॥ ओः ॥

शब्दकल्पद्रुमः

प्रथमो भागः

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९३



शब्दकल्पद्रुमः

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः ।

प्रथमो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : तृतीय, सं० २०२४ वि०
मूल्य : सम्पूर्ण ग्रन्थ १–५ भाग रु० १५०–००

PK
925
D47
1967
V.1

LIBRARY
MAR 2 1970
UNIVERSITY OF TORONTO

©
चौखम्बा संस्कृत सीरीज आफिस
पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी–१ (उ० प्र०)
भारतवर्ष
फोन नं० ३१४५

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 93

SHABDA-KALPADRUM

OR

AN ENCYCLOPÆDIC DICTIONARY OF SANSKRIT WORDS ARRANGED IN ALPHABETICAL ORDER GIVING THE ETYMOLOGICAL ORIGIN OF THE WORDS ACCORDING TO PANINI, THEIR GENDER, VARIOUS MEANINGS AND SYNONYMS, AND ILLUSTRATING THEIR SYNTACTICAL USAGE AND CONNOTATION WITH QUOTATIONS DRAWN FROM VARIOUS AUTHORITATIVE SOURCES SUCH AS VEDAS, VEDANTA, NYAYA, OTHER DARSHANAS, PURANETIHAS, MUSIC, ART, ASTRONOMY, TANTRA, RHETORICS AND PROSODY AND MEDICINE ETC.

BY
RAJA RADHA KANTA DEVA

PART ONE

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1

Publisher : The Chowkhamba Sanskrit Series Office, Varanasi.
Printer : Vidya Vilas Press, Varanasi
Edition : Third, 1967
Price : 1–5 Vols. Complete Rs. 150–00

© The Chowkhamba Sanskrit Series Office
Oriental and Foreign Book-Sellers and Publishers
P. O. Chowkhamba, Post Box 8,
Varanasi–1 (India)
1967
Phone : 3145

PUBLISHER'S NOTE.

This unique Encyclopaedia-cum-Dictionary of Sanskrit Language has been so well-known that it needs no introduction. It is, by far, the most comprehensive Dictionary which not only shows the Etymology, Gender, Meanings, and Synonyms of each word, but also gives profuse quotations to illustrate the usage and connotation of each of them. These quotations have been drawn from all the major sources of Sanskrit Literature, such as, Vedas, Vedangas, Vedanta, Nyaya, other Darshanas, Purana-Itihasa, Sangita, Shilpa, Soopakarashastra, Jyotisha, Tantra-Akhyana, Kavya-Alankara-Chhanda Shastras, and Medicine etc. This work has the major advantage over other similar works, such as, St. Petersburg Dictionary and Monier Williams-Sanskrit-English Dictionary, in as much as it incorporates all their achievements at the same time improving upon many of their deficiencies.

In our country the importance of such Sanskrit works cannot be overemphasized, because, besides being a unifying force, the Sanskrit language is the mother of all Indian languages of the country, from which they can draw upon to replenish their vocabularies.

Such an important work remained out of print for a long time, to the result that thousands of rupees were charged for its single set. In sheer spirit of dedication to the cause of advancement of Sanskrit Learning, we reprinted it in 1961 by photo offset process. Our edition, due to the importance of the work itself and the low price at which it was offered, completely sold out in a very short time, but the demands still continued. Under these circumstances, although we felt embarrassed in expressing our inability to fulfil the demands, yet we were slightly hesitant at the outset in undertaking a third edition because of the heavy financial implications involved in the venture. However, due to the persistent pressure of many of our patrons we had to ultimately decide to issue a third edition. As a result of the same this new edition is being presented to the readers.

We fully realize that such an ambitious venture cannot be successful without the blessings of the Government and Non-government Institutions, scholars, and students alike, and therefore hope that our present undertaking would also receive the same patronage and encouragement which the earlier edition was fortunate enough to receive.



शब्दकल्पद्रुमः

अर्थात्

एतद्देशस्थसमस्तकोषाशेषशास्त्रसङ्कलिताकारादिवर्णक्रमविन्यस्तशब्द-तल्लिङ्ग-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सूपकारशास्त्र-ज्योतिष-तन्त्राख्यान-काव्यालङ्कार-च्छन्दःप्रभृतिनाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-स्मृत्युक्तव्यवस्थादिसंयुक्त-सर्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थातिरिक्तबहुलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः
नूतनसङ्कलितबहुलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-
सुप्रशस्तपरिशिष्टेन च सार्द्धम्।

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः नागराक्षरैः प्रकाशितश्च।

प्रथमो भागः

कलिकाता-राजधान्यां

व्यासिस्तमिसनयन्त्रे मुद्रितः, ७१ न० पाथुरियाघाट-स्थितभवनात् प्रकाशितश्च। शकाब्दाः १८०८।

॥ श्रीजगदीशो जयति ॥

भूमिका

मङ्गलाचरणम् ।

उपास्महे शिवं सत्यं सर्व्वसर्व्वार्थसाधकम् ।
द्यावाभूमी स्थितं व्याप्य शब्दब्रह्म सनातनम् ॥ १ ॥

स्वरूपं देवभाषाया विष्णोर्विश्वात्मनो यथा ।
ईदृक्तयेयत्तया वा को नु निर्वक्तुमीश्वरः ॥ २ ॥

विष्णुवत् सा हि सत्त्वेन ब्रह्मवद् रजसा च सा ।
रुद्रवत् सा च तमसा व्यानशेऽशेषपिण्डपम् ॥ ३ ॥

अज्ञानतिमिराच्छन्नं तदाऽस्थास्यत् चराचरम् ।
नाऽभविष्यद् यदि ज्योतिः संस्कृताह्वं सुमङ्गलम् ॥ ४ ॥

तमोभूतमिदं विश्वं प्रसुप्तमिव सर्व्वतः ।
अरुणोदयवेलेव भाषेयं प्रत्यबोधयत् ॥ ५ ॥

एकमेवाऽद्वितीयं तत् सच्चिदानन्दमव्ययम् ।
परं वेद्यतमं ब्रह्म भाषेयं प्रथमं जगौ ॥ ६ ॥

इयमुन्मीलयामास प्रथमं विश्ववासिनाम् ।
आत्मज्ञानमयीं दृष्टिं नलिनीमिव भानुभा ॥ ७ ॥

अनया भाषयैवादावृषिभिर्ज्ञानदृष्टिभिः ।
प्रलय-स्थिति-सर्गाणां दर्शितं तत्त्वमद्भुतम् ॥ ८ ॥

विश्व-विश्वेशयोस्तत्त्वमियमेवाऽन्ववोधयत् ।
चतुर्व्वर्गफलं ज्ञानं गुणान् सत्त्वादिकांस्तथा ॥ ९ ॥

सिद्धचारणगन्धर्व्वैर्देवदानवमानवैः ।
इयमाराध्यते भाषा जननीव युगे युगे ॥ १० ॥

ब्रह्मकण्ठात् किल पुरा जाता ब्रह्माण्डपूजिता ।
जयत्यमरभाषेयमासंसाराद् युगे युगे ॥ ११ ॥

न ब्रह्मा न हरिर्नेशो यस्याः पारं परं गतः ।
गीर्व्वाणवाणीं तां वन्दामहे गीर्व्वाणवन्दिताम् ॥ १२ ॥

योनेरनन्तरत्नानां तस्याः कोषाः सहस्रशः ।
पूर्व्वाचार्य्यकृताः शस्ता विलसन्ति महीतले ॥ १३ ॥

पर्य्यायवाचकाः केचित् केचित् नानार्थवाचकाः ।
लिङ्गानुशासनाः केचित् न तु सर्व्वार्थसाधकाः ॥ १४ ॥

अतिसंक्षिप्तजटिलाश्छन्दोबद्धा दुरन्वयाः ।
विनाचार्य्यं न शक्यास्ते मनागपि विगाहितुम् ॥ १५ ॥

युगपत् सर्व्वकोषाणां यथावत् स्मरणं विना ।
कार्य्यकालेऽभीप्सितार्थसम्प्राप्तिर्नोपपद्यते ॥ १६ ॥

स्थितेष्वपि पुरः सर्व्वकोषेष्वन्धैर्यथा जनैः ।
इष्टार्थोऽतद्रहस्यज्ञैर्यत्नतोऽपि न लभ्यते ॥ १७ ॥

सर्व्वाधिगम्यं निर्म्मातुं कोषं सर्व्वार्थसाधकम् ।
उदियाय कलौ वङ्गे राधाकान्तो नरेश्वरः ॥ १८ ॥

अकारादिक्रमन्यस्ते शब्दे शब्दे पृथक् पृथक् ।
तत्तच्छब्दार्थसम्पूर्त्तिः प्रथमं तेन दर्शिता ॥ १९ ॥

स एवादिगुरुस्तस्मात् कोषाणामीदृशात्मनाम् ।
यः सर्व्वभोग्यमकरोत् संस्कृतं देवदुर्लभम् ॥ २० ॥

मन्ये कल्याणनामाऽसौ शब्दकल्पं विनिर्म्ममे ।
एकत्र पिण्डपाशेषज्ञानैश्वर्य्यदिदृक्षया ॥ २१ ॥

नैकत्र परिनिष्ठाऽस्ति सर्व्वज्ञानस्य यद्यपि ।
कोषस्तस्य तथाप्येष कोऽपि ज्ञानमहानिधिः ॥ २२ ॥

वेदकर्त्ता विधातेव वाल्मीकिरिव काव्यकृत् ।
व्यासो भारतकर्त्तेव स लोके गौरवं गतः ॥ २३ ॥

दंष्ट्रादण्डेन दैत्यारिर्निमग्नां प्रलयाम्बुधौ ।
वराहरूपी भगवान् काश्यपीमुददीधरत् ॥ २४ ॥

कलौ तु धरणीकान्तो राधाकान्तः प्रदीप्यते ।
उद्धृत्याऽनन्तकालाब्धेर्देवभाषां महीयसीम् ॥ २५ ॥

न दृष्टं न श्रुतं क्वापि तद्धि शास्त्रं बुधैर्भुवि ।
यन्नैवोद्धृतमेतस्मिन् कोषे तेन महात्मना ॥ २६ ॥

वेदानुद्धृतवान् पूर्व्वं मत्स्यरूपी जनार्द्दनः ।
असौ त्वशेषशास्त्राणि विप्लुतानि समन्ततः ॥ २७ ॥

सुराः समेता दितिजैर्ममन्थुः क्षीरनीरधिम् ।
एक एव ममन्थाऽयमपारं शास्त्रसागरम् ॥ २८ ॥

सुधासिन्धुसुधां पीत्वा सुरा अमरतां गताः ।
पीत्वा त्विमां कोषसुधां देवदानवमानवाः ॥ २९ ॥

कौस्तुभाख्यमपां सारं शौरेरेव हि भूषणम् ।
कोषरत्नमिदं त्वस्य जातं त्रैलोक्यभूषणम् ॥ ३० ॥

पारिजातः सुरतरुः सुरभीकुरुते दिवम् ।
शब्दकल्पद्रुमस्त्वेष प्रीणाति भुवनत्रयम् ॥ ३१ ॥

धन्वन्तरिः स भगवान् स्वर्गस्यैव चिकित्सकः ।
अशेषाणान्तु लोकानां कोष एष चिकित्सकः ॥ ३२ ॥

समुद्रोद्भूतया लक्ष्म्या लक्ष्मीवान् केवलो हरिः ।
श्रीराधाकान्त-कोषेण लक्ष्मीवद् भुवनत्रयम् ॥ ३३ ॥

न केवलं सेव्यतेऽसौ कोषः शब्दार्थलिप्सुभिः ।
सर्व्वेषामेव सूतेऽयं कामान् कल्पद्रुमो यथा ॥ ३४ ॥

योगिनामप्ययं कोषो योगशास्त्रमनुत्तमम् ।
भोगिनां भोगशास्त्रं च रोगिणां च महौषधम् ॥ ३५ ॥

सर्व्वेषामेव धर्म्माणामाश्रमाणां च सर्व्वशः ।
कृत्यजातमशेषेण प्रोक्तमत्र प्रसङ्गतः ॥ ३६ ॥

जीविकामर्ज्जयन्त्यस्माद् विप्राः षट्कर्म्मशालिनः ।
क्षत्रिया वैश्यशूद्राश्च ये चाऽन्ये वर्णसङ्कराः ॥ ३७ ॥

कर्म्मकाण्डरतैर्नित्यं ज्ञानकाण्डरतैस्तथा ।
रागिभिर्वीतरागैश्च सर्व्वैरेवैष सेव्यते ॥ ३८ ॥

उपजीव्यो यथैवाऽयं गुरुभिर्मन्त्रदातृभिः ।
उपजीव्यस्तथैवाऽयं शिष्यैर्मन्त्रग्रहीतृभिः ॥ ३९ ॥

निदानं चाऽत्र रोगाणां लक्षणं च पृथक् पृथक् ।
संप्राप्तिश्च चिकित्सा च सर्व्वं प्रोक्तमशेषतः ॥ ४० ॥

ओषधीनामशेषाणां गुणपर्य्यायसंग्रहाः ।
नानाभाषाप्रचलिता आख्याश्चैवाऽत्र दर्शिताः ॥ ४१ ॥

इह संगीतविज्ञानं भुक्तिमुक्तिप्रदं नृणाम् ।
प्रसङ्गतः समासेन प्रोक्तं सर्व्वमतानुगम् ॥ ४२ ॥

आश्चर्य्याणामशेषाणां ज्ञानानामाकरो महान् ।
अहो कोऽपि यशोराशिः कोषोऽयं तस्य भूभृतः ॥ ४३ ॥

मन्दभाग्येऽपि वङ्गेऽस्मिन् जज्ञिरे बहवो बुधाः ।
विहीना अपि शौर्य्येण ज्ञानेनाऽमरतां गताः ॥ ४४ ॥

तन्त्रमन्त्रादिशास्त्राणि स्मृतयो न्यायविस्तराः ।
योगशास्त्राणि काव्यानि रूपकाख्यायिकास्तथा ॥ ४५ ॥

नानादेवार्च्चनकथा ऐन्द्रजालिकमेव च ।
उपदेवकथाश्चित्रा ग्राम्यदेवकथास्तथा ॥ ४६ ॥

व्रतोपवासनियमा बलिहोमजपादयः ।
पीठतीर्थादिमाहात्म्यं शक्तिपूजाः सहस्रशः ॥ ४७ ॥

एतच्चाऽन्यच्च बहुधा शास्त्रं वङ्गमनीषिभिः ।
नवद्वीपादिवास्तव्यैः प्रणीतं ज्ञानदृष्टिभिः ॥ ४८ ॥

अरक्षिष्यदयं कोषो ज्ञानं तद् वङ्गजं न चेत् ।
नामाऽपि तस्याऽद्य तदाऽगमिष्यद् विलयं ध्रुवम् ॥ ४९ ॥

एकेनाऽपि गुणेनाऽयमनेनाऽमरतां व्रजेत् ।
यदयं वङ्गदेशस्य कृतीः कीर्त्तीश्च रक्षति ॥ ५० ॥

पुण्यां द्रवमयीं धारामानिनाय भगीरथः ।
पुण्यां कीर्त्तिमयीं धारां राधाकान्तोऽवतारयत् ॥ ५१ ॥

सोऽनर्घ्यं जीवितं दीर्घं विभवं चाऽतुलं निजम् ।
अकातरं शब्दकल्पद्रुमस्याऽर्थे न्ययोजयत् ॥ ५२ ॥

अस्य कोषमहासिन्धोर्वहोः कालात् परं नृपः ।
स प्रपेदे परं पारं भवाब्धेरिव निर्म्ममः ॥ ५३ ॥

सोऽशेषकोषव्ययजं स्वकोषं त्यागिनां वरः ।
अमूल्यं व्यतरन्मूल्यं विना विद्वद्भ्यो महायशाः ॥ ५४ ॥

स जीवन्नेव सुकृती स्वकृतेरतुलं फलम् ।
विलोक्य सफलं मेने नरजन्म सुदुर्लभम् ॥ ५५ ॥

आमेरिकास्या यूरोपवासिनोऽशेषपण्डिताः ।
शब्दकल्पद्रुमं दृष्ट्वा ययुः परमविस्मयम् ॥ ५६ ॥

धीरेन्द्राश्च नरेन्द्राश्च ये यत्रासन् तदा भुवि ।
तमभ्यवर्षन् सम्मानैर्मेघाः शस्यमिवाऽम्बुभिः ॥ ५७ ॥

वङ्गभूर्भुवने धन्या शब्दकल्पद्रुमेण या ।
कल्पद्रुमवतीं नित्यं स्पर्द्धते ह्यमरावतीम् ॥ ५८ ॥

स शब्दकल्पद्रुमकृद् यत्र जज्ञे तमालयम् ।
शोभावाजारभूपानां सन्तस्तीर्थं प्रचक्षते ॥ ५९ ॥

साधारणोपकाराय मेलनं देशवासिनाम् ।
विदुषां सङ्गमो वाऽपि तत्रैवाऽद्याऽपि जायते ॥ ६० ॥

महावङ्गसमाजस्य तद्वंशोऽद्यापि कीर्त्यते ।
अविसंवादितं सर्व्वैश्चूडामणिरिति क्षितौ ॥ ६१ ॥

एवं प्रतिष्ठां गमयन् स्ववंशं यशसा नृपः ।
अगण्यपुण्यैर्धन्योऽसौ पुण्यलोकमुपेयिवान् ॥ ६२ ॥

गते बहुतिथे कालेऽकारि कोपेऽत्र दुर्लभे ।
वरदाकान्तमित्राद्यैः पुनर्मुद्राङ्कने ग्रहः ॥ ६३ ॥

मुद्रां नीतेऽथाऽविकलं शब्दकल्पद्रुमे च तैः ।
अचिरेणैव पुस्तानि तानि निःशेषतां ययुः ॥ ६४ ॥

पुनरेयाऽस्य दौर्लभ्यमुपलभ्याऽन्यदुर्लभान् ।
गुणांश्चाऽजनि नश्चित्ते पुनर्मुद्राङ्कने ग्रहः ॥ ६५ ॥

ततः स्वत्वाधिकारिभ्यः क्रीत्वा स्वत्वं यथाविधि ।
प्रवृत्ता दुष्करे कार्य्ये वयं सत्कार्य्यगौरवात् ॥ ६६ ॥

वङ्गाक्षरैरितः पूर्व्वं कोप एष प्रकाशितः ।
तेनाऽसौ सुखपाठ्योऽभूत् केवलं वङ्गवासिनाम् ॥ ६७ ॥

नागरी वर्णमाला तु संस्कृतैकोपयोगिनी ।
सर्व्वत्राद्रियते प्रायः सर्व्वैः संस्कृतपाठिभिः ॥ ६८ ॥

सर्व्वेषां बोधसौकर्य्यमतोऽस्माभिर्विधित्सुभिः ।
प्रशस्तैर्नागरैर्वर्णैरेष कोपः प्रकाश्यते ॥ ६९ ॥

शब्दकल्पद्रुमं कोषं प्रणिनाय यदा नृपः ।
संस्कृतं प्रचरद्रूपं नाऽधुनेव तदाऽभवत् ॥ ७० ॥

तदा प्रयोजनाभावात् स्वकोषे तेन भूभुजा ।
सर्व्वेषामेव शब्दानां व्युत्पत्तिर्नैव दर्शिता ॥ ७१ ॥

जन्मभूमिं प्रति प्रेम्णा तेनोपादानलिप्सुना ।
अस्योपादानसामग्री स्वदेशाद् भूयसाहृता ॥ ७२ ॥

मुग्धबोधं व्याकरणं वङ्गदेशस्य गौरवम् ।
तन्मतेन ततस्तेन शब्दव्युत्पत्तयः कृताः ॥ ७३ ॥

पाणिनीयं व्याकरणं प्रायः संस्कृतपाठिभिः ।
सयत्नं सेव्यते सर्व्वैश्चिरमाद्रियते च तत् ॥ ७४ ॥

दिने दिने नृणां यावत् संस्कृते भक्तिरेधते ।
पाणिनीयस्य माहात्म्यं तावदेवोपचीयते ॥ ७५ ॥

अनुसृत्य ततोऽस्माभिः पाणिनीयानुशासनम् ।
सर्व्वेषामेव शब्दानां व्युत्पत्तिः परिदर्श्यते ॥ ७६ ॥

प्रत्नतीर्थाश्रमसरिद्देशारण्यमहीभृताम् ।
सिद्धदेवर्षिभूपालशास्त्रशास्त्रकृतां तथा ॥ ७७ ॥

कलादर्शनविज्ञानज्योतिषां च नवं नवम् ।
अधुनाविष्कृतं तत्त्वं धन्यैः पाश्चात्यसूरिभिः ॥ ७८ ॥

अदृष्टपूर्व्वाः शब्दार्थाः प्रमाणानि बहूनि च ।
इदानीं ग्रन्थविस्ताराद् यान्ति दृष्टिपथं विदाम् ॥ ७९ ॥

मूलातिरिक्तं तत् सर्व्वं मूलेऽस्माभिर्निवेश्यते ।
वेष्टनाकारचिह्नान्तर्व्यवच्छेदचिकीर्षया ॥ ८० ॥

अनुचिन्त्य द्वयोरेव पक्षयोः सुखसाध्यताम् ।
अस्माकं ग्राहकाणां च खण्डशोऽयं प्रकाश्यते ॥ ८१ ॥

परिशिष्टे वक्तव्या विषयाः

परिशिष्टद्वयं चैव कोपस्याऽस्य विधीयते ।
एकं धात्वादिसम्बन्धि शब्दसम्बन्धि चाऽपरम् ॥ ८२ ॥

प्रथमपरिशिष्टे वक्तव्या विषयाः—

धातु-धात्वर्थ-रूपाणि लकारार्थाः पृथक् पृथक् ।
अनुबन्धाश्च धातूनां गणवाच्यभिदास्तथा ॥ ८३ ॥

कृत्तद्धितसमासानां लिङ्गानां विवृतिस्तथा ।
प्रथमे परिशिष्टेऽस्य सर्व्वमेतन्निवेश्यते ॥ ८४ ॥

द्वितीयपरिशिष्टे वक्तव्या विषयाः—

लौकिका बहवः शब्दा वैदिकाश्च विशेषतः ।
ग्रन्थप्रचारविरहादन्धकार इव स्थिताः ॥ ८५ ॥

पाश्चात्यविदुषां ज्ञानापूर्व्वालोकेन तेऽधुना।
दिने दिने प्रकाशन्ते चार्य्यकीर्त्तिं वितन्वते ॥ ८६ ॥

सार्थप्रमाणास्ते सर्व्वे परिशिष्टे द्वितीयके।
दीयन्ते बुधसहाय्यान्निजशक्त्यनुसारतः ॥ ८७ ॥

कोषेऽस्मिन् यानि शास्त्राणि प्रमाणायोद्धृतानि च।
मूलातिरिक्ताः शब्दा वै बहवः सन्ति तेष्वपि ॥ ८८ ॥

तेऽपि सर्व्वेऽत्र दीयन्ते यश्चाऽभावोऽस्ति यत्र च।
यथाज्ञानं यथास्थानं सोऽप्यस्माभिर्निरस्यते ॥ ८९ ॥

शब्दाब्धेस्तु परं पारं न जानाति सरस्वती।
अगाधं चाऽप्रमेयं तं को वा निर्वक्तुमीश्वरः ॥ ९० ॥

स्वशक्तिकाष्ठामाश्रित्य तथाप्यस्माद्दशैर्जनैः।
परिशिष्टस्य सम्पूर्त्तौ प्रयत्नोऽस्य विधीयते ॥ ९१ ॥

इत्येष मुद्राङ्कयितुं स राजा नागराक्षरैः।
पुनरेव स्वकं कोषं सर्व्वभोगविधित्सया ॥ ९२ ॥

परिशिष्टं च विस्तीर्णं वेदशब्दार्थबोधकम्।
निर्म्ममे सोऽस्य कोषस्य महान्तं यत्नमास्थितः ॥ ९३ ॥

दुर्व्विलासात्तु दैवस्य हस्तलेखाश्च तेऽखिलाः।
कीटैः कवलिता हन्त! नाशमापुरशेषतः ॥ ९४ ॥

चकमे च महात्माऽसौ सकाशात् परवर्त्तिनाम्।
संस्कृतज्ञानविस्तारेणाऽस्य संस्करणं पुनः ॥ ९५ ॥

अतो वयं संप्रवृत्ता अस्मिन् संस्करणे नवे।
पुण्यश्लोकस्य तस्यैव भूपस्येच्छानुसारतः ॥ ९६ ॥

शब्दकल्पद्रुमस्रष्टुः कुलात् तस्यैव भूभृतः।
पदे पदेऽत्र साहाय्यं कार्य्येऽस्माभिरवाप्यते ॥ ९७ ॥

देवदेव! महादेव! रक्ष रक्ष चिरं विभो!।
वंशावलीं तस्य राज्ञो धारां भागीरथीमिव ॥ ९८ ॥

हे विश्ववासिनः सर्व्वे सन्तो विद्यानुरागिणः!।
सहाया नो भवन्त्वस्मिन् भवन्तो ज्ञानगौरवात् ॥ ९९ ॥

करुणाकणया यस्य नरस्तरति दुस्तरम्।
सिद्धिदाता स भगवान् नः पूरयतु काङ्क्षितम् ॥१००॥

भक्तिमात्रसहायानां हीनानां साधनान्तरैः।
भक्तवाञ्छाप्रदो देवो वाञ्छितं प्रददातु नः ॥१०१॥

कलिकाता
७१, पाथुरियाघाटा ष्ट्रीट
शकाब्दाः १८०८

श्रीवरदाप्रसादवसोः
तदनुजस्य च
श्रीहरिचरणवसोः

OPINIONS OF LITERARY MEN ANENT THE CELEBRATED SANSKRIT ENCYCLOPEADIC LEXICON THE SABDAKALPADRUMA. BY THE LATE RENOWNED RAJAH SIR RADHAKANT DEB, BAHADUR, K. C. S. I., OF CALCUTTA.

Sir Hyde East, Chief Justice, has very great pleasure before he leaves India, in stating the high regard and estimation in which he holds Babu Radhakant Deb, the son of a worthy and respectable father, Gopeemohun Deb; he has had the benefit of their assistance upon several interesting occasions calculated to promote the general good and advancement of their countrymen, and he has always found them both to be men of the highest probity and of sound good sense. Radhakant is also a considerable scholar, and is now engaged in compiling a very learned work. I quit these two most worthy men and my friends, with much regret, and I recommend them both to the protection and esteem of my successor.

Calcutta, 1822.

Extract of a letter from Professor Eugene Burnouf, Secy. to the Asiatic Society of Paris, dated 5th May, 1835.

I feel great pleasure in announcing to you that the Council of the Asiatic Society has enrolled you as a member, upon my proposition, which was supported by Dr. Mohl, one of the Members of the Council. You have been for a length of time nominated to become an Honorary Member of the Society, and the Council was not ignorant of the great services you rendered to Indian literature by the publication of your Sabdakalpadruma, a real philological, and religious treasure of India.

Extract of a letter from His Excellency W. Oxholme, Minister to His Majesty Frederic VII, King of Denmark, dated 10th May, 1854, *Danish Legation.*

The undersigned Minister to H. M., the King of Denmark to the Court of St. James, has been charged by his gracious Sovereign to transmit to the learned Radhakunta Raja Bahadur, the accompanying royal medal, *pro meritis* as a token of the sincere acknowledgment, and the high value placed by His Majesty upon the esteemed gift of two copies of the interesting and elaborate work called the Sabdakalpadruma, conferred by the author upon His Majesty's own, and the University's library, in Copenhagen.

Extract of a letter from Dr. Albrecht Weber, a Member of the Royal Academy of Sciences at Berlin, dated 26th March, 1858.

I have the pleasure to inform you that the Royal Academy of Sciences, yesterday, on my proposal, elected you, as an Honorary Member, on account of your merits as Author of the Sabdakalpadruma. It is one of the highest honours, our Academy can invest with, for the number of the Honorary Members is very small and restricted.

Extract of a letter from J. Prinsep, Esq., Secretary to the Asiatic Society of Bengal, dated 7th July, 1836.

The Society is already aware of the eminent services you have rendered to your countrymen, as well as to every student of Indian Literature by the compilation, and publication of your Sanscrit Encyclopædical Lexicon, and is satisfied that you will derive the truest sentiments of self-pride, and satisfaction from having accomplished so laudable and creditable an undertaking; while to posterity your name will be handed down, among those who have been most prominent in enriching and preserving your national literature.

Extract from the Minutes of the Proceedings of the Committee of Correspondence of the Royal Asiatic Society of Great Britain and Ireland. Transactions of the R. A. S. of G. B. and I., vol. 2nd Ap. P. LXIII.

Sir Alexander Johnston, having laid before the Committee, the first volume of a Sanscrit Encyclopædical Dictionary, and a Bengallee Spelling Book, compiled by Baboo Radhakant Deb, of Calcutta. It was resolved—"That in consequence of the talent displayed in those works, and the general exertions of Baboo Radhakant Deb, for the promotion of knowledge, he be recommended to the Council for election, as a Corresponding Member of the Royal Asiatic Society." "that a Report of the steps taken by this Society in relation to Capt. Low, and Baboo Radhakant Deb, be made to Lord William Bentinck, and Mr. Fullerton; and that those Governors be requested to afford their assistance to Capt. Low, and Baboo Radhakant Deb, in the attainment of the Society's objects."

Extract of a letter from P. Clarke, Esq., Secretary to the Royal Asiatic Society of Great Britain, and Ireland, dated 6th April, 1845.

In acknowledging the continuation of your learned and valuable work, allow me to assure you how highly the Royal Asiatic Society estimates the elaborate productions of learned Native gentlemen, and what marked approbation accompanies the recognition of their labours.

Extract from the Annual Report of the Asiatic Society of Paris, for 1846.

Le Rajah Radhakant Deb de Calcutta, a fait parâitre le cinquième volume de son Dictionnaire encyclopedique Sanscrit. Dans cet ouvrage, chaque mot est suivi de l'interpretation du sens, des synonymes avec l'indication du dictionnaire dont ils sont tires, de la descriptien de l'objet auquel il s'applique, et de citations empruntées aux livres classiques qui en ont fait usage. L'utilité de cet ouvrage pour les études en Europe est malheusement restriento par son excessive rareté; car l'auteur l'imprime à ses frais et ne le met pas en vente.—La systeme de distribuer les ouvrages au lieu de les vendre fait honneur à la magnificience des auteurs ou des Gouvernements, mais quelque soin qu'on mette à les faire parvenir dans les mains de ceux en feraint usage, on n'y reussit jamais completment, et il vaudrait meux, je dirais même, il serait plus généreux de les mettre en vente à un prix assez bas pour que tous ceux qui en ont besoin pussent se les procurer.

L'enterprise de Radhakant Deb est, au reste, d' autant plus meritoire que l'étude du Sanscrit, comme, en général, celle des langues savantes de l'Orient, ne jamais été aussi peu encouragée dans l' Inde qu'elle l'est actuellement.

Translation.

Rajah Radhakant Deb of Calcutta has issued the 5th volume of his Sanscrit Encyclopedic Dictienary. In this work each word is followed by the explanatien of its meaning, by synonyms, the Dictionary being indicated from which they are taken; by the description of the object to which the word applies; and by quotatiens from the classical works in which it is used.

The utility of this work for the purposes of study in Europe is unfortunately limited by reason of its great scarcity, for the author presents it at his own cost and does not put it forward for sale. The system of distributing works instead of selling them, does honour to the generosity of authers and Governments, but in spite of the care they may take to cause their books to reach the hands of those who can make use of them, they never succeed completely in effecting their purpese, and it would be much better, and I may even say more generous, to cause the works to be sold at a price sufficiently low to enable all those to procure them who have need of them.

Finally the undertaking of Radhakant Deb, is so much the more meritorious, as the study of the Sanscrit, as that of the learned languages of the East generally, has never been so little encouraged in India as at the present time.

Extract from the Journal of the American Oriental Society, Vol. I, No. 1, *p.* 77.

The learned Radhakant Deb, at Calcutta, continues the printing of his *Thesaurus* of the Sanscrit language and literature; the 4th volume reached Paris two years ago.

Extract of a letter from G. A. Bushby, Esq., Secretary to the Government of India, dated 15*th January*, 1848.

They (the Court) have requested the Government to convey to you their thanks for the presentation of the Dictionary, and to signify their high sense of the industry and learning exhibited in the work.

Extract of a letter from George Cowper, Esq., Secretary to the Government of India, dated 5th August, 1853.

I am directed to inform you that in a despatch recently received, the Hon'ble Court direct the Governer-General in Council to convey to you their acknowledgments for your very valuable and learned work, and to expresa their satisfactien in finding that you have justly appreciated the motives by which they are actuated in giving encouragement to the cultivation of the ancient language and literature of India.

Extract from the Preface to the Sanscrit and English Dictionary of Dr. Horace Hayman Wilson, Professor of Sanscrit in the University of Oxford, 1*st edition*, 1819, *P. XXXVIII.*

A compilation of a superior character to any of these modern works and indeed to any of the more ancient works is now in progress in Calcutta, it is entitled the Sabdakalpadruma, and is a Sanscrit Dictionary alphabetically arranged, with reference to the authorities, and with copious explanations in the Sanscrit language, it is printed in the Bengali character, it is the work of a young native gentleman of fortune and family, Radhakanta Deva, with the assistance of the best Pandits, and is printing at his own expense, and is an occupation which singularly contrasts with the low luxury, in which Hindoos of his age and rank ordinarily spend their time and money; the politeness of the auther has favoured me with the first sheets of the work, but I regret, it has not sufficiently advanced for me to benefit by its contents, he has also obliged me with many critical remarks on the earlier part of my own Dictionary, of which, where practicable, I have availed myself. The Sabdakalpadruma must take some considerable time before it is completed.

Extract from an article by Dr. H. H. Wilson, published in the Journal of the Asiatic Society of Great Britain and Ireland, Vol. 13, *Pt.* 2, *P.* 209.

Besides the laudable efforts which are being made in India to preserve the memorials of Antiquity, very meritorious activity prevails there in the promotion of Sanscrit literature. Foremost amongst its results, we may place the completion of a voluminous Sanscrit Lexicon, by Rajah Radhakanta Deva, a native gentleman of Calcutta of the highest respectability and well-known as combining a devoted attachment to the institutions and religion of his country, with a liberal participation in all public measures for improving the education of his countrymen by the efficient cultivation of the English language and European literature and science.

Extract of a letter from the same, dated London, 16th August, 1852.

Your perseverance and disinterestedness in this great work are entitled to the highest credit, and it will no doubt perpetuate your name for ever amongst the students of Sanscrit.

Extract of a letter from the same, dated 18th May, 1859.

Your work is an immense storehouse of valuable materials and will be consulted whilst Sanscrit is studied; I wish it were reprinted in a smaller type and on better paper.

Extract of a letter from A. Stirling, Esq., Persian Secretary to the Government of India, dated 23rd January, 1826.

The highest consideration appears to be due to the author for engaging in so useful and at the same time laborious a literary undertaking, and the manner of its execution will afford the most important facilities to the study of Sanscrit letters.

Extract of a letter from William Butterworth Bayley, Vice-president of the Supreme Council of India, dated the 27th January, 1826.

I am well pursuaded that a work to which *you* have devoted much of your time and attention must be highly valuable and useful, and it is gratifying to observe, that your talents and labours are directed to numerous important objects tending to advance the knowledge, to raise the character, and to promote the best interests of your countrymen.

Extract of a letter from G. F. Gordon, Esq., dated 8th February, 1826.

The proof of your munificent application of time and fortune, to the promotion of the literature of your countrymen which your valuable Dictionary affords, in addition to the many other instances exhibited in your zealous support of every public institution that has education for its object, cannot fail to place you high in the esteem of liberal-minded Englishmen * * * and I beg to add my earnest hope that you may long live not merely to complete the work, but to enjoy the well-earned reputation to which it will so justly entitle you.

Extract from the Preface to the Rev. Mr. Morton's Dictionary of the Bengali and English language.

The Sabdakalpadruma now in course of publication by Baboo Radhakanta Deva, whose talents and useful labours reflect the greatest credit on himself and his fellow-countrymen of this Province, and promise to be of eminent service to the students of Hindoo Literature, has been consulted as far as published. The compiler having with equal kindness and liberality been favoured by that gentleman with the copy of the extant portion of his elaborate work, takes this opportunity of offering his grateful acknowledgments to him for the aid thence derived.

Extract of an article by Dr. R. Lenz, published in the Journal of the Royal Asiatic Society of Great Britain and Ireland, Vol. II, P. 188 (1835).

Three volumes of this valuable work comprising each nearly 1000 pages in large quarto, are now in the library of the Royal Asiatic Society, presented to it by the learned author. This portion perfectly justifies the high character, which Professor Wilson gave the work in the first edition of his Dictionary in 1819; anticipating only from a few sheets, then printed, how inestimable a store of authentic information on a variety of subjects connected with Sanscrit literature would be laid open by this admirable undertaking, the expensiveness of which did not however admit a hope of its speedy accomplishment. Radhakanta's work is very distinctly, and generally speaking, accurately printed in the Bengali character; and deserves certainly not the least part of its superior character to the generality of Indian printings from being alphabetically arranged in the European method. A great part of its articles have indeed become comparatively of inferior importance since the appearance of the 2nd edition of Mr. Wilson's Dictionary, where every additional information, supplied by the learned Hindoo on the different meanings of words, has of course been carefully reproduced by the celebrated lexicographer, who was then already in possession of the three volumes before us, except a few sheets at the end of the last. Our recommendation of these volumes is not so much founded on the lexicographical as on the Encyclopædical portion; which forms by far, the most copious and interesting part of the whole; although the first mentioned articles have a fair claim to the attention of the Sanscrit student on account of their ample specification of synonyms, collected from all *coshas* of celebrity and their commentaries, so as to supply in some measure, the deficiency of a dictionary, English and Sanscrit, or that of an index pointing out for any meaning all the variety of Sanscrit expressions. The method adopted by the author in articles of a merely lexicographical nature, is, next to the word in question, to note its gender if a noun, or if not, its grammatical character, then to give a short definition of its meaning by mentioning the class of beings or ideas to which it belongs, next to explain it by corresponding expressions in Bengali; sometimes also in Persian; after which he proceeds to the *Paryáya* or list of synonyms in Sanscrit, which sometimes amount as in the article *Chandra* to the number of one hundred and more, noticing always their respective authorities. * *

We beg to conclude our present remarks on this important work with the prediction, that in its remaining portion the author will probably continue to extend its articles in the same proportion as he has evidently done during his preparation of the present volumes, the third of which contains an article of no less than 162 pages on *Práyaschitta* analogous in form and nature to that on *karmavipaka* which we mentioned above: we only wish he would no longer prevent his European admirers from reaping the advantage of the portion hitherto printed, but at once make up his mind to send to Europe these three volumes, valuable as are their contents, to be sold separately.

Extract of a letter from Eugene Burnouf, Membre de l' Institut de France, dated 5th May, 1835.

J'eprouve une grande satisfaction à vous annoncer que le Conseil de la Société Asiatique de Paris vous a reçu au nombre des membres honoraires, sur la proposition que j'en ai faite et qui a été appuyée par M. Le Dr. Mohl, l'un des membres du conseil. Vous étiez depuis long temps appellé, Monsieur, a faire partie des membres honoraires de la Société, et le conseil n'ignorait pas les grands services que vous rendez à la litterateur Indienne par la publication de votre Sabda Kalpa Druma, veritable trezor philologique, philosophique et religeux de l'Inde. * * * mais, j'ai deja pu voir parle examen rapide de plusieurs articles etendus, tels que *Prayaschitta Brahmana et* autres, quelle riche instruction contien cet ouvrage què est fait pour placer le rom de son auteur au premier rang des Savants Brahmanes qui ont consaire leurs veilles à rebut honorable de populariser la belle langue et la litterateur interessante de leurs pères.

Translation.

I feel great pleasure in announcing to you, that the Council of the Asiatic Society has enrolled you as a member upon my proposition, which was supported by Dr. Mohl, one of the members of the Council, you have been for a length of time nominated to become an Honorary Member of the Society, and the Council was not ignorant of the great services you rendered to Indian Literature, by the publication of your Sabdakalpadruma, a real philological, philosophical and religious treasure of India * * *

I can already see from a brief examination of many excellent articles, such as *Prayaschitta, Brahmana* and others, what great instruction can be derived from this work which must place the name of its author on the first rank of learned Brahmins, who have consecrated their labours to the honourable end for making popular the fine language and interesting literature of their fathers.

Extract of a letter from the same, dated 25th October, 1840.

Je pense que vous n'aviez pas besoin de cet homage pour être convaincu des sentiments de respect et de gratitude que je vous porte ; et du plaisir avec lequel je me souviens du beau present que vous avez bien voulu me faire de votre précieux et si utile Sabdakalpadruma. Je ne puis me servir de votre excellent lexique sans vous remercier de cœur du service que vous avez rendu à la connaissance de l'Inde en le composant, et à mes études particulierès, en voulant bien m'en adresser un exemplaire.

Translation.

I think you don't require any homage to be convinced of the sentiments of respect and gratitude which I entertain for you, and of the pleasure with which I remember the beautiful present which you have been good enough to make to me of your very valuable and useful Sabdakalpadruma. I cannot make use of your excellent lexicon without thanking you heartily for the service which you have rendered to the literature of India by its preparation, and to my particular studies, in being good enough to present me with a copy of it.

Extract of a letter from Major A. Troyer, Member of the Asiatic Society of Paris, editor of the Raja Tarangini, &c., dated — June, 1837.

Be sure that we expect with great impatience the continuation of your valuable Dictionary, honourable mention of which was made in several philosophical Journals of the Continent.

Ditto, dated Paris, 12th January, 1847.

I have in my last letter expressed to you his (M. Gorressio's) desire to carry with your name, your excellent Dictionary to Turin, the capital of one of the Italian kingdoms ; your work will be the only one in Italy, which country will not then have to envy France and Germany, where your merit is already justly appreciated.

Ditto, dated 18th December, 1849, *quoted in a letter from H. Piddington, Esq., dated 7th February*, 1849.

Our worthy friend Major Troyer, in a letter from Paris, 18th December, says: "Will you be so kind as to remember me kindly to my friend Rajah Radhakant Deb, and to tell him that Monsr. Gorressio has received his Dictionary, and that the continuation of this most valuable work is anxiously expected by all the Sanscrit scholars ; tell him, I beg you, that his Sabdakalpadruma shall be a "*Namayasdruma.*"

Ditto. Dated Paris 20th March, 1859.

Your very valuable work, the Sabdakalpadruma, perpetually strikes my eyes among my books, and is often consulted by me. I congratulate you very sincerely upon the well deserved testimonies of honour which you have received from so many learned Societies of Europe * * * * . You have completed the great service which your lexicon renders, and will for ever render, to Sanscrit literature by an Appendix.

Extract of a letter from Dr. Nathaniel Wallich, dated London, 6th June, 1838.

There is a Latin quotation which I may in perfect truth apply to you : *Exergiste monumentum ære perennius*, that is to say, you have raised to yourself a trophy more lasting than brass or other transitory things. I cannot conceive a more stupendous and noble undertaking than your Sanscrit Dictionary, which judging from the awful labour of the four first volumes ending with ব will at least require another final very big volume. All who have any respect for literature, all who have the least pretension to judge of the sublimity of the Sanscrit language, and all who not knowing

the least of it, have at least the decency to suppose that the admiration for the venerable language expressed by such men as a Colebrooke, a Jones, a Mill, a Wilson, a Schlegel, a Wilford, a Carey and the other great foreigners (not to say a word of the natives of this country,) is well founded, all, I say, must feel the deep gratitude that is due to the great and learned author of such a work as the Sabdakalpadruma.

Extract of a letter from George Norton, Esq., dated 25th September, 1844.

In my position as President of the Madras University, I must bring your splendid work to useful account, and in every way I feel gratified by such a mark of esteem paid to me by a fellow labourer in the cause of native education and advancement.

Extract of a letter from Dr. E. Roer, dated 7th June, 1847.

Accept my sincerest thanks for your kindness in presenting me with a copy of the Dictionary which will be of the highest value to me. I owe to it already a great debt of gratitude for the assistance I derived from it when all other resources failed me. When translating the *Bhásháparichchheda*, the technical terms of which I had sometimes great difficulty in understanding exactly, I found always my doubts removed on referring to the Dictionary, when the Pandit whom I consulted could not give me a satisfactory explanation.

Extract of a letter from H. B. Koenig, Esq., to Dr. E. Roer published in the Journal of the Asiatic Society of Bengal, Vol. 17, Part 1, P. 33.

To the celebrated Radhakanta, I shall by the same opportunity, transmit a copy of all my publications, which I have sent to the Society, for which consignment, you sir, will be kind enough to procure one or two copies of the celebrated Sanscrit Dictionary published by Radhakanta. The distinguished author, will perhaps be the more inclined to comply with my wishes as he will benefit by it, in a high degree, the Oriental Students in Germany, as I do not design this work for sale, but shall religiously keep it for the numerous applications made to me for its use.

Extract of a letter from the same to the Rajah, dated Bonn, 21st December, 1847.

The applications made to me for the use of this treasure, are already very numerous, though it has not as yet arrived here, and willingly as I would further science, by fulfilling all requests, and granting all wishes, this of course is impossible as the number of those, who devote themselves at present to this branch of science is already too vast even in Germany alone, to allow the use of it to all, however urgent their requests, however desirous and able, they themselves may be, I must be content by granting the use of this work only to the most eminent of the eminent students of Sanscrit, to whom it will be an inexhaustible source of knowledge and wisdom, as it will be a great gratification to me, to be thus instrumental in furthering and increasing science.

Extract of a letter from F. E. Hall, Esq., Assistant Principal, Benares College, dated 26th April, 1850.

In a letter from Dr. Wilson, which Dr. Ballantyne received a short time ago, the learned Oxford Professor expresses himself in much about the same terms respecting your most laudable compilation, that he employs in the Preface to the first Edition of his dictionary, commendation from such a quarter you must of course, in company with all Indian scholars, esteem at its value, which is not light.

Extract of a letter from Dr. Herman Brockhaus, Professor of Sanscrit Literature in the University of Leipzig, and Secretary to the German Oriental Society, dated 5th December, 1850.

You are not unacquainted with the deep interest which has been awakened in Europe by the introduction of the study of the ancient sacred language and literature of your nation, that this interest is heightened every year as new sources of this grand object are opened and become the object of deep and scientific investigation. * * * *

But alas! the necessary resources to bring light and order into this world so new to us often fail us. One of the most important of these resources is your inestimable Sabdakalpadruma. Astonishing is the learning displayed in this great work, so rich in its contents, so invaluable as the most complete collection of the most valuable results of the Indian mind, but alas! it is extremely rare in the Continent of Europe. It is quite impossible to obtain it through booksellers, and as I find myself so often at a loss in my studies from the want of it, I hope you will excuse the request that I here venture to make, *viz.*, to send me a copy of your Sabdakalpadruma.

Extract of a letter from the same, dated 15th December, 1851.

It is a source of heartfelt delight to me, that your obliging and ready compliance, with my request, will put me in possession of the invaluable treasures contained in your Encyclopedia of the Indian language and wisdom.

I shall consider this precious work the gift of your generousity as a deposit presented in some measure to the learned men in Germany, and shall willingly extend my communications to all, who may wish to quaff from this inexhaustible spring. I hope thus to make the most honorable use of your valuable present, and at the same time to comply most worthily with the views and wishes of the generous donor.

Extract of a letter from Edward E. Salisbury, Professor of Sanscrit in Yale College U. S. A. Secretary to the American Oriental Society, dated 28th September, 1850.

While I beg you to receive my grateful acknowledgments, I would fain hope that the fulfilment of your desires, respecting the cultivation of Sanscrit learning in the Western world, may be promoted by the introduction of your work into our libraries.

Extract of a letter from Pandita Radhakrishna of the Court of the late Maharaja Ranajita Sinha, dated Lahore, 9th June, 1852.

The 7th Vol. of the said work has not yet reached this station, but is expected within a very short time. The other volumes of the work have lately occupied my close attention and been found to be an invaluable production in the literary world; your indefatigable labour I firmly believe, will be amply rewarded by the inestimable advantages, which students will derive from its perusal. * * * * * * * * As I have caused the work to be transcribed in the *Devanagara* character, the Literati, of this Province have thereby an easy access to it; all the Pandits of this country, who have seen it, have expressed their approbation of it in high terms of eulogium.

Extract of a letter from Dr. Charles Lassen, Professor of Sanscrit Literature in Bonn, dated 7th August, 1852.

By the completion of the Sabdakalpadruma one of the most arduous and important literary enterprises, has been brought to a successful conclusion, and thereby a vast treasure of information, on a great number of subjects connected with Indian religion, science, arts, geography, and material productions, has been opened to the literary men who occupy themselves with their study. By this performance your Highness has rendered your name, immortal amongst those of the patrons of Sanscrit philology, and proved to the present age, that India still possesses luminaries of science, which may vie with the most celebrated Hindus of yore for glory, your Highness speaks too moderately of your work by saying, that it may be only useful to the novice in Sanscrit, I have on the contrary by frequently referring to it, after having in vain sought for the desired information in other works, and found which I wanted in your Sabdakalpadruma, convinced myself that it is a rich source of information, on a multitude of subjects. * * * The Sabdakalpadruma forms the chief ornament of my library, and I need hardly add, that I shall ever cherish in grateful memory the benevolence your Highness has bestowed on me by deigning to present me with such an inestimable gift.

Extract of a letter from the same, dated 4th October, 1853.

By this accomplishment your Highness has made an in exhaustible mine, of hitherto hidden treasures accessible to Sanscrit scholars, and placed your name amongst those of the munificent patrons of Indian philology, the cultivators of which will, for ever, venerate your memory as that of one of their greatest benefactors. Your Highness may rest assured that I shall always regard your donation, as a most precious reward for my labours in the field of Hindu Antiquities, and I ardently wish that the 8th volume may soon be published by which this grand, and incomparable work will be completed.

Extract of a letter from Dr. Albrecht Weber, Docent of the Sanscrit language in the University of Berlin, and Editor of the White Yajurveda, &c., dated 21st October, 1855.

The Sabdakalpadruma will remain for ever a monument of your industry and peraeverance and a valuable mine of of useful information about the later Hindu notions and literature.

Extract from the Preface to the Sanscrit Worterbuch being published under the auspices of the Imperial Academy of Sciences at St. Petersburgh, by Rudolph Roth and Otto Bohtlingk, Vol. 1, 1855.

Radhakanta's Sabdakalpadruma, eine Werk, welches dem gelehrten Inder in vielfacher Beziehung zur grössten Ehre gereicht, hat uns in den Stand gesetzt, eine grosse zahl von unedirten indischen wörterbuchern und von commentaren zu diesen wörterbüchern, welche uns auch handschriftlich nicht zu Gebote standen, zu benutzen. Arch Anführungen aus edirten und unedirten Schriften, vor allem aber die reiche synonymik von Pflauzennamen ist uns sehr zu Statten gekommen. Ein exemplar dieses durch den Buchhandel nicht erreichbaren schätzbaren werkes verdankt die Kaiserliche Akademie der Wissenschaften der Freigebigkeit des Verfassers.

Translation.

Radhakant's Sabdakalpadruma, a work which in many respects, reflects the highest credit on the learned Indian, has enabled us to make use of a great number of unedited Indian Dictionaries and of commentaries to these Dictionaries of which we possess no copies. It is very useful likewise for its reference to edited and unedited manuscripts containing all the copious synonyms of plants. This precious work is not obtainable through Booksellers, the Imperial Academy of Sciences is indebted for a copy of it to the liberality of the Author.

Extract of a letter from Dr. Max Müller, Editor of the Rig Veda &c. to Dr. E. Roer, dated — 1847. *Published in the Journal of the Asiatic Society of Bengal, Vol.* 17, *Part I, P.* 331.

I would especially be gratified to hear the opinion of learned men above the prejudices of their country as Raja Radhakanta Deva for instance, who by his Dictionary has acquired the lasting gratitude of all Sanscrit scholars, and who best knows that the ancient literature of India need not to be screened from the light of publicity, but may boldly challenge the comparison of the literature of all nations, the history of which shews the same progress of intellectual development.

Extract from Dr. M. Müller's Preface to the Rig Veda Sanhita, Vol. 2.

I have been also honoured by that distinguished scholar and noble patron of Sanscrit literature Raja Radhakant Deva of Calcutta with a most valuable present the Sabdakalpadruma, a work which by its comprehensive range and its excellent arrangement stands unrivalled in Indian Philology.

Extract of a letter from the same, dated London, 30th March, 1856.

I also felt it my duty to express publicly in the preface to my second volume of the Rig Veda, my personal obligation to you for the valnable present which yon made me of your magnificent work, the Sabdakalpadruma, a work which does infinite credit to your public spirit, your reverence for the antiqnities of your own nation and your comprehensive knowledge of all that is truly valuable in the literature of your ancestors. This work will make your name for ever revered among your countrymen and highly respected among the Scholars of Europe.

तथा च श्रुतिः यावदस्मिंल्लोके पुरुषपुष्पेन कर्म्मणा यूयते तावदयं स्वर्गे लोके वसतीति।

Extract of a letter from Dr. Chütz dated Bielefeld, 21st October, 1857.

Till now I honoured you deeply as a great scholar, the author of the Sabdakalpadruma, now I love yon as one of the kindest hearts on the earth.

Extract from Art. VI of the Journal of the Royal Asiatic Society of Great Britain and Ireland, read by Professor H. H. Wilson, 19th March, 1859.

The writer, a friend of many years, Raja Radhakanta Deb is well known as a leading member of the Native Society of Calcutta, who adds to the distinction of rank and station, that of a foremost place amongst Sanscrit scholars, as evinced by his great Lexicon or Literary Encyclopædia of the Sanscrit language, in seven quarto volnmes, the Sabdakalpadrnma, which enjoys a Europcan as well as Indian celebrity. Any opinion coming from him on subjects connected with the ancient literature of his country is entitled to the greatest deference.

Her Majesty Qneen Victoria has been graciously pleased to confer on Raja Radhakanta Bahadnr, a distinguished mark of Royal favour by the gift of a splendid gold medal, bearing on one side the head of Her Majesty and on the reverse the words "From Her Majesty Qucen Victoria to Raja Radhakant Bahadur" and it was accompanied with the following letter from the Right Honorable Sir Charles Wood, Secretary of State for India.

Secretary of State for India in Council.

India Office, 28th July, 1859.

Sir,

I have laid before the Qneen yonr letter with the copy of the Sabdakalpadruma forwarded by you for presentation to Her Majesty; and I am commanded to acquaint you that Her Majesty has received the work very graciously, and fully appreciating the spirit of loyalty in which you have transmitted it, has directed me to forward to yon the accompanying medal.

I have the honor to be,
Sir,
Your most obedient humble servant,
CHARLES WOOD.

Raja Radhakant Deb Bahadur.

Extract of a letter from Pundita Vitthala Sastri of the Benares College, dated Samvat 1908.

अहमत्र पाठशालायां हालसाहिब् समीपे भवदीयं महान्तं समस्तप्रबन्धलक्षणातिवर्तिनम् चतुष्पञ्चाक्षविषय-संग्रहमनोहरं कोशमवालोकयम् सम्यक् परिचित मुद्रित यन्त्राक्षरतयाच हालसाहिबेन तदालोचनाय नियोजितः प्रथमं सप्तमकाण्डमुखोपन्यस्त मुखबंधनाभिधप्रकरणं यथातथम् चन्द्रात्तम् तत्रच श्रीमतां भवताम् एतत्कोशसमर्पणविषयं सततवर्द्धमान औदार्य्यातिशयम् उपलभ्य एतत्कोशप्राप्तावुत्कण्ठितचेता इमं वर्त्तदूतं भवत् सविधे प्रस्थापयम्॥

Translation.

I have seen in this College, with Mr. Hall, your grand Lexicon, which surpasses all ancient and modern Dictionaries and derives its excellence from its comprehending the topics of an infinite variety of *Sastras*. As I am well familiar with printed Bengali characters, he has engaged me to examine the work: I have read the Preface at the beginning of the 7th Volume; observing therein your ever increasing liberality in the distribution of the book, I have, with an anxious heart to obtain it, sent you this *Literal* Messenger.

Extract of a letter from Raja Vijayagovinda Sinha of Purnia, dated

हैतध्वान्तविनाशनैकविलसत् विद्यान्तरत्नप्रदम् ।
प्राविर्भूतं खलु नान्तमेव नितरां श्रीशब्दकल्पद्रुमम् ॥

Translation.

Excepting only the last volume, I have received the Sabdakalpadruma, which alone exists to dispel the gloom of doubt and furnishes us with the jewel of demonstrated truth.

Extract of a letter from Maharaja Madanamohana of Vishnupura, dated 2nd Aswina.

भवत् प्रेरिताभिरचित शब्दकल्पद्रुमपत्थं दर्शं दर्शं वयमाकम् वयत् सदोमण्डलपण्डितानाञ्च भूयोभूयोऽवधिता परमतुष्टिर्जायते श्रुता तमपि वाक्षोक्यच वयमाभिः नैव नानादर्शनपरिशीलिततत्त्वम् अवगन्तव्यम् ।

Translation.

Myself and the Panditas of my *Sabha* have derived perfect and supreme satisfaction from the perusal of your Sabdakalpadruma sent to us; by applying to it and hearing it recited, we must acquaint ourselves with the result of your extensive researches.

Extract of a letter from Professor Rudolph Roth, dated Tubingen, 14th March, 1859.

— habe ich zunächst um Entschuldigung zu bitten dass ich nicht schon früher den richtigen Empfang des Sabdakalpadruma anzeigte. Genehmigen Sie meinen besten Dank für dieses werthvolle Geschenk, das nicht nur einen Schmuck meiner Bücher sammlung bildet und mir dio trefflichsten Dienste leistet, sondern auch mich an die freundlichen Gesinnungen des Gebers erinnert.

Translation.

I have first of all to beg to apologize, that I did not earlier, duly inform you of the Sabdakalpadruma. Accept my best thanks for the precious gift which not only forms an ornament of my library and renders admirable service to me but reminds mo of the friendly feeling of tho Donor.

Extract of a letter from Pandita Radhakrishna, dated Lahore, 10th May, 1859.

यावच्चन्द्रदिवाकरौ क्षितितले खेलाक्षना राजत-
स्तावद्देववरस्य कीर्तिरतुला कल्पद्रुमात् स्थास्यति ।
राधाकान्त वपस्य भूपसुमणे भूमण्डले सम्मुदा
जीयाद्दे सच पुत्रपौत्रसहितः श्रीशेन संरक्षितः ॥

धनात् सर्व्वं सर्व्वं नच धनयुताः पण्डितगणाः ।
कथंवेषां सर्वं विदितमिव स्यात् पुस्तक मतात् ॥
सुधातुषारं प्राप्ताः सुगमविधिना यस्य कृतितः ।
क्षितौ राधाकान्तो जयतिहि विद्येषान्नरपतिः ॥

Translation.

As long as the sun and moon will shed on earth tho radiance emanating from them so long will the Kalpadruma derived unparalleled glory of Raja Radhakanta, tho chief of tho Devas and the gem amongst the Rajas, continue in this world, may he, protected by *Srisa*, live delighted with his son, and grandson. Wealth commands everything, but all Panditas are not wealthy, how could they know the contents of hundreds of works. May success attend Radhakanta, tho distinguished among the Rajas, by whose felicitously referable work, tho essence of knowledge can be easily obtained.

मुखबन्धनं ।

तत्रादौ मङ्गलाचरणश्लोकाः ।

योऽद्वैतसच्चिदानन्दपरब्रह्मेति कीर्त्तितः ।
उपासकानां कार्य्यार्थं कृपया पञ्चधाभवत् ॥
शक्तिः शिवस्तथा सूर्य्यो गणेशो विष्णुरेव च ।
अशेषविघ्ननाशाय भक्तिश्रद्धासमन्वितः ॥

साष्टाङ्गं तं प्रणम्यादौ शिष्टाचारानुसारतः ।
राजावाहादुरोपाधि-श्रीराधाकान्त-देवजः ॥
परेषामुपकाराय शब्दकल्पद्रुमाभिधं ।
कोषं नव्यक्रमयुतं कृतवान् बद्धयत्नतः ॥

ग्रन्थसमाप्तौ मङ्गलाचरणबीजं ।

संस्कृतग्रन्थानामेतादृशी रीतिः सर्व्वत्र प्रचलिता यन्मङ्गलाचरण-श्लोकानुक्रमणिकादिकं ग्रन्थादावेव लेखनीयं भवितुमर्हति । किन्त्वस्मिन् कोषे तन्नाचरितं । तस्यैतत्कारणं । उक्तश्लोकादि-रचन-प्रागेव प्रथम-काण्डादि-मुद्राङ्कन-समापनमात्रेण तल्लिप्सवो स्वदेशविदेशीयमहात्मानः पुनः पुनः प्रार्थयित्वा सर्व्वमेव गृहीतवन्तः । इदानीं एतत्कोषस्य प्रथमादिकाण्डं नोपस्थितं । तेन हेतुना एतन्मङ्गलाचरणादि-रूप-मुखबन्धनं शेषकाण्डपुरोवर्त्ति कृतं । किन्त्वेतद्ग्रन्थारम्भे अथ शब्दकल्पद्रुमो मुद्र्यते इति लिखनेन मङ्गल-वाचकाथ-शब्दप्रयोगादेव एतत्कोषस्य मङ्गलाचरण-सिद्धिर्जाता । तदुक्तं श्राद्धतत्त्व-धृतश्रुतौ,—

"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्वा विनिर्यातौ तेन माङ्गलिकावुभौ" ॥

ग्रन्थरचनप्रयोजनं ।

अष्टादशसंख्यकासु शास्त्रीयभाषासु संस्कृतभाषा गीर्व्वाणवाणी । अतः सर्व्वाग्रिष्टा सर्व्वत्र समरूपा सर्व्वजनमान्या च । देवैर्ऋषिभिश्च तद्भाषया अष्टादशविद्याः प्रणीताः । किन्त्वस्मिन् भारतवर्षे उक्तविद्या-सम्बन्धि-पारिभाषिक-शब्दादीनां प्रकाशक-कोषो न प्राप्यते । ते च तत्तद्भाष्य-टीकादिभिरेव चरितार्था भवन्ति । किञ्च महा-महोपाध्यायैः प्राचीन-नवीन-कवि-कोविदगणैः पद्येन पर्य्यायनानार्थ-युक्त-बहुविधाभिधानरचना कृता । किन्तु तत्तद्-ग्रन्थीयैकार्थ-शब्दसंग्रहस्य वर्गस्मरणाभावात् प्रयोजनीय-पर्य्याय-शब्दप्राप्तिः सुदुष्करी । एवं अनेकार्थ-शब्दसंग्रहस्य एकादि-षड्वर-पर्य्यन्त-काम्तादि-ह्रान्तशब्द-निबद्ध-निखिल-श्लोकानां पाठव्यतिरेकेण प्रार्थनीय-नानार्थ-शब्दं-निर्गमोऽतिदुर्गमश्च । विशेषतः तत्तदेकैक-कोषे समग्र-शब्दार्थयोर्लाभाभावः । इत्यादि-दोषमहामालोच्य परोपकाराय पठद्भ्यावधि-वर्त्तमानकाल-पर्य्यन्तं बहुतरपरिश्रमैः धीरवर-निकर-साहाय्यैरेतद्देशप्राप्य-समस्तकोष-वेद-वेदान्तवेदाङ्गभाष्य-व्याकरण-च्छन्दोज्योतिष-साहित्य-नाटक-काव्यालङ्कार-वैद्यक-सङ्गीत-न्याय-सांख्य-पातञ्जल-वैशेषिक-मीमांसा-स्मृति-पुराणेतिहास-तन्त्रागम-निगम-शिल्प-सूपकार-नीतिशास्त्र-कुलाचार्य्य-गोस्वामि-ग्रन्थादिभ्यः शब्दसमूहं संगृह्य कविकल्पद्रुम-नामक-धातुपाठ-ग्रन्थात् धातुनिवहञ्च सङ्कलय्य सकलशब्द-धात्वर्थानामनायासेन लाभार्थं विना पद्येन वर्णव्यवस्थाक्रमेण शब्दकल्पद्रुमाभिधानाभिनवाभिधानं कृतवान् । इमं सप्तकाण्डात्मक-बृहत्कोषं स्वीयकोष-व्ययेन मुद्राङ्कयित्वा मुद्राव्यतिरेकेण नानादिग्देशीय-विशिष्ट-पात्रेभ्यो बन्धुवर्गेभ्यो याचकेभ्यश्च दत्तवान् ॥

ग्रन्थस्य नामकारणं ।

एतत्कोषस्य शब्दकल्पद्रुम-नाम-करण-कारणमेतत् । स्वर्गीय-कल्पद्रुम-सन्निधाने यो यत् प्रार्थयते तस्य तत्प्राप्ति-र्भवत्येव । मत्कृतमर्त्त्यीय-शब्दकल्पद्रुम-समीपे यानि यानि समीहित-शब्दादीनि प्रार्थयन्ते तानि तान्यवश्यं प्राप्नुवन्ति । अतः कल्पवृक्ष-सादृश्यमेव नामकारणं । प्राचीनसंग्रहकृद्भिरपि स्वकृतग्रन्थानां कल्पद्रुम-कल्पतरु-कल्पलता-प्रभृति नामधेयं कृतं । तत्सदृशार्थक-कामधेनु-चिन्तामण्यादि-पुस्तकानि च प्रचलन्ति एतद्ग्रन्थस्य वृक्षरूपकत्वात् अस्य खण्डस्य काण्डेति संज्ञां कृतवान् ॥

अथ ग्रन्थपरिपाटी ।

अतः परमहमेतत्कोषस्यानुक्रमं विशेष-नियमञ्च विवृणोमि । निखिलाभिधानिक-शास्त्रिक-लौकिक-व्यवहारिक-साधुशब्दानां धातुगणानाञ्च झटिति प्राप्तये तेषामानुपूर्व्विकाकारादि-क्षकारान्त-पञ्चाशद्वर्णानां यथाक्रमं सूचीं कृत्वा विन्यासमकुर्व्वं। तत्र प्रथमं स्वरवर्णादिशब्दानां परे हलवर्णादि-शब्दानां शेषे युक्ताक्षरादि-शब्दानाञ्च वर्णक्रमेणैव यथास्थानं प्रथमा-विभक्त्यन्तत्वेन संस्थापनमकार्षं। पदसाधने येषामनयाक्षराणां विकारो लोपो वा अभवत् ते वर्णास्तत्तच्छब्दोपरि विन्यस्ताः। अनुस्वार-विसर्गाणां षोड़श-स्वरान्तर्गतत्वेन तदुभयवदाद्य-वर्णयुक्त-शब्दान् स्वरवर्णस्थलाभिषिक्तान् चकार । तत्पश्चात् प्रत्येक-शब्दस्य लिङ्गं प्रत्येक-धातोरनुबन्धञ्च निर्णीतवान् । येषां धातूनामनुबन्धो नास्ति तत्स्थानं विन्दुयुक्तमथवा शून्यमास्ते । तदनन्तरं सकल-शब्दानामर्थवाचक-पदानि प्रथमाविभक्त्यन्तत्वेन एवं समस्त-धात्वर्थवाचक-पदानि सप्तमीविभक्त्यन्तत्वेन लिखितानि । प्रत्येक-प्रसिद्ध-शब्दोत्तरं

तदीयपर्य्यायाः देशभाषास्च तथा प्रत्येक-धात्वर्थानन्तरं तट्टीका धातुदीपिकाव्याख्यापदादीनि विहितानि सर्व्वशेषे तेषां प्रमाणानि तदभावे तत्प्रयोगाः तद्विरहे तद्व्युत्पत्ति-लिखिता ॥

वर्णमालायां च वर्ग्य-जकारान्तःस्थयकारौ मूर्द्धन्य-णकार-दन्त्यनकारौ वर्ग्यवकारान्तःस्थवकारौ तालव्यशकार-मूर्द्धन्यषकारदन्त्यसकाराः सन्ति । एतदखिल-वर्णादि-शब्दानां धातूनाञ्च प्रभेदं कृत्वा सूचीपूर्व्वकं यथास्थानं संस्थापनं कृतवान् । वङ्गदेशे उक्तवर्णानामुच्चारण-भेदाभावः । विशेषतो वकार-द्वयस्याकारोच्चारणयोर्भेदो नास्ति पश्चिमादिदेशे वर्त्तते । किन्तु सुग्धबोधटीकायां दुर्गादासविद्यावागीशधृता वकार-भेदिकैकप्राचीनकारिकास्ति । सा यथा,—

"उदूटौ यत्र विद्येते यो वः प्रत्ययसन्धिजः । अन्तःस्थं तं विजानीयात्तदन्यो वर्ग्य उच्यते" ॥

एतत्कारिकया सकलवकार-प्रभेदो न भवति । इति हेतोरहं धातूनां शब्दाकरत्वादोऽयदन्त्य-वकारादिधातुद्वारा पदसाधनं कृत्वा वङ्ग-प्रयत्नै-र्वकारद्वय-भेदं प्रकाशितवान् रेफयुक्तवर्णन्तु रवर्णात् परं शब्द-सूचीमध्ये विन्यस्तवान् ॥

पूर्व्वतन-कोषकार-वर्गैः स्वस्वकोषे धातुसङ्ग्रहो न कृतः शब्दमात्रसंग्रहः कृतः । किन्तु शब्दानामुत्पत्ति-स्थानं धातुः । अतएवाहं सर्व्वोत्तम-वोपदेवीय-धातुपाठ-कविकल्पद्रुमात् (१७५४) चतुःपञ्चाशदधिक-सप्तदशशत-संख्यक-धातून् सङ्कलय्य एतत्कोषान्तर्गतान् कृतवान् । तच्च १३२ अकारान्त-धातवः । २४ आकारान्त-धातवः । १८ इकारान्त-धातवः । २५ ईकारान्त-धातवः । ३३ उकारान्त-धातवः । १३ ऊकारान्त-धातवः । २१ ऋकारान्त-धातवः । १६ ॠकारान्त-धातवः । ६ एकारान्त-धातवः । २५ ऐकारान्त-धातवः । ५ ओकारान्त-धातवः । ५८ ककारान्त-धातवः । २१ खकारान्त-धातवः । २७ गकारान्त-धातवः । २० घकारान्त-धातवः । ५० चकारान्त-धातवः । १८ छकारान्त-धातवः । ७२ जकारान्त-धातवः । ३ झकारान्त-धातवः । ७१ टकारान्त-धातवः । २३ ठकारान्त-धातवः । ७६ डकारान्त-धातवः । १ ढकारान्त-धातुः । ५० णकारान्त-धातवः । ३१ तकारान्त-धातवः । २८ थकारान्त-धातवः । ७८ दकारान्त-धातवः । ३७ धकारान्त-धातवः । २८ नकारान्त-धातवः । ६४ पकारान्त-धातवः । १५ फकारान्त-धातवः । ४५ बकारान्त-धातवः । ३८ भकारान्त-धातवः । ३३ मकारान्त-धातवः । ३१ यकारान्त-धातवः । ४२ रान्त-धातवः । ८३ लकारान्त-धातवः । ६८ वकारान्त-धातवः । ३८ तालव्यशकारान्त-धातवः । ११६ मूर्द्धन्यषकारान्त-धातवः । ६५ दन्त्यसकारान्त-धातवः । ५० हकारान्त-धात-वः । ४२ सौच-धातवः सन्ति । एषां मध्ये संख्याया एकषष्टकारान्त-धातुरेवमेको लकारान्त-धातुर्नास्ति । सौच-धातूनां नियत-प्रयोगाभावः । एतत्समुदाय-धातुर्गणभेदे विभक्तोभूतस्तस्माद्धेतोर्धातु-पाठस्य गणसंज्ञा अभवत् । तन्मध्ये प्रसिद्ध-गणा दश । अवान्तर-गणा अनेके विद्यन्ते । यथा,—

भ्वाद्यदादी जुहोत्यादिर्दिवादिः स्वादिरेव च । तुदादिश्च रुधादिश्च तनक्र्यादि-चुरादयः ॥

इति दुर्गादास-विद्यावागीश-कृत-कविकल्पद्रुम-टीका धातुदीपिका ॥ उक्तगणे वोपदेव-विप्रेण अकाराद्यादि-धातुपाठ-क्रमेण अकारान्तादि-धातु-सकलं कथितवान् । किन्त्वहमेतत्क्रमानुगमनमकृत्वा निजकोष-रीत्यनुसारेण शब्दसूचीमध्ये धातुगणान् लिखितवान् ॥

सांकेतिकवर्णचिह्नादीनां विवरणं ।

एतत्पुस्तकस्य प्रतिपत्रस्य प्रत्येक-पृष्ठ-मध्यस्थाने युग्मरेखा-प्रदानेन द्विभागं कृत्वा तद्भागद्वये शब्दादिर्लिखितः । तस्यान्तिम-शब्दादेर्व्वर्णं व्यञ्जन-पर्य्यन्तं उक्तभागद्वयोपरि विन्यस्तमभवत् । तदृष्टिमात्रेण यदक्षर-पर्य्यन्त-शब्द-स्तत्पृष्ठारूढो भूतस्तद्बोधो भविष्यति । तेनेष्ट-शब्दानामनायासेन लाभो भविता ॥

पुंलिङ्गस्य सङ्केतः "पुं" । स्त्रीलिङ्गस्य संक्षेपः "स्त्री" । क्लीवलिङ्गस्य चिह्नं "क्ली" । वाच्यलिङ्गस्य अर्थात् त्रिलिङ्गस्य लक्ष्म "त्रि" । एवम-व्ययशब्दस्यैक-देशस्य "व्य" इत्यक्षरस्य ग्रहणं कृतं ॥

यस्मिन् स्थले एक-शब्द-घटकी-भूत-वङ्गवर्णाः पंक्तिद्वये पतितास्तज्ज्ञापनार्थं तत्प्रथमपंक्तिशेषे एका क्षुद्र-समरेखा (-) प्रदत्ता भूता ॥

एकार्थ-शब्दस्योत्तरं एवं प्रमाणस्य पूर्व्वं एका विषम-रेखा (।) प्रदत्ता । भिन्नार्थक-शब्दस्य एवं प्रमाणस्य परं विषम-रेखाद्वयं (॥) विन्यस्तं । प्रथमकाण्डे क्वचिदस्य व्यतिक्रमो जातः ॥

समानार्थक-दि-व्यादि-शब्देष्वेकस्थले उपस्थितेषु तदुत्तरं तज्ज्ञापकं एवम्प्रकार-वेष्टन-चिह्नं " } " दत्तं ॥

विशेषदृष्टान्तसमापनात् परं विशेष-शब्दार्थारम्भात् पूर्व्वञ्च पुष्पाकारचिह्नं (*) कृतं । एवं विस्तारित-विषयान्तर्गत-प्रकरणभेदस्थले पुष्पा-कारेणाङ्कितं ॥

येषां प्रसिद्ध-शब्दानामुत्तरं तत्पर्य्याय-शब्दा लिखितास्तत्संख्यानामङ्कपातः कृतः । तत्रोक्त-प्रसिद्ध-शब्दमेकत्वेन गणयित्वा तत्पर्य्याये द्वयादि-संख्याङ्काः स्थापिताः ॥

पूर्व्वोदित-चतुःपञ्चाशदधिक-सप्तदशशत-धातूनां षट्चत्वारिंशदनुबन्धवर्णानां फलानि लिख्यन्ते ॥

अः—अनुबन्धेषु मध्ये अकारः सुखोच्चारणार्थः । यथा धक्ष नक्ष क नाशने इति ॥

आः—निष्ठाभावादि-कर्म्मवेट् । आकारेतो धातोर्भावे आदिकर्म्मणि च विहिताया निष्ठाया वा इडित्यर्थः । यथा दर्मिद्या स्नेहे भावादिढे वेति मिन्नं मेदितं तेन । प्रमिन्नः प्रमेदितः स्यः । भावादिकर्म्मभ्यामन्यत्र निष्ठाया न इम् इत्यर्थः । यथा आदित इति भिन्नः भिन्नवान् ॥

दः—नुन्वान्। वदिङ् नुत्यभिवादयोः। अतएवेदितो नुन् वन्द्यते विष्णुः॥

दर्—वा आङ्वान्। च्युतिर् क्षरणे दरितस्तु वेति अच्युतत् अच्योतीत्॥

दीः—अनिङ्निष्ठः। दीपीङ् यृ दीपने। नेमडोश्चीति दीप्तः दीप्तवान्॥

उः—क्वावेट्। चमु भक्षणे। पु क्लिशूदित इम् इति चमित्वा चान्त्वा॥

ऊः—वेट्कः। यस्य सामान्यविधिना इम्विहितः ऊदितः परस्य तस्य वा इम् इत्यर्थः। षिधू शिवे शास्त्रे। वेमूदिदिति असेधीत् असेत्सीत्॥

ऋः—चङ्यृङ्क्षः। चङि ञेः परे अङि परे ऋङ्क्षः ऋक्षाभाववान्। यथा ढौक्रङ् गत्यां। अरडुऋङ्क्ष इत्यच ऋदिदर्जनात् अडूढौकत्॥

ॠः—वा चङि ऋङ्क्षः इत्यनुवर्त्तते। कॄण् आर्त्तस्वरे। भ्राज भ्राशेति अचीकणत्। अचकाणत्। येषां सप्तम-स्वरानुबन्धः कैश्चित् पठ्यते कैश्चिन्न पठ्यते तेषां ऋक्ष-विकल्पनार्थोऽयमनुबन्धः॥

ऌः—अङ्वान्। ऐागम्क्ष गत्यां। ग्लास्क्ष्वुत्पुषादेरिति अगमत्॥

एः—सिचि अवृद्धिः। सिचि व्यांविहितसौ। ए कट् वृतौ वृषि। हसादेः सेम इत्यच एदिदर्जनात् अकटीत्॥

ऐः—यजादिः स्यात्। यजै ञौ देवार्चने। व्यथग्रहेति जिः इयाज। ग्रहस्वपाद्योरिति इज्यात्॥

ओः—निष्ठातनः। निष्ठायास्तो निष्ठातः निष्ठातेा नेा यस्मात् स निष्ठातनः। रुजो शौ भङ्गे। स्फुल्लाद्योदिदिति रुग्नः रुग्नवान्॥

औः—अनिट्। औ गम्क्ष गत्यां। वसोरस्येत्यच औदिदर्जनात् गन्ता॥

कः—चुरादिः। गणत्क संख्याने। चुर्भ्यो ञिर्व्वेति गणयति॥

किः—चुरादिर्वा। पचे गणान्तरनियमाभावात् भ्वादिरित्यर्थः। युज कि संयमे योजयति योजति। यद्यपि चुरादिभ्यो ञिर्व्विकल्प्यते तथाप्यन्येषामनुरोधादिदमुक्तं। अन्येषां मते तु चुरादिभ्यो ञिर्नित्यः। तत्रापि युजप्रभृतिभ्यो वेति। क्षमते तु चुर्भ्यो ञिर्व्वेत्यत्र वाग्रहस्य व्यवस्थावाचित्वात् चुरादिभ्यो ञिर्नित्यः। अत्र युज-प्रभृतिभ्यो वेति॥

गः—क्र्यादिः। डु क्रीञ् ग द्रव्यपर्य्यये। दिवस्तुदेति क्रीणाति॥

गिः—घ्वादिरपि। अपिग्रहात् क्र्यादिश्च। पू ञ गि शोधे। घ्वादेः स्व इतिह्रस्वः पुनाति। अपूः स स्वादिः। पूवर्ज्जितः स घ्वादिर्स्वादिश्च स्यात्। लू ञगि छिदि लुनाति। स्फुल्लाद्योदिदिति लूनः लूनवान्। कॄ गॄ ज्या ग्लाहाल्वादेरिति लूनिः॥

घः—रुदादिः। लघिर रुद रोदे। रुह्योऽयोहस्वस्येम इति रोदिति। रुदाद्यस्तीति ईम् अरोदीत्॥

ङः—तङ्वान् कर्त्तरि। कर्त्तरि वाच्ये तङ्वान् आत्मनेपदी। एध ङ वृद्धौ। नवग्रः पमे इति एधते॥

जः—ज्वलाद्यः। ज्वल ज्म चलविषोः। दूनीभूज्वलाद्येति णः ज्वालः। पचे पचादित्वादन् ज्वलः। एवं कुच ज रोधपर्ङ्कौटिल्यलेखने। दूनीभूज्वलाद्येति णः कोचः। पचे कॄ गॄ ज्ञा प्रीति कः कुचः॥

झः—ज्वलाद्यः। इति केचित्॥

ञः—आत्मने। आत्मने आत्मार्थं फलवति कर्त्तर्य्यात्मनेपदं अफलवति परस्मैपदमिति शेषः यज ञौ देवार्चायां यजते यजमानः यजति याजकः। चुरादेस्तु स्वार्थविहित-ञेर्ज्जकारेण ञित्वेऽपि उभयपदं न स्यात् अन्यथा स्वम ञक् वितर्के इत्यादे र्ञानुबन्धो व्यर्थः स्यात्॥

ञिः—अद्यक्षः। अद्य वर्त्तमाने क्षो यस्मात् स अद्यक्षः। ञि ष्ठा स्थाने। ज्ञार्वेच्छार्थञीच्छीलादेरिति स्थितो विष्णुस्तिष्ठतीत्यर्थः॥

टुः—साधुः। टु ङ वेप चलने। द्वितेाऽथुरिति वेपथुः॥

ठः—फणादिः। इति केचित्॥

डुः—चिमगयुतः। छ ञ द डु छतौ। द्वितस्त्रञ्जे इति छत्रिमं॥

णः—फणादिः। फण ण निस्तेहे। ट फल भजेति फेणतुः पफणतुः फेणिथ पफणिथ॥

तः—अदन्तः। अदन्तानां पृथग्वर्गविधानेनैव ज्ञाने सिद्धे तानुबन्धोऽनभ्यासानामङ्गादिषु कान्तत्वादिभ्रमनिरासार्थः।

दः—तनादिः। तन दु ञ विस्तृतौ। तनभ्यः ष्टुविति तनेाति। सेर्लुक् तथासेारिति अतत अतनिष्ट अतथाः अतनिष्टाः। वनतनाद्यनिमामिति प्रतत्य॥

धः—रुधादिकः। रुधिर्धौ ञि ञ आवृतौ। दिवसु तुदेति रुणद्धि॥

नः—स्वादिः। पु ञण सन्ध्याक्लेदपीड़नयेा। दिवसु तुदेति सुनेाति॥

पः—सुचादिः। सुच्क्ष ग प ञौ मेाचे। तुण्रधेासुचामिति सुञ्चति॥

भः—शमादिः। शमुभिर्य शमे। यन्योशमादीति शाम्यति॥

मिः—घटादिः। निचिन्नमेादीर्घो वा। दीर्घो दीर्घवान्। घट य म ङ चेष्टे। ओस्नमेासुर्घश्चेति अघटि अघाटि घटं घटं घाटं घाटं। निचि ह्रस्वः मेाऽनुवर्त्तते। निचि ञौ ह्रस्वः ह्रस्ववान्। घटादि जनीति घटयति॥

मिः—वा। निचि ह्रस्व इत्यनुवर्त्तते। फण मि ण गतौ। वा सम यम फणेति फणयति फाणयति॥

यः—दिवाद्यः। दिव्यु जिगीषेच्छादौ। दिवसु तुदेति दीव्यति॥

रः—वैदिकः। वेदेष्वेव प्रयुज्यन्ते नतु भाषायामित्यर्थः। गार्लिस्तुतौ जन्मनि। जगाति॥

लः—अदादिकः। अदूौ भक्षे। लुगघ्नोऽपः अत्ति॥

लिः—क्रादिः। क्रादेरदाद्यन्तर्गणत्वेन ख्यातत्वाददादिखसूचकानुबन्धो न कृतः। अथवा लुः स्वपादिश्च लिर्क्रादिरित्येकं वाक्यं। लु लि एतदुभयानुबन्धौ धातू क्रमात् स्वपादिक्रादीनाः। चकारस्योभयत्र सम्बन्धाददादौ चेत्यर्थः। क्रादिः पृथक्गण इत्येके। अतएव पठन्ति च।

"क्राद्यदादौ जुहोत्यादिर्दिवादिः स्वादिरेव च। तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयः"॥ इति।

ऊलि होमेऽदने। क्रादौ रे दिः जुह्वोति।

लुः—स्वपादिश्च। चकाराददादिश्च। स्वमते स्वपादेः प्रयोजनं नास्ति। दरिद्रतीत्यादौ स्वपादित्वादजादौ सार्व्वधातुके। आद्युदात्तत्वमिति वोपदेवः॥

वः—वृतादिः। वृत ङ व ङ वर्त्तने। वृङ्वोनेम पे इति तेनैव परस्मैपदे वर्त्स्यति विवृत्सति। आत्मनेपदे तु वर्त्स्यते विवर्त्सिषते। अन्यत्र विवर्त्सिषा विवृत्सा॥

शः—तुदादिकः। तुदौ ञ श व्यथे। दिवसुतुदेति तुदति॥

शिः—कुटादिश्च। चकारात् तुदादिश्च। कुटां नुम्नौ ञ्जिति इति नियमात् कुट शि कौटिल्ये इत्यादीनां अकुटीत् इत्यादौ न गुणः। णू शि स्तवने इत्यादीनां अनुवौदित्यादिषु न वृद्धिः। अगुणत्वादुव् च॥

षः—क्षदङ्वान्। आख्यातिकस्याङोऽप्राप्त्यर्थं क्षदिति विशेषणं। स्वमते तूभयत्र ङ एव। डु ओ श पच पाके। भौषि चिन्नीति पचा॥

सः—जक्षादिः। जक्ष च सु घ भक्षहासयोः। द्विरुक्त जक्षादीति द्विसंज्ञायां अचस्तस्य भ्रिदचोऽङेरिति न नुण् जक्षत्। क्लीवे जक्षश्चोस्तु दः अतुर्नुण् इति जक्षति जक्षन्ति। आख्यातिकेऽन्तोऽन्तो ङेरिति जक्षति। अनुस् भिदेरिति अजक्षुः। इति धातुदीपिकायां अनुबन्धफलनिरूपणं॥

आदिकोषविवरणं।

सर्व्वेषां कोषाणामादि अग्निपुराणोक्ताभिधानं। तत्रादौ स्वर्गपातालादिवर्गः। ततोऽव्ययवर्गः। ततो नानार्थवर्गः। ततो भूपुराद्रिवनौषधिसिंहादिवर्गाः। ततो नृब्रह्मक्षत्रविट्शूद्रवर्गाः। शेषे सामान्यानि नामलिङ्गानि सन्तीति मया दृष्टं। अमरसिंहस्तु उक्ताग्निपुराणीयाभिधानस्य कस्यचित् कस्यचित् वर्गस्य व्यतिक्रमं कृत्वा तत्रोदित-सामान्य-नामलिङ्गानां विशेष्य-निघ्न-वर्गभङ्गीर्णवर्गाविति संज्ञां स्थापयित्वा अन्ते लिङ्गादिसंग्रहवर्गस्य योगं कृत्वा स्वीयकोषं रचितवान्। एवं जटाधरोऽपि अमरकोषस्यानुकरणं कृतवान्। इति विरलप्रचारः॥

प्राप्तकोषादिनामानि।

अत्राभिधाने मत्प्राप्तयद्यत्कोषादितः शब्दादयः संगृहीतास्तेषां संज्ञाः पश्चाल्लिख्यन्ते॥

अमरसिंहकृतं	नामलिङ्गानुशासनं ..	१	पुरुषोत्तम देवकृतः	त्रिकाण्डशेषः	१५
अजयपालकृतः	नानार्थसंग्रहः	२	तत्सुता	हारावली	१६
गदसिंहकृतता	नानार्थध्वनिमञ्जरी ..	३	भावमिश्रकृतः	भावप्रकाशः	१७
चक्रपाणिदत्तकृता	शब्दचन्द्रिका	४	मधुरेशपण्डितकृता	शब्दरत्नावली	१८
जटाधराचार्य्यकृतः	पर्य्यायनानार्थकोषः ..	५	महेश्वरवैद्यकृतः	विश्वप्रकाशः	१९
दण्डाधिनाथकृता	नानार्थरत्नमाला ..	६	मेदिनीकरवैद्यकृतः	नानार्थशब्दकोषः ..	२०
दुर्गादासविद्यावागीशकृता	धातुदीपिका	७	रामेश्वरशर्म्मकृता	शब्दमाला	२१
धनञ्जयकविकृता	नाममाला	८	रत्नमालाकरवैद्यकृता ..	आयुर्वेदार्णवोत्थितपर्य्यायरत्नमाला	२२
धरणिदासब्राह्मणकृतः ..	सारसंग्रहनामकानेकार्थसमुच्चयः	९	वोपदेवविप्रकृतः	कविकल्पद्रुमः	२३
नरसिंहकाश्मीरपण्डितकृतः ..	निर्घण्टुराजः अर्थात् राजनिर्घण्टः	१०	श्रीनन्दनभट्टाचार्य्यकृतं ..	वर्णाभिधानं	२४
नारायणदासकविराजकृतः ..	राजवल्लभः	११	श्रीरामशर्म्मकृतः	उणादिकोषः	२५
पद्मनाभदत्तद्विजकृतः ..	भूरिप्रयोगः	१२	सिद्धान्तकौमुदीसंक्षिप्तसारकारकृते	उणादिवृत्तौ ..	२६।२७
पुरुषोत्तमदेवकृतः	एकाक्षरकोषः	१३	हलायुधभट्टकृता	अभिधानरत्नमाला ..	२८
तत्कृतः	द्विरूपकोषः	१४	हेमचन्द्रजैनकृतः	अभिधानचिन्तामणिः	२९

अप्राप्तकोषनामानि।

एतद्भिन्नानेकप्राचीनाभिधानानि सन्ति। यद्यपि तानि मया अप्राप्तानि तथापि तेषां मध्ये बहुकोषाणां प्रयोगप्रमाणानि अमरटीकाधृतानि आसादितानि। एवं विश्वमेदिनीकोषे तत्सकलाभिधानानां शब्दाः समाहृताः। उक्तकोषद्वयशब्दानां शब्दकल्पद्रुमाभ्यन्तरितत्वेन वक्ष्यमाणसमस्तप्राचीनकोषाणां शब्दाः एतत्कोषान्तर्गता भूताः।

विश्वधृतप्राचीनकोषाः ।

भोगीन्द्र १	वाचस्पति ४	मङ्गल ७	भागुरिरचितकोषाः .. १०
कात्यायन २	व्याडि ५	सुभाङ्ग ८	
साहसाङ्क ३	विश्वरूप ६	वोपालित ९	

मेदिनीधृतप्राचीनकोषाः ।

उत्पलिनी .. १	रन्तिदेव ७	गङ्गाधर १३	चन्द्र १९
शब्दार्णवः २	रत्नापरनामहर .. ८	वाभट १४	विक्रमादित्य .. २०
संसारावर्त्तः .. ३	गोवर्द्धन ९	माधव १५	गोमिरचितकोषाः .. २१
नाममालाख्यः .. ४	रभसपाल १०	धर्म्म १६	पाणिनिपदानुशासनञ्च .. २२
वररुचि ५	रुद्र ११	तारपाल १७	
शाश्वत् ६	अमरदत्त १२	वामन १८	

एतदन्ये बलहड्डप्रभृतिकृतकोषाः सन्ति ॥

लभ्यालभ्यामरकोषटीकानामानि ।

अमरकोषश्च भृशप्रामाणिकः व्युत्पादकश्च । तस्मात् बहुतरटीकाकारैस्तस्य नानाविधा टीका कृता । तन्मध्ये कतिपयलभ्यटीकानां प्रमाणानि शब्दकल्पद्रुमे दत्तानि । किन्तु तत्समुदायटीकाकृन्नामानि टीकानामधेयानि चाहं व्यक्तीकरोमि ॥

क्षीरस्वामी .. १	माधवी ११	कोलाहलाचार्य्यः .. २१	कृता व्याख्यासुधीः .. ३०
सुभूतिः २	मधुमाधवी १२	ध्रुवस्वामी .. २२	अच्युतोपाध्यायकृतव्याख्या-
हड्डुचन्द्रः ३	सर्व्वानन्दः १३	रामतर्कवागीशः .. २३	प्रदीपः ३१
कलिङ्गः ४	अभिनन्द १४	नयनानन्दः २४	मथुरेशविद्यालङ्कारकृता
कोङ्कटः ५	मल्लिनाथः १५	विद्याविनोदः .. २५	सारसुन्दरी .. ३२
सर्व्वधरः ६	रायमुकुटमणिः .. १६	रघुनाथचक्रवर्त्ती .. २६	नारायणचक्रवर्त्तिकृता पदार्थ-
राजदेवः ७	नीलकण्ठः १७	व्याख्यामृतः .. २७	कौमुदी ३३
गोवर्द्धनः ८	अरुणः १८	टीकासर्व्वस्वः .. २८	रमानाथविद्यावाचस्पतिकृत-
द्राविड़ः ९	भगीरथः १९	सन्देहभञ्जिका .. २९	चिन्ताखविवेक .. ३४
भोजराजः १०	जयादित्यः २०	रामाश्रमापरनामभानुदीक्षित-	भरतमल्लिककृता मुग्धबोध
		एतद्भिन्ना अपि टीका वर्त्तन्ते ॥	सम्मता टीका .. ३५

अत्राहृतविषयकृन्दं शब्दसिन्धुदुस्तरत्वञ्च विज्ञापयामि ।

कोषगणातिरिक्तनानाशास्त्रोक्तशब्दप्रमाणप्रयोगोपाख्यानादीनि । चातुर्व्वेदिकषाड्दर्शनिकमतविवरणपदार्थकर्म्मोपासनाज्ञानकाण्डब्रह्मनिरूपण-वेदाङ्गशिक्षादीनि । शाब्दिककाव्यालङ्कारिकछान्दसिकसूत्रवृत्तिमात्रानामलक्षणोदाहरणचित्रकाव्यनवरसरतिबन्धादयः । स्मार्त्तयज्ञमलमासादि-लक्षणदायभागशौचसंस्कारप्रायश्चित्तोद्वाहतिथिकृत्यजन्माष्टमीदुर्गोत्सवाष्टादशविवादपद-चतुष्पाद्व्यवहारैकादश्याद्युपवासनिर्णयतड़ागभवनवृषोत्सर्गव्रतप्र-तिष्ठापरीक्षाज्योतिःशुभाशुभदिनादिवास्तुयागदीक्षाक्रिकाचारमासकृत्यपुरुषोत्तमादिमाहात्म्यश्राद्धपूर्व्वकृत्यकर्म्मविपाकद्वादश्याद्याधिकरणदत्तकव्यवस्था-दयः । पौराणिकतान्त्रिकवर्णतत्त्वषट्कर्म्मस्नानतर्पणपूजामुद्रामन्त्रयन्त्रजपहोमबलिध्यानस्तवकवचमाहात्म्यभुवनस्वर्गनरकदेतवादानवतीर्थावतारनदनदीदे-शभेदपीठपर्व्वतवृत्तराजनीतिवर्णाश्रमधर्म्मवर्णसङ्करद्रव्यशुद्धिमहादाननिधिरत्नाद्युत्पत्तिसृष्टिप्रलयदुर्गपुरमन्दिरश्रीमूर्त्तिनिर्म्माणप्रमाणादीनि । ज्यौतिषिक-सैद्धान्तिकवारतिथिनक्षत्रयोगकरणसंक्रान्तिमासर्त्तुपक्षवर्षायनजातफलाकालग्रहणनक्षत्रचन्द्रधूमकेतुस्त्रीपुरुषादिशुभाशुभलक्षणशकुनस्वरोदयगणिताङ्कलेख-व्यवहाररात्रिचक्रभुगोलखगोलदृग्गोलवर्णनादीनि । आयुर्व्वेदीयजन्मक्रमशरीरस्थानरोगनिदानपूर्व्वरूपसम्प्राप्त्युपशयचिकित्सौषधद्रव्यगुणपाचनजारणमा-रणपथ्यापथ्यनाड़ीमूत्रजिह्वापरीक्षापञ्चकर्म्मषड्रसोत्पत्त्याख्यानादयः । गान्धर्व्ववेदीयनृत्यगीतवाद्यस्वरताललयतानमानग्रामश्रुतिमूर्च्छनारागरागिणीत-त्पुत्रतद्भार्य्यागानसमयध्रुवकगमकनायकनायिकानिरूपणादीनि । युक्तिकल्पतरुग्रन्थीयनीतिद्वन्दनगरीवास्तुराजगृहविशेषसामान्यामनोपकरणालङ्कारात्त-यात्रायुक्तयः तथा चतुष्पद्द्विपदनिष्पदयानोद्देशाः । पत्रकौमुदीयपत्रप्रमाणभङ्गरचनलेखननयनपटनचिह्नकोणच्छेदनपदन्यास श्रीशब्दविन्यासप्रश-स्तिप्रकरणादीनि । कुलाचार्य्यादिग्रन्थीयब्राह्मणवैद्यकायस्थानामुत्पत्तिवंशगोत्रप्रवरपर्य्यायश्रोत्रियकुलीनमौलिकगोष्ठीपतिनिर्णयादीनि च शब्दकल्पद्रुमस्य सप्तकाण्डे मया समाहृतानि । यान्यवशिष्टानि तानि परिशिष्टे प्रवक्ष्यामि । तत्तद्ग्रन्थनामानि वाहुल्यभिया नोक्तानि । तथापि शब्दसमुद्रस्य पारगमनं दुष्करतरं । तदुक्तं कलापसुग्धबोधटीकाधृतश्लोके ।

अहञ्च भाष्यकारश्च कुशाग्रीयधियावुभौ । नैव शब्दाम्बुधेः पारं किमन्ये जड़बुद्धयः ॥

परिशिष्टकरणकारणम् ।

अस्मिन् सप्तकाण्डात्मकशब्दकल्पद्रुमपुस्तके ये ये शब्दार्थप्रमाणप्रयोगादयः पूर्वं प्राप्त्यभावेन न संगृहीताः। अथवा भ्रमवशात् पतिताः। एवं यस्य यस्य रोगस्य निदानमात्रं लिखितं तत्तद्दौषधानि न विहितानि। एवं येषां शब्दानां अमरातिरिक्तकोषोक्तपर्य्यायशब्दसङ्कलनं न कृतं। एवं दीकारोत्तरचकारादिवर्णयुक्तकतिपयशब्दानां मुद्राङ्कनप्रमादेन स्खलनं जातं। एवं अकाराद्यादिवर्ग्यवकारादिपर्य्यन्तधातूनां तत्तद्दीकाधृतपदोदाहरणादयः पुरा न लिखिताः। एतत्सर्वमवशिष्टं परिशिष्टमध्ये लिपिबद्धीकरिष्यामि। अतःपरमेतत्परिशिष्टीयापुनरुक्तशब्दादीन् प्रागुदितसप्तकाण्डीयशब्दसूचीमध्ये यथास्थानं स्थापयित्वा ग्रन्थसमाप्तौ मङ्गलाचरणबीजं परिशिष्टकरणकारणञ्च हित्वा एतन्मुखबन्धनं प्रथमकाण्डस्य पूर्वं योजयित्वा पुनर्मुद्राङ्कने कृते एष कोषः सुसम्पूर्णं भविष्यति। किञ्च पश्चिमदेशीयलोकानां महोपकाराय देवनागराक्षरेण एतत्कोषमुद्राङ्कनार्थं पाश्चात्या महत्सुवर्णा ममान्तिके बहुशः प्रार्थयन्ते। किन्तु तत्प्रार्थनापूरणे मदीयायुषोऽनुकूलतायां सन्दिहानो विहितोऽस्मि। यद्यपि कश्चित् विपश्चित् किम्वा विषयी स्वोपलाभार्थं मत्कृतैतद्ग्रन्थाधिकारं यथारीति गृहीत्वा अस्मिन् कर्म्मणि प्रवर्त्तेत तत्र ममापत्तिर्नास्तीति ॥

शाके वह्निमसुद्रशैलधरणीमानेऽरुणे कर्कटे, याते खाग्निमिताब्दतः परममौ मत्शब्दकल्पद्रुमः ।
काण्डैः सप्तभिरन्वितो भगवतोऽनुक्रोशतः, पूर्णतां प्राप्तो दूषणमस्ति किञ्चिदिह चेत् तत् क्षम्यतां साधुभिः ॥

अथ सर्व्वोपासकसम्मतमङ्गलाचरणोनविंशतिपद्यानि ।

वेदा वदन्ति यं सत्यमानन्दमद्वितीयकम् ।
तथाम्नतञ्चैकरूपमवाङ्मनसगोचरम् ॥
सर्वातीतं सर्वगतं चिदेकरसमेव च ।
देशकालापरिच्छिन्नमपादमपि शीघ्रगम् ॥
सर्वग्रहमपाणिञ्च सर्वेषां दर्शकं तथा ।
अचक्षुषमपि श्रोत्रहीनं श्रोतारकं पुनः ॥
अचिन्त्यमपि सर्वज्ञं सर्वेषाञ्च नियामकम् ।
सर्वशक्तियुतं सृष्टिस्थितिप्रलयकारकम् ॥ १ ॥
तथौपनिषदा यं हि शुद्धबुद्धस्वभावकम् ॥ २ ॥
कथयन्त्यादिविद्वांसं सिद्धं यं कापिला विदुः ॥ ३ ॥
क्लेशकर्म्मविपाकाद्यैरपरामृष्टमेव यं ।
निर्म्माणकायमास्थाय सम्प्रदायप्रवर्त्तकम् ॥
तथानुग्राहकमपि प्रभाषन्ते पतञ्जलाः ॥ ४ ॥
लोकवेदविरुद्धैर्यं निर्लेपञ्च खतन्त्रकम् ॥
महापाशुपताः सर्वे ब्रुवन्ति सततं भुवि । ५ ।
शैवाः शिवं यं वदन्ति वैष्णवाः पुरुषोत्तमम् ॥ ६ । ७ ॥
पितामहमिति प्राज्ञः पौराणिकजना विदुः । ८ ।
याज्ञिका यज्ञपुरुषं सर्वज्ञमिति सौगताः ॥ ९ । १० ॥
निरावरणमित्येव प्रलपन्ति दिगम्बराः । ११ ।
यमुपास्यस्वरूपेण देशितं हि निरन्तरम् ॥
मीमांसका वै भाषन्ते चार्वाकाः प्रवदन्ति यं ।
लोकानां व्यवहारेण सिद्धं सन्ततमेव च ॥ १२ । १३ ॥
यावदुक्तोपपन्नं हि न्यायज्ञाः सम्प्रचक्षते । १४ ।
शिल्पिनो विश्वकर्म्मेति यं भणन्ति सुनिश्चितम् ॥ १५ ॥
शाक्ता वदन्ति यं नित्यामाद्याप्रकृतिरूपिणीम् । १६ ।
सौरास्तेजोमयं सूर्य्यं गाणपत्या गणेश्वरम् ॥ १७ । १८ ॥
रामानुजा यं वदन्ति विशिष्टाद्वैतवादिनः ।
लक्ष्मीनारायणं भक्ताधीनं नित्यशरीरिणम् ॥ १९ ॥
निम्बादित्यास्तथा माध्वाचार्य्याद्या द्वैतवादिनः ।
विष्णुं सशक्तिं सन्मूर्त्तिं धर्माऊर्भक्तवत्सलम् ॥ २० ॥
रामानन्दा रामचन्द्रं भक्तानुग्रहकारकम् ।
सीतया सहितं प्रोचुर्यं नित्यं नित्यविग्रहम् ॥ २१ ॥
श्रीमन्माध्वानुयायि श्रीनित्यानन्दादिवंशजाः ।
गोस्वामिनो नन्दसूनुं श्रीकृष्णं प्रवदन्ति यं ॥ २२ ॥
कायेन मनसा वाचा भक्त्या च प्रणिपत्य तम् ।
श्रीराधाकान्तदेवेन राज्ञातिप्रणयात्मतः ।
शब्दादीन्यवशिष्टानि संगृह्य बहुशास्त्रतः ।
परिशिष्टः शब्दकल्पद्रुमस्य क्रियतेऽधुना ॥

अथ ग्रन्थप्रतिज्ञानवश्लोकाः ।

शब्दकल्पद्रुमग्रन्थे सप्तकाण्डमयेऽखिले ।
येषामेव हि शब्दार्थपर्य्यायाणां तथैव च ॥
प्रमाणानां प्रयोगाणां धातुसम्बन्धिनां पुनः ।
पदोदाहरणानाञ्च चिकित्सानां गदस्य च ॥
न संग्रहोऽभवत् पूर्वग्रन्थे कारणकूटतः ।
तेषां सङ्कलनञ्चास्मिन् परिशिष्टे करोम्यहम् ॥

तथा वेदनिघण्टाख्यः पञ्चाध्यायसमन्वितः ।
वैदिकानाञ्च शब्दानामतिप्राचीनकोषकः ॥
तस्याच्च देशे विरलप्रचारत्वेन तद्धृतः ।
पर्य्यायशब्दसन्दोहः केनापि कोषकारिणा ॥
न संगृहीतस्तद्धेतोर्दुरूहोऽयुत एव च ।
प्रायो वैदिकशब्दार्थो बोधगम्यो भवेन्नहि ॥

अतस्तत्प्रथमाध्याये द्वितीये च तृतीयके ।
येषां स्थितानां शब्दानां पर्य्यायान् परिशिष्टगान् ॥
करिष्यामस्य निम्ने हि तेषां वर्गस्तु नाम च ।
तथा सङ्ख्या विलिख्यन्ते लोकानां ज्ञानहेतवे ॥
चतुर्थे पञ्चमाध्याये यदस्ति पदवृन्दकम् ।
तत्पर्य्यायस्य बोधस्य चाभावान्नाच्च गृह्यते ॥

तत्र प्रथमाध्याये ४१४ नामानि यथा ।

वर्गः	नाम	सङ्ख्या
१	पृथिवीनामधेयानि ..	२१
२	हिरण्यनामानि.. ..	१५
३	अन्तरीक्षनामानि ..	१६
४	साधारणनामानि ..	६
५	रश्मिनामानि.. ..	१५
६	दिङ्नामानि	८
७	रात्रिनामानि.. ..	२३
८	राज्युपनामानि ..	१६
९	अहर्नामानि	१२
१०	मेघनामानि	३०
११	वाङ्नामानि	५७
१२	उदकनामानि ..	१००
१३	नदीनामानि	३७
१४	अश्वनामानि	२६
१५	आदिष्टोपयोजनानि	१०
१६	ज्वलतिकर्म्माणः ..	११
१७	ज्वलतो नामधेयानि	११

इति वेदनिघण्टौ प्रथमाध्यायः ॥

द्वितीयाध्याये ५१६ नामानि ।

वर्गः	नाम	सङ्ख्या
१	कर्म्मनामानि	२६
२	अपत्यनामानि ..	१५
३	नृनामानि	२५
४	वाङ्नामानि	२२
५	अङ्गुलिनामानि ..	२२
६	कान्तिकर्म्माणः ..	१८
७	अन्ननामानि	२८
८	अस्तिकर्म्माणः ..	१०
९	बलनामानि	२८
१०	धननामानि	२८
११	गोनामानि	९
१२	क्रुध्यतिकर्म्माणः ..	१०
१३	क्रोधनामानि.. ..	११
१४	गतिकर्म्माणः.. ..	१२२
१५	क्षिप्रनामानि.. ..	२९
१६	अन्तिकनामानि ..	११
१७	संग्रामनामानि ..	४९
१८	व्याप्तिकर्म्माणः ..	१०
१९	बधकर्म्माणः	३३
२०	वच्चनामानि	१८
२१	ऐश्वर्य्यकर्म्माणः ..	४
२२	ईश्वरनामानि ..	४

इति वेदनिघण्टौ द्वितीयाध्यायः ॥

तृतीयाध्याये ४१० नामानि ।

वर्गः	नाम	सङ्ख्या
१	बऊनामानि	१२
२	क्रक्षनामानि	११
३	मङ्क्षनामानि	२५
४	मङ्क्षनामानि	२२
५	परिचरणकर्म्माणः ..	१०
६	सुखनामानि	२०
७	रूपनामानि	१६
८	प्रशस्यनामानि ..	१०
९	प्रज्ञानामानि	११
१०	सत्यनामानि	६
११	पश्यतिकर्म्माणः ..	८
१२	उत्तराणि पदानि सर्व्व-पदसमाम्नाय ..	९
१३	उपमानामानि ..	१२
१४	अर्च्चतिकर्म्माणः ..	४४
१५	मेधाविनामानि ..	२४
१६	स्तोटनामानि.. ..	१३
१७	यज्ञनामानि.. ..	१५
१८	ऋत्विङ्नामानि ..	८
१९	याच्ञाकर्म्माणः ..	१७
२०	दानकर्म्माणः	१०
२१	अध्येषणाकर्म्माणः ..	४
२२	खपितिकर्म्माणः ..	२
२३	कूपनामानि	१४
२४	स्तेननामानि	१४
२५	निर्णीतान्तर्हितनामधेयानि..	६
२६	दूरनामानि	५
२७	पुराणनामानि ..	६
२८	नूतननामानि.. ..	६
२९	दिग्व उत्तराणि नामानि	२९
३०	द्यावापृथिव्योर्नामधेयानि	२४

इति वेदनिघण्टौ तृतीयाध्यायः ॥

चतुर्थाध्याये २७८ पदानि ।

वर्गः	पदं	सङ्ख्या
१	अहा इत्यादिपदानि	६२
२	सखिमित्यादिपदानि	८४
३	आसुसुक्षणिरित्यादि-पदानि	१३२

इति वेदनिघण्टौ चतुर्थाध्यायः ॥

पञ्चमाध्याये १५१ पदानि ।

वर्गः	पदं	सङ्ख्या
१	अग्निरित्यादिपदानि	३
२	द्रविणोदा इत्यादि-पदानि	१३
३	अश्व इत्यादिपदानि..	३९
४	वायुरित्यादिपदानि ..	३२
५	श्येन इत्यादिपदानि..	३९
६	अश्विनावित्यादिपदानि	३१

इति वेदनिघण्टौ पञ्चमाध्यायः ॥

अथ ग्रन्थस्यानुक्रमणिकादिलेखनाभावकारणं वृत्तद्वयम् ।

यन्तस्यानुक्रमणिका साङ्केताक्षरलक्ष्म च । परिशिष्टस्य करणे कारणादिकमेव हि ॥
पूर्वं सप्तमकाण्डीयमुखबन्धे प्रकीर्त्तितम् । अतो न लिख्यतेऽचैव पुनरुक्तिभयान्मया ॥

अथादर्शपत्राणां वल्मीकभक्षणजन्यमनस्तापतन्निवारणहेतुपद्यानि ।

इदानीं परिशिष्टीयबऊलादर्शपत्रिकाः । तापो जामाढदौहित्रगणैरेव निवारितः ॥
यन्त्रालयमसुत्पन्नवल्मीकगणभक्षिताः ॥ यतस्ते परिशिष्टीयशब्दैरन्यैश्च संयुतम् ।
अतस्तद्गतशब्दानां नाभवन्मुद्रयाङ्कनम् । देवनागरवर्णेन शब्दकल्पद्रुमं पुनः ॥
तच्चेदृतं तदा ग्रन्थबाऊल्यं समजायत ॥ मुद्राङ्कितं प्रकुर्वन्ति यत्नेनातिशयेन च ।
किन्तु सांप्रतमादर्शनाशजन्यो मनोगतः । तस्य प्रकाशाल्लोकानामुपकारो भविष्यति ॥

अथ ग्रन्थकर्तुर्व्वंशवर्णनश्लोकाः ।

आसीत् श्रीहरिदेवाख्यः श्रीहरेरंशरूपकः ।
कायस्थानां कुले देववंशस्योद्भवहेतुकः ॥
मुरशिदाबादनगरामन्ने खजनपालकः ।
कर्णसुवर्णनामधेयसमाजे वासकारकः ॥
सदा हरिपदाम्भोजयुगलध्यानकारकः ।
मौद्गल्यगोत्रजातानामेष बीजाभिधानकः ॥ १ ॥
तस्य दूर्गावरो नाम सुतः सर्वगुणान्वितः । २ ।
तस्माद्विश्वेश्वरो जातस्तस्य विप्रेश्वरः सुतः ॥ ३ । ४ ॥
सदानन्देन संपूर्णः पूर्णानन्दोऽभवत्ततः । ५ ।
खानोपाधिस्तत्तनयः पीताम्बर इति स्मृतः ॥
अदभ्रशालिशालित्वाद्धान्यपीताम्बरेति च ।
विख्यातो भुवि सर्वत्र गोष्ठीपतिवरः स च ॥ ६ ॥
पृथ्वीधरस्तत्तनूजस्तस्माच्च कुरुनन्दनः । ७ । ८ ।
चत्वारस्तनयास्तस्य चतुर्दिग्निवासिनः ॥
प्रथमः शिवदासाख्यश्चौखण्डिख्यातिसंयुतः ।
मलुयीनामके देशे वासस्तेन सदा कृतः ॥
नित्यानन्दो द्वितीयस्तु रायोपाधिः सुविश्रुतः ।
कृतसौदपुरावासो नित्यानन्देन पूरितः ॥
चतुर्भुजस्तृतीयो यः सोऽपि रायेत्युदाहृतः ।
तालायामकृतावासश्चतुर्भुजपदाश्रितः ॥
चतुर्थः श्रीनाथरायो धुले पुरकृतायनः ।
सदा श्रीनाथचरणाम्भोजार्चनपरायणः ॥ ९ ॥
नित्यानन्दात्मजः श्रीमान् श्रीमन्तेतिसमीरितः ॥१०॥
चण्डीवरस्तस्य पुत्रश्चण्डिकापूजने रतः ॥ ११ ॥
तज्जातः परमानन्दः परमानन्ददायकः ॥ १२ ॥
काशीनाथश्च विजयावल्लभस्तत्कुमारकः ।
ज्येष्ठस्तु मल्लिकोपाधी रायोपाधिः कनिष्ठकः । १३ ।
विजयावल्लभाज्जातः कृष्णानन्दोद्विजार्चकः ॥ १४ ॥
रघुनन्दनदेवस्तत्तनयः परिकीर्त्तितः । १५ ।
विद्याधरस्तस्य सूनू रायेतिख्यातिमागतः ॥
आदौ नाजरायामवासी निताड़ावासकृत्ततः । १६ ।
तस्यात्मजो हरिहरो जातो हरिहराश्रितः ॥१७॥
षट् सुतास्तस्य विज्ञेयाः सर्वलोकप्रशंसिताः ।
ज्येष्ठस्तु यादवानन्दः सदा यादवसेविता ॥
द्वितीयो रामचन्द्राख्यस्तृतीयो लक्ष्मणो मतः ।
देवीदासस्तुरीयोऽभूत् मजुमदार उपाधितः ॥
परोपकारनिरतः सदा बन्धुभिरावृतः ।
मुड़ागाछादिदेशानां कानुनगोपदमागतः ॥
स च तस्मिन् जनपदे कर्णसुवर्णसमाजतः ।
उत्थाय वासमकरोत् पुत्रदारादिभिर्यतः ॥
दुर्गादासः पञ्चमस्तु सदा दुर्गाप्रपूजकः ।
षष्ठस्तु माधवानन्दः सर्वानन्दप्रदायकः ॥ १८ ॥
देवीदासमजुमदारतनयाः षट् प्रजाभृतः ।
गौरीकान्तो ज्येष्ठपुत्रः स च वंशविवर्जितः ॥
चण्डीशरणसंज्ञस्तु मध्यमश्चण्डिकार्चकः ।
तृतीयः पुण्डरीकाक्षः सहस्राक्षश्चतुर्थकः ॥
महावङ्गकृतो यो हि पदे पैत्र्ये नियोजितः ।
सरकारोपाधियुतो राजेन्द्रः पञ्चमः सुतः ॥
कामारपोलयामान्तर्वासस्तेन विनिर्म्मितः ।
कनिष्ठो रुक्मिणीकान्तो बन्धुभिर्ज्ञातिभिर्वृतः ॥
मुड़ागाछाप्रदेशे तु पञ्चग्रामे ह्यधिष्ठितः ।
स च केशवरायस्य चचियस्य विशेषतः ॥
अप्राप्तव्यवहारस्य विख्यातस्य समन्ततः ।
तद्देशाधिपते राज्ये नवाबेन नियोजितः ॥
अपश्यद्व्यवहारांश्च तद्राज्यशासने रतः ।
अतोऽस्मिन् भूतले लोकैर्व्यवहर्त्तेति कीर्त्तितः ॥ १९ ॥
तस्यैव तु कनिष्ठस्य चत्वारो देहसम्भवाः ।
धार्म्मिकाः कर्म्मकुशला लोके संप्राप्तगौरवाः ॥
ज्येष्ठो रामेश्वरः पैत्र्यं पदं प्राप्तः कृतश्रमः ।
महावङ्गकृतस्तेषु कृष्णरामस्तु मध्यमः ॥
राजारामस्तृतीयस्तु तेषां रुद्रेश्वरोऽन्तिमः ।
अनपत्यतया सोऽपि रुद्राराधकसत्तमः ॥ २० ॥
रामेश्वरस्य षट् पुत्रास्तेषां ज्येष्ठो महागुणः ।
रामचन्द्रस्तथा रामचरणो मध्यमः पुनः ॥
तृतीयो रघुनाथाख्यः श्रीरामस्तु तुरीयकः ।
रामकेशवनामा च पञ्चमः केशवार्चकः ॥
बलरामाभिधः षष्ठो बलवान् बलिनां यतः ।
एषां ज्येष्ठः कनिष्ठश्च वंशाभावमुपागतः ॥ २१ ॥
मध्यमो रामचरणो गुणैर्बन्धुभिरन्वितः ।
व्यवहर्त्तोपाधियुक्तो गोविन्दपुरमंस्थितः ॥
स च हिज्लीतमौलिग्रमहिषादलदेशतः ।
लवणस्य तथा राज्ञः करादाने नियोजितः ॥
कटकादिप्रदेशस्य महावङ्गकृतस्ततः ।
देवानीसंज्ञकपदं प्राप्तवान् बन्धुमानितः ॥
बन्धुभिर्वर्गिभिः सार्द्धं मेदिनीपुरमध्यतः ।
संग्रामं तुमुलं कृत्वा रणमध्ये निपातितः ॥२१॥
देवानरामचरणव्यवहर्त्तृमहाशयात् ।
समुत्पन्नास्त्रयः पुत्रा अशेषकुशलालयात् ॥

व्यवहर्त्तापाधियुक्तो रामसुन्दर आदिमः ।
विद्यान्नौषधदानेन गणनीयः स चाग्रिमः ॥
पञ्चकोटादिदेशे सोऽभवद्धश्चमत्तमः ।
माणिक्यचन्द्रदेवस्य मध्यमः पुण्यकृत्तमः ॥
अङ्कर्षिधरणीचन्द्रमाणे हिजरिहायने ।
दिल्लीश्वरप्रसादेन सम्प्राप्तौ तौ शुभक्षणे ॥
फरमाननामकलिपिं रायोपाधिं तथैव च ।
मन्सबानां सहस्रं सादिपञ्चशतमेव च ॥*॥
कनिष्ठो नवकृष्णाख्यदेवो जातो गुणाकरः ।
आसीत् किलकिलारूपामरावत्यां पुरन्दरः ॥
रूपवान् धनवान् मान्यो वदान्यः पण्डिताश्रयः ।
कुलशीलादिमन्यन्यो गोष्ठीपतिमहाशयः ॥
रसेषुसिन्धुशुभ्रांशुमाने दूरेजिहायने ।
कोम्पानिना मुन्सिपदे नियुक्तोऽसौ शुभे दिने ॥
सोऽभवत् कारणं तषां बङ्गराज्यस्य शासने ।
ततः किलकिलापुर्य्यां वाणिज्यकार्य्यसाधने ॥
स्थितान् दूरेजनिचयान् नवाबो वलमाश्रितः ।
सेराजद्दौलाभिधानो दूरीकृत्य गतस्ततः ॥
अथ तत्परवर्षे तु कर्णेल् क्लाइव् महावलः ।
आगत्य नवकृष्णेन मुन्सिना सहितः किल ॥
योद्धुं ययौ नवाबेन सार्द्धं खवलसंवृतः ।
गत्वा पलाशियामे स युद्धं कृत्वाजयत् ततः ॥
धरणीरसवाजीन्दुमित दूरेजिवत्सरे ।
काममालीखाननामा नवाबोऽभूत्ततः पुरे ॥
स एवंरेजपत्नीयान् प्रधानराजपूरुषान् ।
निहत्य साधयामास निखिलान् स्वमनोरथान् ॥
मेजर् आदम् ततः शीघ्रं सार्द्धं तेनैव मुन्सिना ।
गत्वा तूदयनालायां रणं कृत्वा दुरात्मना ॥
विजित्य वलवन्तं तं नवावं सेनया सह ।
निष्कण्टकमिदं राज्यं कृतवान् स भयापहः ॥
बाणर्तुसिन्धुशुभ्रभ्मितदूरेजिवत्सरे ।
भूत्वा गवर्णरो लार्ड क्लाइव् किलकिलापुरे ॥
समेत्य मुन्सिना सार्द्धं परामृश्य च विस्तरं ।
जाफरालीखानमंज्ञं नवावं मतिमत्तरं ॥
वङ्गदेशस्य च सुवादारं कृत्वा ततः परं ।
मेजफ्फरजङ्गनामानमतिबुद्धिमतां वरं ॥
तं नायेवसुवादारं चकार गुणसागरं ।
पञ्चविंशतिलक्षन्तु मुद्राणां कृतवान् स्थिरं ॥
तयोर्व्ययार्थं प्रत्यब्दं ततः क्लाइव् गुणाकरः ।
तेनैव मुन्सिना सार्द्धं दिल्लीं गत्वा च सत्वरः ॥
शाहालभ्वादशाहेन नवाबेन च धीमता ।
सूजाद्दौला नामकेन स सन्धिमकरोत् सदा ॥
अङ्काब्धिचन्द्रभ्माने हिजरिसंवत्सरे ततः ।
शौषालस्य द्वितीयाह्ने नवकृष्णाय तोषतः ॥
श्रीशाहालम्वादशाहो फरमानाख्यं लिपिं मुदा ।
दत्तवान् यत्र लिखितं दिल्लीशेन सुसम्पदा ॥
सहस्रपञ्चकञ्चैव मन्सवानां हि सादिनां ।
सहस्रचितयं वीर्य्ययुतानां शीघ्रगामिनां ॥
उत्तमं शिविकायानं झल्लरेण सुशोभितं ।
नकाराख्यं वाद्ययन्त्रं ध्वजं तोगैतिनामितं ॥
राजवाहादुरोपाधिं मानवृद्धियशस्करं ।
कृपया दत्तवानस्मै बङ्गमानपुरःसरं ॥
सूजाद्दौला नवावस्य समीपात् राजयोग्यकं ।
खेलातनामकं प्राप्तो वसनं भूषणादिकं ॥
तस्मिन् वर्षे स भूपालो नवकृष्णोऽतिधीमते ।
नवदीपाधिपश्रीलकृष्णचन्द्राय भूभृते ॥
महाराजेन्द्रवाहादुरोपाधिं मानवृद्धितः ।
दापयामास शाहालम् वादशाहसमीपतः ॥
ततः स सहितो लार्ड क्लाइवेन महात्मना ।
काशीधाम समागम्य बभूवासौ महामनाः ॥
महाराजोपाधिकश्रीवलवन्ताङ्गयेन च ।
सिंहेन हि सुवे वाराणस्याः सुनियमं स च ॥
कृत्वा विश्वेश्वरस्याग्रे नाट्यमन्दिरमध्यतः ।
नवकृष्णेश्वरं लिङ्गं स्थापयामास भक्तितः ॥
ततः पाट्नानामदेशे महाराजेन तत्र च ।
श्येतावरायेण सह सुवे वेहारकस्य च ॥
कृत्वा सुनियमं तत्र तेनैव सहितो हि सः ।
कलिकाताख्यनगरे समायातो गतालसः ॥
ततस्तुष्टमनाः क्लाइव् कोम्पानेर्दत्तवान् पदं ।
देवानीसंज्ञकं तस्मै राज्ञे बङ्गलमानदं ॥
रसर्तुसिन्धुभ्माने दूरेजिहायने पुनः ।
शाहालम्वादशाहस्य प्राग्वृत्तस्य महात्मनः ॥
समीपतः फरमानाख्यलिपिमानीय यत्नतः ।
तस्मै राज्ञे ददौ प्रीत्या प्रीतये तस्य धीमतः ॥
यत्रास्तीदं विलिखितं दिल्लीशेन सता स्वयं ।
मन्सबानां षट्सहस्रं सहस्राणां चतुष्टयं ॥
सादिनाञ्च महाराजोपाधिमस्मै प्रदत्तवान् ।
एवं सुवर्णघटितं पदकञ्च ददौ महान् ॥
यत्र मुद्रितपारस्यभाषयास्तीति वर्णितं ।
दूरेजकोम्पानिकर्म्मोत्तमरूपेण साधितं ॥
पश्यतो वादशाहस्य समीपात् सननामके ।
सप्ताशीत्यधिके चैव रुद्रसङ्ख्यशतेऽब्दके ॥

राजोपाधिस्तथा वाहादुरोपाधेस्तथैव च ।
भूपालनवकृष्णाभिधानवाहादुराय च ॥
दातुं दयाभवत् लार्ड क्लाइवस्य महामतेः ।
तगमया सहितं चिह्नं कोम्पानेस्तन्महीभृते ॥
दत्तं तथा दशविधं खेलातं वस्त्ररूपकं ।
किरीटं कुण्डलं रत्नभूषां हारञ्च मौक्तिकं ॥
फलकं करवालञ्च दण्डं चामरमुत्तमं ।
मयूरपुच्छव्यजनं घटीयन्त्रं मनोरमं ॥
हस्त्यश्वं भद्रैर्युक्तं शिविकायानमेव च ।
लार्ड क्लाइव् ददौ राज्ञे सदा हितकराय च ॥
एवं सिपाइसंज्ञानां नृणां तद्वारपालने ।
आज्ञां दत्त्वा तस्य हस्तं गृहीत्वा तु वरासने ॥
हस्तिपृष्ठे समारोह्य पुरं प्रेरितवांस्ततः ।
हस्त्यश्वपत्तिनिकरैर्बन्दीनैश्च संवृतः ॥
स च राजा रौप्यमुद्रां क्षिपन् मार्गेति हर्षतः ।
विवेश स्वं पुरं रम्यं सर्व्वलोकैः प्रशंसितः ॥
समुद्ररसवाजीन्दुमाने दूरेजिहायने ।
स लार्ड क्लाइवो सेस्तर् वार्लेष्टाय महात्मने ॥
राज्यभारं समर्प्याथ स्वस्थाने प्रस्थितोऽभवत् ।
चकार च महाराजो देवानीकर्म्म पूर्व्ववत् ॥
तस्मिन्नस्मिन् समये माता स्मृत्वा विष्णोः पदं गता ।
अनेकलक्षमुद्राभिस्तेनाद्या तत्क्रिया कृता ॥
ततः कोम्पानिसंक्रान्तं कर्म्म त्यक्त्वा स भूपतिः ।
पारमार्थिकचिन्तायां नियुक्तोऽभून्महामतिः ॥
अथ कोम्पानिना गिर्जानिर्म्माणार्थं प्रयाचितः ।
मूल्यं विनार्थितां भूमिं दत्तवानतिमोदतः ॥
वसुसिन्धुमुनिक्षौणीमाने दूरेजिहायने ।
सुतानुज्यादिकं ग्रामं प्राप्तवानिह पत्तने ॥
तेनैव तस्य राज्ञस्तु धनिविज्ञानिमानिनः ।
प्रजा भूता हि बङ्गला एतन्नगरवासिनः ॥
समुद्रवसुभूमीन्दुमाने वङ्गाख्यकाब्दके ।
हेष्टिंस् गवर्णरस्याक्लावर्द्धमानाभिधानके ॥
देशे तस्य महाराजं राजाश्रोलीतिनामके ।
कार्य्यं नियोजयामास स गत्वा तत्र देशके ॥
राज्यस्य शासनस्यैवं राज्ञो राज्ञ्यास्तथैव च ।
समग्रविषयस्यैव सुन्दरं नियमं स च ॥
कृत्वा राजकरान् सर्व्वानादाय बङ्गलक्ष्मृतः ।
खालिसानामके स्थानेऽर्पितवान् सुसमाहितः ॥
एवं रसवसुक्षौणीन्दुमे वङ्गाख्यवर्षतः ।
महाराजाधिराजो यस्तेजश्चन्द्रेतिसंज्ञितः ॥
चतुःसप्ततिसाहस्राधिकाष्टलक्षमुद्रिकाः ।
तथा सप्तशतं मुद्राः सप्तविंशतिकाधिकाः ॥
ऋणं कृत्वा महाभागो महाराजसकाशतः ।
राज्ञः करं राजकोषे प्रेषयामास यत्नतः ॥
ततो गवर्णरस्यैव क्लनुमत्यनुसारतः ।
खालिसासंज्ञकात् स्थानात् महाराजोऽतिबाधितः ॥
क्रमशः क्रमशश्चैव मुद्रास्ताः प्रतिवर्षतः ।
आदानमकरोत् राजाधिराजस्तोपकारतः ॥
रामर्षिशशिभूमाने वङ्गसंवत्सरे स च ।
श्रीमद्राधावल्लभस्य सेवनार्थं चिराय च ॥
दत्तवान् वल्लभपुरं कृत्वा देवोत्तरं मुदा ।
श्रीमन्नन्ददुलालस्य सेवार्थमपि सर्व्वदा ॥
आनरपुरेतिख्यातायां परगणायां प्रयत्नतः ।
चारग्रामं तथा देवोत्तरं कृत्वा ददौ ततः ॥
तथाग्रद्वीपतः श्रीमद्गोपीनाथं मनोहरं ।
विग्रहं वल्लभपुरात् श्रीराधावल्लभं परं ॥
एवञ्च खड्दहग्रामात् श्रीश्यामसुन्दराङ्कयं ।
श्रीमन्नन्ददुलालाख्यं शाँदवनाग्रामतः स्वयं ॥
स्वकं पुरं समानीय स राजा बङ्गयत्नतः ।
विधिबोधितरूपेण चिरं संसेव्य संयतः ॥
नानाविधानलङ्कारान् मुक्तावज्रविभूषितान् ।
तापनीयान् मणिमयान् दत्त्वा प्रेरितवांस्च तान् ॥
पिपीतकाख्यद्वादश्यां समाहूयाथ पण्डितान् ।
दानमानैः पुरस्कृत्य दिग्विदिक्षु समाश्रितान् ॥
श्रीमद्गोपीनाथसंज्ञं श्रीगोविन्दं तथा परं ।
विग्रहं संप्रतिष्ठाप्याकरोदाराधनं वरं ॥
वेहालाग्राममारभ्य कुलपीं यावदुत्तमं ।
स स्वव्ययेन पन्थानं कृतवान् सर्व्वतः समं ॥
तथा स्वकीयपुरतः पुरोऽतिशयविस्तृतं ।
चकार राजपन्थानं मञ्जुलं सुपरिष्कृतं ॥
नेत्राम्बराब्धिभूमाने शकसंज्ञकहायने ।
कुलाचार्य्यान् बुधगणांश्चानीय स्वनिकेतने ॥
स च द्वाविंशपर्य्यायिमुख्यानां बङ्गयत्नतः ।
कुलीनानामेकयायीमकरोद्बुरिदानतः ॥
श्राद्धायाम्बरपक्षेन्दुमानेऽसौ वङ्गवत्सरे ।
विहाय देहमगमत्यादाम्भोजयुगं हरेः ॥ २२ ॥

रामसुन्दरदेवस्य रायख्यातियुतस्य च ।
अशेषगुणसम्पन्नाः पुत्रा जाता हि पञ्च च ॥
कृष्णमोहनदेवस्तु तेषां ज्येष्ठः प्रकीर्त्तितः ।
व्रजमोहनदेवो यः स धीमान् मध्यमः स्मृतः ॥
गोपीमोहनदेवश्च तृतीयो भुवि विश्रुतः ।
भूपतेर्नवकृष्णस्य स एव दत्तकः सुतः ॥

चतुर्थो निरपत्योऽभूद्देवो गोलोकमोहनः ।
कनिष्ठो वैष्णवोऽपुत्रो देवो भुवनमोहनः ॥ * ॥
माणिक्यचन्द्रराय्स्य द्वौ सुतौ च तयोः पुनः ।
ज्येष्ठो राधाकृष्णदेवो निरपत्यो महागुणः ॥
गोपीकृष्णाख्यदेवस्तु कनिष्ठो देवतार्चकः ।
शुद्धाचारः कृती दान्तो बुद्धिमान् वंशकारकः ॥ २३ ॥
पुत्त्राबुभौ महाराजनवकृष्णस्य चाग्रिमः ।
गोपीमोहनदेवस्तु तयोर्यः स च दत्तिमः ॥
कौन्सेलाधत्तजान् दृष्टे विल्साभिधानकस्य च ।
एवमादिमजेन्रेल् जान् कार्णकस्य तथैव च ॥ .
गवर्णरमेकफार्ग्गनस्य देवानीसंज्ञकं पदं ।
स प्राप्य तत्र कर्त्तव्यं कृतवानतिमानदं ॥
तथात्र मत्स्यविपणेर्व्वर्त्मार्थं बहुमूल्यकं ।
कोम्पानये ददौ स्थानं सर्व्वेषां हितकारकं ॥
अङ्केन्दुपक्षभूमाने वङ्गसंज्ञकहायने ।
पौत्त्रोदाहार्थमाहूय स तु यत्नात् शुभे दिने ॥
कुलाचार्य्यान् कुलीनांश्च गृहीत्वा तत्सुसम्मतिं ।
कनिष्ठषड्भ्रातृजयोः कुलयोश्चिरसंस्थितिं ॥
कृतवानथ मात्रा स तुलापुरुषदानकं ।
कारयामास यत्नेन यथोक्तविधिपूर्व्वकं ॥
ततश्च मातृकृत्ये स सुवर्णदानसागरं ।
कृत्वा ददौ द्विजाग्र्येभ्यस्तानाहूय च सादरं ॥
रामाग्निनागभूमाने ईरेजाब्दे स मानदं ।
गवर्णरस्य कारुण्यात् प्राप्तवानुत्तमं पदं ॥
राजबाहादुरोपाधिं सुवर्णाम्बरसंज्ञकं ।
अनेकरत्नघटितं शिरोभूषणयुग्मकं ॥
तथा सन्मौक्तिकं हारं फलकं करवालकं ।
शस्त्रिषट्सङ्ख्यपत्तीनां शिविकाग्र्यगमार्थकं ॥
आज्ञाञ्च प्राप्तवान् सोऽपि बहुसम्मानपूर्व्वकं ।
चिरमाध्यादिरहितः कृत्वा राज्यमकण्टकं ॥
वह्निवेदाब्धिशशभृन्माने वङ्गाख्यहायने ।
सौरचैत्रे शुक्लपक्षस्यैकादश्यां तिथौ दिने ॥
अर्द्धं नारायणस्येवेऽन्यार्द्धं कारणजीवने ।
देहस्याधायात्मजनैर्गीयमाने जनार्दने ॥
भावयन्निष्टदेवस्य रूपं हृदयसंस्थितं ।
ज्ञानतः स महीपालः संप्राप्तोऽथ मृतोऽमृतं ॥ * ॥
कनिष्ठो राजकृष्णाख्य औरस्यो गुणिमानकृत् ।
राजाग्रगण्यो मान्यस्य वदान्यो गानशास्त्रवित् ॥
स च त्रयोविंशमंख्यपर्य्यायाणां महात्मनां ।
कुलीनानामेकयायीं कृतवान् गुणशालिनां ॥
तथा कुलप्रदीपाख्यं कुलशास्त्रं प्रयत्नतः ।
कुलीनानन्दजनकं चकार कीर्त्तिखानतः ॥
यथा चैतन्यदेवेन कृतं नगरकीर्त्तनं ।
तथा राज्ञा कृतञ्चेति जनाः कुर्व्वन्ति कीर्त्तनं ॥
रामाग्निवसुशुभांशुमाने ईरेजिवत्सरे ।
गङ्गातीरे ज्ञानपूर्वं मृतोऽगात् हरिमन्दिरे ॥ २३ ॥
कृष्णमोहनदेवस्य तनयौ द्वौ सुशीलकौ ।
राजनारायणाख्यानश्रीनारायणदेवकौ ॥ * ॥
व्रजमोहनदेवस्याप्युभौ पुत्त्रौ तयोः परः ।
धार्म्मिको रामरत्नाख्यो हरनारायणोऽवरः ॥ * ॥
गोपीकृष्णस्य देवस्य पुत्त्राश्चत्वार एव च ।
तेषां ज्येष्ठस्तु गोपालकृष्णोऽतिसात्त्विकः स च ॥
श्रीलगोकुलकृष्णस्तु मध्यमो गुणसागरः ।
वाङ्गालवेङ्के नायेवदेवानीकर्म्मतत्परः ॥
गोपेन्द्रकृष्णगोपेशकृष्णौ सन्तानवर्ज्जितौ ।
तृतीयकतुरीयौ च बाल्ये देहान्तरं गतौ ॥ २४ ॥
वाणाम्बरर्षिभूमानसमायां शकभूपतेः ।
गोपीमोहनदेवस्य गोष्ठीपतिमहीपतेः ॥
श्रीराधाकान्तदेवेति नाम्नः पुत्त्रोऽभजायत ।
वङ्गविद्यां तथा हिन्दीं पारसीमारवीं ततः ॥
ईरेजीं संस्कृतञ्चैवाधीतवान् सोऽतियत्नतः ।
तथा चतुर्धुरीणस्य गोपीकान्तस्य धीमतः ॥
सर्व्वायमान्यस्य गोष्ठीपतेर्मौलिकराजतः ।
सिंहेत्युपाधियुक्तस्य प्रपौत्त्रीं स उपायत ॥
गोष्ठीपतिरभूत्तेन कुलाचार्य्यादिसम्मतः ।
वङ्गेलण्डफ्रान्सजर्म्मान्डेन्मार्काद्रिप्रदेशतः ॥
रुषियामेरिकासंज्ञदेशानाञ्चैव मध्यतः ।
विद्यादिविषयाणान्तु सभानां सभ्यतामितः ॥
एवं धर्म्मसभायाञ्च तथान्यासां सभापतिः ।
बभूव बहुसम्मानपूर्व्वकं स महामतिः ॥
स वाणाग्नीभशशभृन्मिते ईरेजिवत्सरे ।
प्राप्तः किलकिलानामनगरेऽस्मिन् मनोहरे ॥
गवर्णरस्यैवेच्छातो माजिष्ट्रेटीयकं पदं ।
यदैवैकान्तमान्यानां गुणिनामपि मानदं ॥
सुन्यग्निनागभूमाने ईरेजाब्दे तु पैटकं ।
राजोपाधिञ्च कौन्सेलात् वसनं भूषणादिकं ॥
मानवर्द्धनपत्रेण सहितं बहुमूल्यकं ।
तथा गवर्णरस्यैव सभायामादिपीठकं ॥
प्राप्तवानतिदुष्प्राप्य यत्नोके मानदायकं ।
अङ्कवेदाब्धिभूमाने वङ्गाब्दे विधिपूर्व्वकं ॥
गयातीर्थप्रयाणार्थं प्रस्थितः पथिमध्यतः ।
मुरशिदाबादनगरे श्रीनवाबसभाङ्गतः ॥

सम्मानितः स च समादरतस्तत्समीपतः ।
राजार्हं हेमवसनं सप्तकं सप्तरूपतः ॥
हेमाख्यपक्षिपुच्छेन युक्तं युग्मं किरीटकं ।
कुण्डलं मौक्तिकं हारं फलकं करवालकं ॥
यत् सदा भूपतीनां हि भूरिसम्भ्रमवर्द्धकं ।
प्राप्तवांस्तत्तु दुष्प्राप्यं बङ्गसम्मानपूर्ब्बकं ॥
अथेन्दुरसपक्षाब्जमाने वङ्गाब्दहायने ।
पौत्राद्वाहोपलक्षेण सभां कृत्वा शुभे दिने ॥
समाहूय कुलाचार्य्यान् कुलीनान् पण्डितान् स च ।
कायस्थानां चतुर्विंशपर्य्यायाणां तथैव च ॥
सुमुख्यानां कुलीनानां कनिष्ठानाञ्च सर्व्वशः ।
एवं षड्भ्राट्जातानामेकयायी चकार सः ॥
तत्पत्रिकां कारिकायाः पुस्तकञ्चापि मुद्रितं ।
कुलीनघटकादिभ्यः कृत्वा तत् समर्पितं ॥
पाटशालाध्यापनाय ग्रन्थनिर्म्म एहतुतः ।
स्कुलबुक् सोसाइटीनाम या सभास्मिन् प्रदेशतः ॥
स तदर्थं नीतिकथा बालाशिक्षादिपुस्तकं ।
कृतवान् हेक्मते आशुजार् वृत्तायुर्व्वेदवाचकं ॥
पुस्तं पारस्यभाषात इरेजीभाषया पुनः ।
अनुवाद्य ग्रेटवृटनदेशे राज्ञो महात्मनः ॥
स च राइयल् एसियाटिक् समाजे प्रेरयत्ततः ।
तत्र मुद्राङ्कितं कृत्वा तत्शतं परिमाणतः ॥
अनुवादकसाचिध्ये तस्यैव दर्शनार्थतः ।
कृपया प्रेषयामासुस्तत्सदःस्थाः प्रयत्नतः ॥
तथाऽऽ वय्ययायामकालसम्पादनीयकं ।
ब्रह्मकल्पद्रुमाख्याभिधानञ्च सप्तकाण्डकं ॥
परोपकृतये कृत्वा गुणिभ्योऽभवदर्पिता ।
यत्प्राप्यालोक्य मन्तुष्टाः सर्व्वदेशीयपण्डिताः ॥
प्रत्येके प्रेरयामासुः सुख्यातिपत्रिकादिकं ।
विज्ञेषतो दिनेमारराज्येगोहेमहारकं ॥
स्वीयास्यचिह्नसंयुक्तपदकोत्तमधारकं ।
प्रीत्या संप्रेषयामास राज्ञोऽर्थे मानदायकं ॥
पुनस्तदभिधानस्य परिग्रिष्टमतिश्रमात् ।
निर्म्माय मुद्रितं तेन प्रदानार्थं बङ्गव्ययात् ॥ २४ ॥

अत्रैव कथयामीमं इतिहासं पुरातनं ।
सङ्क्षेपेण च तद्राज्ञो लोकविस्मयकारणं ॥
नागवेदाष्टभूमाने इरेजाब्दे हि वैरिणा ।
टाकीग्रामनिवासेन केनचित् ख्यातमुन्मिना ॥
दुष्टेनाभीष्टसिद्ध्यर्थं दण्डपारुष्यसंज्ञके ।
विवादस्य पदे मान्यजनानां मानभञ्जके ॥
कारितो मिथ्याभियोगस्तस्य निर्द्दोषभूभृतः ।
ऊलीग्रामस्य मेजिष्ट्रेट् नामकेनाविचारतः ॥
पोलिसमुपरिष्टेनडेष्टसंज्ञकस्य समीपतः ।
क्रुधा तन्मिथ्यापवादः पत्रेण प्रकटीकृतः ॥
तेन सेक्रेटरिद्वारा गवर्णराय वेदितः ।
सोऽपि तैर्ब्बहुधा चेष्टां कृतवान् तद्दमार्थतः ॥
किन्तु सेशन्जजाख्यस्य प्राड्विवाकस्य धीमतः ।
अतिसूक्ष्मविचारेण राजा निर्द्दोषतां गतः ॥
तस्माद्विपक्षपक्षाणां क्रूराणाञ्च विशेषतः ।
तेषामुद्यमभङ्गेन लज्जाधिक्यमजायत ॥
तेन सर् हरवर्ट मेडाक् डेपिउटी गवर्णरः ।
स्नेहेनाक्लिन्नहृदयः सदयश्चातिसत्वरः ॥
आह्वानार्थं तस्य राज्ञः प्रेषयामास पत्रकं ।
स चानीय स्वभवने तस्य सम्मानपूर्ब्बकं ॥
सान्त्वयित्वा जयात्तस्मै धन्यवादं प्रदत्तवान् ।
एवं गवर्णरो जेनरेल् लार्डडेल्हौसिरात्मवान् ॥
स्वदेशयानसमये सभामध्येऽतिहर्षितः ।
तद्राज्ञो दक्षिणं हस्तं गृहीत्वातिप्रयत्नतः ॥
लार्डेन च तथा लेडी केनिङ्गेन सहोत्सुकः ।
साक्षात् तं कारयामास मानिनां मानवर्द्धकः ॥
पूर्ब्बोक्तमिथ्याभियोगे दण्डार्हकरणाय च ।
उद्योगजन्यदोषस्याप्यकरोत् क्षालनं स च ॥
स तु मुन्सी पुनरपि दण्डपारुष्यवादतः ।
फरासडाङ्गानगरे पलायित्वा मृतस्ततः ॥

राजकृष्णस्य नृपतेर्जाता वसुमिताः सुताः ।
शिवकृष्णो नृपो ज्येष्ठो यस्यास्ति शिवतुल्यता ॥
रूपवान् गुणवांश्चापि कालीकृष्णस्तु मध्यमः ।
दयालुर्बुद्धिमान् मान्यो धार्म्मिको मानवोत्तमः ॥
इरेजीभाषया सोऽपि महानाटवनामकं ।
तथा रमलमेत्याख्यमिरेजानाञ्च पुस्तकं ॥
बङ्गीयभाषया चैवानुवादमकरोत्ततः ।
राजवाहादुरोपाधिं प्राप्तो गवरन्मेण्टतः ॥
देवीकृष्णोऽतिसरलो देवभक्तस्तृतीयकः ।
अपूर्ब्वगुणसंयुक्तोऽपूर्ब्बकृष्णस्तुरीयकः ॥
देवान् कुङर् नामधेयं ग्रन्थं स चोर्दुभाषया ।
निर्म्माणं कृतवान् सोऽपि निजायासव्ययेच्छया ॥
ततो माधवकृष्णस्तु सुशीलः पुचवर्ब्बतः ।
पञ्चमो देवताभक्तः सोऽल्पे वयसि संस्थितः ॥
कृतवान् स च वेतालपञ्चविंशतिनामकं ।
ग्रन्थं पारस्यभाषातोऽनुवादं यत्नपूर्वकं ॥
षष्ठः कमलकृष्णस्तु दैवे पैत्र्ये सदा रतः ।
कार्य्ये बङ्गगुणोपेतस्तथा पण्डितमण्डितः ॥

एवं गङ्गासागरयोः सङ्गमे तेन निर्म्मितं ।
श्रीमत्कपिलदेवस्य मन्दिरं सुपरिष्कृतं ॥
तुलापुरुषदानञ्च श्रीमद्भागवतस्य च ।
पारायणं वागवाजारस्थ घट्टे तथैव च ॥
शिवस्य स्थापनं माचा कारयामास सोत्सुकः ।
बहुवित्तव्ययेनैव कुलकीर्त्तिविवर्द्धकः ॥
नरेन्द्रकृष्णेतिसंज्ञो यः सुतः स तु सप्तमः ।
रूपवान् गुणवांश्चैव नरेन्द्रेण पुनः समः ॥
स च डेपिउटीमेजिष्ट्रेट् बभूव सदाशयः ।
यो हि यादवकृष्णस्तु कनिष्ठोऽतिदयामयः ॥
तेन देवान् मोशफकाख्यं पुस्तकञ्चोर्दुभाषया ।
निर्म्माय मुद्रितं तच्च कृत्वा दत्तं निजेच्छया ॥
गयाधामस्थतः सोऽपि पुत्रहीनोऽस्तं गतः ।
चन्द्रेषुपक्षभूमाने वङ्गसंज्ञकवर्षतः ॥
राजराधाकान्तदेवसाहाय्येन मुदान्वितैः ।
स्वपर्य्यायकुलीनानामेकयायौ कृता च तैः ॥२४॥

श्रीराधाकान्तदेवस्य राजवाहादुरस्य च ।
चयः सुताः सिङ्गगोष्ठीपतयः स्वकुलेषु च ॥
यतो गोष्ठीपतेः पुत्रा दौहित्राश्च विश्रेयतः ।
तेषां ज्येष्ठः श्रीमहेन्द्रनारायण इतीरितः ॥
देवब्राह्मणभक्तः स बुद्धिमांश्च गुणान्वितः ।
मध्यमः श्रीलराजेन्द्रनारायण इति श्रुतः ॥
धार्म्मिकः सत्यवादी स कर्म्मदक्षश्च सत्तमः ।
यस्तु श्रीदेवेन्द्रनारायणो देवः स चान्तिमः ॥
व्यवहारज्ञानयुतः प्रतापादिसमन्वितः ।
मन्त्रणादाननिपुणो धीमान् धीमद्भिरादृतः ॥
एते भारतवर्षीयगवर्णरसमाजतः ।
तत्र यानस्याधिकारं कुमारोपाधिकं ततः ॥
पञ्चप्रकारं वसनं भूषणञ्च मनोरमं ।
चयः सहोदराः सर्व्वे प्रत्येके लेभिरे समं ॥२५॥

जाताः पुत्राश्चयः श्रीमच्छिवकृष्णस्य भूभृतः ।
तेषां श्रीयुतभूपेन्द्रकृष्णो ज्येष्ठः प्रकीर्त्तितः ॥
चत्वारस्तनयाः श्रीलकालीकृष्णस्य भूपतेः ।
तेषां ज्येष्ठः श्रीहरेन्द्रकृष्ण इत्यभिधीयते ॥
बभूव यो डेपिउटीमेजिष्ट्रेटिपदे स्थितः ।
श्रीदेवीकृष्णदेवस्य तनयौ द्वौ च धीमतः ॥
श्रीमदानन्दकृष्णो यस्तयोर्ज्येष्ठः स च स्मृतः ।
श्रीयुतापूर्ब्बकृष्णस्य चत्वारस्तनयास्ततः ॥
श्रेष्ठो ज्येष्ठः श्रीकुमारकृष्णेतिख्यातिसंयुतः ।
श्रीमन्नरेन्द्रकृष्णो यः सम्भूतास्तस्य देहतः ॥
चयः पुत्रास्तेषु मध्ये ज्येष्ठपुत्रोऽभवत् पुनः ।
श्रीमद्व्रजेन्द्रकृष्णेति नाम्ना ख्यातः सुलक्षणः ॥२६॥

राजनारायणस्यैव देवोपाधियुतस्य च ।
पुत्रोऽभवज्जगत्कृष्णनामेदानीं मृतः स च ॥
श्रीनारायणदेवस्य चयः पुत्रा गुणैर्युताः ।
तेषां ज्येष्ठः श्रीप्रसन्ननारायण इति श्रुतः ॥
गवरन्मेण्टस्य तोशाखानायां प्रथमं स हि ।
अध्यक्षोऽभूत्तच्च कर्म्मनिर्व्वाहकरणेन हि ॥
तस्मै गवर्णरो लार्डहार्डिञ्जः कृपयान्वितः ।
रायबाहादुरोपाधिं दत्तवानतितोषतः ॥
ततो मुरशिदाबादे नवाबस्य समीपतः ।
नेजामतस्य देवानीं प्राप्तवान् बहुभाग्यतः ॥
तत्रापि च नवाबस्य सन्निधौ लब्धवानयं ।
राजबाहादुरोपाधिमेकान्तमानतः स्वयं ॥२५॥

गोपालकृष्णदेवस्य पुत्राश्चत्वार एव तु ।
श्रीलश्रीकृष्णदेवो यः सर्व्वेषामग्रजः स तु ॥
श्रीमद्गोकुलकृष्णस्य तनयौ द्वौ महात्मनः ।
श्रीमन्नृपेन्द्रकृष्णस्तु ज्येष्ठोऽतिनन्दिवर्द्धनः ॥२५॥

श्रीमन्महेन्द्रादिनारायणदेवस्य धीमतः ।
नाद्यापि तनयो जातो गृहदैवगुणदोषतः ॥
तथा श्रीयुतराजेन्द्रनारायणस्य कायतः ।
श्रीमद्गिरीन्द्रादिनारायणः पुत्रो व्यजायत ॥
एवं श्रीयुतदेवेन्द्रनारायणशरीरतः ।
संजातश्च श्रीव्रजेन्द्रनारायणेतिसंज्ञितः ॥२६॥

श्रीमद्भूपेन्द्रकृष्णस्य पुत्रो जातोऽतिसुन्दरः ।
श्रीजितेन्द्रियकृष्णेतिख्यातियुक्तः प्रियङ्करः ॥
श्रीमद्धरेन्द्रकृष्णस्य तनयश्चातिशोभनः ।
श्रीमद्धरेन्द्रकृष्णोऽयजातः सरसिजानन ॥२६॥

जगत्कृष्णस्यात्मजस्तु ज्येष्ठोऽभूदतिशीलवान् ।
श्रीमत्तारणकृष्णेतिनाम्ना ख्यातोऽतिबुद्धिमान् ॥
श्रीलप्रसन्नादिनारायणस्य सुत उत्तमः ।
श्रीमद्भूपेन्द्रादिनारायणः प्रथमधरोपमः ॥२६॥

इत्येकादिकषड्विंशपुरुषान्तातिनिर्म्मला ।
देववंशावली या सा समाप्ता मौलिकातुला ॥

वर्णमाला।

नागरी।	English.	বাঙ্গালা।	ওড়িয়া।
अ ...	a ...	অ ...	ଅ
आ (ा) ...	á ...	আ (া) ...	ଆ (ା)
इ (ि) ...	i ...	ই (ি) ...	ଇ (ି)
ई (ी) ...	í ...	ঈ (ী) ...	ଈ (ୀ)
उ (ु) ...	u ...	উ (ু) ...	ଉ (ୁ)
ऊ (ू) ...	ú ...	ঊ (ূ) ...	ଊ (ୂ)
ऋ (ृ) ...	ṛi ...	ঋ (ৃ) ...	ଋ (ୃ)
ॠ (ॄ) ...	ṛí ...	ৠ (ৄ) ...	ୠ (ୄ)
ऌ (ॢ) ...	lṛi ...	ঌ (ঌ) ...	ଌ (ଌ)
ॡ (ॣ) ...	lṛí ...	ৡ (ৡ) ...	ୡ (ୣ)
ए (े) ...	e ...	এ (ে) ...	ଏ (େ)
ऐ (ै) ...	ai ...	ঐ (ৈ) ...	ଐ (ୈ)
ओ (ो) ...	o ...	ও (ো) ...	ଓ (ୋ)
औ (ौ) ...	au ..	ঔ (ৌ) ...	ଔ (ୌ)
ं ...	ṇ or ṃ ...	ং ...	ଂ
ः ...	ḥ ...	ঃ ...	ଃ
क ...	k ...	ক ...	କ
ख ...	kh ...	খ ...	ଖ
ग ...	g ...	গ ...	ଗ
घ ...	gh ...	ঘ ...	ଘ
ङ ...	ṅ ...	ঙ ...	ଙ
च ...	c' ...	চ ...	ଚ
छ ...	c'h ...	ছ ...	ଛ
ज ...	j ...	জ ...	ଜ
झ ...	jh ...	ঝ ...	ଝ

नागरी।	English.	বাঙ্গালা।	ওড়িয়া।
ञ ...	ṅ ..	ঞ ...	ଞ
ट ...	ṭ ..	ট ...	ଟ
ठ ...	ṭh ..	ঠ ...	ଠ
ड ...	ḍ ..	ড ...	ଡ
ढ ...	ḍh ..	ঢ ...	ଢ
ण ...	ṇ ..	ণ ...	ଣ
त ...	t ..	ত ...	ତ
थ ...	th ..	থ ...	ଥ
द ...	d ..	দ ...	ଦ
ध ...	dh ..	ধ ...	ଧ
न ...	n ..	ন ...	ନ
प ...	p ..	প ...	ପ
फ ...	ph ..	ফ ...	ଫ
ब ...	b ..	ব ...	ବ
भ ...	bh ..	ভ ...	ଭ
म ...	m ..	ম ...	ମ
य ...	y ..	য ...	ଯ
र ...	r ..	র ...	ର
ल ...	l ..	ল ...	ଲ
व ...	v ..	ৱ ...	ୱ
श ...	ś ..	শ ...	ଶ
ष ...	sh ..	ষ ...	ଷ
स ...	s ..	স ...	ସ
ह ...	h ..	হ ...	ହ
क्ष ...	ksh ..	ক্ষ ...	କ୍ଷ



शब्दकल्पद्रुमः।

अ,

अ, अकारः। आद्यस्वरवर्णः। अस्योच्चारणस्थानं कण्ठः। स तु ह्रस्वो दीर्घः प्लुतश्च भवति। इति व्याकरणं॥ अस्य लेखनप्रकारो यथा,—

"दक्षतः कुण्डली भूत्वा कुक्षिता वामतो गता।
ततोर्द्धसंस्थता रेखा दक्षोर्द्धा तासु शङ्करः॥
विधिर्नारायणश्चैव सन्तिष्ठेत् क्रमतः सदा।
अर्द्धमात्रा शक्तिरूपा ध्यानमस्य च कथ्यते॥"

इति वर्णोद्धारतन्त्रं॥ अस्य तत्त्वं यथा,—

"शृणु तत्त्वमकारस्य अतिगोप्यं वरानने।
शरच्चन्द्रप्रतीकाशं पञ्चकोणमयं सदा॥
पञ्चदेवमयं वर्णं शक्तित्रयसमन्वितं।
निर्गुणं त्रिगुणोपेतं स्वयं कैवल्यमूर्त्तिमान्॥
विन्दुतत्त्वमयं वर्णं स्वयं प्रकृतिरूपिणी"।

इति कामधेनुतन्त्रं॥ अस्य पर्य्यायः।

"अः श्रीकण्ठो माढकाद्योऽनन्तो विष्णुरनुत्तरः"।

इति बीजवर्णाभिधानं॥ अन्यच्च।

"अः श्रीकण्ठः सुरेशश्च ललाटश्चैकमात्रिकः।
पूर्णोदरी रुद्रिमेधौ सारस्वतः प्रियम्बदः॥
महाब्राह्मी वासुदेवो धनेशः केशवोऽमृतं।
कीर्त्तिर्निवृत्तिर्व्योमगौरी नरकारिर्हरो मरुत्॥
ब्रह्मा वामाद्यजो ह्रस्वः करसुः प्रणवाद्यकः"।

प्रणवाद्यावयव इत्यर्थः।

"ब्रह्माणी कामरूपश्च कामेशी वासिनी वियत्॥
विश्वेशः श्रीविष्णुकण्ठौ प्रतिपत्तिधिरग्निनी।
अर्कमण्डलवर्णाद्यौ ब्राह्मणः कामकर्षिणी"॥

इति वर्णाभिधानतन्त्रं॥

अ, अ, अभावः। अल्पः। निषेधः। अनुकम्पा। इति मेदिनी। (नञोऽयमकारः षड्विधान् नञर्थान् बोधयति। यथा,—

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"॥

इति। सादृश्ये यथा—अब्राह्मणः ब्राह्मणसदृश इत्यर्थः। अभावे यथा—अभोजनं भोजनाभावः। अन्यत्वे यथा,—घटः अघटः, पटः घटभिन्न इत्यर्थः। अल्पत्वे यथा—अनुदरी कन्या अल्पोदरी इत्यर्थः। अप्राशस्त्ये यथा,—अधनं धन्यधनं, धन्यधनम् अप्रशस्तधनम् इत्यर्थः। विरोधे यथा—अधर्म्मः परापकारः, परापकारः धर्म्मविरोधी इत्यर्थः।)

अः, पुं, (अतति सर्व्वं व्याप्नोति इति अततेर्डः) विष्णुः। इति मेदिनी।

अंश

"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकार उच्यते ब्रह्मा प्रणवेन त्रयो मताः"॥

इति दुर्गादासधृतवचनं। (क्ली। ब्रह्म। यथा,—

अ इ उ ए ओ ओम् कलाश्च मूलं ब्रह्म इति कीर्त्तितम्, इति अग्निपुराणम्।)

अक्षती, [न्], त्रि, (न क्षती, नञ्समासः। अत्र अक्षशब्दो न नञ्जातः, तथात्वे अक्षती इत्येव स्यात्। अपितु स्वप्रकृतिरेव ततश्च अक्षमात्रनिपातनात् नात्र सन्धिरिति ज्ञेयम्।) अनक्षी। अक्षग्रस्तः। अधारी। यथा,—

"दिवसस्याष्टमे भागे शाकं पचति यो नरः।
अक्षती चाप्रवासी च स वारिचर मोदते"॥

इति महाभारतं।

अंश, तृ क विभाजने। अंशकरणे। इति कविकल्पद्रुमः। तालव्योपधः। विभाजन इति भाजतृ क तु एधक्कृत्यां इत्यस्य रूपं। अंशयति अंशापयति धनं वणिक्। इति दुर्गादासकृतधातुदीपिका॥

अंशः, पुं, (अंश विभाजने, अदन्तचुरादिः। कर्म्मणि घञ्।) विभाजनं। तत्पर्य्यायः। भागः २। वण्टकः ३। इत्यमरः॥ विभागः ४ भक्तिः ५। इति जटाधरः॥ अंशशब्दो दन्त्यसान्तोऽपि। अंशांस तृ क विभाजने इति कविकल्पद्रुमदृश्यनात्। स्कन्धः। इति विद्याविनोदादयः॥ (वस्त्रैकदेशः। रिक्थविभागः। चतुर्थभागः। भाव्यङ्गः। रविमूर्त्तिविशेषः। आदित्यविशेषः, यथा,—

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरेव च।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः"॥

इति महाभारतम्। कृत्तस्य यद्यधिकत्रिंशततमभागः। यदुवंशीयः नृपविशेषः, यथा,—ततः कुरुवत्सः ततश्च अनुरथः ततः पुरुहोत्रो जज्ञे ततश्च अंशु इति।)

अंशकं, क्ली, दिनं। इति त्रिकाण्डशेषः॥

अंशकः, पुं, (अवश्यमंशं हरति इति अंशं हारीति कन्।) ज्ञातिः। दायादः। इति त्रिकाण्डशेषः॥ (अल्पांशः। अल्पार्थे कन्।)

अंशभाक्, [ज्], त्रि, (अंशं भजते इति अंश+भज्+क्विः।) अंशी। (दायादः) यथा। बौधायनः।

"स्वस्रीयनिरुद्धासु त्रयो वर्णा द्विजातयः।

अंशु

प्रातरुत्थाय कर्त्तव्यं देवर्षिपितृतर्पणं"॥
निरुद्धासु न कुर्व्वीरन्नंशभाक् तत्र सेतुजत्।

इति प्रायश्चित्ततत्त्वं॥

अंशलः, त्रि, (अंशः प्रशस्तस्कन्धः अस्ति अस्य इति अंश+लच्।) अंसलः। बलवान्। इत्यमरटीकायां रमानाथः॥ (प्रशस्तस्कन्धविशिष्टः)

अंशी, [न्], त्रि, (अंशोऽस्यास्तीति अंश+इनि।) अंशयोग्यः। वण्टकविशिष्टः। भागी। यथा याज्ञवल्क्यः।

"विभागश्चेत् पिता कुर्य्यात् स्वेच्छया विभजेत् सुतान्।
ज्येष्ठं वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः"॥

इति। सति तु पितरि पार्व्वणाद्यधिकारात् पुत्राणां नांशिता। एवं धनिनः पौत्रस्वत्वोपरमे तदंशमात्रे प्रपौत्राणामंशिता। इति दायतत्त्वं॥

अंशुः, पुं, (अंशयति इति अंश विभाजने। भृञ्यादित्वात् कुः।) किरणः॥ प्रभा॥ इति मेदिनी॥ वेशः॥ इति धरणी॥ सूत्रादिसूक्ष्मांशः। इति हेमचन्द्रः॥ वेशः॥ सूर्य्यः॥ इति विश्वः॥ (ऋषिविशेषः। लतावयवः। सोमलतावयवः। भागः।)

अंशुकं, क्ली, (अंशून् कायति। कै शब्दे। आतश्चेति कः। यद्वा अंशुभिः काश्यते। काश दीप्तौ। अन्येष्वपीति डः।) वस्त्रमात्रं॥ सूक्ष्मवस्त्रं। उत्तरीयवस्त्रं॥ इति मेदिनी॥ शुभ्रवस्त्रं॥ इत्यमरटीकायां रमानाथः॥ (अधोवस्त्रं।) पत्रं। तेजपात इति भाषा। इति राजनिर्घण्टः॥

अंशुधरः, पुं, (अंशूनां धरः। धरति इति धरः॥ पचाद्यच्।) सूर्य्यः॥ इति त्रिकाण्डशेषः॥

अंशुमत्फला, स्त्री, (अंशुमन्ति सूक्ष्मावयववन्ति फलानि अस्याः। अंशुमानिव फलानि अस्याः इति वा। अजादित्वात् टाप्।) कदलीवृक्षः। इत्यमरः॥

अंशुमती स्त्री, (अंशवः सन्ति अस्याः। मतुप् ङीप् च। अंशुमत्यां फलं मूलञ्च अंशुमती। अनुदात्तादेरिञ इति अञ्। फलपाकमूलेषु इति लुपि युक्तवद्भावः।) सालपर्णीवृक्षः। इत्यमरः॥ (परदेवता।)

अंशुमान् [त्] पुं, (अंशवो विद्यन्ते अस्य इति। तदस्यास्तीति मतुप्।) सूर्य्यः॥ इति त्रिकाण्डशेषः॥ असमञ्जपुत्रः सूर्य्यवंशीयराजविशेषः॥ यथा।

"सगरस्यासमञ्जस्तु असमञ्जादथांशुमान्।
दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः"॥

इति रामायणे बालकाण्डे ७० सर्गः ॥ सूर्य्यवंशीयासमञ्जोराजपौत्रः । यथा,—
"ततश्चकारासमञ्जा गङ्गानयनकारणं ।
लक्षवर्षं तपस्तप्त्वा ममार कालयोगतः ॥
दिलीपस्तस्य तनयो गङ्गानयनकारणं ।
तपः कृत्वा लक्षवर्षं ययौ लोकान्तरं नृपः ॥
अंशुमांस्तस्य पुत्रोऽभूद्गङ्गानयनकारणं ।
तपः कृत्वा लक्षवर्षं ममार कालयोगतः ॥
भगीरथस्तस्य पुत्रो महाभागवतः सुधीः ।
तपः कृत्वा लक्षवर्षं ममार कालयोगतः" ॥
इत्यादि ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः ॥ (विश्वव्यापिप्रकाशः परमात्मा ।) अंशुयुक्ते त्रि । सोमलतायां अवयवविशिष्टः ।)

अंशुमाली, [न्] पुं, (अंशूनां माला अस्ति अस्य इति । व्रीह्यादित्वात् इनिः ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (आदित्य इवांशुमाली चचार, इति विष्णुपुराणम् ।)

अंशुलः, पुं, (अंशुः विद्याज्योतिः अस्ति अस्य । इति । अंशु + लच् ।) याज्ञवल्क्यमुनिः । इति त्रिकाण्डशेषः ॥

अंशुहस्तः, पुं, (अंशुरेव हस्तः यस्य सः ।) सूर्य्यः । इति जटाधरः ॥

अंस, त् क विभाजने । अंशकरणे । इति कविकल्पद्रुमः ॥ दन्त्योपधः । विभाजन इति भाजत् क तु पृथक्कृत्वा इत्यस्य रूपं । अंसयति अंसापयति धनं वणिक् । इति दुर्गादासः ॥

अंसः, पुं, क्ली, (अंस्यते समाहन्यते । अंस समाघाते । घञ् । यद्वा अमति अभ्यते वा भारादिना । अम गतौ । असेः सन् ।) स्कन्धः । इत्यमरः ॥ विभागे पुं । इति विश्वो हेमचन्द्रश्च ॥ (अन्यत् सर्व्वम् अंशशब्दे द्रष्टव्यम् ।)

अंसकूटः पुं, (अंसे स्कन्धे कूटइव इति ।) ककुद् । षाँड़ेर झूँट इति भाषा । इति हेमचन्द्रः ॥

अंसलः, त्रि, (अंसोऽस्यास्तीति । वत्वांसाभ्यां कामबले इति लच् ।) बलवान् । इत्यमरः ॥

अंहः, [स्] क्ली, (अमति गच्छति प्रायश्चित्तादिना । अम गत्यादिषु । असेः ऊक् च इति असुन् ऊगागमश्च । अमति गच्छति अधोऽनेन वा । अहेरसुना सिद्धे अघेरसुनि अह इति मा भूदिति असेः ऊक् चेति सूत्रं । तथा च—
"स्यान्मध्योग्रचतुर्थत्वमंहसोरंहसस्तथा" ।
इति द्विरूपकोषः । एवञ्च 'दत्ताधीः सिद्धसङ्घैर्विदधतु हृदयः शोभमङ्गोविघातम्' इति सूर्य्यशतके पाठः अनुप्रासरसिकानां प्रामादिक इति वदन्ति ।) पापं । इत्यमरः ॥ (दुःखं । विघ्नः । स्वधर्म्मत्यागः ।)

अंहतिः, स्त्री, (हन्तेरंहच इति अतिः ।) दानं । इत्यमरः । रोगः ॥ त्यागः । इति मेदिनी ॥

अंहती, स्त्री, (हन्तेरंहच इति अतिः, पक्षादित्वात् ङीष् ।) दानं । इत्यमरटीकासारसुन्दरी ॥

अंहितिः, स्त्री, (अंहन् + अति । अंहादेशः इड़ागमश्च ।) दानं । इत्यमरटीकायां रायमुकुटः ॥

अंक्रिः, पुं, (अंहि + क्रिण् । वंक्रादयश्च इति उणादिसूत्रम् ।) पादः ॥ वृक्षमूलं । इत्यमरः ॥

अंक्रिपः, पुं, (अंक्रिभिः पिबति इति । पा पाने । सुपोति योगविभागात् कः । दृक्षः । इति हलायुधः ॥

अंक्रिस्कन्धः, पुं, (अंक्रिः पादः । तस्य स्कन्ध इव ।) गुल्फः । (कुर्च्छशिरः ।) इति हेमचन्द्रः ॥

अक, म वक्रगतौ । कुटिलगमने । इति कविकल्पद्रुमः ॥ म अकयति अकति सर्पः । इति दुर्गादासः ॥

अक, इ क लक्ष्मणि । इति कविकल्पद्रुमः । लक्ष्म चिह्नयुक्तकरणं । इ क अङ्कयति वस्त्रं रजकः । नोपधपाठेऽपि ञेर्नित्यत्वाद्धस्वेऽपोऽनाविद्यस्याप्राप्तौ यगादौ अङ्कते इत्यादौ सिद्धे इदित् पाठस्वरादेर्ञेरनित्यत्वज्ञापनार्थः । तेन अङ्कतीत्यपि स्यात् । तथाच वोपदेवः ।
"सिद्धे नित्यणिजन्तत्वान्नित्यनुन्धे कितामिदित् ।
निजनित्यत्वबोधार्थं न दृष्टोऽनुबिधिःक्वचिदिति" ॥
अस्यार्थः । कितां कानुबन्धानां नित्यणिजन्तत्वान्नित्यञन्तत्वान्नित्यनुन्धे नित्यनकारवत्त्वे सिद्धे इदित् इदनुबन्धकरणं णिचो ञेरनित्यत्वबोधार्थं । किन्तु अनुबिधिर्नकाराभावः क्वचिदपि न दृष्टः । इति दुर्गादासः ॥

अक, इ ङ गत्यां । लक्ष्मणि । इति कविकल्पद्रुमः ॥ इ अङ्कते । ङ अङ्कते पुण्यतीर्थेषु दृषयुग्मान्यग्रन्थितः । इति हलायुधः ॥ इति दुर्गादासः ॥

अकं, क्ली, (न कं सुखं । तद्विरुद्धं वा । नञ्समासः । नञः न लोपः ।) पापं । दुःखं । इति मेदिनी ॥

अकचः, पुं, (नास्ति कचः केशः यस्य सः ।) केतुग्रहः । इति हारावली ॥ वाच्यलिङ्गस्तु केशशून्ये ।

अकथ्यः, त्रि, न कथ्यः । नञ्समासः ।) अकथनीयः । अवक्तव्यः ॥

अकनिष्ठः, पुं, (न कनिष्ठः नञ्समासः । वृद्धः । इति शब्दरत्नावली ॥ (बहूनि शतसहस्राणि यावदकनिष्ठानां देवानां सन्निपतितान्यभूवन् इति ललितविस्तरः ।) कनिष्ठभिन्ने वाच्यलिङ्गः ॥

अकनिष्ठगः, पुं, (अकनिष्ठ + गम् + डः ।) बुद्धः । इति त्रिकाण्डशेषः ॥

अकम्पितः, पुं, (न कम्पितः । नञ्समासः ।) बौद्धगणाधिपविशेषः । इति हेमचन्द्रः । कम्परहिते वाच्यलिङ्गः ॥ (असंदिग्धान् स्थिरान् ब्रूयादविचलानकम्पितान् । इति ऋग्वेदीयप्रातिशाख्यसूत्रम् ।)

अकरणिः, स्त्री, (न + कृञ् अनि ।) आलोच्यविशेषः । आपः । यथा तस्याकरणिरेवास्तु । इत्यमरः ॥

अकरा, स्त्री, (न + कृञ् + अच् । स्त्रियां ङीप् ।) आमलकी । इति शब्दचन्द्रिका ॥ वाच्यलिङ्गस्तु करराहिते ॥

अकरण्ड, त्रि, (नास्ति करण्डो यस्य इति ।) करण्डशून्यः । निर्दयः । अल्पः । यथा,—
"रघोर्वंशे कुत्सामकरण्ड समुत्सारयति कः" ।
इति महानाटकं ॥

अकर्कशः, त्रि, (न कर्कशः । नञ्समासः ।) कार्कश्यरहितः । कोमलः । इति हेमचन्द्रः । (अकर्कशा अपरुषा । इति ललितविस्तरः ।)

अकर्णः, त्रि, (नास्ति कर्णो यस्य सः ।) कर्णरहितः । यथा,—
"अपाणिपादो जवनो गृहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः" ।
इति श्वेताश्वतरश्रुतिः ।) बधिरः । इति हेमचन्द्रः ॥

अकर्त्तनः, पुं, (न + कृत् + ल्युट् ।) वामनः । खञ्जः । इति जटाधरः ॥

अकर्त्तव्य, त्रि, (न + कृञ् + तव्य । न कर्त्तव्यं । नञ्समासः ।) अकरणीयं । अकरणार्हं । अकार्य्यं । यथा,—
"अविरोधी भवाब्धौ च सर्व्वमङ्गलमङ्गलं ।
विरोधी नाशवीजञ्च सर्व्वोपद्रवकारणं ॥
अकर्त्तव्यो विरोधश्च दारुणैः क्षत्रियैः सह" ।
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २८ अध्यायः ॥

अकर्त्ता, [ऋ] त्रि, (न कर्त्ता । नञ्समासः ।) अकारकः । यथा,—
"चातुर्व्वर्ण्यं मया सृष्टं गुणकर्म्मविभागशः ।
तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययं" ॥
इति श्रीभगवद्गीतायां ४ अध्याये १३ श्लोकः ॥ (कर्म्मनिर्लिप्तः साङ्ख्योक्तः पुरुषः । कुकर्म्मकारी ।)

अकर्म्म, [न्] क्ली, (न कर्म्म । नञ्समासः ।) अकरणीयकार्य्यं । यथा,—
"किं कर्म्म किमकर्म्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥
कर्म्मणो ह्यपि बोद्धव्यं बोद्धव्यञ्च विकर्म्मणः ।
अकर्म्मणश्च बोद्धव्यं गहना कर्म्मणो गतिः ॥
कर्म्मण्यकर्म्म यः पश्येदकर्म्मणि च कर्म्म यः ।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्म्मकृत्" ॥
इति श्रीभगवद्गीतायां ४ अध्याये १६ । १७ । १८ श्लोकाः ॥ (अप्रशस्तं कर्म्म । कर्म्माभावः । दुष्कर्म्म ।)

अकर्म्मण्य, त्रि, (न कर्म्मणि साधुः । न + कर्म्मन् + यत् । कर्म्मायोग्यं । कार्य्यानर्हं । निष्कर्म्मण्यं । अकेजुया इति भाषा । यथा,—
"षष्टिदण्डात्मिकायाश्च तिथेर्निष्क्रमणे परे ।
अकर्म्मण्यं तिथिमलं विद्यादेकादशीं विना" ॥
इति तिथ्यादितत्त्वं ॥

अकर्म्मा, [न्] त्रि, (नास्ति कर्म्म यस्य । बहुव्रीहिः । कार्य्योत्तमः । निष्कर्म्मा । कार्य्यानुपयुक्तः ॥ (क्रियामन्दः । कुकर्म्मा । स्वेच्छाचारी ।)

अकर्म्मान्वितः, त्रि, (कर्म्मणा अन्वितः न भवतीति । न + कर्म्मन् + अन्वितः ।) कुकर्म्मान्वितः । अकर्म्मविशिष्टः । दुष्कर्म्मयुक्तः ॥

अकल्कनः, त्रि, (नास्ति कल्कनं दम्भः यस्य सः । न + कल्कन ।) दम्भरहितः । तत्पर्य्यायः । दीत-

दम्भः २। इति हेमचन्द्रः॥ (ग्राह्यरहितः। सरलः।) अकल्कल इत्यपि पाठः।

अकल्का, स्त्री, (नास्ति कल्कः अन्धकारमालिन्यं यस्याम् इति।) ज्योत्स्ना। इति शब्दचन्द्रिका॥ वाच्यलिङ्गस्तु कल्करहिते॥ (ग्राह्यशून्यः। दम्भशून्यः। सरलः। निर्म्मलः।)

अकल्पितः, त्रि, (न कल्पित इति। नञ्समासः।) कल्पनारहितः। अकाल्पनिकः। अकृत्रिमः। अरचितः। (सत्यः। प्रकृतः। अवितथः।)

अकल्यः, त्रि, (न कल्यः सुस्थः। नञ्समासः।) रोगी॥ (यथा,—

"अकल्यबालस्यविरविषमस्थक्रियाकुलान्।
... ... नाङ्गायथेन्नृपः"॥

इति मितात्तराधृतवचनम्॥ असमर्थः। यथा,—

"अकल्यः खाङ्गचेष्टायां शकुन्त इव पञ्जरे"।

इति भागवते।) कल्यो निरामयः तत्र नञ्समासः॥

अकल्याणं, क्ली, (न कल्याणं। नञ्समासः।) अमङ्गलं। अशुभं॥ (त्रि। कल्याणरहितः।)

अकस्मात्, व्य, अतर्कितं। हठात् १। तत्पर्य्यायः। सहसा २ सद्यः ३ सपदि ४ तत्क्षणे ५ एकपदे ६। इति हेमचन्द्रः॥ नञ्समस्तकिमुशब्दस्य पञ्चम्यन्तप्रयोगोऽयं। इति केचित्॥

अकारणं, त्रि, (नास्ति कारणं यस्य सः। न+कारणं।) कारणशून्यं। निर्हेतु। अनिमित्तं। यथा,—

"कुतः पुनः शश्वदभद्रमीश्वरे,
न चार्पितं कर्म्म यदप्यकारणम्"।

इति श्रीभागवतं॥ (कारणं विना। कारणाभावः। यथा,—"कारणसामान्ये द्रव्यकर्म्मणां कर्म्माकारणमकृतम्"। इति वैशेषिकसूत्रम्।)

अकारणगुणोत्पन्नगुणः, पुं, (विना कारणगुणं उत्पन्ना जाताः ये गुणाः। अकारणगुण+उत्पन्न+गुण।) स्वाभाविकगुणः। न्यायमते विभुनित्यविशेषगुणाः यथा,—बुद्धिः १ सुखं २ दुःखं ३ इच्छा ४ द्वेषः ५ यत्नः ६ धर्म्मः ७ अधर्म्मः ८ भावना ९ शब्दः १०।

("अतीन्द्रिया विभूनान्तु ये स्युर्वैशेषिका गुणाः।
अकारणगुणोत्पन्ना एते तु परिकीर्त्तिताः"॥

इति भाषापरिच्छेदे। अकारणेति कारणगुणपूर्व्वका रूपादयो वक्ष्यन्ते। बुद्ध्यादयस्तु न तादृशाः। आत्मादेः कारणाभावात्।) इति सिद्धान्तमुक्तावली॥

अकार्य्यं, क्ली, (न कार्य्यम्। नञ्समासः।) क्षपणतारात्रित्यं। यथा,—

"स्तोकादपि च दातव्यमदोनेनैव चात्मना।
अहन्यहनि यत्किञ्चिदकार्य्यं हि तत् स्मृतम्"॥

इत्येकादशीतत्त्वम्॥

अकार्य्यं, क्ली, (न कार्य्यम्। नञ्समासः।) कार्य्याभावः। अकृत्यं। अकर्म्म। (दुष्कर्म्म। कुकार्य्यम्।) यथा,—

किमकार्य्यं कदर्य्याणां दुस्त्यजं किं धृतात्मनां"।

इति श्रीभागवतं॥

अकालः, पुं, (न कालः, अप्रशस्तः कालो वा। नञ्समासः।) असमयः। अप्रशस्तकालः। यथायोग्यकालातिरिक्तसमयः। अशुद्धकालः। यथा,—गुरोरस्तात् प्राक् वृद्धत्वे पञ्चदशाहः। तस्यास्ते द्वात्रिंशद्दिनं। तस्योदयात् परं बालत्वे पञ्चदशाहः। गुर्व्वादित्ययोगे स्थितिकालः दशत्रिंशद्दिनादिः।

सिंहे गुरोः स्थितिकालः सम्वत्सरस्थूलः। अस्य विश्लेषः यदि माघपौर्णमास्यां मघानक्षत्रं प्राप्यते तदैवं भाव्यं। वक्रिगुरौ अष्टाविंशतिदिनं। पूर्व्वराशावनागतातिचारिगुरौ एकवर्षः। अयमेव लुप्तसम्वत्सरः। पूर्व्वराशिगन्तातिचारिगुरौ पञ्चचत्वारिंशत् दिनं। नीचस्थगुरोः स्थितिकालः संवत्सरस्थूलः। राजयुक्तगुरोः स्थितिसमयः एकाब्दः स्थूलः। भृगोर्मौढ्यात्तात् प्राक् वृद्धत्वे पञ्चदशाहः। तस्य मौढ्यास्ते द्विसप्ततिदिनं। तस्योदयात् परं बालत्वे दशाहः। एतत्त्रयं श्रीघ्रास्तमुच्यते॥ भृगोः पादास्तात् प्राक् वृद्धत्वे दशाहः। तस्य पादास्ते द्वादशाहः। तस्योदयात् परं बालत्वे दिनत्रयं। एतत्त्रयं वक्रास्तमुदितं। मलमासे मासमेकं॥ भानुलङ्घितमासे त्रयमासे च तदेव॥ भूकम्पाद्यद्भुते सप्ताहः॥ पौषादिचतुर्मासे एकदिनचरणाङ्कितवर्षे तद्दिनं। दिनद्वयचरणाङ्कितवर्षे दिनत्रयं। दिनत्रयचरणाङ्कितवर्षे सप्ताहः॥ दक्षिणायने षण्मासाः॥ श्रीहरिशयने चतुर्मासः॥ चन्द्रसूर्य्यग्रहणे कर्म्मविशेषे एकत्रिंशदिनानि॥ इति ज्योतिषतत्त्वं॥

अकालजः, त्रि, (अकाले जायते इति। अकाल+जन+ड। अकालजातः। असमयोत्पन्नः। अपूर्णकालोद्भवः। यथा,—

"अकालजन्तु विरसं न धान्यं गुणवत् स्मृतं"॥

इति राजवल्लभः॥

अकालजलदोदयः, पुं, कुज्झटी। इति शब्दमाला॥ अकाले मेघानामुदयः॥ यथा रघुवंशे—

"यवनीमुखपद्मानां सेहे मधमदं न सः।
बालातपमिवाज्ञानामकालजलदोदयः"॥

अकालमेघोदयः, पुं, (अकाले यः मेघानाम् उदयः।) कुज्झटी। इति शब्दमाला॥ अकाले मेघानामुदयः॥

अकिञ्चनः, त्रि, (नास्ति किञ्चन यस्य। मयूरव्यंसकादित्वात् षष्ठीसमासः।) दरिद्रः। नास्ति किञ्चिदपि यस्य। इति हेमचन्द्रः॥ (यथा,—'अकिञ्चनः सन् प्रभवः स सम्पदाम्' इति कुमारसम्भवे।)

अकिञ्चनता, स्त्री, (अकिञ्चनस्य भावः। अकिञ्चन+तल्।) अकिञ्चनस्य भावः। सा तु परिग्रहत्यागरूपयमविशेषः। इति हेमचन्द्रः॥

अकिल्बिषः, त्रि, (नास्ति किल्बिषं यस्य। षष्ठीसमासः।) किल्बिषशून्यः पापरहितः। यथा,—

"न मां दोषेण सुग्रीव गन्तुमर्हस्यकिल्बिषं"।

इति रामायणं॥

अकीर्त्तिः, स्त्री, (न कीर्त्तिः। नञ्समासः।) अयशः। यथा,—

"अकीर्त्तिञ्चापि भूतानि कथयिष्यन्ति तेऽव्ययां।
सम्भावितस्य चाकीर्त्तिर्म्मरणादतिरिच्यते"॥

इति श्रीभगवद्गीतायां २ अध्याये ३४ श्लोकः॥

अकीर्त्तिकरं, त्रि, (अकीर्त्तिं करोति जनयति इति। यद्वा कीर्त्तिकरं न भवतीति नञ्समासः।) अयशस्करं। यथा,—

"कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं।
अनार्य्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्জ্জুন"॥

इति श्रीभगवद्गीतायां २ अध्याये २ श्लोकः॥

अकुतोभयः, त्रि, (नास्ति कुतोऽपि भयं यस्य सः। मयूरव्यंसकादिगणान्तर्गतः। न+कुतः+भयं।) नास्ति कस्माद्भयं यस्य। निर्भयः। यथा। इच्छतामकुतोभयमिति भक्तिरसामृतसिन्धुः॥

अकुप्यं, क्ली, (न कुप्यं, कुप्यादन्यदित्यर्थः। नञ्समासः।) स्वर्णं। रूप्यं इति हलायुधः॥ यथा—

कुरून्नकुप्यं वसु वासवोपमः'। इति भारविः)॥

अकूपारः, पुं, (न कूपारः। नञ्समासः। कुं पृथिवीं पिपर्त्ति इति कूपारः। पॄ पालनपूरणयोः। कर्म्मणि अण्। अन्येषामपीति दीर्घः।) समुद्रः। इत्यमरः॥ कूर्म्मराजः। पायागादिः। इति मेदिनी॥ कमठः। इति चिकित्साङ्गशेषः॥

अकूर्चः, पुं, (नास्ति कूर्चः कैतवं यस्य। बहुव्रीहिः।) बुद्धः। इति चिकित्साङ्गशेषः। कैतवशून्ये त्रि। (दम्भशून्ये)।

अकृतं, त्रि, (न+कृ+क्त।) न कृतं। अविध्यादितं। यथा—

"कालातीतन्तु यत् कुर्य्यादकृतन्तद्विनिर्द्दिशेत्"

इति स्मृतिः॥ (नित्यः। प्रमाणाविषयः। (क्ली) मोक्षः। कारणं। (स्त्री) प्रकृतिविशेषः। यथा—"अपां निम्नदेशगमनादिलक्षणा प्रकृतिः सा न केनचित्कृता"।)

अकृतघ्नः, त्रि, (न+कृत+घ्न+क। न कृतघ्नः इति नञ्समासः।) कृतघ्नः। हितास्मर्त्ता। उपकारामानी। उपकारहन्ता। यथा,—

"भजतोऽपि न वै केचिद्भजन्त्यभजतः कुतः।
आत्मारामाः पूर्णकामा अकृतज्ञा गुरुद्रुहः"॥

इति श्रीभागवतं॥

अकृतित्वं, क्ली, (न+कृतिन्+त्व।) अक्षमता। अपटुता। कर्म्माकुशलत्वं। अयोग्यत्वं॥

अकृती, [न्] त्रि, (न+कृती। नञ्समासः।) कर्म्माक्षमः। कार्य्याकुशलः। क्रियानुपयुक्तः।

अकृत्रिमं, त्रि, (करणात् जातः कृत्रिमः। स न भवतीति नञ्समासः।) अकरणजं। अजन्यं। सिद्धं। अकरणजातं। यथा दक्षः।

"चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्।
तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले"॥

इत्याह्निकाचारतत्त्वं॥ • ॥ किञ्च। कात्यायनः।

"पूर्व्वपक्षं स्वभावोक्तं प्राश्निकोऽथ लेखयेत्।

बोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनं" ॥ स्वभावोक्तं अकृत्रिमं। इति शब्दरत्नावली ॥ (अक्रियोत्पन्नः। नैसर्गिकः। अयत्नलभ्यः। यथा,— "तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति"। इति हितोपदेशः।)

अक्रपः, त्रि, (नास्ति क्रपा यस्य सः।) क्रपाशून्यः। निर्दयः। अकरुणः। यथा,— "वनजौ वनजौ कृत्तस्त्रिरामी सक्रपोऽक्रपः"। इत्यनुष्टुबाचार्य्यः ॥

अक्रपणः, त्रि, (न क्रपणः। नञ्समासः।) कार्पण्यरहितः। दीनताशून्यः। यथा,— "महता व्यसनं प्राप्तो दीनः क्रपण उच्यते। कुलेऽप्यक्रपणे राम संभूतः सर्वकामदे" ॥ इति रामायणं ॥ (पुष्कलः। बहुलः। यथा,— "भूयस्यां नवपक्वैरक्रपणैरतिथ यामो वयम्"। इति वैराग्यशतके।

अक्रियाकर्म्मा, [न्] त्रि, (न क्रियां मलिनं कर्म्म यस्य सः। न+क्रिया+कर्म्मन्।) दुष्कर्म्मरहितः। निष्पापः। शुद्धाचारः। अक्रियां निष्पापत्वात् शुक्लं कर्म्मास्य। इत्यमरटीकायां भरतः ॥

अक्लेशः, त्रि, (नास्ति क्लेशो यस्य। अल्पः अप्रशस्तो वा क्लेशो यस्य सः।) क्लेशरहितः। अल्पक्लेशयुक्तः अप्रशस्तक्लेशविशिष्टः ॥

अकैतवं, क्ली, (न कैतवम्। नञ्समासः।) कैतवाभावः। अकपटता। अधूर्त्तता। अवञ्चना ॥

अकोटः, पुं, (न+कुट+भावे घञ्।) गुवाकः। इति त्रिकाण्डशेषः ॥

अकोविदः, त्रि, (न कोविदः। नञ्समासः।) अपण्डितः। मूर्खः ॥

अकौटिल्यं, क्ली, (न+कौटिल्यं। नञ्समासः।) कौटिल्याभावः। सरलता ॥

अक्का, स्त्री, (अकं दुःखं कायति शब्दायति इति कै शब्दे।) माता। इति शब्दरत्नावली ॥

अक्तः, त्रि, (अञ्जेर्गतौ क्तः। अक्तपरिमाणस्य वाचक इति भाष्यस्य कैयटेन तथा व्याख्यातत्वात्। अनक्ति अज्यते वा। अञ्जू व्यक्त्यादौ। अञ्जिवृसिभ्यः क्तः इति औणादिकः क्तः।) युक्तः ॥ गतः ॥ व्यक्तः ॥ अनञ् अक्तिगतिम्रक्षणे इत्यस्मात् कर्म्मणि क्तः। यथा,— "शिक्काम्बासातुरे पूर्व्वं तैलाक्ते खेद इष्यते"। इति चक्रदत्तः। (स्त्रियां अक्ता इति पदं रात्रिवाचकम् वेदे प्रसिद्धम्।)

अक्तुः, स्त्री, रात्रिः। अनक्ति प्रतिदिनं गच्छति अक्तुः। अञ्जू धातु अक्तिगतिम्रक्षणे बाहुलकात् कुः अनिदितामिति नलोपः। वेदप्रचुरप्रयोगोऽयं ॥ (आयुधं। किरणः। कान्तिः। नक्षत्रं। स्रोतः। अञ्जनघृतं। एते अर्थाः वैदिकग्रन्थे प्रसिद्धाः।)

अक्रव्यादः, त्रि, (न क्रव्यादः। नञ्समासः।) अमांसभक्षकः। यथा,— "क्रव्यादांस्तु मृगान् हत्वा धेनुं दद्यात् पयस्विनीं। अक्रव्यादान वत्सतरीमुष्ट्रं हत्वा तु क्रव्यादं" ॥ इति मानवे ११ अध्याये १३३ श्लोकः ॥

अक्रमः, त्रि, (न क्रमः। नञ् समासः।) नास्ति क्रमो यस्य इति वा।) क्रमरहितः। व्यतिक्रमः। यथा,— "अक्रमाच्छेफसो वृद्धिं योऽभिवाञ्छति मूढधीः"। इति माधवकरः ॥ (क्रमाभावः। क्रमविपर्य्ययः। यथा,—'इदमनुचितमक्रमञ्च पुंसां यदिह जरासपि मान्मथा विकाराः' इति शृङ्गारशतकम्।)

अक्रान्ता, स्त्री, (न+क्रम्+क्त+टाप्।) दहती। इति कात्यिद्रत्नमाला ॥ अनाक्रान्ते त्रि ॥

अक्रियः, त्रि, (नास्ति क्रिया यस्य। अप्रशस्ता वा क्रिया यस्य।) अक्रियान्वितः। कुकर्म्मविशिष्टः। क्रियारहितः। यथा 'अक्रियत्वाच्च सर्व्वदा'। इति चरकः ॥ (निश्चेष्टः। स्पन्दरहितः। कर्म्मत्यागी। यथा,— "अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः। स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः" ॥ इति गीतायाम्।) (स्त्री। क्रियाभावः। क्रियात्यागः। अयथाक्रिया। यथा,— "अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः सर्वकर्म्मिणाम्। अक्रिया च परोक्षा च तृतीया चायथाक्रिया" ॥ इति काव्यसङ्कलितः।)

अक्रूरः, पुं, (क्रौर्य्यवान् क्रूरः, स न भवति इति अक्रूरः। यद्वा क्रूर इति भावप्रधानो निर्देशः। न विद्यते क्रौर्य्यम् इति अक्रूरः।) गान्दिनीपुत्रः। श्वफल्कपितृव्यः। तस्य पिता श्वफल्कः। (तस्य माता गान्दिनी।) इति श्रीभागवतं ॥ क्रूरताशून्ये त्रि ॥ (सरले। यथा,— "स्त्रीणां सुखोद्यमक्रूरं विस्रब्धार्थं मनोरमम्"। इति मनुः। पुंसि विष्णुः। यथा,— "अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः"। इति भारते।)

अक्रोधः, पुं, (न क्रोध इति नञ् समासः। नास्ति क्रोधो यस्य इति वा।) क्रोधचित्तविकारः तद्विपरीतः। स तु आश्रमिणां दशधर्म्मान्तर्गतधर्म्मः। इति जटाधरः ॥ (यथाह मनुः— "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्" ॥ इति।) वाचस्पतिस्तु क्रोधरहितश्चासौ ॥

अक्लान्तः, त्रि, (न+क्लम्+क्त। न क्लान्त इति नञ्समासः।) क्लान्तिरहितः। अनवसन्नः। अग्लानः ॥

अक्लिका, स्त्री, नीलीवृक्षः। इति शब्दचन्द्रिका ॥

अक्लिष्टकर्म्मा, [न्] त्रि, (अक्लिष्टम् अनायाससाध्यं कर्म्म यस्य। बहुव्रीहिः।) अक्लेशेन कर्म्मकर्त्ता। यथा,— "दूतोऽहं कोशलेन्द्रस्य रामस्याक्लिष्टकर्म्मणः"। इति रामायणं।

अक्लैब्यं, क्ली, (न क्लैब्य इति नञ् समासः।) क्लैब्याभावः। यथा,— "यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्म्मभिरगर्हितैः। अक्लेशेन शरीरस्य कुर्व्वीत धनसञ्चयं"। इति मानवे ४ अध्याये ३ श्लोकः ॥ क्लैब्याभाववति त्रि ॥

अक्लेशः, त्रि, (नास्ति क्लेशो यस्य इति बहुव्रीहिः।) क्लेशशून्यः। अनायासः। अकष्टः ॥

अक्ष, न ऊ व्याप्तौ। संहतौ। इति कविकल्पद्रुमः। न अक्ष्णोति धनं लोकः। व्याप्नोति राशीकरोति वा इत्यर्थः। ऊ आक्षिप्तौ। आक्षौ। इति दुर्गादासः।

अक्ष, ऊ व्याप्तौ। संहतौ। इति कविकल्पद्रुमः। अक्षति धनं लोकः। व्याप्नोति राशीकरोति वा इत्यर्थः। ऊ आक्षिप्तौ। आक्षौ। इति दुर्गादासः।

अक्षं, क्ली, (अक्ष्णोति अक्षति वा अक्ष्यते वा अनेन अक्ष वा अक्षू व्याप्तौ। पचाद्यच् घञ् वा। अक्षते अक्षर्थं अक्षू व्याप्तौ। अक्षेर्देवने इति सेो वा।) इन्द्रियं। (यथा विष्णुपुराणे,— "शब्दादिष्वनुरक्तानि निगृह्यात्मानि योगवित्। कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः" ॥) सौवर्च्चलं। तुत्थं। इति मेदिनी। (चक्षुः। यथा रामायणे,— "सर्व्वे तेऽनिमिषैरक्षैस्तमनुव्रतचेतसः"। इति।)

अक्षः, पुं, कर्षपरिमाणं। (यथा,— "ते षोड़शाक्षाः कर्षोऽस्त्री पलं कर्षचतुष्टयं" ।) पाशकः। (अक्षैरत्तीति वा दीव्यति। इति सिद्धान्तकौमुदी।) (पाशक्रीड़ा। यथाह मनुः)— 'मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः'।) कलिद्रुमः। इत्यमरः। (विभीतकवृक्षः। यथा छान्दोग्ये—यथा वै द्वे आमलके द्वे कोले द्वौ वाक्षौ मुष्टिमनुभवति।) ज्ञातार्थः। शकटः। अवहारः। रुद्राक्षः। इन्द्राक्षः। सर्पः। चक्रं। इति मेदिनी। (चक्रधारणदारुभेदः। यथा,— "छिन्नाक्षे भग्नयुगे तिर्य्यक् प्रतिमुखागते। अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च" ॥) आत्मा। रावणपुत्रः। इति हेमचन्द्रः। (यथा रामायणे—'निगृह्य राजा रुमरे सहोत्सुकं कुमारमक्षं प्रसमैक्षताथ वै'।) जातान्धः। गरुड़ः। इति शब्दरत्नावली। (शिवः। यथा भारते— "अक्षस्त्र रथयोगी च सर्व्वयोगी महाबलः"। इति) संस्कृतपलभा। यथा,— "चन्द्रार्किनिघ्ना पलभार्द्धिता च लङ्कावधिः स्यादिह दक्षिणोक्षः"। इति भास्करी ॥ "प्रभा शरघ्ना खतुरीययोगा- दक्षः सदा दक्षिणदिक् प्रदिष्टः"। इति जातकार्णवः— "दक्षिणोत्तररेखायां सा तत्र विषुवत् प्रभा। ध्रुवच्छाया हते चिह्ने विषुवत् कर्णभाजिते ॥ लम्बाक्षाख्ये तयोर्व्यापे लम्बाक्षौ दक्षिणौ सदा"। इति सूर्य्यसिद्धान्तः ॥

अक्षकः, पुं, (अक्ष+क) तिनिशवृक्षः। इति रत्नमाला।

अक्षक्रीड़ा, स्त्री, (अक्षैः या क्रीड़ा) द्यूतक्रीड़ा पाशकक्रीड़ा। यथा। अक्षक्रीड़ायां व्यासयुधिष्ठिरसंवादः प्रचरति। इति तिथ्यादितत्त्वं॥ तद्विवरणं चतुरङ्गशब्दे द्रष्टव्यं॥ * ॥ कार्त्तिकशुक्लप्रतिपदि तत्क्रीड़ाविधिर्यथा। ब्रह्मपुराणे,—

"शङ्करस्य पुरा द्यूतं ससर्ज सुमनोहरं।
कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते॥
जितस्य शङ्करस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्थाच्छङ्करो दुःखी गौरी नित्यं सुखोत्थिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः॥
पराजयो विरुद्धस्तु सज्जनाशकरो भवेत्"।

द्यूतद्याप्राणिभिः क्रीड़नं। यथा मनुः,—

"अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते"।

इति तिथ्यादितत्त्वं॥ * ॥ दशम्यादिदशम्यन्तकरणनिषेधो यथा। स्मृतिः,—

"शाकं माषं मसूरञ्च पुनर्भोजनमैथुने।
द्यूतमत्स्यमुपानञ्च दशम्यां वैष्णवस्त्यजेत्"॥

कूर्म्मपुराणं,—

"कांस्यं मांसं सुरां क्षौद्रं हिंसां तैलमसत्यताम्।
द्यूतक्रीड़ां दिवानिद्रां व्यायामं क्रोधमैथुनं॥
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्ज्जयेत्"।

इत्येकादशीतत्त्वं॥ * ॥ अन्यत् द्यूतशब्दे द्रष्टव्यं॥

अक्षजः पुं, (अक्ष + जन् + ड) वर्च्चः। इति पुरुषोत्तमः। अस्थिज इति क्वचित् पाठः। (विष्णुः। यथा भागवते,—

"जघानोत्पत्य गदया हनावसुरमक्षजः"।

अक्षतं, क्ली, (क्षण् हिंसायां। नपुंसके भावेक्तः। अनुदात्तोपदेशेत्यादिना णत्वाभावः।) लाजाः। नपुंसकं। इति मेदिनी।

अक्षतः, त्रि, (न + क्षण् + क्त) अहिंसितः। इति मेदिनी। अखण्डितः। इति शब्दरत्नावली। (यथाह मनुः,—

"दशस्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।
त्रिषु स्थानेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत्"॥)

अक्षतः, पुं, यवः। इति मेदिनी। (यथा आश्वलायनगृह्यसूत्रे,—

"अक्षतसक्तूनां नवं कलसं पूरयित्वा"।)

अस्यमाचं। इति अमरटीकायां भानुदीक्षितः॥

अक्षताः पुं भू क्षीति स्वामी॥ (न क्षताः येषां ते इति अक्षताः। मुकुटस्तु अमरव्याख्यानावसरे लाजाः पुं भूम्नितेऽक्षतमिति पठित्वा कर्म्मणि क्तः। क्षतं खण्डितं। न क्षतमक्षतमिति विग्रहे नित्यपुंलिङ्गाः नित्यबहुवचनान्ताश्च लाजा अक्षतमिति व्याख्यौ॥ केचित्तु अखण्डतण्डुला अक्षतमित्याहुः॥)

अक्षता स्त्री, कर्कटशृङ्गी। काँकड़ाशृङ्गी इति भाषा। इति शब्दचन्द्रिका॥ पशुसंसर्गरहिता स्त्री। स्मृतिः॥ यथाह याज्ञवल्क्यः—

"अक्षतायां क्षतायां वा जातः पौनर्भवः पुनः"।

अक्षदर्शकः, पुं, (अक्षाणां व्यवहाराणां दर्शकः। अक्ष + दृश् + ण्वुल्।) व्यवहारद्रष्टा व्यवहाराणां ऋणादानादिविवादानां द्रष्टा निर्णेता। धर्म्माध्यक्ष इत्यर्थः। इत्यमरः तट्टीका च॥ जज् इति इंराजीयभाषा॥

अक्षदृक्, (श्) पुं, (अक्ष + दृश् + क्विप्।) अक्षदर्शकः। (व्यवहारस्य ज्ञाता।)

अक्षदेवी, (न्) त्रि, (अक्षैर्देव्यति। दिवु क्रीड़ादौ। सपीति णिनि।) द्यूतक्रीड़ाकारकः। इत्यमरः॥

अक्षद्यूः, पुं, (अक्षैर्दीव्यति। दिवु क्रीड़ादौ। अक्ष + दिव् + क्विप् + ऊठ्।) अक्षक्रीड़कः। इति व्याकरणं॥

अक्षधरः पुं, (अक्ष + धृ + अच्।) शाखोटवृक्षः। इति भूरिप्रयोगः॥

अक्षधूर्त्तः पुं, (अक्षेषु धूर्त्तः। सप्तमी शौण्डैरिति समासः।) द्यूतक्रीड़कः। तत्पर्य्यायः। धूर्त्तः २ अक्षदेवी ३ कितवः ४ द्यूतकृत् ५। इत्यमरः॥ जुयारी इति भाषा॥

अक्षधूर्त्तिल पुं, (अक्ष + धुर् + तिल्।) वृषः। इति हारावली॥

अक्षपाटकः पुं, (अक्ष + पाट + वुन्।) धर्म्माध्यक्षः। इति जटाधरः॥ जज् इति भाषा॥

अक्षपादः पुं, (अक्ष + पाद।) तार्किकः। तत्पर्य्यायः। नैयायिकः २। इति हेमचन्द्रः॥

अक्षपीड़ा स्त्री, (अक्ष + पीड़ा।) यष्टिक्षता लता। इति राजनिर्घण्टः॥

अक्षमः त्रि, (नास्ति क्षमा यस्य सः।) क्षमारहितः। क्षमाशून्यः। (असमर्थः।)

"विष्णुसेवी च स्वपचो वंशानां कोटिमुद्धरेत्।
हरेरभक्तो विप्रश्च स्वञ्च रक्षितुमक्षमः"॥

इति ब्रह्मवैवर्त्ते ३३ अध्यायः॥

अक्षमा स्त्री, (न क्षमा इति नञ्समासः।) अक्षान्तिः। ईर्षा। इति शब्दरत्नावली॥ (यथा किरातार्জ্জुनीये—

"अतिपातितकालसाधना
स्वशरीरेन्द्रियवर्गतापिनी।
जनवन्न भवन्तमक्षमा
नयसिद्धेरपनेतुमर्हति"॥

अक्षमाला स्त्री, (अक्षाणां माला।) अक्षसूत्रं। वशिष्ठपत्नी। इति मेदिनी॥ (यथाह मनुः—

"अक्षमाला वशिष्ठेन संयुक्ताधमयोनिजा"।

अक्षसूत्रेति तान्त्रिकभाषया अकारादिक्षकारान्तवर्णमाला रुद्राक्षमाला च। यथा गौतमीये,—

"पञ्चाशल्लिपिभिर्भाला विहिता जपकर्म्मसु।
अकारादिक्षकारान्ता अक्षमाला प्रकीर्त्तिता॥
क्षणं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः"॥

इति तन्त्रसारः॥ * ॥ अन्यत् मालाशब्दे वर्णमालाशब्दे च द्रष्टव्यं॥

अक्षयः त्रि, (नास्ति क्षयो यस्य सः। बहुव्रीहिः।) क्षयरहितः। अव्ययः। कल्पान्तस्थायी। यथा—

"अक्षराणि पलाल्याऽऽहरमरांस्त्रिदशानिव।
कल्पान्तस्थानसम्बन्धान्नजग्या नाशयर्জ্জिनः"॥

इति मोमांसककारिका॥ अपि च। भविष्यपुराणं।

"चतुर्दश्यां तथाऽमायां पक्षयोः शुक्लकृष्णयोः।
योऽब्दमेकं न भुञ्जीत शिवार्चनपरो नरः॥
यत् पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनां।
तत् पुण्यं सफलं तस्य शिवलोकञ्च गच्छति"॥

इति तिथ्यादितत्त्वं॥ * ॥ पापपुण्याक्षयजनकयोगविशेषः। यथा ज्योतिषे,—

"सोमवारेऽप्यमावास्या आदित्याहे तु सप्तमी।
चतुर्थ्यङ्गारवारे तु अष्टमी च बृहस्पतौ॥
अत्र यत् क्रियते पापमथवा धर्म्मसञ्चयः।
षष्टिजन्मसहस्राणि प्रति जन्म तदक्षयं"॥

इति तिथ्यादितत्त्वं॥ (अनन्तः। अक्षयकालानिमानी। अः वासुदेवः तस्मिन् क्षयो निवासोऽस्य इति व्युत्पत्त्या ब्रह्मणिष्ठः।)

अक्षयतृतीया स्त्री, (अक्षया या तृतीया तिथिः।) वैशाखशुक्लतृतीया। सा तु सत्ययुगाद्या। तत्र स्नानदानादावक्षयफलं। इति। स्मृतिः। यथा,—

"वैशाखे मासि राजेन्द्र शुक्लपक्षे तृतीयिका।
अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता॥
तस्यां दानादिकं पुण्यमक्षयं समुदाहृतं"।

इति तिथ्यादितत्त्वं॥ * ॥ विवरणं तु वैशाखशब्दे द्रष्टव्यं॥

अक्षया स्त्री, (नास्ति क्षयो यस्याः सा।) वारतिथिघटितयोगविशेषः। यथा,—

"अमा वै सोमवारेण रविवारेण सप्तमी।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया"॥

इति भविष्यपुराणम्॥

अक्षरः पुं, (न क्षरति। क्षर सञ्चलने। पचाद्यच्। यद्वा। अश्नुते। अशूं व्याप्तौ। अशेः सरः।) शिवः। विष्णुः। इति शब्दरत्नावली। यथा महाभारते,—

"विश्व विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च"॥

इति।) (अजः। जीवः।)

अक्षरं क्ली, (न क्षरति इति व्युत्पत्त्या।) ब्रह्म। (अविनाशि निर्व्विशेषं प्रणवाख्यं ब्रह्म। कूटस्थः नित्यः आत्मा। यथा,—

"क्षरादिरुद्धधर्म्मत्वादक्षरं ब्रह्म मन्यते।
कार्य्यकारणरूपं तु नश्वरं क्षरमुच्यते॥
यत्किञ्चिदिह लोकेऽस्मिन् वाचो गोचरतां गतं।
प्रमाणस्य च तत्सर्व्वमक्षरे प्रतिषिध्यते॥
यदप्रबोधात् कार्य्यण ब्राह्मणं यत्प्रबोधतः।
तदक्षरं प्रबोद्धव्यं यथोक्तेश्वरवर्त्मना"॥

अकारादिक्षकारान्तैकपञ्चाशद्वर्णः। इति मेदिनी॥ अस्योत्पत्तिकारणं। यथा बृहस्पतिः,—

"धात्वात्मासिके तु सम्प्राप्ते भ्रान्तिः सञ्जायते यतः।
धात्वात्तस्माणि रूपाणि पत्राण्युत्पद्यन्ते पुरा"॥

इत्यादिकृततत्त्वं॥ तच्च पञ्चविधं। यथा,—

"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा।
गुणिका घुर्णसम्भूता लिपयः पञ्चधा स्मृताः"।

इति वाराहीतन्त्रं॥ * ॥ अन्यत् मुद्राशब्दे वर्णशब्दे च द्रष्टव्यं॥ गगनं। धर्म्मः। तपस्या॥

अपामार्गः। इति हेमचन्द्रः॥ मोक्षः। इत्यमरः॥ जलं। इति वेदप्रयोगः।

अक्षरः त्रि, (न क्षरतीति।) अक्षरणीयः। अच्युतः। यथा,—

"तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमन्विताय।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तं तत्त्वतो ब्रह्मविद्यां"॥

इति वेदान्तसारधृता श्रुतिः॥

अपिच।

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते"॥

इति श्रीभगवद्गीतायां १५ अध्याये १७ श्लोकः॥ क्षरश्चाक्षरश्चेति द्वाविमौ पुरुषौ लोके प्रसिद्धौ। तावेवाह। तत्र क्षरः पुरुषो नाम सर्व्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः। कूटो राशिः शिलाराशिः पर्व्वतइव एकदेशेष नश्यत्स्वपि निर्व्विकारतया तिष्ठतीति कूटस्थश्चेतनो भोक्ता स तु अक्षरः पुरुष उच्यते विवेकिभिः। इति तट्टीकायां श्रीधरस्वामी॥

अक्षरचञ्चुः पुं, (अक्षरैर्वित्तः। तेन वित्त इति चञ्चु।) लेखकः। इत्यमरटीकायां वाचस्पतिः॥

अक्षरचणः पुं, (अक्षरैर्वित्तः। तेन वित्त इति चणप्।) लिपिकरः। इत्यमरः। मुन्शी इति भाषा॥

अक्षरचुञ्चुः पुं, (अक्षरैर्वित्तः। तेन वित्त इति चुञ्चुप्।) अक्षरचञ्चुः। लेखकः। इत्यमरः।

अक्षरजननी स्त्री, (अक्षराणाम् अक्षरस्य वा जननी उत्पादिका।) लेखनी। कलमः। यथा,—

"लेखन्यक्षरजननी वर्णमाला मसिप्रसूः"।

इति हारावलीति केचित्॥

अक्षरजीवकः पुं, (अक्षर+जीवक।) लिपिकरः। इति हेमचन्द्रः॥

("लेखकेऽक्षरपूर्व्वाः स्युर्लेखजीवकचुञ्चव"। इति हेमचन्द्रः॥)

अक्षरजीविकः पुं, (अक्षरैर्जीविका यस्य सः।) कायस्थः।

"लेखकः स्याल्लिपिकरः कायस्थोऽक्षरजीवकः"॥

इति हलायुधः। अक्षरजीविनि त्रि॥

अक्षरतूलिका स्त्री, (अक्षराणां तूलिका लेखनसाधनमित्यर्थः।) लेखनी। इति जटाधरः॥

अक्षरविन्यासः पुं, अक्षराणां विन्यासः। लिपिः। लिखनं। इत्यमरटीकायां भरतादयः॥

अक्षरमुखः पुं, (अक्षराणि मुखे तुण्डाग्रे यस्य सः।) शिष्यः। क्षात्रः। इति त्रिकाण्डशेषः॥

अक्षरसंस्थानं क्ली, (अक्षराणां संस्थानं विन्यासः।) लिपिः। लिखनं। इत्यमरः॥

अक्षवती स्त्री, (अक्षाः पाशकाः सन्ति अस्यां इति मतुप्। ङीत्वात्।) द्यूतक्रीड़ा। पाशाखेला इति भाषा। इत्यमरः। (यथा महाभारते,—

"पराजितं सौबलेनाक्षवत्यां"।)

अक्षवाटः पुं, (अक्षस्य मल्लयुद्धस्य वाटः परिसरः।) मल्लभूमिः। तत्पर्य्यायः। नियुद्धभूः २। इति हेमचन्द्रः॥ कुस्तिर आखड़ा इति भाषा॥

अक्षवित् [द्] त्रि, (अक्षं व्यवहारं द्यूतं वा वेत्ति इति विदः क्विप्।) द्यूतज्ञः। व्यवहारज्ञः॥

अक्षसूत्रं क्ली, (अक्षाणां सूत्रं माला।) अक्षमाला। जपमाला। इति जटाधरः। यथा—

"पाणौ कामुकमक्षसूत्रवलयं दक्षोऽपरः पेशलः"।

इति महावीरचरिते।)

अक्षाग्रकीलकः पुं, (अक्षस्य नाभिक्षेपकाष्ठस्य अग्रे अन्ते बन्धनार्थं कीलकः।) शकटचक्रपुरोवर्त्तिकीलकः। तत्पर्य्यायः। अणिः २। इत्यमरः। अणी ३ आणिः ४। इति भरतः॥ चाकारखिल् इति भाषा॥

अक्षान्तिः स्त्री, (न क्षमणम्। क्षमूसहने। दिवादिः। अस्यासिद्धत्वात् क्तिन्। अनुनासिकस्येति दीर्घे नञ्समासः।) पराभ्युदयसहिष्णुत्वं। भार्य्याद्देः परदर्शनाद्यसहिष्णुत्वं। इति भरतः॥ तत्पर्य्यायः। ईर्ष्या २। इत्यमरः॥ ईर्षा ३ अक्षमा ४। इति शब्दरत्नावली॥

("अक्षान्तिसारसर्व्वस्वं दुर्व्वाससमवेहि माम्"। इति विष्णुपुराणे।)

अक्षारलवणं क्ली, (न क्षारलवणम् इति नञ्समासः।) हविष्यान्नविशेषः। महाहविष्यमिति ख्यातं। यथा। "अग्नौचादिमक्षगोक्षीरगोघृतधान्यमुद्गतिलयवसैन्धवसामुद्रलवणात्मकहव्यं। क्षत्रिमात् लवणात् भिन्नमक्षारलवणं मतं"। इदं मतन्तु स्मार्त्तस्य। रत्नाकरमतं। यथा—

"गोक्षीरं गोघृतं चैव धान्यमुद्गयवास्तिलाः।
सामुद्रं सैन्धवञ्चैवमक्षारलवणं मतं"॥

इति नारायणवन्द्यघटीयद्धतशुद्धिकारिका॥

(यथाह मनुः—

"मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतं।
अक्षारलवणं चैव प्रकृत्या हविरुच्यते"॥)

अक्षि क्ली, (अश्नुते अनेन। अशू व्याप्तौ संघाते च। अशेर्निदिति क्सिः। यद्वा। अक्षति। अक्ष व्याप्तौ। इन्।) चक्षुः। इत्यमरः। चक्षुर्गोलकः। इति केचित्॥

अक्षिकः पुं, रञ्जनद्रुः। आच् इति भाषा। इति रत्नमाला॥

अक्षिकूटकः पुं, (अक्षि+कूटक।) चक्षुस्तारा॥

अक्षिगतः त्रि, (अक्षि गतः, अक्षिविषय इव खेदः इत्यर्थः।) द्वेष्यः। इत्यमरः॥

अक्षिभेषजः पुं, (अक्षि+भेषज।) पृष्टिकालोध्रः। इति राजनिर्घण्टः॥ (क्ली, नेत्रौषधम्।)

अक्षिवः पुं, (अक्षि वाति वायति वा। वा गतिबन्धनयोः। आतोऽनुपेति कः।) शोभाञ्जनवृक्षः। सामुद्रलवणे क्ली। इत्यमरटीकायां भरतः॥

अक्षिविकूणितं क्ली, (अक्षि+वि+कूण+भावे क्त।) कटाक्षः। अपाङ्गदृष्टिः। इति हेमचन्द्रः॥

अक्षीकः पुं, रञ्जनद्रुः। आच् इति भाषा। इति रत्नमाला॥

अक्षीवं क्ली, (न क्षीवति अनेन वा अक्षीवयति वा। क्षीव मदे। पचाद्यच्।) समुद्रलवणं। इत्यमरः।

अक्षीवः त्रि, (न क्षीवति माद्यति इति न+क्षीव+अच्।) अमत्तः। इति मेदिनी।

अक्षीवः पुं, शोभाञ्जनवृक्षः। इत्यमरः॥

अक्षुण्णः त्रि, (न क्षुण्ण इति नञ्समासः।) अक्षोदितः। अचूर्णितः। इति क्षुदधात्वर्थदर्शनात्। अच्छिन्नः। यथा। अक्षुण्णं परिवप। इति चूड़ाकरणे पशुपतिः॥

अक्षुब्धः त्रि, क्षोभरहितः। अक्षोभितः। इति क्षुभधातोः क्तप्रत्यये क्षुब्धः। ततो न क्षुब्धः अक्षुब्ध इति नञ्समासनिष्पन्नः॥

अक्षेमं क्ली, (न क्षेमम् इति नञ्समासः।) अमङ्गलं। यथा—

"किन्नु तेषां गृहे क्षेममक्षेमं किन्नु साम्प्रतम्।
कथन्ते किन्नु सद्वृत्ता दुर्वृत्ताः किन्नु मे सुताः"॥

इति देवीमाहात्म्ये १ अध्यायः॥

अक्षोटः पुं, (अश्नोति। अशू व्याप्तौ संघाते च। बाहुलकादोटः॥ अक्षस्येव उटाः पर्णानि यस्य इति वा।) अक्षोड़वृक्षः। स च पर्व्वतजपीलुवृक्षः। इत्यमरटीकायां भरतः॥ आखरोट् इति हिन्दीभाषा। इति राजनिर्घण्टः॥

"पीलुः शैलभवोऽक्षोटः कर्परालश्च कीर्त्तितः।
अक्षोटकोऽपि वातादसदृशः कफपित्तहृत्"॥

इति भावप्रकाशः॥

अक्षोड़ः पुं, (अश्नोति इति अक्ष+ओड़प्रत्ययः।) पर्व्वतोत्पन्नपीलुवृक्षः। तत्पर्य्यायः। कर्परालः २ कन्दरालः ३ आक्षोड़ः ४ अक्षोटः ५ आक्षोटः ६। इत्यमरः तट्टीका च॥

अक्षोड़कः पुं, (अक्षोड़ एव इति स्वार्थे कन्।) पर्व्वतोत्पन्नपीलुवृक्षः। इति रत्नमाला॥

अक्षोभः पुं, (न क्षोभ इति नञ्समासः। नास्ति क्षोभो यस्येति वा।) हस्तिबन्धनस्तम्भः। तत्पर्य्यायः। आलानं २ प्रग्रहः ३। इति त्रिकाण्डशेषः॥ क्षोभरहिते त्रि॥

अक्षौरिभं क्ली, क्षुरिकर्म्माविहितनक्षत्रं। यथा,—

"उत्तराचित्तयोर्याम्ये रोहिणी-
रौद्रसर्पपितृभेषु चाग्निभे।
श्मश्रुकर्म्म सकलं विवर्ज्जयेत्
प्रेतकार्य्यमपि बुद्धिमान् नरः॥
चन्द्रशुद्धिर्यदा नास्ति तारायाश्च विशेषतः।
अक्षौरिभेऽपि कर्त्तव्यं चन्द्रचन्द्रजयोर्दिने"॥

इति ज्योतिस्तत्त्वं॥

अक्षौहिणी स्त्री, (ऊहः समूहः अस्ति अस्या इति इनिः। अक्षाणाम् ऊहिनी। पूर्व्वपदादिति णत्वम्। अक्षादूहिन्यामिति ङीप्।) सङ्ख्याविशेषयुक्तसेना। तद्यथा। २१८७० हस्तिनः। २१८७० रथाः। ६५६१० घोटकाः। १०९३५० पदातयः। समुदायेन २१८७००।

तथा चोक्तं।

"अक्षौहिण्यामित्यधिकैः सप्तत्यन्ताष्टभिः शतैः।

संयुक्तानि सहस्राणि गजानामेकविंशतिः ॥
एवमेव रथानान्तु सङ्ख्यानं कीर्त्तितं बुधैः ।
पञ्चषष्टिसहस्राणि षट्शतानि दशैव तु ।
सङ्ख्यातास्तुरगास्तज्ज्ञैर्विना रथैस्तुरङ्गमैः ।
नृणां शतसहस्रन्तु सहस्राणि नवैव तु ।
शतानि त्रीणि चान्यानि पञ्चाशच्च पदातयः" ।
इत्यमरभरतौ ॥ (अक्षौहिणीपरिमाणं। यथा महाभारते आदिपर्ब्बणि,—
"अक्षौहिण्य इति प्रोक्तं यत्त्वया सूतनन्दन ।
एतदिच्छामहे श्रोतुं सर्ब्बमेव यथायथम् ॥
अक्षौहिण्याः परीमाणं नराश्वरथदन्तिनाम् ।
यथावच्चैव नो ब्रूहि सर्ब्बं हि विदितं तव" ॥
सौतिरुवाच ।
"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिन्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥
त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ।
सृतास्त्रिसप्तु वाहिन्यः एतनेति विचक्षणैः ॥
चमूस्तु एतनास्त्रिसप्तसङ्ख्यनीकिनी ।
अनीकिनीं दशगुणां प्राऊरक्षौहिणीं बुधाः ॥
अक्षौहिण्याः प्रसङ्ख्याता रथानां द्विजसत्तमाः ।
सङ्ख्या गणिततत्त्वज्ञैः सहस्राण्येकविंशतिः ॥
शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः ।
गजानाञ्च परीमाणमेतदेव विनिर्द्दिशेत् ॥
ज्ञेयं शतसहस्रन्तु सहस्राणि नवैव तु ।
नराणामपि पञ्चाशच्छतानि त्रीणि चानघाः ॥
पञ्चषष्टिसहस्राणि तथाश्वानां शतानि च ।
दशोत्तराणि षट् प्राऊर्यथावदिह सङ्ख्यया ॥
एतामक्षौहिणीं प्राऊः सङ्ख्यातत्त्वविदो जनाः ।
यथा कथितवानस्मि विस्तरेण तपोधनाः" ॥

अक्षं क्ली, (अश्नुते । अशू व्याप्तौ संघाते च । क्षत्यशूभ्यां कित्सः । कापः । इत्युणादिकोषः ॥

अखट्टः, पुं, पियालवृक्षः । इति राजनिर्घण्टः ॥ पियासाल इति भाषा ॥

अखट्टिः, पुं, असद्व्यवहारः । आखुटि इति ख्यातः । इति चिकाण्डशेषः ॥

अखण्डः, चि, (न खण्डयते इति। खडि भेदने घञ्। नास्ति खण्डो यस्य इति वा।) खण्डरहितः। पूर्णः। इत्यमरः ॥ ("अखण्डं पुण्यानां फलमिव च तद्रूपमनघम्" इति शाकुन्तले।)

अखण्डनः, पुं, (नास्ति खण्डनं विच्छेदो यस्य सः।) कालः। इति शब्दचन्द्रिका ॥

अखण्डितव्रतः, चि, (न खण्डितः व्रतुरस्य इति। बहुव्रीहिः।) सफलवृत्तादिः। इति शब्दचन्द्रिका ॥

अखातं, क्ली, पुं, (न खातं नञ्समासः। खातभिन्नम् इत्यर्थः।) देवखातं। अकृत्रिमजलाशयः। इत्यमरः ॥ अखातमिति स्वामी ॥ पुंसि यथा,—अखातो देवखातक इत्यमरदत्तः ॥

अखाद्यं, चि, (न खाद्यं। अप्रशस्तं विरुद्धं वा खाद्यम्।) खाद्यानर्हं। अभक्ष्यं ॥

अखिलं, चि, (न विद्यते खिलम् अस्य। न+खिल।) सर्ब्बं। इत्यमरः ॥ (खिलमप्रहतं स्थानं। तत् न भवति इति अक्षयस्थानं।)

अख्यातः, चि, (न ख्यातः विरुद्धार्थे वा नञ्।) अख्यातिविशिष्टः। अप्रतिष्ठितः ॥ अप्रसिद्धः।

अग, म वक्रगतौ ; कुटिलगमने। इति कविकल्पद्रुमः ॥ म अगयति अगति सर्पः। इति दुर्गादासः ॥

अग, इ गतौ। इति कविकल्पद्रुमः ॥ गत्यां इ अङ्गते। इति दुर्गादासः ॥

अगः, पुं, (न गच्छति। गम गतौ। अन्येभ्योऽपीति अन्येष्वपि इति वा डः। न गोऽप्राणिषु इति पाक्षिको ऽप्रकृतिभावः।) पर्ब्बतः। वृक्षः। सर्पः। सूर्य्यः। इति हेमचन्द्रः ॥ (सरीसृपः।)

अगच्छः, पुं, (न+गच्छ।) वृक्षः। इति चिकाण्डशेषः ॥

अगजं, क्ली, (अग+जन्+ड।) शिलाजतु। इति रत्नमाला ॥ पर्ब्बतवृक्षजे चि ॥ (गिरिजाते।)

अगण्यं, त्रि, (न गण्यं। नञ् समासः।) अगणनीयं। अगणेयं। अगणितव्यं। यथा,—
"गुणैरगण्यैरतिशीलशालिभिरिति भारविः"।

अगदः, पुं, (गदविरुद्धः। न गदः अस्मात् इति वा।) औषधं। इत्यमरः ॥ आयुर्ब्वेदोक्ताष्टशाखान्तर्गतशाखाभेदः। यथा,—
"औषधान्यगदो विद्या दैवी च विविधा स्थितिः"। तपसैव प्रसिध्यन्ति"। इति मनुः।) नीरोगे चि। इति रमानाथः ॥

अगदङ्कारः, पुं, (अगदम् अरोगं करोति इति। अगद+कृ+अण्। मुमागमः।) वैद्यः। इत्यमरः ॥

अगमः, पुं, (न गच्छतीति। न+गम+अच्। पचाद्यच्।) वृक्षः। इत्यमरः ॥ पर्ब्बतः। न गच्छतीत्यगमः ॥

अगम्यं, त्रि, (न गम्य इति। न+गम्+यत्।) अगन्तव्यं। अगमनीयं। गमनायोग्यं। यथा,—
"अगम्या साभवत्तत्र यचाभूत् स महारणः"।
इति देवीमाहात्म्यं ॥

अगम्या, स्त्री, अमैथुनार्हा नारी। गम्यागम्याविवरणं यथा, यम उवाच,—
"या या गम्या नृणामेव निबोध कथयामि ते ।
स्वस्त्री गम्या च सर्ब्वेषामिति वेदनिरूपिता ॥
अगम्या च तदन्या या इति वेदविदो विदुः ।
सामान्यं कथितं सर्ब्वं विशेषं शृणु सुन्दरि ! ॥
अगम्याश्चैव या याश्च निबोध कथयामि ताः ।
शूद्राणां विप्रपत्नी च विप्राणां शूद्रकामिनी ॥
अत्यगम्या च निन्द्या च लोके वेदे पतिव्रते ।
शूद्रस्य ब्राह्मणीं गच्छेद् ब्रह्महत्याशतं लभेत् ॥
तत्समं ब्राह्मणी चापि कुम्भीपाकं व्रजेद्ध्रुवं ।
यदि शूद्रां व्रजेद्विप्रो हयमेधपतिरेव सः ॥
स भवो विप्रजातेश्च चाण्डालात् सोऽधमः स्मृतः ।
विष्ठासमश्च तत्पिण्डो मूत्रं तस्य च तर्पणं ॥
तत् पितॄणां सुराणाञ्च पूजने तत् समं सति ।
कोटिजन्मार्ज्जितं पुण्यं सन्ध्यास्नानतपसार्ज्जितं ॥
द्विजस्य हयमेधौघान्नश्यत्येव न संशयः ।
ब्राह्मणश्च सुरापीतो विड्भोजी वृषलीपतिः ॥
हरिवासरभोजी च कुम्भीपाकं व्रजेद्ध्रुवं ।
गुरुपत्नीं राजपत्नीं सपत्नीमातरं प्रसूं ॥
सुतां पुत्रवधूं श्वश्रूं सगर्भां भगिनीं सति ।
सोदरभ्रातृजायाञ्च भगिनीभ्रातृकन्यकां ॥
शिष्याञ्च शिष्यपत्नीञ्च भागिनेयस्य कामिनीं ।
भ्रातृपुत्रप्रियाञ्चैवात्यगम्यामाहुः पद्मजः ॥
एतासु कामनेकां वा यो व्रजेन्मानवाधमः ।
स मातृगामी वेदेषु ब्रह्महत्याशतं लभेत् ॥
अकर्म्माहोंऽपि सोऽस्पृश्यो लोके वेदेऽतिनिन्दितः ।
स याति कुम्भीपाकञ्च महापापी सुदुष्करं" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

अगरी, स्त्री, (न+गृ+अच्+ङीष्।) देवताड़वृक्षः। इत्यमरटीकायां भरतः ॥

अगर्हितः, चि, (न गर्हितः। नञ्समासः) अनिन्दितः। यथा,—
"ज्येष्ठः कुलं वर्द्धयति विनाशयति वा पुनः ।
ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः" ॥
इति मानवे ९ अध्याये १०९ श्लोकः ॥

अगरु, क्ली पुं, (न गरुः दुर्भरः अस्मात् इति।) अगुरु। इति हेमचन्द्रः ॥

अगस्तिः, पुं, (विन्ध्याख्यम् अगम् अस्यति इति अगस्तिः। अस्यतेः क्तिच्। बाहुलकात् तिर्वा।) वकवृक्षः। अगस्त्यमुनिः। इति मेदिनी ॥ यथा वैद्यके,—
"अगस्तिः पित्तकफजित् चतुर्थकहरो हिमः ।
रूक्षो वातकरस्तिक्तः प्रतिश्यायनिवारणः" ॥

अगस्तिद्रुः, पुं, वकपुष्पवृक्षः। इति चिकाण्डशेषः ॥

अगस्त्यः, पुं, (अगं विन्ध्यं स्त्यायति स्तभ्नाति वा। स्त्यै संघाते। आतोऽनुपसर्गे इति कः। अग+स्त्यै+क।) वकपुष्पवृक्षः। इति राजनिर्घण्टः ॥ मित्रावरुणयोः पुत्रः मुनिविशेषः। तस्य पर्य्यायः। कुम्भसम्भवः २ मैत्रावरुणिः ३। इत्यमरः ॥ अगस्तिः ४ पीताब्धिः ५ वातापिद्विट् ६ आग्नेयः ७ और्ब्वशीयः ८ आग्निमारुतः ९ घटोद्भवः १० इति हेमचन्द्रः ॥ (तदुत्पत्तिर्यथा यास्कनिरुक्ते,—
"तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्ब्वशीम् ।
रेतश्चस्कन्द तत्कुम्भे न्यपतत् वाप्सतीवरे ॥
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वशिष्ठश्च तत्रर्षी सम्बभूवतुः ॥
धाऽधा पतितं रेतः कलशे च जले स्थले ।
स्थले वशिष्ठस्तु मुनिः सम्बभूवर्षिसत्तमः ॥
कुम्भे त्वगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः ।
उदियाय ततोऽगस्त्यः ग्रस्यामाचो महातपाः ॥
मानेन सम्मितो यस्मात्तस्मान्मान्य इहोच्यते ।
यदा कुम्भादृषिर्जातः कुम्भेनापि महीयते" ॥

अगस्त्योदयः, पुं, (अगस्त्यस्य नक्षत्रस्य उदयः प्रत्यूषकाले गगने आविर्भावः।) आकाशे नक्षत्ररूपेण अगस्त्यमुनेरुदयः। स तु सौरमाद्रस्य सप्त-

दग्रादिने भवति। अस्यार्घ्यदानं तन्मासीयशुक्लदिनत्रये कर्त्तव्यं। यथा,—
"अगस्त्यार्घ्यदानं सौरेण सिंहराशौ विधानात्"।
यथा ब्रह्मवैवर्त्ते,—
"अप्राप्ते भास्करे कन्यां शुक्लभूतैस्त्रिभिर्दिनैः।
अर्घ्यं दद्युरगस्त्याय गौड़देशनिवासिनः"॥
यथा भीमपराक्रमे।
"यस्तु भाद्रपदस्यान्ते उदिते कलसोद्भवे।
अर्घ्यं दद्यादगस्त्याय सर्व्वान् कामान् लभेत सः"॥
यथा नारसिंहे।
"शङ्खे तोयं विनिक्षिप्य सितपुष्पाक्षतैर्युतं।
मन्त्रेणानेन वै दद्यात् दक्षिणाशामुखस्थितः॥
काशपुष्पप्रतीकाश अग्निमारुतसम्भव।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते"॥
प्रार्थनन्तु।
"आतापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु"॥
गन्धादिकन्तु अगस्त्याय नमः इत्यनेन देयं। विशेषानुपदेशे सामान्यतः प्राप्तत्वात् दक्षिणाशामुखस्थित इति गन्धादावपि प्रयोगाङ्गकर्त्तव्यमित्यादिति रत्नाकरः॥*॥ तत्पत्न्यर्घ्यमन्त्रस्तु।
"लोपामुद्रे महाभागे राजपुत्रि पतिव्रते।
ग्रहाणार्घ्यं मया दत्तं मित्रावरुणिवल्लभे"॥
इति मलमासतत्त्वं॥ (अगस्त्योदये जलानि प्रसीदन्ति इत्यागमः। तथा च रघौ,—
"प्रससादोदयादम्भः कुम्भयोनेर्महौजसः।

अगाधः, त्रि, (नास्ति गाधः स्थितिरत्र। नञोऽस्त्यर्थानामिति बहुव्रीहिः।) अतिगभीरः। अतलस्पर्शः। इत्यमरः॥ (अतिगम्भीरः। दुर्बोधाशयः।)

अगाधं, क्ली, छिद्रं। इति मेदिनी॥

अगाधजलः, पुं, (अगाधं जलं यस्मिन्। बहुव्रीहिः।) ह्रदः। इत्यमरः॥ त्रि। अपरिच्छेद्यजलविशिष्टः।)

अगारं, क्ली, (अगान् ऋच्छति। ऋ गतौ। कर्म्मण्यण्।) आगारं। गृहं। इत्यमरटीकायां भरतः॥
शून्यानि चाप्यगाराणि वनान्युपवनानि च"।
इति। 'खलात् क्षेत्रादगाराद्वा' इति मनुः।)

अगिरः, पुं, (अग+इर।) अग्निः॥ सूर्य्यः॥ राक्षसः॥ इति जटाधरः॥

अगुः, पुं, (नास्ति गौः किरणो यस्य सः। बहुव्रीहिः।) राजग्रहः इति दीपिका॥ किरणरहिते त्रि॥

अगुरु, क्ली, (न गुरु दुर्भरः अस्मात् इति। बहुव्रीहिः।) श्लिष्मपाकरुक्षः॥ कालागुरु। स्वनामप्रसिद्धसुगन्धिकाष्ठविशेषः। अगर इति ख्यातः। अस्य पर्य्यायः। वंशिकं १ राजार्हं २ लोहं ३ कृमिजं ४ जोङ्गकं ५। इत्यमरः॥ हरुजं ६ कृष्णं ७ लोहाख्यं ८ लघु ९। इति रत्नमाला॥ पीतकं १० वर्षाप्रसादनं ११ अनार्य्यकं १२ असारं १३ कृमिजग्धं १४ काष्ठकं १५। इति राजनिर्घण्टः॥ अस्य गुणाः। तिक्तत्वं। उष्णत्वं। कटुत्वं। लेपे रूक्षत्वं। व्रणकफवायुवान्तिमुखरोगनाशित्वञ्च। इति राजवल्लभः राजनिर्घण्टश्च॥
अगुरुर्वा पुंसीति वोपालितः॥ पुमान् इति सर्व्वानन्दः॥ गन्धद्रव्यविशेषः। यथा,—
अगुरु प्रवरं लोहं राजार्हं योगजं तथा।
वंशिकं कृमिजञ्चापि कृमिजग्धमनार्य्यकं॥
अगुरूष्णं कटुत्वं च तिक्तं तीक्ष्णञ्च पित्तलं।
लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत्॥
कृष्णं गुणाधिकं तत्तु लोहवद्वारि मज्जति।
अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः"॥
इति भावप्रकाशः॥

अगुरुः, त्रि, (न गुरुः। नञ् समासः।) गुरुभिन्नः। लघुः। इति मेदिनी॥

अगुरुश्लिष्मपा, स्त्री, श्लिष्मपाकरुक्षः। इत्यमरटीकायां स्वामी॥

अगूढगन्धं, क्ली, (न गूढः व्यक्तः गन्धः यस्य। बहुव्रीहिः।) हिङ्गु। इति राजनिर्घण्टः॥

अगोचरः, त्रि, (न गोचरः। नञ् समासः।) इन्द्रियजन्यप्रत्यक्षाविषयः॥ अज्ञातः। यथा,—
"अगोचरहतं व्याढ्यदितमांसमसृतृजेत्"।
इति राजवल्लभः॥ (वाचामगोचरचरित्रविचित्रिताय इति हनूमत्कारणतके।)

अगोकः [स्] पुं, (अगः ओकः यस्य सः। बहुव्रीहिः।) शरभः। सिंहः। पक्षी। इति मेदिनी॥ (त्रि। पर्व्वतवासी।)

अग्नायी, स्त्री, (अग्नेः स्त्री इत्यस्मिन् अर्थे कृषाकप्यग्निकुसितेत्यादिसूत्रेण अग्निशब्दस्यैकारादेशो ङीष् च।) अग्निभार्य्या। इत्यमरः॥ चेतायुगं। इति जटाधरः॥ ('अग्नायी स्वाहा च ऋतभुक्प्रिया' इत्यमरः।)

अग्निः, पुं, (अङ्क्तयन्ति अग्र्यं जन्म प्रापयन्ति इति व्युत्पत्त्या हविः प्रक्षेपाधिकरणेषु गार्हपत्याहवनीयदक्षिणाग्निसभ्यावसथ्यौपासनाख्येषु षड्ग्निषु। यद्वा अङ्क्ति ऊर्द्धं गच्छति इति। अगि गतौ। अङ्गेर्नलोपश्चेति निः नलोपश्च।) तेजःपदार्थविशेषः। आगुन इति भाषा। धर्म्मस्य वसुभार्य्यायां जातः प्रथमोऽग्निः। तस्य पत्नी स्वाहा। पुत्रास्त्रयः पावकः १ पवमानः २ शुचिः ३। षष्ठमन्वन्तरे अग्नेर्वैसोर्धारायां द्रविणादयः पुत्राः। एतेभ्यः पञ्चचत्वारिंशदग्नयो जाताः। सर्व्वे मिलित्वा एकोनपञ्चाशदग्नयः। इति पुराणं॥ अस्य पर्य्यायः। वैश्वानरः १ वह्निः २ वीतिहोत्रः ३ धनञ्जयः ४ रूपोटयोनिः ५ ज्वलनः ६ जातवेदाः ७ तनूनपात् ८ तनूनपाः ९ वह्निःशुष्मा १० वह्निः ११ शुष्मा १२ कृष्णावर्त्मा १३ शोचिष्केशः १४ उषर्बुधः १५ आश्रयाशुः १६ आशयाशुः १७ बृहद्भानुः १८ कृशानुः १९ पावकः २० अनलः २१ रोहिताश्वः २२ वायुसखः २३ वायुसखः २४ शिखावान् २५ शिखी २६ आशुशुक्षणिः २७ हिरण्यरेताः २८ ऋतभुक् २९ हव्यभुक् ३० दहनः ३१ हव्यवाहनः ३२ सप्तार्च्चिः ३३ दमुनाः ३४ दमूनाः ३५ शुक्रः ३६ चित्रभानुः ३७ विभावसुः ३८ शुचिः ३९ अग्नित्तं ४०। इत्यमरस्तट्टीका च॥ हयाकपिः ४१ जुह्वालः ४२ कपिलः ४३ पिङ्गलः ४४ अरुणिः ४५ अगिरः ४६ पाचनः ४७ विश्वमुखः ४८ क्रोधवाहनः ४९ कृष्णार्च्चिः ५० जुह्वारः ५१ उदर्च्चिः ५२ भास्करः ५३ वसुः ५४ शुष्मः ५५ हिमारातिः ५६ तमोनुत् ५७ सुशिखः ५८ सप्तजिह्वः ५९ अपपारिकः ६० सर्व्वदेवमुखः ६१। इति जटाधरः॥*॥ अस्य गुणाः। वायुकफस्तम्भशीतकम्पनाशकत्वं। आमाशयाजनकत्वं। रक्तपित्तप्रकोपकत्वञ्च। इति राजवल्लभः॥ अपिच।
"अग्नेर्दुर्द्धर्षता ज्योतिस्तापः पाकः प्रकाशनम्।
शोको रोगो लघुस्तैक्ष्णं सततञ्चोर्द्धभासिता"॥
इति मोक्षधर्म्मः॥*॥
अथ कर्म्मविशेषेऽग्नेर्नामानि। यथा,—
"लौकिके पावको ह्यग्निः प्रथमः परिकीर्त्तितः"१।
लौकिके नवग्रहप्रवेशादौ।
"अग्नेस्तु मारुतो नाम गर्भाधाने विधीयते २।
पुंसवने चन्द्रनामा ३ शुङ्गाकर्म्मणि शोभनः ४॥
सीमन्ते मङ्गलो नाम ५ प्रगल्भो जातकर्म्मणि ६।
नाम्नि स्यात् पार्थिवो ह्यग्निः ७ प्राशने च शुचिस्तथा ८
सत्यनामाथ चूड़ायां ९ व्रतादेशे समुद्भवः १०"।
व्रतादेशे उपनयने।
"गोदाने सूर्य्यनामा च ११ केशान्ते ह्यग्निरुच्यते १२"।
गोदाने गोदानाख्यसंस्कारे। केशान्ते समावर्त्तने।
"वैश्वानरो विसर्गे तु १३ विवाहे योजकः स्मृतः १४"।
विसर्गे सामिकर्त्तव्यकर्म्मविशेषे।
"चतुर्थ्यान्तु शिखीनाम १५ धृतिरग्निस्तथापरे १६"।
चतुर्थ्यां विवाहान्ते चतुर्थीहोमे। अपरे धृतिहोमादौ।
"प्रायश्चित्ते विधुश्चैव १७ पाकयज्ञे तु साहसः १८"।
प्रायश्चित्ते प्रायश्चित्तात्मकमहाव्याहृतिहोमादौ। पाकयज्ञे पाकाङ्गकहोमे वृषोत्सर्गग्रहप्रतिष्ठादौ।
"लक्षहोमे च वह्निः स्यात् १९ कोटिहोमे ऋताशनः २०।
पूर्णाऽऊत्यां मरुद्नाम २० शान्तिके वरदस्तथा २२॥
पौष्टिके बलदश्चैव २३ क्रोधाग्निश्चाभिचारिके २४।
वश्यर्थे शमनो नाम २५ वरदानेऽभिदूषकः २६॥
कोष्ठे तु जठरो नाम २७ कव्यादोऽमृतभक्षणे २८"॥
इति गोभिलपुत्रकृतसंग्रहः॥*॥ अथ तस्य रूपं। यथा,—
"पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोऽरुणः।
क्रोधस्थः साक्षसूत्रोऽग्निः सप्तार्च्चिः शक्तिधारकः"॥
इत्यादित्यपुराणं॥*॥ अथ होमीयाग्नेः शुभलक्षणानि। यथा,—
"अर्च्चिष्मान् पिण्डितशिखः सर्पिःकाञ्चनसन्निभः।
स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्यसिद्धये"॥
इति वायुपुराणं॥*॥ वैद्यकमते अग्निस्त्रिधा भौमः १ दिव्यः २ उदर्य्यः ३ तत्राद्यः काष्ठेन्धनप्रभवः ऊर्द्ध्वज्वलनस्वभावः पचनक्लेदादिसमर्थश्च।

द्वितीय उदकेन्धनः पर्य्यगुज्ज्वलनशीलो वाड़वः। तृतीय उभयेन्धनः पर्य्यगुज्ज्वलनशीलः भुक्तस्याहारस्य रसादिपरिणामनिमित्तश्च विद्युदादिश्च। इति विजयरक्षितोपरि सन्देहभञ्जिका ॥ * ॥

अपिच,—

"मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः। कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः" ॥

तेषां कार्य्यं यथा,—

"विषमोवातजान्रोगान् तीक्ष्णः पित्तनिमित्तजान्। करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ॥ समासमाग्नेरश्नीता मात्रा सम्यग्विपच्यते। स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः ॥ कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते। तीक्ष्णाग्निरिति तं विद्यात् समाग्निः श्रेष्ठ उच्यते"॥

इति माधवकरः॥ अत्यन्ततीक्ष्णाग्निरेव हि भस्मक उच्यते। स तु आहाराभावे श्लेष्मशोणितादीन् धातून् पाचयित्वा आशु मारयति। इति रक्षितः॥*॥

(देहजन्याग्नेः नादोत्पादकत्वं यथा सङ्गीतदर्पणे,—

"आत्मना प्रेरितं चित्तं वह्निमाहन्ति देहजम्। ब्रह्मग्रन्थिस्थितं प्राणं स प्रेरयति पावकः ॥ पावकप्रेरितः सोऽथ क्रमाद्ऊर्द्ध्वपथे चरन्। अतिसूक्ष्मध्वनिं नाभौ हृदि सूक्ष्मं गले पुनः ॥ पुष्टं शीर्षे त्वपुष्टञ्च क्वचिन्मं वदने तथा। आविर्भावयतीत्येवं पञ्चधा कीर्त्यते बुधैः ॥ नकारं प्राणनामानं दकारमनलं विदुः। जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते"

अग्नेः सर्व्वसाक्षित्वादि यथा रामायणे,—

"त्वमग्ने सर्व्वदेवानां शरीरान्तरगोचरः। त्वं साक्षी मम देहस्थस्त्राहि मां देवसत्तम"।

यथा च भारते,—

"आदित्यचन्द्रावनिलोऽनलश्च। द्यौर्भूमिरापो हृदयं यमश्च ॥ अहश्च रात्रिश्च उभे च सन्ध्ये। धर्म्मश्च जानाति नरस्य वृत्तम्" ॥

अस्य सर्व्वप्रथमाराधत्वं ऋग्वेदस्य सर्व्वप्रथमसूक्ते उक्तं यथा,—"अग्निमीले पुरोहितम्"। इत्यादि। विष्णुः। सूर्य्यः।) अग्निकोणाधिपतिः। इत्यमरः। चित्रकवृक्षः। रक्तचित्रकः। भल्लातकः। निम्बुकः॥ पित्तं। स्वर्णं। इति राजनिर्घण्टः।

अग्निकः, पुं, (अग्नि + सादृश्ये कप्रत्ययः) इन्द्रगोपनामरक्तवर्णकीटः। इति हेमचन्द्रः॥

अग्निकणः, पुं, (अग्नेः कणः। अग्नि + कण।) अग्निकणा। स्फुलिङ्गः। इत्यमरः॥

अग्निकारिका, स्त्री, (अग्नि + कारिका।) अग्निकार्य्यं। इति हेमचन्द्रः॥

अग्निकार्य्यं, क्ली, (अग्नि + कार्य्यं।) अग्नावग्नेर्वा कार्य्यं। हविर्दानादिपूर्व्वकाग्निज्वालनं। तत्पर्य्यायः। अग्नीन्धनं २ अग्नीधा ३ अग्निकारिका ४। इति हेमचन्द्रः॥ (होमादौ हविर्दानादिपूर्व्वकाग्निज्वालनं। अग्नौ सायं प्रातः समिद्धोमानुष्ठानं। यथा—

"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः। आचारमग्निकार्य्यञ्च सन्ध्योपासनमेव च" ॥

इति मनुः।)

अग्निकाष्ठं, क्ली, (अग्नि + काष्ठं।) अगुरु। इति राजनिर्घण्टः॥

अग्निकुक्कुटः, पुं, (अग्नेः कुक्कुटइव।) ज्वलदग्निदग्धोल्का। ज्वलन्त नुड़ा इति ख्यातः। इति चिकाण्डशेषः॥

अग्निकोणं, क्ली, (अग्नेः अग्निदेवेन अधिष्ठितमित्यर्थः कोणं।) पूर्व्वदक्षिणकोणं। तत्कोणाधिपतिरग्निः। इति ज्योतिषं॥ यथा हलायुधधृतं,—

"गत्वैव तीर्थं कर्त्तव्यं आर्द्रं तत्प्रीतिहेतुकम्। पूर्व्वार्द्धेऽप्यथवा प्रातर्दक्षिणे स्यात् पूर्व्वदक्षिणे" ॥

पूर्व्वदक्षिणे अग्निकोणे। इति प्रायश्चित्ततत्त्वं॥

अग्निक्रीड़ा, स्त्री, (अग्निभिः क्रीड़ा।) अग्निखेला। खधूपादित्यागः। आतशबाजीति ख्याता॥

अग्निगर्भः, पुं, (अग्निः गर्भे अभ्यन्तरे यस्य सः।) अग्निजारवृक्षः। सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥ (शमीवृक्षः। त्रि। अग्नियुक्तगर्भविशिष्टः। यथा,—"अग्निगर्भां शमीमिव"। इति शाकुन्तले।)

अग्निगर्भा, स्त्री, (अग्निः गर्भे यस्याः सा।) महाज्योतिष्मतीवृक्षः। इति राजनिर्घण्टः॥ (शमीवृक्षः।)

अग्निचित्, पुं, (अग्निं चितवान् स्वयम् इति चि चयने। अग्नौ चेरिति क्विप् तुगागमश्च।) अग्निहोत्री। साग्निकः। इत्यमरः॥ (यथा रघुवंशे—

"विदधे विधिमस्य नैष्ठिकं। यतिभिः सार्द्धमनग्निमग्निचित्"।)

अग्निजः, पुं, (अग्नि + जन् + ड।) अग्निजारवृक्षः। इति राजनिर्घण्टः॥ (त्रि। अग्निजातमात्रे।)

अग्निजातः, पुं, (अग्नेः जातः। अग्नि + जन् + क्त।) अग्निजारवृक्षः। इति राजनिर्घण्टः। (त्रि। अग्निजातमात्रे।)

अग्निजारः, पुं, (अग्नि + जार, अग्निं जठराग्निं जारयति परिपाकशक्तिं प्रदाय वर्द्धयति जॄ कर्म्मण्यण् इति पाणिनिसूत्रं) औषधविशेषः। अस्य पर्य्यायः। अग्निनिर्य्यासः २ अग्निगर्भः ३ अग्निजः ४ वह्वग्निमलः ५ जरायुः ६ अर्णवोद्भवः ७ अग्निजातः ८ अग्निजालः ९ सिन्धुफलः १०। अस्य गुणाः। कटुत्वं। उष्णत्वं। कफवायुसन्निपातशूलातिप्रीतिरोगनाशित्वं। पित्तप्रदत्वञ्च। इति राजनिर्घण्टः॥

अग्निजालः, पुं, (अग्नि + जाल।) अग्निजारवृक्षः। इति राजनिर्घण्टः॥

अग्निज्वाला, स्त्री, (अग्नेरिव ज्वाला यस्याः। अग्नेः ज्वाला इति वा।) जलपिप्पली। धातकीवृक्षः। इति राजनिर्घण्टः॥ अग्निशिखा॥ (लाङ्गलिकी।)

अग्निजिह्वा, स्त्री, (अग्नेः जिह्वा।) लाङ्गलीवृक्षः। विषलाङ्गला इति भाषा। इति राजनिर्घण्टः॥ अग्नेः काल्यादिसप्तार्च्चींषि। इति जटाधरः॥ अग्नेः सप्तशिखाः। तासां नामादिकं सप्तजिह्वशब्दे द्रष्टव्यं॥ (योगविशेषः। यथा,—

"सप्तषष्ट्यादितिथयः सोमवारादिभिर्युताः। अग्निजिह्वाः सप्त योगा मङ्गलेष्वतिगर्हिताः" ॥

इति। योगशास्त्रे।)

अग्निदमनी, स्त्री, (अग्नेः जठरानलस्य दमनी।) क्षुपविशेषः। अस्य पर्य्यायः। वह्निदमनी २ वह्निकण्टकी ३ वह्निकण्टारिका ४ गुच्छफला ५ क्षुद्रफला ६ क्षुद्रदुःस्पर्शा ७ क्षुद्रकण्टारिका ८ सर्व्वेन्द्रमाता ९ दमनी १०। अस्या गुणाः। कटुत्वं। उष्णत्वं। रूक्षत्वं। वातकफगुल्मशीहनाशित्वं। रुचिकरत्वं। अग्निदीपनत्वं। हृद्यत्वञ्च। इति राजनिर्घण्टः॥

अग्निदीपनः, त्रि, (अग्नेः जठरानलस्य दीपनः।) अग्निवर्द्धकः। जठराग्निकारकौषधविशेषः। यथा रसेन्द्रचिन्तामणौ,—

"पारदाभ्रतलवङ्गगन्धकं, भागयुग्ममरिचेन मिश्रितम्। तच्च जातिफलमर्द्धभागिकं, तित्तिड़ीफलरसेन मर्दितम् ॥ वह्निमान्दयशवल्लनाशनो, रामवाण इति विश्रुतो रसः। संग्रहग्रहणिकुम्भकर्णक- मामवातखरदूषणं जयेत् ॥ दीयते तु गुणकानुमानतः, सद्य एव जठराग्निदीपनः"।

"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुड़ेन वा। सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी" ॥

इति च भावप्रकाशः॥

अग्निदीप्ता, स्त्री, (अग्नि + दीप्ता) महाज्योतिष्मतीवृक्षः। इति राजनिर्घण्टः॥ (त्रि। वह्निज्वलितः। यथा,—"नापि कर्ण्याकारफलकैः वाणैः नापि विषाक्तैः नाप्यग्निदीप्तफलकैः" इति कुल्लूकभट्टः।)

अग्निदेवा, स्त्री, (अग्निः देवः अधिष्ठात्री देवता अस्या इति) क्षत्तिकानक्षत्रं। इति हेमचन्द्रः॥ (पुं, अग्निदेवः अग्निरूपो देवः। अग्निः देवः अस्य इति विग्रहे त्रि। अग्निपूजकः।)

अग्निनिर्य्यासः, पुं, अग्निजारवृक्षः। इति राजनिर्घण्टः॥

अग्निप्रस्तरः, पुं, अग्निजनकपाषाणः। चकमकीर पाथर इति भाषा॥

अग्निवर्द्धनं, क्ली, (अग्नेः जठरानलस्य वर्द्धनं वृद्धिकारकम्।) जठराग्निवृद्धिकारकम्। तथा,—

"जीरकं रुचिकृत् स्वर्य्यं गन्धाढ्यं कफवातनुत्। पाके च कटुतीक्ष्णोष्णं लघुमित्ताग्निवर्द्धनम्" ॥

इति राजवल्लभः॥

अग्निभं, क्ली, (अग्निरिव भाति इति। अग्नि + भा + क।) स्वर्णं। इति राजनिर्घण्टः॥

अग्निभूः, पुं, (अग्नेर्भवतीति। अग्नि + भू + क्विप्।) कार्त्तिकेयः। इत्यमरः॥ (पुरा किल तारकासुरेण उत्पीड़ितानां देवानां रक्षार्थं शिवेन

अग्निरूपं स्ववीर्यं वह्निमुखे क्षिप्तं। तेन अग्निना क्षत्रिकासु क्षिप्तं। ताश्च दैवागतगर्भरक्षार्थं शरवनं प्रविश्य प्रसूताः। तेन अग्निभूरिति कार्त्तिकेयः। जले क्ली। इति वेदपुराणे॥ यथाह मनुः,—

"अग्नौ दत्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः"॥

अग्निभूतिः, पुं, (अग्नि+भू+क्तिच्।) बौद्धभेदः। सच गोशलजैनाचार्य्यशिष्यः। इति हेमचन्द्रः॥

अग्निमणिः, पुं, सूर्य्यकान्तमणिः। इति जटाधरः॥

अग्निमन्थः, पुं, (अग्निं मन्नाति इति। मन्थ विलोड़ने। कर्म्मणि अण्।) गणिकारिकावृक्षः। इत्यमरः॥ (यथा वैद्यके,—

"अग्निमन्थः श्वयथुहृद्वीर्य्याणः कफवातहृत्। पाण्डुनुत् कटुकस्तिक्तस्तुवरो मधुरोऽग्निदः"॥

अग्निमन्थकुसुमशाकस्तु—

"अग्निमन्थभवबालसुनीता सप्तरात्रमुदके सुसाधिता। तक्रतप्तघृतयुक्तपाचिता हिङ्गुना जनितवासवासिता"॥

अपिच—

"अग्निमन्थोऽथ हृद्यश्च त्रिदोषघ्नमनः सरः। आध्मानच्छर्द्दिहृद्रोगचक्षूरोगविषापहः"॥)

अग्निमारुतिः, पुं, (अग्नौ जठराग्निविषये मारुतिः हनूमान् इव। तस्य जठराग्नौ वातापिप्रभृतयो राक्षसाः भस्मीभूता आसन्। इत्यसौ अग्निमारुतिरुच्यते) अगस्त्यमुनिः। इति हेमचन्द्रः॥

अग्निमुखः, पुं, (अग्निः मुखं यस्य, बहुव्रीहिः।) देवता। ब्राह्मणः। इति मेदिनी॥ चित्रकवृक्षः। भल्लातकः। इति विश्वः॥ (क्ली। अग्नेः पञ्चसु मुखेषु।)

अग्निमुखी, स्त्री, (अग्निरिव मुखं यस्याः। बहुव्रीहिः।) भल्लातकी (भेला)। इत्यमरः॥ लाङ्गलिकी। इति राजनिर्घण्टः॥

अग्निरक्तकं, क्ली, (अग्नेः रक्तकम्। षष्ठीतत्पुरुषः।) अग्न्याधानं। अग्निहोत्रं। इति हेमचन्द्रः॥

अग्निरजाः, [स्] पुं, (अग्नेः रजः स्फुलिङ्गइव।) इन्द्रगोपाख्यकीटः। इति हेमचन्द्रः॥ (क्ली— अग्निवीर्य्यं। स्वर्णं)।

अग्निरुहा, स्त्री, मांसरोहिणी। इति राजनिर्घण्टः॥

अग्निवर्द्धकः, त्रि, (अग्निं जठरानलं वर्द्धयति इति) अग्नि+वृध्+ण्वुल्। अग्निवर्द्धिकारकौषधादिः। आग्नेयः। इति वैद्यकं॥

अग्निवल्लभः, पुं, (अग्नेः वल्लभः उद्दीपकत्वात् प्रियः।) सालवृक्षः। राल। इति राजनिर्घण्टः॥

अग्निवाहः, पुं, (अग्नेः वाहः।) धूमः। इति चिकाण्डशेषः॥ (छागः)।

अग्निवाऽः, पुं, (अग्नेः वाऽरिव।) धूमः। इति जटाधरः॥ (प्रियव्रतपुत्रः। स्वायम्भुवमन्वन्तरपुत्रः।)

अग्निवित्, पुं, (अग्निं वेत्ति इति विदः क्विप्।) अग्निचित्। अग्निहोत्री। इति हेमचन्द्रः॥ (अग्निसंस्कारज्ञः।)

अग्निवीजं, क्ली, (अग्निः वीजं उत्पत्तिस्थानं यस्य तत्। अग्नेः स्वर्णस्य उत्पत्तिं यथाह मनुः,—

"यथाममेश्च संयोगात् हेम रूप्यञ्च निर्बभौ। तस्मात् तयोः स्वयोन्येव निर्गमो गुणवत्तरः"॥) स्वर्णं। इति चिकाण्डशेषः॥

अग्निवीर्य्यं, क्ली, (अग्नेः वीर्य्यं सारइव।) स्वर्णं। इति राजनिर्घण्टः॥ (त्रि, अग्नितुल्यबले)।

अग्निशिखं, क्ली, (अग्नेरिव शिखा केशरः अस्य।) स्वर्णं। इति राजनिर्घण्टः॥ कुङ्कुमं। कुसुम्भपुष्पं। इति मेदिनी॥ (जाङ्गलिकवृक्षः)।

अग्निशिखः, पुं, (अग्नेरिव शिखा रक्तवर्णः केशरः अस्य।) कुसुम्भवृक्षः। कुङ्कुमं। दीपः। नागः। इति शब्दरत्नावली॥

अग्निशिखा, स्त्री, (अग्नेरिव शिखा केशरः अस्याः।) लाङ्गलिकीवृक्षः। विषलाङ्गला इति भाषा। वृक्षविशेषः। तस्य पर्य्यायः। विशल्या १ अनन्ता २ फलिनी ३ शुक्लपुष्पी ४। इत्यमरः॥ (अग्नेः शिखा।) ज्वाला। आगुनेर शिष इति भाषा॥

अग्निशेखरं, क्ली, (अग्नेरिव शेखरं केशरः अस्य।) कुङ्कुमं। इति राजनिर्घण्टः॥

अग्निष्टोमः, [पुं, (अग्नीनां स्तोमः। अग्नेः स्तुत्स्तोमसोमा इति षः।) यज्ञविशेषः। इति शब्दरत्नावली॥ तस्य विधिः। ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्यविहितज्योतिष्टोमनामकयागविशेषस्य गुणविकारोऽग्निष्टोमो नाम। तस्य कालो वसन्तः। तत्राधिकारी अधीतवेद आहिताग्निश्च। इत्थं सोमः। देवता इन्द्रवाय्वादयः। ऋत्विजः षोडशः। तेषाञ्च चत्वारो गणाः। होट्टगणः १ अध्वर्य्युगणः २ ब्रह्मगणः ३ उद्गाट्टगणः ४। एकैकस्य गणस्य चत्वारश्चत्वारः। तत्र होट्टगणे होता १ प्रशास्ता २ अच्छावाकः ३ ग्रावस्तोता ४। अध्वर्य्युगणे अध्वर्य्युः १ प्रतिप्रस्थाता २ नेष्टा ३ उन्नेता ४। ब्रह्मगणे ब्रह्मा १ ब्राह्मणाच्छंसी २ अग्नीध्र ३ पोता ४। उद्गाट्टगणे उद्गाता १ प्रस्तोता २ प्रतिहर्त्ता ३ सुब्रह्मण्यः ४। स च पञ्चाहसाध्यः। प्रथमदिने दीक्षा दीक्षणीयादितदङ्गानुष्ठानं। तत्र द्वितीयदिवसे प्रायणीययागः सोमलताक्रयणं। ततो द्वितीयतृतीयचतुर्थदिवसेषु प्रातःकाले सायंकाले च प्रवर्ग्योपसन्नामकयागानुष्ठानं। चतुर्थदिवसे प्रवर्ग्योद्वासनानन्तरं अग्नीषोमीयपशवनुष्ठानं। तत्र यस्य यजमानस्य गृहे पितृपितामहप्रपितामहानां मध्ये केनापि वेदो नाधीतोऽग्निष्टोमो वा न कृतः स दुर्ब्राह्मणो भवति। तस्य दौर्ब्राह्मण्यपरिहारायाग्निनपशुः कर्त्तव्यः। यस्य यजमानस्य पितृपितामहप्रपितामहानां मध्ये केनापि सोमपानं न कृतं स्यात् तस्य सोमपानविच्छेददोषपरिहारार्थमैन्द्राग्नपशवनुष्ठानं कर्त्तव्यं। इत्थं त्रयाणां पशूनां युगपदालम्भपक्षे एकस्मिन्नेव यूपे त्रयाणां पशूनां बन्धनं। इत्थं पशुत्रयानुष्ठानं चतुर्थदिवसे तस्मिन्नेव दिने वा तृतीयभागे उत्थाय प्रयोगारम्भः कार्य्यः। तत्र पात्रासादनं। पात्राणि च ग्रहपात्रचमसपात्राणि स्थाल्यश्चेति। तत्र ग्रहपात्राणि वितस्तिमात्राणि उलूखलाकाराणि। ऊर्द्धपात्राणि चमसपात्राणि तावत्परिमितान्येव तिर्य्यगाकृतीनि कोणचतुष्टयविशिष्टानि धारणार्थदण्डयुक्तानि। स्थाल्यो मार्त्तिक्यः। ततः आरभ्य सोमलताक्रयणेन सोमरसं निष्क्रास्य निष्क्रास्य ग्रहैश्चमसैश्च होमः कर्त्तव्यः। तत्र सूर्य्योदयानन्तरं आग्नेयपशुयागः कर्त्तव्यः। एवमुक्त्यपर्य्यायान्ते कृते प्रातःसवनसमाप्तिः। ततो मध्यन्दिनसवनं। तत्र दक्षिणादानं। दक्षिणा च द्वादशोत्तरशतं गावः। ततस्तृतीयसवनं। इत्थं प्रातःसवनमाध्यन्दिनसवनतृतीयसवनरूपसवनत्रयात्मकः अग्निष्टोमः प्रधानयागः। इतरेऽङ्गयागाः। तृतीयसवनसमाप्युत्तरमवभृथयागः। उदके वरुणदेवताकपुरोडाशहोमः। तदनन्तरमनुबन्ध्या पशुयागः। तत्र गौः पशुः। तस्य कलिनिषिद्धत्वात् तस्य च नित्यत्वात् तत् स्थाने आमीक्षायागः। तत उदयनीया तत उदवसानीया। सा च पञ्चमदिवसे यावद्रात्रि कर्त्तव्या। तत्समाप्तावग्निष्टोमयागसमाप्तिः। इत्यग्निष्टोमयागीयपदार्थकलासूची॥

अग्निष्ठः, पुं, (अग्नौ तिष्ठतीति। अग्नि+स्था+कः)। लौहमयतण्डुलादिभर्जनपात्रं। इति चिकाण्डशेषः॥ (कड़ा इति भाषा)।

अग्निसखः, पुं, (अग्नेः सखा इति समासे राजाहःसखिभ्यष्टच् इति समासान्तष्टच्।) वायुः। वायुसखोऽग्निरिति दर्शनात्॥

अग्निसन्दीपनं, त्रि, (अग्नेः सन्दीपनम्। सम्+दीप्+ल्युट्।) वह्निवर्द्धकौषधादि। यथा,—

"एला त्वङ्नागपुष्पाणां मात्रोत्तरविवर्द्धिता। मरिचं पिप्पली शुण्ठी चतुःपञ्चगुणोत्तरा॥ द्रव्याण्येतानि यावन्ति तावती सितशर्करा। चूर्णमेतत् प्रयोक्तव्यमग्निसन्दीपनं परं"॥

इति भावप्रकाशः॥

अपि च।

"अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणं"।

इति राजवल्लभः॥

अग्निसम्भवः, पुं, (अग्निः सम्भवो यस्य सः। अग्नि+सम्+भू+अप्।) अरण्यकुसुम्भः। इति राजनिर्घण्टः॥ (कार्त्तिकेयः। त्रि। अग्निसमुत्पन्नः।)

अग्निसहायः, पुं, (अग्नेः जठरानलस्य सहायः उद्दीपकः। कपोतमांसस्य अग्निवर्द्धकत्वात्।) वनकपोतः। इति राजनिर्घण्टः॥ (अग्नेः सहायः बन्धुः। वायुः।)

अग्निसारं, क्ली, (अग्नेरिव सारः बलं यस्य।) रसाञ्जनं। इति राजनिर्घण्टः॥

अग्निस्तम्भनं, क्ली, (अग्नेः स्तम्भनम्। षष्ठीतत्पुरुषः।) मन्त्रौषधिद्वारा अग्नेर्दाहिकाशक्तिनिवारणं। तद्यथा,—

"मालूरस्य वसां गृह्य जलौकां तत्र पेषयेत्।

हस्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमं ॥
मालूरस्य स्थाने मानुषस्य इति वा पाठः ॥१॥
ग्राह्यशीरसमादाय खरमूत्रे निधापितं ।
अग्न्यागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमं ॥२॥
वायसी उदरं मद्म मण्डूकवसया सह ।
गुटिकां कारयेत्तेन ततोऽग्निं प्रक्षिपेदग्रौ ॥
एवमेतत् प्रयोगेण अग्निस्तम्भनमुत्तमं ॥३॥
रक्तपाटलमूलन्तु अवश्यञ्च मूलकैः ॥
दिव्यं स्तम्भयते क्षिप्रं पयःपिष्टं जलान्तकं ॥४॥
मुखीतका वचा कुष्ठं मरीचं नागरं तथा ॥
चर्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत् ॥५॥
गोरोचनां भल्लराजं चूर्णीकृत्य घृतं समं ॥
दिव्यस्तम्भञ्च पीत्वा स्यात्मन्त्रेणानेन वै तथा" ॥६॥
ओमह्मं अग्निस्तम्भनं कुरु । इति गारुडे १८६ अध्यायः ॥

अग्निखात्ताः, पुं, (अग्निना सुकु यथा स्यात् एवम् आत्ताः भक्षिताः, औतस्मात्तांग्निदग्धा इत्यर्थः । मन्वादिस्मृतिषु मूर्द्धन्यषकारवान् एव पाठः । मूर्द्धन्यादेशस्तु न युक्तः ।) मरीचिपुत्रलमिश्रगण-विशेषः । नित्यबहुवचनान्तशब्दोऽयं । इति शब्दमाला,—
"विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः ।
अग्निखात्ताश्च देवानां मारीचा लोकविश्रुताः" ॥
इति मनुः ।

अग्निहोत्रं, क्ली, (अग्नये होत्रम् अत्र इति बहुव्रीहिः ।) यज्ञविशेषः । तत् द्विविधं । माससाध्यं यावज्जीवनसाध्यञ्च । द्वितीये वि-शेषोऽयं । तदग्नौ यावज्जीवं प्रत्यहं प्रातः सायं हवनं । तदग्निना यागकर्त्तुर्दाहश्च । इति स्मृतिः ॥ तत्र क्रमो यथा । ब्राह्मणक्षत्रिय-वैश्यानां क्षतदारपरिग्रहाणां कायत्वान्यत्व-वधिरत्वपङ्गुत्वादिदोषरहितानां वर्णक्रमेण वस-न्तग्रीष्मप्रवृत्तेषु अग्न्याधानं विहितं । अग्न-यस्त्रयः गार्हपत्यः १ दक्षिणाग्निः २ आहवनीयः ३ । एषामाधानं नाम देशविशेषे तत्तन्मन्त्रैः स्थापनं । तेष्वग्निषु सायंकाले प्रातःकाले चा-ग्निहोत्रहोमः कर्त्तव्यः । अग्निहोत्रं नाम होमस्य नामधेयं । अग्नये होत्रं होमो यस्मिन् कर्म्मणीति व्यधिकरणबहुव्रीहिः । तत्र द्रव्याणि दश । पयः १ दधि २ यवागूः ३ घृतं ४ ओदनः ५ तण्डुलाः ६ सोमरसः ७ मांसं ८ तैलं ९ माषाः १० । सम्प्रति कलियुगे पयसा तण्डुलैर्यवागूवा च होम-प्रशिष्टाचारप्रसिद्धः । तत्र एक ऋत्विक् नित्यं होमः यजमानेन वा कर्त्तव्यः ऋत्विजा वा कारयितव्यः । अमावास्यायान्तु रात्रौ यवा-गूद्रव्येण यजमानेनैव कर्त्तव्यः । स चाग्निहोत्र-होमः आरम्भप्रभृति यावज्जीवनं कर्त्तव्यः । प्रथमदिने पूर्व्वोक्तानां दशानां द्रव्याणां मध्ये सम्प्रति प्रचलद्रूपायाञ्च मध्ये येन द्रव्येण प्रथमाग्निहोत्रहोमः कृतः तेनैव द्रव्येण या-वज्जीवनं कर्त्तव्यः । प्रथमहोमस्य यस्मिन् दिने अग्न्याधानं कृतं तस्मिन् दिने सायं-काले आरम्भणीयः । तत्र घृतहोमे सूर्य्यो देवता सायंकाले अग्निर्देवता । आधानानन्तरं प्रथमपौर्णमास्यां दर्शपूर्णमासयागारम्भः क-र्त्तव्यः । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति विधिवाक्यं । तत्र षड्यागाः । पौर्णमास्यां त्रयः । अमायां त्रयः । पौर्णमास्यामाग्नेयाग्नी-षोमीयोपांशुयागाख्ये यागाः । अमावस्या-यामाग्नेयैन्द्रदधिपये यागाख्ययः । तत्रामायां कर्त्तव्ययागत्रयस्य दर्शपदं नामधेयं । पौर्ण-मास्यां कर्त्तव्ययागत्रयस्य पूर्णमासपदं नाम-धेयं । दर्शश्च पूर्णमासश्च दर्शपूर्णमासाविति द्वन्द्वः । पौर्णमासयागस्य प्राथमिककालेऽपि अस्या-च्चतरमिति पाणिनीयानुशासनानुसारेण दर्श-शब्दस्याल्पाच्कत्वात् पूर्व्वनिपातः । दर्शपूर्ण-मासावपि यावज्जीवं कार्य्यौ । तत्रापि त्रयाणां वर्षाणामुपरि लिखितान्धत्वाद्यधिकारप्रतिबन्ध-कीभूतदोषसम्बन्धाभाववतां क्षतानिधानानां स-पत्नीकानामधिकारः । सामान्यतः पर्व्वण्यारम्भः प्रतिपदि याग इति परिभाषा । तत्राक्षत-सोमयागस्य यजमानस्य पौर्णमास्यामाग्नेयपुरो-डाशयागः आज्येनोपांशुयाजयागः । अमायान्तु आग्नेयपुरोडाशयागः ऐन्द्राग्नपुरोडाशयागः । क्षतसोमयागस्य यजमानस्य तु पौर्णमास्यामा-ग्नेयपुरोडाशयागः आज्येनोपांशुयाजयागः अग्नी-षोमीयपुरोडाशयागः । अमायान्तु आग्नेयपुरो-डाशयागः ऐन्द्रपयोयागः ऐन्द्रदधियागश्चेति त्रयः । तत्र ऋत्विजश्चत्वारः । अध्वर्य्युः १ ब्रह्मा २ होता ३ अग्नीदिति ४ । यजुर्वेदैकमन्त्रकर्त्ता अध्वर्य्युः । ऋग्यजुःसामवेदत्रयकर्म्मकर्त्ता ब्रह्मा । ऋग्वेदकर्म्मकर्त्ता होता । अग्नीत्तु प्रायशो-ऽध्वर्य्योरेवानुयायी तत्प्रेरितकर्म्मकर्त्ता । पुरो-डाशो व्रीहितण्डुलैर्यवतण्डुलैर्वा कर्त्तव्यः । अग्नि-होत्रवदयेन द्रव्येणारम्भः क्षतसोमेन द्रव्येण याव-ज्जीवं यागः कर्त्तव्यः । आरम्भवेलायामिच्छेन्न नियामिकेत्यादिदिक्षात्रमिदं । इति यजुर्वेदः ॥ यज्ञाग्निसङ्ख्यः । तत्पर्य्यायः । अग्न्याधानं २ अ-ग्निरक्षणं ३ । इति हेमचन्द्रः ॥

अग्निहोत्रः, पुं, अग्निः । हुतं । इति मेदिनी ॥

अग्निहोत्री, [न्] पुं, (अग्निहोत्रम् अस्यास्तीति । अत इनिठनाविति नीनिः ।) अग्निहोत्रयागकर्त्ता । तत्पर्य्यायः । अग्निवित् २ आहिताग्निः ३ । इति हेमचन्द्रः ॥ अग्निचित् ४ । इत्यमरः ॥ साग्निकः ५ । इति पुराणं ॥
("अग्निहोत्र्यविधाग्नीन् ब्राह्मणः कामकारतः ।
चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत्" ॥
इति मनुः ।)

अग्नीध्रः, पुं, (अग्नि + इन्ध + रन् ।) ऋत्विग्विशेषः । तस्य कर्म्माग्निरक्षणं । इत्यमरः ॥ (अग्निद्वारा वरणीयो ऋत्विग्विशेषः । काम्यायां प्रियव्रतात् उत्पन्नो नृपभेदः । स्वायम्भुवमनुपुत्रो राजभेदः ।)

अग्नीध्रा, स्त्री, अग्निकार्य्यं । इविर्द्धानादिपूर्व्वकाग्नि-ध्वानं । इति हेमचन्द्रः ॥

अग्नीन्धनं, क्ली, (अग्नौ इन्धनम् । अग्नि + इन्ध् + करणे ल्युट् ।) अग्निकार्य्यं । इविर्द्धानादिपूर्व्व-काग्निज्वालनं । इति हेमचन्द्रः ॥ यथाह मनुः—
"अग्नीन्धनं भैक्षचर्य्यामधः शय्यां गुरोर्हितम् ।
आसमावर्त्तनात् कुर्य्यात् कृतोपनयनो द्विजः" ॥

अग्न्यस्त्रं, क्ली, (अग्निमयम् अस्त्रम् । कर्म्मधारयः ।) आग्नेयास्त्रं । अग्निघटितास्त्रं । वन्दूककामान इत्यादिभाषा ॥

अग्न्याधानं, क्ली, (अग्नेः आधानं । अग्नि + आ + धा + ल्युट् ।) श्रुतिविहिताग्निसंस्कारः । अग्नि-रक्षणं । अग्निहोत्रं । इति हेमचन्द्रः ॥

अग्न्यागारं, पुं, (अग्नेः आगारः ।) यज्ञाग्न्याधार-कुण्डं । इति जटाधरः ॥

अग्न्युत्पातः, पुं, (अग्नेः उत्पातः ।) आकाशादिषु अग्निविकारः । धूमकेतूल्कापातादिः । अग्नि-शिखोत्पातो वा । स तु मन्त्रादिद्वारा अग्ने-र्दाहशक्तिनिवारणं । तत्पर्य्यायः । उपाहितः २ । इत्यमरटीकाकृता च ॥

अग्रं, क्ली, (अग्यते अगति वा । अग गतौ ऋचेन्द्रेति साधु ।) उपरिभागः । आगा इति भाषा । अस्य पर्य्यायः । शिरः २ शिखरं ३ इत्यमरः ॥ पुरस्तात् । अवलम्बनं । पक्षपरि-मार्गं । प्रान्तं । समूहः । इति मेदिनी ॥ (भिक्षाविशेषः । यासचतुष्टयम् । "यासप्र-माणा भिक्षास्यादग्रं यासचतुष्टयम्" । इति स्मृतेः ।)

अग्रः, त्रि, श्रेष्ठः । उत्तमः । इत्यमरः ॥ प्रधानं । अधिकः । प्रथमः । इति मेदिनी ॥

अग्रगण्यः, त्रि, (अग्रे गण्यः । गणसङ्ख्याने, यत् ।) अ गणनीयः । यथा,—
"भ्रमणभवनयाने यद्भवानग्रगण्यः" ।
इति महाष्टकं ॥

अग्रगामी [न्] त्रि, (अग्रे गच्छतीति । अग्र + गम् + णिनि ।) अग्रे गमनकर्त्ता । अग्रेसरः । इति हेमचन्द्रः ॥

अग्रजः, पुं, (अग्रे जात इति सप्तम्यां जनेः डः ।) ज्येष्ठभ्राता । तत्पर्य्यायः । पूर्व्वजः २ अग्रियः ३ । इत्यमरः ॥ (यथाह मनुः,—
"सर्व्वेषां धनजातानामाददीताग्रमग्रजः" ।)
ब्राह्मणः । इति हेमचन्द्रः ॥ अग्रे जाते त्रि ॥

अग्रजङ्घा, स्त्री, (अग्रा जङ्घा अवयवावयविनोर-भेदात् (कर्म्मधारयः । अथवा जङ्घाया अग्रं षष्ठी-तत् राजदन्तादित्वात् परनिपातः) प्रतिजङ्घा । जङ्घाग्रभागः । इति हेमचन्द्रः ॥

अग्रजन्मा, [न्] पुं, (अग्रे जन्म यस्य स बहुव्रीहिः,) (जन् + भावे मनिन्) ब्राह्मणः । इत्यमरः ॥
"अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट्कर्म्माण्यग्रजन्मनः" ॥
मनुः । ज्येष्ठभ्राता । ब्रह्मा । इति विश्वः ॥

अग्रजातकः, पुं, (अग्रे जातं जन्म यस्य स बहुव्रीहिः, (जन् + भावे क्तः) ब्राह्मणः । समासान्त कः इति शब्दरत्नावली ॥

अग्रजातिः, पुं, (अग्रे जातिर्जन्म यस्य सः) (जन् + भावे क्तिन्) ब्राह्मणः। इति हेमचन्द्रः॥

अग्रणीः, त्रि, (अग्रे नीयतेऽसौ अग्र + नी + क्विप् अग्रयामाभ्याञ्च इति पाणिनिसूत्रेण णत्वं।) (वक्ता च पुं, यथा चास्याग्रणीत्वं तथाभिशब्दे निरुक्तव्याख्यायामुक्तम्) अग्रिमः। श्रेष्ठः। इति हेमचन्द्रः॥

अग्रतः, [स्] (अग्रे अग्र + सप्तम्यर्थे तस् अग्रं) अग्रे। प्रथमे। तत्पर्य्यायः। पुरतः २ पुरः ३। इत्यमरः॥

अग्रतःसरः, त्रि, (अग्रतः अग्रे सरति गच्छति यः सः अग्रतः + सृ + टः। स्त्रियां ङीप् अग्रतःसरी) (पुरोऽग्रतोऽग्रेषु सर्त्तेः इति पाणिनिसूत्रम्) अग्रगामी। इत्यमरः॥

अग्रदानी, [न्] पुं, (अग्रे दानं प्रेतोद्देश्येन तिलादेर्यत्र याह्मत्वेन विद्यतेऽस्य अग्र + दान + विद्यमानार्थे इन्) पतितब्राह्मणविशेषः। स च प्रेतसम्बन्धदानकषड्रसतिलादिद्रव्यग्राही। यथा,—
"लोभी विप्रश्च शूद्राणामग्रे दानं गृहीतवान्।
यद्गृहे मृतदानानामग्रदानी बभूव सः"॥
इति ब्रह्मवैवर्त्तपुराणं॥ तत्पर्य्यायः। आग्रहारिकः २। इति स्मृतिः॥

अग्रपर्णी, स्त्री, (अग्रे पर्ण पत्रं यस्याः सा जातित्वात् ङीप्) अजशोणवृक्षः। इति रत्नमाला॥ आलकुशी इति केचित्॥

अग्रमांसं, क्ली, (अग्रं प्रधानं मन्यते ज्ञायते यत् अग्र + मन् + स। पृषोदरादित्वात् दीर्घः।) हृदयं। इत्यमरः॥ उदरमध्यवर्त्तिमांसवर्द्धनरूपरोगविशेषः। इति वैद्यकं॥

अग्रयानं, क्ली, (अग्रं प्रथमं यानं सेनागमनं) गासोरं। सेनाग्रगमनं। इति हेमचन्द्रः॥

अग्रलोहिता, स्त्री, (अग्रमग्रभागः लोहितं रक्तवर्णं यस्याः सा बहुव्रीहिः) चिल्लीशाकं। इति राजनिर्घण्टः॥

अग्रबीजः, पुं, (अग्रं शाखाग्रं बीजमुत्पत्तिकारणं यस्य सः बहुव्रीहिः। कलम इति भाषायाम्) बीजाग्रवृक्षमात्रं। स च कुरण्टादिः। इति हेमचन्द्रः॥

अग्रसन्धानी, स्त्री, (अग्रे फलभोगात्पूर्व्वं सन्धीयते अन्विष्यते कार्य्यमनया अग्र + सम् + धा + करणे ल्युट् स्त्रियां ङीप्) यमपञ्जिका। जीवानां शुभाशुभकर्म्मलिखितं यमस्य पुस्तकं। इति त्रिकाण्डशेषः॥

अग्रसरः, त्रि, (अग्रे सरति गच्छति अग्र + सृ + टः।) अग्रेसरः। अग्रगामी। इति हेमचन्द्रः॥ (यथा,—"अग्रेसरो जघन्यानां")। इति भट्टिकाव्ये।

अग्रहः, पुं, (नास्ति ग्रहः गार्हस्थ्याश्रमस्वीकारो यस्य सः बहुव्रीहिः। वानप्रस्थे। नास्ति ग्रहो ज्ञानं यस्य सः।) ज्ञानशून्ये च। वानप्रस्थः। इति त्रिकाण्डशेषः। अग्रह इति पाठे गार्हस्थ्याश्रमबहिर्भूतः॥

अग्रहायणः, पुं, (हायनस्य वर्षस्य अग्रः। ह्रस्वो ग्रीष्मकालयोरिति सूत्रेण ह्रा + ल्युट् युक् च।) मासविशेषः। तस्य व्युत्पत्तिर्यथा,—"हायनस्याग्रोऽग्रहायणः निपातनात् परनिपातनत्वञ्च"। इत्यमरटीकायां भरतः॥ मार्गशीर्षमासः। इति शब्दरत्नावली॥ अस्य पर्य्यायः आग्रहायणिके ज्ञातफलं तत्कृत्यञ्च मार्गशीर्षे द्रष्टव्यम्॥

अग्राह्यं, त्रि, (न ग्राह्यं ग्रहणीयं ग्रह + कर्म्मणि। ण्यत् ग्रहणायोग्ये) अग्रहणीयं। ग्रहणायोग्यं यथा,—
"अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलं।
सालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रतां"॥
इति तिथ्यादित्तत्त्वं॥

अग्रिमः, त्रि, (अग्रे भवः अग्र + डिमच्) प्रधानं। उत्तमः। इति हेमचन्द्रः॥ ज्येष्ठः। अग्रजः। इति जटाधरः॥

अग्रिमा, स्त्री, (अग्रे भवा अग्र + डिमच्) लवणीफलं। लोणा इति ख्याता। इति शब्दचन्द्रिका॥

अग्रियं, त्रि, (अग्रे भवम् अग्र + घ) प्रधानं। इत्यमरः॥

अग्रियः, पुं, (अग्रे भव अग्र + घ) अग्रजः। ज्येष्ठभ्राता। इत्यमरः॥

अग्र्योयं, त्रि, (अग्रे भवः अग्र + क्य) प्रधानं। इत्यमरः॥ अग्रजे पुं,। इति तट्टीकायां रमानाथः॥

अग्रुः, स्त्री, (अङ्क्ते द्रव्यं गृह्यतेऽनया अगि + क्रु ऊङुत इति स्त्रियां वा ऊङ्। निपातनात् गलोपः।) अङ्गुलिः। वेदप्रचुरप्रयोगोऽयं॥

अग्रेगाः, पुं, अग्रगामी। इति मुग्धबोधव्याकरणं॥

अग्रेगूः, पुं, (अग्रे गच्छति यः अग्रे + गम् + क्विप् ऊधगमादीनामित्युपसङ्ख्यानमिति पाणिनिवार्त्तिकेन मलोपः अकारस्य ऊकारः।) अग्रगामी। इत्युणादिवृत्तिः॥

अग्रेदिधिषुः, पुं, (दिधिं धैर्य्यं स्यति इन्द्रियदौर्ब्बल्यात् त्यजति दिधि + सो + अन्युदृनकूजन्भुकन्कुकेलूकर्कन्यूदिधिषु इत्युणादिसूत्रेण कु धत्वञ्च दिधिषुः पुनर्भूर्योषित् अग्रे गमनोद्यादिधिषुः द्विरूढा स्त्री यस्य सः बहु० हलदन्तात् सप्तम्याः संज्ञायामिति पाणिनिसूत्रेण अलुक् पुनर्भूविवाहकारिणि जने) द्विरूढैव यस्य कुटुम्बिनी स द्विजः। द्विज इत्युपलक्षणं। दिधिषुः परपूर्व्वाग्रे दिधिषुस्तत्पुरन्ध्रिकः। इति सामान्येन नाममालादर्शनात्। द्वितीयवारविवाहितपुत्रादिमती गृहिणीह स्वामी इति भाषा। इत्यमरः॥

अग्रेदिधिषुः, स्त्री, (प्रागूढज्येष्ठभगिन्याः प्रागूढकनिष्ठभगिन्यां। अग्रे प्रथमे ज्येष्ठायां भगिन्यां विद्यमानायां गमनोद्यादिधिषुः ज्येष्ठा विवाहकालासहनरूपधैर्य्यलोपकारिणीति विग्रहे प्राक्पार्थिवादित्वात् समासः मध्यपदलोपश्च।) अविवाहितज्येष्ठभगिनीसत्त्वे अग्रे विवाहिता कनिष्ठा। यथा,—
"ज्येष्ठायां विद्यमानायां कन्यायामुह्यतेऽनुजा।
सा चाग्रे दिधिषूर्ज्ञेया पूर्व्वा च दिधिषुः स्मृता"॥
इति देवलः। दिधिषूर्दैर्घीकारान्तोऽपि॥

अग्रेवणं, क्ली, (वनस्याग्रे राजदन्तादित्वात् परनिपातः अलुक्। वनं पुरगे आदित्वात् णत्वम्।) वनस्याग्रभागः। इति शब्दमाला॥

अग्रेसरः, त्रि, (अग्रे सरति गच्छतीति अग्रे + सृ + टः।) अग्रे गमनकर्त्ता। तत्पर्य्यायः। पुरोगः २ प्रष्ठः ३ अग्रतःसरः ४ पुरःसरः ५। इत्यमरः॥ अग्रगामी ६ अग्रसरः ७ अग्रगः ८ पुरोगमः ९ पुरोगामी १०। इति हेमचन्द्रः॥

अग्रेसरिकः, त्रि, (अग्रेसरणं गमनम् अग्रे + सृ + भावे अप् अग्रेसरे गमने प्रहृतः अग्रेसर + ठन् अग्रगामिनि।) अग्रगामी। इति त्रिकाण्डशेषः॥

अग्र्यः, त्रि, (अग्रे भवः अग्र + यत्।) प्रधानं। उत्तमः इत्यमरः। ज्येष्ठभ्रातरि पुं इति तट्टीकायां रमानाथः॥

अघ इ ङ गतौ (अधि गतौ कर्म्मणि लट् ते इदितो नुम् धातोरिति पाणिनिसूत्रेण नुम् अङ्घते। कर्त्तरि लट् ते अङ्क्ते)। निन्दायां। आरम्भे। जवे। इति कविकल्पद्रुमः॥ जवो वेगगतिः। इ अङ्घते। ङ अङ्क्ते वायुर्वेगेन गच्छतीत्यर्थः। जवे एव कैश्चित् पठ्यते। इति दुर्गादासः॥

अघ त् क तत्कृतौ। इति कविकल्पद्रुमः॥ तत्कृतिः पापकृतिः। अघयति व्याधः। कर्म्मणोऽर्थमध्यपाठादकर्म्मकोऽयं। तथा च,—
"धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रिया"॥
इति गोयीचन्द्रः॥ धात्वर्थेन सह कर्म्मण उपसङ्ग्रहादित्यर्थः। क्रमेणोदाहरणानि। नदी वहति क्षरतीत्यर्थः। अघयति व्याधः। भवति घटः। आह्वते जनः। इति दुर्गादासः॥

अघं, क्ली, (अघ पापकरणे क्षुरां अघयति अघ + णिच् + अच्।) पापं। दुःखं। व्यसनं। इत्यमरः॥

अघमर्षणं, त्रि, (अघं पापं मृष्यते उत्पन्नत्वेऽपि नाशनेन कर्म्मात्मत्वात् सह्यतेऽनेन अघ + मृष् + करणे ल्युट्।) पापनाशनं। सर्व्वपापध्वंसिजप्यं। इत्यमरः॥ (उत्पन्नपापनाशार्थं जप्ये मन्त्रभेदे यथा सन्ध्यामन्त्रे द्रुपदादिवेत्यादि) अश्वमेधयज्ञावभृथस्नानमन्त्रः। वैदिकसन्ध्यान्तर्गतमन्त्रकरणकाघातजलप्रक्षेपरूपपापनाशनक्रियाविशेषः। इति स्मृतिः॥ तान्त्रिकसन्ध्यायान्तु,—
"षड्ङ्गन्यासमाचर्य्य वामहस्ते जलं ततः।
गृहीत्वा दक्षिणेनैव संपुटं कारयेद्बुधः॥
शिववाग्युजलप्रख्यैवह्निबीजैस्त्रिधा पुनः।
अभिमन्त्र्य च मूलेन सप्तधा तत्त्वमुद्रया॥
निःक्षिपेत् तज्जलं मूर्द्ध्नि शेषं दत्त्वा निधाय च।
इड़यापूर्य्य देहान्तःस्थालितं पापसञ्चयं॥
कृष्णवर्णं तदुदकं दक्षनाड्या विरेचयेत्।
दक्षहस्ते च तन्मन्त्री पापरूपं विचिन्त्य च॥
पुरतो वध्यपाषाणे निक्षिपेदस्त्रमुच्चरन्"॥
इति तन्त्रसारः॥

अघवान्, [त्] त्रि, (अघं पापं विद्यतेऽस्य अघ + मतुप्) अघविशिष्टः। पापी॥

अङ्क

अघासुरः, पुं, (अघनामा असुरः शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च) अघनामासुरः। स च कंसराजसेनापतिः। इति श्रीभागवतं॥

अघोः, [स्] क्ष, सम्बोधनं। यथा अघो यज्ञ इति वोपदेवः॥

अघोरः, पुं, (न घोरः सौम्यरूपः "या ते रुद्र! शिवा तनूरघोरा पापनाशिनी" इति वेदः।) महादेवः। इति शिवचतुर्दशीव्रतपूजायां॥ अतिभयानके अभयानके च त्रि॥

अघोरा, स्त्री, (नास्ति घोरा भयानका मूर्त्तिर्यस्याः। अतिभयानका इति व्युत्पत्त्यर्थः) भाद्रकृष्णचतुर्दशी। यथा,—

"भाद्रे माससिते पक्षे अघोराख्या चतुर्दशी।
तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवं"॥

इति स्मृतिः॥

अघोषः, त्रि, (नास्ति घोषः शब्दो यत्र बहुव्रीहिः शब्दशून्ये, न अल्पः घोषः शब्दो यत्र बहुव्रीहिः अल्पध्वनियुक्ते। तथाहि,—

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"॥

इति स्मरणात्।) आभीरशून्यदेशादिः। शब्दरहितः। अल्पध्वनियुक्तः। कलापादिव्याकरणस्य संज्ञाविशेषे पुं। स तु वर्गप्रथमद्वितीयवर्णाः शषसाश्च॥

अघ्न्याः, पुं, (न हन्ति विनाशयति खण्डत्वात् न+हन्+कर्त्तरि यक्। निपातनात् साधु।) ब्रह्मा। इत्युणादिकोषः॥

अघ्न्या, स्त्री, (न हन्यते या हन्+कर्म्मणि यक् स्त्रियामाप्।) पतिं वो अघ्न्यानां धेनूनाम् इति वेदः। "अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपि"॥ इति निषेधात्।) स्त्रीगवी। इत्यमरः॥

अङ्क् त् क पदे। लक्ष्मणि। इति कविकल्पद्रुमः॥ कण्ठ्यवर्गाद्योपधः। पदं सङ्ज्ञासंस्थानं। लक्ष्म चिह्नयुक्तक्रिया। तथा च,—

"अर्थक्रियैव धातूनां कर्त्तव्यापारलक्षणा।
आत्मनिष्ठं क्रियार्थत्वं धात्वर्थेष्वक्रियात्मसु"॥

इति वोपदेवः॥

"अङ्क्यत्यरिसैन्यानि युधि एतेषु शायकैः"। इति हलायुधः॥ अङ्कयति अङ्कापयति। इति दुर्गादासः॥

अङ्कः, पुं, (अङ्क्यति चिह्नयति, अङ्क+अच्) चिह्नं। (स्वनामकाङ्कां निचखान शायकं इति रघुवंशे।) क्रोड़। (सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकं। इति विष्णुपुराणे॥) रूपकविशेषः। अपराधः। रेखा। विभूषणं। समीपं। स्थानं। नाटकांशः। इति मेदिनी॥ (प्रत्यक्षनेतृचरितो रसभावससुज्ज्वलः। भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः॥ अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः। इति साहित्यदर्पणे)। चिह्नयुक्तं। इति विश्वः॥ शरीरं। इत्युणादिकोषः॥ नवसङ्ख्या। इति ज्योतिषं॥ (कुचभूमायां। प्रकरणे। अगे। कटिप्रदेशे। कलङ्के। एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः। इति कुमारसम्भवे।)

अङ्कतिः, पुं, (अच्यते पूज्यतेऽसौ अन्च+कर्म्मणि अति न्यङ्क्वादीनाञ्च इति पाणिनिसूत्रेण चस्य कः। वायुपक्षे अञ्चति गच्छति इति व्युत्पत्त्या) ब्रह्मा। अग्निः। अग्निहोत्री। इति विश्वः॥ वायुः। इति त्रिकाण्डशेषः॥

अङ्कनं, क्ली, (अङ्क+णिच् भावे ल्युट्) सङ्ज्ञासंस्थानं। चिह्नयुक्तीकरणं। आँकन् दागन इति भाषा। चिह्नकरणं। यथा परागरक्रिरसौ।

"अन्यत्राङ्कनलक्ष्माभ्यां वाहनिर्म्मोचने कृते।
सायं संयमनार्थन्तु न दुष्येद्दोधवन्धयोः"॥

अङ्कनं चिशूलादिचिह्नकरणं। लक्ष्म स्थिरचिह्नकरणं। इति प्रायश्चित्ततत्त्वं॥

अङ्कपालिका, स्त्री, (अङ्कपालि+स्वार्थे कः स्त्रियामाप्।) आलिङ्गनं। इति शब्दमाला॥

अङ्कपाली, स्त्री, (अङ्केन क्रोड़ेन पालयति अङ्क+पा+अलि स्त्रियां वा ङीप् पक्षे अङ्कपालिः।) आलिङ्गनं। धात्री। वेदिकाख्यगन्धद्रव्यं। तस्य नामान्तरं कोटिः। इति मेदिनी॥

अङ्कलोडः, पुं, (अङ्केन लोढ्यतेऽसौ लोढ+घञ्) चिह्नोटकटच्चः। चेँचको इति भाषा। चिह्नोड़मूल इति केचित्॥ अस्य गुणाः। गुरुत्वं। अजीर्णकारित्वं। शीतलत्वञ्च। इति राजवल्लभः॥

अङ्कितः, त्रि, (अङ्क+क्त।) लाञ्छितः। चिह्नितः। इति शब्दरत्नावली॥

अङ्की, स्त्री, (अङ्कः+स्त्रियां ङीप्।) अङ्कः। मृदङ्गविशेषः। इति शब्दरत्नावली॥

अङ्कुरः, पुं, (अङ्क+उरच्) बीजोद्भवः। नूतनोत्पन्नत्वणादिः। (दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे तन्वी स्थिता कतिचिदेव पदानि गत्वा। इति शाकुन्तले। अस्य पर्य्यायः। अभिनवोद्भिद् २। इत्यमरः॥ उद्भेदः ३ प्ररोहः ४ (चूताङ्कुरास्वादकषायकण्ठः॥ इति कुमारसम्भवे।) अकुरः ५। इति राजनिर्घण्टः। रोहः ६ अङ्करः ७। इति हेमचन्द्रः॥ जलं। रक्तं। लोम। इति मेदिनी॥

अङ्कुरकः, पुं, (अङ्क्यते लवणादिभिर्म्मीयतेऽसौ अङ्क+उरच् ततः स्वार्थे क) नीड़ः। पक्षिवासस्थानं। इति शब्दमाला॥

अङ्कुशः, पुं क्ली, (अङ्क्यते हस्तिचालनार्थमाहन्यतेऽनेन अङ्क+उशच्।) हस्तिचालनार्थलोहमयवक्राग्रास्त्रं। डाङ्कुश इति भाषा। तत्पर्य्यायः। प्रहणिः २। इत्यमरः॥ हणिः ३। इति तट्टीका॥ अङ्कूशः ४। इत्युणादिकोषः॥ (रामायणे,—

"उष्ट्रान् हयान् खरान् नागान् जघ्नुर्दण्डकषाङ्कुशैः॥
कम्पना अङ्कुशा भल्लाः कालचक्रा गदास्तथा"॥)

अङ्कुशदुर्धरः, पुं, (अङ्कुशेन दुर्धियते दुर्ह्रियतेऽसौ दुर्+धृ+कर्म्मणि खल्।) दुरन्तहस्ती। इति त्रिकाण्डशेषः॥

अङ्कुशी, स्त्री, (अच्यते आराध्यतेऽसौ गौडविशेषैः

अङ्क

अङ्क+उशच् स्त्रियां ङीप्। व्यङ्गादीनाञ्च इति चस्य कः।) जिनानां चतुर्विंशतिशासनदेवयन्तर्गतदेवीविशेषः। इति हेमचन्द्रः॥

अङ्कूरः, पुं, (अङ्क+खर्जूरादित्वात् ऊरच् वा उरच्) अङ्कुरः। अभिनवोद्भिद्। इति हेमचन्द्रः॥

अङ्कूषः, पुं क्ली, (अङ्क्यते हस्तिचालनार्थमाहन्यतेऽनेन अङ्क+ऊषच् करणे) अङ्कुशः। इत्युणादिकोषः॥

अङ्कोटः, पुं, (अङ्क+ओटच्) अङ्कोठवृक्षः। इति रत्नमाला॥

अङ्कोठः, पुं, (अङ्क्यतेऽनुभूयतेऽसौ अङ्क+ओठच्) वृक्षविशेषः। आकोड़ इति ख्यातः। धलआँकूड़ा इति केचित्। अस्य पर्य्यायः। निकोचकः २। इत्यमरः॥ निकोठकः ३ निकोचकः ४। इति भरतः॥ अङ्कोलकः ५ बोधः ६ नेदिष्ठः ७ दीर्घकीलकः ८। इति जटाधरः॥ अङ्कोटः ९ रामठः १०। इति रत्नमाला॥ कोठरः ११ रेचौ १२ गूढपत्रः १३ गुप्तखेहः १४ पीतसारः १५ मदनः १६ गूढवल्लिका १७ पीतः १८ ताम्रफलः १९ दीर्घकीलः २० गुणाढ्यकः २१ कोलकः २२ लम्बकर्णः २३ गन्धपुष्पः २४ रोचनः २५ विघ्नान्तकेलगर्भः २६। अस्य गुणाः। कटुत्वं। स्निग्धत्वं। विषलूतादिदोषनाशित्वं। कफवायुहारित्वं। सूतशुद्धिकारित्वं। रेचकत्वञ्च॥ * ॥ तत्फलगुणाः। शीतलत्वं। स्वादुत्वं। श्लेष्मनाशित्वं। गुरुत्वं। बलकारित्वं। धातुपोषकत्वं। विरेचकत्वं। वातपित्तदाहक्षयदुष्टरक्तनाशित्वञ्च। इति राजनिर्घण्टः॥

अङ्कोलः, पुं, (अङ्क्यतेऽनुभूयतेऽसौ अङ्क+ओलच्) अङ्कोठवृक्षः। आकोड़ यस्य प्रसिद्धिः। इत्यमरटीकायां स्वामी॥

अङ्कोलकः, पुं, (अङ्कोल+स्वार्थे कः) अङ्कोठवृक्षः। इति जटाधरः।

अङ्कोलिका, स्त्री, आलिङ्गनं। इति शब्दमाला॥

अङ्कोल्लसारः, पुं, (अङ्कोल्लस्य सारः षष्ठीतत् स्थिरांशः।) स्थावरविषप्रभेदः। इति हेमचन्द्रः॥

अङ्क्षः, पुं, (अङ्क्यते वाद्यते हरीतक्याकृतिर्वाद्यविशेषः यः। अङ्क+क्यत्।) हरीतक्याकृतिमृदङ्गः। माखओयाज इति भाषा। इत्यमरः॥ तदुक्तं,—

"सार्द्धतालत्रयायामचतुर्दशाङ्गुलाननः।
हरीतक्याकृतिर्यः स्यादङ्क्षोऽङ्गे स हि वाद्यते॥

इति भरतः॥ (अपराधिविशेषाणां ललाटादिषु राज्ञा अङ्कनीयः। मनुः,—

"प्रायश्चित्तन्तु कुर्व्वाणाः सर्व्वे वर्णा यथोदितं।
नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसं"॥)

अङ्क्, त् क पदे। (अङ्क्यति चेष्टयति अङ्क+णिच् अच्।) लक्ष्मणि। इति कविकल्पद्रुमः॥ कण्ठ्यवर्गद्वितीयोपधः। पदं सङ्ज्ञासंस्थानं। लक्ष्म चिह्नयुक्तक्रिया। तथा च।

अर्थक्रियैव धातूनां कर्त्तव्यापारलक्षणा।
आत्मनिष्ठं क्रियार्थत्वं धात्वर्थेष्वक्रियात्मसु॥

इति वोपदेवः। अङ्क्यति अङ्कापयति, इति दुर्गादासः॥

अङ्ग, य सम्बोधनं। इत्यमरः॥ (रामायणे,—
"अङ्गवेत्तत्त्व सौमित्रे कस्येमां मन्यसे चमूं"।
पुनरर्थः।)

अङ्गं, क्ली, शरीरादेरेकदेशः। आं इति हिन्दीभाषा। तत्पर्य्यायः। अवयवः २ प्रतीकः ३ अघनः ४। इत्यमरः॥ गात्रं। (भट्टारतिलके,—
"अङ्गानि चम्पकदलैः स विधाय धाता"।)
अप्रधानं। (साहित्यदर्पणे,—
"एक एव भवेदङ्गी भट्टारो वीर एव वा।
अङ्गमन्ये रसाः सर्व्वे कार्य्यनिर्वहणेऽद्भुतं"॥
उपायः। इति मेदिनी॥ (अङ्गते विषयो बुध्यते अनेन अङ्ग + करणे घञ् इति व्युत्पत्त्या) मनः। अङ्गं मनसि काये चेत्यभिधानान्तरदर्शनात्। यथा। "हिरण्यगर्भोऽङ्गभुवं मुनिं हरिरिति माघः"॥ वेदाङ्गशास्त्राणि षट्। यथा,—
"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु"॥
शिक्षा १ कल्पः २ व्याकरणं ३ निरुक्तं ४ ज्योतिषं ५ छन्दः ६। इत्यमरः॥ अङ्गस्य लक्षणं यथा। तदीयप्रधानपतनजनकव्यापारजनकत्वे सति तदीयप्रधानपतनाजनकत्वं। इति तिथ्यादितत्त्वटीका॥

अङ्गः, पुं, स्वनामख्यातदेशः। इति हेमचन्द्रः॥ मेदिनीकारमते नित्यबहुवचनान्तशब्दोऽयं। देशविशेषः। यथा,—
"वैद्यनाथं समारभ्य सुवनेशान्तगं शिवे।
तावदङ्गाभिधो देशो यात्रायां न हि दुष्यते॥
इति शक्तिसङ्गमतन्त्रे ७ पटलः॥ (अयञ्च देशः सरस्वाः सङ्गमे अवस्थितः, अत्र महादेवस्य ऊङ्कारेण कामस्य अङ्गत्यागात् अयं अङ्गनाम्ना ख्यातः। यथा रामायणे,—
"अनङ्ग इति विख्यातस्ततःप्रभृति राघव।
स चाङ्गविषयः श्रीमान् यत्राङ्गं स मुमोच ह"॥

अङ्गः, त्रि, (अङ्गं विद्यतेऽस्य अङ्ग + अर्श आद्यच् तथा मेदिन्यां अङ्गं गात्रे प्रतीकोपाययोः पुं भूम्नि नीलति। क्लीवैकत्वे त्वप्रधाने त्रिष्वङ्गवति चान्तिके इति मेदिनी।) अङ्गविशिष्टः। निकटः। इति मेदिनी॥

अङ्गग्रहः, पुं, (ग्रह + भावे अप्। अङ्गानां रोगादिना ग्रहः वेदना) गात्रवेदना। इति वैद्यकं॥

अङ्गजं, क्ली, (अङ्गे जायते अङ्ग + जन् + सप्तम्यां जनेर्डः इति पाणिनिसूत्रेण डः कर्त्तरि) रक्तं। इति मेदिनी॥ शरीरजे वाच्यलिङ्गं॥

अङ्गजः, पुं, पुत्रः। वेगः। कामः। मदः। इति विश्वमेदिन्यौ॥ मदस्थाने गदः। इति काचिन्मेदिनी॥ (स्त्रीणां यौवने सात्त्विकभावविशेषः। यथा साहित्यदर्पणे,—
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः।
अलङ्काराश्च भावहावहेलाश्चयोऽङ्गजाः॥

अङ्गजा, स्त्री, कन्या। अङ्गाज्जात इतस्तात् स्त्रियामाप्॥

अङ्गणं, क्ली, (अङ्गते गम्यते अत्र + अधिकरणे ल्युट् एषोदरादित्वात्साधुत्वम्) अङ्गनं। चत्वरं। इत्यमरटीकायां भरतः॥ (देवीमाहात्म्ये, विमानं हंससंयुक्तमेतत्तिष्ठतितेऽङ्गने।)

अङ्गतिः, पुं, (अङ्गते सेवायै गम्यते अग्निं + कर्म्मणि अति। ब्रह्मणि विष्णौ अग्नौ च।) ब्रह्मा। विष्णुः। अग्निः। अग्निहोत्री। इति शब्दरत्नावली॥ (अग्निहोत्रिपक्षे तु कर्त्तरि अति। अङ्गते गम्यते ऽनेन इति व्युत्पत्त्या वाहने।)

अङ्गदं, क्ली, (अङ्गं ददाति खण्डयति अङ्ग + दो + कः उपपदसमासः) केयूरं। ताड़ बाजू इत्यादि भाषा। इत्यमरः॥ (रामायणे,—
"धूयमानैश्च वासोभिः श्लक्ष्णैरङ्गदमूषणैः"।)

अङ्गदः, पुं, (अङ्गं ददाति शुद्धकाले अवयवद्वयति अङ्ग + दो + कर्त्तरि कः) कपिभेदः। स च बालिनामवानरराजपुत्रः। इति मेदिनी॥ (रामायणे,—
"कुमुदं पद्मदमभिर्जाम्बवन्तञ्च सप्तभिः।
अग्रीत्या बालिनः पुत्रमङ्गदं बिभिदे शरैः"॥

अङ्गदा, स्त्री, अङ्गं देहं ददाति स्वस्वामिनि समर्पयति या अङ्ग + दा + कर्त्तरि कः स्त्रियामाप्) दक्षिण दिग्हस्तिभार्य्या। इति मेदिनीकरहेमचन्द्रौ॥

अङ्गनं, क्ली, अङ्गनभूमिः। आङ्गन् उठान इति भाषा। तत्पर्य्यायः। चत्वरं २ अजिरं ३। इत्यमरः॥ अङ्गणं ४। इति तट्टीका॥ प्राङ्गणं। (रामायणे,—
"महाराजाङ्गनं शूराः प्रविशन्तु महोदयं"।)
५। यानं। गमनं। इति मेदिनी॥

अङ्गना, स्त्री, प्रशस्तानि अङ्गानि अस्या इति अङ्गात् कल्याण इति नः। कामिनी। सुन्दराङ्गी स्त्री। इति मेदिनी। (मनुः—
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः"।)
सार्व्वभौमनाम्न उत्तरदिग्गजस्य पत्नी। इत्यमरः॥ कर्कटकन्यालक्षिकमकरमीनराशयः। इति ज्योतिषतत्त्वम्॥

अङ्गनाप्रियः, पुं, (अङ्गनानां प्रियः प्रीतिप्रदः। स्त्रियश्च अशोकपुष्पेण स्वीयमङ्गमलङ्कुर्व्वन्ति इति लोके प्रसिद्धिः। अङ्गनाया दक्षिणदिक्पत्न्याः प्रियः इतिव्युत्पत्त्या तत्स्वामिनि) अशोकवृक्षः। इति शब्दमाला॥

अङ्गपालिः, पुं, (अङ्गेन पाल्यते संश्लिष्यतेऽनेन अङ्ग + पा + अलिः) आलिङ्गनं। इति त्रिकाण्डशेषः॥ स्त्रियां ङीप् वेदिकाख्यगन्धद्रव्ये।)

अङ्गमर्द्दः, पुं, (अङ्गं मर्द्दयति यः अङ्ग + मर्द्द + कर्म्मण्यण् उपपदसमासः।) अङ्गमर्द्दनकारकभृत्यः। तत्पर्य्यायः। संवाहकः २। इति हेमचन्द्रः॥ अङ्गमर्द्दकः ३। इति त्रिकाण्डशेषः॥ अङ्गमर्द्दी ४। इति हलायुधः॥

अङ्गमर्द्दकः, पुं, (अङ्गस्य मर्द्दकः संवाहकः षष्ठीतत्।) अङ्गमर्द्दः। इति त्रिकाण्डशेषः॥

अङ्गमर्द्दी [न्] पुं, अङ्गं साधु मर्द्दयति संवाहयति यः अङ्ग + मर्द्द + णिनि।) अङ्गमर्द्दः। इति हलायुधः॥

अङ्गरक्षः, पुं, (रक्षं रक्षावर्णं अङ्गं यस्य स बहुव्रीहिः वाहिताग्न्यादिषु इति सूत्रेण परं पूर्व्वं वा निपात्यते।) वृक्षविशेषः। गुग्गारोचनी इति ख्यातः। तत्पर्य्यायः। पिकाक्षः २ रोचनी ३ लघुपत्रकः ४। इति शब्दचन्द्रिका॥ कम्बिलक्षः ५ कर्कशः ६ चन्द्रः ७ रक्ताङ्गः ८। इत्यमरः॥

अङ्गरक्षिणी, स्त्री, अङ्गं रक्षति पालयति या अङ्ग + रक्ष + णिनि।) अङ्गरक्षार्थं। साँजोया इति भाषा। तत्पर्य्यायः। जालिका २ जालप्राया ३ आयसी ४। इति हेमचन्द्रः॥

अङ्गरागः, पुं, रज्यतेऽङ्गमनेनेति रज्यतेऽङ्गेन रज्ज + करणे घञ् घञि च भावकरणयोरिति नलोपोऽदुपधत्वञ्च। अङ्गस्य रागः षष्ठीतत्पुरुषः।) गात्ररञ्जनं। अङ्गे चन्दनादिलेपनं। तत्पर्य्यायः। विलेपनं २। इति हेमचन्द्रः॥ (रामायणे,—
"स्नानानि चाङ्गरागांश्च माल्यानि विविधानि च"।)

अङ्गराट्, पुं, (अङ्गे तद्देशे राजते यः अङ्ग + राज् + क्विप् उपपदसमासः)। अङ्गदेशाधिपतिः। स च कर्णः। इति हेमचन्द्रः॥ (दशरथसखः लोमपादश्च रामायणे,—
"सख्यं तस्याङ्गराजेन भविष्यति महात्मनः।
कन्या चास्य महाभागा शान्ता नाम भविष्यति॥
अङ्गराजेऽनपत्यस्तु लोमपादो भविष्यति।
स राजानं दशरथं प्रार्थयिष्यति भूमिपः"॥

अङ्गलोध्रः, पुं, (अङ्गेन अङ्गुल्यादिना लोध्यते छिद्यतेऽसौ लोदि + कर्म्मणि यत् अङ्गेन लोध्रः तृतीयातत् पुरुषः। अङ्गलोध्र इति पाठे अङ्गेन तद्वृक्षस्थितचिह्नविशेषेण लोध्रः अनुमेयः धातूनामनेकार्थत्वादत्र लोदिधातुरनुमानार्थः।) चिल्हाटकवृक्षः। इति रत्नमाला॥ अङ्गलोध्र इति च पाठः॥

अङ्गवः, पुं, अङ्गे खदेहे वाति अतिशुष्कत्वात् क्षीणमिव भवति अङ्ग + वा + कर्त्तरि कः। शुष्कफलं। इति शब्दचन्द्रिका॥

अङ्गविक्षतिः, पुं, (अङ्गानां विक्षतिर्व्विकारो यस्मात् बहुव्रीहिः।) अपस्मारोगः। इति राजनिर्घण्टः॥

अङ्गविक्षेपः, पुं, (वि + क्षिप् + भावे घञ्। अङ्गस्य विक्षेपः एकस्थानादन्यस्थाने चालनं षष्ठीतत्पुरुषः अङ्गहारोऽङ्गविक्षेप इत्यमरः।) अङ्गहारः। अङ्गचालनरूपनृत्यं। इत्यमरः॥

अङ्गवैक्षतं, क्ली, (विक्षति + प्रज्ञादिभ्यश्च इति स्वार्थे अण् अङ्गस्य वैक्षतम्) आकारः। इङ्गितं। इति जटाधरः

अङ्गसंस्कारः, पुं, (अङ्गस्य संस्कारः शोभा षष्ठीतत्। सम् + कृ + भावे घञ् संपर्य्युपेभ्यः इत्यादिना इति सुट्।) कुङ्कमादिना शरीरशोभाधानरूपसंस्कारः। इति भरतः॥ स्नानोद्वर्त्तनादिः, इति स्वामी॥ शरीरसंस्कारमात्रं। इत्यन्ये॥ स्वेदादिकृतदौर्गन्ध्यहरणाय चन्दनादिना उद्वर्त्तनानुलेपनादिः। इति सारसुन्दरी। तत्पर्य्यायः। परिकर्म्म २। इत्यमरः॥ प्रतिकर्म्म ३। इति क्वचित् पाठः॥

अङ्गहारः, पुं, (अङ्गानां हारः एकस्थानादन्यस्थाने

चालनं षष्ठीतत्पुरुषः।) अङ्कानां स्थानात् स्थानान्तरनयनं। तत्पर्य्यायः। अङ्कविन्यासः २। इत्यमरः॥ अङ्कहारिः ३। इति तट्टीका॥ स्थिरहस्तपर्य्यस्तकादिको दार्ढिंग्यत्प्रकारः। इति मधुः॥ वृश्चिकभ्रमरादिदार्ढिंग्यद्रूपः। इति रायः। अङ्कुल्यादिविन्यासस्थिरंग्यद्रूपः। इति कौमुदी॥

अङ्कहारिः, पुं, (अङ्कानि क्रियन्ते चाल्यन्तेऽत्र अङ्क + हृ + इञ् अजादिभ्यश्च इति पाणिनिसूत्रेण अधिकरणे इञ्। रङ्गभूमिः, नृत्यभूमिश्च।) अङ्कहारः। इति भरतधृतहडुचन्द्रः॥

अङ्कहीनः, त्रि, (अङ्केन हीनः रहितः ततीया तत्पुरुषः। हा + कर्म्मणि क्तः।) अवयवरहितः। अङ्कहानिर्विग्रिष्टः। (यथा, याज्ञवल्क्यः,—
"कालकर्म्मात्मवीजानां दोषैर्मातुस्तथैव च।
गर्भस्य वैकृतं दृष्टमङ्गहीनादि जन्मतः॥)
अङ्गहीनं क्रियाहीनं विधिहीनञ्च यद्भवेत्"॥
इति स्मृतिः॥ कामदेवे पुंलिङ्गः॥

अङ्काधिपः, पुं, (अङ्कस्य देशविशेषस्य अधिपः षष्ठीतत्पुरुषः।) अङ्कदेशाधिपतिः। स च कर्णः। इति भूरिप्रयोगः॥

अङ्गारः, पुं, क्ली, (अगि + आरन् इदितो नुम्धातोरिति नुम्।) दग्धकाष्ठखण्डं। तत्तु निरग्नि साग्नि च। कयला आङ्गरा इति भाषा। तत्पर्य्यायः। अलातं २ उल्मुकं ३। इत्यमरः॥ आलातं ४ उल्मुकं ५। इति तट्टीका।
("घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्"।)
अङ्गारः, पुं, (रक्तं रक्तवर्णमङ्गं यस्य स बहुव्रीहिः पृषोदरादित्वात् साधुः) मङ्गलग्रहः। इति मेदिनी॥ हितावली। इति वैद्यकं॥

अङ्गारकः, पुं, (अङ्गार + स्वार्थे कः।) मङ्गलग्रहः इत्यमरः,—
("धरात्मजः कुजो भौमो भूमिजोभूमिनन्दनः।
अङ्गारको यमश्चैव सर्व्वरोगापहारकः"॥
इति वराहपुराणम्।) (रामायणे,—
"दिवीव ग्रहयोर्घोरं बुधाङ्गारकयोर्महत्।
कौशलानाञ्च नक्षत्रं ज्येष्ठा मैत्राग्निदैवतं।
आक्रम्याङ्गारकस्तस्थौ विशाखामपि चाम्बरे"॥)
अङ्गारः। कुशकण्टकवृक्षः। इति मेदिनी॥ भृङ्गराजः। इति राजनिर्घण्टः॥

अङ्गारतैलं, क्ली, (अङ्गारेण पक्वं तैलं शाकपार्थिवादित्वात् समासः। मध्यपदलोपश्च) स्वनामख्यातपक्वतैलं। तस्य पाकप्रकारो गुणश्च। यथा,—
"मूर्व्वा लाक्षा हरिद्रे द्वे मञ्जिष्ठा सेन्द्रवारुणी।
वृहती सैन्धवं कुष्ठं राला मांसी घृतावरी॥
आरनालाढ्यकेनैव तैलप्रस्थं विपाचयेत्।
तैलमङ्गारकं नाम सर्व्वज्वरविमोचनं"॥
इति सुखबोधः॥

अङ्गारकमणिः, पुं, (रक्तवर्णत्वादङ्गारकवत् मणिः अथवा अङ्गारकस्य मणिः षष्ठीतत्पुरुषः। माणिक्यं भास्करे देयं चन्द्रे मुक्तां प्रदापयेत् प्रवालञ्च कुजे दद्यादित्यादिना तत्कृतासुभप्रतिकाराय प्रवालदानोक्तेः तत्प्रियत्वं।) प्रवालः। इति राजनिर्घण्टः॥

अङ्गारकुष्ठकः, पुं, (अङ्गारवर्णं कुष्ठमिव कन्) हितावली। इति राजनिर्घण्टः॥

अङ्गारधानिका, स्त्री, (अङ्गाराश्चि धीयन्ते धार्य्यन्तेऽत्र धा + अधिकरणे ल्युट् स्त्रियां ङीप्। अङ्गाराणां धानी ततः स्वार्थे कः। पक्षे अङ्गारधानी।) अङ्गारधारणपात्रं। आङ्टा इति ख्याता। साँजाल इति केचित्। तत्पर्य्यायः। अङ्गारशकटी २ हसन्ती ३ हसनी ४। इत्यमरः॥

अङ्गारपरिपाचितं, क्ली, (अङ्गारेण परिपाच्यते परि + पच् + स्वार्थे णिच् ततः कर्म्मणि क्तः।) अङ्गारपक्वं। शूलविङ्गाङ्गारदग्धमांसं। कागाव इति ख्यातं। इति शब्दचन्द्रिका॥

अङ्गारपर्णः, पुं, (अङ्गारवत् पर्णं पत्रं यस्य स बहुव्रीहिः। वनभेदे। सोऽस्यास्ति ततः अर्शं आद्यच् तत्स्वामी) चित्ररथगन्धर्व्वः। इति महाभारतं॥

अङ्गारपुष्पः, पुं, (अङ्गारवत् रक्तवर्णं पुष्पं यस्य सः बहुव्रीहिः।) इङ्गुदीवृक्षः। जियापुता। इति ख्यातः। इति रत्नमाला॥

अङ्गारमञ्जी, स्त्री, (अङ्गारवत् रक्तवर्णा मञ्जी मञ्जरी यस्याः सा बहुव्रीहिः। समासान्तविधेरनित्यत्वात् कबभावः।) करञ्जविशेषः। इति शब्दरत्नावली॥ अस्य नामान्तरं अङ्गारमञ्जरी॥

अङ्गारवल्लरी, स्त्री, करञ्जविशेषः। इत्यमरः॥ भार्गी। गुञ्जा। इति राजनिर्घण्टः॥

अङ्गारवल्ली, स्त्री, (अङ्गारवत् रक्तवर्णा वल्ली कर्म्मधारयः। गुञ्जालता, स्वार्थे कन् अङ्गारवल्लिका।) महाकरञ्जः। भार्गी। इति राजनिर्घण्टः॥

अङ्गारशकटी, स्त्री, (शक्नोति वोढुं शकटं। शकट + स्त्रियां ङीप् अल्पार्थे शकटी। अङ्गारस्य शकटी षष्ठीतत्पुरुषः। आङ्टा इति भाषा। धुनाची इति) अङ्गारधानिका। इत्यमरः॥

अङ्गारिः, स्त्री, (अङ्गारमस्या अस्ति अङ्गार + अत इन् ठनाविति ठन् तस्य इ कः पृषोदरादित्वात् कलोपः) अङ्गारधानिका। इति जटाधरः॥

अङ्गारिका, स्त्री, (अङ्गारवत् रक्तवर्णा अङ्गार + इवार्थे कन् स्त्रियां टाप्) इक्षुकाण्डं। पलाशकलिका। इति मेदिनी॥ (अङ्गारमस्या अस्ति अङ्गार + मत्वर्थे ठन् तस्य इ कः स्त्रियां टाप् इति व्युत्पत्त्या अङ्गारपात्रम्।)

अङ्गारिणी, स्त्री, (अङ्गारमस्या अस्ति अङ्गार + मत्वर्थे इन् स्त्रियां ङीप्।) अङ्गारधानिका। भास्करत्यक्ता दिक्। (सूर्य्यत्यक्ततया अङ्गारवत् रक्तवर्णा दिक्।) इति मेदिनी॥

अङ्गारितं, क्ली, (अङ्गारमिवाचरति अङ्गार + क्विप् ततः क्तः।) पलाशकलिकोद्गमः। (अङ्गारं करोति अङ्गार + णिच् कर्म्मणि क्तः। मत्वर्थे इतच् वा दग्धप्रायकाष्ठं) दग्धे त्रि। इति विश्वः।

अङ्किका, स्त्री, कञ्चुकः। काँचली इति ख्याता। इति हेमचन्द्रः॥

अङ्गिरा, [स्] पुं, (अङ्गति ब्रह्मणो मुखान्निःसरति अगि गतौ + असुन् इरस् च) मुनिविशेषः। स च ब्रह्मणो मुखाज्जातः। तस्य भार्य्या कर्दममुनिकन्या श्रद्धा। पुत्राः उतथ्यः १ बृहस्पतिः २। कन्या सिनीवाली १ कुहूः २ राका ३ अनुमतिः ४। इति श्रीभागवतं॥

अङ्गी, [न्] त्रि, (अङ्गं विद्यतेऽस्य अङ्ग + मत्वर्थे इन्।) अङ्गविशिष्टः। अवयवी। यथा येनाङ्गेनाङ्गी विज्ञातो भण्यते तस्मादङ्गाच्च त्रि। इति मुग्धबोधटीकायां दुर्गादासः॥ प्रधानं। मुख्यः। यथा। "यद्यङ्गी स्यादसान्तरे"। इति ध्वनिकारः॥

अङ्गीकारः, पुं, (अङ्गीति चान्तं तत्पूर्व्वकात् कृ + घञ्) स्वीकारः। तत्पर्य्यायः। सम्बित् २ आगूः ३ प्रतिज्ञानं ४ नियमः ५ आश्रवः ६ संश्रवः ७ अभ्युपगमः ८ समाधिः ९ प्रतिश्रवः १०। इत्यमरः॥

अङ्गीकृतं, त्रि, (अङ्गीति चान्तं तत्पूर्व्वकात् कृ + कर्म्मणि क्तः) स्वीकृतं तस्य पर्य्यायः। ऊरीकृतं २ उररीकृतं ३ आश्रुतं ४ प्रतिज्ञातं ५ संगीर्णं ६ विदितं ७ संश्रुतं ८ समाहितं ९ उपश्रुतं १० उपगतं ११ प्रतिश्रुतं १२ अभ्युपगतं १३। इत्यमरः॥

अङ्गुरिः, स्त्री, (अगि गतौ + उणिच् रलयोरेकत्वस्मरणात् लस्य रत्वम्) पाणिपादाङ्गुली। इत्युणादिकोषः॥

अङ्गुरिः, स्त्री, (अङ्ग + उणिच् पक्षे ङीप्) अङ्गुली। इत्यमरटीका॥

अङ्गुरीयः, पुं, क्ली, (अङ्गुरेरिदं तत्र भवं वा अङ्गुरि + ङः तस्य ईयः) अङ्गुलीयकं। आङ्टी इति भाषा। अङ्गुलौ भवं अङ्गुलीयं मनोषादित्वात् लस्य रः। इति भरतः॥ (यथा रामायणे,—
"ददौ चास्य तदा प्रीतः स्वनामाङ्कामभिचिह्नितं।
अङ्गुरीयमभिज्ञानं राजपुत्र्याः परन्तपः"॥)

अङ्गुरीयकं, क्ली, पुं, (स्वार्थे कः) अङ्गुलीयकं। इत्यमरटीकायां मुकुटादयः॥ रामायणे,—
"रामनामाङ्कितञ्चेदं प्रगृह्याङ्गुरीयकं"।

अङ्गुलः पुं, (अङ्ग + उन् अङ्गौ इस्तं लीयते अङ्ग + ली + डः) हेमचन्द्रः॥ अङ्गुली॥ इत्यमरटीकायां रमानाथः॥ अङ्गुलपरिमाणं। इत्यमरटीकायां वाचस्पतिः॥ (अङ्गसंख्यकयवोदरपरिमाणे यवोदरैरङ्गुलमष्टसंख्यैरिति भास्कराचार्य्योक्तेः नः।) (यथा रामायणे,—
"न ह्यविद्धं तयोर्गात्रे बभूवाङ्गुलमन्तरं"।)

अङ्गुलिः, स्त्री, (अङ्ग + उलिच्) करशाखा। आङ्गुल इति भाषा। (यथा मनुः,—
"कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः"।)
गजकर्णिका। हस्तिशुण्डाग्रभागः। इति हेमचन्द्रः॥ अङ्गुष्ठः। इत्युणादिकोषः॥

अङ्गुलितोरणं क्ली, (अङ्गुलेः तोरणं बहिर्द्वारमिव षष्ठीतत्पुरुषः) चन्दनादिद्वारा ललाटे कृतोर्द्धचन्द्रः। इति हारावली॥

अङ्गुलिमुद्रा, स्त्री, (अङ्गुलेः मुद्रं लक्षणया धारयितुर्हर्षं राति ददाति या अङ्गुलिमुद्+रा+कर्त्तरि कः) साक्षरोर्म्मिका। प्रभुनाम्ना खनाम्ना वा अङ्कितमङ्गुरीयकं। छापेर आङ्गुटी मोहरखोदा आङ्गुटी इति भाषा। इत्यमरः॥

अङ्गुलिमुद्रिका, स्त्री, (अङ्गुलिमुद्रा+स्वार्थे कः) अङ्गुलिमुद्रा। इत्यमरटीकायां रमानाथः॥

अङ्गुलिमोटनं, क्ली, (अङ्गुल्योर्म्मोटनं मर्द्दनं यस्मिन् तत् बहुव्रीहिः) अङ्गुलिद्वयमर्द्दनजातशब्दः। आङ्गुलमट्कान इति भाषा। तत्पर्य्यायः। पुच्छटी २। इति चिकाण्डशेषः॥ खच्छटी ३ अङ्गुलिसन्देशः ४। इति हारावली॥ मुच्छुटी ५। इति जटाधरः॥ मुच्छुटीतु मुष्टिपर्य्याये हेमचन्द्रेण लिखिता।

अङ्गुलिसन्देशः, पुं, (अङ्गुल्या अङ्गुलिध्वनिना सन्देशः मोटनं षष्ठीतत्पुरुषः सम्+दिश्+भावे घञ्) अङ्गुलिमोटनं। इति हारावली॥

अङ्गुली, स्त्री, (अङ्ग+उलिच् स्त्रियां वा ङीप् पक्षे अङ्गुलिः) शरीरावयवविशेषः। आङ्गुल इति भाषा। (रामायणे,—
"कनिष्ठायामप्यङ्गुल्यां भ्रातुर्मम स राक्षसः॥
ज्वालाङ्गुलीभिर्भगवान् विग्भ्यः स ऊताशनः"॥)
तत्पर्य्यायः। करशाखा २। इत्यमरः॥ (अङ्गुलिः ३ अङ्गुरिः ४ अङ्गुरी ५ अङ्गुलः ६।) इति तट्टीका॥ सा क्रमेण पञ्चधा, यथा—अङ्गुष्ठः १ तर्ज्जनी २ मध्यमा ३ अनामिका ४ कनिष्ठा ५ इत्यमरजटाधरौ॥ हस्तियुग्मायां। इति मेदिनी॥

अङ्गुलीकः, पुं, क्ली, (अङ्गुल्यां कायते निधीयतेऽसौ अङ्गुली+कै+धञर्थे कन्भागि कः) अङ्गुलीयकं। इति चिकाण्डशेषः॥

अङ्गुलीपञ्चकं, क्ली, (पञ्चानामङ्गुलीनां समाहारः द्विगुसमासः राजदन्तादित्वात् पञ्चशब्दस्य परनिपातः) हस्तस्य पञ्चाङ्गुलानि यथा,—अङ्गुष्ठः १ प्रदेशिनी २ मध्यमा ३ अनामिका ४ कनिष्ठिका ५। इति राजनिर्घण्टः॥

अङ्गुलीयः, पुं, क्ली, (अङ्गुल्या अयं तत्र भवो वा अङ्गुली+छ तस्येयः) अङ्गुलीयकं। इत्यमरटीका॥

अङ्गुलीयकं, क्ली पुं, (अङ्गुलीय+स्वार्थे कः) अङ्गुलिभूषणं। आङ्गटी इति भाषा। तत्पर्य्यायः। ऊर्म्मिका २। इत्यमरः॥ अङ्गुरीयकं ३ अङ्गुलीयः ४ अङ्गुलीयः ५। इति तट्टीका॥ करारोटः ६ अङ्गुलीकः ७। इति चिकाण्डशेषः॥ पुंसि प्रमाणं। अयं मैथिल्यभिज्ञानं काकुत्स्थस्याङ्गुलीयकः। इति भट्टिः॥

अङ्गुलीसम्भवः, पुं, (अङ्गुल्यां सम्भूतः जातः सप्तमीतत्पुरुषः) नखः। इति राजनिर्घण्टः॥

अङ्गुष्ठः, पुं, (अङ्गौ हस्ते मुख्यत्वेन तिष्ठति यः अङ्गु+कर्त्तरि कः अस्माद्गोभू इत्यादिना घत्वम्) वृद्धाङ्गुलिः। इत्यमरः। बुड़ो आङ्गुल इति भाषा। (मनुः,—
"अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते"।)

अङ्गुषः, पुं, (अङ्गति गच्छति अगि+ऊषन्) नकुलः। बाघः। इत्युणादिकोषः॥

अङ्घः, [स्] क्ली, (अङ्घ्यते दुर्गतिं गच्छत्यनेन अघि+सर्व्वधातुभ्योऽसुन् इति असुन्) अंहः। पापं। इत्युणादिकोषः॥ (सूर्य्यशतके,—
"विदधतु भृगवः प्रीग्रमङ्घोर्विघातं"।)

अङ्घ्रिः, पुं, (अङ्घ्यते गच्छत्यनेन अघि+करणे रिः) पादः। (सूर्य्यशतके,—"ग्रीर्णाघ्राणाङ्घ्रिपाणीन्"।) वृक्षमूलं। इति चिकाण्डशेषः॥

अङ्घ्रिनाम, [न्] क्ली, (अङ्घ्रिरूपेण नमते जलाद्याकर्षणेन कल्पते यत् अङ्घ्रि+नम्+अन् णिच्) वृक्षमूलं। इति हेमचन्द्रः॥

अङ्घ्रिनामकः, पुं, (अङ्घ्रिनाम+स्वार्थे कः) वृक्षमूलं। इत्यमरः॥

अङ्घ्रिपः, पुं, (अङ्घ्रिणा पिबति अङ्घ्रि+पा+ड) वृक्षः। इति हेमचन्द्रः॥

अङ्घ्रिपर्णी, स्त्री, (अङ्घ्रिवत् पर्णं पत्रं यस्याः सा बहुव्रीहिः स्त्रियां ङीप्) एरण्डपर्णी। चाकुलिया इति ख्याता। इत्यमरटीकायां रमानाथः॥

अङ्घ्रिवल्लिका, स्त्री, (अङ्घ्रिवत् वल्लिः उपमितिकर्म्मधारयः। स्वार्थे कः) चिरपर्णीवृक्षः। चाकुलिया इति भाषा। इत्यमरः॥ अस्या रूपान्तरं अङ्घ्रिवल्लिः अङ्घ्रिवल्ली॥

अच इ पूजायां। इति कविकल्पद्रुमः॥ इ अञ्चते। अञ्चु गतिपूजनयोरिति पूजार्थो यः स एवायं। इदित् पाठः पूजायां गत्योर्भावात्। उदनुबन्धाभावश्च क्षुधवसपजार्थाश्चेत्यादिना क्त्वाप्रत्ययस्य निष्ठायाश्च नित्येम्बिधानात्। इति दुर्गादासः॥

अच इ अ गतौ। क्षिप्तौ। इति कविकल्पद्रुमः॥ इ अञ्चते। अ अञ्चति अञ्चते। इति दुर्गादासः॥

अच उ अ गतौ क्षिप्तौ। इति कविकल्पद्रुमः॥ अचति अचते। उ अचित्वा (उदितो वा इतीड्भावपक्षे) अक्त्वा। क्षिप्तौ क्षिरश्चक्षब्दः। इति दुर्गादासः॥

अचण्डी, स्त्री, (चडि कोपने पचाद्यच् इदित्त्वात् नुम् स्त्रियां ङीप् न चण्डी नञ्समासः) सुशीला गौः। शान्त गाइ इति भाषा। तत्पर्य्यायः सुकरा २। इत्यमरः॥ अकोपना स्त्री॥

अचलः, पुं, (चलति यः चल्+पचाद्यच् न चलः नञ्समासः) पर्व्वतः। (रामायणे,—
"आससाद ततो रामः स्थितं शैलमिवाचलं"।)
कीलकः। इति मेदिनी॥ अकम्पे त्रि॥ (स्थिरः, स्थिरः। यदुक्तं,—
"न स्वरूपात् न सामर्थ्यात्
नच भावादिकात् गुणात्।
चलनं विद्यते यस्ये-
त्यचलः कीर्त्तितोऽच्युतः"॥
अविकारी, कूटस्थः)।

अचलकीला, स्त्री, (अचलः सुमेरुपर्व्वतः कीलः स्तम्भस्वरूपो यस्याः सा बहुव्रीहिः। कीलो लेशे द्वयोः स्तम्भ इति मेदिनी) पृथिवी। इति शब्दरत्नावली॥

अचलत्विट्, [ष्] पुं, (अचला स्थिरा त्विट् यस्य सः बहुव्रीहिः) कोकिलः। इति शब्दचन्द्रिका॥

अचलभ्राता, [तृ] पुं, बौद्धगणाधिपविशेषः। स तु शैवजैनाचार्य्यस्य एकादशशिष्यान्तर्गतः। इति हेमचन्द्रः॥

अचला, स्त्री, (न चला नञ्समासः) पृथिवी। इति मेदिनी॥ यथा रामायणे,—
"पृथिवीमपि कामं तं ससागरवनाचलां"।

अचिरद्युतिः, स्त्री, (अचिरा क्षणस्थायिनी द्युतिः कान्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति चिकाण्डशेषः॥

अचिरप्रभा, स्त्री, (अचिरा क्षणस्थायिनी प्रभा कान्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति हेमचन्द्रः॥

अचिररोचिः, [स्] स्त्री, (अचिरा रोचिः कान्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति जटाधरः॥

अचिरा, स्त्री, (अचिं ज्ञानोपदेशं राति ददाति या अचि+रा+कर्त्तरि क उपपदसमासः अच्+भावे इक्) अर्हतां मातृविशेषः। इति हेमचन्द्रः॥

अचिरांशुः, स्त्री, (अचिराः क्षणस्थायिनः अंशवः किरणा प्रभाः यस्याः सा बहुव्रीहिः।) विद्युत्। इति हलायुधः॥ अचिरात् व्य अचिरं। शीघ्रं। अविलम्बं। यथा,—
"अचिरादुपकर्त्तुराचरे-
दथवात्मौपयिकीमुपक्रियां"।
इति नैषधं॥

अचिरामा, स्त्री, (अचिरा क्षणस्थायिनी आभा दीप्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति हारावली॥

अचेतनः, त्रि, (नास्ति चेतना ज्ञानं यस्य स बहुव्रीहिः) चेतनारहितः। चैतन्यशून्यः। अज्ञानः। यथा,—
"कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु"।
इति मेघदूतकाव्यं॥ चेन्द्रियं चेतनं द्रव्यं निरिन्द्रियमचेतनं। इति चरकः॥

अचैतन्यं, क्ली, (न चैतन्यं चेतना नञ्तत्पुरुषः) निश्चेतना। चेतनाभावः। अज्ञानं। यथा,—
"अचैतन्यमिदं विश्वं चैतन्यं देवमेव यत्।
न जानन्त्यपि शास्त्राज्ञा भ्रमन्त्येव हि केवलं"॥
इति चैतन्यचन्द्रामृतं॥ तद्वति त्रि॥

अच्छं, व्य, (न च्छति सम्मुखत्वात् दृष्टिं नाटयतीति न छो+धञर्थे कः नञ्तत्पुरुषः) आभिमुख्यं। साम्मुख्यं। इति मेदिनी॥

अच्छः, त्रि, (न च्छति निर्म्मलत्वात् दृष्टिं नाटयतीति नञ्+छो+कर्त्तरि कः उपपदसमासः) स्वच्छः। निर्म्मलः। इत्यमरः॥ (अमरशतके, अच्छकपोलमूलगलितैः)।

अच्छः, पुं, (न च्छति निर्म्मलत्वात् दृष्टिं नाटयतीति न+छो+कर्त्तरि कः उपपदसमासः) स्फटिकः। भालूकः। इति मेदिनी॥

अच्छभल्लः, पुं, (अच्छा निर्म्मलाः भल्लाः शस्त्राणीव नखा यस्य सः बहुव्रीहिः यथा—मेदिन्यां भल्लः स्यात् पुंसि भल्लूके शस्त्रभेदे पुनर्द्वयोः) भालूकः। इत्यमरः। तट्टीकाकारमते अच्छो भल्लश्चेति शब्दद्वयमपि॥

अच्छा, स्त्री,(अविद्यमुच्छायते आच्छाद्यतेऽनया,च्छो + करणे अङ्। अस्य विष्णोः छा आच्छादनं षष्ठी-तत्पुरुषः। अकारो वासुदेवः स्यादित्येकाक्षरीय-कोषे।) विष्णोराच्छादन। इति मुग्धबोधव्याकरणं॥

अच्छिद्रं, त्रि, (नास्ति छिद्रं यत्र बहुव्रीहिः) छिद्र-रहितं। दोषाभावविशिष्टं। यथा शातातप-पराशरौ।—

"अच्छिद्रमिति यद्वाक्यं वदन्ति द्विजदेवताः।
प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलैः समं"॥

इति श्राद्धतत्त्वं॥

अच्छिद्रावधारणं, क्ली, (अच्छिद्रस्य दोषरहित-कर्म्मणः अवधारणं निश्चयः) दोषरहितकर्म्म-निश्चयः। तज्ज्ञापकवाक्यं। यथा,—

ततः कर्म्मसमाप्तावच्छिद्रावधारणं कुर्य्यात्। तथाच शातातपपराशरौ।—

"अच्छिद्रमिति यद्वाक्यं वदन्ति द्विजदेवताः।
प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलैः समं"॥

इति श्राद्धतत्त्वं॥

अपि च। वशिष्ठः।

"ततः शान्तिं प्रकुर्व्वीत अवधारणवाचनं"।

अवधारणं अच्छिद्रावधारणं। इति तिथ्यादि-तत्त्वं॥ तद्वाक्यं यथा,—अद्यामुके मासि अमुक-पक्षे अमुकतिथौ मत्कृतैतदमुककर्म्माच्छिद्रमस्तु॥

अच्छिन्न, त्रि, (छिद + कर्म्मणि क्तः न छिन्नं नञ्-समासः) छेदरहितं। अकर्त्तितं। यथा गर्गः,—

"श्रुत्वा पुत्रस्य वै जन्म कृत्वा वेदोदिता क्रियाः।
अच्छिन्ननालं पश्येत्तं दत्त्वा रूक्मं फलान्वितं"॥

इति शुद्धितत्त्वं॥

अपि च। शङ्खः।

"अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः।
हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः"॥

अच्छिन्नसंशयः फलोपायेतिकर्त्तव्यतासु निश्चय-शून्यः। इति प्रायश्चित्ततत्त्वं॥

अच्युतः, पुं, (न च्यवते स्वरूपतो न गच्छति यः नित्य इति यावत्। च्यु + कर्त्तरि क्तः न च्युतः नञ्-समासः। पीताम्बरोऽच्युतः शार्ङ्गीत्यमरः) विष्णुः। इत्यमरः॥ (यथा कुमारसम्भवे,—तत्रावतीर्य्या-च्युतदत्तहस्तः।) स्थिरे त्रि॥ सोऽन्यवेलायामेत-त्त्रयं प्रतिपद्येताच्छितमस्यच्युतमसि प्राणसंशित-मसीति छान्दोग्योपनिषत्।

अच्युताग्रजः, पुं, (अच्युतस्य अग्रजः) बलरामः। इत्य-मरः॥ इन्द्रः। इति हेमचन्द्रः॥

अच्युतावासः, पुं, (ओप्यते वासः क्रियतेऽत्र आ + वस् + अधिकरणे घञ् यद्वा अच्युतस्य आवासः। 'अश्वत्थः सर्व्ववृक्षाणां देवर्षीणाञ्च नारदः' इति भगवद्गीतायाम्।) अश्वत्थवृक्षः।

इति राजनिर्घण्टः॥

अज क्षेपे। गतौ। इति कविकल्पद्रुमः॥ अजति। इति दुर्गादासः॥

अज इक भासि (अजि दीप्तौ चुरा इदित्वान्नुम्।) इति कविकल्पद्रुमः॥ इक अञ्जयति। भासि दीप्तौ। इति दुर्गादासः॥

अजः, पुं, (न जायते नोत्पद्यते यः नञ् + जन् + अन्ये-ष्वपि दृश्यत इति कर्त्तरि डः उपपदसमासः।)

("न हि जातो न जायेऽहं न जनिष्ये कदाचन।
क्षेत्रज्ञः सर्व्वभूतानां तस्मादहमजः स्मृतः"॥

इति भारते।

"योमामजमनादिञ्च वेत्ति लोकमहेश्वरम्"।

इति भगवद्गीतायाम्।) ब्रह्मा। विष्णुः। शिवः। कामदेवः। सूर्य्यवंशीयराजविशेषः। स च रघु-राजपुत्रः दशरथपिता च। मेषः। इति ज्यो-तिषं॥ माङ्गल्यधातुः। इति हेमचन्द्रः॥ जन्म-रहिते वाच्यलिङ्गः। छागः। इति मेदिनी॥ तत्-परीक्षा। यथा,—

"नक्षत्राणां विभेदेन नराणान्तु गणत्रयं।
तेषां शुभाय निर्द्दिष्टं पशुवस्त्वत्रयं बलौ॥
ये क्षणाः शुचयश्छागाः पशवोऽन्ये तथैव च।
देवजातिभिरुत्सृज्यास्ते सर्व्वार्थोपसिद्धये॥
ये पीता हरिता वापि नरजातेरुदीरिताः।
ये शुक्लाश्च महान्तो वा रक्तोजातेः शुभप्रदाः॥
यो मोहादथवाज्ञानादबलिमन्यं प्रयच्छति।
बध एव फलं तस्य नान्यत् किञ्चित् फलं भवेत्"॥

इति युक्तिकल्पतरुः॥

अजकर्णः, पुं, (अजस्य छागस्य कर्णवत् पत्रं यस्य सः) असनवृक्षः। इति रत्नमाला॥ यथा वैद्यके।

("अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति।
कफपाण्डुश्रुतिगदान् मेहकुष्ठविषव्रणान्"॥)

अजकर्णकः, पुं, (अजकर्णः + स्वार्थे कः) सालवृक्षः। इति राजनिर्घण्टः॥

अजकवः, पुं, क्ली, (अजो विष्णुश्च कः ब्रह्मा च द्वन्द्वः तौ वाति शिवः त्रिपुरासुरवधे प्रीणयत्यनेन अज क + वा + करणे कः।) "कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दितः" इत्येकाक्षरीयकोषे) शिव-धनुः। इति त्रिकाण्डशेषः॥

अजकावः, पुं, क्ली, शिवधनुः। इति त्रिकाण्डशेषः॥

अजगन्धा, स्त्री, (अजस्य गन्धवत् गन्धो यस्याः सा) वनयवानी। तत्पर्य्यायः। अजमोदा २। खराश्वा ३ कारवी ४। इति रत्नमाला॥ उग्रगन्धा ५। इत्य मरः॥ वृक्षविशेषः। ववरी इति हिन्दीभाषा॥ इति मदनविनोदः॥ तिलौञ्जि इति राजनिर्घण्टः॥ तत्पर्य्यायः। वस्तगन्धा २ खरपुष्पा ३ अवि-गन्धिका ४ उग्रगन्धा ५ ब्रह्मगर्भा ६ ब्राह्मी ७ पूति-मयूरिका ८। अस्या गुणाः। कटुत्वं। उष्णत्वं। वातगुल्मोदररोगवर्णव्रणार्त्तिशूलनाशित्वं। पीता चेदङ्गने हिता। इति राजनिर्घण्टः॥

अजगन्धिका, स्त्री, (अजस्य गन्धः षष्ठीतत्पुरुषः तद्वत् गन्धोऽस्यास्ति अजगन्ध + मत्वर्थे ठन् ठस्येक इति ठस्य इकः) वर्व्वरीवृक्षः। इत्यमरः॥ बावरि इति भाषा।

अजगन्धिनी, स्त्री, (अजगन्धोऽस्यास्ति अजगन्ध + मत्वर्थे इन् स्त्रियां ङीप्) अजशृङ्गीवृक्षः। इति रत्नमाला॥

अजगरः, पुं, (अजं गिरति ग्रसते यः गॄ + पचाद्यच् अजस्य गरः षष्ठी तत्पुरुषः) सनामख्यातसर्प-सर्पः। तत्पर्य्यायः। भुजगः २ वाहसः ३। इत्यमरः॥

अजगवं, क्ली, (अजयोर्विष्णुब्रह्मणोर्गं त्रिपुरासुरवधे गीतं षष्ठी तत्पुरुषः। तादृशं गीतं वाति सम्बध्नाति यत् अजग + वा + कर्त्तरि क उपपद-समासः। "गङ्गागीतश्च गौश्चैव गूढधेनुः सरस्वती" इत्येकाक्षरीयकोषे) पिनाकः। शिवधनुः। इत्य-मरः॥ तस्य रूपान्तरं। अजकवं। अजकावं। अजोकवं। अजगावं॥

अजगावं, क्ली, (अजयोर्व्विष्णुब्रह्मणोर्गं गीतं षष्ठी तत्पुरुषः। तादृशं गीतमवति सम्पादयति यत् अजग + अव + कर्म्मण्यण् उपपदसमासः) शिव-धनुः। इति शब्दमाला॥

अजजीविकः, पुं, (अजः जीविका जीवनोपायो यस्य सः) अजाजीवी। छागपालकः। तत्पर्य्यायः। जावालः २। इति हेमचन्द्रः॥

अजटा, स्त्री, (नास्ति जटा यस्याः सा) भूम्यामलकी इति राजनिर्घण्टः॥ तस्या रूपान्तरं। अजड़ा। अज्झटा॥

अजड़ा,स्त्री,(अजड़ां जाड्याभावं सम्पादयति या अज-ड़ा + करोत्यर्थे णिच् ततः पचाद्यच्) कपिकच्छुः। आलकुशी इति भाषा॥ इति राजनिर्घण्टः॥

अजत्था, स्त्री, (अजानां समूहः अज + त्थन् स्त्रियां टाप् अजसमूहः। तद्वानावर्त्तनात्) स्वर्ण-यूथिका। इति दीक्षितः॥

अजदण्डी, स्त्री, (अजस्य ब्रह्मणो यज्ञाय दण्डः काष्ठ-मस्याःसा स्त्रियां ङीप्। ब्रह्मदण्डीवृक्षकाष्ठेनयज्ञ-विधानात्) ब्रह्मदण्डीवृक्षः इति राजनिर्घण्टः॥

अजनकः, त्रि,(न जनकः नोत्पादकः नञ्समासः। जन-यति जन् + णिच् ण्वुल्) अनुत्पादकः। अजन्मदः। अस्रष्टा। अकारकः॥

अजननिः, पुं, (न + जन् + आक्रोशे नञ्यनिरिति सूत्रेण निन्दायां भावे अनिः। तस्याजननिरेवास्तु जननीक्लेशकारिणि इति प्रसिद्धप्रयोगोऽप्यस्ति) जन्मराहित्यं। उत्पत्त्यभावः। अकरणिः। भ्रायः। यथा। अजननिरस्तु तस्य। इत्यमरटीकायां रायमुकुटः॥

अजन्यं, क्ली, (न जन्यते सम्पाद्यते केनापि न + जन् णिच् यत्) उत्पातः। शुभाशुभसूचकभूकम्पादिः। इत्यमरः॥ अजननीये त्रि॥

अजपः, पुं,(अप्रशस्तं जपति पठति यः। जप् + पचा-द्यच् न जपः नञ्समासः।) असदध्येता। कुपाठकः। इति हेमचन्द्रः॥ (अजं पाति रक्षति यः + अज + पा + कर्त्तरि क उपपदसमासः) छागपालकः। यथा,—

"ओषधीर्नामरूपाभ्यां जानते ह्यजपा वने"।

इति चरकः॥

अजपा, स्त्री, (न जप्यते नोच्चार्य्यतेऽसौ अपितु श्वास-

प्रश्वासयोर्गमनागमनाभ्यां सम्पाद्यते जप् + घञ् अर्थे कः स्त्रियां टाप् नञपा नञ्समासः।) हंसमन्त्रः। यथा,—
"वियदर्द्धेन्दुललितस्तदादिसर्गसंयुतः।
अजपाख्यो मनुः प्रोक्तो ह्यक्षरः सुरपादपः"॥*॥
अस्य देवतार्द्धनारीश्वरमूर्त्तिः। यथा,—
"उद्यद्भानुस्फुरिततडिदाकारमूर्द्ध्वाम्बिकेशं
पाशाभीतिं वरदपरमुं संदधानं कराब्जैः
दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूलं
सौम्याग्नेयं वपुरवतु नश्चन्द्रचूड़ं त्रिनेत्रं"॥
इति तन्त्रसारः॥ * ॥ स्वाभाविकनिःश्वासप्रश्वासरूपेण जीवजप्यहंसमन्त्रः।
तथाच दक्षिणामूर्त्तिसंहितायां।
"अथ वक्ष्ये महेशानि प्रत्यहं प्रजपेन्नरः।
मोहबन्धं न जानाति मोक्षस्तस्य न विद्यते॥
श्रीगुरोः कृपया देवि ज्ञायते जप्यते यदा।
उच्छ्वासनिःश्वासतया तदा बन्धक्षयो भवेत्॥
उच्छ्वासैरेव निःश्वासैर्हंस इत्यक्षरद्वयं।
तस्मात् प्राणस्य हंसाख्य आत्माकारेण संस्थितः॥
नाभेरुच्छ्वासनिःश्वासात् हृदयाग्रे व्यवस्थितः।
षष्टिश्वासैर्भवेत् प्राणः षट्प्राणा नाड़िका मता॥
षष्टिनाड्या ह्यहोरात्रं जपसंख्याक्रमो मतः।
एकविंशतिसाहस्रं षट्शताधिकमीश्वरि॥
जपते प्रत्यहं प्राणी सान्द्रानन्दमयीं परां।
उत्पत्तिर्जपमारम्भो मृत्युस्तत्र निवेदनं॥
विना जपेन देवेशि जपो भवति मन्त्रिणः।
अजपेयं ततः प्रोक्ता भवपाशनिकृन्तनी"॥
अन्यत्रापि।
"षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिं।
एतत्संख्यान्वितं मन्त्रं जीवो जपति सर्व्वदा"॥*॥
सन्ध्यावन्दनहीना। इति महाभारतं॥

अजभक्षः, पुं, (अजानां भक्षः खाद्यः षष्ठीतत्पुरुषः। भक्ष + कर्म्मणि घञ्।) वर्व्वूरवृक्षः। इति राजनिर्घण्टः॥

अजमीढः, पुं, (अजः छागः यज्ञे मीढः सिक्तो यत्र सः तद्देशाधिपः अजमीढ + अण् संज्ञापूर्व्वकवृद्धेरनित्यत्वात् वृद्धभावः।) राजा युधिष्ठिरः। इति त्रिकाण्डशेषः॥

अजमोदा, स्त्री, (अजानां खाद्यतया मोदो हर्षो यस्याः सा अजानां मोदो गन्ध इव गन्धो यस्याः सा) यवानिका। तत्पर्य्यायः। उग्रगन्धा २ ब्रह्मदर्भा ३ यवानिका ४॥ इत्यमरः। यमानी द्विविधा।
एका क्षेत्रयमानी सा अजमोदेत्येव ख्याता। अपरा यमानीत्येव ख्याता। अविशेषात् द्वयोरपीति भरतः॥ केचित्तु अजमोदादिदयं वनयमान्यां। ब्रह्मदर्भादिदयं यमान्यामित्याहुः। उग्रगन्धाजमोदाख्या स्मृतक्षेत्रयमानिकेति। यमानी दीपको दीप्यो भूतिकश्च यमानिकेति च रत्नमाला॥ इति भरतः॥ * ॥ वैद्यके तु वनयमानी इति ख्याता। तत्पर्य्यायः। खराश्वा २ वल्गमोदा ३ मर्कटी ४ मोदा ५ गन्धदला ६ हस्तिकारवी ७ गन्धपत्रिका ८ मायूरी ९ अग्निमोदा १० मोदाख्या ११ वह्निदीपिका १२ ब्रह्मकोशी १३ विशाखी १४ हयगन्धा १५ उग्रगन्धिका १६ मोदिनी १७ फलमुख्या १८ विप्रख्या १९। अस्या गुणाः। कटुत्वं। उष्णत्वं। रूक्षत्वं। रुचिकारित्वं। कफवायुशूलाध्मानारुचिजठरामयनाशित्वञ्च। इति राजनिर्घण्टः॥ यमानी। यथा,—
"अजमोदा खराश्वा च मयूरो दीप्यकस्तथा।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तकः॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत्।
उष्णा विदाहिनी हृद्या दृष्या बलकरी लघुः॥
नेत्रामयक्षमिच्छर्द्दिहिध्मवस्तिरुजो हरेत्"॥*॥
अथ खुरासानीयवानीनामगुणाः।
"पारसीययवानी तु यवानीसदृशी गुणैः।
विशेषात् पाचनी रूक्षा ग्राहिणी मादिनी गुरुः"॥
इति भावप्रकाशः॥

अजमोदिका, स्त्री, (अजं मोदयति हर्षयति या। मुद् + णिच् ण्वुल् स्त्रियां टाप्। अजस्य मोदिका षष्ठीतत्पुरुषः) यवानी। इति वैद्यकं॥

अजम्भः, पुं, (न सन्ति जम्भा दन्ता यस्य सः) (सूर्य्ये च) भेकः। इति शब्दरत्नावली॥ न सन्ति जम्भा दन्ता अस्य॥

अजयः, पुं, (जि + भावे अच् न जयः नञ्समासः।) पराजयः। यथा,—
"सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ"।
इति भगवद्गीता॥ राढ़देशप्रसिद्धनदविशेषः॥

अजया, स्त्री, (न जीयते पराजीयतेऽसौ जि + कर्म्मणि अच् स्त्रियां टाप् न जया नञ्समासः।) विजया। भाङ्ग सिद्धि इति ख्याता। इति राजनिर्घण्टः॥

अजय्य, त्रि, (जेतुमशक्यं जि + कर्म्मणि "ऋहलोर्ण्यत्" इति यत् न जय्यं नञ्समासः।) जेतुमशक्यं। अजेयं। इति मुग्धबोधव्याकरणं॥ (यथा रघुवंशे,—"राज्ञामजय्योऽजनि पुण्डरीकः"।)

अजरः, त्रि, (जॄ + भावे अच् गुणः स्त्रियां टाप्, नास्ति जरा जीर्णावस्था यस्य सः) जरारहितः। वार्द्धक्यशून्यः। यथा,—
"अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत्"।
इति हितोपदेशः॥

अजरा, स्त्री, (नास्ति जरा यस्याः सा।) जीर्णपक्षीलता। क्षुद्रदारकप्रभेदः। यष्टिकन्या। घृतकुमारीति ख्याता। इति राजनिर्घण्टः॥

अजर्य्यं, क्ली, (न जीर्य्यति जॄ + कर्त्तरि अजर्य्यं सङ्गतमिति सूत्रेण यत्। तेन सङ्गतमार्य्येण रामाजर्य्यं हुतमिति भट्टिः) सङ्गतं। सौहार्दं। इति हेमचन्द्रः॥ अजरार्हे त्रि॥ (यथा रघुवंशे,—
"मृगराजस्य जरसोपदिष्टमदेहबन्धाय पुनर्वधूभ्यः"।

अजलम्भनं, क्ली, (अज इव लभ्यते छाग्यवर्षत्वात् ज्ञायतेऽसौ लभ् + कर्म्मणि ल्युट्) खोतोद्भवं। इति शब्दचन्द्रिका॥

अजलोमा, [न] पुं, (अजस्य लोमेव लोम मञ्जरी यस्य सः) वृक्षविशेषः। गुयाग्निषा। गूयाग्निमी इति च भाषा। तत्पर्य्यायः। अग्निखी २ केशी ३ महाकक्षा ४ अग्रपर्णी ५। इति रत्नमाला॥

अजवृष्ट्की, स्त्री, (अजस्य छागस्य वृष्ट्किमिव वृष्ट्किः यस्याः सा स्त्रियां ङीप्) वृक्षविशेषः। गाड़रिअण्डी मेढ़ाअण्डी। इति ख्याता। तत्पर्य्यायः। विषाणी २। इत्यमरः॥ विषाणिका ३ चक्रश्रेणी ४ अजगन्धिनी ५ मौर्व्वी ६ नेत्रौषधी ७ आवर्त्तिनी ८। इति रत्नमाला॥ मेषवृष्ट्की ९ वर्त्तिका १० सर्पदंष्ट्रिका ११ चक्षुष्या १२ तिक्तदुग्धा १३ एलवृष्ट्की १४ कर्णिका १५। अस्या गुणाः। कटुत्वं तिक्तत्वं। कफवायूशूलश्वासहृद्रोगविषरोगकासकुष्ठनाशित्वं। चक्षुर्हितकारित्वञ्च॥ तत्फलस्य गुणाः। तिक्तत्वं। उष्णत्वं। कटुत्वं कफवायुनाशित्वं। जठरानलरुचिकारित्वं। हृद्यत्वं। लवणाक्षरसत्वञ्च। इति राजनिर्घण्टः॥ (यथा सुश्रुते,—
"अजगन्धाश्वगन्धा च काला सरलया सह।
एकैषिकाजवृष्ट्की च प्रलेपः श्लेष्मशोथहृत्"॥

अजस्रं, क्ली, (नञ् + जस् + नमिकम्पिस्मजसइत्यादिना रक् नञ्समासः) निरन्तरं। सततं। इत्यमरः॥ (यथा रघुवंशे, "अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्त्तसे"।)

अजहल्लक्षणा, स्त्री, (न जहत् न त्यजन् स्वार्थौ यां वृत्तिं यदा न जहतौ स्वार्थं या लक्षणा सा।) लक्षणाख्यवृत्तिविशेषः। उपादानलक्षणा। स्वीयार्थात्यागिनी लक्षणा। यथा। कुन्ताः प्रविशन्तीत्यत्र कुन्तधारिपुरुषे लक्षणा इत्यलङ्कारशास्त्रं॥

अजहल्लिङ्गः, पुं, (न जहत् लिङ्गं यं शब्दं यदा न जहत् लिङ्गं यः शब्दः इति।) विशेषणभूतोऽपि स्वलिङ्गात्यागी शब्दः। इति व्याकरणं॥

अजहा, स्त्री, (न जहाति परित्यजति शुक्लान्, अनुपसर्गाल्लिम्पविन्दधारिपारि वेदेजिचेति सातिसाहिभ्यश्च इति पाणिनिसूत्रेण चकारस्य अनुक्तसमुच्चयार्थात् घः हित्वं नञ्तत्, स्त्रियां टाप्) शूकशिम्बी। इत्यमरटीकायां स्वामी॥ अत्यागे त्रि॥

अजा, स्त्री, (न जायते नोत्पद्यते अपि तु उत्पद्यते न + जन् + कर्त्तरि ड नञ् समासः। अत्र नञ्शब्दः शिरःस्थाने। आद्याशक्तिपक्षे नञ्निषेधार्थः, अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाम् अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोग्यामजोऽन्यः"—इति श्वेताश्वतरोपनिषद्॥) ओषधिभेदः। (यथा सुश्रुते,—
"अजा महौषधी ज्ञेया शुक्लकुन्देन्दुपाण्डुरा"।)

अजागरः, पुं, (न जागरयति सेवनेन लोकान् निद्रापयति यः, जागृ + णिच् जागोऽविचिच

नोऽडित्सु इति गुणः ततः पचाद्यच् नञ्समासः।) भृङ्गराजवृक्षः। इति शब्दरत्नावली॥ जागरण-रहिते त्रि॥

अजाजी, स्त्री, (अजेन वीयते अत्युत्कटगन्धतया त्यज्यतेऽसौ अज्+इञ् अजादिभ्यश्च इति कर्म्मणि इञ्। अजेन आजिः क्षतीया तत्। स्त्रियां वाङीष्) श्वेतजीरकः। कृष्णजीरकः। काकोदुम्बरिका। इति राजनिर्घण्टः॥

अजाजीवः, पुं, (अजेन अजव्यवसायेन आजीवति सम्यक् प्राणान् धारयति यः, आ+जीव+घञ् अजेन आजीवः क्षतीयातत्पुरुषः) जावालः। छागोपजीवी। इत्यमरः॥

अजातः, त्रि, (जन्+कर्त्तरि क्तः न जातः नञ्-समासः।) अजन्मविशिष्टः। अनुत्पन्नः। यथा। अजातपक्षा इव मातरं खगाः। इति श्रीभागवतं॥ (यथा दायभागे,—

"ये जाता येऽप्यजाता वा ये च गर्भे व्यवस्थिताः।
वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपोविगर्हितः"॥)

अजातशत्रुः, पुं, (अजातः सर्व्वप्रियत्वात् अनुत्पन्नः शत्रुर्यस्य सः) राजा युधिष्ठिरः। इति हेमचन्द्रः॥ (यथा महाभारते,—

"अजातशत्रुमासाद्य कुन्ती वचनमब्रवीत्"।)

(शिवः। काशीपुत्रः। शमीकपुत्रः।)(यथा हरिवंशे,

"श्यामपुत्रः शमीकस्तु शमीको राज्यमावहत्।
जुगुप्समानो भोजत्वाद्राजसूयमवाप सः।
अजातशत्रुः शत्रूणां जज्ञे तस्य विनाशनः"॥)

(बिम्बिसारपुत्रः स च शाक्यमुनिसमकालीनः॥)

अजातारिः, पुं, (अजातः सर्व्वप्रियत्वात् अनुत्पन्नः अरिः शत्रुर्यस्य सः) राजा युधिष्ठिरः। इति भूरिप्रयोगः॥

अजातौल्वलिः, पुं, (अजया उपजीवी तौल्वलिः मुनिविशेषः शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च। तुल्वलस्यापत्यं तुल्वल+अत इञिति इञ्) अजोपजीविमुनिविशेषः। इति मध्यपदलोपिकर्म्मधारयसमासे सुपद्मव्याकरणं॥ तुल्वलस्यापत्यं तौल्वलिः अजोपजीवी चासौ तौल्वलिश्चेति। इति तट्टीका॥

अजादनी, स्त्री, (अजेन क्षयधर्म्मयते भक्ष्यतेऽसौ अद्+कर्म्मणि ल्युट् स्त्रियां ङीप् अजस्य अदनी खाद्या षष्ठीतत्पुरुषः) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥

अजानेयः, पुं, (अजवत् शिवस्यवत् यथास्थानमारोहिणं नयति प्रापयति। आ+नी+क्षयल्युटो बहुलमिति सूत्रेण कर्त्तरि यत्। अजस्कागे हरिब्रह्मधातुस्मरहरे वृषे इति मेदिनी) उत्तमघोटकः। तत्पर्य्यायः। हयोत्तमः २ वाताश्वजात्यः ३। इति त्रिकाण्डशेषः॥ अजानेयः ४ कुलीनः ५। इत्यमरः॥ निर्भये त्रि। इति त्रिकाण्डशेषः॥

अजान्त्री, स्त्री, (अजस्य अन्त्रमिव देहबन्धनमिव अन्त्रं तदाकारमञ्जरी यस्याः सा बिल्वगौरादिभ्यश्च इति ङीष्) वृक्षविशेषः। नीलवर्णवोना इति भाषा तत्पर्य्यायः। नीलवृक्षा २ नीलपुष्पी ३ अतिलोमशा ४ नीलिनी ५ क्षुद्रगलान्त्री ६ अन्तःकोटरपुष्पी ७। इति रत्नमाला॥ वस्त्रान्त्री। वृद्धदारकः। इति राजनिर्घण्टः॥

अजापालकः, त्रि, (अजानां पालकः रक्षकः षष्ठीतत्पुरुषः) अजाजीवी। छागरक्षकः। इति शब्दरत्नावली॥

अजितं, त्रि, (न जितं न पराजितं नञ्समासः। जि+कर्म्मणि क्तः) अनिर्जितं। इति हेमचन्द्रः॥ अतिपराजितश्च॥

अजितः, पुं, (न जितः न केनापि पराजित ऐश्वर्य्येण। "वेधाः शार्ङ्गोऽजितः कृष्णो दृढः शर्म्मगणोऽच्युत" इति सहस्रनाम पर्य्याये।) विष्णुः। बुद्धः। तीर्थङ्कर्जैनविशेषः। इति हेमचन्द्रः॥ शिवः। इति तस्य सहस्रनाममध्ये पठितः॥

अजिनं, क्ली, (अजति धूल्यादि आदत्तेऽति यत् अज्+कर्त्तरि इनन् बाहुलकात् अजेर्व्यत्ययश्च पोश्च इति नवी आदेशः) (अजाजिनं शोणितविन्दुवर्षि चेति कुमारसम्भवे) चर्म्म। ब्रह्मचार्य्यादिधार्य्यक्षय्यासारादित्वक्। इत्यमरः॥ जिनभिन्ने वाच्यलिङ्गं।

अजिनपत्रा, स्त्री, (अजिनं चर्म्म पत्रं पक्षो यस्याः सा) चर्म्मचटिका। चामचिका इति ख्याता। तत्पर्य्यायः। जतुका २। इत्यमरः॥ जतुका ३। इति तट्टीका।

अजीनपत्री, स्त्री, (अजीनं चर्म्म पत्रं यस्याः सा गौरादित्वात् ङीष्) जतुका। इति राजनिर्घण्टः॥

अजिनयोनिः, पुं, (अजिनानां चर्म्मणां योनिः आकरः षष्ठीतत्पुरुषः। योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे इति मेदिनी) हरिणः। इत्यमरः॥

अजिरं, क्ली, (अजति गच्छन्ति यत्र अज+अधिकरणे किरच्। उठान इति भाषा। अजति गच्छति यः इति वायुः। अजति गच्छति क्षयभङ्गुरमिति यावत् इति शरीरं। अजन्ति इन्द्रियाणि गच्छन्त्यत्र इति व्युत्पत्त्या विषयः।) चत्वरं। (यथा विष्णुपुराणे,—

"पुनश्च भरतस्याभूदाश्रमस्थोटजाजिरे"।)

वायुः। शरीरं। मण्डूकः। विषयः। इति मेदिनी॥

अजिह्मं, त्रि, (जिहि वक्रतायां जिहि+मक् न जिह्मं नञ्समासः) अवक्रं। सरलं। इत्यमरः॥ भेके पुं। इति शब्दरत्नावली॥ (यथा मनुः,—

"अजिह्मामशठां शुद्धां जीवेद् ब्राह्मणजीविकां"।)

अजिह्मगः, पुं, (अजिह्मं सरलं गच्छति यः अजिह्म+गम्+डः उपपदसमासः) बाणः। इत्यमरः॥ अवक्रगे वाच्यलिङ्गः॥ (यथा रामायणे,—

"ते तस्य कायं निर्भिद्य रक्तपुङ्खा अजिह्मगाः।
निष्पेतुर्लोहितादिग्धा रक्ता इव महोरगाः॥
न ह्यभिद्यं तयोर्गात्रे बभूवांगुलमन्तरं।
नानिर्भिन्नं न चाभ्यक्तमपि सूक्ष्मजिह्मगैः"॥)

अजिह्मः, पुं, (नास्ति जिह्मा यस्य सः) भेकः। इति त्रिकाण्डशेषः॥ जिह्मारहिते त्रि॥

अजीर्णं, क्ली,(क्षृ+क्तः, नञ्जीर्णं नञ्समासः) अपाकः। तत्पर्य्यायः। वायुगुल्मः २ अन्तर्वमिः ३ पलताप्यः ४। इति त्रिकाण्डशेषः॥ अथाजीर्णस्य विप्रकृष्टं निदानमाह। अत्यम्बुपानादिषमाशनाच्च सन्धारणात्, स्वप्नविपर्य्ययाच्च। कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य॥ सन्धारणात् क्षुद्गतमूत्रपुरीषादीनां। स्वप्नविपर्य्ययात् दिवाशयनाद्रात्रौ जागरणात्। लघु चापीत्यपिशब्दात् स्निग्धोष्णादिगुणयुक्तमपि॥* अन्यच्च।

"ईर्षाभयक्रोधपरिप्लुतेन
लुब्धेन शुचैन्यनिपीडितेन।
प्रद्वेषयुक्तेन च सेव्यमान-
मन्नं न सम्यक् परिपाकमेति"॥

परिप्लुतेन व्याप्तेन। उक्तकारणेभ्योऽतिमात्रभोजनं विशेषादजीर्णस्य कारणमजीर्णञ्च बहुव्याधीनां कारणमित्याह।

"अनात्मवन्तः पशुवद्भुञ्जते येऽप्रमाणतः।
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि"॥

अनात्मवन्तः अबुद्धिमन्तः। रोगानीकस्य विसूच्यादेः। मूलं कारणं॥* अन्यच्च।

"प्रायेणाहारवैषम्यादजीर्णं जायते नृणां।
तन्मूलो रोगसंघातस्तद्विनाशाद्विनश्यति"॥

तद्विनाशाद्विनश्यति अजीर्णविनाशात् विनश्यति रोगसंघात इत्यर्थः। यदा तत् अजीर्णं आशाद् भक्ष्याद् विना भक्ष्याभावे विनश्यति निवर्त्तते इत्यर्थः॥* अजीर्णस्य सामान्यस्य लक्षणमाह।

"ग्लानिर्गौरवमाटोपो भ्रमो मारुतमूढ़ता।
विबन्धोऽतिप्रवृत्तिर्वा सामान्याजीर्णलक्षणं"॥

मारुतमूढ़ता वायोरवरोधः। विबन्धः मलाप्रवृत्तिः॥* सन्निपातकारणैः सहितानजीर्णस्य भेदानाह।

"आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः"।

त्रिभिरित्येकशो न तु मिलितैः।

"अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः"॥

केचित् सुश्रुतादयः। रसशेषतः भुक्तस्य पक्वस्य सारभूतो यो द्रवः स रसः सोऽपि पच्यते। भुक्तस्य पक्वस्य सारभूतो यो द्रवः स चापक्वः स रसशेषः तस्मात् चतुर्थमजीर्णं तत्रामाजीर्णं॥* तत्रामाजीर्णादिरसशेषस्य को भेद उच्यते। आमं मधुरतागतमपक्वं अन्नमेव। रसशेषस्तु भुक्तस्य पक्वस्य सारभूतो यो द्रवः स चापक्व इति भेदः। अजीर्णं पञ्चमं केचित् निर्द्दोषं दिनपाकि च। निर्द्दोषं गौरवभ्रमशूलादिदोषाजनकं। दिनपाकि च आहारोऽहोरात्रेण पाकं यातीति स्वभावः। यत्तु मात्राकालसात्म्यादिदोषाद्दिनान्तरे पाकं याति तद्दिनपाकि। अतएव यामामध्ये न भोक्तव्यमिति वचनं,—

वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरं"।

प्राकृतं अविकारकं। प्रतिवासरं प्रतिदिनभावि। मुक्तं यावन्नजीर्णं तावदजीर्णमित्युच्यते। एतदभिधानस्य प्रयोजनं पाकार्थं वामपार्श्वशयन-

प्रियशब्दादिसेवनादिकं। न चाऽऽहारस्य निषेधः। प्रातराशे त्वजीर्णे तु सायमाशो न दुष्यतीति वचनेन सायमाशस्यावश्यं कर्त्तव्यत्वात् ॥*॥ आमाजीर्णस्य लक्षणमाह,—

"तत्रामे गुरुतोत्क्लेशः शोथो गण्डाक्षिकूटगः।
उद्गारस्य यथाभुक्तमविदग्धः प्रवर्त्तते" ॥

गुरुता उदराङ्गयोः। उत्क्लेशः उपस्थितं वमनमिव। अक्षिकूटोऽक्षिपुटकः। अविदग्धः अनस्लो निर्गन्धश्च ॥*॥ विदग्धाजीर्णस्य लक्षणमाह,—

"विदग्धे भ्रमदग्धमूर्च्छापित्तास्य विविधा रुजः।
उद्गारस्य सधूमास्लः खेदो दाहश्च जायते" ॥

विविधा रुजः शैथचोषदाहादयः ॥*॥ विष्टब्धाजीर्णस्य लक्षणमाह,—

"विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः।
मलवातापवृत्तिश्च स्तम्भो मोहोऽङ्गपीडनं" ॥

वातवेदनाः तोदभेदादयः॥ स्तम्भो गात्राणां। मोहो मूर्च्छा ॥*॥ रसशेषाजीर्णस्य लक्षणमाह,

"रसशेषेऽन्नविद्वेषो हृदयाशुद्धिगौरवे" ॥*॥

एतस्य उपद्रवानाह,—

"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः।
उपद्रवा भवन्त्येते मृतिश्च रसशेषतः" ॥*॥

अतिभुक्तेभ्यः आमाद्यजीर्णेभ्यो विसूच्यादिरोगानाह,—

"आमं विदग्धं विष्टब्धमित्यजीर्णं यदीरितं।
विसूचलसकौ तस्माद्भवेचापि विलम्बिका" ॥

नात्र यथासङ्ख्यं तदा विष्टब्धाद्विलम्बिका भवितुमर्हति। सा च कफवाताभ्यां भवतीत्येकैकतोऽजीर्णादिसूच्यादित्रयोत्पत्तिः ॥*॥ विसूच्यादिनिरुक्तिमाह,—

"सूचीभिरिव गात्राणि तुदन्त्यन्तरुतेऽनिलः।
यत्राजीर्णेन सा वैद्यैर्विसूचीति निगद्यते" ॥*॥

विसूच्या निदानमाह,—

"न तां परिमिताहारा लभन्ते विदितागमाः।
मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः" ॥

विदितागमाः ज्ञाताऽऽयुर्वेदाः ॥*॥ विसूच्या लक्षणमाह,—

"मूर्च्छातिसारोवमथूः पिपासा
शूलं भ्रमोद्वेष्टनजृम्भदाहाः।
वैवर्ण्यकम्पौ हृदये रुजश्च
भवन्ति तस्यां शिरसश्च भेदः" ॥

उद्वेष्टनं हस्तपादयोः। शिरसो भेदः शिरःशूलं॥ विसूच्या उपद्रवानाह,—

"निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता।
अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः" ॥

अमी उपद्रवा घोरा अमी निद्रानाशादयः उपद्रवाः सर्व्वेषामेव रोगाणां घोरा भयङ्कराः। विसूच्याः पञ्च दारुणा विसूच्यास्तु पञ्चापि यदि सुखदा दारुणाः प्राणभयङ्कराः ॥*॥ अलसकलक्षणमाह,—

"कुक्षिरानह्यतेऽत्यर्थं प्रताम्येत् परिकूजति।
निरुद्धो मारुतश्चैव कुक्षावुपरि धावति ॥
वातवर्चो निरोधश्च यस्यात्यर्थं भवेदपि।
तस्यालसकमाचष्टे दक्षोद्गारौ च यस्य तु" ॥

आनह्यते आध्मायते। प्रताम्येत् ग्लायति। परिकूजति आर्त्तनादं करोति। कुक्षौ अजीर्णेन निरुद्धो मारुतः उपरि धावति हृदयकण्ठादिकं गच्छतीत्यर्थः। काश्यपस्त्वाह,—

"नाधो याति न चाप्यूर्द्धमाहारो न च पच्यते।
कोष्ठे स्थितोऽलसीभूतस्तत्तोऽसावलसः स्मृतः" ॥

विसूचलसयोररिष्टमाह,—

"यः श्यावदन्तौष्ठनखोऽल्पसंज्ञः
कृष्णेक्षणोऽभ्यन्तरयातनेत्रः।
क्षामस्वरः सर्व्वविमुक्तसन्धि-
र्यायान्नरः सोऽपुनरागमाय" ॥

सर्व्वविमुक्तसन्धिः सर्व्वे विमुक्ताः शिथिलीभूताः सन्धयो यस्य सः ॥*॥ विलम्बिकाया लक्षणमाह,—

"दुष्टश्च भुक्तं कफमारुताभ्यां
प्रवर्त्तते नोर्द्धमधश्च यत्र।
विलम्बिकां तां भृशदुश्चिकित्सा-
माचक्षते शास्त्रविदः पुराणाः" ॥

भृशदुश्चिकित्सां प्रत्याख्यायोपचरणीयम्। इयमसाध्यैवेति जेज्जटः ॥*॥ जीर्णस्याहारस्य लक्षणमाह,—

"उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितं।
लघुता क्षुत्पिपासे च जीर्णाहारस्य लक्षणं" ॥*॥

अथ चिकित्सा,—

"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुडेन वा।
सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी ॥
गुडेन शुण्ठीमथवोपकुल्यां
पथ्यां त्वतीयामथ दाडिमं वा।
आमेष्वजीर्णेषु गुदामयेषु
वर्च्चो विबन्धेषु च नित्यमद्यात्॥
श्लोकं दन्ती त्रिवृच्चित्रं कृष्णामूलं विचूर्णितं
तच्चूर्णं गुडसंमिश्रं भक्षयेत् प्रातरुत्थितः ॥
एतद्गुडाष्टकं नाम बलवर्णाग्निवर्द्धनं।
श्लोकोदावर्त्तशूलघ्नं श्लीहपाण्डुगदापहं॥

सर्व्वचूर्णसमो गुडो देयः। केचित्तु द्विगुणं गुडं दत्त्वा गुटिकां कुर्व्वन्ति। रेचकोऽयं योगः। गुडाष्टकम् ॥*॥ दहनाजमोदसैन्धवनागरमरिचानि चाम्लतक्रेण। सप्ताहादग्निकरं पायसूर्णो नाशनं परमं। औषधमित्यध्याहार्य्यं,—

"तत्रामे वमनं कार्य्यं विदग्धे लङ्घनं हितं।
विष्टब्धे स्वेदनं शस्तं रसशेषे शयीत च ॥
वचा लवणतोयेन वान्तिरामे प्रशस्यते ॥
कणादिकल्कं वा पीत्वा वान्तिरामे प्रशस्यते"
इत्यनेनान्वयः ॥*॥

"धान्यनागरसिद्धं वा तोयं दद्यादिचक्षणः।
आमाजीर्णप्रशमनं शूलघ्नं वस्तिशोधनं ॥
भवेद् यदि प्रातरजीर्णशङ्का
तदाभयां नागरसैन्धवाभ्यां।
विचूर्णितां शीतजलेन भुक्ता
भुक्तामशङ्को मितमन्नकाले ॥
विदह्यते यस्य तु भुक्तमात्रं
दंदह्यते हृच्च गलश्च यस्य।
द्राक्षां सितामाक्षिकसम्प्रयुक्तां
लिह्याभयां चातिसुखं लभेत ॥
त्रिकटुकमजमोदा सैन्धवं जीरके द्वे
समधरणधृतानामष्टमो हिङ्गुभागः।
प्रथमकवलभुक्तं सर्पिषा चूर्णमेत-
ज्जनयति जठरेऽग्निं वातरोगांश्च हन्ति" ॥

अजमोदात्र यवानी। अन्तःसंमार्ज्जनत्वात्। जीरके द्वे शुक्लं कृष्णञ्च। धरणमत्र मानं। तेन समधरणं घृतानां तुल्यमानं गृहीतानां शुण्ठ्यादीनां भागाः सप्त। तत्राष्टमो भागो हिङ्गुनः। हिङ्ग्वष्टकम् ॥*॥

"शुद्धं सूतं गन्धकञ्च पलमानं पृथक् पृथक्।
हरीतकी च द्विपला नागरस्त्रिपलः स्मृतः ॥
कृष्णा च मरिचं तद्वत् सिन्धूत्थं त्रिपलं मतं।
चतुष्पला च विजया मर्द्दयेन्निम्बुकद्रवैः ॥
पुटानि सप्त देयानि धर्म्ममध्ये पुनः पुनः।
अजीर्णारिरयं प्रोक्तः सद्यो दीपनपाचनः ॥
भक्षयेद्द्विगुणं भक्ष्यं पाचयेद्धृदयेदपि।
अजीर्णारिः ॥*॥

"द्वौ क्षारौ चित्रकं पाठा करञ्जं लवणानि च।
सूक्ष्मैलापत्रकं भार्गी क्षमिघ्नं हिङ्गु पौष्करं॥
शुण्ठी दार्व्वी त्रिवृन्मुस्तं वचा चेन्द्रयवास्तथा।
दन्त्याश्च जीरकं धात्री श्रेयसी चोपकुञ्चिका ॥
अम्लवेतसमस्लीका यवानी देवदारु च।
अभयातिविषा श्यामा हपुषारग्वधं समं ॥
तिलमुष्ककशिग्रूणां कोकिलाक्षपलाग्रयोः।
क्षाराणि लौहकिट्टञ्च तत्रं गोमूत्रसेचितं ॥
सूक्ष्मचूर्णानि कृत्वा तु समभागानि कारयेत्।
मातुलुङ्गरसेनैतद्भावयेद्दिवसत्रयं ॥
दिनत्रयन्तु शुक्लेन तथार्द्रकरसेन च।
अत्यग्निकारकं चूर्णं प्रदीप्ताग्निसमप्रभं ॥
उपयुक्तं विधानेन नाशयत्यचिराद्गदान्।
अजीर्णमथ गुल्मांश्च प्लीहानं गुदजानि च॥
उदराण्यन्त्रवृद्धिञ्च अष्ठीलां वातशोणितं।
प्रमुदत्यन्त्रनान्दीषान्नरमग्निं प्रदीपयेत्॥

द्वौ क्षारौ सर्ज्जिका यवक्षारश्च। लवणानि पञ्च। कृष्णा सैन्धवं विषाम्बिल इति लोके। श्रेयसी हरीतकी। उपकुञ्चिका मगरैला। अम्लवेतसाभावे शुक्लं दातव्यं। श्यामा साङ्ग। मुष्ककः मोच इति लोके। कोकिलाक्षः कोइलखा इति लोके। वृक्षदग्निमुखचूर्णं ॥*॥

"क्षुद्रार्कचित्रकैरण्डवरुणं सपुनर्नवं।
तिलापामार्गकदलीपलाग्रं तित्तिडी तथा ॥
गृहीत्वा ज्वालयेदेतत् प्रस्थं भस्माखिलञ्च तत्।
जलाढके विपक्तव्यं यावत् पादावशेषितं ॥
सुप्रसन्नं विनिःस्राव्य लवणप्रस्थसंयुतं।
पक्वं विधूमकठिनं सूक्ष्मचूर्णीकृतं पुनः ॥
यवानीजीरकव्योषस्थूलजीरकहिङ्गुभिः।

एषगर्दभलैरेभिश्चूर्नितैस्तत् विमिश्रयेत् ॥
आर्द्रकस्य रसेनापि भावयेच्छोषयेत् पुनः ।
शीतोदकेन तच्चूर्णं पिबेत् प्रातर्हि मात्रया ॥
तस्मिन् जीर्णेऽन्नमश्नीयादयुषैर्जाङ्गलजै रसैः ।
दूषदस्नैः सलवणैः सुखोष्णैर्वह्निदीपनैः ॥
एतेनाग्निर्विवर्द्धेत बलमारोग्यमेव च ।
तत्रानुपानं शृतं हि तक्रं वा भोजनं हितं ॥
मन्दाग्नेर्गौविकारेषु वातश्लेष्मामयेषु च ।
सर्व्वाङ्गशोथरोगेषु शूलगुल्मोदरेषु च ॥
अश्मर्य्यां शर्करायाञ्च विन्मूत्रानिलरोगिषु ।
वज्रवानरचूरः ॥ * ॥
"सामुद्रं लवणं ग्राह्यमथकर्षमितं बुधैः ।
सौवर्चलं पञ्चकर्षं विड्सैन्धवधान्यकं ॥
पिप्पली पिप्पलीमूलं पत्रकं कृष्णाजीरकं ।
तालीशं केशरं चव्यमस्तवेतसकं तथा ॥
द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्बुधः ।
मरिचं जीरकं विश्वमेकैकं कर्षमात्रकं ॥
दाड़िमं स्याच्चतुःकर्षं त्वगेले चार्द्धकर्षके ।
एतच्चूर्णीकृतं सर्व्वं लवणं भास्कराभिधं ॥
भक्षयेच्छाणमानं तत्तक्रमस्तुकाक्षिकैः ।
वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षयं ॥
अर्शांसि ग्रहणीं कुष्ठं विबन्धञ्च भगन्दरं ।
शूलं शोथं श्वासकासावामदोषञ्च हृद्रुजं ॥
अश्मरीं शर्करायापि पाण्डुरोगं कृमीनपि ।
मन्दाग्निं नोऽयेदेतद्दीपनं पाचनं परं ॥
हिताय सर्व्वलोकानां भास्करैरेतदीरितं ।
हन्यात् सर्व्वान्यजीर्णानि भुक्तमात्रमसंशयं ॥
निम्बु रसादिकं दत्त्वा गुटिकामप्यकेकुर्व्वन्ति"॥
अथ दाड़िमस्य बीजानां चूर्णं कर्षचतुष्टयमितं देयं । भास्करलवणचूर्णं ॥*॥ सैन्धवं समूलमगधा चव्यानलनागरं पथ्या । क्रमवृद्धि मग्निवृद्धौ वड़वानलनामचूर्णं स्यात् ॥ वड़वानलचूर्णं ॥ * ॥ पथ्यानागरकृष्णाकरञ्जविल्वाग्निभिः सितातुल्यैः । वड़वानल इव जरयति बज्रगुर्व्वपि भोजनं चूर्णं द्वितीयं वड़वानलचूर्णं ॥ * ॥
"एलात्वङ्नागपुष्पाणां मात्रोत्तरविवर्द्धिता ।
मरिचं पिप्पली शुण्ठी चतुःपञ्च षडुत्तरं ॥
द्व्याण्येतानि यावन्ति तावती सितशर्करा ।
चूर्णमेतत् प्रयोक्तव्यमग्निसन्दीपनं परं" ॥
समशर्करचूर्णं ॥ * ॥
"इन्द्रासनं सप्तपलं त्रिफलायाः पलत्रयं ।
पलत्रयं शुषगस्य सितायाश्च चतुःपलं ॥
अमृता शृतपुची च तथा कृष्णापराजिता ।
आसां चूर्णं समादाय पलमात्रं पृथक् पृथक् ॥
भावयेदेकतः सर्व्वं भृङ्गराजरसेन तु ।
स्वभाविकमिदं चूर्णं स्निग्धभाण्डे विनिक्षिपेत् ॥
विलिहन् मधुसर्पिर्भ्यां मन्दाग्निः सहसा नरः ।
मुच्यते ग्रहणीरोगात् गुदरोगात् सजाठरात् ॥
मेहं कुष्ठञ्च वीसर्पवातरोगान् सशोथितान् ।
न चात्र परिहारोऽस्ति भोजनं सर्व्वकामिकं ॥
रोगानीकप्रशान्त्यर्थं मुनिभिः परिकीर्त्तितं ।
अस्याभ्यासात् बलं वीर्य्यं पुष्टिर्दृष्टिश्च जायते ॥
त्रिसप्ताहप्रयोगेण जायते नात्र संशयः ।
ज्वालामुखीचूर्णं ॥ * ॥ अथ अजीर्णे रसाः,—
"द्विपलं गन्धकं शुद्धं पलमेकन्तु पारदं ।
मृतं लोहं तथा ताम्रं कर्षद्वयमितं पृथक् ॥
संचूर्ण्य सर्व्वं संमिश्र द्रावयित्वाग्नियोगतः ।
सम्यग्द्रुतं समस्तं तत्पञ्चाङ्गुलदले क्षिपेत् ॥
पुनः संचूर्ण्य तत्सर्व्वं लोहपात्रे निधाय च ।
जम्बीरस्य रसं तत्र पूतं पलशतं क्षिपेत् ॥
चुल्ल्यां निवेश्य तद्यत्नात् मृदुना वह्निना पचेत् ।
रसे तस्मिन् घनीभूते तत्संशोष्य विचूर्णयेत् ॥
पञ्चकोलकषायस्य चुक्रेण सहितस्य च ।
भावनास्तत्र दातव्याः पञ्चाशत्संख्यया मुनैः ॥
भृष्टटङ्गनचूर्णेन तुल्येन सह मेलयेत् ।
मरिचेनापि तुल्येन तदर्द्धेन विड़ेन च ॥
भावयेत् सप्तकृत्वस्तच्चणकाम्लजलेन च ।
ततः संशोष्य संपिष्य कूपीमध्ये निधापयेत् ॥
रसः क्रयादनामायं भैरवानन्दयोगिना ।
उक्तः सिंहलराजाय बज्रमांसाग्निने पुरा ॥
भक्षयेद्भोजनस्यान्ते मात्रयमितं रसं ।
भक्षयित्वा रसं पश्चात् पिबेत्तक्रं ससैन्धवं ॥
अतीवगुरु यद्भुक्तमतिमात्रमथापि वा ।
तत्सर्व्वं जीर्य्यति क्षिप्रं रसस्यैतस्य भक्षणात् ॥
शूलं गुल्मञ्च विषमं प्लीहानमुदरं तथा ।
रसः क्रयादनामायं विनिहन्ति न संशयः"
क्रयादो रसोऽजीर्णे ॥ * ॥ रसेन्द्रचिन्तामणौ रसरत्नप्रदीपे रसप्रदीपे च ॥
"क्षारत्रयं सूतगन्धौ पञ्चकोलमिदं शुभं ।
सर्व्वैस्तुल्या जया भल्ला तदर्द्धा शिग्रुजा जटा ॥
एतत् सर्व्वं जयाशिग्रुवह्निमार्कवजैर्द्रवैः ।
भावयेत्तिदिनं धर्म्मे ततो लघुपुटे क्षिपेत् ॥
सप्तधार्द्रद्रवैर्देयो रसो ज्वालानलो भवेत् ।
निष्कोऽस्य मधुना लीढ़ोऽनुपानं गुड़नागरं ॥
हन्त्यजीर्णमतीसारं ग्रहणीमग्निमार्द्दवं ।
श्लेष्महृल्लासवमनमालस्यमरुचिं जयात्" ॥
पञ्चकोलं,—
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरं । जयाच विजया । मार्क्कवो भृङ्गराजः । लघुपुटे गजपुटे । आर्द्रमार्द्रकं । निष्कः टङ्कः । ज्वालानलो रसोऽजीर्णे ॥ * ॥ रसप्रदीपे,—
"टङ्कणं रसगन्धौ च समं भागत्रयं विधात् ।
कपर्दः खर्ज्जिकाक्षारौ मागधी विश्वभेषजं ॥
पृथक् पृथक् कर्षमात्रं वसुभागमिहोषणं ।
जम्बीरास्त्रैर्दिनं घृष्टं भवेदग्निकुमारकः ॥
विसूचीशूलवातादिवह्निमान्द्यप्रशान्तये" ।
क्षारोयवक्षारः । अग्निकुमारो रसो विसूच्याद्यजीर्णे ॥*॥ रसेन्द्रचिन्तामणौ,—
"शुद्धसूतं गन्धकञ्च पलमानं पृथक् पृथक् ।
हरीतकी च विपला नागरस्त्रिपलः स्मृतः ॥
कृष्णा च मरिचं तद्वत् सिन्धूत्थं त्रिपलं मतं ।
चतुष्पला च विजया मर्दयेन्निम्बुकद्रवैः ॥
पुटानि सप्त देयानि धर्म्ममध्ये पुनः पुनः ।
अजीर्णारिरयं प्रोक्तः सद्यो दीपनपाचनः ॥
भक्षयेद्द्विगुणं भक्ष्यं पाचयेदेचयेदपि ।
अजीर्णारिः ॥ * ॥
" पारदाम्रतलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितं ।
तच्च जातिफलमर्द्धभागिकं
तिन्तिड़ीफलरसेन मर्द्दितं ॥
वह्निमान्द्यदशनाक्षयो
रामवाण इति विश्रुतो रसः ।
सङ्ग्रहग्रहणि कुम्भकर्णक-
मामवातखरदूषणं जयेत् ॥
दीयते तु चणकानुमानतः
सद्य एव जठराग्निदीपनः ।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः ॥
पारा भाग १ विषभाग १ लवङ्गभाग १ गन्धकभाग १ मरिचभाग ८ जायफलभाग २। रामवाणरसोऽजीर्णे ॥ * ॥
रसेन्द्रचिन्तामणौ,—
" पलं चित्राक्षारः पलपरिमितं पञ्चलवणं द्वयं सम्यक्पिष्टं भवति लघु निम्बुफलरसैः । ततस्तानं तस्मिन् पलपरिमितं शुद्धशुकलं क्षिपेदारान् सप्त द्रवति तदनेनैव विधिना ॥ पलप्रमाण कटुकत्रयञ्च पलार्द्धमानेन च हिङ्गुभागः । विषं पलद्वादशभागयुक्तं तावानृसो गन्धक एव चोक्तः—
"बदराख्यिप्रमाणेन वटीमेतस्य कारयेत् ।
भक्षयेत् सर्व्वदा सा स्यात् सर्व्वागीर्ण्यप्रशान्तये ॥
सर्व्वोदरेषु शूलेषु विसूच्यां विविधेषु च ।
अग्निमान्द्येषु गुल्मेषु सदा शुष्कवटी हिता" ॥
शुष्कवटी अजीर्णे ॥ * ॥ रसप्रदीपे,—
"खुरकाक्षिचित्रापामार्गरम्भातिलपलाशजान् ।
जवखान् भिषगादद्यात् प्रत्येकं पलमात्रया ॥
लवणानि पृथक् पञ्च ग्राह्याणि पलमात्रया ।
खर्ज्जिका च यवक्षारश्चूर्णं चितयं पलं ॥
सर्व्वं त्रयोदशपलं सूक्ष्मचूर्णं विधाय तु ।
निम्बूफलरसे प्रस्थसंमिते तत् परिक्षिपेत् ॥
तत्र शुष्कस्य शुकलं पलं वह्नौ प्रताप्य तु ।
वारान्निर्व्वापयेत् सप्त सर्व्वं द्रवति तद्यथा ॥
नागरं त्रिपलं ग्राह्यं मरिचञ्च पलद्वयं ।
पिप्पली पलमाना स्यात् पलार्द्धं भृष्टहिङ्गुनः ॥
ग्रन्थिकं चित्रकं चापि यवानी जीरकं तथा ।
जातीफलं लवङ्गञ्च पृथक् कर्षद्वयोन्मितं ॥
रसोगन्धो विषञ्चापि टङ्कणञ्च मनःशिला ।
एतानि कर्षमात्राणि सर्व्वं संचूर्ण्य मिश्रयेत् ।
शुरावार्द्रेण चुक्रेण संनीय वटिकाश्चरेत् ॥
मात्रप्रमाणां सा वैद्यैर्दृष्टशुष्कवटी स्मृता ॥
सर्व्वाजीर्णप्रशमनी सर्व्वशूलनिवारिणी ।
विसूच्यलसकादीनां सद्यो भवति नाशिनी" ॥
दृष्टशुष्कवटिका अजीर्णे ॥ * ॥
"टङ्गणकक्षाम्लतानां सहिङ्गुलानां समभागाः ।
मरिचस्य भागयुगलं निम्बुनीरैर्वटी कार्य्या ॥
वटिकां कलायसदृशीमेकां वा समश्नीयात् ।

सत्वरमजीर्णघ्ने वह्नेर्दीप्ते कफध्वस्तौ" ॥
अजीर्णकण्टको रसः ॥ *॥
"जलपीतमयमार्गमूलं हन्यादिसूचिकां ।
सतैलं कारवेल्लाम्बु विधुनोति विसूचिकां ॥
बालमूलस्य निःक्वाथः पिप्पलीचूर्णसंयुतः ।
विसूचीनाशनः श्रेष्ठो जठराग्निविवर्द्धनः ॥
विल्वनागरनिःक्वाथो हन्याच्छर्दिविसूचिकां ।
विल्वनागरकैडर्य्यक्वाथस्तदधिको गुणैः" ॥
कैडर्य्यं कट्फलम्,—
"श्योनं करञ्जस्य फलं हरिद्रे
मूलं समावाप्य च मातुलुङ्गाः ।
छायाविशुष्का गुटिकाः कृतास्ता
हन्युर्विसूचीं नयनाञ्जनेन" ॥
मातुलुङ्गी मधुकर्कटी । अनुभूतमिदम्,—
"अपामार्गस्य पञ्चाङ्गं मरिचानि समानि च ।
अश्वस्य लालया पिष्टान्यञ्जनाद् घ्नन्ति सूचिकां ॥
विसूच्यामतिसृष्टायां तक्रं दधिसमं जलं ।
गारिकेलाम्बु पेयं वा प्राग्जाताय योजयेत् ॥
त्वक्पत्रराखागुरुग्रियुकुष्ठै-
रक्षप्रपिष्टैः सवचाशृताङ्गैः ।
उद्वर्त्तनं खल्लिविसूचिकाघ्नं
तैलं विपक्वञ्च तदर्थकारि" ॥
त्वक्तैलम् ॥ *॥
"कुष्ठसैन्धवयोः कल्कः शुक्तं तैलं तु तच्छृतं ।
विसूच्या मर्दनं तेन खल्लीशूलनिवारणम्" ॥
कुष्ठतैलम् ॥ *॥
"पिप्पलायां तथोत्क्लेशे लवङ्गस्याम्बु शस्यते ।
जातीफलस्य वा घृतं घृतं भद्रघनस्य वा ॥ *॥
उत्क्लेशग्रहणम्,—
"उत्क्लेशयन्न निर्गच्छेत् प्रसेकस्त्रीवनेरितं ।
हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्दिशेदिति ॥
सरलवागडमुदरमक्षपिष्टैः प्रलेपयेत् ।
दारुहैमवतीकुष्ठशृताङ्गाहिङ्गुसैन्धवैः" ॥
हैमवती श्वेतवचा । दारुवट्कम् ॥ *॥
"तक्रेण युक्तं यवचूर्णमुष्णं
सक्षारमार्त्तिं जठरे निहन्यात् ।
क्षेदो घटैर्वा बडवास्यपूर्णै-
रुष्णैस्तथान्यैरपि पाणितापैः ॥
विलम्बिकालसकयोरयमेव क्रियाक्रमः ।
अतएवैतयोरुक्तं पृथक् नेह चिकित्सितम् ॥
तद्बल्यकं गुरुस्निग्धसान्द्रमन्दहिमस्थिरैः ।
अन्नपानैर्नयेच्छान्तिं पित्तघ्नैश्च विरेचनैः ॥
अथ शुद्धलाघिग्रान्ये माहिषदधिदुग्धसर्पींषि च ।
संसेवेतयवागूं समधूच्छिष्टां ससर्पिष्कां ।
अथवात् पित्तहरणं पायसं प्रतिभोजनं ॥
श्यामात्रिवृद्विपक्वञ्च पयोदध्याद्विरेचनं ।
यत् किञ्चित् मधुरं मेध्यं स्नेहनं गुरु भीजनं ।
सर्व्वं तदत्यग्निहितं भुक्त्वा प्रस्वपनं दिवा" ॥
सितशुण्ठं सितकमलं छागीक्षीरेण पायसं सिद्धं । भुक्त्वा घृतेन पुरुषो दादशदिवसादजीर्णितो भवेत् ॥*॥ अथ विशिष्टद्रव्याजीर्णे विशिष्टपाचनद्रव्यमाह,—
"अलं घनसपाकाय फलं कदलसम्भवं ।
कदलस्य तु पाकाय बुधैरभिहितं घृतं ॥
घृतस्य परिपाकाय जम्बीरस्य रसो हितः ।
नारिकेलफलतालबीजयोः
पाचकं सपदि तण्डुलं विदुः ।
क्षीरमाशु सहकारपाचनं
चारमज्जनि हरीतकी हिता ॥
मधूकमालूरघृतादनानां
परूषकखर्ज्जूरकपित्थकानां ।
पाकाय पेयं पिचुमर्दबीजं
घृतेऽपि तक्रेऽपि तदेव देयं ॥
खर्ज्जूरघृष्टकाटकयोः प्रशस्तं
विश्वौषधं कुत्र च भद्रमुस्तं ।
यच्चाक्षबोधिद्रुफलेषु घृतं
क्षत्ते तथा वार्च्युषितं प्रशस्तं ॥
तण्डुलेषु पयसः पयो हितं
दीप्यकन्तु चिपिटे कषायुतं ।
धन्यिका दधिजलेन जीर्य्यते
कर्कटी च सुमनेषु गोर्य्यते" ॥
सुमनेषु गोधूमेषु । गीर्य्यते कथ्यते ।
"गोधूममाषहरिमन्थसतीलमुद्ग-
पाको भवेत् झटिति मातुलपुष्पकेषु ।
खण्डश्च खण्डयति माषभवं त्वजीर्णं
तैलं कुलत्थमथवा विदधाति जीर्णं" ॥
मातुलपुष्पकः धत्तूरफलं ।—
"कङ्गुश्यामाकनीवाराः कुलत्थाश्चाविलम्बितं ।
दग्धो जलेन जीर्य्यन्ति वैदलाः काञ्जिकेन तु ॥
पिष्टान्नं घृतलं वारि क्षुण्णरान् सैन्धवं पचेत् ।
माषखण्डरी निम्बमूलं पायसं मुद्गयूषकैः" ॥
वटोदुम्बराश्वत्थवञ्जुलेन फेणीशृतं पर्पटः शिग्रुवीजेन याति । कक्षामूलतो लड्डुकापूपशष्कुलीविधाको भवेच्छ्लीपदकुली मण्डयेत्थ ॥ वेणुवारः वेगर इति लोके । तद् यथा ।—
"खेहो निशाहिङ्गुलवङ्गकैला-
धान्याकजीराद्रकनागराणि ।
अक्षोषणं सैन्धवपूर्णमन्ने
यथोचितं संस्कृतये प्रशस्तम्" ॥ इति ॥
शष्कुलः शष्कुलः पानकविशेषः । मण्डः माण्ड इति लोके ।—
"किमत्र चित्रं बडमत्स्यमांस
भोजी सुखी काञ्जिकपानतः स्यात् ।
इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्यः परिपाकमेति ॥
आममाम्रफलं मीने तद्वीजं पिष्टिते हितं ।
कूर्म्ममांसं यवक्षाराच्छीघ्रं पाकमुपैति हि ॥
कपोतपारावतनीलकण्ठ
कपिञ्जलानां पिशितानि भुक्त्वा ।
काश्मस्य मूलं परिपीय पिष्टं
सुखी भवेन्नात्र बडोद्भवो हि दृष्टं ॥
कपोतो धवलः पाण्डुः ।
"शाकानि सर्व्वाण्यपि यान्ति
पाकं क्षारेण सद्यस्तिलनालजेन ।
चञ्चूकसिद्धार्थकवास्तुकानां
गायत्रिसारक्वथितेन पाकः" ॥
चञ्चूकं चेचूरु इति लोके । गायत्री खदिरः ।
"पलङ्किकामेथिकवास्तुकानां
वार्त्ताकुवंशाङ्कुरमूलकानां ॥
उपोदिकालावुपटोलकानां
सिद्धार्थको मेघरवस्य पक्षा" ॥
मेघरवः चवराई इति लोके ।—
"विपच्यते शूरणकं गुडेन
तथालुकं तण्डुलजोदकेन ।
पिण्डालुकं जीर्य्यति कोरदूषात्
कसेरुपाकः किल नागरेण ॥
लवणक्षारगुलतोयात् सर्पिर्जम्बीरकाद्यक्षात् ।
मरिचादपि तक्षोष्णं पाकं यात्येव काञ्जिकात्तैलं ॥
क्षीरं जीर्य्यति तक्रेण तद्दध्यं कोष्णमण्डकात् ।
माहिषं माणिमत्स्येन शुष्कचूर्णेन तद्दधि" ॥
मण्डकः माण्डे इति लोके,—
"रसाला जीर्य्यति श्वोषात् खण्डं नागरभक्षणात्
सिता नागरमुक्तेन तथेक्षुक्षारैकारसात् ।
जरामिरागैरिकचन्दनाभ्या-
मभ्येति शीघ्रं मुनिभिः प्रशीतं ।
उष्णेन घृतं शिशिरेण चोष्णं
जीर्णो भवेत् क्षारगणास्तथाक्षैः" ॥
इरा मदिरा ।
"तप्तं तप्तं हेम वा तारमग्नौ
तोये क्षिप्तं सप्तकृत्वस्तदम्भः ।
पीत्वाजीर्णं तोयजातं निहन्या-
त्तच्च क्षौद्रं भद्रयुक्तं विशेषात्" ॥
तच्च तोयाजीर्णे । इति जठराग्निविकाराजीर्णविसूचिकालसविलम्बिकाचिकित्सा । इति भावप्रकाशः ॥

अजीवः, त्रि, (नास्ति जीवः आत्मा यस्य स बहुव्रीहिः) मृतः । अवसन्नः । इति त्रिकाण्डशेषः ॥

अजीवनिः, स्त्री, (नञ् + जीव + आक्रोशेगम्यानि रिति सूत्रेण अनिः) जीवनाभावः । अकरणिः । शापः । यथा । तस्याजननिरेवास्तु । इत्यमरटीकायां भरतः ॥ अजीवनिस्तव भूयात् । इति सुग्धबोधः ॥

अजुगुप्सितः, त्रि, (गुप् + सन् + क्त न जुगुप्सित नञ् समासः) अनिन्दितः । यथा,—
"उपवेश्य तु तान् विप्रानासनेष्वजुगुप्सितान् ।
गन्धमाल्यैः सुरभिरर्चयेद्देवपूर्व्वकं" ॥
इति मानवे ३ अध्याये २०९ श्लोकः ॥

अजेयः, त्रि, (न जेयः नञ् समासः) इति नञ् पूर्व्वकजिधातोः कर्म्मणि यत्प्रत्ययः । अजेतव्यः । अजयनीयः । यथा ।—
"अजेयस्त्वञ्च संग्रामे ममापि हि भविष्यति" ।
इति स्कान्दे काशीखण्डे २३ अध्यायः ।

अज्येष्ठवृत्तिः, पुं, (ज्येष्ठस्य वृत्तिः आचरणं षष्ठीतत्पुरुषः नास्ति ज्येष्ठवृत्तिः ज्येष्ठाचरणं यस्य सः बहुव्रीहिः) ज्येष्ठवृत्तिरहितः । भ्रातृषु पितृवदवर्त्तनाभाववान् । यथा,—

"यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः।
अज्येष्ठवर्त्तिर्यस्तु स्यात् स सम्पूज्यस्तु बन्धुवत्" ॥
इति मानवे ९ अध्याये ११० श्लोकः ॥
यो ज्येष्ठोऽनुजेषु पितृवद्वर्त्तते स पितेव मातेव अगर्हणीयो भवति। यः पुनस्तथा न वर्त्तते स मातुलादिवदर्चनीयः। इति तट्टीकायां कुल्लूकभट्टः।

अजैकपात्, [द्] पुं, (अजस्य छागस्य एकः पाद इव पादो यस्य सः बहुव्रीहिः अलोपः) एकादशरुद्रान्तर्गतरुद्रविशेषः। इति शब्दमाला ॥ (हरिवंशे,—
"अजैकपादहिर्बुध्न्य ऋतश्च भारत।
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः" ॥)

अजैकपादः, पुं, (अजस्य छागस्य एकः पाद इव पादो यस्य सः विकल्पे अलोपः) रुद्रविशेषः। इति जटाधरः ॥ छन्दोऽनुरोधादसन्धिरपि विष्णुपुराणे चन्द्रकलाप्रस्तावे अजएकपादिति ॥ (यथा भारते।—
"अजैकपादहिर्बुध्नो विरूपाक्षः सुरेश्वरः।
जयन्तो बहुरूपश्च त्र्यम्बकोऽपराजितः।
वृषाकपिश्च सावित्रो हरश्च रुद्रा इमे स्मृताः")

अञ्जुका, स्त्री, (अर्ज्यति नायकादर्थमुपार्ज्यति या अर्ज्जि + संज्ञायां कन् ह्रस्वश्च) नाट्योक्तौ वेश्या। इत्यमरः ॥ (एसा अञ्जु आ हि अ एन किन्पि आलिहन्ती चिट्ठदि मच्छकटिके।)

अञ्झटा, स्त्री, (करट इति वत् उज्झति सर्व्वदोषान् नाशयति या उज्झ + कर्त्तरि अटन् स्त्रियां टाप् एषोदरादित्वात् उकारस्य अः। यद्वा, अदव्ययमाश्चर्य्ये अत् आश्चर्य्यकारी झटः सङ्घातोऽस्याः। अत्ति क्षिप् झटति झटसंघाते अच्। टाप्। अथासौ झटा च वा ॥
("अम्लं समधुरं तिक्तं कषायं कटुकं सरम्।
चक्षुष्यं सर्व्वदोषघ्नं हृद्यमामलकीफलम्" ॥
इति सुश्रुते।) भूम्यामलकी। इत्यमरः ॥

अञ्झाणं, क्ली, उज्झति अस्रं वारयति या उज्झ + कर्त्तरि अलच् एषोदरादित्वात् उकारस्य अकारः) फलकं। ढाल इति ख्यातं। इति हेमचन्द्रः ॥ (पुं, अङ्कारः, कोकिलः।)

अज्ञः, त्रि, (ज्ञा + कर्त्तरि कः नञ्सः नञ्समासः।) जड़ः। मूर्खः। इत्यमरः। (यदुक्तं,—
"अज्ञो भवति वै बालः पिता भवति मन्त्रदः।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदं" ॥
यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः।
इदं शरणमज्ञानां।
"अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणोवराः।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः॥")

अज्ञानं, क्ली, (ज्ञा + भावे ल्युट् नञ्सः नञ्समासः) विपरीतज्ञानं। तत्पर्य्यायः। अविद्या २ अहम्मतिः ३। इत्यमरः ॥ सृष्टिकाले ब्रह्मा प्रथमं पञ्चप्रकारमज्ञानं ससर्ज्ज। यथा। तमः १ मोहः २ महामोहः ३ तामिस्रं ४ अन्धतामिस्रं ५।

इति श्रीभागवतं ॥ वेदान्तमते सदसद्भ्यामनिर्व्वचनीयं त्रिगुणात्मकं भावरूपं ज्ञानविरोधि यत्किञ्चित्। ज्ञानरहिते त्रि ॥ (यथा मनुः—
अज्ञानात् वारुणीं पीत्वा संस्कारेणैव शुद्धति।
अज्ञानात्प्राश्य विण्मूत्रं।
अज्ञानात् बालभावाच्च साक्ष्यं वितथमुच्यते ॥)

अञ्चतिः, पुं, (अञ्चति गच्छति यः अञ्च + कर्त्तरि अति) वायुः। इति त्रिकाण्डशेषः ॥

अञ्चलः, पुं, (अञ्चति प्रान्तभागं गच्छति अञ्च + अलच्) वस्त्रप्रान्तभागः। आँचल इति भाषा। इति हलायुधः ॥ (यथा साहित्यदर्पणे।—
"ऊरुः कुरङ्गकदृशस्त्रञ्चलेनाञ्चलेभाति" ॥

अञ्चितः, त्रि, (अञ्च + कर्म्मणि क्तः नाञ्चेः पूजायामिति नलोपाभावः) पूजितः। इत्यमरः ॥ (यथा रघुवंशे।—
"उभावलञ्चक्रतुरञ्चिताभ्यां
तपोवनाहृत्तिपथं गताभ्यां ॥)

अञ्चितभ्रूः, स्त्री, (अञ्चिते उत्कृष्टे भ्रुवौ यस्याः सा बहुव्रीहिः) सुन्दरभ्रूयुक्तनारी। इति स्त्रीपर्य्याये राजनिर्घण्टः ॥

अञ्जनं, क्ली, (अनज् + भावे ल्युट्, कज्जले तु गम्यमाने करणे ल्युट्) मक्षणं। गमनं। मक्षीकरणं। इत्यगट् प्रत्ययान्तान्जधातवश्चः। कज्जलं। तत्तु षड्विधं। यथा,—
"सौवीरं जाम्बवं तुत्थं मयूरश्रीकरं तथा।
दर्व्विका नीलमेघश्च अञ्जनानि भवन्ति षट्॥
तल्लक्षणानि यथा"—
"सवद्रूपन्तु सौवीरं जाम्बवं प्रस्तरं तथा।
मयूरश्रीकरं रत्नं मेघनीलन्तु तैजसं॥
दृष्ट्वा निगाद्य चैतानि ग्रिलायां तैजसेऽथवा।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पुत्रक॥
घृततैलादियोगेन ताम्रादौ दीपवह्निना।
यदञ्जनं जायते तु दर्व्विका परिकीर्त्तिता॥
सर्व्वाभावे तु तां दद्यात् देवीभ्यो दर्व्विकाञ्जनं।
महामाया जगद्धात्री कामाख्या त्रिपुरा तथा।
आप्नुवन्ति महातोषं षड्भिरेभिः सदाञ्जनैः॥
विधवा नाञ्जनं कुर्य्यात् महामायार्थमुत्तमं।
नादत्ते त्वञ्जनं देवी वैष्णवी विधवाकृतं॥
न मृत्पात्रे योजयेत्तु साधको नेत्ररञ्जनं।
न यूनाफलमाप्नोति मृत्पात्रविहिताञ्जनैः॥
चतुर्व्वर्गप्रदो धूपः कामदं नेत्ररञ्जनं।
तस्माद्द्वयमिदं दद्याद्देवेभ्यो भक्तितो नरः" ॥
इति कालिकापुराणे ६८ अध्यायः॥ अस्य गुणः। तारानैर्म्मल्यकारित्वं। निर्म्मलचन्द्रतुल्यनिराकुलदृष्टिकारित्वञ्च। इति राजवल्लभः ॥ सौवीराञ्जनं। रसाञ्जनं। अक्षिः। मसी। इति हेमचन्द्रः ॥ अग्निः इति विश्वः ॥ आलङ्कारिकभाषया व्यञ्जनाख्यवृत्तिः। यथा,—
"अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवार्थैकधीहृद्यार्थतिरञ्जनं॥
इति काव्यप्रकाशः ॥

अञ्जनः, पुं, (अनक्ति प्रतीच्यां दिशि रक्तत्वेन प्रकाशते यः अनज् + कर्त्तरि ल्युट्) पश्चिमदिग्हस्ती। अञ्जयति स्वेषु शुभाशुभे सूचयति अनज् + णिच् + ल्युट्) जेष्ठी। जेठी इति भाषा। इति विश्वमेदिन्यौ, (दिवा नतु प्रयोक्तव्यं नेत्रयोस्तीक्ष्णमञ्जनं। विरेकदुर्बलादृष्टिरादित्यं प्राप्य सीदति॥ इति आगमः)।

अञ्जनकेशी, स्त्री, (अञ्जनवत् केशोयस्याः सा बहुव्रीहिः स्त्रियां ङीप् यत्संयोगेन केशस्य कृष्णता भवेत्) हनूमन्मातृविलासिनीनामगन्धर्व्वस्त्री। इत्यमरः ॥

अञ्जना, स्त्री, (अनक्ति स्वकान्त्या शोभते अनज् + युच् कर्त्तरि) वानरीविशेषः। सा च हनूमन्माता। इति मेदिनी ॥ (रामायणे,—
"अञ्जनेति परिख्याता पत्नी केशरिणः कपेः।
अभिशापात्पत्नयाज्ञाता पुत्रञ्च दिवि चारिणी" ॥)

अञ्जनाधिका, स्त्री, (अञ्जनात् कज्जलादधिका कृष्णवर्णा) अञ्जनिका। इति हेमचन्द्रः ॥

अञ्जनावती, स्त्री, (अञ्जनं विद्यतेऽस्याः अतिशयितवर्णत्वात् अञ्जन + मतुप् स्त्रियां ङीप्) मतौ च वक्तव्योऽनाजरादीनामिति दीर्घः मस्य वः) सुप्रतीकनामदिग्गजभार्य्या। इत्यमरः ॥

अञ्जनिका, स्त्री, (अञ्जनम् अञ्जनवत् वर्णोविद्यतेऽस्याः सा अञ्जन + अर्शआद्यच् स्त्रियां टाप् स्वार्थे कः।) ज्येष्ठीविशेषः आँजनाइ इति। आञ्जिना इति च भाषा तत्पर्य्यायः। अञ्जनाधिका २ हालिनी ३ हलाहलः ४। इति हेमचन्द्रः ॥ क्षुद्रमूषिका। इति जटाधरः ॥

अञ्जनी, स्त्री, (अनक्ति चन्दनकुङ्कुमादिभिः शोभते अनज् + कर्त्तरि ल्युट् स्त्रियां ङीप्) लेप्यनारी। चन्दनादिलेपनयोग्या। इति विश्वमेदिन्यौ ॥ कटुकाहल्याः। कालाञ्जनीहल्याः। इति राजनिर्घण्टः।

अञ्जलिः, पुं, (अनज् + अलि अवश्याञ्जखिपुटयोरिति वेणीसंहारनाटके) हस्तसमुटः। आँजला इति भाषा। कुडवपरिमाणं। इति मेदिनी ॥ (यथा रामायणे। न प्रभातं त्वयेच्छामि निशे नक्तञ्चरभूमिते। क्रियतां मे दया भद्रे मयाऽयं रचितोऽञ्जलिः)॥

अञ्जलिका, स्त्री, (अञ्जलि + स्वार्थे क) वालभूषिका। इति जटाधरः ॥ अञ्जनिका। इति च पाठः ॥

अञ्जलिकारिका, स्त्री, (अञ्जलेः कारिका) लज्जालुलता। इति राजनिर्घण्टः ॥ पुत्तलिका। इति हेमचन्द्रः ॥

अञ्जसः, त्रि, (अञ्ज + असच्) अवक्रः। ऋजुः ॥ इति हेमचन्द्रः।

अञ्जसा अ (अञ्जं गतिं विनम्रभावं स्यति नाशयति अञ्ज + सो + कर्त्तरि का) द्रुतं, शीघ्रं, यथार्थं, प्रकृतं, इत्यमरः। (यथामनुः,—
"आसमाप्तेः शरीरस्य यस्तु सुश्रूषते गुरुं।
स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतं" ॥)

अञ्जिः, पुं, (अनज् + इन् ञिलादिचिह्नः) प्रेषणिकः। प्रेरकः। इत्युणादिकोषः ॥

अञ्जिरुः, पुं, (अनक्ति स्वतेजोभिर्जगत् प्रकाशयति

अङ्ग + इष्ठ।) सूर्य्यः। इत्युणादिकोषः॥
अङ्गीरं, क्ली, (अङ्ग + भावे इन् स्त्रियां वा ङीप् अङ्गीम् अग्निकारित्वादि गुणं राति ददाति अङ्गी आतोऽनुपसर्गे इति कर्त्तरि कः। अथवा अङ्ग + ईरम्) खनामख्यातपलाण्डुविशेषः। आँजिर + इति पेयारा इति च भाषा। तत्पर्य्यायः। मङ्गुलं २ काकोदुम्बरिकाफलं ३। अस्य गुणाः। शीतलत्वं। स्वादुत्वं। गुरुत्वं। वायुपित्तरक्तक्षयमिश्रमूत्रकृच्छ्रपीड़ाकफमुखवैरस्यनाशित्वं। अग्निकारित्वञ्च। लशुनाङ्गीरं तस्मादल्पगुणं। इति राजवल्लभराजनिर्घण्टौ॥
अटनं, क्ली, (अट + भावे ल्युट्) भ्रमणं। (यथा सर्व्वत्रगतीश्वरत्वमगमत् त्वां मार्ग्ग भिक्षाटनं। इति घण्टाकर्णः॥)
अटनिः, स्त्री, (अटति तथा गच्छति यत्र अट् + अधिकरणे अनि) धनुरग्रभागः। धनुकेर ऊल् इति भाषा। इत्युणादिकोषः॥
अटनी, स्त्री, (अटनि + स्त्रियामा ङीप्) अटनिः। धनुष्कोटिः। इत्यमरः॥ (यथा उत्तरचरिते। ध्वनदगुरुगुणाटगीद्धतकराकलोलाहतं)॥
अटरूषः, पुं, पतत्त्वेन वासकवृक्षः। इत्यमरः॥
अटरूषः, पुं, (अटति मत्युग्रासे पतत्त्वेन अट + घञर्थे कः। अटं कासास्थरोगं रोषति नाशयति रुष् + कर्त्तरि कः अटस्य रूषो वा षष्ठीतत्पुरुषः। वासकः कासनाशक इति वैद्यके) वासकवृक्षः। इत्यमरटीकायां रायमुकुटः॥
अटविः, स्त्री, (अटति वार्द्धक्ये गच्छति यत्र अट् + अधिकरणे अवि पद्माद्यलि वनं व्रजेदिति।) वनं। इति रायमुकुटः॥
अटवी, स्त्री, (अटवि + स्त्रियां ङीप्) वनं। इत्यमरः। (यथा रामायणे। आनर्त्तांश्चैव मार्गांश्च कान्तारारण्यटवीस्तथा)॥
अटा, स्त्री, (अट् + भावे अङ् ततष्टाप्) पर्य्यटनं। भ्रमणं। इति रत्नकोषः नीलकण्ठश्च॥
अटाट्या, स्त्री, (पौनः पुन्येन अटनं भ्रमणम् अट् + सूचिसूचिमूत्रशब्दार्त्तीत्यादिना यङ् + भावे घञ्। स्त्रियां टाप्) पर्य्यटनं। इत्यमरः॥ पुनःपुनर्भ्रमणं। अतिशयभ्रमणं। इति व्याकरणं॥) अट्ट क तौच्छ्ये। अनादरे। इति कविकल्पद्रुमः॥ टहयान्तः। क अट्टयति। एकटकार उति रामः॥ तौच्छ्यमल्पीभावः। इति दुर्गादासः॥
अट्ट ड अतिक्रमे। वधे। इति कविकल्पद्रुमः॥ मूर्द्धन्यवर्गाद्योपधः। ड अटिट्टिषते दन्त्यवर्गाद्योपधः। ड अतिट्टिषते। दन्त्यवर्गष्ठतीयोपधः। ड अट्टितिषते खलं राजा। इति दुर्गादासः॥
अट्टं, क्ली, (अट्ट + अच्) मुख्यं। भक्षं। अन्नं। इति मेदिनी भूरिप्रयोगश्च॥
अट्टः, पुं, (अट्टते एकं गृहमतिक्रम्य यत्र गृहे गच्छति अट्ट + अधिकरणे घञ्) क्षौमः। इत्यमरः॥ तन्मयादिगृहं। इति भरतः॥ प्राकारायस्थितरथ्यागृहं। इति कौटिल्यः। अट्टेति ख्यातगृहविशेषः। इति कोङ्कटः॥ प्राकारमण्डपस्योपरि शाला। इति केचित्॥ हर्म्यादिवातकुटिका। इति केचित्॥ मण्डपोपरि हर्म्यागृहं। इति केचित्॥ प्राकारधारणार्थोऽभ्यन्तरे क्षौमाख्योऽट्टः। इति भट्टः॥ अतिशयः। इति मेदिनी॥ हट्टः इति हेमचन्द्रः॥
अट्टट्ट य (वीप्सायाद्विर्व्वचनम् शकन्ध्वादित्वात् पररूपत्वमस्य अट्टट्टहासमश्नुवं शिवदूती चकार हेति घण्टो) अत्युच्चं। इति जटाधरः॥
अट्टनं (क्ली) चक्रफलास्थं। इति चिकाण्डशेषः॥
अट्टहासः, पुं, महत्तरो हासः। शब्दयुक्तहास्यं। इति हेमचन्द्रः॥ (यथा देवीमाहात्म्ये। देवीननादोचैः साट्टहासं मुहुर्मुहुः॥ व्यम्बकस्याट्टहासः॥ मेघदूते)॥
अट्टहासकः, पुं, (अट्टं सातिशयं हासकः अतिश्वेतपुष्पत्वात् हास्यकारीव द्वितीयातत् पुरुषः) कुन्दपुष्पं वृक्षः। इति राजनिर्घण्टः॥
अट्टहासी [न्] पुं, (अट्टं सदानन्दत्वात् सातिशयं हसति अट्ट + हस + णिनि उपपद समासः) शिवः। इति हेमचन्द्रः॥
अट्टालः, पुं, (अट्टवत् प्रासादसदृशवत् अलति भवति अल + अच्) प्राकारादुपरितनमुन्नतस्थानं। इति श्रीधरस्वामी॥ यथा। भज्यमानपुरोद्यानप्राकाराट्टालगोपुरं। इति श्रीभागवतं॥
अट्टालकः, पुं, (अट्टवत् प्रासादसदृशवत् अलति भवति अल + अच् स्वार्थे कन्) उपरितनगृहं। अट्टालिकोपरि गृहं। तत्पर्य्यायः। क्षौमः २ अट्टः ३। इति हेमचन्द्रः॥
अट्टालिका, स्त्री, (अट्टाल + स्वार्थे कन् स्त्रियां टाप्) राजगृहं। तत्पर्य्यायः। हट्टागारं २ हर्म्म्यं ३ सौधं ४ धवलागारं ५। इति जटाधरः॥ (राजतरङ्गिणी, अटित्वाट्टालिकादिभ्यो देशेभ्यः।)
अट्टालिकाकारः, पुं, (अट्टालिकां करोति यः अट्टालिका + कृ + अण् उपपद समासः प्रासादकारकः) शूद्रागर्भे चित्रकारौरसजातजातिविशेषः। तस्य कर्म्म गृहनिर्म्माणादि। राज इति थैकर इति च भाषा।
"कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्य्यतः।
बभूवाट्टालिकाकारः पतितो जारदोषतः"।
इति ब्रह्मवैवर्त्तपुराणं॥
अट्टा, स्त्री, (अटनम् अट् + भावे क्यप् स्त्रियां टाप् समस्या इति वत्) परिभ्रमणं। पर्य्यटनं। इत्यमरटीकायां रायमुकुटः॥ यथा,—
"तौर्य्यत्रिकं कथाट्टा च कामजो दशको गणः"।
इति स्मृतिः॥
अठ इ ड गतौ इति कविकल्पद्रुमः॥ इ (कर्म्मणि) अठ्यते ड अठते। इति दुर्गादासः॥
अठ गते। इति कविकल्पद्रुमः॥ अठति। इति दुर्गादासः॥
अड ट ण व्याप्तौ (स्वादिं सेट्।) इति कविकल्पद्रुमः॥ ट वैदिकः। न अड्नोति। इति दुर्गादासः॥
अड उद्यमे। (स्वादिं सेट् परं।) इति कविकल्पद्रुमः॥ अडति लोकः सुखाय। इति दुर्गादासः॥
अडु अभियोगे। इति कविकल्पद्रुमः॥ मूर्द्धन्यवर्गाद्यतीयोपधः। (स्वादिं सेट् परं अडु + सन् लट् तिप्) अडिडिषति। क्विपि संयोगान्तलोपे अड्। अभियोगः समाधानं। अड्डति पक्षं विद्वान्। अभि समन्तात् योगोऽभियोग इति गोविन्दभट्टः॥ इति दुर्गादासः।
अण स्वे। इति कविकल्पद्रुमः॥ अणति। स्वः शब्दः। इति दुर्गादासः॥
अण य ड जीवने। प्राणने। इति कविकल्पद्रुमः॥ य ड अण्यते जनो दुःखेन जीवतीत्यर्थः। इति दुर्गादासः॥
अणकः, त्रि, (अण् + अच् कुत्सायां कन्) कुत्सितः अधमः। इत्यमरः॥
अणव्यं, क्ली, (अणोः सूक्ष्मशस्यस्य चीनादिकस्य भवनमुत्पत्तिस्थानमिति यावत् अणु + यत्) आणवीनं (अणोः, सूक्ष्मशस्यस्य चीनादिकस्य भवनमुत्पत्तिस्थानमिति यावत् अण् + घञ् तस्य इनः आदिवृद्धिश्च)। अणधान्योत्पादकक्षेत्रं। इति रायमुकुटः॥
अणिः, पुं, स्त्री (अणति शब्दायते अण् + इन् स्त्रियां वा ङीप्) अग्राग्रकीलकः। रथचक्राग्रस्थितकीलः। इत्यमरः॥ अस्त्रिः। सूच्याद्यग्रभागः। सीमा। इति मेदिनी॥ तस्य रूपान्तरं। अणी। आणिः (अणति शब्दायते अण् + इञ्, अजादिभ्यश्च इति इञ्, आजि इति वत्)। इत्यमरटीका॥
अणिमा [न्] पुं, (अणु + भावे इमनिच। अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ईशित्वञ्च वशित्वञ्च तथा कामावसायिता इति सांख्यतत्त्वकौमुद्याम्) अणोर्भावः। अणुत्वं। सूक्ष्मता। इति व्याकरणं। अष्टविधैश्वर्य्यमध्ये ऐश्वर्य्यविशेषः। इत्यमरः॥ यत्प्रभावात् देवाः सिद्धाश्च सूक्ष्मीभूय सर्व्वत्र विचरन्ति केचिदपि न लक्ष्यन्ते। इति तट्टीका॥
("अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता"॥
इति आगमः।)
अणीयः, [स्] त्रि, अतिशयेन अणुः अणु + ईयसुन्) अत्यल्पं। अतिसूक्ष्मं। इत्यमरः॥ (यथा मनुः,—
"प्रशासितारं सर्व्वेषामणीयांसमणोरपि।
रुक्माभं स्वप्नधीगम्यं विद्यात् तं पुरुषं परं"॥)
अणु, त्रि, (अणति सूक्ष्मत्वं गच्छति अण् + उन्। लवलेसशकलाणवः इत्यमरः) क्षुद्रं। सूक्ष्मं। इति मेदिनी॥
अणुः, पुं, (अण् + उन्) शेषः। व्रीहिविशेषः। सूक्ष्मधान्यं। चिना इत्यादि भाषा। इत्यमरः। (यथा मनुः। न गृह्णीयात् शुल्कमणुष्वपि॥)
अणुकः, त्रि, (अणुप्रकारः अणु + स्वार्थादित्वात्

प्रकारार्थे कन्। अणुप्रकारे, अणुशब्दार्थे चीनादिधान्ये) चतुरः। निपुणः। अल्पः। स्तोकः। इति मेदिनी॥

अणुमा, स्त्री, (अणुः सूक्ष्मा भा दीप्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति चिकाण्डशेषः॥

अणुरेवती, स्त्री, (अणुः सूक्ष्मा रेवती नक्षत्रमिव।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

अणुव्रीहिः, पुं, (अणुः सूक्ष्मः व्रीहिः, कर्म्मधारयः, चीनादि।) सूक्ष्मधान्यं। तत्पर्य्यायः। प्रसातिका २। इति रत्नमाला॥

अण्डं, क्ली, (अम् संयोगे भावे क्विप् अमं संयोगं डयन्ते गच्छन्त्यनेन अम्+डी+करणे डः। पुंसोऽवयवभेदे मुष्के, पक्षिडिम्बे। "तदण्डमभवद्धैमं सहस्रांशुसमप्रभमिति" मनुः।) पक्ष्यादिप्रादुर्भावकोषः। अण्डा। डिम्। इति भाषा। तत्पर्य्यायः। पेशी २ कोषः ३। इत्यमरः॥ पेशिः ४ कोशः ५ पेशीकोषः ६। इति तट्टीका॥ डिम्बः ७। इति मेदिनी॥ मत्स्यपक्षिकूर्म्माण्डानां गुणाः,—

("नातिस्निग्धानि वृष्याणि स्वादुपाकरसानि च। वातघ्न्यतिसुक्रकराणि गुरूण्यण्डानि पक्षिणाम्"॥ इति वैद्यके॥)

स्वादुत्वं। कटुपाकित्वं। रुचिशुक्रकारित्वं। वातश्लेष्मनाशित्वञ्च। इति राजवल्लभः॥ मुष्कः। वीर्य्यं। इति विश्वः॥ मृगनाभिः। इति केचित्॥

अण्डकः, पुं, (अण्ड+स्वार्थे कन्) अण्डकोषः। इति हेमचन्द्रः॥

अण्डकोटरपुष्पी, स्त्री, (अण्डवत् कोटरे अभ्यन्तरे पुष्पं यस्याः सा बहुव्रीहिः, स्त्रियां ङीप्।) अजान्त्रीवृक्षः। नीलराखा। नीलवृक्षा इति ख्याता। इति काचिन्नलमाला॥ अन्तःकोटरपुष्पी इत्यपि पाठः॥

अण्डकोशः, पुं, (अण्डस्य मुष्कस्य कोशः, षष्ठीतत्।) अण्डकोषः। इत्यमरटीका॥

अण्डकोषः, पुं, (अण्डस्य मुष्कस्य कोषः, षष्ठीतत्पुरुषः।) स्वनामख्यातशरीरावयवविशेषः। तत्पर्य्यायः। मुष्कः २ वृषणः ३। इत्यमरः॥ अण्डं ४ पेशं ५ अण्डकः ६। इति हेमचन्द्रः॥ बीजपेशिका ७। इति राजनिर्घण्टः॥ सीमा ८। इति जटाधरः॥ फलकोषकः ९। इति चिकाण्डशेषः॥ फलं १०। इति रामायणं॥ कोषकोषकमुष्काण्डवृषणा अण्डकोषकः। सीमा च पेशसीमानौ फलमित्यपि क्वचित्॥ इति शब्दरत्नावली॥

अण्डकोषकः, पुं, (अण्डकोष+स्वार्थे कन्) अण्डकोषः। इति शब्दरत्नावली॥

अण्डजः, पुं, (अण्डे जायते अण्ड+जन्+कर्त्तरि, ड उपपदसमासः) पक्षी। सर्पः। मत्स्यः। छकलासः। इति विश्वमेदिन्यौ॥ अण्डजातमात्रे त्रि। इत्यमरः॥

("अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः। यानि चैवंप्रकाराणि स्थलजान्यौदकानि च"॥ इति मनुः।)

अण्डजा, स्त्री, (अण्डे जायते इति अण्ड+जन्+कर्त्तरि ड, उपपदसमासः, स्त्रियां टाप्।) मृगनाभिः। कस्तूरी। इति विश्वमेदिनीहेमचन्द्राः॥

अण्डालुः, पुं, (अण्डं विद्यते अस्य अण्ड+मत्वर्थे आलुच्) मत्स्यः। इति शब्दचन्द्रिका॥

अण्डीरः, पुं, (अण्ड+मत्वर्थे ईरन्, विशिष्टसामर्थ्यवान्।) पुरुषः। शुक्रः। इति मेदिनी॥

अण्वी, स्त्री, (अणु+वेतेर्गुणवचनादिति पक्षे ङीप्) अङ्गुलिः। अस्याः प्रचुरप्रयोगो वेदे। छीवा॥

अत, इ बन्धने (इदित्वात् नुम् भ्वादिः सेट् परं) इति कविकल्पद्रुमः॥ अतीति बन्धे। श्रेष्ठो दीर्घादिरित्यन्यः। अतएव अन्यते ईन्यते। खमते तु अन्यते इन्यते। छन्दोऽनुरोधादुभयत्र इकारः॥ इति दुर्गादासः॥

अत ईं बन्धने। इति कविकल्पद्रुमः॥

अत सातत्यगते। इति कविकल्पद्रुमः॥ सातत्यगतं नैरन्तर्य्येण भ्रमणं प्रापणञ्च। अतति वायुः। अतति सूर्य्यो गगनं प्राप्नोतीत्यर्थः। इति दुर्गादासः।

अतः, [स्] अ, (एतस्मात्, एतद्+एतदोऽश्नियेति पञ्चम्यर्थे तस् एतद्शब्दस्य अशादेशः) कारणं। अपदेशः। निर्देशः। इति विश्वः॥

अतएव, अ, (एतद्+तस् पञ्चम्यर्थे तस्। एतदः अन् इति एकारस्य अकारः।) अस्मादेव। एतत्कारणेनैव। अनेनैव हेतुना। यथा,—

"अतएव महेशानि रजयोः समता भवेत्"।

इति सारदातिलकटीकायां राघवभट्टः॥ अतएव पं। इति वोपदेवः॥

अतटः, पुं, (तट्यते आहन्यते जलेन इति तट्+घञर्थे कः, तटं जलप्रपातस्थानं न विद्यते अस्य बहुव्रीहिः) पर्व्वतस्योच्चस्थानं। तत्पर्य्यायः। प्रपातः २ भृगुः ३। इत्यमरः॥ (यथा शाकुन्तले। मनोरथानामतटप्रपातः॥)

अतर्कः, पुं, (तर्क्यतेऽनेन तर्क+घञर्थे कः। तर्कस्तर्कहेतुः स नास्ति यस्य स बहुव्रीहिः) अहेतुकः। मुक्ततर्कपरः। इति महाभारते दानधर्म्मः॥

अतलं, क्ली, (नास्ति तलं गाधभागो यस्य तत् बहुव्रीहिः। अतलस्पर्शमिति व्युत्पत्त्यर्थः॥) प्रथमखण्डपातालं। भूरिप्रयोगः॥

अतलस्पर्शः, त्रि, (नास्ति तलस्य अधोभागस्य स्पर्शो यस्य स बहुव्रीहिः।) अगाधः। अतिगभीरः) इत्यमरः॥

अतलस्पृक् [श्] त्रि, (न तलं गाधभागः नञ्समासः, तत् स्पृशति यः अतल+स्पृश्+कर्त्तरि क्विन् अतलस्पर्शकारी। कर्म्मणि क्विन् तत् स्पृश्यते येन।) अतलस्पर्शः। तत्पर्य्यायः। आस्थार आस्थागश्च अस्ताघं ४ अगाधं ५। इति हेमचन्द्रः॥

अतसः, पुं, (अतति सततं गच्छति यः अत्+कर्त्तरि असच्, स्त्रियां ङीप्।) (अतसीवृक्षविशेषः) वायुः। इत्युणादिकोषः॥ आत्मा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ वल्कलनिर्म्मितवस्त्रं। वस्त्रं। यथा—"अतसः क्षौमं प्रदरं वायुश्चेति धातुवृत्तौ" माधवः॥

अतसी, स्त्री, (अत्+असच्, स्त्रियां ङीप्।) क्षुद्रपुष्पक्षुपवृक्षभेदः। मसिना इति ख्याता। तत्पर्य्यायः। चणका २ उमा ३ क्षौमी ४ रुद्रपत्नी ५ सुवर्षला ६। इति रत्नमाला॥ पिच्छिला ७ देवी ८ मदगन्धा ९ मदोत्कटा १० क्षुमा ११ हैमवती १२ सुनीला १३ नीलपुष्पिका १४। अस्या गुणाः। उष्णत्वं। तिक्तत्वं। वातहारित्वं। श्लेष्मपित्तकारित्वञ्च। अन्यात्तैलस्य गुणाः। मधुरत्वं। पिच्छिलत्वं। मदगन्धित्वं। कषायत्वं। वायुकफकासनाशित्वं॥ स्वादुत्वं। उष्णत्वं। अम्लत्वं। पाके कटुत्वञ्च। इति राजवल्लभराजनिर्घण्टौ॥ यथा,—

"अतसी नीलपुष्पी च मार्ब्बती स्वादुमा क्षुमा।
अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरुः।
उष्णा दृक्शुक्रवातघ्नी कफपित्तविनाशिनी"॥

इति भावप्रकाशः॥ शुक्लद्रुमः। इत्यमरटीका॥

अति, य, प्रशंसा। (अत्+इ। पूजायां। अतिरतिक्रमणे चेति। अत्यादयः क्रान्ताद्यर्थे इति पाणिनिसूत्रम्।) प्रकर्षं। लङ्घनं। इति विश्वमेदिन्यौ॥ अतिशुद्धं। क्रान्तं। पूजनं। असम्भावना। इति दुर्गादासः। प्रादिविंशत्युपसर्गान्तर्गतोऽयं॥

अतिकथः, त्रि, (कथामतिक्रान्तः कुगतिप्रादय इति समासः। कथनायोग्यं।) अश्रद्धेयः। नष्टः। इति मेदिनी॥ नष्टधर्म्मः। इति हेमचन्द्रः॥

अतिकथा, स्त्री, (अयुक्तश्चासौ कथा कर्म्मधारयः।) अपार्थवाक्यं। व्यर्थभाषणं। इति विश्वः हेमचन्द्रश्च॥

अतिकन्दकः, पुं, (अतिरिक्तः कन्दो मूलं यस्य कप्) हस्तिकन्दवृक्षः। इति राजनिर्घण्टः॥

अतिकेशरः, पुं, (अतिरिक्ताः केशराः किञ्जल्काः यस्य सः।) कुलकवृक्षः। इति राजनिर्घण्टः॥

अतिक्रमः, पुं, (अतिक्रान्तः क्रमः नियमः, अति क्रम्+भावे घञ् वृद्ध्यभावः) क्रमोल्लङ्घनं। तत्पर्य्यायः। अतिपातः २ (अति पत्+भावे घञ्) उपात्ययः ३ पर्य्यायः ४। अभिक्रमः। राज्ञे शत्रून् प्रति अभीतयोधादेर्गमनं। इत्यमरः॥

अतिक्रान्तः, त्रि, (अति+क्रम्+कर्त्तरि क्तः) कृतातिक्रमः। कृतक्रमोल्लङ्घनः। राजानमतिक्रान्ता अतिराजी। इति वोपदेवः॥ अतीतः। यथा। वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते। इति रुचितः॥

अतिक्रामकः, त्रि, अतिक्रमकर्त्ता। क्रमोल्लङ्घकः। अतिपूर्ब्बक्रमधातोः कर्त्तरि ण्वुल्॥

अतिगण्डः, पुं, (गण्डमतिक्रान्तः अत्यादयः क्रान्ताद्यर्थे।) विंशुभादिसप्तविंशतियोगमध्ये षष्ठयोगः। तत्र जातफलं।

"कलिप्रियो वेदविनिन्दकश्च
धूर्त्तः कृतघ्नो गलरोगयुक्तः।

सरोमदेहः पुरुषोऽतिदीर्घः
प्रकाण्डगण्डस्त्वतिगण्डजन्मा" ॥
इति कोष्ठीप्रदीपः ।

अतिगन्धः, पुं, (अतिरिक्तो गन्धो यस्य सः ।) भूतटणं । चन्यकः । मुद्गरवृक्षः । गन्धकः । इति राजनिर्घण्टः ॥ (अतिगर्व्वितः ।)

अतिगन्धालुः, पुं, (अतिगन्धो विद्यतेऽस्य अति-गन्ध + मत्वर्थे आलु । अतिशयितगन्धयुक्ते) पुत्र-दात्रीलता । इति राजनिर्घण्टः ॥

अतिगर्व्वितः, त्रि, (अति अधिको गर्व्वः कर्म्मधारय-सोऽस्य जातः अतिगर्व्व + इतच् ।) महाहंकृतः । अतिशयगर्व्वयुक्तः । तत्पर्य्यायः । समुन्नद्धः २ । इति हलायुधः ॥

अतिगृहा, स्त्री, (गृहमतिक्रान्ता कुगतिप्रादीति समासः ।) एष्मिपर्णीविशेषः । क्षुद्रचाकुलिया इति भाषा । इति रत्नमाला ॥ गृहातिक्रामके त्रि ॥

अतिचरा, स्त्री, (गन्धविस्तारेण स्वस्थानमतिक्रम्य चरति गच्छतीव अति चर + कर्त्तरि अच् स्त्रियां टाप् ।) पद्मचारिणीवृक्षः । स्थलपद्मिनी । इत्यमरः ॥ राजनिर्घण्टश्च ॥

अतिचारः, पुं, (अतिक्रम्य चरणं गमनम् अति + चर + भावे घञ् ।) शीघ्रगमनं । अतिक्रम्य गमनं । कुजादिपञ्चग्रहाणां राशिभोगकालासमाप्तौ राश्यन्तरगमनं । तत्र पूर्ब्बराशिगमने वक्राति-चारः । परराशिगमने अतिचारः । एतौ गुरो-र्भेदकालो भवति । गुरुस्तु यदि पुनः पूर्ब्बराशिं नायाति तदा महातिचारः । तेन लुप्तसम्वत्सरो भवति । ग्रहाणां स्वभोज्यमानराश्यापि वक्राति-चारौ भवतः ॥ तत्र नाकालः । इति स्मृति-ज्योतिषे ॥

अतिच्छत्रः, पुं, (छाद्यते आच्छाद्यतेऽनेन छद् + णिच् + करणे ष्ट्रन् । अतिक्रान्तश्छत्रम् इति व्युत्पत्त्या छत्रातिक्रमकारी ।) भूतटणं । इति राजनिर्घण्टः ॥ जलटणविशेषः । अखण्डवर्णकुल्या-खाड़ा इति ख्यातः । इति रत्नमाला ॥ छत्रा । काटछाति । भुँइछाति । पोयालछाति इति ख्याता । इत्यमरः ॥

अतिच्छत्रकः, पुं, (अति + छत्र + स्वार्थे कन्) छत्रवृक्षः । छातारियाविष इति ख्यातः । तस्य मूले पत्रे वचाकारः कटुरसश्च । इति रत्नमाला ॥ भूतटणं । इति राजनिर्घण्टः ॥

अतिच्छत्रा, स्त्री, (छत्रमतिक्रान्ता, अत्यादय इति समासः ।) अवाक्पुष्पी । मौरी इति ख्याता । इत्यमरः ॥ घृताङ्गा । गुलुपा इति प्रसिद्धा । इति रत्नमाला ॥ (छत्रातिछत्रे लाङ्गलीं जटिलां ब्रह्म-चारिणीं ॥ इति सुश्रुते ॥)

अतिजवः, त्रि, (अतिशयितो जवो वेगो यस्य सः ।) अतिशीघ्रगामी । अतिवेगवान् । (दवयदतिजवेन प्राप्तमुर्व्वीविभागं ॥ इति भट्टिकाव्ये) ॥ तत्प-र्य्यायः । जङ्घालः २ । इत्यमरः ॥ जङ्घिलः ३ अतिबलः ४ । इति तट्टीका ॥

अतिजागरः, पुं, (जागृ + भावे घञ् अतिशयितो जागरो जागरणं यस्य सः । अतिजागरणयुक्ते त्रि ।) नीलक्रौञ्चः । कालवकः । इति राजनिर्घण्टः ॥

अतिडीनं, क्ली, (डी + भावे क्तः तस्य नः । अत्यन्त डीनं गमनं कर्म्मधारयः ।) पक्षिणां प्रचण्डगमनं । इति महाभारतं ॥

अतितीव्रा, स्त्री, (अतिशयेन तीव्रा) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

अतिथिः, पुं, कुशपुत्रः । स च श्रीरामचन्द्रस्य पौत्रः । इति मेदिनी ॥ कोपः । इति विश्वः ॥

अतिथिः, त्रि, (अतति सातत्येन गच्छति न तिष्ठति अत् + इथिन्) अज्ञातपूर्ब्बः गृहागतव्यक्तिः । इति श्रीधरस्वामी ॥ अतिथ् इति भाषा । तत्पर्य्यायः । आगन्तुः २ आवेशिकः ३ गृहागतः ४ । इत्य-मरः ॥ स्त्रीलिङ्गे आवेशिकी ५ अतिथी ६ । इति तट्टीकासारसुन्दरी ॥ आगान्तुः ७ । इति हड्-चन्द्रः । प्रघूर्णः ८ अभ्यागतः ९ प्राघूर्णिकः १० । इति हेमचन्द्रः ॥ प्राघुणिकः ११ । इति विश्वः ॥ प्राघुणः १२ । इति त्रिकाण्डशेषः ॥ * ॥ तस्य लक्षणं । यस्य न ज्ञायते नाम न च गोत्रं न च स्थितिः । अकस्मात् गृहमायाति सोऽतिथिः प्रोच्यते बुधैः ॥ * ॥ तस्य निवर्त्तने गृहस्थस्य दोषः यथा,—
"अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति" ॥
इति पुराणं ॥ * ॥ तस्य ग्रहणकालः । "ततो गोदोहमात्रन्तु कालं तिष्ठेद्गृहाङ्गने । अति-थिग्रहणार्थाय तदूर्द्धं वा यदृच्छया" ॥ इति विष्णुपुराणं ॥ * ॥ गोदोहकालस्य मुहूर्त्ताष्टम-भागः । यथा । "आचम्य च ततः कुर्य्यात् प्राज्ञो द्वारावलोकनं । मुहूर्त्तस्याष्टमं भागमुदीक्ष्यो ह्यतिथिर्भवेत्" ॥ इति मार्कण्डेयपुराणं ॥* ॥ तस्य मूर्खत्वादिविचारो नास्ति । "प्रियो वा यदि वा द्वेष्यो मूर्खः पतित एव वा । संप्राप्ते वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः" ॥ इति प्रातातपः ॥* ॥ तस्य वेदादयो न प्रष्टव्याः ।
"स्वाध्यायगोत्रचरणमप्यपि तथा कुलं ।
हिरण्यगर्भबुद्ध्या तं मन्येताभ्यागतं गृही" ॥
इति विष्णुपुराणं ॥ * ॥ तस्य देशादौ एष्टे दोषः ।
"देशं ग्रामं कुलं विद्यां पृष्ट्वा योऽन्नं प्रयच्छति ।
न स तत्फलमाप्नोति दत्त्वा स्वर्गं न गच्छति" ॥
इति स्मृतिः ॥ * ॥ अतिथये गृहस्थानुसारेण दातव्यं ।
"भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा ।
अदत्त्वा नैव भोक्तव्यं यथा विभवमात्मनः" ॥
इति मार्कण्डेयपुराणं ॥ * ॥ भिक्षादिलक्षणं ।
"ग्रासप्रमाणा भिक्षास्यादग्रं ग्रासचतुष्टयं ।
अग्राच्चतुर्गुणं प्राऽर्द्धं हन्तकारं द्विजोत्तमाः" ॥
इति मार्कण्डेयपुराणम् । इत्याह्निकतत्त्वं ॥

अतिथिपूजनं, क्ली, (अतिथेः पूजनं सेवा षष्ठीतत्-पुरुषः ।) अतिथिसेवा । आतिथ्यक्रिया । तत्प-र्य्यायः । हव्यक्षः २ । इति हेमचन्द्रः ॥

अतिदानं, क्ली, (दा + भावे ल्युट्, अत्यन्तं दानं सर्व-स्वध्वंसपूर्ब्बकपरस्वत्वोत्पत्तिः, कर्म्मधारयः ।) बहु-दानं । अपरिमितदानं । यथा,—
"अतिदाने बलिर्बद्धः अतिमाने च कौरवाः ।
अतिरूपे हृता सीता सर्व्वमत्यन्तगर्हितम् ॥
इति चाणक्यः ॥

अतिदिष्टः, त्रि, (अति + दिश् + क्तः । अन्यधर्म्मा-णामन्यत्रारोपणमतिदेशः यथा,—"तिङ्शित् सार्व्वधातुकमित्यातिदेशिकसूत्रम् ।) अतिदेशवि-शिष्टः । यथा,—"न समानगोत्रां भार्य्यां विन्दे-तेत्यनेन शूद्रस्यापि सगोत्रा कथं न निषिध्यते" इति चेदत्र उपदिष्टातिदिष्टगोत्रस्यैव निषेधो नत्वतिदिष्टातिदिष्टशूद्रगोत्रादेः । इत्युद्धाहतत्त्वं ॥

अतिदीप्यः, पुं, (अत्यन्तं दीप्यते विचित्रवर्णतया आत्मना प्रकाशते अति + दीप् + कर्त्तरि ण्यत् ।) रक्तचित्रकवृक्षः । इति राजनिर्घण्टः ॥

अतिदेशः, पुं, (अति + दिश् + भावे घञ्) अन्य-धर्म्मस्यान्यत्र आरोपणं । यथा,—"इखदिकः" इत्यादिः । इति दुर्गादासः ॥ कारिका यथा,—
"प्रकृतात् कर्म्मणो यस्मात् तत्समानेषु कर्म्मसु ।
धर्म्मोऽतिदिश्यते येन अतिदेशः स उच्यते" ॥
इति मलमासतत्त्वम् ॥ स तु पञ्चविधः । शास्त्रा-तिदेशः । १ यथा,—"नित्येन तुल्यं श्रेषं स्यात् इत्यत्र तुल्यशब्देन अतिदेशः" । १ । कार्य्याति-देशः २ यथा,—"अप्रयाजास्तः इत्यत्र कार्य्येण निषेधेन दर्शपौर्णमासधर्म्मातिदेशः" । २ । निमि-त्तातिदेशः ३ यथा,—"विकृतौ मौद्गचरुयागे व्रीहिकार्य्यकारिणि सुद्गे व्रीहिकार्य्यनिमित्तत्वात् धर्म्माः प्रोक्षणादयः कर्त्तव्यन्ते" । ३ । व्यपदेशा-तिदेशः ४ यथा,—"मासमग्निहोत्रं जुहोति इत्यत्र माससाध्यायनाख्ययागे अग्निहोत्रपदव्यप-देशात् अग्निहोत्रधर्म्मातिदेशः" । ४ । "रूपा-तिदेशः" ५ यथा,—"यजमानाद्भिन्नो यूपः इत्य-त्र यूपे यजमानादन्यत्वरूपावगमात् यजमान-धर्म्मस्य तदीयपरिमाणस्यातिदेशः" । इति श्राद्ध-विवेकटीकायां श्रीकृष्णः ॥

अतिनु, त्रि, (कुगतिप्रादीतिसमासः । गोस्त्रियोरुप-सर्जनस्येति ह्रस्वः ।) अतीतनौकं । नावमतिक्रान्तं । नावोत्तीर्णं । इत्यमरः । तस्य पुंस्त्रीलिङ्गयोः अतिनौः इति रूपं ॥

अतिपतनं, क्ली, (अति + पत् + भावे ल्युट्) अत्ययः । अतिक्रमणं । इति शब्दरत्नावली ॥

अतिपत्त्राः [न्] पुं, (अत्युत्कृष्टः पत्त्राः कर्म्मधारयः । अतेः पूजार्थत्वान्न समासान्तप्रत्ययः ।) सन्मार्गः । सुपथः । इत्यमरः ॥

अतिपत्रः, पुं, (अतिबृहत् पत्रं यस्य सः बहुव्रीहिः ।) हस्तिकन्दवृक्षः । शाकवृक्षः । इति राजनिर्घण्टः ॥

अतिपातः, पुं, (अति + पत् + भावे घञ्) अति-क्रमः । उपायव्ययः । पर्य्ययः । इत्यमरः ॥ (यथा शाकुन्तले—न चेदन्यकार्य्यातिपातः) ॥

अतिपातकं, क्ली, (अतिदुष्टतया अन्यत् पातकं पापमतिक्रान्तं प्रादिसमासः ।) नवविधपापमध्ये गुरुतरपातकं । तत् त्रिविधं । पुंसः माद्दुहिद्-

सुखागमनजन्यं। स्त्रियास्तु पुत्रपितृश्वसुरगमनजन्यं। इति प्रायश्चित्तविवेकः॥

अतिबलः, त्रि, (अतिशयितं बलं यस्य सः बहुव्रीहिः।) प्रबलः। अतिशयबलवान्। प्रकृष्टबलविशिष्टः। इति मेदिनी॥ (विजृम्भमाणोऽतिबलः प्रत्यबुध्यत राक्षसः॥ इति रामायणम्)॥

अतिबला, स्त्री, अत्यन्तं बलं यस्याः सा बहुव्रीहिः।) विश्वामित्रेण रामाय दत्ते अस्त्रविद्याविशेषे यथा,—

"महाबले इमे विद्ये बलामतिबलां तथा"।

इत्यादि रामायणे।) पीतबला। पीतवर्णवाड़ियाला इति ख्याता। पिटारणी। इति मदनविनोदः॥ गुरुशकरीभेदः। इति राजनिर्घण्टः॥ तत्पर्य्यायः। बलिका २ बल्या ३ विकङ्कता ४ वाद्यपुष्पिका ५ घण्टा ६ शीता ७ शीतपुष्पा ८ भूरिचला ९ दृढ्यगन्धिका १०। तस्या गुणाः। तिक्तत्वं। कटुत्वं। वातकफनिनाशित्वं। दाहतृष्णाविषच्छर्द्दिक्लेदोपशमकारित्वञ्च। इति राजनिर्घण्टः॥

अतिभारगः, पुं, (अतिभारेण वेगेन गच्छति अतिभार + गम् + कर्त्तरि ड, उपपदसमासः।) (खरः। अश्वतरः। गर्द्दभात् बड़वाजातः अश्वभेदः।) खेसरः। खचर इति भाषा। इति राजनिर्घण्टः॥

अतिभीः, पुं, (अतिबिभेत्यस्याः अति भी + अपादाने क्विप्।) वचज्वाला। इति हलायुधः॥

अतिभूमिः, स्त्री, (अतिशयिता भूमिर्म्मर्य्यादा कर्म्मधारयः, अतिमर्य्यादा।) आधिक्यं। यथा। प्राप्य मन्मथमदातिभूमिं दुःसहस्तनभरः सुरतस्येति माघः॥ अतिशयितभूमिः॥

अतिमङ्गल्यः, पुं, (अतिमङ्गलाय हितः अतिमङ्गल + यत्।) विल्ववृक्षः। इति रत्नमाला॥ अतिशयमङ्गलजनके त्रि॥

अतिमर्य्यादः, त्रि, (मर्य्यादामतिक्रान्तः प्रादिसमासः।) अतिशयितः। इति हेमचन्द्रः॥ अतिशये स्त्री॥

अतिमात्रं, क्ली, (मात्रामल्पमतिक्रान्तं प्रादिसमासः।) अतिशयः। तद्युक्ते त्रि। इत्यमरः॥ (यथा ग्राकुन्तले। अतिमात्रलोहिततलौ बाहू घटोत्क्षेपणात्॥)

अतिमुक्तः, (पुं) माधवीलता। इत्यमरः॥ तिनिशवृक्षः। इति हेमचन्द्रः॥

अतिमुक्तः, त्रि, (अतिशयेन मुक्तः निर्व्वाणमुक्तिं गतः अति + मुच् + कर्त्तरि क्तः, निर्व्वाणमुक्तिविशिष्टः।) निष्कलः। निःसङ्गः। इतिविश्वमेदिन्यौ॥ प्राप्तनिर्व्वाणः॥

अतिमुक्तकः, पुं, (मुच् + भावे क्तः, अतिशयेन मुक्तं बन्धशैथिल्यं यस्य सः बहुव्रीहिः, कप्।) तिनिशवृक्षः। इत्यमरः॥ तिन्दुकवृक्षः। पुष्पवृक्षविशेषः। तत्पर्य्यायः। पुण्ड्रकः २ मल्लिनी ३ भ्रमरानन्दा ४ कामुककान्ता ५। तस्य गुणाः। कषायत्वं। शीतलत्वं। भ्रमनाशित्वं। पित्तदाहज्वरोन्मादहिक्काच्छर्द्दिनिवारकत्वञ्च। इति राजनिर्घण्टः॥ (कर्णिकारान् कुरुवकान् चम्पकानतिमुक्तकान्॥ इति रामायणे)॥

अतिमोदा, स्त्री, (अत्यन्तो मोदो गन्धो यस्याः सा।) नवमल्लिका। इति राजनिर्घण्टः॥

अतिरसा, स्त्री, अत्यन्तो रसो यस्याः सा।) मूर्व्वालता। राखा। क्षीतनकं। इति राजनिर्घण्टः॥

अतिरिक्तः, त्रि, (अति रिच् + कर्त्तरि क्तः। श्रेष्ठे भिन्ने शून्ये च। भावे क्तः, अतिरेके आधिक्ये च।) अधिकः। अतिशयितः। तत्पर्य्यायः। समधिकः २। इत्यमरः॥

अतिरेकः, त्रि, (अति रिच् + भावे घञ्। आधिक्ये श्रेष्ठत्वे च।) अतिशयः। यथा,—

"सम्पूर्णे तूभयोर्ज्ञेयमतिरेके परेऽहनि"।

इति तिथ्यादितत्त्वं॥

अतिरोगः, पुं, (अत्यन्तोरोगः व्याधिः अति रुज् + भावे घञ्।) क्षयव्याधिः। इति राजनिर्घण्टः॥

अतिरोमशः, पुं, (अतिशयितं रोम तदेव विद्यतेऽस्य अतिरोमन् + मत्वर्थे श) वनच्छागलः। इति हारावली॥ दृढत्वानर इति केचित्॥ अतिशयलोमयुक्ते त्रि॥

अतिलोमशा, स्त्री, (अतिशयितं लोम अतिलोमन् + मत्वर्थे श, स्त्रियां टाप्।) नीलबुक्का। इति रत्नमाला॥

अतिवर्त्तुलः, पुं, (अतिशयितो वर्त्तुलः कर्म्मधारयः।) कलायविशेषः। वाँटुला कड़ाइ इति भाषा। इति रत्नमाला॥ अस्य गुणाः सतीलग्रब्दे द्रष्टव्याः॥

अतिवादः, पुं, (अति + वद् + भावे घञ्।) अभिवादः। परुषोक्तिः। इत्यमरटीकायां रमानाथः॥ ("अतिवादांस्तितिक्षेत नावमन्येत कञ्चनः। नचेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित्॥ मनुः।)

अतिविकटः, पुं, (अतिशयितो विकटः भीषणः) दुरुहस्थली। इति शब्दमाला॥ अतिकराले त्रि॥

अतिविषा, स्त्री, (विषमतिक्रान्ता प्रादिसमासः। वा विषमतिक्रान्तं यया बहुव्रीहिः।) वृक्षविशेषः। आतइच। आतेच इति भाषा। तत्पर्य्यायः। विश्वा २ विषा ३ प्रतिविषा ४ उपविषा ५ अरुणा ६ शृङ्गी ७ महौषधं ८। इत्यमरः॥ काश्मीरा ९ श्वेता १०। इति रत्नमाला॥ श्वेतकन्दा ११ भङ्गी १२ भङ्गुरा १३ विरूपा १४ श्यामकन्दा १५ विषरूपा १६ वीरा १७ भार्द्गी १८ श्वेतवचा १९ अमृता २०। इति राजनिर्घण्टः॥ तस्या गुणाः। पाचकत्वं। ग्राहित्वं। दोषनाशित्वञ्च। इति राजवल्लभः॥ कटुत्वं। कफपित्तज्वरामातिसारकासविषच्छर्द्दिनाशित्वञ्च।

"त्रिविधातिविषा ज्ञेया शुक्ला कृष्णा तथारुणा।
रसवीर्य्यविपाकेषु निर्व्विशेष गुणाधिका"॥

इति राजनिर्घण्टः॥

"विषा त्वतिविषा विश्वा शृङ्गी प्रतिविषारुणा।
शुक्लकन्दा चोपविषा भङ्गुरा ग्रन्थवल्लभा॥
विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत्।
कफपित्तातिसारामविषकासवमिक्रिमीन्"॥

इति भावप्रकाशः॥

अतिविस्रब्धनवोढ़ा, स्त्री, (अतिविस्रब्धा अतिप्रश्रययुक्ता नवोढ़ा प्रणयिनी नायिका इति यावत् कर्म्मधारयः।) स्त्रीयान्तर्गतमध्यनायिकाभेदः। तस्याः लक्षणं। नायकातिशयप्रश्रययुक्ता। अस्याश्चेष्टा। सधैर्य्यसापराधनायके वक्रोक्तिः। अधैर्य्यसापराधनायके परुषवाक्। इति रसमञ्जरी॥

अतिवृष्टिः, स्त्री, (अतिशयेन वृष्टिः वर्षणं।) अतिशयवृष्टिः। ईतिविशेषः। स तु महद्वर्षणरूपः क्षुधीणामुत्पातः। यथा,—

"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः॥

इति पराशरः॥

अतिवेलं, क्ली, (वेलां मर्य्यादां कूलं वा अतिक्रान्तं प्रादिसमासः, क्लीवः।) अतिशयिते त्रि। इत्यमरः॥ (जलमतिवेलं पयोराशेः॥ नीतिमाला)।

अतिव्यथा, स्त्री, (अत्यन्ता व्यथायातना कर्म्मधारयः। व्यथ + भावे अङ् स्त्रियां टाप्।) अतिशययातना। तीव्रवेदना। इति शब्दरत्नावली॥

अतिव्याप्तिः, स्त्री, (अतिशयेन व्याप्तिर्व्याप्तनं।) अतिशयव्यापनं। अलक्ष्ये लक्षणस्य गमनं। यथा साध्याभाववदवृत्तित्वमिति व्याप्तिलक्षणे धूमवान् वह्नेरित्यत्र धूमाभावाधिकरणह्रदवृत्तित्वाभावमादाय अतिव्याप्तिः। इति तार्किकाः॥ खाद्यवह्नितप्राक्क्षणावच्छेदेन रविमुच्यमानरश्मीयरविसंयोगविशिष्टखान्तिमत्क्षणकत्वं मलमासत्वं भानुसङ्क्रिते अतिव्याप्तिवारणाय औत्पातिकभिन्नत्वेन विशेषणीयं। इति मलमासतत्त्वटीका॥ मुख्यफलजनकव्यापारजनकत्वे सति मुख्यफलाजनकत्वं अङ्गत्वं घटादावतिव्याप्तिवारणाय सत्यन्तं इति तिथ्यादितत्त्वटीका च॥

अतिशक्तिता, स्त्री, (अतिशयिता शक्तिः कर्म्मसाधनसामर्थ्यं यस्य बहुव्रीहिः, तस्य भावः तल् स्त्रियां टाप्) विक्रमः। महाबलं। इत्यमरः॥

अतिशक्तिभाक् [ज्] पुं, (अतिशयिता शक्तिः कर्म्म साधनसामर्थ्यं कर्म्मधारयः। तां भजते अतिशक्ति + भज् + कर्त्तरि क्विप्, उपपदसमासः।) अतिशयशक्तिविशिष्टः। अतिसमर्थः। सवीर्य्यमतिशक्तिभाक्। इत्यमरः॥

अतिशयः, पुं, (अति + शी + अच्) अधिकः। तत्पर्य्यायः। भरः २ अतिवेलं ३ भृशं ४ अत्यर्थं ५ अतिमात्रं ६ उद्गाढ़ं ७ निर्भरं ८ तीव्रं ९ एकान्तं १० नितान्तं ११ गाढ़ं १२ बाढ़ं १३ दृढ़ं १४। इत्यमरः॥ अतिमर्य्यादः १५ उत्कर्षः १६। इति हेमचन्द्रः॥ बलवत् १७ सुष्ठु १८ किमुत १९ सु २० अतीव २१ अति २२। इत्यव्ययवर्गे अमरः॥ अतिरिक्तः २३ समधिकः २४। इति विशेष्यनिघ्नवर्गे अमरः॥

अतिशयनं, क्ली, (अति + शी + भावे ल्युट्) अतिशयः। तद्युक्ते त्रि। इत्यमरटीकायां रमानाथः। (शयनमतिक्रान्तं अत्यादीतिसमासः। अतिक्रान्तशयनम्॥)

अतिशायनं, क्ली, (अति शी + स्वार्थे णिच् भावे

ल्युट्।) अतिशयनं। इति शब्दरत्नावली॥ (आधिक्यं। प्रकर्षः। प्रशंसा।)

अतिशोभनः, त्रि, (अतिशोभते अति + शुभ + कर्त्तरि ल्युः।) अतिप्रशस्यः। अतिप्रशस्यः। श्रेष्ठः। इत्यमरः॥

अतिसर्ज्जनं, क्ली, (अतिशयेन सर्जनं दानं अति + सृज् + भावे ल्युट्) अतिशयदानं। तत्पर्य्यायः। विसर्गः २। इत्यमरः॥ दानं। वधः। इति मेदिनी॥ (विधुरां ज्वलनातिसर्ज्जनात् ननु मां प्रापय पत्युरन्तिकं॥ इति कुमारसम्भवे॥)

अतिसारः, पुं, (अतिशयेन मलं द्रवीकृत्य सरति निःसारयति अति + सृ + घञ्धिमत्त्वबलेष्विति वक्तव्यमिति वार्त्तिकसूत्रेण कर्त्तरि घञ् दृद्धिः दीर्घश्च।) बहुद्रवमलनिःसरणरोगः। तत्पर्य्यायः। अग्निगन्धिः २ उदरामयः ३। इति त्रिकाण्डशेषः॥ अतीसारः ४। इति वैद्यकं॥ * ॥ तस्य निदानं।

"गुर्व्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः।
विरुद्धाध्यशनाजीर्णैर्विषमैश्चापि भोजनैः॥
क्लेदाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विभेदकैः।
शोकाद्युग्राम्बुमद्यातिपानैः सात्म्यर्तुपर्य्ययैः॥
जलाभिरमणैर्व्वेगविघातैः क्रिमिदोषतः।
नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते"॥

संप्राप्तिर्यथा,—

"संशम्यापां धातुरग्निं प्रदुष्टः
शुक्लन्मिश्रो वायुनाधः प्रणुन्नः।
सरत्यतीवातिसारं तमाहु-
र्व्याधिं घोरं षड्विधं तं वदन्ति॥
एकैकशः सर्व्वशश्चापि दोषैः
शोकेनान्यः षष्ठ आमेन चोक्तः"॥ * ॥

पूर्व्वरूपं यथा,—

"हृन्नाभिपायूदरकुक्षितोद-
गात्रावसादानिलसन्निरोधाः।
विट्सङ्ग आध्मानमथाविपाको
भविष्यतस्तस्य पुरःसराणि॥"

इति माधवकरः॥ अथ सामान्यातिसारस्य चिकित्सामाह।

"आमपक्वक्रमं हित्वा नातिसारक्रिया यतः।
अतोऽतिसारे सर्व्वस्मिन्नामं पक्वञ्च लक्षयेत्॥
क्रमश्चिकित्सा। तत्रामपक्वयोर्लक्षणं।
"संदुष्टमानेर्दोषैस्तु न्यक्तमस्तु निमज्जति।
पुरीषं भृशदुर्गन्धि पिच्छिलं चामसंज्ञितं॥
एतान्येव तु लिङ्गानि विपरीतानि यस्य वै।
लाघवञ्च विशेषेण तत्तु पक्वं विनिर्दिशेत्॥
न च संग्राह्यमं दद्यात् पूर्व्वमामातिसारिणे।
अकाले संगृहीतो हि विकारान् कुरुते बहून्॥
दद्यात्कालसकाध्मानग्रहण्यर्शोभगन्दरान्।
शोथं पाण्डामयं श्लीहगुल्ममेहोदरज्वरान्॥
डिम्भस्य स्थविरस्यथ वातपित्तात्मकस्य यः।
क्षीणधातुबलस्यापि षड्दोषोऽतिविश्रुतः॥
आमोऽपि क्षम्यतेयः स्यात् पाचनान्मरणं भवेत्।
लङ्घनमेकं मुक्त्वा न चान्यदस्तीह भेषजं वा जिनः।
समुदीर्णदोषनिचयं तत् पाचयते तथा शमयेत्॥
लङ्घनएव दोषदुःसहपिपासायां दोषपाकार्थं षड्विधिनार्द्धमृतं योगचतुष्टयमाह,—
"धान्योदीच्यमृतं तोयं तृष्णादाहातिसारिणे।
क्षीवेरमृडुकवेराभ्यां मुस्तपर्पटकेन वा॥
मुस्तोदीच्यमृतं शीतं प्रदातव्यं पिपासवे।
हितं लङ्घनमेवादौ पूर्व्वरूपेऽतिसारिणः॥
कार्य्यं वातशमनस्यान्ते प्रदवं लघुभोजनं।
पथ्यादाडिमवत्सकमुस्तैर्नागरातिविषान्वितैः॥
आमातीसारनाशाय क्वाथमेभिः पिबेन्नरः।
पथ्यादिक्वाथः॥ * ॥
"पाठाहिङ्ग्वजमोदोग्रापञ्चकोलाब्दजं रजः।
उष्णाम्बुपीतं सरुजं जयत्यामं सशैन्धवं॥"
पाठादिचूर्णं॥ * ॥
"हरीतकीं सातिविषां हिङ्गु सौवर्चलां वचां।
सैन्धवञ्चापि संपिष्य पाययेदुष्णवारिणा॥
आमातिसारं योगोऽयं पाचयित्वा चिकित्सति।
आमातिसारो योगेन यत्नेतेन न शाम्यति।
न तं योगशतेनापि चिकित्सति चिकित्सकः॥"
चिकित्सति अपनयति। हरीतक्यादिकल्कः॥*॥
"वत्सकातिविषा बिल्वमुस्तबालकजं मृतं।
अतीसारं जयेत् सामं चिरजं रक्तशूलजित्॥"
वत्सकादिक्वाथः॥ * ॥
"एरण्डरससंपिष्टं पञ्चमामञ्च नागरं।
आमातिसारशूलघ्नं दीपनं पाचनं परं॥"
नागरस्य पुटपाकः कल्कश्च॥ * ॥
"धान्यबालकबिल्वाब्दनागरैः पाचितं जलं।
आमशूलविबन्धघ्नं पाचनं नित्यसेवितं॥"
धान्यपञ्चकं॥ * ॥
"पित्ते धान्यचतुष्कन्तु सुण्ठीत्यागाद्वदन्ति हि।
रक्तेऽपि पित्तसाधर्म्याद्धितं धान्यचतुष्टयं॥"
धान्यचतुष्कं॥ इति आमातिसारस्य चिकित्सा॥*॥
"सलोध्रं धातकीबिल्वं मुस्तामास्थिकलिङ्गकं।
पिबेन्माहिषतक्रेण पक्वातीसारनाशनं॥"
लोध्रादिचूर्णं॥ * ॥
"अम्बष्ठा धातकी लोध्रं समङ्गा पद्मकेशरं।
मधुकारुबिल्वञ्च पक्वातीसारहा गणः॥"
अरुः श्योनाकः। पाठादिर्गणः॥ * ॥
"समङ्गा धातकीपुष्पं मञ्जिष्ठा लोध्रएव च।
शाल्मलीवेष्टको लोध्रो दाड़िमद्रुफलत्वचौ॥
आम्रास्थिमध्यं लोध्रञ्च बिल्वमध्यं प्रियङ्गु च।
मधूकं वृक्षवेरञ्च दीर्घवृन्तत्वगेव च॥
चत्वार एते योगाः स्युः पक्वातिसारनाशनाः।
ते योगा उपयोग्याः स्युः सद्यो द्राक्षेक्षुगुडाम्बुना॥"
समङ्गात्र लज्जालुः। शाल्मलीवेष्टको मोचरसः। दाड़िमस्य द्रुमफलयोस्त्वचौ। प्रियङ्गोर्नपुंसकत्वमत्र फले वर्त्तमानत्वात्। वृक्षवेरमत्र सुण्ठी। दीर्घवृन्तः श्योनाकः तस्य त्वक्। समङ्गादीनि चत्वारि चूर्णानि॥
"कच्चटजम्बूदाड़िमवृक्षाटकपत्रबिल्ववर्हिष्ठं। जलधरनागरसहितं गङ्गामपि वेगवाहिनीं रुन्ध्यात्"॥
कच्चटं चवराई शाकस्य भेदः। कच्चटादिभिश्चतुर्भिः पत्रशब्दः सम्बध्यते। वर्हिष्ठं बालकं गङ्गाधरक्वाथः॥ * ॥
"मोचरसमुस्तनागरपाठारुधातकीकुसुमैः।
चूर्णं मथितसमेतं रुणद्धि गङ्गाप्रवाहमपि"॥
अरुः श्योनाकः। मथितं निर्ज्जलं दधि वस्त्रपूतं।
गङ्गाधरचूर्णं॥ * ॥
"मुस्तावत्सकबीजं मोचरसो बिल्वधातकीलोध्रं।
गुड़मथितसंप्रयुक्तं गङ्गामपि वेगवाहिनीं रुन्ध्यात्"॥
द्वितीयं गङ्गाधरचूर्णं॥ * ॥
"मुस्तारुकशुण्ठीभिर्धातकीलोध्रबालकैः।
बिल्वमोचरसाभ्याञ्च पाठेन्द्रयववत्सकैः॥
आम्रबीजसमङ्गातिविषायुक्तैर्बिचूर्णितैः।
मधुतण्डुलपानीयपोतैर्नश्येत् प्रवाहिकां॥
सर्व्वेऽतिसारा ग्रहणी प्रशमं याति वेगतः।
वृद्धगङ्गाधरं चूर्णं रुन्ध्याद्वेगवाहिनीं॥"
समङ्गा लज्जालुः। वृद्धगङ्गाधरचूर्णं॥ * ॥
अङ्कोटमूलकल्कः तण्डुलपयसा समाक्षिकः पीतः।
सेतुरिव वारिवेगं झटिति रुन्ध्यादतीसारं"॥
अङ्कोटकल्कः॥ * ॥
"कुटजत्वग्बलामार्द्रा द्रोणनीरे पचेत् भिषक्।
पादशेषं मृदं नीत्वा वस्त्रपूतं पुनः पचेत्॥
लज्जालुर्धातकी बिल्वं पाठा मोचरसस्तथा।
मुस्तं प्रतिविषा चैव चूर्णान्येषां पलं पलं॥
निक्षिप्य विपचेत्तावत् यावत् दर्व्वी प्रलिप्यते।
जलेन छागदुग्धेन पीतो मण्डेन वा जयेत्॥
घोरान् सर्व्वानतीसारान् नानावर्णान् सवेदनान्।
अङ्गमर्दं समस्तञ्च तथार्शांसि प्रवाहिकां॥"
कुटजावलेहः॥ * ॥
"क्षत्वालबालं सुदृढं पिष्टैरामलकैर्भिषक्।
आर्द्रकस्य रसेनाशु पूरयेन्नाभिमण्डलं॥
नदीवेगोपमं घोरं प्रदुष्टं दुर्द्धरं नृणां।
सद्योऽतिसारमजयं नाशयत्येष योगराट्॥
पाठा पिष्टा च गोदुग्धा तथा मध्यत्वगाम्बजा।
अतीसारं व्यथादाहयुक्तं हन्युदरे धृता॥ * ॥
अथ वातातिसारस्य लक्षणं।
"अरुणं फेनिलं रूक्षमल्पमल्पं मुहुर्मुहुः।
शूलदामं सरुक्कृच्छ्रं मारुतेनातिसार्य्यते"॥
अरुणमीषदक्तं। शूलत् पुरीषं। सरुक्कृच्छ्रं शब्दो गुदे। तत्साहचर्य्यात् रुगपि गुद एव बोद्धव्या॥ * ॥ तस्य चिकित्सा।
"वचा चातिविषा मुस्तं बीजानि कुटजस्य च।
श्रेष्ठः कषाय एतेषां वातातिसारशान्तये"॥ * ॥
अथ पित्तातीसारस्य लक्षणं।
"पित्तात् पीतं शूलदाहं दुर्गन्धि हरितं द्रुतं।
गुदपाकोष्मामूर्च्छादाहयुक्तं प्रवर्त्तते"॥ * ॥
तस्य चिकित्सा।
"बिल्वशुक्रयवाम्बोदबालकातिविषाशृतः।
कषायोहन्यतीसारं सामं पित्तसमुद्भवं"।
बिल्वादिकषायः॥ * ॥
"रसाञ्जनं सातिविषं कुटजस्य फलं त्वचं।
धातकीपुष्पवेरञ्च पाययेत्तण्डुलाम्बुना॥
निहन्ति मधुना पीतं पित्तातीसारमुल्बणं।
ऋभिं सन्दीपयत्येतत् शूलमाशु निवारयेत्॥
रसाञ्जनादिचूर्णं॥ * ॥ अथ पित्तातिसारभेदस्य

रक्तातीसारस्य संप्राप्तिमाह,—
"पित्तकृन्ति यदात्यर्थं द्रव्याण्यन्नाति पैत्तिके ।
तद्दोषाज्जायते शीघ्रं रक्तातीसार उल्बणः ॥*॥"
तस्य चिकित्सा ।
वत्सकत्वक्गदो दाडिमफलरुम्भवा त्वक् च ।
त्वगयुगलं पलमानं विपचेदष्टांशसम्मिते तोये ॥
अष्टमभागं शेषं क्वाथं मधुनापिबेत् पुरुषः ।
रक्तातिसारमुल्बणमतिशयितं नाशयेन्नियतं ॥
कुटजदाडिमक्वाथः ॥ * ॥
"कुटजातिविषा मुस्तं बालकं लोध्रचन्दनं ।
धातकी दाडिमं पाठा क्वाथमेषां समाक्षिकं ॥
पिबेद्रक्तातिसारे तु दाहशूलामसंयुते ।
कुटजादिकषायोऽयं सर्व्वातीसारनाशनः ॥"
चन्दनमत्र रक्तचन्दनं कुटजादिक्वाथः ॥ * ॥
"गुडेन भक्षयेद्बिल्वं रक्तातीसारनाशनं ।
आमशूलविबन्धघ्नं कुक्षिरोगहरं परं ॥"
बिल्वं सुस्निग्धं बालबिल्वगर्भं शीतं तत्स्वेदनोदकं चानुपेयं । गुडबिल्वं ॥ * ॥
"जम्ब्वाम्रामलकीनान्तु कुट्टयेत् पल्लवान् नवान् ।
संग्रह्य स्वरसं तेषां अजाक्षीरेण योजयेत् ॥"
तत्पिबेन्मधुना युक्तं रक्तातीसारनाशनं ।
जम्ब्वादिस्वरसः ॥ * ॥
"निष्काथ्य मूलममलं गिरिमल्लिकायाः
सम्यक् पलद्वितयमम्बुचतुःशरावे ।
तत्पादशेषसलिलं खलु शोषयीत्थं
क्षीरे पलद्वयमिते कुशलैरजायाः ॥
प्रक्षिप्य मायकानष्टौ मधुनस्तत्र शीतले ॥
रक्तातिसारी तत्पीत्वा नैरुज्यं क्षिप्रमाप्नुयात्" ॥
कुटजक्षीरं ॥ * ॥
"पीत्वा शतावरीकल्कं पयसा क्षीरभुग् जयेत् ।
रक्तातिसारं पीत्वा वा तया सिद्धं घृतं नरः ॥"
शतावरीकल्कस्तद्घृतञ्च ॥ * ॥
"गोदुग्धनवीनतन्तु मधुना सितया सह ॥
लीढ़ं रक्तातिसारे तु ग्राहकं परमं मतं" ॥
नवनीतावलेहः ॥ * ॥
"पीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना ।
रक्तातिसारजिद्रक्तपित्तदड्दाहमेहनुत्" ॥
चन्दनमत्र श्वेतं । चन्दनकल्कः ॥ * ॥
"विरेकैर्बहुभिर्यस्य गुदं पित्तेन दह्यते ।
पच्यते वा तयोः कार्य्यं सेकप्रक्षालनादिकं" ॥
आदिशब्देन लेपादिग्रहः ।
"पटोलयष्टीमधुककाक्वाथेन घृतप्लुतैः ।
गुदप्रक्षालनं कार्य्यं तेनैव गुदसेचनं ॥
दाहे पाके हितं क्वागीदुग्धं सच्छौद्रशर्करं ।
गुदस्य क्षालने सेके युक्तं पाने च भोजने ॥
गुदस्य दाहपाकयोः ।
"गुदनिःसरणे प्रोक्तं चाङ्गेरीघृतमुत्तमं ।
अतिप्रवृत्त्या महती भवेद्यदि गुदव्यथा ।
स्निग्धमूषकमांसेन तदा संस्वेदयेद्गुदं ॥
अथ गोधूमचूर्णस्य संनीतस्य तु वारिणा ।
साज्यस्य गोलकं कृत्वा मृदु संस्वेदयेद्गुदं ॥
(गुदव्यथायां)गुदभंगे गुदं स्नेहैरभ्यज्यान्तःप्रवेशयेत् ।
प्रविष्टं स्वेदयेन्मन्दं मूषकस्यामिषेण हि ॥"
मूषकस्यामिषेण काञ्जिकेनोत्स्विन्नेन शरख-पत्रादिस्थापितेन स्वेदयेत् ।
"मूषकस्याथ वसया पायुं सम्यक् प्रलेपयेत् ।
गुदभंगाभिधो व्याधिः प्रशाम्यति न संशयः ॥
चाङ्गेरीकोलदध्यम्लक्षारनागरसंयुतं ।
घृतं विपक्वं पातव्यं गुदभंगगदापहं ॥
चाङ्गेरी चतुष्पत्रा अम्लालोनिका तस्याः स्वरसः कोलस्य क्वाथः दध्यम्लं दधिरूपमम्लं एतत्त्रयं मिलितं घृताच्चतुर्गुणं । क्षारनागरयोः कल्कः ।
चाङ्गेरीघृतं ॥ * ॥
"कोमलं पद्मिनीपत्रं यः खादेच्छर्करान्वितं ।
एतन्निश्चित्य निर्द्दिष्टं न तस्य गुदनिर्गमः ॥
पद्मिनीपत्रं पुरइनिपत्रं तत्संशोध्य संचूर्ण्य शर्करा युक्तं खादेत् । अयन्तु गुदभंगेऽतीसारं विनापि भवति । ततः क्षुद्ररोगेषु लिखितः । अत्र तु गुदस्य दाहपाकव्यथाप्रसङ्गात् भंगेऽपि लिखितः।
चिकित्सा तूभयत्र तुल्यैव ॥ *॥ अथ श्लेष्मातिसारस्य लक्षणं ।
"श्वेतं स्निग्धं घनं विस्रं शीतलं मन्दवेदनं ।
गौरवारुचिसंयुक्तं श्लेष्मणा सार्य्यते शकृत् ॥
विस्रं स्वादामगन्धि यत् ॥*॥ अथ तस्य चिकित्सा।
"श्लेष्मातिसारे प्रथमं हितं लङ्घनपाचनं ।
योज्यस्वामातिसारघ्नो यथोक्तो दीपनो गणः ॥
चव्यश्चातिविषा कुष्ठं बालबिल्वं सनागरं ।
वत्सकत्वक्फले पथ्या क्वर्द्दिश्लेष्मातिसारनुत्" ॥
चव्यादिक्वाथः ॥ * ॥
"हिङ्गु सौवर्चलं शोषमभयातिविषा वचा ।
पीतमुष्णाम्बुना चूर्णमेषां श्लेष्मातिसारनुत् ॥"
हिङ्ग्वादिचूर्णं ॥ * ॥
"क्षमिश्रक्रवचाविल्वपेशीधान्याकाकट्फलं ।
एषां क्वाथं भिषग्दद्यात् अतीसारे बलासजे" ॥
विड्ङ्गादिक्वाथः ॥ * ॥ अथ द्विदोषजातिसारायां लक्षणानि चिकित्सा च ।
"द्विदोषलक्षणैर्विद्यादतीसारं द्विदोषजं ।
तेषां चिकित्सा प्रोक्तैव विश्लिष्टा च निगद्यते ॥
कट्फलं मधुकं लोध्रत्वक् दाड़िमफलस्य च ।
सतण्डुलजलं चूर्णं वातपित्तातिसारनुत्" ॥
वातपित्तातिसारे ॥ * ॥
"चित्रकातिविषा मुस्तं बालबिल्वं सनागरं ।
वत्सकत्वक्फलं पथ्या वातश्लेष्मातिसारनुत्" ॥
वातश्लेष्मातिसारे ॥ * ॥
"मुस्ता सातिविषा मूर्व्वा वचा चकुटजः समाः ।
एषां कषायः सच्छौद्रः पित्तश्लेष्मातिसारनुत्" ॥
पित्तश्लेष्मातिसारे॥ अथ सन्निपातातिसारस्य लक्षणं।
"तन्द्रायक्तो मोहसादास्यशोषी
वर्चं कुर्य्यान्नैकरूपं दवर्त्तः ।
सर्व्वोद्भूते सर्व्वलिङ्गोपपत्तिः
क्षुद्रोऽसाध्यो बालवृद्धाबलानां" ॥
अथ तस्य चिकित्सा ॥ * ॥
"पञ्चमूलीबलाबिल्वगुडूचीमुस्तनागरैः ।
पाटाभूनिम्बवर्हिष्ठकुटजत्वक्फलैः घृतं ॥
सर्व्वजं हन्त्यतीसारं ज्वरञ्चापि तथा वमिं ।
शूलोपद्रवं श्वासं कासं वापि सुदुस्तरं ॥
पञ्चमूल्यत्र सामान्या पित्ते योज्या कनीयसी ।
वाते पुनर्ब्बलासे च सा योज्या महती मता" ॥
वर्हिष्ठं बालकं । पञ्चमूल्यादिक्वाथः ॥ * ॥
"अभया नागरं मुस्तं गुडेन सह योजितं ।
चतुःसमेयं गुटिका स्यात्त्रिदोषातिसारनुत् ॥
आमातिसारमानाहं सविबन्धं विसूचिकां ।
ह्रदीनरोचकं हन्याद्दीपयत्याशु चानलं" ॥
चतुःसमो मोदकः ॥ * ॥
"तत्क्षणाद्धृतकुटजत्वचं तण्डुलवारिणा ।
पिष्टां चतुःपलमितां जम्बुपल्लववेष्टितां ॥
सूत्रेण बद्धा गोधूमपिष्टेन परिवेष्टितां ।
लिप्ताञ्च घनपङ्केन निर्द्दहेद्गोमयाग्निना ॥
अङ्गारवर्णाञ्च मृदं दृष्ट्वा वह्नेः समुद्धरेत् ।
ततो रसं समादाय शीतं क्षौद्रयुतं पिबेत् ॥
उक्तः क्षयाच्चिपुत्रेण पुटपाकस्तु कौटजः ।
जयेत् सर्व्वानतीसारान् दुस्तरान् सुचिरोत्थितान्
कुटजपुटपाकः ॥ * ॥
"कुटजत्वक्कृतः क्वाथो वस्त्रपूतो घनीकृतः ।
स लीढ़ोऽतिविषायुक्तः स्यात्त्रिदोषातिसारनुत् ॥
इच्छन्त्यन्येऽस्मांशेन क्वाथादतिविषारजः ।
प्रक्षिपेदा चतुर्थांशमिति केचिदवन्ति हि" ॥
कुटजावलेहः ॥ * ॥
"पलमङ्कोठमूलस्य पाठां दार्व्वीञ्च तत्समां ।
पिष्ट्वा तण्डुलतोयेन वटकानक्षसम्मितान् ॥
क्वाथयुष्कांश्च तान् कुर्य्यात्तेषैकं तण्डुलाम्बुना ।
पेषयित्वा प्रदद्यात्तं पानाय गदिने भिषक् ॥
वातपित्तकफोद्भूतान् द्वन्द्वजान् सान्निपातिकान् ।
हन्यात् सर्व्वानतीसारान् वटकोऽयं प्रयोजितः"॥
अङ्कोठवटकः ॥ * ॥ अथागन्तुजस्य शोकातिसारस्य संप्राप्तिपूर्व्वकं लक्षणमाह ।
तैस्तैर्भावैः शोचतोऽत्याशनस्य
वाय्वोष्मा वै वह्निमाविश्य जन्तोः ।
कोष्ठं गत्वा क्षोभयेत् तस्य रक्तं
तच्चाधस्तात् काकयन्तीप्रकाशं ॥
निर्गच्छेद्वै विड्भिमिश्रं क्वचिच्च
निर्गन्धं वा गन्धवद्बातिसारः ।
शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं
रोगो वैद्यैः कष्ट एष प्रदिष्टः ॥
अयमर्थः।तैस्तैर्भावैर्बन्धुवित्तक्षयादिभिः शोचतः शोकं कुर्व्वतः। जन्तोः प्राणिनः। वाय्वोष्मा वाय्वः शोकजदेहोष्मणा जनितं नेत्रनासागलादिषु जलं तेन सहितः उष्मा शोकजं देहतेजः। स कोष्ठं गत्वा वह्निमाविश्य जठराग्निं मन्दीकृत्य। वाय्वसहित्यादुष्णाग्नेरपि वह्नेर्मन्दीभाव इति नदोषः।वह्नेर्मन्दीभावादेव अल्पाशनस्येति जन्तोर्विशेषणं। ततश्चास्य जन्तोः रक्तं क्षोभयेत् स्वस्थानात्चालयेत्। इति संप्राप्तिः॥ अथ लक्षणं। तच्च रक्तं अधस्तात् गुदात् काकयन्तीप्रकाशं गुञ्जाफलसदृशं विड्भिर्मिश्रं गन्धवच्च। अविट् निर्गन्धं वा निर्गच्छेत्। शोकोत्पन्नोऽतिसारः अतिमात्रं दुश्चिकित्स्यः । शोकाप-

नोदनं विना केवलेन भेषजेन प्रतिकर्त्तुमशक्यत्वात्। एषोऽतिसारः वैद्यैः कष्टः कष्टेन साध्यः। प्रदिष्टः कथित इत्यर्थः ॥ * ॥ अथागन्तुजत्वेन साम्यात् भयातिसारस्यापि संप्राप्तिपूर्ब्बकं लक्षणमत्रैवाह।

"भयेन क्षोभिता दोषा दूषयन्ति मलं यदा।
तदातिसार्य्यते तन्तु क्षिप्रमुष्णजलप्लवं॥
वातपित्तातिसारस्य प्रायो लिङ्गैः समन्वितं।
न भयोपशमाच्छम्यत्यस्मिन्स्यात् सभयात् स्मृतः॥

प्लवत इति प्लवं जले प्लवमानं। ननु भयातिसारस्य कथमागन्तुजत्वमयमपि दोषज एव। यत आह। भयेन क्षोभिता दूषिता दोषा मलं दूषयन्ति। तन्मलमतिसरति। अत्र पूर्ब्बमेव दोषसम्बन्धः। उच्यते।

"रागद्वेषभयात् ये च ते स्युरागन्तवो गदाः"।

इति वचनाद्भयातीसार आगन्तुज एव। श्लोकस्य त्वयमर्थः। भयेनैव हेतुभूतेन दोषा वातपित्तकफा अतीसारणाय क्षोभिताः सञ्चालिताः न दूषिता भयेन त्रयाणामपि दोषाणां दूषणासम्भवात्। अतिसर्त्तुं चलिता वातपित्तकफा मलं दूषयन्ति तत् सर्व्वं वातपित्तकफमलं भयेनैवातिसार्य्यते। पश्चाद्दातसम्बन्धो भयाद्दायुरिति वचनात्। अतएव भयातिसारे वातहर्य्यव क्रिया कथितेति समाधिः ॥ * ॥ अथ तयोश्चिकित्सा।

"भयशोकसमुद्भूतौ ज्ञेयौ वातातिसारवत्।
तयोर्व्वातहरी कार्य्या हर्षणाश्वासनैः क्रिया"॥

वातातिसारवत् वातातिसारलक्षणैः। तयोश्चिकित्सा च हर्षणाश्वासनपूर्ब्बिका वातहरी कार्य्या ॥ * ॥ अथामातीसारस्य संप्राप्तिपूर्ब्बकं लक्षणमाह।

"अन्नाजीर्णात् प्रदुताः क्षोभयन्तो
दोषाः कोष्ठे धातुसंघान् मलांश्च।
नानावर्णं नैकशः सारयन्ति
शूलोपेतं षण्मलेनं वदन्ति॥

अन्नं भुक्तं तदजीर्णं चेति कर्म्मधारये अन्नाजीर्णात् तस्मात् प्रदुता उपदुताः। क्षोभयन्तः चालयन्तः। नैकश इत्यत्र नाकादित्वान्नात्तरविपर्य्ययः। नन्वामेन दोषा दूष्यन्ते गुर्व्वादिभक्षणादिभिरिव ते कथातीसारमुत्पादयन्ति। सत्यामेवातीसारमुत्पादयति। तेनामातीसारोऽपि दोषज एव किमर्थमयं पृथगुच्यते। उच्यते। आमातीसारस्य चिकित्साविशेषार्थं सम्प्राप्तिपूर्ब्बको लक्षणविशेषः पृथगुक्तः। कः स चिकित्साविशेषस्तमाह। अतिसारेषु सर्व्वेष्वेव संग्राहकमौषधमुक्तमामातीसारे तु ग्राहकं विरुद्धं। यत उक्तं।

"नामे संग्राहकं विद्यादतीसारे कदाचन।
संगृह्णीतो बलादामो विकारान् कुरुते बहून्"॥

इति। बलाद्भेषजबलात्। विकारान् ग्रहण्याध्मानशूलगुल्मप्लीहोदरज्वरादीन् ॥ * ॥ तस्य चिकित्सा।

"वत्सकातिविषा शुण्ठी बिल्वहिङ्गुयवाम्बुदाः।
चित्रकेण युता एषां क्वाथ आमातिसारनुत्"॥

आमातिसारस्य चिकित्सा पूर्ब्बमुक्तैव ॥ * ॥

"शोथघ्नीन्द्रयवाः पाठा विड्ङ्गातिविषा घनाः।
क्वथिताः सोषणाः पीताः शोथातिसारनाशनाः"॥

शोथघ्नी पुनर्नवा। उषणं मरिचं। सशोथातीसारे ॥ * ॥

"आम्रास्थिमध्यमालूरफलक्वाथः समाक्षिकः।
शर्करासहितो हन्यात् कृच्छ्रतीसारमुल्बणं॥"

मालूरफलं बिल्वफलं।

"कषायो भक्षसुद्गस्य सलाजमधुशर्करः।
निहन्याच्छर्द्यतीसारं तृष्णादाहं ज्वरं भ्रमं"॥

कृच्छ्रतीसारे ॥ * ॥

"दध्ना ससारेण समाक्षिकेण
भुञ्जीत निःसारकपीडितस्तु।
सुतप्तकुप्यक्वथितेन चापि
क्षीरेण शीतेन मधुप्लुतेन"॥

निःसारकः निढ़ाही इति लोके। सुतप्तकुप्यक्वथितेन। सुतप्तसुवर्णरजतेतरलोहनिर्व्वापणक्वथितेन। भुञ्जीत पथ्यमिति शेषः॥ निःसारके ॥ * ॥

"दीप्ताग्निर्निष्पुरीषो यः सार्य्यते फेनिलं शनैः।
स पिबेत् फाणितं शुण्ठीं दधि तैलं पयो घृतं॥
बला विश्वाप्लुतं क्षीरं गुड़तैलानुयोजितं।
दीप्ताग्निं पाययेत् प्रातः सुखदं वर्च्चसक्षये"॥

पुरीषक्षये ॥ * ॥

"तुलां संकुच्य विल्वस्य पचेत् पादावशेषितं।
सक्षीरं साधयेत्तैलं श्लक्ष्णपिष्टैरिमैः समैः॥
विल्वं सधातकीकुष्ठं शुण्ठी रास्ना पुनर्नवा।
देवदारु वचा मुस्तं लोध्रमोचरसान्वितं॥
एभिर्म्मर्दग्निना पक्वं ग्रहण्यर्शोऽतिसारनुत्।
विल्वतैलमिति ख्यातमत्रिपुत्रेण भाषितं॥
ग्रहण्यर्शोऽधिकारे ये स्नेहाः समुपदर्शिताः।
प्रयोज्याश्चेऽतिसारेऽपि त्रयाणां तुल्यहेतुता"॥

त्रयाणां ग्रहण्यर्शोऽतिसाराणां। विल्वतैलं ॥ * ॥ अथातिसारभेदस्य प्रवाहिकाख्यस्य संप्राप्तिपूर्ब्बकलक्षणमाह।

"वायुः प्रदुष्टो निचितं बलासं
नुदत्यधस्तादहिताशनस्य।
प्रवाहतोऽल्पं बहुशो मलाक्तं
प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः"॥

अस्यायमर्थः। अहिताशनस्य अतिशयेन वातलभक्ष्यभोजिनः। प्रदुष्टो वायुः प्रवाहतः कण्ठहृद्वलेन सशब्दं वायुमपानमार्गेण त्यजतः। निचितं सञ्चितं। बलासं कफं। मलाक्तं पुरीषयुक्तं अल्पं। बहुशः वारंवारं। अधस्तात् गुदमार्गेण। नुदति प्रेरयति। तज्ज्ञाः पुराणा वैद्याः। तां प्रवाहिकां। प्रवदन्ति कथयन्ति ॥ * ॥

तस्या वातजादिभेदेन रूपमाह।

"प्रवाहिका वातकृता सशूला
पित्तात् सदाहा सकफा कफाच्च।
सशोणिता शोणितसम्भवाच्च
ताः स्नेहरूक्षप्रभवा मतास्तु"॥

तत्र रूक्षप्रभवा वातजा। स्नेहप्रभवा कफजा। तु शब्दात्तीक्ष्णोष्णप्रभवा पित्तजा रक्तजा च। तासामतीसारवदादिश्च लिङ्गं क्रमं चामविपक्वताश्च। क्रमं चिकित्सां ॥ * ॥ तस्याश्चिकित्सामाह।

"बिल्वपेशी गुड़ं लोध्रं तैलं मरिचसंयुतं।
लीढ्वा प्रवाहिकाक्रान्तः सत्वरं सुखमाप्नुयात्"॥

बिल्वादिरवलेहः ॥ * ॥

"धातकीवदरीपत्रकपित्थरसमाक्षिकं।
सलोध्रमेकतो दध्ना पिबेन्निर्व्वाहिकार्दितः"॥

एकतः प्रत्येकं दध्ना पिबेदित्यर्थः। निर्व्वाहिका प्रवाहिका। धातक्यादिः ॥ * ॥ अथ असाध्यातिसारिणोलक्षणमाह।

"पक्वजाम्बवसंकाशं यस्तत्खण्डनिभं तनुं।
घृततैलवसामज्जवेसवारपयोदधि।
मांसधावनतोयाभं क्षय्यं नीलारुणप्रभं॥
कृष्णं सक्तदालोक्य नातिसारमुपक्रमेत्।
तृष्णादाहरुचिश्वासहिक्कापार्श्वास्थिशूलिनं"॥

संमूर्च्छारतिसंमोहयुक्तं पक्वबलीगुदं।
प्रलापयुक्तञ्च भिषक् वर्ज्जयेदतिसारिणं॥ संमूर्च्छा सकलेन्द्रियमनसां स्वस्वविषयग्रहणाग्रहणहेतुरवस्थाविशेषः। संमोहः विकृतमतित्वं।

"असंस्कृतगुदं क्षीणं शूलाध्मानैरुपद्रुतं।
गुदे पक्वे गतोष्माणमतीसारिणमुत्सृजेत्॥
असंस्कृतगुदं गुदसंवरणाक्षमं।
गुदे पक्वे गतोष्माणं गुदपाकारम्भके पित्ते विद्यमानेऽपि शीतगात्रं नष्टाग्निं वा।

"श्वासशूलपिपासार्त्तं क्षीणं ज्वरनिपीड़ितं।
विशेषेण नरं वृद्धमतीसारो विनाशयेत्॥
शोथं शूलं ज्वरं तृष्णां श्वासं कासमरोचकं।
हृद्विसूर्च्छाञ्च हिक्काञ्च दृष्ट्वातिसारिणं त्यजेत्॥
हृत्पादाङ्गुलीसन्धिप्रपाको मूत्रनिग्रहः।
पुरीषस्योष्णातातीव मरणायातिसारिणां॥
अतीसारी राजरोगी ग्रहणीरोगवानपि।
मांसाग्निबलहीनो यो दुर्लभं तस्य जीवनं॥
बाले वृद्धे त्वसाध्योऽयं लिङ्गैरेतैरुपद्रुतः।
अपि यूनामसाध्यः स्यादतिदुष्टेषु धातुषु"॥

एतैर्लिङ्गैः पर्व्वोक्तैः पक्वजाम्बवसंकाशत्वादिभिः॥ * ॥

अथातिसारयुक्तस्य लक्षणं।

"यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति।
दीप्ताग्नेर्बहु कोष्ठस्य स्थितस्तस्योदरामयः"॥

उच्चारं पुरीषं विना स्थितः निरुद्ध उदरामयोऽतिसारः॥ * ॥ अथातीसारिणो वर्ज्जनीयानाह।

"स्नानावगाहनाभ्यङ्गगुरुस्निग्धादिभोजनं।
व्यायाममग्निसन्तापमतीसारी विवर्ज्जयेत्"॥

स्नानमुद्वर्त्तनेन। अवगाहनं नद्यादौ। इत्यतीसाराधिकारः। इति भावप्रकाशः॥

अतिसारकी, [नृ] त्रि, (अतिसार + स्वार्थे कन् ततो मत्वर्थे इन्) सातिसारः। अतिसाररोगयुक्तः। उदरामयी। इत्यमरः॥

अतिसाम्या, स्त्री, (साम्यं समतामतिक्रान्ता अत्यादीति समासः अतुल्यस्थलयुक्ता इति यावत्।)

लतायष्टिमधु। इति राजनिर्घण्टः॥ अस्या गुणाः क्लीतनकशब्दे द्रष्टव्याः॥ (यष्टिमधु इति भाषाः।)

अतिस्किरः, त्रि, (स्कायी ओप्यायी वृद्धौ अति + स्काय + स्कायितस्विचश्चिश्नकीत्यादिसूत्रेण रक् एषोदरादित्वात् आयभागस्य इ अतिवृद्धः) अतिस्फूर्त्तिशाली। तत्पर्य्यायः। स्फोरः २। इति जटाधरः॥

अतिहसितं, क्ली, (अतिशयेन हसितं हास्यं हस् + भावे क्तः।) अतिशयहास्यं। इति जटाधरः॥ (ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च। नीचानामपहसितं तथातिहसितञ्च षड्भेदाः॥ "मधुरस्वरं विहसितं सांसश्विरःकम्पनमवहसितं। अपहसितं साश्रुत्वं वित्तिमाङ्गं भवत्यतिहसितं"॥ इति साहित्यदर्पणे॥)

अतिहासः, पुं, (अतिशयेन हासः हास्यम् अति + हस् + भावे घञ्।) सशब्दहासः। तत्पर्य्यायः। अनुस्यूतः २। इति हेमचन्द्रः॥

अतीतं, त्रि, (अति + इण् + क्तः) भूतकालः। तत्र तिस्रो धी टी ठी विभक्तयो भवन्ति। यथा भवद्भूतभव्ये त्रिश्चः क्यादयः। क्यादयः क्रमात्यस्तिस्तिस्रः क्रमाद्वर्त्तमानातीतभविष्यत्सु कालेषु स्युः। इति मुग्धबोधव्याकरणं॥ तस्य लक्षणादि यथा। वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वं। लङ्लुङोरतीतत्वं। लिट्क्रियोर्व्वक्तुः परोक्षत्वं अतीतत्वञ्च। लुङोऽतीतत्वं क्रियातिक्रमश्च। कुतश्चिद्धेतुगुण्यात् क्रियानिष्पत्तिः क्रियातिक्रमः। क्तक्तवत्वोरतीतत्वं। इति सारमञ्जरी॥

अतीतः, त्रि, (अति इण् कर्त्तरि क्तः।) मतः। भूतः। अतिक्रान्तः। यथा,—
"न नस्यं न्यूनसम्बन्धे नातीताग्रीतिवत्सरे"।
इति वैद्यकपरिभाषा॥ सङ्गीतशास्त्रमते मानप्रभेदः॥

अतीन्द्रियं, त्रि, (इन्द्रियमतिक्रान्तम् अत्यादीति समासः।) अप्रत्यक्षं। प्रत्यक्षाविषयं। इन्द्रियागोचरं। इन्द्रियायाह्यं। इत्यमरः॥ ("योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः"। इति मनुः।
"अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः"॥ इति रघुवंशे॥)

अतीव, व्य, (अत्येव इव अवधारणे प्रादिसमासः, अवधृतातिशयेऽत्यन्तातिशये च।) अतिशयः। इत्यमरः॥
("अहं हि कारणं श्रुत्वा वैरस्यातीवमानद"॥ इति रामायणे॥)

अतीसारः, पुं, अतिसाररोगः। इति वैद्यकं॥

अतुलः, पुं, (नास्ति तुला सादृश्यं यस्य सः।) तिलवृक्षः। इति शब्दचन्द्रिका। तुलनारहिते त्रि॥ ("राज्ञसेन्द्रप्रभावेण श्रिया चातुलया तया"॥ इति रामायणे॥)

अतुल्यं, त्रि, (न तुल्यं सदृशं नञ्समासः।) निस्तुल्यं। अनुपमं। असाम्यं। असदृशं। यथा,—
"अतुल्यमहसा साकं मम रामेण विग्रहः"।
इति भट्टिः॥

अतुष्टिकरं, त्रि, (तुष्टिं सन्तोषं करोति तुष्टि + कृ + कर्त्तरि टच् उपपदसमासः स्त्रियां ङीप् अतुष्टिकरी।) सन्तोषाजनकं। यथा मनुः,—
"अनिर्देशश्च प्रेतान्नं अतुष्टिकरमेव च"॥
इत्याङ्गिकतत्वं।

अतृप्तिः, स्त्री, (तृप् + भावे क्तिन् न तृप्तिः सन्तोषः नञ्समासः। बहुव्रीहौ तु तृप्तिरहितः असन्तोषकरः।) तृप्त्यभावः। अपरितुष्टिः। अज्ञानाभिलाषः। यथा,—
"उष्णाद्यतिमतः प्रवेशदहनं कङ्क्षतिक्ता रसा।
वर्णः पाण्डुविवर्जितः क्षपितता कर्म्माणि पित्तस्यवै"
इति रक्षितः॥ अतृप्ते त्रि॥

अतेजः, [स्] क्ली, (न तेजः तेजोविरोधितमः नञ्समासः।) छाया इति राजनिर्घण्टः॥ तेजोरहिते त्रि॥

अत्कः, पुं, शरीरावयवः। अङ्गं। इत्युणादिकोषः॥

अत्कः, त्रि, (अतति सततमनित्यतया विकारं गच्छति अत् + कन् अतति सततं गच्छति अत् + कन्) पथिकः। भाग्यः। इत्युणादिकोषः॥

अतट ड अतिक्रमे। बधे। इति कविकल्पद्रुमः॥ दन्त्यवर्गाद्योपधः। ड अतिदृष्टिते। इति दुर्गादासः॥

अत्ता, स्त्री, (अतति सततं स्नेहं संबध्नाति अत् + तक् स्त्रियां टाप्।) माता। ज्येष्ठा भगिनी। इत्यमरटीकायां रमानाथः॥ अत्ता मातायज्ञसा। इति नानार्थकोषः॥ प्राकृतभाषायां श्वश्रूः। इति साहित्यदर्पणटीका॥

अत्तिः, स्त्री, (अत्यते सततं कर्म्मणि सम्बध्यतेऽनया, अत् करणे क्तिन् माता च।) नाद्योक्तौ ज्येष्ठा भगिनी। इति शब्दरत्नावली।

अत्तिका, स्त्री, (अत्ति + स्वार्थे कन्) अन्तिका। नाद्योक्तौ ज्येष्ठा भगिनी। इति भरतः द्विरूपकोषश्च।

अत्नुः, पुं, (अतति सततं गच्छति अत् + कर्त्तरि नु वायुः सततगन्ता पथिकः।) सूर्य्यः। इत्युणादिकोषः॥

अत्यः, पुं, (अतति शीघ्रं गच्छति अत् + कर्त्तरि यत्, क्वचिदपवादविषयेऽप्युत्सर्गोऽप्यभिनिविशते इति न्यायात् अन्यथा हलन्तात् ण्यति आत्य इति स्यात् द्रुतगामी अश्वः।) अश्वः। वैदिकशब्दोऽयं॥

अत्यन्तं, क्ली, (अन्तं सीमामतिक्रान्तम् अत्यादीति समासः।) अतिशयः। यथा। अत्यन्तं कठिनौ तथापि हृदयानन्दाय वक्षोरुहौ। इति नरहरिकविः॥

अत्यन्तकोपनः, त्रि, (अत्यन्तं कोपनः क्रोधशीलः द्वितीयातत्, कुप् + कर्त्तरि युच्।) अतिशयक्रोधी। तत्पर्य्यायः। चण्डः २। इत्यमरः॥

अत्यन्तगामी, [न्] त्रि, (अत्यन्तं शीघ्रं गच्छति अत्यन्त + गम् + णिनि उपपदसमासः।) अतिशयगमनशीलः। अतिशीघ्रगमनकर्त्ता। तत्पर्य्यायः। अत्यन्तिकः २। इति हेमचन्द्रः॥

अत्यन्तः सुकुमारः, पुं, (अत्यन्तः सुकुमारः कर्म्मधारयः।) कङ्कनीवृक्षः। इति राजनिर्घण्टः॥

अत्यन्तिकः, पुं, (अत्यन्तं गच्छति अत्यन्त + ठन् ठस्येक इति ठस्य इकः अति सातिशयमन्तिकं कर्म्मधारयः, अतिनिकटम्।) अतिशयभ्रमणकर्त्ता। अत्यन्तगामी। इति हेमचन्द्रः॥

अत्यन्तीनः, त्रि, (अन्तस्यात्ययः अव्ययीभावसमासः। अत्यन्तं गामी द्वितीयातत्पुरुषः। लक्ष्मीं परम्परोणां त्वमत्यन्तीनत्वमुन्नये इति भट्टिः।) भृशङ्गामी। अतिशयगमनशीलः। इत्यमरः॥

अत्यम्लं, क्ली, (अत्यन्तः अम्लोरसः फलपत्रादौ यस्य सः।) वृक्षाम्लं। इति राजनिर्घण्टः॥ तेंतुल इति भाषा॥

अत्यम्लपर्णी, स्त्री, (अत्यम्लं पर्णं पत्रं यस्याः सा जातित्वात् ङीप्।) लताविशेषः। तत्पर्य्यायः। तीक्ष्णा २ काण्डरा ३ वल्लिपूरणः ४ करवेल्लो ५ वयस्था ६ अरण्यवासिनी ७। अस्या गुणाः। तीक्ष्णाम्लत्वं। प्लीहशूलविनाशित्वं। वातहारित्वं। अग्निरुचिकारित्वं। गुल्मश्लेष्मरोगापहारित्वञ्च। इति राजनिर्घण्टः॥

अत्यम्ला, स्त्री, (अत्यन्तः अम्लरसो यस्याः सा स्त्रियां टाप्) वनबीजपूरः। मधुरलेबु। मधुटाबा इति ख्याता। इति रत्नमाला॥

अत्ययः, पुं, (अति + इण् + भावे अच्।) मृत्युः। अतिक्रमः। दण्डः। दोषः। छद्मं। इत्यमरः॥ ("जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः। आकाशमिव पङ्केन न स पापेन लिप्यते॥ इति मनुः॥)

अत्यर्थं, क्ली, (अर्थमतिक्रान्तं अत्यादीति समासः।) अतिशयः। तद्विशिष्टे वाच्यलिङ्गः। इत्यमरः॥। ("लक्ष्मणो रामभत्यर्थमुवाच हितकाम्यया"। इति रामायणे॥)

अत्यल्पं, त्रि, (अत्यन्तमल्पं मनाक्।) यत्किञ्चित्। अतिसूक्ष्मं। तत्पर्य्यायः। अल्पिष्ठं २ अल्पीयः ३ कणीयः ४ अणीयः ५। इत्यमरः॥

अत्याकारः, पुं, (अति आधिक्येन आकारः तिरस्कारः। आ + कृ + भावे घञ्।) अतिशयितः। आकारो देहः कर्म्मधा। कृहदेहः। अतिशयितः आकारो यस्य सः तद्विशिष्टः।) न्यक्कारः। तिरस्कारः। इति हेमचन्द्रः॥

अत्याचारं, क्ली, (आचारमतिक्रान्तं अत्यादीति समासः।) विरुद्धाचरणं। आचारमतिक्रम्य इत्यव्ययीभावसमासनिष्पन्नं॥

अत्याचारः, पुं, (अति अनुचित आचारः कर्म्मधा।) अनुचिताचारः। असङ्गताचरणं। आचारोल्लङ्घनं। अन्यायः॥ (अति अनुचितः आचार आचरणं यस्य सः अन्यायाचरणकारी।)

अत्याज्यं, त्रि, (त्यक्तुं न शक्यं अति त्यज् + शक्यार्थे ण्यत्, कुत्वाभावः।) त्यागानर्हं। अत्यक्तव्यं। अत्यजनीयं। यथा, यत्तु पतितस्त्रीगमनस्य लघुत्वं प्रायश्चित्तविवेकहृद्धिरुक्तं तदत्याज्यापरं। इति प्रायश्चित्ततत्त्वं॥

अत्यालः, पुं, (अति अत्याग्रयेण आ चतुर्दिक्षु अलति भूषति अति + आ + अल + कर्त्तरि अच् । लालचिता इतिभाषा) रक्तचित्रकवृक्षः । इति राजनिर्घण्टः ॥

अत्याशा, स्त्री, (अतिशयेन आशा) अतिशयाशा । अत्यन्तस्पृहा । असम्भावनीयवाञ्छा । यथा,—
"अत्याशाभिरुपागताध्वगगणान् धन्यावनौ तापिताञ्जोयत्तर्पयितुं त्वमोऽस्मि मम तद्दुःखैर्मनो दूयते"। इत्युद्भटः ॥

अत्याहारी [न्] त्रि, अतिपूर्ब्बाऽपूर्ब्बहृधातोः कर्त्तरि णिन् प्रत्ययनिष्पन्नः । अतिशयाहारकर्त्ता । बह्वाशी । अपरिमितभोजी ॥

अत्याहितं, क्ली, (अत्यन्तमाधीयते तन्निवारणाय चित्तं निधीयते ऽत्र अति आ + धा + क्तोऽधिकरणे द्रव्यगतिप्रत्ययवसानार्थेभ्यश्च इति सूत्रेण क्त अधिकरणे) महाभीतिः । अतिशयभयं । जीवानपेक्षि कर्म्म । जीवनाशारहितसाहसकर्म्म । इत्यमरः ॥ (अत्याहितं किमपि राक्षसकर्म्म कुर्य्यात् । इति रामायणं ।)

अत्युक्तिः, स्त्री, (अतिशयेन उक्तिः कथनम् अति + वच् + भावे क्तिन्) आरोपितकथनं । अतिशयोक्तिः । असम्भवोक्तिः । अलङ्कारविशेषः । यथा ।
"अत्युक्तिरद्भुतातथ्यशौर्य्यौदार्य्यादिवर्णनं ।
त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः" ॥
इति चन्द्रालोकः ॥

अत्यूहः, पुं. (अतिशयेन ऊह्यते रवजनितलक्षणवर्त्मकरणं यथा तथा शब्द्यायते यः अति + ऊह + कर्त्तरि अच् । अतिशयितः ऊहस्तर्कः प्रादीति समासः, अतितर्कः) कालकण्ठः । दात्यूहपक्षी । इति मेदिनी ॥ अतिशयवितर्कः ॥ (अत्यूहा नीलिकायां स्त्री कलकण्ठखगे पुमान् ॥ इति मेदिनी ॥)

अत्यूहा, स्त्री, (अतिशयितः ऊहः पुण्योत्कर्षेण तर्को यस्याः सा स्त्रियां टाप्) नीलिका । श्रेयोगिका । इति मेदिनी ॥

अत्र, व्य, एतद् + सप्तम्यर्थे त्रल् एतदशब्दस्य अआदेशः) एतस्मिन् । एखाने इति भाषा । एतच्छब्दस्य सप्तम्यास्त्रादेशे रूपोऽयं ॥ (अपि सन्निहितोऽत्र कुलपतिः ॥ इति शाकुन्तले ॥)

अत्रभवान्, [त्], त्रि,(एतद् + अन्येभ्योऽपीति प्रथमार्थे त्रल् अत्र अयं भवान् कर्म्मधारयः ।) पूज्यः । श्राद्ध्यः । मान्यः । नाटकेऽस्य प्रचुरप्रयोगः । इति हेमचन्द्रः ॥ (नूनमत्रभवतः शरीरकृतिं सर्व्वथायमनुयाति सायकः ॥ इति भारविः ॥)

अत्रिः, पुं. (अत्ति स्म एकगरुडवेगेव सर्व्वमेव गरलं पीतवान् अद् + कर्त्तरि ट्रन् दस्य तः ।
"मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
ब्रह्मणोः मानसाः पुत्राः वशिष्ठेति सप्त ते" ॥
इति) सप्तर्षिमध्ये ऋषिविशेषः । स च ब्रह्मणश्चक्षुषो जातः । तस्य भार्य्या कर्दममुनिकन्या अनसूया । पुत्राः दत्तः १ दुर्व्वासाः २ चन्द्रश्च ३ । इति श्रीभागवतं॥ (यथा मनुः,—
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुं ।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च" ॥)

अत्रिजातः, पुं, (अत्रेर्जात उत्पन्नः पञ्चमीतत्पुरुषः।) चन्द्रः । द्विजन्मा । यथा,—
"अत्रिजातस्य या मूर्त्तिः शशिनः सज्जनस्य च ।
क्व सा चैवात्रिजातस्य तमसो दुर्जनस्य च" ॥
इति त्रिविक्रमभट्टः ॥

अत्रिदृग्जः, पुं, (अत्रेः दृक्चक्षुः षष्ठीतत्पुरुषः तस्मात् जातः अत्रि दृक् + जन् + ड उपपदसमासः।) चन्द्रः । इति हेमचन्द्रः ॥

अत्रिनेत्रजः, (पुं,) चन्द्रः । इति जटाधरः ॥

अत्रिनेत्रप्रसूतः, पुं, (अत्रिनेत्रात् प्रसूतः पञ्चमीतत्पुरुषः) चन्द्रः । इति हलायुधः ॥

अत्रिनेत्रभूः, पुं, (अत्रिनेत्रात् भवति यः अत्रिनेत्र + भू + कर्त्तरि क्विप्) चन्द्रः । इति त्रिकाण्डशेषः ॥

अत्रिभारद्वाजिका, स्त्री, अत्रिश्च भरद्वाजश्च द्वन्द्वः तयोः स्त्रीपुंसयोर्म्मैथुनात् जाता अत्रि भरद्वाज + "द्वन्द्वादुन् वैरमैथुनयोरिति" वुन् तस्य अकः स्त्रियां टाप्) अत्रिभारद्वाजी विवाहः । इति शब्दरत्नावली ॥

अथ, व्य, (अर्थ + ड एषोदरादित्वात् रस्य लोपः।) मङ्गलं । अनन्तरं । आरम्भः । प्रश्नः । कार्त्स्न्यं । इत्यमरः ॥ अधिकारः । संशयः । विकल्पः । समुच्चयः । इति मेदिनी ॥ (अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः ॥ इति रघुवंशे ॥)

अथकिं (अर्थं पूर्व्वोक्तं वाक्यं कवते स्वीकरोति अर्थ + कु + डिम् एषोदरादित्वात् रस्य लोपः । अर्थो ऽभिधेयरैवल्पप्रयोजननिवृत्तिषु इत्यमरः ।) व्य, स्वीकारः । इति शब्दरत्नावली ॥

अथर्व्व [न्] क्ली, (अथ लोकमङ्गलाय अर्व्वते प्राप्नोति यत् अथ + अर्व्व + कर्म्मणि अनिप् शकन्ध्वादित्वात् पररूपं । मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ इत्यमरः) वेदविशेषः । इति मेदिनी ॥ तत्तु चतुर्थवेदः नवशाखायुक्तः । अस्य विवरणं वेदशब्दे द्रष्टव्यं ।

अथर्व्वणः, पुं,(अथर्व्वं विद्यतेऽस्य न प्रत्ययः।) शिवः। इति त्रिकाण्डशेषः ॥

अथर्व्वणिः, पुं, (अथर्व्ववेदं नयति ज्ञानविषयं प्रापयति अथर्व्वन् + नी + कर्त्तरि क्विप् । एषोदरादित्वात् ह्रस्वः) अथर्व्ववेदज्ञब्राह्मणः । पुरोहितः । इति मेदिनी ॥

अथर्व्वा [न्] पुं, (अथ लोकमङ्गलाय अर्व्वति वेदविशेषं प्रस्तौति अथ + अर्व्व + अनिप् शकन्ध्वादित्वात् पररूपं) ब्राह्मणः । इति मेदिनी ॥ (श्रुतपदपंक्तिरथर्व्वणेव वेदः ॥ इति भारविः) ॥

अथो, व्य, (अर्थ + डो एषोदरादित्वात् रलोपः) मङ्गलं । आनन्तर्य्यं । समुच्चयः । प्रश्नः । आरम्भः । कार्त्स्न्यं । अधिकारः । संशयः । विकल्पः । इति मेदिनी ॥
("स्त्रियो रत्नान्यथो विद्या धर्म्मः शौचं सुभाषितं ।
विविधानि च शिल्पानि समादेयानि सर्व्वतः" ॥
इति मनुः ॥)

अद इ बन्धे । (भ्वादि परस्मैपदी सेट् इदित्) इति कविकल्पद्रुमः ॥ इ अन्द्यते । इति दुर्गादासः ॥

अद ल आ भक्षणे (अनिट् परस्मैपदी अदादि ।) इति कविकल्पद्रुमः ॥ ल अत्ति । आ अत्ता । गमाद्यतमनित्यमिति न्यायात् मुपः स्थितौ अदतीत्यपीति वररुचिः । इति दुर्गादासः ॥

अदः [स्] त्रि, (न दस्यते अङ्गुलिरत्त्यिप्यते यत्र न + दस् + बाहुलकात् क्विप् चिलिङ्कत्वञ्च ।) एतत् । पुरोवर्त्ति । इद इति भाषा । परं । परोक्षभूतं । इति मेदिनी । सेद इति भाषा ।

अदत्तं, त्रि, (न दत्तम् उत्सृष्टं नञ्समासः नञश्च अप्राशस्त्ये यथा कारिकायां ।
"तत् साहश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः" ॥
इति ।) अन्यायेन दत्तं । यथा । यत् पुनरन्यायेन दत्तं तददत्तं । षोड़शप्रकारमपि प्रत्याहर्त्तव्यमेव इत्यर्थादुक्तं भवति । नारदेन च । दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकमिति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतं ।
"अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः ।
तथोन्मत्तापरीहासव्यत्यासच्छलयोगतः ॥
बालमूढ़ार्त्तदत्तत्वात्तमत्तोन्मत्तापवर्जितं ।
कर्त्ता ममेदं कर्म्मेति प्रतिज्ञाभेच्छया च यत् ॥
अपात्रे पात्रमित्युक्ते कार्य्यं वा धर्म्मसंहिते ।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतमिति ॥
अयमर्थः । भयेन बन्दिग्राहादिभ्यो दत्तं । क्रोधेन पुत्रादिवैरनिर्य्यातनायान्यस्मै दत्तं । पुत्रवियोगादिनिमित्तशोकाविष्टेन दत्तं । उत्कोचेन कार्य्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तं । परिहासेनोपहासेन दत्तं । एकः स्वद्रव्यमन्यस्मै ददात्यन्योऽपि तस्मै ददातीति दानव्यत्यासः । छलयोगतः श्रुतदानमभिसन्धाय सहस्रमिति परिभाष्य ददाति । बालेनाप्राप्तषोड़शवर्षेण । मूढ़ेन लोकवेदानभिज्ञेन । अस्वतन्त्रेण पुत्रदासादिना । आर्त्तेन रोगाभिभूतेन मत्तेन मदनीयप्रमत्तेन । उन्मत्तेन वातिकाद्युन्मादयस्तेन । अपवर्जितं दत्तं । तथायं मदीयमिदं कर्म्म करिष्यतीति प्रतिज्ञाभेच्छया दत्तं । अचतुर्वेदाय चतुर्वेदोऽहमित्युक्तवते दत्तं । यज्ञं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुञ्जानाय दत्तमित्येवं षोड़शप्रकारमपि नूनमदत्तमित्युच्यते । प्रत्याहरणीयत्वात् । आर्त्तदत्तस्यादत्तत्वं धर्म्मकार्य्यव्यतिरिक्तविषयं ।
"सस्नेहार्त्तेन वा दत्तं श्रावितं धर्म्मकारणात् ।
अदत्त्वा तु मृते दाप्यस्तत्सुतौ नात्र संशयः ॥
इति कात्यायनस्मरणात् । यः पुनः षोड़शप्रकारमप्यदत्तं गृह्णाति यस्मादेयं प्रयच्छति । तयोर्दोषो नारदेनोक्तः ।
"गृह्णात्यदत्तं यो लोभात् यस्मादेयं प्रयच्छति ।
अदेयदायको दण्ड्यस्तथा दत्तप्रतीच्छकः" ॥
इति मिताक्षरा ॥ कन्यकानां त्वदत्तानां । इति कात्यायनः ॥

"नह्यदत्तां महीं पित्रा भरतः शास्तुमिच्छति" इति रामायणं ।)

अदत्ता, स्त्री, (न दत्ता नोत्सृष्टा नञ्समासः, नञ्च निषेधार्थः ।) अविवाहिता । इति स्मृतिः ।

अदनं, क्ली, (अद् भोजने भावे ल्युट् ।) भक्षणं । भोजनं । इति हेमचन्द्रः ॥

("इन्धनार्थमशुष्काणां द्रुमाणामवपातनं ।
आत्मार्थञ्च क्रियारम्भो निन्दितान्नादनं तथा" ॥
इति मनुः ।)

अदभ्रः, त्रि, (दम्भ + रक् । दम्भमल्पं नदभ्रं नञ्समासः ।) प्रचुरः । बहुः । इत्यमरः ॥ (अदभ्रदर्भामविश्रय्य स स्थलीं जहासि निद्रामग्निवैः श्रिवारुतैः ॥ इति किरातार्জ্জुनीयं ॥)

अदर्शनं, क्ली, (दृश् दर्शने, भावे ल्युट्, नञ्समासः ।) दर्शनाभावः । (अदर्शनञ्च ते वीर भूयो मां तापयिष्यति ॥ इति रामायणं ।) असाक्षात् । दृष्ट्यगोचरं । तत्पर्य्यायः । विनाशः २ । इत्यमरः । (व्याकरणमते लोपः यथा ऋग्वेदप्रातिशाख्ये,—"विरुत्तिषु प्रत्ययादेरदर्शनम्" । इति ।)

अदलः, पुं, (न दल्यते भिद्यते यत्, न दल् + घञर्थे कन् ।) हिञ्जलवृक्षः । इति शब्दचन्द्रिका ॥ दलरहिते त्रि ॥

अदला, स्त्री, (नास्ति दलं पत्रं यस्याः सा ।) घृतकुमारी । इति शब्दचन्द्रिका ॥

अदाता, त्रि, (न दाता नञ्समासः । दा + तृच् ।) कृपणः । दानशक्तिरहितः । यथा,—
"अदाता पुरुषस्त्यागी स्वधनं त्यज्य गच्छति" ।
इति प्राचीनः ॥
("कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः ।
मृते भर्त्तरि पुत्रस्तु वाच्योमातुररक्षिता" ॥
इति मनुः ॥)

अदान्तः, त्रि, (न दान्तः नञ्समासः ।) तपःक्लेशासहिष्णुः । अकृतबाह्येन्द्रियनिग्रहः । इति पुराणं ॥

अदितिः, स्त्री, (दितिर्भिन्ना अदितिः । नञो दाञो डितिरिति शाकटायनोक्तेर्डितिप्रत्ययान्तो वा । अदनाददितिः वा ।) दक्षप्रजापतिकन्या । सा कश्यपपत्नी । देवमाता च । इति त्रिकाण्डशेषः ॥ भूमिः । अखण्डः । इति शब्दरत्नावली ॥

अदितिनन्दनः, पुं, (अदितेर्नन्दनः पुत्रः, षष्ठीतत्पुरुषः ।) देवता । इत्यमरः ॥

अदृक्, [ग्] त्रि, (नास्ति दृक् चक्षुर्यस्य सः ।) दृष्टिरहितः । अन्धः । इत्यमरः ॥

अदृश्यं, त्रि, (दृश् + कर्म्मणि क्यप् न दृश्यं, नञ्समासः ।) अदर्शनीयं । अप्रत्यक्षं । "यथा,—
कन्यादेरतिकोमला त्रिभुवनव्याप्राप्यदृश्या जनैः" ।
इत्युद्भटः ॥

अदृष्टं, क्ली, (न दृष्टं नञ्समासः ।) अग्निजलादिद्वारा जातं भयं । इत्यमरः ॥ जन्मान्तरीयसंस्कारः । भाग्यं । यथा । "अदृष्टमप्यर्थमदृष्टवैभवात् करोति सुप्तिर्जनदर्शनातिथिं ॥ इति श्रीहर्षः । तच्च आत्मनोऽतीन्द्रियगुणः । इदं वासनाजन्यं । तत्त्वज्ञाननाश्यं । भोगनाश्यञ्च । धर्म्माधर्म्मभेदेन तत् द्विविधं । धर्म्मस्तु स्वर्गादिकारणं । गङ्गास्नानयागादिजन्यः । कर्म्मनाश्यजलादिस्पर्शनाश्यश्च । अधर्म्मस्तु नरकादिकारणं । प्रायश्चित्तादिनाश्यश्च । इति भाषापरिच्छेदः ॥

अदृष्टः, त्रि, (न दृष्टः ।) अकृतदर्शनः । अवीक्षितः । "अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता" ।
इति रसतरङ्गिण्यां भानुदत्तः ॥

अदृष्टवान्, [त्] त्रि, (अदृष्टं भाग्यं विद्यतेऽस्य, अदृष्टं मतुप् ।) भाग्यवान् । कपालिया इति भाषा । (स्त्रियां ङीप् अदृष्टवती) ।

अदृष्टिः, स्त्री, (न दृष्टिः नञ्समासः ।) प्रतिकूला दृष्टिः । कुत्सिता दृष्टिः । सरोषवक्रदृष्टिः । कुटिलचक्षुः । असौम्यात्ति । वक्रदृष्टियुक्तचक्षुः । इत्यमरः ॥

अदृष्टिका, स्त्री, (विरुद्धा दृष्टिः नञ्समासः । नञ्च विरोधार्थे, स्वार्थे कन् स्त्रियां टाप् ।) सरोषवक्रदृष्टिः । इति शब्दरत्नावली ॥

अदेवमाटकः, पुं, (देवो वृष्ट्यम्बु माता माटतुल्यो यत्र सः, समासान्तः कः, ततो नञ्समासः ।) देवमाटकभिन्नदेशः । नदीमाटकदेशः । यथा । (वितन्वति क्षेममदेवमाटकाः ॥ इति भारविः ॥)

अद्गः, पुं, (अद्यते भुज्यते यत्, अद् कर्म्मणि गन् ।) घृतं । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

अद्ट ड अतिक्रमे बधे । इति कविकल्पद्रुमः ॥ दन्त्यवर्गद्वतीयोपधः । (अड्टितुं अतिक्रमितुमिच्छति—अद्ट् + सन् + लट् ते ।) ड अड्टिटिषते । इति दुर्गादासः ॥

अद्ड, अभियोगे । इति कविकल्पद्रुमः ॥ दन्त्यवर्गद्वतीयोपधः । (अड्डितुं अभियोक्तुमिच्छति अद्ड् + सन् + लट् तिप् ।) अड्डिडिषति । क्विपि संयोगान्तलोपे अद् । अभियोगः समाधानं । अड्डति पक्षं विद्वान् । अभि समन्तात् योगोऽभियोगः इति गोविन्दभट्टः ॥ इति दुर्गादासः ॥

अद्धा, व्य, (अतं सततं गमनं ज्ञानं वा दधाति अत् + धा + क्विप् ।) यथार्थं । तत्पर्य्यायः । तत्त्वं २ अञ्जसा ३ । इत्यमरः ॥ (अद्धा श्रियं पालितसङ्गराय प्रत्यर्पयिष्यत्यनघां स साधुः ॥ इति रघुः ।)

अद्भुतं, क्ली, अपूर्व्वं । तत्पर्य्यायः । विस्मयः २ आश्चर्य्यं ३ चित्रं ४ । तद्विशिष्टे वाच्यलिङ्गं । इत्यमरः ॥

अद्भुतं, त्रि, (अतीति अत् + क्विप् आकस्मिकार्थमव्ययं तथा भाति-भा + डुतच् ।) आश्चर्य्यं । तत्पर्य्यायः । इङ्गं २ । इति जटाधरः ॥ * ॥ अथाद्भुतं । अद्भुतसागरे आथर्व्वणाद्भुतवचनं । प्रकृतिविरुद्धमद्भुतमापदः प्राक् प्रबोधाय देवाः सृजन्तीति । तेन आपज्ज्ञानाय भूम्यादीनां पूर्व्वं स्वभावप्रच्यवोदेवकर्त्तृकोऽद्भुत इति ॥ एवञ्च बुधोदयपर्व्वग्रहणादीनां गणितागतत्वेन प्रकृतागामपि यदुत्पातत्वं तद्भाक्तं ।
तत्कारणञ्च गर्गसंहितावार्हस्पत्ययोः ॥
"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः ।
नरापचारान्नियतमुपसर्गः प्रवर्त्तते ॥
ततोऽपचारान्नियतमपवर्জ্জन्ति देवताः ।
ताः सृजन्त्यद्भुतां स्तांस्तु दिव्यनाभसभूमिजान् ॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः ।
विचरन्ति विनाशाय रूपैः सम्बोधयन्ति च" ॥
तांश्च परं न दर्शयेदित्याह विष्णुः ॥ नोत्पातं दर्शयेदिति ॥ * ॥ तच्च वेलानक्षत्रमण्डलनिरूपणं । यथा दीपिकायां ॥
"प्राक्दिक्त्रिचतुर्भागेषु द्युनिशोरङ्गुलेषु सर्व्वेषु ।
अनिलाग्निशक्रवरुणा मण्डलपतयः शुभाशुभेषु ॥
वेलामण्डलं ॥ * ॥
"अर्य्यम्णादित्यतुष्कचन्द्रतुरगादित्येषु वायुर्भवेत् ।
देवेज्याजविशाखयाम्ययुगले पित्रद्वये चानलः ॥
विश्वादित्यधाटमैत्ययुगलेष्विन्द्रो भवेन्मण्डलः ।
सर्पोपान्त्यमृगान्त्यमूलयुगलेष्वग्नेय्यपामीश्वरः ॥
पवनदहनौ नेष्टौ योगस्तयोरतिदुष्करः ।
सुरपवरुणौ शस्तौ योगस्तयोरतिशोभनः ॥
सवरुणमरुन्मित्रः शक्रस्तथाग्निसमायुतः ।
फलविरहितः सेन्द्रो वायुस्तथाग्नियुतोऽम्बुपः ॥
यन्मण्डलेऽद्भुतं जातं शान्तिस्तद्देवताश्रया ।
तथा शान्तिहयं कार्य्यं मण्डलद्वयजाद्भुते" ॥ * ॥
विष्णुधर्म्मोत्तरे ।
"ग्रहर्क्षवैकृतं दिव्यं आन्तरीक्षं निबोध मे ।
उल्कापातो दिशां दाहः परिवेषस्तथैव च ॥
गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता तथा ।
एवमादीनि लोकेऽस्मिन् नाभसानि विनिर्द्दिशेत् ॥
चरस्थिरभवं भौमं भूकम्पमपि भूमिजं ।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितं ॥
भौमश्चाल्पफलं ज्ञेयं चिरेण परिपच्यते ।
नाभसं मध्यफलदं मध्यकालफलप्रदं ॥
दिव्यं तीव्रफलं ज्ञेयं क्षीघ्रकारि तथैव च ॥ * ॥
भीतोत्थाता विपर्य्यासश्चतूनां रिपुजं भयं ॥
पुष्पे फले च विकृते राज्ञो मृत्युं तथादिशेत् ।
अकालप्रभवा नार्य्यः कालातीताः प्रजास्तथा ॥
विकृताः प्रसवाश्चैव युग्मप्रसवनं तथा ।
हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा क्वयः ॥
पशवः पक्षिणश्चैव तथैव च सरीसृपाः ।
विनाशं तस्य देहस्य कुलस्य च विनिर्द्दिशेत् ॥ * ॥
प्रदोषे कुक्कुटारावो हेमन्ते चापि कोकिलाः ।
अर्कोदये ऽर्कोभिमुखश्चारावो भयं दिशेत् ॥
उलूको वसते यत्र निपतेद्वा तथा गृहे ।
क्षेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ॥
गृध्रः काकः कपोतश्च उलूकः श्येन एव च ।
चिल्लश्च चर्म्मचिल्लश्च भासः पारावत एव च ॥
गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते ।
पक्षान्मासात्तथा वर्षान्मृत्युः स्यादृग्रहेमेधिनः ॥
पत्नीपुत्रस्य वा मृत्युर्द्रव्यस्यापि विनश्यति ।
ब्राह्मणाय गृहं दत्त्वा दत्त्वा तन्मूल्यमेव वा ॥
गृहीत्वादि रोचेत शान्तिरेषां प्रयोजयेत् ।
मांसास्थीनि समादाय श्मशानादग्न्यधवायसाः ॥
श्वा शृगालोऽथ वा मध्ये पुरस्य प्रविशन्ति चेत् ।
विकिरन्ति गृहादौ च श्मशानं सा मही भवेत् ।

चौरेण हन्यते लोकः परचक्रसमागमः ।
संग्रामश्च महाघोरो दुर्भिक्षं मरकं तथा ॥
अद्भुतानि प्रसूयन्ते तत्र देशस्य विप्लवः ।
अकाले फलपुष्पाणि देशविप्लवकारणं" ॥ * ॥
मत्स्यपुराणे ।
"अतिरुधिरनाहरुर्दुर्भिक्षादिभयं मतं ।
अन्तौ तु दिनार्द्धं रुधिरेक्षया भयाय च ॥
निरभ्रे वाथ रात्रौ वा श्वेतं यान्योत्तरेण तु ।
इन्द्रायुधं ततो दृष्ट्वा उल्कापातं तथैव च ॥
दिग्दाहपरिवेषौ च गन्धर्वनगरं तथा ।
परचक्रभयं विद्यात् देशोपद्रवमेव च" ॥
भासो वनकुक्कुटः ॥*॥ कंसनिधनसूचने हरिवंशः,—
"वक्रमङ्गारकश्चक्रे चित्रायां घोरदर्शनः ।
चलत्यपर्व्वणि मही गिरीणां शिखराणिच" ॥ * ॥
वायोत्पाते स एव ।
"दक्षिणां दिशमास्थाय धूमकेतुः स्थितो भवेत् ।
वक्रमङ्गारकश्चक्रे क्षत्तिकासु भयङ्करः" ॥ * ॥
क्षत्यचिन्तामणौ ।
"यक्षाग्नौचविवेकतत्त्ववसुधा लोकाः क्षुधापीड़िताः ।
विप्रा वेदहतास्तथा प्रचलिता वह्न्यग्निनोदुःखिताः ।
क्ष्मौगी मन्दफला नृपाश्च विकलाः संग्रामघोरा मही
प्रेताघातदुरन्तपीड़िततरा देवेज्यराक्षोर्युतौ ॥
रक्षे शस्त्रोद्योगो मांसास्थिवसादिभिर्मरकः ।
धान्यहिरण्यतक्रफलकुसुमाद्ये वर्षिते भयं विद्यात् ॥
अङ्गारपांशुवर्षे विनाशमुपयाति तन्नगरं ।
उपलं विना जलधरैर्विप्लुता वा यदा प्राणिनो दृष्ट्वा ॥
हिमं वाप्यतिवृष्टिं शस्यानामीतिसंजननं" ॥ * ॥
बुधकौशिकसम्वादे ।
"पक्षाग्राः प्रपाते च फलं शस्यस्य प्ररोहणे ।
शीर्षे राजश्रियोऽग्निर्भाङ्गे वैधर्म्यमेव च ।
कर्णयोर्भूषणावाप्तिर्नेत्रयोर्हर्षदर्शनं ॥
नासिकायाश्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनं ।
कण्ठे चैव श्रियोऽवाप्तिर्भुजयोर्विभवो भवेत् ॥
धनलाभो बाहुमूले करयोर्धनवृद्धयः ।
स्तनमूले च सौभाग्यं हृदि सौख्यविवर्द्धनं ॥
एष्ठे नित्यं महीलाभः पार्श्वयोर्बन्धुदर्शनं ।
कटिदेये वस्त्रलाभो गुह्ये मृत्युसमागमः ॥
ऊरौ चार्थक्षयो नित्यं गुदे रोगभयं भवेत् ।
उर्व्वोस्तु वाहनावाप्तिर्जानुजङ्घोर्यसंक्षयः ॥
वामदक्षिणयोः पादोर्भ्रमणं नियतं भवेत् ।
पक्षाग्राः प्ररोहणे चैव पतने शस्यस्य च ॥
व्यत्यासाच्च फलञ्चैव तद्वदेवं प्रजायते ।
पक्षाग्राः प्ररोहणं रात्रौ शस्यस्य प्रपातनं ॥
निधनार्थाय भवति व्याधिपीड़ाविपर्य्यये ।
पतनागन्तरञ्चैवारोहणं यदि जायते ॥
पतने फलमुत्कृष्टं रोहणेऽन्यत् फलं भवेत् ।
आरोहणञ्चोर्द्ध्वपक्षे अधोवक्त्रे च पतनं ॥
भवेदिष्टफलं तस्य तत्फलं जायते ध्रुवं ।
स्पृष्टमात्रेण यः सद्यः सचेलं जलमाविशेत् ॥
पक्षाग्रप्राशनञ्च कुर्य्यादर्कावलोकनं ।
पक्षीरूपं सुवर्णस्य रत्नवस्त्रेण वेष्टयेत् ।
पूजयेद्धान्यपुष्पाद्यैस्तदग्रे पूर्णकुम्भके ।

पक्षाग्रयं पक्षरत्नं पक्षामृतं सपल्लवं ॥
पक्षवृक्षकषायञ्च निःक्षिप्याबाह्येत् ततः ।
पूजयेद्धान्यपुष्पाद्यैर्लोकपालांस्तथा ग्रहान् ।
मृत्युञ्जयेन मन्त्रेण समिद्भिः खादिरैः शुभैः ।
तिलैर्व्याहृतिभिर्होममष्टोत्तरसहस्रकं" ॥
पक्षी ग्रहगोधिका । मृत्युञ्जयमन्त्रस्त्र्यम्बकमन्त्रः ।
इति विवाकरः ॥ * ॥ गर्गसंहितायामाश्लेषास्त्यययोः ।
"ये तेषु शान्तिं कुर्व्वन्ति न ते यान्ति पराभवं ।
ये तु न प्रतिकुर्व्वन्ति क्रियया श्रद्धयान्विताः ॥
दाम्भिक्याद्वा विमोहाद्वा विनश्यन्त्येव तेऽचिरात्' ॥*॥
अत्र निमित्तनिश्चयवतोऽधिकारः । अन्यथा
दोषः । इत्याह मत्स्यपुराणं,—
"भिन्नमण्डलवेलायां ये भवन्त्यद्भुताः क्वचित् ।
तत्र शान्तिद्वयं कार्य्यं निमित्ते सति नान्यथा ।
निर्निमित्तकृता शान्तिर्निमित्तमुपपादयेत् ।
एतच्च तत्तद्विशेषविहितशान्तिविषयं । अन्यथा
वेलामण्डलसन्देहे शान्तिर्न स्यात् साधारण-
शान्तिश्च निर्विषया स्यात् । अतएवोक्तं योगि-
याज्ञवल्क्येन,—
"यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्या समुदाहृतः ॥
गायत्र्या प्रयतः शुद्धः सर्व्वपापैः प्रमुच्यते ।
शान्तिकामश्च जुहुयात् गायत्रीमन्त्रतैः शुचिः ॥
हन्तुकामश्च नृपतेर्हतेन जुहुयात् शुचिः ।
सावित्र्याशान्तिहोमांश्च कुर्य्यात् पर्व्वसु नित्यशः ॥
प्रणवाद्याहृतिभ्याश्च स्वाहान्ता होमकर्म्मणि ।
प्रतिलोमा प्रयोक्तव्या फट्कारान्ताभिचारके ॥*॥
विश्वामित्रेणापि निमित्तसन्देहे क्षत्रादीन्युक्तानि ।
यथा,—
"क्षत्रचान्द्रायणादीनि शुद्ध्यभ्युदयकारणं ।
प्रकाशे च रहस्ये च संग्रहेऽनुक्तकेऽस्फुटे ॥ * ॥
मार्कण्डेयपुराणं ।
"दिग्देशजनसामान्यं नृपसामान्यमात्मनि ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभं ॥
परस्पराभिवादञ्च ग्रहदोषेषु जायते" ॥
तथा,—
"तस्माच्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ॥
लोकवादांश्च शान्तोश्च ग्रहपीड़ासु कारयेत् ।
भूदोहानुपवासांश्च शस्तं चैत्याभिवन्दनं ॥
कुर्य्यात् होमं तथा दानं आर्द्रं क्रोधविवर्जनं ।
अद्रोहं सर्व्वभूतेषु मैत्रीं कुर्य्याच्च पण्डितः ॥
वर्जयेदुषतीं वाचमतिवादांस्तथैव च ।
ग्रहपूजाश्च कुर्व्वीत सर्व्वपीड़ासु मानवः ॥
एवं शान्त्यन्यघोराणि घोराणि द्विजसत्तम ।
प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यनेकशः" ॥ * ॥
लोकवादाश्च तत्रैवोक्ताः । यथा,—
"आकाशाद्देवतानाञ्च देव्यादीनाञ्च सौहृदात् ।
एथिव्यां प्रतिलोके च लोकवाद इति स्मृतः ॥"
ते च सर्व्वभूतडाकिन्याद्यभिभवशान्त्यर्थं लौकि-
कौषधमन्त्रादयः विषहरीमङ्गलचण्डिकागीतादयः
चैत्यवृक्षादौ क्षेत्रपालदेवतापूजा च । तथा-
चापस्तम्बः । स्त्रीभ्योऽवरवर्णेभ्यो धर्म्मश्रेष्ठान्

प्रतीयादित्येक इति । धर्म्मश्रेष्ठान् श्रुतिस्मृति-
सदाचारेष्वप्रसिद्धानिति नारायणोपाध्यायः ।
भूदोहस्य पात्रं विना भूमौ गोस्तनं निष्पीड्य
दुग्धोत्सर्गः । चैत्यः पूज्यत्वेन ख्यातो ग्रामस्य
वृक्षः । तथा च बाणोत्पाते हरिवंशः,—
"अनेकग्राखस्त्वैत्यस्य निपपात महीतले ।
अर्चितः सर्व्वकन्याभिर्दानवानां महात्मनां ॥"
उपतीमकल्याणीं । अतिवादश्च पूज्यमतिक्रम्य
भाषणं ॥ * ॥ मत्स्यपुराणं,—
"काकस्यैकरवश्चावः प्रभाते दुःखदायकः ।
काको मैथुनकासक्तः श्वेतो वा यदि दृश्यते ॥
उलूको वसते यत्र निपतेद्वा तथा गृहे ।
ज्ञेयो ग्रहपतेर्मृत्युर्धननाशस्तथैव च ॥ * ॥"
वराहसंहितायां,—
क्रीड़ानुरक्तो रतिमांसलुब्धो
भीतो रुजार्त्तः पतितो विहङ्गः ।
नासौ गृहस्थस्य विनाशहेतु-
र्दोषः समुत्पद्यत याऽरार्य्याः ॥ * ॥
अद्भुतशान्तिमाह मात्स्ये,—
"गृहे यच्चिविकारेषु कुर्य्याच्छान्तरतर्पणं ।
देवाः कपोता इति वा जप्तव्यं सप्तनिर्द्दिजैः ॥
गावश्च देया विविधा द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते पापमुपैति शान्तिं
सप्तैर्द्दिजैर्व्वा विनिवेदितं यत् ॥"
द्विजैः यच्चिभिः । अपिवा अन्यैरपि ॥ * ॥ भुज-
बलभीमे ।
"एको दृष्टस्त्रयो गावः सप्ताश्वा नव दन्तिनः ।
सिंहप्रसूतिका गावः कथिताः स्वामिघातकाः ॥*॥"
मत्स्यपुराणे ।
"अङ्गे दक्षिणभागे तु शस्तं विष्फुरणं भवेत् ।
अप्रशस्तं तथा वामे दृष्टस्य हृदयस्य च ॥
लाञ्छनं पिटकं चैव ज्ञेयं विष्फूर्जितं तथा ।
विपर्य्ययेण विहितं सर्व्वं स्त्रीणां फलं तथा" ॥*॥
अनिष्टचिह्नोपगमे द्विजानां कार्य्यं सुवर्णेन च
तर्पणं स्यात् । शङ्खः । "दुःस्वप्नानिष्टदर्शनादौ घृतं
हिरण्यञ्च दद्यात्" इति । मात्स्ये ।
"नमस्ते सर्व्वलोकेश नमस्ते भृगुनन्दन ।
कवे सर्व्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तुते ॥
एवं शुक्रोदये कुर्व्वन् याचादिषु च भारत ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ॥
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ दृहस्पते ।
क्रूरग्रहैः पीड़ितानामभयाय नमो नमः ॥
संक्रान्तावपि कौन्तेय याचासम्भ्युदयेषु च ॥
कुर्व्वन् दृहस्पतेः पूजां सर्व्वान् कामान् समश्नते" ॥
वैष्णवास्ते व्यासः ।
"ग्रहयज्ञैः शान्तिकैश्च किं क्लिश्यन्ति नरा द्विज ।
महाशान्तिकरः श्रीमांस्तुलस्या पूजितो हरिः ॥
उत्पातान् दारुणान् पुंसां दुर्निमित्तानने कशः ।
तुलस्या पूजितो भक्त्या महाशान्तिकरो हरिः ॥"
अत्र ब्रह्मपुराणीयो मन्त्रः ।
"नमस्ते वज्रदंष्ट्राय विष्णवे परमात्मने स्वाहा"

इति ॥ * ॥ छन्दोगपरिशिष्टं । अथातो रज-स्वलाभिगमने गोऽश्वभार्य्यासु गमने यमजजनने विजातीयजनने वा काककङ्कश्येनबकगृध्रेनभास-चिल्लकपोतानां गृहप्रवेशे मानुषस्योपरि विश्रा-मणे एषामेव क्रियमाणे गृहद्वारारोहणे वाङ्मु-तेषु कल्पदृष्टेन विधिनाग्निमुपसमाधाय प्राय-श्चित्ताव्याऽहृतीर्जुहोति अद्भुताय अग्नये स्वाहा सोमाय विश्वेभ्यो रुद्राय वायवे सूर्य्याय मृत्यवे विश्वेभ्यो देवेभ्यः स्वाहेति स्थालीपाकहृतान्य दिति ॥ * ॥ कपोतं विशेषयति शौनकः ।

"रक्तपादः कपोताख्यः अरण्यौकाः शुकच्छविः ।
स चेच्छालां विशेच्छालासमीपञ्च व्रजेद्यदि ॥
अन्येषु गृहमध्ये वा वल्मीकस्योद्गमादिषु" ।

कल्पदृष्टेन विधिना गृह्योक्तेन । प्रायश्चित्ताः व्याऽहृतीः अद्भुतदोषप्रशमनार्था सप्तव्याऽहृतीः । अद्भुताय अग्नये स्वाहा इत्यादिमन्त्रैः । तत्र स्थालीपाकेतिकर्त्तव्यतायां पायसचरुभिरेतेभ्यो देवेभ्यो जुहुयात् । छन्दोगपरिशिष्टं । पश्चात् घृतपायसेन ब्राह्मणान् भोजयित्वा गोवरं दत्त्वा शान्तिर्भवतीति । गोवरं गोश्रेष्ठं दत्तिणां तां गां हृत्वा दोषशान्तिर्भवतीति । तथाचोक्तं,—

"गौर्विशिष्टतमा लोके वेदेष्वपि निगद्यते ।
न ततोऽन्यदयं यस्मात् तस्माद्गौर्वरमुच्यते" ॥ * ॥

छन्दोगपरिशिष्टं । यस्येषामन्यतममापन्नः प्राय-श्चित्तं न कुर्य्यात् तस्य गृहपतेर्मरणं सर्व्वधनाग्नी वा भवति तस्मात् प्रायश्चित्तं कर्त्तव्यं कर्म्मापवर्गे वामदेव्यगानं शान्तिः शान्तिरिति । अपवर्गो समाप्तौ । वामदेव्यगानं शान्तिः कर्त्तव्या आवृत्ति-प्रकरणसमाप्त्यर्था । वार्हस्पत्ये । शमयन्त्यासन्ना-हृत् कर्म्मादिहृतं निमित्तमाश्रित्य । अतिवर्षणोः पवासव्रतदोच्चाजघ्यहवनानि ॥ * ॥ वराहः ।

ये च न दोषं जनयन्त्यत्यांस्तान्हृतुस्वभावहृतान् ।
ऋषिपुत्रहृतैः श्लोकैर्विद्यादेभिः समासोक्तैः ॥

तथा च मत्स्यपुराणं ।

"वज्राशनिमहीकम्पसन्ध्यानिर्घातनिस्वनाः ।
परिवेषरजोधूमरक्तार्कास्तमयोदयाः ॥
द्रुमेभ्योऽथ रसस्नेहमधुपुष्पफलोद्गमाः ।
गोपक्षिमदहृद्धिश्च शिवाय मधुमाधवे ॥ * ॥
तारोल्कापातकलुषं कपिलार्केन्दुमण्डलं ।
अनग्निज्वलनं स्फोटं धूमरेणुनिराकुलं ॥
रक्तपद्मारुणा सन्ध्या नभः शुभ्रार्णवोपमं ।
सरितान्तोयसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥ * ॥
शक्रायुधपरीवेषौ विद्युच्चुल्काविरोहणं ।
कन्योद्वर्त्तनवैहृत्यं रसनं दरणं क्षितेः ॥
नद्युदपानसरसां हृद्ध्यर्द्धा भवनस्रवाः ।
पतनस्थाद्रिगेहानां वर्षासु न भयावहं" ॥

हरिवर्षे वर्षावर्णनायां,—

"क्वचित् कन्दरहासाढ्यं क्षिलीन्ध्राभरणं क्वचित्" ।

इति दर्शनात् वर्षासु क्षिलीन्ध्रोद्गमो न भया-वहः ॥ * ॥

"दिव्यस्त्रीभूतगन्धर्व्वविमानाद्भुतदर्शनं ।
ग्रहनक्षत्रतारानां दर्शनञ्च दिवाम्बरे ॥

गीतवादित्रनिर्घोषो वनपर्व्वतसानुषु ।
शुष्यद्भिरसोत्पत्तिरपापाः शरदि स्मृताः ॥ * ॥
शीतानीलतुषारत्वं नर्दनं मृगपक्षिणां ।
रक्षोयक्षादिसत्त्वानां दर्शनं वागमानुषी ॥
दिशो धूमान्धकाराश्च शुभा वनपर्व्वताः ।
उच्चैः सूर्य्योदयास्तत्वं हेमन्ते शोभना मताः ॥ * ॥
हिमपातानिलोत्पातविरूपाद्भुतदर्शनं ।
दृष्ट्वाञ्जनाभमाकाशं तारोल्कापातपिञ्जरं ॥
चित्रा गर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिणां ।
पक्षाङ्गुरुलतानाञ्च विकाराः शिशिरे शुभाः ॥
ऋतुस्वभावजा ह्येते दृष्टाः स्वर्गे शुभावहाः ।
ऋतावन्यत्र चोत्पाता दृष्टास्ते भयदारुणाः" ॥ * ॥
उन्मत्तानाञ्च या गाथाः शिशूनाञ्चेष्टितञ्च यत् ।
स्त्रियो यच्च प्रभाषन्ते तत्र नास्ति व्यतिक्रमः ॥
पूर्व्वं चरति देवेषु पश्चाद्रुच्छति निघ्नान् ।
नादेशिता वाग्वदति सत्या ह्येषा सरस्वती ॥ *

बृहस्पतिः,—

"ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृणां ।
आवयन्त्यर्थलोभेन विनेयास्तेऽपि यत्नतः ॥

विनेया दण्डनीयाः । इति ज्योतिस्तत्त्वं ॥

अद्भुतः, पुं, (अद्भुतकारादिनवरसानां मध्ये रसविशेषः । तस्य स्थायिभावो विस्मयः । देवता गन्धर्व्वः । वर्णः पीतः । आलम्बनं लोकातीतवस्तु । उद्दीपनं तद्गुणमहिमा । अनुभावाः स्तम्भस्वेदरोमाञ्च-गद्गदस्वरविभ्रमनेत्रविकाशादयः । अस्य व्यभि-चारिभावाः वितर्कावेगसम्भ्रान्तिहर्षादयः । इति साहित्यदर्पणं ॥

अद्भुतस्वनः, पुं, (अद्भुतः अतिशयितः स्वनः शब्दो यस्य सः ।) महादेवः । इति त्रिकाण्डशेषः । (अद्भुतः स्वन इति कर्म्मधारये आश्चर्य्यशब्दः) ।

अद्भुतसारः, पुं, (अद्भुतः अतिकठिनः सारः स्थिरांशो यस्य सः ।) खदिरसारः । इति केचित् ॥

अद्मनिः, पुं, (अत्ति भक्षयति सर्व्वान् अदेर्मुट् चेत्य नेः ।) अग्निः । इत्युणादिकोषः ॥

अद्मरः, त्रि, (अद् भक्षणे, रुचसदः क्मरच् ।) भक्षकः । भक्षणपरः । इत्यमरः ॥

अद्य व्य, (सद्यपरुत् परार्य्यैषम इति इदमोऽश्-भावो दाच निपात्यते ।) वर्त्तमानदिनं । आजि इति भाषा । इत्यमरः ॥

अद्यतनः, पुं, (सायञ्चिरमित्यादिना द्युद्युभ्यां ट्युटच् ।) कालविशेषः । स च भाष्यमते दुर्गसिंहमते च पूर्व्वरात्रिशेषदण्डचतुष्टयावधिकपररात्रिसार्द्धया-मपर्य्यन्तः । पूर्व्वरात्रिशेषाद्यावधिपररात्रिप्रथमा-र्द्धपर्य्यन्तो वा । भट्टहरिक्रमदीश्वरमते पूर्व्वरात्रि-शेषप्रहरावधिपररात्रिप्रथमप्रहरपर्य्यन्तः । अद्य जातवस्तुनि त्रि ॥

अद्यश्वीन, त्रि, (अद्य श्वस् + ख तस्य ईन टिखलोपः) आसन्नमरणादि । अद्य श्वो वा भवति अद्यश्वीनं मरणं । इति संक्षिप्तसारव्याकरणपरिशिष्टं ॥

अद्यश्वीना, स्त्री, (अद्यश्वस् + "अद्यश्वीनावष्टब्धे" इति सूत्रेण ख तस्य ईन टिलोपश्च स्त्रियां टाप् ।) आसन्नप्रसवा अद्य श्वो वा सूते अद्यश्वीना-

गौः इति संक्षिप्तसारपरिशिष्टं ।

अद्यावधि, स्त्री, (अद्य अवधिः सीमा यस्य तत् ।) अ-द्यारभ्य । आजि इत्यत्र । इति भाषा । वर्त्तमान-दिवसपर्य्यन्तं । आजि नागाइत इति भाषा ॥

अद्रिः, पुं, (अदिशृदीति क्रिन् ॥) सूर्य्यः । पर्व्वतः । वृक्षः । इत्यमरः ॥ परिमाणविशेषः । इति शब्द-रत्नावली ॥ (शाखी । मानभेदः । सप्ताङ्कः । पर्व्वतमूषिका ॥)

अद्रिकर्णी, स्त्री, (पर्व्वतमूषिकायाः कर्णवत् पुष्प-मध्यस्थपत्रं यस्याः सा स्त्रियां ङीप् ।) अपराजिता । इति राजनिर्घण्टः ॥

अद्रिकीला, स्त्री, (अद्रयः कीलाः स्तम्भवत् यस्या सा पृथिवी ।) भूमिः । इति त्रिकाण्डशेषः ॥

अद्रिज, क्ली, (अद्रौ जातं इति जनेर्डः ।) शिलाजतु इति रत्नमाला ॥ पर्व्वतजातवस्तुनि त्रि ॥

अद्रिजा, स्त्री, (अद्रेर्जाता इति जनेर्ड तत्रस्टाप्, पार्व्वती ।) दुर्गा । इति हेमचन्द्रः ॥ सैंहलीवृक्षः । इति राजनिर्घण्टः ॥

अद्रितनया, स्त्री, (अद्रेः तनया ।) पार्व्वती । यथा— एषोऽहमद्रितनयासुखपद्मजन्मेति काव्यप्रकाशः ॥ (अथैनमद्रेस्तनया शुशोच ॥ इति रघुः ॥)

अद्रिनन्दिनी, स्त्री, (अद्रेर्नन्दिनी । पार्व्वती ।) दुर्गा ॥ हिमालयाद्रिजातत्वात् ॥

अद्रिभिद्, पुं, (अद्रीन् पर्व्वतान् भिनत्ति अद्रि + भिद् + क्विप् तुक् ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

अद्रिभूः, पुं, (त्रि, अद्रौ भवति अद्रि + भू + क्विप् । पर्व्वतजातमात्रे ।) आखुकर्णीलता । इति राज-निर्घण्टः ॥

अद्रिराजः, पुं, (अद्रीनां राजा इति समासे राजाह॥ खखिभ्यश्च ।) हिमालयपर्व्वतः । इति हेमचन्द्रः ।

अद्रिसारः, पुं, (अद्रेः सारः स्थिरांशः ।) जौहः । इति रत्नमाला ॥

अद्रीशः, पुं, (अद्रेः ईशः) शिवः । हिमालयः । इति धरणी ॥

अदयः, पुं, (नास्ति दयं हितं यस्य ।) बुद्धः । इति हेमचन्द्रः ॥ (आत्मा । अद्वैतवादी ।)

अदयवादी, [न्] पुं, (अदयं सर्व्वमेव चित्-स्वरूपं नात्मनोऽन्यत् किञ्चनेति वदति अदय + वद् + णिनि । वेदान्तिकः ।) बुद्धः । इत्यमरः ॥

अदारं, क्ली, (अप्रशस्तं प्रवेशायोग्यं दारं ।) द्वार-व्यतिरिक्तप्रदेशः । यथा—

"अदारेण च नातीयाद् ग्रामं वा वेश्म वावृतं ।
रात्रौ च वृक्षमूलानि दूरतः परिवर्ज्जयेत् ॥"

इति मानवे ४ अध्याये ७२ श्लोकः ॥ प्राचीरादा-वृतं ग्रामं गृहञ्च द्वारव्यतिरिक्तप्रदेशेन प्राकारा-दिलङ्घनं कृत्वा न विशेत् । रात्रौ च वृक्ष-मूलावस्थानं दूरतस्त्यजेत् । इति तट्टीकायां कुल्लूकभट्टः ॥ द्वाररहिते त्रि ॥

अद्वितीयः, त्रि, (न विद्यते द्वितीयं यस्य ।) द्वितीय-रहितः । (सदेव सौम्येदमग्र आसीदेकमेवा-द्वितीयं इति श्रुतेः ।) अतुल्यः । यथा,— एकमेवाद्वितीयं ब्रह्म । इति वेदान्तः ॥ नचाग्नि-

नेपः सहि नाद्रितोयः । इति मेदिनी ॥

अद्वैतः, त्रि, (द्विधाभेदमितः प्राप्तः । द्वित + स्वार्थे अण् न द्वैत । द्वितीयरहितः ।) एकः । यथा,—
यदद्वैतं ब्रह्मोपनिषदि तदप्यस्य तनुभा । इति श्रीचैतन्यचरितामृतं ॥

अद्वैतः, पुं, (द्विधाभेदमितः प्राप्तः द्वितीयातत्, प्रज्ञादित्वात् स्वार्थे अण् ततोभिन्नः नञ्समासः ।) द्वैतरहितः विष्णुः । यथा,—
"विष्णुमानन्दमद्वैतं विज्ञानं सर्व्वगं प्रभुं ।
प्रणमामि सदा भक्त्या चेतसा हृदयालयं ॥"
इति गारुडे २३८ अध्यायः ॥ ० ॥ शिवावतारविशेषः । यथा,—
"नित्यानन्दो भक्तरूपो व्रजे यः श्रीहलायुधः ।
भक्तावतार आचार्य्योऽद्वैतो यः श्रीसदाशिवः ॥"
तत्पत्न्यादिविवरणं यथा,—
"महादेवस्य मित्रं यः कुबेरो गुह्यकेश्वरः ।
कुबेरपण्डितः सोऽद्य जनको ऽस्य विदांवरः ॥
पुरा कुबेरः कैलासे सिध्यसाध्यनिषेविते ।
जजाप परमं मन्त्रं शैवं श्रीशिववल्लभः ॥
ततो दयालुर्भगवान् वरं दास्यति सोऽब्रवीत् ।
ततः कुबेरो वरयामास त्वं मे सुतो भव ॥
प्रार्थितस्तेन देवेशो वरदेशः सदाशिवः ।
जन्मजन्मान्तरे पुत्र प्राप्स्यामि पुत्रतां तव ॥
इति प्राप्य वरं कश्चं कियन्तं कालमास्थितः ।
कार्य्यादीशवशात् सोऽद्यादैतस्य जनकोऽभवत् ॥
योगमाया भगवती गृहिणी तस्य साम्प्रतं ।
सीतारूपेणावतीर्णा श्रीनाम्नी तत्प्रकाशतः ॥
तस्य पुत्रोऽच्युतानन्दः कृष्णचैतन्यवल्लभः ।
श्रीमत्यण्डितगोस्वामिशिष्यप्रिय इति श्रुतं ॥
यः कार्त्तिकेयः प्रागासीदिति।जल्पन्ति केचन" ।
इति गौरगणोद्देशदीपिका ॥

अद्वैतवादी, [न्] त्रि, (अद्वैतं "चिदेव सत्यं नान्यत् किञ्चिन" इति वदति, अद्वैत + वद् + णिनि उपपदसमासः ।) एकब्रह्मवादी । तस्य मतं यथा,—
ब्रह्मैव सत्यं प्रत्यक्षादिसिद्धं विश्वं ब्रह्मणि आरोपितं । यथा रज्जुः रज्जुस्वरूपाज्ञानात् सर्पवत् प्रतिभाति । तथा ब्रह्मस्वरूपाज्ञानात् विश्वं वस्तुवत् प्रतिभाति प्रकृतिर्ज्जीवाश्च पर्य्यवसाने ब्रह्मैव ब्रह्मान्यत् सदस्तु नास्ति । अत्र प्रमाणं शारीरिकसूत्रस्य भाष्यटीकाकल्पतरुभावरत्नप्रभादि ॥

अधः [स्] अव्य, (अधरस्य अधादेशः ततः असिच् ।) तलं । नीचं । अधोभागः । यथा,—
"लोकानुपर्य्युपर्य्यास्तेऽधोऽधोऽधधि च माधवः" ।
इति वोपदेवः ॥ पातालं । योनिः । इति त्रिकाण्डशेषः ॥

अधःपुष्पी, स्त्री, (अधः अधोमुखं पुष्पं यस्याः । अधस् + पुष्प + ङीप् ।) गोजिह्वा । इति राजनिर्घण्टः ॥ द्वयविशेषः । हेठाऊली । चोरखड़िका । भाँटुइ इति भाषा । तत्पर्य्यायः । अवाक्पुष्पी २ मङ्गल्या ३ अमरपुष्पिका ४ । इति रत्नमाला ॥

अधःक्षिप्तः, त्रि, (अधः अधोभागे क्षिप्तः पतितः ।) अधस्थक्तवत्तु । इति जटाधरः ॥

अधमः, त्रि, (अव पालने + अम, वस्य धादेशः ।) न्यूनः । निन्दितः । अपकृष्टः । तत्पर्य्यायः । निकृष्टः २ प्रतिकृष्टः ३ खर्व्वः ४ रेफः ५ याप्यः ६ अवमः ७ कुत्सितः ८ अवद्यः ९ कुपूयः १० खेटः ११ गर्ह्यः १२ अणकः १३ । इत्यमरः ॥ रेपः १४ अरमः १५ आणकः १६ अणकः १७ । इति तट्टीका ॥ (याचना मोघा वरमधिगुणे नाधमे लब्धकामा । इति मेघदूते) ॥

अधमः, पुं, (अव पालने + अम, वस्य धादेशः ।) उपपतिभेदः । तस्य लक्षणं । भयदयालज्जाशून्यत्वं । कामक्रीड़ाविषये कर्त्तव्याकर्त्तव्याविचारकत्वञ्च । इति रसमञ्जरी ॥

अधमभृतकः, त्रि, (अधम + भृ + क्त + स्वार्थे कन् ।) (अधमः । निकृष्टः । भृतकः । भृत्यः ।) अधमभृत्यः । नीचदासः । दौवारिकभारवाहकादयः ॥

अधमर्ण, त्रि, (अधम + ऋण ऋणविषये अवश्यदेयविषये अधमः निन्दितः राजदन्तादित्वात् परनिपातः । वा अधमं ऋणमवश्यदेयत्वेन विद्यते यस्य ।) ऋणग्रहीता । ऋणी । इत्यमरः ॥ खातक इति भाषा ।
("अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः ।
दापयेत् धनिकस्यार्थमधमर्णात् विभावितं ॥
अपह्नवेऽधमर्णस्य देहीत्युक्तस्य संसदि ।
अभियोक्ता दिशेद्देयं करणं वान्यदुद्दिशेत्" ॥
इति मनुः ।) ॥

अधमर्णिकः, त्रि, (अधममवश्यदेयत्वेन निन्दितं ऋणं । तदेव दाढ्यत्वेन विद्यते अस्य । अधमर्ण + अत इनिठनाविति ठन् । तस्य इक ।) अधमर्णः । यथा,—
"ग्रहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः ।
दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरं ॥"
इति मिताक्षरा ॥
("यैः यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः ।
तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकं" ॥
इति मनुः ।) ॥

अधमा, स्त्री, (अधम + स्त्रियां टाप् ।) स्त्रीयालक्षणान्तर्गतनायिकाभेदः । अस्या लक्षणं । हितकारिप्रियतमे अहितकारित्वं । अस्याः क्रिया अधमा । अस्या निष्कारणकोपत्वात् चण्डीति नाम । इति रसमञ्जरी ॥

अधमाङ्गं, क्ली, (अधमम् अङ्गं कर्म्मधारयः ।) पादः । चरणः । इति शब्दचन्द्रिका ॥

अधरं, क्ली पुं, (न म्रियते कामुकस्य धैर्य्यं न तिष्ठति यत्र, न + धृ + पुंसि संज्ञायां घः प्रायेणेति अधिकरणे घः ।) स्मरागारं । रतिगृहं । योनिरिति यावत् । इति शब्दरत्नावली चिकाण्डशेषश्च ॥

अधरः, पुं, (न म्रियतेऽसौ धृ + अच् ततो नञ्समासः ।) मुखावयवविशेषः । नावो ठोंट । इति भाषा । ओष्ठः । उपर ठोंट । इति भाषा । तयोः

पर्य्यायः । रदनच्छदः २ दशनवासः ३ । इत्यमरः ॥ परन्तु द्वयोरपि ओष्ठाधरप्रयोगः यथा । रदनच्छदौ दशनवाससी उभयत्र वर्त्तेते तथा ओष्ठाधरावपि उभयत्रेति नयनानन्दः ॥ रायमुकुटोऽप्याह उपरिवर्त्ती अधोवर्त्ती च ओष्ठः अधरोऽप्येवं । पुरुषस्य रक्ताधरः प्रशस्तः । यथा,—
"पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकोऽधरजिह्वा च सप्त रक्तं प्रशस्यते ॥"
स्त्रियास्तु यथा,—
"पाटलावर्त्तुलः स्निग्धो रेखाभूषितमध्यभूः ।
सीमन्तिनीनामधरो राज्ञां चैव प्रियो भवेत् ॥
श्यामः स्थूलोऽधरोष्ठः स्यात् वैधव्यकलहप्रदः ।
मलग्नो मत्तकाशिन्याश्चोत्तरोष्ठः सुभोगदः ॥"
इति सामुद्रकं ॥

अधरः, त्रि, (न धरः नञ्समासः । नीचः ।) अधः । तलं । हीनः । अपकृष्टः । इति मेदिनी ॥ हीनवादी । इति हेमचन्द्रः ॥ (यथा शाकुन्तले । पिबसि रतिसर्व्वस्वमधरं ।) ॥

अधरतः, अव्य, [स्] (अधर + तसिल् प्रथमापञ्चमीसप्तम्यर्थवृत्तौ ।) अधस्तात् । अधोभागः । इति हलायुधः ॥

अधरमधु, क्ली, (अधरस्य मधु यद्वीतत् ।) वक्त्रासवः । अधरामृतं । अधररसः । इति त्रिकाण्डशेषः ॥

अधरस्तात् अव्य, अधरतः । इति हलायुधः ॥

अधरस्तात्, अव्य, (अधर + अस्ताति विकल्पे अधरस्य अधादेशः ।) अधस्तात् । अधरात् । दिग्वाचकशब्दात् दिग्देशकालवाचे प्रथमापञ्चमीसप्तमीनां स्थाने तात् प्रत्ययोभवति । इति व्याकरणं ॥

अधरा, स्त्री, (न धरा नञ्समासः ।) अधोदिक् । इति व्याकरणं ॥ नीचा । यथा । अधराय कृता यथैव सा । इति नैषधं ॥

अधरात्, अव्य, अधरतः । अधरेण । अधरस्तात् । इत्यमरटीका ॥

अधरामृतं, क्ली, (अधरस्य अमृतम् ।) अधरसुधा । यथा,—
"सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण
हासावलोककलगीतजहृच्छयाग्निं ।
नो चेदयं विरहजागरणुपयुङ्क्ते देहा
ध्यानेन याम पदयोः पदवीं सखे ते ॥"
इति श्रीभागवते १० स्कन्धे २९ अध्यायः ॥

अधरीकृतः, त्रि, (अधरःकृतः तिरस्कृतः अधर् + च्वि तस्य ईत्वं ।) धिक्कृतः । तिरस्कृतः । इति जटाधरः ॥

अधरेण, अव्य, (अधरे देशे अधरस्यां दिशि वा अधर + एनप् ।) अधोदिग्देशकालः । अधोदिक्देशकाले । इति व्याकरणं ॥

अधरेद्यु, [स्] अव्य, (अधरे परे दिवसे अधर + एद्युस् ।) अधरदिवसः । परदिनं । इति शब्दरत्नावली ॥

अधर्म्मः, पुं, (म्रियतेऽनेन धृ + मनिन् ततो नञ्समासः, नञर्थविरोधार्थः ।) धर्म्मविरोधी । स तु ब्रह्मणः एष्टाज्जातः । इति श्रीभागवतं ॥ पापं ।

अपराधः । श्रुतिस्मृतिविरुद्धाचारः । यथा,—
"अधर्म्मेणैधते राजन् ततो भद्राणि पश्यति ।
ततः सपत्नान् जयति समूलस्तु विनश्यति ॥"
इति महाभारतम् ।
("अधर्म्ममिदमत्यन्तं कथं भीष्मोऽनुमन्यते" ।
इति महाभारतं ॥)

अधर्म्मी, [न्] त्रि, (अधर्म्मः पापं विद्यतेऽस्य ।) अधार्म्मिकः । अधर्म्मात्मा । अधर्म्मशब्दादस्यर्थे इन् ॥

अधश्चरः, पुं, (अधश्चरति इति अधस् + चर + अच् ।) चौरः । इति हारावली ॥ अधोगामिनि त्रि ॥

अधश्चौरः, पुं, (अधः चौरः अधस् + चुर + अच् + स्वार्थे अण्) नीचचौरः । सिंदालचोर इति भाषा । इति केचित् ॥

अधस्तात् अ, (अधर + अस्तातिल् ।) अधोभागः । इति हलायुधः ॥ (तस्माधस्तात् वयमपि रतान्तेषु पर्य्यटेषु । इति उत्तरचरितं ।) (तथा "निमज्जतोऽधस्तादन्यौ दाढ्यप्रतीच्छौ" ॥ इति मनुः ।) पश्चाद्भागः । इत्यमरटीका ॥ रतिगृहं । भगं । इति त्रिकाण्डशेषः ॥

अधामार्गवः, पुं, (न धीयतेऽसौ अधाः न + धा + किप् । तादृशं मार्गं वाति गच्छति । अधा + मार्ग + वा + कः ।) (अपामार्गः । इति क्षीरस्वामी ।) धामार्गववद्दृश्यः । इत्यमरटीकायां रायमुकुटः ॥

अधार्म्मिकः, त्रि, (धर्म्मं चरति । धर्म्म + ठक् । न धार्म्मिकः ।) अधर्म्मी । अधर्म्मात्मा । पापी । तत्पर्य्यायः । आधार्म्मिकः २ । इति त्रिकाण्डशेषः ॥ यथा,—
"यस्तु पञ्च महायज्ञविहीनः स निराकृतः ।
अधार्म्मिकः स्वादृषलः अवकीर्णी व्रतव्रती" ॥
इति जटाधरः ॥ अतो नाधार्म्मिके वसेद्ग्रामे ।
इति कुल्लूकभट्टश्च ॥

अधि अ, (न धीयते धार्य्यते । नञ् + धा + कि ।) प्रादिविंशत्युपसर्गमध्ये उपसर्गविशेषः । अस्यार्थः । उपरिभागः । इति दुर्गादासः ॥ अधिकारः । ईश्वरः । इति मेदिनी ॥ अधिकं । यथा अधिमासः अधिको मासः इत्यर्थः । इति स्मृतिः ॥

अधिः, पुं, आधिः । मनःपीड़ा । इत्यमरटीकायां भरतः ॥

अधिकं, क्ली, (अधि + स्वार्थे कन् ।) काव्यालङ्कारभेदः । तस्य लक्षणं । अधिकं एधुलाधारादाधेयाधिक्यवर्णनं । उदाहरणं यथा । ब्रह्माण्डानि जले यत्र तत्र मान्ति न ते गुणाः ॥ इति कुवलयानन्दे अप्पयदीक्षितः ॥

अधिकः, त्रि, (अध्यारूढ़ एव अधि + स्वार्थे कन् ।) अतिरिक्तः । अनेकः । इति हेमचन्द्रः । (पुमान् पुंसोऽधिके शुक्रे । स्त्री भवत्यधिके स्त्रियाः । इति मनुः ।)

अधिकरणं, क्ली, (अधि + कृ + अधिकरणे ल्युट् ।) एकन्यायोपपादनं । इति हेमचन्द्रः ॥ अधिक्रियते अत्र । विषयादिपञ्चावयवविवेचनोपेतग्रन्थः । यथा,—
"विषयो विशयश्चैव पूर्व्वपक्षस्तथोत्तरं ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतं" ॥
विषयो विचाराईवाक्यं । विशयोऽस्यायमर्थो न वेति संशयः । पूर्व्वपक्षः प्रकृतार्थविरोधितर्कोपन्यासः । उत्तरं सिद्धान्तानुकूलतर्कोपन्यासः । निर्णयो महावाक्यार्थतात्पर्य्यनिश्चयः । एवं क्रमेण विवेचनमत्राधिक्रियते इत्यधिकरणं । इति तिथ्यादितत्त्वं ॥ अधिक्रियतेऽर्थोऽनेनेति वा अधिकरणं वेदविचारग्रन्थात्मिका मीमांसा । सा च द्विधा कर्म्ममीमांसा ब्रह्ममीमांसा चेति । कर्म्मकाण्डवेदविचारग्रन्थः कर्म्ममीमांसा जैमिनिप्रणीता सैव मीमांसालेन प्रसिद्धा पूर्व्वमीमांसा इत्युच्यते । ब्रह्मकाण्डवेदविचारग्रन्थश्च ब्रह्ममीमांसा वेदव्यासप्रणीता सा च वेदान्तलेन प्रसिद्धा उत्तरमीमांसा इत्युच्यते । इत्यत्र मीमांसापदमपि करणाधिकरणव्युत्पत्त्या ग्रन्थपरं ज्ञेयं । भावव्युत्पत्त्या तु विचारपूर्व्वकनिर्णयपरमिति । यत्तु अधिक्रियते विचारोऽस्मै इति व्युत्पत्त्या अधिकरणं मीमांसासिद्धान्त इत्यादीचेनाभिहितं तन्न । सिद्धान्तस्याधिकरणावयवत्वेनाधिकरणाङ्गत्वात् अधिकरणत्वानुपपत्तेः । यथा न्यायमते निगमनस्य न्यायावयवत्वं न तन्मात्रस्य न्यायत्वं तथेहापीति सुधीभिर्भाव्यं । तस्य चाधिकरणस्य पञ्चाङ्गानि । तदुक्तं,—
"विषयोऽविषयश्चैव पूर्व्वपक्षस्तथोत्तरं ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतं" ॥
विषयो विचाराईवाक्यं । यथा । खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्य यूपं कुर्व्वीत इत्यादि संयोगपृथक्त्वाधिकरणादेः । एवं विषयो निश्चयस्तद्विप्रतिपत्तिरोधी वा अविषयः संशयः । तदुक्तं,—
"विशब्दश्च विशेषार्थः सिनोतिर्बन्धनार्थकः ।
विशेषेण सिनोतीति विषयोऽर्थनियामकः" ॥
नियामकः कोटिनिश्चायकतया विशेषदर्शनात्मकव्याप्यवत्त्वादिनिश्चय एव । एवमेव न्यायगुरुन्यायवागीशभट्टाचार्य्यचरणाः ॥ अन्ये तु विशय इति विपूर्व्वस्य श्रेतेः संशयार्थकत्वमालोच्य तालव्यमध्यपाठं वदन्तः विशयः संशयः इति व्याचक्षते तच्च विपूर्व्वश्रेतेः संशयार्थकत्वे मानमनुसन्धेयं । संशयः अस्यायमर्थो न वेत्याकारकः । पूर्व्वपक्षः सिद्धान्तविरुद्धतर्कोपन्यासेन सिद्धान्तविरुद्धसंशयैककोटित्वव्यवस्थापनं । उत्तरं प्रकृतसिद्धान्तानुकूलतर्कोपन्यासेन प्रकृतसिद्धान्तसिद्धसंशयापरकोटित्वव्यवस्थापनं । निर्णयः सिद्धान्तसिद्धविचार्य्यवाक्यतात्पर्य्यावधारणं । कर्म्ममीमांसाधिकरणानि सहस्रसंख्यकानि जैमिनिप्रणीतानि शास्त्रदीपिकादौ पार्थसारथिमिश्रादिभिर्बहुधा विवृतानि । इति चन्द्रशेखरशततत्त्वसम्बोधिनी ॥*॥ व्याकरणमते आधाररूपकारकं । तच्चतुर्व्विधं । सामीप्यं १ यथा गङ्गायां घोषः । कालिन्द्यां रेमे ॥ औपश्लेषः २ यथा दिवि देवाः । कानने रेमे ॥ विषयः ३ यथा शास्त्रे निपुणः । मोक्षौ कृशलः ॥ व्याप्तिः ४ यथा तिलेषु तैलं । सकले स्थितः ॥ * ॥

अधिकर्द्धिः, त्रि, (अधिका ऋद्धिः सम्पत्तिर्यस्य सः ।) अतिशयसम्पत्तियुक्तः । तत्पर्य्यायः । सम्मुदः २ । इत्यमरः ॥

अधिकर्म्मिकः, पुं, (अधिकृत्य दृष्टं कर्म्मणि प्रभवति अधिकर्म्मन् + ठन् तस्य इक) दृष्टार्थव्यक्तः । इति हेमचन्द्रः ॥ हाटेर दारोगा इति भाषा ।

अधिकाङ्कं, क्ली, (अङ्कादधिकं मयूरव्यंसकादित्वात् समासः ।) सकचुकाः मध्ये यद्बध्नन्ति तत् । कचुकादिदार्ढ्यार्थं सूत्रैर्मध्यकाये निबध्यपट्टिकादि । तत्पर्य्यायः । सारसनं २ । इत्यमरः ॥ विंशत्यङ्गुल्याद्यतिरिक्ताङ्गविशिष्टे त्रि ॥ (यथा मनुः ।—
"नोद्वहेत् कपिलां कन्यां
नाधिकाङ्गीं न रोगिणीं" ॥)

अधिकारः, पुं, (अधि + कृ + घञ् ।) राजादीनां चामरधूननच्छत्रधारणादिव्यापारः । तत्पर्य्यायः । प्रक्रिया २ । इत्यमरः ॥ प्रकरणं । यथा नैमित्तिकोऽयं प्रायश्चित्ताधिकार इति मिताक्षरा ॥ स्वामित्वं । यथा "सर्व्वे सुरधिकारिणः" इति स्मृतिः ॥ अधिकृतदेशादिः । यथा निजाधिकारः भिन्नाधिकारः इत्यादि बहवः शिष्टप्रयोगाः ॥ (यथा मनुः ।—
"तस्य शास्त्रेऽधिकारोऽस्मिन्
ज्ञेयो नान्यस्य कस्यचित्" ॥)

अधिकारी, [न्] त्रि, (अधिकरोति अधि + कृ + णच्यादित्वात् णिनि ।) प्रभुः । स्वामी । अधिपतिः । अधिकारविशिष्टः । स्वत्ववान् । इति स्मृतिः ॥ यथा,—
"इत्यापूर्त्तं द्विजातीनां धर्म्मः सामान्य उच्यते ।
अधिकारी भवेत् शूद्रः पूर्त्ते धर्म्मे न वैदिके" ॥
इति मलमासतत्त्वं ॥ अपिच ।
"स्नातोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि" ।
इत्याह्निकाचारतत्त्वं ॥ वेदान्तमते विधिवदधीतवेदाङ्गत्वेन आपाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्জनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्म्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता । इति वेदान्तसारः ॥ * ॥ धनाधिकारिणो दायभागशब्दे दृश्याः ॥ * ॥ श्रीमूर्य्यादीनां वेद्यकर्त्ता । इति लोकप्रसिद्धं ॥

अधिकारी, [न्] पुं, (अधिकरोति अधि + कृ + णच्यादित्वात् णिनि ।) वेदान्तशास्त्रवेत्ता । अधिगताखिलवेदार्थोऽनितान्तनिर्म्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता । इति वेदान्तसारः ॥ पुरुषः । इति राजनिर्घण्टः ॥

अधिक्षतः, पुं, (अधि + क्षि + क्तः ।) अध्यक्षः । आयव्ययवेक्षकः ॥ इत्यमरः ॥ (आचार इत्यधिक्षतेन मया स्थापिता या वेश्यस्त्रिरवरोधस्थेषु राज्ञः । इति शाकुन्तले ।) कृताधिकारद्रव्ये वाच्यलिङ्गः ।

अधिक्रमः, पुं, (अधि + क्रम् + घञ् दीर्घभावः ।) आक्रमणं । इति हेमचन्द्रः ॥

अधित्यका, स्त्री, (अधिरूढा पर्व्वतोपरिभागम् अधि + त्यकन् स्त्रियां टाप्।) पर्व्वतोपरिभूमिः। इत्यमरः ॥ (उपत्यकाद्रेरासन्ना भूमिरूर्द्धमधित्यका ॥ अमरकोषः। यथा रघुवंशे,—"अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं" ॥)

अधिपः, त्रि, (अधिपाति रक्षति अधि + पा + क।) अधिपतिः। स्वामी। इत्यमरः ॥ राजा। इति त्रिकाण्डशेषः ॥ (यथा रघुवंशे —अथ प्रजानामधिपः प्रभाते ॥)

अधिपतिः, पुं, (अधिपाति रक्षति अधि + पा + डति।) प्रभुः। स्वामी। इति हलायुधः ॥ (यथा रघुवंशे। "वचो निशम्याधिपतिर्दिवौकसां" ॥)

अधिभूः, पुं, (अधि + भू + कर्त्तरि क्विप्।) स्वामी। प्रभुः। इत्यमरः ॥

अधिमासः, पुं, (मासात् रविसंक्रान्तिमासादधिकमयूरव्यंसकादित्वात् समासः।) रविसंक्रान्तिद्वयमध्यवर्त्तिचान्द्रमासः। रविसंक्रान्तिशून्यशुक्लप्रतिपदादिदर्शान्तमासः। तत्पर्य्यायः। अधिकमासः २ असंक्रान्तमासः ३ मलमासः ४ मलिम्लुचः ५ विनामकः ६ नपुंसकः ७। इति मलमासतत्त्वं ॥

अधिमांसकः, पुं, (अधिकं मांसं यत्र सः, समासान्तः कः।) दन्तरोगविशेषः। यथा,—

"दन्तरुक् पश्चिमे दन्ते
महान् शोथो महान् स्रवः।
लालास्रावी कपर्द्दती
विज्ञेयः सोऽधिमांसकः" ॥

इति भावप्रकाशः ॥ अस्य चिकित्सा दन्तरोगशब्दे द्रष्टव्या ॥

अधिरथः, पुं, (रथमधिरूढः अत्यादीति समासः।) कर्णपिता। स तु सूतजातिः। तस्य कर्म्म सारथ्यं। यथा। विवेशाधिरथो रङ्गं यष्टिप्राणो ज्वयन्निव। इति महाभारतं ॥ (यथा हरिवंशे। "सत्कर्म्मसूतत्वापि सूतत्वधिरथस्तु वै।
यः कर्णं प्रतिजग्राह तेन कर्णस्तु सूतजः" ॥)

अधिराज्यभाक्, पुं, (अधिकं राज्यं कर्म्मधारयः, तत्भजते अधिराज्य + भज् + क्विप् उपपदसमासः।) अधिराट्। यथा। अवन्यान् पृथिवीपालान् पृथिव्यामधिराज्यभाक्। इति महाभारतं।

अधिराट्, [ज्] पुं, (आधिक्येन राजते अधि + राज् + कर्त्तरि क्विप्।) सम्राट्। चक्रवर्त्ती। इति महाभारतं ॥ (यथा रघुवंशे । इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य।)

अधिरोहिणी, स्त्री, (अधिरोहः आरोहणं तदेव साधनत्वेन विद्यतेऽस्य अधि + रोह + इन् स्त्रियां ङीप्।) (अधिरोहणी इति पाठे अधिरुह्यते अनया अधि + रुह + करणे ल्युट् स्त्रियां ङीप्।) वंशकाष्ठादिनिर्म्मितारोहणमार्गः। सिँड़ि इति भाषा। तत्पर्य्यायः। निःश्रेणिः २। इत्यमरः ॥ निःश्रेणी ३। इति तट्टीका ॥ अधिरोहणी इत्यपि पाठः ॥

अधिवचनं, क्ली, (अधि + वच् + ल्युट्। पक्षपातेन कथनं। "अधिकं वचनं पक्षपातेन वचनं" इति माधवाचार्य्यः।) नाम। संज्ञा। इति त्रिकाण्डशेषः ॥

अधिवासः, पुं, (अधि + वस् + घञ्।) निवासः। धूपनादिभिः संस्कारः। इति मेदिनी ॥ तद्द्रव्याणि। मृत्तिका १ गन्धः २ शिला ३ धान्यं ४ दूर्व्वा ५ पुष्पं ६ फलं ७ दधि ८ घृतं ९ स्वस्तिकं १० सिन्दूरं ११ शृङ्गः १२ कज्जलं १३ रोचना १४ श्वेतसर्षपः १५ स्वर्णं १६ रौप्यं १७ ताम्रं १८ चामरं १९ दर्पणं २० दीपः २१ प्रशस्तपात्रं २२। इति भवदेवः ॥ क्वचित् पुस्तके श्वेतसर्षपस्थाने सिद्धान्नं क्वचिच्च चामरस्थाने। तत्रानुष्ठानं। "दुर्गापूजादोलयात्रायागादौ पूर्व्वदिने सायंकाले आचारात् संस्कारकर्म्मणि तद्दिने पूर्व्वाह्णे मन्त्रं पठित्वा क्रमेणोक्तद्रव्याणि आदौ देवादीनां ललाटे पश्चाद्भ्रुवौ स्पर्शयित्वा प्रशस्तपात्रे स्थापयित्वा तत्पात्रं पूर्व्वोक्तक्रमेण वारत्रयं स्पर्शयेत्। द्रव्यविशेषेण संस्कारः। तत्र यजुर्व्वेदोक्तमन्त्रास्त्रयोविंशतिद्रव्याणि च यथा। तैलहरिद्रां गृहीत्वा,—

"ॐ कोसि कतमोसि कस्मै त्वा काय त्वा सुश्लोकः सुमङ्गलः सत्यराजन्। अनया तैलहरिद्रया अस्य शुभाधिवासनमस्तु। एवं सर्व्वत्र" । १ ।

गन्धं गृहीत्वा,—

"ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्व्वभूतानां तामिहोपाह्वये श्रियं" ।२।

मृत्तिकां गृहीत्वा,—

"ॐ भूरसि भूमिरस्य दितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं माहिꣳसीः"। ३।

पुनर्गन्धेन गन्धद्वारामिति।

शिलां गृहीत्वा,—

"ॐ प्रपर्व्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति खसि च प्लवानाः ता आवृत्र वधरा गुदक्ता अहिं बुध्नमनुरीयमानाः। विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि"। ४।

धान्यं गृहीत्वा,—

"ॐ धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञन्यं"। ५।

दूर्व्वां गृहीत्वा, —

"ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परिएवानो दूर्व्वे प्रतनु सहस्रेण शतेन च"। ६।

पुष्पं गृहीत्वा,—

"ॐ श्रीश्च ते लक्ष्मीश्च पत्न्या अहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं इष्णन्निषाण मुम्मइषाण सर्व्वलोकम्मइषाण"। ७।

फलं गृहीत्वा,—

"ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः"। ८।

दधि गृहीत्वा,—

"ॐ दधिक्रावण्नोऽकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरोत् प्रणआयुꣳषितारिषत्" ।९।

घृतं गृहीत्वा,—

"ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि" ।१०।

स्वस्तिकं गृहीत्वा,—

"ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः स्वस्तिन स्तार्क्ष्यो रिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु" । ११ ।

सिन्दूरं गृहीत्वा,—

"ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमीय पतयन्ति यह्वाः। घृतस्य धारा अरुषोण वाजी काष्ठाभिन्दन्नूर्म्मिभिः पिन्वमानः"। अत्र "वातप्रमीय पतयन्ति जङ्घा"। इत्यपि पठन्ति । १२ ।

शृङ्गं गृहीत्वा,—

"ॐ प्रतिश्रुत्काया अर्चनं घोषाय भयमन्ताय बऊवादिनमनन्ताय मूकꣳ शृङ्गायाऽम्बराघातं महसे वीणावादं क्रोशाय तूणवद्धमवरस्पराय शृङ्खं वनाय वनपमन्यतोऽरण्याय दावधं"। १३।

कज्जलं गृहीत्वा,—

"ॐ समिद्धोऽग्न ऋदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः वाजीवहन् वाजिनं जातवेदो देवानां वक्षिप्रियमासधस्थं"। १४।

रोचनां गृहीत्वा,—

"ॐ युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः रोचन्ते रोचना दिवि"। १५।

सिद्धान्नं गृहीत्वा,—

"ॐ अन्नपते अन्नस्य नो धेह्यनमीवस्य शुष्मिणः। प्रदातारं तारिषऊर्जं नो धेहि द्विपदे चतुष्पदे। सिद्धान्नमत्र आतपतण्डुलाः"। १६।

काञ्चनं गृहीत्वा, —

"ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधारः पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम। १७।"

रजतं गृहीत्वा,—

"ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनं"। १८।

ताम्रं गृहीत्वा,—

"ॐ असौ यस्ताम्रोरुण उतबभ्रुः सुमङ्गलः ये चैनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशो वैषाꣳ हेलइमहे"। १९।

सिद्धार्थं गृहीत्वा,—

"ॐ रक्षोहणो बलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो बलगहनो वलयामि वैष्णवान् रक्षोहणो बलगहनोऽवस्तृणामि वैष्णवान् रक्षोहणौ बलगहना उपधामि वैष्णवी रक्षोहणौ बलगहनौ पर्य्यूहामि वैष्णवी वैष्णवमसि वैष्णवाय"।२०।

दर्पणं गृहीत्वा,

"ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवोयाति भुवनानि पश्यन्"। २१।

दीपं गृहीत्वा,—

"ॐ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सु बर्हिषि"। २२।
सर्व्वद्रव्ययुक्तडल्लकं गृहीत्वा,—
"ॐ प्रतिपदसि प्रतिपदे त्वा अनुपदसि अनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा। २३।
इति यजुर्व्वेदीयदुर्गोत्सवपद्धतिः॥ * ॥ सामवेदिनामधिवासमन्त्रास्तत्तद्द्रव्याणि च यथा। प्रथमं गन्धेन,—
"ॐ भद्रा इन्द्रस्य रातयः सोऽस्य कामं विधतो नरोषति मनोदानाय चोदयन्"। १।
"ॐ महित्रीणामवरस्तु चुल्लमित्रस्यार्यम्नः दुराधर्षं वरुणस्य"। २।
इति मह्या।
पुनर्गन्धेन,—
"ॐ भद्रा इन्द्रस्य रातयः इत्यादि"। ३।
"ॐ वित्तदापो न पर्व्वतस्य एकादुक्थेभिरग्ने जनयन्त देवाः तत्वाग्निरः। सुश्रुतयो वाजयत्या जिग्नगिर्व्वर्हो जिग्युरश्वाः"। ४।
इति शिलया।
"ॐ धानावन्तं करम्भिण मपूप्वन्तमुक्थिनं इन्द्रप्रातर्जुषस्व नः"। ५।
इति धान्येन।
"ॐ जज्ञायथा मपूर्व्य मघवन् वृत्रहत्याय। तत्पृथिवी मप्रथयस्तदस्तभ्ना उतो दिवम्"। ६।
इति दूर्व्वया।
"ॐ पवमान व्यश्नुहि रश्मिभिर्व्वाजसातमः। धनत्वक्षोत्रे सुवीर्य्यम्"। ७।
इति पुष्पेण।
"ॐ इन्द्रन्नरोने मधिता हवन्ते यत्पार्य्या युनक्ते धियस्ताः शूरो नृषाता श्रवसश्च कामला गोमति व्रजे भजात्वद्रिः"। ८।
इति फलेन।
"ॐ दधिक्राव्णोऽकारिषं जिष्णोरश्वस्य वाजिनः सुरभिणो मुखाकरोत् प्रणतायुंषि तारिषत्"। ९।
इति दध्ना।
"ॐ घृतवती भुवनानामभिश्रियोर्व्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्म्मणा विष्कभितेऽजरे भूरिरेतसा"। १०।
इति घृतेन।
"ॐ अस्ति सोमोऽयं सुतः पिबन्त्यस्य मरुतः उतस्वराजोऽश्विना"। ११।
इति खस्तिकेन।
"ॐ सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावा पशुमप्सु गृभ्णते"। १२।
इति सिन्दूरेण।
"ॐ खसृन्वयो वसूनां यो राया मानेता य इड़ानां सोमो यः सुक्षितीनां"। १३।
इति गन्धेन।
"ॐ अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मध्वाभ्यञ्जते"। १४।
इति कज्जलेन।
"ॐ आयन्त इव सूर्य्यं विश्वेदिन्द्रस्य भक्षत वसूनि जातो जनिमान्योजसा प्रतिभागन्नदीधिमः"। १५।
इति रोचनया।
"ॐ प्रतीउषा अपूर्व्या व्युच्छति प्रिया दिवस्तुबे वा मघिना वृहत्"। १६।
इति सिद्धार्थेन।
"ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं। सनिं मेधा मयासिषं"। १७।
इति काञ्चनेन।
"ॐ यदर्चो हिरण्यस्य वद्मा वर्चो गवामुत। सत्यस्य ब्रह्मणो वर्च्चसेन मा संसृजामसि"। १८।
इति रौप्येण।
"ॐ रन्नहांसि सूर्य्य वड़ादित्य महां असि महस्ते सतो महिमापनिष्ट समक्षा देवमहां असिः"। १९॥
इति ताम्रेण।
"ॐ मनुज्योतिर्जुषतामाज्यस्य वृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं। यन्नः समिमं दधातु विश्वे देवाः स इह मादयन्तां मों प्रतिष्ठ"। २०।
इति दीपेन।
"ॐ आदित्य प्रयतस्य वेत्तसो ज्योतिः पश्यन्ति वासरं पावाय दिव्यं तोदिवि"। २१।
इति दर्पणेन।
"ॐ उद्यल्लोकानरोचय प्रभभूतमरोचय होइ इमान् लोकानरोचय होइ विश्वभूतमरोचय। होइा ऐवात्र धर्म्मो ज्योतीषि"। २२।
इति प्रशस्तपात्रेण। प्रशस्तपात्रं पूर्व्वोक्तसर्व्वद्रव्यस्थापितैकपात्रं। इति सामवेदीयदुर्गोत्सवपद्धतिः॥

अधिवासनं, क्ली, (अधिवासयति स्थापयति देवता अनेन अधि + वस् + णिच् + करणे ल्युट्।) अधिवासः। गन्धमाल्यादिभिः संस्कारकरणं। इत्यमरः॥ (अनया तैलहरिद्रया अस्याः शुभाधिवासनमस्तु॥ इति दुर्गोत्सवपद्धतिः॥)

अधिविन्ना, स्त्री, (अधिविद्यते लभ्यतेऽसौ, अधि + विद् + कर्म्मणि क्तः स्त्रियां टाप्।) अध्यूढ़ा। प्रथमविवाहिता स्त्री। कृतानेकविवाहस्यामिनः आपेक्षिकप्रथमोढ़ा भार्य्या। इत्यमरः॥
("अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं"॥ इति मनुः।)

अधिश्रयणी, स्त्री, (अधि श्रियते पच्यतेऽत्र अधि + श्रि + अधिकरणे ल्युट् स्त्रियां ङीप्।) चुल्ली। इत्यमरः॥ चुला इति भाषा।

अधिष्ठानं, क्ली, (अधितिष्ठतेऽत्र अधि + स्था + अधिकरणे ल्युट्।) नगरं। चक्रं। प्रभावः। अध्यासनं। अवस्थानं। इत्यमरः॥ (यथा रामायणे,—
"यद्भूयात् सम्परित्यज्य स्वमधिष्ठानमृद्धिमत्।
कैलासं पर्व्वतश्रेष्ठमध्यास्ते नरवाहनः"॥)

अधिक्षिप्तः, त्रि, (अधि + क्षिप् + कर्म्मणि क्तः।) प्रतिक्षिप्तः। इत्यमरः॥ प्रेरितः। इति भरतः॥ प्रणिहितः। स्थापितः। कुत्सितः। भर्त्सितः। इति मेदिनी॥

अधीतः, त्रि, (अधि + इङ् + कर्म्मणि क्तः।) कृताध्ययनः। पठितः। यथा,—
"अधीते श्रुतसाहस्रमनन्तं वेदपारगे"।
इति स्मृतिः॥ पठितशास्त्रं। पाठे क्ली॥

अधीतिः, स्त्री, (अधि + इङ् + भावे क्तिन्।) अध्ययनं। पठनं। इति जटाधरः॥

अधीती, [न्] त्रि, (अधीतमनेन अधीत + इन्।) अध्ययनविशिष्टः। कृताध्ययनः। इति व्याकरणं॥

अधीनः, त्रि, (इनं प्रभुमधिगतः आश्रादीति समासः।) परवशः। तत्पर्य्यायः। निघ्नः २ आयत्तः ३ वशच्छन्दः ४ गृह्यकः ५। इत्यमरः॥ (यथा कुमारसम्भवे,—
"त्वदधीनं खलु देहिनां सुखं"॥)

अधीरः, त्रि, (न धीरः स्थिरः नञ्समासः।) चञ्चलः। इति हलायुधः॥ कातरः। इत्यमरः॥ (यथा नागानन्दे,—
"निर्व्याजं विधुरेष्वधीर इति
मां येनाभिधत्ते भवान्"॥)

अधीरा, स्त्री, (न धीरा व्यवसायिनी, नञ्समासः।) विद्युत्। इति हारावली॥ मानावस्थायां मध्याप्रगल्भनायिकयोर्भेदः॥ तस्या लक्षणं। अव्यक्तकोपप्रकाशकत्वं। मध्याधीरायाः परुषवाक्कोपप्रकाशिका॥ प्रौढ़ाधीरायास्तर्জ্জনताड़नादिकं कोपप्रकाशं। सा द्विधा। ज्येष्ठा कनिष्ठा च। इति रसमञ्जरी॥

अधीश्वरः, त्रि, (अधिकः ईश्वरः कर्म्मधारयः।) अधिपतिः। प्रभुः। इति हलायुधः॥ (यथा पञ्चतन्त्रे,—
"चन्द्रे मण्डलसंस्थे विस्पष्टते राऊणा दिनाधीश्वरः॥)

अधीश्वरः, त्रि, (अधिकः ईश्वरः कर्म्मधारयः।) प्रशस्ताश्चेषसामन्तः। महाराजः। चक्रवर्त्ती। इत्यमरः॥

अधुतं, त्रि, अकम्पितं। धुञ्नकम्पे इत्यस्मात् कर्म्मणि क्तः, पञ्चाद्भावसमासः। दीर्घमध्योऽपि॥

अधुना, अ, (अस्मिन् काले इदमशब्दस्य रूपमिति निपातनात्।) अस्मिन्काले। इदानीं। सम्प्रति। इत्यमरः॥

अधुनातनं, त्रि, (अधुना भवम् अधुना + ट्युल् तुट् च।) इदानीन्तनं। वर्त्तमानकालवर्त्ति। एतत्कालीनं। इति व्याकरणं॥

अधृतः, पुं, (धृ क्तः, न धृतः नञ्समासः।) विष्णुः। इति तस्य सहस्रनाममध्ये पठितः। अक्षतधारणवस्तुनि त्रि॥

अधृष्टः, त्रि, (धृष् + क्तः, न धृष्टः नञ्समासः।) सलज्जः। तत्पर्य्यायः। अप्रगल्भः २। इति शब्दरत्नावली॥ शारदः ३ अप्रतिभः ४। इति जटाधरः॥ शालीनः ५। इत्यमरः॥

अधृष्यः, त्रि, (धृष् + कर्म्मणि क्यप्।) प्रगल्भः। अधर्म्मणीयः। इति मेदिनी॥ (यथा रघुवंशे,—
"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनां।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः"॥)

अधृष्या, स्त्री, (न + धृष् + संज्ञायां क्यप्। यस्यां

स्थाने पराभवो न भवति तावद्भूमौ नदी।) नदी-विशेषः। इति मेदिनी॥

अधैर्य्यं, त्रि, (नास्ति धैर्य्यं यस्य सः।) धैर्य्यशून्यः। धैर्य्याभावे स्त्री। यथा,—

"धैर्य्याधैर्य्यपरिग्रहद्विजयोरेवंविधोः प्रीतये"। इति भानुभट्टः॥

अधोऽंशुकं, क्ली, (अधः नीचदेशस्थम् अंशुकं वस्त्रं, कर्म्मधारयः।) परिधानवस्त्रं। इत्यमरः॥

अधोघण्टा, स्त्री, (अधः अधोदेशादारभ्य घण्टेव फलं यस्याः सा।) अपामार्गः। इति रत्नमाला॥

अधोजिह्विका, स्त्री, (अल्पा जिह्वा कन् स्त्रियां टाप्, अधः अधरा जिह्विका कर्म्मधारयः।) तालु-मूलस्थक्षुद्रजिह्वा। इति हारावली॥ आलजिव इति भाषा।

अधोभुवनं, क्ली, (अधः नीचदेशस्थं भुवनं लोकः कर्म्मधारयः।) पातालं। इत्यमरः॥

अधोमर्म्म, [न्] क्ली, (अधः अधरं मर्म छिद्रं।) गुह्यद्वारं। इति हेमचन्द्रः॥

अधोमुखः, त्रि, (अधोमुखं यस्य सः।) अधोवदनः। पातालमुखः। तत्पर्य्यायः। अवाङ्मुखः २। इत्यमरः॥ अवाचीनः ३। इति जटाधरः॥ अधोमुखनक्षत्रगणो यथा,—

"अश्लेषवह्नियमपित्र्यविशाखयुक्तं
पूर्व्वत्रयं श्रुतभिषा च नवाप्युडूनि।
एतान्यधोमुखगणानि शुभानि नित्यं
विद्यार्थ्यभूमिखननेषु च शोभितानि"॥

इति ज्योतिःसारसंग्रहः।

अधोमुखी, स्त्री, (अधोमुखं यस्याः सा, स्त्रियां टाप्।) गोजिह्वाक्षुप्तः। इति राजनिर्घण्टः॥

अधोवायुः, पुं, (अधः अधरः वायुः कर्म्मधारयः।) अपानवायुः। यथा,—

"च्युतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत्"। इति तन्त्रसारे योगिनीहृदयं॥

अधोक्षजः, पुं, (अधः प्राकृत्वाभावात् हीनम् अक्षजं प्रत्यक्षज्ञानं यस्य सः। अक्षात् इन्द्रियात् जायते अक्ष+जन् ड, पक्षे तत्।) विष्णुः। इत्यमरः॥ (यथा महाभारते। अधो न क्षीयते जातु यस्मात्तस्मादधोक्षजः।)

अध्यग्नि, क्ली, (अग्नेः समीपे अव्ययीभावः।) विवाह-काले अग्निसमीपे स्त्रियै दत्तं धनादि। यथा,—

"विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ।
तदध्यग्निकृतं सद्भिः स्त्रीधनन्तु प्रकीर्त्तितं"॥

इति दायभागे कात्यायनः॥

अध्यर्द्धा, स्त्री, (अधिकमर्द्धं बीजं यस्याः सा, स्त्रियां टाप्) कर्पिकच्छः। इत्यमरः॥ आलकुशी इति भाषा। भूम्यामलकी। इति रत्नमाला॥

अध्ययनं, क्ली, (अधि+इङ्+भावे ल्युट्।) गुरुमुखा-दानुपूर्व्व्याश्रवणं। पठनं। ब्राह्मणस्य षट्कर्म्मा-न्तर्गतमिदं। इति शब्दरत्नावली॥

अध्यवसायः, पुं, (अधि+अव+सो+भावे घञ्।) उत्साहः। इत्यमरः॥ कर्म्मसु सुकरः प्रत्ययः। इति मधुः। कर्म्मसु दृढ़यत्नकारको भावः। इति रमानाथः॥ कर्म्मसु प्रत्ययः इति नयनानन्दः॥ अध्यवसे बलोद्यमः। इति केचित्॥ उद्योगोद्यमौ चात्र। इति भरतः॥

अध्यशनं, क्ली, (अधिकमशनं भोजनं कर्म्मधारयः।) अजीर्णे भोजनं। यथा। अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते। इति भावप्रकाशः॥

अध्यक्षः, पुं, (अधि+अक्ष्+अच्।) (क्षत्रधारणादि व्यवहारे-ऽधिकृतः। यथाकः।) क्षौरिकाख्यः। इति शब्दरत्नावली॥

अध्यक्षः, त्रि, (अक्षमिन्द्रियमधिगतः प्रादि-समासः।) प्रत्यक्षः। इन्द्रियजन्यज्ञानं।

(यदध्यक्षेव जगतां वयमारोपितास्त्वया॥
इति कुमारसम्भवे।) अधिकृतः।
आयव्ययादिनिरीक्षकः। इत्यमरः॥

अध्यायकः, त्रि, (अधि+इङ्+णिच्+ण्वुल्।) अध्यापनकर्त्ता। पाठगुरुः। अध्यापयिता। तत्पर्य्यायः। उपाध्यायः २। इत्यमरः॥

अध्यापनं, क्ली, (अधि+इङ्+णिच्+भावे ल्युट्।) पाठनं। विद्यादानं। ब्राह्मणानां षट्कर्म्मान्तर्गत-कर्म्मेदं। इति शब्दरत्नावली॥ (यथा मनुः,—

"अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव षट्कर्म्माण्यग्रजन्मनः"॥)

अध्यायः, पुं, (अधि+इङ्+भावे घञ् अध्ययनम्।) वेदपुराणादिपरिच्छेदः। ग्रन्थसन्धिः। तन्मानान्त-राणि यथा। सर्गः। वर्गः। परिच्छेदः। उद्घातः। अङ्कः। संग्रहः। उच्छ्वासः। परिवर्त्तः। पटलः। काण्डं। स्थानं। प्रकरणं। पर्व्व। आह्निकं। इति त्रिकाण्डशेषः॥ स्कन्धः। लवकः। उल्लासः। पादः। उद्योतः। विरचनं। इत्यादयपि॥

यदुक्तम्।

("सर्गोवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमेव च॥
स्थानं प्रकरणं चैव पर्व्वोल्लासाह्निकानि च।
पुराणादौ परिच्छेदा अनेके परिकीर्त्तिताः॥")

अध्यारूढः, त्रि, (अधि+आङ्+रुह्+क्तः।) समारूढः। क्षतारोहणः। अत्यधिकः। अति-शयः। इति मेदिनी॥

अध्यारोपः, पुं, (अधि+आ+रुह्+णिच्भावे अच्।) वस्त्वन्यवस्तुतत्त्वारोपः। सच्चिदानन्दाद्वयब्रह्मणि अज्ञानादिसकलजडसमूहस्यारोपणमित्यर्थः। अ-सर्पभूतरज्जौ सर्पारोपवत्। इति वेदान्तसारः॥

अध्यावाहनिकं, क्ली, (अध्यावाहनं पितृस्वहात् स्वामिगृहागमनं तत्काले लब्धं अध्यावाहन+लब्धार्थे ठन् तस्य इकः। अधि+आ+वह्+णिच् ल्युट्।) स्त्रीधनविशेषः। यथा,—

"यत् पुनर्लभते नारी नीयमाना हि पैतृकात्।
अध्यावाहनिकं नाम तत् स्त्रीधनमुदाहृतं॥"
इति दायभागे कात्यायनः॥

अध्याहारः, पुं, (अधि+आ+हृ+भावे घञ्।) अध्याहारः। तर्कणं। ऊहनं। इति शब्द-रत्नावली॥

अध्याहारः, पुं, (अधि+आ+हृ+भावे घञ्।) तर्कः। ऊहः। इत्यमरः॥ असरूपार्थस्य शब्दा-न्तरेण सरूपीकरणं। आकाङ्क्षासमासकपदानु-सन्धानं। वाक्यसम्पूर्णार्थपदयोजनं। युक्तिप्राप्तस्य पदान्तरमुद्दाहृत्य व्यक्तीकरणं। इति तट्टीका॥

अध्युग्रः, त्रि, (अधि+वस्+क्तः, आगमशास-विधेरनित्यत्वात् इड़ागमाभावः। क्तान्तद्वितसमा-साश्च अभिधाननियामका इति प्रसिद्धेः।) सार्द्ध-त्रिसङ्ख्या। ३॥ साड़े तिन इति भाषा। यथा,—

अवाप्य खां भूमिं भुजगनिभमध्युष्टवलयं।
इति आनन्दलहरी॥

अध्युद्गः, पुं, (उद्गमधिगतः प्रादिसमासः।) उद्ग-युक्तरथः। उद्गवाह्यप्रेक्षा। इति हारावली॥

अध्युप्तः, पुं, (अधि+वप्+क्तः।) महेश्वरः। इति मेदिनी॥ (अधिरोपितः। समुप्तः। अभ्युदय-शाली।)

अध्युप्तः, त्रि, (आधिक्येन वृद्धिं गतः अधि+वप्+क्तः।) अधिकवृद्धियुक्तः। समृद्धः। इति धरणी॥

अध्यूढा, स्त्री, (अधि+वह+कर्म्मणि क्तः, स्त्रियां टाप्।) प्रथमविवाहिता स्त्री, क्षतसापत्निका। क्षतानेकविवाहस्य प्रथमोढा स्त्री। इत्यमर-मेदिनीकरौ॥

अध्येषणा, स्त्री, (अधि+इष्+णिच्+भावे युच्, स्त्रियां टाप्।) याच्ञा। इति हेमचन्द्रः॥ आराध-स्यादरपूर्व्वकं कर्म्मणि नियुक्तकरणं। गुर्व्वादेः सत्कारपूर्व्वकं क्वचिदर्थे नियोजनं। तत्पर्य्यायः। सनिः २। इत्यमरः॥ सनी ३। इति तट्टीका॥

अध्वगः, पुं, (अध्वना पथा गच्छति अध्वन्+गम्+ड, उपपदसमासः।) पथिकः। इत्यमरः॥ उड़ुः। इति त्रिकाण्डशेषः॥ सूर्य्यः। इति हेमचन्द्रः॥ खेसरः। इति राजनिर्घण्टः॥ खचर इति भाषा।

अध्वगभोग्यः, पुं, (अध्वगेन पथिकेन भोग्यः, अना-यासलभ्यफलत्वात्, द्वितीयातत्पुरुषः।) आम्रा-तकवृक्षः। इति त्रिकाण्डशेषः॥

अध्वगा, स्त्री, (अध्वन्+गम्+ड, उपपदसमासः। स्त्रियां टाप्।) गङ्गा। इति त्रिकाण्डशेषः॥

अध्वजा, स्त्री, (अध्वनि जायते अध्वन्+जन्+ड, उपपदसमासः, स्त्रियां टाप्।) सर्षपशाकवृक्षः। इति राजनिर्घण्टः॥

अध्वनीनः, त्रि, (अध्वनि साधुः अध्वन्+ख तस्य ईनङ्।) पथिकः। इत्यमरः॥

अध्वन्यः, त्रि, (अध्वनि साधुः अध्वन्+यत्।) पथिकः। इत्यमरः॥ (अध्वन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं॥ इति अमरशतके॥)

अध्वरः, पुं, (अध्वानं सन्मार्गं राति ददाति अध्वन्+रा+कः उपपदसमासः।) यज्ञः। वसुभेदः। सावधानः। इति मेदिनी॥ ("तमध्वरे विश्वजिति क्षितीशः"। इति रघुवंशे।)

अध्वरथः, पुं, (अध्वेव रथो गमनसाधनं यस्य सः।) पथरथः। अध्वगमनोपयुक्तरथः। तत्पर्य्यायः। परिधातिकः २। इति हेमचन्द्रः॥

अध्वर्युः, पुं, (अध्वरं यज्ञं यौति सम्पादयति अध्वर + यु + कर्त्तरि क्विप्, एषोदरादित्वात् तुम्भावः रस्याकारलोपः, हेमकारी ऋत्विक्।) यजुर्वेदवेत्ता। इत्यमरः॥ (यथा कुमारसम्भवे,—

"विवाहयज्ञे वितते ऽग्नि यूय-
मध्वर्य्यवः पूर्व्वहुता मयेति"।)

अध्वशल्यः, पुं, (अध्वनि पथि शल्यमिव आचरति सकण्टकतया अध्वशल्य + क्विप् ततोऽण्।) अपामार्गः। इति राजनिर्घण्टः॥

अध्वा [न्] पुं, (अक्ति गमनेन वर्त्म नाशयति, अद् + वाऽलुक्यात् क्वनिप्, एषोदरादित्वात् दकारस्य धः।) पन्थाः। कालः। संस्थानं। अवस्कन्दः। इति मेदिनी॥ स्कन्धः। इति च पाठान्तरं॥ अध्वगमनजन्यश्रमः। मेदःकफस्थूलतासौकुमार्य्यनाशित्वं। इति राजवल्लभः॥

अध्वान्तशावचः, पुं, (अध्वान्तस्य वर्त्मसीमायाः शावचः शत्रुवत्, षष्ठीतत्पुरुषः।) खद्योतकः॥ इति शब्दचन्द्रिका॥

अन घ लु प्राणने। जीवने। इति कविकल्पद्रुमः॥ घ लु अनिति लोको जीवति इत्यर्थः। इति दुर्गादासः॥

अन ड य प्राणने। जीवने। इति कविकल्पद्रुमः॥ य ड अन्यते। इति दुर्गादासः॥

अनंशुमत्फला, स्त्री, (न अंशुमत् मोचान्तर्व्वर्त्तितया सूर्य्यकिरणशून्यं फलं यस्याः सा।) अंशुमत्फला। कदली। इति शब्दार्थरः॥

अनः [स्] क्ली, (अनिति जीवत्यनेन जीविकोपायत्वात् अन् + असुन्।) शकटं। इत्यमरः॥ (यथा मनुः,—

"होता वापि हरेदश्वमुद्गाता चाप्यनःऋये"।)

अन्नं। इत्युणादिकोषः॥ जननी। जन्म। जन्मी। इति कोषान्तरं॥

अनकः, त्रि, (अन् + अच् + कुत्वायां कन्।) अशकः। अधमः। इत्यमरटीकायां भरतः॥

अनगारः, पुं, (नास्ति अगारं गृहं यस्य सः, गृहस्थाश्रमशून्यः।) ऋषिः। मुनिः। इति हेमचन्द्रः॥ अगारशून्ये वाच्यलिङ्गः॥

अनग्निः, पुं, (नास्ति श्रौतः स्मार्त्तो वा अग्निर्यस्य सः।) श्रौतस्मार्त्तकर्म्महीनः॥ इति महाभारते दानधर्म्मः॥ (अनाहिताग्निर्ब्राह्मणः। यथाह मनुः,

"अग्नीनात्मनि वैतानान् समारोप्य यथाविधि।
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः"॥)

अनघः, त्रि, (नास्ति अघं पापं यस्य सः।) अपापः। निर्म्मलः। मनोज्ञः। इति मेदिनी॥ (यथा शाकुन्तले—

"अखण्डं पुण्यानां फलमिव च तद्रूपमनघं"॥)

अनङ्गं, क्ली, (नास्ति अङ्गमवयवो यस्य तत्।) आकाशं। मनः। इति मेदिनी।

अनङ्गः, पुं, (नास्ति अङ्गं कायो यस्य सः।) कामदेवः। इत्यमरः॥ (यथा मेदिनी। "अनङ्गो मदनेऽनङ्गमाकाशमनसोरपि"॥) अङ्गरहिते वाच्यलिङ्गः॥

अनङ्गकं, क्ली, (नास्ति अङ्गमाकारो यस्य तत्, ततः स्वार्थे कः।) चित्तं। मनः। इति शब्दरत्नावली॥

अनङ्गासुहृत् [द्] पुं, (अनङ्गस्य कामदेवस्य असुहृत् शत्रुः शिवजटाग्निना तद्देहभस्मीकरणात्।) शिवः। इति हेमचन्द्रः॥

अनच्छः, त्रि, (न अच्छः निर्म्मलः।) आविलः। अनिर्म्मलः। इत्यमरः॥

अनञ्जनं, क्ली, (नास्ति अञ्जनं खमूर्त्तिप्रकाशो यस्य तत्, निराकारत्वात्, अञ्ज + भावे ल्युट्।) आकाशं। इति शब्दचन्द्रिका॥ अञ्जनशून्ये त्रि॥ (यथा साहित्यदर्पणे,—

"नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः"।)

अनडुच्छिक्षा, स्त्री, (अनडुहो वृषभस्य जिह्वेव जिह्वा यस्याः सा स्त्रियां टाप्।) गोजिह्वाशुल्लः। इति राजनिर्घण्टः॥

अनडुही, स्त्री, (अनडुह् + गौरादित्वात् ङीष् पक्षे आम्।) अनड्वाही। इति हेमचन्द्रः॥ गाइ इति भाषा।

अनड्वान्, [डुह्] पुं, (अनडुह् + प्रथमैकवचनम्।) वृषः। एँड़े इति भाषा। तत्पर्य्यायः। गौः २ भद्रः ३ बलीवर्दः ४ दम्यः ५ दान्तः ६ स्थिरः ७ बली ८ उक्षा ९ कक्षुमान् १० ऋषभः ११ वृषभः १२ वृषः १३ धुर्य्यः १४ धुरीयः १५ धौरेयः १६ शाकटिकः १७ शिववाहनः १८ रोहिणीरमणः १९ वोढा २० गोनाथः २१ सौरभेयकः २२। इति राजनिर्घण्टः॥ (यथा मनुः,—

"अजमेषावनड्वाहं खरं हस्त्येकहायनम्"॥)

अनड्वाही, स्त्री, (अनडुह् + गौरादित्वात् ङीष्, आमागमस्य आमभावपक्षे केवलं ङीष्।) अनडुही। स्त्रीगवी। इति हेमचन्द्रः॥ गाइ इति भाषा।

अनद्यः, पुं, (अद् + कर्म्मणि ण्यत् संज्ञापूर्व्वकविधेरनित्यत्वात् वृद्ध्यभावः, न अद्यः अप्रशस्तखाद्यः, नञ्समासः, नञश्च अप्राशस्त्ये।) गौरसर्षपः। इति राजनिर्घण्टः॥

अनधिगतः, त्रि, (अधि + गम् + कर्म्मणि क्तः, न अधिगतः ज्ञातः, नञ्समासः। गतभिन्नः प्राप्तभिन्नः।) अनवगतः। यथा,—"अरे विद्वन्मन्याश्चानधिगतवेदार्थविभवाः"। इति भगवदाचार्य्यमिति प्रामाणिकाः॥

अनध्यक्षः, त्रि, (अक्षमिन्द्रियमधिगतः प्राप्तिसमासः, प्रत्यक्षः तद्भिन्नः नञ्समासः।) अप्रत्यक्षः। इत्यमरटीकायां रमानाथः॥ अधोक्षभिन्नः॥

अनन्तं, क्ली, (नास्ति अन्तः सीमा यस्य तत्।) आकाशं। इत्यमरः॥ अभ्रकं। इति राजनिर्घण्टः॥

अनन्तः, पुं, (नास्ति अन्तः विनाशो यस्य सः, तथाहि भागवते "लोके नष्टे दिपरार्द्धावसाने मवानेकः शिष्यते शेषसंज्ञः"।) विष्णुः। इति मेदिनी॥ बलदेवः। अनन्तजिन्नाम जिनः। इति हेमचन्द्रः॥ शेषनागः। इत्यमरः॥ वासुकिः। इति शब्दमाला॥ सिन्दुवारवृक्षः। इति राजनिर्घण्टः॥

अनन्तः, त्रि, (नास्ति अन्तः सीमा विनाशो वा यस्य सः।) अन्तरहितः। अनवधिः। अशेषः। असीमः। इत्यमरो मेदिनी च॥ (यथा कुमारसम्भवे।—"अनन्तरत्नप्रभवस्य यस्य"।)

अनन्तजित्, पुं, (जयतीति जि + कर्त्तरि क्विप्, अनन्तो नाम जित् जयो बौद्धविशेषः शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च।) जिनानां चतुर्व्विंशत्यन्तर्गतचतुर्दशजिनः। तत्पर्य्यायः। अनन्तः २। इति हेमचन्द्रः॥

अनन्ततीर्थकृत्, पुं, (अनन्तानि असङ्ख्यानि तीर्थानि शास्त्राणि कर्म्मधारयः, तानि कृतवान् अनन्ततीर्थ + कृ + क्विप्, उपपदसमासः।) अनन्तजित्। इति हेमचन्द्रः॥ (अनन्तजित् नाम जिनः॥)

अनन्तरं, त्रि, (नास्ति अन्तरमवकाशो यस्य तत्।) अनवकाशं। अन्तररहितं। तत्पर्य्यायः॥ अव्यवहितं २ संसक्तं ३ अपटान्तरं ४। इति हेमचन्द्रः॥ पश्चादर्थे क्ली॥ (पश्चात्। ततःपरं। यथा रघुवंशे,—"पितुरनन्तरमुत्तरकोशलान्"॥)

अनन्तविजयः, पुं, (विजयतेऽनेन वि + जि + करणे अच्, ततोऽनन्तानामसङ्ख्यानां शत्रूणां शब्देन विजयः विजयसाधनम् षष्ठीतत्पुरुषः।) युधिष्ठिरराजस्य शङ्खः। इति श्रीभगवद्गीता॥

अनन्तवीर्य्यः, पुं, (अनन्तमसीमं वीर्य्यं तेजो यस्य सः।) भाविकल्पे जिनानां चतुर्व्विंशत्यन्तर्गतत्रयोविंशतीर्थकरजिनः। इति हेमचन्द्रः॥

अनन्तव्रतं, त्रि, (अनन्तस्य तन्नामकदेवस्य व्रतं षष्ठीतत्पुरुषः।) भाद्रशुक्लचतुर्दश्यां कर्त्तव्यमनन्तदेवस्य व्रतं। तद्विधिर्यथा। भविष्ये,—

"अनन्तव्रतमेतद्धि सर्व्वपापहरं शुभं।
सर्व्वकामप्रदं नृणां स्त्रीणाञ्चैव युधिष्ठिर॥
तथा शुक्लचतुर्दश्यां मासि भाद्रपदे भवेत्।
तस्यानुष्ठानमात्रेण सर्व्वपापं प्रणश्यति"॥*॥

व्रतारम्भप्रतिष्ठयोर्वर्ज्ज्यकालमाह ज्योतिषे,—

"गुरोर्भेगोरस्तबाल्ये वार्द्धके सिंहगे गुरौ।
वक्रिजीवास्तविंशेऽक्षि गुर्व्वादित्ये दशाहिके॥
पूर्व्वराशावनायातातिचारिगुरुवत्सरे।
प्राग्राशिगन्तृजीवस्य चातिचारे चिपत्तके॥
कम्पाद्यद्भुतसप्ताहे नीचस्थेऽब्दे मलिम्लुचे।
भानुलङ्घितके मासि क्षये राड्युते गुरौ॥
पौषादिकचतुर्म्मासे चरणाङ्गितवर्षगे।
एकेनाङ्का चैकदिने द्वितीयेन दिनत्रये॥
तृतीयेन तु सप्ताहे माङ्गल्यानि शुभान्विताः।
विद्यारम्भकर्त्तृवेधौ चूड़ोपनयनोद्वहान्॥
तीर्थस्नानमनाद्यन्तं तथानादिसुरेज्यगं।
परीक्षारामयज्ञांश्च पुरश्चरणदीक्षणे॥
व्रतारम्भप्रतिष्ठे च यहारम्भप्रवेशने।
प्रतिष्ठारम्भणे देवकूपादेर्वर्ज्ज्यन्ति हि॥
द्वात्रिंशद्दिवसाश्चास्ते जीवस्य भार्गवस्य च।
द्वासप्ततिर्म्महत्यस्ते पादास्ते द्वादशक्रमात्॥
अस्तात् प्राक् परयोः पक्षं गुरोर्वार्द्धकबालते।
पक्षं दद्यो महास्ते तु भृगुर्बालो दशाहिकः॥
पादास्ते तु दशाहानि दद्योबालो दिनत्रयं"॥*॥

"मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे" ।
ददर्श प्रीतो सा स्त्रीणां समूहं रक्तवाससां ॥
चतुर्दश्यामर्चयन्तं भक्त्या देवं पृथक् पृथक्" ।
इति भविष्योत्तरीयान्मध्याह्नव्यापिनी तिथिर्ग्राह्येति वाच्यं । पूर्वाह्णो वै देवानामिति श्रुत्यादिभिः पूर्वाह्णे दैवकृत्यविधानात् । विश्वसमभिव्याहृतार्थवादेन तद्बाधायोगात् किन्तु तस्यैव गौणकालबोधकं तत् । कालमाधवीयोऽप्येवं । भविष्येऽपि पूजाविधायको मध्याह्नो नोक्तः । यथा,—
"स्नात्वा दर्भमयानन्तं वारिधान्यां निवेश्य च ।
पूजयेद्गन्धपुष्पाद्यैर्नैवेद्यैर्विविधैरपि ॥
चतुर्दश्यफलैर्मूलैर्नवजैः कुसुमैरपि ।
यवगोधूमशालीनां चूर्णेनैकतरस्य च ।
कृत्वा पूपदयं तस्मै दद्यादेकं घृताप्लुतं ।
स्वयमेकन्तु भुञ्जीत करे बद्धा सुडोरकं ॥
चतुर्दश्यग्रन्थियुक्तं कुङ्कुमेन विलेपितं ।
सुवित्तस्तं विष्णुनामप्रतिग्रन्थिसमन्वितं ।
चतुर्दशसूत्रमयं सूत्रं कार्पासमेव च" ॥ * ॥
पूजाडोरकबन्धनमन्त्रस्तु रत्नाकरे,—
"अनन्तसंसारमहासमुद्रे
मग्नान् समभ्युद्धर वासुदेव ।
अनन्तरूपिन् विनियोजयस्व
अनन्तरूपाय नमो नमस्ते" ॥
इति गन्धमुद्रा ।
"अनेन डोरकं बद्धा भोक्तव्यं सुस्थमानसैः" ।
इत्यङ्गं भविष्योत्तरीयं कालकौमुद्यां लिखितमिति ॥ * ॥ तथा,—
"पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहि मां पुण्डरीकाक्ष सर्व्वपापहरो भव ॥
अद्य मे सफलं जन्म जीवितञ्च सुजीवितं ।
यत्तवाङ्घ्रियुगाब्जाग्रे मूर्द्धा मे भ्रमरायते" ॥
इत्याभ्यां नमस्कुर्य्यात् । अनन्तकथामप्यत्र शृण्वन्ति । इति तिथ्यादितत्त्वं ॥ * ॥ * ॥ अथ प्रयोगः । आचम्य खस्तिवाच्य सङ्कल्पं कुर्य्यात्,—
"अद्य भाद्रे मासि शुक्ले पक्षे चतुर्दश्यां तिथावारभ्य अमुकगोत्रः श्रीअमुकः धनधान्यपुत्रपौत्राद्यनवच्छिन्नसन्ततिप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा चतुर्दशवर्षपर्य्यन्तं भगवदनन्तभट्टारकपूजाचतुर्दशग्रन्थियुक्तडोरकमूलबन्धनकथाश्रवणब्राह्मणसंप्रदानकातपसिततण्डुलप्रस्थहृदयघटितपूपार्द्धोपकल्पनतदर्द्धात्मकर्तृकभोजनरूपमनन्तव्रतमहं करिष्ये" इति सङ्कल्प्य सूत्रं पठेत् ॥ * ॥ ततो गृहिकया अष्टदलपद्मं निर्म्माय तन्मध्ये घटमारोप्य प्राणयामं वा चतुर्दिक्षु ध्वजां निवेश्य यथोक्तविधिना गणेशग्रहदिक्पालशिवदुर्गालक्ष्मीनारायणपूजां कृत्वा घटं ध्यायेत्,—"ॐ महेन्द्रं मत्तैरावतस्कन्धस्थं सहस्रनयनोज्ज्वलं । मणिकाञ्चनघटितनानालङ्कारभूषितं वज्रहस्तं ग्रथन्वितं देवगन्धर्व्वगणैर्वृतं मुनिगणैः स्तूयमानं" ॥ एवं ध्यात्वा महेन्द्राय नमः एवं क्रमेण संपूज्य प्रणमेत्,—
"ॐ शक्रः सुरपतिश्चैव वज्रहस्तो महाबलः ।
ऐरावतगजारूढः सहस्राक्षो नमोऽस्तु ते" ॥
ततो दक्षत्यात्रे जलं संस्थाप्य दक्षं दत्त्वा समुद्रमावाहयेत्,—
ॐ गङ्गेचेत्यादिनावाह्य समुद्रं पूजयेत् ॥ * ॥
ततो भूतशुद्ध्यादिप्राणायामान्तं कृत्वा अनन्तं ध्यायेत्,—
"ॐ दिव्यसिंहासनासीनं देवेशं गरुडध्वजं ।
शुक्लवर्णं चतुर्बाहुं नागयज्ञोपवीतिनं ॥
शङ्खचक्रगदापद्मधरं पीताम्बरं विभुं ।
श्रिया वाण्या च संश्लिष्टं किरीटादिसमुज्ज्वलं ॥
फणाशतसमायुक्तं जगन्नाथं जगद्गुरुं ।
अनन्तं चिन्तयेद्देवं नारदाद्यैरुपस्तुतं" ॥
एवं ध्यात्वा सस्थिरसि पुष्पं दत्त्वा मानसोपचारैः संपूज्य अर्घ्यं संस्थाप्य ।
आं हृदयाय नमः एवं षडङ्गानि विन्यस्य पुनर्ध्यात्वावाहयेत् ।
"ॐ आगच्छानन्त देवेश पत्नीभ्यां वाहनान्वित ।
गन्धर्व्वादिगणोपेत सान्निध्यमिह कल्पय" ॥
ततः पूजयेत् ।
पाद्यं गृहीत्वा,—
"ॐ पाद्यं गृहाण देवेश सुरासुरमनोहरं ।
तुष्टो मे भव देवेश नरसिंह नमोऽस्तु ते" ॥
अर्घ्यं गृहीत्वा,—
"अर्घ्यं गृहाण देवेश सुगन्धिकुङ्कुमान्वितं ।
दूर्व्वाक्षतसमायुक्तं नमस्ते विश्वमूर्त्तये" ॥
आचमनीयं गृहीत्वा,—
"ॐ इदमाचमनीयन्ते दिव्यतोयोद्भवं प्रभो ।
भक्त्या दत्तं मयानन्त नमस्ते पन्नगाधिप" ॥
एवं मधुपर्कं पुनराचमनीयं स्नानीयं वस्त्रयुग्मञ्च दद्यात् ॥ * ॥
गन्धः,—
"ॐ गन्धोऽयं देवदेवेश कुङ्कुमागुरुसम्भवः ।
यथाशक्त्या मया दत्तो देवेश प्रतिगृह्यतां" ॥
पुष्पं,—
"ॐ पुष्पं गृहाण भोऽनन्त सुगन्धिद्रव्यमुत्तमं ।
पद्मनाभ नमस्तेऽस्तु कुशलं कुरु सर्व्वदा" ॥
धूपः,—
"ॐ धूपोऽयं ते महाभाग दशाङ्गोऽगुग्गुलो सह ।
मया दत्तः प्रभो विष्णो गृह्यतां सुरनायक" ॥
दीपः,—
"ॐ दीपं गृहाण भोऽनन्त जाज्वल्यमानमद्भुतं ।
त्वं गृहाण सदा देव रक्ष मां घोरसागरात्" ॥
यज्ञोपवीतं,—
"ॐ ऋग्यजुःसाममन्त्रेण चिरक्तं पन्नगेनिना ।
सावित्रीग्रन्थिसंयुक्तमुपवीतं तवानघ" ॥
नैवेद्यं,—
"ॐ नानाभक्ष्यसमायुक्तं चतुर्दशफलैर्युतं ।
भक्त्या सम्पादितं देव सपूपं गृह्यतां विभो" ॥ *॥
ततो बलभद्रं संपूज्य स्तुतिं कुर्य्यात्,—
"ॐ बलभद्रं महाभागं हलिनं नागकुलायुधं ।
कादम्बरीमदोन्मत्तं नमामि बलदेवकं" ॥
ततः आवरणदेवताः पूजयेत् ।
ॐ गणेशाय नमः । एवं लोकपालेभ्यः । नवग्रहेभ्यः । अष्टवसुभ्यः । एकादशरुद्रेभ्यः । द्वादशादित्येभ्यः । अनन्तादिनागेभ्यः । मत्स्यादिदशावतारेभ्यः । मासेभ्यः । ऋतुभ्यः । वत्सरेभ्यः । धर्म्माय । अधर्म्माय । ज्ञानाय । अज्ञानाय । वैराग्याय । अवैराग्याय । ऐश्वर्य्याय । अनैश्वर्य्याय । शिवाय । दुर्गायै । पृथिव्यै । गङ्गायै । यमुनायै । महालक्ष्म्यै । सरस्वत्यै । गरुडाय । शङ्खाय । चक्राय । गदायै । पद्माय । कौस्तुभाय । सूर्य्यमण्डलाय । सोममण्डलाय । वह्निमण्डलाय । वायुमण्डलाय । सर्व्वेभ्यो देवेभ्यः । सर्व्वाभ्यो देवीभ्यः ॥ * ॥
ततः स्तुतिं पठेत्,—
"ॐ अनन्तसंसारमहासमुद्रे
मग्नं समभ्युद्धर वासुदेव ।
अनन्तरूपिन् विनियोजयस्व
अनन्तरूपाय नमो नमस्ते ॥
नमोऽस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥
हृदिस्थं सर्व्वदेवानां इन्द्रियाणां गुणातिगं ।
सर्व्वपापहरं देवं प्रणमामि जनार्द्दनं ॥
अनन्तरूपेण विभर्षि पृथ्वीं
अनन्तलक्ष्मीं विदधासि तुष्टः ।
अनन्तभोगान् प्रददासि तुष्टः
अनन्तमोक्षं पुरुषे प्रहृष्टः ॥
प्रणमामि हृषीकेशं वासुदेवं जगद्गुरुं ।
स्थितिसृष्टिविनाशानां कर्त्तारं प्रणमाम्यहं ॥
राक्षसानामरिं नौमि नौमि दैत्यविमर्द्दकं ।
जगतां हितकर्त्तारं नौमि पद्मेक्षणं सदा ॥
जन्मजन्मकृतं यच्च बाल्ययौवनवार्द्धके ।
दृष्टिमाप्नोतु तत् पुण्यं पापं हर हलायुध ॥
भक्तिहीनं क्रियाहीनं मन्त्रहीनं यदर्चितं ।
यथोद्दिष्टमिमां पूजां परिपूर्णां कुरुष्व मे ॥
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहि मां पुण्डरीकाक्ष हरे संसारसागरात्" ॥
ततो घटस्थजलेन संप्रोक्ष्य करमूले डोरकं बध्नीयात् ।
"ॐ इदं डोरमनन्ताख्यं चतुर्दशगुणात्मकं ।
सर्व्वदेवमयं विष्णो करे धारयाम्यहं" ॥
ततो भोज्यमुत्सृजेत् ॥ * ॥
ततः कथां शृणुयात् ।
यथा,—
अरण्यवासमुचितो युधिष्ठिरस्तपो वशी ।
प्राप्तस्त्रैलोक्यनाथेन कृष्णेन परमात्मना ॥
कथोपकथनं जातं तयोस्तत्र प्रियाप्रियं ।
विशेषेण च गोविन्दं पप्रच्छ च युधिष्ठिरः ॥*॥
युधिष्ठिर उवाच ।
केन व्रतेन देवेश वाञ्छितं प्राप्यते वसु ।
निष्पापाः सकला लोकाः भवन्ति जन्मजन्मनि ॥*॥
श्रीकृष्ण उवाच ।

अस्ति व्रतमनन्ताख्यं यत्कृतं सुरसद्मनि ।
इन्द्राद्यैर्लोकपालैश्च तन्मे कथयतः प्रभो ॥
शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे तथा ।
तस्यानुष्ठानमात्रेण सर्व्वपापं प्रणश्यति ॥ * ॥

युधिष्ठिर उवाच ।

कृष्ण कोऽयं त्वयाख्यातो योऽनन्त इति संज्ञितः ।
कोऽयं शेषश्च नागश्च अनन्तस्तक्षकः स्मृतः ॥
परमश्चोत्तमं वापि उताहो ब्रह्म उच्यते ।
क एषोऽनन्तसंज्ञो वै तन्मे ब्रूहि जनार्द्दन ॥ * ॥

श्रीकृष्ण उवाच ।

अनन्त इत्यहं पार्थ मम रूपं निबोध तत् ।
आदित्यगतिरूपेण यः काल उपपद्यते ॥
कलाकाष्ठामुहूर्त्तादिदिनरात्रित्यवस्थया ।
पक्षो मास ऋतुर्व्वर्षं युगकल्पव्यवस्थया ॥
सोऽहं कालोऽवतीर्णोऽस्मि भुवो भारावतारणात् ।
दानवानां विनाशाय वसुदेवतनूद्भवं ॥
अनन्तं विद्धि मां पार्थ कृष्णं विष्णुं हरिं शिवं ।
ब्रह्माणं भास्करं शेषं सर्व्वव्यापिनमीश्वरं ॥
प्रत्ययार्थं मया पार्थ विश्वरूपं निबोध तत् ।
पूर्व्वमेव महाबाहो योगिध्येयमनुत्तमं ॥ * ॥

युधिष्ठिर उवाच ।

अनन्तव्रतमाहात्म्यं विधिं विधिविदां वर ।
किं पुण्यं किं फलं तस्य अनुष्ठानञ्च तस्य किं ॥
केन वा तत्कृतं पूर्व्वं लोके केन प्रकाशितं ।
तत्सर्व्वं वक्तुमिच्छामि ब्रूहि नारायण प्रभो ॥ * ॥

श्रीकृष्ण उवाच ।

आसीत्पुरा कृतयुगे सुमन्तुर्नाम वै द्विजः ।
वशिष्ठगोत्रजो विद्वान् शीलवान् विजितेन्द्रियः ॥
पत्नी तस्याभवद्दीक्षा सती सत्यव्रते स्थिता ।
चारित्रशीलसम्पन्ना सुरूपा भृगुवंशजा ॥
तस्याः कालेन संजाता दुहिता सर्व्वलक्षणा ।
शीला नाम्ना सुशीला सा वर्द्धते पितृवेश्मनि ॥
माता तस्यास्तु कालेन ज्वरदाहप्रपीड़िता ।
समागत्य नदीतोये मृता स्वर्गपुरं ययौ ॥
कृतं सुमन्तुना तस्याः कर्म्म यत् पारलौकिकं ।
ततः सुमन्तुः संत्यज्य दुःखं शोकं क्रमात् पुनः ।
नापत्नीको गृही धर्म्मं कर्त्तुमर्हति वै क्वचित् ।
इति सञ्चिन्त्य मनसा विवाहोत्सुकमानसः ॥
देवलस्य मुनेः कन्यां कर्कशां परिणीतवान् ।
सा कर्कशातिदुःशीला सदा निष्ठुरभाषिणी ॥
कोपना प्रतिकूला च निर्लज्जा कलहप्रिया ।
अदत्ता गृहकृत्येषु दत्ता भोजनकर्म्मणि ॥
कलहेन तु सन्तुष्टा रुष्टा बन्धुजनान् प्रति ।
सा तु शीला पितुर्गेहे वर्द्धिता च दिने दिने ॥
करोति सखिभिः सार्द्धं शिशुक्रीड़ामनुत्तमां ।
गृहान्तरस्थलद्वारदेहलीतोरणादिषु ॥
चतुरङ्गकवर्णैश्च रक्तपीतसितासितैः ।
स्वस्तिकं पद्मशङ्खौ च मण्डयन्ती पुनः पुनः ॥
कुर्व्वन्ती प्रत्यहं बाला देवतातिथिपूजनं ।
गृहकृत्ये सदा दक्षा पितुरत्यन्तवल्लभा ॥
कालेन कियता विप्रस्तां दृष्ट्वा यौवनोद्गतां ।
कस्मै देया मया कन्या इति चिन्तान्वितोऽभवत् ॥

ततो देववशात्तत्र कौण्डिन्यः समुपागतः ।
मुनिश्रेष्ठो महाभागः कुलीनो धर्म्मतत्परः ॥
मनसा चिन्तयामास सुमन्तुः सुतपाः सुधीः ।
अस्मै भाग्यवशाच्छीला प्रतिपाद्या प्रयत्नतः ॥
इति ज्ञात्वा मतिं विप्रो ददौ कन्यां शुभे दिने ।
कन्यामलङ्कृतां साध्वीं शीलां चन्द्रनिभाननां ॥
गृह्योक्तवेदविधिना विवाहमकरोत्तदा ।
ततो होमादिकं कर्म्म समाप्य समये मुनिः ॥
सुमन्तुः कर्कशां प्राह जामात्रे देहि दक्षिणां ।
सफलं कुरु मे दानं प्रिये मुनिकुलोद्भवे ॥
दक्षिणारहितं कर्म्म निष्फलं जायते यतः ।
सा तु तद्वचनं श्रुत्वा कर्कशा कुपिताभवत् ॥
सुमन्तुं भर्त्सयामास कर्कशैर्व्वचनैः पतिं ।
अलङ्कारं समानीय स्वकीयस्यापि बन्धनं ॥
निक्षिप्य निभृते स्थाने कर्कशाग्यगृहं ययौ ।
सुमन्तुश्चातिदीनात्मा लज्जितश्चाभवत्तदा ॥
यत्किञ्चिदर्थयोग्यञ्च द्रव्यमानीय यौतुकं ।
जामात्रे प्रददौ विप्रः परिचार्य्य पुनः पुनः ॥
ततो विवाहं निर्व्वर्त्य कौण्डिन्योऽपि निजाश्रमं ।
गोयाने तां समारोप्य शीलामादाय वै ययौ ॥
ततः सा पथि गच्छन्ती शीला चन्द्रनिभानना ।
मध्याह्ने भोज्यवेलायां समुत्तीर्य्य सरित्तटे ॥
ददर्श शीला नारीणां समूहं व्रतचारिणां ।
पुंसां वृन्दञ्च तत्रैव रक्तपीताम्बरासनं ॥
चतुर्दश्यामर्चयन्तं भक्त्यानन्तं पृथक् पृथक् ।
दृष्ट्वा समूहं नारीणां सती पप्रच्छ सादरं ॥
विनयावनता साध्वी प्रणिपत्य सुरेश्वरं ।
किमिदं क्रियते कार्य्यं भवतीभिस्तदुच्यतां ॥ * ॥

स्त्रिय ऊचुः ।

भाद्रे मासि सिते पक्षे उत्थिते वासवध्वजे ।
आराधिते महेन्द्रे च ध्वजाकारासु यष्टिषु ॥
नत्वा सरसि यः स्नात्वा अनन्तार्च्चनमारभेत् ।
कृत्वा दर्भमयं देवं वारिवाजसमन्वितं ॥
अनन्तं देवदेवेशं चतुर्बाहुं किरीटिनं ।
अतसीपुष्पसंकाशं काञ्चनाङ्गदभूषणं ॥
शङ्खचक्रगदाशार्ङ्गं विविधायुधधारिणं ।
गृह्णेहि भगवन् कृष्ण तव यज्ञः प्रवर्त्तते ॥
वारिधान्यां तथानन्तं भगवन्तं नियोजयेत् ।
मण्डले पुष्पनैवेद्यं धूपवस्त्रानुलेपनं ॥
दत्त्वा च पूजयेद्भक्त्या अनन्तं विश्वरूपिणं ।
पिष्टकार्थं व्रीहिचूर्णं यवगोधूमयोस्तु वा ॥
एतेषां प्राप्यते यत्तु तद्ग्राह्यं प्रस्थसंज्ञितं ।
अर्द्धं विप्राय दातव्यमर्द्धमात्मनि योजयेत् ॥
पूजयित्वा तथा देवं गन्धपुष्पैर्यथाक्रमं ।
श्रुत्वा कथां ततस्तस्य कुङ्कुमाक्तं सडोरकं ॥
चतुर्दशग्रन्थियुक्तं नारी वामकरे न्यसेत् ।
पुमांस्तु दक्षिणे बाहौ तदानन्तं प्रपूजयेत् ॥
निर्व्वर्त्य पूजां देवस्य पूपं भुक्त्वा यथासुखं ।
विसृज्य दक्षिणां दत्त्वा प्रणम्य च यथासुखं ॥
शीला श्रुत्वा वचस्तासां यथा ताभिरुदाहृतं ।
व्रतं चकार सा बाहौ बद्ध्वा डोरकमुत्तमं ॥
पूपप्रस्थञ्च सा ज्ञात्वा भुक्त्वा चैव तथैव च ।

पुनर्जगाम तेनैव गोरथेन समन्विता ॥
तेनानन्तप्रसादेन गृहं गोधनसङ्कुलं ।
ददर्शमं श्रिया युक्तं धनधान्यसमन्वितं ॥
विविधातिथिसम्पूर्णं नानारत्नैर्विभूषितं ।
वराश्वमत्तमातङ्गमहिषैर्गोधनान्वितं ॥
शीला च मणिकाञ्चीभिर्मुक्ताभरणभूषिता ।
दिव्याङ्गी शीलसम्पन्ना सावित्रीप्रतिमा यथा ॥
कदाचिदुपविष्टा सा वह्निकुण्डं समागता ।
कौण्डिन्योऽपि विप्रेन्द्रोमात् दृष्ट्वा डोरमनन्तकं ।
शीलायाः करमूले च बद्धमेव प्रयत्नतः ।
पप्रच्छ क्रोधवचसा भ्रुकुटीकुटिलं मुखं ॥
किमिदं डोरकं हस्ते बद्धा भार्य्येऽच तिष्ठसि ।
प्रमेयः कस्य देवस्य दुर्ब्बुद्धे ब्रूहि सत्वरं ॥ * ॥

शीलोवाच ।

अनन्तं देवदेवस्य प्रमेयं डोरकं शुभं ।
करे बद्धं विधानेन शृणु मे वचनं प्रभो ॥
प्रसादाद् यस्य देवस्य भुङ्क्ते सुविपुलं धनं ।
न जानासि कथं नाथ तदेवं जगदीश्वरं ॥
शीलावाक्यं ततः श्रुत्वा कौण्डिन्यः कुपितोऽभवत् ।
कोऽसावनन्तसंज्ञो वै न श्रुतोऽपि वरानने ॥
इत्युक्त्वाहस्य कुपितो भुजाडोरमनन्तकं ।
क्षिप्त्वा ज्वालाकुले वह्नौ निर्भर्त्स्य बहुधा प्रियां ॥
ततः सा संभ्रमात् शीला हाहा कृत्वा प्रधाविता ।
वह्नेः सूत्रं समादाय क्षीरमध्ये ततोऽक्षिपत् ॥
ततस्तया करे वामे पुनर्बद्धं सडोरकं ।
अनन्ताक्षेपदोषेण दारिद्र्यं पतितं गृहे ॥
न कैश्चित् वर्ण्यते लोकैः सोऽपि विप्रो युधिष्ठिर ।
गात्रे मलिनता प्राप्ता चक्षुर्निद्रां तथैव च ॥
शून्यानि गृहरूपाणि दग्धानि वह्निना क्वचित् ।
निरीक्ष्य स्वपुरं विप्रश्चिन्तयामास चेतसा ॥
अथ शीला विवर्णा सा दुःखिता पतिदोषतः ।
विचचार पुरीं सर्व्वां शून्यागारसमन्वितां ॥
अथ कौण्डिन्यविप्रस्य संजाता बुद्धिरुत्तमा ।
ममापि दुष्कृतं कर्म्म कृतं वा मे विगर्हितं ॥
अनन्ताक्षेपदोषेण ममापि गतिरीदृशी ।
अनन्तं यत्र पश्यामि तत्र यास्यामि दुर्म्मतिः ॥
ततो जगाम कौण्डिन्यो वनं व्याघ्रादिसङ्कुलं ।
व्रतस्यान्वेषणं कर्त्तुं पादौ दृष्टुं तथा हरेः ॥
विह्वलः स ययौ मार्गे जनजन्तुविवर्जिते ।
तत्रापश्यच्च तं वृक्षं फलपुष्पसमन्वितं ।
वर्ल्लितं पक्षिसङ्घातैः कीटैश्चैव विशेषतः ।
तमपृच्छत् त्वयानन्तः क्वचिद्दृष्टो महाद्रुम ॥
स चोवाच महावृक्षो नानन्तं वेद्मि भो द्विज ।
ततो गच्छन् ददर्शाग्रे हृदमध्ये सवत्सिकां ॥
हृदमध्ये प्रधावन्तो न खादति न जिघ्रति ।
हे महाधेनुके ब्रूहि किमनन्तस्त्वयेक्षितः ॥
सवत्सा तमुवाचाथ नानन्तं वेद्मि हे द्विज ।
ततो गच्छन् ददर्शाग्रे वृषश्रेष्ठं वने स्थितं ॥
तमपृच्छदयं विप्रः अनन्तो वीक्षितस्त्वया ।
वृषभस्तमुवाचेदं विषण्णं ब्राह्मणं प्रति ॥
यद्यनन्तमहं जाने तदा मे गतिरीदृशी ।
ततो व्रजन् ददर्शाग्रे गर्द्दभं कुञ्जरं तथा ॥

नानामायाप्रचरन्तं मदगर्ब्बमदर्पितं ।
स तं दृष्ट्वा द्विजोऽपृच्छदनन्तं दृष्टवान् किमु ॥
प्रत्युत्तरमुवाचेदं नानन्तं वेद्मि हे द्विज ।
ततो व्रजन् ददर्शाग्रे रम्यं पुष्करिणीहयं ।
अन्योन्यजलसंघातैर्व्वीचिभिरुपशोभितं ।
शुभैः कुमुदकह्लारैः कमलोत्पलशोभितं ॥
भ्रमरैश्चक्रवाकैश्च हंसकारण्डवैर्युतं ।
तमपृच्छत् द्विजोऽनन्तो भवतीभ्याञ्च लक्षितः ॥
पुष्करिण्यावृतुत्वं न जानीवो हरिं क्वचित् ।
निपपात ततो विप्रो हाहा कृत्वा रुदन् भुवि ॥
किं करोमि क्व गच्छामि कथं पश्यामि तं विभुं॥*॥
ततः कृपालुहृदयो देवेशो देवपूजितः ॥
तत्क्षणाद्भगवान् विष्णुर्द्विजप्रत्यक्षमागतः ।
वृद्धब्राह्मणरूपेण प्रोवाच वचनं द्विजं ॥
उत्तिष्ठोत्तिष्ठ विप्रेन्द्र त्यज दुःखं सुखी भव ।
अनन्तं दर्शयिष्यामि तस्यां विष्णुं हरिं शिवं ॥
ब्राह्मणं तं समादाय पातालवर्त्मना पुरीं ।
तां पुरीं दर्शयामास ततस्तान्तर्दधे द्विजः ॥
स तां ददर्श कौण्डिन्यः पुरीं त्रैलोक्यदुर्ल्लभां ॥
दिव्यनारीनरैर्युक्तां मणिरत्नविभूषितां ॥
सुवर्णरचितां सर्व्वां वेष्टितां तत्तटादिभिः ।
तत्राप्यपश्यत् स कौण्डिन्यो देवदेवमनन्तकं ॥
विश्वरूपं जगन्नाथं चतुर्ब्बाहुं किरीटिनं ।
शङ्खचक्रगदापद्मधारिणं गरुडध्वजं ॥
दक्षिणे विलसल्लक्ष्मीं वामे क्रीड़त्सरस्वतीं ।
सप्तफणासमायुक्तं दिव्यसिंहासनेस्थितं ॥
एवं रूपं जगन्नाथं दृष्ट्वा भक्त्या स्तुतिः कृता ।
जगाम भूमौ शिरसा अनन्तस्य समीपतः ॥

नमोऽस्त्वनन्ताय सहस्रमूर्त्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

अज्ञानेन मया देव यत् कृतं पापकर्म्मणा ।
तत्सर्व्वं क्षपया शंस त्वमस्य मधुसूदन ॥ *॥
अथ कौण्डिन्यविप्रस्य स्तुतिं श्रुत्वा जनार्द्दनः ।
प्रसन्नो भगवान्देवस्तमनन्तोऽनन्तरूपधृक् ॥
कथं मे प्रियमाख्यातमिहागच्छेति भूसुर ॥*॥

अनन्त उवाच ।

तुष्टोऽहं ब्राह्मणश्रेष्ठ भक्त्या तव विशेषतः ।
वरं गृहाण विप्रेन्द्र तुष्टोऽस्मि त्वत्र विस्मयं ॥ * ॥

कौण्डिन्य उवाच ।

स्वकर्म्मफलभोगेन यां यां योनिं व्रजाम्यहं ।
तस्यां तस्यां हृषीकेश हरिभक्तिर्दृढास्तु मे ॥
अतिप्रमादान्मोहाद्वा यन्मया दुष्कृतं कृतं ।
तदागः क्षम्यतां नाथ प्रणामामि पुनः पुनः ॥
श्रुत्वानन्तस्तु तद्वाक्यं ददौ तस्मै वरत्रयं ।
दारिद्र्यनाशनं धर्म्मं विष्णुलोकं तथाक्षयं ॥०॥

कौण्डिन्य उवाच ।

पूर्णो मनोरथो देव मम चाद्य विशेषतः ।
किञ्चित् पृच्छामि देवेश तन्मे ब्रूहि जगत्पते ॥
कश्छत्रः को रथः का गौः किन्तत् पुष्करिणीहयं ।
कः खरः कुञ्जरः को वा को वा वृद्धद्विजोत्तमः ॥
कृपया कथयस्वाद्य यदि दृष्टो मया विभो ।

श्रीअनन्त उवाच ।

यस्मान्नवृत्तो दृष्टो हि विप्रो विद्यासु गर्व्वितः ।
उपस्थिताय शिष्याय विद्यां यस्मान्न दत्तवान् ॥
तेन कर्म्मविपाकेन वृक्षत्वं प्राप्य तिष्ठति ।
वृषभो यस्त्वया दृष्टो लोभकर्म्मकृतः पुरा ॥
दत्तं पर्य्युषितं द्रव्यं स्वादु भुक्तं स्वयं यतः ।
वृषभत्वं समासाद्य ततस्तिष्ठति निर्ज्जने ॥
विप्राय वसुधां दत्त्वा निष्फलां शून्यवर्ज्जितां ।
तेनासौ गोत्वमासाद्य क्षणमध्ये प्रधावति ॥
धर्म्माधर्म्मौ विजानीयादयत्तत् पुष्करिणीहयं ।
गर्हभोऽज्ञानसम्पन्नः कुञ्जरो मदगर्व्वितः ॥
ब्राह्मणोऽसावनन्तोऽहं यस्त्वया दर्शितो मुने ।
एतत्ते कथितं सर्व्वं गच्छ विप्र निजाश्रमं ॥
पुनः सम्वृद्धिस्ते विप्र भविष्यति न संशयः ।
भुक्त्वा भोगांश्च विपुलान् संप्राप्स्यसि महत् पदं ॥
इति दत्त्वा वरं तस्मै तत्रैवान्तरधीयत ।
कौण्डिन्योऽपि गृहं गत्वा करोति व्रतमुत्तमं ॥
अनन्ताख्यं महापुण्यं वर्षाणाञ्च चतुर्दशं ।
श्रीलया सह धर्म्मात्मा सुखं भुक्त्वा मनोरथान् ॥
विष्णुलोकं समासाद्य रराज श्रीलया सह ।
अनन्ताख्यव्रतेनेह समाप्तेनैव पार्थिव ॥
सर्व्वपापविनिर्म्मुक्ता यास्यन्ति परमां गतिं ।
एवमेवं हि नियमात् स्त्रियोऽनन्तव्रतान्नृप ॥
पुत्रपौत्रधनैर्युक्ता भुक्त्वा भोगान् मनोरथान् ।
विष्णुलोकमाप्नुवन्ति यावच्चन्द्रदिवाकरौ" ॥
इति भविष्यपुराणे अनन्तव्रतं समाप्तं ॥

अनन्तशीर्षा, स्त्री, (अनन्तानि बहूनि शीर्षाणि शिरांसि यस्याः सा ।) वासुकिपत्नी । इति शब्दमाला ॥

अनन्ता, स्त्री, (नास्ति अन्तो यस्याः सा ।) पार्व्वती । पृथिवी । अग्निशिखावृक्षः । श्यामालता । दूर्व्वा । पिप्पली । दुरालभा । हरीतकी । आमलकी । गुडूची । इति मेदिनी ॥ यवासः । श्वेतदूर्व्वा । नीलदूर्व्वा । अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥ अनन्तमूलं । तत्पर्य्यायः । गोपवल्ली २ कारावला ३ सुगन्धा ४ भद्रवल्लिका ५ भद्रा ६ नागजिह्वा ७ । इति रत्नमाला ॥ गोपी ८ श्यामा ९ शारिवा १० उत्पलशारिवा ११ । इत्यमरः ॥ गोप्यादिपद्मश्यामलतायां नागजिह्वायां इति केचित् । गोप्यादिद्वयं श्यामलतायां अनन्तोत्पलशारिवेति द्वयं अनन्तमूले इति केचित् । इति तट्टीकायां भरतः ॥ तस्या गुणाः । मलबन्धकारित्वं । रक्तपित्तनाशित्वं । शीतलत्वञ्च । इति राजवल्लभः ॥

अनन्यगतिकः, त्रि, (नास्ति अन्या गतिः यस्य। समासान्तः कः ।) गत्यन्तररहितः । एकाश्रयः । "अनन्यगतिके जने विगतपातके घातके यथारुचि तथा कुरु प्रिय तथापि मान्यं भजे" । इत्युद्भटः ॥

अनन्यजः, पुं, (नास्ति अन्यत् यस्मात् सः अनन्यो विष्णुः, तस्मात् जात इति, अनन्य + जन् + ड ।) कामदेवः । इत्यमरः ॥

अनन्यवृत्तिः, त्रि, (न अन्या वृत्तिरस्य इति ।) एकमात्रवृत्तिः । तत्पर्य्यायः । एकतानः २ एकाग्रः ३ एकायनः ४ एकसर्गः ५ एकाग्रः ६ एकायनगतः ७ । इत्यमरः ॥

अनपायी, [न्] त्रि, (नास्ति अपायः विनाशोऽस्य इति, न + अपाय + इनि ।) निश्चलः । अपायशून्यः । अनश्वरः । यथा,—
"अनपायिभिरस्माभिर्गुमायाश्च ग्रहे प्रभो" ।
इति श्रीभागवतं ॥
("अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी" ।
इति कुमारे ॥)

अनभिज्ञः, त्रि, (अभि जानाति इति अभिज्ञः, अभि + ज्ञा + कः, न अभिज्ञ इति नञ्समासः ।) मूर्खः । प्रज्ञारहितः । बुद्धिहीनः । यथा,—
"धिक् त्वां चूततरो परापरपरिज्ञानानभिज्ञो भवान्" ।
इति भमरशतकं ॥

अनभिलाषः, पुं, (न अभिलाष इति नञ्समासः ।) अरुचिः । इति राजनिर्घण्टः ॥ अनिच्छा ॥ (त्रि, नास्ति अभिलाषो यस्य इति समासे अभिलाषशून्यः ।)

अनमः, पुं, (नमति प्रणमति इति नमः, नम् + पचाद्यच्, न नमः अनम इति नञ्समासः ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥

अनमितम्पचः, त्रि, (मितं परिमितं पचति इति, मित + पच् + खच्, न मितम्पच इति अमितम्पचः, न अमितम्पच इति अनमितम्पचः, नञ्समासः ।) मितम्पचः । कृपणः । इत्यमरटीकायां रमानाथः ॥

अनम्बरः, पुं, (नास्ति अम्बरं परिधेयं यस्य सः ।) बौद्धविशेषः । इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

अनयः, पुं, (अयः शुभावहो विधिस्तद्विन्नः नञ्समासः ।) दैवं । अशुभं । व्यसनं । विपद् । इति मेदिनी ॥
("अनयो नयसम्पन्ने यत्र ते विहता मतिः" ।
इति रामायणे ।)

अनर्गलं, त्रि, (नास्ति अर्गलं प्रतिबन्धो यस्य तत् ।) निरर्गलं । प्रतिबन्धकरहितं । तत्पर्य्यायः । अवार्धः २ उच्छृङ्खलं ३ उद्दाम ४ नियन्त्रितं ५ निरङ्कुशं ६ । इति हेमचन्द्रः ॥
("ततः परं तेन मखाय यज्वना
तुरङ्गमुत्सृष्टमनर्गलं पुनः ।
इति रघुवंशे ।)

अनर्थकं, क्ली, (नास्ति अर्थः यस्य तत्, समासान्तः कः ।) निरर्थकं । अर्थशून्यवाक्यं । तत्पर्य्यायः । अवद्यं २ । इत्यमरः ॥ अवद्यं ३ । इति तट्टीका ॥

अनलः, पुं, (नास्ति अलः बडबाह्यवस्तुदहनेऽपि क्षतिर्यस्य सः, क्षत्तिकानक्षत्रे, वत्सरे भगवति वासुदेवे ।) अग्निः । वसुभेदः । इति मेदिनी ॥ चित्रकः । रक्तचित्रकः । भल्लातकः । पित्तं । इति राजनिर्घण्टः ॥

अनलप्रभा, स्त्री, (अनलस्य वह्नेः प्रभेव प्रभा यस्याः,

सा ।) ज्योतिष्मतीलता । इति राजनिर्घण्टः ॥
अनलप्रिया, स्त्री, (अनलस्य अग्नेः प्रिया षष्ठीतत् ।) अग्निभार्य्या । आग्नेयी । इति जटाधरः ॥
अनलिः, पुं, (अनिति अन् + पचाद्यच् अनः तन्मधुपानेन जीवनधारयिता अलिः भ्रमरो यत्र सः ।) वकवृक्षः । इति त्रिकाण्डशेषः ॥
अनवधानं, क्ली, (न अवधानं मनोयोगः नञ्समासः ।) चित्तस्याविक्षेपः । अमनोयोगः । अप्रणिधानं । इति हलायुधः ॥ तद्विशिष्टे त्रि ॥
अनवधानता, स्त्री, (नास्ति अवधानं मनोयोगो यस्य सः, तस्य भावः ततस्तल् स्त्रियां टाप् ।) मनोयोगशून्यता । चित्तस्यानन्यविषयाभावत्वं । कार्य्ये अनवहितत्वं । तत्पर्य्यायः । प्रमादः २ । इत्यमरः ॥
"कर्त्तव्याकरणं यच्च समर्थस्य क्वचिद्भवेत् ।
उच्यते द्वितयं तच्च प्रमादोऽनवधानता" ॥
इति शब्दरत्नावली ॥
अनवरः, त्रि, (न अवरः, नञ्समासः ।) अकनिष्ठः । अन्यूनः । श्रेष्ठः । प्रधानः । यथा,—
"सोऽयमिन्द्रादनवरो वासुदेवाच्च भारत" ।
इति विराटपर्व्व ॥
अनवरतं, क्ली, (अव + रम् + भावे क्तः, नास्ति अवरतं विरतिर्यत्र तत् ।) निरन्तरं । तत्पर्य्यायः । सततं २ अनारतं ३ अश्रान्तं ४ सन्ततं ५ अविरतं ६ अनिशं ७ नित्यं ८ अजस्रं ९ प्रसक्तं १० आसक्तं ११ अनद्धं १२ । इति जटाधरः ॥
तद्विशिष्टे वाच्यलिङ्गः । इत्यमरः ॥
("अनवरतधनुर्ज्यास्फालनक्रूरकर्म्मा" ।
इति शाकुन्तले ।)
अनवरार्द्धः, त्रि, (अवरमद्ध, कर्म्मधारयः, तत्र भवः, अवरार्द्ध + यत्, ततो नञ्समासः ।) उत्तमः । प्रधानः । इत्यमरः ॥
अनवलम्बः, त्रि, (नास्ति अवलंबः आश्रयो यस्य सः ।) अवलम्बनशून्यः । निराश्रयः । यथा,—
"न परं पथि पक्षपातिता-
नवलम्बे किमु मादृशेऽपि सा" ।
इति नैषधं ॥
अनवसरः, त्रि, (नास्ति अवसरः अवकाशो यस्य सः ।) निरवकाशः । अवसराभावे पुं । यथा,—
"अतर्क्यैश्वर्य्ये त्वय्यनवसरदुःस्था हतधियः" ।
इति महिम्नः स्तोत्रं ॥
अनवस्करं, त्रि, (अव अधोवर्त्मना कीर्य्यते क्षिप्यते अव + कृ + अप्, "वर्च्चस्कोऽवस्कर इति सुड़ागमः" नास्ति अवस्करो मलं यस्य तत् ।) निर्म्मलं । शोधितं । इत्यमरः ॥
अनवस्था, स्त्री, (अव + स्था भावे अङ्, न अवस्था अवस्थानं नञ्समासः ।) तर्कविशेषः । तस्य लक्षणं । अप्रामाणिकानन्तप्रवाहमूलकप्रसङ्गत्वं । यथा,—
"घटत्वं यदि यावद्घटहेतुवृत्ति स्यात् घटान्यवृत्ति स्यात्" । इति तार्किकाः ॥ उपपाद्योपपादकयोरविश्रान्तिः । इति मीमांसकाः । दशाभावः । स्थित्यभावः ॥
("एवमप्यनवस्था स्याद् या मूलक्षतिकारिणी" ।
इति काव्यप्रकाशे ।)
अनवस्थानः, पुं, (न अवस्थानमवस्थितिर्यस्य सः ।) वायुः । इति राजनिर्घण्टः ॥ अवस्थितिशून्ये त्रि ॥ (चञ्चलः । अव्यवस्थितः ।)
अनवस्थितिः, स्त्री, (न अवस्थितिः अवस्थानं नञ्समासः ।) चापल्यं । चाञ्चल्यं । अस्थिरता । अधैर्य्यं । इति हेमचन्द्रः ॥
अनशनं, क्ली, (अश् भावे ल्युट्, न अशनं भोजनं, नञ्समासः ।) भोजनाभावः । उपवासः । इति हलायुधः ॥ वदति त्रि ॥ (प्रायोपवेशनं । "तदहमनशनं कृत्वा प्रातः प्राणानुत्सृजामि" । इति पञ्चतन्त्रे ।)
अनश्वरं, त्रि, (नश् + कर्त्तरि वरच् न नश्वरं, नञ्समासः ।) सनातनं । नित्यं । ध्रुवं । शाश्वतं । इति हेमचन्द्रः ॥
("मत्वा विश्वमनश्वरं निविशते संसारकाराग्रहे" ।
इति वैराग्यशतके ।)
अनसूया, स्त्री, (असु क्षेपणादित्वात् यक् + भावे अ, स्त्रियां टाप्, न असूया नञ्समासः ।) असूयाभावः । तस्या लक्षणं यथा बृहस्पतिः ।
"न गुणान् गुणिनो हन्ति स्तौति मन्दगुणानपि ।
नान्यदोषेषु रमते सानसूया प्रकीर्त्तिता" ॥
इत्येकादशीतत्त्वं ॥ अत्रिमुनिपत्नी । इति गारुड़े २९ अध्यायः ॥ कर्द्दममुनिकन्या । इति श्रीभागवतं ॥ असूयाशून्ये त्रि ॥
अनहंवादी, [न्] त्रि, (अहमिति गर्व्वं वदति यः, अहं + वद् + णिनि, उपपदसमासः, ततो नञ्समासः । अहमित्यव्ययं ।) गर्व्वरहितः ।
"मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्व्विकारः कर्त्ता सात्विक उच्यते" ।
इति श्रीभगवद्गीता । अनहंवादी गर्व्वरहितः । इत्याह्निकतत्त्वं ॥
अनहङ्कृतिः, स्त्री, (न अहङ्कृतिः अहङ्कारः नञ्समासः ।) अहङ्काराभावः । तत्पर्य्यायः । अशोचः २ । इति त्रिकाण्डशेषः ॥ (त्रि नास्ति अहङ्कृतिः यस्य इति समासे अहङ्कारशून्यः ।)
अनक्षः, त्रि, अक्षिहीनः । अन्धः । न विद्यते अक्षिणी यस्य इत्यर्थे ष प्रत्ययः । अक्षभिन्नः ॥
अनक्षरं, क्ली, (न सन्ति प्रशस्तानि अक्षराणि यत्र तत् ।) दुर्व्वचनं । इति भरतः ॥ अवचनार्हे । इति मधुः ॥ गालिप्रभृति । गुणालेपकदोषाविष्कारित्वाद्यं । इति केचित् ॥ तत्पर्य्यायः । अवाच्यं २ । इत्यमरः ॥
अनक्षि, क्ली, (अप्रशस्तमक्षि नेत्रं, नञ्समासः ।) कुत्सितचक्षुः । तत्पर्य्यायः । असौम्याक्षि २ । इति हेमचन्द्रः ॥
अनाकुलः, त्रि, (न आकुलः नञ्समासः ।) स्थिरः । एकाग्रः । अव्याकुलः । अव्ययः । इति जटाधरः ।
("अनाकुलाऽविक्लवा च सुसम्भ्रान्ता च मे मतिः" ।
इति रामायणे ।)
अनाक्रान्ता, स्त्री, (कैरपि न आक्रान्ता आक्रमितुमयोग्या कण्टकव्याप्तत्वात्, नञ्समासः ।) कण्टकारीवृक्षः । इति रत्नमाला ॥ अनाक्रमणविशिष्टे त्रि ॥
अनागतं, त्रि, (आङ् + गम् + कर्त्तरि क्तः, न आगतं नञ्समासः ।) भविष्यत् । इति राजनिर्घण्टः ॥ अनायातं । अनुपस्थितं । अज्ञातं । यथा—
("तावद्भयस्य भेतव्यं यावद्भयमनागतं" ।
इति पञ्चतन्त्रे ।)
"अनागतादिलिङ्गेन न स्यादनुमितिस्त्रिदा" ।
इति भाषापरिच्छेदः ॥
अनागतार्त्तवा, स्त्री, (न आगतमप्राप्तमार्त्तवं स्त्रीपुष्पविकाशनं यस्याः सा, स्त्रियां टाप् । ऋतु + अण् ।) अप्राप्तऋतुका । अरजस्का । तत्पर्य्यायः । गौरी २ नग्निका ३ । इत्यमरः ॥
अनाचारः, पुं, (न कुत्सित आचारः नञ्समासः । नञ्च अप्राशस्त्ये अभावार्थे तु आचाराभावः ।) कदाचारः । अशुद्धाचारः । श्रुतिस्मृतिविरुद्धकर्म्मकरणं । यथा,—
"सर्व्वदेशेष्वनाचारः पथि ताम्बूलचर्व्वणं" ॥
इति स्मृतिः ॥ तद्विशिष्टे त्रि ॥
अनातपः, पुं, (आङ् + तप् + अच्, आतपस्य रौद्रस्याभावः नञ्समासः ।) रौद्राभावः । छाया । इति राजनिर्घण्टः ॥ (त्रि छायाविशिष्टे ।
"खल्वाटोदिवसेश्वरस्य किरणैः सन्तापिते मस्तके ।
वाञ्छन् देशमनातपं विधिवशात् बिल्वस्य मूलं गतः" ॥ इति नीतिशतके ।)
अनातुरः, त्रि, (न आतुरः रोगी नञ्समासः ।) अरोगी । यथा,—
"तेषामनातुराः पूर्व्वे वातलाद्याः सदातुराः" ।
इति चरकः । ("भेजे धर्म्ममनातुरः" । इति रघुवंशे ।)
अनाथः, त्रि, (नास्ति नाथः आश्रयो यस्य सः ।) प्रभुहीनः । नाथशून्यः । यथा,—
"वना वना वनाश्चत्वत् स्वजीवना वनामवत्" ।
इति नलोदयः ।
("नाथवन्तस्त्वया लोकास्त्वमनाथा विपद्यसे" ।
इति उत्तरचरिते ।)
अनादरः, पुं, (आ + दृ + भावे अप्, न आदरः नञ्समासः ।) निरादरः । तत्पर्य्यायः । परिभवः २ परिभावः ३ तिरस्क्रिया ४ रीढ़ा ५ अवमानना ६ अवज्ञा ७ अवहेलं ८ असूत्तणं ९ । इत्यमरः ॥ असुत्तणं १० असूर्त्तणं ११ असूर्त्तणं १२ । इति भरतः ॥ ("गुणेषु रागो व्यसनेष्वनादरः" । इति पञ्चतन्त्रे ।)
अनादिः, त्रि, (नास्ति आदिः कारणं यस्य सः ।) आदिरहितः । उत्पत्तिशून्यः । स्वयम्भूः । यथा,—
"अनादिरादिर्गोविन्दः सर्व्वकारणकारणं" ।
इति ब्रह्मसंहिता ॥
अनादृतः, त्रि, (आ + दृ + कर्म्मणि क्तः, न आदृतः नञ्समासः ।) निरादरः । अवज्ञातः । अवमानितः । इति हेमचन्द्रः ॥

"सर्व तस्यादृता धर्म्मा यस्यैते त्रय आदृताः।
अनादृतास्तु यस्यैते सर्व्वास्तस्याफलाः क्रियाः" ॥
इति मनुः।)

अनामकं, क्ली, (अनम् अन्+घञर्थे कः, अनं जीवनं आमयति, रोगग्रस्तं करोति, अम्+णिच्+ण्वुल् अनस्य आमकं षष्ठीतत्पुरुषः।) अर्शोरोगः। इति शब्दरत्नावली॥ मलमासे पुं। इति मलमासतत्त्वं॥ दुर्नामके निर्नामके च त्रि।

अनामयं, क्ली, (आ+अम्+भावे घञ्, आमं रुमावस्थां याति प्राप्नोत्यनेन, आम+या क, आमस्य अभावः अव्ययीभावः।) रोगाभावः आरोग्यं। इत्यमरः॥
("ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयं"।
इति मनुः।) तद्विशिष्ट त्रि॥

अनामा, [न्] पुं, (नास्ति ब्रह्मशिरश्छेदनसाधनतया अप्रशस्तं नाम यस्य सः। अनया अङ्गुल्या शिवेन ब्रह्मशिरश्छिन्नं। इति पुराणे।) अनामिकाङ्गुली। इति शब्दरत्नावली॥

अनामिका, स्त्री, (नास्ति ब्रह्मशिरश्छेदनसाधनतया प्रशस्तं नाम यस्याः सा। स्त्रियां डाप् ततः स्वार्थे कन् टाप् च।) कनिष्ठामध्यमयोर्मध्यवर्त्यङ्गुली। इत्यमरः॥ ("वस्त्रान्तानामिकाकेशनखरोमदशास्पृशः"। इति सुश्रुते॥)

अनायत्तः, त्रि, (आ+यत्+क्तः, न आयत्तः नञ्समासः।) अवशीभूतः। अनधीनः। यथा,—
"एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता।"
इति हितोपदेशः॥

अनायासः, पुं, (आ+यस्+घञ् ततो नञ्समासः।) अक्लेशः। तस्य लक्षणं यथा। बृहस्पतिः॥
"शरीरं पीड्यते येन सुखेनापि कर्म्मणा।
अत्यन्तं तन्न कुर्व्वीत अनायासः स उच्यते" ॥
इत्येकादशीतत्त्वं॥ श्रमश्चतिरेकः। यत्नाभावः। यथा,—
"अनायासेन मरणं विना दैन्येन जीवनं।
अनाराधितगोविन्दचरणस्य कथं भवेत्" ॥
इति प्रामाणिकाः॥

अनायासकृतं, त्रि, (अनायासेन अक्लेशेन कृतं तृतीयातत्पुरुषः।) अनायासेन यत् क्रियते स्म तत्। विना यत्नेन कृतं। तत्पर्य्यायः। फाण्टं २। इत्यमरः॥

अनारतं, क्ली, (आ+रम्+क्तः, ततो नञ्समासः।) अनवरतं। सततं। नित्यं। इत्यमरः॥
("अनारतं तेन पदेषु लम्भिताः।
विभज्य सम्यग्विनियोगसत्क्रिया" ॥
इति किरातार्জ্জुनीये।)

अनारम्भः, पुं, (आ+रभ्+भावे घञ्, ततो नञ्समासः।) आरम्भाभावः। यथा,—
"न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते"।
इति भगवद्गीता॥

अनार्জ্জवं, क्ली, (ऋजोर्भावः ऋजु+भावे अण्, ततो नञ्समासः।) रोगः। इति राजनिर्घण्टः॥ ऋजुत्वाभावः॥

अनार्य्यः, त्रि, (ऋ+ण्यत्, न आर्य्यः श्रेष्ठः, नञ्समासः।) अश्रेष्ठः। यथा,—
"अनार्य्यजुष्टमस्वर्य्यमकीर्त्तिकरमर्জ্জुन"।
इति श्रीभगवद्गीता॥

अनार्य्यकं, क्ली, (नास्ति आर्य्यो यत्र देशे तादृशार्य्यावर्त्तभिन्नदेशे भवं अनार्य्य+कन्।) अगुरुकाष्ठं।
इति राजनिर्घण्टः॥

अनार्य्यजं, क्ली, (नास्ति आर्य्यो यत्र देशे तादृशार्य्यावर्त्तभिन्नदेशे जायते यत्, अनार्य्य+जन्+ड, उपपदसमासः।) अगुरु। इति हेमचन्द्रः॥

अनार्य्यतिक्तः, पुं, (अनार्य्यप्रियत्वासौ तिक्तश्चेति शाकपार्थिवादिः।) भूनिम्बः। इत्यमरः॥ चिरात इति भाषा।

अनालोचितः, त्रि, (न आलोचितः कर्त्तव्यतया अवधारितः।) अकृतालोचनः। इतिकर्त्तव्यतयानवधारितः। अविवेचितः। यथा,—
"किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा"।
इति देवीमाहात्म्यं॥

अनाविलः, त्रि, (न आविलः, नञ्समासः।) आविलशून्यः। निर्म्मलः। इति हलायुधः॥ (स्वच्छः, स्वास्थ्यकरः।)
("पद्मगन्धि शिवं वारि सुखं शीतमनाविलं"।
इति रामायणे।
"आङ्गल्यं शस्यसम्पन्नमार्य्यप्रायमनाविलम्"।
इति मनुः।)

अनाहृतः, त्रि, (आ+हृ+कर्म्मणि क्तः न आहृतः, नञ्समासः।) आवरणशून्यः। अनाच्छादितः। यथा। "अनाहृतत्वादहिरन्तरं न ते"। इति श्रीभागवतं॥

अनाहृष्टिः, स्त्री, (न आहृष्टिर्वर्षणं, नञ्समासः।) ईतिविशेषः। वर्षणाभावः। इति स्मृतिः॥ शुका इति भाषा।
("अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः।
प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः" ॥
इति प्रसिद्धम्।)

अनाद्यः, त्रि, (याचिनिमित्ते तु नञ्+णिच् कर्म्मणि यत् ततो नञ्समासः।) नाद्यायोग्यः। नञ्धातोर्घञि नञ्समासः॥

अनासिकः, त्रि, (नास्ति नासिका यस्य सः।) नासिकारहितः। तत्पर्य्यायः। विखः २ विखुः ३ विग्रः ४। इति हेमचन्द्रः॥

अनाहतं, क्ली, (आ+हन्+क्तः नास्ति आहतं छेदो यस्य तत्।) तन्त्रोक्तषट्चक्रान्तर्गतचतुर्थचक्रं। तत्तु हृदयस्थकादिठान्तवर्णयुक्तोद्यदादित्यसन्निभदादशदलपद्माकारं। तन्मध्ये अयुतसूर्य्यसमप्रभशब्दब्रह्ममयबाणलिङ्गमस्ति। इति तन्त्रसारः॥

अनाहतं, त्रि, (आ+हन्+भावे क्तः, न सन्ति आहतानि छेदच्छालनभोगा यस्य तत्।) नूतनवस्त्रं। छेदच्छालनभोगरहितवस्त्रं। इत्यमरः॥ अगुणितं। इत्यजटाधरः॥ अक्षतधातं॥ (अक्षतः। आघातरहितः। अक्षतश्च। तन्त्रोक्तषट्चक्रान्तर्गतचतुर्थचक्रं, तत् तु हृदयस्थकादिठान्तवर्णयुक्तोद्यदादित्यसन्निभदादशदलपद्माकारं, तन्मध्ये अयुतसूर्य्यसमप्रभशब्दब्रह्ममयबाणलिङ्गमस्ति।
"शब्दोब्रह्ममयः शब्दोऽनाहतो यत्र दृश्यते।
अनाहताख्यं तत्पद्मं मुनिभिः परिकीर्त्तितं" ॥

अनाहारः, पुं, (आ+हृ+भावे घञ् ततो नञ्समासः।) भोजनाभावः। यथा,—
"ऋतावनाहारतया भयेनेति" चरकः॥

अनाहूतः, त्रि, (आ+हे+कर्म्मणि क्तः ततो नञ्समासः।) अकृताह्वानः। अनिमन्त्रितः। यथा,—
"अनाहूतैरेत्य प्रचुरगुणलोभेन भवतः"।
इत्युद्भटः॥ क्षुद्रमध्योऽपि यथा—
"अनाऽऽता अप्यभियान्ति सौहृदं"।
इति श्रीभागवतं॥

अनिगीर्णः, त्रि, (नि+गॄ+क्तः ततो नञ्समासः।) अनुक्तः। यथा,—
"विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्"।
इति साहित्यदर्पणं॥

अनिच्छुः, त्रि, (इष्+कर्त्तरि उ विन्दुरिच्छुरिति सूत्रेण निपातनात् साधुः।) अनिच्छाविशिष्टः। अनाकाङ्क्षी। अस्पृहः। इच्छतीति इच्छुः ततो नञ्समासः॥

अनित्यः, त्रि, (नि+त्यप् ततो नञ्समासः।) नश्वरः। अस्थायी। जन्यवस्तु। यथा,—
"धर्म्मो नित्यः सुखदुःखेऽप्यनित्ये।
जीवो नित्यो हेतुरस्याप्यनित्यः"।
इति महाभारते भारतसावित्री॥

अनिन्दितः, त्रि, (निदि+कर्म्मणि क्तः ततो नञ्समासः।) निन्दारहितः। अगर्हितः। तत्पर्य्यायः। प्रशस्यः २ साधुः ३। इति त्रिकाण्डशेषः॥
("अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्জयेत्"॥
इति मनुः॥)

अनिपुणः, त्रि, (न निपुणः पटुः नञ्समासः।) अप्रवीणः। अविज्ञः। अपटुः। यथा,—
"यः शास्त्रादिष्वनिपुणः श्रद्धावान् स तु मध्यमः"।
इति भक्तिरसामृतसिन्धुः॥

अनिमिषः, पुं, स्त्री, (नास्ति निमिषः निमेषः चक्षुःस्पन्दनं यस्य सः।) देवता। मत्स्यः। इत्यमरः॥ (निमेषरहितः। स्थिरदृष्टिः। सावधानः। अप्रमत्तः।
"सुरेषु नाप्यश्नदवैक्षताक्षणो-
र्नृपे निमेषं निजसम्मुखे सति"।
इति नैषधे।)

अनिमिषाचार्य्यः, पुं, (अनिमिषाणां देवानां आचार्य्यः गुरुः षष्ठीतत्।) बृहस्पतिः। देवगुरुः। इति शब्दरत्नावली॥

अनिमेषः, पुं, (नास्ति निमेषः चक्षुःस्पन्दनं यस्य सः।) देवता। मत्स्यः। इति हेमचन्द्रः॥

अनियतं, त्रि, (नि+यम्+क्तः, न नियतं नञ्समासः।) अनित्यं। अस्थायि। यथा,—
"रत्नादयोऽप्यनियते रसे स्युर्व्यभिचारिणः"।

इति साहित्यदर्पणः ॥ "रिक्तं त्रिविधं मुनयो नियतमनियतं योगजञ्च"। इति ज्योतिषं ॥

अनियमः, पुं, (न नियमः, नञ्समासः।) नियमाभावः। अनिश्चयः। अनिर्द्धारः। यथा,—
"गुरुषष्ठञ्च पादानां शेषेष्वनियमो मतः"।
इति छन्दोमञ्जरी ॥ तद्विशिष्टे त्रि ॥

अनिराकृतः, त्रि, (निर्+आ+कृ कर्म्मणि क्तः, ततो नञ्समासः।) अनिवारितः। यथा,—
"अनिराकृततापसम्पदं
फलहीनां सुमनोभिरुज्झितां"।
इति माघः ॥

अनिरुद्धं, क्ली, (नि+रुध्+भावे क्तः, नास्ति निरुद्धं यस्मात् तत्।) सन्दानं। पश्चादिबन्धनरज्जुः। इति चिकाण्डशेषः ॥

अनिरुद्धः, पुं, (न निरुध्यतेऽसौ नि+रुध्+कर्म्मणि क्तः, ततो नञ्समासः।) कामदेवपुत्रः। तत्पर्य्यायः। उषापतिः २ ब्रह्मसूः ३ विश्वकेतुः ४। इत्यमरः ॥ स तु भगवतश्चतुर्व्यूहान्तर्गतादित्यूहः। तस्मात् सृष्टिर्भवति यथा,—
"तमसो ब्रह्मसम्भूतं तमोमूलात्मतात्मकं।
तद्विश्वभावसंज्ञान्तं पौरुषीं तनुमाश्रितं ॥
सोऽनिरुद्ध इति प्रोक्तस्तत् प्रधानं प्रचक्षते।
तदव्यक्तमिति ज्ञेयं त्रिगुणं नृपसत्तम ॥
विद्यासहायवान् देवो विश्वक्सेनो हरिः प्रभुः।
अम्भस्येव शयनञ्चक्रे निद्रायोगमुपागतः ॥
जगतश्चिन्तयन् सृष्टिं महानात्मगुणः स्मृतः"।
इति महाभारते मोक्षधर्म्मः ॥

अनिरुद्धः, त्रि, (नि+रुध्+कर्म्मणि क्तः, ततो नञ्समासः।) रोधशून्यः। अप्रतिबद्धः। चरः। इति विश्वः ॥

अनिरुद्धपथं, क्ली, (अनिरुद्धः प्रतिबन्धरहितः पन्था यत्र सः।) आकाशं। इति शब्दचन्द्रिका ॥ अरुद्धवर्त्म ॥

अनिरुद्धभाविनी, स्त्री, (अनिरुद्धस्य कामपुत्रस्य भाविनी पत्नी, षष्ठीतत्।) उषा। सा च कामपुत्रपत्नी। बाणराजकन्या। इति शब्दरत्नावली ॥

अनिर्णयः, पुं, (निर्+नी+भावे अच्, ततो नञ्समासः।) अनिर्द्धारः। अनिश्चयः। निर्पूर्व्वकनीञ्धातोरलि नञ्समासः ॥

अनिर्धारितः, त्रि, (निर्+धृ+णिच् कर्म्मणि क्तः, ततो नञ्समासः।) अकृतनिर्धारणः। अनिश्चितः। यथा। "अनिर्धारितैकत्वानेकत्वविशेषस्य पूर्व्वरूपमात्रस्य व्यक्तस्य व्याधिलिङ्गत्वं"। इति रोगपूर्व्वरूपलक्षणे रक्षितः ॥

अनिर्म्मलः, त्रि, (न निर्म्मलः परिष्कृतः नञ्समासः।) मलिनः। आविलः। अपरिष्कृतः। निर्म्मलाभावे क्ली ॥

अनिर्म्माल्या, स्त्री, (निर्+मल्+ण्यत् स्त्रियां टाप्, ततो नञ्समासः।) एकानामकौषधिः। इति शब्दरत्नावली ॥

अनिर्व्वचनीयः, त्रि, (निर्+वच्+कर्म्मणि अनीयः, ततो नञ्समासः।) निर्व्वचनायोग्यः। अनिर्व्वाच्यः। वाक्यागम्यः। यथा, "सदसद्भ्यामनिर्व्वचनीयं त्रिगुणात्मकं भावरूपं ज्ञानविरोधि यत्किञ्चिदिति वदन्ति"। इत्यज्ञानलक्षणे वेदान्तसारः ॥

अनिर्व्वाहः, पुं, (निर्+वह्+भावे घञ्, ततो नञ्समासः।) निर्व्वाहाभावः। अनिष्पत्तिः। असङ्गतिः। यथा। मुख्यार्थबाधे तद्योगे इति कारिकायां मुख्यार्थस्यान्वयबाधोऽपि तात्पर्य्यविषयस्यान्वयस्य मुख्यार्थतावच्छेदकरूपेणानिर्व्वाह एव। इति काव्यप्रकाशटीकायां महेश्वरः ॥

अनिर्व्विण्णः, त्रि, (निर्+विद्+क्तः, ततो नञ्समासः।) निर्व्वेदशून्यः। यत्रे निर्व्विण्णमानस इत्यत्र निर्व्विण्णं विरक्तं इति देवीमाहात्म्यटीका तद्धिन्नः अविरक्तः विषयासक्त इति यावत् ॥ निर्व्विण्णोतिममत्वेन इत्यत्र निर्व्विण्णो दुःखितः इति देवीमाहात्म्यटीका तद्धिन्नः अदुःखितः ॥ बहुव्रीहौ तु अतिदुःखितः ॥

अनिर्ऋतिः, स्त्री, (नि निर्ऋतिः, खाच्छन्द्यं, नञ्समासः।) निर्ऋत्यभावः। दरिद्रता। यथा।
"अनिर्ऋतिनिशाचरी मम गृहान्तरालं गता"।
इत्युद्भटः ॥

अनिलः, पुं, (अनिति जीवत्यनेन अन्+इलच्।) वायुः। इत्यमरः ॥ वसुविशेषः। इति मेदिनी ॥ (शरीरस्थप्राणादिवायुः। वातरोगः। खातिनक्षत्रं।)

अनिलघ्नकः, पुं, (अनिलं वातरोगं हन्ति इति, अनिल+हन्+टक्+स्वार्थे कन्।) विभीतकवृक्षः। इति राजनिर्घण्टः ॥

अनिलसखः, पुं, (अनिलस्य सखा इति राजाहःसखिभ्यष्टच् इति समासान्तः टच्।) अग्निः। इति हेमचन्द्रः ॥

अनिलान्तकः, पुं, (अनिलस्य अन्तकः।) इक्ष्वाकवृक्षः। इति राजनिर्घण्टः ॥

अनिलामयः, पुं, (अनिलः वात एव आमयः रोगः, रूपकसमासः।) वातरोगः। इति राजनिर्घण्टः ॥

अनिर्लोचितः, त्रि, (न निर्लोचित इति नञ्समासः, निर्+लोचि+क्त।) अनालोचितः। अविवेचितः। यथा,—
"अनिर्लोचितकार्य्यस्य वाग्जालं वाग्मिनो वृथा"।
इति माघः ॥

अनिशं, क्ली, (निशा रात्रिः, उपचारात् व्यापारराहित्यम्, नास्ति निशा यस्मिन् तत्, क्रियाविशेषणत्वे अस्य क्लीवत्वं, द्रव्यविशेषणत्वे तु त्रिलिङ्गत्वं।) अनवरतं। सततं। इत्यमरः ॥ ("निजमैच्छि मन्दमनिशं निशितैः क्षपितं शरीरमशरीरशरैः"। इति माघे।)

अनिश्चितः, त्रि, (निर्+चि+कर्म्मणि क्तः, न निश्चित इति नञ्समासः।) निश्चयरहितः। अनिरूपितः। अनिर्णीतः। यथा, "कवय आनतकन्धरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः"। इति श्रीभागवतं ॥

अनिष्टः, त्रि, (इष्+कर्म्मणि क्तः, न इष्ट इति नञ्समासः।) अनभिलषितः। अवाञ्छितः। यथा, "इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्"। इति साहित्यदर्पणं ॥

अनिष्टा, स्त्री, (इष्+क्त, +टाप्, नञ्समासः) नागबला। इति राजनिर्घण्टः ॥

अनिष्णातः, त्रि, (नि+स्ना+कर्त्तरि क्तः, न निष्णात इति नञ्समासः।) अकुशलः। अप्रवीणः। अनभिज्ञः। अज्ञानी। निपूर्व्वात् स्नाशौचे इत्यस्मात् कर्त्तरि क्ते नञ्समासः ॥

अनिष्पन्नः, त्रि, (पाणिनिमते तु नि+स्ना+कर्त्तरि क्तः, निनदीभ्यां स्नातेः कौशले इति षत्वं, ततो नञ्समासः।) निष्पत्तिरहितः। असमाप्तः। असम्पूर्णः। निर्पूर्व्वकपदधातोः कर्म्मणि क्ते निष्पन्नः पश्चान्नञ्समासः ॥

अनिक्षुः, पुं, (इक्षुसदृशः नञ्समासः, नञश्च सादृश्ये।
"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"॥
इति कारिकायां।)
इक्षुविशेषः। आखु। खाकड़ा इति ख्यातः। तत्पर्य्यायः। इक्षुतुल्या २ इक्षुशालिका ३ इक्षालिका ४। इति रत्नमाला ॥

अनीकः, पुं, क्ली, (नास्ति नीः स्वर्गप्रापको यस्मात्। कप्, अर्द्धर्चादित्वात् पुंस्त्वं क्लीवत्वञ्च।) युद्धं, सैन्यं। इति मेदिनी ॥

अनीकस्थः, पुं, (अनीके युद्धे तिष्ठति, अनीक+स्था+कर्त्तरि डः, उपपदसमासः।) रणगतः। संग्रामस्थः। हस्तिशिक्षाविधज्ञश्चः। राजरक्षकः। चिक्रं। वीरमर्द्दकः। इति मेदिनी ॥ जयढाक इति भाषा।

अनीकिनी, स्त्री, (अनीको रणोऽस्ति प्रयोजनत्वेन अस्या इति, अनीक+इनि+स्त्रियाम्।) सैन्यसंख्याविशेषः। तद्यथा। ६५६१ अश्वाः। २१८७ हस्तिनः। १०९३५ पदातयः। २१८७ रथाः। समुदायेन सप्तत्यधिकाष्टशताधिकसहस्राधिकायुतद्वयं। २१८७० अक्षौहिणीदशमांशेयं। इत्यमरभरतौ ॥

अनीचिदर्शी, [न्] पुं, (नीचात् नीचकार्य्यात् अन्यत्, नञ्समासः, तदेव विद्यतेऽस्य अनीच+इनि, तादृशसत्कर्म्मशालिजनवत् पश्यति अनीची+दृश्+णिनि, उपपदसमासः।) बुद्धभेदः। इति चिकाण्डशेषः ॥

अनीतिः, स्त्री, (न नीतिः, नञ्समासः।) दुर्नीतिः। अन्यायः। अत्याचारः। यथा,—
"विप्लवो व्यतिपातश्च ये चान्येऽनीतिसम्भवाः"।
इति वामनपुराणं ॥

अनीशः, पुं, (नास्ति ईशः नियन्ता यस्य सः।) विष्णुः। इति तस्य सहस्रनाममध्ये पठितः ॥ ईश्वरभिन्ने त्रि। यथा,—
"अनीशो वा कुर्य्याद्भुवनजनने कः परिकरं"।
इति पुष्पदन्तः ॥

अनु, व्य, उपसर्गविशेषः। अस्यार्थाः। पश्चात्। सादृश्यं। लक्षणं। वीप्सा। इत्यमरभरतौ। भागः।

हीनः। सहार्थः। आयामः। समीपं। परिपाटी। इति मेदिनी॥ पुनरर्थः। इति मुग्धबोधटीकायां दुर्गादासः॥

अनुकः, त्रि, (अनु कामयते, अनु+कन्। कामुकः। कामी। इत्यमरः॥

अनुकम्पा, स्त्री, (अनु+कम्प्+भावे अः, स्त्रियां टाप्।) दया। कृपा। इत्यमरः॥ ("भूतानुकम्पा तव चेदियं गौरेका भवेत् खलिमती त्वदन्ते"। इति रघुवंशे।)

अनुकम्पाः, त्रिः (अनुकम्पामर्हति अनुकम्पा+अर्हार्थे यत्। अथवा अनु+कम्प् णिच्+कर्म्मणि यत्।) तरस्वी। वेगवान्। इति हारावली॥ कृपायोग्यः। दयापात्रं।
"अनुकम्प्योऽनुकम्पस्य स जातः स च जीवति"। इति काव्यप्रकाशः॥
("दुहितरमनुकम्पामदिरादाय दोर्भ्यां"।) इति कुमारसम्भवे।)

अनुकरणं, क्ली, (अनु+कृ+ल्युट्।) अनुकारः। सदृशीकरणं। व्याकरणमते तत् द्विविधं। यत्रार्थरहितकेवलशब्दस्य सदृशकरणं तत् शब्दानुकरणं १। यत्रार्थविशिष्टस्य सदृशकरणं तदर्थानुकरणं २। इति गोयीचन्द्रटीकोपरि विद्यालङ्कारटीप्पनी॥

अनुकर्षः, पुं, (अनुक्रष्यते खसम्बन्धेन चक्रेण, अनु+कृष+घञ्।) रथाधःस्थितकाष्ठं। इत्यमरः॥ रथेर तला इति भाषा। रथस्याधस्तनभागे यद्वा रथाधारणकाष्ठं तिष्ठति यतोऽधश्चक्रं उपरि पट्टकर्म्म यत्र चक्रं तदनुकर्षशब्दवाच्यं। इति भरतः। आकर्षणं। इति मेदिनी॥

अनुकर्षणं, क्ली, (अनु+कृष्+भावे ल्युट्।) अवकर्षणं। आकर्षणं। इति मेदिनी॥

अनुकर्षा, [न्] पुं, (अनु+कृष्+अन्।) अनुकर्षः। रथाधःस्थितकाष्ठं। इत्यमरटीकायां रायमुकुटः॥

अनुकल्पः, पुं, (अनुकल्प्यते गौणत्वेन विधीयते, अनु+कृप्+णिच्+अच्।) मुख्यकल्पादधमः। गौणकल्पः। मुख्यस्यानापन्नप्रतिनिधिः। यथा, "व्रीह्यभावे नीवारैर्यजेत"। इत्यमरभरतौ॥
("प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।
न साम्परायिकं तस्य दुर्मतेर्विद्यते फलं"॥
इति मनुः।)

अनुकामीनः, त्रि, (कामस्य इच्छायाः सदृशं, सादृश्यार्थे अव्ययीभावः, ततो गच्छतीत्यर्थे खः तस्य ईनः।) कामङ्गामी। स्वेच्छागमनशीलः। इत्यमरः॥

अनुकारः, पुं, (अनु+कृ+घञ्।) सदृशीकरणं। सदृशरूपवेशभाषाद्याविष्करणं। तत्पर्य्यायः। अनुहारः २। इत्यमरः॥ उपमा ३। इति हेमचन्द्रः॥
("भवेदभिनयोऽवस्थानुकारः स चतुर्विधः"। इति साहित्यदर्पणे।)

अनुकूलः, त्रि, (अनुकूलं करोति, अनुकूल+कृ+णिच् पचाद्यच्।) अप्रतिकूलः। दक्षिणः। सहायः। यथा, "मयानुकूलेन नभस्वतेरितं"। इति श्रीभागवतं॥

अनुकूलः, पुं, (अनुकूलयति केवलस्वपत्नीं सुखयति, अनुकूल+कृ+णिच् अच्।) पतिभेदः। तस्य लक्षणं।
"सदा पराङ्गनापराङ्मुखत्वे सति स्वस्यानुरक्तत्वं"। इति रसमञ्जरी॥ (यथा साहित्यदर्पणे,—
"एकस्यामेव नायिकायामासक्तोऽनुकूलनायकः। किन्वन्येऽपि जना वदन्ति सुभगोऽप्यस्याः प्रियो नान्यतो दृष्टिं निक्षिपतीति विस्मयवता मन्यामहे दुःस्थितं"।)

अनुकूलता, स्त्री, (अनुकूलस्य भावः, अनुकूल+भावे तल् स्त्रियां टाप्।) आनुकूल्यं। तत्पर्य्यायः। दाक्षिण्यं २। इति हेमचन्द्रः॥ (अनुग्रहः। दया। प्रसादः। "मुहृदिव प्रकटय्य मुखप्रदां प्रथममेकरसामनुकूलतां"। इति उत्तरचरिते।)

अनुकूला, स्त्री, (अनुकूल+स्त्रियां टाप्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

अनुक्रमः, पुं, (क्रममनुगतः, प्रादिसमासः।) यथाक्रमं। तत्पर्य्यायः। आनुपूर्व्वी २ परिपाटी ३ आवृत् ४ पर्य्यायः ५। इत्यमरः॥ प्रतिसंक्रमणं। अनुक्रमणिका। यथा,—
"द्वादशे तु पुराणोक्तसर्व्वार्थानुक्रमः कृतः।
प्रथमस्कन्धमारभ्य प्राधान्येन समासतः"॥
इति श्रीभागवते १२ स्कन्धे १२ अध्यायटीकायां श्रीधरस्वामी॥
("कनिष्ठादेश्चिन्यङ्कुण्यमूलान्यग्रं करस्य च।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्"
इति याज्ञवल्क्यः।)

अनुक्रमणिका, स्त्री, (अनुक्रम्यते उत्तरोत्तरं परिपाट्या आरभ्यतेऽनया, अनु+क्रम+करणे ल्युट्, स्त्रियां ङीप्, ततः स्वार्थे कन् स्त्रियां टाप्।) भूमिका। ग्रन्थादेर्मूखबन्धः। पुराणादेरुक्तविवरणस्य संक्षेपेण पुनः कथनं। इति पुराणं॥
("अनुक्रमणिकाध्यायं वृत्तान्तानां सपर्व्वणाम्"। इति महाभारते।)

अनुक्रोशः, पुं, (अनु+कुश्+घञ्।) करुणा। दया। इत्यमरः॥ ("सौहार्दाद्वा विदुर इति वा मय्यनुक्रोशबुद्ध्या"। इति मेघदूते।)

अनुगः, त्रि, (अनुगच्छति, अनु+गम्+डः।) पश्चाद्गामी। अनुचरः। अनुसरः। तत्पर्य्यायः। अन्वक् २ अन्वञ्चः ३ अनुपदः ४। इत्यमरः॥ सेवकः ५। दासः ६। इति हलायुधः॥
("येषां श्रीरनुगा बुद्धिर्न ते मुह्यन्ति भारत"। इति महाभारते।)

अनुगतः, त्रि, (अनुगच्छति अनु+गम्+कर्त्तरि क्तः।) अनुगः। आश्रितः। अधीनः। पश्चादागतः। यथा,—
"आगच्छद् यत्र काकुत्स्थः स्वर्गाय समुपस्थितः।
विमानवरकोटीभिर्देवैरनुगतस्तदा"॥
इति रामायणं॥ नियतः। यथा, "न च तदनुगतमेव अभिधावलम्बने नापि तस्य भावात्"। इति पञ्चमोल्लासे काव्यप्रकाशकारः॥

अनुगवीनः, पुं, (गोः पश्चात् अव्ययीभावः अनुगु+खः, तस्य ईनः।) गोपः। गोरक्षकः। गोः पश्चात् यष्टेर्गामी। इति संक्षिप्तसारव्याकरणपरिशिष्टं।

अनुगमः, पुं, (अनु+गम्+भावे अप्।) पश्चाद्गमनं। उपसर्पणं। यथा,—
"क्षते तु दीयते गत्वा चेतायामाहुताय वै।
द्वापरे याचमानाय कलौ त्वनुगमान्विते"॥
इति स्मृतिः॥ न्यायमते येन रूपेण तावत्पदार्थग्रहः तदेव रूपं तावत्पदार्थानुगमकं तस्य क्रिया॥

अनुगमनं, क्ली, (अनु साहित्येन गमनं, अनु+गम्+भावे ल्युट्।) सहगमनं। यथा, "अथौ लोकपाला आदित्यचन्द्रानिलाम्बाकाशभूमिजलहृदयावस्थितान्तर्यामिपुरुषयमदिनरात्रिसन्ध्याधर्म्माः! यूयं साक्षिणो भवत ज्वलच्चितारोहणेन भर्त्तृशरीरानुगमनमहं करोमि"। इति शुद्धितत्त्वं॥

अनुगामी, [न्] त्रि, (अनुगच्छति, अनु+गम्+णिनि।) कामंगामी। इति हेमचन्द्रः॥ सहचरः २। पश्चाद्गामी ३। यथा,—
"दृष्ट्वा श्रियमिवायान्तीं ब्रह्माणमनुगामिनीं"। इति रामायणं॥

अनुग्रहः, पुं, (अनु+ग्रह्+अप्।) दुःखदूरकरणेच्छा। अनिष्टवारणपूर्व्वकेष्टसाधनं। तत्पर्य्यायः। अभ्युपपत्तिः २। इत्यमरः॥
("विज्ञपोन्मत्तनिःस्वानामकृत्सापूर्व्वकं हि यत्।
पूरणं दानमानाभ्यामनुग्रह उदाहृतः"॥
इत्युक्तलक्षणा दारिद्र्यादिजनितदुःखहरणेच्छा।
("महाननुग्रहो मे स्यादाज्ञप्तस्य महात्मना"।
इति रामायणे।)

अनुचरः, त्रि, (अनु साहित्येन चरति गच्छति, अनु+चर+ट।) सहचरः। सहायः। इत्यमरः॥ दासः। इति हलायुधः॥ ("अनुचरेण धनाधिपतेरथो"। इति भारविः।
"पैठकं वाञ्छतो राज्यं पार्थस्यानुचरा वधुः"।
इति रामायणं।)

अनुच्छिष्टः, त्रि, (उत्+शिष्+क्त, नञ्समासः।) उच्छिष्टभिन्नः। पवित्रः। इति हलायुधः॥
("लक्ष्मा निमन्त्रयाञ्चक्रे तमनुच्छिष्टसम्पदा"।
इति रघुवंशे।)

अनुजं, क्ली, प्रपौण्डरीकनामसुगन्धिद्रव्यं। इति राजनिर्घण्टः॥

अनुजः, पुं, (अनु पश्चात् जायते, अनु+जन्+ड।) कनिष्ठभ्राता। तत्पर्य्यायः। जघन्यजः २ कनिष्ठः ३ यवीयान् ४ अवरजः ५। इत्यमरः॥ कनीयान् ६ यविष्ठः ७। इति जटाधरः। जघन्यः ८। इति शब्दरत्नावली॥

अनुजा, स्त्री, (अनु पश्चात् जाता, अनु+जन्+ड+स्त्रियां टाप्।) कनिष्ठा भगिनी। यथा,—
"भ्रातस्त्वानुजातोहं भुङ्क्ष्व भक्तमिदं मयः"।
इति तिथ्यादितत्त्वं॥

अनु

अनुजीवी, [न्] त्रि, (अनुजीवति, अनु + जीव् + णिनि ।) दासः । तत्पर्य्यायः । सेवकः २ अर्थी ३ । इत्यमरः ॥ अनुचरः । इति हलायुधः ॥ ("अनुजीविना पराधिकारचर्चा न कर्त्तव्या" । इति हितोपदेशः ।)

अनुज्ञा, स्त्री, (अनु + ज्ञा + भावे अङ् ।) आज्ञा । अनुमतिः । यथा, "नान्योन्यं ब्राह्मणयोर्न गुरुशिष्ययोरन्तरा व्यपेयात् अनुज्ञया तु व्यपेयात्" । इति तिथ्यादितत्त्वं ॥

अनुतरं, क्ली, (अनुतीर्य्यते नदी उत्तीर्य्यते अनेन, अनु + तॄ + अप् ।) आतरः । तरपण्यं । इत्यमरटीकायां रायमुकुटः ॥ पाराणी कड़ी । इति भाषा ।

अनुतर्षः, पुं, (अनु + तृष् + भावे घञ् ।) तृष्णा । अभिलाषः । मद्यपानपात्रं । इति मेदिनी ॥

अनुतर्षणं, क्ली, (अनु + तृष् + करणे ल्युट् ।) चषकः । सुरापानपात्रं । इत्यमरः ॥

अनुतापः, पुं, (अनु + तप् + भावे घञ् ।) पश्चात्तापः । इत्यमरः ॥ पस्तान इति भाषा । ("चिरसम्मोहशयनादुत्थितस्य य आत्मनः । हाहाकारोऽनुतापः स्यात् स्वकर्म्मस्मृतिसम्भवः" ॥ इति सङ्क्षिप्तः ।) ("क्षयापनेनानुतापेन तपसाध्ययनेन च । पापकृन्मुच्यते पापात् तथा दानेन चापदि" ॥ इति मनुः ।)

अनुत्तमः, त्रि, (नास्ति उत्तमः उत्कृष्टो यस्मात् सः ।) श्रेष्ठः । प्रधानः । इत्यमरः ॥ ("श्रुतिस्मृत्युदितं धर्म्ममनुतिष्ठन् हि मानवः । इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्" । इति मनुः ।) नञ्समासे तु अधमः ॥

अनुत्तरं, त्रि, (नास्ति उत्तरं प्रधानं यस्मात्, न उत्तरं इति नञ्समासो वा ।) मुख्यं । इति हेमचन्द्रः ॥ श्रेष्ठं । प्रतिजल्पविवर्जितं । प्रत्युत्तरहीनं । इति मेदिनी ॥ स्थिरं । इति धरणी ॥ अधः । दक्षिणदिक् । इत्यमरटीकायां स्वामी ॥ प्रत्युत्तराभावे स्त्री । यथा, "भवत्यवज्ञा च भवत्यनुत्तरात्" । इति नैषधं ॥

अनुदग्रः, त्रि, (नास्ति उदग्रं उन्नतं यस्मात्, न उदग्रः इति वा ।) अनुच्चः । बहुव्रीहौ तु अल्पोच्चः ॥

अनुदात्तः, पुं, (न उत् + आ + दा + क्त, न उदात्तः इति नञ्समासः ।) वेदगाने नीचस्वरः । यथा, "उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः" । इति शब्दरत्नावली ॥ ("उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः" इति पाणिनिः ।)

अनुदारः, त्रि, (न उदार इति नञ्समासः नास्ति उदारो यस्मात् इति वा ।) अतिशयदाता । अदाता । अतिमहान् । अमहान् । अनुगतदारः । यथा, "यस्मिन् प्रसीदसि पुनः स भवत्युदारोऽनुदारश्च" । इति मम्मटभट्टः ॥

अनुदिनं, क्ली, (दिने दिने इति वीप्सायामव्ययीभावः ।) प्रतिदिनं । प्रत्यहं । यथा,—

"पारावत खलु शिखाकणमात्रभोगी
कामी भवेदनुदिनं वद कोऽत्र हेतुः" ।

इति श्रीचैतन्यदेवः ॥

अनुद्रुतं, क्ली, (अनु + द्रु + क्तः ।) तालविशेषः । स तु द्रुतार्द्धो मात्राचतुर्थभागो वा । यथा,—

"अर्द्धमात्रं द्रुतं ज्ञेयं द्रुतार्द्धाप्यनुद्रुतं" ।

इति शब्दरत्नावली ॥ अनुधावित इति । यथा,—

"अनुद्रुतः संयति येन केवलं
बलस्य शत्रुः प्रणुनंस शीघ्रतां" ।

इति माघः ॥

अनुधावनं, क्ली, (अनु + धाव् + भावे ल्युट् ।) पश्चाद्धावनं । अनुसन्धानं । यथा,—

"तस्मिन् कुरङ्गशावाक्षी मुक्तचित्तं निवारय ।
न तन्मनस्तवाधीनं यथा तत्रानुधावनं" ॥

इत्युद्भटः ॥

अनुनयः, पुं, (अनु + नी + भावे अच् ।) विनयः । ("कथं नु शक्योऽनुनयोमहर्षेर्-
विश्राणनाच्चान्यपयस्विनीनाम्" ।
इति रघुवंशे ।) तत्पर्य्यायः । प्रणिपातः २ प्रणतिः ३ । इति हेमचन्द्रः ॥ (सदाचारः । क्रोधोपनयः ।
"एवं रामवचः श्रुत्वा लक्ष्मणानुनयं तथा" ।
इति रामायणं ।)

अनुपदं, क्ली, (अनु पश्चात् पद्यते गच्छति, अनु + पद् + पचाद्यच् ।) अनुगः । पश्चाद्गामी । इत्यमरः ॥ (य, पदस्य पश्चात् इति अव्ययीभावे अन्वक् । अनन्तरं । अव्यवहितोत्तरकालं ।
"अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ।
आशिषामनुपदंसमस्पृशत्
दर्भपाटिततलेन पाणिना" ।
इति रघुवंशे ।)

अनुपदी, [न्] त्रि (अनुपदमन्वेषा अनुपद + इन् ।) अन्वेषा । अन्वेषणकर्त्ता । इति हलायुधः ॥

अनुपदीना, स्त्री, (अनुपद + अनुपदं बद्धा इत्यर्थे खः तस्य ईनः स्त्रियां टाप् ।) पदायतोपानत् । इत्यमरः ॥ बुट् इत्यादिभाषा ।

अनुपमः, त्रि, (नास्ति उपमा सादृश्यं यस्य सः ।) उपमाशून्यः । उत्तमः । इति मेदिनी ॥ (सर्व्वोत्कृष्टः । सादृश्यरहितः ।
"बलं प्रमाणं शक्तिश्च परैरनुपमं मम" ।
इति रामायणे ।)

अनुपमा, स्त्री, (नास्ति उपमा सादृश्यं यस्याः सा ।) कुमुदनामदिग्गजयोषा । इत्यमरः ॥ सुप्रतीकनामदिग्गजस्त्री । "भवेदनुपमा सुप्रतीकिन्यां स्त्री त्रिभूत्तमे" । इति मेदिनी ॥

अनुपातः, पुं, (अनु + पत् + भावे घञ्, अनुरूपः त्रैराशिकेन पातः । पाटिगणितोक्तेन त्रैराशिकेन युक्तः संख्यायातः ।) पश्चात्पतनं । पूर्व्वाङ्कपातानुसारेण अपराङ्कपातः । यथा,—

"पुरान्तरं चेद्दिदमुत्तरं स्यात्
तदत्तविश्लेषलवैस्तदा किं ।
चक्रांशकैरित्यनुपातयुक्त्या

अनु

युक्तं निरुक्तं परिधेः प्रमाणं" ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

अनुपातकं, क्ली, (पातयति निरयं प्रेरयति, पत् + णिच् + ण्वुल् । पातकं ब्रह्महत्यादि तत्सदृशं प्रादिसमासः । वेदनिन्दादिजन्यपापविशेषः । तानि च विष्णुना दर्शितानि, यथा,—"यागस्थस्य क्षत्रियस्य वैश्यस्य च रजस्वलायाश्चान्त्यवर्णजाश्चाक्षत्रियोपायाश्चाविज्ञातस्य गर्भस्य भ्रूणागतस्य च घातनं ब्रह्महत्यासमानमिति" ।) महापातकसदृशपापविशेषः ।
तत् पञ्चत्रिंशत्प्रकारं, यथा,—

समुत्कर्षे मिथ्यावचनं	१
तत् द्विविधं । आत्मगामि ।	
असूयापूर्ब्बकपरगामि च ।	
राजगामि पैशुन्यं	१
पितुर्मिथ्यादोषकथनं	१
एतत्त्रयं ब्रह्महत्यासमं ॥	३
वेदत्यागः । स तु अधीतवेदविस्मरणं ।	१
वेदनिन्दा	१
कौटसाक्ष्यं	१
तद्द्विविधं । ज्ञातस्याकथनं । मिथ्याकथनञ्च ।	
सुहृद्वधः	१
स तु ब्राह्मणव्यतिरिक्तमित्रवधः ।	
ज्ञानपूर्ब्बकाभ्यासेन गर्हितान्नस्य अर्थात् अन्त्यजान्नस्य भक्षणं	१
ज्ञानपूर्ब्बकाभ्यासेन गर्हितान्नस्य अर्थात् छत्राकादेर्भक्षणं	१
एतत् षड्विधं सुरापानसमं ॥	६
निक्षेपहरणं	१
नरहरणं	१
अश्वहरणं	१
रजतहरणं	१
भूमिहरणं	१
हीरकहरणं	१
मणिहरणं	१
एतानि सप्त स्वर्णस्तेयसमानि ॥	७
सपीठस्त्रीगमनं	१
कुमारीगमनं	१
अन्त्यजागमनं	१
सख्युः स्त्रीगमनं	१
औरसेतरपुत्रस्त्रीगमनं	१
पुत्रस्यासवर्णस्त्रीगमनं	१
एतानि षट् विमाढ्यगमनसमानि ॥	६
माढ्व्यस्त्रीगमनं	१
पिढ्व्यस्त्रीगमनं	१
श्वश्रूगमनं	१
मातुलानीगमनं	१
शिष्यस्त्रीगमनं	१

भगिनीगमनं १
आचार्य्यभार्य्यागमनं १
श्वश्रूगतागमनं १
राज्ञीगमनं १
प्रव्रजितागमनं १
धात्रीगमनं १
साध्वीगमनं १
वर्णोत्तमागमनं १
एतानि त्रयोदश गुर्व्वङ्गना- } १३
गमनसमानि ॥ }

इति प्रायश्चित्तविवेकसङ्ग्रहः ॥ १५

अनुपानं, क्ली, (अनु + पा + कर्म्मणि ल्युट् ।) औषधाङ्गपेयविशेषः । औषधेन सह तत्पश्चाद्दा पीयते यत् । यथा,—
"अनुपानविशेषेण करोति विविधान् गुणान्" ।
इति वैद्यकं ॥

अनुपुष्यः, पुं, (पुष्यमनुगतः तत्पुष्यविकसनेनैव तत्काशात् प्रादिसमासः ।) ग्रहः । इति शब्दचन्द्रिका ॥

अनुप्रासः, पुं, (रसाद्यनुगतत्वेन प्रकर्षेण वर्णानामासः न्यासः, अनु + प्र + अस् + घञ् ।) तुल्यवर्णविन्यासः । यथा,—"वर्णसाम्यमनुप्रासः" इति काव्यप्रकाशः ॥
"वर्णावृत्तिरनुप्रासः पदे पादे विधीयते" ।
इति काव्यचन्द्रिका । अस्य विवरणं अलङ्कारशब्दे द्रष्टव्यम् ॥ ("वर्णसाम्यरूपः शब्दालङ्कारविशेषः, अत्र वर्णानामेव सादृश्यं ज्ञेयं, स्वरसाम्येऽपि सादृश्यं वैचित्र्याभावात् न गणितं । स तु पञ्चविधः, छेकानुप्रासो वृत्त्यनुप्रासः श्रुत्यनुप्रासोऽन्त्यानुप्रासो लाटानुप्रासश्चेति । अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्" । इति साहित्यदर्पणे ।)

अनुप्लवः, पुं, (अनु साहित्येन प्लवते गच्छति, अनु + प्लु + पचाद्यच् ।) सहायः । अनुचरः । इत्यमरः ॥ ("सानुप्लवः प्रभुरपि क्षणदाचराणाम्" । इति रघुवंशे ।)

अनुबन्धः, पुं, (अनु + बन्ध + यथासम्भवं भावादौ घञ् ।) दोषोत्पत्तिः । प्रक्रत्यादिः । आदिशब्देन प्रत्ययागमादेग्रहः । विनश्वरः । उच्चरितप्रध्वंसी इत्संज्ञको वर्णः ॥ मुख्यानुयायिशिष्यः । विवाहादिषु मुख्यं पित्रादिकमनुयाति यः । मुख्यानुयायी शिष्यश्चेति हयंखतन्त्रमिति स्वामी । प्रक्रतस्यानुवर्त्तनं । प्रक्रान्तस्य अनिवर्त्तनं । इत्यमरभरतौ ॥ दोषोत्पादे यथा,—
"अनुबन्धं बुद्धास्य दण्डो विधीयतामिति" ।
विनश्वरे यथा । औट् टकारानुबन्धे लोपः ॥ प्रक्रतस्यानुवर्त्तने यथा । भोक्तुमनुबन्धः क्रतः । शिष्यौ यथा । "बालकानुबन्धेन यात्रामङ्गो माभूत्" । इत्यमरटीकासारसुन्दरी ॥ ० ॥ बन्धः । इति मेदिनी ॥ आरम्भः । इति शब्दरत्नावली ॥ लेशः । इति त्रिकाण्डशेषः ॥ ० ॥ वेदान्तमते अधिकारिविषयसम्बन्धप्रयोजनानि । वैद्यकमते वातादिदोषाणामप्राधान्यं ॥

अनुबन्धी, स्त्री, (अनुबध्यते अतिनिश्वासेन व्याप्रियतेऽनया, अनु + बन्ध + करणे घञ्, ततो गौरादित्वात् ङीष् ।) हिक्का । इत्यमरः । इति मेदिनी ॥ ("अनुबन्धः शिष्यौ दोषे पादे मुख्यानुयायिनि । विनश्वरे प्रक्रत्यादौ प्रक्रतस्यानुवर्त्तने ॥ अनुबन्धी तु हिक्कायां इत्याख्यामपि योषिति" । इति मेदिनी ।)

अनुबोधः, पुं, (अनु + बुध् + णिच् + भावे अच् ।) गन्धोद्दीपनं न्यूनपूर्व्वगन्धस्य चन्दनादेः प्रयत्नविशेषेण पुनः पूर्व्वसौगन्ध्योत्पादनं । तत्पर्य्यायः । प्रबोधनं २ । इत्यमरः ॥ पश्चाद्बोधः ॥

अनुभवः, पुं, (अनु + भू + भावे अप् ।) स्मृतिभिन्नज्ञानं । अनुमानादि । धारावाहिज्ञानं । तत्पर्य्यायः । उपलब्धिः २ इत्यमरः ॥

अनुभावः, पुं, (अनुभावयति बोधयत्यनेन, अनु + भू + णिच् करणे अच् ।) प्रभावः । कोपदण्डजं तेजः । सतां मतिनिश्चयः । सतां अभिप्रायस्य निश्चयः । निश्चयमात्रेऽपि भावबोधकः । रत्यादिसूचकगुणक्रियादिः । स च लोचनचातुर्य्यभ्रूक्षेपमुखरागादिरूपः । एवमन्यत्रापि । इत्यमरभरतौ ॥ (स्थिरता । निर्द्धारः । अवश्यम्भाविता । तेजः । यथा,—
"नरपतिकुलभूत्यैर्गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्टं लोकपालानुभावैः" ।
इति रघुवंशे ।)

अनुभूतिः, स्त्री, (अनुभवनं अनु + भू + क्तिन् ।) अनुभवः । सा चतुर्व्विधा । प्रत्यक्षं १ अनुमितिः २ उपमितिः ३ शाब्दबोधः ४ । इति भाषापरिच्छेदः ॥

अनुभूताद्यविस्मृतिः, स्त्री, (अनुभूतादीनि व्याकरणादीनां पदपदार्थप्रभृतीनि न विस्मर्य्यन्तेऽनया, न + वि + स्मृ + करणे क्तिन् ।) संस्कारः । अनुभूतानां स्मृतानाञ्च अविस्मृतिर्यस्मात् स भावनाख्यसंस्कार इति यावत् ॥

अनुमतकर्म्मकारी, [न्] त्रि, (अनुमतमनुज्ञातं कर्म्म कर्म्मधारयः, तत्करोति यः अनुमतकर्म्म + क्र + णिनि उपपदसमासः ।) लिखितपत्राद्यनुसारेण कर्म्मकर्त्ता । आज्ञया कार्य्यकर्त्ता च ॥ इति व्यवहारकाण्डं ॥ अक्ती इति आरबी भाषा ।

अनुमतिः, स्त्री, (अनु + मन् + भावे क्तिन् । कलाहीनत्वेऽपि पूर्णिमाविहितयागादिकरणाय अनुज्ञायतेऽस्यां अनु + मन् + अधिकरणे क्तिन् ।) सम्मतिः । अनुज्ञा । न्यूनेन्दुकला पूर्णिमा । चतुर्दशीयुक्ता पूर्णिमा । इति मेदिनी ॥
("कुहूं चैवानुमत्यै च प्रजापतय एव च ।
सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः" ॥
इति मनुः ।)

अनुमरणं, क्ली, (अनु + मृ + भावे ल्युट् ।) पश्चान्मरणं । भर्त्तरि मृते तत्पादुकादिकमादाय ज्वलचितारोहणपूर्व्वकं स्त्रिया मरणं । यथा—
"देशान्तरमृते पत्यौ साध्वी तत्पादुकादयं ।
निधायोरसि संयुक्ता प्रविशेत् ज्ञातवेदसं" ॥
इति ब्रह्मपुराणं ॥ ब्राह्मण्या निषेधमाह, स्मृतिः ।
"पृथक् चितिं समारुह्य न विप्रा गन्तुमर्हति" ॥
सहमरणं । मृतभर्त्रा सह ज्वलचितारोहणपूर्व्वकं स्त्रिया मरणं । यथा,—
"भर्त्रानुमरणं काले याः कुर्व्वन्ति तथाविधाः ।
कामात्क्रोधाद्भयान्मोहात्सर्व्वाः पूता भवन्ति ताः" ॥
इति महाभारतं ॥

अनुमा, स्त्री, (अनु + मा + भावे अङ् ।) अनुमितिः । अनुमानं । इति त्रिकाण्डशेषः ॥

अनुमानं, क्ली, (अनु + मा + ल्युट् ।) अनुमितिकरणं । अनुमितिः । इति चिन्तामणिः ॥ तत्पर्य्यायः । अनुमा २ इति त्रिकाण्डशेषः ॥

अनुमानोक्तिः, स्त्री, (अनुमानेन उक्तिः कथनं तत्पुरुषः ।) तर्कः । ऊहः । इति हलायुधः ॥

अनुमितिः, स्त्री, (अनु + मा + क्तिन् ।) अनुभवविशेषः । व्याप्तिविशिष्टपक्षधर्म्मताज्ञानजन्यज्ञानं । यथा,—"धूमदर्शनाद्वह्निमान् पर्व्वत इत्याकारज्ञानं । अस्या व्यापारकरणं परामर्शः । अस्याः करणं व्याप्तिज्ञानं" । इति भाषापरिच्छेदः ॥

अनुमोदितं, त्रि, (अनु + मुद् + णिच् + कर्म्मणि क्तः ।) ज्ञातानुमोदनं । अनुमतं । यथा,—
"भवता यद्ध्वसितं तन्मे साध्वनुमोदितं" ।
इति श्रीभागवतं ॥
("गान्धर्व्वेण विवाहेन वक्रोऽथ मुनिकन्यकाः ।
श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः" ॥
इति शाकुन्तले ।)

अनुयायी, [न्] त्रि, (अनुयाति पश्चात् गच्छति, अनु + या + णिनि ।) सदृशः । पश्चाद्गामी । यथा । मुख्यानुयायिनि शिष्यावित्यनुबन्धशब्दार्थे अमरः ॥

अनुयुक्तः, पुं, (अनु + युज् + क्तः ।) भ्रष्टकाथ्येता । इति महाभारतं । (अभियुक्तः । निन्दितः । जिज्ञासितपदार्थः । क्रतप्रश्नः ।)

अनुयोक्ता, [क्तृ] पुं, (अनु + युज् + तृच् ।) भ्रष्टकाथ्यापकः । इति महाभारतं ॥ (प्रश्नकर्त्ता ।)

अनुयोगः, पुं, (अनु + युज् + घञ् ।) प्रश्नः । इत्यमरः ॥

अनुयोगक्रत्, पुं, (अनुयोगं प्रश्नविषयसन्देहं क्रन्तति क्रिनत्ति, अनुयोग + क्रत् + क्विप् ।) आचार्य्यः । इति हेमचन्द्रः ॥

अनुयोजनं, क्ली, (अनु + युज् + णिच् + ल्युट् ।) प्रश्नः । इति हेमचन्द्रः ॥

अनुयोज्यं, त्रि, (अनुयुज्यते नियुज्यते, अनु + युज् + ण्यर्थे ण्यत् ।) निन्दार्हं । अनुपूर्व्वकनिन्दार्थयुजधातोः कर्म्मणि यप्रत्ययः ॥ (प्रश्नयः । जिज्ञास्यः ।
"ममेदमिति यो ब्रूयात् सोऽनुयोज्यो यथाविधिः"
इति मनुः ।)

अनुरक्तः, त्रि, (अनु + रञ्ज + कर्त्तरि क्तः ।) आसक्तः । अनुरागयुक्तः । यथा,—
"अनुरक्तो गुणान् ब्रूते विरक्तो दूषणानि च" ।
इत्युद्भटः ॥

अनुरञ्जनं, क्ली, (अनु + रञ्ज + भावे ल्युट्।) अनुरागः। हर्षजननं। यथा,—विश्लेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवरेति जयदेवः॥ (प्रीतिजननं। आह्लादनं। आराधनं। "युक्तः प्रजानामनुरञ्जने स्यात्तस्मात् यशो यत् परमं धनं वः"। इति उत्तरचरिते।)

अनुरतः, त्रि, (अनु + रम् + कर्त्तरि क्तः।) अनुरागविशिष्टः। प्रीतः। अनुरक्तः। अनुपूर्ब्बरमधातोः कर्त्तरि क्तः॥
("धर्म्मानुरतमत्यर्थं शान्तं सूनृतभाषिणम्"। इति भारते)॥

अनुरतिः, स्त्री, (अनु + रम् + भावे क्तिन्।) अनुरागः। इति हेमचन्द्रः॥

अनुरागः, पुं, (अनु + रञ्ज + भावे घञ्।) प्रीतिः। आसक्तिः। तत्पर्य्यायः। रतिः २ रागः ३ अनुतिः ४। इति हेमचन्द्रः॥
("कपटकितेन प्रथयति मय्यनुरागं कपोलेन"। इति शाकुन्तले।)

अनुरागी, [न्] त्रि, (अनु + रञ्ज + कर्त्तरि घिनुण् कुत्वं निपातनात् नलोपश्च।) अनुरागविशिष्टः। अनुरक्तः। इति शब्दरत्नावली॥

अनुराधा, स्त्री, (राधां विशाखामनुगता, कुगतिप्रादयइति सूत्रेण समासः।) सप्तदशनक्षत्रं। तस्या रूपं। सर्पाकृतिसप्ततारात्मयं। इति कालिदासः। "बलिनिभताराचतुरश्रात्मकं"। इति दीपिकाटीका॥ अस्या अधिदेवता मित्रः। तत्र जातफलं। यथा,—
"सत्कीर्त्तिकान्तिश्च सदोत्सवः स्याज्ज्ञेता रिपूणाञ्च कलाप्रवीणः।
स्यात्सम्भवे यस्य किलानुराधा सम्पत्प्रमादौ विविधौ भवेतां॥"
इति कोष्ठीप्रदीपः॥

अनुरूपः, त्रि, (रूपमनुगतः प्रादिसमासः।) तुल्यरूपः। सदृशः। यथा,—
"देवानामनुरूपा हि चरन्त्येते महीतले"।
इति रामायणं॥ (तुल्यगुणः। योग्यः।
"तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः"।
इति रघुवंशे।)॥

अनुरोधः, पुं, (अनु + रुध् + घञ्।) आराधादेरिष्टसम्पादनं। उपरोधः। ("तदनुरोधात् कठोरगर्भामपि बधूं जानकीं विसृज्य गुरुजनस्तत्र गतः"। इति उत्तरचरिते।) तत्पर्य्यायः। अनुवर्त्तनं २। इत्यमरः॥

अनुलापः, पुं, (अनु वारं वारं लपनं, अनु + लप् + भावे घञ्।) पुनः पुनः कथनं। पुनरुक्तिः। इत्यमरः॥

अनुलेपनं, क्ली, (अनु + लिप् + भावे ल्युट्।) गात्रे गन्धद्रव्यादिलेपनं। तद्द्रव्यञ्च। तस्य गुणाः। प्रीत्योजःशुक्रवृद्धिकारित्वं। घर्म्मदौर्गन्ध्यतन्द्रातापश्रमनाशित्वञ्च। इति राजवल्लभः॥ ("निरस्तमाल्याभरणानुलेपनाः"। इति ऋतुसंहारे।)

अनुलोमः, पुं, (अनुपूर्ब्बात् लोमशब्दात् अच्, प्रत्यन्वेति अव्।) यथाक्रमं। अविलोमः। यथा,—
"वर्णमाला समाख्याता अनुलोमविलोमिका"।
इति तन्त्रसारे नारदवचनं॥ (क्रमानुगतः। अनुकूलः।
"जड़ानप्यनुलोमार्थान् प्रवाचः श्रुतिनां गिरः"।
इति शिशुपालवधे।)

अनुलोमजः, त्रि, (अनुलोमेन यथाक्रमेण जातः, अनुलोम + जन + डः, उपपदसमासः)। अनुलोमजातः। अप्रतिलोमजः। यथा। ब्राह्मणात् क्षत्रियागर्भजातः। क्षत्रियात् वैश्यायां जातः। इत्यादि उत्तमादधमायां जातः। यथा,—
"सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः।
अन्योऽन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः"॥
इति मनुः॥

अनुवत्सरः, पुं, (अनुकूलोवत्सरः, दानादिविशेषाय।) वर्षः। इति हेमचन्द्रः॥ संवत्सरादिपञ्चकान्तर्गतवत्सरविशेषः। अस्मिन् वर्षे धान्यदाने महाफलं। शुक्राब्दात् पञ्चभिर्हृते यः शेषस्तिष्ठति तेन एकादिक्रमेणार्स-परि-इदा-अनु-उदा-पूर्ब्बकवत्सरसंज्ञका वत्सरा भवन्ति। इति मलमासतत्त्वं॥

अनुवर्त्तनं, क्ली, (अनु + वृत् + भावे ल्युट्।) अनुरोधः। इत्यमरः॥ व्याकरणमते पूर्ब्बसूत्रस्थितपदादेरनुवृत्तिः॥ (पश्चादगमनं। अनुसरणं।
"इदानीं तदाज्ञानुवर्त्तनं उचितम्"। इति हितोपदेशः।)

अनुवाकः, पुं, (अनूच्यते अनु + वच् + घञ्, कुत्वं।) ऋग्यजुःसामसमूहः। इत्यमरः॥ वेदविशेषः। इति सुभूतिः॥ ("जेतुं जैत्रानथ खलु जपन् सूक्तसामानुवाकान्"। इति महावीरचरिते।)

अनुवादः, पुं, (अनु + वद् + घञ्।) कुत्सितार्थवाक्यं। इति शब्दरत्नावली॥ पुनरुक्तिः। उक्तस्य पुनः कथनं। यथा,—
"विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्ज्ञानादर्थवादस्त्रिधा मतः"॥
इति शुद्धितत्त्वटीका॥ वाचारम्भनमात्रं। यथा,—
"विनानुवादं न च तन्मनीषितं
सम्यग्यतस्यस्यतसुपाददत् पुमान्"।
इति श्रीभागवतं॥

अनुवासनं, क्ली, (अनु + वास + सौरभ्ये भावे ल्युट्।) स्नेहनं। धूपनं। इति हेमचन्द्रः॥ स्नेहवस्तिः। यथा,—
"अथानुवासनं स्नेहवस्तिधूपनयोरपि"।
इति मेदिनी॥
"द्विधा वस्तिः परिज्ञेयो निरूहश्चानुवासनं।
कषायाद्यैर्निरूहः स्यात् स्नेहाद्यैरनुवासनं"॥
इति वैद्यकं॥

अनुवृत्तिः स्त्री, (अनु + वृत् + क्तिन्।) अनुवर्त्तनं। अनुरोधः। इति। हेमचन्द्रः। व्याकरणमते,—
"पूर्ब्बसूत्रस्थितपदस्य परसूत्रेष्वपस्थितिः"। तत्पर्य्यायः। अधिकारः २। सा त्रिविधा यथा,—
"सिंहावलोकितास्यस्य मण्डूकप्लुतिरेव च।
गङ्गास्रोत इति ख्यातः अधिकारास्त्रयो मताः"॥
सिंहावलोकितो यथा। वावगोर्दान्ते इत्यस्मात् दान्त इति पदस्य ऋत्यगित्यन्तेष्वपस्थितिः॥ मण्डूकप्लुतिर्यथा। टा ङिस् ङे ङसोत्यस्मात् अत इति पदस्य आङ्गिमभवीत्यत्रोपस्थितिः॥ गङ्गास्रोतो यथा। ङेः सि औ जसित्यस्मात् ङेरिति पदस्य तद्धितपर्य्यन्तेष्वपस्थितिः॥ इति मुग्धबोधटीकायां दुर्गादासः॥ (अनुवर्त्तनं। अनुसरणं। अनुमोदनं। अनुरञ्जनं।
"असकृत्साभ्यासरतिं विचिन्त्यतं
तवानुवृत्तिं न च कर्त्तुमुत्सहे"।
इति कुमारसम्भवे। अनुकरणं। "यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा"। इति साहित्यदर्पणे।
"कान्तानुवृत्तिचातुर्य्यमपि अनुशिक्षितं वक्त्रेण"।
इति उत्तरचरिते।)

अनुव्रजनं, क्ली, (अनु + व्रज + भावे ल्युट्।) अनुव्रज्या। गृहागतानां स्निग्धानां गमनसमये क्रियद्दूरपर्य्यन्तपश्चाद्गमनरूपशिष्टाचारः। आग बाड़ान इति भाषा। यथा,—
"आयान्तमग्रतो गच्छेत् गच्छन्तं तमनुव्रजेत्"।
इति तन्त्रसारे निगमकल्पद्रुमः॥

अनुव्रज्या, पुं, (अनु + व्रज + भावे क्यप्, ग्रयं ह्रस्वमनुगतः प्रादिसमासः, ह्रस्वानुगते चि।) दीर्घदेशः। पूर्ब्बवैरता। अनुतापः। इत्यमरः।("अनुव्रज्यादनुरोदिमि चोत्सुकः"। "अनुव्रज्यदुःखायेदं हृतहृदयं सम्प्रति विबुद्धम्"। इति शाकुन्तले।) देषः। अनुबन्धः। इति मेदिनी॥ (क्रोधः। पश्चात्तापादिकारणात् विप्रतिपत्तिः। यथा,—
"क्रयविक्रयानुव्रज्यो विवादः स्वामिपालयोः"।
इति मनुः।)

अनुव्रज्यागा, स्त्री, (अनु + व्रज्या + आगच्, अनुतापकर्त्तरि त्रि।) परकीयान्तर्गतनायिकाभेदः। तस्या लक्षणं। इष्टहानिजनितानुतापवती। सा त्रिधा। वर्त्तमानसङ्केतस्थानविघट्टनेन १ भाविसङ्केतस्थानाभावज्ञया २ स्वाधिष्ठितसङ्केतस्थाने भर्त्तुर्गमनानुमानेन ३। इति रसमञ्जरी।

अनुव्रज्यी, स्त्री, (अनुव्रज्यते अनुतप्यतेऽनया, अनु + व्रज्या + अच्, गौरादित्वात् ङीष्।) क्षुद्रशोगान्तर्गतपादरोगविशेषः। तस्य लक्षणं। यथा,—
"गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थितां।
पादस्यानुव्रज्यीं तान्तु विद्यादन्तःप्रपाकिनीं"॥
इति माधवकरः॥ तच्चिकित्सा यथा,—
"हरेदनुव्रज्यीं वैद्यः क्रियया श्लेष्मविध्नेः"।
इति भावप्रकाशः॥

अनुव्रज्यी, [न्] त्रि, (अनु + व्रज्या + इनि।) दण्डवत्प्रणामैश्चरणमूले शेते यः। यथा। "यं संपद्य जहात्यजामनुव्रज्यी सुप्तः कुजायं यथा"। इति श्रीभागवतं॥ (अत्यर्थमासक्तः। अनुरक्तः। पश्चात्तापयुक्तः। अनुशोचनपरः।)

अनुव्रज्यः, पुं, (अनुव्रज्यति हिनस्ति, अनु + व्रज् + पचाद्यच्।) राक्षसः। इति शब्दमाला॥

अनुशासनं, क्ली, (अनु + शास् + भावे ल्युट्।) आदेशः। आज्ञा। यथा,—
"इत्येते ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनं"।
इति श्रीभागवतं॥ श्रुत्यादनं। यथा नामलिङ्गानुशासनमित्यमरः॥ (उपदेशः। नियोगकरणं।
"अहिंसयैव भूतानां कार्य्यं श्रेयोनुशासनम्"।
इति मनुः।)

अनुशीलनं, क्ली, (अनु पौनःपुन्येन शीलनमभ्यासः, अनु + शीलि + भावे ल्युट्।) पुनःपुनरभ्यासः। मुहुः सेवनं। यथा,—
"आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा"।
इति भक्तिरसामृतसिन्धुः॥

अनुशोचनं, क्ली, (अनु + शुच् + भावे ल्युट्।) अनुशोचना। तत्पर्य्यायः। मन्युः २ शोकः ३ शुक् ४। इति जटाधरः॥

अनुषङ्गः, पुं, (अनु + सन्ज + भावे घञ्।) कारुण्यं। दया। इति हलायुधः॥ एकान्वितपदस्यान्यान्वयः। यथा। कोषोबलस्यापहृतमित्यादौ बलान्वितापहृतस्य कोषेऽन्वयः॥ न्याये उपनयस्यायम्यदस्य निगमनेऽनुषङ्गः। यथा। वह्नियाप्यधूमवांश्चायं तस्माद्वह्निमान्॥ प्रसङ्गः। अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः। यथा,—
"नित्यक्रियां तथा चान्ये ह्यनुषङ्गफलां श्रुतिं"।
इति स्मृतिः॥

अनुष्टुप्, [भ्] स्त्री, (अनु सततं स्तुभ्यतेऽनया, अनु + स्तुभ + क्विप् यत्वं।) सरस्वती। इति शब्दरत्नावली॥ अष्टाक्षरपदं छन्दः। सा तु समार्द्धसमविषमवृत्तभेदेन त्रिधा तत्र श्लोकस्य प्रायिकप्रयोगः। तस्य लक्षणं।
"पञ्चमं लघु सर्व्वत्र सप्तमं द्वितुर्थयोः।
गुरु षष्ठन्तु पादानां श्लोकेष्वनियमो मतः"॥
इति छन्दोमञ्जरी॥ अस्याः प्रस्तारः २५६। इति पिङ्गलः॥

अनुष्ठानं, क्ली, (अनु + स्था + भावे ल्युट्)। कर्म्मारम्भः। करणं। यथा,—
"श्रुता श्रीभवदेवेन कर्म्मानुष्ठानपद्धती"।
(उपपादनं। व्यवस्थापनं। उपयोगिता। आनुरूप्यं। कार्य्यकरणं। अभ्यासः। अनुशीलनं। चर्चा।
"उपपत्तिपरित्यक्तशास्त्रानुष्ठानमोहितैः"।
इति राजतरङ्गिणी।
"अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रितः"।
इति मनुः। शास्त्रविहितकर्त्तव्यादिसम्पादनम्।
"किन्त्वनुष्ठाननित्यत्वं स्नातन्त्र्यमपकर्षति"।
इति उत्तरचरिते।)

अनुष्णं, क्ली, (न उष्णं, नञ्समासः।) उत्पलं। इति राजनिर्घण्टः॥

अनुष्णः, त्रि, (न उष्णः, नञ्समासः।) अशीतः। इत्यमरः॥ उष्णभिन्नः। शीतलः। बहुव्रीहौ तु अन्यार्थः॥

अनुष्णवल्लिका, स्त्री, (अनुष्णा शीतला वल्लीव, कर्म्मधारयः।) नीलदूर्व्वा। इति राजनिर्घण्टः॥

अनुसन्धानं, क्ली, (अनु + सम् + धा भावे ल्युट्।) अन्वेषणं। चेष्टा। इत्यादिकाव्यानुसन्धानबलादिति काव्यप्रकाशः॥

अनुसारः, पुं, (अनु + सृ + भावे घञ्।) अनुसरणं। अनुयानं। अनुक्रमः। यथा,—
"अथ लौहविधिं वक्ष्ये लौहशास्त्रानुसारतः"।
इति वैद्यकसुखबोधः॥

अनुहारः, पुं, (अनु + हृ + घञ्।) अनुकारः। सदृशीकरणं। सदृशरूपवेशभाषाद्याविष्करणं। इत्यमरः॥ उपमा। इति हेमचन्द्रः॥
("तद्भूषानुहारस्तु हेतौ सत्यप्यतद्गुणः"।
इति साहित्यदर्पणे।)

अनुक्षणं, क्ली, (क्षणे क्षणे वीप्सायामव्ययीभावः।) प्रतिक्षणं। सर्व्वदा। अनवरतं। क्षणशब्दस्य वीप्सार्थानुपसर्गेणाव्ययीभावसमासः॥

अनूकः, क्ली, (अनु + उच् + घञर्थे कः, न्यङ्क्वादीनाञ्च इति कुत्वम्।) कुलं। वंशः। शीलं। स्वभावः। इति मेदिनी॥

अनूकः, पुं, (अनु + उच् + घञर्थे कः, न्यङ्क्वादीनाञ्च इति कुत्वम्।) गतजन्म। पूर्व्वजन्म। इति मेदिनी॥
(वंशः। कुलं। स्वभावः। शीलं।
"अनूकं तु कुले शीले पुंसि स्यात् गतजन्मनि"।
इति मेदिनी।)

अनूचानः, पुं, (अनु + वच् + लिट् तस्य कानच्।) साङ्गवेदविच्छ्रोत्रियः। शिक्षादिषडङ्गसहितवेदवेत्ता। इत्यमरः॥
("इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः"।
इति कुमारसम्भवे।
"ऋषयश्चक्रिरे धर्म्मं योऽनूचानः स नो महान्"।
इति मनुः।)

अनूचानः, त्रि, (अनु + वच् + लिट् तस्य कानच्। वेदस्यानुवचनं कृतवान्, उपेयिवानित्यादिना साधुः।) विनीतः। सविनयः। इति मेदिनी॥
(साङ्गवेदविच्छ्रोत्रियः;
"अनूचानो विनीते स्यात् साङ्गवेदविच्छ्रोत्रियः"।
इति मेदिनी॥
शिक्षाकल्पादिषडङ्गसहितवेदाध्ययनकारी, यथा,
"इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः"।
इति कुमारसम्भवे।
"ऋषयश्चक्रिरे धर्म्मं योऽनूचानः स नो महान्"।
इति मनुः)॥

अनूढः, त्रि, (वह + कर्म्मणि क्तः संप्रसारणं ततो नञ्समासः।) अविवाहितः। आइबड़ इति भाषा। यथा,—
"परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात्"।
इत्यमरः॥

अनूद्यं, त्रि, (अनु + वद् + क्यप् संप्रसारणं।) अनुवाद्यं। अनुवदनीयं। अवदनीये क्लमर्थः। इति संक्षिप्तसारव्याकरणं॥

अनूनं, त्रि (न ऊनं, नञ्समासः।) अखण्डं। समग्रं। पूर्णं। इति जटाधरः॥ (अहीनः। अन्यूनः।
"इमामनूनां सुरमेरवेहि"। इति रघुवंशे।)

अनूनकं, त्रि, (न ऊनं, नञ्समासः, ततः स्वार्थे कन्।) सकलं। पूर्णं। अखण्डं। इत्यमरः॥

अनूपं, त्रि, (अनुगता आपोऽत्र, समासान्त अच्, अस्य उत्वं।) जलबहुलदेशः। जलप्लावितस्थानं। तत्पर्य्यायः। जलप्रायं २। इत्यमरः॥ अस्य गुणाः। शीतलत्वं। स्निग्धत्वं। वातश्लेष्मकारित्वं। गुरुत्वञ्च। इति राजवल्लभः॥ एतद्देशीयजलगुणाः। गुरुत्वं॥ घनत्वं। पिच्छिलत्वं। मधुरत्वं। श्लेष्मजनकत्वं। स्निग्धत्वं। अग्निनाशित्वं। प्रमेहगलगण्डश्लीपदच्छर्द्दिप्रभृतिरोगकारित्वञ्च। इति राजनिर्घण्टः।

अनूपः, पुं, (अनुगता आपोऽत्र, प्रादिभ्यो धातुजस्य वाच्योवाचोत्तरपदलोपश्चेति बहुव्रीहिः) महिषः। इति त्रिकाण्डशेषः॥ (जलप्रायः। जलबहुलः। बहुम्बुयुक्तः। "अनूपो महिषे नाम्बुप्रायदेशे तु वाच्यवत्"। इति मेदिनी॥)

अनूपजं, क्ली, (अनूपे जलप्रायदेशे जायते, अनूप + जन् + डः उपपदसमासः।) आर्द्रकं। इति राजनिर्घण्टः॥

अनूपदेशः, पुं, (अनूपः जलप्रायः देशः कर्म्मधारयः।) जलप्रायदेशः। तस्य लक्षणं यथा,—
"नदीमल्वलशैलाद्यपुल्लोत्पलकुलैर्युतः।
हंससारसकारण्डचक्रवाकादिसेवितः॥
सरोवराहमहिषशरभोद्दिकुलाकुलः।
प्रभूतद्रुममुख्याढ्यो नानाशस्यफलान्वितः॥
अनेकशालिकेदारकदलीक्षुविभूषितः।
अनूपदेशो ज्ञातव्यो वातश्लेष्मभयार्त्तिमान्"॥
इति भावप्रकाशः॥

अनूरुः, पुं, (नास्ति ऊरू यस्य सः।) सूर्य्यसारथिः। अरुणः। इत्यमरः॥ (ऊरुहीनः।)॥

अनूरुसारथिः, पुं, (अनूरुः अरुणः सारथिः रथचालको यस्य सः।) सूर्य्यः। यथा,—
"गतं तिरश्चीनमनूरुसारथेः"।
इति माघः॥

अनृजुः त्रि, (न ऋजुः सरलः, नञ्समासः।) असरलः। शठः। इत्यमरः॥
("न प्राणिपादचपलो न नेत्रचपलोऽनृजुः"।
इति मनुः।)

अनृशी, [न्] त्रि, (ऋणं विद्यतेऽस्य, ऋण + इनि ऋणी, नञ्समासः।) अनृणी। अधारी। यथा,—
"एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा सोऽनृशी भवेत्"।
इत्याह्निकतत्त्वं॥ ऋणाभावविशिष्टः। यथा यक्ष उवाच।
"को मोदते किमाश्चर्य्यं कः पन्थाः का च वार्त्तिका
वद मे चतुरः प्रश्नान् मृता जीवन्तु बान्धवाः"॥
युधिष्ठिर उवाच।
"पञ्चमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे।
अनृशी चाप्रवासी च स वारिचर मोदते॥
अहन्यहनि भूतानि गच्छन्तीह यमालये।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्य्यमतःपरं॥
तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणं।

धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥
अस्मिन् महामोहमये कटाहे
सूर्य्याग्निना रात्रिदिवेन्धनेन ।
मासर्त्तुदर्व्वीपरिघट्टनेन
भूतानि कालः पचतीति वार्त्ता" ॥
इति मुद्गङ्कितमहाभारते वनपर्व्वणि ३१२ अध्यायः ॥ अपि च ।
"देवानामनृणो जन्तुर्यज्ञैर्भवति मानवः" ।
इत्यादि शुद्धतत्त्वं ।

अनृतं, क्ली, (न ऋतं नञ्समासः ।) क्षुधिः । मिथ्या । इत्यमरः ॥ विवाहादिपञ्चकेष्वनृतं न पापजनकं । यथा,—
"विवाहकाले रतिसंप्रयोगे
प्राणात्यये सर्व्वधनापहारे ।
विप्रस्य चार्थे ह्यनृतं वदेत
पञ्चानृतान्याऽऽहुरपातकानि" ॥
इति महाभारते कर्णपर्व्वणि अर्জुनं प्रति श्रीकृष्णवचनं ॥

अनेकं, त्रि, (एकस्मात् अन्यत् नञ्समासः ।) एकातिरिक्तसंख्यानं तद्विशिष्टश्च । बहु । यथा,—
"अनेकराजन्यरथाश्वसङ्कुलं" ।
इति भारविः ॥

अनेकजः, पुं, (अनेकं जायते, अनेक + जन् + डः उपपदसमासः ।) पक्षी । इति त्रिकाण्डशेषः ॥ बहुजाते त्रि ॥

अनेकधा, अ, (अनेक + प्रकारार्थे धा ।) अनेकप्रकारं । बहुधा । यथा,—
"पाटीसूत्रोपमं बीजं गूढमित्यवभाषते ।
नास्ति गूढमगूढानां नैव योढेत्यनेकधा" ॥
इति लीलावती ॥ अनेकवारार्थेऽपि क्वचित्प्रयोगः ॥

अनेकपः, पुं, (अनेकाभ्यां मुखशूकाभ्यां पिबति, अनेक + पा + कः, उपपदसमासः ।) हस्ती इत्यमरः ॥

अनेकाश्रितगुणः, पुं, (अनेकानि आश्रितः, द्वितीयाश्रितातीत इत्यादिना समासः, तादृशः गुणः कर्म्मधारयः ।) बहुनिष्ठगुणः । तद्यथा । संयोगः १ विभागः २ द्विपृथक्त्वादिः ३ एकत्वान्यसङ्ख्या ४ । इति सिद्धान्तमुक्तावली ॥
("संयोगश्च वियोगश्च सङ्ख्या द्वित्वादिकास्तथा ।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः" ।
इति भाषापरिच्छेदे ।)

अनेडमूकः, त्रि, (नास्ति एडः वधिरः मूकः वाक्शक्तिरहितश्च यस्मात् सः ।) धूर्त्तः । भ्रष्टः । श्रुतिवाग्विहीनः । इति मेदिनी ॥ काला बोबा इति भाषा ।

अनेहाः, [स्] पुं, (न हन्यते, न + हन् + असुन् एषोदरादित्वात् हन् स्थाने एहादेशः, ततः सौकृते अनङादेशः ।) कालः । समयः । इत्यमरः ॥
("तस्यूतस्यान्तिके दोहस्त्रिस्थानेहःप्रतीक्षिकः" ।
इति राजतरङ्गिणी ।)

अनैक्यं, क्ली, (न ऐक्य भावे ष्यञ् ।) ऐक्याभावः । अनेकता । एकस्य भावः ऐक्यं पश्चान्नञ्समासः ॥

अनो, अ, (न नी डो) निषेधार्थः । अभावः । इत्यमरटीकायां नीलकण्ठः ॥

अनोकहः, पुं, (अनसः शकटस्य अकं गमनं षष्ठीतत्, तत् हन्ति अनोक + हन् + डः ।) वृक्षः । इत्यमरः ॥
("एकस्तुषारैर्गिरिनिर्झराणा-
मनोकहाकम्पितपुष्पगन्धी" ।
इति रघुवंशे ।)

अनृच उ गतिपूजनयोः । इति मुग्धबोधे वोपदेवः ॥

अनृच उ पूजने । गमने । स्निग्धोक्तौ । इति कविकल्पद्रुमः ॥ उ अञ्चित्वा अङ्क्त्वा । स्निग्धोक्तिरव्यक्तशब्दः । इति दुर्गादासः ॥

अनृज क व्यक्तौ । इति कविकल्पद्रुमः ॥ व्यक्तिरिह विशेषणं । क अञ्चयति वुद्धिं सुधीः । विशिनष्टीत्यर्थः । इति दुर्गादासः ॥

अनृज उ ध ञि व्यक्तौ । गतौ । अञ्चखे । इति कविकल्पद्रुमः ॥ उ अञ्जिष्यति अङ्क्ष्यति । ध अनक्ति । ञि अक्तोस्ति । व्यक्तिः स्फुटीकरणं ।
"शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रितयेऽपि योग्यतां" ।
इति माघः ॥ अनक्ति गात्रं तैलेन जनः । इति दुर्गादासः ॥

अन्तं, क्ली, (अम् + तन् ।) स्वरूपं । स्वभावः । इति मेदिनी त्रिकाण्डशेषश्च ।

अन्तं, क्ली, पुं, (अम् + तन् ।) शेषः । इति मेदिनी ॥ तत्पर्य्यायः । जघन्यं २ चरमं ३ अन्त्यं ४ पाश्चात्यं ५ पश्चिमं ६ । इत्यमरः ॥

अन्तः, पुं, (अम् + तन् ।) नाशः । इत्यमरः ॥ स्वरूपः । प्रान्तः । सीमा । निश्चयः । अवयवः । इति हेमचन्द्रः ॥

अन्तः, त्रि, (अम् + तन् ।) अन्तिकः । निकटः । इति मेदिनी ॥ अतिमनोहरः । इति विश्वः ॥

अन्तःकरणं, क्ली, (अन्तर्मध्यवर्त्ति करणं ज्ञानसाधनं, कर्म्मधारयः, कृ + करणे ल्युट् ।) अन्तरिन्द्रियं । धीन्द्रियं । तत्पर्य्यायः । मनः २ निगुः २ । इति त्रिकाण्डशेषः ॥ अस्य कार्य्यभेदान्नामभेदमुक्तवा, यथा,—
"मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरं ।
संशयो निश्चयो गर्व्वः स्मरणं विषया अमी" ॥
इति वेदान्तः ॥ (अस्योत्पत्तिर्यथा,—"मिलितैस्तु तैः अन्तःकरणमेकं स्यात्" इति । तैः पञ्चभूतस्यसत्त्वांशैर्मिलितैः अन्तःकरणं भवतीत्यर्थः ।)
"धनुर्भृतोऽप्यस्य दयार्द्रभाव-
माख्यातमन्तःकरणैर्विभूतैः" ।
इति रघुवंशे ।)

अन्तःकुटिलः, पुं, (अन्तरभ्यन्तरे कुटिलः वक्रः ।) शठः । इति राजनिर्घण्टः ॥ कुटिलान्तःकरणे त्रि ॥

अन्तःपुरं, क्ली, (अन्तर्मध्यवर्त्ति पुरं गृहं, कर्म्मधारयः ।) राज्ञः स्त्रीगृहं । तत्पर्य्यायः । अवरोधनं २ अवरोधः ३ शुद्धान्तः ४ । इत्यमरः ॥ अन्तःपुरादयो राजदारेष्वपि तात्स्थ्यात् वर्त्तन्ते । यथा । "शुद्धान्तसम्भोगनितान्ततुष्टे" । इति नैषधम् । इति भरतः ॥ "दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा" । इत्यभिज्ञानशकुन्तलम् ॥

अन्तःपुराध्यक्षः, पुं, (अन्तःपुरस्य अध्यक्षः रक्षकः, षष्ठीतत्पुरुषः ।) राज्ञामन्तःपुररक्षकः । तल्लक्षणं यथा,—
"वृद्धः कुलोद्गतः शुद्धः पिङ्गपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते" ॥
इति युक्तिकल्पतरुः ॥

अन्तःसत्वा, स्त्री, (अन्तर्मध्ये सत्त्वं प्राणी सारो वा यस्याः सा, स्त्रियां टाप् ।) भल्लातकः । इति शब्दचन्द्रिका ॥ गर्भवती । अन्तरुदरमध्ये सत्त्वं प्राणी यस्याः सा ॥

अन्तःस्वेदः, पुं, (अन्तः मध्ये स्वेदः मदजलं यस्य सः ।) हस्ती । इति त्रिकाण्डशेषः ॥

अन्तकः, पुं, (अन्तं विनाशं करोति, अन्त + कृ + ण्वुल् ।) यमः । इत्यमरः । ("ऋषिप्रभावात् मयि नान्तकोऽपि प्रभुः प्रहर्त्तुं किमुतान्यहिंसाः" । इति रघुवंशे ।)

अन्तगः, त्रि, (अन्तं पारं गच्छति, अन्त + गम् + डः, उपपदसमासः ।) अन्तगामी । पारगः । यथा, "वेदान्तगोब्राह्मणगः स्यात् क्षत्रियो विजयी भवेत्" इति महाभारते विष्णुसहस्रनामफलं ॥ मृतः । अन्तं नाशं गच्छतीति ॥

अन्ततः, [स्] अ, (अन्त + तस् ।) सम्भावना । अवयवः । पञ्चम्यर्थः । शासनं । इति विश्वः ॥ (शेषादारभ्य । प्रान्तभागेन । अग्रभागेन ।
"वैश्योऽद्भिः प्राशितास्याभिश्च शूद्रः स्पृष्टाभिरन्ततः" इति मनुः ।)

अन्तर्, अ, (अम् + अरन् तुडागमश्च ।) मध्यं । प्रान्तं । स्वीकारः । इति विश्वः ॥

अन्तरं, क्ली, (अन्तं याति ददाति, अन्त + या + कः, उपपदसमासः ।) अवकाशः । अवधिः । परिधानं । अन्तर्धानं । भेदः । तादर्थ्यं । अवसरः । मध्यं । अन्तरात्मा । छिद्रं । आत्मीयः । विना । बहिः । इत्यमरः ॥ सदृशः । इति तट्टीका मेदिनी च ॥* ॥ अवकाशे यथा । "मृणालसूत्रान्तरमप्यलभ्यं" । इति कुमारसम्भवे ॥ अवधौ यथा । "निरन्तराभ्यन्तरवातरन्ध्रिषु" ॥ परिधाने यथा । अन्तरे शाटकाः परिधानीया इत्यर्थः ॥ अन्तर्द्धौ यथा, "पर्व्वतान्तरितो रविः" ॥ भेदे यथा,—
"यदन्तरं सर्षपशैलराजयो-
र्यदन्तरं वायसवैनतेययोः" ।
इति रामायणं ॥ तादर्थ्ये यथा । त्वामन्तरेण ऋणं गृहीतं त्वदर्थमित्यर्थः ॥ छिद्रे यथा । "प्रहरेदन्तरे रिपुं" ॥ आत्मीये यथा । "अयमत्वन्तरो मम" ॥ विनार्थे यथा । "हरे त्वदालोकनमन्तरेण" ॥ बहिरर्थे यथा । अन्तरे षण्डालस्य वाह्या इत्यर्थः ॥ अवसरे यथा । "अथान्तरे च जुजटा कुलवर्त्मपातेत्यादि" ॥ मध्ये यथा । "आवयोरन्तरे जाताः पर्व्वताः परितो द्रुमाः" ॥ सदृशे

यथा "इकारस्य घकारोऽन्तरतमः"। इति भरतः॥

अन्तरङ्गः, त्रि, (अन्तः सदृशं अङ्गं यस्य सः।) आत्मीयः। स्वसम्पर्कः। यथा,—

"चरमगिरिकुरङ्गी पृष्ठकण्डूयनेन
क्षपिति सुखमिदानीमन्तरङ्गः कुरङ्गः"।

इति कालिदासः॥

अन्तरा,व्य, (अन्तरेति अन्तर + इन् + डा, टिभागलोपः।) वर्ज्जनं। विना। यथा,—

("न द्रक्ष्यामः पुनर्जातु धार्म्मिकं राममन्तरा"। इति रामायणे।) मध्यं। निकटं। इति मेदिनी॥

अन्तरापत्या, स्त्री, गर्भिणी। अन्तरे उदरमध्ये अपत्यं यस्याः सा॥

अन्तरायः, पुं, (अन्तरं व्यवधानं एति, अन्त + इन् + अच्, षष्ठीतत्पुरुषः।) विघ्नः। इत्यमरः॥

("स चेत् स्वयं कर्म्मसु धर्म्मचारिणां
त्वमन्तरायो भवसि च्युतो विधिः"।

इति रघुवंशे।)

अन्तरालं, क्ली, (अन्तरा मध्यं लाति, अन्तरा + ला + कः।) मध्यप्रदेशः। अभ्यन्तरं। इत्यमरः॥

("मुञ्चन्तरालमुभयत्रगिरिः सवितुश्च योषिदमितीत दृशा"। इति माघः। "उदेति भानुर्गगनान्तरालें"। इति पद्यमाला।)

अन्तरालकं, क्ली, (अन्तराल + स्वार्थे कन्।) अभ्यन्तरं। इति राजनिर्घण्टः॥

अन्तरितं, त्रि, (अन्तरं इतं प्राप्तं द्वितीयातत्, अथवा अन्तरं व्यवधानं जातमस्य, अन्तर + तारकादित्वात् इतच्।) अन्तर्द्धानप्राप्तं। व्यवहितं। तत्पर्य्यायः। प्रच्छन्नं २। इति त्रिकाण्डशेषः। व्यवकलितार्थः। वाकि इति भाषा। इति लीलावती॥

अन्तरिक्षं, क्ली, (अन्तर्मध्ये ऋक्षाणि नक्षत्राणि यस्य तत्, एषोदरादित्वात् ऋकारस्य इकारः। अन्तरीक्षमिति पाठे ऋकारस्य ईकारः।) अन्तरीक्षं। आकाशं। इति छान्दसं। इत्यमरटीकायां पुरुषोत्तमजातरूपसभूतिरायादयः॥

("अन्तरिक्षगतांश्चैव मुनीन् देवांश्च पीड़येत्"। इति मनुः।)

अन्तरीपं, क्ली, पुं, (अन्तर्गता आपोऽत्र, तत्, समासान्तः अः, इन्तरुपसर्गेभ्य इति अपईदादेशः।) द्वीपं। इत्यमरः॥

अन्तरीयं, क्ली, (अन्तरस्य परिधानस्य इदं अन्तर् + छः तस्य ईयः।) अधोवस्त्रं। परिधानवस्त्रं। इत्यमरः॥

("नाभौ हृतश्च यदस्त्रं आच्छादयति जानुनी। अन्तरीयं प्रशस्तं तत् अच्छिन्नमुभयोस्तयोः"॥ इत्येवं लक्षणं)

अन्तरीक्षं, क्ली, (अन्तर्मध्ये ऋक्षाणि नक्षत्राणि यस्य तत्, एषोदरादित्वात् ऋकारस्य ईकारः।) गगनं। इत्यमरः। अभ्रकधातुः। इति राजनिर्घण्टः॥

अन्तरीक्षजलं, क्ली, (अन्तरीक्षस्य आकाशस्य जलं षष्ठीतत्।) आकाशजलं। दिव्योदकं। इति राजनिर्घण्टः॥

अन्तरे, व्य (अन्तरेति अन्तर + इङ् + विच् तस्य लोपः।) मध्यं। अभ्यन्तरं। इत्यमरः॥

अन्तरेण, व्य (अन्तरेति अन्तर + इण + णः तस्य नेत्वं एषोदरादित्वात्।) मध्यं। विना। व्यतिरेकः। इत्यमरः॥

अन्तर्गण्डः, त्रि, (अन्तर्मध्ये गण्डुः ग्रीवाप्रदेशजातगलमांसपिण्डमिव निरर्थकः।) निरर्थकः। वृथा। इति हेमचन्द्रः॥

("काव्यान्तर्गण्डभूता या सा तु नेह प्रशस्यते"। इति साहित्यदर्पणे।)

अन्तर्गतं, त्रि, (अन्तः अन्तःकरणात् गतं, अथवा अन्तर्मध्ये गतं प्राप्तम्।) विस्मृतं। मध्यप्राप्तं। इति हेमचन्द्रः॥("अन्तर्गतश्च ग्रामे"। इति मनुः॥ "सागरान्तर्गताः केचित् केचित् पर्व्वतमाश्रिताः"। इति रामायणम्। आभ्यन्तरः। हृदयमध्यस्थितः। अन्तःकरणस्थः। "अन्तर्गतप्रार्थनमन्तिकस्थं"। इति शाकुन्तले।

"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः"॥
इति मनुः।)

अन्तर्गृहं, क्ली, (गृहस्य मध्ये, अव्ययीभावः।) गृहमध्यं। इति नानार्थकोषशब्दार्णवे अमरः॥ घरेर भितर इति भाषा। (वाराणसीक्षेत्रे सप्तावरणवति स्थानविशेषे।

"अन्यस्थाने कृतं पापं वाराणस्यां विनश्यति।
वाराणस्यां कृतं पापं पञ्चक्रोश्यां विनश्यति॥
पञ्चक्रोश्यां कृतं पापं अन्तर्गृहे विनश्यति"।
इति काशीमाहात्म्यम्।)

अन्तर्जठरं, क्ली, (जठरस्य उदरस्य मध्ये अव्ययीभावः।) कुक्षिमध्यं। कोष्ठं। इत्यमरः॥

अन्तर्दधनं, क्ली, (अन्तर्मध्ये दध्यते मत्तता क्रियतेऽनेन, अन्तर् + दध् + करणे ल्युट्।) सुरावीजं। इति शब्दचन्द्रिका॥

अन्तर्दाहः, पुं, (अन्तर्मध्ये दाहः सन्तापः।) कोष्ठसन्तापः। शरीराभ्यन्तरज्वालः। इति राजनिर्घण्टः॥

अन्तर्द्धा, स्त्री, (अन्तर्द्धानं, अन्तर् + धा + भावे अङ् स्त्रियां टाप्।) अन्तर्द्धानं। इत्यमरः॥

अन्तर्द्धानं, क्ली, (अन्तर्धानं, अन्तर् + धा + भावे ल्युट्।) आच्छादनं। इति शब्दरत्नावली॥ तत्पर्य्यायः। अन्तर्द्धा २ व्यवधा ३ अन्तर्द्धिः ४ अपवारणं ५ अपिधानं ६ तिरोधानं ७ पिधानं ८ छदनं ९। इत्यमरः॥

("अन्तर्द्धानं स्मृतिः कान्तिर्दृष्टिः श्रोतृत्वता तथा" इति याज्ञवल्क्यः।)

अन्तर्द्धिः, पुं, (अन्तर्द्धानम् अन्तर् + धा + भावे किः।) अन्तर्द्धानं। इत्यमरः॥

अन्तर्द्वारं, क्ली, (अन्तर्गृहमध्यस्थं द्वारं।) प्रकोष्ठद्वारं। इति भरतः॥ गृहाभ्यन्तरद्वारं। गृहाभ्यन्तरप्रकोष्ठादिद्वारं जालद्वारं वा। इति स्वामी॥ तत्पर्य्यायः। प्रच्छन्नं २। इत्यमरः॥ पक्षद्वारं खड़्किकाद्वारं। यथा,—

"प्रच्छन्नमन्तर्द्वारञ्च पक्षद्वारं तदुच्यते"।
इति श्रीधरस्वामी॥

अन्तर्भूतः, त्रि, (अन्तर्मध्ये भूतः स्थितः, अन्तर् + भू + कर्त्तरि क्तः।) गुणीभूतः। अन्तःस्थः। अन्तरस्थः। अन्तर्गतः। यथा,—

"स एव भगवान् विष्णुरन्तर्भूतः सनातनः"।
इति पद्मपुराणे माघमाहात्म्यं॥

अन्तर्म्मनाः, [स्] त्रि, (बाह्यव्यापारशून्यतया अन्तर्गमनः चेतो यस्य सः।) दुर्म्मनाः। विमनाः। व्याकुलचेताः। इत्यमरः॥

अन्तर्यामी, [न्] पुं, (अन्तर्मध्ये यमयति स्वस्वकार्य्येषु इन्द्रियादीनि नियोजयति, अन्तर् + यम् + णिच् + उपपदसमासः।) अन्तःकरणनियामकः। तत्पर्य्यायः। आत्मा २ जीवः ३ पुरुषः ४ पुरुलः ५ ईश्वरः ६। इति त्रिकाण्डशेषः॥ विशुद्धसत्वप्रधानाज्ञानोपहितचैतन्यं। इति वेदान्तसारः॥ मनोगतज्ञे त्रि॥

("अन्तराविश्य भूतानि योबिभर्त्त्यात्मकेतुभिः। अन्तर्यामीश्वरः साक्षात् पातु नो यद्वशे स्फुटम्"।

अन्तर्वंशिकः, पुं, (वंशः स्तावलम्बनयष्टिर्विद्यतेऽस्य, वंश + ठक् तस्य इकः, अन्तः क्षपान्तःपुरे वंशिकः यष्टिधारी नियुक्तः पुरुषः।) अन्तःपुराधिकृतः। अन्तःपुराध्यक्षः। इत्यमरः॥

अन्तर्व्वत्नी, स्त्री, (अन्तर्गर्भमध्यस्थमपत्यं विद्यतेऽस्याः, अन्तर् + मतुप्, अन्तर्व्वत्पतिवतोर्नुक् इति ङीप्नुगागमौ।) गर्भिणी। इत्यमरः॥

("तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती।
सुतावसूत सम्पन्नौ कोषादण्डाविव स्थितिः"॥
इति रघुवंशे।)

अन्तर्व्वमिः, पुं, (अन्तः कुक्षिमध्यात् वमयति उद्गारयति अन्तर् + वम् + णिच् + इक् ह्यादिभ्य इति बाहुल्यात् इक्।) अपाकः। अजीर्णः। इति त्रिकाण्डशेषः॥

अन्तर्व्वाणिः, त्रि, (अन्तः अन्तःकरणे वाणी शास्त्रविहिता वाक् यस्य सः, ऋक्षः।) शास्त्रवित्। शास्त्रज्ञः। इत्यमरः॥

अन्तर्व्विगाहनं, क्ली, (अन्तर्मध्ये विगाहनं प्रवेशः, अन्तर् + वि + गाह् + ल्युट्।) प्रवेशनं। इति हेमचन्द्रः॥

अन्तर्व्वेदी, स्त्री, (अन्तः एथ्वीमध्यस्थतया वेदीव। अन्तर्वेदि इति पाठे अन्तर्मध्ये वेदिर्यत्र देशे सः।) ब्रह्मावर्त्तदेशः। गङ्गायमुनयोर्म्मध्यदेशः। आप्रयागहरिद्वारपर्य्यन्तदेशः। दोयाव इति पश्चिमदेशे ख्याता। तत्पर्य्यायः। शशस्थली २। इति त्रिकाण्डशेषः॥

अन्तर्हासः, पुं, (अन्तरव्यक्तोहासः हास्यं।) अव्यक्तहासः। गूढ़हास्यं। तत्पर्य्यायः। उद्दर्शनं २। इति त्रिकाण्डशेषः॥ तद्वति त्रि॥("ततोऽन्तर्हासविकासमुखः स तदुचितमाचचार"। इति पञ्चतन्त्रं। "सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे"। इति मेघदूतम्।)

अन्तर्हितं, त्रि, (अन्तर् + धा + क्तः ।) लुक्कायितं । गुप्तं । तत्पर्य्यायः । संवीतं २ रुद्धं ३ आवृतं ४ संवृतं ५ पिहितं ६ छन्नं ७ स्थगितं ८ अपवारितं ९ तिरोधानं १० । इति हेमचन्द्रः ॥ ("अन्तर्हिते शशिनि सैव कुमुदती मे दृष्टिं न नन्दयति संस्मरणीयशोभा" । इति शाकुन्तले ।)

अन्तवासी, [न्] पुं, (अन्तेऽध्येतुमध्यापकसमीपे वसति, अन्त + वस् + णिनि उपपदसमासः ।) अन्तेवासी । शिष्यः । इत्यमरटीकायां भरतः ॥

अन्तशय्या, स्त्री, (अन्ताय नाशाय शय्या शयनं यत्र + भावे क्यप् । स्त्रियां टाप्) भूमिशय्या । मृत्युः । श्मशानं । इति मेदिनी ॥
("अन्तशय्या मृतौ भूमिशय्यायां पिटकानने" । इति मेदिनी ।)

अन्तावशायी, [न्] पुं, (अन्ते नीचजातितया ग्रामसीमायामवशेते तिष्ठति, अन्त + अव + शी + णिनि उपपदसमासः ।) चण्डालः । मुनिविशेषः । इति हेमचन्द्रः ॥ नापितः । इत्यमरः ॥

अन्तिः, स्त्री, (अन्यते ज्येष्ठभगिनीत्वेन सम्बध्यतेऽसौ, अन्त + करोत्यर्थे णिच् + इक् । अन्तिकेतिपाठे स्वार्थे कन् स्त्रियां टाप् ।) नाद्योक्तौ ज्येष्ठा भगिनी । इति शब्दरत्नावली ॥ (अन्तिका भगिनी ज्येष्ठेत्यमरः ।) समीपे च । यथा । "मुग्धप्रभीतवदुपेयतुरन्तिमात्रोः" । इति श्रीभागवतं ॥

अन्तिकं, त्रि, (अन्तः सामीप्येन विद्यतेऽस्य, अन्त + ठन् तस्य इकः ।) निकटं । इत्यमरः ॥ सामीप्ये क्ली । इति धरणी ॥ ("अन्तर्गतप्रार्थनमन्तिकस्थं" । "स्तनसि मृदुकर्णान्तिकचरः" । इति शाकुन्तले । "ननु मां प्रापय प्रभुरन्तिकम्" । इति कुमारसम्भवे ।)

अन्तिकतमः, त्रि, (अतिशयेन अन्तिकः, अन्तिक + तम ।) अतिनिकटः । तत्पर्य्यायः । नेदिष्ठः २ । इत्यमरः ॥ नेदीयान् ३ अन्तितमः ४ । इति जटाधरः ॥

अन्तिका, स्त्री, (अन्तः नाशाय अभिनेढसामीप्यमस्याः अस्ति, अन्त + ठन् तस्य इकः स्त्रियां टाप् ।) नाद्योक्तौ ज्येष्ठा भगिनी । इत्यमरः ॥ तत्पर्य्यायः । अन्तिका २ अर्न्तिका ३ । इति तट्टीका । चुल्ली । शतलानामौषधं । इति मेदिनी ॥ चामारकन्या इति ख्याता ।
("अन्तिकं निकटे वाच्यलिङ्गं स्त्री शतलौषधौ । चुल्यां ज्येष्ठभगिन्यान्च नाद्योक्त्या कथ्यतेऽन्तिका" ॥ इति मेदिनी ।)

अन्तिकाश्रयः, पुं, (अन्तिकस्य आश्रयः अवलम्बनं, षष्ठीतत्पुरुषः ।) निकटाश्रयः । समीपस्थावलम्बनं । तत्पर्य्यायः । उपघ्नः २ । इत्यमरः ॥

अन्तिमः, त्रि, (अन्त + डिमच् ।) अन्ते भवः । चरमः । अन्त्यः । इति जटाधरः ॥
("अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः । सकृत् दुःखकरावाद्यावन्तिमस्तु पदे पदे" ॥ इति हितोपदेशः ।) अतिनिकटः । इत्यमरटीकायां नीलकण्ठः ॥

अन्तेवासी, [न्] पुं, (अन्ते विद्यामध्येतुमध्यापकसमीपे वसति । चण्डालपक्षे तु नीचजातितया ग्रामप्रान्ते वसति शयवासेत्यलक्, अन्त + वस् + णिनि ।) शिष्यः ।
("क्षणात्प्रान्तेवासी कुशिकपतिराज्ञापयति वः" । इति महावीरचरिते ।
"तात ! प्राचेतसान्तेवासी लवोऽभिवादयते" । इति उत्तरचरिते ।) चण्डालः । इत्यमरः ॥ प्रान्तस्थायिनि च ॥ इति विश्वः ॥

अन्त्यं, क्ली, (अन्ते भवं, अन्त + यत् ।) दशसागरसंख्या । सहस्रलक्षकोटिः । इति लीलावती ॥ द्वादशलग्नं । इति ज्योतिषं ॥

अन्त्यः, त्रि, (अन्ते भवः, अन्त + यत् ।) अन्ते भवः । शेषोत्पन्नः । अधमः । जघन्यः । इति मेदिनी ॥ (अन्तिभः । चरमः । शेषः ।
"असह्यपीडं भगवन् ऋणमन्त्यमवेहि मे" । इति रघुवंशे ।)

अन्त्यः, पुं, (अन्ते भवः अन्त + यत् ।) मुस्ता । इति मेदिनी ॥ सुता घास इति भाषा । म्लेच्छः । इति प्रायश्चित्ततत्त्वं ॥

अन्त्यजः, पुं, (अन्त्यो भूत्वा जायते, अन्त्य + जन् + डः ।) शूद्रः । इति हलायुधः ॥ रजकादिसप्तजातयः । यथा,—
"रजकश्चर्म्मकारश्च नटो वरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" ॥
इति यमवचनं ॥ जघन्यजे च ॥

अन्त्यजन्मा, [न्] पुं, (अन्त्यं ब्राह्मणक्षत्रियविशां जन्मानन्तरं जन्म यस्य सः ।) चतुर्थवर्णः । शूद्रः । इति रत्नावली ॥
("प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः" । इति मनुः ।)

अन्त्यजातिः, पुं, (अन्त्या जातिर्जन्म यस्य सः ।) चाण्डालादिः । यथापस्तम्बः ।
"अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि ।
स वै ज्ञात्वा तु कालेन कुर्य्यात्तत्र विशोधनं ॥
चान्द्रायणं पराको वा द्विजातीनां विशोधनं ।
प्राजापत्यन्तु शूद्राणां तथा संसर्गदूषणे ॥
यैस्तत्र भुक्तं पक्वान्नं क्षुद्रं तेषां विनिर्दिशेत् ।
तेषामपि च यैर्भुक्तं तेषामर्द्धं विधीयते" ॥
इति प्रायश्चित्ततत्त्वं ॥

अन्त्यभं, क्ली (अन्त्यं शेषस्थितं भं नक्षत्रं कर्म्मधारयः ।) रेवतीनक्षत्रं । मीनराशिः । इति ज्योतिषं ॥

अन्त्यवर्णः, पुं, (अन्त्यः वर्णः जातिः कर्म्मधारयः ।) शूद्रः । इति हेमचन्द्रः ॥

अन्त्यावसायी, [न्] पुं, (अन्त्यः सन् अवस्यति, अन्त्य + अव + सो + णिनि उपपदसमासः ।) चाण्डालादिसप्तजातयः । यथा,—
"चाण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा ।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः" ॥
इति अङ्गिराः ॥ (निषादस्त्रियां चण्डालजातौ मुद्दाफरास इति ख्यातः संकीर्णजातिविशेषः ।
"निषादस्त्री तु चण्डालात् पुत्रमन्त्यावसायिनं ।
श्मशानगोचरं सूते वाह्यानामपि गर्हितम्" ॥
इति मनुः ।)

अन्त्येष्टिः, स्त्री, (अन्त्या अन्ते भवा इष्टिः, कर्म्मधारयः ।) चरमसंस्कारः । स तु शवदाहादिरूपः । यथा,—
"सपिण्डादिभिदाशौचसंक्षेपोऽन्त्येष्टिपद्धतिः" ।
इति शुद्धितत्त्वप्रतिज्ञायां स्मार्त्तभट्टाचार्य्यः ॥ तत्प्रयोगो दाहशब्दे द्रष्टव्यः ॥ तदनन्तरं पूरकपिण्डप्रमाणं पिण्डशब्दे द्रष्टव्यं ॥ तस्य प्रयोगोऽत्र लिख्यते । ततः पिण्डदानं तत्र क्रमः । तण्डुलप्रस्थतिदयं द्विः प्रक्षाल्य ऐशान्यां दिशि सुस्थिरं पचेत् । ततः पवित्रपाणिः प्राचीनावीती पातितवामजानुर्दक्षिणामुखो हस्तप्रमाणां चतुरस्रलोष्ठायां दक्षिणप्लवां पिण्डिकां कृत्वा तदुपरि रेखां कृत्वा दर्भानास्तीर्य्य तिलान् प्रक्षिप्य । ॐ अमुकगोत्रप्रेतामुकदेवशर्म्मन्नेनवनेनिक्ष्व इत्यास्तीर्णकुशोपरि सतिलजलेनावनेजयेत् । ततस्तिलमधुघृतादिमिश्रं तप्तपिण्डं गृहीत्वा अद्यामुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणः एतत् प्रथमपिण्डं पूरकं इत्यवने जनस्थाने दद्यात् । ततः पिण्डपात्रक्षालनजलेन पुनरवनेजयेत् । ॐ अमुकगोत्रप्रेतामुकदेवशर्म्मन्नेतत्ते ऊर्णातन्तुमयं वासः । ततः आमृण्मयपात्रे जलाञ्जलिं पिण्डसमीपे स्थापयेत् । गन्धं माल्यञ्च यथाशक्ति दद्यात् । वाग्यर्य्यन्तं पिण्डं पश्यंस्तिष्ठेत् । ततः पिण्डादिकं जले क्षिपेत् । कालेऽप्यकृतचूडोपनयनानां अनूढकन्यानाञ्च कुशास्तरणं विनेति शेषः । एवं कृतचूडानामुपनयनकालात् प्राक् दर्भोपरि पिण्डदानं । उपनयनकाले आगते कृतोपनयनानां दर्भोपरि पिण्डदानं । एवं अष्टवर्षविवाहकाले आगते ऊढस्त्रीणां दर्भोपरि पिण्डदानं । राजा वाचम्य दक्षिणामुखः प्राचीनावीती पातितवामजानुः त्रिकाष्ठिकोपरि मृण्मयपात्रे उदकं तथा पात्रान्तरे क्षीरं निधाय प्रेतात्र स्नाहि पिब चेदं क्षीरमिति ब्रूयात् । तदेकरात्रमावश्यकं दशरात्रं फलभूयस्त्वार्थमिति । द्वितीयपिण्डादिषु द्वितीयं पिण्डं पूरकं इत्यादिविशेषः । द्वितीयपिण्डे मृण्मयपात्रद्वये जलाञ्जलिद्वयं । तृतीयादिपिण्डे पात्रादिवृद्धिः । येन पञ्चपञ्चाशत् पात्राण्यञ्जलयश्च तावन्ति । यद्दाशौचप्रथमदिने पिण्डानां त्रयं । द्वितीयदिने चतुष्टयं । तृतीये त्रयं । प्रथममेकं द्वितीये चतुष्टयं । तृतीये पञ्चमं वा कार्य्यः । चतुरहाशौचे प्रथमचतुर्थयोर्द्वौ द्वौ । द्वितीयतृतीययोस्त्रयस्त्रयः । पञ्चाहाशौचे तु प्रथमपञ्चमदिनयोरेकैकमुः पिण्डः । द्वितीयचतुर्थयोर्द्वौ द्वौ । तृतीये चत्वारः । षड्हाशौचे द्वितीयचतुर्थदिनयोस्त्रयस्त्रयः । शेषेष्वेकैकः । सप्ताहाशौचे तृतीयचतुर्थपञ्चमदिनेषु द्वौ द्वौ । शेषेष्वेकैकः । अष्टाहाशौचे चतुर्थपञ्चमदिनयोर्द्वौ द्वौ । शेषेष्वेकैकः । नवाहाशौचे तु पञ्चमदिने द्वौ । शेषेष्वेकैकः । पक्षिणीह्यहाशौचयोस्त

आद्यद्वितीयदिनयोः पञ्च पञ्च पिण्डाः। द्वादशाहाद्यशौचे नवदिनेषु नवपिण्डाः। शेषदिने दशमः। सद्यः शौचैकाहयोरेकाह एव दशमपिण्डाः। अशौचान्तमध्ये पिण्डो देयः रात्रावपि ॥ * ॥

गङ्गाम्भस्यस्थिप्रक्षेपप्रयोगस्तु। ततः स्नात्वाचम्य उदङ्मुखः कुशत्रयजलान्यादाय ॐ तत्सदित्युच्चार्य्य अद्यामुकेत्यादि अमुकस्य एतदस्थिसमसंख्यकवर्षसहस्रावच्छिन्नस्वर्गाधिकरणकमहीयमानत्वकामोऽमुकस्यैतान्यस्थिखण्डानि गङ्गायां प्रक्षिपामीति सङ्ख्यापूरणं कृत्वास्थीनि पञ्चगव्येन सिक्त्वा हिरण्यमध्याज्यतिलैः संयोज्य मृत्तिकापुटे स्थापयित्वा दक्षिणहस्तेन तत्पुटकमादाय दक्षिणां दिशं पश्यन् ॐ नमोऽस्तु धर्म्मराजायेति वदन् जलं प्रविश्य स मे प्रीतो भवत्वित्युक्त्वास्थि प्रक्षिपेत्। ततो मज्जनं कृत्वोत्थाय सूर्य्यं दृष्ट्वा दक्षिणामुत्सृजेत्। इति शुद्धितत्त्वं ॥ * ॥ किञ्च शातातपः।

"जलमेकाहमाकाशे स्थाप्यं क्षीरञ्च मृण्मये"।

पारस्करः। मृण्मये तां रात्रिं क्षीरोदके विहायसि निदध्युः। प्रेतायेत्यादीयुदकं पिब चेदं क्षीरं। इदं रात्राविति गौड़ाः। गारुड़े तु।

"अपक्वे मृण्मये पात्रे दुग्धं दद्यात् दिनत्रयम्"।

इत्युक्तं। हेमादौ पात्रे तु दशाहमुक्तं।

"तस्मान्निधेयमाकाशे दशरात्रं पयो जलं।
सर्व्वतापोपशान्त्यर्थमध्वश्रमविनाशनं" ॥

देवजानीये कारिकायां।

"तत्र प्रेतोपक्रमतये दशरात्रमखण्डितं।
कुर्य्यात् प्रदीपं तैलेन वारिपात्रञ्च मार्त्तिकं ॥
भोज्यात् भोजनकाले तु भक्तमुद्दिश्य निर्व्वपेत्।
नामगोत्रेण सम्बुध्य धरित्र्यां पिण्डयज्ञवत्" ॥

इति निर्णयसिन्धौ ५ परिच्छेदः ॥

अन्त्रं, क्ली, (अन्त्यते कायः सम्बध्यतेऽनेन अति बन्धने करणे ष्ट्रन्।) पुरीतत्। इत्यमरः ॥ आँतड़ी (आँत् इति भाषा। आँत् इति ख्यातः देहबन्धको नाड़ीभेदः।

उक्ताः सार्द्धास्त्रयो ग्रामाः पुंसामन्त्राणि सूरिभिः।
अर्द्धग्रामेण हीनानि स्त्रीणामन्त्राणि निर्दिशेत् ॥

इति वैद्यकम्।)

अन्त्रवृद्धिः, स्त्री, पुं, (अन्त्रजन्या वृद्धिः, शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च।) रोगविशेषः। तन्निदानादि यथा,—

"वातकोपिभिराहारैः शीततोयावगाहनैः।
धारणे रथभाराध्वविषमाक्षप्रवर्त्तनैः ॥
क्षोभणैः क्षोभितान्त्रेण क्षुद्रान्त्रावयवं यदा।
पवनो दिगुणीकृत्य स्वनिवेशादधो नयेत् ॥
कुर्य्यादन्त्रगसन्धिस्थो ग्रन्थाभं श्वयथुं तदा"।

धारणं उपस्थितस्य वेगस्य। ईरणं अनुपस्थितस्य वेगस्य प्रेरणं।

"विषमाक्षप्रवर्त्तनं वक्त्रेणाक्षमोटनं"।

अन्यानि क्षोभणानि च बलवद्धिपहकठोरधनुरादीनि। तैः क्षोभितः संदूष्य सञ्चालितः पवनः यदा क्षुद्रान्त्रावयवं दिगुणीकृत्य स्वनिवेशादधो नयेत्। तदा वंक्षणसन्धिस्थः सन् वंक्षणसन्धौ ग्रन्थिरूपं श्वयथुं कुर्य्यात् इत्यर्थः ॥ * ॥

उपेक्षितायां अन्त्रवृद्धेरवस्थामाह।

"उपेक्षमाणस्य मरुद्विवृद्धि-
माध्मानरुक् स्तम्भवतीञ्च कुर्य्यात्।
स पीड़ितोऽन्तः स्वनवान् प्रयाति
प्रध्मापयन्नेति पुनश्च मुक्तः ॥

उपेक्षमाणस्य वृद्धिमित्यर्थः। मरुद्वृद्धिं मुष्कवृद्धिं। आध्मानरुक् स्तम्भवतीं कुर्य्यात्। तत्राध्मानमुदरे रुक् वृद्धयोर्मुष्कयोः स्तम्भो गात्रे तद्युक्तां कुर्य्यात् इत्यर्थः। भोजोऽप्याह।

"अन्त्रं दिगुणमादाय वातो नयति वंक्षणं।
वंक्षणात्तद्युजा युक्तं फलकोष्यां प्रपद्यते" ॥
स मुष्कवृद्धिः। अन्तः उदरे प्रध्मापयन् आगमनमार्गमुच्छ्रूनं कुर्व्वन् इति प्रयाति ॥ * ॥ असाध्यमाह।

"यस्यान्त्रावयवश्चिष्टान्मुष्कयोर्व्वातसञ्चयात्।
स्यादन्त्रवृद्धिः सोऽसाध्यो वातवृद्धिसमाह्वयः" ॥

स कीदृक् स्यादित्याकाङ्क्षायामाह। वातवृद्धिसमाह्वयः ॥ * ॥ सामीप्यादत्रैव ब्रध्नमाह।

"अत्यभिष्यन्दिगुर्व्वन्नशुष्कपूत्यामिषाशनात्।
करोति ग्रन्थिवच्छोथं दोषो वंक्षणसन्धिषु ॥
ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्दिशेत्" ॥ * ॥

अथ वृद्धेश्चिकित्सा।

"वृद्धावन्त्रासनं मार्गमुपवासं गुरूणि च।
वेगाघातं एष्ठयानं व्यायामं मैथुनं त्यजेत् ॥
वातवृद्धौ पिबेत् स्निग्धं यथाप्राप्तं विरेचनं।
सक्षीरं वा पिबेत् तैलं मासमेरण्डसम्भवं ॥
गुग्गुलुक्षेरवृक्षजं तैलं गोमूत्रेण पिबेन्नरः।
वातवृद्धिं जयत्याशु चिरकालानुबन्धिनीं ॥
पित्तग्रन्थिक्रमेणैनं पित्तवृद्धिमुपाचरेत्।
जलौकाभिर्हरेद्रक्तं वृद्धौ पित्तसमुद्भवे ॥
चन्दनं मधुकं पद्ममुशीरं नीलमुत्पलं ॥
क्षीरपिष्टप्रलेपेन दाहशोथरुजापहं ॥
त्रिकटुं त्रिफलाक्षारं सक्षारं लवणं पिबेत्।
विरेचनमिदं श्रेष्ठं कफवृद्धिविनाशनं ॥
लेपनं कटुतीक्ष्णोष्णं स्वेदनं रूक्षमेव च।
परिषेकोपनाहौ च सर्व्वमुष्णमिहेष्यते ॥
मुञ्जर्मुञ्जजलौकाभिः शोणितं रक्तजे हरेत्।
पिबेद्विरेचनं वापि शर्करात्तौद्रसंयुतं ॥
शीतमालेपनं सर्व्वं सर्व्वं पित्तहरं तथा।
पित्तवृद्धिक्रमं कुर्य्यादामे पक्वे च रक्तजे ॥
स्वेदोभेदः समुत्थे तु लेपयेत् सुरसादिना।
शिरो विरेचनद्रव्यैः सुखोष्णैर्मूत्रसंयुतैः ॥
संस्वेद्य मूत्रप्रभवं वस्त्रपट्टेन वेष्टयेत्।
सीवन्याः पार्श्वतोऽधस्तात् विध्यद्दीप्तिमुखेन वै ॥
मुष्कशोथमगच्छन्त्यामन्त्रवृद्धौ विचक्षणः"।

दीप्तिमुखेन शस्त्रविशेषेण। अगच्छन्त्यां अखण्डयां ॥

"तैलमेरण्डजं पीत्वा बलासिद्धं पयोन्वितं।
आध्मानशूलोपचितमन्त्रवृद्धिं जयेन्नरः ॥
रास्नायष्ट्यमृतैरण्डबलारण्डवधोद्भवैः।
पटोलेन वृषेणापि विधिना विहितं हितं ॥

रण्डतैलेन संयुक्तमन्त्रवृद्धिं व्यपोहति"।

राजादिकाद्यः ॥ * ॥

"गन्धर्व्वहस्ततैलेन वृषेणापि युतं पिबेत्।
विशालामूलजं चूर्णं वृद्धिं हन्यान्न संशयः"।

विशाला इन्द्रवारुणी ॥ * ॥

"वचासर्षपकल्केन प्रलेपः शोथनाशनः।
शिग्रुत्वक्सर्षपैः पिष्टैः शोथश्लेष्मानिलापहः ॥
शुद्धसूतं दिधागन्धं मृतान्येतानि योजयेत्।
लोहं रङ्गं तथा ताम्रं कांस्यञ्चाथ विशोधितं ॥
तालकं तुत्थकं वापि तथा शुल्बं वराटकं ॥
त्रिकटु त्रिफला चव्यं विड़ङ्गं वृद्धदारकं ॥
कर्च्चूरं मागधीमूलं पाठां सहचरां वचां।
एलाबीजं देवकाष्ठं तथा लवणपञ्चकं ॥
एलादिसमभागानि चूर्णयेदथ कारयेत्।
कषायेण हरीतक्या वटिकां टङ्कसम्मितां ॥
एकां तां वटिकां यस्तु निगिलेद्दारिणा सह।
अण्डवृद्धिरसाध्योऽपि तस्य नश्यति सत्वरं" ॥

वृद्धिवाधिका वटी ॥ * ॥ अथ ब्रध्नस्य चिकित्सा।

"भृङ्गैरण्डतैलेन सम्यक् कल्कोऽभयाभवः।
क्षुण्णासैन्धवसंयुक्तो ब्रध्नरोगहरः परः ॥
अजाजीहपुषाकुष्ठं गोमेदवदरान्वितं।
काञ्जिकेन तु संपिष्टं तल्लेपो ब्रध्नजित् परः" ॥

गोमेदं पत्रं। तथा च निघण्टौ धन्वन्तरिः।

"पत्रं हलाङ्क्यं रामं गोमेदं वसनाङ्क्यं"।

इतिवृद्धिब्रध्नाधिकारः। इति भावप्रकाशः ॥

अन्दिका, स्त्री, (अन्दति नाद्याय व्येष्ठभगिनीत्वं सम्बध्नाति, अदि + ण्वुल् स्त्रियां टाप्। नाद्योक्तौ व्येष्ठभगिनी इत्यमरटीकायां।) अन्तिका। बुल्ली। इत्यमरटीकायां नीलकण्ठः ॥ बुला इति भाषा।

अन्दुः, स्त्री, (अन्द्यते बध्यतेऽनेन, अदि + करणे उण्, बाहुलकात्।) हस्तिनिगड़ः। आँदुया इति भाषा। स्त्रीपादभूषणं। इति हेमचन्द्रो भूरिप्रयोगश्च ॥ मल पञ्चम इत्यादि भाषा।

अन्दुकः, पुं, (अन्द्यते बध्यतेऽनेन, अदि + करणे उण्, ततः स्वार्थे कन्।) हस्तिपादबन्धनशृङ्खलः। तत्पर्य्यायः। निगड़ः २। इत्यमरः ॥ पादालङ्कारविशेषः। तत्पर्य्यायः। पादकटकः २। इति त्रिकाण्डशेषः ॥

अन्दूः, स्त्री, (अन्द्यते बध्यतेऽनेन, अदि + उण्, ततः ऊङुत इति स्त्रियां ऊङ्।) हस्तिपादबन्धनलौहनिगड़ः। आन्दुया इति भाषा। स्त्रीपादभूषणं। भल गुजरी इत्यादि भाषा। इति मेदिनी ॥ (निगड़ः। शृङ्खला। बन्धनरज्जुः। अन्दः स्त्रियां स्यान्निगड़े प्रभेदे भूषणस्य च। इति मेदिनी।)

अन्दूकः, पुं, (अन्दू + स्वार्थे कन्, पृषोदरादित्वात् पक्षे केहश इति ह्रस्वाभावः। स्वार्थिकप्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिक्रामन्ति इति पुंस्त्वं मन्यथा अन्दूका इति स्यात्।) अन्दूः। इत्यमरटीकायां स्वामी ॥ अन्यत् क दृक् क्वये। इति कविकल्पद्रुमः ॥ (पाणिनिमते तु अन्धदृष्टि

विघाते चुरादि सेट्।) दृक्त्वयो दृष्टिरहिनी-भावः। तेनाकर्म्मकोऽयं। सत्ताजीवनदर्पभीतिशून्यनक्रीडानिवासत्वयाव्यक्तध्वाननभोगतिस्थितिजरालज्जाप्रमादोदये। मोहे खोटनवेगयुद्वदहनख्यातिक्षरोन्मादके शुद्धिखेदपलायनभ्रमणके ग्लानौ श्रुतौ मज्जने॥ दृप्तौ जागरशोषवक्रगमनोत्साहे मतौ संशये स्नानौ मन्दगतौ च नृत्यपतने चेष्टाक्रुधौ रोदने। वृद्धौ हावक्षतौ च सिद्धिविरतौ हर्षोपवेशे बले कम्पोद्वेगनिमेषभङ्गयतनाद्ये धातवोऽकर्म्मकाः॥ दौर्बल्यादिषु चार्थेषु वर्त्तमानास्तु धातवः। वाचका भावमात्रस्य यतस्तस्मादकर्म्मकाः॥ कौटिल्यादिषु चार्थेषु प्रोक्ता ये ते तु धातवः। तद्भावेऽकर्म्मकाः स्युस्तदृत्वात्यां सकर्म्मकाः॥ इति। अन्धयति अन्धापयति वृद्धः। इति दुर्गादासः॥

अन्धं, क्ली, (अन्ध + अच्।) अन्धकारः।
("सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा"। इति उत्तरचरिते।) जलं। इति मेदिनी।

अन्धः, त्रि, (अन्ध + अच्।) चक्षुर्दयहीनः। आन्धा आँधुला इति हिन्दी भाषा। तत्पर्य्यायः। अदृक् २। इत्यमरः। ("वृद्धोऽन्धः पतिरेष मक्षकगतः"। इति साहित्यदर्पणे।
"अन्धो मत्स्यानिवाश्नाति स नरः कण्टकैः सह। यो भाषतेऽर्थवैकल्यमप्रत्यक्षं सभाङ्गतः"।
इति मनुः।)

अन्धः, [स्] क्ली, (अन्ध + असुन्।) अन्नं। इत्यमरः॥

अन्धकः, पुं, (अन्ध + ण्वुल्।) देशभेदः। इति शब्दरत्नावली॥ नृपभेदः।
("सुदंष्ट्रं च सुचारुं च क्षेमामित्यन्धकास्त्रयः "। इति हरिवंशे।) असुरभेदः। इति महाभारतं॥
("स व्रजत्यन्धवद्यस्मादनन्धोऽपि हि भारत। तमन्धकोऽयं नाम्नेति प्रोचुस्तत्र निवासिनः"। इति हरिवंशे।) मुनिविशेषः। इति याज्ञवल्क्यः॥ (दृष्टिहीनः। चक्षुर्दयहीनः।
"अन्धकः कुब्जकश्चैव राजकन्या च त्रिस्तनी। त्रयोऽप्यन्यायतः सिद्धाः सम्मुखे कर्म्मणि स्थिते"॥
इति पञ्चतन्त्रे।,

अन्धकरिपुः, पुं, (अन्धकस्य असुरस्य रिपुः नाशकतया शत्रुः, षष्ठीतत्पुरुषः।) शिवः। इत्यमरः॥ श्लेषकाव्यादौ अन्धकारनाशकत्वात् सूर्य्याग्निचन्द्रेषु च वर्त्तते॥

अन्धकारः, पुं, क्ली, (अन्धमन्धकवत् करोति, अन्ध + कृ + अण्।) तेजःसामान्याभावः। आँधार इति भाषा। तत्पर्य्यायः। ध्वान्तं २ तमिस्रं ३ तिमिरं ४ तमः ५। इत्यमरः॥ ("अथान्धकारं गिरिगह्वराणां"। इति रघुवंशे।) भूच्छायं ६। इति राजनिर्घण्टः॥ महान्धकारे अन्धतमसं। ७ सर्व्वव्यापकान्धकारे सन्तमसं। ८ अल्पान्धकारे अवतमसं ९। इत्यमरः॥ अस्य गुणाः। भयदृष्टितेजोऽवरोधकारित्वं। तिक्तत्वं। सर्व्वव्याधिकरत्वञ्च। इति राजवल्लभः॥

अन्धकासुहृद्, पुं, (अन्धकस्य असुरस्य असुहृत्, नाशकतया शत्रुः, षष्ठीतत्पुरुषः।) शिवः। इति हेमचन्द्रः॥

अन्धकूपः, पुं, (अन्धमन्धकारं करोति, अन्ध + करोत्यर्थे णिच् + पचाद्यच्, तादृशः कूपः।) सान्धकारकूपः। इति त्रिकाण्डशेषः॥ आँधुया पातुया इति भाषा।
("मज्जत्यात्मा भक्तिहीनो महामोहमये भवे। अन्धकूपे निरालम्बश्छिन्नरज्जुर्यथा घटः"॥ इति सद्भावे।)

अन्धतमसं, क्ली, (अन्धयति, अन्ध + अच्, अन्धं तमः कर्म्मधारयः, समासान्त अच्।) निविड़ान्धकारं। इत्यमरः॥
("प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः"। इति शिशुपालबधे।)

अन्धतामसं, क्ली, (तम एव तामसं प्रज्ञादित्वात् स्वार्थे अण्।) निविड़ान्धकारं। महान्धकारं। इत्यमरटीकायां स्वामी॥

अन्धतामिस्रं, क्ली, (तमिस्रैव तामिस्रं, स्वार्थे अण्, अन्धं निविड़ं तामिस्रं कर्म्मधारयः।) निविड़ान्धकारमयनरकविशेषः। पञ्चप्रकाराज्ञानान्तर्गताज्ञानविशेषः। देहनाशे अहमेव मृतोऽस्मीति बुद्धिः। इति भारतभागवते,—
("एकविंशतिविधनरकान्तर्गतद्वितीयनरकविशेषः" स च निविड़ान्धकारमयः। "तस्यां धर्म्मपत्न्यामन्धतामिस्रमभ्यधायत्"। इति महावीरचरिते।)

अन्धमूषिका, स्त्री, (अन्ध दृष्टिविघाते, अन्ध + भावे घञ्, अन्धं दृष्टिविघातं मुष्णाति तत्सेवनेन नाशयति, मुष् + ण्वुल् एषोदरादित्वात् दीर्घः स्त्रियां टाप्।) देवताड़द्रुः। इति शब्दचन्द्रिका॥

अन्धाहिः, पुं, स्त्री, (अन्धः अहिः सर्पइव।) मत्स्यभेदः। इति त्रिकाण्डशेषः॥ कुँचिया इति ख्यातः।

अन्धिका, स्त्री, (अन्ध + ण्वुल् स्त्रियां टाप्।) द्यूतविशेषः। रात्रिः। इति मेदिनी॥ सर्षपी। इति हेमचन्द्रः॥ स्त्रीविशेषः। चक्षूरोगविशेषः। इति शब्दरत्नावली॥

अन्धुः, पुं, (अन्ध + उण्।) कूपः। इत्यमरः॥

अन्धुलः, पुं, (अन्ध + उलच्।) शिरोवृक्षः इति शब्दचन्द्रिका॥

अन्ध्रः, पुं, (अन्धयति गीतेन मृगान् अन्धवत् करोति, अन्ध + कर्त्तरि रः।) व्याधः। मृगयाजीवी। इति कश्चित् संग्रहकारः। (वैदिहिकात् कारावरस्त्रियां जातो जातिविशेषः, स तु सततं ग्रामबहिर्वासो मृगयाजीवी च।
"कारावरनिषादात् तु चर्म्मकारः प्रसूयते। वैदिहिकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ"॥
इति मनुः।)

अन्न, क्ली, (अद् + कर्म्मणि क्तः।) खिन्नतण्डुलं। यथा,—
"शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते। आमं वितुषमित्युक्तं खिन्नमन्नमुदाहृतं"॥
इति आह्निकतत्त्वधृतवशिष्ठवचनं॥ तत्पर्य्यायः। भक्तं २ अन्धः ३ भिस्सा ४ ओदनं ५ दीदिविः ६। इत्यमरः॥ भिस्सा ७। इति तट्टीका॥ क्रूरं ८। इति राजनिर्घण्टः॥ अट्टं ९ कसिपुः १० जीवातुः ११। इति जटाधरः॥ कूरं १२ आपूपिकं १३ जीवन्तिः १४ प्रसादनं १५। इति शब्दरत्नावली॥ * ॥ अस्य गुणाः। बुद्धिशुक्रप्रीतिपुष्टिधात्विन्द्रियबलकारित्वं। गुरुत्वं। क्षुधात्वयरोगश्रमकार्श्यनाशित्वञ्च॥ * ॥ नवान्नगुणाः। श्लेष्मकारित्वं। स्वादुत्वं। सुस्निग्धत्वं। दृंहणत्वं। गुरुत्वञ्च॥ * ॥ पुराणान्नगुणाः। विरसत्वं। रूक्षत्वं। पथ्यत्वं। अग्निकारित्वञ्च॥ * ॥ उष्णान्नगुणाः। प्रशंसनीयत्वं। हृद्यत्वं। अग्निकारित्वं। वायुश्लेष्मनाशित्वं। रक्तपित्तप्रकोपकारित्वञ्च॥ * ॥ अत्युष्णान्नगुणाः। बलनाशित्वं॥ * ॥ शीतशुष्कान्नयोर्गुणाः। दुर्ज्जरत्वं॥ * ॥ अतिस्निग्धान्नगुणाः। ग्लानिकारित्वं॥ * ॥ तण्डुलान्वितान्नगुणाः। दुर्जरत्वं॥ * ॥ जलधौतसद्योऽन्नगुणाः। शीघ्रपाकित्वं। हिमत्वं। लघुत्वञ्च॥ * ॥ रात्रिस्थितजलयुक्तान्नगुणौ। त्रिदोषकोपकारित्वं। रूक्षत्वञ्च॥ * ॥ भृष्टतण्डुलान्नगुणौ। लघुत्वं। अग्निप्रदीपनत्वञ्च। इति राजवल्लभः॥ * ॥ धान्यं। इति राजनिर्घण्टः॥ विष्णुः। इति तस्य सहस्रनामसु पठितं॥ अदनीयद्रव्यमात्रं॥ अन्नसाधनं यथा,—
"सुधौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत्। तद्भक्तं प्रहृतं श्रेष्ठं विपदं गुणवन्मतं"॥
तद्गुणाः।
"भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु। अधौतमसुतं स्फीतं गुर्व्वशुचं कफप्रदं"॥
इति भावप्रकाशः॥ * ॥ तद्दानफलं यथा,—
"वारिदस्तृप्तिमायाति सुखमक्षय्यमन्नदः"॥
अन्नस्य प्रजापतिर्देवता। अक्षयसुखप्राप्तिः फलं। प्रतियहे मुह्यिहश्यं। इति शुद्धितत्त्वं। अपि च,
"ब्रह्महत्यासमं पापं अन्नदानात् प्रणश्यति। अन्नदः पापकर्म्मापि पूतः स्वर्गे महीयते"॥
इति प्रायश्चित्ततत्त्वं॥ * ॥ अथ प्रजापतिदैवतान्नदानावर्त्तः। तत्र अन्नदानस्तुतिः। ब्रह्मपुराणे।
"अन्ने प्रतिष्ठिता लोका अन्नमाश्चयं परं। तस्मादन्नं प्रशंसन्ति सदैव पितृमानवाः॥
अन्नस्य हि प्रदानेन नरो याति परां गतिं। सर्व्वकामसमायुक्तः प्रेत्य चेहाधिकं सुखं"॥
तथा,—
"अन्नमूर्ज्जस्वलं लोके दत्त्वोर्ज्जस्वी भवेन्नरः। सतां पन्थानमाश्रित्य सर्व्वपापैः प्रमुच्यते"॥
महाभारते।
"अन्नदः पशुमान् पुत्री धनवान् भोगवानपि। प्राणवांश्चापि भवति रूपवांश्च तथा नृप"॥
तथा,—
"अन्नदस्य मनुष्यस्य बलमोजो यशांसि च। कीर्त्तिश्च वर्द्धते श्रद्धास्त्रिषु लोकेषु पार्थिव"॥
आग्नेयपुराणे। अन्नस्तुत्यनन्तरं।
"तस्मादन्नं सदा देहि श्रद्धया नृपसत्तम।

ब्रह्महत्यादिकं पापं अन्नदस्य प्रणश्यति" ॥
तथा,—
"अन्नदानात् परं दानं न भूतं न भविष्यति ।
पुण्यं यशस्यमायुष्यं बलपुष्टिविवर्द्धनं ॥
सर्व्वमन्नस्य दानेन भवतीति विनिश्चयः ।
महाकाञ्चनचित्राणि सेवितान्यप्सरोगणैः ॥
अन्नदस्योपतिष्ठन्ति विमानानि सुरालये ।
भक्ष्यभोज्यमयाः शैला दिव्यरूपाश्चलद्भृताः ॥
दृश्यपुरुजना नित्यमुपतिष्ठन्ति चाग्रतः ।
हस्त्यश्वरथयानैश्च क्रीड़मानाश्च ते नराः" ॥
पद्मपुराणे ।
"आपर्व्वतनदी वापी पृथिवी सर्व्वकामदा ।
विधिना तेन सा दत्ता योऽन्नं ददाति सर्व्वदा ।
क्षुधिते यः प्रयच्छेत अन्नं श्रद्धासमन्वितः ।
ब्रह्मणो भवने स वै ब्रह्मणा सह मोदते ॥
चान्द्रवारुणलोकाश्च याम्याः कौबेरकास्तथा ।
गोलोको ब्रह्मलोकश्च सर्व्वे चान्ने प्रतिष्ठिताः ॥
ददत् कन्यामलङ्कृत्य हस्त्यश्वञ्च महाधनं ।
अन्नदानस्य चैतानि कलां नार्हन्ति षोड़शीं" ॥
विष्णुधर्म्मोत्तरे ।
"यावतो ग्रसते ग्रासान् विद्वान् विप्रः सुसंस्कृतः ।
अन्नप्रदस्य तावन्तः क्रतवः परिकीर्त्तिताः" ॥ * ॥
अथान्नदानधर्म्माः । यमः ।
"आदरेण च भक्त्या च यदन्नमुपदीयते ।
तत् प्रीणयति पात्राणि मात्सर्यं मानवर्জ্জितं ॥
दुर्लभस्तु मुदा दाता सुदा भोक्ता च दुर्लभः ।
सुदा दाता च भोक्ता च तावुभौ स्वर्गगामिनौ ॥
योऽन्नं बहुमतं भुङ्क्ते यच्चान्नं बहुमन्यते ।
यच्चान्नं प्रीतितो दद्यात् तस्यान्नमुपतिष्ठते ॥
प्रीतितोऽन्नञ्च यो दद्यात् स्वकीयात् योऽभिपूज्य च ।
प्रीतितोऽक्षयमश्नाति पूजितः स्वर्गमश्नुते ॥
यो दद्यादप्रियेणान्नं यच्चान्नं नाभिनन्दति ।
तावुभौ नरके मग्नौ वसेतां शरदां शतं" ॥ * ॥
अथान्नदानविशेषफलविशेषपरिभाषा ।
कूर्म्मपुराणे ।
"गृहस्थायान्नदानेन फलं नाप्नोति मानवः ।
आममेवास्य दातव्यं दत्त्वाप्नोति परां गतिं" ॥
अन्नदानेन पक्वान्नदानेन फलं नाप्नोति ।
इति गृहस्थायान्नदानेन यादृशं फलं तादृशं पक्वान्नदानेन नाप्नोतीत्यर्थः । गृहस्थस्यान्नदाने सति तस्य पक्वयत्ननिष्पत्तेः ॥ * ॥

अथ सामान्यान्नदानं नन्दिपुराणे ।
"अन्नाद्भुतानि जातानि देवा ह्यन्नाद्यकाङ्क्षिणः ।
न तस्य पात्रादिविधिर्व्विना श्राद्धं प्रकीर्त्तितः" ॥
तथा,—
"अपि कीटपतङ्गानां शुनां चाण्डालयोनिनां ।
दत्त्वान्नं लोकमाप्नोति प्राजापत्यं समासतः ॥
बान्धवेभ्योऽतिथिभ्योऽन्नं पुत्रेभ्योऽन्नं प्रयच्छतः ।
दीनान्धकृपणानाञ्च स्वर्गः स्यादन्नदायिनां ॥
ग्रासमात्रं वरो दत्त्वा अन्नानामन्नमश्नुते ।
स्वर्गे वसेत् समानान्तु शतं भोगैर्म्मनोरमैः ॥
ग्रासे ग्रासे फलं ह्येतदधिवत् परिकीर्त्तितं ।
एतदेवायने प्रोक्तं द्विगुणं पुण्यगौरवं ॥
अन्नं विना क्षुधार्त्तस्य दत्त्वान्नं देशकालतः ।
फलं पञ्चगुणं प्रोक्तं सर्व्वभावसमन्वित" ॥
सर्व्वभावसमन्वित इति सम्बोधनं । अत्र यजमानः प्राणिमात्रेभ्यो गृहीतोदपूर्णताम्रपात्रः उदङ्मुखः सङ्कल्प्य यथेष्टकालावधि अन्नं दद्यात् । तद्यथा । ॐ नन्दिपुराणोक्तप्राणिमात्रान्नदानफलप्राप्तिकामोऽहं प्राणिभ्योऽन्नं दास्ये । तदवधि यथासम्भवं प्राणिमात्रेभ्यः स्वगृहे अन्यत्र वा भक्तशालां कृत्वा अविच्छिन्नमन्नं देयं । अतएव धार्म्मिकास्ताम्रपट्टविलिखितां भूमिं समुपकल्प्य आचन्द्रार्कस्थायिनीं भक्तशालां ददाति ॥ * ॥
वायुपुराणे ।
"क्षिप्रमन्नमलिष्टं दद्यादन्नं बुभुक्षिते ।
सव्यञ्जनं सदा स्निग्धं भक्ष्यं सत्कृत्य यत्नतः" ॥
क्षिप्रमतिथिप्राप्त्यनन्तरमेव । अक्लिष्टमनुपहतं । भक्ष्यमप्रतिषिद्धं ।
"तरुणादित्यसङ्काशं विमानं हंसवाहनं ।
अन्नदो लभते तिस्रः कल्पकोटीस्तथैव च ॥
अन्नदानात् परं दानं न भूतं न भविष्यति ।
अन्नाद्भूतानि जायन्ते जीवन्ति च न संशयः ॥
जीवदानात् परं दानं न किञ्चिदपि विद्यते ।
अन्नाज्जीवति चैलोक्यं चैलोक्यस्येह तत्फलं" ॥
बुभुक्षितेभ्योऽन्नं पूर्ब्बवत् संकल्प्य दद्यात् ।
ॐ वायुपुराणोक्तान्नदानफलप्राप्तिकामोऽहं बुभुक्षितेभ्यः सव्यञ्जनं स्निग्धमन्नं दास्ये । एवं सङ्कल्प्य बुभुक्षितानन्विष्य तेभ्यो यथोक्तमन्नं दद्यात् ॥ * ॥
महाभारते ।
"श्रान्ताय क्षुधितायान्नं यः प्रयच्छति भूमिप ।
स्वायम्भुवं महत् स्थानं स गच्छति नराधिप" ॥
श्रान्ताय क्षुधितायान्नं पूर्ब्बवत् सङ्कल्प्य दद्यात् । ॐ स्वायम्भुवस्थानप्राप्तिकामोऽहं श्रान्ताय क्षुधितायान्नं दास्ये । इति सङ्कल्प्य यथाकाले श्रान्तं क्षुधितमनुसन्धायान्नं तस्मै दद्यात् ॥ * ॥ तथा,—
"सङ्घो ददाति यच्चान्नं सदैकायमना नरः ।
न स दुर्गाण्यवाप्नोति ह्येवमाह पराशरः" ॥
अभीष्टसमये सद्ब्राह्मणक्षत्रियवैश्यशूद्रेभ्योऽन्नं पूर्ब्बवत् सङ्कल्प्य दद्यात् । ॐ महाभारतोक्तसङ्घोचरान्नदानफलप्राप्तिकामोऽहं सङ्घेभ्योऽन्नं दास्ये । ततः प्रभृति अभिमतकाले सङ्घो ब्राह्मणादिभ्योऽन्नं दद्यात् ॥ * ॥ तथा,—
"यो दद्यादपरिक्लिष्टमन्नमध्वनि वर्त्तते ।
श्रान्तायादृष्टपूर्ब्बाय तस्य पुण्यफलं महत्" ॥
अपरिक्लिष्टमनुपहतं । यथोक्तप्राणिनेऽन्नं पूर्ब्बवत् सङ्कल्पयेत् । ॐ महापुण्यफलप्राप्तिकामोऽहं श्रान्तायाध्वगाय अदृष्टपूर्ब्बायान्नं दास्ये । इति सङ्कल्प्य यथाकालमध्वगमन्विष्य यथोक्तमन्नं तस्मै दद्यात् । अध्वनि वर्त्तते इति शब्दनिर्देशात् पथि गच्छते पथिकाय वर्त्मनि कुटीं कृत्वा तरुतले चान्नं दद्यात् ॥ * ॥ विष्णुधर्म्मोत्तरे ।
"सक्तून् मानवो दत्त्वा सक्तूनार्थिनि काङ्क्षितं ।
अक्षयं फलमाप्नोति स्वर्गलोकञ्च गच्छति" ॥
सक्तूं संस्कृतं । सव्यञ्जनमन्नं पूर्ब्बवत् सङ्कल्प्य तदर्थिभ्यो दद्यात् । विष्णुधर्म्मोत्तरोक्तसक्तून्नाकाङ्क्षिगोचरसक्तून्नदानफलप्राप्तिकामोऽहं यथाशक्ति सक्तूनार्थिभ्यो सक्तूमन्नं दास्ये । इति सङ्कल्प्य सक्तूनार्थिनोऽनुसन्धाय तेभ्यो यथाशक्ति सक्तून् दद्यात् ॥ * ॥ तथान्नदानप्रकरणे ।
"सहस्रपरिवेष्टारं नरकन्तु न गच्छति ।
विमानेनार्कवर्णेन स्वर्गलोके महीयते" ॥
सहस्रपरिवेष्टारः सहस्राय मनुष्येभ्योऽन्नप्रदः । यथासम्भवं सहस्राय मनुष्येभ्यो नित्यमन्नं पूर्ब्बवत् सङ्कल्प्य दद्यात् । ॐ विष्णुधर्म्मोत्तरोक्तसहस्रपरिवेष्टनफलप्राप्तिकामोऽहं यथासम्भवं सहस्राय मनुष्येभ्यो व्यञ्जनादिसहितमन्नं दास्ये । इति सङ्कल्प्य यथाशक्ति नानादिनैः सहस्रं मनुष्यान् भोजयेत् । देवलः ।
"कृत्वापि पातकं कर्म्म यो दद्यादन्नमीप्सितं ।
ब्राह्मणानां विशेषेण स निहन्त्यात्मनस्तमः" ॥
विशेषेण इत्यभिधानात् अब्राह्मणेऽपि फलमेतद्भवत्येव । एवञ्च सामान्येनान्नदानमिदं । ईप्सितमित्यर्थिनं दृष्ट्वा यथायथमभिमतमन्नमुत्पाद्य तेभ्यःपूर्ब्बवत् सङ्कल्प्य दद्यात् । ॐ ब्राह्मणप्रमुखनानावर्णेभ्य आत्मीयतमःक्षयकामोऽहं यथासम्भवं ईप्सितमन्नं दास्ये । ततः प्रभृति यथायथमुपस्थितेभ्य ईप्सितमन्नं दद्यात् । इत्यादि वल्लालसेनकृतदानसागरे अन्नदानावर्त्तः ॥

अन्नः, पुं, (अनित्यनेन अन + नन्, अद्यते इति अद् + क्तः वा ।) सूर्य्यः । इति सिद्धान्तकौमुदी ॥
अन्नः, त्रि, (अनित्यनेन अन + नन् ।) भुक्तः । खादितः । इति मेदिनी ॥
अन्नकोष्ठकः, पुं, (कोष्ठमिव, कोष्ठ + कन् अन्नस्य तण्डुलादेः कोष्ठकः रक्षणस्थानं ।) तण्डुलादिरक्षणस्थानं । इति हेमचन्द्रः ॥गोला करइ इत्यादि भाषा ।
अन्नगन्धिः, पुं, (अन्नस्येव अपक्वतया गन्धोयस्य सः । उपमानाच्च इति पाणिनिसूत्रेण इच् समासान्तः ।) उदरामयरोगः । इति चिकित्साशेषः ॥
अन्नपूर्णा, स्त्री, (अन्नं पूर्णं यस्याः सा राजदन्तादित्वात् परनिपातः ।) स्वनामख्यातदेवीविशेषः । तन्मन्त्रादि यथा,—
"माया हृद्भगवत्यन्ते माहेश्वरिपदं ततः ।
अन्नपूर्णे ठयुगलं मनुः सप्तदशाक्षरः" ॥
कल्पे च ।
"प्रणवाद्या यदा देवी तदा सप्तदशाक्षरी ।
अन्नप्रदा मोक्षदा च सदा विभवदायिनी ॥
मायाद्या च यदा देवी तदा सा सकलेष्टदा ।
श्रीबीजाद्यायदा देवी तदा सुखविवर्द्धिनी ॥
वाग्बीजाद्या यदा विद्या वागीशत्वप्रदायिनी ।
कामाद्या च यदा विद्या सर्व्वकामप्रदायिनी ॥
तारमायादिका विद्या भोगमोक्षैकदायिनी ।
माया श्रीयुग्मबीजाद्या सदा विभवदायिनी ॥

श्रीमाया युग्मबीजाद्या सर्व्वसम्पत्तिपूरणी"॥ * ॥
एवं पूजा प्रातःस्नानादिपीठन्यासान्तं विधाय हृत्पद्मस्य केशरेषु मध्येषु च भुवनेश्वरीपीठमन्त्रान्तं पीठशक्तीर्न्यस्य ऋष्यादिन्यासं कुर्य्यात्। यथा शिरसि ब्रह्मणे ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदि अन्नपूर्णायै देवतायै नमः। तत्रैव।
"एतेषां मन्त्रराजीनां ऋषिर्ब्रह्मा उदाहृतः।
पङ्क्तिः छन्दः समाख्यातं देवता चान्नपूर्णिका"॥
ततः कराङ्गन्यासौ। क्रीं अङ्गुष्ठाभ्यां नमः। क्रीं हृदयाय नमः। इत्यादि सर्व्वत्र मायाबीजेन कुर्य्यात्। तथा च निबन्धे।
अङ्गानि मायया कुर्य्यात् ततो देवीं विचिन्तयेत्। कल्पे च।
"यद्यद्बीजाद्या भवेद्विद्या तद्बीजेनाङ्गकल्पना"॥१॥
ततो ध्यानं।
"रक्तां विचित्रवसनां नवचन्द्रचूड़ा-
मन्नप्रदाननिरतां स्तनभारनम्रां।
न्यस्तान्यिन्दुसकलाभरणं विलोक्य
हृष्टां भजे भगवतीं भवदुःखहन्त्रीं"॥
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्। ततः सामान्योक्तपीठपूजां विधाय भुवनेश्वरीमन्त्रोक्तजयादिपीठमन्त्रान्तां पीठपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत। यथा केशरेष्वग्निकोणे श्रीं हृदयाय नमः। नैर्ऋते क्रीं शिरसे स्वाहा। वायव्ये क्रीं शिखायै वषट्। ऐशान्यां क्रीं कवचाय हुं। मध्ये नेत्रत्रयाय वौषट्। चतुर्दिक्षु क्रीं अस्त्राय फट्। अष्टदलेषु पूर्व्वादिषु ब्राह्म्यै माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै इन्द्राण्यै चामुण्डायै महालक्ष्म्यै प्रणवादिनमोऽन्तेन पूजयेत्। तत्रैव।
"दलेषु पूजयेदेता ब्राह्म्याद्याः क्रमशः सुधीः"।
भूपुरस्य प्रणवचतुर्द्व्यक्षरो विन्दुयुक्तः॥ कालिकापुराणे मन्त्रस्य सेतुकरणे उक्तत्वात्। तत इन्द्रादीन् वज्रादींश्च पूजयित्वा धूपादि विसर्জ্জनान्तं कर्म्म समापयेत्॥ * ॥ अस्य पुरश्चरणजपः षोड়शसहस्रसङ্খ্যः। तथा च।
"यथाविधि जपेन्मन्त्रं वसुयुग्मसहस्रकं।
साज्येनान्नेन शुद्धयात्तद्दशांशमनन्तरं"॥
अयं मन्त्रः प्रणवादिरष्टादशाक्षरः। मायादिः श्रीबीजादिश्च। तथा मायां विना प्रणवादिः कामादिः श्रीबीजादिः वाग्भवादिश्च सप्तदशाक्षरः। कवचे तथा प्रतिपादनात्। विशेषस्तु यद्यद्बीजादिको मन्त्रस्तेनैवाङ्गप्रकल्पना॥ * ॥

अथान्नपूर्णास्तोत्रं।

"नमः कल्याणदे देवि नमः शङ्करवल्लभे।
नमो भक्तप्रिये देवि अन्नपूर्णे नमोऽस्तु ते॥
नमो मायास्वरूपायै नमः शङ्करवल्लभे।
माहेश्वरि नमस्तुभ्यमन्नपूर्णे नमोऽस्तु ते॥
महामाये शिवधर्म्मपत्नीरूपे हरप्रिये।
वाञ्छादात्रि सुरेशानि अन्नपूर्णे नमोऽस्तु ते॥

उद्यद्भानुसहस्राभे नयनत्रयभूषिते।
चन्द्रचूड़े महादेवि अन्नपूर्णे नमोऽस्तु ते॥
विचित्रवसने देवि अन्नदानरतेऽनघे।
शिवनृत्यकृतामोदे अन्नपूर्णे नमोऽस्तु ते॥
साधकाभीष्टदे देवि भवदुःखविनाशिनि।
कुचभारनते देवि अन्नपूर्णे नमोऽस्तु ते॥
षट्कोणपद्ममध्यस्थे षड়ङ्गयवतीमये।
ब्रह्माण्यादिस्वरूपे च अन्नपूर्णे नमोऽस्तु ते॥
देवि चन्द्रकृतापीड़े सर्व्वसाम्राज्यदायिनि।
सर्व्वानन्दकरे देवि अन्नपूर्णे नमोऽस्तु ते॥
इन्द्राद्यर्चितपादाब्जे शक्रादिरूपधारिणि।
सर्व्वसम्पत्प्रदे देवि अन्नपूर्णे नमोऽस्तु ते॥
पूजाकाले पठेद्यस्तु स्तोत्रमेतत् समाहितः।
तस्य गेहे स्थिरा लक्ष्मीर्जायते नात्र संशयः॥
प्रातःकाले पठेद्यस्तु मन्त्रजापपुरःसरं।
तस्य चान्नसमृद्धिः स्याद्वर्द्धमाना दिने दिने॥
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन।
प्रकाशात् कार्य्यहानिः स्यात्तस्माद्यत्नेन गोपयेत्"॥
इत्यन्नपूर्णास्तोत्रं समाप्तं॥ * ॥

अथ अन्नपूर्णाकवचं॥

"कथिताद्यान्नपूर्णाया या या विद्याः सुदुर्ल्लभाः।
त्वया कथिताः सर्व्वा श्रुताश्चाधिगता मया॥
साम्प्रतं श्रोतुमिच्छामि कवचं यत् पुरोदितं।
त्रैलोक्यरक्षणं नाम कवचं मन्त्रविग्रहं"॥

ईश्वर उवाच।

"शृणु पार्व्वति वक्ष्यामि सावधानावधारय।
त्रैलोक्यरक्षणं नाम कवचं ब्रह्मरूपकं॥
ब्रह्मविद्यास्वरूपञ्च महदैश्वर्य्यदायकं।
पाठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्य्यभाग्भवेत्॥
त्रैलोक्यरक्षणस्यास्य कवचस्य ऋषिः शिवः।
छन्दो विराडन्नपूर्णा देवता सर्व्वसिद्धिदा॥
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः।
क्रों नमो भगवत्यन्ते माहेश्वरिपदं ततः।
अन्नपूर्णे ततः स्वाहा चैषा सप्तदशाक्षरी॥
पातु मामन्नपूर्णा सा या ख्याता भुवनत्रये।
विभाया प्रणवाद्येषा तथा सप्तदशाक्षरी॥
पातत्वन्नपूर्णा सर्व्वाङ्गं रत्नकुम्भान्नपात्रदा।
श्रीबीजाद्या तथा चैषा दिरन्ध्रार्णा तथा मुखं॥
प्रणवाद्या भ्रुवौ पातु कण्ठं वाग्बीजपूर्व्विका।
कामबीजादिका चेषा हृदयन्तु महेश्वरी॥
तारं श्रीं क्रीं नमोऽन्ते च भगवति पदं ततः।
माहेश्वरि पदं चान्नपूर्णे स्वाहेति पातु मे॥
नाभिमेकोनविंशार्णा पायान्माहेश्वरी सदा।
तारं माया रमा कामः षोड়শार्णास्ततःपरं॥
शिरःस्था सर्व्वदा पातु विंशत्यर्णात्मिका च या।
करौ पादौ सदा पातु रमा कामोध्रुवस्तथा॥
ध्वजश्च सर्व्वदा पातु विंशत्यर्णात्मिका च या।
अन्नपूर्णा महाविद्या क्रीं पातु भुवनेश्वरी॥
शिरः श्रीं क्रीं तथा स्त्रीञ्च त्रिपुटा पातु मे गुदं।
षड়्दीर्घभाजा बीजेन षड়ङ्गानि पुनन्तु मां॥
इन्द्रो मां पातु पूर्व्वे च वह्निकोणेऽनलोऽवतु।
यमो मां दक्षिणे पातु नैर्ऋत्यां निर्ऋतिश्च मां।

पश्चिमे वरुणः पातु वायव्यां पवनोऽवतु।
कुबेरश्चोत्तरे पातु मामैशान्यां शिवोऽवतु॥
ऊर्द्धाधः सततं पातु ब्रह्मानन्तो यथाक्रमात्।
वज्राद्यायुधाः पान्तु दशदिक्षु यथाक्रमात्॥
इति ते कथितं पुण्यं त्रैलोक्यरक्षणं परं।
यद्धृत्वा पठनाद्देवाः सर्व्वैश्वर्य्यमवाप्नुयुः॥
ब्रह्मा विष्णुश्च रुद्रश्च कवचं धारणादृषयः।
सृजत्यवति हन्त्येव कल्पे कल्पे पृथक् पृथक्॥
पुष्पाञ्जल्यष्टकं देव्यै मूलेनैव पठेत्ततः।
युगायुतकृतायास्तु पूजायाः फलमाप्नुयात्॥
प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे।
वाणी वक्त्रे वसेत्तस्य सत्यं सत्यं न संशयः॥
अष्टोत्तरशतं चास्य पुरश्चर्य्याविधिः स्मृतः।
भूर्ज्जे विलिख्य गुलिकां स्वर्णस्थां धारयेद्यदि॥
कण्ठे वा दक्षिणे बाहौ सोऽपि सर्व्वतपोमयः।
ब्रह्माद्यादीनि शस्त्राणि तद्वात्रं प्राप्य पार्व्वति।
माल्यानि कुसुमान्येव भवन्त्येव न संशयः"॥
इति भैरवतन्त्रे भैरवभैरवीसंवादे अन्नपूर्णाकवचं समाप्तं। इति तन्त्रसारः॥ * ॥ तस्याः स्तुत्यन्तरं यथा। ॐ नमोऽन्नपूर्णायै।
"ॐ नित्यानन्दकरी वराभयकरी सौन्दर्य्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥१॥
नानारत्नविचित्रभूषणकरी हेमाम्बराड়म्बरी
मुक्ताहारविलम्बमानविलसद्वक्षोजकुम्भान्तरी।
काश्मीरागुरुवासिताङ्गरुचिरे काशीपुराधीश्वरी।
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥२॥
योगानन्दकरी रिपुक्षयकरी धर्म्मैकनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी।
सर्व्वैश्वर्य्यकरी तपःफलकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥३॥
कैलासाचलकन्दरालयकरी गौरी उमा शङ्करी
कौमारी निगमार्थगोचरकरी ॐकारबीजाक्षरी।
मोक्षद्वारकवाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥४॥
दृश्यादृश्यविभूतिभावनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रभेदनकरी विज्ञानदीपाङ्कुरी।
विश्वाधीशमनःप्रमोदनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥५॥
गुर्व्वी सर्व्वजनेश्वरी जयकरी मातान्नपूर्णेश्वरी
नारीनीलसमानकुन्तलधरी नित्यान्नदानेश्वरी।
सर्व्वानन्दकरी सदा शिवकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥६॥
आदिक्षान्तसमस्तवर्णनकरी चन्द्रप्रभा भास्करी
काश्मीरा त्रिपुरेश्वरी त्रिलहरी नित्याङ्कुरी निर्ज्जरी।
कामाकाङ्क्षकरी महोत्सवकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥७॥
चन्द्रार्कानलकोटिपूर्णवदना बालार्कवर्णेश्वरी
चन्द्रार्काग्निसमानकुण्डलधरी चन्द्रार्कविम्बाधरी।
मालापुस्तकपाशाङ्कुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥८॥

दर्व्योपाकसुवर्णरत्नघटिका दत्ते करे संस्थिता
वामे चारुपयोधरी रसभरी सौभाग्यमाहेश्वरी।
भक्ताभीष्टकरी फलप्रदकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥९॥
सर्व्वज्ञायकरी महाभयहरी माता कृपासागरी
ज्ञानानन्दकरी निरामयकरी विश्वेश्वरी श्रीधरी।
साक्षान्मोक्षकरी सदाशिवकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥१०॥
अन्नपूर्णे सदा पूर्णे शङ्करप्राणवल्लभे।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि नमोऽस्तु ते॥११॥
इति श्रीशङ्कराचार्य्यविरचितमन्नपूर्णास्तोत्रं समाप्तं॥ क्वचित् पुस्तके शङ्कराचार्य्यस्थाने वेदव्यास इति पाठः॥

अन्नप्राशनं, क्ली, (अन्नस्य प्राशनं भोजनं यस्मिन् तत्। अन्न+प्र+अश+भावे ल्युट्।) षष्ठे मासि अष्टमे वा बालकस्य पञ्चमे मासि सप्तमे वा बालिकायाः प्रथमान्नभक्षणरूपसंस्कारः। इति स्मृतिः॥ तस्य क्रमः। शोभनदिने कृतस्नानः कृतवृद्धिश्राद्धः पिता शुचिनामाग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमं कुर्य्यात्। ततः आज्येन तत्तन्मन्त्रैः पञ्चाऽऽहुतीर्जुहुयात्। ततः पञ्चप्राणानां होमः। ततो महाव्याहृतिहोमं कृत्वा प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीच्यं श्राद्धीयनान्दीमुखादिवामदेव्यगानान्तं कर्म्म निर्व्वर्त्य मन्त्रेण कुमारस्य मुखे अन्नं दद्यात्। ततः कर्म्मकारयितृब्राह्मणाय दक्षिणां दद्यात्। इति भवदेवभट्टः॥ तस्य विहितदिनादि यथा,—
"ततोऽन्नप्राशनं षष्ठे मासि कार्य्यं यथाविधि।
अष्टमे वाथ कर्त्तव्यं यदेष्टं मङ्गलं कुले"॥
षष्ठ इति मुख्यः कल्पः प्रागुक्तन्यायात्। कृत्यचिन्तामणौ।
"अन्नस्य प्राशनं कार्य्यं मासि षष्ठेऽष्टमे बुधैः।
स्त्रीणान्तु पञ्चमे मासि सप्तमे प्रजनौ सुनिः॥
द्वादशीसप्तमीनन्दारिक्तासु षट्पर्व्वसु।
बलमायुर्यशो हन्यात् शिशूनामन्नभक्षणं"॥
भुजबलभीमे।
"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वा तिथौ
सौम्यादित्यसितेन्दुजीवदिवसे पक्षे च शुक्लेतरे।
प्राजेशादिति पौष्णवैष्णवयुगैर्हस्तादिषट्कोत्तरै-
राग्नेयाग्नितिपित्र्यभैश्च नितरामन्नादिभक्तं शुभं"॥
युगैरिति प्राजेशादौ प्रत्येकं सम्बध्यते। तथाचापि तिथ्यादिविद्धमृक्षं विवर्ज्जयेत्।
"कृष्णद्वन्द्वधनुर्म्मीनकन्यालग्नेऽन्नभक्षणं।
त्रिकोणाष्टकयुकान्त्यग्रहा यद्यत्तथाधमं॥
दुष्टः ग्रहधरो लग्नात् षष्ठाष्टस्थोऽन्नभक्षणे"।
मार्कण्डेयः।
"देवता पुरतस्तस्य पितुरङ्कगतस्य च।
अलङ्कृतस्य दातव्यमन्नं प्राप्ते च काञ्चने॥
मध्याह्नेऽनकोपेतं प्राश्नीयात् पायसं ततः।

कृतप्राशनमुत्सङ्गे मातुर्बालन्तु तं न्यसेत्॥
देवाग्रतोऽथ विन्यस्य शिल्पभाण्डानि सर्व्वशः।
शास्त्राणि चैव शस्त्राणि ततः पश्येत्तु लक्षणं॥
प्रथमं यत् स्पृशेद्बालः शिल्पभाण्डं स्वयं तथा।
जीविका तस्य बालस्य तेनैव तु भविष्यति"॥
इति ज्योतिस्तत्त्वं॥

अन्नमयकोषः, पुं, (अन्नस्य विकारः अन्न+विकारार्थे मयट्। "आनन्दमयोऽभ्यासादिति" शारीरकसूत्रे भाष्यकारेणोक्तम्।) स्थूलशरीरं। इति वेदान्तसारः॥

अन्नमलं, क्ली, (अन्नस्य मलं षष्ठीतत्पुरुषः।) मद्यं। यथा,—
"सुरा वै मलमन्नानां पुरीषं मलमुच्यते।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्"॥
इति प्रायश्चित्तविवेकः॥

अन्नविकारः, पुं, (अन्नस्य विकारः षष्ठीतत्पुरुषः।) शुक्रं। इति राजनिर्घण्टः॥ (अन्नकृतशोणितमांसादिपरिणामजशरमधातुः। रेतः।)

अन्नादः, पुं, (अन्नमत्ति भुङ्क्ते अन्न+अद्+अण्।) विष्णुरन्नमन्नखादकश्च जगदभिन्नतया, तथाहि श्रुतौ "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेय इत्यादि शङ्करभाष्ये। "यज्ञान्तकृत् यज्ञश्चान्नमन्नमन्नाद एव च"।)
विष्णुः। इति तस्य सहस्रनाममध्ये पठितः॥ अन्नभोक्तरि त्रि॥ (परान्नभोजनकारी।)

अन्यः, त्रि, (अन्+बाहुल्यात् यः।) असदृशः। इति मेदिनी॥ परः।
("चातकतापशमनो जलधरभिन्नो भवेत्कोऽन्यः"। इति नीतिमाला।
"सोऽयमन्येन वेगादुद्दामेन
हिरदपतिना सन्निपत्याभियुक्तः"।
इति उत्तरचरिते।) तत्पर्य्यायः। भिन्नः। २ अन्यतरः। ३ एकः। ४ त्वः। ५ इतरः ६। इत्यमरः॥ विलक्षणः। ७। इति जटाधरः॥ एकतरः ८। नोमः ९। इति शब्दरत्नावली॥

अन्यत्, अ, (अन्+बाहुल्यात् यत्।) इतरं। भिन्नं। यथा देवदत्त आयातोऽन्यद्यज्ञदत्तः।
"अन्यदेवास्य गाम्भीर्य्यमन्यद्धैर्य्यं महीयते"।
इत्यादौ तु क्लीवलिङ्गप्रथमैकवचनान्तान्यशब्दस्वीकारेणाप्युपपत्तिरिति बोध्यं।

अन्यतः, [स्] अ, (अन्य+"सर्व्वविभक्तिभ्यस्तसिलिति" तसिल्।) अन्यत्र। अन्यस्मात्। यथा—
"एकतो हि धिगमूमगुणज्ञा-
मन्यतः कथमदःप्रतिलम्भः"। इति नैषधं॥

अन्यतमः, त्रि, (अन्य+डतमच्।) भिन्नतमः। बहूनां मध्ये निर्द्धारितैकः। इति व्याकरणं॥ अनेकेर मध्ये एक इति भाषा।
("एषामन्यतमे स्थाने यः साध्यमनृतं वदेत्।
आसां महर्षिचर्य्याणां त्यक्तान्यतमया तनुम्"॥
इति मनुः।) न्यायमते अनेकभेदावच्छिन्नप्रतियोगिताकभेदः॥

अन्यतरः, त्रि, (अन्य+डतरच्।) अन्यः। इत्यमरः॥ भिन्नतरः। द्वयोर्मध्ये निर्द्धारितैकः। इति व्याकरणं॥ दुयेर मध्ये एक इति भाषा।
("अधर्म्मेण च यः प्राह यश्चाधर्म्मेण पृच्छति।
तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति"॥
इति मनुः।) न्यायमते द्वयावच्छिन्नप्रतियोगिताकभेदः॥

अन्यतरेद्युः, [स्] अ, (अन्यतरस्मिन् दिवसे निपातनात् द्यादेशः।) अन्यतरदिने। दिनद्वययोरेकतरदिने। इत्यमरः॥

अन्यत्र, अ, (अन्यस्मिन्+अन्य+त्रल्।) वर्জ্জनं। विना। यथा,—
"अन्यत्र निधनात् पत्युः पत्नी केशान्न वापयेद्"।
इति प्राचीनाः। पत्युर्निधनादन्यत्र पतिमरणं विनेत्यर्थः। स्थानान्तरं। यथा।
"अन्यत्र यूयं कुसुमावचायं
कुरुध्वमत्रास्मि करोमि सख्यः"।
इति काव्यप्रकाशः। (कार्य्यान्तरे। क्रियान्तरे।
"मधुपर्के च यज्ञे च पितृदैवतकर्म्मणि।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः"॥
इति मनुः।
विषयान्तरे। शास्त्रान्तरे।
"योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमं।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः"॥
इति मनुः।)

अन्यथा, अ, (अन्येन प्रकारेण अन्य+प्रकारार्थे थाल्।) परार्थः। मिथ्या। इति मेदिनी॥ दुष्टं। इति शब्दरत्नावली॥ अन्यप्रकारं। इति व्याकरणं॥
("स्वभावो नोपदेशेन शक्यते कर्त्तुमन्यथा"।
इति पञ्चतन्त्रं। अन्यायेन। शास्त्रविरोधेन। अयथायथम्।
"अमात्याः प्राड्विवाको वा यत्कुर्य्युः कार्य्यमन्यथा।
तत् स्वयं नृपतिः कुर्य्यात् तान् सहस्रञ्च दण्डयेत्"॥
इति मनुः।)

अन्यथासिद्धिः, स्त्री, (अन्यथा अन्यप्रकारेण सिद्धिः।) कार्य्याव्यवहितपूर्ब्ववर्त्तित्वे सति कार्य्यानुत्पादकत्वं। सा पञ्चविधा। यथा। यत्कार्य्यं प्रति कारणस्य पूर्ब्ववर्त्तिता येन रूपेण गृह्यते तत्कार्य्यं प्रति तद्रूपमन्यथासिद्धं। यथा घटं प्रति दण्डत्वं॥ १॥ यस्य स्वातन्त्र्येण अन्वयव्यतिरेकौ न स्तः किन्तु कारणमादायान्वयव्यतिरेकौ तदन्यथासिद्धं। यथा घटं प्रति दण्डरूपं॥ २॥ अन्यं प्रति पूर्ब्ववर्त्तितां गृह्णीत्वेव यस्य यत्कार्य्यं प्रति पूर्ब्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यं प्रति अन्यथासिद्धत्वं। यथा घटादिकं प्रति आकाशस्य॥ ३॥ यत्कार्य्यजनकं प्रति पूर्ब्ववर्त्तित्वं गृहीत्वेव यस्य यत्कार्य्यं प्रति पूर्ब्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यं प्रति अन्यथासिद्धत्वं। यथा कुलालपितुर्घटं प्रति॥ ४॥ अवश्यसृष्टनियतपूर्ब्ववर्त्तिनएव कारणत्वसम्भवे तद्भिन्नमन्यथासिद्धं। यथा घटं प्रति रासभादिः॥ ५॥ इति सिद्धान्तमुक्तावली॥

अन्यदा, व्य, (अन्यस्मिन् काले अन्य + दा ।) कालान्तरे । अन्यसमये । यथा,—
"अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।
पराक्रमः परिभवे वैजात्यं सुरतेष्विव" ॥
इति माघः ॥

अन्यपुष्टः, पुं, (अन्यया स्वमाढभिन्नया पुष्टः ।) कोकिलः । यथा,—
"अप्यन्यपुष्टाः प्रतिकूलशब्दाः
श्रोतुर्व्वितन्वीरिव ताडयानाः" ।
इति कुमारसम्भवे ॥

अन्यपूर्ब्बा, स्त्री, (अन्यः पूर्ब्बो यस्याः सा ।) पौनर्भवा कन्या । एकस्मै वागादिना दत्ता पुनरन्येन विवाहिता कन्या । सा सप्तधा यथा,—
"सप्त पौनर्भवाः कन्या वर्জ्जनीयाः कुलाधमाः" ।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला ॥
उदकस्पर्शिता या च या च पाणिग्रहीतिका ।
अग्निं परिगता या तु पुनर्भूप्रसवा च या ॥
इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्" ।
इत्युद्वाहतत्त्वं ॥

अन्यभृत्, पुं, (अन्यान् कोकिलान् बिभर्त्ति पालयति अन्य + भृ + क्विप् ।) काकः । इति हेमचन्द्रः ॥ (कोकिलः ।)

अन्यभृतः, पुं, (अन्यया स्वमाढभिन्नया भृतः पालितः ढतीयातत्पुरुषः ।) कोकिलः । इति हलायुधः ॥
("कलमन्यभृतासु भाषितं
कलहंसीषु मदालसं गतं" । इति रघुः ।)

अन्यमनस्कः, त्रि, भिन्नचित्तः । अन्यमनाः । अन्यस्मिन् मनो यस्य स इति बहुव्रीहौ कप्रत्ययेन सिद्धः ॥ (विषयान्तरासक्तचित्ततया उपस्थितकार्य्येऽनवहितहृदयः । अस्थिरः । चञ्चलचित्तः ।)

अन्यवर्द्धितः, त्रि, (अन्यया योषिता वर्द्धितः पुष्टः ।) अन्यपुष्टः । परैधितः । अन्येन प्रतिपालितः । इति जटाधरः ॥

अन्यवादी, [न्] त्रि, (अन्यत् पूर्ब्बस्वीकृतवाक्यात् भिन्नं वदति, अन्य + वद् + णिनि उपपदसमासः ।) इतरवादी । अस्थिरवादी । अन्यथावादी । यथा,—
"अन्यवादी क्रियादेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" ॥
इति व्यवहारतत्त्वे नारदः ॥

अन्यशाखकः, पुं, (अन्या स्वशाखेतरा शाखा यस्य सः, समासान्तः कः ।) स्ववेदशाखामुत्सृज्यापरशाखाध्ययकर्म्म कुर्व्वाणः । तत्पर्य्यायः । शाखारूढः २ । इति हेमचन्द्रः ॥

अन्यादृक्, [श्] त्रि, (अन्यमिव पश्यति अन्य +, दृश् + क्विन्, उपपदसमासः । "दृक् दृशवतुषु" इति आकारः ।) अन्यप्रकारः । इति मुग्धबोधव्याकरणं ॥

अन्यादृशः, त्रि, (अन्यइव पश्यति अन्य + दृश् + कञ् आत्वञ्च ।) अन्यप्रकारः । इति मुग्धबोधव्याकरणं ॥

अन्यायः, पुं, (न्यायः । सङ्गतिः । युक्तिः । औचित्यं, तस्मादन्यः नञ्समासः ।) न्यायभिन्नः । अनौचित्यं । अयुक्तिः । यथा,—
"अन्यायेनापि यद्भुक्तं पित्रा पूर्ब्बतरैस्त्रिभिः ।
न तच्छक्यमपाकर्त्तुं क्रमात्पुरुषागतं" ॥
इति व्यवहारतत्त्वे नारदः ॥

अन्याय्यः, त्रि, (न्यायादनपेतः, न्याय + अनपेतार्थे यत्, ततो नञ्समासः ।) अनुचितः । अयोग्यः । यथा,—दृष्टार्थसत्त्वे अदृष्टकल्पनाया अन्याय्यत्वादित्यधिकरणमालायां माधवाचार्य्यः ॥ (असङ्गतः । गर्हितः । धर्म्मविरुद्धः । युक्तिविरोधी ।
"न्याय्यं सन्नेच्छते कर्त्तुमन्याय्यं वा करोति यः" ।
इति कात्यायनसंहिता ।)

अन्यूनः, त्रि, (न न्यूनः, नञ्समासः ।) न्यूनतारहितः । सम्पूर्णः । इति जटाधरः ॥

अन्येद्यु, [स्] व्य, (अन्यस्मिन् दिवसे निपातनात् सिद्धम् ।) अन्यस्मिन्नहनि । दिवसान्तरे । अन्यदिने । इत्यमरः ॥
("अन्येद्युरात्मानुचरस्य भावं
जिज्ञासमाना मुनिहोमधेनुः" ।
इति रघुवंशे ।)

अन्योदर्य्यः, पुं स्त्री, (अन्यस्याः स्वमाढभिन्नविमातुरुदरे जातः अन्योदर + यत् एकपितृकः भिन्नमाढको भ्राता ।) वैमात्रेयः । यथा,—
"अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्" ।
इति याज्ञवल्क्यः ॥ (अन्यमाढजः ।)

अन्योन्य, त्रि, (अन्य + व्यतिहारार्थे द्वित्वं, ततः पूर्ब्बपदात्यरः सुञ्च ।) उभयतः । तत्पर्य्यायः । इतरेतरं । २ परस्परं । ३ । इति हेमचन्द्रः ॥
("अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैः" इति उत्तरचरिते ।)

अन्योन्याश्रयः, त्रि, (अन्योन्यमाश्रयति, अन्योन्य + आ + श्रि + पचाद्यच् ।) परस्परज्ञानसापेक्षज्ञानाश्रयः । इति स्मार्त्ताः ॥ स्वयंहसापेक्षग्रहसापेक्षग्रहकः । इति तार्किकाः ॥ तर्कविशेषः । तस्य लक्षणं । स्वापेक्षापेक्षितत्वनिबन्धनप्रसङ्गत्वं । अपेक्षा च ज्ञप्तौ उत्पत्तौ स्थितौ च ग्राह्या । तत्राद्या यथा । घटोऽयं यद्येतद्घटज्ञानजन्यज्ञानविषयः स्यात् तदैतद्घटभिन्नः स्यात् । द्वितीया यथा । घटोऽयं यद्येतद्घटजन्यजन्यः स्यात् तदैतद्घटजन्यभिन्नः स्यात् । तृतीया यथा । घटोऽयं यद्येतद्घटवृत्तिवृत्तिः स्यात् तथात्वेनोपलभ्येत ।इति जगदीशः ॥

अन्वक्, [च्] त्रि, (अनु पश्चात् अञ्चति गच्छति अनु + अञ्च + क्विन्) पश्चाद्गामी । इत्यमरः ॥ (अनु पदं । पश्चात् । "तां देवतापित्रतिथिक्रियार्थामन्वक् ययौ मध्यमलोकपालः" । इति रघुवंशे ।)

अन्वयः, पुं, (अनु + इण् + भावे अच् ।) वंशः । कुलं । इत्यमरः ॥
("तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः" ।
इति रघुवंशे । वंशपरम्परा ।
"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्" ।
इति रघुवंशे ।
"काव्यदेव्यभिधा सूरबधूः शुद्धान्वया" ॥
इति राजतरङ्गिणी । वंशजाताः पुत्रपौत्रादयः ।
"मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः" ।
इति नारदः ।
"स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ।
इति मनुः ।) पदानां परस्पराकाङ्क्षा योग्यता च । इति दुर्गादासः ॥ परस्परसम्बन्धः । इति रामतर्कवागीशः ॥

अन्ववायः, पुं, (अनु + अव + इण् + भावे अच् ।) वंशः । कुलं । इत्यमरः ॥ ("कथमेकान्ववायोऽयमसञ्जाकं" । इति शाकुन्तले ।)

अन्वष्टका, स्त्री, (अष्टौ परिमाणान्यस्याः, अष्टन् + कन्, इत्वाभावः, अष्टकामनुगता प्रादिसमासः ।) अष्टकापश्चात्तिथिः । सा तु गौणचान्द्रपौषमाघफाल्गुनाश्विनमासानां कृष्णनवमी । तत्र सामान्यानां मातृकश्राद्धं । इति श्राद्धविवेकः ॥ तत्र साग्निकर्त्तव्यमातृपक्षश्राद्धं । यथा शङ्खः ।
"पित्रादित्रिकपत्नीषु भोज्या मातृः प्रतिद्विजाः ।
स्त्रीणामेव तु तच्छस्मान्मातृश्राद्धमिहोच्यते" ॥
एतच्चान्वष्टकाश्राद्धं साग्निमाचेण कर्त्तव्यं ।
तथा च विष्णुः । अन्वष्टकाकृष्णकावदभौ कृत्वा मासे पितामहौ प्रपितामहौ पूर्ब्ववद्ब्राह्मणान् भोजयित्वा इति । अत्र होमस्तादेवाग्निप्राप्तेरग्रिग्रहणं तन्नियमार्थं । न चाग्नौ करणहोमे विप्रपाण्यादेर्व्विधानादत्रापि तथेति वाच्यं । प्रकृतीभूतश्राद्धविधुक्तस्याधारान्तरस्य विकृतीभूतश्राद्धे विशेषविहिताधारेण बाधात् । शरमयवर्हिषा कुशमयबर्हिर्बाधवत् । न वा लौकिकाग्नौ होमः । "न पैत्र्ययज्ञियो होमो लौकिकाग्नौ विधीयते" । इति मनुवचनेन निषेधात् । श्राद्धचिन्तामणावप्येवं । इति श्राद्धतत्त्वं ॥

अन्वञ्च्, त्रि, (अनु + अञ्च् + पचाद्यच् । अञ्चतिरिन्द्रियमनुगतम्, प्रादिसमासः, प्रत्यञ्चे, अनुगते अनुपदे ।) पश्चाद्गामी । इत्यमरः ॥

अन्वाधिः, पुं, (अनु पश्चात् आधीयते न्यस्यते, अनु + आ + धा + कि ।) एकस्मिन् यदर्पितं वस्तु तेन पुरुषान्तरे अमुष्मिन् स्वामिनि त्वं दास्यसीति निक्षिप्तं तत् । इति विवादार्णवसेतुः ॥ कार्य्येषु वाचनेन अमुष्मिन् पुरुषे त्वं दद्या इति परिभाष्य यत् समर्पितं तत् । इति हलायुधः ॥ यथा,—
"अर्थमार्गणकार्य्येषु अन्यस्मिन् वचनान्मम ।
दद्यास्त्वमिति यो दत्तः स ह्यन्वाधिरुदाहृतः" ॥
इति कात्यायनः ॥ पुनर्बन्धकः । पश्चान्मानसी व्यथा । अनुपूर्ब्बकस्य आधिशब्दस्य इत्यर्थद्वयमपि सम्भवति ॥

अन्वाधेयं, क्ली, (अनु विवाहानन्तरमाधेयं समर्पणीयं, अनु + आ + धा + कर्म्मणि यत् ।) विवाहानन्तरपितृमातृभर्तृकुललब्धस्त्रीधनं । यथा,—
"विवाहात् परतो यत्तु लब्धं भर्त्तृकुलात् स्त्रिया ।
अन्वाधेयं तदुद्दिष्टं लब्धं बन्धुकुलात्तथा" ॥
इति कात्यायनः,—

अन्वासनं, क्ली, (अनु + आस् + ल्युट्) स्नेहवत्तिः । अनुशोचनं । उपासना । इति विश्वमेदिन्यौ । श्लिष्यादिस्नेहं । इति हलायुधः ॥ (अनुवासनं ॥

पश्चात् तापः ।)

अन्वाहार्य्यं, क्ली, (प्रतिमासमाहरणीयं, अनु + आ + हृ + ण्यत् ।) मासिकश्राद्धं । इत्यमरः ॥ तत्तु प्रत्यमावास्याविहितं पार्व्वणश्राद्धं अक्षतसपिण्डीकरणस्य वत्सरान्ते प्रतिमासं यत् श्राद्धं तदिति केचित् । इति भरतः ॥ गोभिलमतञ्चोक्तकर्म्मणामाद्यश्राद्धं । तदन्ताङ्गदक्षिणा च । यथा,—

"यत् श्राद्धं कर्म्मणामादौ याचान्ते दक्षिणा भवेत् ।
अमावास्यं हितीयं यदन्वाहार्य्यं विदुर्बुधाः" ॥

इति गोभिलमतञ्च ॥

अन्वाहार्य्यकं क्ली, (प्रतिमासमाहरणीयं, अनु + आ + हृ + ण्यत्, ततः स्वार्थे कन् ।) अन्वाहार्य्यं । यथा,—

"पित्र्यमन्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकं" ।

इति मनुः ॥

अन्वाहितं, त्रि, (अनु + आ + धा + कर्म्मणि क्त ।) यदेकस्य हस्ते निहितं द्रव्यं तेनापि पश्चादन्यस्य हस्ते स्वामिने देहीति निहितं तत् । इति मिताक्षरा ॥

("याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः" । इति याज्ञवल्क्यः,—

"एष एव विधिर्दृष्टो याचितान्वाहितादिषु" ॥

इति नारदः ।) गच्छित द्रव्य ताहार स्वामिके दिते अन्यहस्ते अर्पणकरा इति भाषा ॥

अन्वितः, त्रि, (अनु + इण् + क्त ।) युक्तः । मिलितः । इति जटाधरः ॥ ज्ञतान्वयपदादिः । यथा,—

"पदार्थान्तरैरन्विताना सङ्केतो ग्रह्यते" ।

इति काव्यप्रकाशः ॥

(पदानां योग्यताकाङ्क्षादिरूपान्वयसहितः । परस्परं सम्बद्धः ।

"वर्णाः पदं प्रयोगार्हान्वितैकार्थबोधकाः" ॥

इति साहित्यदर्पणे ।)

अन्विष्टः, त्रि, (अनु + इष् + क्त ।) अन्वेषितः । ज्ञतान्वेषणः । इत्यमरः ॥ ("यदायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हैः" । इति कुमारसम्भवे ।)

अन्वीतः, त्रि, (अनु + ईङ् गतौ + कर्त्तरि क्तः ।) अन्वितः । युक्तः । इति जटाधरः ॥

अन्वेषणं, क्ली, (अनु + इष् + ल्युट्) अन्वेषणा । अनुसन्धानं । यथा । "सुग्रीवो राममित्रं च जनकतनयान्वेषणे प्रेषितोऽहं" । इति महानाटकम् । ("दोषान्वेषणमेव मत्सरयुजां नैसर्गिको दुर्ग्रहः" । इत्युद्भटः ।)

अन्वेषणा, स्त्री, (अनु + इष् + णिच् + भावे युच् तस्य अनः, ततः टाप् ।) तर्कादिना यथाबोधितधर्म्मान्वेषणं । अन्वेषणमात्रं । तत्पर्य्यायः परीष्टिः २ पर्य्येषणा ३ गवेषणा ४ । इत्यमरः ॥

अन्वेषितः, त्रि, (अनु + इष् + णिच् + कर्मणि क्त ।) ज्ञतान्वेषणः । तत्पर्य्यायः ॥ गवेषितः । २ अन्विष्टः । ३ मार्गितः । ४ मृगितः । ५ इत्यमरः ॥ ६ परीष्टः । ७ पर्य्येषितः । इति अन्वेषणापर्य्याये परीष्टिपर्य्येषणापदद्वयोक्तेः ॥

अन्वेष्टा, (ऋ) त्रि, (अनु + इष् + ट्वच् ।) अन्वेषणकर्त्ता । तत्पर्य्यायः ॥ आनुपदः २ । इति हेमचन्द्रः ॥ ("अन्वेष्टारो ब्राह्मणाश्च भ्रमन्ति ग्रतशोमहीं" । इति गलोपाख्यानं ।)

अप, य, (न पाति, न + पा + ड "वादयोऽसत्त्वे" इति निपातसंज्ञया स्वरादिनिपातमव्ययमिति अव्ययम् ।) उपसर्गविशेषः । अस्यार्थः । अनादरः । भंशः । असाकल्यं । वैरूप्यं । त्यागः । नञर्थः । इति दुर्गादासः ॥ अपज्ञार्थः । वर्ज्जनार्थः । वियोगः । विपर्य्ययः । विज्ञप्तिः । चौर्य्यं । निर्देशः । हर्षः । इति मेदिनी ॥

अपः, [स्] क्ली, (आप् + असुन्, पृषोदरादित्वात् रूपम् ।) यज्ञकर्म्म । इत्युणादिकोषः ।

अपकर्म्म, क्ली, (अपज्ञातं कर्म्म ।) दुष्क्रिया । मन्दकर्म्म । अपज्ञार्थापोपसर्गेण कर्म्मशब्दस्य कर्म्मधारयसमासः ।

अपकारः, पुं, (अप + कृ + भावे घञ् ।) द्रोहः । अनुपकारः । मन्दकरणं । इति हलायुधः । (अनिष्टसाधनं । असद्व्यवहारः । अत्याचारः । देवः ।

"उपकर्त्तारिणा सन्धिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः" ।

इति माघः ।)

अपकारगोः, [र्] स्त्री, (अपकारेण गीः वाक्यं ।) अपकारवाक्यं । भर्त्सनं । इत्यमरः ।

अपकारी, [न्] त्रि, (अपकरोति, अप + कृ + णिनि ।) अपकारकः । द्रोहकः । यथा,—

"अपकारिणि चेत् क्रोधः क्रोधः क्रोधे कथं न ते ।
धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि" ॥

इत्युद्भटः । (अहितकारी । अनिष्टसाधकः । पीड़कः । दुर्वृत्तः । कुकर्म्मकारी ।

"किं भक्षेनासमर्थेन किं ग्रक्षेनापकारिणा" ।

इति पञ्चतन्त्रम् ।)

अपक्षरं, त्रि, (अप + क्षर् + क्तः ।) जघन्यं । तत्पर्य्यायः । अधमं । २ निकृष्टं । ३ अपाकं । ४ गर्ह्यं । ५ अवद्यं । ६ काण्डं । ७ कुत्सितं । ८ प्रतिक्षरं । ९ याप्यं । १० वेषः । ११ अवमं । १२ ह्रवं । १३ खेटं । १४ पापं । १५ अपशब्दं । १६ कुपूयं । १७ चेलं । १८ अर्व्वयं । १९ । इति हेमचन्द्रः ।

अपक्रमः, पुं, (अप + क्रम + भावे घञ्, "नोदात्तोपदेशे मान्तस्येत्यादिना वृद्धिनिषेधः" ।) पलायनं । इत्यमरः ।

अपक्रिया, स्त्री, (अप् + कृ + भावे श ।) द्रोहः । अपकारः । इति हेमचन्द्रः ॥ (विपरीतप्रयोगः । "चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया" । इति माघः ।)

अपक्रोशः, पुं, (अप् + क्रुश् + भावे घञ् ।) निन्दनं । जुगुप्सनं । भर्त्सनं । इति शब्दरत्नावली ।

अपक्वः, त्रि, (न पच्यते, पच् + कर्म्मणि क्तः, ततो नञ्समासः ।) पक्वभिन्नः । काँचा इति भाषा । यथा,—

"तैले विपर्य्ययं विद्यात् पक्वे चापक्व एव च" ।

इति वैद्यकपरिभाषा । तत्पर्य्यायः । २ असिद्धं । ३ आमं । ४ अपक्वं । इति रत्नमाला ।

("अपक्वे स्रवणं दद्यात् पक्वे दद्यात् मरीचकम्" ॥ इति आमवाक्ये ।)

अपगतः, त्रि, (अप + गम् + कर्त्तरि क्तः, अपयाते पलायिते च ।) मृतः । इति हेमचन्द्रः । गतः । दूरीभूतः । यथा,—"तापोनापगतस्तृषा न च छाया धूली न धौतं तनोः" इत्यादि वल्लालसेनः ।

अपगा, स्त्री, (अधोमुखेन गच्छति, अप + गम् + कर्त्तरि डः, स्त्रियां टाप् ।) आपगा । नदी । इत्यमरटीकायां भरतः । (स्रोतस्वती दीपवती स्रवन्ती निम्नगापगा इत्यमरः ।)

अपघनः, पुं, (अपहत्य मिलित्वा वियुज्यते, अप + हन् + "अपघनोऽङ्ग"-मिति पाणिनिसूत्रेण अप् हस्याने घ ।) अवयवः । अङ्गं । इत्यमरः । ("वृष्णिभिरपघनैर्घधरव्यक्तघोषान्" । इति सूर्य्यशतके ।)

अपघातः, पुं, अपहननं । अपज्ञार्थापोपसर्गात् हनधातोर्भावे घञ् हस्य घः नस्य तः । अपज्ञस्त्युत्फलकव्यापारः । अपहन्यते इति व्युत्पत्त्या अपपूर्व्वक हनधातोर्भावे घञ्प्रत्ययेन निष्पन्नः ॥

अपचयः, पुं, (अप + चि + भावे अच् । अपहरणं ।) क्षतिः । हानिः । तत्पर्य्यायः । अपहारः २ । इत्यमरः ॥ (पूजा सम्मानना । क्षयः । "देहस्यापचयो-मतौ निविशते गाढ़ो गृहेषु ग्रहः" । इति भ्रान्तिशतके ।) [पूजितः । इत्यमरः ।

अपचायितः, त्रि, (अप + चाय + कर्म्मणि क्तः ।)

अपचारः, पुं, (अप + चर् + भावे घञ्, अपथ्यसेवनं ।) अहिताचरणं । यथा, "योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधाश्चपचारैः" ।

इति माधवकरः ।

("ज्ञतापचारोऽपि परैरनाविष्कृतविक्रियः ।
असाध्यं कुरुते कोपं प्राप्ते काले गदो यथा" ॥

इति माघः ।)

अपचितः, त्रि, (अप + चाय + पूजार्थे कर्म्मणि क्तः । अपचितश्चेति पाणिनिसूत्रेण पक्षे चायस्याने चिभावः । अप + चि + क्तः ।) हीनः । क्षयितः । अवयवाद्यपचययुक्तः । स्त्रीयः । क्षुद्रः । "अपचितमपि गात्रं व्याधतत्वादलक्ष्यं" । इति शाकुन्तले ।

अपचितिः, स्त्री, (अप + चि + भावे क्तिन् । हानिः । क्षयः । पूजा । निष्कृतिः । इति मेदिनी । (क्षयः । ध्वंसः । सम्मानना ।

"अहं त्वपचितिं भ्रातुः पितुश्च सकलामिमां" ।

इति रामायणे ।)

अपच्छायः, त्रि, (अपगता छाया यस्मात् सः ।) देवः । उपदेवः । निष्प्रभः । अपगता छाया यस्मात् इति बहुव्रीहौ क्रुच्छः । (अपज्ञच्छाया-विशिष्टः । मिश्रादिः ।

"अजाखुरं खुरोत्सर्गमार्ज्जनीरेणुवर्ज्जनैः ।
दीपच्छायापच्छायेव त्यज्यते निर्धनोजनः" ।)

अपञ्चीकृतं, क्ली, (अपञ्चात्मकं पञ्चात्मकं कृतं, पञ्च + अभूततद्भावे चि कृ + क्तः, ततो नञ्समासः । सूक्ष्मभूतं । पञ्चीकृतभिन्नाकाशादिपञ्चभूतं । इति वेदान्तसारः ।

("पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितं।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनं" ॥
इति पञ्चदश्यां ।)

अपटान्तरं, त्रि, (पटेन वस्त्रेण तिरस्करिण्या इति यावत् अन्तरं व्यवधानं यत्र तत्, ततो नञ्समासः ।) आसन्नं । संसक्तं । अपदान्तरं । अव्यवहितं । इत्यमरटीकायां स्वामी ॥

अपटी, स्त्री, (अल्पः पटः अल्पार्थे नञ्समासः, गौरादित्वात् ङीष् ।) वस्त्रप्रावरणं । इति हेमचन्द्रः । कानात् । इति भाषा । (यवनिका । पर्दा । इत्यादि भाषा ।)

अपटुः, स्त्री, (न पटुः, नञ्समासः ।) व्याधितः । रोगी । इत्यमरः । पटुतारहितः । कार्य्याक्षमः । यथा,—

"सा क्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रयैरपटवो जाताः स्म इत्यद्भुतं" ।
इत्यमरुकविः ॥

अपतर्पणं, क्ली, (अप + तृप् + भावे ल्युट् । लङ्घनं । रोगादौ भोजनाभावः । इति हेमचन्द्रः । (अपगतं तर्पणं तृप्त्यभावो यस्य तत् । गतलोभः । तृप्तिशून्यः ।)

अपत्यं, क्ली, (न पतति वंशो यस्मात्, पत + बाहुल्यात् यत्, ततो नञ्समासः ।) पुत्रः । कन्या । तत्पर्य्यायः । २ सन्तानः । ३ तोकं । ४ सन्ततिः । ५ प्रसूतिः । इति जटाधरः ।

("अस्मिंस्तु निर्गुणे गोत्रे नापत्यमुपजायते") ।
इति हितोपदेशे ।

"महीभृतः पुत्रवतोऽपि दृष्टिं
तस्मिन्नपत्ये न जगाम तृप्तिं" ।
इति कुमारसम्भवे ।)

अपत्यदा, स्त्री, (अपत्यं गर्भं तत्सेवनेन ददाति, अपत्य + दा + कर्त्तरि कः, उपपदसमासः ।) गर्भदात्रीवृक्षः । इति राजनिर्घण्टः ।

अपत्यपथः, पुं, (अपत्यस्य गर्भान्निःसारणस्य पन्था मार्गः, षष्ठीतत्पुरुषः, समासान्त अच् ।) भगं । योनिः । इति हेमचन्द्रः ।

अपत्यभ्रुचुः, पुं, (अपत्यस्य भ्रुचुः, षष्ठीतत्पुरुषः ।) कर्कटः । इति शब्दचन्द्रिका । काँकड़ा । इति भाषा ।

अपत्रपः, त्रि, (अप + त्रप् + भावे अच्, ।) त्रपारहितः । निर्लज्जः । अपगता त्रपा यस्येति बहुव्रीहौ आकारस्य ह्रस्वः ॥ ("सापत्रपः कुलगुरुर्विहितस्त्वया नः" । इति धनञ्जयविजय व्यायोगे ।)

अपत्रपा, स्त्री, (अपगता त्रपा अन्यतो लज्जा यस्याः सा, स्त्रियां टाप् लज्जाहीना । लज्जाशून्या ।) अन्यतो लज्जा । परस्मात् लज्जा । इत्यमरः । लज्जामात्रं । इति रत्नकोषः ।

अपत्रपिष्णुः, त्रि, (अप + त्रप् + श्नीकार्थे कर्त्तरि ष्णुच् ।) स्वभावसत्रपः । लज्जाशीलः । इत्यमरः । लाजुक इति भाषा ।

अपथं, क्ली, व्य, (न प्रशस्तः पन्थाः मार्गः, नञ्समासः । नास्ति पन्थाः प्रशस्तः मार्गो यत्र तत् । प्रशस्तवर्त्मशून्ये नगरादौ ।) अपन्थाः । मार्ग एव यो न भवति तत् । इत्यमरः । योनिः । इति शब्दरत्नावली । (विमार्गः । कुपथः । असन्मार्गः । साधुविगर्हितः पन्थाः । "अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः" । इति रघुवंशे ।

"न कथञ्चित् वर्णानामपथमपक्वोऽपि भजते" ।
इति शाकुन्तले ।)

अपथ्यं, त्रि, (पथ्ये वैद्योक्तभोजनादिनियमाय नीतुं क्षमाधाराय वा हितं यत् ततो नञ्समासः ।) पथ्यभिन्नं । अहितं । यथा,—

"यत्पथ्यं यदपथ्यञ्च वक्ष्यते रक्तपित्तिनां" ।
इति पथ्यापथ्यग्रन्थः ।

अपदानं, क्ली, (अप + दैप्शोधने भावे ल्युट्, विद्यमानार्थे अर्थं आद्यच् । अथवा अपदायति परिशुध्यत्वेन कर्म्मणा, अप + दैप् + शोधने करणे ल्युट् ।) अवदानं । वृत्तं कर्म्म । वृत्तिः प्रवर्त्तनं सा प्रशस्ता विद्यते यत्र तत् । यत्र कर्म्मणि वृत्तिः सर्व्वैः प्रशस्यते तत् इत्यर्थः । इत्यमरटीकायां स्वामी ॥

("गण्यतत्पदानसम्मितां
भवतः सोऽपि न सत्क्रियामिमां" ।
इति शाकुन्तले ।)

अपदान्तरः, त्रि, (नास्ति पदान्तरं व्यवधानं यत्र सः ।) अव्यवहितः । संयुक्तः । इत्यमरः । अभिन्नपदे क्ली । (सन्निकर्षः । सान्निध्यं । सामीप्यं । नैकट्यं ।)

अपदिग्, क्ली, व्य, (दिशोर्मध्ये, अव्ययीभावः, समासान्त अच् ।) दिक्कोणः । दिशोर्मध्यं । तत्पर्य्यायः । विदिक् २ । इत्यमरः ।

("क्लीबाव्ययं त्वपदिग्दिशोर्मध्ये विदिक् स्त्रियां" ।
इत्यमरः ।)

अपदेशः, पुं, (अप + दिश् + घञ् । स्थानं ।) निमित्तं । व्याजं । छद्मापाच्छादनं । तत्पर्य्यायः । २ व्याजः । ३ लक्ष्यं । इत्यमरः । परानिष्टकारिभिन्नघटना । इति महाभारतटीका । (ख्यातिः । कीर्त्तिः । छलं ।

"रक्षापदेशान्मुनिहोमधेनो-
र्वन्यान् विनेष्यन्निव दुष्टसत्त्वान्" ।
इति रघुवंशे ।)

अपध्वंसजः, पुं, (अपध्वस्यतेऽनेन, अपध्वंस + कर्त्तरि घञ्, अपध्वंसो जातीनां भिन्नतासम्पादकः सङ्करस्तस्माज्जायते, अपध्वंस + जन् + ड, उपपदसमासः ।) वर्णसङ्करः । यथा,—

"शूद्राक्रान्ता सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः" ।
इति मनुः । (प्रतिलोमजातः । भिन्नवर्णसङ्कमजातः । करणादिसंकीर्णवर्णः ।)

अपध्वस्तः, त्रि, (अप + ध्वंस् + क्तः ।) परित्यक्तः । निन्दितः । चूर्णीकृतः । इति मेदिनी । (अतिदुराचारः ।) परित्यक्तः । "अपध्वस्तः परित्यक्ते निन्दिते ऽप्यवचूर्णिते" । इति मेदिनी ।

अपनयनं, क्ली, (अप + नी + भावे ल्युट् ।) खण्डनं । दूरीकरणं । यथा,—"इति श्रीशाम्बपुराणे रोगापनयने श्रीसूर्य्यवक्त्रविनिर्गतस्तवराजः समाप्तः" इति ।

("नातिश्रमापनयनाय यथा श्रमाय
राज्यं सुहृत्सु तदधीनमिवातपत्रं" ।
इति शाकुन्तले ।)

अपनोदनं, क्ली, (अप + नुद् + भावे ल्युट् ।) खण्डनं । दूरीकरणं । यथा,—"मानापनोदनविनोदमते गिरीशे" । इति श्रीहर्षः । (अपनुदति दूरीकरोति, अप + नुद् + कर्त्तरि बाहुल्यात् ल्युटि ।) खण्डकः । दूरीकारकः ।

"यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः ।
तथाघमर्षणं जप्यं सर्व्वपापापनोदनं" ।
इति मनुः ।)

अपन्थाः, [थिन्] पुं, (न पन्थाः, नञ्समासः, समासान्तविधेरनित्यत्वात् अच् अजभावः ।) अपथं । इत्यमरः ।

अपपात्रितः, त्रि, (अपक्वं पात्रं भोजनपात्रं यस्य सः, येन जनेन भुक्ते भोजनपात्रमस्पृष्टं भवतीति यावत् षण्ढादादिः, अपपात्रः कृतः, अपपात्र + करोत्यर्थे णिच् + क्तः ।) उत्कटदोषैर्जातिभिर्भिन्नोदकीकृतः । यथा,—अपपात्रितस्य रिक्थपिण्डोदकानि निवर्त्तन्ते" । इति शुद्धितत्त्वं शङ्खापस्तम्बौ ।

अपभ्रंशः, पुं, (अप + भ्रंस् + घञ् ।) ग्राम्यभाषा । अपभाषा । तत्पर्य्यायः । अपशब्दः २ । इत्यमरः॥ पतनं । यथा,—

"अत्यारूढिर्भवति महतामप्यधःपातनिष्ठा" ।
इत्यभिज्ञानशाकुन्तले । (अधः पतनं । ध्वंसः । अधोगतिः ।)

अपमः, पुं, (अपक्वतया मीयते, अप + मा + घञर्थे कः ।) क्षान्तिः । इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

अपमानं, क्ली, (अप + मा + भावे ल्युट् ।) अनादरः । अमर्य्यादा । इति शब्दरत्नावली ॥ तत्पर्य्यायः ।

"स्यादवज्ञा परीहारः परिभावः पराभवः ।
अपमानं परिभवस्तिरस्कारस्तिरस्क्रिया ।
अवहेला च हेला स्यादवहेलनहेलने ।
क्षेपो निकारधिक्कारौ पर्य्यायः स्यादनादरे" ॥
इति शब्दरत्नावली ॥ ० ॥ तस्य अधर्म्मत्वं यथा,—

"अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनञ्चापमानञ्च मतिमान्न प्रकाशयेत्" ॥
इति चाणक्यः ॥

("अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः ।
स्वकार्य्यमुद्धरेत् प्राज्ञः कार्य्यध्वंसे हि मूढता") ॥

अपमित्यकं, क्ली, (अपमित्यपमानं क्रीत्वा गृह्यते, अप + मेङ् प्रणिदाने + क्त्वा तस्य ल्यप्, "मयतेरिदन्यतरस्यामिति आख्याने इतक्, ततः कन् ।) ऋणं । इति हलायुधः ॥

अपमृत्युः, पुं, (अपक्वः रोगेण विना मृत्युः मरणं

कर्म्मधारयः।) अपघातमरणं। विना रोगेण मरणं। यथा,—
"अपमृत्युभयं नास्ति मृतो मोक्षमवाप्नुयात्"।
इति देवीमाहात्म्यकीलकं॥ यत्तु शुद्धितत्त्वे प्रोक्तं पक्षिमत्स्यमृगदंष्ट्रिदङ्किनखिपतनानशनवह्निविषबन्धनजलप्रवेशशस्त्राघातादिजन्यमरणं तदेवापमृत्युरिति सुधीभिर्विभाव्यं॥

अपयानं, क्ली, (अपा या + भावे ल्युट्) पलायनं। इत्यमरः॥ प्रमाणं। प्रस्थानं। "मानस्य द्रुतमपयानमास्थितस्य"। इति माघः।)
"अपयानेऽपि च भवान् समर्थोऽनघविक्रमः"।
इति रामायणे।

अपरं, क्ली, (न पूर्य्यते, पृ + अप् ततो नञ्समासः।) हस्तिपश्चाद्भागः। गजान्त्यजङ्घादिभागः। इति मेदिनी॥

अपरः, त्रि, (न एणाति प्रीणयति, पॄ + पचाद्यच, ततो नञ्समासः।) अन्यः। इतरः। अर्व्वाचीनः। इति मेदिनी॥

अपरत्वं, क्ली, (अपरस्य भावः भावे त्व।) न्यायमते तत् द्विविधं। दैशिकं कालिकञ्च। दैशिकं यथा। अल्पसूर्य्यसंयोगजज्ञानजन्यगुणः। तस्यासमवायिकारणं दिक्संयोगः॥ कालिकं यथा॥ अल्पस्पर्य्यपरिस्पन्दज्ञानजन्यगुणः। तस्यासमवायिकारणं कालपिण्डसंयोगः। तदुभयं अपेक्षाबुद्धिजन्यं। अपेक्षाबुद्धिनाश्यत्वेन तदुभयोर्नाश्यः। इति सिद्धान्तमुक्तावली॥

अपरतिः, स्त्री, (अप + रम् + भावे क्तिन्।) निवृत्तिः। विरतिः। इति हेमचन्द्रः॥ (अपगता रतिः प्रीतिर्यस्य सः त्रि, प्रीतिरहितः। अपगता रतिः प्रीतिर्यस्य सः त्रि, कुत्सितप्रीतियुक्तः।)

अपरपक्षः, पुं, (अपरः श्रेष्ठः पक्षः अथवा अपरः शुक्लादितरः पक्षः, कर्म्मधारयः।) कृष्णपक्षः। स तु पितृपक्षः। यथा। पूर्व्वः पक्षो देवानामपरः पक्षः पितॄणामिति श्रुतिः॥ पक्षौ पूर्व्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ। इत्यमरः॥ मनुः। अथ श्राद्धममावास्यायां पितृभ्यो दद्यात् यद्यमीष्वपि वापरपक्षस्य यदहर्व्वा सम्पद्यते। इति श्राद्धतत्त्वम्॥

अपररात्रः, पुं, (रात्रेः अपरः श्रेष्ठावयवः, एकदेशिसमासः, अच् समासान्तः "रात्राह्नाहाः पुंसि" इति पुंस्त्वं।) रात्रिशेषः। तत्पर्य्यायः। उषःद्वयं २। इति त्रिकाण्डशेषः॥

अपरस्परं, त्रि, (अपरे च परे च इन्द्वः, अपरस्पराः क्रियासातत्ये" इति सुडागमः, क्रियावतां साहित्ये।) क्रियासातत्यं। कर्म्मनिरन्तरता। इत्यमरः॥

अपरा, स्त्री, (न पूर्य्यतेऽनया, पॄ + अपादाने अप्, ततो नञ्समासः।) जम्बूः। इति मेदिनी॥ पश्चिमदिक्। इति हेमचन्द्रः॥

अपराङ्गं, क्ली, (अपरस्य रसादेरङ्गम्, षष्ठीतत्पुरुषः) गुणीभूतव्यङ्ग्यभेदः। यथा अगूढमपरस्याङ्गमिति भरतमुनिः॥ अस्यार्थः। अपरस्य रसादेर्वाच्यार्थीभूतस्य वा वाच्यस्याङ्गं रसादि अनुरञ्जनरूपं वा। इति काव्यप्रकाशः॥ तत्रैवोदाहरणं।
"अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः"॥ अत्र गूढकारः करुणस्याङ्गमिति॥

अपराङ्मुखः, पुं, (परा + अञ्च + क्विन्, पराक् मुखं यस्य सः, ततो नञ्समासः।) अविमुखः। संमुखीभूतः। यथा,—
"आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः। युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः"॥
इति मानवे ७ अध्याये ८९ श्लोकः॥

अपराजितः, पुं, (परा + जि + क्तः, ततो नञ्समासः।) शिवः। विष्णुः। ऋषिविशेषः। अनिर्ज्जिते त्रि। इति मेदिनी॥

अपराजिता, स्त्री, दुर्गा। जयन्तीवृक्षः। अश्वगन्धा। इति मेदिनी॥ खल्वपला। विष्णुक्रान्ता। इति राजनिर्घण्टः॥ श्वेतालुः। शमीभेदः। शुक्लिनी। हपुषाभेदः। इति वैद्यकं॥ खनामख्यातपुष्पलताविशेषः। शुक्लनीलभेदेन सा द्विधा। तस्याः पर्य्यायः। आस्फोता २ गिरिकर्णी ३ विष्णुक्रान्ता ४। इत्यमरः॥ आस्फोटा ५। इति तट्टीका॥ गवाक्षी ६ अश्वखुरी ७ श्वेता ८ श्वेतभण्डा ९ गवादनी १०। इति रत्नमाला॥ अद्रिकर्णी ११ कटभी १२ दधिपुष्पिका १३ गर्दभी १४ सितपुष्पी १५ श्वेतस्पन्दा १६ भद्रा १७ सुपुष्पी १८ विषघ्नी १९ नगपर्य्यायकर्णी २० अश्वाक्षादिखुरी २१। अस्या गुणाः। हिमत्वं। तिक्तत्वं। पित्तोपद्रवविषदोषनाशित्वं। चक्षुर्हितत्वं। त्रिदोषघ्नमताकारित्वञ्च। इति राजनिर्घण्टः॥ शोथकासनाशित्वं। कण्ठहितकारित्वञ्च। इति राजवल्लभः॥
("दक्षिणे च नरैः सम्यक् पूजनीयाऽपराजिता। मोक्षार्थं विजयार्थञ्च पूर्व्वोक्तविधिना नरैः। नवमीशेषयुक्तायां दशम्यामपराजिता। ददाति विजयं देवी पूजिता जयवर्द्धिनी"॥
इति स्कान्दे।)

अपराद्धपथकः, त्रि, (अपराद्धः लक्ष्यात् च्युतः पृषत् कोवाणो यस्य सः।) लक्ष्यच्युतशरयुक्तः। यस्य बाणो लक्ष्यात् च्युतः सः। इत्यमरः॥
("क्षतहस्तः सुप्रयोगविशिक्षितः क्षतपुङ्खवत्। अपराद्धपथकोऽसौ लक्ष्यात् यच्युतसायकः"॥
इत्यमरः।)

अपराधः, पुं, (अप + राध् + भावे घञ्।) अकार्य्यादिदोषः। तत्पर्य्यायः॥ आगः २ मन्तुः ३। इत्यमरः॥ स च द्वात्रिंशद्विधो यथा। आगमे।
"यानैर्व्वा पादुकैर्व्वापि गमनं भगवद्गृहे।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः॥
उच्छिष्टे वाथवाशौचे भगवद्दर्शनादिकं।
एकहस्तप्रणामश्च तत्पुरस्तात् प्रदक्षिणं॥
पादप्रसारणं चाग्रे तथा पर्य्यङ्कबन्धनम्।
शयनं भक्षणं वापि मिथ्याभाषणमेव च॥
उच्चैर्भाषामिथोजल्पो रोदनानि च विग्रहः।
निग्रहानुग्रहे चैव नृषु च क्रूरभाषणम्।
कम्बलावरणञ्चैव परनिन्दा परस्तुतिः।
अश्लीलभाषणं चैव अधोवायुविमोक्षणम्॥
शक्तौ गौणोपचारश्च अनिवेदितभक्षणं।
तत्तत्कालोद्भवानाञ्च फलादीनामनर्पणं॥
विनियुक्तावधिस्थस्य प्रदानं व्यञ्जनादिके।
एकीकृत्यासनं चैव परेषामभिवादनं॥
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा
अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्त्तिताः"॥*॥
वाराहे।
"द्वात्रिंशदपराधा ये कीर्त्यन्ते वसुधे मया।
वैष्णवेन सदा ते तु वर्जनीया प्रयत्नतः॥
ये वै न वर्जयन्त्येतान् अपराधान् मयोदितान्।
सर्व्वधर्म्मपरिभ्रष्टाः पच्यन्ते नरके चिरं॥
राजान्नभक्षणञ्चैकमापद्यपि भयावहं।
ध्वान्तागारे हरेः स्पर्शः परं सूक्ष्मतनाशनः॥
तथैव विधिमुल्लङ्घ्य सहसा स्पर्शनं हरेः।
द्वारोद्घाटो विना वाद्यं क्रोडमांसनिवेदनं॥
पादुकाभ्यां तथा विष्णोर्मन्दिरायोपसर्पणं।
कुक्कुरोच्छिष्टस्खलनं मौनभङ्गोऽच्युतार्चने॥
तथा पूजनकाले च विड्तुत्सर्गाय सर्पणं।
श्राद्धादिकमकृत्वा च नवान्नस्य च भक्षणं॥
अदत्त्वा गन्धमाल्यादि धूपनं मधुघातिनः।
अकर्म्मण्यप्रसूनेन पूजनञ्च हरेस्तथा॥
अकृत्वा दन्तकाष्ठञ्च स्नात्वा निधुवनं तथा।
स्पृष्ट्वा रजस्वलां दीपं तथा मृतकमेव च॥
रक्तं नीलमधौतञ्च पारक्यं मलिनं पटं।
परिधाय मृतं दृष्ट्वा विमुच्यापानमारुतं॥
क्रोधं कृत्वा श्मशानञ्च गत्वा भूत्वाप्यजीर्णभुक्।
भक्षयित्वा क्रोडमांसं पिण्याकं जालपादकं॥
तथा कुसुम्भशाकञ्च तैलाभ्यङ्गं विधाय च।
हरेः स्पर्शी हरेः कर्म्मकरणं पातकावहं॥*॥
किञ्च तत्रैव।
मम शास्त्रं वहिष्कृत्य अस्माकं यः प्रपद्यते।
मुक्ता च मम शास्त्राणि शास्त्रमन्यत् प्रभाषते॥
मद्यपस्तु समासाद्य प्रविशेद्भवनं मम।
यो मे कुसुम्भशाकेन प्रापणं कुरुते नरः॥
अपि च।
"मम दृष्टेरभिमुखं ताम्बूलं चर्व्वयेत्तु यः।
कुरवकपलाशस्थैः पुष्पैः कुर्य्यान्ममार्चनं॥
ममार्द्रामासुरे काले यः करोति विमूढधीः।
माठाशनोपविष्टो यः पूजयेद्वा निरासनः॥
वामहस्तेन मां कृत्वा स्नापयेद्वा विमूढधीः।
पूजापर्य्युषितैः पुष्पैः स्रोवनं गर्व्वकल्पनं॥
तिर्य्यक् पुण्ड्रधरो भूत्वा यः करोति ममार्चनं।
याचितैः पत्रपुष्पाद्यैर्यः करोति ममार्चनं॥
अप्रक्षालितपादो यः प्रविशेन्मम मन्दिरं।
अवैष्णवस्य पक्वान्नं यो मह्यं विनिवेदयेत्॥
अवैष्णवेषु पश्यत्सु मम पूजां करोति यः।
अपूजयित्वा विघ्नेशं सम्भाष्य च कथालिनं॥
नरः पूजान्तु यः कुर्य्यात् स्वपनञ्च नखाम्भसा।
अमौनी धर्म्मलिप्साढ्यो मम पूजां करोति यः॥

ज्ञेयाः परेऽपि बहवोऽपराधाः सदसंमतैः।
आचारैः शास्त्रविहितनिषिद्धातिक्रमादिभिः"॥"॥
अथापराधशमनं।
"संवत्सरस्य मध्ये च तीर्थे शौकरके मम।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात्॥
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत्।
अनयोस्तीर्थयोरङ्गे यः सेवेत् सुकृती नरः॥
सहस्रजन्मजनितानपराधान् जहाति सः"।
स्कान्दे।
"अहन्यहनि यो मर्त्यो गीताध्यायन्तु संपठेत्।
द्वाविंशदपराधेस्तु अहन्यहनि मुच्यते"॥
अत्र कार्त्तिकमाहात्म्ये।
"तुलस्या कुरुते यस्तु शालग्रामशिलार्चनं।
द्वाविंशदपराधांश्च क्षमते तस्य केशवः"॥
तत्रैवान्यत्र।
"द्वादश्यां जागरे विष्णोर्यः पठेत्तुलसीस्तवं।
द्वाविंशदपराधानि क्षमते तस्य केशवः॥
यः करोति हरेः पूजां श्रद्धयाशस्त्राङ्कितो नरः।
अपराधसहस्राणि नित्यं हरति केशवः"॥
इति श्रीहरिभक्तिविलासे ८ विलासः॥

अपराङ्कः, पुं, (अङ्कः अपरः एकदेशिसमासः, समासान्तः टच्, अहःस्थाने अङ्कादेशः।) ग्रेषं अहः। दिनग्रेषभागः। इत्यमरः।
("रामाणां रमणीयतां विदधति ग्रीष्मापराङ्कागमे" इति अमरशतके।
"तथा आद्धस्य पूर्व्वाह्णादपराह्णो विशिष्यते"। इति मनुः।) विकाल इति भाषा। तस्य भेदाः।
द्विधा विभक्तदिनस्य ग्रेषभागः॥ त्रिधा विभक्तदिनस्य तृतीयभागः॥ स तु त्रिंशद्दण्डदिनमाने विंशतिदण्डात् परं दशदण्डं यावत्। पञ्चधा विभक्तदिनस्य चतुर्थभागः। स तु अष्टादशदण्डात् परं षड्दण्डं यावत्। इति श्रुतिस्मृती॥

अपराह्णतनं, त्रि, (अपराह्णे भवम् सप्तम्येकवचनान्त अपराह्ण+ष्यु तुट्च, "स्वकालतनेषु कालनाम्न इति" पक्षे अलुक्।) अपराह्णभववस्तु। अपराह्णजातं। इति सिद्धान्तकौमुदी॥

अपराह्णेतनं, त्रि, (अङ्कोऽपरः एकदेशिसमासः, तत्र भवम् अपराह्ण+ष्यु तुट्च, "स्वकालतनेषु कालनाम्न" इति पक्षे अलुक्।) अपराह्णेतनं। इति सिद्धान्तकौमुदी॥

अपरिकलितः, त्रि, (परि+कल्+कर्म्मणि क्तः, ततो नञ्समासः।) अज्ञातः। अदृष्टः। यथा,—
"अपरिकलितपूर्व्वः कश्चमत्कारकारी
स्फुरति मम गरीयानेष माधुर्य्यपूरः।
अयमहमपि हन्त प्रेक्ष्य यं लुब्धचेताः
सरभसमुपभोक्तुं कामये राधिकेव"॥
इति ललितमाधवः॥

अपरिच्छन्नं, त्रि, परिच्छदशून्यं। परिपूर्व्वछदधातोः कर्त्तरि क्ते नञ्समासः॥

अपरिच्छिन्नं, त्रि, (परि+छिद्+क्त ततो नञ्समासः।) परिच्छेदरहितं। असीम। बहिरन्तरशून्यं। यथा,—"किञ्च परिच्छिन्नस्य नीड़े पक्ष्यादेरिव प्रवेशो भवेत् तव त्वनाहतत्वात् अपरिच्छिन्नत्वेन बहिरन्तरभेदो नास्ति कुतः प्रवेशः"। इति श्रीधरस्वामी॥

अपरिपक्वं, त्रि, परिपाकरहितं। किञ्चित्पक्वं। परिपूर्व्वपचधातोः कर्त्तरि क्ते तस्य वले चस्य च कले परिपक्वं ततो नञ्समासः॥

अपरिमितं, त्रि, (परि+मा+क्त, ततो नञ्समासः।) परिमाणरहितं। मानतुलासंस्थाशून्यं। यथा,—"अपरिमिता ध्रुवास्तनुभृतो यदि सर्व्वगतास्तर्हि न शास्यतेति नियमो ध्रुवनेतरथा"। इति श्रुत्यध्यायः।

अपरिस्नानः, पुं, (परि+स्ना+क्त तस्य नत्वं, ततो नञ्समासः।) रक्तास्नानदुष्टः। इति राजनिर्घण्टः॥ स्नानिरहिते वाच्यलिङ्गः॥ (नूतनः। अपरिशुष्कः। निर्म्मलः।)

अपरिष्कारः, पुं, ("संपर्य्युपेभ्यः करोतौ भूषणे इति" सुड़ागमः।) परिष्काराभावः। अनिर्म्मलत्वं। तद्वति त्रि। परिपूर्व्वकृधातोर्भावे घञि नञ्समासः।

अपरिष्कृतं, त्रि, असंमार्जितं। अनिर्म्मलं। अभूषितं। अनलङ्कृतं। परिपूर्व्वकृधातोः कर्म्मणि क्ते नञ्समासः। यथा,—
"मलपूतिसमायुक्तश्लेष्मविण्मूत्रपिच्छिलं।
रेतोनिष्ठीवमानाभिः स्रवद्भिरपरिष्कृतं"॥
इति कालिकापुराणे ५६ अध्यायः॥

अपरिहार्य्यं, त्रि, (परि+हृ+कर्म्मणि ण्यत्, ततो नञ्समासः।) अपरिहरणीयं। अत्याज्यं। यथा,
"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि"॥
इति श्रीभगवद्गीता॥

अपरूपं, त्रि, (अपह्नुतं रूपं कर्म्मधारयसमासः।) अपह्नुतरूपं। विकृतरूपं। अपोपसर्गेण रूपशब्दस्य बहुव्रीहिसमासः॥ कर्म्मधारयसमासे क्लीं॥ लोके तु आश्चर्य्यमिति प्रसिद्धं॥

अपरेद्युः, [स्] व्य, (अपरस्मिन् दिवसे दिवसस्य एद्युश्चादेशः)। अपरेऽह्नि। अपरदिने। इत्यमरः॥ ("पूर्व्वेद्यरपरेद्युर्व्वाश्राद्धकर्म्माण्युपस्थिते निमन्त्रयेत विप्रान् वै" इति स्मृतिः।)

अपर्णा, स्त्री, (नास्ति पर्णं तपस्यायां पर्णभक्षणवृत्तिर्व्वा यस्याः सा, टाप्।)
दुर्गा। इत्यमरः॥
("स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः।
तदप्यपाकीर्णमतः प्रियंवदा
वदन्त्यपर्णेति च तां पुरा विदः"। इति कुमारसम्भवे।)
पत्रशून्ये त्रि॥

अपर्य्याप्तं, त्रि, (परि+आप्+क्त, नञ्समासः।) पर्य्याप्तिशून्यं। असीम। असमर्थं। यथा,—
"अपर्य्याप्तं तदस्माकं बलं भीष्माभिरक्षितं।
पर्य्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं"॥
इति श्रीभगवद्गीता॥

अपर्य्युषितं, क्ली, (परि+वस्+क्त, नञ्समासः।) अद्युष्टं। सद्योभवं। यथा नारसिंहे,—
"अपर्य्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः।
स्त्रीयारामोद्भवैर्वापि पुष्पैः संपूजयेद्धरिं"॥
इत्याह्निकाचारतत्त्वम्॥

अपर्व्वदण्डः, पुं, (अपर्व्वः पर्व्वरहितः ग्रन्थिशून्य इति यावत् दण्डः कर्म्मधारयः।) रामशरदण्डं। इति राजनिर्घण्टः॥

अपलं, क्ली, (अपलाति अपराक्रमणं गच्छति येन, अप+ला+कर्त्तरि क। नास्ति पलं मांसं यस्य सः, मांसशून्यं।) कीलकं। इति शब्दमाला॥ पलशून्ये त्रि॥

अपलपनं, क्ली, अपलापः। अपोपसर्गात् लपधातोर्भावे अनट् प्रत्ययः॥ (पाणिनिमते तु अप+लप्+भावे ल्युट्।)

अपलापः, पुं, (अप+लप्+भावे घञ्।) सतोऽप्यसत्त्वेन कथनं। ज्ञातस्य गोपनं। तत्पर्य्यायः। २ निह्नुतिः। ३ अपह्नुतिः। ४ अपह्नवः। ५ निह्नवः। इति शब्दरत्नावली॥ प्रेम। इति। मेदिनी॥

अपलाषिका, स्त्री, (अप+लष्+भावे ण्वुल्।) दृष्या। इति हेमचन्द्रः॥

अपवनं, क्ली, (अपह्नुतं छद्मिमत्वात् अल्पत्वाच्च वनं कर्म्मधारयः।) उपवनं। छद्मिमवनं। इति हेमचन्द्रः॥

अपवरकः, पुं, (अपव्रियन्ते लोकाः सम्भज्यन्तेऽत्र, अप+वृ+"गृहवृनिश्चिगमश्च" इति अप्, ततः स्वार्थे कन्, अथवा अप+वृ+क्रादिभ्यः संज्ञायां वुन् तस्य अकः।) अन्तर्गृहं। तत्पर्य्यायः। २ गर्भागारं ३ वासौकः ४ शयनागारं। इति हेमचन्द्रः॥ ("दीपोऽपवरकस्यान्तर्वर्त्तते तत्प्रभा बहिः"।)

अपवर्गः, पुं, (अपवृज्यते संसारः मुच्यतेऽनेन, अप+वृज्+घञ् कुत्वं।) मोक्षः। त्यागः। क्रियावसानसाफल्यं। कर्म्मफलं। इति विश्वमेदिन्यौ॥ क्रियान्तः। कार्य्यसमाप्तिः। इति जटाधरो रत्नावली च॥ पूर्णता। इति धरणी॥ (निर्व्वाणं। मुक्तिः। "अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्म्मयोर्गतौ" इति रघुवंशे। समाप्तिः। शेषः। अवसानं। "क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः"। इति भारविः।)

अपवर्ज्जनं, पुं, (अप+वृज्+भावे ल्युट्।) दानं। मोक्षः। त्यागः। इति मेदिनी॥

अपवादः, पुं, (अप+वद्+भावे घञ्।) आज्ञा। निन्दा। तत्पर्य्यायः। अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ उपक्रोशः ६ जुगुप्सा ७ कुत्सा ८ गर्हणं ९ इत्यमरः॥ (वचनीयं। "लोकापवादाद्भयं" इति नीतिशतके। "देश्यामपि हि वैदेह्यां सापवादो यतो जनः"। "हा कथं शोतादेव्या ईदृशमचिन्तनीयं जनापवादं देवस्य कथयिष्यामि"। इति उत्तरचरिते। आज्ञा। अनुमतिः। आदेशः। "ततोऽपवादेन पताकिनीपतेश्चचाल निर्हादवती महाचमूः"। इति भार

विः ।) विश्वासः । इति मेदिनी ॥ विश्लेषः । बाधकः । यथा,—
"क्वचिदपवादविषये ऽप्युत्सर्गोऽभिनिविशते" ।
इति कलापपरिशिष्टं ॥ रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वं । तदुक्तं ।
"सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथा प्रथा विवर्त्त इत्युदाहृतः" ॥
अस्य मतं । आभ्यां अध्यारोपापवादाभ्यां तत्त्वम्यदार्थशोधनमपि सिद्धं भवति । इति वेदान्तसारः ॥

अपवारणं, क्ली, (अप + वृ + णिच् भावे ल्युट् ।) अवधानं । अन्तर्द्धानं । इत्यमरः ॥

अपवारितं, त्रि, (अप + वृ + णिच्, कर्म्मणि क्तः ।) अन्तर्हितं । इति हेमचन्द्रः ॥

अपवित्रं, त्रि, (पू + इत्रच्, ततो नञ्समासः ।) पवित्रतारहितं । असुद्धं । यथा,—
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं सवाह्याभ्यन्तरः शुचिः" ॥
इति स्मृतिः । (अविशुद्धः । अनिर्म्मलः । दूषितः । मलिनः ।
"अपवित्रमिदं कर्म्म कृतं मोहान्मयया तया" ।
इति रामायणे । "यदेव सारमेयोऽपवित्रः खनन्यादो नीयते" । इति पञ्चतन्त्रे ।)

अपविद्धः, त्रि, (अप + व्यध् + क्तः ।) प्रत्याख्यातः । निराकृतः । इति हेमचन्द्रः ॥ (त्यक्तः । प्रतिक्षिप्तः ।
"कुवेरस्य मनःशल्यं शंसतीव पराभवं ।
अपविद्धगदो बाहुर्भग्नश्च इव द्रुमः" ॥
इति कुमारसम्भवे । चूर्णीकृतः । दलितः ।
"मृदिताश्चापविद्धाश्च दृश्यन्ते कमलस्रजः" ।
इति रामायणे ।)

अपविद्धपुत्रः, पुं, (अपविद्धः पुत्रः, कर्म्मधारयः,) दादशविधपुत्रमध्ये पुत्रविशेषः । स तु घोरजाद्यसमर्थमातापितृभ्यां त्यक्तः तयोरन्यतरस्मरणे अन्यतरेण वा त्यक्तः अनन्तरं अन्येन गृहीत्वा पुत्रत्वेन परिकल्पितः । यथा,—
"मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते" ॥
इति मनुः ॥

अपविषा, स्त्री, (अपं अपगतं विषं यस्याः सा, स्त्रियां टाप् ।) निर्व्विषीडलं । इति राजनिर्घण्टः ॥

अपशब्दः, पुं, (अप + शब्द + कर्त्तरि अच् । अपसद इति पाठे अप + सद् + अच् ।) अपसदः । नीचः । इत्यमरटीकायां भरतः ॥

अपशब्दः, पुं, (अप असंस्कृतः शब्दः, कर्म्मधारयः ।) असंस्कृतशब्दः । अप्राकृतशब्दः । लौकिकशब्दः । ग्राम्यभाषा । तत्पर्य्यायः । अपभ्रंशः २ । इत्यमरः ॥
("तस्य ह्यविवेकत्वात् प्रमादाच्चतादिभिः ।
अन्यथोच्चारिताः शब्दा अपशब्दा इतीरिताः" ॥
इति हरिवंशे ।)
"आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृतः ।
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितं" ॥
इति दण्डी ॥

अपशुक्[च्] पुं, (शुच् + भावे क्विप्, अपगता शुक् शोको यस्य सः ।) आत्मा । यथा । "क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विनापशुघ्नात्" । इति श्रीभागवतं ॥

अपशोकः, पुं, (अपगतः शोको यस्मात् सः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ ("शोकरहितः । दुःखहीनः ।
"हरप्रीतिकरो वृक्षो ह्यशोकः शोकनाशनः ।
दुर्गाप्रीतिकरोऽसित्वं मामशोकं सदा कुरु" ॥
देवीपूजापद्धतिः ।)

अपस्कं, क्ली, (अप + स्था + कः, अम्बाम्बागोसख्यापत्यादिना सत्वं ।) अङ्गुष्ठाग्रं । इति हेमचन्द्रः ॥

अपस्कु, व्य, (अप + स्था + "अपदुःसुभ्यः स्थः कुः, इति कु, सुखमादित्वात् सत्वम् ।) निरवद्यं । विपरीतं । शोभनं । इति शब्दमाला ॥

अपस्कुः, पुं, (अप + स्था + कु, सुखमादित्वात् सत्वं ।) कालः । वामे च । इति मेदिनी ॥ (समयः । असत्यः । विरुद्धार्थः । प्रतिकूलः । विपरीतः ।
"तव धर्म्मराज इति नाम कथमिदमपस्कु पश्यते ।
मौमदिनमभिदधत्यथवा भग्नमप्रशस्तमपि मङ्गलं जनाः ।" इति माघः । वामः । दक्षिणेतरः ।)

अपस्कुरं, त्रि, (अप + स्था + कुरच्, सुखमादित्वात् सत्वं ।) प्रतिकूलं । इति हेमचन्द्रः ॥

अपस्कुलं, त्रि, (अप + स्था + कुरच्, रस्य लत्वं ।) प्रतिकूलं । विपरीतं । इति चिकाण्डशेषः ॥

अपसदः, पुं, (अपसीदति अपशब्दत्वं प्राप्नोति, अप + सद् + पचाद्यच् ।) नीचः । इतरलोकः । इत्यमरः ॥
("विप्रस्य चिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन् वहेतेऽपसदाः स्मृताः" ॥
इति मनूक्ते अनुलोमवर्णस्त्रीजाते वर्णसङ्करभेदे मूर्द्धावसिक्तादौ पुं स्त्रीं ।)

अपसरः, पुं, (अप + सृ + भावे अप् ।) अपसरणं । स्थानात् स्थानान्तरगमनं । अपोपसर्गात् गत्यर्थसृधातोर्भावे अण्प्रत्ययः ॥
("निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्बिषं" ।
इति मनुः ।)

अपसर्ज्जनं, क्ली (अप + सृज + भावे ल्युट् ।) मोक्षः । परित्यागः । दानं । इति भूरिप्रयोगः ॥ (वधः । हत्या । परिवर्जनं ।)

अपसर्पः, त्रि, (अपसर्पति, अप + सृप् + कर्त्तरि अच् ।) चरः । हरकरा इति प्रसिद्धः । इत्यमरः ॥ (गूढचरः । स्पशः ।
"यथार्हवर्गः प्रणिधिरपसर्पश्चरः स्पशः ।
चारश्च गूढपुरुषश्चाप्रः प्रत्ययितश्चिषु" ॥
इत्यमरः ।
"सर्याधिराजोरुभुजोऽपसर्पं
यमस्य भर्त्तुं विजितारिभर्त्तुः" ।
इति रघुवंशे ।)

अपसवि, व्य, (अप + सव् + बाहुल्यात् अवि ।) प्रदेशिन्यङ्गुष्ठयोरन्तरा । पिटतीर्थं । यथा ।
"प्रदेशिन्यङ्गुष्ठयोरन्तरा अपसवि अपसव्यं वा तेन पिटभ्यो निदधाति" । इति श्राद्धतत्त्वे भट्टभाष्यधृतयमः ॥

अपसव्यं, क्ली, (सव्यादपक्रान्तं, "निरादयो गताद्यर्थे पञ्चम्या" इति समासः ।) अपसवि । पिटतीर्थं । इति श्राद्धतत्त्वे भट्टभाष्यधृतयमः ॥

अपसव्यं, त्रि, (सव्यादपक्रान्तः, "निरादयो गताद्यर्थे पञ्चम्या" इति समासः ।) शरीरदक्षिणभागः । प्रतिकूलः । इति मेदिनी ॥ (विपरीतः ।
"वाता मरुद्भिनक्षैनमपसव्यं प्रचक्रमुः" ।
इति रामायणे ।)

अपस्करः, पुं, (अपकीर्य्यते, अप + कृ + अप्, "अपस्करो रथाङ्गमिति" पाणिनिसूत्रेण सुडागमः ।) रथाङ्गं । तच्च अक्षायुगचक्रादि । इत्यमरः ॥ गुह्यद्वारं । विष्ठा । इति धरणी ॥

अपस्नातः, त्रि, (अपस्नपनेन स्नातः अमङ्गलार्थत्वात्, अप + स्ना + कर्त्तरि क्तः ।) मृतमुद्दिश्यस्नातस्नानो जनः । इत्यमरः ॥ ("अपस्नातस्नानिष्पीडितमौलिरेव भवनमाजगाम" इति हर्षचरिते ।) संस्कारार्थं स्नापितो मृतः । इति स्नामी ॥

अपस्नानं, क्ली, (अप + स्ना + भावे ल्युट् ।) मृतस्नानं । मृतोद्देश्यकस्नानं । इति हेमचन्द्रः ॥ (अपविद्धस्नानं । स्नानावशिष्टजलेन स्नानं । स्नानोदकं । स्नानावशिष्टं जलं ।
"उद्वर्त्तनमपस्नानं विण्मूत्रे रक्तमेव च ।
श्लेष्मनिष्ठूतवान्तानि नाधितिष्ठेत्तु कामतः" ।
इति मनुः ।)

अपस्मारः, पुं, (अपस्मर्य्यते पूर्व्वरूपं विस्मर्य्यतेऽनेन, अप + स्मृ + करणे घञ् ।) रोगविशेषः । मृगी इति भाषा । तत्पर्य्यायः । अङ्गविप्लुतिः २ लालाधः ३ भूतविक्रिया ४ । इति राजनिर्घण्टः ॥*॥ तस्य सामान्यरूपं ।
"तमःप्रवेशः संरम्भो दोषोद्रेकश्च सूतेः ।
अपस्मार इति ज्ञेयो गदो घोरश्चतुर्व्विधः" ॥*॥
तस्य निदानपूर्व्विका सम्प्राप्तिः ।
"चिन्ताशोकादिभिः क्षुद्रा दोषा हृत्स्रोतसि स्थिताः ।
ज्ञात्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्व्वते" ॥*॥
तस्य पूर्व्वरूपं । यथा,—
"हृत्कम्पः शून्यता खेदो ध्यानं मूर्च्छा प्रमूढता ।
निद्रागमश्च तस्मिंश्च भविष्यति भवत्यथ" ॥*॥
वातिकस्य रूपं ।
"कम्पते प्रदशेत् दन्तान् फेनोद्गमी श्वसित्यपि ।
परुषारुणरूक्षाणि पश्येद्भूयांसि चानिशात्" ॥*॥
पैत्तिकस्य रूपं ।
"पीतफेनाङ्गवक्त्राक्षः पीतहृद्याङ्गमूत्रनः ॥
सद्यःशोषाग्निसन्तापप्रलोकदर्शी च पैत्तिकः" ॥*॥
श्लैष्मिकरूपं ।
"शुक्लफेनाङ्गवक्त्राक्षः शीतहृद्याङ्गमूत्रनः ।
पश्यन् शुक्लानि रूपाणि श्लैष्मिको मुच्यते चिरात्" ॥*॥
त्रिदोषजरूपं ।

"सर्व्वैरेभिः समस्तैश्च लिङ्गैर्ज्ञेयस्त्रिदोषजः" ॥ * ॥
असाध्यलक्षणं ।
अपस्मारः स चासाध्यो यः क्षीणस्यानवस्य यः ॥*॥
अरिष्टलक्षणं ।
"प्रस्फुरन्तं सुबहुशः क्षीणं प्रचलितभ्रुवं ।
नेत्राभ्याञ्च विकुर्व्वाणमपस्मारो विनाशयेत्" ॥*॥
तस्य वेगकालः ।
"पक्षाद्वा द्वादशाहाद्वा मासाद्वा कुपिता मलाः ।
अपस्माराय कुर्व्वन्ति वेगं किञ्चिदथान्तरं ॥
देवे वर्षत्यपि यथा भूमौ बीजानि कानिचित् ।
शरदि प्रतिरोहन्ति तथा व्याधिसमुच्चयाः" ॥
इति माधवकरः ॥ * ॥ तस्य चिकित्सा । यथा,—
"तैलेन लशुनः सेव्यः पयसा च शतावरी ।
ब्राह्मीरसश्च मधुना सर्व्वापस्मारभेषजं ॥ * ॥
चूर्णैः सिद्धार्थकादीनां भक्तितैरथवापि तैः ।
गोमूत्रपिष्टैः सर्व्वाङ्गलेपैः स्नाय्वपस्मृतिः" ॥
सिद्धार्थकादिः उन्मादोक्तः ॥ * ॥
"शिग्रुकट्वङ्गकिणिहीनिम्बत्वग्रसपाचितं ।
चतुर्गुणे गवां मूत्रे तैलमभ्यङ्गने हितं" ॥
कट्वङ्गः शोनापाठा । किणिही चिरिचिरा ॥*॥
"निर्गुण्डीभवबन्दाकनावनस्य प्रयोगतः ।
उपैति सहसा नाशमपस्मारो महागदः ॥ * ॥
मनोज्ञा तार्क्ष्यविष्ठा वा शुक्लत् पारावतस्य च ।
अञ्जनाद्धन्त्यपस्मारमुन्मादञ्च विशेषतः" ॥
मनोज्ञा मनःशिला । तार्क्षी गरुड़ः । शुक्लत् विष्ठा ॥ * ॥
"यः खादेत् क्षीरभक्ताशी माक्षिकेण वचारजः ।
अपस्मारं महाघोरं चिरोत्थं स जयेदध्रुवं" ॥
वचा घुरवच् ॥ * ॥
"कुष्माण्डकफलोत्थेन रसेन परिषेचितं ।
अपस्मारविनाशाय मद्याक्षं च पिबेत् त्र्यहं" ॥
त्र्यहमिति एतस्य पानादिदिवसत्रयेणैवापस्मारोपशमो भवतीत्यभिप्रायः ॥ * ॥
"ब्राह्मीरसवचाकुष्ठशङ्खपुष्पीघृतं घृतं ।
पुराणं स्यादपस्मारोन्मादग्रहहरं परं" ॥
एतस्य प्रक्रिया । पुराणं गोघृतं प्रस्थमितं वचाकुष्ठशङ्खपुष्पीणां समुदितानां कुड़वमितानां कल्केन प्रस्थमितब्राह्मीरसपिष्टेन पचेत् । ब्राह्मीघृतं ॥ * ॥
"कुष्माण्डकरसे सर्पिरर्द्धादशगुणे पचेत् ।
यच्चाक्षकल्कं तत्पानमपस्मारविनाशनं" ॥
कुष्माण्डकघृतं ॥ * ॥
"द्वौ कीटमेषौ विधिवदानीय रविवासरे ।
कण्ठे भुजे वा संधार्य्य जयेदुग्रमपस्मृतिं" ॥
अयन्तु कीटो नदीतीरे सिकतामध्ये तिष्ठति ॥*॥
"शिग्रुकुष्ठजलाजाजीलशुनव्योषहिङ्गुभिः ।
वस्तमूत्रे घृतं तैलं नावनं स्यादपस्मृतौ" ॥
जलं बालकं । अजाजी जीरकः । वस्तः छागः ।
नावनं नस्यं ॥ * ॥ इत्यपस्माराधिकारः । इति भावप्रकाशः ॥

अपहारः, पुं, (अप + हृ + भावे घञ् ।) अपचयः । हानिः । इत्यमरः ॥ अपहरणं । चौर्य्यं । संगोपनं । धनस्वाम्यनुपयोगित्वयः । इति दायभागः ॥ (विनाशः ।
"कर्णनासापहारेण भगिनी मे विरूपिता" ।
इति रामायणे । स्तेयं । यद्धान्यापहारादिकं कर्म्म दृश्यस्वामिसमक्षं बलात्कृतं तत्साहसं स्यात् ।
इति कल्पतरुभट्टः । निह्नवः । "कथं वा आत्मनः अपहारं करोमि" । इति शाकुन्तले ।)

अपहारकः, त्रि, (अप + हृ + ण्वुल् ।) अपहारी । अपहरणकर्त्ता । यथा,—
"परापवादनिरतः परद्रव्यापहारकः" ।
इति पुराणं ॥
("द्विविधान् तस्करान् विद्यात् परद्रव्यापहारकान् प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः" ॥
"अन्यहर्त्तामयाविञ्च मौखं वागपहारकः ।
वस्त्रापहारकः श्वेतं पङ्गुतामन्नहारकः" ॥
इति मनुः । चौरः ।
"योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते ।
स पापकृत्तमोलोके स्तेन आत्मापहारकः" ।
इति मनुः ।)

अपहासः, पुं, (अप + हस् + भावे घञ् ।) अकारणहास्यं । इति हेमचन्द्रः ॥

अपक्लवः, पुं, (अप + क्लु + भावे अप् ।) अपलापः । स्नेहः । इति मेदिनी ॥
("ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपक्लवे तद्द्विगुणं तन्मनोरनुशासनम्" ॥
इति मनुः ।)

अपक्लृतिः, स्त्री, (अप + क्लृ + भावे क्तिन् ।) अपलापः । अपक्लवः । इति शब्दरत्नावली ॥ उपमेयासत्यकरणपूर्ब्बकोपमानसत्यतात्पर्य्यवस्थापिकालङ्कृतिः । तस्या लक्षणं ।
"प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपक्लृतिः" ।
उदाहरणं ।
"अवाप्तः प्रागल्भ्यं परिणतवचः श्लेषनयने ।
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ॥
अमुष्येयं मन्ये विगलदमृतस्यन्दिशिशिरे ।
रतिश्रान्ता शेते रजनिरमणी गाढ़मुरसि" ॥
इति काव्यप्रकाशः ॥
("प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपक्लृतिः ।
गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन ॥
यदि श्लेषेणान्यथा वाऽन्यथयेत् साप्यपक्लृतिः" ।
इति साहित्यदर्पणे ।)

अपांनाथः, पुं, (अपां नाथः अलुक्समासः ।) समुद्रः । इति राजनिर्घण्टः ॥

अपांनिधिः, पुं, (निधीयतेऽत्र, नि + धा + अधिकरणे किः, अपां निधिः आधारः ।) समुद्रः । वारांनिधिः इति दर्शनात् ॥

अपांपतिः, पुं, (अपां पतिः, अलुक्समासः ।) समुद्रः । इत्यमरः ॥ वरुणः । अप्पतिरित्यमरशेषोक्तत्वात् ॥

अपांपित्तं, क्ली, (अपां पित्तमिव तदुत्पन्नत्वात् तस्य पित्तत्वं, अलुक्समासः ।) अग्निः । इति शब्दरत्नावली ॥ चित्रकवृक्षः । वह्निसंज्ञक इत्यमरशेषोक्तत्वात् ॥

अपाक्, [च्] त्रि, (अप + अञ्च + क्विन्, नलोपः ।) दक्षिणदिग्भववस्तु । तत्पर्य्यायः । अपाचीनं २ । इति हेमचन्द्रः ॥

अपाकः, पुं, (पच + भावे घञ्, ततो नञ्समासः ।) पाकाभावः । अजीर्णता । यथा,—
"अङ्गमर्द्दोऽरुचिस्तृष्णा आलस्यं गौरवं ज्वरः ।
अपाकः शून्यतास्थानामामवातस्य लक्षणं" ॥
इति माधवकरः ॥ पाकाभावविशिष्टे त्रि । यथा,—
"गात्रप्रदेशे क्वचिदेव दोषाः
संमूर्च्छिता मांसमसृक् प्रदूष्य ।
वृत्तं स्थिरं मन्दरुजं महान्त-
मनल्पमूलं चिरदह्यपाकं" ॥
इति माधवकरः ॥

अपाकशाकं, क्ली, (न पच्यते, पच् + घञ्, नञ्समासः, अपाकः शाको यस्य तत् ।) आर्द्रकं । इति राजनिर्घण्टः ॥

अपाङ्गः, पुं, (अपाञ्चति वर्त्म गच्छति चक्षुर्यत्र, अप + अञ्च + अधिकरणे घञ् ।) नेत्रयोरन्तः । चक्षुःकोणः ।
("चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं" ।
इति शाकुन्तले । "कुवलयदृशां लोललोलैरपाङ्गैः" ।
इति शान्तिशतके ।) तिलकः । इत्यमरः ॥ अङ्गहीने त्रि । इति मेदिनी ॥

अपाङ्गकः, पुं, (अपगतमङ्गं यस्य समासान्तः कः ।) अपामार्गवृक्षः । इति शब्दरत्नावली ॥ आपां इति भाषा । अङ्गहीने त्रि ॥

अपाङ्गदर्शनं, क्ली, (अपाङ्गेन नेत्रप्रान्तेन दर्शनं तृतीयातत्पुरुषः ।) कटाक्षः । इति हेमचन्द्रः ॥

अपाची, स्त्री, (अप + अञ्च + क्विन्, स्त्रियां ङीप् ।) दक्षिणदिक् । इति हलायुधः ॥

अपाचीनं, त्रि, (अपाच्यां दक्षिणस्यां दिशि भवं, अपाच् खः तस्य ईनः ।) अपागधं । दक्षिणदिग्भववस्तु । विपर्य्यस्तं । विपरीतं । इति विश्वमेदिन्यौ ॥

अपाच्यं, त्रि, दक्षिणदिग्भववस्तु । अपाची दक्षिणदिक् ततो भवार्थे ष्यञ्प्रत्ययः ॥ पचनायोग्यं । पचधातोः कर्म्मणि ण्यति पाच्यं पश्चान्नञ्समासः ॥

अपाटवं, क्ली, (पटोर्भावः पटु + भावे अण्, नास्ति पाटवं पटुता यत्र तत् ।) रोगः । इति हेमचन्द्रः ॥ अपटुता । जड़ता । पटोर्भावः पाटवं ततो नञ्समासः ॥

अपात्रं, क्ली, (कुत्सितं पात्रं अप्राशस्त्ये नञ्समासः ।) कुपात्रं । असत्पात्रं । यथा । "अपात्रे पतितेदत्तं सुवर्णं नरकार्णवे" । इति मलमासतत्त्वं ॥ (योग्यताहीनं । निन्दितं । विद्यातपोहीनं । दानादियोग्यताहीनं ।
"विद्येव कन्यका मोहादपात्रे प्रतिपादिता ।
यज्ञसे न न धर्म्माय जायेतानुशयाय तु" ॥
इति कथासरित्सागरे ।)

अपात्रीकरणं, क्ली, (अनपात्रं अपात्रं कुत्सितपात्रं क्रियतेऽनेन, अपात्र + च्वि + कृ + करणे ल्युट् ।) नवविधपापमध्ये पापविशेषः । तच्चतुर्व्विधं ।

निन्दितधनादानं १ वाणिज्यं २ शूद्रसेवनं ३ असत्यभाषणं ४ । इति प्रायश्चित्तविवेकः ॥
("निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं ।
अपात्रीकरणं क्षेयमसत्यस्य च भाषणं" ॥
इति मनुः ।)

अपादानं, क्ली, (अपादीयते विश्लिष्यतेऽस्मात्, अप + आ + दा + ल्युट् ।) यस्मादवधेर्वस्त्वन्तरस्य चलनं भवति तत् । षट्कारकमध्ये पञ्चमकारकं । तच्चैकादशार्थे पञ्चमी स्यात् यथा । यतोऽपायः । यथा वृक्षात् पर्णं पतति १ । यतो भीः । यथा व्याघ्रात् बिभेति २ । यतो जुगुप्सा । यथा पापात् जुगुप्सते धीरः ३ । यतः पराजयः । यथा सिंहात् पराजयते हस्ती ४ । यतः प्रमादः । यथा धर्म्मात् प्रमाद्यति नीचः ५ । यत आदानं । यथा भूपात् धनमादत्ते विप्रः ६ । यतो भूः । यथा पितुः पुत्रो जायते ७ । यतस्त्राणं । यथा व्याघ्रात् गां रक्षति गोपः ८ । यतो विरामः । यथा जपाद्विरमति विप्रः ९ । यतोऽन्तर्द्धिः । यथा गुरोरन्तर्द्धत्ते शिष्यः १० । यतो वारणं । यथा यवेभ्यो गां वारयति ११ । इति मुग्धबोधटीकायां दुर्गादासः ॥

अपानं, क्ली, (अपनयति मलादि निःसारयति, अप + अन् + णिच् + पचाद्यच् ।) मलद्वारं । तत्पर्य्यायः । गुदं २ । पायुः ३ । इत्यमरः ॥ गुह्यं ४ । गुदवर्त्म ५ । इति जटाधरः ॥ तनुरुहः ६ । मार्गः ७ । इति शब्दरत्नावली ॥

अपानः, पुं, (अपानिति अधोदेशात् निःसरति, अप + अन् + अच् ।) गुदस्थवायुः । इत्यमरः ॥ अवाग्गमनवान् पाय्वादिस्थानवर्त्ती वायुः । इति वेदान्तसारः ॥
("अधोनयत्यपानस्तु आहारञ्च नृणामधः ।
मूत्रशुक्रवहो वायुरपान इति कीर्त्तितः" ॥
इत्युक्तलक्षणोऽवाग्गमनवान् गुदादिकाष्ठपार्श्वापायूपस्थवृत्तिवायुः । गुदस्थवायुः ।)
("प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ" ।
इति भगवद्गीता ।)

अपापः, त्रि, (नास्ति पापं यस्य सः ।) निष्पापः । पापशून्यः । यथा,—
"इयं दाशरथे सीता सुव्रता ब्रह्मचारिणी ।
अपापा हि त्वया त्यक्ता ममाश्रमसमीपतः" ॥
इति रामायणं ॥

अपामार्गः, पुं, (अपामृज्यते रोगो दूरीक्रियते अनेन, अप + आ + मृज् + करणे घञ् ।) वृक्षविशेषः । आपां इति भाषा । तत्पर्य्यायः । शैखरिकः २ धामार्गवः ३ मयूरकः ४ प्रत्यक्पर्णी ५ कीशपर्णी ६ किणिही ७ खरमञ्जरी ८ । इत्यमरः ॥ शैखरेयः ९ अधामार्गवः १० केशपर्णी ११ इति तट्टीका ॥ खरमञ्जरी १२ प्रत्यक्पुष्पी १३ क्षारमध्यः १४ अधोघण्टा १५ शिखरी १६ इति रत्नमाला ॥ दुर्ग्रहः १७ अध्वशल्यः १८ काण्डीरकः १९ मर्कटी २० दुरभिग्रहः २१ वाशिरः २२ पत्राकपुष्पी २३ कण्टी २४ मर्कटपिप्पली २५ कटुमञ्जरिका २६ अघाटः २७ क्षारकः २८ पाण्डुकण्टकः २९ नालकाण्टः ३० कुब्जः ३१ । अस्य गुणाः । तिक्तत्वं । उष्णत्वं । कटुत्वं । कफार्शःकण्डूदरामयविषरोगनाशित्वं । धारकत्वं । वान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ अग्निवर्द्धकत्वं । क्लेदकारित्वं । स्रंसनत्वञ्च । इति राजवल्लभः ॥ तत्फलगुणाः । रसे स्वादुत्वं । पाके दुर्ज्जरत्वं । विष्टम्भित्वं । वायुकारित्वं । रूक्षत्वं । रक्तपित्तप्रसादनत्वञ्च । इति भावप्रकाशः ॥ (अपामार्गं ओषधीनां सर्व्वासामेक इद्वशीति अथर्ववेदः ।)

अपाम्पतिः, पुं, (अपां पतिः, अलुक्समासः ।) समुद्रः । इत्यमरः ॥ वरुणः । अप्यतिरित्यमरटीकोक्तत्वात् ॥

अपाम्पित्तं, क्ली, (अपां पित्तमिव अलुक्समासः तत्तुल्यत्वात् ।) अग्निः । इति शब्दरत्नावली ॥ चित्रकवृक्षः । वह्निसंज्ञक इत्यमरटीकोक्तत्वात् ।

अपायः, पुं, (अप + इण् + भावे अच् ।) विश्लेषः । इति रामतर्कवागीशः ॥ चलनं । इति दुर्गादासः ॥ विनाशः । यथा,—
"सा काशी त्रिपुरारिराजनगरी पायादपायाज्जगत्" । इति काशीखण्डे ॥

अपारं, क्ली, (नास्ति पारं यस्य तत् ।) अवारं । नद्यादेरर्व्वाक्पारं । इति हलायुधः ॥ असीमे त्रि ॥

अपावृतं, त्रि, (अप + आ + वृ + आच्छादने क्तः ।) पिहितं । आवृतं । खतन्त्रं । स्वाधीनं । इति मेदिनी ॥ (उद्घाटितं । अनावृतं । अपसारितावरणं ।
"यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं" ।
इति गीता ।)

अपाश्रुतं, त्रि, (अप + आ + श्रु + क्तः ।) लुठितं । इति हेमचन्द्रः ॥ लोटा । गड़ागड़ि इति भाषा । (अन्तरितं । परावृत्तं । निहृतं ।
"प्रतिग्रहादपाश्रुत्तः सन्तुष्टो येन केनचित्" ।
इति महाभारते ।)

अपाश्रयः, पुं, (अपाश्रियते आच्छाद्यतेऽनेन, अप + आ + श्रि + करणे अच् ।) प्राकृणावरणं । सामियाना । चाँदोया इति भाषा । तत्पर्य्यायः । मत्तालम्बः २ प्रग्रीवः ३ मत्तवारणः ४ । इति हेमचन्द्रः ॥ आश्रयशून्ये त्रि ॥ (चन्द्रातपः । निराश्रयः । आश्रितः । अधीनः ।
"ब्राह्मणापाश्रयो नित्यमुत्कृष्टां जातिमश्नुते" ।
इति मनुः ।)

अपासङ्गः, पुं, (अप + आ + सन्ज् + घञ् ।) उपासङ्गः । तूणः । इत्यमरटीकासारसुन्दरी ॥

अपासनं, क्ली, (अप + अस + भावे ल्युट् ।) मारणं । इत्यमरः ॥

अपास्तं, त्रि, (अप + अस + क्तः ।) निरस्तं । यथा । एतेन नातिसन्ध्यासमीपत इत्यनेन रात्रसीवेलामात्रं निषिध्यते इति मैथिलमतमपास्तं । इति तिथ्यादितत्त्वं ॥

अपाक्तं, त्रि, (अक्तमिन्द्रियमपगतमनुगतमिति यावत्, प्रादिसमासः । अपक्तमक्ति चक्षुः कर्म्मधारयः, अच् समासान्तः । अपगतमक्ति चक्षुः कर्म्मधारयः, अच् समासान्तः ।) प्रत्यक्षं । इति त्रिकाण्डशेषः । कुत्सितचक्षुः । लोचनशून्यं । एतावर्थौ व्युत्पत्तिलभ्यौ ॥

अपि व्य, (न पिबति पिगतौ क्विप्, आगमशास्त्रस्यानित्यत्वान्न तुक् ।) उपसर्गविशेषः । अस्यार्थाः । आहरणं । सम्भावनं । निन्दा । अनुज्ञा । अन्वयः । समुच्चयः । इति दुर्गादासः ॥ प्रश्नः । शङ्का । युक्तपदार्थः । कामाचारक्रिया । इति विश्वमेदिन्यौ । ("अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु" इति पाणिनिसूत्रम्) ॥

अपिगीर्णं, त्रि, (अपि + गॄ + कर्म्मणि क्तः ।) स्तुतं । वर्णितं । इत्यमरः ॥

अपिच्छिलः, त्रि, (न पिच्छिलः नञ्समासः ।) पैच्छिल्याभावविशिष्टः । पिच्छिलताशून्यः । यथा । "प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलं" ।
इति माधवकरः ॥ (परिष्कृतः । अमलिनः । निर्मलः । गाढ़ः ।)

अपितु व्य, (अपि + तु ।) यद्यर्थे । यद्यपि । इति त्रिकाण्डशेषः ॥

अपिधानं, क्ली, (अपि + धा + भावे ल्युट् ।) आच्छादनं । अन्तर्द्धानं । इत्यमरः ॥ (आवरणं । "द्वारे पुरस्योद्घटितापिधाने" । इति कुमारसम्भवे ।
"शिलापिधाना काकुत्स्थ दुर्गे चास्याः प्रवेशनं" ।
इति रामायणे ।)

अपिनद्धं, त्रि, (अपि + नह् + कर्म्मणि क्तः, अस्य वालोपे पिनद्धश्च ।) परिहितवस्त्रादि । तत्पर्य्यायः । आमुक्तः २ प्रतिमुक्तः ३ पिनद्धः ४ । इत्यमरः ॥

अपीतः, पुं, (पा + कर्म्मणि क्तः । न पीतः, नञ्समासः ।) पीतभिन्नवर्णः । तद्विशिष्टे अक्षतपाने च त्रि इति नञ्समस्तपीतशब्दस्यैतावर्थौ ॥

अपीनसं, क्ली, (अपीनाय अस्थूलत्वाय सीयते कल्पते, अपीन + सो + कर्म्मकर्त्तरि कः । पीनसात् रोगविशेषात् भिन्नं नञ्समासः ।) पीनसरोगः । इति रभसः ॥ तद्रहिते त्रि ॥

अपीच्यं, त्रि, अतिसुन्दरं । यथा,—
"अपीच्यदर्शनं शश्वत् सर्व्वलोकनमस्कृतं ।
सन्तं वयसि कैशोरे भृत्यानुग्रहकातरं" ॥
इति श्रीभागवतं ॥

अपुच्छा, स्त्री, (नास्ति पुच्छमस्याभागो यस्याः सा, टाप् ।) शिंशपावृक्षः । इति शब्दचन्द्रिका ॥ (त्रि, लाङ्गूलहीनः । शिखरहीनः ।)

अपुनर्भवः, पुं, (न पुनर्भवति न पुनरुत्पद्यतेऽस्मात्, न पुनर् + भू + अपादाने अप्, मयूरव्यंसकादित्वात् समासः ।) मुक्तिः । कैवल्यं । इति हेमचन्द्रः ॥ पुनर्जन्माभावः । यथा,—
"हेतौ लिङ्गे प्रशमने रोगाणामपुनर्भवे ।
ज्ञानं चतुर्विधं यस्य स राजार्हो भिषक्तमः" ॥
इति चरकः ॥ (कर्त्तरि अचि तु पुनर्जन्मशून्यः मुक्त इति यावत् ।)

अपुष्पफलदः, पुं, (अपुष्पं, पुष्पं विना फलं ददाति,

अपुष्पफल + दा + कर्त्तरि कः, उपपदसमासः ॥) पनसवृक्षः । इति राजनिर्घण्टः ॥ पुष्पव्यतिरेकजातफलवृक्षमात्रं ॥ (अहेतुकफलदातरि त्रि)

अपूपः, पुं, (न पूयते विशीर्य्यते, न + पूय + पः, यलोपः ।) पिष्टकः । इत्यमरः ॥ गोधूमः । इति राजनिर्घण्टः ॥

("घृताक्तसरसं यावं पायसापूपमेव च" । इति मनुः ।)

अपूप्यः, पुं, (अपूपाय हितः "विभाषा हविरपूपादिभ्यः" इति पाणिनिसूत्रेण यत् ।) गोधूमचूर्णं । इति जटाधरः ॥ मयदा इति भाषा ।

अपूरणी, स्त्री, (न पूरयति पुष्पगन्धेन मनःप्रीतिं पूर्णां करोति निर्गन्धत्वात्, पूर + णिच् + कर्त्तरि ल्युट्, स्त्रियां ङीप् ततो नञ्समासः ।) शाल्मलिवृक्षः । इति शब्दचन्द्रिका ॥

अपूर्ब्बं, क्ली, (नास्ति पूर्ब्बं पूर्ब्बकालभवं दृष्टं यस्य तत् ।) कर्म्मजन्यमदृष्टं । तत्पर्य्यायः । अनुशयः २ नियोगः ३ अतिशयः ४ कार्य्यं ५ प्रयोगः ६ । इति स्मृतिः ॥ तच्चतुर्विधं यथा । फलापूर्ब्बं १ समुदायापूर्ब्बं २ उत्पत्त्यपूर्ब्बं ३ अङ्गापूर्ब्बं ४ । येन स्वर्गं आरभ्यते तत् फलापूर्ब्बं । अमावास्यायां त्रयाणां यागानामेकः समुदायः पौर्णमास्यामपरः तयोर्भिन्नकालवर्त्तिनोः संहत्यफलापूर्ब्बारम्भायोगात्तदारम्भाय समुदायद्वयजन्यमपूर्ब्बद्वयं कल्पनीयं । तयोरेकैकस्यारम्भाय एकैकसमुदायवर्त्तिनां त्रयाणां यागानां भिन्नवृत्तिवर्त्तित्वेन संघातापत्त्यभावात् यागत्रयजन्यानि त्रीण्युत्पत्त्यपूर्ब्बाणि कल्पनीयानि । तेषाञ्चाङ्गोपकारमन्तरेणानिष्पत्तेरङ्गानां चानेकवृत्तिवर्त्तिनां संघातासम्भवात् अङ्गापूर्ब्बाणि कल्पनीयानि । तच्च त्रयं विभागः । इत्यधिकरणमाला ॥

अपूर्ब्बं, त्रि, (नास्ति पूर्ब्बं यस्य, न पूर्ब्बः नञ्समासः) आश्चर्य्यं । यथा,—

"अपूर्ब्बेयं हरेर्माया चिगुणा रज्जुरूपिणी ।
यया मुक्तो न चलति बद्धो धावति धावति" ॥

इति उद्भटः ॥ पूर्ब्बदिग्देशकालभिन्नं ॥

अपेतराक्षसी, स्त्री, (अपेतः राक्षस इव पातकं यस्याः सा, गौरादित्वात् ङीष् ।) तुलसीवृक्षः । इति राजनिर्घण्टः ॥

अपेयं, त्रि, (पा + कर्म्मणि अर्हार्थे यत् ।) पानायोग्यं । अपानीयं । यथा,—"मद्यमपेयमदेयमनियाज्यं" । इति तिथ्यादितत्त्वे उशनःसूत्रं ॥ ("जलधिरलमपेयं पण्डिते निर्धनत्वं" ।)

("यैः कृतः सर्व्वभक्ष्योऽग्निरपेयश्च महोदधिः ।
त्वयी चाप्यायितः सोमः को न नश्येत्प्रकोप्यतान्" ॥ इति मनुः ।)

अपेक्षणीयं, त्रि, (अप + ईक्ष + कर्म्मणि अनीयर् ।) अपेक्षायोग्यं । अपेक्ष्यं । अपेक्षितव्यं । यथा,—

"आत्मा यत्नेन रक्ष्यो रणशिरसि पुनः सोऽपि नापेक्षणीयः" । इति नवरत्नमध्ये शुकः ॥

अपेक्षा, स्त्री, (अप + ईक्ष + भावे अ, स्त्रियां टाप् ।) कार्य्यनिमित्तयोरन्योन्याभिसम्बन्धः । इति सुपद्मटीकायां विष्णुमिश्रः ॥ आकाङ्क्षा । यथा,—"सा प्रक्रिया या कचमित्यपेक्षा" । इति वेदान्तटीकायां वाचस्पतिमिश्रः ॥ (आकाङ्क्षा । अभिलाषः । आशा ।

"अपेक्षा भिक्षायामपि किमपि चेतः स्खलयति" । इति शान्तिशतके । प्रयत्नः । अनुरागः । सम्मानना ।

"अलब्धं चैव लिप्सेत लब्धं रक्षेदपेक्षया ।
रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत्" ॥

इति मनुः । पर्य्यालोचनं । विचारः । अनुचिन्तनं ।

"सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः" । इति रघुवंशे ।

"न चुद्दोऽपि प्रथमसुकृतापेक्षया संश्रयाय" । इति मेघदूते ।)

अपेक्षाबुद्धिः, स्त्री, अनेकैकत्वविषयकबुद्धिः । नानैकत्वावगाहिबुद्धिः । अयमेकः अयमेक इत्याकारबुद्धिः । इति भाषापरिच्छेदः ॥

("अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरुच्यते" इति "अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः" इति च भाषापरिच्छेदे ।)

अपोगण्डः, त्रि, (अपगतश्चरकर्म्मणि वेदविहितकार्य्यादन्यकर्म्मणि गण्डः उद्यतः, गडि उद्यमे + पचाद्यच्, निपातनात् अपशब्दस्याकारस्य उकारः, अपसि कर्म्मणि गण्डः अतिभीरुत्वात् त्याज्यः ।) स्वभावतो न्यूनाधिकाङ्गविशिष्टः । तत्पर्य्यायः । पोगण्डः २ विकलाङ्गः ३ अङ्गहीनकः ४ । इति शब्दरत्नावली ॥ शिशुः । वलिभः । त्रिवलियुक्तः । इति मेदिनी ॥ अतिभीरुः । इति विश्वः हेमचन्द्रश्च ॥ द्वे स्वभावतो न्यूनाधिकाङ्गे ऊनविंशत्यङ्गुलीकैकविंशत्यङ्गुलीकादौ जने वर्त्तते इत्यर्थः । विकलं स्वभावहीनं अङ्गमस्य विकलाङ्गः । अपङ्गं गच्छति अपोगण्डः । नास्तीति गमेर्डः निपातनात् पस्य पोभावः ।

"अपोगण्डस्तु शिशुके विकलाङ्गे च भीरुके" । इति विश्वः ॥ निपातनादपस्यादिलोपे पोगण्डोऽपि । पोगण्डो विकलाङ्गे स्यादिति हलायुधः ॥ पोगण्डो विकलाङ्गकः । इति रत्नकोषः । इति तट्टीकायां भरतः ।

अपोदिका, स्त्री, (अपगतमुदकं यस्याः सा, स्त्रियां टाप्, एषोदरादित्वात् दित्वं ।) उपोदिका । पूतिकाशाकं । इत्यमरटीकायां स्वामी ॥

अपोहः, पुं, (अप + ऊह + भावे घञ् ।) अपगतऊहः । वितर्काभावः । शुश्रूषाद्यष्टधाधीगुणान्तर्गतषष्ठगुणः ।

("शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः") ॥ इति हेमचन्द्रः ॥ अतद्व्यावृत्तिः । इति काव्यप्रकाशटीकायां महेश्वरः ॥

अप्नः, [स्] क्ली, (आप्यते स्वर्गो लभ्यतेऽनेन, आप + करणे तस् क्रस्नः ।) यज्ञकर्म्म । इत्युणादिकोषः ॥

अप्नुः, पुं, (आप्यते भोगाय प्राप्यते यः, आप् + कर्म्मणि तुः क्रस्नः ।) शरीरं । अङ्गं । इत्युणादिकोषः ॥ ("अथाग्नये द्वितीये यामाहुतिं जुहोति" । इति शतपथब्राह्मणः ।)

अप्नः, [स्] क्ली, (आप् + असुन् नुट् क्रस्नश्च ।) जलं । वेदप्रयोगोऽयं ॥

अप्पतिः, पुं, (अपां पतिः, षष्ठीतत्पुरुषः ।) वरुणः । इत्यमरः ॥ समुद्रः । अपामप्यतिरिति दर्शनात् ॥

अप्पित्तं, क्ली, (अपां पित्तमिव ।) अग्निः । इत्यमरः ॥ चित्रकवृक्षः । वह्निसंज्ञकत्वात् ॥

अप्रकटः, त्रि, (न प्रकटः व्यक्तः नञ्समासः ।) अव्यक्तः । अप्रकाशः । यथा,—

"प्रकटाप्रकटा चेति लीला सेयं द्विधोच्यते" ।
इति भागवतामृते पद्मपुराणं । अस्य विवरणं लीलाशब्दे द्रष्टव्यं ॥

अप्रकाण्डः, पुं, (नास्ति प्रशस्तः काण्डः स्तम्बो यस्य सः ।) काण्डरहितवृक्षः । स तु भिण्टिकादिः । तत्पर्य्यायः । स्तम्बः २ गुल्मः ३ । इत्यमरः ॥

अप्रकाशः, पुं, (न प्रकाशः नञ्समासः ।) प्रकाशाभावः । तत्पर्य्यायः । जनान्तिकं २ । इति त्रिकाण्डशेषः ॥ (गुप्तः । अप्रकाशितः । गूढः ।

"द्विविधांस्तस्करान् विद्यात् परद्रव्यापहारकान् ।
प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः" ॥

इति मनुः । न प्रकाशते इति अप्रकाशः, पचाद्यच् । अन्धकारावृतः, अदृश्यः ।

"प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः" ।
इति रघुवंशे । निहितः । प्रच्छादितः । प्रोथितः ।

"यानि चैवंप्रकाराणि कालाद्भूमिर्न भक्षयेत् ।
तानि सन्धिषु सीमायामप्रकाशानि कारयेत्" ॥

इति मनुः । रहसि । परोक्षं ।

"नातताय्यवधे दोषो हन्तुर्भवति कश्चन ।
प्रकाशं वा प्रकाशं वा मन्युस्तन्मन्युमृच्छति" ॥

इति मनुः ।) तद्विशिष्टे त्रि ॥

अप्रशस्तः, पुं, (न प्रशस्तः नञ्समासः ।) काकः । इति शब्दरत्नावली ॥ अधमे त्रि ॥

अप्रखरः, त्रि, (न प्रखरः तीक्ष्णः नञ्समासः ।) प्राखर्य्यरहितः । अतीक्ष्णः । तद्धर्म्मे क्ली । खं रातीति कः खरः प्रशस्तः खरः प्रखरस्तस्मो नञ्समासः । (मृदुः । शान्तः ।)

अप्रगुणः, त्रि, (न प्रशस्तो गुणो धैर्य्यरूपो यस्य सः, गुणमप्राप्तः प्रादिसमासः ततो नञ्समासः ।) व्याकुलः । त्रस्तः । इत्यमरः ॥

अप्रतिकरः, त्रि, (प्रति करोति विश्वासं नोत्पादयति प्रति + कृ + कर्त्तरि अच्, न प्रतिकरः ततो नञ्समासः ।) विश्वस्तः । विश्वासपात्रं । इति जटाधरः ॥

अप्रतिपक्षः, त्रि, अप्रतियोगी । विपक्षशून्यः । नास्ति प्रतिपक्षो यस्य इति बहुव्रीहिसमासनिष्पन्नः ॥

अप्रतिभः, त्रि, अप्रत्युत्पन्नमतिः । अप्रगल्भः । नास्ति प्रतिभा नवनवोन्मेषशालिनी प्रज्ञा यस्य सः । इति प्रतिभान्वितशब्दार्थे भरतः ॥ (मृदुः । लज्जाशीलः । हतज्ञानः ।) (स्त्रियां उत्तरस्याप्रतिपत्ति-

रूपो नियहस्थानविशेषः, उत्तरार्हं परोक्तं बुद्धापि यत्रोत्तरामेये उत्तरं न प्रतिपद्यते तत्र अप्रतिभानियहस्थानम्।)

अप्रतिरथं, क्ली, (नास्ति प्रतिरथः समः सङ्गरार्थत्वेन यस्य तत्।) यात्रा। सामवेदः। मङ्गलं। इति भूरिप्रयोगचिकाण्डशेषौ ॥ (युद्धार्थयानं। युद्धसमये यात्राकृतमङ्गलं।
"यद् यात्रा मङ्गलं साम तदप्रतिरथं विदुः" ॥
इति हारावली।)

अप्रतिरथः, पुं, (नास्ति प्रतिरथः प्रतियोद्धा यस्य सः।) योद्धा इति भूरिप्रयोगः ॥ तुल्ययोद्धृरहितः। इति पुराणं ॥
("दौष्मन्तिमप्रतिरथं तनयं प्रसूय"।
इति शाकुन्तले।
"एतेषां तमसामिवाप्रतिरथैस्तेजोभिः"।
इति महावीरचरिते।)

अप्रतिरूपकथा, स्त्री, (नास्ति प्रतिरूपा अनुरूपा कथा यस्यां सा।) अप्रतिवचना वाक्। अतुल्या कथा। तत्पर्य्यायः। सङ्गनिका २। इति त्रिकाण्डशेषः ॥

अप्रतिष्ठः, त्रि, अप्रतिष्ठितः। प्रतिष्ठारहितः। नास्ति प्रतिष्ठा यस्येति बहुव्रीहौ ह्रस्वः। यथा। हयशीर्षपञ्चरात्रीयसङ्घर्षणकाण्डे।
"सर्व्वसूक्तेषु कर्त्तव्या प्रतिष्ठा विधिना बुधैः।
फलार्थिभिस्त्वप्रतिष्ठं यस्मान्निष्फलमुच्यते" ॥
इति मठादिप्रतिष्ठातत्त्वं ॥
("अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः"।
इति उत्तरचरिते।)

अप्रतुलं, क्ली, (प्रस्तुतस्य तुलाया अभावः, अव्ययीभावः।) प्रस्तुतपरिमाणाभावः। अनिर्द्देतिरिति लोकप्रसिद्धिः। प्रस्तुततुलारहिते त्रि। नास्ति प्रकर्षा तुला यस्य धनादेः धनादेर्यस्य वा ॥

अप्रत्ययः, पुं, (प्रति+इन्+भावे अच्, ततोनञ्समासः। नास्ति प्रत्ययः विश्वासो यस्य वा) (सन्देहः। संशयः।
"बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः" ॥
इति शाकुन्तले।) प्रत्ययाभावः। अविश्वासः। यथा "दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानां"। इति श्रीशिक्षनः।

अप्रत्यक्षः, त्रि, (अक्षमिन्द्रियं प्रतिगतः प्राप्तिसमासः, न प्रत्यक्षः नञ्समासः।) प्रत्यक्षशून्यः। इन्द्रियागोचरः। तत्पर्य्यायः। अतीन्द्रियः २। इत्यमरः। ("किन्तु तस्य बलज्ञोऽहं भ्राष्टरूपस्य वैरिणः।
अप्रत्यक्षं च मे वीर्य्यं समये तव राघव" ॥)
प्रत्यक्षाभावे क्ली ॥

अप्रधानं, क्ली, (न प्रधानं, नञ्समासः।) प्राधान्यरहितं। तत्पर्य्यायः। अप्राग्र्य २ उपसर्ज्जनं ३। इत्यमरः ॥ वाच्यलिङ्गोऽप्ययं। इति भरतः ॥

अप्रमत्तः, त्रि, (प्र+मद्+क्तः, ततोनञ्समासः।) व्यवधानविशिष्टः। सावधानः। यथा,—
"पापात् पराजितो दुःखादप्रमत्तो विधेः सतः"।
इति बोपदेवः ॥

अप्रयोगः, पुं, (प्र+युज्+घञ्, ततो नञ्समासः) प्रयोगाभावः। अनुल्लेखादिः। यथा। "उक्तार्थानामप्रयोगः"। इति दुर्गादासः ॥

अप्रलम्बं, क्ली, (प्र+लम्ब+घञ्, नञ्समासः।) अविलम्बं। शीघ्रं। इति हलायुधः ॥ तद्वति त्रि। (सत्वरः। विलम्बरहितः। झटिति।)

अप्रशस्तं, त्रि, (प्र+शंस्+क्तः, नञ्समासः।) असत्। अश्रेष्ठं। अविहितं। यथा,—
"अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्"।
इति तिथ्यादितत्त्वे पराशरः ॥ (मूत्रपुरीषादिकं।
"अप्रशस्तन्तु क्षत्वापु मासमादीत भक्षभुक्"।
इति मनुः।)

अप्रसक्तं, त्रि, (प्र+सद्+क्तः, नञ्समासः।) व्याविलं। अनर्द्धं। इति शब्दरत्नावली ॥ अतुष्टं। यथा,—
"त्वयि प्रसन्ने परशर्म्मभिः किं
त्वय्यप्रसन्ने परशर्म्मभिः किं"।
इति प्राचीनाः ॥ (अतुष्टः। अप्रफुल्लः। विषण्णः। विरक्तः। प्रतिकूलः। "अप्रसन्नमनाः किं नु सदा मां प्रति वत्सलः"। इति रामायणे।)

अप्रसिद्धं, त्रि, (प्र+सिध्+क्तः, नञ्समासः।) प्रसिद्धतारहितं। अविख्यातं। यथा,—
"लिङ्गं सामर्थ्यं रूढिगतं प्रसिद्धं न त्वप्रसिद्धं"।
इति तिथ्यादितत्त्वं ॥ ("अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म्म"इति कुमारसम्भवे।)

अप्रस्तुतं, त्रि, (न प्रस्तुतं नञ्समासः।) अप्रक्रान्तं। प्रकरणाप्राप्तं। यथा,—"अप्रस्तुतप्रशंसा सा या चैव प्रस्तुताश्रया"।
इति काव्यप्रकाशः ॥ अप्रशंसितं। प्रपूर्ब्बस्तुत्यर्थस्तुधातोः कर्म्मणि क्ते नञ्समासः ॥
"अप्रस्तुतप्रस्तुतयोर्द्वीपकन्तु निगद्यते।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत्" ॥
इति साहित्यदर्पणे।)

अप्रस्तुतप्रशंसा, स्त्री, काव्यालङ्कारविशेषः। सा च अप्राकरणिकस्यार्थस्य अभिधानेन प्राकरणिकस्याक्षेपः। तस्या लक्षणं। "अप्रस्तुतप्रशंसा सा या चैव प्रस्तुताश्रया। सा च कार्य्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति"।
"तदन्यस्य वचस्तुल्ये तुल्यस्येति च षड्विधा" ॥
आद्यायाः उदाहरणं यथा,—
"यातः किन्न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते नो कार्य्यातितरां क्षणात्सि कथयत्येवं सवाष्पे मयि। लज्जामन्थरतारकेण निपतद्बाराश्रुणा चक्षुषा दृष्ट्वा मां हसितेन भाविमरणोत्साहस्त्वया सूचितः" ॥
इति काव्यप्रकाशः ॥ इतरासां उदाहरणानि बाहुल्यान्नोक्तानि ॥

अप्रहतं, त्रि, (न प्रहन्यते स्म, प्र+हन्+क्तः, नञ्समासः।) अक्षतभूमिः। खिला भूमिः। इत्यमरः ॥ (वस्त्रभेदः। तल्लक्षणं तथा,—
"ईषद्धौतं नवं श्वेतं सदशं यन्त्रधारितं।
निर्नेजकाच्छालितं चाप्रहतं वास उच्यते" ॥
इति।)

अप्राग्र्यं, त्रि, (प्राग्र्यः प्रधानं नञ्समासः।) अप्रधानं। इत्यमरः ॥

अप्राचीनं, त्रि, अपुरातनं। नव्यं। प्राचीतरदिग्जातं। प्रागभवं प्राचीनं ततो नञ्समासः ॥

अप्राप्तः, त्रि, (प्र+आप्+कर्म्मणि क्तः, नञ्समासः।) अलब्धः। यथा। "अप्राप्तप्रापको विधिः"। इति सङ्कल्पकौमुदी दुर्गादासश्च ॥ (अनधिगतः।
"अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः"।
इति भाषापरिच्छेदे। अनुपस्थितः। अनागतः। न्यूनवयाः। अप्राप्तकालः।
"उत्कृष्टायाभिरूपाय वराय सदृशाय च।
अप्राप्तामपि तां तस्मै कन्यां दद्यात् यथाविधि" ॥
इति मनुः।)

अप्राप्तव्यवहार, पुं, (अप्राप्तः व्यवहारो येन सः, अथवा अप्राप्तः व्यवहारः व्यवहारयोग्यं वयो येन सः।) व्यवहारानभिज्ञः। अप्राप्तवयस्कः। नाबालग् इति आरबी भाषा। यथा,—
"अप्राप्तव्यवहाराणां धनं व्ययविवर्ज्जितं।
न्यसेयुर्बन्धुमित्रेषु प्रोषितानां तथैव च" ॥
इति दायतत्त्वधृतकात्यायनवचनं ॥ किञ्च।
"गर्भस्थैः सदृशो ज्ञेयः षष्ठमाद्वत्सरात् शिशुः।
बाल आषोड़शाद्वर्षात् पौगण्डोऽपि निगद्यते ॥
परतो व्यवहारज्ञः स्वतन्त्रः पितराहृते" ॥
इति व्यवहारतत्त्वधृतनारदवचनं ॥

अप्राप्तिः, स्त्री, (प्र+आप्+भावे क्तिन्, नञ्समासः।) अप्रापणं। अलाभः। तद्वति त्रि। यथा,—
"तदप्राप्तिमहादुःखविलीनाग्नेयपातका" ।
इति काव्यप्रकाशकारः ॥

अप्राप्यं, त्रि, (प्र+आप्+कर्म्मणि ण्यत्, नञ्समासः।) अप्रापणीयम्। अप्राप्तव्यं। प्रपूर्ब्बादापधातोः कर्म्मणि ये नञ्समासः ॥

अप्रामाणिकः, त्रि, (प्रमाणेन सिद्धः, प्रमाण+ठक् तस्य इकः, नञ्समासः) प्रमाणानभिज्ञः। प्रमाणासिद्धः। प्रामाण्यरहितः। यथा। "अतोऽविभक्तार्जितत्वमात्रेण धनस्य साधारणत्वाभिधानमप्रामाणिकं"। इति दायभागः ॥

अप्रामाण्यं, क्ली, (प्रमाणस्य भावः, प्रमाण+भावे ष्यञ्, नञ्समासः।) प्रामाण्याभावः। यथा,—
"अप्रामाण्यं जनयति सदा नन्दसूनोर्वियोगः"।
इति पदाङ्कदूतं ॥

अप्रियं, त्रि, (प्रीत+कर्त्तरि कः, नञ्समासः।) अनभीष्टं। अनीप्सितं। अप्रीतिकरं। अहृद्यं। यथा,— [इति पुराणं ॥
"सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियं"।

अप्रियवचः, क्ली, (अप्रियं अप्रीतिकरं वचः वाक्यं कर्म्मधारयः।) निष्ठुरवाक्यं। इति पारुष्यशब्दार्थे भरतः ॥

अप्रिया, स्त्री, (न प्रिया न प्रीतिकरी लोकानां, नञ्समासः।) दुष्टस्त्रीभेदः। इति शब्दरत्नावली ॥ (अप्रीतिकरी नारी।)

अप्रीतं, त्रि, प्रीतिरहितं। असन्तुष्टं। प्रीत्यर्थप्रीधातोः कर्त्तरि क्ते नञ्समासः॥

अप्सरोराक्षसी, स्त्री, (न प्रेता प्राप्ता राक्षसमिव पातकं प्रादिसमासः, गौरादित्वात् ङीष्।) अपेतराक्षसी। तुलसी। इति रत्नमाला॥

अप्सरसः, स्त्री, (अद्भ्यः समुद्रजलेभ्यः सरन्ति उद्यान्ति, अप्+सृ+असुन्।) सर्व्वेश्याः। उर्व्वशीमेनकाद्याः। बहुवचनान्तोऽयं शब्दः। इत्यमरः॥ ("अप्सु निर्मथनादेव रसात् तस्मात् वरस्त्रियः। उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन्" ॥)

अप्सरा, स्त्री, सर्व्वेश्या। इति शब्दरत्नावली। ("स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपि"। इति शब्दार्णवे।)

अफलः, त्रि, (नास्ति फलं वृक्षोत्पन्नं धर्म्मोत्पन्नं वा यस्य सः।) विफलः। निष्फलः। इति हेमचन्द्रः॥ फलकाले अनुत्पन्नफलकवृक्षः। तत्पर्य्यायः। बन्ध्यः२ अवकेशी ३। इत्यमरः॥ भावुकवृक्षः। इति शब्दचन्द्रिका॥

अफला, स्त्री, (नास्ति फलं यस्या सा।) भूम्यामलकी।

अफेनं, क्ली, (निन्दितं फेनं निर्य्यासो यस्य तत्।) वृक्षनिर्य्यासविशेषः। आफिं इति भाषा। तत्पर्य्यायः। खसखसरसं २ निफेनं ३ अहिफेनकं ४ अस्य गुणाः। सन्निपातनाशित्वं। शुक्रबलमोहकारित्वञ्च॥ तच्च चतुर्व्विधं। एकं श्वेतवर्णं। अग्निजीर्णताकारकत्वान्नाम जारणं। द्वितीयं कृष्णवर्णं। मृत्युकारकत्वान्नाम मारणं। तृतीयं पीतवर्णं। वयःस्तम्भनकारकत्वान्नाम धारणं। चतुर्थं कर्व्बूरवर्णं। मलसारकत्वान्नाम सारणं। इति राजनिर्घण्टः॥ (त्रि, फेनरहितः। "अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्म्मवित्"। इति मनुः।)

अब इ ड शब्दे। इति कविकल्पद्रुमः॥ इ अम्बते। ड अम्बते अम्बां प्रेरयति। इति चतुर्भुजः दुर्गादासश्च॥

अबद्धं, त्रि, (बन्ध+क्तः, नञ्समासः।) प्रस्तावानुपयोगिवचनं। समुदायार्थशून्यवाक्यं। अनर्थककथा। इत्यमरः॥ ("जरद्गवः कम्बलपादुकाभ्यां।
द्वारि स्थितो गायति मङ्गलानि॥
तं ब्राह्मणी पृच्छति पुत्रकामा।
राजन् रुमायां लशुनस्य कोऽर्थः"॥
इत्याद्यस्य विषयः। अनियन्त्रितः। स्वाधीनः। मुक्तः।) बन्धनशून्यं॥

अबद्धकं, त्रि, (बन्ध+क्तः, नञ्समासः, स्वार्थे कन्।) समुदायार्थशून्यवाक्यं। इति शब्दरत्नावली॥

अबद्धमुखः, त्रि, (न बद्धं नञ्समासः, अबद्धं यथाभिलाषकथनेन अप्रतिबद्धं मुखं यस्य सः।) अप्रियवादी। दुर्म्मुखः। इत्यमरः॥ (स्त्रियां वा ङीप् अबद्धमुखी अबद्धमुखा)।

अबध्य, त्रि, (हन्तुमयोग्यं हन्+अर्हार्थे कर्म्मणि यत्, "हनोवा वधच" इति वधादेशे। वधमर्हति इति वध्यः, न वध्यः, नञ्समासः।) अनर्थकवाक्यं। बधायोग्यं। इति मेदिनी॥ ("अबद्धाश्च स्त्रियं प्राऽऽहुस्तिर्य्यग्योनिगतामपि"। इति स्मृतिः। बधदण्डायोग्ये ब्राह्मणे च, "वधः सर्व्वस्वहरणं पुराद्निर्व्वासनाङ्कने"। "तदङ्गच्छेदइत्युक्तो दण्ड उत्तमसाहसः। अविशेषेण सर्व्वेषामेष दण्डविधिः स्मृतः॥ बधादृते ब्राह्मणस्य न बधं ब्राह्मणोऽर्हति"॥ इति मिताक्षरायां।)

अबन्ध्यः, त्रि, (बन्ध+ण्यत्, न बन्ध्यः अफलः नञ्समासः।) सफलः। फलकाले फलयुक्तवृक्षः। तत्पर्य्यायः। फलेग्रहिः २। इत्यमरः॥ फलग्रहिः ३। इति तट्टीका॥ अमोघफलोदयः ४। इति राजनिर्घण्टः॥ ("इयेष सा कर्त्तुमबन्ध्यरूपतां"। इति कुमारसम्भवे। "याच्ञामाशंसिताबन्ध्यप्रार्थनं"। "कर्म्मभिरप्यबन्ध्यैः"। इति रघुवंशे।)

अबलं, त्रि, (नास्ति बलं सामर्थ्यं यस्य तत्।) बलरहितं। दुर्ब्बलं। यथा। "अबलस्कुलाग्निनो भसान्"। इति नैषधं॥

अबलः, पुं, (नास्ति बलं यस्य सः, क्षणभङ्गुरत्वात् तस्य तथात्वं।) वरुणवृक्षः। इति शब्दचन्द्रिका॥

अबला, स्त्री, (नास्ति बलं यस्याः सा।) नारी। इत्यमरः॥ ("तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी"। इति मेघदूते।)

अबाधं, त्रि, (नास्ति बाधा यस्य तत्।) बाधशून्यं। अनिवारितं। तत्पर्य्यायः। निरर्गलं २। इत्यमरः। अनर्गलं ३ उच्छृङ्खलं ४ उद्दाम ५ अनियन्त्रितं ६ निरङ्कुशं ७। इति हेमचन्द्रः॥ बाधा पीड़ा तया हीनञ्च॥ (अङ्गशाखे त्रिभुजांशविशेषः। अस्फुटत्वं। अविघटता। जटिलीभावः।)

अबिन्धनः, पुं, (आपएव इन्धनमुद्दीपनसाधनं यस्य सः।) वाड़वाग्निः। इति सन्देहभञ्जिका॥ ("अबिन्धनं वह्निमसौ बिभर्त्ति"। इति रघुवंशे।)

अबोधः, पुं, (बुध+भावे घञ्, नञ्समासः।) अज्ञानं। यथा। "निसर्गदुर्बोधमबोधविक्लवाः"। इति भारविः॥ बहुव्रीहौ त्रि॥ (अज्ञानः। मूढः॥ अनभिज्ञः। हतबुद्धिः। किङ्कर्त्तव्यविमूढः।)

अब्ज, क्ली, (अप्सु जायते, अप्+जन+कर्त्तरि डः, उपपदसमासः।) पद्मं। इति मेदिनी॥ दशार्ब्बुदसंख्या। शतकोटिः। इति लीलावती॥

अब्जः, पुं, (अद्भ्यः जायते, अप्+जन्+डः।) चन्द्रः। धन्वन्तरिः। निचुलवृक्षः। इति मेदिनी॥

अब्जः, पुं, क्ली, (अद्भ्यः जायते, अप्+जन+डः।) शङ्खः। इति मेदिनी॥ (जलभवशुक्तिमुक्तादिकं।) "अब्जमश्ममयञ्चैव राजतञ्चानुपस्कृतं"। "अब्जेषु चैव रत्नेषु सर्व्वेष्वश्ममयेषु च"। इति मनुः।)

अब्जजः, पुं, (अब्जात् विष्णुनाभिपद्मात् जायते, अब्ज+जन्+कर्त्तरि डः।) ब्रह्मा। इति त्रिकाण्डशेषः॥

अब्जभोगः, पुं, (अब्जस्य शङ्खस्य भोग इव शरीरमिव भोगो यस्य सः।) पद्मकन्दः। इति शब्दचन्द्रिका॥

अब्जयोनिः, पुं, (अब्जं विष्णुनाभिपद्ममेव योनिरुत्पत्तिस्थानं यस्य सः।) विधाता। ब्रह्मा। इत्यमरः॥

अब्जवाहनः, पुं, (अब्जमिव शङ्खवत् शुभ्रं वाहनं रथो यस्य सः।) शिवः। इति त्रिकाण्डशेषः॥

अब्जहस्तः, पुं, (अब्जं पद्मं हस्ते यस्य सः।) सूर्य्यः। इति हेमचन्द्रः॥

अब्जिनी, स्त्री, (अब्जानां समूहः, अब्ज+पुष्करादित्वात् इनि, स्त्रियां ङीप्।) पद्मिनी। इति राजनिर्घण्टः॥ पद्मसमूहः। पद्मलता। पद्मयुक्तदेशः। इति नलिनीशब्दटीकायां भरतः॥

अब्जिनीपतिः, पुं, (अब्जिन्याः पद्मसमूहस्य पतिः, षष्ठीतत्पुरुषः।) सूर्य्यः। इति हेमचन्द्रः॥

अब्दः, पुं, (अवति सीमानं रक्षति अव+"अज्ञादय" इति दन् नेघपर्व्वतविशेषपक्षे तु अपो ददाति, अप्+दा+कर्त्तरि कः।) वत्सरः। मेघः। मुस्ता। इति मेदिनी॥ पर्व्वतविशेषः। इति विश्वः॥

अब्दसारः, पुं, (अब्दस्य मुस्तायाः सारः मूलनिर्य्यासः।) कर्पूरभेदः। इति राजनिर्घण्टः॥

अब्धिः, पुं, (आपो जलानि धीयन्तेऽत्र, अप्+धा+अधिकरणे किः, उपपदसमासः।) समुद्रः। इत्यमरः॥

अब्धिकफः, पुं, (अब्धेः समुद्रस्य कफ इव कफाकारतया तस्य तादृशत्वं।) समुद्रफेनः। तत्पर्य्यायः। हिण्डीरः २। फेनः ३। इत्यमरः॥

अब्धिजौ, पुं, (अब्धौ जायेते अब्धि+जन+कर्त्तरि डः, उपपदसमासः।) अश्विनीकुमारौ। द्विवचनान्तोऽयं शब्दः। इति हेमचन्द्रः॥

अब्धिद्वीपा, स्त्री, (अब्धिसंख्याता लवणादिसप्तसंख्याता द्वीपा यस्याः सा।) पृथिवी। इति त्रिकाण्डशेषः॥

अब्धिनगरी, स्त्री, (अब्धेः समुद्रस्य सन्निहिता नगरी।) द्वारकापुरी। इति त्रिकाण्डशेषः।

अब्धिनवनीतकः, पुं, (अब्धेः समुद्रस्य नवनीतमिव, षष्ठीतत्पुरुषः।) चन्द्रः। इति शब्दरत्नावली॥

अब्धिफेनः, पुं, (अब्धेः समुद्रस्य फेनः, षष्ठीतत्पुरुषः।) समुद्रफेनः। इति राजनिर्घण्टः॥

अब्धिमण्डूकी, स्त्री, (अब्धिं समुद्रं मण्डयति, अब्धि+मण्ड+ऊक, स्त्रियां ङीष्।) मुक्ताक्षोटः। शुक्तिः। इति हेमचन्द्रः॥ झिनुक इति भाषा॥

अब्धिशयनः, पुं, (अब्धौ प्रलये समुद्रे शेते, शी+बाहुलयात् कर्त्तरि ल्युट्, सप्तमीतत्पुरुषः।) विष्णुः। इति हेमचन्द्रः॥ (नारायणोहि प्रलये अब्धौ शेते, यदुक्तं,—
"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृतः"।
इति मनुः।)

अब्धिवह्निः, पुं, (अब्धेः समुद्रस्य अग्निः, षष्ठीतत्पुरुषः।) वड़वानलः। इति हेमचन्द्रः॥

अभक्तः, पुं, (अपोभक्षयति, अप+भक्ष+शिलिकामिभक्ष्याचरिभ्यो ण इति कर्त्तरि णः, उपपदसमासः।) सर्पः। इति त्रिकाण्डशेषः।

अम्भं, क्ली, (अपो बिभर्त्ति, अप्+भृ+कर्त्तरि कः।) मेघः। इत्यमरः। मुस्ताटङ्गं। अभ्रकधातुः। इति राजनिर्घण्टः॥

अम्भ्रमातङ्गः, पुं, (अम्भस्य, मेघस्य अधिपः मातङ्गः शाकपार्थिवादित्वात् समासः, मध्यपदलोपश्च।) ऐरावतः। इत्यमरः॥

अम्भिः, स्त्री, (अपः नौकामलापनयनाय बिभर्त्ति धारयति, अप्+भृ+किः।) काष्ठकुद्दालः। नौकामलापनयनार्थकुद्दालाकृतिकाष्ठं। इत्यमरः॥ (पणादिद्रव्याणां समर्घीकरणपात्रं। तीक्ष्णाग्रो लोहदण्डः।

"अम्भिं कार्षायसीं दद्यात् सर्पं हत्वा द्विजोत्तमः। पलालभारकं यण्डे मैसकञ्चैकमासकं"॥

इति मनुः।)

अम्भेयं, त्रि, (अम्भे मेघे भवं, अभ्र+घ तस्य इय।) मेघोद्भववस्तु। इत्यमरः॥

अब्रह्मचर्य्यकं, क्ली, (ब्रह्मचर्य्यविरोधि, विरोधे नञ्समासः। ततः स्वार्थे कन्।) मैथुनं। इति त्रिकाण्डशेषः॥ ब्रह्मचर्य्यशून्ये त्रि॥

अब्रह्मण्यं, क्ली, (ब्रह्मणि ब्राह्मणोचितकर्म्मणि अहिंसादौ साधु, ब्रह्मण्+यत्, नञ्समासः।) नाथोक्तौ नायं वध इत्याकारोक्तिः। अवधयाच्ञा। तत्पर्य्यायः। अवधोक्तिः २। इत्यमरः॥ ("नेपथ्ये अब्रह्मण्यमब्रह्मण्यं। अचान्तरे ब्राह्मणेन मृतं पुत्तमुत्क्षिप्य राजद्वारे सोरस्ताडनमब्रह्मण्यमुद्घोषितं"।

इति उत्तरचरिते। वेदविरुद्धं अतिनिन्दितं कर्म्म। निरतिशयव्यसनशोकादिप्रकाशोक्तिरियं।)

अभ इ ड ध्वनौ। इति कविकल्पद्रुमः॥ इ अभ्यते। ड अभते। इति दुर्गादासः॥

अभयं, क्ली, (भयस्याभावः इत्यव्ययीभावः, यद्वा नास्ति भयं यस्मात् तत्, हरीतक्यां दुर्गामूर्त्तिभेदे च स्त्री।) वीरणमूलं। इत्यमरः॥ भयाभावः। ("नातः परतरो धर्म्मो नृपाणां यद्दयार्द्रितं"। विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा"।

इति याज्ञवल्क्यः।

"योदत्वा सर्व्वभूतेभ्यः प्रव्रजत्यभयं गृहात्। तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः"॥

इति मनुः।)

"प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये। बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी"॥

इति श्रीभगवद्गीता॥ भयरहिते त्रि। इति विश्वः॥

अभयडिण्डिमः, पुं, (अभयाय स्वयोद्भवभयाभावायडिण्डिमः।) युद्धढक्का। सङ्ग्रामपटहः। इति त्रिकाण्डशेषः॥

अभया, स्त्री, (नास्ति भयं यस्याः सा।) हरीतकी। इत्यमरः॥ चम्पादेशजातपद्मगिरा हरीतकी। सा नेत्ररोगे प्रशस्ता। इति राजवल्लभः॥ (दुर्गा।)

अभक्ष्यं, त्रि, (भक्ष+कर्म्मणि ण्यत्, नञ्समासः। अभक्षणीयं। अखाद्यं। यथा,—

"अधार्य्यं चर्म्म मे सङ्ख्यं करिष्यसि किमस्थिभिः। अभक्ष्यं चैव मे मांसं त्वादृशैर्ब्रह्मचारिभिः"॥

इति रामायणं॥ (भोजनायोग्यं वस्तु, भक्षणाय मन्वादिभिः शास्त्रकारैः निषिद्धं द्विजातिभिः वर्ज्जनीयं वस्तु। तानि च यथा, लशुनगृञ्जनपलाण्डुराख्यानि चीणि स्थूलकन्दशाकानि। विष्ठादिजातानि तण्डुलीयादीनि च। लोहितश्वेतनिर्य्यासः। क्षीरनीलद्रवश्वेतनिर्य्यासः। ग्रेलुफलं। गव्यं। पेयुषञ्च। देवोद्देशेन आत्मार्थं पक्वाः क्षुरसंयावपायसापूपाः। असंस्कृत पशुमांसं। नैवेद्यार्थमन्नानि निवेदनात् प्राक्। हवींषि च होमात् प्राक् इत्यादि।)

अभाजनं, क्ली, (न भाजनं, नञ्समासः।) अपात्रं। अयोग्यं। यथा,—

"दीधीवेवीट्समः कश्चित् गुणवद्भोरभाजनं। क्षिप्रप्रत्ययनिभः कश्चिच्च सन्निहित न ते"॥

इति काव्यप्रकाशः॥ पात्ररहिते त्रि॥

अभावः, पुं, (भू+भावे घञ्, नञ्समासः।) मरणं। असत्ता। इति विश्वमेदिनौ॥

"अस्ति पुत्रो वशे यस्य भृत्योभार्य्या तथैवच। अभावे सति सन्तोषः स्वर्गस्थोऽसौ महीतले"॥

इति चाणक्यः।

("अन्यभावे तु विप्रस्य प्राणानेवोपपादयेत्। साध्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः"॥

इति मनुः।) द्रव्यादिषट्कभिन्नः। स द्विविधः। संसर्गाभावः १ अन्योन्याभावश्च २। इति भाषापरिच्छेदः॥ भावशून्यः भावः स्थायिभावादिरिति अलङ्कारशास्त्रं॥

अभावनीयः, त्रि, अचिन्तनीयः। चौरादिकचिन्तार्थभूधातोः कर्म्मण्यनीये नञ्समासः॥

अभावनं, क्ली, (भाव्+ल्युट्, नञ्समासः।) अकथनं। मौनं। इत्यमरः॥

अभि, व्य, (न भाति, न+भा+कि।) उपसर्गविशेषः। अस्यार्थाः। समन्तात्। उभयार्थः। वीप्सा। इत्यमरभाः। धर्षणं। इति दुर्गादासः॥ अभिलाषः। आभिमुख्यं। इति मेदिनी॥ चिह्नं। इति वोपदेवहेमचन्द्रौ॥

अभिकः, त्रि, (अभिकामयते इति ण्वुलकाभिकेति साधुः।) कामी। कामुकः। इत्यमरः॥

अभिक्रमः, पुं, (अभि+क्रम+घञ्। नोदात्तेति वृद्धभावः। अभिक्रम्यते कर्म्मणा प्रारभ्यते इति व्युत्पत्त्या कर्म्मारब्धफले प्रारम्भे च।) अभीतयोधादेर्युद्धे शत्रुसम्मुखगमनं।

आरोहणं। इति हेमचन्द्रः॥

अभिख्या, स्त्री, (अभि+ख्या+अङ्।) नाम। शोभा। कीर्त्तिः। इति मेदिनी॥ आख्यानं। इति शब्दरत्नावली॥ (शोभा। सौन्दर्य्यं। रमणीयता। [इति रघुवंशे।

"काव्यभिख्यां तयोरासीत् व्रजतोः शुद्धवेश्ययोः"।

"कामप्यभिख्यां स्फुरितैरपुण्यदासन्नलावण्यफलोऽधरोष्ठः"।

इति कुमारसम्भवे। यक्षः॥)

अभिगस्तः, त्रि, (अभि+ग्रस्+कर्म्मणि क्तः।) शत्रुणाक्रान्तः। इत्यभिपन्नशब्दार्थे अमरः। (अभियुक्तः।)

अभिग्रहः, पुं, (अभि+ग्रह्+भावे अप्।) अभियोगः। इत्यमरः॥ कलहाङ्गानं। अपचिकीर्षया अतिक्रम्याक्रमणं। आभिमुख्येन युद्धादिप्रवृत्तिः। इति तट्टीकायां भरतः॥ गौरवं। अभिग्रहणं। इति मेदिनी॥ लुट् इति भाषा। (चौर्य्यकरणं।)

अभिग्रहणं, क्ली, (अभि+ग्रह+भावे ल्युट्।) अभिहारः। इत्यमरः॥ चौर्य्यकरणं। सम्मुखे हरणं। इति तट्टीकायां भरतः॥ (साहसं। अपचिकीर्षया अतिक्रम्याक्रमणं।)

अभिघातः, पुं, (अभि+हन्+भावे घञ्।) दण्डादिभिरभिहननं। आघातः। यथा,—

"अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः"।

इति माधवकरः॥ प्रत्नादौ कवर्गादिवर्गाणां पूर्व्वस्थितचतुर्थद्वितीयतृतीयचतुर्थवर्गाः क्रमेण परस्थितवर्गैकैकद्विचिवर्गयुक्ताः। तत्र क्ली। यथा—

"अभिघातं स्यात् पूर्व्वं वेदद्वित्र्यब्धिवर्गाश्चेत्। नगवर्गाणां परतो धरणीचन्द्रद्विरामाख्याः"॥

इति केरलग्रन्थः॥ (प्रहारः। अभिहननं। आघातः।

"चक्षद्भुजभ्रमितचण्डगदाभिघात-संचूर्णितोरुयुगलस्य सुयोधनस्य"।

इति वेणीसंहारे। सङ्घर्षणं। संमर्द्दः। पीड़नं। क्लेशदानं। शोकक्षोभः।

"सम्भवांश्च वियोनीषु दुःखप्रायासु नित्यशः। शीतातपाभिघातांश्च विविधानि भयानि च"॥

इति मनुः। प्रतीकारः। अपसारणं।)

अभिघाती, [न्] पुं, (आभिमुख्येन हन्ति, अभि+हन्+णिनि।) शत्रुः। इत्यमरः॥ (विपक्षः॥ आक्रमणकारी।

"एकदा न विगर्ह्यीयात् बह्वन् राजाभिघातिनः। सदर्पोऽप्युरगः कीटैर्बहुभिर्नश्यति ध्रुवं"॥

इति हितोपदेशे। पीड़ाजनकः। आघातकारी।

"सुव्यवस्थितमन्त्रेण परमर्म्माभिघातिना। भवितव्यं नरेन्द्रेण न कामवशवर्त्तिना"।

इति रामायणे। प्रतीकारः। अपसारणं।)

अभिघारः, पुं, (अभि घार्य्यते समन्तात् वह्नौ सिच्यते, अभि+घृ क्षरणे णिच्+अच्।) घृतं। इति राजनिर्घण्टः॥

अभिचरः, पुं, (आभिमुख्येन सेवायै चरति, अभि+चर्+ट।) दासः। भृत्यः। इति हेमचन्द्रः॥

अभिचारः, पुं, (आभिमुख्येन शत्रुवधार्थं चारः कार्य्यकरणं अभि+चर+भावे घञ्।) हिंसाकर्म्म। इत्यमरः॥ अथर्व्ववेदोक्तमन्त्रयन्त्रादिनिर्म्मितमारणोच्चाटनादिहिंसात्मककर्म्म। इति भरतः॥ मारणादिफलकतान्त्रिकप्रयोगविशेषः। स षड्विधः। मारणं १ मोहनं २ स्तम्भनं ३ विद्वेषणं ४ उच्चाटनं ५ वशीकरणं ६। इति तन्त्रसारः॥ उपपातकविशेषः। इति प्रायश्चित्तविवेकः॥ स तु श्येनादियज्ञेनानपराधस्य मारणं। इति कुल्लूकभट्टः॥ यथा,—

"हिंसौषधीनां स्त्रीजीवोऽभिचारो मूलकर्म च"। इति मनौ ११ अध्यायः ॥ * ॥ अथाभिचारः। "ॐ विरूढे रूपिणि चण्डिके वैरिणममुकं देहि देहि स्वाहा"। इति खड्गमभिमन्त्र्य खड्गमन्त्रांश्च पठित्वा खड्गं संपूज्य छागादिकममुकोऽसि इति वैरिनाम्नाभिमन्त्र्य रक्तसूत्रेण त्रिधा मुखं बद्धा वैरिनाम्ना प्राणप्रतिष्ठां कृत्वा।

"ॐ अयं स वैरी यो द्वेष्टि तमिमं पशुरूपिणं। विनाशय महादेवि स्फें स्फें खादय खादय"॥

इति पठित्वा बलिशिरसि पुष्पं दत्त्वा बलिमन्त्रं पठित्वा बलिं संपूज्य अद्याश्विने मासि महानवम्यां अमुकगोत्रोऽमुकदेवशर्म्मा अमुकशत्रुनाशाय इमं छागं महिषं वा अमुकदेवतं भगवत्यै दुर्गायै तुभ्यमहं सम्प्रददे। इत्युत्सृज्य आं क्रूं फट् इति क्षिप्त्वा मूलं पठित्वा एतद्रुधिरं दुर्गायै नमः। इति रक्तं शिरश्च दत्त्वा अष्टाङ्गमांसैर्होमं मूलमन्त्रेण कुर्य्यादिति तन्त्रसारः॥

अभिचारिन्, [न्] त्रि, (अभिचरति शत्रुवधार्थं कर्म्म करोति, अभि + चर + णिनि।) अभिचारकर्त्ता। तन्त्रादिशास्त्रोक्तानिष्टकारी। अभिपूर्ब्बचरधातोः कर्त्तरि णिन्॥

अभिजनः, पुं, (अभिजायतेऽत्र, अभि + जन् + आधारे घञ्, डुअभावः।) ख्यातिः। जन्मभूमिः। कुलश्रेष्ठः। वंशः। इति मेदिनी॥ (अन्वयः। "अभिजनतपोविद्यावीर्य्यक्रियातिशयैर्निजैः"। इति महावीरचरिते।

"कथं दशरथाज्जातः शुद्धाभिजनकर्म्मणः"। इति रामायणे।)

अभिजातः, त्रि, (अभिजन् + भावे क्तः, अभिमतं प्रशस्तं जातं जन्म यस्य सः।) सुन्दरः। न्याय्यः। इति विश्वः॥ कुलजः। कुलीनः। बुधः। पण्डितः। इत्यमरः॥ (श्रेष्ठवंशोद्भवः।

"जात्यन्तेनाभिजातेन शूरः शौर्य्यवता कुशः। अमन्यतैकमात्मानमनेकं वह्निना वशी"॥

इति रघुवंशे।

"न स्त्रेच्छितव्यं यज्ञादौ स्त्रीषु नापक्वतं वदेत्। सङ्कीर्णं नाभिजातेषु नाप्रबुद्धेषु संस्कृतं"॥

इति मनुः। उचितः। उपयुक्तः। योग्यः। सुरूपः। मनोहरः। मान्यः। पूज्यः। धन्यः। श्लाघ्यः। भगवान्। सम्भ्रान्तः।)

अभिजित्, क्ली, (अभि + जि + क्विप्।) दिवसस्याष्टममुहूर्त्तः। कुतपकालइति प्रसिद्धः॥ यथा,—

"अपराह्णे तु संप्राप्ते अभिजिद्योहिणोदये। यदत्र दीयते जन्तोस्तदक्षयमुदाहृतं"॥

इति मत्स्यपुराणं॥ नक्षत्रविशेषः। तत्तु तारकाचयात्मकश्रृङ्गाटकाकृति। उत्तराषाढायाः शेषपञ्चदण्डाः श्रवणायाः प्रथमदण्डचतुष्टयं एतदूनविंशतिदण्डात्मकमभिजिद्भवति॥ इति ज्योतिषं॥ तत्र जातफलं।

"अतिसुललितकान्तिः सम्मतः सज्जनानां ननु भवति विनीतस्त्यागकीर्त्तिः सुवेषः। द्विजवरसुरभक्तो व्यक्तवाङ्मानवः स्याद-भिजिति यदि सूतिर्भूपतिः खस्रवंशे"॥

इति कोष्ठीप्रदीपः॥

अभिज्ञः, त्रि, (अभि साकल्येन जानाति, अभि + ज्ञा + कर्त्तरि कः।) प्रवीणः। निपुणः। विज्ञः। इत्यमरः॥ (बोद्धा। दक्षः। कुशलः।

"अभिज्ञाश्चेदपातानां क्रियन्ते नन्दनद्रुमाः"।

"अनभिज्ञास्त्वभिसाराणां दुर्दिनेष्वभिसारिकाः"।

इति कुमारसम्भवे।)

अभिज्ञानं, क्ली, (अभिज्ञायतेऽनेन, अभि + ज्ञा + करणे ल्युट्।) चिह्नं। इति हेमचन्द्रः। (अङ्कः। लक्षणं।

"एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा मा कौलीनाच्चकितनयने मय्यविश्वासिनी भूः"।

इति मेघदूते। स्मृतिः। ज्ञानभेदः।

"एवमुक्त्वा रामेण हनूमान् वानरर्षभः। पूर्ब्बवृत्तमभिज्ञानं भूयः संप्रत्यभाषत"॥

इति रामायणे। सोऽयमितिज्ञानसाधनं चिह्नं। स्मरणार्थमङ्गुरीयादिकं चिह्नं। "अयं मैथिल्यभिज्ञानं काकुत्स्थस्याङ्गुरीयकः"। इति भट्टिकाव्ये।)

अभितः, [स्] अव्य, (अभि + तसिल्।) प्रीप्सा। साकल्यं। आभिमुख्यं। उभयतः। "अङ्कान्न्यायाद्धीदभितः प्रधानं"। इति भट्टिकाव्ये।) समीपं। इति मेदिनी॥

अभिधर्षणं, क्ली, (अभि + धृष् + भावे ल्युट्।) रक्तःपिशाचभूतादेरभिषङ्गः। इति महाभारतं॥ सर्व्वतोभावेन धर्षणञ्च॥

अभिधा, स्त्री, (अभि + धा + करणे भावे च अङ्, स्त्रियां टाप्।) नाम। इति हेमचन्द्रः॥ न्यायमते शब्दशक्तिः। मीमांसामते विधिसमवेतविधिव्यापारीभूतपदार्थः। तस्या लक्षणं। "स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते"। इति काव्यप्रकाशः॥ * ॥ तत्र "सङ्केतितार्थस्य बोधनादग्रिमाभिधा"। इति साहित्यदर्पणं॥ (आख्या। आज्ञा। अभिधानं। नामधेयं।)

अभिधानं, क्ली, (अभिधीयते अनेन, अभि + धा + करणे ल्युट्।) नाम। इत्यमरः॥ कथनं। यथा। "तवाभिधानाद्व्यथते नताननः"। इति भारविः॥ शब्दकोषः। यथा। "कृत्तद्धितसमासानामभिधानं नियामकं"। इति वोपदेवः॥ (आख्या। नामधेयं।

"आख्याज्ञ अभिधानञ्च नामधेयञ्च नाम च"।

इत्यमरः। "शिखरिणि क्रतु नाम क्रियाश्चिरं किमभिधानमसावकरोत्तपः"। इति साहित्यदर्पणे। उक्तिः। उल्लेखः। निर्देशः।)

अभिधेयं, क्ली, अभिधानं। नाम। ("इति प्रयोजनाभिधेयसम्बन्धाः" इति वोपदेवः।) अभिधीयते अनेनेति करणे यः॥

अभिधेयं, त्रि, (अभि + धा + कर्म्मणि यत्।) अभिधागम्यं। वाच्यं। प्रतिपाद्यं। यथा। "इति प्रयोजनाभिधेयसम्बन्धाः"। इति वोपदेवः॥

अभिध्या, स्त्री, (अभि + ध्यै + अङ् + टाप्।) परस्वे विषयस्पृहा। इत्यमरः॥ परद्रव्ये निस्पृहा। दोषचिन्तापूर्ब्बकं परस्वे लिप्सा इत्येके। विषयप्रार्थना। इति स्वामी। विषयस्य लाभस्य स्पृहा विषयस्पृहा विषयेण चौर्य्यादिना स्पृहा इति तृतीयासमासः इत्यन्ये। विषयिस्पृहेतिपाठे परस्वविषये विषयितया स्पृहा निस्पृहाभावः। इति कश्चित् इति कौमुदी। इत्यमरटीकायां भरतः॥ अभिलाषः। इति रायमुकुटः॥

अभिनन्दनः, पुं, (अभिनन्दयति, अभि + नदि + णिच् + ल्युट्) बुद्धविशेषः। चतुर्थस्तीर्थंकरजिनोऽयं। इति हेमचन्द्रः॥ सर्व्वतोभावेनानन्दजनके त्रि॥

अभिनयः, पुं, (अभिनीयते हृद्गतक्रोधादिभावः प्रकाश्यतेऽनेन अभि + नी + करणे अच्। हृद्गतक्रोधादिभावाभिव्यञ्जकः। अङ्गुल्यादिना व्यक्तीकृतमनःकार्य्यं। तत्पर्य्यायः। व्यञ्जकः २। इत्यमरः॥ दृश्यकाव्यं। रङ्गादिभिर्नटैः रामयुधिष्ठिरादीनामवस्थानुकरणं। स चतुर्व्विधः। आङ्गिकः १। वाचिकः २। आहार्य्यः ३। सात्त्विकः ४। इति साहित्यदर्पणं॥ ("तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपा बुधाः शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम्"। इति उत्तरचरिते।)

अभिनवः, त्रि, (अभि + नु + भावे अप्।) नूतनः। इत्यमरः॥

("अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्"।

इति शाकुन्तले।)

अभिनवोद्भित्[द्] पुं, (अभिनवं यथातथा उद्भिनत्ति उद्भिद्य जायते, अभिनव + उत् + भिद् + कर्त्तरि क्विप्।) अङ्कुरः। इत्यमरः॥

अभिनिर्मुक्तः, पुं, (अभि साकल्येन सायन्तनकार्य्येण निर्मुक्तः।) सूर्य्यास्तकालज्ञायी। यस्मिन् मुने सूर्य्योऽस्तं याति सः। इत्यमरः॥

("सूर्य्येण ह्यभिनिर्मुक्तः शयानोऽभ्युदितश्च यः। प्रायश्चित्तमकुर्व्वाणो युक्तः स्यान्महतैनसा"॥

इति मनुः।)

अभिनिर्याणं, क्ली, (शत्रुमभिलक्षीकृत्य निर्याणं निर्गमः।) विजिगीषोः प्रयाणं। यात्रा। इत्यमरः॥ (जिगीषया गमनं।

"यत्नेनयाभिनिर्य्याणं स्मृतं तदभिषेणनम्"।

इति हलायुधः।)

अभिनिवेशः, पुं, (अभि + नि + विश् + भावे घञ्।) मनःसंयोगविशेषः। मनोनिवेशः। आवेशः। शास्त्रादौ प्रवेशः। तत्पर्य्यायः। निबन्धः २। इति हेमचन्द्रः॥ योगशास्त्रमते मरणजन्यभयजनकाविद्याविशेषः॥ (आग्रहः। अवश्यमिदं कर्त्तव्यमित्यादिरूपोऽध्यवसायः। दृढ़सङ्कल्पः।

"इत्युक्तवन्तं जनकात्मजायां नितान्तरूक्षाभिनिवेशमीशं"।

इति रघुवंशे।

"अथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा"

इति कुमारसम्भवे। आसक्तिः। अनुरागः। अभिलाषः। "बलीयान् खलु मेऽभिनिवेशः"। इति शाकुन्तले।)

अभिनिष्टानः, पुं (अभि + नि + ष्टन् + घञ्, अभिनिसः स्तनः शब्दसंज्ञायां इति षत्वं।) विसर्गः। अक्षरं। इति मेदिनी॥

अभिनीतः, त्रि, (अभि + नी + क्तः।) युक्तः। न्याय्यः। अतिसंस्कृतः। प्रशस्तो भूषितो वा। अमर्षी। क्रोधनः अल्पभावान् वा। इत्यमरः॥ ("अस्मिन्नेव प्रकरणे धनञ्जयमुदारधीः। अभिनीततरं वाक्यमित्युवाच युधिष्ठिरः"। इति महाभारते। विज्ञः। धीरः।

"स भवान् वित्तसम्पन्नः स्थितः पथि निरत्यये। मित्रार्थमभिनीतत्वं यथावत् कर्त्तुमर्हसि"। इति रामायणे।)

अभिनेता, [ट्टृ] त्रि, (अभि + नी + कर्त्तरि तृच्।) अभिनयकर्त्ता। केचो संओयाला इत्यादि भाषा। इति नाटकप्रसिद्धं॥

अभिपन्नः, त्रि, (अभि + पद् + कर्त्तरि क्तः।) अपराद्धः। अपराधवान्। आपदृतः। प्राप्तविपत्तिः। अभियस्तः। ग्रहगणाक्रान्तः। इत्यमरः॥ (क्षीकृतः। अक्षीकृतः। अभिभूतः। पीड़ितः।

"दाहप्रपाकौ शिशिराभिनन्द्याः। पित्ताभिपन्नेनयने भवन्ति"।

"दृष्टिर्दोषाभिपन्ना"। इति सुश्रुते।)

अभिप्रायः, पुं, (अभि + प्र + इण् + भावे अच्।) इच्छाविशेषः। तत्पर्य्यायः। आशयः २ छन्दः ३। इत्यमरः॥ आकूतं ४ भावः ५। इति जटाधरः। (अभिसन्धिः। हृद्गतो भावः।

"दुर्य्योधन ममाप्येतत् हृदि संपरिवर्त्तते। अभिप्रायस्य पापत्वात् नैवं तु विहतोऽस्म्हं"। इति महाभारते। [इति मनुः।)

"तेषां सं स्वमभिप्रायमुपलभ्य पृथक् पृथक्"।

अभिप्रेतं, त्रि, (अभि + प्र + इण् + क्तः।) अभिप्रायविषयीभूतं। अभीष्टं। यथा,—

"कामाय तु हितं काम्यमभिप्रेतार्थसिद्धये। पार्व्वणेन विधानेन तदप्यक्तं खगाधिप"॥ इति भविष्यपुराणं॥ (वाञ्छितः। सम्मतः।)

अभिभवः, पुं, (अभि + भू + भावे अप्।) गर्व्वनाशः। परिभवः। पराभवः। इति शब्दरत्नावली हेमचन्द्रश्च॥ (पराजयः। तिरस्कारः।

"रघोरभिभवाशङ्कि सुप्तभे दिवतां मनः"। इति रघुवंशे।

"बलवानपि निस्तेजाः कस्य नाभिभवास्पदं"। इति हितोपदेशे।)

अभिभूतः, त्रि, (अभि + भू + क्तः।) ज्ञानरहितः। तत्पर्य्यायः। इतिकर्त्तव्यतामूढ़ः २ विहस्तः ३ व्याकुलः ४ अभिभायः ५ विस्रवः ६ विह्वलः ७। इति जटाधरः॥ पराभूतः। भग्नदर्पः। तत्पर्य्यायः। आत्तगर्व्वः २। इति जटाधरः॥ आत्तगन्धः ३। इत्यमरः॥ अभिहतः ४। इति तट्टीका॥

("दैत्याभिभूतस्य युवामवोढ़ं मग्नस्य दोर्भिर्भुवनस्य भारम्"। इति भट्टिः।)

अभिभूतिः, स्त्री, (अभि + भू + भावे क्तिन्।) अनादरः। अवज्ञा। इति शब्दरत्नावली। (पराभवः। पराजयः। मानभङ्गः। निकारः।

"अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः"। इति भारविः।)

अभिमतं, त्रि, (अभि + मन् + कर्म्मणि क्तः।) इष्टं। सम्मतं। यथा,—

"अभिमतफलसूत्रसौ चारु पुष्कोर बाहु-स्तरुषु चुकुवुरुच्चैः पक्षिणस्वानुकूलाः"। इति भट्टिः॥ (हृद्यः। प्रियः। हृदयङ्गमः।

"स माधवेनाभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः"। इति कुमारसम्भवे।

"अनिशमपि मकरकेतुर्मनसो-रुजमावहन्नभिमतो मे"॥ इति शाकुन्तले।)

अभिमन्त्रणं, क्ली, (अभि + मन्त्र + करणे ल्युट्।) आह्वानं। आकारणं। इति हेमचन्द्रः॥ डाकन् इति भाषा। (मन्त्रपाठेन संस्कारकरणं। यथा,—

"दत्त्वान्नं पृथिवीपात्रमिति पात्राभिमन्त्रणम्"। इति याज्ञवल्क्यः।)

अभिमन्थः, पुं, (अभि मथ्यते चक्षुः पीड्यतेऽनेन, अभि + मन्थ + करणे घञ्।) चक्षूरोगः। इति त्रिकाण्डशेषः॥ अधिमन्थ इति वैद्यके पाठः। तस्य निदानसम्प्राप्तिरूपाणि।

"दृष्टैरेतैरभिष्यन्दैर्नराणामक्रियावतां। तावन्तस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः॥ उत्पाद्यत इवात्यर्थं नेत्रं निर्म्मथ्यते तथा। शिरसोऽर्द्धञ्च तं विद्यादधिमन्थं खलक्षणैः"॥ स तु चतुर्विधः। यथा। "हन्याद्दृष्टिं श्लैष्मिकः सप्तरात्रादधिमन्थो रक्तजः पञ्चरात्रात्। षड्रात्रा-द्वै वातिकः संनिहन्यान्मिथ्याचारात् पैत्तिकः सप्त एव"॥ इति माधवकरः॥

अभिमन्युः, पुं, (अभिमन्यते युद्धार्थं, अभि + मन् + युच्, निपातनात् अनादेशाभावः।) अर्জ্জুনपुत्रः। स तु सुभद्रागर्भजातः। इति महाभारतं॥

अभिमरः, पुं, (अभिम्रियतेऽस्मात्, अभि + मृ + अप्) युद्धं। वधः। स्वसैन्यभय। इति विश्वमेदिन्यौ॥ बन्धनं। इति जटाधरः॥ (संहारः। समरः। अवरोधः। स्वपक्षाद्भयं। सङ्कटस्थजनिर्गमः। प्राणनिरपेक्षो यो द्वय हेतोः याड़ हस्तिनं वा योधयति सः अभिमरः इत्येके।)

अभिमर्दः, पुं, (अभि + मृद् + भावे घञ्।) अवमर्दः। पीड़नं। सम्परायः। युद्धं। इति मेदिनी॥ (शत्रुहतपीड़नं। विपक्षराजस्य उच्छेदसाधनं।

"हतोऽभिमर्दः कुशलैः प्रसह्य"। इति महाभारते।)

अभिमातिः, पुं, (अभि + मा + कर्त्तरि क्तिच्।) शत्रुः। इति हेमचन्द्रः॥

अभिमानः, पुं, (अभि + मन् + भावे घञ्।) अर्थादिना दर्पः। तत्पर्य्यायः। अहङ्कारः २ गर्व्वः ३ ज्ञानं ४ बोधः ५ प्रणयः ६ प्रेमप्रार्थना ७ हिंसा ८ हननं ९। इत्यमरभरतौ॥ स्मयः १० अवलेपः ११ दर्पः १२ अवष्टम्भायः १३ टङ्कः १४। इति जटाधरः॥ अपि च।

"गर्व्वो मदोऽभिमानः स्यादहङ्कारस्त्वहङ्कृतिः। स्यादुद्धतमनस्कत्वे मानश्चित्तसमुन्नतिः। अहङ्कारस्य पर्य्याय इति केचित् प्रचक्षते"॥ इति शब्दरत्नावली॥

अभिमानितं, क्ली, (अभिमानः जातोऽस्य, अभिमानः + इतच्। अभिमान्यतेऽत्र, अभि + मन् + णिच् + आधारे क्तः।) सुरतं। मैथुनं। इति त्रिकाण्डशेषः॥ अभिमानयुक्ते त्रि॥ (गर्व्वः। मदः। दर्पः।)

अभिमानी, [न्] त्रि, (अभिमन्यते, अभि + मन् + णिनि।) अभिमानयुक्तः। अभिमानयस्तः। यथा,—

"कर्त्ता धृतच्छलानां जतुमयशरणीदीपितः सोऽभिमानी"। इति वेणीसंहारः॥

अभिमायः, त्रि, (मायामविद्यामधिगतः, प्रादिसमासः।) इतिकर्त्तव्यतामूढ़ः। अभिभूतः। इति जटाधरः॥

अभिमुखं, त्रि, (अभिगतो मुखं। अव्ययादयः क्रान्ताद्यर्थे द्वितीयया इति समासः।) सम्मुखं। इति जटाधरः॥

अभियातिः, पुं, (युद्धार्थमभिमुखं यातिः गमनं, अभि + या क्तिच्।) शत्रुः। इति हेमचन्द्रः॥

अभियाती, [न्] पुं, (युद्धार्थमभियानं गमनं, अभि + या + भावे क्तः; इनि।) शत्रुः। इत्यमरटीकायां रायमुकुटः॥

अभियुक्तः, त्रि, (अभि + युज् + क्तः।) तत्परः। परकार्य्यकरुद्धः। इति मेदिनी॥

("उद्दामेन दिरदपतिना सन्निपत्याभियुक्तः"। इति उत्तरचरिते।

"अभियुक्तो यदा पश्येत् न किञ्चिद्धितमात्मनः। युध्यमानस्तदा प्राज्ञो म्रियते रिपुणा सह"। इति हितोपदेशे।) स्मृतिशास्त्रमते अभियोगविषयीभूतः। आसामी इति ख्यातः। तत्पर्य्यायः। प्रत्यर्थी २ प्रतिवादी ३। यथा,—

"अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवं। मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः"॥ इति व्यवहारतत्त्वे नारदः॥

अभियोक्ता, [क्तृ] त्रि, (अभि + युज् + कर्त्तरि तृच्।) अभियोगकर्त्ता। विवादकर्त्ता। फरियादी इति ख्यातः। तत्पर्य्यायः। वादी २ अर्थी ३। यथा,—

"अभियोक्ता प्रगल्भत्वात् वक्तुं नोत्सहते यदि। तदा कालः प्रदातव्यः कार्य्यशक्त्यनुरूपतः"॥ इति व्यवहारतत्त्वे नारदः॥

अभियोगः, पुं, (अभि + युज् + भावे घञ्।) अप-

राधादियोजनं। अन्येन विरोधे स्वार्थसम्बन्धितया राजसमीपे कथनं। आह्वास नालिश इति ख्यातः। यथा,—
"अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत्"।
इति याज्ञवल्क्यः॥ युद्धार्थाह्वानं। इति रायमुकुटः॥ अपकारकरणेच्छापूर्ब्बकाक्रमणं। तत्पर्य्यायः। अभिग्रहः २। इत्यमरः॥ उद्योगः। इति हेमचन्द्रः॥
("स प्रापदप्राप्तपराभियोगं
नरेन्द्रगुप्तं नगरं मङ्क्षुतात्"।
इति कुमारसम्भवे।)

अभिरामः, त्रि, (अभिरमते मनोऽत्र, अभि+रम्+आधारे घञ्।) रुचिरः। सुन्दरः। इति हेमचन्द्रः॥ (मनोहरः। मनोज्ञः। रमणीयः। आनन्दकरः।
"मनोऽभिरामाः हरयस्तो रथनेमिस्वनोन्मुखैः"।
इति रघुवंशे।)

अभिरूप, पुं, (अभिलक्ष्यं रूपमस्य।) पण्डितः। इति हेमचन्द्रः॥ कामदेवः। चन्द्रः। शिवः। विष्णुः। इति शब्दरत्नावली॥

अभिरूपः, त्रि, (अभिरूपयति शास्त्रार्थं निरूपयति, अभिरूप+णिच्+अच्।) मनोहरः। पण्डितः। इति मेदिनी॥ ("इयं हि रसभावविशेषदीक्षागुरोः विक्रमादित्यस्याभिरूपभूयिष्ठा परिषद्"। इति शाकुन्तले।)

अभिलापः, पुं, (अभिलप्यते मानसं कर्म्म कथ्यतेऽनेन, अभि+लप्+करणे घञ्।) शब्दः। इति चिकाण्डशेषः॥ सङ्कल्पाङ्गवाक्यं। यथा। "काम्याभिलाषसहितः कुशतिलजलत्यागरूपः सङ्कल्पः शास्त्रार्थः"। इति प्रक्रमाधिकरणं॥ (वचनं। कथनं। वाक्यं।
"तथाभिलाषसंसर्गयोग्यत्वविरहान्न च।
सविकल्पकसंवेद्यः"। इति साहित्यदर्पणे।)

अभिलावः, पुं, (अभि+लू+भावे घञ्।) छेदनं। इत्यमरः॥

अभिलाषः, पुं, (अभि+लष+भावे घञ्।) लोभः। तत्पर्य्यायः। इच्छा २ आकाङ्क्षा ३ स्पृहा ४ ईहा ५ वट् ६ वाञ्छा ७ लिप्सा ८ कामः ९ तर्षः १० मनोरथः ११। इत्यमरः॥ काङ्क्षा १२ कान्तिः १३ रुक् १४ रुचिः १५ दोहदः १६ अभिलासः १७। इति शब्दरत्नावली॥ श्रद्धा १८ हृष्या १९ मतिः २० छन्दः २१। इति जटाधरः॥ ("भव हृदय साभिलाषं सम्मति सन्देहनिर्णयो जातः"। इति शाकुन्तले। "अतोऽभिलाषे प्रथमं तथाविधे"। इति रघुवंशे।) सङ्गमेच्छा २२। इति रसमञ्जरी॥

अभिलाषी, [न्] त्रि, (अभि+लष्+णिनि।) अभिलाषयुक्तः। यथा,—
"जलाभिलाषी जलमाददानां
छायेव तां भूपतिरन्वगच्छत्"।
इति रघुवंशे॥

अभिलाषुकः, त्रि, (अभि+लष्+शीलार्थे उकञ्।) अभिलाषयुक्तः। तत्पर्य्यायः। लुब्धः २ गृध्नुः ३ गर्द्धनः ४ हृष्णुक् ५। इत्यमरः॥ लोभी ६ विलासविभवानसः ७। इति जटाधरः॥
("जयमत्रभवान् नूनमरातिष्वभिलाषुकः"।
इति भारविः।)

अभिलासः, पुं, (अभि+लस्+भावे घञ्।) अभिलाषः। इच्छा। इत्यमरटीकासारसुन्दरी॥

अभिवादः, पुं, (अभि+वद+भावे घञ्।) अप्रियवाक्यं। तत्पर्य्यायः। पारुष्यं २। इत्यमरः॥ (वन्दना। प्रणतिः। प्रणामः।
"अभिवादात्परं विप्रो ज्यायांसमभिवादयन्।
असौनामाहमस्मीति स्वं नाम परिकीर्त्तयेत्"॥
इति मनुः।)

अभिवादकः, त्रि, (अभि+वद्+णिच्+ण्वुल्।) वन्दनशीलः। तत्पर्य्यायः। वन्दारुः २। इत्यमरः॥ अप्रियवक्ता। पारुष्यार्थाभिपूर्ब्बवदेः कर्त्तरि ण्वुकः॥ (प्रणामकारी। अभिवादनकारी।
"आगतोऽस्मीत्युवाचैनं भवन्तमभिवादकः"।
इति शकुन्तलोपाख्यानं।)

अभिवादनं, क्ली, (अभिमुखीकरणाय वादनं नामोच्चारणपूर्ब्बकनमस्कारः, अभि+वद्+णिच्+भावे ल्युट्।) नामोच्चारणपूर्ब्बकनमस्कारः। अभिवादये भो अमुकशर्म्माहमित्येवंरूपः। तत्तु पादस्पर्शपूर्ब्बकनमस्कारः। तत्पर्य्यायः। पादग्रहणं २। इत्यमरः॥
("अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि संप्रवर्द्धन्ते आयुर्विद्यायशोबलं"॥
इति मनुः।)

अभिव्याप्तिः, स्त्री, (अभि+वि+आप्+भावे क्तिन्।) सर्व्वावस्थानं। सर्व्वतोवृत्तिः। तत्पर्य्यायः। संमूर्च्छनं २। इत्यमरः॥

अभिशपनं, क्ली, (अभि+शप्+भावे ल्युट्।) मिथ्याभिशंसनं। अभिशापः। अभिपूर्ब्बशपधातोर्भावेऽनट्॥

अभिशप्तः, त्रि, (अभि+शप्+क्तः।) प्राप्ताभिशापः। शापयुक्तः। यथा,—
"न नामग्रहणं कुर्य्यात् कृपणस्य गुरोस्तथा।
भार्य्याया अभिशप्तस्य जनकस्य विशेषतः"॥
इति मेघदूतटीका॥
("न क्रुध्यत्यभिशप्तोऽपि क्रोधनीयानि वर्ज्जयन्"।
इति रामायणे। "अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत्"। इति कुमारसम्भवे।)

अभिशस्तः, त्रि, (अभि+शंस्+क्तः।) परस्त्रियां परपुरुषे वा मैथुनं प्रति मिथ्यादूषितः। मैथुनं प्रति व्याहृतः। इति केचित्। उपपन्नपातकः। इति केचित्। मिथ्यादूषितमात्रं। इति केचित्। इति भरतः॥ तत्पर्य्यायः। आख्यातितः २ ख्यापितः ३। इत्यमरः॥ (प्राप्तापवादः। अभिपक्वदुष्टः।
"वत्सस्य ह्यभिशस्तस्य पुरा भ्रात्रा यवीयसा।
नाग्निर्ददाह रोमाणि सत्येन जगतः सृप्रः"॥
इति मनुः। विनिन्दितः। विगर्हितः। पातककर्त्ता। [इति मनुः।)
"पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयीः"।

अभिशस्तिः, स्त्री, (अभि+शंस्+भावे क्तिन्।) लोकापवादः। इति हेमचन्द्रः॥ ("स्यमन्तकं च सत्राजिताय दत्त्वा मिथ्याभिशस्तिविमुक्तम् अवाप"। इति विष्णुपुराणे।) याच्ञा। इत्यमरः॥

अभिशापः, पुं, (अभि+शप्+घञ् वृद्धिः।) सर्व्वलोकेयं त्वया हतमित्यादिमिथ्यादूषणं वाक्यं। मिथ्यापवादः। तत्पर्य्यायः। मिथ्याभिशंसनं २। इत्यमरः॥ क्रोधात् द्विजादिभिर्दुःखाभिधारणं। इति पुराणं॥ ब्राह्मणगुरुवृद्धसिद्धानां अनिष्टाभिशंसनं। इति विजयरक्षितः॥
("यस्याभिशापात् दुःखार्त्तो दुःखं विन्दति नैषधः"।
इति नलोपाख्याने।)

अभिषङ्गः, पुं, (अभि+सञ्ज+घञ् उपसर्गादितिषः।) पराजयः। आक्रोशः। शपथः। इति मेदिनी॥ मिथ्यापवादः। इति मधुरानाथः॥ आलिङ्गनं। इत्यमरटीकायां रायमुकुटः॥ सर्व्वतोभावेन सङ्गः। इति हलायुधः॥ भूताद्यावेशः। यथा,—
"अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः"।
इति माधवकरः॥ (पराभवः। परिभूतिः।
"जातोभिषङ्गो नृपतिर्निषङ्ग-
दुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः"।
इति रघुवंशे।
"तीव्राभिषङ्गप्रभवेन वृत्तिं
मोहेन संस्तम्भयतेन्द्रियाणां"।
इति कुमारसम्भवे। शोकः। दुःखं। "अभिषङ्गजड़ं विजज्ञिवांसमिति श्लिष्येण किलान्ववोधयत्"। इति रघुः।)

अभिषवः, पुं, (अभि+सु+अप्, गुणः षत्वञ्च। यज्ञः। स्नानं। मद्यसन्धानं। तच्च चिरस्थापितमदेत्यादिकक्षे दृश्यं। इति मेदिनी॥ यज्ञस्नानं सोमलतापानञ्च। तत्पर्य्यायः। सूत्या २ सवनं ३। इत्यमरः॥
("भवेदभिषवः स्नाने मद्ये सन्धानयज्ञयोः"।
इति मेदिनी)

अभिषवं, क्ली, काञ्जिकं। इति हलायुधः॥ काँजि इति भाषा।

अभिषुतं, क्ली, (अभि+सु+क्तः षत्वं।) काञ्जिकं। इत्यमरः॥

अभिषेकः, पुं, (अभि+सिच्+भावे घञ्।) स्नानं।
इति चिकाण्डशेषः॥
("एकदा सोऽभिषेकार्थमाजगाम महानदीं"।
इति विष्णुपुराणे।
"निर्वृत्तयर्थ्यन्यजलाभिषेकां।
वासोवसानामभिषेकयोग्यं"।
इति कुमारसम्भवे।)
अथ ७दोलयाचाभिषेकद्रव्याणि लिख्यन्ते। क्षीरतलजलं १ गोमयं २ गोमूत्रं ३ दुग्धं ४ दधि ५ घृतं ६ कुशोदकं ७ शङ्खोदकं ८ चन्दनोदकं ९ कुङ्कुमोदकं १० फलोदकं ११ पुष्पोदकं १२ चन्दनपिष्टामलकोद्वर्त्तनं १३ सुगन्धिजलं १४ तेनाङ्गवारस्नानं तत्र द्वितीयसप्तमाष्टमवारेषु दुग्धघृत-

मधुयोजनं । गन्धोदकं १५ । तेन पञ्चधा स्नानं । तीर्थजलं १६ गङ्गोदकं १७ वल्मीकतोयं १८ सर्व्वौषधिजलं १९ सहस्रधाराजलं २० घटोदकं २१ केषाञ्चिन्मते अष्टोत्तरशतघटोदकं । इति उत्कलखण्डं ॥ * ॥ अथ दक्षन्नन्दिकेश्वरपुराणोक्तानि ७दुर्गापूजाभिषेकद्रव्याणि लिख्यन्ते । पिष्टामलकीयुक्तहरिद्रा १ । तया दर्पणप्रतिबिम्बे देवीमुद्दिश्य यथाक्रमं वक्ष्यमाणप्रत्येकद्रव्येण मन्त्रं पठित्वा स्नापयेत् । शुद्धजलं २ शुद्धजलं ३ गङ्गाजलं ४ गन्धोदकं ५ पञ्चगव्यं प्रत्येकं यथा—गोमूत्रं ६ गोमयं ७ दुग्धं ८ दधि ९ घृतं १० कुशोदकं ११ पञ्चामृतं १२ शिशिरोदकं १३ मधु १४ पुष्पोदकं १५ इक्षुरससागरोदके १६ सर्व्वौषधिमहौषधिजलं १७ पञ्चकषायोदकं १८ अष्टमृत्तिकाः १९ फलोदकं २० उष्णोदकं २१ सहस्रधाराजलं २२ अष्टकलसोदकं यथा । व्योमगङ्गाम्बुपूर्णाष्टकलसः २३ मेघतोयपूर्णद्वितीयकलसः २४ सारस्वततोयपूर्णतृतीयकलसः २५ सागरोदकपूर्णचतुर्थकलसः २६ पद्मरेणुमिश्रितजलपूर्णपञ्चमकलसः २७ निर्झरोदकपूर्णषष्ठकलसः २८ सर्व्वतीर्थाम्बुपूर्णसप्तमकलसः २९ शुद्धजलपूर्णाष्टमकलसः ३० ॥ * ॥ नानापद्धतिषु द्रव्याणां व्युत्क्रमपुनरुक्त्याधिक्यानि सन्ति यत्र यान्युक्तातिरिक्तद्रव्याणि तानि लिख्यन्ते । यथा । नदी १ नारिकेल २ रत्न ३ दृष्टि ४ कर्पूर ५ चन्दन ६ अगुरु ७ स्वर्ण ८ रजत ९ गोरोचना १० कुङ्कुम ११ श्रीफल १२ धान्य १३ दूर्व्वा १४ शर्करा १५ सरोवर १६ अक्ष १७ गङ्गासागर १८ पद्मशस्य १९ तिल २० ह्रद २१ पुष्करिणी २२ कूप २३ फलमूल २४ अर्घ्य २५ घटचतुष्टय २६—जलानि । शीतलजलञ्च २७ । तिलतैलं १ गन्धतैले २ । नदीकूल १ वराहदन्त २ वेश्याद्वार ३ राजद्वार ४ वृषशृङ्ग ५ वल्मीक ६ चतुष्पथ ७ पारावार ८ देवद्वार ९ गङ्गा १०—मृत्तिकाः ॥ गजदन्त ११ नद १२ उभयकूल १३ नागर १४ गोष्ठ १५ त्रिपथ १६—मृत्तिका इति केचित् ॥ पञ्चामृतं प्रत्येकं सर्व्वौषधिमहौषधी पृथक् ॥ पञ्चकषायाः प्रत्येकं ॥ पञ्चामृतातिरिक्तमधुघृतदुग्धानि ॥ उद्वर्त्तनद्रव्ये केवलहरिद्रा इति केचित् ॥ तैलहरिद्रा इति केचित् ॥ गन्धपिष्टपद्मशस्यचूर्णमिति केचित् ॥ कालीपुराणदेवीपुराणोक्तपद्धतिष्वपि तथा । तासां मध्ये पूर्व्वोक्तातिरिक्तद्रव्याणि लिख्यन्ते । यथा । प्रवाल १ मरकत २ पद्मराग ३ मुक्ता ४ माणिक्य ५ वैदूर्य्य ६ पद्म ७ कह्लार ८ कुमुद ९ खड्ग १० अलक्त ११ वापी १२ रक्तचन्दन १३ नानातीर्थ १४ हरिद्रा १५ पिष्ट १६ शालितण्डुल १७ सिद्धार्थ १८—जलानि । पञ्चतीर्थमृत् १ । विष्णुतैलं १ । उद्वर्त्तनद्रव्यं तैलहरिद्रायुक्तामलकी १ ॥ * ॥ अथ दक्षन्नन्दिकेश्वरदेवीकालीपुराणपद्धत्युक्ताष्टकलसस्नानकालीनरागिणी रागवाद्यानि ॥

पुं । रागरागिण्यौ । वाद्यं ।

टं । मालसी १ मङ्गलोत्सवः	१
दें । वाराड़ी १ इन्द्रविजयः	१
कां । मालवः १ विजयः	१
टं । देवकीरी २ भुवनविजयः	२
दें । मालवगौड़ः २ मङ्गलविजयः	२
कां । ललिता २ दुन्दुभिः	२
टं । वाराड़ी ३ विजयः	३
दें । मालवः ३ देवोत्सवः	३
कां । विभाषा ३ दुन्दुभिः	३
टं । देशालः ४ राजाभिषेकः	४
दें । देशालः ४ घनतालः	४
कां । भैरवी ४ वंशी	४
टं । धानुषी ५ मधुरी	५
दें । मालवी ५ मधुकरः	५
कां । कोड़ा ५ इन्द्राभिषेकः	५
टं । भैरवी ६ करतालः	६
दें । भैरवी ६ ढक्का	६
कां । वाराड़ी ६ शङ्खः	६
टं । गुज्जरी ७ वंशी	७
दें । वसन्तः ७ शङ्खः	७
कां । वसन्तः ७ पञ्चशब्दः	७
टं । वसन्तः ८ पञ्चशब्दः	८
दें । कोड़ा ८ मर्दङ्गः	८
कां । धानुषी ८ विजयः	८

अथ देवप्रतिष्ठाभिषेकद्रव्याणि । नदी १ नद २ सागर ३ निर्झर ४ मेघजलानि ५ पञ्चामृतं ६ कुशोदकसहितपञ्चगव्यं ७ अश्वखुर ८ गजदन्त ९ पर्व्वत १० कुश ११ वल्मीकमृत्तिकाः १२ तिलतैलं १३ घृतं १४ पञ्चकषायोदकं १५ आम्र १६ चम्पक १७ शमी १८ पद्म १९—करवीरपुष्पाणि २० तुलसी २१ कुन्द २२—श्रीफलपत्राणि २३ तिलकल्कप्रालितगुडलिल्वपत्रामलकचूर्णान्यतममार्जनद्रव्यं २४ उष्णोदकं २५ तीर्थोदकं २६ अष्टोत्तरशतकुम्भाः तदर्द्धं वा विंशतिर्व्वा एको वा २७ । वैदिकाष्टोत्तरशतपलेन लौकिकषष्ट्यधिकशतत्रयतोलकमितेन जलेन पृथक् पृथक् घटेन द्रव्यमालोथ कार्य्यं ॥ अशक्तौ तु । वल्मीकमृत्तिका । गोमयं । शुष्कगोमयं । भस्मयुक्तपरिमितजलं । गन्धयुक्तजलञ्च । इति देवप्रतिष्ठातत्त्वं ॥ * ॥ अथ राजाभिषेकद्रव्याणि । व्याघ्रचर्म्मास्तीर्णालङ्कृतस्वर्णभद्रासनं १ गङ्गायमुनासङ्गमजलं २ यावत्पुण्यनदीजलं ३ पूर्व्वमुखनदीजलं ४ पश्चान्मुखनदीजलं ५ तिर्य्यङ्नदीजलं ६ सर्व्वसमुद्रजलं ७ क्षीरिवृक्षप्रवालयुक्तपद्मोत्पलविमिश्रितालङ्कृतकाञ्चनपूर्णकुम्भाः ८ चक्रः ९ रोचना १० घृतं ११ मधु १२ दुग्धं १३ दधि १४ पुण्यतीर्थमृत्तिका १५ पुण्यतीर्थजलं १६ मङ्गलदध्यं १७ मणिदण्डश्वेतचामरद्वयजनं १८ माल्यभूषितश्वेतच्छत्रं १९ श्वेतवृषः २० श्वेताश्वः २१ महागजवरः २२ वराभरणभूषिताष्टकन्याः २३ सर्व्ववादित्राणि २४ अलङ्कृतवन्दी २५ । इति वाल्मीकिरामायणे अयोध्याकाण्डं ॥ * ॥ अथ राजाभिषेकविधिः । पुरोहितो राज्ञः प्रजापालनाधिकारसिद्ध्यर्थं परदिनेऽभिषेके कर्त्तव्ये पूर्व्वदिने गणेशमाटकापूजनपुण्याहवाचननान्दीप्रभृति पूर्व्वाह्णे कुर्य्यात् । राजा राज्ञी च नियमं कृत्वा उपवासं कुर्य्यात् । परदिने अमात्यसामन्तसहितः पुरोहितः कृतमङ्गलस्नानौ राज्ञीराजानौ मणिकाञ्चनपृथिवीपुण्याणि स्पर्शयित्वा नानारत्नचन्द्रातपोपशोभितमण्डपमध्ये व्याघ्रचर्म्माच्छादितासने उपवेशयेत् । ततः पूर्व्वोत्तरनीचां वेदीं कृत्वा तत्र स्वगृह्योक्तविधिनाग्निं संस्थाप्य घृताक्ताः पलाशाश्वत्थशमीसमिधो वैदिकैर्मन्त्रैर्जुहुयात् । तत औडुम्बरस्रुवेण वैदिकमन्त्रैर्घृताहुतीर्जुहुयात् । ततः सर्व्वतोभद्रमण्डपे स्थापितस्वर्णरजतताम्रमृण्मयकलसस्थसर्व्वौषधिपल्लवैलालवङ्गादि-सुगन्धिद्रव्यसंवासितपुण्यनदीतोयं सुवर्णविभूषितशङ्खेन ऋत्विग्भिः सह गृहीत्वा तूर्य्यघोषैर्मङ्गलपाठैः राजसूयवाजपेयमहाभिषेकोक्तसूक्तमन्त्रैः सस्त्रीकं राजानं प्राङ्मुखं मूर्द्धि कन्याभिः सहाभिषिञ्चेत् । ततोऽमात्यादयः सर्व्वे अभिषिञ्चेयुः । ततः पुरोहितमन्त्रिसामन्तप्रकृतिपुरुषा अलङ्कृताभिः कन्याभिः सह सुवासोगन्धमाल्याद्यलङ्कृतराज्ञीराज्ञोर्ललाटे कुङ्कुमागुरुकस्तूर्य्यादिद्रव्यैस्तिलकं दद्युः । ततो राज्ञो मूर्द्धि किरीटं दत्त्वा छत्रचामरादिराजचिह्नद्रव्याणि समुपकल्पयेयुः । ततो दुन्दुभिस्तुतिपुण्याहचतुर्व्वेदघोषैः स्वकुलक्रमागतनाम्ना अमुकत्वं राजा भव इत्युक्त्वा राज्ञोपरि श्वेतकुसुमलाजाक्षतादि विकिरेयुः । ततो वन्दिनो मागधाश्च स्तुतिं कुर्य्युः । ततो ब्राह्मणा आशिषं कुर्य्युः । ततः अमात्यादयः राज्ञे उपायनानि दत्त्वा नमस्कुर्य्युः । इति महाभारतादयः ॥ * ॥

अभिषेचनं, क्ली, (सेनया अभियानम् । सेनाशब्दात् णिच्, ल्युट् । उपसर्गात् सुनोतीति षत्वम् ।) शत्रुं प्रति सेनासहितगमनं । सेनया सह करणभूतया वा विजिगीषोः शत्रोराभिमुख्येन गमनं । इत्यमरभरतौ ॥ ("यत् सेनयाभिगमनमरौ तदभिषेचनम्" । इत्यमरः ।)

अभिष्टुतं, त्रि, (अभि + स्तु + कर्म्मणि क्तः ।) वर्णितं । स्तुतं । इत्यमरः ॥ ("अभिष्टुतो विश्वसृजा प्रसूनैः" । इति भागवतपुराणे ।)

अभिष्यन्दः, पुं, (अभि + स्यन्द + घञ् । "अनुविपर्य्यभिनिभ्यः स्यन्देरप्राणिषु" इति षत्वं ।) अतिवृद्धिः । आस्रावः ।

"अलकामतिवाह्यैव वसतिं वसुसम्पदाम् ।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम्" ॥

इति कुमारसम्भवे ।) चक्षूरोगविशेषः । इति मेदिनी ॥ तस्य निदानं सम्प्राप्तिश्च । यथा,—

"उष्णाभितप्तस्य जलप्रवेशाद्-
दूरेक्षणात् स्वप्नविपर्य्ययाच्च ॥
खेदाद्रजोधूमनिषेवणाच्च

कर्दैर्विघातादमनातियोगात् ॥
द्रवान्नघान्नाग्निशि सेविताच्च
विण्मूत्रवातक्रमनिग्रहाच्च ।
प्रसक्तसंरोदनशोककोपा-
च्छिरोऽभिघातादतिमद्यपानात् ॥
तथा ऋतूनाञ्च विपर्य्ययेण
क्लेशाभिघातादतिमैथुनाच्च ।
वाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषाः" ॥
स च चतुर्व्विधः । यथा,—
"वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्व्विधः ।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥
निस्तोदनस्तम्भनरोमहर्ष-
संघर्षपारुष्यशिरोऽभितापाः ।
विशुष्कभावः शिशिराश्रुता च
वाताभिपन्ने नयने भवन्ति ॥
दाहप्रपाकौ शिशिराभिनन्दा
धूमायनं वाष्पसमुच्छ्रयश्च ।
उष्णाश्रुता पीतकनेत्रता च
पित्ताभिपन्ने नयने भवन्ति ॥
उष्णाभिनन्दा गुरुताच्छिशोथः
कण्डूप्रदेहावतिशीतता च ।
स्रावो बऋः पिच्छिल एव चापि
कफाभिपन्ने नयने भवन्ति ॥
तास्राश्रुता लोहितनेत्रता च
रुज्यः समन्तादतिलोहितास्च ।
पित्तस्य लिङ्गानि च यानि तानि
रक्ताभिपन्ने नयने भवन्ति" ॥
इति माधवकरः ॥ तस्य चिकित्सा यथा,—
"हे पादमध्ये पृथुसन्निवेशे
शिरो गते हे बऋधा हि नेत्रे ।
ताः प्रोच्छणोत्सादनलेपनादीन्
पादप्रयुक्तान्नयनं नयन्ति" ॥
प्रोच्छणं सेचनं । उत्सादनं उद्वर्त्तनं ।
"मलोष्मसंघट्टनपीड़नाद्यै-
स्ता दूषयन्ते नयनानि दुष्टाः ।
भजेन्महादृष्टिहितानि तस्मा-
दुपानदभ्यञ्जनधावनानि" ॥
मलं धूल्यादि । मलादिभिर्दुष्टाः ताः शिरानयनानि दूषयन्ते इत्यन्वयः ॥
"चक्षुष्याः शालयो मुद्गा यवा मांसन्तु जाङ्गलं ।
पक्किमांसं विशेषेण वास्तूकं तण्डुलीयकं ॥
घटोलकर्कोटकशारवेल्ल-
फलानि सर्पिःपरिपाचितानि ।
तथैव वार्त्ताकुफलं नवीनं
दृष्टेर्हितः स्वादु तथापि तिक्तः ॥
कट्वम्लगुरुतीक्ष्णोष्णमाम्रनिष्पावमैथुनं ।
मद्यवल्लूरपिण्याकमत्स्यशाकविरूढ़कं ।
विदाहीन्यन्नपानानि न हितान्यक्षिरोगिणः ॥
सेक आश्चोतनं पिण्डी विड़ालस्तर्पणं तथा ।
पुटपाकोऽञ्जनं चैभिः कर्म्मभिर्नेत्रमुपाचरेत्" ॥ * ॥
कर्म्मविधिः । तत्र सेकविधिः ।
"सेकस्तु सूक्ष्मधाराभिः सर्व्वस्निग्धयने हितः ।
मीलितास्तस्य मर्त्यस्य प्रदेयश्चतुरङ्गुलः ॥
स चापि स्नेहनो वाते पित्ते रक्ते च रोपणः ।
लेखनस्तु कफे कार्य्यस्तस्य मात्रा विधीयते ॥
षड्भिर्वाचां घृतैः स्नेहे चतुर्भिस्तैलु रोपणे ।
तैस्त्रिभिर्लेखने कार्य्यः सेको नेत्रप्रसादने ॥
निमेषोन्मेषणे पुंसामङ्गुल्याच्छोटिका तथा ।
गुर्व्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैः" ॥
छोटिका टुटकी इति लोके ।
"सेकस्तु दिवसे कार्य्यो रात्रौ चात्यन्तिके गदे" ।
स यथा,—
"एरण्डदलमूलत्वक्पृतमाजं पयो हितं ।
सुखोष्णं नेत्रयोः सिक्तं वाताभिष्यन्दनाशनं ॥
पथ्याक्षामलखस्खसवल्कलकल्केन सूक्ष्मवस्त्रेण ।
क्षत्वा पोटलिकां तामहिफेनोत्थद्रवेणाक्तां ॥
निदधीत लोचने स्यात् सर्व्वाभिष्यन्दसंक्षयः शीघ्रं ।
योगोऽयमखिलरुक्षो जगदुपकाराय कारुणिकैः ॥
शुक्ला पाणितलं दृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्दारि तिमिराणि व्यपोहति ॥
स्नानं क्षणतिलैस्यापि चक्षुष्यमनिलापहं ।
आमलैः सततं स्नानं परं दृष्टिबलावहं ॥
त्रिफलायाः कषायस्तु धावनान्नेत्ररोगजित् ।
कवलान्मुखरोगघ्नः पानतः कामलापहः" ॥ * ॥
अथाश्चोतनविधिः ।
"क्षाग्यश्चीरद्रवस्नेहविन्दूनां यत्तु पातनं ।
क्षङ्गुलोन्मीलिते नेत्रे प्रोक्तमाश्चोतनञ्च तत् ॥
विन्दवोऽष्टौ लेखनेषु रोपणे दशविन्दवः ॥
स्नेहने द्वादश प्रोक्तास्ते पीते कोष्णरूपिणः ।
उष्णे तु शीतरूपाः स्युः सर्व्वत्रैवैष निश्चयः ॥
वाते तिक्तं तथा स्निग्धं पित्ते मधुरशीतलं ।
कफे तिक्तोष्णरूक्षं स्यात् क्रमादाश्चोतनं हितं ॥
आश्चोतनानां सर्व्वेषां मात्रा स्यादाकूपतोन्मिता ।
ततः परं लोचनाभ्यां भेषजाय नयो मतः ॥
आश्चोतनं न कर्त्तव्यं निशायां केनचित् क्वचित्" ।
तदुयथा,—
"विल्वादिपञ्चमूलेन स्नुहत्यैरण्डशिग्रुभिः ।
क्षाग्य आश्चोतने कोष्णो वाताभिष्यन्दनाशनः ॥
त्रिफलाश्चोतनं नेत्रे सर्व्वाभिष्यन्दनाशनं" ॥ * ॥
अथ पिण्डीविधिः ।
"उक्तभेषजकल्कस्य पिण्डी च कोमलाश्रया ।
वस्त्रखण्डेन संबद्धाभिष्यन्दव्रणनाशिनी ॥
स्निग्धोष्णा पिण्डिका वाते पित्ते सा शीतला मता ।
रूक्षोष्णा श्लेष्मणि प्रोक्ता विधिरक्तो बुधैरयं" ॥
सा यथा,—
"एरण्डपत्रमूलत्वङ्निर्म्मिता वातनाशिनी ।
धात्री विरचिता पित्ते शिग्रुपत्रकृता कफे ॥
निम्बपत्रकृता पिण्डी पित्तश्लेष्महरी भवेत् ।
मुरठी निम्बदलैः पिण्डी सुखोष्णा खल्वसैन्धवा ॥
भार्य्या नेत्रेऽनिलश्लेष्मशोथकण्डूव्यथाहरी ।
त्रिफला पिण्डिका नेत्रे वातपित्तकफापहा" ॥
'पथ्याक्षामलखस्खसवल्कलकल्कोऽहिफेनजलयुक्तः ।
तेन विरचिता पिण्डी शमयति सकलानभिष्यन्दान्" ॥
इति भावप्रकाशः ॥
अभिष्यन्दिरमणं, क्ली, (अभिष्यन्दः प्रधाननगरस्यातिदृढ्या तत्सन्निधाने स्थापनं स एव विद्यतेऽत्र इनि, रमतेऽत्र रम + आधारे ल्युट्, ततः कर्म्मधारयः ।) प्रधाननगरसन्निहितनगरं । तत्पर्य्यायः । शाखानगरं २ । इति जटाधरः ॥
अभिसन्तापः, पुं, (अभिसन्ताप्यतेऽत्र, अभि + सम् + तप् + णिच् + आधारे अच् ।) युद्धं । इति हलायुधः ॥
("जन्यं स्यादभिसन्तापः संमदोविग्रहस्त्रधा" । इति हलायुधः ।)
अभिसन्धानं, क्ली, (अभि + सम् + धा + भावे ल्युट् ।) वञ्चनं । प्रतारणं । इति हेमचन्द्रः ॥
("पराभिसन्धानपरं यद्यप्यस्य विचेष्टितं ।
जिगीषोरश्वमेधाय धर्म्मायैव बभूव तत्" ॥
इति रघुवंशे ।)
अभिसन्धिः, पुं, (अभिसन्धानं अभि + सम + धा + भावे किः ।) अभिसन्धानं । उद्देशः । यथा,—
"पिण्डैन्नमस्ये दिवि ये च मूर्त्ताः,
स्वधासुजः काम्यफलाभिसन्धौ ।
प्रदानशक्ताः सकलेप्सितानां,
विमुक्तिदा येऽनभिसंहितेषु" ॥
इति रघुवंशे ॥
("अथ ते मुनयो दिव्याः प्रेक्ष्य हैमवतं पुरं ।
स्वर्गाभिसन्धिसुहृतं वज्रिणामिव मेनिरे" ॥
इति कुमारसम्भवे ।)
अभिसम्पातः, पुं, (अभिसम्पात्यते योद्धा यत्र, अभि + सम् + पत् + आधारे घञ् ।) युद्धं । इत्यमरः ॥
अभिसरः, पुं, (आभिमुख्येन सरति, अभि + सृ + पचाद्यच् ।) सहायः । अनुचरः । इत्यमरः ॥
("राजा राज्यवर्द्धनं महासामन्तैः श्रुत्वा साभिसरम् उत्तरापथं प्राहिणोत्" । इति हर्षचरिते ।)
अभिसर्ज्जनं, क्ली, (अभि + सृज् + भावे ल्युट् ।) दानं । वधः । इति धरणी ॥
अभिसारः, पुं, (अभि + सृ + आधारे घञ् ।) बलं । युद्धं । सहायः । साधनं । इति धरणी ॥ स्त्रीपुंसयोरन्यतरस्यान्यतरार्थं सङ्केतस्थलगमनं । इत्यजङ्गरक्षाख्यं ॥ ("रजिसखसारे गतमभिसारे मदनमनोहरवेषं" । इति गीतगोविन्दे । "एवं श्रुत्वाभिसाराणां पुंश्चलीनां विनोदने" । इति साहित्यदर्पणे ।)
अभिसारिका, स्त्री, (अभिसरति कान्तनिर्द्दिष्टसंकेतस्थानं गच्छति या, अभि + सृ + ण्वुल्, स्त्रियां टाप् ।) स्वीयादिषोड़शनायिकासमथे अष्टावस्थाविशिष्टाऽन्यनायिकान्तर्गतनायिकाभेदः । अस्या लक्षणं । सङ्केतस्थले स्वयं गमनकर्त्री एवं प्रियगमनकारयित्री । अस्याश्चेष्टा । समयानुरूपभूषणं । श्रद्धा । बुद्धिर्नैपुणं । कपटसाहसादिः । सा त्रिविधा । दिवाभिसारिका १ ज्योत्स्नाभिसारिका २ अन्धकाराभिसारिका ३ । इति रसमञ्जरी ॥

("कान्तार्थिनी तु या याति संकेतं साभिसारिका" इत्युक्तलक्षणा कान्तप्रार्थनया स्वयं संकेतस्थानगामिनी स्वस्थाने वा कान्तानयनकारिणी नायिका। यदुक्तं दर्पणकारैः।
"अभिसारयते कान्तं या मन्मथवशंवदा।
स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका" ॥)

अभिहारः, पुं, (अभि + हृ + घञ्।) चौर्य्यं। सम्मुखे हरणं। तत्पर्य्यायः। अभियहणं २। इत्यमरः ॥ सन्नहनं। कवचधारणं। अभियोगः। अपचिकीर्षयाभिगम्याक्रमणं। इति मेदिनी ॥ (साहसं। अपहरणं।
"यस्याभिहारं कुर्य्याच्च स्वयमेव नराधिपः"।
इति महाभारते।)

अभिहितं, त्रि, (अभि + धा + कर्म्मणि क्तः।) उक्तं। कथितं। इत्यमरः ॥
("अर्थिनाभिहितोयोऽर्थः प्रत्यर्थी यदि तं तथा।
सम्भोजिनो साभिहिता यैश्चाची दत्तिका द्विजैः" ॥
इति मनुः।)

अभीकः, पुं, (अभि + कन्, "अनुकाभिकाभीकाः कामयिता" इति पाणिनिसूत्रम्।) कविः। इति मेदिनी ॥ स्वामी ॥ इति हलायुधः ॥ (पतिः। कामुकः। कामी।
"ददृशे पर्य्यणालायां राज्ञस्याभीकयाथ सः"।
इति भट्टिकाव्ये।
उत्सुकः। क्रूरः। निष्ठुरः। निर्भयः। निःशङ्कः।
("अभीकः कामुके क्रूरे निर्भये त्रिषु ना कवौ"।
इति मेदिनी।)

अभीकः, त्रि, (अभि + कन्।) कामुकः। क्रूरः। उत्सुकः। निर्भयः। इति शब्दरत्नावली ॥

अभीप्सितं, त्रि, (अभ्याप्तुं प्राप्तुमिष्टं, अभि + आप् + सन् कर्म्मणि क्तः।) वाञ्छितं। अभीष्टं। इत्यमरः ॥
("मेने मेनापि तत्सर्व्वं पत्युः कार्य्यमभीप्सितं"।
इति कुमारसम्भवे।)

अभीरः, पुं, (अभीरयति गा अभिमुखीकृत्य गोष्ठं नयति, अभि + ईर + णिच् + अच्।) आभीरः। गोपः। इत्यमरटीकायां रमानाथः ॥

अभीरुः, पुं, (भी + कर्त्तरि ञीलार्थे कुः ततो नञ्समासः।) भैरवः। यथा,—
"अभीरुर्भैरवो भीरुभूतपो योगिनीपतिः"।
इति वटुकभैरवस्तवः ॥ निर्भये त्रि ॥ (निर्भीकः। भयहीनः। निःशङ्कः। "स्थाने युद्धे च कुशलानभीरूनविकारिणः"। इति मनुः।)

अभीरुः, स्त्री, (भी + कर्त्तरि कु ञीलार्थे, नञ्समासः।) शतमूली। इत्यमरः ॥

अभीरुपत्री, स्त्री, (भी + कर्त्तरि कु ञीलार्थे, नञ्समासः, वा स्त्रियां ऊङ् असंकुचितपत्रत्वात् तस्यास्तथात्वं, न भीरूणि पत्राणि यस्याः सा, स्त्रियां ङीप्।) शतमूली। इत्यमरः ॥

अभीशुः, पुं, (अभितः श्यति सुखं तनूकरोति, अभि + शो + कु, एषोदरादित्वात् दीर्घः।) प्रग्रहः। वाग्डोर इति भाषा। ("स्थिरा वसन्तु नेयोरघो अस्या स एषां सुसंस्कृता अभीशवः"। इति ऋक्। वेदेऽस्य प्रचुरप्रयोगः ॥ किरणः। इति हलायुधः ॥

अभीशुः, स्त्री, (अभितः अश्नुते व्याप्नोति, अभि + अश् + कर्त्तरि उन्, एषोदरादित्वात् अलोपो दीर्घः।) अङ्गुलिः। वेदेऽस्य प्रचुरप्रयोगः ॥

अभीषङ्गः, पुं, (अभि + सन्ज घञ्, दीर्घः।) आक्रोशः। इत्यमरः ॥

अभीषुः पुं, (अभि + इष् + उ।) किरणः। इत्यमरः ॥ कामः। अनुरागः। इति शब्दरत्नावली ॥

अभीष्टं, त्रि, (अभि + इष् + कर्म्मणि क्तः।) वाञ्छितं। तत्पर्य्यायः। अभीप्सितं २ हृद्यं ३ दयितं ४ वल्लभं ५ प्रियं ६। इत्यमरः ॥
("प्राणायथात्मनोऽभीष्टा भूतानामपि ते तथा"।
इति हितोपदेशः।
"अभीष्टायामभूद्ब्रह्मन् पितुरत्यन्तवल्लभः"।
इति विष्णुपुराणं।)

अभीष्टा, स्त्री, (अभि + इष् + क्त, स्त्रियां टाप्।) रेणुकानामगन्धद्रव्यं। इति शब्दचन्द्रिका ॥
("ताम्बूलवल्ली ताम्बूली नागवल्लीपय्य द्विजा।
हरेणुः रेणुका कौन्ती कपिला भस्मगन्धिनी ॥
ताम्बूल्यां कटुकाभीष्टा देवाभीष्टा महाफला"।
इति शब्दचन्द्रिका।)

अभीक्ष्णं, क्ली, (क्षणमभिगतं, प्रादिसमासः एषोदरादित्वात् दीर्घः अलोपश्च।) भृशं। नित्यं। तदयुक्तक्रिययोऽस्त्रि। इति मेदिनी ॥ (पुनः पुनः। शश्वत्। अविरतं। निरन्तरं। "उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमत्तसुतयातिदुर्गमः"। इति माघः ॥
"इच्छन्त्यभीक्ष्णं क्षयमात्मनोऽपि
न ज्ञातयस्तुल्यकुलस्य लक्ष्मीं"।
इति भट्टिकाव्ये।)

अभीक्ष्णं, य, (अभि + क्ष्णु तेजने डमु, एषोदरादित्वात् दीर्घः "स्वरादिनिपातमव्ययम्" इति अव्ययं।) पुनः पुनः। अनारतं। इत्यमरः ॥

अभुक्तः, त्रि, (भुज् + भावे क्तः अर्द्धं आद्यच् विद्यमानार्थे, नञ्समासः, वा भुज + कर्म्मणि क्तः, नञ्समासः।) उपवासी। यथा,—
"अभुक्तस्य दिवानिद्रा पायाणमपि जीर्य्यति"।
इति वैद्यकं ॥ अक्षतभोजनं वस्तु ॥ (भुक्ता ब्राह्मणाः पीता गाव इति पाणिनिभाष्यम्। "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि"। इति पुराणम्।)

अभूमिः, स्त्री, (न भूमिः, नञ्समासः।) स्थानाभावः। अनाधारः। आश्रयाभावः। यथा। "अभूदभूमिः प्रतिपत्तजन्मनां भियाम्" इति माघः ॥ "नाभूदभूमिः स्मरशायकानाम्" इति नैषधं ॥

अभेदः, त्रि, (नास्ति भेदो यस्य सः।) भेदरहितः। अविशेषः। यथा,—"अभेदः शिवरामयोः" इति पुराणं ॥ (तादात्म्यम्।
"काकाः कृष्णाः पिकाः कृष्णाः को भेदः पिककाकयोः।
वसन्ते समुपायाते काकः काकः पिकः पिकः" ॥
इति नीतिरत्ने। "भेदेऽप्यभेदः सम्बन्धे सम्बन्धस्तद्विपर्य्ययौ"। इति साहित्यदर्पणे।)

अभेद्यं, क्ली, (भेत्तुं न शक्यते, भिद् + शक्यार्थे ण्यत् नञ्समासः।) हीरकं। इति राजनिर्घण्टः ॥ अभेदनीयवस्तुनि त्रि। यथा,—
"अस्त्राण्यनेकरूपाणि तथाभेद्यश्च दंशनं"।
इति देवीमाहात्म्यं ॥

अभोजनं, क्ली, (भुज् + भावे ल्युट्, नञ्समासः।) भोजनाभावः। उपवासः। यथा,—
"अजीर्णे भोजनं येषां जीर्णे येषामभोजनं।
राज्ञावभोजनं येषां तेषां नश्यन्ति धातवः" ॥
इति वैद्यकं ॥ (अशनं।
"वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनं" ॥
इति मलमासतत्त्वं।)

अभ्यग्रं, त्रि, (अभिमुखमग्रं यस्य तत्।) समीपं। निकटं। इत्यमरः ॥

अभ्यङ्गः, पुं, (अभि + अञ्ज घञ् कुत्वं।) तैलमर्दनं। तत्पर्य्यायः। स्नेहनं २। इति राजनिर्घण्टः ॥ यथा,—
"तैलमत्यं यदङ्गेषु न च स्यादब्जतर्पणं।
सा मार्द्दिः एथगभ्यङ्गो मस्तकादौ प्रकीर्त्तितः ॥
अभ्यङ्गमाचरेन्नित्यं स जराश्रमवातहा।
शिरःश्रवणपादेषु तं विशेषेण शीलयेत्" ॥
इत्यायुर्व्वेदः ॥ * ॥ अस्य गुणाः। मार्दवकारित्वं। कफवातनाशित्वं। धातुपुष्टिजनकत्वं। त्वग्वर्णबलप्रदत्वञ्च ॥ पादाभ्यङ्गगुणाः। निद्राचक्षुर्हितकारित्वं। पादरोगनाशित्वञ्च ॥ पादगते हे शिरे चक्षुषि सम्बद्धे स्तः अतश्चक्षुर्हितार्थिना पादाभ्यङ्गः करणीयः ॥ कफव्यस्तक्षतभेदवमनाजीर्णिभिर्नाभ्यङ्गः करणीयः। इति राजवल्लभः ॥ * ॥ अपरञ्च।
"मूर्द्धि दत्तं यदा तैलं भवेत् सर्व्वाङ्गसङ्गतं।
खोतोभिस्तर्पयेद्यस्माद्ब्राह्म स चाभ्यङ्ग उदाहृतः" ॥
तत्पर्य्यायः। अभ्यञ्जनं २। इति शुद्धितत्त्वधृतायुर्व्वेदः ॥ आभां इति भाषा।

अभ्यङ्गः, पुं, (अभि + अञ्च + अच्, एषोदरादित्वात् साधः।) तिलकल्कः। इति ऋग्वेदिश्राद्धप्रयोगः ॥

अभ्यञ्जनं, क्ली, (अभि + अञ्ज + कर्म्मणि ल्युट्।) तैलं। इति हेमचन्द्रः ॥ अभ्यङ्गः। इति राजनिर्घण्टः ॥ (तैलादिना शिरःसहितदेहमर्द्दनम्।
"भोजनाभ्यञ्जनाद्दानात् यदन्यत् कुरुते तिलैः ॥
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति" ॥
इति मनुः।)

अभ्यन्तरं, क्ली, (अन्तरमभिगतं प्रादिसमासः।) मध्यं। तत्पर्य्यायः। अन्तरालं २। इत्यमरः ॥ अन्तः ३ अन्तरं ४ अन्तरालकं ५। इति राजनिर्घण्टः ॥
("प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ"।
इति भगवद्गीता।)

अभ्यमितः, त्रि, (अभि + अम् + क्तः।) रोगी। इत्यमरः ॥

अभ्यमित्रीणः, पुं, (अमित्रस्याभिमुखं अव्ययीभावसमासः, अलङ्कारमीत्यधिकारे अभ्यमित्र + ख तस्य ईनः।) अभ्यमित्यः। इत्यमरः ॥

अभ्य

("हरामि रामसौमित्री मृगो भूत्वा मृगद्युवौ।
उद्योगमभ्यमित्रीणो यथेष्टं तच्च सन्तनु" ॥
इति भट्टिः।)

अभ्यमित्रीयः, पुं, (अमित्रस्य शत्रोरभिमुखं अयनीभावः, अभ्यमित्रमलङ्कामीत्यधिकारे अभ्यमित्र + कृ तस्य ईयः।) अभ्यमित्यः। इत्यमरः ॥

अभ्यमित्यः, पुं, (अभ्यमित्र + पूर्ब्बवत् यत्।) स्वसामर्थ्यवशेन शत्रुसम्मुखगमनकर्त्ता। युद्धस्थले शत्रुसम्मुखगामी। तत्पर्य्यायः। अभ्यमित्रीयः २ अभ्यमित्रीणः ३। इत्यमरः ॥
("तमुद्यतनिशातासिं प्रत्युवाच जिजीविषुः।
मारीचोऽनुनयंस्त्रासादभ्यमित्यीभवामि ते" ॥
इति भट्टिकाव्ये।)

अभ्यर्ण, त्रि, (अभि + अर्द्द + क्तः, आविदूर्य्ये इड्भावः णत्वञ्च।) निकटं। इत्यमरः। (आसन्नः। निकटवर्त्ती। "तीव्रः स्मरसन्तापो न तथादौ बाधते यथासन्ने। तपति प्रावृषि नितरामभ्यर्णजलागमो दिवसः"। इति रत्नावली। "उच्यन्तां सैनिकाः न कैश्चिदाश्रमाभ्यर्णभूमयः परिक्राम्यन्तां"। इति महावीरचरिते। समीपं। सन्निधानं। अन्तिकं। "अभ्यर्णे परिरभ्य निर्भरमुरः प्रेमान्धया राधया"। इति गीतगोविन्दे।)

अभ्यवकर्षणं, क्लीं, (अभि + अव + कृष् + भावे ल्युट्।) शस्त्यादेरुत्पाटनं। तत्पर्य्यायः। निर्हारः २। इत्यमरः ॥

अभ्यवस्कन्दः, पुं, (अभि + अव + स्कन्द + घञ्।) निःशङ्कीकरणाय शत्रुभिर्दीयमानः प्रहारः। तत्पर्य्यायः। अभ्यासादनं २ प्रपातः ३ धाटी ४। इति हेमचन्द्रः ॥

अभ्यवस्कन्दनं, क्लीं, (अभि + अव + स्कन्द + भावे ल्युट्) निःशङ्कीकरणाय शत्रुभिर्दीयमानः प्रहारः। शत्रुसम्मुखगमनं। इत्यमरभरतौ ॥

अभ्यवहारः, पुं, (अभि + अव + हृ + भावे घञ्।) भक्षणं। आहारः। इति हेमचन्द्रः ॥

अभ्यवहृतं, त्रि, (अभि + अव + हृ + क्तः।) भुक्तं। खादितं। इत्यमरः ॥

अभ्यसनं, क्लीं, (अभि + अस + ल्युट्।) अभ्यासकरणं। पौनःपुन्येन करणं चिन्तनञ्च। यथा,—
"स्यादभ्यासोऽभ्यसनेऽन्तिके"। इति मेदिनी ॥
(अभ्यासः। पौनःपुन्येनैकक्रियाकरणं। पुनःपुनः आवर्त्तनम्।
"विद्याभ्यसनेनेव प्रसादयितुमर्हसि"।
इति रघुः।
"स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते"।
इति गीता।)

अभ्यसूया, स्त्री, (असू उपतापे हिंसायाञ्च, कयङ्गादित्वात् यक् + भावे अ स्त्रियामाप्।) असूया। गुणेषु दोषारोपणं। यथा। "चैत्यस्य दानं तामसं"। इत्यमरटीकायां भरतः ॥ ("अनिर्द्दतं भूतिषु गूढवैरं सत्कारकालेऽपि कृताभ्यसूयम्"। इति भट्टिकाव्ये"। ईर्ष्या। विद्वेषः। औद्धत्यादन्यगुणाद्वैनामसहिष्णुता।

अभ्या

"कृताभ्यसूया पदकाङ्क्षिणा ते।
नितान्तदीर्घैर्जनिता तपोभिः"।
इति कुमारसम्भवे ॥
"प्रत्यादत्तत्त्वयि करधि स्यादनल्पाभ्यसूयः"।
इति मेघदूते।)

अभ्याकाङ्क्षितं, क्लीं, (अभि + आ + काङ्क्ष + भावे क्तः, इदित्वान्नुम्।) मिथ्याभियोगः। इति शब्दरत्नावली ॥ मिछादाओया इति भाषा।

अभ्याख्यानं, क्लीं, (अभि + आ + ख्या + ल्युट्।) मिथ्याभियोगः। मिथ्याविवादः। श्रुतं मे धारयसीत्यादि मिथ्योद्भावनं। इत्यमरभरतौ ॥

अभ्यागतः, पुं, (अभि + आ + गम् + कर्त्तरि क्तः।) अतिथिः। इति हेमचन्द्रः ॥ "स च ज्ञातपूर्ब्वमभ्यागतः" इति श्रीधरस्वामी ॥
"बालो वा यदि वा वृद्धो युवा वा गृहमागतः।
तस्य पूजा विधातव्या सर्ब्वत्राभ्यागतो गुरुः" ॥
इति हितोपदेशे।)

अभ्यागमः, पुं, (अभि + आ + गम् + अप्।) समीपं। मारणं। युद्धं। वैरं। अभ्युत्थानं। इति विश्वः ॥ (घातः। प्रहारः। शत्रुता। विरोधः। समीपं। अन्तिकं। सन्निधानं।
"अभ्यागमो विरोधाजिघातार्थभूदमनान्तिके"।
इति मेदिनी ॥ सम्मुखागमनं। उपस्थितिः।
"का त्वं शुभे कस्य परिग्रहो वा
किं वा मदभ्यागमकारणं ते"।
इति रघुवंशे।)

अभ्यागारिकः, त्रि, (अभ्यागारे तद्गृहकर्म्मणि व्याप्तः, ठन् तस्य इकः।) कुटुम्बव्याप्तः। पुत्रदारादिपोषणव्ययः। इत्यमरः ॥

अभ्यादानं, क्लीं, (अभि + आ + दा + भावे ल्युट्।) आरम्भः। इत्यमरः ॥ प्रथमारम्भः। इति रायमुकुटः ॥

अभ्यान्त, त्रि, (अभि + आ + अम + कर्त्तरि क्तः इड्भावः, पक्षे अभ्यामितः।) रोगी। इत्यमरः ॥

अभ्यामर्दः, पुं, (अभ्यामृद्यतेऽत्र, अभि + आ + मृद् + आधारे घञ्।) संग्रामः। इत्यमरः ॥

अभ्याशः, त्रि, (आभिमुख्येनाश्यते व्याप्यतेऽनेन, अशू व्याप्तौ करणे घञ्।) समीपं। इत्यमरटीकायां रायमुकुटः ॥

अभ्यासः, पुं, (आभिमुख्येनास्यते क्षिप्यते, असुक्षेपे कर्म्मणि घञ्।) अभ्यसनं। आवृत्तिः। इति मेदिनी ॥ पुराभ्यासः। तत्पर्य्यायः। खरली २ योग्या ३। इति त्रिकाण्डशेषः ॥ समीपे त्रि। इत्यमरः। चित्तस्यैकस्मिन्नभ्यन्तरे बाह्ये वा प्रतिमादावालम्बने सर्ब्वतः समाहृत्य पुनः पुनः स्थापनमभ्यासः ॥ यथा,—
"अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय"।
इति भगवद्गीताटीकायां नीलकण्ठः ॥

अभ्यासादनं, क्लीं, (अभि + आ + सद् + णिच् + ल्युट्।) निःशङ्कीकरणाय शत्रुभिर्दीयमानः प्रहारः। शत्रुसम्मुखगमनं। इत्यमरभरतौ ॥

अभ्याहारः, पुं, (अभि + आ + हृ + भावे घञ्।)

अभ्यु

अभिहारः। चौर्य्यं। इत्यमरटीका ॥ (अभिग्रहणं। भोजनं। आहारः।)

अभ्युत्थानं, क्लीं, (अभि + उत् + स्था + भावे ल्युट्।) गौरवं। इति हेमचन्द्रः ॥ आसनादेरुत्थानं। यथा,—
"यदा यदा च धर्म्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहं" ॥
इति श्रीभगवद्गीता ॥ (ख्यातिः। कीर्त्तिः। यशः। गौरवेणोत्थानादिना प्रत्युद्गमनं। "अलमलमभ्युत्थानेन, ननु सर्ब्वस्याभ्यागतो गुरुरिति भवानेवास्माकं पूज्यः"। इति नागानन्दः।
"नाभ्युत्थानं क्रिया यत्र नालापा मधुराक्षराः।
गुणदोषकथा नैव तत्र हर्षेण गम्यते" ॥
इति पञ्चतन्त्रे। अभ्युदयः। अभ्युन्नतिः।
"नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः" ॥
इति रघुवंशे। सूर्य्योदयः। उदयः। उद्भवः।)

अभ्युदयः, पुं, (अभि + उत् + इण् + अच्।) इष्टलाभः। विवाहादिः। इति आभ्युदयिकशब्दार्थे आद्यतत्त्वं ॥ सर्ब्वतोभावेनोदयः। अर्थाद्धनजनादिवृद्धिः। यथा,—
"राजन्नभ्युदयोऽस्तु वल्लनकवे हस्ते किमास्ते तव
श्लोकः कस्य कवेरमुष्य कृतिनस्तत् पश्यतां पश्यते।
किन्त्वासामरविन्दसुन्दरदृशां द्राक्षामरान्दोलनादुद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः क्षणं वार्य्यतां" ॥
इत्यस्य पूर्ब्वार्द्धं वल्लनकविकर्णाटराजयोर्वाक्यं शेषार्द्धं कालिदासस्य ॥ (उन्नतिः। समृद्धिः।
"विपदि धैर्य्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः"। इति हितोपदेशे। पराक्रमः। वीर्य्यं। प्रभावः। "यद्बाहुदण्डाभ्युदयानुजीविनो यदुप्रवीराः"। इति भागवतपुराणं।)

अभ्युदितः, त्रि, (अभि + उत् + इण् + क्तः।) यस्मिन् सुप्ते सूर्य्य उदेति सः। सूर्य्योदयकालशायी। इत्यमरः ॥ उदयप्राप्तः। यथा,—
"माघे मासि रटन्त्यापः किञ्चिदभ्युदिते रवौ।
ब्रह्मन्नमपि चाण्डालं कं पतन्तं पुनीमहे" ॥
इति तिथ्यादितत्त्वं ॥ (अभितः सर्ब्वतः उदितशब्देन इतं गतं प्रातर्विहितं कर्म्मास्मादिति व्युत्पत्त्या सूर्य्योदयकाले निद्रया अननुष्ठिततत्कालोचितक्रियाकलापः।)

अभ्युपगतः, त्रि, (अभि + उप + गम् + क्तः।) स्वीकृतः। अङ्गीकृतः। इति हेमचन्द्रः ॥
("प्रियाभ्युपगते राज्ये पाण्डवा मधुसूदन।
जिताः शकुनिना राज्यं तत्र किं मम दुष्कृतं" ॥
इति महाभारते। समीपागतः। अन्तिकसमागतः। अनुमितः। निर्द्धारितः। सिद्धान्ततया निरूपितः। सङ्गीभूतः। सन्निकृष्टः।)

अभ्युपगमः, पुं, (अभि + उप + गम् + भावे अप्।) स्वीकारः। इत्यमरः ॥ निकटागमनं। इति मेदिनी ॥ (अङ्गीकारः। प्रतिज्ञा। "प्रसीदेति ब्रूयामिदमसति कोपे न घटते करिष्याम्येवं नो पुनरिति भवेदभ्युपगमः"। इति रत्नावली। अनुमतिः। अनुमोदनं।

"सर्व्वदोषानभिष्वङ्गादाम्नायसमतां गताः।
युष्माकमभ्युपगमाः प्रमाणं पुण्यपापयोः"।
इति महावीरचरिते।)

अभ्युपपत्तिः, स्त्री, (अभि+उप+पद्+क्तिन्।) अनुग्रहः। इत्यमरः॥ (अनिरुनिवारणपूर्ब्बकाभीष्टसम्पादनरूपोऽनुग्रहः। प्रसादः। "तदर्हस्याभ्युपपत्या जीवितमस्या अवलम्बितुम्"। इति शाकुन्तले। रक्षा। परिचर्य्या।
"कामिनीषु विवाहेषु गवाम्भक्षे तथेन्धने।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम्"।
इति मनुः।)

अभ्युपायः, पुं, (अभि+उप+इण्+भावे अच्।) अङ्गीकारः। स्वीकारः। इति हेमचन्द्रः॥ उपायः। यथा। "तत्स्वीकृतिव्यतिकरे क इहाभ्युपायः"। इति काव्यप्रकाशः॥ (कौशलं।
"अनेकैरभ्युपायैस्ते जिघांसन्ति स्म पाण्डवान्"।
"निपुणेनाभ्युपायेन नगरं वारणावतं"।
"निपुणेनाभ्युपायेन यदब्रवीमि तथा कुरु"॥
इति महाभारते।)

अभ्युपायनं, क्ली, (अभि+उप+इण्+ल्युट्।) उपायनं। उपढौकनद्रव्यं। यथा,—
"तावानय समं गोपैर्नन्दाद्यैः साभ्युपायनैः"।
इति श्रीभागवतं॥

अभ्युपेतं, त्रि, (अभि+उप+इण्+कर्म्मणि क्तः।) स्वीकृतं। उपगतं। यथा,—
"अहमभ्युपेतस्वामर्थिभावादिति मे विषादः"।
इति रघुः॥ (अङ्गीकृतः।
"मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः"।
इति मेघदूते।)

अभ्युषः, पुं, (अभ्युष्यते अग्निना दह्यतेऽसौ अभि+उष्+बाहुलकात् कर्म्मणि कः।) अभ्यूषः। पौलिः। इत्यमरटीकायां भरतः॥

अभ्यूषः, पुं, (अभि+ऊष+बाहुलकात् कर्म्मणि कः।) पाकावस्थागतकलायादिः। आरब्धपाकावयवसर्षपादिः। वह्निना ईषद्दग्धः घुट घुट शब्दवान् इति केचित्॥ दरदग्ध इति श्रीधरः॥ तत्पर्य्यायः। आपक्वं २ पौलिः ३। इत्यमरः॥ अभ्युषः ४ अभ्योषः ५। इति भरतः॥*॥ प्रोलिका। रोटी इति प्रसिद्धा। अस्या गुणाः। मधुरत्वं। गुरुत्वं। रोचकत्वं। बलकारित्वं। श्लेष्मवर्द्धनकत्वं। पित्तरक्तप्रदायित्वञ्च॥*॥ अङ्गारकृतायास्तस्या गुणाः। अग्निदीपनत्वं। वायुवर्द्धिकारित्वं। लघुत्वं। बलकारित्वञ्च।
"सा खट्वयुक्ता चेत् घनाघनगुणान्विता"।
इति राजनिर्घण्टः॥ ईषत्पक्वं। यथा,—
"आपक्वमवपक्वं स्यादाभ्युषः पौलिपौलिके।
अभ्यूषोऽभ्योष इत्येते ईषत्पक्वार्थवाचिषु"॥
इति शब्दरत्नावली॥

अभ्योषः, पुं, (अभ्युष्यते अग्निना दह्यतेऽसौ, अभि+ऊष+कर्म्मणि घञ्।) अभ्यूषः। इत्यमरटीकायां भरतः॥

अभ्र गत्यां। इति कविकल्पद्रुमः॥ ओलवर्गचतुर्थोपधः। अभ्रति। इति दुर्गादासः।

अभ्रं, क्ली, (अपोबिभर्त्तीति अप+भृ+क।) मेघः। आकाशं। स्वर्णं। अभ्रकधातुः। इति मेदिनी॥ उपधातुविशेषः। तस्योत्पत्तिनामलक्षणगुणाः।
"पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतं।
विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः॥
ते निपेतुर्घनघ्वानाच्छिखरेषु महीभृतां।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकं॥
तदभ्रं वज्रजातत्वादभ्रमभ्रस्वोद्भवात्।
गगनादलितं यस्माद्गगनञ्च ततो मतं॥
विप्रक्षत्रियविट्शूद्रभेदात्तत् स्याच्चतुर्विधं।
क्रमेणैव सितं रक्तं पीतं कृष्णञ्च वर्णतः॥
प्रशस्यते सितं तारे रक्तं तंतुरसायने।
पीतं हेमनि कृष्णन्तु गदेषु भूतयेऽपि च॥
पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्विधं।
सुस्निग्धमौ विनिःक्षिप्तं पिनाकं दलसञ्चयं॥
अज्ञानाद्भक्षणात्तस्य महाकुष्ठप्रदायकं।
दर्दुरं खनिनिःक्षिप्तं कुरुते दर्दुरध्वनिं॥
गोलकान् बज्रवद्भः कृत्वा स स्यान्मृत्युप्रदायकः।
नागन्तु नागवद्भौ फुत्कारं परिमुञ्चति॥
तद्भक्षितमवश्यन्तु विदधाति भगन्दरं।
वज्रन्तु वज्रवत्तिष्ठेत्तन्नाम्नौ विक्रृतिं व्रजेत्॥
सर्व्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत्।
अभ्रमुत्तरपूर्व्वोत्थं बज्रसत्वं गुणाधिकं॥
दक्षिणाद्रिभवं स्वल्पसत्वमल्पगुणप्रदं"॥*॥
मारिताभ्रगुणाः।
"अभ्रं कषायं मधुरं सुशीत-
मायुष्करं धातुविवर्द्धनञ्च।
हन्यात्त्रिदोषं व्रणमेहकुष्ठं
प्लीहोदरग्रन्थिविषक्षयार्शांसि च॥
"रोगान् हन्ति द्रढ़यति वपुर्वीर्य्यवृद्धिं विधत्ते
तारुण्याढ्यं रमयति शतं योषितां नित्यमेव।
दीर्घायुष्कान् जनयति सुतान् विक्रमैः सिंहतुल्यान्
मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रं"॥*॥
अशोधिताभ्रदोषाः।
"पीडां विधत्ते विविधां नराणां
कुष्ठं त्वयं पाण्डुगदञ्च घोरं।
हृत्पार्श्वपीडाञ्च करोत्यशुद्ध-
मभ्रं ह्यसिद्धं गुरुतापदं स्यात्"॥*॥
अस्य शोधनविधिर्यथा।
"कृष्णाभ्रकं धमेद्वह्नौ ततः क्षीरे विनिःक्षिपेत्।
भिन्नपत्रन्तु तत् कृत्वा तप्तलोहस्य चाम्बुनि॥
भावयेदशयामं तदेवमभ्रं विशुध्यति"॥*॥
तस्य मारणं यथा॥
"कृत्वा धान्याभ्रकं तच्च शोधयित्वाथ मर्दयेत्।
अर्कक्षीरैर्दिनं खल्वे चक्राकारञ्च कारयेत्॥
वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत्।
पुनर्म्मर्द्यं पुनः पाच्यं सप्तवारान् पुनः पुनः॥
ततो वटजटाक्वाथैस्तदर्द्धेयं पुटत्रयं।
म्रियते नात्र सन्देहः प्रयोज्यं सर्व्वकर्म्मसु॥
तुल्यं घृतं मृताभ्रेण लौहपात्रे विपाचयेत्।
घृते जीर्णे तदभ्रन्तु सर्व्वयोगेषु योजयेत्"॥*॥
तच्च धान्याभ्रस्य विधिः।
"पादांशसलिलं युक्तमभ्रं बद्ध्वाथ कम्बले।
चिरात्तं स्रापयेन्नीरे तत् क्लिन्नं मर्दयेत् करैः॥
कम्बलाद्गलितं सूक्ष्मं वालुकारहितञ्च यत्।
तद्धान्याभ्रमिति प्रोक्तमभ्रमारणसिद्धये"॥
इति भावप्रकाशः॥

अभ्रंलिहः, पुं, (अभ्रं लेढि स्पृशति, अभ्र+लिह कर्त्तरि खश्, मुमागमः।) वायुः। इति शब्दरत्नावली॥ (मेघस्पर्शी। अत्युच्चः।
"अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः"॥
इति मेघदूते।)

अभ्रकं, क्ली, (अभ्र गतौ+ण्वुल्, तस्य अक।) खनामख्यातधातुः। आभ्र इति भाषा। तत्पर्य्यायः। गिरिजं २ अमलं ३। इत्यमरः॥ गिरिजामलं ४ गौर्य्यामलं ५। इति स्वामी॥ गिरिजावीजं ६ गरुजध्वजं ७। इति वाचस्पतिः॥ शुभ्रं ८। इति जटाधरः॥ घनं ९ व्योम १० अब्दं ११। इति रत्नमाला॥ अभ्रं १२ भङ्गं १३ अभ्वरं १४ अन्तरीक्षं १५ आकाशं १६ बज्रपत्रं १७ खं १८ अनन्तं १९ गौरीजं २० गौरीजेयं २१। इति राजनिर्घण्टः॥ अस्य गुणाः। रसायनत्वं। स्निग्धत्वं बलवर्णाग्निवर्द्धकत्वञ्च। इति राजवल्लभः॥ अपि च। गुरुत्वं। हिमत्वं। बल्यत्वं। कुष्ठमेहक्षितिदोषनाशित्वञ्च॥*॥ तच्चतुर्व्विधं यथा,—
"श्वेतं पीतं लोहितं नीलमभ्रं
चातुर्व्विध्यं जातिभिन्नक्रियार्हं।
श्वेतं तारे काञ्चने पीतरक्ते
नीलं व्याधिव्यूहमग्र्यं गुणाढ्यं"॥
इति मदनविनोदः॥
("अभ्रकस्तव वीजन्तु मम वीजन्तु पारदः।
अनयोर्मेलनं देवि मृत्युदारिद्र्यनाशनं"॥
इति चक्रदत्तः।)

अभ्रङ्कषः, पुं, (अभ्रमाकाशं कषति गच्छति धातूनामनेकार्थत्वात् अभ्र+कष्+खच्+मुम्।) वायुः। इति धारिणिः॥ (मेघस्पर्शी। अत्युन्नतः। अभ्रंलिहः।
"सर्व्वद्रुमयशःशाखं रामकल्पतरुं कपिः।
आदायाभ्रङ्कषं प्रायान्मङ्गलं फलशालिनं"॥
इति भट्टिकाव्ये।)

अभ्रपिशाचः, पुं, (अभ्रे आकाशे पिशाच इव। तस्य क्षयात्मकत्वेन नीलवर्णतया पिशाचतुल्यत्वं।) राजयक्ष्मः। इति त्रिकाण्डशेषः॥

अभ्रपिशाचकः, पुं, (अभ्रे पिशाच इव इवार्थे कन्।) राजयक्ष्मः। इति हारावली॥

अभ्रपुष्पं, क्ली, (अभ्रं मेघ एव पुष्पं जलरूपफलस्य निदानं यस्य तत्, तस्य मेघप्रभवत्वात् तथात्वं।) जलं। यथा,—
"अभ्रपुष्पमपि दित्सति प्रीतं
सार्थिना विमुखता यदभाजि"। इति नैषधे॥

अभ्रपुष्पः, पुं, (अभ्रमिव शुभ्रं पुष्पं यस्य सः।) वेतसवृक्षः। इत्यमरः॥

अभ्रमः, त्रि, (न भ्रमः भ्रान्तिः, नञ्समासः।) (भ्रमाभावः।) भ्रमरहितः। अभ्रान्तः। नास्ति भ्रमो यस्येति बहुव्रीहिः॥

अभ्रमांसी, स्त्री, (अभ्रमिव जटायां मांसमस्याः सा गौरादीत्वात् ङीष्।) आकाशमांसीलता। इति राजनिर्घण्टः॥ (जटामांसी।)

अभ्रमातङ्गः, पुं, (अभ्रस्य मेघस्य अधिष्ठाता मातङ्गः, शाकपार्थिवादित्वात् समासः, मध्यपदलोपश्च।) ऐरावतः। इन्द्रहस्ती। इत्यमरः॥ (स च समुद्रजातः पूर्व्वदिङ्नागः।)

अभ्रमाला, स्त्री, (अभ्राणां माला श्रेणी, षष्ठीतत्पुरुषः।) मेघश्रेणी। मेघसमूहः। इति हलायुधः॥ (घनघटा। कादम्बिनी।)

अभ्रमुः, स्त्री, (न भ्राम्यति, भ्रम+उञ्, नञ्समासः, मान्तत्वात् ह्रस्वभावः।) ऐरावतस्त्री। सा पूर्व्वदिग्हस्तिनी। इत्यमरः॥

अभ्रमुप्रियः, पुं, (अभ्रमोः पूर्व्वदिक्हस्तिन्याः प्रियः।) ऐरावतहस्ती। इति हेमचन्द्रः॥ (अभ्रमातङ्गः।)

अभ्रमुवल्लभः, पुं, (अभ्रमोः वल्लभः प्रियः।) ऐरावतहस्ती। इत्यमरः॥

अभ्ररोहं, क्ली, (अभ्रात् मेघात् रोहः जन्म यस्य तत्, तस्य मेघशब्दोत्पन्नत्वात् तथात्वं।) वैदूर्य्यमणिः। इति राजनिर्घण्टः॥

अभ्रवाटिकः, पुं, (अभ्रस्येव वाटी वक्रता यस्याः सा, समासान्तः कः, ह्रस्वः।) आम्रातकः। इति राजनिर्घण्टः॥

अभ्रान्तः, त्रि, (भ्रम्+कर्त्तरि क्तः, नञ्समासः।) भ्रान्तिशून्यः। यथा।
"आप्ताः श्रिष्टा विबुद्धास्ते तेषां वाक्यमसंशयम्" इत्यत्र "यतोऽभ्रान्तबुद्धयः"। इति चरकटीकाकारः॥ (यथार्थज्ञानयुक्तः। भ्रमशून्यः। स्थिरश्च।)

अभ्रिः, स्त्री, (अपो बिभर्त्ति, नौकामार्ज्जनार्थं धारयति, अप्+भृ+कर्त्तरि किः।) काष्ठकुद्दालः। नौकामार्ज्जनार्थकुद्दालाकृतिकाष्ठं। इत्यमरः॥ (तीक्ष्णाग्रो लोहदण्डः।
"अभ्रिं कार्ष्णायसीं दद्यात् सर्पं हत्वा द्विजोत्तमः"। इति मनुः।)

अभ्रियः, त्रि, (अभ्रे भवः, अभ्र+घ तस्य इय।) अभ्रोद्भववस्तु। तत्पर्य्यायः। मेघभवः २। इत्यमरः। (घनसम्भूतः। विद्युत्। मेघजलं। वज्रं। कुलिशं।)

अभ्री, स्त्री, (अभ्रति मलं गच्छति अभ्र+इन्, ह्रस्वादिकारादिति पक्षे ङीष्।) काष्ठकुद्दालः। इत्यमरटीकायां भरतः॥

अभ्रेषः, पुं, (भ्रेष् चलने+घञ्, नञ्समासः।) उचितः। न्यायः। इत्यमरः॥

अभ्रोत्थं, क्ली, (अभ्रात् मेघात् उत्तिष्ठति उद्भवति, अभ्र+उत्+स्था+क।) वज्रं। इति त्रिकाण्डशेषः॥

अभ्रक् रोगे। क आभ्रयति व्याधिर्लोकं। इति दुर्गादासः॥

अभ गतौ। भजने। शब्दे। अभति। इति दुर्गादासः॥

अभ्र, व्य, (अभ्+क्विप्, खरादित्वादव्ययत्वमस्य।) शीघ्रता। अल्पं। इति व्याडिः॥

अभं, त्रि, (अभ्+भावे घञ्, मान्तत्वान्न वृद्धिः, अभो रोगो विद्यते अस्मात्, अर्शआद्यच्, प्रायेण अपक्वफलभक्षणेन रोगोत्पत्तेस्तस्य तथात्वं।) अपक्वफलादि। इति शब्दरत्नावली॥ रोगे पुं। इति मुग्धबोधव्याकरणं॥

अभङ्गलं, क्ली, (नास्ति भङ्गलं शुभं यस्मात् तत्।) अशुभसूचकं। तद्यथा,—
"सार्द्धं सैन्यसमूहैश्च वाद्यभाण्डैरसङ्ख्यकैः।
ददर्शाभङ्गलं राजा पुरो वर्त्मनि वर्त्मनि॥
ययौ तथापि समरं न जगाम गृहं पुनः।
मुक्तकेशीं छिन्ननासां रुदन्तीञ्च दिगम्बरां॥
क्षण्वक्त्रपरीधानामपरां विधवामपि।
मुखदुष्टां योनिदुष्टां व्याधियुक्ताञ्च कुट्टिनीं॥
पतिपुत्रविहीनाञ्च डाकिनीं पुंश्चलीमहो।
कुम्भकारं तैलकारं व्याधं सर्पोपजीविनं॥
कुचेलमतिरूक्षाङ्गं नग्नं काषायवासिनं।
अङ्गविक्रयिणञ्चैव कन्याविक्रयिणं तथा॥
चितां दग्धशवं भस्म निर्व्वाणाङ्गारमेव च।
सर्पदष्टनरं सर्पं गोधाञ्च शशकं विषं॥
श्राद्धपात्रञ्च पिण्डञ्च मोटकं वानरं तथा।
देवलं शववाहञ्च शूद्रश्राद्धान्नभोजिनं॥
शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकं।
कुम्भपुत्तलिकाञ्चैव शवदाहनकारिणं॥
शून्यकुम्भं भग्नकुम्भं तैलं लवणमस्थि च।
कार्पासं काक्षपं चूर्णं कुक्कुरं शूद्रकारिणं॥
दन्तिणे च शृगालञ्च कुर्व्वन्तं भैरवं रवं।
कपर्दकञ्च क्षौरञ्च छिन्नकेशं नखं मलं॥
कलहञ्च विलापञ्च विलापकारिणं जनं।
अमङ्गलं वदन्तञ्च रुदन्तं शोककारिणं॥
मिथ्यासाक्ष्यप्रदातारं चौरञ्च नरघातिनं।
पुंश्चलीपतिपुत्रञ्च पुंश्चल्योदनभोजिनं॥
देवतागुरुविप्राणां वस्तुवित्तापहारिणं।
दत्तापहारिणं दस्युं हिंसकं सूचकं खलं॥
पिटमाटविरक्तञ्च द्विजाश्चत्यविघातिनं।
सत्यघ्नञ्च कृतघ्नञ्च स्याप्यापहारिणं जनं॥
विप्रद्रोहं मित्रद्रोहं क्षतं विश्वासघातकं।
गुरुदेवद्विजानाञ्च निन्दकं खाङ्गघातकं॥
जीवानां घातकञ्चैव खाङ्गहीनञ्च निर्दयं।
व्रतोपवासहीनञ्च दीक्षाहीनं नपुंसकं॥
गलितव्याधिगात्रञ्च काणं वधिरमेव च।
एकाक्षं छिन्नलिङ्गञ्च सुरामत्तं सुरां तथा॥
छिन्नं वमन्तं रुधिरं महिषं गर्द्दभं तथा।
मूत्रं पुरीषं श्लेष्माणं कल्पिनं टङ्कपालिनं॥
भञ्जावातं रक्तवृष्टिं वात्याञ्च वृक्षपातनं।
वृकञ्च शूकरं गृध्रं श्येनं कङ्कञ्च भल्लुकं॥
पाशञ्च शुष्ककाष्ठञ्च वायसं गन्धकं तथा।
अयदानिग्राह्यञ्च तन्त्रमन्त्रोपजीविनं॥
वैद्यञ्च रक्तपुष्पञ्चौषधं तुषसेव च।
कुवार्त्तां मृतवार्त्ताञ्च विप्रशापञ्च दारुणं॥
दुर्गन्धवातं दुःशब्दं राजा संप्राप वर्त्मनि।
मनश्च कुत्सितं प्राणाः क्षुभिताश्च निरन्तरं॥
वामाक्षस्पन्दनं देहजाड्यं राज्ञो बभूव ह।
तथापि राजा निःशङ्को दर्शं दर्शममङ्गलं"॥
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः॥

अमङ्गलः, पुं, (नास्ति मङ्गलं यस्य) रराक्षसवृक्षः॥ इति शब्दचन्द्रिका॥

अमङ्गलः, त्रि, (न मङ्गलः, नञ्समासः।) मङ्गलशून्यः। अकुशलः। यथा। "अमङ्गलं रूपमिदं दधत् कथं"। इति विद्वन्मोदतरङ्गिणी॥ मङ्गलाभावे स्त्री। यथा। "अमङ्गलाभ्यासरतिं विचिन्त्य तं"। इति कुमारसम्भवः॥

अमङ्गल्यः, त्रि, (मङ्गलाय हितः, मङ्गल+यत् ततो नञ्समासः।) अमङ्गलजनकः। यथा,—
"अमङ्गल्यं ध्रीलं तव भवतु नामैवमखिलं"।
इति पुष्पदन्तः॥ (अशुभकरः। अग्निवस्तूचकः।
"देवि! मैवममङ्गल्यवादिनी भव"। इति नागानन्दः।)

अमण्डः, पुं, (नास्ति मण्डो भक्तावग्निर्वा यस्य सः।) रराक्षसवृक्षः। इत्यमरः॥ (मण्डहीनभक्तादि। भूयश्चहीनश्च।)

अमतः, पुं, (अम् रोगे+अतच्, अथवा मन्+भावे क्तः, नास्ति मतमभिप्रायो यत्र सः। अथवा मन्+कर्म्मणि क्तः, नञ्समासः।) रोगः। मृत्युः। कालः। इत्युणादिकोषः॥

अमतिः, पुं, (अम्+अति।) कालः। चन्द्रः। इति मेदिनी॥ दुष्टे त्रि। इति शब्दरत्नावली॥
"अमतिः पुंसि काले च दुष्टे हिमकरेऽपि च"।
इति शब्दरत्नावली। अबुद्धिः। अज्ञानं। अनभिसन्धिः।
"भुक्तातोऽतमस्यान्नममत्या क्षपणं त्वहं।
मत्या भुक्त्वा चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च"॥
इति मनुः।)

अमत्रं, क्ली, (अमति भुङ्क्तेऽत्रमत्र, अम् भोजने आधारे अत्रन्।) पात्रं। अस्य भाषा अमित्तिं। इत्यमरः॥ (भाजनं। स्थानं। भोजनपात्रं।)

अमत्सरः, पुं, अन्यशुभद्वेषाभावः। अत्र नञ्समासः॥ मात्सर्य्यरहिते त्रि। अत्र बहुव्रीहिसमासः॥

अमनिः, स्त्री, (अमति यात्यत्र, अम+आधारे अनि।) वर्त्म। पन्थाः। इत्युणादिकोषः॥

अमन्दः, पुं, (न मन्दः विरोधे नञ्समासः।) वृक्षः। इति शब्दचन्द्रिका॥ मन्दभिन्ने त्रि। यथा।
"दृष्ठभाग्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयना-
न्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः।" इति श्रीभागवतं॥ (भीषणः। घोरः। अतिगभीरः।
"आगृह्णद्भिरिवकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरम्
व्याघूर्णाधमदन्दुभिरवैराभातमुज्जृम्भयन्"।
इति उत्तरचरिते। प्रभुरः। बहुलः। अनल्पः।

"क्षणत्वनककिङ्किणीभगभग्गायितस्यन्दनै-
रमन्दमदद्दुर्दिनदिरदवारिदैरावृतः" ॥
इति उत्तरचरिते । "आनन्दममन्दमिमं कुवलय-
दलनोचने ददासि त्वं" । इति काव्यप्रकाशः ।
अजड़ः । कुशलः । उद्योगी ।)

अममः, पुं, (नास्ति ममेत्यभिमानो गृहादिषु यस्य ।)
भाविजिनविशेषः । इति हैमचन्द्रः ॥ ममताशून्ये
त्रि । (संसारमायारहितः । विषयासक्तिशून्यः ।
"अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः ।
शरण्येष्वममश्चैव वृक्षमूलनिकेतनः" ॥
इति मनुः ।)

अमरः, पुं, (मृ + कर्त्तरि अच् नञ्समासः ।) देवः ।
इत्यमरः ॥
("विभौ देवगुरौ वज्रपाणिविबुधैरैः" ।
इति महाभारते ।
"फलं कर्म्मायत्तं किममरगणैः किञ्च विधिना" ।
इति शान्तिशतके ।)
कुलिशवृक्षः । अस्थिसंहारवृक्षः ॥ इति मेदिनी ॥ पारदः । इति राजनिर्घण्टः ॥ मृत्युरहिते त्रि । यथा,—
"अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत्" ।
इति हितोपदेशः ॥ अमरसिंहः । स चादिशाब्दिकः नामलिङ्गानुशासननामककोषकारः विक्रमादित्यराजसभीयनवरत्नान्तर्गतरत्नविशेषश्च ।
यथा,—
"इन्द्रस्यन्द्रः काशकृत्स्ना पिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥
इति कविकल्पद्रुमः ॥
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य" ॥
इति नवरत्नं ॥ स एव बौद्धमतावलम्बीति केचित् ॥

अमरजः, पुं, (अमर इव जायते, अमर + जन् + डः ।) दुग्धदिरक्षवृक्षः । इति राजनिर्घण्टः ॥ (कालस्कन्धः । पञ्चतरुः ।)

अमरदारुः, पुं, (अमराणां दारुः, षष्ठीतत्पुरुषः ।) देवदारुवृक्षः । इति राजनिर्घण्टः ॥

अमरद्विजः, पुं, (अमरपूजकोद्विजः शाकपार्थिवादित्वात् समासः, मध्यपदलोपश्च ।) देवलब्राह्मणः । इति शिकाण्डशेषः ॥ (देवाजीवः । देवपूजकः ।)

अमरपुष्पकः, पुं, (अमरमविशीर्णं पुष्पं यस्य समासान्तः कः ।) काशदृश्यं । इति रत्नमाला ॥ केशरं । इति भाषा ।

अमरपुष्पिका, स्त्री, (अमरमशीर्णं पुष्पं यस्याः सा-जातित्वात् स्त्रियां ङीप्, स्वार्थे कन् ।) अधःपुष्पीवृक्षः । इति रत्नमाला ॥

अमररत्नं, क्ली, (अमराणां रत्नमिव ।) स्फटिकः । इति राजनिर्घण्टः ॥

अमरवल्लरी, स्त्री, (अमरा छेदनेऽपि न म्रियमाणा वल्लरी वल्ली ।) आकाशवल्ली । इति वैद्यकं ॥

अमरा, स्त्री, (न म्रियते मृ + कर्त्तरि अच्, नञ्-समासः ।) दूर्व्वा । गुडूची । इन्द्रपुरी । शूणा । जरायुः । इति मेदिनी ॥ इन्द्रवारुणीवृक्षः ॥ वटीवृक्षः । महानीलीवृक्षः । यष्टिकन्या । धृतकुमारी इति ख्याता । इति राजनिर्घण्टः ॥ नाभिनाला । इति शिकाण्डशेषः ॥

अमराद्रिः, पुं, (अमराणां देवानामद्रिः पर्व्वतः, देवालयत्वात् तस्य तथात्वं ।) सुमेरुः । इति जटाधरः ॥

अमरावती, स्त्री, (अमरा विद्यन्तेऽस्यां, अमर + मतुप् मस्याने व दीर्घश्च ।) इन्द्रनगरी । इत्यमरः ॥ अमराः सन्ति अस्यामिति मोक्षभूपादिति वतुः नाम्नाम्त्यर्थे इति दीर्घः । इति भरतः ॥ तत्पर्य्यायः । पुष्पभासा २ देवपूः ३ । इति जटाधरः ॥ महेन्द्रनगरी ४ अमरा ५ सुरपुरी ६ । इति शब्दरत्नावली ॥ तद्वर्णनं यथा । शिवशर्म्मोवाच ।
"रमयन्ती मनोऽतीव कैषा कस्येयमीप्सितुः ।
नयनानन्दसन्दोहदायिनी पूरनुत्तमा" ॥
गणावूचतुः ।
"शिवशर्म्मन् महाभाग सुतीर्थफलितद्रुम ।
लोकोऽत्र रमते विप्र सहस्राक्षपुरी त्विमं ॥
तपोबलेन महता निर्म्मिता विश्वकर्म्मणा ।
दिवापि कौमुदी यस्याः सौधश्रेणीश्रियं श्रयेत् ॥
यदा कलानिधिः क्वापि दर्शेऽदृश्यत्वमावहेत् ।
तदा सप्रेयसीं ज्योत्स्नां सौधेष्वेषु निगूहयेत् ॥
यदच्छभित्तौ वीक्ष्य स्वमन्ययोषिदिहशङ्किता ।
मुग्धानासु विधेश्चित्रमपि स्वां चित्रशालिकां ॥
हर्म्येषु नीलमणिभिर्निर्म्मितेष्वत्र निर्भयं ।
खनीलिमानमाधाय तमोऽहःस्वपि तिष्ठति ॥
चन्द्रकान्तशिलाजालस्रुतमत्रामलं जलं ।
तत्र चादाय कलसैर्नेच्छन्त्यन्यजलं जनाः ॥
कुविन्दा न च सन्त्यत्र न च ते पशवो हगः ।
चेलान्यनङ्गतीव्रत्र यतः कल्पद्रुमोऽर्पयेत् ॥
गणाका नात्र विद्यन्ते चिन्ताविद्याविशारदाः ।
यतो जानाति सर्व्वेषां चिन्तां चिन्तामणिर्द्रुतं ॥
सूपकारा न सन्त्यत्र रसकर्म्मविचक्षणाः ।
दुग्धे सर्व्वरसानेका कामधेनुरतोऽनिशं ॥
कीर्त्तिरुच्चैःश्रवा यस्य सर्व्वतो वाजिराजिषु ।
रत्नमुच्चैःश्रवाश्चात्र हयानां पौरुषाधिकः ॥
ऐरावतो दन्तिराजश्चतुर्दन्तोऽत्र राजते ।
द्वितीय इव कैलासो जङ्गमः स्फाटिकोज्ज्वलः ॥
तरुरत्नं पारिजातः स्त्रीरत्नं सोर्व्वशी त्विह ।
नन्दनं वनरत्नञ्च रत्नं मन्दाकिनी ह्यपां ॥
त्रयस्त्रिंशत् सुराणां या कोटिः अतिसमीरिता ।
प्रतीच्छते सावसरं सेवायै प्रत्यहं त्विह ॥
स्वर्गेऽस्मिन्नपदान्यन्यद्विद्यन्ते किञ्चन ।
यद्यत् त्रैलोक्यमैश्वर्य्यं न तत्तुल्यमनेन हि ॥
अश्वमेधसहस्रस्य लभ्यं विनिमयेन यत् ।
किन्तेन तुल्यमन्यत् स्यात् पवित्रमथवा महत् ॥
अर्हिष्यती संयमनी पुण्यवत्यमलावती ।
गन्धवत्यलकैषी च नैतत्तुल्या महर्द्धिभिः ॥
अयमेव सहस्राक्षस्त्वयमेव दिवस्पतिः ।
शतमन्युरयन्देवो नामान्येतानि नामतः ॥
सप्तापि लोकपाला ये त एनं समुपासते ।
नारदाद्यैर्मुनिवरैरयमाश्रीरिरीड्यते ॥
एतत्स्थैर्य्यं सर्व्वेषां लोकानां स्थैर्य्यमिष्यते ।
पराजयान्महेन्द्रस्य त्रैलोक्यं स्यात् पराजितं ॥
मनुजा दनुजा दैत्यास्तपस्यन्त्युग्रसंयमाः ।
गन्धर्व्वयक्षरक्षांसि महेन्द्रपदलिप्सवः ॥
सगराद्या महीपाला वाजिमेधविधायकाः ।
हुतवन्तो महायज्ञं शक्रैश्वर्य्यं जिघृक्षवः ॥
निष्प्रत्यूहं क्रतुशतं यः कश्चित् कुरुतेऽवनौ ।
जितेन्द्रियोऽमरावत्यां स प्राप्नोति पुलोमजां ॥
असमाप्तक्रतुशता वसन्त्यत्र महीभुजः ।
ज्योतिष्टोमादिभिर्यागैर्यजन्त्यपि ते द्विजाः ॥
तुलापुरुषदानादिमहादानानि षोड़श ।
ये यच्छन्त्यमलात्मानस्ते लभन्तेऽमरावतीं ॥
अक्षीववदिनो धीराः संग्रामेष्वपराङ्मुखाः ।
विक्रान्ता वीरशयने तेऽत्र तिष्ठन्ति भूभुजः ॥
इत्युद्देशात् समाख्याता महेन्द्रनगरीस्थितिः ।
यायजूका वसन्त्यत्र यज्ञविद्याविशारदाः ॥
एतस्या दक्षिणे भागे येयं दृश्यते पूः शुभा ।
इमामर्द्धिश्रवीं वीक्ष्य वीतिहोत्रपुरीं शुभां" ॥
इति स्कान्दे काशीखण्डे १० अध्यायः ॥

अमर्त्यः, पुं, (न मर्त्यः, इति नञ्समासः ।) देवता, इत्यमरः ॥ (मरणधर्म्मरहितः । अक्षयः । अविनश्वरः ।)

अमर्त्यभुवनं, क्ली, (अमर्त्यानां देवानां भुवनं वासस्थानं ।) स्वर्गः । इति हलायुधः ॥

अमर्षः, पुं, (मृष + भावे घञ्, नञ्समासः । नास्ति मर्षः क्षोधो यस्य, चि, क्षोधशून्यः ।) क्षोधः । इत्यमरः ॥
("कस्मित्पिष्टवधामर्षात् पुनर्नोत्सादयिष्यति" ।
इति रामायणे । अक्षमा । असहिष्णुता । इत्यघाते असहिष्णुत्वं ।
"यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः" ॥
इति भगवद्गीता ।)

अमर्षणः, त्रि, (मृष + बाहुल्यात् कर्त्तरि ल्युट् नञ्समासः ।) क्षोधी । इत्यमरः ॥ (क्षोधनः । क्षोपनस्वभावः । अतिसंक्रुद्धः । प्रक्षोपितः ।
"रघोरवृश्चमभयेन पत्रिणा
हृदि क्षतोगोत्रभिदप्यमर्षणः" ।
इति रघुवंशे । असहनः । असहिष्णुः ॥ परक्षतापमानादेरसहनशीलः ।
"गत्वा क्रुदे वासुदेवेन सार्द्धं
अमर्षणं धर्षयतः सुतं मे" । इति महाभारते ।
"अमर्षणः शोणितकाङ्क्षया किं
पदा स्पृशन्तं दशति द्विजिह्वः" । इति रघुवंशे ।)

अमलं, क्ली, (नास्ति मलं यस्य तत् ।) अभ्रधातुः । निर्म्मले त्रि । इति मेदिनी ॥

अमला, स्त्री, (नास्ति मलं यस्याः सा, अथवा अम् + कलच् स्त्रियां टाप् ।) लक्ष्मीः । इति मेदिनी ॥ सातलावृक्षः । इति राजनिर्घण्टः ॥ भूम्यामलकी । इत्यमरः ॥ नाभिनाला । इति शिकाण्डशेषः ॥

अमसः, पुं, (अम गतिरोगादौ असच्।) कालः। निर्बोधः। रोगः। इत्युणादिकोषः॥ ("अमसो वालिशे काले रोगभेदे पुमानयं"। इति अमरः।)

अमा, व्य,, (न मा + का खरादिलादव्ययं।) सहार्थः। निकटं। इत्यमरः॥

अमा, स्त्री, (न मांति क्षयोदयविशेषं परिच्छिनत्ति, मा + क, नञ्समासः।) अमावस्या। इति त्रिकाण्डशेषः॥ चन्द्रमण्डलस्य षोड़शकला। तथा च स्कन्दपुराणीयप्रभासखण्डे।

"अमा षोड़शभागेन देवि प्रोक्ता महाकला। संस्थिता परमा माया देहिनां देहधारिणी"॥

अस्यार्थः। चन्द्रमण्डलस्य षोड़शभागेन परिमिता आधारशक्तिरूपा क्षयोदयरहितत्वात् नित्या सूत्रवत् सर्व्वानुस्यूता अमा नाम्नी महाकला प्रोक्ता। इति रघुनन्दनः॥ (सह। सार्द्धं। समीपं। निकटं। अन्तिकं।)

अमांसः, त्रि, (नास्ति मांसं यस्य सः।) दुर्ब्बलः। इत्यमरः॥ अल्पमांसयुक्तः। मांसरहितश्च॥ (क्षुद्रः। स्त्रीणकायः। निरामिषभक्षणवस्तु।)

अमात्यः, पुं, (अमा सह विद्यते, अमा + त्यप्।) मन्त्री। इत्यमरः॥ तत्परीक्षा। यथा,—

"शान्तो विनीतः कुशलः सत्कुलीनः शुभान्वितः। शास्त्रार्थतत्त्वगोऽमात्यो भवेद्भूमिभुजामिह"॥ इति युक्तिकल्पतरुः॥

("भृता हि पाण्डुनामात्या बलञ्च सततं भृतं। मान्यानन्यानमात्यांश्च ब्राह्मणांश्च तपोधनान्"॥ इति महाभारते।)

अमानं, क्ली, (मन् + णिच् + भावे ल्युट्, नञ्समासः।) अनादरः। न्यक्कारः। इति शब्दरत्नावली॥

("अतुष्टिदानं कृतपूर्ब्बनाशन-
ममाननं दुश्चरितानुकीर्त्तनं।
कथाप्रसङ्गेन च नामविस्मृति-
र्विरक्तभावस्य जनस्य लक्षणं"॥

इति हितोपदेशे।)

अमानस्यं, क्ली, (मानसाय मनसे हितं मानस + यत्, नञ्समासः।) दुःखं। पीड़ा। व्यथा। तद्युक्ते त्रि। इत्यमरः॥ आमनस्यं आमानस्यमपि पाठः॥

अमान्यः, त्रि, (मन् + कर्म्मणि ण्यत्, नञ्समासः।) अमाननीयः। अनादृत्यः। मान्यशब्दस्य नञा समासः॥

अमामसी, स्त्री, (अमा सह सूर्य्येण मासो यस्यां, गौरादित्वात् ङीष्। एषोदरादित्वात् रूपं।) अमावस्या। इत्यमरटीकायां रमानाथः॥

अमामासी, स्त्री, (अमा सह सूर्य्येण मासो यस्यां, गौरादित्वात् ङीष्।) अमावस्या। इत्यमरटीकायां रमानाथः॥

अमायिकः, त्रि, (न + माया + ठन्, तस्य इक।) मायारहितः। माया विद्यते यस्य स मायिकः ततो नञा समासः॥

अमावसी, स्त्री, (अमा, साहित्येन वसतस्सूर्य्याकौ यस्यां, अमा + वस + अधिकरणे गौरादित्वात् ङीष्।) अमावस्या। इति शब्दरत्नावली॥

अमावस्या, स्त्री, (अमा साहित्येन वसतस्सूर्य्याकौ यस्यां, अमा + वस + आधारे ण्यत् स्त्रियां टाप्।) क्षयपक्षान्ततिथिः। सा तु चन्द्रमण्डलस्य षट्दशकलाक्रियारूपा तत्क्रियोपलक्षितः कालो वा। इति तिथ्यादितत्त्वं॥ सूर्य्याचन्द्रमसोर्यः परः सन्निकर्षः सामावस्या। इति गोभिलः॥ परः सन्निकर्षश्च उपर्य्यधोभावापन्नसमसूत्रपातन्यायेन एकराश्यवच्छेदेन सहावस्थानरूपः। इति रघुनन्दनः॥ तत्पर्य्यायः। अमावास्या २। दर्शः ३। सूर्य्येन्दुसङ्गमः ४। इत्यमरः॥ पञ्चदशी ५। इति स्मृतिः॥ अमावसी ६। अमावासी ७। इति शब्दरत्नावली॥ अमामसी ८। अमामासी ९। इत्यमरटीकायां रमानाथः॥ सा दृष्टेन्दुकला सिनीवाली १०। नष्टेन्दुकला च कुहूः ११। इत्यमरः॥ तद्यवस्यादि यथा। अथामावस्या। सा च प्रतिपद्युता ग्राह्या युग्मात्। वराहपुराणे चाण्डालशूद्रप्रश्ने।

"यद्यस्त्यप्यमावास्या उभे पक्षे चतुर्दशी।
अश्नातानां गतिं यास्ये यद्यहं नागमे पुनः"॥

अतोऽत्र स्नानमावश्यकं। अतोऽत्र जीवत्पितृकेणापि स्नातव्यम्।

"अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनं।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत्"॥

इति वचनं रागप्राप्तस्नाननिषेधकं।

"भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः। तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु"॥

इति त्रयोदशीप्रकरणोक्तवचनाच्च॥ *॥ पैठिनसिः। "न पर्व्वसु तैलं क्षौरं मांसमभ्युपेयात् नामावास्यायां हरितमपि छिन्द्यात्"। इति॥ *॥

"पुत्रे तु जन्मनक्षत्रे व्यतीपाते च वैधृतौ।
अमायाञ्च नदीस्नानं पुनात्यासप्तमं कुलं"॥

अत्र दहत्यजन्मदुष्कृतमिति ज्योतिषे पाठः॥*॥ व्यासः।

"अमावास्यां भवेद्यत्नो यदि भूमिसुतस्य च।
गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी"॥

"सिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत्।
गोसहस्रफलं दद्यात् स्नानं यन्नौनिना कृतम्"॥

सिनीवाली चतुर्दशीयुक्तामावास्या व्यक्तापि प्रशस्ता एवमन्यत्रापि वारविशिष्टविधौ न युग्मादरः निरवकाशत्वेन संज्ञायायोगात्। एतच्च मौनमरुणोदयकालमारभ्य स्नानपर्य्यन्तं। न तु स्नानकालमात्रे।

तत्र,

"उच्चारे मेथुने चैव प्रस्रावे दन्तधावने।
स्नाने भोजनकाले च षट्सु मौनं समाचरेत्"॥

इति स्नान्देन तस्य सामान्यतः प्राप्तत्वात्। उच्चारे पुरीषोत्सर्गे॥ *॥ स्मृतिः।

"करतोयाजलं प्राप्य यदि सोमयुता कुहूः।
अरुणोदयवेलायां सूर्य्यग्रहसमा मता"॥

स्नानमन्त्रः।

"करतोये सदानीरे सरित्श्रेष्ठे सुविश्रुते।
पौण्ड्रान् ज्ञापय से नित्यं पापं हर करोद्भवे"॥ पौण्ड्रान् देशविशेषान्॥ *॥ मरीचिः।

"मासे नभस्यमावास्या तस्यां दर्भचयो मतः।
अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः"॥ अत्र।

"दर्भाः क्षौमाजिनं मन्त्रा ब्राह्मणा हविरग्नयः।
अयातयामान्येतानि नियोज्यानि पुनः पुनः"॥

इति ग्रह्मपरिशिष्टवचनेनैव सिद्धौ आवश्यामावास्याया उपादानं।

"वार्षिकांश्चतुरो मासान्नाहरेत् कुशसन्ततिकाः।
आददीत त्वभावेऽपि सद्यो यस्योपयोजनं"॥

इति संवत्सरप्रदीपधृतशिवरहस्यीयस्यापवादकमिति॥ विद्याकरधृतं।

"सङ्क्रान्तेरन्तरं यावत् शुद्धिः स्यादिग्वहिर्मता।
ततः परं न गृह्णीयात् जपादौ यज्ञकर्म्मणि"॥*॥ संवत्सरप्रदीपे।

"अमावास्यान्तु कन्यार्के तीर्थप्राप्तौ तथा नरः।
कृत्वा श्राद्धं विधानेन दद्यात् षोड़शपिण्डकं"॥ तत्प्रमाणप्रयोगौ षोड़शीशब्दे द्रष्टव्यौ॥*॥ अमावास्यायामपि मलमासे श्राद्धाभावमाह कौथुमिः।

"संवत्सरातिरेको वै मासो यः स्यात्त्रयोदशः।
तस्मिंस्त्रयोदशे श्राद्धं न कुर्य्यादिन्दुसंक्षये"॥ सम्वत्सरप्रदीपे।

"एकराशिस्थिते सूर्य्ये यदि दर्शद्वयं भवेत्।
दर्शश्राद्धं तदादौ स्यान्न परत्र मलिम्लुचे"॥ यत्तु।

"जातकर्म्मणि यत् श्राद्धं दर्शश्राद्धं तथैव च।
मलमासेऽपि तत्कार्य्यं व्यासस्य वचनं यथा"॥

इति व्यासवचनं तत्पिण्डपितृयज्ञाख्यश्राद्धपरं॥*॥ अमावास्याश्राद्धकालमाह छन्दोगपरिशिष्टं।

"पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि ग्रस्यते।
वासरस्य तृतीयांशे नातिसन्धासमीपतः"॥

पिण्डानां पितॄणां अन्वाहार्य्यं श्राद्धं मासैकदृष्टिजनकं यत्तत्तथा। तथा च मनुः।

"पिण्डानां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः"। राजनि चन्द्रे। ग्रस्यत इत्यनेन क्वचिच्चन्द्रक्षयाभावेऽपि अमावास्याश्राद्धं सूचितं। एतादृग्व्युत्पत्तेः साग्निरग्निसाधारणत्वात् वक्ष्यमाणकात्यायनोक्तरीत्या क्षीणाक्षभिन्नतावद्भागभेदः साधारणः॥ *॥ यत्तु,—

"पितृयज्ञन्तु निर्व्वर्त्त्य विप्रस्वन्नक्षयेऽग्निमान्।
पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकं"॥

इति मनुवचनं तत्साग्निः पिण्डपितृयज्ञं निर्व्वर्त्त्य मासानुमासिकं प्रतिमासिकं श्राद्धं कुर्व्वीतेतिक्रमविधायकं। अत्रानुग्रहस्य वीप्सार्थकत्वं। तथा च।

"लक्षणवीप्सेत्यभूतेष्वभिर्भागे परिप्रती।
अनुरेषु सहार्थे च हीने उपरि कथ्यते"॥

चन्द्रक्षयेऽमावास्यायां न तु कात्यायनोक्तक्षये

तथात्वे वर्द्धमानादौ प्रतिमासानुपपत्तेः। एवमेव आद्धविवेकः। अतएव तत्रैवामावास्याव्यतिरिक्तक्षयापक्षविहितपार्व्वणश्राद्धे ययास्तमिति वचनात् व्यवस्थेयुक्तं। तत्र साग्निकर्त्तृकत्वाविशेषितामावास्याव्यतिरेकाभिधानात् क्षीणादिभेदेन व्यवस्था साग्निनिरग्निसाधारणीत्यवगम्यते। एवञ्चामावास्यायां मृताग्निनिमित्तक औरसक्षेत्रजगुप्तकर्त्तृव्यपार्व्वणे क्षीयमाणादिना न व्यवस्था किन्तु ययास्तमित्यनेन। एतद्धृतं मलमासतत्त्वे ॥ * ॥

यत्तु दशममुहूर्त्तस्य मत्स्यपुराणोक्तापराह्णिकत्वेऽपि श्राद्धे तस्य त्यागः। पिण्डपित्र्ययार्थं एवेति वासरछतीयांशाभिधानं साग्निपरमेवेति परिशिष्टप्रकाशोक्तं तन्न युक्तं। पूर्व्वाह्णो वै देवानां मध्यं दिनं मनुष्याणां अपराह्णः पितॄणां इति श्रुत्या तन्मुहूर्त्तस्य मनुष्यकर्म्माङ्गत्वेन बोधनादेव श्राद्धे परित्यागः। एतच्छ्रुतिमूलकमेव वासरस्य छतीयांशे त्रिधा विभक्तस्य दिनस्य छतीयभागे नातिसन्ध्यासमीपत इति सन्ध्यासमीपैकमुहूर्त्त श्रापद्यपि वर्ज्जनीय इत्यर्थः। तेन।

"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परं॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु"॥

इति मत्स्यपुराणे निषिद्धमुहूर्त्तत्रये आपदि मुहूर्त्तद्वयमभ्यनुज्ञातं अतिशब्दस्वरसात्। "त्रिमुहूर्त्तापि कर्त्तव्या पूर्व्वा दर्शा च बह्वृचैः"। इति हारीतवचनाच्च। तेन पूर्व्वदिने मुहूर्त्तत्रयमाप्तलाभे परदिने वासरस्य छतीयांशालाभे पूर्व्वदिने एव श्राद्धं। एतेन नातिसन्ध्यासमीपत इत्यनेन रात्रसीवेलामात्रं निषिध्यत इति मैथिलमतमपास्तं। सर्व्वकर्म्मसु स्नानदानादिष्वपि अनापदीत्यर्थः। इति श्राद्धविवेकः॥ तेनाग्नौ तस्यामपि तत्करणं। अतएव पराशरः।

"दिवाकरकरैः पूतं दिवास्नानं प्रशस्यते।
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्"॥

इति ॥ * ॥ दर्शद्वैधे कुत्र श्राद्धमित्याह छन्दोगपरिशिष्टे कात्यायनः।

"यदा चतुर्दशीयामं तुरीयमनुपूरयेत्।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते"॥

चतुर्दशीयामं चतुर्दशीसम्बन्धिदिनयाममिति तद्दिनस्यामावास्यासम्बन्धेऽपि चतुर्दशीनिर्देशोऽधिकेन व्यपदेशा भवन्तीति न्यायात्। तेन यदा अमावास्याचतुर्दशीसम्बन्धिदिनस्य चतुर्थं प्रहरं छन्यं किञ्चिन्यूनं वा अनुपूरयेत् अत्रानुपूरयेदित्यभिधानात् तुरीययामस्य पादोनदण्डद्वयान्यूनप्रथममुहूर्त्तस्य बहुकालत्वं प्रतीयते। एतेन प्रहरत्रयाभ्यन्तरे किञ्चिदधिकप्रहरत्रये वा चतुर्दशी प्रतीयते। ततश्चोभयवासरीयछतीयांशसम्बन्धिपञ्चधाविभक्तापराह्णमुहूर्त्तयोर्मुहूर्त्तान्यूनदर्शलाभे दैधं न त्वेकदिनमात्रे तल्लाभे। तत्र पूर्व्वोक्तेन वासरस्य छतीयांशे इत्यनेनैव दैधानुदयात्। अतो यद्दिने वासरछतीयांशे तादृग्दर्शलाभस्तत्रैव श्राद्धं। मुहूर्त्तोनतिथेस्तु कर्म्मानर्हत्वान्न दैधावसरः। तथा च भविष्ये।

"व्रतोपवासनियमे घटिकैका यदा भवेत्।
सा तिथिः सकला ज्ञेया पित्र्यर्थे चापराह्णिकी"॥

इति। अत्र च प्रागुक्तजाबालिवचनोक्ता मुहूर्त्तात्मिका घटिका ग्राह्या योग्यत्वात् न त्वेकदण्डात्मिका। वक्ष्यमाणरौहिणादिग्रहणे तथा दृष्टत्वाच्च। ततश्च पूर्व्वोक्तद्वैधे तद्दिवसीयचतुर्दश्यपेक्षया परदिने अमावास्या क्षीयमाणा न्यूनकालव्यापिनी न तु पूर्व्वापरदिवसीययावच्चतुर्दश्यपेक्षया अनुपस्थितेः। एवं स्तम्भितावर्द्धमानयोरपि। तदैव पूर्व्वदर्श एव श्राद्धं। खोल्कचन्द्रक्षयानुरोधात्। यदा त्रिंशद्घटात्मकदिवसे चतुर्दश्यधिकचतुर्थयामपूरणे मुख्यापराह्णीयकिञ्चिन्यूनमुहूर्त्तलाभस्तदापि तदैवेत्यनेन चन्द्रक्षयानुरोधात् पूर्व्वदिने श्राद्धं न तु मुख्यापराह्णीयमुहूर्त्तलाभेऽपि परदिने। अत्र चन्द्रक्षयश्चतुर्दश्यमयामात् प्रभृति अमावास्यासप्तमयामपर्य्यन्तमिति वक्ष्यते। तदैवेत्येव श्रवणात्तिथिद्वैधे खण्डविशेषो नियम्यते कर्म्मणि खण्डान्तरव्युदासाय। एवञ्च यत्र पूर्व्वापरदिने वासरछतीयांशीयमुख्यापराह्णे मुहूर्त्तोनदर्शलाभस्तत्रापि पूर्व्वदिन एव श्राद्धं वासरछतीयांशचन्द्रक्षयातिशब्दस्वरसात्। त्रिमुहूर्त्तापीत्यनुरोधाच्च। यत्र तु पूर्व्वदिने त्रिमुहूर्त्तमात्रव्यापिन्यमावास्या परदिने छतीयांशमुहूर्त्तव्यापिनी सती क्षीयमाणा तत्र परदिने चन्द्रक्षयाभावेऽपि मुख्यापराह्णलाभात् श्राद्धम्। अन्यथा,—

"यदा चतुर्दशीयामं तुरीयमनुपूरयेत्"।

इति विशेषाभिधानं व्यर्थं स्यात् ॥ * ॥

अथ "यत्र पूर्व्वाह्णे श्राद्धं तत्र यदहस्त्वेव चन्द्रमा न दृश्येत ताममावास्यां कुर्व्वीत" इति गोभिलविरोधः। तथाविधचतुर्दशीयुक्तामावास्यायाः सिनीवालीत्वेन प्रातश्चन्द्रदर्शनात्। तत्राह सत्यव्रतः।

"यदुक्तं यदहस्त्वेव दर्शनं नेति चन्द्रमाः।
तत्क्षयापेक्षया ज्ञेयं क्षीणे राजनि चेत्यपि"॥

"यदहस्त्वेव चन्द्रमा न दृश्येत तामामावास्यां कुर्व्वीत" इति यद्गोभिलसूत्रं तच्चन्द्रक्षयाभिप्रायिकम्। अन्यथा गोभिलीयतादृग्सूत्रान्तरेण सह पौनरुक्त्यापत्तेः। तस्मात् प्रथमसूत्रं कुहूपरं तत्र वर्द्धमानापक्षे नियतं। क्षीणास्तम्भितयोस्तु यथायोग्यमनुसरणीयम्। एवञ्च "यदहस्त्वेव चन्द्रमा न दृश्येत तामामावास्यां कुर्व्वीत" इति श्रुतिरेतत्समानार्थकं अन्यत्तरं वा तदपि वर्द्धमानादिपरं न तु कात्यायनवचनात्तत्र क्षयलक्षणा कल्पनरूपप्रवृत्तिविरुद्धायुक्ता।

"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसि"।

इति विरोधात्। क्षीण इति कात्यायनेन मया यत् क्षीणे राजनीत्युक्तं तदपि क्षयाभिप्रायकम्। अथैवं दृश्यमानेऽप्येकदा इति यद्गोभिलस्य सूत्रान्तरं तद्व्यर्थम्। "यदहस्त्वेव" इत्यादि द्वितीयसूत्रप्राप्ततिथेः सिनीवालीत्वेनैव चन्द्रदर्शनप्राप्तेरित्यत आह स एव।

"यच्चोक्तं दृश्यमानेऽपि तच्चतुर्दश्यपेक्षया।
अमावास्यां प्रतीक्षेत तदन्ते वापि निर्व्वपेत्"॥

दृश्यमानेऽप्येकदेति यदुक्तं तच्चतुर्दश्यां श्राद्धाय पूर्व्वसूत्रममावास्यापदोपादानाच्चन्द्रक्षये सत्यमावास्याविषयं। इदं पुनरित्थम्भूतचतुर्दशीविषयमिति श्राद्धविवेकः। तत् किममावास्यावच्चतुर्दशीत्यत्राह अमावास्यां प्रतीक्षेत उभयतिथिप्राप्तौ श्राद्धायामावास्या प्रतीक्षणीया। यत्र पूर्व्वदिने दिवा सार्द्धमुहूर्त्तमात्रे अमावास्या परदिने च सार्द्धदशममुहूर्त्तमात्रे तत्र चोभयदिने श्राद्धयोग्यामावास्या न प्राप्यते तत्र तदन्त चतुर्दश्यन्ते निर्व्वपेत् दद्यात् ॥ * ॥ अत्रैव विषये साग्निनिरग्न्योर्व्विशेषमाह कालमाधवीये जाबालिः।

"अपराह्णव्याप्यापि यदि दर्शस्तिथित्रये।
आहिताग्नेः सिनीवाली निरग्नेरादेः कुहूर्भवेत्"॥

आदिशब्दादनुपनीतशूद्रगोत्रहणं ॥ * ॥ क्षयमाह कात्यायनः।

"अष्टमेऽह्नि चतुर्दश्याः क्षीणो भवति चन्द्रमाः।
अमावास्यान्तमांशे च ततः किल भवेदृषुः"॥

चतुर्दश्यष्टमे यामे चन्द्रमाः क्षीण चतुर्थभागोनकलावशिष्टो भवति। "अचेन्दुराद्ये प्रहरेऽवतिष्ठते" इत्यादिस्वरसात्। अमावास्याष्टमे यामे चागुर्भवति पुनरुत्पद्यते किलेत्यागमवार्त्तायां तेन अमावास्यायाः सप्तमे यामे क्षयत्वक्षय इत्यवगम्यते। "ततश्चान्त्यकलावयवनाशेत्पत्तिरेव क्षयः सा च सूक्ष्मतायां विनाशेऽप्यस्तीति" श्राद्धविवेकः॥ उत्पत्तिराद्यक्षणसम्बन्धः। तेन विनाशस्यानन्तत्वेऽपि नातिव्याप्तिः ॥ * ॥ अत्र विशेषमाह स एव।

"आद्यहायणमावास्या तथा ज्यैष्ठस्य या भवेत्।
विशेषमाभ्यां ब्रुवते चन्द्रचारविदो जनाः"॥

आभ्यामिति ल्यब्लोपे पञ्चमी इमे प्राप्येत्यर्थः। चन्द्रचारविदो ज्योतिर्व्विदः। अत्र पौर्णमास्यान्तमास इति परिशिष्टप्रकाशः॥ अत्र बीजं ब्रह्मपुराणीयतिथिक्षयं। तथा च श्राद्धमधिकृत्य ब्रह्मपुराणं।

"पयोमूलफलैः शाकैः क्षयापक्षे च सर्व्वदा"।

अत्र क्षयापक्षे चतुर्दशीव्यतिरिक्तायां यस्यां कस्यांचित् तिथौ श्राद्धविधानादमावास्यापि लभ्यत इति ॥ * ॥ को विशेषइत्यत्राह स एव।

"अचेन्दुराद्ये प्रहरेऽवतिष्ठते
चतुर्थभागोनकलावशिष्टः।
तदन्त एव क्षयमेति क्षत्क्ष-
मेवं ज्योतिश्चक्रविदो वदन्ति"॥

अत्र मासदये अमावास्यायां चतुर्थभागोनकलावशिष्टः चतुर्थभागोना या कला तयावशिष्टः कलाभागत्रयमात्रः सन्नाद्ये प्रहरेऽवतिष्ठते। अर्थात् चतुर्दश्यष्टमयामे क्षयारम्भ इति। तदन्त एव अमावास्यान्तयाम एव क्षयं क्षत्क्षमेति। अन्य-

चामावास्या सङ्गमयाम इति विशेषः। तेन मार्गशीर्षज्येष्ठयोरुभयदिने चन्द्रक्षयलाभे यद्यपि यदा चतुर्दशीयाममिति वचनात् पूर्व्वदिने एव आद्धं प्राप्नोति तथापि तद्वचनं चन्द्रक्षयानुरोधमूलमिति। क्षतक्षयानुरोधात् क्षीणायामपि परत्रापराह्णलाभे आद्धं अन्यथैतद्विशेषाभिधानं व्यर्थं स्यात्। * ॥ अत्रापि विशेषान्तरमाह स एव। यस्मिन्वब्दे द्वादशैकश्च यत्यस्मिंस्तृतीयया परिदृश्यो नोपजायेत। यथो मासः। तृतीयया मात्रया चतुर्थभागोनकलया परिदृश्यश्चन्द्रो न भवति किन्तु तदधिकन्यूनकलयेति। तेन मलमासयुताब्दे अन्यमासवदनयोरपि चतुर्दशक्षयतयादि दर्शसप्तमयामपर्य्यन्तं क्षय इति। मलमासयुताब्दस्तु एकस्मान्मलमासादब्दद्वयानन्तराब्दस्तृतीयेऽब्दे मलमासस्यावश्यम्भावादिति ॥ * ॥ चन्द्रक्षयानुरुद्धं क्षीणापक्षमुपसंहरति स एव।

"एवं चारं चन्द्रमसो विदित्वा
क्षीणे तस्मिन्नपराह्णे च दद्यात्"।

एवं चारं गतिविशेषं ॥ * ॥ क्षम्भितायां व्यवस्थामाह स एव।

"सम्मिश्रा या चतुर्दश्या अमावास्या भवेत् क्वचित्।
खर्व्वितां तां विदुः केचिदुपेष्यमिति चापरे" ॥

क्षीणायाः पूर्व्वमुक्तत्वात् वर्द्धमानायाश्च वक्ष्यमाणत्वात् अस्य वचनस्य क्षम्भितापरत्वं। खर्व्वितां नीचां पिटलोकप्रापणानर्हां केचित् यजुर्व्वेदिनः। अपरे ऋग्वेदिनः तामेव उपेष्यमुपगच्छत श्राद्धायेति शेषः। उपेष्यमित्यत्र गताध्वामितिपाठे गतः प्राप्तः पिटलोकप्रापणाय अध्वा अनयेति गताध्वा प्रशस्तेत्यर्थः। "तस्माच्छन्दोगा उभयानुरोधादिच्छात उभयादरं कुर्व्वन्ति" इति कात्यायनसूत्रस्तः ॥ * ॥ व्यक्तमाह लघुहारीतः।

"त्रिमुहूर्त्तापि कर्त्तव्या पूर्व्वा दर्शा च षड्गुणैः।
कुहूरध्वर्युभिः कार्य्या यथेष्टं सामगैरिति" ॥

अत्र त्रिमुहूर्त्तेत्युपादानात् क्षम्भितायां पूर्व्वदिने त्रिमुहूर्त्तमात्रलाभेऽपि बह्वृचानां आद्धं। न तु मुख्यापराह्णलाभादपि परदिने। सामगानां तत्रापि नियमः। एतादृग्विषय एव उभयत्रापराह्णलाभेऽपीयं व्यवस्थेति श्राद्धविवेकः। मुख्यापराह्णस्य एकदिनमात्रलाभेऽप्युभयदिनलाभात् ॥ * ॥ वर्द्धमानायां व्यवस्थामाह कात्यायनः।

"वर्द्धमानाममावास्यां जन्त्येदपरेऽहनि।
यामांस्त्रीनधिकान् वापि पिटयज्ञस्ततो भवेत्" ॥

यामांस्त्रीनिति पूर्व्वदिवसीययामत्रयन्यूनचतुर्दशपेक्षया। अथैवं वासरटतीयांश्रानुरोधेन श्राद्धविधानात् कथममावास्याश्राद्धे पर्युदस्तरात्र्यादीतरकालपरिग्रहः। सत्यं। तिथिदैधे क्षीणादिभेदेन खण्डविशेषपरिग्रहाय वासरटतीयांश्राप्रेक्षा अन्यथोभयदिने वासरटतीयांश्राप्राप्तौ श्राद्धलोपापत्तेः। प्रागुक्तनिरभ्रादेः कुहूर्म्मतेत्यस्य निर्विषयतापत्तेश्च अतः पर्य्युदस्तेतरकालस्यापि परिग्रहः। यदा तु पूर्व्वापरखण्डयोरन्यतरस्यैव परिग्रहस्तदा यथायोग्यं तत्रैव तथा-

क्रमुहूर्त्तदयपर्य्युदस्तेतरकालकुतपादिमुहूर्त्तपञ्चकरौहिण्यादिमुहूर्त्तचतुष्टयवासरटतीयांश्रीयापराह्णमुहूर्त्तदयकालाः। यथाक्रममापस्तम्बसामान्यप्रशस्तप्रशस्ततर-प्रशस्ततमत्वेन ज्ञेयाः। एवमखण्डतिथावपि नातिसन्ध्यासमीपत इति पूर्व्वोक्तत्वात्।

"सायाह्नस्त्रिमुहूर्त्तः स्यात् आद्धं तत्र न कारयेत्"।

इति मत्स्यपुराणात्।

"रात्रौ आद्धं न कुर्व्वीत राक्षसी कीर्त्तिता हि सा।
सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाचिरोदिते" ॥

इति मनुवचनाभ्यां।

"ऊर्द्धं मुहूर्त्तात् कुतपात् यन्मुहूर्त्तचतुष्टयं।
मुहूर्त्तपञ्चकं वापि स्वधाभवनमिष्यते" ॥

इति मत्स्यपुराणान्मुहूर्त्तपञ्चकमित्यत्र कुतपादिति ल्यब्लोपे पञ्चमी कुतपमारभ्येत्यर्थः। ततस्तेनैव।

"अपराह्णे तु सम्प्राप्ते अभिजिद्रौहिणोदये।
यदत्र दीयते जन्तोस्तदत्ययमुदाहृतं" ॥

इत्युक्तं। "पूर्व्वाह्णो वै देवानां मध्यं दिनं मनुष्याणां अपराह्णः पिटृणां"। इति श्रुतिः। वासरस्य टतीयांश इति कात्यायनवचनं।

"सायाह्नस्त्रिमुहूर्त्तः स्यात् आद्धं तत्र न कारयेत्"

इत्येतामेकवाक्यत्वात् वासरटतीयांशीयापराह्णमुहूर्त्तदयस्य लाभः। इति तिथ्यादितत्त्वं।

अमावासी, स्त्री, (अमा साहित्येन चन्द्रार्कौ यत्रां वसतो यत्र तिथौ सा, अमा + वस + आधारे ण्यत्, स्त्रियां टाप्। णित्वात् वृद्धिः।) अमावसीतिथिः। इत्यमरः॥

अमिचः, पुं, (अमरोगे इचच्।) शत्रुः। इत्यमरः॥ (रिपुः। विपक्षः। शत्रुपक्षीयः। प्रतिकूलः।

"भाटरूपे ममामित्रे दर्शसे राज्यकामुके।
अमित्रो मित्ररूपेण भ्रातुस्त्वमसि लक्ष्मण"॥

इति रामायणे।)

अमिषं, क्ली, (अम् रोगे कर्म्मणि इषन्) लौकिकसुखं। इत्युणादिकोषः॥ क्षणाभावः॥ (न मिश्रश्चं नञ्समासः, क्षणनाभावः। नास्ति मिश्रश्चं यस्य तत्, क्षणशून्यः।)

अमी, [न्] त्रि, (अम् रोगे + भावे घञ्, मान्तत्वात् वृद्धिभावः, अमो रोगो विद्यतेऽस्य, इन्।) रोगी। यथा। अम्यर्यं। इति वोपदेवः॥

अमीवं, क्ली, (अम + वन्, ईड़ागमः।) पापं। दुःखं। यथा,—

"तं त्वाहं भवभीतानां प्रपन्नानां भयापहं।
आपृच्छे शापनिर्म्मुक्तः पादस्पर्शादमीवहन्"॥

इति श्रीभागवतं॥

("न हि त्वमीदृशं ज्ञात्वा तस्यामीवं दशानन।
जीवितुं शक्यसि चिरं विषं पीत्वेव दुर्म्मतिः"॥

इति रामायणे।)

अमुकं, त्रि, बुद्धिस्थत्वोपनीतत्वतत्तद्धर्म्मावच्छिन्नं। खण्डवृत्तिविशेषधर्म्मपरत्वादेव तत्तदनुवाचकं। यथा इति भाषा। अदस्शब्दस्य अकि कृते

सेरोत्त्वाभावे अकोऽकारस्य उत्त्वे अमुक इति भवति अमुक इत्यागमिकं। इति क्रमदीश्वरः॥ यथा,—

"अमुकामुकगोत्रैतत् तुभ्यमन्नं स्वधा नमः"।

इति आद्धतत्त्वं॥ (अभिवादये इति शब्दोच्चारणानन्तरं अमुकनामाहमस्मीति स्वं नाम परिकीर्त्तयेत्। इति कुल्लूकभट्टः।

"संनिवेश्यं प्रमाणञ्च स्वहस्तेन लिखेत् स्वयम्।
मतं मेऽमुकपुत्रस्य अमुकस्य महीपते"॥

इति नारदः।)

अमुक्कं, क्ली, (मुच् + क्तः, न मुक्तः विरोधे नञ्समासः।) कुरिकाविशेषः। इति हलायुधः॥ हातकुरी इति भाषा। मुक्तिरहिते अत्यक्ते च त्रि॥ (अप्राप्तमोचनः। अखतन्त्रः।

"अमुक्ता भवता नाथ मुहूर्त्तमपि सा पुरा"।

इति साहित्यदर्पणे।

"अमुक्तो मानसैर्दुःखैरिच्छाद्वेषसमुद्भवैः"।

इति महाभारते। खड्गादिकं। यदुक्तम्,—

"खड्गादिकममुक्तञ्च नियुद्धं विगतायुधम्"।

इति।)

अमुत्र, व्य, (अमुष्मिन् अदस् + त्रल् उत्त्वमत्वे।) जन्मान्तरं। परलोकः। इत्यमरः॥ (अमुष्मिन् इत्यर्थस्य वाचकः।

"अनेनैवार्भकाः सर्व्वे नगरेऽमुत्र भक्षिताः"।

इति कथासरित्सागरे। भवान्तरे। जन्मान्तरे।

"तथैव यः त्यजेत्कालं त्यजियो गोपशाम्यति।
अप्रियः सर्व्वभूतानां सोऽमुत्रेह च नश्यति"।

"इच्छद्भिः सततं श्रेय इह चामुत्र चोत्तमं"॥

इति महाभारते।)

अमुष्यपुत्रः, पुं, स्त्री, (अमुष्य पुत्रः निपातनात् अलुक् समासः।) प्रख्यातवंशोद्भवः। कुलीनः। इति जटाधरः॥

("स्यादामुष्यायणस्त्वार्थोऽमुष्यपुत्रो महाकुलः"।

इति जटाधरः।)

अमूर्त्तः, त्रि, (मूर्च्छ + क्तः, नञ्समासः।) मूर्त्तिभिन्नः। मूर्त्तिरहितः। यथा। सङ्ख्या अमूर्त्तत्वादिति वोपदेवः॥ न्यायमते। आकाशं। कालः। दिक्। आत्मा। एषां सामान्यगुणाः संख्या १ परिमितिः २ एथक्त्वं ३ संयोगः ४ विभागः ५। आकाशस्य विशेषगुणः शब्दः। कालादिग्रोर्विशेषगुणो नास्ति आत्मनो विशेषगुणाः। बुद्धिः १ सुखं २ दुःखं ३ इच्छा ४ द्वेषः ५ यत्नः ६ भावनाख्यसंस्कारः ७ धर्म्मः ८ अधर्म्मः ९। इति भाषापरिच्छेदः॥ (रूपहीनः। आकृतिरहितः। वायुः। अन्तरीक्षञ्च। यदुक्तं,—

"सन्निवेशो नेत्रदृश्यो यस्य तन्मूर्त्तमुच्यते।
क्षितिरम्बुत्रियं मूर्त्तममूर्त्तं वितरत्रयं"॥ इति।

"क्षितिर्जलं तथा तेजः पवनो मन एव च।
परापरत्वमूर्त्तत्वक्रियायोगाश्रया अमी"॥

इति भाषापरिच्छेदः।)

अमूदृशः, त्रि, (यादृशिमिते तु, अमुमिव पश्यति, अदस् + दृश् + क्विन्, दृश्यादेशे आत्वे कृते ततः

ऊत्वमते ।) एवंप्रकारः । एतद्रूपः । इति मुग्धबोधं ॥ यथा,—"अमूदृशी तत् कविवन्दिवर्णितैः" । इति नैषधं ॥

अमूलकं, त्रि, मूलरहितं । प्रमाणशून्यं । नास्ति मूलं यस्येति बहुव्रीह्यर्थे कप्रत्ययः ॥

अमूला, स्त्री, (नास्ति मूलं शिफ. यस्याः सा, स्त्रियां टाप् ।) अग्निशिखावृक्षः । इति शब्दचन्द्रिका ॥ मूलरहिते त्रि । इति मुग्धबोधं ॥

अमृणालं, क्ली, (मृणालतुल्यं सादृश्ये नञ्समासः, तस्य मृणालसदृशकोमलत्वात् तथात्वं ।) वीरणमूलं । इत्यमरः ॥

अमृतं, क्ली, (म्र+भावे क्तः, नास्ति मृतं मरणं यस्मात् तत्, तत्पायिनां मरणाभावात् तस्य तथात्वं ।) समुद्रोद्भवदेवभक्ष्यामरत्वजनकद्रव्यविशेषः । यदा पृथुराजभयेन पृथ्वी गौर्भूता तदा देवा इन्द्रं वत्सं कृत्वा हिरण्मययात्रे अमृतरूपम्यथोऽदुदुहन् तत्तु दुर्व्वाससः शापात् समुद्रमध्यं गतं पश्चात् समुद्रमथने अमृतपूर्णकलसंग्रहीत्वा धन्वन्तरिरुत्थितः । इति भारतभागवते ॥ तत्पर्य्यायः ॥ पीयूषं २ सुधा ३ । इत्यमरः ॥ पेयूषं ४ । इति तट्टीकासारसुन्दरी ॥ * ॥ निर्जरं ५ । समुद्रनवनीतकं ६ । इति शब्दरत्नावली ॥ जलं । घृतं ॥ यज्ञीयद्रव्यं ॥ अयाचितवस्तु ॥ मुक्तिः । इति मेदिनी ॥ दुग्धं । औषधं । विषसामान्यं । वत्सनाभः । पारदः । इति राजनिर्घण्टः ॥ अन्नं । धनं । स्वर्गः । भक्ष्यीयद्रव्यं । हृद्यं । स्वादुद्रव्यं । इति हेमचन्द्रः ॥

अमृतः, पुं, (म्र+कर्त्तरि क्तः, नञ्समासः ।) धन्वन्तरिः । देवता । इति मेदिनी । वाराहीकन्दः । वनसूद्गः । इति राजनिर्घण्टः ॥ सुन्दरः । अतिहृद्यः । इति भरतधृतधाड़िः ॥ (आत्मा, यथा महाभारते,—

"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
महतः परमव्यक्तमव्यक्तादमृतः परः ।
अमृतान्न परं किञ्चित् सा काष्ठा सा परा गतिः" ॥

सूर्य्यः ॥ सुरपतिरिन्द्रः ॥ विष्णोः सहस्रनाममध्ये परिगणितो नामभेदः ॥) मरणरहिते त्रि । यथा । "अमृते जारजः कुणपः" । इत्यमरः ॥

अमृतजटा, स्त्री, (अमृतवत् सुस्वादुर्जटा यस्याः सा ।) जटामांसी । इति राजनिर्घण्टः ॥

अमृततरङ्गिणी, स्त्री, (अमृतस्य पीयूषस्य तरङ्गिणी नदीव ।) ज्योत्स्ना । इति राजनिर्घण्टः ॥

अमृतदीधितिः, पुं, (अमृतवत् सन्तोषकारिण्यः दीधितयो यस्य सः ।) चन्द्रः । इति शब्दरत्नावली ॥ ("अमृतदीधितिरेष विदर्भजे भजति तापमसुख्यं" । इति नैषधे ।)

अमृतफलं, क्ली, पुं, (अमृतमिव स्वादु फलं ।) पारावतवृक्षः । पटोलः । इति राजनिर्घण्टः ॥ नासपाती । इति पारस्य भाषा । यथा । अथाम्रतफलं यदृक्कसातक्रविलप्रभृतिदेशेषु नासपाती इति प्रसिद्धं ।

"अमृतफलं लघु हृद्यं सुस्वादु त्रीन् हरेद्दोषान् ।
देशेषु मुद्गलानां बल्लं तल्लभ्यते लोकैः" ॥
इति भावप्रकाशः ॥

अमृतफला, स्त्री, (अमृतवत् स्वादु फलं यस्याः सा, स्त्रियां टाप् ।) द्राक्षा । आमलकी । इति राजनिर्घण्टः ॥ (लघुखर्ज्जूरीवृक्षः । बलविशेषः । नासपाती । इति पारस्यभाषा ।

अमृतवल्ली, स्त्री, (अमृतवत् वल्ली, तस्या रोगनाशकत्वात् तथात्वं ।) गुडूची । इति रत्नमाला ॥

अमृतरसा, स्त्री, (अमृतवत् स्वादुः रसो यस्याः सा, स्त्रियां टाप् ।) कपिलद्राक्षा । इति राजनिर्घण्टः ॥ (पक्वान्नविशेषः ॥ सा च
"तृतीयभागखण्डेन मिश्रितं घस्रिपिण्डकं ।
शुभ्रमीषद्घृतयुतं मर्द्दयेद्दृढपाणिना ॥
एवं समुद्धृतं कृत्वा स्थापयेद्भाजनीमितं ।
ततोऽन्यस्मिन्नहनि तु चित्रितं निस्त्वचैस्तिलैः ॥
विधायापूपकं तेन तम्बिकायां हृते पचेत् ।
ततोऽमृतरसा जाता वातहृद्बलवर्द्धिनी" ॥
इति भावप्रकाशे ।)

अमृतसम्भवा, स्त्री, (सम्+भू+भावे अप्, अमृतस्य मरणाभावस्य रोगाभावस्य इति यावत् सम्भव उत्पत्तिर्यस्याः सा, स्त्रियां टाप् ।) गुडूची । इति राजनिर्घण्टः ॥

अमृतसारजः, पुं, (अमृतस्य सारः तस्मात् जायते, अमृतसार+जन्+डः, उपपदसमासः ।) गुड़ः । तवराजोद्भवखण्डः । इति राजनिर्घण्टः ॥

अमृतसूः, पुं, (अमृतं तुषारं सूते, अमृत+सू+क्विप्, उपपदसमासः ।) (अमृतान् देवान् सूते, अमृत+सू+क्विप्, उपपदसमासः ।) चन्द्रः । इति हेमचन्द्रः ॥ देवमातरि स्त्री । अमृतानां देवानां सूः प्रसूतिः ॥

अमृतसोदरः, पुं, (अमृतस्य सोदरः सोदर्य्यः तस्य एकस्मादुत्पन्नत्वात् तथात्वं ।) घोटकः । इति राजनिर्घण्टः ॥ (उच्चैःश्रवा अश्वः ।
"सुरादेवी समुत्पन्ना तुरगः पाण्डरस्तथा" ।
इति भारते ।)

अमृतस्रवा, स्त्री, (स्रवति इति स्रु+अप् । स्त्रियां टाप् । अमृतस्य स्रवा षष्ठीतत्पुरुषः ।) रुदन्तीवृक्षः । लताविशेषः । तत्पर्य्यायः । वृक्षरुहा २ उपवल्लिका ३ घनवल्ली ४ सितलता ५ । अस्या गुणाः । पथ्यत्वं । ईषत्तिक्तत्वं । रसायनत्वं । व्रणनाशित्वं । विषकुष्ठकामकामलाश्वयथुजयकारित्वञ्च । इति राजनिर्घण्टः ॥
("उक्तामृतस्रवा पथ्या ईषत्तिक्ता रसायनी ।
व्रणघ्नी विषकुष्ठामं कामलां श्वयथुं जयेत्" ॥
इति राजनिर्घण्टः ।)

अमृता, स्त्री, (नास्ति मृतं मरणं यस्याः सा ।) गुडूची । मदिरा । इन्द्रवारुणी । ज्योतिष्मती । गोरक्षदुग्धा । अतिविषा । रक्तशिरुत् । दूर्व्वा । आमलकी । हरीतकी । इति राजनिर्घण्टः ॥ तुलसी । इति शब्दमाला ॥ पिप्पली । इति मेदिनी ॥ चम्पादेशजशालमांसा हरीतकी । सा

विरेचने प्रशस्ता । इति राजवल्लभः ॥ (सूर्य्यदीधितिविशेषाः ।
("सौरीभिरिव नाड़ीभिरमृताख्याभिरन्वयः" ।
इति रघुवंशे ।)

अमृतान्धः, [स्] पुं, (अमृतमन्धः अन्नमिव वह्निकरं यस्य सः ।) देवता । इत्यमरः ॥ (अमृतं सुधा अन्धो भक्ष्यं यस्य सः ।)

अमृतापलः, पुं, (अमृतमिव फलं यस्य, पृषोदरादित्वात् दीर्घः ।) पटोलः । इति ख्याभिधानं ॥

अमृताशनः, पुं, (अमृतं अश्नाति भुङ्क्ते, अश्न+बाहुल्यात् कर्त्तरि ल्युट् । अमृतस्य अशनः, षष्ठीतत्पुरुषः ।) देवता । इति हलायुधः ॥

अमृताष्टकं, क्ली, (अमृताप्रभृति अष्टकं यस्य तत् ।) हरितक्याद्यष्टद्रव्यं । यथा,—
"अमृता कटुकारिष्टपटोलघनचन्दनं ।
नागरेन्द्रयवश्वेतदमृताष्टकमीरितं ॥
क्षयितं सकफाचूर्णं पित्तश्लेष्मज्वरापहं ।
हृल्लासारोचकच्छर्द्दिष्टष्णादाहनिवारणं" ॥
इति भावप्रकाशः ॥

अमृतासङ्गः, क्ली, (अमृतस्येव आसङ्गो यस्य तत् ।) तुत्थविशेषः । तत्पर्य्यायः । कर्परिकातुत्थं २ अञ्जनं ३ । इति हेमचन्द्रः ॥

अमृताहरणः, पुं, (अमृतमाहरति, माद्दादास्थापनयनार्थं स्वर्गात् भूलोकं नयति, आ+हृ+कर्त्तरि ल्युट्, ततः षष्ठीतत्पुरुषः ।) गरुड़ः । इति हारावली ॥ ("एरा किल गरुड़ो मातुर्विनतायाः सपत्नीदास्यनिवारणार्थं सर्व्वदेवान् विनिर्जित्य सोमरक्षकच्छेदनयन्त्रादिकञ्चातिक्रम्य स्वर्गादमृतं नागकुलाय दातुमाहृतवान्" । इति पौराणिकी कथा । महाभारतस्यादिपर्व्वणि ।
"श्रुत्वा तमब्रुवन् सर्पा आहरामृतमोजसा ।
ततो दास्यादिप्रमोक्षो भविता तव खेचर ! ॥
इत्युक्तो गरुड़ः सर्पैस्ततो मातरमब्रवीत् ॥
गच्छाभ्यमृतमाहर्त्तुं भक्ष्यमिच्छामि वेदितुं ॥
.. ..
स चक्रं क्षुरपर्य्यन्तमपश्यदमृतान्तिके ।
परिभ्रमन्तमनिशं तीक्ष्णधारमयस्मयं ॥
ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम् ।
.. ..
अच्छिनत्तरसा मध्ये सोममभ्यद्रवत्ततः ॥
समुत्पाट्याऽमृतं तत्र वैनतेयस्ततो बली ।
उत्पपात जवेनैव यन्त्रमुन्मथ्य वीर्य्यवान् ॥
... ...
एवं तदमृतं तेन हृतमाहृतमेव च ।
द्विजिह्वाश्च कृताः सर्पा गरुड़ेन महात्मना" ॥)

अमृताक्षं, क्ली, (अमृतमाक्ष्यते स्पर्द्धते, आ+क्षै+कः, तस्य तुल्यस्वादत्वात् तथात्वं ।) लघुबिल्वफलाक्षतिखोरासानदेशजनांसयातीनामफलं । तत्पर्य्यायः । रुचिफलं २ । अस्य गुणाः । गुरुत्वं । वातनाशित्वं । स्वादुत्वं । अम्लत्वं । रुचिशुक्रकारित्वञ्च ॥ तल्लघुफलगुणाः । हृद्यत्वं । सुस्वादुत्वं । त्रिदोषनाशित्वञ्च । तत् मुद्गलदेशे

बद्धलं लभ्यते। इति भावप्रकाशः॥
अमृतोत्पन्नं, क्ली, (अमृतं विषमिव उत्पन्नं नीलवर्णत्वात्।) खर्परीतुत्थं। इति राजनिर्घण्टः॥
अमृतोत्पन्ना, स्त्री, (अमृतं मधु उत्पन्नं यस्याः सा, "जातिकालसुखादिभ्यो निष्ठायाः परवचनमिति निष्ठायाः परनिपातः"।) मक्षिका। इति राजनिर्घण्टः॥
अमृतोद्भवं, क्ली, (अमृतं विषमिव उद्भवति क्षयवर्णत्वात्, उद्+भू+अप्।) तुत्थं। खर्परीतुत्थं। इति राजनिर्घण्टः॥
अमेधाः, [स्] पुं, (नास्ति मेधा यस्य सः, समासान्तः असिच्।) मूढः। मूर्खः। इति हेमचन्द्रः॥
("नमः समस्मात् पूर्व्वस्मा अन्तरस्मा अमेधसाम्। सुमेधसामन्तरस्मै सतां खस्मै स्वयम्भुवे"।
इति बोपदेवः।)
अमेध्यं, क्ली, (न मेध्यं पवित्रं विरोधे नञ्समासः।) पुरीषं। इति शब्दरत्नावली॥ अपवित्रे त्रि॥
(अपवित्रं। मलमूत्रादिकं वस्तु।
"नाग्निं मुखेनोपधमेत् नमां नेक्षेत च स्त्रियं।
नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्"॥
इति मनुः।)
अमोघः, त्रि, (न मोघो निष्फलः, नञ्समासः।) सफलः। अव्यर्थः। इति मेदिनी॥ नदविशेषे पुं। इति शब्दरत्नावली॥ (इष्टफलप्रदः। अवन्ध्यः।
अविफलः।
"यदमोघमपामन्तरग्नं वीजमज त्वया"।
इति कुमारसम्भवे।
"अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः"।
इति रघुवंशे।
अमोघा, स्त्री, (न मोघा निष्फला, नञ्समासः।) पाटलिवृक्षः। विड्रङ्गं। इत्यमरः॥ हरीतकी। इति मेदिनी॥
अम्ब गतौ। (इति कविकल्पद्रुमः।) ओषधवर्गप्रेषोपधः। अम्बति। इति दुर्गादासः॥
अम्बकं, क्ली, (अम्बति गच्छत्यपर्य्यन्तं गच्छति, अम्ब+ण्वुल्। वा अम्बाते भूगर्भे प्राप्यते, अम्ब+कर्म्मणि घञ् स्वार्थे कन्।) नेत्रं। इति हेमचन्द्रः॥
"आसीनमासन्नशरीरपातं-
स्त्रियम्बकं संयमिनं ददर्श"।
इति कुमारसम्भवे।) ताम्रं। इति राजनिर्घण्टः॥
अम्बरं, क्ली, (अम्बि शब्दे+भावे घञ्, अम्बः शब्दस्तं राति आदत्ते अम्ब+रा+कः।) वस्त्रं।
("एवमुक्ता सुमित्रां सा विवर्णा मलिनाम्बरा"।
इति रामायणे।)
आकाशं। ("दावाग्निः कथमम्बरे" इति साहित्यदर्पणे।) कार्पासः। खनामख्यातसुगन्धिद्रव्यं।
इति विश्वः॥ अभ्रधातुः। इति राजनिर्घण्टः॥
अम्बरिषं, क्ली, (अम्बाते पच्यतेऽत्र, अबि+अरिष वा दीर्घः निपातनात्।) मज्जनपात्रं। भाजना खोला। इति भाषा। इत्यमरटीकायां रमानाथः॥
अम्बरीषं, क्ली, (अबि+गतौ+कर्म्मणि घञ्, अम्बा लब्धा ईर्षा यस्मात् तत्, सिंहवत् पृषोदरादित्वात् रवर्णविपर्य्ययेण साधु।) भाङ्गः। भर्ज्जनपात्रं। इत्यमरः॥ युद्धं। इति मेदिनी॥
अम्बरीषः, पुं, (अम्बाते पच्यते अत्र, निपातनात् साधुः।) विष्णुः। शिवः। इति त्रिकाण्डशेषः॥
किंशोरः। भास्करः। नृपभेदः। स तु सूर्य्यवंशीयनाभागराजपुत्रः।
("भगीरथसुतो राजा श्रुत इत्यभिविश्रुतः।
नाभागस्तु श्रुतस्यासीत् पुत्रः परमधार्मिकः॥
अम्बरीषस्तु नाभागिः सिन्धुद्वीपपिताऽभवत्"॥
इति हरिवंशे।) नरकभेदः॥ आम्रातकवृक्षः। अनुतापः। इति मेदिनी॥
अम्बष्ठः, पुं, (अम्बायां मातरि तिष्ठति, अम्बा+स्था+कः, आम्बाम्बेति यत्नं, आपोः संज्ञाच्छन्दसोर्बहुलमिति कृत्वः, असवर्णाजातत्वात् तस्य तथात्वं।) देशविशेषः। विप्रादिशायामुत्पन्नः। इति मेदिनी॥ अयं चिकित्साजीविः वैद्य इति ख्यातः। इत्यमरटीकायां भरतः॥ हस्तिपकः। यथा,—
"अम्बष्ठाम्बष्ठ मागं नौ देह्यपक्रम मा चिरं"।
इति श्रीभागवतं॥ कायस्थजातिविशेषः। इति पश्चिमदेशे प्रसिद्धः॥
अम्बष्ठकी, स्त्री, (अम्बष्ठं कायति स्वग्रहणार्थमाकर्षति, अम्बष्ठ+कै+कः, गौरादित्वात् ङीष्।) लताविशेषः। आकनादि निसुखी इति च भाषा। तत्पर्य्यायः। पाठा २ अम्बष्ठा ३ कुचेली ४ पापचेलिका ५ एकाष्ठीला ६ वरा ७ तिक्ता ८ प्राचीना ९ एकोग्निका १० वृका ११। इति रत्नमाला॥ विडङ्गकर्णी १२ स्थापनी १३ श्रेयसी १४ रसा १५ पापचेली १६ वनतिक्तिका १७। इत्यमरः॥ अविडङ्गकर्णी १८ अविडङ्गकर्णा १९। इति तट्टीका॥ अम्बष्ठिका २० यूथिका २१ विडङ्गकर्णिका २२ दीपनी २३ तिक्तपुष्पा २४ वृहत्तिक्ता २५ गिरिगिरा २६ वृकी २७ मालती २८ देवी २९ वृत्तपर्णी ३०। इति राजनिर्घण्टः॥ अस्या गुणाः। अतीसारश्रमनत्वं। लघुत्वं। त्रिदोषनाशित्वञ्च। इति राजवल्लभः॥ तिक्तत्वं। गुरुत्वं। उष्णत्वं। वातपित्तज्वरश्वित्रदाहशूलनाशित्वं। भग्नसन्धानकारित्वञ्च। इति राजनिर्घण्टः॥
अम्बष्ठा, स्त्री, (अम्बायां मातरि स्तोत्पत्तिस्थाने इति यावत्, तिष्ठति, अम्बा+स्था+कः, अम्बेत्यादिना यत्वम् पूर्व्ववत् कृत्वः, स्त्रियां टाप्।) क्षुपविशेषः। अम्बाड़ा इति ख्याता। अस्याः पर्य्यायः। बालिका २ बाला ३ गुठाम्बा ४ अम्बालिका ५ अम्बिका ६ अम्बा ७ माचिका ८ वृद्धवल्का ९ मयूरिका १० गन्धपत्री ११ चित्रपुष्पी १२ श्रेयसी १३ मुखवाचिका १४ क्षिप्रपत्री १५ भूरिमल्ली १६। अस्या गुणाः। कषायत्वं। अम्लत्वं। कफकण्ठरोगवातरोगबलाग्ननाशित्वं। व्रणभिकारित्वञ्च। इति राजनिर्घण्टः॥ पाठा। वाङ्गेरी। यूथिका। इत्यमरमेदिनीकरौ॥
अम्बष्ठिका, स्त्री, (अम्बष्ठा+संज्ञायां कन्, स्त्रियां टाप्।) अम्बष्ठा। आकनादि इति भाषा। इति राजनिर्घण्टः॥ ब्राह्मणी। वामनहाटी इति प्रसिद्धा। इति रत्नमाला॥
अम्बा, स्त्री, (अम्बाते खेदेनोपगम्यते, अबि गतौ+घञ्, स्त्रियां टाप्।) जननी। इति शब्दरत्नावली॥
"अम्ब! यत्त्वमिदं प्राप्य प्रणमाय वचो मम"।
"नान्यदत्तमभीप्सामि स्थानमम्ब स्वकर्म्मणा"।
इति विष्णुपुराणे।)
नाथोक्तौ सेव। इत्यमरः॥ पाण्डुराजमातुः स्वसा। इतिमहाभारतं॥ अम्बष्ठा। इति राजनिर्घण्टः। दुर्गा। इति केचित्॥
अम्बालिका, स्त्री, (अम्बेति शब्दं लाति गृह्णाति, अम्बा+ला+कः, उपपदसमासः, कृत्वे अतइत्वं स्वार्थे कन्, स्त्रियां टाप्।) माता। इति शब्दरत्नावली॥ अम्बष्ठा। इति राजनिर्घण्टः॥ पाण्डुराजमाता। इति भारतं॥ (काशीराजस्य कनिष्ठा दुहिता सा च विचित्रवीर्य्यपत्नी।
"अम्बालिका च राजेन्द्र! राजकन्या यवीयसी।
अम्बिकाम्बालिके भार्य्ये प्रादाद्भ्रात्रे यवीयसे॥
"भीष्मो विचित्रवीर्य्याय विधिदृष्टेन कर्म्मणा"।
इति महाभारते।)
अम्बिका, स्त्री, (अम्बा+स्वार्थे कन्, स्त्रियां टाप्।) दुर्गा।
"ईप्सितार्थक्रियोदारं तेऽभिनन्द्य गिरेर्वचः।
आशीर्भिरेधयामासुः पुरःपाकाभिरम्बिकाम्"॥
इति कुमारसम्भवे। माता। इति मेदिनी॥ जैनदेवीविशेषः। इति हेमचन्द्रः॥ कटुकीवृक्षः। इति शब्दचन्द्रिका॥ अम्बष्ठा। इति राजनिर्घण्टः॥ काशीराजस्य मध्यमादुहिता। विचित्रवीर्य्यस्य पत्नी। धृतराष्ट्रस्य माता।
"अम्बा ज्येष्ठाऽभवत्तासामम्बिकात्वथ मध्यमा।
अम्बिकाम्बालिके भार्य्ये प्रादाद्भ्रात्रे यवीयसे॥
भीष्मो विचित्रवीर्य्याय विधिदृष्टेन कर्म्मणा"।
इति महाभारते।)
अम्बिकेयः, पुं, (मात्रिनिमते तु अम्बिकाया अपत्यं पुमान्, अम्बिका+ठक् तस्य इयः, वृद्धभावः।) गणेशः। कार्त्तिकेयः। धृतराष्ट्रराजः॥ अम्बिकाया अपत्यमित्यर्थे छोयः॥
अम्बिकेयकः, पुं, (अम्बिकेय+स्वार्थे कन्।) गणेशः। इति जटाधरः॥
अम्बु, क्ली, (अबि शब्दे+उण्।) वालानामौषधिः। इत्यमरः॥ बाला इति भाषा। जलं ("भुक्ता मृगाजपटली भवता निपीतान्यम्बूनि यत्र नलिनानि निषेवितानि"। इति भामिनीविलासे। "अम्बुजमम्बुनि जातं क्वचिदपि न जायतेऽम्बुजादम्बु"। इत्युद्भटः। "गाढ़मम्बु सितमम्बु यामुनं"। इति काव्यप्रकाशे।)
अम्बुकण्टकः, पुं, (अम्बुनि जले कण्टकइव, सादृश्यार्थे कन्।) कुम्भीरः। इति त्रिकाण्डशेषः॥
अम्बुकिरातः, पुं, (अम्बुनि जले किरातः व्याध इव।) कुम्भीरः। इति त्रिकाण्डशेषः॥
अम्बुकीटः पुं, (अम्बुनि कीटः वानर इव।) मिश्र-

अम्बु

मारजन्तुः। इति हेमचन्द्रः। सुसुक इति भाषा।

अम्बुकूर्म्मः, पुं, (अम्बुनः कूर्म्म इव)। शिशुमारः। इति हेमचन्द्रः॥

अम्बुकेशरः, पुं, (अम्बुजातः केशरोऽस्य।) क्षीरशुक्लवृक्षः। इति रत्नमाला॥

अम्बुचामरं, क्ली, (अम्बुनः चामरमिव।) शैवालं। इति जटाधरः॥ शेयाल इति भाषा।

अम्बुजं, क्ली, (अम्बुनि जायते, अम्बु+जन्+डः।) पद्मं। इति मेदिनी॥ "इन्दीवरेण नयनं मुखमम्बुजेन"। इति भट्टारहरिश्चन्द्रे। "अम्बुजमम्बुनि जातं क्वचिदपि न जायतेऽम्बुजादम्बु"। इत्यद्भुटः।) वस्त्रं। इति त्रिकाण्डशेषः॥

अम्बुजः, पुं, (अम्बुसमीपे जातः।) हिज्जलवृक्षः। इत्यमरः॥ (निशुलवृक्षः॥

"अम्बुजं कमले क्लीवं हिज्जले तु पुमानयं"। इति शब्दरत्नावली।

"अम्बुजो निशुले पुंसि कमले तु नपुंसकं"। इति मेदिनी।)

अम्बुजन्मन्, [न्] क्ली, (अम्बुनो जन्मास्य।) पद्मं। इति राजनिर्घण्टः॥ (सारसविहङ्गः॥ ब्रह्मा। त्रि, जलजातः। सलिलोद्भवः।)

अम्बुतालः, पुं, (अम्बुनि जले तालयति प्रतिष्ठां गच्छति अम्बु+तल+अच्।) शैवालं। इति त्रिकाण्डशेषः॥

अम्बुदः, पुं, (अम्बु जलं ददाति, दा दाने+कः।) मेघः। इति रत्नमाला॥ ("सदा मनोज्ञाम्बुदनादसोत्सुकम्"। इति ऋतुसंहारे। "ग्रीष्माक निर्व्वापयितुं न वासवः खतक्षुतं वह्निमिवाद्रिरम्बुदः"। इति रघुवंशे।) मुस्तकं। यथा। "कणीसविश्वानलदं सहाम्बुदं"। इति वैद्यकं॥

अम्बुधिः, पुं, (अम्बूनि धीयन्तेऽत्र, अम्बु+धा+कर्म्मण्यधिकरणे किः।) समुद्रः। इति शब्दरत्नावली॥ ("रे चाञ्चल्ययुषो मृगाः श्रितनगाः कल्लोलमालाकुलामेतामम्बुधिगामिनीं शर्वसितः सङ्गाहितुं वा कथम्"। इति भामिनीविलासे। "सुरासुराश्च गन्धर्व्वाः क्षोभयामासुरम्बुधिम्"। इति रामायणे।)

अम्बुधिसवा, स्त्री, (अम्बुधि+सु+अप्, स्त्रियां टाप्।) मत्स्यकन्या। धृतकुमारी इति ख्याता। इति राजनिर्घण्टः॥

अम्बुपः, पुं, (अम्बूनि जलानि पाति पिबति वा, अम्बु+पा+कः।) चक्रमर्द्दकवृक्षः। इति शब्दचन्द्रिका॥ (जलेश्वरः। वरुणः।) व्रतभिदास्थ मद्यं। त्रि, जलपानकारी।)

अम्बुपत्रा, स्त्री, (अम्बूनि पत्रे यस्याः सा।) उपटावृक्षः। इति रत्नमाला॥

अम्बुप्रसादः, पुं, (अम्बूनि प्रसादयति स्वच्छतां नयति अम्बु+प्र+सद+णिच्+अच्, उपपदसमासः।) कतकवृक्षः। इति राजनिर्घण्टः॥ निर्म्मली इति ख्यातः।

अम्बुप्रसादनं, क्ली, (अम्बूनि प्रसादयति, प्र+सद णिच्+ल्युट्।) कतकवृक्षः। इति त्रिकाण्डशेषः॥

अम्बु

अम्बुभृत्, पुं, (अम्बु बिभर्त्ति, अम्बु+भृ+क्विप्।) मेघः। मुस्तकं। इत्यमरः॥ समुद्रः। इति केचित्॥

अम्बुमात्रजः, पुं, (अम्बुमात्रे अल्पजले जायते, जन+डः) शम्बूकः। शामुक इति हेमचन्द्रः॥ इति भाषा।

अम्बुरः, पुं, (अम्बु+उरन्।) दारुधनकाष्ठं। इति हेमचन्द्रः॥ गोदरट् इति भाषा।

अम्बुरुहा, स्त्री, (अम्बुनि रोहति, अम्बु+रुह+कः, ततष्टाप्।) स्थलपद्मिनी। इति राजनिर्घण्टः॥

अम्बुवाची, स्त्री, (अम्बु तद्वर्षणं वाचयति सूचयति, वच्+णिच्+अण्, उपपदसमासः, ङीप्।) ऋतुमती एथ्वी। यथा,—

"यद्वारे यत्काले मिथुनसंक्रमणं भूतं तद्वाराभ्यन्तरे तावत्कालावधि विंशत्यादिदण्डाधिकदिनत्रयमम्बुवाची। तत्राध्ययनं बीजवपनं न कार्य्यं। सर्षभयोपशमनाय दुग्धं पेयं"। इत्यतत्त्वं॥ * ॥

अपिच। ज्योतिषे।

"रजोयुक् स्याम्बुवाची च रौद्राद्यपादगे रवौ। तस्यां पाठो बीजवापो नाहिभीर्दुग्धपानतः॥ मृगशिरसि निवृत्ते रौद्रपादेऽम्बुवाची ऋतुमति खलु एथ्वी वर्ज्जयेत्बीजहानि। यदि वपति कृषाय्यः क्षेत्रमासाद्य बीजं न भवति फलभागी शस्यचाण्डालपाकः"॥ रजोयुक् स्या ऋतुमती एथ्वी। मत्स्यसूक्ते।

"धरण्यामृतुमत्यां च भूमिकम्पे तथैव च। अन्तरागमने चैव विद्यां नैव पठेद्बुधः"॥

ज्योतिषे।

"यस्मिन् वारे सहस्रांशुर्यत्काले मिथुनं व्रजेत्। अम्बुवाची भवेन्नित्यं पुनस्तत्कालवारयोः"॥

इदन्तु प्रायिकं। इति तिथ्यादितत्त्वं॥* ॥ अन्यच्च।

"यदार्द्रत्वं समादाय भानोर्म्मन्थगामिता। पुनस्तत्स्नेनमादाय यजनं चिदिनं त्यजेत्॥ काम्यनैमित्तिकञ्चैव यात्रां मन्त्रक्रियान्तथा। ऋतुमत्यां न कुर्व्वीत पूर्व्वसङ्क्षिप्तादृते॥ न कुर्य्यात् खननं भूमेः सूत्यग्रेणापि शङ्करि। बीजानां वपनञ्चैव चतुर्व्विंशतियामकं॥ प्रमादाद्वपनं कृत्वा गावस्तत्र प्रचारयेत्। कृषिं कुर्य्यात् ततस्तस्माच्च खननात्तिलकाञ्चनं"॥

इति मत्स्यसूक्ते महातन्त्रे ५८ पटलः॥* ॥ अपरञ्च।

"रवौ रौद्राद्यपादस्थे भूमेः संजायते रजः। तस्मादिनत्रयं यावत् बीजवापं परित्यजेत्॥ चतारिंशद्घटिकषड्भागयुतो रविर्यदा भवति। तत्राम्बुवाची ज्ञेया शिवर्क्षपादस्थितो यावत्॥ दिग्भागशून्यलिप्तो गणितेन भवति रविर्यदा साग्रः। स भवति निर्गुणकालो द्वितीयपादाश्रयाद्रौद्रे"॥

"न स्वाध्यायं वषट्कारं न देवपितृतर्पणं। कृषीणां वाहनञ्चैव बीजानां वपनं तथा"॥

इति राजमार्त्तण्डः॥ * ॥ अत्र पाकनिषेधो यथा,—

"यतिनो व्रतिनश्चैव विधवा च द्विजस्तथा। अम्बुवाचीदिने चैव पाकं कृत्वा न भक्षयेत्॥

अम्भः

खपाकं परपाकं वा अम्बुवाचीदिने तथा। भक्षणं नैव कर्त्तव्यं चाण्डालान्नसमं स्मृतं"॥

इति संवत्सरप्रदीपे विष्णुरहस्यं॥

अम्बुवासिनी, स्त्री, (अम्बुप्रधाने देशे वसति, वस्+णिनि ङीप्।) पाटलावृक्षः। इति जटाधरः॥

अम्बुवासी, स्त्री, (अम्बुप्रधाने देशे वासो यस्याः सा, गौरादित्वात्, ङीष्।) पाटलावृक्षः। इति राजनिर्घण्टः॥

अम्बुवाहः, पुं, (अम्बूनि वहति, अम्बु+वह्+अण्, उपपदसमासः।) मेघः। इति रत्नमाला॥ ("विश्रान्तिर्वारणसमार्चितजीवितोऽयं नाकर्णितः किमु सखे भवताम्बुवाहः"॥ इति भामिनीविलासे। "बिभ्राणमानीलरुचं पिशङ्गैर्जटाच्छटैस्तप्तमिवाम्बुवाहं"। इति भारविः।) मुस्तकं। मेघनामा इत्यमरेणोक्तत्वात्॥

अम्बुवाहिनी, स्त्री, (अम्बूनि वहति स्थानान्तरं नयति, अम्बु+वह+णिनि, उपपदसमासः, ङीप्।) काष्ठाम्बुवाहिनी। काष्ठादिछिद्रतच्छिद्राद्यनौकाछत्तिजलसेचनी। इत्यमरटीकायां मथुरानाथः॥

अम्बुवेतसः, पुं, (अम्बुजातो वेतसः, कर्म्मधारयः, मध्यपदलोपश्च।) जलवेतसः। तत्पर्य्यायः। परिव्याधः २ विदुलः ३ नादेयी ४। इत्यमरः॥

अम्बुशिरीषिका, स्त्री, (अम्बुनि अल्पः शिरीषः, अल्पार्थे कन् स्त्रीत्वम्।) जलशिरीषवृक्षः। तत्पर्य्यायः। शिरीषिका २ टिण्टिणिका ३ दुर्ब्भगा ४ वारिशिरीषिका ५। अस्या गुणाः। चिदोषविषकुष्ठार्शोनाशित्वं। इति भावप्रकाशः॥

अम्बुसर्पिणी, स्त्री, (अम्बुनि सर्पति अम्बु+सृप+णिनि, उपपदसमासः।) जलौकाः। इति त्रिकाण्डशेषः॥ जोंक् इति भाषा।

अम्बुसेचनी, स्त्री, (अम्बूनि सिच्यन्ते अनया, अम्बु+सिच्+करणे ल्युट्, ङीप्।) अम्बुवाहिनी। नौकाजलसेचनपात्रं। इत्यमरटीकायां मथुरानाथः॥

अम्बूकृतं, त्रि, (अनम्बु अम्बु सम्पद्यमानं कृतं, अम्बु+च्वि+कृ, अभूततद्भावे क्विः।) श्लेष्मकफनिर्गमसहितवार्क्यं। तत्पर्य्यायः। सनिष्ठीवं २। इत्यमरः॥ सघूत्कारं ३। इति हेमचन्द्रः॥ (सनिष्ठीवमुखरावः। "दधति कुहकभाजामत्र भक्तकयूनामनुरसितगुरूणि स्थानमम्बूकृतानि"। इति उत्तरचरिते।)

अम्बुः, पुं, (अबि शब्दे क्लः।) अक्षरसः। इत्युणादिकोषः॥ अम्बल। टक इति च भाषा।

अम्भः, [स्] क्ली, (आप्यते, आप्+असुन्।) जलं। वालगामौषधं। इत्यमरः॥ अमादित्यचतुर्थराशिः। इति ज्योतिषं॥ (अङ्कशास्त्रे चतुर्थसंख्या। वैदिकच्छन्दोभेदः।)

अम्भःसारं, क्ली, (अम्भसां सारं।) मुक्ता। इति राजनिर्घण्टः॥ अम्भस्सारमपि पाठः॥

अम्भःसूः, पुं, (अम्भांसि सूते, सू+क्विप्।) धूमः। इति हेमचन्द्रः॥ अम्भस्सूरिति च पाठः॥

अम्भोजं, क्ली, (अम्भसि जायते, अम्भस्+जन्+ड।) पद्मं। इति शब्दरत्नावली॥ सारसपक्षी। पुष्कराङ्क इत्यमरेणोक्तत्वात्। चन्द्रे पुं। यथा। "पिबन्तं त्वन्मुखाम्भोजच्युतं हरिकथामृतं"। इति श्रीभागवतं॥ जलजाते त्रि॥

अम्भोजन्मजनिः, पुं, (अम्भोजन्मनि विष्णुनाभिपद्मे जनिः जन्म यस्य सः।) ब्रह्मा। यथा,—
"अम्भोजन्मजनिस्तदन्तरगतोवत्सानितोवत्सपान्"। इति श्रीभागवतं॥

अम्भोजयोनिः. पुं, (अम्भोजं नारायणनाभिपद्मं योनिरुत्पत्तिस्थानं यस्य सः।) ब्रह्मा। यथा,—
"सदनमुपगतोऽहं पूर्व्वमम्भोजयोनेः"॥
इति प्रबोधचन्द्रोदयः॥

अम्भोजिनी, स्त्री, (अम्भोज+समूहार्थे इनि ततः ङीप्।) पद्मलता। पद्मसमूहः। पद्मयुक्तदेशः। इति शब्दरत्नावली। (पद्मिनी। नलिनी। "अम्भोजिनीवननिवासविलासहेतुं हंसस्य हन्तुमपरामपि तां विधाता"। इति नीतिशतके।)

अम्भोदः, पुं, (अम्भो जलं ददाति, अम्भस्+दा+कः।) मेघः। मुस्तकं। इति शब्दरत्नावली॥ (जलदानकर्त्तरि, त्रि।)

अम्भोधरः, पुं, (अम्भः जलं धरति, धृ+अच्।) मेघः। ("सप्तीकराम्भोधरमत्तकुञ्जरः"। इति ऋतुसंहारे।) मुस्तकं। इति शब्दरत्नावली॥

अम्भोधिः, पुं, (अम्भांसि धीयन्ते अत्र, धा+आधारे किः।) समुद्रः। इति शब्दरत्नावली॥
("अयं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया।
धनं दूरेऽस्तु वदनमपूरि क्षारवारिभिः"॥
इति साहित्यदर्पणे।
"सम्भूयाम्भोधिमभ्येति महानद्यो नगापगाः"।
इति माघः।)

अम्भोधिवल्लभः, पुं, (अम्भोधेः वल्लभः, षष्ठीतत्पुरुषः।) प्रवालः। इति राजनिर्घण्टः॥

अम्भोनिधिः, पुं, (अम्भांसि निधीयन्तेऽत्र, अम्भस्+नि+धा+किः।) समुद्रः। इति शब्दरत्नावली॥
("असूत सा नागवधूपभोग्यं
मैनाकमम्भोनिधिबद्धसख्यं"।
इति कुमारसम्भवे। विष्णोः सहस्रनाममध्ये परिगणितो नामभेदः, अम्भांसि देवमनुष्यादयो निधीयन्ते अस्मिन् इति व्युत्पत्त्या, नारायणस्य सर्व्वाश्रयत्वात्। "अम्भोनिधिरनन्तात्मा"। इति महाभारते।)

अम्भोराशिः, पुं, (अम्भसां राशिरिव एकत्रोपचितत्वात्।) समुद्रः। इति राजनिर्घण्टः॥

अम्भोरुहं, क्ली, (अम्भसि रोहति, अम्भस्+रुह+कः।) पद्मं। ("आस्ये पूर्णशशाङ्कता नयनयोस्तादात्म्यमम्भोरुहां"। इति मामिनीविलासे।) सारसपक्षी। इत्यमरः॥

अम्मयं, त्रि, (अपां विकारादि, अप्+मयट्।) जलविकारं। फेनादि। इत्यमरः॥ जलमये त्रि। यथा,—
"न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः"॥
इति श्रीभागवतं॥
("सौरीभिरिव नाड़ीभिरमृताख्याभिरम्मयः"।
इति रघुवंशे।)

अम्लः, पुं, (अमति सौरमेण दूरं गच्छति, अम+रन्।) आम्रवृक्षः। फले क्लीवं। इति शब्दरत्नावली॥

अम्लातः, पुं, (अम्लं रसं सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति, अम्ल+अत+अण् वा लस्य रत्वं, पक्षे अम्लातः।) आम्रातकवृक्षः॥ इति शब्दमाला॥

अम्लातकः, पुं, (अम्लं रसं सर्व्वत्र पत्रपुष्पादौ अतति व्याप्नोति अम्ल+अत+अण्+स्वार्थे कन्।) आम्रातकवृक्षः। इति त्रिकाण्डशेषः॥
("आम्रामातकजम्बूत्वक् कषाये विषचेद्वधः।
यवागूं शालिभिर्युक्तां तां भुक्त्वा ग्रहणीं जयेत्"॥
इति शार्ङ्गधरः॥)

अम्लं, क्ली, (अम+क्त।) तक्रं। इति राजनिर्घण्टः॥

अम्लः, पुं, (अम+क्त।) षड्रसमध्ये रसविशेषः। टक इति भाषा। तोयाग्निगुणबाहुल्यादम्लः। इति सुश्रुतः। अस्य गुणाः। शाकवद्दोषकारित्वं। हृद्यत्वं। रक्तमिरक्तमांसकारित्वं। प्रीतनत्वं। वायुनाशित्वं। स्निग्धोष्णत्वं। कटुरसतोऽधिकोष्णवीर्य्यत्वं। जिह्वोद्वेगकारित्वञ्च। इति राजवल्लभः॥ अस्य दन्तोद्वेगकारित्वगुणोऽप्यस्ति। अपि च। प्रीत्यग्निमरुतोकारित्वं। प्रयाचनत्वं। इति राजनिर्घण्टः॥ * ॥ तदतिशयभक्षणगुणाः। याचकत्वं। पित्तश्लेष्मवान्तिलोदकारित्वं। लघुत्वं। उष्णत्वं। वह्निःप्रीतत्वं। वायुनाशित्वञ्च। इति राजवल्लभः॥ भ्रान्तितृष्णिकफपाण्डुदोषकार्श्यकासकारित्वं। इति राजनिर्घण्टः॥ तदति त्रि। इत्यमरः॥ * ॥ अम्लवेतसः। इति राजनिर्घण्टः॥ (यदाह वाभटः॥ "अम्लः क्षालयते मुखम्।
हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचनः।
अम्लोऽग्निदीपनिक्लृत् स्निग्धो हृद्यः पाचनरोचनः॥
उष्णवीर्य्यो हिमस्पर्शः प्रीणनः क्लेदनो लघुः।
करोति कफपित्तास्रं मूढ़वातानुलोमनम्॥
सोऽत्यभ्यस्तस्तनोः कुर्य्याच्छैथिल्यं तिमिरं भ्रमं।
कण्डूपाण्डुत्ववीसर्पशोफविस्फोटदाह्ज्वरान्"॥
हारीतेन यदुक्तं तद्यथा,—
"जिह्वाक्लेदं जनयति तथा नेत्रनैर्मल्यकारी,
बीभत्सं वा जनयति तथा वातरोगापहारी।
कण्डूकुष्ठक्षतरुजकरैः लोहितः शोफिने स्या-
दम्लः प्रोक्तः पवनशमनोऽक्लेक्प्रकोपं तनोति"॥
सुश्रुतस्त्वाह॥"अम्लो जरयति पाचनः पवननिग्रहणोऽनुलोमनः कोष्ठ-विदाही वह्निःप्रीतः क्लेदनः प्रायशोहृद्यश्चेति। सएवं गुणोऽपेक एवात्यर्थमुपसेव्यमानो दन्तहर्ष-नयन-सम्मीलन-रोमसंवेजनकफविलयन-शरीरशैथिल्यान्यापादयति तथा क्षताभिहत-दग्ध-दष्ट-भग्न-रुग्न-स्फुट-प्रच्युतावमूर्च्छित-विसर्पित-क्षिन्न भिन्न-विडोत्पिष्टादीनि पाचयत्याग्नेयत्वभावात् परिदहति कण्ठमुरोहृदयञ्चेति"॥०॥
"अम्लोरसो भक्तं रोचयति, अग्निं दीपयति, देहं

हृंहयति, जर्ज्जरयति, मनो बोधयति, इन्द्रियाणि दृढ़ीकरोति, बलं बर्द्धयति, वातमनुलोमयति, हृदयं तर्पयति, आस्यं संस्रावयति, भुक्तमपकर्षयति, क्लेदं जनयति, प्रीणयति। लघुरुष्णः स्निग्धश्च॥ सएवंगुणोऽप्येकएवात्यर्थमुपयुज्यमानो दन्तान् हर्षयति, तर्पयति, संमीलयति अक्षिणी, संवीजयति लोमानि, कफं विलापयति, पित्तमभिवर्द्धयति, रक्तं दूषयति, मांसं विदहति, कायं शिथिलीकरोति, क्षीण-क्षत-क्षयदुर्ब्बलानां व्ययथुमापादयति। अपि च क्षताभिहत-दष्ट-दग्ध-भग्न-रुग्न-क्षुतावमूर्च्छित-परिसर्पित-मर्म्महत-च्छिन्न-विद्रोत्पिष्टादीनि पाचयत्याग्नेयत्वभावात् परिदहति कण्ठमुरोहृदयञ्च"॥ इति चरकः॥)

अम्लकः, पुं, (अल्पोऽम्लः अल्पार्थे कन्।) लकुचवृक्षः। इति शब्दरत्नावली॥ (लकुचशब्देऽस्य गुणादयो ज्ञातव्याः॥)

अम्लकाण्डं, क्ली, (अम्लं काण्डं यस्य।) लवणत्वणं। इति राजनिर्घण्टः॥

अम्लकेशरः, पुं, (अम्लः केशरो यस्य।) मातुलुङ्गः। बीजपूरः। इति रत्नमाला॥ (टाबालेबु इति भाषा।)

अम्लचूड़ः, पुं, (अम्ला चूड़ा शिखा यस्य।) अम्लशाकः। इति राजनिर्घण्टः॥

अम्लजम्बीरः, पुं, (अम्लो जम्बीरः।) अम्लनिम्बूकः। इति राजनिर्घण्टः॥

अम्लनायकः, पुं, (अम्लं रसं नयति, नी+ण्वुल्।) अम्लवेतसः। इति राजनिर्घण्टः॥

अम्लनिशा, स्त्री, (अम्लरसे निःशेषेण शेते, अम्ल+नि+शी+ड+स्त्रियां टाप्।) शटी। इति राजनिर्घण्टः॥

अम्लपञ्चफलं, क्ली। अम्लरसयुक्तपञ्चप्रकारफलं। तद्यथा। कोलं १ दाड़िमं २ वृक्षाम्लं ३ चुक्रिका ४ अम्लवेतसं ५॥ मतान्तरे। जम्बीरं १ नारङ्गं २ अम्लवेतसं ३ तिन्तिड़ीकं ४ बीजपूरं ५। इति राजनिर्घण्टः॥
("कोलञ्च दाड़िमञ्चैव वृक्षाम्लं चुक्रिका तथा।
अम्लवेतसमित्येतदम्लपञ्चफलं स्मृतम्"॥
"जम्बीरं नागरङ्गञ्च तथाम्लवेतसं पुनः।
तिन्तिड़ीकं बीजपूरमम्लपञ्चफलं स्मृतम्"॥)

अम्लपत्रः, पुं, (अम्लं पत्रं यस्य।) अम्लान्तकवृक्षः। इति राजनिर्घण्टः॥

अम्लपत्री, स्त्री, (अम्लं पत्रं यस्याः सा, ङीप्।) पलाशीलता। क्षुद्राम्लिका। इति राजनिर्घण्टः॥

अम्लपूरं, क्ली, (अम्लेन अम्लरसेन पूर्य्यते, पूर+कर्म्मणि घञ्।) वृक्षाम्लं। इति राजनिर्घण्टः॥

अम्लफलं, क्ली, (अम्लं फलं यस्य।) वृक्षाम्लं। इति राजनिर्घण्टः॥ तेंतुल इति भाषा।

अम्लफलः, पुं, (अम्लं फलं यस्य सः।) आम्रवृक्षः। इति राजनिर्घण्टः॥

अम्लभेदनः, पुं, (अम्लार्थं भिद्यतेऽसौ, अम्ल+भिद्+कर्म्मणि ल्युट्।) अम्लवेतसः। इति राजनिर्घण्टः॥

अम्लरुहा, स्त्री, (अम्लाय रोहति, अम्ल+रुह्+

क ।) मालदेशजनागवल्लीभेदः । अस्या गुणाः । सुतीक्ष्णत्वं । मधुरत्वं । रुचिकारित्वं । हिमत्वं । दाहनाशित्वं । पित्तोद्रेकहरत्वं । अग्निबलसुखामोदश्रीसौभाग्यविवर्द्धनत्वं । मदकारित्वं । गुल्माध्मानविबन्धनाशित्वञ्च । इति राजनिर्घण्टः ॥
("नाशा याऽखरुहा सुतीक्ष्णमधुरा रुच्या हिमा दाहनुत् पित्तोद्रेकहरा सुदीपनकरी बल्या सुखामोदिनी । स्त्रीसौभाग्यविवर्द्धिनी मदकरी ज्ञेया सदा वल्लभा गुल्माध्मानविबन्धजित् च कथिता सा मालवे तु स्मृता" ।)

अम्लकोशिका, स्त्री, (अम्लं रसं जाति यद्वाति अम्लकः तम् ऊनयति हीनयति, अम्लक + ऊन + एबुल्, टाप्चम् ।) क्षुद्रवल्लीविशेषः । आमरुल । इति भाषा । तत्पर्य्यायः । चाङ्गेरी २ चुक्रिका ३ दन्तशठा ४ अम्लिका ५ । इत्यमरः ॥ अस्या गुणाः । कफवायुनाशित्वं । अग्निदीपनत्वं । ग्रहणीरोगे हितकारित्वञ्च । इति राजवल्लभः ॥ वस्त्रादिलग्नलौहचिरकषायरागनाशकगुणोऽप्यस्ति । राजनिर्घण्टोक्तगुणपर्य्यायौ क्षुद्राम्लिकाशब्दे द्रष्टव्यौ । तत्पर्य्यायगुणाः ।
"चाङ्गेरी चुक्रिका दन्तशठाम्लिकाम्लकोशिका । अम्लान्तकस्तु शफरी कुशली चाम्लपत्रकः" ॥ क्वचित् पुस्तके कुशलीस्थाने शफली इति च पाठः ।
"चाङ्गेरी दीपनी रुच्या लघ्व्या कफवातनुत् । पित्तलाम्ला ग्रहण्यर्शःकुष्ठातीसारनाशिनी" ॥ इति भावप्रकाशः ॥
("दीपनी चोष्णवीर्य्या च ग्राहिणी कफमारुते । प्रशस्यतेऽम्लचाङ्गेरी ग्रहण्यर्शोहिता च सा" ॥ इति चरकः ॥
"चाङ्गेरी कफवातघ्नी वह्निकृद् ग्रहणी हिता" । इति वैद्यकरत्नमालायां भरतः ॥ तत्पर्य्यायः । अम्लः २ वेधी ३ रसाम्लः ४ अम्लवेतसः ५ वेतसाम्लः ६ अम्लसारः ७ घृतवेधी ८ वेधकः ९ भीमः १० भेदनः ११ भेदी १२ राजाम्लः १३ अम्लभेदनः १४ अम्लाङ्कुशः १५ रक्तसारः १६ फलाम्लः १७ अम्लनायकः १८ सहस्रवेधी १९ वीराम्लः २० गुल्मकेतुः २१ वराभिधा २२ ग्रन्थिद्रावी २३ मांसद्रावी २४ । इति राजनिर्घण्टः ॥ वराङ्गी २५ । इति रत्नमाला ॥ चुक्रः २६ । इत्यमरः ॥ तत्फलगुणाः । अम्लत्वं । कषायत्वं । उष्णत्वं । वायुकफार्शःश्रमगुल्मनाशित्वं । अरुचिहारित्वञ्च । इति राजनिर्घण्टः ॥ छागमांसलौहसूचीद्रवकारित्वं । यवक्षारवत् गुणकारित्वञ्च । इति भावप्रकाशः ॥ आमाहरोगनाशित्वं । तत्पक्वफलगुणाः । दोषविनाशित्वं । गुरुत्वं । धारकत्वञ्च । इति राजवल्लभः ॥ तत्पर्य्यायगुणाः ।
"स्यादम्लवेतसश्चुक्रः घृतवेधी सहस्रजित् । अम्लवेतसमम्लं भेदनं लघु दीपनं ॥ कृच्छ्रोगशूलगुल्मघ्नं पित्तलोहितदूषणं । रुच्यं विशददोषघ्नं ग्रीहोदावर्त्तनाशनं ॥ वीजपूरं च जम्बीरं निम्बलीकास्त्वेतसं ॥ रुक्षाम्लं हरिमत्यच्च चाङ्गेरीत्यम्लवर्गकः" ॥)
"अम्लवेतसजम्बीरलकुचाम्लचणकाम्लकाः । नागरङ्गं तिन्तिडी च चिञ्चापत्रञ्च निम्बुकं ॥ चाङ्गेरी दाडिमञ्चैव करमर्दन्तथैव च । एष चाम्लगणः प्रोक्तो वेतसाम्लं सदोत्तमम्" ॥ इति वैद्यकरत्नेन्द्रसारसङ्ग्रहः ॥
"दाडिमामलकमातुलुङ्गाम्लातक-कपित्थ-करमर्दवरकोल-प्राचीनामलक-तिन्तिडीक-कोशाम्र-भव्य-पारावत-वेत्रफल-लकुचाम्ल-वेतस-दन्तशठदधि-तक्र-सुरा-शुक्त-सौवीरक-तुषोदक-धान्याम्लप्रभृतीनि समासेनाम्लोवर्गः" । इति सुश्रुतञ्च ॥

अम्लवल्ली, स्त्री, (अम्लरसवती वल्ली ।) स्त्रियर्णिकानामकन्दविशेषः । इति राजनिर्घण्टः ॥

अम्लवाटिका, स्त्री, (अम्लस्य वाटिका स्थानमिव ।) नागवल्लीभेदः । अस्या गुणाः । कटुत्वं । अम्लत्वं । तिक्तत्वं । रूक्षत्वं । उष्णत्वं । मुखपाककारित्वं । विदाहपित्तरक्तप्रकोपकारित्वं । विशदत्वं । वायुनाशित्वञ्च । इति राजनिर्घण्टः ॥ (उक्तञ्च,—
"स्यादम्लवाटी कटुकाम्लतिक्ता रूक्षा तथोष्णा मुखपाककर्त्री । विदाहपित्तास्रविकोपिनी च विशदा वातनिबर्हणी च" ॥)

अम्लवास्तूकं, क्ली, (अम्लरसान्वितं वास्तूकं शाकभेदः ।) चुक्रं । इति राजनिर्घण्टः ॥

अम्लबीजं, क्ली, (अम्लस्य बीजं कारणं ।) रुक्षाम्लं । इति राजनिर्घण्टः ॥

अम्लरुक्षं, क्ली, (अम्लरसो रुक्षे यस्य ।) रुक्षाम्लं । इति राजनिर्घण्टः ॥ तेँतुल इति भाषा ।

अम्लवेतसः, पुं, क्ली, स्वनामप्रसिद्धः अम्लरसरुक्षविशेषः । चुकाम्लाक इति ख्यात इति केचित् । अम्लकुचाइ इति ख्यात इति केचित् । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । अम्लः २ वेधी ३ रसाम्लः ४ अम्लवेतसः ५ वेतसाम्लः ६ अम्लसारः ७ घृतवेधी ८ वेधकः ९ भीमः १० भेदनः ११ भेदी १२ राजाम्लः १३ अम्लभेदनः १४ अम्लाङ्कुशः १५ रक्तसारः १६ फलाम्लः १७ अम्लनायकः १८ सहस्रवेधी १९ वीराम्लः २० गुल्मकेतुः २१ वराभिधा २२ ग्रन्थिद्रावी २३ मांसद्रावी २४ । इति राजनिर्घण्टः ॥ वराङ्गी २५ । इति रत्नमाला ॥ चुक्रः २६ । इत्यमरः ॥ तत्फलगुणाः । अम्लत्वं । कषायत्वं । उष्णत्वं । वायुकफार्शःश्रमगुल्मनाशित्वं । अरुचिहारित्वञ्च । इति राजनिर्घण्टः ॥ छागमांसलौहसूचीद्रवकारित्वं । यवक्षारवत् गुणकारित्वञ्च । इति भावप्रकाशः ॥ आमाहरोगनाशित्वं । तत्पक्वफलगुणाः । दोषविनाशित्वं । गुरुत्वं । धारकत्वञ्च । इति राजवल्लभः ॥ तत्पर्य्यायगुणाः ।
"स्यादम्लवेतसश्चुक्रः घृतवेधी सहस्रजित् । अम्लवेतसमम्लं भेदनं लघु दीपनं ॥ कृच्छ्रोगशूलगुल्मघ्नं पित्तलोहितदूषणं । रुच्यं विशददोषघ्नं ग्रीहोदावर्त्तनाशनं ॥ हिक्कानाहारुचिश्वासकासाजीर्णवमिप्रणुत् । कफवातामयध्वंसि छागमांसद्रवत्वहृत् ॥ यवक्षारगुणं ज्ञेयं लौहसूचीद्रवत्वहृत्" । इति भावप्रकाशः ॥
("अम्लिकायाः फलं पक्वं तस्मादल्पान्तरं गुणैः । गुणैस्तैरेव संयुक्तं भेदनन्त्वम्लवेतसम्" ॥ इति च चरकः ॥)

अम्लशाकं, क्ली, (अम्लः शाको यस्य तत् ।) रुक्षाम्लं । चुक्रं । इति राजनिर्घण्टः ॥ (रुक्षाम्लशब्देऽस्य विशेषो द्रष्टव्यः ॥)

अम्लशाकः, पुं, (अम्लः शाको यस्य सः ।) अम्लद्रव्यविशेषः । तत्पर्य्यायः । शाकाम्लं २ शुक्ताम्लं ३ अम्लचुक्रिका ४ चिञ्चाम्लं ५ अम्लचूडः ६ चिञ्चासारः ७ । अस्य गुणाः । अतिशयाम्लत्वं । वातनाशित्वं । कफदाहहरित्वञ्च । समशर्करामिश्रितस्यास्य गुणाः । दाहपित्तकफार्त्तिनाशित्वं । इति राजनिर्घण्टः ॥ (यदुक्तं,—
"अम्लशाकस्त्वतीवाम्लो वातघ्नः कफदाहनुत् । साम्येन शर्करामिश्रो दाहपित्तकफार्त्तिनुत्" ॥)

अम्लसारं, क्ली, (अम्लरस एव सारः यस्य तत् ।) काम्लिकं । इति राजनिर्घण्टः ॥

अम्लसारः, पुं, (अम्लरस एव सारः यस्य सः ।) अम्लवेतसः । निम्बूकः । हिन्ताबः । इति राजनिर्घण्टः ॥

अम्लहरिद्रा, स्त्री, (अम्लरसयुक्ता हरिद्रा ।) शटी । इति राजनिर्घण्टः ॥

अम्लाङ्कुशः, पुं, (अम्लं अङ्कुशाकारं अग्रं यस्य ।) अम्लवेतसः । इति राजनिर्घण्टः ॥

अम्लातकः, पुं, (न म्लायति, म्लै + तन् स्वार्थे कन्, नञ्समासः ।) अम्लानरुक्षः । इति राजनिर्घण्टः ॥ अस्य गुणपर्य्यायौ राजतरुणीशब्दे ज्ञेयौ ॥

अम्लानः, पुं, (म्लै + क्तः ततो नञ्समासः ।) महासहारुक्षः । इत्यमरभरतौ ॥ आँयला इति ख्यातः ।

अम्लानः, त्रि, (म्लै + क्तः, न म्लानः नञ्समासः ।) म्लानिरहितः । यथा,—
"अम्लानपङ्क्तिं मालां शिरस्युरसि चापरां" । इति देवीमाहात्म्यं ॥ (स्वच्छः । परिष्कृतः । निर्म्मलः । उज्ज्वलः । प्रसन्नः । विशदः । प्रत्ययः । अपर्य्युषितः । अशुष्कः ।)

अम्लानिनी, स्त्री, (अम्लानानां पद्मानां समूहः । इनि ।) पद्मसमूहः । पद्मिनी । इति चिकाण्डशेषः ॥

अम्लिका, स्त्री, (अम्लैव, स्वार्थे कन् ।) तिन्तिड़ी ॥ इत्यमरः ॥ पलाशीलता । श्वेताम्लिका । क्षुद्राम्लिका । इति राजनिर्घण्टः ॥ अम्लोद्गारः । इति मेदिनी ॥ [इति वामटः ।
("दीपनं भेदनं शुष्कमम्लिकाकोशयोः फलं" ।
"अम्लिकायाः फलं पक्वं तस्मादल्पान्तरं गुणैः" ॥ इति चरकः ।
"अम्लिकायाः फलं पक्वं तद्भेदि तु केवलं" ॥ इति सुश्रुतः ।)

अस्त्रिकावटकः, पुं, (अस्त्रिकाया वटकः।) अस्त्रिकां खेदयित्वा जलेन सह मर्दयित्वा तत्संस्कृतजले मग्नवटकः। अम्लवड़ा इति भाषा। अस्य गुणाः। रुच्यग्निकारित्वं। वटकगुणतुल्यगुणत्वञ्च। इति भावप्रकाशः॥
("अस्त्रिकां खेदयित्वा तु जलेन सह मर्दयेत्।
तन्नीरे कृतसंस्कारे वटकान् मज्जयेज्जनः।
अस्त्रिकावटकास्ते तु रुच्या वह्निप्रदीपनाः।
वटकस्य गुणैः पूर्व्वैरेतेऽपि च समन्विताः"॥)

अस्त्रीका, स्त्री, अस्त्रिका। इत्यमरटीकायां रायमुकुटः॥

अस्त्रोटकः, पुं, (अस्त्रं उटं पत्रं यस्य सः।) अम्लनक्तवृक्षः। अम्लकुचाइ इति ख्यातः। इति रत्नमाला॥

अय ङ गतौ। (इति कविकल्पद्रुमः॥) ङ अयते। इति दुर्गादासः॥

अयः, पुं, (एति सुखमनेन, इण + करणे अच्।) शुभावहविधिः। मङ्गलानुष्ठानं। इत्यमरः॥ (कल्याणदायकं दैवं।
"स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः"।
इति रघुवंशे। नरकभेदः। अयःपानमप्यत्र। इति वैद्यकरत्नसारसङ्ग्रहः॥)

अयः, [स्] क्ली, (इण्गतौ, असुन्।) लौहं। इत्यमरः॥ (गुडूच्यादिलौहं॥
"आयुःप्रदाता बलवीर्य्यधाता,
रोगापहर्त्ता मदनस्य कर्त्ता।
अयःसमानं न हि किञ्चिदस्ति,
रसायनं श्रेष्ठतमं नराणां"॥ * ॥
"गुडूचीसारसंयुक्तं त्रिकत्रयसमन्वयः।
वातरक्तं निहन्त्याशु सर्व्ववातहरं परं"॥)

अयनं, क्ली, (अय + भावे ल्युट्।) ज्ञानं। यथा,—
"ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते"।
इति तिथ्यादितत्त्वं॥ गत्याः। सूर्य्यस्य उत्तरदक्षिणदिग्गमनं। तद्यथा। माघादिषण्मासाः उत्तरायणं। श्रावणादिषण्मासाः दक्षिणायनं। इत्यमरः॥ गमनं। गत्यर्थायधातोर्भावेऽनट्॥ रविसंक्रान्तिविशेषः। यथा भविष्यमात्स्यज्योतिषे।
"मृगकर्कटसंक्रान्ती द्वे तूदक्दक्षिणायने।
विषुवती तुला मेषे गोलमध्ये तथापरा"॥
मृगो मकरः। गोलो राशिचक्रं। देवीपुराणे,
"यावद्दिनक्षला मुक्ता तत्पूर्व्वं चोत्तरायणं।
निरंशे भास्करे दृष्टे दिनान्तं दक्षिणायनं"॥
तत्र स्नानदानादौ कोटिगुणफलं भवति। यथा मात्स्ये।
"अयने कोटिगुणितं लक्षं विष्णुपदीषु च।"
इत्यादि।
"अयने विषुवे चैव ग्रयने बोधने हरेः।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु"॥
इति तिथ्यादितत्त्वं॥ * ॥ सूर्य्यगतिविशेषः। यथा,—
"मृगसंक्रान्तितः पूर्व्वं पश्चात्तारादिनान्तरे।
एकवर्षं चतुःषष्ट्यपलमानक्रमेण तु॥
षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः।
एवं चतुःपञ्चदिनमयनारम्भणं क्रमात्॥
व्युत्क्रमेण च तद्वत् स्यादुदग्यानं रवेर्ध्रुवं।
कर्क्किसंक्रमणे तद्वदभितो दक्षिणायनं"॥
इति ज्योतिस्तत्त्वं॥

अयनांशः, पुं, (अयनस्य अंशः भागः।) सूर्य्यगतिविशेषस्य भागः। अथायनांशलक्षसाधनं।
"लग्नं लग्नान्तरं हृत्वा अयनांशैः प्रपूरयेत्।
खानलैर्हरते भागं मिश्रयित्वा दिने दिने"॥
अस्यार्थः। लग्नं रामोगवेदैरित्यादुक्तं लग्नान्तरं हृत्वा यथा मेषलग्नं ३। ४७ लग्नान्तरेण द्वयोराधिक्येन ३० विंशत्यत्रं तद्यायनांशैः पूरयेत्॥ अयनांशस्तु ज्ञातकार्य्यवोक्तः। यथा,—
"शाकमेकाद्रिवेदोनं द्विः हृत्वा दशभिर्हरेत्।
लब्धं हीनञ्च तत्रैव षष्ठ्यात्मास्यायनांशकाः"॥
इति। लब्धस्थाने लब्धेन इति पाठः सिद्धान्तरहस्ये॥ ते च इदानीं चैत्रस्यैकादशाहे सम्भवात् ऊनविंशतिसंख्यकाः। ते च पुनःखानलैः ३० विंशता हरेत्। भागलब्धिस्तु ऊनविंशतिः १९। तच्च मेषलग्ने मिश्रयित्वा ४। ६ षट्पलाधिकदण्डचतुष्टयात्मकं मेषलग्नं भवति। एवं वृषादिकमूह्यं। किन्तु लग्नान्तरेण यत्राधिकं लभ्यते तत्राधिकं लग्नं भवति। एवं यत्र लग्नान्तरेण हानिस्तत्र लग्नेऽपि हानिरिति निष्कर्षः॥ * ॥ इदानीं स्पष्टज्ञानार्थं पद्येन लिख्यते। बाणेवेदो ४। ५-ऽष्टवैदैः श्रुति १। ४८-रिभनयनैरिन्द्रियं ५। २८-खाम्बुनेषु ५। ३०-बाणो वेदानलैः ५। ३४-खाग्निभिरिषु ५। ३०-रिषुरङ्काग्निने ५। ३६-युःकुवेदे ५। ३१-बाणोनागेन्दुभिस्तु ५। १८ श्रुतिरपि रसरामै ४। ३६-गुणाः सप्तबाणैः ३।५७ रामोऽश्वाद्रिस्तु ३।४७-सिद्धान्तजमतमयनांशादिदं लग्नमानं॥ एतच्च तमोलिप्तादिदेशीयं प्रागुक्तायनांशसाधितं॥ * ॥ अङ्केन वेदो ४। ६ मेषः स्यात् वसुवेदैः सुखं ४।४८ वृषः। मुनियुग्मैः शरो ५।२७ वन्द्वः व्योमाब्धिबाणा ५। ४०-कर्कटः॥ वेदरामैः शरः ५। ३४ सिंहः कन्याङ्गयुग्मपक्षकः ५। २६। तुला ऋषिरामपक्ष ५। ३७-वृश्चिकः खाब्धिपक्षकः ५। ४०॥ नवचन्द्रबाणा ५।१६— धनुर्वेदरामैः सुखं ४। ३४ मृगः। वसुपक्षत्रयः ३। ५८ कुम्भः ऋषिवेदत्रयो ३। ४७ झषः॥ * ॥ शून्यर्वेदश्च ४। ६ मेषो नवसुखसुख ४-४६। गौर्म्मेयुग्मैः शिवाक्षो ५। २८ वन्द्वोऽङ्गाप्यित्तबाणो ५।३६ हिमकरभवनो रामरामैः कलत्रः ५। ३३। सिंहः कन्याजरामैरिषु ५। ३१-रिषुजसुखाग्नीषु ५। ३४-यूकोऽलिपृथ्वी ५। ४१ वेदेशाक्षोऽष्टपृथ्वीसरहरमुख ५। १८-कोदण्डमाऽर्णवराहाः॥ बन्धू रामश्च वेदो ४। ३४ रविसुतभवनः पर्व्वतः पञ्चरामः ३। ५७ कुम्भो मीनश्च भुक्ते गिरिसुखदहनं ३। ४७ प्रत्यहं प्रक्रमेण। अस्तं यामित्रराशावनुदिनमवसाद्यच्च राजीवनाथो यदुदयातिस्म द्रुतं स्यादुदयमनुदिवा-राचमाऽर्णवराहाः॥ * ॥ लग्नं लग्नान्तरं हृत्वेति प्रकारान्तरेण यदुक्तं तदपि पद्येन लिख्यते यथा। वेदोऽङ्कै ४। ६-रिभवेदैः श्रुति ४। ४८-रिषुरिभपक्षैः ५। २८ कुवेदैश्च बाणो ५। ३१ बाणो रामानलै ५। ३३-रिन्द्रियमपि नवाक्षै ५। २६ रिषुः समरामैः ५। ३० बाणः शून्याब्धिने ५।४०-भुर्भूतिभि ५। १८-रिषुगुणैरब्धि ४। ३५-रुद्रेभाग्नी ३। ५८ रामोऽश्वाद्रिस्तु ३। ४७ सिद्धान्तजमतमयनांशादिदं लग्नमानं॥
"चैत्रस्यैकादशाहे तु विषुवारम्भणं यदा।
तदैतल्लग्नमानं हि ज्ञेयमन्यच्च साधनात्"॥
इति ज्योतिषसंग्रहः॥ (गतिः। गमनं। मार्गः।
"अगस्त्यचिह्नादयनात् समीपं
दिगुत्तरा भास्वति सन्निवृत्ते"।
इति रघुवंशे। स्थानं। भूमिः। समरसमारम्भकाले योधानां यथाप्रधानं युद्धभूमौ पूर्व्वापरादिदिग्विभागेनावस्थितिस्थानं। सेनासन्निवेशविशेषरूपव्यूहप्रवेशमार्गः।
"अयनेषु च सर्व्वेषु यथाभागमवस्थिताः।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व्व एव हि"॥
इति भगवद्गीता। आश्रयः। विश्रामस्थानं।
"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृतः"॥
इति मनुः। गृहं। वसतिः। वासस्थानं। ज्ञानं। भावसाधनो ग्रन्थः।
"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु॥
छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ कथ्यते।
ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते"॥
इति कूर्म्मपुराणे।)

अयानयीनः, पुं, ग्रारः। यथा। अनुपदसर्व्वाम्नायानयं बद्धा भक्षयति नेयेषु। अयानयः स्थलविशेषः। तत्रेयः। अयानयीनः ग्रारः। इति सिद्धान्तकौमुदी॥

अयन्त्रितः, त्रि, (न यन्त्रितः, नञ्समासः।) अबाधः। अनर्गलः। इति हेमचन्द्रः॥ (अनियन्त्रितः। अनियमितः। स्वाधीनः।
"सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः।
नायन्त्रितस्त्रिवेदोऽपि सर्व्वाशी सर्व्वविक्रयी"॥
इति मनुः।)

अयस्कान्तः, पुं, (अयसु कान्तः रमणीयः।) लौहविशेषः। कान्तलोह इति ख्यातः। तत्पर्य्यायः। कान्तलोहं २ कान्तं ३ लौहकान्तकं ४ कान्तायसं ५ क्षयलोहं ६ महालोहं ७। अस्य गुणाः। तीक्ष्णत्वं। उष्णत्वं। रूक्षत्वं। पाण्डुरोगकफपित्तहरत्वं। रसायनत्वं। अनुत्तमत्वञ्च। स चतुर्व्विधः। भ्रामकः १ चुम्बकः २ रोमकः ३ खेदकः ४। एते रसायने उत्तरोत्तरगुणिनः।
"क्रमेण दार्ढ्याङ्गकान्तिकार्ष्ण्यनीरोगदायिनः"।
इति राजनिर्घण्टः॥ चुम्बकप्रकरोऽप्ययं। (चुम्बक

इति ख्यातः प्रस्तरभेदः। चुम्बकपाथर इति भाषा।
"उमारूपेण ते यूयं संयमस्तिमितं मनः।
शम्भोर्यतध्वमाकृष्टुमयस्कान्तेन लौहवत्"॥
इति कुमारसम्भवे।)
("ततः कोटिसहस्रैर्वा कान्तलौहं महागुणं"।
इति वैद्यकरत्नेन्द्रसारसङ्गृहः॥)

अयस्कार, पुं, (अयोविकारं करोति, कृ+अण् उपपदसमासः।) प्रजङ्घायः। जङ्घाग्रमागः।
इति त्रिकाण्डशेषः॥ लौहकारः। अयस्कारोतीति व्युत्पत्त्या॥

अयाः, [स्] पुं, (इण्+असुन्।) अग्निः। इत्युणादिकोषः॥

अयाचकः, त्रि, (याच+ण्वुल्, ततो नञ्समासः।) याच्ञारहितः। यथा। "यदि भवति स दाता याचकायाचकेषु"। इत्युद्भटः॥ (भिक्षापराङ्मुखः। प्रार्थनाविमुखः।)

अयाचितं, त्रि, (याच्+क्तः, नञ्समासः।) याच्ञां विना लब्धवस्तु। अप्रार्थितं। इत्यमरशब्दार्थमेदिनी॥ (अनर्थितं। "अयाचितोपस्थितमम्बु केवलं"। इति कुमारसम्भवे। "अमृतं स्यादयाचितं"। इति मनुः। "अयाचिताहृतं याच्ञामपि दुष्कृतकर्म्मणः"। इति स्मृतिः।)

अयाचितः, पुं, (याच्+क्तः, ततो नञ्समासः।) मुनिविशेषः। तत्पर्य्यायः। उपवर्षः २ इलभृतिः ३ कृतकोटिः ४। इति त्रिकाण्डशेषः॥

अयानं, क्ली, खभावः। इति हारावली॥ अगमनं। गत्यर्थयाधातोर्भावेऽनट् ततो नञ्समासः॥

अयि, व्य, प्रश्नः। (इण+इन्।) अनुनयः। सम्बोधनं। इति मेदिनी॥ अनुरागे। ("अयि कठोरे! यशः किल ते प्रियं"। इति उत्तरचरिते। "अयि घनोरु! पदानि शनैः शनैः"। इति वेणीसंहारे। "अयि जीवितनाथ! जीवसीत्यभिधायोत्थितया तया पुरः"। इति कुमारसम्भवे।)

अयुक्छदः, पुं, (अयुग्माः सप्त सप्त छदा अस्य।) सप्तपर्णवृक्षः। इति हेमचन्द्रः॥

अयुक्त, त्रि, (युज्+क्तः, नञ्समासः।) अमिश्रितं। अनुचितं। यथा,—
"अयुक्तं यदिह प्रोक्तं प्रमादेन भ्रमेण वा"।
इति दुर्गादासः॥ (असंसक्तः। संयोगरहितः। अनियोजितः। यथा,
"अयुक्तचारा राजानो भविष्यन्ति कथं नु ते"।
इति रामायणे। सर्व्वदा विषयासक्तचित्ततया कर्त्तव्येष्वनवहितः।
"परावमन्ता विषयेषु सक्तवान्,
न देशकालप्रविभागतत्त्ववित्।
अयुक्तबुद्धिर्गुणदोषनिश्चये,
विपन्नराज्यो न चिरात् विपत्स्यते"॥
इति रामायणे।)

अयुग्मच्छदः, पुं, (अयुग्माः सप्त सप्त छदा अस्य।) विषमच्छदः। सप्तपर्णवृक्षः। इत्यमरटीकायां भरतः॥ (छातिम इति ख्यातः सप्तच्छदवृक्षः।
"अनेकराजन्यरथाश्वसङ्कुलं
तदीयमास्थानिकेतनाजिरं।
नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं नृपोपायनदन्तिनां मदः"॥
इति किरातार्জ্জुनीये।)

अयुतं, क्ली, (न युतं, नञ्समासः।) दशसहस्रसंख्या। इति हेमचन्द्रः॥ १०००० दशहाजार इति भाषा। ("नागानामयुतं गुरुक्रनियुतं सार्द्धं रथानां शतं"। इति रामायणे।)

अयुतः, त्रि, (न युतः, नञ्समासः।) असिश्रितः। अयुक्तः। यथा। अपृथग्भावोऽयुतासिद्धिः। इति चरकटीका॥ (असंयुक्तः। असंश्लिष्टः। संयोगरहितः। पुंसि खनामख्यातः राधिकस्य पुत्रः स च क्रोधनस्य पिता।)

अये, व्य, (इण+एच्।) कोपः। विषादः। सम्भ्रमः। स्मरणं। इति मेदिनी॥ सम्बोधनं। इति शब्दरत्नावली॥ (कोमलामन्त्रणे। "अये कान्ते मुग्धे चटुलनयने चन्द्रवदने"। इत्युद्भटः। "अये कथं तातसारथिरस्मसेनः"। इति वेणीसंहारे।)

अयोगः, पुं, (युज्+घञ्, नञ्समासः।) विश्लेषः। विधुरः। कूटः। कठिनोद्यमः। इति मेदिनी॥ वमनविरेचनादीनां प्रतिलोमप्रवृत्तिरल्पप्रवृत्तिर्व्वा। यथा,—
"योगः सम्यक्प्रवृत्तिः स्यादतियोगोऽतिवर्त्तनं।
अयोगः प्रातिलोम्येन न वाल्पं वा प्रवर्त्तनं"॥
इति वैद्यकं॥ ("तत्रासात्म्येन्द्रियार्थसंयोगोऽयोगातियोगमिथ्यायोगादियुक्ता रूपरसादयः"॥
इति माधवकरकृतरोगविनिश्चयग्रन्थे विजयरक्षितः॥
"चीर्य्यायतनानीति अर्थानां कर्म्मणः कालस्य चातियोगायोगमिथ्यायोगाः तत्रातिप्रभावतां दृश्यानामतिमात्रं दर्शनमतियोगः॥ सर्व्वथोऽदर्शनमयोगः अतिसूक्ष्मातिस्निग्धातिविप्रकृष्टरौद्रभैरवादद्भुतदृष्टबीभत्सविकृतादिरूपदर्शनं। मिथ्यायोगः"॥ इति चरकः॥) योगो ध्यानं तदभावः। योगो भेषजं तदभावश्च॥ (विच्छेदः। मिथः संरूढगाढानुरागयोर्नायकनायिकयोर्गुरुजनपराधीनतया दैवगत्या वा विप्रकर्षादन्योन्यादर्शनरूपदशाविशेषः, यदुक्तं दशरूपादर्शे।
"तत्रायोगोऽनुरागेऽपि नवयोरेकचित्तयोः।
पारतन्त्र्येण दैवाद्वा विप्रकर्षादसङ्गमः"॥
अयञ्च पूर्ब्बराग इत्युच्यते। यदुक्तं दर्पणकारैः।
"श्रवणादर्शनाद्वापि मिथः संरूढरागयोः।
दशाविशेषो योऽप्राप्तौ पूर्ब्बरागः स उच्यते"॥)

अयोगवः, त्रि, (अयश्च कटिना गौर्व्वाणी यस्य सः, अच्।) अयोगं दुरयोगं वाति वा+कः।) वैश्यकन्यायां शूद्रादुत्पन्नसन्तानः। इति जटाधरः॥ ("शूद्रादयोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः"॥
इति मनुः।
शूद्रात् वैश्यायां जातः प्रतिलोमजः सङ्कीर्णवर्णः।
"प्रसाधनोपचारज्ञमदासं दासजीवनं।
सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे"॥
इति मनुः।)

अयोगुड़ः, पुं, (अयसा निर्म्मितो गुड़ः पिण्डः।) लौहगुलिका। यथा,—
"वरमाशीविषविषं क्षयितं ताम्रमेव वा।
पीतमग्निसन्तप्तो भक्षितो वाप्ययोगुड़ः"॥
इति चरकः॥

अयोग्रं, क्ली, (अयोऽग्रे मुखे यस्य तत्।) मुषलं। इत्यमरः॥

अयोघनः, पुं, (अयांसि हन्यन्ते तान्यनेन, हन+अप्+घनादेशश्च।) एकीभूतलौहपिण्डः। हातुड़ी इति भाषा। तत्पर्य्यायः। लौहकूटं २। इति हेमचन्द्रः॥
("अयोघनेनाय इवाभितप्तं
वैदेहिबन्धोर्हृदयं विदद्रे"।
इति रघुवंशे।
"कुरु करे गुरुमेकमयोघनं
दहसितो सुकुरुश्च कुरुश्च मे"।
इति नैषधं।)

अयोध्या, स्त्री, (योद्धुमशक्या, युध+ण्यत्, नञ्समासः।) श्रीरामनगरी। पश्चिमदेशे अवोद इति प्रसिद्धा। तत्पर्य्यायः। साकेतं २ कोशला ३। इति हेमचन्द्रः॥ उत्तरकोशला ४। इति त्रिकाण्डशेषः॥ सा तु मोक्षदा पुरी। यथा,—
"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः॥
एतासु पृथिवीमध्ये न गण्यन्ते कदाचन।
श्रीरामधनुरग्रस्था अयोध्या सा महापुरी"॥
इति भूतशुद्धितन्त्रं॥ * ॥ तद्वर्णनं यथा,—
"कोशलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्॥
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता।
मनुना मानवेन्द्रेण या पुरी निर्म्मिता स्वयम्॥
आयता दश च द्वे च योजनानि महापुरी।
श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा॥
राजमार्गेण महता सुविभक्तेन शोभिता।
मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः॥
तान्तु राजा दशरथो महाराष्ट्रविवर्द्धनः।
पुरीमावासयामास दिवि देवपतिर्यथा॥
कपाटतोरणवतीं सुविभक्तान्तरापणां।
सर्व्वयन्त्रायुधवतीमुषितां सर्व्वशिल्पिभिः॥
सूतमागधसम्बाधां श्रीमतीमतुलप्रभां।
उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलां॥
बधूनाटकसंघैश्च संयुक्तां सर्व्वतः पुरीं।
उद्यानाम्रवणोपेतां महतीं शालमेखलां॥
दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदां।
वाजिवारणसम्पूर्णां गोभिरुष्ट्रैः खरैस्तथा॥
सामन्तराजसङ्घैश्च बलिकर्म्मभिरावृतां।
नानादेशनिवासैश्च वणिग्भिरुपशोभितां॥
प्रासादैः रत्नविकृतैः पर्व्वतैरिव शोभितां।
कूटागारैश्च सम्पूर्णामिन्द्रस्येवामरावतीं॥

चित्रामष्टापदाकारां वरनारीगणैर्युतां ।
सर्व्वरत्नसमाकीर्णां विमानग्रहशोभितां ॥
ग्रहगाढ़ामविच्छिद्रां समभूमौ निवेशितां ।
शालितण्डुलसम्पूर्णामिक्षुकाण्डरसोदकां ॥
दुन्दुभीभिर्म्मृदङ्गैश्च वीणाभिः पणवैस्तथा ।
नादितां भृशमत्यर्थं एथिव्यां तामनुत्तमां ॥
विमानमिव सिद्धानां तपसाधिगतं दिवि ।
सुनिवेशितवेश्मान्तां नरोत्तमसमावृतां ॥
ये च बाणैर्न विध्यन्ति विविक्तमपरापरं ।
शब्दवेधञ्च विततं लघुहस्ता विशारदाः ॥
सिंहव्याघ्रवराहाणां मत्तानां नदतां वने ।
हन्तारो निशितैः शस्त्रैर्बलाद्बाहुबलैरपि ॥
तादृशानां सहस्रैस्तामभिपूर्णां महारथैः ।
पुरीमावासयामास राजा दशरथस्तदा ॥
तामग्निमद्भिर्गुणवद्भिरावृतां
द्विजोत्तमैर्व्वेदषडङ्गपारगैः ।
सहस्रदैः सत्यरतैर्महात्मभि-
र्महर्षिकल्पैर्ऋषिभिश्च केवलैः" ॥
इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे पञ्चमः सर्गः ॥ * ॥
"तस्यां पुर्य्यामयोध्यायां वेदवित् सर्व्वसंग्रहः ।
दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥
इक्ष्वाकूणामतिरथो यज्वा धर्म्मपरो वशी ।
महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥
बलवान्निहतामित्रो मित्रवान् विजितेन्द्रियः ।
धनैश्च सञ्चयैश्चान्यैः शक्रवैश्रवणोपमः ॥
यथा मनुर्महातेजा लोकस्य परिरक्षिता ।
तथा दशरथो राजा लोकस्य परिरक्षिता ॥
तेन सत्याभिसन्धेन त्रिवर्गमनुतिष्ठता ।
पालिता सा पुरी श्रेष्ठा इन्द्रेणेवामरावती ॥
तस्मिन् पुरवरे हृष्टा धर्म्मात्मानो बहुश्रुताः ।
नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः ॥
नाल्पसन्निचयः कश्चित्तदा तस्मिन् पुरोत्तमे ।
कुटुम्बी यो ह्यसिद्धार्थोऽगवाश्वधनधान्यवान् ॥
कामी वा न कदर्य्यो वा नृशंसः पुरुषः क्वचित् ।
द्रष्टुं शक्यमयोध्यायां नाविद्वान् न च नास्तिकः ॥
सर्व्वे नराश्च नार्य्यश्च धर्म्मशीलाः सुसंयताः ।
मुदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥
नाकुण्डली नामुकुटी नास्रग्वी नाल्पभोगवान् ।
नामृष्टो न विलिप्ताङ्गो नासुगन्धश्च विद्यते ॥
नामृष्टभोजी नादाता नाप्यनङ्गदनिष्कधृक् ।
नाहस्ताभरणो वापि दृश्यते नाप्यनात्मवान् ॥
नानाहिताग्निर्नायज्वा न क्षुद्रो वा न तस्करः ।
कश्चिदासीदयोध्यायां न चावृत्तो न सङ्करः ॥
स्वकर्म्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ।
दानाध्ययनशीलाश्च संयताश्च प्रतिग्रहे ॥
नास्तिको नानृतो वापि न कश्चिदबहुश्रुतः ।
नास्वयको न चाशक्तो नाविद्वान् विद्यते क्वचित् ॥
नाषडङ्गविदत्रास्ति नावृतो नासहस्रदः ।
न दीनः क्षिप्तचित्तो वा व्यथितो वापि कश्चन ॥
कश्चिन्नरो वा नारी वा नाश्रीमान्नाप्यरूपवान् ।
द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ॥
वर्णेष्वग्र्याचतुर्थेषु देवतातिथिपूजकाः ।
कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ॥
दीर्घायुषो नराः सर्व्वे धर्म्मं सत्यञ्च संश्रिताः ।
सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥
क्षत्रं ब्रह्ममुखं चासीद्वैश्याः क्षत्रमनुव्रताः ।
शूद्राः स्वकर्म्मनिरतास्त्रीन् वर्णानुपचारिणः ॥
सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता ।
यथा पुरस्तान्मनुना मानवेन्द्रेण धीमता ॥
योधानामग्निकल्पानां पेशलानाममर्षिणां ।
सम्पूर्णा कृतविद्यानां गुहा केशरिणामिव ॥
काम्बोजविषये जातैर्व्वाह्लीकैश्च हयोत्तमैः ।
वनायुजैर्नदीजैश्च पूर्णा हरिहयोत्तमैः ॥
विन्ध्यपर्व्वतजैर्मत्तैः पूर्णा हैमवतैरपि ।
मदान्वितैरतिबलैर्मातङ्गैः पर्व्वतोपमैः ॥
ऐरावतकुलीनैश्च महापद्मकुलैस्तथा ।
अञ्जनादपि निष्क्रान्तैर्वामनादपि च द्विपैः ॥
भद्रैर्मन्द्रैर्मृगैश्चैव भद्रमन्द्रमृगैस्तथा ।
भद्रमन्द्रैर्भद्रमृगैर्मृगमन्द्रैश्च सा पुरी ॥
नित्यमत्तैः सदा पूर्णा नागैरचलसन्निभैः ।
सा योजने द्वे च भूयः सत्यनामा प्रकाशते ॥
तां पुरीं स महातेजा राजा दशरथो महान् ।
शशास शमितामित्रो नक्षत्राणीव चन्द्रमाः ॥
तां सत्यनामां दृढ़तोरणार्गलां
गृहैर्विचित्रैरुपशोभितां शिवां ।
पुरीमयोध्यां नृसहस्रसंकुलां
शशास वै शक्रसमो महीपतिः" ॥
इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे षष्ठः सर्गः ॥ युद्धाधिक्ये त्रि ॥

अयोमलं, क्ली, (अयसो मलमिव ।) लौहमलं । इति राजनिर्घण्टः ॥ लोहार गु इति भाषा । तत्पर्य्यायः । मण्डूरं २ लौहकिट्टं ३। तस्य गुणाः । "शूलोर्द्धमुत्तमं किट्टं मध्यञ्चाशीतिवर्षकं । अधमं षष्टिवर्षीयं ततो हीनं विषोपमं ॥ यल्लोहं यद्गुणं प्रोक्तं तत्किट्टञ्चापि तद्गुणं" । इति वैद्यकं ॥
(अस्य शोधनमारणं यथा,—
"दग्ध्वाक्काष्ठैर्मलमायसन्तु,
गोमूत्रनिर्व्वापितमष्टवारान् ।
विचूर्ण्य लीढ़ं मधुना चिरेण,
कुम्भाङ्गयं पाण्डुगदं निहन्ति" ॥
इति वैद्यकरत्नसारसङ्ग्रहः ॥)

अरं, क्ली, (इयर्त्ति गच्छत्यनेन, ऋ + अच् ।) शीघ्रं । चक्राङ्गं । चाकार पाकि इति भाषा । शीघ्रगे त्रि । इति मेदिनी ॥

अरः, पुं, (ऋ + अच् ।) जिनानां कालचक्रस्य द्वादशांशः । स तु अवसर्पिण्याः षष्ठभागः ॥ जिनानामष्टादशतीर्थङ्करः । इति हेमचन्द्रः ॥

अरकः, पुं, (अ + ऋकन् ।) शैवालं । इति हारावली ॥ पर्पटः । इति राजनिर्घण्टः ॥

अरग्वधः, पुं, आरग्वधवृक्षः । सोंदालि इति ख्यातः । इत्यमरटीकायां भरतः ॥ (अस्य गुणादयः आरग्वधशब्दे ज्ञेयाः ।)

अरघट्टः, पुं, (अरं शीघ्रं घट्यते चाल्यतेऽसौ, अर + घट्ट + अच् ।) महाकूपः । इत्यमरजटाधरौ ॥ (कूपात् जलनिःसारणार्थं घटीयन्त्रभेदः । कूपोपरिनिबद्धजलोत्तोलककाष्ठभेदः । "स कदाचिद्दायादैरुद्वेजितोऽरघट्टघाटिकामारुह्य कूपात् क्रमेण निष्क्रान्तः" । इति पञ्चतन्त्रे ।)

अरघट्टकः, पुं, (अरघट्ट + स्वार्थे कन् ।) महाकूपः । तत्पर्य्यायः । पादावर्त्तः २। इति हेमचन्द्रः ॥

अरजाः, [स्] स्त्री, (रन्ज + असुन्, नलोपः नञ्समासः ।) कन्या । कुमारी । इति हेमचन्द्रः ॥ रजोगुणरहिते त्रि ॥ (निर्म्मलः । धौतः । परिष्कृतः ।)

अरटुः, पुं, (अरं शीघ्रं अटति, अट् + उन्) अरलुरुक्षः । इत्यमरटीकायां रायमुकुटः ॥

अरणिः, पुं, (ऋ + अनि ।) गणिकारिकावृक्षः । इति मेदिनी । सूर्य्यः । इति काशीखण्डं ॥

अरणिः, पुं, स्त्री, (ऋ + अनि ।) निर्म्मन्थ्यदारु । अग्निसाधनीभूतकाष्ठं । घर्षणद्वाराग्निजनककाष्ठं । इत्यमरः ॥ (अग्निमन्थनकाष्ठ । अग्न्युत्पादनाय यत्काष्ठं काष्ठान्तरेण घृष्यते तदरणिनामकं काष्ठं ।
"विपक्षवक्षोऽरणिमन्थनोत्थः
प्रतापवह्निरिव धूमलेखा" ।
इति धनञ्जयविजयव्यायोगे ।)

अरणी, स्त्री, अरणिः । इत्यमरटीकायां भरतः ॥ ("विधिना मन्त्रयुक्तेन रूक्षाऽपि मथिताऽपि च । प्रयच्छति फलं भूमिररणीव ऊताशनम्" ॥ इति पञ्चतन्त्रे ।)

अरणीकेतुः, पुं, (अरणी केतुरस्य सः ।) अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥

अरण्यं, क्ली, (अर्य्यते मृगैः, ऋ गतौ, अर्त्तेर्निञ्चेति अन्यः ।) वनं । इत्यमरः ॥ (मोक्षप्रदं दण्डकादिकं नवारण्यं । यदुक्तं,—
"दण्डकं सैन्धवारण्यं जम्बुमार्गञ्च पुष्करं ।
उत्पलावर्त्तकारण्यं नैमिषं कुरुजाङ्गलं ॥
हिमवानर्ब्बुदञ्चैव नवारण्यं विमुक्तिदं" ।)

अरण्यः, पुं, कटफलवृक्षः । इति शब्दचन्द्रिका ॥ (स्वनामख्यातो रैवतस्य मनोः पुत्रः । यदुक्तं हरिवंशे,—
"अरण्यस्य प्रकाशश्च निर्म्मोहः सत्यवान् क्रतुः ।
रैवतस्य मनोः पुत्राः पञ्चमश्चैतदन्तरं" ।)

अरण्यकदली, स्त्री, (अरण्यस्यैव कदली, षष्ठीतत्पुरुषः ।) गिरिकदली । इति राजनिर्घण्टः ॥ (वनकदली । इयं ग्रामादौ न जायते ।)

अरण्यकार्पासी, स्त्री, (अरण्ये कार्पासी, सप्तमीतत्पुरुषः ।) वनकार्पासी । तत्पर्य्यायः । वनजा २ भारद्वाजी ३ वनोद्भवा ४ । अस्या गुणाः । हिमत्वं । रूक्षत्वं । व्रणशस्त्रक्षतनाशित्वञ्च । इति राजनिर्घण्टः ॥

अरण्यकुलत्थिका, स्त्री, (अरण्यस्य कुलत्थिका, षष्ठीतत्पुरुषः ।) कुलत्था । इति राजनिर्घण्टः ॥ वनकुलथी इति भाषा ।

अरण्यकुसुम्भः, पुं, (अरण्यस्य कुसुम्भः, षष्ठीतत्-

पुरुषः ।) वनकुसुम्भः । तत्पर्य्यायः । कौसुम्भः २ अग्निसम्भवः ३ । अस्य गुणाः पाके कटुत्वं । श्लेष्मनाशित्वं । अग्निदीपकारित्वञ्च । इति राजनिर्घण्टः ॥

अरण्यघोली, स्त्री, (अरण्यजा घोली, कर्म्मधारयः ।) वनघोली । पत्रशाकविशेषः । इति राजनिर्घण्टः ॥

अरण्यचटकः, पुं, (अरण्यस्य चटकः, षष्ठीतत्पुरुषः ।) वनचटकः । तत्पर्य्यायः । धूसरः २ भूमिशयः ३ । अस्य गुणाः । शीतत्वं । लघुत्वं । शुक्रवृद्धिकारित्वं । बलप्रदत्वञ्च । इति राजनिर्घण्टः ॥ (अस्य मांसगुणा यथा राजनिर्घण्टे,—

"चटकाखञ्जं तु शीतं लघु हृद्यं बलप्रदं ।
तद्वच्चारण्यचटकं तत्तूष्णं लघुपथ्यदम्" ॥)

अरण्यजार्द्रका, स्त्री, (अरण्ये जायते या, अरण्य + जन् + ड, अरण्यजा आर्द्रका, कर्म्मधारयः ।) वनार्द्रका । इति राजनिर्घण्टः ॥ वन आदा इति भाषा । अस्य गुणपर्य्यायौ ऐन्द्रशब्दे द्रष्टव्यौ ॥

अरण्यजीरः, पुं, (अरण्यस्य जीरः, षष्ठीतत्पुरुषः ।) वनजीरः । इति राजनिर्घण्टः ॥ वनजीरा इति भाषा ।

अरण्यधान्यं, क्ली, (अरण्यस्य धान्यं, षष्ठीतत्पुरुषः ।) नीवारः । इति राजनिर्घण्टः ॥ उड़ी धान इति भाषा ।

अरण्यमक्षिका, स्त्री, (अरण्यस्य मक्षिका, षष्ठीतत्पुरुषः ।) दंशः । इति शब्दरत्नावली ॥ डाँश इति भाषा ।

अरण्यमुद्गः, पुं, (अरण्यस्य मुद्गः, षष्ठीतत्पुरुषः ।) मकुष्टकः । इति राजनिर्घण्टः ॥ वनमुग इति भाषा । (अस्य गुणाः मकुष्टकशब्दे द्रष्टव्याः ।)

अरण्यवायसः, पुं, (अरण्यस्य वायसः, षष्ठीतत्पुरुषः ।) दीर्घकाकः । इति राजनिर्घण्टः ॥ दाँड़ काक इति भाषा ।

अरण्यवासिनी, स्त्री, (अरण्ये वसति या, अरण्य + वस् + णिनि, स्त्रियां ङीप् ।) अत्यल्पपर्णी लता । इति राजनिर्घण्टः ॥

अरण्यवास्तूकः, पुं, (अरण्यस्य वास्तूकः, षष्ठीतत्पुरुषः ।) वनवास्तूकः । इति राजनिर्घण्टः ॥ वन बेतो इति भाषा । अस्य गुणपर्य्यायौ कुञ्जरशब्दे द्रष्टव्यौ ॥

अरण्यशालिः, पुं, (अरण्यभवः शालिः, कर्म्मधारयः मध्यपदलोपश्च ।) नीवारः । वनधान्यं । इति राजनिर्घण्टः ॥

अरण्यशूरणः, पुं, (अरण्यजातः शूरणः, कर्म्मधारयः ।) वनशूरणः । इति राजनिर्घण्टः ॥ वनओल इति भाषा ।

अरण्यश्वा, [न्] पुं, (अरण्ये श्वेव हिंस्रः ।) वृकः । इति हेमचन्द्रः ॥ नेकड़े बाघ इति भाषा ।

अरण्यषष्ठी, स्त्री, (अरण्याय गन्तुं षष्ठी, चतुर्थीतत्पुरुषः ।) ज्येष्ठशुक्लषष्ठी । बाँटाषष्ठी इति भाषा । यथा राजमार्त्तण्डे,—

"ज्यैष्ठे मासि सिते पक्षे षष्ठी चारण्यसंज्ञिता ।
व्यजनैककरास्तस्यामटन्ति विपिने स्त्रियः ॥
तां विन्ध्यवासिनीं स्कन्धषष्ठीमाराधयन्ति च ।
कन्दमूलफलाहारा लभन्ते सन्ततिं शुभां" ॥

कन्दं शूरणादि । मूलं तदितरत् । इति तिथ्यादितत्त्वं ॥

अरण्यानी, स्त्री, (अरण्य + आनुक् + स्त्रियां ङीष् । महत् अरण्यम् इत्यस्मिन् अर्थे इन्द्रवरुणेति सूत्रस्थेन हिमारण्ययोर्महत्त्वइति वार्त्तिकेन अरण्यशब्दस्य आनुगागमः, ततो ङीष् ।) महावनं । इत्यमरः ॥ ("अस्ति मगधदेशे चम्पकवती नामारण्यानी" । इति हितोपदेशे ।)

अरतचपः, पुं, स्त्री, (अरता विरता चपा यस्य ।) कुक्कुरः । इति चिकाण्डशेषः ॥ रत्यलज्जे त्रि ॥ (नास्ति रते हृद्कारे चपा लज्जा यस्य सः ।)

अरतिः, पुं, (ऋ + अति ।) क्रोधः । इत्युणादिकोषः ॥

अरतिः, स्त्री, (रम् + क्तिन्, नञ्समासः ।) अनवस्थितचित्तत्वं । इति रन्तिदेवः ॥ क्रीड़ाभावः । इति कार्त्तिकः ॥ रतिविरहः । रतिशून्ये त्रि ॥ (विरक्तिः । प्रीतिविरहः । अनुरागराहित्यं । उत्साहहीनता । उद्यमाभावः । उद्योगराहित्यं । निश्चेष्टता । सुखाभावः । दुःखं । क्लेशः । औत्सुक्यं । उद्वेगः । इष्टवियोगात् चित्तस्याकुलीभावः । यदुक्तं,—

"स्वाभीष्टवस्त्वलाभेन चेतसो यानवस्थितिः ।
अरतिः सा तु विज्ञेया" । सुश्रुताभावः । अस्वास्थ्यं ।
"अमोऽरतिर्विवर्णत्वं वैरस्यं नयनस्रवः" ।
इति सुश्रुते ।)

अरत्निः, पुं, (ऋ + कत्निः, रत्निः बद्धमुष्टिकरः, स नास्ति यस्य ।) विस्तृतकनिष्ठाङ्गुलिमुष्टिकहस्तः । कुर्परः । इति मेदिनी ॥
("एकविंशतियूपास्ते एकविंशत्यरत्नयः" ।
इति रामायणे । कफोणिः । हस्तः । करतलपार्श्वः । बद्धमुष्टिहस्तः । कील, घुसी इत्यादि भाषा ।

"पदा मूर्ध्नि महाबाहुः प्राहरत् विलपिष्यतः ।
तस्य जानु ददौ भीमो जघ्ने चैनमरत्निना" ॥
इति महाभारते ।)

अरन्धनं, क्ली, (न रन्धनं, अत्र अभावे नञ् ।) पाकाभावः । तत्तु कन्यासंक्रान्त्यां क्षतक्षेत्रे दुष्टान्नभक्षणे च कथ्यते । सौरभाद्रस्य यस्मिन् कस्मिन् दिने क्षतक्षेत्रे इच्छारन्धनमित्युच्यते । इति लोकप्रसिद्धं । तत्र प्रमाणं ।

"कर्कान्नमद्यात् सिंहाहे सिंहान्नं सिंहकन्ययोः ।
मनसाप्येषनागेभ्यो दत्त्वा सर्व्वं निशोधितं" ॥
इत्याचारमार्त्तण्डधृतवचनं ॥

अरमः, त्रि, (न रम्यतेऽत्र, आधारे घञ् ।) अवमः । अधमः । इत्यमरटीकासारसुन्दरी ॥ (नीचः । निकृष्टः । हीनः ।)

अररं, त्रि, (ऋ + अरच् ।) कवाटं । इत्यमरः ॥ करीरकोषः । आच्छादनं । इति विश्वः ॥ (एंसि चर्म्मकर्त्तनच्छुरिकाभेदः । यज्ञाङ्गं । युद्धं । रणः ।)

अररिः, पुं, क्ली, (ऋच्छति ऋ + विच्, अरमियर्त्ति ऋ इनि ।) कपाटं । इति हेमचन्द्रः ॥

अरलुः, पुं, (ऋ + अरु ।) शूकरः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (अस्त्रभेदः । खनामख्यातोऽसुरभेदः ।)

अरले, अ, (अरं शीघ्रं राति, रा + के ।) त्वरान्वितसम्बुद्धिः । शीघ्रसम्बोधनं । इति शब्दरत्नावली ॥ (शीघ्रं प्रत्युत्तरलाभेच्छया कृते अतिव्यग्रतया सम्बोधने ।

"अरे विकारसम्बोधे अरले त्वरयान्विते" ।
इति शब्दरत्नावली ।)

अरलुः, पुं, (अरं लाति, ला + कु, ऋ + अरु + रस्य लः ।) श्योनाकवृक्षः । इत्यमरः ॥ शोनागाछ इति भाषा ।

अरविन्दं, क्ली, (अराकाराणि दलानि तत्सादृश्यात् अराः, तान् विन्दति लभते इत्यर्थे विद् + श ।) पद्मं । सारसपत्त्री । इत्यमरः ॥ ताम्रं । रक्तकमलं । नीलोत्पलं । इति राजनिर्घण्टः ॥ ("उन्मीलितं तूलिकयेव चित्रं सूर्य्यांशुभिर्भिन्नमिवारविन्दम्" । इति कुमारसम्भवे ।

"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलं ।
स्मरामि वदनं तस्याश्चारुचञ्चललोचनम्" ॥
इति साहित्यदर्पणे ।)

अरविन्दिनी, स्त्री, (अरविन्द + इनि, ङीप् ।) नलिनी । इति शब्दरत्नावली ॥ पद्मसमूहः । पद्माकरः । इति रत्नमाला ॥

अरसिकः, त्रि, (रसं वेत्ति, रस + ठन्, नञ्समासः ।) अरसज्ञः । अविदग्धः । यथा । "अरसिकेषु रसस्य निवेदनं शिरसि मा लिख मा लिख मा लिख" ॥ इत्युद्भटः ॥

अराजकः, त्रि, (नास्ति राजा यत्र सः, कप् ।) राजशून्यदेशादिः । यथा,—

"चौरप्रायं जनपदं हीनसत्वमराजकं" ।
इति श्रीभागवतं ॥ (नियन्तृहीनः । शासनकर्त्तृरहितः ।

"अराजके जनपदे दोषा जायन्ति वै सदा ।
उद्दण्डं सततं लोकं राजा दण्डेन शास्ति वै" ॥
इति महाभारते ।)

अराजकः, पुं, (नास्ति राजा यत्र सः कप् ।) राजशून्यदेशादिः । यथा,—

"अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः" ॥
इति मानवे ७ अध्याये ३ श्लोकः ॥

अरातिः, पुं, (न राति ददाति सुखं, रा + क्तिच्, नञ्समासः ।) शत्रुः । इत्यमरः ॥
("अरातिविक्रमालोकविकसत्करविलोचनः" ।
इति साहित्यदर्पणे ।

"अनेकयुद्धविजयी सन्धानं यस्य गच्छति ।
तत्प्रभावेन तस्यास्तु वशं गच्छन्त्यरातयः" ॥
इति पञ्चतन्त्रे ।)

अरालं, त्रि, (ऋ + विच्, अरमालाति, आ + ला + क ।) कुटिलं । वक्रं । इत्यमरः ॥
("अरालैः स्वाभाव्यादलिकरभकश्रीभिरलकैः" ।
इति आनन्दलहरी ।)

अरालः, पुं, (ऋ + विच्, अरमालाति, आ + ला + क।) सर्ज्जरसः। मत्तहस्ती। इति मेदिनी॥ वक्रहस्तः। इति शब्दरत्नावली॥

अराला, स्त्री, (अराल + स्त्रियां टाप्) अदृष्टा। कुलटा। इति शब्दरत्नावली॥

अरिः, पुं, (ऋ + इन्।) शत्रुः। इत्यमरः॥ ("उपकार्य्यारिणा सन्धिर्न मित्रेणापकारिणा"। इति हितोपदेशे। [इति मनुः।) "अनन्तरमरिं विद्यादरिसेविनमेव च"। चक्रं। इति त्रिकाण्डशेषः॥ खदिरभेदः। तत्पर्य्यायः। सन्दानिका २ दाली ३ खदिरपत्रिका ४। अस्य गुणाः। कषायत्वं। कटुत्वं। तिक्तत्वं। रक्तार्शःपित्तनाशित्वञ्च। इति राजनिर्घण्टः॥

अरित्रं, क्ली, (ऋच्छत्यनेन, ऋ + इत्र।) कर्णः। हालि इति भाषा। तत्पर्य्यायः। केनिपातकः २। इत्यमरः॥ केनिपातः ३। इति भरतः॥ ("लोलैररित्रैश्चरणैरिवाभितः"। इति माघः।)

अरिन्दमः, त्रि, (अरीन् शत्रून् कामादीन् वा दाम्यति दमयति, दम् + अन्तर्भूतण्यर्थे खच् मुम्, उपपदसमासः।) शत्रुदमनकारकः। इति मुग्धबोधव्याकरणं।

("यथाकामं यथोत्साहं यथाकालमरिन्दम। सेविता विषयाः पुत्र यौवनेन मया तव"॥ "ज्ञात्वा तु तदृषेः सर्व्वमादीप्तं पाण्डुनन्दनाः। सरक्षां विविशुस्तूर्णं मात्रा सार्द्धमरिन्दमाः"॥ इति महाभारते।)

अरिमर्दः, पुं, (अरिं रोगरूपं शत्रुं मृद्नाति, मृद् + अण्, उपपदसमासः।) कासमर्दवृक्षः। इति राजनिर्घण्टः॥ (त्रि, शत्रुमर्द्दनकारी।)

अरिमेदः, पुं, (अरेर्विट्खदिरस्येव मेदः सारः यस्य सः।) वृक्षविशेषः। गुइया बाबला इति भाषा। तत्पर्य्यायः। इरिमेदः २ रिमेदः ३ गोधास्कन्दः ४ अरिमेदकः ५ अहिमारः ६ पूतिमेदः ७ अहिमेदकः ८ विट्खदिरः ९। अस्य गुणाः। कषायत्वं। उष्णत्वं। तिक्तत्वं। भूतविनाशित्वं। श्लोथातिसारकासविषवैसर्पनाशित्वञ्च। इति राजनिर्घण्टः॥

(अस्य व्यवहारो यच्च तदौषधं यथा,—

"तुलां घृतां नीलसहाचरस्य,
द्रोणेऽम्भसः संश्रपयेद्यथावत्।
पूर्त्वा चतुर्भागरसे तु तैलं,
पचेच्छनैरर्द्धपलप्रयुक्तैः॥
कल्कैरनन्ताखदिरारिमेद-
जम्बाम्बयष्टीमधुकोत्पलानां।
तत्तैलमाश्वेव घृतं मुखेन,
सौख्यं द्विजानां विदधाति सद्यः"॥ * ॥

महासहचरं तैलं॥ इति वैद्यकचक्रपाणिसंग्रहः।)

अरिष्टं, क्ली, (रिष हिंसायां कर्त्तरि क्त, नञ्समासः।) सूतिकागृहं। ("अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा"। इति रघुवंशे।) अशुभं। तक्रं। मरणचिह्नं। (यदुक्तम्, "रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते। तल्लक्षणमरिष्टं स्याद् रिष्टमप्यभिधीयते"॥) अशुभं। इति मेदिनी॥ उपद्रवः। तत्पर्य्यायः। उपलिङ्गः २ उपसर्गः ३ अजन्यं ४ ईतिः ५ उत्पातः ६। इति हेमचन्द्रः॥ (मद्यं। यथा। द्राक्षारिष्टं। दशमूलारिष्टं। बब्बूलारिष्टं।

"अरिष्टं लघुपाकेन सर्व्वतश्च गुणाधिकम्।
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः"॥
इति वैद्यके।)

("मरणचिह्नार्थे लक्षणं यथा। नियतमरणाख्यापकलिङ्गं॥ इति माधवसंगृहीतरोगविनिश्चयग्रन्थटीकाकृद्विजयरक्षितः॥ * ॥ तत्र प्रकृतवर्णोऽर्द्धशरीरे विकृतवर्णोऽर्द्धशरीरे द्वावपि वर्णौ मर्य्यादाविभक्तौ दृष्ट्वा यद्येवं सव्यदक्षिणविभागेन यद्येवं पूर्ब्बपश्चिमविभागेन यद्युत्तराधरदिभागेन यद्यन्तर्बहिर्विभागेनातुरस्यारिष्टमिति विद्यात्"॥ इति चरकः।

"शरीरग्रीवयोर्यस्य प्रकृतेर्विकृतिर्भवेत्।
तत्त्वरिष्टं समासेन व्यासतस्तु निबोध मे"॥
इति च सुश्रुतः॥)

अरिष्टः, पुं, (रिष हिंसायां कर्त्तरि क्त, नञ्समासः।) लशुनः। निम्बः। फेनिलवृक्षः। काकः। कङ्कपक्षी। इति मेदिनी। वृषभासुरः। इत्यनेकार्थध्वनिमञ्जरी॥ मद्यविशेषः। इक्षुविकारसहितामयाचित्रकदन्तीपिप्पल्यादिभूरिभेषजक्वाथादिसंस्कारवान् अरिष्टोऽभिधीयते। इति सुश्रुतटीका॥ अस्य गुणः। अर्शःश्लोथग्रहणीकफरोगनाशित्वं। इति राजवल्लभः॥

("द्रवेषु चिरकालस्थं द्रव्यं यत्संहितं भवेत्।
आसवारिष्टमेदैस्तत् प्रोच्यते भेषजोचितं॥
यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः।
अरिष्टः क्वाथसिद्धः स्यात्तयोर्मानं पलोन्मितं"॥
इति शार्ङ्गधरः॥ गुणोऽस्य यथा चरकेणोक्तः॥
"श्लोकार्शोग्रहणीदोषपाण्डुरोगारुचिज्वरान्।
हन्त्यरिष्टः कफप्रायान्रोगान् रोचनदीपनः॥ * ॥
दन्तीचित्रकमूलानामुभयोः पञ्चमूलयोः।
भागान् पलांशानापोथ्य जलद्रोणे विपाचयेत्॥
त्रिफलायाः दलानाञ्च प्रक्षिप्य त्रिपलं ततः।
रसे चतुर्थशेषे तु पूते प्रीते समावपेत्॥
तुलां गुड़स्य तत्क्षिप्तं मासार्द्धं घृतभाजने।
तन्माक्षया पिबेन्नित्यं अर्शोभ्योऽपि प्रमुच्यते॥
ग्रहणीपाण्डुरोगघ्नं वातवर्च्चोऽनुलोमनं॥
दीपनञ्चारुचिघ्नञ्च दन्त्यरिष्टमिदं विदुः"॥
इति दन्त्यरिष्टः। इति चरकः॥
"अरिष्टो द्रव्यसंयोगसंस्कारादधिको गुणैः।
बऊदोषहरश्चैव दोषाणां शमनश्च सः॥
दीपनः कफवातघ्नः सरः पित्तविरोधनः।
शूलाध्मानोदरश्लीहज्वराजीर्णार्शसां हितः"॥
इति सुश्रुतश्च॥)

अरिष्टकः, पुं, (अरिष्ट एव स्वार्थे क।) फेनिलवृक्षः, इति शब्दरत्नावली॥ रीठाकरञ्ज इति ख्यातः। अरिष्टशब्दार्थोऽप्यत्र॥ रिठा इति भाषा। (अस्य गुणा यथा,—

"अरिष्टकस्त्रिदोषघ्नो ग्रहजिद्गर्भपातनः"।
इति। एतत्फलचूर्णैर्हि कृतपानां नेपालदेशीयकम्बलानामित्यर्थः प्रक्षालनात् शुद्धिर्भवतीति शास्त्रविदां मतम्। यदुक्तं मनुना,
"कौषेयाविकयोरूषैः कृतपानामरिष्टकैः।
श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः"॥ इति।)

अरिष्टतातिः, त्रि, (अरिष्ट + तातिल्।) क्षेमङ्करः। शुभङ्करः। इति भूरिप्रयोगः॥ (स्त्री, शुभाशंसनं। सौभाग्यबुद्धिः। कुशलाशिष्यं। "तदत्रभवता निष्पन्नाशिषां काममरिष्टतातिमाशास्महे"। इति महावीरचरिते।)

अरिष्टदुष्टधीः, त्रि, (अरिष्टेन मरणसूचकनिमित्तेन दुष्टा धीरस्य।) आसन्नमरणसूचितलक्षणेन दूषितबुद्धिः। मरणकुबुद्धियुक्तः। तत्पर्य्यायः। विवशः २। इत्यमरः॥

अरिष्टनेमिः, पुं, (अरिष्टस्य नेमिः, षष्ठीतत्पुरुषः।) जिनानां चतुर्व्विंशत्यन्तर्गतद्वाविंशतितीर्थङ्करः। इति हेमचन्द्रः॥ (विनतागर्भसम्भूतः खनामख्यातः काश्यपमुनिपुत्रः, यथा हरिवंशे,
"तार्क्ष्यश्चारिष्टनेमिश्च गरुड़श्च महाबलः।
अरुणश्चारुणिश्चैव विनतायाः सुताः स्मृताः"॥
दक्षेः प्रपौत्रश्चित्रकस्य पुत्रः खनामख्यातो राजा, यथा, हरिवंशे,
"चित्रकस्याभवन् पुत्राः पृथुर्विपृथुरेव च।
अश्वग्रीवोऽश्ववाहश्च सुपार्श्वकगवेषणौ।
अरिष्टनेमिरश्वश्च सुधर्म्मा धर्म्मभृत्तथा"॥
खनामख्यातः प्रजापतिः। यथा रामायणे,
आदिकाले महाबाहो ये प्रजापतयोऽभवन्।
दक्षो विवस्वानपरोऽरिष्टनेमिस्तथैव च।
काश्यपश्च महाभागस्तेषामासीदपश्चिमः"॥)

अरिष्टसूदनः, पुं, (अरिष्टं तन्नामानमसुरं सूदयति यः, अरिष्टस्य सूदनः नाशक इति वा।) विष्णुः। इति त्रिकाण्डशेषः॥ शुभाशुभनाशके त्रि॥ (कृष्णः। स खलु माथुरे कल्पे अरिष्टनामानमसुरं सूदितवान्।)

अरिष्टा, स्त्री, (अरिष्ट + स्त्रियां टाप्।) कटुका। इति राजनिर्घण्टः॥ कट्की इति भाषा। (खनामख्याता काश्यपपत्नी, सा हि सर्व्वान् गन्धर्व्वान् जनयामास। यथा,—
"अरिष्टा तु महासत्त्वान् गन्धर्व्वानमितौजसः"॥
इति हरिवंशे।)

अरुः, [स्] पुं, (ऋ + उसि।) सूर्य्यः। इत्युणादिकोषः॥ रक्तखदिरः। इति राजनिर्घण्टः॥

अरुः, [स्] पुं, क्ली, (ऋ + उस्।) व्रणं। क्षतं। इत्यमरः॥

अरुः, [स्] क्ली, (ऋ + उसि।) मर्म्म। सन्धिस्थानं। इत्युणादिकोषः॥

अरुचिः, पुं, (न रुचिर्यत्र सः।) रोगभेदः। स च सत्यभिलाषेऽभ्यवहारासामर्थ्यरूपः। इति रक्षितः॥ तत्पर्य्यायः। अरोचकः २ अश्रद्धा ३ अनभिलाषः ४। इति राजनिर्घण्टः॥

("दोषैः पृथक् सह च चित्तविपर्य्ययाच्च,

भक्षायनेषु हृदि चावतते प्रगाढ़ं।
नाम्ने रुचिर्भवति तं भिषजो विकारं,
भक्षोपघातमिह पञ्चविधं वदन्ति" ॥
इति सुश्रुतः । अलङ्कारशास्त्रोक्तदशविधस्मरदशामध्ये परिगणितो वस्तुवैराग्यरूपः स्मरदशाविशेषः, यथा साहित्यदर्पणे,—
"अङ्गेष्वसौख्यं तापः प्राप्तुता क्षपणताऽरुचिः ।
अरुचिर्वस्तुवैराग्यं सर्व्वत्रारागिता धृतिः" ॥
अरुजः, पुं, (रुजति, रुज् + क, नञ्समासः।) आरग्वधवृक्षः । इति राजनिर्घण्टः॥ सोंदालि इति भाषा । (खनामख्यातदानवविशेषः ।
"प्रक्रादोऽग्निशिराः कुम्भः संह्रादो गगनप्रियः ।
अनुह्रादो हरिहरौ वराहः संह्रोऽरुजः" ॥
इति हरिवंशे ।)
अरुणं, क्ली, (ऋ + उनन् ।) कुङ्कुमं । सिन्दूरं । इति राजनिर्घण्टः ॥
अरुणः, पुं, (ऋ + उनन् ।) सूर्य्यसारथिः । स तु विनतापुत्रः गरुड़ज्येष्ठभ्राता च । तत्पर्य्यायः । सूरसूतः २ अनूरुः ३ काश्यपिः ४ गरुड़ाग्रजः ५ सूर्य्यः । अर्कवृक्षः । अत्यल्परागः । ईषद्रक्तवर्णः । इत्यमरः । सन्ध्यारागः । शुल्बरहितः । कपिलवर्णः । कुष्ठभेदः । अरुणगुणविशिष्टे तु वाच्यलिङ्गः । इति मेदिनी ॥ पुन्नागवृक्षः । गुरुः । इति राजनिर्घण्टः ॥ (कपिलवर्णयुक्तः । क्षण्णमिश्रितरक्तवर्णविशिष्टः ।
"कपोताङ्गरुणो धूमो दृश्यते विमलाम्बरे" ।
इति रामायणे ।)
अरुणकमलं, क्ली, (क्षुद्रसर्पइत्यादिवत् नित्यकर्म्मधारयः।) रक्तोत्पलं । इति राजनिर्घण्टः ॥
अरुणलोचनः, पुं, (अरुणे रक्ते लोचने यस्य सः ।) पारावतः । इति राजनिर्घण्टः ॥
अरुणसारथिः, पुं, (अरुणः गरुड़ाग्रजः सारथिर्यस्य सः ।) सूर्य्यः । इति हेमचन्द्रः ॥
अरुणा, स्त्री, (अरुण + स्त्रियां टाप् ।) अतिविषा । श्यामा । मञ्जिष्ठा । त्रिवृता । इति मेदिनी ॥ इन्द्रवारुणी । गुञ्जा । इति राजनिर्घण्टः ॥ मुखिड़तिका । इति रत्नमाला ॥
अरुणात्मजः, पुं, (अरुणस्य आत्मजः, षष्ठीतत्पुरुषः ।) जटायुपक्षी । इति त्रिकाण्डशेषः ॥
अरुणावरजः, पुं, (अरुणस्य अवरजः षष्ठीतत्पुरुषः।) गरुड़ः । इति हेमचन्द्रः ॥
("अरुणावरजं श्रीमानारुरोह रथे हरिः ।
सुवर्णं स्तेन वपुषा सुपर्णं खेचरोत्तमम्" ॥
इति हरिवंशे ।)
अरुणोदयः, पुं, (अरुणस्य बालादित्यस्य उदयो यत्र सः ।) सूर्य्योदयात् पूर्व्वं मुहूर्त्तद्वयकालः । यथा,—
"चतस्रो घटिकाः प्रातरुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः" ॥
इति ब्रह्मवैवर्त्तपुराणं ॥ (यदुक्तं,—
"रजनीशेषयामस्य शेषार्द्धमरुणोदयः" । इति ।
"दृन् प्रशंसत्यजस्रं यो घण्टाताड़ोऽरुणोदये" ।
इति मनुः ।)
अरुणोदयसप्तमी, स्त्री, (अरुणोदयकाले पुण्यविशेषजनिका या सप्तमी ।) माघशुक्लसप्तमी । माकरी सप्तमी । यथा । भविष्ये ।
"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलं ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घदानाभ्यामायुरारोग्यसम्पदः ॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा" ॥
कोटिभास्करा कोटिसप्तमीतुल्या । सूर्य्यग्रहणफलं स्नानजं सन्निहिते बुद्धिरन्तरङ्गा इति न्यायात् । तेन बहुशतसूर्य्यग्रहणकालीनगङ्गास्नानजन्यफलसमफलप्राप्तिः फलमत्र ज्ञेयं। अत्र बहुशतसूर्य्यग्रहाणां प्रत्येकाधिकरणतासंसर्गेणान्वयात् कालानां स्नानानां तत्फलानामपि बहुशतत्वं लभ्यते । अतो नाप्रसिद्धिः ॥ * ॥ पूर्णसप्तम्यां पूर्व्वापरयोर्यत्रारुणोदयकाले सप्तमी तत्र पूर्व्वदिने तत्काले स्नानं ।
"चतस्रो घटिकाः प्रातरुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः ॥
त्रियामा रजनी प्राऊस्यत्काद्यन्तचतुष्टयं ।
नाड़ीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" ॥
इति कालमाधवीयधृतब्रह्मवैवर्त्तीयेन पूर्व्वस्य तत्कालस्य पूर्णतिथिसम्बन्धिदिनकर्त्तव्यकर्म्माङ्गत्वेन इतरस्य चेतराङ्गत्वेनाभिधानात् । अतएव दक्षेण तत्कालमारभ्याह्निकक्षत्यमभिहितं ॥ * ॥ अत्रारुणोदयकाले मुहूर्त्तान्यूनतिथिलाभ एव स्नानं ।
"व्रतोपवासस्नानादौ घटिकैका यदा भवेत् ।
उदये सा तिथिर्ज्ञेया श्राद्धादावस्तगामिनी" ॥
इति विष्णुधर्म्मोत्तरात् । अत्र घटिका मुहूर्त्तं श्राद्धयोग्यकालानुरोधादिति वक्ष्यते । ब्रह्मवैवर्त्तवचने घटिका दण्डरूपा । परवचने नाड़ीनामाद्यन्तचतुष्टयमित्येकवाक्यत्वात् ॥ * ॥ ये तु सूर्य्योदयात् प्रागपि प्रातःस्नानविधानात् तत्रैव माघसप्तम्याख्यगुणफलविधिर्लाघवादित्याहुस्तच्चिन्त्यं । प्रकरणान्यत्वे प्रयोजनान्यत्वं इति जैमिनिसूत्रेण प्रकरणभेदे गुणविधिसिद्धेः। अतएव कल्पतरुरत्नाकरयोः ।
"य इच्छेद्दिपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान् ।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ" ॥
इति । विष्णुस्मृतौ । "यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः" । इति नित्यस्नानप्रकरणात् प्रकरणान्तरास्नानात् प्रकरणान्तराधिकरणन्यायेन काम्यस्नानान्तरमिदमप्युक्तं। न तु गुणफलविधिः। किन्तु काम्यकरणे प्रसङ्गान्नित्यसिद्धिरिति ॥ * ॥ अत्र माघमासनिमित्तकमाघसप्तमीनिमित्तककाम्यस्नानयोः प्रातर्विधानात् नैमित्तिकत्वेन प्रायश्चित्तवत् सकृदनुष्ठानं । "प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः। तदङ्गस्याक्रियायान्तु नास्तिर्न च तत्क्रिया"। इति कात्यायनवचनात्।
"न स्नानमाचरेद्यस्तु मातुरो न महानिशि ।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये" ॥
इति मनुवचनेनैकदाजस्रस्नाननिषेधात् ।
"धर्म्मविघ्नाचरेत् स्नानमाङ्गिकञ्च पुनः पुनः" ॥
इति मनुवचनाच्च । अतएव नान्दीमुखप्रकरणशेषे प्रधानानामपि काम्यानां तत्तद्देशकालविहितानां तत्रैवैव सिद्धिरिति आह्निकचिन्तामणिः ॥ निष्कामविष्णुप्रीतिकामयोः सुतरां सकृदनुष्ठानं। गुणतारतम्यात् फलतारतम्यं इति न्यायेन फलं बोध्यं । तच्च इक्षुक्षीरगुड़ादिमाधुर्य्यभेदवन्निर्द्देष्टुमशक्यं ।
"पञ्चान्तरेऽपि कन्यास्थे रवौ श्राद्धं प्रशस्यते ।
कन्यागते पञ्चमे तु विशेषेणैव कारयेत्" ॥
इति हेमाद्रिधृतादित्यपुराणोक्तवत् । एतद्वचनप्रागर्द्धं कार्त्तिकमलमासाब्दविषयं ।
"देशकालाश्रमक्षेत्रद्रव्यदाढ्यमनोगुणाः ।
सत्कृतस्यापि दानस्य फलातिशयहेतवः" ॥
इति ब्रह्मपुराणोक्तवच्च ॥ * ॥ तीर्थभेदे त्वेकदापि नानास्नानं ।
"विषुवद्दिवसे प्राप्ते पञ्चतीर्थीं विधानतः" ।
इति ब्रह्मपुराणादिवचनात् । "तीर्थभेदे तन्त्रप्रसङ्गयोरसम्भवाच्च" । अतएव गङ्गावाक्यावली-तीर्थचिन्तामण्योः । यत्तु प्रयागे व्यहस्नाने क्रोड़ीकृतेऽपि माघसप्तमीस्नानादावसाधारणसङ्कल्पेन पुनस्तत्रैव प्रातःस्नानाचरणं तदयुक्तं तदा सकृत्स्नानस्यैव विहितत्वात् । अन्यथा तत्त्र्यहफलकामनायां तदानन्त्यापत्तेरित्युक्तं ॥ * ॥ स्नाने परिपाटीमाह क्षत्यकल्पलतायां विष्णुः । सप्तवदरपत्राणि सप्तार्कपत्राणि च शिरसि निधाय।
"यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ।
तन्मे रोकञ्च शोकञ्च माकरी हन्तु सप्तमी" ॥
इत्युच्चार्य्य स्नायादितिशेषः । रोकं क्षिप्रं । तिथिक्षत्यस्य पौर्णमास्यन्तमासाङ्गत्वात् माकरीपदं मकरार्कारूढचान्द्रमासीयतिथिपरं ।
"तिथिकृत्ये च क्षण्णादिं व्रते शुक्लादिमेव च ।
विवाहादौ च सौरादिं मासं कृत्ये विनिर्द्दिशेत्" ॥
इति ब्रह्मपुराणान्मन्वन्तरादित्वेन तथा युक्तत्वाच्च । तथा मत्स्यपुराणे ।
"यस्मान्मन्वन्तरादौ तु रथमाषुर्दिवाकराः ।
माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी ॥
अरुणोदयवेलायां तस्यां स्नानं महाफलं" ।
अतएव नारसिंहे रथाख्यायामित्युक्तं। यथा,—
"महानवम्यां द्वादश्यां भरण्यामपि चैव हि ।
तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद्बुधः ॥
माघमासे तु सप्तम्यां रथाख्यायान्तु वर्ज्जयेत्" ।
द्वादश्यां श्रवणोत्यानद्वादश्यां । भरण्यां गृध्रध्वजपातभरण्यामिति कल्पतरुः। अत्र महानवम्यादिसाहचर्य्याच्चान्द्रत्वं प्रतीयते । अतएव चतुर्दशमन्वन्तरादिगणने क्वापि न रथशब्दलेखः । यथा। भविष्यमत्स्ययोः ।
"अश्वयुक् शुक्लनवमी द्वादशी कार्त्तिकी तथा ।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा ।
आषाढ़स्यापि दशमी तथा माघस्य सप्तमी ॥

श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा।
कार्त्तिकी फाल्गुनी चैत्री ज्येष्ठी पञ्चदशी सिता॥
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः"।
अत्र अमावास्याष्टमीव्यतिरिक्ताः शुक्लाः पुनः-पुनस्तथापदोपादानात्। उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनाच्च॥ अत्र कामधेनौ हुतीया चैव माघस्येति। कल्पतरौ तु हुतीया चैत्रमासस्येति लिखितं। अत्र पाठद्वैधे श्रीपतिरत्नमालायां। "अश्वयुजि शुक्लनवमी द्वादश्यूर्ज्जे मधौ हुतीया च"। इति पाठाच्चैत्रहुतीयैव ग्राह्या। श्रीदत्तोऽप्येवं।माघसप्तम्याश्चान्द्रत्वं सौरागमेऽपि।
"अर्कपत्रैः शवदरैर्दूर्व्वाक्षतसचन्दनैः।
अष्टाङ्गविधिना चार्घ्यं दद्यादादित्यतुष्टये॥
माघेऽथ फाल्गुने वापि भवेद्दे माघसप्तमी।
माकरीति च यत्रोक्तं तत्रायोक्तिदर्शनात्"॥
अष्टाङ्गविधिना।
"योऽष्टाङ्गमर्घ्यमार्पूर्य्य भानोर्मूर्ध्नि निवेदयेत्।
ताम्रपात्रार्घ्यदानेन पुण्यं दशगुणं स्मृतं"॥
इति भविष्यपुराणीयेन। आदित्यपुराणे।
"ऋक्षराशिविशेषेण यत्कर्म विहितं नरैः।
दैवं वाप्यथवा पैत्र्यं तदन्यत्रापि दृश्यते"॥ *॥
अर्घ्यमन्त्रस्तु।
"जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके।
सप्तव्याहृतिके देवि! नमस्ते रविमण्डले"॥
प्रणाममन्त्रस्तु।
"सप्तसप्तिवहप्रीत सप्तलोकप्रदीपन।
सप्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे"॥
सप्तिरश्वः। इति तिथ्यादितत्त्वं॥

अरणीपलः, पुं, (अरण्याः उपलः, कर्म्मधारयः।) रक्तवर्णमणिविशेषः। चुनी इति भाषा। तत्पर्य्यायः। पद्मरागः २ लोहितकः ३ लक्ष्मीपुष्पः ४। इति हेमचन्द्रः॥

अरन्तुदः, त्रि, (अरूंषि मर्म्माणि तुदति, तुद्+खश्+मुम् च।) मर्म्मपीड़कः। तत्पर्य्यायः। मर्म्मस्पृक् २। इत्यमरः॥ (परुषः। कठोरः। श्रवणकटुः। "माकन्दं मकरन्दतुन्दिलममुं गाढस्व काकः स्वयं कर्कारुन्तुदमन्तरेण रचितं त्वां मन्महे कोकिलं"। इति भामिनीविलासे। मर्म्मपीड़ाकरः। हृदयग्रन्थिरूपमर्म्मस्थानस्यर्ग्गकारी। यथा,
"नारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्म्मधीः"।
इति मनुः।
"तीक्ष्णा नारुन्तुदा बुद्धिः कर्म्म ग्रान्तं प्रतापवत्"।
इति माघः।
"अरुन्तुदमिवालानमनिर्व्वाणस्य दन्तिनः"।
इति रघुवंशे।)

अरुन्धती, स्त्री, (न रुन्धती।) वशिष्ठपत्नी। तत्पर्य्यायः। अक्षमाला २। इति हेमचन्द्रः॥ सा कर्दममुनिकन्या महासाध्वी। इति श्रीभागवतं॥ आकाशे सप्तर्षिमध्ये वशिष्ठसन्निधौ तस्या उदयः। गतायुषस्तां न पश्यन्ति। (यदुक्तं,—
"दीपनिर्व्वाणगन्धञ्च सुहृदाक्यमरुन्धतीं।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः"॥
यथा च सुश्रुते,—
"न पश्यति स नक्षत्रं यश्च देवीमरुन्धतीं।
ध्रुवमाकाशगङ्गां वा तं वदन्ति गतायुषं"॥)
सप्तपदीगमनानन्तरं जामाता मन्त्रं पाठयन् वधूं तां दर्शयति च॥

अरुन्धतीजानिः, पुं, (अरुन्धती जाया यस्य सः, निड्।) वशिष्ठमुनिः। इति हेमचन्द्रः॥

अरुन्धतीनाथः, पुं, (अरुन्धत्या नाथः, षष्ठीतत्पुरुषः।) वशिष्ठमुनिः। इति त्रिकाण्डशेषः॥

अरुष्कः, पुं, (अरुर्म्मर्म्मस्थानं कायति पीड़यति, कै+क।) भल्लातकवृक्षः इति शब्दरत्नावली॥

अरुष्करं, क्ली, (अरुः करोति अरुः+कृ+ट, उपपदसमासः यत्वं।) भल्लातकफलं। इति हेमचन्द्र॥

अरुष्करः, पुं, (अरुः करोति, अरुः+कृ+ट, यत्वं उपपदसमासः।) भल्लातकवृक्षः। इति शब्दरत्नावली॥

अरुष्करः, त्रि, (अरुः करोति, अरुः+कृ+ट, यत्वं, उपपदसमासः।) व्रणकरः। क्षतकारकः। इति मेदिनी॥

अरुहा, स्त्री, (रोहति, रुह+क, नञ्समासः।) भूधात्री। इति राजनिर्घण्टः॥ भूमि आमला इति ख्याता।

अरूपः, त्रि, (नास्ति रूपमस्य।) रूपशून्यः। यथा। "अरूपवातातीसारादाविवारुष्यं"। इति रुचितः॥ कुत्सितरूपः।
("इमामरूपामसतीं भक्षयिष्यामि मानुषीम्"। इति रामायणे।)

अरूषः, पुं, (ऋ+ऊषन्।) सर्पविशेषः। इत्युणादिकोषः॥ सूर्य्यः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

अरे, व्य, (ऋ+ए।) नीचसम्बोधनं। इति हेमचन्द्रः॥ ओरे इति भाषा। अपाङ्क्तेतिः। असूया। इति मेदिनी॥ (रोषाङ्काने। अपङ्क्तौ। "अरे चेतोमीन! भ्रमयमधना यौवनजले त्यज त्वं स्वच्छन्दं युवतिजलधौ पश्यसि न किम्"। इति शान्तिशतके। "अरे अनुद्भन्! निरपराधराजकुलकदन महापातकिन् अग्निष्टविद्वतचेष्ट!" इति महावीरचरिते।)

अरेरे, व्य, (अरे+वीप्सायां द्विरुक्तिः।) अधमसम्बोधनं। इति जटाधरः॥ सक्रोधाह्वानं। इति शब्दमाला॥

अरोकः, त्रि, (रुच्+घञ्, नञ्समासः।) निष्प्रभः। दीप्तिरहितः। इत्यमरः॥ रोकश्छिद्रन्तद्रहितश्च॥

अरोचकः, पुं, (न रोचयति प्रीणयति, रुच्+णिच्+ण्वुल्, नञ्समासः।) रोगविशेषः। अरुचिरोग इति भाषा। तस्य निदानरूपे।
"वातादिभिः शोकभयातिलोभ-
क्रोधैर्मनोघ्राणरसग्रगन्धैः।
अरोचकाः स्युः परिदूषितेन्द्रि-
कषायवक्त्रोऽस्य मतोऽनिलेन॥
कटुरसमुखं विरसञ्च पूति
पित्तेन विद्याल्लवणञ्च वक्त्रं।
माधुर्य्यपैच्छिल्यगुरुत्वशैत्य-
विबद्धरम्लन्ध्युतं कफेन"॥ इति माधवकरः॥
अरोचकाः न भोजने रुचिमुत्पादयन्तीत्यरोचकाः व्याधयः पञ्च वातजादिभेदैः॥ *॥ वातिकस्य लक्षणमाह। परिदूषितेन्द्रियः अल्पभक्षणेनैव परिदुष्टो दन्तो यत्र सः। तथा कषायवक्त्रः। कषायरसं वक्त्रं यत्र सः॥ *॥ पैत्तिकमाह।
"कटुरसमुखं विरसञ्च पूति
पित्तेन विद्याल्लवणञ्च वक्त्रं"।
कटुरसमित्यादिना विद्यादित्यन्तेन पैत्तिकस्य लक्षणं॥ *॥ श्लैष्मिकमाह। लवणञ्च वक्त्रं कफजलक्षणेन पठनीयः। यतो विदग्धः श्लेष्मा लवणभावमुपैति।
"माधुर्य्यपैच्छिल्यगुरुत्वशैत्य-
स्निग्धत्वदौर्गन्ध्ययुतं कफेन"।
पैच्छिल्यं मुखस्याभ्यन्तरे। स्निग्धत्वं बहिः॥ *॥ आगन्तुजमाह।
"अरोचके शोकभयातिलोभात्
क्रोधाद्यदृच्छासुचिगन्धजे स्यात्।
स्वाभाविकं चास्यमयारुचिश्च
त्रिदोषजे नैकरसम्भवेच्च"॥
क्रोधादित्यादिशब्देनाद्यधयोरशनरूपयोर्ग्रहणं। स्वाभाविकं। अविद्यतरसं॥ *॥ त्रिदोषजमाह। नैकरसं अनेकरसमिश्रं स्यात्। वातजादिभेदेन मुखे विद्यतिमभिधायान्यदेशे विद्यतिमाह।
"हृच्छूलपीड़नयुतं पवनेन पित्तात्
तृड्दाहचोषबहुलं सकफप्रसेकं।
श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्यात्
वैगुण्यमोहजड़ताभिरथापरञ्च"॥
हृच्छूलपीड़नयुतं हृदि शूलेन पीड़नं तेन युतं। चोषः पार्श्वस्थिताग्निनेव सन्तापः। बहुभिस्त्रिभिर्दोषैः। बहुरुजं उत्कवातादिरोगयुक्तं। वैगुण्यं मनसो व्याकुलत्वं। जड़ता शून्याङ्गता। अपरं आगन्तुजं। भक्तद्वेषाभक्तच्छन्दौ चरकसुश्रुताभ्यामरोचकत्वेनैव संगृहीतौ॥ *॥ तद्भोजनत्वेषां लक्षणानि एथगाह।
"प्रक्षिप्तन्तु मुखे चान्नं यत्र नास्वादते नरः।
अरोचकः स विज्ञेयो भक्तद्वेषमतः शृणु"॥
आस्वादते अन्नस्य मिष्टतां न प्राप्नोति। तदन्नं मिष्टं न लगति इति यावत्।
"चिन्तयित्वा तु मनसा दृष्ट्वा स्पृष्ट्वा च भोजनं।
द्वेषमायाति योजन्तुर्भक्तद्वेषः स उच्यते॥
कुपितस्य भयार्त्तस्य तथा भक्तनिरोधतः।
यत्र नाम्ने भवेच्छुद्धः सोऽभक्तच्छन्द उच्यते"॥ *॥
अथारोचकस्य चिकित्सा।
"भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं।
रोचनं दीपनं वह्नेर्जिह्वाकण्ठविशोधनं॥ २॥
शृङ्गवेररसश्चापि मधुना सह योजयेत्।
अरुचिश्वासकासघ्नं प्रतिश्यायकफापहं॥ २॥
पञ्चाम्लिका सिता शीतवारिणा वस्त्रगालिता।

अरो

एलालवङ्गकर्पूरमरिचैरवधूलितां ॥
पानकस्यास्य गण्डूषं धारयित्वा मुखे मुहुः ।
अरुचिं नाशयत्येव पित्तं प्रशमयेत्तथा" ॥
अस्निकापानं ॥ ३ ॥
"राजिका जीरको मुष्टो भृष्टं हिङ्गु सनागरं ।
सैन्धवं दधि गोः सर्व्वं वस्त्रपूतं प्रकल्पयेत् ॥
तावन्मात्रं क्षिपेत्तत्र यथा स्यादुचितत्तमा ।
तक्रमेतद्भवेत् सद्यो रोचनं वह्निवर्द्धनं" ॥
तक्रं ॥ ४ ॥
"ग्रन्थमावर्त्तितं दुग्धं निवद्धं दधि माहिषं ।
एकीकृत्य घटे घृष्टं शुभ्रशर्करया समं ॥
एलालवङ्गकर्पूरमरिचैश्च समन्वितं ।
नाम्ना श्रिखरिणी कुर्य्यात् रुचिं सकलवल्लभा ॥
श्रिखरिणी ॥ ५ ॥
द्वे पले दाड़िमादक्षौ खण्डाद्धोमंपलत्रयं ।
त्रिसुगन्धिपलद्वैकं चूर्णमेकत्र कारयेत् ।
तच्चूर्णं माक्षया भुक्तमरोचकहरं परं ।
दीपनं पाचनञ्च स्यात् पीनसज्वरकासजित्" ॥
दाड़िमादिचूर्णं ॥ ६ ॥
"लवङ्गकक्कोलमुशीरचन्दनं
नतं सनीलोत्पलखण्डजीरकं ।
जलं सखण्डागुरुभङ्गकेसरं
कथा सविश्वा नलदं सहैलया ।
तुषारजातीफलवंशरोचना-
सिताभ्रभागाः सकलं विचूर्णितं ।
सुशोचनं तर्पणमग्निदीपनं
बलप्रदं दृष्यतमन्त्रिदोषजित् ॥
उरोविबन्धं तमकं गलग्रहं
सकासहिक्कारुचियक्ष्मपीनसं ।
ग्रहण्यतीसारमुरुक्तं क्षयां
तथा प्रमेहान्निखिलान्निहन्ति हि" ॥
कक्कोलं फलं सुगन्धविशेषः । नतं तगरं । जलं बालकं । भृङ्गं त्वक् । नलदमुशीरं । तुषारः कर्पूरः ।
लवङ्गादिचूर्णं ॥ ७ ॥ इत्यरोचकाधिकारः । इति भावप्रकाशः ॥
("यवागूः पञ्चकोलस्य कुलत्थाढ्यायुषकं ।
मुद्गयूषेण वा सम्यक् भक्तानां भोजनं हितं ।
सहिङ्गुव्योषलवणं वह्निनं संप्रशस्यते ।
अग्नितप्ततवत् श्रेष्ठं भोजनारोचकेष्वपि ।
कारवेल्लं पटोलञ्च पलाण्डुः सुरसं शठी ।
लवणं धान्यकं श्रेष्ठं प्रवेहश्च कटुचिकं ॥
शठीसर्षपवास्तूकं घृतपुष्पा यमानिका ।
तुम्बीरकस्य मूलानां शाकं श्रेष्ठं प्रशस्यते ॥
गोधूमपुलिका श्रेष्ठा भृष्टाङ्गारैररोचके ।
जाङ्गलानि च मांसानि भोजयेद्विधिवत्तमः" ॥
इति हारीतोक्तपथ्यादिनियमः ॥ ० ॥
"अरुचौ कवलो ग्राह्यो धूमाः समुखधावनाः ।
मनोज्ञमन्नपानञ्च हर्षणाश्वासनानि च ॥
कुलत्थसौवर्चलाजाजी शर्करामरिचं विड़ं ।
धान्येलापद्मकोशीरपिप्पल्युत्पलचन्दनं ॥
लोध्रं तेजोवती पथ्या चूर्णं संयवागूजं ।
सार्द्रा दाड़िमनिर्य्यासाश्चाजाजी शर्करायुतः ॥

अरो

सतैलमाक्षिकास्वेते चत्वारः कवलग्रहाः ।
चतुरोऽरोचकान् हन्युर्व्वातादेकजसर्व्वजान् ॥
कारवी मरिचाजाजी माक्षाद्राक्षादाड़िमं ।
सौवर्चलं गुड़ं क्षौद्रं सर्व्वारोचकनाशनं ॥
वस्तिः समीरणे पित्ते विरेकं वमनं कफे ।
कुर्य्याद्यथानुकूलानि हर्षणञ्च मनोज्ञजे" ॥
इति चरकोक्तास्वचिकित्सा । सन्निदानलक्षणां चिकित्सामाह ॥ * ॥ सुश्रुतः ।
"दोषैः पृथक् सह च चित्तविपर्य्ययाच्च,
भक्तायनेषु हृदि चावतते प्रगाढ़ं ।
गान्नेऽरुचिर्भवति तं भिषजो विकारं,
भक्तोपघातमिह षड्विधं वदन्ति ॥
हृल्लासपीड़नयुतं विरसाननत्वं,
वातात्मके भवति शिङ्गरोचके तु ।
हृद्दाहधोषबहुता मुखतिक्तता च,
मूर्च्छा सदृड् भवति पित्तकृते तथैव ॥
कण्ठगुरुत्वकफसंस्रवसादतन्द्राः,
श्लेष्मात्मके मधुरमास्यमरोचके तु ।
सर्व्वात्मके पवनपित्तकफा बहूनि,
रूपाण्युपास्य हृदये समुदीरयन्ति ॥
संरागशोकभयविप्लुतचेतसस्तु,
चिन्ताकृतो भवति सोऽप्युचिदर्शनाच्च" ॥*॥
चिकित्सा यथा,—
"वाते वचाम्लु वमनं कृतवान् पिबेच्च,
खेड़ैः सुराभिरथवोष्णजलेन चूर्णं ।
कृष्णाविड़ङ्गयवभस्महरेणुभार्गी,
राखैलहिङ्गुलवणोत्तमनागराणां ॥
पित्ते गुड़ाम्बुमधुरैर्वमनं प्रशस्तं,
खेड़ः ससैन्धवसितामधुसर्पिरिड्यः ।
निम्बाम्बुवासितवतः कफजेऽनुपानं,
राजद्रुमाम्बुमधुना तु सदीप्यकं स्यात् ॥
चूर्णं यदुक्तमथवानिलजे तदेव,
सर्व्वेषु सर्व्वकृतमेवमुपक्रमेत ॥
लाक्षापटोलविड़वेतसकारवीणि-
मूर्व्वाभयाक्षवदरामलकेन्द्रवृक्षैः ।
बीजैः करञ्जवरुणभवैश्च पिण्डै-
खेड़ं पचेत् सुरभिमूत्रयुतं यथावत् ॥
मुस्तां वचां चिकटुकं रजनीद्वयञ्च,
भार्गीञ्च कुष्ठमथ निर्दहनीञ्च पिष्ट्वा ।
मूत्रेऽविजे हिरदमूत्रयुते पचेद्वा,
पाठान्तगामतिविषां रजनीञ्च मुख्यां ॥
मण्डूकिमर्कमसतान्च सलाङ्गलाख्यां,
मूत्रे पचेत्तु महिषस्य विधानविद्वा ।
एतान्न सन्ति चतुरो लिहतस्तु लेहान्,
गुल्मारुचिश्वसनकण्ठहृदामयाञ्च ॥
साम्यान् खदेद्गुरुचितान् विविधांश्च भक्ष्यान्,
पानानि मूलफलसाड़वरागयोगान् ।
अन्नादसांश्च विविधान् विविधैः प्रकारै-
र्भुञ्जीत वापि लघुरुद्गमनःसुखानि ॥
आस्यापनं विधिवदत्र विरेचनञ्च,
कुर्य्यान्मृदूनि शिरसश्च विरेचनानि ।
क्षीणक्षतानि रजनीत्रिफलायुतानि,

अर्क

चूर्णीकृतानि यवसूकविमिश्रितानि ॥
क्षुद्रायुतानि वितरेन्मुखधावनार्थ-
मन्यानि तिक्तकटुकानि च भेषजानि ।
मुस्तादिराजतरुवर्गदशाङ्गसिद्धैः,
क्षौद्रैर्जयेन्मधुयुतैर्विविधैश्च लेहैः ॥
मूत्रासवैर्गुड़कृतैश्च तथान्यरिष्टैः,
क्षारासवैश्च मधुमाधवतुल्यगन्धैः ।
स्यादेषरुग् कफवातहृते विधिज्ञ,
ग्लानिं गते ऊतभुजि प्रशमाय तस्य ॥
इच्छाभिघातभयशोकहृतेऽन्तरग्नौ,
भावान् भवाय वितरेत् खलु शुक्यरूपान् ।
अर्थेषु चाप्यचिरतेषु पुनर्भवाय,
पौराणिकैः श्रुतिपथैरनुमानयेत्तं ॥
दैन्यं गते मनसि बोधनमत्र शस्तं,
यद्यत् प्रियं तदुपसेव्यमरोचके तु ॥*॥
रसगन्धौ समौ शुद्धौ दन्तीक्वाथेन भावयेत् ।
जम्बीरस्य रसैर्वापि आर्द्रकस्य रसेन वा ॥
मातुलुङ्गस्य तोयेन तस्य मज्जरसैर्बुधः ।
पञ्चादिग्रोक्ष्य सर्व्वांस्तान् टङ्कणक्षारवारयेत् ॥
देवपुष्पं वाणमितं रसपादं मृताम्रतं ।
मासमात्रञ्च तत् सर्व्वं नागरेण गुड़ेन वा ॥
सर्व्वारोचकशूलार्त्तिमामवातं सुदारुणं ।
सोऽयं निवारयत्याशु केशरी करिणं यथा" ॥
सुधानिधिरसः ॥ ० ॥ इति वैद्यकरसेन्द्रसारसंग्रहः ॥)

अर्क, क, तापे । (चुरादि उभयपदी सेट् ।) स्तुतौ । इति कविकल्पद्रुमः ॥ एककारः प्रकृतिः पश्चाद्रेफनिमित्तकदित्वं विभाषया वक्तव्यं । तेन क अर्कयति अर्कायति एवं सर्व्वत्र । इति दुर्गादासः ॥

अर्कः, पुं, (अर्च + कर्म्मणि घञ्, कुत्वम् ।) सूर्य्यः । इन्द्रः । ताम्रं । स्फटिकः । इति मेदिनी ॥ पण्डितः । इति शब्दरत्नावली ॥ ज्येष्ठभ्राता । इति दक्षादिगणः ॥ लक्षणया रविवारः । इति ज्योतिषं ॥ स्तुतिविशेषः । आक्रन्द इति भाषा । तत्पर्य्यायः । क्षीरदलः २ पुष्पी ३ प्रतापः ४ क्षीरकाण्डकः ५ विक्षीरः ६ क्षीरी ७ खर्ज्जुरः ८ प्रीतपुष्पकः ९ जम्बनः १० क्षीरपर्णी ११ विकीरणः १२ सदापुष्पः १३ सूर्य्याङ्कः १४ आस्फोतकः १५ तूलफलः १६ शुक्रफलः १७ । इति राजनिर्घण्टः ॥ वसुकः १८ आस्फोतः १९ गणरूपः २० मन्दारः २१ अर्कपर्णः २२ । इत्यमरः ॥ * ॥ अथ श्वेतार्कपर्य्यायः । अलर्कः १ राजार्कः २ प्रतापसः ३ गणरूपी ४ ॥ * ॥ अथ रक्तार्कपर्य्यायः । विश्वोरः १ सदापुष्पी २ रूपिका ३ आदित्यपुष्पिका ४ दिव्यपुष्पिका ५ अर्कः ६ । इति रत्नमाला ॥ अस्य गुणाः । कटुत्वं । उष्णत्वं । अग्निकारित्वं । वातश्लेष्मव्रणार्शःकुष्ठकृमिनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफदोषनाशित्वं । तीक्ष्णत्वञ्च । अस्य क्षीरगुणाः । क्रिमिदोषव्रणनाशित्वं । कुष्ठार्शउदररोगेषु हितकारित्वञ्च । इति राजवल्लभः ॥ तस्य पर्य्यायगुणाः ।
"श्वेतार्को गणरूपः स्यान्मन्दारो वसुकोऽपि च ।

श्वेतपुष्पः सदापुष्पः स बालार्कः प्रतापसः ॥
रक्तोऽपरोऽर्कनामा स्यादर्कपर्णो विकीरणः ।
रक्तपुष्पः शुक्लफलस्तथास्फोतः प्रकीर्त्तितः ॥
अर्कदयं सरं वातकुष्ठकण्डूविषव्रणान् ।
निहन्ति श्वीहगुल्मार्शःश्लेष्मोदरयकृत्कृमीन् ॥
शुक्लार्ककुसुमं दृष्यं लघु दीपनपाचनं ।
अरोचकप्रसेकार्शःकासश्वासनिवारणं ॥
रक्तार्कपुष्पं मधुरं सतिक्तं
कुष्ठकृमिघ्नं कफनाशनञ्च ।
अर्शो बिषं हन्ति च रक्तपित्तं
संग्राहि गुल्मे श्वयथौ हितं तत् ॥
क्षीरमर्कस्य तिक्तोष्णं स्निग्धं सलवणं लघु ।
कुष्ठगुल्मोदरहरं श्रेष्ठमेतद्विरेचनं" ॥
इति भावप्रकाशः ॥ * ॥ निर्यासविशेषः । आरक इति आरबीभाषा । तस्य विधिर्यथा,—
"द्रव्यकल्पः पञ्चधा स्यात् कल्कचूर्णं रसस्तथा ।
तैलमर्कः क्रमाज्ज्ञेयं यथोत्तरगुणं प्रिये ॥
पृथक् द्वन्द्वे सन्निपाते सङ्करेऽसाध्यरोगिणि ।
क्रमादेते प्रयोक्तव्या अन्यथा तु विनाशकाः ॥
आद्ये गुणा गुणाः सर्व्वे द्वितीयञ्च ततो लघु ।
तृतीयं श्वीघ्रकारि स्यात् चतुर्थं नातिदोषजित् ॥
पञ्चमं दोषरहितं गुणसंघप्रकाशकं ।
पञ्चमस्य तु सामर्थ्यं स्वयं पञ्चाननोऽब्रवीत् ।
वर्षाणान्तु सहस्राणि कथ्यतेऽहर्निशं मया ।
सम्पूर्णो नैव जायेत कल्पोऽर्कस्य दशानन ॥ * ॥
पुंवारे पुरुषर्क्षे च दिवार्को यस्तु निर्म्मितः ॥
रमणीषु प्रदातव्यो विलोमात् पुंसु योजयेत् ॥
लोहचूर्णं गैरिकञ्च खटिका भल्लमृत्तिका ।
मृत्तिकास्थिभवं चूर्णं काचं कीकसजं रजः ॥
एतानि समभागानि सर्व्वतुल्या च मृत्तिका ।
भंग्नलोहा पंचमूत्रैः खरास्थमहिषोद्भवैः ॥
गजाजसम्भवाश्वाश्च घृटितं तद्विशोधयेत् ।
यथा गन्धविनाशः स्यात् तथा संमर्दयेत्ततः ॥
लघुहस्तः कुलालोऽस्य कुर्य्यादुदञ्चं सुनिर्म्मलं ।
यथेष्टां स्थालिकां कुर्य्यात् अङ्गुलप्रान्तसारिकां ॥
पृथुबुध्नोदराकारां ह्यङ्गुलोत्सेधवेष्टनीं ।
सारिकान्ते तु परिधिं त्र्यङ्गुलोत्सेधशोभितां ॥
विनिर्माय्याथ सार्य्यन्ते यथा श्लिष्यविनिर्म्मितां ।
छिद्रं कृत्वा नलं दद्यादजशुण्डसमं बुधः ॥
सारिकापरिधेरन्तस्तस्य कुर्य्यात् पिधानकं ।
अर्द्धनिम्बफलसमं परिधिं तस्य चान्ततः ॥
वेदाङ्गुलं मस्तकोर्द्धं कार्य्यं तोयस्य धारणे ।
समर्थां तत्र नलिकां कुर्य्यात्तोयविमोचनीं ॥
तस्यैवान्तरतो लेप्या जीर्णास्थ्ना मृत्तिकाम्बुना ।
अथवा श्वेतकाचं तु सर्व्वदोषापनुत्तये ॥ * ॥
अथ वक्ष्ये तु जीर्णास्थिमृत्तिकाकरणं प्रिये ।
श्लिष्टाजतुल्यले कुर्य्यात् दीर्घगर्त्तं मनोहरं ॥
निक्षिपेत्तत्र नानास्थिसञ्चयं द्विचतुष्पदां ।
सर्जिक्षारं महाक्षारं मृत्क्षारं लवणानि च ॥
गन्धकोष्णजलं क्षेप्यं नानामूत्राणि तत्र वै ।
एवं कृत्वा मासषट्कं दद्यात् पाषाणमृत्तिकां ॥
कङ्कास्थ्यूर्द्धं तदूर्द्धन्तु कुर्य्यादङ्गीष्टिकां शुभां ।

त्रिवर्षाज्जायते सर्व्वमेकीभूतं दृश्यसमं ॥
ततो निष्काश्य तच्चूर्णं कृत्वा पात्राणि निर्म्मयेत् ।
प्रशस्तं भोजनं तत्र सूचयेदन्नदूषणं ॥
महाविषस्य संयोगात्तस्य भङ्गः प्रजायते ।
सूचीविषादिसंयोगात् यत्र स्फोटा भवन्ति च ॥
तत्र क्षिप्तं क्षुद्रविषं पात्रं क्षणं प्रजायते ।
एवं ज्ञात्वा तत्र दद्यान्न कदाचिद्विषादिकं ॥
विषादीनामर्कसिद्धे कुर्य्यात् पात्रन्तु लोहजं ।
स्वर्णजं रौप्यजं वापि कुर्य्यात् पात्रमकल्मषं ॥
अथवा ताम्रजं कुर्य्यादन्तर्व्वङ्गविलेपितं ।
पात्रन्तु बुद्धा कुर्व्वीत कषायो न भवेद्रसः ॥
द्रव्यान्तरस्य संयोगादर्कं तैलञ्च गर्भतः ।
सर्व्वेषां निःसरत्येव पाषाणस्यापि किं पुनः ॥
अनार्कस्तथा तैलं गन्धतालादिसम्भवं ।
वेधकं सर्व्वधातूनां देहस्यापि च सिद्धिदं ॥
यस्तैलकरणे दक्षस्तार्कनिःसारणे क्षमः ।
तत्तत्सेवाकरो नित्यं स रोगैर्नैव बाध्यते ॥ * ॥
कृत्तितार्कस्तु यामेन क्रियाभाभ्यान्तु मध्यमः ।
त्रिभिर्यामैर्भवेच्छ्रेष्ठः स एवार्कस्तु सिद्धिदः ॥
द्रव्यादधिकसौगन्ध्यं यस्मिन्नर्के प्रदृश्यते ।
जीर्णास्थिपात्रसङ्क्लिष्टो द्रव्यवर्णः प्रदृश्यते ॥
शङ्खकुन्देन्दुधवलोऽन्यथा पात्रान्तरे स्थितः ।
जिह्वोपरिगतः स्वादं दद्याद्द्रव्यभवन्तु यः ॥
तमेवार्कं विजानीयादन्यज्ज्ञेयं रसादिवत् ।
कृत्वा सुगन्धं दुर्गन्धमर्कं पुण्यादिभिः सुधीः ॥
गुणार्थं पश्चात् सेवेत क्षन्यथापगुणो भवेत् ।
दुर्गन्धं मन्यतेदर्कं यदि मोहात् कथञ्चन ॥
तदास्य जायते ग्लानिर्व्वान्तिरालस्यकं तथा ।
तद्दोषस्य विनाशाय कुर्य्याद्वान्तिमतन्द्रितः ॥
द्वीपोदूमप्रसूनानां पिबेदर्कपलं जनः ।
चम्बेल्यर्कपलं वापि पीतार्त्तो मालतीभवं ॥ * ॥
अर्कनिष्काशनार्थाय क्रमाज्ज्ञेयाः षड्भयः ।
धूमाग्निश्चैव दीपाग्निर्मन्दाग्निर्मध्यमस्तथा ॥
खराग्निश्च भड़ाग्निश्च तेषां वक्ष्यामि लक्षणं ।
विज्वालो यो धूमाग्निर्धूमाग्निः स उदाहृतः ॥
संसारमतिशुष्कं यत् सुस्निग्धे समेष्यति ।
तत्खारं काष्ठमित्याऽहुः खदिरादिसमुद्भवं ॥
द्वाभ्यां तस्य चतुर्थाभ्यां योऽग्निर्दीपाग्निरुच्यते ।
चतुरंशेन तनैव मन्दाग्निः परिकीर्त्तितः ॥
अर्द्धीकृताभ्यां द्वाभ्यान्तु मध्यमाग्निरुदाहृतः ।
अर्द्धैस्तैः पञ्चभिः प्रोक्तः खराग्निः सर्व्वकर्म्मसु ॥
मस्तकावधिपात्रस्य चतुर्दिक्षु क्रमेण च ।
प्रसरन्ति यदा ज्वालाः स भडाग्निरुदीरितः ॥
सार्द्धयामञ्च यामञ्च यामैकं मुहूर्त्तकं ।
मुहूर्त्तमात्रमित्येवमर्कार्थं वक्ष्यः स्मृताः ॥ * ॥
जीर्णास्थिपात्रे मृत्कीयादर्कं वा काचसम्भवे ।
पाषाणसम्भवे पात्रे कांस्यजेऽथ हिमस्थले ॥
पिबेदर्कमनिर्व्वापं पीत्वा ताम्बूलभक्षणं ।
कुर्य्यादनुक्तताम्बूले लवङ्गं भक्षयेत्ततः ॥
मर्दनादिषु सर्व्वत्र द्रव्यतैलं प्रयोजयेत् ।
अर्कं एव प्रयोक्तव्यो भक्षणे न तु मर्दने ॥
ये ये द्रव्यगुणाः प्रोक्ताः सर्व्वे तेऽर्कसमाश्रिताः ।

सेवेतार्कं प्रिये तस्मादाजा परमधार्म्मिकः ॥
सक्लेऽपि वा रोगिणे वा याचतेऽर्कन्तु येन वा ।
ज्ञात्वा तल्लक्षणं दद्यादन्यथा ब्रह्महा भवेत् ॥ * ॥
वर्णस्वराणां प्रमितिं दूतोक्तस्य तु कारयेत् ।
शुकैर्युक्ता विगुणिता त्रिभिर्भागं समाहरेत् ॥
एकशेषे गुणाः श्वीघ्रं द्विशेषे वर्द्धते गदः ।
त्रिशेषे मरणं वाच्यं स्वार्थं वाचयते यदि ॥
अर्कं तदैतत् विज्ञाय दद्यादर्कं न चान्यथा ।
गदिना तु यदा दूतः प्रेषितश्चेदिचार्य्यते ॥
नपुंसकान्त्यैरूक्तास्तु स्वरा एकादश प्रिये ।
वर्णास्तत्सङ्ख्यका लेख्याः कठवाद्याश्च तत्तले ॥
एकादशसु कोष्ठेषु क्रमादङ्कान् प्रविन्यसेत् ।
रसाक्षयो दृगं वेदाः पर्व्वता ऋतवः क्षताः ॥
वङ्कयः पृथिवी शून्यं चन्द्रमा इति च क्रमात् ।
विहाय जीवं दूतस्य नामाङ्कान्तरयोजनं ॥
एवमेवातुरे क्षत्वा द्वयोरन्यावशेषितं ।
क्षत्वाङ्कयोगं गदिनोऽधिके शेषे शुभं भवेत् ॥
समशेषे दीर्घरोगः न्यूनशेषे च तन्मृतिः ।
एतद्विचार्य्य दातव्यमन्यदप्यौषधं बुधैः ॥
चक्रद्वयन्तु योऽज्ञात्वा दद्यादर्कं विमोहितः ।
जायते क्षयग्रस्तस्य यथा मम मते सति" ॥
इति श्रीलक्ष्मणभट्टतार्कचिकित्सायां यन्त्रविधिघृतकं प्रथमं ॥ * ॥
"अथातः संप्रवक्ष्यामि निर्गमोऽर्कस्य भामिनि ।
पञ्चप्रकारद्रव्यस्य कुर्य्यान्निष्काशनं भिषक् ॥
अत्यन्तकठिनं चाद्यं कठिनञ्च द्वितीयकं ।
आर्द्रं तृतीयमुद्दिष्टं चतुर्थं वुल्लं भवेत् ॥
पञ्चमञ्च द्रवद्रव्यं तेषां विधिरथोच्यते ॥ * ॥
रसवच्चूर्णयेत् द्रव्यमत्यन्तकठिनन्तु यत् ॥
द्विगुणे निःक्षिपेत्तोये क्वाथयां स्थापयेच्च तत् ।
यावच्छुष्कं भवेत्तोयं द्रव्यञ्च श्लथितं यथा ॥
ततः पुनः क्षिपेत्तोयं पूर्व्वद्रव्यसमं भिषक् ।
क्षत्वाऽष्टप्रहरं तत्तु सूर्य्यचन्द्रकरैरलं ॥
संपूज्य गणपतिं सूर्य्यं भैरवं कुलदेवतां ।
निःक्षिपेदर्कयन्त्रे तत् क्षिप्रास्यार्कं समाहरेत् ॥
वर्षाधिकन्तु यत् द्रव्यमत्यन्तकठिनन्तु तत् ।
चन्दनादीनि सर्व्वाणि अत्यन्तकठिनानि च ॥
कोटैर्भुक्तं घुणैर्युक्तं यच्च गन्धविवर्ज्जितं ।
रहितं स्वरसेनापि नार्ककर्म्मणि योजयेत् ॥
यथार्कसंस्थितं द्रव्यं कुर्य्याद्भोक्तुस्तथा वपुः ।
अर्के तरुणभैषज्यं तस्मात् संयोजयेत् प्रिये ॥ * ॥
यवान्यजाजीत्रिकटुभूनिम्बादिकमौषधं ।
ज्ञेयं तत् कठिनं द्रव्यं तदर्कस्य विधिं शृणु ॥
द्विगुणं निःक्षिपेत्तोयं द्रव्ये तु कठिने मते ।
अष्टप्रहरिकं तच्च कुर्य्यात् पर्य्यायमेककं ॥
रक्षेत् द्रव्यं द्विगुणितं दृष्ट्वा देशे तु कौतुकं ।
पश्चात् दत्त्वार्कयन्त्रे तत् अर्कनिष्काशयेच्छनैः ॥ * ॥
आर्द्रद्रव्यं द्विधाप्रोक्तं सरसं नीरसं तथा ।
सदुग्धं गुग्गरसकं द्विधा नीरसमुच्यते ॥
वास्तूकं सार्षपं शाकं निर्गुण्डीरण्डमार्षकं ।
धत्तूराद्यमिदं सर्व्वमार्द्रं सरसमुच्यते ॥
एषां गालान् चूर्णयित्वा विंशांशं निःक्षिपेच्छनैः ।

मुहूर्त्तमुष्णे संस्थाप्य ग्राह्योऽर्को विबुधोत्तमैः ॥
पचाग्रान्तु घृतांशेन तुल्यतोयेन सेचयेत् ।
दद्यात् घटीमर्ककरां ततोऽर्कं कलयेच्छनैः ॥
वटाश्वत्थकरीराद्यमार्द्रद्रव्यन्तु गौरसं ।
विंशांशं निःक्षिपेत्तोयं जलं धर्म्मे च धारयेत् ॥
ततो निष्काग्रयेदर्कं क्रमशश्चाग्निगोक्षवत् ।
सदुग्धन्तु दिधा प्रोक्तं मृदु तीक्ष्णमिति क्रमात् ॥
सातलावचसेऽङ्गसौरिण्याद्यास्तु तीक्ष्णकाः ।
खण्डानि तेषां क्षालाय निःक्षिपेत् पुष्कले जले ॥
दिनत्रयञ्च निष्काग्र्य तोयादीषच्च कुट्टयेत् ।
तदा न दृश्यते दुग्धं दद्यात्तोयं रदांशकं ॥
निष्काग्रयेच्छनैरर्कं स तु तीक्ष्णार्कसंज्ञकः ।
दुग्धिकार्कक्षीरिण्याद्या मृदुदुग्धाः प्रकीर्त्तिताः ॥
जले चतुर्गुणे दद्यात्तान् धर्म्मे विनिवेशयेत् ।
यावज्जलस्योष्णता स्यात् ततो यत्ने विनिःक्षिपेत् ॥
आदावीषच्चूर्णयित्वा षष्ठांशजलसंयुतं ।
एवं द्रव्यं लक्षयित्वा स्वयुक्त्यार्कं विनिर्हरेत् ॥
खण्डीकृत्य च आमानां फलानां मृदुकायिनां ।
सरसानाञ्च यष्टीयादर्कं तोयेन वर्ज्जितं ॥ * ॥
काष्ठेऽम्बरिकादीनां आमानां दार्ढ्यभागिनां ।
क्षुत्वा खल्पानि खण्डानि अष्टीत्वंशं प्रदापयेत् ॥
पृथक् पृथक् च तुवरीं सर्जिक्षारञ्च सैन्धवं ।
दत्त्वा विमर्दयेत् सर्व्वं चतारिंशांशकं जलं ॥
क्षिप्त्वा तत्लवणं धर्म्मे यामार्द्धेनोष्णता भवेत् ।
ततो यत्ने तु तद्दत्त्वा यष्टीयादर्कमुत्तमं ॥
क्षतिपक्वफलानान्तु वीर्य्यतस्तार्कमाहरेत् ।
पुष्यार्कार्थं षोड्शांशं जलं पुष्येण दापयेत् ॥
वडवारफलादीनि चिल्लिकादीनि यानि च ।
क्षेप्याण्युक्तोदके तानि वुक्कणत्वस्य शान्तये ॥
ततश्चत्वारिंशदंशं जलं दत्त्वा समाहरेत् ।
तेषामर्कमथ द्रावद्रव्यार्कोपाय उच्यते ॥
द्रवद्रव्योत्क्षेपणान्ये प्रोच्यते वापकल्पना ॥ * ॥
पिधानानि विचित्राणि तेषामन्तो न विद्यते ॥
घृतपत्रप्रसूनैर्व्वा जात्यत्यैर्मालतीभवैः ।
गुलाबपारिजातैश्च केतकीजैः समाचरेत् ॥
दुग्धे दधि रसे तक्रे क्षौद्रे तैले च सर्पिषि ।
मूत्रादौ देहतोये च चम्पेल्यादिपिधानकं ॥ * ॥
कान्तपाषाणसत्वस्य क्षतं यत्नमनुत्तमं ।
निष्काग्रयेत् सर्व्वार्कं द्रवद्रव्यस्य नान्यथा ॥
अथवा स्तम्भकं द्रव्यं दध्नस्तु नवनीतकं ।
वर्षदग्धोज्झसोत्था मधूच्छिष्टन्तु सर्पिषः ॥
गोकण्ठकन्तु दुग्धस्य तथा मद्यस्य किण्वकं ।
तैलस्य तस्य पिण्याकं सर्व्वं घृतसमन्वितं ॥
यत्ने दत्त्वा द्रवद्रव्यं ययेत्थाक्षीनिवेशनं ।
तथा स्थलं स्थापयित्वा द्रवैर्यत्नं प्रपूरयेत् ॥
आच्छाद्यं सारकैः पूर्णं स्थालीं दद्यादधोमुखीं ।
तया चाकर्षितः सर्व्वो द्रवः फेनं परित्यजेत् ॥ * ॥
दुर्गन्धिर्य्यो भवेदर्कस्तं कुर्य्यात् सुरभिगन्धकं ।
सर्व्वेषामेव मांसानां दुर्गन्धानाञ्च सर्व्वशः ॥
घृताभ्यक्ता हिङ्गुजीरमेधिका राजिका क्षता ।
नवीनायां हरिद्रायां दद्यात् द्रव्यं पुनः पुनः ॥
तत्र दद्यात्तदर्कन्तु यथा दुर्गन्धतां व्रजेत् ।
तथा पुनः पुनः कार्य्यं जायते गन्धवारकं ॥
आयाति रोचको गन्धो भवेत्तद्धरितोपनं ॥ * ॥
सर्व्वेष्वर्कप्रयोगेषु गन्धपाषाणवासना ॥
अर्काणान्तु प्रदातव्या ते भवन्त्यर्कसम्भवाः ।
सर्व्वत्र वातरोगेषु महिषाद्यादिवासना ॥
महिषाद्यास्तथा रास्नं निर्य्यासः सर्ज्जकस्य च ।
कृष्णागुरुः कदम्बश्च महिषाद्यादिपञ्चकं ॥
सर्व्वेषु पित्तरोगेषु चन्दनादिकवासना ।
सर्व्वेषु कफरोगेषु जटामांस्यादिवासनं ॥
चन्दनञ्च तथोशीरं कर्पूरो गन्धवाकुची ।
एलाकर्चूरगोक्षुराः सप्तैते चन्दनादयः ॥
जटामांसी नखं पत्री लवङ्गं तगरं रसः ।
शिलाया गन्धपाषाणाः सप्त मांस्यादिका अमी ॥
वासयेद्दा दशाङ्केन चिदोषाग्नेन चार्कजं ।
नश्यन्ति यस्य धूपेन अवग्रहपिशाचकाः ॥
पश्चाद्गन्धपाषाणात् तावन्महिषगुग्गुलुः ।
चतुरंशं चन्दनञ्च जटामांसी च तावती ।
त्रिभागः सर्ज्जकः सारस्तावदेव हि रास्नकं ।
उशीरं तु द्विभागं स्यात् घृतभृष्टं नखं समं ॥
कर्पूरो मृगनाभिश्च एकभागौ प्रकीर्त्तितौ ।
एष दशाङ्गधूपस्तु रुद्रस्यापि मनो हरेत् ॥ * ॥
पलाङ्कुलशुनादीनां निर्गन्धीकरणं शृणु ।
उत्पाद्यान्तर्व्विषं सम्यक् तक्रमध्ये विनिःक्षिपेत् ॥
पर्य्यायमेकमत्यल्पमध्येऽस्मिन् विरसे सति ।
दद्यान्निष्काग्र्यान्यतक्रं कुर्य्यात्तच्चाष्टमांशकं ॥
द्रोणपुष्पीरसेऽप्येवं मूर्व्वापत्ररसेऽपि वा ।
विपर्य्ययोत्तरं तत्तु रसोनं क्षालयेत् सुधीः ॥
हरिद्याराजिकातोये स्थाप्यं पर्य्यायमेककं ।
उष्णोदकेन संक्षाल्य पर्य्यायं वासयेत्ततः ॥
सहस्रपत्रीपुष्पैर्व्वा अभावे पद्मकैरपि ।
आलोड्यैद्दशांशेन पञ्चांशेन च मस्तुना ॥
युक्तं क्षत्वा याममात्रं स्थापयेत् प्रकटातपे ।
ततो निष्काग्रयेदर्कं जात्यादिकपिधानितं ॥
अस्यार्कस्य सुगन्धेन एकदा मोहितो हरः ।
को जानाति रसोनस्य ह्यर्कोऽयमिति भूतले ॥
एकतः सर्व्वं एवार्का मासार्कस्तु तथैकतः ।
मया स्वर्गे गृहीतस्तु प्राप्तं तत्र च नाम्रतं ॥
तदा प्रोक्तं शिवस्याग्रे मम धिग् जीवितं प्रभो ।
नीता वाथ प्रभुक्ता वा सुधा देवैर्मया श्रुतं ॥
न दृष्टा तत्र देवेशं शिरश्छेदं करोम्यहं ।
ततः प्रसन्नो गिरिशो वाक्यं मां प्रति सोऽब्रवीत् ॥
दत्तं मया समस्तं ते देवाबध्यत्वमेव च ।
किन्ते कार्य्यन्तु सुधया सुधातोऽधिकरोचनं ॥ * ॥
संप्रवक्ष्यामि मांसार्कं मद्यस्यार्कं तथैव च ।
द्रव्याणां विजयादीनां लभ्यते यैः सुखं महत् ॥
मांसन्तु त्रिविधं ज्ञेयं मृदुलं कठिनं घनं ।
तेषामर्कं यथा प्रोक्तं यत्नान्निष्काग्रयेच्छनैः ॥
मृदुलं यद्भवेन्मांसं चत्वारिंशांशकं यदुः ।
स्थूलखण्डीकृते तस्मिन् दत्त्वा तत् क्षालयेच्छनैः ॥
षष्ठांशेनाग्रगन्धेन तद्विलोड्य च निःक्षिपेत् ।
रसमिश्रोरुमांसं तदभावे पयः क्षिपेत् ॥
जातीपत्रं लवङ्गञ्च त्वगेला नागकेशरं ।
मरिचं मृगनाभिञ्च विदुर्गन्धाष्टकं त्विदं ॥
कार्य्यं पुष्यपिधानाद्यमर्कं निष्काग्रयेत्ततः ।
जायतेऽसौ महास्वादुः सुधासमरसः प्रिये ॥
दृढ़मांसस्य खण्डानि लघून्येव प्रकल्पयेत् ।
दद्याच्च तुवरीं तत्र लवङ्गं प्रोक्षया दिशा ॥
क्षालयेदारनालेन चिवारं कोष्णवारिणा ।
क्षालयेत् सप्तवाराणि हरेदर्कन्तु पूर्व्ववत् ॥
दृढ़मांसस्य खण्डानि कुर्य्यादतिलघूनि च ।
आलोड्य शुष्कद्रावेण क्षालयेत् पयसा पुनः ॥
सप्तवाराणि लवणं क्षपेत् पूर्व्ववदेव हि ।
तद्दत्त्वा यत्नमध्ये तु हरेत् पूर्व्ववदर्कजं ॥
सर्ज्जिक्षारं यवक्षारं श्वेतक्षारञ्च टङ्कणं ।
सौभाग्यक्षारकं सौरक्षारं शुष्कभवं तथा ।
अर्कसेऽङ्गपालाशक्षारञ्च तुवरी तथा ।
अपामार्गभवं क्षारं तथाष्टौ लवणानि च ।
लवणाष्टकमेतच्च सैन्धवञ्च सुवर्चलं ।
विड़ं समुद्रसंजातं उद्भिदं रोमकं गड़ं ।
क्षत्वा सर्व्वाणि चैकत्र निर्मुनीरेण भावयेत् ।
एकविंशतिवाराणि काचकूप्यां विनिःक्षिपेत् ।
नखांशूनिम्बुरसकैः सर्व्वमार्द्रीकृतञ्च तत् ।
अधःसच्छिद्रपीठस्थौ मध्ये कूप्यां निवेशयेत् ।
मृत्कर्पटसमायुक्तां सच्छिद्रमिव यथाविधि ।
तस्याग्रे कूपिका योज्या दीर्घकण्ठा मनोहरा ।
सा कूपिका तले स्थाप्या मेलयेच्च दयोर्म्मुखं ।
जलमुष्णं यथा न स्यात् तथा चापरकूपिका ।
अग्नयः क्रमतो देया यामं यामञ्च पञ्च च ।
अनेनैव प्रकारेण क्षारार्काणां समुद्भवः ।
दद्यादस्थीनि मांसानि शुष्कशुक्त्यादिकान्यपि ।
सर्व्वाण्यपि विलीयन्ते शुष्कद्रावे न संशयः ॥ * ॥
पारावताजचटकशुष्कशूकरटिट्टिभाः ।
क्षुद्रमत्स्यादिकाः सर्व्वे मांसेषु मृदुलाः स्मृताः ॥
मृगरोहितकाद्याश्च मत्स्याः शुष्ककिसम्बराः ।
एते कठिनमांसाः स्युः पक्षिणो जलचारिणः ॥
गजकुम्भीरघण्टाद्याः सुगन्धा वर्करादयः ।
गोधा गोऽश्वा लुलापाद्याः घनमांसाः प्रकीर्त्तिताः ॥
अन्नादिसम्भवो योऽर्कस्तन्मद्यं परिकीर्त्तितं ।
तस्य भेदान् प्रवक्ष्यामि घटितं तत् समुद्धरेत् ॥
तदासनानिरुत्थर्धमशुगन्धं प्रयोजयेत् ।
पूर्व्वोक्तैर्धूपयेद्धूपैर्व्जायते गन्धपर्व्वितं ॥
अर्द्धं तत्र जलं देयं सिद्धे देयोऽशुगन्धकः ।
तुषोदकैर्यवैरामैः सतुषैः सकलीकृतैः ॥
सौवीरन्तु यवैरामैः सतुषैः सकलीकृतैः ।
गोधूमैरपि सौवीरं जायते खल्पमादकं ॥
आरनालन्तु गोधूमैरामैः स्याच्छिक्तबीजकैः ।
धान्याम्लं शालिचूर्णादिकोद्भवादिकृतं भवेत् ॥
शुष्कशाकीराजिकायुक्तैः स्यान्मूलकदलभवैः ।
सर्षपस्नरसैर्व्वापि शालिपिष्टकसंयुतैः ॥
कन्दमूलफलादींश्च सक्षेक्षुलवणानि च ।
एकीकृत्य क्षतोऽर्को यस्तत्सूक्ष्ममभिधीयते ॥
पक्वौषधाम्बुसंसिद्धो योऽर्कस्तत् स्यादरिष्टकं ।
अरिष्टलघुपाकेन सर्व्वतश्च गुणाधिकं ॥
शालिपिष्टकपिष्टादिकृतौ योऽर्कः सुरा तु सा ।

पुनर्नवाग्निवापिष्टैर्विहिता वाहनी स्मृता ॥
इक्षोः पक्वैरसैः सिद्धः सीधुः पक्वरसस्य च ।
आमैस्तैरेव यः सिद्धः स च प्रीतरसः स्मृतः ॥
पर्य्यायावाम्बवेन्मद्यं तामसं राजसप्रियं ।
मद्यलावाग्राजसन्तु तदूर्द्धं सात्विकं भवेत् ॥
सात्विके गीतहास्यादि राजसे साहसादिकं ।
तामसे निन्द्यकर्म्माणि निद्राञ्च मदिरा चरेत् ॥
मद्यादिमत्तद्रव्याणां यवानीपादयोगतः ।
अर्कं निष्काग्रयेद्धीमान् बोधकः स्यान्मदस्य सः ॥
धुस्तूरादिकबीजानि तक्रं पयसि निःक्षिपेत् ।
कण्ठशोषविबन्धादिरहितोऽर्को भवेत् सदि" ॥
इति श्रीभङ्गनाथकृतार्कचिकित्सायां यन्त्रशृतकं द्वितीयं ॥ * ॥

"अथातः संप्रवक्ष्यामि केवलार्कगुणान् प्रिये ।
हरीतक्याः शूलहृच्छ्रकामलागदनाशनः ॥
विभीतकस्य वृक्षर्द्धिकफकासविनाशनः ।
आमलस्य चिदोषास्रपित्तमेहान् विनाशयेत् ॥
पिप्पल्याः श्वासकासामवातार्शोज्वरशूलहृत् ।
मरीचस्य क्षमीन् श्वासं हरेत् सर्व्वान् गदानपि ॥
ग्रन्थिकस्य क्षीहगुल्मकफवातोदरापहः ।
चव्यार्कोऽत्यन्तरुचिकृत् विशेषाद्गुदजापहः ॥
अर्कस्तु गजपिप्पल्या वातश्लेष्माग्निमान्द्यनुत् ।
चित्रकस्याग्निकृत् कासग्रहणीक्षमिशोथहा ॥
यवान्याः पाचनो रुच्यो दीपनः शुक्रशूलहृत् ।
अजमोदोद्भवो वातकफहा वस्तिशोधनः ॥
पारसीकयवान्यास्तु ग्राही पाचनमादनः ।
जीरकस्य तु संग्राही गर्भाशयविशुद्धिकृत् ॥
कृष्णाजीरस्य चक्षुष्यो गुल्मच्छर्दितिसारजित् ।
कारव्या बलकृत् हृद्यो ज्वरघ्नः पाचनः सरः ॥
धान्याकस्य वृषादाहवमिश्वासच्छिदोषहृत् ।
शोथज्वरानिलश्लेष्मव्रणशूलाच्छिरोगहृत् ॥
मिश्रेयाया वह्निमान्द्ययोनिशूलक्षमीन् हरेत् ।
ज्वालामरीचकस्यापस्मारभूतच्छिदोषहृत् ॥
मेथिकायाः श्लेष्मवातज्वरामकफनाशनः ।
वनमेथ्याः सर्व्वरोगान् हरेत् कुञ्जरवाजिनां ॥
चन्द्रशूरस्य हिक्काहृद्वातहृत् पुष्टिवर्द्धनः ।
हिङ्गुनः पाचनो रुच्यः क्षमिशूलोदरापहः ॥
वचाया वह्निकृमिकृत् विबन्धाध्मानशूलहृत् ।
पारसीकवचायास्तु भूतोन्मादबलं हरेत् ॥
कुलिञ्जनस्य खरकृत् हृत्कण्ठमुखशोधनः ।
शूलग्रन्थिभवश्चार्को विशेषात् कफकासनुत् ॥
दीपान्तरवचायास्तु हरेच्छूलं शिरःक्रमं ।
एषुधाया हरेत् क्षीहं विषं मोहञ्च दारुणं ॥
इषुधायाः समीरार्शोग्रहणीगुल्मशूलहृत् ।
विड्ङस्योदरश्लेष्मकृमिवातविबन्धनुत् ॥
तुम्बुरोर्गुरुतात्रासकासक्षीहक्षमीन् हरेत् ।
वंशरोचनजस्तृष्णाच्छर्द्यतीसारकासज्वरान् हरेत्॥
समुद्रफेनजः प्रीतो लेखनः कफहृत् सरः ।
जीरकोत्थः शुक्रकफबलकृच्छीतलः समः ॥
आर्षभः पित्तदाहास्रकासवातक्षयापहः ।
महामेदोद्भवोऽर्कस्तु हृद्यस्तन्यः कफापहः ॥
महामेदोद्भवः प्रीतो रक्तपित्तज्वरप्रणुत् ।
काकोल्याः शुक्रलः प्रीतः पित्तश्लेष्मज्वरापहः ॥
क्षीरकाकोलिकाजातो वृंहणो दाहवातहा ।
ऋद्धा बल्यस्त्रिदोषघ्नो रक्तपित्तविनाशनः ।
वृद्धा गर्भप्रदः प्रीतः क्षतकासक्षयापहः ॥
मधुयष्ट्याः केशकरः स्वर्य्यः पित्तानिलास्रजित् ।
जलयष्ट्या विषच्छर्दिदृष्ट्यग्लानिक्षयापहः ॥
कम्पिल्लस्य विरेकी स्यात् मेहानाहविकारनुत् ।
आरग्वधस्य पित्तास्रवातोदावर्त्तशूलहृत् ॥
कट्फ्या मेहश्वासकासक्षमिकुष्ठज्वरापहः ।
भूनिम्बस्य कृमिकुष्ठज्वरव्रणक्षमिप्रणुत् ॥
भद्राया वस्तुपित्तास्रक्षमिवीसर्पकुष्ठनुत् ।
मदनोत्थः कृच्छ्रनेन चातुर्थज्वरकादिहृत् ॥
राखोद्भवः समीरास्रवातशूलोदरापहः ।
नागभिन्नोद्भवो भोगिलुताद्याखुविकारहृत् ॥
माचिकाजस्तु पित्तास्रपक्वातीसारहा लघुः ।
तेजस्विन्याः श्वासकासकफहृद्रुक्दीपनः ॥
ज्योतिष्मत्या वान्तिकरो वह्निबुद्धिस्मृतिप्रदः ।
कुष्ठस्य हन्ति वातास्रकासकुष्ठमहत्कफान् ॥
पौष्करस्यारुचिश्वासान् विशेषात् पार्श्वशूलनुत् ।
हेमाङ्गाया रेकवान्तिकरः कण्डुविनाशनः ॥
प्रच्छ्या हरेद्दुर्द्धवातहिक्काष्ठीलाक्षयखरान् ।
कट्फलोत्थः श्वासकासप्रमेहार्शोरुचीन् हरेत् ॥
भार्ग्या हरेत् कफश्वासपीनसज्वरमारुतान् ।
पाषाणभेदजो योनिरोगहृच्छ्वासगुल्महा ॥
धातकीजस्तृषासारविषक्रिमिविसर्पजित् ।
मञ्जिष्ठाजो विषश्लेष्मरक्तातीसारकुष्ठहा ॥
कुसुम्भजो वर्ण्यकरो रक्तपित्तकफापहः ।
लाक्षाजः क्षमिवीसर्पव्रणोरक्षतकुष्ठहा ॥
हरिद्राया मेहश्लोथत्वग्दोषव्रणपाण्डुनुत् ।
आरण्यकहरिद्रायाः कुष्ठवातास्रनाशनः ॥
कर्पूरकहरिद्रायाः सर्व्वकण्डूविनाशनः ।
दार्व्या विशेषतो लेपात् नेत्रकर्णास्यरोगनुत् ॥
रसाञ्जनोद्भवो नेत्रविकारव्रणदोषहृत् ।
वाकुच्याः क्षमिविस्फोटपाण्डुशोथकफापहः ॥
प्रपुन्नाटस्य हृन्येव कण्डूदद्रुविषानिलान् ।
विषाजो दीपनिकृत् पाके कफपित्तातिसारहा ॥
लोध्रजः प्रीतलो ग्राही चक्षुष्यः कफपित्तनुत् ।
वृहत्यचोद्भवो नेत्रोदरातीसारशोथहृत् ॥
भल्लातकोद्भवो हन्यात् ज्वरोदरक्षमिव्रणान् ।
गुडूच्या दीपनो ग्राही कासपाण्डुज्वरापहः ॥
ताम्बूल्या मुखदौर्गन्ध्यमलवातश्रमापहः ॥
वैल्वः श्लेष्महरो बल्यो लघुरुष्णश्च पाचनः ॥
गम्भारीजो भ्रमहृच्छ्रशूलार्शोविषदाहहृत् ।
पाटल्याश्छर्द्दिशोथास्रकृत्श्लेष्मारुचिदाहहा ॥
अग्निमन्थोद्भवः शोथक्रिमिपाण्डुबलासनुत् ।
श्लेष्मातकजस्तु गुल्मार्शःक्रमिहृद्रुचिदीपित्रकृत् ॥
श्लाघिपर्ण्याः क्षतक्षमिज्वरच्छर्दितिसारहा ।
एष्मिपर्ण्या ज्वरश्वासरक्तातीसारदाहजित् ॥
वार्त्ताक्या ज्वरवैरस्यमलारोचकशूलहा ।
कण्टकार्य्या गर्भकरः पाचनः कफकासहा ॥
गोक्षुरस्याश्मरीमेहक्रुच्छ्रहृद्रोगवातहा ।
जीवन्त्याः सारहृन्नेत्रदोषत्रितयनाशनः ॥
मुद्गपर्ण्याः शोथदाहक्षयहृच्छूर्शोऽतिसारहृत् ।
माषपर्ण्याः शुक्रकरो वातपित्तज्वरास्रजित् ॥
पद्माक्षगोद्भवः शूलशिरःग्रीड़ोदरापहः ।
रक्तकोत्थो ब्रध्नश्वासकासकुष्ठाममारुतान् ॥
मन्दारजो वातकुष्ठकण्डूव्रणविषापहः ।
अर्कार्कः क्षीहगुल्मार्शःश्लेष्मोदरक्रमीन् हरेत् ॥
वच्चीजो लेपतो हन्याद्व्रणशोथोदरव्रणान् ।
सातलोत्थः कफानाहपित्तोदावर्त्तशोथहा ॥
लाङ्गल्या लेपतो हन्यात् शोफास्रव्रणरुग्जितः ।
करवीरोद्भवो नेत्रकोपकुष्ठव्रणापहः ॥
चण्डालोत्थस्तु विषवत् भल्लाते लेपने सृहृत् ।
धत्तूरजो हरेत् क्लेशयूकाक्रमिविषादिकं ॥
वासोद्भवो ज्वरच्छर्द्दिमेहकुष्ठक्षयापहः ।
पार्पटो हन्ति पित्तास्रभ्रमहृच्छ्वाकफज्वरान् ॥
निम्बजो भ्रमहृट्कासज्वरारुचिक्रिमिप्रणुत् ।
महानिम्बोद्भवो गुल्मभूमिकाविषनाशनः ॥
पारिभद्रोऽनिलश्लेष्मशोथमेदःक्रमिप्रणुत् ।
काञ्चनारो गण्डमालागुदभ्रंशव्रणापहः ॥
कोविदारस्तु पित्तास्रप्रदरक्षयकासहा ।
शौभाञ्जनार्कौ रुचिकृत् शुक्रलौ ग्राहिदीपनः ॥
मधुशिग्रुद्वयो हन्यात् विद्रधिश्वयथुक्रिमीन् ।
शिग्रुजो विषहृद्रेच्यो गण्डेनाश्वित्रिरोगहृत् ॥
गिरिकर्ण्याः कुष्ठशूलशोथव्रणविषापहः ।
सिन्धुवारोद्भवो हन्ति शूलशोथामवातान् ॥
निर्गुण्ड्यर्कौ हरेच्छन्तुव्रणकुष्ठारुचीन् लघुः ।
कौटजो दीपनः प्रीतः कफहृद्व्रणकुष्ठजित् ॥
कारञ्जः कफगुल्मार्शोव्रणक्रिमिविषापहः ।
घृतकारञ्जको भेदी वातार्शःक्षमिकुष्ठजित् ॥
करञ्जो वमिवातार्शःक्षमिकुष्ठप्रमेहजित् ।
उच्चटार्कः केशकरो वातपित्तकफापहः ॥
गुञ्जाया हरते श्वासमुखशोषभ्रमज्वरान् ।
कपिकच्छूद्भवो वृष्यो वृंहणो वाजिकर्म्मकृत् ॥
मांसरोहिण्युद्भवस्तु वृष्यो दोषत्रयापहः ।
चित्रकः कुर्य्याद्धातुपुष्टिं तत्फलान्मारवेज्जगान् ॥
पुस्तकान्तरे चेल्लुरिति च पाठः ॥
कण्टकार्य्या दीपनः श्लेष्मशोथोदररुजं हरेत् ।
वैतसो हरते दाहं शोथार्शोयोनिरुग्व्रणान् ॥
जलवेतसजो ग्राही प्रीतो वातप्रकोपनः ॥
इच्छार्कस्तु हरते चराचरविषं स्फुटं ॥
अग्निोठकस्य शूलाग्निशोथव्रणविषापहः ।
बलार्को ग्राही वातास्रपित्तास्रक्षतनाशनः ॥
अतिपूर्व्वबलार्कस्तु मूर्च्छातीसारनाशनः ।
महाबलार्को हरते क्षयं वातानुलोमनः ॥
नागपूर्व्वबलार्कस्तु मूर्च्छामोहहरः परः ।
लक्ष्मणार्कन्तु सेवेत वन्ध्यापि जनते सुतं ॥
खर्जवल्लग्राः शिरःपीड़ादिदोषान् हन्ति दुग्धदः ।
कार्पासार्कः कर्णसंस्थः कर्णरोगान् विनाशयेत् ॥
वंशजः कफपित्तघ्नः कुष्ठास्रव्रणशोथजित् ।
नलार्को वस्तियोन्यर्त्तिदाहपित्तविसर्पहृत् ॥
पाठ्या जयेत् ज्वरच्छर्दिकुष्ठातीसारदृग्रुजः ।
श्वेतहृच्छोद्भवो रेकी पित्तार्शोदरापहः ॥
शरपुङ्खोद्भवः शीघ्रान् गुल्मव्रणविषापहः ।

जवासजो मदभ्रान्तिपित्तास्रकुष्ठकासजित् ॥
मक्षिजोऽत्यन्तबलहृत् शीतमोहानिलार्त्तिजित् ।
अपामार्गभवश्छर्द्दिकफमेदोऽनिलापहः ॥
आरक्तायामार्गभवो धातुस्तम्भनकारकः ।
कोकिलाक्षभवः शीघ्रं सेकाच्छोफाग्निवारयेत् ॥
अक्षिसंहारिकायास्तु भस्मसन्धानहच्छिवे ।
कुमारिकाया उत्थोऽग्निदग्धविस्फोटकान् जयेत् ॥
पुनर्नवायाः श्वेतायाः सर्व्वनेत्रामयापहः ।
पुनर्नवाया रक्ताया याही पित्तास्रनाशनः ॥
प्रसारिण्या वातहरो दृष्यः सन्धानहृत् सरः ।
सारिवाया वह्निमान्द्यकासामविषनाशनः ॥
भृङ्गराजस्य दन्तोर्कः केश्यस्त्वक्यः शिरोर्त्तिहृत् ।
शृङ्गपुष्पीलतायास्तु अर्कः पित्तकफान्तकः ॥
त्रायन्त्यर्कः शूलविषविलेपीज्वरनाशनः ।
मूर्व्वाया मोहहृद्रोगकण्डूकुष्ठज्वरापहः ॥
काकमाच्या नेत्रहितश्छर्द्दिहृद्रोगनाशनः ।
काकनासाभवो वामी शोथार्शश्चित्रकुष्ठहृत् ॥
काकजङ्घोद्भवो हन्यात् ज्वरकण्डूविषक्रिमीन् ।
नागिन्यास्तु हरेच्छूलयोनिदोषवमिक्रिमीन् ॥
मेषशृङ्ग्याः श्वासकासव्रणश्लेष्माच्छिशूलहा ।
हंसपद्या हन्ति शूलभूतरक्तविषव्रणान् ॥
सोमवल्ल्याश्चिदोषघ्नः क्षीरहृच्च रसायनः ।
आकाशवल्ल्याः शीतोऽर्कः पित्तश्लेष्मानलनाशनः ॥
पातालगरुडीजातोऽर्को दृष्यः पवनापहः ।
वृन्दावृक्षोद्भवोऽर्कस्तु विषरक्तोव्रणापहः ॥
वटपत्रीभवश्चोष्णो योनिसूत्रगदापहः ।
हिङ्गुपत्र्या विबन्धार्शःश्लेष्मगुल्मानिलापहः ॥
वंशपत्र्याः पाचनोष्णो हृदस्तिगदसंग्रहृत् ।
मत्स्याक्ष्यर्को व्याहिशीतकुष्ठपित्तकफास्रजित् ॥
सर्पाक्ष्या रोगपः सर्पदष्टश्चिकोन्दुरदंशहृत् ।
शङ्खपुष्पया विषहरः स्मृतिकान्तिबलाग्निदः ॥
अर्कपुष्प्याः कृमिश्लेष्ममेहपित्तविकारजित् ।
लज्जालुकाया भगरक्तपित्तातिसारहृत् ॥
अलम्बुषासम्भवोऽर्कः कृमिपित्तकफापहः ।
दुग्धिकायाः कफहरो दृष्यस्तन्भी क्रिमिप्रणुत् ॥
भूम्यामल्याः कासदृष्णाकफपाण्डुज्वरापहः ।
ब्राह्म्या बुद्धिप्रदश्चार्कः वयस्तासाभ्यासतः कविः ॥
ब्रह्ममण्डूकिका पाण्डुविषशोथज्वरान् हरेत् ।
द्रोणपुष्प्या ज्वरश्वासकासप्लीहशोथजन्तुजित् ॥
सूर्य्यमुख्या हरेत् स्फोटयोनिरक्तकृमिपाण्डुताः ।
बन्ध्याकर्कोटिकाजातः सर्पदर्पव्रणापहः ॥
मार्कण्डिकाया दुर्गन्धविषगरश्लोदरापहः ।
देवदाल्याः शूलगुल्मश्लेष्मार्शोवातजित् परः ॥
धत्तूरजो ग्राहिहिमो वह्निकृद्व्रणदाहहा ।
गोजिह्वाया मेहकासव्रणसारज्वरापहः ॥
नागपुष्प्याः सर्पविषसर्व्वग्रहनिवारणः ।
वेल्लन्तरो मूत्रघातास्रशीतोन्मिलार्त्तिजित् ॥
किंकिन्या वह्निरुचिकृद्दर्पघ्नःकुष्ठकृमिप्रणुत् ।
कौकुन्दरो ज्वरं रक्तं मुखशोषं कफं हरेत् ॥
सदर्पनार्कस्त्वायुष्यः कफशोथास्त्रवातजित्" ।
इति श्रीलक्ष्मणाख्यतार्कचिकित्सायामौषधार्कविधानं तृतीयशतकं ॥ * ॥ अतःपरं नानौषधविधानं चतुर्थशतकं । नानारोगनिवारणार्थं पञ्चमशतकं । विस्फोटकनिवारणार्थं षष्ठशतकं । क्षुद्ररोगादेर्निवारणं सप्तमशतकं । कार्म्मणं नामाष्टमशतकं । गणसंख्या नवमशतकं । धातुशुद्धिर्दशमशतकं । एतत् सर्व्वं अर्कप्रकाशे रावणमन्दोदरीसंवादे अस्ति बाहुल्यभिया न लिखितं ॥

("अर्कक्षीरं सुधाक्षीरं तिक्ततुम्बाश्च पल्लवाः ।
करञ्जो वत्सनाभश्च लेपनं श्रेष्ठमर्शसां" ॥
इति चक्रपाणिसङ्ग्रहः ॥ * ॥
"अर्कार्कवर्कारञ्जद्वयनागदन्तीमयूरकभार्गीराज्ञेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेताहस्तिकाल्यजवणा स्ता पसवृक्षश्चेति" । इति अर्कादिगणः ॥
"अर्कादिको गणो ह्येष कफमेदोविषापहः ।
क्रिमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः" ॥
इति सुश्रुतः ॥)

अर्ककान्ता, स्त्री, (अर्कोऽर्ककिरणः कान्तोऽनुकूलो यस्याः सा, कम् + क्तः स्त्रियां टाप् ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥ ऊड़ऊड़िया इति ख्याता । इति राजनिर्घण्टः ॥ (अस्या गुणा आदित्यभक्ताशब्दे ज्ञातव्याः ॥)

अर्कचन्दनं, क्ली, (अर्कस्य प्रियं चन्दनं, षष्ठीतत्पुरुषः ।) रक्तचन्दनं । इति राजनिर्घण्टः ॥ (रक्तचन्दनशब्दे ऽस्य गुणावली ज्ञेया ॥)

अर्कजौ, पुं, (अर्काज्जायेते यौ, अर्क + जन् ड, पृषोदरादित्वात् तत्पुरुषः ।) अश्विनीकुमारौ । नित्यद्विवचनान्तशब्दोऽयं । इति हेमचन्द्रः ॥

अर्कतनयः, पुं, (अर्कस्य तनयः, षष्ठीतत्पुरुषः ।) कर्णराजः । इति हेमचन्द्रः ॥ वैवस्वतमनुः । सावर्णिमनुः । शनिः । यमः । यमुनायां तपत्याञ्च स्त्री । इति महाभारतं ।

अर्कनन्दनः, पुं, (अर्कस्य नन्दनः, षष्ठीतत्पुरुषः ।) अर्कतनयः । इति त्रिकाण्डशेषः ॥

अर्कपत्रः, पुं, (अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्य सः ।) आदित्यपत्रवृक्षः इति राजनिर्घण्टः ॥

अर्कपत्रा, स्त्री, (अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्याः सा ।) वृक्षविशेषः । इङ्गेर मूल इति भाषा । तत्पर्य्यायः । सुनन्दा २ अर्कमूला ३ विषापहा ४ । इति रत्नमाला ॥

अर्कपर्णः, पुं, (अर्क इव रक्तं पर्णमस्य सः ।) अर्कवृक्षः । इत्यमरः ॥ आकन्द इति ख्यातः । (अस्य विशेषोऽर्कशब्दे ज्ञातव्यः ।)

अर्कपादपः, पुं, (अर्कः अर्कवृक्षइव तीक्ष्णः पादपः ।) निम्बवृक्षः । इति त्रिकाण्डशेषः ॥

अर्कपुष्पिका, स्त्री, (अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः सा, जातित्वात् ङीष् कप् ।) वृक्षभेदः । अर्कझञ्जी झलीपुष्पश्चेति ख्याता । तत्पर्य्यायः । पयस्या २ सूर्य्यवल्ली ३ सितपर्णी ४ । इति रत्नमाला ॥

अर्कपुष्पी, स्त्री, (अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः सा, जातित्वात् ङीष् ।) कुटुम्बिनीवृक्षः । तत्पर्य्यायगुणाः ।

"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका ।
अर्कपुष्पी कृमिश्लेष्ममेहचित्तविकारजित्" ॥
इति भावप्रकाशः ॥ राजनिर्घण्टोक्तपर्य्यायगुणाः कुटुम्बिनीशब्दे द्रष्टव्याः ॥

अर्कप्रिया, स्त्री, (अर्कं प्रीणाति, प्री + क, अर्कस्य प्रिया इति वा ।) जवा । इति राजनिर्घण्टः ॥ (जवाशब्देऽस्य विशेषो ज्ञातव्यः ॥)

अर्कबन्धुः, पुं, (अर्कस्य बन्धुरिव ।) गौतमः । स च इक्ष्वाकुकुलोद्भवशाक्यवंशीयबुद्धः । इत्यमरः ॥

अर्कबान्धवः, पुं, (बन्धुरेव बान्धवः, बन्धु + स्वार्थे अण्, अर्कस्य बान्धवः, षष्ठीतत्पुरुषः ।) अर्कबन्धुः इति हेमचन्द्रः ॥

अर्कभक्ता, स्त्री, (अर्कस्य भक्ता, षष्ठीतत्पुरुषः ।) आदित्यभक्तावृक्षः । इति राजनिर्घण्टः ॥ ऊड़ऊड़िया इति ख्याता ।

अर्कमूला, स्त्री, (अर्क इव विषधराणां दुःसहं मूलं यस्याः सा ।) अर्कपत्रा । इति रत्नमाला ॥ इङ्गेर मूल इति भाषा ।

अर्करेतोजः, पुं, (अर्कस्य रेतसो जायते, अर्करेतस् + जन् + ड, उपपदसमासः ।) सूर्य्यपुत्रविशेषः । तत्पर्य्यायः । रेवन्तः २ भगगः ३ हयवाहनः ४ । इति हेमचन्द्रः ॥

अर्कवल्लभः, पुं, (अर्कस्य वल्लभः, षष्ठीतत्पुरुषः ।) बन्धूकवृक्षः । इति राजनिर्घण्टः ॥ (बन्धूकवृक्षशब्दे ऽस्य गुणादयो ज्ञेयाः ॥)

अर्कवेधं, क्ली, (अर्केण विध्यते, अर्क + व्यध + घञ्यच् ।) तालीशपत्रं । इति राजनिर्घण्टः ॥ (तालीशपत्रशब्दे ऽस्य गुणादिविवरणं ज्ञेयं ।)

अर्कव्रतं, क्ली, (अर्कस्य व्रतं, षष्ठीतत्पुरुषः ।) आरोग्यसप्तम्यादि सूर्य्यव्रतं । इति स्मृतिः ॥ सूर्य्यस्य जलशोधनवस्त्रजाकरग्रहणं । यथा,—
"अष्टौ मासान् यथादित्यस्तोयं हरति रश्मिभिः ।
तथा हरेत् करान्राज्ञामित्यमर्कव्रतं हि तत्" ॥
इति मनुः ।

अर्कसूनुः, पुं, (अर्कस्य सूनुः पुत्रः ।) यमः । इति हेमचन्द्रः ॥

अर्कसोदरः, पुं, (अर्कस्य सोदर इव हितकारी ।) ऐरावतहस्ती । इति हेमचन्द्रः ॥

अर्काहिता, स्त्री, (अर्काय हिता अनुकूला, चतुर्थीतत्पुरुषः ।) आदित्यभक्तावृक्षः । इति राजनिर्घण्टः ॥ ऊड़ऊड़िया इति ख्याता । (अस्याः विशेष आदित्यभक्ताशब्दे द्रष्टव्यः ॥)

अर्काश्मा, [न्] पुं, (अर्कस्य अनुगतः अश्मा, मध्यपदलोपी कर्म्मधारयः ।) अरुणोपलः । (चुणि इति ख्यातः प्रस्तरभेदः ।) सूर्य्यकान्तमणिरिति यावत् । इति हलायुधः ॥

अर्काह्वः, पुं, (अर्केण आह्वयते यः, अर्क + आ + ह्वे + अप् ।) अर्कवृक्षः । इत्यमरः ॥ आकन्द इति भाषा ।

अर्कोपलः, पुं, (अर्कस्यानुगत उपलः, कर्म्मधारयः ।) सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥ (चुणि इति ख्यातो रत्नभेदः । स्फटिकमणिः । "अका-

पलोल्लसितवक्रिभिरक्रि तप्तास्त्रीव्रं महाव्रतमिवात्र चरन्ति वप्राः"। इति माघः।)

अर्गलं, क्ली, स्त्री, (अर्ज + कलच्, कुत्वम्।) कपाटबन्धककाष्ठविशेषः। इत्यमरः॥ ऊड़का तसला इत्यादि भाषा।

("ससम्भ्रमेन्द्रद्रुतमातितार्गला
निमिलिताक्षीव भियामरावती"।

इति काव्यप्रकाशे।

"तां सत्यनाम्नीं दृढतोरणार्गलां
गृहैर्विचित्रैरुपशोभितां शिवां"।

इति रामायणे।

"अथानपोढ़ार्गलमप्यगारं"। इति रघुः। प्रतिबन्धः। प्रत्यवायः। अन्तरायः।

"ईप्सितं तदवज्ञानात् विद्धिसार्गलमात्मनः"।

इति रघुवंशे।)

कल्लोले च। इति मेदिनी॥ देवीमाहात्म्यपाठस्यादौ पाठ्यस्तोत्रविशेषः॥ यथा

मार्कण्डेय उवाच।

"ब्रह्मन् केन प्रकारेण दुर्गामाहात्म्यमुत्तमं।
ब्रूहि शीघ्रं सिद्धति तत्सर्व्वं कथयस्व महाप्रभो॥

ब्रह्मोवाच।

अर्गलं कीलकञ्चादौ पठित्वा कवचं पठेत्।
जपेत् सप्तशतीं पश्चात् क्रम एष शिवोदितः॥
अर्गलं दुरितं हन्ति कीलकं फलदं तथा।
कवचं रक्षते नित्यं चण्डिका त्रितयं दिशेत्॥
अर्गलं हृदये यस्य स चार्गलवाक् सदा।
कीलकं हृदये यस्य वज्रकीलितमानसः॥
कवचं हृदये यस्य स वज्रहृदयः खलु।
ब्रह्मणा निर्म्मितं पूर्व्वं विनिश्चित्यापि चेतसा"॥

इत्यादि। तदाद्यश्लोको यथा,—

"जय त्वं देवि चामुण्डे जय भूतापहारिणि!।
जय सर्व्वगते देवि! कालरात्रि नमोऽस्तु ते"॥

तस्य शेषश्लोको यथा,—

"इदं स्तोत्रं पठित्वा च महास्तोत्रं पठेन्नरः।
सप्तशतीं समाराध्य वरमाप्नोति सम्मदं"॥

इत्यर्गलास्तोत्रं॥

अर्गलिका, स्त्री, (क्षुद्रार्गला, अर्गला गौरादित्वात् ङीष् स्वार्थे कन्।) अल्पार्गला। इति हेमचन्द्रः॥ खिल इति भाषा।

अर्घ, मूल्ये, (भ्वादि—परं—सकं सेट्।) इति कविकल्पद्रुमः॥ अर्घति गां गोपः। इति दुर्गादासः। ("परीक्षका यत्र न सन्ति देशे नार्घन्ति रत्नानि समुद्रजानि"। इति पञ्चतन्त्रे।)

अर्घः, पुं, (अर्घ + घञ्।) मूल्यं।

("कुर्य्युरर्घं यथाप्रख्यं ततो विंशं नृपो हरेत्"।

"मणिमुक्ताप्रवालानां लौहानां तान्तवस्य च।
गन्धानाञ्च रसानाञ्च विद्यादर्घबलाबलम्"॥

इति मनुः।) पूजाविधिः। इत्यमरः॥ अयं शब्दः सामगानां सर्व्वत्राभिलाषे सयकारो नपुंसकलिङ्गेनैव प्रयोज्यः अन्यवेदिनां निर्यकारः पुंलिङ्गेन प्रयोज्यः। इति श्राद्धतत्त्वं॥ (दूर्व्वाक्षतसर्षपपुष्पादिविरचितोदेवब्राह्मणादिसम्मानार्थः पूजोपचारभेदः। "अये वनदेवतेयं फलकुसुमपल्लवार्घेण मामुपतिष्ठते"। इति उत्तरचरिते।

"स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै"।

इति मेघदूते।

"दूर्व्वासर्षपपुष्पाणां दत्वार्घं पूर्णमञ्जलिम्"।

इति याज्ञवल्क्यः।)

अर्घीशः, पुं, (अर्घोऽस्यास्य इति अर्घी, तेषु ईशः।) शिवः। इति शब्दरत्नावली॥

अर्घ्यं, त्रि, (अर्ह्यते पूज्यते, अर्ह + ण्यत्, न्यङ्क्वादीनाञ्चेति कुत्वं, अर्घमर्हति इति यादार्घाभ्यञ्चेति यत् वा।) पूजनयोग्यं। पूज्यं। इति मेदिनी॥ अर्घार्थं। तत्तु पूजार्थदूर्व्वाक्षतचन्दनपुष्पमिश्रितवारि। इत्यमरः॥

("अनर्घ्यमर्घ्येण तमद्रिनाथः,
स्वर्गौकसामर्चितमर्चयित्वा"।

इति कुमारसम्भवे।

"अर्घ्यमर्घ्यमितिवादिनं नृपं,
सोऽनवेक्ष्य भरताग्रजो यतः"।

इति रघुवंशे।) अर्घार्थजलम् इति अमरटीकायां भरतः॥ तत्तु सामान्यविशेषभेदेन द्विविधं। तत्राद्यस्य क्रमः। स्वमन्त्रे त्रिकोणवृत्तभूवृत्तं विलिख्याधारशक्तिं पूजयित्वा अस्त्रमन्त्रेण पात्रं प्रक्षाल्य मन्त्रेण जलेनापूर्य्याङ्गुष्ठमुद्रया मन्त्रेण सूर्य्यमण्डलात्तीर्थमावाह्य प्रणवेन गन्धपुष्पाभ्यां संपूज्य धेनुमुद्रां प्रदर्श्य प्रणवमन्त्रधा दशधा वा जपेत्॥ अन्यस्य क्रमः। स्वमन्त्रे त्रिकोणमण्डलं लिखा तत्र त्रिपदिकामारोप्य अस्त्रेण शङ्खं प्रक्षाल्य तदुपरि संस्थाप्य मन्त्रेण गन्धपुष्पाक्षतदूर्व्वादि तत्र निःक्षिप्य विमलजलेन विलोममातृकया मूलेन च पूरयेत् ततस्त्रिपदिकायां वह्निमण्डलपूजां शङ्खे सूर्य्यमण्डलपूजां जले सोममण्डलपूजां ततो मन्त्रेणाङ्गुष्ठमुद्रया सूर्य्यमण्डलात्तीर्थमावाह्य मन्त्रेण स्वहृदयाद्देवतां तत्रावाह्य कूर्चमन्त्रेणावगुण्ठ्यास्त्रमन्त्रेण गालिनीमुद्रां प्रदर्श्य मन्त्रेण तज्जलं वीक्ष्य अङ्गमन्त्रैः सकलीकृत्य गन्धपुष्पाभ्यां देवतां संपूज्य तदुपरि मत्स्यमुद्रयाच्छाद्य मूलमन्त्रमष्टधा जप्त्वा धेनुमुद्रां प्रदर्श्यास्त्रेण संरक्ष्य तस्मात् किञ्चित् जलं प्रोक्षणीपात्रे निःक्षिपेत्। इति तन्त्रसारः॥

अर्घ्यं, क्ली, (अर्घ + यत्।) जरत्कारुमुनितपोवनतरुद्भूतमधु। तस्य गुणाः। चक्षुरायुर्हितकारित्वं। आमवातकफपित्तनाशित्वञ्च। इति राजवल्लभः॥

अर्च्च, क, पूजे। (चुरादि—सकं—सेट्।) इति कविकल्पद्रुमः॥ क अर्चयति। गोवर्द्धनस्त्विममात्मनेपदिनं मत्वा विभाजसे मकरकेतनमर्च्चयन्तीत्यादि स्खलितमित्याह। इति दुर्गादासः॥

अर्च्च, ञ, पूजे। (भ्वादि—सक—सेट्।) इति कविकल्पद्रुमः॥ ञ अर्चति अर्चते। इति दुर्गादासः॥

अर्चकः, त्रि, (अर्चति, अर्च + ण्वुल्।) पूजकः। अर्चनाकारकः। यथा,—

"अर्चकस्य तपोयोगात् अर्चनस्यातिशायनात्।
आभिरूप्याच्च विम्बानां देवः सान्निध्यमृच्छति"॥

इति तिथ्यादितत्त्वं॥

("ब्रह्मचारी व्रती च स्यात् गुरुदेवद्विजार्चकः"।

इति मनुः।)

अर्चनं, क्ली, (अर्च + भावे ल्युट्।) पूजनं। यथा,—

"धनधान्यकरं नित्यं गुरुदेवद्विजार्चनं"।

इति राजवल्लभः॥ पूजाद्रव्ये च। यथा,—

"अर्चकस्य तपोयोगात् अर्चनस्यातिशायनात्"।

इति तिथ्यादितत्त्वं।

अर्चना, स्त्री, (अर्च + युच्, टाप्।) पूजा। इति जटाधरः॥ गुरुदेवद्विजानां नित्यार्चनागुणाः। स्वर्गायुर्-आयुर्धनधान्यकारित्वं। अलक्ष्मीपापनाशित्वञ्च। इति राजवल्लभः॥

अर्चा, स्त्री, (अर्च + आधारे अङ्।) पूजा। प्रतिमा। इति मेदिनी॥ (देवादीनां पूजनं। "अर्चा चेत् विधितश्च ते वद तदा किं मोक्षलाभक्षमैः"॥ इति शिवशतके।)

अर्चिः, स्त्री, (अर्च + इन्।) अग्निशिखा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

("आसीदासन्ननिर्व्वाणप्रदीपार्चिरिवोषसि"।

इति रघुवंशे।)

अर्चिः, [स्] स्त्री, क्ली, (अर्च + इसि।) अग्निशिखा। किरणाः। इत्यमरः। दीप्तिः। इत्युणादिकोषः॥ अयं शब्दः सान्त इदन्तश्च॥ ("हर्म्याणां हेमशृङ्गश्रियमिव निचयैरर्चिषामादधानः"। "विरम विरम वह्ने मुञ्च धूमानुबन्धं प्रकटयसि किमुच्चैरर्चिषां चक्रवालम्"। इति रत्नावली।)

अर्चितः, त्रि, (अर्च + कर्म्मणि क्तः।) पूजितः। इत्यमरः॥ (पूजाविधिना सम्मानितः।

"वेश्मन्येवं स्थिते तत्र गत्वा तान् परमार्चितान्"।

"अर्चितास्त्र नरैः पौरैः पाण्डवा भरतर्षभ"।

इति महाभारते।)

अर्चिष्मान्, [त्] पुं, (अर्चिर्विद्यतेऽस्य, अर्चिस् + मतुप्।) अग्निः। इति हेमचन्द्रः॥ सूर्य्यः। अर्चिःशब्दात् अतिशये मतुप्प्रत्ययः॥ (त्रि, दीप्तः। तेजोविशिष्टः। प्रभावान्।) (खनामख्यातो देवर्षिभेदः। यदुक्तं, हरिवंशे,

"अर्चिष्मांस्तम्बरुश्चैव भारिश्च वदतां वरः।
नेतारो देवदेवानामेते हि तपसान्विताः"।)

अर्च्यः, त्रि, (ऋच् + स्तुतौ ण्यत्, अर्च + यत् वा।) अर्चनीयः। पूज्यः। इति हेमचन्द्रः॥

("मरुत्प्रयुक्ताश्च मरुत्सखाभं,
तमर्च्यमारादभिवर्त्तमानम्"।

इति रघुवंशे।)

अर्ज्ज, अर्ज्जने। (भ्वादि—परं—सकं सेट्।) इति कविकल्पद्रुमः॥ अर्ज्जनमलब्धस्य लाभः। यशश्चार्ज्जति यः स्थिरमिति हलायुधः। इति दुर्गादासः॥

अर्ज्ज, क संस्कारे (चुरादि—उभं—सकं—सेट्।) इति कविकल्पद्रुमः॥ क अर्ज्जयति किमपि लोकः संस्करोतीत्यर्थः। प्रतियत्ने प्राञ्चः। अर्ज्जयति धनं परिजनः। इति रमानाथः। इति दुर्गादासः॥

अर्ज्जकः, पुं, (अर्ज्जयति, अर्ज्ज + ण्वुल्।) श्वेतपर्णासः। वावुइ इति भाषा। तत्पर्य्यायः। श्वेतच्छदः २ गन्धपत्रः ३ पाता ४ कुठेरकः ५। इति शब्दचन्द्रिका॥ वर्ब्बरीभेदः। आजवलाइ इति पश्चिमदेशे ख्यातः। तत्पर्य्यायः। क्षुद्रतुलसी २ क्षुद्रपर्णः ३ मुखार्ज्जकः ४ उग्रगन्धः ५ जम्बीरः ६ कुठेरः ७ कठिञ्जरः ८। अस्य गुणाः। कटुत्वं। उष्णत्वं। कफवातामयनेत्ररोगनाशित्वं। रुचिकारित्वं। सुखप्रसवकारकत्वञ्च। इति राजनिर्घण्टः॥ सामान्यतुलसी। इति रत्नमाला॥ ("कफघ्ना लघवो रुक्षाः स्निग्धोष्णाः पित्तवर्द्धनाः। कटुपाकरसास्त्वेव सुरसार्ज्जकभूस्तृणाः"॥ इति सुश्रुतश्च॥)

अर्ज्जकः, त्रि, (अर्ज्जयति, अर्ज्ज + ण्वुल्।) उपार्ज्जनकर्त्ता। यथा। "अतएव वशिष्ठेन ज्येष्ठस्याशुद्धयमभिधायार्ज्जकस्यांशुद्धयमभिहितं"। इति दायभागः॥

अर्ज्जनं, क्ली, (अर्ज + ल्युट्।) उपार्जनं। स्वहेतुभूतो व्यापारः। यथा। अर्ज्जनं स्वहेतुभूतो व्यापारः अर्ज्जनं स्वं नापादयतीति विप्रतिषिद्धमिति दायभागः॥ ("अर्जयित्व्यापारोऽर्जनमिति जीमूतवाहनः"। "स्वामित्वजनकव्यापारत्वम्" इति महेश्वरः"। "स्वामित्वहेतुभूतव्यापारत्वम् इति। श्रीकृष्णः"। "पित्रनिधनकालीनं वा जीवनमेव पुत्रस्यार्ज्जनं भविष्यति"। इति दायभागः। "अर्थानामर्जने दुःखमर्जितानाञ्च रक्षणे"। इति पञ्चतन्त्रे। "द्रव्यार्जनञ्च नाशश्च मित्रामित्रस्य चार्जनम्"। इति मनुः।)

अर्जुनं, क्ली, (अर्ज + उनन्।) दृग्। नेत्ररोगः। इति विश्वमेदिन्यौ॥ तस्य लक्षणं। "एको यः शुक्लरुधिरोपमस्तु विन्दुः सुकृष्णो भवति तदर्जुनं वदन्ति"। इति माधवकरः॥ ("नीलक् श्यामोऽर्जुनं विन्दुः शुक्लोहितलोहितः" इति वाभटश्च।)

अर्जुनः, पुं, (अर्ज + उनन्।) पाण्डुराजस्य तृतीयपुत्रः। स तु इन्द्रात् कुन्तीगर्भे जातः। तत्पर्य्यायः। पाल्गुनः २ जिष्णुः ३ किरीटी ४ श्वेतवाहनः ५ वीभत्सुः ६ विजयः ७ कृष्णः ८ सव्यसाची ९ धनञ्जयः १०। इति विराटपर्व्व। पार्थः ११ शक्रनन्दनः १२ गाण्डीवी १३ मध्यमपाण्डवः १४ श्वेतवाजी १५ कपिध्वजः १६ राधाभेदी १७ सुमद्रेयः १८ गुडाकेशः १९ बृहन्नलः २०। इति जटाधरः॥ श्वेन्द्रिः २१। इति भूरिप्रयोगः॥ * स्वनामख्यातवृक्षविशेषः। आजन इति भाषा। तत्पर्य्यायः। नदीसर्जः २ वीरतरुः ३ इन्द्रद्रुः ४ ककुभः ५। इत्यमरः॥ शुभ्रवरः ६ पार्थः ७ चित्रयोधीः ८ धनञ्जयः ९ वैरातद्रुः १० किरीटी ११ गाण्डीवी १२ शिवमल्लकः १३ सव्यसाची १४ कर्णारिः १५ करवीरकः १६ कौन्तेयः १७ इन्द्रद्रुः १८ वीरद्रुः १९ कृष्णसारथिः २० एथाजः २१ फाल्गुनः २२ धन्वी २३। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"ककुभोऽर्জ্জুননামाख्यो नदीसर्জ্জश्च कीर्त्तितः।
इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः॥
ककुभः शीतलो भग्नव्रणतत्क्षयविषापहः।
मेदोमेहव्रणान् हन्ति तुवरः कफपित्तहृत्"॥
इति भावप्रकाशः॥ अस्य गुणाः। क्षतभग्नरक्तक्षीणमूत्रक्षरोगे पथ्यत्वं। इति राजवल्लभः॥ कषायत्वं। उष्णत्वं। व्रणरोपणत्वं। कफपित्तश्रमदृष्णार्त्तिनाशित्वं। वायुरोगप्रकोपकारित्वञ्च। इति राजनिर्घण्टः॥ *॥ (अस्य व्यवहारो यथा,—
"अर्জ্জুনस्य त्वचा सिद्धं क्षीरं दद्याद्गदामये"॥
इति वैद्यकचक्रपाणिसंग्रहः॥)

कार्त्तवीर्य्यार्জ্জুनः। माहिष्मती नाम पुरी तस्य राजधान्यासीत्, स खलु भुजवीर्य्येण सप्तद्वीपां धरामजयत्। योगाद् बाऽुसहस्रञ्च लब्धवान्।
"तस्य बाऽुसहस्रन्तु युध्यतः किल भारतः!।
योगात् योगेश्वरस्येव प्रादुर्भवति मायया॥
तेनेयं पृथिवी सर्व्वा सप्तद्वीपा सपर्व्वता।
ससमुद्रा सनगरा उग्रेण विधिना जिता॥
तेन सप्तसु द्वीपेषु सप्तयज्ञाप्तदक्षिणाः।
प्राप्तानि विधिना राज्ञा श्रूयन्ते जनमेजय"॥
"योऽर्জ্জুनेनार्জ্জनस्तुल्यो द्विबाऽुर्জ্জबाऽुना"।
इति महाभारते।) मयूरः। मातुरेकसुतः। इति मेदिनी। श्वेतवर्णः। तद्वति त्रि। इत्यमरः॥

अर्জ্জুनध्वजः, पुं, (अर्জ্জुनस्य पार्थस्य ध्वजः, रथकेतुभूतः, सततं तत्रावस्थानात्।) हनूमान्। इति हेमचन्द्रः॥

अर्জ্জুनी, स्त्री, (अर्জ্জ + उनन्, गौरादित्वात् ङीष्।) गवी। करतोयानदी। कुट्टनी। उषा। इति विश्वमेदिन्यौ॥

अर्জ্জুनोपमः, पुं, (अर्জ্জुनः स्वनामख्यातः वृक्षः उपमा यस्य सः।) वृक्षभेदः। पेगुन इति भाषा। तत्पर्य्यायः। महापत्रः २ शाकवृक्षः ३ अनीलः ४ अर्णः ५। इति शब्दचन्द्रिका॥ शाकाख्यः ६ खरपत्रः ७। इति रत्नमाला॥

अर्णः, पुं, (अर्च्यते क्षः।) शाकवृक्षः। इति शब्दचन्द्रिका। अक्षरं। इत्यागमः॥ वर्णः। यथा,—
"वर्णोऽक्षरं रश्मिरर्णः खरास्तु कथिता अचः।
व्यञ्जनानि हलो वर्गाः कादयोऽष्टौ प्रकीर्त्तिताः"॥
इति वीजवर्णाभिधानं॥

अर्णः, [स्] क्ली, (ऋच्छति, ऋ गतौ उदके नुट् चेत्यर्त्तेरसुन् तस्य च नुट्।) जलं। इत्यमरः॥

अर्णवः, पुं, (अर्णांसि जलानि सन्त्यस्मिन्, अर्णसो लोपश्चेति वः सलोपश्च।) समुद्रः। इत्यमरः॥ ("अदृश्यताभिगम्यश्च यादोरत्नैरिवार्णवः"। इति रघुवंशे।)

अर्णवजः, पुं क्ली, (अर्णवात् जायते, अर्णव + जन + ड, उपपदसमासः।) समुद्रफेनः। इति रत्नमाला॥ (समुद्रफेनशब्दस्य विवरणं ज्ञेयं॥)

अर्णवमन्दिरः, पुं, (अर्णवः मन्दिरमिव यस्य सः।) वरुणः। इति हेमचन्द्रः॥

अर्णवोद्भवः, पुं, (उद्भवत्यस्मात्, उत् + भू + अपादाने अप्, अर्णवः उद्भवो यस्य सः।) अग्निजारवृक्षः। इति राजनिर्घण्टः॥ (अग्निजारशब्दस्य गुणा ज्ञातव्याः॥) (चन्द्रः। अमृतं।)

अर्णोदः, पुं, (अर्णांसि ददाति, दा + क।) मुस्तकः। मेघः। इति राजनिर्घण्टः॥

अर्णोभवः, पुं, (अर्णसि जले भवति, अर्णस् + भू + अप्, उपपदसमासः।) शृङ्खः। इति राजनिर्घण्टः॥

अर्त्तगलः, पुं, (आर्त्तइव गलति, गल + अच्, पृषोदरादित्वात् वा कृखः।) आर्त्तगलः। नीलभिण्टिका। इत्यमरटीकायां भरतः॥ (नीलभिण्टिशब्दस्य गुणो व्याख्येयः॥)

अर्त्तनं, क्ली, (ऋत + ल्युट्, पक्षे इयङभावः।) जुगुप्सा। निन्दा। इत्यमरः॥

अर्त्तिः, स्त्री, (अर्द् + क्तिन्।) पीड़ा। धनुरग्रभागः। इत्यमरः॥ (पीड़ार्थे उदाहरणं यथा,—
"घूर्णं समं रघकहिङ्गुमहौषधानां,
मुण्ठाम्बुना कफसमीरणसम्भवासु।
हृत्पार्श्वपृष्ठजठरार्त्तिषिसूचिकासु
पेयन्तथा यवरसेन च विज्वरघ्ने॥"
इति वैद्यकचक्रपाणिसंग्रहः॥)

अर्त्तिका, स्त्री, (ऋत + ण्वुल्।) अन्तिका। नाट्योक्तौ ज्येष्ठा भगिनी। इत्यमरटीकायां स्वामी॥

अर्थ तृ क ङ याचने। इति कविकल्पद्रुमः॥ ङ अर्थयते अर्थापयते। प्रार्थयत्यल्पमूल्यानीत्यादौ प्रार्थनं प्रार्थः पश्चात् प्रार्थं करोति इति णौ परस्मैपदं। इति दुर्गादासः॥

अर्थः, पुं, (अर्थ + घञ्।) विषयः। याच्ञा। धनं। कारणं। वस्तु। शब्दप्रतिपाद्यः। निवृत्तिः। प्रयोजनं। इति मेदिनी॥ प्रकारः। इति हेमचन्द्रः॥ (धनार्थे यथा,—
"अर्थेन बलवान् सर्व्वः अर्थाद्भवति पण्डितः"।
इति हितोपदेशे। अयञ्च त्रिवर्गस्यान्तर्गतः।
"कस्यार्थधर्म्मौ वद पीड़यामि
सिन्धोस्तटावोघइव प्रवृद्धः॥" इति कुमारसम्भवे।
"तमसोलक्षणं कामो राजसस्त्वर्थ उच्यते
सत्त्वस्य लक्षणं धर्म्मः श्रेयसेषां यथोत्तरं"॥
इति मनुः। शब्दप्रतिपाद्यः। शब्दानामभिधेयः।
"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये"।
इति रघुवंशे। अभिधेयं। अलङ्कारशास्त्रादौ अर्थस्त्रिविधः, वाच्यो लक्ष्यो व्यङ्ग्येति।

अर्थना, स्त्री, (अर्थ + युच्।) याच्ञा। भिक्षा। इत्यमरः॥

अर्थपतिः, पुं, (अर्थानां पतिः, षष्ठीतत्पुरुषः।) कुबेरः। राजा। इति मेदिनी॥ ("अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः"। "स नैषधस्यार्थपतेः सुतायाम्"। इति रघुवंशे।)

अर्थप्रयोगः, पुं, (अर्थानां धनानां प्रयोगः, षष्ठीतत्पुरुषः।) वृद्धिजीविका। इत्यमरः॥ सूदे देया बाड़ी देया इत्यादि भाषा।

अर्थवादः, पुं, (अर्थस्य लक्षणया स्तुत्यर्थस्य निन्दार्थस्य वा वादः, वद्+करणे घञ्।) स्तुतिः। प्रशंसा। इति हेमचन्द्रः॥ स तु त्रिविधः। गुणवादः १ अनुवादः २ भूतार्थवादः ३। यथा,—
"विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्ज्ञानावर्थवादस्त्रिधा मतः"॥
इति भट्टः॥ तत्त्वसम्बोधिनीमते सप्तविधः। स्तुत्यर्थवादः १ फलार्थवादः २ सिद्धार्थवादः ३ निन्दार्थवादः ४ परकृतिः ५ पुराकल्पः ६ मन्त्रः ७। एषामुदाहरणानि श्रुत्युक्तत्वात् न लिखितानि॥ विध्यसमभिव्याहृतवाक्यं। यथा। "अर्थवादश्च विध्यसमभिव्याहृतवाक्यरूपः" सोऽपि त्रिविधः। गुणवादानुवादभूतार्थवादभेदात्। यथा—
"विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्ज्ञानावर्थवादस्त्रिधा मतः"॥
इति॥ अयमर्थः। विरोधे विशेष्यविशेषणयोः सामानाधिकरण्येनान्वयविरोधे गुणवादः अङ्गकथनरूपत्वात्। यथा "यजमान स्तस्तरः" इति। अत्र स्तस्तरः कुशमुष्टिः तस्य यजमानेऽभेदान्वयबाधात् यजमानस्य कुशमुष्टिधारणरूपार्थवादरूपत्वात् गुणवादः। अवधारिते प्रमाणान्तरसिद्धेऽर्थे यो वादः। यथा नान्तरीयकेऽग्निश्चेतव्यः अग्निर्हिमस्य भेषजं इत्यादि च। अन्तरीयकेऽग्निचयनस्यासम्भवेन तदभावस्य अग्नेर्हिमनाशकत्वस्य च लौकिकप्रमाणसिद्धत्वात् अनुवादः। तद्ज्ञानौ तयोर्विरोधावधारणयोरभावे भूतार्थवादः। यथा इन्द्रो वृत्रहन्नित्यादि। सोऽपि द्विविधः। स्तुत्यर्थवादो निन्दार्थवादश्च। यथा,—
"सन्ध्यामुपासते ये च" इत्यादि स्तुत्यर्थवादः।
"स्त्रीतैलमांससंभोगी पर्व्वस्वेतेषु पुमान्।
विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः"।
इत्यादि निन्दार्थवादः। इति श्राद्धविवेकटीकायां श्रीकृष्णतर्कालङ्कारः॥ * ॥
"प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनं"।
इति वेदान्तसारः॥ तद्विवरणं यथा। अथार्थवादाधिकरणं। तत्रार्थवादाश्च बहुषु श्रूयन्ते ते किं प्रमाणं न वेति संशये पूर्व्वपक्षसूत्रं। आम्नायस्य प्रवर्त्तकत्वं तदर्थमेव तदवतारादिति। अस्यार्थः। आम्नायस्य वेदस्य प्रवर्त्तकत्वं विधेये इति शेषः। तदर्थं वेदाभिधानात्। तच्च प्रवर्त्तकत्वं कार्य्यताज्ञानद्वारैव तद्विना प्रवृत्त्यभावात्। अतः सिद्धार्थकानां स्तुत्यर्थवादानां कार्य्यतावाचकपदाभावात् न कार्य्यताधीजनकत्वं। अतोऽप्रामाण्यमेव। अतस्तेषामर्थवादानां प्रवर्त्तकत्वार्थमवश्यं विधिकल्पनं स्तुतिविशेषणत्वं वा युक्तं अतएव सिद्धान्तसूत्रं। विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरिति। अस्यार्थः। अर्थवादानां स्तुतिपरत्वेन विधिना सह एकवाक्यत्वात् ते अर्थवादाः प्रमाणानि स्युः। तथा च विधेयप्रवृत्तावेव तेषां तात्पर्य्यं तत्रैव प्रमाणं यत्परशब्दः स शब्दार्थं इति सिद्धान्तात् न स्वार्थे स्तुत्यादौ तत्र तात्पर्य्याभावात्। तर्हि यत्र दुःखेन सम्भिन्नमित्यादेः स्वतन्त्रार्थवादानां का गतिरित्यत्राह भूतार्थानां क्रियार्थेन समाम्नायः। अस्यार्थः। भूतार्थानां सिद्धार्थानां क्रियार्थेन कार्य्यबोधकेन विधिना इति यावत्। समाम्नायः पाठः कार्य्यइति शेषः। ततश्च विधिवाक्याकाङ्क्षापूरकत्वेन कार्य्यान्वितबोधकतया तेषां प्रामाण्यं। यथा। लिखिष्यमाणयूपाहवनीयवाक्यानां यूपाहवनीयपरिचयाय कार्य्यान्वितबोधकत्वेन स्वार्थबोधकत्वे प्रामाण्यं। तथा स्वर्गकामो यजेतेत्यत्र स्वर्गरूपपरिचयाय स्वर्गबोधकत्वेन।
"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरं।
अभिलाषोपनीतं यत् तत् सुखं स्वःपदास्पदं"॥
इत्यादि वाक्यानामपि प्रामाण्यं। अन्यथा यूपादिपदार्थापरिचये च तत्तद्विधिवाक्यानां प्रवृत्तिर्न स्यादतो विधिनैकवाक्यत्वात् सिद्धार्थकानामपि प्रामाण्यं। यत्र तु विधिना सह विरोधः तत्र न स्वार्थे प्रामाण्यं। यथा "अहरहः सन्ध्यामुपासीत" इत्यादौ।
"सन्ध्यामुपासते ये तु नियतं संशितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्"॥
इत्याद्यर्थवादानां॥ अतो नित्ये कर्म्मणि फलश्रुतिरर्थवादश्च सोऽपि स्तुत्यादनपरः। अतोऽत्र कार्य्यताज्ञानादेरप्रवृत्तिरिति दिक्। इति धर्म्मदीपिका॥

अर्थवान्, [त्] पुं, (अर्थोऽस्यास्य, अर्थ+मतुप्+मस्य वः।) पुरुषः। इति राजनिर्घण्टः॥ अर्थविशिष्टे त्रि॥ (ऐश्वर्य्यशाली। "तेनार्थवान् लोभपराक्षुखेन"। इति रघुवंशे। अभिधेययुक्तः। सार्थकः।
"करोति यः सर्व्वजनातिरिक्तां
सम्भावनामर्थवतीं क्रियाभिः"।
इति किरातार्जुनीये। "अर्थवान् खलु मे राजशब्दः"। इति शाकुन्तले।)

अर्थविज्ञानं, क्ली, (अर्थस्य विज्ञानं, षष्ठीतत्पुरुषः।) शुश्रूषाद्यष्टधीगुणान्तर्गतगुणविशेषः। शब्दार्थज्ञानं। इति हेमचन्द्रः॥
("शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः"॥)

अर्थव्ययज्ञः, त्रि, (अर्थस्य अयं तत्प्रकारं जानाति, ज्ञा+क।) धनव्ययप्रकारवित्। (किं धनं, कथं, कुत्र, कियत्, कस्मै वा व्ययितव्यमिति विशेषाभिज्ञः।) तत्पर्य्यायः। सुकुलः २। इति हेमचन्द्रः॥

अर्थशास्त्रं, क्ली, (अर्थस्य भूमिधनादेः प्रापकं शास्त्रं, षष्ठीतत्पुरुषः।) चाणक्यादिप्रणीतं नीतिशास्त्रं। तत्पर्य्यायः। दण्डनीतिः २। इत्यमरः॥ यथा,—
"बृहस्पतिप्रभृतिभिः प्रणीतस्यार्थशास्त्रकं।
तत्रैव दण्डनीतिः स्यादत्र ज्ञेयौ नयानयौ"॥
इति शब्दरत्नावली॥ अष्टादशविद्यान्तर्गतविद्याविशेषः। यथा विष्णुपुराणं।
"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश॥
आयुर्व्वेदो धनुर्व्वेदो गान्धर्व्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः"॥
इति प्रायश्चित्ततत्त्वं॥ * ॥ धर्म्मशास्त्रेणार्थशास्त्रस्य बाधत्वं यथा॥
"स्मृत्यर्थेन विरोधे हि अर्थशास्त्रस्य बाधनं।
परस्परविरोधे तु न्याययुक्तं प्रमाणवत्"॥
अर्थशास्त्रस्य मन्वादिप्रणीतराजनीत्यादिविषयस्य। यदाह,—
"अनागमन्तु यो मुङ्क्ते बहून्यब्दशतान्यपि।
चौरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः॥
इत्यनयोर्धर्म्मशास्त्रार्थशास्त्रयोर्विप्रतिपत्तौ धर्म्मशास्त्रेण दण्डविधायकमर्थशास्त्रं बाध्यते। तत्स्वार्थशास्त्रस्य चिपुरुषीयेतरपरत्वेन सङ्गोचः"।
इति मलमासतत्त्वं॥

अर्थसिद्धकः, पुं, (अर्थात् सिद्धः, अर्थः प्रयोजनं धनं वा सिद्धोऽस्य, समासान्तः कः।) सिन्दुवारवृक्षः। इति राजनिर्घण्टः॥

अर्थागमः, पुं, (अर्थस्य आगमः, षष्ठीतत्पुरुषः।) धनागमः। तत्पर्य्यायः। आयः २। इति हलायुधः॥
("अर्थागमो नित्यमरोगिता च
प्रिया च भार्य्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड्जीवलोकेषु सुखानि राजन्"॥
इति हितोपदेशे।)

अर्थिकः, पुं, (अर्थयते इत्यर्थी याचकः कुत्सितार्थे कन्।) वैतालिकः। निद्रायस्य राजादेर्जागरयिता। इति हेमचन्द्रः॥

अर्थी, [न्] त्रि, याचकः। सहायः। सेवकः। विवादी। इति विश्वः॥ धनी। अर्थो विद्यतेऽस्येति इन्॥

अर्थ्यं, क्ली, (अर्थ+यत्।) शिलाजतु। इत्यमरभेदिनीकरौ॥ अर्थहिते त्रि॥

अर्थ्यः, त्रि, (अर्थे साधुः, तत्साधुरिति यत्, अर्थादनपेतः, धर्म्मपथ्यर्थन्यायादनपेत इति यत्प्रत्ययः।) पण्डितः। धनवान्। न्याय्यः। इत्यमरभरतौ। याच्यः। याचनार्थकार्थधात्वोः कर्म्मणि यः॥ (अर्थयुक्तः। उदारार्थयुक्तः।
"अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः"।
इति रघुवंशे।
"वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे"।
इति कुमारसम्भवे।)

अर्द यातनागतियाचनेषु। (गतौ, सकं पीड़ायां अकं भ्वादि परं सेट्।) इति कविकल्पद्रुमः॥ यातना ताड़नं। अर्दति पुत्रं पिता। "अरट्टनं नार्दति चातकोऽपि"। न याचतीत्यर्थः। इति दुर्गादासः॥

अर्द ञ वधे। (चुरां-उभं-सकं-सेट्।) इति कविकल्पद्रुमः॥ ञ अर्दति अर्दते। "रत्तःसङ्खाणि चतुर्द्दशार्दीत्"। अयमात्मनेपदीत्यन्ये। इति दुर्गादासः॥

अर्द क वधे। इति कविकल्पद्रुमः॥ क अर्द्दयति। अयमात्मनेपदीत्यन्ये। इति दुर्गादासः॥

अर्दनं, क्ली, (अर्द+ल्युट्।) याचनं। पीड़नं। हननं। गमनं। अर्दधातोर्भावेऽनट्प्रत्ययः॥
("स्वजस्वेति तदेवाच बलं परबलार्दनम्"।
इति रामायणे।)

अर्दना, स्त्री, (अर्द + युच्, टाप्।) याच्ञा। भिक्षा। इत्यमरः। (यातना। वधः। हिंसा। गतिः।)
अर्दनिः, पुं, (अर्द + अनि।) अग्निः। याच्ञा। रोगः। इत्यमरटीकायां भरतः॥
अर्दितं, क्ली, (अर्द + क्तः।) वायुव्याधिविशेषः। तस्य (निदानपूर्व्वरूपसम्प्राप्तिपूर्व्वकं)लक्षणमाह(सुश्रुतः)।
"उच्चैर्व्याहरतोऽत्यर्थं खादतः कठिनानि च।
हसतो भृशतो भाराद्विषमाच्छयनादपि॥
शिरोनासौष्ठचिबुकललाटेक्षणसन्धिजः।
अर्दयित्वानिलो वक्त्रमर्दितं जनयत्यतः॥
वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते।
शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम्॥
ग्रीवाचिबुकदन्तानां तस्मिन् पार्श्वे तु वेदना॥
(यस्याक्षयो रोमहर्षो वेपथुर्नेत्रमाविलं।
वायूरर्द्धं त्वचि स्थायस्तोदो मन्याहनुग्रहः॥)
तमर्दितमिति प्राहुर्व्याधिं व्याधिविशारदाः"॥
तस्यासाध्यलक्षणञ्चाह॥
"क्षीणस्यानिमिषाक्षस्य प्रसक्ताव्यक्तभाषिणः।
न सिध्यत्यर्दितं वाढं चिरवर्षं वेपनञ्च॥"॥
भावप्रकाशेऽप्येयं व्याख्या॥ व्याहरतः वदतः। कठिनानि पूगफलादीनि। विषमाच्छयनासनादिति पाठान्तरे। विषमाच्छयनासनात् ग्रीवादिवैपरीत्येन शयनादासनाच्च। अर्दयति पीड़यति। जनयेत्तत इति पाठान्तरे। ततस्तदनन्तरं अर्दितं जनयेत्। अर्दिते जाते किं स्यात्तदाह। वक्रीभवतीत्यादि। अपवर्त्तते वक्रीभवति। चलति कम्पते। वाक्सङ्गः वाङ्निरोधः। नेत्रादीनामित्यादिशब्देन भ्रूगण्डनासिकादीनां ग्रहणं। वैक्लवं वेदनास्फुरणवक्रत्वादि। ग्रीवेत्यादि यस्मिन् पार्श्वे अर्दितं तस्मिन् पार्श्वे ग्रीवादीनां वेदना॥ अनिमिषाक्षस्य निमेषासमर्थचक्षुषः। प्रसक्तं प्रकर्षेण लग्नं अव्यक्तञ्च भाषितुं क्षीणं यस्य। तस्य अर्दितं न सिध्यति चिरवर्षं अतीतवर्षत्रयं। अथवा त्रयाणां चक्षुर्नासामुखानां वर्षः स्रावो यत्र तत्। वेपनस्य कम्पनशीलस्य च। वाढमतिशयेन न सिध्यति इत्यन्वयः। वाढमित्यर्थे च स एवार्थः॥"॥
(चरकस्त्वाह।
"अतिवृद्धः शरीरार्द्धमेकं वायुः प्रपद्यते।
यदा तदोपशोष्याक्ष्णः काणं पादञ्च जानु च॥
तस्मिन् सङ्कोचयत्यर्द्धं मुखं जिह्मं करोति च।
वक्रीकरोति नासाभ्रुललाटाक्षिहनुन्तथा॥
ततो वक्रं व्रजत्यास्ये भोजनं वक्त्रनासिकं।
स्तब्धं नेत्रं कथयतः स्रवत्यक्ष्णश्च निष्प्रभं॥
दीना जिह्वा समुत्क्षिप्ता कला सज्जति चास्यवाक्।
दन्तास्खलन्ति बाध्येते श्रवणौ भिद्यते स्वरः॥
पादहस्ताक्षिजङ्घोरुशङ्खश्रवणगण्डरुक्।
अर्द्धे तस्मिन् मुखार्द्धे वा केवले स्यात्तदर्दितं"॥"॥
वाग्भटस्त्वाह।
"शिरसा भारहरणादतिहास्यप्रभाषणात्।
उत्तानशयनात्क्षवथुस्वरकार्मुककर्षणात्॥
विषमादुपधानाच्च कठिनानाञ्च चर्व्वणात्।
वायुर्विवृद्धस्त्वेतैश्च बलैरर्द्धमाश्रितः॥
वक्त्रीकरोति वक्त्रार्द्धमूर्द्धं हसितमीक्षितं।
ततोऽस्य कम्पते मूर्द्धा वाक्सङ्गस्तब्धनेक्षता॥
दन्तचालः स्वरभ्रंशः श्रुतिहानिः क्षरग्रहः।
गन्धाज्ञानं स्मृतेर्मोहस्त्रासः सुप्तस्य जायते॥
निष्ठीवः पार्श्वतोयायादेकस्याक्ष्णो निमीलनं।
जघोरुर्द्धं रुजा तीव्रा शरीरार्द्धेऽधरेपि वा॥
तमाहुरर्दितं केचिदेकायामथ चापरे"॥"॥
हारीतसंहितायामप्युक्तं।
"सन्तापदाहशोषाच्च मूर्च्छापित्तान्वितोमरुत्।
श्लैष्मं शोथोरुचिर्जाड्यं वातश्लेष्मसमन्वितं॥
यो द्वन्द्वजाश्रितो धीरास्तं साध्यं मारुतं विदुः।
केवलोऽपि समीरोऽपि सोऽपि साध्यतमः स्मृतः॥
वक्त्रं भवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते।
वैक्लव्यं नयनानाञ्च विसंज्ञो वेदनातुरः॥
ग्रीवायां गण्डयोर्दन्तपार्श्वे यस्यातिवेदना।
तमर्दितमिति प्राऊर्वातव्याधिविचक्षणाः॥
लालास्रावोऽथ शोषश्च हनुग्राहो विरस्यता।
दन्तशूलं भवेद्यस्य वातेनार्दितमेव च॥
पीतार्द्धं सज्वरं तृष्णा पित्तजे मोह एवच।
श्लेष्मसम्भोऽस्य भवति कफोद्भूते ऽथवार्दिते"॥"॥)
"वातात्पित्तात्कफाच्च स्यात् त्रिविधं तत्समासतः।
लालास्रावो व्यथा कम्पः स्फुरणं हनुवाग्ग्रहः॥
ओष्ठयोः श्वयथुः शूलस्यार्दिते वातजे भवेत्।
पीतमास्यं ज्वरस्तृष्णा पित्तजे मोहधूपने॥
गण्डे शिरसि मन्यायां शोथः स्तम्भः कफात्मके"॥"॥
(अथ तस्य चिकित्सामाह सुश्रुतः॥ अर्दितातुरं बलवन्तमुपक्रमवन्तञ्च वातव्याधिविधानेनोपचरेदैरण्येश्चैकैश्च मस्तिष्कशिरोवस्तिस्नेधूपोपनाहस्नेहनाड़ीस्वेदादिभिः। ततः सप्तमं महापञ्चमूलं काकोल्यादिं विदारिगन्धादि मौदकानूपमांसं तथैवौदकन्दांश्च संहृत्य द्विगुणोदके क्षीरद्रोणे निक्षाथ्य पादावशिष्टमवतार्य परिस्राव्य तैलप्रस्थेनोन्मिश्र पुनरग्नावधिश्रयेत् ततस्तैलं क्षीरानुगतमवतार्थ शीतीभूतमभिमन्त्रीयात्तच्च यः स्नेहः उत्तिष्ठेत्तमादाय मधुरौषधसहाक्षीरयुक्तं विपचेदेतत् क्षीरतैलमर्दितातुराणां पानाभ्यङ्गादिधूपयोज्यं॥ तैलहीनं वा क्षीरसर्पिरक्षितर्पणमिति॥"॥ चरकस्तु॥
"अर्दिते नावनं मूर्द्धि तैलं तर्पणमेव च॥
नाड़ीस्वेदोपनाहाश्च आनूपपिशितैर्हिताः"॥"॥
वाग्भटश्च॥
"अर्दिते नावनं मूर्द्धि तैलं श्रोत्राक्षितर्पणं।
सशोफे वमनं दाहरागयुक्ते शिराव्यधः"॥"॥
हारीतसंहितायां।
"अर्द्धं पलं रसोनस्य हिङ्गुसैन्धवजीरकैः।
सौवर्चलेन संयुक्तं तथैव कटुकत्रिकं॥
घृतेन संयुतं भक्षेन्मासमेकं दिने दिने।
निहन्ति वातरोगञ्च अर्दितस्य प्रतानकं"॥"॥
चक्रपाणिसंग्रहे॥
"रसोनं नवनीतेन प्राश्य हन्त्यर्दितं द्रुतं।
अर्दिते नवनीतेन खादेन्माषगुड़ौ नरः॥
क्षीरमांसरसैर्भुक्ता दशमूलीरसं पिबेत्।
स्नेहाभ्यङ्गशिरोवस्तिपाननस्यपरायणः।
अर्दितं स जयेत् सर्पिः पिबेदौत्तरभक्तिकं"॥"॥
भावप्रकाशेऽप्येतदतिरिक्तं यत्संगृहीतं तच्चैतत्॥)
"स्नेहपानानि नस्यञ्च भोज्यान्यनिलघ्नन्ति च।
उपनाह्याश्च शस्यन्ते स्वेदनं वस्तयोऽर्दिते"॥
वस्तिरत्रशिरोवस्तिरेव।
"दशमूलीकषायेण मातुलुङ्गरसेन वा।
बलया पञ्चमूल्या वा क्षीरं वातात्मके हितं॥
पिष्टं माषकृतं जग्ध्वा नवनीतेन सोऽर्दिती।
क्षीरं मांसरसैर्भुक्ता दशमूलीरसं पिबेत्॥
अर्दिते पित्तजे प्रीतान् स्नेहांश्चैव विनिर्दिशेत्।
घृतवस्तिप्रसेकञ्च क्षीरसेकं तथैव च॥
जिह्मीभूताननो मूकोदाहवान् योऽर्दिती भवेत्।
कुर्य्यात् प्रतिक्रियां तस्य वातपित्तविनाशिनीं॥
श्लेष्मभागे त्वयं नीते लंघनैः समुपाचरेत्।
अर्दिते श्लोथसंयुक्ते वमनञ्च प्रशस्यते॥
रसोनकल्कं तिलतैलमिश्रं
खादेन्नरो योऽर्दितरोगयुक्तः।
तस्यार्दितं नाशमुपैति शीघ्रं
वन्दं घनानामिव वायुवेगात्"॥ इति।
अर्दितः, त्रि, (अर्द्द + क्तः।) याचितः। इत्यमरः॥ हिंसितः। इति मेदिनी॥ गतः। पीड़ितः। इति शब्दरत्नावली॥
अर्द्धं, क्ली, (ऋध् + घञ्।) समानांशः। समभागः। इत्यमरः॥ आधा इति भाषा। समभागेऽर्द्धशब्दः पुमान् क्लीबञ्च। अर्द्धशब्दः पुंलिङ्गः खण्डपर्य्यायएव विभागीकृत्य वर्त्तितस्य तुल्यवर्त्तिते अर्द्ध क्लीबमेवेति केचित्। अर्द्धो रूपभेदात् भागे पुंसि। तथा वस्त्रार्द्धो नगरार्द्धः उपचारात्तु भागवति वाच्यलिङ्गः। यथा अर्द्धा शाटी अर्द्धः कम्बलः अर्द्धं वस्त्रं। इति माधवी॥ असमपरिभागवृत्तिस्त्रिलिङ्गोऽर्द्धइत्यनुन्नासः। समग्रविभागेऽर्द्धशब्दो नपुंसक एव नान्यलिङ्गः। इति भागवृत्तिः। इति भरतः॥
अर्द्धः, पुं, (ऋध् + घञ्।) एकदेशः। तत्पर्य्यायः। भित्तं २ शकलं ३ खण्डं ४। इत्यमरः॥ ("पक्षार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्व्वकायम्"॥ इति शाकुन्तले।
"सर्व्वनाशे समुत्पन्ने अर्द्धं त्यजति पण्डितः।
अर्द्धेन कुरुते कार्य्यं सर्व्वनाशो हि दुःसहः"॥ इति पञ्चतन्त्रे।)
अर्द्धगङ्गा, स्त्री, (अर्द्धं गङ्गायाः, एकदेशतत्पुरुषः।) कावेरी नदी। इति त्रिकाण्डशेषः॥
अर्द्धगुच्छः, पुं, (अर्द्धः चन्द्रसमः गुच्छः।) चतुर्व्विंशतिगच्छकहारः। इति हेमचन्द्रः॥ चव्विशनरि दाना इति भाषा।
अर्द्धचन्द्रः, पुं, (अर्द्धं चन्द्रस्य।) नखक्षतं। बाणविशेषः।
("चतुर्भिरर्द्धचन्द्रैश्च जघान चतुरो हयान्"। इति रामायणे।) गलहस्तः। ("ग्रहगोलाः सर्व्वेऽर्द्धचन्द्रं दत्वा निःसारिताः"। इति पञ्चतन्त्रे।) ललाटेपी यस्य प्रसिद्धिः। इति मेदिनी॥ चन्द्रकः।

चन्द्रखण्डं । इति हेमचन्द्रः ॥ मयूरपुच्छेर चाँद इति भाषा ।

अर्द्धचन्द्रा, स्त्री, (अर्द्धं चन्द्रस्य, अर्द्धचन्द्र + टाप् ।) क्षणचिरत्, इत्यमरः ॥ काल तेउड़ी इति भाषा ।

अर्द्धचन्द्रिका, स्त्री, (अर्द्धचन्द्र + स्वार्थे कन्, ह्रस्वे अत इत्त्वे टाप् ।) कर्णस्फोटालता । इति राजनिर्घण्टः ॥

अर्द्धचोलकः, पुं, क्षुद्रचोलकः । इति हारावली ॥ काँचली इति भाषा ।

अर्द्धजाह्नवी, स्त्री, (अर्द्धं जाह्नव्याः ।) कावेरी नदी । इति हेमचन्द्रः ॥

अर्द्धतिक्तः, पुं, (अर्द्धः असम्पूर्णस्तिक्तः ।) नेपालनिम्बः । इति राजनिर्घण्टः ॥ (नेपालनिम्बशब्देऽस्य गुणा वक्तव्याः ॥)

अर्द्धनारीशः, पुं, (अर्द्धाङ्गे या नारी पार्व्वतीरूपा तस्या ईशः ।) शिवः । इति शब्दरत्नावली ॥ तस्य ध्यानं यथा,—

"नीलप्रवालरुचिरं विलसन्निनेत्रं
पाशाङ्कुशोत्पलकपालकशूलहस्तं ।
अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुबद्धमुकुटं प्रणमामि रूपं" ॥

इति तन्त्रसारः ॥

अर्द्धनारीश्वरः, पुं, (अर्द्धाङ्गे या नारी तस्या ईश्वरः ।) उमामहेश्वरः । स च शिवः । यथा विष्णुधर्म्मोत्तरे ।

"अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।
अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिः" ॥

इति तिथ्यादितत्त्वं ॥ अपि च ।

"अजेशः सर्व्वसोमेशस्तथा लाङ्गुलिदारुकौ ।
अर्द्धनारीश्वरश्चोमाकान्तश्चाष्टाविहेरितौ" ॥

इति तन्त्रसारे शिवमन्त्रे श्रीकण्ठादिन्यासः ॥ * ॥ अस्य मन्त्रादिकं यथा,—

"अग्निसंवर्त्तकादित्यशनिलौ षष्ठविन्दुमत् ।
चिन्तामणिरिति ख्यातं बीजं सर्व्वसमृद्धिदं" ॥

अग्नीरेफः । संवर्त्तकः क्षकारः । आदित्यो मकारः । र रेफः । अनिलो यकारः । औ स्वरूपं । षष्ठस्वर ऊकारः ॥ प्रपञ्चसारे । "अनलकयमरेफप्रायसत्यान्तवामश्रुतिहिमरुचिखण्डैर्मण्डितो मन्त्रराजः" । इति वचनात् रेफ एव न तु वकारः । रूँ क्षूँ मूँ रूँ यूँ औँ ऊँ । इति मन्त्रः । अस्य पूजा प्रातःस्नात्यादिश्वेतपीठमन्त्रकं विन्यस्य ऋष्यादिन्यासं कुर्य्यात् । यथा शिरसि काश्यपाय ऋषये नमः । मुखेऽनुष्टुप्छन्दसे नमः । हृदि अर्द्धनारीश्वराय देवतायै नमः । ततः कराङ्गन्यासौ कुर्य्यात् । रं अङ्गुष्ठाभ्यां नमः । कं तर्जनीभ्यां स्वाहा । वं मध्यमाभ्यां वषट् । मं अनामिकाभ्यां हूँ । यं कनिष्ठाभ्यां वौषट् । यं करतलपृष्ठाभ्यां फट् । एवं हृदयादिषु । तथा च निबन्धे । "रेफादिवह्निनैः षड्भिः कुर्य्यादङ्गानि षट् क्रमात्" । ततो ध्यानं ।

'नीलप्रवालरुचिरं विलसन्निनेत्रं
पाशाङ्कुशोत्पलकपालकशूलहस्तं ।
अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुबद्धमुकुटं प्रणमामि रूपं" ॥

एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा श्वेतोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत । यथा । केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च रं इत्यादिना षड्रङ्गानि पूजयेत् । ततः पत्रेषु पूर्व्ववत् दमभादीन् पूजयेत् । पत्राग्रेषु पूर्व्वादितः ब्राह्मीं माहेश्वरीं कौमारीं वैष्णवीं वाराहीं इन्द्राणीं चामुण्डां महालक्ष्मीञ्च पूजयेत् । तद्बहिरिन्द्रादीन् वज्रादींश्च संपूज्य धूपादिविसर्जनान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं लक्षजपः । तथा च ।

"लक्षमेकं जपेन्मन्त्रमित्थं मन्त्री विचिन्तयन् ।
अयुतं मधुरासिक्तैर्जुह्वात्तिलतण्डुलैः" ॥

इति तन्त्रसारः ॥

अर्द्धपारावतः, पुं, (अर्द्धेन अङ्गेन पारावत इव ।) चित्रकण्ठकपोतः । तित्तिरिपक्षी । इति मेदिनी ॥

अर्द्धमाणवः, पुं, द्वादशयष्टिकहारः । इति हेमचन्द्रः ॥ बारोनरि हार इति भाषा ।

अर्द्धरात्रः, पुं, (अर्द्धं रात्रेः, अर्द्धं नपुंसकमित्येकदेशी समासः, अहःसर्व्वैकदेशसंख्यातपुण्याच्च रात्रेरिति समासान्तोऽच्प्रत्ययः, रात्र्यह्नाह्नां पुंसि इति नियमात् पुंस्त्वम् ।) रात्र्यर्द्धभागः । दुइप्रहर राचि इति भाषा । तत्पर्य्यायः । निशीथः २ । इत्यमरः ॥ निसम्पातः ३ अवसरालयः ४ । इति शब्दरत्नावली ॥ सुप्तजनः ५ । इति जटाधरः ॥ रात्र्यष्टमुहूर्त्तः । स तु रात्रिमध्यदण्डद्वयात्मकः । सम्पूर्णार्द्धरात्रोऽप्यहं । महानिशा । सा तु सार्द्धप्रहरानन्तरं सार्द्धतृतीयप्रहरपर्य्यन्तं । इति स्मृतिः ॥

("मध्यन्दिनेऽर्द्धरात्रे च श्राद्धं भुक्त्वा च सामिषम्" ।
"मध्यन्दिनेऽर्द्धरात्रे वा विश्रान्तो विगतक्लमः ।
चिन्तयेद्धर्म्मकामार्थान् सार्द्धं तैरेक एव वा" ॥
इति मनुः ।)

अर्द्धर्चः, पुं, क्लीं, (अर्द्धं ऋचः समासान्तः अच्प्रत्ययः ।) अर्द्धऋक् । ऋङ्नामकवैदिकमन्त्रार्द्धभागः । इत्यमरः ॥

अर्द्धलक्ष्मीहरिः, पुं, (अर्द्धं लक्ष्म्या आकारे, अर्द्धं च हरेः, तादृशो हरिः ।) विष्णुः । यथा । गौतमीये,—

"ऋषिः प्रजापतिश्छन्दो गायत्री देवता पुनः ।
अर्द्धलक्ष्मीहरिः प्रोक्तः श्रीबीजेन षडङ्गकं" ॥

अस्य मन्त्रादि यथा,—

"तारं नमः पदं ब्रूयान्नरौ दीर्घसमन्वितौ ।
पवनोऽयमन्त्रोऽयं प्रोक्तो वसुस्वरः परः" ॥

अस्य पूजाप्रयोगः । प्रातःस्नात्यादिस्नानान्तं कर्म्म कृत्वा पूजामण्डपमागत्य वैष्णवाचमनं कुर्य्यात् । तद्यथा गौतमीये,—

"केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत् करौ ।
द्वाभ्यामोष्ठौ विमृज्य द्वाभ्यां मृज्यान्मुखं ततः ॥
एकेन हस्तं प्रक्षाल्य पादावपि तथैकतः ।
संप्रोक्ष्यैकेन मूर्द्धानं ततः सङ्कर्षणादिभिः ॥
आस्यनासाक्षिकर्णांश्च नाभ्युरस्कं भुजौ क्रमात् ।
स्पृशेदेवं भवेदाचमनञ्च वैष्णवाव्वये ॥
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत्" ॥

केशवादयस्तु केशव-नारायण-माधव-गोविन्द-विष्णु-मधुसूदन-त्रिविक्रम-वामन-श्रीधर-हृषीकेश-पद्मनाभ-दामोदर-सङ्कर्षण-वासुदेव-प्रद्युम्नानिरुद्ध-पुरुषोत्तमाधोक्षज-नृसिंहाच्युत-जनार्द्दनोपेन्द्र-हरिविष्णवः ॥ वाक्यन्तु ओम् केशवाय नमः । इत्यादि । तथा च ।

"सचतुर्थिनमोऽन्तैश्च नामभिर्व्विन्यसेत् सुधीः"

ततः सामान्यार्घ्यादिमाटकान्यासान्तं कर्म्म विधाय केशवकीर्त्यादिन्यासं कुर्य्यात् । अस्य ऋष्यादिन्यासः । शिरसि प्रजापतये ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदि अर्द्धलक्ष्मीहरये देवतायै नमः । ततः कराङ्गन्यासौ । श्रीं अङ्गुष्ठाभ्यां नमः । इत्यादि । श्रीं हृदयाय नमः । इत्यादि । तथा च गौतमीये ।

"ऋषिः प्रजापतिश्छन्दो गायत्री देवता पुनः ।
अर्द्धलक्ष्मीहरिः प्रोक्तः श्रीबीजेन षडङ्गकं" ॥

ततो ध्यानं ।

"उद्यत्प्रद्योतनप्रतरुचिं तप्तहेमावदातं
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टं ।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं,
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिं" ॥

इत्यादि । इति तन्त्रसारः ॥

अर्द्धवीक्षणं, क्लीं, (अर्द्धमसम्पूर्णं वीक्षणम् ।) अपाङ्गदर्शनं । कटाक्षः । इति हेमचन्द्रः ॥

अर्द्धाशनं, क्लीं, (अर्द्धमसम्पूर्णमशनं भोजनं, अर्द्ध + अश् + ल्युट् ।) अर्द्धाशनं । अर्द्धभोजनं । इति शब्दरत्नावली ॥

अर्द्धसफरः, पुं, (अर्द्धः सफरः ।) क्षुद्रमत्स्यविशेषः । दाँड़िका माछ इति भाषा । तत्पर्य्यायः । दण्डपालः २ । इति हारावली ॥

अर्द्धहारः, पुं, (ऋध-दृढौ + अच्, अर्द्धः सम्पन्नः हारः ।) चतुःषष्टियष्टिकहारः । इत्यमरः ॥ चौषट्टिनरि हार इति भाषा ।

अर्द्धाशनं, क्लीं, (अर्द्धमसम्पूर्णमशनं भोजनं, अर्द्ध + अश् + ल्युट् ।) अर्द्धभोजनं । इति शब्दरत्नावली ॥

अर्द्धासनं, क्लीं, (अर्द्धमासनस्य ।) खेदादानं । अकृत्सनं । इति धरणिः ॥ (उपवेशनार्थमासनार्द्धदानरूपः खेदव्यञ्जकः सम्मानभेदः । यथा,—

"अर्द्धासनं गोत्रभिदोऽधितस्थौ" । इति रघुवंशे । "मम हि दिवौकसां समक्षम् अर्द्धासनोपवेशितस्य" । इति शाकुन्तले ।)

अर्द्धेन्दुः, पुं, (अर्द्धमिन्दोः ।) चन्द्रार्द्धभागः । नखहस्तः । नखचिह्नं । अतिप्रौढ़स्त्रीयोन्यङ्गुलियोजनं । इति मेदिनी ॥ अर्द्धचन्द्रवाणः । इति हेमचन्द्रः ॥

अर्द्धोदयः, पुं, (अर्द्धस्य समग्रस्य पुण्यस्य उदयो यत्र ।) योगविशेषः । स च रविवारव्यतीपातअवष्वान्नत्रैर्युक्ता चेत् पौषभाद्रयोरमावास्या स्यात्तदा भवति । यथा । पाद्मात्तनिर्णयामृते ।

"अमार्कपातश्रवणैर्युक्ता चेन्माघपौषयोः।
अर्द्धोदयः स विज्ञेयः कोटिसूर्य्यग्रहैः समः॥
अत्र सूर्य्यपर्व्वशतादधिक इति कृत्यचिन्तामणौ पाठः। तथा।
"दिवैव योगः श्रेष्ठोऽयं न च रात्रौ कदाचन।"
स्कन्दपुराणे।
"अर्द्धोदये तु संप्राप्ते सर्व्वं गङ्गासमं जलं।
शुद्धात्मानो द्विजाः सर्व्वे भवेयुर्ब्रह्मसन्निभाः॥
यत्किञ्चित् क्रियते दानं तद्दानं सेतुसन्निभं" ॥
शिवविष्णुस्थानप्रशस्तकालोऽपि। बृहन्नारदीयं।
"अर्द्धोदये च पूष्यार्के हस्तार्के रोहिणीबुधे"।
इति तिथ्यादितत्त्वं॥

अर्द्धोरुकं, क्ली, (अर्द्धमूरोः अर्द्धोरु, तत्र काश्यते, काश + ड।) उत्तमस्त्रीणां अर्द्धोरुपर्य्यन्तं चेलनाकारपरिधेयवस्त्रं। तत्पर्य्यायः। चण्डातकं २। इत्यमरः॥

अर्पणं, क्ली, (ऋ + णिच् + ल्युट्।) प्रापणं। समर्पणं। यथा,—
"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणं"॥
इति श्रीभगवद्गीतायां ९ अध्यायः। (न्यासनं। न्यासः।
"कैलासगौरं वृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठम्"।
इति रघुवंशे। स्वत्यागः। परित्यागः।
"अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये"।
इति साहित्यदर्पणे।)

अर्षिसः, पुं, (ऋ + णिच् + इसन्।) हृदयं। इत्युणादिकोषः॥ (अयमसंः।)

अर्ब्ब, हिंसे। (भादि-परं-सकं-सेट्।) गतौ। इति कविकल्पद्रुमः॥ अर्ब्बति। इति दुर्गादासः॥

अर्ब्बुदः, पुं, क्ली, (अर्ब्ब + विच्, तस्मै उदेति, उद् + इण + ड।) दशकोटिसंख्या। रोगविशेषः। मांसकीलः। मांसपुरुषः। आव् इति भाषा। इति लिङ्गादिसंग्रहे अमरो मेदिनी च॥ तस्य निदानलक्षणे।
"गात्रप्रदेशे क्वचिदेव दोषाः
संमूर्च्छिता मांसमसृक् प्रदूष्य।
वृत्तं स्थिरं मन्दरुजं महान्त-
मनल्पमूलं चिरवृद्धिपाकं॥
कुर्व्वन्ति मांसोच्छ्रयमत्यगाधं
तमर्ब्बुदं शास्त्रविदो वदन्ति"।
महान्तं यश्चापेक्षया चिरेण वृद्धिरपाकश्च यस्य तत् चिरवृद्धिपाकं। अपाकमिति यत्नेन सकाशादस्य भेदशापकं। अत्यगाधं दूरानुप्रविष्टं॥*॥
निदानपूर्व्वकाणि विशिष्टानि लक्षणान्याह।
"वातेन पित्तेन कफेन वापि
रक्तेन मांसेन च मेदसा च।
तज्जायते तस्य च लक्षणानि
यत्नेन समानानि सदा भवन्ति"॥
यत्नेन समानानि वातिकपैत्तिकश्लैष्मिकमेदोजानां यद्यपीनां लक्षणैर्व्वातिकपैत्तिकश्लैष्मिकमेदोजानार्ब्बुदानां लक्षणानि तुल्यानि भवन्ति॥*॥ रक्तार्ब्बुदमाह।
"दोषप्रदुष्टं रुधिरं शिराश्च
सङ्गोथ संपीड्य ततस्त्वपाकं।
सस्रावमुन्नह्यति मांसपिण्डं
मांसाङ्कुरैराहतमाशु वृद्धिं॥
सवत्यजस्रं रुधिरं प्रदुष्ट-
मसाध्यपेतद्रुधिरात्मकन्तु।
रक्तक्षयोपद्रवपीड़ितत्वात्
पाण्डुर्भवेदर्ब्बुदपीड़ितस्तु"॥
दोषोऽत्र पित्तं रुधिरं शिराश्च सङ्गोथ संपीड्य संहतीकृत्य मांसास्रजोः सर्व्वेष्वर्ब्बुदेषु दूष्यत्वं रक्तजे तु विशेषतो रक्तदुष्टिः। एवं मांसार्ब्बुदे विशेषतो मांसदुष्टिर्बोद्धव्या। ततो मांसपिण्डमुन्नह्यति उद्गतं करोति। अपाकं ईषत्पाकं यथा स्यादेवमिति क्रियाविशेषणं ईषत्पाकञ्च एकदेशपाकेन। रक्तक्षयोपद्रवपीड़ितत्वात्। रक्तक्षयोपद्रवाः सुश्रुतेनोक्ताः। तैः पीड़ितत्वात्। अर्ब्बुदपीड़ितः रक्तार्ब्बुदपीड़ितः॥* मांसार्ब्बुदस्य संप्राप्तिमाह
"मुष्टिप्रहारादिभिरर्दितेऽङ्गे
मांसं प्रदुष्टं समुपैति शोथं।
अवेदनं स्निग्धमनन्यवर्ण-
मपाकमश्मोपममप्रचाल्यं"॥
मांसं प्रदुष्टं वातेन। अवेदनं वेदनारहितं ईषद्वेदनं वा। अपाकं पाकरहितं ईषत्पाकं वा। अश्मोपमं पाषाणवत् कठिनं। अप्रचाल्यं स्थिरं। यद्यपि रक्तमांसार्ब्बुदयो रक्तमांसयोर्हेतुत्वेनोक्तिः तथापि रक्तजे पित्तं मांसजे वायुरारम्भकः॥*॥ निदानमाह।
"प्रदुष्टमांसस्य नरस्य गाढ़-
मेतद्भवेन्मांसपरायणस्य"।
मांसाशनाभ्यासेन यः प्रदुष्टमांसस्तस्यैव भवति इत्यर्थः॥*॥ असाध्यमाह।
"मांसार्बुदं खेतदसाध्यमाहुः
साध्येष्वपीमानि विवर्जयेच्च।
संप्रस्तुतं मर्म्मसु यच्च जातं
स्रोतःसु वा यच्च भवेदचाल्यं"॥
साध्येष्वपि वातजादिष्वपि। इमानि वक्ष्यमाणानि संप्रस्तुतादीनि॥*॥ अपरासाध्यमाह।
"यज्जायतेऽन्यत् खलु पूर्व्वजाते
ज्ञेयं तदध्यर्ब्बुदमर्ब्बुदज्ञैः।
यद्वृद्धजातं युगपत् क्रमाद्वा
दिरर्ब्बुदं तच्च भवेदसाध्यं"॥*॥
अर्ब्बुदानां पाकाभावे हेतुमाह।
"न पाकमायाति कफाधिकत्वा-
न्मेदोबहुत्वाच्च विशेषतस्तु।
दोषस्थिरत्वात् ग्रथनाच्च तेषां
सर्व्वार्ब्बुदान्येव निसर्गतस्तु"।
ग्रथनात् ग्रन्थिरूपत्वात्। गन्धपच्यां कृष्णमेदसोराधिक्येऽपि पाको दृश्यते तथाच कथं न पाक इत्याह निसर्गात् स्वभावात्॥*॥
अथार्ब्बुदस्य चिकित्सा।

"यत्स्यार्ब्बुदानां न यतो विशेषः
प्रदोषहेत्वाकृतिदोषदुष्टेः।
अतश्चिकित्सेद्विषमार्ब्बुदानि
विधानविद्ग्रन्थिचिकित्सितेन॥
हरिद्रा-लोध्र-पत्तङ्ग-रक्तधूम-मनःशिलाः।
मधुप्रगाढ़ो लेपोऽयं मेदोऽर्ब्बुदहरः परः॥१॥
मूलकस्य क्षतः क्षारो हरिद्रायास्तथैव च।
शङ्खचूर्णेन संयुक्तो लेपः सिद्धोऽर्ब्बुदापहः॥२॥
वटदुग्धकुशरोमकलिप्तं वद्धं वटस्य पत्रेण। अध्यक्षिसप्तरात्रात् महदप्युपयान्तिमर्ब्बुदं गच्छेत्॥३॥
शिग्रुमूलकयोर्व्वीजं रक्तोन्नं सुरसा यवं।
तक्रेणाश्वरिपुं पिष्ट्वा लिम्पेदर्ब्बुदशान्तये॥४॥
रक्तोन्नं सर्षपं। सुरसा तुलसी। यवं रन्ध्रयवं। अश्वरिपुं करवीरं। इत्यर्ब्बुदाधिकारः। इति भावप्रकाशः॥

अर्ब्बुद, पुं, (अर्ब्ब + उदच्।) पर्व्वतविशेषः। इति मेदिनी॥

अर्भः, पुं, (ऋ + भ।) बालकः। इति हेमचन्द्रः॥ (प्रभाहीनः। मलिनः। शिश्यः। क्षाचः। शिशिरः। शाकशस्यादिकं।)

अर्भकः, पुं, (अर्भ एव, स्वार्थे कन्।) शिशुः। इत्यमरः॥
("अभूच्च नग्नः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः"।
इति रघुवंशे।) मूर्खः। क्षुद्रः। इति मेदिनी॥ खल्वः। सदृशः। इत्युणादिकोषः॥

अर्म्म, क्ली, पुं, (ऋ + मन्।) चक्षुरोगविशेषः। इति लिङ्गादिसंग्रहे अमरः॥ तच्च षड्विधं। प्रस्तार्थर्म्म १ शुक्लार्म्म २ रक्तार्म्म ३ मांसार्म्म ४ स्नायवर्म्म ५। एषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि। वैद्यके नान्तक्लीवलिङ्गोऽयं शब्दः॥

अर्म्मणः, पुं, (ऋ + बाहुलकात् मनन्।) द्रोणपरिमाणं। इति वैद्यकपरिभाषा॥

अर्य्यः, पुं, (ऋ + यत्।) स्वामी। वैश्यः। इत्यमरः॥ श्रेष्ठे च। इति तट्टीकायां भरतः॥ (चि, उत्कृष्टः। न्याय्यः। प्रभुः।

अर्य्यमा, [न्] पुं, (अर्य्यं श्रेष्ठं मिमीते, मा + कनिन्।) सूर्य्यः।
("प्रोषितार्य्यमणं मेरोरन्धकारस्तटीमिव"।
इति माघः।
"सूर्य्योऽर्य्यमा भगस्त्वष्टा पूषार्कः सविता रविः।
गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः"॥
इति महाभारते। कश्यपात् दक्षकन्यया दित्या जातो द्वादशादित्यमध्ये परिगणितः ख्यात आदित्यः, यदुक्तं हरिवंशे,—
"मारीचात् कश्यपाज्जातास्ते दित्या दक्षकन्यया।
तत्र शक्रश्च विष्णुश्च जज्ञाते पुनरेव हि॥
अर्य्यमा चैव धाता च त्वष्टा पूषा च भारत!॥
विवस्वान् सविता चैव मित्रो वरुण एव च।
अंशोभगश्चातितेजा आदित्या द्वादश स्मृताः"॥)
अर्कवृक्षः। इत्यमरः॥ भिन्नदेवविशेषः। इति मेदिनी॥

अर्य्या, स्त्री, (ऋ + यत् + टाप्।) वैश्यस्त्रीजातिः। इत्यमरः॥

अर्य्याणी, स्त्री, (अर्य्य + आनुक् + ङीप्।) वैश्यस्त्रीजातिः। इत्यमरः॥

अर्य्यी, स्त्री, (अर्य्य + ङीप्।) वैश्यपत्नी। इत्यमरः॥ वैश्यस्त्रीजातिः। इति दुर्गादासः॥

अर्व्व वधे। (इति कविकल्पद्रुमः)॥ (भादिः-परः-सकः-सेट्।) अर्व्वति। इति दुर्गादासः॥ अन्तःस्थवकारान्तोऽयं॥

अर्व्वती, स्त्री, (अर्व्व + षाड्वलकात् वनिप् + ङीप्।) घोटकी। इति हलायुधः॥ कुट्टनी। इति त्रिकाण्डशेषः॥

अर्व्वा, [न्] पुं, (ऋ + वनिप्।) घोटकः। इत्यमरः॥ इन्द्रः। गोकर्णपरिमाणं। इति विश्वः॥ कुत्सिते च। इत्यमरः॥

अर्व्वाक्, व्य, (अवरे काले देशे वा अञ्चति, अनुच + क्विन्, एषोदरादित्वात् अर्व्वादेशः।) पूर्व्वकालतः पश्चात्। तत्पर्य्यायः। अवरः २। इत्यमरः॥ निकटं। इति भरतः। अर्व्वाच् इति केचित्॥

अर्व्वाचीनः, त्रि, (अर्व्वाग्भवः, खः।) पश्चाज्जातः। विपर्य्यस्तं। इति धरणिः॥ (इदानीन्तनः। अधोभागस्थितः। अवरदेशगतः।
("यदूर्द्ध्वं एथिव्या अर्व्वाचीनमन्तरीक्षात्"। इति श्रुतपथब्राह्मणे।)

अर्श, क्ली, (ऋच्छ् + अच्।) अर्शोरोगः। इति शब्दरत्नावली॥ (वलिकाकारः गुह्यस्थरोगभेदः।)

अर्शः, [स्] क्ली, (ऋ + असुन्, नुट्।) खनामख्यातपायुरोगः। तत्पर्य्यायः। दुर्नामकं २। इत्यमरः॥ दुर्नाम ३ गुदकीलः ४ गुदाङ्कुरः ५। इति राजनिर्घण्टः॥ अनामकं ६। इति शब्दरत्नावली॥ यथा। अथार्शोऽधिकारः। तत्रार्शसः सन्निकृष्टनिदानान्याह।
"एथग्दोषैः समस्तैश्च शोणितात् सहजानि च। अर्शांसि षट्प्रकाराणि विद्याद्गुदवलिचये"॥ केचिद्बुधिरस्यापि दोषत्वं मन्यन्ते। तन्मतमाश्रित्याह। शोणितादिति। सहजानि शरीरेण सह जातानि। सङ्ख्यामाह। षट्प्रकाराणीति। गुदवलिचये सार्द्धचतुरङ्गुलं गुदस्य मानं तस्यावयवभूतास्तिस्रो वलयः शृङ्गावर्त्तनिभा उपर्य्युपरि सन्ति। तासां नाम प्रवाहिणी विसर्जनी संवरणी चेति। तत्र गुदौष्ठोऽर्द्धाङ्गुलमानस्तदूर्द्ध्वमङ्गुलमाना प्रथमा वलिः। सार्द्धैकाङ्गुलमाना द्वितीया। त्रुटीया च तावती। उक्तञ्च।
"अर्द्धाङ्गुलप्रमाणेन गुदौष्ठं परिचक्षते। गुदौष्ठादङ्गुलं चैकं प्रथमान्तु वलिं विदुः॥ सार्द्धैकाङ्गुलमानेन एथगन्ये प्रकीर्त्तिताः"॥ *॥
अथ वातार्शसो विप्रकृष्टं निदानमाह।
"कषायकटुतिक्तानि रूक्षशीतलघूनि च। प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसेवनं॥ लङ्घनं देशकालौ च शीतौ व्यायामकर्म्म च। शोको वातातपस्पर्शौ हेतुर्वातार्शसां मतः"॥ प्रमितमपरिमितं। तीक्ष्णमिति मद्यविशेषणं। पैष्ट्यादिमद्दुमद्यस्य वातसमकत्वात्। आतपस्तूष्णवीर्य्योऽप्युद्भूतरौक्ष्यादातप्रकोपे हेतुः वातार्शसां। नन्वर्शांसि सर्व्वाणि त्रिदोषजानि। यतः आह।
"पञ्चात्मा मारुतः पित्तं कफो गुदवलिक्षये। सर्व एव प्रकुप्यन्ति गुदजानां समुद्भवः"॥ इति। तथा सति कथं वातार्शसामिति उच्यते। तत्तदाधिक्याद्यपदेशभेद इति न दोषः। अतएव अग्रे वक्ष्यते। पित्तोल्वणानामिति तथाच चरकः।
"अर्शांसि नाम जायन्ते नासन्निपतितैस्त्रिभिः। दोषैर्दोषविशेषात्तु विशेषः कथ्यतेऽर्शसां"॥ इति॥ *॥ अथ पित्तार्शसो विप्रकृष्टनिदानमाह।
"कट्वम्ललवणोष्णानि व्यायामाभ्यातपप्रभाः। देशकालावग्निशिरौ क्रोधोमद्यमसूयनं विदाहि तोक्ष्णमुष्णं यत् तत् सर्व्वं पानभोजनं। पित्तेल्वणानां विज्ञेयः प्रकोपे हेतुरर्शसां"॥ उष्णद्रव्यस्य स्पर्शनादि वोद्वह्यं उष्णपानभोजनस्याग्रे वक्ष्यमाणत्वात्। अभ्रातपप्रभा अभ्र्यातपयोः प्रभा तेजः। अथवा अभ्र्यातपेतरतेजस्विद्रव्यस्य दीप्तिः प्रभा। अग्निशिरो देशो मरुः। असूयनं परसम्पत्तिद्वेषः। पानभोजनं पीयत इति पानं। भुज्यते इति भोजनं प्रकोपे उत्पत्तौ॥ *॥
अथ कफार्शसो विप्रकृष्टं निदानमाह।
"मधुरस्निग्धशीतानि लवणाम्लगुरूणि च। व्यायामदिवास्वप्नप्रण्यासनसुखे रतिः॥ प्राग्वातसेवाप्रीतौ च देशकालावचिन्तनं। श्लैष्मिकाणां समुद्दिष्टमेतत् कारणमर्शसां"॥ अचिन्तनं निश्चिन्तता॥ *॥ अथ त्रिदोषार्शसो विप्रकृष्टं निदानमाह।
"सर्व्वो हेतुस्त्रिदोषाणां सहजैर्लक्षणं समं"। जनकत्वेन त्रयो दोषा येषां तानि त्रिदोषाणि अर्शांसि तेषां सर्व्वो हेतुः। एथग्वातपित्तकफार्शोहेतुः। त्रिदोषार्शसां लक्षणञ्च सहजैः सहजार्शोभिः समं सदृशं। ननु त्रिदोषाणां इति विशेषणं व्यर्थं। यतः सर्व्व एव व्याधयस्त्रिदोषजाः। उक्तञ्च।
"द्वयमेकरसं नास्ति न रोगोऽप्येकदोषजः। एकस्तु कुपितो दोष इतरावपि कोपयेत्"॥ इति। युक्तिमप्याह। खकारखादङ्गो वायुः श्लैत्याच्छीतं स्नेहाणां लाघवात्तेजोरूपं पित्तं वर्द्धयते। तथा पित्तं कटुकत्वात् वातं द्रवत्वात् कफं वर्द्धयते। श्लेष्मा च श्लैत्यादायुं द्रवत्वात पित्तं वर्द्धयते इति। उच्यते। यत्र खखकारणात्त्रयो दोषाः कुप्यन्ति तत्र त्रिदोषजव्यपदेश इति न दोषः॥ *॥ अथार्शसां पूर्व्वरूपमाह।
"विरम्भोऽन्नस्य दौर्ब्बल्यं कुक्षेराटोप एव च। कार्श्यमुद्गारवाङ्ल्यं सक्थिसादोऽग्निविट्कता॥ ग्रहणीदोषपायश्च प्रसङ्गश्चोदरस्य च। पूर्व्वरूपाणि निर्दिष्टान्यर्शसामभिवृद्धये"॥ दौर्ब्बल्यमाबल्यं। आटोपः गुड़्गुड़ाशब्दः। अभिवृद्धये उत्पत्तये॥ *॥ अथार्शसां संप्राप्तिपूर्व्वकं सामान्यं लक्षणमाह।
"दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन्। मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि तान् जगुः"॥ त्वङ्मांसपदेन त्वङ्मांसाश्रितं रक्तमपि गृह्यते। चिकित्सायां रक्तस्रावणोपदेशात्। अपानं गुदं। आदिशब्दान्नासानेत्रनाभिमेढ्रादिष्वपि कुर्वन्ति॥ *॥
अथ वातार्शोलक्षणमाह।
"गुदाङ्कुरा बर्हनिभाः शुष्काश्चिमिचिमान्विताः। श्यावारुणाः स्तब्धा विशदाः परुषाः खराः॥ मिथोविसदृशा वक्रास्तीक्ष्णा विस्फुटिताननाः। विम्बीकर्क्कन्धुखर्জ্জूरकार्पासीफलसन्निभाः॥ केचित्कदम्बपुष्पाभाः केचित् सिद्धार्थकोपमाः। शिरःपार्श्वांसकक्षूरुवङ्क्षणाभ्यधिकव्यथाः॥ स्रवथूद्गारविष्टम्भहृद्ग्रहारोचकप्रदाः। कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः॥ तैरार्त्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकं। रूक्फेनपिच्छानुगतं विड्बद्धमुपवेश्यते॥ क्षणात्खड्गनखविशूचनेनेवक्षञ्च जायते। गुल्मप्लीहोदराष्ठीलासम्भवस्तत एव च"॥ बर्हनिभाः वातोल्वणाः। गुदाङ्कुराः अर्शांसि। चिमिचिमान्विताः चिमिचिमा यथाविशेषः चरचरावे इति लोके तदन्विताः। श्यावारुणाः श्यावा धूम्रवर्णाः। अरुणा ईषद्रक्ताः। स्तब्धाः कठिनाः। विशदाः अपिच्छिलाः। परुषाः गोजिह्वावत् स्पर्शे कर्कशाः। खराः कर्क्कोटकफलवत् सूक्ष्मानेककण्टकाचिताः। विम्बादिफलसन्निभाः आकृत्याः। अत्र विकल्पबोधकं वक्ष्यमाणं केचित् केचिदिति पदं सम्बन्धनीयं।
"कदम्बपुष्पाभाः स्थूला अनेकसूक्ष्माग्रिखराः। सिद्धार्थकोपमाः पीतसूक्ष्मपिड़काश्रिताः"॥ तैरार्त्त इति अर्शोभिः पीड़ितः। तैरार्त्तो विड्वुपवेश्यत इत्यार्त्तस्य प्रयोज्यकर्त्तुः कर्म्मतार्थत्वात्। ग्रथितं मलगुटिकाग्रथितविड्वर्त्तिरूपं। पिच्छा पिच्छिलो द्रवभागः। बद्धं संहतं। विष्शब्दो नपुंसकोऽप्यस्ति। उपवेश्यते त्यज्यते। अतएव वातार्शस एव गुल्मादीनां सम्भवः। अष्ठीला नाभेरधोभागे पाषाणपिण्डिकावदातव्याधिविशेषः॥ *॥ अथ पित्तार्शोलक्षणमाह॥
"पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः। तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः॥ शुष्कजिह्वायकृत्खण्डजलौकोवक्त्रसन्निभाः। दाहपाकज्वरस्वेदतृष्णामूर्च्छारतिप्रदाः॥ सोष्माणो द्रवनीलाभ्यापीतरक्तामवर्च्चसः। यवमध्या हरित्पीतहारिद्रत्वङ्नखादयः"॥ पित्तोत्तराः पित्तोल्वणाः। तनु अघनं। श्लथाः लम्बिनः। सन्निभाः आकृत्या। पाको गुदस्य। सोष्माणः उष्णस्पर्शाः। हरिच्छाकवर्णं। पीतं हरितालवर्णं। हारिद्रं हरिद्रावर्णं। आदिशब्दान्मलमूत्रमुखानां ग्रहणं॥ *॥ अथ केचिद्बुधिरस्यापि दोषत्वं मन्यन्ते तन्मतमाश्रित्य रक्तार्शोलक्षणमाह।

"रक्तोल्वणा गुदे कीलाः पित्तास्रतिसमन्विताः ।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ॥
तेऽत्यर्थं दुष्टमुष्णञ्च गाढ़विट्कप्रपीड़िताः ।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ॥
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः ।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः ॥
विट् श्यावं कठिनं रूक्षमधोवायुर्न वर्त्तते ।
तनु चारुणवर्णञ्च फेनिलञ्चाङ्गसर्शसां ॥
कण्डूरुगुदशूलञ्च दौर्ब्बल्यं यदि वाधिकं ।
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणं ॥
शिथिलं श्वेतपीतञ्च विट् स्निग्धं गुरु शीतलं ।
यद्यर्शसां घनञ्चास्रक् तन्तुमत् पाण्डु पिच्छिलं ॥
गुदं सर्पिच्छं स्तिमितं गुरु स्निग्धञ्च कारणं ।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः" ॥
गुदे कीला अर्शांसि । पित्तास्रतिसमन्विताः पित्तार्शोलक्षणयुक्ताः । आकारेण च वटप्ररोहादिसदृशाः । दुःखै रोगैः । त्वक्पारुष्याम्बुशीतप्रार्थनादिभिः । कलुषेन्द्रियः आकुलसर्वेन्द्रियः ॥ ० ॥ रक्तजस्यापि वातोल्वणस्य लक्षणमाह ॥ तत्र रक्तार्शसि । अनुबन्धः उल्बणत्वं । रूक्षणं रूक्षयतीति रूक्षणं रूक्षं द्रव्यं । पित्तोल्वणस्य तु लक्षणं ।

"रक्तोल्वणा गुदे कीलाः पित्तास्रतिसमन्विताः"। इत्यादिनैवोक्तं । रक्तपित्तयोः समानलिङ्गत्वात् ॥ ॥*॥ कफोल्वणस्य लक्षणमाह । सर्पिच्छं पिच्छिलार्द्रं । स्तिमितमार्द्रचर्म्मावगुण्ठितमिव ॥*॥ अथ श्लेष्मार्शोलक्षणमाह ।

"श्लेष्मोल्वणा महामूला घना मन्दरुजः सिताः ।
उत्पन्नोपचिताः स्निग्धाः स्तब्धस्तब्धगुरुस्थिराः ॥
पिच्छिलास्तिमिताः श्लक्ष्णाः कण्डूढ्याः स्पर्शनप्रियाः
करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः ॥
वङ्क्षणानाहिनः पायुवस्तिनाभिविकर्षिणः ।
सकासश्वासहृल्लासप्रसेकारुचिपीनसाः ॥
मेहहृच्छिरोजाड्यशिरश्चक्षुरकारिणः ।
क्लैब्याग्निमार्द्दवच्छर्द्दिरामप्रायविकारदाः ॥
वसाभसकफप्राज्यपुरीषाः सप्रवाहिकाः ।
न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः" ॥
उत्पन्नाः उन्नताः । उपचिताः स्थूलाः । स्निग्धाः सस्नेहाः । स्थिरा निश्चलाः । पिच्छिलाः कफाराध्यत्वात् । स्तिमिताः आर्द्रवस्त्रगुण्ठिता इव । श्लक्ष्णा मणिवन्मसृणाः । करीरो वंशाङ्कुरः । पनसास्थिगोस्तनाः तदाकृतयः । वङ्क्षणानाहिनः वङ्क्षणयोरानाहकारिणः । पायवादिव्याकर्षणवत् पीड़ाकारिणः । कृच्छ्रं मूत्रकृच्छ्रं । शिरोजाड्यं शिरसो भाराक्रान्तत्वमिव । क्लैब्यं स्त्रीष्वनिच्छा । अत्र छर्द्दिशब्दः सान्त आर्षत्वात् । आमप्रायविकारदाः आमबहुला व्याधयोऽतीसारग्रहण्यादयः तान् ददति ॥ ० ॥ अथ द्वन्द्वजार्शोलक्षणमाह ।

"हेतुलक्षणसंसर्गाद्विद्यात् द्वन्द्वोल्वणानि च" ॥*॥ अत्र त्रिदोषार्शसः सहजार्शसश्च लक्षणमाह ।
"सर्व्वैः सर्व्वात्मकान्याहुर्लक्षणैः सहजानि च"।

सर्व्वैर्लक्षणैर्वातपित्तश्लेष्मार्शोलक्षणैः प्रागुक्तैः । सर्व्वात्मकानि सान्निपातिकान्यर्शांस्याहुः । तथा तरेव लक्षणैः सहजानि चार्शांस्याहुः ॥*॥ तन्त्रान्तरे सहजार्शोलक्षणं पृथगाह ।
"अर्शांसि सहजातानि दारुणानि भवन्ति हि ।
दुर्दर्शनानि पापानि परधाराणवन्ति च ॥
अन्तर्म्मुखानि तैरार्त्तः क्षीणः क्षीणस्वरो भवेत् ।
क्षीणानलः क्षीणरेताः शिरासन्ततविग्रहः ॥
अल्पप्रजः क्रोधशीलः सन्ततान्त्रस्वनान्वितः ।
शिरोदृक्कर्णनासासु रोगी हृच्छ्वेषकेवान्" ॥*॥
अथ सुखसाध्यार्शोलक्षणमाह ।
"बाह्यायान्तु बलौ जातान्येकदोषोल्बणानि च ।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च" ॥
बाह्यायां बलौ संवरण्यां । न चिरोत्पतितानि अनतिक्रान्तसंवत्सराणि । एतानि लक्षणानि मिलितानि सुखसाध्यत्वबोधकानि ॥*॥ अथ कृच्छ्रसाध्यार्शोलक्षणमाह ।
"द्वन्द्वजानि द्वितीयायां बलौ यान्याश्रितानि च ।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च" ॥
द्वितीयायां बलौ विसर्जन्यां । परिसंवत्सराणि परिगतः सवत्सरो येषां तानि । अतिक्रान्तसंवत्सराणि इति यावत् । एतानि प्रत्येकं कृच्छ्रसाध्यलक्षणानि ॥*॥ अथासाध्यार्शोलक्षणमाह ।
"सहजानि त्रिदोषाणि यानि चाभ्यन्तरां वलिं ।
जायन्तेऽर्शांसि संग्रह्य तान्यसाध्यानि निर्दिशेत्" ॥
अभ्यन्तरां वलिं प्रवाहिणीं । एतान्यपि प्रत्येकमसाध्यलक्षणानि ।
"श्लेष्मलादायुषस्त्रीणि चतुष्पादसमन्वये ।
याप्यन्ते दीप्तकायाग्नेः प्रत्याख्येयान्यतोऽन्यथा" ॥
यद्यायुषः श्लेषो वर्त्तते चिकित्सायाश्चत्वारः पादास्ते यथा । वद्यवचनकारी धनवानुदारो जितेन्द्रियो रोगी । १ । ग्राह्ये कर्म्मणि च कुशलो वैद्यः । २ । अनलस आप्तः प्रियः परिचारकः । ३ । नवं रसवीर्य्यादियुक्तमौषधं । ४ । एषां समन्वये संयोगे सति दीप्तकायाग्नेः पुरुषस्य । तानि अर्शांसि । याप्यन्ते चिकित्सया । अतोऽन्यथा प्रत्याख्येयानि न चिकित्सानीत्यर्थः ॥*॥ अथार्शोऽरिष्टमाह ।
"हृत्पार्श्वशूलं यस्यासाध्योऽर्शसो हि सः ॥
असाध्यः सन्निपतितमरणो वेदितव्यः । अर्शसः अर्शोरोगयुक्तः । एतन्मिलितमरिष्टलक्षणं ।
"हृत्पार्श्वशूलं संमोहश्छर्द्दिरक्तस्य रुग्ज्वरः ।
तृष्णा गुदास्यपाकश्च निहन्युर्गुदजातुरं ॥
गुदस्य यदास्यमोष्ठदेशस्तस्य पाकः । हृत्पार्श्वशूलादिसमस्तं यस्तं चारिष्टलक्षणं ॥
"तृष्णारोचकशूलार्त्तमतिप्रसृतशोणितं ।
शोथातिसारसंयुक्तमर्शांसि क्षपयन्ति हि" ॥*॥
अथ मेढ्रादिजार्शोलक्षणमाह ।
"मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नामिजानि च ।
गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च" ॥
यथास्वं यथात्मीयलक्षणं । न चात्रोक्तनिदान-

पूर्व्वरूपसंप्राप्तिलक्षणयुक्तं । तत्र तत्रार्शःपदं तु मांसाङ्कुरसाम्यात् । गण्डूपदः किञ्चुलकः ॥*॥ अत्र मांसाङ्कुरसाम्यादधिकारे चर्म्मकीलस्य संप्राप्तिपूर्व्वकं लक्षणमाह ।
"व्यानो ग्रहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः ।
कीलोपमं स्थिरखरश्चर्म्मकीलन्तु तद्विदुः" ॥
चर्म्मा इति लोके । खरं कर्कशं ॥*॥ तस्यैव वातादिभेदेन लक्षणमाह ।
"वातेन तोदभास्यं पित्तादसितरक्तता ।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता" ॥
सवर्णता शरीरसमानवर्णता ॥*॥ अथ सामान्यतः अर्शसश्चिकित्सा ।
"यद्दोषानुलोम्याय यदग्निबलवृद्धये ।
अन्नपानौषधं सर्वं तत्सेव्यं नित्यमर्शसैः" ॥
अर्शसैः अर्शोरोगयुक्तैः ।
"शालियष्टिकगोधूमयवान्नानि घृतैः सह ।
अजाक्षीरेण वा निम्बपटोलानां रसेन वा ॥
कन्दैर्व्वार्त्ताकुमूलैर्व्वा रसैर्मांसरसेन वा ।
जीवन्त्युपोदिकाशाकैस्तण्डुलीयकदान्तुकैः" ॥१॥
कन्दोऽत्र सूरणः । अत्र मूलं मूलकं ।
"अन्यैश्च रूक्षविष्मूत्रमरुद्बिबन्धदीपनैः ।
अर्शांसि भिन्नवर्चांसि हन्याद्वातातिसारवत् ॥
सतक्रं लवणं दद्याद्बातवर्चोऽनुलोमनं ।
न प्ररोहन्ति गुदजाः पुनस्तक्रसमाहताः ॥
तक्राभ्यासेऽर्शसैः कार्य्यो बलवर्णाग्निवृद्धये ।
क्षोतःसु तक्रशुद्धेषु सम्यक् चलति यद्रसः ॥
तेन पुष्टिस्तथा तुष्टिर्बलं वर्णश्च जायते ।
वातश्लेष्मविकाराणां घृतञ्च विनिवर्त्तयेत् ॥
श्लक्ष्णं शौरिं कन्दं पक्वामौ पुटपाकवत् ।
अद्यात् सतैललवणं दुर्नामविनिवृत्तये ॥ २ ॥
चिरिबिल्वाग्निसिन्धूत्थनागरेन्द्रयवारलून् ।
तक्रेण पिबतोऽर्शांसि निपतन्त्यरुजा सह" ॥
चिरिबिल्वः करञ्जः तस्य फलस्यात्र मज्जा ग्राह्यः । अरलुः श्योनकः । करञ्जादिचूर्णं ॥ ३ ॥
"लेपं रजनिचूर्णेन सुधादुग्धयुतेन च ।
अर्शोरोगनिवृत्त्यर्थं कारयेत्तच्चिकित्सकः ॥ ४ ॥
पिप्पलीसैन्धवं कुष्ठं शिरीषस्य फलं तथा ।
स्नुग्दुग्धमर्कदुग्धं वा लेपोऽयं गुदजान् हरेत् ॥५॥
हरिद्राजालिनीचूर्णं कटुतैलसमन्वितं ।
एष लेपो वरः प्रोक्तो ह्यर्शसामन्तकारकः" ॥
जालिनी कटुतुरइ इति लोके ॥ ६ ॥
"असितानां तिलानान्तु पलं शीतजलेन तु ।
खादतोऽर्शांसि शाम्यन्ति दृढ़ा दन्ता भवन्ति हि ॥७॥
शुक्लैर्व्वार्थ जलौकोभिः प्रोच्छूनकठिनार्शसः ।
शोणितं सञ्चितं दृष्ट्वा हरेत् प्राज्ञः पुनः पुनः ॥ ८ ॥
कासीसं सैन्धवं क्षारा शुण्ठी कुष्ठञ्च लाङ्गली ।
शिलाभिदम्बमारञ्च दन्तीजन्तुघ्नचित्रकं ॥
तालकं कुनटी स्वर्जक्षीरी चैतैः पचेद्भिषक् ।
तैलं स्नुह्यर्कपयसा गवां मूत्रे चतुर्गुणे ॥
एतदभ्यङ्गतोऽर्शांसि क्षारेणेव पतन्ति हि ।
क्षारकर्म्मकरं ह्येतन्न च संदूषयेद्बलिं" ॥
कासीसं कौसीस इति लोके । लाङ्गली करहारी

इति लोके । शिलाभित् पाषाणभेदः । अश्मारः कनैल इति लोके । स्वर्णक्षीरी चोक इति लोके । दृहत्कासीसाद्यं तैलं ॥ ९ ॥

"गुडूचीकाशमरिचनागदलवगेलं
चूर्णीकृतं क्रमविवर्द्धितमूर्द्धमन्त्यात् ।
खादेदिदं समसितं गुदजाग्निमान्द्यं
गुल्मारुचिश्वसनकण्ठहृदामयेषु" ॥

तद्यथा । एलाच सूक्ष्मा ग्राह्या । यत आह मदनपालः ।

"एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत्" । इत्यादि । तस्या बीजभागः १ तज्जभागः २ दलं पत्रं । यत आह निघण्टौ धन्वन्तरिः ।

"तमालपत्रकं पत्रं स्यात् पलाशं दलाह्वयम्" । इति तस्य भागः ३ । नागो नागकेशरं । यत आह निघण्टौ धन्वन्तरिः ।

"नागपुष्पं मतं नागं केशरं नागकेशरम्" ॥ इत्यादि । तस्य भागः ४ मरीचभागः ५ पिप्परिभागः ६ शुण्ठीभागः ७ चिनिभागः २८ । समशर्करचूर्णं ॥ १० ॥

"त्रिपलं षट्कवेरस्य चतुष्कं मरिचस्य च ।
पिप्पल्याः कुड़वार्द्धञ्च चव्यायाः पलमेव च ॥
तालीशपत्रस्य पलं पलार्द्धं केशरस्य च ।
द्विपलं पिप्पलीमूलमर्द्धकर्षञ्च पत्रकात् ॥
सूक्ष्मैलाकर्षमेकन्तु कर्षञ्च त्वङ्नागयोः ।
गुड़ात् पलानि त्रिंशच्च चूर्णमेकत्र कारयेत् ॥
अङ्गप्रमाणगुटिका प्राणदा चेति सा स्मृता ।
पूर्व्वं भक्ष्यञ्च पश्चाच्च भोजनस्य यथाबलं ॥
मद्यं मांसरसं यूषं क्षारतोयं पिबेदनु ।
हन्यादर्शांसि सर्व्वाणि सहजान्यखजानि च ॥
वातपित्तकफोत्थानि सन्निपातोद्भवानि च ।
पानात्यये मूत्रकृच्छ्रे उरोरोगे गलग्रहे ॥
विषमज्वरपित्ते च पाण्डुरोगे तथैव च ।
कृमिहृद्रोगिणाञ्चैव गुल्मशूलार्त्तिनां तथा ॥
कृच्छ्रातीसाररोगाणां कामलाहिक्किनां तथा ।
शुण्ठीस्थानेऽभया देया हृद्ग्रहे पित्तजे गदे ॥
प्राणदेयं सितां दत्त्वा गुड़मानाच्चतुर्गुणां ।
अस्रपित्ताग्निमान्द्यादौ प्रयोज्या गुदजातुरे ॥
अनुपाने प्रयोक्तव्यं व्याधौ श्लेष्मभवे पलं ।
पलद्वयं त्वनिलजे पित्तजे तु पलत्रयं ॥

फलान्नधान्यान्नरसान्नशस्ता
मद्यं मरुद्रोगिणि चानुपानं ।
इक्षो रसक्षारहिमाम्बु पित्ते
उष्णाम्बुयूषौ कफजे विदध्यात् ॥

गवेधुकाजमादेयं मृदौ क्रूरे च पञ्च वा ।
अनुपानं प्रयोक्तव्यं देशकालमवेक्ष्य वा" ॥
इति प्राणदा गुटिका ॥ ११ ॥

"त्रिकत्रयं वचा हिङ्गु पाठाक्षारौ निशाद्वयं ।
चव्यतिक्ता कलिङ्गानि शताह्वा लवणानि च ॥
ग्रन्थिविल्वाजमोदा च गवेधुकाविंशतिर्मतः ।
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ॥
चूर्णं विड़ालपदकं पिबेदुष्णेन वारिणा ।
एरण्डतैलयुक्तं वा लिह्याच्चूर्णमिदं नरः ॥
हन्यादर्शांसि सर्व्वाणि श्वासगुल्मभगन्दरान् ।
हृच्छूलं पार्श्वशूलञ्च वातगुल्मं तथोदरं ॥
हिक्कां कासं प्रमेहांश्च पाण्डुरोगं सकामलं ।
आमवातमुदावर्त्तमन्त्रवृद्धिं गुदक्रिमीन् ॥
अन्ये च ग्रहणीदोषा भिषग्भिर्ये प्रकीर्त्तिताः ।
विजयो नाम चूर्णोऽयं तान् सर्व्वानाशु नाशयेत् ॥
महाज्वरोपसृष्टानां भूतोपहतचेतसां ।
अप्रजानाञ्च नारीणां हितमेतद्धि भेषजं ॥
त्रिकत्रयं त्रिफलात्रिकटुत्रिसुगन्धीनि ।
क्षारौ खर्ज्जिका यवक्षारश्च । लवणानि पञ्च । ग्रन्थिः पिप्पलीमूलं । विड़ालपदकं कर्षं । विजयचूर्णं ॥ १२ ॥

"मरिचमौषधचित्रकशूरण-
भागा यथोत्तरं द्विगुणाः ।
सर्व्वसमो गुड़भागः
सेव्योऽयं मोदकः प्रसिद्धफलः ॥
ज्वलनं ज्वलयति जाठर-
मुन्मूलयति शूलगुल्मगदान् ।
निःशेषयति श्लीपद-
मर्शांसि विनाशयत्याशु" ॥

तद्यथा । मरिचभागः १ शुण्ठीभागः २ चित्राभागः ४ शूरणभागः ८ गुड़भागः १५ । लघुशूरणमोदकः ॥१३॥

"षोड़शशूरणतोऽर्शा वह्नेरर्द्धौ महौषधस्याथ ।
अर्द्धेन भागयुक्तिर्मरिचस्य ततोऽपि चार्द्धेन ॥
त्रिफला कणा समूला तालीशरुस्करक्तमिश्रानां ।
भागा महौषधसमा दहनांशुतालमूली च ॥
भागः शूरणतुल्यो दातव्यो वृद्धदारकस्यापि ।
भक्ष्यैले मरिचांशे सर्व्वाण्येकत्र कारयेत् चूर्णं ॥
द्विगुणेन गुड़ेन युतः सेव्योऽयं मोदकः प्रकामधनैः ।
गुरुवर्य्यभोज्यनिरतैरितरैर्षूपद्रवं कुर्य्यात् ॥
भस्मकमनेन जनितं पूर्व्वमगस्त्यस्य योगराजेन ।
भीमस्य मारुतेरपि महाग्नी येन तौ जातौ ॥
अग्निबलमाचहेतुर्न केवलं शूरणो महावीर्य्यः ।
हन्ता शूरक्षारानलैर्विनाप्यर्शःसामेषः ॥
स्वयमुशीपदगदहृद्ग्रहणीच्च कफानिलोद्भूतां ।
नाशयति वलीपलितं मेधां कुरुते जरां हरते ॥
हिक्कां कासं श्वासं सराजरोगान् प्रमेहांश्च ।
श्लीहानञ्च तथोग्रं हन्यादाशु रसायनं पुंसां" ॥

एषां भागो यथा । शूरणभागः १६ चिताभागः८ सोठिभागः ४ मरिचभागः २ । हरीतकी । वहेरा अवरा । पीपर पिपरामूल । तालीशं तालीशपत्रं । अरुस्करं भल्लातकं । तदसत्वे रक्तचन्दनं । विड़ङ्गं प्रत्येकं भागः ४ तालमूली मूषली तस्याः भागः ८ विधाराभागः १६ तज्जभागः २ एलाइचक्षोटीबीजभागः २ गुड़भागः ४ । ७२ । वृहच्छूरणो मोदकः ॥ १४ ॥

"त्रिवृत्तेजोवती दन्ती स्वदंष्ट्रा चित्रकं शटी ।
गवाक्षीमुस्तविश्वाक्षविड़ङ्गानि हरीतकी ॥
पलोन्मितानि चैतानि पलान्यष्टावरुस्करात् ।
वृद्धदारात् पलान्यष्टौ शूरणस्य तु षोड़श ॥
जलद्रोणद्वये क्वाथ्यं चतुर्भागावशेषितं ।
पूतं तु तं रसं भूयः क्षौद्रेभ्यः त्रिगुणं गुड़ं ॥
लेहं पचेत् पुनस्तावद्यावद्वर्व्वीप्रलेपनं ।
अवतार्य्य ततः पश्चात् चूर्णानीमानि दापयेत् ॥
त्रिवृत्तेजोवतीकन्दचित्रकान् द्विपलांशिकान् ।
एलात्वक्पत्रिकं चापि नागाङ्गं चापि षट्पलं ॥
द्वात्रिंशच्च पलान्यत्र चूर्णयित्वा निधापयेत् ।
ततो मात्रां प्रयुञ्जीत जीर्णे क्षीररसाशिनः" ॥

तेजोवती तेजवती तेजवल्कल इति च ।
कन्दः शूरणः ।

"हन्यादर्शांसि सर्व्वाणि तथा सर्व्वोदराण्यपि ।
गुल्मानपि प्रमेहांश्च पाण्डुरोगं हलीमकं ॥
दीपयेदनलं मन्दं यत्नाग्नां चापकर्षति ।
आध्मवाते प्रतिश्याये पीनसेऽयं हितो मतः ॥
भवन्त्यनेन पुरुषाः शतं वर्षाण्यनामयाः ।
दीर्घायुषः प्रजनना वलीपलितवर्জ্জिताः ॥
गुड़ः श्रीवाऊशालोऽयं रसायनवरो मतः ।
दुर्नामान्तकरो ह्येष दृष्टो वारसहस्रशः ॥
यावद्वर्व्वीप्रलेपः स्यादयावद्दा तण्डुली भवेत् ।
तोयपूर्णे यदा पात्रे क्षिप्तो न ज्ञवते गुड़ः ॥
क्षिप्तस्तु निश्चलस्तिष्ठेत् पतितस्तु न शीर्य्यते ।
एष पाकः समस्तानां गुड़ानां परिकीर्त्तितः ॥
सार्द्धं पलं पलार्द्धं भक्षयेद्गुड़खण्डयोः ।
श्रेष्ठा तु मध्यमा हीना मात्रोक्ता मुनिभिस्त्रिधा" ।
वाऊशालो गुड़ः ॥ १५ ॥

"तिला भल्लातकं पथ्या गुड़श्चेति समांशकं ।
दुर्नामश्वासकासघ्नं श्लीहपाण्डूज्वरापहं ॥
पित्तश्लेष्मप्रशमनी कच्छ्वदमृजापहा ।
गुदजान्नाशयत्याशु भक्षिता सगुड़ाभया" ॥१६॥*॥

"प्रणम्य शङ्करं रुद्रं दण्डपाणिं महेश्वरं ।
जीवितारोगमन्विच्छन्नारदोऽपृच्छदीश्वरं ॥
सुखोपायेन हे नाथ शस्त्रक्षाराग्निभिर्व्विना ।
चिकित्सामर्शसां नृणां कारुण्यादक्तुमर्हसि ॥
नारदस्य वचः श्रुत्वा नराणां हितकाम्यया ।
अर्शसां नाशनं श्रेष्ठं भैषज्यं शङ्करोऽवदत् ॥
पाशुपतवचादिलोहानामादायान्यतमं शुभं ।
क्षात्वा निर्भेजमादौ तु कुलत्था माक्षिकेण च ॥
पत्तूरमूलकल्केन लिम्पेद्रसयुतेन च" ।

कुनटी मनःशिला । माक्षिकं सुवर्णमाक्षिकं । पत्तूरं वकम इति लोके । शालिञ्चा इति रसेन्द्रचिन्तामणौ । रसः पारदः ।

"वह्नौ निःक्षिप्य विधिवत् सारकारेण निर्धमेत् ।
ज्वाला च तस्य रोद्धव्या त्रिफलाया रसेन वा" ॥

सारः काष्ठसारः । शालाकारेण इति रसेन्द्रचिन्तामणौ पाठः ।

"ततो विज्ञाय गलितं शङ्खनाभ्रं समुत्क्षिपेत् ।
त्रिफलाया रसे पूते तदाक्षिप्य तु निर्व्वपेत् ॥
न सम्यग्गालितं यत्तु तेनैव विधिना पुनः ।
ध्मातं निर्व्वापयेत्तस्मिन् लोहं तत् त्रिफलारसे ॥
यल्लोहं न मृतं तच्च पाठ्यं भूयोऽपि पूर्ब्ववत् ।
मारणान्न मृतं यच्च तच्चक्षय्यमलोहवत् ॥
ततः संशोध्य विधिवत् चूर्णयेल्लोहभाजने ।
लोहेनैव तथा वत्स दृषदा सूक्ष्मचूर्णितं ॥

क्षत्वा लोहमये पात्रे मार्द्वे वा लिप्तरन्ध्रके ।
रसैः पञ्चोपमं क्षत्वा तं पचेद्भोमयाग्निना ॥
पुटानि क्रमशो दद्यात् पृथगेषां विधानतः ।
त्रिफलार्द्रकभृङ्गाणां केशराजस्य बुद्धिमान् ॥
माक्षिकन्दकभक्षातवक्षीनां सूरणस्य च ।
हस्तिकर्णपलाशस्य कुलिङ्गस्य तथैव च" ॥
भृङ्ग भङ्गरिया । केशराजः भृङ्गराज इति हिः ।
कुलिङ्गं खुरीछीरं ।
"पुटे पुटे चूर्णयित्वा लोहात् बोड़शिकं पलं ।
तन्मानं त्रिफलायाश्च पलेनाधिकमाहरेत् ॥
अष्टभागावशिष्टे तु रसे तस्याः पचेद्बुधः ।
अष्टौ पलानि दत्त्वा च सर्पिषो लोहभाजने ॥
तांम्रे वा लोहदर्व्या तु चालयेदिधिपूर्व्वकं ।
ततः पाकविधानज्ञः खल्वे चोर्द्धे च सर्पिषि ॥
मृदुमध्यादिभेदेन मक्षीयात् पाकमाप्यतः ।
आरभेत विधानज्ञः क्षतकौतुकमङ्गलः ॥
भामरं घृतसंयुक्तं विलिह्यादक्षिकक्षमात् ।
वर्द्धमानानुपानञ्च गव्यक्षीरेण संयुतं ॥
गव्याभावे त्वजायाञ्च स्निग्धद्रव्यादिभोजनं ।
सद्योवह्निकरश्चैव भक्षकश्च नियच्छति ॥
हन्ति वातं तथा पित्तं कुष्ठानि विविधं ज्वरं ।
गुल्माक्षिपाण्डुरोगांश्च निदानस्यरोचकं ॥
शूलञ्च परिणामञ्च प्रमेहमवबाहुकं ।
क्षयपुं रुधिरस्रावं दुर्नामानं विशेषतः ॥
बलवद्दृढंहणश्चैव कान्तिदं स्वरवर्द्धनं ।
पूरीरलाघवकरमारोग्यं पुष्टिवर्द्धनं ॥
आयुष्यं श्रीकरश्चैव वयस्तेजस्करं शुभं ।
सश्रीकपुत्रजननं वलीपलितनाशनं ॥
दुर्नामारिष्टयं नाम्ना दृष्टो वारसहस्रशः ।
अनेनार्शांसि दह्यन्ते यथा तूलञ्च वह्निना ॥
सौकुमार्य्यात्स्वकायत्वात् मद्यसेवी यथा नरः ।
जीर्णमद्यादियुक्तादिभोजनैः सह दापयेत्" ॥
रसेन्द्रचिन्तामणौ यथास्थाने यदा क्षतीयचरण-
स्थाने जीर्णे मद्ये प्रयोक्तव्यमिति पाठः ।
"चातपतिरवर्त्तीरमयूरग्रन्थिकादयः ।
चटकः कलविङ्कश्च वर्त्तका हरितालकः ॥
श्लेष्मकश्च वृहल्लावो वनविष्किरकादयः ।
पारावतमृगादीनां मांसं शास्त्रोक्तं शुभं ॥
वर्त्तोरिः वगेरा इति लोके । चटको वंन्यचटकः ।
कलविङ्को मइचटकः । वर्त्तका वटई इति लोके ।
हरितालकः हरिताल इति लोके । विष्किरा-
वर्त्तकादयः ।
"मद्गुरो रोहितः श्रेष्ठः शकुलश्च विशेषतः ।
मत्स्यराजा इमे प्रोक्ता हितमत्स्याय देहिने ॥
शुन्ताकस्य फलं शस्तं पटोलं वृहतीफलं ।
प्रलम्बाभीरवेत्राग्रं तालकन्दस्तथैव च" ॥
प्रलम्बा लम्बालावुः । अभीरुः शतावर्य्याः पत्रशाकं ।
तालकः देवदाली । तथा च निघण्टौ धन्वन्तरिः ।
"जीमूतको देवताड़ो वृत्तकोशो गरो गरी ।
प्रोक्ताखुविषवृक्षोऽयं देवदाली च ताड़कः ॥
देवदाली रसे तिक्ता कषायाऽग्नेयपाण्डुता"
नञ्येदित्यादि ॥

"वालूकं धान्यशाकञ्च केमुकं चक्रवर्त्तनं" ।
चक्रवर्त्तनं चकवतशाकं ।
"नारिकेलञ्च खर्ज्जूरं दाड़िमं लवलीफलं ।
पट्टकाटकञ्च पक्वाम्रं द्राक्षा तालफलानि च ।
जातीकोशं लवङ्गञ्च पूगं ताम्बूलपत्रकं ॥
हितान्येतानि वस्तूनि लोहमेतत् समश्नतां ।
नाशयेत्कुक्षिकुष्ठं कोष्ठं कर्क्कन्धुवदराणि च ।
जम्बीरं बीजपूरञ्च तिन्तिड़ीं करमर्द्दकं" ॥
कोष्ठं क्षुद्रवदरं । कर्क्कन्धुवदराणि महान्ति ।
"आनूपानि च मांसानि शूकरं पुष्करानपि ।
हंससारसदात्यूहशुकवल्लाकिकाः ॥
माक्षिकन्दकरीराणि कतकञ्च कलिङ्गकं ।
कुष्माण्डकञ्च कर्क्कोटं केमुकञ्च विशेषतः ॥
कटुकं कालशाकञ्च काशेरुं कर्क्कटीं तथा ।
ककारादीनि सर्व्वाणि दिदलानि च वर्जयेत् ॥
शूरैरेव समाख्यातशूर्णराजोऽनुकम्पया ।
जगतामुपकाराय दुर्नामारिष्टयं ध्रुवं ॥
स्थानादपेति मेरुश्च पृथ्वी पर्य्येति वायुना ।
पतन्ति चन्द्रतारार्काश्च मिथ्या चेदहमब्रुवं ॥
ब्रह्मघ्नाश्च क्षतघ्नाश्च क्रूरा येऽसत्यवादिनः ।
वर्ज्जनीयाः स्वधर्म्मेण भिषजा गुरुनिन्दकाः ॥
मुनिरसपिष्टविड्रूपं मुनिरसलोढ़ं चिरस्थितं घर्मे ।
द्रावयति लोहदोषान् वह्निर्नवनीतपिण्डमिव" ॥
मुनिरत्रागस्तिः ।
"काले मलप्रवृत्तिर्जाघवमुदरे विशुद्धिरुद्गारे ।
अङ्गेषु लाघवादो मनःप्रसादोऽस्य परिपाके ॥
कृमिरिपुचूर्णं लोढ़ं सहितं खरसेन वङ्गसेनस्य ।
क्षपयत्यचिरात्तितयं लोहाजीर्णोद्भवं शूलं" ॥
वङ्गसेनस्य अगस्त्यः ।
"जीर्णे लोहे पतति चूर्णं भुञ्जीत सिद्धसाराख्यं ।
लोहव्यापन्नश्यति विवर्द्धते जाठरो वह्निः" ॥
तद्यथा,—
"पथ्यासैन्धवशुण्ठीभागाधिकानां पृथक् समो भागः ।
त्रिहतो भागौ निम्बू भाव्यं तत् सिद्धसाराख्यं" ॥
"भवेद्यदतिसारन्तु दुग्धं पीत्वा रुजं जयेत् ।
गुल्मादरग्रकादूर्द्धं रुधिरस्य भयप्रदा" ॥
शूरैरप्रकीर्त्तं लोहं । इति सामान्यक्रिया ॥१७॥*॥
अथ रक्तार्शसां चिकित्सा ।
"रक्तार्शसामुपेक्षेत रक्तमादौ स्रवद्विधक् ।
दुष्टास्रे निर्गते स्युः शूलानाहास्रगामयाः ॥
चन्दनकिरातति क्तकधन्वयवासाः सनागराः क्व-
थिताः । रक्तार्शसां प्रशमना दार्व्वीतिगुडूचीरनिम्बा
वा" ॥ चन्दनमत्र रक्तचन्दनं । चन्दनादिक्वाथः ॥१॥
नवनीततिलाभ्यासात् २ । केसरनवनीतशर्करा-
भ्यासात् ३ । दधिसरमथिताभ्यासात् ४ । गुदजाः
शाम्यन्ति रक्तावहाः ॥
"दध्नस्तूपरि यो भागो घनः स्नेहयुतः सरः" ।
मथितं सररहितं निर्ज्जलं वस्त्रपूतं दधि ।
सपत्रकेसरं क्षौद्रं नवनीतं त्वचं लिहन् ।
सिताकेशरसंयुक्तं रक्तार्शसः सुखीभवेत् ॥ ५ ॥
पयसा घृतेन यूषैः सतीनमुद्गाढ़कीमसूराणां ।
ओदनमद्यादस्तैर्मधुरैरीषत्सुगन्धैश्च ॥ ६ ॥

समङ्गोत्पलमोचाङ्गतिरीटतिलचन्दनैः ।
सिद्धं क्षागीपयो दद्याद् गुदजे शोणितात्मके" ॥
समङ्गा लज्जालुः । मोचाङ्गो मोचरसः । तिरीटो
लोध्रः । चन्दनमत्र रक्तं । समङ्गादिदुग्धं ॥ ७ ॥
"भावितं रजनीचूर्णं खुरीछीरैः पुनः पुनः ।
बन्धनात् सुदृढ़ं खूत्वं क्षिप्तमर्शोभगन्दरं" ॥
क्षारसूत्रं ॥ ८ ॥
"नासानाभिसमुत्थेषु तथा मेढ्रादिजेष्वपि ।
क्रियामर्शःसु कुर्व्वीत तत्र तत्र यथोदितां ॥
चर्म्मकीलन्तु संक्षिप्य दहेत् क्षारेण वाग्निना ।
वेगावरोधक्षीणेष्वयानान्युत्कटकाशनं ॥
यथास्वं दोषलक्षान्नमर्शःसु परिवर्ज्जयेत्" ।
इत्यर्शोऽधिकारः ॥ * ॥ इति भावप्रकाशः ॥

अर्शसः, त्रि, (अर्शस् + अस्त्यर्थे अच् ।) अर्शोरोग-
युक्तः । इत्यमरः ॥
("हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम्" ।
इति मनुः ।
"अन्नपानौषधं सर्व्वं तत्सेव्यं नित्यमर्शसाम् ।
हस्ते पादे मुखे नाभ्यां गुदे दशसयोलघा ।
शोथो हत्यार्शसूलञ्च यस्यासाथोऽर्शसो हि सः" ॥
इति भावप्रकाशः ।)

अर्शसानः, पुं, (ऋ + असानच्, सुट् ।) अग्निः ।
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ ("अर्श-
सानाय शत्रूणां हिंसिने" । इति वेदभाष्यम् ।)

अर्शी, [न्] त्रि, (अर्शस्त्यस्य, अर्श + इनि ।)
अर्शोरोगयुतः । इति शब्दरत्नावली ॥

अर्शोघ्नः, पुं, (अर्शो हन्ति, अर्श + हन् + ट ।)
ओल्लः । तत्पर्य्यायः । शूरणः २ कन्दः ३ । इत्य-
मरः ॥ सूरणः ४ । इति तट्टीका । ओल इति
भाषा । (अर्शोरोगविनाशकः ।
"अर्शोघ्नं कारवं मूत्रं मानुषन्तु विषापहम्" ।
इति सुश्रुते ।)

अर्शोघ्नी, स्त्री, (अर्शस् + हन् + ट + ङीप् ।) ताल-
मूली । इति मेदिनी ॥

अर्शोहितः, पुं, (अर्शसि हितः, सेवनेन तन्नाशक-
त्वात् ।) भल्लातकः । इति चिकित्साङ्गग्रहः । भेला
इति भाषा ।

अर्ह योग्यत्वे । (भ्वादिः-परं-सकं-सेट् ।) पूजने ।
इति कविकल्पद्रमः ॥ अर्हति विप्रो वेदं पठितुं ।
सकर्म्मकोऽपि ।
"यज्ञदानतपांस्यस्य कलां नार्हन्ति षोड़शीं" ।
इति दुर्गादासः ॥
("अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति" ।
इति मनुः ।
"द्विजाग्र्यहान्यर्हसि षोढुमर्हन्" ।
इति रघुवंशे ।
"गुरोर्गुरौ सन्निहिते गुरुवन्मानमर्हति" ।
इति मनुः ।)

अर्ह क पूजने । (चुरां-उभं-सकं-सेट् ।) इति
कविकल्पद्रमः ॥ क अर्हयति । इति दुर्गादासः ॥
("राजार्ज्जितस्य मधुपर्कपाणिः" । इति भट्टि-
काव्ये ।)

अर्ह, पुं, (अर्ह + अच् ।) इन्द्रः । इति शब्दरत्नावली ॥

अर्हः, त्रि, (अर्ह + अच् ।) योग्यः । उपयुक्तः । यथा,—
"तस्मान्नार्हा वयं हन्तुं धार्त्तराष्ट्रान् सबान्धवान्"। इति श्रीभगवद्गीता ॥

अर्हणा, स्त्री, (अर्ह + युच् + टाप् ।) पूजा । इत्यमरः ॥ ("अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे"। इति रघुवंशे ।)

अर्हन्, [त्] पुं, (अर्हः प्रशंसायां शतृ ।) क्षपणकः । बुद्धः । इति मेदिनी ॥ श्रेष्ठस्य पर्य्यायः । जिनः २ पारगतः ३ त्रिकालवित् ४ क्षीणाष्टकर्म्मा ५ परमेष्ठी ६ अधीश्वरः ७ शम्भुः ८ स्वयम्भूः ९ भगवान् १० जगत्प्रभुः ११ तीर्थङ्करः १२ तीर्थकरः १३ जिनेश्वरः १४ वादी १५ अभयदः १६ सार्व्वः १७ सर्व्वज्ञः १८ सर्व्वदर्शी १९ केवली २० देवाधिदेवः २१ बोधदः २२ पुरुषोत्तमः २३ वीतरागाप्तः २४ । इति हेमचन्द्रः ॥

अर्हन्, (त्) त्रि, (अर्ह + शतृ ।) पूज्यः । मान्यः । इति मेदिनी ॥ स्तुतः । इति शब्दरत्नावली ॥ ("यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते"। इति कुमारसम्भवे ।
"त्वमर्हतामग्रसरः स्मृतोऽसि नः"। इति शाकुन्तले ।)

अर्हन्तः, पुं, (अर्ह + बाहुलकात् झच् ।) बुद्धः । क्षपणकः । मान्ये त्रि । इति जटाधरः ॥ शिवः । इति शब्दरत्नावली ॥

अर्हितः, त्रि, (अर्ह + क्त ।) पूजितः । इत्यमरः ॥

अल ञ वारणपर्य्याप्तिभूषासु (भ्वादिं-उभं-सकं ।) इति कविकल्पद्रुमः ॥ ञ अलति अलते वा पापं गङ्गा निवारयतीत्यर्थः । पर्य्याप्तिः सामर्थ्यं । "पर्य्याप्तस्तु यथेष्टं स्यात् क्षमे शक्ते निवारणे"। इति विश्वप्रकाशात् । अलति घोटको धावितुं समर्थः स्यादित्यर्थः । अलति हारो जनं भूषयति इत्यर्थः । इति दुर्गादासः ॥

अलं, स्त्री, (अल + अच् ।) दक्षिकपुच्छकण्टकः । इति हेमचन्द्रः । विहार ऊल इति भाषा । हरितालं । इति रत्नमाला अमरटीका च ॥

अलं, व्य, भूषणं । पर्य्याप्तिः । वारणं । निरर्थकं । शक्तिः । इति मेदिनी ॥ अत्यर्थं । यथा,—
"सर्वं मे विमलं वदामलमलं गोलं विजानासि चेत्"। इति लीलावती ॥

अलकः, पुं, क्ली, (अलति भूषयति मुखं, अल + कुन् ।) भङ्गियुतः केशः । कर्पूरादेः क्षोदचूर्णं तस्य कुन्तलाचूर्णकुन्तलाः तद्धि तच्च न्यस्यते इत्यन्ये । अलति भूषयति मुखं इत्यलकं । इति भरतः ॥ कुटिलकुन्तलः । इति सुभूतिः । इति सारसुन्दरी ॥ तत्पर्य्यायः । चूर्णकुन्तलः २ । इत्यमरः ।
("कर्णेषु योग्यं नवकर्णिकारं
स्तनेषु हारा अलकेष्वशोकाः"।
इति ऋतुसंहारे ।
"इस्ते लीलाकमलमलके बालकुन्दानुविद्धं"।
इति मेघदूते ।)

अलकः, पुं, (अल + कुन् ।) अलर्कः । क्षिप्रकुक्कुरः । इत्यमरटीकायां रायमुकुटः ॥

अलकनन्दा, स्त्री, (अलति पर्य्याप्नोति, अल + कुन्, अलका, नन्दयति इति अच् नन्दा, अलका चासौ नन्दा चेति इति इति कर्म्मधारयः ।) कुमारी । इति त्रिकाण्डशेषः ॥ भारतवर्षीयगङ्गा । इति शब्दमाला ॥ "तथैवालकनन्दा दक्षिणेन तु ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य निषध-हेमकूट-हिमकूटान्यतिरभसतररंहसा लुठन्ती भारतमपि वर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति"। इति श्रीभागवतं ॥
(हिमालयादुत्पन्ना श्रीनगरस्यादूरे गङ्गया सह मिलिता खनामख्याता नदी । गङ्गैव देवलोके अलकनन्देत्युच्यते । इति महाभारते । यदुक्तं,—
"देवेषु गङ्गा गन्धर्व्वे ! प्राप्नोत्यलकनन्दताम् ।
तथैवालकनन्दापि दक्षिणेनेति भारतं ।
प्रयाति सागरं भूत्वा सप्तभेदा महासुने" ॥
इति भागवतपुराणे ।)

अलकप्रभा, स्त्री, (अलका पर्य्याप्ता प्रभा यस्याः सा।) कुबेरपुरी । इति शब्दरत्नावली ॥

अलकप्रियः, पुं, (अलकान् प्रीणाति अलक + प्री + क ।) वृक्षविशेषः । इति जटाधरः ॥

अलका, स्त्री, (अल + कुन् + टाप् ।) कुबेरनगरी । इत्यमरः ॥ अष्टवर्षावधिदशवर्षपर्य्यन्तवयस्का कन्या । इति शब्दरत्नावली ॥

अलकाधिपः, पुं, (अलकाया अधिपः, षष्ठीतत्पुरुषः।) कुबेरः । इति जटाधरः ॥

अलकाधिपतिः, पुं, (अलकाया अधिपतिः, षष्ठीतत्पुरुषः।) कुबेरः । इति शब्दरत्नावली ॥

अलक्तः, पुं, (न रक्तोऽस्मात्, रस्य लत्वं ।) वृक्षनिर्य्यासविशेषः । लाहा । जौ इति च भाषा । तत्पर्य्यायः । रक्ता २ लाक्षा ३ जतु ४ यावः ५ द्रुमामयः ६ । इत्यमरः ॥ रक्ता ७ । इति भरतः । अरक्तः ८ । इत्यमरटीकायां भरतः ॥ जतुकं ९ यावकः १० अलक्तकः ११ रक्तः १२ । इति शब्दरत्नावली ॥ पलङ्कषा १३ क्षमिः १४ वरवर्णिनी १५ । इति जटाधरः ॥ तस्य गुणादिः ।
"लाक्षा पलङ्कषालक्ती यावो वृक्षामयो जतु ।
लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा लघुः ॥
अनुष्णा कफपित्तास्रदृष्टिक्षाकासज्वरप्रणुत् ।
व्रणोरुक्षतवीसर्पक्षमिकुष्ठगदापहा ॥
अलक्तको गुणैस्तद्वद्विशेषाद्व्रणनाशनः"।
इति भावप्रकाशः ॥* लाक्षारसः । आलता इति भाषा । तत्पर्य्यायः । अलक्तकः २ जतुरसः ३ रागः ४ निर्म्मार्ज्जनः ५ जननी ६ जनकरी ७ सम्पद्या ८ चक्रवर्त्तिनी ९ । अस्य गुणाः । तिक्तत्वं । उष्णत्वं । कफवातरोगव्रणदोषनाशित्वं । कण्ठरोगश्रमनत्वं । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥

अलक्तकः, पुं, (अलक्त एव, अलक्तः स्वार्थे कन् ।) निर्म्मार्ज्जनं । अलक्तः । इति हलायुधो हारावली च ॥ लाक्षा । इति राजनिर्घण्टः ॥ ("अलक्तकाङ्कानि पदानि पादयोः"। इति कुमारसम्भवे। "पादालक्तकरक्तमौक्तिकशिलासिद्धाङ्गनाङ्गक्षतैः" इति नागानन्दे ।)

अलगर्दः, पुं, (लगति सृगृति, क्विप्, लग, अर्द्दयति, अर्द्द + अच्, अर्दः, लग् चासौ अर्दश्चेति इति लगर्दः, लग्नः सन् पीड़क इत्यर्थः, निर्व्विषत्वात् तद्विग्नः ।) जलसर्पः । जलवेड़ा इति केचित् । अलाध इति केचित् । इत्यमरटीकायां भरतः ॥ (सविषो जलव्यालभेदः । विलकेउटिया इति भाषा, "तत्र सविषाः कृष्णाः कर्व्वुरा अलगर्द्दा इन्द्रायुधाः सामुद्रिका गोधनन्दाश्चेति"। सुश्रुते ।)

अलगर्द्दः, पुं, (अलं ग्रथ्नाति इति ग्रथ + अच्, एषोदरादित्वात् साधुः ।) जलव्यालः । इत्यमरः ॥ केउटिया इति ख्यातः । जलवेड़ा इति केचित् । अलाध इति केचित् । इति भरतः ॥

अलङ्करणं, क्ली, (अलम् + कृ + भावे ल्युट् ।) भूषणं । इति शब्दरत्नावली ॥

अलङ्करिष्णुः, त्रि, (अलम् + कृ + इष्णुच् ।) अलङ्कारकर्त्ता । भूषणशीलः । इति रघुनाथचक्रवर्त्त्यादयः ॥ तत्पर्य्यायः । मण्डनः २ । इत्यमरः ॥ अलङ्कर्त्ता ३ । इति शब्दरत्नावली ॥*॥ अलङ्कारयुक्तिश्च । इति सारसुन्दर्य्यादयः ॥ तत्पर्य्यायः । अलंकर्त्ता २ मण्डितः ३ प्रसाधितः ४ अलङ्कृतः ५ भूषितः ६ परिष्कृतः ७ । इत्यमरः ॥

अलङ्कर्त्ता, [र्त्तृ] त्रि, (अलम् + कृ + तृच् ।) अलङ्करिष्णुः । इत्यमरः ॥

अलङ्कर्म्मीणः, त्रि, (अलं समर्थः कर्म्मणे, खः ।) कार्य्यकुशलः । कर्म्मक्षमः । इत्यमरः ॥

अलङ्कारः, पुं, (अलम् + कृ + भावे घञ् ।) भूषणं । तत्पर्य्यायः । आभरणं २ परिष्कारः ३ विभूषणं ४ मण्डनं ५ । इत्यमरः ॥ अलङ्क्रिया ६ भूषा ७ अलङ्करणं ८ । इति शब्दरत्नावली । कलायः ९ इति जटाधरः ॥*॥ अथालङ्कारयुक्तिः । तद्धारणादिमुच्यते ।
"रेवत्यश्विधनिष्ठासु हस्तादित्रयेषु च ।
गुरुशुक्रबुधस्यापि वस्त्रालङ्कारधारणं ॥
अनिष्टेष्वपि निर्दिष्टं वस्त्रालङ्कारधारणम् ।
उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मते ॥
शिरस्त्रं मुकुटं हारः कुण्डलञ्चाङ्गदन्तथा ।
कङ्कणं बालकञ्चैव मेखलाद्यावितिक्रमात् ॥
प्रधानभूषणान्येषु यथासंख्यानि निश्चयः ।
पद्मरागञ्च वज्रञ्च विज्ञेयो गोविदस्तथा ॥
मुक्ता वैदूर्य्यनीलञ्च तथा मरकतं क्रमात् ।
आदित्यादिग्रहाणां सर्व्वसम्पत्तिदायकाः ॥
सुवर्णेनापि घटना सर्व्वेषामुपयुज्यते ।
प्रधानभूषणेष्वेवमप्रधाने न निश्चयः ॥
प्रधानभूषणं प्रायः शिरसो ह्यभिधीयते ।
तस्य प्रधानभूषत्वादित्याह भृगुनन्दनः ॥
सुखदा मणयः मुद्रा दुःखदा दोषशालिनः ।
अतो मणीनां वक्ष्यामि लक्षणानि यथाक्रमं" ॥

अस्त

इति युक्तिकल्पतरुः ॥* ॥ मल्लिविग्रेषायां लक्ष्यलक्षणानि तत्तच्छन्दे द्रष्टव्यानि ।*॥ काव्यालङ्कारः । स द्विविधः । शब्दालङ्कारः १। अर्थालङ्कारश्च २। तस्य लक्षणं। काव्यशोभाकरधर्म्मः। इति काव्यादर्शः॥ वैचित्र्यमलङ्कार इत्यलङ्कारसामान्यलक्षणं।

अथालङ्कारनामानि

अक्रमातिशयोक्तिः ——— १
अतद्गुणः ——— २
अत्यन्तातिशयोक्तिः ——— ३
अत्युक्तिः ——— ४
अधिकं ——— ५
अनन्वयः ——— ६
अनुकूलं ——— ७

अनुगुणः ——— ८
अनुज्ञा ——— ९

अनुप्रासः ——— १०

अनुप्रासस्तु पञ्चविधः। एकस्य लक्षणोदाहरणे उक्ते।

अपरे यथा, श्रुत्यनुप्रासः ———
अन्त्यानुप्रासः—

छेकानुप्रासः—

लाटानुप्रासः—

अनुमानं ——— ११

अन्योन्यं ——— १२

अपह्नवातिशयोक्तिः ——— १३

अप्रस्तुतप्रशंसा ——— १४

अभिधाहेतुः ——— १५

अर्थान्तरन्यासः ——— १६

अर्थापत्तिः ——— १७

अस्त

वैचित्र्यञ्च भङ्गीविशेषः प्रतीतिसाक्षिकः। इति काव्यप्रकाशटीकायां महेश्वरः ॥ अङ्गदादिवत् शब्दार्थशोभातिशयजनको रसाद्युपकारकोऽस्थिरधर्म्मः। इति साहित्यदर्पणं ॥ अस्य विवरणं दण्डि-काव्यप्रकाश-साहित्यदर्पणालङ्कारकौस्तुभ-

तल्लक्षणानि

"अक्रमातिशयोक्तिः स्यात् सहत्वे हेतुकार्य्ययोः।१
"सङ्कल्पानुगुणासङ्गीकारमाऽऽहुरतद्गुणं"। २
"अत्यन्तातिशयोक्तिस्तु कार्य्ये हेतुप्रसक्तिजे"।३
"अत्युक्तिरद्भुतातथ्यशौर्य्यौदार्य्यादिवर्णनं"। ४
"अधिकं एथुलाधारादाधेयाधिक्यवर्णनं"। ५
"उपमानोपमेयत्वं यदेकस्यैव वस्तुनः"। ६
"अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेत्। ७

"प्राक्सिद्धः खगुणोत्कर्षोऽनुगुणः परसन्निधेः"। ८
"दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्"। ९

"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्"। १०

"अनेकस्यैकधा साम्यसकृदप्यनेकधा।
एकस्य सकृदप्येष श्रुत्यनुप्रास इष्यते"॥

"उच्चार्य्यत्वादयदेकत्र स्थाने तालुरदादिके"।
सादृश्यं व्यञ्जनस्यैतत् श्रुत्यनुप्रास उच्यते॥
व्यञ्जनस्यैदयथावस्थं सहायेन स्वरेण तु।
आवर्त्तेऽन्त्ययोज्यत्वादनुप्रासः स एव तत्"॥

"शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्य्यमात्रतः।
लाटानुप्रास इष्टुक्तः"॥
"अनुमानन्तु विच्छित्या ज्ञानं साध्यस्य साधनात्"। ११

"अन्योन्यं नाम यत्र स्यादुपकारः परस्परं"। १२

"रूपकातिशयोक्तिः स्यान्निगीर्य्याध्यवसानतः।
यदाप्रकृतिगर्भत्वं सैव सापह्नवा मता"। १३
"अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया"। १४

"अभेदेनाभिधाहेतुर्हेतोर्हेतुमता सह"। १५

"उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः"। १६

"दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते।
क्वचित् प्राकरणिकादप्राकरणिकार्थस्यापतनं।
क्वचित् त्वप्राकरणिकात् प्राकरणिकार्थस्येति द्वौ भेदौ"। १७

अस्त

चन्द्रालोकोज्ज्वल-नीलमणि-काव्यचन्द्रिका-कुवलयानन्द-सरस्वतीकण्ठाभरणादिग्रन्थेषु द्रष्टव्यं। अलङ्काराणां मध्ये ये ये प्रसिद्धास्तेषां नामलक्षणोदाहरणानि चन्द्रालोकधृतानि तदतिरिक्तानि साहित्यदर्पणोक्तानि च लिख्यन्ते।

तदुदाहरणानि

"आलिङ्गन्ति समं देवं व्यां शूराश्च परांस्यते"॥ १
"चिरं रागिणि मच्चित्तेनिहितापि न रज्यसि"॥२
"यास्यामीत्युदिते तन्व्या बलयेऽभवदूर्म्मिका"॥ ३
"त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः"॥४
"ब्रह्माण्डानि जले यत्र तत्र मान्ति न ते गुणाः"॥५
"इन्दुरिवेन्दुः श्रीमानित्यादौ तदनन्वयः"॥ ६
"कुपितासि यदा तन्वि निधाय करजक्षतं।
बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा"॥ ७
"नीलोत्पलानि दधते कटाक्षैरतिनीलतां"॥ ८
"मय्येव जीर्णतां यातु यत्त्वयैव कृतं हरे।
नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति"॥९
"आदाय वकुलगन्धानन्धीकुर्व्वन् पदे पदे भ्रमरान्।
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः"॥१०
"उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीड़त्-कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-प्राप्तप्राय्समासमागमरसोल्लासैरमी वासराः"॥
"दृष्ट्वा दग्धं मनसिजं जीवयन्ति दृशैव याः।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः"॥
"केशः काशस्तवकविकाशः कायः प्रकटितकरभविलासः। चक्षुर्दग्धवराटककल्पं त्यजति न चेतः काममनल्पं"॥
"कोररजीवनयने नयने किं निमीलिते।
पश्य निर्जितकन्दर्पं कन्दर्पवशगं प्रियं"॥
"जानीमहेऽस्याः किल सारसाक्ष्या विराजतेऽन्तः-प्रियवक्त्रचन्द्रः। तत्कान्तिजालैः प्रहृतैस्त्वदङ्गेष्वापाण्डुता कुड्मलतास्विषद्भे"॥ १९
"त्रियामा शुक्लिना भाति शुक्लो भाति त्रियामया"॥ १२
"त्वत्सूक्तिषु सुधा राजन् भ्रान्ताः पश्यन्ति तां विधौ"॥ १३
"एकः क्षती स क्षत्रेषु योऽन्यं शूकान्न याचते"॥ १४

"तारुण्यविलासः। इत्यत्र वशीकरणहेतुर्गायिका-वशीकरणत्वेनोक्ता। विलासश्चासयोस्त्वध्यवसाय-मूलोऽयमलङ्कारः"॥ १५
"हनूमानब्धिमतरत् दुस्तरं किं महात्मनां॥
गुणवद्वस्तुसंसर्गात् याति स्वल्पोऽपि गौरवं।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्य्यते"॥ १६
"हारोऽयं हरिणाक्षीणां लुठति स्तनमंण्डले।
मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः"॥
"विललाप सवाष्पगद्गदं सहजामप्यपहाय धीरतां। अतितप्तमयोऽपि मार्द्दवं भजते कैव कथा शरीरिणां"॥ १७

अथालङ्कारनामानि

अल्पं ——— १८
अवज्ञालङ्कृतिः ——— १९

असङ्कृतिः ——— २०
तस्य त्रीणि लक्षणानि ।

असदर्थनिदर्शना ——— २१

असम्भवः ——— २२
आवृत्तिदीपकं ——— २३
तत् त्रिविधं । पदावृत्तिः । अर्थावृत्तिः । उभयावृत्तिः ।
आक्षेपः ——— २४
अस्य त्रीणि लक्षणानि लक्ष्याणि च ।

उत्प्रेक्षा ——— २५
सा वस्तुहेतुफलात्मतागोचरत्वेन त्रिविधा वस्तूत्प्रेक्षा । हेतूत्प्रेक्षा । फलोत्प्रेक्षा । तत्राद्या उक्तविषया अनुक्तविषया चेति द्विविधा । परे हेतुफलोत्प्रेक्षे सिद्धासिद्धविषयतया प्रत्येकं द्विविधे । एवमुत्प्रेक्षा षड्विधा ।

उत्तरं ——— २६
उदात्तं ——— २७
उपमा ——— २८
उपमेयोपमा ——— २९
उल्लासः ——— ३०

उल्लेखः ——— ३१
लक्षणभेदेन स द्विविधः ।
एकावली ——— ३२

कारकदीपकं ——— ३३

कारणमाला ——— ३४
सा पूर्वपूर्वपदार्थानां कारणत्ववर्णनेन एवमुत्तरोत्तरपदार्थानां कारणत्ववर्णनेन च द्विधा ।
काव्यलिङ्गं ——— ३५

काव्यार्थापत्तिः ——— ३६
कैतवापह्नुतिः ——— ३७

गूढोक्तिः ——— ३८
चपलातिशयोक्तिः ——— ३९
चित्रं ——— ४०

तल्लक्षणानि

"अल्पन्तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता" । १८
"ताभ्यां तौ यदि न स्यातामवज्ञालङ्कृतिस्तु सा" । १९

"विरुद्धभिन्नदेशत्वं कार्यहेत्वोरसङ्गतिः ।
अन्यत्र कर्त्तुमारब्धस्य तदिरुद्धकृतिश्च सा ॥
अन्यत् कर्त्तुं प्रवृत्तस्य तद्विरुद्धकृतिश्च सा" । २०
"अपरं बोधनं प्राहुः क्रियायासत्पदार्थयोः" । अस्यार्थः । कस्यचित् किञ्चित् क्रियाविशिष्टस्य स्वक्रियया-परान् प्रति असतः सतो वार्थस्य बोधनं वर्णनं । २१
"असम्भवोत्पत्तिरसम्भाव्यत्ववर्णनं" । २२
"त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकं" । २३

"आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ।
निषेधाभास आक्षेपं बुधाः केचन मन्वते ॥
आक्षेपोऽन्यो विधौ व्यक्ते निषेधे च तिरोहिते" । २४
"सम्भावनाः स्युरुत्प्रेक्षा वस्तुहेतुफलात्मता ।
उक्तानुक्तास्पदाद्याश्च सिद्धासिद्धास्पदे परे" । २५

"किञ्चिदाकूतसहितं स्यादूढ़ोत्तरमुत्तरं" । २६
"उदात्तमद्भिरचितं श्लाघ्यमाख्योपलक्षणं" । २७
"उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः" । २८
"पर्य्यायेण द्वयोरुक्तेदुपमेयोपमा मता" । २९
"एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि" । ३०

"बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते ।
एकोनबहुधोल्लेखोऽप्यसौ विषयभेदतः" । ३१
"गृहीतमुक्तरीत्यार्थश्रेणीरेकावली मता" । ३२

"क्रमिकैकगतानान्तु गुम्फः कारकदीपकं" । ३३

"गुम्फः कारणमाला स्यादुत्तरोत्तरकारणैः" । ३४

"समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनं" । ३५

"कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते" । ३६
"कैतवापह्नुतिर्यत्र व्याजादेर्निह्नवे पदैः" । ३७

"गूढोक्तिरन्योद्देश्या गीर्यदन्यं प्रति कथ्यते" । ३८
"चपलातिशयोक्तिस्तत्पौर्वापर्य्यव्यतिक्रमः" । ३९
"पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते" । ४०

तदुदाहरणानि

"भग्निमालोर्म्मिका तेऽद्य करे जपवटायते" । १८
"स्वल्पमेवाम्बु लभते पात्रः प्राप्यापि सागरं ।
मीलन्ति यदि पद्मानि का हानिरम्बुराशेः" । १९
"विषं जलधरैः पीतं मूर्च्छिता पथिकाङ्गना ।
अपारिजातां वसुधां चिकीर्षन् द्यां तथाक्रमाः ।
गोत्रोद्धारप्रवृत्तो हि गोत्रोद्धारं पुराकरोः" । २०
"नक्षत्रेशविरोधीति क्षीणं चन्द्रोदये पुनः" । २१

"को वेद गोपस्त्रिशुकः शैलमुत्पाटयिष्यति" । २२
"वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्व्वरी ।
उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः ।
माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः" । २३
"चन्द्र सन्दर्शयात्मानमथवास्ति प्रियामुखं ।
नायं दूति तनेत्यास्तस्याः कालानलोपमः ।
गच्छ गच्छसि चेत्कान्तं तत्रैव स्याज्जनिर्म्मम" । २४
"धूमस्तोमं तमः शृङ्गे कोकीविरहलक्षणं ।
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ॥
रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवं ।
तन्मुखभेच्छया नूनं पद्मैर्व्वैरायते ग्रही ॥
मध्यः किं कुचयोर्हृत्वे बद्धः कनकदामभिः ।
प्रायोऽलं त्वत्पदेनैकं प्राप्तुं तोये तपस्यति" । २५
"यत्रासौ वेतसी पात्र्य तत्रेयं सुतरां सरित्" । २६
"सासौ यत्राभवद्युद्धं तव धूर्ज्जटिनाऽर्ज्जुनः" । २७
"हंसीव भूपतेः कीर्त्तिः स्वर्गादीमवगाहते" । २८
"धर्म्मोऽर्थ इव पूर्णश्रीर्यो धर्म्म इव त्वयि" । २९
"अपि मां पावयेत् साध्वी स्वातेतीक्षति जाह्नवी ॥
काठिन्यं कुचयोर्दृष्टं वाङ्मात्र्यः पादपद्मयोः ।
निन्दन्ति विम्बधातारं त्वद्घाटीष्वरियोषितः ॥
तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनं ॥
लाभोऽयमेव भूपाल सेवकानां न चेदबधः" । ३०
"स्त्रीभिः कामोऽर्थिभिः खड्गः कालः शत्रुभिरेव सः ।
गुरुर्वंशस्य नुनोऽयं कीर्त्तौ भीष्मः शरासने" । ३१
"नेत्रे कर्णान्तविश्रान्ते कर्णौ दोःस्तम्भशासनौ ।
दोःस्तम्भौ जानुपर्य्यन्तप्रलम्बनमनोहरौ ।
जानुनी रत्नमुकुराकारे तस्य महीभुजः" । ३२
"गच्छन्या गच्छति पुनः पात्र्यः पश्यति पृच्छति" । ३३
"नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः ॥
भवन्ति नरकाः पापाः पापं दारिद्र्यसम्भवं ।
दारिद्र्यमप्रदानेन तस्माद्दानपरो भव" । ३४
"जितोऽसि मन्द कन्दर्प मच्चित्तेऽस्ति त्रिलोचनः" । ३५
"स जितन्त्वन्मुखेनेन्दुः का वार्त्ता सरसीरुहां" । ३६
"निर्यान्ति शरनाराचा बालादृक्पातकैतवात्" । ३७
"कृपापेहि परश्लेषादायाति क्षेपरक्तकः" । ३८
"अग्रे मानो गतः पश्चादनुनीता प्रियेण सा" । ३९
"मारमासुषमा चारुरुचा मारबधूत्तमा ।
मात्तधूर्त्ततमावासा सा वामा मेऽस्तु मारमा" । ४०

अथ

अथालङ्कारनामानि

चित्रकाव्यमनेकविधं यथा। पद्म-चक्र-धनुः-खड्ग-नागपाश-कवाट-नौका-बन्धाः। अश्वगति-चिपदी-गोमूत्रिकादयः।

छेकापह्नुतिः ——— ४१

तद्गुणः ——— ४२

तुल्ययोगिता ——— ४३

सा त्रिधा।

प्रथमा यथा ———

द्वितीया यथा ———

तृतीया यथा ———

दीपकं ——— ४४

दृष्टान्तः ——— ४५

निदर्शना ——— ४६

सा त्रिधा।

निरुक्तिः ——— ४७

परिकरः ——— ४८

परिकराङ्कुरः ——— ४९

परिणामः ——— ५०

परिवृत्तिः ——— ५१

परिसंख्या ——— ५२

पर्य्यस्तापह्नुतिः ——— ५३

पर्य्यायः ——— ५४

स द्विविधः।

पर्य्यायोक्तं ——— ५५

तत् द्विविधं।

पिहितं ——— ५६

पुनरुक्तवदाभासः ——— ५७

पूर्व्वरूपः ——— ५८

स द्विविधः।

प्रतिवस्तूपमा ——— ५९

प्रतिषेधः ——— ६०

प्रतीपं ——— ६१

तल्लक्षणभेदेन पञ्चविधं। न तु नामभेदेन।

प्रत्यनीकं ——— ६२

प्रस्तुताङ्कुरः ——— ६३

प्रहर्षणं ——— ६४

तत् त्रिविधं।

प्रौढ़ोक्तिः ——— ६५

भाविकं ——— ६६

भाषासमावेशः ——— ६७

अथ

तल्लक्षणानि

"छेकापह्नुतिरन्यस्य शङ्कातस्तस्य निह्नवे"। ४१

"तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः"। ४२

"वर्ण्यानामितरेषां वा धर्म्मैक्यं तुल्ययोगिता"।

"हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता।
गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता" ।४३
"वदन्ति वर्ण्यावर्ण्यानां धर्म्मैक्यं दीपकं बुधाः" ।४४
"चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः" । ४५
"वाक्यार्थयोः सदृश्योरेक्यारोपो निदर्शना।
पदार्थगर्भामन्ये वदन्त्यन्यां निदर्शनां ॥
अपरां बोधनं प्राज्ञैः क्रियायासत्पदार्थयोः" । ४६
"निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनं"। ४७
"अलङ्कारः परिकरः साभिप्रायविशेषणे" । ४८
"साभिप्रायविशेष्यस्वेद्भवेत् परिकराङ्कुरः" । ४९
"परिणामः क्रियार्थश्चेद्विषयी विषयात्मना"। ५०
"परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः" । ५१
"परिसंख्या निषिध्यैकमेकस्मिन् वस्तुयत्नवत्" । ५२
"अन्यच तस्यारोपार्थः पर्य्यस्तापह्नुतिस्तु सा" । ५३
"पर्य्यायो यदि पर्य्यायैरेकस्यानेकसंश्रयः।
"एकस्मिन् यस्यानेकं वा पर्य्यायः सोऽपि सम्मतः"॥५४
"पर्य्यायोक्तं तु गम्यस्वेदचोभङ्ग्यान्तराश्रयः।
पर्य्यायोक्तं तदप्याऊर्यद्याज्ञेनेष्टसाधनं" ॥ ५५
"पिहितं परवृत्तान्तज्ञातुः साकूतचेष्टितं" । ५६
"आपाततो यदर्थस्य पौनरुक्त्यावभासनं।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः" ॥ ५७
"पुनः स्वगुणसंप्राप्तिः पूर्व्वरूपमुदाहृतं।
पूर्व्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि" ॥ ५८
"वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता" । ५९
"प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्त्तनं" । ६०
"प्रतीपमुपमानस्याप्युपमेयत्वकल्पनं।
अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत् ॥
वर्ण्योपमानलाभेन तथान्यस्याप्यनादरः।
वर्ण्येनान्यस्योपमाया अनिष्पत्तिर्वचश्च तत् ॥
प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते" । ६१
"प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः" । ६२
"प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः" । ६३
"उत्कण्ठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणं।
वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्षणं ॥
यत्नादुपायसिद्धार्थात् साक्षाल्लाभः फलस्य तत्"॥६४
"प्रौढ़ोक्तिरुत्कर्षहेतौ तद्धेतुत्वप्रकल्पनं"। ६५
"भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनं"। ६६
"शब्दैरेकविधैरेव भाषासु विविधासपि।
वाक्यं यत्र भवेत् सोऽयं भाषासम इतीष्यते" ॥६७

अथ

तदुदाहरणानि

"प्रजल्पन् मत्पदे लग्नः कान्तः किं न हि नूपुरः"॥ ४१

"पद्मरागायते नासामौक्तिकं तेऽधरत्विषा"॥ ४२

"सङ्कुचन्ति सरोजानि खेरिणीवदनानि च।
त्वदङ्गमार्द्दवे दृष्टे कस्य चित्ते न भासते।
मालतीशुभ्रश्लेखा कदलीनां कठोरता ॥
प्रदीयते पराभूतिर्मिथश्चाचवयोरया ॥
लोकपालो यमः पाशी श्रीदः शुक्रो भवानपि" ॥ ४३

"मदेन भाति कलभः प्रतापेन महीपतिः" ॥ ४४

"त्वमेव कीर्त्तिमान्राजन् विधुरेव हि कान्तिमान्"॥४५

"या दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता ॥
तन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः ॥
नश्यद्राजविरोधीति क्षीणं चन्द्रोदये तमः" ॥ ४६

"ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान्" ॥ ४७

"सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः" ॥ ४८

"चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः" ॥ ४९

"प्रसन्नेन दृगञ्जेन वीक्षते मदिरेक्षणा" ॥ ५०

"ययावेकं शरं मुक्त्वा कटाक्षान् स रिपुस्त्रियाः" ॥५१

"स्वहृच्छयः प्रदीपेषु न स्वान्तेषु नतभ्रुवां" ॥ ५२

"नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखं" ॥ ५३

"पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनप्रभा ॥
अधुना पुलिनं तच्च यत्र स्रोतः पुराजनि" ॥ ५४

नमस्तस्मै कृतो येन सुधा राजवधूकुचौ ॥
यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह" ॥ ५५

"प्रिये मद्दागते प्रातः कान्ता तत्पमकल्पयत्" ॥५६

"भुजङ्गकुण्डलीयक्षश्रियिशुभ्रांशुशीतगुः।
जगत्यपि सदा पायादव्याच्चेतोहरः शिवः" ॥ ५७

हरकण्ठांशुलिप्तोऽपि श्लेषश्चक्षश्रयाश्रितः ॥
दीपे निर्व्वापितेऽप्यासीत् काक्षीरत्नैर्मुहुर्मुजः" ॥५८

"तापेन भ्राजते सूर्य्यः शूरश्चापेन राजते" ॥ ५९

"न द्यूतमेतत् कितवाक्रीड़नं निगितैः शरैः" ॥ ६०

"तल्लोचनसमं पद्मं तद्वक्त्रसदृशो विधुः।
अलं गर्व्वेण ते वक्तुकान्त्या चन्द्रो भवादृशः।
कः क्रौर्य्यदर्पस्ते मृत्यो त्वत्तुल्याः सन्ति हि स्त्रियः ॥
मिथ्यावादो हि मुग्धाहि त्वन्मुखाभं किलाम्बुजं।
दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दना" ॥ ६१

"जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधःकृतौ" ॥ ६२

"किं भङ्ग सत्यां मालत्यां केतक्यां कण्टकस्यया" ॥ ६३

"तामेव ध्यायते तस्मै विश्लेषा सैव दूतिका ॥
दीपमुद्दीपयेद्यावत्तावदभ्युदितो रविः ॥
निध्यञ्जनौषधीमूलं खनतासादितो निधिः" ॥ ६४

"कचाः कलिन्दजातीरतमालस्तोममेचकाः" ॥ ६५

"अहं विलोकयेऽद्यापि युध्यन्तेऽत्र सुरासुराः" ॥ ६६

"गुञ्जन्मणिमञ्जीरे कलगम्भीरे विहारसरसीतीरे।
विरसासि केलिकीरे किमालि धीरे च गन्धसार-समीरे" ॥ ६७

अथालङ्कारनामानि

भेदकातिशयोक्तिः ——— ६८
भ्रान्तापह्नुतिः ——— ६९
भ्रान्तिमान् ——— ७०
मालादीपकं ——— ७१
मिथ्याध्यवसितिः ——— ७२
मीलितं ——— ७३
मुद्रा ——— ७४
यथासंख्यं ——— ७५
यमकं ——— ७६

युक्तिः ——— ७७
रत्नावली ——— ७८
रूपकं ——— ७९
तत् द्विविधं। अभेदरूपकं। तादूप्यरूपकञ्च। तच्च समन्यूनाधिक्यकथनद्वारा प्रत्येकं त्रिविधं। समाभेदरूपकं। न्यूनाभेदरूपकं। अधिकाभेदरूपकं। समतादूप्यरूपकं। न्यूनतादूप्यरूपकं। अधिकतादूप्यरूपकं। एतेन षड्विधं।
रूपकातिशयोक्तिः ——— ८०

ललितं ——— ८१
लुप्तोपमा ——— ८२
सा चाष्टधा। वाचकलुप्ता। धर्म्मलुप्ता। उपमानलुप्ता। धर्म्मवाचकलुप्ता। वाचकोपमेयलुप्ता। वाचकोपमानलुप्ता। धर्म्मोपमानलुप्ता। धर्म्मोपमानवाचकलुप्ता।
लेशः ——— ८३

लोकोक्तिः ——— ८४
वक्रोक्तिः ——— ८५
विकल्पः ——— ८६
विकस्वरः ——— ८७
विचित्रं ——— ८८
विधिः ——— ८९
विनोक्तिः ——— ९०
लक्षणभेदेन सा द्विविधा।
विभावना ——— ९१
अस्या लक्षणान्युदाहरणानि च षट्।

विरोधः ——— ९२
स दशधा।

तल्लक्षणानि

"भेदकातिशयोक्तिः स्यात् तस्यैवान्यत्वकल्पनं"। ६८
"भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे"। ६९
"स्यात् स्मृतिर्भ्रान्तिसन्देहैस्तदङ्गालङ्कृतित्रयं"। ७०
"दीपकैकावलीयोगान्मालादीपकमुच्यते"। ७१
"किञ्चिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनं"। ७२
"मीलितं यदि सादृश्याद्भेद एव न दृश्यते"। ७३
"सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः"। ७४
"यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः"। ७५
"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते"। ७६

"युक्तिः पराभिसन्धानं क्रियया मर्म्मगुप्तये"। ७७
"क्रमिकाप्रकृतार्थानां न्यासं रत्नावलीं विदुः"। ७८
"विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्"।
"रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः"॥७९

"रूपकातिशयोक्तिः स्यात् निगीर्य्याध्यवसानतः"।
अस्यार्थः। विषयसम्बन्धेन उल्लेखनं विना विषयिवाचकशब्देन ग्रहणं विषयनिगरणं तत्पूर्व्वकं विषयस्य विषयिरूपतया अध्यवसानं तस्मिन् सति रूपकातिशयोक्तिः"। ८०
"प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनं"। ८१
"वर्ण्योपमानधर्म्माणामुपमावाचकस्य च।
एकद्वित्र्यनुपादानात् भिन्ना लुप्तोपमाऽष्टधा"॥ ८२

"लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं"। ८३

"लोकप्रवादानुकृतिं लोकोक्तिरिति कथ्यते"। ८४
"वक्रोक्तिः श्लेषकाकुभ्यामपूर्व्वार्थप्रकल्पनं"। ८५
"विरोधे तुल्यबलयोर्विकल्पालङ्कृतिर्म्मता"। ८६
"यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः"। ८७
"विचित्रं तत्प्रयत्नश्चेत् विपरीतफलेच्छया"। ८८
"सिद्धस्यैव विधानं यत्तामाऊर्व्विध्यलङ्कृतिं"। ८९
"विनोक्तिः स्यादिना किञ्चित् प्रस्तुतं हीनमुच्यते।
तच्चेत् किञ्चिदिना रम्यं विनोक्तिः सापि कथ्यते"॥९०
"विभावना विनापि स्यात्कारणं कार्य्यजन्म चेत्।
हेतूनामसमग्रत्वे कार्य्योत्पत्तिश्च सा मता॥
कार्य्योत्पत्तिस्तृतीया स्यात् सत्यपि प्रतिबन्धके।
अकारणात् कार्य्यजन्म चतुर्था स्याद्विभावना॥
विरुद्धात् कार्य्यसम्पत्तिर्दृष्टा काचिद्विभावना।
कार्य्यात् कारणजन्मापि दृष्टा काचिद्विभावना"॥९१
"जातिश्चतुर्भिर्ज्ञात्याद्यैर्गुणो गुणादिभिस्त्रिभिः।
क्रियाक्रियाद्रव्याभ्यां यत् द्रव्यं द्रव्येण वा मिथः।
विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः"॥ ९२

तदुदाहरणानि

"अन्यदेवास्य गाम्भीर्य्यमन्यद्धैर्य्यञ्च भूपतेः"॥ ६८
"तापं करोति सोत्कम्पं ज्वरः किन्नु सखे स्मरः"॥६९
"अयं प्रमत्तो मधुपस्त्वन्मुखं वेत्ति पङ्कजं"॥ ७०
"स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः"॥७१
"मिथ्याध्यवसितिर्व्वेश्यां वृणुयेत् खञ्जनं वहन्"॥७२
"रसो नालक्ति लाक्षायाश्चरणे सहजारुणे"॥ ७३
"नितम्बगुर्व्वी तरुणी दृगुत्पलविपुला च सा"॥ ७४
"भृङ्गं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय"॥ ७५
"नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजं।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः"॥ ७६
"त्वामालिखन्ति दृङ्नार्य्यां धनुःपौष्पं करेऽलिखत्"॥७७
"चतुरास्यः पतिर्ब्रह्मा सर्व्वज्ञत्वं महीपते"॥ ७८
"अयं हि धूर्ज्जटिः साक्षाद्येन दग्धाः पुरः क्षणात्।
अयमास्ते विना शम्भुस्तान्येवैकं विलोचनं॥
शम्भुर्व्विश्वमवत्यद्य क्षोदित्य समदृक्षितां।
अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना॥
साध्वीयमपरा लक्ष्मीरसुधासागरोत्थिता।
अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते"॥७९
पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति सिताः शराः"॥८०

"ललितं निर्गते नीरे सेतुमेषा चिकीर्षति"॥ ८१
"तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्म्मम।
कान्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया॥
यत् त्वया मेलनं तत्र लाभो मे यच्च तद्गतेः।
तदेतत् काकतालीयमवितर्क्कितसम्भवं"॥ ८२

"अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु।
शुक पञ्जरबन्धस्ते मधुराणां गिरां फलं"॥ ८३
"सहस्र कतिचिन्मासान्मीलयित्वा विलोचने"॥ ८४
"मुञ्च मानं दिनं प्राप्तं नेह नान्दी हरान्तिके"॥८५
"सद्यः शिरांसि चापान् वा नमयन्तु महीभुजः"॥८६
"स न जिग्ये महान्तो हि दुर्दृशाः सागरा इव"॥ ८७
"नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिं"॥८८
"पञ्चमोदञ्चने काले कोकिलः कोकिलोऽभवत्"॥८९
"विद्या हृद्यापि सा विद्या विना विनयसम्पदं।
विना खलैर्व्विभात्येषा राजेन्द्र भवतः सभा"॥ ९०
"अपलाशारसासिक्तं रक्तं ते चरणद्वयं।
अस्रैरतीक्ष्णकठिनैर्व्वर्ज्जयति मन्मथः॥
नरेन्द्रानेव ते राजन् दशत्यसिभुजङ्गमः।
शङ्खादीनानिनादोऽयमुदेति महदद्भुतः॥
प्रीताङ्किरणास्तन्वी हन्त सन्तापयन्ति तां।
यशःपयोराशिरभूत् करकल्पतरोस्तव"॥ ९१
"तव विरहे मलयमरुद्दावानलः शुचिरुचोऽपि शोषमगिः। हृदयमनिशतमपि भिन्ने नलिनीदलमपि निदाघरविरस्याः॥ सन्ततमुषलासङ्गादुज्झतरङ्गहकम्भिघटनाया नृपते। द्विजपत्नीनां

अलं	अलं	अलं
अथालङ्कारनामानि	तल्लक्षणानि	तदुदाहरणानि ।
		कठिनाः सति भवति कराः सरोजकुमाराः ॥ अजस्य गृहतो जन्म निरीहस्य हतद्विषः । स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥ वल्लभोत्सङ्गसङ्गेन विना हरिणचक्षुषः । राकाविभावरीजानिर्बिम्बज्वालाकुलो भवेत् ॥ नयनयुगासेचनकं मानसतत्त्वापि दुष्प्रापं । रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे" ॥ ९२
विरोधाभासः ——— ९३	"आभासत्वं विरोधस्य विरोधाभास इष्यते" । ९३	"विनापि तन्वि हारेण वक्षोजौ तव हारिणौ" ॥ ९३
विहितोक्तिः ——— ९४	"विहितोक्तिः श्लेषगुणं कविनाविष्कृतं यदि" । ९४	"दवापेहि परश्चेदिति वक्ति स सूचनं" ॥ ९४
विशेषः ——— ९५	"विशेषः ख्यातमाधारं विनाप्याधेयवर्णनं । विशेषः सोऽपि यत्रैकं वस्त्वनेकत्र वर्ण्यते ॥ किञ्चिदारभतोऽप्यन्यवस्त्वन्तरकृतिश्च सः" । ९५	"गते सूर्येऽपि दीपस्यात्तमश्छिन्दन्ति तत्कराः । अन्तर्बहिः पुरः पश्चात् सर्व्वदिक्ष्वपि सैव मे ॥ त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणं" ॥ ९५
स त्रिविधः ।		
विशेषोक्तिः ——— ९६	"कार्य्याजनिर्विशेषोक्तिः सति पुष्कलकारणे" । ९६	"हृदि स्नेहच्युतो नाभूत् स्मरदीपे ज्वलत्यपि" ॥ ९६
विषमं ——— ९७	"विषमं वर्ण्यते यत्र घटनाननुरूपयोः । विरूपकार्य्यस्योत्पत्तिरपरं विषमं मतं ॥ अनिष्टस्याप्यवाप्तिश्चेत्तदिष्टार्थसमुद्यमात्" । ९७	"क्वेयं श्रीरीषदुद्भूता क्व तादृङ्मदनज्वरः । कीर्त्तिं प्रसूते धवलां श्यामा तव कृपाणिका ॥ भक्ताश्रया हि मञ्जूषा दृष्ट्याखुस्तेन भक्षितः" ॥ ९७
तत् त्रिविधं ।		
विषादनं ——— ९८	"इष्यमाणविरुद्धार्थसंप्राप्तिश्च विषादनं" । ९८	"दीपमुद्दीपयेद्यावत्तावन्निर्व्वाण एव सः" ॥ ९८
व्याघातः ——— ९९	"व्याघातोऽन्यथाकारि तथाकारि क्रियेत चेत् । सौकार्य्येण निबद्धापि क्रियाकार्य्यविरोधिनः" । ९९	"यैर्जगत् प्रीयते हन्ति तैरेव कुसुमैः स्मरः । दया चेद्बाल इति मय्यपरित्यज्य एव ते" ॥ ९९
स द्विविधः ।		
व्याजनिन्दा ——— १००	"निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते" । १००	"विधे स निन्द्यो यस्ते प्रागेकमेवाहरच्छिरः" ॥ १००
व्याजस्तुतिः ——— १०१	"उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यांस्तुतिनिन्दयोः" । १०१	"कः स्वर्धुनि विवेकस्ते नयसे पापिनो दिवं ॥ साधु दूति पुनः साधु कर्त्तव्यं किमतः परं । यन्मदर्थे विलूनासि दन्तैरपि नखैरपि" । १०१
स द्विविधः ।		
व्याजोक्तिः ——— १०२	"व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनं" । १०२	"सखि पश्य सहारामपरागैरस्मि धूसरा" ॥ १०२
व्यतिरेकः ——— १०३	"व्यतिरेको विशेषश्चेदुपमानोपमेययोः" । १०३	"फेना इवोन्नताः सन्तु किन्तु प्रकृतिकोमलाः" ॥ १०३
शुद्धापह्नुतिः ——— १०४	"शुद्धापह्नुतिरन्यस्यारोपार्थो धर्म्मनिह्नवः" । १०४	"नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहं" ॥ १०४
श्लेषः ——— १०५	"नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्याभयाश्रयः" । १०५	"सर्व्वतो माधवः पायात् स यो गङ्गामदीधरत् ॥ अलेन त्वन्मुखं तुल्यं हरिणा हतशक्तिना । उच्चरद्भूरिकोलालः शुशुभे वाहिनीपतिः" ॥ १०५
स च त्रिविधः । प्रकृतानेकविषयः १ अप्रकृतानेकविषयः २ प्रकृताप्रकृतानेकविषयः ३ ।		
सदृर्थनिदर्शना ——— १०६	"विभावनं सम्भवानां फलं सहृदनुग्रहः" । १०६	"उदयन्नेव सविता पद्मेष्वर्पयति त्विषं" ॥ १०६
सन्देहः ——— १०७	"स्यात् स्मृतिभ्रान्तिसन्देहैस्तदङ्गलङ्गतित्रयं" । १०७	"पङ्कजं वा सुधांशुर्व्वेत्यसाकान्तु न निर्णयः" ॥ १०७
समं ——— १०८	"समं स्यादर्थनं यत्र द्वयोरप्यनुरूपयोः । सारूप्यमपि कार्य्यस्य कारणेन समं विदुः । विना यत्नेन तत्सिद्ध्यैदर्थः कर्त्तुमुद्यमः" । १०८	"स्वानुरूपं कृतं पद्महारेण कुचमण्डलं ॥ नीचप्रसक्ता लक्ष्मि जलजायास्तवोचिता ॥ युक्तो वारणलाभोऽयं भूपतेर्वारणार्थिनः" ॥ १०८
तत् त्रिविधं ।		
समाधिः ——— १०९	"समाधिः कार्य्यसौकर्य्यं कारणान्तरसन्निधेः" । १०९	"उत्कण्ठिता च कुलटा जगामास्तञ्च भानुमान्" ॥ १०९
समासोक्तिः ——— ११०	"समासोक्तिः परिस्फूर्त्तिः प्रस्तुते प्रस्तुतस्य चेत्" । ११०	"अयमैन्द्रीमुखं पश्य रक्तचुम्बति चन्द्रमाः" ॥ ११०
समुच्चयः ——— १११	"बहूनां युगपद्वाजा भावगुम्फः समुच्चयः । अहं प्रथमिकाभाजामेककार्य्यान्वयोऽपि सः" । १११	"नश्यन्ति पश्चात् पश्यन्ति भ्रश्यन्ति च तव द्विषः ॥ लं श्रीलं वयो विद्या धनञ्च मदयत्यसुं" ॥ १११
स द्विविधः ।		
सम्बन्धातिशयोक्तिः ——— ११२	"सम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनं । योगेऽप्ययोगसम्बन्धातिशयोक्तिरितीर्य्यते" । ११२	"सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलं । त्वयि दातरि राजेन्द्र खर्द्दमाद्रियामहे" ॥ ११२
तल्लक्षणभेदेन सा द्विधा ।		
सम्भावनं ——— ११३	"सम्भावनं यदीदं स्यादित्यूहोऽन्यस्य सिद्धये" । ११३	"यदि श्लेषोऽभवद्वक्ता कथिताः स्युर्गुणास्तव" ॥ ११३
सहोक्तिः ——— ११४	"सहोक्तिः सहभावश्चेद्वासते जनरञ्जनः" । ११४	"दिगन्तमगमत्तस्य कीर्त्तिः प्रत्यर्थिभिः सह" ॥ ११४
सामान्यं ——— ११५	"सामान्यं प्रकृतस्यान्यतादात्म्यं सदृशैर्गुणैः" । ११५	"मल्लिकाचितधम्मिल्लाश्चारुचन्दनचर्चिताः । अविभाव्याः सुखं यान्ति चन्द्रिका अभिसारिकाः" ॥ ११५
सारः ——— ११६	"उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते" । ११६	"मधुरं मधु पीयूषं तस्मात् तस्मात् कवेर्वचः" ॥ ११६
सूक्ष्मं ——— ११७	"सूक्ष्मं पराशयाभिज्ञैरसाकूतचेष्टितं" । ११७	"मयि पश्यति सा केशैः सीमन्तमणिमाहरेत्" ॥ ११७
लोकोक्तिः ——— ११८	"लोकोक्तिर्यत्र लोकोक्तेः स्यादर्थान्तरगर्भिता" । ११८	"भुजङ्ग एव जानीते भुजङ्गाचरणं सखे" । ११८
स्वभावोक्तिः ——— ११९	"स्वभावोक्तिः स्वभावस्य जात्यादिरूपस्य वर्णनं" । ११९	"कुरङ्गैरन्तराङ्गाक्षैः लक्ष्यकर्णैः समीक्ष्यते" । ११९

अथालङ्कारनामानि

स्मृतिमान् ——— १२०
हेतुः ——— १२१
स द्विविधः।
हेत्वपह्नुतिः ——— १२२

तल्लक्षणानि

"स्यात् स्मृतिर्भ्रान्तिसन्देहैस्तदङ्गालङ्कृतित्रयं" ।१२०
"हेतोर्हेतुमता सार्द्धं वर्णनं हेतुरुच्यते।
हेतुर्हेतुमतोरैक्यवर्णनं हेतुरुच्यते" । १२१
"शुद्धापह्नुतिरन्यस्यारोपार्थो धर्म्मनिह्नवः।
स एव युक्तिपूर्व्वश्चेदुच्यते हेत्वपह्नुतिः" । १२२

तदुदाहरणानि

"पङ्कजं पश्यतः कान्ता मुखं मे गाहते मनः" ॥१२०
"असावुदेति प्रीतांशुर्मानच्छेदाय सुभ्रुवां ॥
लक्ष्मीविलासो विदुषां कटाक्षावेङ्कटप्रभोः" ॥१२१
"नेन्दुस्त्रीत्रो न निश्शर्कः सिन्धोरौर्व्वोऽयमुत्थितः" ॥
१२२

अलङ्क्रिया, स्त्री, (अलम् + कृ + भावे श।) भूषितकरणं। तत्पर्य्यायः। भूषा २। इत्यमरः॥

अलङ्कृतः, त्रि, (अलम् + कृ + कर्म्मणि क्तः।) अलङ्कारयुक्तः। तत्पर्य्यायः। भूषितः २ प्रसाधितः ३ परिष्कृतः ४ मण्डितः ५। इत्यमरः॥
("अलङ्कृतं जनाकीर्णं विविशुर्वारणावतम्"। इति महाभारते।)

अलञ्जरः, पुं, (अलम् + ञ्जृ + अच्।) मृण्मयबड्डजलधरपात्रं। झाला इति ख्यातः। तत्पर्य्यायः। अलिञ्जरः २ मणिकं ३। इत्यमरटीकायां भरतः॥

अलतिः, पुं, (अल + बाऽलकात् अतिच्।) गीतविशेषः। इत्युणादिकोषः॥

अलन्धूमः, पुं, (अलमत्यर्थो धूमः।) धूमसमूहः। इति जटाधरः॥

अलम्, व्य, भूषणं। पूर्णता। सामर्थ्यं। निषेधः। इत्यमरः॥ निरर्थकं। इति भरतः॥

अलम्बुषः, पुं, (अलं पुष्णाति, पुष + क, षस्य षः।) प्रहस्तः। वमनं। राक्षसविशेषः॥ इति मेदिनी॥ (कुरुक्षेत्रयुद्धे कौरवाणां सहायः स्वनामख्यातो राक्षसः।
"साल्वकिस्वापि संक्रुद्धो राक्षसं क्रूरमाहवे।
अलम्बुषं पूरैर्घोरैर्विव्याध बलिनां बली"॥
इति महाभारते।)

अलम्बुषा, स्त्री, (अलं पुष्णाति, पुष + क, षस्य बः, ततः स्त्रियां टाप्।) सुरङ्गीरी। स्वर्गवेश्याभेदः। इति मेदिनी॥
("अलम्बुषा मिश्रकेशी पुण्डरीका तिलोत्तमा।
सुरूपा लक्षणा क्षेमा तथा रम्भा मनोरमा"॥
इति महाभारते।) अन्यप्रवेशप्रवारणार्थदन्तरेखादिः॥ लज्जालुभेदः। तत्पर्य्यायः। खरत्वक् २ मेदः ३ गला ४। अस्या गुणाः। लघुत्वं। स्वादुत्वं। क्षमिपित्तकफनाशित्वञ्च। इति राजनिर्घण्टः॥ (भावप्रकाशश्च॥
"अलम्बुषा गोक्षुरकं त्रिफला नागरा मताः।
यथोत्तरं भागवृद्धा श्यामाचूर्णन्तु तत्समं॥
पिबेन्मस्तुसुरातक्रकाञ्जिकोष्णोदकेन वा।
पीतं जयत्यामवातं सशोथं वातशोणितं॥
त्रिकजानूरुसन्धिस्थं ज्वरारोचकनाशनं।
पथ्याच्छधान्यस्त्रिफला भागवृद्धावयं क्रमः"॥*॥
अलम्बुषाद्यं चूर्णम्॥*॥ इति वैद्यकचक्रपाणिसंग्रहः॥
"अलम्बुषा गोक्षुरकं मूलं वरणकस्य च।
गुडूची नागरञ्चेति समभागानि कारयेत्॥
काञ्जिकेन तु तत्पेयं विड्डालपदमात्रकं।
आमवाते प्रवृद्धे च योगोऽयममृतोपमः॥*॥
अपराजम्बुषाद्यं चूर्णं॥*॥ इति च भावप्रकाशे॥)

अलर्कः, पुं, (अलमर्कतेऽर्च्यते वा, अर्क + अच्, अर्च + घञ् वा।) क्षिप्रकुक्कुरः। ("आलर्कं विषमिव सर्व्वतः प्रसृप्तम्"। इति उत्तरचरिते।) श्वेतार्कवृक्षः। शादा आकन्द इति भाषा। (अस्य पर्य्यायान्तरं गुणान्तरञ्च यथा—
"अलर्को गुणरूपः स्यान्मन्दारो वसुकोपि च।
श्वेतपुष्पः सदापुष्पः सवालार्कः प्रतापसः॥
रक्तोऽपरोऽर्कनामा स्यादर्कपर्णो विकीरणः।
रक्तपुष्पः शुक्लफलस्तथास्फोटः प्रकीर्त्तितः॥
अर्कद्वयं सरं वातकुष्ठकण्डूविषव्रणान्।
निहन्ति श्वीहगुल्मार्शःश्लेष्मोदरशूलकृत्क्रिमीन्॥
अलर्ककुसुमं रुच्यं लघुदीपनपाचनं।
अरोचकप्रसेकार्शःकासश्वासनिवारणम्"॥
इति भावप्रकाशः॥
"दुष्टकर्दमसंस्पर्शाः कण्डूक्लेदान्वितान्तराः"।
अकुल्योऽलस मित्याङ्गः॥ इति वाभटः॥)
तत्पर्य्यायः। प्रतापसः २ राजार्कः ३ गणरूपी ४। इति रत्नमालामरौ॥ शूकराकारादृष्टपादतीक्ष्णदन्तस्पृशाक्षतिलोमजन्तुविशेषः। दंशनामासुरो भृगुशापात् अयं जन्तुर्भूत्वा कार्त्तवीर्यं भित्त्वा परशुरामदृष्टिपातात् शापमुक्तः पूर्व्वरूपो बभूव। इति महाभारते राजधर्म्मे॥
("ददर्श रामस्तं चापि क्षमिं शूकरसन्निभं।
अष्टपादं तीक्ष्णदंष्ट्रं सूचीभिरिव संवृतं॥
रोमभिः संनिरुद्धाङ्गमलर्कं नाम नामतः।
सोऽब्रवीदृहमासं प्राग्दंशो नाम महासुरः।
पुरा देवयुगे तात! भृगोस्तुल्यवया इव।
सोऽहं भृगोः सुदयितां भार्य्यामपहरं बलात्॥
महर्षेरभिशापेन क्षमिभूतोऽपतं भुवि"।
स्वनामख्यातो नृपतिः।
"ग्रैव्यः श्येनकपोतीये स्वमांसं पक्षिणे ददौ।
अलर्कश्चक्षुषी दत्वा जगाम गतिमुत्तमाम्"॥
इति रामायणे। स्वनामख्यातः काशिराजः, स हि वत्सराजस्य पुत्रः सन्नतेश्च पिता, यथा हरिवंशे,—
"वत्सपुत्रस्त्वलर्कस्तु सन्नतिस्तस्य चात्मजः।
अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसङ्गरः॥
षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च।
तस्यासीत् समहद्राज्यं रूपयौवनशालिनः"।)

अलले, व्य, पिशाचभाषायां सम्बोधनं। तत्पर्य्यायः। अले २ अलेले ३। इति शब्दरत्नावली॥

अलवालं, क्ली, (लवमालाति, ला + क, ततो नञ्समासः।) आलवालं। वृक्षमूले जलधारणार्थक्षुतालिः। चारमादा इति ख्यातः। इत्यमरटीकायां भरतादयः॥

अलवालकं, क्ली, (अलवाल एव, अलवाल + स्वार्थे कन्।) आलवालं। इति शब्दरत्नावली॥

अलसः, त्रि, (न लसति व्याप्रियते, लस + अच्।) आलस्ययुक्तः। आल्सा इति भाषा। तत्पर्य्यायः। मन्दः २ तुन्दपरिमृजः ३ आलस्यः ४ प्रीतकः ५ अनुद्यमः ६। इत्यमरः॥ प्रीतलः ७ कुण्ठः ८ मुखनिरीक्षकः ९। इति शब्दरत्नावली॥ (क्रियामन्दः। क्रियाजड़ः। अवश्यकर्त्तव्येषु अप्रवृत्तिशीलः। "अव्यवसायिनमलसं दैवपरं साहसाच्च परिहीनं। प्रभवेद्यं वृद्धपतिं नेच्छत्युपगूहितुं लक्ष्मीः"। इति हितोपदेशे।)

अलसः, पुं, (लस + अच्, ततो नञ्समासः।) वृक्षविशेषः। पादरोगभेदः। इति मेदिनी॥ पाँकुइ इति भाषा। तस्य निदानरूपे।
"क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुजान्वितौ।
दुष्टकर्दमसंस्पर्शादलसं तं विभावयेत्"॥
अलसं कादई इति लोके। अथ तस्य चिकित्सा।
"पादौ सिल्लारनालेन लेपनं त्वलसे हितं।
पटोलकुनटीनिम्बरोचनामरिचैस्तिलैः॥
क्षुद्राखरससिद्धेन कटुतैलेन लेपयेत्।
ततः कासीसकुनटीतिलचूर्णैर्विचूर्णयेत्"॥
अवधूलयेत्।
"करञ्जबीजं रजनी कासीसं पद्मकं मधु।
रोचना हरितालञ्च लेपोऽयमलसे हितः"॥
इति भावप्रकाशः॥ ("दुष्टकर्दमसंस्पर्शाः कण्डूक्लेदान्वितान्तराः। अकुल्योऽलसमित्याङ्गः"॥ इति वाभटः॥)

अलसकः, पुं, (न लस्यति अनेन, लस + करणे वुन्।) उदररोगविशेषः। इति माधवकरः॥ तस्य रूपं।
"कुक्षिरानह्यतेऽत्यर्थं प्रताम्येत् परिकूजति।
निरुद्धो मारुतश्चैव कुक्षावुपरि धावति॥
वातवर्च्चोनिरोधाश्च यस्यात्यर्थं भवेदपि।
तस्यालसकमाचष्टे ह्युपद्रारौ तु यस्य च"॥
तत्क्षान्तरे।
"प्रयाति नोर्द्धं नाधस्तादाहारो न च पच्यते।
आमाशयेऽलसीभूतस्तेन सोऽलसकः स्मृतः"॥
अस्य लक्षणं चिकित्सा च अजीर्णशब्दे द्रष्टव्या॥
(अलसकमुपदेक्ष्यामः। दुर्ब्बलस्याल्पाग्नेर्बद्धश्लेष्मणो वातमूत्रपुरीषवेगविधारिणः स्थिरगुरुबद्धरूक्ष-

घृतशुष्कान्नसेवितस्तदन्नपानमनिलप्रपीड़ितं श्लेष्मणा च विरुद्धमार्गमतिमात्रप्रलीनमलसत्वान्न बहिर्मुखी भवति। ततश्चर्द्धतीसारवर्च्चान्यामप्रदोषलिङ्गान्यभिदर्शयति अतिमात्राणि। अतिमात्रप्रदुष्टाश्च दोषाः प्रदुष्टामवहमार्गास्तिर्य्यगागच्छन्तः कदाचित् केवलमेवास्य शरीरं दण्डवत् स्तम्भयन्ति। ततस्तमलसकमसाध्यं ब्रुवते। विरुद्धाध्यशनाजीर्णाशनशीलिनः पुनरेव दोषमामविषमित्याचक्षते भिषजो विषसदृशलिङ्गत्वात्। तत्परमसाध्यमाशुकारित्वात् विरुद्धोपक्रमत्वाच्चेति। तत्र साध्यमामं प्रदुष्टमलसीभूतमुल्लेखयेत्। पाययित्वा सलवणमुष्णवारि। ततः स्वेदनवर्त्तिप्रणिधानाभ्यामुपाचरेदुपवासयेच्चैनम्। इति चरकः॥)

अलसा, स्त्री, (अलस+अच्, ततो नञ्समासः, स्त्रियां टाप्।) हंसपदीलता। इति मेदिनी॥ हंसपदीशब्देऽस्य गुणादयो ज्ञेयाः॥

अलसेक्षणा, स्त्री, (अलसे ईक्षणे यस्याः सा।) स्त्रीविशेषः। सा अलसवृत्तियुक्ता। इति हेमचन्द्रः॥

अलक्षणं, क्ली, (लक्षणमनुमापकं सुचिह्नं, विरोधे नञ्, नञ्समासः।) दुर्लक्षणं। मन्दचिह्नं। ("आचारात् धनमक्षय्यमाचारो हन्त्यलक्षणम्"। इति मनुः।) तद्विशिष्टे त्रि॥

अलक्ष्मीः, स्त्री, (न लक्ष्मीः, नञ्त्र विरोधे।) नरकदेवता। तत्पर्य्यायः। निर्ऋतिः २। इत्यमरः॥ कालकर्णी ३। इति शब्दरत्नावली॥ कालकर्णिका ४। इति जटाधरः॥ ज्येष्ठादेवी ५ इति पाद्मोत्तरखण्डे। तस्या विवरणं ज्येष्ठाशब्दे द्रष्टव्यं॥*॥ दीपान्वितामावास्यायां तस्याः पूजाविधिर्यथा। तत्र प्रदोषे आदौ आचारादलक्ष्मीपूजनं। इत्याचार्य्यचूड़ामणिप्रभृतयः॥ गोमयपुत्तलिकां निर्माय वामहस्तेन क्षत्पुष्पं गृहीत्वा ध्यायेत्।

"अलक्ष्मीं कृष्णवर्णां द्विभुजां कृष्णवस्त्रपरीधानां लौहाभरणभूषितां शूर्पराचन्दनचर्चितां गृहसम्मार्জ্জनीहस्तां गर्दभारूढां कलहप्रियां"। इति ध्यात्वा विमुखेन "ॐ अलक्ष्म्यै नमः" इत्यनेन निर्म्माल्येन कृष्णपुष्पेण संपूज्य प्रणमेत्।

"(ॐ)अलक्ष्मीर्त्वं कुरूपासि कुत्सितस्थानवासिनी। सुखरात्रौ मया दत्तां गृह्ण पूजाञ्च शाश्वतीं॥ दारिद्र्यकलहप्रिये देवि! त्वं धननाशिनी। याहि शूर्पोर्म्मले नित्यं स्थिरा तत्र भविष्यसि॥ यदि त्वं मे महाभागे प्रीता भवसि सर्व्वदा। पुत्रबन्धुकलत्रेषु कदाचिन्नागमिष्यसि॥ गच्छ त्वं मन्दिरं शूर्पोर्म्मेर्हीत्वा चाशुभं मम। सदाश्रयं परित्यज्य स्थिरा तत्र भविष्यसि"॥

ततः शूर्पवादेन सीमान्ते तां विसृजेत्।

इति कृत्यचन्द्रिका॥*॥ किञ्च.—

"एवं गते निशीथे तु नारी च सम्मार्জ্জनात्। अलक्ष्मीश्च बहिष्कार्य्या अमन्त्रञ्च यथाविधि"॥

इति कृत्यतत्त्वार्णवधृतब्रह्मपुराणं॥*॥

"एवं गते निशीथे तु जने निद्रार्द्रलोचने।
तावन्नगरनारीभिः सूर्पडिण्डिमवादनैः॥
निष्काश्यते प्रहृष्टाभिरलक्ष्मीः सम्मार्জ্জनात्"॥
इति निर्णयसिन्धौ मदनरत्नधृतभविष्यपुराणं॥

अलातं, क्ली, (ला+क्त, नञ्समासः।) अङ्गारः। इत्यमरः॥ (अर्द्धदग्धकाष्ठः।
"कुरुतेऽस्मिन्नमोघेऽपि निर्व्वाणालातलाघवम्"।
इति कुमारसम्भवे।)

अलाबुः, पुं, स्त्री, (न लभ्यते, न+लबि ऊर्ज्जित् गलोपश्च दृद्धिः।) लताविशेषः तत्फलञ्च। लाउ इति ख्याता। तत्पर्य्यायः। तुम्बः २ तुम्बकः ३ तुम्बा ४ तुम्बी ५ पिण्डफला ६ महाफला ७ अलाबुः ८ एलाबुः ९ लाबुः १० लाबुका ११। इत्यमरः तट्टीका च॥ तुम्बिका १२ तुम्बिः १३ अलाबुः १४। इति शब्दरत्नावली॥ अस्या गुणाः।
"अलाबुः कथिता तुम्बी द्विधा दीर्घा च वर्त्तुला मिष्टं तुम्बीफलं हृद्यं पित्तश्लेष्मापहं गुरु॥ रुच्यं रुचिकरं प्रोक्तं धातुपुष्टिविवर्द्धनं"।
इति भावप्रकाशः॥ भेदकत्वं कफकारित्वं। गुरुपाकित्वं। हिमत्वं। पित्तनाशित्वञ्च। तन्नाड़ीगुणाः। गुरुत्वं। मधुरत्वं॥ मलभेदकत्वं। वातश्लेष्मकारित्वं। रूक्षत्वं। शीतलत्वं। पित्तनाशित्वञ्च। इति राजवल्लभः॥
("वर्षाभेदीन्यलाबूनि रूक्षाशीतगुरूणि च"।
इति चरकश्च।
"अलाबुर्भिन्नविट्का तु रूक्षागुर्व्वतिशीतला"।
इति च सुश्रुतः॥)

अलारं, क्ली, (अरार्द्यते, ऋ+यङ्लुक्+अच् रस्य लः।) कवाटं। इति शब्दरत्नावली॥

अलिः, पुं, स्त्री, (अलति दंशे समर्थो भवति यः, सः, अल+इन्।) भ्रमरः।
("अलिपङ्क्तिरनेकशस्त्रया,
गुणकृत्ये धनुषो नियोजिता"।
इति कुमारसम्भवे।
"अनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय"।
इति रघुवंशे।) वृश्चिकः। इत्यमरः॥ काकः। कोकिलः। इति शब्दरत्नावली॥ मदिरा। इति मेदिनी॥ (वृश्चिकराशिः।)

अलिकं, क्ली, (अल्यते भूष्यते, अल+कर्म्मणि इकन्।) ललाटं। इत्यमरः॥

अलिकुलसङ्कुलः, पुं, (अलिकुलेन सङ्कुलः व्याप्तः, तृतीयातत्पुरुषः।) कुञ्जकवृक्षः। इति राजनिर्घण्टः॥

अलिगर्द्दः, पुं, (अलिरिव वृश्चिक इव गर्द्धयति, गर्द्ध+अच्।) जलसर्पः। आलाध इति ख्यातः। इति शब्दरत्नावली॥

अलिजिह्वा, स्त्री, (अलिरिव क्षुद्रा जिह्वा।) जिह्वोपरि क्षुद्रजिह्वा। आलजिव इति ख्याता। इति शब्दरत्नावली॥

अलिजिह्विका, स्त्री, (अलिजिह्वा एव स्वार्थे कन्; टाप्।) अलिजिह्वा। इति शब्दरत्नावली॥

अलिञ्जरः, पुं, (अल+इन, अलिं सामर्थ्यं जरयति जृणाति वा, अलि+जृ+अच्, पृषोदरादित्वात् साधुः।) मृदादिनिर्म्मितजलाधारविशेषः। जाला इति ख्यातः। इत्यमरः॥
("उदक्रान्तमुपनीय मत्स्यं वैवस्वतो मनुः।
अलिञ्जरे प्राक्षिपत्तं चन्द्रांशुसदृशप्रभं"॥
इति महाभारते।)

अलिदूर्व्वा, स्त्री, (अलिरिवाकारेण दूर्व्वा।) माषादूर्व्वा। इति राजनिर्घण्टः॥

अलिन्दः, पुं, (अलते भूष्यते, अल+कर्म्मणि बाहुलकात् किन्दच्।) बहिर्द्वारसंलग्नचतुरस्रक्षत्रिमभूमिः। तत्पर्य्यायः। प्रघाणः २ प्रघणः ३ बहिर्द्वारप्रकोष्ठः ४ आलिन्दः ५। इत्यमरः॥ गृहद्वारपिण्डकः। अलिन्दः नास्तीति अलञ् इन्द्र कृसादिः। यस्यामलिन्देषु न चक्रुरेवेति माघः। स्वार्थे ण्वे आलिन्दो दीर्घोदिरपि।
"गृहैकदेशे आलिन्दः प्रघाणःप्रघणस्तथा"।
इत्यमरदत्तः। अथ पिण्डक आलिन्द इति हड्डुः। इह तूभयमेव श्लेषादिति साञ्जः।
इत्यमरटीकायां भरतः॥*॥ अन्यच्च।
"प्रघाणप्रघणालिन्दा द्वारबाह्यप्रकोष्ठके।
गृहाभ्यन्तरशय्यार्थपिण्डिकायामपि त्रयं॥
आलिन्दः स्यादलिन्दोऽपि स्यादलिन्दक इत्यपि"।
इति शब्दरत्नावली॥
("शुकाङ्गनीलोपलनिर्म्मितानां
लिप्तेषु भासा गृहदेहलीनां।
यस्यामलिन्देषु न चक्रुरेव
मुग्धाङ्गना गोमयगोमुखानि॥"
इति माघः।)

अलिपक्वः, पुं, स्त्री, (कुत्सितवर्णेन लिप्यते, लिप+बाहुलकात् कर्म्मणि वुन्।) भ्रमरः। कोकिलः। कुक्कुरः। इति मेदिनी॥ (वृश्चिकः।)

अलिपत्रिका, स्त्री, (अलिर्वृश्चिक इव पत्रमस्याः, कपि अत इत्त्वम्।) वृश्चिकाख्यक्षुपः। इति राजनिर्घण्टः॥

अलिपर्णी, स्त्री, (अलिरिव पर्णमस्याः, ङीप्।) वृश्चिकालीवृक्षः। इति राजनिर्घण्टः॥

अलिप्रियं, क्ली, (अलीनां प्रियं षष्ठीतत्पुरुषः।) रक्तोत्पलं। रक्तपद्मं। इति त्रिकाण्डशेषः॥

अलिप्रिया, स्त्री, (अलीनां प्रिया, षष्ठीतत्पुरुषः।) पाटलावृक्षः। इति रत्नमाला॥

अलिमकः, पुं, (अलिरिव मक्कते, मक्क+अच्, पृषोदरादित्वात्लोपः।) भेकः। कोकिलः। भ्रमरः। पद्मकेशरः। मधूकवृक्षः। इति मेदिनी॥

अलिमोदा, स्त्री, (अलीन् मोदयति मुद्+णिच्+अच्।) गणिकारीवृक्षः। इति राजनिर्घण्टः॥

अलिम्बकः, पुं, (न+लिपि+वुन्) पद्मकेशरः। भेकः। भ्रमरः। कोकिलः। इति शब्दरत्नावली॥ (कुक्कुरः। मधूकवृक्षः।)

अलिवाहिनी, स्त्री, (अलिं वाहयति गन्धेन, वह+णिच्+णिनि+ङीप्।) केविकापुष्पं। इति राजनिर्घण्टः॥

अली, [न्] पुं, (अलं वृश्चिकपुच्छस्यकण्टकं विद्यतेऽस्य इनि।) भ्रमरः।

("मलिनिमालिनि माधवयोषितम्"। इति माघः।) दृष्टिकः। इति मेदिनी॥

अलीकं, क्ली, (अल+ईकन्।) अप्रियं। ("तद्यथा स महाराजो नालीकमधिगच्छति"। इति रामायणे।) मिथ्या। इत्यमरः॥ ("ज्ञातेऽलीकनिमीलिते नयनयोः"। इति अमरशतके।) स्वर्गः। इति मेदिनी॥ ललाटं। इति हेमचन्द्रः॥

अलीकं, त्रि, (अल+ईकन्।) मिथ्या। अप्रियं। अल्पं। इति शब्दरत्नावली॥

अलीकमत्स्यः, पुं, अङ्गारखिन्नतिलतैलभृष्टमाषपिष्टं। तच्च प्रमाणं राजनिर्घण्टे यथा।

"माषपिष्टिकया लिप्त्वानागवल्लीदलैर्महत्।
तत्तु संस्वेदयेदुल्क्या स्थाल्यामङ्गारकोपरि॥
ततो निष्काशितं खण्डं तिलतैलेन भर्जयेत्।
अलीकमत्स्य उक्तोऽयं प्रकारः पाकपण्डितैः॥
तं दन्ताकभटिचेण वास्तूकेन च भक्षयेत्॥"

अलुः, स्त्री, (अल+उन्।) आलुः। क्षुद्रकलसी। इत्यमरटीकायां रमानाथः॥

अलुब्धः, त्रि, (लुभ+क्तः, नञ्समासः।) लोभरहितः। यथा मनुः।

"एकोऽप्यलुब्धः साक्षी स्यात् बह्वः शुचोऽपि न स्त्रियः। स्त्रीबुद्धेरस्थिरत्वात्तु दोषैरन्येऽपि ये वृताः"॥

"एकोऽलुब्धस्तु साक्षी स्यादिति कुल्लूकभट्टधृतपाठः।" इति व्यवहारतत्त्वं॥

("अलुब्धैः स्निग्धैः प्रबुद्धैस्सामात्यैः परिवृतः'। इति कादम्बरी।)

अले, व्य, पिशाचभाषया सम्बोधनं। इति शब्दरत्नावली॥

अलेले, व्य, पिशाचभाषया सम्बोधनं। इति शब्दरत्नावली॥

अलोभः, पुं, (न लोभः, अभावे नञ्।) लोभाभावः। यथा,—

"इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः"॥

इति महाभारतं॥

अलोभी, [न्] त्रि, (लोभोऽस्यास्य इति लोभी, न लोभी इति नञ्समासः।) लोभशून्यव्यक्तिः। नास्ति लोभो यस्य इति बह्व्रीहिसमासादिन्प्रत्ययनिष्पन्नः॥

अलोहितं, क्ली, (न लोहितं, नास्ति लोहितं यस्मात् इति वा।) रक्तपद्मं। इति रत्नमाला॥

अलौकिकः, त्रि, (लोके विदितः, लोक+ठक् ततो नञ्समासः।) लौकिकप्रत्यक्षाविषयः। अमा, नुषिकः। लोकातीतः। यथा,—

"अलौकिकत्वादमरः स्वकोषे
न यानि नामानि समुल्लिलेख।
विलोक्य तैरप्यधुना प्रचार-
मयं प्रयत्नः पुरुषोत्तमस्य"॥

इति चिकाण्डशेषद्वितीयश्लोकः॥

("उपसंहर विश्वात्मन्नदोरूपमलौकिकम्"। इति भागवतपुराणम्।)

अल्पं, त्रि, (अल्+प।) किञ्चित्। तत्पर्य्यायः। ईषत् २ मनाक् ३ स्तोकं ४।

("अल्पोऽप्येवं महान् वापि विक्रयस्तावदेव सः"। इति मनुः।) खल्लकं ५ श्लक्ष्णं ६ दर्भं ७ क्षुद्रं ८ तनुः ९ तनूः १० त्रुटिः ११ त्रुटी १२ माषा १३ लवः १४ लेशः १५ कणः १६ कणी १७ कणिका १८ अणुः १९ सूक्ष्मं २०। इत्यमरः॥ क्षुल्लं २१ क्षुल्लकं २२ खल्लं २३ कणा २४। इति शब्दरत्नावली। (अतिसामान्यः।

"अल्पस्य हेतोर्बहु हातुमिच्छन्
विचारमूढः प्रतिभासि मे त्वम्"।

इति रघुवंशे। संक्षिप्तं। अदीर्घं।

"अनन्तपारं किल शब्दशास्त्रं,
स्वल्पं तथायुर्बहवश्च विघ्नाः"।

इति पञ्चतन्त्रम्।)

अल्पकः, पुं, (अल्प एव, अल्प+स्वार्थे कन्।) यवासवृक्षः। इति राजनिर्घण्टः॥ अस्य गुणाः॥

"यासः खादुः सरस्तिक्तस्तुवरः शीतलो लघुः।
कफमेदोमदभ्रान्तिपित्तास्रक्षुष्कासजित्॥
व्रणाविसर्पवातास्रवमिज्वरहरः स्मृतः।
यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा"॥

इति भावप्रकाशः।) (खल्पपरिमितः। किञ्चित्।

"यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः।
तदात्वे चाल्पिकां पीडां तदा सन्धिं समाश्रयेत्"॥

इति मनुः।)

अल्पकेशी, स्त्री, (अल्पाः केशाइव पत्रमस्याः सा।) भूतकेशीवृक्षः। इति रत्नमाला॥

अल्पगन्धं, क्ली (अल्पो गन्धो यस्य तत्।) रक्तकेरवं। इति रत्नमाला॥

अल्पतनुः, त्रि, (अल्पा क्षुद्रापरिमाणा तनुर्यस्य।) खर्व्वः। दुर्ब्बलः। अल्पास्थियुक्तः। क्षुद्रदेहवान् तत्पर्य्यायः। एभिः २। इत्यमरः॥

अल्पपत्रः, पुं, (अल्पं पत्रं यस्य सः।) क्षुद्रपत्रतुलसी। इति रत्नमाला॥

अल्पपद्मं, क्ली, (अल्पमसम्पूर्णं पद्मं।) रक्तपद्मं। इति रत्नमाला॥

अल्पप्रमाणकः, पुं, (अल्पं प्रमाणमस्य, वा कन्।) चेलानं। इति रत्नमाला॥ चेलो चेला तरमूज इति ख्यातः। खरमूज इति केचित्।

अल्पमारिषः, पुं, (अल्पः क्षुद्रः मारिषः नटिया इति ख्यातः शाकः, कर्म्मधारयः।) शाकविशेषः। क्षुद्रनटिया इति ख्यातः। तत्पर्य्यायः तण्डुलीयः २। इत्यमरः॥ (तण्डुलीयशब्देऽस्य गुणा ज्ञेयाः।)

अल्पसरः, [स्] क्ली, (अल्पं क्षुद्रं सरः, कर्म्मधारयः।) क्षुद्रसरोवरः। डोबा गेड़ इति भाषा। तत्पर्य्यायः। वेशन्तः २ पल्वलं ३। इत्यमरः॥

अल्पायुः, [स्] पुं, (अल्पं संक्षिप्तं आयुर्जीवनकालो यस्य सः।) छागः। इति त्रिकाण्डशेषः॥ अपि-रजीविते त्रि॥ (अदीर्घजीवी।

"दुराचारो हि पुरुषो लोके भवति निन्दितः।
दुःखभागी च सततं व्याधितोऽल्पायुरेव च"।

इति मनुः।)

अल्पिष्ठः, त्रि, (अतिशयेन अल्पः, अल्प+इष्ठन्। अत्यल्पं। इत्यमरः॥ [अत्यल्पं। इत्यमरः॥

अल्पीयः, [स्] (अतिशयेन अल्पः, अल्प ईयसुन्।)

अल्लः, पुं, (अल्+क।)
अल्ला, स्त्री, (अल+क, स्त्रियां टाप्।) } परमेश्वरः।

एतन्नाम्ना यवना उपासन्ते। यथा।"ॐ अल्लां इल्ले मित्रावरुणो दिव्यानि धत्ते। इल्ले वरुणो राजा पुनर्ददुः। ह्यामि मित्रो इल्लां इल्लेति इल्लाल्लां वरुणो मित्रो तेजकामाः। होवारमिन्द्रो होतारमिन्द्रो माहासुरिन्द्राः। अल्लो ज्येष्ठं श्रेष्ठं परमं पूर्णं ब्रह्माणमल्लां अल्लोरसुर महमदरकं वरस्य अल्लो अल्लां आदल्लावुकमेककं। अल्लां वुकं। निखातकं। अल्लो यज्ञेन ऊतऊतयः अल्ला सूर्य्यचन्द्रसर्व्वनक्षत्राः अल्लो ऋषीणां सदिथा इन्द्राय पूर्व्वे मायापरमन्त अन्तरिक्षाः। अल्लो पृथिव्या अन्तरिक्षं विश्वरूपं दिव्यानि धत्ते इल्लेले वरुणो राजा पुनर्ददुः। इल्लाकवर इल्लाकवर इल्लल्लेति इल्लाल्लाः इल्ला इल्लल्ला अनादिस्वरूपा अथर्व्वणी शाखां ॐ क्रीं जगान् पशून् सिद्धान् जलचरान् अदृष्टं कुरु कुरु फट्। असुरसंहारिणीं ॐ अल्लो रसुरमहमदरकं वरस्य अल्लो अल्लां इल्लल्लेति इल्लल्लः"। इत्यथर्व्ववेदसूक्तं।

अल्ला, स्त्री, (अल्यते इत्यल्, क्विप्, अल्ले भूषायै लाति गृह्णाति, ला+क।) गायत्रीमाता। इति वोपदेवः॥ (अथर्व्ववेदे अल्लोपनिषदादिख्यातो यवनोपास्यः परमेश्वरः।)

अव रक्षणे। (यथायथं सक्-अक्-च, भ्वादिपरं-सेट्।) गतौ। कान्तौ। स्पृहायामिति यावत्। प्रीतौ। तृप्तौ। द्युतौ। शोभायामिति यावत्। श्रुतौ। आकर्णने इति यावत्। प्राप्तौ। श्लेषे। आलिङ्गने इति यावत्। अर्थने। याच्ञायामिति यावत्। वेशे। प्रवेशे इति यावत्। भावे। सत्तायामिति यावत्। वृद्धौ। ग्रहे। आदाने इति यावत्। बधे। सामर्थ्ये। अवगमे। तृप्तौ। करणे इति यावत्। कामे। इच्छोत्पादने इति यावत्। (इति वोपदेवीयकविकल्पद्रुमः तट्टीका च॥) "अव रक्षे गतौ कान्तौ प्रीतौ तृप्तौ द्युतौ स्तुतौ। प्राप्तौ श्लेषेऽर्थने वेशे भागे वृद्धौ ग्रहे बधे। सामर्थ्येऽवगमे कामे तृप्तौ"। ऊनविंशतिरर्थाः। कान्तिरिच्छा। द्युतिः शोभा। काम इति अन्नाद्युत्पत्तेरिच्छोत्पादना इति भेदः। श्लेष आलिङ्गनं। सामर्थ्यं शक्तिः। रक्षणे प्रसिद्धोऽयं। प्रीतौ तु। "न मामवति सद्भोपा रत्नसूरपि मेदिनी"। इति रघुः॥ अन्यत्र विरलप्रयोगः। केचित्तु स्तुति-भाग-स्नेह-काम-तृतीर्न पठित्वा क्रिया-श्रवण-दहन-भावनाङ्गः। अवति। इति दुर्गादासः॥

अव, व्य, (अव+अच्।) उपसर्गविशेषः। अस्यार्थः। निश्चयः। असाकल्यं। अनादरः। इति दुर्गादासः॥ आलम्बनं। विज्ञापनं। व्यापनं। शुद्धिः। अल्पं। परिभवः। नियोगः। पालनं। इति शब्दरत्नावली॥

अवकटं, क्ली, (अव + स्वार्थे कटच्।) वैरूप्यं। अवात् कुटारच्च वैरूप्ये चकारात् कटच्च। इति गोयीचन्द्रतत्तत्त्वं॥

अवकरः, पुं, (अव + कृ + अप्।) सम्मार्ज्जन्यादिनिःक्षिप्तधूल्यादिः। जञ्जाल इति ख्यातः। तत्पर्य्यायः। सङ्करः २। इत्यमरः॥ अवस्करः ३। इत्यमरटीकायां मथुरानाथः॥ सङ्कारः ४। इति शब्दरत्नावली॥ ("अवकरनिकरं विकिरति तत् किं शुकशाकुरिव हंसः"। इति नीतिशतके।)

अवकलितः त्रि, (अव + कल + क्त।) दृष्टः। इति धरणी॥

अवकाशः, पुं, (अव + काश + घञ्।) अवस्थानदेशः। फाँक इति यावत्। अवसरः। व्याप्तिरहितस्थानं। इत्यन्तरशब्दटीकायां भरतः॥

("न सूक्ष्मतन्तोरपि तावकस्य
तत्रावकाशो भवतः कथं स्यात्"।

इति रत्नावलीनाटिकायाम्।)

अपि च।

"एवञ्च षड्ग्रीत्यादिष्वप्यवकाशमलभमानं"। इति तिथ्यादितत्त्वं॥ अन्यच्च।

"अवकाशेषु चोक्तेषु नदीतीरेषु चैव हि।
विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा"॥

इति मानवे ३ अध्याये २०७ श्लोकः॥ (प्रशस्तप्रदेशः।

"अवकाशो विविक्तोऽयं महानद्योः समागमे"। इति रामायणे। द्रव्यादिसञ्चयस्थानं। अवस्थानं। स्थितिः।

"अवकाशं किलोदन्वान् रामायार्थयितो ददौ"। इति रघुवंशे।)

अवकीर्णः, त्रि, (अव + कॄ + क्त।) अवचूर्णितः। तत्पर्य्यायः। अवध्वस्तः २। इति हेमचन्द्रः॥ (विस्तृतः। प्रस्तृतः। विक्षिप्तः।

"भुक्तानि यौवनसुखानि यशोऽवकीर्णे
राज्ये स्थितं स्थिरधिया चरितं तपोऽपि"।

इति नागानन्दे। उज्झितः। अतिक्रान्तः।)

अवकीर्णी, [न्] त्रि, (अवकीर्णगमनेन अव + कॄ + क्त + इनि, अवकीर्णं भ्रष्टं व्रतमिति शेषः, अस्यास्तीति।) भ्रष्टव्रतः। स्त्रीसंसर्गादिना त्यक्तनियमयुक्तः। इत्यमरजटाधरौ।

("कुशीलवोऽवकीर्णी च दम्भोपपतिरेव च।
पौनर्भवश्च काण्डश्च यस्य चोपपतिर्गृहे"॥

इति मनुः।)

अवकुटारं, क्ली, (अव + स्वार्थे अतिशये वा कुटारच्।) वैरूप्यं। इति संक्षिप्तसारव्याकरणस्य परिशिष्टं॥ (अवाचीनत्वं। वैपरीत्यं।)

अवक्षुरः, त्रि, (अव + क्षुर् + क्त।) बहिष्कृतः। दूरीकृतः। तत्पर्य्यायः। निष्काशितः २। इत्यमरः॥ निःसारितः ३। इति जटाधरः॥ निर्गमितः ४। इति शब्दरत्नावली॥ (बहिष्कारितः। निर्गलितः। आक्षुरः।

"एकाकिनापि हि मया रभसावक्षुरनिस्त्रिंशदीधितिसटाभरभासुरेण"।

इति नागानन्दे। नीचः। निकृष्टः।

"प्रतिकर्त्तुं प्रकृष्टस्य नावक्षुरेण युज्यते"।

इति रामायणे। हीनजातीयः॥ नीचजातीयः। अपकृष्टवर्णः।

"चान्द्रायणं चरेत् सर्व्वानवक्षुरान् निहन्य तु"। इति याज्ञवल्क्यः। गृहादिसम्मार्ज्जकोदकवाहादिः कर्म्मकरः।

"पाणौ देयोऽवक्षुरस्य षड्भक्तस्य वेतनम्।
यागमासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः"॥

इति मनुः।)

अवकेशी, [न्] त्रि, (अवक्षुतं कं सुखं यस्मात्, अवकं फलशून्यतामीशितुं शीलमस्य, अवक + ईश + णिनि।) फलकालेऽप्यनुत्पन्नफलकवृक्षादिः। इत्यमरः॥ तत्पर्य्यायः। वन्ध्यः २ अफलः ३॥

अवक्तव्यं, त्रि, (न वक्तव्यं, नञ्समासः।) वचनायोग्यं। अकथनीयं। न वक्तव्यं अवक्तव्यमिति नञ्समासनिष्पन्नं। यथा,—

"असम्भाव्यं न वक्तव्यं प्रत्यक्षमपि दृश्यते"।

इति चाणक्यः॥

अवक्रयः, पुं, (अवक्रीयते प्रतिरूपदानेन स्वाधीनं क्रियतेऽनेन, अव + क्री + अच्।) क्रयसाधनद्रव्यं। मूल्यं। इत्यमरः॥ (राजग्राह्यं द्रव्यं। वणिग्भिः शुल्कस्थाने प्रतिभाण्डमधिपतये देयं।

"विक्रयावक्रयाधानयाचितेषु प्रधान् दश"।

इति याज्ञवल्क्यः। एतावत्कालमुपयोगार्थं भाण्डवस्त्राश्वादिभ्यो दीयते मह्यं च युष्माभिरेतावद्धनं देयमित्येवंविधं भाटकं। भाड़ा इति भाषा।)

अवगणितं, त्रि, (अव + गण + कर्म्मणि क्त।) अवज्ञातं। अवमानितं। इत्यमरः॥ (तिरस्कृतं।

"आर्य्यासेनासखाप्योऽयवगणितरुजः कानने चन्दनानां, अस्मिन् गायन्तु रागादुरगयुवतयः कीर्त्तिमेतां तवैव"। इति नागानन्दे।)

अवगण्डः, पुं, (अव + गम + ड, डकारस्य नेत्वम्।) गण्डस्यावयवः। वयस्फोड़ा इति यावत्। तत्पर्य्यायः। वरण्डः २। इति त्रिकाण्डशेषः॥

अवगतं, त्रि, (अव + गम + क्त।) ज्ञातं। तत्पर्य्यायः। बुद्धं २ बुधितं ३ मनितं ४ विदितं ५ प्रतिपन्नं ६ अवसितं ७। इत्यमरः॥ प्रमितं ८ मतं ९ प्रतीतं १०। इति जटाधरः॥

अवगतिः, स्त्री, (अव + गम + भावे क्तिन्।) ज्ञानसामान्यं। इति जटाधरः॥ (बोधमात्रं। अप गमः। अपसरणम्।)

अवगधः, त्रि, (अव + गा + कर्त्तरि ध, निपातनात् ह्रस्वः।) प्रातःस्नातः। प्रातःस्नायी। इति सिद्धान्तकौमुदी॥

अवगादः, पुं, (अव + गद + घञ्।) जलद्रोणी। नौकाजलसेचनकाष्ठपात्रं। इति हलायुधः॥

अवगाहः, पुं, (अव + गाह + घञ्।) स्नानं। स्नानमहं। इति वोपदेवः॥

("प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षमवारिसञ्चयः"।

इति ऋतुसंहारः।)

अवगाहनं, क्ली, (अव + गाह + भावे ल्युट्।) स्नानकरणं। तत्पर्य्यायः। अवगाहः २ वगाहः ३ मज्जनं ४ ("कन्दर्पबाणानलैरुग्रधामावगाहनाय विधिना रम्यं सरो निर्म्मितम्"। इति शृङ्गारतिलके।) निमज्जनं ५। डुब दिया नाओया इति भाषा। शिरःस्नानं। अम्भसि मज्जनं। यथा।

अवगाहनन्तु चक्षुःकर्णनासिकामङ्गुलीभिराच्छाद्य कुर्य्यात्।

"अङ्गुलीभिः पिधायैवं श्रोत्रदृङ्नासिकामुखं।
निमज्जेत प्रतिस्रोतस्त्रिः पठेदघमर्षणं"॥

इति समुद्रकरधृतात्। अत्रानुद्धृते वारत्रयमेवावगाहनं।

"नाभिमात्रजले गत्वा कृत्वा केशान् द्विधा द्विजः।
निरुध्य कर्णौ नासाञ्च त्रिःकृत्वो मज्जनं ततः"॥

इति वामनपुराणात्। इत्याह्निकाचारतत्त्वं॥ अन्यत् स्नानशब्दे द्रष्टव्यं॥*॥ आब्दीयब्राह्मणस्य आद्धकर्त्तुरपि अवगाहनस्नानकर्त्तव्यत्वं। यथा गोभिलः। "स्नातान् शुचीन् आचान्तान्" इत्यादि। स्नातान् अवगाहितान् न तु मन्त्रादिस्नातान्। स्वयमपि सूतकादिरहितः स्नातः। इति आद्धतत्त्वं॥

अवगीतं, क्ली, (अव + गै + क्त।) निर्व्वादः। लोकापवादः। इति विश्वमेदिन्यौ॥ (गीतादिना निन्दाख्यापनम्। असाधुगीतं। अशोभनगानं।)

अवगीतः, त्रि, (अव + गै + क्त।) ख्यातगर्हणः। निन्दितः। इत्यमरः॥ ("विधुरं किमतः परं परैरवगीतां गमिते दशामिमाम्"। इति भारविः।) दृष्टः। इति मेदिनी॥ मुञ्जटेष्टः। इति विश्वः॥

अवगुण्ठनं, क्ली, (अव + गुण्ठ + ल्युट्।) योषानानावरकसरन्ध्रवस्त्रं। स्त्रीमुखाच्छादनवस्त्रं। घोमटा इति ख्याता। इति शब्दरत्नावली॥ मुद्राविशेषः। ("अवगुण्ठनसंवीता कुलजाभिसरेद्यदि"। इति साहित्यदर्पणे। "जादे! मुञ्जत्तयं मा लज्ज, अवगुण्ठणं दाव दे अवगुण्ठणम्"। इति शाकुन्तले।) मुद्राविशेषः।

तथा च तन्त्रसारे।

"सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्ज्जनी।
अवगुण्ठनमुद्रेयमभितो भ्रामिता मता"॥

धूल्यादिभक्षणं॥

अवगुण्ठिका, स्त्री, (अवगुण्ठयति आवृणोति, अव + गुण्ठ + ण्वुल्, स्त्रीत्वात् टापि अत इत्वम्।) अवगुण्ठनं। स्त्रीमुखावरकवस्त्रं। इति शब्दरत्नावली॥

अवगुण्ठितं, त्रि, (अव + गुण्ठ + क्त।) चूर्णितं। इति त्रिकाण्डशेषः॥ गुँड़ा करा इति भाषा।

अवगोरणं, क्ली, (अव + गुर उद्यमे + ल्युट्।) ताड़नार्थंदण्डादीनामुद्यम इति ब्राह्मणं॥ मारिवार निमित्ते ठेङ्गा उठान इति भाषा। यथा प्रायश्चित्तविवेके। "दण्डनिपातप्रायश्चित्तेनैव गुरुणा तन्नान्तरीयकावगोरणप्रायश्चित्तमपि सम्पद्यतइत्युक्तं। ननु दण्डनिपातप्रायश्चित्तात् तदन्तः-

पातिनोऽवगोरणप्रायश्चित्तस्य कथं सिद्धिः। तथाहि मनुः।
अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने। अवगूर्य्य ब्राह्मणताड़नार्थं दण्डमुद्यम्य शृतयातनाजनकं यत् पापमुत्पादितं तत्क्षयकामः कृच्छ्रप्राजापत्यव्रतं चरेत्। तदुक्तं संयुधिकरणे। ग्रंथोः प्रजापतेः प्रार्थनया देवैर्ब्राह्मणावगोरणफलत्वेन शृतयातनाभिहिता। तथा च श्रुतिः। ग्रंथुः प्रजापतिः प्रजाविनेता प्रजाहिते रतस्य देवानां हविर्वहन् व्याग्निर्घोऽयाचत। देवास्त्ववगोरणे शृतयातनास्त्वित्यग्निर्घोऽददेतेति। ब्राह्मणादीपिकादौ दर्शपौर्णमासप्रकरणे। देवा वै ग्रंथुं वाईस्पत्यमब्रुवन् हव्यं नो वक्षेति किं मे प्रजाया इति तेऽब्रुवन् यो ब्राह्मणायावगुरेत्तं शृतेन यातयेत् यो निहन्यात् तं सहस्रेण यो लोहितमकरोत् यावतः पांसून् व्यनक्ति तावतः परिवत्सरान् स स्वर्गात्प्रच्यवेत। तस्माद् ब्राह्मणान् नावगुरेत् न हन्यात् न लोहितं कुर्य्यात् इति"। इतिहासात्मकं ब्राह्मणञ्च। इति प्रायश्चित्ततत्त्वं॥

अवग्रहः, पुं, (अव + ग्रह + घञ्।) दन्तिरोधः। (अनावृष्टिः।
"दन्तिर्भवति ग्रस्यानामवग्रहविशोषिताम्"।
"नभोनभस्ययोर्दन्तिमवग्रह इवान्तरे"॥
इति रघुवंशे।) प्रतिबन्धकः। हस्तिललाटं। इति मेदिनी॥ गजसमूहः। इति हारावली॥ स्वभावः।
इति चिकाण्डशेषः॥ (यदुक्तं,—
"तौ स्थास्यतस्ते रूपतेर्निदेशे
परस्परावग्रहनिर्विकारौ"।
इति माघविकाग्निमित्रनाटकम्।) ज्ञानविशेषः। इति हेमचन्द्रः॥ ग्रापः। इत्यमरटीकायां भरतादयः॥ (ग्रहणं। स्वीकारः। हरणं। अपसारणं। निरोधः। अवरोधः।
"स रोचयामास परेण बन्धं
प्रसह्य रक्षोभिरवग्रहञ्च"।
इति रामायणे। अवान्तरपदसंज्ञां सूचयितुं पदपाठकाले किञ्चित्कालमवसानम्। अनादरः। निन्दासूचकवाक्यप्रयोगः।)

अवग्रहणं, क्ली, (अव + ग्रह + भावे ल्युट्।) प्रतिरोधः। अनादरः। इति मेदिनी॥

अवग्राहः, पुं, (अव + ग्रह + घञ्।) ग्रहदोषादिजन्यहस्तिव्याघातः। शुको इति भाषा। तत्पर्य्यायः। हस्तिविघातः २ अवग्रहः ३। इत्यमरः॥ हस्तिललाटं। ग्रापः। इति तट्टीका॥ (यथा,—
"अवग्राहस्ते भूयात्"।)

अवघट्टः, पुं, (अव + घट्ट + आधारे घञ्।) भूरन्ध्रं। गर्त्तः। इति त्रिकाण्डशेषः॥

अवघातः, पुं, (अव + हन् + घञ्।) आघातविशेषः। तण्डुलादिकण्डनं। इति हेमचन्द्रः॥ काँड़ान यस्य प्रसिद्धिः। यथा। चरुविधौ विद्याकरवाजपेयी। ग्राख्यावधारणवेलायां हि यच्च प्रयोजनाभावादिनिश्चयस्तच्चैव तदुपादानादिलोपः ग्राख्यार्थः। यथा क्षणालेऽवघातादिलोपः। यच्च तदनुष्ठानवेलायामेव पुरुषदोषेण प्रयोजनाभावो ज्ञायते तदा प्राक् तन्निश्चयाच्छास्त्रप्रापितः पदार्थो नियमापूर्व्वमाचार्थमनुष्ठेयमेव। अतएव प्रक्षतावपि आलस्यादिना व्रीह्यादिस्थाने तण्डुलादिषु ग्रहीतेष्वाघातादि समाचरन्ति याज्ञिकाः।
"घाते न्यूने तथा छिन्ने साम्नाय्ये मान्त्रिके तथा।
यज्ञे मन्त्राः प्रयोक्तव्या मन्त्रा यज्ञार्थसाधकाः"॥
साम्नाय्ये हविषि मान्त्रिके मन्त्रसाध्ये अवघातादौ तत्काले मन्त्रपाठाभावेऽपि मन्त्राः प्रयोक्तव्याः। इति शुद्धितत्त्वं॥ (अपमृत्युः)॥

अवचस्करः, त्रि, अवचनस्यः। कथार अवाध्य इति भाषा। न वचः करोतीत्यर्थे वचःशब्दपूर्व्वकक्षधातोः टप्रत्ययेन निष्पन्नः॥

अवचूर्णितं, त्रि, (अव + चूर्ण + कर्म्मणि क्त।) चूर्णीकृतद्रव्यं। गुँड़ा करा इति भाषा। तत्पर्य्यायः। अवध्वस्तः २ अपध्वस्तः ३। इत्यमरः तट्टीका च॥

अवचूलः, पुं, (अवनता चूड़ा यस्य, वा डस्य लः।) ध्वजाग्रवद्राधोमुखवस्त्रं। इति हेमचन्द्रः॥

अवचूलकं, क्ली, (अवचूलमिव इवार्थे कन्, संज्ञायां वा कन्।) चामरं। इति त्रिकाण्डशेषः॥

अवच्छिन्नं, त्रि, (अव + छिद् + क्त।) अवच्छेदकतानिरूपकं। विशिष्टं। इति न्यायभाषा। अवच्छेदाश्रयः। यथा। प्रतियोग्यसमानाधिकरणयत्सामानाधिकरण्यात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यव्याप्तिः। इति सिद्धान्तलक्षणचिन्तामणिः॥
("जलाश्रये महाकाशस्तदवच्छिन्नमेव हि।
बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णमथापरम्॥
साभासबुद्धेः कर्त्तृत्वमवच्छिन्ने विकारिणि"।
इति अध्यात्मरामायणे।)

अवच्छुरितं, क्ली, (अव + च्छुर + भावे क्त।) महाहास्यं। इत्यमरटीकायां भरतः॥

अवच्छुरितकं क्ली, (अवच्छुरितमेव, स्वार्थे कन्।) महाहास्यं। इति शब्दरत्नावली॥

अवच्छेदः, पुं, (अव + छिद् + भावे घञ्।) परिच्छेदः। एकदेशः। विशेषणत्वं॥
("शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः"।
इति साहित्यदर्पणम्।)

अवच्छेदकं, त्रि, (अवच्छिनत्ति, अव + छिद् + ण्वुल्।) न्यायमते अव्याप्यवृत्त्यधिकरणसम्बन्धैकदेशः। इतरव्यावर्त्तकः। विशेषणं। अवच्छिद्यतेऽनेनेति यथा। अव्याप्यवृत्तेरवच्छेदकत्वमपि स्वरूपसम्बन्धविशेषः तदाश्रयावच्छेदकः। इति न्यायशास्त्रं॥

अवच्छेदकत्वं, क्ली, (अवच्छेदकस्य भावः, भावार्थे त्व।) स्वरूपसम्बन्धविशेषः। यथा। घटकत्वावच्छेदकत्वं स्वरूपसम्बन्धविशेषः। इत्यवच्छेदकत्वनिरुक्तौ शिरोमणिः॥ अनतिरिक्तवृत्तित्वं। यथा। अवच्छेदकत्वञ्च इहानतिरिक्तवृत्तित्वं। तेन विशिष्टस्यासत्त्वेऽपि भ्रमात् प्रतिबन्धेऽपि न क्षतिः। इति सामान्यनिरुक्तौ शिरोमणिः॥ अन्यूनानतिरिक्तवृत्तित्वं। यथा। ननु तादृशप्रतियोगित्वान्यूनानतिरिक्तवृत्तित्वं वाच्यं। वह्नित्वं न घटवृत्ति तादृशप्रतियोगित्वान्यूनानतिरिक्तवृत्ति अतआह तार्णावार्णेति। इत्यवच्छेदकत्वनिरुक्तौ जगदीशः॥ अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वं पारिभाषिकं। यथा। तदवच्छिन्नाभाववदसम्बद्धविशिष्टसामान्यकत्वं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्त्वं वा तदनतिरिक्तवृत्तित्वं वक्तव्यं। इति अवच्छेदकत्वनिरुक्तौ शिरोमणिः॥ अव्याप्यवृत्तेरवच्छेदकत्वमपि स्वरूपसम्बन्धविशेषः तदाश्रयावच्छेदकः। तत्रावच्छेदकत्वं इह शिखरिणि नितम्बे ऊताग्नौ न शिखरे इत्यादिप्रतीतिबलात् कुत्रचिदव्याप्यवृत्त्यधिकरणदेशविशेषादिदानीं गोत्वे गौर्नतु शृङ्गे इत्यादिप्रतीतिबलात् कुत्रचित् देशवृत्तितायाः काले कुत्रचित् कालवृत्तितायाः देशे अप्यस्ति। इति न्यायशास्त्रं॥

अवच्छेदावच्छेदः, पुं, व्यापकत्वं। इति न्यायभाषा॥

अवज्ञा, स्त्री, (अव + ज्ञा + अङ्।) अनादरः। अवहेला। इत्यमरः॥ ("आत्मन्यवज्ञां शिथिलीचकार"। इति रघुवंशे।)

अवज्ञात, त्रि, (अव + ज्ञा + क्त।) अवमानितं। अनादृतं। तिरस्कृतं। इत्यमरः॥
"अवज्ञाता भविष्यामो लोकस्य जगतीपते"।
इति महाभारते।)

अवज्ञानं, क्ली, (अव + ज्ञा + भावे ल्युट्।) अवज्ञा। यथा अवज्ञानं अवज्ञा ज्ञातो अनाःमद्वेरिति डः। सम्यादित्वात् ज्ञिविति मधुः। तन्यते गोपावद्भूपं। इत्यमरटीकायां भरतः॥ (अवमानः। तिरस्कारः। अनादरः।
"ईप्सितं तदवज्ञानात् विद्धि सौर्गन्धमात्मनः"।
इति रघुवंशे।)

अवटः, पुं, (अव + अटन्।) खिलं। गर्त्तः। कूपः। ("रक्षसां गतसत्त्वानामेष धर्म्मः सनातनः।
अवटे ये निधीयन्ते तेषां लोकाः सनातनाः"॥
इति रामायणे।) कुहकजीवी। इति विश्वमेदिन्यौ॥

अवटिः, पुं, (अव + अट्टि।) गर्त्तः। इति हलायुधः॥

अवटीटः, त्रि, (अवगता गाधिका, प्रादिसमासः, नतार्थे नासायाः टीटादेशः अर्शआदित्वादच्।) नतनासिकः। खाँदा छेपड़ानेको यस्य प्रसिद्धिः। तत्पर्य्यायः। अवनाटः २ अवभटः ३। इत्यमरः॥

अवटुः, पुं, क्ली, (अव + टीक + मितद्वादित्वात् डुः।) ग्रीवापश्चाद्भागः। इत्यमरः॥ घाड़ इतिख्यातः। कूपः। गर्त्तः। इति हेमचन्द्रः॥ दन्तभेदः। इत्युणादिकोषः॥

अवडङ्गः, पुं, (अवगतो डङ्गः शब्दो यस्मात्।) दृढ़ः इति जटाधरः। कस्यचिन्मते अवदङ्ग इति पाठः॥

अवडीनं, क्ली, (अव + डी + भावे क्त।) पश्चिमाभोगमनं। पश्चिमावरोहणं। इति जटाधरः॥

अवतंसः, पुं, क्ली, (अव + तंस + घञ्।) कर्णपूरः। कर्णभूषणं।
("तं मातरो देवमनुव्रजन्त्यः
स्वाहेनलोभेवबलातंसाः"।

इति कुमारसम्भवे।) शेखरः। शिरोभूषणं। तत्पर्य्यायः। वतंसः २ उत्तंसः ३। इत्यमरः॥ मुकुटं ४ मकुटं ५ मौलिः ६ मौलीकः ७ शेखरं ८ उष्णीषकः ९ कोटीरकं १० कोटीरं ११ किरीटं १२ चूड़ामणिः १३ शिरोरत्नं १४ शिरोमणिः १५। कर्णभूषणं। तत्पर्य्यायः। वतंसः २ कर्णपुरः ३ कुण्डलं ४ कर्णवेष्टनं ५ उत्तंसः ६ दन्तपत्रं ७ कर्णकं ८। इति शब्दरत्नावली॥

अवतमसं, क्ली, (अवततं व्याप्तं तमः, प्रादिसमासः, अच्।) अल्पान्धकारः। इत्यमरः॥ ("अवतमसमिदार्य्ये भास्वताभ्युदेन प्रसभमुडुगणोऽसौ दर्शनीयोऽप्यपास्तः"। इति माघः।)

अवतारः, पुं, (अव + तॄ + करणे घञ्।) अवतरणं। पुष्करिण्यादिः। तीर्थः। इति मेदिनी॥ (सोपानपद्धतिः। प्रस्तावना। आभासः। उपक्रमणिका। यथा। "दूरे गुरुप्रथितवस्तुकथावतारः"। इति शान्तिशतके।) देवानां विशेषतोविष्णोर्मूर्त्तन्तरेण पूर्णांशावेशरूपेण पृथिव्यामवतरणं। अवतारास्तसंख्येयाः तेष्वेते प्रसिद्धाः। ब्रह्मा १ वराहः २ नारदः ३ नरनारायणौ ४ कपिलः ५ दत्तात्रेयः ६ यज्ञः ७ ऋषभदेवः ८ पृथुः ९ मत्स्यः १० कूर्म्मः ११ धन्वन्तरिः १२ मोहिनी १३ नृसिंहः १४ वामनः १५ परशुरामः १६ वेदव्यासः १७ रामः १८ बलरामः १९ कृष्णः २० बुद्धः २१ कल्की २२। इति श्रीभागवते॥ यथा,—

"सत्त्व प्रथमं देवः कौमारं सर्गमाश्रितः।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितं॥
द्वितीयन्तु भवायास्य रसातलगतां महीं।
उज्जहारिष्यन्नुपादत्त यज्ञेशः शौकरं वपुः॥
तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः।
तन्त्रं सात्वतमाचष्ट नैष्कर्म्मं कर्म्मणां यतः॥
तुर्य्ये धर्म्मकला सर्गे नरनारायणावृषी।
भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः॥
पञ्चमः कपिलोनाम सिद्धेशः कालविप्लुतं।
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं॥
षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया।
आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्॥
ततः सप्तम आकूत्यां रुचेर्य्यज्ञोऽभ्यजायत।
स यामाद्यैः सुरगणैरपात् स्वायम्भुवान्तरं॥
अष्टमे मेरुदेव्यान्तु नाभेर्जात उरुक्रमः।
दर्शयन् वर्त्म धीराणां सर्व्वाश्रमनमस्कृतं॥
ऋषिभिर्य्याचितो भेजे नवमं पार्थिवं वपुः।
दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः॥
रूपं स जग्रहे मात्स्यं चाक्षुषोदधिसंप्लवे।
नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं॥
सुरासुराणामुदधिं मथ्नतां मन्दराचलं।
दध्रे कमठरूपेण पृष्ठ एकादशे विभुः॥
धान्वन्तरं द्वादशमं त्रयोदशममेव च।
अपाययत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया॥
चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्জ্জितं।
ददार करजैरूरावेरकां कटकृद्यथा॥
पञ्चदशं वामनकं कृत्वागादध्वरं बलेः।
पदत्रयं याचमानः प्रत्यादित्सुस्त्रिपिष्टपं॥
अवतारे षोड़शमे पश्यन् ब्रह्मद्रुहो नृपान्।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं॥
ततः सप्तदशे जातः सत्यवत्यां पराशरात्।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः॥
नरदेवत्वमापन्नः सुरकार्य्यचिकीर्षया।
समुद्रनिग्रहादीनि चक्रे वीर्य्याण्यतः परं॥
एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी।
रामकृष्णाविति भुवो भगवानहरद्भरं॥
ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां।
बुद्धोनाम्नाञ्जनसुतः कीकटेषु भविष्यति॥
अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु।
जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः॥
अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः।
यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः॥
ऋषयो मनवो देवा मनुपुत्रा महौजसः।
कलाः सर्व्वे हरेरेव सप्रजापतयः स्मृताः॥
एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयं।
इन्द्रारिव्याकुलं लोकं मृड़यन्ति युगे युगे"॥

इति श्रीभागवते १ स्कन्धे ३ अध्यायः॥ (दशावतारा एव प्रधानतया प्रसिद्धाः। ते च यथा,—

"मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः।
रामो रामश्च रामश्च बुद्धः कल्की च ते दश"॥)

(आविर्भावः। जन्म। उत्पत्तिः। यथा,—

"अगच्छदंशेन गुणाभिलाषिणी
नवावतारं कमलादिवोत्पलम्"।

इति रघुः। अपसारणं। हरणं। यथा,—

"भूमेर्भारावताराय ब्रह्मणार्थितः पुरा।
स एव जातो भवने कौशल्यायां तवानघ"॥

इति अध्यात्मरामायणे।

अवतारणं, क्ली, (अव + तॄ + णिच् + ल्युट्।) भूतादिग्रहः। वस्त्राञ्चलं। अर्घ्यं। इति विश्वमेदिन्यौ॥ (ग्रन्थप्रस्तावना। ऊर्द्धादध आनयनं। यथा,—

"क्रियतां यदि शक्तोऽसि गङ्गाया अवतारणं"।

इति रामायणे।)

अवतीर्णः, त्रि, (अव + तॄ + कर्त्तरि क्तः।) अवतरणविशिष्टः। प्रादुर्भूतः। जलादौ कृतावरोहः। यथा। ज्योतिषे।

"नीलग्रीव शुभग्रीव सर्व्वकामफलप्रद।
पृथिव्यामवतीर्णोऽसि खड्गखेट नमोऽस्तु ते"।

इति तिथ्यादितत्त्वं॥

अवतोका, स्त्री, (अवपतितं तोकमस्याः सा।) पतद्ग्रहा गौः। तत्पर्य्यायः। खवद्ग्रहा २। इत्यमरः॥ गाभड़ागाइ। गाभफेला गाइ। इति भाषा॥

अवदंश, पुं, (अव + दन्श् + घञ्।) सुरापानरुचिजनकचर्व्वणद्रव्यं। गजर इति भाषा। तत्पर्य्यायः। भक्ष्यं २। इत्यमरः। विदंशः ३ सन्धानं ४ रोचकः ५। इति राजनिर्घण्टः॥

अवदातः, पुं, (अव + दै + क्तः।) श्वेतवर्णः। पीतवर्णः। इत्यमरः॥

अवदातं, त्रि, (अव + दै + क्तः।) शुक्लगुणविशिष्टं। ("कुन्दैः सविभ्रमवधूहसितावदातैः"॥ इति ऋतुसंहारे। पीतवर्णयुक्तं। निर्म्मलं।

"तत्त्वं क्रमेण विदुषां करुणावदाते
श्रद्धावतां हृदि पदं स्वयमादधाति"।

इति शान्तिशतके।) मनोज्ञं। इत्यमरटीकायां भरतः॥

अवदानं, क्ली, (अव + दो + ल्युट्।) वृत्तं कर्म्म। प्रशस्तमद्यच निर्व्यूढं कर्म्म। ये कर्म्मे प्रवृत्तिते सकले प्रशंसा करे सेइ समाप्तकर्म्म इति भाषा। तत्पर्य्यायः। अपदानं २। इत्यमरः तट्टीका च। खण्डनं। इति मेदिनी॥

("विश्वासप्रार्थहरैः प्रतीतैः
सङ्गीयमानचिपुरावदानैः"।

इति कुमारसम्भवे।) वीरणमूलमिति स्वामी॥ (पराक्रमः। वीर्य्यं। यथा,—

"नैर्ऋतघ्नमथ मन्त्रवन्मुनेः
प्रापदस्त्रमवदानतोषितात्"।

इति रघुवंशे।)

अवदारणं, क्ली, (अवदीर्य्यतेऽनेन, अव + दॄ + णिच् करणे ल्युट्।) खनित्रं। खन्ता इति ख्यातं। इत्यमरः॥ (विदारणं। भेदनं। खननं। यथा,—

"अवदारणकाले तु पृथिवी नावदीर्य्यते"।

इति रामायणे। अव + दॄ + भावे ल्युट्।)

अवदाहः, क्ली, (अवशमितोदाहो येन तत्।) वीरणमूलं। इत्यमरः॥ (उशीरशब्देऽस्य विशेषो ज्ञेयः।)

अवदाहैषिं, क्ली, (अवदाहे इष्टम् अनुकूलम्।) वीरणमूलं। इत्यमरटीकायां भरतादयः॥

अवदाहैषिकापथं, क्ली, उशीरं। खस् इति भाषा।) इति भरतः॥

अवदीर्णं, त्रि, (अव + दॄ + क्त।) द्रवीभूतदृतादि। तत्पर्य्यायः। द्रुतं २। इत्यमरः॥

अवदोहः, पुं, (अव + दुह + घञ्।) दुग्धं। इति चिकित्साशास्त्रेषः॥

अवद्यं, त्रि, (न वदति परं गुरुं, अवद्यावमाधमार्व्वरेणाः कुत्सिते इति वदेर्नञि कर्त्तरि यत्।) अधमः। कुत्सितं। गर्हितं। निकृष्टं। इत्यमरः॥

अवद्यं, क्ली, अनिष्टं। इति वोपदेवः॥ पापं। इति पाणिनिः॥ ("उदवहदनवद्यां तामवद्यादपेतः"। इति रघुवंशे।)

अवधानं, क्ली, (अव + धा + ल्युट्।) मनोयोगः। तत्पर्य्यायः। समाधानं २ प्रणिधानं ३ समाधिः ४। इति हेमचन्द्रः॥

अवधारणं, क्ली, (अव + धृ + णिच् + ल्युट्।) निश्चयः। यथा। "हि हेताववधारणे"। इत्यमरः॥

अवधारितः, त्रि, (अव + धृ + णिच् + क्त।) ज्ञातावधारणः। यथा।

"त्वया सुमुखि किं प्रोक्तं न मया ह्यवधारितं।
विवेचय महाभागे सङ्केतो वर्त्तते खलु"॥

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २० अध्यायः॥

अवधार्य्यः, त्रि, (अव + धृ + ण्यत्।) अवधारणीयः। अवपूर्व्वकधृधातोर्ण्यत् प्रत्ययेन निष्पन्नः। निर्धार्य्यः॥

अवधिः, पुं, (अव + धा + कि ।) अवधानं। सीमा। कालः। ("अथ चेदवधिः प्रतीक्ष्यते" इति भारविः ।) विजं। इति विश्वमेदिन्यौ ॥

अवधीर, त्, क, अवज्ञायां। (अदन्त + चुरा०-उभय०-सक०-सेट्।) अवधीरयति। आवधीरयत् साधुमसाधुः। इति दुर्गादासः ॥

अवधूतः, पुं, (अव + धू + क्तः ।) सन्न्यासाश्रमी। तद्विधानं सन्न्यासिशब्दे द्रष्टव्यं। तद्भेदा यथा। देव्युवाच।

"द्विविधावाश्रमौ प्रोक्तौ गार्हस्थ्यो भैक्षुकस्तथा। किमिदं श्रूयते चित्रमवधूतास्चतुर्विधाः ॥ एतद्भेदितुमिच्छामि तत्त्वतः कथय प्रभो। चतुर्व्विधावधूतानां लक्षणानि विशेषतः ॥

सदाशिव उवाच।

ब्रह्ममन्त्रोपासका ये ब्राह्मणक्षत्रियादयः। गृहाश्रमे वसन्तोऽपि ज्ञेयास्ते यतयः प्रिये ॥ पूर्णाभिषेकविधिना संस्कृता ये च मानवाः। शैवावधूतास्ते ज्ञेयाः पूजनीयाः कुलार्चिते ॥ ब्रह्मावधूतः शैवश्च साग्निमाचारवर्त्तिनः। विदध्युः सर्व्वकर्म्माणि श्रुत्युदीरितवर्त्मना ॥ विना ब्रह्मार्पितञ्चैते तथा चक्रार्पितं विना। निषिद्धमन्नं तोयञ्च न गृह्णीयः कदाचन ॥ ब्रह्मावधूतकौलानां कौलानामभिषेकिणां। पूर्व्वमेव कथितो धर्म्म आचारश्च वरानने ॥ स्नानं सन्ध्यासनं पानं दानञ्च दाररक्षणं। सर्व्वमागममार्गेण शैवब्रह्मावधूतयोः" ॥

इति महानिर्व्वाणतन्त्रे १४ उल्लासः ॥*॥ अन्यच। शङ्कर उवाच।

"शृणु देवि प्रवक्ष्यामि अवधूतो यथा भवेत्। वीरस्य मूर्त्तिं जानीयात् सदा तत्त्वपरायणः ॥ यद्रूपं कथितं सर्व्वं सन्न्यासधारणं परं। तद्रूपं सर्व्वकर्म्माणि प्रकुर्य्यादवीरवल्लभं ॥ दक्षिणे मुण्डनं चामावास्यायामाचरेद्यथा। तथा नैव प्रकुर्य्यात्तु वीरस्य मुण्डनं प्रिये ॥ असंस्कृतं केशजालमुत्कालम्बिकचोच्चयं। अस्थिमालां विभूषां वा रुद्राक्षानपि धारयेत् ॥ दिगम्बरो वा वीरेन्द्रश्चाथ वा कौपिनी भवेत्। रक्तचन्दनसिक्ताङ्गं कुर्य्याद्भस्माङ्गभूषणं" ॥

इति निर्व्वाणतन्त्रे १४ पटलः ॥*॥ अपिच।

"नटकरोटिं विधार्य्यैव कालदण्डं तथा प्रिये। परशुञ्चाजिनञ्चैव योगीव धारयेत् सदा ॥ खट्वाङ्गं धारयेद्योगी वासरूपकवाससी। कपाले धारयेच्चक्रं चन्दनाद्यैर्व्विशेषितः ॥ ईषत् पिङ्गलकं वस्त्रं धारयेत् सर्व्वदा सुत"।

सुत इति शिवस्य सम्बोधनं।

सदर्शनाख्यं यच्चक्रं तत्तु संधारयेद्बुधः ॥ विपर्क्षौ कपिलञ्चैव मडुडिण्डिमभर्भरान्। वादयन् डमरुं योगी यत्र कुत्राश्रमे स्थितः" ॥

इति योगसारे २ परिच्छेदः ॥*॥ अपरञ्च।

"क्षमा दानं तपो ध्यानं बालभावेन शैलजे। शिवोऽहं भैरवानन्दो मुक्तोऽहं कुलनायकः ॥ एवं भावपरो मन्त्री हेतुयुक्तः सदाशिवः। संविदासेवनं कुर्य्यात् सदा कारणसेवनं ॥ भवेत् साक्षात् स पुरुषः शम्भुरूपो न संशयः"।

इति निर्व्वाणतन्त्रं ॥*॥ किञ्च।

'ब्राह्मणः क्षत्रियो वैश्यः शूद्रः सामान्य एव च। कुलावधूतसंस्कारे पशूनामधिकारिता" ॥

इति महानिर्व्वाणतन्त्रं ॥ * ॥ अन्यच।

"निर्व्वाणमुक्तिमाप्नोति ब्राह्मणो वीरभावतः। अवधूतः क्षत्रियश्च भक्त्याद्यैर्हि न संशयः ॥ स्वरूपोऽपि भवेद्वैश्यः शूद्रोऽपि सकुलोकवान्। सम्पूर्णफलमाप्नोति विप्रो निर्व्वाणतां व्रजेत् ॥ त्रिभागं फलमाप्नोति क्षत्रियो वीरभावतः। पादद्वयन्तु वैश्यस्य शूद्रस्य चैकपादकं" ॥*॥

दशनामावधूतानां प्रत्येकं नाम प्रागुक्तमिदानीमपि तेषां प्रधानत्वेनाङ्गीकरणार्थं संज्ञाकथनपूर्वकं लक्षणविशेषमाह।

"अवधूतस्य चाख्यानं शृणुष्व पर्व्वतात्मजे। वनारण्ये भारती च गिरिश्च पुरिरेव च ॥ एकस्थाने तु संस्थित्य इत्यथानादिकश्चरेत्। यो मन्त्रदानं तपसा सवनः परिकीर्त्तितः ॥ खण्डकेशो जटाशूटः सदा वातुलवद्भवेत्। अन्तर्योगी महावीरोऽरण्यसंज्ञश्च शैलजे ॥ नानाशास्त्रेषु यो विज्ञो नानाकर्म्मविशारदः। सदेष्टदेवीभावेन भावयेद् यो हि सावलां ॥ स एव भारतीवीरो महाज्ञानी जितेन्द्रियः। सदोर्द्ध्वबाहुर्यो वीरो मुक्तकेशो दिगम्बरः ॥ सर्व्वत्र समभावेन भावयेत् यो नरोत्तमः। इष्टदेवीं विना नास्ति स गिरिः परिकीर्त्तितः ॥ नानादेशेषु पीठेषु क्षेत्रेषु तीर्थभूमिषु। भ्रमणं कुरुते नित्यं कुर्य्याद्यत्नेन पूजनं ॥ देवतायाः सदा ध्यानं श्रीगुरोः पूजनं तथा। अन्तर्यागेषु यो निष्ठः स वीरः पुरिरेव च ॥ अवधूताश्रमे देवि! यस्य भक्तिः सुनिश्चला। तस्य तुष्टा भवेत् काली किं न सिद्ध्यति भूतले ॥ अवधूतं समालोक्य शम्भुवत् पूजनं चरेत्। शक्तितः पश्चतत्त्वानि यत्नेनैव निवेदयेत्। अशक्तः परमेशानि भक्तितः परितोषयेत्" ॥

इति निर्व्वाणतन्त्रं ॥ * ॥ अपि च।

"भक्तावधूतो द्विविधः पूर्णापूर्णविभेदतः। पूर्णः परमहंसाख्यः परिव्राड्वर उच्यते ॥ क्षतावधूतसंस्कारो यदि स्याज्ज्ञानदुर्ब्बलः। तदा लोकालये तिष्ठन्नात्मानं स तु शोधयेत् ॥ रक्षन् स्वजातिचिह्नञ्च कुर्व्वन् कर्म्माणि केवलं। सदा ब्रह्मपरो भूत्वा साधयेज्ज्ञानमुत्तमं" ॥

इति महानिर्व्वाणतन्त्रं ॥ * ॥ अपि च।

"अवधूतः शिवः साक्षादवधूतः सदाशिवः। अवधूती शिवादेवी अवधूताश्रमं शृणु ॥ चतुराश्रमिणां मध्ये अवधूताश्रमो महान्। अवधूतश्च द्विविधो गृहस्थश्च चितानुगः ॥ सचेलश्चापि दिग्वासा विधियोनिविहारवान्। सदारः सर्व्वदारस्थश्चाकृहासो दिगम्बरः ॥ गृहावधूतो देवेशि कितयत्नु सदाशिवः"।

इति गुप्तमालातन्त्रे २ पटलः ॥ * ॥ अवधूतस्य

ओम् तत् सदिति मन्त्रेण कर्म्मकर्त्तव्यतामाह।

"ॐ तत्सन्मन्त्रमुच्चार्य्य सोऽहमस्मीति चिन्तयन्। कुर्य्यादात्मोचितं कर्म्म सदा वैराग्यमाश्रितः ॥ कुर्व्वन् कर्म्माण्यनासक्तो नलिनीदलनीरवत्। यतेतात्मानमुद्धर्त्तुं तत्त्वज्ञानविवेकतः" ॥ * ॥

सर्व्वेषामोम् तत्सदिति निर्देशेन कर्म्मफलमाह।

"ॐ तत्सदिति मन्त्रेण यो यत्कर्म्म समाचरेत्। गृहस्थो वाप्युदासीनस्तस्याभीष्टाय तद्भवेत्" ॥*॥

तन्मन्त्रक्रियमाणकर्म्मणः सम्पूर्णत्वमपि।

"जपहोमप्रतिष्ठा च संस्काराद्यखिलाः क्रियाः। ॐ तत्सदिति निष्पन्नाः संपूर्णाः स्युर्न संशयः ॥ किमन्यैर्ब्बहुभिर्म्मन्त्रैः किमन्यैर्भूरिसाधनैः। ब्राह्म्येणानेन मन्त्रेण सर्व्वकर्म्माणि साधयेत् ॥ सुखसाध्यमबाऊल्यं संपूर्णफलदायकं। नास्त्येतस्मान्महामन्त्रादुपायान्तरमम्बिके ॥ पुरप्रदेशे देहे वा लिखित्वा धारयेदिमं। गेहे तस्य महालक्ष्मीर्देहः पुण्यमयो भवेत् ॥ निगमागमतन्त्राणां सारात् सारतरो मनुः। ॐ तत्सदिति देवेशि तवाग्रे सत्यमीरितं ॥ चतुर्व्विधानां तत्त्वानामन्येषामपि वस्तूनां ॥ मन्त्रान्नैः शोधनेनानं स्याद्देवेन शोधितं ॥ पश्यन् सर्व्वत्र सद्रूपं जपंस्तत् सन्महामनुं। स्वेच्छाचारः शुद्धचित्तः स एव भुवि कौलराट् ॥ जपादस्य भवेत् सिद्धो मुक्तः स्यादर्शचिन्तनात्। साक्षाद्ब्रह्ममयो देही सार्थमेनं जपेन्मनुं ॥ त्रिपदोऽयं महामन्त्रः सर्व्वकारणकारणं। साधनादस्य मन्त्रस्य भवेन्मृत्युञ्जयः स्वयं ॥ युग्मयुग्मपदं वापि प्रत्येकं पदमेव वा। जप्त्वैतस्य महेशानि साधकः सिद्धिभाग्भवेत्"।

इति मन्त्रप्रशंसा ॥ * ॥ शैवावधूतस्य सर्व्वकर्म्मानधिकारमाह।

"शैवावधूतसंस्कारविधूताखिलकर्म्मणः। नापि देवे नवा पित्र्ये नार्घे ह्यस्येऽधिकारिता" ॥*॥

अथ परमहंसः।

"चतुर्णामवधूतानां तुरीयो हंस उच्यते। त्रयोऽन्ये योगभोगाढ्या मुक्ताः सर्व्वे शिवोपमाः ॥ हंसो न कुर्य्यात् स्त्रीसङ्गं न विधत्ते परिग्रहं। प्रारब्धमश्नन् विहरेत् निषेधविधिवर्जितः ॥ त्यजेत् स्वजातिचिह्नानि कर्म्माणि गृहमेधिनां। तुरीयो विचरेत् क्षौणीं निःसङ्कल्पो निरुद्यमः ॥ सदात्मभावसन्तुष्टः श्लोकमोहविवर्जितः। निर्निकेतस्तितिक्षुः स्यादि सङ्गो निरुपद्रवः ॥ नार्घ्यं भक्ष्यपेयानां न तस्य ध्यानधारणा। मुक्तो विमुक्तो निर्द्वन्द्वो हंसाचारपरो यतिः ॥ इति ते कथितं देवि! चतुर्णां कुलयोगिनां। लक्षणं सविशेषेण साधनां मत्स्वरूपिणां ॥ एतेषां दर्शनात् स्पर्शादालापात् परितोषणात्। सर्व्वतीर्थफलावाप्तिर्जायते मनुजन्मनां" ॥

इति महानिर्व्वाणतन्त्रं ॥

अवध्यं, त्रि, (वधमर्हति, यत्, ततो नञ्समासः।) मारणानर्हं। वधायोग्यं। अनर्थकवाक्यं। इति विश्वमेदिन्यौ। यथा,—

"अवध्याश्च स्त्रियं प्राऽऽहुर्नियोगितासपि।" मृतस्त्रीणामवध्यत्वमाह मत्स्यपुराणं।
"किं त्वया न श्रुतं लोके अवध्याः मृतयोषितः"।
इति प्रायश्चित्ततत्त्वं ॥*॥ आत्मन अवध्यत्वंयथा,—
"देही नित्यमवध्योऽयं देहे सर्व्वस्य भारत।
तस्मात् सर्व्वाणि भूतानि नत्वं शोचितुमर्हसि"॥
इति श्रीभगवद्गीतायां २ अध्यायः ॥*॥ तद्वधे पापं यथा,—
"यावानवध्यस्य वधे तावान् वध्यस्य मोक्षणे।
अधर्म्मोर्द्धतेदृष्टोधर्म्मस्तु विनियच्छतः"॥
इति मानवे ९ अध्याये २४९ श्लोकः॥

अवध्वंसः, पुं, (अव + ध्वंस + घञ्।) परित्यागः। निन्दनं। अवचूर्णनं। इति मेदिनी॥

अवध्वस्तः, त्रि, (अव + ध्वंस + क्त।) परित्यक्तः। निन्दितः। अवचूर्णितः। इति मेदिनी॥

अवनं, क्ली, (अव + ल्युट्।) प्रीणनं। इत्यमरः॥ रक्षणं। इति हेमचन्द्रः॥ गमनं। स्पर्द्धा। तर्पणं। शोभनं। अवर्णं। प्राप्तिः। आलिङ्गनं। याचनं। प्रवेशनं। सत्ता। इच्छा। यज्ञकर्म्म। वधः। प्राप्तिः। अवगमनं। कामः। करणं। एते अवधातवर्थाः॥

अवनतं, त्रि, (अव + नम् + क्त) नम्रं। नतभागः। नोया इति भाषा। तत्पर्य्यायः। अवार्यं २ आनतं ३ नतं ४। इत्यमरः तट्टीका च॥ (अधोभूतः। "लिखन्नास्ते भूमिं वहिरवनतः प्राप्तदयितः"। इति अमरशतके।)

अवनद्धं, क्ली, (अव + नह् + क्त।) आनद्धं। मृदङ्गादिवाद्यं। इत्यमरटीकायां स्वामी॥ (आवद्धः। आच्छादितः। यथाह मनुः,—
"चर्म्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः।"
लिप्तः यथा, "स्नानावनद्धघनशोणितशोणपाणि-रुत्तंसयिष्यति कचांस्तव देवि भीमः।" इति वेणीसंहारनाटकम्।)

अवनयः, पुं, (अव + नी + भावे अच्।) अवनायः। निपातनं। अधःपातनं। इति भरतः॥

अवनाटः, त्रि, (अवनता नासिका, प्रादिसमासः, नतार्थे नासिकाया नाटादेशः अर्शं आद्यच्।) नतनासिकः। खाँदा छेपड़ानाकयुक्ति इति भाषा। तत्पर्य्यायः। अवटीटः २ अवभटः ३। इत्यमरः॥

अवनायः, पुं, (अव + नी + घञ्।) अवनयः। अधोनयनं। इत्यमरः॥ नीचे फेलान इति भाषा।

अवनिः, स्त्री, (अव + अनि।) पृथिवी। इत्यमरः॥
("तामुन्निद्रामवनिशयनां सौधवातायनस्थः"।
इति मेघदूते।)

अवनी, स्त्री, (अव + अनि + ङीप्।) पृथ्वी। इति भरतः॥ आयमाजा लता। इति राजनिर्घण्टः॥

अवनीपतिः, पुं, (अवन्याः पतिः, षष्ठीतत्पुरुषः।) राजा। इति जटाधरः॥
("स श्रवा सुमहाभागः प्रीतिमानवनीपतौ"।
इति मत्स्यपुराणे।)

अवनेजनं, क्ली, (अव + निज् + ल्युट्।) पितृदानार्थं मार्जितकुशोपरि जलसेचनं यथा ब्रह्मपुराणम्,—
"सपुष्पं जलमादाय तेषां पृष्ठे पृथक् पृथक्।
अप्रदक्षिणं नेनिज्यात् गोचनामानुमन्त्रितं॥
पितुरवनेजनं मूलदेशे पितामहप्रपितामहयोस्तु अवनेजनं मध्यदेशायदेशयोः। मातामहादीनामप्येवं। इति। पिण्डोपरि जलसेचनं। यथा ब्रह्मपुराणं,—
"ततो दर्भेषु विधिवत् सम्मार्ज्य च करन्ततः।
प्रक्षाल्य च जलेनाथ चिराचम्य हरिं स्मरेत्।
"तेभ्यः संस्रवपात्रेभ्यो जलेनैवावनेजनं।
दत्त्वात्र पितरश्चेति पठेच्चोदङ्मुखस्थितः"॥
इति च आह्निकतत्त्वं। (प्रक्षालनं।
"न कुर्य्यात् गुरुपुत्रस्य पादयोश्चावनेजनम्"।
इति मनुः।)

अवन्तिः, पुं, (अव + झिच्।) अवन्तीदेशः। इति हेमचन्द्रः॥ नदीविशेषः। इत्युणादिकोषः॥ यथा,
"प्राग्ज्योतिषाः कामरूपा मालवाः स्फुरवन्तयः"।
इति हेमचन्द्रः॥ अपि च।
"अनूपास्तुण्डिकेराश्च वीतिहोत्रा अवन्तयः।
एते जनपदाः ख्याता विन्ध्यपृष्ठनिवासिनः"॥
इति मत्स्यपुराणे ९५ अध्यायः॥

अवन्तिका, स्त्री, (अवति अव रक्षणादौ, बाहुलकात् झिच ततः स्वार्थे कन्, टाप्।) उज्जयिनीनगरी।
"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः"॥
इति स्कन्दपुराणे॥

अवन्तिसोमं, क्ली, (अवन्तिषु अभिषुतं सोमं, प्राक्पार्थिवादित्वात् समासः।) काञ्जिकं। इत्यमरसिंहः॥ काँजि इति भाषा। (काञ्जिकशब्देऽस्य गुणा व्याख्येयाः।)

अवन्ती, स्त्री, मालवदेशस्य नगरी। उज्जैन इति ख्याता। तत्पर्य्यायः। उज्जयिनी २ विशाला ३ पुष्पकरण्डिनी ४। इति हेमचन्द्रः॥ यथा,—
"ताम्रपर्णीं समासाद्य शैलार्द्धशिखरोर्द्धतः।
अवन्तीसंज्ञको देशः कालिका तत्र तिष्ठति"॥
इति शब्दकल्पद्रुमतन्त्रे ७ पटलः॥ अन्यच्च।
"उत्पन्नोर्वः कलिङ्गे तु यमुनायाश्च चन्द्रमाः।
अवन्त्याश्च कुजो जातो मागधे च हिमांशुजः"॥
इति संस्कारतत्त्वधृतमत्स्यपुराणं। अन्यत् पूर्व्वलिखितं। ("प्राप्यावन्तीमुदयनकथाकोविदग्रामवृद्धान्।" इति मेघदूते।)

अवन्ध्यः, त्रि, (बन्धे साधुरिति बन्ध्यः, बन्ध + यत्, ततो नञ्समासः।) फलवान्। फलकाले फलयुक्तवृक्षः। तत्पर्य्यायः। फलेग्रहिः २ फलग्रहिः ३। इत्यमरः॥
("कर्षुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्याम्"।
इति मेघदूते।)

अवपातः, पुं, (अव + पत् + घञ्।) रन्ध्रं। गर्त्तः। इति हेमचन्द्रः॥ अधःपतनं॥ (गजादीनां ग्रहणार्थं कृतस्तृणादिना प्रच्छन्नो गर्त्तः। यथा,—
"अवपातस्तु हस्त्यर्थे गर्त्तश्छन्नस्तृणादिना"।
इति यादवः।
"रोधांसि निम्नवपातमग्नः
करीव वन्यः परुषं ररास"।
इति रघुवंशे। नाटकादौ भयादिजनितपलायनसम्भ्रमादिवर्णनेन प्रस्तुतस्य परिवर्त्तः। यथा,—
"अवपातस्तु निष्क्राम-प्रवेश-त्रास-विद्रवैः"।
इति दशरूपे।)

अवभृथः, पुं, (अवभ्रियते अनेन, अव + भृ + क्थन्।) दीक्षान्तयज्ञः। प्रधानयागसमापकापरयज्ञः। यज्ञादेर्न्यूनाधिक-दोष-शान्ति-निमित्तक-शेष-कर्त्तव्य-होम इति यावत्॥ इत्यमरः तट्टीका च॥ यज्ञावशेषस्नानं। इति भरतः त्रिकाण्डशेषश्च॥
("ततश्चकारावभृथं विधिदृष्टेन कर्म्मणा"
इति भारते।
"भुवं कोणेन कुण्डोघ्नी मेध्येनावभृथादपि"।
इति रघुवंशे।)

अवभटः, त्रि, (अवनतं नासिकायाः, नते नासिकाग्राः संज्ञायामिति भटच्। अवभ्रष्टा नासिका अस्ति अस्य इति अर्शं आद्यच्।) नतनासिकव्यक्तिः। इत्यमरः॥ खाँदा इति भाषा।

अवमः, त्रि, (अवति असात् आत्मानम्, अव रक्षणादौ, अवधेति सूत्रेण अवतेः अमः प्रत्ययो निपातितः। अवो भवो वा, अवोधसोर्द्वोपश्चेति मः।) अधमः। निन्दितः। इत्यमरः॥
("अनलकानलकानवमां पुरीम्"। इति रघुवंशे।)

अवमं, क्ली, तिथ्यन्तदयस्पृष्टैकदिनवारः। एकदिने एकतिथिर शेष अपरतिथिर आद्यन्तस्पर्शं इति यावत्॥ इति ज्योतिषशास्त्रे प्रसिद्धं॥ यथा "तिथ्यन्तदयमेको दिनवारः स्पृशति यत्र तद्भवत्यवमदिनं। त्रिदिनस्पृक्तिथित्रयस्य स्पर्शनादक्षः"। इति ज्योतिषतत्त्वं॥

अवमतं, त्रि, (अव + मन् + क्त।) अवज्ञातं। अवमानितं। अनादृतं। इत्यमरः॥
("सुखं ह्यवमतः शेते सुखञ्च प्रतिबुध्यते"।
इति मनुः।)

अवमतिः, पुं, (अवान्तरगता अमात्यादीनां कार्य्येषु मतिर्यस्य।) स्वामी। ईश्वरः। पतिः। प्रभुः। नेता। इति जटाधरः॥

अवमर्दः, पुं, (अव + मृद् + घञ्।) पीड़नं। अयनं। इत्यमरः॥ ग्रस्तादिसम्पन्नदेशस्य परचक्रेण पीड़नं। इति भरतः॥
("बलावमर्दक्षमयि सन्निविष्टो
यथा न गर्हेयुरुदारसत्त्वाः"।
इति रामायणे।) शत्रुकृतगाढ़प्रहार इति केचित्॥ पदाक्रमणमिति केचित्॥

अवमानः, पुं, (अव + मन् + भावे घञ्।) अपमानः। अमर्य्यादा। यथा,—
"सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव।
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्व्वदा"॥
इति मानवे २ अध्याये १६२ श्लोकः॥

"मानावमानदम्भसहिष्णुत्वमनेन विधीयते"।
इति कल्लूकभट्टः ॥
अवमाननं, क्ली, (अव + मन् + णिच् + ल्युट्।) अपमानः। यथा। अवमाननं अवमानना। मान कि पार्श्वे अवपूर्ब्बः क्रीयि अस्त्रीति अनः। इत्यमरटीकायां भरतः ॥
अवमानना, स्त्री, (अव + मन + णिच् + युच्।) अवज्ञा। अनादरः। इत्यमरसिंहः ॥
("अतोऽवमाननाऽस्माकं मानिना भवता कृता"।
इति विष्णुपुराणे।)
अवमानितः, त्रि, (अव + मान + क्त।) कृतावमानः। अवज्ञातः। अनादृतः। इत्यमरः ॥
("विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता"।
इति सहित्यदर्पणे।)
अवमान्यः, त्रि, (अव + मन + ण्यत्।) अवमाननीयः। यथा,—
"या रोगिणी स्यात्तु हिता सम्पन्ना चैव शीलतः ॥
सानुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हिचित्"॥
इति मानवे ९ अध्याये ८२ श्लोकः ॥
अवमूर्द्धशयः, त्रि, (अवमूर्द्ध + शी + अच्।) अधोमुखशायी। अवनतो मूर्द्धा अस्येत्यवमूर्द्धः। तथाविधः शेते इत्यवमूर्द्धशयः ॥ ("उत्तानशया देवा अव मूर्द्धशया मनुष्याः" इत्युक्तं।)
अवमूर्द्धशायी, [न्] त्रि, (अवमूर्द्ध + शी + णिनि।) अधोमुखशायी। अवमूर्द्धं यथा स्यात् तथा शयितुं शीलमस्य इत्यर्थे णिन् प्रत्ययेन निष्पन्नः ॥
अवयवः, पुं, (अवयौति इति यु मिश्रणे + घञ्वच्।) अङ्गं। इत्यमरः ॥
("खैरेवावयवैः प्रियस्य विशतस्तन्व्या कृतं मङ्गलं"।
इति अमरशतके। उपकरणं। अंशः। एकदेशः।
"तेषामवयवान् सूक्ष्मान् षण्णामप्यमितौजसां"।
इति मनुसंहितायां। न्यायमते आरम्भकद्रव्यञ्च, तत् उपादानकारणतया च अवक्रियते यदुक्तं,—
"अनित्या तु तदन्या स्यात् सैवावयवयोगिनी"।
इति भाषापरिच्छेदे। प्रतिज्ञाहेतूदाहरणोपनयनिगमान्यनुमानावयवाश्च।)
अवरः, त्रि, (न म्रियते इति मृङ्वरणे + ग्रहवृदृनिभ्य अप्।) चरमः। इति मेदिनी। कनिष्ठः। अश्रेष्ठः। यथा,—
"श्रीर्नैपुण्येन विना शम्भुः एथग्विश्वेन तत्पुनः।
न नाना शम्भुना रामादवैगाधोक्तजोऽवरः"॥
इति मुग्धबोधव्याकरणे बोपदेवः ॥ निकृष्टः। यथा,—
"दूरेण ह्यवरं कर्म्म बुद्धियोगाद्धनञ्जय।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः"॥
इति श्रीभगवद्गीतायां २ अध्याये ४९ श्लोकः ॥
अवरं, क्ली, (वृ + अप् ततो नञ्समासः।) गजाक्यजङ्घादिदेशः। इत्यमरमेदिन्यौ ॥
अवरजः, पुं, (अवर + जन् + ड।) कनिष्ठभ्राता। इत्यमरसिंहः ॥
("अस्य चावरजं विद्धि भ्रातरं मां तु लक्ष्मणम्"।
इति रामायणे। हीनवंशजातः।
"द्वौ शूरावरजौ धीरविचित्राख्यौ निजाख्यया"।
इति राजतरङ्गिण्यां ॥ शूद्रः।
"यदि स्त्री यद्यवरजः श्रेयः किञ्चित् समाचरेत्।
तत्सर्व्वमाचरेत् युक्तो यत्र वास्य रमेन्मनः"॥
इति मानवे।)
अवरतः, [स्] अ, (अवर + तसिल्।) अवरस्मात्। चरमे। इति सिद्धान्तकौमुदी ॥
अवरतिः, स्त्री, (अव + रम् + क्तिन्।) विरामः। निवृत्तिः। इत्यमरः ॥
अवरवर्णः, पुं, स्त्री, (अवरश्चासौ वर्णश्चेति, कर्म्मधारयः।) शूद्रः। इत्यमरः ॥
अवरवर्णकः, पुं, स्त्री, (अवरवर्ण + कन् स्वार्थे।) चतुर्थवर्णः। शूद्रः। इति रत्नावली ॥
अवरव्रतः, पुं, (नास्ति वरं यस्मात् तत् अवरं अत्यन्तश्रेष्ठं व्रतं यस्य।) सूर्य्यः। इति चिकाण्डशेषः ॥
अवरस्मात्, अ, (अवर + प्रथमार्थे दिक्कृन्दोभ्य इति अस्तातिः।) अवरतः। पश्चात्। इति सिद्धान्तकौमुदी ॥
अवरा, स्त्री, (नास्ति वरा श्रेष्ठा यस्याः। अवर + टाप्।) दुर्गा। इति विश्वः ॥
अवरार्द्ध्यः, त्रि, (अवरार्द्धे भवः इति अवरार्द्ध यत्।) अवरार्द्धभवः। शेषार्द्धजातः। इति केचित् ॥
अवरीयं, त्रि, (अवरीयते स्म इति अव + रीङ् स्रवणे क्त।) धिक्कृतं। तिरस्कृतं। निन्दितं। इत्यमरः ॥
अवरोधः, पुं, (अव + रुध् + भावे घञ्।) तिरोधानं। (आधारे घञ्।) राजस्त्रीगृहं। राजगृहं। इति विश्वहेमचन्द्रौ ॥
("आपानभूमिगमनमवरोधस्य दर्शनम्"।
इति रामायणे।) राजदाराः। इति मेदिनी ॥
("यस्यावरोधस्तनचन्दनानां
प्रक्षालनाद्वारिविहारकाले।
कलिन्दकन्या मथुराङ्गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति"॥
इति रघुवंशे। निरोधः। बाधा। अन्तरायः। आच्छादनं। केदारादिवेष्टनं।)
अवरोधकः, त्रि, (अव + रुध + ण्वुल्।) अवरोधकारकः। अवरोधकर्त्ता। अवपूर्ब्बकरुधधातोः ण्वुलप्रत्ययेन निष्पन्नः ॥
("सुधन्वा वीर्य्यवान् राजा मिथिलामवरोधकः"।
इति रामायणे।)
अवरोधनं, क्ली, (अवरुध्यते अत्र रुध आधारे कर्म्मणि ल्युट्।) राज्ञामन्तःपुरं। इत्यमरसिंहः ॥ (अव + रुध् + ल्युट् भावे।) रोधकरणं। यथा,—
"क्षण त्वदीय-पद-पङ्कज-पञ्जरान्ते
अद्यैव मे विशतु मानस-राजहंसः।
प्राणप्रयाणसमये कफवातपित्तैः
कण्ठावरोधनविधौ स्मरणं कुतस्ते"॥
इति पाण्डवगीता ॥
अवरोधिकः, पुं, (अवरोध + तत्र नियुक्त इति ठक्। संज्ञापूर्ब्बकत्वात् वृद्धभावः। अवरोधः निवासस्त्रेन अस्ति अस्य वा ठन्।) राजान्तःपुराध्यक्षः। इति हेमचन्द्रः ॥
अवरोहः, पुं, (अव + रुह् + भावे घञ्।) अवतरणं। आरोहणं। (कर्त्तरि संज्ञायां घञ्।) जतोरुहः। इति मेदिनी ॥ वृक्षमूलादग्रपर्य्यन्तं गता लता। शाखाशिफा। इत्यमरः। वोया नामना इति भाषा ॥
("सुदूरमध गत्वा तौ भ्रातरौ रामलक्ष्मणौ।
अवरोहशतावीर्णं वटमासाद्य तस्थतुः"॥
इति रामायणे।) स्वर्गः। इति चिकाण्डशेषः ॥
अवरोहशाखी, [न्] पुं, (अवरोहति अधोगच्छति मूलमस्याः तादृशी या शाखा सा विद्यते अस्य मत्वर्थीय इनिः।) वृक्षवृक्षः। इति राजनिर्घण्टः ॥ (वृक्षशब्दस्य गुणाज्ञेयाः ॥)
अवरोहिका, स्त्री, (अवरोहति अधोगच्छति अव + रुह + ण्वुल् + टाप् अत इत्वं।) अश्वगन्धालता। इति राजनिर्घण्टः ॥
अवरोही, [न्] पुं, (अव + रुह + णिनि।) वटवृक्षः। इति राजनिर्घण्टः ॥ (वटशब्दस्य गुणादयो ज्ञातव्याः।)
अवर्णः, पुं, (वर्ण्यते प्रशस्यते अनेन इति वर्ण्यः ततो विरोधे नञ्समासः।) निन्दा। परीवादः। इत्यमरसिंहः ॥
("सोढुं न तत्पूर्ब्बमवर्णमीशे
आजानिकं स्थाणुमिव द्विपेन्द्रः"।
इति रघुवंशे।)
अवलग्नः, पुं, क्ली, (अवलग्यते इति अव + लग + क्त। दृढ़भावः। लस्ज + क्त, वा।) मध्यदेशः। इत्यमरः ॥ माजा इति भाषा। ("विपुलतरोन्नतश्रोणिलोचनावलग्नम्"। इति माघः।)
अवलग्नः, त्रि, (अव + लग + क्त।) संलग्नः। संयुक्तः। इति मेदिनी ॥
अवलम्बः, पुं, (अव + लबि + अच्।) अवलम्बनं अवपूर्ब्बलम्बधातोरल्प्रत्ययेन निष्पन्नः ॥ (आश्रयः।)
अवलम्बनं, क्ली, (अव + लबि + आधारे ल्युट्।) आश्रयः। यथा,—
"प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्त्तुरभू-
न्नपतिष्यतः करसहस्रमपि"॥
इति माघे ९ सर्गः ॥
अवलम्बितं, त्रि, (अव + लबि + क्त।) अविलम्बितं। शीघ्रं। इति जटाधरः ॥ अधोलम्बायमानं। कृतावलम्बनं। आश्रितं ॥
अवलक्षः, पुं, (अवलक्ष्यते इति अव + लक्ष + घञ्।) वलक्षः। श्वेतवर्णः। (अर्श आदित्वात् अच्।) तद्वति त्रि। इत्यमरटीकायां स्वामी ॥
अवलिप्तः, त्रि, (अव + लिप् + क्त।) धनादिगर्व्वितः। यथा,—
"न संवसेच्च पतितैर्न चाण्डालैर्न पुक्कसैः।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः"॥
इति मानवे ४ अध्याये ७९ श्लोकः। अवलिप्ता धनादिगर्व्विता इति कुल्लूकभट्टः ॥
"अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः"।

इति देवीमाहात्म्यम् ॥

अवलिप्तता, स्त्री, (अवलिप्त + तल् भावे ।) अहङ्कारः । इति हेमचन्द्रः ॥ ("तेजस्विन्यवलिप्तता मुखरता वक्तर्य्यशक्तिः स्थिरे" । इति नीतिशतके ।)

अवलीढ, त्रि, (अव + लिह + क्त कर्म्मणि ।) भक्षितं । यथा मनुः,—

"पतत्रिणावलीढञ्च शुना संस्पृष्टमेव च" ।

इत्यादि । "पतत्रिणावलीढं काकादिना भक्षितं" । इत्याह्निकतत्त्वम् ॥

अवलीला, स्त्री, (अवरा लीला ।) हेला । अनायासः । यथा,—

"रतिश्चं नूतनं प्राप्य विषतुल्यं पुरातनं ।
कान्तं दृष्ट्वा हिनस्त्येव सोपायेनावलीलया" ॥

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २३ अध्यायः ।

अपिच ।

"शूलञ्च भ्रमणं कृत्वा पपात दानवोपरि ।
चकार भस्मसात्तञ्च सरथञ्चावलीलया" ॥

इति च तत्रैव प्रकृतिखण्डे १८ अध्यायः ॥

अवलुण्ठनं, क्ली, (अव + लुठि + भावे ल्युट् ।) लुण्ठनं । लोटा गड़ागड़ी इतिभाषा । अवपूर्ब्बकलुठधातोरनट् प्रत्ययेन निष्पन्नं ॥

अवलेपः, पुं, (अव + लिप् + भावे घञ् ।) अहङ्कारः । "दिएणागानां पथि परिहरन् स्थूलहस्तावलेपान्" इति मेघदूते ।) लेपनं । दूषणं । इति मेदिनी ॥ सक्तुः । इति त्रिकाण्डशेषः ॥

अवलेपनं, क्ली, (अव + लिप् + ल्युट् भावे ।) विलेपनं । अङ्गरागं । माखा इति भाषा । अवपूर्ब्बकलिपधातोरनट् प्रत्ययेन निष्पन्नं ॥

अवलेहः, पुं, (अवलिह्यते क्वाथादेः पुनः पाकात् घनीभूततया खाद्यते इति अव + लिह + कर्म्मणि घञ् ।) लेह्यौषधं । तस्य लक्षणं पर्य्यायश्च यथा,—

"क्वाथादेर्यत् पुनः पाकात् घनत्वं सारसक्रिया ।
सोऽवलेहश्चलेहश्च प्राश इत्युच्यते बुधैः" ॥

("जिह्वालेह्यावलेहिका") इति च वैद्यकपरिभाषा । यथा,—

"कटफलं पौष्करं शृङ्गी ह्रीबेरं वासस्य कारवी ।
श्लक्ष्णचूर्णीकृतं चैतन्मधुना सह लेहयेत् ॥
एषावलेहिका हन्ति सन्निपातं सुदारुणं ।
हिक्कां श्वासञ्च कासञ्च कण्ठरोगञ्च नाशयेत् ।
एतद्धीव्यं कफोद्रेके चूर्णमार्द्रकजै रसैः" ।

तत्रान्तरे च उक्तं ।

"अक्षार्द्धं मधुना लिह्यादार्द्रकस्य रसेन वा ।
संशोषं दारुणं हन्यात्तत्क्षणात्सन्निपातजम्" इति ॥

"सर्व्वेषु सन्निपातेषु न क्षौद्रमवतारयेत् ।
शीतोपचारि क्षौद्रं स्यात्शीतत्वात् विरुध्यते" ।

अयमभिप्रायः । सन्निपातज्वरेषु श्लेष्मनिग्रहार्थं सर्व्वदा खेदो हित उक्तः । तत्राग्निसम्बन्धादेव स्रोतसां तिक्ष्णता । उष्णेन मधुना विरोधः । उक्तञ्च गुप्ततेन ।

"उष्णैर्विरुध्यते सर्वं विषान्वयतया मधु ।
उष्णार्त्तमक्षिकाश्चास्य लिह्यन्ति यथा विषं" इति ।

शीतोपचारि क्षौद्रमिति । शीतेनोपचारोऽस्यास्तीति शीतोपचारि । शीतत्वात्र सन्निपाते विरुध्यते । अयमवलेहः प्रायेणोर्द्ध्वजत्रुरोगहरत्वात् सायमुपयुज्यते । यत उक्तं चरकेण ।

"ऊर्द्ध्वजत्रुगदघ्नी या सा सायमवलेहिका ।
अधोरोगहरी या सा भोजनात्प्राक् प्रयुज्यते" ।

पौष्करं पुष्करमूलं तदलाभे कुष्ठं देयं ॥ शृङ्गी कर्कटशृङ्गी । ह्रीबेरं सुगन्धीपिप्पलीनखरिचानि च । वासो यवासः । केचित् वासस्थाने यवानीं प्रक्षिपन्ति । कारवी मगरेला इति लोके । अक्षार्द्धावलेहिका ॥*॥

"स्निग्धमामलकं पिष्ट्वा द्राक्षया सह मेलयेत् ।
विश्वभेषजसंयुक्तं मधुना सह लेहयेत् ॥
तेनास्य शाम्यति श्वासः कासो मूर्च्छारुचिस्तथा" ॥

इत्यवलेहः ॥*॥ अन्यत् यथा,—

"पिप्पलीं चिपलाक्षापि समभागां ज्वरी लिहन् ।
मधुना सर्पिषा वापि कासी श्वासी सुखी भवेत् ॥
कटफलं पौष्करं शृङ्गी क्षुण्णा च मधुना सह ।
श्वासकासज्वरहरो लेहोऽयं कफनाशनः" ॥

चातुर्भद्रिका ॥ ० ॥

"कटफलं पौष्करं शृङ्गी यवानी कारवी तथा ।
कटुत्रयञ्च सर्व्वाणि समभागानि चूर्णयेत् ॥
आर्द्रकस्य रसैर्लिह्यान्मधुना वा कफज्वरी ।
कासश्वासरुचिच्छर्दिश्लेष्मानिलनिवृत्तये" ॥

अक्षार्द्धावलेहः । इति भावप्रकाशः ॥

("क्वाथस्य स्यात् पुनः पाकात् घनत्वं सारसक्रिया ।
सोऽवलेहश्च लेहः स्यात् तन्मात्रा स्यात्पलोन्मिता ।
सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुड़ः ।
द्रवं चतुर्गुणं दद्यादिति सर्व्वत्र निश्चयः ॥
मृपक्वे तन्तुमत्त्वं स्यादवलेहेऽप्यमज्जनं ।
स्थिरत्वं पीड्यते मद्रा गन्धवर्णरसोद्भवः ॥
दुग्धमिक्षुरसं यूषं पञ्चमूलकषायकं ।
वासाक्षार्धं यथायोग्यमनुपानं प्रशस्यते ॥*॥
तदुदाहरणं । यथा,—

"कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकं ।
पादशेषं गृहीत्वा च तस्मिंश्चूर्णानि दापयेत् ॥
पृथक् पलांशान्येतानि गुडूचीचव्यचित्रकाः ।
मुस्तं कर्कटशृङ्गी च व्यूषणं धन्वयासकं ।
भार्गी राखा शठी चैव शर्करा पलविंशतिः ।
प्रत्येकञ्च पलान्यष्टौ प्रदद्यादृततैलयोः ॥
पक्त्वा लेहत्वमानीय शीते मधु पलाष्टकं ।
चतुष्पलं तु गोक्षीर्य्या पिप्पलीनां चतुष्पलं ॥
क्षिप्त्वा निदध्यात् सुदृढे मृन्मये भाजने शुभे ।
लेहोऽयं हन्ति हिक्कार्त्तिश्वासकासानशेषतः ॥*॥
कण्टकार्य्यवलेहः ॥ ० ॥ इति च शार्ङ्गधरः ॥)

अवलेहनं, क्ली, (अव + लिह् + भावे ल्युट् ।) लेहनं । जिह्वादारा खादनं । चाटन । इति भाषा । अवलेहः । अवपूर्ब्बलिहधातोर्भावे ल्युटप्रत्ययेन निष्पन्नं ॥

अवलोकनं, क्ली, (अव + लुक् + ल्युट् भावे ।) दर्शनं । आलोकनं । इति हेमचन्द्रः ॥

("जलवेलावलोकनकुतूहली" ।
इति नागानन्दे ।)

अवलोकितः, पुं, (अव + लोक + भावे क्त ततोऽस्त्यर्थे अच् ।) लोकनायः । बुद्धः । इति विश्वमेदिन्यौ ॥

अवलोकितं, त्रि, (अव + लोक + कर्म्मणि क्त ।) निरीक्षितं । दृष्टं । इति विश्वमेदिन्यौ । (भावे क्त ।) प्रेक्षणक्रियायां, क्ली ॥

अवल्गुजः, पुं, (अवल्गोरङ्गोभनाज्जायते इति अवल्गु + जन् + ड ।) सोमराजी । इत्यमरः ॥ कृष्णवर्णसोमराजी । हाकुच् यस्य प्रसिद्धिः । तस्य गुणाः । वायु-कफ-कुष्ठ-व्रणदोष-नाशित्वं । इति राजवल्लभः । अस्य विवरणं वाकुची शब्दे द्रष्टव्यं ॥

("अवल्गुजाहीजकर्षं पीत्वा कोष्णेन वारिणा
भोजनं सर्पिषा कार्य्यं सर्व्वकुष्ठप्रणाशनम्" ॥
इति वैद्यकचक्रपाणिसङ्ग्रहः ॥)

अववादः, पुं, (अव + वद् + घञ् ।) आज्ञा । निन्दा । विश्वासः । इति मेदिनी ॥

अवशः, त्रि, (न विद्यते वशमायत्तत्वं यस्य ।) अवशीभूतः । विवशः ।

यथा,—

"श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यञ्च क्रिया कार्य्या विधानतः" ॥

इति शुद्धितत्त्वं ॥ (क्ली, अवश्यं । निश्चितम् ।)

अवशङ्घिकः, त्रि, (अवबद्धे शङ्घिनी येन ।) वस्त्रादिद्वारा दृढजानुजङ्घादयदृढबन्धनपूर्ब्बकोपविष्टः । काँड़बान्धिया वसा इति भाषा । यथा । कात्यायनः ।

"आसनारूढपादस्तु जानुनोर्ज्जङ्घयोस्तथा ।
क्षतावशङ्घिको यस्तु पौढ़पादः स उच्यते" ॥

आसनारूढपादः आसनारूढपादतलः । जानुनोर्ज्जङ्घयोः क्षतावशङ्घिको वस्त्रादिना क्षतदृष्टजानुजङ्घाबन्धः । इत्याह्निकतत्त्वं ॥

अवशिष्टः, त्रि, (अवशिष्यते इति अव + शिष + क्त ।) शेषः । उद्वृत्तः । अवशेषाश्रयः । यथा,—

"वल्मीकमूषिकोत्खातां मदमन्तर्ज्जलां तथा ।
शौचावशिष्टां गेहाच्च नादद्यात् लेपसम्भवां" ॥

इत्याह्निकतत्त्वं ॥

अवश्यं, व्य, (न वश्यं ।) निश्चयः । तत्पर्य्यायः । नूनं २ । निश्चितं ३ । इत्यमरः ॥

("अवश्यं याति तिर्य्यक्त्वं जग्ध्वा चैवाऽऽत्तं हविः" । इति मनुः ॥) (न + वश + यत् ।) अनायत्ते च ॥

अवश्यायः, स्त्री, (अव + श्यै + घञ् । पृषोदरादित्वात् ह्रस्वः ।) कुज्झटिका । इति शब्दरत्नावली ॥ (कुज्झटिकाशब्देऽस्य विशेषो ज्ञेयः ।)

अवश्यायः, पुं, (अवश्यायते शैत्यमापद्यते इति श्यैङ् गतौ + श्याद्यधेति घः । ततो आतो युगिति युक् ।) हिमं । इत्यमरः ॥

("अवश्यायनिपातेन किञ्चित्प्रक्षालिताद्यना" । इति रामायणे ।) गर्व्वः । इति विश्वप्रकाशः ।

अवश्यकयणी, स्त्री, (वश्यकयनी । चिरप्रसूता गौः । इत्यमरटीकायां भारतसुन्दरी ॥

अवश्यं, त्रि, (अवश्यते स्म, शृणि स्तम्भे स्तम्भु-

रोधने वा क्तः। स्तम्भः अवाङ्मेति यः। अवालम्बन इति सूत्रेण आविदूर्य्य स्तम्भः यत्वविधानादवष्टब्धशब्द आमन्नपर इति अद्यश्वीनावष्टब्धे इत्यत्र मनोरमायां स्थितं।) अविदूरः। समीपं। अवलम्बितं। आश्रितं। इत्यमरः॥ बद्धः। रुद्धः। इति भरतः॥ आक्रान्तः। इति मेदिनी॥

अवष्टम्भः, पुं, (अव + ष्टम्भु रोधे इति + घञ्। यत्वञ्च।) स्वर्गं।

("रघोरवष्टम्भमयेन पत्रिणा
हृदि क्षतो गोत्रभिदप्यमर्षणः"।

इति रघुवंशे।) स्तम्भः। प्रारम्भः। इति मेदिनी॥ सौष्ठवं। इति हलायुधः॥ (अवलम्बनं। बोधनम्। निष्पन्दता।)

अवष्वाणं, क्ली, (अव + ष्वन शब्दे + घञ्। यत्वञ्च।) भक्षणं। इति हेमचन्द्रः॥

अवस्, व्य, (अवर + पूर्व्वाधरावराणामित्यसिप्रत्ययः, तत्सन्नियोगेन अवरस्य अवादेशश्च।) व्यतिरेकः। इति केचित्॥

अवसः, पुं, (अव रक्षणादौ अवति इति अन्यविधमीत्यादिना असच् प्रत्ययः।) राजा। सूर्य्यः। इति सिद्धान्तकौमुदी॥

अवसं, क्ली, (अव + असिच् भावे।) रक्षणं। वैदिकशब्दोऽयं॥

अवसक्थिका, स्त्री, (अवबद्धे सक्थिनी यया बन्धप्रणाल्या सा, अव + सक्थि + समासे कप्।) खट्टा। तत्पर्य्यायः। पर्य्यस्तिका २ परिकरः ३ पर्य्यङ्कः ४। इति हेमचन्द्रः॥ (पर्य्यङ्कबन्धः। वस्त्रादिद्वारा एष्ठजानु-जङ्घा-हृदयदृढ़बन्धनपूर्व्वकोपवेशनं। यथा,—

"आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा।
कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते"॥

इति कात्यायनः।

"न्यायानः प्रौढ़पादश्च कृत्वा चैवावसक्थिकाम्।
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च"॥

इति मनुः।)

अवसथः, पुं, (अव + सो + क्थन्।) क्षात्रनिलयः। इति हेमचन्द्रः॥ पाठशाला चौपाड़ी यस्य प्रसिद्धिः। ग्रामः। इति शब्दरत्नावली॥ गृहं। इति हलायुधः॥

अवसथ्यः, पुं, (अवसथ + यत्।) क्षात्रवेश्म। इति हेमचन्द्रः॥ चौपाड़ी इति भाषा॥

अवसन्नः, त्रि, (अव + सद + क्त।) अवसादप्राप्तः। विषण्णः। यथा,—

"महिम्नः पारन्ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः।
अथावाच्यः सर्व्वस्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः"॥

इति पुष्पदन्तकृतशिवस्तोत्रं। अपि च।

"आचारेणावसन्नोऽपि पुनः प्रार्थयते यदि"।

इति व्यवहारतत्त्वं॥

अवसरः, पुं, (अव + सृ + अच्।) प्रस्तावः। मन्त्रविशेषः। वर्षणं। इति मेदिनी॥ वत्सरः। क्षणं। इति हेमचन्द्रः॥ अवकाशः। यथा। "गोवधे एका चेद्बुद्धिभिरित्यपदेशेन दण्डवत् प्रायश्चित्तानि भवन्तीत्यतिदेशानवसरात्। तदवसरस्ते प्रत्येकं पूर्णप्रायश्चित्तदृगुण्यं स्यात्"। इति प्रायश्चित्ततत्त्वं॥ (योग्यकालः। क्रियास्थितियोग्यतासम्पादकरूपः कालिकोऽवकाशः। यथा,—

"कामस्तु बाणावसरं समीक्ष्य"। इति कुमारे।

ग्रिष्यजिज्ञासानिवृत्तावश्यवक्तव्यरूपः सङ्गतिविशेषः। अनन्तरवक्तव्यत्वम् अवसरः। "उपमानेऽवसरसङ्गतिः"। इति जगदीशः।)

अवसर्गः, पुं, (अव + सृज् + घञ्।) स्वेच्छाचारः। तत्पर्य्यायः। प्रकाम्यं २ स्वाच्छन्द्यं ३ अनुमननं ४। इति त्रिकाण्डशेषः॥

अवसर्पः, पुं, (अव + सृप् + अच्।) अपसर्पः। चरः। इत्यमरटीकायां भरतः॥

अवसर्पिणी, स्त्री, (अव + सृप + णिच् ङीप्।) जिनानां कालविशेषः। स तु दशकोटिकोटिसागरवर्षैः समाप्यते। इति हेमचन्द्रः॥

अवसव्यं, त्रि, अपसव्यं। दक्षिणं। इति रायमुकुटः॥

अवसादः, पुं, (अव + सद + घञ्।) अवसन्नता। तत्पर्य्यायः। विषादः २ सादः ३ विषण्णता ४। इति हेमचन्द्रः॥ (श्लेषः। क्षयः। यथा,—

"धैर्य्यावसादेन हृतप्रसादा
वन्यद्विपेनेव निदाघसिन्धुः"।

इति किरातार्জ্জুनीये।)

अवसानं, क्ली, (अव + सो + ल्युट्।) क्रियासमाप्तिः। श्लेषः। तत्पर्य्यायः। सातिः २। इत्यमरः॥ विरामः ३। इति जटाधरः॥ मृत्युः।

("पुंसोऽवसानं व्रजतोऽपि निष्ठुरै-
रिन्धैधनैः पञ्चपदीनमुच्यते"।

इति पञ्चतन्त्रे।) सीमा। इति हेमचन्द्रः॥

अवसायः, पुं, (अव + सो + घञ्।) श्लेषः। समाप्तिः। निश्चयः। इति मेदिनी॥

अवसितं, त्रि, (अव + सो + क्त।) परिपक्वमर्दितधान्यं। तत्पर्य्यायः। ऋद्धं २। इति भरतमेदिन्यौ॥ ज्ञातं। अवसानगतं। समाप्तं। तत्पर्य्यायः। सितः २। इत्यमरमेदिन्यौ॥ ("यदि नेपथ्यविधानम् अवसितम्"। इति शाकुन्तले।)

अवसेकिमः, पुं, (अवसेकेन + निर्वृत्तः। अवसेक + इमनच्।) वटकः। इति हेमचन्द्रः॥ बड़ा इति भाषा॥

अवस्कन्दः, पुं, (अव + स्कन्द + अच्।) विजिगीषूणां निवेशस्थानं। शिविरं। इति हलायुधः॥ अवगाहनं। यथा,—

"ततानुपातं कुसुमान्यगच्छात्
स नद्यवस्कन्दमुपास्पृशच्च।
कुतूहलाच्चारुशिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्त"॥

इति भट्टौ २ सर्गे ११ श्लोकः॥ नद्यामवस्कन्दोऽवगाहो यत्र स्नानक्रियायां। इति तट्टीकायां भरतः॥ (आक्रमणं। यथा,—

"अवस्कन्दभयात् राजा प्रजागरहृतश्रमम्।
दिवासुप्तं समाहन्यान्निद्राव्याकुलसैनिकम्"॥

इति हितोपदेशः।)

अवस्कन्दनं, क्ली, (अव + स्कन्द + ल्युट्।) अवगाहनं। इति भट्टिः॥ अवतरणं। इति महाभारतं॥ अवपूर्ब्बस्कन्दधातोरनट्प्रत्ययेन निष्पन्नं॥

अवस्कारः, पुं, (अव कीर्य्यते क्षिप्यते इति। अव + कृ + घञ् + सुट्।) विष्ठा। गूथं। इत्यमरमेदिन्यौ॥ संमार्জ্জन्यादिनिक्षिप्तधूल्यादि। इत्यमरटीकायां मथुरानाथः सारसुन्दरी च॥

अवस्तात्, व्य, (अवरस्मिन्, अवरस्मात्, अवरस्मिन्नर्थे अस्तातिः।) अवरे। पश्चात्। श्लेषे। अन्ते। इति पाणिनिः॥ ("अवस्तात्स्वर्गलोकं प्रापयन्तः"। इति शतपथब्राह्मणे।)

अवस्तारः, पुं, (अव + स्तृ + घञ्।) यवनिकादिः। कानात् इत्यादि भाषा॥ अवस्तीर्य्यतेऽनेनेति स्तृञ आच्छादने घञ्॥

अवस्तु, क्ली, (न वस्तु। नञ्तत्पुरुषः।) असद्वस्तु। (यथा,—

"अवस्तुनिर्ब्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः"।

इति कुमारे।) वेदान्तमते अज्ञानादिसकलजड़समूहः॥

अवस्था, स्त्री, (अव + स्था + अङ्।) दशा। कालिकविशेषः। इत्यमरः॥

"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।
कैशोरमापञ्चदशात् यौवनन्तु ततः परं॥
आषोड़शाद्बालवेद्वाल्यस्यावस्तथोत्तमे।
वृद्धस्तु सप्ततेरूर्द्धं वर्षीयान् नवतेः परं"॥

इति स्मृतिः॥

अवस्थाचतुष्टयं, क्ली, (अवस्थायाश्चतुष्टयं। तत्पुरुषः।) कालकृतचतुर्विधदशा। यथा। "आपञ्चदशवर्षं बाल्यं। आत्रिंशद्वर्षं कौमारं। आपञ्चाशद्वर्षं यौवनं। पञ्चाशत ऊर्द्धं वृद्धत्वं"। इति वैद्यकशास्त्रे॥

अवस्थानं, क्ली, (अव + स्था + ल्युट्।) स्थितिः। वासः। यथा। "परः सन्निकर्षश्च उपर्य्यधोभावापन्नसमसूत्रपातन्यायेनैकावच्छेदेन सहावस्थानरूपः"। इति तिथ्यादितत्त्वं॥ (अवस्था। प्रतिष्ठा। यथा, "कीदृक् ते व्यसनावस्थानम्"। इति पञ्चतन्त्रे।

"पद्भ्यां दृढ़मवस्थानं स कृत्वा कपिकुञ्जरः"।

इति रामायणे॥)

अवस्थितः, त्रि, (अव + स्था + क्त।) कृतावस्थानः। अवस्थितिविशिष्टः। स्थितं। यथा।

"यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः"।

इति श्रीभगवद्गीतायां २ अध्याये ६ श्लोकः॥

अवस्थितिः, स्त्री, (अव + स्था + क्तिन्।) अवस्थानं। थाका। इति भाषा। अवपूर्ब्बकस्थाधातोः क्तिप्रत्ययेन निष्पन्ना॥ (अनुसरणम्। अभ्यासः।)

अवहस्तः, पुं, (अवरं हस्तस्य। एकदेशी तत्पुरुषः।) हस्तपृष्ठं। इति हेमचन्द्रः॥

अवहारः, पुं, (अव + हृ + घञ्।) चौरः। द्यूतयुद्धादिविश्रामः। निमन्त्रणं। उपनेतव्यद्रव्यं।

याहनामजलजन्तुः । इति विश्वमेदिन्यौ । धर्म्मान्तरं । इति शब्दरत्नावली ॥ (आक्रान्तम् । स्वधर्म्मपरित्यागपूर्व्वकधर्म्मान्तरग्रहणम् । प्रत्यपगम् ।)

अवहारकः, पुं, (अवहार + स्वार्थे कः ।) जलजन्तुविशेषः । हाङ्गर इति ख्यातः । जलहस्तीति केचित् । तत्पर्य्यायः । अवग्राहः २ नक्रनाशः ३ अवहारः ४ । इति शब्दरत्नावली । युद्धादिनिवर्त्तके त्रि ।

अवहार्य्यः, त्रि, (अव + हृ + ण्यत् ।) समर्पणीयः । यथा,—

"आधिश्चोपनिधिश्चोभौ न कालात्ययमर्हतः ।
अवहार्य्यौ भवेतां तौ दीर्घकालमवस्थितौ" ॥

इति मानवे ८ अध्याये १४५ श्लोकः ॥ (अर्थदण्डयोग्यः । यथा,—

"अवहार्य्यो भवेच्चैव सान्वयः षट्शतं दमम् ।
निरन्वयोऽपसरः प्राप्तः स्यात्तौरकिल्बिषं" ॥

इति मनुः ।

अवहालिका, स्त्री, (अव + हल् + ण्वुल् + टाप् ।) प्राचीरं । इति हारावली ॥

अवहित्तं, त्रि, (अव + धा + क्त ।) विज्ञातं । अवधानं गतं । इति धरणी ॥ (सावधानः । प्रमादरहितः । यथा,—

"शृणुष्वावहितो भूत्वा यदुक्तं नन्दने पुरा" ।

इति मार्कण्डेयपुराणम् ॥)

अवहित्था, स्त्री, (न वहित्थमिष्ठतीति अवहित्थः + स्था + क + टाप् । एषोदरादित्वात् साधुः ।) आकारगुप्तिः । रत्यादिसूचकोमुखरागादिराकारः । अङ्गवैक्लव्यमिति बोपालितः ॥ भयलज्जादिना तस्य गोपनं । इत्यमरटीकायां भरतः ॥ (तल्लक्षणं, यथा साहित्यदर्पणे,—

"भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ।
व्यापारान्तरसक्त्यान्यथाभाषण-विलोकनादिकरी" ॥ उदाहरणम् । यथा कुमारसम्भवे,—

"एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्व्वती" ॥
लज्जावशात् कमलदलगणनाव्याजेन हर्षं जुगोप इत्यर्थः । अनेन अवहित्थाख्यः सञ्चारी भाव उक्तः, तदुक्तं,—

"अवहित्था तु लज्जादेर्हर्षाद्याकारगोपनं" ।

इति मल्लिनाथः ।)

अवहेलं, क्ली, स्त्री, (अव + हेड् + घञ् डस्य लः, डलयोरेकत्वस्मरणात् ।) अनादरः अवज्ञा । इत्यमरः ॥

अवहेलनं, क्ली, (अव + हेड् + ल्युट् ।) अवहेला अवमानना । इति शब्दरत्नावली ॥

अवहेलितं, क्ली, (अव + हेड् + क्त ।) अनादरः । अवहेला । तद्विशिष्टे त्रि ॥ कृतावहेलनवस्तु । अवहेलं जातमस्य इत्यर्थे इतप्रत्ययेन निष्पन्नं ॥

अवाक्षुतं, क्ली, (अव + क्ष + क्त ।) उपरिक्षुतक्षुतं । यथा मनुः,—

"छिन्नदन्तं नखैश्छिन्नं पतितान्नमवक्षुतं" ।

इत्यादिकृतत्त्वं ॥

अवाक्, [च्] त्रि, (नास्ति वाक् यस्य सः ।) वाक्यरहितः । इत्यमरः ॥ वोवा इति भाषा । क्विबन्तवद्धातोर्नञ्समासेऽयं प्रयोगः ॥ दक्षिणं । अधोमुखं । एतदर्थे योः अवपूर्ब्बान्नञ्वधातोः प्रयोगः ॥

अवाक्पुष्पी, स्त्री, (अवाक् अधोमुखं पुष्पमस्याः ।) घृतपुष्पा । घृलुफा इति ख्याता । मिश्रेया । इत्यमररत्नमाले ॥ मौरी इति भाषा । वृक्षविशेषः । हेठाऊली चोरऊली चोरखड्की इति भाषा । तत्पर्य्यायः । अधःपुष्पी २ मङ्गल्या ३ अमरपुष्पिका ४ । इति रत्नमाला ॥

अवाक्शिराः, [स्] पुं, (अवाक् अवनतं शिरो यस्य ।) अधोमुखः । यथा,—

"अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं व्रजेत् ।
यः प्रश्नं वितथं ब्रूयात् पृष्टः सन् धर्म्मनिश्चये" ॥

इति मानवे ८ अध्याये ९४ श्लोकः ॥
("इति ब्रुवति रामेतु लक्ष्मणोऽवाक्शिरास्तदा" इति रामायणम् ॥)

अवाग्र्यं, त्रि, (अवनतमग्रमस्य ।) नम्रं । अवनतं । इत्यमरः ॥

अवाङ्, [ञ्च] त्रि, (अव + अञ्च + क्विप् ।) नीचवदनः । तत्पर्य्यायः । अधोमुखः २ अवाङ्मुखः ३ अवाचीनः ४ इत्यमर-जटाधरौ ॥
("साक्षी दृष्टश्रुतादन्यत् विब्रुवन्नार्य्यसंसदि ।
अवाङ् नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते" ॥
इति मनुः ।)

अवाङ्मुखं, त्रि, (अवाङ्मुखमस्य ।) अधोवदनं । यथा,

"तत् श्रुत्वा स बलः खेद-हर्ष-दुःख-त्रपाकुलः ।
अवाङ्मुखः प्राप्तकालां तामुवाचाम्बुगद्गदं" ॥

इति कथासरित्सागरे अलङ्कारवतीलम्बके ६३ रङ्गः ॥

अवाची, स्त्री, (अव + अञ्च + क्विप् + ङीप् । दक्षिणदिक् । इति वोपदेवादयः ॥ अधोदिक् । इति व्याडिः ॥ अधोमुखी ॥

अवाचीनं, त्रि, (अवाचां भवं । अवाची + ख ।) दक्षिणदिग्भववस्तु । अधोमुखः । इति स्वामिजटाधरौ ॥

अवाच्यं, क्ली, (न + वच + ण्यत् ।) दुर्व्वाक्यं । तत्पर्य्यायः । अनक्षरं २ । इत्यमरः ॥ वचनानर्हं । अनक्षरं गालि प्रभृति इति मधुः । निन्दितान्यक्षराणि अत्र अनक्षरं अव्ययानामनेकार्थत्वात् नञ् निन्दायां । एवमवाच्यं वक्तुमयोग्यं वचनौ वाचि दृश्यवासोरिति घ्यञ् भुजवचेति कनिषेधः ॥ इति भरतः ॥
("वाच्यावाच्ये हि कुपितो न विजानाति कर्हिचित्" । इति भारते ।
"अवाच्यं वदतो जिह्वा कथं न पतिता तव" ।
इति रामायणे ।)

अवाच्यः, त्रि, (अवाच् + भवार्थे यत् ।) अनिन्दितः । इति स्मृतिः ॥ अवक्तव्यः । वचनानर्हः । यथा,—

"अनक्षरमवाच्यन्तु वचनार्हं न यद्भवेत् ।
एष वन्ध्यासुतो याति खपुष्पकृतशेखरः ॥
मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्द्धरः" ।

इति शब्दरत्नावली ॥ (अवरदेशकालादौ भवः ।)

अवाच्यदेशः, पुं, (अवाच्यो देशः ।) योनिः । इति विकाण्डशेषः ॥

अवादी, [न्] त्रि, (वद + णिन् । न वादी । नञ्तत्पुरुषः ।) अविरोधी । अविवादी । अवक्ता । अवदनशीलः । वदधातोर्णिन् प्रत्ययानन्तरं नञ्समासनिष्पन्नः ॥

अवाधं, त्रि, (नास्ति बाधा यस्मिन् ।) बाधाशून्यं । अनर्गलं । तत्पर्य्यायः । निरर्गलं २ । इत्यमरः ॥

अवाध्यः, त्रि, बाधानर्हः । बाधायोग्यः । अबाधनीयः । अबाधितव्यः । न बाध्यः अबाध्य इति नञ्समासनिष्पन्नः ॥

अवानं, त्रि, (अव + अन् + अच् ।) शुष्कफलादि । इति शब्दरत्नावली ॥
("अवानमशुष्कादृष्टमेकमाम्रफलं किल" । इति भारते ।)

अवान्तरं, त्रि, (अवगतमन्तरं मध्यम् । प्रादिसमासः ।) प्रधानान्तःपाति । इयं फलश्रुतिर्न श्रेयःपरमपुरुषार्थसाधनपरा न भवति । किन्तु बहिर्मुखानां मोक्षविवक्षया अवान्तरकर्म्मफलैः कर्म्मसु रुच्युत्पादनमात्रं । यथा भैषज्ये औषधे रुच्युत्पादनं । यथा,—

"पिब निम्बं प्रदास्यामि खलु ते खण्डशर्कराम् ।
पित्तैवमुक्तः पिबति तिक्तमप्यतिबालकः" ॥
"अत्र तिक्तनिम्बादिपानस्य न खलु खण्डादिशर्करादिभक्षणस्य प्रयोजनं किन्वारोग्यं तथा वेदेऽप्यवान्तरफलैः प्रलोभयन् मोक्षायैव कर्म्माणि विधत्ते" इति मलमासतत्त्वं ॥

अवापितधान्यं, त्रि, (अवापितं अक्षतवपनं धान्यम् ।) अक्षतवपनधान्यं । रोपितधान्यं । रोयाधान इति भाषा । तत् वापितधान्यापेक्षया किञ्चिद्धीनगुणं । इति राजवल्लभः ॥

अवारं, क्ली, (अव + ऋ + घञ् ।) अर्व्वाक्तटं । नद्यादेः पूर्व्वतीरं । इत्यमरः ॥ एपार इति भाषा ।

अवारपारः, पुं, (अवारं अर्व्वाक्तीरं पारं उत्तरतीरञ्च यस्य ।) समुद्रः । इति हेमचन्द्रः ॥

अवारपारीणः, त्रि, (अवारपारे गच्छतीति । अवारपार + ख ।) पारगः । नद्यादिपारगतत्त्वज्ञः । इति पाणिनिः ॥

अवारिका, स्त्री, (नास्ति वारि यत्र ततः स्वार्थे कन् + टाप् ।) धन्याकं । धनिया इति भाषा । अवरिका च पाठः । इति राजनिर्घण्टः ॥

अवारितं, त्रि, (न वारितं । नञ्समासः ।) अक्षतवारणं । अनिवारितं । यथा,—

"अवारितद्वारतया तिरश्चा-
मन्तःपुरे तस्य निविश्य राज्ञः ।
गतेषु रम्येष्वधिकं विशेष-
मध्यापयामः परमाणुमध्याः" ॥

इति नैषधे ३ सर्गे ४२ श्लोकः ॥

अवारीणः, त्रि, (अवारं गच्छतीत्यार्थे खः ।) पारगः । नदीपारगतः । इति पाणिनिः ॥

अवार्य्यं, त्रि, (न वार्य्यं । नञ्समासः) अनिवार्य्यं ।

अवारणीयं । अवारितव्यं । वारणायोग्यं । यथा,—
"नमस्ते नित्यविलसद्दैत्यवस्त्रनिकेतन ।
अवार्य्यवीर्य्यवद्यं विष्णोर्यत् प्रणमाम्यहं" ॥
इत्युत्कलखण्डे २७ अध्यायः ॥

अवासाः, [स्] त्रि, (नास्ति वासो यस्य ।) वस्त्ररहितः । नग्नः । इत्यमरः ॥

अवास्तवं, त्रि, अयथार्थं । मिथ्या । न वास्तवं अवास्तवमिति नञ्समासनिष्पन्नं ॥

अवाक्षः, त्रि, परिरक्षकः । अवपूर्ब्बकाक्षधातोरल् प्रत्ययेन निष्पन्नः ॥

अविः, पुं, (अव + इन् ।) सूर्य्यः । पर्ब्बतः । मेषः । इत्यमरः ॥ [इति मनुः ।)
("अश्वुकरखरोष्ट्राणां गोऽजाविमृगपक्षिणां" ।
"मूत्राणि हस्तिकरभमहिषीखरवाजिनां ।
गोऽजावीनां स्त्रियां पुंसां मूत्रवर्ग उदाहृतः" ॥
इति वैद्यकरत्नेन्द्रसारसंग्रहे ॥)
नाथः । मूषिककम्बलः । इति मेदिनी ॥ प्राचीरं वायुः । इति दण्डी ॥

अविः, स्त्री, ऋतुमती । इत्यमरः ॥

अविकटः, पुं, (अवीनां मेषाणाम् संघातः । अवि + कटच् ।) मेषसमूहः । इति संक्षिप्तसारपरिशिष्टं ॥ भेड़ारपाल इति भाषा ।

अविकटः, त्रि, अविशालः । अकरालः । अविस्तारः । न विकटः अविकटः इति नञ्समासनिष्पन्नः ॥

अविकं, क्ली, (अवि + क ।) हीरकं । इति राजनिर्घण्टः ॥ (हीरकशब्दे ऽस्य गुणादयो ज्ञातव्याः ॥

अविकारी, [न्] त्रि, (न विकारी + नञ्तत्पुरुषः ।) विकाराजनकः । यथा बृहस्पतिः ।
"कन्दमूलफलैः पुण्यैः शस्तैः शुक्लरसन्तु यत् ।
अविकारि भवेन्मेध्यमभक्ष्यं तद्विकारकृत्" ॥
इत्याह्निकाचारतत्त्वं ॥

अविगन्धिका, स्त्री, (अवेरजायाः गन्द इव गन्धोऽस्याः । ततः स्वार्थे कन् ।) अजगन्धाक्षुपः । इति राजनिर्घण्टः ॥

अविगीतं, त्रि, (न विगीतम् । नञ्तत्पुरुषः ।) अनिन्दितं । यथा । "नापि मङ्गलं सफलमविगीतशिष्टाचारविषयत्वाद्दूर्व्वत्" । इति मङ्गलवादचिन्तामणिः ॥

अविघ्नः, पुं, (न विघ्नः । नञ्तत्पुरुषः ।) करमर्दकवृक्षः । इत्यमरः ॥ पानिआमला इति ख्यातः । इति सारसुन्दरी ॥

अविचारः, पुं, (नास्ति विचारो यस्येति ।) अन्यायः । अत्याचारः । विचाररहिते त्रि । (विचाराभावः ।) यथा,—
"अविचारेण सर्व्वाभिरनुष्ठेयन्तु तत् पुनः ।
संसारोत्तारणायालमेतद्वेदविदो विदुः" ॥
इति मत्स्यपुराणं ॥

अविचारितः, त्रि, (न विचारितः । नञ्तत्पुरुषः ।) अकृतविचारः । अविवेचितः । अविचारशब्दादितप्रत्ययेन निष्पन्नः ॥ ("अतः सर्व्वथाऽविचारितं कर्म्म न कर्त्तव्यम्" । इति पञ्चतन्त्रम् । अविवेचितं सम्यग्विवेचनं विना । यथा,—
"स किं भृत्यः स किं मन्त्री य आदावेव भूपतिम् ।
युद्धोद्योगं स्वभृत्यागं निर्दिशत्यविचारितम्" ॥
इति हितोपदेशः ।)

अविच्छिन्नं, क्ली, (न विच्छिन्नं, नञ्तत् ।) विच्छेदाभावयुक्तं । अनिष्पत्तिमत् । यथा,—
"अविच्छिन्ने कथम्भावे यत् प्रधानस्य पच्यते ।
अविज्ञातफलं कर्म्म तस्य प्राकरणाङ्गता" ॥
इति मलमासतत्त्वम् ॥

अविज्ञः, त्रि, (न विज्ञः । नञ्तत्पुरुषः ।) अप्रवीणः । अनिपुणः । अनभिज्ञः । अशिक्षितः । अज्ञती । यथा,—
एते सर्व्वे गुणाः कान्त सन्ति कान्ते त्वयि ध्रुवं ।
त्वां न वाञ्छन्ति याः कान्तास्ता अविज्ञाश्च वञ्चिताः"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २३ अध्यायः ॥

अविज्ञेयं, त्रि, (न विज्ञेयं । नञ्तत्पुरुषः ।) दुर्ज्ञेयं । यथा,—
"आसीदिदं तमोभूतमप्रज्ञातमलक्षणं ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः" ॥
इति मानवे १ अध्यायः ॥

अविडीनं, क्ली, (न विडीनम् । नञ्तत्पुरुषः ।) पक्षिणां आभिमुख्याभिगमनं । इति महाभारतं ॥

अवितं, त्रि, (अव + क्त ।) त्रातं । रक्षितं । इत्यमरः ॥

अवितथं, क्ली, (न वितथम् । नञ्तत्पुरुषः ।) सत्यं । ("अवितथमाह प्रियंवदा" । इति शाकुन्तले ।) तद्विशिष्टे त्रि । इति रत्नावली ॥ (सार्थकं । यथा,—"वत्स ! अवितथैषा तव भारती भवतु" । इति नागानन्दे ।)

अवित्यजः, पुं, क्ली, (न विशेषेण त्यज्यते रसायनादिषु इति । न + वि + त्यज + क ।) पारदः । इति राजनिर्घण्टः ॥

अविदूसं, क्ली, (अवेर्मेषस्य दुग्धम् । अवेः दुग्धे सोढ़दूसमरीसचः, इति दूसप्रत्ययः ।) मेषदुग्धं । इति हेमचन्द्रः ॥ (मेषदुग्धविवरणेऽस्य विशेषो ज्ञेयः ॥)

अविद्धकर्णा, स्त्री, अम्बष्ठा । आकनादि इति ख्याता । इति भरतराजः । इत्यमरटीकायां भरतः ॥

अविद्धकर्णी, स्त्री, (न विद्धः पर्णरूपः कर्णो यस्याः ।) विद्धकर्णीलता । इति भरतः ॥ (माचिकाशब्देऽम्बष्ठकीशब्दे चास्या गुणादयो ज्ञातव्याः ॥)

अविद्यः, त्रि, (नास्ति विद्या यस्य सः ।) विद्यारहितः । अविद्वान् । विद्याहीनः । यथा,—
"अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः" ।
अपि च । कात्यायनः ।
"नाविद्यानान्तु वैद्येन देयं विद्याधनात् क्वचित्" ॥
इति दायतत्त्वं ॥ अन्यच ।
"अविद्यानान्तु सर्व्वेषामीहातस्तेऽङ्गनं भवेत् ।
समस्तञ्च विभागः स्यादपित्र्य इति धारणा" ॥
इति मानवे ९ अध्याये २०५ श्लोकः ॥

अविद्यमानः, त्रि, (न विद्यमानः । नञ्तत्पुरुषः ।) अवर्त्तमानः । सत्तारहितः । अभावः । यथा नारदः,—
"अविद्यमाने पित्र्यर्क्षे स्वांशादुद्धृत्य वा पुनः ।
अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्व्वसंस्कृतैः" ॥
इति दायतत्त्वं ॥

अविद्या, स्त्री, (न विद्या । नञ्तत्पुरुषः ।) अज्ञानं । इत्यमरः ॥ माया । इति वेदान्ते ॥ (अहङ्कारहेतुकमज्ञानं, मिथ्याज्ञानं, विद्याविरोधिनी, अयथार्थबुद्धिः । यदुक्तम्,—
"अविद्याया अविद्यात्वमिदमेव तु लक्षणम् ।
यत्समाधासहिष्णुत्वमन्यथा वस्तु सा भवेत्" ॥
अन्यच,
"सेयं भ्रान्तिर्निरालम्बा सर्व्वन्यायविरोधिनी ।
सहते न विचारं सा तमो यद्दिवाकरम्" ।
अयञ्चमहदहङ्कारपञ्चतन्मात्रेष्वनात्मख्यातिबुद्धिः । यथा,—"शरीरे मनुष्योऽहमित्यादि" । इयञ्च सर्व्वक्लेशमूलभूता तम इत्युच्यते ।
"अविरोधितया कर्म्म नाऽविद्यां विनिवर्त्तयेत् ।
विद्याविद्यां निहन्त्येव तेजस्तिमिरसंघवत्" ॥
इति आत्मबोधः ।)

अविधिः, पुं, (न विधिः । नञ्तत्पुरुषः ।) अविधानं । शास्त्राविहितं । यथा,—
"येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्ब्बकं" ॥
इति श्रीभगवद्गीतायां ९ अध्याये २३ श्लोकः ॥
अपि च याज्ञवल्क्यः ।
"वसेत् स नरके घोरे दिनानि पशुरोमभिः ।
अमितानि दुराचारो यो हन्त्यविधिना पशून्" ॥
इत्याह्निकतत्त्वं ॥

अविनः, पुं, (अव + इनच् ।) यज्ञः । यागकर्त्ता । इत्युणादिकोषः ॥

अविनयः, पुं, (न विनयः । नञ्तत्पुरुषः ।) विनयाभावः । यथा,—
"बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः ।
वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे ॥
वेणो विनष्टोऽविनयान्नऊषश्चैव पार्थिवः ।
सुदासो यवनश्चैव सुमुखो निमिरेव च" ॥
इति मानवे ७ अध्याये ४०।४१ श्लोकौ ॥ (अशिष्टाचारः । यथा,—
"अयमाचारत्यविनयं सुग्धासु तपस्विकन्यकासु" ।
इति शाकुन्तले ।) अविनीते त्रि ॥

अविनाभावः, पुं, (विना व्यापकं विना न भावः स्थितिः ।) व्याप्तिः । व्याप्यनिष्ठव्यापकनिरूपितधर्म्मः । यथा,—"वह्निमान् धूमात्" इत्यादौ धूमनिष्ठा वह्निनिरूपिता व्याप्तिः ॥ इति न्यायमीमांसयोर्मतं ॥ तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावः । यथा । केयमाकाङ्क्षा न तावदविनाभावः । नीलं सरोजमित्यादौ तदभावात् । विमलं जलं नद्याः कच्छे महिष इत्यत्र जलान्वितनद्या अविनाभावात् कच्छे साकाङ्क्षतापत्तेश्च । इत्याकाङ्क्षाचिन्तामणिः । अविनाभाव इति । तत्पदार्थेन विना यो भावः सत्त्वं तदभाव इत्यर्थः । तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावस्तत्पदार्थे तत्पदार्थाकाङ्क्षा इति भावः । इति तट्टीका माधुरी ॥

अविनीतः, त्रि. (न विनीतः। नञ्तत्पुरुषः।) विनयरहितव्यक्तिः। तत्पर्य्यायः। समुद्धतः २। इत्यमरः॥ (यथा,—
"न चापि प्रतिकूलेन नाविनीतेन रावण!।
राज्यं पालयितुं शक्यं राज्ञा तीक्ष्णेन वा पुनः"॥
इति रामायणे। अनियमितः। यथा,—
"नाविनीतैर्व्रजेद्भूर्यं न च क्षुद्राधिपीडितैः"॥
इति मनुः।)

अविनीता, स्त्री, (न विनीता। नञ्तत्पुरुषः।) पुंश्चली। असती। इति हेमचन्द्रः॥

अविपटः, पुं, (अवि+पटच्।) अवीनां विस्तारः इति संक्षिप्तसारव्याकरणपरिभाष्यं। कम्बलादिः॥

अविप्रियः, पुं, (अवि+प्री+क।) श्यामाकवृक्षः। इति राजनिर्घण्टः॥ (यदा न विप्रिय इत्येवं स्यात् तदा इष्टः।)

अविप्रिया, स्त्री, (अवीनां मेषादीनां प्रिया।) श्वेतालता। इति राजनिर्घण्टः॥

अविभक्तः, त्रि, (न विभक्तः। नञ्तत्पुरुषः।) अष्टयक्। यथा स्मृत्यचिन्तामणौ।
"विभक्ता अविभक्ता वा कुर्य्युः श्राद्धमदैविकं।
मघासु च तथान्यत्र नाधिकारः पृथग्विना"॥
इति मलमासतत्त्वं॥

अविभाज्यं, त्रि, (न विभाज्यम्। नञ्तत्पुरुषः।) विभागायोग्यं। अथ विभाज्याविभाज्ये। तत्र व्यासः।
"अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति यद्धनं।
दायादेभ्यो न तद्दद्यात् विद्यालब्धञ्च यद्भवेत्"॥*॥
विद्याधनमाह कात्यायनः।
"उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्व्वकं।
विद्याधनन्तु तद्विद्यात् विभागे न नियोजयेत्॥
श्रित्र्यादात्विज्यतः प्रश्नात् सन्दिग्धप्रश्ननिर्णयात्।
स्वज्ञानसंश्रयादाद्यं प्राध्ययनात्तु यत्॥
विद्याधनन्तु तत्प्राज्ञैर्विभागे न प्रयोजयेत्।
श्रित्र्येष्वपि हि धर्म्मोऽयं मूल्यादप्यधिकं भवेत्॥
परं निरस्य यल्लब्धं विद्यया द्यूतपूर्व्वकं।
विद्याधनन्तु तद्विद्यात् न विभाज्यं कदाचन"॥*॥
यदि भवान् भद्रमुपन्यस्यति तदा भवत एव मयैतद्देयमिति पणितं यच्चोपन्यासं निह्नुत्यैर्य्य लभते तन्न विभाज्यं। श्रित्र्यादध्यापितात्। आर्त्विज्यतः यजमानाद्विद्यया लब्धधनं न प्रतियह्यलब्धं वेतनरूपत्वात्तस्य। तथा यत्किञ्चिद्विद्याप्रश्ने निह्नुत्यैर्य्यपणितं यदि कश्चित् परितोषाद्दाति। तथा योऽस्मिन् शास्त्रार्थे अस्माकं संशयमपनयति तस्मै धनमिदं ददानीत्युपस्थितस्य संशयमपनीय यल्लब्धं। दादिनोर्व्वा सन्देहे न्यायकरणार्थमागतयोः सम्यङ्निरूपणेन यल्लब्धं षष्ठांशादिकं तथा शास्त्रादिप्रकरणज्ञानं सम्भाव्य यत् प्रतियहादिना लब्धं। तथा शास्त्रज्ञानविवादे अन्यत्रापि यत्र कुत्रचिदन्योन्यज्ञानविवादे निर्ज्ञित्य यल्लब्धं। तथैकस्मिन् देये बहूनामुपस्थिते येन प्रहरात् यल्लब्धं। तथा श्रित्र्यादिविद्यया चित्रकरसुवर्णकारादिभिर्यल्लब्धं। तथा द्यूतेनापि परं निर्ज्ञित्य यल्लब्धं। तत्सर्व्वमविभाज्यमितरैः। तस्माद्यया कयाचिद्विद्यया लब्धमर्ज्जकस्यैव तन्नेतरेषामिति। प्रदर्शनार्थन्तु कात्यायनेन विस्तारितमिति दायभागः॥*॥ नारदः।
"कुटुम्बं बिभ्रयाद्भ्रातुर्यो विद्यामधिगच्छतः।
भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्"॥
बिभ्रयादित्येकवचननिर्देशान्न बहवः। यदि विद्यामभ्यस्यतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्यां संवर्द्धयति तदा तद्विद्यार्ज्जितधने तस्याधिकारः। अश्रुतो मूर्खः। कल्पतरुमिताक्षरादीपकलिकासु। कात्यायनः।
"परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या।
तथा लब्धं धनं यत्तु विद्यालब्धं तदुच्यते"॥
अन्यतः पितृमातृकुलव्यतिरिक्तात्॥*॥ अत्र विशेषयति स एव।
"नाविद्यानान्तु वैद्येन देयं विद्याधनात् क्वचित्।
समविद्याधिकानान्तु देयं वैद्येन तद्धनं"॥
तच्चोदितविद्यापदमुभाभ्यां सम्बध्यते तेन समविद्याधिकविद्यानां भागो न तु न्यूनविद्ययोः। वैद्येन विदुषा॥*॥ पुनर्व्विशेषयति।
"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा।
श्रौर्य्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्बृहस्पतिः"॥
कुले स्वकुले पितामहपितृव्यादिभ्यः। पितृत एव वा। श्रिक्षितविद्यानां भ्रातॄणां। यद्विद्याश्रौर्य्यप्राप्तं धनं तद्विभजनीयमिति कल्पतरुरत्नाकरौ। पुनः कात्यायनः॥
"ह्यंशहरोऽर्द्धहरो वा पुत्रवित्तार्ज्जनात् पिता"। पुत्रवित्तार्ज्जनात्। उदभिहितभावो द्रव्यवत् प्रकाशत इति न्यायात् पुत्रार्ज्जितवित्तात् पितुर्ह्यंशित्वं पितृधनानुपघातविषयं भ्रातृधनोपघातविषयञ्च। अर्ज्जकस्य तु ह्यंशित्वं भ्रातृधनोपघाते तु तेषामप्येकांशित्वं वक्ष्यमाणव्यासवचनात्। पितुरर्द्धहरत्वन्तु पितृद्रव्योपघातादुगुणवत्त्वादेति दायभागः। अनुपघाते पिता ह्यंशहरः अर्ज्जकत्वात् स्वयमपि ह्यंशहरः इतरेषामनंशित्वं। भ्रातृद्रव्योपघाते तु तस्याप्येकांश इति ह्यंशार्द्धांशयोर्भेदकथनं॥*॥ पुनः कात्यायनः।
"गोप्रचारश्च रथ्या च वस्त्रं यच्चाप्ययोजितं।
प्रायोज्यं न विभज्येत श्रित्र्यर्थन्तु बृहस्पतिः"॥
प्रायोज्यं यच्च प्रयोजनार्हं पुस्तकादि न तन्मूर्खादिभिः सह पण्डितादिभिर्व्विभजनीयं एवमेव दायभागमदनपारिजातादयः। याज्ञवल्क्यः।
"पितृभ्यामेव यद्दत्तं तत्तस्यैव धनं भवेत्"।
पुत्रदुहित्रोर्यदलङ्कारादि दत्तं तत्तस्यैवेति शूलपाणुपाध्यायाः॥ नारदः।
"श्रौर्य्यभार्य्याधने चोभे यच्च विद्याधनम्भवेत्।
श्रौक्षेतान्यविभाज्यानि प्रसादो यच्च पैतृकः"॥
प्राप्तञ्च सह भार्य्ययेति भरद्वाजवचनात् भार्य्याप्राप्तिकाले लब्धं धनं भार्य्याधनमौद्वाहिकमित्यर्थः। चोभे इत्यत्र श्रित्रीति पाठे एतल्लिङ्गं हित्वान्यदिमञ्जेदित्यनुवर्त्तते अत एतान्यविभाज्यानीति। न वास्तुविभागो नोदकपात्रालङ्कारोपयुक्तस्त्रीवाससामग्र्यां प्रचाररथ्यानां विभागश्च इति प्रजापतिरिति। यस्मिन् वास्तुनि येन गृहोद्यानादिकं कृतं अपरेणापि स्थानान्तरे तथा कृतञ्चेत् तदा येन यत् कृतं तत्तस्यैव। अन्यत्राप्येवं॥*॥ साधारणधनार्ज्जितेऽपि विशेषमाह व्यासः।
"साधारणं समाश्रित्य यत्किञ्चिदुपनायकं।
शौर्य्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः॥
तस्य भागदयं देयं शेषास्तु समभागिनः"।
अत्र भ्रातर इत्युपलक्षणं पितृव्यादयोऽपि बोद्धव्याः। तस्यार्जकस्य। साधारणोपघाते यस्य यावतोऽंशस्याल्पस्य महतो वा उपघातस्तस्य तदनुसारेण भागकल्पना कार्य्येति दायभागः॥ याज्ञवल्क्यः।
"क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः।
दायादेभ्यो न तद्दद्यात् विद्यया लब्धमेव च"॥
पितृपितामहागतं बलादन्यैर्हृतं योऽन्यस्मादनुज्ञया उद्धरति तदंशान्तरेभ्यो न दद्यात्॥*॥ भूमौ तु विशेषयति शङ्खः।
"पूर्व्वनष्टाच्च यो भूमिमेक एवोद्धरेत् श्रमात्।
यथाभागं भजन्त्यन्ये दत्त्वांशन्तु तृतीयकं"॥
एतद्वचनं स्मृतिमहार्णवकामधेनुपारिजातप्रभृतिव्यलिखनादयुक्तमेवेति रत्नाकरः। तत्र, दायभागमिताक्षराप्रभृतिभिर्दृष्टत्वात्। इति दायतत्त्वं॥

अविमरीसं, क्ली, (अवि+मरीसच्। अवेर्दुग्धे मरीसच्प्रत्ययः।) मेषदुग्धं। इति हेमचन्द्रः॥ ("तर्षणाश्चोतनैर्नस्यैरुद्धन्तूष्णमाविकं"॥ इति भाङ्गुरिः॥)

अविमुक्तं, क्ली, (वि+मुच्+क्त। ततो, न विमुक्तम्। नञ्तत्पुरुषः।) वाराणसीक्षेत्रं। यथा,—
"मुने प्रलयकालेऽपि न तत् क्षेत्रं कदाचन।
विमुक्तं न शिवाभ्यां यदविमुक्तं ततो विदुः॥
अविमुक्तं तदारभ्य क्षेत्रमेतदुदीर्य्यते।
यस्यानन्दवनं नाम पुराऽकारि पिनाकिना।
क्षेत्रस्यानन्दहेतुत्वादविमुक्तमनन्तरं॥
आनन्दकन्दबीजानामङ्कुराणि यतस्ततः।
क्षेयानि सर्व्वलिङ्गानि तस्मिन्नानन्दकानने॥
अविमुक्तमिति ख्यातमासीदित्यं घटोद्भव"।
इति काशिखण्डे २६ अध्यायः॥ (मूर्द्धचिवुकान्तराले स्थाने च। यथा,—
'एष योऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठितः'
इति। "आमनन्ति चैनं परमेश्वरमस्मिन् मूर्द्धचिवुकान्तराले"। इति च भाष्ये।)

अविमुक्तः, पुं, (न विमुक्तः। नञ्तत्पुरुषः।) वाराणसीक्षेत्रं। इति काशीखण्डे। अत्यक्ते त्रि॥

अविरतं, क्ली, (न विरतम्। नञ्तत्पुरुषः।) सततं। अनवरतं।
("अविरतोच्छ्रितवारिदिपाण्डुभिर्विरहितैरचिरद्युतितेजसा"॥
इति किरातार्জ্জुनीये।) तद्वति त्रि। इत्यमरः॥

अविरलं, त्रि, (न विरलं। नञ्तत्पुरुषः।) विरलान्तररहितं। तत्पर्य्यायः। निविरीशं २ घनं ३

निविड़ं ४ निरन्तरं ५ सान्द्रं ६ नीरन्ध्रं ७ बहलं ८ दृढ़ं ९ गाढ़ं १०। इति हेमचन्द्रः॥

अविरोधः, पुं, (न विरोधः। नञ्तत्पुरुषः।) विरोधाभावः। यथा,—

"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी। अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत् सता"॥

इति आह्निकतत्त्वधृतशाबालवचनं॥ अपि च।

"अपसर्पन्तु ते भूता ये भूता भूमिपालकाः। भूतानामविरोधेन पूजाकर्म्म करोम्यहं"॥

इत्याह्निकतत्त्वं॥

अविलम्बनं, क्ली, (न विलम्बनम्। नञ्तत्पुरुषः।) शीघ्रं। अविलम्बितं। इति रायमुकुटः॥

अविलम्बितं, क्ली, (वि + लबि + क्त। ततो नञ्तत्पुरुषः।) विलम्बाभावः। तत्पर्य्यायः। शीघ्रं २ त्वरितं ३ लघु ४ क्षिप्रं ५ ऋरं ६ द्रुतं ७ सत्वरं ८ चपलं ९ तूर्णं १० आशु ११। इत्यमरः॥

अविलम्बितः, त्रि, (न विलम्बितः। नञ्समासः।) त्वरायुक्तः। तत्पर्य्यायः। उचण्डः २। इत्यमरः॥ अवलम्बितं ३। यथा,—

"अविलम्बितमुच्चण्डं केऽप्याडम्बरवल्गितं"।

इति जटाधरः॥

अविला, स्त्री, (अव + इलच्।) मेषी। भेड़ी। इति हेमचन्द्रः॥ (नास्ति विलं यत्रेत्यर्थे, त्रि॥)

अविवादः, पुं, (न विवादः। नञ्तत्पुरुषः।) विवादाभावः। यथा,—

"यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः। तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः"॥

इति मानवे ८ अध्याये ९२ श्लोकः॥

अविवादी, [न्] त्रि, (न विवादी। नञ्तत्पुरुषः।) विवादरहितः। निर्व्विवादी। नञ्पूर्व्वविवादशब्दादिन्प्रत्ययेन निष्पन्नः॥

अविवाहितः, पुं, स्त्री, (न विवाहितः। नञ्तत्पुरुषः।) अनूढ़ः। अक्षतोदाहः। अक्षतोपयमः। अपरिणीतः। अक्षतपाणिग्रहः। आइबड़ इति भाषा। नञ्पूर्व्वविवाहशब्दादितप्रत्ययेन निष्पन्नः॥

अविवाह्या, स्त्री, (न विवाह्या। नञ्तत्पुरुषः।) विवाहानर्हा। यथा। सुमन्तुः। "माढ़पिढ़सम्बद्धा आसप्तमादविवाह्याः कन्या भवन्ति"। आपञ्चमादन्येषां मतं। नारदोऽपि।

"आसप्तमात् पञ्चमाच्च बन्धुभ्यः पिढ़माढ़तः। अविवाह्या सगोत्रा च समानप्रवरा तथा॥ सप्तमे पञ्चमे वापि येषां वैवाहिकी क्रिया। ते च सन्तानिनः सर्व्वे पतिताः शूद्रतां गताः"॥*॥

सर्व्वाः पिढ़पक्षो मातरस्तद्भ्रातरो मातुलास्तद्दुहितरो भगिन्यस्तत्पत्न्यानि भागिनेयानि ताश्चाविवाह्याः अन्यथा सङ्करकारिण्यस्तथाध्यापयितुरेतदेवेति। ताश्च यथा। पिढ़पितामहादीनां सप्तानां सन्ततिः सप्तमीपर्य्यन्ता नोद्वाह्या। एवं पिढ़बन्धुप्रभृतिसम्बन्धघटकानां सप्तानां सन्ततिः सप्तमीपर्य्यन्ता नोद्वाह्या। एवं मातामहप्रमातामहादीनां पञ्चानां सन्ततिः पञ्चमीपर्य्यन्ता नोद्वाह्या। एवं माढ़बन्धुप्रभृतिसम्बन्धघटकानां पञ्चानां सन्ततिः पञ्चमीपर्य्यन्ता नोद्वाह्या। बन्धुतन्मात्रोरसत्वेऽपि पिढ़मातामहमाढ़मातामहप्रभृत्युपरितनानां पञ्चानां त्रयाणां सप्तमीपञ्चमीपर्य्यन्ता नोद्वाह्येति। एवञ्च पितुर्म्मातुश्च मातामहकन्यान्तरसत्वे तामादाय सप्तमीपञ्चमीपर्य्यन्तायाः परीहारः। एवं बन्ध्वन्तरेऽप्यूह्यं। बन्ध्वपेक्षया त्रिगोत्रगणनं परतः सर्व्वत्र। पूर्व्वतस्तु पितुर्म्मातुश्च मातुलपुत्ररूपबन्धोरपि स्वापेक्षया अन्येषां बन्धूनां मातामहगोत्रापेक्षया त्रिगोत्रगणनं सर्वसामञ्जस्यं स्यात्। अन्यथा पितुः पितामहदौहित्रीकन्यायाः पितामहभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः। पिढ़गोत्रापेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात्। एवं पितुः प्रमातामहदौहित्रीकन्यायाः पितामहीभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः। पितामहीमाढ़पुत्रबन्ध्वपेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात्। एवं मातुः प्रपितामहदौहित्रीकन्यायाः मातामहभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः। वरस्य मातामहापेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात्। एवं मातुः प्रमातामहदौहित्रीकन्याया मातामहीभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् पराया विवाहः प्रसज्येत स चायुक्तः। मातामहीभ्राढ़पुत्रबन्ध्वपेक्षया तस्या स्त्रिगोत्रमध्यवर्त्तित्वात्। इति। एवं माढ़सपत्नीभ्राढ़सन्ततिः पिढ़माढ़सगोत्रादयोऽप्यविवाह्याः॥*॥

असवर्णायां अविवाह्यत्वं यथा। कर्त्तौ त्वसवर्णायां अविवाह्यत्वमाह दक्षनारदीयं।

"समुद्वाह्याग्निसाक्षीकारं कमण्डलुविधारणं। द्विजानामसवर्णासु कन्यासूपयमस्तथा"॥

इत्यादि। इत्युद्वाहतत्त्वं॥

अविवेकः, पुं, (न विवेकः। नञ्तत्पुरुषः। नास्ति विवेको यस्य इति समासे वाच्यलिङ्गः।) सदसद्विवेचनाराहित्यं। यथा। 'देहात्मनोरविवेकादस्येवं शोको भवतीति तद्विवेकप्रदर्शनार्थं श्रीभगवानुवाच अशोच्यानित्यादि"। इति श्रीभगवद्गीता २ अध्यायस्य ११ श्लोकटीका॥ तद्वति त्रि। अविमृश्यकारी। यथा,—("सहसा विदधीत न क्रियामविवेकः परमापदाम्पदम्"॥ इति किरातार्জ্জुनीये॥ सदसद्विवेकरहितः। यथा,—

"उत्तमोत्तममप्राप्यमविवेकोऽभिवाञ्छसि"। इति विष्णुपुराणं।)

अविवेकी, [न्] त्रि, (न विवेकी। नञ्तत्पुरुषः। विवेकशून्यः। अविवेचकः। यथा। "तस्मादविवेकिनः सुखमात्रलिप्सवो नाधाधिकारिणः") इति मुक्तिवादस्य गादाधरी टीका। अपि च।

"अस्मिन् प्रसन्ने देवेऽस्मै परमं धाम लभ्यते। मयाविवेकिना तस्य हृदये जनिता यथा॥ सर्व्वपापहरो विष्णुः स मया व्यथितः कृतः"। इति पाद्मे क्रियायोगसारे ११ अध्यायः॥

अविवेचकः, त्रि, (न विवेचकः। नञ्तत्पुरुषः।) विवेचनारहितः। अविवेकी। न विवेचकः अविवेचकः इति नञ्समासनिष्पन्नः॥

अविशेषः, त्रि, (न विशेषः। नञ्तत्पुरुषः।) विशेषरहितः। अभेदः। तुल्यः। विशेषाभावे, पुं॥ विशेषाभावः। यथा,—

"पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवं। अविशेषेण कर्त्तव्यं विशेषान्नरकं व्रजेत्"॥

इति आह्निकतत्त्वं॥ ("सांख्यादिमतसिद्धानि तन्मात्राख्यानि सूक्ष्मभूतानि, तानि च इदमेतदेवंगुणकमिति व्यक्ततया नानुभूयन्ते इत्यविशेषाः सूक्ष्माश्चोच्यन्ते"। तथा च विष्णुपुराणे,—

"तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता। न शान्ता नापि घोरास्ते न मूढ़ाश्चाविशेषिणः"॥

इति।)

अविश्रान्तः, त्रि, विश्रामरहितः। विश्रान्तिशून्यः। अनवरते, क्ली। विपूर्ब्बश्रमधातोः क्तप्रत्ययानन्तं नञ्समासनिष्पन्नः॥ ("अविश्रान्तं पत्युर्गुणगणकथालेड़नजड़ा"॥ इति आनन्दलहर्य्याम्॥)

अविश्रामं, क्ली, (नास्ति विश्रामो यस्मिन् इति।) विश्रामराहित्यं। यथा,—

"अविश्रामं वहेद् भारं शीतोष्णञ्च न विन्दति। ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात्"॥

इति चाणक्यं॥

अविश्वस्तः, त्रि, (न विश्वस्तः। नञ्तत्पुरुषः।) विश्वासानर्हः। अकृतविश्वासः। प्रत्ययायोग्यः। यथा,—

"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्। विश्वासात् भयमुत्पन्नं मूलान्यपि निकृन्तति"॥

इति चाणक्यं॥

("विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम्"। इति भारते॥)

अविश्वासा, स्त्री, (नास्ति विश्वासो यस्याम् सा।) चिरप्रसूता गौः। केलेगगाइ इति भाषा। इति शब्दचन्द्रिका॥

अविषः, पुं, (अव + टिषच्।) समुद्रः। इति कातन्त्रीयोणादिवृत्तिः। (राजा। पृथिवी। स्वर्गः। रक्तकमाचे त्रि।) विषशून्ये त्रि॥ (यथा,—

"इत्येता अविषा व्याख्याताः"॥ इति सुश्रुते॥)

अविषा, स्त्री, (नास्ति विषं यस्याम्।) निर्विषाहरीतकं। इति राजनिर्घण्टः॥

अविषी, स्त्री, (अविष + ङीप्।) नदी। इत्युणादिवृत्तावुज्ज्वलदत्तः॥

अविसोढ़, क्ली, (अवेर्दुग्धम्। अवि + सोढ़च्।) गेवदुग्धं। इति हेमचन्द्रः॥

अविस्पष्टं, क्ली, (वि + स्पश + क्त। ततो नञ्समासः।) अस्पष्टवाक्यं। तत्पर्य्यायः। स्खिदं २। इत्यमरः॥

("नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ"॥ इति मनुः॥ अस्फुटः। यथा,—

"विदड्डिं कम्पस्य प्रथयतितरां साध्वसवशादविस्पष्टां दृष्टिं तिरयति पुनर्वाष्पसलिलैः"॥

इति रत्नावल्याम्॥)

अवी, स्त्री, (अवत्यात्मानं लज्जया। अव + ई।) ऋतुमती। इति हेमचन्द्रः॥

अवीचिः, पुं, (नास्ति वीचिः प्रकाशः सुखं वा अत्र।) नरकविशेषः। इति शब्दरत्नावली॥ ("अवीचिमन्धतामिस्रं कुम्भीपाकं तथैव च। असिपत्रवनञ्चैव तापनञ्चैव विंशकम्"॥ इति याज्ञवल्क्यः॥) वाद्यलिङ्गस्तरङ्गशून्ये॥

अवीचिः, पुं, (नास्ति वीचिः सुखं यस्मिन्) } नरकवि-
अवीचिमत्, क्ली, (अवीचि + मतुप्।) } शेषः। यथा। "वैतरणी पूयोदः प्राणरोधो विण्मूत्रं लालाभक्षः सारमेयादनमवीचिरयःपानमिति। य इह वा अन्यतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथञ्चित् स वै प्रेत्य नरके अवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायात् गिरिमूर्द्धः संपात्यते। यत्र जलमिव स्थलमभ्रष्टमभासते तदवीचिमत् तिलशो विभीर्य्यमाणशरीरो न म्रियमाणः पुनरारोपितो नियतति"। इति श्रीभागवते ५ स्कन्धे २६ अध्यायः॥

अवीचिमयः, पुं, (अवीचि + मयट्।) नरकभेदः। "यः साक्ष्यादौ अन्यतं वदति स निरवलम्बेऽवीचिमये अधःशिरा निपात्यते यत्र"। इति श्रीभागवते॥

अवीरः, त्रि, (नास्ति वीरो यस्य।) सत्वरहितः। निर्व्वीर्य्यः। इति मेदिनी॥

अवीरा, स्त्री, (नास्ति वीरः पुत्रादिर्यस्याः।) अजातापत्यविधवा। इति स्मृतिः। निष्पतिसुता। इत्यमरभरतौ॥ तदन्नभोजने दोषप्रायश्चित्ते यथा,—

"यो विप्रोऽवीरान्नभोजी ऋतुस्नातान्नभोजकः। भगजीवी वार्द्धुषिको विषहीनो यथोरगः"॥ इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः॥*॥ अपि च।

"अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः। यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेत् ध्रुवं"॥ इति च तत्रैव २७ अध्यायः॥*॥ विष्णुः। गन्धगणिकास्तेनगायनकान्नानि मुक्त्वा सप्तरात्रं पयसा वर्त्तेत। अवीरास्त्रीसम्भोगसंसर्गपतितान्नाच्च। इति प्रायश्चित्तविवेकः॥*॥ सामान्येनाभोज्यान्नभोजनप्रकरणे मनुः,— [इत्यादि।

"नाश्नीयादुरुते यज्ञे यामयाजिकृते तथा"। "अनर्चितं हविष्यान्नमवीरायाञ्च योषितः" इत्यादिकमुपक्रम्य।

"भुक्त्वा चान्यतमस्यान्नमनर्च्यात्तपयं त्र्यहं"। "मत्वा भुक्त्वा चरेत् कृच्छ्रं रेतो विण्मूत्रमेव च"॥ इति। अवीरा पतिपुत्रविहीना निःसम्बन्धिनी। स्वसम्बन्धिन्यास्तु श्राद्धादिनाभ्यनुज्ञानात् व्यवहारात् धनाधिकारात्च। इति च प्रायश्चित्तविवेकः॥*॥ अस्या धनाधिकारो यथा याज्ञवल्क्यः,—

"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः॥ एषामभावे पूर्व्वस्य धनभागुत्तरोत्तरः। स्वर्य्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः"॥ तथा विष्णुः। अपुत्रस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि। इत्यादि। तेन प्रपौत्रपर्य्यन्तानामभावे पत्नी धनाधिकारिणी। यथा कात्यायनः।

"भर्त्तृदायं मृते पत्यौ विन्देत स्त्री यथेष्टतः। विद्यमाने तु संरक्षेत् क्षपयेत् तत्फलेऽन्यथा॥ अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता। भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्धमाप्नुयुः"॥ यथेष्टत इति धर्म्मार्थं। तथा च व्यासः।

"लोकान्तरस्थं भर्त्तारमात्मानञ्च वरानने। तारयत्युभयं नारी नित्यं धर्म्मपरायणा"॥ मदनपारिजातधृता स्मृतिः।

"यद्यदिष्टतमं लोके यद्यत् पत्युः समीहितं। तत्तद्गुणवते देयं पतिप्रीणनकाम्यया"॥ भर्त्तुः शयनं पालयन्ती नान्यगामिनी। अतएव हरिवंशीयपुण्यकव्रतोपाख्याने॥

"दानोपवासपुण्यानि सुव्रतान्यप्यनन्ति। निष्फलान्यसतीनां हि पुण्यकानि तथा शुभे"॥ तथा बृहन्मनुः,—

"अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता। पत्नीव दद्यात् तत्पिण्डं क्षतक्षमंशं लभेत च"॥ तत्पिण्डमित्यत्र तदित्यनुषज्य। तच्छब्देन भर्त्तुः परामर्शात् भर्त्तुः क्षतक्षमंशं यावदंशं हरेत् न तु वर्त्तनोचितमात्रं। इति दायतत्त्वं॥*॥ अस्याः पतिश्राद्धाधिकारो यथा। पुत्रपौत्रप्रपौत्राभावे पत्नी। तथा च शङ्खः।

"पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया। तदभावे तु पत्नी स्यात् तदभावे सहोदरः॥ भार्य्यापिण्डं पतिर्द्दद्यात् भर्त्रे भार्य्या तथैव च। स्वस्रादेश्च सुता चैव तदभावे द्विजोत्तमः"॥ इत्यादि॥

"अपुत्रा स्त्री यथा पुत्रः पुत्रवत्यपि भर्त्तरि। पिण्डं दद्यात् जलञ्चैव जलमात्यन्तु पुत्रिणी"॥ इति निर्म्मूलं समूलत्वेऽपि बालदेशान्तरितपुत्रसद्भावविषयमिति श्राद्धविवेकप्रभृतयः। इति॥*॥ अस्या भर्त्रादितर्पणाधिकारो यथा स्मृतिः।

"तर्पणं प्रत्यहं कार्य्यं भर्त्तुः कुशतिलोदकैः। तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्व्वकं"॥ एतत्तु तर्पणं पुत्रपौत्राद्यभावविषयमिति मदनपारिजातः। इति॥*॥ मृतायास्तस्या आद्य-श्राद्धादि पञ्चदशश्राद्धं कर्त्तव्यं न तु सपिण्डनं। यथा। अत्र सपत्नीपुत्रस्य पुत्रत्वातिदेशात् तत्फलेऽपि स्त्रीणां सपिण्डनं मैथिलैरुक्तं तन्न।

"पुत्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः। पुत्रस्य पुत्रपुत्रे भ्राडपुत्रादेयोऽपि ये"॥ इति जघुहारीतवचने एवकारेण अतिदिष्टपुत्रनिषेधात्। पुत्रेणेति तत्सत्त्वमात्रविवक्षितं। "सपिण्डीकरणं तासां पुत्राभावे न विद्यते"। इति मार्कण्डेयपुराणैकवाक्यत्वात्।

"यानि पञ्चदशाद्यानि अपुत्रस्येतराणि च। एकस्यैव तु दातव्यमपुत्रायाश्च योषितः"॥ इति कृन्दोगपरिशिष्टेन आद्यपञ्चदशश्राद्धैः प्रेतत्वपरिहारोक्तत्वाच्च। एतत्पत्युरभावे द्रष्टव्यं। ततश्च द्वितीयो पुत्रे अन्येनापि सपिण्ड्यते। एवं पतिसत्वेऽपि। अतएव मैथिलैरवीरायाः सपिण्डनं नास्तीत्युक्तं। इति च शुद्धितत्त्वं॥

अवेद्यः, पुं, (विद + ण्यत्। ततो, न वेद्यः नञ्समासः।) गोवत्सकः। इति शब्दचन्द्रिका। बाकुर इतिभाषा। अज्ञेये त्रि॥ (अविवाह्यः। यथा,—

"अभिचारेण वर्णानामवेद्यावेदनेन च। स्वकर्म्मणाञ्च त्यागेन जायन्ते वर्णसङ्कराः"॥ इति मनुः।)

अवेलः, पुं, (नास्ति वेला यस्य सः।) अमलापः। अपक्वः। इति मेदिनी॥

अवेला, स्त्री, पूगचर्व्वितं। इति मेदिनी॥ चिबान गुया इति भाषा। अपराह्णः। इति लोकप्रसिद्धं। वेलाशून्ये त्रि॥

अवेक्षणं, क्ली, (अव + ईक्ष + ल्युट्।) अवेक्षा॥ दर्शनं। यथा। "क्षताक्षतावेक्षणवत् स्वयं तत्प्रेक्षावेक्षणस्य कर्त्तव्यत्वात्"। इति संस्कारतत्त्वं। (तथाच।

"दूरादवेक्षणं हासः संप्रश्ने सादरो भ्रमम्। परोक्षेऽपि गुणश्लाघा स्मरणं प्रियवस्तुषु"॥ इति हितोपदेशे॥ अवधानम्। प्रतिजागरः। अनुसन्धानम्। यथा,—

"निगद्य श्लोकं स्वयमेव धीमान् वर्णाश्रमावेक्षणजागरूकः।" इति रघुवंशे॥)

अवेक्षा, स्त्री, (अव + ईक्ष + अ + तत॰ टाप्।) प्रत्यवेक्षणं। प्रत्यक्षदृष्टिः। तत्पर्य्यायः। प्रतिजागरः २। इत्यमरः। (अवधानम्। अनुसन्धानम्। यथा,—

"अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया। रक्षितं वर्द्धयेत् वृद्ध्या वृद्धं दानेन निक्षिपेत्"॥ इति मनुः।

("यदि रामस्य भावेक्षा त्वयि स्यान्माद्यवत्सदा"। इति रामायणे।)

अवेक्षितं, त्रि, (अव + ईक्ष + क्त।) दृष्टं। यथा मनुः।

"केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः। भूमिप्रावेक्षितञ्चैव संस्पृष्टाप्युदकया"॥ इत्याह्निकाचारतत्त्वम्॥ (क्षतावधानः। यथा, रघुवंशे। "स कदाचिदवेक्षितप्रजः"।)

अवैधं, त्रि, (न वैधं विधित आगतं। नञ्तत्पुरुषः।) विधिविषयः। विधिविवर्ज्जितं। विधिप्राप्तभिन्नं॥ ("अवैधं पञ्चमं कुर्व्वन् राज्ञो दण्डेन मुच्यते"। इति स्मृतिः॥)

अवोदं, त्रि, (अव + उन्द + घञ्।) आर्द्रं। इति जटाधरः॥

अवोधः, त्रि, (नास्ति बोधो ज्ञानं यस्य।) निर्व्बोधः। अज्ञानः।

अवोक्षणं, क्ली, (अव + उक्ष + ल्युट्।) प्रोक्षणविशेषः। मुखहस्तेन जलक्षेपणं। यथा हारीतः।

"तस्मादङ्गिरवोच्यतेऽद्यादाभ्य एव च" । अवोच्य प्रोच्य इति रत्नाकरः॥ नव्यवर्द्धमानधृतम्।

"उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम्।
न्युब्जताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्" ॥
इति शुद्धितत्त्वम् ॥

अब्दः, पुं, (अव + दन् ॥ औणादिकोऽयं ।) वत्सरः। मेघः। मुस्ता। इति रायमुकुटः सारसुन्दरी च ॥ (मुस्तार्थे प्रयोगो यथा,—

"किराताब्दामृताविश्वचन्दनोदीच्यवत्सरैः।
शृतोयातिसारघ्नमनं विशेषाज्ज्वरनाशनम्" ॥
इति वैद्यकचक्रपाणिसङ्ग्रहः॥)

अव्यक्तः, पुं, (वि + अञ्ज + क्त। ततो नञ्समासः।) विष्णुः। शिवः। कन्दर्पः। इति मेदिनी। मूर्ख इति हेमचन्द्रः। अस्फुटे त्रि॥)

अव्यक्तं, क्ली, प्रकृतिः। आत्मा। इति हेमचन्द्रः। महदादि। परमात्मा। इति मेदिनी ॥

("योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।
सर्व्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ" ॥
इति मानवे ॥

गणितादौ अज्ञातराश्यादिः। अदृश्यः। साङ्ख्यमते सर्व्वकारणं रूपादिहीनतया चक्षुराद्यगोचरं प्रधानं महदादि।

"महतः परमव्यक्तमव्यक्तात् पुरुषः परः"।
इति कठोपनिषद् ॥

वेदान्तमते सूक्ष्मशरीरं स्वापावस्थायां शब्दप्रवृत्तिनिमित्तैर्जातिगुणक्रियासम्बन्धैर्वर्জ্জितं निर्व्विकारं निराकारं ब्रह्म। परमात्मा, मायोपाधिकं ब्रह्म, सूक्ष्ममतीन्द्रियं लिङ्गग्राह्यं परब्रह्म। यदुक्तम्,—

"अव्यक्तमिति विज्ञेयं लिङ्गग्राह्यमतीन्द्रियम्"।
रूपादिविहीनत्वेन चक्षुराद्यगोचरो योगाभ्यासावसेयो भावः।

"ब्राह्मं सरः कारणमप्रवाचो
बुद्धेरिवाव्यक्तमुदाहरन्ति"। इति रघुवंशे ॥

प्रकृतिः। तथा हि,—"यत् सर्व्वस्य जगतो बीजभूतमव्याकृतमनामरूपमतत्सर्व्वकार्य्यकारणशक्तिसमाहाररूपं अव्यक्ताव्याकृताकाशादिनामवाच्यं परमात्मन्योतप्रोतभावेन समाश्रितं वटकणिकायामिव वटवृक्षशक्तिः। सत्त्वादिरूपेण निरूप्यमाणे व्यक्तिरस्य नास्तीत्यव्यक्तम्"।
यदुक्तम्। "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" ॥ ०॥ सर्व्वभूतानां कारणमकारणं सत्त्वरजस्तमोलक्षणमशरूपमखिलस्य जगतः सम्भवहेतुरव्यक्तं नाम। तदेकं बहूनां क्षेत्रज्ञानामधिष्ठानं समुद्र इवोदकानां भावानां" ॥ इति सुश्रुतः ॥

"अनादिः पुरुषो नित्यो विपरीतस्तु हेतुजः।
सदकारणवन्नित्यं दृष्टं हेतुमदन्यथा ॥
तदेव भावादग्राह्यं नित्यत्वान्न कुतश्चन।
भावाज्ज्ञेयं तदव्यक्तमचिन्त्यं व्यक्तमन्यथा"॥ इति ॥

"अव्यक्तमात्मा क्षेत्रज्ञः शाश्वतो विभुरव्ययः"।
इति च ॥

"अतोऽन्यत् पुनरव्यक्तं लिङ्गग्राह्यमतीन्द्रियं" ॥
इति च ॥

"अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमव्ययो विदुः" ॥
इति च चरकः ॥)

अव्यक्तरागः, पुं, (न व्यक्तोऽव्यक्तो रागोऽरुणिमा।) ईषल्लोहितवर्णः। तत्पर्य्यायः। अरुणः २। इत्यमरः॥ ताम्रः ३ गौरः ४। इति जटाधरः ॥

अव्यङ्गः, त्रि, (न सन्ति अङ्गानि यस्य ।) अङ्गरहितः। अविकलाङ्गः। यथा,—

"तत आहूय धर्म्मज्ञं ब्राह्मणं वेदपारगं।
अव्यङ्गावयवं पूज्य गन्धधूपार्चनादिभिः" ॥
इति मत्स्यपुराणे ६६ अध्यायः ॥

अव्यङ्गा, स्त्री, (अवेर्भेषस्य अङ्गं पृष्ठमिव अङ्गं यस्याः।) शूकशिम्बी। इति केचित् ॥ अमरकोषे अव्यङ्गा इति तट्टीकायां अव्यङ्गा इति च पाठः ॥ अङ्गरहिते अविकलाङ्गे च त्रि ॥

अव्यङ्गं, क्ली, (नास्ति अङ्गालङ्कारो यस्मिन् ।) अङ्गालङ्काररहितकाव्यं ॥ यथा,—

"सव्यङ्गमुत्तमं काव्यमव्यङ्गमधमं स्मृतं।
किञ्चिद्व्यङ्ग्यसमायुक्तं मध्यमं परिकीर्त्तितं" ॥
इति काव्यचन्द्रिका ॥

अव्यञ्जनः, पुं, (नास्ति अव्यञ्जनं शुभलक्षणं पृष्ठं, यस्य।) पृष्ठहीनपशुः। इति हलायुधः ॥ अस्फुटे त्रि ॥ (अनुद्भिन्नरजस्वलाचिह्ना कन्या। यथा,—

"असंप्राप्तरजा गौरी प्राप्ते रजसि रोहिणी।
अव्यञ्जगा भवेत् कन्या कुचहीना च नग्निका" ॥
इति पद्मतन्त्रे ॥)

अव्यण्डा, स्त्री, (न विगतमण्डं वीजमस्याः।) अध्यण्डा इति कुत्रचिदमरकोषे पाठः ॥ आलकुशीति भाषा ।

अव्यथः, त्रि, (नास्ति व्यथा यस्य सः।) पीड़ारहितः। व्यथाशून्यः। सर्पे पुं। इति मेदिनी ॥

अव्यथा, स्त्री, (न व्यथा। नञ्तत्पुरुषः ।) हरीतकी ॥ पद्मचारिणी। इत्यमरः ॥

अव्यधिः, पुं, अश्वः। सङ्ग्रामे न बिभ्यतीति अव्यधिः। व्यध भयसञ्चलनयोः सर्व्वधातुभ्य इति इन्प्रत्ययः ततो नञ्समासः। वेदप्रयोगोऽयं ॥

अव्यधिषः, पुं, (न + व्यध + टिषच्।) समुद्रः। सूर्य्यः। इति सिद्धान्तकौमुद्या उणादिवृत्तिः ॥

अव्यधिषी, स्त्री, (अव्यधिष + ङीप् ।) पृथिवी। अर्द्धरात्रं। इति सिद्धान्तकौमुदी ॥

अव्ययः, त्रि, (न + व्यय + क्यप् ।) व्ययशून्यः। इति पाणिनिः ॥

अव्ययं, क्ली, पुं, (न + वि + इन् + अच्।) शब्दविशेषः। तत्परे विभक्तिर्न तिष्ठति अतएव लिङ्गत्रयाविशेतं। तथाच कातन्त्रे,—

"सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु।
वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययम्" ॥
(क्ली, अनाद्यन्तं विकारशून्यं परब्रह्म। यथा,—

"अनवद्यमलमक्षयमदीर्घमजमव्ययम्।

अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत्" ॥
इति आत्मबोधे ॥)

अव्ययः, पुं, (नास्ति व्ययो यस्य ।) विष्णुः।
("नमस्कृत्य सुरेशाय विष्णवे प्रभविष्णवे।
पुरुषायाप्रमेयाय शाश्वतायाव्ययाय च" ॥
इति मार्कण्डेयपुराणे ॥) व्ययरहिते, त्रि। इति मेदिनी ॥ (अविनाशी। नित्यपुरुषः। यथा,—

"तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः"॥ इति रघुवंशे।

"सूक्ष्माभ्यो मूर्त्तिमाताभ्यः संभवत्यव्ययाद्ययम्"।
इति मानवे ॥)

अव्यर्थः, त्रि, (न व्यर्थः। नञ्तत्पुरुषः।) अमोघः। सफलः। यथा,—

"दुर्निवार्य्यश्च दुर्द्धर्षमव्यर्थं वैरिघातकम्।
तेजसा चक्रतुल्यश्च सर्व्वशस्त्रास्त्रघातकम्" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १८ अध्यायः ॥

अव्यवसायवान्, [त्] त्रि, (अव्यवसाय + मतुप्। मस्य वः।) अव्यवसायरहितः। अव्यवसायी। तत्पर्य्यायः। शिक्षुः २। इति त्रिकाण्डशेषः। (अनुशीलनरहितः।)

अव्यवस्था, स्त्री, (वि + अव + स्था + अङ्। ततो नञ्समासः।) अवसिद्धान्तः। अविधिः। शास्त्रविरुद्धव्यवस्था। इति नञ्समासनिष्पन्ना ॥ (चञ्चले। यथा, कुमारे,

"स्खलारविन्दश्रियमव्यवस्थां" ॥)

अव्यवस्थितः, त्रि, (न व्यवस्थितः। नञ्समासः।) नीतिशास्त्रादिव्यवस्थानभिज्ञः। सिद्धान्तरहितः। यथा,—

"क्वचिद्गुरुः क्वचित्तुल्यो रघुस्तुल्यः क्वचे क्वचे।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः" ॥
इति हितोपदेशः ॥

अव्यवहार्य्य, त्रि, (वि + अव + हृ + ण्यत्। ततो नञ्समासः।) व्यवहारायोग्यं। अव्यवहरणीयं यथा। ज्ञातस्त्रीगोब्राह्मणस्त्रीगमने तत्तुल्यतया द्विगुव्रतावचरणे कृतेऽपि न व्यवहार्य्यः। यथा याज्ञवल्क्यः।

"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्।
कामतोऽव्यवहार्य्यस्तु वचनादिह जायते" ॥
पापान्तरेऽप्यव्यवहार्य्यत्वं याज्ञवल्क्योक्तम्।
"शरणागतबालस्त्रीहिंसकान् संश्रयेन्न तु।
चौर्य्यव्रतानपि सदा कृतघ्नसहितानिमान्" ॥
"अत्र च कामतो महापातकादिदुष्टापाकर्तुरव्यवहार्य्यत्वदर्शनात् कामतो बहुतरगुणयुक्तशरणागतादिहन्तुरमव्यवहार्य्यत्वं न तु हीनतरहन्तुरन्यथा विषमप्रायश्चितापत्तिः स्यात्"।
इति प्रायश्चित्ततत्त्वम् ॥

अव्यवहितं, त्रि, (वि + अव + धा + क्त। ततो नञ्तत्पुरुषः।) व्यवधानशून्यं। तत्पर्य्यायः। संसक्तं २ अपटान्तरं ३ अपदान्तरं ४। इत्यमरः॥ तट्टीका च ॥ लग्नं ५। इति शब्दरत्नावली ॥ ("सिसाधयिषाविरहविशिष्टचरणाव्यवहितोत्तरत्वयोत्पत्तिकानुमितिकमभिनेति" ॥ इति दीधितिः ॥)

अश्यवहृतः, त्रि, (न व्यवहृतः। नञ्तत्पुरुषः।) अव्यवहारः। इति नञ्समासनिष्पन्नः॥

अश्याजः, पुं, (न श्याजः। नञ्तत्पुरुषः।) श्यामाभावः। यथा।

"इदं किलाव्याजमनोहरं वपुः
तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति"॥

इत्यभिज्ञानशकुन्तलानाटके प्रथमोऽङ्कः।

शीघ्रं। यथा। "सेक्ष्यो यदि मारवस्तरुरयं पाथोदयाथोवरैरव्याजं परिवृद्ध किं चिरयसे कालः परिक्रामति। मूले सिक्तरसे दले विगलिते शीर्णे तथा वल्कले न स्यादस्य परिस्थितेः प्रभुरहो धारापि वारां तव॥" इत्युद्भटः॥

अश्याप्यं, त्रि, (न श्याप्यं। नञ्तत्पुरुषः।) अश्यापनीयं। श्यानिरहितं। अनधीतं। यथा। "नापि साध्यव्यापकाश्याप्यत्वेन श्यानिविरहोन्नायकतया साध्यव्याप्यव्यापकत्वेनोपाधेरेव साध्यव्यापकत्वसाधनात्। तस्मादुपाधिर्हेत्वाभासान्तरमिति"। इत्यपाधिवादचिन्तामणिः। अपि च,

"अश्याप्यवृत्तिः स्त्रग्विको विशेषगुण इष्यते"।

इति भाषापरिच्छेदः॥

अश्याप्यवृत्तिः, त्रि, (अश्याप्य सर्व्वावच्छेदमप्राप्य वृत्तिर्यस्य।) किञ्चिदवच्छिन्नवृत्तिः।

("अश्याप्यवृत्तिः स्त्रग्विको विशेषगुण इष्यते"। इति भाषापरिच्छेदः।)

सप्तमाधिकरणाभावप्रतियोगीति यावत्। दैशिककालिकभेदेन स द्विविधः। तत्पर्य्यायः। प्रादेशिकः २। आत्मनो विशेषगुणाः। बुद्धिः १ सुखं २ दुःखं३ इच्छा-४ द्वेषः५ यत्नः ६ धर्म्मः ७ अधर्म्मः ८ भावनाख्यसंस्कारः ९ आकाशस्य विशेषगुणः शब्दः १०। सामान्यगुणौ संयोग ११ विभागश्च १२। एते सर्व्वे अश्याप्यवृत्तयः स्युः। इति न्यायभाषा॥

अश्याहृतं, त्रि, (न श्याहृतम्। नञ्तत्पुरुषः।) अश्यातशून्यं। यथा।

"यस्य चिकालममलं ज्ञानमश्याहृतं सदा।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति"॥

इति शब्दमाला॥ किञ्च। विष्णुपुराणम्।

"अन्नं बलाय मे भूमेरपामग्न्यनिलस्य च।
भवत्येतत् परिश्रान्तौ ममास्त्वश्याहृतं सुखम्॥
प्राजापानसमानानामुदानव्यानयोस्तथा।
अन्नं तृप्तिकरञ्चान्तु ममास्त्वश्याहृतं सुखम्"॥

इत्याह्निकाचारतत्त्वम्। (अकुण्ठितं। यथा,—

"वेदशास्त्रार्थविज्ञाने येषामश्याहता मतिः"।

इति मार्कण्डेयपुराणे।)

अश्याहृतः, त्रि, अकथितः। न श्याहृतः अश्याहृतः। नञ्समासनिष्पन्नः॥

अश्व ऊ ड ग (स्वादिं-आत्मं-सकं-वेट्।) व्याप्तिसंहत्योः। ऊ ड अश्नुते अश्व्यते। न अश्नोति। संहतिः समूहः। इति दुर्गादासः॥

("यद्दाति गयास्थश्च सर्व्वमानन्त्यमश्नुते"। इति याज्ञवल्क्यसंहिता।)

अश्व ग (क्रादिं-परं-सकं-सेट्।) भोजने। अश्नात्यन्नं बुभुक्षितः। इति दुर्गादासः।

अश्वकुम्भी, स्त्री, (अश्वा सलिलं स्कुम्भाति स्याप्नोति इति। अश्वा+स्कुम्भ+ट+एषोदरादित्वं।) पानीयघटजः। इति रत्नमाला॥ पाना इति भाषा।

अश्वक्यं, त्रि, (न शक्यम्। नञ्तत्पुरुषः।) अशक्यनीयं। असाध्यं। यथा। "अशक्ये अध्यवसायः समर्थना"। इति मुग्धबोधव्याकरणम्॥

अशक्तं, त्रि, (न शक्तः। नञ्तत्पुरुषः।) शक्तिरहितं। असमर्थं यथा। मनुः।

"विभ्यादेषोऽकृतःसर्व्वान् ज्येष्ठो भ्राता यथा पिता।
भ्राताशक्तः कनिष्ठो वा शक्त्यपेक्षा कुले स्थितिः"॥

इति दायतत्त्वम्॥

"उपवासेष्वशक्तानां नक्तं भोजनमिष्यते"।

इति तिथ्यादितत्त्वम्॥

अशनुः, पुं, (न+शद्+क्नु। नञ्तत्पुरुषः।) चन्द्रः। इति शब्दचन्द्रिका॥ शत्रुरहिते मित्रे च त्रि॥

अशनं, क्ली, (अश्+ल्युट्।) भक्षणं। अन्नं। इति हेमचन्द्रः॥("शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः॥" इति नागानन्दे॥

"विश्रिस्रमिश्रसंस्कारैः पथ्यैरिष्टैरसादिभिः।
मनोज्ञं शुचि नात्यूष्णं प्रत्यग्रमशनं हितं"॥

इति सुश्रुतः॥)

अशनः, पुं, असनवृक्षः। पीतशालवृक्षः। इति रायमुकुटः॥ (असनशब्देऽस्य विशेषो ज्ञातव्यः॥)

अशनपर्णी, स्त्री, (अशनस्य शालवृक्षविशेषस्य पर्णमिव पर्णमस्याः।) वृक्षविशेषः। तत्पर्य्यायः। वातकः २ शीतलः ३ शीतलवातकः ४ असनपर्णी ५ शनपर्णी ६ सनपर्णी ७ शीतः ८ शीतकः ९ अपराजिता १०। माराटी इति ख्याता। इति शब्दरत्नावली॥

अशनाया, स्त्री, (अशन+क्यच्।) भोजनेच्छा। क्षुधा। इत्यमरः॥

("अन्नादां अशनाया निवर्त्तते पानात्पिपासा"। इति शतपथब्राह्मणे। "क्षुताशनायः फलवद्भिभूया"। इति भट्टौ।)

अशनायितं, त्रि, (अशनाय+क्त। अशनाया भोजनेच्छा जाता अस्य इति इतच् वा।) क्षुधितं। इत्यमरः॥

अशनिः, पुं, स्त्री, (अश्नाति सङ्घातं करोति। अश्+अनिः।) वज्रं। इत्यमरः। विद्युत्॥ ("अथवा मम भाग्यविप्लवादशनिः कल्पित एव वेधसा" इति रघुवंशे।)

अशर्म्मं [न्], क्ली, (न शर्म्म। नञ्समासः। नास्ति शर्म्म यस्मिन् इति समासे वाच्यलिङ्गः।) कष्टं। दुःखं।

("एकौघभूतं तदशर्म्म कृष्णां
विभावरीं ध्वान्तमिव प्रभेदे॥"
इति भारविः॥) तद्विशिष्टे त्रि। इति जटाधरः॥

अशाखा, स्त्री, (नास्ति शाखा यस्याः।) शूलीटङ्गं। इति राजनिर्घण्टः॥

अशितं, त्रि, (अश्+क्त।) भुक्तं। खादितं। हृतं। इति हेमचन्द्रः॥

("आप एव तदशितं नयन्ते"।
"तेजोऽशितं त्रेधा विधीयते"।

इति च छान्दोग्ये उपनिषदि॥

"अशितं माचया काले पथ्यं याति जरां सुखं"॥ इति वाभटः॥ "यावद् यस्याशनमशितमनुपहत्य प्रकृतिं यथाकालं जरां गच्छति, तावदस्य मात्रा प्रमाणं वेदितव्यं भवति"॥ इति चरकश्च॥)

अशितङ्गवीनं, त्रि, (अशिता भोजिता गावो यत्र। अशितगो+ख+निपातनात् मुमागमः।) आशितङ्गवीनं। पूर्व्वगवादिचरित्रत्रेत्रादि। इत्यमरटीकासारसुन्दरी॥

अशित्रः, त्रि, (अश्+इत्र।) चौरः। इत्युणादिकोषः॥ (चरः।)

अशिरं, क्ली, (अश्+इर।) हीरकं। इति राजनिर्घण्टः॥ (हीरकशब्दस्य विशेषो ज्ञेयः॥)

अशिरः, पुं, (अश्र भोजने+इर।) अग्निः। राक्षसः। सूर्य्यः। इति मेदिनी॥

अशिरा, स्त्री, अशिरराक्षसस्त्री। इत्युणादिकोषः॥

अशिश्विका, स्त्री, (अशिश्वी+स्वार्थे कन्।) अनपत्या। कन्यापुत्रविहीना स्त्री। इति शब्दरत्नावली॥ आँटकुड़ी इति भाषा॥

अशिश्वी, स्त्री, (नास्ति शिशुर्यस्याः इति। निपातनात् ङीप्।) अशिश्विका। इत्यमरः॥

अशिक्षितं, त्रि, (न शिक्षितं। नञ्समासः।) शिक्षारहितं। अनिपुणः। अनभिज्ञः। यथा। "यत्र सारथेरकौशल्यात् यानमन्यथा गच्छति तत्र हिंसायां अशिक्षितसारथिनियोगात् स्वामी दिग्गतं दण्डं दाप्यः स्यात्"। इति कुल्लूकभट्टव्याख्यानात्। इति प्रायश्चित्ततत्त्वं॥

अशीतः, त्रि, (न शीतः। नञ्तत्पुरुषः।) शीताभावयुक्तः। यथा,—

"अशीताश्चरवो माघे फाल्गुने पशुपक्षिणौ।
चैत्रे जलचराः सर्व्वे वैशाखे नरवानरौ"॥

इति पुराणं॥

अशीतिः, त्रि, (अष्टदशतः परिमाणमस्य। षड्त्रिंशत्तीत्यादिना निपातनात् प्रकृतेरशीभावस्तिप्रत्ययश्च।) संख्याविशेषः। ८० आशी इति भाषा। यथा मनुः,—

"अशीतिभागं गृह्णीयात्
मासात् वार्द्धुषिकं शतात्।
द्विकं शतं वा गृह्णीयात्
सतां धर्म्ममनुस्मरन्"॥

इत्याह्निकाचारतत्त्वं॥ अपि च।

"अशीतिर्दस्य वर्षाणि बालो वाप्यूनषोड्शः।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च"॥

इति प्रायश्चित्ततत्त्वं॥

अशुद्धं, त्रि, (न शुद्धम्। नञ्तत्पुरुषः।) अपवित्रं। अशुद्धशोधनं। अशौचयुक्तं। यथा। शङ्खः,—

"ततः श्राद्धमशुद्धौ तु कुर्य्यादेकादशे तथा।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः"॥
इति।
"शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा देवपैत्रयोः।
दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुद्धति"॥
इति च शुद्धितत्त्वं॥ (वर्णाद्यशुद्धियुक्तः।)

अशुभं, क्ली, (न शुभम्। नञ्तत्पुरुषः। नास्ति-शुभं यस्येति समासे वाच्यलिङ्ग एव।) पापं। इति हेमचन्द्रः॥ अमङ्गलं।
("न च किञ्चिदुवाचैनं शुभं वा यदि वाऽशुभम्"। मा च वोऽस्त्वशुभं किञ्चित्सर्व्वथा पण्डुनन्दनाः"॥ इति च भारते॥) तद्युक्ते त्रि। यथा,—
"सर्व्वाशुभानां परिमोक्षकारि
सम्पूजनं देववरस्य विष्णोः"।
इति ज्योतिस्तत्त्वं॥ अपि च। मदनपारिजात-धृतं।
"अशुभं स्वप्ननं दृष्ट्वा देवब्राह्मणपूजनं।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः"॥
इति तिथ्यादितत्त्वं॥

अशून्यशयनव्रतं, क्ली, (न शून्यं शयनं यस्मात्, तत् व्रतम्।) श्रावणकृष्णद्वितीयाकर्त्तव्यव्रतविशेषः। यथा,—
"ब्रह्मोवाच।
भगवन्! पुरुषस्येह स्त्रियाश्च विरहादिकं।
शोक-व्याधि-भयं दुःखं न भवेद्येन तद्वद॥
भगवानुवाच।
श्रावणस्य द्वितीयायां कृष्णायां मधुसूदनः।
क्षीरार्णवे सलक्ष्मीकः सदा वसति केशवः॥
तस्यां संपूज्य गोविन्दं सर्व्वान् कामान् समश्नुते।
गो-भू-हिरण्य-दानादि सप्तकल्पशतानुगं॥
अशून्यशयना नाम द्वितीया या प्रकीर्त्तिता
तस्यां सम्पूजयेद्विष्णुमेभिर्मन्त्रैर्व्विधानतः॥
श्रीवत्सधारिन् श्रीकान्त श्रीधाम श्रीपतेऽव्यय।
गार्हस्थं मा प्रणाशं मे यातु धर्म्मार्थकामद॥
अग्नयो मा प्रणश्यन्तु देवताः पुरुषोत्तम।
पितरो मा प्रणश्यन्तु मत्तो दाम्पत्यभेदतः॥
लक्ष्मीर्न वियुज्यते देवो न कदाचित् यथा भवान्।
तथा कलत्रसम्बन्धो देव मा मे वियुज्यतु॥
लक्ष्मीर्न शून्यं वरद यथा ते शयनं सदा।
शय्या ममाप्यशून्यास्तु तथैव मधुसूदन॥
गीतवादित्रनिर्घोषं देवस्याग्रे तु कारयेत्।
घण्टा भवेदग्रतस्य सर्व्ववाद्यमयी यतः॥
एवं सम्पूज्य गोविन्दमश्नीयात्तैलवर्ज्जितं।
नक्तमस्तारलवणं यावत्तस्याव्रतोद्यं॥
ततः प्रभाते संजाते लक्ष्मीपतिसमन्वितां।
दीपान्नभाजनैर्युक्तां शय्यां दद्यादिजन्मने॥
पादुकोपानहच्छत्रचामरासनसंयुतां।
अभीष्टोपस्करैर्युक्तां शुक्लपुष्पाम्बरावृतां॥
सोपधानकविश्रामां फलैर्नानाविधैर्युतां।
तथाभरणधान्यैश्च यथाशक्त्या समन्वितां॥
अव्यङ्गाङ्गाय विप्राय वैष्णवाय कुटुम्बिने।
दातव्या वेदविदुषे न वकव्रतिने क्वचित्॥
तत्रोपवेश्य दाम्पत्यमलंकृत्य विधानतः।
पात्रस्तु भाजनं दद्यात् भक्ष्यभोज्यसमन्वितं।
ब्राह्मणस्यापि सौवर्णीमुपस्करसमन्वितां।
प्रतिमां देवदेवस्य सोदकुम्भां निवेदयेत्॥
एवं यस्तु पुमान् कुर्य्यादशून्यशयनं हरेः।
वित्तशाठ्येन रहितो नारायणपरायणः॥
न तस्य पत्न्या विरहः कदाचिदपि जायते।
नारी चाविधवा ब्रह्मन् यावच्चन्द्रार्कतारकं॥
न विरूपं न शोकार्त्तं दाम्पत्यं जायते क्वचित्।
न पुत्रपशुरत्नानि क्षयं यान्ति पितामह॥
सप्तकल्पसहस्राणि सप्तकल्पशतानि च।
कुर्व्वन्नशून्यशयनं विष्णुलोके महीयते"॥
इति मत्स्यपुराणे अशून्यशयनव्रतं ६७ अध्यायः॥

अशृतं, त्रि, (न शृतम्। नञ्तत्पुरुषः।) अपक्वं। इति रत्नमाला॥
"तण्डुलात् षोड़शगुणे शृते वाप्यशृते तथा।
तोये पेयां पचेत्तावद्यावत् सिक्थकनिर्गमः"॥
इति वैद्यकपरिभाषा॥

अशेषं, त्रि, (नास्ति शेषो यस्येति।) शेषरहितं। निःशेषं॥ सर्व्वं। इत्यमरः॥
("स्थानं प्राप्याग्र्यशेषाणां जगतामपि पूजितम्"॥
"अहिंसादिव्वशेषेषु गुणेषु गुणिनां वरः"॥
इति च विष्णुपुराणम्॥ अशेषेण। यथा,—
"अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः"।
इति कुमारे।
"वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः"॥
इति गीतायाम्॥)

अशोकं, क्ली, पारदं। इति मेदिनी॥ शोकरहिते त्रि॥

अशोकः, पुं, (नास्ति शोको यस्मात्।) स्वनाम-ख्यातपुष्पवृक्षविशेषः। तत्पर्य्यायः। शोकनाशः२ विशोकः३ वञ्जुलद्रुमः४ वञ्जुलः५ मधुपुष्पः६ अपशोकः७ कङ्केल्लिः८ केलिकः९ रक्तपल्लवः १० चित्रः११ विचित्रः१२ कर्णपूरः१३ सुभगः १४ दोहदी१५ ताम्रपल्लवः१६ रोगितरुः१७ हेमपुष्पः१८ रामा१९ वामाङ्घ्रिघातनः२० पिण्डीपुष्पः२१ नटः२२ पल्लवद्रुः२३। अस्य गुणाः शीतलत्वं। हृद्यत्वं। पित्तदाहश्रमापहत्वं। गुल्मशूलोदराध्मानाग्निमान्द्यं। कृमिकारकत्वञ्च। इति राजनिर्घण्टः॥ अस्य पर्य्यायगुणाः।
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः।
कङ्केल्लिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा॥
अशोकः शीतलस्तिक्तो ग्राही वर्ण्यः कषायकः।
दोषापचीढ्यादाहघ्नमिशोषविषनाशजित्"॥
इति भावप्रकाशः॥
अस्य कलिकाभक्षणविधिरशोकाष्टमीशब्दे द्रष्टव्यः॥ (योषितां नूपुरचरणप्रहारेण अशोकानां पुष्पोद्गमो भवतीति कविसमयप्रसिद्धिः। यदुक्तम्।
"पादाघातादशोकं विकसति वकुलं योषितामास्यमद्यैः"। इति साहित्यदर्पणे। अपरञ्च।
"पादाहतः प्रमदया विकसत्यशोकः
शोकं जहाति वकुलो मुखशीधुसिक्तः"।
अपरञ्च।
"नूपुरारवेण स्त्रीचरणेनाभिताड़नम्।
दोहदं यदशोकस्य ततः पुष्पोद्गमो भवेत्"॥
कुमारसम्भवे ऽपि।
"असूत सद्यः कुसुमान्यशोकः"। इति॥
"कुसुमं क्षतदोहदक्षया
यदशोकोऽयमुदीरयिष्यति"।
इति रघुवंशे।
"अशोकवल्कलक्षारं घृतं दुग्धं सुशीतलं।
यथाबलं पिबेत्प्रातस्त्रीक्षारदरनाशनं॥"
इति वैद्यकचक्रपाणिसंग्रहः॥
"अशोकवल्कलप्रस्थं तोयाढ़के विपाचितं।
तेन पादावशेषेण क्षीरकेण तथैव च॥
घृतप्रस्थं पचेदेतत्क्षिप्त्वा च तथापरं।
तण्डुलाम्बुन्यशाक्षीरं प्रस्थं प्रस्थं पृथक् पृथक्॥
केशराजरसस्यापि प्रस्थमेकं भिषग्वरः।
जीवनीयैः पियालैश्च परूषकरसाक्षनैः॥
यष्ट्याह्वाशोकमूलैश्च मृद्वीका च घृतावरी।
तण्डुलीयकमूलैश्च कल्कैरेतैः पलार्द्धकैः॥
शर्करायाः पलान्यष्टौ गर्भदन्त्याश्चूर्णितं।
पुष्यायोगेन तत्पीतं निहन्यात् सर्व्वदोषजं॥
श्वेतं क्षयं तथा नीलं प्रदरं हन्ति दुस्तरं।
कुक्षिशूलं योनिशूलं पृष्ठशूलञ्च दारुणं॥
मन्दाग्निमरुचिं पाण्डुं क्षतजं श्वासकासिनां।
अशोकघृतमेतत्तु विख्यातं स्त्रीगदेषु च"॥ * ॥
अशोकघृतं॥ * ॥
इति वैद्यकस्नेहमालिकायां॥)

अशोकः, त्रि, (नास्ति शोको यस्येति वाच्यलिङ्गः।) शोकरहितः। यथा,
"त्वामशोक हराभीष्ट मधुमाससमुद्भव।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु"॥
इति तिथ्यादितत्त्वं॥ (स्वनामख्यातो दशरथस्य मन्त्री। उक्तं रामायणे।
"ऋष्यशृंग्यज्ञतो विजयः सिद्धार्थोऽप्यर्थसाधकः।
अशोको धर्म्मपालश्च सुमन्त्रश्चाष्टमोऽभवत्"॥
स्वनामख्यातो नृपतिश्च, यथा भारते।
"अशोको नाम राजाभून्महावीर्य्योऽपराजितः।
तस्मादवरजो यस्तु राजन्नश्वपतिः स्मृतः"॥

अशोकरोहिणी, स्त्री, (अशोकइव रोहतीति। अशोक + रुह + णिच् + ङीप्।) कटुरोहिणी। इत्यमरः॥ कटकीति भाषा। ("अशोकरोहिणी-वैजयन्ती-सुवर्चला-पुनर्नवा-दन्तिकाली-ज्योतिष्म-ती-प्रभृतीनि समासेन तिक्तो वर्गः"।
इति सुश्रुते॥)

अशोकषष्ठी, स्त्री, (अशोका शोकादिरहिता या षष्ठी।) चैत्रस्य शुक्लषष्ठी। तस्यां षष्ठीपूजा यथा,
"चैत्रे मास्यसिते पक्षे षष्ठ्यां षष्ठीं समर्च्चयेत्।
सुखाय पुत्रलाभाय शुक्लपक्षे तथैव च"॥
इत्युत्तरकामाख्यातन्त्रे ११ पटलः॥०॥
"प्रसूत्या द्वादशे मासि सम्पूज्यामत्यहृद्ये।

सुते जाते तथा यस्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्वैष्ठे चारण्यसंज्ञिता ।
आषाढे कार्दमी ज्ञेया श्रावणे लगुडनी मता ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा ।
नाद्याख्या कार्त्तिके मासि मार्गे मूलकरूपिणी ॥
पौषे मांसवतीरूपा च शीतला तपसि स्मृता ॥
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता"॥
इति स्कान्दपुराणम् ॥

अशोका, स्त्री, (न विद्यते शोको दुःखं यस्याम् ।) कटुकी । इत्यमरः । अर्हतां शासनदेवताभेदः । इति हेमचन्द्रः ॥

अशोकारिः, पुं, (अशोकस्य अरिः । कदम्बवृक्षः । इति शब्दचन्द्रिका ॥

अशोकाष्टमी, स्त्री, (न विद्यते शोको यस्यां सा । एवम्भूता अष्टमी ।) चैत्रमासीयशुक्लाष्टमी । तत्राष्टसङ्ख्यकाशोककलिकायुक्तजलपानं कर्त्तव्यम् । यथा, अथाशोकाष्टमी स्कान्दे ।
"मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीं ।
पिबेदशोककलिकाः सायाल्लौहित्यवारिणि" ॥
अशोकाख्येत्युपादानात्तिथिमात्रेऽपि तत्पानं । फलन्तु मन्त्रलिङ्गात् शोकराहित्यमवगन्तव्यं । लौहित्यवारिणि ब्रह्मपुत्राख्यनदजले । पुनर्वसुयोगे तु फलाधिक्यं । आह लिङ्गगरुडपुराणयोः ।
"अशोककलिकाखाद्यौ ये पिबन्ति पुनर्वसौ ।
चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः" ॥
पानमन्त्रस्तु ।
"त्वामशोक हराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु" ॥
स्त्रीशूद्रकर्त्तृकपानेऽपि प्रागुक्तयुक्तेः स्वयं मन्त्रः पठनीयः । स्त्रीपक्षे ऊहोऽपि नास्ति विहितमेकादशीतत्त्वे । अशोकपानन्तु पञ्चमार्द्धप्रहरव्यापिन्यामष्टम्यां भाद्रहितीयोक्तवत् । इति तिथ्यादितत्त्वं ॥ * ॥ अपि च । अत्र स्रोतोजले बुधवारे पुनर्वसुनक्षत्रयुक्तशुक्लाष्टम्यां वाजपेययज्ञजन्यफलसमफलप्राप्तिकामः स्नायात् । ब्रह्मपुत्रे तु सर्व्वपापक्षयपूर्व्वकतीर्थस्नानजन्यफलप्राप्तिकामः स्नायात् । स्नानेतिकर्त्तव्यतां विधाय ।
"ॐ, ब्रह्मपुत्र महाभाग शान्तनोः कुलनन्दन ।
अशोकागर्भसंभूत पापं लौहित्य मे हर" ॥
इति पठित्वा स्नायात् ।
केवलशुक्लाष्टम्यां ब्रह्मपदगमनफलं । पञ्चमार्द्धप्रहरव्यापिन्यां पुनर्वसुयुक्तायां केवलायां वा शुक्लाष्टम्यां शोकरहितत्वकामः अष्टावशोककलिका अहं पिबामि इति सङ्कल्प्य,—
"त्वामशोक हराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु" ॥
इति पठित्वा विष्णुपदजलमिश्रिता अशोककलिका अष्टौ पिबेत् । स्त्रीशूद्रानुपनीतैरपि मन्त्रः पठनीयः पौराणिकत्वात् । स्त्रीपक्षे लिङ्गोक्तो नास्ति प्रकृतेः समवेतार्थत्वात् । इति कृत्यतत्त्वं ॥

अशोचः, पुं, (न शोचः । नञ्समासः ।) शोकाभावः । तत्पर्य्यायः । अनुशंकातिः । इति त्रिकाण्डशेषः ।

अशौचं, क्ली, (शुच् + कर्म्मणि ण्यत् । ततो नञ्तत्पुरुषः ।) शोकायोग्यं । अशोचनीयं । यथा,—
"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः" ॥
इति श्रीभगवद्गीतायां २ अध्याये ११ श्लोकः ॥
(तथा च चाणक्ये,—
"अशोच्यो निर्धनः प्राज्ञोऽशोच्यः पण्डितबान्धवः ।
अशोच्या विधवा नारी पुत्रपौत्रप्रतिष्ठिता")

अशौचं, क्ली, (शुचेः पवित्रताया भावः शौचं ततो नञ्तत्पुरुषः) शुचित्वाभावः । स्मृतौ तु । वैदिककर्म्मानर्हत्वप्रयोजकीभूतसंस्कारविशेषः । यथा । वैदिककर्म्मानर्हत्वप्रयोजकसंस्कारविशेषरूपमशौचं । वैदिककर्म्मार्हत्वप्रयोजकसंस्काररूपं शौचं । न चाशौचाभाव एव शुद्धिर्नसंस्कारविशेष इति वाच्यं । अघानां यौगपद्येति न वर्द्धयेदघानि इत्येताभ्यामशौचे पापपर्य्यायाघपदप्रदर्शनात् अशौचपदस्य यथाभावरूपत्वं । तथा,—
"देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां ।
आयान्ति तस्मात्तदहः पुण्यं यच्च सर्व्वदा" ॥
इत्यादित्यपुराणीयेन शौचं पुण्यपददर्शनात् शौचस्यापि भावरूपता प्रतीयते । इति शुद्धितत्त्वं ॥ * ॥ मन्त्रदगुरुमरणे अशौचं यथा,—
"गृहीतो देवतामन्त्रः सावित्रीग्रहणं कृतं ।
यस्मात्तस्य चिरात्तन्तु ब्रह्मविद्याग्रहो यतः ॥
उपनीयाध्यापको यस्तस्मिन्नपि चिरात्तकं ।
वेदवेदाङ्गशास्त्राणां व्याख्यानं शिक्षितं यतः ॥
ज्ञानं प्रतिष्ठितं येन वेदाभ्यासो यतः कृतः ।
तस्मिन्मृते चैकरात्रं गुरौ शिष्ये तथैव च ॥"
इति मत्स्यसूक्ते महातन्त्रे ३५ पटलः ॥ अपि च ।
"गुरावुपरते चैव व्यहाणि शिष्यसन्ततौ" ।
इति विज्ञानतन्त्रं ॥ * ॥ अन्यत् पूर्व्वलिखितं । विहितकर्म्मविरोधदृष्टविशेषः । तदनेकविधं तत्र शुद्धितत्त्वोक्ताशौचानि सङ्क्षिप्यन्ते ॥

अथ सपिण्डाद्यशौचं १ ॥

जनने मरणे च सप्तमपुरुषपर्य्यन्तं सम्पूर्णाशौचं । तच्च विप्रस्य दशाहः क्षत्रियस्य द्वादशाहः । वैश्यस्य पञ्चदशाहः । शूद्रस्य मासः ॥ (यथाह मनुः ।
"शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति" ॥)
जनने मरणे च दशमपुरुषपर्य्यन्तं सर्व्वेषां वर्णानां व्यहः । चतुर्दशपुरुषपर्य्यन्तं पत्निणी ॥
जनने मरणे च जन्मनामस्मृतिपर्य्यन्तं सर्व्ववर्णानामेकाहः ॥ जन्मनामस्मृतेरभावे स्नानमात्रं ॥
अशौचं प्रति कन्यायास्त्रिपुरुषं सापिण्डं । मातामहमरणे सर्व्वेषां वर्णानां चिरात्रं ॥
माढव्यस्वीय-पितृष्वस्रीय-मातुलपुत्र-भागिनेयमरणे सर्व्ववर्णानां पत्निणी ॥
पितामहभगिनीपुत्र--पितामहीभगिनीपुत्र--पितामहीभ्रातृपुत्ररूप-पितृबान्धवत्रयमरणे सर्व्ववर्णानां पत्निणी ॥
मातामहभगिनीपुत्र-मातामहीभगिनीपुत्र-मातामहीभ्रातृपुत्ररूप-मातृबान्धवत्रयमरणे सर्व्ववर्णानामहोरात्रं ॥
एकग्रामवासिस्वगोत्रजमरणे सर्व्ववर्णानामहोरात्रं ॥
औरसव्यतिरिक्तपुत्रजननमरणयोःपरपूर्व्वभार्य्याप्रसवमरणयोश्च सर्व्ववर्णानां चिरात्रं ॥
आचार्य्यमरणे ब्राह्मणादिवर्णत्रयाणां चिरात्रं ॥
समानजातीयोत्कृष्टजातीयपुरुषान्तर-संगृहीतस्वभार्य्यामरणे सर्व्वेषां चिरात्रं ॥ हीनवर्णोपभुक्तामरणे तु नाशौचं ॥
भगिनीपुत्रश्वश्रे माढव्यसुर्भ्रातृपुत्रश्वश्रे पितृव्यसुः पैतृव्यस्वीयगृहे मातुलपुत्रस्य जामातृश्वश्रे श्वश्रूश्वसुरयोर्मरणे भगिनीपुत्रादिचतुर्णां चिरात्रं ॥
श्वश्रूश्वसुरयोः सन्निधिमरणे सर्व्ववर्णानां चिरात्रं ॥ श्वश्रूश्वसुरयोरेकग्रामस्थितयोर्मरणे सर्व्वेषां पत्निणी ॥
श्वश्रूश्वसुरयोर्भिन्नग्रामस्थितयोर्मरणे सर्व्वेषामहोरात्रं ॥
भगिनी-मातुलानी-मातुल-पितृष्वस्र-माढव्यस्र-गुर्व्वङ्गना-मातामही-मरणे सर्व्वेषां पत्निणी ॥
आचार्य्यपत्नीपुत्रयोरुपाध्यायस्य माढव्यैमातेयस्य श्यालकस्य सहाध्यायिनः शिष्यस्य च मरणे सर्व्ववर्णानामहोरात्रं ॥ माढव्यस्रपुत्र-पितृष्वस्रपुत्र-मातुलपुत्ररूपात्मबान्धवत्रयमरणे सर्व्ववर्णानां पत्निणी ॥
(तथा च मनुः—
"मातुले पत्निणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च" ।
प्रथममन्येनोढ़ा तेनैव जनितपुत्रा पुत्रसहितैवान्यमाश्रिता पश्चात्तेनापि जनितपुत्रा तयोः पुत्रयोर्यथासम्भवं प्रसवमरणयोर्द्वितीयपुत्रपितुस्त्रिरात्रं । तत्पितृव्यानामेकरात्रं । तद्द्वितीयपितुर्म्मरणे तथाविधपुत्रयोरपि चिरात्रं । तथाविधपुत्रयोः परस्परप्रसवमरणयोर्म्माढव्यजातुक्त्राशौचं ॥
दौहित्रमरणे सर्व्वेषां वर्णानां पत्निणी ॥
पितृमाढव्यमरणे ऊढ़ानां कन्यानां चिरात्रं ॥ यदि मातुलमाढव्यस्रपितृष्वस्रप्रभृतीनां दहनवहनं करोति तदा सर्व्वेषां वर्णानां चिरात्रं ॥
मातामहादीनां चिरात्राभ्यन्तरं मरणमरणे तच्छ्रवणेन शुद्धिः । तत्परतोत्तरश्रवणे तु नाशौचं । किन्त्वाचारात् स्नानमात्रं ॥

अथ बालाद्यशौचं २

नवमादिमासजातबालस्याशौचकालाभ्यन्तरे मरणे मातापित्रोरस्पृश्यत्वं युक्तं तदेव स्वजातृजननाशौचं ॥ ज्ञातीनान्त्वशौचं नास्ति ॥
नवमादिमासमृतजातयोः कन्यापुत्रयोः पित्रादिसपिण्डानां मातुश्च जननाशौचं ॥ तच्च ब्राह्मणानां दशाहं शूद्राणां मासः ॥ पुत्रजन्मनि पितुः सचेलं स्नानं । पुत्रमुखदर्शनात्परं पुनः सचेलस्नानं ॥
(तथाच संवर्त्तः,—
"जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते ।

माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः" ॥)
पुत्रकन्याजनने ब्राह्मण्या दशाहानन्तरं लौकिककर्म्माधिकारः।
पुत्रजनने ब्राह्मण्या विंशतिरात्रोत्तरस्नानात् वैदिककर्म्माधिकारः।
कन्याजनने ब्राह्मण्या मासोत्तरस्नानात् वैदिककर्म्माधिकारः॥
शूद्रायाः कन्यापुत्रजनने त्रयोदशाहोत्तरं लौकिककर्म्माधिकारः। वैदिककर्म्मणि तु मासोत्तरस्नानात् शुद्धिः॥
एतत् सर्व्वं कन्यापुत्रयोर्विद्यमानत्वे बोध्यं॥
जननाशौचोत्तरं षण्मासाभ्यन्तरमजातदन्तमरणे मातापित्रोरेकाहः। सपिण्डानान्तु सद्यः शौचं॥
षण्मासाभ्यन्तरेऽपि जातदन्तस्य मरणे मातापित्रोस्त्र्यहः। सपिण्डानामेकाहः॥ षण्मासोपरि द्विवर्षपर्य्यन्तं बालकमरणे मातापित्रोस्त्र्यहः। सपिण्डानामक्षतचूड़े एकाहः। क्षतचूड़े त्र्यहः॥
(अत्र मनुः,—
"नृणामक्षतचूड़ानां विशुद्धिर्नैशिकी स्मृता।
निर्वृत्तचूड़कानां तु चिराच्छुद्धिरियते॥
ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः।
अलङ्कृत्य शुचौ भूमावस्थिसञ्चयनादृते॥
नास्य कार्य्योऽग्निसंस्कारो न च कार्य्योदकक्रिया।
अरण्ये काष्ठवत् त्यक्त्वा तूष्णीमास्ते यथा पुरा॥")
द्विवर्षोपरि मासत्रयाधिकषड्वर्षपर्य्यन्तमनुपनीतबालकस्य मरणे मातापित्रादिसपिण्डानां त्र्यहः॥ तन्मध्येऽप्युपनीतस्य मरणे दशाहः। मासत्रयाधिकषड्वर्षोपरि मरणे पित्रादिसपिण्डानां दशाहः॥
शूद्रस्य षण्मासाभ्यन्तरे अनुत्पन्नदन्तस्य मरणे चिरात्रं। उत्पन्नदन्तस्य पक्षाहः॥ षण्मासोपरि द्विवर्षाभ्यन्तरे अक्षतचूड़मरणे पक्षाहः। तत्रापि क्षतचूड़मरणे द्वादशाहः॥ द्विवर्षोपरि षड्वर्षाभ्यन्तरे मरणे द्वादशाहः। अत्रापि दैवात् क्षतोद्वाहे मासो व्यवक्रियते॥ षड्वर्षोपरि मासः॥

अथ स्त्र्यशौचं॥२

कन्याया जन्मावधिद्विवर्षाभ्यन्तरे मरणे सर्व्ववर्णानां पित्रादिसपिण्डानां सद्यः शौचं। द्विवर्षोपरि वाग्दानपर्य्यन्तमेकाहः॥
वाग्दानोत्तरं विवाहपर्य्यन्तं कन्यामरणे भर्त्तृकुले पितृकुले च चिरात्रं
("स्त्रीणामसंस्कृतानां तु व्यूढानामुध्यन्ति बान्धवाः"। इति मनुः।)
विवाहोत्तरं मरणे भर्त्तृकुलस्यैव सम्पूर्णाशौचं॥
दन्तजन्मपर्य्यन्तं भगिनीमरणे सोदरभ्रातुः सद्यः शौचं॥
चूड़ापर्य्यन्तं भगिनीमरणे एकरात्रं। विवाहपर्य्यन्तं चिरात्रं॥
दत्तकन्यायाः पितृगृहे प्रसवमरणयोः पित्रोः भ्रूयनासनादिसंसर्गशून्ययोस्त्रिरात्रं। तथाविधबन्धुवर्गाणां एकरात्रं। तथाविधसंसर्गिणान्तु सर्व्वेषां पूर्णाशौचं॥ एतत्सर्व्वं सर्व्ववर्णसाधारणं॥

अथ गर्भस्रावाशौचं॥४

षण्मासाभ्यन्तरे गर्भस्रावे सर्व्ववर्णस्त्रीणामेवाशौचं। तच्च लौकिकवैदिककर्म्मणोर्गर्भमाससमसङ्ख्यदिनव्यापकं॥ [इति मनुः।)
("रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति"॥
द्वितीयमासावधिगर्भस्रावे मासतुल्यदिनाधिकादेकदिनात्परं ब्राह्मण्या वैदिककर्म्माधिकारः॥ क्षत्रियाया गर्भमाससमसङ्ख्यदिनाधिकात् दिनद्वयात्। वैश्याया दिनत्रयात्। शूद्रायाः षड्दिनात्॥
सप्तमाष्टममासयोर्गर्भपतने मातुः सम्पूर्णाशौचं। सगुणसपिण्डानां सद्यः शौचं। निर्गुणपित्रादिसपिण्डानामहोरात्रं। यथेष्टाचरणशीलानां सपिण्डानां त्रिरात्रं तत्र जातस्य तद्दिनएव मरणे एवं ज्ञेयं॥ सप्तमाष्टममासजातबालस्य जन्मद्वितीयदिनादौ मरणे नवमादिमासजातबालकमरणवदशौचं। तच्च बालाद्यशौचे विहितं॥

अथ मृत्युविशेषाशौचं॥५

शस्त्राननुमतबुद्धिपूर्ब्बकात्मघातिनो नाशौचदाहश्राद्धादि॥
शस्त्रानुमत्या अनशनादिमृतस्य प्रमादादनशनाग्न्यग्नि-वह्नि-जलोद्बन्धदेशप्रपतन-संग्राम-भृङ्गि-दंष्ट्रिनखि-व्याल-विष-चण्डाल-चौर-हतस्य च चिरात्रं॥
भृङ्ग्यादिभिः स्त्रिया च क्रोड़ां कुर्व्वतः प्रमदाप्रमादमृतस्य नाशौचादि॥ नागविप्रियकारित्वेन तद्धतस्य मरणोद्देशप्रवृत्तविशुद्धतस्य चौर्य्यदोषेण राज्ञा हतस्य कलहं कृत्वा चण्डालाद्यैरसमानवर्णैर्हतस्य विप्रादेर्व्याधिजनकौषधस्य विषस्य वह्नेश्च वा दातुर्म्मरणे पाषण्डाश्रितस्य नित्यपरापकारिणः क्रोधात् स्वयं प्रायविषवह्न्यादिप्रवेशोद्बन्धन-जल-गिरि-वृक्षप्रपात-मृतस्य धर्म्मशास्त्रादिमयपाचनिर्म्माढविप्रादेर्म्मनुष्यवधस्यानाधिकारिणः कण्डदेशोत्पन्नभगरोगस्य ऊर्ध्वकर्म्माग्रक्तनपुंसकस्य ब्राह्मणविषयापराधकरणाग्निहतस्य बुद्धिपूर्ब्बकब्राह्मणहतस्य च महापातकिनो गलत्कुष्ठिनश्च एवंविधपतितानां मरणे च न दाहाद्यशौचादिकं कार्य्यं। तत्कृत्वा तप्तकृच्छ्रद्वयं कुर्य्यात्॥
(अत्र मनुः,—
"दुष्टास्त्रैरजातानां प्रव्रज्यासु च तिष्ठताम्।
आत्मनस्त्यागिनाञ्चैव निवर्त्तेतोदकक्रिया॥
पाषण्डमाश्रितानाञ्च चरन्तीनाञ्च कामतः।
गर्भभर्त्तृवधाञ्चैव सुरापीनाञ्च योषितां"॥
इति।) स्नेच्छतस्करादिभिर्युद्धे स्वाम्यर्थहतविप्रादेर्दाहाद्यशौचादिकमस्त्येव॥
कृतप्रायश्चित्तगलत्कुष्ठिनो दाहाद्यशौचादिकं कार्य्यं॥
शस्त्रेणाभिमुखहतस्य तु सद्यःशौचं दाहादि च॥
गवार्थे ब्राह्मणार्थे वा दस्युना युद्धे हतस्याहोरात्रमशौचं॥
नृपतिरहितयुद्धे गरुड़ादिहतस्य पराङ्मुखहतस्य च चिरात्राशौचं॥
गोविप्रप्रणेऽभिमुखयुद्धहतस्य सद्यः शौचं पराङ्मुखहतस्य तु चिरात्रं॥

लौकिकपारिभाषिकोभयशस्त्रघातेतरहतमरणे सर्व्ववर्णानां सप्ताहमध्येऽहं सप्ताहादूर्द्धं सम्पूर्णाशौचं॥
लौकिकपारिभाषिकशस्त्रघातमरणे त्र्यहमध्ये त्र्यहं त्र्यहाद्ऊर्द्धं प्रक्षालनाशौचं॥
लौकिकशस्त्रघातः खड्गशरादिघातः॥ पारिभाषिकशस्त्रघातस्तु।
"पश्चिमस्यमर्गणैर्ये तु दंष्ट्रिपट्टङ्गिनखैर्हताः।
पतनानशनप्रायैर्व्वह्न्यम्बिविषबन्धनैः॥
मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः"॥
इति देवीपुराणोक्तः॥

अथ विदेशस्थाशौचं॥६

अशौचकालाभ्यन्तरे विदेशस्थजननमरणाशौचश्रवणे श्रोत्रियाहोभिः शुद्धिः॥
("विगतं तु विदेशस्थं शृणुयात् यो ह्यनिर्दशं।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्"॥
इति मनुः।)
अशौचकालोत्तरं विदेशस्थज्ञातिजननश्रवणेऽशौचं नास्त्येव। पुत्रजननश्रवणे तु सचैलस्नानात् शुद्धिः॥ (अत्र मनुराह।
"निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः"॥)
सम्पूर्णाशौचिमरणे वर्षाभ्यन्तरश्रवणे सपिण्डानां त्रिरात्रेण शुद्धिः। सचैलस्नानादशक्तौ शृणुयात्॥
निवृत्तिः। वर्षोत्तरश्रवणे तु सपिण्डानां स्नानेन शुद्धिः॥ (अत्र मनुः।
"अतिक्रान्ते दशाहे च त्रिरात्रमशुचिर्भवेत्।
संवत्सरे व्यतीते तु स्पृष्ट्वापो विशुध्यति"॥)
मातृ-पितृ-भर्तृ-मरणे वर्षोत्तरश्रवणे पुत्रजन्मैकाहेन शुद्धिः॥ द्विवर्षोत्तरश्रवणे स्नानमात्रं॥
पूर्णाशौचातिक्रमएव विदेशस्थमरणाशौचश्रवणे त्र्यहाशौचं। न खण्डाशौचातिक्रमे॥ यत्र मरणमात्रं श्रुतं विज्ञेयं मासादिकमज्ञातं तत्र श्रवणदिनावधिखण्डाद्यशुद्धमशौचं। खण्डाशौचेऽपि महागुरुनिपाते एकरात्रं॥

अथाशौचसङ्करः॥७

जननाशौचमध्ये जननाशौचान्तरपाते मरणाशौचमध्ये मरणाशौचान्तरपाते च पूर्व्वाशौचकालेन सर्व्ववर्णानां शुद्धिः॥ (यथाह मनुः—
"अन्तर्दशाहे स्यातान्येत् पुनर्मरणजन्मनी।
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशं"॥)
पूर्णजननाशौचान्तर्दिने पूर्णजननाशौचान्तरपाते पूर्णमरणाशौचान्तर्दिने पूर्णमरणाशौचान्तरपाते च पूर्व्वाशौचान्तिमदिवसीयोत्तरप्रभाते सूर्य्योदयात् पूर्व्वं तत्पाते सूर्य्योदयावधिदिनत्रयेण शुद्धिः॥
एवं मरणाशौचेऽपि॥
पूर्व्वोक्तवर्द्धितदिनद्वयत्रयाभ्यन्तरेऽशौचान्तरपाते पूर्व्वाशौचकालेन शुद्धिः॥
अशौचचित्तयान्तर्दिनकृत्यं क्षौरादिकमेकदैव तद्द्वितीयदिनकृत्यं श्राद्धादिकं तत्परदिने॥

अत्र च अशौचान्तिमदिनतत्प्रभातयोः खपुत्रजनने पिण्डमाढमर्द्धमरणे च न दिनद्वयत्रयवृद्धिः। किन्तु खपुत्रजननावधि पिण्डमाढमर्द्धमरणावधि च पूर्णाशौचं ॥ ज्ञातिजननाशौचपूर्व्वार्द्धे खपुत्रजनने ज्ञातिजननाशौचकालेन शुद्धिः॥ परार्द्धे चेत् खपुत्रजननाशौचकालेन शुद्धिः ॥

ज्ञातिमरणाशौचकालमध्ये पिण्डमाढमर्द्धमरणे पूर्व्वार्द्धे पूर्व्वाशौचकालेन परार्द्धे पराशौचकालेन शुद्धिः ॥

खपुत्रजननाशौचान्तिमदिनतत्प्रभातयोर्ज्ञातिजनने पिण्डमाढमर्द्धमरणाशौचान्तिमदिनतत्प्रभातयोर्ज्ञातिमरणेऽपि न दिनद्वयत्रयवृद्धिः। किन्तु पूर्व्वाशौचकालेन शुद्धिः॥

खपुत्रजननाशौचान्तिमदिनतत्प्रभातयोः खपुत्रान्तरजनने एवं माढमरणाशौचान्तिमदिनतत्प्रभातयोः पिण्डमरणे पिण्डमरणाशौचान्तिमदिनतत्प्रभातयोर्म्माढमरणे च क्रमेण दिनद्वयत्रयवृद्धिः॥ जननाशौचद्वयसन्निपाते पूर्व्वजातो यदाशौचकालाभ्यन्तरे मृतस्तदा सपिण्डानां सद्यःशौचेन पूर्व्वाशौचनाशः ॥ तन्नाशादेव परार्द्धजातबालस्य माढपिढव्यतिरिक्तसपिण्डानां पूर्व्वार्द्धजातबालस्य मातापित्रादिसकलसपिण्डानां परजननाशौचस्य निवृत्तिः॥ पूर्व्वजातबालस्य मातापित्रोरस्पृश्यत्वयुक्तस्वस्वजात्युक्तजननाशौचं ॥ जननाशौचद्वयसन्निपाते प्रथमजननाशौचपूर्व्वार्द्धजातबालमरणे तन्मातापित्रोः पूर्व्वाशौचकालपर्य्यन्तं अङ्गास्पृश्यत्वयुक्तमशौचं ॥ परार्द्धजातबालमरणे तु तज्जननावधि तन्मातापित्रोरङ्गास्पृश्यत्वयुक्तस्वजात्युक्तजननाशौचं। विंशेषातिरिक्तसमसंख्यदिवसीयजननमरणाशौचयोः सन्निपाते मरणाशौचकालेन शुद्धिः। असमसंख्यदिवसीयजननमरणाशौचयोः सन्निपाते तु दीर्घाशौचकालेन शुद्धिः॥ सूतेतरायाः पुत्रजननप्रयुक्तविंशतिरात्राशौचाभ्यन्तरे पत्युर्म्मरणेऽपि पुत्रजननाशौचकालेन शुद्धिः॥

पूर्व्वोक्तसपिण्डद्वयजननवर्द्धिताशौचमध्ये पिण्डमाढमर्द्धमरणेऽपि वर्द्धितसपिण्डद्वयजननाशौचकालेन शुद्धिः। एकाहे पूर्णाशौचिसपिण्डद्वयमरणे यावदशौचं तावत् सर्व्वसपिण्डानामस्पृश्यत्वं ॥ सकुल्यपर्य्यायसमानोदकमरणे विद्युदादिमरणेऽपि अशौचं चिरात्रं। अङ्गास्पृश्यत्वमेकरात्रं। तेनैतत् चिरात्रद्वयं गुरु॥ विदेशस्थमरणे अर्थात् अशौचमध्ये अश्रुतसपिण्डमरणे चिरात्राशौचं अङ्गान्स्पृश्यत्वस्नानापनेयं। अतस्तल्लघु। एषां सन्निपाते गुरुणैव शुद्धिः॥

विदेशश्रुतज्ञातिचिरात्राशौचस्य लघुनः विदेशश्रुतपिण्डमाढमर्द्धचिरात्राशौचेन शुद्धिः॥ तुल्यचिरात्राशौचसन्निपाते पूर्व्वेणैव शुद्धिः॥ कन्यापुत्रयमजोत्पत्तौ सर्व्ववर्णाया मातुर्म्मासेन शुद्धिः पित्रादिसपिण्डानां स्वजात्युक्ताशौचं ॥ तयोरशौचमध्ये एकतरमरणे शूद्राभिन्नमातुः कन्यामरणात् सद्यः शुद्धिः। न तु पुत्रमरणात् ॥ पित्रादिसपिण्डानान्तु प्रथमजातमरणात् शुद्धिः। न तु परजातमरणात् ॥ शूद्रायां यमजोत्पत्तौ प्रथमजातमरणाशौचेन शुद्धिः। न तु परजातमरणात् ॥ पित्रादिसपिण्डानान्तु प्रथमजातमरणात् शुद्धिः न तु परजातमरणात् ॥ एवमन्यद्भाव्यं सुधीभिः ॥

अथ श्वानुगमनाद्यशौचं ॥ ८

ब्राह्मणश्वानुगमने ब्राह्मणस्य सचेलस्नानाग्निस्पर्शघृतप्राशनैः शुद्धिः ॥

क्षत्रियश्वानुगमने ब्राह्मणस्य एकाहेन शुद्धिः ॥ वैश्यश्वानुगमने ब्राह्मणस्य द्व्हेन शुद्धिः ॥ शूद्रश्वानुगमने ब्राह्मणस्य प्राणायामशतेन दिनत्रयेण च शुद्धिः ॥

प्रमादात् शूद्रश्वानुगमने ब्राह्मणस्य जलावगाहनाग्निस्पर्शघृतप्राशनैः शुद्धिः ॥

अनाथब्राह्मणस्य धर्म्मबुद्ध्या दहनवहनयोः स्नानघृतप्राशनाभ्यां सद्यः शौचं ॥

लोभेन सजातीयदाहे स्वसजात्युक्ताशौचं ॥ असजातीयश्वदहनवहनस्पर्शैः श्वजात्युक्ताशौचं॥ स्नेहादसम्बन्धिदाहकविप्रादेस्त्र्हवासे चिरात्रं। अशौचिकुलान्नभोजने तत्तुल्याशौचं ॥ अशौचान्नभोजनं विना तद्गृहवासेऽहोरात्रं ॥ विशेषवचनाभावे सम्बन्धिनो मातुलादेरस्नेहेनापि दाहे चिरात्रं ॥

चिताधूमसेवने स्नानात् शुद्धिः ॥ (यथाह मनुः। "असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्। विशुध्यति चिरात्रेण मातुराप्तांश्च बान्धवान् ॥ यदन्नमत्ति तेषां तु दशाहेनैव शुध्यति। अनदन्नन्नमक्लैव स चेत् तस्मिन् गृहे वसेत् ॥ अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति" ॥)

शूद्रे मृतेऽस्थिसञ्चयनकालाभ्यन्तरे तदभ्यहं गत्वाऽनिपातेन विप्रस्य चिरात्रं ॥ स्नानान्तरेऽश्रुपातनेऽहोरात्रं ॥

शूद्रे मृतेऽस्थिसञ्चयनकालादूर्द्ध्वं मासाभ्यन्तरे तदभ्यहेऽश्रुपातने विप्रस्याहोरात्रं सचेलस्नानञ्च ॥ अस्थिसञ्चयनात् पूर्व्वं विप्रभ्यहे रोदने विप्रस्य एकाहेन शुद्धिः ॥

क्षत्रवैश्ययोर्भ्यहे रोदने विप्रस्य द्व्हेन शुद्धिः॥ शूद्रस्तु सर्व्वत्र रोदने नक्तेन शुद्धः ॥

मृतशूद्रस्य बान्धवैः सह रोदनरहितविलापमात्रे ब्राह्मणस्याहोरात्रं ॥

अस्थिसञ्चयनकालस्तु पूर्णाशौचे ब्राह्मणस्य चतुर्थाहः। क्षत्रियस्य षष्ठाहः। वैश्यस्य अष्टमाहः। शूद्रस्य दशमाहः ॥ व्यहाशौचे सर्व्वेषां द्वितीयाहः ॥

पूर्णाशौचिमरणे ब्राह्मणस्य चतुर्थाहेऽस्पृश्यतानिवृत्तिः ॥ क्षत्रियस्य षष्ठदिने। वैश्यस्य अष्टमदिने। शूद्रस्य दशमदिनेऽस्पृश्यतानिवृत्तिः ॥ सर्व्वस्य खण्डाशौचे त्रिभागकालेनास्पृश्यतानिवृत्तिः।

अतीतेऽशौचे सचेलस्नानेनास्पृश्यतानिवृत्तिः ॥ जननाशौचे सपिण्डानां अस्पृश्यता नास्ति ॥ पुत्रोत्पत्तौ स्नानात् पूर्व्वं पितुर्विमातृणाञ्चास्पृश्यत्वं ॥

सूतिकास्पर्शे पितुर्विमातृणाञ्च सूतिकातुल्यकालास्पृश्यत्वं। अन्येषां स्नानमात्रं ॥

कन्यापुत्रयोर्ज्जनने मातुर्दशरात्रमस्पृश्यत्वं ॥

कन्यापुत्रयोर्जनने शूद्रायास्त्रयोदशरात्रमस्पृश्यत्वं॥

अथ क्षताशौचं ॥ ९

नाभेरूर्द्धमधोवा रुधिरस्रवे सन्ध्यावन्दनाद्यतिरिक्तकर्म्मण्येकाहः ॥

दन्तरक्तस्रवे सर्व्वत्र कर्म्मण्येकाहः ॥

अथ रजस्वलाशौचं ॥ १०

तत्र प्रथमदिनावधि चिरात्रमशौचं॥ चिरात्रात् परं सप्तदशाहपर्य्यन्तं रजोदर्शनेऽशौचाभावः ॥ अष्टादशाहे रजोदर्शने एकाहमशौचं ॥ ऊनविंशदिने रजोदर्शने द्व्हाशौचं ॥ ऊनविंशतिदिनात् परं रजोदर्शने चिरात्राशौचं॥ रजस्वला चतुर्थेऽह्नि भर्त्तृसेवनादिलौकिककर्म्मणि शुद्धा। पञ्चमेऽहनि दैवपैत्रकर्म्मणोः शुद्धा ॥ ("शुद्धामर्त्तुश्चतुर्थेऽह्नि असृग्दा दैवपैत्रयोः। दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति" ॥ इति शुद्धितत्त्वे।)

रजस्वलाया अशौचमध्ये सूतिकास्पर्शे अन्यजजातिस्पर्शे च चिरात्रोपवासेन शुद्धिः॥ उपवासस्तु अशौचात् परं करणीयः ॥

भर्त्तृपूरकपिण्डदानकाले यदि रजस्वला भवति तदा वस्त्रं त्यक्त्वा पुनः स्नात्वा पूरकं दद्यात् किन्तु शुद्धुत्तराशौचदिनासत्त्वएवायं विधिः। तत्सत्त्वे तु शुद्धा भूत्वा देयं॥

आब्दिकश्राद्धकालेऽपुत्रभार्य्या यदि रजस्वला भवति तदा पञ्चमेऽहनि तच्छ्राद्धं कुर्य्यात् ॥"॥ (अभिषिक्तक्षत्रियाणां चान्द्रायणादिव्रतकारिणां गवामयनादियागप्रवृत्तानाञ्च सपिण्डमरणादावशौचाभावश्च। उक्तञ्च मनुना।

"न राज्ञामधदोषोऽस्ति व्रतिनां न च सत्रिणाम्। ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा" ॥

विष्णुनाप्युक्तम्। "अशौचं न राज्ञां राजकर्म्मणि, न व्रतिनां व्रते, न सत्रिणां सत्रे"। इति ॥)

इत्यशौचव्यवस्था समाप्ता ॥

अश्मः, पुं, पर्व्वतः। मेघः। वैदिकशब्दोऽयं ॥

अश्मकदली, स्त्री, (अश्मा इव कदलीफलं यस्याः।) कदलीविशेषः। इति राजनिर्घण्टः ॥ अस्याः गुणपर्य्यायौ काष्ठकदलीशब्दे द्रष्टव्यौ ॥

अश्मकेतुः, स्त्री, (अश्मेव केतुरस्याः।) क्षुद्रपाषाणभेदाख्यः ॥ इति राजनिर्घण्टः ॥

अश्मगर्भः, पुं, (अश्मेव गर्भो यस्य।) हरिन्मणिः। मरकतं। इत्यमरः ॥

अश्मगर्भज, क्ली, (अश्मनो गर्भाज्जायते इति। अश्मगर्भ + जन् + ड।) मरकतं। इति राजनिर्घण्टः ॥ पान्ना इति भाषा ॥ (पुं, पाषाणजो वह्निः।)

अश्मघ्न:,पुं, (अश्मानं पाषाणं हन्ति भिनत्तीति। अश्म

+ हन् + टक्।) पाषाणभेदनवृक्षः। इति राजनिर्घण्टः॥ हाथाजुड़ी इति भाषा॥ अश्मभेदशब्देऽस्य पर्य्यायगुणौ ज्ञातव्यौ॥

अश्मजं, क्ली, (अश्मनः प्रस्तराज्जायते इति। अश्मन् + जन + ड।) शिलाजतु। इत्यमरः॥ लौहं इति राजनिर्घण्टः॥

("अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम्। तेषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति॥" इति मनुः॥ शिलाजत्वर्थे वैद्यकचक्रपाणिसंग्रहस्याश्मरीरोगचिकित्सायां वक्ष्यते यथा॥ 'अश्मता चाश्मजं देयं'॥)

अश्मजतुकं, क्ली, (अश्मजतु + स्वार्थे कन्।) शिलाजतु। इति राजनिर्घण्टः॥ (शिलाजतुशब्देऽस्य विशेषविवरणं ज्ञेयं॥)

अश्मदारणः, पुं, (अश्मानं दारयतीति। अश्म + दृ + णिच् + ल्युट्।) टङ्कः। पाषाणविदारणास्त्रं। इति जटाधरः॥ टाँकी इति पश्चिमदेशे ख्यातः॥

अश्मन्तं, क्ली, (अश्मनः प्रस्तरस्यापि अन्तो भवत्यत्र। प्रकन्ध्वादित्वं।) चुल्ली। अश्मभं। मरकं। अनवधिः। क्षेत्रं। इति मेदिनी॥ (पुं, धर्म्मात् मरुत्वत्यां जातः खनामख्यातो मरुद्भेदः। तथा च हरिवंशे।

"मरुत्वती मरुत्वन्तो देवानजनयत्सुतान्।"

"अश्मन्तं चित्ररश्मिञ्च तथा निष्कुषितं नृपं॥")

अश्मन्तकं, क्ली, (अश्मन्त + स्वार्थे कन्।) चुल्ली। मल्लिकाच्छादनं। दीपाधाराच्छादनं। इति मेदिनी॥ सेज आँधारिया इत्यादि भाषा।

अश्मन्तकः, पुं, अश्मन्त + कन्।) वृक्षविशेषः। अस्वकुचाइ इतिभाषा। तत्पर्य्यायः। अस्नोटकः २। इति रत्नमाला॥ वृक्षविशेषः। आवुटा इति पश्चिमदेशे ख्यातः। तत्पर्य्यायः। इन्दुकः २ कुराली ३ अश्मपचः ४ अश्मात्तक ५ नीलपत्रः ६ यमलपत्रकः ७। अस्य गुणाः। मधुरत्वं। कषायत्वं। सुशीतलत्वं। पित्तप्रमेहविदाहव्रण्यादिघमज्वरविषार्त्तिच्छर्द्दिभूतनाशित्वञ्च॥ इति राजनिर्घण्टः॥

अश्मपुष्पं, क्ली, (अश्मनः पुष्पमिव।) शैलेयं। शैलजनामगन्धद्रव्यं। इत्यमरः॥

अश्मभाजं, क्ली, (अश्मैव भाजयति चूर्णितं करोति। भञ्जचूर्णने। भज + णिच् + अण्। एषोदरादित्वात् जस्य लत्वम्।) द्रव्यचूर्णार्थलौहादिपात्रं। तत्पर्य्यायः। लौहभाण्डं २। इति शब्दचन्द्रिका॥ हामानदिस्ता इति भाषा॥

अश्मभित्, [द्,] पुं, (अश्मानं भिनत्तीति। अश्म + भिद् + क्विप्।) पाषाणभेदी वृक्षः। इति रत्नमाला॥ प्रस्तरभेदके त्रि॥

अश्मभेदः, पुं, (अश्मनो भेदो भवत्यस्मात्।) पाषाणभेदी वृक्षः। इति रत्नमाला॥ (अस्य गुणाः।

"अश्मभेदो हिमस्तिक्तः कषायो वस्तिशोधनः। भेदनो हन्ति दोषार्शोगुल्मक्षुच्छ्महृद्व्रजः॥ योनिरोगान् प्रमेहांश्च श्लीहशूलव्रणानि च"।

इति भावप्रकाशः॥

"एरण्डो विजपूरश्च गोक्षुरं वृहतीद्वयं। अश्मभेदस्तथाविल्व एतन्मूलः कृतः पृथक्॥ एरण्डतैलहिङ्वाढ्यो यवक्षारः ससैन्धवः। स्तनकण्ठकटीमेढ्रहृदयोत्थव्यथां जयेत्"॥

इति शार्ङ्गधरः॥)

अश्मयोनिः, पुं, (अश्मा योनिरुत्पत्तिस्थानं यस्य।) मरकतमणिः। इत्यमरटीकायां भरतः॥

अश्मरः, त्रि, (अश्मनोऽयमिति। अश्म + रः।) प्रस्तरसम्बन्धीयः। इति पाणिनिः॥ पातुरिया इति भाषा।

अश्मरी, स्त्री, (अश्मानं राति ददाति या। अश्मन् + रा + क + गौरादित्वात् ङीप्। मूत्रकृच्छ्ररोगे हि मूत्रदारे प्रस्तरमिव कठिनमांसं रचयति।) मूत्रकृच्छ्ररोगः। पातरी इति भाषा। यथा। अथाश्मर्य्यधिकारः। अत्राश्मर्य्याः सन्निकृष्टनिदानं सङ्ख्याञ्चाह।

"वातपित्तकफैस्तिसृचतुर्थी शुक्रजा मता। प्रायः श्लेष्माश्रयाः सर्व्वा अश्मर्य्यः स्युर्यथोपमाः"॥

श्लेष्माश्रयाः श्लेष्मसमवायिकारणाः। शुक्रजां विना। शुक्रजायास्तु शुक्रस्यैव समवायिकारणत्वात्। अन्ये तु शुक्राश्मर्य्यामपि कफकारणत्वमिच्छन्ति। प्रायःशब्दश्चात्र विशेषार्थः। यमोपमाश्चिकित्सां विना॥ * ॥ सम्प्राप्तिमाह।

"विशोषयेद्वस्तिगतं सशुक्रं मूत्रं सपित्तं पवनः कफं वा। यदा तदाश्मर्य्युपजायते तु क्रमेण पित्तेष्विव रोचना गोः॥

पवनो वस्तिगतं सशुक्रं मूत्रं सपित्तं कफं वा शोषमुपनयेत् यदा तदा अश्मरी क्रमेण क्रमशो वर्द्धमाना। यथा गोः पित्तेषु रोचनेवेत्यनयः॥* ॥ पूर्व्वरूपमाह।

"नैकदोषाश्रयाः सर्व्वा अथासां पूर्व्वरूपाणि। वस्त्याध्मानं तदासन्नदेशेषु परितोऽतिरुक्॥ मूत्रे वस्तिसगन्धत्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः"।

वस्तिः क्षुगलकः॥ * ॥ सामान्यलक्षणमाह।

"सामान्यलिङ्गं रुड्नाभिसेवनीवस्तिमूर्द्धसु। विशीर्णधारं मूत्रं स्यात् तया मार्गनिरोधने॥ तद्यपायात् सुखं मेहेदच्छं गोमेदकोपमं। तत्संक्षोभात् क्षते साश्मभायासाद्यातिरुग्भवेत्"॥

वस्तिमूर्द्धा नाभेरधोदेशः। विशीर्णधारं सविच्छेदधारं। तया अश्मर्य्या। मार्गः मूत्रवाहि स्रोतः। तद्यपायात् कदाचिदायुना अश्मर्य्या मूत्रमार्गादन्यत्र गमनात्। सुखं मेहेत् मूत्रयेत्। गोमेदकोपमं गोमेदको मणिः किञ्चिल्लोहितस्तद्वर्णं। तत्संक्षोभात् तस्या अश्मर्य्याः सञ्चारात्। घर्षणेन मूत्रवहे स्रोतसि क्षते जाते साश्मं सरक्तं मेहेत्। आयासात् प्रवाहणादिजनितात्॥ * ॥ वातोल्बणमाह।

"तत्र वाताद्भृशं त्वर्त्तो दन्तान् खादति वेपते। मुहुराति मेहनं नाभिं पीड़यत्यपि सङ्क्षयन्॥ सानिलं मुञ्चति शकृन्मुञ्चर्म्मेहति विन्दुशः। श्यावारुणाश्मरी चास्य स्याच्चिता कण्टकैरिव"॥

सङ्क्षयन् आर्त्तनादं कुर्व्वन् नाभिदेशं पीड़यति। शकृत् पुरीषं सानिलं मुञ्चति। मुहुर्म्मुहुर्मेहति। विन्दुशः विन्दुं विन्दुं मेहति मूत्रयेत्। श्यावेत्यादि श्यावा किञ्चित् श्यामा। अरुणा किञ्चिद्रक्ता। एवं चाश्मर्य्या वर्णाकारकथनं आह्वथाणां प्रत्यक्षसंवादिशास्त्रप्रामाण्यख्यापनार्थमाह्वः। चिताकण्टकैरिव वदरीबीजवत् क्षुद्राङ्कुरैर्वेष्टिता॥ * ॥ पित्तोल्बणमाह।

"पित्तेन दह्यते वस्तिः पच्यमान इवाग्निना। भल्लातकास्थिसंस्थाना रक्ता पीता सिताश्मरी"॥

दह्यते सान्द्रादग्निनेव। वस्तिरिति मूत्रकोषः। पच्यमानइव क्षारेणेव। उष्मवान् उष्मसमृद्धः॥ * ॥ कफोल्बणामाह।

"वस्तिर्निस्तुद्यतइव श्लेष्मणा श्लीतलो गुरुः। अश्मरी महती श्लक्ष्णा मधुवर्णाथवा सिता"॥

महती कुक्कुटाण्डतुल्या। मधुवर्णा ईषत्पिङ्गलशुक्ला॥

"एता भवन्ति बालानां तेषामेव हि भूयसा। आश्रयोपचयाज्ञत्वात् ग्रहणाहरणे सुखाः"॥

एताः दोषत्रयजनिताः बालानां स्युः॥ यतः सर्व्वा एवाश्मर्य्यो विशेषतः श्लेष्मसमवायिकारणाः। बालास्तु विशेषतस्तन्निदानसेविनो भवन्ति। उक्तञ्च सुश्रुतेन। प्रायेणैता अश्मर्य्यो दिवास्वप्नसमशनाध्यशनस्निग्धशीतगुरुमधुराहारप्रियत्वात् विशेषेण बालानां भवन्तीति। भूयः पदोपादानात् महतामपि त्रिदोषजनिता भवन्ति। तेषामेव बालानामेव। ग्रहणाहरणे सुखाः ग्रहणं निष्कासनार्थमङ्गुलिभ्यां। आहरणं याचनादिपूर्व्वकं निष्कासनं तत्र सुखाः सुखदाः। तत्र हेतुमाह। आश्रयोपचयाज्ञत्वादिति आश्रयो वस्तिः तस्योपचयः स्थौल्यं तस्याज्ञत्वात्॥ * ॥ शुक्राश्मरीमाह।

"शुक्राश्मरी तु महतां जायते शुक्रधारणात्"।

अत्ययानामनेकार्थत्वात् तु शब्दोऽत्रावधारणार्थः। तेन महतामेव न तु बालानां। तेषां वक्ष्यमाणसम्प्राप्तेरसम्भवात्। न तु शुक्राभावो वाच्यः। शुक्रधारणात् वेगात् अवमानस्य शुक्रस्य धारणात्॥ * ॥ शुक्राश्मर्य्याः सम्प्राप्तिमाह।

"स्थानाच्युतमसृक्तं हि मूष्कयोरन्तरेऽनिलः। शोषयत्युपसंहृत्य शुक्रं तच्छुक्रमश्मरी"॥

अनिलः मैथुनवेगेन स्थानाच्युतं। असृक्तं मैथुनवेगधारणेन धृतं शुक्रं। मूष्कयोः मेढ्रसहितयोः। मेढ्रवृषणयोरन्तर इति सुश्रुतवचनात्। तेन मेढ्रवृषणमध्यगतवस्तिमुखे उपसंहृत्य एकीकृत्य शोषयति। तच्छुक्रमश्मरी तथाभूतं शुक्रमेवाश्मरी॥ * ॥ अस्या लक्षणमाह।

"वस्तिकृच्छ्रक्षयत्वमुष्कश्वयथुकारिणी। तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते॥ पीड़िते त्ववकाशेऽस्मिन्नश्मर्य्येव च शर्करा"।

तस्यां शुक्राश्मर्य्यां। उत्पन्नमात्रायां यदा सा कथमपि विलीयते विलयं याति तदा शुक्रं इति मूत्रमार्गात् प्रवर्त्तते। पीड़िते त्ववकाशेऽस्मिन् तुशब्दोऽवधारणे। तेन अस्मिन्नेव अवकाशे स्थाने मेढ्रवृषणयोरन्तरे पीड़िते सति सा

विलीयते अन्तर्लीना भवति। अवस्थाभेदादश्मरी शर्करा सिकता भवतीत्याह। अश्मर्य्येव च शर्करा चकरात् सिकता च भवति। शर्करासिकतयोश्च भेदो मश्रुत्वाल्पत्वाभ्यां बोद्धव्यः। कथं अश्मरी शर्करा भवतीत्याह। सा भिन्नमूर्त्तिर्वातेन शर्करेत्यभिधीयते। सा अश्मरी ॥*॥ शर्करायाः पातमवरोधञ्च सहेतुकमाह।

"अश्मरी वायुना भिन्ना सा तस्मिन्ननुलोमगे।
निरेति सहमूत्रेण प्रतिलोमे विबध्यते।
मूत्रस्रोतःप्रदत्ता सा सक्ता कुर्य्यादुपद्रवान्"॥

सा अश्मरी। तस्मिन् वायौ। अनुलोमगे मूत्रस्रोतःसु सम्यक्प्रदत्ते मूत्रेण सह सा शर्करा निरेति पतति। प्रतिलोमगे ऊर्द्धप्रदत्ते वायौ विबध्यते। तदा मूत्रस्रोतः श्रिता सक्ता लग्ना स्यात्तदा उपद्रवान् कुर्य्यात्। तानेवोपद्रवानाह।

"दौर्ब्बल्यं सदनं कार्श्यं कुक्षिशूलमथारुचिं।
पाण्डुत्वमुग्रवातञ्च दृष्ट्वा हृत्पीड़नं वमिं"॥

दौर्ब्बल्यमिन्द्रियाणां। सदनं अवसन्नत्वं। कार्श्यमङ्गानां। उदरैकदेशे शूलं। उग्रवातं मूत्राघातविशेषं ॥*॥ अश्मरी शर्करा सिकतानामरिष्टमाह।

"प्रसूनगन्धिरुधिरं वज्रमूत्रं रजान्वितं।
अश्मरी क्षपयत्याशु शर्करा सिकतान्विता"॥

शर्करा सिकतेति च नामद्वयमन्वर्थं ॥*॥
अथाश्मर्य्याश्चिकित्सा।

"मुञ्जाग्निमन्थपाषाणभिन्दुवरुणगोक्षुरैः।
अभयारववधपलैः क्वाथं कृत्वा विचक्षणः॥
क्षारमुद्धारवरुणचूर्णं क्षिप्त्वा पिबेन्नरः।
अश्मरी मूत्रकृच्छ्रञ्च नाशमायाति निश्चितं॥
क्वाथः मुञ्जादिनामायं दीपनः पाचनः परः।
हन्ति कोष्ठाश्रितं वातं कण्ठरुग्गदमेढ्रजं"॥

रुक्कुष्ठं।
मुञ्जादिक्वाथः ॥*॥

"श्लेष्मपक्वाम्रमधकाश्मभेद-
कौन्तीश्वदष्ट्राहयकोरुवूकैः।
श्रितं पिबेदश्मजतुप्रगाढ़ं
सशर्करं मूत्रगदेऽश्मरीषु"॥

उरुवूक एरण्डस्याच्च मूलं। मूत्रगदे मूत्रकृच्छ्रे।
श्लेष्मादिक्वाथः ॥*॥

"कुम्भाण्डकरसं हिङ्गुयवक्षारयुतं पिबेत्।
वस्तौ मेढ्रे मूलयुक्ते अश्मरीशर्कराञ्जयेत्"॥*॥
"वरुणत्वक्शिलाभेदमुण्डीगोक्षुरकैः कृतः।
कषायक्षारसंयुक्तः शर्करां पातयत्यधः"॥

क्षारो यवक्षारः ॥*॥

"त्रिकण्टकस्य बीजानां चूर्णं माक्षिकसंयुतं।
अवीक्षीरेण सप्ताहादश्मरीनाशनं पिबेत्"॥

अवीर्मेषी ॥*॥

"वरुणत्वक्कषायस्तु पीतो गुड़समन्वितः।
अश्मरीं पातयत्याशु वस्तिशूलञ्च नाशयेत्"॥*॥
'क्वाथो वरुणमूलस्य तस्य कल्केन संयुतः।
शिग्रुमूलस्य च क्वाथः कटूष्णाश्मरीं हरेत्"॥*॥
"भृङ्गवेरयवक्षारपथ्याकालीयकान्वितः।
दधिमण्डो भिनत्त्यश्मशरीमाशु पानतः"॥
भृङ्गवेरं नागरं ॥*॥

"नो जग्धं क्षुमिभिर्घृतं सुतरुणं स्निग्धं शुचिस्थानजं
घस्रे पुण्यनिरीक्षिते वरुणकं क्वित्वा तुलां याहयेत्।
संग्रह्याशु चतुर्गुणाम्भवपि पचेत् पादावशेषं जलं
तत्तुल्येन गुड़ेन वै दृढ़तरे भाण्डे पचेत्तत् पुनः॥
ज्ञात्वैवं घनतां गुड़े परिगते प्रत्येकमेषां पलं
मुण्डैर्व्वारुकवीजगोक्षुरकयोः पाषाणभिच्छीतलात्।
कुष्माण्डत्रपुषात्तवीजकुनटीवाल्लूकशोभाञ्जनं
दार्व्योगिरिजाभयाक्षमिह तां चूर्णीकृतांशाक्षिपेत्॥
पथ्याक्षी प्रतिवासरं गुड़ममुं योऽश्नप्रमाणं नरः
खादेत्तस्य समस्तदोषजनिताश्मर्य्यः पतन्ति द्रुतं"।

एर्व्वारुकवीजं कर्कटीवीजं। पाषाणभित् हाथाक्षोड़ीति लोके। शीतला नीलदूर्व्वा। तथाच।

"नीलदूर्व्वा स्मृता श्रेष्ठा शादलं हरितं तथा।
शतपर्व्वा शीतकूर्म्मी शीतला वामनी तथा"॥

इति निघण्टौ धन्वन्तरिः॥ कुनटी धान्यकं। गिरिजं शिलाजतु। क्षमिहृत् विड़ङ्गं। वरुणादिगुड़ः ॥*॥

"मञ्जिष्ठा चाणुकं बीजं जीरकः शतपुष्पिका।
धात्रीफलं वदरकं गन्धकञ्च मनःशिला॥
एतेषां समभागानां चूर्णं टङ्कमितं नरः।
भक्षयेन्मधुना सार्द्धं पतेत्तस्याश्मरी ध्रुवं"॥*॥
"पलद्वयमितं कोष्णे कुलत्थस्य भृते तु यः।
लवणं क्षारपुष्पस्य सार्द्धमाषद्वयोन्मितं॥
क्षिप्त्वा पिबेत् पतेत्तस्य मूत्रेण सममश्मरी।
शर्करा सिकता चापि दृष्टमेतदनेकधा"॥
इत्यश्मर्य्यधिकारः ॥*॥ इति भावप्रकाशः॥
(अस्या निरुक्तिमाह भोजः।
"तुल्यतामश्मना याति तस्मात्तामश्मरीं विदुः"।
इति माधवकृतरुग्विनिश्चयस्यान्यतमटीकाकृतोक्तं॥
"पिट्टमाढ़कदोषेण अथवा मूत्ररोधनात्।
अतिपथ्याक्षाभिचारैर्जायते चाश्मरीगदः॥
मूत्राविष्टौ च पितरौ सुरतं कुरुतो यदि।
मूत्रेण सहितं युक्तं च्यवते गर्भसम्भवं॥
पक्वजस्य स्वदेहस्य स च तत्र प्रजायते।
मूत्रं मूत्रस्य संस्थाने करोति बन्धनं क्षिपु॥
सोऽप्यसाध्यो मूत्रगदस्वाल्पाद्भवति मानुषे।
तारुण्ये चापि साध्यश्च जायते मूत्रशर्करा॥
विपरीतेन चोत्ताने स्त्रिया च पुरुषेण वा।
शुक्रञ्च प्रवहेत्तस्य स्त्रीशुक्रं विधिमोति च॥
पुनश्च मेहने वासः वातेन शोणितञ्च तत्।
हृयं दत्तं प्रपद्येत मूत्रदारं रुजन्ति च॥
तेन मूत्रप्ररोधश्च जायते तीव्रवेदना।
अण्डसन्धिस्थिता याति शर्करा शुक्रसाधका॥
अतो वक्ष्यामि भैषज्यं शृणु पुत्र! महामते"।
अस्याश्चिकित्सा यथा॥
"शुण्ठीगोक्षुरकस्यैव वरुणस्य त्वचस्तथा।
क्वाथो गुड़युवक्षारयुक्तश्चाश्मरिनाशनः॥१॥
गोक्षुरकस्य बीजानां धातुमाक्षिकसंयुतं।
चूर्णं माक्षिकदुग्धेन पानाच्चाश्मरिपातनं"॥२॥
अस्यां पथ्यानि यथा॥
"पुराणयष्टिकाशालिरक्तशुल्लकास्तथा।
श्यामाकः कोद्रवोद्दालो मर्कटीशुण्ठधान्यकं॥
कुलत्थयवगोधूमास्तथाचेवाड़की भिषक्।
वातघ्नाश्च प्रयोक्तव्या भोजने वातरोगिणां॥
कौद्दालादानि च मांसानि पथ्यान्यश्मरिनाशने"॥
इति हारीतः॥

"विशोषयेद्लिगतन्तु शुक्रं
मूत्रं सपित्तं पवनः कफं वा।
यदा तदाश्मर्य्युपजायते तु
क्रमेण पित्तेश्विव रोचना गोः॥
कदम्बपुष्पाकृतिरश्मतुल्या
श्लक्ष्णा चिपुष्पाप्यथवापि मृदी।
मूत्रस्य चेन्मार्गमुपैति रुद्धा
मूत्रं रुजां तस्य करोति वस्तौ॥
ससीवनीमेहनवस्तिशूलं
विण्मूत्रयोर्बाधकरञ्च करोति मूत्रं।
रुणद्धि मेढ्रं स तु वेदनार्त्तो
मुञ्चन् मुहुर्मुञ्चति मेहते च॥
क्षोभात् क्षते मूत्रयतीह साम्रक्
तस्याः सुखं मेहति च व्यपायात्।
एषाश्मरी मारुतभिन्नमूर्त्तिः
स्याच्छर्करामूचपथात् क्षरन्ती"॥*॥

चिकित्सा यथा॥*॥

"क्रिया हिता त्वश्मरिशर्कराभ्यां
क्षुद्रे तथैवेह कफानिलाभ्यां।
कार्य्याश्मरीभेदनपातनाय
विशेषयुक्तं शृणु कर्म्मसिद्धं॥
पाषाणभेदं दृषकं स्वदंष्ट्रा-
पाठाभयाद्योषशठीनिकुम्भाः।
हिंसीखराश्वासितमारकाभ्या-
मेर्व्वारुकाणां च पुरस्य बीजं॥
उपकुञ्चिका हिङ्गु सवेतसास्लं
स्याद् द्वे दृहत्यौ हपुषा वचा च।
चूर्णं पिबेदश्मरिभेदि पक्वं
सर्पिश्च गोमूत्रचतुर्गुणन्तैः॥१॥
शिग्रोस्तु यूषो मृदुमूलकल्का-
द्विल्वप्रमाणाद्घृततैलभृष्टात्।
प्रीतोऽश्मभित्स्याद्धिमण्डयुक्तं
पेयः प्रकामं लवणेन युक्तः॥२॥
जलेन शौभाञ्जनमूलकल्कः
भृष्टो हितश्चाश्मरिशर्कराभ्यां॥३॥
पीत्वा च मद्यं निगदं श्रेयेन
हृयेन वा शीघ्रजवेन यायात्।
तैः शर्करा प्रथ्यवतेऽश्मरी तु
शाम्येन्नचेच्छल्यविदुद्धरेत्तां"॥४॥

अस्यां वर्ज्जनीयान्याह।

"व्यायामसन्धारणशुक्रभस्म-
पिष्टान्नवातार्ककरस्थवायान्।
खर्ज्जूर-मूलूक-कपित्थ-जम्बु
विल्वं कषायञ्च रसं भजेन्न"॥

इति च चरकः॥)

चतस्रोऽश्मर्य्यो भवन्ति। श्लेष्मणा वातेन पित्तेन

सुक्रेण चेति ॥ तत्रासंशोधनशीलस्यापथ्यकारिणः प्रकुपितः श्लेष्मामूत्रसम्मूर्छोऽनुप्रविश्य वस्तिमश्मरीं जनयति । तासां पूर्व्वरूपाणि वस्तिपीड़ारोचकौ मूत्रकृच्छ्रं वस्तिशिरोमुष्कशेफसां वेदना कृच्छ्रा ज्वरावसादौ वस्तगन्धित्वं मूत्रस्येति ॥

"यथास्थं वेदनावर्त्मं दुष्टं स्राव्रमथाविलं ।
पूर्व्वरूपेऽश्मनः कृच्छ्रान्मूत्रं कृजति मानवः" ॥

अथ जातासु नाभि-वस्ति-सेवनी-मेहनेष्वन्यतमस्मिन् मेहतो वेदना मूत्रधारासङ्गः सरुधिरमूत्रता मूत्रविकिरणञ्च गोमेदकप्रकाशमनाविलं सस्निकं विसृजति धावन-लङ्घन-प्लवन-पृष्ठ-यानाध्वगमनैरस्य वेदना भवति ॥

तत्र श्लेष्माश्मरी श्लेष्मलमन्नमभ्यवहरतोऽत्यर्थमुपलिप्याधः परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो विवृणोति तस्य मूत्रप्रतिघाताद्व्यथते भिद्यते निस्रुद्यत इव च वस्तिर्गुरुः शीतश्च भवति । अश्मरी चात्र श्वेता स्निग्धा महती कुक्कुटाण्डप्रतीकाशा मधूकपुष्पवर्णा वा भवति तां श्लैष्मिकीमिति विद्यात् ॥

पित्तयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतीघाताद्व्यथते चूष्यते दह्यते पच्यते इव वस्तिरण्वातश्च भवति । अश्मरी चात्र सरक्ता पीतावभासा कृष्णा भल्लातकास्थिप्रतिमा मधुवर्णा वा भवति तां पैत्तिकीमिति विद्यात् ॥

वातयुक्तस्तु श्लेष्मा सङ्घातमुपगम्य यथोक्तां परिवृद्धिं प्राप्य वस्तिमुखमधिष्ठाय स्रोतो निरुणद्धि तस्य मूत्रप्रतीघातात्तीव्रा वेदना भवति तथात्यर्थं पीड्यमानो दन्तान् खादति नाभिं पीड़यति मेढ्रं मृद्नाति वायुं स्पृशति विघृर्ण्णते विदहति वातमूत्रपुरीषाणि कृच्छ्रेण वास्य मेहतो निःसरन्ति । अश्मरी चात्र श्यामा परुषा विषमा खरा कदम्बपुष्पवत् कण्टकाचिता भवति तां वातिकीमिति विद्यात् ॥

प्रायेणैतास्विशोऽश्मर्य्यो दिवास्वप्न-समशनाध्यशन-गुरु-स्निग्ध-गुरु-मधुराहारप्रियत्वादिदोषेण बालानां भवन्ति तेषामेवाल्पवस्तिकायत्वादनुपचितमांसत्वाच्च वस्तेः सुखग्रहणाहरणा भवन्ति । महत्तान्तु शुक्राश्मरी शुक्रनिमित्ता भवति । मैथुनाभिघातादतिमैथुनाद्वा शुक्रञ्च तिलमनिर्गच्छद्विमार्गगमनादनिलोऽभितः संरुद्ध्य मेढ्रवृषणयोरन्तरे संहरति संहृत्य चोपशोषयति सा मूत्रमार्गमावृणोति मूत्रकृच्छ्रं वस्तिवेदनां वृषणयोश्च शोथमापादयति पीड़ितमात्रे च तस्मिन्नेव प्रदेशे प्रविलयमापद्यते तां शुक्राश्मरीमिति विद्यात् ॥

अस्थाखिकित्सा यथा ॥

"अश्मरी दारुणो व्याधिरन्नकृतिमतो मतः ।
औषधैस्तरणः साध्यः प्रवृद्धश्छेदमर्हति ।
तस्य पूर्व्वेषु रूपेषु स्नेहादिक्रम इष्यते ।
तेनास्यापचयं यान्ति व्याधेर्मूलान्यशेषतः ॥
घृतैः क्षारैः कषायैश्च क्षीरैः सोत्तरवस्तिभिः ।
यदि नोपशमं गच्छेत् क्षेत्रस्तत्रोत्तरो विधिः ॥
कुशलस्यापि वैद्यस्य यतः सिद्धिरिहाध्रुवा ।
उपक्रमो ह्यतस्तस्योऽयमतः स परिकीर्त्तितः ॥
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत् ।
तस्मादाप्तेन कर्त्तव्यमीश्वरं साधुकारिणा" ॥

अथ रोगान्वितमुपस्निग्धमपक्वदोषमीषत् कठिनमभ्यक्तस्विन्नशरीरं भुक्तवन्तं कृतवस्तिकर्म्मस्वस्तिवाचनमयोपहरणीयोक्तेन विधानेनोपकल्पितसम्भारमाश्वास्य ततो बलवन्तमविक्षवमात्मानुसमे फलके प्रागुपवेश्य पुरुषञ्च तस्योत्तरे निषण्णपूर्व्वकायमुत्तानमुन्नतकटीकं वस्त्रधारकोपविष्टं सङ्कुचितजानुकूर्परमितरेण सहावबद्धं सूत्रेण घ्राटकैर्व्वा ततः स्वभक्तनाभिप्रदेशस्य वामपार्श्वं विमृद्य मुष्टिनावपीड़येदधोनाभेर्यावदश्मर्य्यधः प्रपद्येति । ततः स्नेहाभ्यक्ते स्नानसंस्वेदिते वातहरप्रदेशिनीमध्यमे पायौ प्रणिधायानुसेवनीमासाद्य प्रयत्नबलाभ्यां पायुमेढ्रान्तरमानीय निर्व्यलीकमनायतमविषमञ्च वस्तिं संन्निवेश्य भृशमुत्पीड़येदङ्गुलिभ्यां यथाग्रन्थिरिवोन्नतं ग्रन्थ्यं भवति ॥

"सचेदगृहीतग्रन्थ्येतु विद्यात्तज्ञो विचेतनः ।
हतवस्तिमणीर्यञ्च निर्व्विकारो मतोपमः ॥
न तस्य निर्हरेच्छल्यं निर्हरेत्तु म्रियेत सः ।
विना त्वेतेषु रूपेषु निर्हर्त्तुं समुपाचरेत् ॥"
इति सुश्रुतः ॥

"अयोरजः श्लक्ष्णपिष्टं मधुना सह योजयेत् ।
अश्मरीं विनिहन्त्याशु मूत्रकृच्छ्रञ्च दारुणं ॥"
॥ * ॥ लौहप्रयोगः ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहः ॥)

अश्मरीघ्नः, पुं, (अश्मरीं मूत्रकृच्छ्रं हन्ति । अश्मरी + हन् + टक् ।) वरुणवृक्षः । इति त्रिकाण्डशेषः ॥

अश्मरीहरः, पुं, (अश्मरीं हरति । अश्मरी + हृ + अच् ।) धान्यविशेषः । इति रत्नमाला ॥ दे धान इति ख्यातः ।

"वरुणः कफवातघ्नो भेदी चोष्णोऽश्मरीहरः" ।
इति वैद्यकद्रव्यगुणाः ॥)

अश्मसारः, पुं, क्ली, (अश्मनः सारः ।) लौहः । इत्यमरः ॥ ("प्राणाः सत्वरमश्मसारकठिना गच्छन्ति गच्छन्त्वमी" । इति साहित्यदर्पणे ।)

अश्मीरः, पुं, क्ली, (अश्मन् + ईर ।) अश्मरीरोगः ॥ इत्युणादिकोषः ॥

अश्मोत्थं, क्ली, (अश्मनः उत्तिष्ठति यत् । उत् + स्था + क ।) शिलाजतु । इति राजनिर्घण्टः ॥

अश्रं, क्ली, (अश्नुते व्याप्नोति नेत्रं कण्ठं वा अश् + रक् ।) नेत्रजलं । इत्युणादिकोषः ॥ ("ताम्रमश्रं नवजलमयं मोचयिष्यत्यवश्यं" । इति मेघदूते ॥ "सखीभिरश्रोत्तरमीक्षितामिमाम्" । इति कुमारे ॥) रक्तं । इत्यमरटीका ॥

अश्रद्धानः, त्रि, (न श्रद्धानः । नञ्तत्पुरुषः ।) श्रद्धाहीनः । यथा देवलः ।

"प्रत्ययो धर्म्मकार्य्येषु तथा श्रद्धेत्युदाहृता ।
नास्ति ह्यश्रद्धानस्य धर्म्मकृत्ये प्रयोजनं" ॥
इति श्राद्धतत्त्वं ॥

अश्रद्धा, स्त्री, (न श्रद्धा । नञ्तत्पुरुषः ।) शास्त्रार्थे अदृढ़प्रत्ययः । यथा,—

"विधिहीनं भावदुष्टं श्रुतमश्रद्धया च यत् ।
तद्भरन्त्यसुरास्तस्य मूढ़स्य दुष्कृतात्मनः" ॥
इति श्राद्धतत्त्वं ॥ (मानसिकवृत्तिभेदः । यथा श्रुतौ,—

"कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधीर्धीरित्येतत् सर्वं मन एव" ॥
"अश्रद्धया च यद्दत्तं तत्तामसमुदाहृतम्" ॥
इति गीतायाम् ॥)

अश्रद्धेयं, त्रि, श्रद्धानर्हं । आदरायोग्यं । शास्त्रार्थादृढ़प्रत्ययायोग्यं । अत्र श्रद्धाशब्दपूर्व्वक धातोर्यप्रत्यये पश्चान्नञ्समासेन निष्पन्नं ॥ ("किमनेनाश्रद्धेयव्याधवचनप्रत्ययमात्रपरिगृहीतेनाकृतज्ञेन" । इति पञ्चतन्त्रे ।)

अश्रपः, पुं, क्ली, (अश्रं रक्तं पिबति यः । अश्र + पा + ड ।) राक्षसः । इत्यमरः ॥

अश्राद्धभोजी, [न्] त्रि, (न श्राद्धभोजी । नञ्तत्पुरुषः ।) श्राद्धान्नाभक्षकः । यथा । दुर्गसिंहोऽपि अश्राद्धभोजीत्यस्य सति भोजने अश्राद्धमेव भुङ्क्ते न श्राद्धमिति न नियमः । तथात्वे व्रतलोपः स्यात् । इति प्रायश्चित्ततत्त्वं ॥

अश्राद्धी, [न्] पुं, (अश्राद्धमस्त्यस्य । अश्राद्ध + इन् ।) श्राद्धपक्षयज्ञशून्यः । यथा मनुः ।

"नाद्यात् सूदस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः ।
आददीतामवेवास्मादहत्तावेकरात्रिकं" ॥
अश्राद्धिनः श्राद्धपक्षयज्ञशून्यस्य । इत्याह्निकाचारतत्त्वं ॥

अश्राद्धेयः, पुं, (न श्राद्धेयः । नञ्समासः ।) श्राद्धानर्हः । श्राद्धायोग्यब्राह्मणः । यथा । अत्रिकाश्यपौ,—

"पितुर्गेहे च या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥
यस्तु तां वरयेत् कन्यां ब्राह्मणो ज्ञानदुर्ब्बलः ।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिं" ॥
इत्युद्वाहतत्त्वं ॥

अश्रान्तं, क्ली, (अविद्यमानं श्रान्तमत्र । नञ्समासः) अनवरतं । नित्यं । इत्यमरः ॥ अमरहिते त्रि ॥

अश्रान्तः, त्रि, अमरहितः । यथा । "अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा शिञ्जन्नञ्जमुखौघविघ्नितनवस्वर्गक्रियाकेलिना । पूर्व्वं गाधिसुतेन साभिघटिता मुक्तानु मन्दाकिनी यत् प्रासादकूलवल्लिरनिलान्दोलैरखेलद्दिवि" ॥ इति नैषधे १ सर्गः ॥

अश्रिः, स्त्री, (अश्नाति अश्नुते वा । अशू भोजने अशू व्याप्तौ वा । आश्रीयते प्राहारार्थम् । आङि-श्रिइनिभ्यां ऋसञ्चेति इण् स च ङित् ङित्वात् टिलोप आङो ऋसञ्च ।) मुद्गादेः कोणः । इति हेमचन्द्रः ॥ अस्त्रादेरग्रभागः । इत्यमरः ॥

("दृत्तस्य दन्तुः कुलिशं कुण्ठिताग्रीव लक्ष्यते"। इति कुमारे।
"वक्षो वा एष यदृयूपः सोऽस्याश्निः कर्त्तव्योऽस्याश्निः वै वज्रः"। इति ऐतरेयब्राह्मणे।)

अश्री, स्त्री, अश्निः। अस्यादेरग्रभागः॥ इत्यमरटीका॥

अश्रु, क्ली, (अश्नुते नेत्रमिति। अशू+रुक्। अथवा न श्रयति इति। न+श्रि+डुन्।) चक्षुर्ज्जलं। तत्पर्य्यायः। नेत्राम्बु २ रोदनं ३ अश्रं ४ अस्रं ५ असृ ६ वाष्पं ७। इत्यमरकोषशब्दरत्नावल्यौ। ("श्रुतदेहविसर्ज्जनः पितुश्चिरमश्रूणि विमुच्य राघवः"। इति रघुवंशे।) लोचं ८। इति जटाधरः॥

अश्रुत, त्रि, (न श्रुतं। नञ्तत्पुरुषः।) अकृतश्रवणं॥ अंगाकर्णितं। अश्रुना इति भाषा। यथा,—
"अतार्थस्य परित्यागात् अश्रुतार्थस्य कल्पनात्। प्राप्तस्य बाधादित्येवं परिसङ्ख्या त्रिदोषिका"।
इति प्रायश्चित्ततत्त्वं॥

अश्लेषा, स्त्री, (नास्ति श्लेषो यस्याम्।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतनवमनक्षत्रं। अस्य रूपं। चक्राकृतिषड्रनक्षत्रात्मकं। इति दीपिका॥ तस्याधिदेवता सर्पः॥ यथा। अश्वि-यम दहन-कमलज-अग्नि-शूलभृददिति-जीव-फणि-पितरः। इत्यादि ज्योतिस्तत्त्वं॥सा केतुग्रहस्य जन्मनक्षत्रं। यथा,—
"विघ्नाखानलतोयानि वैष्णवं भगदैवतं।
पुष्या पौष्णं यमः सर्पो जन्मभान्यर्कतः क्रमात्"॥
इति दीपिका॥ सा च अधोमुखगणः। यथा,—
"अश्लेषवक्रियमपित्र्यविशाखयुक्तं
मूर्ब्बाभयं शतभिषा च नवाप्युडूनि।
एतान्यधोमुखगणानि शिवानि नित्यं
विद्यार्घ्यभूमिखननेषु च शोभितानि"॥
इति ज्योतिस्तत्त्वं॥*॥ तस्या मस्तकोपरि उदये राशिलग्ननिरूपणं यथा,—
"मौलिगे भुजगभे स्वपुच्छके
मङ्गुराह्वतिनि सप्ततारके।
मारकेलिरसिके तुलोदयात्
निर्यगुर्ज्जलधिखाब्धिलिम्बिकाः"॥ १। २४।
इति कालिदासकृतराशिलग्ननिरूपणं॥ तत्र जातफलं॥
"दृषाटनः स्यादतिदुष्टचेताः
कष्टप्रदश्चापि दृषा जनानां।
सर्पे सदर्पो हि गृहार्पितार्थः
कन्दर्पसन्तप्तमना मनुष्यः"॥
इति कोष्ठीप्रदीपः॥

अश्लेषाभवः, पुं, (अश्लेषायां भवः।) केतुग्रहः। इति हारावली॥

अश्वः, पुं, (अश्नुते मार्गं व्याप्नोति। अशू व्याप्तौ अशूप्रुषिलटीति क्वन्।) घोटकः। तत्पर्य्यायः। पीतिः २ पीती ३ वीतिः ४ घोटः ५ घोटकः ६ तुरगः ७ तुरङ्गः ८ तुरङ्गमः ९ वाजी १० वाहः ११ अर्व्वा १२ गन्धर्व्वः १३ हयः १४ सैन्धवः १५ सप्तिः १६। इत्यमरः तट्टीकाच॥
("जितसिंहभया नागा यत्राश्वा विजयोनयः"। इति कुमारे॥
"गच्छन्तमुच्चलितचामरचारुमश्वम्"॥
इति शिशुपालवधे॥) अश्वेन भ्रमणगुणाः। वातकोपनाशकस्थैर्य्यबलाग्निकारित्वं। इति राजवल्लभः॥ पुंजातिविशेषः। तस्य लक्षणं।
"काष्ठतुल्यवपुर्दृष्टो मिथ्याचारश्च निर्भयः।
द्वादशाङ्गुलमेढ्रश्च दरिद्रस्तु हयो मतः"॥
इति रतिमञ्जरी॥ (खनामख्यातो दक्षिणवंशीयो नृपतिश्चित्रकस्य पुत्रः। यथा,—
"चित्रकस्याभवन् पुत्राः पृथुर्विप्रथुरेव च।
अश्वग्रीवोऽश्ववाऽश्वश्च सुपार्श्वकगवेषणौ॥
अरिष्टनेमिरश्वश्च।" इति हरिवंशे॥ खनाम ख्यातो दानवश्च यथा महाभारते।
"चत्वारिंशद्दनोः पुत्राः ख्याताः सर्व्वत्र भारत॥
स्वर्भानुरश्वोऽश्वपतिर्हयपर्व्वा जकस्तथा"॥)

अश्वकन्दिका, स्त्री, अश्वगन्धावृक्षः। इति रत्नमाला॥

अश्वकर्णः, पुं, (अश्वस्य कर्ण इवपत्रमस्य।) शालवृक्षविशेषः। लताशाल इति केचित्॥ तत्पर्य्यायः। जरणद्रुमः २ तार्क्ष्यप्रसवः ३ ध्रुवसम्भवः ४ धन्यः ५ दीर्घपर्णः ६ कुम्भिकः ७ कौम्भिकः ८। अस्य गुणाः। कटुत्वं। तिक्तत्वं। स्निग्धत्वं। उरोविस्फोटपित्तास्रकण्डुग्निरादोषार्त्तिनाशित्वञ्च॥ इति राजनिर्घण्टः॥
("सालतालाश्वकर्णानां पर्य्यैर्वञ्जभिराहृताम्"॥ इति रामायणे॥
"अश्वकर्णः कषायः स्याद्व्रणस्वेदककफापहः।
ब्रध्नविद्रधिवाधिर्य्यमेहिनिकर्णगदान् हरेत्"॥
इति भावप्रकाशः॥
"विम्बीफलं साश्वकर्णं स्तन्यलृत् कफपित्तजित्।
लृद्दाहज्वरपित्तास्रकासश्वासक्षयापहं"॥
इति सुश्रुतः॥)

अश्वकर्णकः, पुं, (अश्वकर्ण+स्वार्थे कन्।) शालवृक्षः। इत्यमरः॥

अश्वकिनी, स्त्री, (अश्वक+इन्+ङीप्।) अश्विनीनक्षत्रं। इति हेमचन्द्रः॥

अश्वखुरः, पुं, (अश्वस्य खुरमिवाकृतिर्यस्य।) गन्धीनामगन्धद्रव्यं। इति रत्नमाला॥

अश्वखुरा, स्त्री, अपराजितालता। इति राजनिर्घण्टः॥

अश्वखुरी, (स्त्री) अपराजितालता। इति शब्दमाला॥

अश्वगन्धा, स्त्री, (अश्वस्य गन्ध एकदेशोमेढ्रनिव मूलमस्याः।) खनामख्यातवृक्षविशेषः। अश्वगन्ध इतिख्याता। तत्पर्य्यायः। हयगन्धा २ वाजिगन्धा ३ अश्वगन्धिका ४ वल्या ५ तुरगगन्धा ६ कम्बुका ७ अश्वरोहिका ८ कम्बुकाष्ठा ९ अवरोहिका १० वाराहकर्णी ११ तुरगा १२ वनजा १३ वाजिनी १४ हया १५ पुष्टिदा १६ बलदा १७ पुष्टिः १८ पीवरा १९ पलाशपर्णी २० वातघ्नी २१ श्यामला २२ कामरूपिणी २३ काला २४ प्रियकरी २५ गन्धपत्री २६ हयप्रिया २७ वाराहपत्री २८ अस्या गुणाः। कटुत्वं। उष्णत्वं। तिक्तत्वं। मदगन्धित्वं। बलशुक्रकारित्वं। वायुकाश्वासक्षयव्रणजराव्याधिनाशित्वञ्च। इति रत्नमालाराजनिर्घण्टराजवल्लभाः॥
"गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया।
वाराहकर्णी वरदा वरदा कुष्ठगन्धिनी"॥
क्वचित्पुस्तके अन्यवरदास्थाने वदरीति पाठः।
"अश्वगन्धालिलक्ष्मश्चित्रश्चोष्णत्रयापहा।
वल्या रसायनी तिक्ता कषायोष्णातिशुक्ला"॥
इति भावप्रकाशः॥
("यवाश्वगन्धा यष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं हितम्। घृतावर्य्यश्वगन्धाभ्यां पयस्यैरण्यजीवनैः"॥
इति सुश्रुते॥
"अश्वगन्धास्तु वातघ्नी बल्या हृद्या रसायनी"॥
इति वैद्यकरत्नमालायां॥
"पादकल्केऽश्वगन्धायाः क्षीरे दशगुणे पचेत्।
घृतं पेयं कुमाराणां पुष्टिबलबर्द्धनं"॥
॥*॥ अश्वगन्धाघृतं॥*॥
इति वैद्यकचक्रपाणिसंग्रहः॥)

अश्वगोयुगं, क्ली, (द्वावश्वौ। द्वित्वे, अश्व+गोयुगच्।) अश्वद्वयं। इति पाणिनिः॥ एक योड़ाघोड़ा इति भाषा।

अश्वगोष्ठं, क्ली, (अश्वानां स्थानं। गोष्ठजादयः स्थानादिषु पशुनामभ्य इति, अश्व+गोष्ठच्।) अश्वस्थानं। आस्तबल इति आरबीभाषा। यथा,—
"पशुभ्यः स्थानदिघट्के गोष्ठगोयुगषड्गवं।"
इत्यनेन अश्वशब्दात् गोष्ठप्रत्ययेन निष्पन्नं॥
इति मुग्धबोधव्याकरणं॥

अश्वग्रीवः, पुं, (अश्वस्य ग्रीवाइव ग्रीवा यस्य।) विष्णुद्वेष्यासुरविशेषः। इति हेमचन्द्रः॥ (यथाह भारते।
"अश्वग्रीवश्च क्रूरश्च तुङ्गश्च महाबलः"॥
तत्रैव च।
"अश्वग्रीव इति ख्यातः पृथिव्यां सोऽभवन्नृपः"॥
खनामख्यातो दक्षिणवंशीयो नृपतिः सहि चित्रकस्य पुत्रो दक्षिणनृपतेः पौत्रः। यथा हरिवंशे,—
"चित्रकस्याभवन् पुत्राः पृथुर्विप्रथुरेव च।
अश्वग्रीवोऽश्ववाऽश्वश्च सुपार्श्वकगवेषणौ"॥)

अश्वघ्नः, पुं, (अश्वं हन्तीति। अश्व+हन्+टक्।) करवीरपुष्पवृक्षः। इति रत्नमाला॥

अश्वतरः, पुं, स्त्री, (तनुरश्वः। वत्सोक्षाश्वर्षभेभ्यश्च तनुत्व इति तरच्। अश्वेनाश्वायामुत्पन्नोऽश्वः। अश्वत्वं च जातिः। तत्सहचरितस्योक्षधर्म्मस्य तनुत्वं अन्यपिण्डकत्वात्।) अश्वायां गर्द्दभेन जातः पशुविशेषः। इति स्मृतिः। खच्चर इति भाषा॥
("हयानश्वतरानुष्ट्रांस्तथैव सुरभेः सुतान्"। इति रामायणे॥
"सकृद्दुष्टं हि यो मित्रं पुनः सन्धातुमिच्छति।
स मूढमुपगृह्णाति गर्भाश्वतरी यथा"॥
इति पञ्चतन्त्रे॥)

अश्वतरः, पुं, वेगसरः। नागराजविशेषः। इति मेदिनी॥
("कम्बलाश्वतरौ चापि नागकालीयकस्तथा"।
"ऐरावतो महापद्मः कम्बलाश्वतरावुभौ"॥
इति च महाभारते॥) गन्धर्वविशेषः। पुंवत्सः। इति धरणिः॥

अश्वत्थः, पुं, (अश्वत्थं जलमस्यास्ति। मूले सिक्तत्वात्। अर्श-आद्यच्। अश्वत्थवत् कामकर्म्मवातेरितनित्यप्रचलितस्वभावत्वात् आसुविनाशित्वेन स्थोऽपि स्थास्नुरिति विश्वासानर्हत्वाच्च मायामयः संसारवृक्षः। ग्राम्यलिवटाद्यपेक्षया न स्थिरं तिष्ठति अश्ववत् तिष्ठति वा। स्था गतिनिवृत्तौ। एषोदरादित्वात् पूर्ब्बोत्तरपदान्तादोः सकारयोस्तकारौ सुपिस्थ इति कः।) खनामख्यातवृक्षविशेषः। पिपर इति पश्चिमदेशीयभाषा। तत्पर्य्यायः। बोधिद्रुमः २ चलदलः ३ पिप्पलः ४ कुञ्जराशनः ५। इत्यमरः॥ अच्युतावासः ६ चलपत्रः ७ पवित्रकः ८ शुभदः ९ बोधिवृक्षः १० याज्ञिकः ११ गजभक्षकः १२ श्रीमान् १३ क्षीरद्रुमः १४ विप्रः १५ मङ्गल्यः १६ श्यामलः १७ गुह्यपुष्पः १८ सेव्यः १९ सत्यः २० शुचिद्रुमः २१ धनुवृक्षः २२। अस्य गुणाः। सुमधुरत्वं। कषायत्वं। शीतलत्वं। कफपित्तविनाशित्वं रक्तदाहघ्नमनकारित्वञ्च॥ तत्फलस्य गुणाः। सद्यो योनिदोषहारित्वं। शीतलत्वं। अतिवृष्यत्वं। पित्तरक्तविसर्पितृष्णादाहच्छर्द्दिश्रोथारुचिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥
("अश्वत्थोडुम्बरप्लक्षन्यग्रोधानां फलानि च।
कषायमधुराण्याहुः वातलानि गुरूणि च"॥
इति चरकः॥
अश्वत्थदेवायतनश्मशान-
वल्मीकसन्धासु चतुष्पथेषु।
याम्ये सपित्ते परिवर्ज्जनीया
वृक्षे नरा मर्म्मसु ये च दष्टाः"॥
इति सुश्रुतः॥)
अथाश्वत्थवन्दनकालमन्त्राः।
"अश्वत्थं वन्देन्नित्यं पूर्ब्बाह्णे प्रहरद्वये।
अत ऊर्द्धं न वन्देत अश्वत्थन्तु कदाचन॥
(ॐ) चक्षुस्पन्दं भुजस्पन्दं तथा दुःखप्रदर्शनं।
शत्रूणाञ्च समुत्थानमश्वत्थ शमयाशु मे॥
अश्वत्थरूपी भगवान् प्रीयतां मे जनार्दनः।
त्वां दृष्ट्वा नश्यते पापं दृष्ट्वा लक्ष्मीः प्रवर्त्तते॥
प्रदक्षिणे भवेदायुः सदाश्वत्थ नमोऽस्तु ते"॥
इति स्मृत्यर्थसारे हलायुधधृतवचनं॥ गर्द्दभाण्डवृक्षः। इति विश्वः॥
"बोधिद्रुः पिप्पलोऽश्वत्थश्चलपत्रो गलाशनः।
पिप्पलो दुर्ज्जरः शीतः पित्तश्लेष्मव्रणास्रजित्॥
गुरुस्तुवरको रूक्षो वर्ण्यो योनिविशोधनः"॥*॥
अथ पिप्पलभेदः। गजहण्डु इति हिन्दिभाषा।
"पारिभद्रोन्यः फलीशश्च कपिचूतः कमण्डलुः।
गर्द्दभाण्डः कन्दरालकपीतनसुपार्श्वकाः॥
फलीशो दुर्ज्जरः स्निग्धः क्रिमिश्लेष्मकफप्रदः।
फलेऽम्लमधुरो मूले कषायः स्वादुमज्जकः"॥*॥
अथ वेलियापिप्पलः।
"नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्यादनन्तभूः॥
नन्दीवृक्षो लघुः स्वादुस्तिक्तस्तुवर उष्णकः।
कटुपाकरसो ग्राही विषपित्तकफास्रनुत्"॥
इति भावप्रकाशः॥*॥ तस्य विष्णुस्वरूपत्वं यथा,—
ऋषय ऊचुः।
"कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ"॥
सूत उवाच॥
"अश्वत्थरूपो भगवान् विष्णुरेव न संशयः।
रुद्ररूपो वटस्तद्वत् पलाशो ब्रह्मरूपधृक्॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः।
दुःखापद्याधिदुःखानां विनाशकारिणौ ध्रुवं"॥
ऋषय ऊचुः।
"कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः।
एतत् कथय सर्व्वज्ञ संशयोऽत्र महान् हि नः"॥
सूत उवाच।
"पार्ब्बतीशिवयोर्देवैः सुरतं कुर्ब्वतोः किल।
अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नः कृतः पुरा॥
ततस्तु पार्ब्बती क्रुद्धा शशाप त्रिदिवौकसः।
रेतःसेकसुखभंशकाम्यमाना तदा रुषा"॥
पार्ब्बत्युवाच।
"कृमिकीटादयोऽप्येते जानन्ति सुरतेः सुखं।
तस्मान्मम सुखभंशात् यूयं वृक्षत्वमाप्नुथ"॥
सूत उवाच।
"एवं सा पार्ब्बती देवी अशपत् क्रुद्धमानसा।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः॥
तस्मादिमौ विष्णुमहेश्वरावुभौ
बभूवतुर्बोधिवटौ मुनीश्वराः।
बोधिस्त्वयं चार्किदिनं विनैव
न संस्पृशेदर्कजवारयोगात्"॥
इति पाद्मे उत्तरखण्डे १६० अध्यायः॥*॥
ऋषय ऊचुः।
"अस्पृश्यत्वं कथं जातं सूत बोधितरुः स्वयं।
स्पृश्यत्वञ्च कथं प्राप्तस्तथायं शनिवासरे"॥
सूत उवाच।
"समुद्रमथनाद्यानि रत्नान्यापुः सुरोत्तमाः।
श्रेष्ठञ्च कौस्तुभं तेषु विष्णवे प्रददुः सुराः॥
यावदक्षीचकारासौ लक्ष्मीं भार्य्यार्थमात्मनः।
तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनं"॥
लक्ष्मीरुवाच।
"असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते।
तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन॥
विवाह्योद्वाहमां पश्चात् एष धर्म्मः सनातनः।
तस्मात् धर्म्मव्यतिक्रामं न कुर्य्या मधुसूदन॥
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः।
उद्दालकाय मुनये सुदीर्घतपसे तदा॥
आत्मवाक्यानुरोधेन तामलक्ष्मीं ददौ किल।
स्थूलोष्ठीं शुक्लदशनां विरूपां विकृतीं तनुं॥
खदिराङ्गनयनां रूक्षपिङ्गशिरोरुहां।
स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य स्वमाश्रमं॥
वेदध्वनिसमायुक्तमानयामास धर्म्मवित्।
होमधूपसुगन्धाढ्यं वेदघोषेण नादितं॥
आश्रमं तं विलोक्याथ व्यथिता साब्रवीदिदं।"
ज्येष्ठोवाच।
"नहि वासानुरूपोऽयं वेदध्वनियुतो मम॥
नाचारागमिश्रे भो ब्रह्मन् नयस्वान्यत्र मां ध्रुवं"।
उद्दालक उवाच।
"कथं नायासि किञ्चात्र वर्त्तते क्षमतं तव।
तव योग्या च वसतिः का भवेत्तद्वद त्वं मां"॥
ज्येष्ठोवाच।
"वेदध्वनिर्भवेद्यस्मिन् अतिथीनाञ्च पूजनं।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहं॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहं॥
दानशौचे न विद्येते परद्रव्यापहारिणः।
परदाररता यत्र तत्र स्थाने रतिर्म्मम॥
वृद्धसज्जनविप्राणां यत्र स्यादवमाननं।
निष्ठुरं भाषणं यत्र तत्र सम्यग्वसाम्यहं"॥
सूत उवाच।
"इति तद्वचनं श्रुत्वा विसन्नवदनोऽभवत्।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह"॥
उद्दालक उवाच।
"अश्वत्थवृक्षमूलेऽस्मिन् अलक्ष्मीः अस्यतां त्वमं
आश्रमस्थानमालोक्य यावदायाम्यहं एनः"॥
सूत उवाच।
"इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः।
प्रतीक्षन्ती चिरं तत्र यदा न तं ददर्श सा॥
तदा रुरोद करुणं भर्त्तुस्त्यागेन दुःखिता।
तत्तस्याः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत्॥
तदा विज्ञापयामास विष्णुमुद्विग्नमानसा"।
लक्ष्मीरुवाच।
"स्वामिन् मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता।
तामाश्वासयितुं याहि कृपालो यद्यहं प्रिया"॥
सूत उवाच।
"लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्"॥
विष्णुरुवाच।
"अश्वत्थवृक्षमासाद्य सदालक्ष्मीः स्थिरा भव।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति।
अस्पृश्योऽसौ भवेत्तस्मात् मन्दवारं विना किल"॥
इति पाद्मे उत्तरखण्डे १६१ अध्यायः॥ २॥
वैशाखमासे तस्य सेचनफलं यथा,—
"वैशाखे सिञ्चयेन्नित्यं विष्णुमश्वत्थरूपिणं।
चतुर्वर्गफलावाप्तिहेतवे वैष्णवो जनः॥
गण्डूषमात्रतोयेन कूर्य्याद्योऽश्वत्थसेचनं।
सोऽपि याति परं स्थानं विमुक्तः पापकोटिभिः॥
अश्वत्थमूलं विप्रर्षे यो बध्नाति शिलादिभिः।
अश्वत्थरूपी भगवान् किं तस्मै न हि यच्छति॥
अश्वत्थद्रुममालोक्य प्रणामं कुरुते तु यः।
आयुर्दद्यिर्भवेत्तस्य वर्द्धन्ते सर्वसम्पदः॥

यथाश्वत्थतले विप्र धर्म्मिकर्म्मे विधीयते ।
न्यूनातिरिक्तता न स्यात्तस्मिन् कर्म्मणि जैमिने ॥
तत्र तीर्थानि सर्व्वाणि त्रिस्रोतादीनि जैमिने ।
यत्राश्वत्थतरुस्तिष्ठेत् एकोऽपि शाखिनां वरः ॥
अश्वत्थपूजको यस्तु स एव हरिपूजकः ।
अश्वत्थमूर्त्तिर्भगवान् स्वयमेव यतो द्विज ॥
तरुज्ञानाद्विजश्रेष्ठ योऽश्वत्थं हन्ति मूढधीः ।
संसारे नास्ति तत्कर्म्म यत् कृत्वा स च मुच्यति ॥
अश्वत्थो वृक्षराजोऽयं हरिमूर्त्तिः प्रकीर्त्तितः ।
तस्मादश्वत्थहन्तॄणां त्राता कोऽपि न विद्यते ॥
अश्वत्थं पश्यतो विप्र स्पृशतः स्मरतस्तथा ।
देहस्थं पातकं तस्य हरेत् प्रणमतो हरिः ॥
विलोक्याश्वत्थहन्तारं यः शक्तो न निवारयेत् ।
तन्नेत्रयुग्मं वड़िशैर्यमेनोत्पाट्यते स्वयं ॥
अश्वत्थच्छेदनं मूढ़ मा कुर्विति वदेन्न यः ।
तस्य जिह्वां कुरिकया स्वयं छिन्नत्ति भास्करिः ॥
अश्वत्थशाखामेकां यः खड्गेनापि निहन्ति यः ।
स कोटिब्रह्महत्यानां फलं प्राप्नोति मानवः ॥
यत्पापं ब्रह्महत्यायां गुरुस्त्रीगमने च यत् ।
सुरापाने तथास्तेये न्यासापहरणे तथा ॥
यत्पापं भ्रूणहत्यायां गोहत्यायां द्विजोत्तम ।
स्त्रीहत्यायाश्च यत्पापं परस्त्रीगमने तथा ॥
शरणागतहत्यायां हत्यायां सुहृदां तथा ।
विश्वासवाक्यकथने परहिंसाविधौ च यत् ॥
यत् पापं परनिन्दायां हरिवासरभोजने ।
अश्वत्थच्छेदनाद्घोरं तत् पापं प्राप्यते जनैः ॥
विष्णुमूर्त्तेर्ज्जनो मोहादश्वत्थस्य निहन्ता यः ।
तत्तुल्यः पातकी कोऽपि न श्रुतः क्षितिमण्डले ॥
वदाम्यश्वत्थमाहात्म्यं सर्व्वपापप्रणाशनं ।
साक्षादेव स्वयं विष्णुरश्वत्थोऽखिलविश्वराट् ॥
तद्भक्तिं कुर्वतः पुंसो विद्यते नाशुभं क्वचित् ।
अश्वत्थं सेवते यस्तु विष्णुबुद्धा नरोत्तमः ॥
तस्य प्रसन्नो भगवान् ददाति परमं पदं" ।
इति पाद्मे क्रियायोगसारे अश्वत्थसेवनं नाम
११ अध्यायः ॥
(अस्थिररूपः संसारवृक्षः । यथा, गीतायाम् ।
"ऊर्द्धमूलमधःशाखमश्वत्थं प्राऽव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्" ॥
विस्तरस्तु गीतायाः पञ्चदशेऽध्याये द्रष्टव्यः ॥)

अश्वत्थभेदः, पुं, (अश्वत्थस्य भेदो विभिन्नता यस्मिन् ।) स्थालीवृक्षः । इति राजनिर्घण्टः ॥

अश्वत्था, स्त्री, पूर्णिमातिथिः । इति मेदिनी ॥

अश्वत्थामा, [न्,] पुं, (अश्वस्येव स्थाम बलं यस्य । पृषोदरादित्वात् सस्य तः । अथवा अश्व इव तिष्ठति युद्धे । अश्व + स्था + मनिन् ।) द्रोणाचार्य्यपुत्रः । स तु चिरञ्जीवी महाबली च । तत्पर्य्यायः । कृपीसुतः २ द्रौणायनः ३ । इति त्रिकाण्डशेषः ॥ द्रौणिः ४ । इति स्मार्त्तः ॥ द्रव्यभावे द्रौणिः ५ ॥ (अयं खलु जात एव अश्ववद् ननाद अतोऽस्य अश्वत्थामेति नाम । तथा च भारते ।
"अहमन् गौतमीपुत्रमश्वत्थामानमेव च ।
स जातमात्रो व्यनदत् यथैवोच्चैःश्रवा हयः ॥
तच्छ्रुत्वान्तर्हितं भूतमन्तरीक्षमभाषत ।
अश्वस्येवास्य यत् स्थाम नदतः प्रदिशो गतम् ॥
अश्वत्थामैव बालोऽयं तस्मान्नाम्ना भविष्यति" ।)

अश्वत्थी, स्त्री, (क्षुद्रोऽश्वत्थः । अश्वत्थ + अल्पार्थे ङीप् ।) वृक्षविशेषः । पिप्पली इति लोके । तत्पर्य्यायः । लघुपत्री २ पवित्रा ३ क्षुद्रपत्रिका ४ पिप्पलिका ५ वनस्था ६ अश्वत्थिका ७ । अस्या गुणाः । मधुरत्वं । कषायत्वं । रक्तपित्तनाशित्वं । विषदाहप्रशमनकारित्वं । गुर्व्विण्या हितकारित्वञ्च । इति राजनिर्घण्टः ॥

अश्वदंष्ट्रा, स्त्री, (अश्वस्य दंष्ट्रा इव आकृत्या ।) गोक्षुरवृक्षः । इत्यमरः ॥

अश्वन्नं, क्ली, (अश्नु-(सृ)-नामन्तो यस्मिन् ।) अश्नुभं । क्षेत्रं । चुल्ली । अनवधि । मृतं । इति हेमचन्द्रः ॥

अश्वपालः, पुं, (अश्वान् पालयतीति, अश्व + पाल + कर्म्मणि उपपदे अण् प्रत्ययः ।) घोटकरक्षकः । इति अश्वपालिकशब्दटीकायां दुर्गादासः ॥ सहस् इति आरबीभाषा । ("दत्तातङ्गोऽश्वगणानामनुद्धतसरश्मिः संभ्रमादश्वपालैः प्रभ्रष्टोऽयं श्रवद्भः प्रविशति त्वपतेर्मन्दिरं मन्दुरायाः" इति रत्नावल्याम् ।)

अश्वपुच्छी, स्त्री, (अश्वस्य पुच्छमिव केशरोऽस्याः ।) माषपर्णीवृक्षः । इति राजनिर्घण्टः ॥

अश्वबालः, पुं, (अश्वस्य बाल इव । काशस्य पुष्पं अश्वबालवत् विभाति ।) काशः । केश्या इति भाषा । इति त्रिकाण्डशेषः ॥

अश्वमहिषिका, स्त्री, (अश्वमहिषयो वैरम् । द्वन्द्वात् वुन् वैरमैथुनिकयोरिति अश्वमहिष + वुन् ।) अश्वमहिषयोर्नित्यवैरं । इति शब्दरत्नावली ॥

अश्वमारः, अश्वमारकः } पुं, (अश्वं मारयति । अश्व + मृ + णिच् + अण् ।) करवीरवृक्षः । इति शब्दरत्नावली ॥ ("लाङ्गारेवतकुटजाऽश्वमारकटपलहरिद्राहयनिम्बसप्तच्छदमालत्यस्त्रायमाणा चेति" । इति सुश्रुते ॥
"करवीरः श्वेतपुष्पः श्वेतकुम्भोऽश्वमारकः" ।
इति भावप्रकाशः ॥
"तत्र श्वेतकाश्वमारशुक्लेत्यादि ।
सुश्रुतस्य कल्पस्थानेऽभिहितं ॥")

अश्वमुखः, पुं, (अश्वस्य मुखमिव मुखं यस्य । किन्नरः । इति हलायुधः ॥ (स्त्री, किन्नरी । किम्पुरुषस्त्री । यथा कुमारे ।
"न दुर्व्वहश्रोणिपयोधरार्त्ता
ह्रिन्दन्ति मन्दां गतिमश्वमुख्यः" ॥)

अश्वमेधः, पुं, (अश्वः मेध्यते हिंस्यते यत्र । मेध हिंसने + घञ् ।) यज्ञविशेषः । इति जटाधरः ॥ यत्र लक्षणविशेषाक्रान्तमश्वं संप्रोक्ष्य कपाले जयपत्रं बद्धा त्यजेत् तद्रक्षार्थं पुरुषविशेषं नियोजयेत् संवत्सरान्ते अश्वे आगते सति अथवा केनापि संबद्धे युद्धं कृत्वा तमानीय यथाविधि वधं कृत्वा तदङ्गया होमः कर्त्तव्यः । कामनानुसारेण तत्फलं । मोक्षः ब्रह्महत्यापापक्षयः स्वर्गश्च । यथा । आपस्तम्बः ।
"राजा सार्व्वभौमः अश्वमेधेन यजेत नाप्यसार्व्वभौमः" । इति ॥ प्रायश्चित्तात्मकाश्वमेधो यथा । विष्णुः ।
"अनुपातकिनश्चैते महापातकिनो यथा ।
अश्वमेधेन शुध्यन्ति तीर्थानुसरणेन वा" ॥
अपि च ।
"अश्वमेधेन शुध्यन्ति महापातकिनश्चिमे" ।
इति विष्णूक्ताश्वमेधस्य प्रायश्चित्तत्वम् । पापक्षयस्वर्गोभयसाधकस्य तु तस्यापि न प्रायश्चित्तत्वम् । इति प्रायश्चित्ततत्त्वम् ॥ ० ॥ कलौ तस्य निषेधो यथा वृहन्नारदीये ।
"दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ ।
महाप्रस्थानगमनं गोमेधञ्च तथा मखं ॥
इमान् धर्म्मान् कलियुगे वर्ज्यानाऽऽहुर्मनीषिणः" ।
इत्युद्धृतत्त्वम् ॥ अन्यच्च । ब्रह्मपुराणम् ।
"नराश्वमेधौ मद्यञ्च कलौ वर्ज्या द्विजातिभिः" ।
इति तिथ्यादितत्त्वम् ॥ ० ॥ तत्फलजनककर्म्माणि यथा,—
"वैशाखे मासि यः कुर्य्यात् प्रपां माधवतुष्टये ।
दिने दिनेऽश्वमेधस्य फलं प्राप्नोति मानवः" ॥
इति पाद्मे क्रियायोगसारे ११ अध्यायः ॥
अपि च ब्रह्माण्डे ॥
"स्नानन्तु भक्त्या गङ्गायां कर्तुकामस्य गच्छतः ।
पदे पदेऽश्वमेधस्य फलं मर्त्यस्य जायते" ॥
इति प्रायश्चित्ततत्त्वम् ॥

अश्वमेधिकः, पुं, (अश्वमेधाय हितः । अश्वमेध + ठक्, ठञ् वा ।) अश्वमेधयागोपयुक्तघोटकः । इति जटाधरः ॥ (श्रीवल्लिङ्के खनामख्यातं महाभारतान्तर्गतं चतुर्दशपर्व्व । यथा,—
"ततोऽश्वमेधिकं पर्व्व सर्वपापप्रणाशनम्" ।
"ततोऽश्वमेधिकं पर्व्व प्रोक्तं तच्च चतुर्दशम्" ।)

अश्वमेधीयः, पुं, (अश्वमेधाय हितः । अश्वमेध + छ ।) अश्वमेधयज्ञीयाश्वः । तत्पर्य्यायः यवुः २ । इत्यमरः ॥ तस्य लक्षणम् ।
"कालाम्भोधरसङ्काशः सर्व्ववर्णमुखो बली ।
यस्य पार्श्वावुभावर्द्धचन्द्राकारौ सशोभनौ ॥
पुच्छं विद्युल्लतोकाशमुदरं कुन्दसन्निभं ।
पादाश्चैव हरिद्वर्णाः कर्णौ सिन्दूरसन्निभौ ॥
ज्वलदग्निनिभा जिह्वा चक्षुषी भास्करोपमे ।
विराजितो रोमराज्या सानुलोमविलोमया ॥
विचित्रैर्विविधैर्वर्णैश्चित्रो रजतबिन्दुभिः ।
यो वेगे वायुतुल्यः स्यादुच्चैरुच्चैःश्रवा यथा ॥
यस्य गात्रोद्भवो गन्धो गन्धर्व्वमपि मोहयेत् ।
एवं लक्षणसंयुक्तो यज्ञीयः पशुरुच्यते ॥
अश्वस्य पालकश्चातिबलवान् पुत्र उच्यते ।
पुत्रतुल्यः सुहृदापि बन्धुविघ्नः क्रतूत्तमः" ॥
इति वाह्निष्टरामायणम् ॥

अश्वयुक्, [ज्] स्त्री, (अश्वं युनक्ति रूपेणानुकरोतीति अश्व + युज् + क्विप् ।) अश्विनीनक्षत्रं । इत्यमरः ॥

अश्वयुक्[ज्] } पुं, (अश्वेन नक्षत्रेण युक् युक्ता यौगे
अश्वयुजः } मासी अस्यस्मिन् ।) आश्विनमासः ।

इति शब्दरत्नावली ॥ ("अश्वयुक् क्षणपक्षे तु श्राद्धं कुर्य्यादिति स्मृतिः"। भाद्रपदाश्वयुजौ वर्षाः। इति सुश्रुतः।)

अश्वरक्षः, पुं, (अश्वान् रक्षतीति। अश्व + रक्ष + अण्।) घोटकरक्षकः। अश्वपालः। इति जटाधरः ॥

अश्वरोधकः, पुं, (अश्वान् रुणद्धि। अश्व + रुध् + ण्वुल्।) करवीरवृक्षः। इति राजनिर्घण्टः ॥

अश्वलाला, स्त्री, (अश्वस्य लालेवाकारेण।) सर्पविशेषः। तत्पर्य्यायः। हलाहलः २ ब्रह्मसर्पः ३। इति चिकाण्डशेषः ॥

अश्ववक्त्रः, पुं, (अश्वस्य वक्त्रमिव वक्त्रं यस्य।) किन्नरः। इति शब्दरत्नमाला ॥

अश्ववड़वं, क्ली, अश्ववड़वानां समाहारः। अश्ववड़वयोर्द्वन्द्वे अश्ववड़वौ। अश्ववड़वानां द्वन्द्वे अश्ववड़वाः। इत्यमरटीकायां भरतः सारसुन्दरी च। घोड़ा घुड़ीर समाहारद्वन्द्वसमासे क्लीवलिङ्गेर एकवचन हय इतरेतरद्वन्द्वे पुंलिङ्गेर द्विवचन बऊ वचन हय इति भाषा ॥

अश्ववहः, पुं, (अश्वेन उह्यते यः सः। अश्व + वह + अच्।) अश्ववाहकः। इति जटाधरः। घोड़सओयार इति भाषा ॥

अश्ववारः, पुं, (अश्वं वारयतीति। अश्व + वृ + णिच् + अण्।) सादी। इति हेमचन्द्रः। घोड़सओयार इति भाषा ॥

("परस्परोत्पीड़ितजानुभागा
दुःखेन निश्चक्रमुरश्ववाराः"।
इति माघे।)

अश्ववारणः, पुं, (अश्वं वारयति + अश्व + वृ + णिच् + ल्यु।) गलकम्बलरहितगोसदृशपशुविशेषः। तत्पर्य्यायः। गवयः २ वनगवः ३ गोसदृक्षः ४। इति हेमचन्द्रः ॥

अश्ववित्, [द्] पुं, (अश्वं अश्वविद्यां वेत्तीति। अश्व + विद् + क्विप्।) नलराजः। इति चिकाण्डशेषः ॥ (नलस्य राज्ञोऽश्वविद्याज्ञता वर्णिता भारते। यथा।

"बाऊकस्तमुवाचाथ देहि विद्यामिमां मम।
मत्तोऽपि चाश्वहृदयं गृह्याग पुरुषर्षभ!॥
ऋतुपर्णं ततो राजा बाऊकं कार्य्यगौरवात्।
हयज्ञानस्य लोभाच्च तं तथेत्यब्रवीदृचः॥
ग्रयोक्तां त्वं गृहाणेदमक्षाणां हृदयं परं।
निक्षेपो मेऽश्वहृदयं त्वयि तिष्ठतु बाऊक"॥
बाऊको बाऊकवेशधारी नलः।)

अश्ववैद्यः, पुं, घोटकचिकित्सकः। सालोतरी इति हिन्दिभाषा। अश्वस्य वैद्यः इति षष्ठीतत्पुरुषसमासनिष्पन्नः ॥

अश्वशाला, स्त्री, घोटकगृहं। घोड़ार पाइशाल। आस्तबल् इति भाषा। यथा वाजिशाला तु मन्दुरा। इत्यमरः ॥ द्वे अश्वावस्थानगृहे। वाजिनोऽश्वस्य शाला गृहं वाजिशाला। अश्वशालादि च। इति तट्टीकायां भरतः ॥ ("कोषागारमायुधागारमश्वशालां हस्तिशालाञ्च"। इति भारते।)

अश्वशृङ्गालिका स्त्री, (अश्वशृङ्गालयोर्विवरम्। द्वन्द्वात् वुन्।) अश्वशृङ्गालयोर्वैरम्। इति शब्दरत्नावली ॥

अश्वषड़्गवं, क्ली, (अश्व + षड़्गवच्।) अश्वषट्कं। षड़्श्वाः। इति पाणिनिः ॥

अश्वसेनसुतपनन्दनः, पुं, (अश्वसेनो नृपस्तस्य नन्दनः।) सनत्कुमारः। इति हेमचन्द्रः ॥

अश्वा, स्त्री, (अश्व + टाप्।) घोटकी। घुड़ी इति भाषा। तत्पर्य्यायः। वामी २ वड़वा ३। इत्यमरः ॥

अश्वारिः, पुं, (अश्वानामरिः।) महिषः। इति जटाधरः ॥

अश्वारूढ़ः, पुं, (अश्वं आरूढ़ो येन।) अश्वारोहः। घोटकोपरि क्षतारोहणः। यथा। "अश्वारोहास्तु सादिनः"। इत्यमरः ॥ द्वे अश्वारूढ़े। अश्वमारोहन्ति अश्वारोहाः घञ्। सादयन्ति अश्वान् सादिनः ग्रहादित्वात् णिन्। इति तट्टीकायां भरतः ॥

अश्वारोहः, त्रि, (अश्वमारोहतीति। अश्व + आ + रुह + अण्।) अश्वपृष्ठस्थितयोद्धा। घोड़सोयार इति भाषा। तत्पर्य्यायः। सादीर इत्यमरः ॥ अश्ववहः २। इति जटाधरः ॥ अश्ववारः ४ तुरगी ५। इति हेमचन्द्रः ॥

अश्वारोहा, स्त्री, अश्वगन्धावृक्षः। अश्ववाहके त्रि। इति मेदिनी ॥ (अश्वगन्धाशब्देऽस्याः गुणा आख्याताः।)

अश्वारोही, [न्] त्रि, अश्वारोहणविशिष्टः। अश्वारूढ़ः। अश्वारोहणकर्त्ता। अश्वारोहणशीलः ॥ घोड़सोयार इति भाषा। अश्वमारोढ़ुं शीलमस्येत्यर्थे णिन्प्रत्ययेन निष्पन्नः ॥

अश्वावरोहकः, पुं, अश्वगन्धावृक्षः। इति रत्नमाला।

अश्वास्त्रः, (अश्वस्यास्त्रीव।) देवसर्षपवृक्षः। इति राजनिर्घण्टः ॥

अश्विनी, स्त्री, (अश्वः अश्वरूपं विद्यते यस्याः। अश्व + इन् + ङीप्।) सप्तविंशतिनक्षत्रान्तर्गतप्रथमनक्षत्रं। अश्विन्यादयो रेवत्यन्ताः सप्तविंशतितारा दक्षस्यापत्यत्वात् दाक्षायण्य उच्यन्ते। तत्पर्य्यायः। अश्वयुक् २ दाक्षायणी ३। इत्यमरः ॥ सा चन्द्रस्य भार्य्या। नवपादात्मकमेषराशेरादिचतुष्पादरूपा च ॥ अस्या रूपं। घोटकमुखाकृतितारात्रयात्मकं। अस्या अधिष्ठात्री देवता अश्वारूढ़पुरुषः। इति ज्योतिःशास्त्रं। तस्यां जातफलं। "सदैव देवाभ्युदितो विनीतः सत्त्वान्वितः प्राप्तसमस्तसम्पत्। योषाविभूषात्मजभूरितोषः स्यादश्विनीजन्मनि मानवस्य"। इति कोष्ठीप्रदीपः ॥ तस्य मस्तकोपरि उदये कर्कटलग्नस्य १।३० त्रिंशत्पलाधिकदण्डैको गतो भवति। यथा। "तन्वि घोटकमुखाकृतौ त्रिभे मस्तकोर्द्ध्वपथभाजि वाजिनि। चारुचन्द्रमुखि कर्कटोदयात् निर्गता गगनरन्ध्रलिप्रिका"॥ इति श्रीकालिदासकृतराजसभनिर्णयः ॥

अश्विनीकुमारौ, पुं, (अश्विन्या अश्वीभूतसंज्ञानामसूर्य्यपत्न्याः यमौ कुमारौ।) अश्विनीसुतौ। अश्वीभूतसंज्ञानामसूर्य्यपत्न्याः यमजपुत्रौ। तौ देववैद्यौ। (यथा हरिवंशे,

"विवस्वान् कश्यपाज्जज्ञे दाक्षायण्यामरिन्दम!।
तस्य भार्य्याभवत्संज्ञा त्वाष्ट्री देवी विवस्वतः"॥
"देवौ तस्यामजायेतामश्विनौ भिषजां वरौ"।)
नित्यद्विवचनान्तशब्दोऽयं।

अश्विनीपुत्रौ, पुं, (अश्विन्याः पुत्रौ।) सर्व्वैद्यौ। इति हेमचन्द्रः ॥

अश्विनीसुतौ, पुं, (अश्विन्याः सुतौ।) अश्विनीपुत्रौ। तयोः पर्य्यायः। सर्व्वैद्यौ २ अश्विनौ ३ दस्रौ ४ नासत्यौ ५ आश्विनेयौ ६। इत्यमरः। नासिक्यौ ७ गदागदौ ८। इति जटाधरः ॥ पुष्करस्रजौ ९। इति शब्दरत्नावली ॥

अश्विनौ, पुं, (प्रशस्ता अश्वाः सन्ति ययोः। इनिः। यद्वा, अश्विन्याम् जातौ। सन्धिवेलेत्यणो नक्षत्रेभ्यो बञ्जलमिति लुकि लुक्तद्धितलुकीति ङीपो लुक्॥) अश्विनीकुमारौ। इत्यमरः ॥

("त्वाष्ट्री तु सवितुर्भार्य्या वड़वारूपधारिणी।
असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ"॥
इति महाभारते।
"किमश्विनौ सोमरसं पिपासू"।
इति भट्टौ।)

("अश्विनौ देवभिषजौ यज्ञवाहाविति स्मृतौ।
दक्षस्य हि शिरश्छिन्नं पुनस्ताभ्यां समाहितं॥
प्रपूषणो दशनाःपूष्णो नेत्रे नष्टे भगस्य च।
वध्यिगश्च भुजस्ताभ्यामेव चिकित्सितः॥
चिकित्सितस्तु प्रीतांशुर्गृहीतो राजयक्ष्मणा।
सोमाग्निपतितस्तस्मै क्षतस्ताभ्यां पुनः सुखी॥
भार्गवस्यावनः कामी वृद्धः सन् विकृतिं गतः।
वीतवर्णस्वरोपेतः क्षतस्ताभ्यां पुनर्युवा॥
एतैश्चान्यैश्च बऊभिः कर्म्मभिर्भिषगुत्तमौ।
बभूवतुर्भृशं पूज्याविन्द्रादीनां महात्मनां॥
ग्रहास्तोत्राणि मन्त्राणि तथान्यानि हवींषि च।
धूम्राश्च पंशवस्ताभ्यां प्रकल्प्यन्ते द्विजातिभिः॥
प्रातश्च सवने सोमं ग्रक्षोऽश्विभ्यां सहाश्नते।
सौत्रामण्याश्च भगवानश्विभ्यां सह मोदते॥
इन्द्राग्नी चाश्विनौ चैव स्तूयन्ते प्रायशो द्विजैः।
स्तूयन्ते वेदवाक्येषु न तथान्या हि देवताः॥
अमरैरजरैस्तावद्विबुधैः साधिपैर्ध्रुवैः।
पूज्येते प्रयतैरेवमश्विनौ भिषजाविति॥'
इति चरकः ॥

"श्रूयते हि यथा रुद्रेण यज्ञस्य शिरश्छिन्नमिति ततो देवा अश्विनावभिगम्योचुः। भगवन्तौ नः श्रेष्ठतमौ युवां भविष्यथः। भवद्भ्यां यज्ञस्य शिरः सन्धातव्यं। तावूचतुरेवमस्विति। अथ तयोरर्थे देवा इन्द्रं यज्ञभागेन प्रासादयन्। ताभ्यां यज्ञस्य शिरः संहितमिति"॥ इति सुश्रुतः॥)

अश्वीनः, त्रि, एकाश्वकरणकदिनैकगम्यस्थानादिः। आश्विन इत्यमरः ॥ वृद्धभावपक्षे आश्विनः ॥

अश्वीयं, क्ली, (अश्वानां समूहः। अश्व + छ।) अश्वबृन्दं। अश्वसमूहः। तत्पर्य्यायः। आश्वं २। इत्यमरः ॥

अश्वीयः, त्रि, (अश्वाय हितः । अश्व + छ ।) अश्वहितकारी । इति मेदिनी ॥ अश्वसम्बन्धीयः ॥

अष, ञ् (भादिः उभं-सकं-सेट् ।) दीप्तौ । ग्रहणे । गतौ । इति कविकल्पद्रुमः ॥ ञ् अषति अषते । इति दुर्गादासः ॥

अषड्ग्रन्थीयः, त्रि, (अविद्यमानानि षड्ग्रन्थीनि यत्र । अषड्ग्रन्थाश्रितऽण्वलङ्कर्मेति खार्थे खः । अक्षिशब्दोऽत्र श्रोत्रेन्द्रिये वर्त्तते । बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् ।) यो मन्त्रादिर्ह्याभ्यां क्रियते न श्रुतीयादीनां गोचरः । इत्यमरः । दुर्जने करा मन्त्रणा इति भाषा ॥

अषाढः, पुं, (अषाढ़या युक्ता पौर्णमासी आषाढ़ी, सा यत्र मासे अण् वा लुक् सः । आषाढ़ी पूर्णिमा प्रयोजनमस्य । प्रयोजनार्थे अण् ।) आषाढ़मासः । ऋते पालाशदण्डः । इत्यमरटीकायां भरतः दिरूपकोषः ॥

अषाढ़कः, पुं, (अषाढ़ + स्वार्थे कन् ।) आषाढ़मासः । इति शब्दमाला ॥

अष्ट, [न्] त्रि, (अश्नुते अश् व्याप्तौ कन् ।) सप्तभ्यां नुट् चेति कनिन् ।) संख्याविशेषः । ८ आठ इति भाषा । नित्यबहुवचनान्तः शब्दोऽयं । इति व्याकरणं ॥ अष्टसंख्यावाचकशब्दाः । योगाङ्गं १ वसुः २ शिवमूर्त्तिः ३ दिग्गजः ४ सिद्धिः ५ ब्रह्मश्रुतिः ६ व्याकरणं ७ दिक्पालः ८ अहिः ९ कुलाद्रिः १० ऐश्वर्य्यं ११ । इति कविकल्पलता ॥

अष्टकः, त्रि, (अष्टावध्यायाः परिमाणमस्य । अष्टन् + कन् ।) अष्टसंख्या । अष्ट एवाष्टकः स्वार्थे कप्रत्ययः । अष्टसंख्याविशिष्टं यथा,—"गङ्गाष्टकं पठति यः प्रयतः प्रभाते वाल्मीकिना विरचितं सुखदं मनुष्यः" । इति वाल्मीकीयगङ्गाष्टकं ॥ अपि च ।

"अच्युतं केशवं विष्णुं हरिं सत्यं जनार्दनं ।
हंसं नारायणञ्चैव एतन्नामाष्टकं शुभं" ॥
इति ब्रह्मपुराणे श्रीविष्णुनामाष्टकं स्तोत्रं ॥

अष्टकर्णः, पुं, (अष्टौ कर्णा यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥

अष्टका, स्त्री, (अश्नन्ति पितरोऽस्याम् । अश् + तकन् ।) आद्धविशेषः । तिथिभेदः । तद्यथा । गौणचान्द्रपौषमाघफाल्गुनमासीयकृष्णाष्टमी । आश्विनकृष्णाष्टमी च । एतासु आद्धमावश्यकं । यथा । आग्रहायण्या ऊर्द्धं तिसृषु कृष्णाष्टमीषु आद्धानि नित्यानि । यथा गोभिलः ।

"अष्टका ऊर्द्धमाग्रहायण्यास्तिस्राष्टमी" ।
इति । ब्रह्मपुराणे ।

"पित्र्यदानाय मूले स्यादष्टकास्विह एव च ।
कृष्णपक्षे वरिष्ठा हि पूर्व्वा चैन्दो विभाव्यते ॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेवकी ।
आद्या पूपैः सदा कार्य्या मांसैरन्या भवेत्तथा ॥
शाकैः कार्य्या तृतीया स्यादेष क्रमगतो विधिः" ।
मूले प्रधानस्थाने अमावास्यां अमावास्या हि आद्धस्य प्रधानकालस्तद्दिति यावत् । ऐन्दी साग्नेरिन्द्रदेवताकयागसम्बन्धात् । एवं प्राजापत्या वैश्वदेवकी च । मांसैः पशोः । तथा च गोभिलः ।

"पशुवाल्यतरसम्भारः स्यात्तदापि पशुनैव कुर्य्यात्" इति । पशुवेति निपातसमुदायो यद्यर्थे पशुरपि छाग एव । छागोऽनादेशे पशुः । इति गौतमात् । न च तैस्या ऊर्द्धमष्टम्यां गौः । इति गोभिलसूत्रेण गवोपदेशात् कथमनुपदिष्टत्वमिति वाच्यं । तदसम्भवे पशुरित्यनेन यः पशुरुपदिष्टस्तस्य विशेषतोऽनुपदिष्टत्वात् । तैषी पौषी । वस्तुतस्तु हरिवंशे मृगोऽपि विहितः । यथा,—

"इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत् ।
मांसमानय आद्धाय मृगं हत्वा महाबलः" ॥
इति । स्त्रिया बधाभावमाह सएव ।

"अवध्यास्तु स्त्रियं प्राऽऽहुस्तिर्य्यग्योनिगतामपि" ।
एतदर्द्धं ब्रह्मपुराणेऽपि । आरण्यानामगस्त्यप्रोक्तिरत्नं वक्ष्यते । पश्वभावे स्थालीपाकेन । यथा गोभिलः । "अपि वा स्थालीपाकं कुर्व्वीत" । इति । तद्विधानन्तु ।

"स्थालीपाकं पशुस्थाने कुर्य्यादथानुकल्पिकं ।
अपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु" ॥
इति छन्दोगपरिशिष्टोक्तं ग्राह्यं । अन्विति ओदनचरोः पश्चात् । अतएव सातातपः ।

"नवोदके नवान्ने च गृहप्रच्छादने तथा ।
पितरः स्नुहयन्त्यग्रमष्टकासु मघासु च ॥
तस्माद्दद्यात् सदा युक्तो विदत्तं ब्राह्मणेषु च" ।
तस्मादग्रं प्रधानं । पूपादिकन्तूपकरणत्वेन शक्तानामावश्यक उभयत्र सदेति अवशात् । तथा च ।

"नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत् ।
उपेक्षातिक्रमे दोषश्रुतेरत्यागदर्शनात् ॥
फलश्रुतेश्चौषधिवा च तस्मित्यमिति कीर्त्तितं" ।
इति तिथ्यादितत्त्वम् ॥

गौणचान्द्रपौषस्य कृष्णाष्टमी पूपाष्टका । गौणचान्द्रमाघस्य कृष्णाष्टमी मांसाष्टका । गौणचान्द्रफाल्गुनस्य कृष्णाष्टमी शाकाष्टका । केषाञ्चिन्मते गौणचान्द्राश्विनस्य कृष्णाष्टमी अष्टकापदवाच्या । तासु क्रमात् पूपमांसशाकैः षाट्पौरुषिकं आद्धं कर्त्तव्यं । इति ब्रह्मवायुविष्णुधर्म्मोत्तरपुराणानि ॥

अष्टकाष्ठं, क्ली, (अष्टकमष्टकस्य ।) नयपीठी । इति चिकाकड़ग्रेवः । पाथार छक् इति भाषा ।

अष्टपात्, [द्], पुं, (अष्टौ पादा यस्य ।) लूता । माकड़सा । इति भाषा । शरभः । इति हेमचन्द्रः ॥

अष्टपादः, पुं, (अष्टौ पादा यस्य ।) ऊर्णनाभविशेषः । तत्पर्य्यायः । किन्नुनः २ । इति चिकाकड़ग्रेवः ॥

अष्टपादिका, स्त्री, (अष्टसु दिक्षु पादा यस्याः । अत्यल्लोपः । ङीपि पद्भावे संज्ञायां कन् हस्वः ।) लताविशेषः । इति रत्नमाला ॥ हापरमाली इति भाषा ॥

अष्टमः, त्रि, अष्टानां पूरणः । इति व्याकरणं ॥ (तस्य पूरणे डट् । नान्तादसङ्ख्यादेर्मट् ।) यथा । काव्यायनः ।

"अष्टमेऽब्दे चतुर्हायनाः स्त्रीणो भवति चन्द्रमाः ।
अमावास्याष्टमांशे च ततः किल भवेदृणुः" ॥
इति आद्धतत्त्वं ॥ अपि च ।

"सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम" ॥
इति देवीमाहात्म्यं ॥

अष्टमङ्गलं, क्ली, (अष्टप्रकारं मङ्गलम् ।) अष्टप्रकारमङ्गलद्रव्यं । तद्यथा,—

"भृंगराजो दधो नागः कलसो व्यजनन्तथा ।
वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलं" ॥
इति कृष्णनन्दिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतौ ॥

"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथा रमः" ॥
इति शुद्धितत्त्वं ॥

अष्टमङ्गलः, पुं, (अष्टौ मङ्गलानि शुभचिह्नानि यस्मिन् ।) श्वेतवर्णमुखवत्सःखुरकेशपुच्छयुक्तवृषोटकः । इति हेमचन्द्रः ॥

अष्टमङ्गलघृतं, क्ली, (अष्टाभिः मङ्गलजनकद्रव्यैः कृतं यद्घृतं ।) अष्टौषधयुक्तपक्वघृतं । यथा,—

"वचा कूष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च ।
सारिवा सैन्धवञ्चैव पिप्पली घृतमष्टमं ॥
सिद्धं घृतमिदं मेध्यं पिबेत् प्रातर्दिने दिने ।
वृद्धस्मृतिः कुमारीणां पिबतामष्टमङ्गलं" ॥
इति भावप्रकाशः ॥

अष्टमानं, क्ली, (अष्टौ मुष्टयः परिमाणमस्य ।) कुड़वपरिमाणं । शरावार्द्धं । इति वैद्यकपरिभाषायां ॥ ("प्रसृतिभ्यामञ्जलिःस्यात् कुड़वोऽर्द्धशरावकः ॥ अष्टमानश्च स ज्ञेयः", इति शार्ङ्गधरः ॥)

अष्टमिका, स्त्री, (अष्टम + कन् + स्त्रियामाप् ।) शुक्तिपरिमाणं । चतुस्तोलकं । इति वैद्यकपरिभाषायां ॥

("स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा" ॥ इति शार्ङ्गधरः ॥)

अष्टमी, स्त्री, (अष्टानां पूरणी । अष्टम + ङीप् ।) क्षीरकाकोली । इति शब्दचन्द्रिका ॥ तिथिविशेषः । सा चन्द्रस्याष्टमकलात्रियारूपा । तदुपलक्षितकालरूपा च । सा च शुक्ला नवमीयुता ग्राह्या गुणात् । कृष्णा च सप्तमीयुता । यथा निगमः ।

"कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्व्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ॥
उपवासादिकार्य्येषु एष धर्म्मः सनातनः" ॥ ० ॥
भविष्यपुराणे ।

"चतुर्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः ।
योऽब्देमेकं न भुञ्जीत शिवार्चनपरो नरः ॥
यत् पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनां ।
तत्पुण्यं सकलं तस्य शिवलोकञ्च गच्छति" ॥
ततश्च सततसत्रयाज्यक्षयपुण्यसमपुण्यप्राप्तिः शिवलोकगतिश्च फलं । फाल्गुनशुक्लाष्टमीचतुर्दश्योरारभ्य वर्षं यावत् प्रत्यष्टमीप्रतिचतुर्दश्युपवासव्रतं ॥ ० ॥ कालिकापुराणे ।

"यैषा ललितकान्ताख्या देवी मङ्गलचण्डिका ।
वरदाभयहस्ता च द्विभुजा गौरदेहिका ॥

रक्तपद्मासनस्था च मुकुटकुण्डलमण्डित।।
रक्तकौषेयवस्त्रा तु स्मितवक्त्रा शुभानना॥
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा।
उमया भाषितं मन्त्रं यत् पूर्व्वं त्रैकमक्षरं॥
मन्त्रमस्यास्तु तज्ज्ञेयं तेन देवीं प्रपूजयेत्"।
एकमक्षरं श्रीक्लींवीजरूपं।
"तथाऽष्टम्यां नवम्यां च पूजा कार्य्या विशेषतः।
पटेषु प्रतिमायां वा घटे मङ्गलचण्डिकां॥
यः पूजयेद्भौमवारे शुभैर्द्रव्यैस्तितैः शिवां।
सततं साधकः सोऽपि काममिष्टमवाप्नुयात्"॥*॥
ज्योतिषे। ग्रनैश्चरस्य वारेण वारेणाङ्गारकस्य च।
"कृष्णाष्टमी चतुर्दश्यौ पुण्यात् पुण्यतरे स्मृते"॥
तथा—
"सोमवारेऽप्यमावास्या आदित्यार्हे तु सप्तमी।
चतुर्थ्यङ्गारवारे च अष्टमी च शनिस्तथा॥
अत्र यत् क्रियते पापमघवा धर्म्मसञ्चयः।
षष्टिजन्मसहस्राणि प्रतिजन्म तदश्नुते"॥
इति तिथ्यादितत्त्वं॥*॥ श्रीकृष्णजन्माष्टमीव्रतं अष्टकाश्राद्धं भीष्माष्टमीव्रतञ्च तत्तच्छब्दे द्रष्टव्यं॥ महाष्टमीव्रतं महाष्टमीशब्दे द्रष्टव्यं॥ तत्र जातफलं।
"भूपालतः प्राप्तधनः क्षमाङ्गः
सुखी कृपालुर्युवतिप्रियश्च।
चतुष्पदाढ्यो धनधान्ययुक्तः
स्यादष्टमीजो मनुजः सुधीरः॥"
इति कोष्ठीप्रदीपः॥

अष्टमूर्त्ति, पुं, (अष्टौ मूर्त्तयो यस्य।) शिवः। इति हेमचन्द्रः॥ तस्यैकमूर्त्तिनामानि। क्षितिमूर्त्तिः सर्व्वः १ जलमूर्त्तिर्भवः २ अग्निमूर्त्तिः रुद्रः ३ वायुमूर्त्तिरुग्रः ४ आकाशमूर्त्तिर्भीमः ५ यजमानमूर्त्तिः पशुपतिः ६ चन्द्रमूर्त्तिर्म्महादेवः ७ सूर्य्यमूर्त्तिरीशानः ८। इति तन्त्रशास्त्रं॥ एताः शरभरूपिशिवस्याष्टपादाः इति कालिकापुराणं॥ यथा।
"अष्टमूर्त्तिर्निधीशश्च ज्ञानचक्षुस्तमोमयः"।
इति वटुकभैरवस्तोत्रं॥ तस्याष्टमूर्त्तयो यथा।
"अग्निरिन्दुश्च सूर्य्यश्च भूमिरापः प्रभञ्जनः।
यजमानः खमष्टौ च महादेवस्य मूर्त्तयः"॥
इति शब्दमाला॥
("अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम्"॥)
इति रघुवंशे॥ तथा कुमारे च।
"तत्राग्निमाधाय समित्समिद्धं
स्वमेव मूर्त्यन्तरमष्टमूर्त्तिः"॥)

अष्टलोहकं, क्ली, अष्टधातुविशेषः। तद्यथा। सुवर्णं १ रजतं २ ताम्रं ३ रङ्गं ४ सीसं ५ कान्तलोहं ६ मुण्डलोहं ७ तीक्ष्णलोहं ८। इति राजनिर्घण्टः॥

अष्टवर्गः, पुं, (अष्टानां औषधविशेषाणां रविप्रभृतीनां वा वर्गः।) औषधविशेषाणां। तद्यथा। ऋषभः १ जीवकः २ मेदः ३ महामेदः ४ ऋद्धिः ५ वृद्धिः ६ काकोली ७ क्षीरकाकोली ८। इति वैद्यकपरिभाषा। एकीकृतैतदौषधगुणाः। रक्तपित्तव्रणवायुपित्तनाशित्वं। इति राजवल्लभः॥
("जीवकर्षभकौ मेदे काकोल्यौ ऋद्धिवृद्धिके।
अष्टवर्गोऽष्टभिर्द्रव्यैः कथितस्त्वरकादिभिः॥
अष्टवर्गो हिमः स्वादुर्वृंहणो शुक्रलो गुरुः।
भग्नसन्धानकृत् कामबलासबलवर्द्धनः॥
वातपित्तास्रवृट्दाहज्वरमेहक्षयप्रणुत्"।
इति भावप्रकाशः॥)
ज्योतिषशास्त्रोक्तगोचरविशेषः। तद्यथा। आदौ रव्यादिसप्तग्रहाणां राहोश्च अष्टमासकोष्ठं कृत्वा प्रत्येकमासकोष्ठे जन्मकालीनग्रहाधिष्ठितराश्यवधिखाद्दिनकृच्छुभद इत्यादि दीपिकोक्तवचनाङ्कसंख्यकगृहे रेखां विन्यसेत् तत्र रवेर्दादशकोष्ठे ४८ चन्द्रस्य ४६ कुजस्य ३६ बुधस्य ५५ गुरोः ५६ भृगोः ५२ शनेः ३६ राहोः ३६ एतत्संख्यका रेखा देयाः। ततः प्रत्येकगृहस्थरेखाः द्विगुणीकृत्य अष्टाधिकास्त्रेत् अष्टभिः शोधयेत्। शेषा रेखाः शुभाः ख्याताः। अष्टौनास्त्रेत्तदा विन्दुभिर्ग्रहाणां धूम्रं कार्य्यं। तत्र विन्दवोऽशुभाः ख्याताः। अष्टौ चेत् तदा विन्दुरेखयोरभावस्तत्र समं परिकीर्त्तितं॥ तस्य नामगुणाः।
"जीवकर्षभकौ मेदे काकोल्यौ ऋद्धिवृद्धिके।
अष्टवर्गोऽष्टभिर्द्रव्यैः कथितस्त्वरकादिभिः॥
अष्टवर्गो हिमः स्वादुर्वृंहणः शुक्रलो गुरुः।
भग्नसन्धानकृत् बल्यः शरीरबलवर्द्धनः॥
वातपित्तास्रवृट्दाहज्वरमेहक्षयप्रणुत्"।
इति भावप्रकाशः॥*। ज्योतिःशास्त्रोक्तगणनया रेखाविन्दुभ्यां शुभाशुभफलसूचकजन्मकालीनाष्टग्रहसमुदायः। यथा। अथाष्टवर्गः।
"जन्मकालग्रहस्थित्या फलं वक्ष्ये शुभाशुभं"।
खाद्दिनकृत् शुभदः क्षितिपक्षसमुद्रनगादिकपक्षगतो १। २। ४। ७। ८। ६। १०। ११। ऽथ विभावरिभर्त्तुस्त्र्याङ्कदशेषगतो ३। ६। १०। ११। ऽथ कुजाद्रविवत् १। २। ४। ७। ८। ६। १०। ११। अथ सोमसुताच्छिखरर्त्तुनवादिषु यातः। ३। ५। ६। ६। १०। ११। १२। देवगुरोर्विधयर्त्तुनवेशगतो ५। ६। ६। ११। ऽथ सुरारिगुरोः समयाचलभास्करयातः। ६। ७। १२। तीक्ष्णमरीचिसुतादपि भास्करवत्। १। २। ४। ७। ८। ६। १०। ११। अथ लग्नगृहात् चित्रतनयाङ्कदशादिषु यातः ३। ४। ६। १०। ११। १२। रविरेखाः। ४८। भुजङ्गविलासाभिधानमालादण्डकेनादित्याष्टवर्गः॥*॥ चन्द्रः शुभोऽर्कांचिकालाद्रिदन्ताबलाशशिवस्य। ३। ६। ७। ८। १०। ११। खतः खात् कुरामर्त्तंगाशशिवस्यः। १। ३। ६। ७। १०। ११। व्योमाब्धिवक्रीयुषड्गोदिगीशेभ्य। २। ३। ५। ६। ६। १०। ११। ऽथ खात् कुरामाब्धिवाणागदन्तावलाशशिवस्यः १। ३। ४। ५। ७। ८। १०। ११। जीवात् कुदृग्वेदशैलेभकाष्ठाशिवस्थो १। २। ४। ७। ८। १०। ११। ऽथ शुक्राद्विवेदेशशैलेषग्रहाशशिवस्यः ३। ४। ५। ७। ६। १०। ११। तोक्ष्णांशुदेहोद्भवाद्रामबाणर्त्तुगम्भुसितो ३। ५। ६। ११। ऽथोदयाद्दयवाहर्त्तुकाष्ठाशिवस्यः। ३। ६। १०। ११। चन्द्ररेखाः। ४६। कामबाणाभिधानमालादण्डकेन चन्द्राष्टवर्गः॥*॥ कुजोऽर्कांचुभो वह्निबाणर्त्तुदिक्शशम्भुगो ३। ५। ६। १०। ११। ऽथेन्दुतो रामकालेशग ३। ६। ११। खतः खात् कुदृग्वेदसप्ताष्टदिक्शशम्भुगः स्यात् १। २। ४। ७। ८। १०। ११। निशानाथपुत्राद्रुणेष्वङ्करन्ध्रोपयातः। ३। ५। ६। ११। ततो जीवतः कालकाष्ठाशिवार्कोपयातो ६। १०। ११। १२। ऽथ देवारिपूज्यादनेहोगजेशार्कसंख्यः। ६। ८। ११। १२। ततः सूर्य्यपुत्रात् कुवेदागनागग्रहाशशिवस्थो १। ४। ७। ८। ६। १०। ११। ऽथ लग्नात् कुरामाङ्कदिक्शशम्भुयातः। १। ३। ६। १०। ११। कुजरेखाः ३६। सिंहविलासाभिधानमालादण्डकेन भौमाष्टवर्गः॥*॥ क्षः शुभोऽर्कतः शरर्त्तुगोशिवार्कगो ५। ६। ६। ११। १२। ऽथ चन्द्रतो द्विवेदकालनागदिक्शशेषु। २। ४। ६। ८। १०। ११। भूमिजात् कुदृक्कृतागनागगोदशेशगः। १। २। ४। ७। ८। ६। १०। ११। ततः खतः कुवह्निपक्षषखवादिकेषु। १। ३। ५। ६। ६। १०। ११। १२। वाक्पतेरसाश्शशम्भुसूर्य्यगो ६। ८। ११। १२। ऽथ शुक्रतः कुवाङ्कवह्निवेदपक्षनागगोशिवेषु। १। २। ३। ४। ५। ८। ६। ११। षड्गुतः कुदृक्कृतागनागपक्षखिगतो ऽथ। १। २। ४। ७। ८। ६। १०। ११। १२। लग्नतः क्षितिद्विवेदकालनागदिक्शिवेषु। १। २। ४। ६। ८। १०। ११। बुधरेखाः। ५५। अष्टोकमञ्जरीसंज्ञकमालादण्डकेन बुधाष्टवर्गः॥*॥ सुरराजगुरुः शुभदो रवितः कुयमानलवेदनगादिकपक्षगतो १। २। ३। ४। ७। ८। ६। १०। ११। ऽथ विधोर्द्विशराचलगोशिवगो २। ५। ७। ६। ११। वसुधातनयात् कुयमाब्धिनगाष्टदशेशगतो १। २। ४। ७। ८। १०। ११। ऽथ बुधात् क्षितियुग्मक्षतेषुरसग्रहदिक्गिरिशोपगत १। २। ४। ५। ६। ६। १०। ११। खदनु खत एकयमानलवारिधिपर्व्वतनागदशेशगतो १। २। ३। ४। ७। ८। १०। ११। ऽथ सितादयमपक्षरसग्रहदिशिवगो २। ५। ६। ६। १०। ११। रविनन्दनतो दहनेषुरसार्केगत ३। ५। ६। १२। ऽथ लग्नगृहात् कुयमाब्धिशरर्त्तुनगग्रहदिग्गिरिशोपगतः १। २। ४। ५। ७। ८। १०। ११। गुरुरेखाः ५६। कुसुमस्तवकाभिधानमालादण्डकेन बृहस्पतेरष्टवर्गः॥*॥ भृगुः शुभो रवेर्गजेशसूर्य्यगो। ८। ११। १२। ऽथ चन्द्रतः खादिपक्षकाष्टगोशिवार्कगः। १। २। ३। ४। ५। ८। ६। ११। १२। कुजात् त्रिवेदकालगोशिवार्कगो ३। ४। ६। ८। ११। १२। ऽथ बोधनात् त्रिबाणकालरन्ध्रदशसंस्थितः। ३। ५। ६। ८। ११। गुरोः शरार्णवरन्ध्रदिग्भरेशग। ५। ८। ८। १०।

शेषग्रहाशशिवस्थः ३। ४। ५। ७। ८। १०। ११। तीक्ष्णांशुदेहोद्भवाद्रामबाणर्त्तुगम्भुसितो ३। ५। ६। ११। ऽथोदयाद्दयवाहर्त्तुकाष्ठाशिवस्थः। ३। ६। १०। ११। चन्द्ररेखाः। ४६। कामबाणाभिधानमालादण्डकेन चन्द्राष्टवर्गः॥*॥ कुजोऽर्कांचुभो वह्निबाणर्त्तुदिक्शशम्भुगो ३। ५। ६। १०। ११। ऽथेन्दुतो रामकालेशग ३। ६। ११। खतः खात् कुदृग्वेदसप्ताष्टदिक्शशम्भुगः स्यात् १। २। ४। ७। ८। १०। ११। निशानाथपुत्राद्रुणेष्वङ्करन्ध्रोपयातः। ३। ५। ६। ११। ततो जीवतः कालकाष्ठाशिवार्कोपयातो ६। १०। ११। १२। ऽथ देवारिपूज्यादनेहोगजेशार्कसंख्यः। ६। ८। ११। १२। ततः सूर्य्यपुत्रात् कुवेदागनागग्रहाशशिवस्थो १। ४। ७। ८। ६। १०। ११। ऽथ लग्नात् कुरामाङ्कदिक्शशम्भुयातः। १। ३। ६। १०। ११। कुजरेखाः ३६। सिंहविलासाभिधानमालादण्डकेन भौमाष्टवर्गः॥*॥ क्षः शुभोऽर्कतः शरर्त्तुगोशिवार्कगो ५। ६। ६। ११। १२। ऽथ चन्द्रतो द्विवेदकालनागदिक्शशेषु। २। ४। ६। ८। १०। ११। भूमिजात् कुदृक्कृतागनागगोदशेशगः। १। २। ४। ७। ८। ६। १०। ११। ततः खतः कुवह्निपक्षषखवादिकेषु। १। ३। ५। ६। ६। १०। ११। १२। वाक्पतेरसाश्शशम्भुसूर्य्यगो ६। ८। ११। १२। ऽथ शुक्रतः कुवाङ्कवह्निवेदपक्षनागगोशिवेषु। १। २। ३। ४। ५। ८। ६। ११। षड्गुतः कुदृक्कृतागनागपक्षखिगतो ऽथ। १। २। ४। ७। ८। ६। १०। ११। १२। लग्नतः क्षितिद्विवेदकालनागदिक्शिवेषु। १। २। ४। ६। ८। १०। ११। बुधरेखाः। ५५। अष्टोकमञ्जरीसंज्ञकमालादण्डकेन बुधाष्टवर्गः॥*॥ सुरराजगुरुः शुभदो रवितः कुयमानलवेदनगादिकपक्षगतो १। २। ३। ४। ७। ८। ६। १०। ११। ऽथ विधोर्द्विशराचलगोशिवगो २। ५। ७। ६। ११। वसुधातनयात् कुयमाब्धिनगाष्टदशेशगतो १। २। ४। ७। ८। १०। ११। ऽथ बुधात् क्षितियुग्मक्षतेषुरसग्रहदिक्गिरिशोपगत १। २। ४। ५। ६। ६। १०। ११। खदनु खत एकयमानलवारिधिपर्व्वतनागदशेशगतो १। २। ३। ४। ७। ८। १०। ११। ऽथ सितादयमपक्षरसग्रहदिशिवगो २। ५। ६। ६। १०। ११। रविनन्दनतो दहनेषुरसार्केगत ३। ५। ६। १२। ऽथ लग्नगृहात् कुयमाब्धिशरर्त्तुनगग्रहदिग्गिरिशोपगतः १। २। ४। ५। ७। ८। १०। ११। गुरुरेखाः ५६। कुसुमस्तवकाभिधानमालादण्डकेन बृहस्पतेरष्टवर्गः॥*॥ भृगुः शुभो रवेर्गजेशसूर्य्यगो। ८। ११। १२। ऽथ चन्द्रतः खादिपक्षकाष्टगोशिवार्कगः। १। २। ३। ४। ५। ८। ६। ११। १२। कुजात् त्रिवेदकालगोशिवार्कगो ३। ४। ६। ८। ११। १२। ऽथ बोधनात् त्रिबाणकालरन्ध्रदशसंस्थितः। ३। ५। ६। ८। ११। गुरोः शरार्णवरन्ध्रदिग्भरेशग। ५। ८। ८। १०।

अष्ट

११। स्तः स्तः कुपञ्चकाष्टरन्ध्रदिक्खिवोपगः १। ५। ८। ६। १०। ११। ग्रनैर्गुणाब्धिपञ्चनागगोदग्रेग्रगो। ३। ४। ५। ८। ६। १०। ११। ऽथ लग्नतः कुपञ्चकाष्टगोग्निवस्थितः। १। २। ३। ४। ५। ८। ६। ११। शुक्ररेखाः। ५२। अनङ्ग-शेखराभिधानमालादण्डकेन भार्गवाष्टवर्गः॥ * ॥ सुभः पङ्कुरर्कात् स्थायमाम्भोधिग्रैलाष्टदिक्खग्नि-खग। १। २। ४। ७। ८। १०। ११। इन्दुतो रामकालेग्रगतः। ३। ६। ११। खाम्बुताङ्क्रि-बाणर्तुकाष्टाग्निवार्कोपगो। ३। ५। ६। १०। ११। १२। ऽथ ग्रतः कालदन्तावलादिस्थितो। ६। ८। ६। १०। ११। १२। जीवतो वाणकालेग्र-मार्त्तण्डयात। ५। ६। ११। १२। स्ततो दैत्य-पूज्यादनेहःग्निवार्कोपयातः। ६। ११। १२। स्ततो वीतिहोत्रेषु कालेग्रयात। ३। ५। ६। ११। स्ततो लग्नतः खागुणाम्भोधिषड्दिक्खहेग्रस्थितः। १। ३। ४। ६। १०। ११। ग्रनैरेखाः ३६। मत्तमातङ्गलीलाभिधानदण्डकेन ग्रनैश्चराष्टवर्गः। इति दीपिका। * ॥ राज्ञः शुभोऽर्काद्भुजवह्नि-वेदर्त्तुरन्ध्रगो। २। ३। ४। ६। ६। ऽथ चन्द्रात् कुराम्बुवेदाङ्कग। १। ३। ४। ६। स्ततः कुजा-दङ्गिबाणाङ्करन्ध्रगतो। ३। ५। ६। ६। ऽथ बुधाच्छशिपञ्चवह्निबाणरन्ध्रग। १। २। ३। ५। ६। स्ततो जीवाद्व्यवाहवेदाङ्करन्ध्रग। ३। ४। ६। ६। स्ततः शुक्रात् पञ्चवह्निबाणरन्ध्रगत। २। ३। ५। ६। स्ततः सौरात् पञ्चबाणर्तुग। २। ५। ६। स्ततः स्ततः ग्रग्निवेदबाणदिपुरन्ध्रगो। १। ४। ५। ६। ६। ऽथ लग्नाद्वेदरन्ध्र-दिग्रदस्तूर्य्यगतः। ४। ६। १०। ११। १२। राज्ञरेखाः। ३६। मृगेन्द्रविलासाभिधानदण्डकेन राज्ञैरष्टवर्गः॥ * ॥ सूर्य्यादेकद्वितुःसप्ताष्ट-दग्रैकादग्रेषु। १। २। ४। ७। ८। १०। ११। सोमात्त्रिषड्दग्रैकादग्रेष। ३। ६। १०। ११। भौमात्त्रिपञ्चषड़ेकादग्रेषु। ३। ५। ६। ११। बुधात् षड़ष्टनवदग्रैकादग्रेषु। ६। ८। ६। १०। ११। गुरोः पञ्चषड़ेकादग्रदादग्रेष। ५। ६। ११। १२। शुक्रात् षड़ेकादग्रदादग्रेषु ६। ११। १२। ग्रनैस्त्रिपञ्चाष्टदग्रैकादग्रेषु। ३। ५। ८। १०। ११। लग्नादेकत्रितुःषड्दग्रकादग्रेषु। १। ३। ४। ६। ११। एवं लग्नरेखाः ३७॥ * ॥

"इति निगदितमिष्टं नेष्टमन्यद्विग्रेषा-
दधिकफलविपाकं जन्मभात्तत्र दद्युः।
उपचयमष्टमित्रखेचराः पुष्टमिष्टं
त्वपचयमष्टनीचारातिभे नेष्टसंज्ञम्॥
यावती यावती रेखा ग्रहाणामष्टवर्गके।
तावतीं द्विगुणीकृत्य अष्टाभिः परिग्रोधयेत्॥
अष्टोपरि भवेद्रेखा अष्टाभ्यन्तरविन्दवः।
अष्टाभिस्तु समो यत्र तत् समं परिकीर्त्तितम्॥
रेखा ग्रहाच्छुभे देया विन्दवस्त्वेतरत्र तु।
रेखाविन्दू समानौ चेत् समस्तत्र निगद्यते॥
रेखाधिक्ये शुभं ज्ञेयं तद्विन्दोरग्रुभम्।
श्रीरानन्दस्तथा ग्रेयो भोगो राज्यं भवेत्तथा॥

अष्ट

मलिनोऽथ विपत्तैव हानिर्मृत्युर्भवेत्तथा।
ह्यादिरेखा ह्यादिविन्दोः फलान्येतान्यनुक्रमात्॥
रेखायां वत्सरो ज्ञेयः सार्द्धसप्तदिनं समे।
अष्टवर्गदग्रायुः स्यात् दिनं चतुर्धु विन्दुषु"॥
इत्यायुर्दायः। इत्यष्टवर्गः॥ * ॥ नन्दी।
"अष्टवर्गशुभैः ग्रीमान् कर्म्म कुर्य्यान्नभस्वरैः।
गोचरस्थैस्तदप्राप्तौ तदप्राप्तौ च वेधगैः॥
व्रतारम्भे विवाहे च यात्रायां च्तरकर्म्मणि।
अविशुद्धाष्टवर्गस्य समस्ता निष्फलाः क्रियाः॥
"सततं दिग्रति गराणां
राग्नौ भग्नेऽष्टवर्गफलं निखिलं।
भावफलं प्रथमार्द्धे
दृष्टिफलान्यर्द्धमुक्तेषु"॥
इत्यष्टवर्गार्थकथनम्। इति ज्योतिस्तत्त्वम्॥

अष्टश्रवाः, [स्] पुं, (अष्टौ श्रवांसि यस्य। चतु-र्मुखस्य ब्रह्मणः प्रतिमुखं दिक्कर्णतया तथात्वम्।) ब्रह्मा। इति त्रिकाण्डग्रेषः॥

अष्टाकपालः, पुं, (अष्टसु कपालेषु संस्कृतः। संस्कृतं भक्ष्य इत्यणोदिगोर्लुगनपत्ये इति लुक्। अष्टनः कपाले हविर्मीत्यात्वम्।) यज्ञविग्रेषः। यत्र अष्टसु कपालेषु पुरोडाग्रः पक्वा क्रयते। इति श्रुतिः॥

अष्टाङ्गार्घ्यः, पुं, (अष्टौ अङ्गानि उपकरणानि यस्य तादृग्रोऽर्घ्यः।) अष्टद्रव्यघटितपूजोपकरणवि-ग्रेषः। यथा,—
"आपः क्षीरं कुग्राग्राणि दधि सर्पिः सतण्डुलाः।
यवाः सिद्धार्थकाश्चैव अष्टाङ्गार्घ्यः प्रकीर्त्तितः"।
इति तन्त्रम्॥
"आपः क्षीरं कुग्राग्राणि दूर्वं मधु तथा दधि।
रक्तानि करवीराणि तथा रक्तञ्च नन्दनम्॥
अष्टाङ्ग एष अर्घ्यो व भागवे परिकीर्त्तितः"।
इति कालीखण्डम्॥

अष्टादग्र [न्] त्रि, (अष्टाधिका दग्र।) अष्टाधिक-दग्रसंख्या। १८ आठार इति भाषा। नित्यबहु-वचनान्तग्रब्दोऽयं। इति सिद्धान्तकौमुदी॥ (यथा मनुः।
"अष्टादग्रसु मार्गेषु निवद्धानि पृथक् पृथक्"।)
अथाष्टादग्रवाचकग्रब्दाः यथा। दीपः १ विद्या २ पुराणं ३ स्मृतिः ४ धान्यं ५। इति कविकल्पलता॥
("अगाहताष्टादग्रतां जिगीषया
नवद्वयद्वीपपृथक्कजन्मग्रियाम्।"
इति नैषधे।
"अष्टादग्र पुराणानि कृत्वा सत्यवतीसुतः"।
इति भारते॥)

अष्टादग्राङ्गः, पुं, (अष्टादग्र अङ्गानि यस्मिन्।) अष्टादग्रप्रख्यात्मकौषधं। स चतुर्व्विधः। दग्र-मूल्यादिः १। भूनिम्बादिः २। द्राक्षादिः ३। मुस्तादिः ४। तद्यथा।
"दग्रमूली ग्रठी पृग्निपौष्करं सदुरालभा।
भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी॥
अष्टादग्राङ्ग इत्येष सन्निपातज्वरापहः।
कासहृद्रुहपार्श्वार्त्तिहिक्काश्वासवमीहरः"॥१॥

अष्ट

"भूनिम्बदारुदग्रमूलमहौषधाब्द-
तिक्तेन्द्रवीजधनिकेभकणाकषायः।
तन्द्राप्रलापकसनारुचिदाहमोह
श्वासादियुक्तमखिलं ज्वरमाशु हन्ति"॥२॥
"द्राक्षास्ता ग्रठी पृग्निपर्णी मुस्तकं रक्तचन्दनं।
नागरं कटुका पाठा भूनिम्बं सदुरालभं॥
उग्रीरं पद्मकं धान्यं बालकं कग्रटकारिका।
पुष्करं पिप्पलीमूलं क्वाथं जीर्णज्वरापहः॥
कासं श्वासञ्च विषमं ग्वयथूदरनाग्रनं।
अष्टादग्राङ्गमुदितमेतत् स्यात् सन्निपातनुत्"॥३॥
मुस्तपर्पटकोग्रीरदेवदारुमहौषधं।
त्रिफला धन्वयासञ्च नीली काम्पिल्लकं त्रिवृत्॥
किराततिक्तकं पाठा बलाकटुकरोहिणी।
मधुकं पिप्पलीमूलं मुस्ताद्यो गण उच्यते॥
अष्टादग्राङ्गमुदितमेतद्धा सन्निपातनुत्।
पित्तोत्तरे सन्निपाते हितश्चोक्तं मनीषिभिः॥
मन्यास्तम्भउरोघाते उरःपार्श्वग्िरोग्रहे"॥४॥
इति सुखबोधः॥

अष्टापदं, पुं,क्ली, (अष्टसु धातुषु पदं प्रतिष्ठा यस्य। पञ्चौ पञ्चौ अष्टौ पदानि यस्येति वा। अष्टनः संज्ञायामिति दीर्घः।) स्वर्णं। धुस्तूरः। ग्रारीणां फलकः। इत्यमरमेदिनीकरौ॥ पाग्गार इक् इति भाषा। यथा "धुस्तूरः कनकाह्वयः"। इत्य-मरदर्ग्गनात्। अष्टापदग्रब्दस्य कनकवाचकत्वाच्च॥ ("आवर्त्तिताष्टापदकुम्भतोयैः।"
इति कुमारसम्भवे॥
"स रामकरमुक्तेन निहतो द्यूतमण्डले।
अष्टापदेन बलवान् राजा वच्यधरोपमः॥"
इति हरिवंग्रे॥)

अष्टापदः, पुं, (अष्टौ पदानि यस्य।) ग्ररभः मर्कटः। इति मेदिनी॥ लूता। चन्द्रमल्ली। क्रिमिः। कैलासपर्व्वतः। इति हेमचन्द्रः॥ कीलकः। इति धरणिः॥

अष्टापदी, स्त्री, (अष्टौ पादा यस्याः। संख्यासु पूर्व्व-स्येति पादस्यान्तलोपे पादोन्यतरस्यामिति ङीपि पादः पत्॥) चन्द्रमल्ली। इति मेदिनी॥

अष्टारचक्रवान् [त्] पुं, (अष्टारमष्टकोणं चक्रं विद्यते यस्य। अष्टारचक्र+मतुप्। मस्य वः।) जिनविग्रेषः। तत्पर्य्यायः। मङ्गुग्रीः २ ज्ञान-दर्पणः ३ मङ्गुभद्रः ४ मङ्गुघोषः ५ कुमारः ६ स्थिरचक्रः ७ वच्यधरः ८ प्रज्ञाकायः ६ वादिराट् १० नीलोत्पली ११ महाराजः १२ नीलः १३ ग्रार्दूलवाहनः १४ धियाम्पतिः १५ पूर्व्वजिनः १६ खड्गी १७ दण्डी १८ विभूषणः १६ बालव्रतः २० पञ्चवीरः २१ सिंहकेलिः २२ ग्रिखाधरः २३ वागीग्वरः २४। इति त्रिकाण्डग्रेषः॥

अष्टिः, स्त्री, (अस्यते एधित्यां क्षिप्यते इति+अस+क्तिन्। एषोदरादित्वात् वत्वम्।) बीजं। इत्युणादिकोषः॥ आँठि इति भाषा।

अष्ठीवान् [त्] पुं, क्ली, (अतिग्रयितमस्थि यस्मिन्। अस्थि+मतुप्। मस्य वः। आसन्दीवदष्ठीवदिति निपातनादस्थिग्रब्दस्याष्ठीभावः।) जानु। इत्य-

मरः ॥ आँठु इति भाषा ।

अस ल भावे । (अदां-परं-अकं-सेट् ।) भावः सत्ता । सा चेह विद्यमानतैव । ल अस्ति विष्णुः । इति दुर्गादासः ॥ (वि + अति) । अतिक्रमे । पराभवे । "अन्यो व्यतिस्ते तु ममापि धर्म्मः" इति भट्टौ । (अभि) भागसत्तायाम् । "यदत्र ममाभिस्यात् दीयताम्" । इति पाणिनिः । (आविस्) आविर्भावे ।

"तेषामाविरभूद् ब्रह्मा परिम्लानमुखश्रियाम्" । इति कुमारे । (प्रादुस्) प्रादुर्भावे । उद्भवे ।

"महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः" । इति मनुः ।)

अस इ र् य उ क्षेपे । (दिवां-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ य अस्यति । उ असित्वा अस्वा । इर् आस्यत् आसीत् । अस्यमानं महागदा इति भट्टौ ताच्छील्ये ग्नुः ग्नानः । इति दुर्गादासः ॥

("तस्मिन्नास्यदिषीकास्त्रं रामो रामानुबोधितः" । इति रघुवंशे । (अति) अतिक्रमे । पराभवे ।

"वज्रभिश्चैकमत्यस्यन्नेकेन च बहून् जनान्" । इति रामायणे । (वि + अति) उत्क्षेपे ।

"अत्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः" । इति मनुः । (अप) दूरनिक्षेपे ।

धीरानपास्यज्जनकस्य कन्या
नेयं प्रतिज्ञा मम दत्तपूर्व्वा" ।

इति रामायणे । (अभि) अभ्यासे ।

"अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः" । इति कुमारे । (नि) निक्षेपे । "न मद्विधो न्यस्यति भारसुद्यमम्" । इति भट्टौ । (उप + नि) प्रस्तावे ।

"स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः" । इति किराते । (सं + उप + नि) प्रमाणादिना दृढ़ीकरणे ।

"त्वया च मया समुपन्यस्तेष्वपि मन्त्रेष्ववज्ञानं वाक्पारूष्यञ्च कृतम्" । इति हितोपदेशे । (प्रति + नि) स्थापने ।

"तथैवायुधशालानि भ्रातृभ्यां कवचानि च ।
रथोपस्थे प्रतिन्यस्य सचर्म्म कठिनं च यत्" ॥

इति रामायणे । (निर्) दूरीकरणे । पराभवे ।

"यशांसि सर्व्वेषुभृतां निरास्यत्" ।

"तानर्हिदद्यादीश्च निरास्यच्च तलाहतान्" ॥

इति च भट्टौ । (परि) विस्तृतौ । "पर्य्यस्यन्निह निचयः सहस्रसंख्यां" । किराते ॥ "ताम्रोष्ठपर्य्यस्तरुचः स्मितस्य" । इति कुमारे ॥ पातने च ।

"दासीघटमपां पूर्णं पर्य्यस्येत् प्रेतवत् सदा" । इति मानवे ॥ (सम्) संयोगे । एकत्र संश्लेषे । यथा,—

"सर्व्वोऽप्यवयवोऽङ्गा समस्यते ।"
"अयं समर्थनं सह समस्यते ॥"

इति च पाणिनिः ॥ इत्यादिः ॥

अस ञ् अयार्थे । (भ्वादिं-उभं-सकं-सेट् ।) अयार्थौ दीप्तिग्रहणगतयः ॥ "वासुदेवं परित्यज्य योऽन्यदेवमुपासते" । उपगच्छतीत्यर्थः । लावण्य उत्पाद्यत इवास यत्न इत्यादिसिद्धे अनेकार्थत्वात् सत्तार्थोऽयमपीति रमानाथः । अनुप्रयोगादन्यत्रापि परोक्षायामस्तेर्भूभावं केचिन्नेच्छन्तीति धातुप्रदीपः । इति दुर्गादासः ॥

असंख्य, त्रि, असंख्यनीयः । संख्यारहितः । अपरिमितः । न विद्यते संख्या यस्येति बहुव्रीहिः । अगणनीयः । यथा,—

"असंख्यं द्विपरार्द्धादि पुद्गलात्मात्यनन्तकं" ।
इति हेमचन्द्रः ॥ अपि च ।

"शतयोजनविस्तीर्णैः शतस्कन्धसमन्वितैः ।
असंख्यशाखानिकरैरसंख्यपलसंयुतैः" ॥
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४१ अध्यायः ॥

असंख्यात, त्रि, संख्यारहितं । यथा । मदनपारिजाते ।

"अङ्गुल्यग्रेण यज्ज्ञानं यज्ज्ञानं मेरुलङ्घितं ।
असंख्यातञ्च यज्ज्ञानं तत्सर्व्वं निष्फलं भवेत्" ॥
इत्याह्निकाचारतत्त्वं ॥

असंस्कृत, त्रि, (न संस्कृतः । नञ्समासः ।) संस्काररहितं । यथा । आपस्तम्बः ।

"असंस्कृतः सुतः श्रेष्ठो नापरो वेदपारगः" ।
इति शुद्धितत्त्वं ॥ अन्यच्च ।

"असंस्कृतप्रमीतस्य पिता न श्राद्धमाचरेत् ।
यदि स्नेहाचरेच्छ्राद्धं सपिण्डीकरणं विना" ॥
इति ।

"असंस्कृतौ न संस्कार्य्यौ पूर्व्वौ पौत्रप्रपौत्रकैः ।
पितरं तत्र संस्कुर्य्यादिति धर्म्मो व्यवस्थितः" ॥
इति च श्राद्धतत्त्वं ॥

असंस्कृतवाक्य, क्ली, (असंस्कृतं संस्कृतेतरं वाक्यम् ।) संस्कृतेतरभाषा । तत्पर्य्यायः । अपभ्रंशः २ अपशब्दः ३ । इत्यमरटीका ॥

असंस्थान, क्ली, असंस्थितिः संस्थानाभावः । न संस्थानमसंस्थानमिति नञ्समासनिष्पन्नं ॥

असंहतः, पुं, (न संहन्यते येन । न + सम् + हन् + करणे क्त ।) व्यूहविशेषः । स तु सेनानां पृथग्वृत्तिः । इति रायमुकुटादयः ॥ (दण्डः । भोगः । मण्डलः ।) असमूहिते अहते च त्रि ॥

असंहत, त्रि, असंलग्नः । संहतो लग्नः न संहतः असंहतः इति नञ्समासनिष्पन्नः ॥

असकृत्, व्य, (न सकृत् । नञ्समासः ।) पुनः पुनः । वारं वारं । इत्यमरः ॥

("अनेकस्यैकधा साम्यमसकृद्व्याप्यनेकधा" ।
इति साहित्यदर्पणे ।
"अन्नप्रायेणासकृच्चैतान् गुणैश्च परिचोदयेत्" ।
इति मानवे ।)

असङ्कल्पित, त्रि, (न सङ्कल्पितः । नञ्समासः ।) सङ्कल्पाविषयः । यथा । विष्णुपुराणे ।

"कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिन् लयं ते त्वमलाः प्रयान्ति" ॥
इति मलमासतत्त्वं ॥

असङ्गुष्ठः, पुं, (न सङ्गुष्ठः ।) विस्तृतः पन्थाः । इति हेमचन्द्रः ॥

असङ्ख्यः, त्रि, सङ्ख्यारहितः । अगणनीयः । स तु द्विपरार्द्धादिः । इति हेमचन्द्रः ॥

असङ्कृतः, त्रि, (न सङ्कृतः । नञ्तत्पुरुषः ।) सङ्कृतिरहितः । नासङ्कृतं प्रयुञ्जीतेति प्रसिद्धिः ॥ यथा । वस्तुतस्तु जिज्ञासुमेकपुरुषं प्रति सङ्कृतमपि अतादृशमन्यं प्रति असङ्कृतमिति यं प्रतिपादयितुमानन्तर्य्याभिधानं तादृशाभिधानप्रयोजकतत्पुरुषीयजिज्ञासाजनकज्ञानविषयोऽर्थः तं प्रति सङ्कृतिरिति पुरुषविशेषनियन्त्रितं सङ्कृतित्वं वाच्यं । इत्यनुमितिग्रन्थीयगदाधरी ॥ अयुक्तः । यथा देवीपुराणे ।

"षष्ठ्यहये जन्मतिथिर्यदि स्यात्
पूज्या तदा जन्मभसंयुता च ।
असङ्कृता मेन दिनद्वयेऽपि
पूज्या परा या भवतीह यत्नात्" ॥

इति तिथ्यादितत्त्वं ॥ (असभ्यः । अशिक्षितः । यथा हितोपदेशे ।

"आसन्नमेव नृपतिर्भजते मनुष्यं
विद्याविहीनमकुलीनमसङ्कृतं वा" ॥)

असती, स्त्री, (न सती साध्वी । नञ्समासः ।) भ्रष्टा । व्यभिचारिणी तत्पर्य्यायः । पुंश्चली २ धर्षिणी ३ बन्धकी ४ कुलटा ५ इत्वरी ६ स्वैरिणी ७ पांशुला ८ । इत्यमरः ॥ दृष्टा ९ दुष्टा १० धर्षिता ११ । इति शब्दरत्नावली ॥ सङ्गा १२ निशाचरी १३ चपारङ्गा १४ । इति जटाधरः ॥ ("आबाल्यादसती सती सुरपुरीं कुन्ती समारोहयत्" । इति धर्म्मविवेके ।)

असतीसुतः, पुं, स्त्री, (असत्याः सुतः ।) व्यभिचारिणीपुत्रः । तत्पर्य्यायः । बान्धकिनेयः २ बन्धुलः ३ कौलटेरः ४ कौलटेयः ५ । इत्यमरः ॥

"बन्धुलः कौलटेरश्च कौलटेयोऽसतीसुतः ।
तथा बान्धकिनेयस्तु स्यात् कौलकेय इत्यपि ॥
अथ सत्यान्तु भिक्षुक्यां पुत्रो भवति यः पुनः ।
तत्र कौलटिनेयः स्यात्कौलटेयोऽपि स स्मृतः" ॥
इति शब्दरत्नावली ॥ अपि च । असतीसूनुः कौलटेरश्च बन्धुलः ।

"अपि बान्धकिनेयः स्यात्कौलटेयोऽतिभिक्षुकी ।
कुलटापि सती सा चेत् कौलटेयस्तदात्मजः ॥
अपि कौलटिनेयः स्यात्" । इति जटाधरः ॥

असतीसूनुः, पुं, (असत्याः सूनुः ।) कुलटापुत्रः । इति जटाधरः ॥

असत्, त्रि, (अस् + शतृ ततो नञ्समासः ।) अविद्यमानं । असाधुः । मूर्खः । ब्रह्मभिन्नवस्तु । इति वेदान्तः ॥ जड़वर्गः । यथा,—

"यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्व्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा" ॥
इति देवीमाहात्म्ये १ अध्यायः ॥ सत् चेतनवर्गः । असत् जड़वर्गः ।

"तस्य सर्व्वस्य या शक्तिः सा यदा त्वं तदा कथं" ।
स्तूयेत्यर्थः । इति सप्तशतीकायां नागोजीभट्टः ॥ * ॥
निष्फलं । यथा,—

"अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत् ।

असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह" ॥
इति श्रीभवद्गीतायां १७ अध्याये २८ श्लोकः ॥
निन्दितः। यथा,—
"असत्कुलप्रसूता या कान्तं विज्ञातुमक्षमा"।
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ॥ अनित्यं। यथा।
"अज्ञानन्तु सदसद्भ्यामनिर्व्वचनीयं"। इत्यादि
वेदान्तसारः ॥

असत्पथः, पुं, (न सन् पन्थाः।) मन्दपथः। तत्पर्य्यायः। कुपथः २ कापथः ३ अध्वः ४ दुरध्वः ५ अपथः ६ कदध्वा ७ विपथः ८ कुत्सितवर्त्म ९। इति शब्दरत्नावली ॥

असदध्येता, (ऋ) त्रि, (असत् निषिद्धशास्त्रमधीते इति। असत्+अधि+इङ्+तृच्।) असदध्ययनशाली। तत्पर्य्यायः। व्रजपः २। इति हेमचन्द्रः ॥

असदृग्, त्रि, (न सदृग्। नञ्तत्पुरुषः।) अतुल्यः। अनुपमेयः। दृश्यसदृशी श्रुतिरिति पुष्पदन्तः ॥ यथा। ब्रह्मवैवर्त्ते।
"वित्तशाठ्यमकुर्व्वाणः सम्यक्फलमवाप्नुयात्।
कुर्व्वाणो वित्तशाठ्यन्तु लभते ऽसदृशं फलम्" ॥
इति तिथ्यादितत्त्वं ॥

असद्ग्रहः, पुं, (असति अप्राप्ये वस्तुनि ग्रहः आग्रहः।) अवहट्टिः। इति चिकाण्डशेषः ॥ बालकादीनां खोइट आवदार इत्यादिभाषा।

असनं, क्ली, (अस्यते इति। अस+ल्युट्।) क्षेपणं। इति मेदिनी ॥ ("दलनिरसने विनियोगः"। इति भवदेवः।)

असनः, पुं, वृक्षविशेषः। पियाशाल इति ख्यातः। तत्पर्य्यायः। महासर्ज्जः २ सौरिः ३ बन्धूकपुष्पः ४ प्रियकः ५ बीजवृक्षः ६ नीलकः प्रियसालकः ८।
("प्रियविमानितमानवतीरुषां
निरसनैरसनैरहयार्थता"।
इति शिशुपाले।) अस्य गुणाः। कटुत्वं। उष्णत्वं। तिक्तत्वं। वातार्त्तिदोषगलदोषरक्तमयव्रणनाशित्वं। सारकत्वञ्च। इति राजनिर्घण्टः ॥ वृक्षभेदः। आसन इति ख्यातः। तत्पर्य्यायः। अजकर्णः २ वनेसर्ज्जः ३ महासर्ज्जः ४। इति रत्नमाला ॥ अस्य गुणाः। कफपित्तनाशित्वं। इति राजवल्लभः।
("बीजकः पीतसारश्च पीतपुष्पक इत्यपि।
बन्धूकपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः ॥
बीजकः कुष्ठवीसर्पश्वित्रमेहगुदकृमीन्।
हन्त्यश्मपित्तश्च लघुः केश्यो रसायनः"॥
इति भावप्रकाशेऽस्य पर्य्यायगुणौ कथितौ ॥)

असनपर्णी, स्त्री, (असनस्य पर्णमिव पर्णमस्याः।) वृक्षविशेषः। तत्पर्य्यायः। वातकः २ शीतकः ३ शीतलवातः ४ अपराजिता ५ शुक्लपर्णी ६। इत्यमरः ॥ शीतः ७ शीतकः ८ सनपर्णी ९। इति शब्दरत्नावली ॥ माराटी इति भरतः ॥ ओसान इति सारसुन्दरी ॥

असन, [त्] पुं, इन्द्रः। इति चिकाण्डशेषः ॥

असन्तुष्टः, त्रि, (न सन्तुष्टः। नञ्समासः।) सम्यक् तुष्टिरहितः। सन्तोषशून्यः। यथा,—
"असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः"।
इति चाणक्यं ॥

असन्नद्धः, त्रि, (न सम्यक् नद्धः स्वकार्य्यक्षमः।) समुद्यतः। प्रतिज्ञाभिमानी। दर्पितः। इति जटाधरः ॥ अकृतसन्नाहः ॥

असम्मानं, क्ली, मानहानिः। अमर्य्यादा। अनादरः। असाधुमानं। असच्च तत् मानञ्चेति कर्म्मधारयसमासनिष्पन्नं ॥

असभ्यः, त्रि, असभासत्। समानुपयुक्तः। असामाजिकः ॥ न सभ्यः असभ्य इति नञ्समासनिष्पन्नः। खलः। यथा,—
"अयन्वसभ्यस्तव जन्म नो गृहे
अत्यागृजांस्ते न्यवधीत् सुरेश्वर।
स तेऽवतारं पुरुषैः समर्पितं
श्रुत्वाधुनैवाभिसरत्युदायुधः"॥
इति श्रीभागवते १० स्कन्धे ३ अध्याये २० श्लोकः ॥ असभ्यः खलः। समर्पितं कथितं। इति श्रीधरस्वामी ॥

असमः, पुं, (नास्ति समो यस्य।) बुद्धः। इति शब्दरत्नावली ॥

असमः, त्रि, विषमः। अतुल्यः। यथा। "इत्येषा सहकारिप्रकृतिरसमा माया दुरन्नीतितो मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता"। इति कुसुमाञ्जलौ १ स्तवकः ॥

असमञ्जसं, क्ली, (न समञ्जसं युक्तियुक्तम्।) असङ्गतं। अनुपयुक्तं। तत्पर्य्यायः। दुर्जातं २ दुःसञ्जं ३। इति चिकाण्डशेषः ॥ ("अतिप्रणयादेतन्मयोक्तमसमञ्जसम्"। इति कथासरित्सागरे। (पुं) सगरराजज्येष्ठपुत्रः। यथा हरिवंशे।
"केशिन्यसूत सगरादसमञ्जसमात्मजम्"।)

असमयः, पुं, (अपक्वः समयः। नञ्समासः।) अकालः। दुःसमयः। यथा,—
"एतान् जनान्न सेवेत आधिसङ्घस्य दुर्ज्जयः।
सर्व्वं बोध्यसमये काले सर्व्वं ग्रसिष्यति" ॥
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥

असमर्थः, त्रि, (न समर्थः। नञ्समासः।) अशक्तः। दुर्ब्बलः। यथा। ब्रह्मवैवर्त्ते।
"उपवासासमर्थश्चेदेकं विप्रन्तु भोजयेत्।
तावद्धनानि वा दद्याद् यदभुक्तादिगुणं भवेत्"।
इति तिथ्यादितत्त्वं ॥

असमवायिकारणं, क्ली, (न समवायि कार्य्येण कारणेन वा सह एकस्मिन्नर्थे समवेतं कारणम्।) समवायिकारणासन्नकारणं। समवायिकारणे प्रत्यासन्नजनकं। यथा। घटं प्रति कपालद्वयसंयोगः। एतत्कारणं गुणः कर्म्म च। समवायिकारणे प्रत्यासन्न इत्या ये कारण इय। इति न्यायभाषा ॥ (एतत् कारणन्तु सर्व्वत्र द्रव्ये गुणः गुणे गुणः कर्म्म च। तदुक्तं भाषापरिच्छदे। "गुणकर्म्मसमवृत्ति ज्ञेयमत्राप्यसमवायिहेतुत्वम्"।)

असमानं, त्रि, (नास्ति समानो यस्य।) अतुल्यं। विजातीयं। सजातीयभिन्नं। यथा शङ्खः।
"समानार्थोचं प्रथमे प्रथमेन समाचरेत्।
असमानं द्वितीयेन धर्म्मराजवचो यथा" ॥
इति शुद्धितत्त्वं ॥

असमाप्तं, त्रि, (न समाप्तं। नञ्तत्पुरुषः।) समाप्तिरहितं। असम्पूर्णं। अनिष्पन्नं। यथा। स्मृतिः।
"असमाप्ते व्रते पूर्व्वे नैव कुर्य्याद्व्रतान्तरं"।
इति तिथ्यादितत्त्वं ॥

असमीक्ष्यकारी, [न्] त्रि, (समीक्ष्य विचिन्य न करोतीति। असमीक्ष्य+कृ+णिनि।) अविवेचनापूर्व्वककर्म्मकर्त्ता। तत्पर्य्यायः। जाल्मः २। इत्यमरः ॥ ("उचितमेवैतत् ममासमीक्ष्यकारिणः"। इति हितोपदेशे।)

असम्बद्धं, त्रि, (न सम्बद्धं परस्परान्वययुक्तं। नञ्समासः।) अनर्थकवाक्यं। तत्पर्य्यायः। अवद्धं २। इति जटाधरः ॥
("असम्बद्धकृतश्चैव व्यवहारो न सिध्यति"।
इति मनुः। विप्रकृष्टः। अनियमः। यथा भारते।
"असम्बद्धा महाराज! तान् निगृह्णन्ति ते गजाः"
इति ॥)

असम्मतः, त्रि, (न सम्मतः। नञ्समासः। अनभिमतः। तत्पर्य्यायः। प्रणाय्यः २। इति हेमचन्द्रः ॥
("असम्मतः कस्तव मुक्तिमार्गं
प्रनर्भवक्लेशभयात् प्रपन्नः"।
इति कुमारे।)

असम्मानं, क्ली, अमर्य्यादा। अपमानं। सम्यग्ज्ञानाभावः। न सम्मानं असम्मानमिति नञ्समासनिष्पन्नं ॥

असरुः, पुं, (अस+अरुः।) वृक्षविशेषः। इति शब्दचन्द्रिका ॥ कुकुरसोंका इतिख्यातः।

असहनः, पुं, स्त्री, (न सहनः। नञ्समासः।) शत्रुः। इति हेमचन्द्रः ॥ (अधीरः। असहिष्णुः। यथा,—
"कस्मात् प्राप्य तिरस्क्रियामसहनोऽप्यस्यादिति प्रस्तुते"। इति महावीरचरिते।
"प्रिया मुच्चत्यद्य स्फुटमसहना जीवितमसौ"।
इति रत्नावल्यां। क्षमाराहित्यम्। यथा, साहित्यदर्पणे।
"अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत्।
प्रागात्मयेऽप्यसहनं तत्तेजः समुदाहृतम्" ॥
इति ॥)

असह्यः, त्रि, (न सह्यः। नञ्तत्पुरुषः।) असहनीयः। असोढव्यः। सहनायोग्यः। यथा,—
"वरं रामशरात् सह्या न च वैभीषणं वचः।
असह्यं ज्ञातिदुर्व्वाक्यं मेधान्तरितरावत्"॥
इति महानाटके ॥ ज्ञातिदुर्व्वाक्यमित्यत्र दुर्व्वचो ज्ञातेरिति च पाठः ॥

असाधारणं, त्रि, (न साधारणं सामान्यधर्म्मयुक्तम्। नञ्समासः।) साधारणभिन्नं। असामान्यं। विशेषः। न्यायमते साध्यव्यापकीभूताभावप्रतियोगिहेतुः। यथा वह्निमान् जलत्वादित्यादिः। यथा। "यत्तु प्रयागे व्यहस्नाने क्रोडीकृते माधवसन्निधौस्नानादावसाधारणसङ्कल्पेन प्रवर्त्तथैव

प्रातःस्नानाचरणं" इति तिथ्यादितत्त्वं ॥ किञ्च "असाधारणशरीरव्यापारार्ज्जितं स्वविद्यया दातुमनिच्छन्न दद्यात्"। इति दायभागः ॥ अतुल्यं। इति शूद्रवर्गे साधारणशब्दार्थदर्शनात् ॥

असाध्यं, त्रि, (न साध्यं साधयितुमशक्यम्।) असाधनीयं। साधनायोग्यं। अशक्यं। असाधितव्यं। यथा,—

"सहजानि चिदोषाणि यानि चाभ्यन्तरे बलं।
त्रायन्तेऽपीह संग्रह्य तान्यसाध्यानि निर्दिशेत्"॥

इति भावप्रकाशः ॥ अपि च।

"य इदं प्रपठेन्नित्यं दुर्गानामशतात्मकं।
नासाध्यं विद्यते तस्य त्रिषु लोकेषु पार्व्वति"॥

इति विश्वसारतन्त्रे दुर्गाशतनामात्मकं स्तोत्रं ॥ ("साध्या याप्यत्वमायान्ति याप्यास्त्वासाध्यतां तथा। घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम्"। "अमर्म्मोपहिते देशे शिरासस्नायुवर्ज्जिते। विकारो योऽनुपर्य्येति तदसाध्यस्य लक्षणं" ॥ इति सुश्रुतः॥)

असाध्वी, स्त्री, (न साध्वी। नञ्समासः।) अपतिव्रता। यथा ज्योतिस्तत्त्वम्,—

"कन्यातुलाभ्रस्मिथुने च साध्वी
मेषेष्वसाध्वी धनवर्ज्जिता च।
निन्द्योऽपि लग्ने द्विपदांश इष्टः
कन्यादिलग्नेष्वपि नान्यभागः" ॥ इति।

असान्द्रं, त्रि, (न सान्द्रं निविड़ं। नञ्तत्पुरुषः।) अनिविड़ं। विरलं। इति जटाधरः ॥

असाम्प्रतं, त्र, (न साम्प्रतम् युक्तम्। नञ्तत्पुरुषः।) अयुक्तं। अनुचितं। तथा च कालिदासः।

"विषवृक्षोऽपि संवर्द्ध स्वयं छेत्तुमसाम्प्रतम्"।

इति। कुमारे २। ५५ ॥

("सम्प्रत्यसाम्प्रतं वक्तुमुक्तो मुषलपाणिना"।

इति माघे। "अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसाम्प्रतम्"। इति रघौ ८। ६०।)

असारः, पुं, (नास्ति सारो यस्य।) शरशलभः। इति शब्दचन्द्रिका ॥

असारं, त्रि, (नास्ति सारो यस्य।) सारराहितवस्तु। स्थिरांशशून्यं। तत्पर्य्यायः। फल्गु २। इत्यमरः ॥ निःसारं ३ निष्फलं ४। इति शब्दरत्नावली ॥ वाच्यं ५। इति जटाधरः ॥ (यथा—मनुसंहितायां ८। २०३।

"नान्यदन्येन संसृष्टरूपं विक्रयमर्हति।
न चासारं न च न्यूनं न दूरे न तिरोहितम्"।

"असारे खलु संसारे चीणि सारणि भावयेत्"। इति हितोपदेशे ॥

"निर्दग्धनमसाराणां लघुर्बज्रोऽतिगं नरः।"

इति माघे ॥

"बहूनामप्यसाराणां समवायो बलावहः।"

इति पञ्चतन्त्रे ॥

"धिगिमं देहभृतामसारताम्।" इति रघुवंशे ॥ "अतो विपरीतास्त्वसाराः" ॥ इति चरकः ॥)

असारं, क्ली, नास्ति सारो यस्य।) अगुरु। इति राजनिर्घण्टः ॥ (अगुरुशब्देऽस्य विशेषो ज्ञेयः ॥

असाक्षात्, अ, (न साक्षात्। नञ्तत्पुरुषः।) अप्रत्यक्षं। अदर्शनं। अगोचरं ॥ अतुल्यं। इति साक्षात् शूद्रार्थदर्शनात् ॥

असिः, स्त्री, (अस्यते अवगाहनेन पापानि दूरीकरोति या। अस + इन्।) नदीविशेषः। सा च काशीदक्षिणदिक्स्थिता। यथा।

"तस्मात् विश्वेश्वराच्चैव काशीवासेऽत्र कारणं।
असिश्च वरणा यत्र क्षेत्रस्यास्यान्तरे कृते ॥
वाराणसीति विख्याता तदारभ्य महामुने।
अस्यैव वरणायाश्च सङ्गमं प्राप्य काशिका ॥
वाराणसीह करुणामयदिव्यमूर्त्ते-
रुत्सृज्य यत्र तु तनुं तनुभृत् सुखेन।
विश्वेशदृङ्महसि यत् सहसा प्रविश्य
रूपेण तां वितनुता पदवीं दधाति ॥
जातो मृतो बहुषु तीर्थवरेषु ये त्वं
जन्तोर्न जातु भवगान्तिरभून्निमज्य।
वाराणसीति गदतीह मृतोऽमृतत्वं
प्राप्याधुना मम बलात् स्मरशासनः स्यात्" ॥

इति काशीखण्डे ३० अध्यायः ॥

असिः, पुं, (असतीति। अस दीप्तौ इनि।) अस्त्रभेदः। खाँड़ा तरवाल इत्यादि भाषा। तत्पर्य्यायः। खड्गः २ निस्त्रिंशः ३ चन्द्रहासः ४ ऋष्टिः ५ कौक्षेयकः ६ मण्डलाग्रः ७ करपालः ८ क्षुराग्रः ९ इत्यमरः ॥ प्रवालकः १० भद्रात्मजः ११ रिष्टः १२ ऋष्टिः १३ धाराविषः १४ कौक्षेयः १५ तरवारिः १६ तरवाजः १७ क्षुराग्रकः १८ करवालः १९ क्षुराणी २० शस्त्रः २१। इति शब्दरत्नावली ॥ विघसनः २२। इति त्रिकाण्डशेषः ॥

("पर्णशालामथ क्षिप्रं विक्षतासिः प्रविश्य सः।
वैरूप्यपौनरुक्त्येन भीषयां तामयोजयत्" ॥

इति रघुवंशे १२। ४० ॥

"स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा।
दृष्टगुल्माहते चापैरसिचर्म्मायुधैः स्थले ॥"

इति मनौ ७। १९२ ॥) तस्य स्तुतिर्यथा।

"असिर्विघसनः खड्गस्तीक्ष्णधारो दुरासदः।
श्रीगर्भो विजयश्चैव धर्म्मपालो नमोऽस्तु ते ॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा।
नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः ॥
हिरण्यश्च शरीरस्ते धाता देवो जनार्द्दनः।
पिता पितामहो देवस्त्वं मां पालय सर्व्वदा ॥
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः क्षुधोदरः।
भावशुद्धोऽमर्षशश्च अतितेजास्तथैव च ॥
इयं येन धृता स्त्रीणी हतश्च महिषासुरः।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः" ॥

इति रुद्रनन्दिकेश्वरपुराणीयदुर्गोत्सवपद्धतिधृतवाराहीतन्त्रं ॥

असिकं, क्ली, (असति दीप्यते यत्। अस्+इकन्।) अधरचिबुकयोर्म्मध्यभागः। इति हेमचन्द्रः ॥

असिक्निका, स्त्री, असिक्नी। दासी। इति जटाधरः ॥ ("मतोगवस्तूर्णमसिक्निकानां"। इति पाणिनिः।

असिक्नी, स्त्री, (न सिता शुक्लकृष्णा। छन्दसि कमेक इति तस्य कः नान्तत्वात् ङीप् च।) अदृङ्गान्तःपुरचारिणी प्रेष्या ॥ इत्यमरः ॥ नदी विशेषः। इति मेदिनी ॥ (दक्षपत्नी वीरणसुता। यथा हरिवंशे। "असिक्नीमावहत्पत्नीं वीरणस्य प्रजापतेः। सुतां सुतपसा युक्ताम्" इति ॥)

असिगण्डः, पुं, (अस्यते क्षिप्यते इति असिः क्षिप इत्यर्थः। असिः गण्डो यस्मिन्।) क्षुद्रोपधानं। इति जटाधरः ॥ छोटबालिश इति भाषा ॥

असितः, पुं, (न सितः शुक्लः। नञ्समासः।) कृष्णवर्णः। तद्विशिष्टे त्रि। (यथा पुष्पदन्ते ॥

"असितगिरिनिभं स्यात् कज्जलं सिन्धुपात्रम्"।
"चकाशे विनिविष्टेन स सन्थेव निशाऽसिता"।

इति रामायणे ॥) इत्यमरः ॥ ग्रहविशेषः। कृष्णपक्षः। इति हलायुधः ॥ (स्वनामख्यातः सूर्य्यवंशोद्भवो भरतपुत्रो राजा। यथा, रामायणे—

"भरतात् तु महातेजा असितो समजायत"।

स्वनामख्यातः कश्चित् व्यासशिष्यो मुनिः। यथा हरिवंशे।

"असितस्यैकपर्णा तु देवलस्य महात्मनः"।

पर्व्वतभेदः। यथा भारते,—

"तत्र पुण्यह्रदः ख्यातो मैनाकश्चैव पर्व्वतः।
बहुमूलफलोपेतस्त्वसितो नाम पर्व्वतः" ॥)

असिता, स्त्री, (न सिता। असित पलितयोः प्रतिषेधात् वर्णादनुदात्तादिति ङीप् तकारस्य ककारादेशश्च न।) नीलीवृक्षः। इति राजनिर्घण्टः ॥ या अदृङ्गा महादेवीभिः प्रेष्यते अन्तःपुरे च पुनः पुन चरति सा। इत्यमरटीकायां भरतः ॥ या अदृङ्गा युवती कृष्णकेशा प्रेष्या दासी अन्तःपुरे चरति सा इति सारसुन्दरी ॥ (स्वनामख्याता सर्व्वेश्या। यथा हरिवंशे।

"असिता च सुवाक्चैव सुदत्ता सुमुखी तथा"।)

असिताभ्रशेखरः, पुं, (असितः कृष्णवर्णः अभ्रो मेघ इव शेखरो यस्य।) बुद्धविशेषः। इति त्रिकाण्डशेषः ॥

असितार्चिः [स्] पुं, (असिता कृष्णा अर्चिः शिखा यस्य।) अग्निः। इति त्रिकाण्डशेषः ॥

असितालुः, पुं, (असितः आलुः।) नीलालुः। इति राजनिर्घण्टः ॥

असितोत्पलं, क्ली, (असितमुत्पलम्।) नीलोत्पलं। इति राजनिर्घण्टः ॥ (यथा चरकः।

"उत्पलानि कषायाणि पित्तरक्तहराणि च" ॥)

असिदंष्ट्रः, पुं, (असिरिव तीक्ष्णा दंष्ट्रा यस्य।) जलजन्तुविशेषः। मकर इति ख्यातः। इति शब्दरत्नावली ॥

असिदंष्ट्रकः, पुं, (असिदंष्ट्र + स्वार्थे कन्।) असिदंष्ट्रः। मकरः। इति त्रिकाण्डशेषः ॥

असिद्धं, त्रि, (न सिद्धम्। नञ्समासः।) अपक्वं। अखिन्नं। इति रत्नमाला ॥ सिद्धिरहितं ॥ ("स्वयमसिद्धः कथं परान् साधयेत्" इति न्यायः। न्यायते, आश्रयासिद्धत्वादिभिर्दोषैर्दुष्टो हेतुः। यथा, भाषापरिच्छेदे।

"अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासस्तु पञ्चधा" ॥)

असिद्धिः, स्त्री, (न सिद्धिः। नञ्समासः।) अनिष्पत्तिः। न्यायमते सा त्रिविधा। पक्षासिद्धिः १ यथा काञ्चनमयपर्व्वतो वह्निमान् इत्यादिः १। स्वरूपासिद्धिः २ यथा, पर्व्वतः काञ्चनमयवह्निमान् इत्यादिः २। व्याप्त्यासिद्धिः ३ यथा, पर्व्वतो वह्निमान् ज्वलत्वादित्यादिः ३। (यथा भाषापरिच्छेदे।

"आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतः त्रिधा॥
पक्षासिद्धिर्यत्र पक्षो भवेन्नास्तिमयो गिरिः।
ह्रदो ह्रदं धूमवत्त्वादाद्यासिद्धिरथापरा॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत्" ।)

असिधावः, पुं, (असिं धावति निर्म्मलं करोतीति। असि+धाव+अण्।) शस्त्रमार्ज्जकः। इति जटाधरः॥ शिकलकर इति भाषा।

असिधावकः, पुं, (असिधाव+स्वार्थे कन्।) असिधारकर्त्ता। शस्त्रमार्ज्जकः। इत्यमरः॥

असिधेनुः, स्त्री, (असिर्धेनुरिव यस्याः। असेर्धेनुसादृश्येन कुरिकाया लक्षत्यसादृश्यम्।) कुरिका। इति हलायुधः॥ कुरी इति भाषा।

असिधेनुका, स्त्री, (असिर्धेनुका इव यस्याः।) कुरिका। इत्यमरः॥

असिपत्रः, पुं, (इक्षुपक्षे, असिरिव तीक्ष्णं पत्रं यस्य।) इक्षुः। खड्गकोषः। नरकविशेषः। इति मेदिनी॥ गुण्डनाम तृणं। इति राजनिर्घण्टः॥

असिपत्रकः, पुं, (असिपत्र+कन्।) इक्षुः। इति त्रिकाण्डशेषः॥

असिपत्रवनं, क्ली, (असिरिव तीक्ष्णं पत्रं यस्य तादृशं वनं।) नरकविशेषः। "पत्रैर्यत्र विदार्य्यते"। इति मनुः॥ ("यस्त्विह वै निजपथादनापद्यपगतः पापरुचोपगतस्तत्समसिपत्रवनं प्रवेश्य कषया प्रहरन्ति तत्रासावितस्ततो धावमानः उभयतोधारैः क्षुरकल्पैस्तालवनासिपत्रैश्छिद्यमानसर्व्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्म्महा पापरुचानुगमनफलं भुङ्क्ते"। इति श्रीभागवते॥

"असिपत्रवनं नाम नरकं शृणु चापरम्।
योजनानां सहस्रं वै व्याप्तदग्रान्तृतावनिः॥
तप्ता सूर्य्यकरैस्तत्र कल्पकालाग्निदारुणैः।
प्रपतन्ति सदा तत्र प्राणिनो नरकौकसः॥
तस्मध्ये च वनं शीतं स्निग्धपत्रं विभाव्यते।
पत्राणि यत्र खड्गानि फलानि द्विजसत्तम"॥
इति मार्कण्डेयपुराणे।)

असिपुच्छकः, पुं, (असिरिव पुच्छो यस्य।) शिशुमारः। इति हारावली॥

असिपुत्रिका, स्त्री, (असेः पुत्रीव।) कुरिका। इति हलायुधः॥

असिपुत्री, स्त्री, (असेः पुत्रीव।) इत्यमरः॥ कुरिका। कुरी इति भाषा।

असिमेदः, पुं, (असिरिव मेदो निर्य्यासो यस्य।) विट्खदिरः। इति शब्दरत्नावली॥ (इदमेदशब्दोऽस्य गुणा ज्ञेयाः॥)

असिहेतिः, पुं, (असिर्हेतिः प्रधानास्त्रं यस्य।) खड्गधारी योद्धा। तत्पर्य्यायः। नैस्त्रिंशिकः २। इत्यमरः॥

असु, क्ली, (अस्यतेऽनेन। अस्+उ।) चित्तं। उपतापः। इत्युणादिकोषः॥

असुः, पुं, (अस्यन्ते इति। अस्+उ।) प्राणः पञ्चप्राणेषु बहुवचनान्तः। असवः। इत्यमरः॥ ("तेजस्विनः सुखमसूनपि संत्यजन्ति"। इति नीतिशतके। ६६ श्लोकः।)

असुखं, क्ली, (न सुखम्। नञ्समासः।) दुःखं। इति हेमचन्द्रः॥
(यथा मनुसंहितायां १२। १६।
"तौ धर्म्मं पश्यतस्तस्य पापं यातन्त्रितौ सह।
याभ्यां प्राप्नोति संक्लेशं प्रेत्येह च सुखासुखम्"॥
तत्रैव ४। ७०।
"न कर्म्म निष्फलं कुर्य्यान्नायत्यामसुखोदयम्")

असुधारणं, क्ली, (असूनां धारणं।) जीवनं। इत्यमरः॥

असुभृत्, त्रि, (असून् बिभर्त्तीति। असु+भृ+क्विप्।) प्राणी। जीवः। यथा। "वृतय इव स्वसन्त्यसुभृतो यदि तेऽनुविधा महदहमादयो ऽण्डमसृजन् यदनुग्रहतः"। इति श्रीभागवते दशमस्कन्धे ८७ अध्याये १४ श्लोकः॥

असुरः, पुं, स्त्री, (अस्यति देवान् क्षिपति इति। अस+उरन्। यद्वा न सुरः विरोधे नञ्तत्पुरुषः। यद्वा नास्ति सुरा यस्य सः। सूर्य्यपक्षे असति दीप्यते इति उरन्।) सुर विरोधी। स तु कश्यपात् दितिगर्भजातः। तत्पर्य्यायः। दैत्यः २ दैतेयः ३ दनुजः ४ इन्द्रारिः ५ दानवः ६ शुक्रशिष्यः ७ दितिसुतः ८ पूर्व्वदेवः ९ सुरद्विट् १० देवरिपुः ११ देवारिः १२ इत्यमरः॥
("सुराः प्रतिग्रहाद्देवाः सुरा इत्यभिविश्रुताः।
अप्रतिग्रहणात्तस्य दैतेयाश्चासुराः स्मृताः"॥
इति रामायणे।) सूर्य्यः। इति मेदिनी। राक्षः इति ज्योतिःशास्त्रम्॥

असुररिपुः, पुं, (असुराणां रिपुः।) विष्णुः। इति शब्दरत्नावली॥

असुरसा, स्त्री, (न विद्यते सु शोभनो रसो यस्याः।) वर्व्वरी। इति रत्नमाला। वावुइ तुलसी इति भाषा। (वर्व्वरीशब्देऽस्या विशेषो ज्ञातव्यः॥)

असुरा, स्त्री, रात्रिः। रासिः। इति मेदिनी॥

असुराङ्गं, क्ली, (असुरस्याङ्गमाङ्गं यस्य।) कांस्यं। इति हेमचन्द्रः॥

असुरी, स्त्री, (अस्+उरन्+ङीष्।) रात्रिका। इत्यमरटीकायां भरतादयः। राई सर्षा इति भाषा॥ असुरपत्नी॥ [दरः। इत्यमरः।

असूर्त्तरं, क्ली, (न+सूर्त्त+ल्युट्।) अवज्ञा। अनादरः। इत्यमरः॥

असूया, स्त्री, (असू+न असूयायाम्। असू+यक्+अ।) गुणेषु दोषाविष्करणं। परगुणे दोषारोपणं इत्यमरः॥ (यथा साहित्यदर्पणे।
"असूयान्यगुणार्द्दीनामौद्धत्यादसहिष्णुता।
दोषोद्घोषभ्रूविभेदवक्राक्षोक्तिकृतादिकृत्"॥
इयञ्च "हर्षासूया विषादाः"। इत्यादिना व्यभिचारिभावमध्येऽपि परिगणिता॥)

असूर्य्यम्पश्या, स्त्री, (सूर्य्यमपि न पश्यति या। न+सूर्य्य+दृश्+खश्। सत्यपि सूर्य्यदर्शने प्रयोगो भवति। यदा तु सूर्य्यदर्शनाभावमात्रम् सूर्य्येतरस्य चन्द्रादेर्दर्शनं वा विवक्षितं तदा खश् न भवति।) राजपत्न्यादिः। इति कलापधारिणी॥
("असूर्य्यम्पश्यरूपा त्वं किमभीरारार्य्यसे"। इति भट्टिः॥)

असूर्त्तरम्, असूर्त्तरं, क्ली, (सूर्त्त आदरे तस्मात् ल्युट् ततो नञ्समासः।) अनादरः। इत्यमरः।

असृक्, [ज्] क्ली (न+सृज्+क्विप्।) रक्तम्। इत्यमरः॥ ("पानमप्यसृजः क्षिप्रं खपीड़ायै जलौकसाम्"। इति दृष्टान्तशतकम्।) कुङ्कुमं। इति राजनिर्घण्टः॥ विष्कुम्भादि सप्तविंशति योगान्तर्गतषोड़शयोगः॥ तत्र जातफलं।
"धनी कुरूपः कुमतिर्दुरात्मा
विदेशगामी रुधिरप्रकोपः।
महाप्रलोभी पुरुषो बलीया-
नसृक् प्रसूतौ किल यस्य जन्तोः"।
इति कोष्ठीप्रदीपः। रक्तार्थे यथा, वैद्यकं॥
"रसासृङ्मांसमेदोऽस्थि मज्जशुक्राणि धातवः"।
"तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते"।
"वातासृक् पूर्व्वलक्षणं।" इति माधवकरः॥
"विदाह्यन्नं विरुद्धञ्च तत्तच्चासृक् प्रदूषणं।
भजतां विधिहीनञ्च स्वप्नाजागरमैथुनं॥
प्रायेण सुकुमाराणामचङ्क्रमणशीलिनां।
अभिघातादयुद्धेच्च शृणामसृजि दूषिते॥
वातैः शीतैर्वायुरुद्धः कुद्धो विमार्गगः।
तादृग्नासृजा रुद्धः प्राक् तदेव प्रदूषयेत्"॥
इति वाभटः॥
"असृजः श्लेष्मजस्यापि यः प्रसादः परो मतः"।
"तदवष्टादशात्काले वर्त्तमानमसृक् पुनः।
जरापक्वशरीराणां याति पञ्चाशतः क्षयं॥
मदमूर्च्छा श्रमार्त्तानां वातविण्मूत्रसङ्गिनां।
निद्राभिभूतभीतानां शृणां नासृक् प्रवर्त्तते"॥
इति सुश्रुतः॥)

असृक्करः, पुं, (असृक् शोणितं करोतीति। असृज्+कृ+ट।) शरीरस्थधातुः। इति हेमचन्द्रः॥ (भुक्तस्यान्नादिकस्य प्रथमं रसरूपता, रसस्य परिपाकतो रक्तरूपता इति वैद्यके प्रसिद्धिः। "रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते"॥ इति सुश्रुतः॥)

असृक्पः, पुं, स्त्री, (असृक् पिबतीति। असृज्+पा+ड) राक्षसः इति हेमचन्द्रः॥

अस्रधरा, स्त्री, (अस्रक् शोणितं धरतीति। अस्रक् + धृ + अच्।) चर्म्म। इत्यमरटीकायां भरतादयः॥

अस्रपाटी, स्त्री, पुं, (न + स्रप् + काट्।) रक्तधारा इत्यमरटीकासारसुन्दरी।

असेचनकं, त्रि, (न सिच्यते मनो यस्मिन्। न + सिच् + ल्युट्। संज्ञायां कन्।) यस्य दर्शनात् चक्षे रन्तो नास्ति तत्। अत्यन्तप्रियदर्शनं। इत्यमरः। याहाके देखिया चक्षिर शेष ना हय एमन वस्तु। ("नयनयुगमेचनकं मानसकृत्यापि दुष्प्रापं"। इति साहित्यदर्पणे॥)

असौम्यस्वरः, त्रि, (असौम्यः कठोरः स्वरो यस्य।) काकवत् मन्दस्वरयुक्तः। तत्पर्य्यायः। असरः २। इत्यमरसिंहः॥

असौष्ठवं, क्ली, (न सौष्ठवं। नञ्समासः) अप्रशंसनीयत्वं। अशोभनत्वं। अनातिश्रेष्यं। नञ् पूर्ब्बात् सुकृशब्दात् भावे ष्णप्रत्ययः॥ ("गमनमलसं शून्या दृष्टिः शरीरमसौष्ठवं"। इति मालतीमाधवे। अलङ्कारशास्त्रे स्मरदशाभेदः। यथा साहित्यदर्पणे। "असौष्ठवं मलापत्तिलाघस्तु विरहज्वरः"॥)

अस्तः, पुं, (अस्यन्ति रविकिरणा यस्मिन्। अस् + त।) अस्ताचलः। पश्चिमाचलः। तत्पर्य्यायः। चरमाद्रिः २। इत्यमरमेदिन्यौ॥
("विडम्बयत्यस्तनिमग्नसूर्य्यम्"। इति रघुः।
"सहस्रशिखरश्चैव नानातीर्थसमाकुलम्।
चकार रत्नसंकीर्णं भूयोऽस्तं नाम पर्व्वतं"॥
इति हरिवंशे।)
तस्मात् सप्तमस्थानं। इति दीपिका॥

अस्तं, त्रि, (अस् + क्त।) क्षिप्तं। अवसानप्राप्तं। इति मेदिनी॥ ("धृतिरपास्तसंज्ञा मतिः"। इति मालतीमाधवे॥ "निरस्तगाम्भीर्य्यमपास्तधैर्य्यं"। इति माघे॥ सूर्य्यास्तगमनं। "करजाल मस्तसमयेऽपि सताम्"। इति माघे॥
तथा कुमारसम्भवे २। २३।
"यमोपि विलिखन् भूमिं दण्डेनास्तमितत्विषा।
कुरुतेस्मिन्नमोघेपि निर्व्वाणालातलाघवम्"॥)

अस्तं, क्ली, भयुः। इति हेमचन्द्रः॥

अस्तकः, पुं, (अस्त + कन्।) मोक्षः। निर्व्वाणं। इति त्रिकाण्डशेषः॥

अस्तम्, अ, (अस् + तम्।) अदर्शनं। इत्यमरः॥ (राज्यमस्तमितेश्वरम्" इति रघुः॥)

अस्तमती, स्त्री, (अस्तं यातीति। अस्तम् + यत् + अच् + गौरादित्वात् ङीष्।) शालपर्णी वृक्षः। इति शब्दरत्नावली॥

अस्ताघः, त्रि, (अस्तं गतं अघं मालिन्यं यस्मात्।) अगाधः। अतिगभीरः। इति हेमचन्द्रः।

अस्ताचलः, पुं, (अस्ताय अचलः। यद्वा अस्तः पश्चिमोऽचलः) अस्तगिरिः। पश्चिमाचलः। इति शब्दरत्नावली। ("अस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि"। इति हितोपदेशः॥)

अस्ताद्रिः, पुं, (अस्तः पश्चिमोऽद्रिः पर्व्वतः।) अस्ताचलः। इति त्रिकाण्डशेषः॥

अस्ति, व्य, (अस् + स्तिक्) विद्यमानता। तत्पर्य्यायः सत्त्वं २। इत्यमरः॥ अस्धातोस्तिपि क्तेऽप्येतद्रूपं॥ (यथा चानन्दे।
"अतिथिर्बालकश्चैव राजा भार्य्या तथैव च।
अस्ति नास्ति न जानन्ति देहि देहि पुनः पुनः"॥)

अस्तिमान्, त्रि, (अस्ति विद्यमानमिति विद्यते यस्य अस्ति + मतुप्।) धनी इति हेमचन्द्रः॥

अस्त्र, व्य, (अस् + तुन्।) अङ्गीकारः। असूया। पीड़ा। इति विश्वमेदिन्यौ। असधातोः तुपि क्तेऽप्येतद्रूपं स्यात्॥

अस्थानं, क्ली, (न स्थानं। नञ्समासः।) भर्त्सनं। निन्दा। इति त्रिकाण्डशेषः॥

अस्त्रं, क्ली, (अस्यते क्षिप्यते यत्। अस् + ष्ट्रन्।) प्रहारयोग्यद्रव्यमात्रं। हातियार इति भाषा। तत्पर्य्यायः। आयुधं २ प्रहरणं ३ शस्त्रं ४। इत्यमरः॥ खड्गः ५। धनुः ६। इति मेदिनी। क्षेपनयोग्यवाणादि। इति रायमुकुटः॥ ("प्रयुक्तमप्यस्त्रमितो वृथा स्यात्"। "प्रत्याहृतास्त्रो गिरीशप्रभावात्"। इति च रघुः॥) तन्निरूपणं यथा,—
"दण्डसाध्यं यतो राज्यं स दण्डः शस्त्रसंश्रितः।
अस्त्राणि भूमिपालानां निरूप्यन्ते ततः क्रमात्"॥
अथ गणना।
"खड्गचर्म्म धनुर्व्वाणौ शूलभल्लौ तथापरौ।
अर्द्धचन्द्रश्च नाराचः शक्तियष्टी तथा परे॥
परश्वधक्रशूले च परिघश्चैवमादयः।
अस्त्रभेदाः समुद्दिष्टाः श्रीमद्भोजमहीभुजा"॥
वात्स्यन्तु।
"अस्त्रन्तु द्विविधं प्रोक्तं निर्म्मायं मायिकन्तथा।
खड्गादिकन्तु निर्म्मायं मायिकं दहनादिकं।
दहनोऽथ जलं काष्ठं लोष्ट्रं शूलादयस्तथा।
तप्ततैलादिकश्चैव मायिकस्यास्त्रमुच्यते॥
खड्गादीनान्तुगणना पूर्ब्बमेव निदर्शिता।
अस्त्रात्मनैव निर्द्दिष्टः कवचादिरपीष्यते"॥
इति युक्तिकल्पतरुः॥ *॥
खड्गचर्म्मादि परीक्षा तत्तच्छब्दे द्रष्टव्या॥

अस्त्रकण्टकः, पुं, (अस्त्रं कण्टक इव। वाणास्त्रस्य कण्टकाकृतित्वात्।) वाणः। इति त्रिकाण्डशेषः॥

अस्त्रकारकः, पुं, (अस्त्राणां कारकः।) अस्त्रनिर्म्माता। शस्त्रनिर्म्मायकः। आयुधकारः। अस्त्रकारी॥

अस्त्रचिकित्सकः, पुं, (अस्त्रेण चिकित्सतीति। अस्त्र + कित् + स्वार्थे सन् + ण्वुल्।) शस्त्रवैद्यः॥
("छेद्याद्यैर्व्रणभिषजो यः स्नेहादिषु च कर्म्मसु"। इत्यादि सुश्रुतः॥)

अस्त्रजित्, क्ली, (अस्त्रं अस्त्राघातजं व्रणादिकं जयति निवारयति। अस्त्र + जि + क्विप्।) वृक्षविशेषः। कवाट् वेटु इति ख्यातं। कवाड़वटुया इति केचित्। अस्य पर्य्यायः। कवाटवल्कशब्दे द्रष्टव्यः। अस्त्रजित् इति च पाठः। इति रत्नमाला॥

अस्त्रमार्ज्जः, पुं, (अस्त्रं मार्ष्टि। अस्त्र + मृज् + अण्।) अस्त्रमार्ज्जकः। शानकरः। तत्पर्य्यायः। शस्त्रमार्ज्जः २। असिधावः ३। असिधावकः ४। इति शब्दरत्नावली॥

अस्त्रसायकः, पुं, नाराचास्त्रं। समुदयलौहमयबाणः। इति शब्दमाला॥

अस्त्रागारं, क्ली, (अस्त्राणामागारं।) अस्त्रशस्त्रगृहं। सेलाखाना इति पारस्यभाषा। तत्पर्य्यायः। आयुधागारं २। यथा,—
"स्थापना जातितत्त्वज्ञः सततं प्रतिजाग्रता।
राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः"॥
इति मात्स्ये १८९ अध्यायः॥

अस्त्रागारः, पुं, अस्त्रशस्त्रगृहं। सेलाखाना इति भाषा॥

अस्थागं, त्रि, (अस्थामस्थितिं गच्छति प्राप्नोतीति। अस्था + गम + ड।) अगाधं। अतिगभीरं। इति हेमचन्द्रः॥

अस्थाघं, त्रि, (अस्थामस्थितिं हन्तीति। अस्था + हन + अप्।) अतलस्पर्शं। इति हेमचन्द्रः॥

अस्थानं, त्रि, (नास्ति स्थानं प्राशस्त्यं यत्र) अतलस्पर्शं। इति जटाधरः॥ मन्दस्थले क्ली॥ ("अस्थाने पतितामतीवमहतामेतादृशी स्याद्गतिः"। इति नीतिप्रबन्धे।)

अस्थायं, त्रि, अगाधं। स्थीयते यत्रेत्यधिकरणवाचे घञि कृते पश्चादस्तादयन्प्रत्यये स्थायं ततो न स्थायमस्थायमिति नञ्समासनिष्पन्नं। न सम्भवति स्थायः स्थितिर्यत्र इति केचित्॥

अस्थायी, [न्] त्रि, स्थितिरहितः। नश्वरः। स्थातुं शीलमस्येति शीलार्थे णिनि स्थायी, न स्थायी अस्थायीति नञ्समासनिष्पन्नः॥

अस्थारं, त्रि, (अस्थामस्थितिं राति। अस्था + रा + ड।) अतलस्पर्शं। अगाधं। इति शब्दरत्नावली॥

अस्थावरं, क्ली, स्थावरेतरद्रव्यं। जङ्गमवस्तु। न स्थावरं अस्थावरं इति नञ्समासनिष्पन्नं॥

अस्थावरं, त्रि, (न स्थावरम्। नञ्समासः।) स्थावरेतरद्रव्यं। जङ्गमवस्तु। इति स्मृतिः॥

अस्थि, क्ली, (अस्यते क्षिप्यते यत्। अस् + क्थिन्।) शरीरस्थसप्तधात्वन्तर्गतधातुविशेषः। हाड़ इति भाषा। तत्पर्य्यायादि शरीरशब्दे द्रष्टव्यं॥ तत्पर्य्यायः। कीकसं २ कुल्यं ३ मेदोजं ४। इत्यमरादयः॥ (अस्थिस्वरूपाद्युक्तं भावप्रकाशे।
"मेदो यत् स्वाम्निगा पक्वं वायुना चातिशोषितं।
तदस्थिसंज्ञां लभते स सारः सर्व्वविग्रहे॥
अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः।
अस्थिसारैस्तथा देहा ध्रियन्ते देहिनां ध्रुवं॥
तस्मादस्थिविनाशेषु त्वक्सारेषु शरीरिणाम्।
अस्थीनि न विनश्यन्ति सारा एतानि सर्व्वथा"॥
"मेदसोऽस्थि ततो मज्जा मज्जतः शुक्रसम्भवः"॥
इति सुश्रुतः॥
त्रीणि सप्तशतान्यस्थिशतानि वेदवादिनो भाषन्ते। शल्यतन्त्रेषु त्रीण्येवशतानि। तेषां सविंशमस्थिशतं शाखासु। सप्तदशोत्तरं शतं कोष्ठे पार्श्वपृष्ठोदरोरसु। ग्रीवां प्रत्यूर्द्धं त्रिषष्टिः। एवं

अस्थां त्रीणि शतानि पूर्य्यन्ते ॥
एकैकस्यान्तु पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश । तलकूर्चगुल्फसंश्रितानि दश । पार्ष्ण्यामेकं । जङ्घायां द्वे । जानुन्येकं । एकमूराविति । त्रिंशदेवमेकस्मिन् सक्थीनि भवन्ति । एतेनेतर सक्थिबाहू च व्याख्यातौ ॥ श्रोण्यां पञ्च तेषां गुदभगलिंगवृषणेषु चत्वारि । त्रिकसंश्रितमेकं । पार्श्वे षट्त्रिंशदेवमेकस्मिन् हितीयेऽप्येवं । एष्ठे त्रिंशत् । अष्टावुरसि । द्वे अक्षकसंज्ञे । ग्रीवायां नवकं । कण्ठनाड्यां चत्वारि । द्वे हन्वोः । दन्ता द्वात्रिंशत् । नासायां त्रीणि । एकं तालुनि । गण्डकर्णशङ्खेष्वेकैकं । षट् शिरसि ॥ एतानि पञ्चविधानि भवन्ति । तद्यथा ।
कपाल-रुचक-तरुण-वलय-नलकसंज्ञानि । तेषां जानुनितम्बांसगण्डतालुशङ्खशिरस्सु कपालानि । दशनास्तु रुचकानि । ग्राह्यकर्णग्रीवाद्यिकोषेषु तरुणानि । पाणिपादपार्श्वपृष्ठोदरोरस्सु वलयानि । शेषाणि नलकसंज्ञानि ॥
"मांसान्यत्रनिबन्धानि सिराभिः स्नायुभिस्तथा । अस्थीन्याहुस्तथा ज्ञात्वा नश्यीर्य्यन्ते यतन्ति वा"॥
इति च सुश्रुतः ॥) वीजं । इति रायमुकुटः वैद्यकञ्च ॥ आँटी इति भाषा ।

अस्थिकुण्डं, क्ली, (अस्थां कुण्डम् ।) आस्यपूर्णनरकुण्डविशेषः । यथा,—
"पितृणां यो विशुद्धपदे पिण्डं नैव ददाति च ।
स च तिष्ठत्यस्थिकुण्डे खलोमाब्दं महेश्वरि" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥

अस्थिकृत्, पुं, (अस्थि करोति यः । अस्थि + कृ + क्विप् ।) शरीरस्थमेदो धातुः । इति हेमचन्द्रः ॥ (मेदसोऽस्थि । इति सुश्रुतः ।)

अस्थिजः, पुं, (अस्थ्नो जायते इति । अस्थि + जन + ड ।) मज्जा । इति राजनिर्घण्टः ॥ (मज्जशब्देऽस्य गुणादयो द्रष्टव्याः ।)

अस्थितुण्डः, पुं, स्त्री, (अस्थीव दारुवं तुण्डं यस्य ।) पक्षी । शब्दमाला ॥ [इति हेमचन्द्रः ॥

अस्थिधन्वा, [न्] पुं, (अस्थिमयं धनुर्यस्य ।) शिवः ।

अस्थिपञ्जरः, पुं, (अस्थि पञ्जर इव ।) शरीरास्थिसमूहः । तत्पर्य्यायः । करङ्कः २ कङ्कालं ३ । इति हेमचन्द्रः ॥

अस्थिभक्षः, पुं, स्त्री, (अस्थि भक्षयति । अस्थि + भक्ष + अच् ।) कुक्कुरः । इति हारावली । (पक्षिविशेषः । हाड़गिला इति भाषा ।)

अस्थिभुक् [ज्] पुं, स्त्री, (अस्थि भुङ्क्ते इति । अस्थि + भुज् + क्विप् ।) कुक्कुरः । इति हेमचन्द्रः ॥

अस्थिमाली, [न्], पुं, (अस्थिमाला विद्यते यस्य अस्थिमाला + इन्) शिवः । इति हेमचन्द्रः । ("मूलहस्योऽस्थिमाली" इति शिवशतके ।)

अस्थिरः, त्रि, (न स्थिरः । नञ्तत्पुरुषः ।) चञ्चलप्रकृतिः । तत्पर्य्यायः । सङ्गसुक्रः २ । इत्यमरः । अनिश्चितः । इति स्वामी ॥
("लुब्धः क्रूराऽवशोऽसत्यः प्रमादी भीरुरस्थिरः" ॥ इति हितोपदेशे ।)

अस्थिरमतिः, त्रि, (अस्थिरा मतिर्यस्य ।) चञ्चलबुद्धिः । यथा । "विक्रान्तं कुलमुख्यमस्थिरमतिं वित्तेश्वरं साक्षिराः" । इति ज्योतिस्तत्त्वे दिग्रहयोगफलं ॥

अस्थिरविभूतिः, स्त्री, (अस्थिरा विभूतिः ।) चञ्चलैश्वर्य्यं । यथा । "अस्थिरविभूतिमैत्रं चलमटनं स्खलितनियममपि चरभे" । इति ज्योतिस्तत्त्वे राशिफलं ॥

अस्थिविग्रहः, पुं, (अस्थिसारो विग्रहो यस्य ।) भङ्गिनामकशिवसङ्घचरः । इति हेमचन्द्रः ॥

अस्थिशृङ्खला, स्त्री, (अस्थ्नां शृङ्खला योजनकारणम् ।) ग्रन्थिमान् वृक्षः । इति राजनिर्घण्टः ॥ (हाड़जोड़ा इति भाषा । यथा भावप्रकाशः ॥
"काण्डं त्वग्विरहितं मस्थिशृङ्खलाया
मार्द्धार्द्धं दिदलमकक्षुकं तदर्द्धम् ।
संपिष्टं सुतनु ! ततस्तिलस्य तैले
संपक्वं वटकमतीव वातहारि"॥)

अस्थिसंहारः, पुं, (अस्थीनि संहरति योजयति । अस्थि + सं + हृ + अण् ।) वृक्षविशेषः । हाड़जोड़ा इति भाषा । तत्पर्य्यायः । वज्रवल्ली २ ग्रन्थिमान् ३ कुलिशं ४ अमरः ५ । इति रत्नमाला ॥ हस्तिशुण्डी ६ वनालिका ७ । इति हारावली । अस्य गुणाः । वलास्थिभग्नहितकारित्वं । वायुनाशित्वञ्च । इति राजवल्लभः ॥ यथा,—
"ग्रन्थिमानस्थिसंहारी वज्रवल्ली चास्थिशृङ्खला ।
अस्थिसंहारकः प्रोक्तो वातश्लेष्महरो ऽस्थियुक् ॥
उष्णः सरः कृमिघ्नश्च दुनामघ्नो ऽस्थिरोगजित् ।
रूक्षः स्वादुर्गुरुर्ज्ञेयः पाचनः पित्तलः स्मृतः ॥
काण्डं त्वग्विरहित मस्थिशृङ्खलाया
मार्द्धार्द्धं दिदलमकक्षुकं तदर्द्धं ।
संपिष्टं सुतनु ततस्तिलस्य तैले
संपक्वं वटकमतीव वातहारि" ॥
इति भावप्रकाशः ॥
("अस्थिभग्नेऽस्थिसंहारो हितोवल्योऽनिलापहः" इति वैद्यकद्रव्यगुणाः ।)

अस्थिसंहारी, स्त्री, (अस्थीनि संहरति या । अस्थि + सम् + हृ + अण् + स्त्रियां ङीप्) ग्रन्थिमान् वृक्षः । इति राजनिर्घण्टः ॥ (अस्थिसंहारशब्देऽस्य गुणा ज्ञातव्याः ।)

अस्थिसारः, पुं, (अस्थ्नः सारः पाकपरिणामः) मज्जा । इति राजनिर्घण्टः ॥

अस्थिस्नेहसङ्घकः, पुं, (अस्थ्नः स्नेहस्तस्य सङ्घकः ।) मज्जा । इति राजनिर्घण्टः ॥

अस्थैर्य्यं, क्ली, अस्थिरता । स्थिरस्य भावः इत्यर्थे ष्यञ्प्रत्यये स्थैर्य्यं न स्थैर्य्यमस्थैर्य्यमिति नञ्समासेन निष्पन्नं ॥ ("अस्थैर्य्येण विभूतयोऽप्युपहता यस्यं न किं केन वा" । इति वैराग्यशतकम् ॥ २९ श्लोकः ।)

अस्थिखदारु, क्ली, (अस्थिवं कठोरं दारु ।) देवकाष्ठं । देवदारुभेदः । इति राजनिर्घण्टः ॥

अस्पष्टं, त्रि, (न स्पष्टम् । नञ्तत्पुरुषः ।) अव्यक्तं अस्फुटं । यथा । स्निग्धं । अस्पष्टं । इति मुग्धबोधव्याकरणं ॥

अस्पृहा, स्त्री, (न स्पृहा । नञ्समासः ।) इच्छाभावः । यथा,—
"यथोत्पन्नेन सन्तोषः कर्त्तव्यो ऽत्यल्पवस्तुना ।
परस्याचिन्तयित्वार्थं सास्पृहा परिकीर्त्तिता" ॥
इत्येकादशीतत्त्वं ॥ (नास्ति स्पृहा यस्येति वाक्ये त्रि, स्पृहा रहितः । उदासीनः ।)

अस्फुटं, त्रि, (न स्फुटम् । नञ्समासः ।) अस्पष्टं । अव्यक्तं । स्निग्धवाक्यं । इति हेमचन्द्रः ॥

अस्फुटवाक्, [च्] त्रि, (अस्फुटा वाक् यस्य ।) अस्पष्टवक्ता । तत्पर्य्यायः । लोहलः २ । इत्यमरसिंहः ॥

अस्मद्, त्रि, आत्मवाची सर्व्वनामशब्दः । अस्य रूपं यथा । अहं, आमि । आवां, आमरा दुइ । वयं, आमरा अनेक । इत्यादि व्याकरणं ॥ एकविंशतिविभक्तिषु तस्य रूपाणि यथा । अहं १ आवां २ वयं ३ । १ । मां ४ आवां ५ अस्मान् ६ । २ । मया ७ आवाभ्यां ८ अस्माभिः ९ । ३ । मह्यं १० आवाभ्यां ११ अस्मभ्यं १२ । ४ । मत् १३ आवाभ्यां १४ अस्मत् १५ । ५ । मम १६ आवयोः १७ अस्माकं १८ । ६ । मयि १९ आवयोः २० अस्मासु २१ । ७ । एतानि त्रिषु लिङ्गेषु समानानि हितीया-चतुर्थी-षष्ठीनां एकवचन-द्विवचन-बहुवचनविभक्तिषु तस्य रूपान्तराणि यथा । हितीयैकवचने मा । चतुर्थी-षष्ठ्योरेकवचने मे । आसां द्विवचने नौ । आसां बहुवचने नः । श्लोकपादवाक्यादौ एतानि रूपाणि न स्युः । च वा हा ह एव शब्दयोगे अदर्शनार्थदृश्यर्थधातुयोगे च न स्युः । इति व्याकरणं ॥

अस्मन्तं, क्ली, अश्मन्तं । चुल्ली । इति रायमुकुटः ॥ उनान आखा इति भाषा ॥

अस्त्रः, पुं, (अस्यते क्षिप्यते यत् । अस् + रक् ।) कोशः । केशः । इत्यमरः ॥

अस्त्रं, क्ली, (अस्यते क्षिप्यते यत् । अस् + रन् ।) रक्तं । असृ । इत्यमरः ॥ (रक्तार्त्ते यथा,—
"पिपासादाहपित्तास्रयुक्तं पित्तज्वरं जयेत्" ।
इति शार्ङ्गधरः ॥
"क्षीणेऽस्रे मधुराकाङ्क्षा मूर्च्छा च त्वचि रूक्षता ।
स्नेहित्वञ्च सिराणां स्यादातादुन्मार्गगामिता" ।
इति भावप्रकाशः ॥ "असृक्स्राविणो विद्वा" इति । 'असृग्दरी बलिनोऽप्यसृं न प्रस्रात् स्रावयेत्परं" ।
इति वाभटः ॥ * ॥ नेत्रजलार्थे यथा,—
"कुर्य्यात्सायं शिराव्यधं तेनास्यूर्द्धीक्षणात्रमं" ।
इति वाभटः ॥ * ॥ आलस्यनयने साक्षे, इति धरकः ॥)

अस्त्रकण्ठः, पुं, (अस्त्रं कण्ठे यस्य ।) वायसः । इति हारावली ॥

अस्त्रखदिरः, पुं, (अस्त्रवर्णः खदिरः ।) रक्तखदिरवृक्षः । इति राजनिर्घण्टः ॥ (खदिरशब्देऽस्यगुणादयो ज्ञेयाः ॥)

अस्त्रजं, क्ली (अस्त्रात् रक्तात् परिपाकेन जायते यत् । अस्त्र + जन् + ड ।) मांसं । इति राजनिर्घण्टः ॥ (मांसशब्देऽस्यविशेषो ज्ञातव्यः ॥)

अस्वपः, पुं, स्त्री, (अस्वं पिबतीति। अस्व + पा + ड।) राक्षसः। इत्यमरः॥ ("द्विरागमं लघुभ्रुवे चरेऽस्वपे मृदुडुनि"। इति मुहूर्त्तचिन्तामणिः। जलौकाः।)

अस्वपत्नकः, पुं, (अस्वमिव रक्तं पत्नं यस्य। संज्ञायां कन्।) भिण्डाटकः। इति राजनिर्घण्टः॥

अस्वपा, स्त्री, (अस्वं रक्तं पिबति या। अस्व + पा + ड + टाप्।) जलौकाः। इति हेमचन्द्रः॥

अस्वपाला, स्त्री, (अस्वमिव रक्तं पलं यस्याः।) सल्लकीवृक्षः। इति राजनिर्घण्टः॥

अस्वमाक्षिका, स्त्री, (अस्वस्य रक्तस्य मातेव पोषिका। संज्ञायां कन्। एषा हि शरीररक्तधातूनां श्रेष्ठा।) शरीररसः। इति राजनिर्घण्टः॥

अस्वरोधिनी, स्त्री, (अस्वं क्षतजरक्तं रुणद्धि या। अस्व + रुध + णिच् + स्त्रियां ङीप्।) लज्जालुलता। इति रत्नमालाराजनिर्घण्टौ॥

अस्वविन्दुच्छदा, स्त्री, (अस्वविन्दुरिव बिन्दुः च्छदे पत्रे यस्याः।) लक्ष्मणा नाम कन्दः॥ इति राजनिर्घण्टः॥

अस्वार्ज्जकः, पुं, (अस्वानामर्ज्जकः।) श्वेततुलसी। इति रत्नमाला॥

अस्रु, क्ली, (अस्यते क्षिप्यते। अस् + रु।) चक्षुर्ज्जलं। तत्पर्य्यायः। नेत्राम्बु २ रोदनं ३ अस्रं ४ अश्रु ५। इत्यमरः॥ वास्पं ६। इति शब्दरत्नावली॥ लोचं ७। इति जटाधरः॥ ("अस्रा अस्रावधारां त्यजति"। इति कौचकवधः। "रागाम्बुवेदनाग्लानौ परं लेखनमञ्जनं"। इति वाभटः॥)

अस्वच्छन्दः, त्रि, (न स्वच्छन्दः। नञ्समासः।) अधीनः। आयत्तः। इत्यमरः॥

अस्वतन्त्रः, त्रि, (न स्वतन्त्रः। नञ्समासः।) परतन्त्रः। पराधीनः। इति जटाधरः॥

अस्वप्नः, पुं, (नास्ति स्वप्नो निद्रा यस्य।) देवता। इत्यमरः॥ (निद्राया अभावार्थे यथा,— "अस्वप्नः सन्ततानन्दः च मज्जास्थिकुमितेऽग्निजे"॥ इति माधवकरः॥ "मज्जस्थोऽस्थिषु सौषिर्य्यमस्वप्नं लब्धतां रजं"॥ इति वाभटः॥)

अस्वरः, त्रि, (अप्रशस्तः स्वरो यस्य।) मन्दस्वरयुक्तः। तत्पर्य्यायः। असौम्यस्वरः २। इत्यमरः॥ ("अथ गद्गदशब्दस्तु विलपन् वसुधाधिपः। उवाच मृदुमन्दार्थं वचनं दीनमस्वरम्"॥ इति रामायणे॥)

अस्वाध्यायः, पुं, (न विद्यते स्वाध्यायो वेदाध्ययनं यस्य।) विधिपूर्व्वकवेदाध्ययनहीनः। तत्पर्य्यायः। निराह्वतिः २। इत्यमरः॥ अनध्यायः। अध्ययने निषिद्धदिनं। तद्यथा। चन्द्रसूर्य्यग्रहणदिनानि। तानि तु। ग्रस्तास्ते ३ दिनानि। अन्यत्र १ दिनं। सन्ध्यागर्জ্জने १ दिनं। माघादिमासचतुष्टये गर्জ্জनमात्रे तद्दिनं। निर्घातशब्दे १ दिनं। भूकम्पे १ दिनं। उल्कापाते १ दिनं। महोल्कापाते आकालिकः। एकवेदसमापनानन्तरं १ दिनं। आरण्यकनामकवेदभागसमापनानन्तरं १ दिनं। पञ्चपर्व्वाणि ५ दिनानि। चैत्रशुक्लप्रतिपत् १ दिनं। श्रावणशुक्लप्रतिपत् १ दिनं। मार्गशुक्लप्रतिपत् १ दिनं। एताः प्रतिपदो नित्याः। अन्याः काम्याः। वज्रपाते आकालिकः। विद्युत्समकालीनमेघशब्दे आकालिकः। चतुर्दशमन्वन्तराः १४ तिथयः। युगाद्याः ४ तिथयः। माघमासस्योभयपक्षीयद्वितीया २ दिने। आश्विनस्योभयपक्षीयद्वितीया २ दिने। चैत्रशुक्लपक्षद्वितीया १ दिनं। कार्त्तिकस्योभयपक्षीयद्वितीया २ दिने। आषाढ़स्योभयपक्षीयद्वितीया २ दिने। मार्गमासस्योभयपक्षीयद्वितीया २ दिने। फाल्गुनमासस्योभयपक्षीयद्वितीया २ दिने। उत्सवदिनानि अनेकानि। अक्षयतृतीया १ दिनं। इति स्मृतिः॥ ("कृष्णेऽष्टमी तन्निधनेऽहनी दे कृष्णेतरेऽप्येवमहर्दिसन्ध्यं। अकालविद्युत् स्तनयित्नुघोषे खतन्त्रराष्ट्रक्षितिपव्यथासु॥ श्मशानयानाद्यतनाहवेषु महोत्सवौत्पातिकदर्शनेषु। नाध्येयमन्येषु च येषु विप्रा नाधीयते नाशुचिना च नित्यं"॥ इति सुश्रुतः॥)

अस्वामिकं, त्रि, (नास्ति स्वामी उत्तराधिकारी यस्मिन्।) स्वामिरहितवस्तु। अकर्त्तृकं। वेयोरिस् इति पारस्य भाषा। यथा। एतच्च अयदानं स्वभूमौ अस्वामिकायाच्च न दद्यात्। अस्वामिकान्याह यमः।

"अटव्यः पर्व्वताः पुण्या नद्यस्तीर्थानि यानि च। सर्व्वाण्यस्वामिकान्याहुर्न हि तेषु परिग्रहः"॥ पुण्या इति विशेषणात् अटव्यो नैमिषाद्याः पर्व्वता हिमालयाद्याः। नद्यो गङ्गाद्याः। तीर्थानि पुरुषोत्तमादिक्षेत्राणि। वाराणस्याद्यायतनानि च। स्वाम्यभावे हेतुमाह न हि तेष्विति। इति श्राद्धतत्त्वं॥

अस्वामिविक्रयः, पुं, (अस्वामिना अनधिकारिणा कृतो विक्रयः।) अस्वामिकर्त्तृकविक्रयः। यथा सम्प्रत्यस्वामिविक्रयाख्यं व्यवहारपदमुपक्रमते। तस्य च लक्षणं नारदेनोक्तं।

"निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा। विक्रीयतेऽसमक्षं यत्सज्ञेयोऽस्वामिविक्रयः"॥ इति तत्र किमित्याह।

"स्वयं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते। हीनाद्रहोहीनमूल्ये वेलाहीने च तस्करः"॥ स्वं आत्मसम्बन्धिद्रव्यं अन्यविक्रीतमस्वामिविक्रीतं यदि पश्यति तदा लभेत गृह्णीयात्। अस्वामिविक्रयस्य स्वत्वहेतुत्वाभावात्। विक्रीतद्रव्यं दत्ताहितयोरपलक्षणार्थं। अस्वामिद्रव्यत्वेन तुल्यत्वात्। अतएवोक्तं। अस्वामिविक्रयं दत्तमाधिञ्च विनिवर्त्तयेदिति। क्रेतुः पुनरप्रकाशिते गोपिते क्रये दोषो भवति। तथा हीनात्तद्द्रव्यागमोपायहीनात्। रहसि चैकान्ते सम्भाव्यद्रव्यादपि हीनमूल्ये अल्पतरेण मूल्येन क्रये। वेलाहीने वेलया हीनो वेलाहीनः क्रयो राज्यादौ कृतः तत्र च क्रेता तस्करो भवति। तस्करवत् दण्डभाक् भवतीत्यर्थः। यथोक्तं।

"द्रव्यं स्वमस्वामिविक्रीतं प्राप्य स्वामी तदाप्नुयात्। प्रकाशक्रयतः शुद्धिः क्रेतुः स्तेयं रहःक्रयात्"इति॥ स्वाम्यभियुक्तेन क्रेता किं कर्त्तव्यमित्यत आह।

"नष्टापहृतमासाद्य हर्त्तारं ग्राहयेन्नरं। देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत्"॥ नष्टमपहृतं वान्यदीयं क्रयादिना प्राप्य हर्त्तारं ग्राहयेत् चौरोद्धरणकादिभिः। आत्मविशुद्धय राजदण्डाप्राप्त्यर्थञ्च। अथाविदितदेशान्तरं गतः कालान्तरे वा विपन्नस्तदा मूलसमाहरणाशक्तेर्विक्रेतारमदर्शयित्वैव स्वयमेव तद्धनं नाविकस्य समर्पयेत्। तावतैवासौ शुद्धो भवतीति श्रीकराचार्य्येण व्याख्यातं। तदिदमनुपपन्नं। विक्रेतुर्दोषेणाशुद्धिरित्यनेन पौनरुक्त्यप्रसङ्गात्। अतोऽन्यथा व्याख्यायते। नष्टापहृतमिति नाविकं प्रत्ययमुपदेशः। नष्टमपहृतं वा आत्मीयं द्रव्यमासाद्य क्रेतृहस्तस्थं ज्ञात्वा तं हर्त्तारं क्रेतारं स्थानपालादिभिर्ग्राहयेत्। देशकालातिपत्तौ देशकालातिक्रमे स्थानपालाद्यसन्निधाने तदिव्यापनकालात् प्राक्पलायनाद्यशङ्कायां स्वयमेव गृहीत्वा तेभ्यः समर्पयेत्॥०॥

ग्राहिते हर्त्तरि किं कर्त्तव्यमित्यत आह।

"विक्रेतुर्दोषेणाशुद्धिः स्वामी द्रव्यं नृपो दमं। क्रेता मूल्यमवाप्नोति तस्माद्यत्नस्य विक्रयी"। यद्यसौ गृहीतः क्रेता न मयेद मपहृतं अन्यसकाशात् प्राप्तमिति वक्ति तदा तस्य क्रेतुर्विक्रेतृदर्शनमात्रेण शुद्धिर्भवति। न पुनरसावभियोज्यः। किन्तु तत्प्रदर्शितेन विक्रेता सह नाविकस्य विवादः। यथाह बृहस्पतिः।

"मूले समाहृते क्रेता नाभियोज्यः कथञ्चन। मूलेन सह वादस्तु नाविकस्य विधीयते"॥ इति तस्मिंश्च विवादे यद्यस्वामिविक्रयनिश्चयो भवति तदास्य नष्टापहृतस्य गवादिद्रव्यस्य यो विक्रयी विक्रेता तस्य सकाशात् स्वामी नाविकः स्वीयं। द्रव्यमवाप्नोति चौरस्यापराधानुरूपं दण्डं क्रेता च मूल्यमवाप्नोति। अथासौ देशान्तरं गतः तदा योजनसङ्ख्यानयनाय कालो देयः।

"प्रकाशं वा क्रयं कुर्य्यात् मूलं वापि समर्पयेत्। मूलानयनकालस्तु देय स्तद्भाव्यसङ्ख्यया इति स्मरणात्॥०॥ अथाविज्ञातदेशतया मूलमाहर्त्तुं न शक्नोति तदा क्रयं शोधयित्वैव शुद्धो भवति। असमाहार्य्यमूलस्तु क्रयमेव विशोधयेदिति मनुवचनात्। यदा पुनः साक्ष्यादिभिः दैवेन वा क्रयं न शोधयति मूलञ्च न प्रदर्शयति तदा स एव दण्डभाग्भवतीति।

"अनुपस्थापयन्मूलं क्रयं वाप्यविशोधयन्। यथाभियोगं धनिने धनं दाप्यो दमञ्च सः"॥ इति स्मरणात्। स्वं लभेतान्यविक्रीतमित्युक्तं॥*॥ तस्मिन्पुना किं कर्त्तव्यमित्यत आह।

"आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा।
पञ्चबन्धो दमस्तस्य राज्ञे तेनाविभावितेः"॥
आगमेन रिक्थक्रयादिना उपभोगेन च मदीयमिदं द्रव्यं तत्त्वं नष्टमपहृतं वेत्यपि भाव्यं साधनीयं तत्स्वामिना अतोऽन्यथा तेन स्वामिना अविभावितेः पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशो दमो नाष्टिकेन राज्ञे देयः॥*॥ अत्रैवायं क्रमः। पूर्वस्वामी नष्टमात्मीयं साधयेत् ततः क्रेता चौर्य्यपरिहारार्थं मूल्यलाभाय च विक्रेतारमानयेत्। अथानेतुं न शक्नोति तदात्मदोषपरिहाराय क्रयं प्रोधयित्वा नाष्टिकस्य समर्पयेदिति॥*॥
तस्करस्य प्रच्छादकं प्रत्याह।
"हृतं प्रसह्य यो द्रव्यं परहस्तादवाप्नुयात्।
अनिवेद्य नृपे दण्ड्यः स तु यत्प्रवतिं पशून्"॥
हृतं प्रसह्य वा चौरादिहस्तस्थं द्रव्यमनेन मदीयं द्रव्यमपहृतमिति नृपस्यानिवेद्यैव दर्पादिना यो गृह्णात्यसौ षडुत्तरान् नवतिपशून् दण्ड्यतीयः। तस्करप्रच्छादकत्वेन दुष्टत्वात्॥*॥
राजपुरुषानीतं प्रत्याह।
"शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतं।
अर्व्वाक् सम्वत्सरात् स्वामी हरेत परतो नृपः"॥
यदा तु शुल्काधिकारिभिः स्थानरक्षिभिर्वा नष्टमपहृतं द्रव्यं राजपार्श्वं प्रत्यानीतं तदा संवत्सरादर्व्वाक्प्राप्तश्चेत् नाष्टिकस्तद्द्रव्यमवाप्नुयात्। ऊर्द्धं पुनः संवत्सराद्राजा गृह्णीयात्। स्वपुरुषानीतञ्च द्रव्यं जनसमूहेषूद्घोष्य यावत् संवत्सरं राज्ञा रक्षणीयं। यथाह गौतमः। प्रणष्टस्वामिकमधिगम्य राज्ञे प्रब्रूयुर्विख्याप्य सम्वत्सरं राज्ञा रक्ष्यमिति। यत् पुनर्मनुना विथन्तरमुक्तं—
"प्रणष्टस्वामिकं द्रव्यं राजा यब्दं निधापयेत्।
अर्व्वाक् यब्दात् हरेत् स्वामी परतो नृपतिर्हरेत्"॥
इति। तच्चतुष्पदसम्बन्धब्राह्मणविषयं। रक्षणनिमित्तं षड्भागादिग्रहश्च तेनैवोक्तं।
"आददीताथ षड्भागं प्रणष्टाधिगतान्नृपः।
दशमं दादशं वापि सतां धर्म्ममनुस्मरन्"॥ इति। द्वितीयद्वितीयप्रथमसंवत्सरेषु यथाक्रमं षष्ठादयो भागा वेदितव्याः। प्रपञ्चितञ्चैतत् पुरस्तात्॥*॥ मनूक्तषड्भागादिग्रहस्य द्रव्यविशेषे अपवादमाह।
"पशवोऽनेकशफे दद्यात् चतुरः पञ्च मानुषे।
महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके"॥
एकशफे अश्वादौ प्रणष्टाधिगते तत्स्वामी राज्ञे रक्षानिमित्तं चतुरः पशून् दद्यात्। मानुषे मनुष्यजातीये द्रव्ये पञ्च पशून्। महिषोष्ट्रगवां रक्षानिमित्तं प्रत्येकं द्वौ द्वौ पशौ। अजाविके पुनः प्रत्येकं पादं पादं दद्यादिति सर्व्वत्रानुषज्यते। अजाविकमिति समासनिर्द्देशेऽपि पादं पादमिति वीप्सावलात् प्रत्येकं सम्बन्धो गम्यते॥ इत्यस्वामिकविक्रयप्रकरणं। इति मिताक्षरायां व्यवहाराध्यायः॥

अस्वामी, [न्] त्रि, (न स्वामि अधिकारी यस्य। नञ्समासः।) स्वामिभिन्नः। यथा। बृहस्पतिः।
"अस्वामिना तु यद्भुक्तं गृहक्षेत्रोपजादिकं।
सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते"॥
इति दायतत्त्वं॥
अस्वाम्यं, क्ली, (न स्वाम्यम्। नञ्समासः। स्वामित्वाभावः। यथा देवलः।
"अस्वाम्यं हि भवेदेयां निर्द्देशे पितरि स्थिते"।
इति दायतत्त्वं॥
अस्वास्थ्यं, क्ली, सुस्थतयाभावः। सुस्थतयाराहित्यं। स्वास्थ्यस्याभावः अस्वास्थ्यमित्यव्ययीभावसमासनिष्पन्नं॥ (यथा शिशुपालवधे।
"विगृह्य चक्रे नमुचिद्विषा बली
य इत्यमस्वास्थ्यमहर्द्दिवन्दिवः"॥
भुक्ते स्वास्थ्यमुपैति च, इति गृहणीरोगेऽभिहितं माधवकरेण संगृहीतञ्च। अत्र हि अभुक्तेऽस्वास्थ्यमिति तात्पर्य्यं॥)
अह इ क भाषे। (उभं-चुरां-अकं-सेट्।) दीप्तिरिति यावत्। इति कविकल्पद्रुमः॥ इ कं अंहयति। भासो दीप्तिः। इति दुर्गादासः॥
अह इ ङ गतौ। (भ्वादिं-आत्मं-सकं-सेट्।) इति कविकल्पद्रुमः॥ इ अंह्यते। ङ अंहते। इति दुर्गादासः॥
अह, च, प्रशंसा। क्षेपणं। नियोगः। विनिग्रहः। इति मेदिनी॥
अहं, त्रि, अस्मद्शब्दस्य प्रथमान्तस्य रूपं। आमि इति भाषा। यथा आह्निकतत्त्वं,—
'अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न शोकभाक्।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान्"।
(तथा च रघुवंशे १। ६८।
"सोऽहमिज्या विशुद्धात्मा प्रजालोपनिमीलितः")
अहंयुः, त्रि, (अहंमस्यास्तीति अहंशब्दात् "अहंशुभयोर्युस्" इति युस्।) अहङ्कारयुक्तः। गर्व्वान्वितः। तत्पर्य्यायः। अहङ्कारवान् २। इत्यमरः॥ ("अहंयुनाथ क्षितिपः शुभंयुः"। इति भट्टिः।)
अहः [न्], क्ली, दिवा। इत्यमरः॥ [टीका॥
अहःपतिः, पुं, (अहः पतिः।) सूर्य्यः। इत्यमरः॥
अहङ्कारः, पुं, (अहमिति ज्ञानं क्रियतेऽनेन। अहं+कृ+घञ्।) अहङ्कृतिः। तत्पर्य्यायः। गर्व्वः २ अभिमानः ३ इत्यमरः॥ पुराणमते स त्रिविधः। सात्विकः १ राजसः २ तामसश्च ३। सात्विकाहङ्कारात् इन्द्रियाधिष्ठातारो देवा मनश्च जातं। राजसाहङ्कारात् दशेन्द्रियाणि जातानि। तामसाहङ्कारात् सूक्ष्मपञ्चभूतानि जातानि। वेदान्तमते अभिमानात्मिकान्तःकरणवृत्तिः॥ अहमित्यभिमानः। स च शरीरादिविषयको मिथ्याज्ञानमुच्यते। इति गोतमसूत्रवृत्तिः। "अहमित्यर्थं तस्य करणं। अहमिति किरति अनेति वा अहङ्कारः। करोतेः किरतेर्वा घञ्। कारप्रत्यय इत्यन्ये" इत्यमरटीकायां भरतः। मदः ४ स्मयः ५ अपलेपः ६ दर्पः ७। इति जटाधरः।
अहङ्कृतिः ८ उद्धतमनस्कत्वं ९। मानः १० चित्तसमुन्नतिः ११। यथा।
"गर्व्वोमदोऽभिमानः स्यादहङ्कारस्त्वहङ्कृतिः।
स्यादुद्धतमनस्कत्वे मानश्चित्तसमुन्नतिः॥
अहङ्कारस्य पर्य्याय इति केचित् प्रचक्षते"॥
इति शब्दरत्नावली॥ (अहङ्कारस्याश्रय आत्मा। यथा, भाषापरिच्छेदे।
"अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः"।
अहङ्कारतत्त्वं। यथाह मनौ, १। १४।
"मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम्"।
गर्व्वोन्नत्यम्। यदुक्तं।
"अहङ्कारश्च सर्व्वेषां पापबीजमसङ्गलम्।
ब्रह्मादेषु च सर्व्वेषां गर्व्वपर्य्यन्तमुन्नतिः"॥
स च द्विविधः, विशेषरूपः सामान्यरूपश्चेति। तत्रायमहं एतस्य पुत्र इत्येवं यत्किमभिमन्यमानो विशेषरूपो व्यष्ट्यहङ्कारः। अस्मीत्येतावन्मात्रमभिमन्यमानः सामान्यरूपः समष्ट्यहङ्कारः। स च हिरण्यगर्भो महान् आत्मेति च सर्व्वानुसूयूतत्वादुच्यते। अहमभिमानरूपो योऽहङ्कारः स सर्व्वसाधारणः। आरोपितगुणैरात्मनो महत्वाभिमानः। अहमेव श्रेष्ठ इति दुरभिमानः। महाकुलप्रसूतोऽहं महतां शिष्यो नास्ति हितीयो मत्सम इत्यभिमानः। आत्मश्लाघनाभावेऽपि मनसि प्रादुर्भूतोऽहं सर्व्वोत्कृष्ट इति गर्व्वः।)
अहङ्कारवान्, त्रि, (अहङ्कारो विद्यतेऽस्य। अहङ्कार+मतुप्। मस्य वः।) गर्व्वान्वितः। इत्यमरः॥ तत्पर्य्यायः। अहंयुः २। इत्यमरः॥ अहङ्कारान्वितः ३। इति शब्दरत्नावली। गर्व्वितः ४। इति जटाधरः॥
अहङ्कारी, [न्] त्रि, गर्व्वयुक्तः। अहङ्कारो विद्यतेऽस्येति अस्यर्थे णिन्प्रत्ययेन निष्पन्नः। अभिमानी। गर्व्वान्वितः॥ (दशरथरूपके॥
"धीरोद्धतस्त्वहङ्कारी बलश्लाघी विकत्थनः"।)
अहङ्कृतिः, स्त्री, (अहम्+कृ+क्तिन्।) अहङ्कारः। गर्व्वः। इति शब्दरत्नावली॥ (यथा पञ्चतन्त्रे॥
"युध्यतेऽहङ्कृतिं कृत्वा दुर्ब्बलो यो बलीयसा"।)
अहतं, क्ली, (हन्+क्त। ततो नञ्समासः।) नवाम्बरं। नूतनवस्त्रं। इति हलायुधशब्दरत्नावल्यौ॥ (अहतलक्षणं यथा महाभारते,—
"ईषद्धौतं नवं श्वेतं सदशं यन्नधारितम्।
अहतं तद्विजानीयात् पावनं सर्व्वकर्म्मसु"॥
"अहतैश्चैव वासोभिर्माल्यैश्चावचैरपि"। इति॥
"अहतानि च वासांसि रथञ्च शुभलक्षणम्"।
इति रामायणे। अनाहते, त्रि,॥
अहमहमिका, स्त्री, (अहमहं शब्दोऽस्यत्र, वीप्सायां ठित्वम्। शेषाद्यित्वात् ठन्। ततष्टाप्।) परस्पराहङ्कारः। इत्यमरः। परस्परं परमपेक्ष्यापरस्यापरमपेक्ष्य परस्य योऽहङ्कारोऽहमेव श्रेष्ठोऽहमेव श्रेष्ठ इति मानः। इति भरतः आमि बड़ आमि बड़ बलिया परस्पर अहङ्कार इति भाषा। (यथा पञ्चतन्त्रे,—

"इत्यद्याहमहमिकया तयोर्विवदतोः"।)

अहम्पूर्व्विका, स्त्री, (अहं पूर्व्वं अहं पूर्व्वमिति कथनं यत्र। अहम्पूर्व्व + ठन् + स्वार्थे कन् + ततष्टाप्।) अहम्पूर्व्वं अग्रे भवामि अहं पूर्व्वं अग्रे भवामि इत्यन्योऽन्यं योधानां धावनक्रिया। इत्यमरः। आमि अग्रे याव वलिया योद्धा दिगेर परस्पर आगे धाओया इति भाषा। (यथा किराते,—

"सुगेषु दुर्गेषु च तुल्यविक्रमै-
र्जवादहम्पूर्व्विकया यियासुभिः"।)

अहम्मतिः, स्त्री, (अहंप्रधाना मतिर्ज्ञानं।) अविद्या। अज्ञानं। इत्यमरः॥

अहर्गणः, पुं, (अह्नां गणः) मासः इति हारावली। यहाणां मध्यादिज्ञानार्थं श्वेतवाराहकल्पावधिरद्यावधिब्रह्मसिद्धान्तोक्तकल्पावधिकल्पाद्यब्दावधि वा इष्टकालपर्य्यन्तं परिगणितदिनसमूहः। तत्पर्य्यायः। युष्मदं २। दिनौघः ३। युगणः ४। दिनपिण्डः ५। इति ज्योतिःशास्त्रम्॥

अहर्ज्जरः, पुं, (अहोभिर्लोकान् जरयति। अहन् + जॄ + णिच + अच्। यद्वा अहानि जीर्य्यन्त्यन्तर्भवन्त्यस्मिन्। अहन् + जॄ + अच्।) संवत्सरः। यथा। "यथापः प्रवता यन्ति यथा मासा अहर्ज्जरं। एवं मां ब्रह्मचारिणः धातरायन्तु सर्व्वतः स्वाहा"। इति तैत्तिरीयोपनिषदि शिक्षावल्ली॥ यथा लोके आपः प्रवता प्रवणवता निम्नवता देशेन यन्ति गच्छन्ति। यथा वा मासा अहर्ज्जरं संवत्सरोऽहर्ज्जरोऽहोभिः परिवर्त्तमानो लोकान् जरयतीति अहानि वा अस्मिन् जीर्य्यन्ति अन्तर्भवन्ति इत्यहर्ज्जरः। तच्च यथा मासा यन्ति एवं मां ब्रह्मचारिणः हे धातः सर्व्वस्य विधातः मामायन्तु सर्व्वतः सर्व्वदिगभ्यः। इति शङ्कराचार्य्यकृतभाष्यम्॥

अहर्पतिः, पुं, (अह्नः पतिः। षष्ठे अहःपतिः।) सूर्य्यः। इत्यमरः। (यथा रघुवंशे १०। ५४।

"द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम्"।)

अहर्ब्बान्धवः, पुं, (अह्नो बान्धवः। अह्नो मणिरिव) **अहर्म्मणिः** च।) सूर्य्यः। इति हेमचन्द्रः। अर्कवृक्षः।

अहर्मुखं, क्ली, (अह्नो मुखं।) प्रत्यूषः। इत्यमरः॥

अहल्यः, त्रि, (हलेन कृष्यं। ततो नञ्समासः।) हलानाकृष्टक्षेत्रादिः। अकृष्टभूमिः॥

अहल्या, स्त्री, अप्सरोविशेषः। (यथा हरिवंशे।

"दिवोदासस्य राजर्षेरहल्या च यशस्विनी।
शरद्वतश्च दायादमहल्या समसूयत"॥

गौतममुनिपत्नी। इति मेदिनी॥ सा च महासाध्वी। प्रातः काले तस्यानामस्मरणे महापातकनाशो भवति। यथा पुराणं,—

"अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा।
पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनं"॥

सत्ययुगे इन्द्रः गौतममुपधारयं कृत्वा तस्याः सतीत्वं नाशितवान्। ततो गौतमशापेन सा पाषाणदेहा बभूव। ततस्त्रेतायुगे श्रीरामचन्द्रस्य पादस्पर्शात् शापात् विमुक्ता सती पुनः पूर्व्वरूपा मानवी भूता। इति रामायणम्॥

अहस्करः, पुं, (अहः करोति। अहन् + कृ + ट। कस्कादित्वात् सः।) सूर्य्यः। इति हेमचन्द्रः। अर्कवृक्षः॥

अहस्पतिः, पुं, (अह्नः पतिरिव।) सूर्य्यः। इत्यमरः। अर्कवृक्षः। अमरे तत्पर्य्याये अर्काङ्क इति दर्शनात्॥

अहह, व्य, (अहं जहातीति। अहम् + हा + ड। एषोदरादित्वात्सलोपः।) अद्भुतं। खेदः। परिक्लेशः। प्रकर्षः। सम्बोधनं। इति मेदिनी॥ (आश्चर्य्यं। विस्मयः। यथा हितोपदेशे।

"अहह! महापङ्के पतितोऽसि"।
"अहह! तात! पश्यत्व दारुणं"।

इति महाराष्ट्रके॥)

अहहा, व्य, (अहं जहातीति। अहम् + हा + क्विप्। एषोदरादित्वात् साधुः।) अद्भुतं। खेदं। इत्यमरटीकायां रायमुकुटादयः। अत्र अहहशब्दार्थोऽपि द्रष्टव्यः॥

अहार्य्यः, पुं, (हृ + ण्यत्। ततो नञ्समासः।) पर्व्वतः। इत्यमरमेदिन्यौ॥

अहार्य्यं, त्रि, (न हार्य्यं। नञ्समासः।) हर्त्तुमशक्यं। अहर्त्तव्यं। अहरणीयं। इति मेदिनी॥

("अहार्य्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः"
"तच्चात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः"॥
इति च मनुः ९। १८९।)

अहिः, पुं, (आहन्तीति। आ + हन् + इण्। हन हिंसागत्योः। आडि श्रिहनिभ्यां कसवेति इण्। स च डित्। डित्वात् टिलोपः। आडो कसच।) वृत्रासुरः। सर्पः। इत्यमरः। सूर्य्यः। पथिकः। राजः। इत्यनेकार्थध्वनिमञ्जरी॥ (सीसकं। राजः। वप्रः। श्लेष्मातकवृक्षः। खलः। "विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः। यदहिर्नकुलदेवो खकुलदेवो पुनः पिशुनः"। इति वासवदत्तायाः प्रस्तावनाश्लोकः॥)

अहिंसा, स्त्री, (न हिंसा। नञ्समासः।) कुलिकवृक्षः। कुलेखाड़ा इति ख्याता। अस्या गुणाः। विषरोगग्रीष्मनाशित्वं। इति राजवल्लभः॥ (कोकिलाक्षशब्देऽस्या गुणादयो ज्ञेयाः। हिंसा रहिते, त्रि।)

अहिका, स्त्री, (न + हा + डिक् + टाप्।) शाल्मलीवृक्षः। इति शब्दचन्द्रिका॥

अहिकान्तः, पुं, (अहेः सर्पस्य कान्तः प्रियः। भक्ष्यत्वात्।) वायुः। इति हेमचन्द्रः॥

अहिच्छत्रः, पुं, (अहेः छत्रः फणा इव छादकः।) देशविशेषः। तत्पर्य्यायः। प्रत्यग्ररथः २। मेघपुष्पीवृक्षः। इति हेमचन्द्रः॥

अहिच्छत्रा, स्त्री, शर्करा। इति राजनिर्घण्टः। चिनि इति भाषा। पुरीविशेषः। इति ज्योतिषतत्त्वं॥ तथा वृद्धगार्ग्यः। "केशवमानर्त्तपुरं पाटलीपुत्रं पुरीमहिच्छत्रां। दितिमदितिञ्च स्मरतां क्षौरविधौ भवति कल्याणं"। इति ज्योतिस्तत्त्वं॥

अहिजित्, पुं, (अहिं सर्पं वृत्रासुरं वा जितवान् अहि + जि + क्विप्।) विष्णुः। कालीयनागदमनात्॥ इन्द्रः। वृत्रासुरनाशात्॥

अहितः, त्रि, (न हितः। नञ्समासः।) शत्रुः। इत्यमरः। (यथा रघुवंशे ४। २८॥

"स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा।
अहितानिलोद्धूतैस्तज्जयप्रतिभैरिव केतुभिः"।)

अपथ्यं इति शब्दचन्द्रिका॥

("एकान्ताहितानि दहनपचनसारणादिषु प्रवृत्तान्यग्निसंस्कारविषादीनि।" इति सुश्रुते। प्रतिकूलः। असुखकरः। यथा वैराग्यशतके।

"लोकस्याप्यहितमाचरतीति चित्रम्"। २५॥

"परोऽपि हितवान् बन्धुर्बन्धुरप्यहितः परः।
अहितो देहजो व्याधिर्हितमारण्यमौषधं"॥ इति हितोपदेशः। अहिताहारोपयोगिनां पुनः कारणतो न सद्यो दोषवान् भवत्यपचारः, नहि सर्व्वाण्यपथ्यानि तुल्यदोषाणि न च सर्व्वे दोषास्तुल्यबलाः। नच सर्व्वाणि शरीराणि व्याधिक्षमणे समर्थानि। तदेव ह्यपथ्यं देशकालसंयोगवीर्य्यप्रमाणातियोगात् भूयस्तरमपथ्यं सम्पद्यते॥ स एव दोषः संसृष्टयोर्निर्विरुद्धोपक्रमो गम्भीरानुगतः प्राणायतनसमुत्थो मर्म्मोपघाती वा भूयान् कष्टतमः क्षिप्रकारितमश्च सम्पद्यते इति चरकः।

"इह खलु यस्माद्द्रव्याणि स्वभावतः संयोगतश्चैकान्तहितान्येकान्ताहितानि हिताहितानि भवन्ति"। "एकान्ताहितानि दहनपचनसारणादिषु प्रवृत्तान्यग्निसंस्कारविषादीनि।"

"दुग्धस्यैकान्तहितता विषस्यैकान्ततोऽहिता तं
एव युक्तरूपाद्येषु द्रव्येषु सन्निपातादिषु॥
एकान्तहितता विद्धि वत्स! सुश्रुत! नान्यथा"॥

"विरुद्धान्येवमादीनि रसवीर्य्यविपाकतः।
तान्येकान्ताहितान्येव श्रेयं विद्याद्धिताहितं"॥
इति सुश्रुतः॥)

अहितुण्डिकः, पुं, (अहेः तुण्डं मुखं, तेन दीव्यति यः सः। अहितुण्ड + ठक्। संज्ञापूर्व्वकत्वात् वृद्धभावः।) भिक्षार्थं सर्पखेलकः। तत्पर्य्यायः। व्यालग्राही २। इत्यमरः। सापुड़े इति भाषा॥

अहिदिट्, [ध्] पुं, (अहिं वृत्रासुरं सर्पं वा देष्टि यः। अहि + दिष् + क्विप्।) इन्द्रः। गरुड़ः। मयूरः। नकुलः। इति मेदिनी॥

("अहिदिधक्षतदभवता निगृह्यतां"। इति माघे।

"एकाहिरक्षार्थमहिद्विषेऽद्य
दत्तो मयात्मेति यया ब्रवीति"।

इति नागानन्दे॥

अहिनकुलता } स्त्री, अहिनकुलयोर्वैरं। नित्य-
अहिनकुलिका } विरोधितेति यावत्। अहिश्च नकुलश्च अहिनकुलौ तयोर्भाव इति भावार्थे त-ष्वि(क)प्रत्यययोः स्त्रियामापा निष्पन्ना॥

अहिपुत्रकः, पुं, (अहेः सर्पस्य पुत्रक इव। सर्पाकारत्वात्।) नौकाविशेषः। तत्पर्य्यायः। पोतः २ तरालुः ३। इति हारावली॥

अहि

अहिपूतनः, पुं, क्षुद्ररोगविशेषः। तल्लक्षणं यथा,—
"ग्रहस्नानसमायुक्तेऽधौते ऽपाने शिशोर्भवेत्।
स्विन्ने वा स्नाप्यमानस्य कण्डूरत्वक्फोडुवा॥
कण्डूयनात्ततः क्षिप्रं स्फोटः सवत्र जायते।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनं"॥*॥
तच्चिकित्सा यथा भावप्रकाशे,—
"तत्र संशोधनैः पूर्वं धात्रीस्तन्यं विशोधयेत्।
त्रिफलाखदिरक्वाथैर्व्रणानां क्षालनं हितं॥
ग्रहसौवीरयष्ट्याह्वैर्लेपः कार्य्योऽहिपूतने"। इति
(रविनिश्चयटीकाधृता विजयेन व्याख्याप्रसङ्गतो भोजवचनं यदाहृतं तद्यथा,—यदुक्तं।
"दुष्टस्तन्यस्य पानेन मलस्याक्षालनेन च।
कण्डूदाहरुजावद्भिः पिडकैश्च समाचितः॥
अहिपूतनः सम्भवति यथादोषञ्च दारुणः"॥
इति सविदानलक्षणसम्प्राप्तिकं चिकित्सितं वाभटेन वा यदुक्तं तद्यथा,—
"मलोपलेपात् खेदाद्वा गुदे रक्तक्षयोद्भवः।
ताम्रोव्रणोऽन्तःकण्डूमान् जायते मूर्द्धुपद्रवः॥
केचित्तं माढकादोषं वदन्त्यन्येऽहिपूतनं।
प्रष्टार्द्धुदकुन्दञ्च केचित्र तमनामिकं"॥*॥
चिकित्सा।
"तत्र धात्र्याः पयःशोथं पित्तश्लेष्महरौषधैः। १
घृतप्रगीतञ्च पीताम्बुयुक्तमन्तरुपानकं॥ २
सक्षौद्रताक्ष्यशैलेन व्रणं तेन च लेपयेत्। ३
त्रिफलावदरीशल्लकत्वक्-क्वाथ-परिषेचितं॥ ४
कासीश-रोचना- तुत्थ-मनोह्वालरसाञ्जनैः॥ ५
लेपयेदक्षपिष्टैर्वा चूर्णितैर्वाविचूर्णयेत्॥ ६
सुवर्च्चलीरधवा यष्टीग्रहसौवीरकाञ्जनैः॥ ७
सारिवाग्रहनाभिश्यामग्रहस्य त्वथोऽथवा"॥८॥
चक्रपाणिसंग्रहे तु॥
"पटोलपत्रत्रिफलारसाञ्जनविपाचितं।
पीतं घृतं नाशयति क्षिप्रमप्यहिपूतनं"॥
पटोलाद्यघृतं॥*॥)

अहिफेनं, क्ली, (अहेः सर्पस्य फेनं गरलमिव। अत्युग्रत्वात्।) अफेनं। इति राजनिर्घण्टः। आफिं इति भाषा। (अस्य पर्य्यायमाह भावप्रकाशकारः।
"उक्तं खसपलक्षीरमाफूकमहिफेनकं"।
अस्य कार्य्यमाह शार्ङ्गधरः।
"पूर्वं व्याप्याखिलं कायं ततः पाकञ्च गच्छति।
व्यवायि तद्यथा भङ्गा फेनञ्चाहिसमुद्भवं"॥
अपरञ्चाफेनशब्दे आफूकशब्दे च ज्ञातव्यं।)

अहिर्बुध्नः, पुं, (अहिः बुध्ने यस्य।) शिवः।
("अजैकपादहिर्बुध्नः पिनाकी चापराजितः"।
इति हरिवंशे।) रुद्रविशेषः॥ इति जटाधरः॥
(यथा हरिवंशे।
"सुरभी कस्यपादुद्वानेकादश विनिर्ममे।
महादेवप्रसादेन तपसा भाविता सती॥
अजैकपादहिर्बुध्नस्त्वष्टा रुद्राश्च भारत"। इति।)

अहिर्बुध्नदेवता, स्त्री, (अहिर्बुध्नो रुद्रोऽधिष्ठात्री देवता यस्याः।) उत्तरभाद्रपदनक्षत्रं। इति ज्योतिःशास्त्रं॥

अहो

अहिभयं, क्ली, (अहेः सर्पतुल्यखलपक्षात् सर्पादा भयं।) राज्ञां खलपक्षोद्भवभयं। इत्यमरः॥ सर्पभयं॥

अहिभयदा, स्त्री, (अहेर्भयं यति खण्डयतीति। अहिभय + दो + क) भूम्यामलकी। इति राजनिर्घण्टः॥ (भूम्यामलकीशब्देऽस्या गुणावली ज्ञातव्या॥)

अहिभुक्, [ज्] पुं, (अहिं भुङ्क्ते। अहि + भुज् + क्विप्।) गरुडः। मयूरः॥ इत्यमरः॥ नाकुली। गन्धनाकुली। इति राजनिर्घण्टः॥

अहिमर्दनी, स्त्री, (अहेर्मर्दनं भवत्यस्याः।) गन्धनाकुलीनाम कन्दविशेषः॥ इति राजनिर्घण्टः॥

अहिमारः, पुं, (अहिं मारयति यः सः। अहि + मृ + णिच् + अण्।) अरिमेदकवृक्षः। इति राजनिर्घण्टः॥

अहिमेदकः, पुं, (अहिं मेदयति स्पर्शमात्रेण गलयति यः सः।) अरिमेदकवृक्षः। इति राजनिर्घण्टः॥ (अरिमेदशब्देऽस्य गुणादयो ज्ञेयाः॥)

अहिलता, स्त्री, (अहिरिव लता। दीर्घाकारत्वात्।) गन्धनाकुली। ताम्बूली। इति राजनिर्घण्टः॥

अहीरणिः, पुं, (अहीन् ईरयति दूरीकरोति। अहि + ईर + अनि।) दिमुखसर्पः। इति त्रिकाण्डशेषः॥

अहे, य, क्षेपः। वियोगः। इति शब्दमाला॥

अहेरुः, स्त्री, (न हिनोति। हि गतौ वाऽऊङादुः। ततो नञ्समासः।) श्रुतमूली। इत्यमरः॥

अहो, य, (न + हा + डो।) धिगर्थः। शोकः। करुणार्थः। विषादः। सम्बोधनं। प्रशंसा। विस्मयः। पदपूरणं। असूया। वितर्कः। इति मेदिनी॥ (यथा रामायणे अयोध्याकाण्डे॥
"अहो धिगिति सामर्षो वाचमुक्त्वा नराधिपः"।
"अहो मधुरमासां दर्शनं"। इति शाकुन्तले प्रथमाङ्के।)

अहोरात्रः, पुं, (अहश्च रात्रिश्च द्वयोः समाहारः। राज्ञाहाहाः पुंसि। अहः सर्व्वैकदेशे टच् इति टच्।) दिवानिशं। स तु सूर्य्योदयदयपरिच्छिन्नत्रिंशन्मुहूर्त्तात्मककालः। इत्यमरः॥ मनुष्याणां मासेन पैत्र्योऽहोरात्रो भवति। मनुष्याणामेकवर्षेण देवानामहोरात्रो भवति। द्विसहस्रयुगितमानुष्यचतुर्युगमानेन ब्रह्मणोऽहोरात्रो भवति। तत्र मनुष्यमानेन ८६४०००००० वर्षा भवन्ति॥

अहोवत, य (अहो च वत च।) अनुकम्पा। खेदः। सम्बोधनं। इति विश्वमेदिनौ॥
("अहोवतासिस्पृहणीयवीर्य्यः"। इति कुमारे।
"अहोवत! कीदृशीं वयोऽवस्थामापन्नोऽसि"। इति शाकुन्तले। [इति गीता॥)
"अहोवत! महत्पापं कर्त्तुं व्यवसिता वयम्"।

अक्षाय, य, (क्ष क्षयनयने। वाऽऊङाङ्वे घञ्। इद्धिः। एषोदरादित्वात् वस्य यः। ततो नञ्समासः।) भटिति। द्रुतं। इत्यमरः॥
(अक्षाय सा नियमजं क्षममुत्ससर्ज"। इति कुमारे।
"अक्षाय तावदरुणेन तमो निरस्तम्"। इति रघौ।
"स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा

आक

मूर्च्छन् मोसमकर्षिहर्षविहितस्वानाक्षिकाक्षाश्रवः"। इति काव्यप्रकाशे।)

अक्षीकः, पुं, (नास्ति क्षीलज्जा यस्य।) वौद्धः। क्षपणकः। इति त्रिकाण्डशेषः॥

अक्षला, स्त्री, (न + क्षे + डल।) भल्लातकवृक्षः। इति शब्दचन्द्रिका॥ भेला इति भाषा।

आ

आ, आकारः। द्वितीयस्वरवर्णः। अस्योच्चारणस्थानं कण्ठः। स च दीर्घः प्लुतश्च भवति।
"आकारं परमाक्षरं ब्रह्मज्योतिर्मयं प्रिये।
ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं प्रिये।
पञ्चप्राणमयं वर्णं स्वयं परमकुण्डली"॥
इति कामधेनुतन्त्रे॥ अस्य लेखनप्रकारो यथा—
"अकारस्योपमासस्य दक्षक्रोडायता लघुः।
ब्रह्मादयस्तथा शक्तिस्तिस्रस्तिष्ठन्ति नित्यशः"॥
इति वर्णोद्धारतन्त्रं। तस्य नामानि यथा—
"आकारो विजयानन्तो दीर्घच्छायो विनायकः।
क्षीरोदधिः पयोदश्च पाण्डो दीर्घास्यदक्षकौ॥
प्रचण्ड एकजो रुद्रो नारायण इभेश्वरः।
प्रतिष्ठा मानदा कान्तो विश्रान्तक गजान्तकः॥
पितामहो दिठान्तो भूः क्रिया कान्तिश्च सम्भवः।
द्वितीया मानदा काली विघ्नराजः कुजो वियत्॥
स्वरान्तकश्च हृदयमङ्गुष्ठो भगमालिनी"॥
इति वर्णाभिधानं॥

आ, य, स्मृतिः। यथा। "आज्ञातं सजटायुरेवः"। वाक्यं। यथा। "आ एवं मन्यसे"। इत्यमरः॥ (पूर्वं मैवं मंस्था इदानीं खेवं मन्यसे इत्यर्थः।) अनुकम्पा। (यथा, आ देवदत्तो दरिद्रः इति।) समुच्चयः। इति मेदिनी॥ (यथा, देवेभ्यश्च पितृभ्यश्च आ।) क्वचित् निषिद्धसन्धिवर्णः। आङ्शब्दो योऽर्थो न सन्धीयते स इत्यर्थः। इति भरतः॥ ("आ एवं तत्त्वमर्य्यादा आ एवं तत्कृतं मया"। इति सुग्धबोधम्।)

आं, य, एवं। खीकारः। इत्यमरः॥

आः, पुं, महेश्वरः। इति पुरुषोत्तमः॥ पितामहः। वाक्यं। यथा अग्निपुराणे एकाक्षराभिधानं॥
"आ विष्णुः प्रतिषेधः स्यादाः पितामहवाक्ययोः।
सीमायामथवाप्तौ आ भवेत् संक्रोधपीड़योः"॥

आः, [स्] य, क्रोधः। यथा। आः पापदुर्म्मुखः। ("आः किमेतदितिक्रोधादभाष्य महिषासुरः"। इति मार्कण्डेयपुराणम्।
"आः पापे दुर्विनीते महाञ्जाते"। इति कादम्बरी।) पीड़ा। यथा आः प्रीतं। इत्यमरभरतौ। स्मृतिः। स्पर्द्धा। तर्ज्जनं। इति शब्दरत्नावली॥

आकम्पितं, त्रि, (आकम्पते स्म। आङ् + कपि + क्त।) कम्पविशिष्टं। तत्पर्य्यायः। वेल्लितं २ प्रेङ्खितं ३ आधूतं ४ आधुतं ५ चलितं ६ इत्यमरः॥ कम्पितं ७ धुतं ८ आधूतं ९ विधूतं १० धूतं ११ प्रकम्पितं १२। इति शब्दरत्नावली॥
("अनोकहाकम्पितपुष्पगन्धी"। इति रघौ।

"आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारलताधिवासैः"।
इति ऋतुसंहारे॥)

आकरः, पुं, (आकीर्य्यन्ते धातवोऽत्र। आङ्+कॄ+अप्। यद्वा आकुर्व्वन्ति संघीभूय कुर्व्वन्ति व्यवहारमत्रेति वा। आ+कॄ+घ।) धातुरत्नादेरुत्पत्तिस्थानं। तत्पर्य्यायः। खनिः २ इत्यमरः॥ ("आकरे पद्मरागाणां जन्म काचमणेः कुतः"। इति हितोपदेशः।
"शैलेन्द्रो हिमवान् नाम धातूनामाकरो महान्" इति रामायणम्।) समूहः। ("शब्दाकरकरग्रामसमर्थमखिलमखिलम्"। इति कविकल्पद्रुमः।) श्रेष्ठः। इति मेदिनी॥

आकर्षणं, क्ली, (आ+कर्ष+ल्युट्।) अवर्षणं॥ ("मुदा तदाकर्षणतत्परोऽभूत्"। इति नैषधे।)

आकर्षः, पुं, (आकृष्यते इति। आ+कृष+घञ्।) पाशकः। पाशा इति भाषा। अक्षक्रीड़ा। पाशा खेला इति भाषा। सारिफलकः। इत्यमरः॥ छक इति भाषा। (यथा महाभारते।
"आकर्षस्ते वाक्फलः सुप्रणीतो
हृदि प्रोढ़ो मन्त्रपदः समाधिः"।
इन्द्रियं। धनुरभ्यासवस्तु। आकर्षणं। इति मेदिनी॥ आकृष्यते अनेन। आँकुषी इति भाषा। यष्टा। "आकर्ष इव स्वा आकर्षश्वः"। इति मुग्धबोधव्याकरणं॥ आकर्षतुल्य इति ज्ञापनार्थ-इव शब्दः। इति दुर्गादासः॥ (अयस्कान्तः। निकषोपलः।)

आकर्षणं, क्ली, (आ+कृष्+ल्युट्।) आकर्षः। बलादानयनं। टानन् इति भाषा। यथा,—
"सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः।
केशाकर्षणनिर्धूतगौरवा मागमिष्यसि"॥
इति मार्कण्डेये देवीमाहात्म्यम्॥ *॥
तन्त्रोक्तकर्म्मविशेषद्वारा योषाद्यानयनं। यथा। अथाकर्षणं।
"आकर्षणविधानानि कथयामि समासतः।
यद्दृष्टं चैपुरे तन्त्रे यदृष्टं भूतडामरे॥
श्रीबीजं मान्मथं बीजं लज्जाबीजं समुद्धरेत्।
प्रथमं प्रणवं दत्त्वा त्रिपुरादेविपदं ततः॥
अमुकीति पदं दत्त्वा आकर्षय द्विधा पदं।
स्वाहान्तं मन्त्रमुद्धृत्य जपेदयुतसङ्ख्यकं॥
षट्कोणचक्रमालिख्य रक्तचन्दनकुङ्कुमैः।
षड्रं कारयेन्मन्त्री लज्जाबीजसमन्वितं॥
षड्दीर्घभाक्षरैर्युक्तं वादविन्दुविभूषितं॥
रक्तपुष्पाक्षतधूपादिनैवेद्यैः प्रपूज्य तां।
भावयन् चेतसा देवीं त्रिनेत्रां चन्द्रशेखरां।
बालार्ककिरणप्रख्यां सिन्दूरारुणविग्रहां॥
वामे च दक्षिणे पाणौ जपमालाञ्च वामके।
मन्त्रस्यास्य प्रभावेण रम्भामपि तथोर्व्वशीं॥
आकर्षयेन्न सन्देहः किं पुनर्मानवीमिह॥ *॥
भूर्जपत्रे समालिख्य कुङ्कुमालक्तवारिणा॥
काश्मीरागुरुकस्तूरीरोचनामिलितेन च।
अनामारक्तमिश्रेण कमलाक्षीमनुं लिखेत्॥
ॐ क्रीं कमलाक्षि अमुकीमाकर्षयाकर्षय ॐ फट्॥
इमं मन्त्रं जपेदादौ सहस्रैकं ततः पुनः।
तद्भूर्जपत्रमादाय गुलिकां कारयेत् सुधीः॥
तेनैवं साध्यपादोत्थमृत्तिकापङ्कवेष्टितां।
शोषितां तेजसा भानोर्वेष्टयेत् चिरुटकैः पुनः॥
प्रतिमां स्त्रीनिमां कृत्वा क्षिपेत्तस्यास्तदोदरे।
गुलिकां पातयेत् पात्रे प्रतिमां साध्यरूपिणीं॥
तादृशाभिमुखो भूत्वा निर्जने निशि साधकः।
ततस्तद्गतचित्तश्च तावत् कालं जपेन्मनुं।
यावदायाति सन्त्रस्ता मदनालसविग्रहा॥*॥
अथान्यत् कथयाम्यत्र नृपाकर्षणहेतवे।
देवस्यापि नरस्यापि मोहिनीमन्त्रशापतः॥
अथ मन्त्रं महेशान्यास्तारमादौ ततस्त्रयं।
पञ्चशायकवीजञ्च दत्त्वाथ भुवनेश्वरीं॥
मोहिनीति च नामान्ते षट्कारं पुनरालिखेत्।
स्वाहान्तमन्त्रमुद्धृत्य मध्यवीजेन कारयेत्॥
षड्कृत्वो दीर्घयुक्ताद्यैश्चक्रेऽष्टदलके यजेत्।
प्रथमं साध्यनामानि लेखानि च कजोदरे॥
महारजनरक्तेन पूर्व्वमन्त्रपदं युतं।
मोहिनीं पद्मकिञ्जल्के स्तम्भिनीं स्तम्भिनीं तथा॥
वशङ्करीं कुलेशीञ्च ततो वै विश्ववासिनीं।
आकर्षिणीं ततः क्लिन्नामर्चयेदष्टपत्रके॥
गन्धपुष्पादिधूपाद्यैर्भक्तियुक्तेन चेतसा।
लक्षजप्तेन सर्व्वत्र शीघ्रमाकर्षणं भवेत्॥ *॥
क्रीं कालिकायै धीमहि
तन्नः काली प्रचोदयात्।
ॐ आकर्षिणी वज्रधारिणी
ॐ फट् स्वाहा अमुकीमाकर्षय॥
प्रथमं पूर्व्वमुद्धृत्य उग्रसेनी ततः परं।
नितम्बिनी वह्निजाया विद्या परमदुर्लभा॥
सिन्दूरपुत्तलिं कृत्वा तस्या नाम हृदि लिखेत्।
पलमूल्येन ताम्बूलं समानीय आमश्राद्धदये
नैवेद्यं कृत्वा कृष्णाष्टोत्तरशततुलस्या मूलमन्त्र-पठिते पुत्तल्या हृदि नामस्थाने ताड़िते सति सा समायाति"। इति श्रीकृष्णानन्दविद्यावागीश-कृततन्त्रसारषट्कर्म्मदीपिका तन्त्रसारश्च॥

आकर्षणी, स्त्री, (आकृष्यते अनया। आ+कृष्+ल्युट्+स्त्रियां ङीप्।) फलपुष्पाद्याकर्षकयष्टि-काविशेषः। आँकुषी इति भाषा॥

आकलनं, क्ली, (आ+कल्+ल्युट्।) आकाङ्क्षा। परिसंख्या। बन्धनं। इति मेदिनी॥ ("सेव्यापि सानुनयमाकलनाय यन्त्रा"। इति माघः।)

आकल्पः, पुं, (आ+कृप्+घञ्।) वेषः। इत्यमरः॥ कल्पनं। इति मेदिनी॥ मण्डनं। रोगः। इति हेमचन्द्रः॥ वेषार्थे यथा रघौ,—
("अक्षतकविधिसर्व्वाङ्गीनमाकल्पजातं
विलसितपदमाद्यं यौवनं सा प्रपेदे"।
"स्तोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत्"। इति साहित्यदर्पणे तृतीयपरिच्छेदे।
कल्पपर्य्यन्ते ष्य, यथा—"आकल्पं नरकं भुङ्क्ते"। इति स्मृतिः।)

आकल्पकः, पुं, (आकल्प+कन्।) तमः। मोहः। यज्ञियः। उत्कण्ठा। हर्षः। इति मेदिनी॥

आकलः, पुं, (आकल्यते यत्र, आ+कल्+अच्।) प्रस्तरविशेषः। इति शब्दरत्नावली॥ कङ्गिपातर-इति भाषा।

आकस्मिकं, त्रि, (अकस्मात् भवं। अकस्मात्+ठञ्।) अकस्मादुद्भवं। हठाज्जातं॥ ("आकस्मिक-प्रत्ययभासां च देवीं वाचमनुष्टुभेन छन्दसा परि-ष्टुतामभ्युदैरयत्"। इति उत्तररामचरितम्॥)

आकाङ्क्षा, स्त्री, (आङ्+काङ्क्ष+अच्+टाप्।) इच्छा। अभिलाषः। इत्यमरः॥ (रमणीयवस्तु-स्पृहा। यदुक्तं साहित्यदर्पणे।
"आकाङ्क्षा रमणीयत्वात् वस्तुनो या स्पृहा तु सा"।
अपेक्षा। जिज्ञासा। अनुसन्धानं। यथा पदा-न्वये,—
"नाकाङ्क्षा किं भवति विपुलश्रीमतोऽर्थान्तरेषु"।)
न्यायमते। यत्पदमस्ते यत्पदान्वयबोधो न भवति तत्पदे तत्पदवत्ता। प्रतीतिपर्य्यवसानविरहः। इत्या-लङ्कारिकाः॥

आकायः, पुं, (आङ्+चि+घञ्।) निवासः। इति वोपदेवः॥

आकारः, पुं, (आ+कृ+घञ्।) इङ्गितं। अभि-प्रायानुरूपचेष्टाविष्करणं। संकेत ठार इत्यादि भाषा। आक्रियतिः। मूर्त्तिः। इत्यमरः॥ ("तस्य संवृतमन्त्रस्य गूढ़ाकारेङ्गितस्य च"। इति रघौ १। २०।
"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च"। इति हितोपदेशे सुहृद्भेदः। मूर्त्तिः। "आकार-सदृशप्रज्ञः"। इति रघौ १। १५।)

आकारगुप्तिः, स्त्री, (आकारस्य गुप्तिः।) रत्या-दिसूचको मुखरागादिराकारः। आकारोऽङ्ग-वैकृतमिति वोपालितः॥ गुप्तिर्गोपनं। आकारस्य भयलज्जादिना गुप्तिराकारगुप्तिः। इत्यमर-टीकायां भरतः॥ तत्पर्य्यायः। अवहित्था २। इत्यमरः॥ अङ्गविकृतस्य रोमाञ्चादेराच्छादनात् अवहित्थिस्तिरवहित्था। इति सारसुन्दरी॥ ("भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था"। इति साहित्यदर्पणम्।)

आकारगोपनं, क्ली, (आकारस्य गोपनं।) आकार-गुप्तिः। रत्यादिसूचकमुखरागादिगोपनं। इति हेमचन्द्रः॥

आकारणं, क्ली, स्त्री, (आङ्+कृ+णिच्+ल्युट्।) आह्वानं। इत्यमरः॥ डाकन इति भाषा। ("तैस्य मणिभद्राकारणाय कश्चित् प्रेषितः"। इति पञ्चतन्त्रम्।)

आकालिकं, त्रि, (समानकालौ आद्यन्तौ यस्य। "आकालिकडाद्यन्तवचने" इति समानकालस्या-कालादेशः। इकट् प्रत्ययश्च निपातनात्। यद्वा अकाले भवम्। अकाल+ठञ्।) क्षणध्वंसि। इति धरणिः॥ समानकालीनजन्मविनाशशाली। इति संक्षिप्तसारः॥ अकालसम्भवं। आरम्भ-कालात् तत्सजातीयकालस्थायि। निमित्तं काल-मारभ्य परेद्युर्यावत्कालः स एव कालस्तावदकाल-

स्तत्र भवः। इति तिथितत्त्वं ।(यथा मनौ ४।१०५
("एतानाकालिकान् विद्यादनध्यायान्तावपि"।
"तपस्विनः स्थानुवनौकसस्ता-
नाकालिकीं वीक्ष्य मधुप्रवृत्तिम्" ॥
इति कुमारसम्भवे ३। ३३ ॥)

आकालिकप्रलयः, पुं, (आकालिकः प्रलयः।) प्रलय-विशेषः। स्वायम्भुवमन्वन्तरे कपिलशापेन अकाले जगत्प्लावनं। तद्विवरणं यथा—

श्रीमार्कण्डेय उवाच ।

"आकालिकोऽयं प्रलयो यतो भगवता कृतः।
तत् शृण्वन्तु महाभागा वाराहं लोकसंक्षयं।
यथा वा मत्स्यरूपेण वेदास्नाताश्च शार्ङ्गिणा।
तदहं संप्रवक्ष्यामि सर्व्वपापप्रणाशनं" ॥

श्रीकपिल उवाच ।

"स्वायम्भुव मनुश्रेष्ठ ब्रह्मरूप महामते।
ममैकमीप्सितार्थं त्वं देहि प्रार्थयतोऽधुना ॥
जगत् सर्व्वं तवैवेदं त्वया च परिपालितं।
त्वया सर्व्वं जगत् सृष्टं त्वमेव जगतां पतिः ॥
तन्मे देहि रहःस्थानं त्रिषु लोकेषु दुर्लभं
पुण्यं पापहरं रम्यं ज्ञानप्रभवमुत्तमं ॥
अहं हि सर्व्वभूतानां भूत्वा प्रत्यक्षदर्शिवान्।
उद्धरिष्ये जगज्ज्ञातान् निर्माय ज्ञानदीपिकाम् ॥
अज्ञानसागरे मग्नमधुना सकलं जगत्।
ज्ञानदीपं प्रदायाहं तारयिष्ये जगत्त्रयं" ॥

श्रीमनुरुवाच ।

"यदि त्वयाखिलजगद्धितार्थं ज्ञानदीपिका।
चिकीर्षुणा तपः कार्य्यं किं स्वार्थार्थंगया तव ॥
देवागाराणि तीर्थानि क्षेत्राणि सरितस्तथा।
यद्भवन्ति पुण्यभाञ्जात्र तिष्ठन्ति कपिल! क्षितौ ॥
तेषामेकतमं त्वद्येदासाद्य कुरुषे तपः।
स्थानं ब्रह्मन् तपःसिद्धौ न भविष्यति तत्र किं" ॥

कपिल उवाच ।

"त्वयि विश्रम्भमाधाय तपसः सिद्धयेऽचिरात्।
स्थानं मया प्रार्थितं ते तं मां क्षिपसि हेतुभिः ॥
अलाभ्यन्ते वचो मेऽद्य प्रार्थनायां विकत्थनं।
यत्त्वं वदसि तस्मात्त्वं फलमेतदवाप्नुहि ॥
इदं त्रिभुवनं सर्व्वं सदेवासुरमानुषं।
हतप्रहतविध्वस्तमचिरेण भविष्यति ॥
न चिरात् द्रक्ष्यसि मनो! जलपूर्णं जगत्त्रयं।
हतप्रहतविध्वस्तं तव गर्व्वविघातनं ॥
एवमुक्त्वा मुनीन्द्रोऽसौ कपिलस्तपसां निधिः।
अन्तर्दधे जगामापि तदा ब्रह्मसदो मुनिः ॥
कपिलस्य वचः श्रुत्वा विषण्णवदनो मनुः।
भावीति प्रतिपद्याशु मनुर्नोवाच किञ्चन ॥
विज्ञाता वदरीं यातो गङ्गाद्वारान्तिकं मनुः।
प्रविश्य तपसे यत्नमकरोल्लोकभावनः।
आराधयामास हरिं जगत्कारणकारणं ॥
ॐ नमो भगवते वासुदेवाय शुद्धज्ञानस्वभाविने।
इति जप्यं प्रजपतो मनोः स्वायम्भुवस्य तु ॥
प्रससाद जगन्नाथः केशवो न चिरादथ।
ततः क्षुब्धार्णवो भूत्वा दुर्व्वादलसमप्रभः ॥
कर्परकलिकायुग्मतुल्यनेत्रयुगोज्ज्वलः।

तपस्यन्तं महात्मानं मनुं स्वायम्भुवं मुनिं ॥
आससाद तदा क्षुद्रमत्स्यरूपी जनार्दनः।
उवाच च महात्मानं मनुं स्वायम्भुवं तदा ॥
तपोनिधे महाभाग भीतं मां त्रातुमर्हसि।
नित्यं युद्धे जितं मत्स्यैर्विशालैर्भक्षितुं प्रति ॥
अथ प्रभूतैर्विपुलैर्द्रावितः पृथुरोमभिः।
प्राणाकाङ्क्षी महात्मानं भवन्तं शरणं मुनिं ॥
प्राप्तोऽहं यत्नमुक्तोऽपो मयि मां परिपालय।
इति तस्य वचः श्रुत्वा मनुः स्वायम्भुवस्ततः ॥
अलिञ्जरे तोयपूर्णे न्यधाद्विपुलभोगिनि।
स तस्मिन् मलिके मत्स्यो वर्द्धमानो दिने दिने ॥
सामान्यरोहितप्रायदेहोऽभून्नचिरादथ।
दशघटजलपूर्णं प्रत्यहं स महात्मा
मलिकमसति कुर्व्वन् वर्द्धयामास मत्स्यं।
स च सुविषदनेत्रो मत्स्यराजोऽचिरेण
मलिकसलिलमध्ये लोमशः पीनदेहः" ॥
इति कालिकापुराणे ३१ अध्यायः ॥*॥

श्रीमार्कण्डेय उवाच ।

"ततस्तया पीनतनुं दृष्ट्वा मत्स्यं मनुः स्वयं।
गृहीत्वा पाणिना फुल्लनलिनीं सरसीं ययौ ॥
तत्सरस्तच्च विपुलं पुण्ये नारायणाश्रमे।
एकयोजनविस्तीर्णं सार्द्धयोजनमायतं ॥
नानामीनगणोपेतं शीतामलजलोत्करं।
तदासाद्य सरो मत्स्यं विनिधाय मनुस्तदा ॥
पालयामास सुतवत् कृपया परया युतः।
सोऽचिरेणैव कालेन पीनो वैसारिणोऽभवत् ॥
न समस्तत्र सरसि दृहत्काये द्विजोत्तमाः।
स एकदा महामत्स्यः पूर्व्वापरतटद्वये ॥
शिरःपुच्छे निधायाशु तुङ्गदेहः समुच्छ्रितः।
स्वायम्भुवं महात्मानं क्रोशन्तं चाह मामिति ॥
तं तथा स मनुर्ज्ञात्वा क्रोशन्तं मीनपुङ्गवं।
आससाद तदा मत्स्यं जघान च करेण तं ॥
न शक्नोम्यहमुद्धर्त्तुं पृथुरोमाणमद्भुतं।
इति सञ्चिन्तयन्नेवं प्रोद्धार करेण तं ॥
भगवानपि विश्वात्मा मत्स्यरूपी जनार्द्दनः।
स्वायम्भुवकरं प्राप्य लघिमानमुपाश्रयत् ॥
ततः करांभ्यामुद्धृत्य स्कन्धे धृत्वाऽऽजं मनुः।
निनाय सागरं तत्र तोये च निदधे ततः ॥
यथेच्छमत्र वर्द्धस्व न कोऽपि त्वां हनिष्यति।
अचिरेणैव सम्पूर्णदेहत्वं समवाप्नुहि ॥
इत्युक्त्वा स महाभागः सर्व्वप्राणभृतांवरः।
लघुत्वं चिन्तयंस्तस्य विस्मयं परमं गतः ॥
मत्स्योऽपि न चिरादेव पूर्णकायस्तदा महान्।
सर्व्वतः पूरयामास देहभोगेन सागरं ॥
तं पूर्णकायमालोक्य व्यतीत्याम्भः समुच्छ्रितं।
शृङ्गैः शिराभीरचितं मानसाचलसन्निभं ॥
रुन्धन्तं सागरं सर्व्वं देहाभोगाचलीकृतं।
स्वायम्भुवो मनुर्धीमान् मेने मत्स्यं न तं तदा ॥
ततः प्रपच्छ तं साक्षा मत्स्यं स्वायम्भुवो मनुः।
विचिन्त्य लघिमानञ्च प्रच्छन्नमूर्त्तिं तदाद्भुतां" ॥

श्रीमनुरुवाच ।

"न त्वां मत्स्यमहं मन्ये कस्त्वं मे वद सत्तम!।

महत्त्वं लघिमानन्ते चिन्तयन् सुमहत्तम ॥
त्वं ब्रह्मा शूयथवा विष्णुः शम्भुर्व्वा मीनरूपधृक्।
न चेद्भवं महाभाग तन्मे वद महामते" ॥

श्रीमत्स्य उवाच ।

"आराधोऽहं त्वया नित्यं यो हरिः स सनातनः।
तवेप्सितमसिद्ध्यर्थं प्रादुर्भूतः समाहितः ॥
यत्त्वमिच्छसि देवेशं मत्तः शान्तेन मूर्त्तिना।
तत्करिष्येऽद्य तां मूर्त्तिमिमां विद्धि मनो मम" ॥

श्रीमार्कण्डेय उवाच ।

"इति तस्य वचः श्रुत्वा विष्णोरमिततेजसः।
ज्ञात्वा प्रत्यक्षतो विष्णुं मनुस्तुष्टाव केशवं" ॥

श्रीमनुरुवाच ।

"नमस्ते जगदव्यक्तपरावरपते हरे।
पावकादित्यशीतांशुनेत्रत्रयधराय च ॥
जगत्कारण सर्व्वज्ञ जगद्धाम हरे पर।
सुरौघ परमेशान नारायण सुरेश्वर" ॥
इत्यादिस्तोत्रं।

श्रीमार्कण्डेय उवाच ।

"स्वायम्भुवेन मनुना संस्तुतो मत्स्यरूपधृक्।
वासुदेवस्तदा प्राह मेघगम्भीरनिस्वनः" ॥

श्रीभगवानुवाच ।

"तुष्टोऽस्मि तपसा तेऽद्य भक्त्या चापि स्तुतो मुहुः॥
सपर्य्यया तथानेन वरं वरय सुव्रत।
इष्टार्थं संप्रदास्यामि तुभ्यं नात्र विचारणा ॥
वरयाभीप्सितान्कामान् लोकानां वा हितञ्च यत्"

मनुरुवाच ।

"यदि देयो वरो मेऽद्य लोकानां यो हितो भवेत्।
तन्मे देहि वरं विष्णो तं वक्ष्यामि शृणुष्व मे ॥
शप्तवान् कपिलः पूर्व्वं मदर्थे भुवनत्रयं।
हतप्रहतविध्वस्तं सकलं ते भविष्यति ॥
येनेयमुद्धृता पृथ्वी येनेयं परिपालिता।
संहरिष्यति यत्नेनां तेऽधुना शाश्वतश्चिमां ॥
ततोऽहं दीनहृदयस्त्वामेव शरणं गतः।
न यथेदं त्रिभुवनं जलप्लुतं भविष्यति ॥
हतप्रहतविध्वस्तं तथा त्वं देहि मे वरं"।

श्रीभगवानुवाच ।

"न मत्तः कपिलो भिन्नस्तथा न कपिलादहं।
यदुक्तं मुनिना तेन मयोक्तं विहितं मनो ॥
तस्माद्यदुदितं तेन तत् सत्यं नान्यथा भवेत्।
करिष्ये तत्र साहाय्यं स्वायम्भुव निबोध तत् ॥
हतप्रहतविध्वस्ते तोयमग्ने जगत्त्रये।
न चिरादेव तत्तोयं शोषयिष्यामि वै मनो ॥
यावज्जलञ्चवस्तावत् यथा कार्य्यं त्वया मनो।
तन्मे निगदितं तथ्यं शृणुष्वावहितोऽधुना ॥
सर्व्वयज्ञियकाष्ठैरेका नौका विधीयतां।
तामहं दृढयिष्यामि यथा नो भिद्यते जलैः ॥
दशयोजनविस्तीर्णां त्रिंशद्योजनमायतां।
धारिणीं सर्व्वबीजानां भुवनत्रयवर्द्धनीं ॥
सर्व्वौषधिकदत्तानां भूरिवल्कलतन्तुभिः।
नवयोजनदीर्घान्तु शमत्रयसुवेष्टितां ॥
कुरु स्वयं मनो तूर्णं दृढतीमीदृशीं वटीं।
जगद्धात्री जगन्माया लोकमाता जगन्मयी ॥

दृढ़यिष्यति तां रज्जुं न चुच्यति यथा तथा ।
सर्व्वाणि बीजान्यादाय सर्व्वेदान् सप्त वै ऋषीन् ॥
तस्यां नावि निसन्नस्त्वं वर्त्तमाने जलप्लवे ।
दक्षेण सह संगम्य स्मरिष्यसि मनो मम ॥
स्मृतोऽहं तूर्णमायास्ये भवतो निकटं प्रति ।
श्यामलेनाथ शृङ्गेण त्वं मां ज्ञास्यसि वै तदा ॥
यावत् प्रहृतविध्वस्तं हतं स्याद्भुवनत्रयं ।
तावत् शृङ्गेण तां नावं वोढ़ाहं नात्र संशयः ॥
जलप्लवे तु संपूर्णे शृङ्गे मम च तां हरिं ।
त्वं तया वटिकया तूर्णं सदा नेष्यसि वै दृढ़ं ॥
बद्धायां नावि मे शृङ्गे दैवमानेन वत्सरान् ।
सप्तकं प्रेरयिष्यामि तां नावं शोषयन् जलं ॥
ततः शुष्केषु तोयेषु प्रोन्मग्ने शिखरे गिरेः ।
हिमाचलस्य बद्धा तां तस्मिन्नावमहं मनो ॥
त्वां वै शोषयिता नित्यं तावत्तु शोषये जलं ।
चिन्तितोऽहं त्वया यास्ये यदाहं निकटं तव ॥
शृङ्गेण श्यामलेनैव त्वं मां ज्ञास्यसि पुष्करे ।
पुनः सृष्टिं ततः कृत्वा मत्प्रसादान्महामते ॥
त्रैलोक्यदुर्ज्ञभाग्भद्विमवाप्स्यसि सनातनीं ।
अहमाराधितो येन जप्येन भवता मनो ॥
सर्व्वसिद्धिर्भवेत्तस्य यस्तोषयति तेन मां" ।

श्रीमार्कण्डेय उवाच ।

"इति दत्त्वा वरं तस्मै मत्स्यरूपेण नमस्कृतः ।
अन्तर्दधे जगन्नाथो लोकानुग्रहकारकः ॥
स्वायम्भुवोऽपि भगवानन्तर्द्धानं गते हरौ ।
यथोक्तं हरिणा पूर्व्वं नावं रज्जुं तथाकरोत् ॥
सर्व्वयात्रियदक्षौघान् क्षिप्त्वा स्वायम्भुवस्तदा ।
उद्वेग कारयामास नावं दृढ़तरां ततः ॥
तेषां वल्कलसमूहतन्तुसंघैर्वटोरिकां ।
पूर्व्वोक्तेन प्रमाणेन कारयामास वै मनुः ॥
ततः कालेन महता दृप्तं युद्धं महाद्भुतं ।
विष्णोर्यज्ञवराहस्य सरभस्य हरस्य च ॥
ततो जलप्लवे भूते विध्वस्ते भुवनत्रये ।
तया रज्ज्वा तरिं बद्धा बीजान्यादाय सर्व्वशः ॥
वेदान्ऋषीन् तथा सप्त दत्तं चादाय वै मनुः ।
तस्यां नावि समाधाय तोयमग्ने चराचरे ॥
स्वायम्भुवस्तदा मत्स्यं हरिं सस्मार वै ततः ।
ततो जलानामुपरि सशृङ्ग इव पर्व्वतः ॥
उद्दीप्तैकशृङ्गेण विष्णुर्मत्स्यस्वरूपधृक् ।
आगतस्तत्र न चिराद्यत्रास्ते स मनुर्हरिः ॥
तरिमावह्य विपुले तोयराशौ भयङ्करे ।
यावच्चलाचलं तोयं तावत् शृङ्गे तरिं न्यधात् ॥
जले प्रकृतिमापन्ने शृङ्गे बद्धा तरिं तदा ।
तां नावं चोदयामास सप्तकं दैववत्सरान् ॥
स्वयं नावमवष्टभ्य दधार परमेश्वरः ।
योगनिद्रा जगद्धात्री समासीदट्टोरिकां ॥
ततः शनैः शनैस्तोये शोषं गच्छति वै चिरात् ।
पश्चिमं हिमवत् शृङ्गमुन्मग्नं तोयमध्यतः ॥
द्विसाहस्रैर्योजनानामुच्छ्रितस्य हिमप्रभोः ।
पञ्चाशत्तु सहस्राणि शृङ्गं तत्तस्य चोच्छ्रितं ॥
तस्मिन् शृङ्गे ततो नावं बद्धा मत्स्यात्मधृक् हरिः ।
जगाम शोषणायाशु जलानां जगतां पतिः ॥

एवं हि मत्स्यरूपेण वेदास्त्राताश्च शार्ङ्गिणा ।
कपिलस्य तु शापेन क्षतोऽयाकालिको लयः ॥
आकालिकोऽयं प्रलयो यतो भगवता क्षतः ।
इति वः कथितं सर्व्वं यथावत् द्विजसत्तमाः" ॥
इति कालिकापुराणे ३२ अध्यायः ॥

आकालिकी, स्त्री, (अकाल + ठञ् + ङीप् ।) विद्युत् ।
इति हेमचन्द्रः ॥

आकाशः, पुं, क्ली, (आ समन्तात् काश्यन्ते दीप्यन्ते सूर्य्यादयो यत्र । आ + काश् + घञ् ।) पञ्चभूतान्तर्गतभूतविशेषः । स तु शून्यः । तत्पर्य्यायः । द्यौः २ द्यौः ३ अभं ४ अभ्रं ५ व्योम ६ पुष्करं ७ अम्बरं ८ नभः ९ अन्तरीक्षं १० अन्तरिक्षं ११ गगनं १२ अनन्तं १३ सुरवर्त्म १४ खं १५ वियत् १६ विष्णुपदं १७ विहायः १८ । इत्यमरः ॥ नाकः १९ अनङ्गः २० नभसं २१ मेघवेश्म २२ महाविलं २३ । इति जटाधरः ॥ मरुद्वर्त्म २४ मेघवर्त्म २५ त्रिपिष्टपं २६ । इति शब्दरत्नावली ॥ न्यायमते अस्य सामान्यगुणाः सङ्ख्यादयश्च । विशेषगुणः शब्दः । स तु नित्यः अशरीरी च । अश्रोत्रेन्द्रियं कर्णः । सत्त्वेकः किन्तु उपाधिभेदेन नाना भवति ।
("शब्दः श्रोत्रेन्द्रियत्वापि क्षित्यादि च विविक्षतात् ।
वियतः कथिता एते गुणागुणविचारिभिः" ॥
तथा च भाषापरिच्छेदे ।
"आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ।
इन्द्रियं तु भवेत् श्रोत्रमेकः सन्नप्युपाधितः" ॥)
वेदान्तमते स जन्यः ॥

आकाशगङ्गा, स्त्री, (आकाशपथवाहिनी गङ्गा ।) स्वर्गगङ्गा । यथा, शिवरात्रिव्रतकथायां,—
"आकाशगङ्गासलिलतरङ्गगणनादिते ।
त्रैगुण्यललितैश्वारुसरद्विद्युपवीजिते" ॥
("नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे" ।
इति रघौ १ । ७८ ।
"उभौ यदि व्योम्नि पृथग् प्रवाहा-
वाकाशगङ्गापयसः पतेताम्" । इति माघः ।)

आकाशजननी [न्] पुं, (आकाशमार्गस्य जननी ।) प्रगण्डीमध्यस्थितजनानां वाह्यार्थदर्शनार्थानिच्छुद्वच्छिद्राणि । यद्द्वारा आग्नेयास्त्रगुलिकाः प्रक्षिप्यन्ते । इति राजधर्म्मः ॥ (आकाशजननी स्त्री आकाशपथस्य जननीव योषिका । इति केचित् ।)

आकाशदीपः, पुं, (आकाशे दीयमानो दीपः ।) कार्त्तिकमासे भगवदुद्देशेन नभसि दत्तप्रदीपः । यथा । कार्त्तिके आकाशदीप उक्तो निर्णयामृते पुष्करपुराणे ।
"तुलायां तिलतैलेन सायंकाले समागते ।
आकाशदीपं यो दद्यात् मासमेकं हरिं प्रति ॥
महतीं श्रियमाप्नोति रूपसौभाग्यसम्पदम्" । इति तद्विधिश्च हेमाद्रौ आदिपुराणे ।
"दिवाकरेऽस्ताचलमौलिभूते
गृहादद्रे पुरुषप्रमाणं ।
यूपाकृतिं यज्ञियदारुदाम-
मारोप्य भूमावथ तस्य मूर्द्धि ॥
यवाकृतिच्छिद्रयुतास्तु मध्ये
द्विहस्तदीर्घा अथ षट्टिकास्तु ।
कृत्वा चतस्रोऽष्टदलाश्रितीस्तु
याभिर्भवेदष्टदिशानुसारी ॥
तत्कर्णिकायान्तु महाप्रकाशो
दीपः प्रदेयो दलगास्तथाष्टौ ।
निवेद्य धर्म्माय हराय भूम्ये
दामोदरायाप्यथ धर्म्मराजे ॥
प्रजापतिभ्यस्तथ सत्पृष्टभ्यः
प्रेतेभ्य एवाथ तमःस्थितेभ्यः" । इति ।
अपरार्के स्कन्दो मन्त्रो यथा,—
"दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे" ॥
इति निर्णयसिन्धौ २ परिच्छेदे कार्त्तिकमाहात्म्यं ॥

आकाशप्रदीपः, पुं, (आकाशे दीयमानः प्रदीपः ।) तुलायां दीयमानलक्ष्मीदामोदरसम्प्रदानाकाशप्रदीपः । तथाच ब्रह्माण्डपुराणे ।
"तुलायां तिलतैलेन सायं सन्ध्यासमागमे ।
आकाशदीपं यो दद्यात् मासमेकं निरन्तरं ।
सश्रीकाय श्रीयुतये स श्रीमान् भुवि जायते ॥
ॐदामोदराय नभसि तुलायां लोलया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥
इति मन्त्रेण यो दद्यात् प्रदीपं सर्पिरादिना ।
आकाशे मण्डपे वापि स चात्तयज्ञं लभेत् ।
विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकं ।
अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः" ॥

आकाशमांसी, स्त्री, (आकाशजाता मांसी ।) सूक्ष्मजटामांसी । केदारे उत्पत्तिरस्याः । तत्पर्य्यायः । निरालम्बा २ खसम्भवा ३ श्वेतवाली ४ सूक्ष्मपत्री ५ गौरी ६ पर्व्वतवासिनी ७ अभ्रमांसी ८ । अस्या गुणाः । हिमत्वं । शोथव्रणनाड़ीरोगनाशित्वं । लूतागर्द्दभकज्वालाहारित्वं । वर्ण्यकारित्वञ्च । इति राजनिर्घण्टः ॥

आकाशमूली, स्त्री, (आकाशे भूमिरहितस्थाने मूलमस्याः । ङीप् ।) कुम्भिका । इति हारावली ॥ पाना इति ख्याता । (कुम्भिकाशब्देऽस्याः गुणा द्रष्टव्याः ।)

आकाशरज्जी [ज्जु] पुं, (आकाशे उच्चस्थाने स्थितः सन् रज्जतियः । आकाश + रज्ज + णिच् ।) प्रगण्डीस्थितप्रविधिः । दुर्गबहिःप्राचीरोपरिस्थितचरः । इति राजधर्म्मः ॥

आकाशवल्ली, स्त्री, (आकाशस्य वल्लीव । अत्यन्तशिखत्वात् ।) लताविशेषः । आकाशवेल अमरवेल इति ख्याता । तत्पर्य्यायः । खवल्ली २ दुस्पर्शा ३ व्योमवल्लिका ४ । अस्या गुणाः । मधुरत्वं । कटुत्वं । पित्तनाशित्वं । शुक्रवर्द्धकत्वं । रसायनत्वं । बलकारित्वं । दिव्यौषधिपरत्वं । इति राजनिर्घण्टः ॥
"आकाशवल्ली तु बुधैः कथिताऽमरवल्लरी ।
खवल्ली ग्राहिणी तिक्ता पित्तश्लेष्मामनाशिनी" ।
इति भावप्रकाशः ॥

आकाशवाणी, स्त्री, (आकाशादुद्भवा वाणी।) अशरीरिणी वाक्। दैववाणी। इति पुराणं॥

आकाशसलिलं, क्ली, (आकाशात्पतितं सलिलं जलं।) टिट्योदकं। इति राजनिर्घण्टः॥

आकिञ्चनं, क्ली, (अकिञ्चनस्य दरिद्रस्य भावः। अकिञ्चन + अण्।) अकिञ्चनता॥

आकीर्णं, त्रि, (आङ् + कॄ + विक्षेपे + क्तः।) व्याप्तं। तत्पर्य्यायः। संकीर्णं २ सङ्कुलं ३। इत्यमरः। समाकीर्णं ४। इति शब्दरत्नावली॥ (यथा, रघुवंशे। प्रथमसर्गे ५० श्लोकः।

"आकीर्णमृषिपत्नीनामुटजद्वारोधिभिः"॥)

जलादिभिर्निरवकाशं। इति भरतः॥

आकुञ्चनं, त्रि, (आङ् + कुचि + ल्युट्।) न्यायमते पञ्चप्रकारकर्म्मान्तर्गतकर्म्मविशेषः। सङ्कोचः॥ (प्रसारितस्य संक्षिप्तत्वसम्पादनं। नमनं। वक्रतासम्पादनं। यथा। भाषापरिच्छेदे।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च"॥)

आकुलं, त्रि, (आङ् + कुल + कः।) व्याकुलं। तत्पर्य्यायः। अस्तं २ अप्रगुणं ३। इत्यमरः॥ (यथा शाकुन्तले। "विभवगुरुभिः क्रान्तैस्तस्य प्रतिक्रियमाकुला"॥)

आकूतं, क्ली, (आङ् + कूङ् + क्तः) अभिप्रायः) आशयः। इति हेमचन्द्रः॥ (तात्पर्य्यं। इच्छा। यथा साहित्यदर्पणे। २य परिच्छेदे।

"हसन्नेवार्पिताकूतं लीलापद्मं निमीलितं"। इति
"हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः"॥
इति शाकुन्तले।)

आकृतिः, स्त्री, (आक्रियते इयं गौरयं अश्वः इति व्यज्यतेऽनया। आङ् + कृ + क्तिन्।) रूपं। शरीरं। जातिः। इति मेदिनी॥ (यथा शाकुन्तले प्रथमाङ्के।

"किमिव हि मधुराणां मण्डनं नाकृतीनां"॥

न्यायमते सामान्यं, जातिः। "आकृतिर्जातिलिङ्गाख्या"। इति न्यायसूत्रम्। जातिलिङ्गमित्याख्या यस्याः जातेर्गोत्वादेर्हि साक्षादसंबन्धविशेषो लिङ्गम्। तस्य च परम्परया प्रत्यक्षहेतित्वम्। जातिद्रव्यसमवायिकारणतावच्छेदिकाजातिर्धर्म्मो यस्याः सा इत्यर्थः इति कश्चित्॥)

आकृतिच्छत्रा, स्त्री, (आकृत्या छत्रमिव या।) घोषातकीवृक्षः। श्वेतघोषा इति भाषा। इति रत्नमाला॥ (घोषकशब्देऽस्या विशेषो ज्ञेयः।)

आकृष्टं, त्रि, (आङ् + कृष् + कर्म्मणि + क्तः।) ह्रतार्कर्षणं। आकर्षितं॥ (प्रलोभितः, मुग्धः। यथा हितोपदेशे। "ततो लोभाकृष्टेन केनचित् पाथेयनालोचितं"॥ इति)

आकोकेरः, पुं, मकरराशिः। इति ज्योतिस्तत्त्वं॥

आक्रन्दः, पुं, (आङ् + क्रन्द + घञ् + अच् वा।) रोदनं। यथा रामायणे।

("तासामाक्रन्दशब्देन सहसोद्भ्रान्तलोचनः"।)

आक्रान्दनं। मित्रं। दायादयुद्धं। भ्राता। इति मेदिनी॥ध्वनिः (यथा रामायणे।

"तत्रैव निहि नागानामाक्रन्दः श्रूयते महान्"॥)

नाथः। पार्ष्ण्याग्राहात् परो राजा। इति धरणिः। (यथा मानवे ७। २०७।

"पार्ष्ण्याग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले"।)

आक्रमः, पुं, (आङ् + क्रम् + अच्।) आक्रमणं। तत्पर्य्यायः। अधिक्रमः २ क्रान्तिः ३। इति हेमचन्द्रः॥ (अधिरोहः। व्याप्तिः। विक्षेपः। अधिगमः। प्राप्तिः। अधिकारः॥)

आक्रमणं, क्ली, (आङ् + क्रम् + ल्युट्।) आक्रमकरणं। ("यः एतद्वर्त्ती नृपतिः देशाक्रमणाद्याचरति"। इति कुल्लूकभट्टः।) व्यापनं॥ (अतिवर्त्तनं। यथा, रामायणे।

"कण्टकाक्रमणक्लान्ता वनमद्य गमिष्यति"।

आरोहणम्। यथा रामायणे।

"न देवलोकाक्रमणं नामरत्वमहं वृणे"।)

आक्रान्तः, त्रि, (आङ् + क्रम + क्त) ह्रताक्रमणः। अधिक्रान्तः। आक्रमविशिष्टः। इति हलायुधः॥ (अभिभूतः। पराभूतः। वशीभूतः। यथा मनुः—

"न पापरोगैराक्रान्ते नोपसृष्टेऽन्त्यजैर्नरैः"।)

आक्रीड़ः, पुं, (आङ् + क्रीड़ + घञ्।) राजोपवनं। राज्ञः साधारणं वनं। इत्यमरः॥ (केलीकाननं, लीलास्थानं। यथा, रामायणे।

"आक्रीड़ालङ्कृतं स्फीतं सुविभक्तं सुसंस्कृतं"।

तथा च कुमारे। २। ६७।

"अक्रीड़पर्व्वताक्लेन कल्पिताः खेषु वेश्मसु"।

कुरुत्यामन्यपुत्राः खनामख्यातः पौरवः"॥

यथा हरिवंशे।

"दुष्मन्तस्य तु दायादः कुरुत्यामः प्रजेश्वरः।
कुरुत्यामादथाक्रीड़स्तत्वारस्तस्य चात्मजाः"॥)

आक्रोशः, पुं, (आङ् + क्रुश + घञ्।) क्रोधाकर्त्तव्यनिश्चयः। तत्पर्य्यायः। आक्षेपः २ अभिषङ्गः ३ शापः ४। इति हेमचन्द्रः॥ (यथा रामायणे।

"आक्रोशं मम मातुश्च प्रमार्ष्ट्वं पुरुषर्षभ" इति।)

आक्रोशनं, क्ली, (आङ् + क्रुश् + ल्युट्।) अभिशापः। तत्पर्य्यायः। अभिषङ्गः २ अभीषङ्गः ३। इत्यमरः॥

आक्षपाटिकः, पुं, (अक्षपटे नियुक्तः। अक्षपट + ठक्।) अक्षदर्शकः। धर्म्माध्यक्षः। इति जटाधरः॥

आक्षपादः, पुं, (अक्षपाद + अण्।) नैयायिकः। इति भूरिप्रयोगः॥

आक्षारणा, स्त्री, क्ली, (आङ् + क्षर + णिच् + युच्।) मैथुनं प्रति आक्रोशः। इत्यमरः॥ परस्त्रीनिमित्तं पुंसः परपुरुषनिमित्तं स्त्रिया वा दूषणं। यथा "ह्रतागम्यागमनत्वं स्थानान्तरं गच्छ"। इति भरतः॥ क्वेनालि अपवाद इति भाषा॥

आक्षारितं, त्रि, (आङ् + क्षर + णिच् + क्त।) परस्त्रियां परपुरुषे वा मैथुनं प्रति मिथ्यादूषितं। अपवादग्रस्तं। इत्यमरः॥

आक्षिकः, पुं, आक्षकुलजः। इति रत्नमाला॥ आचेर गाछ इति भाषा। (द्यूतनिमित्तः। यथा क्रीड़ाविषयकः। अत्र अक्षैर्दीव्यति जितो वा इति अक्ष + ठञ्। यथा मानवे ८।१५६॥

"प्रातिभाव्यं वृथादानमाक्षिकं सौरिकञ्च यत्।

दण्डशुल्कावशेषञ्च न पुत्रो दातुमर्हति"॥
("पित्तश्लेष्मघ्नमम्लञ्च वातिकञ्चाक्षिकीफलं।
मधुरास्रविषाकञ्च वातपित्तहरञ्च तत्"॥
इति चरकः॥
"आक्षिकः पाण्डुरोगघ्नो ग्रह्यः संग्राहको लघुः"।
इति सुश्रुतः॥)

आक्षीव, पुं, (आङ् + क्षीव + अच्।) अक्षीवः। शोभाञ्जनवृक्षः। इति रायमुकुटः॥

आक्षेपः, पुं, (आङ् + क्षिप् + घञ्।) अपवादः। इत्यमरः॥ भर्त्सनं। (यथा—नीतिशतके।४२॥

'क्षान्त्येवाक्षेपरुक्षाक्षरमुखरमुखान्दुर्मुखान्दूषयन्तः
सन्तः साक्षर्य्यचर्य्या जगति बहुमता कस्यनाभ्यर्थनीयाः'

आकर्षणं।

("नवपरिणयलज्जाभूषणां तत्र गौरीं।
वदनमपहरन्तीं तत्कृताक्षेपमीक्षः"॥
इति कुमारे। ७। ६५। विन्यासः। स्थापनं।

"कर्णार्पितो लोध्रकषायरूक्षे
गोरोचनाक्षेपनितान्तगौरे।
तस्याः कपोले परभागलाभात्"।

इति कुमारे। ७। १७ अपहरणं। यथा,—
"यच्चांशुकाक्षेपविलज्जितानां"। १। १४ कुमारे।
उपस्थितिः। यथा साहित्यदर्पणम्।
"मुख्यार्थस्येतरात्क्षेपो वाक्यार्थेऽन्वयसिद्धये"।
इति।) काव्यालङ्कारः। इति मेदिनी॥ (अलङ्कारप्रकरणे विशेषो द्रष्टव्यः।)

आक्षेपकः, पुं, (आङ् + क्षिप् + ण्वुल्।) निन्दाकरः। व्याधः। इति मेदिनी॥ वातरोगविशेषः। तस्य कारणलक्षणे। निदाने यथा—
"यदा तु धमनी सर्व्वाः कुपितोऽभ्येति मारुतः।
तदा क्षिपत्यशु मुखमुड़र्देहं मुड़ुचरः॥
मुड़ुमुड़ुस्वरादस्यपादाक्षेपक इति स्मृतः"।

आक्षोटः, पुं, (अक्षोट एव स्वार्थे अण्।) अक्षोटवृक्षः। पर्व्वतजपीलुवृक्षः। इति शब्दरत्नावली॥ ("वातामाभिषुकाक्षोटमूलकानिकोचकाः।
गुरव्याखिलधमधुरा सोष्णमाशा बलप्रदाः।
वातघ्ना दीपना रुच्याः कफपित्ताभिवर्द्धनाः"॥
इति चरकः॥)

आक्षोड़ः, पुं, आक्षोटवृक्षः। इत्यमरटीकायां भरतः॥

आक्षोदनं, क्ली, (आङ् + क्षुद् + ल्युट्।) मृगया। इत्यमरः॥

आखण्डलः, पुं, (आखण्ड + कलच्।) इन्द्रः। इत्यमरः॥ (यथा कुमारसम्भवे। ह्रतीयसर्गे३।११।

"आखण्डलः काममिदं बभाषे"।)

आखनिकः, पुं, (आङ् + खन + इकन्।) चौरः। उन्दुरुः। शूकरः इति मेदिनी॥ (खनित्रादिकं खननसाधनद्रव्यं। खननकर्त्ता।)

आखातं, पुं, क्ली, (आङ् + खन् + क्त।) अखातं। देवखातं। इत्यमरटीकायां रायमुकुटः॥

आखुः, पुं, (आङ् + खन + कुः।) मूषिकः। इत्यमरः॥ (यथा नीतिशतके। "क्षुत्वाखुर्विवरं स्वयं निपतितो नक्रं मुखे भोगिनः"।) शूकरः। चौरः।

इति हेमचन्द्रः॥ देवताड़वृक्षः। इति रत्नमाला॥ (आखुमांसगुणा यथा,—
("आखोर्मांसं सपदि बऊधा खण्डखण्डीकृतं यत्तैले पाच्यं द्रवति निरतं यावदेतन्न सम्यक्।
तत्तैलाक्तं वसनमनिशं योनिभागे दधाना,
हन्ति व्रीड़ाकरभगफलं नात्र सन्देहबुद्धिः"॥
इति वैद्यकचक्रपाणिसंग्रहः॥)

आखुकर्णी, स्त्री (आखोः कर्णमिव पत्रमस्याः। आखुकर्ण + ङीप्) लताविशेषः। मूषाकाणी इति भाषा। तत्पर्य्यायः। क्षुद्रिका २ द्रवन्ती ३ चित्रा ४ सुवर्णी ५ उन्दुरकर्णी ६ न्यग्रोधी ७ मूषककर्णी ८ दन्तिकर्णी ९ वऊकर्णिका १० माता ११ भूमिचरी १२ चण्डा १३ ग्रन्थरी १४ वऊपादिका १५ प्रत्यक्श्रेणी १६ तथा १७ पुत्रश्रेणी १८ अद्रिभूः १९। अस्या गुणाः। कटुत्वं उष्णत्वं। कफपित्तहरत्वं। सारकत्वं। व्यानाहज्वरशूलनाशित्वं। परमपाचकत्वं। इति राजनिर्घण्टः॥
"आखुपर्णी आखुकर्णी कर्णिका भूदरीभवा।
आखुकर्णी कटुस्तिक्ता कषाया शीतला लघुः॥
विपाके कटुका मूत्रकफामयक्षमिप्रणुत्"।
इति भावप्रकाशः॥

आखुगः, पुं, (आखुना गच्छति यः। गम + डः) गणेशस्य मूषिकवाहनत्वात् तथात्वं।) गणेशः। इति हेमचन्द्रः॥

आखुपर्णिका, स्त्री, (आखोः कर्णमिव पर्णमस्याः।) लताविशेषः। इति रत्नमाला॥ इन्दुरकाणी इति भाषा। (आखुपर्णीशब्दे आखुकर्णीशब्दे चास्या गुणादयो ज्ञातव्याः।)

आखुपर्णी, स्त्री, (आखोः कर्णमिव पर्णमस्याः।) आखुपर्णिका। इति रत्नमाला॥
"मुक्ताखुपर्णीफलदारुशिग्रु-
क्षाराः सक्षौद्रा क्रिमिशत्रुकल्काः।
मार्गद्वयेनापि चिरप्रवृत्तान्
क्रिमीन्निहन्यात् क्रिमिजांश्च रोगान्"॥
इति वैद्यकचक्रपाणिसंग्रहः।
"आखुपर्णीक्रिमिशत्रवैः सर्पिष्कैः पिण्डमिश्रितैः।
पक्वा पूपलिकां खादेद्बान्धाल्लघु पिबेदनु"॥
इति वाभटः॥ गुणादयोऽप्येतस्या आखुकर्णीशब्दे ज्ञातव्याः॥)

आखुपाषाणः, पुं, पाषाणभेदः। आखुपाषाणगामोऽयं लोहसंकरकारकः। इति राजनिर्घण्टः॥

आखुभुक् [ज्] पुं, (आखून् भुङ्क्ते यः। आखु + भुज् + क्विप्) विड़ालः। इत्यमरः॥

आखुरथः, पुं, (आखुः रथो वाहनं यस्य।) गणेशः। इति हलायुधः॥

आखुविषहा, स्त्री, (आखोर्विषं हन्ति या।) देवताड़वृक्षः। इति शब्दाधरः॥ देवदालीलता। इति राजनिर्घण्टः॥

आखेटः, पुं, (आङ् + खिट् + घञ्) मृगया। इत्यमरः॥ शिकार इति भाषा। ("सुभगाखेटभूमित्वं"। कथासरित्सागरे १५। १२०।

आखेटकः, पुं, (आङ् + खिट् + ण्वुल्।) मृगया। इति शब्दरत्नावली॥ यथा मत्स्यतन्त्रे।
"आखेटकस्य धर्म्मेण विभवाः सुर्वशे नृणाम्।
नृप्रजाः प्रेरयत्येको हन्त्यन्योऽत्र मृगानिव"॥)

आखेटशीर्षकं, क्ली, कुट्टिमभेदः। इति शब्दरत्नावली सुड़ङ्ग इति भाषा। (यदुक्तं।
"कपिशीर्षं द्रुमशीर्षं तथाचाखेटशीर्षकं।
इति कुट्टिमभेदाः स्युः शब्दिकैः समुदाहृताः"।)

आखेटिकः, पुं, (आखेटे मृगयायां कुशलः। आखेट + ठक्।) मृगयाकुशलकुक्कुरः। तत्पर्य्यायः। आखेटिकः २ विश्वकद्रुः ३। इति हारावली॥ (मृगयाकर्त्ता। त्रासजनकः। भयङ्करः। मृगयुः। व्याधः।)

आखोटः, पुं, (आख + उट्।) फलवृक्षविशेषः। आखरोट् इति भाषा। तत्पर्य्यायः। पार्व्वतीयः २ फलश्रेष्ठः ३ गुड़ाशयः ४ कीरेष्टः ५ कन्दराजः ६ मधुमज्जा ७ दृढच्छदः। अस्य गुणाः। मधुरत्वं। बलकारित्वं। स्निग्धत्वं। उष्णत्वं। वातपित्तनाशित्वं। रक्तदोषप्रशमनत्वं। शीतलत्वं। कफकोपनत्वं। इति राजनिर्घण्टः॥ (आक्षोड़शब्दे आक्षोटशब्दे चास्य गुणादिकं ज्ञेयं॥)

आख्या, स्त्री, (आङ् + ख्या + अङ् + टाप्) नाम। संज्ञा। इत्यमरः॥ यथा कुमारसम्भवे १। २६।
"उमेति माता तपसो निषिद्धा
पश्चादुमाख्यां सुमुखी जगाम"।

आख्यातं, त्रि, (आङ् + ख्या + क्तः) कथितं। उक्तं। इत्यमरः॥ (प्रथितः, प्रसिद्धः, प्रकाशितः।) व्याकरणोक्तधातूत्तरविहिततिङ्प्रत्ययादि॥

आख्यानं, क्ली, (आङ् + ख्या + ल्युट्) कथनं। यथा
"कथितं वसुपाख्यानं ब्रह्मपुत्र यथागमं।
देवी मङ्गलचण्डी या तदाख्यानं निशामय"॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४१ अध्यायः॥

आख्यायिका, स्त्री, (आङ् + ख्या + ण्वुल्। टाप्।) उपलब्धार्थकथा। इत्यमरः॥ इतिहास उपन्यास इति ख्याता॥ (आख्यायिकालक्षणं। यथा,—
"प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः।
परस्पराश्रया या स्यात्सा मताख्यायिका क्वचित्"
इति च साहित्यदर्पणे।
"आख्यायिका कथावत्स्यात् कवेर्वंशादिकीर्त्तनं"

आगः, [स्] क्ली, पापं। अपराधः। इत्यमरः॥ (यथा शिशुपालवधे ३य सर्गे १०८ श्लोकः।
"सहिष्ये शतमागांसि सूनोस्ते इति यत्त्वया"।)

आगतं, त्रि, (आङ् + गम् + क्तः।) आयातं। उपस्थितं॥ (लब्धः। प्राप्तः यथा, हितोपदेशे।
"आगतन्तु भयं वीक्ष्य प्रतिकुर्य्यात् यथोचितम्"।)

आगन्तुः, त्रि, (आङ् + गम् + तुन्।) अतिथिः। इत्यमरः॥ आगमनशीलः। अनियतः॥
("अकस्मादागन्तुना सह विश्वासो न युक्तः"। इति हितोपदेशः। आकस्मिकरोगादि। यथा,
"आगन्वपि शरीरशल्यव्यतिरेकेण यावन्तोभावा दुःखमुत्पादयन्ति"। इति सुश्रुतः।
निजागन्तुभेदेन रोगस्य कारणद्वैविध्यादागन्तुशब्दोऽयमामयस्यान्यतरकारणवाची।
तदयथा,—
"द्विविधा पुनः प्रकृतिरेषामागन्तुर्निजविभागात्"। "मुखानि तु खल्वागन्तोर्नखदशनपतनाभिचाराभिशापाभिषङ्गबधबन्ध-पीड़न-रज्जु-दहन-मन्त्राशनि-भूतोपसर्गादीनि"।
"आगन्तुर्हि यथापूर्व्वमुत्पन्नो जघन्यं
वातपित्तश्लेष्मणां वैषम्यमापादयति"।
उदाहरणं। "तत्रागन्तवश्छेदनभेदनच्छादनभञ्जन-पिच्छनोत्पेषणवेष्टनप्रहार-बध-बन्धन-व्यधन-पीड़नादिभिर्व्वा। भल्लातक-गुप्पफलरसात्मगुप्तामूषक-क्रिमिमूषकाहितपत्रलतागुल्मसंस्पर्शनैर्वा खेदन-परिसर्पणावमूत्रणैर्व्वा विषिणाम्॥ सविषाविष-प्राणिदन्तविषाणानखनिपातनैर्व्वा।
सागरविषवात-हिम-दहन-संस्पर्शनैर्व्वा शोथाः समुपजायन्ते"॥ इति चरकेणोक्तं॥

आगन्तुकं, त्रि, (आगन्तु + स्वार्थे कन्) आहार्य्यं। अनित्यस्थायि। इति चिकित्साशब्देभेदः॥ (अज्ञातकुलशीलादिर्नवागतः पुरुषः। यथाः
"त्वया च मूलभृत्यानामास्यायमागन्तुकः पुरस्कृतः"। इति हितोपदेशे॥ अतिथिः। अज्ञातस्वामिकः पश्वादिः। यथा याज्ञवल्क्ये॥
"मङ्गल्योत् क्षुद्रपशवः सूतिकागन्तुकादयः।
पालो येषां तु ते मेषा दैवराजपरिप्लुताः"॥
आकस्मिकरोगादिरोगः। यथा, सुश्रुते।
"शूलशल्य आशुकारिमने धातुस्थस्य शल्यमितिरूपं तत् द्विविधं, शारीरमागन्तुकं च"। इति॥)

आगमं, क्ली, (आङ् + गम + अच्।) तन्त्रशास्त्रं। अस्यार्थः। यथा तन्त्रशास्त्रं॥
"आगतं पञ्चवक्त्रात्तु गतञ्च गिरिजानने।
मतञ्च वासुदेवस्य तस्मादागममुच्यते"॥ इति
(एतल्लक्षणं यथा,—
"सृष्टिश्च प्रलयश्चैव देवतानां तथार्च्चनं।
साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च॥
षट्कर्म्मसाधनं चैव ध्यानयोगश्चतुर्विधः।
सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदुर्बुधाः"॥ इति
यथा रघुवंशे। १०। २६॥
"बऊधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः")

आगमः, पुं, (आ + गम् + अच्।) शास्त्रमात्रं।)
("आगमादिव तमोपहादितः
सम्भवन्ति मतयो भवच्छिदः"।
इति किराते। ५। २२।) आगमनं। इति मेदिनीकरहेमचन्द्रौ॥ (अर्थादीनामागमः। यथा, नीतिशतके ७३ श्लोके। "नित्यव्यया प्रचुरनित्यधनागमा च"। इति। प्राप्तिः। उपार्जनम्।
"नाधर्म्मेणागमः कश्चिन्मनुष्यान् प्रति वर्त्तते"।
इति मनुः॥)
साक्षिपत्रादिः। इति व्यवहारमाहृका॥ प्रकृतिप्रत्ययानुपघाति कार्य्यं। इति व्याकरणं॥ (शास्त्रज्ञानं। श्रुतवत्ता। यथा,
"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः"।
इति रघुवंशे १म सर्गे १५। यथा च रघौ १४। ८०।
"तामर्पयामास च शोकदीनां
तदागमप्रीतिषु तापसीषु"॥)

आग्र

आगमनं, क्ली, आङ्पूर्व्वगमधातोरनट्प्रत्ययान्तस्य रूपमिदं। आसा इति भाषा॥ (यथा रघुवंशे। "रामस्त्वासन्नदेशत्वात् भरतागमनं पुनः"। स्त्रीरूपमः। यथा,—

"अन्त्यागमनपापस्य पापः पृच्छन् स निष्कृतिं"। इति राजतरङ्गिणी।)

आगमावर्त्ता, स्त्री, दक्षिकाक्षीदृक्षः। इति राजनिर्घण्टः॥

आगमितं, त्रि, (आ + गम + णिच् + क्त) अधीतं। पठितं। इति जटाधरः॥ (यापितं प्रापितं।)

आगाधं, क्ली, (अगाध एव। स्वार्थे अण्।) अगाधं। अतिगभीरं इत्यमरटीकायां मथुरानाथः॥

आगान्तुः, त्रि, आगन्तुकः। अतिथिः। इत्यमरटीकायां नीलकण्ठः॥ (अभ्यागतः। आगन्तुः।)

आगामी, [न्] त्रि, (आङ् + गम् + णिन्। भविष्यत्कालः। इति राजनिर्घण्टः॥ (यथा, हितोपदेशे। "भो यजमान! आगामिन्याममावास्यायां यक्ष्यामि यज्ञम्"।)

आगारं, क्ली, (आग + ऋ + अण) गृहं। इत्यमरटीकां॥ (यथा मनुः।

"आश्रमेषु विशेषेषु त्रैवर्ण्यैरागारमुपसंव्रजेत्।)

आगुः, [ऋ] स्त्री, आगूः। प्रतिज्ञा। इत्यमरटीकायां रमानाथः॥

आगूः, स्त्री, (आ-गमेः क्विपि गमः कादित्वन्तलोपे ऊङागमादीनामित्यूकारादेशः।) प्रतिज्ञा। इत्यमरः॥

आग्नीध्रं, क्ली, (अग्निमिन्धे, इन्धीदिप्तौ, क्विप्, नलोपः। अग्नीधः स्थानं; अग्नीधः शब्दे रन्। तत्रस्थितत्वात् ऋत्विग्याग्नीय उच्यते) अग्नीध्रं। होत्रगृहं। इत्यमरटीकायां रमानाथः॥ आग्नेय्या अग्नीध्रमुपतिष्ठते इत्यत्र आग्नीध्रं मण्डपमित्याख्यानदर्शनात्। धनदारा वरणीयऋत्विजि पुं॥ (स्वायम्भुवस्य प्रथमस्य मनोर्दशपुत्रमध्ये परिगणितः स्वनामख्यातः पुत्रः। यथा हरिवंशे।

"आग्निध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्वसुः। ज्योतिष्मान् द्युतिमान् हव्यसवनः पुत्र एव च॥ मनोः स्वायम्भुवस्यैते दश पुत्राः महौजसः"। प्रियव्रतस्य पुत्रः स्वनामख्यातो मनुवंशीयो नृपतिः। यदुक्तं,—

"अग्नीध्रो नाम नृपतिर्जम्बुद्वीपो मनोः कुले। तज्जातो नृपसंज्ञाभिः कथ्यन्ते भरतादयः"॥ प्रियव्रतस्य राज्ञः दशपुत्रमध्येपरिगणितः स्वनामाख्यातः पुत्रः। यदुक्तम् विष्णुपुराणे २। १॥

"प्रियव्रतसुताः ख्याताञ्जेषां नामानि मे शृणु॥ आग्नीध्राग्निबाहुञ्च वपुष्मान् द्युतिमांस्तथा। मेधा मेधातिथिर्भव्यः सवनः पुत्र एव च॥ ज्योतिष्मान् दशमस्तेषां सत्यनामा सुतोऽभवत्"॥

आग्नेयं, क्ली, (अग्निर्देवता यस्य।) स्वर्णं। इति राजनिर्घण्टः। देशविशेषः। इति शब्दरत्नावली॥ रक्तं। इति हेमचन्द्रः॥ घृतं। इति पाणिनिः॥

आग्नेयः, पुं, (अग्निर्देवतास्य अण्। अग्निनोक्तं पुराणं यदाग्नेयं वेदसम्मितमित्युक्तलक्षणे महापुराणभेदे वह्निपुराणे च। अग्निदेवताके द्रव्यमात्रे च त्रिं। अग्नियोषितीति खाहायाम् अग्निदेवताकायामृचि च। आग्नेयव्रतं। यथा मनौ ६।३१०।

"दुष्टसामन्तहिंसस्य तदाग्नेयव्रतं स्मृतम्"।) अगस्त्यमुनिः। इति पाणिनिः॥ अग्निसम्बन्धीये त्रि

आग्नेयी, स्त्री, (आग्नेय + ङीप्।) अग्निकोणं॥ खाहा। इति जटाधरः॥

आग्रयणं, क्ली, नवशस्येष्टिः। यथा,—

"शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते। धान्यपाकवशादन्ये श्यामाकैर्वनिनः स्मृतः"॥ इत्यनेन शरद्वसन्तविहितनवशस्येष्टेः।

"श्यामाकैर्व्रीहिभिश्चैव यवैरन्योन्यकालतः। प्रशस्यशुं युज्यतेऽवश्यं न त्वाग्रयणकालयोः"॥ इति कालान्तरदर्शनात् आशेऽपि तथा इति। आग्रयणं नवशस्येष्टिः। इति मलमासतत्त्वं॥

आग्रहः, पुं, (आङ् + ग्रह + अप्) अनुग्रहः। आसक्तिः। आक्रमः। ग्रहणं। इति मेदिनी॥ (प्रसादः, अभिनिवेशः, आसक्तः, यथा,

"इत्याग्रहात् वदन्तं तं स पिता तत्र नीतवान्"॥ इति कथासरित्सागरे २५।६६।)

आग्रहायणः, पुं, मार्गशीर्षमासः। इति रायमुकुटः॥

आग्रहायणिकः, पुं, (आग्रहायण्या मृगशिरसा युक्ता पौर्णमासी अस्मिन्। आग्रहायण + ठक्) आग्रहायणमासः। मतभेदे वत्सराद्यमासोऽयं। अस्मिन् मासे वृश्चिकराशिस्थो रविः। तत्पर्य्यायः। मार्गशीर्षः २ सहाः ४ मार्गः ४। इत्यमरः॥ आग्रहायी ५ अलकः ६ सहः ७ मार्गशिरः ८। इति शब्दरत्नावली॥ आग्रहायणसम्बन्धिनि त्रि।

आग्रहायणी, स्त्री, (अग्रे हायनमस्याः। मतभेदे मार्गशीर्षमारभ्य वर्षप्रवृत्तेः। प्रज्ञाद्यण्। पूर्व्वपदादिति णत्वं। गौरादित्वात् ङीष्) मृगशिरोनक्षत्रं। इत्यमरः॥ आग्रहायणमासस्य पौर्णमासी॥

आघट्टकः, पुं, (आङ् + घट्ट + वुन्। ततः स्वार्थे कः) रक्तापामार्गः। इति राजनिर्घण्टः॥

आघाटः, पुं, (आङ् + घट् + घञ्) सीमा। इति हेमचन्द्रः॥ अपामार्गः। इति राजनिर्घण्टः॥

आघातः, पुं, (आङ् + हन् + घञ्) वधस्थानं। इति त्रिकाण्डशेषः॥ हननं। क्षेदनं। चोट कोप इत्यादि भाषा॥ (यथा साहित्यदर्पणे। "पादाघातादशोकं विकसति बकुलं योषितामास्यमद्यैः"॥)

आघातनं, क्ली, (आङ् + हन् + स्वार्थे णिच् + ल्युट्) वधस्थानं। इति हारावली॥ हननं॥

आघारः, पुं, (आङ् + घृ + घञ्) घृतं। इति हेमचन्द्रः। ऋग्वेदिनां स्रुवेण चतुराज्यं स्रुचि दत्त्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नेर्वायव्यकोणादारभ्याग्नेयीं यावदविच्छिन्नघृतधारादानं। एतत्स्रुवेण चतुराज्यं स्रुचि दत्त्वा इन्द्रं ध्यात्वाग्नेर्नैर्ऋतकोणादारभ्य ऐशानीं यावदविच्छिन्नघृतधारादानं। इति कालेसिः॥ यजुर्वेदिनान्तु स्रुवेण मन्त्रोच्चारणपूर्व्वकपूर्व्वोक्तक्रमेण घृतधारादानं। इति पशुपतिः॥

आघ्रा

आघूर्णितं, त्रि, (आङ् + घूर्ण + क्त) घूर्णितनेत्रादिः। घूराण इति भाषा। यथा, देवीमाहात्म्ये॥

"आघूर्णितो वा वातेन स्थितः पोते महार्णवे"।।

आघ्राणं, क्ली, (आङ् + घ्रा + ल्युट्) दृग्निः। इति हेमचन्द्रः॥ गन्धग्रहणं। सूँघा इति भाषा॥

"भेदघ्रां गन्धाघ्राणतः।" इति कथासरित्सारे १३। १६।)

आघ्रातः, त्रि, (आङ् + घ्रा + क्त) शिक्षितः। आक्रान्तः। इति मेदिनी॥ दृग्नः। इति हेमचन्द्रः॥ (आघ्राविषवीक्षतः। यथा, नागानन्दे। "नीताः किं न निशा शशाङ्कधवला गात्रातमिन्दीवरं॥)

आर्घ्यं, क्ली, पीतवर्णदीर्घतुण्डषट्पदसन्निभमाक्षिकोत्पन्नमधु। अस्य गुणाः। अतिशयचक्षुर्हितकारित्वं। कफपित्तरक्तदोषनाशित्वञ्च॥ इति राजनिर्घण्टः॥ यथा, भावप्रकाशः॥

"मधूकपुष्पा निर्यासं जरत्कार्य्याश्रमोद्भवाः। स्रवन्त्यार्घ्यं तदा ख्यातं श्वेतकं मालवे पुनः॥ तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः। आर्घ्यास्तास्तत्कृतं यत्तदार्घ्यमित्यपरे जगुः"॥ ("आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परं। कषायं कटुपाके च बल्यं तिक्तमवातलत्"॥ इति सुश्रुतः॥)

आङ्, अ, उपसर्गविशेषः। अस्यार्थः। ईषत्। यथा आपिङ्गलः। अभिव्याप्तिः। यथा आजन्मब्रह्मचारी। सीमा। यथा आसमुद्रक्षितीशानां। इति रघौ १ म सर्गे। धातुयोगजः। यथा आरोहति। इत्यमरभरतौ॥ समन्तात्। ग्रहणं। प्रत्याहृत्तिः। इति दुर्गादासः॥

आङ्गं, क्ली, (अङ्गस्य इदं। अङ्ग + अण्) कोमलाङ्गं। इति त्रिकाण्डशेषः॥

आङ्गारं, क्ली, (अङ्गार + अण्) अङ्गारसमूहः। इति रायमुकुटः॥

आङ्गिकः, त्रि, (अङ्ग + ठक्) अङ्गनिष्पन्नभावव्यञ्जकभ्रूक्षेपादिः। इत्यमरः॥ मार्द्वङ्गिकः। इति शब्दरत्नावली॥ (यथा साहित्यदर्पणे।

"भवेदभिनयो ऽवस्थानुकारः स चतुर्विधः। आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथा"।)

आङ्गिरसः, पुं, (अङ्गिरस् + अण्) बृहस्पतिः। इत्यमरः। (यथा मनुः। २। १५१।

"अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः। पुत्रका इति होवाच ज्ञानेन परिगृह्य तान्"॥)

आचमनं, क्ली, (आङ + चम् + ल्युट्) वैधकर्म्मारम्भात् पूर्व्वं वारत्रयजलपानानन्तरं यथाक्रमाष्ठाङ्गस्पर्शरूपप्रतिज्ञनकक्रिया। तत्पर्य्यायः। उपस्पर्शः २। इत्यमरः॥ आचमः ३ शुचिप्रणीः ४। इति शब्दरत्नावली॥ तद्विधानं यथा॥

"चिरायाभेदयः पूर्व्वं द्विः प्रमृज्यात्ततो मुखं। संमृज्याङ्गुष्ठमूलेन त्रिभिरास्यमुपस्पृशेत्॥ अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरं। अङ्गुष्ठानामिकाभ्याञ्च चक्षुरोचे पुनः पुनः॥ कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयन्तु तलेन वै। व्यभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्॥

ऋचो यजूंषि सामानि त्रिः पिबन् प्रीणयेत् क्रमात्।
अथर्वाङ्गिरसौ पूर्वं द्विः प्रमार्ष्टा नयेन्मुखं॥
सेतिहासपुराणानि वेदाङ्गानि यथाक्रमं।
खं मुखं नासिके वायुं नेत्रे सूर्य्यं श्रुती दिशः॥
प्राजापत्यग्रन्थयो नाभिं ब्रह्माणं हृदयं स्पृशेत्।
रुद्रं मूर्द्धानमालभ्य प्रीणात्यथ शिखामथो॥
बाहू यमेन्द्रवरुणकुबेरवसुधानगान्।
अभ्युक्ष्य चरणौ विष्णुमिन्द्रविष्णुकरद्वयं॥
वासुकिप्रमुखान् नागान् जलं क्षिपति यत् क्षितौ।
येऽन्तरा विन्दवो यान्ति भूतग्रामश्च तेदिज॥
अग्निवायुसूर्य्येन्द्रा गिरयोऽङ्गुलिपर्व्वसु।
गङ्गाद्याः सरितस्तासु या रेखाः करमध्यगाः॥
तले सोमः सतीर्थश्च स्मृतोऽतः पावनः करः।
इति गारुडे २१५ अध्यायः॥*॥

अन्यच्च। अथाचमनं। पराशरः। यथा,—
"कृत्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः।
निबद्धशिख आसीनो द्विज आचमनं चरेत्"॥

आपस्तम्बः। यथा,—
"इत्येवमङ्गिराजानु प्रक्षाल्य चरणौ पृथक्।
हस्तौ चामन्त्रिवन्ताभ्यां पश्चादासीत संयतः"॥

आजान्विति अध्वश्रमादिना तत्पर्य्यन्तमशौचे आजङ्घात इति हारीतोक्तं सामान्यतः।
"कृतोपवीतं सध्यानं वाङ्मनःकायसंयतः"॥७॥

शिखाबन्धे विशेषमाह ब्रह्मपुराणम्।
"गायत्र्या तु शिखां बद्धा नैर्ऋतां ब्रह्मरन्ध्रतः।
जुटिकाञ्च ततो बद्धा ततः कर्म्म समारभेत्"॥

याज्ञवल्क्यः। यथा,—
"अन्तर्जानु शुचौ देशे उपविश्य उदङ्मुखः।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्"।
अन्तर्जानु जानुनोर्मध्ये हस्तौ कृत्वेति शेषः॥

भविष्यपुराणे। यथा,—
"समौ तु चरणौ कृत्वा तथा बद्धशिखोऽपि"।

आचामेदित्यनुवर्त्तौ देवलः। यथा,—
"शिखां बद्धा वसित्वा तु निर्निक्ते वाससी शुभे।
तूष्णीं भूत्वा समादाय नोदङ्मुख्य विलोकयन्"॥*॥

ब्राह्मणावरोधे तु मनुः। यथा,—
"कायवैदग्निकाभ्यान्तु न पिबेत् कदाचन"।

मार्कण्डेयः। यथा,—
"सपवित्रेण हस्तेन कुर्य्यादाचमनक्रियां।
नोच्छिष्टं तत् पवित्रन्तु मुक्तोच्छिष्टन्तु वर्जयेत्"॥

उदकग्रहणे परिमाणमाह भरद्वाजः। यथा,—
"आयतं पर्व्वणां कृत्वा गोकर्णाकृतिमत् करं।
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः॥
मुक्ताङ्गुष्ठकनिष्ठाभ्यां ग्रासेनाचमनं चरेत्।
मासमज्जनमाचान्तु संगृह्य त्रिः पिबेदपः"॥

याज्ञवल्क्यः॥ यथा,—
"अङ्गिरन्तु प्रकृतिस्थाभिर्हीनाभिः पर्वबुद्बुदैः।
हृत्कण्ठतालुगाभिश्च यथासङ्ख्यं द्विजातयः॥
शुद्धेरन् स्त्री च शूद्रश्च सकृत् सृष्टाभिरन्ततः"।

अन्ततः ओष्ठप्रान्ते। प्रचेताः॥
"अनुष्णाभिरफेनाभिः पूताभिर्वच्छ चक्षुषा।
हृद्गताभिरगृह्याभिस्त्रिचतुर्व्वाङ्गिराचमेत्"॥

चतुर्व्वेति भावशुद्ध्यपेक्षया॥*॥

आचमनप्रकारमाह दक्षः।
"प्रक्षाल्य हस्तौ पादौ च त्रिः पिबेदम्बु वीक्षितं।
संहत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं॥
संहत्य तिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत्।
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरं॥
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः।
नाभिं कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै॥
सर्व्वाभिस्तु शिरोदेशं बाहू चाग्रेण संस्पृशेत्"।
पुनःपुनरिति घ्राणादीनां गोलकद्वयाभिप्रायेण।
इति श्रीदत्तः॥*॥

वीप्सायामुभयोरपवादमाह यमः।
"राज्ञावनीक्षितेनापि शुद्धिरुक्ता मनीषिभिः।
उदकेनातुराणाञ्च तथोष्णेनोष्णपायिनां"॥*॥

मुखमार्জनानन्तरं व्यासः। "वामहस्तं पादौ शिरश्च दक्षिणेन पाणिना जलेनाभ्युक्षयेत्" इति सामवेदिक्रमः। यजुर्व्वेदिनान्तु गौतमः। "पादौ चाभ्युक्षयेत् खानि चोपस्पृशेत् शीर्षाणि मूर्द्धि दद्यात् उदकबिन्दून्"॥*॥

इन्द्रियस्पर्शे विशेषमाह मनुः। "खानि चैव स्पृशेदद्भिः" इति। नाभिस्पर्शे व्यासः। यथा,—
"ततः स्पृशेन्नाभिदेशं पुनरापश्च संस्पृशेत्"।

इन्द्रियस्पर्शानन्तरं भविष्ये। यथा,—
"यद्भूमावुदकं वीर समुत्सृजति दानव।
वासुकिप्रमुखान्नागान् तेन प्रीणाति मानवः"॥*॥

जलस्थलोभयकर्म्मानुष्ठानार्थञ्च जलस्थलैकचरज्ञाचमनं कर्त्तव्यमाह पैठीनसिः॥ "अन्तरुदके आचान्तो अन्तरेव शुद्धो भवति बहिरुदके आचान्तो बहिरेव शुद्धः स्यात् तस्मादन्तरेकं बहिरेकञ्च कृत्वा पादमाचामेत् सर्व्वत्र पूतो भवति" इति॥*॥ जलमात्रे जानोरूर्द्धमुत्तिष्ठन्नाचमनमाह विष्णुः। यथा,—
"जानोरूर्द्धं जले तिष्ठन्नाचान्तः शुचितामियात्।
अधस्ताच्छतकृत्वोपि समाचान्तो न शुध्यति"॥

हारीतः। यथा,—
"आर्द्रवासा जले कुर्य्यात्तर्पणाचमनं जपं।
शुष्कवासाः स्थले कुर्य्यात्तर्पणाचमनं जपं"॥*॥

आचमननिषेधे देवलः। यथा,—
"सोपानत्को जलस्थो वा मुक्तकेशोऽपि वा पुनः।
उष्णीषी वापि नाचामेदक्षरेणोदेष्य वा शिरः॥
न गच्छन्न शयानश्च न चलन्न परान् स्पृशन्।
न हसन् नैव संजल्पन्नात्मानञ्चैव वीक्षयन्॥
केशग्रहीवीमधःकायमस्पृशन् धरणीमपि।
यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करं"॥

आत्मानं हृदयं। तथा व्यासः।
"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्"॥

मरीचिः। यथा,
"न वह्निर्जानु त्वरया नासनस्थो न चात्वितः।
न पादुकास्थो नान्यचित्तः शुचिः प्रयतमानसः॥
भुक्तासनस्थोऽप्याचामेन्नान्यकाले कदाचन।
जानुभ्यामूर्द्धमाचम्य जले तिष्ठन्न दुष्यति"॥

शाट्यायनः। यथा,
"स्नानमाचमनं होमं भोजनं देवतार्चनं।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम्"॥*॥

द्विराचमननिमित्तानि॥
"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा स्त्र्योपसर्पणे।
आचान्तः पुनराचामेदासो विपरिधाय च"॥

ब्रह्मपुराणं॥ यथा,
"होमे भोजनकाले च सन्ध्ययोरुभयोरपि।
आचान्तः पुनराचामेदन्यत्रापि सकृत् सकृत्"॥*॥

अथाचमननिमित्तानि॥
"निष्ठीवने तथाभ्यङ्गे तथा पादावसेचने।
उच्छिष्टस्य च सम्भाषादशुचिप्रहतस्य च॥
सन्देहेषु च सर्व्वेषु शिखां बद्धा तथैव च।
विना यज्ञोपवीतेन नित्यमेवमुपस्पृशेत्॥
उष्ट्रवायससंस्पर्शे दर्शने चान्त्यवासिनां"॥

हारीतः। यथा,
"स्त्रीशूद्रोच्छिष्टसम्भाषणे मूत्रपुरीषोत्सर्गदर्शने देवमभिगन्तुकाम आचामेत्॥*॥

अथ आचमनप्रतिप्रसवमाह स्मृतिः। यथा,
"क्षुते निष्ठीवने सुप्ते परिधानेऽश्रुपातने।
कर्म्मस्थ एषु नाचामेद्यावत् कर्म्म न सृजेत्"॥

वृद्धशातातपः।
"वातकर्म्मणि निष्ठीवे दन्तश्लिष्टे तथाऽनृते।
क्षुते पतितसंभाषे दक्षिणश्रवणं स्पृशेत्"॥

मार्कण्डेयपुराणम्॥ यथा,
"कुर्य्यादालम्भनं स्पर्शं गोष्ठस्यार्कदर्शनम्।
कुर्व्वीतालम्भनं वापि दक्षिणश्रवणस्य च॥
यथाविभवतो ह्येतत् पूर्व्वाभावे ततः परम्"॥*॥

आचमने जलाधारनिषेधमाह। उशनाः॥ यथा,
"कांस्यायसेन पात्रेण चपुसीसकृपित्तलैः।
आचान्तः शुचिरप्येवं न कदाचित् शुचिर्भवेत्"॥

इति गोपालयज्वाननकृताचारनिर्णये॥
"आयतं पर्व्वणां कृत्वा गोकर्णाकृतिवत् करं।
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः॥
मुक्ताङ्गुष्ठकनिष्ठाभ्यां ग्रासेनाचमनं चरेत्।
मासमज्जनमाचान्तु संगृह्य त्रिः पिबेदपः"॥

इति भारद्वाजः॥
"अङ्गिरन्तु प्रकृतिस्थाभिर्हीनाभिः पर्वबुद्बुदैः।
हृत्कण्ठतालुगाभिश्च यथासङ्ख्यं द्विजातयः॥
शुध्येरन् स्त्री च शूद्रश्च सकृत्सृष्टाभिरन्ततः"॥

इति याज्ञवल्क्यः॥
"अङ्गाभिः पूयते विप्रः कण्ठगाभिश्च भूमिपः।
वक्त्रोऽङ्गिः प्राशिताभिश्च शूद्रः स्पृष्टाभिरन्ततः"॥

इति मनुः॥
"स्त्रियास्त्वेदङ्गिकं तीर्थं शूद्रजातेस्तथैव च।
सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः"॥

इति मिताक्षरा॥

आचमनकः, पुं, (आचमन + वुन्।) निष्ठीवनपात्रं। पिकदान डाबर इति भाषा। तत्पर्य्यायः। प्रोष्ठः २ कटकोलः ३ पतद्ग्रहः ४। इति हारावली॥ ("कोश्वस्त्रिताङ्गनचकिताचमनकवाह्निनि"। इति हर्षचरिते॥)

आचा

आचमनीयं, क्ली, (आचम्यतेऽनेन । आङ् + चम् + अनीयर् ।) मुखप्रक्षालनार्थजलं । तद्दानविधिर्यथा, कालिकापुराणे ६७ अध्यायः ॥
"दद्यादाचमनीयन्तु सुगन्धिसलिलैः शुभैः ।
कर्पूरवासितैर्व्वापि क्षुण्णागुरुसुधूपितैः ॥
यथा तथा सुगन्धैर्व्वा प्रसन्नैः फेनवर्ज्जितैः ।
तत्तज्जलेन पात्रेण गृह्णेनाथ प्रदापयेत् ॥
उदकं दीयते यत्तु प्रसन्नं फेनवर्ज्जितं ।
आचमनाय देवेभ्यस्तदाचमनमुच्यते ॥
केवलं तोयपात्रेण तदा दद्यान्नमिश्रितं ।
वासितन्तु सुगन्धाद्यैः कर्त्तव्यं यदि लभ्यते ॥
आयुर्ब्बलं यशोवृद्धिं प्रदायाचमनीयकं ।
लभते साधको नित्यं कामांश्चैव यथेप्सितान्" ॥

आचरणं, क्ली, (आङ् + चर् + ल्युट्) आचारः । व्यवहारः । ("अधीतिबोधाचरणप्रचारणैः" । इति नैषधे ।)

आचरित, त्रि, (आङ् + चर् + क्तः) कृताचरणं । ("अलं वामकरे कृत्वा या सन्ध्याचरिता द्विजैः" । इति काशीखण्डे ।) व्यवहृतं । (यदुक्तं ।
"दारपुत्रपशून् हत्वा कृत्वा द्वारोपवेशनं ।
यत्रार्थो दाप्यतेऽर्थं स्वं तदाचरितमुच्यते" ॥
एतत्तु पारिभाषिकं ॥)

आचान्तः, त्रि, (आङ् + चम् + क्तः) कृताचमनः । यथा । बौधायनः ।
"स्नात्वा पीत्वा क्षुते सुप्त भुक्त्वा रथ्योपसर्पणे ।
आचान्तः पुनराचामेत् वासो विपरिधाय च" ॥
इत्याह्निकतत्त्वं ।

आचामः, पुं, (आङ् + चम् + घञ्) आचमनं । इति शब्दरत्नावली ॥ भक्तमण्डः । इत्यमरः ॥ (भक्तञ्च । पानं । यथा, काव्यप्रकाशे ।
"चकोर्य्य एव निपुणाश्चन्द्रिकाचामकर्म्मणि" ॥)

आचारः, पुं, (आङ् + चर् + घञ्) व्यवहारः । तत्पर्य्यायः । चरित्रं २ चरितं ३ चारित्रं ४ चरणं ५ वृत्तं ६ शीलं ७ । इति हेमचन्द्रः ॥ स्नानाचमनादिः । इति मानवे २ अध्याये ६६ श्लोकटीकायां कुल्लूकभट्टः । व्यवहारः ॥ स तु विचारः । यथा बृहस्पतिः ।
"आचारेणावसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभिधेयो जितः पूर्व्वं प्राड्न्यायस्तु स उच्यते" ॥
इति व्यवहारतत्त्वं ॥ चरित्रं । एतद्विवरणं सदाचारशब्दे द्रष्टव्यं ॥ (रघुः । २ । १० । "आचारलाजैरिव पौरकन्याः" ।)

आचारवर्ज्जितः, त्रि, (आचारेण वर्ज्जितः ।) आचारबहिर्भूतः । इति जटाधरः ॥ (अव्यवस्थितः । नियमरहितः ।)

आचारी, स्त्री, (आङ् + चार + ङीष्) द्विजमोचिका लता । इति राजनिर्घण्टः ॥ हेलञ्चा इति ख्याता । आचारविशिष्टे त्रि । (द्विजमोचिकाशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

आचार्य्यः, पुं, (आङ् + चर् + ण्यत् ।) वेदाध्यापकः । वैदिकमन्त्रव्याख्याकर्त्ता । तत्पर्य्यायः । मन्त्रव्याख्याकृत् २ । इत्यमरः ॥ द्रोणाचार्य्यः । इति चिकाण्डशेषः ॥ तल्लक्षणं यथा,—
"उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः ।
सकल्पं सरहस्यञ्च तमाचार्य्यं प्रचक्षते" ॥
इति मानवे २ । १४० ॥
(ततोऽनन्तरमाचार्य्यं परीक्षेत । तद्यथा,—
"पर्य्यवदातश्रुतं परिदृष्टकर्म्माणं दक्षं दक्षिणं शुचिं जितहस्तमुपकरणवन्तं सर्व्वेन्द्रियोपपन्नं प्रकृतिज्ञं प्रतिपत्तिज्ञमनुपस्कृतविद्यमनलूयकमकोपनं क्लेशग्रहमं शिष्यवत्सलमध्यापकं शासनसमर्थमित्येवंगुणो ह्याचार्य्यः सुक्षेत्रमार्त्तवो मेघ इव शस्यगुणैः सुशिष्यमाशु वैद्यगुणैः सम्पादयति । तमुपलक्षयेदाराधयिष्यन्नुपचरेदग्निवच्च देववच्च राजवच्च पितृवच्च भर्त्तृवच्चाप्रमत्तस्ततस्तत्प्रसादात् कृत्स्नं शास्त्रमधिगम्य शास्त्रस्य दृढतायामभिधानसौष्ठवस्यार्थस्य विज्ञाने वचनशक्तौ च भूयः प्रयतेत सम्यक्" । इति चरकः ॥)

आचार्य्या, स्त्री, (आचार्य्य + टाप् ।) मन्त्रव्याख्याकर्त्री । इत्यमरसिंहः ॥ (वेदादिशास्त्राध्यापनकर्त्री ।)

आचार्य्याणी, स्त्री, (आङ् + चर् + ण्यत् + ङीप् + आनुक् ।) आचार्य्यपत्नी । इत्यमरः ॥ (यथा महावीरचरिते ॥
"अम्बकं देवमाचार्य्यमाचार्य्याणीञ्च पार्ब्बतीं" ॥)

आचितं, क्ली, (आङ् + चि + क्त ।) दशभारपरिमाणं । इत्यमरः । २५ मोन इति भाषा ॥

आचितः, पुं, (आङ् + चि + क्त ।) शकटो भारः । इत्यमरः । एक गाड़ির বোঝা इति भाषा ॥ शुयुतपलं । इति मेदिनी ॥

आचितः, त्रि, (आङ् + चि + क्तः) संगृहीतः । छन्नः । इति मेदिनी ॥ (एकत्र सन्निवेशितः, व्याकीर्णः, व्याप्तः, ग्रथितः, गुम्फितः । यथा भारविः ।
"कचाचितौ विस्रगिवागजौ गजौ" ॥ यथा रघुवंशे ।
"यद्धीचिता सत्वरमुत्पतायाः
पदे पदे दुर्निमिते गलन्तो" ॥)

आच्छकः, पुं, वृक्षविशेषः । आच इति भाषा । तत्पर्य्यायः । रञ्जनद्रुः २ पक्षीकः ३ पक्षिकः ४ आक्षिकः ५ । इति रत्नमाला ॥

आच्छन्नं, त्रि, (आङ् + छद् + क्तः ।) आच्छादितं । आवृतं । यथा । "मेघाच्छन्नेऽह्नि दुर्दिनं" । इत्यमरः ॥
("पङ्कपांशुजलाच्छन्नं सुव्यक्तं दस्युविद्रुतं" । इति हितोपदेशः ॥)

आच्छादः, पुं, (आङ् + छद् + घञ् ।) वस्त्रं । इति हेमचन्द्रः ॥

आच्छादनं, क्ली, (आङ् + छद् + ल्युट् ।) वस्त्रं । इत्यमरः ॥ संपिधानं । अपवर्त्तनमात्रं । इति मेदिनी ॥ (यथा मनुः । ३ । ५६ ॥
"तस्मादेतान् सदा गृह्यान् भूतयज्ञाच्छादनादिभिः" ॥)

आच्छादित, त्रि, (आङ् + छद् + णिच् + क्तः) कृताच्छादनं । आवृतं । ढाका इति भाषा ।

आच्छुरितं, क्ली, (आङ् + क्षुर + क्तः) सशब्दहास्यं । नखघातं । इति धरणिः ॥ आवृतं । (यथा कथासरित्सागरे ।
"न सेहे कञ्चुकेनापि क्षिप्रमाच्छुरितं वपुः" ।)

आच्छुरितकं, क्ली, (आङ् + क्षुर + भावे क्तः । ततः स्वार्थे कन्) सोत्रासहासः । इत्यमरः ॥ हास्यं । नखाघातविशेषः । इति मेदिनीकरहेमचन्द्रौ ॥

आच्छोदनं, क्ली, (आङ् + छिद् + ल्युट् । ततः एषोदरादित्वात् इत ओत् ।) मृगया । इत्यमरः ॥

आञ्ज्, इ, आयामे । (भादिः-परः-सकः-सेट्-।) इति कविकल्पद्रुमः ॥ इत्यादौ द्वित्वाभावः प्रक्रियाभ्रमनिरासार्थः । इ आञ्क्ते । आयामो दीर्घीकरणं । आञ्क्ति कटं शिल्पी । इति । दुर्गादासः ॥

आज्यं, क्ली, (अज + अण् । अजसम्बन्धी छागस्य घृतमांसादिः) घृतं । इति जटाधरः ॥ (यथा वैद्यके ।
"गव्यमाज्यं तथा चौष्ट्रमाविकं माहिषञ्च यत् ।
अतो धातुविवृद्ध्यर्थमाज्यं मांसं प्रशस्यते" ॥)
(तथाच रामायणे । २ । ९१ । ६७ ।
"आज्यैश्चापि च वाराहैर्निष्ठानवरसञ्चयैः" ।
घृतार्थ—गव्यादिघृतभेदेन यदुक्तं तत्सर्व्वं घृतशब्दे ज्ञातव्यं किन्त्वाज्यशब्दव्युत्पत्त्या दुग्धादिकं यदुपलभ्यते तदन्यत्र प्रदर्श्यते ॥
"आज्यं दधि भवेच्चोष्णं क्षयवातविनाशनं ।
दुर्नामश्वासकासेषु हितमग्निप्रदीपनं ॥
विपाके मधुरं हृद्यं रक्तपित्तप्रसादनं ।
प्रोक्तं कार्श्यापहं प्रोक्तं वातपित्तनिवर्हणं" ॥
इति हारीतसंहितायां ॥
"नातिशीतं गुरुस्निग्धं मांसमाज्यमदोषलं ।
शरीरधातुसामान्यादनभिष्यन्दि हृंहणं" ॥
इति चरको वाग्भटश्च ॥
"गव्यतुल्यगुणत्वाज्जं विशेषाच्छ्लेष्मिणां हितं ।
दीपनं लघु संग्राहि श्वासकासासपित्तनुत् ।
अजानामल्पकायत्वात् कटुतिक्तनिषेवनात् ॥
नात्यम्बुपानाद्वायोश्च सर्व्वव्याधिहरं पयः" ।
"दध्याज्यं कफपित्तघ्नं लघुवातक्षयापहं ।
दुर्नामश्वासकासेषु हितमग्नेः प्रदीपनं ॥
विपाके मधुरं हृद्यं रक्तपित्तप्रसादनं" ॥
"आज्यं घृतं दीपनीयं चक्षुष्यं बलवर्द्धनं ।
कासे श्वासे क्षये चापि पथ्यं पाके च तद्गुरु" ॥
इति च सुश्रुतः ॥)

आजकं, क्ली, (अज + वुञ्) अजसमूहः । छागलेर पाल इति भाषा । इत्यमरः ॥

आजकारः, पुं, (आज + ङ + अण्) शिवद्वेषः । इति शब्दरत्नावली ॥

आजगवं, क्ली, (अजगव + प्रज्ञाद्यण्) शिवधनुः । इति हेमचन्द्रः ॥

आजन्मसुरभिपत्रः, पुं, (आ जन्मनः सुरभीणि पत्राणि यस्य सः) भल्लातकवृक्षः । इति राजनिर्घण्टः ॥

आजानेयः, पुं, क्ली, (अज् + घञ् + आज + आनेयः) कुलीनाश्वः । श्रेष्ठघोटकः । इत्यमरः ॥ "शल्लिभिर्भिन्नहृदयाः स्खलन्तोऽपि पदे पदे । आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः" ॥ इत्यश्वतत्त्वं ॥

आजिः, स्त्री, (अज् + इन्) । यज्ञं । समानभूमिः ।

इत्यमरकोषमेदिन्यौ। छायं। इति हेमचन्द्रः। (युद्धार्थे यथा,—"आदृणवती लोचनमार्गमाजौ रजोन्धकारस्य विष्टम्भितस्य"। इति रघुः।७।४३।) आक्षेपः। इति शब्दरत्नावली॥

आजीवः, पुं, (आङ्+जीव+घञ्।) जीविका। इत्यमरः॥

("बऽमूलफलो रम्यः खाजीवः प्रतिभाति मे"॥ इति रामायणे।)

आजुः, [ऊ] स्त्री, (आङ्+जुर्+क्विप्।) आजूः। विष्टिः। इति स्वामी॥

आजूः, स्त्री, (आ+जुगतौ+क्विप् दीर्घश्च।) वेतनं विना कर्म्मकारः। वेँगार इति भाषा। इत्यमरः॥ (यदुक्तम्,

"इठादष्टतिकः क्लेशोविष्टिराजूश्च कीर्त्यते"।)

आज्ञप्तः, त्रि, (आ+ज्ञा+णिच्+क्त।) आज्ञाप्राप्तः। यथा, देवीमाहात्म्यम्।

"आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः। चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः"॥

आज्ञा, स्त्री, (आङ्+ज्ञा+अङ्+टाप्।) आदेशः। तत्पर्य्यायः। अववादः २ निर्देशः ३ निदेशः ४ शासनं ५ शिष्टिः ६। इत्यमरः॥

("तथेति शैलाधिपतेः प्रतीच्छां"। इति कुमारे। ३। २२।

"पश्चात् वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत्" इति रघौ। १२। ७।)

आज्ञाकारी, [न्] त्रि, (आज्ञा+कृ+णिन्।) आज्ञया कर्म्मकारी। आज्ञावहः। आज्ञानुवर्त्ती॥

आज्ञाचक्रं, क्ली, षट्चक्रान्तर्गतषष्ठचक्रम्। तथा च तन्त्रे,—"आज्ञानामाम्बुजं तद्द्विदलकरसदृग्धं ध्यानधामप्रकाशं हक्षाभ्यां वैकलाभ्यां प्रविलसितवपुर्नेत्रपत्रं सुशुभ्रं। तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना विद्यां मुद्रां कपालं डमरुजपवटीं बिभ्रती शुद्धचित्ता॥ एतत् पद्मान्तराले निवसति च मनः सूक्ष्मरूपं प्रसिद्धम्"॥ इति तत्त्वचिन्तामणौ षट्चक्रप्रकाशः॥

आज्ञापकः, त्रि, (आङ्+ज्ञा+णिच्+ण्वुल्।) आज्ञाकर्त्ता।

आज्ञापत्रं, (आज्ञायै पत्रं।) क्ली आदेशलिपिः। निदेशलिखनं। ऊकुमनामा इति पारस्यभाषा॥

आज्ञापनं, क्ली, (आङ्+ज्ञापि+ल्युट्।) विज्ञापनं। जानान इति भाषा॥

आज्ञाप्तः, त्रि, (आङ्+ज्ञापि+क्त।) आज्ञप्तिविशिष्टः। लब्धाज्ञः। आज्ञाप्राप्तः॥

आज्यं, क्ली, (आङ् पूर्ब्वात् अञ्जेः संज्ञायामिति क्यप्।) घृतं। इत्यमरः॥ श्रीवासः। इत्यजयपालः॥ (यागक्रियासाधनं तैलदुग्धादिकमपि आज्यशब्देनोच्यते। यदुक्तं स्मृसङ्गहे।

"घृतं वा यदि वा तैलं पयो वा दधि यावकं। आज्यस्थाने नियुक्तानामाज्यशब्दो विधीयते"॥ यथा रघुवंशे। ७।२०। "तत्रार्चितो भोजयतेः पुरोधाः ऊहाग्निमाज्यादिभिरग्निकल्पः"॥)

आज्यभागः, पुं, (आज्यस्य भागः) ऋग्वेदिनां अग्नेरुत्तरभागे खुवेणाग्निसम्मदानकघृताऊतिः तद्दक्षिणभागे सोमसम्मदानकाऊतिश्च। इति कालेसिः।

यजुर्वेदिनान्तु अग्नेरुत्तरदक्षिणयोः पश्चिमादिप्राच्यन्तघृतधारा। इति पशुपतिः॥

आञ्जनेयः, पुं, (अञ्जनाया अपत्यं, अञ्जना+ढक्।) अञ्जनानामवानरीपुत्रः। स तु हनूमान्। इति चिकाण्डशेषः॥ (यथा महानाटके।

"उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः। आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयं"॥)

आञ्जिनेयः, पुं, (आञ्जन+ढक्+इट्।) जन्तुविशेषः। आजनाइ इति ख्यातः। इति शब्दमाला॥

आटिः, पुं, (आङ्+अट+इन्।) पक्षिविशेषः। घुराखि इति ख्यातः। इत्यमरः॥

आटीकरं, क्ली, (आङ्+टीक्+ल्युट्।) वस्त्राणां गमनं। इति चिकाण्डशेषः॥

आटीकरः, पुं, (आटीक+र।) रथः। इति भूरिप्रयोगः॥

आटोपः, पुं, (आङ्+टुप्+घञ्।) दर्पः। इति हेमचन्द्रः॥ वायुजन्य-उदरगुड़्गुड़ाशब्दः। इति वैद्यकं॥ (गर्व्वः, सम्भ्रमः, संरम्भः। यथा-पञ्चतन्त्रे "विषं भवतु मावाभूत् फटाटोपो भयङ्करः"। यथा शिशुपालबधे। 'साटोपमुर्व्वीमनिशं नदन्तः'।

"आटोपपङ्क्तासवमीगुरुत्व-स्तैमित्यमावाहकपप्रसेकैः"।

इति माधवकरः।)

आडम्बरः, पुं, (आङ्+दम्+वरच्। ततः दस्थाने ड। आड़म्बाते डवि क्षेपे घञ् भावे वा। आड़म्बं राति रमयति वा आतोनुपेति कः। मूलविभुजेति वा कः। आड़म्बयति वा बाऊलकादरन्।) पटहः। तूर्य्यरवः। गजेन्द्रगर्जनं। इत्यमरः॥ आरम्भः। इति चिकाण्डशेषः॥ पद्मं। दर्पः। इति मेदिनी॥ क्रोधः। इति स्वामी॥ हर्षः। इति शब्दरत्नावली॥ (आयोजनं। एकत्र सन्निवेशः, यथा, भामिनीविलासे। "धातः किं नु विधौ विधातुमुचितो धाराधराड़म्बरः"॥ युद्धं। स्वार्थे यथा, "असारस्य पदार्थस्य प्रायेणाड़म्बरो महान्। नहि तादृक्ध्वनिः स्वर्णे यथा कांस्ये प्रजायते"॥)

आड़िः, स्त्री, (आङ्+अड़+इन्।) घुराखिपक्षी। इत्यमरः॥ खनामख्यातमत्स्यविशेषः। अस्याः गुणाः। गुरुत्वं। स्निग्धत्वं। वातश्लेष्मप्रकोपनत्वं। अतिबलशुक्रमेधाग्निवृद्धिकारित्वञ्च॥ इति राजवल्लभः॥ (विश्वामित्रशापेन वशिष्ठो महर्षिराड़िपक्षिरूपतां गतः इति पौराणिकी कथा॥ यथा मार्कण्डेयपुराणे आड़िवकयुद्धे,—

"श्रुत्वा शापं महातेजा विश्वामित्रोऽपि कौशिकः। त्वमप्याड़िर्भवखेति प्रतिशापमयच्छत॥ आड़िं सोऽप्युत्पतय्यौ वकः पक्ष्मामताड़यत्"॥)

आड़ूः, पुं, (अण शब्दे। अनोडच्चेत्युः।) उड़ुपः। भेला माड इत्यादि भाषा। इत्युणादिकोषः।

आढ़कं, क्ली, (आ समन्तात् ढ़ौकते ढ़ौक्यते वा ढ़ौक गतौ अच् घञ् वा पृषोदरादिः। परिमाणविशेषः। आढ़ा इति भाषा। यथा,—

"घृतयोजनविस्तीर्णं चिंशद्योजनमायतं। आढ़कस्य भवेन्मानं मुनिभिः परिकीर्त्तितं"॥

अपि च॥

"चिंशद्योजनविस्तीर्णं घृतयोजनमायतं। विंशद्योजनगम्भीरमाढ़कं परिकीर्त्तितं"॥

इति गणपतिभट्टः। इति ज्योतिस्तत्त्वं॥

आढ़कः, पुं, क्ली, चतुःप्रस्थपरिमाणं। आढ़ी इति भाषा। इत्यमरः॥ द्रोणचतुर्थभागः। इति लीलावती॥ अयमुन्मितिभेवेत् कुक्षिरित्यादिवचनात् षट्पञ्चाशदधिकद्विशतमुष्टिर्भवति। व्यवहारे षोड़शसेरो विंशतिसेरो वा। वैद्यकमते अष्टशरावपरिमाणं। तत्पर्य्यायः। पात्रं २ कंसं ३ भाजनं ४। इति परिभाषा॥

("चतुःप्रस्थैस्त्वाढ़कं। भाजनं कांस्यपात्रञ्च चतुःषष्टिपलञ्च तत्"॥ इति शार्ङ्गधरः।

"चतुःप्रस्थमथाढ़कं।

"पात्रं तदेव विज्ञेयं कंसप्रस्थाष्टकन्तथा"॥

इति चरकः।)

अपचयविवक्षायां आढ़किकेत्यपि स्यात्। इत्यमरटीकासारसुन्दरी॥ आढ़िका। इति भरतः॥

आढ़किकः, त्रि, (आढ़क+ठञ्।) आढ़कपरिमितबीजवपनादियोग्यक्षेत्रादिः। इत्यमरः॥

आढ़की, स्त्री, शमीधान्यविशेषः। अरहर इति भाषा। तत्पर्य्यायः। तुवरी २ वर्य्या ३ करवीरसुजा ४ उत्तरबीजा ५ पीतपुष्पा ६। अस्याः गुणाः। कषायत्वं। मधुरत्वं। कफपित्तनाशित्वञ्च। तद्दलगुणाः। ईषद्वातरुचिकारित्वं। गुरुत्वं। ग्राहित्वञ्च। पीता रक्ता सिता त्रिविधेयं। श्वेता दोषदा। लोहिता रक्ता वल्या पित्तताप्रादिहन्त्री च। पीता दीपनी पित्तदाहध्वंसिनी च॥ तदयुषं बल्यं। इति राजनिर्घण्टः॥ अमरमते तत्पर्य्यायः। काञ्ची २ मतल्ला ३ तुवरिका ४ मतालकं ५ सुराष्ट्रजं ६। भरतमल्लिकमते एतत् षट्कं अरहरस्य। सारसुन्दरीमते तुवरिकाख्यगन्धद्रव्यस्य। केषाञ्चिन्मते सुगन्धिमृत्तिकायाः॥ (अस्याः पर्य्यायगुणावाह।

"आढ़की तुवरी चापि सा प्रोक्ता शूकशुम्बिका॥ आढ़की तुवरा रूक्षा मधुरा शीतला लघुः। ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित्"॥

इति भावप्रकाशः॥

"मृदुः कषाया च सरक्तपित्तं निहन्ति कासानिलवातला स्यात्। गुल्मज्वरारोचककासकृद्दि-हृद्रोगदुर्नामहराढ़की स्यात्"॥

इति हारीतः॥

"आढ़की कफपित्तघ्नी वातला,"। इति चरकः॥

"आढ़की कफपित्तघ्नी नातिवातप्रकोपनी"।

इति सुश्रुतः॥)

आढकीनः, त्रि, (आढक + ख ।) आढकिकः । इत्यमरटीका ॥

आढ्यः, त्रि, (आढौकते ढौङ् गतौ बाहुलकात् ण्यः ।) धनवान् । इत्यमरः । युक्तः । विशिष्टः । अन्वितः । यथा, धनाढ्यः गुणाढ्य इत्यादिः । (यथा मनुः ८।१६८ ।
"चत्वारस्त्रपचीयन्ते विप्र आढ्यो वणिङ् नृपः" ।
यथा भगवद्गीतायां,—
"आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया" ॥)

आणकः, त्रि, (अणक एव स्वार्थे अण् ।) अणकः । अधमः । इति रायमुकुटः ॥

आणवीनं, त्रि, (अणु + खञ् ।) अणवीयं । अणुधान्योद्भवोचितक्षेत्रं । इत्यमरटीकायां रायमुकुटः ।

आत्तिः, पुं, स्त्री, (अय + इन् ।) अन्तायकीलकः ॥ अग्निः । सीमा । इति मेदिनी ॥

आतङ्कः, पुं, (आङ् + तकि + घञ् ।) रोगः ।
(यथा, याज्ञवल्क्यः,—
"दृष्ट्वा पथि निरातङ्कं क्षत्वा वा ब्रह्महा शुचिः" ॥)
सन्तापः । शङ्का । (यथा, महावीरचरिते,—
"आतङ्कश्रमसाहसव्यतिकरोत्त्रस्यत्त्रसंसङ्गतां" ॥)
मुरजध्वनिः । इति मेदिनीकरहेमचन्द्रौ ॥ ज्वरः । इति राजनिर्घण्टः ॥
("नानातन्त्रविहीनानां भिषजामल्पमेधसां ।
सुखं विज्ञातुमातङ्कमयमेव भविष्यति" ॥
इति माधवकरः ॥
रोगार्थे उदाहरणं यथा सुश्रुते ।
"प्रत्नेन च विजानीयात् देशं कालं जातिं साम्यमातङ्कसमुत्पत्तिं वेदनासंसुप्तायं बलमित्यादि" ॥
ज्वरार्थे पर्य्यायान्याह ।
"ज्वरो विकारो रोगश्च व्याधिरातङ्क एव च ।
इत्यर्थनामपर्य्यायैर्विविधैरभिधीयते" ॥
इति चरकः ॥)

आतञ्चनं, क्ली, (आङ् + तञ्च् + ल्युट् ।) प्रतिघातः । गणितस्य खर्वादेर्द्व्यात्तरेखावचूर्णनं । इति स्वामी ॥ निक्षेपणं । इति सुभूतिः ॥ उपद्रवः । इति रायमुकुटः ॥ द्रवद्रव्यप्रक्षेपणोचितचूर्णं । इति शारसुन्दरी ॥ जवनं । वेगः । व्याप्यायनं । तर्पणं । इत्यमरभेदिन्यौ ॥

आततायी, [न्] त्रि, (आतत + अय + घिन् ।) वधोद्यतः । इत्यमरः ॥
"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारापहारी च षडेते आततायिनः ॥
आततायिनमायान्तं हन्यादेवाविचारयन् ।
नाततायिवधे दोषो हन्तुर्भवति कश्चन" ॥
इति भगवद्गीताटीकायां श्रीधरस्वामी ॥

आतपः, पुं, (आङ् + तप + घञ् ।)
रौद्रं । तत्पर्य्यायः । प्रकाशः २ द्योतः ३ । इत्यमरः ॥ दिनज्योतिः ४ सूर्य्यालोकः ५ दिनप्रभा ६ रविप्रकाशः ७ प्रद्योतः ८ तमारिः ९ तापनः १० द्युतिः ११ । अस्य गुणाः । कटुत्वं । रूक्षत्वं स्वेदमूर्च्छादाहवैवर्ण्यजनकत्वं । नेत्ररोगप्रकोपनत्वञ्च ॥ इति राजनिर्घण्टः ॥

("आतपः कटुको रूक्षः स्वेदमूर्च्छादाहवैवर्ण्यजननो नेत्ररोगप्रकोपनः" ॥
"आतपः पित्तदृष्ट्याग्निस्वेदमूर्च्छाभ्रमासृजत् ।
दाहवैवर्ण्यकारी च" इति सुश्रुतः ॥
यथा शाकुन्तले,—
"कथमातपे गमिष्यसि परिवाधाकोमलैरङ्गैः" ॥
यथा ऋतुसंहारे, ११ ।—
"मृगाः प्रचण्डातपतापिता भृशम्" ॥)

आतपत्रं, क्ली, (आतप + त्रै + कः) छत्रं । इत्यमरः ॥
(यथा शाकुन्तले,—
"राज्यं स्वद्दस्तधृतदण्डमिवातपत्रं" ।
यथा रामायणे,—
"पाण्डरेणातपत्रेण ध्रियमाणेन मूर्द्धनि" ॥
"छत्रशब्देऽस्य गुणादयो ज्ञातव्याः" ।)

आतपत्रकं, क्ली, छत्रं । इति शब्दरत्नावली ॥

आतपवारणं, क्ली, (आतप + वारि + ल्युट् ।) छत्रं । इति हेमचन्द्रः ॥ (यथा रघुवंशे, ३ । ७० ।
"दृषत्तिकाकुदं दत्वा यूने सितातपवारणं" ।
"अनुदितान्यसितातपवारणः" ॥)

आतपाभावः, पुं, (आतपस्य अभावः । षष्ठीतत्पुरुषः ।) छाया । इति राजनिर्घण्टः ॥

आतरः, पुं, (आङ् + तॄ + अप् । आतरत्वनेन, पुंसि संज्ञायामिति घः ।) गद्यादितरणाय देयकपर्दकादिः । तत्पर्य्यायः । तरपण्यं २ । इत्यमरः ॥ पाराजिकड़ि नौकाभाड़ा इति भाषा ॥

आतर्पणं, क्ली, (आङ् + तृप् + ल्युट् ।) प्रीणनं । तृप्तिः । मद्यफालेयकं । आसिपना इति भाषा । इति मेदिनी ॥ (यथा मेदिनी ।
"आतर्पणं प्रीणने स्यात् मद्यफालेयकेऽपि च" ॥)

आतायी, [न्] पुं, (आङ् + तायि + घिन् ।) आतायी । चिल्लः । इत्यमरटीकायां स्वामी ॥ (असुरभेदः । चिल इति ख्यातः पक्षिभेदः ॥)

आतायो, [न्] पुं, (आङ् + ताय + घिन् ।) चिल्लः । चिल इति भाषा । इत्यमरः ॥

आतारः, पुं, (आङ् + तॄ + घञ् ।) आतरः । तरपण्यं । इति शब्दरत्नावली ॥

आतिः, पुं, (अत + इञ् ।) पक्षी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

आतिथेयः, त्रि, (अतिथि + ढञ् । अतिथौ साधुः ।) अतिथिसेवाकारकः । इत्यमरः ॥ (यथा रघुवंशे, ५ । २
"प्रत्युज्जगामातिथिमातिथेयः ॥
यथा कुमारसम्भवे, ५ । २१ ।
"तमातिथेयी बहुमानपूर्व्वया सपर्य्यया" ।
यथा मनुः, ३ । १८ ।
"दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु" ।

आतिथ्यं, त्रि, (अतिथि + ष्यञ् ।)
अतिथ्यर्थवस्तु । अतिथिमत्कादिदत्थं इत्यमरः ॥ अतिथिसेवा च ॥ ("यथा हितोपदेशे ।
"अरावप्युचितं कार्य्यमातिथ्यं गृहमागते" ॥)

आतिथ्यः, पुं, अतिथिः । इति मेदिनी ॥

आतुः, पुं, (आङ् + तु + डुः ।) मेषकः । मेषा माड़ इत्यादि भाषा । इति शब्दमाला ॥

आतुरः, त्रि, (आङ् + तुर + क) रोगी । तत्पर्य्यायः । आमयावी २ विकृतः ३ व्याधितः ४ अपटुः ५ अभ्यमितः ६ अभ्यक्तः ७ । इत्यमरः ॥ (यथा हितोपदेशे । वैद्यानामातुरः श्रेयान् । यथा मनुः, ४ । १२६ ।
"न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि" ॥
आतुरावस्थास्वपि कार्य्याकार्य्ये प्रति कालाकालसंज्ञा । तद्यथा—अस्यामवस्थायामस्य भेषजस्य कालोऽकालः पुनरस्येति । एतदपि भवत्यवस्थाविशेषेषु तस्मादातुरावस्थास्वपि हि कालाकालसंज्ञा ! तस्य परीक्षा मुञ्जर्मुञ्जरातुरस्य सर्व्वावस्थाविशेषावेक्षणं यथावद्भेषजप्रयोगार्थं । न ह्यतिपतितकालमप्राप्तकालं वा भेषजमुपयुज्यमानं यौगिकं भवति । कालोहि भैषज्ययोगपर्य्यायमभिनिर्व्वर्त्तयति ॥ इति चरकः ॥
आतुरमुपक्रममाणेन भिषजायुरेवादौ परीक्षेत ।
इति सुश्रुतः ॥)

आढ्यं, क्ली, (आढ्य + ष्यञ् ।) धनविशेषः । आता इति भाषा । अस्य गुणाः । दृष्टिजनकत्वं । रक्तवर्द्धकत्वं । स्वादुत्वं । शीतलत्वं । बलमांसकारित्वं । हृद्यत्वं । दाहरक्तपित्तवायुनाशित्वञ्च । इति द्रव्यगुणाः ॥

आतोद्यं, क्ली, (आङ् + तुद् + ण्यत् ।) वाद्यं । तच्चतुर्विधं । वीणादिवाद्यं ततं १ मुरजादिवाद्यं आनद्धं २ वंश्यादिवाद्यं सुषिरं ३ कांस्यतालादिवाद्यं घनं ४ इत्यमरः ॥ (यथा रघुवंशे । "वज्रमातोद्यशिरोनिवेष्टितां ।
"आतोद्यं ग्राहयामास समत्वाज्जयदायुधं" ॥)

आत्तगन्धः, त्रि, (आत्तः अरिष्टा गृहीतः गन्धो गर्व्वो यस्य सः बहुव्रीहिः ।) दूरीभूताहङ्कारः । तत्पर्य्यायः । अभिभूतः २ । इति हेमचन्द्रः ॥ गृहीतगन्धः ॥ (यथा रघुवंशे १३ । १७ ।
"पक्षच्छिदा गोत्रभिदात्तगन्धाः
शरण्यमेनं शतशो गृहीताः" ।)

आत्तगर्व्वः, त्रि, (आत्तः अरिष्टा गृहीतः गर्व्वो यस्य सः बहुव्रीहिः ।) अरिष्टा गृहीतगर्व्वः । दूरीभूताहङ्कारः । भग्नदर्पः । इत्यमरः ॥

आत्मगुप्ता, स्त्री, (आत्मना गुप्ता । तृतीया तत्पुरुषः ।) लताविशेषः । आलकुशी इति भाषा । तत्पर्य्यायः । मर्कटी २ कण्डुरा ३ अध्यण्डा ४ कच्छुरा ५ जटा ६ जड़ा ७ शुकशिम्बा ८ आत्मगुप्ता ९ ऋषभी १० कपिकच्छुरा ११ । इति रत्नमाला ।
("माषैः समानं फलमात्मगुप्ता" । इति सुश्रुतः । विशेषोऽस्याः कपिकच्छुराशब्दे द्रष्टव्यः ।)

आत्मयाजी, [न्] त्रिः, (आत्मन् + यज + घिन् ।) आत्मम्भरिः । स्वार्थी ॥

आत्मघाती, [न्] त्रि, (आत्मन् + हन् + घिन् ।) आत्महन्ता । यथा कूर्म्मपुराणे ॥
"व्यापादयेद्दृष्टयात्मानं स्वयं योऽन्युदकादिभिः ।
विहितं तस्य नाग्नौचं नाग्निर्नाप्युदकादिकं" ॥
आत्महननकर्त्ता । अवैधबुद्धिपूर्व्वकात्महननस्य प्रायश्चित्तं यथा,—
'इन्द्रियैरपरित्यक्ता ये च मूढा विषादिनः ।

घातयन्ति स्वमात्मानं चण्डालादिहताश्च ये ॥
तेषां पुत्राश्च पौत्राश्च दयया समभिप्लुताः ।
यच्च आद्धं प्रयच्छन्ति विष्णुनामप्रतिष्ठितं ॥
तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवे" ।
इति हेमाद्रौ दक्षज्ञातातपेनोक्तम् ।
"आत्मनो घातशुद्ध्यर्थं चरेच्चान्द्रायणद्वयं ।
तप्तकृच्छ्रचतुष्कञ्च त्रिंशत् कृच्छ्राणि वा पुनः ॥
अर्ध्वाक् संवत्सरात् कुर्य्यादहनादि यथोदितं ।
ज्ञात्वा नारायणबलिमनित्यत्वात्तदायुषः" ॥
इदमात्मवधनिमित्तं तज्ज्ञातिवधप्रायश्चित्तेन समुचितं कार्य्यम् । इति निर्णयसिन्धौ ५ परिच्छेदः ॥
अन्यत् पतितशब्दे द्रष्टव्यम् ॥ * ॥ आत्मत्यागिषु विशेषमाह गौतमः । "प्रायोऽनाशकप्रस्थाग्नि-विषोदकोद्बन्धनप्रपतनैरेच्छताम्" इति । प्रायो महाप्रस्थानं । अनाशकमनशनं । प्रपतनं शैल-शिखरादवपातनं । इत्यादिनिमित्तैः शास्त्रावि-हितमार्गेण इच्छापूर्व्वकमृतानामग्नौचादिकं न कर्त्तव्यमित्यर्थः । अङ्गिराः ।
"चाण्डालादुदकात् सर्पात् ब्राह्मणादैद्युतादपि ।
दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्म्मिणां ॥
उदकं पिण्डदानञ्च प्रेतेभ्यो यत् प्रदीयते ।
नोपतिष्ठति तत्सर्व्वं अन्तरीक्षे विनश्यति" ॥
यथा मनुः ।
"दुष्कासङ्गरजातानां प्रव्रज्यासु च तिष्ठतां ।
आत्मनस्त्यागिनां चैव निवर्त्तेतोदकक्रिया" ॥
दुष्कासङ्गरजातानामिति दुष्कुलजाताः पञ्चमहा-यज्ञादिरहिताः । सङ्गरजाताः प्रतिलोमजाः ॥ * ॥ प्रमादात् पूर्व्वोक्तनिमित्तैर्म्मरणे विद्यते एवा-ग्नौचादिकं । अतएवाङ्गिराः ।
"अथ कश्चित् प्रमादेन म्रियेतास्मादकादिभिः ।
तस्याग्नौचं विधातव्यं कर्त्तव्या चोदकक्रिया" ॥
चाण्डालादिदग्धाग्निदग्धादीनां प्रतिपत्तिकर्म्म च स्मृत्यन्तरेऽभिहितं ।
"चैतानं प्रक्षिपेदग्नौ आवसथ्यं चतुष्पथे ।
पात्राणि तु दहेदग्नौ यजमाने दृष्यति" ॥
दृष्यतः अविहितमार्गेण मृतः । तथा,—
"आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया ।
तेषामपि च गङ्गायास्तीरे संस्थापनं मतं" ॥
गङ्गेति पुण्यनद्युपलक्षणं ॥ * ॥ एवं पूर्व्वोक्त-निमित्तमरणे मृतानां खेहादिनाद्याग्नौर्द्ध्वदेहिक-करणे स्मृत्यन्तरे प्रायश्चित्तमाम्नातं ।
"ज्ञात्वाग्निमुदकं स्नानं स्पर्शनं हवनं तथा ।
"रज्जुच्छेदाश्रयातश्च तप्तकृच्छ्रेण शुद्ध्यति" ॥ इति ।
एतच्च बुद्धिपूर्व्वं प्रत्येकमन्यादिकरणे ॥
अबुद्धिपूर्व्वके तु संवर्त्तः ।
"दृष्वामन्त्रीतमं प्रेतं यो वहेत दहेत वा ।
कटोदककिया ज्ञात्वा कृच्छ्रं सान्तपनं चरेत्" ॥
यच्च समनन्वादिर्मासं भैक्षाहारस्त्रिसवनञ्च ।
तथा एकरात्राभोजनादिकं चाभिहितं तदशक्त-विषये देशकालाद्यपेक्षानुसारेण योजनीयं ॥ * ॥
यस्तु दक्षादिर्दुर्जनमभिषक्क्रियस्तस्यात्महननमप्यनु-ज्ञातमादिपुराणे ।
"दक्षः शौचस्मृतेर्दुग्नः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेदस्तु भृग्वग्न्यनशनाम्बुभिः ॥
तस्य त्रिरात्रमाशौचं द्वितीये तस्त्रिसन्ध्यः ।
तृतीये तूदकं ज्ञात्वा चतुर्थे श्राद्धमारभेत्" ॥
तथा,—
"गच्छेत् महापथं वापि तुषारगिरिमादरात् ।
प्रयागे वटशाखायां देहत्यागं करोति यः ॥
स्वयं देहविनाशस्य काले प्राप्ते महामतिः ।
उत्तमान् प्राप्नुयाल्लोकान्नात्मघाती भवेत् क्वचित् ॥
एतेषामधिकारस्तु सर्व्वेषां सर्व्वजन्तुषु ।
नराणामथ नारीणां सर्व्ववर्णेषु सर्व्वदा ॥
अशौचं स्यात् यथैतेषां वक्ष्यमाणहतेषु च ।
वाराणस्यां त्रियेद्यस्तु प्रत्याख्यातभिषक्क्रियः ॥
प्रणवं तारकं ब्रूते नान्यथा कस्यचित् क्वचित्" ।
विवस्वान् ।
"सर्व्वेन्द्रियविमुक्तस्य स्वव्यापाराद्यमस्य च ।
प्रायश्चित्तमनुज्ञातमग्निपातो महापथः" ॥
धर्म्मार्জ্জनासमर्थस्य दानव्रतार्द्धकादिरूपप्राय-श्चित्तासमर्थस्य । एवं शास्त्राविहितमार्गेण मृतानां चाण्डालादिमृतानां संवत्सरादूर्द्धमौर्द्धदेहिकं कार्य्यं । षट्त्रिंशन्मते ।
"गोब्राह्मणहतानाञ्च पतितानां तथैव च ।
ऊर्द्धं संवत्सरात् कुर्य्यात् सर्व्वमेवौर्द्धदेहिकं" ॥ * ॥
अत्रापरं विशेषमाह पराशरः ।
"चाण्डालेन श्वपाकेन गोभिर्व्विप्रैर्हतो यदि ।
आहिताग्निर्मृतो विप्रो लोकाग्नौ मन्त्रवर्জ্জितं ।
दग्ध्वास्थीनि पुनर्गृह्य क्षीरेण स्नापयेत्ततः ।
खेताग्निना स्वमन्त्रेण एषगेतत् पुनर्हुतं" ॥ * ॥
संवत्सरादर्ध्वमपि तत्तत्पापानुसारेण दिगुणादि-प्रायश्चित्तं विधाय नारायणबलिञ्च ज्ञात्वा और्द्ध्व-देहिकं कार्य्यं । आयुषोऽनित्यत्वेन संवत्सरानन्तर-मौर्द्धदेहिकादिलोपप्रसङ्गात् । तच्च नारायण-बलिं ज्ञात्वा । तथा च दक्षयाज्ञवल्क्यौ ।
"नारायणबलिः कार्य्यो लोकगर्हाभयान्नरैः ।
तथा तेषां भवेत् शौचं नान्यथेत्यब्रवीदृषभः" ॥
नारायणबलौ ज्ञाते और्द्ध्वदेहिककरणे भवती-त्यर्थः । * ॥ सर्पहते तु विशेषः । संवत्सरं यावत् पक्वान्नागपूजां विधाय तदनन्तरं नारायण-बलिं ज्ञात्वा सौवर्णनागं प्रत्यक्षां गाञ्च व्यासोद्दे-शेन ब्राह्मणाय दत्त्वा और्द्धदेहिकं कुर्य्यात् ॥ * ॥
नारायणबलिस्वरूपञ्च विष्णुनाभिहितं ।
"एकादश्यां समासाद्य शुक्लपक्षस्य वै तिथिं ।
विष्णुं समर्च्चयेद्देवं यमं वैश्वस्तं तथा ॥
दग्धपिण्डान् हताभ्यक्तान् दर्भेषु मधुसंयुतान् ।
तिलमिश्रान् प्रदद्याद्वै संयतो दक्षिणामुखः ॥
विष्णुं बुद्धौ समासाद्य गच्छसि ततः क्षिपेत् ।
नामगोत्रयुगं ज्ञात्वा पुष्पैरभ्यर्चनं ततः ॥
धूपदीपप्रदानञ्च भक्ष्यभोज्यं तथापरं ।
विधातपःसमुद्भान् वै कुलोत्पन्नान् समाहितान् ॥
निमन्त्रयेत विप्रान् वै पञ्च सप्त नवापि वा ।
अपरेऽह्नि सम्प्राप्ते मध्याह्ने समुपोषितः ॥
विष्णोरभ्यर्चनं कृत्वा विप्रांस्तानुपवेशयेत् ।
उदङ्मुखान् यथान्यायेषं पिण्डरूपमनुस्मरन् ॥
मनो निवेश्य विष्णौ वै सर्व्वं कुर्य्यादतन्द्रितः ।
आवाहनादि यत् प्रोक्तं दैवपूर्व्वं तदाचरेत् ॥
दत्तान् ज्ञात्वा ततो विप्रस्तृप्तिं दृष्ट्वा यथाविधि ।
हविष्यश्चन्नेनैव तिलादिसहितेन च ॥
पञ्च पिण्डान् प्रदद्याच्च दैवरूपमनुस्मरन् ।
प्रथमं विष्णवे दद्यात् ब्रह्मणे च द्वितीयं च ॥
यमाय सानुसाराय चतुर्थं पिण्डमुत्सृजेत् ।
मृतं संकीर्त्य मनसा गोत्रपूर्व्वमतःपरं ॥
विष्णोर्नाम गृहीत्वैवं पञ्चमं पूर्व्ववत् क्षिपेत् ।
विप्रानाचम्य विधिवत् दक्षिणाभिः समर्चयेत् ॥
एकं दक्षतमं विप्रं हिरण्येन समर्चयेत् ।
गवा वस्त्रेण भूम्या च प्रेतं तं मनसा स्मरेत् ॥
ततस्तिलाम्भो विप्रास्तु हस्तैर्दर्भसमन्वितैः ।
क्षिपेयुर्गोत्रपूर्व्वन्तु नाम बुद्धौ निवेश्य च ॥
हविर्गन्धतिलाम्भस्तु तस्मै दद्युः समाहिताः ।
मित्रभृत्यजनैः सार्द्धं पश्चाद्भुञ्जीत वाग्यतः" ॥
भविष्यपुराणे ।
"सुवर्णतारनिष्पन्नं नागं कृत्वा तथैव गां ।
व्यासाय दत्त्वा विधिवत् पितुरान्ण्यमाप्नवान्" ॥
इति मदनपारिजाते ५ स्तवकः ॥

आत्मघोषः, पुं, (आत्मानं घोषयतीति । आत्मन् + घुष् + अच् ।) काकः । इत्यमरः ॥ कुक्कुटः । इति शब्दचन्द्रिका ॥

आत्मजः, पुं, (आत्मन् + जन् + डः । आत्मा वै जायते पुत्र इति श्रुतेः ।) पुत्रः । इत्यमरः ॥ मनुः, १७ । १ ॥
"तस्यार्थे सर्व्वभूतानां गोप्तारं धर्म्ममात्मजं" ।
यथा रामायणे,—
"दिष्ट्या प्रसवयामास दितिर्दुर्जनकात्मजं" ॥)

आत्मजन्मा [न्] पुं, (आत्मनः जन्म यस्य सः बहु-व्रीहिः ।) पुत्रः । इति शब्दरत्नावली ॥
यथा कुमारसम्भवे, ६ । २८ ।
"अत आहर्तुमिच्छामि मार्ग्गतीमात्मजन्मने" ।
यथा रघुवंशे, १ । ३३ ।
"तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः" ॥)

आत्मजा, स्त्री, (आत्मन् + जन् + ड + आप् ।) कन्या । इत्यमरः ॥ बुद्धिः । इति शब्दरत्नावली ॥

आत्मतत्त्वं, क्ली, (आत्मनः तत्त्वं स्वरूपम् ।) तत्तद्वा-सकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमे-वात्मतत्त्वं । शुद्धादिभासकं नित्यशुद्धत्वादिस्वरूप-मेवात्मवस्त्विति यावत् । एतद्विवरणं यथा ।
"इदानीं प्रत्यगात्मनि इदमिदमयमयमारोपय-तीति विशेष उच्यते । तथाच । अतिप्राज्ञतस्तु आत्मा वै जायते पुत्र इत्यादि श्रुतेः स्वस्मिन्नेव स्वपुत्रेऽपि प्रेमदर्शनात् पुत्रे पुत्रे नष्टेऽहमेव पुत्रो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति ॥ १ ॥ चार्व्वाकस्तु स वा एष पुरुषोऽन्नरसमय इत्यादि श्रुतेः प्रदीप्तस्फात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् स्थूलोऽहं ह्रस्वोऽहं इत्याद्य-नुभवाच्च स्थूलशरीरमात्मेति वदति ॥ २ ॥ अप-रश्चार्व्वाकः तेऽप्राज्ञाः प्रज्ञामतिं समेत्य ब्रूयु

रित्यादिश्रुतेः इन्द्रियाद्यभावे शरीरचलनाभावात् काणोऽहं वधिरोऽहं इत्याद्यनुभवाच्च इन्द्रियाद्यात्मेति वदति ॥ ३ ॥ अन्यस्तु चार्व्वाकः अन्योऽन्तर आत्मा प्राणमय इत्यादिश्रुतेः प्राणाभावे इन्द्रियचलनायोगात् अहमशनायावानहं पिपासावान् इत्याद्यनुभवाच्च प्राण आत्मेति वदति ॥ ४ ॥ इतरस्तु चार्व्वाकः अन्योऽन्तर आत्मा मनोमय इत्यादिश्रुतेः मनसि सुप्ते प्राणादेरभावात् अहं सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति ॥ ५ ॥ बौद्धस्तु अन्योऽन्तर आत्मा विज्ञानमय इत्यादिश्रुतेः कर्त्तुरभावे करणस्य ग्रहणाभावात् अहं कर्त्ताहं भोक्ता इत्याद्यनुभवाच्च बुद्धिरात्मेति वदति ॥ ६ ॥ प्राभाकरतार्किकौ तु अन्योऽन्तर आत्मा आनन्दमय इत्यादिश्रुतेः सुषुप्तौ बुद्ध्यादीनामज्ञाने सत्यदर्शनात् अहमज्ञोऽहं ज्ञानीत्याद्यनुभवाच्च अज्ञानमात्मेति वदतः ॥ ७ ॥ भट्टस्तु प्रज्ञानघन एवानन्दमय आत्मेत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशयद्भावात् मामहं न जानामि इत्याद्यनुभवाच्च अज्ञानोपहितं चैतन्यमात्मेति वदति ॥ ८ ॥ अपरबौद्धः असदेवेदमय आसीदित्यादिश्रुतेः सुषुप्तौ सर्व्वाभावादहं सुप्तः सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति ॥ ९ ॥ इतेषां पुत्रादीनां शून्यपर्य्यन्तानामनात्मत्वमुच्यते। एतैरेतिप्राह्यतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्व्वपूर्व्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मबाधदर्शनात् पुत्रादीनामनात्मत्वं स्पष्टमेवेति ॥ * ॥ किञ्च प्रत्यगभिन्नोऽचक्षुरश्रोत्रोऽमना अकर्त्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधात् अस्य पुत्रादिशून्यपर्य्यन्तस्य जड़स्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वात् अहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्य्यन्तमखिलमनात्मैव। अतस्तत्साक्षात्कारं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यनैवात्मतत्त्वमिति वेदान्तविदनुभवः" । इति वेदान्तसारः (५०—५८)।

आत्मदर्शः, पुं, (आत्मन् + दृश् + घः ।) दर्पणः। इति हेमचन्द्रः। (यथा रघुवंशे । "निश्वासवाष्पागमसम्भ्रमेण । प्रसादमात्मीयमिवात्मदर्शः" ।)

आत्मनीन, त्रि, (आत्मन् + खः ।) आत्मने हितं । इति आकरग्रन्थः। पथ्यं । इति राजनिर्घण्टः ॥ ("मनसिर्द्दतिमात्मनीनाम्" । इति प्रबोधचन्द्रोदयः ।)

आत्मनीनः, पुं, (आत्मन् + ख ।) सुतः । ज्ञाताः ॥ प्राज्ञाधारः । विदूषकः । इत्यजयः ॥

आत्मबन्धु, पुं, (आत्मनः बन्धुः । षष्ठीतत्पुरुषः । यद्वा "आत्ममाद्यस्वसृः पुत्रा आत्मापिट्यस्वसृः सुताः । आत्ममातृजपुत्राश्च विज्ञेया आत्मबान्धवाः" ।) पितृष्वस्रादिपुत्रः । मातृजपुत्रः । मातृष्वस्रादिपुत्रः । इति स्मृतिः॥

आत्मवीरः, पुं, (आत्मा वीरइव यस्य ।) प्राज्ञवान् । ज्ञाताः । विदूषकः । इति मेदिनी ॥

आत्मभूः, पुं, (आत्मन् + भू + क्विप् ।) ब्रह्मा । कामदेवः । इत्यमरः ॥ विष्णुः । शिवः । इति शब्दरत्नावली ॥
(यथा रघुवंशे १० । २० ।
"सर्व्वस्रष्टुरमिज्ञातः सर्व्वयोनिरयोनिमान्नभूः" ।)

आत्ममूली, स्त्री, (आत्मन् + मूल + ङीप् ।) दुरालभाशब्दः । इति शब्दमाला ॥ (दुरालभाशब्दे ऽस्याविशेषोज्ञेयः ।)

आत्मम्भरि, त्रि, (आत्मानं बिभर्त्तीति, आत्मन् + भृ + इन् + मुम् ।) आत्मोदरमात्रभरणकर्त्ता । तत्पर्य्यायः । कुक्षिम्भरि २ स्वोदरपूरकः ३ । इत्यमरः ॥ (आधूनः, परार्थवैमुख्येन स्वार्थसाधनपरः । यथा भट्टिकाव्ये । "आत्मम्भरित्वं पिशुनैर्नराणां" ॥ यथा हितोपदेशे ।
"शिष्टैरप्यविशेषज्ञ उदरं क्षतनाशकः ।
त्यज्यते किं पुनर्नान्यैः पलाण्डुरात्मम्भरिर्नरः" ॥)

आत्मयोनिः, पुं, (आत्मैव योनिरुपादानकारणमस्य बहुव्रीहिः ।) ब्रह्मा । विष्णुः । शिवः । कामदेवः । इति मेदिनीशब्दरत्नावल्यौ (यथा कुमारे १ । ७० ।
"ददर्श चक्रीक्षतचारुपार्श्वं
प्रहर्त्तुमभ्युद्यतमात्मयोनिं" ॥)

आत्मरक्षा, स्त्री, महेन्द्रवारुणीवृक्षः । इति राजनिर्घण्टः । (आत्मशरीररक्षणं ।)

आत्मलभ्या, स्त्री, शतावरी । इति राजनिर्घण्टः ॥

आत्मश्लाघा, स्त्री, (आत्मनः श्लाघा ।) आत्मगर्व्वः । स्वीयप्रशंसा ।

आत्महत्या, स्त्री, (आत्मनः हत्या ।) आत्मघातः । स्वबधः ॥

आत्महा, [न्] पुं, (आत्मन् + हन् + क्विप् ।) देवजः । इति शब्दरत्नावली । आत्मघाती । "इदेहमाद्यं सुलभं सुदुर्लभं ध्रुवं सुकल्पं गुरुकर्णधारं । मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा" ॥ इति श्रीभागवते । (अपरञ्च यथा,
"लब्धा कथञ्चित् नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनं । यस्त्वात्ममृत्यौ न यतेत मूढधीः स आत्महा स्वं विनिहन्त्यसद्ग्रहात्" ॥)

आत्मा, [न्] पुं, (अतति सन्ततभावेन ज्ञानादिसर्व्वावस्थासु अनुवर्त्तते, अत सातत्यगमने + मनिन् ।) यत्नः । धृतिः । बुद्धिः । स्वभावः । ब्रह्म । देहः । इत्यमरः ॥ मनः । इति मेदिनी ॥ परावर्त्तनं । इति धरणी ॥ पुत्रः । इति शब्दरत्नावली । जीवः । यत्नः । उत्साहः । वायुः । इति हेमचन्द्रः ॥
("आत्मज्ञः करणैर्योगात् ज्ञानं तस्य प्रवर्त्तते" ।
"अव्यक्तमात्मा क्षेत्रज्ञः शाश्वतो विभुरव्ययः" ।
"चेतवान् यतश्चात्मा ततः कर्त्ता निगद्यते" ।
"देही सर्व्वगतोऽज्ञात्मा क्षेत्रे संस्पर्शनेन्द्रिये ।
सर्व्वाः सर्व्वास्ववस्थासु नात्मानो वेत्ति वेदनाः" ॥
"विभुत्वमतएवास्य यस्मात् सर्व्वगतो महान् ।
मनसश्च समाधानात् पश्यत्यात्मा तिरस्कृतं" ॥
"आदिर्नास्त्यात्मनः क्षेत्रपारम्पर्य्यमनादिकं" ।
"स सर्व्वगः सर्व्वशरीरभृच्च,
स विश्वकर्म्मा स च विश्वरूपः ।
स चेतनाधातुरतीन्द्रियश्च,
स नित्ययुक् सानुशयः सएव ॥
रसात्ममातापितृसम्भवानि,
भूतानि विद्याद्दश षट् च देहे ।
चत्वारि तत्रात्मनि संश्रितानि,
स्थितस्तथात्मा च चतुर्षु तेषु ॥
भूतानि मातापितृसम्भवानि,
रजश्च शुक्रञ्च वदन्ति गर्भे ।
आप्यायते शुक्रमसृक्समुद्भवै-
र्यैस्तानि भूतानि रसोद्भवानि ॥
भूतानि चत्वारि तु कर्म्मजानि,
यान्यात्मजीवानि विशन्ति गर्भं ।
सवीजधर्म्माह्यपरापराणि,
देहान्तराण्यात्मनि यान्ति यान्ति ॥
रूपादिरूपप्रभवः प्रसिद्धः,
कर्म्मात्मकानां मनसो मनस्तः ।
भवन्ति येत्वाह्यतिबुद्धिभेदाः
रजस्तमस्तत्र च कर्म्महेतुः ॥
अतीन्द्रियैस्तैरतिसूक्ष्मरूपै
रात्मा कदाचिन्न वियुक्तरूपः ।
न कर्म्मणा नैव मनोमतिभ्यां
न चाप्यहङ्कारविकारदोषैः" ॥
इति चरकः ॥
"यदा यदात्माक्षतिमान्यं भवे-
त्तदा मनस्तत्त्वधितिष्ठतीन्द्रियं ।
ततो मनोऽधिष्ठितमिन्द्रियं घटे-
प्रवर्त्तते संग्रयबुद्धिसम्भवे" ॥
इति वैद्यकवादार्थदर्पणं ।)

आत्माधीनः, पुं, (आत्मनोऽधीनः ।) पुत्रः । प्राज्ञाधारः । ज्ञाताः । विदूषकः । इति हेमचन्द्रः ॥

आत्माग्नी, [न्] पुं, (आत्मन् + अग्नि + णिन् ।) मत्स्यः । इति त्रिकाण्डशेषः ॥

आत्माश्रयः, पुं, (आत्मा आश्रयो यस्य सः ।) तर्कविशेषः । तस्य लक्षणं । स्वापेक्षापादकप्रसङ्गत्वं । अपेक्षा च ज्ञप्तौ उत्पत्तौ स्थितौ च ज्ञाप्या । तत्राद्या यथा । एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यं स्यात् एतद्घटज्ञानभिन्नं स्यात् । द्वितीया तु घटोऽयं यद्येतद्घटजनकः स्यात् एतद्घटभिन्नः स्यात् । तृतीया च अयं घटो यद्येतद्घटवृत्तिः स्यात् तथात्वेनोपलभ्येत इति ॥

आत्मीयः, त्रि, (आत्मन् + छ ।) स्वकीयः । अन्तरङ्गः । इति हेमचन्द्रः ॥ (यथा रघुवंशे ।
"प्रसादमात्मीयमिवात्मदर्शः" ।
कुमारसम्भवे । २ । १९ ॥
"किमिदं द्युतिमात्मीयां न बिभर्त्ति यथा पुरा"।)

आत्मोद्भवा, स्त्री, (आत्मनः उद्भवो यस्याः सा ।) मायपर्णी । इति राजनिर्घण्टः ॥ कन्या । पुत्रे, पुं ॥ (मायपर्णीशब्देऽस्या विशेषो ज्ञातव्यः ।)

आत्रेयः, पुं, (अत्रेरपत्यं पुमान् । अत्रि + ढक् ।) अत्रिमुनिपुत्रः । स च दत्तः । दुर्व्वासाः । चन्द्रश्च ।

इति मेदिनी ॥ शरीरस्थरसधातुः । इति हेमचन्द्रः ॥

आत्रेयिका, स्त्री, (अत्रि + ढक् + कन् + टाप् ।) ऋतुमती । इति हलायुधः ॥

आत्रेयी, स्त्री, (अत्रि + ढक् + ङीप् ।) पुष्पवती स्त्री । (यथाह अङ्गिराः,—

"आहिताग्नेर्ब्राह्मणस्य हृत्वा पत्नीमनिन्दिताम् ।
ब्रह्महत्याव्रतं कुर्य्यात् आत्रेयीमप्तथैव च" ॥)

नदीविशेषः । इति मेदिनी ॥ (अत्रिमुनिपत्नी ।) यथा भारते,—

"सरयूर्वारवत्या च लाङ्गली च सरिद्वरा ।
करतोया तथात्रेयी लौहित्यश्च महानदः" ॥)

आथर्व्वणं, क्ली, (अथर्व्वन् + अण् ।) अथर्व्वणां समूहः । अथर्व्वनाम्ना मुनिना प्रोक्तो वेदः अथर्व्वा तेषां सङ्घः । इत्यमरः ॥ शान्तिमन्त्रं । इति हेमचन्द्रः ॥ (यथा महावीरचरिते ।

"आथर्व्वणस्तोत्र इवाभिचारः" ।)

आथर्व्वणः, पुं, (अथर्व्व वेत्तीति । अथर्व्वन् + अण् ।) पुरोहितः । अथर्व्ववेदज्ञब्राह्मणः । इति हेमचन्द्रः ॥

आदरः, पुं, (आङ् + दृ + अप् ।) आरम्भः । इति त्रिकाण्डशेषः ॥ समादरः । सम्मानः ॥ (यथा किरातार्জ্জুनीये ५ । १६ ।

"स जगदे वचनं प्रियमादरात्
मुखरतावसरे हि विराजते" ।

कुमारसम्भवे ६ । १३ ।

"तद्दर्शनादभूत् ग्रन्थोर्भूयान् दारार्थमादरः" ।

हितोपदेशे ।

"सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः" ।)

आदर्य्यः, त्रि, (आङ् + दृ + ण्यत् ।) आदरणीयः । आदर्त्तव्यः ॥ आदरोपयुक्तः ॥

आदर्शः, पुं, (आङ् + दृश् + घञ् ।) दर्पणं । टीका । प्रतिपुत्रकं । इति मेदिनी ॥ (यथा भगवद्गीतायां ।

"धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतं" ॥)

आदानं, क्ली, (आङ्दा + ल्युट् ।) ग्रहणं । अश्वाभरणं । इति मेदिनीहेमचन्द्रौ ॥ रोगजन्यं । इति राजनिर्घण्टः । (स्वीकारः प्रतिग्रहः । यथा कुमारसम्भवे ५ । ११ ॥

"कुशाङ्कुरादानपरिक्षतानि" ॥ मनुः, ७ । २०४ ।

"आदानमप्रियकरं दानञ्च प्रियकारकं ।
अभीप्सितानामर्थानां काले युक्तं प्रशस्यते" ॥)

आदानी, स्त्री, (आ + दा + ल्युट् + ङीप् ।) हस्तिघोषाख्यः । इति रत्नमाला ॥

आदिः, पुं, (आङ् + दा + कि ।) पूर्व्वः । प्रथमः । इत्यमरः ॥ पदान्ते गणसूचकः । यथा इत्यादिः ॥ (प्रथिमः । प्राक्सत्ता । नियतपूर्व्ववर्त्तिकारणं । उत्पत्तिहेतुः । सामीप्ये । व्यवस्थायां । प्रकारे, अवयवार्थे च आदिशब्दस्य प्रयोगो भवति । यदुक्तं,—

"सामीप्येऽथ व्यवस्थायां प्रकारेऽवयवे तथा ।
आदिशब्दं तु मेधावी चतुर्ष्वर्थेषु लक्षयेत्" ॥

यथा मानवे १ । ८ ।

"अप्यग्र्य सप्तर्व्वादौ तासु बीजमवासृजत्" ।

कुमारे १ । ६ । "जगदादिरनादित्वं" ॥)

आदिकविः, पुं, (आदिः प्रथमः कविः ।) ब्रह्मा इति श्रीभागवतं ॥ वाल्मीकिमुनिः । इति हेमचन्द्रः ॥ ("तेने ब्रह्महृदा य आदिकवये मुह्यन्ति यत् सूरयः" । इति भागवते १ । ४ ।)

आदिकारणं, क्ली, (आदि आद्यं कारणम् ।) पूर्व्वनिमित्तं । मूलहेतुः । तत्पर्य्यायः । निदानं २ । इत्यमरः ॥

आदिगदाधरः, पुं, (आदिराद्यः आदौ पूजितो वा गदाधरः ।) गयास्थदेवताविशेषः । यथा,—

"गयाशिरस्यादयित्वा गुरुत्वादास्थिता शिला ।
कालान्तरेण यक्षत्वं स्थित आदिगदाधरः ॥
तथा यक्षोऽथयक्षरूपी आसीदादौ गदाधरः ।
आदिरादौ पूजितोऽत्र देवैर्ब्रह्मादिभिर्यतः ॥
याद्याद्यगन्धपुष्पाद्यैरत आदिगदाधरः" ॥

इति गारुड़े गयामाहात्म्ये ८५ अध्यायः ॥ अपिच

"गदयादाववष्टभ्य गयासुरशिरःशिलां ।
निश्चलार्थं स्थितो यस्मात्तस्मादादिगदाधरः" ॥

इति वायुपुराणीयगयामाहात्म्ये ८ अध्यायः ॥

आदितालः, पुं, (आदिराद्यस्तालः ।) तालविशेषः । यथा,—सङ्गीतदामोदरः ।

"एकस्य सघुर्यत्र आदितालः स कथ्यते ।
गुरुस्तत् पुरतो वाद्यः प्रायेणैतन्निदर्शनं" ॥ इति ।

आदितेयः, पुं, (अदितेरपत्यं पुमान् । अदिति + ढक् ।) अदितिपुत्रः । देवः । इत्यमरः ॥

आदित्यः, पुं, (अदितेरादित्यस्य वा अपत्यं + ण्यः ।) देवः । सूर्य्यः । इत्यमरमेदिन्यौ ॥ द्वादशादित्यगणे बहुवचनान्तः । इत्यमरः ॥ तत्पर्य्येकनामानि । विवस्वान् १ अर्य्यमा २ पूषा ३ त्वष्टा ४ सविता ५ भगः ६ धाता ७ विधाता ८ वरुणः ९ मित्रः १० शक्रः ११ उरुक्रमः १२ । एते कश्यपात् अदितिभार्य्यायां जाताः । कल्पान्तरे त्वष्टृकन्या संज्ञा आदित्यपत्नी आदित्यस्य तेजः सोढुमसमर्था अतस्तस्याः घिष्टङ्कतादित्यहृदयग्रहणद्वा द्वादशादित्याः । तेषां द्वादशमासेष्वेकैकस्योदयः । इति पुराणं ॥ अर्कवृक्षः । इत्यमरः ॥ आकन्द इति भाषा । ("आदित्यमण्डलस्थितो हिरण्मयोविष्णुः" । यथा शान्तिशतके । ४ । २४ ।

"आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं" ।

भारते ।

"आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च" ।

हरिवंशे द्वादशादित्यकथा यथा ।

"मरीचात् कश्यपाज्जातास्तेऽदित्या दक्षकन्यया ।
तत्र शक्रश्च विष्णुश्च जज्ञाते पुनरेवह ॥
अर्य्यमा चैव धाता च त्वष्टा पूषा च भारत ।
विवस्वान् सविता चैव मित्रो वरुण एव च ।
अंशो भगश्चातितेजा आदित्या द्वादश स्मृताः" ॥

तस्य संवत्सरात्मनो भगवानादित्यो गतिविशेषेणाक्षिनिमेषकाष्ठाकलामुहूर्त्ताहोरात्रपक्षमासऋत्वयनसंवत्सरयुगप्रविभागं करोति ॥ इति सुश्रुतः)

आदित्यपत्रः, पुं, (आदित्यवृक्षस्य पत्रमिव पत्रमस्य ।) क्षुपविशेषः । तत्पर्य्यायः । अर्कपत्रः २ अर्कदलः ३ सूर्य्यपत्रः ४ तपनच्छदः ५ कुष्ठारिः ६ विटपः ७ सुपत्रः ८ रविप्रियः ९ रश्मिपतिः १० वह्निः ११ । अस्य गुणाः । कटुत्वं । उष्णवीर्य्यत्वं । कफवातरोगजाठरगुल्मारोचकनाशित्वं । अग्निसन्दीपनत्वञ्च । इति राजनिर्घण्टः ॥

आदित्यपुष्पिका, स्त्री, (आदित्यवत् लोहितं पुष्पमस्याः ।) लोहितार्कवृक्षः । इति रत्नमाला ॥ राङ्गा आकन्द इति भाषा ।

आदित्यभक्ता, स्त्री, (आदित्यस्य भक्ता ।) ओषधीविशेषः । ऊड़ऊड़िया इति भाषा । तत्पर्य्यायः । वरदा २ अर्कभक्ता ३ सुवर्चला ४ सूर्य्यलता ५ सूर्य्यावर्त्ता ६ अर्ककान्ता ७ मयूरकपर्णी ८ सुरसम्भवा ९ सौरी १० सुतेजाः ११ अर्कप्रिया १२ वरिष्ठा १३ मयूरकी १४ सप्तनामा १५ देवी १६ मार्त्तण्डवल्लभा १७ विक्रान्ता १८ भास्करेष्टा १९ । अस्या गुणाः । हिमत्वं । तिक्तत्वं । कटुत्वं । उष्णत्वं । कफत्वदोषकण्डूव्रणकुष्ठभूतग्रहोग्रगीतज्वरनाशित्वञ्च । अन्यच्च । स्वादुपाकरसत्वं । गुरुत्वं । अपित्तवर्द्धकत्वं । क्षाररसत्वं । विशेषवातनाशित्वञ्च । इति राजनिर्घण्टः ॥

आदित्यसूनुः, पुं, (अदितेरपत्यं पुमान् आदित्यः सूर्य्यः तस्य सूनुः षष्ठीतत्पुरुषः ।) सुग्रीववानरः । इति हेमचन्द्रः ॥ यमः । शनैश्चरः । सावर्णिमनुः । वैवस्वतमनुः । इति पुराणं ॥ (कर्णः ।)

आदिदेवः, पुं, (आदिः कारणं स च देवश्चेति कर्म्मधारयः ।) नारायणः । तत्पर्य्यायः । ऋभुक्षाः ३ अमिताभः ४ विभुः ५ विष्णुः ६ सहस्रशृङ्गः ७ वृषाकपिः ८ । इति त्रिकाण्डशेषः ॥ (जगदुपादानादिगुणवान् वासुदेवः विष्णुः, महादेवः, ब्रह्मा च यथा, भगवद्गीतायां, १० । १२ ।

"परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं ॥
त्वमादिदेवः पुरुषः पुराण-
स्त्वमस्य विश्वस्य परं निधानं" ॥

यथा, महाभारते,—सूर्य्यस्य नामाष्टशतमध्ये परिगणितो नामभेदः ।

"ध्वन्तरिर्धूमकेतुरादिदेवोऽदितेः सुतः" ॥)

आदिमं, त्रि, (आदौ भवं अयादिपक्षात् ठिमच् । यद्वा मध्यान्म इत्यनादेशेति वचनात् मः ।) आद्यं । प्रथमभववस्तु । इत्यमरटीका व्याकरणञ्च ॥ (यथाह भाषापरिच्छेदे,—

"एते पञ्चान्यधासिद्धा दण्डत्वादिकमादिमम्" ।

"आदिमः श्लेषश्लेषादिसंयोगः परिकीर्त्तितः" ॥)

आदिराजः, पुं, (आदिः प्रथमः राजा इति राजाहःसखिभ्यष्टच् ।) पृथुराजः । इति हेमचन्द्रः ॥ (महीक्षितामाद्यो वैवस्वतो मनुः । अविक्षित्सुतः खनामख्यातः पौरवो राजा । यथा, रामायणे ।

"आदिराजो मनुरिव प्रजानां परिरक्षिता" ॥

महाभारते ।

"अविक्षितः परिक्षित्तु श्रवलाश्वश्च वीर्य्यवान् ।
आदिराजो विराजश्च शाल्मलिश्च महाबलः" ॥

आदिवराहः, पुं, (आदिः कारणं स च वराहश्चेति कर्म्मधारयः।) विष्णुः। इति त्रिकाण्डशेषः॥ आदिशूकरः। आद्यकोलः॥

आदिशं, क्ली, (आद्+दिश्+क्तः।) उच्छिष्टं। इति मेदिनी॥

आदिष्टः, त्रि, (आद्+दिश्+क्त।) आदेशितः। आज्ञप्तः इति मेदिनी। (नियोजितः, उपदिष्टः, अनुशासितः, अभिहितः।)

आदीनवः, पुं, (दीङ्क्षये भावे क्तः। खादय ओदितः, ओदितश्चेति नत्वं। आदीनस्य वा नम्। ब्रजत्यर्थे क इति वाऽजलकात् वातेः कः।) क्लेशः। इत्यमरः॥ दोषः। दुरन्तः। इति मेदिनी॥ (यथा, शिशुपालवधे २। २२।
"यद्वासुदेवेनादीनमनादीनवमीरितं"।)

आदीपनं, क्ली, (आदीप्यते आङ्+दीप्+भावे ल्युट्।) आलिम्पना। इति त्रिकाण्डशेषः॥ आलिपना इति भाषा।

आदृतः, त्रि, (आङ्+दृञ्+आदियते यः कर्म्मणि क्तः।) कृतादरः। सादरः। अर्चितः। पूजितः। इत्यमरः॥ (सावधानः, अवहितः, अप्रमत्तः। यथा, मद्यतन्त्रे,
"आत्मानमावृतो रक्षेत्प्रमादाद्धि विनश्यति"।)

आदृत्यः, त्रि, (आङ्+दृ+क्यप्।) आदरणीयः। आदरयोग्यः॥

आदेशः, पुं, (आङ्+दिश्+भावे घञ्।) आज्ञा। इति हेमचन्द्रः॥ ज्योतिःशास्त्रभेदः। इति सिद्धान्तशिरोमणिः॥ वर्णस्य वर्णान्तरोत्पत्तिः। प्रकृतिप्रत्ययोपघातिकार्य्यं। इति व्याकरणं। (अनुमतिः, शासनं, उपदेशः, शास्त्राचार्य्योपदेशगम्यो वार्त्तासञ्चारः, कार्य्यभेदः, यथा मुग्धबोधे
"स्थानिवदादेशः"। यथा, मनुः, ८। २५८।
"मङ्गलादेशसंयुक्तां मध्यां श्वेतामिकैः सह"।)

आदेशी, [न्] पुं, (आङ्+दिश्+णिनि।) दैवज्ञः। गणकः। इति हेमचन्द्रः॥ (त्रि, आदेशकर्त्ता, उपदेष्टा, यथा, रघुवंशे, ४। ६८।
"कथेवाप्तादेशामिव वभूव रघुचेष्टितं"॥)

आदेष्टा, [ऋ] पुं, (आदिशति ऋत्विजादीन् यागादिक्लेशसम्पादनाय प्रेरयति। आङ्+दिश अतिसर्ज्जने+तृच्।) यागविषये क्लेशसम्पादनाय यथार्थं कर्म्म कुर्व्वति ऋत्विजामादेशकः। तत्पर्य्यायः ब्रती २ यष्टा ३ यजमानः ४। इत्यमरः॥ अन्वादेष्टा ५ याजकः ६। इति हेमचन्द्रः॥ आदेशकर्त्ता॥

आद्यं, क्ली, (अद्यते यत् अद कर्म्मणि ण्यत्।) धान्यं। इति राजनिर्घण्टः॥ अदनीयद्रव्ये त्रि॥ (यथा—मनुः, ५। २४।
"तत्पर्य्युषितमप्याद्यं हविः शेषञ्च यद्भवेत्।
चिरस्थितमपित्वाद्यं"—इत्यादि।)

आद्यः, त्रि, (आदौ भवः दिगादिभ्यो यत् यद्वा अद्यते यः अद कर्म्मणि ण्यत्।) प्रथमः। इत्यमरः॥ (यथा महाभारते,—
"तोषितोऽहं त्वयश्रेष्ठ त्वयेदानीं कर्म्मणा"।
रघुवंशे, १। ११।
"आसीत् महीक्षितामाद्यः प्रणवश्छन्दसामिव"।)
मुख्यः। यथा मनुः ५। २६।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः"।

आद्यकविः, पुं, (आद्यश्च कविश्चेति कर्म्मधारयः।) वाल्मीकिमुनिः। इति भूरिप्रयोगः॥ (पुराणकविः ब्रह्मा)।

आद्यमाषकः, पुं, (आद्य+मष्+इवार्थे कन्+कः।) माषकपरिमाणं। पञ्चरत्तिकाः। इत्यमरः॥ यथाह भास्कराचार्य्यः,—
"दशार्द्धगुञ्जं प्रवदन्ति माषं"।)

आद्यबीजं, क्ली, (आद्यं मुख्यं बीजं कारणं।) आदिकारणं। इति जटाधरः॥

आद्या, स्त्री, (आदौ भवा दिगादित्वात् यत् टाप्।) दुर्गा। इति शब्दरत्नावली। काली। तारा। त्रिपुरसुन्दरी। भुवनेश्वरी। इति तन्त्रसारगीतन्त्रयोगिनीतन्त्राणि। प्रधाना शक्तिः। महाविद्या। यथा, मुण्डमालातन्त्रे १० पटलः॥
"सत्ये तु सुन्दरी आद्या त्रेतायां भुवनेश्वरी।
द्वापरे तारिणी आद्या कलौ काली प्रकीर्त्तिता॥
नामभेदं प्रवक्ष्यामि रूपभेदं वरानने।
न भेदः कालिकायाश्च तारायाः जगदम्बिके॥
षोड़श्या भुवनायाश्च भैरव्याश्चिपुरेश्वरि।
छिन्नायाश्चैव धूमायाः भीमायाः परमेश्वरि॥
ततश्च वगलामुख्या मातङ्ग्याश्च सुरेश्वरि।
न च भेदो महेशानि विद्यायाः वरवर्ण्णिनि"॥
आदिभूते त्रि॥

आद्यूनः, त्रि, (आङ् पूर्ब्बात् दीयतेरकर्म्मकत्वात् क्तः। दिवोविजिगीषायामिति निष्ठातस्य नत्वं यस्य विभाषेति नेट्, च्छ्वोरित्यूठ्।) औदरिकः। इत्यमरः॥ पेटुक इति भाषा। (यदुक्तं, अमरे।
"आद्यूनः स्यादौदरिके विजिगीषाविवर्ज्जिते"।
"आद्यूनः सदृशद्विष्येव प्रायेयच्छावलम्बितः"॥
इति किराते ११। ५।) आदिहीनः॥

आद्योपान्तं, क्ली, (आद्यश्च उपान्तश्च द्वन्द्वः।) पूर्ब्बापरं। इक्कनागादि इति भाषा॥

आधमनं, क्ली, (आधीयते आङ्+धा+कर्मणि ल्युट्।) बन्धकं। इति स्मृतिः। (आधिः। यथा मनुः,—
"योगाधमनविक्रीतं योगदानप्रतिग्रहं।
यत्र वाप्युपधिं पश्येत् तत्सर्व्वं विनिवर्त्तयेत्"॥

आधानं, क्ली, (आधीयते आङ्+धा+भावे ल्युट्। यद्वा आधीयते स्थाप्यते यत् कर्म्मणि ल्युट्।) गर्भाधानं। अग्न्याधानं। स्थापितद्रव्यं। इति स्मृतिः॥ (ग्रहणं, धारणं। अधिगमः, करणं। सम्पादनं। श्रौताग्नेः स्मार्त्ताग्नेर्वा ग्रहणं, ब्राह्मणानां प्रतिदिनकर्त्तव्या विहितवह्निस्थापनपूर्ब्बकहोमादिक्रिया, यजनं, होमः। यथा रघुवंशे, १। २४।
"प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः"॥
यथा मनुः, ५। १६८।
"भार्य्यायै पूर्ब्बमारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणि।
पुनर्दारक्रियां कुर्य्यात् पुनराधानमेव च"॥
यथा महाभारते,—
"सर्व्वेषां पुनराधानं विधिदृष्टेन कर्म्मणा"।
यथा मेघदूते, पूर्ब्बमेघे। ३।
"तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोः"॥)

आधानिकं, क्ली, (आधानं गर्भाधानं प्रयोजनमस्य। प्रयोजनमिति ठक्।) गर्भाधानसंस्कारः। इति त्रिकाण्डशेषः॥

आधारः, पुं, (आधियन्ते अस्मिन् इति आधारः अध्यायन्यायेति सूत्रे अवहारादारेत्युपसंख्यानादधिकरणे घञ्। आकरणशास्त्रे अधिकरणकारकं, तल्लक्षणं यथा सिद्धान्तकौमुद्यां, आधारोऽधिकरणं कर्त्रीप्सितं कर्म्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञः स्यात्। तच्च सामीप्यात्श्लेषविषयव्याप्तिभेदात्त्रिविधं। तथा सिद्धान्तकौमुद्यां, औपश्लेषिकोवैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा यथा—कटे आस्ते। स्थाल्यां पचति। मोक्षे सर्व्वस्मिन्नात्मास्ति।) अधिकरणं। आलवालं। अम्बुधारणं। इति मेदिनी॥ क्षेत्रादिसेकार्थं सेतुना बद्धनाथं जलं निरुध्य यत्र स्थाप्यते स आधारः बद्धकन्दरादिः। बाँध इति ख्यातः। इत्यमरटीकायां भरतः॥ भूस्याद्यर्थं जलबन्धनमाधारः। इति वैकुण्ठः॥ क्षेत्रादिसेकार्थं जलाधारस्थानमाधार इति मधुः॥ (यथा रघुवंशे ५।६।
"आधारबन्धप्रमुखैः प्रयत्नैः
संवर्द्धितानां सुतनिर्व्विशेषं।
क्वचिन्न व्याप्तादिरुपप्लवो वः
श्रमच्छिदामाश्रमपादपानाम्"॥
याज्ञवल्क्यः।
"तथात्मकोऽप्यनेकस्तु जलाधारेष्विवांशुमान्"॥)

आधार्म्मिकः, त्रि, (अधर्म्म+ठञ्।) अधार्म्मिकः। इति त्रिकाण्डशेषः॥ (यथा मनुः।
"आधार्म्मिके वसेद्ग्रामे"॥)

आधिः, पुं, (आङ्+धा+किः।) मनःपीड़ा। प्रत्याशा। बन्धकं। व्यसनं। अधिष्ठानं। इति मेदिनी॥
(यथा, हितोपदेशे।
"आधिव्याधिपरीताय अद्य श्वो वा विनाशिने।
कोऽहि नाम शरीराय धर्म्मापेतं समाचरेत्"॥
तथा च वैराग्यशतके।
"आधिव्याधिशतैर्जनस्य
विविधैरारोग्यमुन्मूल्यते"॥)

आधिक्यं, क्ली, (अधिक+ष्यञ्।) अधिकस्य भावः। अधिकत्वं। अतिशयता। यथा।
"युग्मायामपि रात्रौ चेत् श्रोणितं प्रचुरं तथा।
कन्या च पुंवत् भवति शुक्राधिक्ये पुमान् भवेत्"॥
इति ज्योतिस्तत्त्वम्॥ (श्रेष्ठता। उत्कर्षः। प्राबल्यम्। यथा साहित्यदर्पणे। १० षः।
"आधिक्यमुपमेयस्योपमानात् न्यूनताथवा"।
यथा, मनुः ७। १६६।
"यदावगच्छेदायत्यामाधिक्यं भ्रुवमात्मनः"॥
आधिक्यं नाम यदायुर्व्वेदे भाष्यमाणे वार्द्धुष्यमौद्गलम् अन्यदा प्रतिसम्बधार्थमुच्यते यदा

पुनः प्रतिसम्बद्धमपि द्विरभिधीयते तत् पुनरुक्तदोषाधिकं तच्च पुनरुक्तं द्विविधं, अर्थपुनरुक्तं शब्दपुनरुक्तञ्च। तत्रार्थपुनरुक्तं नाम यथा,—
"भेषजमौषधं साधनम्" इति, शब्दपुनरुक्तं "पुनर्भेषजं भेषजम्" इति चरकः॥)

आधिघ्नः, त्रि, (आधि+हन्+क।) यक्ष्मः। व्यथितः। इत्यजयपालः॥

आधिदैविकं, त्रि, (अधि+देव+ठञ्। अनुश्रुतिकादीनां च इत्युभयपदवृद्धिः।) दुःखविशेषः। तद्यथा,। "आधिदैविकं यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनं"। इति साङ्ख्यतत्त्वकौमुदी॥ (देवतामधिकृत्य,प्रवृत्तं,दाहशीतादिजनितं दुःखं। अतिवातादिदृष्ट्यादिहेतुकं दुःखं। देवतामधिकृत्य प्रवृत्तं ग्राह्यम्। यथा मनुः ६। ८२।
"अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च।
आध्यात्मिकञ्च सततं वेदान्ताभिहितञ्च यत्"॥
"तत्तु सन्निविधे व्याधावुपनिपतति" इति सुश्रुतः।)

आधिपत्यं, क्ली, (अधिपति+ष्यञ्।) अधिपतेर्भावः। स्वामित्वं। प्रभुत्वं। ऐश्वर्यं। यथा,
"नहि प्रपश्यामि ममापनुद्यात्
यच्छोकमुच्छोषणमिन्द्रियाणां।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यं"॥
इति श्रीभगवद्गीतायां २ अध्यायः ८॥
(यथा मनुः १२।१००।
"सर्व्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति"।)

आधिभोगः, पुं, (आधेर्बन्धकस्य भोगः।) बन्धकद्रव्यस्य भोगः॥

आधिभौतिकं, त्रि, (अधिभूत+ठञ्। अनुश्रुतिकादीनां चेत्युभयपदवृद्धिः।) दुःखविशेषः। यथा। "बाह्योपायसाध्यं दुःखं द्वेधा। आधिभौतिकं आधिदैविकञ्च। तत्राधिभौतिकं मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तं"। इति साङ्ख्यतत्त्वकौमुदी॥ ("तत्तु सन्निविधे व्याधावुपनिपतति"। इति सुश्रुतः॥)

आधिमन्थवः, पुं, (आधि+मन्थ+अण्।) ज्वराग्निः। इति हारावली॥

आधिवेदनिकं, त्रि, (अधि+विद्+ल्युट्। ततः अधिवेदन+ठञ्।) द्वितीयविवाहार्थं प्रथमस्त्रियै दत्तधनादि। यथा,—
"अधिविन्नस्त्रियै देयमाधिवेदनिकं समं।
न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितं"॥
इति याज्ञवल्क्यः॥

आधूतः, त्रि, (आङ्+धू+क्तः।) आधूतः। कम्पितः। इत्यमरटीकायां रायमुकुटः॥

आधुनिकः, त्रि, (अधुना+ठञ्।) अधुनाजातः। नव्यः॥

आधूतः, त्रि, (आङ+धू+क्त।) कम्पितः। इत्यमरः॥ (विक्षिप्तः, अभिभूतः, व्याकुलितः। आन्दोलितः, चालितः। यथा, रघुवंशे, १। ३८।
"पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः"।)

आधेयं, त्रि, (आङ्+धा+यत्।) आधारस्थितवस्तु। यथा। शब्दबोधे चैकपदार्थे अपरपदार्थसंसर्गः संसर्गमर्य्यादया भासते। स च क्वचिद्भेदः क्वचिदतिरिक्त एवाधाराधेयप्रतियोग्यनुयोगिविषयविषयिभावादिः। इति गदाधरभट्टाचार्य्यकृतप्रथमव्युत्पत्तिवादः॥ उत्पाद्यः। यथा,—
"सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते।
आधेयत्वान्नियाज्यञ्च सोऽसत्त्वप्रकृतिर्गुणः"॥
इति वोपदेवकृतमुग्धबोधीयकारिका॥ आधेय उत्पाद्यः। यथा पक्वान्नमयपात्रेषु रक्तताद्यः स वह्निसंयोगादिना निष्पाद्यते। इति तट्टीकायां दुर्गादासः॥

आधोरणः, पुं, (आधोरयति धोरं गतिं चातुर्य्यं कर्त्तरि ल्युः।) हस्तिपकः। माउत इति भाषा। ("आधोरणा हस्तिपका हस्त्यारोहा निषादिनः"। अमरः। यथा,—रघुवंशे ७। ४६।
"आधोरणानां गजसन्निपाते
शिरांसि चक्रैर्निशितैः क्षुराग्रैः"॥)

आध्मातः, पुं, (आङ्+ध्मा+क्तः।) ग्रन्थितः। दग्धः। वातरोगविशेषः। संयतः। इति मेदिनी॥ (स्फीतः दर्पादिना उद्धतः, विवर्द्धितः। यदुक्तं। "ततो मानाध्मातः स पतति यदा श्रोत्रगहने"। हितोपदेशे। "ततोऽसौ दर्पाध्मातस्तस्योपरि आत्मानं निक्षिप्य पञ्चत्वं गतः"। उत्तरचरिते। "व्याधिर्वोषममन्ददुन्दुभिरवैराध्मातमुच्छृण्वन्"।)

आध्मानं, क्ली, (आङ्+ध्मा+ल्युट्।) वातव्याधिविशेषः। तस्य रूपं।
"साटोपमत्युरुजमाध्मातमुदरं भृशं।
आध्मानमिति जानीयाद्वोरं वातनिरोधनं"॥
इति निदानं। पेटफाँपा इति भाषा।
तस्य चिकित्सा यथा,—
"आध्माने लङ्घनं पूर्व्वं दीपनं पाचनं ततः।
मलवर्त्तिक्रियां कुर्य्यात् वस्तिकर्म्म च श्रेष्ठकं॥
कर्षमात्रा भवेत् क्षुण्णा चिरता स्यात् पलोन्मिता।
खण्डादपि पलं ग्राह्यं चूर्णमेकत्र कारयेत्॥
मधुनाज्यमितं लिह्यात् चूर्णमाध्मानशान्तये"॥
नाराचचूर्णं। १॥
"दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः।
लिम्पेत् कोष्णैरलर्षिष्टैः शूलाध्मानयुतोदरं॥
हैमवती वचा। दारुषट्कलेपः॥ २॥
"अभयारम्बधो धात्री दन्ती तिक्ता खुही चित्रत्।
मुक्ता प्रत्येकमेतानि ग्राह्याणि पलमात्रया॥
तानि संचूर्ण्य सर्व्वाणि जलाढ्कयुगे पचेत्।
तत्र तोयेऽष्टमं भागं कषायमवशेषयेत्॥
निस्वग्जैपालबीजानि नवानि पलमात्रया।
तनुवस्त्रहृतान्येव तस्मिन् क्वाथे प्रक्षिप्य पचेत्॥
ज्वालयेदग्निमं मन्दं यावत् क्वाथो घनो भवेत्।
ततः खल्ले क्षिपेत् भागानष्टौ जैपालबीजतः॥
भागांस्त्रीन् नागराद्धौ च मरिचात् द्वौ च पारदात्।
गन्धकात् द्वौ च तानीह यावद्यामं विमर्दयेत्॥
रसो नाराचनामायं भक्षितो रक्तिकामितः।
जलेन प्रीतलेनैव रोगानेतान् विनाशयेत्॥
आध्मानं शूलमानाहं प्रत्याध्मानं तथैव च।

उदावर्त्तं तथागुल्ममुदराणि हरत्यसौ॥
वेगे शान्ते च भुञ्जीत शर्करासहितं दधि।
ततस्तत्स्निग्धवेगापि ततो दध्योदनं मनाक्"॥
महानाराचो रसः॥ ३॥ इति भावप्रकाशः॥
(वायुना सवेदनमुदरपरिपूर्णत्वमाध्मानत्वं। इति रुग्विनिश्चयग्रन्थव्याख्यानरुद्रविजयरक्षितः॥)

आध्मानी, स्त्री, (आङ्+ध्मा+ल्युट्+ङीप्।) गलिकागामगन्धप्रियं। इति राजनिर्घण्टः॥

आध्या, स्त्री, (आङ्+धी+अङ्+टाप्।) चिन्ता। स्मृतिः। इति शब्दरत्नावली॥

आध्यात्मिकं, त्रि, (आत्मानमधिकृत्य भवं अधि+आत्मन्+ठञ्।) दुःखविशेषः। यथा। दुःखानां त्रयं दुःखत्रयं तत् खल्वाध्यात्मिकं आधिभौतिकं आधिदैविकञ्च। तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां निमित्तं। मानसं कामक्रोधलोभमोहेर्ष्याविषादविषादहर्षनिबन्धनं। सर्व्वं चैतदान्तरोपायसाध्यत्वात् आध्यात्मिकं दुःखं। इति साङ्ख्यतत्त्वकौमुदी॥ (आत्मतत्त्वविषयकं। यथा, मनुः २।११७।
"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत्"॥

आध्यानं, क्ली, (आङ्+धै+ल्युट्।) ध्यानं। चिन्ता। इत्यमरः॥

आध्यापकः, पुं, (आ सम्यक् अध्यापयति यः इति अध्यापकः। स एव स्वार्थे अण्।) अध्यापकः। इति शब्दरत्नावली॥

आनः, पुं, (अन्+घञ्) उच्छ्वासः। बहिर्मुखश्वासः। इति हेमचन्द्रः॥ (अन्तःस्थितस्य प्राणवायोर्नासिकयोच्छ्वासः।)

आनकः, पुं, (आङ्+अन्+ण्वुल्) पटहः। भेरी। मृदङ्गः। शब्दयुक्तमेघः। इति मेदिनी॥ (यथा, भगवद्गीतायां १।१३।
"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः"।)

आनकदुन्दुभिः, पुं, (आनकाः दुन्दभयो देववाद्यविशेषाः यस्य जन्मनि। वसुदेवजन्मनि देवा दुन्दुभिध्वनिञ्चक्रुः।) वसुदेवः। इत्यमरः॥ (कृष्णपिता। यथा—हरिवंशे॥
"वसुदेवो महाबाहुः पूर्व्वमानकदुन्दुभिः।
जज्ञे यस्य प्रसूतस्य दुन्दुभ्यः प्राणदन् दिवि॥
आनकानां च संह्रादः सुमहानभवद्दिवि"॥)

आनकदुन्दुभिः, पुं स्त्री, (आनकः प्रोत्साहको दुन्दुभिः।) दड्डरुका। इत्यमरटीकायां भरतः॥

आनतः, त्रि, (आङ्+नम्+क्तः।) नतः। तत्पर्य्यायः। अवायः २ अवगतः ३। इत्यमरः॥ (अधोमुखः, विनतः, प्रणतः, विनयनम्रः। यथा, हरिवंशे।
"शिष्टभाषोर्हि यादान् वै नमश्चक्रुरानतौ"।
महाभारते।
"स कदाचित् भृशं विद्धो बाणेनानतपर्व्वणा"।
मनुः।
"रम्यमानतसामन्तं स्फीतं देशमावसेत्"।)

आनतिकरः, त्रि, (आनति+कृ+अच्।) प्रणतो-

विधः। यथा। प्रायश्चित्तोपदेशाय वस्त्रादिना ब्राह्मणस्तोषणीयः। यथा मिताक्षरायां पराशरः। "पापं प्रख्यापयेत् पापो धेनुं दत्त्वा तथा दृढं"। एतच्चोपलक्षणं।

"प्रख्याप्य पापं वक्तृभ्यः किञ्चिद्दत्त्वा व्रतं चरेत्।" इति स्मृतेः।

देवलवचने "तोषयित्वा द्विजोत्तमान् इति"। अत्र तोषयित्वा इति श्रवणात् आगतिकरणेन तदुपहरणान्नदोषः। इति प्रायश्चित्ततत्त्वं॥

आनद्धं, क्ली, (आनह्यते चर्म्मणा बध्यते इति। आङ्+नह्+क्तः।) चर्म्मबद्धमुखवाद्यमात्रं। तत्तु मुरजादि। इत्यमरः॥ कल्पमात्रं। तत्तु वेणुभूषादि। इत्यजयपालः॥

आनद्धः, त्रि, (आङ्+नह्+कर्म्मणि+क्तः।) सन्नितः। बद्धः। इति मेदिनी॥ (यथा सुश्रुते। "व्यभ्रस्तुषारैः सविता हिमानद्धो जलाशयाः"।)

आनं, क्ली, (आनिति अनेन। आङ्+अन्+ल्युट्) मुखं। इत्यमरः॥ ("तदाननं मत्सुरभि क्षितीश्वरः" इति रघुः। ३। ३।)

आनन्दः, पुं, (आङ्+नन्द+घञ्) आह्लादः। तत्पर्य्यायः। आनन्दथुः २ हर्षः ३ प्रीतः ४ मुत् ५ मुत् ६ प्रीतिः ७ प्रमोदः ८ हर्षः ९ प्रमदः १० आमोदः ११ संमदः १२। इत्यमरः॥

(यथा, उत्तरचरिते।

"यत्रानन्दास्रु मोदाश्च यत्र स्निग्धाश्च सम्पदः"। मनुः।

"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन"।) वासुदेवस्य बलविशेषः। इति हेमचन्द्रः॥

आनन्दः, त्रि, (आनन्द+अर्श आदित्वात् अच्।) आनन्दविशिष्टः। हर्षयुक्तः। सुखी। इत्यमरटीका॥ ("गुणे शुक्लादयः एंसि गुणिलिङ्गास्तु तद्वति"। इत्यमरोक्तेः अत्र गुणिलिङ्गः।)

आनन्दथुः, पुं, (आङ्+नन्द+अथुच्।) आनन्दः। हर्षः। इत्यमरः॥ तद्युक्ते त्रि॥

आनन्दनं, क्ली, (आङ्+नदि+ल्युट्) गमनागमनसमये सुहृदादेरालिङ्गनारोग्यस्वागतादिप्रश्नादिद्वारा आनन्दोत्पादनं। तत्पर्य्यायः। सभाजनः २ सभाजनः ३ सभाजनः ४ आप्रश्नः ५ आमन्त्रणं ६॥ इत्यमरः तट्टीका च॥ (आनन्दजननं, हर्षोत्पादनं। प्रमोदकरः, सुखजनकः। यदुक्तं।

"मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः"। इति हितोपदेशे।)

आनन्दपटं, क्ली, (आनन्दाय पटम्।) नवोढ़ावस्त्रं। इति हारावली॥

आनन्दप्रभवं, क्ली, (आनन्दः प्रभवोयस्य तत्।) रेतः। वीर्य्यं। इति हेमचन्द्रः॥

("वाय्वाकाशादिभिर्भावैः सौम्येभ्यो जायतेऽम्भसि। तेन स्रवन्ति तच्छुक्रं नवात् कुम्भादिवोदकं॥ स्रोतोभिः स्यन्दते देहात् समन्तात् शुक्रवाहिभिः। हर्षोद्रेकोदीरितं रागात् सङ्कल्पाच्च मनोभवात्॥ वस्तौ संभृत्य निर्याति स्खलान्निम्नादिवोदकं।" इति चरकः॥

"शुक्रदेहाश्रितं शुक्रं प्रसन्नमनसस्तथा। स्त्रीषु व्यायच्छतश्चापि हर्षात्तत् संप्रवर्त्तते॥" इति सुश्रुतः॥)

आनन्दमयकोषः, पुं, (आनन्दमयस्य परमात्मनः कोष इवावरकः।) सत्त्वप्रधानाज्ञानं। तत्पर्य्यायः। कारणशरीरं २ सुषुप्तिः ३। इति वेदान्तः॥

आनन्दा, स्त्री, (आनन्दयति या। आङ्+नन्द+णिच्+अच्+टाप्) विजया। आरामशीजता। इति राजनिर्घण्टः॥ [इति शब्दमाला॥

आनन्दिः, पुं, (आङ्+नन्द+किः।) आनन्दः। हर्षः।

आनन्दितः, त्रि, (आङ्+नन्द+क्तः। यद्वा आनन्दः संज्ञातोऽस्य। आनन्द+इतच्।) आनन्दयुक्तः। हृष्टः। आह्लादितः॥ (यथा महाभारते।

"पुनरानन्दिताः सर्व्वे मधुरायां वसामहे॥")

आनन्दी, [न्] त्रि, (आनन्द+इनि।) आनन्दविशिष्टः॥

आनन्दी, स्त्री, हर्षविशेषः। आकन्दपाता इति ख्याता। इति शब्दचन्द्रिका॥

आनयः, पुं, (आनीयते वेदाध्ययनायात्र। आङ्+नीङ+अच्) उपनयनं। इति हेमचन्द्रः॥

आनयनं, क्ली, (आङ्+नी+ल्युट्।) स्थानान्तरनयनं। आना इति भाषा॥ (यथा रामायणे।

"आदिश्यत्युषसांस्तत्र राजामानयने वहून्"॥)

आनर्त्तः, पुं, (आङ्+नृत्+घञ्।) देशविशेषः। द्वारका इति ख्याता। तत्पर्य्यायं। युङ्कं। इत्यमरः॥ जलं। इति मेदिनी॥ आनर्त्तदेशवासी लोकः। इत्यमरटीका॥ (यथा हरिवंशे। "आनर्त्तान् कालकूटांश्च कुलिन्दांश्च विजित्य सः"॥ स्वनामख्यातो राजा।

"शर्य्यातेर्मिथुनं त्वासीदानर्त्तो नाम विश्रुतः।

"आनर्त्तस्य तु दायादो रेवो नाम महाद्युतिः"॥

"आनर्त्तविषयश्चासीत् पुरी चास्य कुशस्थली"।

"आनर्त्तस्तु विभोः पुत्रः सुकुमारस्ततोऽभवत्"॥)

आनायः, पुं, (आङ्+नीञ्+घञ्।) जालं। इत्यमरः॥

आनाय्यः, पुं, (आनाय्यते गार्हपत्यादानीय संस्क्रियते ऽसौ आङ्+नी+ण्यत्।) दक्षिणाग्निः। इत्यमरः॥ गार्हपत्यादग्नेरानीय यो दक्षिणाग्निरारोप्यते। तत्र। इति भरतः॥ होम करिवार निमित्ते घर हइते आनिया दक्षिणदिके राखा आगुन् इति भाषा॥

आनाहः, पुं, (आङ्+नह्+घञ्।) मूत्रपुरीषरोधकरोगः। तत्पर्य्यायः। विबन्धः २। इत्यमरः॥ विष्टम्भः ३ मलरोधनः ४। इति राजनिर्घण्टः॥ ("आनाहार्त्तं ततो दृष्ट्वा तत्सैन्यमसुखार्दितम्"। इति महाभारते।) तस्य सम्प्राप्तिरूपे। यथा,

"आमं शङ्कादा निचितं क्रमेण भूयो विवद्धं विगुणानिलेन। प्रवर्त्तमानं न यथास्वमेनं विकारमानाहमुदाहरन्ति"॥ इति निदानं॥

("यस्य वातः प्रकुपितः कुक्षिमाश्रित्य तिष्ठति। नाधो व्रजति नाप्यूर्द्धमानाहस्तस्य जायते"॥ इति चरकः॥

अस्य चिकित्सामाह। भावप्रकाशे यथा,—

"तुल्यकार्य्यत्वकार्य्यत्वादुदावर्त्तहरीं क्रियां। आनाहेषु च कुर्व्वीत विशेषश्चाभिधीयते॥*॥ चित्रकत्रिफलाहरीतक्यो द्विचतुःपञ्चभागिकाः। गुडेन तुल्या गुटिका हरत्यानाहमुल्बणं॥*॥

वर्त्तिस्त्रिकटुसैन्धव सर्षपस्नुहधूमकुष्ठमदनफलैः। मधुनि गुडे वा पक्वै- र्विहिता साङ्गुष्ठसम्मिता विज्ञैः॥ वर्त्तिरियं दृष्टफला गुदे घृताभ्यक्ता। आनाहमुदरजात्तिं शमयति जठरं तथा गुल्मम्"॥*॥

इति त्रिकटुकाद्यावर्त्तिः॥*॥

चक्रपाणिसङ्ग्रहे तु चिकित्सा यथा,—

"उदावर्त्तक्रियायोगे साम्ये लङ्घनपाचनम्"॥

"द्विरत्नरा द्विगुणा सकुष्ठा सुवर्चिका चेति विडङ्गचूर्णं। सुखाम्बुनानाहविरूक्षिकार्त्ति- हृद्रोगगुल्मोर्द्धसमीरणघ्नम्॥*॥ वचाभयाचित्रकयावशूकान् सपिप्पलीकातिविषान् सकुष्ठान्। उष्णाम्बुनानाहविमूढ़वातान् पीत्वा जयेदाशु हितौदनाशी॥*॥

त्रिवृद्धरीतकीश्यामाः क्षुद्दीक्षीरेण भावयेत्। वटिका मूत्रपीतास्ता ज्येष्ठा आनाहभेदिकाः॥*॥ राठ-धूम-विड़द्योष-गुड़-मूत्रैर्विपाचिता। गुदेऽङ्गुलसमावर्त्तिर्निधेयानाहशूलनुत्॥*॥ मूलकं शुष्कमाक्षञ्च वर्षाभूमूलपञ्चकम्। आरेवतफलञ्चापि पक्त्वा तेन पचेद्घृतम्। तत् पीतमात्रं शमयेदुदावर्त्तमसंशयम्"॥*॥ शुष्कमूलकाद्यं घृतम्॥*॥) दैर्घ्यं। इति रमानाथः॥

आनिलिः, पुं, (अनिलस्य वायोरपत्यं अनिल+इञ्।) हनूमान्। इति त्रिकाण्डशेषः॥ (भीमः।)

आनिली, स्त्री, (अनिल+अण्+ङीप्।) खातिनक्षत्रं। इति हेमचन्द्रः॥

आनीलः, पुं, नीलघोटकः। इति हेमचन्द्रः॥ (असितः। ईषन्नीलः। यथा किरातार्জ্জनीये, "आनीलाभैर्विरचितपरभागा रत्नैः"।)

आनुकूल्यं, क्ली, (अनुकूल+ष्यञ्।) अनुकूलता॥ (साम्मुख्यं। प्रसादः। सहायता। यथा शाङ्गधरपद्धतौ।

"यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते"। यथा, रामायणे।

"रमतस्वानुकूल्येन ययुः संवत्सरा दश"।)

आनुगत्यं, क्ली, (अनुगतस्य भावः कर्म्म वा। अनुगत+ष्यञ्।) अनुगतत्वं। अनुगतस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥

आनुपूर्व्वी, स्त्री, क्ली, (अनुपूर्व्व+अण्।) परिपाटी। अनुक्रमः। इत्यमरः॥ (यथा मनुः ३। २२।

"षड़ानुपूर्व्व्या विप्रस्य क्षत्रस्य चतुरो वरान्"। यथा रामायणे।

"आनुपूर्व्व्या स धर्म्मज्ञः पप्रच्छ कुशलं कुले"।)

आनुमानिकः, त्रि, (अनुमानाय हितः। अनुमान + ठक्। युक्तिसिद्धः। सांख्यमते प्रधानं प्रकृतिः।) अनुमानसम्बन्धीयः। अनुमानविषयीभूतः॥

आनुरक्तिः, स्त्री, (आ + अनु + रञ्ज + क्ति।) अनुरागः। (आसक्तिः। अनुरक्तिः॥)

आनुविधित्सा, स्त्री, (आ + अनु + वि + धा + सन् + अङ् + टाप्।) उपकृतेरप्रत्युपकारेच्छा। इति पुराणम्॥

आनूपः, पुं, (अनूप + अण्।) अनूपदेशस्थजन्तुमात्रं। तच्च खड्गिमहिषवराहादि। एषां मांसगुणाः। गुरुत्वं। उष्णत्वं। मधुरत्वं। स्निग्धत्वं। शुक्रकारित्वं। वायुनाशित्वञ्च। इति राजवल्लभः॥ अनूपदेशजगुणाः। घनत्वं। गुरुत्वं। पिच्छिलत्वं। मधुरत्वं। श्लेष्मजनकत्वं। स्निग्धत्वं। अग्निनाशित्वं। प्रमेहश्लीपदच्छर्दिगलगण्डादिरोगकारित्वञ्च। इति राजनिर्घण्टः॥ अनूपदेशस्थजन्तोर्लक्षणं तन्मांसस्य गुणाश्च।

"कुलेचराः श्ववाश्वापि कोशस्थाः पादिनस्तथा।
मत्स्या एते समाख्याताः पञ्चधानूपजातयः॥
आनूपा मधुराः स्निग्धा गुरवो वह्निमर्दनाः।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशं॥
तथाभिष्यन्दिनस्ते हि प्रायेऽपथ्यतमाः स्मृताः"॥
इति भावप्रकाशः॥

("क्रमरक्रमरः खड्गो महिषो गवयो गजः।
न्यङ्कुर्वराहश्चानूपा मृगाः सर्व्वे वरास्तथा"॥
"गुरुत्वो मधुरो गतिधान्वानूपनिषेवणात्"।
इति चरकः। तथाच हारीतः॥
"आनूपास्तेषु विज्ञेयाः श्लेष्मणा वातकोपगाः"।
आनूपवर्गस्तु पञ्चविधः। यथा। "कूलचराः श्ववाः कोशस्थाः पादिनो मत्स्याश्चेति" इति सुश्रुतः॥ वज्रजवयुक्ते, त्रि।)

आनृशंस्यं, क्ली, (अनृशंसस्य भावः। अनृशंस + ष्यञ्।) अनिष्ठुरता॥ (अक्रौर्य्यं। अहिंसत्वं। कारुण्यं। यथा मनुः २। १०१, ३। ५७, ३। ११२।
"आनृशंस्यात् ब्राह्मणस्य भुञ्जते ह्येतरे जनाः"।
"अर्हयं तत्कुमारीणामानृशंस्यं च केवलम्"॥
"भोजयेत् सह भृत्यैस्तावानृशंस्यं प्रयोजनम्"॥)

आन्तरीक्षं, क्ली, (अन्तरीक्ष + अण्।) अन्तरीक्षं। गगनं। इति हिरूपकोषः॥ (यथा महाभारते।
"उत्पातांश्चिविधान् प्रादुर्नारदो भगवानृषिः।
दिव्यांश्चैवान्तरीक्षांश्च पार्थिवांश्च पितामहः"॥)
अन्तरीक्षभवस्तुनि त्रि॥ (यथा रामायणे।
"स्वस्ति तेऽस्त्वान्तरीक्षेभ्यः पार्थिवेभ्यः पुनः पुनः"॥)

आन्तिका, स्त्री, (अन्तिक + अण् + टाप्।) अन्तिका। ज्येष्ठा भगिनी॥ इति हिरूपकोषः॥

आन्तिकः, त्रि, (अन्त + ठक्।) अन्ते भवः। अन्तसम्बन्धीयः॥

आन्दोल तृ क् दोलने। (अदन्तपुरा०-उभ०-अक० सेट्।) इति कविकल्पद्रुमः॥ आन्दुदोलत्। इति दुर्गादासः॥

आन्दोलनं, क्ली, (आन्दोल + ल्युट्।) चलनं। कम्पनं। ("किन्वासामरविन्दसुन्दरदृशां ब्राक्चामरान्दोलनादुद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः स्तवं वार्य्यताम्"। इति कालिदासः। पुनः पुनरभ्यासः। मुञ्जरालोचनम्।)

आन्दोलितं, त्रि, (आन्दोल + क्त।) कृतान्दोलनं। तत्पर्य्यायः। चलितं २ कम्पितं ३ धूतं ४ वेल्लितं ५। इति हेमचन्द्रः॥

आन्धसिकः, त्रि, (अन्धस् + ठक्।) पाचकः। सूपकारः। इत्यमरः॥

आन्वयिकः, त्रि, (अन्वय + ठक्।) प्रशस्तकुलजः। सत्कुलोद्भवः। तत्पर्य्यायः। कौलः २। इति त्रिकाण्डशेषः। अन्वयसम्बन्धी॥ (कुलीनः। दिव्यभावरतः। कुलाचारी। साधकः। "और्द्ध्वस्रोतसिकः श्रेवः कौल आन्वयिकः स्मृतः"। इति त्रिकाण्डशेषः।)

आन्वीक्षिकी, स्त्री, (अवजादनु ईक्षा पर्य्यालोचना प्रयोजनमस्याः। अनु + ईक्षा + ठञ् + ङीप्।) तर्कविद्या। न्यायविद्या। इत्यमरः॥ दुर्गा। यथा,
"आत्मवेदनशीलत्वादन्वीक्षाप्यपराथवा।
अन्वीक्षां कुरुते यस्मात्तस्मादान्वीक्षिकी स्मृता"॥
इति देवीपुराणे ४५ अध्यायः॥ (अध्यात्मविद्या, प्रत्यक्षपरोक्षाभ्यामीक्षितस्य अर्थस्यानु पश्चात् ईक्षणं अन्वीक्षा सा प्रयोजनं यस्याः सा आन्वीक्षिकी अनुमानविद्या न्यायदर्शनवैशिषिकादिका। इयं हि त्रयीवार्त्तादिविद्याचतुष्टयान्तर्गता आत्मविज्ञानहेतुका धर्म्मार्थसंसाधिका राजभिरवश्यं रक्षणीया सती विद्येति कथ्यते॥
यथा, कामन्दकीयनीतिसारे।
"आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती।
विद्याश्चतस्र एवैता लोकसंस्थितिहेतवः"॥
"आन्वीक्षिक्यात्मविज्ञानं धर्म्माधर्म्मौ त्रयीस्थितौ।
अर्थानर्थौ च वार्त्तायां दण्डनीतौ नयानयौ"॥
इति।)

आप लृ न व्याप्तौ कि आपने। (चुरा० पक्षे भादि०-स्वादि० वा-उभ०-पर०-सक०-सेट्।) इति कविकल्पद्रुमः॥ लृ आपत्। न आप्नोति कीर्त्तिं ब्रह्माण्डं। व्याप्तौ आप्ना। कि आपयति आपति। स्वराज्यं प्राप्नुते भवान्। इति शब्दरत्नावल्यां दुर्गादासः॥ (याजने।
"खे खेऽन्तरे सर्व्वमिदमुत्पाद्यापुश्चराचरम्"।
इति मनुः। (अभि) अभिलाषे।
"नान्यदत्तमभीप्सामि स्थानमग्र्य! स्वकर्म्मणा।
इच्छामि तदहं स्थानं यत्र प्राप पिता मम"॥
इति विष्णुपुराणम्। (प्रति + अव) प्रतिग्रहणे।
"तां प्रत्यवापुरविलम्बितमुत्तरन्तो
धौताङ्गलग्ननवनीलपयोजपङ्क्तेः"। इति।
शिशुपालवधे। (प्र) उपगमने।
"ते च प्रापुरदन्तान्तं बुबुधे चादिपूरुषः"।
इति रघुवंशे १०। ६। इत्यादि।)

आपः, पुं, (आप् + क्विप्।) अष्टवसुमध्ये वसुविशेषः। इति जटाधरः॥

आपः [स्] स्त्री, (आप् + असुन्।) जलं। पापं। इत्यादिकोषः॥

आपक्वं, त्रि, (आङ् + पच् + क्त।) ईषत्पक्वकषायादि। तत्पर्य्यायः। पौलिः २ अभ्यूषः ३। इत्यमरः॥ रुटी इति केचित्॥ (यथा ऋतुसंहारे।
"आपक्वशालिललितानतगात्रयष्टिः
प्राप्ता शरत्सुरभिरित्र रम्यरूपा"॥ १॥)

आपगा, स्त्री, (आपां समूहः आपं। तस्य समूहे इत्यण्। तत आपेन जलसमूहेन गच्छति प्रचलतीति। आप् + गम् + ड + टाप्।) नदी। इत्यमरः। (यथा रामायणे।
"आपगाः कृतपुण्यास्ताः पद्मिन्यश्च सरांसि च"॥
"आपगाश्च महानूपाः सानुमन्तश्च पर्व्वताः"॥
तथाच माघे २। १००।
"सम्भूयाम्भोधिमभ्येति महानद्या नगापगा"॥)

आपणः, पुं, (आङ् + पण + अच्।) पण्यविक्रयशाला। दोकान इति भाषा। तत्पर्य्यायः। निषद्या २ विपणिः ३ पण्यवीथिका ४। इत्यमरः॥ चतुष्पथे इट्टे इत्यन्ये। आपणादिदयं इट्टे विपण्यादिदयं इट्टगट्टे इति केचित्। इत्यमरटीकायां भरतः। (यथा रामायणे।
"माल्यापणेषु राजन्ते नाद्य पण्यानि वै तथा"।
तथा महाभारते।
"भक्ष्यमाल्यापणानाञ्च ददृशुः श्रियमुत्तमां"॥)

आपणिकः, पुं, (आङ् + पण + ठक्। अथवा आपण + ठक्।) वणिक्। इत्युणादिकोषः॥ दोकानि मुदि व्यवसायी इत्यादि भाषा। (पण्यानां क्रयविक्रयादिविषयके, त्रि॥)

आपतिकः, पुं, (आङ् + पत् + इकन्।) श्येनपक्षी। बाज इति भाषा। दैवायत्ते त्रि। इत्युणादिकोषः॥

आपत्, [द्] स्त्री, (आङ् + पद् + क्विप्।) विपत्। विपत्तिः। इत्यमरः॥ यथा।
"आपत्सु मूढो धृतिमान्यः सम्यक् प्रतिपद्यते।
कर्म्माण्यवश्यकार्य्याणि तमाहुः पुरुषं बुधाः"॥
इति वह्निपुराणम्॥ ०॥ किञ्च।
"आपदि किं शरणीयं शरणीयं चरणयुगलमम्बायाः। तच्छरणं किं कुरुते ब्रह्मादीनपि किङ्करान् कुरुते"॥ इत्युद्भटः॥ ०॥ मनुः ११। २६-३०।
"विश्वैश्च देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः।
आपत्सु मरणाद्भीतैर्व्विधेः प्रतिनिधिः कृतः"॥
"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।
न साम्परायिकं तस्य दुर्भृतेर्व्विद्यते फलम्"॥
इत्येकादशीतत्त्वम्॥
"आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि।
मनस्तापेन शुद्ध्येत्तु हुपदां वा शतं जपेत्"॥
इति प्रायश्चित्ततत्त्वम्॥ ०॥
"आपदर्थे धनं रक्षेत् दारान् रक्षेत् धनैरपि।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि"। इति।
"जागीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे।
मित्रञ्चापदि काले च भार्य्याञ्च विभवक्षये"॥
इति च चाणक्यम्॥ २६॥ २१॥

आपत्तिः, स्त्री, (आङ् + पद् + क्तिन्।) दोषः। इति हेमचन्द्रः॥ प्रापणं। आपत्। इति मेदिनी॥

आपत्प्राप्तः, त्रि, (आपदं प्राप्तः। ६या तत्पुरुषः।)

विपद्ग्रस्तः। तत्पर्य्यायः। आपन्नः २। इत्यमरः॥
आपद्, स्त्री, (आङ्+पद्+क्विप्।) विपत्तिः। इत्यमरः। (यथा हितोपदेशे।
"आपदामापतन्तीनां हितोऽप्यायाति हेतुतां"।)
आपदा, स्त्री, (आ+पद्+अङ्+टाप्।) विपत्तिः। इति रायमुकुटः॥
आपनं, क्ली, (आप्+ल्युट्।) प्रापणम्॥ मरीचं। इति शब्दचन्द्रिका।
आपनिकः, पुं, (आङ्+पन्+इकन्।) इन्द्रनीलमणिः। किरातः। इत्युणादिकोषः॥
आपन्नः, त्रि, (आङ्+पद्+क्तः।) आपद्ग्रस्तः। तत्पर्य्यायः। आपत्प्राप्तः २। इत्यमरः॥ प्राप्तः। इति मेदिनी॥ (यथा भागवते,—
"आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्।
ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं"॥
यथा हितोपदेशे,—
"बलीयसाभियुक्तस्तु दृष्टोऽन्यप्रतिक्रियः।
आपन्नः सन्धिमन्विच्छेत्कुर्व्वाणः कालयापनं"॥)
आपन्नसत्त्वा, स्त्री, (आपन्नं प्राप्तं सत्त्वं गर्भरूपेण जन्तुरनया।) गर्भवती। इत्यमरः॥
("सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः"।
इति रघुः १०।५०।
"गार्ग्याद्यापन्नसत्त्वायास्तथातिद्रुतमभ्रतः"॥
इति सुश्रुतः॥)
आपमित्यकं, क्ली, (मेङ् प्रतिदाने उदीचां माङो व्यतीहारे इति क्त्वा। कुमतीति समासः। समासेऽनञ्पूर्व्वे क्त्वो ल्यबादेशः। मयतेरिदन्यतरस्यामिति ईत्वं अपमित्य निर्वृत्तं। अपमित्ययाचिताभ्यां कक्कनाविति कक्।) विनिमयात् प्राप्तं। इत्यमरः॥ बदल करिया लयोया द्रव्य इति भाषा।
आपवः, पुं (आपोर्वरुणस्यापत्यं पुमान्। आपु+अपत्यार्थे अण्।) वशिष्ठमुनिः। इति महाभारतं॥
("तत्ते शापात् विनिर्मुक्ता आपवस्य महात्मनः"।
इति महाभारते। तथा च हरिवंशे,—
"यं लेभे वरुणः पुत्रं पुरा भास्वन्तमुत्तमं।
वशिष्ठं नाम स मुनिः ख्यात आपव इत्युत"॥)
आपस्तम्बः, पुं, धर्म्मशास्त्रप्रयोजकमुनिविशेषः।
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः"॥
इति याज्ञवल्क्यवचनं॥
आपस्तम्बिनी, स्त्री, (आपः स्तम्भातीति। आपस्+स्तम्भ+णिनि।) चिञ्चिनीलता। इति राजनिर्घण्टः॥
आपाकः, पुं, (आङ्+पच्+घञ्।) कुम्भकारभृत्याद्यदग्धस्थानं। इति शब्दाधरः॥ पोयान् इति भाषा।
आपातः, पुं, (आङ्+पत्+घञ्।) पतनं। तत्कालः। इति मेदिनी॥ पातनं। इति शब्दचन्द्रिका॥ (यथा हितोपदेशे।
"आपातरम्याः विषयाः पर्य्यन्तपरितापिनः"।
तथा च मनुः ११।६।
"मध्वापातो विषास्वादः स्वधर्म्मप्रतिरूपकः"।)
आपानं, क्ली, (आपीयते अस्मिन्। आङ्+पा+अधि+ल्युट्।) मद्यपानार्थसभा। तत्पर्य्यायः। पानगोष्ठिका २। इत्यमरः॥ मद खावार घर इति भाषा॥ (यथा महाभारते, वनपर्व्वणि २८० अध्याये।
"गन्धर्व्वाप्सरसो भद्रे! मामापानगतं सदा"।
१३। तत्रैव २ अध्याये।
"आपाने पानकलिता दैवेनाभिप्रमोदिताः"।
"ददर्श यदुवीराणामापाने वैशसं महत्"।)
आपालिः, पुं, (आङ्+पल्+इन्।) केशकीटः। इति जटाधरः॥ उकुन इति भाषा।
आपिञ्जरं, क्ली, (ईषत् पिञ्जरम्।) सर्ज्जं। इति राजनिर्घण्टः॥
("आपिञ्जरा बद्धरजःकणत्वा-
न्मञ्जर्य्युदारा मुमुभेऽर्जुनस्य"॥
इति रघुः १६। ५१। सर्ज्जशब्दोऽस्य गुणादयो वक्तव्याः॥)
आपीड़ः, पुं, (आङ्+पीड्+घञ्वच्।) शिखास्थितमाल्यं। तत्पर्य्यायः। शेखरः २। इत्यमरः॥ (यथा रघुवंशे १८। २८।
"तस्मिन् कुलापीड़निभे निपीड़ं
सम्यक् महीं शासति शासनाङ्कां"॥)
आपीतं, क्ली, (आङ्+पा+क्त।) माक्षिकधातुः। इति राजनिर्घण्टः॥ (यथा रामायणे।
"आपीतवर्णवदनं प्रसन्नमिव भूमिपं"।)
आपीनं, क्ली, (ओ प्यायी वृद्धौ। आङ्+प्याय+क्त। प्यायः पी निशायां सोपसर्गस्य नः।) ऊधः। गरर पालान्। इति भाषा। इत्यमरः॥ (यथा रघुवंशे २। १८।
"आपीनभारोद्वहनप्रयत्नात्
यष्टिर्गुरुत्वाद्ददृशे नरेन्द्रः"॥)
आपीनः, त्रि, (आङ्+प्याय+क्त।) ईषत्स्थूलः। सम्यक्स्थूलः॥
आपीनः, पुं, कूपः। इति वोपदेवः॥
आपूपिकं, क्ली, (अपूपानां समूहः। अपूप+ठक्।) अपूपसमूहः। बड़पिठकं। इत्यमरः॥
आपूपिकः, त्रि, (अपूपाः पण्यमस्य। अपूप+ठक्।) पिष्टकजीवी। पिष्टकविक्रयकर्त्ता। तत्पर्य्यायः। कान्दविकः २ भक्ष्यकारः ३। इत्यमरः॥ मयरा हालुइकर बटिओयाला। इत्यादि भाषा॥
आपूप्यः, पुं, (अपूप+यञ्।) ग्रहुः। चूर्णकः। इति त्रिकाण्डशेषः॥ छातु मयदा बेसन इत्यादि भाषा।
आपूर्त्तिः, स्त्री, (आङ्+पृ+क्तिः।) ईषत्पूरणं। सम्यक्पूरणं॥
आपूषं, क्ली, (आ+पूष् वृद्धौ+करणे घञ्।) रङ्गं। इति राजनिर्घण्टः॥ रां इति भाषा॥ (रङ्गशब्देऽस्य गुणादयो ज्ञातव्याः॥)
आप्रच्छा, स्त्री, (आङ्+प्रच्छ+अङ्+ततः टाप्।) आभाषणं। आलापः। इति हेमचन्द्रः॥
आप्रोक्षितं, क्ली, (अप्रात् द्रतीयषष्ठनवमदादशलभं। इति ज्योतिःशास्त्रं॥
आप्तः, त्रि, (आप+क्तः।) प्रत्ययितः। विश्वस्तः। इत्यमरः॥ (यथा मानवे ७। ८०।
"संवत्सरिकमाप्तैश्च राष्ट्रादाहारयेत् बलिं"।)
प्राप्तः। लब्धः। (तेभ्यः किमाप्तं मया। इति कालिदासः।) सत्यं। इति हेमचन्द्रः॥ (हितः। कुशलः।
"कुमारभृत्याकुशलैरनुष्ठिते
भिषग्भिरात्रेरथ गर्भभर्म्मणि"।
इति रघुवंशे ३। १२। सन्निकृष्टः। आत्मीयः।
"असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्।
विशुध्यति चिराच्चैव मातुराप्तांश्च बान्धवान्"॥
इति मनुः ३।१२। "आप्तान् सन्निकृष्टान् सहोदरभाटभगिन्यादीन्" इति तट्टीका। बहुः। अधिकः। यथा मनुः।
"यजेत राजा क्रतुभिर्व्विविधैराप्तदक्षिणैः"।
"राजा नानाप्रकारान् बहुदक्षिणान् अश्वमेधादियज्ञान् कुर्य्यात्"। इति तट्टीका।
आप्तः, पुं, (आप्+क्त।) भ्रमप्रमादविप्रलिप्साकरणापाटवरूपदोषचतुष्टयरहितः। स च ऋष्यादिः। इति स्मृतिः। आप्तास्तावत्॥
"रजस्तमोभ्यां निर्म्मुक्तास्तपोज्ञानबलेन ये।
येषां त्रैकालिकममलं ज्ञानमव्याहतं सदा॥
आप्ताः शिष्टा विबुद्धास्ते तेषां वाक्यमसंशयं।
सत्यं वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तमाः"॥
इति चरकः॥)
आप्तगर्व्वः, त्रि, (आप्तः प्राप्तः गर्व्वो येन सः। प्राप्ताहङ्कारः॥
आप्ता, स्त्री, जटा। इति हारावली॥
आप्तिः, स्त्री, (आप्+क्तिः।) सम्बन्धः। योगः। लाभः। प्राप्तिः। इति हेमचन्द्रः॥
आप्तोक्तिः, स्त्री, (आप्तस्य भ्रमप्रमादादिशून्यजनस्य उक्तिः।) सिद्धान्तवाक्यं। तत्पर्य्यायः। राद्धं २ सिद्धकृतं ३ अभ्युपेतः ४ समयः ५ आगमः ६। इति हेमचन्द्रः॥
आप्यं, त्रि, (अपां विकारः तस्य विकारइत्यत्वात् स्वार्थे यञ्।) जलविकारजं। फेनादि। तत्पर्य्यायः। अम्मयं २। इत्यमरः॥ (यथा हरिवंशे।
"आप्याः प्रभूता ऋभवः पृथुकाश्च दिवौकसः।
लेखा नाम महाराज पञ्च देवगणाः स्मृताः"॥
"तस्मादाप्यो रसः परस्परसंसर्गात् परस्परानुग्रहात् परस्परानुप्रवेशाच्च सर्व्वेषु सर्व्वेषां सान्निध्यमत्युत्कर्षापकर्षाच्च ग्रहणं"। इति सुश्रुतः॥)
आप्यं, क्ली, वाप्यस्थः। इत्यमरटीकायां रायमुकुटः। कुड़ इति भाषा॥
आप्यायनं, क्ली, (आङ्+प्याय्+ल्युट्।) तर्पणं। प्रीणनं। वृद्धिः। इति राजनिर्घण्टः॥ (यथा महाभारते,—
"प्रीतप्रसादमिच्छेयं तव चाप्यायनं पुनः"।
यथा मनुः, ३।२१३, ३।२०३।
"लोकस्याप्यायने युक्तान् श्राद्धदेवान् द्विजोत्तमान्"

"देवकार्य्यादिजातीनां पितृकार्य्ये विशिष्यते । देवं हि पितृकार्य्यस्य पूर्व्वमाप्यायनं स्मृतं" ॥)

आप्यायितः, त्रि, (आङ् + प्याय् + णिच् + क्तः ।) तृप्तः । प्रीतः । वर्द्धितः । यथा,—

"एषा सूर्य्यस्य वीर्य्येण सोमस्याप्यायिता तनुः । पौर्णमास्यां स दृश्येत सम्पूर्णो दिवसक्रमात्" ॥

इति कौर्म्मे ४० अध्यायः ॥ आनन्दितः । इति लोकप्रसिद्धं ॥ (यथा हितोपदेशे ।

"आप्यायितोऽहं भवतामनेन वचनामृतेन" ॥)

आप्रच्छनं, क्ली, (आङ् + प्रच्छ + ल्युट् ।) गमनागमनादिसमये सुहृदादेरालिङ्गनादेरोग्यप्रश्नस्वागतादिनानन्दनं । इत्यमरः ॥

आप्रच्छन्नं, क्ली, (आङ् + प्र + छद् + क्त ।) आप्रच्छनं । तत्पर्य्यायः । आनन्दनं २ सभाजनं ३ ॥ इति हेमचन्द्रः ॥ [प्रपर्य्यन्तं ॥

आप्रपदं, क्ली, (प्रपदं पादाग्रं । तत्पर्य्यन्तं ।) पादा-

आप्रपदीनं, त्रि, (आप्रपदं पदाग्रान्तं व्याप्नोतीति । आङ् + प्र + पद + ख ।) पादाग्रपर्य्यन्तपतितवस्त्रादि । इत्यमरः ॥ ('आप्रपदीनां करठे यमदोलामिव गुणकुसुममालामारूढाम्" । इति हर्षचरिते ५म उच्छ्वासः ।)

आप्लवः, पुं, (आङ् + प्लु + अप् ।) स्नानं । इत्यमरः ॥

आप्लवव्रती, [न्] पुं, (आप्लवते प्लुङ् + अच्, आप्लवः स्नानं तत्र व्रती नित्यस्नायीति मुकुटः ।) आप्लुतव्रती । स्नातकब्राह्मणः । इत्यमरटीकायां भरतः ॥

आप्लावः, पुं, (आङ् + प्लुङ् + घञ् । जलप्रक्षेपः, जलसेचनं, जलमध्ये सम्यगवगाहनं, जलप्लावनं, जलानां सर्व्वतः समुच्छलनं ।) स्नानं । इत्यमरः ॥

आप्लुतः, पुं, (आङ् + प्लुङ् + क्तः ।) आप्लुतव्रती । स्नातकः । इति मेदिनी ॥

आप्लुतः, त्रि, (आङ् + प्लु + क्त ।) स्नातः । कृतस्नानः । इति मेदिनी ॥ (आप्लुतः सर्व्वपापेभ्यः स गङ्गायां व्यमुच्यत । इति भारते ।) स्नाने क्ली इति हेमचन्द्रः ॥ (आर्द्रीकृतः । सिक्तः । पप्लुतश्चेत्,—

"अन्ये जर्ज्जरितकलेवरा रुधिरास्रुताः" । इति)

आप्लुतव्रती, [न्] पुं, (आप्लुतस्य स्नातकस्य व्रतमस्यास्तीति । आप्लुतव्रत + इनि ।) समाप्तवेदाध्ययनस्नानशीलः । ब्रह्मचर्य्यं त्यक्त्वा यो गृहाश्रमं गतः सः । समाप्तवेदाध्ययनो यः स्नानशील आश्रमान्तरं न गतः सोऽपि । आप्लुतं स्नानं तत्र व्रती नित्यस्नायी इति व्युत्पत्तिः । इत्यमरटीकायां भरतः ॥

आप्वा, [न्] पुं, (आप् + वुन् ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

आफूकं, क्ली, अफेनं । इति वैद्यकं ॥ आफिं इति भाषा । (अस्य गुणानाह । भावप्रकाशे ॥

"आफूकं ग्रीष्मजं ग्राहि श्लेष्मघ्नं वातपित्तलं" ।)

आबद्धः, पुं, (आङ् + बन्ध + क्तः ।) दृढ़बन्धनं । प्रेम । अलङ्कारः । इति विश्वमेदिन्यौ ॥ (यथा मेघदूते ६ । "गर्भाधानक्षणपरिचयान्नूनमाबद्धमाला" ॥)

योक्त्रं । इति मेदिनी ॥

आबन्धः, पुं, (आबध्यतेऽनेन आङ् + बन्ध + घञ् ।) योक्त्रं । इत्यमरहेमचन्द्रौ ॥ योत्दड़ी इति भाषा । भूषणं । प्रेम । बन्धनं । इति हेमचन्द्रः ॥ (यथा अमरुशतके । ३८ ॥

"गते प्रेमाबन्धे प्रणयबद्धमाने विगलिते" ।)

आबलिः, स्त्री, आलिः । श्रेणी । इत्यमरः ॥ (समूहः, आबली ।)

आबिद्धः, त्रि, (आङ् + व्यध् + क्तः ।) वक्रः । क्षिप्तः । इत्यमरः । पराहृतः । इति मेदिनी ॥ मूर्खः । इति शब्दरत्नावली ॥

आबिधः, पुं, बेधनास्त्रं । इत्यमरः ॥ भोमर तुरपन इत्यादि भाषा ।

आबिलः, त्रि, (आ + बिल + क ।) अनच्छः । अनिर्म्मलः । इत्यमरः ॥

आबिलकन्दः, पुं, मालाकन्दः । इति राजनिर्घण्टः ॥

आबुत्तः, पुं, (आप् + क्विप् + आपमुत्तनोति । अन्येभ्योपीति ड ।) नाद्योत्तौ भगिनीपतिः । इत्यमरः ॥

आभरणं, क्ली. (आभियतेऽनेन । भृञ भरणे । ल्युट् ।) भूषणं । अलङ्कारः । इत्यमरः ॥ (तच्चतुर्व्विधं, आवेध्यं बन्धनीयं, क्षेप्यं, आरोप्यं चेति । तत्र आवेध्यं कुण्डलादि, बन्धनीयं कुसुमादिकं, क्षेप्यं नूपुरादिकं, आरोप्यं हारादि । यदुक्तं,—

"स्याद्भूषणं त्वाभरणं चतुर्धा परिकीर्त्तितं । आवेध्यं बन्धनीयञ्च क्षेप्यमारोप्यमेव तत्" ॥

(यथा मनुः, ७ । २२२ ।

"वाहनानि च सर्व्वाणि शस्त्राण्याभरणानि च" ।

यथा कुमारसम्भवे । ५ । ४४ ॥

"किमित्यपास्याभरणानि यौवने धृतं त्वया वार्द्धकशोभि वल्कलं" ॥)

आभा, स्त्री, (आङ् + भा + अङ् + टाप् ।) शोभा कान्तिः । इति हेमचन्द्रः ॥ दीप्तिः । ज्योतिः ॥ (वातरोगभेदः । वबुले । यथा भावप्रकाशे वातव्याधौ त्रिकशूलचिकित्सा,—

"आभा वबुलपर्य्यायः कथितः कोविदैरिह" ।)

आभातिः, स्त्री, (आङ् + भा + क्तिन् दीप्तिः, ज्योतिः ।) छाया । इति राजनिर्घण्टः ॥

आभाषणं, क्ली, (आङ् + भाष् + ल्युट् ।) आलापः । कथनं । इत्यमरः ॥ (यथा रघुवंशे । २ । ५८ ॥

"सम्बन्धमाभाषणपूर्व्वमाहुः" ।)

आभासः, पुं, (आङ् + भास् + घञ् वा घञ् ।) सदृशः । प्रतिबिम्बं । इति वेदान्तः ॥ दीप्तिः । अभिप्रायः ॥ (प्रतिबिम्बादिवदवास्तवस्वरूपमविद्याकार्य्यं, मृषाबुद्धिः । यथा अध्यात्मरामायणे,—

"आभासस्तु मृषाबुद्धिरविद्याकार्य्यमुच्यते । अविच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पतः ॥ आभासत्वपरं बिम्बभूतमेवं त्रिधा चितिः । साभासबुद्धेः कर्त्तृत्वमवच्छिन्ने विकारिणि" ॥

तथा च पञ्चदश्यां ६—७ ।

"चिच्छायारोग वस्त्वेग सदृशा इव कल्पिताः । पृथक् पृथक् चिदाभासश्चैतन्याध्यस्तदेहिनां ॥ कल्प्यन्ते जीवनामानो बहुधा संसरन्त्यमी । वस्त्वाभासे स्थितान् वर्णान् यद्वदाधारवस्त्वगान्" ॥)

आभासरः, पुं, (आङ् + भास् + वरच् ।) चतुःषष्टिसङ्ख्यकगणदेवताविशेषः । इत्यमरः ॥ (यदुक्तं, आभासराश्चतुःषष्टि । यदा,—

"आत्मा ज्ञाता दमो दान्तः शान्तिर्ज्ञानं शमस्तपः । कामः क्रोधो मदो मोहो द्वादशाभासरा इमे" ॥)

आभिजनः, पुं, (अभिजनादागतः । अभिजन + अण् ।) अभिजनस्य भावः । कुलसम्बन्धीयः । गाँइ पदवी इत्यादि भाषा ॥ (यथा कुमारसम्भवे, १ । २६ ।

"तां पार्व्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव" ॥)

आभिजात्यं, क्ली, (अभिजात + ष्यञ् ।) अभिजातस्य भावः । कौलिन्यं । पाण्डित्यं ॥ (महावंशजननजनितमर्य्यादा । यथा रामायणे,—

"आभिजात्यं हि ते मन्ये यथा मातुस्तथैव च" ॥)

आभिधा, स्त्री, (अभि + धा + अङ् + टाप् ।) शब्दः । इति शब्दरत्नावली ॥

आभिधातकं, क्ली, (अभिधा + तक् + अच् ।) शब्दः । इति शब्दरत्नावली ॥

आभिरूप्यं, क्ली, (अभिरूप + ष्यञ् ।) अभिरूपस्य भावः । यथा,—

"अर्च्चकस्य तपोयोगादर्च्चनस्यातिशायनात् । आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छति" ॥

इति तिथ्यादितत्त्वधृतहयशीर्षपञ्चरात्रीयवचनं ॥

आभीरः, पुं, (आ समन्तात् भियं राति । रा दाने आत इति कः ।) गोपः । इत्यमरः ॥ आहिर इति भाषा । स च ब्राह्मणादम्बष्ठायां जातः । इति मनुः ॥

आभीरपल्लिः, स्त्री, (आभीराणां पल्लिः ।) गोपपल्ली । इत्यमरटीकायां रायमुकुटः ॥ गोयालापाड़ा इति भाषा ॥

आभीरपल्ली, स्त्री, (आभीराणां पल्ली ।) गोपग्रहसमूहः । गोपग्रामः । गोपग्रहं । गोपस्थानं । तत्पर्य्यायः । घोषः २ । इत्यमरः ॥

आभीरी, स्त्री, (आभीरएंयोगादितिजातेरिति च ङीष् ।) गोपस्त्रीजातिः । गोपपत्नी । तत्पर्य्यायः । महाश्रेणी २ । इत्यमरः ॥ आहिरिणी इति भाषा ॥

आभीलं, क्ली, (आ समन्तात् भियं लाति जनयति । आङ् + भी + ला + क ।) कष्टं । कृच्छ्रं । इत्यमरः ॥ (भयावहः, भीतिजनकः । यथा मेदिनी,—

"आभीलं न द्वयोः कृच्छ्रे वाच्यलिङ्गं भयानके" ॥

यथा महाभारते,—

"रात्रौ निशीथे स्वाभीले गतेऽर्द्धसमये नृप । प्रचारे पुरुषादानां रक्षसां घोरकर्म्मणाम्" ॥)

आभीलः, त्रि, (आङ् + भी + ला + क ।) कष्टयुक्तः । इत्यमरः ॥ भयानकः । इति मेदिनी ॥

आभीक्ष्णं, क्ली, (अभीक्ष्ण + ष्यञ् ।) अत्यर्थं । नित्यं । तद्युक्तक्रियायां त्रि । इति शब्दरत्नावली ॥

आभेरी, स्त्री, रागिणीविशेषः । इति हलायुधः ॥

आभोगः, पुं, (आङ् + भुज + घञ् ।) परिपूर्णता । इत्यमरः ॥ (यथा मेघदूते, उत्तरमेघे २१ ।

"गण्डाभोगात्कठिनविषमामेकवेणीं करेण" ।

यथा ग्राकुन्तले । "अकथितोऽपि ज्ञायत एव यथायमाभोगस्तपोवनस्य" ॥)

वरुणस्य ऋचं । यत्रः । इति मेदिनी ॥ कविनामयुक्तगानसमापककविता । भणिता इति भाषा । यथा,—

"यत्रैव कविनाम स्यात् स आभोग इतीरितः" ।

इति सङ्गीतदामोदरः ॥

आभ्युदयिकं, त्रि, (अभ्युदयः प्रयोजनम् अस्य । अभ्युदय + ठक् ।) अभ्युदयनिमित्तश्राद्धादि । यथा । अथाभ्युदयिकश्राद्धं । तत्र गोभिलः । आभ्युदयिके श्राद्धे युग्मानाशयेत् प्रदक्षिणमुपचारः ऋजवो दर्भाः यवैस्तिलार्थः । सम्पन्नमिति दृष्टिप्रश्नः । दधिदराज्ञतमिश्राः पिण्डाः नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च प्रीयन्तां न स्वधाच्च प्रयुञ्जीत इति । अभ्युदयो विवाहादिस्तदर्थं श्राद्धं आभ्युदयिकं । आभ्युदयिके अभ्युदयनिमित्तके । अभ्युदयः इष्टलाभः । स च भूतभविष्यद्भेदेन द्विविधः । तत्र भूतं पुत्रजन्मादि भविष्यत् विवाहादि । एवञ्च श्राद्धविवेकादौ श्राद्धभेदगणने वृद्धिश्राद्धत्वेन कर्माङ्गत्वेन च यदुभयत्वमुक्तं तदुभयमेवाभ्युदयिकत्वेनोपपन्नं तेनाभिलाषे आभ्युदयिकश्राद्धमिति प्रयोज्यं । अत्र यवैस्तिलार्थ इत्यनेन पार्व्वणश्राद्धप्राप्ततिलस्थाने यवविधानात् आभ्युदयिकस्यापि पार्व्वणप्रकृतित्वं प्रतीयते । अन्यथा तिलार्थ इत्युपादानं व्यर्थं स्यात् । ततश्च पार्व्वणप्रकृतिकत्वेन पित्र्य युग्मब्राह्मणप्राप्तौ तन्निराशाय पिण्डपक्षे ब्राह्मणयुग्मत्वोपदेशः दैवे युग्मत्वस्य पार्व्वणप्राप्तत्वान्नतदर्थोपदेशः ।

"अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणं" ।

इति याज्ञवल्क्यवचनेन देवकर्म्मानन्तरं पिण्डकर्म्मकरणे प्राप्तवामोपचारनिराशाय प्रदक्षिणमुपचारः तेन देवपिण्डकर्म्मकरणाय दक्षिणावर्त्तेन गन्तव्यं । द्विगुणमुग्मत्वनिराशाय ऋजवो दर्भा इति ऋजुलोपदेशः । दृष्टाः स्थ इत्यनेन दृष्टिप्रश्ने सम्पन्नमिति प्रष्टव्यं । योग्यत्वात् सुसम्पन्नमिति प्रोक्षे इति वक्ष्यमाणछन्दोगपरिशिष्टवचनाच्च सुसम्पन्नमित्युत्तरं । एतद्धर्म्मयब्राह्मणपक्षेप्यबाधितत्वाद्ग्राह्यं । दधिदराज्ञतमिश्रा इत्यनेन दध्यादिमिश्रत्वमावश्यकं । अक्षतेा यवः ।

"अक्षताश्च यवाः प्रोक्ता भग्ना धाना भवन्ति ते" ।

इति भट्टनारायणधृतात् । अतएव वक्ष्यमाणछन्दोगपरिशिष्टवचने अक्षतमनुक्ता संयोज्य यवकर्म्मानुदधिभिरिति निःसन्दिग्धमुक्तं । स्वधावाचनप्रश्ननिष्पत्तये नान्दीमुखाः पितरः प्रीयन्तामित्युपदेशः । तत्र स्वधां वाचयिष्ये इति पिण्डपक्षएव प्रश्नः अतएव तन्निष्पत्तये दैव इति आदौ देवपक्षे नान्दीमुखाः पितरः प्रीयन्तामिति प्रश्नः । उत्तरञ्च प्रीयन्तामिति । ततः पिण्डपक्षे स्वधावाचनस्यानीयत्वेन वृद्धप्रमातामहेभ्यश्च इति चकारनिर्देशेन च स्वधोच्यतामितिवत् प्रत्येकमेव प्रीयन्तामिति पृच्छेत् प्रत्युत्तरञ्च अस्तु स्वधा इतिवत् तत्तेषामेव प्रीयन्तामिति । अत्र नान्दीमुखाः पितर इत्यादि नान्दीमुखेभ्यः पिण्डभ्य इति निर्देशेन च नान्दीमुखं पिण्डगामिति विष्णुपुराणेन च मातामहेभ्यश्च तथा नान्दीमुखेभ्य एव च इति ब्रह्मपुराणेन च नान्दीमुखपदश्रुतेस्तद्विशेषणविशिष्टस्यैवाभ्युदयिके देवतात्वं ततश्चापि प्रीयन्तामितिवन्नान्दीमुखेभ्यः पितामहेभ्य इति वाच्यं । न तु नान्दीमुखविशेषणशून्यं पितामहेभ्यः प्रीयन्तामिति पिण्डदयितेक्षं युक्तम् । नान्दीमुखेभ्यः पिण्डभ्य प्रीयन्तामित्यन्वितस्य नान्दीमुखेभ्य इत्यस्य पितामहेभ्य इत्यादावनन्वयित्वेन प्रागुक्तयुक्त्या प्राप्तस्य नान्दीमुखविशेषणस्य पितामहेभ्य इत्यादावपि प्राप्तेः । एतेनात्र मैथिलोक्तं तन्त्रतात्रविधानमपि निरस्तं । पार्व्वणवत् स्वधाः प्राप्तेः तन्निराशाय न स्वधां प्रयुञ्जीतेति अत्र विशेषादभिलाषे मन्त्रे च स्वधापदनिवृत्तिः । अभिलाषे नम इति ब्रूयात् । "अमुकानुकगोत्रेतत् तुभ्यमन्नं स्वधा नमः" । इति ब्रह्मपुराणे श्राद्धे स्वधा नमः पदयोरत्यागबोधकत्वेन विकल्पादाभ्युदयिके स्वधानिषेधान्नम एवात्रेति । पितृनप्यत्र देववदित्यनेनापि पार्व्वणोक्तविश्वदेवपक्षीयनम एव प्रतीयते न तु मैथिलोक्तं स्वाहेति । श्राद्धे तथा प्रयोगे प्रमाणाभावात् । एवमाश्वलायनगृह्ये यवोसीति मन्त्रे तु पुष्ट्या इति श्रुतेर्मन्त्रमात्रे स्वधापदस्थाने पुष्टिपदप्रयोगः । इति श्राद्धतत्त्वं । अन्यत् नान्दीमुखशब्दे द्रष्टव्यं ॥

आमं, त्रि, (आम्यते ईषत्पच्यते । आ + अम + कर्म्मणि घञ् ।) पाकरहितं । काँचा इति भाषा । तत्पर्य्यायः । अपक्वं २ असिद्धं ३ अक्वथं ४ । इति रत्नमाला ॥

("आमपक्वकमं हित्वा नातिसारे क्रिया यतः" । इति वैद्यकचक्रपाणिसंग्रहः ॥

"मज्जत्यामाशुगत्वादिट् पक्वात्तूत्प्लवते जले ।
विनातिद्रवसङ्घातश्लेष्मश्लेष्मप्रदूषणात् ॥
परीक्ष्यैवं पुरा स्नानं निरामं वा सदोषिणां ।
विधिनोपाचरेत्स्नेयक् पाचनेनेतरेण वा" ॥

चिकित्सा यथा,—

"चित्रकं पिप्पलीमूलं द्वौ क्षारौ लवणानि च ।
शोभं हिङ्गुत्रमोदाश्च चत्वार्येकत्र चूर्णयेत् ॥
गुडिका मातुलुङ्गस्य दाडिमस्य रसेन वा ।
हृता विषाशयस्थामन्दीपयन्त्याशु चानलं" ॥

इति चित्रकाद्यगुडिका ॥ इति चरकः ॥)

आमं, क्ली, षट्प्रकाराजीर्णरोगमध्ये रोगविशेषः । तस्य कारणरूपे ।

"आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः ।
अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥
अजीर्णं पञ्चमं केचिन्निर्दोषं दिनपाकि च ।
वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरं ॥
तत्राम गुरुतोत्क्लेदः प्रोथो गण्डाक्षिकूटगः ।
उद्गारश्च यथामुक्तमविदग्धः प्रवर्त्तते" ॥

इति निदानं ॥ अन्यच्च ।

भुक्तमन्नावशेषं यत् रसं भूयस्त्वपाचितं ।
गतमामाशये यस्मात्तस्मादामं तदुच्यते ॥
अन्नमन्नरसं केचित् केचिच्च मलसञ्चयं ।
प्रथमां दोषदुष्टिञ्च आममित्यभिधीयते' ॥

अपक्वं । यथा,—

"शूल्यं क्षेत्रगतं प्राज्ञः सतुषं धान्यमुच्यते ।
आमं वितुषमित्युक्तं खिन्नमन्नमुदाहृतं" ॥

इति श्राद्धतत्त्वधृतवशिष्ठवचनं ॥ रोगविशेष तल्लक्षणादि अजीर्णशब्दे द्रष्टव्यं ॥

("उष्णाणोऽल्पबलत्वेन धातुमाद्यमपाचितं ।
दुष्टमामाशयगतं रसमामं प्रचक्षते ॥
आमेन तेन संसृष्टा दोषादूष्माश्च दूषिताः ।
सामाइत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः ॥
स्रोतोरोधबलभ्रंशगौरवानिलमूढ़ताः ।
आलस्यापक्तिनिष्ठीवमनोभेदाश्चिलामाः ॥
लिङ्गं मलानां सामानां निरामाणां विपर्य्ययः" ।

इति चरकः ॥

"आमेऽजीर्णे तु बन्धस्येत् क्षारस्तं लघु शस्यते ।
पुष्पकासीशमिश्रं वा क्षीरेण लवणेन च ।
सदाड़िमरसं सर्पिः पिबेद्वातेऽधिके सति" ॥

इति च चरकः ॥)

आमः, पुं, (अम + घञ् ।) रोगमात्रं । रोगभेदः । इति मेदिनी ॥ मलवैषम्यरोगः । इति राजनिर्घण्टः ॥

("पिबेत् स परिकर्त्तामे मले वा दाड़िमाम्बुना ।
विड़ेन लवणं पिण्डं बिल्वं चित्रकनागरं" ॥

इति चरकः ॥)

आमगन्धि, क्ली, (आमस्यापक्वस्य गन्धइव गन्धो यत्र ।) चिताधूमादिगन्धयुक्तं । अपक्वमांसादिगन्धविशिष्टं । तत्पर्य्यायः । विस्रं २ विस्रं ३ । इत्यमरः ॥

आमगन्धः, पुं, (आमगन्धयतीति । आ + गन्ध + णिच् + घञ् ।) रक्तशुक्तः । इति राजनिर्घण्टशब्दरत्नावल्यौ ॥ (रक्तशब्देऽस्य गुणादयो व्याख्येयाः ।)

आमनस्यं, क्ली, (अमनसो भावः । ब्राह्मणादित्वात् ष्यञ् ।) पीड़ा । दुःखं । इत्यमरः ॥

आमन्त्रणं, क्ली, (आ + मन्त्र + भावे ल्युट् ।) सम्बोधनं । इति हेमचन्द्रः ॥ आप्रच्छनं । इति जटाधरः ॥ निमन्त्रणं । इति स्मृतिः ॥ निमन्त्रणविशेषः । यदकरणे प्रत्यवायो नास्ति । यथा "इह श्रोत्रीयं भवान्" । इति मुग्धबोधव्याकरणं ॥

आमयं, क्ली, (आमं रोगं याति अनेन । आम + या + ड ।) कुष्ठनामौषधिः । इतिराजनिर्घण्टः ॥ कुड़ इति भाषा ।

आमयः, पुं, (अम रोगे + भावे + घञ् । मीञ् हिंसायां करणे अच् वा ।) रोगः । इत्यमरः ॥

("तदुक्तं विविधैर्योगैर्निहन्यादामयान् बहून्" । इति सुश्रुतः ॥

"तत्र व्याधिरामयो गद आतङ्को यक्ष्मात्ययो विकारो रोग इत्यनर्थान्तरं" । इति चरकः ॥)

आमयावी, [न्] त्रि, (आमयोऽस्यास्य आमयस्योपसंख्यानं इति दीर्घश्चेति विनिः । रोगी । इत्यमरः ॥

आमर्षः, पुं, (मृष + घञ् + नञ्समासः। अन्येषामपीति दीर्घः।) क्रोधः। इत्यमरटीकायां भरतः॥ ("निरुद्योगं निरामर्षं निर्वीर्यमरिनन्दनं"। इति रामायणे।)

आमलकं, क्ली, (आ + मल + कुन् शिल्पिसंज्ञयोः। आमलक्याः फलं। फलेलुगिति विकारावयवप्रत्ययस्य लुक्॥) आमलकीविशेषः। काठ आमला इति भाषा। तत्पर्य्यायः। काश्यधात्रीफलं २ क्षुद्रामलकं ३ क्षुद्रजातीफलं ४। अस्य गुणाः। कषायत्वं। कटुत्वं। शीतत्वं। पित्तास्रदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ ("तद्दामलकं शीतमम्लं पित्तकफापहं"। इति वाभटः॥ "विद्यादामलके सर्व्वान् रसान् लवणवर्ज्जितान्। खेदभेदःकफोत्क्लेदपित्तरोगविनाशनं"॥ इति चरकः॥)

आमलकः, पुं, (आड् + मल + कुन्।) वासकवृक्षः। इति शब्दचन्द्रिका॥ (यथा मार्कण्डेयपुराणे। "भल्लातकानामलकांस्तिन्दुकांश्च महाफलान्"।)

आमलकी, स्त्री, (आड् + मल + कुन् + जातेरिति ङीष्।) स्वनामख्यातफलवृक्षविशेषः। आमला इति भाषा। तत्पर्य्यायः। तिष्यफला २ अमृता ३ वयस्था ४ वयःस्था ५ कायस्था ६। इत्यमरटीका च। श्रीफला ७ धात्रिका ८ शिवा ९ प्रान्ता १० धात्री ११ अमृतफला १२ रुद्या १३ वृत्तफला १४ रोचनी १५। इति राजनिर्घण्टः। कर्म्मफला १६ तिष्या १७ इति रत्नमाला॥ अस्या गुणाः। हरीतकीगुणवद्गुणत्वं। विशेषेण शुक्रकारित्वं। शीतवीर्य्यत्वं। अम्लत्वात् वायुनाशित्वं। श्लेष्मादिमाधुर्य्यात् पित्तनाशित्वं। कषायरूक्षत्वात् कफनाशित्वं। सर्व्वफलाधिकगुणत्वं। भोजनाद्यमध्यान्ते प्राशस्त्यं। निरत्ययत्वं। दोषहरत्वञ्च। अस्य मज्जगुणाः। दृष्ट्याच्छर्दिकफवायुनाशित्वं। लघुत्वं। कषायत्वं। बलकारित्वञ्च। इति राजवल्लभः॥ अपि च। लघुत्वं। दाहवमिमेहश्लेष्मनाशित्वं। रसायनत्वं। कटुत्वं। रुचिकरत्वं। रक्तदोषनाशित्वं। भ्रमविबन्धाध्मानविष्टम्भदोषप्रशमनकारित्वञ्च। अस्य मज्जनो विभीतकमज्जवद्गुणत्वञ्च। इति राजनिर्घण्टः। (अस्या नामानि गुणाश्च।

"तिष्यामलकमाख्यातं धात्री तिष्यफलामृता। हरीतकीसमह्यात्रीफलं किन्तु विशेषतः॥ रक्तपित्तप्रमेहघ्नं परं वृष्यं रसायनम्। हन्ति वातं तदम्लत्वात् पित्तं माधुर्य्यशैत्यतः॥ कर्म रूक्षकषायत्वात् फलं धात्र्यास्त्रिदोषजित्। यस्य यस्य फलस्येह वीर्य्यं भवति यादृशं॥ तस्य तस्यैव वीर्य्येण मज्जानमपि निर्दिशेत्"। इति भावप्रकाशः॥ "तान् गुणांस्तानि कर्म्माणि विद्यादामलकेष्वपि। यान्युक्तानि हरीतक्यां वीर्य्यस्य तु विपर्य्ययः"॥ इति चरकः॥) तच्छुष्कफलगुणाः। कफपित्तनाशित्वं। अम्लत्वं। स्वादुद्रव्यद्वारा पाके पित्तनाशित्वञ्च। इति राजवल्लभः॥ तस्या उत्पत्तिर्यथा। सख्यावूचतुः। "उक्तस्त्वया महेशानि तुलसीबिल्वसम्भवः। अनयोस्तुल्य एकः कः शिवविष्णुप्रियस्तरुः॥ तदावां श्रोतुमिच्छावः शिवसुन्दरि कथ्यतां"।

देव्युवाच।

"अस्ति बिल्वतुलसीतरुतुल्यः पुण्य एक उत विष्णुशिवार्हः। नामतोऽमलक इत्यपि सख्यौ रोपितः कमलयाथ मयापि॥

कदाचित् देवयात्रायां प्रभासे पुण्यतीर्थके। सर्व्वे देवाः समायाता दिने पुण्ये च कुत्रचित्॥ तत्राहञ्च स्वयं लक्ष्मीरेकस्थाने समागते। तत्रावयोर्मतिर्जाता शिवविष्णुप्रपूजने॥ अहं श्रियमवोचञ्च सामुद्रि गृह्यतु मे मतिं। सकल्पितेन द्रव्येण पूजयेऽहं हरिं प्रभुं॥ मामुवाच ततो लक्ष्मीर्गङ्गादाक्षरभाषिणी॥ ममाप्येवं मतिर्जाता त्वमवोचः स्वयं यथा। सकल्पितेन द्रव्येण पूजयेऽहं त्रिलोचनं"॥

देव्युवाच।

"सजये विजये देवि! नावेवम्भूतयोस्तदा। नयनेषु सुजातानि अमलाश्रुजलानि च॥ तानि नौ नयनेभ्यश्च निपेतुर्भुवि हे सखि!। ततो जाता द्रुमाः पृथ्व्यां चत्वारो विमलप्रभाः॥ ख्याता आमलकी नाम्ना जाता कादमलाद्यतः। श्यामलश्चदलस्तेषां कर्व्वूरस्कन्धमूलकाः॥ शिराग्रथितपत्राली पत्रमालाकपत्रका। विल्वस्य च तुलस्याश्च ये गुणाः कथिताः सखि॥ ते ते गुणाः सर्व्वएव आमलक्यां समाहिताः। पत्रमालादलैरस्याः शिवविष्णू सुरेश्वरौ॥ सर्व्वथा पूजितौ स्यातां सख्यौ नास्त्यत्र संशयः। माघे मासि सितायां तामेकादश्यां समुद्भवां॥ शुभामामलकीं दृष्ट्वा समेताः सर्व्वदेवताः। ऋषयस्ते सशिष्याश्च हर्षमाणः परं तदा॥ शिवाच्युतस्तवैश्चापि ददृशुस्तुष्टुवुस्तदा"॥ ०॥ अस्या नमस्कारमन्त्रादिः।

"नमाम्यामलकीं देवीं पत्रमालाद्यलङ्कृता। शिवविष्णुप्रियां दिव्यां श्रीमतीं सुन्दरप्रभां॥ एतेन खलु मन्त्रेण सर्व्वा अस्याः क्रिया मताः। एतामुद्दिश्य तीर्थानि त्रीण्युक्तानि मनीषिभिः॥ विल्वस्तुलवदेवेह पृथिव्यां कर्म्मणां स्वले। सिषिचुस्तामामलकीं सर्व्वतीर्थजलैर्द्विजाः॥ अथ सर्व्वसुराश्चाथ मुनीनाञ्च तदाग्रतः। मया संपूजितः क्षत्राः श्रीश्च शम्भुमपूजयत्॥ तदा जयजयध्वानो बभूव क्षितिमण्डले। आकाशे पुष्पवृष्टिश्च गन्धर्व्वाश्च पुष्पकाः॥ दृष्ट्वा श्यामलकीं देवीं ववारानन्दमुत्तमं। तेन धात्रीति नाम्नापि राजत्यामलकी शुभा॥ नमस्कृत्य श्यामलकीं गता देवा दिवाकथा। ब्रह्मविष्णुशिवाश्चापि तत्राधिष्ठानमाश्रिताः॥ जाता श्यामलकी देवी परमानन्ददायिनी। मान्या श्राव्या च पूज्या च प्रयत्नत्वा सखीत्रियं"।

इति बृहद्धर्म्मपुराणे आमलकीप्रादुर्भावः १२ अध्यायः॥ * ॥ एकादश्यां तच्च विष्णुप्रीतिर्यथा। "तुष्यत्यामलकैर्विष्णुरेकादश्यां विशेषतः। श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः"॥ इति गारुडे २१५ अध्यायः॥

आमवातः, पुं, (आमोऽपाकहेतुः वातः।) स्वनामख्यातरोगविशेषः। तस्य निदानपूर्व्विकां संप्राप्तिमाह। "विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च। स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्व्वतस्तथा॥ वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति। तेनात्यर्थमपक्वोऽसौ धमनीभिः प्रपद्यते॥ वातपित्तकफैर्भूयो दूषितः सोऽग्निजो रसः। स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः॥ जनयत्यग्निदौर्ब्बल्यं हृदयस्य च गौरवं। व्याधीनामाश्रयो ह्येष आमसंज्ञोऽतिदारुणः॥ विरुद्धाहारचेष्टस्य विरुद्धाहारः क्षीरमत्स्यादि। विरुद्धा चेष्टा मुक्ता व्यायामादि। तद्युक्तस्य। निश्चलस्य निर्व्यापारस्य। "स्निग्धं भुक्तवतो ह्यन्नं व्यायामं कुर्व्वतः" इति मिलितो हेतुः। श्लेष्मस्थानं आमाशयसन्ध्यादि। तेन श्लेष्मस्थानगतेन अत्यर्थं अपक्वः। पित्तस्थानगमने तु पक्वोऽभिष्यदित्यभिप्रायः। असौ आमः धमनीभिः प्रपद्यते धमनीमार्गेण चलति। भूयो दूषितः अतिशयेन दूषितः। सोऽग्निजो रसः। आमः स्रोतांसि अभिष्यन्दयति संस्तभ्य रसवहशिरोवरोधं कृत्वा स्रोतांसि गुरूणि करोति। नानावर्णः वातादिजनितवर्णभेदान्नानावर्णः॥ * ॥ आमस्य लक्षणमाह।

"अजीर्णात् यो रसो जातः सञ्चितो हि क्रमेण वै। आमसंज्ञां स लभते शिरोगात्ररुजाकरः"॥ अजीर्णात् भुक्तादजीर्णात्॥ * ॥ आमवातस्य सामान्यलक्षणमाह।

"युगपत् कुपितावेतौ चिकसन्धिप्रवेशकौ। स्तब्धञ्च कुरुते गात्रमामवातः स उच्यते"॥ एतौ वातकफौ। चिकसन्धिप्रवेशकौ वेदनयेति बोद्धव्यौ॥ * ॥ तत्रान्तरे तस्य लक्षणान्तरमाह।

"अक्षमर्दोऽरुचिस्तृष्णाश्वासालस्यं गौरवं ज्वरः। अपाकः सूक्ततोद्गानां आमवातस्य लक्षणम्"॥ ०॥ अस्यैवातिवृद्धस्य लक्षणमाह।

"स कष्टः सर्व्वरोगाणां यदा प्रकुपितो भवेत्। हस्तपादशिरोगुल्फचिकजानूरुसन्धिषु॥ करोति सरुजं शोथं यत्र दोषः प्रपद्यते॥ स देशो रुज्यतेऽत्यर्थं व्याविद्ध इव दृश्यते॥ जनयेत् सोऽग्निदौर्ब्बल्यं प्रसेकारुचिगौरवम्। उत्साहहानिं वैरस्यं दाहश्च बहुमूत्रता॥ कुक्षौ कठिनतां शूलं तथा निद्राविपर्य्ययं। हृत्पीडनिश्चमूर्च्छाश्च हृदयार्द्दं विड्विबद्धता॥ जाड्यान्वितं कुजमानाङ्गं कष्टान्यानुपद्रवान्"। यदा प्रकुपितो भवेत् प्रकर्षेण कुपितः स्यात्तदा वक्ष्यमाणानुपद्रवान् करोति। तानाह हस्तेत्यादि। यत्र दोषः दुष्ट आमः प्रपद्यते गच्छति। जाड्यं अकर्म्मण्यत्वं। अन्यानुपद्रवान् कषायरूक्षत्वादीन्

॥*॥ तथैव विशिष्टानि लक्षणान्याह।
"पित्ताद्दाहं सरागञ्च सशूलं पवनात्मकं।
स्तिमितं गुरुकण्डूकं कफजुष्टं तमादिशेत्"॥
गुरुकण्डूकं बद्धकण्डूकम् ॥*॥ तस्यासाध्यत्वादि-
कमाह।
"एकदोषानुगः साध्यो द्विदोषो याप्य उच्यते।
सर्व्वदेहचरः शोथः सन्निपातिकः" ॥*॥
अथ आमवातस्य चिकित्सा।
"लङ्घनं स्वेदनं तिक्तं दीपनानि कटूनि च।
रेचनं स्नेहनमपि वस्त्यश्चाममारुते ॥
रूक्षस्नेहौ विधातव्यौ वालुकापुटकैरिह।
उपनाह्याश्च कर्त्तव्यास्तेऽपि स्नेहविवर्जिता ॥*॥
वास्तूकमत्र दृन्ताकं पटोलं कारवेल्लकं।
कोरदूषा यवाः पथ्याः वस्तिकाः शालयोऽनवाः" ॥
अनवाः पुराणाः।
"लावकानां तथा मांसं हितं तक्रेण संस्कृतं।
हितश्च यूषः कौलत्थः कलायस्यकस्य च" ॥*॥
"चित्रकं कटुका पथ्या नागरातिविषामृताः।
चूर्णिताः कोष्णतोयेन पिबेदामनिलापहाः ।१।
शुण्ठी शुण्ठी शिवासेव्या देवाह्वातिविषामृताः।
क्वथिताः प्रपिबेदामवाती रूक्षश्च भोजयेत्॥
देवाह्वा देवदारु। २।
आमवातगजेन्द्रस्य शरीरवनचारिणः।
एकएव निहन्तायमेरण्डस्नेहकेशरी। ३।
एरण्डस्नेहयुक्तां हरीतकीं भक्षयेद्दिधिवत्।
आमानिलार्त्तियुक्तो युक्तो दद्या च मध्यमा। ४।
श्वेतं पुनर्नवामूलं तेन तैलं प्रसाधयेत्।
आमवातरुजं हन्ति पादाभ्यङ्गनमर्द्दनात्।५।
आरग्वधस्य पत्राणि भल्लातानि कटुतैलतः।
आमवातप्रशान्त्यर्थं खादेद्गुल्लाहृतानि च। ६।
शुण्ठीगोक्षुरकक्वाथः प्रातः प्रातर्निषेवितः।
आमवाते कटीशूले पाचनं रुक्प्रणाशनं। ७।
कटीशूले पिबेत्तैलं एरण्डफलसम्भवं।
महौषधगुडश्चोष्णं क्वाथं मागधिकायुतं॥
विश्वौषैरण्डबीजानि पिष्ट्वा क्षीरे विपाचयेत्।
तत्पायसं कटीशूले मध्यमां परमौषधं। ८।
राला वातारिमूलञ्च वासकः सदुरालभः।
शुण्ठीदारुबलामुस्तनागरातिविषामयाः॥
स्वदंष्ट्राद्याधिघातश्च मिथिधान्यं पुनर्नवा।
अश्वगन्धामृता क्षुण्णा दृढदारुः शतावरी॥
वचा सहचरश्चैव चविका दहतीदयं।
समभागानि सर्व्वाणि राला त्रिगुणा मता॥
पिबेत् कषायमेतेषामष्टभागावशेषितं।
क्षिप्त्वा नागरचूर्णञ्च प्रक्षेपोऽत्र यथाबलं॥
सर्व्वेषु वातरोगेषु सामेषु तु विशेषतः।
पक्षाघातेऽर्दिते कम्पे कुब्जे सन्धिगतेऽनिले॥
जानुजङ्घास्थिपीड़ासु मध्यमाश्च दनुग्रहे।
उरस्तम्भे वातरक्ते विसूच्यां क्रोष्टुशीर्षके॥
हृदामये च दुर्नाम्नि योनिशुक्रामयेषु च।
पुंसां मेढ्रगते वाते स्त्रीणां बन्ध्यामये तथा॥
योषितां गर्भदं मुख्यं नास्त्यस्मात् परमौषधं।
महाराल्लादिकः क्वाथो वेधसार्थं विनिर्म्मितः"॥
महाराल्लादिकक्वथः ।९। "अजमोदामरिच-
पिप्पलीविड्डसुरदारुचित्रकशृताङ्गाः। सैन्धव-
मागधिमूलं भागा नवकस्य पलिकाः स्युः॥ शुण्ठी
दशपलिका स्यात् पलानि तावन्ति वृद्धदारस्य।
अभया पलानि पञ्च श्लक्ष्णं चूर्णं विधापयेदेषां।
समगुडवटकानदतश्चूर्णं वा कोष्णवारिणा पिबतः।
नश्यन्त्यामानिलजाः सर्व्वे रोगाः सुदारुणाः शीघ्रं।
आगाहश्लजतूनी प्रतितूनी यकृत्प्लीहौ गुल्मः। कटि-
एष्ठपरिष्फुटनं स्फुटनं चैवास्थिजङ्घयोस्तीव्रं॥
स्रयथुस्तथाङ्गसन्धिषु ये चान्येऽप्यामवातजा रोगाः
सर्व्वे प्रयान्ति शान्तिं तमहव सूर्य्यांशुविध्वस्तं॥
अजमोदादिचूर्णमोदकः।१०।
"आमवाते हितोऽतीव पथ्यादिर्गुग्गुलुर्मतः"।
तथैव योगराजाख्यस्सरकादिचिकित्सकः।११।
नागरस्य पलान्यष्टौ घृतस्य कुड़वं तथा।
क्षीराढ़कसमायुक्तं खण्डस्यार्द्धशतं पलं॥
शोषत्रिजातकदृश्यात् प्रत्येकञ्च पलं पलं।
निःक्षिपेच्चूर्णितं तत्र खादेदग्निबलं यथा॥
आमवातप्रशमनं धातुपुष्टिकरं परं।
बल्यमायुष्यमोजस्यं बलीयलितनाशनं"॥
शुण्ठीखण्डः। १२।
"मेथिकायाः पलान्यष्टौ शुण्ठ्या अष्ट पलानि च।
तयोश्चूर्णं घटे पूतं दुग्धे मद्दग्निना पचेत्॥
दुग्धाढ़कयुगे गव्यं घृतमष्टपलं क्षिपेत्।
तत्तावत्सुपचेत् यावत् भवेदतिघनं पयः॥
पुनः पचेत् मृदग्नौ च दत्त्वाढ़कमितां सितां।
ततः पाके सुविज्ञाते व्यजनादवतारयेत्॥
मरिचं पिप्पली शुण्ठी कणामूलं सचित्रकं।
यवानी जीरको धान्यं कारवी घृतपुष्पिका॥
जातीफलं त्वटीलवङ्गं च पत्रकं भद्रमुस्तकं।
श्लक्ष्णीयात् पलमेतेषां सर्व्वेषाञ्च पृथक् पृथक्॥
षड़ङ्गं नागरं तत्र मरिचं च षड़ङ्गकं।
एषां चूर्णं परिक्षिप्य सर्व्वं संमिश्र्य रक्षयेत्॥
एतत्तु मेथजं प्रोक्तं मेथिकापाकसंज्ञकं।
भक्षयेत् पलमात्रं तत् यथा चाग्निबलं तथा॥
आमवातं निहन्त्येतत् सर्व्वांश्च पवनामयान्।
ज्वरांश्च विषमान् हन्ति पाण्डुरोगं सकामलं॥
हन्त्युन्मादमपस्मारं प्रमेहान् वातशोणितं।
अम्लपित्तं श्रीतपित्तं शिरःपीड़ां दृगामयं॥
प्रदरं सूतिकारोगं हन्यादेतन्न संशयः।
वपुषः पुष्टिबृंहण्यं वीर्य्यवृद्धिकरं परं"।
मेथिकापाकः। १३।
"रसो रसोनस्य पिचुप्रमाणः
क्षिपेच्च तत्राल्पमितं घृतं गोः।
पिबेदुभे तेन दहत्यवश्यं
शिखीव तूलं हि महामवातं"।
सामान्यवातव्याधिचिकित्साया हि लिखितं रसो-
नाष्टकमामवाते अतिगुणदं। १४।
"सैन्धवं श्रेयसी राला घृतपुष्पा यवानिका।
खर्जिका मरिचं कुष्ठं शुण्ठी सौवर्चलं विड़ं॥
वचाऽजमोदा जरणः पौष्करं मधुरं कणा।
एतान्यर्द्धपलांशानि सूक्ष्मकल्कानि कारयेत्॥
प्रस्थमेरण्डतैलस्य प्रस्थोऽम्लु घृतप्रस्थकं।
काञ्जिकं द्विगुणं दत्त्वा मस्तु च द्विगुणं तथा॥
एतत् संभृत्य संभारं मृदग्निना पचेत्।
सिद्धमेतत् प्रयोक्तव्यमामवातहरं परं॥
पाने चाभ्यञ्जने वस्तौ कुर्य्यादग्निबलं भृशं।
वातार्त्ते वंक्षणे शूले कटीजानूरुसन्धिजे॥
तथा हृत्पार्श्वजे शूले शूलं श्लेष्मणि पीड़िते।
अन्यांश्चानिलजान् रोगान् नाशयत्याशु देहिनां"
इत्यमृतैरण्डाद्यं तैलं। १५।
"दधिमत्स्यगुड़क्षीरपोतकीमाषपिष्टकं।
वर्जयेदामवातार्त्तो गुड़मांसमनूपजं"॥
इत्यामवाताधिकारः। इति भावप्रकाशः॥
(आत्रेयउवाच।
"लक्षणं शृणु पुत्र! त्वं समासेन वदाम्यहं।
गुर्व्वन्नाहारपुष्टेन मन्दाग्निश्च व्यायिनः॥
तर्पितैः कन्दशाकैस्तु आमोवायुसमीरितः।
श्लेष्मस्थाने प्रपद्यैव जायते बड्ववेदनः॥
आमातिसारो वर्त्तते सन्धौ शोथः प्रजायते।
जड़त्वञ्चैव गात्राणां बलासपतनं मुखे॥
दृष्टमन्याग्निकेशातवेदनार्त्तोऽपि सीदति।
अङ्गं वैकल्यमायाति आमवाते भिषग्वर"!॥
चिकित्सा यथा॥*॥
"तस्य नो स्नेहनं कार्य्यं पाचनञ्च विधीयते।
आमं संक्षयते प्राज्ञैः चतुर्धा भेदलक्षणैः"॥
विष्टम्भामलक्षणं यथा॥*॥
"विष्टम्भो गुल्मलक्षणेही आमः पक्वाम एव च।
सर्व्वाङ्गगो भवेच्चान्यो वक्ष्ये तस्यापि लक्षणं॥
विष्टम्भो गुद आध्मानं वस्तिशूलञ्च जायते।
तस्यापि पाचनं कार्य्यं स्नेहनञ्चैव कारयेत्"॥
गुल्मशूलामलक्षणं यथा॥*॥
"जठरं गर्ज्जते यस्य गुल्मवत् परिपीड्यते।
कटीदेशे जड़त्वञ्च आमगुल्माभिशङ्कितः॥
तस्यादौ लङ्घनानि स्युर्ज्ञात्वा देहबलाबलं।
पाचनं नैव कर्त्तव्यं गुल्मपाके विमूर्च्छति॥
पाचिते चापि गुल्माग्नौ तदासु मरणं ध्रुवम्"।
स्नेहामलक्षणं यथा॥*॥
"यस्य च खिद्यता गात्रे जाड्यं मन्दाग्निको बली।
स्नेहामो विजयो यस्य स्नेहीवामः प्रकीर्त्तितः॥
तस्य नो स्नेहनं कार्य्यस्तोपवासश्च कारयेत्।
पाचनञ्चैव कर्त्तव्यमामञ्चैवातिसारयेत्"।
आमस्य लक्षणं यथा॥*॥
"यस्य श्लोपानत्वं जाड्यं तथा चैव घनोदरं।
अरुच्यामातिसारस्य सचासाध्यो विजानता॥
प्रत्याख्येया क्रिया कार्य्या जीवितस्यापि संशये।
पाचनं पाचितं ज्ञात्वा तस्माच्चूर्णानि दापयेत्"॥
चिकित्सा यथा॥*॥
"आमवाते कषायञ्च दशमूलीजलं पिबेत्।
गुड़ूची नागरं पथ्या चूर्णमेतद्गुड़ान्वितं॥
धान्यनागररास्नादेवदारुवचाभयाः।
पाचनश्चामवाते च श्लेष्मणेतत्सुखावहं"॥)
आमातीसारः, पुं, (आमरोगेण कृतः अतीसारः।)
षट्प्रकारातीसारमध्ये रोगविशेषः। तस्य

संप्राप्तिरूपे ।
अन्नाशीर्णात् प्रदूताः क्लोमयन्तः
कोष्ठं दोषा धातुसंघान् मलांश्च ।
नानावर्णं नैकशः सारयन्ति
श्लेष्मोपेतं षष्ठमेनं वदन्ति ॥
संसृष्टमेभिर्दोषैस्तु न्यस्तमप्सवसीदति ।
पुरीषं भृशदुर्गन्धि पिच्छिलं चामसंज्ञितं" ॥
इति निदानं ॥
(चिकित्सा यथा,—
"न तु संग्रहणं दद्यात् पूर्व्वमामातीसारिणे ।
दोषाक्षादौ रुध्यमाना जनयन्त्यामयान् बहून् ॥
ग्रीषपायश्चामयज्ञीहकुष्ठगुल्मोदरज्वरान् ।
दद्रुकालसकाध्मानग्रहण्यर्शोगदांस्तथा ॥
क्षीणधातुबलार्त्तस्य बद्धदोषोऽति निर्भृतः ।
आमोऽपि स्तम्भनीयः स्यात् पाचनान्मरणं भवेत्"
इति वैद्यकचक्रपाणिसंग्रहः ॥*॥
"अभया मस्तुना पिष्टा मधुशर्करयान्विता ।
आमातीसारं शमयेद् गुडामलकमेव च ॥
वत्सकं जीरके दे च दध्ना पिबन्तु दापयेत् ।
आमातिसारशमनं वस्तिशूलं नियच्छति" ॥
इति हारीतः ॥* ॥ "तस्य रूपाणि विज्ञेयमामविद्भुतमवसादितं । रूक्षं द्रवं सशब्दमशब्दं वा विबद्धमूत्रवातमतिसार्य्यते पुरीषं वायुश्चान्तःकोष्ठस्य सशब्दशूलः तिर्य्यक् चरति विबद्ध इत्यामातिसारः" ।
"आमे परिणते यस्तु विबद्धमतिसार्य्यते ।
सशूलपिच्छमल्पाल्पं बद्धगुदः सप्रवाहिकं ॥
तं मूलकानां यूषेण बदराम्लामथापि वा ।
उपोदकायाः क्षीरिण्या यवाग्या वास्तुकस्य वा ॥
सुवर्चलायाश्चोर्व्या शाकेनावल्गुजस्य वा ।
शुष्काया वर्कारुकाणां वा जीवन्त्याश्चिर्भटस्य वा ॥
जोङ्गीकायाः सपाठाया शुष्कशाकेन वा पुनः ।
दधिदाड़िमसिद्धेन बद्धस्नेहेन भोजयेत्" ॥
इति चरकः ॥)

आमात्यः, त्रि, (अमात्य एव स्वार्थे अण्।) अमात्यः। मन्त्री। इति द्विरूपकोषः ॥ बलाध्यक्षः।

आमानस्यं, क्ली, (न प्रशस्तं मानसं यस्य सः अमानसस्तस्य भावः। अमानस + ष्यञ्।) आमनस्यं। पीड़ा। दुःखं। इति शब्दरत्नावली ॥

आमान्नं, क्ली, (आमञ्च तत् अन्नमेति कर्म्मधारयः।) अपक्वान्नं। काँचाचाउल इति भाषा। तद्दानमन्त्रो यथा,—
"आमान्नं ते प्रयच्छामि फलताम्बूलसंयुतं ।
सदृतं परमं दिव्यं मया भक्त्या निवेदितं" ॥
इति कृत्यचिन्तामणिधृतकेश्वरपुराणोक्तदुर्गोत्सवपद्धतिः ॥*॥
बलात् चाण्डालादिस्वामिकापक्वान्नभोजनप्रायश्चित्तं यथा। चाण्डालान्नं भुक्त्वा चिरान्नमुपवसेत् सिद्धं भुक्त्वा पराकः। इति बलाद्भोजनविषयं। इति प्रायश्चित्तविवेकः ॥ चिरान्नमामान्नविषयं। परत्र सिद्धमित्युक्तेः। पराकमाह मनुः।
"यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनं ।
पराको नाम कृच्छ्रोऽयं सर्व्वपापापनोदनः" ॥
"तेनान्नामान्ने सिद्धान्नप्रायश्चित्ततुरीयभागविधानादज्ञानादावपि तत्तुरीयकल्पना इति"। इति प्रायश्चित्ततत्त्वं ॥*॥ आमान्नदाने कर्त्तव्यश्राद्धानि। यथा,—
"आपद्यनौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा।
आमश्राद्धं द्विजैः कार्य्यं शूद्रेण तु सदैव हि" ॥
इति श्राद्धतत्त्वधृतप्रचेतोवचनं ॥ अपि च। योगिनीतन्त्रे।
"गिरमेरामश्राद्धे तु अन्नं न क्वापयेत् क्वचित्।
दद्यौ च क्वापयेदन्नं संक्रमे ग्रहणेषु च" ॥
इति तिथ्यादितत्त्वम् ॥*॥

आमाशयः, पुं, (आमस्य आशयः षष्ठीतत्पुरुषः।) अपक्वस्थानं। तत्तु नाभिस्तनयोर्म्मध्यभागः। इति शब्दचन्द्रिका ॥ (यथा महाभारते,—
"पक्वाशयस्त्वधोनाभ्यामूर्द्धमामाशयः स्मृतः"।
यथा च सुश्रुते,—
"पक्वामाशययोर्म्मध्ये शिराप्रभवा नाभिर्नाम"॥*॥
"नाभिस्तनान्तरं जन्तोराऊरामाशयं बुधाः"।
"आमाशयस्तु तदधः" इति भावप्रकाशः ॥
"तत्रामाशयः पित्ताशयस्योपरिष्टात् तत्प्रत्यनीकत्वादूर्द्धगतित्वात्तेजसश्चन्द्र इवादित्यस्य स चतुर्व्विधस्याहारस्याधारः"। "आमाशयः श्लेष्मणः"। इति सुश्रुतः ॥)

आमिक्षा, स्त्री, (आमिश्यते मिश्र सेचने बाहुलकात् सक्।) घृतोष्णादुग्धे दधियोगसम्भवा या। छीरसा इति ख्याता। छाना इति केचित्। इत्यमरः ॥ तत्पर्य्यायः। दधिकूर्चिका २ पयस्या ३ क्षीरसन्तानिका ४। इति राजवल्लभादयः ॥
("ग्राहिणी वातला रूक्षा दुर्जरा तक्रकूर्चिका"। इति सुश्रुतः अत्र हि तक्रकुर्चिका शब्देनामिक्षोच्यते इति पर्य्यायान्तरदृष्टत्वात् ॥)

आमिषं, क्ली, पुं, (आमिश्यते मुख्यते मिश्र श्लेषणे घञ् संज्ञापूर्व्वकत्वान्न गुणः।) मांसं। इत्यमरः ॥ भोग्यवस्तु। संभोगः। उत्कोचः। इति मेदिनी ॥ सुन्दराकाररूपादि। लोभसत्त्वयः। इति हेमचन्द्रः ॥ लाभः। कामगुणः। रूपं। भोजनं। इति हारावली ॥

आमिषप्रियः, पुं, (आमिषं प्रियं यस्य सः।) कङ्कपक्षी। इति राजनिर्घण्टः ॥ मांसाभिलाषिणि त्रि ॥

आमिषाशी, न्, त्रि, (आमिषं अश्नाति आमिष + अश् + णिनि।) मत्स्यमांसभोजनशीलः। तत्पर्य्यायः। ग्रौष्कलः २। इत्यमरः ॥

आमिषी, स्त्री, (आमिषवदाकारोऽस्त्यस्या जटायामिति अर्शआदित्वादच् गौरादीत्वात् ङीष् च।) मिषी। जटामांसी। इति केचित्। इत्यमरटीकायां भरतः ॥

आमीक्षा, स्त्री, (आमिश्यते, मिश्र सेचने बाहुलकात् सक्।) आमिक्षा। आवर्त्तिते तप्ते क्षीरे दधियोगात् या वटिकाकारा विकृतिर्जायते सा। इति पुरुषोत्तमः ॥

आमुक्तः, त्रि, (आङ् + मुच् + क्तः।) परिहितवस्त्रादिः। इत्यमरः ॥ परिहितकवचव्यक्तिः ॥

आमुषः, पुं, (आम + वप् + क।) कण्टकयुक्तवंशविशेषः। इति शब्दचन्द्रिका ॥ वेउड़बाँश। इति ख्यातः।

आमुष्यायणः, त्रि, (अमुष्य अपत्यम् + फक्। अलुक्।) ख्यातवंशोद्भवः। सत्कुलजातः। इति त्रिकाण्डशेषः ॥

आमूलं, क्ली, (मूलपर्य्यन्तं आमूर्ध्वं। अव्ययीभावः।) मूलपर्य्यन्तं ॥ (प्रारम्भावधि। यथा, शाकुन्तले।)
"आमूलशुद्धसन्तति कुलमेतत् पौरवं प्रजानन्त्ये"।)

आमोदः, पुं, (आङ् + मुद् + घञ्।) अतिदूरगामिगन्धः। इत्यमरः ॥ गन्धः। हर्षः। इति मेदिनी ॥ सुमनद्रव्यगन्धः। इति शब्दरत्नावली।
(यथा रघुवंशे। १।४३।
"आमोदमुपजिघ्रन्तौ खनिःश्वासानुकारिणम्"।)

आमोदनं, क्ली, (आङ् + मुद् + ल्युट्।) आमोदकरणं। हर्षणं ॥ प्रीणनं। आनन्दनं।

आमोदितः, त्रि, (आ + मुद् + णिच् + क्त। यद्वा आमोदः सञ्जातोऽस्य तारकादित्वादितच्।) आनन्दितः। सुगन्धितः। सङ्गन्धयुक्तः। यथा,—
"पारिजातप्रसूनोत्थगन्धामोदितदिङ्मुखे"।
इति शिवरात्रिव्रतकथा ॥ आनन्दितः। आमोदशब्दादितप्रत्ययेन निष्पन्नः ॥

आमोदी, [न्] त्रि, (आमोद + णिनि।) सुखवासनः। इत्यमरः ॥ कर्पूरादिवटिकाहृतमुखगन्धः। इति सारसुन्दरी ॥ सुखवासनवटिकादिः। आमोदयुक्तः कर्पूरादिरामोदी। इति भरतः ॥ नानाद्रव्यरचित एकैकश एव वा कर्पूरादिभिर्मुखोपयोग्यसुखवासनवटिकादिः। इति सर्व्वस्वं। गन्धयुक्तः। हर्षविशिष्टः ॥ (यथा भर्त्तृहरिः।
"नवकुटजकदम्बामोदिनो गन्धवाहाः"।)

आम्नायः, पुं, (आङ् + म्ना + घञ् + युक्।) श्रुतिः। वेदः। (यथा महावीरचरिते।
"इतीयो ह्येष मेधोऽग्निराम्नायः पञ्चमोऽथवा"।
उत्तरचरिते।
"समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः"।)
संप्रदायः। गुरुपरम्पराप्राप्तोपदेश इति यावत् ॥ इत्यमरः ॥ निगमः। उपदेशः। इति मेदिनी ॥ कुलं। आगमः। इति हेमचन्द्रः ॥ कुलक्रमः। इति शब्दरत्नावली ॥ (उपदेशः, शिक्षादानं, तन्त्रशास्त्रं, अभ्यासः, आलेडनं, आलोचनं।)

आम्बिकेयः, पुं, (अम्बिकाया अपत्यं स्त्रीभ्यो ढक्।) धृतराष्ट्रो राजा। इति त्रिकाण्डशेषः ॥ (यथा महाभारते।
"परं श्रेयः पाण्डवेया मयोक्तं
न मे तच्च श्रुतवानाम्बिकेयः"।)
कार्त्तिकेयः।

आम्रः, पुं, (अम्यते अम गत्यादौ अमितम्योदीर्घश्चेति रक् दीर्घश्च।) फलवृक्षविशेषः। आम आँव इति भाषा। तत्पर्य्यायः। चूतः २ रसालः ३। अतिसौरभश्चेत् सहकारः ४। इत्यमरः ॥ कामशरः। कामवल्लभः ६ कामाङ्गः ७ कीरेष्टः ८ माधवद्रुमः ९ मदनाभीष्टः १० सीधुरसः ११ मधूली १२

कोकिलोत्सवः १३ वसन्तदूतः १४ अस्त्रफलः १५ मोदास्यः १६ मन्मथालयः १७ मधुवासः १८ सुमदनः १९ पिकरागः २० नृपप्रियः २१ प्रियाम्बुः २२ कोकिलावासः २३। इति राजनिर्घण्टः। माकन्दः २४ षट्पदातिथिः २५ मधुव्रतः २६ वसन्तद्रुः २७ पिकप्रियः २८ स्त्रीप्रियः २९ गन्धबन्धुः ३० अलिप्रियः ३१। इति शब्दरत्नावली॥ मदिरासखः ३२। इति जटाधरः॥ बालाम्रफलगुणाः। वायुरक्तपित्तकारित्वं। इति राजवल्लभः॥ अपिच। कषायत्वं। अम्लरसत्वं। सुगन्धित्वं॥ कफामयनाशित्वं। अम्लकरत्वं। पित्तप्रकोपवायुरक्तदोषपटुत्वादिरुचिप्रदत्वञ्च। तच्च बद्धास्थिताकृक्। इति राजनिर्घण्टः॥* ॥ मध्याम्रगुणाः। पित्तकारित्वं॥*॥ पक्वाम्रगुणाः। वर्णरुचिमांसशुक्रबलकारित्वं। पित्ताविरोधित्वं। वायुनाशित्वं। हृद्यत्वं। गुरुत्वं। अनुलोमनत्वं। इति राजवल्लभः॥ अपिच। चिरोद्गमताकारित्वं। स्वादुत्वं। पुष्टिजनकत्वं। अधिकधातुप्रचयकारित्वं। दृष्टिकान्तिकारित्वं। दृष्ट्याश्रमशमनत्वञ्च। इति राजनिर्घण्टः॥* ॥ मधुयुक्ताम्रगुणाः। क्षयरोगशीर्षवातश्लेष्मरोगनाशित्वं॥*॥ घृतयुक्ताम्रगुणाः। वातपित्तनाशित्वं। अग्निबलवर्णकारित्वञ्च॥* ॥ दुग्धयुक्ताम्रगुणाः। शीतलत्वं। स्वादुत्वं। गुरुत्वं। स्निग्धत्वं। मेदकत्वं। वातपित्तहारित्वं। शुक्ररक्तबलवर्द्धकत्वञ्च॥*॥ तत्फलाम्बिगुणाः। दृष्ट्याश्रर्हिमेहातीसारनाशित्वं। इति राजवल्लभः॥*॥ तत्पत्रगुणाः। कषायत्वं॥*॥ तन्मूलगुणाः। सुगन्धित्वं। कषायत्वं। रुचिकारित्वं। संग्राहित्वं। शीतलत्वञ्च॥*॥ तत्पुष्पगुणौ। रुचिकारित्वं। अग्निदीपनत्वञ्च॥*॥ आम्रपेषीगुणाः। कषायत्वं। अम्लत्वं। भेदकत्वं। कफवातनाशित्वञ्च॥*॥ क्षत्रिमपक्वाम्रगुणाः॥ अम्लरसहानेर्मधुरत्वाच्च पित्तनाशित्वं॥*॥ चुषिताम्रगुणाः॥ परमरुचिबलवीर्यकारित्वं। लघुत्वं। शीतलत्वं। शीघ्रपाकित्वं। वातपित्तहारित्वं। सारकत्वञ्च॥*॥ तद्वासितरसगुणाः। बलकारित्वं। गुरुत्वं। वातहरत्वं। सारकत्वं। हृद्यत्वं। दृष्टिजनकत्वं। अतिशुक्रवर्द्धकत्वं। कफवर्द्धकत्वञ्च॥*॥ तत्खण्डगुणाः॥ गुरुत्वं। रोचकत्वं। गुरुपाकित्वं। मधुरत्वं। दृंहणत्वं। बलकारित्वं। शीतलत्वं। वातनाशित्वञ्च॥*॥ अतिशुष्काम्रफलगुणाः॥ मन्दाग्निविषमज्वररक्तामयबद्धगुदोदरगुल्मामयकारित्वं। "इतदम्लाम्लविषयं न तु मधुराम्लपरं। मधुरस्य परं नेत्रहितत्वादिगुणत्वात्॥ यद्यतिशुष्कमम्लञ्च करोति तदा गुडौजलानुपानं। अथवा सौवर्चलेन सह क्षीरं प्रयोक्तव्यं"॥*॥ तत्पल्लवगुणाः। रुचिकारित्वं। कफपित्तनाशित्वञ्च॥*॥ तथा च राजनिर्घण्टः।

"आम्रमामं जलं स्निग्धं मर्दितं दृढपाणिना।
सिताशीतांबुसंयुक्तं कर्पूरमरिचान्वितं॥
प्रपानकमिदं श्रेष्ठं भीमसेनेन निर्म्मितं।
सद्यो रुचिकरं बल्यं शीघ्रमिन्द्रियतर्पणम्"॥

(तत्रादावाम्रस्य नामानि गुणाश्च।

"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः॥*॥
आम्रपुष्पमतीसारकफपित्तप्रमेहनुत्।
अल्पगुदुरिहरं शीतं रुचिकृद्ग्राहि वातलम्॥
आम्रं बालं कषायाम्लं रुच्यं मारुतपित्तजित्।
तरुण्यन्तु तदत्यम्लं रूक्षं दोषत्रयावहम्॥
आम्रमामं त्वचाहीनमातपेऽतिविशोषितम्॥
अम्लं स्वादुकषायं स्याद्वेदनं कफवातजित्॥*॥
पक्वन्तु मधुरं हृद्यं स्निग्धं बलसुखप्रदम्॥
गुरु वातहरं हृद्यं वर्ण्यं शीतमपित्तलम्।
कषायानुरसं वह्नि-श्लेष्म-शुक्र-विवर्द्धनम्॥*॥
तदेव रूक्षसम्यक्तं गुरुवातहरं परम्।
मधुराम्लरसं किञ्चित् भवेत् पित्तप्रकोपनम्॥*॥
अम्लं क्षत्रिमपक्वञ्च तद्भवेत् पित्तनाशनम्॥*॥
रसस्याम्लस्य हीनत्वं माधुर्य्याच्च विशेषतः॥
उषितं तत्परं रुच्यं बल्यं वीर्य्यकरं लघु॥
शीतलं शीतपाकि स्यादातपित्तहरं सरम्॥*॥
तद्रसो गालितो बल्यो गर्ब्बवातहरः सरः।
अहृद्यस्तर्पणोऽतीव दृंहणः कफवर्द्धनः॥*॥
तस्य खण्डं गुरुपरं रोचनं चिरपाकि च।
मधुरं दृंहणं बल्यं शीतलं वातनाशनम्॥
वातपित्तहरं रुच्यं दृंहणं बलवर्द्धनम्॥*॥
हृद्यं वर्णकरं स्वादु दुग्धाम्लं गुरु शीतलम्॥*॥
मन्दानलत्वं विषमज्वरञ्च
रक्तामयं बद्धगुदोदरञ्च।
आम्रातियोगो नयनामयं वा
करोति तस्मादति तानि नाद्यात्॥
एतदम्लाम्लविषयं मधुराम्लपरं न तु।
मधुरस्य परं नेत्रहितत्वाद्या गुणा यतः॥
गुरुत्वाम्रसेऽनुपानं स्यादाम्राणामतिभक्षणे।
जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च"॥*॥

आम्रबीजस्य गुणाः।

"आम्रबीजं कषायं स्याच्छर्दातीसारनाशनम्।
ईषदम्लञ्च मधुरं तथा हृदयदाहनुत्"॥*॥

आम्रनवपल्लवस्य गुणाः॥

"आम्रस्य पल्लवं रुच्यं कफपित्तविनाशनम्"॥*॥
इति भावप्रकाशः॥

"अपक्वमाम्रं फलमेव शस्तं
संग्राहि पित्तास्रजि कोपनञ्च।
तथा विपक्वं मधुरन्तु चाम्लं,
भेद्यं सपित्तामयनाशनञ्च"॥

इति हारीतः॥

"वातपित्तास्रदृग्बालं बद्धास्थिकफपित्तजित्॥
गुर्व्वाम्रं वातजित् स्वादम्लं कफमुक्तजित्"।
इति वाभटः॥

"रक्तपित्तकरं बालमापूर्णं पित्तवर्द्धनम्।
पक्वमाम्रं जयेद्वायुं मांसशुक्रबलप्रदम्"॥*॥

"आम्रामलकलेहाश्च दृंहणा बलवर्द्धनाः।
रोचनास्तर्पणाश्चोक्ताः स्नेहमाधुर्य्यगौरवात्"॥
इति चरकः।

"पित्तानिलकरं बालं पित्तलं बद्धकेशरम्॥
हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदम्।
कषायानुरसं स्वादु वातघ्नं दृंहणं गुरु॥
पित्ताविरोधि सम्यक्तमाम्रं शुक्रविवर्द्धनम्।
दृंहणं मधुरं बल्यं गुरु विष्टभ्य जीर्य्यति"॥
इति सुश्रुतः॥)

आम्रगन्धकः, पुं, (आम्रगन्ध + कन्।) समङ्गिवृक्षः। इति राजनिर्घण्टः॥

आम्रपेषी, स्त्री, (आम्रस्य पेषी।) शुष्कामखण्डं। आम्रषी इति भाषा। अस्या गुणाः। अम्लत्वं। कषायत्वं। उष्णत्वं। भेदकत्वं कफवातनाशित्वञ्च। इति राजवल्लभः॥

आम्रातः, पुं, (आम्र + अत् + अच्।) आम्रातकः। इति शब्दमाला॥ (अस्य गुणाः। यदुक्तं।

"आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकृत् परम्।
पक्वन्तु तुवरं स्वादुरसपाकं हिमं स्मृतम्।
तर्पणं श्लेष्मनं स्निग्धं हृद्यं विष्टम्भि दृंहणम्।
गुरु बल्यं मरुत्पित्तक्षतदाहक्षयापहम्"।

"राजाम्रवृक्ष आम्रातः कामाङ्गो राजपुत्रकः।
राजाम्रन्तुवरं स्वादु विष्टम्भं शीतलं गुरु॥
ग्राहि रूक्षं विबन्धाध्मवातकृत् कफपित्तनुत्"।
इति भावप्रकाशः॥ तथा च चरके।

"मधुरं दृंहणं बल्यमाम्रातं तर्पणं गुरु।
सस्नेहं श्लेष्मलं शीतं हृद्यं विष्टभ्य जीर्य्यति"॥)

आम्रातकः, पुं, (आम्रं तद्रसम् आ ईषत् अतति माति। अत सातत्यगमने ल्वुनादित्वात् वुन्।) वृक्षविशेषः। आमड़ा इति भाषा। तत्पर्य्यायः। पीतनः २ कपीतनः ३। इत्यमरः॥ वर्षपाकी ४। इति रत्नमाला॥ पीतनकः ५ कपिचूडा ६ अम्बाटिकः ७ भ्रष्टफलः ८ रसाढ्यः ९ तनुत्वीरः १० कपिप्रियः ११ अम्बरातकः १२ अम्बरीयः १३ कपिचूडः १४। इति जटाधरः। तदम्लफलगुणाः। कषायत्वं। अम्लत्वं। वृष्यत्वं। तत्पक्वफलगुणाः। मधुराम्लत्वं। स्निग्धत्वं। पित्तकफनाशित्वञ्च। इति राजनिर्घण्टः॥ अपिच। दृष्टिबलविष्टम्भाजीर्णकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः॥ आम्रावर्त्तः। इति राजनिर्घण्टः॥ (यथा मार्कण्डेयपुराणे।

"आम्रानाम्रातकान् भव्यान्
नारिकेलान् सतिन्दुकान्"। इति।

अस्य पर्य्यायो गुणाश्च।

"आम्रातकः पीतनश्च मर्कटाम्रः कपीतनः॥
आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकृत्परम्।
पक्वन्तु तुवरं स्वादु रसे पाके हिमं स्मृतं॥
तर्पणं श्लेष्मलं स्निग्धं हृद्यं विष्टम्भि दृंहणं।
गुरु बल्यमरुत्पित्तक्षतदाहक्षयापहम्"॥
इति भावप्रकाशः॥
"आम्रातकफलं हृद्यं सस्नेहं श्लेष्मवर्द्धनं"।
इति सुश्रुतः॥)

आम्रावर्त्तः, पुं, (आम्रस्य आवर्त्तः।) आम्रशुष्करसः। तत्पर्य्यायः। आम्रातकः २। आमसत्व इति भाषा। अस्य गुणाः। दृष्ट्याश्रर्हिवातपित्तहरत्वम्। सारकत्वम्। रुचिकारित्वम्। सूर्य्यां-

-भुभिः पाकात् लघुत्वञ्च। "पक्वस्य सहकारस्य कटे विस्तारितो रसः। घर्म्मशुष्को मुञ्जदंत्त आम्रातक इति स्मृतः"॥ इति राजनिर्घण्टः॥ (यदुक्तम्।

"आम्रावर्त्तस्तृषाच्छर्दिवातपित्तहरः सरः। रुच्यः सूर्य्यांशुभिः पाकाल्लघुश्च स हि कीर्त्तितः"।)

आम्रेडितं, क्ली, (आड्+म्रेडि+क्तः।) द्विरुक्तम्। इत्यमरः॥ दुइ तिन् वार वला इति भाषा। (उन्मत्तेन यथा कथितस्य पुनः पुनः कथनं क्रियते एवं कथितस्य द्विस्त्रिवारकथनम्।)

आम्लवेतसः, पुं, (आम्लोऽम्लरसयुक्तो वेतसः।) अम्लवेतसवृक्षः। इति राजनिर्घण्टः॥ (अम्लवेतसशब्दोऽस्य विशेषो ज्ञेयः॥)

आम्ला, त्रि, (आ सम्यक् अम्ला अम्लरसयुक्ता।) तिन्तिड़ीवृक्षः। इति शब्दरत्नावली॥ श्रीवल्ली। इति राजनिर्घण्टः॥

आम्लिका, स्त्री, (आम्ला+कन्।) तिन्तिड़ीवृक्षः। इत्यमरटीकायां रायमुकुटः॥ अम्लोद्गारः। इति शब्दमाला॥ (यथा चरके।

"आम्लिकायाः फलं पक्वं तस्मादल्पान्तरं गुडैः"॥)

आम्लीका, स्त्री, (अम्ल+ठक्।) तिन्तिड़ीवृक्षः। इत्यमरटीका॥

आयः, पुं, (आङ्+या+ड।) धनागमः। प्राप्तिः। लाभः। (यथा मनुः। ८। ४१९।

"अहन्यहन्यवेक्षेत कर्म्मान्तान् वाहनानि च। आयव्ययौ च नियतावाकरान् कोषमेव च"॥)

स्त्रागारस्थकः। इति हलायुधः॥ (ज्योतिषप्रसिद्धमेकादशभवनम्।)

आयःशूलिकः, त्रि, (अयःशूलेन अर्थानन्विच्छति। अयःशूलदण्डाजिनाभ्यां ठकठञाविति ठक्।) तीक्ष्णकर्म्मा। क्षिप्रकारी। इति भूरिप्रयोगः॥ (यदुक्तम्।

"तीक्ष्णोपायेन योऽन्विच्छेत् आयःशूलिको जनः"।)

आयतः, त्रि,(आङ्+यम्+क्तः।) दीर्घः। इत्यमरः॥ लम्बा इति भाषा। (विस्तृतः। विशालः। आकृष्टः। यथा पद्मतन्त्रे।

"तन्तवोऽप्यायता नित्यं तन्तवो बहुलाः समाः"।)

आयतच्छदा, स्त्री, (आयताः च्छदा यस्याः सा।) कदलीवृक्षः। इति त्रिकाण्डशेषः॥

आयतनं,क्ली, (आङ्+यत+ल्युट्।) यज्ञस्थानं। देवस्थानं। तत्पर्य्यायः। चैत्यं २। इत्यमरः॥ यथा रामायणे,—

"येभ्यः प्रणमसे पुत्र! चैत्येष्वायतनेषु च"।

"समित्कुशपवित्राणि वेद्यश्चायतनानि च। स्त्यग्विलानि च विप्राणां शैला वृक्षा नदाः क्षुभाः"॥

आश्रयः, विश्रामस्थानं। यथा चाणक्यः।

"नासमीक्ष्य परं स्थानं पूर्व्वमायतनं त्यजेत्"॥

कुमारसम्भवे, ७। ५।

"स हरस्तदेकायतनं जगाम"।

भद्रासन भिटा इत्यादिस्थातो वास्तुदेशः। याज्ञवल्क्यः,— [आधिनिदानम्।)

"आरामायतनग्रामनिधानोद्यानवेश्मसु"।)

आयतिः, स्त्री,(आङ्+यम्+क्तिन्।) उत्तरकालः। भविष्यत्कालः।

(यथा मनुः, ७। १६६, ७। १७८।

"यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः। तदात्वे चाल्पिकां पीड़ां तदा सन्धिं समाश्रयेत्"।

"आयतिं सर्व्वकार्य्याणां तदात्वञ्च विचारयेत्"॥)

प्रभावः। कोषदण्डजं तेजः। इत्यमरः॥ दैर्घ्यं। सङ्गः। इति विश्वहेमचन्द्रौ॥ प्रापणं। इति धरणी॥ (राजतरङ्गिणी।

"प्रतापमायतिं शोभां हेमन्ताहस्य वारिदः। स्मृतिश्लेषां करोत्येव लोभश्च पृथिवीभुजां"॥)

आयत्तः, त्रि, (आङ्+यम्+क्तः।) अधीनः। वशीभूतः। इत्यमरः॥ (यथा पद्मतन्त्रे,—

"तत् भद्र! स्वयमायत्तो ह्यात्मा सर्व्वस्य"।)

आयत्तिः स्त्री,(आङ्+यत्+क्तिन्।) दिनं। स्नेहः। वशित्वं। सामर्थ्यं। सीमा। इति विश्वः हेमचन्द्रश्च॥ शयनं। दैर्घ्यं। प्रभावः। भविष्यत्कालः। इति धरणी॥ (न्यायपथावलम्बिता। अधीनता।)

आयल्लकं, क्ली, उत्कण्ठा। इति हेमचन्द्रः॥

आयसं, क्ली, (अयस्+अण्।) लौहं। इति भरतः राजनिर्घण्टश्च॥ अयोनिर्म्मितादौ, त्रि॥ (यथा महाभारते,—

"आयसं हृदयं मन्ये तस्य दुष्कृतकर्म्मणः"।

यथा मनुः, ८। २१५।

"शुल्कं चोभयतस्तीक्ष्णमायसं दण्डमेव वा"।

रघुवंशे, १७। ६३।

"स चकर्ष परस्मात् तदयस्कान्त इवायसम्"।

(अयोजनितार्थे यथा,—

"विपाके कटु शीतञ्च सर्व्वश्रेष्ठं तदायसम्"॥

इति वैद्यकचक्रपाणिसंग्रहे॥)

आयसी, स्त्री, (अयसा निर्म्मिता। अयस्+अण्+ङीप्।) लौहमयकवचः। तत्पर्य्यायः। अङ्गरक्षिणी २ जालिका ३ जालप्राया ४। इति हेमचन्द्रः॥

आयस्तः, त्रि, (आङ्+यस्+कर्त्तरि क्तः।) तेजितः। क्षिप्तः। क्षेपितः। कुपितः। हतः। इति मेदिनी॥ (प्रयत्नशीलः, कार्य्योत्सुकः, यत्नसिद्धः, कष्टसिद्धः।)

आयातं, त्रि, (आङ्+या+क्तः।) आगतं। यथा,

"हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः। आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते"॥

इति मार्कण्डेये देवीमाहात्म्यम्॥

आयानं, क्ली, (आङ्+या+ल्युट्।) स्वभावः। इति जटाधरः॥ आगमनं॥ (यथा महाभारते,—

"आयाने वासि विदितो रामस्य विदितात्मनः"।

आयामः,पुं, (आङ्+यम्+घञ्।) दैर्घ्यं। इत्यमरः॥ (यथा रामायणे,—

"योजनायतविस्तारमेकैको धरणीतलम्"।

मेघदूते, पूर्व्वमेघे। ५८।

"तेनोदीचीं दिशमनुसरेस्तिर्य्यगायामशोभी"।)

आयासः,पुं, (आङ्+यस्+घञ्।) श्रान्तिः। तत्पर्य्यायः। श्रमः २ क्लमः ३ क्लेशः ४ परिश्रमः ५ प्रयासः ६ व्यायामः ७। इति हेमचन्द्रः॥ (अतियत्नः। प्रयत्नः। यथा साहित्यदर्पणे,—

"स्त्यायासमनस्तापक्षुत्पिपासादिसम्भवा"।

महाभारते,—

"शोकहर्षौ तथायासः सर्व्वं स्नेहात् प्रवर्त्तते"।

रामायणे,—

"नैवायासं क्वचित् भद्रे प्राप्नुसे न च विप्रियं"।)

आयुः, पुं, क्ली, (एति इण् गतौ कुन्दसीण इत्युण्।) जीवितव्याप्यकालः। इति जटाधरः॥ (जीवनं, प्राणाः। यथा महाभारते,—

"अहं केशरिणः क्षेत्रे वायुना जगदायुना। जातः कमलपत्राक्षो हनूमान्नाम वानरः"।

स्वनामख्यातस्वन्नृवंशीयो राजा, स च नहुषस्य पिता। यथा महाभारते,—

"नहुषो नाम राजर्षिर्यस्तं ते ओत्रमागतः। तत्रैव पूर्व्वपूर्व्वेषामायेर्वंशधरः सुतः"।

पुरूरवसः पुत्रः स्वनामख्यातो राजा। यथा हरिवंशे,—

"बुधस्य तु महाराज विद्वान् पुत्रः पुरूरवाः"।

"तस्य पुत्रा बभूवुस्ते सप्त देवसुतोपमाः। दिवि ख्याता महात्मान आयुर्धीमानमावसुः"।

हृदस्य पुत्रः स्वनामख्यातोऽसुरः। यथा हरिवंशे,—

"हृदस्य पुत्रो ह्यायुर्वै शिविः कालस्तथैव च"।)

आयुः, [स्] क्ली, (एति गच्छतीति इण्+उसि+णिच्च।) जीवितकालः। परमायुः। इत्यमरः॥ तत्पर्य्यायः। विजीवितं २ नित्यगः ३ अनुबन्धः ४।

"पुरुषाः सर्व्वसिद्धाश्च चतुर्वर्षशतायुषः। कृते त्रेतादिकेऽप्येवं पादशो ह्रसति क्रमात्"॥

इति वैद्यकं॥

"अरोगाः सर्व्वसिद्धार्थाश्चतुर्व्वर्षशतायुषः। कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः"॥

इति मनुः १। १८३॥ हृतं। इति राजनिर्घण्टः॥

("नाभिस्थः प्राणपवनः स्पृष्ट्वा हृत्कमलान्तरं। कण्ठादहर्विनिर्याति पातुं विष्णुपदामृतं॥

पीत्वा चान्नरसीयूषं पुनरायाति वेगतः। प्रीणयन् देहमखिलं जीवयन् जठरानलम्॥

शरीरप्राणयोरेवं संयोगादायुरुच्यते"।

इति शार्ङ्गधरः॥

"शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितं। नित्यगश्चानुबन्धश्च पर्य्यायैरायुरुच्यते"॥ इति।

"वर्षशतं खल्वायुषः प्रमाणमस्मिन् काले। सन्ति पुनरधिकोनवर्षशतजीविनो मनुष्याः। तेषां विकृतिवर्জ্জैः प्रकृत्यादिबलविशेषैरायुषो लक्षणतश्च प्रमाणमुपलभ्य वयसस्त्रित्वं विभजेत"।

"तन्त्रेण तत्रायुरुक्तं स्वलक्षणतो यथावदिहैव तत्र शरीरमानसाभ्यां रोगाभ्यामनभिद्रुतस्य विशेषेण यौवनवतः समन्वागतबलवीर्य्यपौरुषपराक्रमस्य श्रोत्रविज्ञानेन्द्रियेन्द्रियार्थबलसमुदाये वर्त्तमानस्य परमर्द्धिरुचिरविविधोपभोगस्य समृद्धसर्व्वारम्भस्य यथेष्टविचारणात् सुखमायुरुच्यते"। इति च।

"असुखमतो विपर्य्ययेण हितैषिणः पुनर्भूतानामस्मादुपरतस्य सत्यवादिनः शमपरस्य परी-

आयु

च्यकारिणोऽप्रमत्तस्य चिवर्गं परस्परेणानुपहतमुपसेवमानस्य पूजार्हं सम्यूजकस्य ज्ञानविज्ञानोपशमशीलस्य दम्भोपसेविनः सुनियतरागरोगेर्ष्यामदमानवेगस्य सततं विविधप्रदानपरस्य तपोज्ञानप्रशमनित्यस्याध्यात्मविदस्तत्परस्य लोकमिमञ्चामुञ्चापेक्षमाणस्य स्मृतिमतो हितमायुरुच्यते"। इति च॥

"अहितमतो विपर्य्ययेण प्रमाणमायुषस्त्वर्थेन्द्रियमनोबुद्धिचेष्टादीनां विज्ञातिलक्षणैरुपलभ्यते अनिमित्तैरिदमस्मात् क्षणान्मुहूर्त्ताद्दिवसात्पक्षषण्मासाद्दश-सप्तदश-द्वादशाद्वात् पञ्चाभ्यासात् वर्षाभ्यासात् संवत्सराद्वा स्वभावमापत्स्यते इति। तच्च स्वभावः प्रकृतेरपरमो मरणमनित्यतानिरोधइत्येकोऽर्थः। इत्यायुषः प्रमाणमतो विपरीतमप्रमाणम्"। इति च॥

"वर्षशतं खल्वायुषः प्रमाणमस्मिन् काले तस्य निमित्तं प्रकृतिगुणात्मसम्पत् सात्म्योपसेवनञ्चेति"। इति च चरकः॥)

आयुक्तः, त्रि, (आङ्+युज्+क्तः।) कर्म्माध्यक्षः। तत्पर्य्यायः। नियोगी २ कर्म्मसचिवः ३ व्यापृतः४। इति हेमचन्द्रः॥

आयुधः, पुं, (आयुध्यतेऽनेनेति। आङ्+युध्+क।) अस्त्रं। इत्यमरः॥ (आयुधानां त्रयो भेदाः। प्रहरणानि, पाणिमुक्तानि, यन्त्रमुक्तानि चेति। तत्र प्रहरणानि खड्गादीनि, पाणिमुक्तानि चक्रादीनि, यन्त्रमुक्तानि शरादीनि। "हतायुधो यावदहं तावदन्यैः किमायुधैः"। "किं वक्ष्यत्यथमेवमद्य विमुखं मामुद्यतेऽप्यायुधे"। इति चोत्तरचरिते।)

आयुधधर्म्मिणी, स्त्री, (आयुधमेव धर्म्मो विद्यते यस्याः। आयुधधर्म्म+इन्+ङीप्।) जयन्तीवृक्षः। इति शब्दचन्द्रिका॥

आयुधागारं, क्ली, (आयुधानां आगारं। षष्ठीतत्।) अस्त्रगृहं। सेलाखाना इति ख्यातं। इति महाभारते राजधर्म्मः॥ तत्र नियुक्तस्य लक्षणं यथा,—

"शास्त्रज्ञातिततत्त्वज्ञः सततं प्रतिजाग्रता।
राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः"॥
इति मात्स्ये १९८ अध्यायः॥ (यथा मनुः८।२८०।

"कोष्ठागारायुधागारदेवतागारभेदकान्।
हस्त्यश्वरथहर्त्तृंश्च हन्यादेवाविचारयन्"॥)

आयुधिकः, पुं, (आयुधेन जीवति, आयुध+ठक्।) अस्त्रजीवी। तत्पर्य्यायः। शस्त्राजीवः २ कायदण्डिकः ३ आयुधीयः ४। इत्यमरः॥ (यथा महाभारते १९।७।३६।

"न पादरक्षैः संयुक्ताः नान्तरायुधिका ययुः"।

आयुधीयः, पुं, (आयुध+छ।) आयुधिकः। इत्यमरः॥ (योद्धा। यथा मनुः ७। २२२।

"अनङ्गृतञ्च सम्पश्येदायुधीयं पुनर्जनं"।

उत्तरचरिते ६। "तर्ज्जयन्ति विस्फुरितशस्त्राः कुमारमायुधीयश्रेणयः"।) [रत्नमाला॥

आयुर्घृतं, क्ली, (आयसो द्रव्यम्,) औषधं। इति

आयुर्व्वेदः, पुं, (आयुरनेन विन्दति वेत्ति वेद्यायुर्व्वेदः। आयस्+विद्+करणे घञ्।) अष्टादशविद्यान्तर्गतधन्वन्तरिप्रणीतविद्याविशेषः। वैद्यकशास्त्रं। चिकित्साशास्त्रं। तत्तु अथर्व्ववेदान्तर्गतं। यथा,

"विधातार्थर्व्वसर्व्वस्वमायुर्व्वेदं प्रकाशयन्।
स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुं"॥
इति भावप्रकाशः॥

चरणव्यूहमते ऋग्वेदस्योपवेदः आयुर्व्वेदः। अथर्व्ववेदस्य शस्त्रशास्त्राण्युपवेदः॥* अथायुर्व्वेदस्य विवरणम्।

"ऋग्यजुःसामाथर्व्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः।
विचिन्त्य तेषामर्थं चैवायुर्व्वेदं चकार सः॥
कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः।
स्वतन्त्रसंहितां तस्मात् भास्करश्च चकार सः॥
भास्करश्च स्वशिष्येभ्य आयुर्व्वेदं स्वसंहितां।
प्रददौ पाठयामास ते चक्रुः संहितास्ततः॥
तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च।
व्याधिप्रणाशबीजानि साध्वि मत्तो निशामय॥
धन्वन्तरिर्दिवोदासः काशीराजोऽश्विनीसुतौ।
नकुलः सहदेवोऽर्किश्यवनो जनको बुधः॥
जाबालो जाजलिः पैलः करथोऽगस्त्य एव च।
एते वेदाङ्गवेदज्ञाः षोड़श व्याधिनाशकाः॥
चिकित्सातत्त्वविज्ञानं नाम तन्त्रं मनोरमम्।
धन्वन्तरिश्च भगवान् चकार प्रथमे सति॥
चिकित्सादर्पणं नाम दिवोदासश्चकार सः।
चिकित्साकौमुदीं दिव्यां काशीराजश्चकार सः॥
चिकित्सासारतन्त्रञ्च भग्नञ्च चाश्विनीसुतौ।
तन्त्रं वैद्यकसर्व्वस्वं नकुलश्च चकार सः॥
चकार सहदेवश्च व्याधिसिन्धुविमर्दनं।
ज्ञानार्णवं महातन्त्रं यमराजश्चकार सः॥
अवनो जीवदानञ्च चकार भगवान्मुनिः।
चकार जनको योगी वैद्यसन्देहभञ्जनं॥
सर्व्वसारं चन्द्रसुतो जाबालस्तन्त्रसारकं।
वेदाङ्गसारं तन्त्रञ्च चकार जाजलिर्मुनिः॥
पैलो निदानं करथस्तन्त्रं सर्व्वधरं परं।
वैद्यनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः॥
चिकित्साशास्त्रबीजानि तन्त्राण्येतानि षोड़श।
व्याधिप्रणाशबीजानि बलाधानकराणि च॥
मथित्वा ज्ञानमथनैरायुर्व्वेदपयोनिधिं।
ततस्तन्त्राण्युज्जहरुर्नवनीतानि कोविदाः॥
एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहितां।
आयुर्व्वेदं सर्व्ववीजं सर्व्वं जानामि सुन्दरि॥
व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः॥
आयुर्व्वेदस्य विज्ञाता चिकित्सासु यथार्थवित्।
धर्म्मिष्ठश्च दयालुश्च तेन वैद्यः प्रकीर्त्तितः"॥
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः॥*॥
तस्य लक्षणम् यथा,—

"आयुर्हिताहितं व्याधिनिदानं शमनं तथा।
विद्यन्ते यत्र विद्वद्भिः स आयुर्व्वेद उच्यते"॥
तस्य निरुक्तिर्यथा,—

"अनेन पुरुषो यस्मात् आयुर्विन्दति वेत्ति च।
तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः"॥
इति भावप्रकाशः॥*॥ अन्यत् रोगशब्दे वेदशब्दे वैद्यशब्दे च द्रष्टव्यम्॥

("हिताहितं सुखं दुःखमायुस्तस्य हिताहितं।
मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते"॥
"तस्यायुषः पुण्यतमो वेदो वेदविदां मतः।
वक्ष्यते यन्मनुष्याणां लोकयोरुभयोर्हितः"॥
"किमायु कस्मादायुर्व्वेदः किञ्चायुर्व्वेदः शाश्वतोऽशाश्वत इति। कानि चास्याङ्गानि कैश्चायमध्येतव्यः किमर्थञ्चेति"।

"तत्र भिषजा एष्टेनैवञ्चतुर्णामृक्सामयजुरथर्व्ववेदानामात्मनोऽथर्व्ववेदे भक्तिरादेया वेदोक्ताथर्व्वणः स्वस्त्ययनबलिमङ्गलहोमनियमप्रायश्चित्तोपवासमन्त्रादिपरिग्रहाच्चिकित्सां प्राह चिकित्सा चायुषो हितायोपदिश्यते नेदमोपदिश्यायुर्वाच्यं तच्चायुश्चेतनाप्रवृत्तिर्जीवितमनुबन्धोधारि चेत्येकोऽर्थः, तदा आयुर्व्वेदयत्यायुर्व्वेदः कथमुच्यते खलक्षणतः सुखासुखतो हिताहिततः प्रमाणाप्रमाणतश्च यतश्चायुष्यानायुष्याणि द्रव्यगुणकर्म्माणि वेदयत्यतोऽप्यायुर्व्वेदः तच्चायुष्याणि अनायुष्याणि च द्रव्यगुणकर्म्माणि केवलेनोपदेक्ष्यन्ते"।

"तानिन्द्रः सहस्रदृगमरगुरुवरोऽब्रवीत् स्वागतं ब्रह्मविदां शान्ततपोधनानां ब्रह्मर्षीणामस्मि भवोग्लानिरप्रभावत्वं वैस्वर्य्यं वैवर्ण्यञ्च ग्राम्यवासक्षततमसुखमसुखानुबन्धं च। ग्राम्यो हि वासो मूलमधर्म्मस्तानां तत्कृतं पुण्यबद्धिरनुग्रहः प्रजानां स्वशरीरमरत्तिभिः कालश्चायमायुर्व्वेदोपदेशस्य ब्रह्मर्षीणामात्मनः प्रजानाञ्चानुग्रहार्थमायुर्व्वेदमश्विनौ मह्यं प्रयच्छतां प्रजापतिरश्विभ्यां। प्रजापतये ब्रह्मा प्रजानामल्पमायुर्व्वराव्याधिबहुलमसुखमसुखानुबन्धं अल्पतादल्पतपोदमनियमदानाध्ययनसञ्चयं मत्वा पुण्यतममायुःप्रकर्षकरं जराव्याधिप्रशमनं ऊर्ज्जस्करममृतं ऋषिं शरण्यमुदाक्तं भवन्तो मत्तः श्रोतुमर्हन्त्युपधारयितुं प्रकाशयितुञ्च प्रजानुग्रहार्थमार्षं ब्रह्म च मैत्रीं कारुण्यमात्मनश्चानुत्तमं पुण्यमुदारं ब्राह्मसत्त्वयं कर्म्मेति"। इति चरकः॥

"तानुवाच भगवान् स्वागतं वः। सर्व्वत्र वा मीमांसा अध्याप्याश्च भवन्तो वत्साः! इह खल्वायुर्व्वेदो नाम यदुपाङ्गमथर्व्ववेदस्यानुत्पाद्यैव प्रजाः श्लोकशतसहस्रमध्यायसहस्रञ्च कृतवान् स्वयम्भूः। ततोऽल्पायुष्ट्वमल्पमेधस्त्वञ्चावलोक्य नराणां भूयोऽल्पधा प्रणीतवान्॥ तद्यथा॥ शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति"॥

"वत्स! सुश्रुत! इह खल्वायुर्व्वेदप्रयोजनं व्याधुपशमनाय व्याधिपरिमोक्षः स्वस्थस्य रक्षणञ्च। आयुरस्मिन् विद्यतेऽनेन वा आयुर्विन्दतीत्यायुर्व्वेदः। तस्याङ्गवरमाद्यमागमप्रत्यक्षानुमानोपमानैरविरुद्धमुपधारय। एतद्ध्रुवं प्रथमं प्रागभिघातप्रशमसंरोहादयश्चास्थिरसन्धानाच्च"।

"तदिदं शाश्वतं पुण्यं स्वर्ग्यं यशस्यमायुष्यं वृत्तिकरञ्चेति"॥

आयु

आयु

"ब्रह्मा प्रोवाच ततः प्रजापतिरश्विनौ तस्मादस्विनावश्विभ्यामिन्द्र इन्द्रादहं मघा त्विह प्रदेयमर्षिभ्यः प्रजाहितहेतोः" ॥ इति सुश्रुतः ॥)

आयुर्व्वेदी, [न्] त्रि, (आयुर्व्वेदो ज्ञातव्यत्वेन विद्यते यस्य । आयुर्व्वेद + इनि ।) आयुर्व्वेदज्ञः । चिकित्सकः । वैद्यः । इति हेमचन्द्रः राजनिर्घण्टश्च ॥

आयुर्योगः, पुं, (आयुषो जीवितकालस्य योगो भवत्यस्मात् ।) औषधं । इति राजनिर्घण्टः ।

आयुष्मान्, [त्] त्रि, (आयुस् + मतुप् ।) चिरजीवी । दीर्घायुः । तत्पर्य्यायः । जैवातृकः २ । इत्यमरः ॥ (यथा मनुः, २ । १२५, ३ । २६३ ।

"आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने" । "आयुष्मन्तं सुतं सूते यशोमेधासमन्वितं" इतिच ॥)

आयुष्मान्, पुं, विष्कुम्भादिसप्तविंशतियोगान्तर्गतद्वितीययोगः । तत्र जातफलं । "यस्यायुष्मान् जन्मकाले धनुष्मान् याने यानं तस्य देशेषु कार्य्यं । कुर्य्यान्नूनं क्रीडनं पुष्पवाद्यां दासैर्व्वासैरन्वितो गर्व्वितश्च" ॥ इति दीपिका ॥

("आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि" इति सुश्रुतः ॥)

आयुष्यं, त्रि, (आयुष् + यत् ।) पथ्यं । इति राजनिर्घण्टः ॥ आयुर्हितकारकं ॥ (मनुः । ४ । १०६ ।

"धन्यं यशस्यमायुष्यं स्वर्ग्यं चातिथिपूजनं" ।

तत्रैव २ । ५१ ।

"आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखम्" ।

"आयुष्यं भोजनं जीर्णे वेगानाञ्चाविधारणं ।
ब्रह्मचर्य्यमहिंसा च साहसानाञ्च वर्ज्जनं" ॥
इति सुश्रुतः ॥

"आयुष्या दीपनी चैव चक्षुष्या व्रणशोधिनी" । इति हारीतः ।)

आयुष्यसूक्तं, क्ली, (आयुष्यञ्च तत्सूक्तञ्चेति । कर्म्मधारयः ।) नान्दीश्राद्धादौ वसुधारासम्पातनानन्तरपाठ्यो वैदिकमन्त्रविशेषः ।

सामगानां तन्मन्त्रो यथा,—

ॐ आयुर्विश्वायुर्विश्वं विश्वमायुरसिमहि । प्रजान्त्वरधिनिधेह्यस्मे घृतं जीवेम शरदो वयन्ते । आयुषे मे पवस्व वर्चसे मे पवस्व विदुः एथिव्या दिवो जनित्रा ग्रहणन्त्वापोधःक्षरन्ती सोमो ह्रोदाय ममायुषे मम ब्रह्मवर्चसाय यजमानस्यार्द्धा अमुष्य राय्याय । अमुष्य स्थाने यदर्थं श्रद्धित्तस्य षष्ठ्यन्तनाम प्रयोज्यं । इति रघुनन्दनभट्टाचार्य्यधृतश्राद्धप्रयोगतत्त्वं ॥ * ॥

यजुर्व्वेदी तन्मन्त्रो यथा,—

ॐ आयुष्यं वर्चस्यं रायष्योषमौद्भिदं इदं हिरण्यं वर्चस्व जेत्रायाविक्षतादुमां । न तदक्षाँसि न पिशाचास्तरन्ति वेदानामोजः प्रथमजाँ ह्येतत् । यो बिभर्त्ति दाक्षायणाँ हिरण्याँ सहदेवेषु क्रुणुते दीर्घमायुः समनुष्येषु क्रुणुते दीर्घमायुः । यदा बध्नान्दाक्षायणाँ हिरण्याँ शतानीकाय सुमनस्यमानाः । तन्न आवधामि शतसारदाय युष्माञ्जरदष्टियथासं" । इति तत्कृतयजुर्व्वेदीयश्राद्धप्रयोगतत्त्वं ॥

आयुस्करः, त्रि, (आयुस् + कृ + क ।) परमायुर्जनकः ॥ (आयुर्वृद्धिजनकः ;

"सहामलकमुक्तिभिर्दधिसरेण तैलेन वा
गुडेन पयसा घृतेन यवगक्तुभिर्वा सह ।
तिलेन सहमाक्षिकेण पललेन सूपेन वा
वपुस्करमरस्करं परममेध्यमायुस्करं" ॥
इति वाभटः ॥)

आयोगः, पुं, (आङ् + युज् + घञ् ।) गन्धमाल्योपहारः । व्यापारः । रोधः । इति हेमचन्द्रः ॥ (यथा रामायणे,—

"सरलैः कर्णिकारैश्च किंशुकैश्च सपुष्पितैः ।
स देशो भ्रमरायोगः प्रदीप्त इव लक्ष्यते" ॥)

आयोगवः, पुं, (अयोगव एव स्वार्थे अण् ।) शूद्रादैश्यायां जातो जातिविशेषः । इति हेमचन्द्रः ॥ तस्य कर्म्म काष्ठतक्षणं । (यथा मनुः १० । १२, १० । १६ ।

"शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणां ।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः" ॥
"आयोगवोऽयं क्षत्ता च चाण्डालश्चाधमो नृणां ।
प्रतिलोमेन जायन्ते शूद्रादपसदास्त्रयः" ॥)

आयोजनं, क्ली, (आङ् + युज् + ल्युट् ।) उद्योगः । आहरणं । व्यवसादनं । यथा,—

"कुत्रचित् तण्डुलाः सन्ति क्व च स्थाली क्व चेन्धनं ।
तेषामायोजनं कुर्व्वन् मुख्यः कर्त्ताभिधीयते" ॥
इति गोयीचन्द्रधृतकारिका ॥

आयोधनं, क्ली, (आङ् + युध + ल्युट् ।) युद्धं । वधः । इति मेदिनी ॥ (रघुवंशे, ६ । ४२ ।

"आयोधने क्षणगतिं सहाय-
मवाप्य यः क्षत्रियकालरात्रिं" ।

भट्टिः, "आयोधने स्यायुकमस्त्रजातम्" । रघुः, ५ । ७१ । "आयोधनाग्रसरतां त्वयि वीर ! याते ।)

आरं, क्ली, (आङ् + ऋ + भावे घञ् ।) मुण्डायसं । मुण्डलोहं । इति राजनिर्घण्टः ॥ पित्तलं । इत्यमरटीका ॥ कोणः । प्रान्तभागः । इत्यानन्दलहरीटीका ॥ (चक्राङ्गकाष्ठभेदः । यथा महाभारते,

"आरान्तरेणावपतत् संक्षिप्याङ्गं क्षणेन ह" ।
"यस्त्रिषष्टिशतारण्यं वेदार्थं स परः कविः" ॥)

आरः, पुं, (आङ् + ऋ + कर्त्तरि संज्ञायां घञ् ।) मङ्गलग्रहः । अग्निः । पित्तलं । इति हेमचन्द्रः ॥ वृक्षभेदः । तत्पर्य्यायः । मधुरास्रफलः २ । इति रत्नमाला ॥ देशज इति ख्यातः ॥

आरकूटः, पुं क्ली, (आरं कूटयति स्तूपीकरोति पचाद्यच् ।) पित्तलं । इत्यमरः ॥ (यथा नैषधे ।

"अकाक्षने काक्षननायिकाङ्के किमारकूटाभरणेन न स्त्रियः" ।)

आरक्तं, त्रि, (आरक्तवतीति । आङ् + रञ्ज + अच् ।) रक्तायुक्तं । इति शब्दरत्नावली ॥ रक्तगौरं । इति विश्वः ॥

आरक्तः, पुं, (आङ + रञ्ज + अच् ।) गजकुम्भसन्धिः । इति चिकाण्डशेषः ॥

आरग्वधः, पुं, (आ + रगे शब्दायां क्विप् । आरगं रोगशब्दामपि हन्ति अच् बधादेशश्च ।) वृक्षविशेषः, सोनालु सोंदालि इति ख्यातः । तत्पर्य्यायः । राजवृक्षः २ सम्याकः ३ चतुरङ्गुलः ४ आरेवतः ५ व्याधिघातः ६ कृतमालः ७ सुवर्णकः ८ । इत्यमरः ॥ मध्यानः ९ रोचनः १० दीर्घफलः ११ नृपद्रुमः १२ हिमपुष्पः १३ राजतरुः १४ कण्डुघ्नः १५ ज्वरान्तकः १६ अरुजः १७ स्वर्णपुष्पः १८ स्वर्णद्रुः १९ कुष्ठसूदनः २० कर्णाभरणकः २१ महाराजद्रुमः २२ कर्णिकारः २३ स्वर्णाङ्गः २४ । इति राजनिर्घण्टः ॥ प्रग्रहः २५ । इति रत्नमाला ॥ अस्य गुणाः । अतिमधुरत्वं । शीतलत्वं । शूलज्वरकण्डुकुष्ठमेहकफविषमनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । ज्वरहृद्रोगवातरक्तोदावर्त्तरोगे अतिप्रशस्यत्वं । मृदुत्वञ्च । अस्य फलगुणाः । मधुरत्वं । शुक्रकारित्वं । वातपित्तहारित्वञ्च । इति राजवल्लभः ॥ आमलतास इति हिन्दीभाषा ।

"आरग्वधो राजवृक्षः सम्याकश्चतुरङ्गुलः ।
आरेवतव्याधिघातकृतमालसुवर्णकाः ॥
कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः ।
आरग्वधो गुरुः स्वादुः शीतलः श्लेष्मनोत्तमः ॥
ज्वरहृद्रोगपित्तास्रवातोदावर्त्तशूलनुत् ।
तत्फलं श्लेष्मलं रुच्यं कुष्ठपित्तकफापहं ॥
ज्वरे तु सततं पथ्यं कोष्ठशुद्धिकरं नरे" ।
इति भावप्रकाशः ॥
(व्यवहारो यथा,—
"बाले वृद्धे क्षते क्षीणे सुकुमारे च मानवे ।
योज्योमृदुबलापित्तादिशेषाच्चतुरङ्गुलः" । * ॥
ग्रहणप्रणाली यथा ॥ * ॥
"फलकाले फलन्तस्य ग्राह्यं परिणतञ्च यत् ।
तेषां गुणवतां भारं सिकतासु निधापयेत् ॥
सप्तरात्रात् समुद्धृत्य शोषयेदातपे भिषक् ।
ततो मज्जानमुद्धृत्य शुचौ भाण्डे निधापयेत्" । * ॥
संयोगविशेषे गुणा यथा ॥ * ॥
"दाक्षारसयुतो देयो दाक्षोदावर्त्तपीड़िते ।
चतुर्व्वर्षसुखं बाले यावद्दादग्रवार्षिके । * ॥
चतुरङ्गुलमज्जक्तु प्रस्थं वायवाङ्गुलिं ।
सुरामण्डेन संयुक्तमथवा कोलसीधुना ॥
दधिमण्डेन वा युक्तं रसेनामलकस्य वा ।
क्षौद्रेण शीतकषायं तं पिबेत् सौवीरकेण वा" ॥
इति चरकः ॥)

आरट्टः, पुं, (आङ् + रट् + टच् ।) देशविशेषः । चिकाण्डशेषे क्षत्रियवर्गे आरट्टशब्ददर्शनात् ॥ तत्र आरट्टोऽपि पाठः ॥ (यथा भारते,—

"पञ्चनद्यो वहन्त्येता यत्र पीलुवनान्युत ।
शतद्रुश्च विपाशा च तृतीयैरावती तथा ॥
चन्द्रभागा वितस्ता च सिन्धुषष्ठा वहिर्गिरेः ।
आरट्टा नाम ते देशा गणधर्म्मा न तान् व्रजेत्" ॥
"पञ्च नद्यो वहन्त्येता यत्र निःसृत्य पर्व्वतात् ।
आरट्टा नाम वाह्लीका न तेष्वार्य्यो दृष्टं वसेत्" ।)

आरट्टजः, पुं, (आरट्टदेशे जायते आरट्ट + जन + डः ।) आरट्टदेशोद्भवघोटकः । इति जटाधरः ।

त्रिकाण्डशेषभूरिप्रयोगौ च। (आरट्टदेशोत्पन्ने, त्रि। यथा महाभारते,—
"सीधोः पानं गुरुतल्पावमर्दो
भ्रूणहत्या परवित्तापहारः।
येषां धर्म्मस्तान् प्रति नास्त्यधर्म्म-
आरट्टजान् पश्चनदान् धिगस्तु"॥)

आरटिः, पुं, (आङ्+ऋ+अटिच्।) आवर्त्तः। तत्पर्य्यायः। कुलहडकः २। इति हारावली। पाकमारा जल इत्यादि भाषा॥

आरण्यपशुः, पुं, (अरण्ये भवः। अरण्य+यञ्+स चासौ पशुश्चेति कर्म्मधारयः।) अरण्यजातपशुः। स च सप्तधा यथा। महिषः १ वानरः २ ऋक्षः ३ सरीसृपः ४ वराहः ५ एणतः ६ मृगः ७। इति तिथ्यादितत्त्वे पैठीनसिः॥

आरण्यमुद्गा, स्त्री,(अरण्यमुद्गस्येवाकारः पर्व्वे यस्याः। ततः स्वार्थे अण्।) मुद्गपर्णी। मुगानी इति भाषा। इति राजनिर्घण्टः॥

आरण्यराजिः, पुं, (अरण्ये भवः आरण्यः अत्र सिंह एव स एव राजिः।) सिंहराजिः। मकरप्रभार्क्षः। मीनमेषवृषराशयः। इति दीपिका॥

आरतिः, स्त्री, (आङ्+रम्+क्तिन्।) विरतिः। निवृत्तिः। इत्यमरः॥ (उपरमः, नीराजनम्।)

आरनालं, क्ली, (आर्च्छति आङ्+ऋ+अच् आरः। नल गन्धे ज्वलतीति णः नालः। आरः नालो गन्धो यस्य।) काञ्जिकं। इति हेमचन्द्रः॥
"आरनालन्तु गोधूमैरामैः स्यान्निस्तुषीकृतैः।
पक्वैर्व्वा सन्धितैस्तत्तु सौवीरसदृशं गुणैः"॥
इति राजनिर्घण्टः॥
("काञ्चा हरिद्रा मल्लिका कल्कैस्तैलं विपाचयेत्। वङ्गगुणेनारनालेन दाहशीतज्वरापहं"॥*॥
काञ्चादितैले॥*॥ इति वैद्यकचक्रपाणिसंग्रहः॥)

आरनालकं, क्ली, (आरनालम् एव स्वार्थे कः।) काञ्जिकं। इत्यमरः॥ कांजि इति भाषा।

आरब्धं, त्रि, (आङ्+रभ्+क्तः।) कृतारम्भं। आरम्भे क्ली। यथा,—
"आरब्धं मलमासात् प्राक् यत् कर्म्म न समापितं।
आगते मलमासेऽपि तत् समाप्यं न संशयः"॥
इति मलमासतत्त्वं॥*॥ आरब्धकर्म्मण्यशौचाभावो यथा,—
"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकं"॥
इति तिथ्यादितत्त्वं॥

आरम्भः, पुं, (आङ्+रभि+घञ्।) प्रथमकृतिः। तत्पर्य्यायः। प्रक्रमः १ उपक्रमः २ अभ्यादानं ३ उद्घातः ४ आरम्भः ५। इत्यमरः॥ अभ्यादानादित्रयमारम्भमात्रे। प्रक्रमादिपञ्च आरम्भमात्रे इत्येके। केचित्तु प्रक्रमादित्रयं प्रथमारम्भे। अभ्यादानादित्रयं आरम्भमात्रे। इति बहुभिरुक्तमपि न साधु यतः प्रथमकृतिरेव आरम्भः तत्पूर्व्वत्रयं आरम्भे श्रेयस्त्रयं आरब्धे इत्याढ्यः। इति भरतः॥ त्वरा। उद्यमः। वधः। दर्पः। इति मेदिनी॥ प्रस्तावना। इति त्रिकाण्डशेषः॥ आद्यकृतिः। यथा,—
"मीनादिस्थो रविर्यैर्यामारम्भप्रथमत्वके।
भवेत्तेऽब्दे चान्द्रमासास्तैस्त्रया द्वादश स्मृताः"॥
आरम्भप्रथमत्वके आद्यकृत्यादयसमये। इति मलमासतत्त्वम्॥ पारिभाषिकारम्भो यथा,—
"आरम्भो वरणं यज्ञे सङ्कल्पो व्रतजापयोः।
नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया"॥
इति तिथ्यादितत्त्वम्॥ (यथा मेघदूते। ३७।—
"इत्यारम्भे हर पशुपतेरर्द्धनागाजिनेच्छाम्"।
साहित्यदर्पणे। प्रमथपरिच्छेदे।
"ग्रन्थारम्भे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामः"। रघुवंशे। १।१५।
"आगमैः सदृशारम्भ आरम्भसदृशोदयः"।)

आरवः, पुं, (आङ्+रु+अच्।) शब्दः। इत्यमरः॥ (यथा रामायणे। "वानराणामुदारवं"।)

आरवी, स्त्री, आरवनामकम्लेच्छदेशीयभाषा। यथा,
"श्लेषाश्लेषा मघा पूर्व्वा रेवती भरणीदये"।
विशाखार्द्रोत्तराषाढ़शतभे पापवासरे॥
लग्ने स्थिरे सचन्द्रे च पारसीमारवीं पठेत्";
इति गणपतिमुहूर्त्तः॥

आरा, स्त्री, (आङ्+ऋ+अच्+टाप्।) चर्म्मभेदकास्त्रं। तत्पर्य्यायः। चर्म्मप्रभेदिका २। इत्यमरः॥
"उद्यम्याराममयकायोत्थितस्य"। इति माघः।)

आराग्रं, क्ली, (आरायाः अग्रं षष्ठीतत्।) अर्द्धचन्द्राद्यस्त्रमुखं।
"अर्द्धचन्द्रखुरप्रादिधाराग्रं सुखमुच्यते"।
"आराग्रन्तु मुखन्तेषां पुष्पपत्रादिभेदतः"॥ इति हलायुधः॥

आरात्, व्य, (आ राति। रा दाने बाहुलकादातिप्रत्ययः।) दूरं। निकटः। इत्यमरः॥
(यथा, उत्तरचरिते।
"मेघमालेव यस्यायमारादपि विभाव्यते"। इति
"तमर्थमारादभिवर्त्तमानम्"। इति रघौ २।१०।

आरातिः, पुं, (आङ्+रा+क्तिन्।) अरातिः। शत्रुः। इति भरतः दिरूपकोषश्च॥

आरात्रिकं, क्ली, (आङ्+रात्रि+कन्।) नीराजननिमित्तदीपः। नीराजना। नीराजनयात्रश्च। आरति इति भाषा। तथाच हरिभक्तिविलासे।
"ततश्च मूलमन्त्रेण दत्त्वा पुष्पाञ्जलित्रयं।
महानीराजनं कुर्य्यात् महावाद्यजयस्वनैः॥
प्रज्वालयेत्तदर्थञ्च कर्पूरेण घृतेन वा।
आरात्रिकं शुभे पात्रे विषमानेकवर्त्तिकं"॥
अन्यच्च।
"आदौ चतुष्पादतले च विष्णो-
र्द्वौ नाभिदेशे मुखमण्डलेकं।
सर्व्वेषु चाङ्गेष्वपि सप्तवारा-
नारात्रिकं भक्तजनस्तु कुर्य्यात्"॥

आराधनं, क्ली, (आङ्+राध्+ल्युट्।) साधनं। प्राप्तिः। तोषणं। इत्यमरः॥ पचनं। इति मेदिनी॥ (यथा वैराग्यशतके हरिणादूषणे ५।
'मन्त्राराधनतत्परेण मनसा नीताः प्रशमाने निशाः'।
उत्तरचरिते। प्रथमाङ्के।
"स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा"।
कुमारसम्भवे १। ५९।
"आराधनायास्य सखीसमेतां
समादिदेश प्रयतां तनूजाम्"।)

आराधना, स्त्री, (आङ्+राध्+णिच्+युच्+स्त्रीत्वात् टाप्।) साधना। तत्पर्य्यायः। सेवा २ भक्तिः ३ परिचर्य्या ४ प्रसादना ५ शुश्रूषा ६ उपासना ७ वरिवस्या ८ परिष्टिः ९ उपचारः १०। इति हेमचन्द्रः॥

आरामः, पुं, (आरम्यतेऽत्र, आङ्+रम्+आधारे घञ्।) उपवनं। इत्यमरः॥ बागान् इति भाषा। (यथा, मनुः,—८। २९२। ८। २९४।
"क्षेत्रकूपतड़ागानामारामस्य गृहस्य च"।
"गृहं तड़ागमारामं क्षेत्रं वा भीषया हरन्"॥)

आरामशीतला, स्त्री,(आरामत्वात् शीतला स्वित्रधा।) सुगन्धिपत्रिविशेषः। वन्यर्य्यादिवर्गे लिखिता। तत्पर्य्यायः। आनन्दी २ शीतला ३ सुगन्धिनी ४ रामा ५ महानन्दा ६ गन्धाढ्या ७ रामशीतला ८। अस्या गुणाः। तिक्तत्वं। शीतलत्वं। पित्तहारित्वं। दाहशोथप्रशमनत्वं। विस्फोटव्रणरोपणत्वञ्च। इति राजनिर्घण्टः॥ (यथा वैद्यके।
"आरामशीतला तिक्ता शीतला पित्तहारिणी"।)

आरालिकः, त्रि, (आरालं कुटिलं चरति इति ठक्।) सूपकारः। पाचकः। इत्यमरः॥

आरावः, पुं, (आङ्+रु+घञ्।) शब्दः। इत्यमरः॥ (यथा महाभारते।
"आरावं माटवर्गस्य भृगूणां क्षत्रियैर्वधे"।
"आरावः सुमहांश्चासीत्"।)

आरुः, पुं, (ऋच्छति अर्यते वा। ऋ+ऊ+णिच्।) पिङ्गलवर्णः। तद्युक्ते त्रि। इत्युणादिकोषः॥

आरूकं, क्ली, (आरू+कन्।) हिमाचले प्रसिद्धौषधीविशेषः। आड़ इति भाषा। तत्पर्य्यायः। वीरसेनं २ वीरं ३ वीरारुकं ४। तत्रत्रयाणामादिभेदतः चतुर्जातिः। तेषां गुणाः। मधुरत्वं। हिमत्वं। वर्णःप्रमेहगुल्मास्रदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ (यथा चरके।
"अस्रं पयस्यकं द्राक्षा वदर्य्याश्चारुकाणि च"॥)

आरूढः, त्रि, (आङ्+रुह्+कर्त्तरि क्तः।) कृतारोहणः। वृक्षादिर उपर चड़ा व्यक्ति इति भाषा। यथा,—
"राम रामेति रामेति क्रूजन्तं मधुराक्षरं।
आरूढ़कविताशाखं वन्दे वाल्मीकिकोकिलं"॥
इति रामायणपाठस्य पूर्व्वभागश्लोकः॥
(यथा स्मृतिः।
"आरूढ़ो नैष्ठिकं धर्म्मं यस्तु प्रच्यवते पुनः।
प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा"॥
गीता।
"योगारूढ़स्य तस्यैव शमः कारणमुच्यते"।)

आरो

आरेवतं, क्ली, (आरेवयति निस्तारयति मलं सारकत्वात्। रेङ् शब्दगतौ। णिच्+विच्॥ अतति। अत+अच्। तत आरेव् चासौ अतश्चेति।) पारावतवृक्षफलं। इति राजनिर्घण्टः॥
("मूलकं शुष्कमाभाष्य वर्षाभूः पञ्चमूलकं। आरेवतपलाशांशु पक्वा तेन घृतं पचेत्"॥ इति सुश्रुतः वैद्यकचक्रपाणिसंग्रहश्च॥)

आरेवतः, पुं, (आरेवयति रेचयति मलं सारकत्वात् आङ्+रेव्+णिच्+विच्+अतच्।) आरग्वधवृक्षः। इत्यमरः॥

आरोग्यं, क्ली, (अरोगस्य भावः। ष्यञ्।) व्याधभावः। तत्पर्य्यायः। अगामयं २। इत्यमरः॥ पाटवं ३ साधवं ४ वार्त्तं ५। इति राजनिर्घण्टः॥ ("आरोग्यं तत् सुखावहं"। इति शार्ङ्गधरः॥
"धर्म्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्"।
"सुखसंज्ञकमारोग्यम्,"
"वेदाध्ययनशब्दाश्च सुखो वायुः प्रदक्षिणः।
पथि वेश्मप्रवेशे तु विद्यादारोग्यलक्षणम्॥"
इति चरकः॥
"सुखमात्रं समासेन सदृत्तस्यैतदीरितं।
आरोग्यमायुरर्थो वा नासद्भिः प्राप्यते नृभिः"॥
इति सुश्रुतः॥)

आरोग्यशाला, स्त्री, (आरोग्यार्थी शाला। मध्यपदलोपिकर्म्मधारयः।) आरोग्यदानयोग्यं। चिकित्सालयः। यथा,—
"धर्म्मार्थकाममोक्षाणामारोग्यं साधनं यतः।
अतस्त्वारोग्यदाता च नरो भवति सर्व्वदः॥
आरोग्यशालां कुर्व्वीत महौषधपरिच्छदां।
विदग्धवैद्यसंयुक्तां वह्निरसंयुतां॥
वैद्यस्तु शास्त्रवित् प्राज्ञो दृष्टौषधपराक्रमः।
ओषधीमूलतत्त्वज्ञः समुद्भरणकालवित्॥
बलवीर्य्यविपाकज्ञः शालिमांसौषधीगणे।
त्यागिवद्देहिनां तद्वदनुकूलः प्रियंवदः"॥
इति वैद्यकं॥

आरोपः, पुं, (आङ्+रुह्+णिच्+घञ्।) मिथ्याज्ञानं। यथा। "असर्पभूते रज्जौ सर्पारोपवत् वस्तुन्यवस्त्वारोपः अध्यारोपः"। इति वेदान्तसारः॥ मिथ्याविष्करणं। यथा। "असूया तु दोषारोपो गुणेष्वपि"। इत्यमरः॥
(यथा साहित्यदर्पणे। १०म परिच्छेदे।
"आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा"।
"रूपितं रोपितारोपो विषये निरपह्नवे"॥
"यत्र कस्यचिदारोपः परारोपणकारणम्"।)

आरोपणं, क्ली, (आङ्+रुह्+णिच्+ल्युट्।) न्यासः। संस्थापनं। (शस्त्रादीनां रोपणं। शरासनादौ ज्याद्दीनां संयोजनं, उन्मनं, समुत्थापनं, यथा साहित्यदर्पणे। १०म परिच्छेदे।
"यत्र कस्यचिदारोपः परारोपणकारणम्"।
रामायणे। आदिकाण्डे।
"यद्यस्य धनुषो रामः कुर्य्यादारोपणं मुने"।)

आरोपितं, त्रि, (आङ्+रुह्+णिच्+क्तः।) कृतारोपणं। निहितं। न्यस्तं। इति हलायुधः॥

आर्त्तः

कल्पितं॥ (यथा कुमारसम्भवे ३। ३५।
"तं देशमारोपितपुष्पचापे"। काव्यप्रकाशे।
"समस्तवस्तुविषयं श्रौता आरोपिता यदा"।)

आरोहः, पुं, (आङ्+रुह्+घञ्।) दैर्घ्यं। वरस्त्रियाः श्रोणिः। इत्यमरः॥ (यथा माघे "आरोहैर्निविडैरहन्नितम्बबिम्बैः"।) अवरोहः। आरोहणं। गजारोहः। समुच्छ्रयः। इति मेदिनी॥ ("आरोहमिव रत्नानां प्रतिष्ठानमिव श्रियः"। इति रामायणे।) परिमाणविशेषः। नितम्बः। इति हेमचन्द्रः॥ (आरोहति यः। आङ्+रुह्+अच्। निषादी। यथा, हरिवंशे,—
"अश्वाश्च पर्य्यधावन्त हतारोहा दिशो दश"।)

आरोहकः, त्रि, (आङ्+रुह्+ण्वुल्।) आरोहणकर्त्ता॥

आरोहणं, क्ली, (आरुह्यतेऽनेन। आङ्+रुह्+ल्युट्।) सोपानं। सिढ़ि इति भाषा। (भावे ल्युट्।) समारोहः। नीचादूर्द्ध्वगमनमिति यावत्। (यथा कुमारसम्भवे १। ३९।
"आरोहणार्थं नवयौवनेन
कामस्य सोपानमिव प्रयुक्तम्"।)
प्ररोहणं। अङ्कुरादिजननमिति यावत्। इति मेदिनी॥

आर्किः, पुं, (अर्कस्यापत्यं। अर्क+इञ्।) अर्कपुत्रः। शनैश्चरः। इति ज्योतिःशास्त्रं॥ (वैवस्वतमनुः, सुग्रीवः, कर्णश्च।)

आर्गलः, पुं क्ली, (अर्गल एव स्वार्थे अण्।) अर्गलः। इति द्विरूपकोषः॥ खिल इति भाषा।

आर्ग्वधः, पुं, आरग्वधवृक्षः। इति शब्दचन्द्रिका॥ ("आरग्वधशब्देऽस्य गुणादयो ज्ञातव्याः"।)

आर्घा, स्त्री, (आङ्+अर्घ्+अच्।) पीता दीर्घतुण्डा षट्पदसन्निभा मक्षिका। इति राजनिर्घण्टः॥

आर्घ्यं, क्ली, (आर्घ्या मक्षिकया विहितम्। आर्घा+यत्।) आर्घानाममक्षिकोत्पन्नमधु। तस्य गुणाः। अतिशुक्रचक्षुर्हितकारित्वं। कफपित्तास्रदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ (यदुक्तं,—
"मधूकवृक्षनिर्य्यासं जरत्कार्व्वाश्रमोद्भवाः।
सवन्त्यार्घ्यं तदाख्यातं श्वेतकं मालवे पुनः।
तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः।
आर्घास्तासूद्भवं यत् तदार्घ्यमित्यपरे जगुः"॥
यथा सुश्रुते,—
"आर्घ्यं मधुरतिचक्षुष्यं कफपित्तहरं परं।
कषायं कटु पाके च बल्यं तिक्तमवातलम्"॥
इदं हि अष्टविधमधुजातिमध्ये परिगणितम्।
"पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च।
आर्घ्यमौद्दालिकं दालमित्यष्टौ मधुजातयः"॥)

आर्त्तः, त्रि, (आङ्+ऋ+क्तः।) पीड़ितः। अशुद्धः। यथा,—
"आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः"॥
इति प्रायश्चित्ततत्त्वं॥ (दुःखितः, कातरः, शोकाभिभूतः, उद्वेजितः, विरक्तः, अपकृतः, उत्पीड़ितः। यथा शाकुन्तले, प्रथमाङ्के।

आर्त्तिः

"आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि"।
"देव्योऽपि सम्मतः शिष्टस्तस्मार्त्तस्य यथौषधम्"।
इति रघौ। १। २८। (तथा च चरके॥
"नास्त्यनार्त्तः भेषजेनोपपादयेत्"। इति॥

आर्त्तगलः, पुं, (आर्त्त इव गलति पचाद्यच्।) नीलझिण्टी। तत्पर्य्यायः। बाणः २ बाणा ३ दासी ४ आर्त्तगलः ५। इत्यमरटीकायां भरतः॥
("दासे आर्त्तगलश्च सः"। इति भावप्रकाशः॥)

आर्त्तवं, क्ली, (ऋतुरस्य प्राप्तः, अण् यद्वा ऋतुरेव। प्रज्ञादिभ्यश्चेत्यण्।) स्त्रीरजः। इत्यमरः॥ पुष्पं। इति मेदिनी॥ (यथा मनुः, ३। ४८।
"तस्मात् युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियं"।
"नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने"॥
अथार्त्तवस्य स्वरूपमाह।
स्त्रीणां रस एव मासेनार्त्तवं भवतीत्युक्ता पुनराह सुश्रुत एव।
"मासेनोपचितं काले धमनीभ्यस्तदार्त्तवं।
ईषदिवर्णकृष्णञ्च वायुर्योनिमुखं नयेत्"॥
गर्भग्रहणयोग्यस्यार्त्तवस्य लक्षणमाह।
"शुक्लारक्तप्रतिमं यच्च यदा लाक्षारसोपमं।
तदार्त्तवं प्रशंसन्ति यदासो न विरज्यते"॥
आर्त्तवस्य वर्णभेदयाभिधानं। वातादिप्रकृतिभेदेन वर्णभेदात्। यदासो न विरज्यते। यदासो लग्नं प्रक्षालितं तदासस्यजति न तु विकृततरकं कुर्य्यात्"।
इति भावप्रकाशः॥
"मासान्निष्पिच्छदाहार्त्ति पक्षराच्चानुबन्धि च।
नैवातिबहुलाल्पमार्त्तवं शुद्धमादिशेत्॥
शुक्लाम्बुलसवर्णञ्च पद्मालक्तकसन्निभं।
इन्द्रगोपकसङ्काशमार्त्तवं शुद्धमेव तत्"॥
इति चरकः,—
"शुक्लारक्तप्रतिमं यत्तु यदा लाक्षारसोपमं।
तदार्त्तवं प्रशंसन्ति यदासो न विरज्यते॥
विधिमुत्तरवक्ष्यन्तं कुर्य्यादार्त्तवशुद्धये॥
स्त्रीणां स्नेहादियुक्तानां चतस्रश्चार्त्तवादिषु।
कुर्य्यात् कल्कान् पिचुंश्चापि पथ्यान्याचमनानि च॥
यद्यिभूते पिबेत् पाठां भूषणं वृक्तकाणि च।
दुर्गन्धे पूयसङ्काशे मज्जातुल्ये तथार्त्तवे॥
पिबेद्वृक्षस्य यः क्षारः क्षन्दनक्षारमेव च"।
"आर्त्तवं श्रोणितन्त्वाग्नेयमग्नीषोमीयत्वाद्गर्भस्य पाञ्चभौतिकत्वापरजीवरक्तमाडराचार्य्याः"॥
"एवं मासेन रसः शुक्रीभवति स्त्रीणामार्त्तवमिति"। इति सुश्रुतः॥)

आर्त्तवः त्रि, (ऋतुः प्राप्तोऽस्य। अण्।) ऋतूद्भवः। इति मेदिनीकरहेमचन्द्रौ॥ यथा रामायणे,—
"आर्त्तवान्युपभुञ्जाना पुष्पाणि च फलानि च"।
रघौ ८। ३९।
"अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम्"।)

आर्त्तवी, स्त्री, वाजिनी। घोटकी। इति राजनिर्घण्टः॥

आर्त्तिः, स्त्री, (आङ्+ऋ+क्तिन्।) पीड़ा। धनुष्कोटिः। इत्यमरटीकायां भरतः॥ रोगः। इति

राजनिर्घण्टः। (यथा मेघदूते, पूर्ब्बमेघे। ५४।
"आपन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्"।
सुश्रुते,—
"दाहातिसारपित्तास्रमूर्च्छामद्यविषार्त्तिषु"।)
आर्द्र, त्रि, (अर्द्द + रक् दीर्घश्च।) सजलवस्तु। भिजा इति भाषा। तत्पर्य्यायः। सार्द्रं २ क्लिन्नं ३ क्लिन्नितं ४ तिमितं ५ समुन्नं ६ उत्तं ७। इत्यमरः॥ (तच्च द्विविधं यदुक्तं,—
'आर्द्रं द्रव्यं द्विधा प्रोक्तं सरसं नीरसं तथा।
सदुग्धं गुप्तरसकं द्विधा नीरसमुच्यते॥
वास्तूकं सार्षपं शाकं निर्गुण्डीरण्डमार्षकम्।
धुस्तूराद्यमिदं सर्व्वमार्द्रं सरसमुच्यते॥
वटाश्वत्थकरीराद्यमार्द्रद्रव्यं तु नीरसं।
सदुग्धं तु द्विधा प्रोक्तं मृदु तीक्ष्णमिति क्रमात्।
ग्रातला वज्रसीऽऊरुसौरिण्याद्यास्तु तीक्ष्णकाः।
दुग्धिकार्कस्नुहीरिण्याद्या मृदुदुग्धाः प्रकीर्त्तिताः"॥
यथा रघुवंशे, "आर्द्रान्ततारोपयमन्यभूतां"।
मेघदूते उत्तरमेघे २५।
"तन्वीमाद्रां नयनसलिलैः सारयित्वा कथञ्चित्")॥
आर्द्रकं, क्ली, (अर्द्द्यति कफं आर्द्रं। ततः कन्। यद्वा आर्द्रयति जिह्वायां। क्वन्।) कटुमूलविशेषः। आदा इति भाषा। तत्पर्य्यायः। शृङ्गवेरं २ इत्यमरः॥ कटुभद्रं ३ कटूत्कटं ४। इति केचित्। गुल्ममूलं ५ मूलजं ६ कन्दरं ७ वरं ८ महौषं ९ सैकतेष्टं १० अनूषजं ११ अपाकशाकं १२ चान्द्राख्यं १३ राजकन्दं १४ सुशाककं १५ शाकं १६ आर्द्रशाकं १७ सच्छाकं १८। इति राजनिर्घण्टः॥ अस्य गुणाः। कफवातविबन्धानाहशूलपित्तनाशित्वं। हृद्यत्वं। रुचिप्रकाशित्वञ्च। इति राजवल्लभः॥ अपिच। उष्णत्वं। कटुत्वं। विपाके शीतलत्वं। लघुत्वं। अग्निदीपनत्वं। श्लेष्मकण्ठामयनाशित्वञ्च। इति राजनिर्घण्टः॥ नवार्द्रकगुणाः। भोजनाग्रे पथ्यत्वं। जिह्वाकण्ठविशोधनत्वं। अग्निसन्दीपनत्वं। हृद्यत्वं,—
"वातपित्तकफेभानां शरीरवनचारिणां।
एक एव निहन्तास्ति नवार्द्रककेशरी"॥
इति द्रव्यगुणः,—
"आर्द्रकं शृङ्गवेरं स्यात् कटुभद्रं तथार्द्रिका।
आर्द्रिका मेदिनी गुर्व्वी तीक्ष्णोष्णा दीपनी तथा।
कटुका मधुरा पाके रूक्षवातकफापहा।
ये गुणाः कथिताः शुण्ठ्यास्तेऽपि सन्त्यार्द्रकेऽखिलाः।
भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनं।
कुष्ठे पाण्डामये कृच्छ्रे रक्तपित्ते व्रणे ज्वरे।
दाहे निदाघशरदोर्नैव पूजितमार्द्रकं"॥
इति भावप्रकाशः॥
(तदार्द्रकमेतच्च, इति वाभटः॥
"रोचनं दीपनं हृद्यमार्द्रकं विश्वभेषजं।
वातश्लेष्मविबन्धेषु रसस्तस्योपदिश्यते"॥
इति चरकः॥
"कफानिलहरं स्वर्य्यं विबन्धानाहशूलनुत्।
कटूष्णं रोचनं हृद्यं शृङ्गवेरार्द्रकं स्मृतम्"॥
इति सुश्रुतः॥)
आर्द्रपटी, [न्] पुं, (आर्द्रपट + इनि।) आर्द्ररक्तवस्त्रादृतकर्त्तृकशत्रुनाशफलकाभिचारकर्म्मविशेषः। यथा। "अथार्द्रपटी। प्रणवो हृदयं भगवति चामुण्डे रक्तवाससे अप्रतिहतरूपपराक्रमे अमुकवधाय विचेतसे वह्निवल्लभा। आर्द्ररक्तपटेनाहृतः समुद्रगामिनीनदीतटे ऊषरभूमौ वा दक्षिणामुख ऊर्द्ध्वबाङ्ध्येत् यावत् पटः शुष्यति तावत् प्राणाः शुष्यन्ति शत्रोः"। इति तन्त्रसारः॥ आर्द्रपटविशिष्टे, त्रि॥
आर्द्रमाषा, स्त्री, माषपर्णी। इति राजनिर्घण्टः॥ माषाणी इति भाषा।
आर्द्रशाकं, क्ली, (आर्द्रं शाकमस्य।) आर्द्रकं। इति राजनिर्घण्टः॥
आर्द्रा, स्त्री, (आर्द्र + टाप्।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतषष्ठनक्षत्रं। अस्य रूपं। पद्माक्षत्रुज्ज्वलैकतारकामयं। अस्या अधिष्ठात्री देवता शिवः। इति कालिदासः॥ मणित्युल्यैकतारात्मकं। इति केचित्॥ तत्र जातफलं।
"क्षुधाधिको रुक्षशरीरकान्तिः
कलिप्रियः कोपयुतोऽविनीतः।
प्रसूतिकाले च भवेत् किलार्द्रा
नचार्द्रचेताः शरजागतेऽपि"।
इति कोष्ठीप्रदीपः॥
आर्द्रालुब्धकः, पुं, (आर्द्रायां तन्नाम्नि प्रसिद्धनक्षत्रे लुब्धक इव।) केतुग्रहः। इति हलायुधः॥
आर्द्रिका, स्त्री, (आर्द्रक + टाप्।) आर्द्रकं। इति भावप्रकाशः॥
("आर्द्रिका तिक्तमधुरा मूत्रला न च पित्तकृत्"॥ इति वाभटः।)
आर्य्यः, त्रि, (अर्त्तुं प्रकृतमाचरितुं योग्यः। अर्य्यते वा॥ ऋ + ण्यत्।) सत्कुलोद्भवः। इत्यमरः। पूज्यः। श्रेष्ठः। वृद्धः। इति शब्दरत्नावली॥ सत्कृतः। इत्यजयः॥ (मान्यः, उदारचरितः, शान्तचित्तः। यथा, रामायणे, ३ काण्डे।
"योऽहमार्य्येण परवान् भ्राता ज्येष्ठेन भाविनि"।
न्यायपथावलम्बी, प्रकृताचारशीलः, सततकर्त्तव्यकर्म्मानुष्ठाता। यदुक्तं,
"कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन्।
तिष्ठति प्राकृताचारे स तु आर्य्य इति स्मृतः"॥
धार्म्मिकः। धर्म्मशीलः। यथा, मनुः, १०। ७५७।
"आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत्"।
उचितः। यथा, रामायणे,—
"मार्गमार्य्यं प्रपन्नस्य नानुमन्येत कः पुमान्"॥
नाट्योक्तौ सम्मानसूचकमिदं नाम प्रायेण मान्यजनाङ्काने व्यवह्रियते। यथा, सातित्यदर्पणे, षष्ठपरिच्छेदे।
"खेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः"।
"वाग्यौ नटीसूत्रधाराचार्य्यनाम्ना परस्परं"॥)
आर्य्यः, पुं, (अर्त्तुं सदाचरितुं योग्यः। ऋ + ण्यत्।) स्वामी। वृद्धः। इति हेमचन्द्रः॥ सुहृत्। इत्यजयः। (श्रेष्ठवर्णः। म्लेच्छेतरजातिः। यदुक्तं महाभारते।
"म्लेच्छाश्चान्ये बहुविधाः पूर्ब्बं ये निकृता रणे।
आर्य्याश्च पृथिवीपालाः"। इति। स्वनामख्यातः सावर्णमनोः पुत्रः। यथा, हरिवंशे।
"वरीयांश्चावरीयांश्च संमतो धृतिमान् वसुः।
चरिष्णुरार्य्यो धृष्णुश्च राजः सुमतिरेव च।
सावर्णस्य मनोः पुत्राः भविष्या दश भारत!"॥)
आर्य्यकं, क्ली, पितृपाचादिपितृकार्य्यं। इति त्रिकाण्डशेषः॥
आर्य्यकः, पुं, (आर्य्य + स्वार्थे कन्।) पितामहः। मातामहः। इति शब्दमाला॥ (यथा रामायणे,—
"अद्य ते कतिचिद्राज्यन्नतस्यार्य्यकवेश्मनः"।
"आर्य्यकस्ते तु कुशली युधाजिन्मातुलस्तव"॥
महाभारते,—
"आर्य्यकेण च दृष्टः स दृष्ट्या आर्य्यकेण च।
तदा दौहित्रदौहित्रः परिष्वक्तः सुपीड़ितम्"॥
पूज्यव्यक्तिमात्रम्। स्वनामख्यातो नागश्रेष्ठः, यथा महाभारते,—
"आर्य्यकश्चोग्रकश्चैव नागः कनकपोतकः"।)
आर्य्यका, स्त्री, (आर्य्यक + टाप्। उदीचामात इति पक्षे इत्त्वाभावः।) श्रेष्ठा स्त्री। इति वोपदेवः॥
आर्य्यपुत्रः, पुं, (आर्य्यस्य पुत्रः। षष्ठीतत्पुरुषः।) भर्त्ता। स्वामी। इति हेमचन्द्रः॥ (यथा रामायणे,—
"आर्य्यपुत्र! पिता माता भ्राता पुत्रस्तथा स्नुषा।
स्वानि पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते"॥)
गुरुपुत्रः। मान्यस्य पुत्रः।
आर्य्यमिश्रः, त्रि, (आर्य्यः श्रेष्ठो मिश्रश्च।) गौरवितः। इति त्रिकाण्डशेषः॥ (माननीयः, पूज्यः। यथा रामायणे, २ काण्डे।
"समस्तमार्य्यमिश्राणां साधूनां गुणवर्त्तिनाम्"।
उत्तरचरिते, प्रस्तावनायां।
"अद्य खलु भगवतः कालप्रियनाथस्य यात्रायामार्य्यमिश्रान् विज्ञापयामि"।)
आर्य्या, स्त्री, (ऋ + ण्यत् + स्त्रियां टाप्।) पार्ब्बती। इति त्रिकाण्डशेषः। छन्दोविशेषः। तस्या लक्षणम्।
"यस्याः पादे प्रथमे द्वादशमात्राः स्थितास्तृतीयेऽपि।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या"॥
इति श्रुतबोधः॥ अपिच।
"लक्ष्मैतत्प्रभवति गोपेता भवति नेह विषमे जः।
षष्ठो जश्च न लघुर्वा प्रथमेऽर्द्धे नियतमार्य्यायाः॥
षष्ठे द्वितीयवात्परकेऽस्मिन् मुखलाघवं सयतिपदनियमः।
चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो जः"॥
सा नवधा।
"पथ्या विपुला चपला मुखचपला जघनचपलाच।
गीत्युपगीत्युद्गीतय आर्य्यागीतिश्च नवधार्य्या"॥
इति छन्दोमञ्जरी॥ श्रेष्ठा स्त्री॥
आर्य्यावर्त्तः, पुं, (आर्य्या आवर्त्तन्तेऽत्र। आर्य्य + आ + वृत् + आधारे घञ्।) विन्ध्यहिमाचलयोर्मध्यदेशः। तत्पर्य्यायः। पुण्यभूमिः २। इत्यमरः॥ यथा,—
"आसमुद्रात्तु वै पूर्ब्बादासमुद्रात्तु पश्चिमात्।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधाः"॥
इति मानवे २। २२॥ अपि च, अमरे।—

"आर्य्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमाचयोः"।
आर्य्यिका, स्त्री, (आर्य्य + स्वार्थे कन् + अत इत्वं।) श्रेष्ठा स्त्री। इति वोपदेवः॥
आर्षः, पुं, (ऋषे रिदं। ऋषि + अण्।) विवाहविशेषः। यत्र वरात् गोद्वयं गृहीत्वा तेनैव सह कन्यादानं। यथा, याज्ञवल्क्यः,—
"यज्ञस्यायर्त्विजे दैव आर्षं आदाय गोयुगं।
चतुर्दश्यं प्रथमजः पुनात्युत्तरजश्च षट्"॥
(यथा मनुः, ३। २९।
"एकं गोमिथुनं द्वे वा वरादादाय धर्म्मतः।
कन्याप्रदानं विधिवदार्षो धर्म्मः स उच्यते"॥)
ऋषिप्रणीते त्रि॥ (यथा मनुः १२।१०६।
"आर्षं धर्म्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्म्मं वेद नेतरः"॥
आर्षभिः, पुं, (ऋषभस्यापत्यम्। ऋषभ + इञ्।) ऋषभपुत्रः। स तु भरतराजचक्रवर्त्ती। इति हेमचन्द्रः॥
आर्षभी, स्त्री, (ऋषभस्य वृषस्य प्रिया। ऋषभ + अण् + ङीप्।) कपिकच्छवृक्षः। इति राजनिर्घण्टः।
(मध्यममार्गे नक्षत्रविशेषाणां संज्ञाविशेषः। यथा, "तथा हे चापि फल्गुन्यौ मघा चैवार्षभी मता"। कपिकच्छशब्देऽस्या गुणादयो ज्ञातव्याः॥)
आर्षभ्यः, पुं, (ऋषभस्य प्रकृतिः। ऋषभ + अञ्।) षण्डोपयुक्तवृषभः। तत्पर्य्यायः। षण्डतायोग्यः २। इत्यमरः॥ षाँड़ेर उपयुक्त एँड़े इति भाषा॥
आर्हतः, पुं, (अर्हन् जिन एव। अर्हत् + अण्।) जिनविशेषः। तत्पर्य्यायः। बादबादी २। इति हेमचन्द्रः॥
आलं, क्ली, (आलयति भूषयतीति। आ + अल् + अच्।) हरितालं। इत्यमरः॥ अनल्पे त्रि। इति हेमचन्द्रः॥ (यथा वैद्यकरत्नेन्द्रसारसंग्रहे॥)
("हरितालं तालमालमालं शैलूषभूषणम्।
पिञ्जरं रोमहरणं तालकं पीतमित्यपि"॥)
आलगर्दः, पुं, (अलगर्द एव। स्वार्थे अण्।) अलगर्दः। जलसर्पः।
आलम्बः, पुं, (आङ् + लबि + घञ्।) अवलम्बः। आश्रयः॥ (यथा रघौ। गतिः। "इह हि पततां नास्त्यालम्बो न चापि निवर्त्तनम्"। इति भ्रान्तिमतके ३। २।) अधोलम्बनम्। यथा, रामायणे,—
"शोभते किञ्चिदालम्बैः शालयः कनकप्रभाः"॥)
आलम्बनं, क्ली, (आङ् + लम्ब + ल्युट्।) अवलम्बनं। विभावविशेषः। यथा,—
"आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ।
आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात्"॥
इति साहित्यदर्पणे ३य परिच्छेदः।
आलम्भः, पुं, (आङ् + लभि + घञ्।) मारणं। वधः। इत्यमरः॥ (यथा स्मृतिः, "अश्वालम्भं गजालम्भं"। मेघदूते पूर्व्वमेघे। ३६।
"व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्"।
छेदनम्। कर्त्तनम्। मनुः ११। १४४।
"क्षेत्रजानामोषधीनां जातानां च स्वयं वने।
दधालम्भेऽनुगच्छेत् गां दिनमेकं पयोव्रतः"॥
स्पर्शः। आलिङ्गनम्। यथा मनुः २। १७९।
"द्यूतञ्च जनवादञ्च परिवादं तथाऽनृतं।
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च"॥)
आलम्भ्या, स्त्री, (आङ् + लभि + ण्यत्।) वधार्हा। हननीया। इति वोपदेवः॥
आलयः, पुं, (आलीयतेऽस्मिन्। आ + ली + आधारे अच्।) गृहं। इत्यमरः॥ (यथा कुमारे १। १।)
"हिमालयो नाम नगाधिराजः" नैषधे, "तत्रामरालयमरालमरालकेयी"। रामायणे ३ काण्डे।
"न हि दुष्टात्मनामार्य्या निवसन्त्यालये चिरं"।
समयपर्य्यन्ते, क्ली। भागवते १ अध्याये ५। "पिबत भागवतं रसमालयम्")॥
आलवालं, क्ली, (आ समन्तात् जलस्य लवमालाति आ + लव + ला + क।) तरुमूलसेचनार्थखल्वजलाधारः। चारमादा इति भाषा। तत्पर्य्यायः। आवालं २ आवापः ३। इत्यमरः॥ (रघुवंशे १। ५१।
"विश्वासाय विहङ्गानामालवालाम्बुपायिनाम्"।
माघे। "विपुलजलवालभृतवारिदर्पणः"।)
आलसः, त्रि, (अलस + स्वार्थे अण्।) अलसः। आलस्ययुक्तः। इति दिरूपकोषः॥
आलस्यं, क्ली, (अलस + ष्यञ्।) अलसस्य भावः। अलसता। तत्पर्य्यायः। तन्द्रा २ कौसीद्यं ३। इति हेमचन्द्रः॥ मन्दता ४ मान्द्यं ५ कार्य्यप्रद्वेषः ६। इति राजनिर्घण्टः॥ (यदुक्तं। "आलस्यं श्रमगर्भाद्यैर्जाड्यं श्लेष्मासितादिकृत्" इत्युक्तलक्षणो व्यभिचारिभावभेदः। सुश्रुते।
"सुखस्पर्शप्रसक्तिं दुःखद्वेषणालोलता।
प्रवृत्तस्य चाप्युत्साहः कर्म्मण्यालस्यमुच्यते"॥)
आलस्यः, त्रि, (अलस एव। अलस + स्वार्थे ष्यञ्।) अलसयुक्तः। तत्पर्य्यायः। मन्दः २ तुन्दपरिमृजः ३ प्रीतकः ४ अलसः ५ अनुद्यमः ६। इत्यमरः॥
आलातं, क्ली, (अलातमेव। अलात + स्वार्थे अण्।) अलातं। अङ्गारः॥
आलानं, क्ली, (आलीयतेऽत्र। आङ् + ली + ल्युट्। विभाषा लीयतेरित्यात्त्वम्।) गजबन्धनस्तम्भः। इत्यमरः॥ गजबन्धनरज्जुः। इति नीलकण्ठः॥ (रघुवंशे १। ७१।
"अरन्तुदमिवालानमनिर्वाणस्य दन्तिनः"।
कादम्बरी। "इभमदमलिनमालानस्तम्भयुगलमुपहसन्तमिवोरुदण्डद्वयेन"।
रघुवंशे ४। ६६, ४। ८१।
"गजालानपरिक्लिष्टैरक्षोटैः सार्द्रमांसलाः"।
"तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः"॥)
बन्धनं। इति रायमुकुटः॥ रज्जुः। इति मेदिनी॥
आलापः, पुं, (आङ् + लप् + घञ्।) कथोपकथनं। सम्भाषणं। तत्पर्य्यायः। आभाषणं २। इत्यमरः। (साहित्यदर्पणे, प्रथमपरिच्छेदः।
"काव्यालापाश्च ये केचित् गीतकान्यखिलानि च"।)
आलाप्यः, त्रि, (आङ् + लप् + कर्म्मणि ण्यत्।) आलापयोग्यः। आलापनीयः॥
आलावर्त्तः, क्ली, (आलमत्यर्थमावर्त्तते इति आल + आ + वृत् + अच्।) वस्त्रनिर्म्मितव्यजनं। इति हेमचन्द्रः॥ कापड़ेर पाखा इति भाषा।
आलावुः, स्त्री, अलावुः। इति शब्दरत्नावली॥ लाउ इति भाषा। (अलाबुशब्देऽस्या विशेषो ज्ञेयः॥
आलावूः, स्त्री, अलावुः। इति शब्दरत्नावली॥
आलास्यः, पुं, (आलं पर्य्याप्तं आस्यं मुखं यस्य सः।) कुम्भीरः। इति हेमचन्द्रः॥
आलिः, स्त्री, (आलयति भूषयति। आ + अल भूषणे। अच इः।) वयस्या। (यथा कुमारसम्भवे। ५।८३।
("निवार्य्यतामालि किमप्ययं वटुः,
पुनर्विवक्षुः स्फुरितोत्तराधरः"।)
(आलति निर्वापयति जलं। अल वारणे। सर्व्वधातुभ्य इन्।) सेतुः। (अल्यतेऽनया। अल् + इञ्।) पंक्तिः। इति मेदिनी अमरश्च॥ सन्ततिः। इति शब्दरत्नावली॥
आलिः, पुं, (आलति दंशने समर्थो भवति। आ + अल् + बाहुलकात् इन्।) वृश्चिकः। भ्रमरः। इति हारावली अमरटीका च॥
आलिः, त्रि, (आङ् + अल् + इन्।) विशदाशयः। निर्म्मलान्तःकरणः। इति मेदिनी॥ अनर्थः। इति हेमचन्द्रः॥
आलिङ्गनं, क्ली, (आङ् + लिङ् + ल्युट्।) प्रीतिपूर्व्वकपरस्परश्लेषः। कोलाकोली इति भाषा। तत्पर्य्यायः। अङ्कपालिः २ श्लिषा ३। इति चिकाण्डशेषः॥ परिरम्भः ४ परीरम्भः ५ परिष्वङ्गः ६ संश्लेषः ७ उपगूहनं ८। इत्यमरः॥ तत्प्रभेदा यथा। आमोदालिङ्गनं १ मुदितालिङ्गनं २ प्रेमालिङ्गनं ३ आनन्दालिङ्गनं ४ रत्यालिङ्गनं ५ मदनालिङ्गनं ६ विनोदालिङ्गनं ७। इति कामशास्त्रम्॥
("आलिङ्गनान्यधिकृताः स्तुटमाप्नुरेव"।
इति माघः॥ यथा मेघदूते उत्तरमेघे ९।
"यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानां"।)
आलिङ्गी, [न्] पुं, (आ + लिङ् + इनि।) आलिङ्गः। मृदङ्गविशेषः। इत्यमरटीकायां स्वामी शब्दरत्नावली च॥
आलिङ्ग्यः, पुं, (आ + लिङ् + ण्यत्।) यवाङ्कतिमृदङ्गः। इत्यमरः॥ मादोल इति भाषा। यथा शब्दार्णवे॥
"चतुरङ्गुलहीनोऽङ्गान्मुखे चैकाङ्गुलेन यः।
यवाङ्कतिः स आलिङ्ग्य आलिङ्ग्य स हि गीयते"॥
आलिङ्गरः, पुं, (आलिङ्गर + अण्।) आलिङ्गरः। इति चिकाण्डशेषः॥ जाला इति भाषा।
आलिन्दः, पुं, (आलिन्द + अण्।) आलिन्दः। बहिर्द्वारप्रकोष्ठः। गृहान्तरगम्यार्थवेदिका। इति रायमुकुटः शब्दरत्नावली च॥ गृहैकदेशः। इत्यमरमाला॥
आलिन्दकः, पुं, (आलिन्द एव स्वार्थे कः।) आलिन्दः। इति शब्दरत्नावली॥
आलिम्पनं, क्ली, (आङ् + लिम्प + ल्युट्।) मङ्गलालेपनं। आलिपना इति भाषा। तत्पर्य्यायः। आतर्पणं २ आदीपनं ३ मण्डोदकं ४। इति चिकाण्डशेषः॥

आली, स्त्री, (आलि+ङीष्।) सखी। पङ्क्तिः। दन्तिकः। इत्यमरटीकायां भरतादयः॥ सेतुः। इति शब्दरत्नावली॥ (अपत्यार्थे यथा कुमारे ६।४९। "तोयान्तर्भास्करालीव रेजे मुनिपरम्परा"।)

आलीढ़, क्ली, (आङ्+लिह्+क्तः।) धन्विनां दक्षिणजङ्घाप्रसारवामपादसंकोचरूपावस्थानं। इत्यमरः। (यथा, रघौ ३।५२।

"अतिष्ठदालीढविशेषशोभिना
वपुःप्रकर्षेण विडम्बितेश्वरः"।

तल्लक्षणं यथा, चिन्तामणिधृतम्।

"नमिता पूर्वजङ्घा च पश्चिमा प्रसृता भवेत्।
समो मध्यकायश्च स्यादालीढस्य लक्षणम्"॥)

आलीढ़, त्रि, (आङ्+लिह्+क्तः।) अङ्गितं। भुक्तं। इति मेदिनी॥ (हृतः, रघुवंशे, २।३७।

"सेनान्यमालीढमिवासुरास्त्रैः"।)

आलीढ़कं, क्ली, (आलीढ एव स्वार्थे कः।) तर्जकानां खलीषु क्रीड़नं। इति हारावली॥ वाकुरेर खेला इति भाषा। आटीलकमिति क्वचित् पाठः॥

आलीनकं, क्ली, (आलीन+कन्।) रङ्गं। इति हेमचन्द्रः॥ रां इति भाषा।

आलु, क्ली, (आङ्+लु+डु।) मेलकः। स्वनामख्यातमूलविशेषः। इति मेदिनी॥ अस्य गुणाः। रक्तपित्तनाशित्वं। गुरुत्वं। स्वादुत्वं। शीतलत्वं। स्तनदुग्धशुक्रकारित्वञ्च। इति द्रव्यगुणः॥

आलुः, स्त्री, (आलाति। आङ्+ला+डु।) स्वल्पवारिधानिका। घटीभारी इत्यादि भाषा। तत्पर्य्यायः। कर्करी २ गलन्तिका ३। इत्यमरः॥

आलुः, पुं, पेचकः। इति शब्दरत्नावली॥ कासालुः। इति राजनिर्घण्टः॥

आलुकं, क्ली, (आलु+स्वार्थे कन्।) मूलविशेषः आलु इति भाषा। इति राजवल्लभः॥ एलवालुकं। इति राजनिर्घण्टः॥ तद्विवरणं यथा,—

"आलुकमप्यालूकं तत् कथितं वीरसेनस्य।
काष्ठालुकशृङ्गालुकहस्त्यालुकानि कथ्यन्ते॥
पिण्डालुकमध्यालुकरक्तालुकानि यक्ष्माणि"।
काष्ठालुकं काठिन्ययुक्तकटाम्। शृङ्गालुकं श्वेततायुक्तशृङ्गालु। हस्त्यालुकं दीर्घतायुक्तमहाशरीरं। पिण्डालुकं वर्त्तुलसुघनी। मध्यालुकं मधुरतायुक्तरोमान्वितदीर्घसुघनी। रक्तालुकं रताकू तरखा इति च। एषां गुणाः।

"आलुकं शीतलं सर्व्वं विष्टम्भि मधुरं गुरु।
रक्तमूत्रमलं रूक्षं दुर्ज्जरं रक्तपित्तनुत्॥
कफानिलकरं बल्यं हृद्यं स्तन्यविवर्द्धनम्"।
इति भावप्रकाशः॥

("आलुकानि च सर्व्वाणि तथा सूप्यानि जानीयात्। स्निग्धं निष्पीड़ितरसं स्नेहाढ्यं नातिदोषलम्"॥ इति वाभटः॥

"विदारीकन्दशतावरीविसमृणालभद्राटककर्कशेरुककपिण्डालुकमध्यालुकहस्त्यालुककाष्ठालुकशृङ्गालुकरक्तालुकेन्दीवरोत्पलकन्दप्रभृतीनि"॥

"रक्तपित्तहराण्याहुः शीतानि मधुराणि च।
गुरूणि बहुशुक्राणि स्तन्यवृद्धिकराणि च"॥

इति सुश्रुतः॥)

आलुकः, पुं, (आलाति पृथ्वीं कामरोगं वा आङ्+ला+डु+संज्ञायां कन्।) कासालुः। इति राजनिर्घण्टः॥ श्वेतनागः। इति हेमचन्द्रः॥

आलुकी, स्त्री, दीर्घाकारस्वल्परक्तालुः। अरई इति भाषा। यथा, भावप्रकाशे॥

"रक्तालुभेदो या दीर्घा तन्वी च ग्रथितालुकी।
आलुकी बलकृत् स्निग्धा गुर्व्वी हृत्कफनाशिनी।
विष्टम्भकारिणी तैले तलितातिरुचिप्रदा"॥

आलेख्यं, क्ली, (आङ्+लिख्+ण्यत्।) चित्रं। इति हेमचन्द्रः॥ (यथा माघे, २।६७।

"इति संरम्भिणो वाग्भीर्बलस्यालेख्यदेवताः"।

"निश्चीथदीपाः सहसा हतत्विषो
बभूवुरालेख्यसमर्पिता इव"। रघुवंशे ३।१५।)

आलेख्यप्रेक्षः, त्रि, (आलेख्यं चित्रमेव प्रेक्षो यस्य सः।) मृतः। इति हेमचन्द्रः॥ (यथा रघुवंशे, १४।१५।

"वाष्पायमाणो बलिमन्निकेत-
मालेख्यशेषस्य पितुर्व्विवेश"।)

आलोकः, पुं, (आङ्+लुक्+घञ्।) दर्शनं। देखा इति भाषा। द्योतः। आलो इति भाषा। ज्ञान्तिघृतके, ४।६।

"आलोकाय निशासु चन्द्रकिरणाः सख्यं कुरङ्गैः सह"। मेघदूते पूर्व्वमेघे ३८।

"रक्षालोके नरपतिपथे सूचिभेद्यैस्तमोभिः"। यथा शाकुन्तले, प्रथमाङ्के।

"यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलताम्"। (यथा, रामायणे ४ काण्डे। ५०। २४।

"आलोकं ददृशुर्धीरा नीराशा जीविते यदा"।

वन्दिभावयं। स्तुतिरिति यावत्। इति मेदिनी॥ (रघुवंशे। २। ९।

"उदीरयामासुरिवोन्मदानां
मालोकशब्दं वयसां विरावैः"॥)

आलोकनं, क्ली, (आङ्+लोक्+ल्युट्।) दर्शनं। इत्यमरः॥ (रघुवंशे, ७। ५। "ततस्तदालोकनतत्पराणां," कुमारसम्भवे। २। ४५।

"भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते"।

माघे, ११। ३३।

"व्रजति हि सफलत्वं वस्तुभालोकनेन"।)

आलोचनं, क्ली, (आङ्+लुच्+ल्युट्।) दर्शनं। विवेचनं॥ (यथा हेमचन्द्रः, "रहस्यालोचनं ज्ञानम्"। सांख्यमते निर्विकल्पकं ज्ञानं निर्द्धर्मकं शुद्धवस्तुविषयकं प्राथमिकं ज्ञानं। यदुक्तं।

"अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥
ततःपरं पुनर्वस्तु धर्म्मैर्जात्यादिभिर्यथा"।

"बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन सम्मता"।

"शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः"॥ सांख्यकारिका।)

आवनेयः, पुं, (अवन्या अपत्यं अवनी+ढक्।) मङ्गलग्रहः। इति ज्योतिःशास्त्रं॥ (यथा काशीखण्डे। १७ अध्याये।

"उत्पत्तिं चास्य वक्ष्यामो भूसुतोऽयं यथाभवत्।
पुरा तपस्यतः शम्भोर्दक्षायज्ञे वियोगतः॥
भालस्थलात्पपातैकः स्वेदबिन्दुर्महीतले।
ततः कुमारः संजज्ञे लोहिताङ्गो महीतलात्॥
स्वेदसम्वर्द्धितः सोऽथ धात्र्या धात्रीस्वरूपया।
माङ्गेय इत्यतः ख्यातिं पराभयं गतस्ततः"॥)

आवपनं, क्ली, (ओप्यते क्षाप्यतेऽत्र। आङ्+वप्+आधारे ल्युट्।) द्रव्यक्षापनपात्रं। भाण्डं। इत्यमरः॥ सम्यक्क्षुरिकर्म्म। सम्यग्बीजतन्तुवपनं॥ (यथा महाभारते, आदिपर्व्वणि।

"प्रभुरग्निः प्रतपने भूमिरावपने प्रभुः।
प्रभुः सूर्य्यः प्रकाशित्वे सतां चाभ्यागतः प्रभुः"॥
"अग्निर्हिमस्य भैषज्यं भूमिरावपनं महत्"।)

आवरणं, क्ली, (आङ्+वृ+ल्युट्।) फलकं। इति हेमचन्द्रः॥ ढाल इति भाषा। आच्छादनं। ढाका इति भाषा॥ (यथा महाभारते, आदिपर्व्वणि।

"विचित्राणि च वासांसि प्रावाराबरणानि च"।

"सूर्य्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा"। इति रघुः। ५। १३। मनुः। ३।१६३।

"स्त्रीतसां भेदको यश्च तेषाञ्चावरणे रतः"॥)

आवरणशक्तिः, स्त्री, (आवरणे शक्तिः।) मायाशक्तिः। यथा। "स्वल्पोऽपि मेघो बहुयोजनविस्तीर्णमादित्यमण्डलं अवलोकयितृजननयनपथपिधायकतयाच्छादयतीव तथैवाज्ञानं परिच्छिन्नमपि आत्मानमपरिच्छिन्नमसंसारिणं अवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यं"॥ इति वेदान्तः॥

आवर्त्त, क्ली, (आङ्+वृत्+घञ्।) माक्षिकधातुः। इति राजनिर्घण्टः॥ (आवर्त्तनं। चक्राकारेणभ्रमणं।)

आवर्त्तः, पुं, (आङ्+वृत्+घञ्।) जलभ्रमः। इत्यमरः॥ घूर्ण्णा इति भाषा। (रघुवंशे ६। ५२।

"रूपं तमावर्त्तमनोज्ञनाभिः"।)

चिन्ता। आवर्त्तनं। इति मेदिनी॥ मेघनायकचतुरुत्थानगतमेघाधिपविशेषः। इति पुराणं ज्योतिषञ्च। (यथा मेघदूते पूर्व्वमेघे ६।

"जातं वंशे भुवनविदिते पुष्करावर्त्तकानाम्"।)

राजावर्त्तनामोषरलं। इति राजनिर्घण्टः॥

आवर्त्तकी, स्त्री, (आवर्त्त इव कायति प्रकाशते। आवर्त्त+कै+क+ङीष्।) लताविशेषः। भगतवल्ली इति लोकेषु प्रसिद्धा। तत्पर्य्यायः। तिन्दुकिनी २ विभाण्डी ३ विषाणिका ४ रङ्गलता ५ मनोज्ञा ६ रक्तपुष्पी ७ मरुत्पाली ८ पीतकोषा ९ चर्म्मरङ्गा १०। अस्या गुणाः। कषायत्वम्। अम्लत्वम्। शीतवीर्य्यकारित्वम्। पित्तनाशित्वञ्च। भद्रदन्तिकावद्गुणाः। इति राजनिर्घण्टः॥

आवर्त्तनं, क्ली, (आङ्+वृत्+ल्युट्।) दुग्धादेरालोड़नं। आघोटान इति भाषा। धातुद्रव्यस्य द्रवीकरणं। इत्यमरटीका॥ गलान इति भाषा। सूर्य्यस्य पश्चिमदिगवस्थितच्छायायाः पूर्व्वदिग्गमनारम्भकालः। "आवर्त्तनात्तु पूर्व्वाह्णो ह्यपराह्णस्ततःपरं" इति स्मृतिः॥

आवर्त्तनी, स्त्री, (आङ्+वृत्+ल्युट्+ङीप्।) धातुद्रव्यद्रावणार्थमृत्पात्रं। मुकी इति भाषा। तत्पर्य्यायः। तैजसावर्त्तनी २ मूषा ३ मूषः ४। इति शब्दरत्नावली॥

आवर्त्तनमणिः, पुं, (आवर्त्तनाकारो मणिः।) राजावर्त्तनामोपरत्नं। इति राजनिर्घण्टः॥

आवर्त्तिनी, स्त्री, (आवर्त्त+इनि+ङीप्।) अक्षग्रहणीवृक्षः। इति रत्नमाला॥

आवर्हितः, त्रि, (आङ्+वृह्+क्तः।) उन्मूलितः। उत्पाटितः। इति हेमचन्द्रः।

आवलिः, स्त्री, (आङ्+वल+इन्।) श्रेणी। पंक्तिः। इत्यमरः॥

आवली, स्त्री, (आङ्+वल्+इन्+ङीप्।) आवलिः। इत्यमरः॥ (यथा अमरशतके ३। "आलोलामलकावलीं विलुलितां बिभ्रच्चलत्कुण्डलं"। "द्विजावलीव्याजनिशाकरांशुभिः"। इति माघे १। २५।)

आवल्यं, क्ली, (अवल+ष्यञ्।) अबलस्य भावः दौर्बल्यं॥

आवश्यकं, त्रि, (अवश्य+मनोज्ञादित्वादुञ्। अव्ययानां भमात्र इति टिलोपः।) अवश्यकर्त्तव्यं। नैत्यिकं। उचितं। यथा। "घ्यणोरावश्यके। उपर्गादावश्यकेऽर्थे घ्यण् स्यात्"। इति मुग्धबोधव्याकरणं॥ किञ्च। आवश्यकपर्व्वादिक्रियमाणस्य नित्यनैमित्तिकत्वं। इति तिथ्यादितत्त्वं॥ (यथा साहित्यदर्पणे,। "आवश्यकानां कार्य्याणां अविरोधादिनिर्म्मितः"।)

आवसथं, क्ली, (आवसन्ति आगत्य वसन्ति अस्मिन्। आङ्+वस+अथच्।) गृहं। इति हेमचन्द्रः॥ (वसतिस्थानं। विश्रामस्थानं। अग्निगृहं। अग्निहोत्रस्थानं।
रघुवंशे, ८। १४ "निवसन्नावसथे पुराद्दिः"। मनुः। ३। १०७।
"आसगावसथौ गृह्यामनुव्रज्यामुपासनाम्"।)

आवसथः, पुं, (आवसन्त्यत्र। आ+वस+अधिकरणे अथच्।) गृहं। (यथा, हितोपदेशे मित्रलाभे "अस्ति चम्पकाभिधानायां नगर्यां परिव्राजकावसथः"।) आर्य्याकोषः। आर्य्याच्छन्दसो ग्रन्थभेदः। व्रतविशेषः। इत्युणादिकोषः॥

आवसितं, त्रि, (आवस्यते आच्छाद्यते आङ्+वस आच्छादने+क्तः।) परिपक्वमर्दितधान्यं। इति भरतः॥ बऊलितधान्यं। इति सुभूतिः॥ सम्पन्नधान्यं। इत्यन्ये॥ तत्पर्य्यायः ऋद्धं २। इत्यमरः॥

आवहः, पुं, (आभिमुख्येन वहतीति। आङ्+वह्+अच्।) सप्तवाय्वन्तर्गतवायुविशेषः। स च भूवायुः। इति पुराणज्योतिषे॥
(यथा, मनुः, ८। ३४७।
"द्यौ शुक्रज्योतिरादित्यो नन्दो हरिस्तपास्तथा। चित्रज्योतिः सत्यज्योतिर्ज्योतिष्मान् स्वन्य आवहः"॥ इति प्रापकः। जनकः। यथा मनुः,—
"समुद्वहेज्जात्यहसिकान् सर्व्वभूतभयावहान्"। रघुवंशे। १४।५, "क्लेशावहा मर्त्तुरलक्षणाहं"।)

आवहमानं, त्रि, (आङ्+वह्+शानच्।) क्रमागतं॥ (परम्परागतं, धारावाहि।)

आवाधा, स्त्री, (आ सम्यक् बाधा।) दुःखं। पीड़ा। इति शब्दरत्नावली। भूखण्डं। त्रिकोणक्षेत्रमध्यरज्जुनिक्षेपेण यत् खण्डद्वयं जायते तत्। इति लीलावती॥

आवापः, पुं, (आ वपन्ति सलिलमत्र। आङ्+वप्+घञ्।) आलवालं। इत्यमरः॥ वलयः। (यथा महाभारते १४ पर्व्वणि।
"मोहात् पपात गाण्डीवमावापं च करादपि"।)
यज्ञे चिन्तनं। (परराष्ट्रचिन्तनम्। यथा, माघे। २८८।
"तन्त्रावापविदा योगैर्मंडलानधिशिश्रिता"।)
पानभेदः। इति हेमचन्द्रः॥ भाण्डवपनं। परिक्षेपः। इति मेदिनी॥ निम्नोन्नतभूमिः। इत्यजयः॥ पात्रं। इति शब्दरत्नावली॥ प्रधानहोमः। इति स्मृतिः॥

आवापकः, पुं, (आ उप्यते इति। आङ्+वप्+कर्म्मणि घञ्+संज्ञायां कन् वा।) वलयः। इत्यमरः॥

आवापनं, क्ली, (आवाप्यतेऽनेनेति आङ्+वप्+णिच्+करणे ल्युट्।) सूत्रयन्त्रं। इति शब्दमाला॥ ताँत् इति भाषा।

आवारि, स्त्री, (आङ्+वृ+इ।) इष्टवेश्म। इत्यादिकोषः॥ दोकान हाट्चालि इत्यादि भाषा।

आवालं, क्ली, (आङ्+वल्+घञ्।) आलवालं। इत्यमरः॥ (बालकमभिव्याप्य इत्यर्थे।) बालकपर्य्यन्तम्॥

आवाल्यं, क्ली, (बाल्यात् आ आवाल्यं पर्य्यन्तार्थेऽव्ययीभावः।) बाल्यावस्थापर्य्यन्तं॥ (यथा धर्म्मविवेके,—"आबाल्यादसती सती सुरपुरीं कुन्ती समारोहयत्"।)

आवासः, पुं, (आ वसन्ति अत्र इति। आङ्+वस्+अधिकरणे घञ्।) गृहं इति हेमचन्द्रः॥ (यथा गीतगोविन्दे। ४।१०।
"आवासो विपिनायते प्रियसखीमालापि जालायते"।)

आवाहनं, क्ली, (आङ+वह्+णिच्+ल्युट्।) आकानं। निमन्त्रणं। यथा,—
"प्रतिमास्थानेष्वग्नौ नावाहनविसर्জ্জने"।
इति। विनायकादीनां व्याहृतिभिरावाहनमाह मत्स्यपुराणं।
"विनायकं तथा दुर्गां वायुमाकाशमेव च।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ"॥
इति च तिथ्यादितत्त्वं॥ आवाहनीमुद्रा मुद्राशब्दे द्रष्टव्या॥

आवाहनी, स्त्री, (आवाह्यतेऽनया। आङ्+वह्+णिच्+करणे ल्युट् ङीप्।) मुद्राविशेषः। यथा,
"हस्ताभ्यामञ्जलिं बद्धानामिकामूलपर्व्वणोः।
अङ्गुष्ठौ निःक्षिपेत् सेयं मुद्रा त्वावाहनी स्मृता"॥
इति तन्त्रशास्त्रं॥

आविः, [स्] य, (अवते। उङ्शब्दे+इर्।) प्राकाश्यम्। प्रस्फुटत्वं। तत्पर्य्यायः। प्रादुः २। इत्यमरः॥

आविकः, पुं, (अविना मेषलोम्ना कृतम् इति अवि+ठक्।) कम्बलं। इति हलायुधः॥ (त्रि, मेषलोम्ना निर्म्मितं,। २।४१
"वसोरन्नानुपूर्व्वेण शाणक्षौमाविकानि च"।
भेड़ीदुग्धं। यथा वैद्यके,—
"आविकं लवणं स्वादु स्निग्धोष्णं वाप्यरीप्रगुत्।
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम्॥
गुरु कासेऽनिलोद्भूते केवले चानिले वरम्"।
इति।)

आविघ्नः, पुं, (आङ्+विज्+क्तः।) अविघ्नः। करमर्द्दकः। इति शब्दरत्नावली॥ याणि आमला इति ख्यातः। इत्यमरटीकासारसुन्दरी॥ (उद्विग्नः उत्कण्ठितः।)

आविर्भावः, पुं, (आविस्+भू+घञ्।) प्रकाशनः। देवावतरणं। प्रादुर्भावः। यथा,—
"तदा मे मनसा ध्यातो दयासिन्धुर्जनार्दनः।
भक्तानामनुकम्पार्थं यस्याविर्भावमिच्छति"॥
इति जैमिनिभारते आश्वमेधिके पर्व्वणि २ अध्यायः॥

आविर्भूतः, त्रि, (आविस्+भू+क्त।) प्रकाशितः। अधिष्ठितः। जन्मयुक्तः। अवतीर्णः। प्रादुर्भूतः। आविर्भावविशिष्टः। यथा,—
"उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ।
लग्ने कर्कटके पुनर्व्वसुदिने मेषं गते भूपणि।
निर्दग्धुं निखिलाघपल्लवसमिधो मध्यादयोधारणेराविर्भूतमभूदपूर्व्वविभवं यत्किञ्चिदेकं महः"॥
"तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी।
आविर्भूता महाघोरा योगिनीकोटिभिः सह"॥
इति च तिथ्यादितत्त्वम्॥

आविष्कारः, पुं, (आविस्+कृ+घञ्।) प्रकाशः॥ (यथा साहित्यदर्पणे, २ परिच्छेदे।
"आविष्कारातिशयवाभिधेयवत् स्फुटप्रतीयर्त्ते"।)

आविष्कृतः, त्रि, (आविस्+कृ+क्तः।) प्रकाशितः। तत्पर्य्यायः। प्रकटितः २। इति हेमचन्द्रः। (यथा उत्तरचरिते, षष्ठाङ्के। "आविष्कृतं कथाप्रावीण्यं वत्सेन"।)

आविष्टः, त्रि, (आ+विश्+क्तः।) प्रेतवाहितः। भूतादिग्रस्तः। इति चिकित्साशास्त्रेषु॥ आवेशयुक्तः। निविष्टः॥ (उपहतः। यथा कामन्दकः,
"आविष्टइव दुःखेन हृद्गतेन गरीयसा"।)

आवीरचूर्णं, क्ली, (आवीरमेव चूर्णम्।) पञ्चगु। भागु इति वङ्गभाषा। आवीर इति हिन्दीभाषा। यथा,—
"चन्दनागुरुकस्तूरीकुङ्कुमद्रवसंयुतं।
आवीरचूर्णं रुचिरं गृह्यतां परमेश्वर"॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः॥

आवुकः, पुं, (अवति रक्षतीति। अव+बाहुलकादुण्+कन्।) नाप्तोक्तौ पिता। इत्यमरः॥

आवृत्, स्त्री, (आङ्+वृत्+क्विप्।) अनुक्रमः। परिपाटी। इत्यमरः॥ (प्रकारः। जातकर्म्मादिक्रियाकलापः। यथा मनुः, ३।२४८। २।६६।
"अनयैवावृता कार्य्यं पिण्डनिर्वपणं सुतैः"।

"अमन्त्रिका तु कार्य्येयं स्त्रीणामाहृदयेषतः" ॥)

आहृतः, त्रि, (आङ्+हृ+क्तः।) कृतावरणः। तत्पर्य्यायः। वेष्टितम् २ वलयितम् ३ संवीतम् ४ रुद्धम् ५। इत्यमरः॥ (आच्छादितं, प्राहृतं, आकीर्णं। वर्णभेदः, स च ब्राह्मणादुग्रजातीयायां जातः।)

आहृत्तः, त्रि, (आङ्+हृत्+क्तः।) कृतावरणः। आहृतः। इत्यमरटीका॥ (अभ्यस्तः, क्रमवैपरीत्येन स्थापितः, प्रतिनिवृत्तः, पलायितः, उद्वर्त्तितः, परिवर्त्तितः। यथा उत्तरचरिते,

"स कृतघ्न एव सन्दर्शोऽस्माकमाहृत्तः"।)

आवेगः, पुं, (आङ्+विज्+घञ्।) त्वरा। इति हेमचन्द्रः॥ (यथा दशरूपके,—

"आवेगः सम्भ्रमोऽस्मिन्नभिसरणजनिते स्खलनादियोगो वातात् पांसूपदिग्धस्त्वरितपदगतिर्वर्हजे पिञ्छिताङ्गः"। यथा अमरशतके ८, ३।

"आवेगादवधीरितः प्रियतमस्तूष्णींस्थितस्तत्क्षणात्"।)

आवेगी, स्त्री, (आङ्+विज्+घञ्+ङीप्।) वृद्धदारकवृक्षः। इत्यमरः राजनिर्घण्टश्च। (अस्या गुणादयो वृद्धदारकशब्दे द्रष्टव्याः॥)

आवेदनं, क्ली, (आङ्+विद्+ल्युट्।) निवेदनं। (विज्ञापनम्।)

आवेशः, पुं, (आङ्+विश्+घञ्।) अहङ्कारविशेषः। तत्पर्य्यायः। संरम्भः २ आटोपः ३। अपस्माररोगः। इति हेमचन्द्रः॥ भूतादिना रोगः। तत्पर्य्यायः। भूतसञ्चारः २ भूतक्रान्तिः ३ यक्षामयः ४। इति राजनिर्घण्टः॥ आसक्तिः। अभिनिवेशः॥ (यथा रघुवंशे, ५।१९।

"तस्मै क्षयावेशविवर्द्धिताय"।)

आवेशनं, क्ली, (आविश्यतेऽस्मिन्। आङ्+विश्+ल्युट्।) शिल्पशाला। इत्यमरः॥ (मनुः, ९।२६५।

"जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च"। (भावे ल्युट्।) भूतावेशः। (यथा, साहित्यदर्पणे ३ परिच्छेदे।

"मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः"।) प्रवेशः। इति मेदिनी॥ कोपः। इति धरणी॥ परिवेशः। इति हेमचन्द्रः॥

आवेशिकः, त्रि, (आवेशं संरम्भं प्राप्तः। आवेश+ठञ्।) आगन्तुः। अतिथिः। इत्यमरः॥ क्लीवं। असाधारणं। तत्पर्य्यायः। अन्यासाधारणं २ प्रातिस्विकं ३। इति त्रिकाण्डशेषः॥

आवेष्टकः, पुं, (आङ्+वेष्ट+ण्वुल्।) प्राचीरादिः। इति हलायुधः॥ पाँचिल वेड़ा इत्यादि भाषा॥

आवीधनं, क्ली, (आङ्+व्यध्+ल्युट्।) ज्ञानम्। बुद्धिः॥

आशंसा, स्त्री, (आङ्+शंस+अङ्+टाप्।) इच्छा। आकाङ्क्षा। इति हेमचन्द्रः॥ (रघुवंशे, १२।४४।

"निदधे विजयाशंसां चापे सीताच्च लक्ष्मणे"।)

आशंसिता, [तृ] त्रि, (आङ्+शंस+तृच्।) आशंसाकर्त्ता॥ आकाङ्क्षाशीलः। इत्यमरः॥

आशंसुः, त्रि, (आङ्+शंस+उ।) आशंसिता। इच्छुः॥ इत्यमरः॥

आशक्तः, त्रि, (आङ्+शक्+क्तः।) सम्यक्शक्तिविशिष्टः॥

आशङ्का, स्त्री, (आङ्+शकि+अ+टाप्।) भयं। त्रासः। इति हेमचन्द्रः॥ (संशयः, वितर्कः।) शाकुन्तले, प्रथमाङ्के।

"नक्षाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति"। कथासरित्सागरे, १४ तरङ्गे।

"तत् श्रुत्वा विगताशङ्कस्तामकारयदूषिताम्"।)

आशनः, पुं, (अशन+स्वार्थे अण्) अशनवृक्षः। इति भरतः द्विरूपकोषश्च॥

आशयः, पुं, (आङ्+शीङ्+अच्।) अभिप्रायः। मनसवृत्तः। आधारः। इति विश्वमेदिन्यौ॥ विभवः। किण्वचानः। चेतः। अजीर्णं। कोष्ठागारं। इत्यजयपालः। धर्म्माधर्म्मौ। अदृष्टं। इति कुसुमाञ्जलिः॥ (अभिप्रायार्थे यथा, कथासरित्सागरे, १२ तरङ्गे।

"तच्चालोक्याशयं बुद्धा तस्य सोऽपि वसन्तकः"। चित्तार्थे यथा, भगवद्गीतायां, १०।२०।

"अहमात्मा गुडाकेश सर्व्वभूताशयस्थितः"।

"आशयाः सप्त"। "आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयो मूत्राशयः स्त्रीणां गर्भाशयोऽष्टम"इति। सुश्रुतः॥)

आशयाशः, पुं, (आशेरतेऽत्रेत्याशयः। एरच्। आधारः। तमश्नाति। कर्म्मण्यण्।) आशयाशः। अग्निः। इत्यमरटीकायां स्वामी॥

आशरः, पुं, (आ शृणाति शॄ हिंसायां+पचाद्यच्।) अग्निः। राक्षसः। इति मेदिनी॥

आशा, स्त्री, (आ समन्तात् अश्नुते व्याप्नोतीति। आङ्+अशू+पचाद्यच्+टाप्।) दीर्घाकाङ्क्षा। आयता तृष्णा। (यथा, भ्रान्तिशतके, ४।२६।

"आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला"। दिक्। इत्यमरः।

वासवाशामुखे भाति इन्द्रचन्दनविन्दुवत्"॥

इति साहित्यदर्पणे १० परिच्छेदे। स्वनामख्याता दक्षप्रजापतिकन्या। यथा, हरिवंशे,—

"श्रीर्कीर्त्तिस्तथा कीर्त्तिराशा मेधा च सुव्रता"।)

आशाढः, पुं, आषाढ़मासः। व्रतिनां पलाशदण्डः। इत्यमरटीका द्विरूपकोषश्च॥

आशाढा, स्त्री, पूर्व्वाषाढानक्षत्रं। उत्तराषाढा च॥

आशापुरसम्भवः, पुं, (आशापुरात् सम्भवो यस्य।) भूमिजगुग्गुलुः। इति राजनिर्घण्टः॥

आशाबन्धः, पुं, (आशाया बन्धः। षष्ठीतत्।) समाश्वासः। (मेघदूते,—

"आशाबन्धः कुसुमसदृशं प्रायशोह्यङ्गनानां। सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि"॥)

प्रत्याशा। मर्कटजालकं। माकड़सार जाल इति भाषा। इति मेदिनी॥

आशितं, त्रि, (आङ्+अशू+क्तः।) अशितं। भुक्तं इति जटाधरः॥

आशितङ्वीनं, त्रि, (आशिता भोजिता गावो यत्र अयङ्स्थाशितङ्वलमिति खः। निपातनात् पूर्व्वस्य मुम्।) अशिताङ्वीनं। गावो यत्राशिताः पुरा। इत्यमरः॥ (यथा भट्टिकाव्ये ४र्थे सर्गे।

"हित्वाशीतङ्वीनानि फलैर्यत्राशितम्भवम्"।) पूर्व्वे ये स्थाने गरु चरियाछेइति भाषा।

आशितम्भवं, क्ली, (आशित+भू+खच्+मुमागमः।) अन्नादि। इत्यौ पुं। इति मेदिनी॥ (यावता अन्नेन अतिशयादिः भोजितः तृप्तोभवति तावत् अन्नादिकम्। यथा, भट्टिकाव्ये ४र्थे सर्गे,—

"हित्वाशिताङ्वीनानि फलैर्यत्राशितम्भवम्"।)

आशिता [तृ] त्रि, (आ अश्नातीति। आ+अशू+तृच्।) बहुभोजनशीलः। अतिशयभोक्ता। इति हेमचन्द्रः॥

आशिरः, पुं, (आ+अश+किरच्।) राक्षसः। अग्निः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (सूर्य्यः।)

आशीः, [स्] स्त्री, (आङ्+शास्+क्विप्+उपधाया इत्वम्) आशीर्व्वादः। सर्पदन्तः। इत्यमरः॥ वृद्धिनामौषधिः। इति राजनिर्घण्टः॥ (हितप्रार्थनं, अभीष्टवृद्धिप्रार्थनं। यदुक्तं,—

"वात्सल्यात् यत्र मान्येन कनिष्ठस्याभिधीयते। इष्टावधारकं वाक्यमाशीः सा परिकीर्त्तिता"॥ यथा, कुमारे ७।४७।

"तस्मै जयाशीः सस्वजे पुरस्तात्"।)

आशी, स्त्री, (आङ्+अश्+अच्+ङीप्।) हिताशंसनं। अहिदन्तः। सर्पविषं। इति शब्दरत्नावली॥ [इति विषविद्या॥

"आशी तालुगता दंष्ट्रा तया दष्टो न जीवति"।

आशीर्व्वादः, पुं, (आशिषो वादः षष्ठीतत्।) आशीर्व्वचनं। मङ्गलप्रार्थना॥ (यथा, मनुः। २।३३।

"मङ्गल्यं दीर्घवर्णान्तमाशीर्व्वादाभिधानवत्"।)

आशीविषः, पुं, (आशिषि दंष्ट्रायां विषमस्य सः पृषोदरादित्वात् साधुः।) सर्पः। इत्यमरः॥ रघुवंशे,—३।५७।

"गरुत्मदाशीविषभीमदर्शनैः"।

आशुः, पुं, क्ली, (अश्नुते इति। अशूङ् व्याप्तौ उण्।) ग्रीष्मः। द्रुतम्। (यथा शाकुन्तले १ अङ्के। ("तदाशु कृतसन्धानं प्रतिसंहर सायकम्"।). सत्त्वगामि वेगे त्रि। इत्यमरः॥

आशुगः, पुं, (आशु शीघ्रं गच्छतीति। आशु+गम्+ड।) वायुः। बाणः। (रघुवंशे, १२।९१।

"रावणस्यापि रामास्त्रो भित्वा हृदयमाशुगः"।) शीघ्रगामिनि, त्रि। इत्यमरः॥ मनुः ४।९८। ("विनीतैस्तु व्रजेन्नित्यमाशुगैर्जन्तुवाजितैः"।)

आशुपत्री, स्त्री, शल्लकीलता। इति रत्नमाला॥

आशुव्रीहिः, पुं, (आशुः व्रीहिः।) आशुधान्यं। इत्यमरटीकायां भरतमुकुटौ॥

आस्रुग्लक्षिः, पुं, (आ समन्तात् स्रोतुमिच्छति । आङ् + स्रुष् + सन् + अनि ।) अग्निः । इत्यमरः ॥ (यथा कादम्बर्याम्,—"मन्त्रपूतानि हवींषि प्रतिगृह्णाति एतत्प्रीत्या आस्रुग्लक्षिः" ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

आस्रेकुटी, [न्] पुं, पर्व्वतः । इति शब्दमाला ॥

आस्थर्य्यं, क्ली, (आङ् + चर् + ण्यत् + सट् निपातनात् ।) अपूर्व्वं । तत्पर्य्यायः । विस्मयः २ अद्भुतं ३ चित्रं ४ । इत्यमरः । (यथा, रघौ १६।८७ ।

"गन्धोदग्रं तदनु वहतः पुष्पमास्थर्य्यमेघाः" ।)

आस्मनः, पुं, (आस्मन् + अण् ।) अरुणः । सूर्य्यसारथिः । इति त्रिकाण्डशेषः ॥ (अस्मनि प्रस्तरे भवमित्यर्थे अस्मन् + अण् । शिलाभववस्तुनि त्रि । यथा भट्टौ ४ । २६ ।

"यच्चापमास्मनप्रख्यं सेषुं धत्तेऽन्यदुर्व्वहम्" ।)

आश्रमः, पुं,क्ली, (आङ् + श्रम + घञ् ।) शास्त्रोक्तधर्म्मविशेषः । आश्राम्यन्ति खं खं तपश्चरन्त्यत्र । स चतुर्विधः । ब्रह्मचर्य्यं १ गार्हस्थ्यं २ वानप्रस्थ्यं ३ सन्न्यासः ४ । इति स्मृतिः ॥ ब्रह्मचारी । गृहः । वानप्रस्थः । भिक्षुः । इत्यमरः ॥ मुनीनां वासस्थानं । वनं । मठः । इति मेदिनी ॥ (कलियुगे तु ब्रह्मचर्य्यवानप्रस्थौ न स्तः केवलं गृहस्थभिक्षुकाश्रमावेव, यदुक्तं । महानिर्व्वाणतन्त्रे ।

"गार्हस्थो भैक्षुकश्चैव आश्रमौ द्वौ कलौ युगे" ।

रघुवंशे, १।४८ ।

"स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः" ।)

आश्रमिकः, त्रि, (आश्रम + ठक् ।) आश्रमयुक्तः । इति शब्दरत्नावली ॥

आश्रयः, पुं, (आङ् + श्रि + अच् ।) राज्ञां सन्ध्यादिषड्गुणान्तर्गतगुणविशेषः । इत्यमरः ॥ व्यपदेशः । (यथा, मनु २।११ ।

"येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते ॥
एष धर्म्मो विधिः साक्षादुक्तः कर्म्मविधौ स्मृतौ ।
वेदस्मृत्युदितं सम्यङ्निबद्धं स्वेषु कर्म्मसु ॥
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्व्विधं प्राहुः साक्षाद्धर्म्मस्य लक्षणम् ॥
सर्व्वं तु समवेक्ष्येदमिदं धर्म्मागमं स्वधीः ।
तं तं निषेवमाणो हि न स्खलेत् स्वकृतेष्वपि ॥
श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्म्मावुभौ स्मृतौ ।
उभावपि हि तौ धर्म्मौ सम्यगुक्तौ मनीषिभिः ॥
यमावेकत्र वा तुल्यौ विकल्पो विहितावुभौ ।
यथा यथा हि सद्धर्म्मो न हीयेत तथा तथा ॥
समवेत्य तु तत्त्वेन बुद्धेर्यो भवति परः ।
स तत्र लभते सर्व्वं विन्दते च परं सुखम् ॥
एवं सदा सर्व्वभूतेष्वात्मानं पुरुषोऽभ्यसन् ।
समदर्शनमभ्येति ब्रह्म चाव्यक्तगं परम् ॥
अहिंसयेन्द्रियासङ्गैर्व्वैदिकैश्चैव कर्म्मभिः ।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ॥
इह चानुत्तमां कीर्त्तिं पुरुषः कर्म्मभिः श्रुतैः ।
वसन्नेवाश्रमे पुण्ये सुखमत्यन्तमश्नुते ॥
आश्रमादाश्रमं गत्वा नरो नियतमानसः ।
न कुतश्चिद्भयमाप्नोति मुच्यते सर्व्वकिल्बिषैः ॥
एवं प्रवर्त्तमानस्य गृहस्थस्य यथाविधि ।
स्नातकस्य द्विजातेश्च वृत्तिं लिप्सेत कर्म्मणा ॥
ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेत् ॥
कुसीदं दशकं ख्यातं तस्मात्तद्द्विगुणं स्मृतम् ।
त्रिगुणे व्यवहारस्तु तस्मात्कृषिमुपानयेत् ॥
कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिता ।
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ॥
तृणं काष्ठं च धान्यं च यावदत्यन्तमश्नुते ।
तावतो जीवतो दण्डो नान्यथेति विधारणा ॥
हन्यन्ते जीवसङ्घा हि शश्वत्कृषिगतास्त्विह ।
स्थावराणां च सत्त्वानां हिंसा तत्र प्रवर्त्तते ॥
हिंसाप्रायो हि यो धर्म्मः कुतस्तं प्रतिपद्यते ।
वर्ज्जयेत्तां प्रयत्नेन कृषिं पापफलां द्विजः ॥
कृषौ हि महती हिंसा द्विपदां च चतुष्पदाम् ।
कृषिं नियच्छतो भूयस्तस्मात्तां परिवर्ज्जयेत् ॥
कृषिं तु नाद्रियन्ते ये कृषिजीवी च सत्तमः ।
तेषां संजायते पुण्यं कृषिकर्त्तुः पदे पदे

आषाढ़ाभूः, पुं, (आषाढ़ा + भू + क्विप्।) मङ्गलग्रहः। इति हेमचन्द्रः॥

आषाढ़ी, स्त्री. (आषाढ़स्य इयं। आषाढ़ + अण् + ङीप्।) आषाढ़मासस्य पूर्णिमा। इति मेदिनी॥

आप्, क्ली, (अश्नुते आप्नोतीति अप् + डुन् इडिच्च।) आकाशं। इत्युणादिकोषः॥

आस, ञि ङ ल उपवेशने। (अदा०-आत्म०-अक०-सेट्।) इति कविकल्पद्रुमः॥ विद्यमानतायां। इति तट्टीका॥

("आसने भगवानास्तां सहैभिर्मुनिपुङ्गवैः"। इति रामायणे १ काण्डे) ञि आसितेऽस्ति। ल ड आस्ते सिंहासने नृपः। विद्यमानतायामप्ययं। आकाशमास्ते। इति दुर्गादासः॥ (सम् + अधि) सम्यगुपवेशने। आप्तौ। यथा रघुवंशे, १३।५२।

"वीरासनेर्थानजुषामधीशा-
ममी समध्यासितवेदिमध्याः"।

(अनु) पश्चादुपवेशने। यथा रघौ, २।२४।

"तामन्तिकन्यस्तबलिप्रदीपा-
मन्वास्य गोप्ता गृहिणीसहायः"। इति।

उपासनायां। यथा रामायणे,—

"ततश्चीरोचरासङ्गः सन्ध्यामन्वास्य पश्चिमाम्"। इति।

(अभि) अभ्यासे। (उत्) उपेक्षायां। यथा माघे। २।४२।

"विधाय वैरं सामर्षे नरोऽरौ य उदासते"। इति।

(उप) समीपोपवेशने। यथा मनुः, ४।१५४।

"कृताञ्जलिरुपासीत गच्छतः पृष्ठतोऽन्वियात्"। इति।

वह्वाञ्जलिश्च गुरुसमीपमासीत इति तट्टीका॥ उपासनायां। यथा,—

"मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते"। इति गीतायां १२।२। सेवने। यथा,—

"उपासते ये महसा! परपाकमबुद्धयः"। इति मनुः ३।१०४। परपाकमुपासते सेवन्ते इति तट्टीका। (निर्) निरासे। अपसारणे। (प्रति + सम्) प्रतिदन्दितयावस्थाने। "कोऽन्यः प्रतिसमासेत कालान्तकयमादृते"। इति भारतम्। इत्यादि।)

आसः, पुं, (अस्यन्ते क्षिप्यन्ते अनेनेति। अस् + करणे घञ्।) धनुः। इति हेमचन्द्रः॥

आसक्तः, त्रि, (आङ् + सञ्ज + क्तः।) आसक्तिविशिष्टः। तत्पर्य्यायः। तत्परः २ प्रसितः ३। इत्यमरः॥ (विषयान्तरपरिहारेण सर्व्वदा निविष्टः। यथा, किराते।११।३४।

"असक्तास्त्वासभी मूढ़ा वामशीला हि जन्तवः"।)

आसक्तं, क्ली, (आङ् + सञ्ज + क्तः।) नित्यं। सततं। अविरतं। इति जटाधरः॥

आसक्तिः, स्त्री, (आङ् + सञ्ज + क्तिन्।) आनुरक्तिः। आसङ्गः॥

आसङ्गं, क्ली, (आङ् + सञ्ज + अच्।) अनवरतं। नित्यं। सततं। तत्युक्ते त्रि। इति जटाधरः॥

(यथा, कुमारे।५।६।

"न षट्पदश्रेणिभिरेव पङ्कजं
सप्रेवलासङ्गमपि प्रकाशते"।)

तुवरी। सौराष्ट्रमृत्तिका इति यावत्। इति राजनिर्घण्टः॥ आसक्तिः॥ (यथा, गीतायां ४।२०।

"त्यक्त्वा कर्म्मफलासङ्गमित्यतृप्तो निराश्रयः"।)

आसङ्गिनी, स्त्री, (आसङ्ग + इनि + ङीप्।) चक्रवातः। वातभ्रमः। इति त्रिकाण्डशेषः॥ घूरणिया वातास इति भाषा।

आसत्तिः, स्त्री, (आङ् + सद् + क्तिन्।) सङ्गमः। लाभः। इति मेदिनी॥ (अविच्छेदः। निरन्तरं। यथा, साहित्यदर्पणे २ य परिच्छेदे।

"वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः"। आसत्तिर्बुद्ध्यविच्छेदः" इति तट्टीका।)

न्यायसते पदसन्निधानकारणं। यत्पदार्थस्य यत्पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिकारणं। इति सिद्धान्तमुक्तावली॥

आसनं, क्ली, (आस्यते उपविश्यतेऽस्मिन्। आस् + अधिकरणे + ल्युट्।) पीठ। पिँड़ि चौकि इत्यादि भाषा। हस्तिस्कन्धदेशः। यत्र महामात्रो निवसति। विजिगीषोर्दुर्गादीनवर्द्धयतः स्थितिः। इत्यमरः॥ याचानिवर्त्तनं। इति मेदिनी॥ अष्टाङ्गयोगस्य द्वितीययोगाङ्गं। तत्तु पद्मप्रकारकरचरणादिसंस्थानविशेषः। यथा,—

"पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा।
वीरासनमिति प्रोक्तं क्रमादासनपञ्चकम्"॥

तेषां क्रमः।

"ऊर्व्वोरुपरि विन्यस्य सम्यक् पादतले उभे।
अङ्गुष्ठौ च निबध्नीयात् हस्ताभ्यां व्युत्क्रमात्तथा॥
पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम्॥१॥
जानूर्व्वोरन्तरे सम्यक् कृत्वा पादतले उभे।
ऋजुकायो विशेन्मन्त्री स्वस्तिकं तत् प्रचक्षते॥२॥
सीमन्याः पार्श्वयोर्न्यस्येद्गुल्फयुग्मं सुनिश्चलम्।
वृषणाधःपादपार्ष्णिं पार्ष्णिभ्यां परिबन्धयेत्॥
भद्रासनं समुद्दिष्टं योगिभिः सारकल्पितम्॥३॥
ऊर्व्वोः पादौ क्रमान्न्यस्येत् कृत्वा प्रत्यङ्मुखाङ्गुली।
करौ निदध्यादाख्यातं वज्रासनमनुत्तमम्॥४॥
एकपादमधः कृत्वा विन्यस्योरौ तथेतरम्।
ऋजुकायो विशेन्मन्त्री वीरासनमितीरितम्"॥५॥

इति तन्त्रसारः॥ अन्यच्च।

"आसनानि कुलेशानि यावन्तो जीवजन्तवः।
चतुरशीतिलक्षाणि चैकैकं समुदाहृतम्।
आसनेभ्यः समस्तेभ्यः साम्प्रतं द्वयमुच्यते।
एकं सिद्धासनं नाम द्वितीयं कमलासनम्"॥

इति निरुक्ततन्त्रम्॥

षट्कारासनानि वन्द्यशब्दे द्रष्टव्यानि॥

उपवेशनाधारः। पीठादि। यथा।

श्रीभगवानुवाच।

"उपचारान् प्रवक्ष्यामि शृणु षोड़श भैरव।
यैः सम्यक् तुष्यते देवी देवोऽप्यन्यो हि मक्षितः॥
आसनं प्रथमं दद्यात् पौष्यं दारुजमेव वा।
वास्त्रं वा चार्म्मणं कौशं मण्डलस्योत्तरे त्यजेत्॥

पौष्यासनं यदिच्छितं यस्य तद्यदि गर्भकम्॥
निवेदयेत्तदा पद्मे विपुलं हारि चोत्सृजेत्।
पौष्यं पुष्पौघरचितं कुशसूत्रादिसंयुतं॥
अतिप्रीतिकरं देव्या ममाप्यन्यस्य भैरव।
यद्वा दारुसमुद्भूतमासनं मरुजं शुभम्॥
नोच्छ्रायं नातिविस्तीर्णमासनं विनियोजयेत्॥
अन्यदारूद्भवेनापि दद्यादासनमुत्तमम्॥
सकण्टकं क्षीरयुक्तं दारुसारविवर्जितम्।
चैत्यवृक्षशमीसंभूतं वर्जयित्वा विभीतकम्॥
वाल्कलं कोषजं फालं वल्लमेतत्त्रयं मतम्।
रोमजं कम्बलश्चैव तदनेन चतुष्टयम्॥
अनेन रचितं दद्यादासनं चेष्टभूतये।
सिंहव्याघ्रतरक्षूणां छागस्य महिषस्य च॥
गजानां तुरगाणाञ्च कृष्णसारस्य चर्म्मणः।
शूकरस्याथ रासस्य मृगाणां नवभेदिनाम्॥
चर्म्मभिः सर्व्वदेवानामासनं प्रीतिदं स्मृतम्।
वास्तेषु कम्बलं शुक्लमासनं देवतुष्टये॥
राङ्कवं चार्म्मणं श्रेष्ठं दारवं चन्दनोद्भवम्।
यच्चासनं कुशमयं तदासनमनुत्तमम्॥
सर्व्वेषामपि देवानामृषीणाञ्च यतात्मनाम्।
योगपीठस्य सदृशमासनं स्थानमुच्यते॥
आसनस्य प्रदानेन सौभाग्यं मुक्तिमाप्नुयात्।
शम्बरो रोहितो व्याघ्रः सम्बरो वभ्रुणो रुरुः॥
शृङ्गैणहरिणाश्चेति मृगा नवविधा मताः।
हरिणाश्चापि विज्ञेयः पञ्चभेदोऽत्र भैरव॥
ऋष्यः खड्गो रुरुश्चैव एषतश्च मृगस्तथा।
एते बलिप्रदानेषु चर्म्मदाने च कीर्त्तिताः॥
सर्व्वेषां तैजसानाञ्च आसनं व्योमयुच्यते।
आयसं वर्ज्जयित्वा तु कांस्यं सीसकमेव वा॥
शिलामयं मणिमयं तथा रत्नमयं मतम्।
आसनं देवताभ्यस्तु मुक्तये मुक्तये समुत्सृजेत्॥*॥
अथैव साधकानाञ्च आसनं शृणु भैरव।
यत्रासीनः पूजकस्तु सर्व्वसिद्धिमवाप्नुयात्॥
शैलाञ्च चार्म्मणं वास्त्रं तैजसञ्च चतुष्टयम्।
आसनं साधकानाञ्च सततं परिकीर्त्तितम्॥
पूर्व्वोक्तं यच्च देवेभ्य आसनं परिकीर्त्तितम्।
तत्सर्व्वमासनं शुक्लं पूजाकर्म्मणि साधके॥
न यथेष्टासनो भूयात् पूजाकर्म्मणि साधकः।
काष्ठादिकासनं कुर्य्यात् मितमेव सदा बुधः॥*॥
चतुर्व्विंशत्यङ्गुलेन दीर्घं काष्ठासनं मतम्।
षोड़शाङ्गुलविस्तीर्णमुत्सेधचतुरङ्गुलम्॥
षड़ङ्गुलं वा कुर्य्यात्तु नोच्छ्रितं चात्र कारयेत्।
पूर्व्वोक्तं वर्ज्जयेदन्यमासनं पूजनेष्वपि॥
वास्त्रं द्विहस्तान्नो दीर्घं सार्द्धहस्तान्न विस्तृतम्।
न व्यङ्गुलात्तथोच्छ्रायं पूजाकर्म्मणि संश्रयेत्॥
यथेष्टं चार्म्मणं कुर्य्यात् पूर्व्वोक्तं सिद्धिदायकम्॥
षड़ङ्गुलाधिकं कुर्य्यान्नोच्छ्रितन्तु कदाचन।
कार्म्मलं चार्म्मणं चैलं महामायाप्रपूजने॥
प्रशस्तमासनं प्रोक्तं कामाख्यायास्तथैव च।
त्रिपुरायाश्च सततं विष्णोश्चापि कुशासनम्॥
वङ्कदीर्घं वङ्कहस्तायं तथैव वङ्कविस्तृतम्।
दारुभूमिसमं प्रोक्तमप्यपि सर्व्वकर्म्मणि॥

पृथक् पृथक् कल्पयेच्च शोभनं तादृशासनम्।
न पञ्चमासनं कुर्य्यात् कदाचिदपि पूजने ॥
न प्राग्यङ्गससमुद्भूतमस्थिजं हिरदाहृते।
मातङ्गदन्तसञ्जातमासनं कामिके चरेत् ॥
चर्म्मपूर्व्वोदितं ग्राह्यं तथा गन्धमृगस्य च ॥१॥
सलिले यदि कुर्व्वीत देवतानां प्रपूजनम् ॥
तत्राप्यासनमासीनो नोत्थितस्तु समाचरेत्।
तोये शिलामयं कुर्य्यादासनं कौशमेव वा ॥
दारवं तैजसं वापि नान्यदासनमाचरेत्।
आसनारोपसंस्थानं स्थानाभावे तु पूजकः ॥
आसनं कल्पयित्वा तु मनसा पूजयेज्जले ॥
यद्यासनस्य संस्थानं तोयमध्ये न विद्यते ॥
अन्यत्र वा तदा स्थित्वा देवपूजां समाचरेत्।
इत्येतत् कथितं पुत्र पूज्यपूजकसङ्गतम् ॥
आसनं पाद्यमधुना शृणु वेतालभैरव" ॥
इति कालिकापुराणे ६७ अध्यायः ॥

आसनः, पुं, (अस क्षेपने + ल्युः + प्रज्ञाद्यण्।) जीवकवृक्षः। इति मेदिनी ॥ (जीवकवृक्षशब्देऽस्य विशेषो ज्ञेयः।)

आसना, स्त्री, (आस्यतेऽस्याम्। आस + ल्यासश्रन्थो युच्।) स्थितिः। इत्यमरः ॥

आसनी, स्त्री, (आस्यतेऽस्मिन्। आस + अधिकरणे ल्युट् + स्त्रियां ङीप्।) विपणिः। (आस + भावे + ल्युट् + ङीप्) स्थितिः। इति मेदिनी ॥

आसन्दः, पुं, (आसं ददातीति। आस + ड।) वासुदेवः। इति मेदिनी ॥

आसन्दी, स्त्री, (आस्यतेऽस्यां। आस्। अन्दादयश्चेति साधुः।) क्षुद्रखट्वा। इति मेदिनी ॥ (यथा, शतपथब्राह्मणे ५।४।४।१। "तस्मादस्मा आसन्दीमाहरन्ति सैषा खादिरी विदग्धा भवति येयं वभ्रुयुता भरतानाम्"।)

आसन्नः, त्रि, (आङ् + सद् + क्तः।) निकटः। इत्यमरः ॥ (समीपवर्त्ती, कुमारसम्भवे, ३।४४॥ "आसीनमासन्नशरीरपातः"। अस्ताभिमुखः सूर्य्यः।)

आसवः, पुं, (आस् + सुञ् + अप्।) मद्यविशेषः। तत्पर्य्यायः। मैरेयं २ शौण्डः ३। इत्यमरः ॥
"शौण्डिरुत्तरसैः पक्वैरपक्वैरासवो भवेत्।
मैरेयं धातकीपुष्पगुडधानाद्यसंहितम्" ॥
इति माधवेन भेदः कृतस्यापि सूक्ष्ममनादृत्येदमुक्तम्। इति भरतः ॥ मद्यमात्रम्। इति राजनिर्घण्टः ॥ (यथा मनुः ११।९५।
"यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवं।
तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः" ।)
("यदपक्वौषधाम्भ्यां सिद्धं मद्यं स आसवः"। इति शार्ङ्गधरः। यथा भावप्रकाशे।
"आसवस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः" ।)
आसवभेदेन गुणभेदो यथा ॥
"क्लेदी मध्वासवस्तीक्ष्णो मेहपीनसकासजित्"।
"शार्करः सुरभिः खादुर्हृद्यो गतिमदो मधुः"।
इति च वाभटः ॥
"सुखप्रियः सुखमदः सुगन्धिर्वक्त्ररोगनुत्।
जरणीयः परिणतो हृद्यो वर्ण्यश्च शार्करः"।
"रोचनो दीपनो हृद्यः शोषशोफार्शसंहितः।
स्नेहश्लेष्मविकारघ्नो वर्ण्यः पक्वरसो मतः" ॥
"मृदो भिन्नग्रहदातो गौडस्तर्पणदीपनः।
क्लेदी मध्वासवस्तीक्ष्णो मैरेयो मधुरो गुरुः" ॥
इति चरकः ॥ तथा च सुश्रुते ॥
"तीक्ष्णः सुरासवो हृद्यो मूत्रलः कफवातनुत् ॥
मुखप्रियः शिरमदो विज्ञेयोऽनिलनाशनः।
लघुर्मध्वासवस्क्लेदी मेहकुष्ठविषापहः ॥
तिक्तः कषायः शोफघ्नस्तीक्ष्णः खादुरवातहृत्।
तीक्ष्णः कषायो मदहृद्दुर्नामकफगुल्महृत् ॥
कृमिमेदोऽनिलहरो मैरेयो मधुरो गुरुः।
बल्यः पित्तहरो वर्ण्यो मद्वीकेक्षुरसासवः" ॥)

आसवद्रुः, पुं, (आसवस्य द्रुः।) तालवृक्षः। इति राजनिर्घण्टः ॥

आसादितः, त्रि, (आङ् + सद् + णिच् + क्तः।) प्राप्तः। लब्धः। इत्यमरः ॥ (सन्निधापितः, आयोजितः, सम्पादितः।)

आसारः, पुं, (आङ् + सृ + घञ्।) धारासंपातः। वेगवृष्टिः। (मेघदूते, "त्वामासारप्रशमितवनोपप्लवं साधु मूर्द्धा"। प्रसरणम्। सैन्यानां सर्व्वतो व्याप्तिः। इत्यमरः ॥ (यथा पञ्चतन्त्रे ।३।४९।
"तस्मात् दुर्गं दृढं कृत्वा सुभटासारसंयुतं"।)
सङ्घट्टनम्। इति मेदिनी ॥ (यथा पञ्चतन्त्रे ३।२९।
"अज्ञातवीर्यधासारतोयप्रस्थो व्रजेत्तु यः"।)

आसीनः, त्रि, (आस् + शानच्।) उपविष्टः। इति जटाधरः ॥ वसा लोक इत्यादि भाषा।

आसीनप्रचलायितं, क्ली, (आसीनेन उपविष्टेन प्रचलवदाचरितम्।) उपविश्य निद्रावशेन दोलनम्। इति राजवल्लभः ॥ ढोला इति भाषा।

आसुतिः, पुं, (आसूयते + आङ् + सुञ् + क्तिन्।) मद्यसन्धानम्। इति हेमचन्द्रः ॥ मद चोयान इति भाषा।

आसुतीवलः, पुं, (आसुतिरस्यास्ति रजःशब्दात्मासुतिपरिषदौ वलच्। वलेति दीर्घः।) यज्वा। शौण्डिकः। इति हेमचन्द्रः ॥ (कन्यापालः, शूद्रजातिविशेषः।)

आसुरः, पुं, (असुर + प्रज्ञाद्यण्।) असुरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
"ब्राह्माद्याश्चाष्टधाविवाहान्तर्गतविवाहविशेषः।
"आसुरो द्रविणादानात्" ॥ इति याज्ञवल्क्यः।
"ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म्म उच्यते" ॥
इति मनुः ३।३१।

आसुरं, क्ली, विड्लवणम्। इति राजनिर्घण्टः ॥ असुरस्य भावः। (यथा गीतायां ७।१५।
"न मां दुष्कृतिनो मूढा प्रपद्यन्ते नराधमाः।
माययापहृतज्ञाना आसुरं भावमाश्रिताः" ।)
असुरसम्बन्धीये त्रि। इति शाकरभाष्यम् ॥

आसुरं, त्रि, (असुरस्येदम्। असुर + अण्।) असुरसम्बन्धि। यथा —
"यस्मिन् भवे पुराणे च विप्रे देवा न लेभिरे।
आसुरं तद्भवेत् श्राद्धं हवनं मन्त्रवर्जितम्" ।
इति श्राद्धतत्त्वे ऋग्वेदीयगरुडपरिशिष्टम् ॥
अपि च।
"स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने।
आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्ज्जयेत्" ॥
इति श्राद्धतत्त्वधृतयमवचनम् ॥*॥ आसुरसर्गो यथा।
"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥
प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुराः।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥
असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम्।
अपरस्परसम्भूतं किमन्यत् कामहैतुकम् ॥
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।
प्रभवन्त्युग्रकर्म्माणः क्षयाय जगतोऽहिताः ॥
काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः।
मोहात् गृहीत्वा सद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः ॥
चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः।
कामोपभोगपरमा एतावदिति निश्चिताः ॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥
इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम्।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥
असौ मया हतः शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥
अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥
आत्मसम्भावितास्तब्धा धनमानमदान्विताः।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्व्वकम् ॥
अहङ्कारं बलं दर्पं कामं क्रोधञ्च संश्रिताः।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥
तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्" ॥
इति श्रीभगवद्गीतायां १६ अध्यायः ॥

आसुरी, स्त्री, (असुरस्य इयं। असुर + तस्येदमित्यण् ततः ङीप्।) रात्रिका। राइ इति भाषा। इति राजनिर्घण्टः ॥ त्रिविधचिकित्सान्तर्गतचिकित्साविशेषः। सा च क्लेदभेदाद्द्वात्मिका। इति वैद्यकं शब्दचन्द्रिका च ॥

आसेचनः, त्रि, (न सिच्यते मनोऽत्र। नञ् + सिच् + अधिकरणे ल्युट्। ततः स्वार्थे अण्।) यस्य दर्शने तृप्तिरन्तो न जायते सः। तत्पर्य्यायः। अतृप्तिकृत् २। इति हारावली ॥ (आ + सिच् + करणे + ल्युट्। आसेचनपात्रम्। यथा, ऋग्वेदे १।१६९।१३। "या पात्र पूषा आसेचनानि"।)

आसेचनकः, त्रि, (आसेचन एव संज्ञायां कन्।) आसेचनकः। आसेचनः। इत्यमरटीकायां रायमुकुटः ॥ (यथा, साहित्यदर्पणे १०म परिच्छेदे।
"नयनयुगासेचनकं मानसतृप्त्यापि दुष्प्रापम्"।)

आस्कन्दनं, क्ली, (आङ् + स्कन्द + भावे ल्युट्।) तिरस्कारः। रवः। घोषणं। इति मेदिनी॥ (यथा किराते ६।२५। "चरणास्कन्दनामिता-चलेन्द्रः"।)

आस्कन्दितं क्ली, (आङ् + स्कन्द + भावे + क्त।) अश्व-गतिविशेषः। स च सम्यग्गतिः। इत्यमरः॥

आस्कन्दितकं, क्ली, (आस्कन्दितमेव स्वार्थे कन्।) आस्कन्दितं। अश्वानां पञ्चमगतिः। तत्पर्य्यायः। उत्तेरितं २ उपकण्ठं ३। इति हेमचन्द्रः॥ ("उत्तेरितमुपकण्ठमास्कन्दितकमित्यपि। उत्प्लुत्योत्प्लुत्य गमनं कोपादिवाखिलैः पदैः"। हेमचन्द्रः॥)

आस्तरः, पुं, (आस्तीर्य्यतेऽसौ। आङ् + स्तृ + अप्।) कटिकम्बलं। इति हेमचन्द्रः॥ वस्त्राद्यास्तरणं॥ (यथा भ्रान्तिशतके, २।१९। "वासो वल्कल-मास्तरः किसलयान्योक्तरूक्षां तलम्"॥)

आस्तरणं, क्ली, (आस्तीर्य्यते यत् येन वा आङ् + स्तृ + कर्म्मणि करणे वा ल्युट्।) हस्तिपृष्ठस्थित-चित्रकम्बलं। झूल इति भाषा। तत्पर्य्यायः। प्रवेणी २ वर्गः ३ परिस्तोमः ४ कुथा ५ कुथः ६। इत्यमरः॥ प्रवेणिः ७ परिस्तोमः ८ कुथं ९। इत्यमरटीका॥ (अथा, कुशासनं। यथा रामा-यणे, ३ काण्डे।

"राङ्कवास्तरणे पूर्ब्बमयोध्याधिपतिर्वसेत्"।

महाभारते, आदिपर्ब्बणि।

"दर्भास्तरणमास्तीर्य्य निधनात् धृतराष्ट्रजः"॥)

आस्तिकः, पुं, (अस्तीत्यस्य। अस्ति + ठक्।) मुनि-विशेषः। स तु जरत्कारुमुनिपुत्रः। तत्पिता गर्भस्थं तं ज्ञात्वास्तीत्युक्ता गत इत्यस्मादास्तिकः। (यथा,—

"अस्तीत्युक्ता गतो यस्मात् पिता गर्भस्थमेव तम्। वनं तस्मादिदं तस्य नामास्तिकेति विश्रुतम्"॥)

इति महाभारतम्॥

("आस्तिकस्य मुनेर्माता भगिनी वासुकेस्तथा"। इति मनसाप्रणाममन्त्रः।)

आस्तिकः, त्रि, (अस्ति ईश्वर इति मतिर्यस्य। अस्ति + ठक्।) नास्तिकभिन्नः। ईश्वरोऽस्तीति-वादी। वेदप्रामाण्यवादी। तत्पर्य्यायः। श्रद्धालुः २ आद्धः ३। इति हेमचन्द्रः॥

("सत्यधर्म्मच्युतात् पुंसः कुद्धादाशीविषादिव। अनास्तिकोऽप्युद्विजते जनः किं पुनरास्तिकः"॥ इति महाभारते आदिपर्ब्बणि॥)

आस्तिकाख्यदः, पुं, (आस्तिकस्य मुनेराख्यं सर्पसत्रात् निष्कृतिरूपप्रयोजनं ददाति यः। जनमेजयो राजा आस्तिकमुनिवचनात् सर्पयज्ञात् विरराम इति पौराणिकी कथा।) जनमेजयो राजा। इति शब्दरत्नावली॥

आस्तीकः, पुं, आस्तिकमुनिः। इति त्रिकाण्डशेषः॥

आस्तीकजननी, स्त्री, (आस्तीकस्य जननी माता, षष्ठीतत्पुरुषः।) आस्तिकमाता। मनसा देवी। इति शब्दरत्नावली॥

आस्था, स्त्री, (आङ् + स्था + अङ् + टाप्।) यत्नः। आलम्बनं। आस्थानं। अपेक्षा। इति मेदिनी-कारहेमचन्द्रौ॥ (श्रद्धा। आदरः। प्रतिष्ठा। यथा, रघौ १०।७३।

"दैवात् सर्गादवध्यत्वं मर्त्त्यास्यापराङ्मुखः"।

"विनश्वरे विहायास्यां यशः पालय मित्र मे"। इति हितोपदेशः॥)

आस्थानं, क्ली, (आस्थीयतेऽस्मिन् इति। आङ् + स्था + ल्युट्।) सभा। इत्यमरः। (यथा, किरातेे १।१६। "अनेकराजन्यरथाश्वसंकुलं तदीयमास्थानिकेतनाजिरम्"।) यत्नः। इत्यजयः॥ (आश्रयः। स्थानम्।)

आस्थानी, स्त्री, (आस्थान + ङीप्।) सभा। इत्य-मरः॥ ("आस्थानीं समये सभं रुपजनः सायन्तने सम्यतन्"। इति रत्नावली।)

आस्पदं, क्ली, (आस्पद्यतेऽस्मिन् इति। आस्पदं प्रति-ष्ठायामिति निपातनात् सुट्।) प्रतिष्ठा। कर्म्म। इत्यमरः॥ प्रभुत्वं। इति धरणी। स्थानं। इति हेमचन्द्रः॥ ("रागस्यास्पदमित्यवैमि न हि मे ध्वंसीति न प्रत्ययः"। इति नागानन्दे। तथा च रघौ ३।३६।

"नरेन्द्रमूलायतनादनन्तरं तदास्पदं श्रीर्युवराजसंज्ञितम्"।)

आस्पन्दनं, क्ली, (आङ् + स्पन्द + ल्युट्।) स्पन्दनं। कम्पनम्॥

आस्फालः, पुं, (आङ् + स्फुल् + घञ्।) हस्ति-कर्णास्फालनं। हातिर काण नाड़ा इति भाषा। तत्पर्य्यायः। झलज्झला। इति हारावली-त्रि-काण्डशेषौ॥ (आस्फालनं। सञ्चालनं।)

आस्फालनं, क्ली, (आङ् + स्फुल् + णिच् + ल्युट्।) आटोपः। प्रागल्भ्यम्॥ (यथा रघौ ९।७३।

"ऐरावतास्फालनविभ्रमं यः सङ्कट्टयन्नङ्गदमङ्गदेन"।)

आस्फुजित्, पुं, (आस्फु + जि + क्विप्।) शुक्राचार्य्यः। इति त्रिकाण्डशेषः॥

आस्फोटः, पुं, (आङ् + स्फुट् + अच्।) आस्फोत-वृक्षः। इति शब्दरत्नावली॥ आकन्द इति भाषा। शूरादेर्बाङ्कादिशब्दः। इति श्रीभागवतम्॥ ("कक्षैः कक्ष्यां विधुन्वानावास्फोटं तत्र चक्रतुः"। इति महाभारते सभापर्ब्बणि।)

आस्फोटकः, पुं, (आङ् + स्फुट् + ण्वुल्।) पर्व्वत-जपोलुवृक्षः। इति शब्दमाला॥ आकरोट इति भाषा।

आस्फोटनं, क्ली, (आङ् + स्फुट् + ल्युट्।) विकाशः। मुद्रणं। इति धरणी॥ बाङ्कादिशब्दः। ताल ठोका इत्यादि भाषा॥ (यथा रामायणे ५ काण्डे। "आस्फोटननिनादांस्च बालानां तत्र खेलताम्"॥ धान्यादेस्तुषविश्लेषकरणम्।)

आस्फोटनी, स्त्री, (आस्फुट्यतेऽनया। स्फुट् + करणे। ल्युट् + ङीप्।) वेधनिका। इत्यमरः॥ तुरपन भमर इत्यादि भाषा।

आस्फोटा, स्त्री, (आस्फोटयतीति। आङ् + स्फुट् + अच् + टाप्।) नवमल्लो। वनमल्लो। इति शब्द-रत्नावली॥ (नवमल्लीशब्देऽस्या विशेषो ज्ञेयः।)

आस्फोतः, पुं, (आस्फोटयतीति। आङ् + स्फुट् + अच् + पृषोदरादित्वात् साधुः।) अर्कवृक्षः। कोविदारकवृक्षः। इति मेदिनी॥ भूपलाशवृक्षः। इति शब्दचन्द्रिका॥ (यथा, वाभटे।

("मूलं सप्ताङ्गात्त्वक्क्षीरीधात्र्यमारा-दर्कान्मालत्याश्चित्रकास्फोतनिम्बात्।
बीजं कारञ्जं सार्षपं प्राणुनाटं श्रैष्ठा जन्तुघ्नं क्रूषणं हे हरिद्रे"॥)

आस्फोतकः, पुं, (आस्फोत एव स्वार्थे कन्।) अर्क-वृक्षः। इति राजनिर्घण्टः॥

आस्फोता, स्त्री, (आस्फोत + टाप्।) अपराजिता। वनमल्लिका। इति मेदिनी॥ सारिवावृक्षः। इति राजनिर्घण्टः। वृक्षविशेषः। हापरमालीति ख्याता। अस्या गुणौ। कुष्ठविषरोगनाशित्वं। इति राजवल्लभः॥

आस्यं, क्ली, (अस्यते क्षिप्यतेऽस्मिन् इति अस क्षेपणे कर्त्तरि ल्युट इति ण्यत्। यदा आस्यन्दते अस्रादिना प्रस्रवति इति स्यन्दू प्रस्रवणे + ड।) मुखं। सुख-मध्यम्। (यथा, मनुः १।८५।)

("यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः"।) (आस्ये भवमास्यं।) मुखभवे त्रि। इति मेदिनी॥

आस्यपद्मं, क्ली, (आस्यमिव पद्मानि यस्य तत्।) पद्मं। इति शब्दचन्द्रिका।

आस्यलाङ्गलः, पुं, (आस्यं लाङ्गलं भूविदारकयन्त्र-मिव यस्य।) शूकरः। इति हेमचन्द्रः॥

आस्यलोम, [न्] क्ली, (आस्यस्य लोम।) श्मश्रु। इति हेमचन्द्रः॥

आस्या, स्त्री, (आस् + ण्यत्।) स्थितिः। इत्यमरो मेदिनी च॥ (आसनं, इति वैद्यमाधवकररोग-विनिश्चयसंग्रहे। यथा,—

"आस्यामुखं खप्रसखं दधीनि"

सुश्रुतेऽस्या गुणा यथा,

"आस्या वर्णकफस्थौल्यसौकुमार्य्यकरी सुखा"।)

आस्यासवः, पुं, (आस्यस्य मुखस्य आसव इव।) लाला। इति हेमचन्द्रः॥ थुतु लाल इत्यादि भाषा।

आस्रपः, पुं, (आस्रं पिबतीति। आस्र + पा + क।) मूलानक्षत्रं। इति हेमचन्द्रः॥ (राक्षसः।)

आस्रवः, पुं, (आङ् + स्रु + अच्।) क्लेदः। कसं। इत्यमरः॥

आह, व्य, (उवाच इत्यर्थे कालमात्रे निपातोऽयं।) क्षेपः। नियोगः। इति मेदिनी॥ दृढ़सम्भावनं। इति शब्दरत्नावली॥

आहकज्वरः, पुं, (आहको नासारोग एव ज्वरः।) नासारोगविशेषः। नासाज्वर इति ख्यातः। तस्य लक्षणम्।

"तनुना रक्तशोथेन युक्तो नासापुटान्तरे। गात्रशूलज्वरकरः श्लेष्मणा ह्याहकः स्मृतः"॥

इति वैद्यकम्॥ (आहव इति क्वचिदेवके पाठः। तद्यथा, आहवज्वरस्य लक्षणम्।

"शोथः सरक्तो नासायां व्यथासावो ज्वरस्तथा। वातश्लेष्माहृतित्यश्च आहवाख्यं विनिर्द्दिशेत्"।

अस्य चिकित्सा यथा, वैद्यकचिकित्सारत्ने ॥
"दूर्व्वाचूर्णं फलं माषकुलत्थौ वंशपत्रिका ।
जलस्थलभवो कर्णमोरटाखरमञ्जरी ॥
दण्डोत्पलस्य मूलानि क्षाण्डादश्च गुणोऽभसि ।
तत्पादशेषिते तैलं तुलां क्षत्वा विपाचयेत् ।
तत्तैलं प्रतिमर्षञ्च आहवाख्यं ज्वरं जयेत्" ॥
॥*॥ दूर्व्वाद्यं तैलं ॥*॥)

आहतं, क्ली, (आ + हन् + क्त ।) पुरातनवस्त्रं । नूतनवस्त्रं । इति मेदिनी । मृषार्थकवाक्यं । इत्यमरः॥

आहतः, त्रि, (आ + हन् + क्तः ।) गुणितः । ताडितः । इति मेदिनी ॥ ("प्रति दिवसं याति लयं वसन्तवाताहतेव शिशिरश्रीः"। इति पञ्चतन्त्रम्। क्षातः। मिथ्योक्तः। इत्यजयः॥ निहतः। "द्यूना विंशतिराहताश्चौहिणीनाम्"। इति महाभारतम्।)

आहतः, पुं, (आहन्यते यः + आङ् + हन् + कर्म्मणि + क्त ।) आनकः । ढक्का । इति मेदिनी ॥

आहतलक्षणः, त्रि, (आहतं अभ्यस्तं लक्षणं यस्य ।) गुणैः प्रतीतः । गुणेन ख्यातः । तत्पर्य्यायः । क्षतलक्षणः २ । इत्यमरः ॥

आहरः, पुं, (आङ् + हृ + अच् !) उच्छ्वासः । अन्तर्मुखश्वासः ॥ इति हेमचन्द्रः ॥ (आहरणशीले वाच्यलिङ्ग एव । यथा, रघौ १।४९ ।
"वनान्तराद्पाहृत्तैः समित्कुशफलाहरैः" ।)

आहरणं, क्ली, (आङ् + हृ + भावे ल्युट् ।) द्रव्याद्यानयनं । आसादनम् । यथा । देवीपुराणं ।
"मृदाहरणसंघट्टप्रतिष्ठाक्षानमेव च ।
स्नपनं पूजनञ्चैव विसर्जनमतःपरं" ॥
इति तिथ्यादितत्त्वम् ॥

आहवः, पुं, (आह्वयते अरिर्यस्मिन् । आङ + ह्वे + अप् ।) युद्धं ।
("यदाश्रौषं भीष्ममत्यन्तशूरम्
हतं पार्थेनाहवेष्वप्रधृष्यम्" ॥
इति महाभारते आदिपर्व्वणि १।१८२ ।
आह्वयते आज्यादिकं यत्र । आङ् + ह्वे + अप् ।) यज्ञः । इति शब्दरत्नावली ॥

आहवनीयः, पुं, (आह्वयते आज्यादिरस्मिन् । आङ् + ह्वे + अनीयर् ।) यज्ञाग्निविशेषः । इत्यमरः । गार्हपत्यादुद्धृत्य होमार्थं यः संस्क्रियते सः । इति भरतः ॥ (यथा, मनौ २।२३१ ।
"गुरुराहवनीयस्तु साग्निरेता गरीयसी" ।)

आहारः, पुं, (आङ् + हृ + घञ् ।) द्रव्यगलाधःकरणं । तत्पर्य्यायः । जग्धिः २ भोजनं ३ जेमनं४ लेपः ५ निघसः ६ न्यादः ७ । इत्यमरः ॥ जमनं ८ विघसः ९ इति तट्टीका ॥ प्रत्यवसानं १० भक्षणं ११ अशनं १२ ॥ इति रत्नमाला ॥ अभ्यवहारः १३ खदनं १४ निगरः १५ । इति राजनिर्घण्टः ॥ अस्य गुणाः । सद्यस्तृप्तिजनकत्वं । बलकारित्वं । देहधारकत्वञ्च । इति राजवल्लभः ॥
("तमुवाच भगवानात्रेयः। हिताहारोपयोग एकएव पुरुषस्याभिवृद्धिकरो भवति। अहिताहारोपयोगः पुनर्व्याधिनिमित्तमिति"।
"तमुवाच भगवानात्रेयः। यदाहारजातमग्निवेश्म ! समांश्चैव शरीरधातून् प्रकृतौ स्थापयति, विषमांश्च समीकरोतीत्येतद्धितं विद्धि तद्विपरीतं इत्येतद्धिताहितलक्षणमनर्थवादभवति एवं वादिनश्च भगवन्तमात्रेयमग्निवेश उवाच। भगवन्नेतदेवमुपदिष्टं भूयिष्ठकल्पाः सर्व्वभिषजो विज्ञास्यन्ति। तमुवाच भगवानात्रेयः। येषां विदितमाहारतत्त्वमग्निवेश ! गुणतो द्रव्यतः कर्म्मतः सर्व्वावयवतो मात्रादयो भावास्तत्र तदेवमुपदिष्टं विज्ञातुमुत्सहेरन् यथा तु खल्वेतदुपदिष्टं भूयिष्ठकल्पाः सर्व्वभिषजो विज्ञास्यन्ति तथैतदुपदेक्ष्यामः। मात्रादीन् भावानुदाहरन्तस्तेषां हि बहुविधविकल्पा भवन्ति। आहारविधिविशेषांस्तु खलु लक्षणतश्चावयवतश्चानुव्याख्यास्यामः। तद्यथा,आहारत्वमाहारस्यैकविधमर्थाभेदात्। स पुनर्द्वियोनिः स्थावरजङ्गमात्मकत्वात्। द्विविधः प्रभावो हिताहितोदर्कविशेषात्। चतुर्विधोपयोगः पानाशनभक्ष्यलेह्योपयोगात्। षड्रसादो रसभेदतः षड्विधत्वात्" । इति चरकः ॥
"यदाहारगुणैः पानं विपरीतं तदिष्यते।
अन्नानुपानं धातूनां दृष्टं यन्न विरोधि च" ॥
इति च चरकः ॥
"प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च षट्सु रसेष्वायत्तो रसाः पुनर्द्रव्याश्रयाः" ॥
"स च तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसङ्घातः सुखकरश्च भवति" ।
"आहारः प्रीणनः सद्यो बलवृद्धेहधारकः ।
आयुस्तेजःसमुत्साहस्मृत्योजोऽग्निविवर्द्धनः" ॥
इति सुश्रुतः ॥) स त्रिविधः। सात्विकः १ राजसिकः २ तामसिकः ३ । सात्विकाहारो यथा,— ८ श्लोकः ।
"आयुः-सत्त्व-बलारोग्य-सुख-प्रीति-विवर्द्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः" । राजसिकाहारो यथा, ९ श्लोकः ।
"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः" ॥
तामसिकाहारो यथा, १० श्लोकः ।
"यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्" ॥
इति श्रीभगवद्गीता १७ अध्यायः ॥ आहरणं । इति मेदिनी ॥
("स पुनर्दैवयान्योक्तः पुण्याहारो यदृच्छया"। इति महाभारतम् । आदिपर्व्वणि ७६ । सम्भवपर्व्वणि ७६।३५ ।)

आहारसम्भवः, पुं, (आहारात् सम्भवो यस्य ।) शरीररसरसधातुः । इति हेमचन्द्रः ॥

आहार्य्यं, त्रि, (आङ् + हृ + ण्यत् ।) आगन्तुकं । इति त्रिकाण्डशेषः ॥
("आहार्य्यैर्नीयमानं हि क्षणं दुःखेन हृद्यताम्" इति कामन्दकः ।) आहरणीयं ॥ (यथा, मनुः ८।२०२ । "अथ मूलमनाहार्य्यं प्रकाशक्रयशोधितः" ।) (ग्रन्थकर्म्मभेदः । यथा सुश्रुते "तच्च ग्रन्थकर्म्माष्टविधं, तद्यथा ;—छेद्यं भेद्यं, लेख्यं वेध्यं ऐद्यम्, आहार्य्यं, विस्राव्यं, सीव्यमिति"। "आहार्य्यशर्करास्त्रिखो दण्डकर्णमलाम्बरी" ।)

आहार्य्यः पुं, नाट्योक्तौ व्यञ्जकविशेषः । स तु भूषादिना रचितः । इति हेमचन्द्रः ॥ (यथा साहित्यदर्पणे । षष्ठाङ्के ।
"भवेदभिनयोऽवस्थानुकारः स चतुर्व्विधः ।
आङ्गिको वाचिकश्चैवमाहार्य्यः सात्त्विकस्तथा" ॥)

आहार्य्यशोभा, स्त्री, (आहार्य्यात् या शोभा ।) कृत्रिमशोभा । चित्रभूषादिना कृतद्युतिः । इति जटाधरः ॥ (यथा, भट्टिकाव्ये २य सर्गे,—
"आहार्य्यशोभारहितैरमार्यैः
ऐच्छिष्ट पुंभिः प्रचितान् स गोष्ठान्" ।)

आहावः, पुं, (आङ् + ह्वे + अप् ॥ निपातनात् वृद्धिः।) कूपसमीपे पश्वादिजलपानार्थकृतखल्वजलाशयः। इत्यमरः ॥ चौवाच्चा इति भाषा । (आह्वयतेऽरिरत्र इति व्युत्पत्त्या।) युद्धं। आह्वानं । इति धरणिः॥ (आह्वयतेऽत्र इति आ + ह्वे + अधिकरणे घञ् ।) अग्निः ।)

आहिकः, पुं, (अहिरिव आकृतिर्यस्य । अहि + ठक् ।) पाणिनिमुनिः । इति त्रिकाण्डशेषः ॥ केतुग्रहः । इति हेमचन्द्रः ॥

आहितः, त्रि, (आङ् + धा + क्त ।) न्यस्तः । अर्पितः । स्थापितः । इति हलायुधः ॥
(यथा, किराते ।
"आवर्त्तनैरहिपतेरयमाहिताङ्गः" ।)

आहितलक्षणः, त्रि, (आहितं लक्षणं यस्य ।) आहतलक्षणः । इत्यमरटीकायां रमानाथः ॥ गुणादिद्वारा ख्यातः ।

आहिताग्निः, पुं, (आहितः स्थापितोऽग्निर्येन ।) साग्निकः । अग्निहोत्री इति स्मृतिः ॥
("न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः"। इति मनुः ३।२८२ । तथा च रघौ २ ४४ ॥
"गुरोरपीदं धनमाहिताग्नेः" ।)

आहितुण्डिकः, पुं, (अहितुण्डेन दीव्यति । अहितुण्ड + ठक् ।) व्यालग्राही । सापुड़िया इति भाषा । इत्यमरः शब्दरत्नावली च ॥ (यथा पञ्चतन्त्रम् ।
"वैद्यसांवत्सराचार्य्याः स्वपक्षेऽधिकृताश्चराः ।
यथाहितुण्डिकोन्मत्ताः सर्व्वं जानन्ति शत्रुषु" ।)

आह्नं, क्ली, (आङ् + ह्नु + क्त ।) स्नेहस्यानां पञ्चमहायज्ञान्तर्गतयज्ञविशेषः॥ स तु नृयज्ञः । इति जटाधरः ॥

आह्वतिः, स्त्री, (आ + ह्वे + क्तिन् ।) देवोद्देशे मन्त्रोच्चारणपूर्व्वकोऽग्नौ हविर्निक्षेपः । तत्पर्य्यायः । देवयज्ञः २ होमः ३ होत्रं ४ वषट्कारः ५ । इति हेमचन्द्रः ॥ (यथा, रघौ १।५३ ।
"पुनानं पवनोद्भूतैर्धूमैरा ह्वतिगन्धिभिः" ।
धर्म्मात् मरुद्वत्यां जातः खनामख्यातो मरुद्वेदः । यथा हरिवंशे,—
"मरुद्वती मरुत्वन्तो देवानजनयत् सुतान् ।
नड्वलं चाह्वतिं चैव चारित्रं ब्रह्मपन्नगम्" ।)

आह्वल्यं, क्ली, (आङ् + ह्वल् + ष्यञ् ।) तृणविशेषः तरवट इति काश्मीरादौ ख्यातं । तत्पर्य्यायः ।

इलराख्यं २ तगरं ३ तरवटं ४ शिग्रीफलं ५ सपुष्पं ६ पीतपुष्पं ७ काञ्चनपुष्पकं ८ नृपमाक्षल्यकं ९ शरत्पुष्पं १०। तस्य गुणाः। तिक्तत्वं। शीतलत्वं। चक्षुर्हितत्वम्। पित्तदाहमुखरोगकुष्ठकण्डूतिजन्तुशूलव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

आङ्कतं, क्ली, (आ + ङ्के + क्त।) प्रलयपर्य्यन्तं। यथा,—

"कदम्बानि पटोलानि दन्ताकसहितानि च।
न त्यजेत् कार्त्तिके मासि यावदाङ्कतनारकी"॥
"आङ्कतानि आभूतानि प्रलयपर्य्यन्तानीति यावत्"। इति तिथ्यादितत्त्वम्॥

आङ्कतः, त्रि. (आङ् + ङ्के + क्त।) कृताङ्कनः। यथा,—

"प्रगायतः खवीर्य्याणि तीर्थपादः प्रियश्रवाः।
आङ्कत इव मे शीघ्रं दर्शनं याति चेतसि"॥
इति श्रीभागवते १ स्कन्धे ६। १४॥

आङ्कतिः, स्त्री, (आङ् + ङ्के + क्तिन्।) आङ्कनं। इति शब्दरत्नावली॥

आङ्गेयं, त्रि, (अङ्गौ भवं। अङ्गि + ढञ्।) अङ्गिसम्बन्धि। तद्विषयधर्म्मादि। इत्यमरः॥

आङ्गो, व्य, (आ इन्तीति। आङ + हन् + डो।) विकल्पः। इत्यमरः॥ प्रश्नः। (यथा शाकुन्तले पञ्चमाङ्के।

"दारव्यागी भवान्याङ्गो परस्त्रीस्पर्शपांसुलः"।)
विचारः। इति मेदिनीकरहेमचन्द्रौ॥
("आङ्गो निवर्त्तयति समं हरिणाङ्गनाभिः"।
इति शाकुन्तले प्रथमाङ्के।)

आङ्गोपुरुषिका, स्त्री, (अङ्गो अहमेव पुरुषः। मयूरव्यंसकादित्वात् समासः। अङ्गोपुरुषस्य भावः। अङ्गोपुरुष + वुञ् + स्त्रीत्वात् टाप्।) दर्पात् आत्मनि सम्भावना सा। इत्यमरः॥ अधिकार्थवचनेन शब्दैरप्रतिघातात्मिष्क्रयणं। आत्मविषयकार्य्यसिद्धिजननशक्त्याविष्क्रयणं। इति भरतः॥
(यथा, भट्टौ ५।२७।

"आङ्गोपुरुषिकां पश्य मम सद्मलक्ष्मिभिः"।)

आङ्गोस्वित्, व्य, (आङ्गो च स्वित्।) आङ्गो। विकल्पः। इत्यमटीका॥

आङ्गः, पुं, (अङ्गां समूहः।) दिनसमूहः। इति व्याकरणम्॥

आङ्गिकं, त्रि, (अङ्गा निर्व्वृत्तं। अङ्गन् + ठञ्।) दिननिर्व्वर्त्त्ये। दिनसाध्ये। इति मेदिनी॥ दिनसम्बन्धी॥

आङ्गिकं, क्ली, (अङ्गा निर्व्वृत्तं। अङ्गन् + ठञ्।) भोजनं। प्रकरणसमूहः। यज्ञभागः। नित्यक्रिया। इति मेदिनीकरहेमचन्द्रौ॥

अथ श्रीरघुनन्दनभट्टाचार्य्यकृताङ्गिकाचारतत्त्वोक्तकर्म्माणि संक्षेपेण लिख्यन्ते॥

तत्र प्रथमयामार्द्धकृत्यम्।

"ब्राह्मे मुहूर्त्ते जागरित्वा ब्रह्मविष्णुशिवनक्षत्रान् स्मृत्वा गुरुप्रणामं कृत्वा आत्मानं ब्रह्मत्वेन संभाव्य तद्विषयकतत्त्वधर्म्मकर्म्मार्थं चिन्तयेत्॥

ततः शयनादुत्थाय स्वचिवास्त्यक्त्वा पृथिवीं

नमस्कृत्य दक्षिणचरणं भूमौ विन्यस्य कर्क्कोटकनागादमयन्तीनलऋतुपर्णराजकार्त्तवीर्य्यार्জ্জুनान् स्मृत्वा नेत्रमुखे प्रक्षाल्य द्विराचामेत्॥

ततः नैर्ऋत्यां दक्षिणस्यां वा दिशि मूत्रपुरीषात्सर्गं जलमृत्तिकाशौचञ्च कृत्वा द्विराचम्य हरिं स्मृत्वा दिवा सूर्य्यं रात्रौ चन्द्रं तारां वा तदसम्भवे अग्निं पश्येत्॥

ततो दन्तधावनं। दन्तकाष्ठाभावे निषिद्धदिने च द्वादशगण्डूषजलैः पञ्चैर्व्वा मुखं शोधयित्वा द्विराचामेत्।

ततः प्रातःस्नानं तिलकं सन्ध्यातर्पणञ्च कृत्वा सूर्य्योदयपर्य्यन्तं गायत्रीं जपेत्॥ स्नानाशक्तौ आर्द्रवस्त्रेण गात्रमार्জ্জनं मन्त्रस्नानञ्च कृत्वा सन्ध्योपासनं कुर्य्यात्॥

तत आदर्शादिदर्शनं दधिदूर्व्वादिमङ्गलद्रव्यस्पर्शनञ्च कुर्य्यात् इति॥ *॥

अथ द्वितीययामार्द्धकृत्यम्॥

वेदविद्याद्यभ्यासः। समित्पुष्पाद्याहरणञ्च॥ *॥

अथ तृतीययामार्द्धकृत्यम्।

गुरुदेवधार्म्मिकोपासनं। कुटुम्बभरणार्थमीश्वरोपासनादि च॥*

अथ चतुर्थयामार्द्धकृत्यम्।

मध्याह्नस्नानं। तच्च परस्नातोदके चेत् तदा सप्त पञ्च त्रीन् वा मृत्पिण्डान् तीरे क्षिप्त्वा नाभिमात्रोदके कुशहस्तः सशिरस्कमज्जनं कृत्वा द्विराचम्य सङ्कल्प्य यथाविधि चिर्निमज्जेत्॥

ततः स्नानवस्त्रपात्रव्यतिरेकेण गात्रमार्জ্জनं तिलकं तर्पणञ्च कुर्य्यात्॥

ततः अष्टममुहूर्त्ते मध्याह्नसन्ध्यां समाप्य ब्रह्मयज्ञं विधाय देवपूजनं कृत्वा पादोदकं नैवेद्यञ्च यथाकाले उपयुञ्जीत॥ *॥

अथ पञ्चमयामार्द्धकृत्यम्॥

बलिवैश्वदेवकर्म्मणी काम्यबलिकर्म्म वामदेव्यगानं गानाशक्तौ तस्य त्रिः पाठः पार्व्वणश्राद्धानन्तरं बलिवैश्वदेवकर्म्मणी कर्त्तव्ये॥

बलिकर्म्मानन्तरमतिथिलाभार्थं मुहूर्त्तं गोदोहनकालं वा अभोजनेन प्रतीक्षेत। तल्लाभे भिक्षादिकं दत्त्वा तदनुव्रजेत्। तदानीमतिथ्यलाभे नित्यश्राद्धान्तरमतिथीन् भोजयेत्। भोजनासामर्थ्ये भिक्षां दद्यात्। अतिथ्यलाभे ब्राह्मणाय दानं तदसम्भवे अग्नौ जले वा किञ्चिदन्नं क्षिपेत्॥

ततो नित्यश्राद्धं। वामदेव्यगानं तदशक्तौ ऋक्त्रयं पठेत्। नित्यश्राद्धकरणासामर्थ्ये बलितर्पणाभ्यां पितृयज्ञसिद्धिः॥ ततो गोग्रासदानं गोनमस्कारञ्च कुर्य्यात्॥ ततो यथाविधि भोजनं। विष्णुपादोदकादिकं पूर्व्वमग्रहीतश्चेत् इदानीं ग्रहीयात्॥ ततः स्नानानन्तरं न गत्वा मद्धिर्घर्षणैर्मुखहस्तौ शोधयित्वा तृणादिना दन्तलग्नरसद्रव्यमपनीय जलगण्डूषैर्मुखाभ्यन्तरं संशोध्य पादौ प्रक्षालयेत्॥

तत आसनस्थ एव भूमौ पादौ संस्थाप्य द्विराचम्य मुखं तुलसीपत्रादिना संशोध्य दक्षिणपादाङ्गुष्ठे दक्षिणहस्तेन मन्त्रेण जलं दद्यात्॥

ततो मृत्तिकामार्জ্জनाभावेऽप्युचितादविलम्बमेव भोजनपात्रमुद्धृत्य उच्छिष्टमपनीय तत् स्थानं गोमयोदकाभ्यां सिञ्चेत्॥

ततः सुस्थ आसने उपविश्य इष्टदेवतानाम स्मृत्वा अन्नजीर्णतार्थं मन्त्रपाठपूर्व्वकवामहस्तेनोदरं परिमृज्य पादशुद्धत्रज्जनानन्तरं वामपार्श्वेन किञ्चित् कालं शयित्वा ताम्बूलादिमुखवासनद्रव्यं भोक्तव्यम् इति॥ *॥

अथ षष्ठसप्तमयामार्द्धकृत्यम्।

इतिहासपुराणादिश्रवणम्॥

अथाष्टमयामार्द्धकृत्यम्॥

लौकिकचिन्ताकरणम्। सायंसन्ध्योपासनम्। इष्टदेवतास्मरणादिकञ्च कुर्य्यात्॥ *॥

अथ रात्रिकृत्यम्।

सन्ध्यानन्तरमिष्टदेवतामन्त्रजपत्रिकालपाठ्यस्तव-नारायणस्मरणानि कुर्य्यात्॥

ततोऽन्नादिपाके जाते पूर्व्ववद्बलिवैश्वदेवकर्म्मणी कृत्वा अतिथिलाभेऽन्नादिकं तस्मै दत्त्वा अवश्यभरणीयैः सह सार्द्धप्रहराभ्यन्तरेऽनतिद्रुतं भुञ्जीत। अन्नभोजनाभावे ताम्बूलादिकं भोक्तव्यम्॥ प्रथमयामाभ्यन्तरे विद्याभ्यासं कुर्य्यात्॥ ततः शयनं। शुचिदेशे खट्वोपरि शय्यां कृत्वा शिरोदेशे पूर्णकुम्भं निधाय रात्रिवासः परिधाय प्रक्षालितपाणिपादो द्विराचान्तः पूर्व्वशिरा दक्षिणशिरा वा पद्मनाभं स्मृत्वा यामद्वयाभ्यन्तरे शयीत॥ *॥

अथ दारोपगमनम्।

ऋतौ निषिद्धेतरदिने स्त्रीसम्भोगं कृत्वा तां दक्षिणपार्श्वेन स्वापयेत्॥

ततः अविलम्बेन मूत्रपुरीषोत्सर्गवत् मज्जनाभ्यां लिङ्गं हस्तौ पादौ च प्रक्षाल्य द्विराचम्य स्वायात्॥ ऋतुभिन्नगमने तु लिङ्गप्रक्षालनाचमनद्वयमाचम्य कुर्य्यात्। स्त्रियास्तु ऋतावनृतावपि लेपादिक्षालनानन्तरमाचमनमात्रं न स्नानं॥ स्नानादेः पूर्व्वं मूत्रपुरीषोत्सर्गौ न कुर्य्यात्। सम्भोगानन्तरं तस्यां रात्रौ एकशय्यायां न शयीयातां। अनृतावपि गर्भवत्त्वेऽपि कामुकीमुपेयात्॥

ऋतावभिगम्य प्रातर्नैमित्तिकमङ्गशून्यस्नानं कुर्य्यात्॥

ऋतुगमनं पुत्रोत्पत्तिपर्य्यन्तमावश्यकम्॥ इत्याङ्गिकाचारतत्त्वोक्तकर्म्म समाप्तं॥ *॥

आह्लादः, पुं, (आङ् + ह्लद् + घञ्।) आनन्दः। हर्षः। यथा। श्रीभागवते १०। ५। १॥

"नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः।
आहूय विप्रान् वेदज्ञान् स्नातः शुचिरलङ्कृतान्॥"

आह्लादितः, त्रि, आनन्दितः। हृष्टः। जाताह्लादः। इतोऽस्य जाते इत्यनेन आह्लादशब्दात् इतप्रत्ययेन निष्पन्नः॥

आह्वयः, पुं, (आङ् + ह्वे + अच्। यद्वा आह्वेर्यायते प्राप्यते इति। आङ् + या + घञर्थे कः।) नाम। इत्यमरः॥ (यथा, रामायणे, बालकाण्डे ४। ७॥

दु

"कृत्वा तु तन्महाप्राज्ञः कार्यं रामायणाङ्कयम्"।) अष्टादशव्यवहारपदान्तर्गतो व्यवहारविशेषः। यथाह मनुः अष्टमे। ४५।६।७। "तेषामाद्यमृणादानं" इत्युपक्रम्य। "स्त्रीपुंधर्म्मो विभागश्च द्यूतमाह्वय एव च"।)

आङ्का, स्त्री, (आङ्कानमिति। आङ् + कै + अङ्।) नाम। संज्ञा। इत्यमरः॥

आङ्कानं, क्ली, (आङ् + कै + भावे ल्युट्।) आवाहनं। डाका इति भाषा। तत्पर्य्यायः। हूतिः २ आकारणं ३। इत्यमरः॥ (यथा मनुः ९।१२६। "जन्मज्येष्ठेन चाङ्कानं स्वब्राह्मण्यास्विप स्मृतम्"।) (आह्वयतेऽनेन। करणे ल्युट्।) नाम। इति शब्दरत्नावली॥

दू

इ, इकारः। तृतीयस्वरवर्णः। अस्योच्चारणस्थानं तालु। स च ह्रस्वो दीर्घः प्लुतश्च भवति। (अयञ्च उदात्तानुदात्तस्वरित-भेदात् त्रिविधः। अनुनासिकाननुनासिकभेदाच्च प्रत्येकं द्विविधः एतेन षड्विध एव।)

"इकारं परमानन्दसुगन्धकुसुमच्छविम्।
हरिब्रह्ममयं वर्णं सदा रुद्रयुतं प्रिये॥
सदा शक्तिमयं देवि गुरुब्रह्ममयं तथा।
सदाशिवमयं वर्णं परं ब्रह्मसमन्वितम्॥
हरिब्रह्मात्मकं वर्णं गुणत्रयसमन्वितम्।
इकारं परमेशानि स्वयं कुण्डली मूर्त्तिमान्"॥
इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायां।)
तस्य लेखनप्रकारो यथा,
"ऊर्द्धाधः कुटिला मध्ये रेखा तत्सङ्गता भवेत्।
लक्ष्मीब्राह्मी तथेन्द्राणी क्रमात्तासेव संवसेत्॥
पूर्षाधःकुञ्चिता रेखा दक्षोर्द्धा कामरूपिणी।
मात्राशक्तिः कोणयुता ध्यानमस्य प्रचक्षते"॥
इति वर्णोद्धारतन्त्रम्॥*॥ (यद्यपि सिद्धान्तकौमुद्यां "इचुयशानां तालु" इति सामान्यतः उक्तं तथापि शब्देन्दुशेखरादिष्वस्य विस्तरतो विवृतिरुक्ता। यथा,—"तुल्यास्य प्रयत्नमिति सूत्रेण प्रशब्देन विलक्षणयत्नबोधेऽपि लोके यत्नप्रयत्नयोः पर्य्यायतेति ध्वनयन्नाह प्रयत्नो हि द्विधा इति क्वचित् यत्नो द्विधेत्येव पाठः। एतेषां आभ्यन्तरत्वं वर्णोत्पत्तेः प्राग्भावित्वात्। तथाहि नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो नाम वायुः ऊर्द्धमाक्रमन् उरःप्रभृतीनि स्थानान्याहन्ति ततो वर्णस्य तदभिव्यङ्गकध्वनेर्वा-त्पत्तिस्ततोत्पत्तेः। प्राक्जिह्वाग्रोपाग्रमध्यमूलानि वर्णोत्पत्तिस्थानं तालवादि यदा सम्यक् स्पृशन्ति तदा स्पृशता ईषत्स्पर्शे ईषत्स्पृशता समीपावस्थाने संवृतता दूरावस्थाने विवृतता अतएव इचुयशानां तालव्यत्वादिविशेषेऽपि चवर्गे उच्चारयितव्ये जिह्वाग्रादीनां तालुस्थानेन सम्यक् स्पर्शः यकारे ईषत् स्पर्शः शकारेकारयोः समीपदूरावस्थानं। स्पृष्टं प्रयतनमिति यतेर्नपुंसके भावि ल्युट्। प्रयत्नमित्यपपाठः नञन्तस्य पुंस्त्वात्। "शेषाः स्पृष्टा ईषत्स्पृष्टाः" इत्यादि। यथा, शिक्षायां शब्देन्दुसारः। तथाहि "अचोऽस्पृष्टाः यणस्त्वीषत् नेमस्पृष्टाः प्लुतः स्मृताः। "शेषाः स्पृष्टाः ईषत्स्पृष्टाः" इत्यादि। अत्र अचः अस्पृष्टाः सन्ध्यभावरूपविवृतत्ववन्तः यणस्त्वीषत् अस्पृष्टा इत्यनुषज्यते तेन ईषदस्पृष्टा ईषद्विवृता इत्यर्थः। नेम इत्यर्द्धं तेन प्लुतः ईषत् विवृताः यणमपेक्ष्याधिकविवृतत्ववन्त इत्यर्थः। अपि च—"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्"। ईळे इत्येतत् समस्तमपि पदमनुदात्तम् "तिङ्ङतिङ" इति सूत्रेण अतिङन्तादग्निशब्दात् परस्य ईळ इति तिङन्तस्य निघातविधानात् अग्निमीळ इति पदयोः संहिताकाले तु धातुगतस्य ईकारस्य स्वरितत्वम् "उदात्तानुदात्तस्वरितः" इति सूत्रेण उदात्तात् परस्यानुदात्तस्य स्थाने स्वरितः स्यात् इत्यर्थकेनानुदात्तस्य ईकारस्य स्थाने स्वरितादेशात् ततःपरस्य ळे इत्यत्र एकारस्य तिङ्प्रत्ययरूपस्य स्वरितात् संहितायाम् पूर्व्वसवर्णस्य नितरां उदात्तत्वम्। अपरञ्च तालवादिस्थानमाभ्यन्तरप्रयत्नइति सूच्यते। अत्र मूलम् पाणिनीयशिक्षाग्रन्थे। यथा,—"कण्ठ्याववर्हा विचुयशास्तालव्या ओऊऔवुपू"। "स्वराणामुष्माणश्चैव विवृतं करणं मतम्"।)
तस्य नामानि यथा,—
"इः सूक्ष्मा शाल्मली विद्या चन्द्रः पूषा सुगुह्यकः।
सुमित्रः सुन्दरो वीरः कोटरः काटरः पयः॥
भ्रूमध्यो माधवस्तुष्टिर्दक्षनेत्रञ्च नासिका।
घ्राणान्तः कान्तः कामिनी च कामो विघ्नविनायकः॥
नेपालो भरणी रुद्रो नित्या क्लिन्ना च पावकः"।
इति वर्णाभिधानतन्त्रम्॥ (माढकान्यासेऽस्य दक्षिणचक्षुषि स्थानम्। यथा, माढकान्यासधृतमन्त्रः "इं नमो दक्षिणचक्षुषि इं नमो वामचक्षुषि"। इति।)

इ,) गतौ। (भ्वादिं-इणपचे अदां-परं-सकं-अनिट्।)
इल,) अयति। ल इति। एषक्पाठसामर्थ्यात् पूर्व्वो न लित्। शेषस्त इण गताविति प्रसिद्धः। विनोऽप्यर्थाविवादिषु ग्रहणमस्यैव। इति दुर्गादासः॥ (उत्।) उदये। समुन्नतौ। यथा,—
"उदयति यदि भानुः पश्चिमे दिग्विभागे" इति।
(अभि + उत्।) अभ्युदये। समुन्नतौ। सर्व्वेगत्यर्था ज्ञानार्थाः प्रायार्थाश्च इत्यनेन प्रायार्थोऽप्यस्य बहुलः प्रयोगः। यथा,—मनुः।
"ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रताम्"।
"अयमेति मन्दं मन्दं कावेरीवारिपावनः पवनः"।
इति साहित्यदर्पणम्। (अति) अतिक्रमे। पराभवे। यथा, हितोपदेशे। १।
"अतीत्य हि गुणान् सर्व्वान् स्वभावो मूर्द्धि वर्त्तते"।
"ततः परं जनस्थानं क्रोशत्रयमतीत्य वै"।
इति रामायणे। (अनु) अनुकरणम्।
"धातुरादेशमन्वेति तद्यथा हि तदर्पणः।
नामाधीनो मनुष्योऽयं कार्यं भजति कञ्चन"॥
इति महाभारते। (अप) अपगमने। पलायने।

दू

"प्रत्यादेशव्यलीकमेतु ते"। इति शाकुन्तले। (सम् + आ) सम्मिलने। "देवास्त्वैतान् समत्योचूर्य्यार्थं वः शिश्रुरुक्तवान्"। इति मनुः। २। १५२। इत्यादयो ज्ञेयाः।)

इ, ल, स्मर्य्यां। (अदां- परं-सकं-अनिट्।) अधिपूर्व्वोऽयं। अधिग्रहणं अन्यपूर्व्वस्य केवलस्य च प्रयोगनिरासार्थं। एवं सर्व्वत्र। ल अध्येति तव लक्षणं। इक स्मरणे इति प्रसिद्धोऽयं। इन्दिक इत्यत्रास्यैव ग्रहणम्। इति दुर्गादासः॥

इ ङ ल अध्ययने। (अदा०-आ०-सक०-अनिट्।) अधिपूर्व्वोऽयं। अध्ययनमर्थतः शब्दतश्च गुरुतो ग्रहणं। ङ ल वेदमधीते विप्रः। इति दुर्गादासः॥ ("यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः" इति मनुः।२।१३७।)

इ, य, भेदः। क्रोधोक्तिः। अपाकरणं। अनुकम्पा। इति मेदिनी॥ खेदः। इति हेमचन्द्रः॥

इंरेजः, पुं, (जङ्गदेशजातम्लेच्छजातिविशेषः। यथा,—
"अधिपा मराठलाश्च संग्रामेष्वपराजिताः।
इंरेजा नव षट् पञ्च जङ्गजाश्चापि भाविनः"॥
इति मेरुतन्त्रे २३ प्रकाशः॥

इः, [स्] ष, कोपः। सन्तापः। दुःखभावना। इति शब्दरत्नावली॥

इः, पुं, (अस्य विष्णोः श्रीलक्ष्म्यास्यापत्यम् पुमान्। अ + इञ्।) कामदेवः। इति पुरुषोत्तमस्त्रिलाद्यधौ॥ यथा, आग्नेये एकाक्षराभिधानम्।
"इः कामे रतिलक्ष्म्योरी उः शिवे ब्रह्मकाद्य ऊः"॥

इक्काटः, पुं, (इणविशेषः। तत्पर्य्यायः। बब्रूमूकः २। इति त्रिकाण्डशेषः। कोशाङ्कः३ इत्कटः ४। इति हारावली॥ (इत्कटशब्दोऽस्य विशेषो द्रष्टव्यः॥)

इक्षुः, पुं, (इष्यतेऽभिलष्यतेऽसौ इति। इष् + क्सु।) खनामख्यातवृक्षः। आक् इति भाषा। तत्पर्य्यायः। रसालः २। इत्यमरः॥ कर्कोटकः ३ वंशः ४ कान्तारः५ सुकुमारकः६ अधिपत्रः७ मधुत्वक्यः८ दृष्यः९ गुडत्वक्यः १०। इति राजनिर्घण्टः॥ मत्पुष्पः ११ महारसः १२ असिपत्रः १३ कोशकारः १४ इक्षवः १५। इति शब्दरत्नावली॥ पयोधरः १६। इति जटाधरः॥*॥ तस्य भेदाः। वंशकः १ कान्तारः २ भीरुः ३ पौण्ड्रः ४। इति रत्नमाला॥ सामान्येक्षुगुणाः। रक्तपित्तनाशित्वं। बलशुक्रकफकारित्वं। पाके मधुरत्वं। स्निग्धत्वं। गुरुत्वं। शीतलत्वं। मूत्रशुद्धिकारित्वञ्च। तस्य मूले अतिमधुरत्वं। मध्ये मधुरत्वं। ग्रन्थित्वगग्रभागेषु लवणरसत्वञ्च। इति राजवल्लभः॥ मूलादूर्द्धं मधुरत्वं। मध्ये अतिमधुरत्वं। अग्रे क्रमाल्लवणत्वं नीरसत्वञ्च॥ अपक्वे इक्षुभक्षणगुणाः। पित्तदाहत्वं। सुक्ते वातप्रकोपणत्वं। सुक्तिमध्ये गुरुतरत्वञ्च॥ इति राजनिर्घण्टः॥ दन्तनिष्पीड़ितेक्षुरसगुणाः। हिमत्वं। शुक्रकारित्वं। दृष्टिजनकत्वम्। जीवनहितकारित्वम्। वायुरक्तपित्तनाशित्वं। स्वादुत्वं। स्निग्धत्वं। प्रीतिदात्वं। रक्तवर्द्धकत्वं। मुखप्रसादकारित्वं। धातुवर्द्धकत्वञ्च। इति राजवल्लभः॥ अपि च। रक्तदोषभ्रमभ्रमन-

कारित्वं। अल्पश्लेष्मदाहत्वं। हृद्यत्वं। रुचिजनकत्वं। मूत्रशुद्धिकारित्वं। देहस्य कान्तिदाहत्वं। बलकारित्वं। पीयूषोपमत्वं। त्रिदोषशमनत्वञ्च। इति राजनिर्घण्टः॥ यन्त्रनिष्पीड़ितरसगुणाः। रक्तशुक्रकारित्वं। शीतलत्वं। सारकत्वं। रुचिकरत्वं। दाहजनकत्वञ्च॥ इति राजवल्लभः॥ अपि च। दन्तनिष्पीड़ितरसगुणवद्गुणत्वं। किञ्चित् पित्तवायुनाशित्वं। अकोमलत्वं। अस्वादुत्वं। क्षीरविष्टम्भदाहकारित्वञ्च। पर्य्युषितरसगुणाः। वान्तिहरत्वं। वातजनकत्वं। जाड्यप्रतिश्यायरोगदाहत्वं। कफवायुकारित्वञ्च। इति राजनिर्घण्टः॥ तत्पक्वरसगुणाः। गुरुत्वं। सुतीक्ष्णत्वं। कफवातनाशित्वञ्च। इति राजवल्लभः॥ स्निग्धत्वं। अतिशूयगुरुत्वं। अतिपाके विदाहित्वं। पित्तास्रदोषकारित्वञ्च। इति राजनिर्घण्टः॥

अस्य विकाराः॥

"लसीकाफाणितगुड़खण्डमत्स्यण्डिकासिताः।
निर्म्मला लघवो ज्ञेयाः शीतवीर्य्या यथोत्तरम्"॥
इति राजवल्लभः। अथेक्षुवर्गः। तत्रेक्षोर्नामादि गुणाश्च।

"इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूरिरसोऽपि च।
गुड़मूलोऽसिपत्रश्च तथा मधुदलः स्मृतः॥
इक्षवो रक्तपित्तघ्ना बल्या दृष्याः कफप्रदाः।
स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः"॥*॥

अथेक्षुभेदाः।

"पौण्ड्रको भीरुकश्चापि वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः॥
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
इत्येता जातयस्तेषां कथयामि गुणानपि"॥*॥

अथ पौण्ड्रकभीरुकयोर्गुणाः।

"वातपित्तप्रशमनौ मधुरौ रसपाकयोः।
सुशीतौ लघ्वौ बल्यौ पौण्ड्रको भीरुकस्तथा"॥*॥

अथ कोशकारगुणाः।

"कोशकारो गुरुः शीतो रक्तपित्तत्रयापहः"॥*॥

अथ कान्तारेक्षुगुणाः।

"कान्तारेक्षुर्गुरुर्दृष्यः श्लेष्मलो लघ्वगः सरः"॥*॥

अथ दीर्घपोरवंशकयोर्गुणाः।

"दीर्घपोरः सकठिनः सक्षारो वंशकः स्मृतः"॥*॥

अथ शतपोरकगुणाः।

"शतपर्व्वा भवेत् किञ्चित् कोशकारगुणान्वितः।
विशेषात् किञ्चिदुष्णश्च सक्षारः पवनापहः"॥*॥

अथ मनोगुप्तागुणाः।

"मनोगुप्ता वातहरी दृष्यामयविनाशिनी।
सुशीता मधुरातीव रक्तपित्तविनाशिनी"॥*॥

अथ तापसेक्षुगुणाः।

"तापसेक्षुर्भवेत् स्वादी मधुरा श्लेष्मकोपना।
तर्पणा रुचिकृच्चापि दृष्या च बलकारिणी"॥*॥

अथ बालयवदलेक्षुगुणाः।

"बाल इक्षुः कफं कुर्य्यान्मेदोमेहकरश्च सः।
युवा तु वातहृत् स्वादुर्मधुशीतोष्णश्च पित्तनुत्॥
रक्तपित्तहरो वृद्धः क्षतहृत् बलवीर्य्यकृत्"॥*॥

अथाङ्गभेदेन भेदः।

"मूले तु मधुरोऽग्रार्धं मध्येऽपि मधुरः स्मृतः।
अग्रे ग्रन्थिषु च ज्ञेयं इक्षुः षट्‌रसो जनैः"॥*॥

अथ दन्तपीड़ितेक्षुरसगुणाः॥

"दन्तनिष्पीड़ितस्येक्षोः रसः पित्तास्रनाशनः।
शर्करासमवीर्य्यः स्यादविदाही कफप्रदः"॥*॥

अथ यन्त्रपीड़ितस्येक्षुरसस्य गुणाः।

"मूलाग्रयन्त्रे ग्रन्थ्यादिपीड़नान्मलसंकरात्।
किञ्चित् कालं विष्टभ्याच विकृतिं याति यान्त्रिकः॥
तस्मादविदाही विष्टम्भी गुरुः स्याद्‌यान्त्रिको रसः"॥

अथ पर्य्युषितस्येक्षुरसस्य गुणाः।

"रसः पर्य्युषितो नेष्टो ह्यम्लो वातापहो गुरुः।
कफपित्तकरः शोषी भेदनश्चातिमूत्रलः"॥*॥

अथ पक्वस्येक्षुरसस्य गुणाः।

"पक्वो रसो गुरुः स्निग्धः सुतीक्ष्णः कफवातनुत्॥
गुल्मानाहप्रशमनः किञ्चित्पित्तहरः स्मृतः"॥*॥

अथेक्षुरसस्य विकाराणां गुणाः।

"इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः।
गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः॥
दृष्या मोहहराः शीता लघ्वग्नि विषहारिणः"॥
इति भावप्रकाशः॥

(अथ क्षतेक्षुगुणाः।

"रसायनोत्तमो बल्यो रोगवारणमुत्तमः।
स्निग्धश्च तर्पणो दृष्यो लघ्वग्निश्च सजीवनः॥
स्वादुगुणाभिवृद्धत्वादातपित्तप्रशान्तिकृत्।
दृष्योऽप्यन्तर्विदाही स्यात् सितेक्षुः कफकृन्मतः"॥

अथ क्षयेक्षुगुणाः।

"तद्वत् सुक्षयो भवनं गुणानां
दृष्यो भवेत्तर्पणलघ्वग्निश्च।
सञ्जीवनं स्यान्मधुरो रसेन
शोषापहर्त्ता वमथोकारी"॥*॥

अथ यन्त्रोद्भवरसगुणाः।

"यन्त्रेण पीड़ितरसः कथितो गुरुश्च
दृष्यः कफश्च कुरुतेऽथ मृगीतलश्च।
पाके विदाहिबलकृच्च सुशोभनश्च
संसेवितो रुधिरपित्तरुजं निहन्ति"॥*॥

अथ दन्तपीड़ितरसगुणाः।

"दन्तेन पीड़ितरसो रुचिकृद्गुरुश्च
सन्तर्पणो बलकरः कफकृच्छमघ्नः।
विष्टम्भकोऽपि रुधिरञ्च तथैव पित्तं
शोषं निहन्ति मधुरः स हिमो सरश्च"॥*॥

अथ पक्वरसगुणाः॥*॥

"पक्वो गुरुतरः स्निग्धः सुतीक्ष्णः कफवातहा।
पित्तघ्नोऽपि विशेषेण गुल्मातिसारकासनुत्"॥*॥
इति हारीतः। तथा च वाभटः शार्ङ्गधरश्च।
"इक्षोः रसो गुरुः स्निग्धो वृंहणः कफमूत्रकृत्।
दृष्यः शीतोऽस्रपित्तघ्नः स्वादुपाकरसः सरः।
सोऽग्ने सलवणो दन्तपीड़ितः शर्करासमः॥
मूलाग्रयन्त्रजग्रन्थ्यादिपीड़नान्मलसङ्करात्।
किञ्चित्कालं विष्टभ्य च विकृतिं याति यान्त्रिकः॥
विदाही गुरुविष्टम्भी तेनासौ तत्र पौण्ड्रकः।
शैत्यप्रसादमाधुर्य्यैर्वरस्तमनुवांशिकः॥
शातपर्व्वककान्तारनैपालाद्यास्ततः क्रमात्।

सक्षाराः सकषायाश्च सोष्णाः किञ्चिद्विदाहिनः"॥
"दृष्यः शीतः स्थिरः स्निग्धो वृंहणो मधुरो रसः।
श्लेष्मणो भक्षितस्येक्षोर्यान्त्रिकस्तु विदह्यते॥
शैत्यात् प्रसादान्माधुर्य्यात् पौण्ड्रकादंशको वरः"।
इति चरकः॥ तथा च सुश्रुते॥
"इक्षवो मधुरा विपाका गुरवः शीताः स्निग्धबल्या दृष्या मूत्रला रक्तपित्तप्रशमनाः कृमिकफकराश्चेति ते चानेकविधाः। तद्यथा,—
"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः॥
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
इत्येता जातयः स्थौल्यादगुणान् वक्ष्यामतः परम्॥
सुशीतो मधुरः स्निग्धो वृंहणः श्लेष्मणः सरः।
अविदाही गुरुर्दृष्यः पौण्ड्रको भीरुकस्तथा॥
आभ्यां तुल्यगुणः किञ्चित्सक्षारोवंशको मतः।
वंशवच्छतपोरस्तु किञ्चिदुष्णः स वातहा॥
कान्तारतापसावित्थौ वंशकानुगुणौ मतौ।
एवंगुणास्तु काण्डेक्षुः स तु वातप्रकोपणः॥
सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः।
वातलाः कफपित्तघ्नाः सकषाया विदाहिनः॥
कोशकारो गुरुः शीतो रक्तपित्तत्रयापहः।
अतीवमधुरो मूले मध्ये मधुर एव तु॥
अग्रेष्वन्थिषु विज्ञेय इक्षूणां लवणो रसः।
अविदाही कफकरो वातपित्तनिवारणः॥
वक्त्रप्रह्लादनो दृष्यो दन्तनिष्पीड़ितो रसः।
गुरुर्विदाही विष्टम्भी यान्त्रिकस्तु प्रकीर्त्तितः॥
पक्वो गुरुः सरः स्निग्धः सुतीक्ष्णः कफवातनुत्"॥)

कोकिलाक्षदण्डः। इति राजनिर्घण्टः॥

इक्षुकाण्डः, पुं, (इक्षुदण्डस्य काण्ड इव काण्डो यस्य।) मुञ्जकः। शरमुञ्ज इति ख्यातः। इति शब्दचन्द्रिका॥ (यथा, रामायणे २।९१।२५।
"अपराह्णोदकं शीतमिक्षुकाण्डरसोपमम्"।)
काण्डदण्डम्। इति राजनिर्घण्टः॥

इक्षुगन्धः, पुं, (इक्षुदण्डस्य गन्ध इव गन्धो यस्य।) काण्डदण्डम्। इति भावप्रकाशः॥ क्षुद्रगोक्षुरकवृक्षः। इति राजनिर्घण्टः॥

इक्षुगन्धा, स्त्री, (इक्षुगन्ध + टाप्।) गोक्षुरकवृक्षः। गोखुरी इति भाषा। शुक्लभूमिकुष्माण्डः। कोकिलाक्षवृक्षः। कुलिया खारा इति भाषा। काण्डदण्डम्। इत्यमरो मेदिनी च॥ काशिया इति भाषा।

इक्षुगन्धिका, स्त्री, (इक्षुगन्ध + कन् + टाप्।) भूमिकुष्माण्डः। इति शब्दरत्नावली॥ (भूमिकुष्माण्डशब्देऽस्या गुणादयो ज्ञेयाः॥)

इक्षुतुल्या, स्त्री, (इक्षोस्तुल्या।) दृष्यविशेषः। आनाखु इति ख्याता। तत्पर्य्यायः। इक्ष्वाखिका २ अनिक्षुः ३ इक्ष्वालिका ४। इति रत्नमाला॥

इक्षुदर्भा, स्त्री, (इक्षुवृक्षस्य दर्भो बन्ध इव दर्भो यस्याः।) दृष्यविशेषः। तत्पर्य्यायः। सुदर्भा २ पत्रालुः ३ दृष्यपत्रिका ४। अस्या गुणाः। सुमधुरत्वं। स्निग्धत्वं। ईषत्कषायत्वं। कफपित्तहरत्वं। रुचिजनकत्वं। लघुत्वं। परमदृष्यिकारित्वञ्च।

इति राजनिर्घण्टः ॥

इक्षुनेत्रं, क्ली, (इक्षोर्नेत्रं ।) इक्षुमूलं । इति राजनिर्घण्टः ॥

इक्षुपत्रः, पुं, (इक्षोः पत्रमिव तीक्ष्णं पत्रं यस्य ।) यावनालनामधान्यविशेषः । इति राजनिर्घण्टः ॥ जोयार इति भाषा ।

इक्षुप्रः, पुं, (इक्षुरिव पूर्य्यते । इक्षु + पॄ + क ।) शरटत्वं । इति राजनिर्घण्टः ॥ (शरटशब्देऽस्य गुणादयो ज्ञातव्याः ।)

इक्षुबालिका, स्त्री, (इक्षोर्बालिकेव तदाकृतित्वात् ।) इक्षुतुल्या । इति रत्नमाला ॥ अनाख इति ख्याता । काशः । इति राजनिर्घण्टः ॥ काशिया इति भाषा ।

इक्षुमूलं, क्ली, (इक्षोः मूलमिव मूलं यस्य ।) वृक्षविशेषः । तत्पर्य्यायः । इक्षुनेत्रं २ मोरटकं ३ वंशनेत्रं ४ वंशमूलं ५ मोरटं ६ वंशपूरकं ७ । इति राजनिर्घण्टः ॥ ("अतीव मधुरो मूलः" इति सुश्रुतः ।)

इक्षुयोनिः, पुं, (इक्षोर्योनिरुत्पत्तिकारणं ।) पुण्ड्रकइक्षुः । इति राजनिर्घण्टः ॥ (तत्र पौण्ड्रकः । प्रीत्यप्रसादमाधुर्य्यैर्वरः, इति वाभटः । पौण्ड्रकशब्दे ऽस्य विशेषो ज्ञेयः ॥)

इक्षुरः, पुं, (इक्षुमिक्षुवत् गन्धं राति ददातीति । इक्षु + रा + क ।) कोकिलाक्षवृक्षः । इति रत्नमाला ॥ कुलिया खारा इति भाषा । इक्षुः । गोक्षुरकवृक्षः । इति शब्दरत्नावली ॥ काशः । इति राजनिर्घण्टः ॥

इक्षुरकः, पुं, (इक्षुर + स्वार्थे + क ।) कोकिलाक्षवृक्षः । स्थूलशरः । काशशरणं । इति राजनिर्घण्टः ।

("क्षयक्षुण्णेक्षुरकयोः फलचूर्णं सशर्करम् ।
धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत्" ॥
इति सुश्रुतः ॥)

इक्षुरसः, पुं, (इक्षोरिव रसो यस्य ।) काशशरणं । इति भावप्रकाशः ॥ (इक्षुवृक्षस्य रसः। अस्य गुणाः क्रमेण यथा ; दन्तपीड़ितेक्षुरसगुणाः । जीवनहितकारित्वं, हिमत्वं, शुक्रकारित्वं, श्लेष्मजनकत्वं, वायुरक्तपित्तनाशित्वं, स्वादुत्वं, रक्तवर्द्धकत्वं धातुवर्द्धकत्वञ्च यथा भावप्रकाशः ।

"दन्तनिष्पीड़ितस्येक्षो रसः पित्तास्रनाशनः ।
शर्करासमवीर्य्यः स्यादविदाही कफप्रदः" ॥
यन्त्रनिष्पीड़ितरसगुणाः, रक्तशुक्रकारित्वम्, शीतलत्वं, सारकत्वं, दाहजनकत्वं, किञ्चित् पित्तवायुनाशित्वं, क्षीरविष्टम्भदाहकारित्वञ्च यथा, भावप्रकाशे,—

"भूनाग्रजन्तुयज्ञाद्यपीड़नात् मलसंकरात् ।
किञ्चिन्नाशं विशत्याथ विक्लितिं याति यान्त्रिकः ॥
तस्मात् विदाही विष्टम्भी गुरुः स्यात् यान्त्रिको रसः । पर्य्युषितेक्षुरसगुणाः । वान्तिहरत्वं, वातजनकत्वं, जाड्यप्रतिश्यायरोगदाहत्वं, कफवायुकारित्वञ्च । यथा भावप्रकाशे ।

"रसः पर्य्युषितो नेयो ह्यम्लो वातांपहो गुरुः ।
कफपित्तकरः श्लेष्मी भेदनश्चातिमूत्रलः" ॥ * ॥
पक्वेक्षुरसगुणाः । गुरुत्वं। सृतीक्ष्णत्वं । कफवातनाशित्वं । स्निग्धत्वं । अतिपाके विदाहित्वं । पित्तास्रदोषश्लेष्मकारित्वञ्च । यथा भावप्रकाशे ।

"पक्वो रसो गुरुः स्निग्धः सृतीक्ष्णः कफवातनुत् ।
गुल्मानाहप्रशमनः किञ्चित् पित्तहरः स्मृतः" ॥*॥
इक्षुरसविकारगुणाः । यथा भावप्रकाशे ।

"इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः ।
गुरवो मधुरा वल्याः स्निग्धाः वातहराः सराः ।
दध्या मोहहराः शीता हृद्या विषहारिणाः" ॥)

इक्षुरसक्षाथः, पुं, (इक्षुरसस्य क्षाथः ।) गुड़ः । इति हेमचन्द्रः ॥ (गुड़शब्दे ऽस्य गुणादयो व्याख्येयाः ।)

इक्षुरसोदः, पुं, (इक्षुरसवत् उदकं यस्य उदकस्य उदभावः ।) इक्षुसमुद्रः । इति जटाधरः ॥

इक्षुवल्लरी, स्त्री, (इक्षुरिव सुस्वादा वल्लरी ।) क्षीरविदारी । क्षीरकन्दः । इति राजनिर्घण्टः ॥

इक्षुवल्ली, स्त्री, (इक्षुरिव सुस्वादा वल्ली लता ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

इक्षुवाटिका, स्त्री, पुण्ड्रकः । इति राजनिर्घण्टः । पुड़ि आक् इति भाषा ।

इक्षुवाटी, स्त्री, (इक्षोर्वाटीव ।) पुण्ड्रकः । इति राजनिर्घण्टः ।

इक्षुवेष्टनः, पुं (इक्षोरिव वेष्टनं यस्य ।) भद्रमुञ्जः । इति राजनिर्घण्टः ॥

इक्षुशाकटं, क्ली, (इक्षोः क्षेत्रं । इक्षुशब्दात् क्षेत्रे शाकटशाकिनौ इति शाकटप्रत्ययः ।) इक्षुक्षेत्रम् । इति व्याकरणम् ॥ इक्षुर भूमि इति भाषा ।

इक्षुशाकिनं, क्ली, (इक्षोर्भवनं क्षेत्रं वा । इक्षु + शाकिन ।) इक्षुक्षेत्रं । इति व्याकरणम् ॥

इक्षुसारः, पुं, (इक्षोः सारः ।) गुड़ः । इति राजनिर्घण्टः ॥

इक्ष्वाकुः पुं, (इक्षुमाकरोतीति । इक्षु + आङ् + कृ + मितद्वादित्वात् डुः । यद्वा इक्ष इति शब्दं व्यक्तीति व्यक गतौ बाहुलकादुण् ।) वैवस्वतमनुपुत्रः । स तु सत्ययुगे अयोध्यायां सूर्य्यवंशीयादिराजः । इति पुराणम् ॥ (गीतायाम् । ४ । १ ।
"विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्" ।
इक्ष्वाकोर्गोत्रे जाताः इति व्युत्पत्त्या वाच्यलिङ्गाः । इक्ष्वाकुवंशोद्भवाः । यथा रघुः । १।७२ ।
"इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" ।)

इक्ष्वाकुः, स्त्री, (इक्षु + आङ् + कृ + डु ।) कटुकुम्बी । इत्यमरो मेदिनी च ॥ तितलाउ इति भाषा । ("इक्ष्वाकुकुसुमचूर्णं वा पूर्ब्ववदेव क्षीरेण काशश्वासच्छर्द्दिकफरोगेषूपयोगः" । इति सुश्रुते ।
"सिद्धं वच्चाम्यथेक्ष्वाकुकल्पं येषां प्रशस्यते" ।
अस्याः पर्य्यायो यथा ।
"लम्बाऽथ कटुकालाबुतुम्बी पिण्डफला तथा ।
इक्ष्वाकौ फलिनी चैव प्रोच्यते तस्य कल्पना" ॥
अस्या रोगविशेषे प्रशस्तता यथा ।
"कासश्वासविषच्छर्द्दिज्वरार्त्ते कफकर्षिते ।
प्रताम्यति नरे चैव वमनार्थं तदिष्यते" ॥
अवस्थाभेदेनास्या व्यवहारो यथा ।
"अपुष्पस्य प्रवालानां मुष्टिं प्रादेशसम्मिताम् ।
क्षीरप्रस्थे पृतं दद्यात् पित्तोद्रिक्ते कफज्वरे ॥
पुष्पादिषु च चत्वारः क्षीरे जीमूतके यथा ।
योगाहरितपाण्डूनां सुरामण्डेन पञ्चमः ॥
फलस्य रसभागश्च त्रिगुणक्षीरसाधितम् ।
उरःस्थिते कफे दद्यात् स्वरभेदे सपीनसे ॥
हृतमध्येफलेजीर्णे स्थितं क्षीरं यदा दधि ।
जातं स्यात् कफजे कासे श्वासे वम्याश्च तत्पिबेत् ॥
मस्तुना वा फलान्मध्यं पाण्डुकुष्ठविषार्द्दितः ।
तेन तक्रं विषघ्नं वा सक्षौद्रलवणं पिबेत् ॥
अजाक्षीरेण बीजानि भावयेत् पाययेत च ।
विषगुल्मोदरग्रन्थिगण्डेषु क्षीपदेषु च ॥
तुम्ब्याः फलरसैः शुष्कैः सपुष्पैरवचूर्णितम् ।
कृर्त्तयेन्माल्यमाघ्राय गन्धसम्पत्सुखोचितः ॥
भक्षयेत्फलमध्यं वा गुड़ेन फलेन च ।
इक्ष्वाकुफलतैलं वा सिद्धं वा पूर्ब्ववदृतम् ॥
पञ्चाशद्वृश्चदानि फणादीनां यथोत्तरम् ।
पिबेद्विमृद्य बीजानि कषायेष्वासुतं पृथक् ।
यष्ट्याह्वकोविदाराद्यैर्मुस्तिमन्तर्नखं पिबेत् ॥
कषायैः कोविदाराद्यैर्माक्षाच्च फलवत् स्मृताः ।
गुल्ममेहे प्रसेके च कल्कं मांसरसैः पिबेत् ॥
नरः साधु वमत्येवं न च दौर्ब्बल्यमश्नुते" ॥
"इक्ष्वाकुमूलं मदनं विशल्यातिविषे वचां ।
कुष्ठं किण्वाग्निकौ चापि पिबेत्तुल्यानि पूर्ब्ववत्" ॥)
इति चरकः ॥)

इक्ष्वारिः, पुं, (इक्षुवृक्षस्य अरिः ।) काशशरणं । इति राजनिर्घण्टः ॥ (काशशब्देऽस्य गुणादयो ज्ञातव्याः ।)

इक्ष्वालिकः, पुं, (इक्षुरिव अलति व्याप्नोतीति ।) काशशरणं । इति भावप्रकाशः ॥

इक्ष्वालिका, स्त्री, (इक्ष्वालिक + टाप् ।) इक्षुतुल्या । इति रत्नमाला ॥ आनाख इति भाषा । खागड़ा इति केचित् ॥

इख, गतौ । (भ्वादिं-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ द्वतीयस्वरादिः । एखति । इति दुर्गादासः ॥

इख, इ, गतौ । (भ्वादिं-परं-सकं-सेट्-इदित् ।) इति कविकल्पद्रुमः ॥ द्वतीयस्वरादिः । इ, इङ्खते । इति दुर्गादासः ॥

इग, इ, गतौ । (भ्वादिं-परं-सकं-सेट्, इदित् ।) इति कविकल्पद्रुमः ॥ द्वतीयस्वरादिः । इ, इङ्गति इङ्गितं । इति दुर्गादासः ॥ (यदुक्तं भारते ।
"त्वया हृषीकेण हृषीकमिदं विश्वं यच्चेङ्गं यच्च नेङ्गति" ।

इङ्गं, क्ली, (इगि + क ।) अद्भुतं । जङ्गमं । इति मेदिनीकरहेमचन्द्रौ ॥ (यथा, भारते ।
("त्वया हृषीकेण हृषीकमिदं विश्वं यच्चेङ्गं यच्च नेङ्गति" ।)

इङ्गः, पुं, (इङ्ग + घञ् ।) इङ्गितं । ज्ञानं । इति मेदिनीकरहेमचन्द्रौ ॥

इङ्गितं, क्ली, (इगि + क्त ।) अभिप्रायानुरूपचेष्टाविष्करणं । ठार सङ्केत । इत्यादि भाषा । तत्पर्य्यायः । आकारः २ इङ्गः ३ । इत्यमरः ॥ गमनं । चेष्टा । इति हेमचन्द्रः ॥
("आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारेण लक्ष्यतेऽन्तर्गतं मनः" ॥
हितोपदेशे सुहृद्भेदः । (तथाच रघुः २।२० ।)

"तस्य संहतमन्त्रस्य गूढ़ाकारेङ्गितस्य च" ।)

इक्षुदः, पुं (इक्षुं यति अवखण्डयतीति । इक्षु + दो + क । अस्य उक् ।) इक्षुदीवृक्षः । इत्यमरभरतौ ॥

("इक्षुदन्तिक्तमधुरं स्निग्धोष्णं कफवातजित्" । इति चरकः ॥०॥ विशेषोऽन्यस्मेक्षुदीशब्दे ज्ञेयः ॥)

इक्षुदी, स्त्री, (इक्षुद + ङीष् ।) वृक्षविशेषः । इक्षौट इति भाषा । जीयापुता इति तु वङ्गदेशीया प्रमादेन वदन्ति तस्य तु पुत्रजीव इत्यादीनि नामानि प्रसिद्धानि । तत्पर्य्यायः । तापसतरुः २ । इत्यमरः ॥ हिङ्गुपत्रः ३ विषकण्टः ४ अनिलान्तकः ५ गौरवृक्षः ६ तनुपत्रः ७ शूलारिः ८ तापसद्रुमः ९ तीक्ष्णकण्टः १० तैलफलः ११ पूतिगन्धः १२ विगन्धकः १३ क्रोष्टुफलः १४ ।

(यथा रघुः १४।८२ ।

"ता इक्षुदीक्षेहशतप्रदीप-
मास्तीर्णमेधाजिनतल्पमन्तः" ॥)

अस्या गुणाः । मदगन्धित्वं । कटुत्वम् । उष्णत्वम् । पेनिलत्वम् । लघुत्वम् । रसायनत्वम् । जन्तुवातामयकफव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

(अस्य पर्य्यायपूर्व्वकं गुणानाह ।

"इक्षुदोऽङ्गारदश्चक्ष्य तिक्तकस्तापसद्रुमः ।
इक्षुदः कुष्ठभूतादिव्रणविषक्रिमीन् ॥
हन्त्यण्डिचित्रशूलघ्नस्तिक्तकः कटुपाकवान्" ।
इति भावप्रकाशः ॥) ज्योतिष्मतीवृक्षः । इति रत्नमाला ॥ नयापाटी इति भाषा ।

इक्षुलः, पुं, स्त्री, इक्षुदीवृक्षः । इति भरतो द्विरूपकोषश्च ॥

इच्छा, स्त्री, (एषणं इच्छा । इष् + श + टाप् ।) मनोधर्म्मविशेषः । तत्पर्य्यायः । आकाङ्क्षा २ वाञ्छा ३ दोहदः ४ स्पृहा ५ ईहा ६ लट् ७ लिप्सा ८ मनोरथः ९ कामः १० अभिलाषः ११ तर्षः १२ । इत्यमरः ॥ रुक् १३ इषा १४ श्रद्धा १५ इच्छा १६ वाञ्छितं १७ मतिः १८ दोहलं १९ छन्दः २० इट् २१ । इति जटाधरः ॥ (यथा मनौ ५।४५ "योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया" ॥) न्यायमते अस्याः कारणम् । (यथा, भाषापरिच्छेदे । १४८, १४९ ।)

"निर्दुःखले सुखे चेच्छा तज्ज्ञानादेव जायते ।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि ॥
चिकीर्षाज्ञातिसाध्यत्वप्रकारेच्छा तु या भवेत् ।
तद्धेतुः कृतिसाध्येऽसाधनत्वमतिर्भवेत्" ॥

अस्याः प्रतिबन्धः । "बलवद्विरुद्धहेतुत्वमतिः स्यात् प्रतिबन्धिका" । इति भाषापरिच्छेदे १४८ ॥

इच्छावती, स्त्री, (इच्छा विद्यते यस्याः । इच्छा + मतुप् । मस्य वः ।) धनादीच्छायुक्ता स्त्री । तत्पर्य्यायः । कामुका २ । इत्यमरः ॥

इच्छावसुः, पुं, (इच्छयाभिलाषमात्रेणैव वसु धनं यस्य ।) कुबेरः । इति जटाधरः ॥

इच्छुः, त्रि, (इच्छतीति । इषधातोर्निपातनात् सिद्धम् ।) इच्छाविशिष्टः । आकाङ्क्षायुक्तः । इति व्याकरणम् ॥ (यथा, रामायणे ।१।४।८ ।

("शूरणः शूरणोच्छूनां पितुरादेशपालकः" ।)

इच्छकः, पुं, (इच्छु + कन् ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ टावालेवु इति ख्यातः ।

इञ्जलः, पुं, (एतीति । इ + क्विप् + तुक्; इत् जलमस्य ।) हिञ्जलवृक्षः । हिजल गाछ इति भाषा । तत्पर्य्यायः । निचुलः २ अम्बुजः ३ । इत्यमरः ॥ (सपर्य्यायगुणाः यथा, भावप्रकाशे ।

"इञ्जलो हिञ्जलश्चापि निचुलश्चाम्बुजस्तथा ।
ञ्जलवेतसवद्वेद्यो हिञ्जलोऽयं विषापहः" ॥)

इज्यः, पुं, (इज्या विद्यते यस्य । इज्या अर्च्च आद्यच् ।) बृहस्पतिः । इति ज्योतिषं शब्दरत्नावली च ॥ ("जीवार्किभानुजेज्यानां क्षेत्राणि सुरजादयः" ।)

इज्यः, त्रि, (इज्या पूजास्यस्य । अर्च्च आद्यच् ।) गुरुः । पूज्यनीयः । इति मेदिनी ॥

इज्या, स्त्री, (यजनं इति । यज + भावे क्यप् + टाप् ।) दानं । यज्ञः । (यथा, रघुः । १ । ६८ ।)

("सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः") पूजा । सङ्गमः । इति मेदिनी ॥ (कर्म्मणि क्यप् ।) गौः । इति राजनिर्घण्टः ॥ कुट्टनी । इति चिकाण्डशेषः ॥

इज्याशीलः, पुं, (इज्यां यज्ञं शीलयति पुनःपुनराचरतीति । इज्या + शील + ण ।) पुनःपुनर्यज्ञकर्त्ता । तत्पर्य्यायः । यायजूकः २ । इत्यमरः ॥

इक्षाकः, पुं, मत्स्यविशेषः । इति चिकाण्डशेषः ॥ इँचला मोचाचिङ्ड़ि इति भाषा । (चिङ्गटशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

इट गत्यां । (भ्वादिः-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ एटति । इति दुर्गादासः ॥

इट्[ष्]स्त्री, (इष् + क्विप् ।) इच्छा । इति जटाधरः ॥

इट्चरः, पुं, (एषणमिति इट् । इष् + क्विप् । तेन चरति इति । इष् + चर् + अच् ।) षण्डः । इत्यमरः ॥ बाँड़ इति भाषा ।

इड़ा, स्त्री, (इल् + क + टाप् ।) बुधग्रहभार्य्या । सा इक्ष्वाकुराजकन्या । (यथा हरिवंशे,—

"तत्र दिव्याम्बरधरा दिव्याभरणभूषिता ।
दिव्यसंहननां चैव इड़ां जज्ञे इति श्रुतिः" ॥)
गौः । (यथा, भारते, —

"इड़ाज्यहोमाऽऽतिथिभिर्मन्त्राग्निचाविशारदैः" ।)
वचनं । (देवीभेदः । यथा, हरिवंशे,—

'श्रुतिःप्रीतिरिड़ाकान्तिःक्षान्तिःपुष्टिःक्रिया तथा' ।)
एथ्वी । इति मेदिनी ॥ (यथा, महाभारते, घोषयात्रापर्व्वणि २३५।१० ।

"पतत्रिसङ्घैः स जघन्यरात्रे
प्रबोध्यते नूनमिड़ातलस्थः" ।) स्वर्गः ।
शरीरस्य वामभागस्था नाड़ी । इति हेमचन्द्रः ॥ (तथा च षट्चक्रभेदे २ श्लोके ।

"मेरोर्वाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षे निषण्णे, मध्ये नाड़ी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्य्याग्निरूपा" ।

"मेरोर्मेरुदण्डस्य वाह्यप्रदेशे बहिर्भागे सव्यदक्षे वामदक्षिणे पार्श्वे शशिमिहिरशिरे चन्द्रसूर्य्यात्मिके नाड्यौ इड़ापिङ्गलानाड़ीहृयमितिफलितार्थः । निषण्णे वर्त्तते" । ज्ञानसङ्कलनीतन्त्रे । ८ ।

"इड़ा नाम स्मृता गङ्गा यमुना पिङ्गला स्मृता ।
गङ्गायमुनयोर्मध्ये सुषुम्ना च सरस्वती ॥
एतासां सङ्गमो यत्र त्रिवेणी सा प्रकीर्त्तिता ।
तत्र स्नातः सदा योगी सर्व्वपापैः प्रमुच्यते" ॥

इयन्तु सकामकर्म्मानुष्ठायिजीवानां पुनरावर्त्तिकारिणी धूममार्गा पितृयानरूपिणी ।

अनयोरिड़ापिङ्गलयोर्मध्ये गता सुषुम्नैव ब्रह्मनाड़ी यस्यां नाड्यां इदं सर्व्वं विश्वं प्रतिष्ठितम् । यथा उत्तरगीतायाम् । २ अध्याये ।

"इड़ा च वामनिःश्वासः सोममण्डलगोचरा ।
पितृयानमितिज्ञेया वाममाश्रित्य तिष्ठति ॥१२॥
गुदस्य एष्ठभागेऽस्मिन् वीणादण्डस्य देहभृत् ।
दीर्घास्थि मूर्द्धिपर्य्यन्तं ब्रह्मदण्डेति कथ्यते ॥१३॥
तस्यान्ते सुषिरं सूक्ष्मं ब्रह्मनाड़ीति सूरिभिः ॥१४॥
इड़ा पिङ्गलयोर्मध्ये सुषुम्ना सूक्ष्मरूपिणी ॥
सर्व्वं प्रतिष्ठितं यस्यां सर्व्वगं सर्व्वतोमुखम्" ॥१५॥
परं आसामिड़ादीनां नाड़ीनां शोधनमकुर्व्वन् योगी कदाप्यात्मप्रसादं लब्धुं नार्हति तथा च भगवच्छङ्करोक्तयोगशास्त्रे ।

"ईप्सितानि समभ्यस्य वाञ्छितानि यथाविधि ।
प्राणायामं ततो गार्गि जितासनगतोऽभ्यसेत् ॥
मदासने कुशान् सम्यक् आस्तीर्य्यामृतमेव च ।
लम्बोदरञ्च सम्पूज्य फलमोदकभक्षणैः ॥
तदासने सुखासीनः सव्ये न्यस्येतरं करम् ।
समग्रीवशिराः सम्यक् संहतास्यः सुनिश्चलः ।
प्राङ्मुखोदङ्मुखोवापि नासाग्रन्यस्तलोचनः ॥
अतिभुक्तमभुक्तञ्च वर्ज्जयित्वा प्रयत्नतः ।
नाड़ीसंशोधनं कुर्य्यात् उक्तमार्गेण यत्नतः ॥
दृधा क्लेशो भवेत्तस्य तच्छोधनमकुर्व्वतः ।
नासाग्रे शशभृद्बीजं चन्द्रामृतपवितानितम् ॥
सप्तमस्य तु वर्गस्य चतुर्थं वर्गसंयुतम् ।
विश्वमध्यस्थमाकोक्य नासाग्रे चक्षुषी उभे ॥
इड़या पूरयेद्वायुं वाह्यं दादशमात्रकैः ।
ततोऽग्निं पूर्व्ववद्ध्यायेत् स्फुरज्ज्वालावलीयुतम् ।
रुधश्च विन्दुसंयुक्तं शिखिमण्डलसंस्थितम् ॥
ध्यायेद्विरेचयेद्वायुं मन्दं पिङ्गलया पुनः ।
पुनः पिङ्गलयापूर्य्य ध्यायं दक्षिणतः सुधीः ॥
तद्वद्विरेचयेद् वायुमिड़या तु शनैः शनैः ।
त्रिचतुर्वत्सरस्यापि त्रिचतुर्मासमेव च ।
गुरुणोक्तप्रकारेण रहस्येवं समभ्यसेत्" ॥)

इड़ाधिका, स्त्री, (इड़ावत् अधति । इड़ा + अच् । ण्वुल् । टाप् + अत इत्वम् ।) वरटा । बोल्ता इति भाषा । इति शब्दचन्द्रिका ॥

इड़िका, स्त्री, (इड़ा + स्वार्थे क, इत्वम् ।) एथ्वी । इति शब्दरत्नावली ॥

इड़िङ्गः, पुं, (इड़िङ् + कै + ड ।) वनच्छगलः । इति हेमचन्द्रः ॥

इडूरः, पुं, (इट् + ड + अच् ।) इट्चरः । षण्डः । इत्यमरटीकायां स्वामी ॥

इत, इ गत्ये । (इदित्-दिवां-आत्मं-सकं-सेट् ।) इ इत्यते । इति दुर्गादासः ॥

इतः, त्रि, (इ + क्त।) गतः। स्मृतः। इति मेदिनी॥ (प्राप्तः। ज्ञाने, क्ली।)

इतः, [स्] व्य, (अस्मादिति निपातनात् सिद्धम्।) नियमः। पञ्चम्यर्थः। (यथा कुमारे २। २८।
"तदद्भुत वत्साः किमितः प्रार्थयध्वं समागताः"।) विभागः। इति विश्वः॥

इतरः, त्रि, (इना कामेन तरतीति। इ + तॄ + अच् यद्वा इतेन ज्ञानेन क्षीयते इति बाहुलकात् अरः।) अन्यः ("वामेतरस्तस्य करः प्रहर्त्तुः"। इति रघुः। २।३१।) नीचः। इत्यमरः॥

इतरविशेषः, पुं, (इतरस्मात् विशेषः।) अन्यप्रभेदः॥

इतरेतरं, त्रि, अन्योऽन्यं। परस्परं। इति हेमचन्द्रः॥ यथा, रघुः। ७। ५४।)
("व्यूहावुभौ तावितरेतरस्मात्
भङ्गं जयश्चापतुरव्यवस्थम्"।)

इतरेद्युः, [स्] व्य, (इतर + एद्युस्।) इतरस्मिन्नहनि। अन्यदिने। इत्यमरः॥

इतस्ततः, व्य, अत्र तत्र। एखाने सेखाने इति भाषा। यथा,—
"हे सहस्रे रथानां स गजानामयुतं रणे।
इतस्ततो धावमानः सुरथो रथिनां वरः"॥
इति जैमिनिभारते आश्वमेधिके पर्व्वणि २० अध्यायः॥ अपि च।
"ताड़ितास्तेन वीरेण पन्नगेन्द्रास्तसमागताः।
इतस्ततस्ते तन्मुक्ता गताः पातालमुज्ज्वलाः"॥
इति पाद्मे पातालखण्डे ४४ अध्यायः॥

इति, व्य, (इण् + क्तिच्।) हेतुः। (यथा, रघुः। २। २२।
"वत्सोत्सुकापि स्तिमिता सपर्य्या,
प्रत्यग्रहीत्सेति ननन्दतुस्तौ"।)
प्रकरणम्। (यथा, मनुः। २। १५॥
"उदितेऽनुदिते चैव समयाध्युषिते तथा।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः"॥)
प्रकाशः। (यथा, रघुः। १। १२।
"दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव"॥)
आदिः। समाप्तिः। इत्यमरः॥ निदर्शनम्। ("आपो नारा इति प्रोक्ता आपो वै नरसूनवः"। इति मनुः। १। १०।) प्रकारः। अनुकर्षः। परस्तुतिः। इति मेदिनी॥ (विवक्षानियमः। प्रत्यक्षं। अवधारणं। परामर्शः। मानम्। इत्यमर्षः। एवार्थः। "गुणानित्येव तान् विद्धि"। इति रामायणे। १म काण्डे।)

इतिकर्थं, त्रि, (इति इत्थं प्रकारेण कथा यस्य।) अश्रद्धेयं। नष्टं। इति मेदिनी॥

इतिकथा, स्त्री, अर्थशून्यवाक्यं। इति मेदिनी॥

इतिह, व्य, (इति एवं च ह किल च।) पारम्पर्य्योपदेशः। तत्पर्य्यायः। ऐतिह्यं २। इत्यमरः॥

इतिहासः, पुं, (इतिह आस्तेऽस्मिन्। इतिह + आस + घञ्।) भूयवृत्तान्तः। प्राचीनकथा। तत्पर्य्यायः। पुरावृत्तं २। इत्यमरः॥ (यथा, मनुः। ३। २३२।
"आख्यानानीतिहासांश्च पुराणानि खिलानि च"।)
व्यासादिप्रणीतभारतादिग्रन्थः। इति भरतः॥

इत्कटः, पुं, (इतं समीपस्थं जनं कटति आच्छादयति फलेन इति। इत् + कट् + अच्।) वृक्षविशेषः। ओकड़ा इति भाषा। तत्पर्य्यायः। वञ्जुलः २ वाटीदीर्घः ३ खरच्छदः ४। इति रत्नमाला॥ ("वीरणशालिषष्टिकेक्षुबालिकादर्भकुशकाशगुन्द्रेत्कटकटगमूलानीति दशेमानि स्तन्यजननानि भवन्ति"। इति चरकः॥)

इत्तिला, स्त्री, रोचनाख्यगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

इत्थं, व्य, (इदम् + थमु। एतेतौरथोरिति इदादेशः।) इदंप्रकारः। इति वोपदेवः॥ एइ प्रकार इतिभाषा। (यथा रघौ। २। २५।
"इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः।)

इत्यः, त्रि, (इ + क्यप्।) गम्यः। इति व्याकरणम्॥

इत्वरः, त्रि, (एतीति + इ + क्वरप्।) क्रूरकर्म्मा। पथिकः। दुर्व्विधः। नीचः। इति हेमचन्द्रः॥

इत्वरी, स्त्री, (एति परपुरुषं प्राप्नोतीति। इ + क्वरप् + ङीष्।) असती। इत्यमरो मेदिनी च॥ अभिसारिका। इति हेमचन्द्रः॥

इद, इ, परमैश्वर्ये। (इदित् आदि-परं-सकं-सेट्।) इति कविकल्पद्रुमः॥ इ इन्दते इन्दति इन्द्रः। इति दुर्गादासः॥

इदं, [म्] त्रि, (एति, इण् गतौ, इणो दमुगिदि दशपादीत्यसिः। यद्वा इन्दति, इदि परमैश्वर्ये, इन्देः कमिर्नलोपश्चेति दीक्षितः।) पुरोवर्त्तिवाचकसर्व्वनाम। इति व्याकरणम्॥ एइ इति भाषा।

इदंकार्य्या, स्त्री, (इदम् कार्य्यं यस्याः।) दुरालभावृक्षः। इति शब्दचन्द्रिका॥

इदा, स्त्री, संवत्सरादिवर्षपञ्चकान्तर्गतदशतीयवत्सरः। इति मलमासतत्त्वं॥ अस्या विवरणम् वत्सरशब्दे द्रष्टव्यम्॥

इदानीं, [न्] व्य, (इदम् + दानीं, इदम इश्।) अस्मिन् काले। सम्प्रति। इत्यमरः॥
("इदानीं दीर्घसत्रस्य सा चेदानीं प्रचेतसः"। इति रघुः। १। ८०।) वाक्यभूषणम्। इति शब्दरत्नावली॥

इदानीन्तन, त्रि, (इदानीं + भवार्थे ष्युः।) इदानीम्भवं। सम्प्रतिजातं। आधुनिकं। इति व्याकरणम्॥
"वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः"। इति साहित्यदर्पणे ३ परिच्छेदे। २९।)

इदावत्सरः, पुं, (इदा इति वत्सरः।) संवत्सरादिपञ्चान्तर्गतवत्सरविशेषः। अस्मिन् वत्सरे अन्नवस्त्रदानं महाफलम्। इति विष्णुधर्म्मोत्तरम्॥ ("संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोसीदृत्सरोऽसि"। इति वाजसनेयीसंहिता। २७॥४५॥)

इद्धं, क्ली, (इन्द + क्तः।) आतपः। दीप्तिः। इति मेदिनी॥ आश्चर्य्यं। इति जटाधरः॥

इद्धः, त्रि, निर्म्मलः। इति शब्दरत्नावली॥

इद्वत्सरः, पुं, इदावत्सरः। यथा,—
"संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः।
इद्वत्सरस्तृतीयस्तु चतुर्थस्त्वनुवत्सरः॥
पञ्चमो वत्सरस्तेषां तदेभिः पञ्चभिर्युगं।
तेषु संवत्सरो ह्यग्निः सूर्य्यस्तु परिवत्सरः॥
सोम इद्वत्सरस्तेषां वायुश्चैवानुवत्सरः।
इध्मस्तु वत्सरो ज्ञेयः पञ्चाब्दा ये युगात्मकाः"॥
इति देवीपुराणे कालव्यवस्थानामाध्यायः॥

इध्मं, क्ली, (इन्ध + मक्।) अग्निसन्दीपनकाष्ठम्। इत्यमरः॥ जालानि काठ इति भाषा। ("तच्चेध्मानयने शुक्रो नियुक्तः काश्यपेन ह"। इति भारते।)

इनः, पुं, (एतीति। इ + नक्।) सूर्य्यः। प्रभुः। ("वसु न इनस्पतिः"। ऋग्वेदे। ४३। २।) नृपभेदः। इत्युणादिकोषः॥

इनानी, स्त्री, वटपत्रीवृक्षः। इति राजनिर्घण्टः॥

इन्दम्बरं, क्ली, (इन्दं महार्हम् अम्बरं नीलवस्त्रमिव।) इन्दीवरं। नीलोत्पलं। इति शब्दमाला॥

इन्दिन्दिरः, पुं, भ्रमरः। इति हेमचन्द्रः॥

इन्दिरा, स्त्री, (इन्द + किरच् + टाप्।) लक्ष्मीः। इति जटाधरः चिकाण्डशेषश्च॥ ("मन्दं मन्दं मन्दिरादिन्दिरेव" इति भामिनीविलासे।) शोभा। कान्तिः। यथा, "निशि निःसरदिन्दिरं कथं तुलयामः कलयापि पङ्कजम्"। इति भामिनीविलासे।)

इन्दिरामन्दिरं, क्ली, (इन्दिरायाः मन्दिरं वासस्थानमिव।) विष्णुः। इति राजवल्लभः॥

इन्दिराजयं, क्ली, (इन्दिरायाः लक्ष्म्याः आजयः।) पद्मं। इति शब्दरत्नावली। क्लीवत्वमभिधानात्॥

इन्दिरावरं, क्ली, (इन्दिरायाः लक्ष्म्याः वरं प्रियं।) नीलोत्पलं। इति शब्दरत्नावली॥

इन्दिवरं, क्ली, (इन्दतीति। इदि परमैश्वर्ये, इगुपधात् किदिति इन्। इन्दिर्लक्ष्मीस्तस्याः वरं प्रियं।) नीलोत्पलं। इति शब्दमाला॥

इन्दीवरं, क्ली, (इन्दी लक्ष्मीस्तस्याः वरं प्रियं।) नीलपद्मं। तत्पर्य्यायः। नीलाम्बुजन्म २। इत्यमरः। कुवलयं ३ नीलाब्जं ४ नीलोत्पलं ५। इति रत्नमाला॥ ("इन्दीवरेण नयनं मुखमम्बुजेन"। इति कालिदासः। "इन्दीवरश्यामतनुर्नृपोऽसौ"। इति रघुः। ६। ६५।) (नीलोत्पलशब्देऽस्य गुणादयो ज्ञेयाः।)

इन्दीवरिणी, स्त्री, (इन्दीवर + इनि ङीष्।) उत्पलिनी। इति राजनिर्घण्टः॥ (नीलोत्पलसमूहः।)

इन्दीवरी, स्त्री, (इन्दीवरमस्त्यस्याः। अर्श आद्यच् गौरादित्वात् ङीष्।) घृतमूली। इति मेदिनीराजनिर्घण्टौ॥
("वासानिम्बपटोलकेतकिदलाकुब्जाम्बुजेन्दीवरी" इति परिभाषायां॥)

इन्दीवारं, क्ली, (इन्द्या लक्ष्म्या वारो वरणं यस्मिन्।) इन्दीवरं। इत्यमरटीकायां रायमुकुटः॥

इन्दुः, पुं, (उनत्ति अमृतधारया भुवं क्लिन्नां करोति इति। उन्द + उ + आदेरिच्च।) चन्द्रः। ("दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव"। इति रघुः। १। १२।) कर्पूरः। इत्यमरः॥ (चन्द्रसमसंख्यः एकसंख्यायुक्तः। मृगशिरानक्षत्रम्॥ "दिवार्ककिरणैर्जुष्टं स्पृष्टमिन्दुकरैर्निशि"।

इति वैद्यकद्रव्यगुणः ॥)

इन्दुकः, पुं, (इन्दुरिव शुक्लत्वात्। इन्दु+कन्।) अश्वन्तकवृक्षः। इति राजनिर्घण्टः ॥

इन्दुकमलं, क्ली, (इन्दुवन्द्र इव शुभ्रं कमलं।) सितोत्पलं। इति राजनिर्घण्टः ॥

इन्दुकलिका, स्त्री, (इन्दुरिव शुक्ला कलिका यस्याः।) केतकी। इति राजनिर्घण्टः ॥ (केतकीशब्देऽस्या विशेषो ज्ञेयः ॥)

इन्दुकान्तः, पुं, (इन्दुः कान्तः प्रियो यस्य। चन्द्रोदयेऽयं निष्यन्दतीतिभावः।) चन्द्रकान्तमणिः। इति राजनिर्घण्टः ॥

इन्दुकान्ता, स्त्री, (इन्दुः कान्तो यस्याः।) रात्रिः। इति हेमचन्द्रः ॥

इन्दुजनकः, पुं, (इन्दोर्जनकः।) समुद्रः। इति त्रिकाण्डशेषः ॥ (समुद्रात् चन्द्रोत्पत्तिकथा भारते आदिपर्व्वणि अष्टादशाध्याये द्रष्टव्या। यथा, —

"ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात्।
प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः" ॥ ३४॥)

इन्दुजा, स्त्री, (इन्दोर्जायते या। इन्दु+जन्+ड।) नर्म्मदा नदी। इति हेमचन्द्रः। नर्व्वदा इति ख्याता। (इयं च प्रतीच्यामवन्तिषु स्थिता प्रत्यक् स्रोतोवहा च। यथा,—

"अवन्तिषु प्रतीच्यां वै कीर्त्तयिष्यामि ते दिशि।
यानि तत्र पवित्राणि पुण्यान्यायतनानि च ॥
प्रियङ्गुवामवनोपेता वानीरफलशालिनी।
प्रत्यक्स्रोता नदी पुण्या नर्मदा तत्र भारत" ! ॥
इति भारते आदिपर्व्वणि ८६ अध्यायः ॥)

इन्दुपुचः, पुं, (इन्दोः पुत्रः।) बुधग्रहः। इति शब्दरत्नावली ॥

इन्दुपुष्पिका, स्त्री, (इन्दुरिव शुभ्रं पुष्पं यस्याः।) कलिकारीवृक्षः। इति राजनिर्घण्टः ॥ विमलाकुला इति भाषा।

इन्दुभृत्, पुं, (इन्दुं बिभर्त्तीति। इन्दु+भृ+क्विप्।) शिवः। इति हेमचन्द्रः ॥

इन्दुमती, स्त्री, (इन्दुः पूर्णेन्दुर्विद्यते यस्याः। इन्दु+मतुप्।) पूर्णिमेव इति राजनिर्घण्टः ॥ (इन्दुमती पूर्णिमेव आनन्ददायिका स्वनामख्याता विदर्भराजभगिनी, अजराजपत्नी। यथा,—रघुः।

"अथेश्वरेण क्रथकैशिकानां
स्वयंवराय स्वसरिन्दुमत्याः"। ५।३९।

"वसुधामपि हस्तगामिनी-
मकरोदिन्दुमतीमिवापरां" ।८।१।)

इन्दुरत्नं, क्ली, (इन्दुरिव शुभ्रं रत्नम्।) मुक्ता। इति राजनिर्घण्टः ॥

इन्दुलेखा, स्त्री, (इन्दोश्चन्द्रस्य लेखेव।) अमृता। सोमलता। शुक्लिकला। इति मेदिनी। यमालिका इति शब्दमाला ॥

इन्दुलोहकं, क्ली, (इन्दुलोह+कन्।) रौप्यं। इति राजनिर्घण्टः।

इन्दुवल्ली, स्त्री, (इन्दोर्वल्ली लता।) सोमलता। इति जटाधरः ॥ (सोमलताशब्देऽस्या गुणादयो व्याख्येयाः।)

इन्दुव्रतं, क्ली, (इन्दवे इन्दुलोकार्थं वा व्रतं।) चान्द्रायणव्रतं। इति त्रिकाण्डशेषः॥ (यथा, महाभारते ॥)

("इन्द्रव्रतसहस्रं तु यश्चरेत् कायशोधनम्।
पिबेत् यश्चापि गङ्गाम्भः समौ स्यातां न वा समौ")

इन्दूरः, पुं, मूषिकः। इति जटाधरः। इँदुर इति भाषा। (गणेशवाहनं। इति पुराणम्।)

इन्द्रः, पुं, (इन्दतीति। इदि परमैश्वर्ये तस्मात् रन् प्रत्ययः।) देवराजः। स तु अदितिपुत्रः। पूर्व्वदिक्पतिश्च। तस्य भार्य्या शची। पुत्राः जयन्तः १ ऋषभः २ मीढुष्वः ३। अस्त्रं वज्रं। वाहनं ऐरावतः। पुरी अमरावती। वनं नन्दनं। तत्पर्य्यायः। मरुत्वान् २ मघवा ३ विडोजाः ४ पाकशासनः ५ दृढ़ाश्वः ६ सुनासीरः ७ पुरुहूतः ८ पुरन्दरः ९ जिष्णुः १० लेखर्षभः ११ शक्रः १२ शतमन्युः १३ दिवस्पतिः १४ सुत्रामा १५ गोत्रभित् १६ वज्री १७ वासवः १८ वृत्रहा १९ वृषा २० वास्तोष्पतिः २१ सुरपतिः २२ बलारातिः २३ शचीपतिः २४ जम्भभेदी २५ हरिहयः २६ स्वाराट् २७ नमुचिसूदनः २८ संक्रन्दनः २९ दुश्च्यवनः ३० तुराषाट् ३१ मेघवाहनः ३२ आखण्डलः ३३ सहस्राक्षः ३४ ऋभुक्षा ३५। इत्यमरः। महेन्द्रः ३६ कौशिकः ३७ पूतक्रतुः ३८ विश्वभरः ३९ हरिः ४० पुरदंशा ४१ शतधृतिः ४२ शतनाधाड् ४३ अहिद्विषः ४४। इति जटाधरः ॥ वज्रपाणिः ४५ देवराजः ४६ पर्व्वतारिः ४७ पर्य्यण्यः ४८ देवताधिपः ४९ नाकनाथः ५० पूर्व्वदिक्पतिः ५१ पुलोमारिः ५२ अर्हः ५३ प्राचीनबर्हिः ५४ तपस्वन्तः ५५। इति शब्दरत्नावली। तस्य चतुर्दश नाम भेदा यथा।

"इन्द्रश्च विश्वभुग् ज्ञेयो विपश्चित्तदनन्तरम्।
विभुः प्रभुः शिखिश्चैव तथैव च मनोजवः।
तेजस्वी साम्प्रतश्चेन्द्रो बलिर्भाव्यस्त्वनन्तरम् ॥
अद्भुतश्चेदिवश्चैव दशमश्चेन्द्र उच्यते।
सुप्राणश्च सुकीर्त्तिश्च ऋतधामा दिवस्पतिः।
इति भूता भविष्याश्च इन्द्रा ज्ञेयाश्चतुर्दश" ॥

इति देवीपुराणे कालव्यवस्थाध्यायः।

विष्कुम्भादिसप्तविंशतियोगान्तर्गतषड्विंशयोगः। तत्र जातफलम्।

"प्रतापशीलो बलवान् गुणाढ्यः
श्लेष्माधिकः श्रीकमलाभ्युपेतः।
किलेन्द्रयोगो यदि जन्मकाले
महेन्द्रतुल्यः पुरुषः प्रसन्नः"।

इति कोष्ठीप्रदीपः ॥ * ॥ अन्तरात्मा आदित्यविशेषः। इति मेदिनी (यथा, हरिवंशे।

"तत्र शक्रश्च विष्णुश्च जज्ञाते पुनरेव ह" ।)

कुटजवृक्षः। रात्रिः। इति धरणी ॥ उपदीपविशेषः। इति शब्दमाला ॥ परमेश्वरः। इति वेदान्तः ॥ ("इन्द्रो मायाभिः पुरुरूप ईयते" इति श्रुतिः ॥ इन्द्रियं। श्रेष्ठः। प्रथमः। यथा, नरेन्द्रो राजा। पक्षीन्द्रो गरुडः। इत्यादिः।)

इन्द्रकं, क्ली, (इन्द्रस्य ऐश्वर्य्यशालिनः कं सुखं यस्मिन्।) सभागृहम्। तत्पर्य्यायः। अस्थानगृहं २। इति हेमचन्द्रः ॥

इन्द्रकीलः, पुं, (इन्द्रस्य कील इव।) मन्दरपर्व्वतः। इति हेमचन्द्रः ॥ (यथा रामायणे २।८०।१८।

"तत्रेन्द्रकीलप्रतिमाः प्रतोलिवरशोभिताः।)

इन्द्रकुञ्जरः, पुं, (इन्द्रस्य कुञ्जरः।) ऐरावतहस्ती। इति जटाधरः ॥

इन्द्रकोषः, पुं, (इन्द्रस्य ऐश्वर्य्यशालिनः कोषः।) मद्यः। खड्गः। इति त्रिकाण्डशेषः ॥ तमङ्गकः। इति हेमचन्द्रः। घोमला गोँजला इत्यादिख्यातः। निर्यूहोऽपि। यथा, महेश्वरः।

"निर्यूहः शेखरे द्वारे निर्य्यासे नागदन्तके"।

इन्द्रगोपः, पुं, (इन्द्रो गोपो रक्षको यस्य।) रक्तवर्णकीटविशेषः। मखमली इति भाषा। तत्पर्य्यायः। अग्निरजः २ वैराटः ३ तितिभः ४ अग्निकः ५ इति हेमचन्द्रः। शक्रगोपः ६ वर्षाभूः ७ रक्तवर्णः ८। इति राजनिर्घण्टः ॥ ("अविरलवितरेवहीन्द्रगोपैः"। इति किराते। १९।३।)

इन्द्रचन्दनं, क्ली, (इन्द्रस्य चन्दनं रक्तविशेषः।) हरिचन्दनम्। इति राजनिर्घण्टः ॥

इन्द्रचिर्भिटी, स्त्री, लताविशेषः। तत्पर्य्यायः। इन्दीवरा २ युग्मफला ३ दीर्घवृन्ता ४ उत्तमारुणी ५ पुष्पमञ्जरिका ६ द्रोणी ७ करम्भा ८ नलिका ९। अस्या गुणाः। कटुत्वं। शीतत्वं। पित्तश्लेष्मकासदोषव्रणकृमिनाशित्वं। चक्षुर्हितकारित्वञ्च। इति राजनिर्घण्टः ॥

इन्द्रच्छन्दः, [स्] क्ली, (इन्द्र इव सहस्रपुच्छेन छाद्यते इति। इन्द्र+छद्+असुन्। निपातनात् सिद्धं।) सहस्रगुच्छहारः। इति हेमचन्द्रः ॥

इन्द्रजालं, क्ली, (इन्द्राणामिन्द्रियाणां जालं आवरकम्। यद्वा इन्द्रस्य परमेश्वरस्य जालं माया इव।) मायाकर्म्म। भोजबाजि; भेलकि इत्यादि भाषा। तत्पर्य्यायः। कुहकं २ जालं ३ कुरुतिः ४। तद्विवरणग्रन्थो यथा,—

"अथातः संप्रवक्ष्यामि चेन्द्रजालमनुत्तमम्।
व्याधिदारिद्र्यहरणं जराम्रत्युविनाशनम् ॥
इन्द्रस्य यो न जानाति जालेशं रुद्रभाषितम्।
नियहानुग्रहे तस्य का शक्तिः परमेश्वरि ! ॥
न तेषां जायते सिद्धिर्गोचे क्षेत्रे गृहेऽपि वा।
इन्द्रजालं न जानाति स क्रुद्धः किं करिष्यति ॥
न जीवति वरारोहे संसारे दुःखसागरे।
इन्द्रजालं न जानाति कुतः सौख्यं भवेत्ततः ॥
कौतूहलं कुतस्तेषां कुतः कामा वरानने !।
संसारसागरे घोरे कामलुब्धाश्च मानवाः।
रुद्रकर्म्म न हि तेषां कुतः सौख्यं विधीयते ॥
यथा नदीनदाः सर्व्वे सागरे समुपागताः।
तथा सर्व्वाणि शास्त्राणि इन्द्रजालस्थितानि च ॥
तन्त्राणाञ्च यथा भानुः शीतलानां यथा शशी।
गम्भीराणां यथा सिन्धुर्जालेन्द्रश्च तथा प्रिये ! ॥
तथा किं बहुनोक्तेन वर्णनेन पुनः पुनः।
जालेन्द्रस्य समं शास्त्रं न भूतं न भविष्यति" ॥ ॥
"अथातः संप्रवक्ष्यामि ओषधीनां विधिं वरे।
येन विज्ञानमात्रेण सर्व्वसिद्धिर्भविष्यति ॥
महाकालस्य बीजानि प्रस्थमेकं समाहरेत्।

धात्रीरसेन देवेशि ! सप्त वारान् विभावयेत्" ॥ गुटिका कर्त्तव्या तां गुटिकां मुखे निक्षिप्य पारावतो भवति ॥ १ ॥ "अथातः संप्रवक्ष्यामि शृणु त्वं मम वल्लभे। काकस्य शीर्षं संगृह्य कृष्णमृत्तिकां पूरयित्वा पुनर्धुस्तूरबीजानि वापयेत् काले तानि पुष्पितानि भवन्ति तदा यस्योपरि निक्षिपेत् स काको भवति ॥ २ ॥ मयूरशीर्षमादाय कृष्णचतुर्दश्यां मृत्तिकां पूरयेत् शणबीजानि वापयेत् यदा फलितो पुष्पितो भवति तदा शणबीजानि ग्रीवायां बन्धयेत् तेन मयूरो भवेत् ॥ ३ ॥ कृष्णचतुर्दश्यां मयूरशीर्षमादाय कृष्णमृत्तिकां पूरयेत् कार्पासबीजानि वापयेत् यदा फलिताः पुष्पिता भवन्ति पुष्पफले संगृह्य समस्तं पेषयित्वा अङ्गं विलिप्य पानीयमध्ये प्रविश्य तथा जले तिष्ठेत् यथा स्थले ॥ ४ ॥ कृष्ण-काक-शीर्षमादाय काकमाचीबीजानि वापयेत् यदा फलिताः पुष्पिता भवन्ति तत्फलं संगृह्य मुखे प्रक्षिप्य काको भवति काक इव गच्छति मत्वा उड्डीर्णो मोक्षः ॥ ५ ॥ पारावतशीर्षमादाय कृष्णमृत्तिकां पूरयित्वा तिलबीजानि वापयेत् क्षीरोदकेन सिञ्चनीयं यदा पुष्पिता भवन्ति तदा मुखे संस्थाप्य अन्तर्हितो भवेत् ॥ ६ ॥ तेषां फलानां चूर्णं कृत्वा तेन चूर्णेन यं स्पृशति स किङ्करो भवेत् सर्वस्वं ददाति ॥ ७ ॥ तानि तिलानि संगृह्य नेत्राञ्जनेन सह पिष्ट्वा कपिलादुग्धेन गुटिकां कारयेत्। सप्तरात्रं पाचयेत्। तां गुटिकां मुखे निक्षिप्य अन्तर्हितो भवति देवैरपि न दृश्यते मनुष्याणां का कथा। उड्डीर्णेन पुरुषो भवति। जीवेद्वर्षशतं स्त्रियः सर्वे जनाश्च वश्या भवन्ति ॥ ८ ॥ गृध्रशिरः समादाय कृष्णचतुर्दश्यां कृष्णमृत्तिकां निक्षेपेत् लशुनबीजानि वापयेत् यदा फलं पुष्पं भवति तदा पुष्यनक्षत्रे पुष्पं गृहीत्वा अञ्जनेन सह कपिलाघृतेन कज्जलं पातयेत् चक्षुरञ्जनीयं तावत् योजनशतं पश्यति मेदिनीं दिवा नक्षत्राण्यपि पश्यति लाभस्तस्य। किञ्चित् कर्त्तुमिच्छति तत् करोति न संशयः ॥ ९ ॥ अन्ये च सर्वे जीवाः एवं उष्ट्रगर्दभमहिष्यादिसघृतहञ्जीवाः। यत् यत् बीजं यस्य शिरसि वापयेत् यदा पुष्पितः फलितो भवति तदा यस्य बीजानि मुखे निक्षिप्यन्ते स जीवो भवति नात्र सन्देहः ॥ १० ॥ * ॥ अथ सर्वेषां धारणमन्त्रः। ॐ क्रीं क्रीं क्रैं ऐं लं लं ॐ भौ स्वाहा। एकादशाक्षरो मनुरस्य पुरश्चरणं लक्षजपः। दशांशहोमः घृतेन तर्पणं मार्जनं ब्राह्मणभोजनादिकं कारयित्वा सिद्धिर्भवति ॥ * ॥

अथ वश्याधिकारः।

"मातुलुङ्गस्य मूलन्तु धुस्तूरबीजकेन च।
पलाशपुष्पमादाय सूक्ष्मचूर्णन्तु कारयेत् ॥
योऽस्य गन्धं समाघ्राति स च खेचरेण पश्यति।
दुन्दुभिं षट्टाङ्कांश्चैव शङ्खांश्चैव तु लेपयेत् ॥
एष भूलोपरिस्थानां कुमारीणां गृहेषु च।
भूपतेः सेव्यमानानां तथापत्यापजीविनां ॥
न चाभिर्दृश्यते वेश्म यत्रैष सोऽगदो भवेत्"।

अथ मन्त्रः।

ॐ "रक्तचामुण्डे अमुकं मे वशमानय क्रीं क्रीं हूं फट्। अयुतं जपत्यम्। ॐ नमोऽस्तु आदित्याय किलि किलि चिलि चिलि धूमं लिहि यक्षिणि मोदते हि शाकिनि अनिदुदुशूलपाणि स्वाहा॥ वर्णाः ४० शिलाक्षतिके मन्त्रे। ॐ नमो गुह्यावासिन्यै गुह्यपति गुह्यिले मनोजवो ॐ ह्रं ॐ विज्ये नमः। शिलायाः कृतिः करलिखिता खदिरानलसन्तप्तलिङ्गा यतो नवयोषितोऽपि आकर्षणं। वर्णाः २६। ॐ नमः कपालरुद्राय सर्वलोकवशङ्कराय अनाथायाप्रतिहतबलवीर्यपराक्रमप्रभवाय हा हा हे हे पच पच मारय मारय कपट कपट काट सर्प कर्म्मकरि अमुकं मे वशमानय स्वाहा। ७७। वर्णाः अयुतजपाद्वशीकरोति॥* अन्यप्रकारः।

"पारावतस्य हृदयं चक्षुर्जिह्वा च शोणितम्।
अञ्जनं रोचनयुतं वनितावशकृत् परम्" ॥
तत्र मन्त्रः। ॐ नय नय महारिणि नमो देव्यै स्वाहा॥१५॥ एकविंशतिवारान् परिजप्य सिद्धिर्भवति ॥ * ॥ अन्यप्रकारः।

"कपालं मानुषं ग्राह्यं कनकस्य फलानि च।
कर्पूरं मधुसंयुक्तं निघृष्य तिलकेन च ॥
नारी वा पुरुषोऽनेन वश्यो भवति नित्यशः।
एष कापालिको योगो वशिष्ठस्य शुभं मतम्" ॥*॥

अन्यप्रकारः। पुरुषार्थी।

"कर्पूरं वालुकं लाक्षा रजसा सप्तभावितं।
रतिकाले भगं लिप्य पतिर्दासो भविष्यति" ॥*॥

अन्यप्रकारः।

"नरजिह्वां ममुद्धृत्य सूक्ष्मचूर्णन्तु कारयेत्।
जलेन च सुशीतेन दापयेत् तद्दिवसाग्रः॥
पाने फले च पुष्पे च भक्ष्ये भोज्ये च दापयेत्।
प्रजापतिकुलोद्भूता यदि साक्षादरुन्धती ॥
साभिसक्षा प्रियं याति नान्यं पुरुषमिच्छति" ॥*॥

अन्यप्रकारः।

"कनकक्षाप्यपामार्गं सुरसा गौरसर्षपाः।
तिलतैलेन पिष्ट्वापि योनिलेपः प्रशस्यते" ॥

अत्र मन्त्रः। ॐ नम शूल्यायै दरि विदरि यामिनि अमुकं मे वशमानय स्वाहा ॥ * ॥ अन्यप्रकारः। हरितालं श्मशाने कृष्णचतुर्दश्यां क्षिप्त्वा कुष्ठविभिश्रं ग्राह्यं अवश्यं वशी भवेत् स नरः॥*॥

अन्यप्रकारः। ऋतुनवलोचनतालालाटास्थिबाणसाधितं तैलं सकलमनुजेन्द्रललनावशङ्करं मकरालये पुष्ये। नरतैलं प्रेताम्बरवह्निकं कृत्वा मात्रे रात्रौ प्रज्वाल्यार्कवृक्षस्कन्धे कज्जलं कृत्वा चक्षुषी अभ्यञ्जयेत् यं पश्यति स वश्यो भवति ॥*॥

अन्यप्रकारः।

"कर्णदन्तमलं लाला स्वदेहात्तिमलत्रयम्।
नासिकोद्भवरक्तञ्च चूर्णमेतद्विलायुतम् ॥
एतत् सर्वं समुद्धृत्य गुटिकां कारयेद्बुधः।
पानभोजनके देया वशीकरणमुत्तमम्" ॥ * ॥

अन्यप्रकारः।

काकजिह्वा वचा कुष्ठं आत्मनो रुधिरं स्त्रियः।
तद्भावितञ्च मक्षिष्ठा तगरं गौरसर्षपाः ॥
शिवनिर्माल्यसंयुक्तं समभागानि कारयेत्।
भोज्ये पानेऽथवा देयाः स्त्रीणान्तु वशकारकाः ॥
नित्यं पुरुषमिच्छन्ती मृतमप्यनुगच्छति ॥ * ॥

अन्यप्रकारः। कृष्णसर्पमण्डुलप्रमाणं शिरश्छित्वास्यास्यं सर्षपादिभिः पूरयित्वा कायाशुष्कं शोषयेत्। परतः सर्षपान् ग्राहयित्वा तानि यस्मै दीयते स वश्यो भवति ॥ * ॥ अन्यप्रकारः॥ पूगीफलं निर्गिलितापागमार्गं निर्गतं गृह्य धुस्तूररसान्तरितं कृत्वा सप्तदिनानि पूजयेत् ॥ पुनः कुङ्कुमचन्दनैरधिवास्य यस्मै दीयते स वश्यो भवति ॥ * ॥ अन्यप्रकारः।

"दर्दुरयुग्मं गृहीत्वा तद्धूमेन दाहयेत्।
तद्भस्म सह पानेन वशकृत् परमो मतः" ॥*॥

अन्यप्रकारः।

"अजगन्धस्य पत्राणि वचा कुष्ठेन भावयेत्।
श्मशानभस्मसंयुक्तं चूर्णञ्चेत्रिषु दुर्लभम् ॥
अनेनैव तु चूर्णेन जोटयेत् चित्र यादृशम्।
पुष्पितं फलितं दृष्ट्वा चूर्णं दत्त्वादिलभयेत्।
तत्क्षणात् फलते दत्तो नरनारीषु का कथा ॥*॥

अन्यप्रकारः।

"जिह्वामूले सप्तरात्रं सैन्धवेनापि मिश्रितम्।
ददाति यस्य पानेषु सोऽपि वश्यो भवेत् क्षणात्"॥*

अन्यप्रकारः।

"गोपित्तं सैन्धवञ्चैव दृहतीफलमेव च।
लेपमेतत् प्रयोक्तव्यं नरनारीवशङ्करम्" ॥ * ॥

अन्यप्रकारः।

"बालामूलं चूर्णयित्वा रक्तरेतःसमन्वितः।
दद्यात् पानेन प्रमदां क्षिप्रमेव वशं नयेत् ॥
पुत्रादिञ्च धनं त्यक्त्वा दासीवत् भवति तु सा।
यत्र वा नीयते तत्र पश्चात् भ्रमति विह्वला" ॥*॥

अन्यप्रकारः। वल्मीकमृत्तिकायाः प्रतिकृतिं कृत्वा क्षीरेण स्नाप्य आज्येन वा अभ्यज्य तस्य लवणाञ्जलिमेकविंशतिवारं जुहुयात् चिराचेण वश्यो भवति सप्तरात्रेणाथवा। देवीञ्च गान्धारीं यक्षिणीं शक्रस्यापि यक्षीं वशमानयति ॥ * ॥ अन्यप्रकारः।

"उड्डानुः पक्षिणो मलमात्मनो रुधिरान्वितम्।
स्त्रीपुंसयोः प्रदातव्यं वशीकरणमुत्तमम्" ॥

अत्र मन्त्रः। त्रिशूलिने त्रिनेत्राय हिलि हिलि स्वाहा। वर्णाः १४। सप्तजपेन सिद्धिः ॥ * ॥

अन्यप्रकारः।

"कृष्णपक्षचतुर्दश्यां मृतभस्म तु ग्राहयेत्।
स्त्रीणाञ्च मूर्द्धि दातव्यं विद्यया परिजप्तया ॥
दह्यते मुह्यते नारी पच्यते शुष्यतेऽपि च।
अङ्गानि चैव भज्यन्ते यदि तं न समाविशेत्" ॥

अत्र मन्त्रः। ॐ नमश्चामुण्डे श्मशानवासिनि स्वाहा। वर्णाः। १४। सप्तरात्रेण प्रेरकः ॥ * ॥

अन्यप्रकारः।

"श्वेतार्कं रोचनायुक्तं आत्ममूत्रेण पेषयेत्।
ललाटे तिलकं कृत्वा त्रैलोक्यं क्षोभयेत् क्षणात्।
दृष्टमात्रेण तेनैव सर्वो भवति किङ्करः"॥ * ॥

अन्यप्रकारः।

"श्वेतार्कं चन्दनेनैव रमयेत् सह लेपयेत् ।
दीयते कस्यचिद्यापि पश्चाद्दासी भविष्यति ॥ *॥

अथ पतिवशीकरणम् ।

"मधुकं सह तैलेन सार्धयेच्च तु पेषयेत् ।
एतेन प्राग्विमभ्यङ्ग्य भर्त्रा सा सहिता स्वपेत् ॥
संदत्ते मैथुनीभावे पतिर्दासो भविष्यति" ॥ * ॥
अन्यच्च ।

"मनःशिलाकुङ्कुमसर्षपाच्च
तथा च कुष्ठं सहदेवदारु ।
रक्तश्च रक्तं पलितेन सार्द्धम्
प्रपेषयेत् सूक्ष्मतरं महान्तम् ॥
प्रक्षातपूर्व्वाभिमुखोऽपि भूत्वा
संस्मृत्य लक्ष्मीश्वरकेश पूज्य ।
ततः प्रकुर्य्यात् तिलकं ललाटे
वामाच हस्ताच्चतुरङ्गुलीभिः ॥
पुंदृष्टमात्रेण भवेत् स कान्ता-
दासादिदासच्च किमत्र चित्रम्" ॥ * ॥

अथ लिङ्गलेपाधिकारः ।

"दृष्टतीयत्वमूलानि पिप्पली मरिचानि च ।
भया रोचनया सार्द्धं लिङ्गलेपोत्तमो मतः ॥
निःशेषस्त्रीजगत्कर्षं गात्रा स्त्रीहृदयाङ्गमम् ।
मोहनं शस्त्रमेतद्धि मदनस्य स्मृतं बुधैः" ॥ * ॥
अन्यच्च ।

"कुष्ठच्च धातकीपुष्पं मरिचानि वचा तथा ।
अनेन लिङ्गमालिप्य क्षत्वा श्यामां वशं नयेत् ॥
तासाश्चित्तहरोऽप्येष स्मृतमप्यनुगच्छति ।
विवशा भक्तिभावेन पश्चात् सर्व्वं प्रयच्छति" ॥ * ॥
अन्यच्च ।

"पञ्चरक्तानि संगृह्य शुभानि च यथेच्छया ।
सर्व्वाणि समभागानि प्रियङ्गुश्चापि तत्समम् ॥
नागरं दशभागेन लेपः कान्तावशङ्करः" ॥ * ॥
अन्यच्च ।

"देवदारु वचा कुष्ठं चतुर्थं वैश्वभेषजं ।
आस्फोतीरसैर्युक्तं गौरीश्यामावशङ्करम्" ॥ * ॥
अन्यच्च ।

"हरिद्रा दृष्टतीमूलं भद्रमुस्तं तथोत्पलम् ।
विड्गं क्षारं वैरञ्च समभागानि कारयेत् ॥
लिङ्गलेपोत्तमो ह्येष रक्तवल्लीवशङ्करः" ॥ *॥
अन्यच्च ।

"हरिद्रा पिप्पलीमूलं पद्मं मधुकमेव च ।
एतानि समभागानि नवनीतेन पेषयेत् ॥
लिङ्गलेपोत्तमो ह्येष गौरीप्रीताय शाङ्करः" ॥ *॥
"कौशिकशोणितलेपात् सेचनाद्वा एषं भवेल्लिङ्गं ।
तदग्नन्तेजस्तम्भमयं कीलकसदृशं भवेच्च ॥
कौशिकं रुधिरं ग्राह्य गोमूत्रेण च पेषयेत् ।
वीर्य्यं हि स्तम्भयेन्नित्यं प्रहरार्द्धं न संशयः" ॥ *॥
सर्व्वसाधारणो मन्त्रः । 'ॐ यं क्रीं क्रीं श्रीं फट् स्वाहा । अनेन मन्त्रेण सर्व्वयोगानभिमन्त्र्य सिद्धिः" । इति श्रीपार्व्वतीपुत्रश्रीनित्यनाथविरचिते सिद्धखण्डे तन्त्रसारे कौतूहलविद्यानाम इन्द्रजालतन्त्रम् ॥ *॥ पुस्तकत्रयमालोच्य यथासाध्यं शोधितमेतत् ॥ * ॥ * ॥ अथच । ईश्वर उवाच ।

"इन्द्रजालं विना रक्षां न करोतीति निश्चितम् ।
रक्षामन्त्रं महामन्त्रं सर्व्वसिद्धिप्रदायकम्" ॥
"ओं नमो नारायणाय विश्वम्भराय इन्द्रजाल-
कौतुकानि दर्शय दर्शय सिद्धिं कुरु कुरु स्वाहा"
अष्टोत्तरशतजपेन सिद्धिः ॥ * ॥ अथ रक्षामन्त्रः ।
"ओं नमः परब्रह्मपरात्मने मम शरीरे पाहि
पाहि कुरु कुरु" ॥
"उलूकस्य कपालेन धृतेनाहतकज्जलं ।
तेन नेत्राञ्जनं कृत्वा रात्रौ पठति पुस्तकम् ॥ १ ॥
अङ्गोलबीजनिक्षिप्ते गुरुवारे मुखे गजे ।
मन्त्रेण सिच्यते नित्यं यावद्बीजफलं हि वै ॥
त्रिलोहवेष्टितं कृत्वा एकवीजं मुखे स्थितम् ।
मत्तमातङ्गवीर्य्यस्तु वायुतुल्यपराक्रमः ॥
दशहस्तमदृष्टत्वं षोड्शं रूप्यभागकम् ।
एवं संख्या त्रिलोही च ज्ञातव्या सर्व्वकर्म्मणि ॥२॥
यानि कानि च बीजानि जङ्गमं स्थलमेव च ।
अङ्गोलबीजनिक्षिप्ते मुखे भूमितले ध्रुवम् ॥
तद्बीजं मुखमध्यस्थं त्रिलोहैर्वेष्टितं कुरु ।
तद्रूपो हि भवेन्मर्त्यो नान्यथा शङ्करोदितम् ॥३॥
यानि कानि च बीजानि अङ्गोलतैलमेलनात् ।
सफलो जायते वृक्षः सिद्धियोगमुदाहृतम् ॥ ४ ॥
शवमुखे विन्दुमात्रं तत्तैलं निःक्षिपेद्यदि ।
एकयामं भवेत् जीवो नान्यथा शङ्करोदितम् ॥५॥
गृध्रबीजस्थितं तैलं पारावतपुरीषकम् ।
नराहस्य वसायुक्तं गृहीत्वा च समं समम् ॥
गर्दभस्य वसायुक्तं हरितालं मनःशिला ।
एभिस्तु तिलकं कृत्वा यथा लङ्केश्वरो नृपः ॥ ६ ॥
उलुविष्ठां गृहीत्वा तु एरण्डतैलपेषणात् ।
यस्याङ्गे निक्षिपेत् विन्दुं स क्षिप्रो जायते ध्रुवम् ॥७॥
सर्पदन्तं गृहीत्वा तु क्षणाद्रस्त्रिककण्टकम् ।
कृकलासरक्तसंयुक्तं सूक्ष्मचूर्णन्तु कारयेत् ॥
यस्याङ्गे निक्षिपेच्चूर्णं सद्यो याति यमालयम् ॥ ८ ॥
सिन्दुरं गन्धकं तालं समं पिष्ट्वा मनःशिलाम् ।
तल्लिप्तवस्त्रं शिरसि अग्निवत् दृश्यते ध्रुवम् ॥ ९॥
अर्कक्षीरं वटक्षीरं क्षीरं डुम्बरसम्भवम् ।
गृहीत्वा पात्रके लिप्ते जलपूर्णं करोति च ।
दुग्धं संजायते तत्र महाकौतुककौतुकम् ॥१०॥
अङ्गोलतैललिप्ताङ्गो दृश्यते रात्रिसाक्षितिः ।
पलायन्ते नराः सर्व्वे पशुपक्षिगजाहयाः ॥११॥
अङ्गोलस्य तु तैलेन दीपं प्रज्वालयेन्नरः ।
रात्रौ पश्यति भूतानि खेचराणि महीतले ॥१२॥
बुधे वा शनिवारे वा कृकलां गरिगृह्य च ।
शुचुर्मूत्रयते यत्र कृकलां तत्र निःक्षिपेत् ॥
निखनेद्भूमिमध्येषु उद्धृते च पुनः सुखी ।
नपुंसकं भवेत् सद्यं नान्यथा शङ्करोदितम् ॥१३॥
गन्धकं हरितालञ्च गोमूत्रञ्च विषं तथा ।
सूक्ष्मचूर्णमयं कृत्वा किञ्चिदङ्गे विनिःक्षिपेत् ॥
विघ्नाः सर्व्वे पलायन्ते यथा युद्धेषु कातराः ॥१४॥
इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे इन्द्र-
जालकौतुकदर्शनं नाम एकादशः पटलः ॥ * ॥ * ॥
अन्यच्च ।

"वशकर्षणकर्म्माणि वसन्ते योजयेत् प्रिये ।
ग्रीष्मे विद्वेषणं कुर्य्यात् प्रावृषि स्तम्भनं तथा ॥
शिशिरे मारणञ्चैव शान्तिकं शरदि स्मृतम् ॥
हेमन्ते पौष्टिकास्याच्च ऋतुकर्म्मविचारदः ।
वसन्तश्चैव पूर्व्वाह्णे ग्रीष्मो मध्याह्न उच्यते ॥
वर्षा ज्ञेयापराह्णे तु प्रदोषे शिशिरः स्मृतः ।
अर्द्धरात्रे च हेमन्तः शरदं तत्परं स्मृतम्" ॥ * ॥
अथ पक्षादिनिर्णयः ।

"कृष्णपक्षे मारणादि शुक्लपक्षे च वर्द्धनम् ॥
द्वादश्यां मारणं कर्म्म एकादश्यां तथैव च ।
तृतीयां नवमीञ्चैव वशाकर्षञ्च कारयेत् ।
स्तम्भनञ्च चतुर्दश्यां चतुर्थ्यां प्रतिपद्यपि ॥
द्वितीयां षष्ठीमष्टम्यां कारयेत् शान्तिकर्म्म च ।
अश्विनीमृगमूलाश्च पुष्या पुनर्व्वसुस्तथा ॥
वशाकर्षञ्च कर्त्तव्यं कारयेच्च सदा बुधः ।
ज्येष्ठा च उत्तराषाढा अनुराधा च रोहिणी ॥
कारयेन्मारणं शान्तिं स्तम्भनं विजयं तथा ।
विधिमन्त्रसमायुक्तमौषधं सफलं भवेत् "॥ * ॥
अथ वशीकरणम् ।

"सिन्दूरमाक्षिककपोतमलानि पिष्ट्वा
लिङ्गं विलिप्य रमते तरुणीं नवोढ़ां ।
शान्तिं न याति पुरुषो मनसापि नूनं
दासी भवेदिति मनोहरदिव्यमूर्त्तिः ॥
पुष्ये रुद्रजटामूलं मुखस्थं कारयेद्बुधः ।
ताम्बूलादौ प्रदातव्यं वश्या भवति निश्चितम् ॥
तथैव पाटलीमूलं ताम्बूलेन तु वश्यकृत् ।
नागपुष्पं प्रियङ्गुश्च तगरं पद्मकेशरम् ॥
जटामांसी समं नीत्वा चूर्णयेत् मन्त्रवित्तमः ।
साङ्गं धूपयते तेन भजते कामवत् स्त्रियः" ॥
ॐ मूली मूली महामूली सर्व्व संक्षोभयेभ्यः
उपद्रवेभ्यः स्वाहा । धूपमन्त्रः ॥
"पानीयस्याञ्जलीन् सप्त दत्त्वा विद्यामिमां जपेत् ।
सालङ्कारां नवां कन्यां लभते मासमात्रतः ॥
ॐ विश्वावसुर्नाम गन्धर्व्वः कन्यानामधिपतिः सुरूपां
सालङ्कारां देहि मे नमस्तस्मै विश्वावसवे स्वाहा ।
"कन्याग्रहे शालकाष्ठं क्षिपेदेकादशाङ्गुलम् ।
ऋक्षे च पूर्व्वफल्गुन्यां यस्तां कन्यां प्रयच्छति ॥ *॥
अथ सर्व्वजनवशीकरणम् ।
"शिला च रोचनामूलं वारिणा तिलके कृते ।
दृष्टमात्रे वशं याति नारी वा पुरुषोऽपि वा ॥
स्वर्णेन वेष्टनं कृत्वा तेनैव तिलके कृते ।
सम्भाषणेन सर्व्वेषां त्रैलोक्यं वशमानयेत्" ॥
ॐ क्रीं क्लीं ऐं स्त्रौं भोगप्रदा भैरवी मातङ्गी
त्रैलोक्यं वशमानय स्वाहा । औषधोपरि सहस्रजपं
कुर्य्यात् । पुनः सप्तवारजपेन तिलकं कारयेत्
शक्रसमोऽपि वश्यो भवति । इति कालनाथविर-
चिते इन्द्रजाले १ अध्यायः ॥ * ॥
अथाकर्षणं । ॐ क्रीं चामुण्डे ज्वल ज्वल प्रज्वल
प्रज्वल स्वाहा । अनेन मन्त्रेण स्त्रियं दृष्ट्वा जपं
कुर्य्यात् तत्क्षणात् एष्यतः समागच्छति । पूर्व्व-
मेवायुतजपेन सिद्धिः ॥
"अश्लेषायां समादाय अर्ज्जुनस्य च ब्रह्मकम् ।
अजमूत्रेण संपिष्य स्त्रीणां शिरसि दापयेत् ॥

पुरुषस्य पशूनां वा क्षिपेदाकर्षणं भवेत्" ॥ * ॥
अथ जयः।
"गोजिह्वां शिखिमूलं वा मुखे शिरसि संस्थिता।
कुरुते सर्व्ववादेषु जयं पुंसे समुद्धृते ॥
मार्गशीर्षपौषमास्यां शिखिमूलं समुद्धरेत्।
बाहौ शिरसि वा धार्य्यं विवादे विजयो भवेत् ॥
गिरिकर्णीं शमीं गुञ्जां श्वेतवर्णां समाहरेत्।
चन्दनेनान्वितस्त्वेव तिलकेन जयी नरः ॥
कपिकार्कवटावङ्किर्विद्रुमः पद्ममस्तथा।
तिलकं कुरुते यस्तु पश्येत्तं पद्मधा रिपुः ॥
आर्द्रायां वटवन्दाकं गृहीत्वा धारयेत् करे।
संग्रामे जयमाप्नोति जयां स्मृत्वा जयी भवेत्" ॥
अस्य मन्त्रः। ॐ नमो महाबलपराक्रम समस्त-विद्याविशारद अमुकस्य भूजबलं बन्धय बन्धय दृष्टिं स्तम्भय स्तम्भय अङ्गानि धूनय धूनय पातय पातय महीतले फ्रीं ॥ * ॥ अथ सौभाग्यम्।
"पुष्योद्धृतं सितार्कस्य मूलं वामेतरे भुजे।
बद्धा सौभाग्यमाप्नोति दुर्भगापि न संशयः ॥
रक्तचित्रार्कमूलन्तु सोमवल्ले समुद्धृतं।
क्षीरैः पिष्ट्वा वटीं कुर्य्यात् तिलकं शुभमङ्गना" ॥ * ॥
अथ ईश्वरादिक्रोधोपशमनं। ॐ शान्ते प्रशान्ते सर्व्वक्रोधोपशमनि स्वाहा।
अनेन मन्त्रेण त्रिःसप्तधा जपेन मुखं मार्जयेत्।
ततः क्रोधोपशमनं भवति" ॥* गजनिवारणम्।
"श्वेतापराजितामूलं हस्तस्थं वारयेत् गजम्।
मूलं त्रिशूल्या वक्त्रस्थं गजवश्यकरं भवेत्" ॥ * ॥
व्याघ्रनिवारणं।
"मुखस्थं दृष्टतीमूलं हस्तस्थं व्याघ्रभीतिजित्"।
फ्रीं फ्रीं फ्रीं श्रीं श्रो श्रो स्वाहा।
इत्यष्टाक्षरमन्त्रेण लोष्टं पठित्वा क्षिपेत्।
तदा मुखं न चालयति गन्तुमशक्तः ॥
"मूलं कृष्णचतुर्दश्यां गृह्येल्लाङ्गलीभवम्।
हस्तस्थं व्याघ्रभीतादिभयहृत् परिकीर्त्तितम्" ॥
इति इन्द्रजालतन्त्रे ३ उपदेशः ॥* अथ स्तम्भनम्।
"श्वेतगुञ्जोत्थितं मूलं मुखस्थं दृष्टतुरुजित्"।
ॐ फ्रीं रक्त रक्त चामुण्डे तुरु तुरु अमुकं मे वशमानय वशमानय स्वाहा। अयं चण्डामन्त्रः।
उक्तयोगसिद्धिः ॥
"पुष्यार्के मधुवन्दाकं गृहीत्वा प्रक्षिपेद्बुधः।
सभामध्ये च सर्व्वेषां मूकस्तम्भः प्रजायते" ॥ * ॥
मेघस्तम्भनम्। इष्टकद्वयसंपुटमध्ये मेघसंख्यक-चतुरस्रं विलिख्य उद्याने स्थापयेत्तदा मेघान् स्तम्भयति। मन्त्रः। "मेघान् स्तम्भय स्तम्भय" ॥*॥
नौकास्तम्भनम्।
"भरण्यां क्षीरकाष्ठस्य कीलं मध्याङ्गुलं क्षिपेत्।
नौकामध्ये तदा नौकास्तम्भनं जायते ध्रुवम्" ॥*॥
निद्रास्तम्भनम्।
"मूलं कृष्णा मधुकं पिष्ट्वा नस्यं समाचरेत्।
निद्रास्तम्भनमेतद्धि मूलदेवेन भाषितम्" ॥ * ॥
शस्त्रस्तम्भनम्।
"कपित्थस्य च वन्दाकं कृत्तिकायां समाहरेत्।
वक्त्रसंस्थन्तु देवस्य शस्त्रस्तम्भनकं परम् ॥
करे सदर्शनामूलबन्धनात् स्तम्भनं तथा"।
ॐ अहो कुम्भकर्ण महाराक्षस निकुम्भगर्भ-सम्भव परसैन्यस्तम्भन महाभय रणरङ्ग आज्ञापय स्वाहा। अष्टोत्तरसहस्रजपात् सिद्धिः ॥
"गृहीत्वा शुभनक्षत्रे अपामार्गस्य मूलकम्।
लेपमात्रे शरीराणां सर्व्वशस्त्रनिवारणम् ॥
पुष्यार्के श्वेतगुञ्जाया मूलमुद्धृत्य धारयेत्।
हस्ते कायभयं नास्ति संग्रामे च कदाचन" ॥*॥
गोमहिष्यादिस्तम्भनम्।
"उद्गस्थास्थि चतुर्दिक्षु निखनेत् भूतले ध्रुवम्।
गां मेषीं महिषीं वाजीं स्तम्भयेत् करिणीमपि"॥*॥
बुद्धिस्तम्भनम्।
"भृङ्गराजमयामार्गं सिद्धार्थं सहदेविकाम्।
ओलं वचाञ्च श्वेतार्कं ध्रुवमेषां समाहरेत्॥
लौहपात्रे विनिक्षिप्य दिदिनान्ते समुद्धरेत्।
तिलकैः सर्व्वभूतानां बुद्धिस्तम्भकरं परम्" ॥
ॐ नमो भगवते विश्वामित्राय नमः सर्व्व-मुखीभ्यां विश्वामित्र आगच्छ आगच्छ स्वाहा।
उक्तयोगस्यायं मन्त्रः ॥ * ॥ चौरगतिस्तम्भनम्।
ॐ ब्रह्मवेणिनि शिवे रक्त रक्त स्वाहा। अनेन मन्त्रेण सप्तपाशान् गृहीत्वा चीणि कक्षां बद्धा अपरान् मुष्टिभ्यां धारयेत्। इति चौराणां गति-स्तम्भनम्। * ॥ गर्भस्तम्भनम्।
"ग्राह्यं कृष्णचतुर्दश्यां धूस्तूरस्य तु मूलकम्।
कक्षां बद्धा रमेत् कान्तां न गर्भं धारयेत् क्वचित्॥
मुक्तेन लभते गर्भं पुरा नागार्जुनोदितम्।
तन्मूलचूर्णं योनिस्थं न गर्भं सम्भवेत् क्वचित् ॥
सिद्धार्थमूलं शिरसि बद्धा कान्तां रमेत्तु यां।
न गर्भं धारयेत् सा स्त्री मुक्तेन लभते पुनः" ॥*॥
शुक्रस्तम्भनम्।
"नीलीमूलं श्मशानस्थं कक्षां बद्धा तु वीर्य्यवत्।
रक्तापामार्गमूलन्तु सोमवारे निमन्त्रयेत् ॥
भौमे प्रातः समुद्धृत्य कक्षां बद्धा तु वीर्य्यवत्" ॥
इति कामरत्ने ३ उपदेशः ॥ * ॥ मोहनम्।
"भृङ्गीवचानलदसर्जरसं समानं
कृत्वा त्रुटिं मलयजञ्च षडेकमिश्रम्।
यो धूपयेन्निजगृहं वसनं शरीरं
तस्यापि दास इव मोहमुपैति लोकः" ॥
भृङ्गराजः केशराजो लज्जा च सहदेविका।
एभिस्तु तिलकं कृत्वा त्रैलोक्यं मोहयेन्नरः" ॥
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः क्रूं स्वाहा।
"अनेनैव तु मन्त्रेण कृत्वा ताम्बूलभावनम्।
साध्यस्य मुखनिक्षिप्तं मोहमायाति तत्क्षणात्"॥
ॐ भीं क्षीं भों मोहय। इमं मन्त्रं वारत्रयं जपेत्। मोहमाप्नोति मानवः॥ * ॥ देहरञ्जनम्।
"कदम्बपत्रं लोध्रञ्च अर्জ্জুनस्य च पुष्पकम्।
पिष्ट्वा गात्रोद्वर्त्तनाच्च कायदुर्गन्धनाशनम्॥
एला-शृटी-पत्रक-चन्दनानि
तोयाभयाग्निशुभनामयानि।
ससौरभोऽयं सुरराजयोगः
ख्यातः सुगन्धो नरमोहयोग्यः" ॥ * ॥
मुखरञ्जनम्।
"रसालजम्बूफलगर्भसारः
सकर्कटो माक्षिकसंयुतश्च।
स्थितो मुखान्ते पुरुषस्य रात्रौ
करोति पुंसां मुखवासमिष्टम् ॥
चूर्णं सुराकेशरकुष्ठकानां
प्रातर्दिनान्ते परिलेढि या स्त्री।
अष्टार्द्धमासेन मुखस्य वासः
कर्पूरतुल्यो भवति प्रकामः" ॥ * ॥
केशरञ्जनीकरणादि।
"लोहकिट्टं जवापुष्पं पिष्ट्वा धात्रीफलं समम्।
चिदिनं लेपयेत् शीर्षे त्रिमासं केशरञ्जनम्" ॥
इति कृष्णीकरणम्॥ * ॥ केशशुक्लीकरणम्।
"वच्चाक्षीरेण सप्ताहं अन्वहं भावयेत्तिलम्।
तत्तैलसिक्ताः केशाः स्युः शुक्लाश्च नात्र संशयः ॥
इति कामरत्ने ४ उपदेशः ॥* अथ वाजीकरणं
"अश्विन्यां वटवन्दाकं क्षीरैः पिष्ट्वा महाबलः।
पुष्योद्धृतं पिबेन्मूलं श्वेतार्कस्य प्रयत्नतः ॥
स्नग्राचन्तु गोक्षीरैर्दोऽपि तरुणायते"।
"चूर्णं विदार्य्याः स्वरसेन तस्याः
विभावितं भास्कररश्मिजाले।
मध्याह्नसंमिश्रितमेव लीढ़े-
दृक्षस्त्रियो गच्छति निर्विशङ्कः" ॥ * ॥
जन्मबन्ध्याचिकित्सा।
"समूलपत्रां सर्पाक्षीं रविवारे समुद्धरेत्।
एकवर्णगवां क्षीरैः कन्याहस्तेन पेषयेत् ॥
ऋतुकाले पिबेत् बन्ध्या पलार्द्धं तद्दिने दिने।
क्षीराशाल्यन्नमुद्गञ्च लघ्वाहारं प्रदापयेत् ॥
एवं सप्तदिनं कुर्य्यात् बन्ध्या भवति गर्भिणी।
उद्वेगं भयशोकञ्च दिवानिद्रां विवर्जयेत् ॥
न कर्म्म कारयेत् किञ्चित् वर्जयेत् सावगाहनम्।
पतिसङ्गं चरेत् सा च नात्र कार्य्या विचारणा ॥
कृष्णापराजितामूलं छागीक्षीरेण संपिबेत्।
ऋतुकाले समायाते भुक्ता गर्भधरा भवेत् ॥
गोक्षुरस्य तु बीजन्तु पिबेन्निर्गुण्डिकारसैः।
त्रिरात्रं सप्तरात्रं वा बन्ध्या भवति गर्भिणी" ॥
इतीन्द्रजाले जन्मबन्ध्याचिकित्सा ॥ * ॥
अथ काकबन्ध्याचिकित्सा।
"अश्वगन्धीयमूलन्तु ग्राह्येत् पुष्यभास्करे।
पेषयेन्महिषीक्षीरैः पलार्द्धं भक्षयेत् सदा ॥
सप्ताहाल्लभते गर्भं काकबन्ध्या चिरायुषम्"।
इतीन्द्रजाले काकबन्ध्याचिकित्सा ॥ * ॥
अथ मृतवत्साचिकित्सा।
"प्राङ्मुखः कृत्तिकाऋक्षे बन्ध्या कर्कोटकीं हरेत्।
तत्कन्दं पेषयेत्तोयैः कर्षमात्रं सदा पिबेत् ॥
या बीजपूरद्रुममूलमेकं
क्षीरेण पक्वं प्रपिबेत् विमिश्रम्।
ऋतौ निजं या तु पतिं प्रयाति
दीर्घायुषं सा तनयं प्रसूते ॥
मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा वला।
मेदा पयस्या काकोली मूलञ्चैवाश्वगन्धजम् ॥
अजमोदा हरिद्रे द्वे हिङ्गुः कटुकरोहिणी।
उत्पलं कुमुदं द्राक्षा काकल्यौ तन्मूलद्वयम् ॥

एतेषां कर्षकैर्भागैर्घृतप्रस्थं विपाचयेत् ।
घृतावशेषितं क्षीरं घृतस्येदं चतुर्गुणम् ॥
संपिबेन्नियतं नारी नित्यं स्त्रीषु च ग्रस्यते ।
पुत्रान् जनयते नारी मेधाज्ञान् प्रियदर्शनान् ॥
या चैवास्थिरगर्भा स्यात् या नारी जनयेत् मृतम् ।
अल्पायुषश्च जनयेत् या च कन्याः प्रसूयते ॥
योनिदोषे रजोदोषे गर्भस्रावे च ग्रस्यते ।
प्रजावर्द्धनमायुष्यं सर्व्वग्रहनिवारणम् ॥
नाम्ना फलघृतं ह्येतदायुष्यं परिकीर्त्तितम् ।
नोक्तञ्च लक्ष्मणामूलं वदन्त्यत्र चिकित्सकाः ॥
जीववत्सा शुक्लवर्णा घृतमत्र तु दीयते ॥
अरण्यगोमयेनात्र वह्नेर्व्वाला प्रदीयते" ।
अत्र पयस्या क्षीरयुक्तभूमिकुष्माण्डम् । उत्पलं ।
नीलं । इतीन्द्रजाले मृतवत्साचिकित्सा ॥ * ॥
अथ गर्भस्रावचिकित्सा । प्रथमे मासि ।
"गोक्षीरैः पेषयेत्तुल्यं पद्मकेशरचन्दनम् ।
पयसे तं पिबेन्नारी महागर्भः स्थिरो भवेत् ॥
अथवा मधुकं दारु शरस्तम्बस्य बीजकम् ।
संपिष्य क्षीरकाकोलीं पिबेत् क्षीरेण गोभवैः ॥१॥
नीलोत्पलं मृणालञ्च षष्ठी कर्कटशृङ्गिका ।
गोक्षीरञ्च द्वितीये च पीत्वा ग्राम्यति वेदना ॥२॥
श्रीखण्डं तगरं कुष्ठं मृणालं पद्मकेशरम् ।
पिबेत् शीतोदकैः पिष्ट्वा तृतीये वेदनावती ॥
अथवा क्षीरकाकोलीबलागन्तापयः पिबेत् ॥३॥
शीतोत्पलं मृणालानि गोक्षीरक-कशेरुकम् ।
तुर्य्यमासे गवां क्षीरं पिबेत् सा वेदनापरा ॥
अथवा मधुकं राम्ना श्यामा ब्राह्मणयष्टिका ।
अनन्ता पेषयित्वा तु गवां क्षीरैः समं पिबेत् ॥४॥
पुनर्णवा च काकोली तगरं नीलमुत्पलम् ।
गोक्षीरं पञ्चमे मासि गर्भस्रोगहरं भवेत् ॥
अथवा दहतीयुग्मं यष्ट्याह्वं कट्फलं त्वचः ।
गोहतं क्षीरसंयुक्तं पिबेत् पिष्ट्वा च पञ्चमे ॥ ५ ॥
सिता काश्मर्य्यमज्जा च शीततोयेन पेषयेत् ।
षष्ठे मासि गवां क्षीरैः पिबेत् क्षोभं निवर्त्तयेत् ॥
अथवा गोक्षुरं शिग्रुं मधुकं पृश्निपर्णिकाम् ।
बलायुक्तां पिबेत् पिष्ट्वा गोदुग्धैः षष्ठमासके ॥६॥
काश्मरं पौष्करं मूलं शृङ्गाटं नीलमुत्पलम् ।
पिष्ट्वा च सप्तमे मासि क्षीरैः पीत्वा प्रशाम्यति ॥
अथवा मकरदाक्षां शृङ्गाटञ्च सकेशरम् ।
मृणालं शर्करायुक्तं क्षीरैः पेयन्तु सप्तमे ॥ ७ ॥
यष्टी पद्माक्षकार्कमुस्तं केशरं गजपिप्पली ।
नीलोत्पलं गवां क्षीरैः पिबेदष्टममासके ॥
अथवा विल्वमूलञ्च कपित्थं दहती शमी ।
इक्षुपाटलयोर्मूलं रुधिः क्षीरं प्रसाधयेत् ।
तत्क्षीरमष्टमे पीत्वा गर्भे ग्राम्यति वेदना ॥८॥
विष्णाक्रावीजकक्कोलं मधुना सह लेपयेत् ।
वेदना नवमे मासि शान्तिमाप्नोति नान्यथा ॥
अथवा मधुकं श्यामा ह्यनन्ता क्षीरकाकली ।
रुधिः सिद्धं पिबेत् क्षीरं नवमे वेदनावती ॥९॥
शर्करा गोस्तनी द्राक्षा सक्षुद्रं नीलमुत्पलम् ।
पाययेत् दशमे मासि गवां क्षीरैः प्रशान्तये ॥
अथवा शुद्धसंसिद्धं गोक्षीरं दशमे पिबेत् ।
अथवा मधुकं दारु शुक्लक्षीरेण संपिबेत् ॥१०॥
क्षौद्रं घृतं चन्दनसिन्धुजातं
महेन्द्रराजं पयसा सुपिष्टम् ।
गर्भं क्षरन्तं प्रतिहन्ति शीघ्रं
योगो विसुञ्जन् किल मूलदेवैः" ॥
इति इन्द्रजाले गर्भस्रावचिकित्सा ॥ * ॥
अथ गर्भशुष्कम् ।
"गोक्षीरं शर्करायुक्तं गर्भशुष्कप्रशान्तये ।
पिबेद्वा मधुकं चूर्णं गाम्भारीफलचूर्णकम् ॥
समांसं गव्यदुग्धेन गर्भिणी च प्रशान्तये" ॥*॥
अथ सुखप्रसवयोगः ।
"श्वेतं पुनर्णवामूलं चूर्णं योनौ प्रवेशयेत् ।
तत्क्षणात् प्रसूते नारी गर्भे सति प्रपीड़िते ॥
वासकस्य तु मूलन्तु क्षीरस्थं समुद्धरेत् ।
कन्यां बद्ध्वा सप्तसूत्रैः सुखं नारी प्रसूयते ॥
सहदेव्याश्च मूलं वा कटिस्थं प्रसवेत् सुखम् ।
अपामार्गस्य मूलन्तु ग्राहयेच्चतुरङ्गुलम् ॥
दारि प्रवेशयेत् योनौ तत्क्षणात् सा प्रसूयते" ॥*॥
अथ स्तनवर्द्धनं स्तनोत्थापनञ्च ।
"तैलं वचादार्द्धिमकल्कसिद्धं
सिद्धार्थजं लेपनतो नितान्तम् ।
नारीकुचौ चारुतरौ सुपीनौ
कुर्य्यात्सदा योगवरः प्रदिष्टः ॥
श्रीपर्णिकाया रसवल्कसिद्धं
तिलोद्भवं तैलवरं प्रदिष्टम् ।
तुलेन दत्तोऽयुगे प्रदेयं
प्रयाति वृद्धिं पतितोऽपि नार्य्याः ॥
प्रथमकुसुमकाले नस्ययोगेन पीतं
सनियममसरागं तद्बलाम्भो युवत्याः ।
कुचयुगलमुपीनं क्षिप्रमेव नो याति यातं
कथित इति पुरैव चक्रदत्तेन योगः" ॥*॥
अथ योनिसंस्कारः ।
"प्रक्षालयेन्निम्बकषायनीरैः
स्निग्धाम्ल्यक्षय्यागुरुगुग्गुलानां ।
धूपेन योनिं निधिं धूपयित्वा
नारी प्रमोदं विदधातु भर्त्तुः" ॥ * ॥
अथ लोमशातनम् ।
"पलाशभस्मान्वितताम्रचूर्णै-
रम्भोमिश्रैः परिलिप्य भूयः ।
कन्दर्पगेहे मृगलोचनानां
रोमाणि रोहन्ति कदापि नैव" ॥
इति इन्द्रजालतन्त्रसंग्रहः ॥ युद्धे क्षुद्रोपायविशेषः ।
इति हेमचन्द्रः ॥
इन्द्रजालिकः, त्रि, (इन्द्रजालं करोति इन्द्रजालेन दीव्यतीति वा । इन्द्रजाल + ठक् ।) कुहककारी ।
इति जटाधरः ॥ बाजीकर इति भाषा ।
इन्द्रजित्, पुं, (इन्द्रं जितवान् इति । इन्द्र + जि + क्विप् ।) रावणपुत्रः । (तत्पर्य्यायः । मेघनादः २ मन्दोदरीसुतः ३ । इति जटाधरः ॥
(अस्य जन्मविवरणं यथा, रामायणे ७।१२ । सर्गे,
"एवमाकर्णदा राम! राक्षसेन्द्रेण दानवः ।
महर्षेस्तनयं ज्ञात्वा मया दानवपुङ्गवः ॥
दातुं दुहितरं तस्मै रोचयामास तत्र वै ॥ १६ ॥
करेण तु करं तस्या ग्राहयित्वा मयस्तदा ।
प्रहसन् प्राह दैत्येन्द्रो राक्षसेन्द्रमिदं वचः ॥ १७ ॥
इयं ममात्मजा राजन् हेमयाप्सरसा धृता ।
कन्या मन्दोदरी नाम पत्न्यर्थं प्रतिगृह्यताम् ॥ १८ ॥
वाढमित्येव तं राम! दग्ध्वीवोऽथभाषत ।
प्रज्वाल्य तत्र चैवाग्निमकरोत् पाणिसङ्ग्रहम्" ॥ १९ ॥
"ततो मन्दोदरी पुत्रं मेघनादमजीजनत् ।
स एष इन्द्रजिन्नाम युष्माभिरभिधीयते ॥ २८ ॥
जातमात्रेण हि पुरा तेन रावणसूनुना ।
रुदता सुमहान् मुक्तो नादो जलधरोपमः ॥ २९ ॥
जड़ीकृता च सा लङ्का तस्य नादेन राघव! ।
पिता तस्याकरोत् नाम मेघनाद इति स्वयम्" ॥ ३० ॥
अस्य यथा इन्द्रजिदित्यभिधानं जातं तदपि उक्तं तत्रैव ३५ सर्गे ।
"जिते महेन्द्रेऽतिबले रावणस्य सुतेन वै ।
प्रजापतिं पुरस्कृत्य ययुर्लङ्कां सुरास्तदा ॥ १ ॥
तत्र रावणमासाद्य पुत्रभ्रातृभिरावृतम् ।
अब्रवीद् गगने स्थित्वा सामपूर्व्वं प्रजापतिः ॥ २ ॥
वत्स रावण! तुष्टोऽस्मि पुत्रस्य तव संयुगे ।
अहोऽस्य विक्रमौदार्य्यं तव तुल्योऽधिकोऽपि वा ॥ ३ ॥
जितं हि भवता सर्व्वं त्रैलोक्यं स्वेन तेजसा ।
कृता प्रतिज्ञा सफला प्रीतोऽस्मि ससुतस्य ते ॥ ४ ॥
अयञ्च पुत्रोऽतिबलस्तव रावण वीर्य्यवान् ।
जगतीन्द्रजिदित्येव परिख्यातो भविष्यति ॥ ५ ॥
बलवान् दुर्जयश्चैव भविष्यत्येव राक्षसः ।
यं समाश्रित्य ते राजन् स्थापितास्त्रिदशा वशे" ॥ ६ ॥
महावीरो लक्ष्मणस्तु विभीषणेन वानरादिभिश्च सह निकुम्भिलां गत्वा तत्रस्थमेनमिन्द्रजितं व्यापादयामास इति तत्रैव लङ्काकाण्डे ५ सर्गमारभ्य ७ सर्गेषु उक्तम् ॥
स्वनामख्यातो दानवः । यथा हरिवंशे । ३ । ८३ ।
"इन्द्रजित् सत्यजिच्चैव वक्षनामस्तथैव च ।
महानाभश्च विक्रान्तः कालनाभस्तथैव च" ॥)
इन्द्रजिद्विजयी, [न्] पुं, (इन्द्रजितः रावणपुत्रस्य । विजयी इति । इन्द्रजित् + वि + जि + णिनि ।) लक्ष्मणः । इति शब्दरत्नावली ॥ (अस्य विवरणन्तु रामायणे । ६ । ९१ सर्गे उक्तम् । यथा,—
"इत्युक्त्वा बाणमाकर्णं विकृष्य तमजिह्मगम् ।
लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति ॥ ७२ ॥
ऐन्द्रास्त्रेण समायोज्य लक्ष्मणः परवीरहा ।
तच्छिरः सशिरस्त्राणं श्रीमत् ज्वलितकुण्डलम् ।
प्रमथ्येन्द्रजितः कायात् पातयामास भूतले" ॥ ९३ ॥)
इन्द्रतूलं, क्ली, (इन्द्रस्य तूलं । आकाशे उड्डीयमानत्वात् ।) आकाशप्रतिसूत्रम् । आकाशबुड़िर सुता इति भाषा । तत्पर्य्यायः । इन्द्रसूत्रकम् २ वीग्रहासम् ३ वंशकफम् ४ वातनूलम् ५ मरुज्जम् ६ । इति हारावली ॥
इन्द्रतूलकं, क्ली, (इन्द्रतूलमेव । इन्द्रतूल + स्वार्थे कन् ।) इन्द्रतूलं । इति चिकित्साशब्देभः ॥
इन्द्रदारुः, पुं, (इन्द्रस्य दारुः ।) देवदारुवृक्षः । इति भावप्रकाशः ॥ (अस्य पर्य्यायः ।

"देवदारु स्मृतं दारुभद्रं दार्व्विन्द्रदारु च ।
मस्तदारुकिलिमं क्षचिमं सुरभूरुहः" ॥)

इन्द्रद्रुः, पुं, (इन्द्रस्य द्रुर्वृक्षः ।) अर्ज्जुनवृक्षः । इत्यमरः । कुटजवृक्षः । इति राजनिर्घण्टः ॥

इन्द्रद्रुमः, पुं, (इन्द्रस्य द्रुमो वृक्षः ।) अर्ज्जुनवृक्षः । इति शब्दरत्नावली ॥

इन्द्रनीलः, पुं, (इन्द्रवत् नीलः ।) मरकतमणिः । इति हेमचन्द्रः ॥ पान्ना इति भाषा । (अस्य परीक्षा यथा, चिन्तामणिधृतवचनम् ।

"क्षीरमध्ये क्षिपेत् नीरं क्षीरक्षेत् नीलतां व्रजेत् ।
इन्द्रनीलमिति ख्यातं तदाहि रत्नकोविदैः" ॥

"क्वचित् प्रभालेपिभिरिन्द्रनीलै-
र्मुक्तामयी यष्टिरिवानुविद्धा" ॥

इति रघुवंशे । १३।५४। यथा, भावप्रकाशः ॥ अथ इन्द्रनीलगोमेदयोर्नामानि ।

"नीलन्तथेन्द्रनीलश्च गोमेदः पीतरत्नकम्" ।)

इन्द्रनीलकः, पुं, (इन्द्रनील + स्वार्थे कन् ।) मरकतमणिः । इति शब्दरत्नावली ॥

इन्द्रपुष्पा, स्त्री, (इन्द्रनीलवत् पुष्पं यस्याः ।) लाङ्गलिकीवृक्षः । इति रत्नमाला ॥ विषलाङ्गला इति ख्याता । (लाङ्गलिकीशब्देऽस्या विवरणं द्रष्टव्यं ।)

इन्द्रपुष्पिका, स्त्री, (इन्द्रपुष्पैव । कन् ।) कलिकारी । इति राजनिर्घण्टः ॥ विषलाङ्गला इति भाषा ।

इन्द्रप्रस्थं, क्ली, (इन्द्रस्य इन्द्रनीलस्य प्रस्थम् इव ।) राजधुधिष्ठिरनिर्म्मितनगरम् । अधुना दिल्ली इति ख्यातम् । (यथा, महाभारते १।२०८।२८।

"ततः पुण्ये शिवे देशे शान्तिं कृत्वा महारथाः ।
नगरं याययामासुर्दैपायनपुरोगमाः ॥
सागरप्रतिरूपाभिः परिखाभिरलङ्कृतं" ॥
"तस्मिन्विशुद्धसङ्काशं इन्द्रप्रस्थं व्यरोचत ।
मेघवृन्दमिवाकाशे विद्युत्समावृतम्" ॥)

इन्द्रप्रहरणं, क्ली, (इन्द्रस्य प्रहरणम् ।) इन्द्रास्त्रम् । वज्रम् । इति हलायुधः ॥

इन्द्रभेषजं, क्ली, (इन्द्रं महत् भेषजम् ।) शुण्ठी । इति शब्दरत्नावली ॥

इन्द्रमहकामुकः, पुं, (इन्द्रमहं कामयते इति । इन्द्रमह + काम + उकञ् ।) कुक्कुरः । इति चिकाण्डशेषः ॥

इन्द्रयवः, पुं, क्ली, (इन्द्रस्य इन्द्रवृक्षस्य यवः यवाकारबीजत्वात् तथात्वम्) खनामख्यातिवृक्षबीजविशेषः । तत्पर्य्यायः । कलिङ्गम् २ भद्रयवम् ३ । इत्यमरः ॥ शक्राक्षः ४ शक्रबीजम् ५ वत्सकः ६ वत्सकबीजम् ७ भद्रजः ८ कुटजः ९ कुटजबीजम् १० कलिङ्गबीजम् ११ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतत्वम् । कफवातरक्तपित्तहरत्वम् । दाहातिसारश्रमनत्वम् । ज्वरदोषशूलमूलनाशित्वञ्च । इति राजनिर्घण्टः ॥ कुड़चिर विचि इति भाषा । यथा,—

"उक्तं कुटजबीजन्तु यवमिन्द्रयवं तथा ।
कलिङ्गश्चापि कालिङ्गं तथा भद्रयवं स्मृतम्" ॥

इति क्षीरे अमरः प्राह ।

"क्वचिदिन्द्रस्य नामैव भवेत्तदभिधायकम् ।
फलानीन्द्रयवास्तस्य तथा भद्रयवा अपि" ॥

इति धन्वन्तरिः प्राह ।

"ऐन्द्रं यवं चिदोषघ्नं संग्राहि कटु शीतलम् ।
ज्वरातीसाररक्तार्शःकृमिविसर्पकुष्ठनुत् ॥
दीपनं गुदकीलाखवातास्रश्लेष्मशूलजित्" ।

इति भावप्रकाशः ॥ (यथा, वैद्यकद्रव्यगुणः ।

"तद्बीजं ज्वरजित्तिक्तं रक्तपित्तातिसारजित्" ।)

इन्द्रलुप्तं, क्ली, (इन्द्राणां इन्द्रनीलवर्णकेशानां लुप्तं लोपो यस्मात् ।) केशरोगविशेषः । टाक इति भाषा । तस्य लक्षणम् ।

"रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् ।
प्रधावयति रोमाणि ततः श्लेष्मा सशोणितः ॥
रुणद्धि रोमकूपांस्तु ततोऽत्येषामसम्भवः ।
तदिन्द्रलुप्तं खालत्यं रूढ्येति च विभाव्यते" ॥

इति निदानम् ॥ खालत्यं रूढ्येति च तस्य पर्य्यायकथनम् । तथाच भोजः ।

"तदिन्द्रलुप्तमित्याहुः खल्वीं रूढ्याञ्च केचन" ।

कार्त्तिकस्त्वाह । "इन्द्रलुप्तं श्मश्रुण्यभवति खालत्यं शिरोरुहेष्वेव रूढ्या सवेदनेति आगमस्तत्र नास्ति" ॥ इति तट्टीका ॥ अथेन्द्रलुप्तस्य चिकित्सा ।

"तिक्तपटोलीपत्रस्वरसैर्हृष्टा भ्रमं याति ।
चिरकालजापि रूढ्या नियतं दिवसत्रयेणैव ॥
गोवृषरक्तिलपुष्पाणि तुल्यञ्च मधुसर्पिषः ।
शिरः प्रलेपितं तेन केशैः समुपचीयते ॥
हस्तिदन्तमसीं कृत्वा काकोदुम्बरस्राङ्गनः ।
लोमान्यनेन जायन्ते लेपात् पाण्डितलेष्वपि ॥
यष्टीन्दीवरमद्दीकातैलाज्यक्षीरलेपनैः ।
इन्द्रलुप्तं श्रमं याति केशा स्युश्च घना दृढाः ॥
जातीकरञ्जवरुणकरवीराम्रपाचितम् ।
तैलमभ्यञ्जनाद्धन्ति इन्द्रलुप्तं न संशयः ॥
स्नुहीपयः पयोऽर्कस्य लाङ्गलीमार्कवो विषम् ।
अजामूत्रं सगोमूत्रं रक्तिका श्वेन्द्रवारुणी ॥
सिद्धार्थकस्तीक्ष्णगन्धा सम्यगेभिर्विपाचितम् ।
तैलं भवति नियमात् खालित्यव्याधिनाशनम् ॥
स्नुहीदुग्धादितैलम्" । इति भावप्रकाशः ॥
("केशघ्नस्य चिकित्सान्तु ब्रूहि हारीत! साम्प्रतम् ।
रूक्षं सघाणुरं वातात् पित्ताद्रक्तं सदाहकम् ॥
कफान्वितं भवेत् स्निग्धं रक्तात्पाकं व्रजन्ति तत् ।
सन्निपातेन सदृशं जायते सर्व्वलक्षणम्" ॥

अस्य चिकित्सा यथा ॥*॥

"गुडेन सुरसा शुण्ठी मातुलुङ्गरसेन तु ।
केशघ्ने वातसम्भूते धावनञ्च प्रशस्यते ॥ १ ॥
त्रिफलाञ्च वचां शुण्ठीं गुडेनापि प्रपेषितम् ।
धावनं कफसम्भूते चेन्द्रलुप्ते प्रशस्यते ॥ २ ॥
पैत्तिके च स्थितं दुग्धं नवनीतान्वितन्तथा ।
सिताश्विवाफलं यष्टी पैत्तिके धावनं मतम् ॥ ३ ॥
भृङ्गराजरसं ग्राह्यं भृङ्गवेररसन्तथा ।
सौवीरकरसेनापि तिलान् पिष्ट्वा प्रलेपनम् ॥
पश्चात् कार्य्यं पूरयेत्तु स्नानमुष्णेन वारिणा ।
धवार्ज्जुनकदम्बस्य शिरीषमपि रोहितम् ॥
क्वाथमेषां शिरोदद्रून् भ्रमयेदिन्द्रलुप्तकम् ।
कुरुवकस्य पुष्पेण जपायाः कुसुमेन च ॥
घृतस्य चेन्द्रलुप्तस्य क्षतमेव निवारणम् ।
पैत्तिकानि च लिङ्गानि दृष्ट्वा दुग्धेन धावनम् ॥
शीतलानि प्रदेयानि पैत्तिकेन विधीयते" ॥

"धुस्तूरपत्राणि च मागधीनां
निम्बा विशालाग्रहधूमकुष्ठम् ।
घृतेन युक्तञ्च जलेन पिष्टं
शिरःप्रलेपे क्षतवारणं स्यात् ॥
पित्ते क्षते दोषयुते च रोगे
पटोलपत्रं पिचुमर्द्दकं वा ।
तथामलक्या फलमेव पिष्ट्वा
घृतेन खण्डेन प्रलेपनञ्च ॥
निवार्य्यते मस्तकजं क्षतञ्च
शिरोर्त्तिसङ्घान् विनिहन्ति चैतत् ।
गजेन्द्रदन्तस्य मसीं गृहीत्वा
प्रलेपनं वा नवनीतकेन ॥
तिलार्कभल्लातकदग्धमाष-
क्षारस्य लेपो नवनीतकेन ।
सर्षस्य क्षारस्य तथा प्रयोगः
खल्लाटके केशचयं करोति" ॥

इति हारीतः ॥

"तेजोऽनिलाद्यैः सह केशभूमिम्
दग्ध्वाशु कुर्य्यात् खलतिन्नरस्य" ॥ * ॥

चिकित्सा यथा चरके ।

"खालत्ये पलिते वल्यां हरिल्लोम्नि च शोधितम् ।
नस्यैस्तैलैः शिरोवक्त्रप्रलेपैश्चाप्युपाचरेत् ॥
सिद्धं विदारीगन्धाद्यैर्जीवनीयैरथापि च ।
नस्यं स्यादथवा तैलं वा खालत्यपलितापहम्" ॥)

इन्द्रलुप्तः, पुं, (इन्द्राणां इन्द्रनीलवत् केशानां लुप्तं नाशो यस्मात् ।) केशनाशकरोगः । तत्पर्य्यायः । इन्द्रलुप्तकः २ केशघ्नः ३ । इति राजनिर्घण्टः ॥

इन्द्रलुप्तकं, क्ली, (इन्द्रलुप्त + स्वार्थे कन् ।) इन्द्रलुप्तरोगः । इति भूरिप्रयोगो जटाधरहेमचन्द्रौ च ॥

इन्द्रवारुणिका, स्त्री, (इन्द्रवारुणी + कन् + टाप् ।) इन्द्रवारुणीलता । इति शब्दचन्द्रिका ॥

इन्द्रवारुणी, स्त्री, (इन्द्रं वारयति । इन्द्र + वृ + णिच् + उन् । ङीप्) लताविशेषः । राखाल ससा इति भाषा ॥ तत्पर्य्यायः । विशाला २ । इत्यमरः ॥ ऐन्द्री ३ चित्रा ४ गवाक्षी ५ गजचिर्भटा ६ मृगेर्व्वारु ७ पिटङ्गीका ८ मृगादनी ९ । इति रत्नमाला ॥ इन्द्रा १० अरुणा ११ गवादनी १२ क्षुद्रसहा १३ इन्द्रचिर्भटी १४ सूर्य्या १५ विषघ्नी १६ गवाक्षिणिका १७ अमरा १८ माता १९ सुकर्णी २० सुफला २१ तारका २२ वृषभाक्षी २३ पीतपुष्पा २४ इन्द्रवल्लरी २५ हेमपुष्पी २६ क्षुद्रफला २७ वारुणी २८ बालकप्रिया २९ रक्तैर्व्वारुः ३० विषलता ३१ शक्रवल्ली ३२ विषापहा ३३ अमृता ३४ विषवल्ली ३५ । चित्रफला ३६ । इति जटाधरः ॥ अपि च ।

"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी ।
वारुणी च पराप्युक्ता सा विशाला महाफला ॥
श्वेतपुष्पा मृगाक्षी च मृगैर्व्वारुर्मृगादनी ।
गवादनीद्वयं तिक्तं पाके कटुरसं लघु ॥
वीर्य्योष्णं कामलापित्तकफप्लीहोदरापहम् ।

श्वासकासग्रहं कुष्ठगुल्मयक्ष्मिव्रणप्रणुत् ॥
प्रमेहमूढ़गर्भाग्निगण्डामयविषापहम्"।
इति भावप्रकाशः॥ अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। शीतत्वम्। रेचनत्वम्। गुल्मपित्तोदरश्लेष्मकृमिकुष्ठज्वरापहत्वञ्च॥ इति राजनिर्घण्टः॥

इन्द्रवृद्धा, स्त्री, (इन्द्रेण इन्द्रियजनितदोषेण वृद्धा। यद्वा इन्द्रः श्रेष्ठोऽपि वृद्धः क्षयो भवति यस्याः।) व्रणरोगविशेषः। तस्य लक्षणम्।
"पद्मकर्णिकवन्मध्ये पिड़काभिः समाचिताम्।
इन्द्रवृद्धान्तु तां विद्यादातपित्तोत्थितां भिषक्"॥
इति निदानम्॥ तस्याश्चिकित्सा।
विरुक्तास्नस्रवृद्धाञ्च गर्हभीं जालगर्दभम्।
पैत्तिकस्य विसर्पस्य क्रियया साधयेत् भिषक्।
पाके तु शोधयेदाव्यपद्मकैर्मधुरभेषजैः"॥
इति भावप्रकाशः॥
("या पद्मकर्णिकाकारा पिटिका पिटिकान्विता।
सा विद्धा वातपित्ताभ्यां ताभ्यामेव च गर्हभी"॥)

इन्द्रवृक्षः, पुं, (इन्द्रस्य वृक्षः।) देवदारु। इति जटाधरः॥ (देवदारुशब्देऽस्य गुणादयो ज्ञातव्याः॥)

इन्द्रसावर्णिः, पुं, चतुर्दशमनुः। अस्मिन् मन्वन्तरे बृहद्भानुरवतारः। शुचिरिन्द्रः। पवित्रचाक्षुषादयो देवाः। अग्निबाहुशुचिशुद्धमागधाद्याः सप्तर्षयः। उरुगम्भीरबुद्ध्याद्या मनुपुत्रा भविष्यन्ति॥ इति श्रीभागवतम्॥ (अयं हि भौत्यनाम्ना चाख्यातः। यथा, विष्णुपुराणे ३। २।
"भौत्यश्चतुर्दशश्चात्र मैत्रेय भविता मनुः।
शुचिरिन्द्रः सुरगणास्तत्र पञ्च गणाश्च तान्। ४०।
चाक्षुषाश्च पवित्राश्च कनिष्ठा भ्राजिरस्तथा।
वसवृद्धाश्च वै देवाः सप्तर्षीनपि मे शृणु। ४१।
अग्निबाहुः शुचिः शुक्रो मागधोऽग्नीध्र एव च।
युक्तस्तथाजितश्चान्यो मनुपुत्रानतः शृणु। ४२।
उरुगम्भीरबुद्ध्याद्या मनोस्तस्य सुता नृपाः"।४३।
मार्कण्डेयपुराणेऽपि १०० अध्याये उक्तरूपेण वर्णितम्। अधुना तु सप्तममन्वन्तरस्याष्टाविंशतितमं युगं।)

इन्द्रसुतः, पुं, (इन्द्रस्य सुतः।) वालिनामवानरराजः। इति हेमचन्द्रः॥ अर्জ্জুনवृक्षः। इति राजनिर्घण्टः॥ जयन्तः। अर्জ্জুनः॥

इन्द्रसुरसः, पुं, (इन्द्रः इन्द्रवृक्ष इव सुरसः सुपत्ररसः।) सिन्दुवारवृक्षः। इत्यमरः॥ निसिन्दा इति ख्यातः। (सिन्दुवारशब्दे निर्गुण्डीशब्दे च अस्य गुणादयो ज्ञेयाः॥)

इन्द्रसुरिसः, पुं, वृक्षविशेषः। निसिन्दा इति भाषा। तत्पर्य्यायः। इन्द्राणी २ निर्गुण्डी ३ सुरसा ४। इति रत्नमाला॥ इन्द्रसुरसः ५ सिन्दुवारः ६ इन्द्राणिका ७। इत्यमरः॥ विसुन्धकः ८ सिन्धकं ९ सुरसः १० सिन्धुवारितः ११ इन्द्रालिका १२ सिन्धुवारकः १३। इति शब्दरत्नावली॥ (इन्द्राणीशब्दे ऽस्य विशेषो ज्ञेयः।)

इन्द्रा, स्त्री, (इदि + रन्।) पक्षिजम्भकवृक्षः। इति मेदिनी॥ काँटा जामीर इति भाषा। इन्द्रपत्नी। शची। इति शब्दरत्नावली॥

इन्द्राग्निधूमः, पुं, (इन्द्राग्नेर्मेघवह्नेर्धूम इव।) हिमं। इति हारावली॥

इन्द्राणिका, स्त्री, (इन्द्राणी + कन्।) इन्द्रसुरिसवृक्षः। इत्यमरः॥

इन्द्राणी, स्त्री, (इन्द्रस्य ऐश्वर्य्यशालिनः सुरराजस्य वा पत्नी। इन्द्र + इन्द्रवरुणेति ङीष् आनुक् च।) दुर्गा। यथा,—
"ऐश्वर्यं परमं यस्या वपुश्चैव सुरासुराः।
इदं परमैश्वर्यं च इन्द्राणी तेन सा शिवा"॥
इति देवीपुराणे ४५ अध्यायः॥* इन्द्रभार्य्या। तत्पर्य्यायः। पुलोमजा २ शची ३। इत्यमरः॥ पौलोमी ४। इति मेदिनी॥ यूतव्रतायी ५। इति जटाधरः॥ माहेन्द्री ६ जयवाहिनी ७ ऐन्द्री ८ श्रुतावरी ९। इति शब्दरत्नावली॥
("यथेन्द्राणी महेन्द्रस्य लक्ष्मीर्लक्ष्मीपतेर्यथा"।
इति भविष्यपुराणे षट्पञ्चभीव्रतकथायाम्। इन्द्रशक्तिः। यथा ऋग्वेदे १।२२।१२। "इहेन्द्राणी मुपह्वये वरुणानीं"। "इन्द्राणीं इन्द्रस्य सूर्य्यस्य वायोर्वा शक्तिम्"। इति दयानन्दसरस्वतीकृतभाष्यम्।) इन्द्रसुरिसवृक्षः। स्त्रीणां करणं। इति मेदिनी॥ नीलसिन्दुवारवृक्षः। स्थूलैला। सूक्ष्मैला। इति राजनिर्घण्टः॥ अष्टमाष्टकान्तर्गतमाष्टकाविशेषः॥ इति स्मृतिः॥

इन्द्रानुजः, पुं, (अनु पश्चात् जायते इति अनुजः कनिष्ठः। इन्द्रस्यानुजः। विष्णुः खलु कश्यपात् अदितौ वामनरूपेण इन्द्रस्य पश्चात् जातः।) विष्णुः। इति हेमचन्द्रः॥ (विस्तरो वामनशब्दे द्रष्टव्यः।)

इन्द्रायुधं, क्ली, (इन्द्रस्यायुधमिव चापाकृतित्वात्।) इन्द्रधनुः। इत्यमरः॥ रामधनुक गाछी इत्यादि भाषा।
("स नादं मेघनादस्य धनुश्चेन्द्रायुधप्रभम्"।
इति रघुवंशे।१२।७९। तथा, मनुः। ४।५९।
"न दिवीन्द्रायुधं दृष्ट्वा कस्यचिद्दुर्मनायते बुधः"।)

इन्द्रारिः, पुं, (इन्द्रस्य अरिः शत्रुः।) असुरः। इत्यमरः॥

इन्द्रावरजः, पुं, (इन्द्रस्य अवरजः वामनरूपेण अनुजः।) विष्णुः। इत्यमरः॥

इन्द्राशनः, पुं, (इन्द्रस्य अशनः खाद्यद्रव्यम्।) संविदावृक्षः। इति शब्दमाला॥ सिद्धि इति भाषा। गुम्मा। इति हारावली॥ कुच इति भाषा।
("इन्द्राग्निकेन्द्राशनकञ्च"।
"तथाचेन्द्राशनोत्कटैः"।
"ग्रीष्मसुन्दरमण्डूकी जयन्तीन्द्राशनस्य च"॥
इति वैद्यकरत्नेन्द्रसारसंग्रहः॥)

इन्द्रियं, क्ली, (इन्द्रस्यात्मनोलिङ्गमनुमापकम्। इन्द्रेण ईश्वरेण सृष्टं। इन्द्रेणात्मना मम चक्षुर्मम श्रोत्रमित्यादि क्रमेण ज्ञातं। इन्द्रेण जुष्टं वा इत्याद्यर्थेषु इन्द्रशब्दात् निपातनात् घच्।) ज्ञानकर्म्मसाधनम्। तत्पर्य्यायः। हृषीकम् २ विषयि ३। इत्यमरः॥ अक्षम् ४ करणम् ५ ग्रहणम् ६। इति राजनिर्घण्टः॥ तत्र तु ज्ञानेन्द्रियाणि पञ्च। यथा। कर्णः १ त्वक् २ चक्षुः ३ जिह्वा ४ नासिका ५ कर्म्मेन्द्रियाणि पञ्च यथा। वाक् १ पाणिः २ पादः ३ पायुः ४ उपस्थः ५। अन्तरिन्द्रियाणि चत्वारि। मनः १ बुद्धिः २ अहङ्कारः ३ चित्तं ४॥ मनस्तावदिन्द्रियाणां नियामकम्। चतुर्दश देवाः चतुर्दशेन्द्रियनियन्तारः। तत्र श्रोत्रस्य देवता दिक्। त्वचो वातः। चक्षुषः सूर्य्यः। रसनायाः प्रचेताः घ्राणस्याश्विनौ। वाचो वह्निः। हस्तस्य इन्द्रः। पादस्य विष्णुः। पायोर्मित्रः। उपस्थस्य प्रजापतिः। मनसश्चन्द्रः। बुद्धेश्चतुर्मुखः। अहङ्कारस्य शङ्करः। चित्तस्याच्युतः। इति वेदान्तः॥ न्यायमते। पृथिव्या इन्द्रियं घ्राणं। जलस्य जिह्वा। तेजसश्चक्षुः। वायोस्त्वक्। आकाशस्य कर्णः। (अथ बुद्धेर्ब्रह्मा। अहङ्कारस्येश्वरः। मनसश्चन्द्रमाः। दिशः श्रोत्रम्। त्वचो वायुः। सूर्य्यश्चक्षुषोः। रसनस्यापः। पृथिवी घ्राणस्य। वचसोऽग्निः। हस्तयोरिन्द्रः। पादयोर्विष्णुः। पायोर्मित्रं। प्रजापतिरुपस्थस्येति। इति सुश्रुतः॥) (यथा, मनुः। २। ८८। "इन्द्रियाणां विचरतां विषयेष्वपहारिषु"।
विज्ञानम्। यथा, ऋग्वेदे १।१११।२।
"यथा त्वयाम सर्व्ववीरया विशातन्तः शर्द्धाय धासथास्त्रिंयम्"। "इन्द्रियं विज्ञानम्" इति दयानन्दभाष्यम्।) शुक्रम्। वीर्य्यम्। इत्यमरः॥

इन्द्रियक्षयः, पुं, (इन्द्रियस्य क्षयः सम्यक् निरोधः।) प्रलयः। इति राजनिर्घण्टः॥

इन्द्रियायतनं, क्ली, (इन्द्रियाणां आयतनमाश्रयस्थानम्।) शरीरम्। इति हेमचन्द्रः॥

इन्द्रियार्थः, पुं, (इन्द्रियाणामर्थः।) इन्द्रियजन्यज्ञानविषयः। यथा। रूपं। शब्दः। गन्धः। रसः। स्पर्शः। तत्पर्य्यायः। विषयः २ गोचरः ३। इत्यमरः॥ (यथा, मनुः। ४। १६।
"इन्द्रियार्थेषु सर्व्वेषु न प्रसज्येत कामतः"।
"अपि स्वदेहात् किमुतेन्द्रियार्थात्
यशोधनानां हि यशो गरीयः"।
इति रघुः।१४।३५।)

इन्द्रेज्यः, पुं, (इन्द्रस्य इज्यः।) बृहस्पतिः। इति शब्दरत्नावली॥

इन्ध ईं ध ङ ञि द्युतौ। इति कविकल्पद्रुमः॥ (धधां-आत्मं-अकं-सेट्।) क्र्यादिः। ईं ञि इन्धोऽस्ति। ङ ध इन्धे। इति दुर्गादासः॥

इन्धनं, क्ली, (इन्धे दीप्यतेऽग्निरनेन। इन्ध + करणं + ल्युट्।) अग्निसन्दीपनद्रव्यकाष्ठादि। जालानी काठ इति भाषा। तत्पर्य्यायः। इध्मम् २ एधः ३ समित् ४ एधम् ५। इत्यमरः॥ समिन्धनम् ६। इति शब्दरत्नावली॥ (यथा, मनुः। ७। ११८। "अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात्"।)

इन्धकाः, स्त्री, इन्धलाः। मृगशिरोनक्षत्रोपरिस्थितपञ्चतारः। इत्यमरटीकायां स्वामी॥

इभः, पुं, स्त्री, (इति गच्छतीति। इण भन्।) औणादिकोऽयं प्रत्ययः।) हस्ती।
("खराश्वोष्ट्रगवेभानामजाविकवधस्तथा"।
इति मनुः। ११।६८। यथा, उत्तरचरिते।

"इभदलितविकीर्णगजश्रेणिनिष्यन्दगन्धः" ।)
उत्तरपदे श्रेष्ठवाचकः । इत्यमरः ॥

इभकणा, स्त्री, (इभो हस्तीव कणा ।) गजपिप्पली । इति रत्नमाला ॥ ("कर्पूरं जातिकोषं सजलमिभकणा तेजपत्रं लवङ्गम्" । इति वैद्यकरसेन्द्रसारसंग्रहः ।)

इभदन्ता, स्त्री (इभस्य दन्त इव । इभदन्त + टाप् ।) नागदन्तीवृक्षः । इति रत्नमाला ॥ (नागदन्ती-शब्दे ऽस्या गुणादयो ज्ञेयाः ।)

इभनिमीलिका, स्त्री, (इभस्य हस्तिन इव निमीलिका ।) वैदग्धी । भङ्गिः । इति चिकाण्डशेषः ॥

इभपालकः, पुं, (इभानां पालकः ।) हस्तिपकः । इति हेमचन्द्रः ॥ माऊत इति भाषा ।

इभमाचलः, पुं, (इभमाचालयति । इभ + आङ् + चल + णिच् + बाऽलकात् ख ।) सिंहः । इति भूरिप्रयोगः ॥

इभया, स्त्री, (इभ + घा + क + टाप् ।) स्वर्णक्षीरीवृक्षः । इति रत्नमाला ॥

इभाख्यः, पुं, (इभस्य आख्या यस्मिन् ।) नागकेशरवृक्षः । इति चिकाण्डशेषः ॥

इभोषणा, स्त्री, इभकणा । गजपिप्पली । इति शब्दचन्द्रिका ॥ (गजपिप्पलीशब्देऽस्या विवरणम् ज्ञेयम् ।)

इभ्यः, त्रि, (इभमर्हतीति दण्डादित्वात् यत् ।) धनवान् । इत्यमरः ॥ (पुं, राजा । हस्तिपकः ।) (यथा छान्दोग्योपनिषदि १।१०। "उषस्तिर्ह चाक्रायण इभ्ययामे प्रद्राणक उवास। सहेभ्यम् कुल्माषाग्रवादन्तं विभित्ते" ।)

इभ्या, स्त्री, हस्तिनी । श्लक्ष्णा । इति मेदिनी ॥

इयं, स्त्री, इदम् शब्दस्य स्त्रीलिङ्गे प्रथमायां रूपं । यह स्त्री इति भाषा । इति व्याकरणम् ॥

इयत्, त्रि, (इदम् परिमाणमस्य । इदम् + वतुप् वस्य यः ।) कियत्संख्यावोधकम् । इतिव्याकरणम् ॥ एतो इति भाषा । (यथा, रघुवंशे । १३।६७।

"इयन्ति वर्षाणि तया सहोग्र-
मभ्यस्यतीव व्रतमासिधारम्" ।)

इयत्ता, स्त्री, (इयत् + तल् ।) इयतो भावः । सीमा । परिमाणम् । सङ्ख्या । इत्यादि ॥ ("अमेया तदपत्त्या वा न गुणानामियत्तया" । इति रघुवंशे । १० । ३२ ।)

इरं, त्रि, ईरणं । शून्यं । ऊषरभूमिः । इत्यमरटीकायां रमानाथः ॥

इरम्मदः, पुं, (इरया उदकेन माद्यति दीप्यते अविन्धत्वात् इति उद्यम्यश्येरम्मदेत्यादिना खशप्रत्ययो मुमागमश्च निपातितः ।) वह्निः । तत्पर्य्यायः । मेघद्योतिः २ । इत्यमरः ॥ मेघाग्निः ३ । इति जटाधरः ॥ अन्योन्यसङ्घट्टनेन मेघाग्निःस्वयञ्ज्योतिर्दृष्टादौ पतति सः । मेघेष्वपलक्षणं वातजाग्निरपि । इति भरतः ॥

इरा, स्त्री, (इं कामं राति ददाति इति । इ + रा + क । यद्वा इतीति इ + रन् + टाप् निपातनात् गुणाभावः ।) भूमिः । वाक्यम् । मद्यम् । जलम् । इत्यमरः ॥ (यथा, आश्वलायनगृह्यसूत्रे । २।६।

"इरां वहन्तो घृतमुक्षमाणा
मित्रेण साकं सह संविशन्तु" ।)

सरस्वती । इति शब्दरत्नावली ॥ (अन्नम् ।)
कश्यपपत्नीविशेषः ।
यथा, गारुडे ६ अध्यायः ॥
"धर्म्मपत्न्यः समाख्याताः कश्यपस्य वदाम्यहम् ।
अदितिर्दितिर्दनुः काला अमायुः सिंहिका मुनिः ।
क्रतुः प्राधा इरा क्रोधा विनता सुरभिः खशा" ।
तस्याः सन्ततिर्यथा ।
"इरा लतालता वल्ली द्रुमजातिश्च सर्व्वशः ।
खशा च यक्षरक्षांसि मुनिरप्सरसस्तथा" ।
(दैत्यविशेषः । यथा, हरिवंशे । ३ । ८२ ।
"मरीचिर्मघवांश्चैव इरा शङ्कुशिरा वृकः" ।)

इराचरं, क्ली, (इरायां चरतीति । इरा + चर् + ट ।) करका । इति चिकाण्डशेषः ॥ हस्तिर ग्रील इति भाषा । जलचरे भूचरे च त्रि ॥

इराजः, पुं, (इरया मद्येन जायते इति । इरा + जन् + ड ।) कन्दर्पः । इति हलायुधः ॥

इरावती, स्त्री, (इरा विद्यतेऽस्या इति । इरा + मतुप् ।) वटपत्रोद्भवः । पाषाणभेदोविशेषः । इति राजनिर्घण्टः ॥ (नदीभेदः । यथा, महाभारते ।
"विपासा च घृतवत्या चन्द्रभागा सरस्वती ।
इरावती वितस्ता च सिन्धुर्देवनदी तथा" ॥

इरिणं, क्ली, (ऋच्छतीति । ऋ गतिप्रापणयोः, किदिच्चेति इनन् ।) शून्यम् । ऊषरभूमिः । इत्यजयः ॥ (यथा, मनुः । ३ । १४२ ।)
"यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम्" ।)

इरिमेदः, पुं, (इरिणो हस्तिनो मेद इव मेदो यस्य ।) अरिमेदः । विट्खदिरः । इति शब्दरत्नावली राजनिर्घण्टश्च ॥
("इरिमेदो विट्खदिरः कालस्कन्धो ऽरिमेदकः" । इति पर्य्यायः । अस्य गुणा यथा भावप्रकाशे ।
"अरिमेदः कषायोष्णो मुखदन्तगदापहः ।
हन्ति कण्डूविषस्फोटकुष्ठविषव्रणान्" ॥)

इरिवेल्लिका, स्त्री, मस्तकोद्भववयजन्यपीड़ाविशेषः । तस्य लक्षणम् ।
"पिड़कामुत्तमाङ्गस्थां रक्तामूषरजाज्वराम् ।
सर्व्वात्मिकां सर्व्वलिङ्गां जानीयादिरिवेल्लिकाम्" ॥
इति निदानम् ॥ चिकित्सा यथा ।
"पैत्तिकस्य विसर्पस्य या चिकित्सा प्रकीर्त्तिता ।
तयैव भिषगेतस्याश्च चिकित्सेदिरिवेल्लिकाम्" ॥
इति भावप्रकाशः ॥ (तथा च वाभटः ।
"चिलिङ्गा पिटिका रक्ता जनूर्द्ध्वमिरिवेल्लिका" ।
"इरिवेल्लिकां गन्धगामां जयेत्पित्तविसर्पवत्" ।
इति वैद्यकचक्रपाणिसंग्रहे ।)

इरेशः, पुं, (इरायाः ईशः ।) विष्णुः । इति शब्दरत्नावली ॥ राजा । वागीशः । वरुणः ॥

इर्व्वारुः, पुं, स्त्री, (उर्व्व + आरच् । एषोदरादित्वात् साधुः ।) कर्कटी । इत्यमरः ॥ काँकुड़ इति भाषा । अस्य गुणाः । स्वादुत्वम् । गुरुत्वं । अजीर्णकारित्वम् । शीतलत्वञ्च । तत्फलगुणाः । दाहच्छर्दिष्णाक्लान्तिनाशित्वम् । इति राजवल्लभः ॥
(कर्कटीशब्देऽस्य विशेषो ज्ञातव्यः ।)

इर्व्वारुशुक्तिका, स्त्री, (इर्व्वारुः शुक्तिकेव स्वयं स्फोटनात् ।) इर्व्वारुविशेषः । इति हारावली ॥ फुटी इति भाषा ।

इर्व्वालुः, पुं, (इर्व्व + आरच् । रलयोरैक्यात् ।) इर्व्वारुः । इत्यमरटीकायां रायमुकुटः ॥

इल, ग्र गत्यै, गतौ । क्षेपे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-गत्यने, अकं-सेट् ।) ग्र इलति । गत्यः गत्यनं । इति दुर्गादासः ॥

इल, क क्षेपे । इति कविकल्पद्रुमः ॥ (चुरां-उभं-सकं-सेट् ।) कृखादिः । क एलयति । इति दुर्गादासः ॥

इलविला, स्त्री, कुबेरमाता । सा च विश्रवःपत्नी । इति पुराणम् ॥

इला, स्त्री, (इलति विष्णुवरात् पुंस्त्वं प्राप्नोति इति । इल + क + टाप् ।) वैवस्वतमनुकन्या । सा च विष्णुवरात् पुंस्त्वं प्राप्य सुद्युम्ननाम्ना ख्याता । पश्चात् शङ्करप्रसादकुमारवनं प्रविश्य पुनः स्त्रीत्वं गता । बुधस्तां भार्य्यात्वेन स्वीकृत्य पुरूरवसं जनयामास । ततस्तस्याः पुरोहितो वशिष्ठः शङ्करमाराध्य तस्यै मासं स्त्रीत्वं मासं पुंस्त्वं दत्तवान् इति श्रीभागवतं ॥ कर्द्दमप्रजापतिपुत्र इलः कार्त्तिकेयजन्मदेशं प्रविश्य स्त्री भूत्वा इलानाम्ना ख्यातः ततः पार्व्वतीमाराध्य मासं स्त्रीत्वं मासं पुंस्त्वञ्च प्राप्तवान् । इति रामायणं ॥ पृथिवी । गौः । वाक्यं । इति मेदिनी ॥

इलावृतं, क्ली, (इलया आवृतं ।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । इति चिकाण्डशेषः । तच्च सुमेरुपर्व्वतं संवेष्ट्यास्ते । तस्य सीमा उत्तरे नीलपर्व्वतः । दक्षिणे निषधः । पश्चिमे माल्यवान् । पूर्व्वे गन्धमादनपर्व्वतः । इति श्रीभागवतम् ॥ अग्नीध्रस्य सनामख्यातः पुत्रः स तु पितुः सकाशात् इलावृतं नाम वर्षमलभत । यदुक्तं विष्णुपुराणे । २ । १ । १६, १७, १८ ।
"जम्बुद्वीपेश्वरो यस्तु अग्नीध्रो मुनिसत्तम ! ।
तस्य पुत्रा बभूवुस्ते प्रजापतिसमा नव ॥
नाभिः किम्पुरुषश्चैव हरिवर्षं इलावृतः ।
रम्यो हिरण्वान् भद्रश्च कुरुर्भद्राश्व एव च ॥
केतुमालस्तथैवान्यः साधुचेष्टो नृपोऽभवत्" ॥)

इलिका, स्त्री, (इला एव । इला + स्वार्थे कन् + टाप् ।) पृथिवी । इति शब्दरत्नावली ॥

इली, स्त्री, (इल गतौ क्षेपणे च इति, इदिकारादिति वा ङीष् ।) ईली । करपालिका । इत्यमरटीकायां रायमुकुटः ॥ हातकुरि इति भाषा ।

इलीशः, पुं, (इलन्ति अधुद्रुतं गच्छन्ति इति इला द्रुतगामिनो मत्स्याः । इल + क । तेषां ईशः ।) सनामख्यातमत्स्यविशेषः । इति शब्दरत्नावली ॥ ("इलीशो जितपीयूषो वाचा वाचामगोचरा ।
रोहितो नो हितः प्रोक्तो मधुरो मधुरोः प्रियः" ।
इत्युद्भटः ।
"इलीशो मधुरः स्निग्धः पित्तश्लेष्माग्निमान्द्यनुत्" ।
इति वैद्यकरत्नगुणः ॥)

इल्वलः, पुं, पक्षिविशेषः। इति शब्दचन्द्रिका॥
इल्लिशः, पुं, इल्लीशमत्स्यः। तत्पर्य्यायः। वारिकर्पूरः २ गाङ्गेयः ३ शूकराधिपः ४ जलतालः ५। इति चिकाखड्गेषः॥ इल्लीशः ६ राजशूकरः ७ इल्लीशः ८ जलतापी ९। इति शब्दरत्नावली॥ अस्य गुणाः। पित्तश्लेष्माग्निदृद्धिकारित्वम्। मधुरत्वम्। हृद्यत्वञ्च। इति राजवल्लभराजनिर्घण्टौ॥ "इल्लिशो मधुरः स्निग्धो रोचनो वह्निवर्द्धनः। पित्तकृत् कफकृत् किञ्चित् लघुर्वृष्योऽनिलापहः"॥ इति भावप्रकाशः॥
इल्वकाः, स्त्री, इल्वलाः। नित्यबहुवचनान्तशब्दोऽयं। इति भरतो द्विरूपकोषश्च॥
इल्वलः, पुं, (इल्+वलच्। निपातनात् गुणाभावः।) दैत्यविशेषः। स च वातापेर्भ्राता। (स च सिंहिकासुतः। यथा, हरिवंशे। ३य अध्याये।
"सैंहिकेया इति ख्याताश्चत्वारोदग्र महाबलाः।६८।
रेणुः बल्यश्च बलिनौ नभश्चैव तथाबलः।
वातापिर्नमुचिश्चैव इल्वलः खरमस्तथा"॥६९॥
तस्य विवृतिर्यथा महाभारते तीर्थयात्रापर्व्वणि अगस्त्योपाख्याने ९६ अध्यायः।
लोमश उवाच।
"इल्वलो नाम दैतेय आसीत्कौरवनन्दन!।
मघिमत्यां पुरि पुरा वातापिस्तस्य चानुजः।४।
स ब्राह्मणं तपोयुक्तमुवाच दितिनन्दनः।
पुत्रं मे भगवानेकमिन्द्रतुल्यं प्रयच्छतु॥ ५॥
तस्मिन् स ब्राह्मणो नादात् पुत्रं वासवसम्मितम्।
चुकोध सोऽसुरस्तस्य ब्राह्मणस्य ततो भृशम्॥६॥
तदा प्रभृति राजेन्द्र इल्वलो ब्रह्महासुरः।
मन्युमान् भ्रातरं क्षान्तं मायावी च्छकरोत्ततः॥७॥
मेषरूपी च वातापी कामरूप्यभवत् क्षणात्।
संस्कृत्य च भोजयति ततो विप्रं जिघांसति॥८॥
स भक्षयति यं वाचा तं वैवस्वतक्षयम्।
स पुनर्दृष्टमास्याय जीवन् संप्रत्यदृश्यत॥९॥
ततो वातापिमसुरं क्षान्तं क्षत्वा सुसंस्कृतम्।
तं ब्राह्मणं भोजयित्वा पुनरेव समाह्वयत्॥१०॥
तामिल्वलेन महता स्वरेण वाचमीरिताम्।
श्रुत्वातिमायो बलवान् क्षिप्रं ब्राह्मणकण्टकः॥११॥
तस्य पार्श्वं विनिर्भिद्य ब्राह्मणस्य महासुरः।
वातापिः प्रहसन् राजन् निश्चक्राम विशाम्पते॥१२॥
एवं स ब्राह्मणान् राजन् भोजयित्वा पुनः पुनः।
हिंसयामास दैतेय इल्वलो दुष्टचेतनः॥१३॥
अगस्त्यस्यापि भगवानेतस्मिन् काल एव तु।
पितॄन् ददर्श गर्त्ते वै लम्बमानानधोमुखान्॥१४॥
ततः ९९ अध्याये इल्वलेन अगस्त्यातिथ्यं कृतम्॥
यथा,— लोमश उवाच।
"इल्वलस्तान् विदित्वा तु महर्षिसहितान् नृपान्।
उपस्थितान् सहामात्यो विधयान्ते न्यमन्त्रयत्॥१॥
तेषां ततोऽसुरश्रेष्ठस्वातिथ्यमकरोत् तदा।
सुसंस्कृतेन क्रौर्य्य भ्रात्रा वातापिना तदा॥२॥
ततो राजर्षयः सर्व्वे विषण्णा गतचेतसः।
वातापिं संस्कृतं दृष्ट्वा मेषभूतं महासुरम्॥३॥
अथाब्रवीदगस्त्यस्तान् राजर्षीन्ऋषिसत्तमः।
विषादो वो न कर्त्तव्यो ह्यहं भोक्ष्ये महासुरं॥४॥
धुर्य्यासनमथासाद्य निषसाद महानृषिः।
तं पर्य्यवेषयद्दैत्येन्द्रः इल्वलः प्रहसन्निव॥५॥
अगस्त्य एव क्षन्तु वातापिं बुभुजे ततः।
भुक्तवत्यसुराङ्गानमकरोत्तस्य चेल्वलः॥६॥
ततो वायुः प्रादुरभूत् अधस्तस्य महात्मनः।
शब्देन महता तात गर्ज्जन्निव यथा घनः॥७॥
वातापे निष्क्रमस्वेति पुनः पुनरुवाच ह॥८॥
तं प्रहस्याब्रवीत् राजन् अगस्त्यो मुनिसत्तमः।
कुतो निष्क्रमितुं शक्तो मया जीर्णस्तु सोऽसुरः॥९॥
इल्वलस्तु विषण्णोऽभूद्दृष्ट्वा जीर्णं महासुरम्।
प्राञ्जलिश्च सहामात्यैरिदं वचनमब्रवीत्॥१०॥)
मत्स्यविशेषः। इति मेदिनी॥
इल्वलाः, स्त्री, (इल+वलच्।) मृगशिरोनक्षत्रशिरो देशस्थिताः पञ्चतारकाः। इत्यमरः॥ (नित्यबहुवचनान्तोऽयम्।)
इव, इ, व्याप्तौ। (इदित्-भ्वादिं--परं-सकं-सेट्।) प्रीणने। इति कविकल्पद्रुमः॥ क्र्यादिः। इ इन्वते। दन्त्यवकारपरत्वान्नानुस्वारः। प्रीणनं कैश्चिन्न मन्यते। इति दुर्गादासः॥
इव, व्य, सादृश्यम्। साम्यम्। इत्यमरः॥ (यथा, रघौ। १। १।
"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ"॥)
(उत्प्रेक्षा। यथा, साहित्यदर्पणे १० परिच्छेदे।
"मुखमेणीदृशो भाति पूर्णचन्द्र इवापरः"।)
ईषत्। वाक्यालङ्कारः। (यथा, शाकुन्तले १ अङ्के।
"किमिव हि मधुराणां मण्डनं नाकृतीनाम्"।
एवार्थः। यथा, ऋग्वेदे १। १८४। ३। "श्रिये पृथन्नियक्षतेव देवाः" "इवशब्द एवार्थे" इति भाष्यम्। अवधारणार्थः। यथा, शतपथब्राह्मणे
"इक्ष्वेव तु ईश्वरा" "इवशब्दोऽवधारणार्थः इति भाष्यम्।)
इक्षीका, स्त्री, इषीका। गजचक्षुर्गोलकः। इत्यमरटीकायां भरतः॥
इष य सर्पणे। गतौ। इति कविकल्पद्रुमः॥ (दिवांपरं-सकं-सेट्।) क्र्यादिः। य इष्यति। सर्पणं गतिः। इति दुर्गादासः॥
इष उ ग्र वाञ्छे। इति कविकल्पद्रुमः॥ (तुदांपरं-अकं-सेट्। उ एषित्वा इट्टा। वेमसङ्लुभेत्यादिसूत्रेणैवेऽसिद्धेऽप्यस्योदनुबन्धकृत्सूत्रे इषगाभीक्ष्ण्ये इत्य सर्पणे इत्येतयोरप्राप्ते विशेषणार्थः। न च पिबादिग्रहणवत्तत्र इच्छ इति ग्रहणेनैवेऽसिद्धिरिति वाच्यं लाघवाभावे प्राचीनमतस्यैव न्याय्यत्वात्। ग इच्छती इच्छन्ती। अस्यैव इच्छादेशः। इच्छति धनं लोकः। इति दुर्गादासः॥
इष ग आभीक्ष्ण्ये। पौनःपुन्येन करणे। इति कविकल्पद्रुमः॥ (क्र्यादिं-परं-अकं-सेट्।) ग इच्छति पण्डितः। पुनः पुनः करोतीत्यर्थः। इति दुर्गादासः॥
इषः, पुं, (इष्यते गम्यतेऽस्मिन् जिगीषुभिरिति। इष+क।) आश्विनमासः। इत्यमरः॥ (यथा, शतपथब्राह्मणे। ४।२। "यच्छरद्भिर्ऋतुभिरोषधयः पच्यन्ते ते नेतावित्यस्योर्गश्च"। इषर्जो ग्रस्त्" । इति सुश्रुतः॥)
इषिका, स्त्री, (इष्+क्षजादिभ्यो वुन्।) इषीका। गजचक्षुर्गोलकः। तूलिका। इत्यमरटीकायां रायमुकुटः॥
इषिरः, पुं, (इष्यति गच्छतीति। इष+किरच्।) अग्निः। इत्युणादिकोषः॥ (गमनशीले, त्रि, यथा, ऋग्वेदे। ७। ३५। ४। "ग्रं न इषिरो अभियातः"। "इषिरः गतिशीलः" इति भाष्यम्।)
इषीका, स्त्री, (ईष्यते इति। ईषेः कित् क्रस्वेतीकन् क्रस्वश्च।) गजाक्षितूलकः। इक्षिचक्षुर्गोलकः। इत्यमरः॥ तूलिका। इति रायमुकुटः॥ काण्डतृणं। इति हेमचन्द्रः॥
("पताकानां पुच्छेषु लग्नेषीका प्रवेशिता"।
"इषीकाञ्च यथा मुञ्जात् कश्चित् निष्कृष्य दर्शयेत्।
योगी निष्कृष्य चात्मानं तथा पश्यति देहतः"।
इति च महाभारते।
"तस्मिन्नास्थदिषीकास्त्रं रामो रामाववोधितः"।
इति रघुः १२।२३"। इषीकास्त्रं काण्डास्त्रं "इषीका काण्डमुच्यते" इति हलायुधः। इति तट्टीका।)
इषुः, पुं, स्त्री, (इष्यति गच्छतीति। इष+उ।) बाणः। इत्यमरः॥ ("उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले"। इति शाकुन्तले २ अङ्के।)
इषुधिः, स्त्री, (इषवो धीयन्ते ऽस्मिन्। इषु+धा कि।) तूणः। इत्यमरः॥ ("धनुर्गाण्डीवमादाय तथाक्षय्ये महेषुधी"। इति महाभारते ३।३९।)
इषुपुङ्खा, स्त्री, शरपुङ्खावल्लः। इति राजनिर्घण्टः॥
इष्टं, क्ली, (इष्यते इष्यते वा यज इष वा+भावे क्त।) यज्ञादिकर्म्म। (यथा, हेमचन्द्रः।
"अग्निहोत्रं तपः सत्यं वेदानां चार्थपालनम्।
आतिथ्यं वैश्यदेवञ्च इष्टमित्यभिधीयते"॥)
यथेप्सितं। कामं। इत्यमरः॥ संस्कारः। इति मेदिनी॥
इष्टं, त्रि, (इष्यते इष्यते वा यत् तत्। इष यज वा+कर्म्मणि क्त।) आप्तसितम्। वाञ्छितम्। पूजितम्। प्रियं। इति मेदिनी॥ (यथा, महाभारते।
"उपपन्नो गुणैरिष्टै रूपवानन्यकोविदः"।
मनुः।४।२२९।
"तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम्"।)
इष्टः, पुं, (इष्यते यः। यज्+क्त।) यज्ञः। इति मेदिनी॥ एरण्डवृक्षः। इति शब्दचन्द्रिका॥ (शमीशब्दे अस्य गुणादिकं बोद्धव्यम्॥)
इष्टका, स्त्री, (इष+तकन्+टाप्।) मृदादि-
इष्टिका, निर्म्माणार्थदग्धमृत्तिकाविशेषः। इति चिकित्सितव्यवहारे लीलावती। इट इति भाषा। तद्गृहगुणाः।
"कूपोदकं वटच्छाया श्यामा स्त्री इष्टकालयम्।
शीतकाले भवेदुष्णमुष्णकाले च शीतलम्"॥
इति चाख्यम्॥* ॥ तद्रचितस्थाने पिण्डकर्म्मणि-

इष्टा

मेधो यथा। शङ्खलिखितौ। नेष्टकारर्चिते पितॄन् सन्तर्पयेत्। इति श्राद्धतत्त्वम्॥*॥ देवोद्देश्यकेष्टकामयज्ञदानफलं यथा। मठादिप्रतिष्ठातत्त्वे॥ "सप्तमयात् कोटिगुणितं फलं स्यात् दारुभिः कृते। कोटिकोटिगुणं पुण्यफलं स्यादिष्टकामये॥ द्विपरार्द्धगुणं पुण्यं श्लेजे तु विदुर्बुधाः। मच्छिलयोः समं ज्ञेयं फलमाद्यदरिद्रयोः"॥

इष्टकापथं, क्ली, (इष्टं कापथं यस्य अधोवायुकरत्वात्।) वीरणमूलम्। इत्यमरः॥ (इष्टकाभिर्निर्म्मितः पन्थाः।) इष्टकानिर्म्मितपथे, पुं॥

इष्टगन्धं, क्ली, (इष्टो गन्धो यस्येति।) बालुका। इति मेदिनी॥

इष्टगन्धः, त्रि, (इष्टो गन्धो यस्य।) सुगन्धिद्रव्यम्। इत्यमरः॥ (इष्टश्चासौ गन्धश्चेति वाक्ये। सौरभम्।)

इष्टा, स्त्री, (इज्यतेऽनया। यज + क्त टाप्।) शमीवृक्षः। इति राजनिर्घण्टः॥

इष्टापूर्त्तं, क्ली, (इष्टञ्च पूर्त्तञ्च द्वयोः समाहारः।) यज्ञखातादिकर्म्म। इति हेमचन्द्रः॥ यथा। "अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम्। आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते॥ वापीकूपतड़ागादिदेवतायतनानि च। अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते"॥ इति मलमासतत्त्वधृतजातूकर्णः॥ (यथा, मार्कण्डेयपुराणे १८।६।

"इष्टापूर्त्तविनाशाय तद्राज्यचौरधर्म्मिणः"॥ तथा च महाभारते। ३। ३२। ३०।

"इष्टापूर्त्तफलं न स्यात् न शिष्यो न गुरुर्भवेत्"।)

इष्टार्थोद्युक्तः, त्रि, (इष्टोऽर्थस्तस्मिन् उद्युक्तः।) उत्सुकः। उत्साहयुक्तः। इत्यमरः॥

इष्टिः, स्त्री, (इष्, यज् वा + क्तिन्।) अभिलाषः। (इति भाष्यकारेच्छा गतार्थत्वात्। इति पाणिनिः।) यागः। इत्यमरः॥(यथा, रघुः।१०।४। "आरेभिरे जितात्मानः पुत्रियामिष्टिमृत्विजः"। "प्राजापत्यं निरूप्येष्टिं सर्व्वदेवसदक्षिणां"। इति मनुः।६।२८। श्लोकसंग्रहः। इति मेदिनी॥

इष्टिकापथिकं, क्ली, वामभ्रूकटाक्षम्। इति राजनिर्घण्टः॥

इष्टिपचः, पुं, (इष्टिं यज्ञं पचतीति। यद्वा, इष्टये खेच्छार्थं पचति यः। इष्टि + पच + अच्।) दनुजः। असुरः। इति शब्दरत्नावली॥

इष्टिभुट्, [ज्] पुं, (इष्टिं यागं भुञ्जाति। इष्टि + भुज् + क्विप्।) दैत्यः। इति त्रिकाण्डशेषः॥

इष्टुः, स्त्री, (इष + तु।) इच्छा। इत्युणादिकोषः॥

इष्मः, पुं, (इच्छतीति इषियुधीति मक्।) कामदेवः। वसन्तकालः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ [कालः। इति हेमचन्द्रः॥

इष्यः, पुं, (इष्यतेऽनेन इति। इष् + क्यप्।) वसन्तः।

इष्वः, पुं, (इष्यतेऽसौ। इष् + वन्। निपातनात् गुणाभावः।) उपदेशः। इत्युणादिकोषः॥

इष्वासः, त्रि, (इषून् बाणान् अस्यतीति। इषु + अस् + घञ्।) इषुक्षेपकम्। इति मेदिनी॥ तिरन्दाज इति ख्यातम्।

ई

इष्वासः, पुं, (इषवो बाणा अस्यन्ते क्षिप्यन्तेऽनेन। इषु + अस् + करणे घञ्।) धनुः। इत्यमरः॥ ("महोरस्को महेष्वासो गूढ़जत्रुरिन्दमः"। इति रामायणे। १। १। १०। गीतायां १।४। "अत्र शूरा महेष्वासा भीमार्জ্জুनसमा युधि"।)

इह, व्य, (अस्मिन् काले, लोके, विषये, देशे, दिशि वा इत्याद्यर्थे निपातनात् सिद्धम्।) अस्मिन्। एइ देशे एइ काले इत्यादि भाषा। इति व्याकरणम्॥ (यथा, मनुः।३।१८१।

"यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत्"। "षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता"। इति हितोपदेशे।)

इहामुत्रफलभोगविरागः, पुं, (इह अस्मिन् लोके स्वर्गचन्दनादिजनितोऽमुत्रामुस्मिन् लोके अमृतादिविषयोत्पन्नो योऽनित्यः फलभोगस्तस्मात् विरागो नितरां विरतिः।) ऐहिकपारत्रिकविषयभोगेभ्यो नितरां विरतिः इति वेदान्तसारे॥

ई

ई दीर्घ ईकारः। चतुर्थस्वरवर्णः। अस्योच्चारणस्थानं तालु। (स च दीर्घः द्विमात्रत्वात् त्रिमात्राश्रयत्वात् प्लुतश्च भवति।) (विस्तृतिस्तु ह्रस्वइकारे द्रष्टव्या।)

"ईकारं परमेशानि स्वयं परमकुण्डली। ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं सदा॥ पञ्चदेवमयं वर्णं पीतविद्युल्लताकृतिम्। चतुर्ज्ञानमयं वर्णं पञ्चप्राणमयं सदा"॥ इति कामधेनुतन्त्रम्। (वङ्गीयभाषायां।) तस्य लेखनप्रकारो यथा।

"ऊर्द्धाधःकुञ्चिता मध्ये त्रिकोणाधोगता पुनः। अधोगता कोणग्रीवा कुञ्चिता दक्षतः शुभा॥ ग्रीवाहीने कोणयुता कुञ्चितोर्द्धगता पुनः। चन्द्रसूर्य्याग्निरूपा सा मात्राशक्तिः प्रकीर्त्तिता"॥ इति वर्णोद्धारतन्त्रम्॥*॥ अस्य नामानि यथा,— "ईः स्त्रीमूर्त्तिर्महामाया लोलाक्षी वामलोचनम्। गोविन्दः शेखरः पुष्टिः सुभद्रा रत्नसञ्चकः॥ विष्णुर्लक्ष्मीः प्रहासश्च वाग्विशुद्धः परापरः। कालोत्तरीयो भैरुण्डा रतिश्च पौण्ड्रवर्द्धनः॥ शिवोत्तमः शिवा तुष्टिश्चतुर्थी विन्दुमालिनी। वैष्णवी वैन्दवी जिह्वा कामकला सनादका॥ पावकः कोटरः कीर्त्तिर्मोहनी कालकारिका। कुचद्वन्द्वं तर्জ্জनी च प्राप्तिस्त्रिपुरसुन्दरी"॥ इति तन्त्रोक्तवर्णाभिधानम्॥ (माढकान्यासे ऽस्य वामचक्षुषि स्थानम्। यथा, माढकान्यासधृतमन्त्रे। "ईं नमो दक्षिणचक्षुषि ईं नमो वामचक्षुषि।)

ई, ल, कान्तौ। गतौ। व्याप्तौ। क्षेपे। प्रजने। खादने। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अकं च-अनिट्।) कान्तिरिच्छा। प्रजनो गर्भग्रहणं इत्यर्थः। ल एति गौः गर्भं गृह्णाति इत्यर्थः। "न हि तरश्चिरुदीते दिक् पराधीनवृत्तिः"।

ईड़ि

इति गणकृता नित्यत्वादात्मनेपदं। धातुरयं कैश्चिन्न मन्यते। इति दुर्गादासः॥

ई, ङ य, गतौ। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-अनिट्।) ङ य ईयते। इति दुर्गादासः॥

ई, य विषादः। अनुकम्पा। इति मेदिनी॥ क्रोधः। दुःखभावनं। प्रत्यक्षं। सन्निधिः। इति हेमचन्द्रः॥ (सम्बोधनम्।)

ईः, पुं, कन्दर्पः। इति त्रिकाण्डशेषः॥

ईः, स्त्री, (अस्य विष्णोः पत्नी। ङीप्।) लक्ष्मीः। इति विश्वमेदिन्यौ॥

ईख, इ गतौ। इति कविकल्पद्रुमः॥ (इदित्-भ्वादिं-परं-सकं-सेट्।) दीर्घादिः। इ ईक्षते। इति दुर्गादासः॥ (ईख गतौ। ईखति इति केचित्।)

ईक्ष ङ दर्शने। इति कविकल्पद्रुमः॥ (भ्वादिं-आत्मं-सकं-सेट्।) दर्शनमिह चाक्षुषज्ञानं प्रणिधानञ्च। ङ ईक्षते चन्द्रं लोकः। "न कामवृत्तिर्व्वचनीयमीक्षते"। इति कालिदासः॥ "निरीक्षिष्यामि यान्मुनीन् इति गणकृतानित्यत्वात्" इति रमानाथः॥ "वस्तुतस्तु निरीक्ष्यते निरीक्षः पचादित्वादन् ततो निरीक्ष इवाचरतीति क्विौ साध्यं" इति दुर्गादासः॥

ईक्षणं, क्ली, (ईक्ष + भावे, ल्युट्।) दर्शनम्। ("क्षतान्धा धनलोभान्धाः नोपकारेक्षणक्षमाः"। इति कथासरित्सागरे॥) (ईक्षतेऽनेनेति करणे ल्युट्।) चक्षुः। इत्यमरः॥ ("अभिमुखे मयि संहृतमीक्षणम्"। इति शाकुन्तले। २ अङ्के। "श्वासक्षामेक्षणा दीना सुनीतिर्वाक्यमब्रवीत्"। इति विष्णुपुराणे।१।११।१५। निरूपणम्। पर्य्यवेक्षणम्। यथा, मनुः ७।१४१।

'स्थापयेदासने तस्मिन् खिन्नः कार्य्येक्षणे नृणाम्"।)

ईक्षणिका, स्त्री, (ईक्षणेन हस्तरेखाद्यवलोकनेन शुभाशुभं जानाति या। ईक्षण + ठन् + टाप्।) दैवज्ञा। लक्षणादिना शुभाशुभनिरूपिणी। इत्यमरः॥ (पुं, दैवज्ञः। यथा, मनुः।६।२५८। "सङ्कल्पादेश्चतुश्चाद्य भक्षास्त्रेक्षणिकैः सह"।)

ईक्ष, इ, कुत्से। गतौ। इति कविकल्पद्रुमः॥ (भ्वादिं-आत्मं-सकं-सेट्-इदित्।) इ ईक्षते। कुत्सः कैश्चिन्न मन्यते। इति दुर्गादासः॥

ईक्ष, ङ, कुत्से। गतौ। इति कविकल्पद्रुमः॥ (भ्वादिं-आत्मं-सकं-सेट्।) दीर्घादिः। ङ ईक्षते ईक्षते। कुत्सः कैश्चिन्न मन्यते। इति दुर्गादासः॥

ईड़, क, स्तुतौ। इति कविकल्पद्रुमः॥ (चूरां-परं-सकं-सेट्।) क ईड़यति। इति दुर्गादासः॥

ईड़, ङ ल, स्तुतौ। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं-सेट्।) ल ङ ईट्टे। इति दुर्गादासः॥ (यथा, रामायणे। ३य काण्डे।

"गन्धर्व्वाः सुरसंघाश्च बहवश्च महर्षयः। अन्तरीक्षगतं देवं गीर्भिरग्र्याभिरीड़िरे"॥)

ईड़ा, स्त्री, (ईड़ + क + टाप्।) स्तुतिः। इति हलायुधः॥ (प्रशंसा।)

ईड़ितः, त्रि, (ईड्यते स्म। ईड़् + क्त।) स्तुतः। कृतस्तवः। इत्यमरः॥ (प्रशंसितः।)

ईर, इ वन्धे। इ ईर्य्यते। इति दुर्गादासः॥ (भ्वादिं-परं-सकं-सेट्। तेन इन्तीति केचित्।)

ईरः, स्त्री, (ईयतेऽनया। ईर+क्विन्।) डिम्बः। प्रवासः। इत्यमरो मेदिनी च॥ क्षवेः षट्प्रकारोपद्रवविशेषः। यथा,—

"अतिदृष्टिरनावृष्टिः शलभा मूषिकाः खगाः। प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः"॥

इति स्मृतिः॥ (कलहभेदः। नृपतिरहितयुद्धम्। "ईतयो व्याधयस्तद्वा दोषा क्रोधादयस्तथा। उपद्रवाश्च वर्त्तन्ते व्याधयः क्षुद्भयं तथा"॥

इति महाभारते हनूमद्भीमसंवादे।३।१४८।३४।)

ईदृक्, [श्] त्रि, (इदम्+दृश्+क्विप्।) अयमिव दृश्यते। इति व्याकरणम्॥ इहार न्याय एवप्रकार इत्यादि भाषा।

("रत्नानीदृंशि भूयांसि न भवन्त्येव भूतले"। इति कथासरित्सागरे। २५। १७६॥ तथा च किराते। २। २८॥

"इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः"।

ईदृक्षः, त्रि, (अयमिव दृश्यतेऽसावित्यार्थे। इदम्+दृश्+क्स दृक्षे चेति ईश्।) ईदृशः। इति व्याकरणम्॥

("ईदृक्षराजकर्म्माणि भवेयुस्तदिदं वयम्"। इति कथासरित्सागरे।)

ईदृशः, त्रि, (अयमिव दृश्यतेऽसौ इदम्+दृश्+कञ्।) ईदृक्। एतत्सदृशः। इति व्याकरणम्॥

("ईदृशानां विपाकोऽपि जायते परमाद्भुतः"। इति उत्तररामचरिते।)

ईर, किं गतौ। प्रेरणे। इति कविकल्पद्रुमः। (वां, उरां-परं-सकं-सेट्।) नुदि। किं ईरयति ईरति। नुदि प्रेरणे। इति दुर्गादासः॥

ईर, ङ ल, कम्पे। गतौ। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं कम्पार्थे, अकं-सेट्।) दीर्घादिः। ङ ल ईर्ते लता वायुना। इति दुर्गादासः॥

ईरिका, स्त्री, दृक्षविशेषः। यथा। ईरिकावणम्। इति शब्दप्रकाशे दुर्गादासः॥

ईरिणं, त्रि, (ऋ+इरन्।) शून्यं। ऊषरभूमिः। इति मेदिनी॥ (यथा, मनुः। ३। १४२॥

"यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम्॥ तथानृते हविर्दत्त्वा न दाता लभते फलम्"॥

"ततस्तदीरिणं जातं समुद्रस्यावसर्पितः"।

इति महाभारते अनुशासनपर्व्वणि। चलनं।)

ईरितं, त्रि, (ईर+क्त।) क्षिप्तम्। इत्यमरः॥ प्रेरितम्। कम्पितम्। गतम्। कथितम्॥ ("इतीरिते वचसि वचस्विनामुना"। इति माघे १७।१।

"तस्य वर्म्म विभिद्याशु स बाणो मत्सुतेरितः"। इति, महाभारते।)

ईर्ष्यं, ईर्षे। (भ्वादिं-परं-अकं-सेट्।) पराभ्युदयासहिष्णुतायामिति यावत्। इति कविकल्पद्रुमः॥ दीर्घादिः। रेफयुक्तः। ईर्षा परादोषासहिष्णुत्वमिति केचित्। ईर्ष्यति खलः साधवे। यदयान्तः इत्येके। इति दुर्गादासः॥

ईर्म्म, क्ली, (ईर+बाहुलकात् मक्।) व्रणः। इत्यमरः॥ (यथा, भट्टिकाव्ये। ४। ४४।

"मृगयुमिव मृगोऽथ दक्षिणेर्म्मा"।)

ईर्ष्या, स्त्री, (ईर+ण्यत्।) भिक्षुव्रतम्। इति जटाधरः॥

ईर्व्वारुः, पुं, स्त्री, (ईरं वृणोतीति। ईर्+इ-बाहुलकात् उण्।) स्फुटिः। इति शब्दरत्नावली॥ फुटी इति भाषा।

ईर्षा, स्त्री, (ईर्ष्यणं। ईर्ष्य+घञ्। हसाल्लोप इति यकारलोपः।) अक्षमा। इति शब्दमाला॥

("कथमीर्षा न कुरुषे सुग्रीवस्य समीपतः"।) इति रामायणे॥ ४। २४। ३७।)

ईर्षालुः, त्रि, (ईर्षा+आलुच्।) ईर्षाविशिष्टः। इति हलायुधः॥

ईर्ष्य, ईर्षे। इति कविकल्पद्रुमः॥ (भ्वादिं-परं-अकं-सेट्।) दीर्घादिः। रेफयुक्तः। ईर्ष्य इति ईर्ष्यतेर्घञि हसाल्लोप इति यलोपे सिद्धम्। ईर्षा परादोषासहिष्णुत्वम्। परदोषासहिष्णुत्वमिति केचित्। ईर्ष्यति खलः साधवे। यदयान्तः इत्येके। इति दुर्गादासः॥

ईर्ष्या, स्त्री, (ईर्ष्यणं। ईर्ष्य+अच्+टाप्।) परोत्कर्षासहिष्णुता। रोष इति भाषा। तत्पर्य्यायः॥ अक्षान्तिः २। इत्यमरः॥ (यथा,मनुः। ७। ४८॥

("पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गुणाष्टकः"। स्त्रियः पत्युरन्यप्रियासङ्गदर्शनादिजनितो मानभेदः। यथा, षट्कारशतके॥

"वचोभिरीर्ष्याकलहेन लीलया समस्तभावैः खलु बन्धनं स्त्रियः"।)

ईर्ष्यालुः, त्रि, (ईर्ष्यां लाति। ईर्ष्या+ला+डु।) ईर्षाविशिष्टः। अक्षान्तियुक्तः। तत्पर्य्यायः। कुहनः२ इति हेमचन्द्रः॥ (यथा, राजतरङ्गिणी।

"दिवसे सन्निधानेन पेशुनप्रेरणा यदि। ईर्ष्यालुना खैरिणीव रक्षितुं यदि पार्य्यते"॥)

ईलिः, स्त्री, (ईर्य्यते इति। ईर+इन् रस्य लः।) फलगदाकारहस्तदण्डः। इति भरतः॥ सौंटा इति ख्याता। करच्छरीति ख्याते एकधारा इति ख्याते यवनास्त्रे वा। इति शब्दसुन्दरी॥

ईलिका, स्त्री, (ईलिरेव। ईलि+स्वार्थे कन् टाप्।) फलगदाकारहस्तदण्डः। इति भरतः॥ सौंटा इति ख्याता। एकधारेलीति स्वामी। तत्पर्य्यायः। ईलिः २ ईली ३ करपाली ४ गुप्तिका ५ करपालिका ६। इति शब्दरत्नावली॥

ईलितः, त्रि, (ईड्+क्त। ड्स्य लः।) स्तुतः। इत्यमरः॥

ईली, स्त्री, (ईर+क। ऋदिकारादिति पाक्षिको ङीष्।) फलगदाकारहस्तदण्डः। तत्पर्य्यायः। करपालिका २। इत्यमरः॥

ईश, ङ, ल, ऐश्वर्य्ये। इति कविकल्पद्रुमः॥ (अदां-आत्मं अकं-सेट्।) दीर्घादिः। ऐश्वर्य्यमीश्वरीभावोऽधीनीकरणञ्च। ङ ल ईशे धनी। मायानामीशिषेण च। अत्र कर्म्मणि षष्ठी। इति दुर्गादासः॥

ईशं, त्रि, (ईशे इति। ईश्+क।) ईश्वरं। (यथा कुमारे २।६ "जगदीशो निरीश्वरः"।) प्रभुः। इति मेदिनीकरहेमचन्द्रौ॥ (यथा, कुमारे। ३।३४ "कथञ्चिदीशा मनसां बभूवुः"।)

ईशः, पुं, (ईशे इति। ईश+क।) महादेवः।

("ग्रन्थैः कृतप्राणविमुक्तिरीशः पर्य्यङ्कबन्धं निविड़ं बिभेद"।

इति कुमारे ३।५६।) ईशानकोणाधिपतिः। इत्यमरः॥

ईशसखः, पुं, (ईशस्य सखा बन्धुः राजाहःसखिभ्यः टच्।) कुबेरः। इति हेमचन्द्रः॥

ईशा, स्त्री, (ईश+अ+टाप्।) लाङ्गलदण्डः। इत्यमरटीका शब्दरत्नावली च॥ (यथा महाभारते वनपर्व्वणि घोषयात्रापर्व्वणि २४०। ३०।

"ईशामन्ये हयानन्ये सूतमन्ये न्यपातयन्"।) (ईशस्य महादेवस्य पत्नी। दुर्गा॥ ईशस्य प्रभोः पत्नी इति व्युत्पत्त्या स्वामिपत्नी। प्रभुस्त्री यथा, अथर्व्ववेदे ११।८।१७ "ईशा वशस्य या जाया"।)

ईशादण्डः, पुं, (ईशायाः लाङ्गलस्य दण्डः।) अक्षयुगयोः सन्धारणार्थो दण्डः। यथा,—

"योजनानां सहस्राणि भास्करस्य रथो नव। ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम"॥

इति विष्णुपुराणे २ अंशे ८। २॥

ईशादन्तः, पुं, (ईशेव दन्तो यस्य।) दृढदन्तहस्ती। तत्पर्य्यायः। महादन्तः २। इति त्रिकाण्डशेषः॥ हस्तिदन्तः। इति शब्दरत्नावली॥

ईशानं, क्ली, (ईश+आनश्।) ज्योतिः। इति मेदिनी॥ (तद्विशिष्टे, त्रि। यथा, ऋग्वेदे।१।१७५।४।

"सुषाय सूर्य्य कवे चक्रमीशान ओजसा"।)

ईशानः, पुं, (ईशे। ईश्+ताच्छिल्यवयोवचनशक्तिषु चानश्।) महादेवः। इत्यमरः॥

("तस्मिन् मुहूर्त्ते पुरसुन्दरीणा-मीशानसंदर्शनलालसानाम्"॥

इति कुमारे ७।५६।

"तत्रेशानं समभ्यर्च्च्य चिरात्रोपोषितो नरः"। इति भारते।) एकादशरुद्रान्तर्गतरुद्रविशेषः। इति पुराणं॥ (यथा, शाम्बलायनगृह्यसूत्रे।४।९।

"हराय मृड़ाय शर्व्वाय शिवाय भवाय महादेवाय उग्राय भीमाय पशुपतये रुद्राय शङ्कराय ईशानाय स्वाहा" इति। दूतमूर्त्तिधरः शिवः। स च धूम्रजटिलः। यथा, मार्कण्डेये। ८८। २३॥

"सा चाह धूम्रजटिलमीशानमपराजिता। दूतत्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः"।) शिवाष्टमूर्त्यन्तर्गतसूर्य्यमूर्त्तिः। इति स्मृतिरागमश्च। (परमेश्वरः। यथा, शुक्लयजुर्व्वेदे।

"सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्जितम्। सर्व्वस्य प्रभुमीशानं सर्व्वस्य शरणं बृहत्"। तथा च महाभारते १। १। २२।

"आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम्। ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम्"॥ साध्यापुत्रो देवतभेदः। यथा,—

"धर्म्मात्साध्यागुद्भवः कामः साध्या साध्यान् व्यजायत। प्रसन्नं भुवनञ्चैव ईशानं सुरभिं तथा"॥

इति भारते ।) ग्रमीदृक्षः । इति राजनिर्घण्टः ॥
ईश्वानी, स्त्री, (ईश्वस्य पत्नी ।) दुर्गा । इति तन्त्रं ॥ ग्रमीदृक्षः । इति राजनिर्घण्टः ॥
ईश्वित,स्त्री,(ईश्वितो भावः । ईश्वित् + तल् ।)ईश्वितं । अणिमाद्यष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । इति शब्दरत्नावली ॥
ईश्वित, [ऋ] त्रि, (ईष्टे इति । ईश् + क्त्वच् ।) ईश्वरः । प्रभुः । अधिपतिः । इत्यमरः ॥ (यथा माघे । २ । ९५ ।
"तदीश्वितारं चेदीनां भवांस्तमवमंस्त मा" ।)
ईश्वित्वं, क्ली, (ईश्वितो भावः । ईश्वित् + त्व ।) ईश्वितं । देवानामष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । इति हेमचन्द्रः ॥ (यदुक्तं ।
"अणिमा लघिमा व्याप्तिः प्राकाम्यं गरिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावशायिता" ॥)
प्रभुत्वम् । येन स्थावरादिसर्व्वभूतानि आज्ञाकारीणि भवन्ति । इत्यमरटीकासारसुन्दरी ॥
ईश्वरं, त्रि, (ईश् + वरच् ।) याच्यं ।
("दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्" ।
इति हितोपदेशे । १ । ७६ ।) स्वामि । इति विश्वमेदिन्यौ ॥ (यथा महाभारते ।
"अहं चैव हि यच्चान्यन्ममास्ति वसु किञ्चन ।
तत्सर्व्वं तव विखण्डं कुरु प्रणयमीश्वर" ॥
नियन्ता । प्रभुः ।
"ईश्वरः सर्व्वभूतानां धर्म्मकोषस्य गुप्तये" ।
इति मनुः । १ । ९९ ॥)
ईश्वरः, पुं, (ईष्टे इति । ईश् + वरच् । यद्वा, अश्नुते व्याप्नोतीति अशधातोर्वरट् उपधाया ईत्वं च ।) शिवः । (यथा, कुमारे । ७ । ३१ ।
"तद्गौरवान्मङ्गलमण्डनश्रीः
सा पस्पृशे केवलमीश्वरेण" ।
"अथेश्वरं देवगणाः सह सप्तर्षिभिर्विभुम्" ॥
"वाग्मिः स्तुतः स्तुवन् यावच्छिवे भावे शिवः स्थितः ।
शिवं शिवाय भूतानां स्थितं ज्ञात्वा कृताञ्जलिः ॥
क्रोधाग्निरुद्धवान् देवमहं किं करवाणि ते" ।
"तमुवाचेश्वरः क्रोधं ज्वरो लोके भविष्यसि" ॥
इति चरके चिकित्सास्थाने ढतीयाध्यायः ॥
"ततः दृष्ट्वा प्रजाः ग्रेषं तदा तं क्रोधमीश्वरः ।
विन्यस्तवान् स भूतेषु स्थावरेषु चरेषु च" ॥
इति सुश्रुते कल्पस्थाने ढतीयाध्यायः ॥)
कन्दर्पः । इति मेदिनी ॥
"विशुद्धसत्त्वप्रधानाज्ञानोपहितचैतन्यम्" ।
इति वेदान्तः ॥ न्यायमते ईश्वरगुणाः । संख्यादिपञ्च बुद्धिः इच्छा यत्नश्च । ईश्वरस्वरूपं ब्रह्मशब्दे दृश्यम् ॥ ऐश्वर्य्यशाली । तत्पर्य्यायः । राष्ट्री १ अर्य्यः २ नियुत्वान् ३ इनइनः ४ । इति वेदनिर्घण्टौ २ अध्यायः ॥ श्रीहरिः । यथा ।

रुद्रउवाच ।

"हरे कथय देवेश देवदेवक ईश्वर ।
को ध्येयः कश्च वै पूज्यः कैर्व्रतैस्तुष्यते परः" ॥
इत्यादि । श्रीहरिरुवाच ।
"शृणु रुद्र प्रवक्ष्यामि ब्रह्मणा च सुरैः सह ।
अहं हि देवो देवानां सर्व्वलोकेश्वरेश्वरः ॥
अहं ध्येयश्च पूज्यश्च स्तुतोऽहं स्तुतिभिः सुरैः ।
अहं प्रपूजितो रुद्र ददामि परमां गतिम्" ॥
इत्यादि च गारुडे २ अध्यायः ॥
(खनामख्यातो नृपतिभेदः । यथा, महाभारते ।
"मतिमांश्च मनुश्रेष्ठः ईश्वरश्चेति विश्रुतः" ।)
ईश्वरा, स्त्री, (ईश्वर + टाप् । ऊंयोगविवक्षाभावात् न ङीष् ।) दुर्गा ।
("विन्यस्तमङ्गलमहौषधिरीश्वरायाः
स्तोत्रोरगप्रतिसरेण करेण पाणिः" ।
इति किराते । "ईश्वराया गौर्य्याः, स्त्रेषभासेत्यादिना वरच् । ऊंयोगविवक्षाभावात् न ङीष्" इति तट्टीका ॥) लक्ष्मीः । सरस्वत्यादिशक्तिः । इति शब्दरत्नावली ॥
ईश्वरी, स्त्री, (ईष्टे इति + ईश् + वनिप् । वनोरचेति ङीषौ ।) ईश्वरा । इति शब्दरत्नावली ॥ ("त्वमीश्वरी देवि ! चराचराणाम्" । इति मार्कण्डेयपुराणं ॥ ९१ । २ ।) त्रिकण्टकीवृक्षः । वन्ध्याकर्कोटकीवृक्षः । रुद्रजटालता । नाकुलीकन्दः । इति राजनिर्घण्टः ॥
ईष उ उञ्छे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) उञ्छ उद्धृतशस्यशेषाहरणं । ईषति धान्यं दीनः । इति दुर्गादासः ॥
ईष ङ दाने । (भ्वादिं-आत्मं-सकं-सेट् ।) ईच्छ । हिंसने । सर्षणे । इति कविकल्पद्रुमः ॥ दीर्घादिः । ङ ईषते । ईच्छो दर्शनं । इति दुर्गादासः ॥
ईषः, पुं, (इष् + क ।) इषः । आश्विनमासः । इत्यमरटीकायां मथुरानाथः ॥ (खनामख्यातः उत्तममनोर्दशपुत्रमध्ये एकः पुत्रः । यथा,—
'औत्तमेयान् महाराज! दश पुत्रान् मनोरमान्'।१८
"ईष ऊर्ज्जस्तनूर्ज्जश्च मधुमाधव एवच ।
शुचिः शुक्रः सहश्चैव नभस्यो नभ एव च" ॥ १९
इति हरिवंशे ७ अध्यायः ॥)
ईषत् व्य, (ईषणमिति । ईष् + अत् ।) अल्पम् । किञ्चित् । मनाक् । इत्यमरः ॥
("तं दृष्ट्वा कुपितं पुत्रमीषत्स्फुरिताधरं" ।
इति विष्णुपुराणे । १ । ११ । १२ ।
"ईषत् सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तं" ।
इति मार्कण्डेयपुराणे, शक्रादिमाहात्म्यम् ॥
"हृदि तिष्ठति यच्चुद्धं रक्तमीषत् सपीतकम्" ।
इति चरके सूत्रस्थाने सप्तदशाध्यायः ॥)
ईषत्करः, पुं, (ईषत् + कृ + खल् ।) अत्यल्पः । तत्पर्य्यायः । लेशः २ उपपदं ३ गन्धः ४ अनुबन्धः ५ । इति चिकाण्डशेषः । ईषत्क्रियमाणं वस्तु । इति व्याकरणं ॥
ईषत्पाण्डुः, पुं, (ईषत् पाण्डुः ।) धूसरवर्णः । इत्यमरः ॥
ईषदुष्णं, त्रि, (ईषच्च तदुष्णञ्चेति ।) अल्पतप्तं । तत्पर्य्यायः । कोष्णं २ कवोष्णं ३ कदुष्णं ४ मन्दोष्णं ५ । इति हेमचन्द्रः ॥
ईषद्रक्तः, पुं, (ईषत् रक्तः ।) अल्पलोहितवर्णः । तत्पर्य्यायः । अथक्तरागः २ अरुणः ३ । इत्यमरः ॥
ईषा, स्त्री, (ईष + क + टाप् ।) लाङ्गलदण्डः । इत्यमरः ॥ लाङ्गलेर ईष् इति भाषा ॥ (ऋग्वेदे ।
"हिरण्मयो वां रथिरीषा अक्षो" ।
रथस्यावयवभेदः । यथा, ऋग्वेदे । १० । १३५ । ३ । "रथः एकैषः" ।
"ईषामन्ये हयानन्ये सूतमन्ये न्यपातयन्" ।
इति महाभारते । वनपर्व्वणि २४० । ३० । ईषेति क्वचित् पाठः ॥)
ईषादन्तः, पुं, (ईषेव दन्तो यस्य ।) दीर्घदन्तहस्ती । तत्पर्य्यायः । उदग्रदन्तः २ । इति हेमचन्द्रः ॥
("ईषादन्तान् हेमकक्षान् पद्मवर्णान् कुथास्तृतान्'
ईषादन्ता महाकायाः सर्व्वे चाप्सरकेरवाः" ॥
इति च भारते ॥)
ईषिका, स्त्री, (ईष + किकन् ।) हस्तिचक्षुर्गोलकः । इत्यमरटीकायां रायमुकुटः ॥ तूलिका । इत्यमरः ॥ अस्त्रविशेषः । यथा,—
"सोऽभिमन्त्र्य शरेषीकामाग्नेयास्त्रेण वीर्य्यवान् ।
काकं तमभिसन्धाय ससर्ज्ज पुरुषर्षभ" ! ॥
इति रामायणं ॥
ईषिरः, पुं, (ईष + किरच् ।) अग्निः । इति त्रिकाण्डशेषः ॥
ईषीका, स्त्री, (ईष + ईकन् । औणादिकप्रत्ययोऽयम् । पर्फरीकादित्वात् साधुः ।) तूलिका । वीरणादिशलाका इत्यन्ये । आवर्त्तितमनावर्त्तितं वा सुवर्णं ज्ञातुं यन्निःक्षिप्यते तच्चेत्यन्ये । आवर्त्तितसुवर्णं द्रवाकारं यत्र निःक्षिप्यते तत्रेति केचित् । इत्यमरटीकायां भरतः ॥
ईष्मः, पुं, (ईष + मक् ।) कामदेवः । वसन्तकालः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
ईह ङ चेष्टे । इति कविकल्पद्रुमः ॥ (भ्वादिं-आत्मं-अकं-सेट् ।) दीर्घादिरकर्म्मकः । ङ ।
"ऐहिष्ट तं कारयितुं कृतात्मा
क्रतुं नृपः पुत्रफलं मुनीन्द्रम्" ।
इति भट्टिः । १ । ११ ॥
सकर्म्मकोऽपि । "भ्रामं भ्रमादपि नेहते" । इति जयदेवः ॥ "सर्व्वः स्वार्थं समीहते" इति माघः । २ । ९५ ॥ इति दुर्गादासः ॥
ईहा, स्त्री, (ईह + अ + टाप् ।) चेष्टा । उद्यमः । ("इच्छया जायते काम ईहयार्थो विवर्द्धते ।
श्रद्धया वर्द्धते धर्म्मस्तेषां फलमिदं विधा" ॥
इति रामायणे । ३ काण्डे । तथा च मनुः २ । ३० ।
"राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे" ।
"वैश्यस्य बहुक्लेशादिचेष्टार्थिनः" इति तट्टीकायां कुल्लूकभट्टः ।) वाञ्छा । इच्छा । इति त्रिकाण्डशेषः ॥
("धर्म्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।
प्रक्षालनाद्धि पङ्कस्य श्रेयो न स्पर्शनं नृणाम्" ॥
इति महाभारते । १ । २ । ४८ ॥)
ईहामृगः, पुं, (ईहाप्रधानो मृगो वृकः ।) कुक्कुरप्रमाणहरिणभिन्नकपिलवर्णजन्तुविशेषः । इति भरतः ॥ घोंघ इति ख्यातः । तत्पर्य्यायः । कोकः २ वृकः ३ । इत्यमरः ॥

("पुलहस्य सुता राजन् मृगभाश्च प्रकीर्त्तिताः। सिंहाः किम्पुरुषा व्याघ्रा यक्षा ईहामृगास्तथा"॥ इति भट्टिकाव्ये। ३। ५॥) (नायको मृगवदलभ्यामपि नायिकामीहते वाञ्छत्यत्र इति।) नाटकरूपकभेदः। इति मेदिनीकरहेमचन्द्रौ॥ (तल्लक्षणं यथा, साहित्यदर्पणे षष्ठपरिच्छेदे। "ईहामृगो मिश्रवृत्तचतुरङ्कः प्रकीर्त्तितः। मुखप्रतिमुखे सन्धी तत्र निर्व्वहणं तथा॥ नरदिव्यावनियमौ नायकप्रतिनायकौ। ख्यातौ धीरोद्धतावन्यो गूढभावादयुक्तवत्॥ दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः। प्रहारामर्षसम्भूतः किञ्चित् किञ्चित् प्रदर्शयेत्॥ पताका नायका दिव्या मर्त्या अपि दयोद्धताः। युद्धमानीय संरब्धं परं व्याजान्निवर्त्तयेत्॥ महात्मानो वधप्राप्ता अपि वध्याः सुरत्र नो। एकाङ्गो देव एवात्र नेतेत्याङ्कः परे पुनः॥ दिव्यस्त्रीहेतुकं युद्धं नायकाः षड्विधीतरे"॥ "मिश्रं ख्याताख्यातम्। अन्यः प्रतिनायकः। पताकानायकास्तु नायकप्रतिनायकयोर्मिलिता दश। नायको मृगवदलभ्यां नायिकामत्र ईहते वाञ्छतीति ईहामृगः। यथा—कुसुमशेखरविजयादि"॥)

ईहाहकः, पुं, (ईहाप्रधानो हकः।) ईहामृगः। इति शब्दरत्नावली॥

उ

उ, उकारः। पञ्चमस्वरवर्णः। अस्योच्चारणं ओष्ठः। (यथा, शिक्षायाम्। "कण्ठ्या वह्निविसर्ज्जनीयकलया ओष्ठौ तथोपूपू"। तथा च मुग्धबोधे। "उच्चयं पवर्गमवा ओ औद्याः"।) स च ह्रस्वो दीर्घः प्लुतश्च भवति। (एवं त्रिधापि प्रत्येकं उदात्तानुदात्तस्वरितभेदेन नवभसञ्ज्ञकः पुनः प्रत्येकं अनुनासिकाननुनासिकभेदात् अष्टादशविध एव भवति। अस्य ध्यानमाह।) "उकारं परमेशानि अधःकुण्डलिनी स्वयम्। पीतचम्पकसङ्काशं पञ्चदेवमयं सदा॥ पञ्चप्राणमयं देवि चतुर्व्वर्गप्रदायकम्"। इति कामधेनुतन्त्रम्। (वङ्गीयभाषायां) अस्य लेखनप्रकारोयथा,—

"ऊर्द्धाधो मध्यतः कृत्वा रेखा वामगता शुभा। तिस्रश्च वायुवह्नीन्द्राः शक्तिर्माता परा स्मृता"॥ इति वर्णोद्धारतन्त्रम्॥ अस्य नामान्तराणि यथा,— "उः शङ्करो वर्षुलाक्षो भूतः कल्याणवाचकः। अमरेशो दक्षकर्णः षड्वक्त्रो मोहनः शिवः॥ उग्रः प्रभूतिर्विष्णुर्विश्वकर्म्मा महेश्वरः। शत्रुघ्नचटिका पुष्टिः पञ्चमी वह्निवासिनी॥ कामघ्नः कामगा चेशो मोहिनी विघ्नहन्मही। उड्डसूः कुटिला श्रोत्रं पारदोपो हरो हरः"॥ इति तन्त्रोक्तवर्णाभिधानम्॥ (मातृकान्यासेऽस्य दक्षिणकर्णे स्थानम्। यदुक्तं मातृकान्यासमन्त्रे "उं नमो दक्षिणकर्णे ऊं नमो वामकर्णे"।)

उ, ड, शब्दे। इति कविकल्पद्रुमः॥ (भ्वादिः-आत्मं अकं-अनिट्।) ड अवते गौः। इति दुर्गादासः॥

उ, य, (उ शब्दे + क्विप् + तुक् च।) सम्बोधनम्। रीषोक्तिः। अनुकम्पा। नियोगः। पदपूरणं। पादपूरणं। इति मेदिनी॥ प्रश्नः। अङ्गीकारः। इति हेमचन्द्रः॥ इदमेव उड् इति ख्यातं॥ ("उमेति मात्रा तपसो निषिद्धा, पश्चादुमाख्यां सुमुखी जगाम"॥ इति कुमारे। १। २६॥)

उः, पुं, (अतति विश्वमयत्वात् सर्व्वं व्याप्नोतीति। अत् + डु।) शिवः। इति त्रिकाण्डशेषः॥ ("अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः। मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः"॥ इति पुराणे।) ब्रह्मा। इति कश्चिदेकाक्षरकोषः॥

उकनाहः, पुं, (पीतरक्तवर्णाश्वः। स एव क्वचित् कृष्णरक्ताश्वविः। इति हेमचन्द्रः॥

उक्तं, क्ली, (वच् + क्त।) एकाक्षरछन्दः। इति मेदिनी॥ वाक्यम्॥

उक्तः, त्रि, (उच्यते यः। वच् + कर्म्मणि क्त।) कथितः। तत्पर्य्यायः। भाषितः २ उदितः ३ जल्पितः ४ आख्यातः ५ अभिहितः ६ लपितः ७ इत्यमरः॥ गदितः ८ निगदितः ९ ईरितः १० उदीरितः ११ भणितः १२ लड़ितः १३ रपितः १४ रठितः १५ भटितः १६ रटितः १७ व्याहृतः १८॥ (यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ६६। ९। "इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः"॥ तथा, तत्रैव ८५। ६६। "इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ"॥)

उक्तिः, स्त्री, (वच् + भावे क्तिन्।) कथनं। तत्पर्य्यायः। व्याहारः २ लपितं ३ भाषितं ४ वचनं ५ वचः ६। इत्यमरः॥ ("अतिसंक्षिप्तविस्तृतोक्तिभिः"। इति मुक्तावलीसूचना। तथा, चामरे। "एकयोक्त्या पुण्यवन्तौ दिवाकरनिशाकरौ"॥)

उक्थं, क्ली, (वच् + थक्।) सामवेदः। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। ३। ६४। ७। "विप्रा उक्थेभिः कवयो गृणन्ति"॥ स्तोत्रम्। यथा, "अथ योसावन्तरक्षिणि पुरुषो दृश्यते सैवर्क तत्साम तदुयजुः तत् उक्थं तद्ब्रह्म"। इति छान्दोग्ये उपनिषदि॥)

उक्थशः [स्] पुं, (उक्थैरुक्थानि वा शंसति। मन्त्रे श्वेतवहोक्थशस्पुरोडाशोखिन्नित्यत्र श्वेतवहादीनां डस् पदस्येति वक्तव्यम्। यत्र परत्वं भावि तत्र डस्। अन्यत्र खिः॥) यजमानः। इति व्याकरणं॥ (यथा, ऋग्वेदे। ७। १६। ६। "नरः शंसन्त्युक्थशास उक्था"।)

उक्था, स्त्री, (वच् + थक् + टाप्।) छन्दोविशेषः। एकाक्षरवृत्तमुक्था। सा द्विविधा। श्रीः १ सर्व्वगुरुः। यथा श्रीस्ते सास्यां। इति छन्दोमञ्जरी। उः २ सर्व्वलघुः। यथा। उरवतु। इति छन्दोऽर्णवः॥

उक्ष ऋषि। (भ्वादिः-परं- सकं-सेट्।) इति कविकल्पद्रुमः॥ उक्षति वृष्टं मेघः। वृट् सेकः। इति दुर्गादासः॥ ("उक्षाम्यक्षकर्णगरस्य मार्गान्"। इति भट्टिकाव्ये। ३। ५॥)

उक्षः त्रि, (उक्ष + अच्।) सिक्तः। धौतः॥

उक्षतरः, पुं, (उक्षन् + तरप्।) महादेवः। इति हेमचन्द्रः॥

उक्षा, [न्] पुं, (उक्ष + कनिन्।) वृषः। इत्यमरः। (यथा, ऋग्वेदे ८।७१।६। "उक्षा मिमाति प्रति यन्ति धेनवः"। तथा च कुमारे ७।७०। "तत्रावतीर्य्याचुतदत्तहस्तः शरद्घनाद्दीधितिमानिवोक्षणः"॥) ऋषभौषधिः॥ इति राजनिर्घण्टः॥

उख, गतौ। इति कविकल्पद्रुमः॥ (भ्वादिः-परं-सकं-सेट्।) पञ्चमस्वरी। ओखति। इति दुर्गादासः॥

उख, इ, गतौ। इति कविकल्पद्रुमः॥ (इदित्-भ्वादि-परं-सकं-सेट्।) पञ्चमस्वरी। इ उख्खति। इति दुर्गादासः॥

उखर्व्वलः, पुं, (दृणविशेषः। तत्पर्य्यायः। उखलः २ भूरिपत्रः ३ सुदृणः ४ दृणोत्तमः ५। अस्य गुणाः। बलदार्ढ्यं। रुचिकारित्वं। पशूनां सर्व्वदा हितकारित्वञ्च। इति राजनिर्घण्टः॥

उखा, स्त्री, (उख + क + टाप्।) स्थाली। इत्यमरः॥ हाँड़ि इति भाषा। (यथा, सुश्रुते। "इद्धः स्वतेजसा वह्निरुखागतमिवोदकम्"॥)

उख्यं, त्रि, (उखायां संस्कृतं। उखा + यत्।) स्थालीपक्वमांसादि। तत्पर्य्यायः। पैठरं ३। इत्यमरः॥ ("शूल्यमुख्यञ्च होमवान्"। इति भट्टिः ४।६। उखायां भवः। अग्निः। यथा, अथर्ब्ववेदे। ४।१४।२। "उख्यान् (अग्नीन्) हस्तेषु बिभ्रतः"॥)

उग्र, त्रि, (उद्यति क्रुधा सम्बध्यते। उच समवाये + ऋज्रेन्द्रेत्यादिना रक्, गच्छान्तादेशः।) रौद्रं। उत्कटं। इत्यमरो मेदिनी च॥ ("लोकेषु प्रथितं घोरं तपस्तस्य भविष्यति"। इति रामायणे॥ "तामिस्रादिषु घोरेषु नरकेषु विवर्त्तनम्"॥ इति मनुः।१२।७५। यज्ञादिधारी। दारुणकर्म्मा। यथा मनुः ४।२१२। "उग्राग्नं सूतिकान्नञ्च पर्य्यायान्नमनिर्द्दशम्"॥)

उग्रं, क्ली, वत्सनाभनामविषं। इति राजनिर्घण्टः॥

उग्रः, पुं, (उच + रक्। गच्छान्तादेशः।) महादेवः। वायुमूर्त्तिरयं। इति भविष्यपुराणम्। (यथा, महाभारते।१३।शिवसहस्रनामकथने।१७।९। "उग्रो वंशकरोवंशो वंशनादो ह्यनिन्दितः"॥ ऋषिविशेषः। इति मार्कण्डेये। ७६। ४७। क्षत्रियात् शूद्रायां जातः जातिविशेषः। इत्यमरः॥ आगुरि इति भाषा। (तथा च मनुः। १०।९। "क्षत्रियात् शूद्रकन्यायां क्रूराचारविहारवान्। क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते"॥) अस्य कर्म्म विलवासिगोधादिबधबन्धनम्"। तथाच मनुः। १०।४९। "क्षत्तोयपुक्कसानान्तु विलौकोबधबन्धनम्"॥

नक्षत्रगणविशेषः । स च पूर्व्वफल्गुनीपूर्व्वाषाढा-पूर्व्वभाद्रपदमघाभरण्यात्मकः । इति ज्योतिषं शोभाञ्जनश्चः । इति शब्दचन्द्रिका ॥ केरल-देशः । इति हेमचन्द्रः । (रुद्रः । उग्रोदेवः । स्वनामख्यातो दानवविशेषः । यथा हरिवंशे । "वेगवान् केतुमानुग्रः सोग्रयायी महासुरः" ॥ धृतराष्ट्रस्य शतपुत्रेषु एकः । यथा, धृतराष्ट्रपुत्र-नामकथने १ । ११७ । ११ । महाभारते । "उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः" । नरेन्द्रादित्याख्यस्य काश्मीरराजस्य स्वनामख्यातो गुरुः । यथा, राजतरङ्गिण्यां । "दिव्यानुग्रहभागुग्राभिधो यस्य गुरुर्व्यधात्" ॥ विष्णुः । इति महाभारते । १३ । १४९ । ५९ ॥ स्त्री, योगिनीभेदः । यथा, कालिकायां । ६० अध्यायः । "महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च" ।)

उग्रकाण्डः पुं, (उग्रः काण्डो यस्य ।) कारवेल्लः । इति राजनिर्घण्टः ॥ करेला इति भाषा । कारवेल्ल-शब्देऽस्य गुणादिकं ज्ञेयम् ।)

उग्रगन्धं, क्ली, (उग्रो गन्धो यस्मिन् ।) हिङ्गु । इति राजनिर्घण्टः ॥

उग्रगन्धः, पुं, (उग्रस्तीव्रः गन्धो यस्मिन् ।) लशुनः । कट्फलः । अर्ज्जकवृक्षः । इति राजनिर्घण्टः ॥ चम्पकः । इति शब्दचन्द्रिका ॥ उत्कटगन्धयुक्ते त्रि ॥ (यथा, हारीते प्रथमस्थानेऽष्टमाध्यायः । "उग्रगन्धं पुराणं स्यादश्ववर्षोषितं घृतम् । यथा यथा जरां याति गुणवत्त्वात्तथा तथा" ॥)

उग्रगन्धा, स्त्री, (उग्रः गन्धो यस्याः ।) अजमोदा । वचा । छिक्किकौषधी । इति मेदिनी ॥ अज-गन्धा । यवानी । इति राजनिर्घण्टः ॥ ("वचा, यमानी च" । इति भावप्रकाशे पूर्व्वखण्डे अनेकार्थ-नामवर्गः ॥)

उग्रचण्डा, स्त्री, (उग्रा चण्डा कोपना स्त्री ।) देवी-भेदः । यथा महिषासुरं प्रति भगवतीवाक्यम् । "उग्रचण्डेति या मूर्त्तिर्भद्रकाली ह्यहं पुनः । यया मूर्त्त्या त्वां हनिष्ये सा दुर्गेति प्रकीर्त्तिता ॥ एतासु मूर्त्तिषु सदा पादलग्नो ह्यसौ भवान् । पूज्यो भविष्यसि त्वं वै देवानामपि रक्षसाम् ॥ आदिदृष्टौ उग्रचण्डामूर्त्त्या त्वं निहतः पुरा । द्वितीयदृष्टौ तु भवान् भद्रकाल्या मया हतः ॥ दुर्गारूपेणाधुना त्वां हनिष्यामि सहानुगम्" । इत्यादि ॥ * ॥ तस्याः प्रादुर्भावो यथा । श्रीभगवानुवाच । "उग्रचण्डा तु या मूर्त्तिरष्टादशभुजाऽभवत् । सा नवम्यां पुरा कृष्णपक्षे कन्यां गते रवौ ॥ प्रादुर्भूता महाभागा योगिनीकोटिभिः सह" ॥ * ॥ अनया मूर्त्त्या दक्षयज्ञभङ्गः कृतः । यथा, — "आषाढस्य तु पूर्णायां सत्रं द्वादशवार्षिकम् । दक्षः कर्त्तुं समारेभे कृताः सर्व्वे दिवौकसः ॥ ततोऽहं न कृतस्तेन दक्षेण सुमहात्मना । कपालीति सती चापि तव्नायेति च नो कृता ॥ ततो रोषसमायुक्ता प्राणांस्तत्याज सा सती । त्यक्तदेहा सती चापि चण्डमूर्त्तिस्तदाभवत् ॥

ततः प्रवृत्ते यज्ञे तु तस्मिन् द्वादशवार्षिके । नवम्यां कृष्णपक्षे तु कन्यायां चण्डमूर्त्तिधृक् ॥ योगनिद्रा महामाया योगिनीकोटिभिः सह । सतीरूपं परित्यज्य यज्ञभङ्गमथाकरोत् ॥ शृङ्गस्य गणैः सर्व्वैः सहिता शृङ्गरेण च । स्वयं बभञ्ज सा देवी महासत्रं महात्मनः ॥ ततो देव्या महाक्रोधे व्यतीते चिदिवौकसः । पूजयाञ्चक्रुरतुलां देवीं पूर्व्वोदितेन वै ॥ पूर्व्वोदितविधानेन पूजामस्या दिवौकसः । कृत्वैव परमामाप्युर्निर्वृतिं दुःखहानये ॥ एवमन्यैरपि सदा कार्य्यं देव्याः प्रपूजनम् । विभूतिमतुलां प्राप्तुं चतुर्व्वर्गप्रदायकम् ॥ यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे । न पूजयति दम्भाद्वा द्वेषाद्वाप्यथ भैरव ॥ क्रुद्धा भगवती तस्य कामानिष्टान्निहन्ति वै । परत्र च महामायावलिर्भूत्वा स जायते ॥ अष्टम्यां रुधिरैर्मांसैर्म्महामांसैः सुगन्धिभिः । पूजयेद्भक्तजातीयैर्व्वलिभिर्भोजनैः शिवां" ॥ इत्यादि ॥ * ॥ तन्मन्त्रो यथा, — "भद्रकालीमुग्रचण्डां महामायां महोत्सवे । नेत्रबीजन्तु सर्व्वासां पूजने परिकीर्त्तितम् । तन्त्रं यथोग्रचण्डायाः पृथक् त्वं शृणु भैरव ॥ आद्यहृदयं नेत्रबीजं मन्त्रस्योपान्तमन्तरे । वह्निनान्तस्थरेणेन्दुविन्दुभ्यां तन्त्रमौग्रकम्" ॥ इत्यादि च कालिकापुराणे ५९ । ६० अध्यायौ ॥

उग्रतारा, स्त्री, (उग्रादपि भयात् भक्तान् त्रायति तारयति वा या ॥ उग्र + तॄ + णिच् + अच् + टाप् । यथा, निरुक्तौ । "उग्रादपि भयात् त्रायति यस्मात् भक्तान् सदा-म्बिका" ।) देवीविशेषः । अस्या उत्पत्त्यादि यथा, — "सर्व्वेषामेव देवानां यज्ञभागानपाहरत् । स्वयं शुम्भो निशुम्भश्च दिक्पालत्वं तथा गतौ ॥ सर्व्वे सुरगणाः सेन्द्रास्ततो गत्वा हिमाचलम् । गङ्गावतारनिकटे महामायां प्रतुष्टुवुः ॥ अनेकसंस्तुता देवी तदा सर्व्वामरोत्करैः । मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत ॥ युष्माभिरमरैरत्र स्तूयते का च भाविनी । किमर्थमागता यूयं मातङ्गस्याश्रमं प्रति ॥ एवं ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषतः । समुद्भूताब्रवीद्देवी मां स्तुवन्ति सुरा इति ॥ शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान् । तस्मात्तयोर्बधायाहं स्तूयेऽद्य सकलैः सुरैः ॥ विनिःसृताया देव्यास्तु मातङ्ग्याः कायतस्तदा । भिन्नाञ्जननिभा कृष्णा साभूद्घोरी त्वगादपि ॥ कालिकाख्याभवत् सापि हिमाचलकृताश्रया । तामुग्रतारामाम्नायो वदन्तीह मनीषिणः ॥ उग्रादपि भयात्त्राति यस्माद् भक्तान् सदाम्बिका । एतस्याः प्रथमं बीजं कथितं तन्त्रमेव च" ॥ * ॥ "एषैवैकजटाख्यातिर्यस्मात्तस्या जटाधिका । शृणु त्वं चिन्तनं चास्याः सम्यक् वेतालभैरवौ ॥ यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम् ।

चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम् ॥ खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं त्वधः । कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम् ॥ खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम् । मुण्डमालां धरां शीर्षे ग्रीवायामपि सर्व्वदा ॥ वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम् । कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम् ॥ वामपादं शवहृदि संस्थाप्य दक्षिणं पदम् । विनस्य सिंहपृष्ठे तु लेलिहाना शवं स्वयम् ॥ साट्टहासमहाघोरा रावयुक्तातिभीषणा । चिन्त्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः" ॥ * ॥ "एतस्याः संप्रवक्ष्यामि या अष्टौ योगिनीस्तु ताः । महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च । घोरा च धूमरी चैव महारात्रिश्च सप्तमी ॥ भैरवी चाष्टमी प्रोक्ता योगिनीस्ताः प्रपूजयेत्" । इति कालिकापुराणे ६० अध्यायः ॥ * ॥ अपिच "ब्रह्मशैलस्य पूर्व्वस्यां भूमिपीठे व्यवस्थिता । "चारुनिम्नं शुभावर्त्तं कामाख्यानाभिमण्डलम् ॥ यत्रोग्रतारारूपेण रमते परमेश्वरी । तत्र तेनैव रूपेण पूजितस्या शुभात्मिका ॥ तस्यास्तु बीजं पूर्व्वस्मिन् उत्तरे प्रतिपादितम् । रूपं शृणु नरश्रेष्ठ येन ध्येया सदाशिवा ॥ कृष्णा लम्बोदरी दीर्घा विरला रक्तदन्तिका । चतुर्भुजा कृष्णकी तु दक्षे कर्त्तृकखर्परौ ॥ खड्गं चैन्दीवरं वामे शीर्षे त्वेकजटां पुनः । वामपादं शवस्योर्व्वे निधायोत्याय दक्षिणम् ॥ शवस्य हृदये न्यस्य साट्टहासं प्रकुर्व्वती । नागहारशिरोमालाभूषिता कामदा परा ॥ चिकोणं मण्डलं चास्या ऊंकारमध्यबीजकम् । द्वारे नानायोगिनीनां नामान्यस्यास्तु तन्त्रके ॥ ज्ञेयानि नरशार्दूल तत्रोक्तं वान्यगोचरे" । इति कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्यायः ॥ * ॥ सा च वशिष्ठशापात् वामा भूता । यथा, — और्व्व उवाच । "एतद्विष्णोर्व्वचः श्रुत्वा विधिना सहितः स तु । अङ्गीचकार हृदये तदुचः साध्यसाधने ॥ विसृज्य तान् ब्रह्मविष्णुयमान् हृषभवाहनः । आदाय सगणान् सर्व्वान् कामरूपान्तरं ययौ ॥ उग्रतारां ततो देवीं गणांश्च प्राह शङ्करः । उत्सारयन्तु सकलान् इमान् लोकान् गणा द्रुतम् ॥ उग्रतारे महादेवि त्वञ्चाप्युत्सारय द्रुतम् ॥ ततो गणाः कामरूपादेवीचाप्यपराजिता । लोकानुत्सारयामासुः पीठं कर्त्तुं रहस्यकम् ॥ उत्सार्य्यमाने लोके तु चतुर्व्वर्णैर्द्विजातिभिः । सन्ध्याचलो गतो विप्रो वशिष्ठः कुपितो मुनिः ॥ सोऽप्युग्रतारया देव्या उत्सारयितुमीश्वया । गणैः सह द्रुतः प्राह शापं कुर्व्वन् सुदारुणम् । यस्मादहं धृतं वामे त्वयोत्सारयितुं मुनिः ॥ तस्मात्त्वं वाम्यभावेन पूज्या भव समन्विका । भर्त्स्यन्ति स्वेच्छवत् यस्मादृषास्ते मन्दबुद्धयः । भवन्तु स्वेच्छास्तस्माद भवत्या कामरूपके ॥

महादेवोऽपि यस्मान्मां निःसारयितुमुद्यतः।
तपोवलं मुनिं दान्तं स्वेच्छवदेदपारगम्॥
तस्मात् स्वेच्छप्रियो भूयात् शङ्करस्यास्त्रिभस्मधृक्।
एतत्तु कामरूपाख्यं स्वेच्छैर्गुप्तं भवद्वलं।
स्वयं विष्णुर्न चायाति यावत् कालमिदं पुनः।
विरलास्तागमाः सन्तु यत्र तत्प्रतिपादकाः॥
विरलं यस्तु जानाति कामरूपागमं बुधः।
स एव प्राप्तकालेऽपि पूर्णं फलमवाप्स्यति॥
एवमुक्ता वशिष्ठस्तु तत्रैवान्तरधीयत।
ते गणाः स्वेच्छतां याताः कामरूपे सुरालये॥
वामाऽभूदुग्रतारापि शम्भुर्स्वेच्छरतोऽभवत्"।
इति च कालिकापुराणे ८२ अध्यायः॥

उग्रत्वं, क्ली, (उग्रस्य भावः। उग्र + त्व।) उग्रता। उत्कटता। तत्पर्य्यायः। चण्डता २। इति हेमचन्द्रः॥

उग्रधन्वा, [न्] पुं, (उग्रं धनुर्यस्य। धनुषश्चेत्यनङ्।) इन्द्रः। इति हेमचन्द्रः॥ ("स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टासायुध इन्द्रो गणेन। संस्रष्टजित् सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरक्ता"। इति ऋग्वेदे। १०।१०३।१॥ शिवः। उग्रधनुर्विशिष्टे, त्रि॥)

उग्रनासिकः, त्रि, (उग्रा दीर्घा नासिका यस्य।) दीर्घनासिकाविशिष्टः। इति हेमचन्द्रः॥

उग्रशेखरा, स्त्री, (उग्रस्य महादेवस्य शेखरं मस्तकं वासस्थानत्वेन यस्याः।) गङ्गा। इति शब्दरत्नावली॥

उग्रसेनः, पुं, (उग्रा सेना यस्य।) मथुरादेशस्य राजविशेषः। स च आहुकपुत्रः। कंसराजपिता च। परीक्षित्पुत्रः। इति श्रीभागवतम्॥ (तथा महाभारतेऽपि "जनमेजयः पारिक्षितः सहभ्राद्भिः कुरुक्षेत्रे दीर्घसत्रमुपास्ते। तस्य भ्रातरस्त्रयः श्रुतसेन उग्रसेनो भीमसेनश्च" इति। तथा च तत्रैव १।६५।१२।
"भीमसेनोग्रसेनौ च सुपर्णो वरुणस्तथा"॥)

उग्रसेनजः, पुं, (उग्रसेनात् जायते इति। उग्रसेन + जन + ड।) कंसनामासुरराजः। इति त्रिकाण्डशेषः॥

उग्रा, स्त्री, (उच्यति क्रुधा सम्बध्यते या। उच समवाये + ऋज्येन्द्रादिना रक् गस्यान्तादेशः। ततष्टाप्।) यवानी। वचा। इति राजनिर्घण्टः॥ ("दन्तचाले हितं श्रेष्ठं तिलोग्राचर्व्वणं सदा"। इति वैद्यकचक्रपाणिसंग्रहे मुखरोगाधिकारे।) छिक्किकौषधी। इति हेमचन्द्रः॥ उग्रजातिस्त्री। (यथा मनुः १०। १९।
"क्षत्तुर्जातस्तु योग्यायां श्वपाक इति कीर्त्यते"॥) धान्याकम्। इति रत्नमाला॥ प्रखरा नारी॥

उङ्गुजः, पुं, उत्कायः। इति शब्दमाला। उकुण् इति भाषा।

उच, इ र य समवायने। मिश्रणे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्।) क्रयादिः। इ र औचत् औचित्। अस्मात् पुरुषादित्वात् नित्यं स इत्यन्ये। य उच्यते केशैः स्नानात्। इति दुर्गादासः॥

उचितं, त्रि, (वच + "शकिवचिकुचिकुटिभ्यः कितच्" इति कितच् प्रत्ययः।) विदितम्। न्यस्तम्। परिमितम्। युक्तम्। इति हेमचन्द्रः॥ याच्ञम्। इति शब्दरत्नावली॥

उचं, त्रि, (उच्चिनोतीति। चिञ चित्यां अन्येभ्योऽपि इति डः। उच्चेस्त्वमस्ति अत्र वा। अर्श आद्यच्, अव्ययानामिति टिलोपः।) उपरि। ऊँचु इति भाषा। तत्पर्य्यायः। प्रांशु २ उन्नतम् ३ उद्यम् ४ उच्छ्रितम् ५ तुङ्गम् ६। इत्यमरः॥ उत्तुङ्गं ७। इति तट्टीका॥ (यथा, रघुः ३।१३।
"ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैः,
असूयगैः सूचितभाग्यसम्पदम्"।)
(ज्योतिषोक्तं ग्रहाणामुच्चस्थानम्। यथा,
"अजतुषभमृगाङ्गनाकुलीराः
झषवणिजौ च दिवाकरादितुङ्गाः।
दशशिखिमनुयुक्तिधीन्द्रियांशै-
स्त्रिगवकविंशतिभिश्च तेऽप्यनीचाः"॥
सूर्य्यादीनां सप्तानां ग्रहाणां मेषवृषभादयो राशयः श्लोकोक्तक्रमविशिष्टा उच्चस्थानानि स्वस्वतुङ्गापेक्षया सप्तमस्थानानि च नीचानि, तत्रोच्चेष्वपि दशमादयो राशित्रिंशाद्याः यथाक्रमं उच्चेषु परमोच्चा नीचेषु परमनीचा भवन्तीति॥)

उच्चैः, [स्] व्य, (उच्चैस् + अव्ययसर्व्वनाम्नां इति प्राग्दिवीयेषु अर्थेषु टेः प्रागक्च्।) उच्चैः। अतिशयोच्चम्। इति द्विरूपकोषः॥ (यथा विष्णुपुराणम्।
"वशिष्ठाद्यैर्दयासारैः स्रोतः कुर्व्द्भिरुच्चकैः"।
उन्नतम्। यथा माघे १।१२।
"शिरोस्तडित्वानिव तावदुच्चकै-
र्जवेन पीठादुदतिष्ठदच्युतः"॥)

उच्चटा, स्त्री, (उत् + चट् + अच् + टाप्।) गुञ्जा। भूम्यामलकी।
("उच्चटाचूर्णमप्येवं क्षीरेणोत्तममिष्यते।
शृतावय्युटजामूलं पेयमेवं बलार्थिना"॥
इति सुश्रुते चिकित्सितस्थाने २६।)
नागरमुस्ता। इति राजनिर्घण्टः॥ दम्भः। चर्य्या। लशुनप्रभेदः। इति हेमचन्द्रः॥ द्रुमविशेषः। निर्व्विषी इति ख्याता। चैंचुया इति केचित्। इत्यमरटीकायां भरतः। तत्पर्य्यायः। चूड़ाला २ चक्रला ३। इत्यमरः॥ अम्बुपत्रा ४ जटिला ५ मुक्तला ६ उत्तानकः ७। इति रत्नमाला॥

उच्चण्डः, त्रि, (उत् चण्डतीति। चडि कोपे + अच्।) त्वरान्वितः। अविलम्बितः। इत्यमरः॥

उच्चतरः, पुं, (उच्चः उन्नतस्तरुः।) नारिकेलवृक्षः। इति राजनिर्घण्टः॥ (नारिकेलशब्देऽस्य विवरणं ज्ञातव्यम्॥)

उच्चतालं, क्ली, (उच्चः मत्ततया प्रचण्डस्तालो यत्र।) गानगोष्ठ्यां नृत्यम्। इति हेमचन्द्रः॥

उच्चदेवः, पुं, (उच्चः सर्व्वदेवमध्यत्वात् श्रेष्ठः देवः।) श्रीखण्डः। इति त्रिकाण्डशेषः॥

उच्चन्द्रः, पुं, (उत् स्वल्पं अवशिष्टश्चन्द्रो यस्मिन्।) रात्रिशेषः। इति शब्दरत्नावली॥

उच्चयः, पुं, (उत् + चि + अच्।) परिधानवस्त्रग्रन्थिः। तत्पर्य्यायः। नीवी २॥ इति हेमचन्द्रः॥ (पुष्पादीनामुच्चालनम्। यथा, रघुः १०।४४।
"करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयम्"।
"पुष्पोच्चयं नाटयति" इति शाकुन्तले १ अङ्के॥ राशिः। समष्टिः। यथा,—
"शिलोच्चयोऽपि क्षितिपालमुच्चैः"। रघुः २।५१।
"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः"।
इति साहित्यदर्पणे। २। १॥)

उच्चलं, क्ली, (उच्चलतीति। उत् + चल् + अच्।) मनः। इति हेमचन्द्रः॥

उच्चललाटा, स्त्री, (उच्चमुन्नतं ललाटं यस्याः।) उन्नतललाटवती। इति त्रिकाण्डशेषः॥

उच्चाटनं, क्ली, (उत् + चट् + णिच् + ल्युट्।) उत्खातम्। उच्चाटन इति भाषा। षट्कर्म्मान्तर्गताभिचारकर्म्मविशेषः। अस्य देवता दुर्गा। तिथिः क्षणा चतुर्दशी अष्टमी च। वारः शनिः। जपमाला साध्यस्य केशसूत्रग्रथिततुरङ्गदशनोद्भवा। फलम्। उच्चाटनं स्वदेशादेर्भ्रंशनं परकीर्त्तितम्॥ इति शारदातन्त्रम्॥

उच्चारः, पुं, (उच्चार्य्यते परित्यज्यते इति। उत् + चर + णिच् + घञ्।) विष्ठा। इत्यमरः॥ ("मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः"। इति मनुः ।४।५०।)
"यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति।
दीप्ताग्नेर्लघुकोष्ठस्य स्निग्धस्तस्योदरामयः"॥
इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमोऽध्यायः।)
उच्चारणम्॥

उच्चारणं क्ली, (उत् + चर + णिच् + ल्युट्।) कथनम्। वाङ्निष्पत्तिकरणम्॥ यथा। "हसे अकारउच्चारणार्थः"। इति मुग्धबोधव्याकरणे, सन्धिसंज्ञा २। अपिच।
"कर्म्मोच्चारणमात्रेण स्पृष्टमात्रानुबन्धतः"।
इति कविकल्पद्रुमः॥

उच्चावचः, त्रि, (उदक् च अवाक् च। मयूरव्यंसकादित्वात् साधुः।) अनेकप्रकारः। तत्पर्य्यायः। नैकभेदः २। इत्यमरः॥ (यथा, मनुः १।३८।
("उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च"।
"उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः"।
इति च मनुः ६। ७३॥)

उच्चिलटः, पुं, द्रव्यगुणमत्स्यः। कोपनपुरुषः। इति मेदिनी॥

उच्चूलः, पुं, (उद्गता चूडा यस्य। ह्रस्य लत्वम्।) ध्वजोर्द्ध्वमुखकूर्चः। इति हेमचन्द्रः॥ निशानेर पाग इति भाषा। अस्य पटुका अवचूलः॥

उच्चैः, [स्] व्य, (उच्चीयते इति। उत् + चि + डैस्।) उच्चम्। महत्। इत्यमरः॥ (यथा, कुमारे २।३७।
"उच्चैरुच्चैरवास्तेन हृदयस्यमहारि च"।
"शिलोच्चयोऽपि क्षितिपालमुच्चैः"।
इति रघुः २।५१। यथा, माघः २। ५१।
"अक्षता हेलया पादमूच्चैर्भूर्जस्य विदिषाम्"॥)

उच्चैःश्रवाः [स्] पुं, (उच्चैः श्रवो यशो यस्य। यद्वा उच्चैः श्रवसी यस्य। यद्वा उच्चैः शृणोतीति उच्चैः

+ अ + असन् ।) इन्द्रघोटकः । इत्यमरः ॥ स तु श्वेतवर्णः समुद्रमन्थनोत्थितः । इति श्रीभागवतम् ॥ ("उच्चैःश्रवैरवास्तेन हयरत्नमहारि च" ॥ इति कुमारे । २ । ४७ ॥)

उच्चैर्घुष्टं, क्ली, (उच्चैर्घुष्यते स्म । घुष + क्त ।) घोषणा । इत्यमरः ॥

उच्छ, इ अ उञ्छे । इति कविकल्पद्रुमः ॥ (तुदां-इदित्-परं-सकं-सेट् ।) ऋक्षादिः । इ उञ्छति । अ उञ्छती उञ्छन्ती । उञ्छ उद्धृतशस्यस्य ग्रेषाप-हरणम् । (यथा, हलायुधः ।

"सुलभं शस्यमुञ्छन्ति यदेषे प्रतिनो द्विजाः" ।

उञ्छः क्षोटनमित्येके । इति दुर्गादासः ॥

उच्छ, इ अ वन्धे । समापने । अतिक्रमे । वर्जने । इति कविकल्पद्रुमः । (तुदां-परं-सकं-सेट् ।) इ उच्छः । अ उच्छती उच्छन्ती । चत्वारोऽर्थाः । समापने । (यक०) उच्छति रात्रिः । "मरणां व्युष्टायामुषसि जनयासास तनयम्" । व्युष्टायां समाप्तायामित्यर्थः । इति दुर्गादासः ॥

उच्छन्न, त्रि, (उत् + छद् + क्त ।) नष्टम् । इति श्रीभगवद्गीता ।

उच्छादनं, क्ली, (उत् + छद् + णिच् + ल्युट् ।) उत्-सादनम् । उद्वर्त्तनम् । गन्धद्रव्यद्वारा शरीरनिर्म-लोकरणम् । इत्यमरटीका ॥

("यथाशक्तिप्रदानेन स्नापनोच्छादनेन च" ।

इति रामायणे । २ । १११ । १० ॥)

उच्छिलीन्ध्र, क्ली, (उत्थितं शिलीन्ध्रम् ।) छत्रिका । इति श्रीभागवतम् ॥ कोड़क छाता इति भाषा ।

("उद्गतशिलीन्ध्रे, त्रि, "कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्याम्" ॥ इति मेघदूते । पूर्ब्बमेघे । १८ ॥)

उच्छिष्ट, त्रि, (उत् शिष्यते यत् । उत् + शिष + क्त ॥) भुक्तावशिष्टम् । इति पुराणम् ॥ यँटो इति भाषा । तद्भोजनप्रायश्चित्तं यथा (प्रायश्चित्ततत्त्वे चाण्डालाद्यन्नभक्षणप्रायश्चित्तप्रकरणे ।) विष्णुः । "आमश्राद्धाशने त्रिरात्रं पयसा वर्त्तेत ब्राह्मणः शूद्रोच्छिष्टाशने चैवमनं ज्ञात्वा सप्तरात्रमुपवसेत्" इति । एवं उच्छिष्टे यः पराक उक्तोऽङ्गिरसा सोऽपि प्रागुक्तसङ्कटापदादिविषये बोध्यः । विष्णु नापि अनुच्छिष्टे पराकोक्तेः । तथाचाङ्गिराः ।

"चाण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे ।
द्विजः शुध्येत् पराकेण शूद्रः कृच्छ्रेण शुध्यति" ॥

यत्तु मिताक्षरायामापस्तम्बः ।

"अन्यानां भुक्तशेषन्तु भक्षयित्वा द्विजातयः ।
चान्द्रं कृच्छ्रं तदर्द्धन्तु ब्रह्मक्षत्रविशां विधिः" ॥

चान्द्रं चान्द्रायणम् । कृच्छ्र तप्तकृच्छ्रम् । एतच्च ब्राह्मणस्य सङ्कटज्ञानविषयं बलात्कारानुत्तारे-ऽप्यन्नेतरताम्बूलाद्युत्कृष्टपरञ्च । तच्चाज्ञाने आप-स्तम्बेन उच्छिष्टे चान्द्रायणविधानात् । अङ्गिरसा अन्त्यावसायिनामित्यादि प्रागुक्तवचने सामान्यत-स्तप्तकृच्छ्रविधानात् अनुच्छिष्टेऽपि तथात्वादेव सर्व्वत्रानुच्छिष्टादुच्छिष्टे द्वैगुण्यं बोध्यम् । प्राय-श्चित्तविवेके संसर्गप्रकरणेऽप्येवम् । क्षत्रियवि-

ट्शूद्रोच्छिष्टयोरपि ज्ञेयम्" ॥* ॥ "सर्व्वत्रोच्छिष्टे तु व्रत-द्वैगुण्यं आपदेज्ञानमुक्तोत्तारिते मासयावकव्रतं तदप्रक्तौ धेनुद्वयं षट्कार्षापणा वा देयाः । तत्रो-च्छिष्टान्ने पराक इति । अभ्यासभेदे त्वाद्यत्ति-रुद्दीया" । इति प्रायश्चित्ततत्त्वम् ॥ * ॥ अथो-च्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तम् । (तत्रैव उच्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तप्रकरणे द्रष्टव्यम्) आपस्तम्बः ।

"भुक्तोच्छिष्टस्नानाचान्तखाण्डालैः स्पर्शने वा ।
प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्यादिहोधनम् ॥
गायत्र्यष्टसहस्रन्तु जपेदां वा व्रतं जपेत् ।
चिराचोपोषितो भूत्वा पञ्चगव्येन शुध्यति ॥
भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत् ।
अर्द्धोच्छिष्टे स्मृतः पादः पाद आमाशने तथा" ॥
प्राजापत्यं स्नाने अर्द्धोच्छिष्टो येनाद्यग्रास आस्ये निक्षिप्तः न तु निगीर्णः । दक्षः ।
"पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः ।
संस्पर्शं यदि गच्छेत्तु शुचोदकान्त्यजैः सह ॥
दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयम् ।"
दिनत्रयं मैथुने स्यात् पाने स्याच्च चतुष्टयम् ॥
काश्यपः ।
"श्वसूकरास्त्यचाण्डालमद्यमाद्यरजस्वलाः ।
यच्चोच्छिष्टः स्पृशेत्तत्र कृच्छ्रं सान्तपनं चरेत् ॥
एतद्ज्ञानाभ्यासे सान्तपने धेनुद्वयं ॥ ब्रह्मपुराणे ।
"उच्छिष्टेन तु स्पृष्टेन विप्रः स्पृष्टस्तु तादृशः ।
उपवासेन शुद्धिः स्यात् स्नात्वा संस्पृश्य एव वा ॥
उच्छिष्टेन तु विप्रेण विप्रः स्पृष्टस्तु तादृशः ।
उभौ स्नानं प्रकुर्व्वीत सद्य एव समाहितौ" ॥
अनुच्छिष्टशूद्रस्पर्शे उच्छिष्टब्राह्मणस्य नक्तमिति प्रायश्चित्तविवेकः ॥ त्यक्तं । इति हेमचन्द्रः ॥ (यथा, शतपथब्राह्मणे २ । ३१ । ११ । "ऋतोच्छिष्टमिदम्" । इति । अनाचान्तो भक्षकः । यथा मनुः २ । ५६ ।
"नचैवात्यशनं कुर्य्यात् नचोच्छिष्टः क्वचित् व्रजेत्" ।

उच्छिष्टभोजनः, पुं, (उच्छिष्टं देवनैवेद्यावशिष्टं भो-जनं यस्य ।) देवनैवेद्यबलिभोजनकर्त्ता । इति हेमचन्द्रः ॥

उच्छिष्टमोदनं, क्ली, सिक्थम् । इति राजनिर्घण्टः । भोम इति भाषा ॥

उच्छीर्षकं, क्ली, (उत् ऊर्द्धस्थापितं शीर्षं मस्तकं येन । बहुव्रीह्यर्थे कन् ।) उपधानम् । इति हलायुधः । बालिश इति भाषा ॥

उच्छून, त्रि, (उत् + श्वि + क्त । ओदितश्चेति तस्य नः । यजादित्वात् सम्प्रसारणे पूर्ब्बरूपे च हल इति दीर्घः ।) स्फीतम् । उन्नतम् । वर्द्धितम् । तथा च प्राचीनाः ।

"कामिन्याः कियदुच्छूनमुरः प्रेयान् समीक्षते ।
नद्यं शालिमिवोत्पन्नमतिदीनः क्षयोबलः" ॥
(स्वर्गग्रामटिकाविलुण्ठनहथोच्छूनैः किमेभिर्भुजैः ।
इति साहित्यदर्पणे । १ परिच्छेदे ॥)

उच्छृङ्खल, त्रि, (उद्गतं शृङ्खलं निगड़ं यस्य ।) शृङ्ख-लारहितं । तत्पर्य्यायः । अवाधं २ उद्दाम ३ अनि-यन्त्रितं ४ अनर्गलं ५ निरङ्कुशं ६ । इति हेम-चन्द्रः ॥ (यथा, हितोपदेशः ३ । ९७ ।
("अन्यदुच्छृङ्खलं सत्त्वमन्यत् शास्त्रनियन्त्रितम्" ॥
"सम्मूर्च्छदुच्छृङ्खलशङ्खनिस्वनः" ।
इति माघः । १२ । १३ ॥)

उच्चयः, पुं, (उत् + श्चि + अच् ।) पर्व्वतदेशादेश-वता । तत्पर्य्यायः । उच्चायः २ उत्सेधः ३ । इत्य-मरः ॥ ("प्राप्ते यूपोच्छ्रये तस्मिन् बद्ध्वैष्वाः खादिराच्च वटे" । इति रामायणे ॥)

उच्चायः, पुं, (उत् + श्चि + घञ् ।) उच्चयः । उच्चता । इत्यमरः ॥ (यथा, याज्ञवल्क्यः ।
"ग्रहाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च" ।
"शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं" ॥
इति मेघदूते । ६० ॥)

उच्छ्रितं, त्रि, (उत् + श्रि + क्त ।) संजातं । समुन्नद्धं । उच्चं । प्रवृद्धं । इति मेदिनी ॥ (यथा, महाभा-रते १३ । दानधर्म्मकथने । ८१ । २६ । "सर्व्व-मर्य्यैर्भान्ति शृङ्गैरभ्रभिरुच्छ्रितैः" ।) त्यक्तं । इति हेमचन्द्रः ॥

उच्छ्वसितं, त्रि, (उत् + श्वस् + क्त ।) प्रफुल्लं । विक-सितं । इति हेमचन्द्रः ॥ (भावे + क्त ।) जीवितम् । स्फुरितम् । प्राणनम् । यथा, मेघदूते । १०१ । "त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सभ्रूविलासै" । "सा खलु भगवतः कण्वस्य कुलपतेरुच्छ्वसितम्" । इति शाकुन्तले ३ अङ्के ॥)

उच्छ्वासः, पुं, (उत् + श्वस् + घञ् ।) अन्तर्मुखश्वासः । ("प्रियामुखोच्छ्वासविकम्पितं मधु" । इति ऋतु-संहारे ग्रीष्मवर्णनाम ३ ।) तत्पर्य्यायः । आहरः २ आगः ३ । इति हेमचन्द्रः ॥ आख्यायिकायामुच्छ्वासः । आश्वासः । इति मेदिनी । (यथा, काद-म्बर्य्यां आख्यायिकालक्षणकथने,—
"वक्त्रं चापरवक्त्रञ्च सोच्छ्वासत्वञ्च भेदकम्" ॥)

उज्जयनी, स्त्री, विशालानगरी । इति त्रिकाण्डशेषः ॥ उज्जैन इति पश्चिमदेशे ख्याता । वङ्गदेशे तु उजनी । इयं मालवदेशस्य नगरी । मोक्षदसप्त-पुर्य्यन्तर्गतपुरी । पुरा विक्रमादित्यराजधानी च अधुना महाराष्ट्रेणाधिष्ठिता ॥ (यथा, मेघदूते पूर्ब्बमेघे । २९ ॥
"सौधोत्सङ्गप्रणयविमुखो मा च भूरुज्जयिन्याः" ।)

उज्जयन्तः, पुं, रैवतपर्व्वतः । इति हेमचन्द्रः ॥

उज्जयिनी, स्त्री, उज्जयनीनगरी । तत्पर्य्यायः । विशाला २ अवन्ती ३ पुष्पकरण्डिनी ४ । इति हेमचन्द्रः ॥

उज्जासनं, क्ली, (उत्, जसु हिंसायाम् । णिच् भावे ल्युट् ।) मारणम् । वधः । इत्यमरः ॥

उज्जृम्भ, त्रि, (उत् + जृम्भि + घञ् ।) प्रफुल्लम् । प्रस्फुटितम् । इति हेमचन्द्रः ॥
("उज्जृम्भमदनाभोगा अिनत्वङ्गानि साऽगना" । इति साहित्यदर्पणे । ३ परिच्छेदे ॥)

उज्जृम्भितं, त्रि, (उत् + जृम्भि + क्त ॥) प्रफुल्लम् । चेष्टायां, क्ली । इति मेदिनी ॥

उज्ज्वलं, त्रि, (उद्विर्ज्वलति प्रकाशते इति । उत् + ज्वल + अच् ।) दीप्तम् । विशदम् । विकाशितम् ।

इति मेदिनी ॥ (यथा, साहित्यदर्पणे । ३ परिच्छेदः । "अस्माकं सखि ! वाससी न रुचिरे यैर्वेधकं नोज्ज्वलं" ।
"विचित्रोज्ज्वलवेषा तु वल्गन्नूपुरनिःस्वना" ॥)

उज्ज्वलं, क्ली, (उत् + ज्वल + अच् ।) स्वर्णम् । इति राजनिर्घण्टः ॥

उज्ज्वलः, क्लीं (उत् + ज्वल + अच्) शृङ्गाररसः । इत्यमरः ॥ (यथा, नैषधे १ । १ ।
"स राजिराजीन्महसां महोज्ज्वलः" ॥)

उज्झ ग् त्यागे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) ओपध इत्येके । उज्जिज्झिषति । औज्जिज्झत् । ग् उज्झती उज्झन्ती । इति दुर्गादासः ॥ अन्यत् उद्झधातौ द्रष्टव्यम् ॥

उज्झः, पुं, (उज्झतीति । उज्झ + अच् ।) त्यागः । विसर्जनम् । (यथा, मनुः ११ । ५६ ।
"ब्रह्मोज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः" ॥)

उज्झितं, त्रि, (उज्झ + क्त ।) उत्सृष्टम् । त्यक्तम् । वर्जितं । इति हलायुधः ॥ (यथा किराते । ५ । ६ ।
"अविरतोज्झितवारिविषाग्दृभिः" ।
"उज्झितायास्त्वया नाथ ! तदैव मरणं वरम्" ॥
इति रामायणे २ । ३० । २० ॥)

उज्झं, क्ली, (उज्झि + घञ् ।) पक्षिच्छद्यादानवत् शस्य ग्रहणं । यथा । उपात्तशस्यात् क्षेत्रात् शेषावचयने । उञ्छेन पक्षिच्छद्यादानवदग्रहणेन शिल्यते सञ्चीयते उञ्छशिलं उञ्छिउञ्छे शिल उञ्छे छञ्छोरित्युक्तेः क्लस्तेति इञुडत्वात् कः उञ्छशिलम् । संघातं विगर्हीत विपर्य्यस्तञ्च नाम । "शुक्ला न चेदुञ्छशिलेन वृत्तिः । फलेन मूलेन च वारिणा च" इति । समाहारद्वन्द्वे उञ्छं शिलञ्च । उञ्छं भैक्षञ्च यच्चान्यत्तत् परिग्रहणन्तु ऋतम् । इति निगमाभिधाने क्लीवम् । पुमानुञ्छऋतशिलं इति वोपालितेः पुंस्युञ्छः । भवभूतिकृतशिलोञ्छे इति गोवर्द्धनः । केचिदुञ्छशिलयोर्भेदमाहुः । "प्रतिग्रहात् शिलं श्रेयस्ततोऽप्युञ्छः प्रशस्यते" । इति तच्च शालादेर्निपातितपरित्यक्तमञ्जरीणां आदानं शिलं । शिलं धान्यमञ्जरीसंग्रहः । इति स्वामी च । एकैकशः कपोतवद्धान्यकणोद्गृहणमुञ्छः । तदुक्तं उञ्छो धान्यकणोच्चय इति । शिलं शालयादि दन्त्यादि च । धर्म्यत्वात् सत्यमिति ऋतम् । इति उञ्छशिलशब्दटीकायां भरतः ॥

उञ्छः, पुं, (उञ्छि उञ्छं + घञ् ।) उञ्छशिलम् । इति जटाधरः ॥ (यथा, रामायणे । २ । २४ । २ ।
"मयि जाते दशरथात् कथमुञ्छेन वर्त्तयेत्" ॥)

उञ्छनं, क्ली, (उञ्छि + ल्युट् ।) आपणादिपतितकणोपादानम् । इति श्रीभागवतम् ॥ उञ्छन खुंटिया लच्योन चुनिया लच्योन कुड़ाइया लच्योन इत्यादि भाषा ॥

उञ्छशिलं, क्ली, (उञ्छश्च शीलञ्चेत्येकवद्भावः ।) उञ्छवृत्तिः । सा तु गृहीतशस्यक्षेत्रात् शेषावचयनम् । तत्पर्य्यायः । ऋतं २ । इत्यमरः ॥ उञ्छशिलं ३ उञ्छः ४ उञ्छं ५ शिलं ६ । इति तट्टीका ॥ (यथा, मनुः । ४ । ५ ।
"ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्" ॥)

उञ्छशीलः, त्रि, (उञ्छः शीलं वृत्तं यस्य ।) उञ्छजीवी । उद्धृतशस्यस्य शेषाहरणकर्त्ता । इति पुराणम् ॥ छिचेर इति भाषा ॥

उटः, पुं, तृणपर्णादिः । इत्यमरटीकायां भरतः ॥

उटज, पु, क्ली, (उटास्तृणपर्णादयस्तेभ्योजायते इति । उट + जन + ड ।) मुनीनां पत्तरचितगृहम् । तत्पर्य्यायः । पर्णशाला २ । इत्यमरः ॥ पर्णोटजः ३ । इति शब्दरत्नावली ॥ यथा रघुः ।
('आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः' । १ । ५० ।
'मृगैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु" । १ । ५२ ।)
गृहमात्रम् । इत्यमरमाला ॥

उठ उपघाते । (भादिं-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ क्रखादिः । ओठति खलः साधुम् । इति दुर्गादासः ॥

उड संहतौ । (परं-अक सेट् ।) सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ उडुपः । इति दुर्गादासः ॥

उडु, क्ली स्त्री, (उ रोषोक्तिपूर्व्वकं डयते इति । उ + डी + डु मितद्वादित्वात् ङ्गः ।) नक्षत्रम् । इत्यमरः ॥ ("तदोडुराजः कुकुभः करैर्मुखम्" । इति भागवतं । १० । २९ । २ । तथा रघुवंशे । १६ । ६५ ।
"इन्दुप्रकाशान्तरितोडुतुल्याः" ।)
जले क्ली । इत्यमरटीकायां भरतः ॥

उडुपः, पुं क्ली, (उडुने।जलात् पाति रक्षतीति । उडु + पा + क ।) भेलकम् । भेला माडु इत्यादि भाषा । तत्पर्य्यायः । प्लवः २ कोलः ३ । इत्यमरः ॥ भेलकः ४ उडुपः ५ तरणः ६ तारणः ७ तारकः ८ । इति शब्दरत्नावली ॥
("तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" ॥ इति रघुवंशे । १ । २ ।) चन्द्रे पुं । इति मेदिनी ॥
("अपश्यत् वदनं तस्य रश्मिवन्तमिवोडुपम्" । इति महाभारते । वनपर्व्वणि ॥ चर्म्मावनद्धपानपात्रं । यथा,—
"चर्म्मावनद्धमुडुपं प्लवः काष्ठ करण्डवत्" ॥
इति सज्जनः ॥)

उडुपतिः, पुं, (उडूनां पतिः ।) चन्द्रः । इति पुराणज्योतिषे ॥ ("अयाचितोपस्थितमम्बु केवलं रसात्मकस्योडुपतेश्च रश्मयः" । इति कुमारे । ५ । २२ ।
"परिमुग्धतां वयिगिवोडुपतेः" । इति माघे ।)

उडुपथः, पुं, (उडूनां पथ्याः ।) आकाशम् । इति हेमचन्द्रः ॥

उडुम्बरः, क्ली, (उडुं बृणातीति । उडु + बृ + अच् ।) ताम्रम् । इति मेदिनी ॥ ("ताम्रं शुल्बमुडुम्बरम्" । इति वैद्यकरत्नमाला । कर्षार्थे यथा,—
"उडुम्बरस्य पर्य्यायैः कर्षस्तु निगद्यते" ॥
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमाध्यायः ।)
कर्षपरिमाणम् । इति वैद्यकपरिभाषा ॥

उडुम्बरः, पुं, (उडु + बृ + अच् ।) उदुम्बरवृक्षः । यज्ञडुमुर इति भाषा । तत्पर्य्यायः । जन्तुफलः २ यज्ञाङ्गः ३ हेमदुग्धकः ४ । इत्यमरः ॥ ब्रह्मवृक्षः ५ । इति रत्नमाला ॥ हेमदुग्धी ६ यज्ञफलः ७ यज्ञोडुम्बरः ८ । इति शब्दरत्नावली ॥ सदाफलः ९ क्षीरवृक्षः १० सुपक्षः ११ श्वेतवल्कलः १२ । इति जटाधरः ॥ अस्य गुणाः । उडुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रजित् । मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः । इति भावप्रकाशः ॥
("उडुम्बरफलं पक्वं चूर्णितं कर्षमात्रकम् ।
संलिह्येन्मधुना सर्व्वमनुपानं सुखावहम्" ॥
इति वैद्यकरसेन्द्रसारसंग्रहे मूत्राघाताधिकारे ।)
अन्यत् उदुम्बरशब्दे द्रष्टव्यम् ॥ देहली । गोवराटेर निचेर काठ इति भाषा । षण्ढम् । नपुंसकमिति यावत् । कुष्ठरोगभेदः । इति मेदिनी ॥

उडुम्बरपर्णी, स्त्री, (उडुम्बरस्य पर्णमिव पर्णं यस्याः ।) दन्तीवृक्षः । इति शब्दचन्द्रिका । (उदुम्बरपर्णीशब्दे ऽस्या विशेषो ज्ञेयः ॥)

उडुपः, पुं क्ली, (उडुपशब्देऽस्य व्युत्पत्तिर्द्रष्टव्या ।) उडुपः । भेला इति भाषा । चन्द्रे पुं । इति द्विरूपकोषः ॥

उड्डयनं, क्ली, (उत् + डी + ल्युट् ।) नभोगतिः । ओड़ा इति भाषा । यथा नैषधे १ । १२५ ॥
"गतो विरुत्योड्डयने निराशताम्" ॥
("सोऽपि तमादाय सम्पातोड्डयनेन प्रस्थितः" । इति पञ्चतन्त्रे ॥)

उड्डामरं, त्रि, (उत्कृष्टः डामरः ।) श्रेष्ठम् । तत्पर्य्यायः । उद्भटं २ उत्तालम् ३ । इति त्रिकाण्डशेषः ॥ (पुं तन्त्रविशेषः ॥)

उड्डीनं, क्ली, (उत् + डी + क्त ।) खगगतिक्रिया । पक्षिणां ऊर्द्ध्वगमनम् । इत्यमरः ॥
("अहं सम्पातादिकानष्टानुड्डीनगतिविशेषान् वेद्मि" । इति पञ्चतन्त्रे ॥)

उड्डीयमानः, त्रि, (उत् + डी + शानच् ।) उड्डयनविशिष्टपक्ष्यादिः । उड़न्त ओड़ता इत्यादि भाषा ॥

उड्डीशः, पुं, (उत् + डी + श । यद्वा उड्डानां उत्पथगामिनां योगिनामित्यर्थः ईशः महादेवस्य योगीश्वरत्वात् ।) आगमशास्त्रविशेषः । शिवः । इति मेदिनी ॥

उत्, व्य, प्रश्नः । वितर्कः । इति मेदिनी ॥ अत्यर्थं । सन्देहः । इति शब्दरत्नावली ॥ (ऊर्द्ध्वम् । अपर्य्यर्थे ॥)

उत व्य, (उ शब्दे + क्त ।) अत्यर्थम् । विकल्पः । समुच्चयः । वितर्कः । प्रश्नः । पादपूरणम् । इति मेदिनी ॥ (अप्यर्थे । एवार्थे । "किमेतदारण्यं उत ग्राम्यम्" । इति पञ्चतन्त्रे । "तत्किमयमातपदोषः स्यात् उत यथा मे मनसि वर्त्तते" । इति शाकुन्तले । "वीरो रक्षः किमयमित्युत दर्पः" । इति उत्तरचरिते ॥)

उतं, त्रि, (वे + क्त । यजादित्वात् सम्प्रसारणम् ।) तन्तुसन्तानः । बोना इति भाषा । तत्पर्य्यायः । ऊतं २ स्यूतम् ३ । इत्यमरः ॥

उतथ्य, पुं, मुनिविशेषः । स च अङ्गिरःपुत्रः । इति पुराणम् ॥
("त्रयस्त्वङ्गिरसः पुत्रा लोके सर्व्वत्र विश्रुताः ।
बृहस्पतिरुतथ्यश्च संवर्त्तश्च धृतव्रतः" ॥
इति महाभारते आदिपर्व्वणि ॥)

उतथ्यानुजः, पुं, (उतथ्यस्यानुजः ।) बृहस्पतिः । इति चिकाण्डशेषः ॥ (यथा माघे २।६९ ।
"तथ्यामुतथ्यानुजवत् जगादाग्रे गदाग्रजम्" ॥)

उतथ्यानुजन्मा, [न्] पुं, (उतथ्यस्य अनुजन्मा अनुजः ।) बृहस्पतिः । इति भूरिप्रयोगः ॥

उताहो, य, (उत च आहो च अनयोः समाहारः ।) परिप्रश्नः । विचारः । इति मेदिनी ॥ विकल्पः । इत्यमरः ॥
("क्षमा खित् श्रेयसी तात! उताहो तेज इत्युत" । यक्षी वा राक्षसी वा त्वं उताहोऽसि सुराङ्गना" ॥ इति च महाभारते ॥)

उताहोस्वित्, य, उताहो । विकल्पः । इत्यमरटीका ॥ ("अन्यद्वपु विदधातीह गर्भमुताहोस्वित् स्वेन कायेन याति" । इति महाभारते ॥)

उत्कः, त्रि, (उद्गतं मनो यस्य । उत् + कन् ।) उन्मनाः । अन्यमनस्कः । इत्यमरः ॥
("तत् श्रुत्वा ते श्रवणसुभगं गर्ज्जितं मानसोत्काः" । इति मेघदूते । ११ । तथा कुमारे । ६ । ९५ ।
"अगमयदद्रिसुतासमागमोत्कः" ॥)

उत्कटं, त्रि, (उद्गतः कटः आवरणं आवरको वा यस्य ।) तीव्रम् । मत्तम् । इति मेदिनी ॥ विषमम् । इति शब्दरत्नावली ॥ (यथा रामायणे ५ काण्डे ।
"चन्द्रांशुनिकराभासा हाराः कासाश्चिदुत्कटाः । स्तनमध्ये सुविन्यस्ता विरेजुर्हंसपाण्डराः" ॥)

उत्कटं, क्ली, गुडत्वक् । तेजपात इति ख्यातं इति केचित् । इत्यमरभरतौ ॥ दारचिनि । इति ख्यातम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायानाह भावप्रकाशे पूर्ब्बखण्डे,
"त्वक्पत्रञ्च वराङ्गञ्च भद्रञ्चोदन्तमुत्कटम्" ।)

उत्कटः, पुं, (उद्गतमदस्तेः उच्छब्दात् स्वार्थे सम्मोदश्चेति कटच् ।) मदः । इति शब्दरत्नावली ॥ संजातमदश्च ली । इति हारावली ॥ शूरः । रक्षोघ्नः । इति राजनिर्घण्टः ॥

उत्कटा, स्त्री, (उद्गतः कटो यस्याः ।) सैंहलीलता । इति राजनिर्घण्टः ॥

उत्कण्ठः, पुं, (उद्गतः कण्ठो यस्य ।) षड्जस्वरस्य षोड़शश्रुतिबन्धान्तर्गतत्रयोदशश्रुतिबन्धः । आसन यस्य प्रसिद्धिः । तस्य लक्षणम् ।
"नारीपादौ च हस्तेन धारयेदूरुके पुनः । स्तनार्पितकरः कामी बन्धश्चोत्कण्ठसंज्ञकः" ॥ इति रतिमञ्जरी ॥

उत्कण्ठा, स्त्री, (उत् + कठि + अ + टाप् ।) उत्कलिका । इष्टलाभे कालक्षेपासहिष्णुता । इत्यमरः ॥ कामादिजातस्मृतिः । इति भरतः ॥ उद्बाहुल्येन स्मरणम् । इति मधुः ॥ उत्कर्षेण दयितस्मरणम् । इति सुभूतिः ॥ प्रियाभिलाषादुन्मनस्त्वं । इत्यन्ये ॥
("गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालाम्" । इति मेघदूते । ८३ ।
"यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया" । इति शाकुन्तले । ४ र्थे अङ्के ॥)

उत्कण्ठितं, त्रि, (उत्कण्ठा जातास्य । उत्कण्ठा + इतच् ।) उत्कण्ठायुक्तम् । तत्पर्य्यायः । उत्कं २ उत्सुकं ३ उन्मनः ४ । इति हेमचन्द्रः ॥
("साश्रेणाखद्युतमविरतोत्कण्ठमुत्कण्ठितेन" । इति मेघदूते । १०३ ॥)

उत्कण्ठिता, स्त्री, (उत्कण्ठा सञ्जातास्याः । उत्कण्ठा + इतच् + टाप् ।) स्वीयादिनायिकाभेदः । अस्याः लक्षणम् ।
"सङ्केतस्थलं प्रति भर्त्तुरना-
गमनकारणं चिन्तयति या" ।
अस्याश्चेष्टाः अरति-सन्ताप-स्तम्भाक्षान्तिश्वास-कम्प-रुदित-श्वासावस्थाकथनादयः । इति रसमञ्जरी ॥
(इयमेव विरहोत्कण्ठिता । यदुक्तं साहित्यदर्पणे दशमपरिच्छेदे ।
"आगन्तुं क्षतचित्तोऽपि दैवान्नायाति यत्प्रियः । तदागमनदुःखार्त्ता विरहोत्कण्ठिता तु सा" ॥
तत्रैव । १० परिच्छेदे अपरुतेरुदाहरणम् । यथा,—
'उत्कण्ठितासि तरले!
नहि नहि सखि! पिच्छिलः पन्थाः'॥)

उत्कता, स्त्री, (उत्कस्य भावः । उत्क + तल् ।) गजपिप्पली । इति शब्दचन्द्रिका ॥ उत्कस्य भावः । उत्कण्ठा ॥

उत्करः, पुं, (उत्कीर्य्यते इति । उत् + कॄ + अप् ।) धान्यादिराशिः । स्तूपः । इत्यमरः ॥
("सिक्तराजपथान् रम्यान् प्रकीर्णकुसुमोत्करान्" । इति रामायणे ॥)

उत्कर्षः, पुं, (उत् + कृष + घञ् ।) अतिशयः । इत्यमरः ॥ (प्राधान्यं । श्रेष्ठता । यथा, "उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले" । इति शाकुन्तले २ य अङ्के ।
"निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत्" । इति मनुः ४।२४४ ॥ वृद्धिः । यथा,—
"पद्मानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः" । इति रघुः । ४।११ ।) अतिशययुक्ते त्रि ॥ स्वकालात् परकालकर्त्तव्यः । इति स्मृतिः ॥

उत्कलः, पुं, (उत् + कल + अच् ।) ओड्रदेशः । इति चिकाण्डशेषः ॥ उड़िश्या इति भाषा । व्याधः । इति शब्दमाला ॥ पाखिमारा इति भाषा ।
("उत्कलादर्शितपथः कलिङ्गाभिमुखं ययौ" । इति रघुवंशे ४।३८ ॥ सुद्युम्नतनयः खनामख्यातो राजा । यदुक्तं महाभारते ।
"सुद्युम्नस्य तु दायादास्त्रयः परमधार्म्मिकाः । उत्कलश्च गयश्चैव विनताश्च भारत! ॥ उत्कलस्योत्कला राजन् विनताश्चस्य पश्चिमा" ॥)

उत्कलं, त्रि, (उत् + कल + अच् ।) भारवाहकम् । इति शब्दमाला । मुटे इति भाषा ॥

उत्कलिका, स्त्री, (उत् + कल + वुन् + टाप् ।) उत्कण्ठा । इत्यमरः ॥
("ततोऽन्येद्युः प्रतिपदं तत्तदुत्कलिकाभृता" । कथासरित्सागरे । २२।१०५ ।) कलिका । इति चिकाण्डशेषः ॥ ("उद्दामोत्कलिकां विषाण्डुररुचं प्रारब्धस्तम्भां चकार" । इति रत्नावली ।) तरङ्गः । ("वनावलीरुत्कलिकासहस्रप्रतिच्छन्नो-त्फुल्लितश्वेतलाभाः" । इति माघः । ३ । ७० ।) हेला । इति हेमचन्द्रः ॥

उत्कलितः, त्रि, (उत् + कल + क्त ।) उन्मनाः । बुद्धिमान् । इति धरणी ॥ (उत्कण्ठितः ॥)

उत्का, स्त्री, (उद्गतं मनो यस्याः । उत् + कन् + टाप् ।) उत्कण्ठिता नायिका । इति रसमञ्जरी ॥

उत्काका, स्त्री, (उत्क + अक + अच् + टाप् ।) प्रतिवर्षप्रसूता गौः । इति शब्दचन्द्रिका ॥

उत्कारः, पुं, (उत्कीर्य्यते इति । उत् + कॄ + घञ् ।) धान्योत्क्षेपणम् । तत्पर्य्यायः । निकारः २ । इत्यमरः ॥ धान सारा इति भाषा । धान्यस्य राशीकरणं वा । इति भरतः ॥

उत्कूटं, क्ली, (उत् + कूट् + क ।) उत्तानशयनम् । इति हारावली ॥ चित् हइया शोया इति भाषा ।

उत्कुणः, पुं, (उत् + कुण + क ।) केशकीटः । उकुण इति भाषा । तत्पर्य्यायः । मत्कुणः २ कोशकुणः ३ उद्दंशः ४ किटिभः ५ । इति हेमचन्द्रः ॥

उत्कूटः, पुं, (उन्नतं कूटमस्य ।) क्षेत्रम् । इति हारावली ॥

उत्कृष्टं, त्रि, (उत् + कृष् + क्त ।) उत्कर्षविशिष्टम् । अतिशययुक्तम् । प्रशस्तम् । प्रशस्तम् । यथा,—
"उत्कृष्टमथमनिष्टसजनेषु मैत्री,
यद्वत् शिलासु सिकतासु जलेषु रेखा ।
वैरं क्रमादधममध्यमसज्जनेषु,
यद्वत् शिलासु सिकतासु जलेषु रेखा" ॥
इत्युद्भटः । (कर्म्मवत्त्वेत्रादिः ॥)

उत्कृष्टभूमः, पुं, (उत्कृष्टा प्रशस्ता भूमिर्यस्मिन् ।) प्रशस्तभूमिः । इति जटाधरः ॥

उत्कोचः, पुं क्ली, (उत्कोचति अशुभं नाशयतीति । उत् + कुच + क ।) घुस् इति ख्यातः । तत्पर्य्यायः । प्राभृतं २ ढौकनं ३ लम्बा ४ कोशूलिकं ५ आमिषं ६ उपाचारः ७ प्रदा ८ आनन्दा ९ हारः १० ग्राह्यं ११ अयनं १२ । इति हेमचन्द्रः ॥ उपदानकं १३ । इति त्रिकाण्डशेषः ॥ अपप्रदानं १४ । इति भूरिप्रयोगः ॥ (यथा, याज्ञवल्क्ये १ । ३॥ ३८ ।
"उत्कोचजीविनो द्रव्यहीनान् कृत्वा प्रवासयेत्" ।)

उत्क्रमः, पुं, (उत् + क्रम + अच् ।) व्यतिक्रमः । विपरीतिः । तत्पर्य्यायः । व्युत्क्रमः २ अक्रमः ३ । इति हेमचन्द्रः ॥

उत्क्रोशः, पुं स्त्री, (उत्क्रोशति प्रहरे प्रहरे शब्दं करोतीति । उत् + क्रुश + अच् ।) कुररपक्षी । इत्यमरः ॥

उत्क्षिप्तः, पुं, (उत् + क्षिप + क्त ।) धुस्तूरफलम् । इति शब्दचन्द्रिका । ऊर्द्ध्वत्यक्ते त्रि ॥

उत्क्षिप्तिका, स्त्री, (उत् + क्षिप् + क्तिन् + कन् + टाप् ।) कर्णाभूषणविशेषः । तत्पर्य्यायः । कर्णोल्लुः २ । इति हेमचन्द्रः ॥

उत्क्षेपणं, क्ली, (उत् + क्षिप् + ल्युट् ।) व्यजनम् । धान्यमर्द्दनवस्तु । इति मेदिनी ॥ उदञ्चनम् । ऊर्द्ध्वक्षेपणम् ।
("अतिमात्रलोहिततलौ बाहू घटोत्क्षेपणात्" इति शाकुन्तले प्रथमाङ्के ।) षोड़शपलम् । इति

हेमचन्द्रः॥ (न्यायमते पञ्चकर्म्ममध्यपरिगणितम्। यथा भाषापरिच्छेदे।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च"। ६॥)

उत्खला, स्त्री, (उत्+खल+अच्+टाप्।) सुरानाम गन्धद्रव्यम्। तत्पर्य्यायः। तालपर्णी २ तालपर्णं ३ तालास्या ४ खशा ५। इति शब्दचन्द्रिका॥ (सुराशब्देऽस्या विवरणं द्रष्टव्यम्॥)

उत्खातं, त्रि, (उत्+खन+क्त।) उन्मूलितम्। इति जटाधरः॥ उत्पाटन इति भाषा।
("त्यागितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः"। इति रघुवंशे।४।३३। विदारितः। यथा,—
"शैलादास्य त्रिनयनहरोत्खातपद्मानिहस्तः"। इति मेघदूते। ११६॥

उत्त, त्रि, (उनत्ति स्म। उन्दी क्लेदने अकर्म्मकत्वात् कर्त्तरि क्तः। नुदविदेति पक्षे नत्वाभावः।) आर्द्रवस्तु। इत्यमरः॥

उत्तंसः, पुं, (उत्तंसयति उत्तंस्यतेऽनेन वा तस्मिः सौत्रो भूषार्थः। पचाद्यच् इलचेति घञ् वा।) कर्णपूरः। कर्णाभरणम्। शेखरः। शिरोभूषणम्। इत्यमरः॥ मतान्तरे क्लीवलिङ्गोऽपि॥ ("नोत्तंसं क्षिपति क्षितौ अवगतः सा मे स्फुटेऽप्यागसि"। इति साहित्यदर्पणे। १म परिच्छेदे॥)

उत्तप्तं, क्ली, (उत्+तप+क्तः।) शुष्कमांसम्। इत्यमरः॥

उत्तप्तः, त्रि, तप्तः। सन्तप्तः। परिप्लुतः। खातः। इति मेदिनी॥

उत्तभितं, त्रि, उन्नमितम्। इति श्रीभागवतम्॥

उत्तमः, त्रि, (अतिशयेन उत्कृष्टः। उत्+तमप्। द्रव्यप्रकर्षार्थत्वान्नाम्। यद्वा उत्तम्यते तमु अच् उत्तम्यते वा घञ्। ओदाक्तेति न वृद्धिः।) भद्रः। उत्कृष्टः। तत्पर्य्यायः। प्रधानं २ प्रमुखः ३ प्रवेकः ४ अनुत्तमः ५ मुख्यः ६ वर्य्यः ७ वरेण्यः ८ प्रवरः ९ अनवराः १० परार्द्ध्यः ११ अग्र्यः १२ प्राग्र्यहरः १३ प्राग्र्यः १४ अग्र्यः १५ अग्रीयः १६ अग्रियः १७। इत्यमरः॥ मुखः १८ अग्र्यः १९ तट्टीका॥ (उत्तमस्यापि वर्णस्य नीचोऽपि यदाश्रयः"। इति हितोपदेशः।
"उत्तमादेवरात् पुंसः काङ्क्षन्ते पुत्रमापदि"॥ इति महाभारते॥)

उत्तमः, पुं, वैष्णिकनामनायकभेदः। तस्य लक्षणम्।
"दयिताश्रमप्रकोपेऽपि उपचारपरायणः"।
इति रसमञ्जरी॥ प्रियव्रतराजपुत्रः। स च द्वितीयमनुः। अस्मिन् मन्वन्तरे सत्यसेनोऽवतारः। सत्यजिदिन्द्रः। सत्यवेदश्रुतभद्रादयो देवाः। वशिष्ठसुताः प्रमदादयः सप्तर्षयः। पवनरञ्जयज्ञहोत्राद्या मनुपुत्राः। इति श्रीभागवतम्॥ (उत्तानपादस्य राज्ञः सुनामख्यातः पुत्रभेदः। यथा, विष्णुपुराणे। १। ११। २॥
"तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः"॥)

उत्तमपत्निनी, स्त्री, (उत्तमपत्नं विद्यते यस्याः। उत्तमपत्न+इनि+ङीप्।) दुग्धिकावृक्षः। इति रत्नमाला। क्षीराइ इति भाषा॥

उत्तमर्णः, पुं, (उत्तमस्य। ऋणमाधमर्ण्ये इति सूत्रे आधमर्ण्यशब्देन व्यवहारविशेषो लक्ष्यते।) ऋणदाता। इत्यमरः॥ महाजन इति भाषा। तत्पर्य्यायः। ऋणदः २। इति जटाधरः॥
("अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः।
दापयेत् धनिकस्यार्थमधमर्णात् विभावितम्"॥ इति मनुः। ८। ४७॥)

उत्तमसंग्रहः, पुं, (उत्तमः संग्रहो यस्मिन्।) सम्यक् संग्रहणम्। तत्तु निर्जने परभार्य्यया सह केशाकेशिपरस्परालिङ्गनसहासनादिरूपमिथुनीभावः। इति मिताक्षरा॥

उत्तमसाहसः, पुं, (उत्तमः साहसोऽस्यस्मिन्।) दण्डविशेषः। स तु साग्रोतिपणसाहस्रः। यथा। साग्रोतिपणसाहस्रो दण्ड उत्तमसाहसः"।
इति याज्ञवल्क्यः॥ सहस्रपणमितोऽपि। यथा,
"पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः।
मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः"॥
इति मनुः॥

उत्तमा, स्त्री, (अतिशयेन उत्कृष्टा। उत्+तमप्+टाप्।) उत्कृष्टा नारी। तत्पर्य्यायः। वरारोहा २ मत्तकाशिनी ३ वरवर्णिनी ४। इत्यमरः॥ मत्तकाशिनी ५। मत्तकासिनी ६। इति तट्टीका॥ दुग्धिकावृक्षः। इति मेदिनी॥ स्त्रीयादिगायिकाभेदः। अस्या लक्षणम्। अहितकारिण्यपि प्रिये हितकारिणी। अन्यास्त्रेष्टा उत्तमा एव। इति रसमञ्जरी॥

उत्तमाङ्गं, क्ली, (उत्तमं प्रशस्तमङ्गं।) मस्तकं। इत्यमरः॥ ("कश्चित् दिवत्खड्गहृतोत्तमाङ्गः"। इति रघौ। ७।५१। "बभौ पतद्भङ्गरवोत्तमाङ्गे"। इति कुमारे॥७।४१। मुखम्। यथा, मानवे १।९३।
"उत्तमाङ्गोद्भवाज्ज्यैष्ठ्यात् ब्राह्मणश्चैव धारणात्।
सर्व्वस्यैवास्य सर्गस्य धर्म्मतो ब्राह्मणः प्रभुः"॥
उत्तमाङ्गं मुखं इति तट्टीका॥)

उत्तमारुही, स्त्री, इन्दीवरी। इति राजनिर्घण्टः॥ (इन्दीवरीशब्देऽस्या गुणादिकं बोध्यम्।)

उत्तरं, क्ली, (उत्+तॄ+अप्।) प्रतिवाक्यम्। इत्यमरः॥ जवाब इति यावनी भाषा।
(यथा, माघे २। २२।
"वचस्तस्य सपदि क्रिया केवलमुत्तरम्"।)
तस्य व्युत्पत्तिः।
"उत्तीर्य्यते निर्णीर्य्यते प्रकृताभियोगोऽनेन"।
तस्य स्वरूपम्।
"पक्षस्य व्यापकं सारसन्दिग्धमनाकुलम्।
अव्याख्यागम्यभित्येवमुत्तरं तद्विदो विदुः"॥
तस्य भेदाः।
"मिथ्या सम्मतिपत्तिश्च अत्यवस्कन्दनं तथा।
प्राड्न्यायश्चोत्तराःप्रोक्ताश्चत्वारः शास्त्रवेदिभिः"॥
इति नारदः॥ (अथ उत्तरं नाम साधर्म्योपदिष्टे वा हेतौ वैधर्म्म्यवचनं वैधर्म्म्योपदिष्टे वा साधर्म्म्यवचनं यथा हेतुमधर्म्माणोविकाराः शीतकस्य द्विद्याधर्म्मैर्हेतुसाधर्म्म्यवचनं हिमाग्निशिरवातसंस्पर्शा इति ब्रुवतः परो ब्रूयात् हेतुविधर्म्माणो विकाराः यथा शरीरावयवानां दाहौष्ण्यं कोपप्रपचने हेतुवैधर्म्म्ये हिमाग्निशिरवातसंस्पर्शा इति। एतत् सविपर्य्ययमुत्तरम्। इति चरके विमानस्थानेऽष्टमोऽध्यायः॥)

उत्तरः, पुं, विराटराजपुत्रः। इति हेमचन्द्रः॥ (यथा महाभारते३। गोहरणपर्व्वणि ३५।३२ "तमुत्तरं वीक्ष्य रथोत्तमे स्थितम्"। तत्रैव ३४ "सहोत्तरेणाशु तदद्य मङ्गलम्")। (खनामख्यातपर्व्वतभेदः। यथा, "दक्षिणस्योत्तरो गिरिः"। इति रामायणे॥ उत्तरयति संसारसागरात् इति व्युत्पत्तेः। शिवः। हरिः॥ भारते।१३।१४८।६६॥)

उत्तरः, त्रि, (उदतिशयेन उद्गतः। उत्+तरप्।) ऊर्द्धः। उदीचीः। (यथा, रामायणे।
"उत्तरे जाह्नवीतीरे हिमवन्तं शिलोच्चयम्"।)
उत्तमः इति मेदिनी अमरश्च॥ (प्रधानं। श्रेष्ठः। यथा, रघुः १३।७।
"नृपा इवोपप्लविनः परेभ्यो,
धर्म्मोत्तरं मध्यममाश्रयन्ते"।
"ब्रह्मधर्म्मोत्तरे राज्ये शान्तनुर्विनयात्मवान्"।
इति महाभारतम्॥) अनन्तरम्।
("वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी।
एतानि मान्यस्थानानि गरीयो यद् यदुत्तरम्"॥
इति मनुः। २। १३६॥)

उत्तरकालः, पुं, (उत्तरः कालः।) भविष्यत्कालः। गौणकालः। यथा, हरिहरभट्टोक्तिः।
"एवमागामियागीयमुख्यकालादधस्तनः।
स्वकालादुत्तरो गौणः कालः पूर्व्वस्य कर्म्मणः"॥

उत्तरकुरुः, स्त्री, (उत्तरः कुरुः।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः॥
("विजित्य यः प्राज्यमयच्छदुत्तरान्
कुरूनकुण्यं वसु वासवोपमः"।
इति किरातार्জ্জুनीये। १। २५॥)

उत्तरकोशला, स्त्री, (उत्तरे स्थिता कोशला।) अयोध्यानगरी। इति त्रिकाण्डशेषः॥
("पितुरनन्तरमुत्तरकोशलान्
ससधिगम्य समाधिजितेन्द्रियः"॥
इति रघुः ९।१।
"यदुपतेः क्व गता मथुरापुरी
रघुपतेः क्व गतोत्तरकोशला"।
इति उद्भटः॥)

उत्तरक्रिया, स्त्री, (उत्तरा अन्तिमा क्रिया।) अन्त्येष्टिक्रिया। सांवत्सरिकश्राद्धादिपित्र्यक्रिया। यथा,
"प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु।
क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता ह्यनुत्तराः"॥
इति विष्णुपुराणम्॥

उत्तरङ्गं क्ली, (उत्तर+गम्+खश्।) दारोर्द्धभक्तदारु। इति हेमचन्द्रः॥ उद्गततरङ्गे त्रि॥
"प्रत्ययहीत् पार्थिवाहिनीं तां
भागीरथीं शोण इवोत्तरङ्गः"॥ इति रघुः।७।३६।

उत्तरणं, क्ली, (उत्+तॄ+ल्युट्।) नद्यादिपारगमनम्। उत्तरण इति भाषा॥

उत्तरतः, [स्] व्य, (उत्तर + स्वार्थे + अतसुच् ।) उत्तरदिग्देशकालात्। इति रायमुकुटः ॥ उत्तर इहते इति भाषा। (यथा, रामायणे ४ ।५५। अध्याये।
"दक्षिणाग्रेषु दर्भेषु कृत्वा चोत्तरतः शिरः।
तमेवानुस्मरिष्यन्तः सर्व्वे संविविशुर्भुवि" ॥)

उत्तरतारं, क्ली, (उत्तरमपरं तारं।) उत्तरतीरम्। इति सिद्धान्तकौमुदी ॥

उत्तरपक्षः, पुं, (उत्तरः पक्षः।) विचारसिद्धान्तः। समाधानम्। तत्पर्य्यायः। सिद्धान्तः२ समाधिः३ कृतान्तः ४। इति त्रिकाण्डशेषः ॥ सिद्धान्तानुकूलतर्कोपन्यासः। इति स्मृतिः ॥ यथा माघे।
("प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम्" ।२।९५॥)

उत्तरपादः, पुं, (उत्तरः पादः।) चतुष्पादव्यवहारान्तर्गतद्वितीयपादः। (यथाह बृहस्पतिः।
"पूर्व्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः"।)
उत्तरम्। इति व्यवहारतत्त्वम् ॥

उत्तरफल्गुनी, स्त्री, (उत्तरा फल्गुनी।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतद्वादशनक्षत्रम्। अस्या रूपम्। दक्षिणोत्तरमिलिततारकाद्वयम्। इति कालिदासः ॥ पर्य्यङ्करूपं तारकाद्वयं। इति दीपिकाटीका ॥ अस्या अधिष्ठात्री देवता अर्य्यमा। अस्या मिश्रगुणः। अस्यां जातफलम्।
"दाता दयालुः खजने सुशीलो
विख्यातकीर्त्तिः सुमतिः प्रधानः।
धीरो नरोऽत्यन्तसुदुखभाव-
श्चोत्तराफल्गुनिकाप्रसूतिः" ॥
इति कोष्ठीप्रदीपः ॥

उत्तरफल्गुनी, स्त्री, (उत्तरा फल्गुनी।) उत्तरफल्गुनीनक्षत्रम्। तत्पर्य्यायः। उत्तरा २ अर्य्यमदेवा ३। इति हेमचन्द्रः ॥

उत्तरभाद्रपत्, [द्] स्त्री, (उत्तरा भाद्रपत्।) उत्तरभाद्रपदानक्षत्रम्। इति ज्योतिषम् ॥

उत्तरभाद्रपदा, स्त्री, (उत्तरा भाद्रपदा।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतषड्विंशनक्षत्रं। तत्पर्य्यायः। प्रौष्ठपदा २ अहिर्ब्बुध्न्यदेवता ३। इति हेमचन्द्रः ॥ अस्या रूपम्।
"उत्तरे सुमुखि तारमूर्त्तिभि-
स्तुत्तमाङ्गमिलितद्वितारके।
गोजचामरकचे द्वयुग्मतो
जोचनाचलकलाः पलायिताः" ॥
इति कालिदासः ॥ पर्य्यङ्करूपमहतारात्मकं। इति दीपिकाटीका ॥ अस्यां जातफलम्।
"धनी कुलीनः कुशलः क्रियादौ
भूपालमान्यो बलवान् महौजाः।
सत्कर्म्मकर्त्ता निजबन्धुभक्तो
यदुत्तराभाद्रपदाप्रसूतः" ॥
इति कोष्ठीप्रदीपः ॥

उत्तरवादी, [न्] त्रि, (उत्तरं वदति यः। उत्तर + वद + णिन्।) उत्तरवक्ता। इति व्यवहारतत्त्वम् ॥ आसामी इति भाषा। यथा याज्ञवल्क्यः २।१७।
("पूर्व्वपक्षेऽधरीभूते भवत्युत्तरवादिनः" ॥)

उत्तरसाक्षी, [न्] त्रि, स्वपक्षसम्बन्धिसाक्ष्यं परिभावतां साक्षिणां यः स्वयं गृह्णाति अर्थिना आथते वा सः। तथाच नारदः।
"साक्षिणामपि यः साक्ष्यं स्वपक्षं परिभावताम्।
अवगात् आवगाद्वापि स साक्ष्युत्तरसंज्ञकः" ॥
इति व्यवहारतत्त्वम्। परसाक्षी इति भाषा ॥

उत्तरसाधकः त्रि, (उत्तरः साधकः।) साधकसहायः। सहकारी ॥

उत्तरा, स्त्री, (उत्तर + टाप्।) विराटराजकन्या। साभिमन्युपत्नी। इति मेदिनी ॥ (यथा महाभारते ३। गोहरणपर्व्वणि ३५। २३।
"स तत्र नर्म्मसंयुक्तमकरोत् पाण्डवो बृहत्।
उत्तरायाः प्रमुखतः सर्व्वं जानन्नरिन्दमः" ॥)
उत्तरा दिक्। तत्पर्य्यायः। कौबेरी २ देवी ३ उदीची ४। इति राजनिर्घण्टः ॥ (यथा महाभारते २। दिग्विजयपर्व्वणि २८। १७।
"एवं स पुरुषव्याघ्रो विजिग्ये दिशमुत्तराम्" ।)
अस्या दिशोऽधिपतिः कुबेरः कर्कटलक्ष्मिकमीनराशयश्च। यथा। समयप्रदीपः ॥
"मेषसिंहधनुः प्राच्यां दक्षिणस्यान्तु तत्परे।
प्रतीच्यां तत्परे ज्ञेया उदीच्याञ्च ततः परे" ॥

उत्तरात्, व्य, (उत्तराधरदक्षिणादिति इति उत्तरादातिप्रत्ययः।) उत्तरा दिक्। इत्यमरटीकायां रायमुकुटः ॥ (यथा, ऋग्वेदे ६।१९।९।
"आ ते शुष्मा वृत्र एतु पश्चादोत्तरादधरादा पुरस्तात्" ॥)

उत्तराधिकारी, [न्] त्रि, (उत्तरं पूर्व्वस्वामिकस्वत्वनाशानन्तरं अधिकरोति पूर्व्वस्वामिकधनेन स्वाम्यमाप्नोतीति। उत्तर + अधि + कृ + णिन्।) प्रथमाधिकारिणः पश्चादधिकारी। दायादः। ओयारिस् इति यावनी भाषा। (मृतधनोत्तराधिकारिणो दायभागशब्दे दृश्यः ॥)

उत्तराभासः, पुं, (सदुत्तरम् इव आभासते। आङ् + भास + क्विप्।) दुष्टोत्तरम्। तथा च कात्यायनः।
"प्रकृतेन असम्बन्धमत्यल्पमतिभूरि च।
पक्षैकदेशव्याप्येव तच्च नैवोत्तरं भवेत्" ॥
इति व्यवहारतत्त्वम् ॥

उत्तरायणं, क्ली, (उत्तरा उत्तरस्यां अयनं सूर्य्यादेर्गमनम्। पूर्व्वपदात्संज्ञायामिति णत्वम्।) सूर्य्यस्य उत्तरदिग्गमनकालः। स तु माघादिषण्मासात्मकः। इति हेमचन्द्रः ॥ (यथाह सूर्य्यसिद्धान्तः।
"भानोर्मकरसंक्रान्तेः षण्मासा उत्तरायणम्।
कर्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम्" ॥
"माघादिमासयुग्मैस्तु ऋतवः षट् क्रमादितः।
उत्तरायणमाद्यैस्त्रिभिः स्याद्दक्षिणायनम्" ।)
देवानां दिनम्। इति स्मृतिः ॥ (मकरसंक्रान्तिः।
"वानप्रस्थाश्रमिभिर्विप्रैः करणीयो यागभेदः"।
यदुक्तं मनुना ६।१०।
"ऋत्वेष्ट्यापयणञ्चैव चातुर्मास्यानि चाहरेत्।
उत्तरायणञ्च क्रमशो दाक्षायणमेव च" ॥
"ग्रिग्गिरश्च वसन्तोऽपि ग्रीष्मः स्यादुत्तरायणे"।
इति हारीते प्रथमस्थाने चतुर्थोऽध्यायः ॥
"ग्रिग्गिराद्यास्त्रिभिस्तैस्तु विद्यादयनमुत्तरम्।
आदानञ्च तदा दत्ते नृणां प्रतिदिनं बलम् ॥
तस्मिन् ह्यत्यर्थतीक्ष्णोष्णरूक्षामार्गखभावतः।
आदित्यपवनाः सौम्यान् क्षपयन्ति गुणान् भुवः ॥
तिक्तः कषायः कटुको बलिनोऽत्र रसाः क्रमात्।
तस्मादादानमाग्नेयम्"। इति सूत्रस्थाने त्रयोदशेऽध्याये वाभटेनोक्तं ॥
"तत्र ते ग्रीष्मवर्षशरदाख्याश्चादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च"।
"उत्तरञ्च ग्रिग्गिरवसन्तयोर्म्मासेषु भगवानाप्याय्यतेऽर्कोत्क्षिप्तकषायकटुकाश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमपचीयते" ॥
इति सूत्रस्थाने षष्ठेऽध्याये सुश्रुतेनोक्तम् ॥)

उत्तराषाढ़ा, स्त्री, (उत्तरा आषाढ़ा।) उत्तराषाढ़ानक्षत्रम्। इति भरतो द्विरूपकोषश्च ॥

उत्तराषाधपतिः, पुं, (उत्तराषाधायाः उत्तरदिग्रूपः अधिपतिः अधिष्ठाता।) कुबेरः। इति हलायुधः ॥

उत्तराषाढ़ा, स्त्री, (उत्तरा आषाढ़ा।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतैकविंशनक्षत्रम्। अस्या रूपम्। सूर्पाकृतितारात्मकम्। अस्या अधिदेवता विश्वः। इति कालिदासः ॥ गजदन्तवदस्तारामयम्। इति दीपिकाटीका ॥ तत्र जातफलम्। यथा कोष्ठीप्रदीपे।
"दाता दयावान् विजयी विनीतः
सत्कर्म्मचेता विभवैः समेतः।
कान्तासुतावान्नसुखो नितान्तं
वैश्वे सुवेषः पुरुषो मनीषी" ॥)

उत्तरासङ्गः, पुं, (उत्तरे ऊर्द्धभागे आसज्यते। उत्तर + आ + सञ्ज + घञ्।) उत्तरीयवस्त्रं। इत्यमरः ॥
("ज्ञताभिधेकां ऋतजातवेदसं
लगुत्तरासङ्गवतीमधीतिनीम्"।
इति कुमारे ५।१६ ॥ तथा, रामायणे २।५०।४८।
"ततश्चीरोत्तरासङ्गः सन्ध्यामन्वास्य पश्चिमाम्" ॥)

उत्तरीयं, क्ली, (उत्तरस्मिन् ऊर्द्धदेहभागे भवम्। उत्तर + छ।) उत्तरीयवस्त्रम्। दोक्होट् दोज्जा इत्यादि भाषा। तत्पर्य्यायः। प्रावारः २ उत्तरासङ्गः ३ दृढतिका ४ संव्यानम् ५। इत्यमरः ॥ कक्षा ६। इति जटाधरः।
("अधास्य रत्नग्रथितोत्तरीय-
मेकान्तपाण्डुस्तनलम्बिहारम्"।
इति रघुः १६।४३। यथा रामायणे २ ८८।१७।
"उत्तरीयमिवासक्तं सुयक्तं सीतया तदा" ॥)

उत्तरेण, व्य, (उत्तर + एनप्।) उत्तरदिग्देशकालः। इत्यमरटीकायां रायमुकुटः॥ यथा मेघदूते १६।७५।
("किञ्चित्पश्चात् व्रज लघुगतिर्भूय एवोत्तरेण"।
"तत्रागारं धनपतिगृहानुत्तरेणास्मदीयम्" ॥)

उत्तरेद्युः, [स्] व्य, (उत्तरस्मिन्नहनि इत्यर्थे सद्यःपरुदिति उत्तरशब्दादेद्युस् प्रत्ययो निपातितः।) उत्तरस्मिन्नहनि। आगामिदिने। इति शब्दरत्नावली ॥

उत्तानं, त्रि, (उद्गतस्तानो विस्तारो यस्मात्।) अगभीरम्। ऊर्द्धमुखस्थितम्। इति मेदिनी ॥ चित्

इति भाषा। (ऊर्द्धतलम्। यथा,
"उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये"।
इति कुमारे ३।४५। तथा, याज्ञवल्क्यः।
"पिष्टपात्रं तदुत्तानं क्षत्वा विप्रान् विसर्ज्जयेत्"।
"उत्तानं लेपनाभ्यङ्गपरिषेकावगाहनैः।
विरेकास्थापनैः स्नेहपानैर्गम्भीरमाचरेत्"॥
इति चिकित्सास्थाने द्वाविंशेऽध्याये वाभटेनोक्तं॥
"उत्तानस्य प्रसुप्तस्य कांस्यं वा ताम्रभाजनम्।
नाभौ निधाय धाराम्बु शीतदाहनिवारणम्"॥
इति हारीते चिकित्सितस्थाने द्वितीयोऽध्यायः॥)

उत्तानकः, पुं, (उत् + तन + खुल्।) उचटाङ्गम्। इति रत्नमाला॥ (उचटाशब्देऽस्य विशेष उक्तः॥)

उत्तानपत्रकः, पुं. (उत्तानं ऊर्द्धमुखं पत्रं यस्य। बहुव्रीह्यर्थे कन्।) रक्तैरण्डवृक्षः। इति राजनिर्घण्टः॥

उत्तानपादः, पुं, (उत्तानः उन्नतः पादः पदं यस्य।) राजविशेषः। स तु स्वायम्भुवमनुपुत्रः इति पुराणम्॥ (यथा, विष्णुपुराणे १।१२॥
"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु।
द्वौ पुत्रौ सुमहावीर्यौ धर्म्मज्ञौ कथितौ तव"॥)

उत्तानपादजः, पुं, (उत्तानपादात् जायते यः। उत्तानपाद + जन् + ड।) उत्तानपादराजपुत्रः। तत्पर्य्यायः। ध्रौवेयः २ ध्रुवाधारः ३ ध्रुवः ४। इति हारावली॥ (उत्तमः। यथा, विष्णुपुराणे १।११॥
"तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः।
अभीष्टायामभूद्ब्रह्मन्! पितुरत्यन्तवल्लभः॥२॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज!
स नातिप्रीतिमांस्तस्यां तस्याञ्चाभूद्ध्रुवः सुतः॥३॥)

उत्तानशयः, त्रि, (उत्तानः शेते। शीङ् शयने पार्श्वादिषूपसंख्यानमिति अच्।) अत्यन्तशिशुः। तत्पर्य्यायः। डिम्भा २ स्तनया ३ स्तनन्धयी ४। इत्यमरः॥ उत्तानशुम्बः॥

उत्तापः, पुं, (उत् + तप् + घञ्।) तेजः। उष्मा। सन्तापः॥ (यथा, हितोपदेशे।
"प्रत्यहः सर्व्वसिद्धीनामुत्तापः प्रथमः किल"॥)

उत्तारः, त्रि, (उत् + तॄ + घञ्।) महान्। तत्पर्य्यायः। उदीर्णः २ उद्भटः ३ उदारः ४ उत्तमः ५। इति जटाधरः॥ (यथा प्रबोधचन्द्रोदये।
"संसारसागरोत्तारतरणिः"।) वमनम्। इति प्रायश्चित्तविवेकादयः॥

उत्तारी, [न्] त्रि, (उत् + तॄ + णिन्।) चपलः। इति भूरिप्रयोगः॥

उत्तालः, त्रि, (उत् + तल + घञ्।) उत्कटः। श्रेष्ठः। विकरालः। ध्वङ्कमः। इति मेदिनी॥
("ससदुत्तालवेतालतालवाद्यं विवेश तत्।
श्मशानं क्षणदाजनीनिवासभवनोपमम्"॥
इति कथासरित्सागरे २५। १३६॥
"अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैः
उत्तालास्त्रिदमेगभीरपयसः पुण्याः सरित्सङ्गमाः"।
इति उत्तरचरिते। २य अङ्के।) त्वरितः। इति हेमचन्द्रः॥

उत्तीर्णं, त्रि, (उत् + तॄ + क्त।) मुक्तम्। पारगतम्॥
("तुलोत्तीर्णस्यापि प्रकटितहताशेषतमसो
रवेस्तादृक्तेजो न हि भवति कन्यां गतवतः"।
इति पद्यसंग्रहे १९॥)

उत्तुङ्गः, त्रि, (उत् अतिशयेन तुङ्गः।) उच्चः। इति जटाधरः॥
("उत्तुङ्गशैलशिखरस्थितपादपानां
काकः क्षणोऽपि फलमालभते सपक्षः"।
इति उद्भटः। उन्नतः। "पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रावति"। इति भर्त्तृहरिः १।७२॥)

उत्तुषः, पुं, (उद्गतस्तुषो धान्यत्वक् यस्मात्।) भक्ष्यधान्यम्। तत्पर्य्यायः। खाजिकः २ लाजाः ३। इति हारावली। खइ इति भाषा॥

उत्तेजना, स्त्री, (उत् + तिज् + णिच् + युच्।) प्रेरणा। व्यङ्करणम्॥ (तीक्ष्णीकरणम्। यथा, "व्याघट्टनोत्तेजनया मणीनाम्"। इति माघे।)

उत्तेजितं, क्ली, (उत् + तिज् + णिच् + क्त।) अश्वचतुर्थगतिः। सा च मध्यवेगेन या गतिः। तत्पर्य्यायः। रेचितम् २। इति हेमचन्द्रः॥ प्रेरिते त्रि॥

उत्तेरितं, क्ली, (उत् + तॄ + इतच्।) अश्वपञ्चमगतिः। तत्पर्य्यायः। उपक्रण्ठं २ आस्कन्दितकम् ३। इति हेमचन्द्रः॥ (तथा चोक्तं,—
"उत्तेरितोऽतिवेगान्धो न पश्यति न शृणोति न पश्यति"॥)

उत्तोलनं, क्ली, (उत् + तुल् + ल्युट्।) ऊर्द्धनयनम्। तोला। इति भाषा॥

उत्त्यक्तः, त्रि, (उत् + त्यज् + क्त।) परित्यक्तः। ऊर्द्धक्षिप्तः। विरक्तः॥

उत्त्रासः, पुं, (उत् + त्रस् + घञ्।) भयम्। इति शब्दरत्नावली॥

उत्थानं, क्ली, (उत् + स्था + ल्युट्।) सैन्यम्। युद्धम्। पौरुषम्। पुण्यकम्। उद्यमः। (यथा रामायणे ५।
"मम धर्म्मार्थमुत्थानं न कामक्रोधसंश्रितम्"।)
उद्गमः। (अभ्युदयः। यथा रघुवंशे। ६।३१।
"निदर्शयामास विशेषदृश्य-
मिन्दुं नवोत्थानमिवेन्दुमत्यै"॥)
हर्षः। वास्तव्यन्तः। व्यङ्गनम्। चैत्यः। (धनार्জ্জননिमित्ता चेष्टा। यथा मनुः ९।२१५॥
"भ्रातॄणामविभक्तानां यद्युत्थानं भवेत्सह।
न पुत्रभागं विषमं पिता दद्यात् कथञ्चन"॥)
मनोत्सर्गः। इति हेमचन्द्रः॥ तन्त्रम्। तच्च स्वमस्तकम्। सैन्यं चिन्ता च। सन्निविष्टः। उपविष्टः। इत्यमरभरतौ॥ गात्रोत्तोलनम्। उठन इति भाषा। (यथा शाकुन्तले २ य अङ्के। "मेदच्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः"।) यथा च,
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत्"॥
इति तिथ्यादितत्त्वम्॥ (पुनर्জীবनम्। मरणानन्तरं पुनर्জীবनलाभः। यथा महाभारते।
"स चापि वरयामास पितुरुत्थानमात्मनः"॥)

उत्थानैकादशी, स्त्री, (उत्थानाय हरेः प्रबोधनाय या एकादशी। अस्यां भगवान् क्षीरोदशय्यागो नारायणः योगनिद्रां विहाय उत्तिष्ठति।) कार्त्तिकशुक्लैकादशी॥ अथ विष्णूत्थानम्। तच्च दिवसे रेवत्यन्तयुक्तायां द्वादश्याम्। रात्रौ रेवत्यन्तपादयोगे तु दिवाद्वतीयभागे रेवतीयुक्तद्वादश्याम्। द्वादश्यामुत्ताभावे एकादशीप्रभृतिपौर्णमास्यन्तान्यतमतिथौ रेवत्यन्तपादयोगे। तदभावे केवलायां द्वादश्यां सन्ध्यायां विष्णुं संपूज्य।
ॐ "महेन्द्ररुद्रैरभिनूयमानो
भवान्धिर्व्वन्दितवन्दनीयः।
प्राप्ता तवेयं किल कौमुदाख्या
जागृध्व जागृध्व च लोकनाथ॥
मेघा गता निर्म्मल एष चन्द्रः
शारद्यपुष्पाणि च लोकनाथ।
अहं ददानीति च पुण्यहेतो-
र्जागृध्व जागृध्व च लोकनाथ"॥
ततश्च।
"उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते।
त्वया चोत्थीयमानेन उत्थितं भुवनत्रयम्"॥
इति पठेत्। इति क्षत्यतत्त्वम्॥

उत्थापनं, क्ली, (उत् + स्था + णिच् + ल्युट्।) उत्तोलनम्। उपस्थितीकरणम्॥
("किमु मे सुकृतं भूयात् भर्त्तुरुत्थापनं न वा"।
इति महाभारते १। आस्तीकपर्व्वणि। ४६।१७।)

उत्थितं, त्रि, (उत् + स्था + क्त।) वृद्धिमत्। प्रोद्यतं। उत्पन्नम्। इत्यमरभेदिनीकरौ॥ (क्षतोत्थानम्।
"अर्द्धाचिता सत्वरमुत्थितायाः"।
इति कुमारे, ७।६१। रघुवंशे च ७।१०।
"शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ"।
इति मेघदूते। ११२। "न यावदेतावुदपश्यदुत्थितौ"। इति माघे। १।१५॥)

उत्थिताङ्गुलिः, पुं, (उत्थिता अङ्गुलयो यत्र।) चपेटः। विस्तृताङ्गुलिकरतलम्। इति शब्दचन्द्रिका। चापड़ इति भाषा॥

उत्पतः, पुं, (उत् ऊर्द्धं पतति गच्छति। उत् + पत् + अच्।) पक्षी। इति त्रिकाण्डशेषः॥

उत्पतनं, क्ली, (उ + पत् + ल्युट्।) उत्पत्तिः। ऊर्द्धगमनम्। इति मेदिनी॥
("अथोत्पतनमन्त्रं सा पठित्वा ससखीजना"।
इति कथासरित्सागरे॥ विंशतरङ्गे॥)

उत्पतिता, [ऋ] त्रि, (उत् + पत् + तृच्।) ऊर्द्धगमनशीलः। उपरिगमनकर्त्ता इत्यमरः॥

उत्पतिष्णुः, त्रि, (उत् + पत् + इष्णुच्।) ऊर्द्धगमनशीलः। तत्पर्य्यायः। उत्पतिता २। इत्यमरः॥
("ससम्भ्रमश्चक्षुषानामेकानामुत्पतिष्णवः"।
इति रघुः। ४। ४७। तथा पञ्चतन्त्रे। ३। ४१।
"मृगपतिरपि कोपात् सङ्कुचत्युत्पतिष्णुः"॥)

उत्पत्तिः, स्त्री, (उत् + पत् + क्तिन्।) उत्पतनम्। तत्पर्य्यायः। जनुः २ जननं ३ जन्म ४ जनिः ५ उद्भवः ६। इत्यमरः॥ संसारः ७ भवः ८ जातिः ९। इति जटाधरः॥ प्रभवः १० भावः ११ सम्भवः १२ जनूः १३। इति शब्दरत्नावली॥

(यथा मनुः। २।६८।
"उत्पत्तिव्यञ्जकः पुण्यः कर्म्मयोगं निबोधत"।)
(साङ्ख्यादिनते आविर्भावः। यथा, मृत्पिण्डे विद्यमानस्य घटस्याविर्भाव एव उत्पत्तिर्यथा तथैव कारणात्मना विद्यमानानां तत्त्वानां आविर्भाव एवोत्पत्तिर्विवक्षिता॥)

उत्पन्नः, त्रि, (उत् + पद् + क्त।) उत्पत्तिविशिष्टः। जातः। उद्भूतः॥

उत्पलं, क्ली, (उत्पलतीति। पल गतौ पचाद्यच्।) नीलकमलम्। कुलौषधिः। इति विश्वः॥ पुष्पम्। इति मेदिनी॥ जलजपुष्पमात्रम्। तच्च पद्मकुमुदादि। तत्पर्य्यायः। कुवलयम् २। इत्यमरः॥ कुवलम् ३। इति जटाधरः॥ कुवेलम् ४। इति शब्दरत्नावली॥ (यथा रघौ ३।३६। "नवावतारं कमलादिवोत्पलम्"।) तस्य गुणाः। कषायत्वम्। मधुरत्वम्। शीतत्वम्। पित्तकफरक्तनाशित्वञ्च। इति राजवल्लभः॥ जलपुष्पविशेषः। कोञि इति हिन्दी भाषा। तत्पर्य्यायः। अनुष्णम् २ रात्रिपुष्पम् ३ जलाङ्गम् ४ हिमाह्वम् ५ निशापुष्पम् ६। अस्य गुणाः। शीतत्वम्। स्वादुत्वम्। पित्तरक्तार्त्तिदोषनाशित्वम्। दाहश्रमवमिभ्रान्तिक्लमिच्छर्दहरत्वञ्च। इति राजनिर्घण्टः॥
("उत्पलानि कषायाणि पित्तरक्तहराणि च"। इति सूत्रस्थाने सप्तविंशेऽध्याये चरकेणोक्तम्॥ "तस्मादल्पान्तरगुणे विद्यात्कुवलयोत्पले"। इति सुश्रुते सूत्रस्थाने षट्चत्वारिंशत्तमोऽध्यायः॥)

उत्पलः, त्रि, (उद्गतं पलं मांसं यस्मात् सः।) मांसशून्यः। इति विश्वः हेमचन्द्रश्च॥

उत्पलगन्धिकं, क्ली, (उत्पलस्य गन्धइव गन्धो यस्य। समासे इत्संज्ञायां कन्।) चन्दनविशेषः। तत्पर्य्यायः। क्षमातामम् २ गोशीर्षम् ३। इति शब्दमाला॥

उत्पलपर्णं, क्ली, (उत्पलस्य पर्णम्। नखक्षतपत्रे पत्रमिव।) कुवलयदलम्। (यथा विष्णुपुराणे १।४।२६।
ततः समुत्क्षिप्य धरां खदंष्ट्रया
महावराहः स्फुटपद्मलोचनः।
रसातलादुत्पलपत्रसन्निभः
समुत्थितो नील इवाचलो महान्॥)
स्त्रीनखक्षतम्। इति हेमचन्द्रः॥ तिलकम्। इति धरणी॥

उत्पलशारिवा, स्त्री, (उत्पलमस्यस्याः उत्पलाकारपुष्पत्वात्। अर्श आद्यच्। यद्वा उद्गतं पलमनया। ततः उत्पला चासौ शारिवा चेति।) श्यामलता। इत्यमरः॥ (श्यामलताशब्देऽस्या गुणादिकं ज्ञेयम्॥)

उत्पलिनी, स्त्री, (उत्पलानि सन्ति अस्यां तेषां समूहो वा। उत्पल + इनि + ङीप्।) पद्मसमूहः। इति शब्दरत्नावली॥ जलपुष्पविशेषः। छोटी कोञि इति हिन्दी भाषा। तत्पर्य्यायः। कैरविणी २ कुमुदती ३ कुमुदिनी ४ चन्द्रेष्टा ५ कुवलयिनी ६ इन्दीवरिणी ७ नीलोत्पलिनी ८। (यथा महाभारते तीर्थयात्रापर्व्वणि ३।८६।२५।
"वहधे सा महाराज बिभ्रती रूपमुत्तमम्।
अग्निवोत्पलिनी शीघ्रमनेरिव शिखा शुभा"॥)

अस्या गुणाः। हिमत्वम्। तिक्तत्वम्। रक्तामयपित्तनाशित्वम्। वातकफकासदाहश्रमवमिश्रमतानाशित्वञ्च। तस्या बीजगुणाः। स्वादुत्वम्। रूक्षत्वम्। हिमत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

उत्पली, स्त्री, तुषचर्पटी। इति मेदिनी। तुँसेर चापड़ा इति भाषा॥

उत्पवनं, क्ली, (उत् + पू + ल्युट्।) कुशग्रन्थिकायां पवित्रमध्येन जलादेरुत्क्षेपणम्। तच्च क्रमः। "पवित्रद्वयमग्रे वामहस्तानामिकाङ्गुष्ठाभ्यां मूले दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां उत्तानहस्ताभ्यां गृहीत्वा आज्ये प्रक्षिप्य तयोर्म्मध्येनाग्नावाज्योत्क्षेपणम्"। इति कालेसिः॥ "पवित्रद्वयमग्रे दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां मूले वामहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा दक्षिणहस्तोपरिभावेन अधोमुखो व्यस्तपाणिः पवित्रमध्येन प्रोक्षणीजलस्य किञ्चिदुत्तोलनम्"। इति पशुपतिः॥ "पशुपत्युक्तक्रमेण सामगानां मन्त्रोच्चारणपूर्व्वकं पवित्रद्वयमध्येनाग्नावाज्योत्क्षेपणं। इति भवदेवभट्टः॥

उत्पश्यः, त्रि, (उद्गूर्द्धं पश्यतीति। उत् + दृश् + ड।) उन्मुखः। ऊर्द्धदृष्टिविशिष्टः। इति हेमचन्द्रः॥

उत्पाटनं, क्ली, (उत् + पट् + णिच् + ल्युट्।) उन्मूलनम्। मूल उपड़ान इति भाषा॥ (यथा सुश्रुते। "निखातोत्पाटनं भङ्गः पतनं निर्गमस्तथा"॥)

उत्पाटितं, त्रि, (उत् + पट + णिच् + क्त।) कृतोत्पाटनं। तत्पर्य्यायः। उन्मूलितम् २ उत्खातम् ३। इति जटाधरः॥ आवर्हितम् ४ उद्धृतम् ५। इति हेमचन्द्रः॥

उत्पातः, पुं, (उत् + पत् + घञ्।) उत्पतति अकस्मादायाति यः। प्राणिनां शुभाशुभसूचकमहाभूतविकारभूकम्पादिः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। अजन्यम् २ उपसर्गः ३। इत्यमरः॥ स त्रिविधः। दिव्यः १ यथा अपर्व्वणि चन्द्रादित्यग्रासादिः। आन्तरीक्ष्यः २ यथा, उल्कापातनिर्घातादिः। भौमः ३ यथा भूकम्पादिः। इति दीपिकाचण्डीटीकेषु॥ (उत्पातानां लक्षणादिकं ऋतौ स्वभावप्रभवात् अदोषत्वञ्चोक्तं बृहत्संहितायां ४६ अध्याये। यथा,—
"नरपतिदेशविनाशे केतोरुदये ऽथवा ग्रहेऽर्केन्दोः।
उत्पातानां प्रभवः स्वर्तुभवत्वाच्यदोषाय॥ ८२॥
येच न दोषान् जनयन्त्यत्यातास्तान्तुस्वभावकृतान्।
ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तैः॥ ८३॥
वल्मीकाग्निमहीकम्पसन्ध्यानिर्घातनिःस्वनाः।
परिवेषरजोधूमरक्तार्कास्तमनोदयाः॥ ८४॥
द्रुमेभ्योऽम्बरसङ्क्षेपवज्रपुष्पफलोद्भवाः।
गोपक्षिमृदवृद्धिस्त्रीवायु मधुमाधवे॥ ८५॥
तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम्।
अग्निज्वलनस्फोटधूमवेण्वनिलाहतम्॥ ८६॥
रूक्षपद्मारुणं सान्ध्यं नभः क्षुब्धार्णवोपमम्।
सरितां चाम्बुसंशोषं दृष्ट्वा ग्रीष्मे भयं वदेत्॥ ८७॥
शक्रायुधपरीवेषविद्युच्छ्वभ्रविरोहणम्।
कम्पोद्वर्त्तनवैक्लव्यं रसनं दरणं क्षितेः॥ ८८॥
सरोनद्युदयानानां वृद्धार्द्रतरणस्रवाः।
सरणं चाद्रिगेहानां वर्षासु न भयावहम्॥ ८९॥
दिव्यस्त्रीभूतगन्धर्व्वविमानाद्भुतदर्शनम्।
ग्रहनक्षत्रतारायां दर्शनं च दिवाम्बरे॥ ९०॥
गीतवादित्रनिर्घोषा वनपर्व्वतसानुषु।
शस्यद्रुद्विरयां हानिरुपापाः शरदि स्मृताः॥ ९१॥
शीतानिलतुषारत्वं नर्दनं मृगपक्षिणाम्।
रक्तोत्पलादिसत्वानां दर्शनं बागमानुषी॥ ९२॥
दिशो धूमान्धकाराश्च सनमोवनपर्व्वताः।
उषैः सूर्य्योदयास्तौ च हेमन्ते शोभनाः स्मृताः॥ ९३॥
हिमपातानिलोत्पातविरूपांद्भुतदर्शनम्।
क्षणाङ्गननिभाकाशं तारोल्कापातपिङ्गरम्॥ ९४॥
चित्रगर्भोद्भवाः स्त्रीषु गोऽश्वाश्वमृगपक्षिषु।
पत्राङ्कुरलतानाञ्च विकाराः शिशिरे शुभाः॥ ९५॥
ऋतुस्वभावजा ह्येते दृष्टाः स्वर्त्तौ शुभप्रदाः।
ऋतोरन्यत्र चोत्पाता दृष्टास्ते भयदारुणाः॥ ९६॥
उन्मत्तानाञ्च या गाथाः शिशूनां भाषितञ्च यत्।
स्त्रियो यच्च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः॥ ९७॥
पूर्व्वं चरति देवेषु पश्चात् गच्छति मानुषान्।
नचोदिता वाग्वदति सत्या ह्येषा सरस्वती॥ ९८॥
उत्पातान् गणितविवर्जितोऽपि बुद्ध्या
विख्यातो भवति नरेन्द्रवल्लभश्च।
एतत्तन्मुनिवचनं रहस्यमुक्तं
यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी"॥ ९९॥

उत्पतनं। उल्लम्फः। यथा, रामायणे ५।६८।२३।
"एकोत्पतेन ते लङ्कामेष्यन्ति हरिपुङ्गवाः"।
उन्नतिः। वृद्धिः। यथा, हितोपदेशे।
"करनिहितकन्दुकसमाः पातोत्पाता मनुष्याणां"।
उत्पत्तिः। यथा, महाभारते, वनपर्व्वणि।
"बुद्धिरात्मानुगतीव उत्पातेन विधीयते।
तदाश्रिता हि सा ज्ञेया बुद्धिस्तस्यैविधी भवेत्"॥)

उत्पादकः, पुं, (उत् + पद + णिच् + ण्वुल्।) पशुविशेषः। तत्पर्य्यायः। शरभः २ कुञ्जरारातिः ३ अष्टपादः ४। इति हेमचन्द्रः॥

उत्पादकः, त्रि, (उत्पादयतीति। उत् + पद् + णिच् + ण्वुल्।) उत्पादयिता। जनकः। यथा मनुः।
"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता"।
२।१४६॥

उत्पादनं, क्ली, (उत् + पद् + णिच् + ल्युट्।) जननम्। उत्पन्नकरणम्। इति व्याकरणम्॥ (यथा मनुः। ९।२७।)
"उत्पादनमपत्यस्य जातस्य परिपालनम्"।

उत्पादशयनः, पुं क्ली, (उत्पाद ऊर्द्धपादः सन् शेते यः सः। उत्पाद + शी + ल्यु।) टिट्टिभपक्षी। इति हेमचन्द्रः॥

उत्पादिका, स्त्री, (उत् + पद् + णिच् + ण्वुल् + टाप्।) देहिकानामकीटः। इति त्रिकाण्डशेषः॥ हिलमोचिका इति शब्दचन्द्रिका॥ पूतिका। इति भरतो द्विरूपकोषश्च॥

उत्पाली, स्त्री, (उत् + पल् + घञ् + ङीष्।) आरोग्यम्। इति शब्दचन्द्रिका॥

उत्पिञ्जलः, त्रि, (उद्गतिशयः पिञ्जलो यथः।) मद्यमाकुलः। अतिशयव्याकुलः। तत्पर्य्यायः। समुत्पिञ्जः २ पिञ्जलः ३। इति हेमचन्द्रः॥

उत्प्रेक्षा, स्त्री, (उत्प्रेक्षते इति उत् + प्र + ईक्ष + अ + टाप्।) अनवधानम्। इति मेदिनी॥ काव्यालङ्कारविशेषः। तस्य लक्षणम्।
"सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्"।
"अस्यार्थः। प्रकृतस्य उपमेयस्य समेन उपमानेन यत् सम्भावनं मिथ्यात्वेन वर्णनम्"। इति काव्यप्रकाशः॥ (अस्या भेदा बहवः। यदुक्तं साहित्यदर्पणे, दशमपरिच्छेदे। ५६—६२॥
"भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता॥
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः।
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि॥
तदप्यधापि प्रत्येकं भावाभावाभिमानतः।
गुणक्रियास्वरूपत्वात् निमित्तस्य पुनश्च ताः॥
द्वाविंशद्विधतां यान्ति तत्र वाच्याभिदाः पुनः।
विना द्रव्यं त्रिधा सर्व्वाः स्वरूपफलहेतुगाः॥
उक्तयनुक्त्योर्निमित्तस्य द्विधा तत्र स्वरूपगाः।
प्रतीयमानाभेदाश्च प्रत्येकं फलहेतुगाः॥
उक्त्यनुक्तोः प्रकृतस्य प्रत्येकं ता अपि द्विधा।
अलङ्कारान्तरोत्था सा वैचित्र्यमधिकं वहेत्॥
मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः"॥
विस्तृतिस्तु अलङ्कारशब्दे द्रष्टव्या॥)

उत्प्लवनं, क्ली, (उत् + प्लु + ल्युट्।) उल्लम्फनम्। लाफान इति भाषा॥ (यथा, मनुः। ५।११५॥
"द्रव्याणां चैव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम्"॥)

उत्प्लवा, स्त्री, (उत् + प्लु + अच् + टाप्।) नौका। इति शब्दरत्नावली॥

उत्फालः, पुं, (उत् + फल् + घञ्।) लम्फः॥
("तत्त्वज्ञं सकृतोत्फालः शक्तिदेवोऽथ साध्वसात्"। इति कथासरित्सागरे। १६ तरङ्गे॥)

उत्फुल्लः, त्रि, (उत्फलतीति। उत् + फल् + क्त। आदितश्चेतोऽभावः उत्फुल्लसंफुल्लयोरुपसंख्यानमिति निष्ठातस्य लः।) प्रफुल्लः। विकसितः। इत्यमरः॥ (यथा, किराते।
("उत्फुल्लकमलपरागजन्या-
दुद्भूतः सरसिजसम्भवः परागः"।
स्फीतः। वर्द्धितः। (यथा, विष्णुपुराणे।१।८।१३॥
"हर्षोत्फुल्लकपोलेन न चापि शिरसा धृता"।
आनन्दादिना विस्कारितः। यथा, रामायणे॥
"अवस्थितैः समीपस्थैस्त्रासादुत्फुल्ललोचनैः"।)
स्त्रीणां करणम्। उत्तानम्। इति मेदिनी॥

उत्सः, पुं, (उनत्ति जलेन। उन्द + उन्दिगुधिकुषिभ्यस्सेति सः। किदित्यनुवृत्तेर्नेत्वं लोपः।) प्रस्रवणम्। इत्यमरः॥ उनइ इति भाषा। यत्र स्थाने खुत्वा जलं गलति तत्र। इति भरतः॥ स्वाम्यादयस्तु यत्किञ्चिद्देन खनज्जलं यत्र स्थाने पतति निपत्य च बहुलीभवति तत्रेत्याहुः॥ तथा साक्षोऽप्याह।
"गिरेरुपरि निर्झरादिप्रभवजलसङ्घातः"।
"अजस्रं मन्दवेगेन खनज्जले। इति कोकाटः"॥

उत्सङ्गः, पुं, (उत्सजते मिलति यत्र। उत् + सञ्ज + घञ्।) क्रोडम्। इति जटाधरः॥
("उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणाम्"॥ इति मेघदूते ८६। तथा,विष्णुपुराणम्।१।११।५॥
"प्रणयेनागतं पुत्रम् उत्सङ्गारोहणोत्सुकम्"॥
पर्व्वतादीनां शिखरदेशः। सानुः॥ यथा, रघुः।
"शिलाविभङ्गैर्मृगराजशावा-
स्तुङ्गं नगोत्सङ्गमिवारुरोह"॥ ६। ३॥
सौधादीनामुपरिभागः। छाद् इति भाषा॥
"सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः"।
इति मेघदूते। २६। अभ्यन्तरभागः।
"वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः"।
इति कुमारे।१।१०। ऊर्द्धतलः। बहिर्भागः।
"दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः"।
इति रघुवंशे। ४। ७४। सङ्गमः॥ आलिङ्गनम्। विवाहः॥ व्रणाधोभागः। घोष इति भाषा॥ यथा सुश्रुते। सूत्रस्थाने।
"अभ्यन्तरमुत्सङ्गं कृत्वा भूयोऽपि विकरोति"।
गर्भः। यथा, महाभारते परीक्षिज्जन्मनि। १४। ६८। १८। १९॥
"आसीन्मम मतिः कृष्ण! पूर्णोत्सङ्गा जनार्दन"॥)

उत्सर्गः पुं, (उत् + सृज् + घञ्।) त्यागः। दानम्। वर्জ্জनम्। (यथा, कुमारे। ७। ३५॥
"श्रीलक्षणोत्सर्गविनीतवेषाः"।
"तयोत्सर्गकृततरगतिरुत्तरं वर्त्म तीर्णः"।
इति मेघदूते। २०॥ यथा, मनुः। ११। १९३।
"तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च"।)
सामान्यविधिः। इति हेमचन्द्रः॥ (यथा, कुमारे। २। २७।
"अपवादैरिवोत्सर्गाः कृतव्याकृत्तयः परैः"।)
साग्निकर्त्तव्यक्रियाविशेषः। इति तिथ्यादितत्त्वम्। अथ वैधोत्सर्गविधिः। स्नानसन्ध्याचमनानि कृत्वा नारायणनमस्कृत्वा संपूज्य देयद्रव्यं वामहस्तेन धृत्वा दक्षिणहस्तेन चिरभ्यर्च्य तद्द्रव्याधिपतिदेवतां सम्प्रदानञ्च अर्चयित्वा संकल्प्य कुशतिलजलत्यागपूर्ब्बकदानम्। इति स्मृतिः॥
(अपानवायोर्व्यापारः। मलमूत्रादिवर्জ্जनम्॥ उत्सृज्यते विण्मूत्रमनेनेति व्युत्पत्त्या पायिन्द्रियम्। यथा,—यथा, मनुः। १२। १२१।
"मनसोन्द्रं दिशः श्रोत्रे क्रान्तिं विष्णौ बले हरम्।
वाय्वग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्"।)

उत्सर्জनं, क्ली, (उत् + सृज् + ल्युट्।) उत्सर्गः। तत्पर्य्यायः। त्यागः १ विहापितं २ दानं ३ विसर्জ্জनं ५ विश्राणनं ६ वितरणं ७ स्पर्शनं ८ प्रतिपादनं ९ प्रादेशनं १० निर्व्वपणं ११ अपवर्জनं १२ अंहतिः १३। इत्यमरः॥ (साग्निकर्त्तव्यक्रियाविशेषः। (यथा, मनुः। ४। ९६।
"पुण्ये तु छन्दसां कुर्य्यात् बहिरुत्सर्জ্जनं द्विजः।
माघशुक्लस्य वा प्राप्ते पूर्ब्बार्द्धे प्रथमेऽहनि"॥)

उत्सर्पिणी, स्त्री, (उत् + सृप् + णिनि + ङीष्। उत्सर्पतीति वाक्ये वाग्घलिङ् एव।) जिनानां कालविशेषः। यथा,—हेमचन्द्रः॥
"कालो द्विविधोऽवसर्पिण्युत्सर्पिणीच भेदतः।
सागरकोटिकोटीनां विंशत्या स समाप्यते॥
अवसर्पिण्यां षड्वा उत्सर्पिण्यां तथैव विपरीताः।
एवं द्वादशभिरैर्विवर्त्तते कालचक्रमिदम्"॥
(उद्गमनशीला। यथा, शाकुन्तले ६ अङ्के।
"उत्सर्पिणी खलु महतां प्रार्थना"। इति॥)

उत्सर्य्या, स्त्री, (उत् + सृ + ण्यत्।) प्रजनकालप्राप्ता गौः। इति जटाधरः॥ गाभ लक्षणेर उपयुक्त गाइ इति भाषा।

उत्सवः, पुं, (उत् + सू + अच्।) नियताकादजनकव्यापारः। तत्पर्य्यायः। क्षणः २ उद्धवः ३ उद्धर्षः ४ महः ५। इत्यमरः॥ (यथा मनुः।३।५९।
"तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च"॥)
उत्सेकः। इच्छाप्रसवः। कोपः। इति मेदिनी॥ (उन्नतिः। अभ्युदयः।
"उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे"॥
इति हितोपदेशेः। १। १६४॥)

उत्सादनं, क्ली, (उत् + सद् + णिच् + ल्युट्।) समुल्लेखः। उद्वर्त्तनम्। इति मेदिनी॥
("उत्सादनञ्च गात्राणां स्नापनोच्छिष्टभोजने"। इति मनुः।२। २०९॥ विनाशः। उन्मूलनम्॥
"पूर्व्वं क्षत्रवधं कृत्वा गतमन्युर्गतज्वरः।
क्षत्रस्योत्सादनं भूयो न खल्वस्य चिकीर्षितम्"॥
इति रामायणम्। १। ७४। २१॥ औषधलेपनादिना व्रणस्य संशोधनम्। तथा,—सुश्रुते।
"अपामार्गोऽश्वगन्धा च तालपर्णी सुवर्चला।
उत्सादने प्रशस्यन्ते काकोल्यादिश्च यो गणः"॥
"उत्सादनात् भवेत् स्त्रीणां विशेषाल्लान्तिमद्दयोः।
प्रहर्षसौभाग्यमृजालाघवादिगुणान्वितम्"॥
इति चिकित्सितस्थाने २४ अध्याये सुश्रुतेनोक्तम्॥)

उत्सादितं, त्रि, (उत् + सद् + णिच् + क्त।) क्षतोत्सादनम्। उद्वर्त्तितम्। निर्म्मलीकृतशरीरम्॥ (यथा, महाभारते ७।८०। १०। प्रतिज्ञापर्व्वणि।
"उत्सादितः कषायेण बलवद्भिः सुधिक्षितैः।
आशुतः साधिवासेन जलेन सुसुगन्धिना"॥)

उत्सारकः, पुं, (उत्सार्य्यन्ते प्रभुद्वारतोऽनेन इति। उत् + सृ + णिच् + वुण्।) द्वारपालः। इति हेमचन्द्रः॥ उत्सारणकर्त्ता॥

उत्सारणं, क्ली, (उत् + सृ + णिच् + ल्युट्।) दूरीकरणम्। चालनम्। स्थानान्तरप्रापणम्॥

उत्साहः, पुं, (उत् + सह + घञ्।) उद्यमः। तत्पर्य्यायः। अध्यवसायः २। इत्यमरः॥ सूत्रम्। इति मेदिनी॥ कल्याणम्। भावविशेषः। इति शब्दरत्नावली॥ (यथा,साहित्यदर्पणे३य परिच्छेदे।
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्यष्टौ प्रोक्ताः शमोऽपि च"।)
ध्रुवकविशेषः। तल्लक्षणं यथा,—
"उत्साहः स्यात् रसे हास्ये ताले केन्दुकसंज्ञके।
वंशस्थद्विकरः पादैस्त्रयोदशमिताक्षरैः"॥
इति सङ्गीतदामोदरः॥

उत्साहवर्द्धनं, क्ली, (उत्साहं वर्द्धयति यत्। उत्साह + वध + ल्युट्।) उद्यमवृद्धिः। वीररसः। इत्यमरः॥

उत्सिक्तः, त्रि, (उत् + सिच् + क्तः।) उद्धतः। इति चिकाण्डशेषः॥ गर्व्वितः। वर्द्धितः। उद्रिक्तः। इति श्रीभागवतम्॥ (यथा, मनुः ८। ७१।
"बालदृद्धातुराणाञ्च साक्ष्येषु वदतां मृषा।
जानीयादस्थिरां वाचमुत्सिक्तमनसां तथा"।
"वीर्य्योत्सिक्तौ हि तौ पापौ कालपाशवशङ्गतौ"।
इति रामायणे १म काण्डे॥)

उत्सिच्यमानः, त्रि, (उत् + सिच् + शानच्।) उद्रिच्यमानः। वृद्धिमान्। इति श्रीभागवतम्॥

उत्सुकः, त्रि, (उत् उद्योगं सुवति सौति सुनोति वा। सु प्रसवैश्वर्य्ययोः। विचिसंज्ञापूर्ब्बकत्वात् गुणाभावः। क्विपि आगमशास्त्रस्यानित्यत्वात्तद्भावो वा। ततः संज्ञायां कन्॥ यद्वा उत् सुवति। षू प्रेरणे। मितद्वादित्वात् डुः। सत्सिति क्विप् वा। कनिकेश इति ह्रस्वः॥ उत् + सु + क्विप् + कन्।) वाञ्छितकर्म्मोद्यतः। तत्पर्य्यायः। इष्टार्थोद्युक्तः २। इत्यमरः॥ उत्कण्ठितः। इति हेमचन्द्रः॥ (यथा, रामायणे आदिकाण्डे।
("प्रेषयिष्यति राजा तु कुशलार्थं तवानघे।
ब्राह्मणान् नित्यशः पुत्रि मोत्सुका भूः कदाचन"॥
"वत्सोत्सुकापि स्तिमिता सपर्य्याम्"।
इति रघुवंशे २।२२॥)

उत्सूरः, पुं, (सूरं सूर्य्यमतिक्रान्तः।) दिनावसानम्। इति हेमचन्द्रः॥

उत्सृष्टः, त्रि, (उत् + सृज् + क्तः।) त्यक्तोत्सर्गः। तत्पर्य्यायः। त्यक्तः २ हीनः ३ विधुतः ४ समुज्झितः ५ धूतः ६। इत्यमरः॥ (यथा, याज्ञवल्क्यः।
"महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः"॥)

उत्सेचनं, क्ली, (उत् + सिच् + ल्युट्।) ऊर्द्धसेकः। उथलन उपचन इत्यादि भाषा॥

उत्सेधः, पुं, (उत् + सिध् + घञ्।) पर्ब्बतवृक्षादीनां दैर्घ्यम्।
("कूर्म्मस्त्रियोजनोत्सेधो दशयोजनमण्डलः"॥
इति महाभारते गजकूर्म्मयुद्धे। २९। ३१।)
उच्छ्रयः। (यथा, कुमारे ५। ८॥
"पयोधरोत्सेधविशीर्णसंहति"॥
उपरिभागः। यथा, कुमारे ५।२४।
"पयोधरोत्सेधनिपातचूर्णिताः"।)
शरीरम्। इत्यमरः॥ संहननम्। इति हेमचन्द्रः॥
("सोत्सेधमुच्चार्थशिरातनुत्वम्"।
इति भावप्रकाशे शोथाधिकारे॥
"उत्सेधं संहतं शोफं तमाऊर्निचयादतः"।
इति निदानस्थाने त्रयोदशाध्याये वाभटेनोक्तम्॥)

उद् व्य, (उ + क्विप् + तुक्। एधोदरादित्वात् साधुः।) विंशत्युपसर्गान्तर्गत उपसर्गविशेषः। अस्यार्थः। ऊर्द्धम्। उत्कर्षः। प्राकट्यम्। नैकट्यम्। इति दुर्गादासः॥ प्रकाशः। विभागः। प्राबल्यम्। अस्वास्थ्यम्। श्लक्ष्णिः। प्राधान्यम्। बन्धनम्। भावः। मोक्षः। लाभः। ऊर्द्धकर्म्म। इति मेदिनी॥

उदं, क्ली, (उद + अच्।) जलम्। इति शब्दरत्नावली।
("जगन्नद्यान्तोदधिसंङ्गवोदे
नारायणस्योदरनाभिनालात्"।
इति श्रीभागवते। तथा च गीतायाम्। २।४६।
"यावानर्थ उदपाने सर्व्वतः संप्लुतोदके"॥)

उदक्, [च्] व्य, (उद् + अञ्च् + अस्तातिः।) उत्तरदिग्देशकालाः। इति मेदिनी॥

उदकं, क्ली, (उनत्तीति। उन्दो क्लेदने + क्वन्। उदकमिति २।३६। उणादिसूत्रेण साधु।) जलम्। इत्यमरः॥
("अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते"।
इति माघः २।३४॥ तथा श्रीभगवद्गीता। २।४६॥
"यावानर्थ उदपाने सर्व्वतः संप्लुतोदके"।
"उदकस्योदः एकहलादौ। पाणिनिः। ६। ३।५६।
इति विकल्पः। उदकुम्भः। उदककुम्भः। यथा, भट्टिः। २। २०।
"तपःक्लृप्ताः शान्त्युदकुम्भहस्ताः"॥ उदशब्दोऽप्युदकपर्य्याय इति भाष्यटीका। उदकस्योदः संज्ञायामिति रक्षितः। यथा, कुमारे ५।२६।
"सहस्रराजीरुदवासतत्परा"॥ इति उज्ज्वलदत्तः।
वारिशब्देऽस्य विवरणं बोद्धव्यम्॥)

उदकपरीक्षा, स्त्री, (उदकस्य उदकेन वा परीक्षा।) दिव्यविशेषः। यथा।
अथोदकपरीक्षा।
पितामहः।
"तोयस्याथ प्रवक्ष्यामि विधिं धर्म्मं सनातनम्।
मण्डलं शुभ्यधूपाभ्यां कारयेत् सुविचक्षणः॥
शरान् संपूजयेद्भक्त्या वैणवञ्च धनुस्तथा"।
तत्र प्रथमतो वरुणं पूजयेत्। यथा नारदः।
"गन्धमाल्यैः सुरभिर्मधुक्षीरघृतादिभिः।
वरुणाय प्रकुर्व्वीत पूजामादौ समाहितः"॥
ततो धर्म्मावाहनादिसकलदेवतापूजाहोमसमन्तकप्रतिज्ञापत्रशिरोनिवेशान्तं कर्म्म कुर्य्यात्।
कात्यायनः।
"शरांस्त्वनायसान्यांस्तु प्रकुर्व्वीत विशुद्धये।
वेणुकाष्ठमयांश्चैव क्षौमा च सुदृढ़ं क्षिपेत्"॥
पितामहः।
"क्षौमा च क्षत्रियः कार्य्यस्तदलाभे ब्राह्मणोऽथवा॥
अक्रूरहृदयः शान्तः सोपवासस्तथा शुचिः॥
इषून् प्रक्षिपेद्धीमान् मारुते वाति वा भृशम्।
विषमे भूप्रदेशे च वृक्षस्याधुसमाकुले"॥*॥
नारदः।
"क्रूरं धनुः सप्तशतं मध्यमं षट्शतं मतम्।
मन्दं पञ्चशतं प्रोक्तमेष ज्ञेयो धनुर्विधिः"॥
अङ्गुलीनां समाधिकं शतं यस्य धनुषः परिमाणं तत् सप्तशतम्। एवं षट्शतादिकम्॥*॥
पितामहः।
"मध्यमेन तु चापेन प्रक्षिपेत्तु शरत्रयम्।
हस्तानान्तु शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः॥
तेषाञ्च प्रेषितानान्तु शराणां शास्त्रदर्शनात्।
मध्यमस्तु शरो ग्राह्यः पुरुषेण बलीयसा॥
शराणां पतनं ग्राह्यं सर्पणं परिवर्जयेत्।
सर्पन् सर्पन् शरो याति दूराद्दूरतरं यतः"॥
पतनं ग्राह्यमिति शरपतनस्थानपर्य्यन्तं गच्छेदित्यर्थः। तेन प्रसरणपक्षेऽपि पतनस्थानकशरग्रहणं ततश्च प्रथमतः पुरुषान्तरेण तत्स्थाने शरः आनेतव्यः॥*॥ नारदः।
"नदीषु नातिवेगासु तड़ागेषु सरःसु च।
ह्रदेषु स्थिरतोयेषु कुर्य्यात् पुंसां निमज्जनम्"॥
नातिवेगासु स्थितिविरोधिवेगशून्यासु॥*॥
विष्णुः। पङ्कशैवालदुष्टग्राहमत्स्यजलौकादिवर्জ্জिते तस्य नाभिमात्रजले मग्नस्यारागद्वेषिणः पुरुषस्यान्यस्योरू गृहीत्वा अभिमन्त्रिताभ्यः प्रविशेत्। तत्समकालञ्च नातिक्रूरमृदुना धनुषा पुरुषोऽपरः शरमोक्षं कुर्य्यादिति तस्य शोधयेत्यर्थः। अन्यथा तस्येति यथ स्यात्॥*॥
अन्यपुरुषस्य स्तम्भधारणमाह स्मृतिः।
"उदके प्राङ्मुखस्तिष्ठेदर्म्मस्थूणां प्रगृह्य च"॥*॥
प्राङ्विवाककर्त्तृकजलाभिमन्त्रणमाह पितामहः।
तोय त्वं प्राणिनां प्राणः रक्षेराचन्तु निर्मितम्।
शुद्धेश्च कारणं प्रोक्तं दिव्यानां देहिनां तथा॥
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे"॥*॥
शोधयितृकाभिमन्त्रणमाह याज्ञवल्क्यः।
"सत्येन माभिरक्षस्व वरुणेत्यभिशाप्य कम्।
नाभिमात्रोदस्थस्य गृहीत्वोरू जलं विशेत्"॥
मा मां। अभिशाप्य शपथं कारयित्वा। कं जलम्। विशेत् निमज्जेत्॥*॥ तोरणञ्च निमज्जनसमीपे समे स्थाने शोधयितृप्रमाणोच्छ्रितं कार्य्यम्। यथा नारदः।
"गत्वा तु तज्जलस्थानं तटे तोरणमुच्छ्रितम्।
कुर्व्वीत कर्णमात्रन्तु भूमिभागे समे शुचौ"॥*॥
शरमोक्षे विशेषमाहतुर्नारदहरहसौ।
"शरप्रक्षेपणस्थानादद्यवा जवसमन्वितः।
गच्छेत् परमया शक्त्या यत्रासौ मध्यमः शरः॥
मध्यमं शरमादाय पुरुषोऽन्यस्तथाविधः।
प्रत्यागच्छेत्तु वेगेन यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।
अन्तर्ज्जलगतं सम्यक् तदा शुद्धिं विनिर्दिशेत्॥
अन्यथा न विशुद्धः स्यादेकाङ्गस्यापि दर्शनात्।
स्थानादान्यत्र गमनादयस्मिन् पूर्व्वं निवेशयेत्"॥*॥
जवितौ विशेषयति नारदः।
"पश्चाशतो धावकानां यौ स्यातामधिकौ जवे।
तौ च तत्र नियोक्तव्यौ शरानयनकर्म्मणि"॥
एकाङ्गस्य दर्शनादिति कात्यायनाभिप्रायेण।
"शिरोमात्रन्तु दृश्येत न कर्णौ नापि नासिके।
अम्भु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत्"॥
इति विशेषाभिधानात्। कात्यायनः।
"निमज्योत्प्लवते यस्तु दृश्येत प्राणिना नरः।
पुनस्तत्र निमज्जेत दंशचिह्नविभावितः"॥
जलान्तर्गतमत्स्यजलौकादिना दष्टः समुत्प्लवते यदि तदा दष्टे दृष्टे पुनर्निमज्जनीय इत्यर्थः॥*॥
पितामहः।
"गन्तुश्चापि च कर्त्तुश्च समं गमनमज्जनम्।
गच्छेत् तोरणमूलान्तु शरस्थानं जवी नरः॥
तस्मिन् गते द्वितीयोऽपि वेगादादाय सायकम्।
गच्छेत्तोरणमूलन्तु यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।

अन्तर्ज्जलगतं सम्यक् ततः शुद्धिं विनिर्दिशेत्"॥ अत्र मज्जनसमकालगमनाभिधानात् शरमोक्षसमकालं गमनं शूलपाण्युक्तमयुक्तम्। मज्जनसमकालत्वित्रं मध्यमं शरमादायेत्यपरमुक्तमपि प्रमाणशून्यम्। ततश्च त्रिषु शरेषु मुक्तेषु एको वेगवान् मध्यमशरपतनस्थानं गत्वा तमादाय तत्रैव तिष्ठति। अन्यस्तु पुरुषो वेगवान् शरमोक्षस्थाने तोरणमूले तिष्ठति एवं स्थितयोस्तृतीयायां करतालिकायां प्राड्विवाकदत्तायां शोधो निमज्जति तत्समकालमेव तोरणमूलस्थितोऽपि द्रुततरं मध्यमशरपतनस्थानं गच्छति शरग्राही च तस्मिन् प्राप्ते द्रुततरं तोरणमूलं प्राप्यान्तर्ज्जलगतं यदि न पश्यति तदा शुद्धो भवतीति वक्तुमार्थः॥ *॥ *॥ तत्र प्रयोगः। उक्तलक्षणजलाशयनिकटे तथा तोरणं विधाय उक्तदेशे लक्ष्यं स्थापयित्वा तोरणसमीपे सशरं धनुः संपूज्य जलाशये वरुणमावाह्य पूजयित्वा तत्तीरे धर्म्मादींश्च देवान् हवनान्तमिष्ट्वा दक्षिणां दत्त्वा शोधस्य शिरसि प्रतिज्ञापत्रं बद्ध्वा प्राड्विवाको जलमभिमन्त्रयेत्। वक्ष्यमाणमन्त्रेण।

ॐ "तोयत्वं प्राणिनां प्राणः सृष्टेराद्यन्तु निर्म्मितम्। शुद्धेषु कारणं प्रोक्तं दयाणां देहिनां तथा॥ अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे"। इति॥ शोधस्तु ॐ "सत्येन माभिरक्षस्व वरुण" इत्यनेन जलमभिमन्त्र्य गृहीतशूलस्य शोधनाभिमानोदकावस्थितस्य बलीयसः प्राङ्मुखस्य पुरुषस्य समीपं जलमध्ये गच्छेत्। ततः शरेषु त्रिषु मुक्तेषु मध्यमशरपातस्थाने मध्यमशरं गृहीत्वा अविन्येकस्मिन् पुरुषे स्थिते अन्यस्मिंश्च तोरणमूलस्थिते प्राड्विवाकेन तालत्रये दत्ते शोधो गृहीतशूलाप्राङ्मुखपुरुषस्योरू गृहीत्वा निमज्जति तत्समकालमेव तोरणमूलस्थोऽपि मध्यमशरस्थानं द्रुतं गच्छति। ततः शरग्राही च तस्मिन् प्राप्ते द्रुतं तोरणमूलं प्राप्य जलान्तःस्थं यदि न पश्यति तदा शुद्धः। कर्णाद्यङ्गं विना शिरोमात्रदर्शनेऽपि शुद्धः। मज्जनस्थानादन्यत्रगमनेऽप्यशुद्धः। ततो दक्षिणादिकं दद्यात्"। इति दिव्यतत्त्वम्॥

उदकौर्य्यः, पुं, (उदेन जलेन कौर्य्यः व्याप्तः।) महाकरञ्जः। इति राजनिर्घण्टः॥

उदकीर्य्यः, पुं, (उदेन कीर्य्यः।) करञ्जविशेषः। इति रत्नमाला॥ डालकरमूचा डहरकरञ्ज इत्यादि भाषा। (अस्योक्तः पर्य्यायो भावप्रकाशे। "उदकीर्य्यस्तृतीयोऽन्यः षड्ग्रन्था हरिवारुणी। मर्कटी वायसी चापि करञ्जी करभञ्जिका"॥ गुणा अस्य करञ्जशब्दे ज्ञातव्याः॥)

उदक्या, स्त्री, (उदकं जलं शुद्धिस्नानार्थमर्हतीति। उदक + संज्ञायामिति यत्।) रजस्वला। ऋतुमती। इत्यमरः॥ (यथा, मनुः। ४।५७।
"नोदक्ययाभिभाषेत यज्ञं गच्छेन्नचार्तवः"॥)

उदगद्रिः, पुं, (उदगुत्तरे योऽद्रिः।) हिमालयपर्व्वतः। इति हेमचन्द्रः॥

उदगयनं, क्ली, (उदक् उत्तरस्यामयनं गमनम्।) उत्तरायणम्। इति स्मृतिः॥ (यथा, मनुः १।६७।
"दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः। अहस्तत्रोदगयनं रात्रिः स्याद् दक्षिणायनम्"॥
"तदादित्यस्योदगयनमादानञ्च वीव्हतून् शिशिरादीन् ग्रीष्मान्तान् व्यवस्येत्"॥ इति सूत्रस्थाने षष्ठेऽध्याये चरकेणोक्तम्। विस्तरश्चास्योत्तरायणशब्दे ज्ञेयः॥)

उदग्भूमः, पुं, (उदगुत्तरदिग्वत् प्रशस्ता भूमिर्यत्र। समासे + अच्।) सङ्भूमिः। उत्कृष्टस्थानम्; इति जटाधरः॥

उदग्रं, त्रि, (उद्गतमग्रं यस्य।) उच्छ्रितम्। उच्चम्। इत्यमरः॥ (विशालम्। महत्। दीर्घम्। भीमम्। "नयन् मधुलिहः स्वैत्यमुदग्रदशनांशुभिः"॥ इति माघः। २। २१। तथा, रघुः। २। ५३।
"च्युतात्किल त्रायत इत्युदग्रः क्षत्तस्य शब्दो भुवनेषु रूढः"। "अवन्तिनाथोऽयमुदग्रबाहुः"॥ इति च रघुः। ६। ३२॥)

उदग्रदन्, [त्] पुं, (उदग्रौ दन्तौ यस्य। अग्रान्तशुद्धशुभदृषवराहेभ्यश्चेति दन्तस्य दत्॥) उच्चदन्तहस्ती। दृहद्दन्तयुक्ते, त्रि। इति हेमचन्द्रः॥

उदग्रः, पुं, (उत् + अञ्च् + समुदोरजःपश्विति क्यप्। अधश्चपोरिति पर्य्युदासात् वीभावो न।) पशुप्रेरणम्। इत्यमरः॥

उदघ्नं, क्ली, (उत् + अघ + ल्युट्।) पिधानपात्रम्। इति हेमचन्द्रः॥ ढाकुनि इति भाषा। (यथा, शतपथब्राह्मणे। ४। ३। ५।
"प्रतिप्रस्थाता संखवावानयत्युन्नेता चमसेन वोदघ्नेन वा"।) ऊर्द्धक्षेपणम्॥

उदञ्चितं, त्रि, (उत् + अञ्च + क्त।) ऊर्द्धक्षिप्तम्। इति हेमचन्द्रः॥ ("उदञ्चिताच्छोऽञ्चितदक्षिणोरुः"। इति भट्टिः॥ (पूजितम्॥)

उदण्डपालः, पुं, (उदण्डस्य उद्भिन्नाण्डस्य पालो गमनं पलायनं यत्र। मत्स्यसर्पविशेषाणामण्डं उद्भिन्नं सत्पलायते इति प्रसिद्धिः।) मत्स्यविशेषः। सर्पभेदः। इति मेदिनी॥

उदधिः, पुं, (उदानि उदकानि वा धीयन्तेऽस्मिन्। उद + वा उदक + धा + कि।) समुद्रः। इत्यमरः॥ ("उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित्"। इति रघुः ८। ८॥ मेघः। घटः॥)

उदधिक्रमः, पुं, (उदधि + क्रम + विट्।) समुद्राक्रमणकर्त्ता। इति व्याकरणम्॥

उदधिमलः, पुं, (उदधेः समुद्रस्य मल इव॥) समुद्रफेनः। अस्य गुणाः। शीतलत्वम्। कषायत्वम्। अतिवान्तिकारित्वञ्च। इति राजवल्लभः॥

उदधिमेखला, स्त्री, (उदधिर्मेखलेव यस्याः॥) पृथिवी। इति महाभारतम्॥ ("चतुरुदधिमालामेखलायाः भुवो भर्त्ता"। इति कादम्बरीकथामुखे।)

उदन्तः, पुं, (उद्गतो निर्गतिः अन्तो यस्य।) वार्त्ता। ("कान्तोदन्तः सुहृदुपगतः सङ्गमात्किञ्चिदूनः"॥ इति मेघदूते १०१। तथा, रघुः। १२। ६६।
"श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः"
साधुः। इति मेदिनी॥ वृत्तियाजनम्। इति शब्दरत्नावली॥ (पाकवशात् प्राप्तान्ते, त्रि। यथा, शतपथब्राह्मणे। "घृतमसदिति तदाऽऽर्द्यर्द्धुदन्तं तर्हि भुञ्जयात् तद्वैनोदन्तं कुर्य्यादुप ह दहेत् यद्यदन्तं कुर्य्यादपजह्यि वै रेत उपदग्धं तस्मान्नोदन्तं कुर्य्यात्"॥)

उदन्तकः, पुं, (उदन्त + स्वार्थे कन्।) वृत्तान्तः। वार्त्ता। इति शब्दरत्नावली॥

उदन्तिका, स्त्री, (उत् + अन्त + णिच् + ण्वुल् + टाप्।) वृष्निः। इति शब्दरत्नावली॥

उदन्या, स्त्री, (उदन्यति उदकमेच्छा वा। सुपः आत्मनः क्यच्। अश्वनायोदन्येति ईत्वाभावः क्यचि उदकस्योदन्भावोऽपि निपात्यते। अप्रत्ययादित्यः।) पिपासा। इत्यमरः॥ (यथा छान्दोग्योपनिषदि। ६।८।५।। "अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति"॥)

उदन्वान्, [त्] पुं, (उदकानि सन्त्यत्र। उदक + मतुप्। उदन्वानुदधौ चेत्युदकस्य उदन्भावो निपातितः मतुपि।) समुद्रः। इत्यमरः॥ (यथा रघुः ४। ५२॥
"असङ्खविक्रमः सङ्घं दूरान्मुक्तमुदन्वता"।
ऋषिविशेषः। इति पाणिनिः। ८।२।१३॥)

उदप आघाते। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (परं-सकं-सेट्।) पञ्चमस्वरादिः। उदप्तः। इति दुर्गादासः॥ पानुबन्ध उदधातुरयं भ्रमवशात् उदपेति लिखितः॥

उदपानं, क्ली, पुं, (उदकं पीयतेऽस्मिन्। उदक + पा + अधिकरणे + ल्युट्, उदकस्य उदः।) कूपः। इत्यमरः॥
("तडागान्युदपानानि वाप्यः प्रस्रवणानि च"। इति मनुः २।४८। तथा, रामायणे २।८०।१२॥
"निर्जलेषु च देशेषु खनयामासुरुत्तमान्। उदपानान् बहुविधान् वेदिकापरिमण्डितान्"॥ भावे ल्युट्। जलपानम्। यथा गीतायाम्। २।४६
"यावानर्थ उदपाने सर्व्वतः संप्लुतोदके"॥)

उदयः, पुं, (उद्यन्ति ग्रहा यस्मात्। उत् + इ + अच्।) पूर्व्वपर्व्वतः। उदयाचलः। (भावे + अच्।) समुन्नतिः। इति मेदिनी॥ दीप्तिः। मङ्गलम्। इति शब्दरत्नावली॥ ग्रहाणामुद्गमः। तच्च सूर्य्यस्योदयविवरणं यथा, विष्णुपुराणे २ अंशे ८ अध्यायः॥ *॥
"उदयास्तमने चैव सर्व्वकालन्तु संमुखे। दिग्भागस्थेषु तथा मैत्रेय विदिग्भागे च॥१३॥ यैर्यत्र दृश्यते भागान् स तेषामुदयः स्मृतः। तिरोभावश्च यत्रैति तत्रैवास्तमनं रवेः॥१४॥ नैवास्तमनमर्कस्य नोदयः सर्व्वदा सतः। उदयास्तमनाख्यञ्च दर्शनादर्शनं रवेः॥१५॥ शक्रादीनां पुरे तिसृन् स्पशत्येष पुरत्रयम्। विकर्णौ द्वौ विकर्णस्थस्त्रीन् कोणान् द्वे पुरे तथा॥१६॥ उदितो वर्द्धमानाभिरामध्याह्नात्तपन् रविः। ततः परं क्रसन्तीभिर्गोभिरस्तं निगच्छति॥१७॥ उदयास्तमनाभ्याञ्च स्मृते पूर्व्वापरे दिशौ।

यावत् पुरस्तात्तपति तावत् एष्ठेऽथ पार्श्वयोः ॥१८॥
ऋतेऽमरगिरेर्मेरोरुपरि ब्रह्मणः सभाम् ।
ये ये मरीचयोऽर्कस्य प्रयान्ति ब्रह्मणः सभाम् ॥१९॥
ते ते निरस्तास्तद्भासा प्रतीपमुपयान्ति वै ।
तस्मादुत्तरस्यां वै दिवाराचिः सदैव हि ।
सर्व्वेषां द्वीपवर्षाणां मेरुरुत्तरतो यतः" ॥२०॥
उदयास्तमने च सर्व्वकालं भवतः । ते च परस्परं संमुखे समानसूत्रस्थे भवतः । तत्र हेतुमाह । यर्यचेति । रवेरुदयास्तमयौ सर्व्वकालं मध्याह्न एव सतोऽर्कस्य न स्त एव अतो रवेरुदयास्तमयत्वं दर्शनादर्शनमात्रमेव ॥ दर्शनादर्शनयोरवधिमाह । शक्रादीनामिति । इन्द्राद्यन्यतमस्य पुरे मध्याह्ने तिष्ठंस्तदेकं पुरं अभितः पुरद्वयं चेत्येवं पुरद्वयं तदन्तरालस्थौ द्वौ च विकर्णौ कोणौ उदयाद्यवस्थाभिः स्तृणति स्वरश्मिभिर्भासयति । तथा विकर्णस्थः अग्न्याद्यन्यतमकोणे मध्याह्ने स्थितस्तं कोणं अभितः स्थितं कोणद्वयं चेत्येवं तीन् कोणान् तन्मध्यवर्त्तिदे च पुरे तथैवोदयाद्यवस्थाभिः स्तृणति । भूवलयस्यार्द्धे प्रतपन् दृश्यते तावदहः । अर्द्धं तु न दृश्यते तावद्रात्रिरित्यर्थः । तथाहि ऐन्द्रे पुरे मध्याह्ने यदा तिष्ठति तदा सौम्यपुरस्थानामस्तमयः । ऐशकोणस्थानां द्वतीयो यामः । अग्निकोणस्थानां प्रथमः । याम्ये स्थितानामुदयः । एवं यदा याम्ये मध्याह्ने तिष्ठति तदा ऐन्द्रे अस्तमयः । अग्निकोणे द्वतीयो यामः । नैर्ऋतिकोणे प्रथमो यामः । वारुणे उदयः । यदा च वारुणे मध्याह्नः तदा याम्ये अस्तमयः । नैर्ऋतिकोणे द्वतीयो यामः । वायव्ये प्रथमः । सौम्ये उदयः । यदा सौम्ये मध्याह्नस्तदा वारुणे अस्तमयः । वायव्ये द्वतीयो यामः । ऐशकोणे प्रथमः । ऐन्द्रे उदयः । एवं अग्निकोणे यदा मध्याह्नस्तदा ऐशकोणे अस्तमयः । इन्द्रपुरे द्वतीयो यामः । यमपुरे प्रथमः । नैर्ऋतिकोणे उदयः । इत्यादि योज्यम् । एवं मेरोः सर्व्वतः परिभ्रमन् सूर्य्योऽर्द्धभूवलयं प्रकाशयन् दर्शनादर्शनाद्यपेक्षया अहोरात्रव्यवस्थाकारणमुक्तं भवति ॥ सन्निधानव्यवधानकृतमेव रश्मीनां वृद्धिह्रासतीव्रत्वमन्दत्वादिकमपीत्याह । उदित इति गोभिः रश्मिभिः ॥ दिग्विभागोऽप्युदयास्तमयनिमित्तएवेत्याह उदयेति । यत्र यस्योदेति सा तस्य पूर्व्वा दिक् । यत्रास्तमेति सा अपरा प्रतीची । तथा श्रुतिः । "तस्मादसावादित्यः सर्व्वाः प्रजाः प्रत्युदेति । तस्मात् सर्व्वा एवान्यतः प्रत्युदगादिति" ॥ पुरस्तादुदयं सूर्य्यं पश्यतश्च दक्षिण-वाम-पार्श्वभागौ दक्षिणोत्तरे दिशाविति दर्शयन् रश्मिविस्तारावधिमाह । यावदिति । चतुर्दिक्षु लोकालोकाचलपर्य्यन्तं तपतीत्यर्थः ॥ मेरौ तु विशेषमाह । ऋते इति । ब्रह्मसभावर्जं मेरोरुपर्य्यपि सर्व्वतस्तपति न तु ब्रह्मसभां भासयति । तत्र हेतुमाह । ये ये मरीचय इति ॥ मेरोः सर्व्वतोऽपि विशेषतान्तरमाह । तस्मादिति । यतो यस्मात् सर्व्वेषां द्वीपानां वर्षाणाञ्च मेरुरुत्तरत एव स्थितः तस्मान्मेरोरुत्तरस्यां दिशि सदा दिवापि अन्येषां दिनेऽपि नित्यं रात्रिरेव । अयं भावः । मेरुं प्रदक्षिणीकुर्व्वन्तं सूर्य्यं ये यत्र पश्यन्ति सैव तेषां प्राची । तेषाञ्च वामभाग एव मेरुः । अतः सर्व्वेषां सर्व्वदा मेरुरुत्तरत एव । दक्षिणभागे च लोकालोकाचलः । तस्मादुत्तरस्यां दिशि सदा रात्रिः । दक्षिणस्याञ्च दिशि सदा दिनमिति । यद्वा । भारतादिवर्षस्थानां सम्मुखे सूर्य्यमुद्यन्तं पश्यतामुत्तरस्यां दिशि वामभागे मेरोरेकतः सदा दिनम् । अन्यतश्च सदा रात्रिः । दक्षिणभागे तु सदा दिनमेवेत्यर्थादुक्तं भवति" ॥ इति तट्टीकायां श्रीधरस्वामी ॥

उदयनं, क्ली (उत् + इ + ल्युट्) उदयः । इति मेदिनी ॥ (यथा ऋग्वेदे १।४८।७।
"एषा युक्ते परावतः सूर्य्यस्योदयनादधि" ॥)

उदयनः, पुं, अगस्त्यमुनिः । वत्सराजः । इति मेदिनी ॥ ("प्राप्यावन्तीनुदयनकथाकोविदान् ग्रामवृद्धान्" । इति मेघदूते । ३१ ।) उदयनाचार्य्यः । स च कुसुमाञ्जलिग्रन्थकर्त्ता ॥

उदरं, क्ली, (उत् ऋणातीति । "उदिदृणातेरजौ पूर्व्वपदान्यलोपश्च" । उत् + दॄ + अच् । अन्त्यलोपश्च ।) नाभिस्तनयोर्मध्यभागः । पेट इति भाषा । तत्पर्य्यायः । पिचिण्डः २ कुक्षी ३ जठरः ४ तुन्दम् ५ । इत्यमरः ॥ युद्धम् । इति मेदिनी ॥ ("उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्" । इति मनुः । ८ । १२५ ॥)

उदरः, पुं, (उदरं अश्नात्यनेनास्येति । अर्त्ति आदित्वात् दच् ।) उदरस्थरोगविशेषः । उदरी इति भाषा । यथा । अथोदराधिकारः । तत्रोदरस्य निमित्तमाह ।
"रोगाः सर्व्वेऽपि मन्देऽग्नौ सुतरामुदराणि च ।
अजीर्णान्मलिनैस्तान्यर्जायन्ते मलसञ्चयात्" ॥
अग्नौ मन्दे सर्व्वे रोगा जायन्ते किन्तु सुतरामतिप्रयेन उदराणि जायन्ते । अपरानपि हेतूनाह । अजीर्णान्मलिनैस्तान्यैः अत्यन्तदोषजनकैः मलसञ्चयात् मलानां दोषाणां पुरीषस्य चातिवृद्धेः । अत्रोदरशब्देनोदरस्थो रोग उच्यते । यत आह ।
"तात्स्थ्यात्तद्धर्म्मताभ्याच्च तत्समीपतयापि च ।
तत्साहचर्य्यात् शब्दानां वृत्तिरुक्ता चतुर्व्विधा" ॥*॥
संप्राप्तिमाह ।
"रुद्धाः खेदाम्बुवाहीनि दोषाः स्रोतांसि सञ्चिताः ।
प्राणाग्न्यपानान् संदुष्य जनयन्त्युदरं नृणाम् ॥*॥
सामान्यरूपमाह ।
"आध्मानं गमनेऽशक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता ।
श्लेष्मः सदनमङ्गानां सङ्गो वातपुरीषयोः ।
दाहस्तन्द्रा च सर्व्वेषु जठरेषु भवन्ति हि ॥*॥
सन्निकृष्टनिदानपूर्ब्बिकां संख्यामाह ।
"एषक्दोषैः समस्तैश्च क्षीहवद्धृतोदकैः ।
सम्भवन्त्युदराण्यष्टौ तेषां लिङ्गं एथक् पृथग् ॥*॥
वातोदरस्य लक्षणमाह ।
"तत्र वातोदरे श्लेष्मः माणिपाभ्राभिकुक्षिषु ।
कुक्षिपार्श्वोदरकटीपृष्ठरुक् पर्व्वभेदनम् ॥
शुष्ककासोऽङ्गमर्द्दश्च गुरुता मलसंग्रहः ।
श्यावारुणत्वगादित्यमकस्माच्चांसवद्धिमत् ॥
ततोदभेदमुदरं तनुक्षाग्निरातनम् ।
आध्मानादतिवच्छब्दमाहतं प्रकरोति च ॥
वायुश्चात्र सरुक् शब्दो विचरेत् सर्व्वतोगतिः" ॥
पाणिपादित्यत्र अञ्चनान्तः पाच्छब्द आर्षत्वात् । कुक्षिपार्श्वोदरेत्यत्र कुक्षिशब्द उदरस्य वामदक्षिणभागहृदयवाची । सर्व्वतोगतिः सकलकोष्ठे सञ्चरन् ॥*॥ पैत्तिकमाह ।
"पित्तोदरे ज्वरो मूर्च्छा दाहस्तृट् कटुकास्यता ।
भ्रमोऽतिसारः पीतत्वं त्वगादावुदरं हरित् ।
पीतताम्रशिरानद्धं सस्वेदं सोष्म दह्यते ।
धूमायते मृदुस्पर्शं क्षिप्रपाकं प्रदूयते" ॥
हरित् शाकवर्णम् । सोष्म अन्तस्तापयुक्तम् । दह्यते बहिर्दाहयुक्तम् । धूमायते धूममिवोद्गमति । क्षिप्रपाकं क्षिप्रपाकात् जलोदरतां याति । प्रदूयते व्यथते ॥*॥ कफोदरमाह ।
"श्लेष्मोदरेऽङ्गसदनं स्वापश्वयथुगौरवम् ।
तन्द्रोत्क्लेशोऽरुचिः श्वासः कासः शुक्लत्वगादिता ।
उदरं स्तिमितं स्निग्धं शुक्लराजीततं महत् ।
चिराभिवृद्धिकठिनं श्लीतस्पर्शं गुरु स्थिरम्" ॥
स्वापः स्पर्शाज्ञता । गौरवमङ्गानाम् । तन्द्रा निद्राबाहुल्यम् । उत्क्लेशो हृल्लासः । शुक्लराजीततं शुक्लशिराव्याप्तम् ॥*॥ सन्निपातोदरमाह ।
"स्त्रियोऽन्नपानं नखलोममूत्र-
विड्वार्त्तवैर्युक्तमसाधुदत्तैः ।
यक्षै प्रयच्छन्त्यरयो गरांश्च
दुष्टाम्बुदूषीविषसेवनाच्च ॥
तेनाशु रक्तं कुपिताश्च दोषाः
कुर्य्युः सघोरं जठरं त्रिलिङ्गम् ।
तच्छीतवाते भृशदुर्दिने च
विशेषतः कुप्यति दह्यते च ॥
स चातुरो मूर्च्छति हि प्रसक्तं
पाण्डुः क्षुधः शुष्यति क्षामया च ।
दूष्योदरं कीर्त्तितमेतदेव
श्लीहोदरं कीर्त्यतो निबोध" ॥
स्त्रिय इत्यविवेकिसन्निहितजनोपलक्षणम् । ताश्च स्वसौभाग्यमिच्छन्त्यः । विट् मांस्यादीनाम् । आर्त्तवं रजः । अरयो वा । गरान् संयोगजानि विषाणि । दुष्टाम्बु सविषमत्यन्तदूषणपर्णादियुतं प्रतिनच्च ॥ दूषीविषं विषमेवाप्राद्युपघातेन स्वल्पप्रभावम् । यत उक्तम् ।
"जीर्णं विषघ्नौषधिभिर्हतं वा
दावाग्निवातातपशोषितच्च ।
स्वभावतो वा गुणविप्रयुक्तं
विषं हि दूषीविषतामुपैति" ॥
गुणविप्रयुक्तं गुणवियुक्तं तत् । उदरं श्लीहतादिषु कुप्यति । दूषीविषस्य कोपात् । मूर्च्छातिविषयोगात् । प्रसक्तं निरन्तरं यतदेव सन्निपातोदरम् । तन्वान्तरे दूष्योदरं कीर्त्तितम् । अथवा परस्परं दूषयन्तीति दोषा एव दूष्याः तैः कृतमुदरं दूष्यो-

दरम् ॥ * ॥ प्लीहोदरमाह ।
"वर्द्धते प्लीहवृद्ध्या यद्दक्षात् प्लीहोदरं हि तत् ।
तद्दक्षे वर्द्धते पार्श्वे निमित्तं तस्य तत्र यत् ॥
प्रवृद्धप्लीहलिङ्गानि यान्युक्तानि भिषग्वरैः ।
प्लीहोदरेऽपि दृश्यन्ते तानि सर्व्वाणि देहिनाम्" ॥
प्लीहोदरस्यैव भेदो यकृद्दाल्युदरं न पुनरधिकमित्याह । "सव्यान्यपार्श्वे यकृति प्रवृद्धे ज्ञेयं यकृद्दाल्युदरं तदेव" । यकृद्दालयति दोषैर्भेदयतीति यकृद्दाल्युदरं तदेव उदरमेव ॥ * ॥ बद्धगुदमाह ।
"यस्यान्नमन्नैरुपलेपिभिर्व्वा,
बालाश्मभिर्व्वा पिहितं यथावत् ।
सङ्घीयते यस्य मलः सदोषः,
शनैः शनैः शुष्करवच्च नाड्याम् ॥
निरुध्यते यस्य गुदे पुरीषं
निरेति कृच्छ्रादपि चाल्पमल्पम् ।
वृद्ध्याभिमध्ये परिवृद्धिमेति
तस्योदरं बद्धगुदं वदन्ति" ॥
उपलेपिभिः पिच्छिलैरन्नैः शाकशालुकादिभिः । बालाश्मभिः बालुकाभिः कर्क्करैर्व्वा बालैः केशैः अश्मभिः पाषाणैर्व्वा । यथावत् यस्य यत् सम्भवति । मलः पुरीषम् । शुष्करवत् संमार्জ্জनीक्षिप्तहव्यधूल्यादिवत् । "शुष्करोऽवकरः पुमान्" इत्यमरः । शुष्करो घृण इति लोके । नाड्यां अन्त्रनाड्याम् । वृद्ध्याभिमध्ये वृद्ध्याभ्योर्मध्ये ॥ * ॥ क्षतोदरमाह ।
"शूल्यं यथान्नोपहतं यदन्नं
भुक्तं भिनत्त्यागतमन्यथा वा ।
तस्मात् क्षतोऽन्त्रात् सलिलप्रकाशः
स्रावः स्रवेद्वै गुदतस्तु भूयः ॥
नाभेरधस्तोदरमेति वृद्धिं
निरुध्यते दाल्यति चातिमात्रम् ।
एतत् परिस्राव्युदरं प्रदिष्टं
दकोदरं कीर्त्तयतो निबोध" ॥
शूल्यं कर्क्करादि । अन्नोपहतं अन्ननिहितम् । भुक्तं यदन्नं भिनत्ति । तथा अन्यथा आगतं भोजनं विना आगतं शूलादि । तदपि यदन्नं भिनत्ति एतदुपलक्षणम् । स्तम्भागमत्यशनं वा यदन्नं भिनत्ति । यत उक्तं चरके ।
"शूल्कराद्यागकाष्ठास्थिकरटैरन्नसंयुतः ।
भिद्येतान्नं यदा भुक्तं स्तम्भयात्यशनेन वा" ॥ इति । तस्मात् भिन्नादन्नात् । गुदतस्तु भूयः अन्नात् संक्षुभ्य पुनर्गुदतः स्रवेदित्यर्थः । दाल्यति विदीर्य्यतइव । पदसिद्धिरार्षत्वात् । एतत् क्षतोदरं तन्नान्तरे परिस्राव्युदरं प्रदिष्टम् ॥ * ॥
उदकोदरमाह ।
"यत् स्नेहपीतोऽप्यनुवासितो वा,
वान्तो विरिक्तोऽप्यथवा निरूढः ।
पिबेज्जलं शीतलमाशु तस्य
स्रोतांसि दुष्यन्ति हि तद्वहानि ॥
स्नेहोपलिप्तेष्वथवापि तेषु-
दकोदरं पूर्ब्ववदभ्युपैति ।
स्निग्धं महत्तत् परिवृत्तनाभि
समाततं पूर्णमिवाम्बुना च" ॥
यथा दृतिः क्षुभ्यति कम्पते च
शब्दायते चापि दकोदरं तत्" ॥
स्नेहपीतः पीतइत्यत्राध्यवसितादित्वात् कर्त्तरि क्तः पश्चात् स्नेहं पीतः स्नेहपीत इति तत्पुरुषः । तेन स्नेहं पीतवानित्यर्थः । अनुवासितो वा गृहीतानुवासनवस्तिः । वान्तः अत्रापि पूर्ब्ववत् कर्त्तरि क्तः तेन वान्तवानित्यर्थः । एवं विरिक्तः विरिक्तवान् । तथा निरूढः गृहीतनिरूढवस्तिः । स चेदासु शीतलं जलं पिबेत् । तस्य तद्वहानि जलवहानि स्रोतांसि दुष्यन्ति स्वकर्म्मदुष्टानि भवन्ति जलवहेषु स्रोतःसु दुष्टेषु सत्सु अन्नरसे उपस्नेहन्यायेन बहिर्भूते दकोदरमायाति । अथवा तेषु उदकवहेषु स्रोतःसु स्नेहोपलिप्तेषु पूर्ब्ववत् यथापूर्ब्वम् । अन्नरसे उपस्नेहन्यायेन बहिर्निःसृते दकोदरमायाति । तथा जलेऽपि बहिर्निःसृते दकोदरमायाति । तत् उदरम् । परिवृत्तनाभि गम्भीरनाभि । समाततं स्तब्धम् । यथा दृतिः चर्म्ममयं जलाहरणपात्रम् । क्षुभ्यति अन्तर्जलदोलनेन सञ्चलति कम्पते बहिः शब्दायते कम्यमानं सत् शब्दं करोति ॥ * ॥
साध्यासाध्यलक्षणमाह ।
"जन्मनैवोदरं सर्व्वं प्रायः कृच्छ्रतमं मतम् ।
बलिनस्तदजातास्तु यत्नसाध्यं नवोत्थितम्" ॥
बलिनः अजातास्तु नवोत्थितञ्च यत्नसाध्यमित्यन्वयः ।
"पश्चाद्दुष्टगुदं तृष्णं सर्व्वं जातोदकं तथा ।
प्रायो भवत्यभावाय छिद्रान्त्रञ्च दकोदरम्" ॥
छिद्रान्त्रं शस्त्रादिना छिद्रमन्त्रं यस्य तदुदरं अभावाय भवति ॥ * ॥
जातोदकस्योदरस्य लक्षणमाह । चरकः ।
"पयःपूर्णा दृतिरिव कोष्ठे शब्दकरं मृदु ।
अप्रत्यक्षशिराःशूलं नितान्तमुदरं महत् ॥
आलस्यमाम्यवैरस्यं मूत्रं बद्धं सकृच्छ्रतः ।
जातोदकस्य लिङ्गं स्यान्मन्दोऽग्निः पाण्डुतापि च ॥
शूलाद्यं कुटिलोपस्थमुपक्लिन्नतनुत्वचम् ।
बलशोणितमांसाग्निपरिक्षीणञ्च वर्জ্জयेत्" ॥
शूलाद्यस्थाने शूनाद्यमिति च पाठः । कुटिलोपस्थं वक्रमेहनम् । उपक्लिन्नतनुत्वचं । उपरि आर्द्रा तन्वी त्वगस्य । तं उदरिणम् ।
"पार्श्वभङ्गान्नविद्वेषश्लीपालीसारपीड़ितम् ।
विरिक्तं चाप्युदरिणं पूर्य्यमाणं विवर्জ্জयेत्" ॥
विरिक्तमपि पूर्य्यमाणं पूर्य्यमाणोदरं उदरिणं विवर्জ্জयेत् ॥ *॥
अथोदरस्य चिकित्सा ।
"एरण्डतैलं दशमूलमिश्रं
गोमूत्रयुक्तस्त्रिफलारसो वा ।
निहन्ति वातोदरशोथशूलान्
क्वाथः समूत्रो दशमूलजश्च ॥
कुष्ठं दन्ती यवक्षारः पाठा चित्रवरा वचा ।
शुण्ठी चोष्णाम्बुना पीता वातोदररुजापहा" ॥
कुष्ठादिचूर्णम् ॥ * ॥
"लशुनस्य तुलामेकां जलद्रोणे विपाचयेत् ।
त्रिकटु त्रिफला दन्ती हिङ्ग सैन्धवचित्रकम् ॥
देवदारु वचा कुष्ठं मधु स्निग्धः पुनर्नवा ।
सौवर्चलं विड्लवणं दीप्यको गजपिप्पली ॥
एतेषां पलिकान् भागान् क्षिप्तः षट्पलानि च ।
पिष्ट्वा कषायेणैतेन तैलं मृदग्निना पचेत् ॥
तत्पिबेत् प्रातरुत्थाय यथाग्निबलमात्रया ।
निहन्ति सकलान् रोगान् उदराणि विशेषतः ॥
मूत्रकृच्छ्रमुदावर्त्तमन्त्रवृद्धिगुदक्रमोन् ।
पार्श्वकुक्षिभवं शूलमामशूलमरोचकम् ॥
यकृदष्ठीलिकानाहान् प्लीहानं चाङ्गवेदनाम् ।
मासमात्रेण नश्यन्ति अपीतिर्व्वातजा गदाः" ॥
इति रसोनतैलम् ॥ * ॥
"पित्तोदरेषु बलिनं पूर्ब्वमेव विरेचयेत् ।
दुर्ब्बलं क्षुद्यवाग्वादौ श्रोधयेत् सौम्यवस्तिना ।
संजातबलकायाग्निं पुनः स्निग्धं विरेचयेत् ॥
पयसा च त्रिवृत्कल्कैस्त्रिवृत्कस्य प्रवृतेन च ॥
पिप्पल्यादिगणेनाज्यं पाचितं पाययेद्भिषक् ।
नरं पथ्यभुजं नित्यं कफोदरनिवृत्तये" ॥ * ॥
"नागरत्रिफलाकल्कैर्दध्यम्बुपरिपेषितैः ।
पाचितं तैलमाज्यञ्च पिबेत् सर्व्वोदरापहम्" ॥
इति नागरादितैलं घृतञ्च ॥ * ॥
"शूलियष्टिकगोधूमयवनीवारभोजनम् ।
निरूहो रेचनं श्रेष्ठं सर्व्वेषु जठरेषु च ॥
आनूपमोदनं मांसं शाकं पिण्डकृतं तिलाः ।
व्यायामश्च दिवास्वप्नपानपानानि वर्জ্জयेत् ॥
तथोष्णवर्गोष्णानि विदाहीनि गुरूणि च ।
नाद्यादन्नानि जठरे तोयपानञ्च वर्জ্জयेत् ॥
उदराणां मलाढ्यत्वाद्बद्धगुदः शोधनं हितम् ।
क्षीरेणैरण्डतैलं वा पिबेन्मूत्रेण वासकृत्" ॥ * ॥
"वातोदरी पिबेत्तक्रं पिप्पलीलवणान्वितम् ।
शर्क्करामस्तिचोपेतं स्वादु पित्तोदरी पिबेत् ॥
यवानीहपुषाजाजीव्योषयुक्तं कफोदरी ।
सन्निपातोदरी युक्तं चिकदुक्षारसैन्धवैः ॥
यवानी हपुषा धान्यं त्रिफला चोषकुञ्चिका ।
कारवी पिप्पलीमूलमजगन्धा शटी वचा ॥
शृताङ्गा जीरको व्योषं स्वर्জ্জीक्षारौ च चित्रकम् ।
द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम् ॥
विड्भिश्च समांसानि दत्त्वा भागत्रयं भवेत् ।
त्रिवृद्विपाले द्विगुणे सातला स्याच्चतुर्गुणा ॥
एष नारायणो नाम्ना चूर्णो रोगगणापहः ।
एनं प्राप्य निवर्त्तन्ते रोगा विष्णुमिवासुराः ॥
तक्रेणोदरिभिः पेयो गुल्मिभिर्वादराम्बुना ।
आनद्धवाते सुरया वातरोगे प्रसन्नया ॥
दधिमण्डेन विड्बन्धे दाड़िमाम्बुभिरर्शसे ।
परिकर्त्तषु दृत्वाम्लैरुष्णाम्बुभिर्जीर्णके ॥
भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे ।
हृद्रोगे ग्रहणीरोगे कुष्ठे मन्देऽनले ज्वरे ॥
दंष्ट्राविषे मूलविषे सगरे क्षत्रिमे विषे ।
यथार्हं स्निग्धकोष्णेन पेयमेतद्विरेचनम्" ॥
उपकुञ्चिका कारवी च वृहज्जीरकः । यस्य भगरैला नाम इति लोके । तस्य भागद्वयं ग्राह्यं पुनरुक्तेः । स्वर्জ्जीक्षारो चोक इति लोके । विशाला इन्द्रवारुणी । सातला सीऊहभेदः सातलेत्येव

प्रसिद्धा । परिकर्त्तो गुदे परिकर्त्तनवत् पीड़ा इति नारायणचूर्णम् ॥ * ॥

"सुकच्चीरदन्तीत्रिफलाविड़ङ्ग-
सिंहीत्रिवृद्विचकसूर्य्यकल्कैः ।
हृतं विपक्वं कुड़वप्रमाणं
लोयेन तस्यात्तसमेन कर्षम् ॥
पीतोष्णमम्भोऽनुपिबेद्विरेके
पेयं रसं वा प्रपिबेद्विधिज्ञः ।
नाराचमेनं जठरामयाना-
मुक्तं प्रयुक्तं प्रवदन्ति सन्तः" ॥

इति नाराचघृतम् ॥ * ॥

"वचाखड्याः कर्षमात्रायाः कल्कं दध्यादिवेष्टितम् ।
निगिलेद्दारिणा नित्यमुदरव्याधिशान्तये" ॥

वचाखड़ी शूरणपत्नो माणभेदः । वचाखड़ी इति लोके ॥ * ॥

"पुनर्नवादारुनिशासविश्वा-
पटोलपथ्याः पिचुमर्द्ददारु ।
सनागरच्छिन्नरुहेति सर्व्वैः
कृतः कषायो विधिना विधिज्ञैः ॥
गोमूत्रयुक् गुग्गुलुना च युक्तः
पीतः प्रभाते नियतं नराणाम् ।
सर्व्वाङ्गशोथोदरपार्श्वशूल-
श्वासान्वितं पाण्डुगदं निहन्ति" ॥

पुनर्नवादिक्वाथः । इत्युदराधिकारः । इति भावप्रकाशः ॥ ("उदरं स्तिमितं गुरु" इति वैद्यकमाधवकरधृतरुग्विनिश्चयग्रन्थः । अस्य शब्दस्य रोगविशेषवाच्यत्वेऽन्याविशेषवाच्यविवक्षितरुदररोगशब्दे ज्ञातव्या ॥)

उदरग्रन्थिः, पुं, (उदरस्य ग्रन्थिरिव ।) गुल्मरोगः । इति हेमचन्द्रः ॥

उदरत्राणं, क्ली, (उदरस्य त्राणं यस्मात् ।) उदरबन्धवस्त्रादि । तत्पर्य्यायः । नागोदं २ । इति हेमचन्द्रः ॥

उदरपिशाचः, त्रि, (उदराय तत्पूरणाय पिशाच इव ।) सर्व्वान्नखादकः । तत्पर्य्यायः । सर्व्वान्नीनः २ सर्व्वान्नभक्षकः ३ । इति हेमचन्द्रः ॥

उदरम्भरिः, त्रि, (उदरं बिभर्त्तीति । उदर + भृ + इन् + मुम् च । निपातसिद्धः ।) स्वोदरमात्रपूरकः । तत्पर्य्यायः । कुक्षिम्भरिः २ आत्मम्भरिः ३ । इति हेमचन्द्रः ॥

उदरव्याधिः, पुं, (उदरस्य व्याधिः ।) उदररोगविशेषः । यथा,—गारुड़े १९४ अध्यायः ॥

"कदलीयवक्षारन्तु पानीयेन प्रसाधितम् ।
तदास्वादनान्नश्यन्ति उदरव्याधयोऽखिलाः" ॥

उदररोगः, पुं, (उदरस्य रोगः ।) जठरव्याधिविशेषः । उदरी इति भाषा ॥

("सिद्धविद्याधराकीर्णे कैलासे नन्दनोपमे ।
तप्यमानं तपस्तीव्रं साक्षाद्धर्म्ममिव स्थितम् ॥
आयुर्व्वेदविदां श्रेष्ठं भिषग्विद्याप्रवर्त्तकम् ।
पुनर्व्वसुं जितात्मानमग्निवेशोऽभ्यवादयत् ॥
भगवन्नुदरैर्दुःखैर्दृश्यन्ते क्षुद्दिता नराः ।
शुष्कवक्त्राः क्षुधैर्गात्रैराध्मातोदरकुक्षयः ॥
प्रणष्टाग्निबलाहाराः सर्व्वचेष्टासु नीश्वराः ।
दीनाः प्रतिक्रियाभावाज्जहतोऽसूनयत्रवत् ॥
तेषामायतनं रुद्ध्वा प्रायूपाक्षुतिभेषजान् ।
यथावज्ज्ञातुमिच्छामि गुरुणा सम्यगीरितम् ॥
सर्व्वभूतहितायर्षिः शिष्येणैवं प्रचोदितः ।
सर्व्वभूतहितं वाक्यं व्याहर्त्तुमुपचक्रमे" ॥

अस्य सनिदानं सम्प्राप्तिकलक्षणं यथा,—

"अग्निदोषान्मनुष्याणां रोगसङ्घाः पृथग्विधाः ।
मलरुद्धा प्रवर्त्तन्ते विशेषेणोदराणि तु ॥
मन्देऽग्नौ मलिनैर्भुक्तैरपाकाद्दोषसञ्चयः ।
प्राणान्यपानान् सन्दूष्य मार्गान् बद्धोत्तरोत्तरान्॥
त्वङ्मांसान्तरमागम्य कुक्षिमाध्मापयन् भृशम् ।
जनयत्युदरं तस्य हेतुं शृणु सलक्षणम्" ॥

सामान्यहेतवो यथा,—

"अत्युष्णलवणाच्चारविदाह्यम्लरसाशनात् ।
मिथ्यासंसर्ज्जनाद्भूत्वविरुद्धाशुचिभोजनात् ॥
क्षीहार्शोग्रहणीदोषकर्षणात् कर्म्मविभ्रमात् ।
क्लिष्टानामप्रतीकाराद्दौर्ब्बल्याद्वेगविधारणात् ॥
स्रोतसां दूषणादामात् संक्षोभादतिपूरणात् ।
अर्शोवातग्रहच्छर्द्योदोदन्तस्फुटनभेदनात् ॥
अतिसञ्चितदोषाणां पापं कर्म्म च कुर्व्वताम् ।
उदराण्युपजायन्ते मन्दाग्नीनां विशेषतः" ॥

प्राग्रूपं यथा,—

"क्षुत्क्षामाः खादतिस्निग्धगुर्व्वन्नं पच्यतेऽचिरात् ।
भुक्तं विदाह्यते सर्व्वं जीर्णाजीर्णं न वेत्ति च ॥
सहते नातिसौहित्यमीषच्छोफश्च पादयोः ।
पृष्ठश्रोणिकटीसन्धिपार्श्वेष्वल्पेऽपि चायासे श्वासमृच्छति ॥
पुरीषनिचयो वृद्धिरुदावर्त्तश्चता च रूक् ।
वस्तिसन्धौ रुगाध्मानं वर्द्धते पाच्यतेऽपि च ॥
आतन्यते च जठरमपि लब्धल्पभोजनात् ।
राजीजन्म वलीनाञ्च इति लिङ्गं भविष्यताम्" ॥

सम्प्राप्तिर्यथा,—

"रुद्धा खेदाम्बुवाहानि दोषाः स्रोतांसि सञ्चिताः ।
प्राणापानान् हि सन्दूष्य जनयन्त्युदरं नृणाम्" ॥

सामान्यलक्षणं यथा,—

"कुक्षेराध्मानमाटोपः श्लोफः पादकरस्य च ।
मन्दोऽग्निः श्लक्ष्णगात्रत्वं कार्श्यञ्चोदरलक्षणम्" ॥

वातजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"रूक्षाल्पभोजनायासवेगोदावर्त्तकर्षणैः ।
वायुः प्रकुपितः कुक्षिहृदस्थिगुदमार्गगः ॥
हृत्वाग्निं कफमुद्धूय तेन रुद्धगतिस्तथा ।
आचिनोत्युदरं जन्तोस्त्वङ्मांसान्तरमाश्रितः" ॥

अस्य रूपाणि ।

"कुक्षि-पार्श्व-पाद-हृषण-श्वयथूदर-विपाटनम् अनियतौ च वृद्धिक्षयौ कुक्षि-पार्श्वशूलोदावर्त्ताङ्गमर्द्द-पर्व्वभेद-मुष्ककास-कार्श्य-दौर्ब्बल्यारोचक-विपाका अधोगुरुत्वं वातवर्च्चमूत्रसङ्गः श्यावारुणत्वं नखनयनवदनत्वङ्मूत्रवर्च्चसामपि चोदरं तन्वसितराजीशिरासन्ततमाहतमाध्मातदृतिशब्दवद्भवति । वायुश्चोर्द्धमधस्तिर्य्यक् च सशूलशब्दश्चरत्येतद्वातोदरं विद्यात्" ॥

पित्तजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"कटूम्ललवणात्युष्णतीक्ष्णाग्न्यातपसेवनैः ।
विदाह्यध्यशनाजीर्णैश्चाशु पित्तं समाचितम् ॥
प्राप्यानिलकफौ रुद्धा मार्गमुन्मार्गमाश्रितम् ।
निहत्यामाग्नये वह्निं जनयत्युदरं ततः" ॥

अस्य रूपाणि ।

"दाहज्वर-तृष्णा-मूर्च्छातिसार-भ्रमाः कटुकास्यत्वं हरितहारिद्रत्वं नख-नयन-वदन-त्वङ्-मूत्र-वर्च्चसामपि चोदरं नील-पीत-हारिद्र-हरित-ताम्रराजीशिरावनद्धं दह्यात् दूषयते धूप्यते रूप्यायते खिद्यते क्लिद्यते मृद्वल्पशं क्षिप्रपाकञ्च भवत्येतत् पित्तोदरं विद्यात्" ॥

श्लेष्मजनितस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"अव्यायामदिवास्वप्नप्रस्वादुस्निग्धपिच्छिलैः ।
दधिदुग्धोदकानूपमांसैश्चाप्युपसेवितैः ॥
क्लेदेन श्लेष्मणा स्रोतः स्वाहृतेष्वाहृतोऽनिलः ।
तमेव पीड़यन् कुर्य्यादुदरं बहिरन्तगः" ॥

अस्य रूपाणि ।

"गौरवारोचकाविपाकाङ्गमर्द्द-सुप्ति-पाणि-पाद-मुष्कोरुश्लोपोत्क्लेश-निद्रा-श्वास-कासाः शुक्लत्वञ्च नख-नयन-वदन-त्वङ्मूत्रवर्च्चसामपि चोदरं शुक्लराजीशिरासन्ततं गुरुस्तिमितस्थिरं कठिनञ्च भवत्येतत् श्लेष्मोदरं विद्यात्" ॥

त्रिदोषजस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,

"दुर्ब्बलाग्नेरपथ्यान्नविरोधिगुरुभोजनात् ।
स्त्रीदत्तैश्च रजोरोम-विण्मूत्रास्थिनखादिभिः ॥
विषैश्च मन्दैर्वाताद्याः कुपिताः सञ्चितास्त्रयः ।
अग्नेः कोष्ठे प्रकुर्व्वन्तो जनयन्त्युदरं नृणाम्" ॥

अस्य रूपाणि ।

"सर्व्वेषामेव दोषाणां समस्तानि लिङ्गान्युपलभ्यन्ते वर्णाश्च नखादिषूदरमपि नानावर्णराजीशिरासन्ततं भवत्येतत् सन्निपातोदरं विद्यात्" ॥

यकृत्प्लीहसमुद्भवस्य सनिदानसम्प्राप्तिकं लक्षणं यथा,—

"असितस्यातिसङ्क्षोभाद्यानयानाभिघेट्टितैः ।
अतिव्यवायभाराध्ववमनव्याधिकर्षणैः ॥
वामपार्श्वाश्रितः प्लीहाच्युतः स्थानात् प्रवर्द्धते ।
प्लीहितं वा रसादिभ्यो विद्रधन्तं विवर्द्धयेत्" ॥

इति तस्य प्लीहाकठिनोच्छ्रितेवादौ वर्द्धमानकच्छपसंस्थान उपलभ्यते सचोपेक्षितः क्रमेण कुक्षिं जठरमन्यधिष्ठानञ्च परिक्षिपन्नुदरमभिनिवर्त्तयति" ॥

अस्य रूपाणि यथा,—

"दौर्ब्बल्यारोचकाविपाकवर्च्चोमूत्रयहृतमःपिपासाङ्गमर्द्द-च्छर्द्दि-मूर्च्छाक्लमाद-कास-श्वास-मृदुज्वरानाहाग्निसादकार्श्यास्यवैरस्य-पर्व्वभेद-कोष्ठ-वातशूलान्यपि चोदरमरुणवर्णं विवर्णं वा नील-हरित-हारिद्र-राजिमद्भवत्येवमेव यकृदपि दक्षिणपार्श्वस्थं कुर्य्यात्तुल्यहेतुलिङ्गौषधत्वात्तस्य प्लीहजठरवबोध इत्येतत् यकृत्प्लीहोदरं विद्यात्" ॥

बद्धगुदोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,
"पक्वाशयैः सहाग्नेन भुक्तैर्बद्धायने गुदे।
उदावर्त्तेस्तथाशैोभिरान्त्रसंमूर्च्छनेन वा॥
अपानो मार्गसंरोधाद्वातमग्निं कुपितोऽनिलः।
वर्च्चःपित्तकफान् रुद्धा जनयत्युदरं ततः"॥

अस्य रूपाणि।

"हृष्णा-दाह-ज्वर-मुख-तालु-ग्रीवोरुसाद-कास-श्वास-दौर्ब्बल्यारोचकाविपाक-वर्च्चोमूत्र-सङ्गाध्मान-च्छर्द्दि-क्लथ्य-शिरोहृन्नाभि-गुदशूलान्यपि चोदरं मूढ़वातं स्थिरमरुणं नीलराजिशिरावनद्धं सराजिकं वा प्रायो नाभ्युपरि गोपुच्छवदभिनिवर्त्तत इत्येतद् बद्धगुदोदरं विद्यात्"॥

छिद्रोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,
"शर्करा-दृढकाष्ठास्थि-कण्टकैरन्नसंयुतैः।
भिद्येतान्त्रं यदा भुक्तैर्ज्जम्भयात्यशनेन वा।
इयात् पाकरसस्तेभ्यश्छिद्रेभ्यः प्रस्रवद्बहिः।
पूरयन् गुदमन्त्रञ्च जनयत्युदरं ततः"॥

अस्य रूपाणि।

"इति तदधोनाभ्याः प्रायोऽभिनिवर्त्तमानमुदकोदरस्य च यथाबलञ्च दोषाणां रूपाणि दर्शयत्यपि चातुरः सलोहित-नील-पीत-पिच्छिल-कुणपगन्धामवर्च्च उपवेशते छिक्का-श्वास-कास-हृष्णाप्रमेहा-रोचकाविपाक-दौर्ब्बल्यपरीतश्च भवत्येतत् छिद्रोदरं विद्यात्"॥

प्लीहोदरस्य निदानपूर्व्विका सम्प्राप्तिर्यथा,—
"स्नेहपीतस्य मन्दाग्नेः क्षीणस्यातिक्षुधस्य वा।
अत्यम्बुपानान्नेऽौ मारुतः श्लोष्मि संस्थितः॥
स्रोतःसु रुद्धमार्गेषु कफश्चोदकमूर्च्छितः।
वर्द्धयेतां तदेवाम्बु स्वस्थानादुदराय तौ"॥

अस्य रूपाणि।

"तस्य रूपाण्यन्नकाङ्क्षापिपासा-गुदस्राव-शूल-श्वास-कास-दौर्ब्बल्याण्यपि चोदरं नानावर्णराजिभिरासन्ततमुदकपूर्णदृतिच्छोभसंस्पर्शं भवत्येतदुदकोदरं विद्यात्"॥

एषां साध्यत्वासाध्यत्वादिलक्षणं यथा,—
"तत्राचिरोत्पन्नमनुपद्रवमनुदकप्राप्तमुदरं त्वरमाणचिकित्सेदुपेक्षितानां क्षेपां दोषाः स्वस्थानादपक्वा अपरिपाकादबलीभूताः सन्धीन् स्रोतांसि चोपलेदयन् खेदञ्च वाङ्गेषु स्रोतःसु प्रतिहतगतिस्तिर्य्यगवतिष्ठमानस्तदेवोदकमाप्याययति"।

तत्र पिच्छोत्क्लेदौ मण्डलमुदरं गुरुस्तिमितमाकोचितमग्रव्यं मृदुस्पर्शमपगतराजीकमाक्रान्तं नाभ्यां सर्पतीति। ततोऽनन्तरं उदकप्रादुर्भावः॥

तस्य रूपाणि कुक्षेरतिमात्रवृद्धिः शिरान्तर्धानगमनमुदकपूर्णदृतिसमच्छोभसंस्पर्शत्वञ्च।

तदातुरमुपद्रवाः स्पृशन्ति हृद्दृतीसार-तमक-हृष्णा-श्वास-कास-हिक्का-दौर्ब्बल्य-पार्श्वशूलारुचि-स्वरभेद-मूत्रसङ्गादयस्तथाविधमचिकित्स्यं विद्यादिति॥ भवति चात्र,—
"वातात् पित्तात् कफात् क्षीणः सन्निपातात्तथोदकात्।
परस्परं क्षुद्रतरमुदरं भिषगादिशेत्॥
पक्वाद्बद्धगुदन्तूर्द्ध सर्व्वं जातोदकन्तथा।
प्रायो भवत्यभावाय छिद्रान्त्वाशोदरं हृणाम्"॥
"श्वयथुः सर्व्वमर्म्मोत्थः श्वासो हिक्कारुचिः सदृट्।
मूर्च्छाच्छर्द्दातिसारश्च निहन्त्युदरिणं नरम्"॥

जलक्षयमाह।

"अशोधमरणाभासं सगुदं नातिभारिकम्।
सदा गुड़गुड़ायान्तं शिराजालगवाच्चितम्॥
नाभिं विश्लथ्य पायौ तु वेगं कृत्वा प्रधावति॥
हृन्नाभिवंक्षणकटीगुदप्रत्येकशूलिनः॥
कर्कशं स्रजतो वातं नातिमन्दे च पावके॥
मूत्रेऽल्पे संहते दोषे लालया विरसे मुखे।
अजातोदकमित्येतैर्लिङ्गैर्विद्याय तत्त्वतः"॥

अतःपरं वातजादिभेदेन चिकित्साविधानं यथा,
"उपक्रामेद्भिषग्दोषबलकालविशेषवित्।
वातोदरे बलवतः पूर्व्वं स्नेहैरुपाचरेत्॥
स्निग्धाय स्वेदिताङ्गाय दद्यात् स्नेहविरेचनम्॥
हृते दोषे परिस्रानं वेष्टयेद्वाससोदरम्॥
तथास्यानवकाशत्वाद्वायुर्नाप्नापयेत् पुनः।
दोषातिमात्रोपचयात् स्रोतसां सन्निरोधनात्॥
सम्भवन्युदराण्येवं अतो नित्यं विशोधयेत्।
शुद्धं संसृज्य च क्षीरं बलार्थं पाययेत्तु तम्॥
प्रागुत्क्लेशाग्निवर्च्चश्च बले लब्धे क्रमात् पयः।
यूषैरसर्व्वा मन्दास्त्रलवणैः रोधितानलम्॥
सोदावर्त्तं पुनः स्निग्धं स्निग्धमास्थापयेन्नरम्।
स्फुरणाक्षेपसन्यस्थिपार्श्वएष्ठिकास्थिषु।
दीप्ताग्निबद्धविड्वातं रूक्षमप्यनुवासयेत्॥
तीक्ष्णाधोभागयुक्तः स्यान्निरूहो दाशमूलिकः।
वातघ्नास्त्रघृतैरङ्गतिलतैलानुवासनः॥
अविरेच्यन्तु यं विद्याद्दुर्ब्बलं स्थविरं शिशुम्।
सुकुमारं प्रकृत्याल्पदोषं वाधोल्वणानिलम्॥
तं भिषक् शमनैः सर्पिर्यूषमांसरसौदनैः।
वस्त्यभ्यङ्गानुवासञ्च क्षीरैश्चोपाचरेद्बुधः॥१॥
पित्तोदरे तु बलिनं पूर्व्वमेव विरेचयेत्।
दुर्ब्बलत्वनुवास्यादौ शोधयेत् क्षीरवस्तिना॥
सञ्जातबलकालाग्निं पुनः स्निग्धं विरेचयेत्।
पयसा सचिरत्लक्ष्णेनोरुबूकघृतेन वा॥
घृतलाजायमाणाभ्यां घृतेनारग्वधेन वा।
सकफे वा समूत्रेण सवाते तिक्तसर्पिषा॥
पुनः क्षीरप्रयोगञ्च वस्तिकर्म्मविरेचनम्।
क्रमेण ध्रुवमातिष्ठन् युक्तः पित्तोदरं जयेत्॥
स्निग्धं स्निग्धं विशुद्धन्तु कफोदरिणमातुरम्।
संसर्ज्जयेत् कटुक्षारयुक्तैरन्नैः कफापहैः॥
गोमूत्रारिष्टपानेश्च चूर्णायस्कृतिभिस्तथा।
सक्षारैस्तैलपानेश्च समयेत्तु कफोदरम्॥
सन्निपातोदरे सर्व्वा यथोक्ताः कारयेत् क्रियाः।
सोपद्रवन्तु निर्हेतुं प्रत्याख्येयं विजानता॥
उदावर्त्तगदानाहैर्दाहमोहहृदग्रहैः।
गौरवारुचिकाठिन्यैस्तानिलादीन् यथाक्रमम्॥
लिङ्गैः क्षीणोदरान् दृष्ट्वा रक्तं वापि स्रवत्यधः।
चिकित्सां संप्रकुर्व्वीत यथादोषं यथाबलम्॥
स्नेहं स्नेहं विरेकञ्च निरूहमनुवासनम्।
समीक्ष्य कारयेद्धीमान् वामे वा व्यधयेत्सिराम्॥
षट्पलं वा पिबेत्सर्पिः पिप्पलीर्व्वा प्रयोजयेत्।
सगुड़ामभयां वापि क्षारारिष्टगणांस्तथा॥
रोहितकलतानान्तु काण्डेका साभया जले।
मूत्रे वा घृतमेतच्च सप्तरात्रस्थितं पिबेत्॥
कामलागुल्ममेहार्शःप्लीहसर्व्वोदरक्रिमीन्।
तद्वन्याज्जाङ्गलरसैर्जीर्णे स्याच्चाच भोजनम्॥
अग्निकर्म्म च कुर्व्वीत भिषग्वातकफोल्वणे।
पैत्तिके जीवनीयानि सर्पींषि क्षीरवस्तयः॥
रक्तावसेकः संशुद्धिः क्षीरपानञ्च शस्यते।
यूषैर्मांसरसैश्चापि दीपनीयसमायुतैः॥
लघून्यन्नानि संस्थ्य भजेत् क्षीहोदरी नरः॥
स्निग्धाय बद्धोदरिणे मूत्रतीक्ष्णौषधान्वितम्।
सतैललवणं दद्यान्निरूहं सानुवासनम्॥
परिस्रंसीनि चान्नानि तीक्ष्णञ्चैव विरेचनम्।
उदावर्त्तहरं कर्म्म कार्य्यं वातघ्नमेव च॥
छिद्रोदरमृते स्वेदात् श्लेष्मोदरवदाचरेत्॥
जातं जातं जलं साध्यमेवं तत्प्रातयेद्भिषक्"॥

अरिष्टलक्षणं यथा।

"हृष्णाकासज्वरार्त्तन्तु क्षीणमांसाग्निभोजनम्।
वर्ज्जयेत् श्वासिनं तद्वत् शूलिनं दुर्ब्बलेन्द्रियम्"॥
"द्रवेभ्यस्तोदकादिभ्यो नित्यच्छेदनपूर्व्वशः।
सर्व्वमेवोदरं प्रायो दोषसंघातजं मतम्।
तस्मात्त्रिदोषशमनीं क्रियां सर्व्वेषु कारयेत्"॥

पथ्यनियमो यथा।

"दोषैः कुक्षौ हि संपूर्णे वह्निर्मन्दत्वमृच्छति।
तस्माद्धोज्यानि योज्यानि दीपनानि लघूनि च॥
रक्तशालीन् यवान् मुद्गान् जाङ्गलांश्च मृगद्विजान्।
पयोमूत्रासवारिष्टान्मधुशुक्तीर्धृतं सुराम्॥
यवागूमोदनं वापि यूषैरद्याद्रसैरपि।
मन्दाम्लस्नेहकटुभिर्यच्च मूलोपसाधितैः"॥

अपथ्यानि यथा।

"क्षीरकानूपजं मांसं शाकं पिण्याकतैलान्।
व्यायामाध्वदिवास्वप्नं यानयानञ्च वर्ज्जयेत्॥
तथोष्णलवणाम्लानि विदाहीनि गुरूणि च।
नाद्यादन्नानि जठरी तोयपानञ्च वर्ज्जयेत्"॥

वातजादिभेदेन तक्रपाननियमो यथा।

"वातोदरी पिबेत्तक्रं पिप्पलीलवणान्वितम्।
शर्करामधुकोपेतं स्वादु पित्तोदरी पिबेत्॥
यमानीसैन्धवाजाजीव्योषयुक्तं कफोदरी।
पिबेन्मधुयुतं तक्रं व्यक्ताम्लं नातिपेलवम्॥
मधुतैलवचाशुण्ठीशताह्वाकुष्ठसैन्धवैः।
युक्तं क्षीहोदराघातं सद्योहन्ति दकोदरी॥
बद्धोदरी तु हृत्पार्श्वबस्त्यानाहाजीर्णसैन्धवैः।
पिबेच्छिद्रोदरी तक्रं पिप्पलीक्षौद्रसंयुतम्॥
"देवदारुपलाशार्कहस्तिपिप्पलीशिग्रुकैः।
साश्वगन्धैः सगोमूत्रैः प्रदिह्यादुदरं समैः॥
पलाशं कर्त्तृणं राखा तदत्यक्षावसेचयेत्।
मूत्राण्यष्टावुदरिणां सेके पाने च योजयेत्॥
रूक्षाणां बद्धवातानां तथा संशोधनार्थिनाम्।
दीपनीयानि सर्पींषि जठरघ्नानि वक्ष्यते॥
पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः।
सक्षारैर्द्वपलिकैर्द्विःप्रस्थं सर्पिषः पचेत्॥
कल्कैर्द्विपञ्चमूलस्य तुलार्द्धस्य रसेन च॥

उद

दधिमण्डातकोपेतं तत्सर्पिर्जठरापहम् ।
श्वयथुं वातविष्टम्भं गुल्मार्शांसि च नाशयेत्" ॥
इति पञ्चकोलघृतम् ॥ * ॥

"चतुर्गुणे जले मूत्रे द्विगुणे चित्रकात्मजे ।
कल्के सिद्धं घृतप्रस्थं सक्षारं जठरी पिबेत्" ॥
इति चित्रकघृतम् ॥

"पटोलमूलरजनीविड़ङ्गत्रिफलात्वचम् ।
काम्पिल्यकौ नीलिनी च त्रिवृता चेति चूर्णयेत् ॥
षडाद्यान् कार्षिकान्तांस्त्रीन् द्वित्रिचतुर्गुणान् ।
क्षत्वा चूर्णमतोमुष्टिं गवां मूत्रेण वा पिबेत् ॥
विरिक्तो मृदु भुञ्जीत भोजनं जाङ्गलैः रसैः ।
मण्डं पेयाञ्च पीत्वा च सव्योषं षड्गुणं पयः ॥
घृतं पिबेत्ततश्चूर्णं पिबेदेव पुनः पुनः ।
हन्ति सर्व्वोदराण्येतच्चूर्णं जातोदकान्यपि ।
कामलां पाण्डुरोगञ्च श्वयथुञ्चापकर्षति" ॥
इति पटोलाद्यं चूर्णम् ॥ * ॥

"नीलिनीं निचुलं व्योषं द्वौ क्षारौ लवणानि च ।
चित्रकञ्च पिबेच्चूर्णं सर्पिषोदरगुल्मनुत्" ॥
इति नीलिन्याद्यं चूर्णम् ॥ * ॥

"भावितानां गवां मूत्रे बस्तिकानान्तु तण्डुलैः ।
यवागूं पयसा सिद्धां प्रकामं भोजयेन्नरम् ॥
पिबेदिक्षुरसञ्चानु जठराणां निवृत्तये ।
स्वं स्वं स्थानं व्रजन्त्येषां तथा पित्तकफानिलाः ॥
क्रियातीते चिरोषे च जठरे चाप्रशाम्यति ।
ज्ञातीन् सहृदो दारान् ब्राह्मणान् नृपतीन् गुरून्॥
अनुज्ञाप्य भिषक् कर्म्म विदध्यात्संशयं ब्रुवन् ।
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत् ॥
एवमाख्याय तस्येदमनुज्ञातः प्रयोजयेत् ।
पानभोजनसंयुक्तं विषमस्मै प्रदापयेत् ॥
यस्मिन् वा कुपितः सर्पो विच्छेज्जेद्धि फले विषम् ।
तेनास्य दोषसंघातः स्थिरो लीनो विमार्गगः ॥
विषेणाशु प्रमाथित्वादाशुभिन्नः प्रवर्त्तते ।
विषेण हृतदोषन्तं शीताम्बुपरिषेचितम् ॥
पाययेत भिषग्दुग्धं यवागूं वा यथाबलम् ।
त्रिवृन्मण्डूकपर्ण्यौ च शाकं सयववास्तुकम् ।
भक्षयेत्कालशाकं वा खरसोदकसाधितम् ॥
निरस्तलवणस्नेहं स्विन्नास्विन्नमनन्नभुक् ।
मासमेकं ततस्त्वेव क्षपितः खरसं पिबेत्" ॥
"हृदन्तु शल्यहर्त्तॄणां कर्म्म स्याद्व्रणकर्म्मणां ।
मात्रायुक्तेन शस्त्रेण पाटयेन्मतिमान् भिषक् ॥
विपाट्यान्त्रन्ततः पश्चाद्दोषं बद्धन्ततान्त्रयोः ।
सर्पिर्भाभ्यज्य केशादीनवमृज्य विमोक्षयेत् ॥
मूर्च्छनात् यच्च संमूढमन्त्रं यच्च विमोक्षयेत् ।
छिद्राण्यन्त्रस्य तु स्थूलैर्दग्ध्वा पिपीलिकैः ॥
बद्धगुः संग्रहीतानि मत्वा क्षिप्त्वा पिपीलिकान् ।
प्रतियोगैः प्रवेश्यान्त्रं बहिः सीव्येदनन्ततः ।
तथा जातोदकं सर्व्वमुदरं व्यधयेद्भिषक् ॥
वामपार्श्वे त्वधो नाभेर्नाड़ीं दत्त्वा च नाशयेत् ।
निःस्राव्य च विमृज्यैतद्देहयेद्वासशोदरम् ॥
तथा बस्तिविरेकाद्यैर्ज्ञानं सर्व्वञ्च वेक्षयेत् ।
निःस्नेहे लङ्घितः पेयामस्नेहलवणां पिबेत् ॥
अतः परञ्च षण्मासान् क्षीरवृत्तिर्भवेन्नरः ।

उद

त्रीन् मासान् पयसा पेयां पिबेत्रीन्वापि भोजयेत्॥
श्यामाकङ्गोरदूष्यं वा क्षीरेण लघुभोजनः ।
नरः संवत्सरेणैवं जयेत् प्राप्तं जलोदरम् ॥
प्रयोगाणाञ्च सर्व्वेषामनुक्षीरं प्रयोजयेत् ।
दोषानुबन्धरक्षार्थं बलरक्षार्थमेव च ॥
प्रयोगपचिताङ्गानां हितं क्षुदरिणां पयः ।
सर्व्वधातुक्षयार्त्तानां देवानामप्यतं यथा" ॥
इति चरके चिकित्सितस्थानेऽष्टादशोऽध्यायः ।

"धन्वन्तरिर्धर्म्मभृतां वरिष्ठो
राजर्षिरिन्द्रप्रतिमो बभूव ।
ब्रह्मर्षिपुत्रं विनयोपपन्नं
शिष्यं शुभं सुश्रुतमन्वशात्सः ॥
पृथक्समस्तैरपि चेह दोषैः
क्षीहोदरं बद्धगुदं तथैव ।
आगन्तुकं सप्तममष्टमञ्च
दकोदरञ्चेति वदन्ति तानि ॥
सुदुर्ब्बलाग्नेरहिताशनस्य
संशुष्कपूयव्रणनिषेवणाद्वा ।
खेहादिमिथ्याचरणाच्च जन्तो-
र्दृद्धिं गताः कोष्ठमभिप्रपन्नाः ॥
गुल्माक्तृतिव्यञ्जितलक्षणानि
कुर्व्वन्ति घोराण्युदराणि दोषाः ।
कोष्ठादुपस्नेहवदन्नसारो
निःसृत्य दुष्टोऽनिलवेगनुन्नः ॥
त्वचः समुन्नम्य शनैः समन्ता-
द्विवर्द्धमानो जठरं करोति" ॥ * ॥

अस्य पूर्व्वरूपं यथा,—

"तत्पूर्व्वरूपं बलवर्णकाङ्गा-
बलीविनाशो जठरे हि राज्यः ।
जीर्णापरिज्ञानविदाहवत्वो
वस्तौ रुजः पादगतस्य शोफः" ॥

वातजादिभेदेन लक्षणानि यथा,—

"संग्रह्य पार्श्वोदरपृष्ठनाभी-
र्यद्वर्द्धते क्षामशिरावनद्धम् ।
सशूलमानाहवदुग्रशब्दम्
ततोदभेदं पवनात्मकन्तत् ॥१॥
यत्तोयपट्टाब्जरदाङ्कयुक्तं
पीतं शिरा यत्र भवन्ति पीताः ।
पीताक्षिविण्मूत्रनखाननस्य
पित्तोत्तरं तत्त्वचिराभिवृद्धि ॥२॥
यच्छीतलं शुक्लशिरावनद्धं
श्लक्ष्णं स्थिरं शुक्लनखाननस्य ।
स्निग्धं महच्छ्लेष्मयुतं ससादं
कफोदरं तच्च चिराभिवृद्धि ॥३॥
विदाह्यभिष्यन्दिरतस्य जन्तोः
प्रदुष्टमत्यर्थमरक्तपक्त्र ।
क्षीहाभिवृद्धिं सततं करोति
क्षीहोदरन्तत् प्रवदन्ति तज्ज्ञाः॥
वामे च पार्श्वे परिवृद्धिमेति
विक्षेपतः सीदति चातुरोऽत्र ।
मन्दज्वराग्निः कफपित्तलिङ्गै-
रुपद्रुतः क्षीणबलोऽतिपाण्डुः॥

उद

सत्येतरस्मिन् यद्यति प्रदुष्टे
ज्ञेयं यकृद्दाल्युदरं तदेव" ॥ ४ ॥

दूष्युदरं बद्धगुदोदरं परिस्राव्युदरं दकोदरञ्चेति चतुर्णामुदराणां सुश्रुतीयं लक्षणादिकं यत् भावप्रकाशे संग्रहीतं तन्नावधार्य्यविधम् ॥

अस्य चिकित्सा यथा ।

"अष्टावुदराणि पूर्व्वमुद्दिष्टानि तेष्वसाध्यं बद्धगुदं परिस्रावि चावग्रहणानि क्षुद्रसाध्यानि सर्व्वाण्येव च प्रत्याख्यायोपक्रमेत । तेष्वाद्यचतुर्व्वर्गो भेषजसाध्यः । कालप्रकर्षात् सर्व्वाण्येव शस्त्रसाध्यानि वर्ज्जयितव्यानि वा ॥

उदरी तु गुर्व्वभिष्यन्दिरूक्षविदाहिस्निग्धपिच्छिलपरिषेकावगाहान् परिहरेत् । शालियवकोद्रवगोधूमनीवारान्नित्यमश्नीयात् ॥

तत्र वातोदरिणं विदारिगन्धादिसिद्धेन सर्पिषा स्नेहयित्वा तिल्वकविषक्तेनानुलोम्य चित्रापलाशतैलप्रगाढ़ेन विदारिगन्धाकषायेणास्थापयेदनुवासयेच्च शुल्वघ्नेन चोपनाहयेदुदरम् । भोजयेच्चैनं विदारिगन्धादिसिद्धेन क्षीरेण जाङ्गलरसेन चाभीक्ष्णं स्नेहयेत् ॥ * ॥

पित्तोदरिणन्तु मधुरगणविपक्वेन सर्पिषा स्नेहयित्वा श्यामात्रिफलाचित्रकदन्तिपिप्पलीनानुलोम्य शर्करामधुघृतप्रगाढ़ेन न्यग्रोधादिकषायेणास्थापयेदनुवासयेच्च पायसेनोपनाहयेदुदरं भोजयेच्चैनं विदारिगन्धादिसिद्धेन पयसा ॥ * ॥ श्लेष्मोदरिणं पिप्पल्यादिकषायसिद्धेन सर्पिषोपस्नेह्य खट्वीक्षारविपक्वेनानुलोम्य चिकटुकमूत्रक्षारतैलप्रगाढ़ेन मुष्कादिकषायेणास्थापयेदनुवासयेच्च शुक्लातसीधातकीकिण्वसर्षपमूलकबीजकल्केनोपनाहयेदुदरं भोजयेच्चैनं चिकटुकप्रगाढ़ेन कुलत्थयूषेण पायसेन वा खेदयेच्चाभीक्ष्णम् ॥ * ॥

दूष्योदरिणन्तु प्रत्याख्याय सप्तलाशङ्खिनीक्षीरसंसिद्धेन सर्पिषा विरेचयेन्मासमर्द्धं मासं वा महाबलक्षीरसुरागोमूत्रसिद्धेन वा शुद्धकोष्ठन्तु मद्येनाश्वमारकगुञ्जाकाकादनीमूलकल्कं पाययेत् । क्षुद्रकाद्याणि वा क्षुधासर्पेण दंशयित्वा भक्षयेत् । वल्लीफलानि वा मूत्रजं कन्दं वा विषमासेवयेत् तेनागदो भवत्यन्यं वा भावमापद्यते ॥ * ॥

भवति चात्र,—

"कुप्रितानिलमूलत्वात् सञ्चयित्वान्नमस्य च ।
सर्व्वोदरेषु शूलंसन्ति बद्धगुक्त्वनुलोमनम्" ॥
ज्योतिष्कपलतैलं वा क्षीरेण सर्ज्जिकाद्विगुणिश्रं पिबेत् ॥ गुडहरितीयां वा हरीतकीं भक्षयेत् ॥ खट्वीक्षीरभावितानां वा पिप्पलीनां सहस्रं कालेन पथ्याक्षुण्णचूर्णं वा खट्वीभावितामुत्कारिकां पक्वां दापयेत्" ॥

"क्षीहोदरिणः स्निग्धस्विन्नस्य दक्षा सुस्रवतो वामबाहौ कुर्य्याभ्यन्तरतः शिरां विध्येद्विमर्दयेत् पाणिना क्षीहानं रुधिरस्यन्दनार्थं ततः संमुद्रदेहं समुद्रशुक्तिकाक्षारं पयसा पाययेत हिङ्गुसौवर्चिकाक्षारेण खुरेण पक्वाग्रक्षारेण वा यवक्षारम् । पारिजातकेक्षरकापामार्गक्षारं वा तैलसंकृष्टम्।

शोभाञ्जनकषायं वा पिप्पलीसैन्धवचित्रकयुक्तम्। पूतिकरञ्जक्षारं वा सक्षौद्रं विड्लवण-पिप्पली-प्रगाढम्॥*॥

पिप्पलीपिप्पलीमूलचित्रकशृङ्गवेरयवक्षारसैन्धवानां पालिकाभागा घृतप्रस्थं तत्तुल्यं क्षीरं तदैकध्यं विपाचयेदेतत् षट्पलकं नाम सर्पिः श्रीहाग्निषङ्गुल्मोदरोदावर्त्त-क्षयपु-पाण्डुरोग-कास-श्वास-प्रतिश्यायोर्द्ध्ववातविषमज्वरानपहन्ति मन्दाग्निर्वा हिङ्ग्वादिकं चूर्णमुपयुञ्जीत यच्चहाल्पीयेन एव क्रियाविभागः विशेषतस्तु दक्षिणबाहौ शिराव्यधः"।

"मक्षिवन्धं सङ्क्षाम्य वामाङ्गुलसमीरिताम्। दक्षेत्सिरां शरेणाशु क्षीरो वैद्यः प्रशान्तये"॥*॥

वङ्क्षणदेशे परिस्राविणि च क्षिप्तक्षिन्नस्याभ्यक्तस्याधो नाभेर्व्यामतश्चतुरङ्गुलमपहाय रोमराज्या उदरं पाटयित्वा चतुरङ्गुलप्रमाणान्यन्त्राणि निष्कृष्य निरीक्ष्य वङ्क्षणदेशान्तप्रतिरोधकरमशानं वातं वा मोक्ष्य मलजातं वा ततो मधुसर्पिर्भ्यामभ्यज्यान्त्राणि यथास्थानं स्थापयित्वा वाह्यव्रणमुदरस्य सीव्येत्। परिस्राविण्यप्येवमेव शल्यमुद्धृत्यान्त्रवातान् संशोध्य तच्छिद्रमन्त्रं समाधाय कार्पासपिपीलिकाभिर्दंशयेत् दष्टे च तासां कायानपहरेत् न शिरांसि ततः पूर्ब्ववत् सीव्येत् सन्धानञ्च यथोक्तं कारयेत् यष्टीमधुकमिश्रया च क्षौद्रमरदावलिप्य बन्धनोपचरेत्ततोनिवातमागारं प्रवेश्याचारिकमुपदिशेद्दासयेच्चैनं तैलद्रोण्यां सर्पिर्द्रोण्यां वा पयोवृत्तिमिति॥*॥ उदकोदरिणस्तु वातहरतैलाभ्यक्तस्योष्णोदकक्षिन्नस्य स्थितस्याग्नेः सपरिस्रुहीतस्याकृष्णात् परिवेष्टितस्याधोनाभेर्व्यामतश्चतुरङ्गुलमपहाय रोमराज्या व्रीहिमुखेनाङ्गुष्ठोदरप्रमाणमवगाढं विध्येत्। तत्र तथादीनामन्यतमस्य नाड़ीद्विदारां पक्षगाड़ीं वा संयोज्यादोषोदकमवसिञ्चेत्ततो नाड़ीमपहृत्य तैलबलयेनाभ्यज्य व्रणबन्धेनोपचरेन्नचैवक्षिप्तेनेव दिवसे सर्व्वं दोषोदकमपहरेत् सहसा ह्यपहृते दृष्ट्वाज्वराङ्गमर्दातीसारश्वासपरिदाहा उत्पद्येरन् आपूर्य्यते वा भृशतरमुदरमसङ्गतप्राणस्य तस्मात्तृतीयचतुर्थपञ्चमषष्ठसप्तमदशमदादशघोड़शराात्रामन्यतममन्तरीक्ष्य दोषोदकमल्पाल्पमवसिञ्चेत्। निःस्रुते निःस्रुते च दोषे गाढ़तरमाविष्कार्य्यश्चर्म्मणामन्यतमेन परिवेष्टयेदुदरं तथा नाध्मायति वायुः षण्मासांश्च पयसा भोजयेच्छाङ्गरेण वा तत्र त्रीन् मासान् अर्द्धोदकेन पयसा पलाशेन जाङ्गलेन वावग्निं मासत्रयं-. मन्नं लघुहितं वा सेवेतैवं संवत्सरेणागदो भवति॥

भवति चात्र,—

आस्थापने चैव विरेचने च
पाने तथाहारविधिक्रियासु।
सर्व्वोदरिभ्यः कुशलैः प्रयोज्यं
क्षीरं घृतं जाङ्गलजो रसो वा"॥

इति सुश्रुते चिकित्सितस्थाने उदराधिकारः॥

औषधान्याह।

"शुद्धसूतं द्विधा गन्धं मृतार्कायःशिलाजतु। रससाम्येन दातव्यं रसस्य द्विगुणं विषम्॥ चित्रकटुचित्रकाकोलीनिर्गुण्डीमूषलीरजः। अजमोदाविधांशेन प्रत्येकञ्च प्रकल्पयेत्। निम्बपत्राङ्कुलद्राक्षैर्भावनाश्चैकविंशतिम्। भृङ्गराजरसैः सप्त दत्त्वा क्षौद्रेण लेहयेत्॥ वदरास्थिप्रमाणेन वटिकां तां दिवा निशि। श्लेष्मोत्तरं निहन्त्याशु नाम्ना वैश्वानरी वटी॥ देवदारुवचिमूलकल्कं क्षीरेण पाचयेत्। भोजनं मेषदुग्धेन कौलोत्थेन रसेन च"॥

इति वैश्वानरी वटी॥*॥

"पिप्पली मरिचं ताम्र-कान्तीचूर्णसंयुतम्। खदीक्षीरे दिनं मर्द्यं तुल्यं जैपालबीजकम्॥ निष्कं खादेत् विरेकाय सद्यो हन्ति जलोदरम्। रेचनानाञ्च सर्व्वेषां दध्यन्नं स्नेहने हितम्। दिनान्ते च प्रदातव्यमन्यदा मुद्गयूषकम्"॥

इति जलोदरारिरसः॥*॥

"पारदं गन्धतुल्यञ्च जैपालं पिप्पलीसमम्। आरग्वधफलान्मज्जां वचीदुग्धेन मर्द्दयेत्। माषमात्रं वटीं खादेत् स्त्रीणां हन्ति जलोदरम्॥ चित्रकमूलरसेनापि पथ्यां दध्योदनं हितम्। दकोदरहरश्चैव कठिने रेचनेन च"॥

इति उदरारिरसः॥*॥

"टिकणं लौहचूर्णस्य चाभ्रस्यापि पलार्द्धकम्। कर्षं शुद्धं मृतं ताम्रं क्षिप्त्वाकाङ्क्षित्वचां पलम्॥ मृगाजिनपलं भस्म सर्व्वमेकत्र कारयेत्। नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक्॥ यक्ष्मत्क्षीहोदरहरं कामलाञ्च हलीमकम्। कासं श्वासं ज्वरं हन्याद्बलवर्णाग्निकारकम्। यक्षदरि त्विदं लौहं वातगुल्मविनाशनम्"॥

इति यक्षदरिलौहम्॥*॥

इति वैद्यकरसेन्द्रसारसंग्रहे॥

पथ्यानि यथा,—

"विरेचनं लङ्घनमब्दसम्भवाः
कुलत्थमुद्गाढकयावगोधूमाः।
मृगद्विजाजाङ्गलसंयुतान्विताः
पेयाः सुरामाक्षिकसीधुमाधवाः॥
तक्रारसोगोरसतैलमार्द्रकम्
शालिञ्च शाकं कुलकं कठिल्लकम्।
पुनर्नवा शिग्रुफलं हरीतकी
ताम्बूलमेलायवशूकमायसम्।
अजा-गवोष्ट्री-महिषी-पयोजलं
लघूनि तिक्तानि च दीपनान्यपि।
वस्त्रेण संवेष्टनमग्निकर्म्मता
विषप्रयोगोऽनुयुतो यथायथम्"॥*॥

अपथ्यानि यथा॥

"सक्षेहं धूमपानं जलपानं शिराव्यधः।
कर्द्दियानं दिवानिद्रा व्यायामः पिष्टवैष्टनम्॥
वैदकानूपमांसानि पत्रशाकानिलानपि।
उष्णानि च विदाहीनि लवणान्यूषराणि च॥
शिम्बीधान्यं विरुद्धान्नं दुष्टनीरं गुरूणि च।
महेन्द्रगिरिजातानां सरितां सलिलानि च॥

विरुग्भीनि विशेषात्तु खेदं छिद्रसमुद्भवे।
वर्ज्जयेदुदरव्याधौ वैद्यो रक्तन्निजं यशः"॥
इति वैद्यकपथ्यापथ्यविधिः॥*॥)

उदरामयः, पुं, (उदरस्य आमयः।) रोगविशेषः। तत्पर्य्यायः। अन्नगन्धिः २ अतिसारः ३। इति चिकित्साशास्त्रोक्तः॥ (अस्योपशमलक्षणं चिकित्सास्थाने नवमाध्याये वाभटेनोक्तम्। यथा,

"यस्योच्चारादिना मूत्रं पवनो वा प्रवर्त्तते।
दीप्ताग्नेर्लघुकोष्ठस्य शान्तस्तस्योदरामयः"॥)

उदरावर्त्तः, पुं, (उदरे आवर्त्त इव।) नाभिः। इति राजनिर्घण्टः॥

उदरिणी, स्त्री, (उदरं तज्जातगर्भोऽस्या अस्तीति। उदर + इनि + ङीप्।) गर्भवती। इति हेमचन्द्रः। (उदरमस्या अस्तीति वाक्ये। दृढदुदरयुक्ता। "लम्बस्तनीमुदरिणीं विदीर्णोत्फुल्लपादकाम्। धात्रा वैरूप्यनिर्म्माणवैदग्धीं दर्शितामिव"। इति कथासरित्सागरे विंशतरङ्गे॥)

उदरिलः, त्रि, (अतिशयितमुदरमस्य। उदर + तुन्दादिभ्यः इलचेति इलच्।) दृढदुदरयुक्तः। भुँड़िया इति भाषा। तत्पर्य्यायः पिचिण्डिलः २ दृढत्वक्कः ३ तुन्दिः ४ तुन्दिकः ५ तुन्दिलः ६ उदरी ७। इति हेमचन्द्रः॥

उदरी, [न्] त्रि, (अतिशयितमुदरमस्य। उदर + इनि।) उदरिलः। इति हेमचन्द्रः॥ (उदररोगयुक्तः। यथा सुश्रुते चिकित्सितस्थाने १४ अध्याये। "उदरी तु गुर्व्वभिष्यन्दिरूक्षविदाहिस्निग्धपिच्छितपरिषेकावगाहान् परिहरेत्। ग्राम्यमृगिषकपयवगोधूमनवीनान्नित्यमश्नीयात्"॥)

उदर्कः, पुं, (उत् + ऋच् + घञ्।) उत्तरकालोद्भवफलम्। इत्यमरः॥ भविष्यत्कालः। इति धरणी॥ ("परित्यजेदर्थकामौ यौ स्यातां धर्म्मवर्জ্জितौ। धर्म्मञ्चाप्यसुखोदर्कं लोकविक्रुष्टमेव च"॥ इति मनुः ४। १७६॥ "उदर्कस्तव कल्याणि! तुष्टो देवगजस्वरः"॥ इति महाभारते पाण्डवोत्पत्तौ १। १२३। २९॥) मदनकण्टकम्। इति मेदिनी। मयना गाछेर काँटा इति भाषा॥

उदर्चिः, [स] त्रि, (उद्गतं अर्चिः प्रभा यस्मात्।) उत्प्रभः। इति मेदिनी। (यथा रघौ १५। ७६।

"ऋचेवोदर्चिषं सूर्य्यं रामं मुनिवपस्विनः"॥

"प्रदक्षिणप्रक्रमणात् क्षणानो-
दर्चिर्षस्तन्मियुनं चकाशे"।

इति रघुवंशे ७। २४। तथा, कुमारे ३। ७१।

"स्फुरन्नुदर्चिः सहसा तृतीया-
दृष्णः क्षणानुः किल सम्पपात"॥)

उदर्चिः, [स], पुं, (उद्गतं अर्चिर्यस्य।) अग्निः। इति मेदिनी॥

"प्रक्षिप्योदर्चिषं कक्षे शरेते तेऽभिमारुतम्"॥ इति माघे २। ४२॥ हरिः। शिवः। कन्दर्पः। इति शब्दरत्नावली॥

उदर्दः, पुं, (उदर्दति पीड़यतीति। उत् + अर्द् + अच्।) रोगविशेषः। तस्य लक्षणम्। यथा, भिदाने॥

"वरटीदष्टसंस्थानः शोथः संजायते बहिः।
सकण्डूस्तोदबहुलः कृच्छ्रज्वरविदाहवान्॥
उदर्दमिति तं विद्याच्छीतपित्तमथापरे।
वाताधिकं शीतपित्तमुदर्दश्च कफाधिकम्"॥
(अस्य चिकित्सा यथा,
"अभ्यङ्गः कटुतैलेन सेकश्चोष्माम्बुभिस्ततः।
उदर्दे वमनं कार्य्यं पटोलारिष्टवारिणा"॥
"सगुडं दीप्यकं यस्तु खादेत् पथ्यान्नभुङ्नरः।
तस्य नश्यति सप्ताहादुदर्दः सर्व्वदेहजः"॥
इति वैद्यकचक्रपाणिसंग्रहे॥)

उदलावणिकः, त्रि, (उदलवणेन लवणाम्भसा सिद्धः। उदलवण + ठक्।) लवणोदकसंसिद्धव्यञ्जनादिः। इति हलायुधः॥

उदवसितं, क्ली, (उदूर्द्धमवसीयते स्म। यो अन्तकर्म्मणि विन् बन्धने वा। क्तः। वसितस्तीतीत्वम्।) गृहम्। इत्यमरः॥

उदश्वित्, क्ली, (उदकेन श्वयति वर्द्धते इति। उद + श्वि + क्विप् + तुक्।) अर्द्धजलयुक्तघोषम्। इत्यमरः॥ अस्य गुणाः। लेपात् कुष्ठरोगनाशित्वम्। दाहदृष्यामुखशोषनाशित्वञ्च। इति राजवल्लभः॥
("अर्द्धोदकमुदश्वित्स्यात्"॥
"उदश्विच्छेष्मलं वर्ष्यं श्रमघ्नं परमं मतम्"॥
इति हारीते प्रथमस्थानेऽष्टमोऽध्यायः॥)

उदात्तं, त्रि, (उत् + आ + दा + क्त।) दयात्यागादिसम्पन्नम्। इति मेदिनी॥ हृद्यम्। दाढ। महत्। इति हेमचन्द्रः॥ (यथा, रामायणे २य काण्डे।)
"उदात्तदत्तानाम् कुञ्जराणाम्"।
नायकभेदः। यथा साहित्यदर्पणे ३ परिच्छेदे॥
"अविकत्थनः क्षमावान् अतिगम्भीरो महासत्त्वः।
स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः"॥)

उदात्तः, पुं, (उच्चैरादीयते स्म। उत् + आ + दा + क्त।) स्वरभेदः। स तु वेदगाने उच्चैःस्वरः। इत्यमरः॥ दानम्। वाद्यविशेषः। इति शब्दरत्नावली॥
काव्यालङ्कारभेदः। इति मेदिनी॥(यदुक्तं साहित्यदर्पणे। १० म परिच्छेदे। १११।
"लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते।
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्"॥)

उदानः, पुं, (उदूर्द्धं आनिति अनेन। उत् + आङ् + अन् + घञ्।) कण्ठस्थवायुः। इत्यमरः॥ तस्य कर्म्म ऊर्द्धनयनम्। इति श्रीधरस्वामी॥
(यथा, सङ्गीतरत्नाकरे, १। ६४।
"उदानः पादयोरास्ते हस्तयोरङ्गसन्धिषु।
कर्म्मास्य देहोन्नयनोत्क्रमणादि प्रकीर्त्तितम्"॥)
"ऊर्द्धगमनवान् कण्ठस्थानीयात्क्रमणवायुः"।
इति वेदान्तः॥ (तथा चोक्तम्।
"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः।
उदानः कण्ठदेशे स्यात् व्यानः सर्व्वशरीरगः"॥
"उदानो नाम यस्तूर्द्धमुपैति पवनोत्तमः"।
इति महाभारते वनपर्व्वणि॥

प्रकुपितोदानस्य लक्षणं यथा।
"हिक्का श्वासः परिश्वासः कासः शोर्त्तिर्घटिकाः।
हृल्लासो हृदि शूलञ्च यक्ष्मादातादिका वमिः।
क्षवथुर्ष्टम्भगश्चैव तथा वैस्वर्य्यमेव च॥
अरुचिश्च प्रतिश्याय एते प्रोक्ता उदानतः।
उदानः श्लेष्मसंयुक्तो दोषात् हृदि प्रकुप्यति"॥
इति चिकित्सितस्थाने २१ अध्याये हारीतेनोक्तम्॥*॥
"उदानः क्षवथूद्गारच्छर्द्दिनिद्रावधारणैः।
गुरुभारातिरुदितहास्याद्यैर्विकृतो गदान्॥
कण्ठरोधमनोभंशच्छर्द्दारोचकपीनसान्।
कुर्य्याच्च गलगण्डादींस्तांस्तान् जत्रूर्द्ध्वसंश्रयान्"।
इति निदानस्थाने षोड़शेऽध्याये वाभटेनोक्तम्॥*॥

अस्य स्थानं कार्य्यञ्च यथा॥
"उदानस्य पुनः स्थानं नाभ्युरःकण्ठ एव च।
वाक्प्रवृत्तिः प्रयत्नोर्ज्जो बलवर्णादि कर्म्म च"।
इति चिकित्सास्थाने २८ अध्याये चरकेणोक्तम्॥
"उदानो नाम यस्तूर्द्धमुपैति पवनोत्तमः॥
तेन भाषितगीतादिविशेषोऽभिप्रवर्त्तते।
ऊर्द्धजत्रुगतान् रोगान् करोति च विशेषतः"॥

दोषान्तरगतस्यास्य लक्षणं यथा॥
"उदाने पित्तसंयुक्ते मूर्च्छादाहभ्रमक्लमाः।
अखेदहर्षौ मन्दाग्निः शीतस्तम्भौ कफाहते"॥
इति निदानस्थाने प्रथमेऽध्याये सुश्रुतेनोक्तम्॥
उदरावर्त्तः। नाभिः। सर्पविशेषः। इति मेदिनी॥ पद्म। इति शब्दरत्नावली॥

उदारः, त्रि, (उत्कृष्टमासमन्तात् राति। रा + आतश्चेति कः। उदर्य्यते, ऋगतिप्रापणयोः कर्म्मणि घञ् वा।) दाता। महान्। (यथा गीतायां ७।१८॥
"उदाराः सर्व्व एवैते ज्ञानी त्वात्मैव मे मतम्"॥
"उदारा महान्तः मौक्तभाज एव इत्यर्थः"॥
इति श्रीधरस्वामी।) ऋज्वाशयः। तत्पर्य्यायः। दक्षिणः २ सरलः ३। इत्यमरः॥
("क उदारः समर्थश्च त्रैलोक्यस्यापि रक्षणे"।
इति रामायणे आदिकाण्डे। गभीरः। सारवान्। रम्यः। न्याय्यः।
"इत्यर्घ्यपात्रानुमितव्ययस्य
रघोरुदारामपि गां निशम्य"।
इति रघुः ५। १२। असाधारणः। सरलाशयः। श्लिष्टः।
"स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज मुनिम्"। इति रघुः ८।९१॥)

उदावत्सरः, पुं, संवत्सरादिपश्चान्तर्गतवत्सरविशेषः। अस्मिन् वर्षे रौप्यदानं महाफलम्। इति विष्णुधर्म्मोत्तरम्॥

उदावर्त्तः, पुं, (उत् + आङ् + वृत् + घञ्।) रोगविशेषः। तत्पर्य्यायः। गुदग्रहः २। इति हेमचन्द्रः॥ मलमूत्रवायुरोधकरोगः। तस्य निदानं संप्राप्तिश्च। यथा निदाने।
"वातविण्मूत्रच्छर्द्यक्षुत्तृष्णोद्गारवधेन्द्रियम्।
क्षुत्तृष्णोच्छ्वासनिद्राणां हृत्योदावर्त्तसम्भवः"॥
(अपरस्यास्य सनिदानसंप्राप्तिकं लक्षणं यथा,—
"कषायतिक्तोषणरूक्षभोज्यैः
सन्धारणाभोजनमैथुनैश्च।

पक्वाशये कुप्यति चेदपानः
स्रोतांस्यधोगानि बली स रुद्धा॥
करोति विण्मूत्रसमीरसङ्गं
क्रमादुदावर्त्तमतः सुघोरम्।
रुजस्तिहृत्कुक्षुदरेष्वभीक्ष्णं
स एष पार्श्वेष्वतिदारुणा स्यात्॥
आध्मानहृल्लासविकर्त्तिकाश्च
तोदोऽविपक्वश्च सवस्तिशोथः।
वर्च्चोऽप्रवृत्तिर्जठरे च गुरुत्वा-
न्मूर्द्धञ्च वायुर्व्विहतो गुदे स्यात्॥
क्षुक्षेण शुष्कस्य चिरात्प्रवृत्तिः
स्याद्वा तनुः स्यात् खररूक्षगीता।
ततश्च रोगा ज्वरमूत्रकृच्छ्र-
प्रवाहिकाहृद्ग्रहणीप्रदोषाः॥
वस्त्यन्त्र-वाधिर्य्य-शिरोऽभितापवातोदराष्ठीलमनोविकाराः।
दृष्यामपित्तारुचिगुल्मकास-
श्वासप्रतिश्यार्दितपार्श्वरोगाः।
अन्ये च रोगा बहवोऽनिलोत्था
भवन्त्युदावर्त्तकृताः सुघोराः"॥

अस्य चिकित्सा यथा,—
"तं तैलसर्पिस्त्वरणाग्निदीप्तैः,
स्वेदैर्यथोक्तैः प्रविलोमदोषम्।
उपाचरेद्वर्त्तिभिरूहबस्ति-
स्नेहैर्विरेकैरनुलोमनाग्नेः॥*॥
श्यामात्रिवृन्मागधिकाभिचूर्णं
गोमूत्रमिश्रं दधिभागमात्रम्।
सनीलिकां हिङ्गवयां गुडेन
वर्त्तिं कराङ्गुष्ठनिभां विदध्यात्॥
पिण्याकसौवर्चलहिङ्गुभिर्व्वा
ससर्षपत्र्यूषणयावशूकैः।
क्रिमिघ्नकम्पिल्लकशङ्खिनीभिः
सुधार्कजक्षीरगुडैर्युताभिः।
स्यात् पिप्पलीसर्षपराठवेश्म-
धूमैः सगोमूत्रगुडैश्च वर्त्तिः॥*॥
श्यामापलेत्तु सपिप्पलीकं
नाड्याग्रवा तत् प्रथमेत्तु चूर्णम्।
रक्षोघ्नतुम्बीकरहाटकाख्या-
चूर्णं सजीमूतकसैन्धवं वा॥*॥
स्निग्धे गुदे तान्यनुलोमयन्ति
नरस्य वर्च्चोऽनिलमूत्रसङ्गम्।
तेषां विघाते तु भिषग्विदध्यात्
स्वभक्तसुस्निग्धतनोर्निरूहम्॥
ऊर्द्धानुलोमौषधमूत्रतैल-
क्षारास्ल-वातघ्नयुतं सतीक्ष्णम्॥*॥
वातेऽधिकेऽस्रं लवणं सतैलं
क्षीरेण पित्ते तु कफे समूत्रम्।
समूत्रवर्च्चोऽनिलसङ्गमासु
गुदं शिरश्च प्रगुणीकरोति॥*॥
चित्रकसुधापत्रतिलादिशाकं
यवान्नौदकानूपरसैर्यवान्नम्।
अन्यैश्च रूक्षानिलमूत्रविड्भि-

रयात् प्रसन्नागुडसौधुपायी ॥ *॥
भूयोऽनुबन्धे तु भवेद्विरेको
मूत्रप्रसन्नादधिमण्डयुक्तैः" ॥ *॥
हिङ्गुत्तरं हिङ्गुवचाभिकुष्ठं
सवर्चिका चैव विडङ्गचूर्णम् ।
सुखाम्बुनाहविसूचिकार्त्ति-
हृद्रोगगुल्मोर्द्धसमीरणघ्नम् ॥ * ॥
वचाभयाचित्रकयावशूकान्
सपिप्पलीकातिविषान् सकुष्ठान् ।
उष्णाम्बुनाहविमूढवातान्
पीत्वा जयेदाशु रसौदनाशी" ॥ * ॥
इति चिकित्सास्थाने षड्विंशेऽध्याये चरकेणोक्तम् ॥
सुश्रुतेनोत्तरतन्त्रे ५५ अध्यायेऽस्य सनिदानसम्प्राप्तिकं लक्षणं चिकित्सा चेति यदुक्तं तद्यथा ।
"अधश्चोर्द्ध च भावानां प्रवृत्तानां स्वभावतः ।
न वेगान् धारयेत् प्राज्ञो वातादीनां जिजीविषुः ॥
वातविण्मूत्रच्छर्म्माश्रुक्षवोद्गारवमीन्द्रियैः ।
व्याहन्यमानैरुदितैरुदावर्त्तो निरुच्यते ॥
क्षुत्तृष्णा-श्वास-निद्राणामुदावर्त्तो विधारणात् ।
तस्याभिधास्ये व्यासेन लक्षणञ्च चिकित्सितम् ॥
त्रयोदशविधश्चासौ भिन्न एतैस्तु कारणैः ।
अपथ्यभोजनाच्चापि वक्ष्यते च यथापरः ॥
आध्मानशूलौ हृदयोपरोधं
शिरोरुजं श्वासमतीवहिक्काम् ।
कास-प्रतिश्याय-गलग्रहांश्च
बलासपित्तप्रसरञ्च घोरम् ॥
कुर्य्यादपानाभिहतः स्वमार्गे
हन्यात् पुरीषं मुखतः क्षिपेद्वा ॥ १ ॥
आटोपशूलौ परिकर्त्तनञ्च
सङ्गः पुरीषस्य तथोर्द्ध्ववातः
पुरीषमास्यादथवा निरेति
पुरीषवेगेऽभिहते नरस्य ॥ २ ॥
मूत्रस्य वेगेऽभिहते नरस्तु
शूकैरिव भिन्नमूर्त्तेः ॥ ३ ॥
मन्याग्रहस्तम्भशिरोविकारा
ष्ठीवोपघातात् पवनात्मकाः स्युः ।
श्रोत्राननघ्राणविलोचनोत्था
भवन्ति तीव्राश्च तथा विकाराः ॥ ४ ॥
आनद्धवस्तिञ्च भवन्ति तीव्राः
शूलाश्च शूलैरिव भिन्नमूर्त्तेः ॥ ५ ॥
मन्यागलस्तम्भशिरोविकारा
ष्ठीवोपघातात् पवनात्मकाः स्युः ।
श्रोत्राननघ्राणविलोचनोत्था
भवन्ति तीव्राश्च तथा विकाराः ॥ ४ ॥
आनन्दजं शोकसमुद्भवं वा
नेत्रोदकं प्राप्तमसृग्वतो हि ।
शिरोरुजत्वं नयनामयाश्च
भवन्ति तीव्राः सह पीनसेन ॥ ५ ॥
भवन्ति गाढं क्षवथोर्विघाता-
च्छिरोऽक्षिनासास्रवणेषु रोगाः ।
कण्ठास्यपूर्णत्वमतीवतोदः
कूजश्च वायोरथवा प्रवृत्तिः ॥ ६ ॥
उद्गारवेगेऽभिहते भवन्ति
जन्तोर्विकाराः पवनप्रसूताः ॥ ७ ॥
हृद्दौर्विघातेन भवेच्च कुष्ठं
येनैव दोषेण विदग्धमन्नम् ॥ ८ ॥
मूत्राशये वा गुदमुष्कयोश्च
शोफो रुजा मूत्रविनिग्रहश्च ।
शुक्राश्मरी तत्स्रवणं भवेद्वा
ते ते विकारा विहते तु शुक्रे ॥ ९ ॥
तन्द्राङ्गमर्द्दारुचिः श्रमश्च
क्षुधोऽभिघातात् क्षपणा च दृष्टेः ॥ १० ॥
कण्ठास्यशोषः श्रवणावरोध-
स्तृष्णाभिघाताद्धृदये व्यथा च ॥ ११ ॥
श्रान्तस्य निश्वासविनिग्रहेण
हृद्रोगमोहावथवापि गुल्मः ॥ १२ ॥
जृम्भाङ्गमर्द्दोऽक्षिशिरोऽतिजाड्यं
निद्राभिघातादथवापि तन्द्रा" ॥ १३ ॥

अरिष्टलक्षणं यथा,
"दृष्ट्याहितं परिक्लिष्टं क्षीणं शूलैरभिद्रुतम् ।
शूलहृन्मर्म्म मतिमानुदावर्त्तिनमुत्सृजेत् ॥

अस्य चिकित्सा यथा,
"सर्व्वेष्वेतेषु विधिवदुदावर्त्तेषु क्षुत्क्षयः ।
वायोः क्रिया विघातव्या स्वमार्गप्रतिपत्तये ॥
सामान्यतः पृथक्त्वेन स्त्रियां भूयो निबोध मे ।
आस्थापनं मारुतजे स्निग्धे स्निग्धे विशिष्यते ॥ १ ॥
पुरीषजे तु कर्त्तव्यो विधिरानाहिको भवेत् ॥ २ ॥
सौवर्चलाढ्यां मदिरां मूत्रेष्वभिहते पिबेत् ।
एलामथ्य मद्येन क्षीरं वापि पिबेन्नरः" ॥ ३ ॥
"स्नेहस्वेदोदावर्त्तं ऊर्ध्वभाजं समुपाचरेत् ॥ ४ ॥
अश्रुमोक्षोऽग्रजे कार्य्यः स्निग्धस्निग्धस्य देहिनः ॥ ५ ॥
तीक्ष्णाञ्जनावपीड़ाभ्यां तीक्ष्णगन्धोपसिंहनैः ।
वर्त्तिप्रयोगैरथवा क्षवथक्तिं प्रवर्त्तयेत् ॥
तीक्ष्णौषधप्रधमनैरथवादित्यरश्मिभिः ॥ ६ ॥
उद्गारजे क्रमोपेतं स्नेहिकं धूममाचरेत् ।
सुरां सौवर्चलवतीं बीजपूरकसान्विताम् ॥ ७ ॥
कण्ठोपघातं यथा दोषं सम्यक् स्नेहादिभिर्जयेत् ।
सच्चारलवणोपेतमभ्यङ्गं वाच दापयेत् ॥ ८ ॥
वस्तिशुद्धिकरावापचतुर्गुणजलप्लुतः ।
आवारिनाशात् क्षपितं पीतवर्णं प्रकामतः ।
रमयेयुः प्रिया भार्य्याः शुक्रोदावर्त्तिनं नरम् ॥ ९ ॥
क्षुद्विघाते हितं स्निग्धमुष्णमल्पञ्च भोजनम् ॥ १० ॥
तृष्णाघाते पिबेन्मद्यं यवागूं वापि शीतलां ॥ ११ ॥
भोज्यो रसेन विश्रान्तः श्रमश्वासातुरो नरः ॥ १२ ॥
निद्राघाते पिबेत् क्षीरं सप्यात्रेयकषायतः" ॥ १३ ॥
अपरञ्च सनिदानसम्प्राप्तिकं लक्षणं चिकित्सा च ।
" वायुः कोष्ठानुगो रूक्षैः कषायकटुतिक्तकैः ।
भोजनैः कुपितः सद्य उदावर्त्तं करोति हि ॥
वातमूत्रपुरीषाष्ठक्षपमेदोवहानि वै ।
स्रोतांस्युदावर्त्तयति पुरीषघातिवर्त्तयेत् ॥
ततोऽङ्गहस्तिशूलार्त्तो गौरवारुचिपीड़ितः ।
वातमूत्रपुरीषाणि क्षुच्छ्वेण कुरुते नरः ॥
श्वासकासप्रतिश्यायदाहमोहवमिज्वरान् ।
कण्ठाहिक्काशिरोरोगमनःश्रवणविभ्रमान् ॥
लभते च बहून्यान् विकारान् वातकोपजान् ।
तत्तैलघृतवसाभ्यक्तं स्निग्धं स्विन्नं निरूहयेत् ॥
दोषतो भिन्नवर्च्चस्कं भुक्तश्चाप्यनुवासयेत् ।
नचेच्छान्तिं प्रयात्येवमुदावर्त्तः सुदारुणः ॥
अथैनं बज्रशः स्निग्धं युञ्जात् स्नेहविरेचनैः ।
पाययेत चिरत्नीलुयवानीरस्नपानकैः" ॥
"देवदार्व्यग्निकं कुष्ठं वचाभ्यां पलङ्कषाम् ।
पौष्करागि च मूलानि तोयस्यार्द्धाढकं पचेत् ॥
पादावशिष्टं तत्पीतमुदावर्त्तं व्यपोहति" ।
घृतं यथा ।
"मूलकं शुष्कमार्द्रञ्च वर्षाभूः पञ्चमूलकम् ॥
आरेवतफलञ्चाप्सु पक्त्वा तेन घृतम्यचेत् ।
तत्पीयमानं शमयेत् उदावर्त्तमशेषतः" ॥ *॥
"चूर्णं निकुम्भकम्पिल्लशमेलाक्षाग्निकोद्भवम् ।
क्षतवेधनमागध्यो लवणाञ्च साधयेत् ॥
गवां मूत्रेण ता वर्त्तीः कारयेत्तु गुदानुगाः" ।
वैद्यकरत्नेन्द्रसारसङ्ग्रहे यच्चिन्तितं तद्यथा ॥
"चिकटुपारदं पथ्याकालकफलं द्विगुणं ।
धानकुलीनां खरसैर्गुड़िका कार्य्यास्तरोल्यास्तु ॥
प्रबलजलोदरगुल्मज्वरपाण्डामयनाशिनी ।
प्रोक्ता तिमिरार्शिपटलविद्रधिप्रबलोदावर्त्तहरी ॥
क्रिमिकोष्ठगात्रकण्डूपिड़काश्च निहन्ति शूलचयं ।
शुद्धगुड़िका कथिता भुवने श्रीवैद्यनाथाख्या" ॥
इति वैद्यनाथवटिका ॥ * ।
अत्र अपथ्यानि यथा ।
"वमनं वेगरोधश्च शमीधान्यानि कोद्रवम् ।
नालीतशाकं शालूकं जाम्बवं कर्कटीफलम् ॥
पिण्याकमालुकं सर्व्वं करीरं पिण्डवैदलम् ।
विरुद्धानि विरुद्धानि कषायाणि गुरूणि च ॥
उदावर्त्ती प्रयत्नेन वर्जयेत् सततं नरः ।
इति वैद्यकपथ्यापथ्यविधिः ।)

उदासः, पुं, (उदस्यते इति । उत् + अस् + घञ् ।) उत्क्षेपः । उद्भावः । औदास्ययुक्ते, त्रि ॥

उदासीनः, पुं, (उदास्ते इति । उत् + आस् + शानच् + ईदास इति ईत्वम् ।) परतरः । इत्यमरः ॥ विजिगीषोः शत्रुमित्रभूमितो व्यवहितः व्यवहितत्वादेव नोपकारी नाप्यपकारी केवलमूर्द्धमासीन इव । इति भरतः ॥ (यथा, मनुः ७।१५५।
"मध्यमस्य प्रचारञ्च विजिगीषोश्च चेष्टितम् ।
उदासीनप्रचारञ्च शत्रोस्चैव प्रयत्नतः" ॥
मण्डलभेदः । यथा, तत्रैव ७।१५८।
"अनन्तरमरिं विद्यादरिसेविनमेव च ।
अरेरनन्तरं मित्रमुदासीनं तयोः परम्" ॥
उपेक्षकः । यथा, —
"उदासीनवदासीनमसक्तं तेषु कर्म्मसु" । इति गीतायाम् ॥ ६ । ९ ॥)

उदास्थितः, पुं, (उत् + आङ् + स्था + क्त ।) द्वारपालः । अध्यक्षः । इति हेमचन्द्रः ॥ प्रव्रज्यावसितः । नग्नसन्न्यासः । इति मेदिनी ॥

उदाहरणं, क्ली, (उत् + आङ् + हृ + ल्युट् ।) दृष्टान्तः । तत्पर्य्यायः । उपोद्घातः २ उदाहारः ३ इति शब्दरत्नावली ॥ (यथा, माघे ।२।३३।
"प्रध्वंसितान्धतमसस्तवोदाहरणं रविः" ।
कथाप्रसङ्गः । कथनम् । यथा, कुमारे ।६।६५।

"अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु" ॥)
पद्यन्यायावयवान्तर्गतमिदम् ॥ (नाट्यशास्त्रे सोत्कर्षवचनोपन्यासरूपो गर्भाङ्गभेदः । यदुक्तं साहित्यदर्पणे ६ष्ठ परिच्छेदे ।
"उदाहरणमुत्कर्षयुक्तं वचनमुच्यते"।
यथा, वेणीसंहारे अश्वत्थामाङ्के ॥
"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात्पाण्डवोनां चमूनां, यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा । यो यस्तत्कर्म्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः, क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्" ॥
षट्त्रिंशन्नाटकलक्षणान्तर्गतलक्षणभेदः । यथा, साहित्यदर्पणे ६ष्ठ परिच्छेदे ।
"यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात् ।
साध्यतेऽभिमतञ्चार्थस्तदुदाहरणं मतम् ॥)

उदाहारः, पुं, (उत् + आ + हृ + घञ् ।) उदाहरणं । इत्यमरः ॥ प्रकृतोपपादकदृष्टान्तादिः । इति भरतः ॥ युक्तिप्राप्तार्थनिदर्शनं इति साङ्ख्यः ॥ प्रकृतसिद्ध्यर्था चिन्ता । इति रायमुकुटः ॥

उदितः, त्रि, (वद् + क्त । यद्वा । उत् + इण + क्त ।) उक्तः । (यथा, किराते । १ । २८ ।
"भवाटग्रेषु प्रमदाजनोदितं
भवत्यधिक्षेपइवानुशासनम्" ॥)
बद्धः । इत्यमरः ॥ उद्गतः । प्राप्तोदयः । इति मेदिनी ॥ (यथा, रामायणे ।
"उदयादुदितं दीप्तं ज्वालापिण्डसमप्रभम्" ॥
"उदितेऽनुदिते चैव समयाधुषिते तथा" ।
इति मनुः । २ । १५ ॥ तथा, किराते । ५ । ५ ।
"दधतमुच्चशिलान्तरगोपुराः,
पुर इवोदितपुष्पवना भुवः" ॥)

उदितोदितः, त्रि, (उदिते कथिते शास्त्रे उदितः अभ्युदितः ।) शास्त्रज्ञः । इति स्मृतिः ॥
("पुरोहितश्च कुर्व्वीत दैवज्ञमुदितोदितम् ।
दण्डनीत्याञ्च कुशलमथर्व्वाङ्गिरसे तथा" ॥
इति याज्ञवल्क्यः ॥)

उदीची, स्त्री, (उत् उत्तरं अञ्चत्यर्कं । उत्क्रान्तं दृष्टिपथं अञ्चति सूर्य्यं वा । उद ईदित्यस्येत ईकारः । ऋत्विगादिना क्विन् । उगितश्चेति ङीप् ।) उत्तरा दिक् । इत्यमरः ॥
("यदोदीच्यां गतिर्भानोस्तदा सूर्य्यबलाधिकम्" ॥
इति हारीतोत्तरे प्रथमस्थाने चतुर्थेऽध्याये ॥)

उदीचीनं, त्रि, (उदीची + ख ।) उदीच्यां भवं । उत्तरदिग्जातवस्तु । इति हेमचन्द्रः ॥ (यथा, शतपथब्राह्मणे १३ । ८ । १ । ६ । "उदीचीनप्रवणे करोत्युदीची वै मनुष्याणां दिक्" ॥)

उदीच्यं, क्ली, (उदीच्यां भवम् । उदीची + यत् ।) बालनामगन्धद्रव्यं । इत्यमरः ॥ बाला इति ख्यातम् । (बालकशब्देऽस्य गुणादयो बोद्धव्याः ॥)

उदीच्यः, पुं, (उदीच्यां भवः । उदीची + यत् ।) शरावतिनद्याः पश्चिमोत्तरदेशः । इत्यमरः ॥ (तद्देशवासिनि त्रि, यथा, रघौ ४ । ६६ ।
"शरैरस्यैरिवोदीच्यानुद्धरिष्यन् रसानिव" ॥
तथा, महाभारते युधिष्ठिरप्रबोधने ८ । ७० । ३४ ॥
"हता उदीच्या निहताः प्रतीच्याः
प्राच्या निरस्ता दाक्षिणात्या विसृंस्ताः" ॥)

उदीरणं, क्ली, (उत् + ईर + ल्युट् ।) कथनम् । इति हलायुधः ॥ (यथा, कुमारे २ । १२ ।
("उद्गातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्" ॥
प्रेरणम् । क्षेपणम् ।
"ब्रह्मास्त्रोदीरणात् शूरैर्देवदानवकिन्नराः" ।
इति महाभारते ॥)

उदीर्णः, त्रि, (उत् + ऋ + क्त ।) उदारः । महान् । इति जटाधरः ॥
("न हि राज्ञामुदीर्णानामेवम्भूतैर्नरैः क्वचित् ।
सख्यं भवति मन्दात्मन् ! श्रिया हीनैर्धनच्युतैः" ॥
इति महाभारते ॥ उत्तेजितः । उद्दीपितः । उद्धतः । यथा, कुमारे २ । ३२ ।
"भवस्वयम्भूवरोदीर्णतारकाख्यो महासुरः" ।
"ब्रह्म क्षत्रेण संरुद्धं क्षत्रं च ब्रह्मणा सह ।
उदीर्णे दहतः शूरान् वनानीवाग्निमारुतौ" ॥
इति महाभारते । पुं, विष्णुः । यथा, महाभारते विष्णुसहस्रनामकथने १३ । १४९ । ८० ।
"उदीर्णः सर्व्वतश्चक्षुरनीशः शाश्वतः स्थिरः" ॥)

उदुम्बरं, क्ली, (उं ऊर्ध्वं बध्नोतीति उम्बरम् । उ + बृ + संज्ञायां खच् । अरुर्द्विषदिति मुम् । उत्तुच्छमुम्बरम् ।) ताम्रम् । इत्यमरः ॥ (ताम्रशब्दे ऽस्य विशेषो ज्ञेयः ॥)

उदुम्बरः, पुं, उड़म्बरवृक्षः । यज्ञडुमुर इति भाषा । तत्पर्य्यायः । क्षीरवृक्षः २ हेमदुग्धः ३ सदाफलः ४ कालस्कन्धः ५ यज्ञयोग्यः ६ यज्ञीयः ७ सुप्रतिष्ठितः ८ शीतवल्कः ९ जन्तुफलः १० पुण्यशुन्धः ११ पवित्रकः १२ सौम्यः १३ शीतफलः १४ । अस्य पक्वफलगुणाः । मधुरत्वम् । हिमत्वम् । क्षमिकारित्वम् । रक्तपित्तदाहमूर्च्छादाहनाशित्वञ्च । अस्य सुपक्वफलगुणाः । अतिशयशीतलत्वम् । मधुरत्वम् । पित्तश्रमशोषहारित्वञ्च । अस्यामफलगुणाः । कषायत्वम् । अग्निदीपनत्वम् । रक्तविकारित्वञ्च ॥ अस्य त्वग्गुणाः । शीतत्वम् । कषायत्वम् । व्रणनाशित्वम् । गर्भिणीगर्भसंरक्षकत्वम् । स्तनदुग्धदाढ्यत्वञ्च । इति राजनिर्घण्टः ॥
(अस्य पर्य्यायगुणौ यथा ।
"उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।
उदुम्बरो हिमो रूक्षो गुरुः पित्तकफापहित् ॥
मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १म भागे वटादिवर्गे ।
अस्य फलगुणांश्चाह चरकः सूत्रस्थाने खप्तविंशेऽध्याये यथा,—
"अश्वत्थोदुम्बरप्लक्षन्यग्रोधानां फलानि च ।
कषायमधुराण्यानि वातलानि गुरूणि च ॥ *॥)
कुष्ठविशेषः । देहली । गोबराटेर नीचेर काठ इति भाषा । षण्ढकः । नपुंसकं । इति हेमचन्द्रः ॥

उदुम्बरदला, स्त्री, (उदुम्बरस्य दलमिव दलमस्याः ।) दन्तीवृक्षः । इति राजनिर्घण्टः ॥ (अस्या गुणादयो दन्तीशब्दे ज्ञेयाः ॥)

उदुम्बरपर्णी, स्त्री, (उदुम्बरस्य पर्णमिव पर्णमस्याः ।) उड़म्बरपर्णी । दन्तिकावृक्षः । इत्यमरः ॥ (अस्याः पर्य्यायाक्षरकेश कल्पस्थाने १२ अध्याये उक्ताः । यथा,—
"दन्त्युदुम्बरपर्णी स्यान्निकुम्भोऽथ मुकूलकः" ॥)

उदूखलं, क्ली, (उदूर्द्ध्वं तत् खञ्च । तत् लाति । आतोनुपेति कः । पृषोदरादित्वात् साधुः ।) गुग्गुलुः । इति मेदिनी ॥ तण्डुलकरणार्थकाष्ठनिर्म्मितपात्रम् । उखलि इति भाषा । तत्पर्य्यायः । उलूखलं २ । इत्यमरः ॥ ("संकुचोदूखले विदान्" इत्यादिप्रयोगो भावप्रकाशादौ द्रष्टव्यः ॥)

उदूढः, त्रि, (उत् + वह + क्तः ।) ऊढः । स्थूलः । इति मेदिनी ॥ (यथा, माघे । १ । ३६ ।)
"उदूढलोकचित्तयेन साम्प्रतम्
गुरुर्धरित्री क्रियतेतरां त्वया" ॥)

उद्गतं, त्रि, (उत् + गम + क्त ।) उद्दान्तम् । कर्द्दितवस्तु । इत्यमरः ॥ ऊर्द्ध्वगतम् । उदितम् ॥

उद्गमः, पुं, (उत् + गम + अप् ।) ऊर्द्ध्वगमनम् । उदयः ॥ (आविर्भावः । यथा, कुमारे । ७ । ७७ ॥
"रोमोद्गमः प्रादुरभूदुमायाः
स्विन्नाङ्गुलिः पुङ्खवकेतुरासीत्" ।
"फलेन सहकारस्य पुष्पोद्गम इव प्रजाः" ॥
इति रघुवंशे । ४ । ९ ॥ प्रस्थानं बहिर्गमनम् ।
"तनयानां क्षुधार्त्तानां पश्यन् प्रायोद्गमन्यधाम्" ।
इति कथासरित्सागरे ४ तरङ्गे ॥)

उद्गमनीयं, क्ली, (उत् + गम + अनीयर् ।) धौतवस्त्रादयं । इत्यमरः ॥ धोया योड़ इति भाषा ।
("सा मङ्गलस्नानविशुद्धगात्री
गृहीतपत्युद्गमनीयवस्त्रा" ।
इति कुमारे । ७ । ११ ॥)

उद्गाढं, क्ली, (उत् + गाह + क्त ।) अतिशयः । तद्युक्ते त्रि । इत्यमरः ॥ ("प्रेमार्द्राः प्रणयस्मृतेः परिचयादुद्गाढरागोदयाः" । इति साहित्यदर्पणे । ३य परिच्छेदे ॥)

उद्गाता, [ऋ] पुं, (उद्गायति साम यः । उत् + गै + तृच् ।) सामवेदज्ञः । सामवेदविदब्राह्मणः इत्यमरः ॥
("ब्रह्माणं परमं वक्त्रादुद्गातारञ्च सामगम् ।
होतारमथ चाध्वर्य्युं बाहुभ्यामसृजत्प्रभुः" ॥
इति हरिवंशे । तथा च मनुः । ८ । २०९ ।
"होता वापि हरेदश्वमुद्गाता चाप्यनःक्रये" ॥
"उद्गाटहोट्टब्रह्माणो यथाध्वर्य्युं विनाध्वरे" ।
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशेऽध्याये ॥)

उद्गारः, पुं, (उत् + गृ + घञ् ।) उद्गमनम् । इत्यमरः ॥ (यथा, रघौ । ६ । ६० ।
"आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्िराजः" ॥)
शब्दः । इति भरतः ॥ (यथा महाभारते ३ ।
"तस्य लाङ्गूलनिनदं पर्व्वतः स गुहामुखैः ।
उद्गारमिव गौर्नदद्मुत्ससर्ज समन्ततः" ॥)
कण्ठगर्ज्जनं । इति जटाधरः ॥ ढेकुर इति भाषा । तनु नागवायुकर्म्म । इति श्रीधरस्वामी ॥ (खावः ।

चारणम्। यथा, रघौ। ४। ५३।
"खर्ज्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः"।
"अधः प्रतिहतो वायुः श्लेष्मणा मारुतेन च"।
"करोत्युद्गारबाऊल्यम्" इति भावप्रकाशे मध्यखण्डे वातरोगाधिकारे॥ वमनप्रकारादिकं वमनशब्दे द्रष्टव्यम्॥ यथा, शारदातिलकटीकायां,—
"उद्गारे नागदृष्टस्तो नीलजीमूतसन्निभः"॥)

उद्गीतं, त्रि, (उद्गैर्गीयते स्म। उत्+गै+क्त।) उच्चैर्गीतम्। इति देवीमाहात्म्यम्॥ (यथा,—मार्कण्डेये ८४। ६।
"शब्दात्मिकासुविमलर्ग्यजुषां निधान-
मुद्गीतरम्यपदपाठवताञ्च साम्नाम्"॥)

उद्गीथः, पुं, (उत्+गै+थक्।) सामवेदभेदः। प्रणवः। इत्यमरटीकायां भरतः॥
("अस्मिन्नगस्त्यप्रमुखाः प्रदेशे
भूयांस उद्गीथविदो वसन्ति"॥
इति उत्तररामचरिते। २याङ्के।)
सामवेदध्वनिः। इत्यमरः॥ सामगानम्। इति सारसुन्दरी॥ साम्नां द्वितीयोऽध्यायः। इति भगीरथः॥ (भवपुत्रः। इति विष्णुपुराणम्॥)

उद्गूर्ण, त्रि, (उत्+गूर+क्त।) उद्यतम्। इत्यमरः॥ उत्तोल्यधृतवस्त्रादि। इति भरतः॥

उद्ग्राहः, पुं, (उत्+ग्रह+घञ्।) उद्ग्रहणम्। ऊर्द्धीकृत्य कस्यचित् ग्रहणम्। इत्यमरः॥ विद्याविचारः। इति भरतः॥

उद्ग्राहितः, त्रि, (उत्+ग्रह+णिच्+क्त।) उद्गीर्णः। बद्धः। ग्राहितः। इति मेदिनी॥ उपन्यस्तः। इति हेमचन्द्रः॥

उद्गः, पुं, (उद्गन्यते इति। उत्+हन्+कर्म्मणि क्यप्। टिलोपात् घत्वं च निपातनात्। यद्वा उद्गन्ति नीचताम्। उत्+हन्+ड।) प्रग्रस्तः। प्रकाण्डः। इत्यमरः॥ (हस्तपुटम्। अग्निः। शरीरस्थो वायुः॥)

उद्घनः, पुं, (ऊर्द्धं हन्यतेऽस्मिन्। उत्+हन+अप्। निपातनात् हस्य घः।) यत्र काष्ठे काष्ठं निधाय तक्ष्यते तत्। इत्यमरः॥ परकाठ इति भाषा॥ (यथा, भट्टिः ७।६२।
"तस्मिन्नन्तर्घने पश्यन् प्रधाने सौधसद्मनः।
लौहीं द्रुघनघस्कन्धां ललितापयनां स्त्रियम्"॥)

उद्घर्षणं, क्ली, (उत्+घृष+ल्युट्।) गात्रादिघर्षणं। इष्टकया उद्घर्षणगुणाः। कण्डुकोठनाशित्वम्। त्वग्गतामितेजनत्वम्। शिरासुखकारकत्वञ्च। इति राजवल्लभः॥
("उद्घर्षणन्तु विज्ञेयं कण्डुकोठानिलापहम्"। इति चिकित्सितस्थाने चतुर्विंशेऽध्याये सुश्रुतेनोक्तम्॥ समासकथनं। उद्घर्षः। यथा। शल्यमिति॥ इति सुश्रुते उत्तरतन्त्रे ६५ अध्याये॥)

उद्घसं, क्ली, (उत्+घस्+क्यप्। घसादेशः।) मांसम्। इति हारावली॥

उद्घाटः, पुं, (उत्+घट्+घञ्।) गृहभेदः। इति चिकाण्डशेषः। चौकिर घर याना इत्यादि भाषा।
(उद्घाटनम्॥)

उद्घाटकं, क्ली, (उत्+घट्+णिच्+ण्वुल्।) कूपाज्जलोत्तोलनार्थयन्त्रविशेषः। तत्पर्य्यायः। घटीयन्त्रम् २। इति हेमचन्द्रः॥

उद्घाटनं, क्ली, (उत्+घट्+णिच्+ल्युट्।) कूपात् जलोत्तोलनार्थं रज्जुसहितघटः। तत्पर्य्यायः। घटीयन्त्रम् २। इत्यमरः॥ उत्तोलनम्। इति भरतः॥ (यथा, हितोपदेशे। मित्रप्राप्तौ॥
"धर्म्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनम्"॥)

उद्घाटितः, त्रि, (उत्+घट्+णिच्+क्त।) कृतोद्घाटनम्। खोला इति भाषा॥
("मद्देऽनुद्घाटितद्वारि नाङ्कतः प्रविशेन्नरः।
वारितार्थप्रवक्तापि पश्चाद्दमशनं त्यजेत्"॥
इति स्मृतिः॥ तन्त्रशास्त्रम्॥)

उद्घाटितज्ञः, त्रि, (जानाति इति ज्ञः। उद्घाटितस्य ज्ञः। उद्घाटित+ज्ञा+क।) प्राज्ञः। इति चिकाण्डशेषः॥

उद्घातः, पुं, (उत्+हन्+घञ्।) आरम्भः। इत्यमरः॥ (यथा, कुमारे २।१२।
"उद्घातः प्रणवो यासां न्यायस्त्रिभिरदीरणम्"।
"आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः"।
इति रघुवंशे। ४।२०॥) शस्त्रम्। ग्रन्थपरिच्छेदः। इति चिकाण्डशेषः॥ पादस्खलनम्। ("ययावनुद्घातसुखेन मार्गम्"। इति रघुः।२।७२। "रथेनानुद्घातस्त्रिमितगतिना"। इति शाकुन्तले। ६ अङ्के॥ समुपक्रमः। पवनाभ्यासयोगाय कुम्भकादिचयम्। उत्तुङ्गः। (यथा, रामायणे ४ काण्डे "पृथुपृष्टकृग्लोद्घातः"। इति॥) मुद्गरम्। इति मेदिनी॥

उद्घ्, ग्र त्यागे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) क्रस्वादिर्दन्त्यवर्गद्वितीयोपधः। क्विपि समुत्सर्गमुद्घ्याम्। स्यादौ नवद्र इति उज्झिभिषति औज्झिभूत्। ग्र उज्झती उज्झन्ती। इति दुर्गादासः॥

उद्घ्नः, पुं, (उत्+दन्+ग्र+अच्।) कीटविशेषः। तत्पर्य्यायः। मत्कुणः २ कोणकुणः ३ किटिभः ४ उत्कुणः ५। इति हेमचन्द्रः॥

उद्घण्डपालः, पुं, (उद्घण्ड इव पाल्यते इति। उद्घण्ड+पाल+ण+घञ्।) सर्पविशेषः। मत्स्यभेदः। इति मेदिनी॥

उद्दन्तुरः, त्रि, (उत् अतिशयेन दन्तुरः।) उत्तुङ्गः। करालः। उत्कटदन्तः। इति मेदिनी॥

उद्दानं, क्ली, (उत्+दो+ल्युट्।) बन्धनम्। इत्यमरः॥ (यथा, महाभारते। शान्तिपर्व्वणि।
"उद्दाने क्रियमाणे तु मत्स्यानां तत्र रज्जुभिः"।)
उद्दमः। चुल्ली। वाड़वाग्निः। मथः। लग्नः। इति विश्वः॥

उद्दामः, त्रि, (दाम्नः उद्गतः।) बन्धनरहितः। स्वतन्त्रः। इति मेदिनी॥ (यथा, रघुः।१।७८॥
"मदव्याकृष्टगङ्गायाः स्रोतस्युद्दामदिग्गजे"॥
"अत्युद्दामभिवोद्दामं गजं मदजलोद्धतम्"।
इति रामायणे॥) महान्। यथा।"उद्दामदन्तुरविधुन्तुददन्तघातैः"। इति प्रबन्ध्याः॥
("उद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि"। इति मेघदूते। २७॥ गम्भीरः। यथा भागवते १ स्कन्धे। "उद्दामभावपिशुनामलवल्गहासं"॥)

उद्दामः, पुं, (उद्दामं दाम यस्य। समासे अच्।) वरुणः। इति मेदिनी॥ (दण्डकभेदच्छन्दोविशेषः। यथा, वृत्तरत्नाकरे।
"यदि नयुगलं ततः सप्तरेफा-
स्तदा दण्डवृद्धिप्रयातो भवेद्दण्डकः।
प्रतिचरणविवृद्धरेफाः स्फुरर्णार्णव-
व्यालजीमूतलीलाकरोद्दामशङ्कादयः"॥)

उद्दालः, पुं, (उत्+दल+घञ्।) वञ्जवारकवृक्षः। इत्यमरः॥ वनकोद्रवः। इति रत्नमाला॥

उद्दालकः, पुं, (उद्दाल एव। स्वार्थे कन्।) वञ्जवारकवृक्षः। इति शब्दरत्नावली॥ (मुनिभेदः। स तु आयोदधौम्यस्य शिष्यः। तस्य नामोत्पत्तिरुक्ता महाभारते १। पौष्योपाख्याने ३ अध्याये।
"एतस्मिन्नन्तरे कश्चिदृषिर्धौम्यो नामायोदस्तस्य शिष्यास्त्रयो बभूवुरुपमन्युरारुणिर्वेदश्चेति। २३॥ स एकं शिष्यमारुणिं पाञ्चाल्यं प्रेषयामास गच्छ केदारखण्डं बधानेति। २४॥ स उपाध्यायेन संदिष्ट आरुणिः पाञ्चाल्यस्तत्र गत्वा तत्केदारखण्डं बन्धुं नाशकत्॥ २५॥ स क्लिश्यमानोऽपश्यदुपायं भवत्वेवं करिष्यामीति॥ २६॥ स तत्र संविवेश केदारखण्डे प्रयाते च तथा तस्मिंस्तदुदकं तस्थौ॥ २७॥ ततः कदाचिदुपाध्यायः आयोदो धौम्यः शिष्यानपृच्छत् क्व आरुणिः पाञ्चाल्यो गत इति॥ २८॥ ते तं प्रोचुः भगवंस्त्वयैव प्रेषितो गच्छ केदारखण्डं बधानेति। स एवमुक्तस्तान् शिष्यान् प्रत्युवाच तस्मात् तत्र सर्व्वे गच्छामः यत्र स गत इति॥ २९॥ स तत्र गत्वा तस्याज्ञानाय शब्दं चकार भो आरुणे पाञ्चाल्य क्वासि वत्स एहीति॥ ३०॥ स तत् श्रुत्वारुणिरुपाध्यायवाक्यं तस्मात् केदारखण्डात् सहसोत्थाय तमुपाध्यायं उपतस्थे॥ ३१॥ प्रोवाच चैनमुपाध्यायं व्ययमस्मात्र केदारखण्डे निःसरमाणमुदकमवारणीयं संरोद्धुं संविष्टो भगवत्शब्दं श्रुत्वैव सहसा विदार्य्य केदारखण्डं भगवन्तमुपस्थितः॥ ३२॥ तदभिवादये भगवन्तमाज्ञापयतु भवान् किमर्थं करवाणीति॥ ३३॥ स एवमुक्तउपाध्यायः प्रत्युवाच यस्मात् भवान् केदारखण्डं विदार्य्य उत्थितस्तस्मात् उद्दालकरव नाम्ना भविष्यतीत्युपाध्यायेनानुगृहीतः"। २४॥
अपरः खनामख्यात ऋषिभेदः। स तु श्वेतकेतुपिता। यथा तत्रैव कुन्तीपुत्रोत्पत्त्युद्याने १२२॥
"बभूवोद्दालको नाम महर्षिरिति नः श्रुतम्।
श्वेतकेतुरिति ख्यातः पुत्रस्तस्याभवन् मुनिः"॥ ९॥)

उद्दितः, त्रि, (उत्+दो+क्त।) बद्धः। इत्यमरटीकायां भरतः॥

उद्दीपकः, त्रि, (उत्+दीप्+ण्वुल्।) उद्दीपनकर्त्ता॥

उद्दीपनं, क्ली, (उत्+दीप्+ल्युट्।) प्रकाशनम्॥

विभावविशेषः । यथा,—
"आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ।
उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये" ॥ ते च ।
"आलम्बनस्य चेष्टाद्या देशकालादयस्तथा" ॥
चेष्टादीत्यादिशब्दात् रूपभूषणादयः । कालादि
इत्यादिशब्दात् चन्द्रचन्दनकोकिलालापभ्रमर-
झङ्कारादयः । इति साहित्यदर्पणे ॥ इय परि-
च्छेदः ॥)

उद्दीप्तः, त्रि, (उत् + दीप + क्त ।) प्रकाशितः ॥

उद्दीप्रं, क्ली, (उत् + दीप् + रक् ।) गुग्गुलुः । इत्य-
मरटीकायां भरतधृतवाचस्पतिः ॥

उद्देशः, पुं, (उत् + दिश् + घञ् ।) अनुसन्धानम् ।
अन्वेषणम् ॥ (न्यायमते नाम्ना निर्देशः । अभि-
धानं यथा,—"पदार्थोद्देशः" । समासकथनम् ।
यथा, "समासकथनमुद्देशः । यथा, ग्रल्यमिति" ॥
पर्व्वतस्य गण्डकूपः । निर्देशः । विवरणम् ।
"इत्येष ते यज्ञोद्देशो मानुषाणां प्रकीर्त्तितः" ।
इति महाभारते । स्थानम् । प्रदेशः ।
"सपर्व्वतवनोद्देशा दक्षिणार्थे स्वयम्भुवा" ।
इति महाभारते ॥)

उद्देशकः, त्रि, (उत् + दिश + ण्वुल् ।) उद्देशकर्त्ता ।
उदाहरणम् । इति लीलावती ॥

उद्देश्यः, त्रि, (उत् + दिश् + ण्यत् ।) उद्देशयः ।
उद्देशनीयः । प्रयोजनम् ॥ (यत् उद्दिश्य विधेयस्य
प्रवृत्तिः भवति तत् । अनुवाद्यम् ॥)

उद्देहिका, स्त्री, (उद्गतो देहो यस्याः ।) कीटविशेषः ।
तत्पर्य्यायः । उपजिह्विका २ उत्पादिका ३ वटिः
४ दिवी ५ । इति हारावली ॥

उद्द्रावः, पुं, (उद्द्रवणम् । द्रु + उदि अयतियौतिपूद्रव-
इति घञ् ।) पलायनम् । इत्यमरः ॥

उद्धतः, पुं, (उत् + हन् + क्त ।) राजमल्लः । इति
त्रिकाण्डशेषः ॥

उद्धतं, त्रि, (उत् + हन् + क्त ।) अविनीतम् । इति
हेमचन्द्रः ॥ (यथा, उत्तरचरिते षष्ठाङ्के ।
"धीरोद्धता नमयतीव गतिर्धरित्रीम्" ।
"मदमानसमुद्धतं रूपं न वियुङ्क्ते नियमेन मूढ़ता" ।
इति किराते । २ । ४९ ॥ उत्थितः । उत्क्षिप्तः ।
आहतः । ताडितः । यथा,—ग्राकुन्तले १म अङ्के ॥
"आत्मोद्धतैरपि रजोभिरलङ्घनीयाः" ।
निविड़ः । घोरः । यथा, पञ्चतन्त्रम् । "तुषार-
वर्षोद्धतप्रवर्षघनधारानिपातसमाहतम्" ॥)

उद्धतमनस्कत्वं, क्ली, (उद्धतं गर्व्वितं मनो यस्य तस्य
भावः ।) गर्व्वः । अभिमानः । इति ग्रब्दरत्नावली ॥

उद्धरणं, क्ली, (उत् + हृ + ल्युट् ।) उद्धारः । वान्ता-
न्नम् । उन्मूलनम् । इति मेदिनी ॥ मुक्तिः । इति
ग्रब्दरत्नावली ॥ (कण्टकादीनां ऋगादेर्व्वा ग्रो-
धनम् । निराकरणम् । उत्तोलनम् । यथा,—
"यत्नवानपि तु श्रीमाल्लाङ्गूलोद्धरणोद्धरः" ।
इति महाभारते ।
"कण्टकोद्धरणैर्नित्यमातिष्ठेत् यत्नमुत्तमम्" ।
इति मनुः ॥ ९ । २५२ । व्यसनादिभ्यो विमोचनम् ।
"सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य" ॥
इति रघुः । २ । २५ ॥)

उद्धर्षः, पुं, (उद्गतो हर्षो यस्मिन् ।) उत्सवः । इत्य-
मरः ॥ (यथा, रामायणे । ४ काण्डे ।
"अयत्नोऽस्मि रणोद्धर्षे तपस्विशरणं गृहम्" ॥)

उद्धर्षणं, क्ली, (उत् + हृष् + ल्युट् ।) रोमाञ्चः । इति
हेमचन्द्रः ॥ (चि, आनन्दकरम् । रोमाञ्चकरम् ।)
(यथा रामायणे २ । २ । १ ॥
"ततः परिषदं सर्व्वामामन्त्र्य वसुधाधिपः ।
हितमुद्धर्षणं चैवमुवाच प्रथितं वचः" ॥)

उद्धवः, पुं, (उद्धुनोति दुःखमिति । उत् + धूञ् + अच् ।)
उत्सवः । इत्यमरः ॥ यज्ञाग्निः । यादवविशेषः ।
इति मेदिनी ॥ यथा, श्रीभागवतम् ॥
"वृष्णीनां सम्मतो मन्त्री कृष्णस्य दयितः सखा ।
शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः" ॥

उद्धानं, क्ली, (उद्धीयतेऽस्मिन् । उत् + धा + ल्युट् ।)
घृतम् । इत्यमरः ॥

उद्धानः, त्रि, (उत् + धा + ल्युट् ।) उद्धृतः । वमितः ।
इति मेदिनी ॥

उद्धान्तः, पुं, (उद्धान्यते इति उत् + धन् + णिच् +
क्त ।) निर्म्मदहस्ती । इत्यमरः ॥ उद्धान्तः । इति
रमानाथः ॥

उद्धारः, पुं, (उत् + हृ + घञ् ।) ऋणम् । इत्यमरः ॥
उद्धृतिः । इति मेदिनी ॥ ("निमग्नस्य पुनरुद्धार-
एव दुर्लभः" । इति हरिदासकोपनिषत् । मोच-
नम् । यथा, शतपथब्राह्मणे १२ । ३ । ४ । २ ।
"अश्वस्य वयमुद्धारमुद्धरामहै" । मोक्षः । निर्व्वा-
णम् ॥ * ॥ उद्धियते साधारणधनात् इत्युद्धारः ।
यद्वा, साधारणद्रव्यात् यत् गरिष्ठं तदुद्धारः ।
इति श्रीनाथः । उद्धियते साधारणधनात्
निष्कृष्य विशेषनिष्ठतया एव बोध्यते इत्युद्धार-
इति अच्युतानन्दः । साधारणत्वेन उद्धियते इति
उद्धार इति रघुनन्दनः । उद्धियते साधारणधनात्
बहिर्भाव्यते इत्युद्धार इति श्रीकृष्णः । यथाह
मनुः ९ । ११२ ॥
"ज्येष्ठस्य विंश उद्धारः सर्व्वद्रव्याच्च यद्वरम् ।
ततोऽर्द्धं मध्यमस्य स्यात् तुरीयस्तु यवीयसः" ॥
ज्येष्ठस्य विंश उद्धारः उद्धियते इत्युद्धारः ज्येष्ठस्या-
विभक्तसाधारणधनात् उद्धृत्य विंशतितमो भाग-
इति तट्टीकायां कुल्लूकभट्टः ॥ * ॥ जयानन्तरं ग्र-
ज्येभ्यो लब्धं धनादिकम् । यदुक्तं मनुना ७ । ९७ ।
"राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः ।
राज्ञा च सर्व्वयोधेभ्यो दातव्यमपृथक् जितम्" ॥
"उद्धारं योद्धारः राज्ञे दद्युः । उद्धियते इत्युद्धारः
जितधनाद्यत् उत्कृष्टधनं सुवर्णरजतभूम्यादि राज्ञे
समर्पणीयम्" । इति तट्टीका ॥)

उद्धारं, क्ली, (उत् + हृ + घञ् ।) उद्धानम् । इत्यम-
रटीकायां स्वामी ॥ उनन् आका इत्यादि भाषा ।

उद्धारणं, क्ली, (उत् + हृ + णिच् + ल्युट् ।) उद्धार-
करणम् । उत्तोलनम् ॥

उद्धारा, स्त्री, गुडूची । इति ग्रब्दचन्द्रिका ॥

उद्धूनं, क्ली, (उत् + धूञ् + णिच् + ल्युट् ।) एक-
चितेलालवङ्गकर्पूरकस्तूरीमरिचत्वचचूर्णम् । इति
पाकरानेश्वरः ॥

उद्धूषणं, क्ली, (उत् + धूष + ल्युट् ।) रोमाञ्चः । इति
हलायुधः ॥

उद्धृतः, त्रि, (उत् + हृ + क्त ।) क्षतोद्धरणम् । तोला
इति भाषा । तत्पर्य्यायः । समुद्धतः २ । इत्यमरः ॥
उत्क्षिप्तः । परिशुक्लोऽभितः । इति मेदिनी ॥
("उद्धर्तुमैच्छत् प्रसभोद्धृतारिः" । इति रघुः ।
२ । ३० तथा नैषधे । ९ । ६६ ।
"इतीव वाहैर्निजवेगदर्पितैः
पयोधिरोधस्तमसुद्धृतं रजः" ॥)

उद्घ्राणं, क्ली, (उत् घ्रायते अग्निरत्र । घ्रा ग्रब्दाग्नि-
संयोगयोः उत्पूर्व्वात् तस्मात् ल्युट् ।) घृतम् । इत्य-
मरटीकायां भरतः ॥

उद्घाः, पुं, (उज्झति कूजमिति । उज्झ + क्विप् । निपा-
तनात् सिद्धम् ।) नदः । इति व्याकरणम् ॥
("तोयदागमइवोद्घभिद्ययोः" । इति रघुः ११ । ८ ।
"कूलं भिद्योद्घसन्निभौ" ॥ इति भट्टिः । ५ । २२ ॥)

उद्बुद्धः, त्रि, (उत् + बुध + क्त ।) विकसितः । इति
हलायुधः ॥ (प्रबुद्धः । यथा तिथितत्त्वे,—
"उद्बुद्धां च जगद्धात्रीं पूजयेत् दीपमालया" ॥
यथा, साहित्यदर्पणे ३ । १६२ ।
"उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।
लोके यः कार्य्यरूपः सोऽनुभावः काव्यनाट्ययोः" ॥)

उद्बोधः, पुं, (उत् + बुध् + घञ् ।) किञ्चित् ज्ञानम् ॥
(यथा साहित्यदर्पणे तृतीयपरिच्छेदे ४१ ।
"उत्पातादिसमुद्बोधः साधारणाभिमानतः ।
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति" ॥)

उद्भटः, पुं, (उत् + भट् + अप् ।) कच्छपः । सूर्य्यः ।
इति मेदिनी ॥ (सूर्य इति केचित् ॥)

उद्भटः, त्रि, (उत् + भट् + अप् ।) प्रवरः । ("पदे
पदे सन्ति भटा रणोद्भटाः" ।) इति नैषधः ॥
श्रेष्ठाश्रयः । तत्पर्य्यायः । महेच्छः २ उदारः
३ उदात्तः ४ उदीर्णः ५ महाग्रयः ६ महामनाः
७ महात्मा ८ । इति हेमचन्द्रः ॥

उद्भवः, पुं, (उद्भवनं उद्भवत्यस्मादिति वा । उत् + भू
+ अप् ।) जन्म । उत्पत्तिः । इत्यमरः ॥ ("दिलीप-
सूनुर्महिष्याकरोद्भवः" । इति रघुः । ३ । ७ । "वि-
ष्णुपादोद्भवा गङ्गा" । इति पुराणम् । विष्णुः ।
प्रपञ्चं प्रत्युपादानकारणत्वात् ॥)

उद्भिज्जः, त्रि, उद्भिज्जाः । इत्यमरटीकायां रमानाथः ॥

उद्भिज्जं, त्रि, (उद्भेदनमिति उद्भिद् सम्पदादित्वात्
क्विप् । तस्मात् जायते यत् । उद्भिद् + जन् + ड ।)
उद्भिद्यजातमात्रम् । तच्च तरुगुल्मादि । इत्यमरः ॥
(यथा, मनुः । १ । ४६ । "उद्भिज्जाः स्थावराः सर्व्वे
बीजकाण्डप्ररोहिणः" । "इन्द्रगोपमण्डूकप्रभृतय-
उद्भिज्जाः" ॥ इति सूत्रस्थाने प्रथमेऽध्याये सुश्रुते-
नोक्तम् ॥)

उद्भित्, [द्] त्रि, (उद्भिनत्ति भूमिमिति । उत् +
भिद् + क्विप् ।) उद्भिज्जम् । इत्यमरः ॥ तच्च प-
ञ्चधा । वृक्षः १ गुल्मः २ लता ३ वल्ली ४ तृणम् ५ ॥
(यथा, महाभारते आदिपर्व्वणि । "संस्वेदजा

अण्डजा उद्भिदश्च"। उद्भिद्यते पशुफलमनेन इति निरुक्तेः यागभेदः ॥)

उद्भिदं, त्रि, (उद्भिनत्तीति। उद्+भिद्+इगुपधेति कः।) तरुगुल्मादि। तत्पर्य्यायः। उद्भित् २ उद्भिज्जम् ३। इत्यमरः॥ उद्भिजम् ४। इति रभसाश्वः॥ (यथा महाभारते १४ पर्व्वणि।
"जरायुजाण्डजातानि स्वेदजान्युद्भिदानि च"॥)

उद्भिदं, क्ली, (उद्भिनत्तीति। उद्+भिद्+क।) पांशुलवणम्। इति रत्नमाला॥ पाडा लुण इति भाषा। ("उद्भिदानि पलाशेक्षुकरीषवेणुक्षितिजानि"। इति सुश्रुते सूत्रस्थाने षट्चत्वारिंशत्तमेऽध्याये॥)

उद्भूतः, त्रि, (उद्भवति स्म। उद्+भू+क्त।) उत्पन्नः। जातः। यथा। ईशानसंहितायाम्।
"माघे कृष्णचतुर्दश्यामादिदेवो महानिशि।
शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः"॥
इति तिथ्यादितत्त्वम्॥ (तथा, भाषापरिच्छेदे ५६।
"उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः"।)

उद्भूतरूपं, क्ली, (उद्भूतं प्रत्यक्षयोग्यं रूपम्।) नयनगोचररूपम्। यथा,—भाषापरिच्छेदे॥
"उद्भूतरूपं नयनस्य गोचरं
द्रव्याणि तद्यन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम्॥५४॥
क्रियाजाती योगयत्तो समवायच्च तादृशम्।
गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः"॥५५॥

उद्भ्रमः, पुं, (उद्भ्रमणमिति। उत्+भ्रम+घञ्। नोदात्तोपदेशेति न वृद्धिः।) उद्वेगः। इत्यमरः॥

उद्भ्रान्तं, क्ली, (उत्+भ्रम+क्त।) बाह्यमुद्भ्रम्य मण्डलाकारखड्गभ्रामणं। इति महाभारतम्॥ (परिभ्रान्ते, त्रि। यथा, रघौ ४। ४६॥
"भारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः"॥
विकले। विक्लवे। यथा, रामायणे,—
"उद्भ्रान्तहृदयश्चापि विवर्णवदनोऽभवत्"॥)

उद्यः, पुं, मदः। इति हेमचन्द्रः॥ (उद्यते यत्। वद+क्यप्। कथनीये, त्रि। यथा, स्मृतौ यम्। वाक्यम्।)

उद्यतं, त्रि, (उत्+यम+क्त।) उत्तोल्यष्टतवस्त्रादि। उद्यतश्चस्त्रादि। तत्पर्य्यायः। उद्गूर्णं २॥ इत्यमरः॥ (यथा, रघुवंशे। ४। १६।
"प्रजार्थसाधने तौ हि पर्य्यायोद्यतकार्म्मुकौ"॥)

उद्यतः, पुं, (उत्+यम+क्त।) ग्रन्थपरिच्छेदः। इति जटाधरः॥

उद्यमः, पुं, (उत्+यम+घञ्। संज्ञापूर्व्वकत्वात् वृद्ध्यभावः।) उद्योगः। तत्पर्य्यायः। गूरणम् २। इत्यमरः॥ गूरणम् ३ गोरणम् ४। इति तट्टीका॥ उत्साहः ५ अध्यवसायः ६ उद्योगः ७। इति जटाधरः॥ (यथा, कुमारे ५। ३।
("निगृह्य चैनां तपसे कृतोद्यमाम्"।
"गृहाक मेनां न नियन्तुमुद्यमात्"।
इति च कुमारे ५। ५॥)

उद्यानं, क्ली, (उद्यायति क्रीड़ार्थमस्मिन्। उत्+या+ल्युट्।) राज्ञः साधारणं वनम्। तत्पर्य्यायः। आक्रीड़ः २।
("वाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्म्या"। इति मेघदूते ७।)निःसरणम्। प्रयोजनम्। इत्यमरः॥

उद्यानपालः, त्रि, (उद्यानं पालयतीति। उद्यान+पालि+अण्।) उद्यानरक्षकः। माली इति भाषा॥
("उद्यानपालसामान्यमृतवस्तुमुपासते"॥
इति कुमारे।२। ३६॥)

उद्युक्तः, त्रि, (उत्+युज्+क्त।) उद्यमयुक्तः। उद्योगविशिष्टः। इत्यमरटीकायां भरतः॥ (यथा, अमरकोषः। "इष्टार्थोद्युक्तउत्सुकः"।)

उद्योगः, पुं, (उत्+युज+घञ्।) यत्नः। चेष्टा। तत्पर्य्यायः। उत्साहः २ अध्यवसायः ३ उद्यमः ४। इति जटाधरः॥ (यथा, मार्कण्डेये ८८।२।
"उद्योगः सर्व्वसैन्यानां दैत्यानामादिदेश ह"।
"उद्योगादनिवृत्तस्य सुसहायस्य धीमतः"।
छायेवानुगता तस्य नित्यं श्रीः सहचारिणी"॥
इति नीतिवाक्यम्।
महाभारतस्य उद्योगपर्व्व। यथा, महाभारते १।१।६३।
"उद्योगः सैन्यनिर्य्याणं श्वेतोपाख्यानमेवच"॥)

उद्योगी, [न्] त्रि, (उद्योगोऽस्यास्तीति। उद्योग+इनि।) उद्योगविशिष्टः। उद्यमी। तथा च।
"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः"॥
इति नीतिसारे १३॥

उद्योतः, पुं, (उत्+द्युत+घञ्) आलोकः। ज्योतिः। इति हलायुधः॥

उद्रः, पुं, (उनत्तीति। उन्द+रक्।) जलजन्तुविशेषः। इत्यमरः॥ उदविड़ाल इति भाषा।

उद्रङ्गः, पुं, पुरविशेषः। "व्योमचारि पुरं शौभमुद्रङ्गः प्रतिमार्गकः"। इति जटाधरः॥

उद्रङ्गः, पुं, व्योमचारि पुरम्। तत्पर्य्यायः। खपुरं २ ऊर्द्धगं पुरं ३ हरिश्चन्द्रपुरं ४ शौभं ५ प्रतिमार्गकः ६ चङ्गा ७ चङ्गः ८। इति त्रिकाण्डशेषः॥

उदग्रः, पुं, (उद्गतो रथो यस्मात्।) रथकीलम्। ताम्रचूड़पक्षी। इति मेदिनी॥

उदिक्तं, त्रि, (उदिच्यते स्म। उत्+रिच+क्त।) स्फुटम्। स्पष्टम्। इति जटाधरः॥

उदेकः, पुं, (उत्+रिच+घञ्।) उपक्रमः। वृद्धिः॥
"अधुनैव कुरङ्गाक्षि जहार जगतां मनः।
न जाने यौवनोद्रेके जीवनस्यापि का गतिः"॥
इत्युद्भटः॥
"हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्त्ति जगताम्"॥
इति महिम्नःस्तोत्रम्॥
("तमःप्रवेशः संरम्भो दोषोद्रेकहतस्मृतेः"।
इति वैद्यकरुग्विनिश्चयेऽपस्माराधिकारे॥)

उद्रेका, स्त्री, (उद्रेक+टाप्।) महानिम्बः। इति राजनिर्घण्टः॥

उद्वत्सरः, पुं, (उत्क्रान्तो वत्सरः।) वत्सरः। इति हेमचन्द्रः॥

उद्बन्धनं, क्ली, (उत्+बन्ध+ल्युट्) ऊर्द्धबन्धनम्। इति स्मृतिः॥ गलाय दड़ि देओन फाँसी देओन टाङ्गान इत्यादि भाषा॥

उद्वमनं, क्ली, (उत्+वम+ल्युट्।) उद्गीरणम्। तुलिया फेलन वाँति करण इत्यादि भाषा॥

उद्वर्त्तः, त्रि, (उत्+वृत्+घञ्।) अतिरिक्तः। उवरण वाड़ा इत्यादि भाषा। यथा। "उद्वर्त्तो हि यत्नः समधिकफलमाचष्टे"। इति व्याकरणटीका॥

उद्वर्त्तनं, क्ली, (उत्+वृत्+णिच्+भावे करणे वा ल्युट्।) उत्पतनम्। (यथा, मेघदूते ४२।
मोघीकर्त्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि"।)
विलेपनम्। घर्षणम्। इति मेदिनी॥
(यथा, मनुः ४। १३२।
"उद्वर्त्तनमपस्नानं विण्मूत्रे रक्तमेव च।
श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामतः"॥)
शरीरनिर्म्मलीकरणगन्धद्रव्यादि। तत्पर्य्यायः। उत्सादनम् २। इत्यमरः॥ हरिद्रा सेवन आवटन इत्यादि भाषा। सामान्योद्वर्त्तनगुणाः। कफवायुमेदोवातरोगनाशित्वम्। अक्लैव्यं-धर्म्मनिर्म्मलकारित्वञ्च॥ हरिद्राद्युद्वर्त्तनगुणाः। कण्डूवैवर्ण्यरूक्षताहारित्वम्॥ तिलोद्वर्त्तनगुणाः। कण्डूरूक्षतात्वग्दोषनाशित्वम्। इति राजवल्लभः॥
("उद्वर्त्तनं वातहरं कफमेदोविलापनम्।
स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम्॥
शिरासुखविविक्तत्वं त्वक्स्थस्यालेख तेजनम्॥
इति चिकित्सितस्थाने २४ अध्याये सुश्रुतेनोक्तम्॥)

उद्वर्द्धनं, क्ली, (उत्+वृध्+ल्युट्।) अन्तर्हासः। इति चिकाण्डशेषः॥

उद्वहितः, त्रि, (उत्+वह्+क्त।) उद्धृतः। इति भूरिप्रयोगः॥ उद्वाहितो वा इति पाठः॥

उद्वहः, पुं, (उद्ध्वं वहति प्रापयतीति। उत्+वह+अच्।) पुत्रः। इति हेमचन्द्रः॥ (यथा,—रघुः। ६। ६।
("उदयमस्तमयञ्च रघूद्वहात्"॥)
समवाय्यन्तर्गतवायुविशेषः। स तु प्रवहवायोरूर्द्धस्थितः। इति सिद्धान्तशिरोमणिः॥
("आवहः प्रवहश्चैव विवहश्च समीरणः।
परावहः संवहश्च उदवहश्च महाबलः॥
तथा परिवहः श्रीमानुत्पातभयशंसिनः।
इत्येते क्षुभिताः सप्त मारुता गगनेचराः"॥
इति हरिवंशे। २३६ अध्याये। विवाहः॥)

उद्वहा, स्त्री, (उद्वह+टाप्।) कन्या। पुत्री। इति हेमचन्द्रः॥

उद्वानः, त्रि, (उत्+वन+घञ्।) उद्गमितः। उद्वान्तः। इत्यमरटीकायां रायमुकुटः॥

उद्वान्तं, त्रि, (उत्+वम्+क्त।) वमितवस्तु। तत्-

पर्य्यायः। उद्गतं २। इत्यमरः॥
उद्गान्तः, पुं, (उद्गतं वान्तं मदो यस्मात्।) निर्म्मदहस्ती। इति मेदिनीकरजटाधरौ॥
उद्गासनं, क्ली, (उत्+वस्+णिच्+ल्युट्।) मारणम्। वधः। इत्यमरः॥ (संस्कारभेदः। यथा, कात्यायने ६। १। २॥
"अप उपस्पृश्य प्राणाद्याहुतीः परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणस्रुक्संमार्जनोद्वासनावेक्षणानि कृत्वाग्नीन्न उत्पूय पश्चात् आज्यग्रहणम्"॥)
उद्वाहः, पुं, (उत्+वह+घञ्।) विवाहः। इत्यमरः। तस्य लक्षणं भार्य्यात्वसम्पादकग्रहणम्। तस्य स्वीकाररूपज्ञानविशेषस्य समवायविषयतयोर्भेदात् वरकन्ययोर्विवाहकर्त्तृत्वकर्म्मत्वे। स तु अष्टविधः। वरमाहूय यथाशक्त्यलङ्कृता कन्या यत्र दीयते स ब्राह्मः १। यत्र यज्ञस्थायर्त्विजे कन्यादानं स दैवः २। यत्र वरात् गोद्वयं गृहीत्वा तेनैव सह कन्यादानं स आर्षः ३। यत्र अनया सह धर्म्मं चरतां इति नियमं कृत्वा कन्यादानं स प्राजापत्यः ४। यत्र धनं गृहीत्वा कन्यादानं स आसुरः ५। यत्र कन्यावरयोरन्योन्यानुरागात् त्वं मे भार्य्या त्वं मे पतिरिति निश्चयः स गान्धर्व्वः ६। यत्र बलात्कारेण कन्याहरणं स राक्षसः ७। यत्र सुप्तायां मत्तायां प्रमत्तायां वा कन्यायां निर्জ্জने गमनं स पैशाचः ८। तस्य निर्णयः। सगोत्रामनवरवयस्कां समानप्रवरां पित्रपेक्षयोर्द्ध्वतनषष्ठीं पुरुषाणां पुत्रकन्यासन्ततिपरम्परया प्रत्येकसप्तमीपर्य्यन्तां अधस्तने तदपेक्षया सप्तमीपर्य्यन्तां पितृबन्ध्वपेक्षयोर्द्ध्वतनषष्ठीं प्रत्येकापेक्षया सप्तमीपर्य्यन्तां अधस्तने तदपेक्षया सप्तमी पर्य्यन्तां मातामहसमानोदकां मातामहापेक्षयोर्द्ध्वतनचतुर्थीं पुरुषाणां पुत्रकन्यासन्ततिपरम्परया प्रत्येकापेक्षया पञ्चमीपर्य्यन्तां अधस्तने तदपेक्षया पञ्चमीपर्य्यन्तां मातृबन्ध्वपेक्षयोर्द्ध्वतनचतुर्थीं प्रत्येकापेक्षया पञ्चमीपर्य्यन्तां अधस्तने तदपेक्षया पञ्चमीपर्य्यन्ताञ्च कन्यां परित्यज्य उद्वाहः कर्त्तव्यः॥ पितृबन्धुमातृबन्धुविरहेऽपि तयोर्योग्यतामवलम्ब्य सप्तमीपर्य्यन्तायाः पञ्चमीपर्य्यन्तायाञ्च कन्यायाः परिहारः। वर्জ্জनीयानां कन्यानां मध्येऽपि या त्रिगोत्रान्तरिता सा विवाह्या। अत्र सप्तमगणनप्रतियोगिपितृपितृबन्धुपञ्चमगणनप्रतियोगिमातामहमातृबन्धुगोत्रमादायैव त्रिगोत्रगणनम्। सूत्रस्य सगोत्राविवाहे दोषाभावः। मातृसपत्नीभ्रातृकन्यां तद्दौहित्रीं अध्यापयितृकन्यां शिष्यकन्यां ब्रह्मदगुरुकन्याञ्च परित्यज्य विवाहः कर्त्तव्यः॥ अथ कन्यादानाधिकारिणः। आदौ पिता। तदभावे पितामहः। तदभावे भ्राता। तदभावे पितृज्ञातिः। तदभावे मातामहः। तदभावे मातुलः। तदभावे माता। तदभावे मातामहज्ञातिः। एतेषामप्यभावे कन्या स्वयं वरं कुर्य्यात्॥ अथ विवाहपूर्व्वकर्त्तव्यकर्म्म। अवश्यंभावि शुभाशुभग्रहादिदोषशान्त्यर्थं होमो हिरण्यगोवस्त्रदानम्। ततो नान्दीश्राद्धम्। शुभसमये वरे उपस्थिते स्वस्तिवाचनादिकं विधाय वरणम्। ध्रुवाचारादि। ततः कन्यादानं यथाशक्ति धनदानञ्च। ततः स्मृह्योक्तविधिनाग्निं संस्थाप्य कुशण्डिकां समाप्य पाणिग्रहणं सप्तपदीगमनञ्च कर्त्तव्यम्॥ ०॥ ज्येष्ठेऽक्षतविवाहे विवाहकर्त्ता कनिष्ठः परिवेदनदोषविशिष्टो भवति। ज्येष्ठः परिविन्नः। सा कन्या परिवेदनीया। कन्यादाता परिदाथी। तत्पुरोहितः परिकर्त्ता। ते सर्व्वे पतिताः। किन्तु देशान्तरस्थज्ञीवैकाग्रवैमात्रेयवेश्यासक्तशूद्रतुल्यातिरोगिजड़मूकान्धबधिरकुब्जवामनकुण्ठातिवृद्धनैष्ठिकब्रह्मचारिवानप्रस्थभिक्षुक्षत्रियसक्तदुष्टधनवृद्धिप्रसक्तकामकारिदत्तकोन्मत्तचौरेषु ज्येष्ठेष्वनूढ़ेष्वपि कनिष्ठविवाहे न दोषः। एवं विज्ञातरूपानूढ़ा ज्येष्ठा कनिष्ठायाः सोदरायाः ऊढ़ायाः परिवेदनाय न भवति। इत्युद्वाहतत्त्वम्॥
उद्वाहनं, क्ली, (उत्+वह+णिच्+ल्युट्।) विवाहः। तत्पर्य्यायः। रणरणं २। इति त्रिकाण्डशेषः॥ हिसीत्यम्। दिवारत्नटच्छेत्रम्। इति हेमचन्द्रः॥
उद्वाहनी, स्त्री, (उद्वाहन+ङीप्।) वराटकः। इति हेमचन्द्रः॥ कड़ि इति भाषा॥
उद्वाहिकः, त्रि, (उद्वाहस्यायम्। उद्वाह+ठक्।) उद्वाहसम्बन्धी॥ (यथा, मनुः। ९। ६४।)
"नोद्वाहिकेषु मन्त्रेषु विधवावेदनं क्वचित्"॥)
उद्वाहितः, त्रि, (उत्+वह+णिच्+क्त।) उद्वर्हितः। उद्धृतः। विवाहितः। यथा। राजमार्त्तण्डे देवलः।
"बाले वृद्धे तथैवाक्षे कुब्जे दैत्यमन्त्रिणि।
उद्वाहितायां कन्यायां दम्पत्योरेकनाशनम्"॥
इति ज्योतिषतत्त्वम्॥ (क्रमिकाले आगमोक्तान्यमार्गेण विवाहिता गर्हिता भवति। यथा,—
"उद्वाहितापि या नारी त्यागीयात् सातु गर्हिता"
इत्यागमसिद्धान्तः॥)
उद्वाहिनी, स्त्री, (उद्वहति उद्वरतीति। उत्+वह+णिनि+ङीप्।) रज्जुः। इति मेदिनी॥
उद्वाहुः, त्रि, (उद्गूर्द्धे बाहुर्यस्य।) ऊर्द्धबाहुः। उद्वेगशब्दार्थे हेमचन्द्रेण लिखितः॥ (यथा, रघु। १।३। ("प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः"॥)
उद्बाहुत्वं, क्ली, ऊर्द्धीकृतबाहुः। उद्वेगशब्दार्थे मेदिनीकरेण लिखितम्॥
उद्विग्नः, त्रि, (उत्+विज+क्त। ओदितश्चेति तस्य नः। श्वीदित इति नेट्।) उद्वेगयुक्तः। यथा,—
"तैर्व्वक्त्ररसमंशुमच्चक्षुभिन्नविपन्नकैः।
निमग्नोद्विग्नसंक्षीणैः पद्मे दीनेव मेदिनी"॥
इति भट्टिकाव्ये ४। ४२॥ (तथा च भारते,—
"नोद्विग्नश्चरते धर्म्मं नोद्विग्नश्चरते क्रियाम्"॥)
उद्विवर्हणं, क्ली, (उत्+वि+वृह+ल्युट्।) उद्धारकरणम्। यथा,—
"कः अद्यधीतान्यतमस्तव प्रभो
रसाङ्कताया भुव उद्विवर्हणम्"।
इति श्रीभागवते १२।४३॥ उद्विवर्हणं उद्धरणम्। इति तट्टीकायां श्रीधरस्वामी॥
उद्वृत्तः, त्रि, (उत्+वृत्+क्त। वृत्तावरित्वात् उत्क्रान्तो वा।) उत्तोलितः। उत्क्षिप्तः। परिमुक्तोज्झितः। उद्दान्तः। इति हेमचन्द्रो मेदिनी च॥ दुर्व्वृत्तः॥ (यथा, महाभारते,—
'उद्वृत्तान् सततं लोकान् राजा धर्म्मेण शास्ति वै"॥)
उद्वेगं, क्ली, (उद्विज्यतेऽनेन इति। उत्+विज्+घञ्।) गुदाकमलम्। इत्यमरः॥
उद्वेगः, पुं, (उत्+विज्+भावे घञ्।) उद्वेजनम्। तत्पर्य्यायः। उद्भ्रमः २। इत्यमरः॥ चमत्कारः। इति भरतः॥ विरहजन्यदुःखम्। इति रसमञ्जरी॥ भयं। इति हेमचन्द्रः। उद्बाहुकम्। उद्भ्रमणम्। इति मेदिनी॥
("त्र्यक्षत्वारम्भे हर पशुपतेरार्द्रनागाजिनेच्छाम्।
प्राप्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या"॥
इति मेघदूते पूर्व्वमेघे ३७ श्लोकः॥
"सद्यं वसुजे महाभुजः
सहसोद्वेगमियं व्रजेदिति"।
रघुः ८। ७।
"संक्षोभेक्ष्वप्युद्वेगो माधुर्य्यं परिकीर्त्तितम्"।
इति साहित्यदर्पणे॥ इय परिच्छेदः॥)
उद्वेगः, त्रि, (उद्गतो वेगो यस्मात्।) स्खलितः। शीघ्रगामी। ऊर्द्धबाहुः। इति हेमचन्द्रः॥
उद्वेजनं, क्ली, (उत्+विज+ल्युट्।) उद्वेगः॥ ("परदाराभिमर्षेषु प्रहर्त्तारमृते महीपतिः।
उद्वेजनकरैर्दण्डैश्छित्त्वा प्रवासयेत्"॥
इति मनुः॥ ८। ३५२॥)
उधः, [स्] क्ली, (वहति उनत्ति वा। वह प्रापणे उन्द क्लेदने वा+असुन्।) ऊधः। इत्यमरटीकायां रमानाथः॥ गरर पालान् इति भाषा॥
उध्रस ग उञ्छे। इति कविकल्पद्रुमः॥ (आदिं-परं-सकं-सेट्।) एतस्मादौ पञ्चमखरः। मध्ये केवलधकारस्याधो रेफः। अयादावुध्रस उञ्छ इत्ययमुदित्त्वादिकः पठ्यते तस्य ध्रासयतीति रूपं अपरं ध्रस्यति। येषां ध्रसेः उत्पूर्ब्बस्य गणदयेऽपि पठनं तेषां मते त्राविधावुध्रस्यति निगदते त्रिचि कृतेऽप्युध्रासयत्यन्यतः। अत्र उत्पूर्ब्बस्येति तु उत्कारः गतूपसर्गः। ग उध्रस्यति ध्रस्यं दीनः। इति दुर्गादासः॥
उध्रस क उत्क्षेपे। उञ्छे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क उध्रासयति धूलिं वायुः। इति दुर्गादासः॥
उन्द, ई ध क्लेदे। इति कविकल्पद्रुमः॥ (धर्षां-परं-सक-सेट्।) क्रखादिः। क्लेद आर्द्रभावः। ध उनत्ति वस्त्रं पयसा। ई उन्दः उत्तः। उन्दिदिवातः। इति दुर्गादासः॥
उन्दः, पुं, उन्दुरः इति द्विरूपकोषः॥
उन्दुरः, पुं, (उन्द+उरः।) मूषिकः। इति भरतो द्विरूपकोषश्च॥ इदुर इति भाषा॥
उन्दूरः, पुं, (उन्द+ऊरः।) जन्तुविशेषः। इदुर इति भाषा। तत्पर्य्यायः। मूषिकः २ आखुः ३। क्षुद्र-

खेत्। गिरिका ४ वालमूषिका ५। नेऽटे इदुंर इति भाषा। इत्यमरः॥ मूषकः ६ मूषः ७ मूषीकः ८ उन्दूरः ९ खनकः १० वभ्रुः ११ दृषः १२ आखनिकः १३ दृशूः १४ दीना १५ मुषीका १६। मूषा १७ मूषीका १८ मूषिका १९। इति शब्दरत्नावली॥ विलेशयः २० सुषिरः २१ इन्दूरः २२। इति जटाधरः॥ क्षुद्रस्य तस्य पर्य्यायः। चिक्का २३ वेश्मनकुषः २४ चिक्का २५। इति च शब्दरत्नावली॥ हालाहला २६ अञ्जनिका २७। इति जटाधरः॥

उन्दूरः, पुं, (उन्द + वाऽलकात् ऊरः।) मूषिकः। इति हेमचन्द्रः॥

("उन्दूरश्चान्तरहितं तेन वातघ्नकल्पवत्"॥ इति वाभटे चिकित्सास्थाने नवमेऽध्याये॥)

उन्दूरकर्णी, स्त्री, (उन्दूरोः मूषिकस्य कर्णाइव पर्णमस्याः। उन्दूरकर्ण + ङीष्।) आखुकर्णीलता। इति राजनिर्घण्टः॥

उन्नः, त्रि, (उन्द + क्त। नुदविदेति पक्षे नत्वम्।) स्निग्धः। दयापरः। इति हेमचन्द्रः॥

उन्नतः, त्रि, (उत् + नम + क्त।) वर्द्धितः। तत्पर्य्यायः। उच्चः २ प्रांशुः ३ उदयः ४ उच्छ्रितः ५ उत्तुङ्गः ६। इत्यमरः॥ उच्चैः ७। इति शब्दरत्नावली॥ तुङ्गः ८। इति जटाधरः॥ (यथा, रघुः। १।१५। "स्थितः सर्व्वोन्नतेनोर्व्वीं क्रान्त्वा मेरुरिवात्मना"॥ क्ली, दिनपरिमाणज्ञानसाधनं उपायः। यथा सिद्धान्तशिरोमणौ। "दिवसस्य यदूनं यच्च ग्रासं तयोर्यदन्यं तदुन्नतसंज्ञं ज्ञेयम्"। (पुं, चाक्षुषमन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये ७६।५४।

"सुमेधा विरजाश्चैव हविष्मानुन्नतो मधुः।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः"॥)

उन्नतनाभिः, त्रि, (उन्नतो नाभिः यस्य।) उच्चनाभियुक्तः। तत्पर्य्यायः। तुन्दिः २। इति हलायुधः।

उन्नतानतं, त्रि, (उन्नतञ्च तत् आनतञ्चेति।) उच्चनीचस्थानादि। तत्पर्य्यायः। वन्धुरम् २। इत्यमरः॥

उन्नतिः, स्त्री, (उत् + नम + क्तिन्।) गरुड़भार्य्या। सम्पद्धिः। ("वक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं गच्छतः"। इति साहित्यदर्पणे॥ इयं परिच्छेदे।) उदयः। इति हेमचन्द्रः॥ (यथा, सिद्धान्तशिरोमणौ।

"मासान्तपादे प्रथमेऽथवेन्दोः
ग्रहोन्नतिर्यद्दिवसेऽवगम्या।
तदोदयस्ते निशि वा प्रसाध्यः
प्रभुर्विधोः खोदितनाड़िकाद्यैः"॥)

उन्नतीशः, पुं, (उन्नत्याख्यदाख्यया प्रसिद्धाया गरुड़पत्न्याः ईशः स्वामी।) गरुड़पक्षी। इति त्रिकाण्डशेषः॥

उन्नमितः, त्रि, (उत् + नम् + णिच् + क्त।) उत्तोलितः। ऊर्द्धीकृतः। इति श्रीधरस्वामी॥

("अथ प्रयत्नोन्नमितानमत्फणै-
र्दृते कथञ्चित् यमिनां गणैरधः"॥
इति माघे। १। १४॥)

उन्नयः, पुं, (उन्नयनम्। उत् + नी + क्वचिदपवाद विषयेऽप्युत्सर्गोऽभिनिविशते इति न्यायात् क।) ऊर्द्धनयनम्। इत्यमरः॥

उन्नयनं, क्ली, (उत् + नी + ल्युट्।) वितर्कः। इति हेमचन्द्रः॥ ऊर्द्धप्रापणम्। उत्तोलनम्। तोलन उठान इत्यादि भाषा॥

(यथा, कात्यायने। २२।१०।५॥

"तेष्वेवोन्नयनमभ्यभि सोमानुन्नयन्तीति श्रुतेः,"। उदूर्द्धे नयनं यस्येति वाक्ये वाच्यलिङ्गः"॥)

उन्नायः पुं, (उन्नयनं इति। उत् + नी + घञ्।) उन्नयनम्। इत्यमरः॥ (यथा भट्टिः। ७। ३७।

"उन्नायानधिगच्छन्तः प्रद्रावैर्वसुधाभृताम्"॥)

उन्नाहः, क्ली, (उत् + नह + घञ्।) काञ्चिकम्। इति हेमचन्द्रः॥

उन्निद्रः, त्रि, (उद्गता निद्रा स्वप्नो दुःखादिकं वा यस्मात्।) प्रफुल्लः। विकसितः। इति हेमचन्द्रः॥

("उन्निद्रपुष्पचयचम्पकपुष्पभासाः"।
इति माघः। प्रबुद्धः। श्रुयनादुत्थितः।
"तासुन्निद्रामवनिशयनां सौधवातायनस्थः"।
इति मेघदूते। ८८। तथा, शाकुन्तले षष्ठाङ्के।
"शय्याप्रान्तविवर्त्तनैर्विगमयत्यु न्निद्रयेव क्षपाः"॥)

उन्भ प श्र पूर्त्तौ। (तुदां + परं + सकं + सेट्।) रुधादिः। प श्र उम्भति कुम्भं जलेन लोकः। उम्भामास। इति दुर्गादासः॥

उन्मत्तः, त्रि, (उत् + मद + क्त।) उन्मादयुक्तः। वायुकृतचित्तविभ्रमविशिष्टः। पागल इति भाषा। तत्पर्य्यायः। उन्मादवान् २। इत्यमरः॥ तस्यौषधम्, यथा,—गारुड़े १९९ अध्यायः॥ *॥

"कूर्म्ममत्स्याखुमहिषगोगृहगालाश्च वानराः।
विड़ालवर्हिकाकाश्च वराहोलूककुक्कुटाः॥
हंस एषाश्च विष्मूत्रं मांसं वा रोमशोणितम्।
धूमं दद्याज्ज्वरार्त्तस्य उन्मत्तेभ्यश्च शान्तये॥
एतान्यौषधजातानि धूपितानि महेश्वर।
निहन्ति ज्वरमुन्मादं कृत्तमिन्द्राशनिर्यथा"॥
("तमात्मनो हतमुपघ्नन्तो देवादयः कुर्व्वन्त्युन्मत्तम्"। इति निदानस्थाने सप्तमेऽध्याये।
"देवर्षिपितृगन्धर्व्वैरुन्मत्तस्य च बुद्धिमान्।
वर्जयेदञ्जनादीनि तीक्ष्णानि क्रूरकर्म्म च॥
सर्पिष्यानादि तस्येह मृदुभैषज्यमाचरेत्"॥
इति च चिकित्सास्थाने १४ अध्याये चरकेणोक्तम्॥
अन्यद्विवरणमस्योन्मादशब्दे ज्ञेयम्॥)
तद्दानप्रामाण्यं यथा,—मत्स्यसूक्ते॥
"उन्मत्तानाञ्च या गाथा शिशूनां चेष्टितं च यत्।
स्त्रियो यच्च प्रभाषन्ते नास्ति तत्र व्यतिक्रमः॥
आदौ गच्छति देवेषु पश्चात् गच्छति मानुषान्।
गादेशिता वाग्वदति सत्या ह्येषा सरस्वती"॥

उन्मत्तः, पुं, (उन्मत्तयति। उन्मत्त + तत्करोतीति णिच् + पचाद्यच्।) धुस्तूरः। यथा,—
("श्वेतोन्मत्तस्योत्तरदिङ्मूलसिद्धस्तु पायसः।
गुड़ाख्यसंयुतो हन्ति सर्व्वोन्मादांश्च दोषजान्"॥
इति वैद्यकचक्रपाणिसंग्रहे उन्मादाधिकारे॥)
मुचुकुन्दवृक्षः। इति मेदिनी॥

उन्मदः, त्रि, (उद्गतो मदो यस्य।) उन्मादयुक्तः। उद्गतमदः। तत्पर्य्यायः। उन्मदिष्णुः २। इत्यमरः॥ ("उदीरयामासुरिवोन्मदानाम्"॥ इति रघुः। २। ६। तथा, माघे ६।२६॥

"मधुकराङ्गनया मुञ्जरुन्मद-
ध्वनिभृता निभृतान्तरमुज्जगे"॥)

उन्मदिष्णुः, त्रि, (उत् + मद + इष्णुच्।) उन्मदः। उन्मादशीलः। इत्यमरः॥

उन्मनाः, [स्] त्रि, (उद्गतं उत्कण्ठितं मनो यस्य।) उत्कण्ठितचित्तः। तत्पर्य्यायः। उत्सुकः २। इत्यमरः॥

("उन्मनाः प्रथमजन्मचेष्टिता-
न्यस्मरन्नपि बभूव राघवः"।
इति रघुः। ११। २२। "पयोधरेणोरसि काचिदुन्मनाः"॥ इति किराते। ८। १६॥)

उन्मथ्यः, पुं, (उत् + मथि + घञ्।) मारणम्। वधः। इति हेमचन्द्रः॥

उन्माथः, पुं, (उन्मथ्यतेऽनेनेति। उत् + मथ + घञ्। मारणादिपक्षे भावे घञ्।) कूटयन्त्रम्। मृगबधोपयुक्तयन्त्रम्। आमिषं दत्त्वा मृगपक्षिबन्धनार्थं यत् सन्धानयन्त्रं निवेश्यते सः। इत्यमरः॥ मारणम्। घातकः। इति मेदिनी॥

(यथा, प्रबोधचन्द्रोदये।

"प्रभो महाप्राणानां क इव भुवनोन्माथविधिषु"॥)

उन्मादः, पुं, (उत् + मद + घञ्। (महादेवः। यथा महाभारते। महादेवसहस्रनामकथने १३ १७। ६९॥ "उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः"।) वातिकरोगविशेषः। तत्पर्य्यायः। चित्तविभ्रमः २। इत्यमरः॥ मतिभंशः ३ उन्मनाः ४। इति राजनिर्घण्टः॥ (चित्तविप्लवः ५२।२३४। इति हेमचन्द्रः॥) मानसरोगविशेषः। तस्यौषधं यथा,—

"वचा चिरुटकश्चैव करञ्जं देवदारु च।
मञ्जिष्ठा त्रिफला श्वेता गिरीषो रजनीद्वयम्॥
प्रियङ्गुनिम्बचिरुटं गोमूत्रेणावघर्षितम्।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनम् तथा॥
अपस्मारविषोन्मादग्रहोन्मत्तज्वरापहम्।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम्"॥
इति गारुड़े १९९ अध्यायः॥ *॥ अथ उन्मादाधिकारः। तत्र उन्मादस्य निरुक्तिमाह।

"मदयन्त्युद्धता दोषा यस्मादुन्मार्गमाश्रिताः।
मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः"॥
अयमर्थः। यस्माद्धेतोरुद्धताः प्रबुद्धा दोषाः उन्मार्गमाश्रिताः मदयन्ति चित्तं विक्षिपन्त्यस्मिन्। अतोऽयमुन्माद इति कीर्त्तितः। सः उन्मादः मानसो व्याधिः मनोवैकृत्यकरत्वात्॥ *॥ तस्यैवावस्थाभेदेन नामान्तरमाह। स चापरुद्धस्तरुणो मदसंज्ञां बिभर्त्ति च। स उन्मादस्तरुणो नवीनः॥ *॥ उन्मादस्य विप्रकृष्टनिदानमाह।

"विरुद्धदुष्टाशुचिभोजनानि
प्रधर्षणं देवगुरुद्विजानाम्।
उन्मादहेतुर्भयहर्षपूर्व्वो
मनोऽभिघातो विषमाश्च चेष्टाः॥"

दुष्टं धत्तूरबीजादिसहितम्। अशुचि रजस्वलादि-

स्यूरम्। प्रधर्षणमभिभवः। विषमाश्च चेष्टाः बलवदिग्रहादयः॥*॥ सन्निकृष्टं निदानमाह।
"एकैकशः सर्व्वशश्च दोषैरत्यर्थमुक्लिष्टैः।
मानसेन च दुःखेन स पञ्चविध उच्यते॥
विषाद्भवति षष्ठश्च यथोक्तं तत्र भेषजम्"॥*॥
तस्य सम्प्राप्तिमाह।
"तैरल्पसत्त्वस्य मलाः प्रदुष्टाः
बुद्धेर्निवासं हृदयं प्रदूष्य।
स्रोतांस्यधिष्ठाय मनोवहानि
प्रमोहयन्त्याशु नरस्य चेतः"॥
अल्पसत्त्वस्य अल्पसत्त्वगुणस्य। मला वातादयः। बुद्धेर्निवासं हृदयं प्रदूष्येति। एतेनाश्रयस्य दुष्ट्या तदाश्रिताया बुद्धेरपि दुष्टिरुक्ता। मनोवहानि स्रोतांसि हृदयाश्रितानि दश। एतानि विशेषतो बोद्धव्यानि। यतश्चरकेण सकलशरीरस्रोतांस्येव मनोऽधिष्ठानत्वेनोक्तानि। प्रमोहयन्ति विक्लवं कुर्व्वन्ति॥*॥
उन्मादस्य सामान्यं रूपमाह।
"धीविभ्रमः सत्त्वपरिप्लवश्च
पर्य्याकुला दृष्टिरधीरता च।
अबद्धवाक्त्वं हृदयश्च शून्यं
सामान्यमुन्मादगदस्य लिङ्गम्"॥
धीविभ्रमः शुक्तिकायां रजतज्ञानम्। सत्त्वपरिप्लवः सत्त्वं मनस्तस्य चाचाल्यम्। अबद्धवाक्त्वं असम्बद्धभाषित्वम्। शून्यं स्मृतिशून्यम्॥*॥
वातिकोन्मादस्य निदानपूर्ब्बिकां सम्प्राप्तिमाह।
रूक्षाल्पशीताल्पविरेकधातु-
क्षयोपवासैरनिलोऽतिवृद्धः।
चिन्तातिदुःखं हृदयं प्रदूष्य
बुद्धिं स्मृतिं वाप्युपहन्ति शीघ्रम्"॥
प्रदूष्य प्रकर्षेण दूषयित्वा॥*॥
तस्यैव रूपमाह।
"अस्थानहास्यस्मृतिनित्यगीत-
वागङ्गविक्षेपणरोदनानि।
पारुष्यकार्श्यारुणवर्णताश्च
जीर्णे बलञ्चानिलजस्य रूपम्"॥
अस्थाने अनवसरे। हास्यादीनि रोदनान्तानि। जीर्णे आहारे। बलं व्याधेः॥*॥
पैत्तिकस्य निदानपूर्ब्बिकां सम्प्राप्तिमाह।
"अजीर्णकट्वम्लविदाह्यशीतै-
र्भोज्यैश्चितं पित्तमुदीर्णवेगम्।
उन्मादमत्युग्रमनात्मकस्य
हृदि स्थितं पूर्ब्ववदाशु कुर्य्यात्"॥
हृदि स्थितं पित्तं चितं सञ्चितम्। पुनः अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैरुदीर्णवेगं सत् उन्मादं कुर्य्यात् पूर्ब्ववत् हृदयं प्रदूष्य इत्यर्थः॥*॥
तस्य रूपमाह।
"अमर्षसंरम्भविनम्रभावाः
सन्तर्जनाभिद्रवणौग्र्यघोषाः।
प्रच्छायशीतान्नजलाभिलाषाः
पीतावभासः पित्तकृतस्य लिङ्गम्"॥
अमर्षोऽसहिष्णुता। संरम्भः आरभटी आडम्बरः इति यावत्। सन्तर्जनं परत्रासनम्। अभिद्रवणं पलायनम्। औग्र्यं गात्रे। घोषो दाहविशेषः। प्रच्छाय इत्यादि छायायां शीतयोरन्नजलयोरभिलाषः॥*॥
श्लैष्मिकस्य निदानपूर्ब्बिकां सम्प्राप्तिमाह।
"सम्पूरणैर्मन्दविचेष्टितस्य
सोष्मा कफो मर्म्मणि संप्रदुष्टः।
बुद्धिं स्मृतिं वाप्युपहन्ति चित्तं
प्रमोहयन् संजनयेद्विकारम्"॥
संपूरणैर्भोजनादिभिः। मन्दविचेष्टितस्य व्यायामरहितस्य। सोष्मा कफ इति कफोऽप्युन्मादं करिष्यन् पित्तं सहायमपेक्षते व्याधिस्वभावात्। मर्म्मणि अत्र मर्म्मशब्देन हृदयमुच्यते। विकारमुन्मादरूपम्॥*॥
तस्य रूपमाह।
"वाक्चेष्टितं मन्दमरोचकञ्च
नारीविविक्तप्रियता च निद्रा।
छर्दिश्च लाला च बलञ्च भुक्ते
नखादिगौक्ल्यञ्च कफात्मके स्यात्"॥
वाक्चेष्टितं मन्दं वचनमल्पम्। नारीविविक्तप्रियता नारीप्रियता विजनप्रियता च। भुक्ते सति बलं व्याधेः॥*॥
सान्निपातिकस्य निदानपूर्ब्बकं लक्षणमाह।
"यः सन्निपातप्रभवोऽतिघोरः
सर्व्वैः समस्तैः स तु हेतुभिः स्यात्।
सर्व्वाणि रूपाणि बिभर्त्ति तादृ-
ग्विरुद्धभैषज्यविधिर्व्विवर्ज्यः"॥
स सान्निपातिक उन्मादः। सन्निपातग्रहणेनैव सर्व्वात्मकत्वं लब्धम्। पुनः सर्व्वैरिति यत्कृतं तद्रजस्तमःप्राप्तणार्थम्। तेन रजस्तमोभिर्मिलितैरित्यर्थः। तेन वातादयो रजस्तमोभिर्म्मलोदोषैर्मिलिताः। समस्तैश्च निदानैः कुपिता उन्मादं जनयन्ति। सर्व्वैर्हेतुभिः समस्तैर्मिलितैः स्यात्। यतोऽन्यो व्याधिः सर्व्वैर्हेतुभिर्मिलितैरेव भवतीति नियमो नास्ति। अयन्तु व्याधिप्रभावात् सर्व्वैर्हेतुभिर्म्मिलितैः स्यात्। तादृगुन्मादः विरुद्धभैषज्यविधिः। विरुद्धभैषज्यविधिरिति कोऽर्थः। चिदोषजे प्रत्येकं वातादिप्रत्यनीका कार्य्या। सा च परस्परविरोधिनी त्रिदोषं हन्ति किञ्चिदेव द्रव्यमामलकादि तच्चात्रायौगिकम्। अतएव विवर्ज्यः न चिकित्स्य इत्यर्थः॥*॥
मनोदुःखजस्य विप्रकृष्टं निदानमाह।
"चौरैर्नरेन्द्रप्रहरैररिभिस्तथान्यै-
र्विन्यासितस्य धनबान्धवसंक्षयाद्वा।
गाढं क्षते मनसि च प्रियया रिरंसो-
र्जायेत घोरतरो मनसो विकारः"॥
अन्यैर्हिंस्रादिभिः। गाढमतिशयेन। क्षते अभिहते। प्रियया प्राप्तुमशक्यया रिरंसोः पुरुषस्य विकारः उन्मादरूपः॥*॥
तस्य रूपमाह।
"चित्रं ब्रवीति च मनोऽनुगतं विसंज्ञो
गायत्यथो हसति रोदिति चातिमूढः"।
चित्रमाश्चर्य्यं। मनोऽनुगतं गोप्यमपि। विसंज्ञो विरुद्धज्ञानः। अतीवमूढः अतीवज्ञानशून्यः। अत्र विकल्पो बोद्धव्यः॥*॥
विषजस्य रूपमाह।
"रक्तोत्तरो हृतबलेन्द्रियभाः सुदीनः
श्यावाननो विवशते तु भवेत् परासुः"।
परासुः मृतः॥*॥
अरिष्टमाह।
"अवाक्शुक्लमुखो वा क्षीणमांसबलो नरः।
जागरूको ह्यसन्देहमुन्मादेन विनश्यति"॥*॥
अथ देवादिकृतस्योन्मादस्य सामान्यं लक्षणमाह।
"अमर्त्यवाग्विक्रमवीर्य्यचेष्टो
ज्ञानादिविज्ञानबलादियुक्तः।
प्रकोपकालो नियतश्च यस्य
देवादिजन्मा स मनोविकारः"।
अमर्त्यवाग्विक्रमवीर्य्यचेष्टः न मर्त्यस्येव मनुष्यस्येव वागादयो यत्र सः। विक्रमः पराक्रमः। वीर्य्यं शौर्य्यम्। ज्ञानादिविज्ञानबलादियुक्तः। ज्ञानं बुद्धिः। आदिपदेन तद्भेदा मेधा-विचारणा-स्मृत्यादयो गृह्यन्ते। विज्ञानं शिल्पादिविषयकं ज्ञानम्। चेष्टा पाटवम्। आदिपदेनाभिमानादि गृह्यते। नियतः वक्ष्यमाणतिथ्यादिभिः। मनोविकार उन्मादः॥*॥
तत्र देवाविष्टस्य लक्षणमाह।
"सन्तुष्टः शुचिरतिदिव्यमाल्यगन्धो
निस्तन्द्रोऽवितथसंकृतप्रभाषी।
तेजस्वी स्थिरनयनो वरप्रदाता
ब्रह्मण्यो भवति नरः स देवजुष्टः"॥
अतिदिव्यमाल्यगन्धः अतिशयेन दिव्यमाल्यस्येव गन्धो यस्य सः। निस्तन्द्रः निरालस्यरहितः। अवितथं सत्यम्। ब्रह्मण्यः ब्राह्मणभक्तः॥*॥
दैत्याविष्टमाह।
"संखेदी द्विजगुरुदेवदोषवक्ता
जिह्माक्षो विगतभयो विमार्गदृष्टिः।
सन्तुष्टो भवति न चान्नपानजातै-
र्दुष्टात्मा भवति स दैत्यजुष्टः"॥
विमार्गदृष्टिः कुमार्गरतः। दुष्टात्मा दुष्टस्वभावः।
गन्धर्व्वाविष्टमाह।
"दुष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः।
नृत्यन् वै प्रहसति चारु चाल्पशब्दं
गन्धर्व्वग्रहपरिपीडितो मनुष्यः"॥
दुष्टात्मा दुष्टजीवात्मा। पुलिनं तोयोत्थितं तटम्; वनान्तरं वनमध्यम्। तयोः सेवी। स्वाचारः प्रनिन्दिताचारः। प्रियाणि परि समन्ततो भावेन गीतगन्धमाल्यानि यस्य स तथा। चारु चाल्पशब्दमिति हसनक्रियाया विशेषणम्॥*॥
यक्षाविष्टमाह।
"ताम्राक्षः प्रथितनुरक्तवस्त्रधारी
गम्भीरोद्भुतगतिरल्पवाक् सहिष्णुः।
तेजस्वी वदति च किं ददामि कस्मै
येा यक्षग्रहपरिपीडितो मनुष्यः"॥*॥

पित्राविष्टमाह ।

"प्रेतानां स दिशति संस्तरेषु पिण्डान्
ग्लानात्मा जलमपि वापसव्यवस्त्रः ।
मांसेक्षुतिलगुडपायसाभिकाम-
स्तद्भक्तो भवति पितृग्रहाभिजुष्टः" ॥

प्रेतानां मृतानां पितृणाम्। दिशति ददाति। अपसव्यवस्त्रः दक्षिणस्कन्धदृतोत्तरीयः ॥ * ॥

नागाविष्टमाह ।

"यस्तूर्ध्वां प्रसरति सर्पवत् कदाचित्
दक्षाक्ष्णौ मुहुरपि जिह्मयावलेढि ।
क्रोधालुर्दृतमधुदुग्धपायसेषु-
र्विज्ञेयः स खलु भुजङ्गमेन जुष्टः" ।

प्रसरति सर्पवत् उरसा चलति। दक्षाक्ष्णौ ओष्ठप्रान्तौ ॥ * ॥

राक्षसाविष्टमाह ।

"मांसासृग्विविधसुराविकारलिप्सु-
र्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः ।
क्रोधालुर्विगुलबलो निशाविचारी
क्षौद्रविट् भवति स राक्षसैर्गृहीतः" ॥

अतिनिष्ठुरोऽतिनिर्दयः ॥ * ॥

ब्रह्मराक्षसाविष्टमाह ।

"देवविप्रगुरुद्वेषी वेदवेदाङ्गविच्छुचिः ।
आत्मपीडाकरोऽहिंसो ब्रह्मराक्षससेवितः" ।

अहिंसः अहिंसाशीलः ॥ * ॥

पिशाचाविष्टमाह ।

"उदस्रः क्षुद्रपशवो विरुद्धभाषी
दुर्गन्धो भृशमशुचिस्त्वघातिलोलः ।
वक्राक्षी विजनवनान्तरोपसेवी
याचेरन् भ्रमति रुदन् पिशाचजुष्टः" ॥

उदस्रः नग्नः। दिगम्बर इति विदेहवचनात्। क्षुद्रो निर्मांसः। पशवो रूक्षाः। अतिलोलः सर्वस्मिन् अन्नपाने लोलुपः। याचेरन् विरुद्धमाचेरन्। ग्रहा हिंसा क्रीड़ा पूजार्थं गृह्णन्ति। अतएवोक्तम्।

"अशुचिं भिन्नमर्य्यादं क्षतं वा यदि वाक्षतम्।
हिंस्युर्हिंसाविहारार्थं सत्कारार्थमथापि वा" ॥ *॥

तत्र हिंसार्थं गृहीतस्य लक्षणमाह ।

"क्षुल्लाक्षो हुतभटनः सवेगवामी
निद्रालुः प्रतति च कम्पते च योऽति ।
यस्याद्रिर्दिरदनगादिविच्युतः स्यात्
सोऽसाध्यो भवति तथा त्वयोदशेऽब्दे ॥"

यस्याद्रीत्यादि यः पर्व्वतादिपतितः सन् यदैर्म्रियतेऽतएवार्थः। आदिशब्देन भित्तिप्रासादादेर्यो गृह्यन्ते। त्रयोदशेऽब्दे सर्व्व एव देवादिगृहीतोऽसाध्यः ॥ * ॥

देवादीनामावेशसमयमाह ।

"देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि।
गन्धर्व्वाः प्रायशोऽष्म्यां यक्षाश्च प्रतिपद्यपि ॥
पितरः कृष्णपक्षे च पञ्चम्यामपि चोरगाः ।
रक्षःपिशाचा रात्रौ च चतुर्दश्यां विशन्ति हि" ॥

कृष्णपक्षे अमायाम्। प्रायशःपदादन्यत्रापि। तिथ्यभिधानप्रयोजनं लक्षणार्थं तत्र तिथौ बलिदानार्थञ्च ॥ * ॥ ननु यदि देवादयो विशन्ति तदा विशन्तस्ते दृश्यन्ते कथं नेत्यत आह ।

"दर्पणादीन् यथा छाया प्रीतेर्ज्ञाप्राणिनो यथा ।
खमणिं भास्करार्चिश्च यथा देहञ्च देहभृक् ॥
विशन्ति न च दृश्यन्ते ग्रहास्तद्वच्छरीरिणाम्" ।

दर्पणादीत्यादिशब्देनान्यदपि निर्म्मलद्रव्यद्रव्यं गृह्यते। छाया प्रतिबिम्बम्। खमणिं सूर्य्यमणिम्। देहभृक् जीवात्मा ॥ * ॥

अथोन्मादस्य चिकित्सा ।

"वातिके स्नेहपानं प्राग् विरेकः पित्तसम्भवे ।
कफजे वमनं कार्य्यं परो वस्त्यादिकक्रमः
यथोपदेक्ष्यते किञ्चिदपस्मारे चिकित्सितम् ।
उन्मादे तच्च कर्त्तव्यं सामान्याद्दोषदूष्ययोः ॥
जलादिद्रुमशैलेभ्यो विषमेभ्यश्च तं सदा ।
रक्षेदुन्मादिनं यत्नात् सद्यः प्राणहरा हि ते" ॥
ते जलादयः ॥ * ॥

'ब्राह्मीकुष्माण्डीपलषड्ग्रन्थाः ग्रन्थपुष्पिकाखरसाः ।
दृष्टा उन्मादहृतः पृथगेते कुष्ठमधुभिश्चाः" ॥

अत्र ब्राह्मीति पदं ब्राह्मीखरसपरम्। कुष्माण्डीपलं तद्बीजपरम्। षड्ग्रन्थे तु यथाश्रुतार्थमेव। तेनायमर्थः। वरमीकरसतोरा ४ कूटकचूर्णमासा २ मधुमासा ८ पेयः। इत्येको योगः ॥ कोशहृद्के बीजकचूर्णमासा २ कूटकचूर्णमासा २ मधुना संगीयावलेह्यम्। द्वितीयो योगः। महाभरीवचकचूर्णमासा २ कूटकचूर्णमासा २ मधुनावलेह्यम्। तृतीयो योगः ॥ ग्रन्थपुष्पीखरसतोरा ४ कूटकचूर्णमासा २ मधुमासा ८ पेयः। चतुर्थयोगः ॥ * ॥

"सिद्धार्थको हिङ्गु वचाकरञ्जौ देवदारु च।
मञ्जिष्ठा त्रिफला श्वेता कटभीत्वक् कटुत्रिकम् ॥
समांशानि प्रियङ्गुश्च शिरीषो रजनीद्वयम्।
वस्तमूत्रेण पिष्टोऽयमगदः पानमञ्जनम् ॥
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ।
अपस्मारविषोन्मादक्षत्यालक्ष्मीज्वरापहम् ॥
भूतेभ्यश्च भयं हन्ति राजद्वारे च ग्रस्यते ।
सर्पिरेतेन संसिद्धं सगोमूत्रं तथार्थकृत्" ॥

सिद्धार्थकादि ॥ * ॥

"त्र्यूषणादिविनाशञ्च दर्शयेदद्भुतानि च ।
वर्द्धं सर्षपतैलाक्तं रक्षेदुत्तानमातपे ॥
कपिकच्छाधवा तैलैर्लोहतैलजलैः स्पृशेत् ।
कक्षाभिस्ताड़येत्तं वा सुवर्द्धं विजने गृहे ॥
सर्षपोद्भवतदत्तेन दंशैः सिंहैर्गजैश्च तं ।
त्रासयेच्छस्त्रहस्तेश्च शत्रुभिश्चाक्षरैस्तथा ॥
अथवा राजपुरुषा वहिर्नीत्वा सुसंयतम् ।
त्रासयेयुर्बधैरेनं तर्ज्जयन्तो दृपाज्ञया ॥
देहदुःखभयेभ्यो हि यतः प्राणभयं महत् ।
ततस्तस्य भ्रमं याति सर्व्वतो विप्लुतं मनः ॥
इष्टद्रव्यविनाशेन मनो यस्याभिहन्यते ।
तस्य तत्सदृशप्राप्या सान्त्वाश्वासैः भ्रमं नयेत् ॥

व्युषणाद्यञ्जनम् ॥ * ॥

"कुष्ठाश्वगन्धे लवणाजमोदे
हे जीरके त्रीणि कटूनि पाठा ।
मङ्गल्यपुष्पी च समान्यमूनि
सर्व्वैः समानाश्च वचां विचूर्ण्य ॥
ब्राह्मीरसेनाखिलमेव भाव्यं
वारत्रयं शुष्कमिदं हि चूर्णम् ।
अक्षप्रमाणं मधुना हृतेन
लिह्यान्नरः सप्त दिनानि यावत् ॥
सारस्वतमिदं चूर्णं ब्रह्मणा निर्म्मितं पुरा ।
हिताय सर्व्वलोकानां दुर्म्मेधानां विचेतसाम् ॥
एतस्याभ्यासतः पुंसां बुद्धिर्म्मेधा धृतिः स्मृतिः ।
सम्यक्तिः कविताशक्तिः प्रवर्द्धेतोत्तरोत्तरम्" ॥

मङ्गल्यपुष्पी शङ्खपुष्पी इति लोके। सारस्वतं चूर्णम् ॥ * ॥

"विश्वाजमोदरजनीद्वयसैन्धवोग्रा-
वच्चाकुष्ठमगधोद्भवजीरकाणाम् ।
चूर्णं प्रभातसमये लिहतः ससर्पि-
र्वाग्देवता निवसति स्वयमेव वक्त्रे" ।

विश्वाद्यं चूर्णम् ॥ * ॥

"क्वाथे विचूर्णिते क्षिप्ता तत्क्वोष्णगुडं जलम्।
पादशेषं प्रकर्त्तव्यमेष क्वाथविधिः स्मृतः ॥
दशमूली तथा रास्ना वातारिश्लिष्टता बला ।
मूर्व्वा शतावरी चेति क्वाथ्यैस्तु कुड़वैः पृथक् ॥
घृते क्वाथे घृतं प्रस्थदयं मद्यमिश्रं पचेत् ।
कल्कीकृतैर्वक्ष्यमाणद्रव्यैः सम्यक् पुनः पचेत् ॥
विश्वाला त्रिफला कौन्ती देवदार्व्वेलवालुकम् ।
स्थिरानन्ता रजन्यौ द्वे प्रियङ्गुः सारिवाद्वयम् ॥
नीलोत्पलैलामञ्जिष्ठादन्तीदाड़िमकेशरम् ।
विडङ्गं ह्रीबेरी च कुष्ठं चन्दनपद्मके ॥
तालीसपत्रं दहती मालतीकुसुमं नवम् ।
अष्टाविंशतिभिः कल्कैरेतैः कर्षमितैः पृथक् ॥
चतुर्गुणं जलं दत्त्वा पिष्टैस्तद्विपचेद्घृतम् ।
महाचैतसनामेदं सर्व्वचेतोविकारहृत् ॥
अपस्मारे महोन्मादे मन्देऽग्नौ ज्वरकासयोः ।
वातरक्ते प्रतिश्याये शोषे कार्श्ये तृतीयके ॥
मूत्रकृच्छ्रे कटीशूले विसर्पाभिहतेषु च ।
पार्श्वामये तथा कण्ठ्यं विषे मेहे गरेऽपि च ॥
देवादिहृतचित्तानां गद्गदानामचेतसाम् ।
शस्तं स्त्रीणाञ्च बन्ध्यानां धन्यमायुर्बलप्रदम् ॥
अलक्ष्मीपापरक्षोघ्नं सर्व्वग्रहनिवारणम् ।
हन्ति भ्रमं मदं मूर्च्छां मेधास्मृतिमतिप्रदम्" ॥

अग्निपत्नी अग्निवतीति लोके अगिया इति च। महाचैतसं घृतम् ॥ * ॥

अथ देवाद्याविष्टानां चिकित्सा ।

"पूजाबल्युपहारैर्हिहोममन्त्राञ्जनादिभिः ।
जयेदागन्तुमुन्मादं यथाविधि शुचिर्भिषक् ॥
कृष्णामरिचसिन्धूत्थमधुगोरोचनाञ्जनम् ।
अञ्जनं सर्व्वदेवादिकृतोन्मादहरं परम्" ॥

कृष्णाद्यञ्जनम् ॥ * ॥

"ऋक्षशम्बुकगोमानि ग्राह्यकी लसुनं तथा ।
हिङ्गु मूत्रञ्च वस्तस्य धूपमस्य प्रयोजयेत् ॥

एतेन शाम्यति क्षिप्रं बलवानपि यो ग्रहः"।
ऋक्षलोमादिधूपः ॥ * ॥
"कल्याणकञ्च युञ्जीत महदा चेतसं घृतम्।
तैलं नारायणं चाथ महानारायणं तथा ॥
ऋते पिशाचादन्येषु प्रतिकूलं न चाचरेत्।
रोगिणं भिषजं यक्षे क्रुद्धा हन्युर्मुहूर्तजसः" ॥
इत्युन्मादाधिकारः। इति भावप्रकाशः॥

(आत्रेय उवाच ॥
"अयं मानसको व्याधिरुन्माद इति कीर्त्तितः।
प्रमत्ता ऊर्द्धगा दोषा ऊर्द्धं गच्छन्त्यमार्गताम् ॥
उन्मादो नाम दोषोऽयं कश्मलाधो भिषग्वरैः।
सोऽपि पृथग्विधैर्दोषैर्द्वन्द्वजोऽन्यः प्रकीर्त्तितः।
यथान्यः सन्निपातेन विषाद्भवति चापरः ॥
अशुचिविषयशून्यागारकेऽरण्यमध्ये
समयगहनवीथीदेवतागारके च।
अथ कथमपि भीत्या शङ्कया खिन्नचेतः-
क्षुभितमनसमार्गत्वान्यमुन्मार्गयेति ॥
चिन्ताव्यथासुभयहर्षविमर्षशोकात्
देवातिथिद्विजगरेन्द्रगुरोर्विमानात्।
प्रेमाधिकाद्युवजनादपि विप्रयोगात्
उन्मादहेतव इमां कथितं वरिष्ठैः ॥
तत्र गायति वा रौति विरूपं पठते यदा।
लोलयेच्छर्दते वापि कम्पते हसते तथा ॥
धावते हनने चैव तथा जिह्वा विनश्यति।
नरो वा भ्रमतेऽत्यर्थं प्रशस्येद्धनमथातुरः ॥
तस्मात्तमारकं कर्म्म कर्त्तव्यं भिषजांवरैः।
विशेषेण भूतविद्यां मध्ये वक्ष्यामि चायतः" ॥
इति महर्ष्यात्रेयभाषिते हारीतोत्तरे द्वयीय-
स्थाने उन्मादनिदाननामा विंशोऽध्यायः ॥
अस्य सम्प्राप्तिसहित-निदानलक्षण-चिकित्सिता-
न्याह वाभटः ॥
"उन्मादाः षट् पृथग्दोषनिचयाधिविषोद्भवाः।
उन्मादोनाम मनसो दोषैरुन्मार्गगैर्मदः ॥
शारीरमानसैर्दुःखैरहितादच प्रागतः।
विप्रकृतात्म्यसमलादिवमादुपयोगतः ॥
विषमस्याल्पसत्त्वस्य व्याधिवेगसमुद्भवात्।
क्षीणस्य चेष्टावैषम्यात् पूज्यपूजाव्यतिक्रमात् ॥
आधिभिश्चित्तविभ्रंशाद्विभेषोपविभेष च।
एभिर्विहीनसत्त्वस्य हृदि दोषाः प्रदूषिताः ॥
धियो विधाय कालुष्यं हत्वा मार्गान् मनोवहान्
उन्मादं कुर्व्वते तेन धीविज्ञानस्मृतिभ्रमात् ॥
देहो दुःखसुखभ्रष्टो भ्रष्टसारथिवद्रथः।
भ्रमत्यचिन्तितारम्भम्"—

वातादिभेदेन लक्षणं यथा ॥

"तत्र वातात् क्षशाङ्गता ॥
अस्थाने रोदनाक्रोशहसितस्मितनर्त्तनम्।
गीतवादित्रवागङ्गविक्षेपास्फोटनानि च ॥
अक्षाक्षा वेणुवीणादिशब्दानुकरणं मुहुः।
व्याख्यातं योगमोऽनर्थमटनं वञ्चभाषिता ॥
अलङ्कारोऽनलङ्कारैरयानैर्गमनोद्यमः।
अद्विरभ्यवहार्य्येषु तल्लाभे वावमानता ॥
उत्पिण्डितास्याच्छित्वं जीर्णे चान्ने गदोद्भवः ॥ १ ॥
पित्तात् सन्तर्ज्जनं क्रोधो मुष्टिलोष्टाद्यभिद्रवः।
शीतेच्छायोदकाकाङ्क्षा नग्नत्वं पीतवर्णता।
असत्यज्वलनज्वालातारकादीपदर्शनम् ॥ २ ॥
कफादरोचकश्छर्द्दिरल्पेहाहारवाञ्छता।
स्त्रीकामता रहः प्रीतिर्लालासिङ्घाणकस्रुतिः ॥
वैभत्स्यं शौचविद्वेषो निद्राश्वयथुरागने।
उन्मादो बलवान् रात्रौ शुक्लमांचे च जायते ॥ ३ ॥
सर्व्वायतनसंस्थानसन्निपाते तदात्मकम्।
उन्मादं दारुणं विद्यात् तं भिषक् परिवर्ज्जयेत् ॥ ४ ॥
धनकान्तादिनाशेन दुःसहेनाभिघङ्गवान्।
पाण्डुर्दीनो मुञ्चमुच्चन् हाहेति परिदेवते ॥
रोदित्यकस्मात् म्रियते तद्गुणान् बद्ध मन्यते।
शोकक्लिष्टमना ध्यायन् जागरूको विचेष्टते ॥ ५ ॥
विषेण श्यावदनो नष्टच्छायाबलेन्द्रियः।
वेगान्तरेऽपि संभ्रान्तो रक्षाच्चस्तं विवर्जयेत्" ॥ ६ ॥

चिकित्सा यथा ॥

"अथानिलज उन्मादे स्नेहपानं प्रयोजयेत्।
पूर्व्वमाहृतमार्गे तु सस्नेहं मृदुशोधनम् ॥
कफपित्तभवेऽप्यादौ वमनं सविरेचनम्।
तथास्य शुद्धदेहस्य प्रसादं लभते मनः ॥
इत्थमप्यनुवृत्तौ तु तीक्ष्णं लावणमञ्जनम्।
हर्षणाश्वासनोत्त्रासभयताडनतर्ज्जनम् ॥
अभ्यङ्गोद्वर्त्तनालेपधूमान् पानञ्च सर्पिषः।
युञ्जीत्तानि हि शुद्धस्य नयन्ति प्रकृतिं मनः" ॥ * ॥
"द्वौ प्रस्थौ खरसाद्ब्राह्म्या घृतप्रस्थञ्च साधितम्।
व्योषश्यामाचित्रकदन्तीशङ्खपुष्पीत्रपद्रुमैः।
सप्तलाक्रिमिहरैः कल्कितैरक्षसम्मितैः ॥
पलद्वया प्रयुञ्जीत परं माषाचतुष्पलम्।
उन्मादकुष्ठापस्मारहरं बन्ध्यासुतप्रदम् ॥
वाक्स्मृतिमेधाकृद्वयन्यं ब्राह्मीघृतं स्मृतम्" ॥

इति ब्राह्मीघृतम् ॥ * ॥

"वरा विश्वा भद्रैला देवदार्व्वेलवालुकैः।
द्विसारिवा द्विरजनी द्विस्थिरा पलिनी नतैः ॥
कृतवेणुकमल्लिष्ठानागकेशरदाड़िमैः।
वेल्लतालीशपत्रैलामालतीसुकुलोत्पलैः ॥
सदन्तीपद्मकहिमैः कर्षांशैः सर्पिषः पचेत्।
प्रस्थं भूतग्रहोन्मादकासापस्मारपाप्मसु ॥
पाण्डुकण्डुविषे शोफे मोहे मेहे गरे ज्वरे।
अरेतस्यप्रजसि वा दैवोपहतचेतसि ॥
अमेधसि स्खलद्वाचि स्मृतिकामेऽल्पपावके।
वल्यं मङ्गल्यमायुष्यं कान्तिसौभाग्यपुष्टिदम् ॥
कल्याणकमिदं सर्पिः श्रेष्ठं पुंसवनेषु च" ॥

इयि कल्याणघृतम् ॥ * ॥

"शृभ्यो द्विसारिवादीनि जले पक्वैकविंशतिम्।
रसे तस्मिन् पचेत्सर्पिर्पृथिक्षीरं चतुर्गुणम् ॥
वीरादिमेदाकाकोलीकर्षिकच्छविषाग्निभिः।
सूर्पपर्णीयुतैरेतन्महाकल्याणकं परम् ॥
दंष्ट्रणं सन्निपातघ्नं पूर्व्वमादधिकं गुणैः" ॥

इति महाकल्याणं घृतम् ॥ * ॥

"जटिला पूतना केशी चारटी मर्कटी वचा ॥
चायमाणा जया वीरा चोरकः कटुरोहिणी।
कायस्था शूकरीच्छत्रा अतिच्छत्रा पलङ्कषा ॥
महाशुरसदन्ता च वनस्था नाकुलीद्वयम्।
कटम्भरा दधिकाली शालिपर्णी च तैर्घृतम् ॥
सिद्धं चातुर्थिकोन्मादग्रहापस्मारनाशनम्।
महापैशाचकं नाम घृतमेतदयशस्तम् ॥
बुद्धिमेधास्मृतिकरं बालानाञ्चाङ्गवर्द्धनम्" ॥

इति महापैशाचकं घृतम् ॥ * ॥

"अवपीड़ाश्च विविधाः सर्षपाः स्नेहसंयुताः।
कटुतैलेन चाभ्यङ्गो धूपयेच्चास्य तद्रजः ॥
सहिङ्गुस्त्रीहृणधूमश्च सूत्रस्थानोदितो हितः ॥*॥
मृगगजगृध्रयकोलूककाकलूकाश्ववस्तजैः ॥
मूत्रपित्तगृहलोमनखचर्म्मभिराचरेत्।
धूपधूमाञ्जनाभ्यङ्गप्रदेहपरिषेचनम् ॥
धूपयेत् सततञ्चैनं स्वगोमत्स्यैस्तु पूतिभिः।
वातश्लेष्मात्मके प्रायः पैत्तिके तु प्रशस्यते ॥
तिक्तकं जीवनीयञ्च सर्पिः स्नेहश्च मिश्रकः।
शिशिराण्यन्नपानानि मधुराणि लघूनि च ॥
विधेश्चिरं यथोक्तां वा वृत्तं मेध्यामिषस्य वा।
निवाते शाययेदेवं मुच्यते मतिविभ्रमात्" ॥
"भूतानुबन्धमीक्षेत प्रोक्तालिङ्गाधिकाकृतिम्।
यद्युन्मादे ततः कुर्य्यादभूतनिर्हृत्सौषधम्।
बलिञ्च दद्यात् पललं यावकं सक्तुपिण्डिकाम् ॥
स्निग्धं मधुरमाहारं तण्डुलान् रुधिरोक्षितान्।
पक्वामकानि मांसानि सुरामैरेयमासवम् ॥
अतिमुक्तस्य पुष्पाणि जात्या सहचरस्य च।
चतुष्पथे गवां तीर्थे नदीनां सङ्गमेषु च ॥
निशीथमिषमद्यो यो हिताशी प्रयतः शुचिः।
निशागन्तुभिरुन्मादैः सत्त्ववान्न स युज्यते ॥
प्रसाद इन्द्रियार्थानां बुद्धात्ममनसान्तथा।
धातूनां प्रकृतिस्थत्वं विगतोन्मादलक्षणम्" ॥*॥

इति वाभटे उत्तरस्थाने सप्तमोऽध्यायः॥

अस्य सनिदानसंप्राप्तिर्यथा।

"इह खलु षड्भ्योन्मादा भवन्ति। तद्यथा,—वातपित्तकफसन्निपातागन्तुनिमित्तात्तत्र दोष-निमित्तास्चत्वारः।
पुरुषाणामेवंविधानां क्षिप्रमभिनिर्वर्त्तन्ते तद्यथा,
"भीरूणामुपक्लिष्टसत्त्वानामुत्सन्नदोषाणाञ्च मलविक्षतोपहितानि अनुचितान्याहारजातानि वैषम्ययुक्तोपयोगविधिनोपयुञ्जानानां तत्तत्प्रयोग वा विषममाचरतामन्यां वा चेष्टां विषमां समा-चरतामल्पपचीयदेहानाञ्च व्याधिवेगसमुद्भवभि-तानामुपहतमनसां वा काम-क्रोध-लोभ-हर्ष-भय-शोक-चिन्तोद्वेगादिभिः पुनरभिघाताभ्याहतानां वा मनस्युपहते बुद्धौ च प्रचलितायामधृतीर्णाः दोषाः प्रकुपिता हृदयमुपरुध्य मनोवहानि स्रोतांस्याहत्य जनयन्त्युन्मादम्। उन्मादं पुनर्मनो-बुद्धि-संज्ञा-ज्ञान-स्मृति-भक्ति-शील-चेष्टाहार-विभ्रमं विद्यात्" ॥

तस्येमानि पूर्व्वरूपाणि। तद्यथा,—
"शिरसः शून्यभावः चक्षुषोः व्याकुलता स्वनःकर्ण-योरुच्छ्वासस्याधिक्यमास्यसंस्रवणमनभिलाषो-ऽरोचकाविपाकौ हृदयग्रहो ध्यानायास-सम्मो-होद्वेगाश्चास्याने सततं लोमहर्षो ज्वरश्चाभीक्ष्ण-

मुन्मत्तचित्तत्वमुदर्हितत्वमर्हितात्कृतिकरणाच्च व्याधेः स्वप्ने च दर्शनमभीक्ष्णं भ्रान्तचलितानवस्थितानवस्थितागाच्च रूपाणामप्रशस्तानाच्च तिलपीड़नचक्राधिरोहणं वातकुण्डलिकाभिस्रोन्मथनं निमज्जनं कलुषाणामम्भसामावर्त्तेषु चक्षुषोश्चापसर्पणमिति दोषनिमित्तानामुन्मादानां पूर्व्वरूपाणि" ॥

अत्र वातादिभेदेनास्य लक्षणानि यथा,—

"ततोऽनन्तरमुन्मादाभिनिर्हृत्तिस्तत्रेदमुन्मादविज्ञानं भवति। तद्यथा,—परिसर्पणमक्षिभ्रुवामोष्ठांस-हनु-हस्त-पादविक्षेपणमकस्मादनियतानाच्च सत्तत्क्षिरामुत्सर्गः फेनागमनमात्म्यात् स्मित-हसित-नृत्य-गीत-वादित्र-प्रयोगाश्चास्थाने वीणावंश-मृदङ्ग-शङ्खातालशब्दानुकरणमसाम्ना। यानमयानैरलङ्करणमनलङ्कारिकैर्द्रव्यैर्लोभोऽभ्यवहार्य्येष्वलब्धेषु। लब्धेषु चावमानस्तीव्रं मात्सर्य्यं कार्श्यं पारुष्यमुत्पिञ्छितारुणाच्छता वातोपसृष्ट-विपर्य्यासानुपसृष्टिता चेति वातोन्मादलिङ्गानि भवन्ति॥

क्रमर्षः क्रोध-संरम्भस्थाने श्लक्ष्णलोष्टकाष्ठमुष्टिभिरभिद्रवणं सेषां परेषां प्रच्छाय-प्रीतोदकान्नाभिलाषः। सन्तापोऽतिवेलम्। ताम्रहरितहारिद्रसंरब्धाक्षिता पित्तोपसृष्टविपर्य्यासादनुपसृष्टिता चेति पित्तोन्मादलिङ्गानि भवन्ति॥

स्थानमेकदेशे मूर्च्छाभावोऽल्पसंक्रमणं लालाश्लिङ्गाणकाप्रस्रवणमनन्नाभिलाषो रहस्कामता बीभत्सत्वं शौचदेषः स्वप्न-निद्रताश्रयसुरानने शुक्लक्षितिमलोपदिग्धाच्छता श्लेष्मोपसृष्टविपर्य्यासादनुपसृष्टिता चेति श्लेष्मोन्मादलिङ्गानि भवन्ति। त्रिदोषलिङ्गसन्निपाते तु सान्निपातिकं विद्यात्। तमसाध्यमित्याचक्षते कुशलाः"॥

साधारणसाधनविधिर्यथा।

"साध्यानान्तु त्रयाणां साधनानि भवन्ति। तद्यथा,—स्नेह-स्वेद-वमन-विरेचनास्थापनानुवासनोपशमनानि कर्म्म-धूप-धूम-पानाञ्जनावपीड़न-प्रधमनाभ्यङ्ग-प्रदेह-परिषेकानुलेपन-बन्ध-बन्धनावरोधन-विस्रासन-विस्मापन-विस्मारणापतर्पणाग्निकर्म्माण्यधनानि॥

भोजनविधानञ्च यथास्वं युक्त्या यच्चान्यदपि किञ्चिन्निदानविपरीतमौषधं कार्य्यन्तत्यादिति। उन्मादान् दोषजान् साध्यान् साधयेद्विधिमुत्तमः। अनेन विधियुक्तेन कर्म्मणा यत्कीर्त्तितम्"॥ इति॥

आगन्तुरुन्मादो यथा।

"यस्तु दोषनिमित्तेभ्य उन्मादेभ्यः समुत्थानपूर्व्वरूपलिङ्गविशेषसमन्वितो भवत्युन्मादस्तमागन्तुमाचक्षते॥

केचित् पुनः पूर्व्वकृतं कर्म्माप्रशस्तमिच्छन्ति। तस्य निमित्तं प्रज्ञापराध एवेति भगवान् पुनर्व्वसुरात्रेय उवाच॥

प्रज्ञापराधाद्ध्यं देवर्षि-पिट्ट-गन्धर्व्व-यक्ष-राक्षस-पिशाच-गुरु-वृद्ध-सिद्धाचार्य्य-पूज्यानवमत्याहितान्याचरति अन्यद्वा किञ्चित् कर्म्माप्रशस्तमारभते।

तमात्मनोऽहितमुपलभन्तो देवादयः कुर्व्वन्त्युन्मत्तम्"॥

आगन्तूनामादस्य पूर्व्वरूपाणि यथा।

"तत्र देवादिप्रकोपनिमित्तेनागन्तूनामादेन पुरस्कृतस्येमानि पूर्व्वरूपाणि। तद्यथा—देव-गो-ब्राह्मण-तपस्विनां हिंसारुचित्वं क्रोपनत्वं नृशंसाभिप्रायता अरतिरोजो-वर्ण्यच्छाया-बल-वपुषाञ्चोपतप्तिः स्वप्ने च देवादिभिरभिभर्त्सनं प्रवर्त्तनञ्चेति ततोऽनन्तरमुन्मादाभिनिर्हृत्तिः॥

तत्रायमुन्मादकराणां भूतानामुन्मादयिष्यतामारम्भविशेषो भवति। तद्यथा। अवलोकयन्तो देवा जनयन्त्युन्मादं गुरवृद्धसिद्धर्षयोऽभिशपन्तः पितरो धर्षयन्तः स्पृशन्तो गन्धर्व्वाः समाविशन्तो यक्षराक्षसाश्चामगन्धमाघ्रापयन्तः पिशाचाः पुनरारुह्य वाहयन्तः॥

तस्येमानि रूपाणि भवन्ति। तद्यथा। अमर्य्यबल-वीर्य्य-पौरुष-पराक्रम-ग्रहण-धारण-स्मरण-वचन-ज्ञान-विज्ञानान्यनियतश्चोन्मादकालः।

उन्मादयिष्यतामपि खलु देवर्षि-पिट्ट-गन्धर्व्व-यक्ष-राक्षस-पिशाचानां गुरवृद्धसिद्धानां वा एष्वन्तरेष्वभिगमनीयाः पुरुषा भवन्ति। तद्यथा—पापस्य कर्म्मणः समारम्भे पूर्व्वकृतस्य वा कर्म्मणः परिणामकाले एकस्य वा शून्यगृहवासे चतुष्पथाधिष्ठाने वा सन्ध्यावेलायामप्रयतभावे वा पर्व्वसन्धिषु वा मिथुनीभावे रजस्वलाभिगमने वा विगुणे वाऽध्ययन-बलि-मङ्गल-होम-प्रयोगे नियमव्रतब्रह्मचर्य्ये वा महाहवे वा देव-कुल-पुरविनाशे वा महाग्रहोपगमने वा स्त्रिया प्रव्रजनकाले विविधभूताशुचिसंस्पर्शने वा वमनरुधिरस्रावाशुचेरप्रयतस्य चैत्य-देवायतनाभिगमने वा मांस-मधु-तिल-गुड़-मद्योच्छिष्टे वा दिग्वाससि वा निशि नगर-निगम-चतुष्पथे पवनप्रशस्तानाभिगमने वा द्विज-गुरु-सुर-यति-पूज्याभिधर्षणे वा धर्म्माख्यातव्यतिक्रमे वा न्यस्तकर्म्मणोऽप्रशस्तस्यारम्भे वा इत्याघातकालाः व्याख्याता भवन्ति॥

त्रिविधन्तु खलून्मादकराणां भूतानामुन्मादने प्रयोजनमभवति। तद्यथा। हिंसारतिरभ्यर्चनञ्चेति। तेषां तत्प्रयोजनविशेषमुन्मत्ताचारविशेषलक्षणैर्विद्यात्। तत्र हिंसार्थमुन्माद्यमानोऽग्निं प्रविशत्यप्सु वा निमज्जति स्खलात् स्रस्ते निपतति शस्त्र-कषा-काष्ठ-लोष्ट-मुष्टिभिर्हन्यात्मानमन्यञ्च प्राणवधार्थमारभते। तमसाध्यं विद्यात्। साध्यौ पुनर्द्वावितरौ। तयोः साधनानि। मन्त्रौषधि-मणि-मङ्गल-बल्युपहार-होम-नियम-प्रायश्चित्तोपवास-स्वस्त्ययन-प्रणिपात-गमनादीन्येवमेते यक्षोन्मादाः व्याख्याता भवन्ति"॥

"नैव देवा न गन्धर्व्वा न पिशाचा न राक्षसाः।
न चान्ये स्वयमक्लिष्टमुपक्लिश्नन्ति मानवम्॥
ये त्वेनमनुवर्त्तन्ते क्लिश्यमानं स्वकर्म्मणा।
न तन्निमित्तः क्लेशोऽसौ न ह्यस्ति कृतकृत्यता"॥

इति चरके निदानस्थाने सप्तमोऽध्यायः॥ * ॥

चिकित्साविशेष आगन्तूनामादकारणलक्षणविशेषश्च।

"समूढचेता न सुखं न दुःखं
नाचारधर्म्मैः कुतश्च शान्तिम्।
विन्दत्यवाप्तस्मृतिबुद्धिसंज्ञो
भ्रमत्यवक्षेतइतस्ततश्च॥
समुद्भ्रमं बुद्धिमनःस्मृतीना-
मुन्मादमागन्तुनिजोत्थमाहुः"॥
"देवर्षि-गन्धर्व्व-पिशाच-यक्ष-
रक्षःपितॄणामभिधर्षणानि।
आगन्तुहेतुर्नियमव्रतादि-
मिथ्याकृतं कर्म्म च पूर्व्वदेहे"॥
"अदृश्यन्तः पुरुषस्य देहं
देवादयः स्वैस्तु गुणप्रभावैः।
विशन्त्यदृश्यास्तरसा यथैव
च्छायातपौ दर्पणसूर्य्यकान्तौ॥
आघातकालास्तु सपर्व्वरूपाः
प्रोक्ता निदानेऽथ सुरासुराद्यैः।
उन्मादरूपाणि पृथक् निबोध
कालञ्च गम्यान् पुरुषांश्च तेषाम्"॥

तद्यथा,—सौम्यदृष्टिं गम्भीरमप्रधृष्यमकोपनमसम्प्रमभोजनाभिलाषिणमल्पस्वेदमूष्मपुरीषवाचं सुभगन्धं पुष्पपद्मवदनमिति देवोन्मत्तं विद्यात्॥

गुरवृद्धसिद्धर्षीणामभिशापाभिचाराभिध्यानानुरूपचेष्टाहारव्याहारं तैरुन्मत्तं विद्यात्॥

अप्रसन्नदृष्टिमप्रयत्नं निद्रालुं प्रतिहतवाचमनन्नाभिलाषारोचकाविपाकपरीतं पिट्टभिरुन्मत्तं विद्यात्॥

चण्डं साहसिकं तीक्ष्णं गम्भीरमप्रधृष्यं सुखवाद्य-नृत्य-गीतान्नपान-स्नान-माल्य-धूप-गन्ध-रक्तवस्त्र-बलिकर्म्म-हास्य-कथायोगप्रियं सुभगन्धमिति गन्धर्व्वोन्मत्तं विद्यात्॥

असक्तं स्वप्ररोदनहास्यं नृत्य-गीत-वाद्य-कथान्नपान-स्नान-माल्य-धूप-गन्धरतिं रक्तविभुतात्तं द्विजातिवैद्यपरिवादिनं रहस्याभिधानमिति यक्षोन्मत्तं विद्यात्॥

नग्ननिद्रमन्नपानद्वेषिणमनाहारमप्रतिबलिनं श्लक्ष्णशोणितमांसरक्तमाल्याभिलाषिणं सन्तर्ज्जकमिति राक्षसोन्मत्तं विद्यात्॥

प्रहासनृत्यप्रधानं देवद्विप्रवैद्यदेषावज्ञाभिः स्तुतिवेदमन्त्रशास्त्रोदाहरणैः काष्ठादिभिरात्मपीड़नेन च ब्रह्मराक्षसोन्मत्तं विद्यात्॥

अस्वस्थचित्तस्थानमनभिमानं नृत्यगीतहासिनं बद्धाबद्धप्रभाषिणं सङ्करकूटमलिनरथ्याचेलशेखारोहणरतिं भिन्नरूक्षवर्णस्वरं नग्नं विधावन्तं नैकत्र तिष्ठन्तं दुःखान्यावेदयन्तं नष्टस्मृतिं पिशाचोन्मत्तं विद्यात्॥

भूतादीनामावेशकालो यथा।

"तत्र शौचाचारं तपःस्वाध्यायकोविदं नरं प्रायः शुक्लप्रतिपदि त्रयोदश्यां च देवाः, पानशुचिविविक्तसेविनं धर्म्मशास्त्रश्रुतिकाव्यकुशलं प्रायः षष्ठीनवम्योर्ऋषयः, माल्य-पिट्ट-गुरु-वृद्ध-सिद्धाचार्य्योपसेविनं प्रायो दशम्यामामावस्यायाञ्च पितरः, गन्धर्व्वास्तु स्तुतिगीतवादित्ररतिं परदारगन्ध-माल्य-प्रिय-शौचाचारं द्वादश्याञ्चतुर्दश्याञ्च,

सत्त्व-बल-रूप-गर्व्व-शौर्य्य-युक्तं माल्यानुलेपनं हास्यप्रियमतिवाक्करणं प्रायः शुक्लैकादश्यां समस्याश्च यच्चाः,स्वाध्याय-तपोनियमोपवासव्रतचर्य्या-देव-यति-गुरु-पूजारतिं भस्मशौचं ब्राह्मणमब्राह्मणं वा ब्रह्मवादिनं शूरमानिनं देवतागार-सलिल-क्रीड़नरतिं प्रायः शुक्लपक्षस्यां पूर्णाचन्द्रदर्शने च ब्रह्मराक्षसाः, रक्तःपिशाचास्तु हीनसत्त्व-पिशुन-स्तेन-लुब्धं प्रायो द्वितीयाद्वतीयाष्टमीषु पुरुषं क्षिप्रमवेक्ष्याभिधर्षयन्तीत्यपरिसंख्येयानां ग्रहाणामाविस्कृततमा ह्येष्टावेते व्याख्याताः" ॥

अत्र ये असाध्यास्तेषां लक्षणानि यथा।

"सर्व्वेष्वपि तु खल्वेष यो हस्तावुद्यम्य रोष-संरम्भो निःसंज्ञमन्येष्वात्मनि वा पातयेत् सङ्घसाध्यो ज्ञेयस्तथा साश्रुनेत्रो मेढ्रप्रवृत्तरक्तः क्षतजिह्वः प्रस्रुतनासिकश्छिद्यमानमर्म्मा प्रतिहन्यमानपापिः सततं विकूजन् दुर्व्वर्णक्षुधार्त्तः पूतिगन्धिश्च हिंसार्थी उन्मत्तो ज्ञेयस्तं परिवर्जयेत्। रत्यर्च्चनाकामोन्मादिनौ तु भिषगभिप्रायाचाराभ्यां बुद्धा तदङ्गोपहारबलिश्रमेण मन्त्रभैषज्यविधिनोपक्रमेत्" ॥

अस्य चिकित्सा यथा।

"लशुनानां घृतं त्रिंशद्भयाच्यूषणात्पलम्।
गवां चर्म्ममसी प्रस्थौ द्वाढ़कं क्षीरमूत्रयोः॥
पुराणसर्पिषः प्रस्थमेभिः सिद्धं प्रयोजयेत्।
हिङ्गुचूर्णं पलं पीते दत्त्वा च मधुमाक्षिकम्॥
तद्दोषागन्तुसम्भूतानुन्मादान् विषमज्वरान्।
अपस्मारांश्च हन्यात्तु पानाभ्यञ्जननावनैः" ॥

लशुनाद्यं घृतम् ॥*॥

"विशेषतः पुराणञ्च घृतं तं पाययेद्भिषक्।
त्रिदोषघ्नं पवित्रत्वादग्नेर्विशेषाद्ग्रहमोक्षणम्॥
गुणकर्म्माधिकं स्थानादाख्यादात् कटुतिक्तकम्।
उग्रगन्धं पुराणं स्याद्ग्रहवर्षस्थितं घृतम्॥
क्षारासवनिभं पीतं तद्धि सर्व्वग्रहापहम्।
मेध्यं विरेचनेष्वग्र्यं प्रधुराणमतः परम्॥
नासाध्यं नाम तस्यास्ति यत्स्यात् वर्षशतं स्थितम्।
दृष्टं स्पृष्टमघ्राणं तद्धि सर्व्वग्रहापहम्॥
अपस्मारग्रहोन्मादवतां ग्रस्तं विशेषतः" ॥

"शतैरौषधवर्गैर्व्वा विशेषत्वं स गच्छति।
अञ्जनोन्मादनालेपान्नावनादींश्च योजयेत्॥
शिरीषो मधुकं हिङ्गु लशुनं तगरं वचाम्।
कुष्ठञ्च वस्तमूत्रेण पिष्टं स्यान्नावनाञ्जनम्" ॥

इति लशुनाञ्जनम् ॥*॥

"प्रसेके पीनसे गन्धैर्धूमवर्त्तिं कृताम्बिवेत्।
वैरेचनिकधूमोक्तैः श्वेतादैर्व्वासहिङ्गुभिः" ॥

इति धूमपानम् ॥*॥ [शिरसः।

"ग्रन्थके ग्रान्तसन्धौ वा मोक्षयेज्जो भिषक्
उन्मादे विषमे चैव ज्वरेऽपस्मारएव च" ॥

"कामशोकभयक्रोधहर्षैर्व्याधिभिरभिसम्भवान्।
परस्परप्रतिद्वन्द्वैरेभिरेव शमं नयेत्" ॥

"देवर्षिपितृगन्धर्व्वैरुन्मत्तस्य तु बुद्धिमान्।
वर्ज्जयेदञ्जनादीनि तीक्ष्णानि क्रूरकर्म्म च।
सर्पिःपानादि तस्येह मृदुभैषज्यमाचरेत्।

पूजां बल्युपहारांश्च मन्त्राञ्जनविधींस्तथा॥
शान्तिकर्म्मेष्टिहोमांश्च जपस्वस्ययनानि च।
वैदोक्तान् नियमांश्चापि प्रायश्चित्तानि चाचरेत्॥
भूतानामधिपं देवमीश्वरं जगतः प्रभुम्।
पूजयन् प्रयतो नित्यं जयत्युन्मादजं भयम्॥
रुद्रस्य प्रमथा नाम गणा लोके चरन्ति ये।
तेषां पूजाञ्च कुर्व्वाण उन्मादेभ्यो विमुच्यते" ॥
इति च चरके चिकित्सास्थाने चतुर्दशोऽध्यायः॥

अस्य विशिष्टपूर्व्वरूपं यथा।

"मोहोद्वेगौ स्वनः श्रोत्रे गात्राणामपकर्षणम्।
अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनम्॥
वायुनोन्मथनञ्चापि भ्रमश्च क्रमतस्तथा।
यस्य स्यादचिरेणैवमुन्मादं सोऽधिगच्छति" ॥

वातजादिभेदेन रूपाणि यथा॥

"रूक्षच्छविःपरुषवाक् धमनीततो वा
श्वासातुरः क्षुभ्यतनुः स्फुरिताङ्गसन्धिः।
आस्फोटयन् पठति गायति नृत्यशीलो
विक्रोशति भ्रमति चाप्यनिलप्रकोपात्॥१॥
दृष्टेददाहबलवान् बलमुद्विनिद्र-
श्छायाहिमानिलजलान्तविहारसेवी।
तीक्ष्णो हिमाम्बुनिचयेऽपि स वह्निशङ्की
पित्तादिवा नभसि पश्यति तारकाञ्च॥२॥
कर्द्दमिप्रसादसदनारुचिकासयुक्तो
योषिद्विविक्तरतिरल्पमतिप्रकारः।
निद्रापरोऽल्पकथनोऽल्पमुगुप्सुसेवी
रात्रौ भृशं भवति चापि कफप्रकोपात्॥३॥
सर्व्वात्मके चिभिरपि व्यतिमिश्रितानि
रूपाणि वातकफपित्तकृतानि विद्यात्।
सम्पूर्णलक्षणमसाध्यमुदाहरन्ति
सर्व्वात्मकं क्वचिदपि प्रवदन्ति साध्यम्" ॥ ४ ॥
अपरयोर्लक्षणानि प्रथमतोऽस्योक्तानि।

अस्य चिकित्सा यथा।

"स्विद्यं स्विन्नन्तु मनुजमुन्मादार्त्तं विशोधयेत्।
तीक्ष्णैरुभयतो भागैः शिरसश्च विरेचनैः॥
विविधैरवपीड़ैश्च सर्षपस्नेहसंयुतैः।
योजयित्वा च तच्चूर्णं घ्राणे नस्यन्तु योजयेत्॥
सततं धूपयेच्चैनं स्वगोमांसैः सुगुग्गुलैः।
सर्षपाणाञ्च तैलेन नस्याभ्यङ्गौ हितौ सदा॥
दर्शयेददभुतान्यस्य वदेन्नाम्नं प्रियस्य च।
भीमाकारैर्नरैर्नागैर्दान्तैर्व्यालैश्च निर्विषैः॥
भीषयेत् सततं पापैः कपाभिर्वाथ ताड़येत्।
यन्त्रयित्वा सघृतं वा धासयेत्तं हताग्निना॥
प्रतुदैर्दारयेच्चैनं मर्म्माघातं विवर्ज्जयेत्।
सापिधाने जरत्कूपे सततं वा निवासयेत्" ॥
"वर्हिश्छकुलमक्षिकाकटुकैलानिशाकृष्णैः।
तेनेदं चिफलाहिङ्गुवाजिगन्धामरड़ुमैः॥
वचाजमोदाकाकोलीमेदामधुकपद्मकैः।
सशर्करं हितं सर्पिः पक्वं क्षीरचतुर्गुणम्॥
बालानां ग्रहजुष्टानां पुंसां दुष्टाल्पमेधसाम्।
ख्यातं फलघृतं स्त्रीणां बन्ध्यानाञ्चाशु गर्भदम्" ॥

इति फलघृतम् ॥*॥

"उरोऽपाङ्गललाटेषु शिराश्चास्य विमोक्षयेत्।

अपस्मारक्रियाश्चापि ग्रहोक्ताश्च कारयेत्
ग्रान्तदोषं विशुद्धञ्च स्नेहवस्तिभिराचरेत्॥
शोकग्रस्तं व्यपनयेदुन्मादे पञ्चमे भिषक्।
उन्मादेषु च सर्व्वेषु कुर्य्याच्चित्तप्रसादनम्॥
मृदुपूर्व्वं मदेऽप्येवं क्रियां विद्वान् प्रयोजयेत्।
विषजे मृदुपूर्व्वाश्च विषघ्नीं कारयेत् क्रियाम्" ॥
इति सुश्रुते उत्तरतन्त्रे द्विषष्टितमोऽध्यायः ॥*॥

"तपांसि तीव्राणि तथैव दानं
व्रतानि धर्म्मो नियमश्च सत्यम्।
गुणास्तथाद्यावपि तेषु नित्याः
व्यस्ताः समस्ताश्च यथाप्रभावम्॥
न ते मनुष्यैः सह संविशन्ति
न वा मनुष्यान् क्वचिदाविशन्ति।
ये वा विशन्तीति वदन्ति मोहात्
ते भूतविद्याविषयादपोह्याः।
तेषां ग्रहाणां परिचारका ये
कोटीसहस्रायुतपद्मसङ्ख्याः।
अष्टावसामांसभुजः सुभीमाः
निशाविहाराश्च तमाविशन्ति" ॥
"निशाचराणां तेषां हि ये देवगणसंस्तुताः।
ते तु तत्सत्त्वसंसर्गादिज्ञेयास्तु तदङ्गनाः॥
देवग्रहा इति पुनः प्रोच्यन्ते गुह्यकाश्च ये।
देववच्च नमस्यन्ते प्रत्यर्थन्ते च देववत्॥
स्वामिशीलक्रियाचाराः क्रमशश्च सुरादिषु।
नैर्ऋतेया दुहितरस्तासां स प्रसवः स्मृतः॥
सत्यवादपरत्वेषु वृत्तिस्तेषां गणैः कृता।
हिंसाविहारा ये केचिद्दिव्यं भावमुपाश्रिताः॥
भूतानीति कृता संज्ञा तेषां संज्ञाप्रवक्तृभिः।
ग्रहसंज्ञाभिभूतानि यस्माद्वैद्यनया भिषक्॥
विद्यया भूतविद्यात्मतश्च निरुच्यते।
तेषां ज्ञान्यर्थमन्विच्छन् वैद्यस्तु सुसमाहितः॥
जप्यैः सनियमैर्होमैरारभेत चिकित्सितम्।
रक्तानि गन्धमाल्यानि बीजानि मधुसर्पिषाम्॥
भक्ष्याश्च सर्व्वे सर्व्वेषां सामान्यो विधिरुच्यते।
वस्त्राणि मद्यमांसानि क्षीराणि रुधिराणि च॥
यानि तेषां यदेष्टानि तानि तेभ्यः प्रदापयेत्।
छिनत्ति मनुजान् येषु प्रायशो दिवसेषु च॥
दिनेषु तेषु देयानि तद्भूतविनिवृत्तये।
देवग्रहे देवगृहे ऊत्वाग्निं प्राग्नयेद्बलिम्॥
कुशस्रक्तिकपूपाद्यैश्चरुप्रायससम्भृतम्।
असुराय यथाकालं विदध्याच्चत्वरादिषु॥
चतुष्पथे राजसस्य भीमेषु गृहनेषु वा।
शून्यागारे पिशाचस्य तीव्रं बलिमुपाहरेत्॥
पूर्व्वमाचरितैर्मन्त्रैर्भूतविद्यादिदर्शितैः।
न शक्या बलिभिर्जेतुं योगैस्तान् समुपाचरेत्" ॥
"नक्तमालफलं व्योषं मूलं श्योनाकविल्वयोः।
हरिद्रे च सतावर्त्तिः पूर्व्ववन्नयनाञ्जनम्" ॥
"न चायुक्तं प्रयुञ्जीत प्रयोगं देवताग्रहे।
ऋते पिशाचादन्येषु प्रतिकूलं न चाचरेत्॥
वैद्यातुरौ निहन्युस्तं ध्रुवं क्रुद्धा महौजसः।
हिताहितविधानञ्च नित्यमेव समाचरेत्॥
ततः प्राप्स्यति सिद्धिञ्च यशश्च विपुलं भिषक्" ॥

इति च सुश्रुते उत्तरतन्त्रे षष्ठितमोऽध्यायः ॥*॥
"सूतायस्कारमभ्रञ्च मुक्ता चापि समं समम्।
सूतपादोत्तमं वज्रं तालं गन्धं मनःशिला ॥
तुल्यं रसाञ्जनं शुद्धमब्भिर्पेषं शिलाञ्जनम्।
पञ्चानां लवणानाञ्च प्रतिभागं वसोन्मितम्॥
भृङ्गराजचिञ्चवचीदुग्धेनापि विमर्दयेत्।
दिनान्ते पिण्डितं कृत्वा रुद्धा गजपुटे पचेत् ॥
भूताङ्कुशो रसो नाम नित्यं गुल्माद्यं जिह्नन्।
आर्द्रकस्य रसेनापि भूतोन्मादसवातजित् ॥
पिप्पल्याक्षं पिबेच्चानु दशमूलकषायकम्।
खेदयेत् कटुतुम्बा च तीक्ष्णमुष्णञ्च वर्ज्जयेत् ॥
माहिषञ्च घृतं क्षीरं गुर्व्वन्नमपि भक्षयेत्।
अभ्यङ्गं कटुतैलेन हितो भूताङ्कुशो रसः"॥
इति भूताङ्कुशो रसः॥*॥ उन्मादभञ्जिनी वटी यथा।
"शुद्धं मनःशिलाचूर्णं सैन्धवं कटुरोहिणी।
वचा शिरीषबीजञ्च हिङ्गुञ्च श्वेतसर्षपम्॥
करञ्जबीजं त्रिकटु मलं पारावतस्य च।
एतानि समभागानि गोमूत्रैर्वटिकां कुरु॥
गिरिमल्लीबीजसमां छायाशुष्काञ्च कारयेत्।
प्रातःसन्ध्यानिशाकाले चक्षुषोरञ्जनं हितम्॥
मधुना दिवसे पाठ्यं रात्रौ चैव जलेन च।
वटिकैषा समाख्याता गाङ्गा चोन्मादभञ्जिनी।
चातुर्थकापस्मारहा सर्व्वोन्मादविनाशिनी"॥
इति वैद्यकरत्नसारसंग्रहे उन्मादाधिकारे॥

अत्र पथ्यानि यथा।
"स्नेहो विरेको वमनञ्च पूर्व्वं
क्रमान्मरुत्पित्तकफोद्भवेषु।
ततः परं वस्तिविधिश्च नस्यम्
सन्तर्ज्जनं ताड़नमञ्जनञ्च॥१॥
आश्वासनञ्चासनबन्धनानि
भयानि दानानि च हर्षणानि।
धूपो दमो विस्मरणं प्रदेहः
शिरोव्यधः संशमनञ्च सेकः॥२॥
आवश्यकर्म्माणि च धूमपानं
धीधैर्य्यसत्त्वात्मनिवेदनानि।
अभ्यञ्जनं स्नापनमासनञ्च
निद्रासुखीतान्यनुलेपनानि॥३॥
गोधूममुद्गाद्यगुणान्वयञ्च
धारोष्णदुग्धं घृतधौतसर्पिः।
घृतं नवीनञ्च पुरातनञ्च
कूर्म्मोमिषं धन्वरसा रसालम्॥४॥
पुराणकुक्कुटमांसपक्वं पटोलं
ब्रह्मीदलं वास्तुकतण्डुलीयम्।
खराश्वमूत्रं गगनाम्बुपथ्या
सुवर्णचूर्णानि च नारिकेलम्॥५॥
द्राक्षाकपित्थं पनसञ्च वैद्यै-
र्विधेयमुन्मादगदेषु पथ्यम्"॥६॥
"पूजाबलिप्रहरणशान्तिविधयो हेमस्त्रिमन्त्रक्रियाः
दानं स्वस्त्ययनं व्रतानि नियमः सत्यञ्चमो मङ्गलम्॥
प्रायश्चित्तविधानमञ्जनविधीरत्नौषधीधारणं
भूतानामनुरूपमिष्टधरणं गौरीपतेरर्चनम्॥७॥
ये च स्युर्भुवि गुह्यकाश्च प्रमथाश्चेषां समाराधनं
देवब्राह्मणपूजनञ्च शमयेदुन्मादमागन्तुकम्"॥८॥

अपथ्यानि यथा॥
"मद्यं विरुद्धान्नमुष्णभोजनं
निद्राक्षुधाष्टत्कृतवेगधारणम्।
व्यवायमाघाढ़फलं कठिन्नकं
शाकानि पत्रप्रभवानि सर्व्वशः॥
तिक्तानि बिम्बी च भिषक् समादिशे-
दुन्मादरोगोपहतेषु गर्हितम्"॥

इति वैद्यकपथ्यापथ्यविधौ उन्मादाधिकारः॥*॥)

औत्सुक्यसन्तापादिकारितमनोविपर्य्याससमुत्थ-प्रियाश्रितवृथाव्यापारः। इति रसमञ्जरी॥ (व्यभिचारिभावभेदः। यथा, साहित्यदर्पणे ३। १३६।
"औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसंत्रासलज्जाः"। इति॥ अस्य लक्षणं सोदाहरणमाह तत्रैव ३। १५५।
"चित्तसम्मोह उन्मादः कामशोकभयादिभिः।
अस्थानहासरुदितगीतप्रलपनादिकृत्"॥
उदाहरणम्।
"भ्रातर्हरेः! भवता भ्रमता समन्तात्
प्राणाधिका प्रियतमा मम वीक्षिता किम्?
भृङ्गभ्रुवारमनुभूय सानन्दम्—
"ब्रूषे किमीमिति सखे! कथयामु तन्मे
किं किं व्यवस्यति कुतोऽस्ति च कीदृशीयम्"॥)

उन्मादः, त्रि, (उत्+मद्+घञ्।) उन्मादरोगयुक्तः। क्षिप्तः। उन्मत्तः। इत्यमरटीकायां नीलकण्ठः॥ पागल इति भाषा॥

उन्मादनः, पुं, (उन्मादयत्यनेन इति। उत्+मद्+णिच+ल्युः) कामदेवस्य पञ्चबाणान्तर्गतबाणविशेषः। इति त्रिकाण्डशेषः॥

उन्मादवान्, त्रि, (उन्मादो विद्यते अस्य। उन्माद+मतुप्। मस्य वः।) उन्मादरोगविशिष्टः। उन्मत्तः। इत्यमरः॥

उन्मानः, पुं, (उत्+मा+ल्युट्।) द्रोणपरिमाणम्। इति वैद्यकपरिभाषा॥
("उन्मानञ्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः"। इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम्॥
"स एव कलशः ख्यातो घटस्तून्मानमेव च"॥
इति कल्पस्थाने द्वादशेऽध्याये चरकेणोक्तम्॥)

उन्मिषितः, त्रि, (उत्+मिष+क्त।) प्रफुल्लः। विकसितः। इति हेमचन्द्रः॥ यथा कुमारे।
"व्यलोकयन्मिषितैस्तडिन्मयै-
र्महातपःसाक्ष्यइव स्थिताः क्षपाः"। ५। २५॥

उन्मीलनं, क्ली, (उत्+मील+ल्युट्।) उन्मेषः। इति हेमचन्द्रः॥ चक्षुर्मेला इति भाषा। विकाशः॥
("अज्ञानतिमिरान्धस्य लोकस्य तु विचेष्टतः।
ज्ञानाञ्जनशलाकाभिर्नेत्रोन्मीलनकारकः"।
इति महाभारते। १। १। ८४॥)

उन्मीलितः, त्रि, (उत्+मील्+क्त।) विकसितः। प्रस्फुटितः। इति हलायुधः॥ ("उन्मीलितं तूलिकयेव चित्रम्"। इति कुमारे। १। ३२॥
"ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः"। इति साहित्यदर्पणे १म परिच्छेदे॥)

उन्मुखः, त्रि, (उद्गूर्द्धं मुखं यस्य।) ऊर्द्धमुखः। तत्पर्य्यायः। उत्पश्यः २। इति हेमचन्द्रः॥
("मनोभिरामाः प्रहसन्तो रथनेमिस्वनोन्मुखैः"। इति रघुः। १।३९।) उत्सुकः। यथा कुमारे। ६।२४॥
"तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे"।
"पतिः प्रतीतः प्रसवोन्मुखीं प्रियाम्"। इति रघुः। ३। १२॥
"अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभिः"। इति मेघदूते। पूर्व्वमेघे १४।
"इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा"।
इति च मेघदूते उत्तरमेघे ३९ श्लोकः॥)

उन्मुदः, त्रि, (उद्गता मुदा यस्मात्।) प्रफुल्लः। विकसितः। इति त्रिकाण्डशेषः॥

उन्मूलितं, त्रि, (उत्+मूल्+क्त।) उत्पाटितम्। इति हेमचन्द्रः॥ (यथा रामायणे। ५।६।
"लङ्कामुन्मूलितां कृत्वा कदा द्रक्ष्यति मां पतिः"॥)

उन्मेषः, क्ली, (उत्+मिष्+घञ्।) चक्षुरुन्मीलनम्। इति हेमचन्द्रः॥ चक्षु मेला इति भाषा।
("खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम्"। इति मेघदूते उत्तरमेघे २०। स्फुरणम्॥ यथा,
"खकिरणपरिवेषोन्मेषशून्याः प्रदीपाः"॥
इति रघुः। ५। ७४॥ विकाशः २। प्रस्फोटनम्। यथा,—
"दीर्घिकाकमलोन्मेषो यावन्माद्येव साध्यते"।
इति कुमारे। २। ३३॥)

उप अ प्रादिविंशत्युपसर्गान्तर्गतउपसर्गविशेषः। अस्यार्थः। अनुगतिः। पश्चाद्भावः। अनुकम्पा। आधिक्यम्। (यथा पाणिनिः २।३।८। "उप परार्द्धे हरेर्गुणाः। परार्द्धादधिका इत्यर्थः।) हीनः। (यथा मुग्धबोधे कारके ७। "विष्णुमन्वर्च्चते भर्गः शक्रादय उपाचुतम्"।) सामीप्यम्। (यथा, मुग्धबोधे समासप्रकरणे ६७। "उपसमिधं उपसमित्। उपनदं। उपनदि"॥) प्राधान्यम्। इति दुर्गादासः॥ दाक्षिण्यम्। सामर्थ्यम्। अत्ययः। भूषणम्। दोषाख्यानम्। निदर्शनम्। आश्चर्य्यकरणम्। दानम्। सारणम्। व्याप्तिः। निष्ठा। उपालम्भनम्। पूजा। उद्योगः। इति शब्दरत्नावली॥

उपकण्ठं, क्ली, (उपगतः कण्ठम्। अव्ययादय इति समासः। उपगतः कण्ठः सामीप्यमस्येति वा॥) ग्रामान्तम्। तत्पर्य्यायः। उपश्लक्ष्णम् २। इति त्रिकाण्डशेषः॥ आस्कन्दितम्। अश्वपञ्चमगतिः। इति हेमचन्द्रः॥ कण्ठसमीपम्॥ (यथा, माघे।
"प्रेङ्खोपकण्ठं मुहुरङ्गभाजो-
रत्नावलीरम्बुधिरावबन्ध"॥)

उपकण्ठः, त्रि, (उपगतः कण्ठः सामीप्यमस्य।) निकटः। इत्यमरः॥ (यथा, कुमारे। ७। ५१॥
"तस्योपकण्ठे घननीलकण्ठः
कुतूहलादुन्मुखपौरदृष्टः"॥)

उपकरणं, क्ली, (उप+कृ+ल्युट्।) प्रधानाङ्गीभूतोपकारकद्रव्यम्। रथादीनां छत्रचामरादि।

तत्यर्थायः । परिच्छदः २ परिवर्हः ३ तत्त्वम् ४ । इति हेमचन्द्रः ॥ भोजनादौ व्यञ्जनादि ॥ यथा । "तस्मादन्नं प्रधानं भूपादिकन्तु उपकरणत्वेन भक्षणानामावश्यकम्" । इति श्राद्धतत्त्वम् ॥ पूजादौ नैवेद्यादि । मद्यबन्धनादौ जालादि ॥

उपकारः, पुं, (उप + कृ + घञ् ।) उपकृतिः । ("उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः" । इति माघः । २।३७॥ "कृतोपकारेव रतिर्बभूव" । इति कुमारे । ३ । ७३ ॥) विकीर्यपुष्पादिः । इति हेमचन्द्रो मेदिनी च ॥

उपकारिका, स्त्री, (उपकरोतीति । उप + कृ + ण्वुल् + टाप् + इत्वम् ।) उपकारकर्त्री । पिष्टभेदः । इति मेदिनी ॥ राजग्रहम् । इत्यमरः ॥ कुश्मूलः । मराठि इति भाषा । इति केचिदाङ्करिति भरतः ॥

उपकारी, स्त्री, (उपकारयतीति । उप + कृ + णिच् + अण् + ङीष् ।) राजग्रहम् । इति भरतधृतद्विरूपकोषः ॥

उपकारी, [न्] त्रि, (उपकरोतीति । उप + कृ + णिनि ।) उपकारविशिष्टः । उपकारकर्त्ता । ("उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम्" इति हितोपदेशे मित्रलाभे ॥)
तत्र दानादानविधिर्यथा । हारीतः । अथासद्द्रव्यदानमस्वर्ग्यं यच्च दत्त्वा परितप्यते तद्दानमफलं यच्चोपकारिणे ददाति ॥ उपकारिणे व्यसनोपकारिणे । तदितरोपकारिणे तु दत्तः ।
"मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणे ।
दीनानाथविशिष्टेभ्यो दत्तन्तु सफलं भवेत्" ॥
इति शुद्धितत्त्वम् ॥ किञ्च ।
"उपकारिषु यः साधुः स साधुः सद्भिरुच्यते ।
समदृष्टिर्भवात्मा त्वं सर्व्वभूतेषु केशव" ॥
इति जैमिनीये आश्वमेधिके पर्व्वणि ११ अध्यायः॥

उपकार्य्यः, त्रि, (उप + कृ + ण्यत् ।) उपकारोचितः । इति मेदिनी ॥

उपकार्य्या, स्त्री, (उपक्रियते इति । उप + कृ + ण्यत् + टाप् ।) राजग्रहम् । इत्यमरः ॥ (पटभवनम् । यथा, रघौ ५ । ४१ ।
"तस्योपकार्य्याश्चितोपचारा
वन्येतरा जानपदोपदाभिः" ॥
"भृत्यघ्नप्रतिविहितोपकार्य्यमार्य्यः,
साकेतोपवनमुदारमध्युवास" । इति च १३ । ७९ ।) कुश्मूलः । मराठि इति भाषा । इति केचिदाङ्करिति भरतः ॥

उपकुक्षिः, स्त्री, (उप + कुक्ष + कि ।) सूक्ष्मक्षुद्रजन्तुजीरकः । इति रत्नमाला ॥ (क्षुद्रजन्तुजीरकशब्देऽस्य गुणादयो बोध्याः ॥)

उपकुक्षिका, स्त्री, (उप + कुक्ष + ण्वुल् + टाप् ।) क्षुद्रजन्तुजीरकः । सूक्ष्मोला । इत्यमरः ॥
("कारवी करवी तद्वद्विज्ञेया सोपकुक्षिका ।
भक्ष्यव्यञ्जनभोज्येषु विविधेष्ववचारिता" ॥
इति सूत्रस्थाने ४६ अध्याये सुश्रुतेनोक्तम् ॥)

उपकुम्भं, स्त्री, (कुम्भस्य समीपे ।) कुम्भसमीपम् । इति व्याकरणम् ॥

उपकुर्व्वाणः, पुं, (उप + कृ + शानच् ।) ब्रह्मचर्य्यानन्तरं यो गृहस्थो भवति सः । इति पुराणम् ॥ (कृतोपकारः । यथा हितोपदेशे सुहृद्भेदे,—
"यतोऽनुपकुर्व्वाणो न कस्यापि उपायनं गृह्णीयात्" ॥)

उपकुल्या, स्त्री, (उपकोलति । कुल संख्याने बन्धुषु च । अघ्न्यादिः ।) पिप्पली । इत्यमरः ॥ पिप्पल इति भाषा । ("क्षय्योपकुल्या मगधी" इति वैद्यकरत्नमाला ॥ "उपकुल्योषणा शौण्डी" इति भावप्रकाशे पूर्व्वखण्डे प्रथमभागे ॥ गुणादिकमस्य पिप्पलीशब्दे ज्ञातव्यम् ॥) (उपगता कुल्यामिति वाक्ये वाच्यलिङ्गः । क्षुद्रसरःसमीपम् ॥)

उपकूपजलाशयः, पुं, (उपकूपं कूपसमीपे यो जलाशयः ।) कूपसमीपे शिलादिनिबद्धपशूपानार्थकृतकूपोद्भूताम्बुस्थानम् । इत्यमरः ॥

उपकर्त्ता, [ऋ] त्रि, (उप + क्रम + तृच् ।) उपक्रमकर्त्ता । आरम्भकर्त्ता । इति व्याकरणम् ॥

उपक्रमः, पुं, (उप + क्रम + घञ् । नोदात्तोपदेशस्य इति न वृद्धिः ।) ज्ञात्वारम्भः । अयमस्योपायः अनेनैतत् सिध्यतीति ज्ञात्वा प्रथमारम्भः ॥ उपधा । राज्ञा धर्म्मकामार्थभयैः अमात्यादेर्यत् परीक्षणं भावतत्त्वनिरूपणम् ॥ प्रक्रमः । प्रथमारम्भः । इत्यमरः ॥ विक्रमः । चिकित्सा । इति मेदिनी ॥ पलायनम् । इति हेमचन्द्रः ॥ (उपायः । यथा,—
"सामादिभिरुपक्रमैः" । इति मनुः । ७ । १०७ ।
आरम्भः । यथा,—"रामोपक्रममाचख्यौ रक्षःपरिभवं नवम्" ॥ १२ । ४२ । इति रघुः । "उपक्रम्यते इत्युपक्रमः कर्म्मणि घञ् । रामस्य कर्तुरुपक्रमः रामोपक्रमं रामेणादौ उपक्रान्तमित्यर्थः । उपक्षोपक्रमं तदाचिख्यासायामिति क्षीरस्वम्" । इति तट्टीका ॥)

उपक्रोशः, पुं, (उप + क्रुश् + घञ् ।) निन्दा । इत्यमरः ॥ (यथा, रघुः । २ । ५३ ।
"राज्येन किं तद्विपरीतवृत्तेः
प्राणैरुपक्रोशमलीमसैर्वा" ॥)

उपक्रोष्टा [ऋ] पुं, स्त्री, (उप + क्रुश् + तृच् ।) गर्द्दभः । इति श्रीभागवतम् ॥ निन्दकः ॥

उपक्रयः, पुं, (उप + क्री + अच् ।) प्रक्रयः । वीज्याशब्दः । इत्यमरटीकायां रायमुकुटः ॥

उपक्षेपणधर्म्मः, पुं, (उपक्षेपणरूपो धर्म्मः ।) शूद्रस्वामिकान्नस्य पाकार्थं ब्राह्मणगृहे समर्पणम् । इति शुद्धितत्त्वे कल्पतरुः ॥

उपगतः, त्रि, (उप + गम् + क्त ।) अङ्गीकृतः । स्त्रीकृतः ॥ इत्यमरः ॥ (यथा रघौ ९ । १५ ।
"उपगतोऽपि च मण्डलनाभितामनुदितान्यसितातपवारणः" ।) कृतमैथुनः ॥

उपगमः, पुं, (उप + गम् + अप् ।) अङ्गीकारः । निकटगमनम् । इति मेदिनी ॥ (यथा रघौ ६ । ६६ ।
"तं प्राप्य सर्व्वावयवानवद्यं
व्यावर्त्ततान्योपगमात् कुमारी" ॥)

उपगूहनं, क्ली, (उप + गूह + ल्युट् ।) आलिङ्गनम् । इत्यमरः ॥ ("स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनः" ॥ इति भागवते १ । ५ । १९ ॥ तथा च साहित्यदर्पणे ६ परिच्छेदे ।
"क्षतिः प्रमाद आनन्दः समयोऽप्युपगूहनम्" ॥)

उपग्रहः, पुं, (उपगृह्यते इति । उप + ग्रह + अप् ।) बन्दी । इत्यमरः ॥ बँदुयान् इति भाषा । उपयोगः । अनुकूलः । इति मेदिनी ॥ (ग्रहसदृशो ज्योतिःपदार्थभेदः । यथा महाभारते ३ । स्कन्दागुसमागमे २२६ । १ ॥
"ग्रहाः सोमग्रहाश्चैव ऋषयो मातरस्तथा ।
ऊताशनमुखाश्चैव दीप्ताः परिषदां गणाः" ॥)

उपग्रहणं, क्ली, (उप + ग्रह + ल्युट् ।) उपाकरणम् । संस्कारपूर्व्वकश्रुतिग्रहणम् । इत्यमरटीकायां रायमुकुटः ॥ (स्त्रीकारः । यथा, रामायणे १ । ४ । ४ ।
"वेदोपग्रहणार्थाय तावग्राहयत प्रभुः" ।
वेदोपबृंहणार्थाय इति पाठान्तरम् ॥)

उपग्राह्यः, पुं, (उपगृह्यते इति । उप + ग्रह + ण्यत् ।) उपढौकनम् । इत्यमरः ॥ भेटी डाळि इत्यादि भाषा ॥

उपघातः, पुं, (उपहन्यते अनेन । उप + हन + करणे घञ् ।) रोगः । इति राजनिर्घण्टः ॥ (भावे घञ् । विनाशः । यथा,—
"तथात्मन्येन्द्रियाणामुपघाते कथं स्मृतिः" ।
इति भाषापरिच्छेदे । ४८ । अपकारः ।
"स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च" ॥
इति मनुः । २ । १७६ ॥)

उपघ्नः, पुं, (उप + हन + क ।) निकटाश्रयः । इत्यमरः ॥ (यथा, रघुः । १५ । १ ।
"छेदादिवोपघ्नतरोर्व्रतज्ञौ" ॥)

उपचक्रः, पुं, (चक्रेण चक्रनाम्ना तुल्यः ।) चक्रवाकपक्षिविशेषः । अस्य मांसगुणाः । लघुत्वम् । हृद्यत्वम् । उष्णवीर्य्यत्वम् । कटुपाकित्वम् । बलाग्निवर्द्धकारित्वञ्च । इति राजवल्लभः ॥
("चकोरैरुपचक्रैश्च पक्षिभिर्जीवजीवकैः" ॥
इति महाभारते ३ भीमस्याजगरग्रहणे १७८ । ७ ॥)

उपचक्षुः, [स्] क्ली, (उपगतं चक्षुषोर्दर्शनार्थम् ।) दिव्यचक्षुः । चश्मा इति पारस्यभाषा । इति लोकप्रसिद्धम् ॥

उपचयः, पुं, (उप + चि + अच् ।) वृद्धिः । उन्नतिः । ("स्वप्नत्युपचये केचित् परस्य व्यसने परे" । इति माघः । २ । ५७ । "तदेतेषामसत्युत्पत्तौ ज्ञानोपचये भवन्तः प्रमाणम्" । इति हितोपदेशे कथामुखम् ।) जन्मात् दृतीयषष्ठदशमैकादशस्थानानि । इति ज्योतिषम् ॥

उपचरितं, त्रि, (उपचर्य्यते स्म । उप + चर + क्त ।) उपासितम् । सेवितम् । इत्यमरः ॥

उपचर्य्या, स्त्री, (उप + चर + क्यप् + टाप् ।) चिकित्सा । इति हलायुधः ॥

उपचाय्यः पुं, (उपचीयतेऽग्निरस्मिन् इति । "अग्नौ परिचाय्योपचाय्यसमूह्याः" ३ । १ । १२१ । इतिण्यदायादेशौ निपात्येते । उप + चि + ण्यत् ।) यज्ञाग्निः । इत्यमरः ॥

उपचारः, पुं, (उप + चर + घञ् ।) रोगप्रतिकारः ।

तत्पर्य्यायः। उपचर्य्या २ चिकित्सा ३ रक्प्रतिक्रिया ४ निग्रहः ५ वेदनानिष्ठा ६ क्रिया ७ उपक्रमः ८ ग्रमः ९। इति राजनिर्घण्टः॥ सेवा। ("समे चिरायास्खलितोपचाराम्"। इति रघौ, ५। २०।) व्यवहारः। ("प्रयुक्तपाणिग्रहणोपचारौ"। इति कुमारे ७। ८६।) उत्कोचः। इति हेमचन्द्रः। परस्य रञ्जनार्थं असत्यभाषणम्। यथा, कुमारे ४। ६। "उपचारपदं नचेदिदं त्वमनङ्गः कथमक्षता रतिः"॥ "उपचारच्छवा दाक्ष्यं" इति चरके सूत्रस्थाने नवमेऽध्याये॥)

उपचार्य्यः, पुं, (उप + चर + ण्यत्।) चिकित्सा। इति हेमचन्द्रः॥

उपचितः, त्रि, (उपचीयते स्म। उप + चि + क्त।) दिग्धः। समृद्धः। इति विश्वमेदिन्यौ॥ (यथा रघौ ९ म—सर्गे,। "मृगवयोगवयोपचितं वनम्"।) समाहितः। इति विश्वः हेमचन्द्रश्च॥ निदिग्धः। लेपादिना वर्द्धितः। इत्यमरः॥ ("यथाह हारीतः।

"प्रयतत्वाद्धोपचितमशुभं नाशयतीति"॥)

उपचित्रा, स्त्री, (उपगता चित्राम्।) मूषिकपर्णी। इत्यमरः। इंदुरकानि इति भाषा। दन्तीवृक्षः। इति राजनिर्घण्टः॥ (दन्त्यर्थे यथा,—

"चित्रा दन्ती निकुम्भः स्यादुपचित्रा सुकूलकः"। इति वैद्यकरत्नमाला।)

उपजापः, पुं, (उप + जप् + घञ्।) भेदः। विच्छेदः। इत्यमरः॥

("तेषु तेषु चाक्षतेषु प्रासरन् परोपजापाः"। इति दशकुमारे विश्रुतचरिते। तथा च माघे २। ६६।

"उपजापः क्षतस्तेन तानाकोपवतस्त्वयि"॥)

उपजिह्वा, स्त्री, (उपगता जिह्वा यस्याः।) कीटविशेषः। तत्पर्य्यायः। उपदेहिका २ वल्मी ३ उददीका ४। इति हेमचन्द्रः॥ आलजिह्वा इति ख्याता च॥ ("उपजिह्वा स्त्रिचौ बाहू"। इति याज्ञवल्क्यः।

"तादृगेवोपजिह्वा तु जिह्वाया उपरि स्थिता"॥ इति वाभटेनोत्तरस्थाने एकविंशेऽध्याये उक्तम्॥

चिकित्सा यथा।

"उपजिह्वां परिस्राव्य यवक्षारेण घर्षयेत्"। इति च वाभटेनोत्तरस्थाने द्वाविंशेऽध्याये उक्तम्॥)

उपजिह्विका, स्त्री, (उपजिह्वा + स्वार्थे कन्।) घण्टिका। आलजिव इति भाषा। तत्पर्य्यायः। प्रतिजिह्वा २। इति राजनिर्घण्टः॥ (ऋग्वेदे ४। ६१। २१। "यदत्युपजिह्विका यदक्रो अतिसर्पति"।) कीटभेदः। तत्पर्य्यायः। उत्पादिका २ वटिः ३ उद्देहिका ४ दिवी ५। इति हारावली॥ ("यस्य श्लेष्मा प्रकुपितो जिह्वामूलेऽवतिष्ठते। आशु संजनयेत् शोथं जायतेऽसोपजिह्विका"॥ इति चरके सूत्रस्थाने १८ अध्यायः।

"जिह्वायरूपः स्वयथुर्हि जिह्वा-
सुन्मथ्य जातः कफरक्तयोनिः।
प्रसेककण्डूपरिदाहयुक्ता
प्रकथ्यतेऽसावुपजिह्विकेति"॥

इति निदानस्थाने षोड़शेऽध्याये सुश्रुतेनोक्तम्॥

अस्य चिकित्सा यथा।

"उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत्। शिराविरेकगण्डूषधूमैस्तेनमुपाचरेत्। जिह्वागतानां कर्म्माक्तं तालव्यानां प्रवक्ष्यते"॥ इति सुश्रुते चिकित्सितस्थाने २२ अध्यायः।)

उपजीविका, स्त्री, (उपजीयतेऽनया। उप + जीव + गुरोश्चेत्यः। संज्ञायां कन् क्रुन् वा।) उपजीव्यम्। जीवनोपायः॥

उपजोषम्, व्य, (उपजोषणम्। उप + जुष + अम्।) आनन्दः। इत्यमरः॥ (यथा, महाभारते १। "यथोपजोषं सर्व्वस्य जनस्विक्रीड भारत"। सुखं। यथा, रामायणे २। ८९। २२।

"आश्वासयित्वा च चमूं महात्मा
निवेशयित्वा च यथोपयोषम्"॥)

उपज्ञा, स्त्री, (उपज्ञायते। ज्ञा अवबोधने। आतश्चोपसर्गे इति कर्म्मणि अङ्।) आद्यज्ञानम्। इत्यमरः॥ तत्त्व विनोपदेशेन प्रथमज्ञानम्। यथा वाल्मीकेः श्लोकनिर्म्माणे ज्ञानम्॥

("अथ प्राचेतसोपज्ञं रामायणमितस्ततः"॥ इति रघुः १५। ६३॥ "लोकेऽभूदयदपज्ञमेव विदुषां सौजन्यजन्यं यशः" इति मल्लिनाथटीकामुखम्॥)

उपटौकनं, क्ली, (उप + टौक + ल्युट्।) पारितोषिकद्रव्यम्। भेट् डाला इत्यादि भाषा। तत्पर्य्यायः। प्राभृतम् १ प्रदेशनम् २ उपायनम् ३ उपग्राह्यः ४ उपहारः ५ उपदा ६। इत्यमरः॥

उपतप्ता, [ऋ] पुं, (उप + तप् + तृच्।) उपतापकमात्रम्। तत्पर्य्यायः। स्पर्शः २ स्पृष्टा ३। इत्यमरः॥ स्पर्शः ४ स्पर्शा ५। इति तट्टीका॥ रोगइत्यन्ये। इति भरतः॥

उपतापः, पुं, (उप + तप् + घञ्।) त्वरा। उत्तापः। रोगः। इति मेदिनी॥ व्यथा। पीड़ा। इति शब्दरत्नावली॥ (यथा, शाकुन्तले।

"विवक्षितं हृतुक्तं उपतापं जनयति"।

पीड़ादायके वाच्यलिङ्गः। यथा, कौशिकसूत्रे। १३५। "धो वनस्पतीनामुपतापो बभूव"॥)

उपत्यका, स्त्री, (उप समीपे आसन्ना भूमिः। उप + "उपाधिभ्यां त्यकन्नासन्नारूढ़योः"। ५। २३४। इति त्यकन्। "त्यकनश्च निषेधः" इति इत्वाभावः।) पर्व्वतनिकटभूमिः। इत्यमरः॥ (यथा, रघुः। ४। ४६।

"मारीचोद्भान्तहारीता मलयाद्रेरुपत्यकाः"॥)

उपदंशः, पुं, (उपदश्यते इति। उप + दंश + कर्म्मणि घञ्।) मद्यपानरोचकभक्ष्यद्रव्यम्। तत्पर्य्यायः। अवदंशः २ चक्षणम् ३ मद्यपासनम् ४। इति हेमचन्द्रः॥ (यथा दशकुमारे विश्रुतचरिते—

"द्विजान् उपदंशान् उपयाच्य"।

"ततस्तस्य शाल्योदनस्य दर्वीद्वयं दत्त्वा सर्पिर्मांसं सूपम् उपदंशं च उपजहार"। इति च।) मेढ़रोगविशेषः। वाङ्को इति भाषा। अथोपदंशाधिकारः। तत्रोपदंशस्य विप्रकृष्टं निदानमाह।

"हस्तविघातान्नखदन्तघाता-
दधारणादल्पसेवनाद्वा।
योनिप्रदोषाच्च भवन्ति शिश्ने
पञ्चोपदंशा विविधाप्रचारैः"॥

हस्तविघातात् हस्तेन मैथुनात्। नखदन्तघातात् नखदन्तघातस्थानत्वेनानुक्तेऽपि मेहने नखदन्तघातो बलवदनुरागोदयात्। उक्तञ्च कामशास्त्रे।

"शास्त्रस्य विषयस्तावद्यावन्मन्दतरो रसः।
रतिचक्रे प्रवृत्ते तु न शास्त्रं नापि च क्रमः"॥

कलहे दुष्टस्त्रीकृतो वा मेहने नखदन्तघातः। उत्कलादौ स्त्रियो मुखयोनयो भवन्ति। ताभिर्व्वा मेहने नखदन्तघातः। योनिप्रदोषात् दीर्घकर्कशयोनिलोमयोगात्। योनिच्छिद्रस्यातिसङ्कुचत्वाद्वा। वातादिदुष्टत्वाद्वा योनिदोषात्। विविधाप्रचारैः। दुष्टजलप्रक्षालनब्रह्मचारिगीगमनादिभिः पञ्चोपदंशाः। वातिकः पैत्तिकः श्लैष्मिकः सान्निपातिकः आगन्तुजश्चेति॥* तत्र वातिकपैत्तिकस्य चोपदंशस्य लक्षणमाह।

"सतोदभेदस्फुरणैस्तु वातैः
स्फोटैर्व्यवस्येन्मरुतोपदंशम्।
पीतैर्ब्बहूल्क्लेदयुतैः सदाहैः
पित्तेन रक्तैः पिशितावभासैः"॥

व्यवस्येत् जानीयात्। पीतैः रक्तैर्व्वेति विकल्पः॥* श्लैष्मिकं सान्निपातिकञ्चाह।

"सकण्डुरैः श्लोफयुतैर्म्महद्भिः
शुक्लैर्घनैः स्रावयुतैः कफेन।
नानाविधस्रावरुजोपपन्न-
मसाध्यमाञ्जस्रिमलोपदंशम्"॥*॥

असाध्यमाह।

"विशीर्णमांसं कृमिभिः प्रजग्धं
मुष्कावशेषं परिवर्ज्जयेत्तम्"।

विशीर्णमांसं गलितमांसम्। प्रजग्धं खादितम्। मुष्कावशेषं विशीर्णसमस्तमेहनमांसत्वेनावशिष्टफलकोषमात्रम्॥* उत्पन्नमात्रचिकित्सायाः अकरणे दोषमाह।

"सञ्जातमात्रे च करोति मूढ़ः
क्रियां नरो यो विषये प्रसक्तः।
कालेन श्लोफक्रिमिदाहपाकैः
प्रशीर्णशिश्नो म्रियते स तेन"।

विषये प्रसक्तः अतिस्त्रीरतः॥* लिङ्गार्शमाह।

"अङ्कुरैरिव संजातैरुपर्य्युपरि संस्थितैः।
क्रमेण जायते वर्त्तिस्तामभ्यूढ़शिखोपमा।
कोषस्याभ्यन्तरे सन्धौ पर्व्वसन्धिगतापि च।
सवेदना पिच्छिला च दुश्चिकित्स्या त्रिदोषजा।
लिङ्गवर्त्तिरिति ख्याता लिङ्गार्श इति चापरे"॥

लिङ्गवर्त्तेः स्थानमाह। कोषाभ्यन्तरे अण्डकोषाभ्यन्तरे। सन्धौ लिङ्गरन्ध्रसन्धौ। पर्व्वसन्धिगता मणिपर्व्वणोः सन्धिगता॥*॥*॥

अथोपदंशस्य चिकित्सा।

"उपदंशेषु सर्व्वेषु स्निग्धं स्विन्नस्य देहिनः।

मेढ्रमध्ये शिरां विध्येत् पातयेद्वा जलौकसः ॥
सद्यो निर्हृतदोषस्य रक्तस्रोतोवृषप्रशान्यतः ।
पाको निवार्य्यो यत्नेन शिश्नत्वयकरः स यत् ॥
वटप्ररोहार्জ্জুনजम्बुलोध्र-
पथ्याहरिद्रारचितः प्रलेपः ।
व्यथां तथा शोथमपाकरोति
सर्व्वोपदंशेषु ततो हितोऽयम् ॥
उपदंशेषु पक्वेषु व्रणप्रक्षालनं हितम् ।
त्रिफलायाः कषायेण भृङ्गराजरसेन वा ॥
नीलोत्पलं सकुसुदं पद्मं सौगन्धिकं तथा ।
एषां चूर्णं धूलनार्थं प्रलेपश्चात्र शस्यते ॥
बन्धूकदलचूर्णेन रजसा दाड़िमत्वचः ।
गुरुणं तद्व्रणे कुर्य्यात्क्षिपं पूगफलेन वा ॥
दहेत् कटाहे त्रिफलां तन्मसी मधुसंयुता ।
प्रलेपेनोपदंशस्य व्रणं सद्यः प्ररोहयेत् ॥
पटोलनिम्बत्रिफलाकिरात-
क्वाथं पिबेद्वा खदिरासनाभ्याम् ।
सगुग्गुलुं वा त्रिफलायुतं वा
सर्व्वोपदंशापहरः प्रयोगः" ॥ * ॥
"भूनिम्बनिम्बत्रिफलापटोल-
करञ्जधात्रीखदिरासनानाम् ।
कषायकल्कैः कृतमाशु चाज्यं
सर्व्वोपदंशापहरं प्रदिष्टम्" ॥
भूनिम्बादिघृतम् ॥ * ॥
"घृतानि यानि प्रोक्तानि कुष्ठे नाड़ीव्रणे व्रणे ।
उपदंशे प्रयोज्यानि सेकाभ्यञ्जनभोजने ॥
क्षारसूत्रेण संछिद्य लिङ्गवर्त्तिमथेषतः ।
दहेच्च तां ततस्ताभ्यां चिकित्सां व्रणवच्चरेत्" ॥
इत्युपदंशाधिकारः । इति भावप्रकाशः ॥ * ॥
अपि च ।
"पटोलनिम्बत्रिफलागुडूचीक्वाथमाविश्येत् ।
सगुग्गुलुं सखदिरमुपदंशौ विनश्यति" ॥
ग्रन्थान्तरे प्रथमार्द्धे "पटोलनिम्बगुडूचीमरिच-
क्वाथमापिबेत्" । इति च पाठः ॥
"दहेत् कटाहे त्रिफलां सा मसी मधुसंयुता ।
उपदंशे प्रलेपोऽयं सद्यो रोपयते व्रणम्" ॥ * ॥
"त्रिफलानिम्बभूनिम्बकरञ्जखदिरादिभिः ।
कल्कैः क्वाथैर्घृतं पक्वमुपदंशहरं परम्" ॥
इति गारुड़े १७५ अध्यायः ॥
(अन्यच्चास्य सनिदानसम्प्राप्तिकं लक्षणमाह। यथा,
"स्त्रीव्यवायनिवृत्तस्य सहसा भजतोऽथवा ।
दोषाधुषितसंकीर्णमलिनानुरजःपथाम् ॥
अन्ययोनिमनिच्छन्तीमगम्यां नवसूतिकाम् ।
दूषितं स्पृशतस्तोयं रतान्तेष्वपि नैव वा ॥
विवर्द्धयिषया तीक्ष्णान् प्रलेपादीन् प्रयच्छतः ।
मुष्टिदन्तनखोत्पीड़ाविषवच्छुक्रपातनैः ॥
वेगनिग्रहदीर्घातिखरस्पर्शविघट्टनैः ।
दोषा दुष्टा गता गुह्यं त्रयोविंशतिमामयान् ॥
जनयन्त्युपदंशादीन् उपदंशोऽत्र पञ्चधा ।
एकदोषैः सरुधिरैः समस्तैश्चाथ मारुतात् ॥
मेढ्रशोफे रजश्छिन्नाः स्तम्भयत् परिमोटनम् ॥१॥
पक्वोदुम्बरसंकाशः पित्तेन स्रवयुर्ज्वरः ॥ २ ॥
श्लेष्मणा कठिनः स्निग्धः कण्डूमान् शीतलो गुरुः॥३॥
शोणितेनासितस्फोटसम्भवोऽसृक्षुतिर्ज्वरः ॥ ४ ॥
सर्व्वजे सर्व्वलिङ्गं स्यात्पुर्मुष्कयोरपि" ॥ ५ ॥
असाध्यलक्षणं यथा ।
"तीव्रा रुगाशुपचनं दरणं क्रिमिसम्भवः ।
याप्यो रक्तोद्भवस्फोथां मृत्यवे सन्निपातजः" ॥
इति वाभटे उत्तरस्थाने ३३ अध्याये ।
अस्य चिकित्सा च यथा ॥
"मेढ्रमध्ये शिरां विध्येदुपदंशे नवोत्थिते ।
शीतां कुर्य्यात् क्रियां शुद्धिं विरेकेण विशेषतः ॥
तिलकल्कघृतक्षौद्रैर्लेपः पक्वे तु पाटिते ।
जम्बाम्रसुमनोनीपश्वेतकाम्बोजिकाङ्कुरान् ॥
शुल्लकीवदरीविल्वपलाशप्रतिनिशोद्भवान् ।
त्वचः क्षीरिद्रुमाणाञ्च त्रिफलाञ्च जले पचेत् ॥
सक्षाथः क्षालनं तेन पक्वतैलञ्च रोपणम् ।
तुत्थगैरिकलोध्रैलामनोशाञ्जरसाञ्जनैः ॥
हरेणुपुष्पकाशीससौराष्ट्रीलवणोत्तमैः ।
लेपः क्षौद्रयुतैः सूक्ष्मैरुपदंशव्रणापहः ॥
कपाले त्रिफला दग्धा सघृता रोपणं परम् ।
सामान्यं साधनमिदं प्रतिदोषन्तु शोफवत् ॥
न च याति यथा पाकं प्रयतेत तथा भृशम् ।
पक्वैः स्यायुश्चिरामांसैः प्रायो नश्यति हि ध्वजः" ॥
इति वाभटे उत्तरस्थाने ३४ अध्यायः ॥
तत्रातिमैथुनादतिब्रह्मचर्य्यादा तथा ब्रह्मचारिणीं चिरोत्सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमां सङ्कीर्णरोमां निगूढ़रोमामल्पद्वारां महाद्वारामप्रियामकामामचौक्ष्यसलिलप्रक्षालितयोनिमक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा नारीमत्यर्थमुपसेवमानस्य तथा करज-दशन-विष-शूकनिपातनादर्दनाद्धस्ताभिघाताच्चतुष्पदीगमनादचौक्ष्यसलिलप्रक्षालनादवपीड़नाच्छुक्रमूत्रवेगविधारणान्मैथुनान्ते वाऽप्रक्षालनादिभिर्मेढ्रमागम्य प्रकुपिता दोषाः क्षतेऽक्षते वा स्रवथुमुपजनयन्ति तमुपदंशमित्याचक्षते ॥
स पञ्चविधस्त्रिभिर्दोषैः पृथक् समस्तैरक्तजा चैकः ॥
तत्र वातिके पारुष्यं त्वक्परिपुटनं स्तब्धमेढ्रता परुषस्रोफता विविधाश्च वातवेदनाः ॥ १ ॥
पैत्तिके ज्वरः स्रवथुः पक्वोदुम्बरसङ्काशस्तीव्रदाहः क्षिप्रपाकः पित्तवेदनाश्च ॥ २ ॥
श्लैष्मिके स्रवथुः कण्डूमान् कठिनः स्निग्धः श्लेष्मवेदनाश्च ॥ ३ ॥
रक्तजे क्षय्यस्फोटप्रादुर्भावोऽत्यर्थमरुक्प्रवृत्तिः पित्तलिङ्गान्यत्यर्थं ज्वरदाहो शोफश्च याप्यश्चैव कदाचित् ॥ ४ ॥
सर्व्वजे सर्व्वलिङ्गदर्शनमवदरणं शेषसः क्षतिप्रादुर्भावो मरणञ्चेति ॥ ५ ॥
इति सुश्रुते निदानस्थाने १२ अध्यायः ॥
चिकित्साविशेषो यथा ।
"यदि वा दुर्ब्बलो जन्तुर्न वा प्राप्तं विरेचनम् ॥
निरूहेण हरेत् तस्य दोषानत्यर्थमुच्छ्रितान् ।
प्रपौण्डरीकयष्ट्याह्ववर्षाभू-कुष्ठदारुभिः ।
सरलागुरुराखाभिर्वातजं संप्रलेपयेत् ।
निचुलैरण्डबीजानि यवगोधूमशक्तवः ॥
एतैश्च वातजं स्निग्धैः सुखोष्णैः संप्रलेपयेत् ।
प्रपौण्डरीकपूर्व्वैश्च द्रव्यैः सेकः प्रशस्यते ॥
गैरिकाञ्जनयष्ट्याह्वसारिवोशीरपद्मकैः ।
सचन्दनोत्पलैः स्निग्धैः पैत्तिकं संप्रलेपयेत् ॥
पद्मोत्पलमृणालैश्च ससर्ज्जार्জ্জুनवेतसैः ।
सर्पिःस्निग्धैः समधुकैः पैत्तिकं सम्प्रलेपयेत् ॥
सेचयेच्च घृतक्षीरन्यग्रोधैरक्षुमधूदकैः ।
अथ वापि सुशीतेन कषायेण वटादिना ॥
शालाश्वकर्णार्জ্জुनकर्णधवलम्बिभिः कफोत्थितम् ।
सुरापिष्टाभिरुष्णाभिः सतलाभिः प्रलेपयेत् ।
रजन्यतिविषामुस्तसरलासुरदारुभिः ।
सपत्रपाठापत्तूरैरथ वा सम्प्रलेपयेत् ॥
करवीरस्य पत्राणि जात्याराग्वधयोस्तथा ।
प्रक्षालने प्रयोज्यानि वैजयन्त्यर्कयोरपि ॥
गोजिविड्भृङ्गयष्टीभिः सर्व्वगन्धैश्च संयुतम् ।
एतत् सर्व्वोपदंशेषु श्रेष्ठं रोपणमिष्यते ॥
सर्ज्जिकातुत्थकाशीसं ग्रैवेयञ्च रसाञ्जनम् ।
मनःशिलासमैर्चूर्णं व्रणवीसर्पनाशनम् ॥
गुन्द्रान्दग्ध्वा कृतं भस्म हरितालं मनःशिला ।
उपदंशविसर्पाणामेतच्छान्तिकरं परम् ॥
मार्कवस्त्रिफलादन्तीताम्रचूर्णमयो रजः ।
उपदंशं निहन्त्येष कृच्छ्रमिन्द्राग्निर्यथा ॥
उपदंशदहेऽप्येतां प्रत्याख्यायाचरेत् क्रियाम् ।
तयोरेव च या योग्या वीक्ष्य दोषबलाबलम् ॥
उपदंशे विशेषेण व्रणे भूयस्त्रिदोषजे ।
दुष्टव्रणविधिं कुर्य्यात् कुधितं लेहनं त्यजेत् ॥
जाम्बवौष्ठेनाग्निवर्णेन पक्वाच्छेषं दहेद्भिषक् ।
सम्यग्दग्धञ्च विज्ञाय मधुसर्पिः प्रयोजयेत् ॥
शुद्धे च रोपणं दद्यात् कल्कं तैलं हितञ्च यत्" ।
इति च सुश्रुते चिकित्सितस्थाने १९ अध्याये ॥
"लवङ्गं मरिचं शुण्ठी विड़ङ्गञ्च वचान्तथा ।
गन्धकं श्वेतखदिरं जातीकोषफले तथा ।
समभागहृतं सर्व्वं मधुना कारयेद्वटीम् ॥
शाणमाचान्तु मतिमान् योजयेदविकल्पितः ।
अनुपानं दुग्धसारं ततस्ताम्बूलभक्षणम्" ॥
इति उपदंशारी रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे उपदंशाधिकारः ॥*॥
अत्र पथ्यानि यथा ॥
कृष्णविरेको ध्वजमथनाड़ी-
वेधो जलौकःपरिषातनञ्च ।
सेकः प्रलेपो यवशालयश्च
धन्वामिषं मुद्गरसो घृतानि ॥ १ ॥
कठिल्लकं शिग्रुफलं पटोलं
शालिश्चशाकं नवमूलकञ्च ।
तिक्तं कषायं मधुकूपवारि
तैलञ्च हन्यादुपदंशरोगम् ॥ २ ॥
अपथ्यानि यथा ॥
"दिवानिद्रां मूत्रवेगं गुर्व्वन्नं मैथुनं गुड़म् ।
आयासमम्लं तक्रञ्च वर्জ্জयेदुपदंशवान् ॥ ३ ॥

इति वैद्यकपथ्यापथ्यविधिः ॥) समष्ठिलक्षणः । शिष्यलक्षणः । इति राजनिर्घण्टः । (भवे घञ् ।) दंशनम् ॥

उपदर्शकः, पुं, (उपदर्शयतीति । उप + दृश् + णिच् + ण्वुल् ।) द्वारपालः । इत्यमरटीकासारसुन्दरी॥ (दर्शयितरि, त्रि ॥)

उपदा, स्त्री, (उपदीयते इति । उप + दा + आतश्चोपसर्ग इत्यङ् ।) उपढौकनम् । इत्यमरः ॥ ("उपदा विविधुः शश्वत् गोत्सेकः कोशलेश्वरम्" । इति रघुः । ४ । १० ।) "प्रत्यर्घ्य पूजामुपदाञ्चकेन"। इति रघुः । ७।३०॥)

उपदानकं, क्ली, (उपदान + स्वार्थे कन् ।) उत्कोचः । इति चिकाण्डशेषः ॥

उपदिष्टः, त्रि, (उप + दिश् + क्त ।) उपदेशप्राप्तः । यथा । "ननु शूद्रस्यापि सगोत्रा कथं न निषिध्यते इति चेदत्र उपदिष्टातिदिष्टगोत्रस्यैव निषेधो न त्वतिदिष्टातिदिष्टशूद्रगोत्रादेरिति" । इत्युद्वाहतत्त्वम् ॥

उपदी, स्त्री, (उपेत्य दीयते क्षिप्यते इति उप + दो + क + ङीष् ।) वन्दाकः । इति राजनिर्घण्टः ॥ परगाछा इति भाषा ॥

उपदेवता, स्त्रीं, (उपगता सादृश्येन देवताम् ।) यक्षभूतादिः॥ (उपदेवतास्तु दश । यथाह अमरः । "विद्याधरोऽप्सरो यक्षो रक्षो गन्धर्व्वकिन्नरौ । पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" ॥)

उपदेशः, पुं, (उप + दिश् + घञ् ।) मन्त्रकथनम् । तत्पर्य्यायः । दीक्षा २। यथा । "चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये । मन्त्रमात्रप्रकथनमुपदेशः स उच्यते" ॥ इति रामार्चनचन्द्रिका ॥ कलावत्यादिदीक्षायामसामर्थ्ये संक्षेपो यथा । "तत्राप्यशक्तः कस्मिंश्चेदङ्गमभ्यर्च्च साक्षतम् । तदम्बुनाभिषिञ्चाष्टवारं मूलेन केवलम् ॥ निधायाक्षौ जपेत् कण्ठ उपदेशे त्वयं विधिः" ॥ इति विश्वसारतन्त्रम् ॥ हितकथनम् । (यथा, हितोपदेशे विग्रहे उक्तम् । "उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये" ॥) शिक्षणम् ॥ (यथा, मनुः ८। २७२ । "धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः" । "एवमित्युपदेशः । यथा । तथा न जातुयात् रात्रौ दिवास्वप्नञ्च वर्जयेदनेन कारणेनेत्युपदेशः ॥ अथोपदिश्यते मधुरेण क्षेत्राभिवर्द्धत इति" । इति सुश्रुते उत्तरतन्त्रे ६५ अध्यायः ॥)

उपदेशी, [न्] त्रि, (उपदिशति यः । उप + दिश् + णिनि ।) उपदेष्टा ॥ (यथा हितोपदेशे मित्रलाभे । "गतानुगतिको लोकः कुट्टनीमुपदेशिनीम् । प्रमाणयति नो धर्म्मे यथा गोघ्नमपि द्विजम्" ॥)

उपदेष्टा, [ष्टृ] त्रि, (उपदिशति यः । उप + दिश् + ष्टृच् ।) उपदेशकर्त्ता । यथा । "तथोपदेष्टारमपि पूजयेच्च ततो गुरुम् । न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया" ॥ इति तिथ्यादितत्त्वम् ॥ बृहस्पतिः । "उपदेष्टानुमन्ता च लोके तुल्यफलौ स्मृतौ" । इत्याह्निकतत्त्वञ्च ॥

उपदेहिका, स्त्री, (उपदेहो विद्यते यस्याः । उपदेह + ठक् ।) कीटविशेषः । तत्पर्य्यायः । उपजिह्विका २ वल्मी ३ उपदीका ४ । इति हेमचन्द्रः ॥

उपद्रवः, पुं, (उप + द्रु + अप् ।) उत्पातः । इति हलायुधः ॥ रोगारम्भकदोषप्रकोपजन्योऽन्यो विकारः । (तल्लक्षणमुक्तं वैद्यके । यथा,— "यो व्याधिलक्षस्य यो हेतुर्दोषलक्षस्य प्रकोपतः । योऽन्यो विकारो भवति स उपद्रव उच्यते" ॥ "व्याधेरुपरि यो व्याधिः उपद्रव उदाहृतः । सोपद्रवा न जीवन्ति जीवन्ति निरुपद्रवाः" ॥ इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये । "तत्रौपसर्गिको यः पूर्व्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपरुजति स तन्मूलएवोपद्रवसंज्ञः" । इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

उपद्रष्टा, [ऋ] त्रि, (उप + दृश् + बाहुलकात् ष्टृच् ।) उपदर्शकः । उदासीनबोधरूपत्वेन गुणप्रचारदर्शी । इति गीताटीका ॥ ("उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः" । इति गीतायां १३ । २२ । साक्षी पुरुषः । यथा, "ऋत्विग्यजमानेषु यजनकर्म्मव्याप्तेषु तत्समीपस्थोऽन्यः स्वयमव्याप्तो यज्ञविद्याकुशलत्वात् ऋत्विग्यजमानव्यापारगुणदोषाणां ईक्षिता तद्वत्कार्य्यकारणव्यापारेषु स्वयमव्याप्तो विलक्षणस्तेषां कार्य्यकारणानां सव्यापाराणां समीपस्थो द्रष्टा उपद्रष्टा साक्षी पुरुषः" ॥)

उपधर्म्मः, पुं, (उपहीनोधर्म्मः ।) पाषण्डः । इति श्रीभागवतम् ॥ (यथा मनुः २ । २३७ । "एष धर्म्मः परः साक्षात् उपधर्म्मोऽन्य उच्यते"॥)

उपधा, स्त्री, (उपधीयते शुद्धिज्ञानमत्र । उप + धा + आतश्चोपसर्ग इत्यङ् + टाप् ।) राज्ञां धर्म्मकामार्थभयैरमात्यादेर्यत् परीक्षणम् । इत्यमरः॥ धर्म्मार्थकाममोक्षद्वारा परीक्षा । यथा । "धर्म्मार्थकाममोक्षेषु प्रत्येकं परिशोधनैः । उपेत्य धीयते यस्मादुपधा परिकीर्त्तिता ॥ अर्थकामोपधाभ्यान्तु भार्य्याः पुत्रांस्तु शोधयेत् । धर्म्मोपधाभिर्विप्रांस्तु सर्व्वाभिः सचिवान् पुनः"॥ इति कालिकापुराणे ८५ अध्यायः ॥ ("भूयोभूयश्चोपधाभिर्विशोध्य तं मे मतिसहायमकरवम्"। इति दशकुमारचरिते विश्रुतचरिते ।) पदानामुपान्त्यवर्णः । इति व्याकरणम् ॥

उपधातुः, पुं, (उप सादृश्ये । धातुसदृशो धातुः ।) अप्रधानधातुसदृशधातुः । स तु सप्तधा यथा । माक्षिकम् १ तुत्थकम् २ अभ्रम् ३ नीलाञ्जनम् ४ मनःशिला ५ हरितालम् ६ रसाञ्जनम् ७ ॥ शरीरस्थधातुभवोपधातुः सप्तधा यथा । रसात् स्तनदुग्धम् १ रक्तात् स्त्रीरजः २ मांसात् वसा ३ मेदसो घर्म्मः ४ अस्थ्नो दन्तः ५ मज्जनः केशः ६ शुक्रात् ओजः ७ । इति वैद्यकम् ॥ ("स्तन्यं रजश्च नारीणां काले भवति गच्छति । शुद्धमांसभवस्नेहः सा धसा परिकीर्त्तिता ॥ स्नेदो दन्तास्तथा केशास्त्वचैवोजश्च सप्तमम् । इति धातुभवा ज्ञेया एते सप्तोपधातवः" ॥ इति शार्ङ्गधरेण पूर्व्वखण्डे पञ्चमेऽध्याये उक्तम् ॥ "सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम् । तुत्थं कांस्यं च रीतिश्च सिन्दूरञ्च शिलाजतु" ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

उपधानं, क्ली, (उपधीयते आरोप्यते मस्तकमत्र । उप + धा + अधिकरणे ल्युट् ।) शिरोधानम् ॥ बालिश इति भाषा । तत्पर्य्यायः । उपबर्हः २ । इत्यमरः । गण्डुः ३ । इति जटाधरः । ("सोपधानां धियं धीराः स्त्रियस्तीं खट्टयन्ति ये"। इति माघः २।७७ । "षट्पदोपधानाध्यासितशिरोभागेन"। इति कादम्बरी ।) विषम् । प्रणयः । इति मेदिनी । वतम् । इति हेमचन्द्रः ॥

उपधानीयं, क्ली, (उपधीयते यस्मिन् । उप + धा + अनीयर् ।) उपधानम् । इति शब्दरत्नावली ॥

उपधिः, पुं, (उपधीयते आरोप्यतेऽनेन । उप + धा + किः ।) कपटः । इत्यमरः ॥ (यथा, मनुः ८।१६५॥ "योगाधमनविक्रीतं योगदानप्रतिग्रहम् । यत्र वाप्युपधिं पश्येत् तत्सर्व्वं विनिवर्त्तयेत्" ॥ "अरिषु हि विजयार्थिनः क्षितीशाः विदधति सोपधि सन्धिदूषणानि" । इति किराते ॥१। ४५ ।) रथचक्रम् । इति हेमचन्द्रः॥

उपधूपितः, त्रि, (उप + धूप् + क्त ।) आसन्नमरणः । परिधूपितः । इति मेदिनी ॥

उपधृतिः, स्त्री, (उप + धृ + क्तिन् ।) किरणः । इति हेमचन्द्रः ॥

उपनतः, त्रि, (उप + नम् + क्त ।) उपस्थितः । इति हेमचन्द्रः ॥ ("अचिरोपनतां स मेदिनीं"। इति रघुः ८ । ७ ॥ नम्रः । यथा, माघे । १२ । ३३ । "शौरेः प्रतापोपनतैरितस्ततः समागतैः प्रश्रयनम्रमूर्त्तिभिः" ॥)

उपनदं, } क्ली, नद्याः समीपम् । इति मुग्धबोध-
उपनदि, } व्याकरणम् ॥ (तथा पाणिनीये । "नदीपौर्णमास्यग्रहायणीभ्यः" । ५ । ४ । ११० । इत्यनेन सिद्धम् ॥)

उपनयः, पुं, (उप समीपे नीयते येन कर्म्मणा । उप + नी + अच् ।) उपनयनम् । इति हेमचन्द्रः ॥ ("गृह्योक्तकर्म्मणा येन समीपं नीयते गुरोः । बालो वेदाय तद्योगात् बालस्योपनयं विदुः"॥ इति स्मृतिः । भावे + अच् । प्रापणम् । यथा, महाभारते ३ । २ । २४। "मानमस्य प्रियाख्यानैः सम्भोगोपनयैर्नयाम्" ॥ न्यायमते यो यो धूमवान् स सवह्निमान् अयमपि तथेत्यादिरूपः न्यायावयवभेदः ॥)

उपनयनं, क्ली, (अध्ययनार्थं आचार्य्यस्य उप समीपं नीयते येन कर्म्मणा इति । उप + नी ल्युट् ।) ब्राह्मणक्षत्रियवैश्यानां यज्ञसूत्रधारणादिरूपप्रधानसंस्कारः । अध्यापनार्थमाचार्य्यसमीपं नीयते येन कर्म्मणा तदुपनयनम् । यथा स्मृतिः । "गृह्योक्तकर्म्मणा येन समीपं नीयते गुरोः ।

बालो वेदाय तद्योगाद्बालस्योपनयं विदुः" ॥*॥
तत्पर्य्यायः । वटूकरणम् २ । इति चिकाण्डशेषः ॥
उपनायः ३ उपनयः ४ आनयः ५ । इति हेमचन्द्रः ॥ तस्य कालः ।
"गर्भाष्टमेऽब्दे बाब्दे ब्राह्मणस्योपनायनम् ।
राज्ञामेकादशे सैके विशामेके यथाकुलम् ।
ब्रह्मवर्चसकामस्य कार्य्यं विप्रस्य पञ्चमे" ॥
ब्राह्मणस्य गर्भावधिषोड़शवर्षपर्य्यन्तम् ॥ तत्र गर्भाष्टमवर्षो मुख्यः । क्षत्रियस्य द्वाविंशतिवर्षपर्य्यन्तम् । तत्रैकादशवर्षो मुख्यः । वैश्यस्य चतुर्विंशतिवर्षपर्य्यन्तम् । तत्र द्वादशवर्षो मुख्यः । इति स्मृतिः ॥ सैके द्वादशे । तत्राशक्तौ प्रायश्चित्तं कृत्वा तदुत्तरे कार्य्यम् ।
"यज्ञोक्तकर्म्मणा येन समीपं नीयते गुरोः ।
बालो वेदाय तद्योगाद्बालस्योपनयं विदुः ॥
रक्तस्रावे तथा शुक्लक्षते पाठनिषेधनात् ।
उपनयनं न तत्र स्यात् इति मन्वादिसम्मतम्" ॥
कृत्यचिन्तामणौ ।
"जन्मोदये जन्मसु तारकासु
मासेऽथवा जन्मनि जन्मभे वा ।
व्रतेन विप्रो न बहुश्रुतोऽपि
विद्याविशेषैः प्रथितः पृथिव्यां ॥
अस्तं गते दैत्यगुरौ गुरौ वा
क्षत्रोऽपि वा यापयतेऽप्यनुक्ते ।
व्रतोपनीतो दिवसे प्रणाशं
प्रयाति देवैरपि रक्षितो यः" ॥
उदये लग्ने । व्रतेन उपनयनेन । भुजबलभीमकृत्यचिन्तामण्योः ।
"स्वातीशक्रधनास्विमित्रकरभे पौष्णेज्यचित्राहरिध्विन्दौ तोयपतौ भगे दितिसुते भाद्रद्वये सागरे ।
केन्द्रस्थे भृगुजेऽङ्गिरःशशिसुते चन्द्रे च तारे शुभे
कर्त्तव्यं व्रतकर्म्म मङ्गलतिथौ वाराः सितार्कोज्यकाः" ॥
तोयपतिः शतभिषा । अदितिसुतउत्तरफल्गुनी । सागरः पूर्व्वाषाढ़ा । दीपिकायाम् ।
जीवार्कोन्दुशुद्धौ हरिशयनवहिर्भास्करे चोत्तरस्थे,
स्वाध्याये वेदवर्णाधिपदृढ़शुभदे क्षौरिभे नादितौ च ।
शुक्रार्कोज्यर्क्षलग्ने रविमदनतिथिं प्रोह्य षष्ठाष्टमेन्दुं,
गो जीवास्तातिचारेऽर्कसितगुरुदिने काशशुद्धौ व्रतं स्यात्" ॥
रविमदनतिथिं सप्तमीं त्रयोदशीम् ॥*॥
कृत्यचिन्तामणौ ।
"माघे द्रविणशीलाढ्यः फाल्गुने च दृढ़व्रतः ।
चैत्रे भवति मेधावी वैशाखे कोविदो भवेत् ॥
ज्येष्ठे गहननीतिज्ञ आषाढ़े क्रतुभाजनः ।
श्रेषेष्वन्येषु रात्रिः स्यान्निषिद्धं निशि च व्रतम्" ॥
राजमार्त्तण्डे ।
"पुनर्व्वसौ व्रतो विप्रः पुनःसंस्कारमर्हति" ।
रुद्रगर्गः ।
"स्मृतियुक्ताननध्यायान् सप्तमीञ्च त्रयोदशीम् ।
पक्षयोर्मासमासस्य द्वितीयां परिवर्जयेत्" ॥
चैत्रशुक्लतृतीया आषाढ़शुक्लादशमी मन्वन्तरादित्वेन निषिद्धा वैशाखशुक्लतृतीया युगादित्वेन निषिद्धेति । यद्यामशुचिरभार्य्यो रिक्तासु बहुदोषभाक् । शुक्लपक्ष एव विहितः प्रागुक्ताश्वलायनवचनात् ॥*॥ सामगानां कुजवारेऽप्युपनयनं श्रीपतिरत्नमालाकृत्यचिन्तामणिधृतवात्स्यवचनात् । यथा ।
"श्राखाधिपे बलिनि केन्द्रगतेऽथ वास्मिन्
वारेऽस्य चोपनयनं कथितं द्विजानाम् ।
नीचस्थितेऽरिगृहगेऽथ पराजिते वा
जीवे भृगावुपनयः स्मृतिकर्म्महीनः" ॥
अस्य श्राखाधिपस्य ॥ दीपिकायां ।
"ऋग्वेदाधिपतिर्जीवो यजुर्व्वेदाधिपः सितः ।
सामवेदाधिपो भौमः श्रुतिजोऽथर्व्ववेदराट्" ॥
वेदाधिपकथनम् ॥*॥
"ब्राह्मणे शुक्रवागीशौ क्षत्रिये भौमभास्करौ ।
चन्द्रो वैश्ये बुधः शूद्रे पतिर्मन्दोऽन्त्यजे जने" ॥
वर्णाधिपकथनम् ॥*॥ पराजयलक्षणं वक्ष्ये याचायाम् ।
अत्रापि विवाहवद्वयोगभङ्गवर्ज्जनम् ।
विष्णुधर्म्मोत्तरे ।
"षोड़शाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः ।
विंशतिः सचतुर्थो च वैश्यस्य परिकीर्त्तिता ॥
सावित्री नातिवर्त्तेत अत ऊर्द्धं पतन्त्यधः" ॥
अत्र षोड़शवर्षस्य उपनयनाकृता प्रतीयते ॥
"पतिता यस्य सावित्री दशवर्षाणि पञ्च च ।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः ॥
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः" ॥
इति यमवचने तदनङ्गता प्रतीयते । अनयोर्गर्भजन्मप्रभृतिगणनाभ्यामविरुद्धार्थता । तथाच माण्डव्यः । "व्रतबन्धविवाहे च वत्सरपरिकल्पनमाऊराचार्य्याः । आधानपूर्व्वमेके प्रसूतिपूर्व्वं सदान्ये तु" ॥*॥ यत्तु द्विजानुपक्रम्य पैठिनसिवचनं द्वादशषोड़शवर्षविंशतिभेदतीता अवरुद्धकाषा भवन्ति इति द्वादशवर्षाद्युपरि ब्राह्मणादीनां महाव्याहृतिहोमप्रायश्चित्तार्थम् । षोड़शोपरि तु व्रात्यहोमादिगुरुप्रायश्चित्तार्थमिति । इत्युपनयनम् । इति ज्योतिस्तत्त्वम् ॥

अथ उपनयनस्यानुष्ठानक्रमः ।

तत्र प्रथमं प्रातः कृतस्नानः कृतवृद्धिश्राद्धः पिता कृतवृद्धिश्राद्धेन पित्रान्यएवाचार्य्यो कृतसदसम्भवे माणवकवृत्तो वा समुद्भवनामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य माणवकं प्रातर्भोजयित्वा अग्न्युत्तरतो नीत्वा श्रिखया सह मुण्डितं स्नापितं कुशकाशजलकृतं क्षौमवस्त्राहृतं तदसम्भवे शुक्लाहृतकार्पासकवस्त्राहृतं माणवकं दक्षिणे पूर्व्वाभिमुखं निधाय प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा तत्तन्मन्त्रैर्व्यस्तसमस्तमहाव्याहृतिहोमं कुर्य्यात् । तत आचार्य्यः पञ्चभिर्म्मन्त्रैः पञ्चाहुतीर्जुहुयात् । तत आचार्य्यः उदगग्रेषु कुशेषु कृताञ्जलिः प्राङ्मुख ऊर्द्धस्तिष्ठेत् । अन्याचार्य्येऽग्निमध्ये माणवकोऽपि कृताञ्जलिराचार्य्याभिमुख उदगग्रेषु कुशेषु ऊर्द्धस्तिष्ठेत् । माणवकस्य दक्षिणतः स्थितो मन्त्रवान् ब्राह्मणो माणवकस्य अञ्जलिमुदकेन पूरयति पश्चात् आचार्य्यस्यापि । ततो गृहीतजलाञ्जलिराचार्य्यो गृहीतजलाञ्जलिं माणवकं पश्यन् मन्त्रं जपति । तत आचार्य्यो माणवकं मन्त्रं पाठयति । ततो माणवकस्याभिवादनार्थं देवताश्रयं नक्षत्राश्रयं गोत्राश्रयं वा माणवकनाम कल्पयित्वा आचार्य्यो माणवके कथयति । ततआचार्य्यो माणवकं मन्त्रेण नामधेयं पृच्छति । माणवकः पूर्व्वाचार्य्यकल्पितं नाम मन्त्रेण कथयति । तत आचार्य्यमाणवकौ पूर्व्वगृहीतजलाञ्जली त्यजेताम् । आचार्य्यस्तु दक्षिणेन पाणिना माणवकस्य साङ्गुष्ठं दक्षिणं पाणिं मन्त्रेण गृह्णाति । ततो गृहीतमाणवकहस्तो मन्त्रं जपत्याचार्य्यः । ततो माणवकमाचार्य्यो मन्त्रेण प्रदक्षिणेन भ्रामयित्वा प्राङ्मुखं करोति । ततो माणवकस्य दक्षिणस्कन्धं स्पृष्ट्वा अवतीर्य्येण दक्षिणपाणिना अव्यवहितं नाभिदेशं आचार्य्यो मन्त्रेण स्पृशति । ततो माणवकस्य नाभेरुपरिदेशं मन्त्रेण आचार्य्यः स्पृशति । ततो माणवकहृदयदेशं मन्त्रेणाचार्य्यः स्पृशति । ततो दक्षिणे पाणिना आचार्य्यो माणवकस्य दक्षिणस्कन्धं स्पृशन् मन्त्रं जपति । ततो वामेन पाणिना माणवकस्य वामस्कन्धं स्पृशन्नाचार्य्यो मन्त्रं जपति । अथाचार्य्यो माणवकं मन्त्रेण सम्बोधयति । अथ सम्बोधितं माणवकं आचार्य्यो मन्त्रेण प्रेषयति । ब्रह्मचारी तु सर्व्वत्र बाढ़मिति ब्रूयात् । ततोऽग्नेरुत्तरभागे गत्वा आचार्य्य उदगग्रेषु कुशेषु प्राङ्मुखं उपविशति । तत आचार्य्याभिमुखो माणवकः पतितदक्षिणजानुः उदगग्रेषु कुशेषु उपविशति । ततः प्रवरसंख्यया पञ्च वा त्रयो वा मेखलायज्ञोपवीतरूपग्रन्थयः कर्त्तव्याः । अथैनं माणवकमाचार्य्यस्त्रिःप्रदक्षिणं कारयित्वा त्रिवृतां मुञ्जमेखलां परिधापयन् मन्त्रद्वयं वाचयति । ततो यज्ञोपवीतं कृष्णसारजिनान्वितं आचार्य्यो माणवकं मन्त्रेण परिधापयेत् । ततो माणवकआचार्य्यस्य उपसन्नो भवति । ततस्तमुपसन्नमाणवकं आचार्य्यः प्रथमं पादं पादं ततोऽर्द्धमर्द्धं ततः कृत्स्नां सावित्रीं अध्यापयेत् । तत आचार्य्यो माणवकं महाव्याहृतीः पृथक् पृथक् कृत्वा प्रणवपूर्व्विका अध्यापयेत् । ततो वैल्वं पालाशं वा माणवकपरिमाणदण्डं माणवकाय प्रयच्छन् आचार्य्यो माणवकं मन्त्रं वाचयति । अथ गृहीतदण्डो ब्रह्मचारी प्रथमं मातरं भिक्षां प्रार्थयति । ततो मातृबन्धून् ततः पितरं ततः पितृबन्धून् ततोऽन्यांश्च प्रार्थयेत् । ततः सर्व्वं लब्धमेत्य आचार्य्याय निवेदयेत् । ततः पूर्व्ववदाचार्य्यो व्यस्तसमस्तमहाव्याहृतिहोमं हुत्वा प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीचं प्राचायनहोमादिवामदेव्यगानान्तं कर्म्म निर्व्वर्त्तयेत् । ततः यदि पितैवाचार्य्यस्तदा कर्म्मकारयितृब्राह्मणाय दक्षिणां दद्यात् । अथान्य-

एवाचार्य्यो हृतः तदा येन हृतः स तस्मै दक्षिणां दद्यात्। ब्रह्मचारी तु तत्रैव स्थाने दिनान्तं यावत् वाग्यतस्तिष्ठेत्। ततः प्राप्तायां सन्ध्यायां सन्ध्यामुपास्य कुशखिकोक्तविधानेन समुद्भवनामानमग्निं संस्थाप्य मन्त्रं जप्त्वा दक्षिणं जानुं भूमौ निधाय दक्षिणपश्चिमोत्तरक्रमेण उदकाञ्जलिसेकमग्निपर्य्युक्षणञ्च कृत्वा समिद्धोमं कुर्य्यात्। ततः प्रादेशप्रमाणदृताक्तसमित्त्रयं गृहीत्वा आद्यन्तयोस्तूष्णीं मध्ये समन्त्रकं अग्नौ जुहुयात्। ततः कर्म्मप्रदीपोक्तविधिना पुनरपि अग्निपर्य्युक्षणोपक्रमं दक्षिणपश्चिमोत्तरक्रमेण उदकाञ्जलिसेकं कुर्य्यात्। ततः ब्रह्मचारी अग्निमभिवाद्य मन्त्रेणाग्निं विसृज्य अतीतायां सन्ध्यायां भिक्षालब्धमन्नं क्षारलवणवर्जितं सघृतमुदकेनाभ्युक्ष्य भक्षणप्रकरणोक्तविधिना भुञ्जीत। एतच्चाग्निकर्म्म समावर्त्तनपर्य्यन्तं प्रत्यहं सायं प्रातः कर्त्तव्यम्॥ इत्युपनयनकर्म्म समाप्तम्॥ इति भवदेवभट्टः॥ (ब्राह्मण-क्षत्रिय-वैश्यानामन्यतममन्वय-वयःश्रौत-स्मार्त्त्यौर्य्य-श्रौचाचार-विनय-शक्ति-बल-मेधा-धृति-स्मृति-मति-प्रतिपत्तियुक्तं तनुजिह्वौष्ठदन्तायमद्भुवक्त्राक्षिनासं प्रसन्नचित्त-वाक्चेष्टं क्लेशसहिष्णुं भिषक् शिष्यमुपनयेत्। अतो विपरीतगुणं गोपनयेत्।

उपनयनीयस्तु ब्राह्मणः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु प्रशस्तायां दिशि शुचौ समे देशे चतुर्हस्तं चतुरस्रं स्थण्डिलमुपलिप्य गोमयेन दर्भैः संस्तीर्य्य पुष्पैर्लाजभक्तैः रत्नैश्च देवताः पूजयित्वा विप्रान् भिषजश्च तत्रोल्लिख्याभ्युक्ष्य च दक्षिणतो ब्राह्मणं स्थापयित्वाग्निमुपसमाधाय खदिर-पलाश-देवदारु-बिल्वानां समिद्भिश्चतुर्णां वा क्षीरवृक्षाणां न्यग्रोधोडुम्बराश्वत्थमधूकानां दधि-मधु-घृताक्ताभिर्व्रीहौमिकेन विधिना खदेत्याज्याद्धुतीर्जुहुयात्। सप्रणवामिमाहृतिमिति मिस्रतः प्रतिदेवतमृषींश्च स्वाहाकारञ्च कुर्य्यात् शिष्यमपि कारयेत्॥ ब्राह्मणक्षत्रयाणां वर्णानामुपनयनं कर्त्तुमर्हति राजन्यो वयस्य वैश्यो वैश्यस्यैवेति। शूद्रमपि कुलगुणसम्पन्नं मन्त्रवर्ज्जमनुपनीतमध्यापयेदित्येके॥ ततोऽग्निं त्रिः परिणीयाग्निसाक्षिकं शिष्यं ब्रूयात्। काम-क्रोध-लोभ-मोह-मानाहङ्कारेर्ष्यापारुष्य-पैशुन्याक्षतालस्यग्रस्यानि हित्वा नीच-जन-दोषा शुचिना कषायवाससा सत्यव्रतब्रह्मचर्य्याभिवादनतत्परेणावश्यं भवितव्यं मदनुमतस्थान-गमन-ग्रथनासन-भोजनाध्ययन-परेण भूत्वा मत्प्रियहितेषु वर्त्तितव्यमतोऽन्यथा ते वर्त्तमानस्याधर्म्मो भवत्यफला च विद्या न च प्राकाम्यं प्राप्नोति। अहं वा त्वयि सम्यग्वर्त्तमाने यद्यन्यथादर्शी स्यामेनोभाग् भवेयमफलविद्यश्च। द्विज-गुरु-दरिद्र-मित्र-प्रव्रजितोपनत-स्राध्वनाद्याभ्युपगतानां चात्मबान्धवानामिव स्वभेषजैः प्रतिकर्त्तव्यमेवं साधु भवति। व्याधशाकुनिक-पतित-पापकारिणां न च प्रतिकर्त्तव्यमेवं विद्या प्रकाशते मित्रयशो धर्म्मार्थकामांश्च प्राप्नोति।

भवतश्चात्र॥

"क्षणेऽष्टमी तन्निधनेहनी द्वे
क्षणेतरेऽप्येवमहर्दिसन्ध्यम्।
अकालविद्युत्-स्तनयित्नुघोषे
खतन्त्रराष्ट्रक्षितिपव्यथासु॥
श्मशानयानाव्रतनाहवेषु
महोत्सवौत्पातिकदर्शनेषु।
नाधीयते नाशुचिना च नित्यम्"॥

इति सुश्रुते सूत्रस्थाने द्वितीयोऽध्यायः॥)

उपनायः, पुं, (उपनीयते आचार्य्यसमीपमिति। उप + नी + घञ्।) उपनयनम्। इति हेमचन्द्रः॥

उपनायकः, पुं, (उपमितो नायकेन।) नायकगुणोत्कर्षकथकः। यथा,—

"नायकस्य गुणोत्कर्षकथका उपनायकाः"।

इति सङ्गीतदामोदरः॥ * ॥ उपपतिश्च॥ (उपनयतीति। उप + नी + ण्वुल्। प्रापके, त्रि॥)

उपनाहः, पुं, (उपनह्यते ऽस्मिन्। उप + नह + घञ्।) वीणादितन्त्रबन्धनस्थानम्। तत्पर्य्यायः। निबन्धनम् २। इत्यमरः॥ व्रणालेपपिण्डः। इति मेदिनी॥ प्रलेप इति भाषा। (यथाह सुश्रुतः।

"आदौ विस्रापनं कुर्य्यात् द्वितीयमवसेचनम्।
तृतीयमुपनाहञ्च चतुर्थीं पाटनक्रियाम्"॥)

उपनिधिः, पुं, (उपनिधीयते इति। उप + नि + धा + कि।) उपन्यस्तवस्तु। स्थाप्यद्रव्यम्। तत्पर्य्यायः। न्यासः। २। इत्यमरः॥

("वासनस्यमनाख्याय हस्ते न्यस्य यदर्पितम्।
द्रव्यमुपनिधिः प्रोक्तः स्मृतिषु स्मृतिवेदिभिः"॥
वासुदेवपुत्रः। इति विष्णुपुराणम्॥)

उपनिषत्, [द्] स्त्री, (उपनिषद्यते प्राप्यते ब्रह्मविद्या अनया इति। उप + नि + सद् + क्विप्।) धर्म्मः। वेदान्तशास्त्रम्। निर्जनस्थानम्। इति मेदिनी॥ (वेदशिरोभागः। तच्च चतुर्णां वेदानां अशीतिसहितशताधिकसहस्रसंख्यका उपनिषदः। तथाहि। ऋचः एकविंशतिः। यजुषो नवाधिकशतम्। साम्नः सहस्रम्। पञ्चाशदुपनिषदोऽथर्ववेदस्य॥ ब्रह्मविद्या॥) समीपसदनम्। इति त्रिकाण्डशेषः॥ तत्त्वम्। इत्यमरटीकायां भरतः॥ (द्विजातिकर्त्तव्यो व्रतभेदः। यथा, आश्वलायनगृह्यकारिकायाम्।

"प्रथमं स्यात् महानाम्नी द्वितीयञ्च महाव्रतम्।
तृतीयं स्यादुपनिषद् गोदानञ्च ततः परम्"॥)

(मुक्तिकोपनिषदि अष्टाधिकशतोपनिषद्भेदाः प्रदर्शिताः। यथा,—

"ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः॥७॥
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं तथा॥१०॥
ब्रह्म कैवल्य-जाबाल-श्वेताश्वा हंस आरुणिः॥१६॥

१ १ १ ४ ५
गर्भो नारायणो हंसो बिन्दुर्नाद-शिरःशिखा॥२३॥

१
मैत्रायणी कैवल्यकी बृहज्जाबाल-तापनी॥२७॥
कालाग्निरुद्र-मैत्रेयी सुबाल-क्षुरि-मन्त्रिकाः॥३२॥

सर्व्वसारं निरालम्बं रहस्यं वज्रसूचिकम्॥३६॥

८ ९ १० ११
तेजोनाद-ध्यान-विद्या-योगतत्त्वात्मबोधकम्॥४२॥

१२ १३ १४ १५
परिव्राट्-त्रिशिखी-सीता-चूडानिर्व्वाण-मण्डलम्॥४८॥

१६ १७
दक्षिणामूरमं स्कन्दं महानारायणाद्वयम्॥५३॥

१८
रहस्यं रामतपनं वासुदेवञ्च मुद्गलम्॥५७॥

१९ २०
शाण्डिल्यं पैङ्गलं भिक्षु महत्शारीरकं शिखा॥६३॥

२१
तुरीयातीत-संन्यास-परिव्राजाच्चमालिका॥६७॥

२२
अक्षमालिकाक्षरं पूर्णा सूर्य्याध्यात्म-कुण्डिका॥७४॥
सावित्र्यात्मा पाशुपतं परब्रह्मावधूतकम्॥७९॥

२३
त्रिपुरातापनं देवी त्रिपुरा कठ-भावना॥८४॥

२४ २५ २६ २७
हृदयं कुण्डली भस्म रुद्राक्षगण-दर्शनम्॥९०॥

२८
तारसार-महावाक्य-पञ्चब्रह्माग्निहोत्रकम्॥९४॥
गोपालतापनं कृष्ण याज्ञवल्क्यं वराहकम्॥९८॥
शाट्यायनी हयग्रीवं दत्तात्रेयं च गारुडम्॥१०२॥

२९ ३० [॥१०८॥
कलि-जाबालि-सौभाग्य-रहस्य-ऋच-मुक्तिकाः"

अत्र स्थितानामेकदेशवाचिशब्दानां विवृतिः।

१ हंसः परमहंसः। २ बिन्दुरमृतबिन्दुः। ३ नादोऽमृतनादः। ४ शिरोऽथर्व्वशिरः। ५ शिखाथर्व्वशिखा। ६ तापनी नृसिंहतापनी। ७ रहस्यं शुकरहस्यम्। ८ तेजः तेजोबिन्दुः। ९ नादो नादबिन्दुः। १० ध्यानं ध्यानबिन्दुः। ११ विद्या ब्रह्मविद्या। १२ परिव्राट् नारदपरिव्राट्। १३ त्रिशिखी त्रिशिखीब्राह्मणः। १४ चूडा योगचूडामणिः। १५ मण्डलं मण्डलब्राह्मणः। १६ दक्षिणा दक्षिणामूर्त्तिः। १७ अद्वयं तारकः। १८ रहस्यं रामरहस्यम्। १९ महत् महोपनिषत्। २० शिखा योगशिखा। २१ परिव्राजः परमहंसपरिव्राजकः। २२ पूर्णाऽम्रपूर्णा। २३ कटः कटरुद्रः। २४ कुण्डली योगकुण्डली। २५ भस्मः भस्मजाबालः। २६ गणः गणपतिः। २७ दर्शनं जाबालदर्शनम्। २८ अग्निहोत्रकं प्राणाग्निहोत्रम्। २९। कलिः कलिसन्तरणम्। ३० रहस्यं खरस्वतीरहस्यम्॥

आसां मध्ये या यदेदान्तर्गतास्ता अपि तत्रैव प्रदर्शिताः। यथा,—

सामवेदान्तर्गताः षोड़शसंख्यका उपनिषदः।

अव्यक्तम् १ आरुणिः २ कुण्डिका ३ केनः ४ छान्दोग्यम् ५ (या)जावालदर्शनम् ६ जाबाली ७ महत् ८ मैत्रायणी ९ मैत्रेयी १० योगचूडामणिः ११ रुद्राक्षम् १२ वज्रसूचिकम् १३ वासुदेवम् १४ संन्यासम् १५ सावित्री १६॥ * ॥

शुक्लयजुर्व्वेदान्तर्गता ऊनविंशतिसंख्यकाः

उपनिषदः यथा,—

अतीताध्यात्मम् १ ईशावास्यम् २ (जा)बालम् ३

तारसारः४ तुरीयम्५ त्रिशिखी६ निरालम्बम् ७ परमहंसः ८ पैङ्गलम् ९ ब्राह्मणमण्डलम् १० ब्राह्मणद्वयतारकम् ११ भिक्षु १२ मन्त्रिका १३ मुक्तिका १४ याज्ञवल्क्यम् १५ बृहदारण्यकम् १६ शाट्यायनी १७ सुबालः १८ हंसः १९ ॥*॥

कृष्णयजुर्व्वेदान्तर्गता द्वात्रिंशत्-संख्यकाः उपनिषदः यथा,—

अक्षि१ अमृतनादः२ अमृतबिन्दुः३ अवधूतम्४ एकाक्षर५ कठरुद्र६ कठवल्ली७ कलिसन्तरणम्८ कालाग्निरुद्रः९ कैवल्यम्१० क्षुरिका११ गर्भः १२ तेजोबिन्दुः१३ तैत्तिरीयकम्१४ दक्षिणामूर्त्तिः१५ ध्यानबिन्दुः१६ नारायण१७ पञ्चब्रह्म१८ प्राणाग्निहोत्रम्१९ ब्रह्म२० ब्रह्मविद्या२१ योगकुण्डलिनी२२ योगतत्त्वम्२३ योगशिखा२४ वराह२५ शारीरकम्२६ शुकरहस्यम्२७ श्वेताश्वतरः२८ सर्व्वसारः २९ स्कन्दः ३० सरस्वतीरहस्यम् ३१ हृदयम् ३२ ॥*॥

ऋग्वेदान्तर्गता दशसंख्यका उपनिषदः यथा,—

अक्षमालिका१ आत्मप्रबोधः२ ऐतरेयः३ कौषितकी४ त्रिपुरा५ नादबिन्दुः६ निर्व्वाणम्७ मुद्गलः८ वज्रसूचिः९ सौभाग्यम्१० ॥ *॥

अथर्व्ववेदान्तर्गता एकत्रिंशत्संख्यका उपनिषदः, अथर्व्वशिखा१ अथर्व्वशिरः२ कृष्णः३ गणपतिः४ गारुडम्५ गोपालतापनम् ६ जाबालम् ७ त्रिपुरातपनम् ८ दत्तात्रेयः ९ देवी१० नारदपरिव्राजकः११ नृसिंहतापनी १२ परब्रह्म१३ परिव्राजकोपनिषत्१४ परमहंसः १५ पाशुपतम् १६ प्रश्नम्१७ भस्म१८ भावना१९ महानारायणम्२० महावाक्यम् २१ माण्डूक्यम्२२ मुण्डकम्२३ रामतापनी २४ रामरहस्यम् २५ बृहज्जाबालम् २६ शरभम्२७ शाण्डिल्यम्२८ सीता२९ सूर्य्यात्म३० हयग्रीवम् ३१॥*॥)

उपनिष्कारं, क्ली, (उपनिष्किरन्ति सैन्यान्यत्र। उप + निस् + कृ + घञ्। ऋदोरप् तु न। अपोवाधकस्य ल्युटोऽपि घस्यापवादत्वात्। यद्वा उपनिष्क्रीर्य्यते सैन्यैर्हन्यते इति। क्त + कर्म्मणि अप्। इदुदुपधस्येति षः।) पुरपथः। इत्यमरः॥ राजपथः। इति हेमचन्द्रः॥

उपनिष्क्रमणं क्ली, (उपक्रम्यतेऽनेन उप + निर् + क्रम + ल्युट्।) राजपथः। इति हेमचन्द्रः॥ निष्क्रमणनामसंस्कारः॥

उपनीतः, पुं, (उप + नी + क्त।) कृतोपनयनः। इति स्मृतिः॥ ("अथोपनीतं विधिवद् विपश्चितः"। इति रघुः। ३। २९।) निकटप्राप्ते च॥

उपन्यासः, पुं, (उप + नि + अस् + घञ्।) वाक्योपक्रमः। तत्पर्य्यायः। वाङ्मुखम् २। इत्यमरः॥ ("तस्मात् ब्रह्मजिज्ञासोपन्यासमुखेन"। इति शारीरकभाष्ये। १। १। ७। विचारः। यथा, मनुः ९।३१।

"विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत"॥
"वक्ष्यमाणं सर्व्वजनहितं विचारं शृणुत"।
इति तट्टीका।

धनादीनामर्पणम्। गच्छित इति भाषा॥)

उपपतिः, पुं, (उपमितः पत्या। अवादयः क्रुष्टाद्यर्थे ३तीयया इति समासः।) जारः। इत्यमरः॥ नां इति भाषा। तस्य लक्षणम्। आचारहानिहेतुः पतिः। स चतुर्व्विधः। सार्व्वकालिकपराङ्गनापराङ्मुखत्वे सति सर्व्वकालमनुरक्तोऽनुकूलः १। सकलनायिकाविषयसमसहजानुरागो दक्षिणः२। भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो धृष्टः ३। कामिनीविषयकपटपटुः शठः ४। इति रसमञ्जरी॥ (यथा, मनुः ३। १५५।

"पौनर्भवञ्च काणञ्च यस्य चोपपतिर्गृहे"॥)

उपपत्तिः, स्त्री, (उप + पद् + क्तिन्।) सङ्गतिः। निर्णतिः। समाधानम्। सिद्धान्तः। प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः। इति वेदान्तसारः॥ ("उपपत्तिमदुल्लिताश्रयम्"। इति भारविः। २। १॥) हेतुः। यथा,—

"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः"। इत्यत्र उपपत्तिभिर्बुद्धिभिर्हेतुभिरिति पक्षतायश्चमाथुरी॥ सङ्गतिः। यथा,—

"लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः"।
इति भाषापरिच्छेदः। ८२॥ (उपायः। यथा माघे।
"अपेक्षितान्योन्यबलोपपत्तिभिः"। सिद्धिः। प्राप्तिः। "स्वार्थोपपत्तिं प्रति दुर्ब्बलाश्रयः"। इति रघुः॥ ५। १२॥)

उपपदं, क्ली, (उपोच्चारितं पदम्।) लेशः। इति त्रिकाण्डशेषः॥ समीपोच्चारणीयपदम्। (यथा, रघौ १६। ४०। "तस्याः स राजोपपदं निशान्तम्"॥) यथा वा नामोत्तरे शुम्भेवर्म्मादि। समभिव्याहृतस्वार्थपोषकपदम्। यथा प्रहारादौ प्रादि। इति व्याकरणम्॥

उपपातकं, क्ली, (उपपतयति नरके यत्। उप + पत् + णिच् + ण्वुल्। यद्वा उपमितं पातकेन।) पापविशेषः। तत्तु ऊनपञ्चाशद्विधं यथा। गोवधः १ अयाज्ययाजनम् २ परदारगमनम् ३ आत्मविक्रयः ४ गुरुत्यागः ५ माढृत्यागः ६ पितृत्यागः ७ एषां शुश्रूषात्यागः ८ स्वाध्यायत्यागः ९ स तु सर्व्वदा ब्रह्मयज्ञत्यागः। अधीतवेदविस्मरणञ्च। अग्नित्यागः १० स तु स्मार्त्ताग्निहोत्रत्यागः। सुतत्यागः ११ स तु तस्य संस्कारभरणाद्यकरणम्। परिवित्तिता १२ सा तु कनिष्ठेन आदौ विवाहे कृते ज्येष्ठस्य। परिवेदनं १३ तत्तु अकृतदारज्येष्ठसत्त्वे कनिष्ठस्य। तयोः कन्यादानं १४ तयोर्याजनं १५ तत्तु तयोरेव विवाहादौ पौरोहित्यम्। कन्याया दूषणं १६ तत्तु मैथुनवर्जमङ्गुलीप्रक्षेपादिना रूपणम्। अङ्गुल्या योनिविदारणमिति यावत्। वार्द्धुष्यं १७ तत्तु निषिद्धवृद्धिजीवनम्। व्रतलोपः १८ स तु ब्रह्मचारिणो मैथुनम्। तडागविक्रयः १९ आरामविक्रयः २० दारविक्रयः २१ अपत्यविक्रयः २२ व्रात्यता २३ सा तु यथाकालमनुपनयनम्। बान्धवत्यागः २४ मृताध्यापनम् २५ तत्तु प्रतिनियतवेतनग्रहणपूर्व्वमध्यापनम्। मृताध्ययनम् २६ तत्तु वेतनप्रदानपूर्व्वकाध्ययनम्। अपण्यानां विक्रयः २७ स तु तिलला क्षागोरसादीनां ब्राह्मणेन विक्रयः। सर्व्वाकरेष्वधीकारः २८ स तु सुवर्णाद्युत्पत्तिस्थानेषु राज्ञाज्ञया अधिकारः। महायन्त्रप्रवर्त्तनं २९ तत्तु महता उदकप्रवाहप्रतिबन्धहेतूनां सेतुबन्धादीनाञ्च प्रवर्त्तनं अथवा तैलादियन्त्रस्य शस्त्रतेजनादियन्त्रस्य च। ओषधिहिंसनं ३० तत्तु धान्यादीनां यथाकथञ्चिन्नाशः। स्त्र्याजीवः ३१ स तु भार्य्यादिस्त्रीणां वेश्यात्वं कृत्वा तदुपजीवनम्। अभिचारकर्म्म ३२ तत्तु श्येनादिना यज्ञेन अनपराधस्य मारणम्। मूलकर्म्म ३३ तत्तु मन्त्रौषधादिना वशीकरणम्। इन्धनार्थं शुष्कद्रुमाणां छेदनं ३४ आत्मार्थं क्रियारम्भः ३५ स तु अनातुरस्य देवपित्राद्युद्देशमन्तरेण पाकाद्यनुष्ठानम्। निन्दितान्नस्य भक्षणम् ३६ तत्तु लशुनादेः सक्षदनिच्छया अथवा गण्डकदेवलतस्करान्नभक्षणम्। अनाहिताग्निता ३७ सा तु समर्थस्य श्रौतस्मार्त्ताग्न्यपरित्यागः। स्तेयं ३८ तत्तु सुवर्णद्रव्यादन्यसारद्रव्यापहरणम्। देवर्षिपितॄणां ऋणाशोधनं ३९ असच्छास्त्राभिगमनं ४० तत्तु श्रुतिस्मृतिविरुद्धशास्त्रग्रन्थग्रहणम् षाषण्डशास्त्राभ्यासो वा। कौशीलव्यक्रिया ४१ सा तु नैर्य्यात्रिकस्य सततानुष्ठानम्। धान्यस्तेयं ४२ पशुस्तेयम् ४३ कुप्यस्तेयम्४३ मद्यपस्त्रीनिषेवनम्४४ स्त्रीवधः ४५ भ्रूणवधः ४६ वैश्यवधः ४७ क्षत्रियवधः ४८ नास्तिक्यम् ४९। तत्तु अदृष्टार्थकर्म्माभावबुद्धिः। नास्ति परलोक इति वा। इति मनुः शूलपाणिश्च॥ (अस्य प्रायश्चित्तादिकं प्रायश्चित्तशब्दे द्रष्टव्यम्॥)

उपपापं, क्ली, (उपमितं पापेन।) उपपातकम्। इति स्मृतिः॥

उपपुरं, क्ली, (उप समीपे पुरम्।) शाखानगरम्। इति हेमचन्द्रः॥

उपपुराणं, क्ली, (उपमितं पुराणैः।) व्यासकृताष्टादशपुराणसदृशनानामुन्यादिप्रणीताष्टादशपुराणम्। यथा,—

"अन्यान्युपपुराणानि मुनिभिः कथितान्यपि।
आद्यं सनत्कुमारोक्तं १ नारसिंहं २ ततः परम्॥
तृतीयं वायवीयञ्च ३ कुमारेण च भाषितम्।
चतुर्थं शिवधर्म्माख्यं ४ साक्षान्नन्दीशभाषितम्॥
दुर्व्वाससोक्तमाश्चर्य्यं ५ नारदीयमतःपरम् ६।
नन्दिकेश्वरयुग्मञ्च ७ तथैवोशनसेरितम् ८॥
कापिलं९ वारुणं१० शाम्बं११ कालिकाह्वयमेव च१२।
माहेश्वरं१३ तथा कल्की१४ दैवं१५ सर्व्वार्थसिद्धिदम्॥
पराशरोक्तमपरम् १६ मारीचम् १७ भास्कराह्वयम्१८।
अत्र दैवं देवीपुराणम्। इति मलमासतत्त्वधृतकूर्म्मपुराणम्॥ (एषां विस्तृतिस्तत्तच्छब्दे द्रष्टव्या॥)

उपपुष्पिका, स्त्री, (उपगता पुष्पमिव विकाशत्वम्। उद्भेदसमये मुखव्यादानात् तथात्वम्।) उम्भा। हाइ इति भाषा। तत्पर्य्यायः। झाटिका २। इति झाटावली॥

उपप्रदानं, क्ली, (उप समीपे प्रदानम्।) उत्कोचः। इति हेमचन्द्रः॥ घुस इति भाषा। (यथा कथासरित्सागरे २४ तरङ्गे।
"उपप्रदानं जिघ्रन्तामेकं ह्याकर्षणौषधम्"॥)

उपप्लवः, पुं, (उप+प्लु+अप्।) राहुग्रहः। विप्लवः। उत्पातः। इति मेदिनी॥
("उपप्लवाय लोकानां धूमकेतुरिवोत्थितः"।)
इति कुमारे। २। ३२।) ग्रहणम्। यथा "उपप्लवे चन्द्रमसो रवेश्च"। इति स्मृतिः॥ (उत्पातसूचकोऽनिष्टादिः। यथा, "कच्चिन्न वाय्वादिरुपप्लवो वः"। इति रघुः। ५। ६। भीतिः। "दृष्टाद्बोपप्लविनः परेभ्यः"। इति रघुः। १३। ७।
"उपप्लविनो भवन्तः"। इति मल्लिनाथः॥)

उपभूषणं, क्ली, (उपमितं भूषणेन।)
घण्टाचामरादि। यथा,—
"घण्टाचामरकुम्भादिपात्रोपकरणादिकम्।
तद्भूषणान्तरे दद्यादृश्यमात्तदुपभूषणम्"॥ इति।
"प्रावारः पानपात्रञ्च गेण्डुको मण्डनेव च।
पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम्"॥
इति च कालिकापुराणे ६८ अध्यायः॥

उपभृत्, स्त्री, (उप+भृ+क्विप्।) चक्राकारयज्ञपात्रं। इत्यमरः॥ (यथा, औचसूत्रे। १।१०।६॥
"पाणिभ्यां स्रुचं परिगृह्योपभृत्याधानम्॥)

उपभोगः, पुं, (उप+भुज+घञ्।) भोजनातिरिक्तभोगः। तत्पर्य्यायः। निर्व्वेशः २। इत्यमरः॥
("प्रियोपभोगचिह्नेषु पौरोभाग्यमिवाचरन्"।
इति रघुः। १२। २२। तथा च स्मृतिः।
"आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा"।
"न जातु कामः कामानामुपभोगेन शाम्यति"।
इति मनुः। २। ९४॥)

उपमा, स्त्री, (उपमीयते इति। उप+मा+अङ्+टाप्।) उपमानम्। सादृश्यम्। इत्यमरः॥
("स्फुटोपमं भूतिसितेन शम्भुना"। इति माघे १।४।
"अपि लक्षितमध्वानं बुबुधे न बुधोपमः"।
इति रघुः। १। ४७।) तस्य वैदिकपर्य्यायः। इदमिव १ इदं यथा २ अग्निर्यथे ३ चतुरस्रिद्दमानात् ४ ब्राह्मणाग्नतचारिणः ५ वृक्षस्यनुतेपुरङ्गतवयाः ६ जारआमगं ७ मेघोभूतोऽभीषन्नपः ८ तदूपः ९ तदर्णः १० तद्वत् ११ तथा १२। इति द्वादशोपमाः। इति वेदनिर्घण्टौ २ अध्यायः॥ (अर्थालङ्कारभेदः। विस्तृतिस्तु उपमालङ्कारशब्दे द्रष्टव्या।)

उपमाता, [ऋ] स्त्री, (उपमिता माता।) धात्री। इति जटाधरः॥ मातुः सदृशी। सा षड्विधा यथाह स्मृतिः।
"मातुःस्वसा मातुलानी पितृव्यस्त्री पितृष्वसा।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः"॥
उपमानकर्त्तरि त्रि॥

उपमानं, क्ली, (उपमीयते इति। उप+मा+ल्युट्।) उपमा। इत्यमरः॥ (यथा, कुमारे। ४। ५।
"उपमानमभूदविलासिनां
करणं यत्तव कान्तिमत्तया"।

सादृश्यज्ञानम्। उपमितिकरणम्। यथा गौर्गवयसदृशेतिवाक्ये। "प्रसिद्धसाधर्म्म्यात् साध्यसाधनमुपमानम्"। इति न्यायसूत्रम्। प्रसिद्धस्य पूर्व्वप्रमितस्य गवादेः साधर्म्म्यात् सादृश्यात् तज्ज्ञानात् साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिरुपमानमुपमितिर्यत इत्यध्याहारेण च करणलक्षणम्। अत्र च वैधर्म्म्योपमितिमपि मन्यन्ते टीकाकृतः। यथा च अतिदीर्घग्रीवत्वादिपश्वन्तरवैधर्म्म्याच्च नत्। उष्ट्रे करभपदवाच्यताग्रहः। एवमन्योऽपि उपमानस्य विषय इति भाव्यं। तथा मुद्गपर्णीसदृशी ओषधी विषं हन्तीत्यतिदेशवाक्यार्थे ज्ञाते मुद्गपर्णीसादृश्यज्ञाने जाते इयमोषधी विषहरणीत्युपमित्या विषयीक्रियते इत्यादि॥)

उपमालङ्कारः, पुं, (उपमैव अलङ्कारः।) साम्यालङ्कारः। यथा। उपमामाह।
"साम्यं वाच्यमवैधर्म्म्यं वाक्यैक्ये उपमा द्वयोः"।
तद्भेदाः। सा द्विविधा। पूर्णा लुप्ता च। तल्लक्षणम्। यथा, —
"सा पूर्णा यदि सामान्यधर्म्म औपम्यवाचि च"।
इयं पुनः औत्पात्यार्थी च। तल्लक्षणन्तु।
"औती यथेववाग्शब्दा इवार्थो वा वतिर्यदि।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः"॥
द्वे द्विधा। तद्धिते समासेऽथ वाक्ये। उदाहरणम्।
"सौरभमस्योरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले"॥
अत्र क्रमेण त्रिविधा औती।
"मधुरः सुधावदधरः
पल्लववतुल्योऽतिपेलवः पाणिः।
चकितमृगलोचनाभ्यां
सदृशौ चपले च लोचने तस्याः"॥
अत्र क्रमेण त्रिविधा आर्थी। पूर्णा षड्वेव तत्।
"लुप्ता सामान्यधर्म्मादेरेकस्य यदि वा द्वयोः॥
त्रयाणां वासुपादाने औत्पात्यार्थी सापि पूर्व्ववत्"॥
इयञ्च तद्धिते औत्पा त्रसम्भवात् पूर्व्वोक्तरीत्या पञ्चप्रकाराः। उदाहरणम्।
"मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये।
वाचः सुधा इवौष्ठस्ते बिम्बतुल्यौ मनोऽस्यवत्"॥
"सा लुप्ता पञ्चधा पुनः।
आधारकर्म्मणिविहिते द्विविधे च क्यङि।
कर्म्मकर्त्रोर्गमुलि च स्यादेवं पञ्चधा पुनः"॥
उदाहरणम्।
"अन्तःपुरीयसि रणेषु सुतीयसि त्वं
पौरं जनं तव सदा रमणीयते श्रीः।
दृष्टः प्रियाभिरमृतद्युतिदर्शनेन्द्र-
संचारमत्र भुवि सञ्चरसि क्षितीश"॥
तदेवं दशप्रकारा लुप्ता। सा पुनर्द्विधा। वाक्यगता समासगता च। यथा।
"उपमानानुपादाने द्विधा वाक्यसमासयोः"।
औत्पात्यार्थित्वभेदेन चतुर्व्विधत्वसम्भवेऽपि प्राचीनरीत्या द्विप्रकारत्वमेवोक्तम्। पुनर्द्विधा।
"औपम्यवाचिनो लोपे समासे क्विपि च द्विधा"

उदाहरणम्।
"वदनं मृगशावाक्ष्याः सुधाकरमनोहरम्"।
"गर्हयति श्रुतिपरमं यक्षं निनदन्महात्मनां पुरतः"
पुनर्धर्म्मोपमानयोर्लोपे द्विधा। तद्यथा।
"द्विधा समासे वाक्ये च लोपे धर्म्मोपमानयोः"।
उदाहरणम्।
"तस्या मुखेन सदृशं रम्यं नास्त्येव वा नयनतुल्यम्"।
पुनर्द्विधा।
"क्विप्समासगता द्वेधा धर्म्मे वादिविलोपने"।
उदाहरणम्। विधवति मुखाज्ञामस्या इत्यादि।
"उपमेयस्य लोपे तु स्यादेका प्रत्यये क्वचि"।
उदाहरणम्।
"अरातिविक्रमालोकविकश्वरविलोचनः।
कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति"॥
धर्म्मोपमेयलोपेऽन्या च। उदाहरणम्। "यशसि प्रसरति भवतः क्षीरोदीयन्ति सागराः सर्व्वे"।
विलोपे च समासगा। यथा। राजते मृगलोचनेत्यादि।
"तेनोपमाया भेदाः स्युः सप्तविंशतिसंख्यकाः"।
पूर्णा षड्विधा। लुप्ता चैकविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा"। इति साहित्यदर्पणस्य १० परिच्छेदात् संगृहीतः॥

उपमितिः, स्त्री, (उप+मि+क्तिन्।) उपमा। इति शब्दरत्नावली॥ न्यायमते सादृश्यज्ञानजन्यज्ञानम्। यथा "गोसदृशो गवयपदवाच्य इत्याकारशक्तिज्ञानम्। अस्य करणं गवादिसादृश्यवत् पिण्डप्रत्यक्षम्। अस्य व्यापारः अतिदिष्टवाक्यार्थस्मरणम्"। इत्युपमानखण्डम्। अपि च। भाषापरिच्छेदे॥ ७९-८०॥
"ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात् सोपमितिः स्मृता॥
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते।
गवयादिपदागान्तु शक्तिधीरुपमाफलम्॥
पदज्ञानन्तु करणं शक्तिधीरुपमाफलम्"॥

उपमेतः, पुं, (उपमां इतः प्राप्तः।) श्लाघ्यवृक्षः। इति शब्दचन्द्रिका॥ (श्लाघ्यवृक्षो हि सर्व्वोन्नतत्वात् उन्नतानामुपमास्थानम्। इत्यर्थः॥)

उपयन्ता, [ऋ] पुं, (उप+यम+तृच्।) पतिः। इति जटाधरः॥ ("अथोपयन्तारमलं समाधिना"। इति कुमारे ५। ४५। "अथोपयन्ता सदृशेन युक्ताम्"। इति रघुः॥ ७। १॥)

उपयमः, पुं, (उप+यम्+अप्।) विवाहः। इत्यमरः॥

उपयाचकः, त्रि, (उप समीपे याचते इति। उप+याच+ण्वुल्।) समीपे याच्ञाकर्त्ता॥

उपयाचितं, त्रि, (उप+याच्+क्त।) स्वेष्टसिद्धये देवाय देयं वस्तु। तत्पर्य्यायः। दिव्यदोहदम् २। इति त्रिकाण्डशेषः॥ (प्रार्थितम्। यथा, कथासरित्सागरे १३ तरङ्गे।
"तस्योपयाचितान्येत्य तत्रत्याः कुर्व्वते जनाः।
तत्तत्वाञ्छितसंसिद्धिहेतोस्तैस्तैरुपायनैः"॥)

उपयाचितकं, त्रि, (उपयाचित+कन्।) उपयाचि-

तम्। खेऽलब्धये देवदेयम्। इति जटाधरः॥ (यथा, कादम्बरी। "सिद्धायतनानि कृतविविध-देवतोपयाचितकानि"॥)

उपयामः, पुं, (उप+यम्+घञ्।) विवाहः। इत्य-मरः। (यज्ञाङ्गपात्रविशेषः। यथा यजुर्व्वेदे ७। ४। ११। "उपयामगृहीतोऽसि"। उपयाम्यतेऽनेन। उप+यम+णिच्+घञ्। इति व्युत्पत्त्या सि-द्धम्॥)

उपयुक्तः, त्रि, (उप+युज्+क्त।) योग्यः। उचितः॥

उपयोगः, पुं, (उपयुज्यते इति। उप+युज्+घञ्।) आचरणम्। इति विजयरक्षितः। इष्टसिद्ध्यर्थ-व्यापारः। इति विश्वमिश्रः॥ ("अनङ्गलेखक्रिया-योपयोगम्"। इति कुमारे। १। ७॥ भोजनम्। "औषधान्नविहाराणामुपयोगं सुखावहम्"। इति निदानस्थाने प्रथमेऽध्याये वाभटेनोक्तम्॥)

उपयोगिता, स्त्री (उपयोगिन्+तल्।) उपयोगिनो भावः। फलसाधनता। प्रयोजनम्। आनुकूल्यम्॥

उपयोगी, [न्] त्रि, (उपयोगोऽस्यास्तीति। उप-योग+इनि।) उपयुक्तद्रव्यादिः। क्रियासाधनम्। अनुकूलः॥ ("तदुपयोगीनि शारीरकसूत्रा-दीनि"। इति वेदान्तसारे। २॥ उपभोगद्रव्यम्। यथा कथासरित्सागरे। १५ तरङ्गे।

"अस्ति कन्यारत्नं मे गृह्यतामुपयोगि चेत्"॥)

उपरोषं, व्य, (उपगोषम्। आनन्दः। इत्यमरटीकायां भरतः॥

उपरक्तः, पुं, (उप+रञ्ज+क्त।) राऊयस्तः सूर्य्य-चन्द्रश्च। इत्यमरः॥ राऊः। इति हेमचन्द्रः॥

उपरक्तः, त्रि, (उप+रञ्ज+क्त।) व्यसनार्त्तः। दैव-मानुषान्यतरपीड़ायुक्तः। इत्यमरः॥

उपरक्षणं, क्ली (उपगतं रक्षणं यत्र।) रक्षणार्थं सैन्य-स्थापनम्। चौकी इति ख्यातम्। तत्पर्य्यायः। सज्जनम् २। इत्यमरः॥

उपरतः, त्रि, (उप+रम+क्त।) मृतः। इति स्मृतिः॥ (यथाह नारदः।

"पितुर्य्युपरते पुत्रा विभजेयुर्धनं पितुः"॥)

विरतः॥

उपरतस्पृहः, त्रि, (उपरता नष्टा स्पृहा धनाद्याकाङ्क्षा यस्य।) सत्यपि सत्त्वे स्वगतधनेच्छारहितः। स्व-मागाधिकरणस्वत्वसमानकालीनेच्छा प्रागभावा-समानकालीनेच्छाध्वंसवान्। इति दायतत्त्वम्॥ इच्छारहितः॥ ("पितुर्य्युपरतस्पृहे"। इति याज्ञवल्क्यः॥)

उपरतिः, स्त्री, (उप+रम्+क्तिन्।) विरतिः। इति हेमचन्द्रः॥ (यथा, मार्कण्डेये ६१। ८।

"विश्वस्योपरतौ शक्ते नारायणि! नमोऽस्तु ते"॥)

"निगृहीतेन्द्रियाणां विषयेभ्य उपरमणम्। अथवा विहितकर्म्मणां विधिना परित्यागः"। इति वेदान्तः॥

उपरमः, पुं, (उप+रम+घञ्। निपातनात् न दृद्धिः।) उपरतिः। इति हेमचन्द्रः॥ ("येनोपरमे कर्म्मब्रह्मचर्य्यं नियोजयेत्"। इति वैद्यके॥)

उपरसः, पुं, (उपमितं रसेन।) उपधातुः। तद्यथा। खेचरम्। अञ्जनम्। कङ्कुष्ठम्। गन्धारी। गैरिकम्। क्षितिनागः। शैलेयं। इति राजनिर्घण्टः॥

"गन्धो हिङ्गुलमभ्रतालकशिलाः खोतोऽञ्जनङ्कुष्ठकम्, राजावर्त्तकचुम्बकौ स्फटिकया शङ्खः खटी गैरिकम्। कासीसं रसकङ्कपर्पटिकता वोलांश्च कङ्कुष्ठकम्, सौराष्ट्री च मता अमी उपरसा सूतस्य किञ्चिद्गुणैः"॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)

उपरागः, पुं, (उप+रञ्ज+घञ्।) राऊयस्तचन्द्रः। सूर्य्यश्च। इत्यमरः॥ ("उपरागान्ते शशिनः समु-पगता रोहिणीयोगम्"। इति शाकुन्तले। निकट-स्थितित्वात् निजगुणादेरन्यत्रारोपणम्। यथा स्फटिकस्तम्भे रक्तपुष्पाणां रक्तिमारोपः।) राऊः। विगानम्। परीवादः। इति हेमचन्द्रः॥ दुर्नयः। ग्रहकक्षोलः। व्यसनम्। इति मेदिनी॥ (यथा रघौ १६। ७। "विभर्षि चाकारमनिर्वृतानां मृगाजिनं हैममिवोपरागम्"॥)

उपरामः, पुं, (उप+रम्+घञ्।) निवृत्तिः। तत्प-र्य्यायः। आरतिः २ अवरतिः ३ विरतिः ४ इत्य-मरः॥ विरामः ५ उपरमः ६ इति भरतः॥ आरा-मः ७ उपरतिः ८ इति हेमचन्द्रः॥

उपरि, व्य, (ऊर्द्धे ऊर्द्धायां ऊर्द्धात् ऊर्द्धायाः ऊर्द्धं ऊर्द्धां वा वसत्यागतो रमणीयं वा। "उपर्य्युपरि-ष्टात्"। ५।३।३१। इति ऊर्द्धस्योपादेशो रिल् प्रत्ययश्च॥) ऊर्द्धम्। इति व्याकरणम्॥ उपर इति भाषा।

("त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः। मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति"॥

इति मेघदूते उत्तरमेघे ३४ श्लोकः।

"अवाङ्मुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता"।

इति रघुः। २। ६०॥)

उपरिष्टात्, व्य, (ऊर्द्धे ऊर्द्धायां ऊर्द्धात् ऊर्द्धायाः ऊर्द्धं ऊर्द्धां वा वसति आगतो रमणीयं वा। "उपरि उपरिष्टात्"। ५। ३। ३१। इत्यूर्द्धस्य उपादेशो रिष्टातिल् प्रत्ययश्च॥) उपरि। ऊर्द्धम्। इति हेमचन्द्रः॥ (यथा रामायणे ४ काण्डे।

"नाधस्तान्नोपरिष्टाच्च गतिर्गाधिसुतस्य मे"॥)

उपरीतकः, पुं, पृषोदरादित्वात् साधुः। आसन इन्धन इत्यादि भाषा। तस्य लक्षणं यथा।

"एकपादमुरौ कृत्वा द्वितीयं स्कन्धसंस्थितम्। नारीं कामयते कामी बन्धः स्यादुपरीतकः"॥ इति रतिमञ्जरी॥ अत्र विपरीतकोऽपि पाठः॥

उपरूपकं, क्ली, (उपमितं रूपकेण।) नाटकविशेषः। स तु अष्टादशविधः। यथा।

"नाटिका त्रोटकं गोष्ठी सट्टकं नाथरासकम्। प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकन्यथा॥ संलापकं श्रीगदितं शिल्पकञ्च विलासिका। दुर्म्मल्लिका प्रकरणी हल्लीशो भाणिकेति च॥ अष्टादश प्राऊरुपरूपकाणि मनीषिणः। विना विशेषं सर्व्वेषां लक्ष्म नाटकवन्मतम्"॥ इति साहित्यदर्पणे ६ परिच्छेदः॥

उपरोधः, पुं, (उप+रुध्+घञ्।) अनुरोधः॥ (प्रतिबन्धः। "अन्येषामपि भैक्षोपजीविनां कृत्यप-रोधं करोषि"। इति महाभारते आदिपर्व्वणि। ३। ७५। "तपोधननिवासिनामुपरोधो माभूत्"। इति शाकुन्तले प्रथमाङ्के॥)

उपरोधकं, क्ली, (उप+रुध्+ण्वुल्।) गर्भागारम्। वासगृहम्। इति शब्दरत्नावली॥

उपर्य्युपरि, व्य, ऊर्द्धोर्द्धं। उपर उपरि इति भाषा। सामीप्यम्। यथा "उपर्य्युपरि यामम्"। इति व्याकरणम्॥

उपलः, पुं, (उपलाति। उप+ला+क।) यहा, उं ग्रभ्नं पलति यः। उ+पल+अच्।) पाषाणः। (यथा,—

"रेवां द्रक्षस्युपलविषमे विन्ध्यपादे विशीर्णाम्"। इति मेघदूते पूर्व्वमेघे १९ श्लोकः।) रत्नम्। इति मेदिनी॥ (यथा मनुः। ११। १४७।

"मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च। अयःकांस्योपलानाञ्च दादशाहं कणाशता"॥ बालुका। यथा, "भिषग्युषाप्रच्छिषी नना"। इति ऋग्वेदे। ६। ११२। ३। "उपलेषु बालुकासु" इति भाष्यम्॥)

उपलक्षणं, क्ली, (उप+लक्ष्+ल्युट्।) अनुक्त-स्वार्थलक्षणा।

("खसिद्धये परार्थेषु परार्थे स्वसमर्पणम्। उपादानं लक्षणञ्चेत्युक्ता सुद्वैव सा द्विधा॥ यथा कुन्ताः प्रविशन्ति। इत्युपादानम्। गङ्गायां घोषः। इत्युपलक्षणम्"। इति काव्यप्रकाशः॥) एकपदेन तदर्थान्यपदार्थकथनम्। यथा, मुद्रितचक्रम्।

"देशान्तरे मृते पत्यौ साध्वी तत्पादुकाद्वयम्। निधायोरसि संशुद्धा प्रविशेज्ज्वातवेदसम्"॥

अत्र पादुकाद्वयमित्युपलक्षणं द्रव्यान्तरमपि॥

उपलक्ष्यः, पुं, (उप+लक्ष्+ण्यत्।) आश्रयः। अव-लम्बनम्॥

उपलब्धिप्रियः, पुं, (उपलब्धिः प्रियो यस्य।) चमर-गामवलजन्तुः। इति राजनिर्घण्टः॥

उपलब्धार्था, स्त्री, (उपलब्धः अर्थो यस्याः।) आख्या-यिका। इत्यमरः॥ हितोपदेशादिकथा॥

उपलब्धिः, स्त्री, (उप+लभ+क्तिन्।) मतिः। प्राप्तिः। (यथा, रघुः ५। ५६। "दृष्टा हि मे स्यात् स्वयदोपलब्धिः"।) ज्ञानम्। इति मेदिनी॥ (यथा महाभारते १४। अनुगीतापर्व्वणि। २२। २९।

"कामन्तु नः खेषु गुणेषु सङ्गः
कामश्च नान्योन्यगुणोपलब्धिः।
अस्मान् विना नास्ति तवोपलब्धि-
स्तावद्वृते त्वां न भजेत् प्रहर्षः"॥)

उपलभेदी, पुं, (उपलं भिनत्तीति। उपल+भिद्+णिनि।) पाषाणभेदी वृक्षः। इति राजनिर्घण्टः॥ (अश्मभेदशब्देऽस्य गुणादयो ज्ञातव्याः॥)

उपलम्भः, पुं, (उप+लभ+घञ्। उपसर्गात् खल-घञोरिति नुम्।) अनुभवः। इत्यमरः॥ (यथा रघुः १४। २।

"विस्रब्धमङ्गान्यतया न दृष्टौ

ज्ञातौ सतसार्ज्जसुखोपलम्भात्"॥)

उपलम्भः, पुं, (उप + लभ + घञ्। "उपात् प्रशंसायाम्" । ७।१।६६। इत्यनेन सिद्धम्।) स्तवः। स्तवोपयुक्तः। यथा उपलम्भाः साधुः। इति मुग्धबोधव्याकरणम्॥

उपला, स्त्री, (उप + ला + क + टाप्।) शर्क्करा। इति मेदिनी॥ ("सितोपला तु गोक्षीरी"। इति वैद्यकचक्रपाणिसंग्रहे यक्ष्माधिकारे॥)

उपलिङ्गं, क्ली, (उपमितं लिङ्गेन।) उपद्रवः। अरिष्टम्। इति हेमचन्द्रः॥ ("केनचित् उपलिङ्गानि गायता"। इति हर्षचरिते पञ्चमोच्छ्वासे॥)

उपलेपनं, क्ली, (उप + लिप् + ल्युट्।) गोमयादिलेपनम्। इति चिकित्साशास्त्रेषः॥ (यथा पञ्चतन्त्रे। "तत्रैव देवायतने संमार्জ্জनोपलेपनमण्डनादिकं कर्म्म समाचापयति"॥)

उपवटः, पुं, (उपमितो वटेन।) प्रियालवृक्षः। इति राजनिर्घण्टः॥ (प्रियालशब्देऽस्य गुणादयो व्याख्येयाः॥)

उपवनं, क्ली, (उपमितं वनेन।) कृत्रिमवनम्। बागान इति भाषा। तत्पर्य्यायः। आरामः २। इत्यमरः॥ (यथा, मेघदूते पूर्ब्बमेघे २४ श्लोकः।

"पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैः"।
"सा केतुमालोपवना दृष्टि-
र्विहारशैलानुगतेव नागैः"।

इति रघुः। १६। २६॥)

उपवर्त्तनं, क्ली, (उपागत्य वर्त्तन्ते अत्र। उप + वृत् + ल्युट्।) जनपदः। जनपदसमुदायः। जनपदैकदेशः। सजलनिर्জ্জलस्थानमात्रम्। इति भरतः॥ तत्पर्य्यायः। देशः २ विषयः ३। इत्यमरः॥ (यथा काशीखण्डे।

"तस्योपवर्त्तनेऽप्येको न श्रुतो गोत्रभित् क्वचित्"॥)

उपवर्षः, पुं, मुनिविशेषः। तत्पर्य्यायः। इलभृतिः २ कृतकोटिः ३ अयाचितः ४। इति चिकित्साशास्त्रेषः॥

उपवर्हः, पुं, (उप + वृह + घञ्।) उपधानम्। इत्यमरः॥ बालिश इति भाषा॥

उपवल्लिका, स्त्री, क्षुद्रतरुवल्लता। इति राजनिर्घण्टः॥

उपवसथः, पुं, (उपागत्य वसन्ति अत्र। उप + वस् + उपसर्गे वसेः इति अथप्रत्ययः।) ग्रामः। इति हेमचन्द्रः॥ (यथा,—शतपथब्राह्मणे। १। २।२।७। "तेऽस्य विश्वे देवा गृहानागच्छन्ति तेऽस्य गृहेषूपवसन्ति स उपवसथः"। यागपूर्ब्बदिनम्॥)

उपवस्त्रं, क्ली, (उप + वस + क्त।) उपवासः। इत्यमरः॥

उपवासः, पुं, (उप + वस + घञ्।) अन्नाद्यानम्। इति मलमासतत्त्वम्। अहोरात्रभोजनाभावः। तत्पर्य्यायः। उपवस्तम् २। इत्यमरः॥ उपोषितम् ३ उपोषणम् ४ औपवस्तम् ५। इति तट्टीका॥ अस्य प्रमाणम्।

"उपाहृतस्य पापेभ्यो यस्तु वासो गुणैः सह।
उपवासः स विज्ञेयः सर्ब्बभोगविवर्জ্জितः"॥

अस्यार्थः। उपाहृतस्य निहृतस्य। पापेभ्यः पापकर्म्मभ्यः। गुणाः। सर्ब्बभूतेषु दया क्षान्तिः अनसूया शौचं अनायासः मङ्गलं अकार्पण्यं अस्पृहा च। सर्ब्बभोगविवर्জ্जितः शास्त्राननुमतत्वगीतादिसुखरहितः। वैधोपवासे भोजनचतुष्टयनिवृत्तिमाह महाभारते।

"सायमाद्यन्तयोरक्नोः सायं प्रातश्च मध्यमे।
उपवासत्रयं प्रेप्सोर्वर्জ্জ्यं भक्तचतुष्टयम्"॥

उपवासदिने वर्জ্জनीयानि। अञ्जनम्। रोचनम्। गन्धः। पुष्पम्। माल्यम्। अलङ्कारः। दन्तधावनम्। गात्राभ्यङ्गः। शिरोभ्यङ्गः। ताम्बूलम्। यच्चान्यत् बलरागकृत्। दिवास्वापः। अक्षक्रीड़ा। मैथुनम्। स्त्रीणां सरागसम्भोक्तृणस्पर्शः। व्रतादिषु पुत्रोत्पत्तिपर्य्यन्तं ऋतौ सक्तत् स्त्रीगमने न दोषः॥ तत्पूर्ब्बापरदिने वर्জ্জनीयानि। कांस्यपात्रे भोजनम्। मांसभोजनम्। सुरापानम्। मधुपानम्। लोभः। वितथभाषणम्। व्यायामः। व्यवायः दिवास्वापः। अञ्जनम्। पिण्याकभक्षणम्। मसूरभक्षणम्। पुनर्भोजनम्। अध्वगमनम्। यानम्। आयासः। द्यूतक्रीड़ा। अभ्यङ्गः। परान्नम्। तैलम्। चणकम्। कोरद्रूषकम्। शाकम्। अधिकक्षुतम्। अत्यम्बुपानम्। इति एकादशीतत्त्वम्॥ उपवासासामर्थ्ये प्रतिनिधिः। स्कन्दपुराणम्॥

"पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा।
एषामभाव एवान्यं ब्राह्मणं विनियोजयेत्"। इति।
"भार्य्या भर्त्तव्रतं कुर्य्यात् भार्य्यायाश्च पतिस्तथा।
असामर्थ्ये द्वयोस्ताभ्यां व्रतभङ्गो न जायते"॥

इति गरुड़पुराणम्॥ तदनुकल्पः।

"नक्तं हविष्यान्नमनोदनञ्च
फलं तिलाः क्षीरमथाम्बु चाज्यम्।
यत्यच्चगव्यं यदि वाथ वायुः
प्रशस्तमत्रोत्तरमुत्तरञ्च"॥

इति वायुपुराणम्॥

"उपवासासमर्थश्चेदेकं विप्रन्तु भोजयेत्।
तावद्वानानि वा दद्यादयद्भक्तद्वितुगं भवेत्॥
सहस्रसम्मितां देवीं जपेद्वा प्रागसंयमान्।
कुर्य्याद्वादशसंख्याकान् यथाशक्ति व्रते नरः"॥

इति ब्रह्मवैवर्त्तपुराणम्॥

"अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्"॥

इति बौधायनः॥

उपवासी, [न्] त्रि, (उपवासोऽस्यास्तीति। उपवास + इनि।) उपवाससयुक्तः। अहोरात्रभोजनाभावविशिष्टः॥

("विमानैर्हंससंयुक्तैर्यान्ति मासोपवासिनः"। इति महाभारते ३। मार्कण्डेयसमस्यापर्ब्बणि दानकथने। १९९। ५१॥

"दिवोपवासी तु निशामिषाशी
जटाधारः सन् कुलटाभिलाषी।
अयं कषायरसचारदण्डः
शठायतीः सर्पति विश्वभण्डः"॥

इति हास्यार्णवः॥)

उपवाह्यः, पुं, (उत्कृष्टो वाह्यः।) राजवाहकहस्ती। तत्पर्य्यायः। राजवाह्यः २। इति हेमचन्द्रः॥ (गजारोहणादिसम्मानयोग्यः। यथा, रामायणे। २। ४५। १६।

"धर्म्मतः स विशुद्धात्मा वीरः सुदृढ़व्रतः।
उपवाह्यस्तु वो भर्त्ता नापवाह्यः पुराद्दनम्"॥)

उपविषं, क्ली, (उपमितं विषेण।) कृत्रिमविषम्। तत्पर्य्यायः। वारं २। गरः ३। इति हेमचन्द्रः॥ (पुं, पारिभाषिकविषः। यथा,—

"अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका।
करवीरोऽथ धुस्तूरः पञ्च चोपविषाः स्मृताः"॥
केषाञ्चिन्मते सप्त उपविषाः। यथा,—
"अर्कसेऽङ्गधुस्तूरा लाङ्गली करवीरकः।
गुञ्जाहिफेनमित्येताः सप्तोपविषजातयः"॥

इति शार्ङ्गधरे मध्यखण्डे द्वादशाध्याये॥)

उपविषा, स्त्री, (विषमुपगता।) अतिविषा। इत्यमरः॥ आतैष इति भाषा। (अतिविषाशब्देऽस्या गुणादयोऽवगन्तव्याः॥)

उपविष्टः, त्रि, (उप + विश + क्त।) आसीनः। इति हेमचन्द्रः॥ वसा इति भाषा। (यथा, मार्कण्डेये देवीमाहात्म्ये। ८१। २८। "उपविष्टौ कथाः काश्चित् चक्रतुर्वैश्यपार्थिवौ"॥)

उपवीतं, क्ली, (उप + वि + इ + क्त।) वामस्कन्धार्पितं यज्ञसूत्रम्। यज्ञसूत्रमात्रम्। इत्यमरः॥ पैतर इति भाषा। (यदुक्तमुपनिषदि।

"ऊर्द्धन्तु चिरतं कार्य्यं तन्तुत्रयमधोरतम्।
चिरतञ्चोपवीतं स्यात् तस्यैको ग्रन्थिरिष्यते"॥

देवलश्चाह।

"यज्ञोपवीतकं कुर्य्यात् सूत्राणि नवतन्तवः"।

तदुभयमेव सर्ब्बदा धारणीयं उत्तरीयवस्त्राभावे तु तत्त्रितयं धारणीयम्। यदुक्तम्।

"यज्ञोपवीते द्वे धार्य्ये श्रौते स्मार्त्ते च कर्म्मणि।
तृतीयमुत्तरीयार्थं वस्त्रालाभेऽतिदिश्यते"॥

तत्सूत्रभेदञ्च मनुना वर्णभेदेन उक्तः। २। ४४। यथा,

"कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्"॥

यथा, माघे। १। ७।

"श्रुतोपवीतं हिमशुभ्रमुच्चकैः"।
"मुक्ताश्चयज्ञोपवीतानि बिभ्रतो हैमवस्त्राजाः"।

इति कुमारे। ६। ६॥)

उपवेदः, पुं, (उपमितो वेदेन।) प्रधानवेदातिरिक्तवेदः। स चतुर्विधः। आयुर्ब्बेदः १ धनुर्ब्बेदः २ गान्धर्ब्बवेदः ३ स्थापत्यवेदः ४। इति श्रीभागवतम्॥

उपवेशनं, क्ली, (उप + विश + ल्युट्।) स्थितिः। वैसन इति भाषा। अस्य गुणाः। मेदोदोषश्लेष्मसौकुमार्य्यसुखकारित्वम्। इति राजवल्लभः॥

उपव्याघ्रः, पुं, (उपमितो व्याघ्रेण।) चित्रकः। इति राजनिर्घण्टः॥ चितावाघ इति भाषा। (स्त्री, व्याघ्रस्य समीपे इति। शार्दूलसमीपम्॥)

उपशमः, पुं, (उप + शम् + घञ्।) शमता। तत्पर्य्यायः। शमः २ शान्तिः ३ शमथः ४ इत्यमरः॥ इति हेमचन्द्रः॥ (यथा, महाभारते १।

पौष्योपाख्याने। ३।१२०।"न हि मे मन्युरद्यापि उपशमं गच्छति"। तथा प्रबोधचन्द्रोदये। ५। १५। "तथायमपि कृतकर्त्तव्यः संप्रति परमामुपशमनिर्वृतिं प्राप्तः"॥)

उपशयः, पुं, (उप + शी + अच्।) निदानपञ्चकान्तर्गतरोगज्ञानजनकः। तस्य लक्षणम्।

"हेतुव्याधिविपर्य्यस्तविपर्य्यस्तार्थकारिणाम्। औषधान्नविहाराणामुपयोगं सुखावहम्॥ विद्यादुपशयं व्याधेः स हि साध्यमिति स्मृतः"। इति निदानम्॥ ("अस्मिन्नर्थे उपशयः पुनर्हेतुव्याधिविपरीतानां विपरीतार्थकारिणाञ्चौषधान्नविहाराणां उपयोगः सुखानुबन्धः"। इति चरके निदानस्थाने प्रथमोऽध्यायः॥)

उपशल्यं, क्ली, (उपगतं शल्यम्।) ग्रामप्रान्तभागः। तत्पर्य्यायः। ग्रामान्तम् २। इत्यमरः॥ (यथा, रघौ १५। ६०।

"उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ"॥ "भ्रमंश्च विधानोपशल्ये कमप्याक्रीड़मासाद्य"। इति दशकुमारे॥)

उपशायः, पुं, (उप + शी + घञ्।) पर्य्यायशयनार्थकः। प्रहरिकादीनां क्रमेण शयनम्। तत्पर्य्यायः। विशायः २। इत्यमरः॥

उपश्रुतं, त्रि, (उप + श्रु + क्त।) प्रतिश्रुतम्। अङ्गीकृतम्। इत्यमरः॥

उपश्रुतिः, स्त्री, (उपश्रूयते। उप + श्रु + क्तिन्।) दैवप्रश्नः। यथाह हारावली॥

"नक्षं निर्गत्य यत् किञ्चिच्छुभाशुभकरं वचः। श्रूयते तद्विदुर्धीरा दैवप्रश्नमुपश्रुतिम्"॥ (उप समीपे श्रुतिः श्रवणम्। समीपश्रवणम्। उपमिता श्रुत्या। वेदसदृशी श्रुतिसदृशत्वात् तथात्वम्॥)

उपस्तम्भकः, पुं, (उप + स्तन्भ + ण्वुल्।) व्याधिक्यम्। यथा। उच्चैःश्रवादीन् तेजोभागोपस्तम्भकतया प्रत्यक्षयोग्यत्वात्। इति बौद्धाधिकारचिन्तामणिः॥

उपसंग्रहः, पुं, (उपसंगृह्यते इति। उप + सम् + ग्रह + अप्।) पादस्पर्शपूर्ब्बकनमस्कारः। तत्पर्य्यायः। पादग्रहणम् २ अभिवादनम् ३। इति हेमचन्द्रः॥ (उपकरणम्। यथा, महाभारते ४। कीचकवधपर्ब्बणि। १६। १५।

"उपातिष्ठन्महाबाहुः पर्य्यङ्के सोपसंग्रहे"॥)

उपसंग्राह्यं, त्रि, (उपसंगृह्यते इति। उप + सम् + ग्रह + ण्यत्।) उपसंग्रहणीयम्। अभिवाद्यम्। पादे ग्रहीतव्यम्। इति हलायुधः॥ (यथा मनुः। २। १३२।

"भ्रातुर्भार्य्योपसंग्राह्या सवर्णाऽहन्यहन्यपि"॥)

उपसंव्यानं, क्ली, (उपसंवीयतेऽनेन। उप + सम् + व्ये + ल्युट् इति ल्युट्।) परिधानवस्त्रम्। इत्यमरः॥ (यथा मुग्धबोधे शब्दसंज्ञायाम्।

"बर्हिर्योगोपसंव्याने"॥)

उपसंहारः, पुं, (उपसंहरणम्। उप + सम् + हृ + घञ्।) अन्तः। शेषः। यथा।

"उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनाच्च"। इति सप्तमीप्रकरणे तिथ्यादितत्त्वलिखनम्॥ (एकत्रीकरणम्। सम्यगाहरणम्॥)

उपसत्तिः, स्त्री, (उप + सद् + क्तिन्।) सङ्गमात्रम्। प्रतिपादनम्। सेवा। इति हेमचन्द्रः॥

उपसद्, पुं, (उप + सद् + क्विप्।) अग्निविशेषः। यथा। वह्निपुराणे गणभेदनामाध्यायः॥

"गार्हपत्यो दक्षिणाग्निस्तथैवाहवनीयकः। एतेऽग्नयस्त्रयो मुख्या श्रेष्ठाश्चोपसदस्त्रयः"॥ (स्त्री, यज्ञभेदः। आश्वलायने ४।८।१"अथोपसद्भिः प्रचरति"। इति। समीपस्थिते व्याचलिङ्गः॥)

उपसदनं, क्ली, (सदनस्य गृहस्य समीपे। यद्वा, उप + सद + ल्युट्।) गृहसमीपम्। (यथा रामायणे १। ५०। १६।

"धन्योस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गव। यज्ञोपसदनं ब्रह्मन् प्राप्तोऽसि मुनिभिः सह"॥ उपसेवनम्। प्राप्तिः। यथा, महाभारते वनपर्ब्बणि।

"तत्रोपसदनं चक्रे द्रोणस्येष्वस्त्रकर्म्मणि"॥)

उपसन्नः, त्रि, (उप + सद् + क्त।) उपनतः। उपस्थितः। इति हेमचन्द्रः॥ (यथा, महाभारते १२। मोक्षधर्म्मपर्ब्बणि। २८७। ११।

"ब्रवीतु भगवांस्तत्त्वं उपसन्नोऽस्म्यधीहि भोः"॥)

उपसम्पन्नः, त्रि, (उप + सम् + पद् + क्त।) यज्ञार्थहतपशुः। तत्पर्य्यायः। प्रमीतः २ प्रोक्षितः ३। पाकेन रूपरसादिसम्पन्नद्रव्यञ्जनादिः। तत्पर्य्यायः। प्रणीतः २। इत्यमरः। पर्य्याप्तः। संस्कृतः। प्राप्तः। मृतः। इति हेमचन्द्रः॥ (यथा, मनुः। ५। ८९।

"श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत्"॥)

उपसरः, पुं, (उप + सृ + अप्।) स्त्रीगमनादिषु पुरुषादीनां प्रथमगर्भाधानाय मैथुनाभियोगः। तत्पर्य्यायः। प्रजनः २। इत्यमरः॥ (यथा, पाणिनिः ३। ३। ७१। "प्रजनने प्रथमगर्भग्रहणम गवामुपसरः"। निरवच्छेदगमनम्। यथा, भट्टिः। "वीनामुपसरं दृष्ट्वा"। अत्र जयमङ्गलस्त्वाह। "वीनां उपसरं नैरन्तर्य्येण निर्गमनम्"॥)

उपसर्गः, पुं, (उप + सृज् + घञ्।) रोगभेदः। (यथा, सुश्रुते। "स्त्रीणां हन्युश्चोपसर्गाः प्रभूताः"।) उपद्रवः। इति मेदिनी॥ (यथा, मार्कण्डेये ८२। ७।

"उपसर्गानशेषांस्तु महामारीसमुद्भवान्"।) धातोः पूर्ब्बवर्त्तिविंशतिसंख्यकप्राद्यवयम्। यथा। प्र। परा। अप। सम्। नि। अव। अनु। निर्। दुर्। वि। अधि। सु। उत्। परि। प्रति। अभि। अति। अपि। उप। आङ्। अस्य प्रमाणम्।

"निपाताश्चादयो ज्ञेयाः उपसर्गास्तु प्रादयः। द्योतकत्वात् क्रियायोगे लोकादवगता इमे"॥ स त्रिधा। "धात्वर्थं बाधते कश्चित्"। यथा आदत्ते। "कश्चित्तमनुवर्त्तते"। यथा प्रसूते। "तमेव विशिनष्ट्यन्यः"। यथा प्रणमति। "उपसर्गगतिस्त्रिधा"। अपि च।

"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। नीहाराहारसंहारप्रतीहारप्रहारवत्"॥

इति मुग्धबोधटीकायां दुर्गादासः॥

उपसर्ज्जनं, क्ली, (उप + सृज् + ल्युट्।) प्रधानभिन्नम्। तत्पर्य्यायः। अप्रधानम् २ अप्राग्र्यम् ३। इत्यमरः॥ (यथा, मनुः ९। २११।

"उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते"॥ (विशेषणम्। त्यागः। उपद्रवः। यथा अनध्यायप्रकरणे मनुः,—

"निर्घाते भूमिचलने ज्योतिषामुपसर्ज्जने"॥)

उपसर्पकः, त्रि, (उप + सृप् + ण्वुल्।) उपसर्पणकर्त्ता। उपासकः॥

उपसर्य्या, स्त्री, (उप + सृ + उपसर्य्या काल्या प्रजने इति साधुः।) प्राप्तगर्भग्रहणकाला गौः। ऋतुमती गौः। तत्पर्य्यायः। काल्या २। इत्यमरः॥ कालप्राप्ता ३ ह्रषरता ४। इति शब्दरत्नावली॥

उपसार्य्यः, त्रि, (उप + सृ + ण्यत्।) समीपगमनीयः। (यथा, पाणिनिः ३। १। १०४। "प्रजने काल्येति किम् उपासार्य्या काप्यीप्राप्या इत्यर्थः"॥)

उपसूर्य्यकं, क्ली, सूर्य्यमुपगतं उपसूर्य्यं स्वार्थे कन्। चन्द्रपक्षे उपसूर्य्यमिव उपसूर्य्यकं इवार्थे कन्॥ चन्द्रसूर्य्यमण्डलम्। इत्यमरः॥

उपस्कृतं, क्ली, (उपस्क्रियते स्म इति। उप + कृञ् + क्त।) मैथुनम्। इति त्रिकाण्डशेषः। उपसर्गग्रस्ते त्रि। तथा च याज्ञवल्क्यः।

"तेनोपस्कृतो लभते न राज्यं राजनन्दनः"॥ (ग्रहोपग्रस्तचन्द्रादिः। यथा मनुः,

"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन। नोपस्कृतं न वारिस्थं न मध्यं नभसोगतम्"॥ व्याप्तम्। यथा, रघुः "रोगोपस्कृततनुर्दुर्बसतिं मुमुक्षुः"॥)

उपस्करः, पुं, (उप + कृ + अप् समवाये चेति सुट्।) व्यञ्जनादिसंस्कारार्थधान्याकसर्षपपिप्पलीदिः। वेसार वाटना इत्यादि भाषा। तत्पर्य्यायः। वेसवारः २। इत्यमरः॥ (यथा रामायणे। २। ६५। ६।

"मङ्गलालम्भनीयानि प्राश्नीयान्युपस्करान्। उपानिन्युस्तथा पुण्याः कुमारीवृद्धलाः स्त्रियः"॥) गृहवासोपकरणम्। तच्च दृषदुपलमूर्षादि। कनककुण्डलहारादि। इति श्रीहेमन्तकालङ्कारः॥ तथा च याज्ञवल्क्यः।

"गृहोपस्करवास्त्यानां दोह्याभरणकर्म्मणाम्। मूल्यं लब्धन्तु यत्किञ्चित् सुल्कं तत्परिकीर्त्तितम्"॥ (तथा च मनुः। ३। ६८।

"पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करः"॥ "सञ्जोपस्करभेषजः"। इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशोऽध्यायः॥)

उपस्त्री, स्त्री, (उपमिता स्त्रिया।) उपपत्नी। ढेमिनी इति भाषा॥

उपस्थः, पुं, (उप + स्था + क।) लिङ्गम्। भगः। क्रोड़ः। इति मेदिनी॥ ("स्योपस्थउपाविशत्"। इति गीतायां १। ४६।) गुह्यद्वारम्। इति हेमचन्द्रः॥ (यथा, मनुः। ८। १२५।

"उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चकम्"॥) निकटे त्रि। इति शब्दरत्नावली॥

उपस्थाता, [ऋ] त्रि, (उप समीपे तिष्ठतीति । उप + स्था + तृच् ।) भृत्यः । "प्रेष्यो भृत्य उपस्थाता सेवकोऽभिसरोऽनुगः"। इति शब्दमाला ॥ (ऋत्विग्भेदे, पुं ॥
"भिषगुद्वर्य्यमुपस्थाता रोगी पादचतुष्टयम् ।
गुणवत् कारणं ज्ञेयं विकारस्योपशान्तये" ॥
इति चरके सूत्रस्थाने नवमोऽध्यायः ।)

उपस्थितः, त्रि, (उप समीपे तिष्ठति स्म । उप + स्था + क्त ।) समीपस्थितः । तत्पर्य्यायः । उपगतः २ उपसन्नः३ । इति हेमचन्द्रः ॥ (यथा, रघुवंशे १।८७।
"उपस्थितेयं कल्याणी मास्मि कीर्त्तित एव यत्" ।
"हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्" ।
इति च रघुः १ । ४५ ।) मृष्टः । शोधितः । इति जटाधरः ॥ (अनार्षः । यथा पाणिनिः । ६ । १ । १२६ ।
"अद्भुतवदुपस्थिते" अत्र सिद्धान्तकौमुदी । उपस्थितोऽनार्षः" । इति ॥)

उपस्पर्शः, पुं, (उप + स्पृश् + घञ् ।) स्पर्शमात्रम् । स्नानम् । आचमनम् । इति मेदिनी ॥

उपस्पर्शनं, क्ली, (उप + स्पृश् + ल्युट् ।) उपस्पर्शः । इति धरणिः ॥ (यथा रामायणे २ । २५ । २४ ।
"उपस्पर्शनकाले तु त्वां रक्षन्तु रघूत्तम !" ॥)

उपस्वत्वं, क्ली, (उपगतं स्वत्वम् ।) उत्पन्नम् । लभ्यम् । स्वत्वास्पदीभूतभूम्यादिलब्धधनादि ॥

उपहृतः, त्रि, (उप + हृ + क्त ।) गृहीतः । उत्पातग्रस्तः । अनुद्वहनीयम् ॥ ("करित्वयोपहृतं पृथक् जनम्" । इति किराते । "किमेभिराशोपहृतात्मवृत्तिभिः" । इति कुमारे । ५ । ७६ ॥)

उपहसितं, क्ली, (उप + हस् + क्त ।) हास्यभेदः इति । जटाधरः ॥ (यथा साहित्यदर्पणे ३य-परिच्छेदे २२८ ।
"ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च । नीचानामपहसितं तथातिहसितं च षड्भेदाः ॥ मधुरस्वरं विहसितं सांसश्रिरःकम्पमवहसितं । अपहसितं साश्रुं विच्छिन्नाङ्गं भवत्यतिहसितम्" ।) अपहसितमत्र उपहसितम् इत्यपि पाठः ॥

उपहारः, पुं, (उप + हृ + घञ् ।) उपढौकनद्रव्यम् । तत्पर्य्यायः । प्राभृतम् २ प्रदेशनम् ३ उपायनम् ४ उपग्राह्यः ५ उपदा ६ । इत्यमरः ॥ (यथा,—रघौ ४ । ८४ ।
"रत्नपुष्पोपहारेण क्षायमाणार्द्ध पादयोः" ।
"बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः" ।
इति मेघदूते पूर्ब्बमेघे ३३ श्लोकः । यथा,—कुमारे । ६ । ४२ ।
"ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम्" ॥
उपगतो हारं इति वाक्ये हारनिकटस्थद्रव्यम् । यथा,—नैषधे । १ । ४८ ॥
"उरोभुवा कुम्भयुगेन शम्भितं
नवोपहारेण वपुस्तृतेन किम्" ॥)

उपहारकः, पुं, कुन्तलदेशः । इति हेमचन्द्रः ॥

उपहासः, पुं, (उप + हस् + घञ् ।) परीहासः । निन्दार्थवाक्यादिः । विदूष ठाट्टा इत्यादि भाषा । "उपहासाय लिंग न स्यात असत्सङ्गो मनीषिणाम्" । इति मलमासतत्त्वम् ॥ (तथा, रघुः । १२ । ३७ ।
"फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य माम्" ॥)

उपाङ्करं, क्ली, (उपक्रियन्त्यत्र । उप + कृ + घञ् ।) निर्जनस्थानम् । (यथा ऋग्वेदे ८ । ६ । २८ । "उपाङ्करे गिरीणाम्" ।) निकटम् । इत्यमरः ॥
("ऊर्म्मिप्रवाहैर्जाङ्घाभ्याः समानीतमुपाङ्करम्" ।
इति महाभारते । ३ । कुण्डलाहरणपर्व्वणि ३०८ । ४ ॥
"सर्व्वानाहूय उपाङ्करे वैद्यान्" । इति हरिवंशे विष्णुपर्व्वणि ॥)

उपाङ्गः, पुं, (उप + कृ + घञ् ।) रथः । इत्युणादिकोषः ॥ (प्रान्तभागः । यथा ऋग्वेदे । १ । ८७ । २ ।
"उपाङ्गरेषु यदचिध्वं ययिं वय इव मरुतः केनचित्पथा" ॥)

उपांशुः, पुं, (उपगता अंशवो यत्र ।) जपभेदः । इति मेदिनी ॥
"जिह्वौष्ठौ चालयेत् किञ्चिद्देवतागतमानसः ।
निजश्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः" ॥
इत्यागमः ॥ (निगूढे वाच्यलिङ्गः । यथा, महाभारते । १ । ३ । १६ । "अस्य लोकमुपांशुव्रतं यदेनं कश्चित् ब्राह्मणः कञ्चिदर्थं अभियाचेत्तं तस्मै दद्यादयम्" ॥)

उपांशु, व्य, विजनम् । रहः । इत्यमरो मेदिनी च ॥ (यथा, रघुः ८ । १८ । "परिचेतुमुपांशु धारणां कुशपूतं प्रवयास्तु विस्रसम्" ॥)

उपाकरणं, क्ली, (उपाक्रियतेऽनेन । उप + आ + कृ + ल्युट् ।) संस्कारपूर्ब्बकश्रुतिग्रहणम् । इत्यमरः ॥ पशूनां संस्कारपूर्ब्बकहननम् । इति स्मृतिः ॥ (यथा, आश्वलायने १० । ४ । "उपाकरणकालेऽभ्यमानीय" ॥)

उपाकर्म्म, [न्] (क्ली, उपाक्रियतेऽनेन । उप + आ + कृ + मनिन् ।) उपाकरणम् । इत्यमरटीकायां रायमुकुटः ॥ (यथा मनुः । ४ । ११६ ।
"उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम्" ॥)

उपाकृतं, त्रि, (उप + आ + कृ + क्त ।) उपस्कृतम् । इति मेदिनी ॥

उपाकृतः, पुं, (उ + आ + कृ + क्त ।) यज्ञे अभिमन्त्र्य हतः पशुः । इत्यमरः ॥
("अनुपाकृतमांसानि देवान्नानि हवींषि च" ।
इति मनुः ।) उपद्रवः । इति हेमचन्द्रः ॥

उपाख्यानं, क्ली, (उप + आ + ख्या + ल्युट् ।) पूर्ब्बवृत्तान्तकथनम् । आख्यानम् । वर्णनम् । विशेषकथनम् । यथा,—
"सर्व्वाख्यानं श्रुतं ब्रह्मन् अतीवपरमाद्भुतम् ।
अधुना श्रोतुमिच्छामि दुर्गोपाख्यानमुत्तमम्" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४४ अध्यायः ॥
"शृणु नारद वक्ष्यामि स्वधोपाख्यानमुत्तमम्" ।
इति च तत्रैव ६८ अध्यायः ॥
("चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम् ।
उपाख्यानैर्विना तावत् भारतं प्रोच्यते बुधैः" ॥
इति महाभारते १ । १ । १०१ ॥)

उपागमः, पुं, (उप + आ + गम् + अप् ।) स्वीकारः । निकटगमनम् । इत्यजयः ॥

उपाग्रहणं, क्ली, (उप + आ + ग्रह् + ल्युट् ।) उपाकरणम् । संस्कारपूर्ब्बकवेदग्रहणम् । इत्यमरटीकायां रायमुकुटः ॥

उपाङ्कः, पुं, (उपमितं अङ्केन ।) तिलकम् । तत्पर्य्यायः । पत्रावली २ पत्रलेखा ३ पत्राङ्गुलिः ४ पुण्ड्रः ५ तमालपत्रकम् ६ चित्रकम् ७ । इति जटाधरः ॥ (पुराण-न्याय-मीमांसा-धर्म्मशास्त्राणि वेदस्य उपाङ्गानि ॥)

उपात्तं, त्रि, (उप + आ + दा + क्त ।) ग्राह्यम् । यथा,—
"क्षयं केचिदुपात्तस्य दुरितस्य प्रचक्षते ।
अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्यते ॥
नित्यक्रियां तथा चान्ये ह्यनुषङ्गफलां श्रुतिम्" ॥
इति प्रायश्चित्ततत्त्वीयजाबालभविष्यपुराणवचनम् ॥

उपात्तः, पुं, (उप समीपे आत्तः ।) निर्म्मदक्षत्री । इति हलायुधः ॥

उपात्ययः, पुं, (उप + अति + इ + अच् । उपगतस्य अत्ययः अतिक्रम्य गमनं वा ।) शास्त्रतो लोकव्यवहाराच्च अतिक्रमः । अतिक्रमः । क्रमोल्लङ्घनम् । दयोः पर्य्यायः । पर्य्यायः २ अतिपातः ३ । इत्यमरः ॥ (यथा पाणिनिः ३ । ३ । ३८ । "परावनुपात्यय इणः" ॥)

उपादानं, क्ली, (उप + आङ् + दा + ल्युट् ।) स्वविषयेभ्य इन्द्रियाकर्षणम् । तत्पर्य्यायः । प्रत्याहारः २ । इत्यमरः ॥ (ग्रहणम् । "स्यादात्मलाभेऽप्युपादानात् स्वीकारादानसत्त्वयोः" । इति साहित्यदर्पणे १० परिच्छेदः ॥) हेतुः । इति चिकित्साशेषः ॥ न्यायमते ॥ समवायिकारणम् । प्रवृत्तिजनकज्ञानञ्च ॥

उपादेयः, त्रि, (उप + आ + दा + यत् ।) ग्राह्यः । उत्तमः । उत्कृष्टः । इति वेदान्तः ॥
("भवे सौख्यं हित्वा श्रमसुखमुपादेयमनघम्" ।
इति शान्तिशतके । १ । २१ ।) विधेयकर्म्म । इति तिथितत्त्वम् ॥

उपाधिः, पुं, (उप + आ + धा + कि ।) धर्म्मचिन्ता । कुटुम्बव्यापृतः । इत्यमरः ॥ छलम् । (यथा रामायणे २ । १११ । २९ ।
"उपाधिर्न मया कार्य्यो वनवासे जुगुप्सितः" ।) विशेषणम् । इति मेदिनी ॥ ("पदार्थविभाजकोपाधिमत्त्वम्" । इति मुक्तावली । ८ ।) नामचिह्नम् । इति शब्दरत्नावली ॥ न्यायमते साध्यव्यापकत्वे सति हेतोरव्यापकः । यथा धूमवान् वह्निरित्यत्र आर्द्रकाष्ठं उपाधिः । अस्य प्रयोजनम् । अभिचारस्यानुमानम् । अलङ्कारमते जातिगुणक्रियायदृच्छाशब्दरूपः ॥

उपाध्यायः, पुं, (उपेत्य अधीयतेऽस्मात् । उप + अधि + इ + घञ् ।) अध्यापकः । इत्यमरः ॥ वेदैकदेशाध्यापकः । यथा,—
"एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः ।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते" ॥
इति भविष्ये २ अध्यायः ॥ मानवे २ । १४५ श्लोके च ॥

उपाध्याया, स्त्री, (उपेत्याधीयतेऽस्याः । इङ्धेति-सूत्रे अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा

ङीषिति घञ्। टाप्।) अध्यापिका। विद्योपदेशिनी। इत्यमरः॥

उपाध्यायानी, स्त्री, (उपाध्यायस्य पत्नी॥ "मातुलोपाध्याययोरानुक् वा" इत्यानुक्।) उपाध्यायपत्नी। इत्यमरः॥ (यथा महाभारते १ ३।६६। "स एवमुक्त उपाध्यायेनोपाध्यायानीमपृच्छत्"॥)

उपाध्यायी, स्त्री, (उपाध्यायस्य पत्नी। आनुगभावपक्षे ङिच्च्।) अध्यापकभार्य्या। इत्यमरः॥

उपानत्, [द्] स्त्री, (उपनह्यते पादावनया। उप+नह+क्विप्। "नहिवृतिवृषीति"। ७३।११६। पूर्व्वपदस्य दीर्घः।) चर्म्मादिनिर्म्मितपादकोषः। जुता इति भाषा। तत्पर्य्यायः। पादुका २ पादूः ३। इत्यमरः॥ पादव्यतिरेकेणात्मोपानद्वहननिषेधो यथा,—

"नात्तैः क्रीड़ेत् कदाचित्तु स्वयं नोपानहौ वहेत्। अश्नन्नश्नो न भुञ्जीत न पायित्र्यं न चासने"॥ इति मानवे ४। ७४॥ "ग्लहं विना कदाचिदपि परिहासेनापि नाक्षादिभिः क्रीड़ेत्। स्वयमित्यभिधानात् आत्मोपानहौ पादव्यतिरिक्तेन हस्तादिना देशान्तरं न नयेत्। अश्नन्नवस्थितश्च न भुञ्जीत हस्ते च प्रभूतमन्नं क्षत्वा क्रमेण न खादेत्। आसने भोजनपात्रं निधाय न भुञ्जीत। इति तट्टीकायां कुल्लूकभट्टः॥ (यथा नैषधे।१।१२३।

"क्षतावहोरस्य हयादुपानहौ"।

"अनारोग्यमनायुष्यं चक्षुषोरुपघातकृत्। पादाभ्यामनुपानद्भ्यां सदा चंक्रमणं त्यजाम्"॥ इति सुश्रुते चिकित्सितस्थाने २४ अध्यायः॥)

उपान्तः, त्रि, (उपगतोऽन्तात्।) निकटम्। इति हेमचन्द्रः॥ ("दिशामुपान्तेषु ससर्ज दृष्टिम्"। इति कुमारे ३।६६। "उपान्तवानीरमरुद्विघट्टितं दृढ़ा"। इति रघुः१६। २१। "ग्रथ्योपान्तनिविष्टसस्मितमुखी"। इति साहित्यदर्पणे ३य परिच्छेदे॥)

उपायः, पुं, (उपाय्यतेऽनेन। उप+अय+घञ्।) राजादीनां शत्रुवशीकरणहेतुचतुष्टयम्। यथा। साम १ दानम् २ भेदः ३ दण्डः। इत्यमरः॥ उपगतिः। इति मेदिनी॥ स्वार्थसम्पादकः। साधनम्। यथा,—

"उपायतः समारम्भाः सर्व्वे सिद्ध्यन्त्युपक्रमाः। उपायं पश्य येन त्वं धारयेथाः प्रजा नृप"॥ इति वह्निपुराणे पृथूपाख्याननामाध्यायः॥ ("उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः"। इति हितोपदेशे। तथा, माघः २।५४। "चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया"। "सर्व्वोपायैस्तथा कुर्य्यात् नीतिज्ञः पृथिवीपतिः"। इति मनुः ७।१७७। चेष्टा। यत्नः। "यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः"। इति मनुः ८।४८। "अध्ययनमध्यापनं तदिद्यासम्भावेत्युपायाः"। "उपायः पुनः कार्य्यादीनां सौष्ठवमभिधानं च सम्यक् कार्य्याकार्य्यफलानुबन्धवर्ज्यानां कार्य्यागामभिनिर्वर्त्तकः इष्टतोऽभ्युपायः क्षतेनोपायार्थोऽस्ति न च विद्यते तदत्वे कृताद्योत्तरकालं फलं फलस्यानुबन्ध इति ज्ञातं दशविधम्"। इति चरके विमानस्थाने ८ अध्यायः॥)

उपायनं क्ली, (उपेयते उपाय्यते वा। उप+इण वा अय+ल्युट्।) उपहारः। उपढौकनद्रव्यम्। इत्यमरः॥ (यथा, कुमारे। २। ३७। "तस्योपायनयोग्यानि रत्नानि सरितां पतिः"।) व्रतादिप्रतिष्ठा। इति स्मृतिः॥ समीपगमनम्॥ (यथा ऋग्वेदे २।२८।२। "उपायन उषसां गोमतीनाम्"॥)

उपार्ज्जनं, क्ली, (उप+अर्ज्ज+ल्युट्।) अर्ज्जनम्। धनाद्याहरणम्। (यथा, रामायणे। ५ काण्डे। "शस्त्राणां सरथानाञ्च कृत्वा सम्यगुपार्जनम्"।) "सत्यहेतुभूतव्यापारः"। इति स्मृतिः॥

उपालम्भः, पुं, (उप+आ+लभ्+घञ्। "उपसर्गात् खलघञोः" इति नुम्।) दुर्व्वाक्यम्। इति हलायुधः॥ स च गुणाविष्करणेन स्तुतिपूर्व्वकः। यथा, महाकुलस्य भवतः किमिदमुचितमिति। निन्दापूर्व्वकश्च। यथा बन्धकीसुतस्य भवतस्तदिदमुचितमिति भागुरिः। इत्यमरटीकासारसुन्दरी॥ ("उपालम्भो नाम हेतोर्दोषवचनं यथापूर्व्वमहेतवो हेत्वाभासा व्याख्याताः"। इति चरके विमानस्थाने ८ अध्यायः॥)

उपाहृतः, त्रि, (उप+आ+हृ+क्त।) अग्रग्रान्त्यर्थं पुनःपुनर्भौ लुठितास्यः। इत्यमरः। निकृत्तः। तथाचैकादशीतत्त्वे।

"उपाहृतस्य यत्पेयो यस्तु वासो गुणैः सह। उपवासः स विज्ञेयः सर्व्वभोगविवर्ज्जितः"॥

उपासकः, पुं, स्त्री, (उपास्ते सेवते यः। उप+आस्+ण्वुल्। द्विजातिसेवकत्वादस्य तथात्वम्।) शूद्रः। इति राजनिर्घण्टः॥

उपासकः, त्रि, (उपासते इति। उप+आस्+ण्वुल्।) उपासनाकर्त्ता। (यथा, वेदान्ते। "चिन्मयस्यादितीयस्य निष्कलस्याशरीरिणः। उपासकानां सिद्ध्यर्थं ब्रह्मणो रूपकल्पना"॥) स च पञ्चविधः। वैष्णवः १ शाक्तः २ शैवः ३ सौरः ४ गाणपत्यः ५। त्रिविधश्च यथा। दिव्यः १ वीरः २ पशुः ३। इत्यागमः॥ अपि च। सात्त्विकः १ राजसिकः २ तामसिकश्च ३॥

उपासङ्गः, पुं, (उपासज्यन्ते शरा अत्र। उप+आङ् सञ्ज+घञ्।) तूणीरः। इत्यमरः॥ (यथा, महाभारते ४। उत्तरस्य अस्त्रदर्शने ४०। ६। "इमे च कस्य नाराचा सहस्रं लोमवादिनः। समन्तात् कलधौताग्रा उपासङ्गे हिरण्मये"॥)

उपासनं, क्ली, (उपास्यन्ते क्षिप्यन्ते शरा अत्र। उप+आस क्षेपे+अधिकरणे ल्युट्। शुश्रूषादिपक्षे भावे+ल्युट्।) शरक्षेपस्थानम्। (यथा रामायणे। २। ६७। २१। "श्रूयते तत्र निर्घोष इष्वस्त्राणामुपासने"।) शुश्रूषा। इत्यमरः॥ ("नित्यनैमित्तिकप्रायश्चित्तोपासनेन"। "उपासनानि शाण्डिल्यविद्यादीनि"। इति च वेदान्तसारे।) विहिंसनम्। इति विश्वः॥ आसनम्। इति मेदिनी॥ ("मङ्गल्योपासनं शस्तं दृष्टिदं व्यसनापहम्"। इति चक्रपाणिदत्तद्रव्यगुणे गुणानां क्रियाभिधानादिवर्गे॥)

उपासना, स्त्री, (उपासनमिति। उप+आस+युच्+टाप्।) सेवा। तत्पर्य्यायः। परिचर्य्या २ शुश्रूषा ३ परिचर्य्या ४ उपासनम् ५। इत्यमरः॥ ("न विष्णूपासना मिथ्या वेदेनोक्ता तु कुत्रचित्। न विष्णुदीक्षा नित्यास्ति शिवस्यापि तथैव च॥ गायत्र्युपासना नित्या सर्व्ववेदैः समीरिता। यया विना त्वधःपातो ब्राह्मणस्यास्ति सर्व्वथा॥ तावता कृतकृत्यत्वं नान्यापेक्षा द्विजस्य हि। गायत्रीमात्रनिष्णातो द्विजो मोक्षमवाप्नुयात्॥ कुर्य्यादन्यन्न वा कुर्य्यात् इति प्राह मनुः स्वयम्। विहाय तान्तु गायत्रीं विष्णूपास्तिपरायणः॥ शिवोपास्तिरतो विप्रो नरकं याति सर्व्वथा। तस्मादाद्यगे राजन् गायत्रीजपतत्पराः॥ देवीपादाम्बुजरता आसन् सर्व्व द्विजोत्तमाः"॥ इति श्रीदेवीभागवतम्॥

सत्यपि ईश्वरे न हि तस्य सर्व्वैश्वर्य्यवत्त्वात् सर्व्वतः पूर्णकामत्वाच्च उपासनयालमिति वाच्यम्। यतः सर्व्वेषामपि भूतजातानामविदितात्मतत्त्वानामपि सुखोत्पत्त्यादिकारणे अलक्षितत्वेनापि प्रीतिरिति नैसर्गिकी वृत्तिरेव। परं यदि च रजस्तमोभ्यामन्धीभूतानां सुतरामात्मानात्मविवेकविहीनानामज्ञमनुष्याणामविद्याकामकर्म्मकलुषीकृते चित्ते नित्यमुक्तशुद्धबुद्धस्वभावः प्रशान्तविमलज्योतिःस्वरूपः स सर्व्वभूतान्तरात्मा न सम्यक् प्रतिभाति। तथा च आत्मस्वरूपमजानन्नपि सर्व्वोऽपि जनः स्वभावत्वेव परमप्रीत्यात्मानं भजते नोचेत् कथमात्मज्ञानविमूढ़ोऽपि अनेनैव मे श्रेयो भविता अस्मिन् कृतेऽहं सुखी भवेयम् इत्याकारेण सर्व्वथा आत्मसुखोत्पादनाय प्रयतते? तस्य सर्व्वान्तरात्मत्वात् सर्व्वैरपि जीवैः सह नित्यसम्बन्धवत्त्वाच्च। यद्यपि तस्मिन् नित्यानन्दस्वरूपे भगवति परमेश्वरे एकान्तप्रीतिकरणमेव तदुपासनं तथापि सर्व्वलोकमोहप्रदायिन्यां अज्ञानावरणकारिण्यामविद्यायां सत्यां कुतः सा सर्व्वसुखप्रदा तापत्रयच्छेत्री परमा प्रीतिरनुभवनीया? अतस्तस्या आत्मज्ञानविलोपिन्या मलिनसत्त्वगुणाया रजस्तमःप्रधानाया अविद्यायाः प्रणाशनार्थमेवावश्यमुपासना करणीयेति सर्व्वेषामपि शास्त्राणां सारमतमिति बोध्यम्। परन्तु सबलदुर्ब्बलाद्यधिकारिभेदेन उपासनाया अपि प्रभेदउपदिष्टस्तत्तदृषिभिः। यदि च मनुष्याणां निःश्रेयसार्थं बहवः पन्थानः स्वमतानुसारेण शास्त्रकृद्भिरुपदिष्टास्तत्रापि आत्मज्ञानमेवाविद्यानाशनायालमिति वेदान्त-भगवद्गीता-पातञ्जल-साङ्ख्यादिज्ञानशास्त्रोपदेष्टृणां प्रशस्तमतमित्येव दृश्यते। वस्तुतस्तु तज्ज्ञानमेव मुक्तेः साक्षात्कारणमित्त्र नैव केषाञ्चिदपि संशयावसरः। किन्तु नैव योगाभ्यासादृते प्रायेण तत्त्वज्ञान-

स्योत्पत्तिः। विशेषतः श्लोकमोहनिमित्तमाह अर्जुनाय स्वयं भगवता वासुदेवेनाप्युपदिष्टम्। यथा, भगवद्गीतायाम्। ६। ४५-४७।

"प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्म्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्জ্জুন!॥
योगिनामपि सर्ब्बेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः"॥

तथा च श्रीमद्भागवते। ३। २५। १३।

"क्षमातरं देवभूतिं प्रति कपिलोक्तिः। यथा,

"योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे।
अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य च"॥

योगाश्चापि क्रियाभक्तिज्ञानादिभेदेन बहुधा सन्ति तत्र प्रथमतः क्रियायोग एव तत्त्वज्ञानप्रेप्सुनाप्यविद्वया संसारासक्तमनसा समाचरणीयः॥ ननु "ज्ञानादृते मुक्तिर्नास्ति"। "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"। "विद्ययामृतमश्नुते"। इत्यादौ सति कथं क्रियायोगएवारभणीय इत्युपदिश्यते? इति चेत् सत्यम्। किन्तु लोके हि श्रद्धाभक्तितपस्यादिषु सात्त्विकराजसतामसादिप्रकृतिभेदात् तेषामविद्याविमोहितानां स्वस्वगुणानुसारिणीं प्रवृत्तिं विचार्य्य श्रोत्रियांस्तान् प्रत्यनुकम्पाविद्योत्याभिमानमोहरागद्वेषादिपरिहरणेन शनैः शनैः सत्त्वशोधनार्थं महात्मभिः शास्त्रकृद्भिरादौ क्रियायोगएव विहितः। कीदृशस्तेषां गुणानुसारिण्यः प्रवृत्तयस्तादृशीभिः प्रवृत्तिभिः समन्वितानां कार्य्यं वा किमिति चेत् अवधार्य्यताम्। यथा, भगवद्गीतायाम्। १७। ३—१३॥

"सत्त्वानुरूपा सर्ब्बस्य श्रद्धा भवति भारत!।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥
अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः॥
कर्षयन्तः शरीरस्थं भूतग्राममचेतसः।
मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान्॥
आहारस्त्वपि सर्ब्बस्य त्रिविधो भवति प्रियः।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु॥
आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः। [प्रियाः॥
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः।
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः॥
यातयामं गतरसं पूतिपर्य्युषितञ्च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥
अफलाकाङ्क्षिभिर्यज्ञो विधिदिष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥
अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ! तं यज्ञं विद्धि राजसम्॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते"॥

"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः"।

इत्यत्र "अतिशुष्कः कट्वादिषु सप्तस्वपि सम्बध्यते। तेन अतिकटुर्निम्बादिः अत्यम्लोऽतिलवणोऽत्युष्णश्च प्रसिद्धः अतितीक्ष्णो मरिचादिः अतिरूक्षः कङ्कोद्रवादिः अतिविदाही सर्षपादिः"॥ इति स्वामी। अमेध्यम् अपवित्रम्॥ यष्टव्यं यजनीयमर्चनीयमिति यावत्॥ फलमभिसन्धाय उद्दिश्य इज्यते यज्ञः क्रियते इत्यर्थः॥ ब्राह्मणादिभ्यो न दृष्टं दत्तमन्नं यदा न निष्पादितमन्नं भक्ष्यभोज्यादिकं यस्मिन् यज्ञे तम्। विधिहीनं शास्त्रोक्तविधिशून्यम्। अदत्तिणं दत्तिणारहितमिति॥

नन्वेवं चेत् तर्हि कीदृशोऽयमविद्वानुरुद्येः क्रियायोगस्तस्य सत्त्वशोधनार्थं इति जिज्ञासायां ब्रूमः॥ यथा, पातञ्जले।

"तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः"॥

तपः शास्त्रान्तरोपदिष्टं चान्द्रायणादि, स्वाध्यायः प्रणवपूर्ब्बाणां मन्त्राणां जपः। ईश्वरप्रणिधानं सर्ब्बक्रियाणां तस्मिन् परमगुरौ फलनिरपेक्षतया समर्पणम्। एतानि क्रियायोग उच्यते। इति राजमार्त्तण्डवृत्तिः।

यच्चापि चान्द्रायणादीति तपसोऽर्थो व्याख्यातः किन्तु शास्त्रान्तरे मतान्तरमपि दृश्यते तच्च कायिकादिभेदेन त्रिविधम्। यथा, भगवद्गीतायाम्। १७। १४—१६।

"देवद्विजगुरुप्राज्ञपूजनं शौचमार्জ্জवम्।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्।
स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते"॥

एतेषां तपसामपि त्रिगुणानुसारिप्रकृत्यादिभेदेन तपःकर्म्माण्यपि त्रिविधानि परिकीर्त्तितानि। तत्रैव। १७। १७—१९॥

"श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥
सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥
मूढग्राहेणात्मनो यत् पीड़या क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्"॥

अपि च अशेषतः कर्म्मणां त्यागः कर्त्तव्यः नित्यादिकं कर्त्तव्यं वेति ज्ञातसंशयमर्জ্জুनं प्रति भगवतोपदेशः। यथा, तत्रैव। १८। ३—१०॥

"त्याज्यं दोषवदित्येके कर्म्म प्राहुर्मनीषिणः।
यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम!।
त्यागो हि पुरुषव्याघ्र! त्रिविधः संप्रकीर्त्तितः॥
यज्ञदानतपःकर्म्म न त्याज्यं कार्य्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥
एतान्यपि तु कर्म्माणि सङ्गं त्यक्त्वा फलानि च।
कर्त्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम्॥
नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥
दुःखमित्येव यत्कर्म्म कायक्लेशभयात्त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥
कार्य्यमित्येव यत्कर्म्म नियतं क्रियतेऽर्জ্জुन!।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः॥
न द्वेष्ट्यकुशलं कर्म्म कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः"॥

कार्य्यमिति। कार्य्यं कर्त्तव्यं नियतं नित्यमित्यर्थः॥ फलतः न हि देहधारिणामशेषतः कर्म्मणस्त्यागः सम्भवेत् यथा, तत्रैव। १८। ११॥

"न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते"॥

परं अनिष्टादिफलमत्यागिनामेव न हि सन्न्यासिनां कदाचित् फलसम्बन्धः। तत्रैव। १८। १२॥

"अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्"॥

अतः काम्यानां कर्म्मणां परित्यागस्तथा सर्ब्बतः फलाभिसन्धानत्यागपूर्ब्बस्य ईश्वरार्पणपरस्य वा नित्यादेः कर्म्मणः करणमेव सत्त्वशोधनार्थं प्रशस्यते। यतः सर्ब्बत्र सात्त्विकज्ञानस्यैव संसारबन्धनच्छेत्तृत्वं राजसतामसयोस्तु भेदज्ञानत्वात् संकीर्णज्ञानत्वाच्च बन्धमोहकारित्वमेव दृश्यते यथा, तत्रैव। १८। २०-२२॥

"सर्ब्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥
पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्।
वेत्ति सर्ब्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥
यत् तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्"॥

सुतरां तेषां गुणभेदेन कर्म्माण्यपि पृथक्त्वेनोक्तानि। यथा, तत्रैव। १८। २३-२५॥

"नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म्म यत्तत्सात्त्विकमुच्यते॥
यत्तु कामेप्सुना कर्म्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम्॥
अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म्म यत्तत् तामसमुच्यते"॥

कर्त्तारोऽपि त्रिविधाः। तत्रैव। १८। २६-२८॥

"मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्व्विकारः कर्त्ता सात्त्विक उच्यते॥
रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः॥
अयुक्तः प्राकृतस्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते"॥

एवं सति सर्ब्वत्र हि विशुद्धसत्त्वगुणस्यैव ब्रह्मसिद्धये कारणत्वं बोध्यते। विशुद्धसत्त्वाश्रयी साधको हि शनैः शनैः भक्त्यात्मकस्य क्रियात्मकादेर्वा योगादेर्निरन्तराभ्यासबलात् आदिपदेनाच केवलं विद्याबलाद् वेति सूच्यते। निष्कामः सन् सत्त्वोद्रेकेणान्तःकरणस्यानि सर्ब्वाणि पापानि सन्दह्य तत्त्वज्ञानं प्राप्नुयात्। ततस्तज्ज्ञानेनात्मसाक्षात्कारं लब्ध्वा जीवन्मुक्तो भवेत्। ततः कैवल्यं प्राप्य नित्यानन्दमयो भवेत्।

अतएव सर्व्वमङ्गलोपायीभूतस्य सत्त्वगुणस्योद्रेकाय दुर्ब्बलाधिकारिभिः प्रथमं निष्कामेणान्तःकरणेन क्रियायोगादिरूपेश्वरोपासना कार्य्येति लक्ष्यते न हि सत्त्वभावेन परमेश्वरोपासनामृते रजस्तमोभावाः केनापि विलापयितुं शक्येरन्। तदभावे नितरां विशुद्धसत्त्वगुणोद्रेकाशा सुदूरपराहतैव। प्रबलरजस्तमोभ्यामस्याभिभूतत्वात्। एवं सति सर्व्वतः सात्त्विकाहारः सात्त्विकानुष्ठानं सात्त्विकावरणामित्यादिसत्त्वभावाश्रयेण क्रमशः रजस्तमोभावं विलापयन् कैवल्याकाङ्क्षी परामात्मसाक्षात्काराभिलाषी वा साधकः कालेन परमसिद्धिं ध्रुवमाप्नुयादेव। परन्तु दुर्ब्बलाधिकारिणा प्रथमतश्चित्तस्य स्थिरत्वापादनाय काचित् स्वाभीष्टां भागवतीं मूर्त्तिमालम्बैवोपासना कर्त्तव्या अन्यथा तेषां सर्व्वरूपाद्युपाधिपरिवर्जिते निर्व्विकारे निरञ्जने गुणातीतेऽवाङ्मनसगोचरे परब्रह्मणि चित्तधारणा विडम्बनैव। परन्त्वित्यत्र न हि ईश्वरोपासनामुपलक्षीकृत्य कथं पौत्तलिकाडम्बरं प्रतिपादयितुं प्रयतसे इति वाच्यम् महात्मभिर्ब्रह्मविद्भिः पूर्ब्बाचार्य्यैर्हि कलुषितचित्तानां दुर्ब्बलाधिकारिणाम् चित्तशुद्धौ प्रथमतश्चित्तस्थैर्य्यसम्पादनाय धारणाध्यानावलम्बनरूपायां प्रतिमायामुपासनायाः कर्त्तव्यतयोपदिष्टत्वात्। अयमर्थः यावत् न सत्त्वोद्रेकेण चित्तशुद्धिर्भवेत् यावन्न स्वहृदये निर्गुणपरमात्मधारणया समाधिशक्तिर्भवेत् यावन्न तत्कथादिषु दृढ़ाभक्तिः रतिश्च भवेत् तावदर्चादौ आदिपदेनाच सूर्य्ये वह्नौ जले अभीष्टमूर्त्तौ वा उपासना कर्त्तव्येत्यर्थः। परमेवं मा मन्यध्वं यत् केवलं मच्छिलादिनिर्म्मितप्रतिमूर्त्तिमाश्रित्यैव यावज्जीवं स्थूलोपासना कर्त्तव्येति॥ "आसत्वशोधनात् क्रमेण स्वहृदये दृढ़तरधारणाध्यानप्रभावेन आचित्तसमाधानाच्च"। इति कालनिर्द्देशात्। ततश्च आदौ नित्याद्यवश्यकर्म्म करणीयमेव। इदं कर्म्मणैव हि बहवः सिद्धिं गताः तथा हि भगवद्गीतायाम्। ३। १९-२०॥

"तस्मादसक्तः सततं कार्य्यं कर्म्म समाचर।
असक्तो ह्याचरन् कर्म्म परमाप्नोति पूरुषः॥
कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः"॥

यदा तु रजस्तमोभावानां निवृत्तौ सत्यां बहुजन्मार्ज्जितसौभाग्यवशात् तस्मिन्नेव ऐकान्तिकी रतिरुत्पद्यते तादृशस्यात्मरतेरात्मक्रीड़स्य योगिनः न तदा किञ्चिदपि कर्म्मणा प्रयोजनमस्ति यथा तत्रैव। ३। १७-१८॥

"यस्त्वात्मरतिरेव स्यादात्मक्रीड़श्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यते॥
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
न चास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः"॥

एवं प्राप्तविद्योऽपि साधारणवत् कर्म्माचरेत् चेत् तत्तु केवलं लोकशिक्षार्थमेव न तु तस्य स्वाभीष्टसिद्धये अविद्याकामकर्म्माद्यभावात् सुखदुःखादिद्वन्द्वनिर्म्मुक्तत्वाच्च।

यथा तत्रैव ३। २१,२५ श्लोके।

"यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते॥
सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत!।
कुर्य्याद् विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्"॥

किन्तु यावदस्मिन् विधातुके श्लेष्मितशुक्रपरिणामपिण्डे शरीरे कर्त्तृत्वाद्यभिमानवान् तावत् "ब्रह्मज्ञोऽस्मि अलं मे कर्म्मणा" इत्येवं मौढ्यात् संसारासक्तोऽतत्त्वज्ञपुरुषः कर्त्तव्यं कर्म्म परित्यजति चेत् उभयतो भ्रश्यत एव। तथाहि योगवाशिष्ठे मोक्षप्रकरणे ७४। ४१।

"संसारविषयासक्तो ब्रह्मज्ञोऽस्मीति वादिनः।
कर्म्मब्रह्मोभयभ्रष्टस्त्यजेदन्त्यज यथा"॥

अतएव कर्म्मत्यागे प्रायशो दोषश्रवणं न तु क्वचित् विधिर्लक्ष्यते यतो विद्योदये तत्त्वज्ञानी विधिनिषेधसापेक्षो भवितुं नार्हति सर्व्ववासनाकामकर्म्ममय्यविद्याभावात् न हि विधिनिषेधाभ्यां सह विदुषः कोऽपि सम्बन्धः। किन्तु अदूरदर्शिनो मन्दस्य तत्त्वज्ञानोपदेशेन कर्म्मानुष्ठानाद् बुद्धिभेदो न कर्त्तव्य इत्यादिशति भगवान् वासुदेवः। यथा भगवद्गीतायां ३। २६, २९॥

"न बुद्धिभेदं जनयेदज्ञानां कर्म्मसङ्गिनाम्।
योजयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन्"॥
"प्रकृतेर्गुणसंमूढ़ाः सज्जन्ते गुणकर्म्मसु।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्"॥

भवतु अलं बहुना वाग्जालेन। योऽस्य विश्वस्य आकाशवत् सर्व्वदा सर्व्वत्र ओतप्रोतरूपेण अन्तर्बहिर्विराजते तस्य सर्व्वव्यापिनः सर्व्वान्तर्यामिनः परमपुरुषस्य स्वरूपभावे यावन्न साधकस्य स्वहृदये धारणाध्यानादिभिः स्थैर्य्यमापद्यते तावदर्चादावेवोपासना कार्य्या दुर्ब्बलाधिकारिणेत्येव निष्कर्षः॥ तथा हि कुलार्णवतन्त्रे ६ उल्लासे।

"चिन्मयस्याप्रमेयस्य निर्गुणस्याशरीरिणः।
साधकानां हितार्थाय ब्रह्मणो रूपकल्पना॥
अरूपं रूपिणं कृत्वा कर्म्मकाण्डरता नराः।
ब्रह्मज्ञानमतानन्दपराः सुकृतिनो नराः"॥

किञ्च तत्रैव ९ उल्लासे।

"निर्व्विशेषं परं ब्रह्म साक्षात् कर्त्तुमनीश्वराः।
ये मन्दास्तेऽनुकल्प्यन्ते सविशेषनिरूपणैः"॥

अधिकारिभेदेनालम्बनीयोपास्यदेवस्यापि भेदः प्रदर्शितः। यथा। तत्रैव ६ उल्लासे।

"अग्नौ तिष्ठति विप्राणां हृदि देवो मनीषिणाम्।
प्रतिमास्वल्पबुद्धीनां सर्व्वत्र विदितात्मनाम्"॥

अपि च कति दिनानि यावत् कर्म्माणि कर्त्तव्यानि अर्थाद्यधिष्ठानेऽर्चनं वा कर्त्तव्यमिति विवित्सायां मूढ़ान् प्रत्यनुकम्प्य तत्प्युपदिदिक्षुः पूर्ब्बाचार्य्याः। यथा भागवते ११। २०। ९॥

"तावत्कर्म्माणि कुर्व्वीत न निर्व्विद्येत यावता।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते"॥

तथा, तत्रैव ३। २९। २५॥

"अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्म्मकृत्।
यावन्न वेद स्वहृदि सर्व्वभूतेष्ववस्थितम्"॥

ननु निःश्रेयसार्थिनां साधकानां यदि प्रथमतः क्रियायोगरूप कर्त्तव्यः तर्हि अलं प्रमाणशतविस्तारेण तच्च परम्परा कर्त्तव्यमेव विधीयतामिति चेत् अवधेहि यत्पथावलम्बनेन सत्त्वे शोधिते सति दुर्ब्बलाधिकार्य्यपि सत्वरं सबलाधिकारित्वं याति। यथा, भागवते ३। २८। १-५।

श्रीभगवानुवाच। (कपिलदेवः।)

"योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे।
मनो येनैव विधिना प्रसन्नं याति सत्पथम्॥
स्वधर्म्माचरणं शक्त्या विधर्म्माच्च निवर्त्तनम्।
दैवाल्लब्धेन सन्तोष आत्मविचरणार्चनम्॥
ग्राम्यधर्म्मनिवृत्तिश्च मोक्षधर्म्मरतिस्तथा।
मितमेध्याद्यनं श्रश्वद् विविक्तक्षेमसेवनम्॥
अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः।
ब्रह्मचर्य्यं तपः शौचं स्वाध्यायः पुरुषार्चनम्॥
मौनं सदासनजयः स्थैर्य्यं प्राणजयः शनैः।
प्रत्याहारश्चेन्द्रियाणां विषयान्मनसा हृदि"॥

सबीजस्य सकारणस्य योगस्य इत्यर्थः॥ विधर्म्मालोकानिष्टकारित्वादिविरुद्धधर्म्मात्॥ दैवाल्लब्धेन प्रारब्धलब्धेन॥ आत्मविदिति। आत्मतत्त्वज्ञानिनां चरणसेवनम्॥ ग्राम्यधर्म्मेति मोक्षपथं विहाय धर्म्मार्थकामादयः ग्राम्यधर्म्मत्वेनोच्यन्ते अतएव ग्राम्यधर्म्मस्त्रैवर्गिकधर्म्मस्तन्निवृत्तिः॥ मितमिति मितं स्वल्पं मेध्यादनं पवित्रद्रव्यभोजनम् विविक्ते निर्जने क्षेमस्य मङ्गलस्य सेवनम्॥ अस्तेयमचौर्य्यम्॥ यावदर्थपरिग्रह इति। यावतार्थेन जीवेत तावन्मात्रस्य परिग्रहः॥ ब्रह्मचर्य्यं योषित्सङ्गराहित्यम्॥ स्वाध्याय इति स्वाध्यायः जपाध्ययनादिः॥ पुरुषार्चनं परमपुरुषस्य उपासनम्॥ मौनमिति मौनं मुनेर्व्रताचरणं मननशीलत्वं वाचां संयमत्वं वा॥ आसनानां स्वस्तिकादीनां विजयः॥ स्थैर्य्यं दीर्घकालमवस्थातुं शक्तिः॥ प्राणजयः प्राणायामैः प्राणनिरोधकरणसामर्थ्यम्॥ प्रत्याहारेति॥ मनसा सह इन्द्रियाणां शब्दस्पर्शादिविषयात् हृदि हृदये प्रत्याहारः प्रत्याकर्षणम्॥ तत्रैव। ३। २८। ६-९॥

"स्वाधिष्ठानामेकदेशे मनसा प्राणधारणम्।
वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः॥
एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथम्।
बुद्धा युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः॥
शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम्।
तस्मिन् स्वस्तिसमासीनः ऋजुकायः समभ्यसेत्॥
प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः।
प्रतिकूलेन वा चित्तं यथास्थिरमचञ्चलम्"॥

स्वाधिष्ठानामिति। मूलाधारादिचक्राणामेकस्मिन् स्थाने मनसा सह प्राणानां धारणम्॥ वैकुण्ठेति। वैकुण्ठस्याकुण्ठितस्य सुखदुःखादिभिरपरामृष्टस्य परमपुरुषस्य लीलाभिध्यानं रूपादिध्यापारसमालोचनम्। आत्मनो मनसः समाधानमैकाग्र्यसाधनम्॥ जितप्राणो निरुद्धप्राणवृत्तिः। अतन्द्रितः निरलसः॥ विजितासनः वशीकृतकरचरणादिसंस्थानविशेषः॥ प्राणस्येति।

प्रतिकूलेन विपर्य्ययक्रमेण वा चित्तं यथा येन प्रकारेण स्थिरमचञ्चलं चाञ्चल्यरहितं स्यात् तथा प्राणमार्गं शोधयेदित्यर्थः॥ तेन किं स्यादित्यत आह। तत्रैव ३।२।१०॥

"मनोऽचिरात् स्यादिरजं जितश्वासस्य योगिनः।
वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम्"॥

निरुद्धप्राणदोषस्य योगिनः मनोऽचिरात् वञ्चिता-पितलोहवत् अविद्याकामकर्म्मजनितमलं विषय-सङ्गजनितपापनिचयमित्यर्थः विहाय विरजं निर्म्मलं स्यात्। इदानीं पूर्व्वोपदिष्टप्राणायामादिना केन कार्य्येण किं फलं स्यात् तत्सर्व्वं क्रमेण सुयुक्तं बोधयति। तत्रैव ३।२८।११-१२॥

"प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान्।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान्॥
यदा मनः स्वं विरजं योगेन सुसमाहितम्।
काष्ठां भगवतो ध्यायेत् स्वनासाग्रावलोकनः"॥

प्राणायामदारा वातपित्तश्लेष्मादिदोषान् धारणया पापानि प्रत्याहारेण इन्द्रियाकर्षणेन विषय-संसर्गान् ध्यानेन अनीश्वरान् शोकमोहाभि-मानदम्भक्रोधमात्सर्य्यादिदोषान् दहेदित्यन्वयः। अनेन विधिना यदा मनः स्थिरतां याति तदा यु-ञ्जानो योगी प्रथमे धारणालम्बनस्वरूपां भगवतः काञ्चित् स्वाभीष्टां मूर्त्तिं ध्यायेदित्युपदिदेश भग-वान् कपिलदेवः॥ इदानीं ध्येयमूर्त्तिं विवृणोति। यथा, तत्रैव ३।२८।१३—१९॥

"प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणम्।
नीलोत्पलदलश्यामं शङ्खचक्रगदाधरम्॥
लसत्पङ्कजकिञ्जल्कपीतकौशेयवाससम्।
श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम्॥
मत्तद्विरेफकलया परीतं वनमालया।
परार्थ्यहारवलयकिरीटाङ्गदनूपुरम्॥
काञ्चीगुणोल्लसच्छ्रोणिं हृदयाम्भोजविष्टरम्।
दर्शनीयतमं शान्तम् मनोनयनवर्द्धनम्॥
अपीव्यदर्शनं शश्वत् सर्व्वलोकनमस्कृतम्।
सन्तं वयसि कैशोरे भृत्यानुग्रहकातरम्॥
कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्करम्।
ध्यायेद्देवं समग्राङ्गं यावन्न च्यवते मनः॥
स्मितं व्रजन्तमासीनं शृण्वानं वा गुहाशयम्।
प्रेक्षणीये हि तं ध्यायेत् शुद्धभावेन चेतसा"॥

ध्येयमूर्त्तेः सकाशात् मनो यावत् विषयान्तरं न याति तावद्ध्यायेदितिभावः। गुहाशयं बुद्धितत्त्वे विराजमानं एवं निरन्तरध्यानेन साधकस्य चित्तं यदा भगवद्रूपे लब्धपदं भवेत् तदा चित्तस्य शनैः शनैः सौष्ठवकरणाय मूर्त्तिं हापयित्वा भगवतस्व-रूपारविन्दादीन्येकैकाङ्गानि ततः सामरणान्य-स्त्राणि ततो विलासहासादीनि च क्रमेण यथा-विधि ध्यातुमुपदिष्टवान् कपिलः॥ ततः किमि-त्याह। एवं चिरं ध्यात्वा योगी बहुजन्मार्जित-सौभाग्यवशात् यदि हरौ प्राप्तभावो भक्त्या हृद-यहृदय आनन्दाश्रुभिः भासमानो भवेत् तर्हि तस्मिन् मूले भगवद्रूपे वह्निशुद्धवत् संलग्नं चित्तं निर्गुणस्य परब्रह्मणः स्वरूपलाभार्थं तस्मादङ्गादिस्थूलरूपाद् वियोज्य निरालम्बनं निर्व्विषयं कृत्वा उपरत-गुणप्रवाहः सन् धारणध्येयादिज्ञानाभावात् सर्व्वो-पाधिपरिवर्ज्जितमेकमेवाद्वितीयमात्मानं पश्यत्येव। यथा तत्रैव ३।२८।३४-३५॥

"एवं हरौ भगवति प्रतिलब्धभावो
भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात्।
औत्कण्ठ्यबाष्पकलया मुहुरर्द्यमान-
स्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते॥
मुक्ताश्रयं यर्हि हि निर्व्विषयं विरक्तं
निर्व्वाणमृच्छति मनः सहसा यथार्चिः।
आत्मानमत्र पुरुषोऽव्यवधानमेक-
मन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः"॥

ननु सुचिरं साधनेन लब्धेऽप्यात्मनि किमायातं। किन्तु भ्रम एवेति चेत् न यतोऽनेकजन्मसाधन-बलात् यदाऽखण्डमात्मानं ईक्षते स योगी सुख-दुःखादिकं सर्व्वमहङ्कारनिष्ठं पश्यति तदा देहा-द्युपाधिनिर्म्मुक्तो जीवन्मुक्तो भवेत्। यथा तत्रैव ३।२८।३६—३७॥

"सोऽप्येतया चरमया मनसो निवृत्त्या
तस्मिन् महिम्न्यवसितः सुखदुःखबाह्ये।
हेतुत्वमस्यति कर्त्तरि दुःखयोर्यत्
स्वात्मन् विधत्त उपलब्धपरात्मकाष्ठः॥
देहञ्च तं न चरमः स्थितमुत्थितं वा
सिद्धो विपश्यति यतोऽध्यगमत् स्वरूपम्।
दैवादुपेतमथ दैववशादपेतं
वासो यथा परिकृतं मदिरामदान्धः"॥

जीवन्मुक्तस्य देहाद्युपाधिवर्गस्य निवृत्तौ तत्र मनः-संयोगाभावात् कथं देहादेर्वर्त्तनमिति शङ्कयन् स्वारब्धकं प्रारब्धवोऽभेवेत्यर्थः देहादेः स्थिति-कारणमित्याह। तत्रैव ३।२८।३८॥

"देहोऽपि दैववशगः खलु कर्म्म यावत्
स्वारम्भकं प्रतिसमीक्षत एव सासुः।
तं सप्रपञ्चमधिरूढसमाधियोगः
स्वप्नं पुनर्न भजते प्रतिबुद्धवस्तुः"॥

ननु यदि परब्रह्मलाभायात्मसाक्षात्कारात्तमेव चरमं देहं मन्यसे तर्हि विद्यैव सुगमोपायः श्रूयते तस्मिन् सति कथं वृथा कर्म्माड़म्बरे प्रवर्त्तयसे इति चेत् न कर्म्मविद्ययोरधिकारिभेदात् आदा-वीश्वरार्पितकर्म्मणा निष्कामकर्म्मणा वा चित्त-शुद्धिं विना कुतो विद्यायामधिकारः। इत्यधि-कारिभेदमुद्दिश्य ज्ञानकर्म्मणोः पृथक् प्रदर्शनेऽपि तत्त्वज्ञानमुपदिशन्तं भगवन्तं वासुदेवं एकवान् जातसंशयोऽर्जुनः। यथा गीतायां ३।१-२।

"ज्यायसी चेत् कर्म्मणस्ते मता बुद्धिर्जनार्दन।
तत्किं कर्म्मणि घोरे मां नियोजयसि केशव॥
व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्"॥

हे जनार्दन! चेद्यदि ते कर्म्मणः सकाशात् बुद्धिर्बोधः ज्ञानमिति यावत् ज्यायसी गरीयसी मता तर्हि कथं मां घोरे कर्म्मणि नियोजयसीत्यन्वयः। व्यामिश्रेण ज्ञानकर्म्मयोर्मिश्रीभूतेन वाक्येन कथं मे बुद्धिं मोहयसीव। इत्येवं विवि-त्सोरर्জুनस्य संशयं निराकुर्व्वन्नाह भगवान् वासु-देवः। तत्रैव ३।३-४॥

"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ!।
ज्ञानयोगेन साङ्ख्यानां कर्म्मयोगेन योगिनाम्॥
न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति"॥

"अतः सम्यक्चित्तशुद्ध्यर्थं ज्ञानोत्पत्तिपर्य्यन्तं वर्णाश्रमोचितानि कर्म्माणि कर्त्तव्यानि अन्यथा चित्तशुद्धभावेन ज्ञानानुत्पत्तेरित्याह न कर्म्मणा-मिति। कर्म्मणां अनारम्भात् अननुष्ठानात् नै-ष्कर्म्म्यं ज्ञानं नाश्नुते न प्राप्नोति। ननु "चेतसेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इति श्रुत्या संन्यासस्य मोक्षाङ्गत्वं तर्हि संन्यासादेव मोक्षो भविष्यति किं कर्म्मभिरित्याशङ्क्योक्तं न चेति। नच चित्तशुद्धिं विना ज्ञानात् संन्यसनादेव ज्ञानशून्यात् सिद्धिं मोक्षं समधिगच्छति प्राप्नोति इति तट्टी-काकृत् पूज्यपादश्रीधरस्वामी।

ननु कामं ईश्वरार्पितेन निष्कामकर्म्मणा चित्त-शुद्धिः प्रजायते ततो ज्ञानं लब्ध्वा मोक्षमाप्नुयात् किन्तु भक्तिबलेनापि सत्त्वं संशोध्याचिरादेवा-विद्याबन्धनात् मुक्तो भवेदित्यपि बहुषु शास्त्रेषु दृश्यते। सर्व्वेभ्यो हि भक्तिमाहात्म्यस्याधिक्यं प्रद-र्शितं महात्मभिरतो बहुप्रयाससाध्यं कर्म्माड़म्बरं विहाय भक्तिपथाश्रयएव गरीयान्निश्रेयसार्थ-मिति चेन्न तदप्यधिकारिभेदेनोक्तत्वात् अर्चा-दावर्चनादिक्रियायोगसाध्यत्वाच्च। किञ्च पुरुषाणां निश्रेयसाय शास्त्रविहितमार्गत्रयं मुक्त्वा नह्यपरः पन्थाः क्वापि दृश्यते श्रूयते वा। तथाहि श्रीमद्भा-गवते ११।२०।६-८। तत्त्वजिज्ञासमुद्धवं प्रति-यथोक्तवान् भगवान् वासुदेवः।

"योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।
ज्ञानं कर्म्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्॥
निर्व्विण्णानां ज्ञानयोगो न्यासिनामिह कर्म्मसु।
तेष्वनिर्व्विण्णचित्तानां कर्म्मयोगस्तु कामिनाम्॥
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः"॥
यदृच्छया दैवगत्या। न निर्व्विण्णो न प्राप्तनिर्व्वेदः।

अतः सर्व्वत्रैव भिन्नभिन्नाधिकारमपेक्ष्य ज्ञान-कर्म्मभक्तियोगादयो विहिताः। यथा तत्रैव ११ स्क० २० अध्याये २६॥

"स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्त्तितः।
कर्म्मणां जात्यशुद्धानां अनेन नियमः कृतः"॥

यथा तत्त्वज्ञानार्थी निःशेषसात्त्विककर्त्ता प्रथ-मतः केवलं अविद्याकर्म्मनिर्हारादीनुद्दिश्य निष्का-मकर्म्मानुष्ठानमाचरति न तु तदिक्तविशुद्धसत्त्वो-ऽधिरूढयोगो योगीव सहसा भेदबुद्ध्यादिकं परि-हातुमर्हति तथा प्रथमं सगुणभक्तियोगाश्रयिणो-ऽपि न हि युगपत् भगवत्स्वरूपतत्त्वज्ञा निर्गुण-भक्ता इव भगवत्प्रतिमाद्यर्चनादिक्रियायोगं परि-त्यक्तुं समर्था भवेयुः किन्तु तादृशेन सगुणभक्ति-योगावलम्बिना दुर्ब्बलाधिकारिणा भगवत्प्रतिमा-पूजादिकर्म्मयोगएव कर्त्तव्यः इत्येतदविहितं

शास्त्रबुद्धिः।

अथ यथाशास्त्रं निकृष्टसात्त्विककर्त्तुर्भेदबुद्धिं प्रदर्श्य दुर्ब्बलाधिकारिणो भक्तियोगावलम्बिनः कर्त्तव्यमपि प्रदर्शयामः। यथा भागवते ३।२९।१०।

"कर्म्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्।
यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः"॥

दुर्ब्बलभक्तियोगाधिकारिकर्त्तव्यता च तत्रैव। ११।११। ३४-४२।

"मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम्।
परिचर्य्या स्तुतिः प्रह्वगुणकर्म्मानुकीर्त्तनम्॥
मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव।
सर्व्वलाभोपहरणं दास्येनात्मनिवेदनम्॥
मज्जन्मकर्म्मकथनं मम पर्व्वानुमोदनम्।
गीत-ताण्डव-वादित्र-गोष्ठीभिर्मदगृहोत्सवः॥
यात्रा बलिर्विधानञ्च सर्व्ववार्षिकपर्व्वसु।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम्॥
ममार्च्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः।
उद्यानोपवनाक्रीड़पुरमन्दिरकर्म्मणि॥
संमार्জ্জনोपलेपाभ्यां सेकमण्डलवर्त्तनैः।
गृहशुश्रूषणं मह्यं दासवद्यदमायया॥
अमानित्वमदम्भित्वं कृतस्यापरिकीर्त्तनम्।
अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम्॥
यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः।
तत्तन्निवेदितं मह्यं तदानन्त्याय कल्पते॥
सूर्य्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम्।
भूरात्मा सर्व्वभूतानि भद्र पूजापदानि च"॥

हे भद्र! एतानि मम पूजास्थानानि। अधुना कस्मिन् स्थले केन यजेत इत्याह तत्रैव ११।११। ४३-४५।

"सूर्य्ये तु विद्यया त्रय्या हविषाग्नौ यजेत माम्।
आतिथ्येन तु विप्राग्ने गोष्वङ्ग यवसादिना॥
वैष्णवे बन्धुसत्कृत्या हृदि खे ध्याननिष्ठया।
वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः॥
स्थण्डिले मन्त्रहृदयैर्भोगैरात्मानमात्मनि।
क्षेत्रज्ञं सर्व्वभूतेषु समत्वेन यजेत माम्"॥

हृदि खे हृदयाकाशे। मुख्यधिया प्राणदृष्ट्या॥ जले जलाञ्जलिप्रदानरूपतर्पणपूर्व्वकैर्द्रव्यैः॥ स्थण्डिले भूमौ मन्त्रान्यासैः॥ भोगैरिति। देहे भोगैरात्मानं प्रतिरन्नादिभिर्देहस्यपरमात्मानं यजेऽहं नत्वविद्याकर्म्मजनितं देहं बिभर्म्मीति चिन्तयेत्॥ क्षेत्रज्ञमिति। सर्व्वभूतेषु क्षेत्रज्ञरूपेणावस्थितं कूटस्थब्रह्मचैतन्यस्वरूपं मां समत्वेन यजेत॥ *॥ एतेषु स्थानेषु तव कीदृग्रूपं ध्येयमित्यपेक्षायाह तत्रैव ११।११। ४६-४७।

"धिष्ण्येष्विति मद्रूपं शङ्खचक्रगदाम्बुजैः।
युक्तं चतुर्भुजं शान्तं ध्यायन्नर्च्चेत् समाहितः॥
इष्टापूर्त्तेन मामेवं यो यजेत समाहितः।
लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया"॥

यदा "मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम्" इत्यारभ्य "लभते मयि सद्भक्तिम्" इत्यन्तैरेतैस्त्रयोदशश्लोकैर्धर्म्माख्यानायनभूतप्रतिमाद्याश्रयिण्या भक्तियोगोपयोगिक्रियैव सद्भक्तिलाभः प्रदर्श्यामास स्वयं भगवान्। सुतरां तदा दुर्ब्बलाधिकारिणा भक्तियोगाश्रयिणापि प्रथमे क्रियायोगरूपं कर्त्तव्यः इति बोध्यतेऽन्यथाचित्तशुद्ध्यभावात् ज्ञानं न लभेत इति तात्पर्य्यार्थः॥

ननु मा भूत्तत्त्वज्ञानं किन्तु शास्त्रविहितक्रियायोगशून्यया भक्त्या क्रमेण निर्गुणाया भक्तेरुदयेनैव चरितार्थतेति चेन्न तयोस्तत्त्वज्ञाननिर्गुणभक्तियोगयोर्लक्षणे नैक्यदर्शनात् उभयोरेवात्मसाक्षात्काररूपचरमफलत्वेनोक्तत्वाच्च। यथा श्रीमद्भागवते ३।२९।११-१२।

"मद्गुणश्रुतिमात्रेण मयि सर्व्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे"॥

ईदृग्भक्तिर्यदि बहुजन्मार्জ্জितसुकृतिवशात् कस्यापि क्वचिदुत्पद्येत तर्हि सालोक्यादिमुक्तिं साधकान्तरैः प्रार्थनीयां भगवता स्वयं दीयमानामपि तादृग्भक्तो नेच्छतीति तन्निस्पृहतां दर्शयन्नाह। तत्रैव ३।२९।१३।

"सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः"॥

अपि च तत्त्वज्ञानिनो निर्गुणभक्तस्य च तयोः शब्दतश्च भेदः न तु लक्षणतः यत उभावेव लक्षणादिना सर्व्वत्र एकाचारौ एकनिष्ठावेकभावापन्नौ लक्ष्येते। यथा भागवते ११।११। २९-३३। भगवद्भक्ततमस्य लक्षणमुपदिष्टवानुद्धवं प्रति भगवान्।

"कृपालुरकृतद्रोहस्तितिक्षुः सर्व्वदेहिनाम्।
सत्यसारोऽनवद्यात्मा समः सर्व्वोपकारकः॥
कामैरहतधीर्दान्तो मृदुः शुचिरकिञ्चनः।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः॥
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः।
अमानी मानदः कल्पो मैत्रः कारुणिकः कविः"॥

कविः क्रान्तदर्शी सर्व्वज्ञ इत्यर्थः।

"आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान्।
धर्म्मान् सन्त्यज्य यः सर्व्वान् मां भजेत स सत्तमः॥
ज्ञात्वा ज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः"॥

तथा, ज्ञानिनोऽपि लक्षणं प्रदर्श्यायास। यथा, तत्रैव ११।११।१२-१७।

"न तथा बध्यते विद्वांस्तत्र तत्रादयन् गुणान्।
प्रकृतिस्थोऽप्यसंसक्तो यथा खं सविताऽनिलः॥
वैशारद्येक्षयाऽसंगशितया छिन्नसंशयः।
प्रतिबुद्ध इव स्वप्नान् नानात्वाद् विनिवर्त्तते"॥
यस्य स्युर्वीतसङ्कल्पाः प्राणेन्द्रियमनोधियाम्।
वृत्तयः स विनिर्मुक्तो देहस्थोऽपि हि तद्गुणैः॥
यस्यात्मा हिंस्यते हिंस्रैर्येन किञ्चिद् यदृच्छया।
अर्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः॥
न स्तुवीत न निन्देत कुर्व्वतः साध्वसाधु वा।
वदतो गुणदोषाभ्यां वर्জ্जितः समदृङ्मुनिः॥
न कुर्य्यान्न वदेत् किञ्चिन्न ध्यायेत् साध्वसाधु वा।
आत्मारामोऽनया वृत्त्या विचरेज्जड़वन्मुनिः"॥

ननु भक्तिज्ञानयोश्चरमफलैक्येऽपि भक्तेः समधिकप्रसंशादर्शनात् भक्तिरेवगरीयसीति चेत् न भक्तिवत् ज्ञानस्यापि प्रसंशादर्शनात् आत्मसाक्षात्कृतौ साक्षात्कारत्वाच्च। यथा श्रीमद्भागवते ११।१९।१—५॥

श्रीभगवानुवाच।

"यो विद्याश्रुतसम्पन्न आत्मवानानुमानिकः।
मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत्॥
ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च सम्मतः।
स्वर्गश्चेवापवर्गश्च नान्योऽर्थो मदृते प्रियः॥
ज्ञानविज्ञानसिद्धाः यदं श्रेष्ठं विदुर्मम।
ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्त्ति माम्॥
तपस्तीर्थं जपो दानं पवित्राणीतराणि च।
नालं कुर्व्वन्ति तां सिद्धिं या ज्ञानकलया कृता॥
तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव।
ज्ञानविज्ञानसम्पन्नो भज मां भक्तिभावितः"॥

किञ्च भगवद्गीतायां ४। ३३-३९।

"श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञानयज्ञः परन्तप!।
सर्व्वं कर्म्माखिलं पार्थ! ज्ञाने परिसमाप्यते॥
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥
यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव!।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥
अपिचेदसि सर्व्वेभ्यः पापिभ्यः पापकृत्तमः।
सर्व्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥
यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्জ্জुन!।
ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा॥
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥
श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति"॥

अतएव निर्गुणभक्तिज्ञानयोर्न क्रियदप्यन्तरं मन्यन्ते तत्त्वदृशः स्वरूपतस्तयोरेकात्मत्वात् अतत्त्वदर्शिनोऽज्ञा एवाविद्यामोहितत्वात् भिन्नदृशो भवन्ति॥ वरं भक्तियोगमुपदिश्यानुपसंहारे ज्ञानविज्ञानसम्पन्ना भक्तिरेव ब्रह्मलब्धये सम्यक् हितसाधनीति प्रदर्शितवानुद्धवाय भगवान्। यथा भागवते ११।१८। ४५-४६।

"भक्त्योद्धवानपायिन्या सर्व्वलोकमहेश्वरम्।
सर्व्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः॥
इति स्वधर्म्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः।
ज्ञानविज्ञानसम्पन्नो न चिरात् समुपैति मां"॥

निष्कामेनानुष्ठितभक्तिरेव शनैः शनैः सान्द्रत्वेन निर्गुणतां गच्छन्ती सती परमप्रेमानन्दरूपेण परिणमते सुतरां तदा स्वयं सान्द्रानन्दमयं तज्ज्ञानं प्रकाशते। तयोर्हि तत्स्वरूपत्वात् न क्वापि निर्गुणभक्तिज्ञानयोगयोर्भेदः श्रूयते। यथा छान्दोग्ये "सत्यं ज्ञानमनन्तं ब्रह्म। आनन्दरूपममृतं यद् विभाति शान्तं शिवमद्वैतम"। इति ज्ञानानन्दयोर्ब्रह्मस्वरूपत्वात् अतएव क्वचित् केनापि न पृथगानन्दत्वेन परिगताया निर्गुणस्वरूपाया भक्तेर्ज्ञानेन सह क्वापिनापि भेदो दर्शयितुं शक्यते

स्वरूपतस्तयोरेकात्मत्वात्। परन्तु तत्त्वज्ञानोत्पादनद्वारा भक्तिरेवानुष्ठेया न तु संसारबन्धनकारिणी नश्वरफलदात्री अन्यभक्तिवत् सकामा भक्तिरेवानुमोदनीया तत्त्वदर्शिभिरिति बोध्यम्॥ यथा भागवते १।२।७.

"वासुदेवे भगवति भक्तियोगः प्रयोजितः।
जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकम्"॥

विशेषतः प्रह्लादध्रुवयोरिव नित्यानित्यवस्तुविवेकदर्शनात्। असुरकुलजातोऽपि प्रह्लादः निष्कामभक्तियोगमाचरन् तत्प्रभावेन प्रतप्तः पितृप्रयुक्तां बाधामतिक्रम्यात्मप्रसादलब्धं विमलानन्दस्वरूपं जीवन्मुक्तत्वं ततो निर्व्वाणमप्यवाप्तवान्। ध्रुवः पुनः स्वायम्भुवमनुवंशजातोऽपि विमाढवचनादीर्ष्यापरवशः सन् परमतत्त्वज्ञादेवर्षिनारददादप्युपदेशं लब्ध्वा अन्तःकामबीजं परिपुष्णन् कठोरतपसापि सकामभक्तियोगमनुष्ठाय कल्पस्थायिनं ध्रुवाख्यलोकं लब्धवान् ततः सद्यप्रत्यागमनकाले सहसा जातनिर्व्वेद आत्मधिक्कारेण मुञ्जन्वशरीरं। इदानीं प्रदर्शयामो यथाक्रमं तयोः राजपुत्रयोः सकामनिष्कामभक्तियोगानुष्ठाननित्यानित्यफलम्॥

यथा, श्रीमद्भागवते। ४।९।२७-३५॥

"सोऽपि सङ्कल्पजं विष्णोः पादसेवोपसादितम्।
प्राप्य सङ्कल्पनिर्व्वाणं नातिप्रीतोऽभ्यगात् पुरम्॥

विदुर उवाच।

सुदुर्ल्लभं यः परमं पदं हरेः
मायाविनस्तच्चरणार्च्चनार्च्चितम्।
लब्ध्वाऽप्यसिद्धार्थमिवैकजन्मना
कथं स्वमात्मानममन्यतार्थवित्॥

मैत्रेय उवाच।

मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान् स्मरन्।
नैच्छन् मुक्तिपतेर्मुक्तिं तस्मात् तापमुपेयिवान्॥

ध्रुव उवाच।

समाधिना नैकभवेन यत् पदं
विदुः सनन्दादय ऊर्द्धरेतसः।
मासैरहं षड्भिरमुष्य पादयो-
श्छायामुपेत्यापगतः पृथङ्मतिः॥

अहोबत ममानात्म्यं मन्दभाग्यस्य पश्यत।
भवच्छिदः पादमूलं गत्वा याचे यदन्तवत्॥
मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः।
यो नारदवचस्तथ्यं नाग्राहीषमसत्तमः॥
दैवीं मायामुपाश्रित्य प्रसुप्तइव भिन्नदृक्।
तप्ये द्वितीयेऽप्यसति भ्रातृभ्रातृव्यहृद्रुजा॥
मयैतत् प्रार्थितं व्यर्थं चिकित्सेव गतायुषि।
प्रसादय जगदात्मानं तपसा दुष्प्रसादनम्॥
भवच्छिदमयाचेऽहं भवं भाग्यविवर्जितः।
स्वाराज्यं यच्छतो मौढ्यान्मानो मे भिक्षितो बत॥
ईश्वरात् क्षीणपुण्येव दासीकारानिवाधनः"।

भगवता नृसिंहदेवेन प्रलोभ्यमानोऽपि प्रह्लादः निष्कामभक्तिज्ञानप्रभावेन किमपि नैच्छदिति धर्म्मनन्दनमजातशत्रुं युधिष्ठिरं आश्वयामास देवर्षिर्नारदः। यथा, भागवते।७।९।५१-५५॥

"इतावदवर्णितगुणो भक्त्या भक्तेन निर्गुणः।
प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत॥

श्रीभगवानुवाच।

प्रह्लाद भद्र भद्रं ते प्रीतोऽहं तेऽसुरोत्तम।
वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम्॥
मामप्रीणत आयुष्मन् दर्शनं दुर्लभं हि मे।
दृष्ट्वा मां न पुनर्जन्तुरात्मानं तप्तुमर्हति॥
प्रीयन्ति ह्यथ मां धीराः सर्व्वभावेन साधवः।
श्रेयस्कामा महाभागाः सर्व्वासामाशिषां पतिम्॥
एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः।
एकान्तित्वाद् भगवति नैच्छत्तानसुरोत्तमः"॥
तत्रैव ७।१०।१—५।

नारद उवाच॥

"भक्तियोगस्य तत् सर्व्वमन्तरायतयार्भकः।
मन्यमानो हृषीकेशं स्मयमान उवाच ह॥
मा मां प्रलोभयोत्पत्त्या सक्तं कामेषु तैर्वरैः।
तत्सङ्गभीतो निर्व्विण्णो मुमुक्षुस्त्वामुपाश्रितः॥
भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत्।
भगवन् संसारबीजेषु हृदयग्रन्थिषु प्रभो!।
नान्यथा तेऽखिलगुरो! घटेत करुणात्मनः॥
यस्तु आशिष आशास्ते न स भृत्यः स वै वणिक्।
आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः॥
अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः।
नान्यथैहावयोरर्थो राजसेवकयोरिव"॥

अस्तु तस्य निस्पृहत्वादि किन्तु तत्त्वज्ञानं नासीदिति चेत् न यतः उपरिष्टादेव तत्त्वज्ञानमूलाया निर्गुणाया भक्तेर्लक्षणं प्रदर्शितं। यथा, भागवते ७।५।१३॥ हिरण्यकशिपुं प्रति प्रह्लादोक्तिः।

"स एष आत्मा स्वपरेत्य बुद्धिभि-
र्दुरत्ययानुक्रमणो निरूप्यते।
मुह्यन्ति यद्वर्त्मनि वेदवादिनो
ब्रह्मादयो ह्येष भिनत्ति मे मतिम्"॥

किञ्च तत्रैव ३१।

"न ते विदुः स्वार्थगतिं हि विष्णुं
दुराशया ये बहिरर्थमानिनः।
अन्धा यथान्धैरुपनीयमाना
वाचीशतन्त्यामुरुदाम्नि बद्धाः"॥

स्वार्थगतिमिति। स्वस्मिन् एवार्थे येषां ते स्वार्थास्तत्त्वज्ञानिनस्तेषां गतिर्ज्ञानस्वरूपम्। बहिरर्थमानिनः इति। बहिर्वाह्यवस्तुषु अर्थो येषां तान् गुरून् इति मन्यन्ते ये इति॥ ननु क्वचिदर्चादेर्निन्दापि लक्ष्यते यदा तदा तदुपासनं निष्फलमिति चेन्न। यतः सर्व्वतः साधुसङ्गलाभ स्योत्कर्षः इति प्रदर्शयन् विशेषतः सर्व्वाभ्य उपासाभ्यः हृदेशे आत्मध्यानमेव गरीय इत्येवोप दिदिक्षुः महान्तः शास्त्रकृतः। अन्यथा "मदर्चास्थापने श्रद्धा" "अर्च्चायामर्च्चयेत्तावत्" "यावन्न मे कथारतिः" इत्यादि वचनानां निष्फलत्वं स्यात्। दर्शितञ्च यथासम्भवमुपासनायां दुर्ब्बलाधिकारिणां यत् यत् कर्त्तव्यं इदानीं सबलाधिकारिणां करणीयं यत्प्रकृतपथं तदेव दर्शयामः समासेनेति। यथा, बृहदारण्यकश्रुतौ॥

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च"। अर्थात् आत्मैव साक्षात् कर्त्तव्यः साक्षात्कारे उपायमाह श्रवणं मननं निदिध्यासनञ्च किन्तु श्रवणादि इति जिज्ञासायां ब्रूमः। यथा। "श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्य्यावधारणम्। लिङ्गानि तु। उपक्रमोपसंहाराभ्यासोऽपूर्व्वताफलार्थवादोपपत्त्याख्यानि। तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपादानं उपक्रमोपसंहारौ। यथा, छान्दोग्ये षष्ठप्रपाठके प्रकरणप्रतिपाद्यस्यादितीयवस्तुनः एकमेवाद्वितीयमित्यादौ "ऐतदात्म्यमिदं सर्व्वम्"। इत्यन्ते च प्रतिपादनम्॥

प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनं अभ्यासः। यथा, तत्रैवाद्वितीयवस्तुनो मध्ये "तत्त्वमसीति" नवकृत्वः प्रतिपादनम्। प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तरेणाविषयीकरणं अपूर्व्वत्वम्। यथा तत्रैवाद्वितीयवस्तुनः तत्त्वौपनिषदं पुरुषं पृच्छामीत्यादिना उपनिषन्मात्रवेद्यत्वप्रतिपादनात्। मानान्तराविषयीकरणं फलन्तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं यथा तत्रैव "आचार्य्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्षेऽथ सम्पत्स्ये"। इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिप्रयोजनं श्रूयते। प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनं अर्थवादः। यथा, तत्रैव उततमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तु प्रशंसनम्।

प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः"। यथा, तत्र "सौम्येकेन मृत्पिण्डेन सर्व्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणविकारो नामधेयं मृत्तिकेत्येव सत्यम्"। इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते"। मननन्तु। "श्रुतस्यादितीयवस्तुनो वेदान्तार्थानुगुण्ययुक्तिभिरनवरतमनुचिन्तनम्"। "विजातीयदेहादिप्रत्ययरहिताऽद्वितीयवस्तुसजातीयप्रत्ययप्रवाहः निदिध्यासनम्"॥ इति वेदान्तशास्त्रेषु।

समाधिस्तु द्विविधः। सविकल्पको निर्व्विकल्पकश्चेति। तत्र सविकल्पको नाम ज्ञाट्ज्ञानादिविकल्पक्षयानपेक्षयाऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्। तदा मृण्मयगजादिभानेऽपि मृद्भानवत् द्वैतभानेऽप्यद्वैतं वस्तु भासते॥

निर्व्विकल्पकस्तु ज्ञाट्ज्ञानादिभेदक्षयापेक्षयाऽद्वितीयवस्तुनि तदाकाराकारितायां बुद्धिवृत्तेरितरामेकीभावेनावस्थानम्। तदा तु जलाकाराकारितलवणानवभासेनाद्वितीयवस्तुमात्रमेवावभासते॥ इति वेदान्ते उपदिष्टं पूर्व्वविभिः॥

अतो ज्ञानलक्षणानि भगवद्गीतायां।१३।७-११॥

"अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः॥

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्म मृत्यु-जरा-व्याधि-दुःख दोषानुदर्शनम् ॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा" ॥
अतो ज्ञेयं वक्ष्ये तच्चैवाध्याये । १२-१७ ॥
"ज्ञेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते ॥
सर्व्वतःपाणिपादन्तत् सर्व्वतोऽक्षिशिरोमुखम् ।
सर्व्वतःश्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति ॥
सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्ज्जितम् ।
असक्तं सर्व्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥
बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥
अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्त्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य विष्ठितम्" ॥
तथा च श्वेताश्वतरश्रुतौ आत्मज्ञानेनैव मुक्तिरिति स्फुटं दर्शयामास । यथा,—
"सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्ज्जितम् ।
सर्व्वस्य प्रभुमीशानं सर्व्वस्य शरणं बृहत्" ॥
"आत्मा गुहायां निहितोऽस्य जन्तो-
रणोरणीयान् महतो महीयान् ।
तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशम्" ॥
महानिर्व्वाणतन्त्रे च । ५ । १२ ॥
"परे ब्रह्मणि विज्ञाते समस्तैर्नियमैरलम् ।
ताभ्यस्तेन किं कार्य्यं लब्धे मलयमारुते" ॥
ननु किमिदानीं वाग्मह्याद्वैतवादं संस्थापयितुं प्रयतते इति चेत् दर्शयामः ।
तथा च श्रीविष्णुधर्म्मे,—
"परात्मनो मनुष्येन्द्र विभागो हि न कल्पितः ।
क्षये तस्यात्मपरयोर्विभागाभावएव हि ॥
आत्मा क्षेत्रज्ञसंज्ञोऽयं संयुक्तः प्राकृतैर्गुणैः ।
तैरेव विगतः शुद्धः परमात्मा निगद्यते ॥
अनादिसम्बन्धवत्या क्षेत्रज्ञोऽहमविद्यया ।
युक्तः पश्यति भेदेन ब्रह्मत्वात्मनि संस्थितम्" ॥
तथाहि श्वेताश्वतरश्रुतिभाष्यधृतवशिष्ठवचन प्रत्यूर्व्वकं दर्शितम् । यथा,—
"यद्यात्मा निर्गुणः शुद्धः सदानन्दोऽजरोऽमरः ।
संसृतिः कस्य तात! स्यात् मोक्षो वाऽविद्यया विभो॥
क्षेत्रनाथे कथं तस्य ज्ञायते भगवान् यतः ।
यथावत् सर्व्वमेतं मे वक्तुमर्हसि साम्प्रतम् ॥
तस्यैव नित्यशुद्धस्य सदानन्दमयात्मनः ।
अवच्छिन्नस्य जीवस्य संसृतिः कीर्त्त्यते बुधैः ॥
एकएव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥
भान्त्यारूढः सएवात्मा जीवसंज्ञः सदा भवेत् ॥"

तथा च शुकाग्र्यो गौड़पादाचार्य्यः ॥
"यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते ।
न सर्व्वे सम्प्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः" ॥
तस्मादद्वितीये परमात्मन्युपाधितो जीवेश्वरयोर्जीवानाञ्च परस्परं भेदव्यवस्थायाः सिद्धत्वान्न विशुद्धसत्वोपाधेरीश्वरस्याविशुद्धोपाधिजीवगताः सुखदुःखमोहाद्यागादयः ॥ तथा च भगवान् पराशरः ।
ज्ञानात्मकस्यामलसत्त्वराशे-
रुपेतदोषस्य सदा स्फुटस्य ।
किं वा जगत्यस्ति समस्तपुंसा-
मज्ञातमस्त्यस्ति हृदि स्थितस्य" ॥
कथं तर्ह्युपाधिकभेदेन बन्धमुक्त्यादिव्यवस्था सोपाधिकानां तेषां वा सोपाधिकैश्वरस्य वा स्वरूपस्थेति इत्याशङ्क्य दृष्टान्तपूर्व्वकं व्यवस्थां दर्शयति ॥
"एकस्तु सूर्य्यो बहुधा जलाधारेषु दृश्यते ।
आभाति परमात्मा च सर्व्वोपाधिषु संस्थितः" ॥
"ब्रह्म सर्व्वशरीरेषु बाह्ये चाभ्यन्तरे स्थितम् ।
आकाशमिव भूतेषु बुद्धावात्मा न चान्यथा" ॥
एवं सति यथा बुद्धा देहोऽहमिति मन्यते ।
'अनात्मन्यात्मता भ्रान्त्या सा स्यात्संसारबन्धिनी' ॥
सर्व्वैर्विकल्पैर्हीनस्तु शुद्धो बुद्धोऽजरोऽमरः ।
प्रशान्तो व्योमवद्व्यापी चैतन्यात्मा सनातनः ॥
धूमाभ्रधूलिभिर्व्योम यथा न मलिनीयते ।
प्राकृतैरपरामृष्टो विकारैः पुरुषस्तथा ॥
यथैकस्मिन् घटाकाशे जलेधूमादिभिर्युते ।
नान्ये मलिनतां यान्ति दूरस्थाः कुत्रचित् क्वचित् ॥
यथा दृष्टैरनेकैस्तु जीवे च मलिनीकृते ।
एतस्मिन्नापरे जीवा मलिनाः सन्ति कुत्रचित्" ॥
परं तु केवलं प्रकृतेः पृथग्भूतचैतन्यज्ञानमात्रेण ब्रह्मज्ञानं सम्भवितुमर्हति । यदि चैके पण्डिताः पृथग्ज्ञानेनैव सिद्धिः स्यादिति मन्यन्ते किन्तु नैव श्रुतय एवं परिचक्षते । यथा, श्वेताश्वतरोपनिषदि "ज्ञाज्ञौ द्वावजावीशानीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता अनन्तश्चात्मा विश्वरूपो ह्यकर्त्ता त्रयं यदा विन्दते ब्रह्ममेतत्" ॥ अतएव ब्रह्मजिज्ञासोर्योगिनः अत्रपदिष्टब्रह्मतत्त्वविज्ञानेनैव मुक्तिः स्यात् अन्यथा असएव ॥ यथा, तत्रैव "क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देवएकः । तस्याभिध्यानात् योजनात् तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्तिः ॥ ज्ञात्वा देवं सर्व्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्यूप्रहाणिः। तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्य्य केवल आप्तकामः" ॥ परं योगाभ्यासादृते नैव कदाचित् तत्त्वज्ञानास्योत्पत्तिरिति श्रुतिस्मृत्यादीनां ज्ञानप्रतिपादकशास्त्राणामुपदेशो दृश्यते यदि च पूर्व्वपूर्व्वप्रकरणे पुराणप्रभृतिविहितयोगादिमतं प्रदर्शितं तत्रापि तत्दृढ़ीकरणाय वैदिकमतमिदानीं प्रदर्शयामः । यथा यजुर्व्वदोक्तश्वेताश्वतरीययोगप्रकरणम् । ॐ "युञ्जानः प्रथमम् मनस्तत्त्वाय सविता धियः ॥ अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १ ॥

युक्तेन मनसा वय देवस्य सवितुः सवे स्वर्गायाय शक्त्यै ॥ २ ॥
युक्ताय मनसा देवान् सुवर्य्यतो धिया दिवं ।
बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥ ३ ॥
युञ्जते मन उत युञ्जते धियो
विप्रा विप्रस्य बृहतो विपश्चितः ॥
विहोत्रा दधे वयुना विदेक इन् ।
महो देवस्य सवितुः परिष्टुतिः ॥ ४ ॥
युजे वां ब्रह्म पूर्व्यं नमोभिः
विश्लोका यन्ति पथ्येव सूराः" ॥ ५ ॥
परन्तु आत्मज्ञादविशदीकरणाय दक्षसंहितैव श्रेयसी जीवानामिति प्रदर्शयितुं भूयोऽप्यनुसरामः । यथा,
"ऊरस्योत्तानचरणः सख्ये नस्येतरं करम् ।
उत्तानं किञ्चिदुन्नाम्य मुखं विलभ्य चोरसा ॥
निमीलितात्तः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन् ।
तालुमूलाच्चलज्जिह्व संवृतास्यः सुनिश्चलः ।
संनिरुध्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः ।
द्विगुणं त्रिगुणं वापि प्राणायाममुपक्रमेत्" ॥
किन्तुएवं मा मन्यध्वं यत् यद्दानिःसृत्य अरण्यवासादौ योगाभ्यासतत्त्वज्ञानादेः सुगमो भवेत् इत्यत्र यथाह दक्षः सप्तमाध्याये ।
"लोको वशीकृतो येन येन चात्मा वशीकृतः ।
इन्द्रियार्थो जितो येन तं योगं प्रब्रवीम्यहं ॥
प्राणायामास्तथा ध्यानं प्रत्याहारस्तु धारणा ।
तर्कश्चैव समाधिश्च षड़ङ्गो योग उच्यते ॥
नारण्यसेवनाद्योगो नानेकग्रन्थचिन्तनात् ।
व्रतैर्यज्ञैस्तपोभिश्च न योगः कस्यचित् भवेत् ॥
नं च पथ्यान्नभुक् योगी न नासाग्रनिरीक्षणात् ।
न चं शास्त्रातिरिक्तेन श्रौतेन स भवेत् क्वचित् ॥
न मौनमलकुहकैरनेकैः सङ्कतैस्तथा ।
लोकयात्रावियुक्तस्य योगो भवति कस्यचित् ॥
अभियोगात् तथाभ्यासात् तस्मिन्नेव तु निश्चयात् ।
पुनः पुनश्च निर्व्वेदाद् योगः सिध्यति नान्यथा" ॥
अतएव निर्व्वेदादृते केवलं तपःस्वाध्यायादिभिर्न योगसिद्धिः शास्त्रकृद्भिरनुमोदनीया । किन्तु आदरनैरन्तर्य्येण आत्मचिन्तादयएव ब्रह्मलब्धेः सदुपाया इति बोध्यम् यथा तत्रैव।
"आत्मचिन्ताविनोदेन शौचक्रीड़नकेन च ।
सर्व्वभूतसमत्वेन योगः सिध्यति नान्यथा ॥
यच्चात्मनि रतो नित्यमात्मक्रीड़स्तथैव च ।
आत्मनिष्ठश्च सततमात्मन्येव स्वभावतः ॥
स्वतश्चैव स्वयं तुष्टः सन्तुष्टो नान्यमानसः ।
आत्मन्येव सुप्तोऽसौ योगस्तस्य प्रसिध्यति ॥
सुप्तोऽपि योगयुक्तः स्याज्जाग्रच्चापि विशेषतः ।
ईदृक्त्रेष्टः स्मृतः श्रेष्ठो गरिष्ठो ब्रह्मवादिनाम्" ॥
परन्तु विषयासक्तिवर्ज्जनं विना क्वापि कस्यचिदपि आत्मसिद्धिर्न प्रजायते । यथा तत्रैव,—
"य आत्मरतिरेकाकी द्वितीयं नैव पश्यति ।
ब्रह्मीभूय स एवं हि दक्षपक्ष उदाहृतः ॥
विषयासक्तचित्तो हि यतिर्मोक्षं न विन्दति ।
यत्नेन विषयासक्तिं तस्माद् योगी विवर्ज्जयेत्" ॥

यदि च केचित् विषयेन्द्रियसंयोगैः सिद्धिर्भवेत् इति वदन्ति तत्र तेषां भ्रान्तिरेव सा यथा तत्रैव, "विषयेन्द्रियसंयोगं केचित् यौगं वदन्ति हि। अधर्म्मो धर्म्मरूपेण गृहीतस्तैरपण्डितैः" ॥ इति ॥ यदि चाद्वैततत्त्वज्ञानमेव सर्व्वतो निश्रेयसकरं जीवानामित्यभीप्सितः प्रदर्शितम् किन्तु दुर्ब्बलसबलाद्यधिकारिभेदेन यथाक्रमं क्रियाभक्तिज्ञानयोगादयः सन्निवेशिता इत्यलमतिपल्लवितेन ॥*॥)

उपासितः, त्रि, (उप + आस् + क्त।) कृतोपासनः। तत्पर्य्यायः। वरिवसितः २ वरिवस्यितः ३ उपचरितः ४। इत्यमरः ॥

उपास्तिः, स्त्री, (उप + आस् + क्तिन्।) सेवा। इति हेमचन्द्रः ॥ (यथा, मुग्धबोधे कारकप्रकरणे ७। "मुक्तिर्नर्च्चेऽच्युतोपास्तिं भूतं भूतमभि प्रभुः" ॥)

उपाहितः, पुं, (उप आसन्नं आहितं फलं यस्य।) अग्न्युत्पातः। स तु उल्कापातादिः। इत्यमरः ॥

उपाहितः, त्रि, (उप + आ + धा + क्त।) संयोजितः। इत्यमरः ॥ आरोपितः। इति मेदिनी ॥

उपेक्षणं, क्ली, (उप + ईक्ष् + भावे ल्युट्।) वर्জ্জनम्। त्यजनम् ॥ (यथा, महाभारते ३। हनूमद्भीमसंवादे १५०। ४२।
"साम्ना दानेन भेदेन दण्डेनोपेक्षणेन च।
साधनीयानि कर्म्माणि समासव्यासयोगतः" ॥)

उपेक्षा, स्त्री, (उप + ईक्ष् + अ + टाप्।) अस्वीकारः। त्यागः। (औदासीन्यम्। यथा, रघुः १४। ६५। "कुर्य्यामुपेक्षां हतजीवितेऽस्मिन्" ।) युद्धविषये तु क्षुद्रोपायः। "मायोपेक्षेन्द्रजालानि क्षुद्रोपाया इमे त्रयः"। इति हेमचन्द्रः ॥

उपेन्द्रः, पुं, (इन्द्रमुपगतः। कश्यपाददितौ वामनावतारे इन्द्रस्यानन्तरं जातत्वात् तथात्वम्।) विष्णुः। इत्यमरः ॥ (उपेन्द्रस्यापरां व्युत्पत्तिमाह हरिवंशे ७५। ४६।
"ममोपरि यथेन्द्रत्वं स्थापितो गोभिरीश्वरः।
उपेन्द्र इति लोका मा गास्यन्ति दिवि देवताः" ॥
तथा च भागवते ८। २३। २१, २२, २३।
"कश्यपस्यादितेः प्रीत्यै सर्व्वभूतभवाय च।
लोकानां लोकपालानामकरोत् वामनं पतिम् ॥
वेदानां सर्व्वदेवानां धर्म्मस्य यशसः श्रियः।
मङ्गलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥
उपेन्द्रं कल्पयाञ्चक्रे पतिं सर्व्वविभूतये।
तदा सर्व्वाणि भूतानि भग्नं समुदिरे नृप!" ॥)

उपोढः, त्रि, (उप समीपे उह्यते स्म। उप + वह + क्त।) निकटः। (यथा, किरातेः १३। २३ "तदुपोढेऽह्नि नभश्चरः पृथक्" ।) विवाहितः। इति मेदिनी ॥ (धृतः। विहितः। यथा शाकुन्तले ७म अङ्के,—
"उपोढ़शब्दा न रथाङ्गनेमयः
प्रवर्त्तमानं न च दृश्यते रजः" ॥)

उपोढः, पुं, (उप + वह + क्त।) व्यूहः। इति धरणी ॥

उपोती, स्त्री, (उप्यते स्म या। उप + वे + क्त + ङीष्।) पत्त्रादिषु वयनसादृश्यादस्य तथात्वम्।) पूतिका। इति शब्दरत्नावली ॥ ("द्वादश्यामुपोतीं त्यक्त्वा पारणं कुर्य्यात्"। इति स्मृतिः ॥)

उपोदकी, स्त्री, (उपगता उदकम्। रसप्राधान्यात्। गौरादित्वात् ङीष्।) पूतिका। पुँइशाक इति भाषा। तत्पर्य्यायः। कलम्बी २ पिच्छिला ३ पिच्छिलच्छदा ४ मोहनी ५ मदशाकः ६ विशाला ७ बलिपोदकी ८। अस्या गुणाः। कषायत्वम्। उष्णत्वम्। कटुत्वम्। मधुरत्वम्। निद्रालस्यरुचिविशूम्भश्लेष्मकारित्वञ्च। इति राजनिर्घण्टः ॥ (यथा, एकादशीतत्त्वे द्वादशीनियमे कूर्म्मपुराणधृतवचनम्।
"द्वादश्यां पारणं कुर्य्यात् वर्জ্জयित्वाप्युपोदकीम्" ॥)

उपोदिका, स्त्री, (उपाधिकमुदकमस्याम्। उत्तरपदस्य चेत्युत्तरपदस्योदादेशः। कप्। टाप्।) पूतिका। इत्यमरः ॥ अस्या गुणाः। सारकत्वम्। स्निग्धत्वम्। बलश्लेष्मकारित्वम्। हिमत्वञ्च। इति राजवल्लभः ॥ (यथा, वैद्यके।
"तण्डुलैरानतव्याजैरसत्येषा उपोदिका"।
"मदग्नी चाप्युपोदिका"।
इति सूत्रस्थाने ६ अध्याये वाभटेनोक्तम् ॥
"उपोदिकादधिभ्यान्तु सिद्धा मदविनाशिनी"।
इति चरके सूत्रस्थाने २ अध्याये ॥
"स्वादुपाकरसा वृष्या वातपित्तमदापहा।
उपोदिका सरा स्निग्धा बल्या श्लेष्मकरी हिमा" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

उपोदीका, स्त्री, पूतिका। इति भरतः द्विरूपकोषश्च ॥

उपोद्घातः, पुं, (उप समीपे उद्घननम्। उप + उत् + हन् + घञ्।) उदाहरणम्। इत्यमरः ॥ आरम्भः। इति भरतः ॥ सङ्गतिविशेषः। यथा,—
"सप्रसङ्गं उपोद्घातो हेतुतावसरस्तथा।
निर्व्वाहकैककार्य्यत्वे षोढ़ा सङ्गतिरिष्यते" ॥
तल्लक्षणं यथा,—
"चिन्तां प्रस्तुतसिद्धार्थामुपोद्घातं विदुर्बुधाः"।
इत्यनुमितौ जगदीशतर्कालङ्कारः ॥

उपोषणं, क्ली, (उप + उष् दाहे + ल्युट्।) उपवासः। इति त्रिकाण्डशेषः ॥ (यथा, तिथितत्त्वे।
"उपोषणं नवम्यान्तु दशम्यान्तैव पारणम्"।
विस्तृतिस्तु उपवासशब्दे द्रष्टव्या ॥)

उपोषितं, क्ली, (उप + वस् + भावे क्त।) उपवासः। इत्यमरटीकायां भरतः ॥ (यथा, मनुः। ५। १५५।
"नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम्" ॥

उपोषितः, त्रि, (उपोष्यते स्म। उप + वस + कर्त्तरि + क्त।) कृतोपवासः। यथा,—
"उपोषितो द्वितीयेऽह्नि पूजयेत् पुरुषं तथा"।
इति दुर्गोत्सवप्रकरणे तिथ्यादितत्त्वम् ॥
(यथा रघौ २। १६।
"मधौ निमेषालसपक्ष्मपङ्क्तिः
रुपोषिताभ्यामिव लोचनाभ्याम्" ॥)

उप्तः, त्रि, (उप्यते स्म यः क्षेत्रादिषु। वप् + क्त।) कृतवपनः। बोना इति भाषा। यथा,—
"तदै धनुस्त इषवः स रथो हयास्ते
सोऽहं रथी नृपतयो यत आनमन्ति।
सर्व्वं क्षणेन तदभूदसदीशरिक्तं
भस्मन् हुतं कुहकराद्धमिवोप्तमूष्याम्" ॥
इति श्रीभागवते १ स्कन्धे १५। २१ ॥
श्रीकृष्णवियोग एवाच हेतुः नान्य इत्याह तदै इति यतो येभ्य ईक्षणेन रिक्तं शून्यं असत् कार्य्यात्तमं सन्मन्त्रविधानेरपि भस्मनि हुतमिव भस्मन्निति लुप्तसप्तम्यन्तं पदम्। अतिप्रीतादपि कुहकान्मायाविनः सकाशाद्राद्धं लब्धं यथा। सम्यक्कर्षणादिनापि उषरभूमौ उप्तं बीजमिव"। इति तट्टीकायां श्रीधरस्वामी ॥*॥ कृतमुण्डनम्। यथा—
"सशिखं वपनं कार्य्यमात्मानाद्धुरुचारिणा"।
इति कात्यायनकृतच्छन्दोगपरिशिष्टेऽप्येवम्। तदेकश्रुतिमूलकत्वात्। तद्भृतपारस्करीये। पर्य्युप्तशिरसमिति सूत्रेऽपि तथैवार्थः तद्भाष्यकृता हरिस्वामिनापि परि सर्व्वतोभावेनोप्तशिरसं मुण्डितशिरसमिति व्याख्यातम्"। इति प्रायश्चित्ततत्त्वम् ॥

उप्तक्षेत्रं, त्रि, (आदौ उप्तं पश्चात् क्षेत्रम्। पूर्व्वकालेति समासः।) बीजवपनानन्तरकर्षितक्षेत्रम्। तत्पर्य्यायः। बीजाक्षेतम् २। इत्यमरः ॥

उभ, पू स्पार्द्धवे। इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट्।) क्रस्वादिः। ओदवकारोपधः। तेन व्यञ्चतीति दीर्घो न स्यात्। स्यादौ नवद्र इति उञ्जिजयिति। ऊर्णोर्ज्जीर्दीर्घपाठसामर्थ्यात् स्वरादेर्न दीर्घ इति केचित्। दन्त्यवकारत्वान्न उञ्जतीत्यत्र दीर्घ इत्यप्येके। पू उञ्जती उञ्जन्ती। आर्द्धवमवक्रीभावः। उञ्जति साधुरवक्रः स्यादित्यर्थः। इति दुर्गादासः ॥ (यथा, ऋग्वेदे। ६। ५। २। १ ॥ "उञ्जन्तं त्वं सुभः पर्व्वतासो निहियता मतियाजस्य यष्टः" ॥)

उभ, पू पूर्त्तौ। इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट्।) क्रस्वादिः। पू उभति कुम्भं जलेन लोकः। उबोभ। इति दुर्गादासः ॥

उभयः, त्रि, (उभौ अवयवौ अस्य। उभ + तयप्। उभादुदात्तो नित्यमिति। ५। २। ४४। तयपोऽयजादेशः। कथमुभये देवमनुष्या इति यतो बहूनामुभावयवौ न घटतः। नैष दोषः। अत्र हि द्वौ राशी समुदायस्यावयवौ। एको देवानां अपरो मनुष्याणामिति। उभादुदात्तो नित्यमिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभशब्दप्रयोगो माभूत् उभयशब्दस्यैव यथा स्यादिति।) युगलम्। इति शब्दचन्द्रिका ॥ दुइ इति भाषा। (यथा, मनुः। २। ५५ ॥
"पूजितं ह्यशनं नित्यं बलमूर्জ্জञ्च यच्छति।
अपूजितन्तु तद्भुक्तमुभयं नाशयेदिदम्" ॥)

उभयतः, [स्] व्य (उभयस्मात्। उभय + तसिल्।) पार्श्वद्वये। उभयपार्श्वे। इति व्याकरणम् ॥ (यथा, मनुः। ८। ३१५।
"शक्तिञ्चोभयतस्तीक्ष्णामायसं दण्डमेव वा" ॥)

उभयद्युः, [स्] व्य, (उभयोरह्नोः। द्युभ्यां भयादिति साधुः।) उभयदिनम्। दिनद्वयम्। इत्यमरः ॥ (यथा, अथर्व्ववेदे। १। २५। ४।
"योऽन्येद्युरुभयद्युरभ्येति" ॥)

उभयेद्युः, [स्] अ (उभयोरह्नोः। सद्यःपरुदिति उभयादेद्युस् निपातितः।) उभयदिनम्। इत्यमरः॥ (यथा, ऐतरेयब्राह्मणे। ५। २९॥
"अग्निहोत्रमुभयेद्युर्हूयते"॥)

उम्, व्य, (उङ् शब्दे + डुम्।) रोषः। अङ्गीकारः। प्रश्नः। इति मेदिनी॥ क्रोधवर्जितः। इति शब्दरत्नावली॥

उमा, स्त्री, (उमो मा तपस्यां कुर्व्वितेति। यथा, "उमेति मात्रा तपसो विषिद्धा पश्चादुमाख्यां सुमुखी जगाम"। इति कुमारोक्तेः। यद्वा ओर्हरस्य मा लक्ष्मीरिव। उं शिवं माति मिमीते वा। आतोऽनुपसर्गेति कः। अजादित्वात् टाप्। अवति ऊयते वा उङ् शब्दे "विभाषा तिलमाषोमेति"। ५। २। ४। निपातनात् मक्॥) दुर्गा। (यथा, कुमारे। ३। ६७।
"उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि"॥)
अतसी। कीर्त्तिः। हरिद्रा। कान्तिः। इति मेदिनी॥ शान्तिः। इति शब्दरत्नावली॥ तासामुत्पत्तिर्यथा।
"यतो हि तपसे पत्नि वनम् गन्तुञ्च मेनका।
उमेति तेन सोमेति नाम प्राप तदा सती"॥
इति कालिकापुराणे ४२ अध्यायः॥

उमाकटः, पुं, (उमाया रजः। उमा "अलावतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम्" इति कटच्।) उमाधूलिः। इति व्याकरणम्॥ मसिनार धूला इति भाषा।

उमागुरुः, पुं, (उमाया गुरुः पिता। सती दक्षयज्ञे शिवनिन्दाश्रवणात् योगविमुक्तदेहा हिमालयात्मेनकागर्भे सम्भूतेति पौराणिकी कथाचानुसन्धेया।) हिमालयपर्व्वतः। इति त्रिकाण्डशेषः॥

उमाचतुर्थी, स्त्री, (उमायाश्चतुर्थी। उमाजन्मतिथित्वादस्याः तथात्वम्। ज्यैष्ठशुक्लचतुर्थी। यथा,
"ज्यैष्ठशुक्लचतुर्थ्यान्तु जाता पूर्व्वमुमा सती।
तस्मात् सा तत्र संपूज्या स्त्रीभिः सौभाग्यवृद्धये"॥
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम्॥

उमापतिः, पुं, (उमायाः पतिः।) शिवः। इत्यमरः॥ (यथा, महाभारते १४। संवर्त्तमरुत्तीये। ८। १
"तप्यते तत्र भगवान् तपो नित्यमुमापतिः"॥)

उमावनं, क्ली, (उमायाः प्रीतये वनमिव।) पुरविशेषः। तत्पर्य्यायः। देवीकोटः २ कोटीवर्षम् ३ बाणपुरं ४ शोणितपुरं ५। इति हेमचन्द्रः॥

उमासुतः, पुं, (उमायाः सुतः पुत्रः।) कार्त्तिकेयः। इति हेमचन्द्रः॥

उमेशः, पुं, (उमाया ईशः पतिः।) महादेवः। इति हेमचन्द्रः॥

उम्बरः, पुं, (उम् इत्यव्यक्तशब्दं बिभर्त्तीति। उम् + डृ + अच्।) दारोर्द्धकाष्ठम्। तत्पर्य्यायः। गृहावग्रहणी २ देहली ३ उम्बरः ४ उदुम्बरः ५। इति हेमचन्द्रः॥ (गन्धर्व्वविशेषः। यथा, हरिवंशे पारिजातहरणे। १२६। १४।
"उम्बरस्तुम्बुरुश्चैव जगुर्गन्धे च षड्जगान्"॥)

उम्बी, स्त्री, (उम् क्रोधवर्ज्जितं स्वभावं वाति प्राप्नोतीति। उम + वा + क। एषोदरादित्वात् वस्य बः।) अर्द्धपक्वधानासंभृष्टयवगोधूममञ्जरी। अस्या गुणाः। कफप्रदत्वम्। बलकारित्वम्। लघुत्वम्। पित्तानिलापहत्वञ्च। इति भावप्रकाशः॥

उम्भ, य पूरणे इति कविकल्पद्रुमः। (तुदां-परं-सकं-सेट्।) उन्भ इति च पाठः॥

उम्यं, क्ली, (उमाया अतस्या हरिद्राया वा क्षेत्रम्। उमा + "विभाषा तिलमाषोमाभङ्गाणुभ्यः"। ५। २। ४। इति यत्।) औमीनम्। अतसीक्षेत्रम्। हरिद्राक्षेत्रञ्च। इति भरतो द्विरूपकोषश्च॥

उर, गतौ। सौत्रधातुरयम्। इति कविकल्पद्रुमः। (परं-सकं-सेट्।) पञ्चमस्वरादिः। उरसः। इति दुर्गादासः॥

उरः, [स्] क्ली, (इयर्त्ति। ऋ गतौ। "अर्त्तेरच्च"। ४। १९४ इति उणादिसूत्रेण असुन् उरादेशः किच्च।) वक्षःस्थलम्। इत्यमरः॥
(यथा, रघुः १०। १०।
"कौस्तुभाख्यमणिं सारं बिभ्राणं हृदतोरसा"।
तथा, माघे ७। २२।
"उरसि सरसमादलेखा
प्रतिमतयानुययावसंशयानः"॥)
तत्पर्य्यायः। वक्षः २ वक्षस् ३ क्रोडम् ४ हृत् ५ भुजान्तरम् ६। इति राजनिर्घण्टः॥

उरः [स्] त्रि, (ऋ + असुन् + उरादेशः किच्च।) उत्तमः। श्रेष्ठः। इति मेदिनी॥

उरःसूचिका, स्त्री, (उरसः सूचिमिव। इवे प्रतिकृतावितिकन्।) मुक्तारचितहारः। इत्यमरः॥

उरगः, पुं, (उरसा गच्छतीति। उरसो लोपश्चेति डप्रत्ययः सकारलोपश्च।) सर्पः इत्यमरः॥ (अङ्गुलीवोरगक्षता"। इति रघुः १। २८।)
सीसकम्। इति राजनिर्घण्टः॥

उरगस्थानं, क्ली, (उरगाणां सर्पाणां स्थानम्।) पातालम्। इति शब्दरत्नावली॥

उरगाशनः, पुं, (उरगान् सर्पान् अत्तीति। उरग + अद् + ल्यु।) गरुड़पक्षी। (ऋ "खावासभागमुरगाशनकेतुयष्ट्या"। इति माघः। ५। १३॥)

उरङ्गः, पुं, (उरसा गच्छतीति। उरस् + गम् + ड। निपातनात् सिद्धम्।) उरङ्गमः। इत्यमरटीकायां रायमुकुटः॥

उरङ्गमः, पुं, स्त्री, (उरसा गच्छतीति। उरस् + गम + खच्।) सर्पः। इति व्याकरणम्॥

उरगः, पुं स्त्री, (ऋ + "अर्त्तेः कुगुच्च" ५। १७। इति उणादिसूत्रेण कुच् उत्वं रपरत्वञ्च।) मेघः। इत्यमरः॥ (यथा, ऋग्वेदे २। १४। ४। "यः उरगं जघान नवचखांसं नवतिञ्च बाहून्"।
तथा हरिवंशे २६। २९।
"उत्तरावरणौ दृष्ट्वा राजा यज्ञागतो गृहम्॥)
मेघः। इति उणादिकोषः॥

उरगाक्षः, पुं, (उरगस्य मेघस्याक्षीवाक्षि यस्य। तत्तुल्यपुष्पत्वात् तथात्वम्। अक्षणोदर्शनादित्यच्॥) वृक्षविशेषः। रुड़ाँचि इति भाषा। चाकुन्दा इति केचित्। तत्पर्य्यायः। प्रपुन्नाड़ः २ गड़गजः ३ दद्रुघ्नः ४ चक्रमर्द्दकः ५ पद्माटः ६। इत्यमरः॥ उरगाख्यः ७ प्रपुन्नडः ८ प्रपुनाड़ः ९। इति तट्टीकायां (अस्य गुणादय रुड़गजशब्दे ज्ञातव्याः॥)

उरगाद्यकः, पुं, (उरगाद्य + स्वार्थे कन्।) उरगाक्षवृक्षः। इति शब्दरत्नावली॥

उरगाख्यः, पुं, (उरगस्य मेघस्य आख्या इव आख्या यस्य।) दद्रुघ्नवृक्षः। इत्यमरटीकायां स्वामी॥

उरगाख्यकः, पुं, (उरगाख्य + स्वार्थे कन्।) दद्रुघ्नवृक्षः। इति शब्दरत्नावली॥

उरुभः, पुं, स्त्री, (उरु कठोरं भमति। भस् चलने। अन्येभ्योऽपीति डः। एषोदरादित्वात् साधुः।) मेषः। इत्यमरः॥ (मेषशब्देऽस्य गुणादिर्ज्ञेयम्॥)

उररी, व्य, (ऋ + बाहुलकात् ररीक्। सम्भ्रमार्थः।) स्वीकारः। विस्तारः। इत्यमरः॥ (यथा, साहित्यदर्पणे २य परिच्छेदे। "इति काव्यनिकं मेदमुररीकृत्य"॥)

उररीकारः, पुं, (उररीकरणम्। उररी + कृ + घञ्।) अङ्गीकारः। इति जटाधरः॥

उररीकृतः, त्रि, (उररी + कृ + क्त।) अङ्गीकृतः। विस्तृतः। इत्यमरः॥

उरश्छदः, पुं, (उरो वक्षः स्थलं छादयतेऽनेनेति। उरस + छद + घ।) कवचः। इत्यमरः॥ (गमाटदेशे ३ काण्डे। "काश्वनोरश्छदास्तेमे पिशाचवदनाः खराः॥)

उरसिजः, पुं, (उरसि वक्षःस्थले जायते। उरस् + जन् + ड। सप्तम्या अलुक्।) स्तोत्रम्। इति हलायुधः॥ (यथा, रामायणे।)
"परिपस्पृशिरे चैनं पीनैरुरसिजैर्मुजैः"॥)

उरसिलः, त्रि, (प्रशस्तं अतिशयितं वा उरो वक्षो यस्य। उरस् + इलच्।) प्रशस्तवक्षोयुक्तः। इत्यमरः॥

उरस्कटः, पुं, (उरः कथ्यतेऽनेन। उरस + कट + क।) बालयज्ञोपवीतकम्। वुकवाक्षाड़ इति ख्यातम्। पञ्चवटश्च तत्पर्य्यायः। इति त्रिकाण्डशेषः॥

उरस्त्राणं, क्ली, (उरस्त्राणं भवत्यस्मात्।) वक्षस्त्राणकवचम्। तत्पर्य्यायः। गात्रोदरम् २। इति हारावली॥

उरस्यः, त्रि, (उरसा निर्म्मितः। उरस् + यत्।) औरसजातः। इत्यमरः॥

उरस्वान्, [त्] त्रि, (प्रशस्तमतिशयितं वा उरो वक्षःस्थलं यस्य। उरस् + मतुप् + मस्य वः।) प्रशस्तवक्षोयुक्तः। तत्पर्य्यायः। उरसिलः २। इत्यमरः॥

उरी, व्य, (वयतेरीक् बाहुलकात् सम्प्रसारणञ्च।) स्वीकारः। विस्तारः। इत्यमरः॥
(यथा रघौ १५। ७०।
"उरीकृत्यात्मनो देहं राज्यमस्मै न्यवेदयत्"॥)

उरीकृतः, त्रि, (उरी + कृ + क्त।) अङ्गीकृतः। विस्तृतः। इत्यमरः॥

उरुः, त्रि, (उर्णोति। ऊर्णु + "सर्वधातुभ्यः")

यो नोऽनुप्रविशेन्मोहात् स वै द्वादशवार्षिकम् ॥
वने चरेत् ब्रह्मचर्य्यमिति वः समयः कृतः ।
तदिदं द्रौपदीहेतोरन्योन्यस्य प्रवासनम् ॥
कृतवांस्तत्र धर्म्मार्थमत्र धर्म्मो न दुष्यति ।
परिचाणञ्च कर्त्तव्यमार्त्तानां पृथुलोचन ! ॥
कृत्वा मम परिचाणं तव धर्म्मो न लुप्यते ।
यदि वाप्यस्य धर्म्मस्य सूक्ष्मोऽपि स्यात् व्यतिक्रमः ॥
स च ते धर्म्म एव स्यात् दत्त्वा प्राणान् ममाच्युत ! ।
भक्ताञ्च भज मां पार्थ ! सतामेतन्नतं प्रभो ! ॥
न करिष्यसि चेदेवं मृतां मामुपधारय ।
प्राणदानान्महादानो वर धर्म्ममनुत्तमम् ॥
शरणञ्च प्रपन्नास्मि त्वामद्य पुरुषोत्तम ! ।
दीनानाथान् कौन्तेय ! परिरक्षसि नित्यशः ॥
साहं शरणमभ्येमि रोरवीमि च दुःखिता !
याचे त्वाञ्चाभिकामाहं तस्मात्कुरु मम प्रियम् ॥
स त्वमात्मप्रदानेन सकामां कर्त्तुमर्हसि ॥

वैशम्पायन उवाच ।

एवमुक्तस्तु कौन्तेयः पन्नगेश्वरकन्यया ।
कृतवांस्तत्तथा सर्व्वं धर्म्ममुद्दिश्य कारणम् ॥
स नागभवने रात्रिं तामुषित्वा प्रतापवान् ।
उदितेऽभ्युत्पितः सूर्य्ये कौरव्यस्य निवेशनात् ॥
आगतस्तु पुनस्तत्र गङ्गाद्वारं तया सह ।
परित्यज्य गता साध्वी उलूपी निजमन्दिरम् ॥
दत्त्वा वरमजेयत्वं जले सर्व्वत्र भारत ! ।
साध्या जलचराः सर्व्वे भविष्यन्ति न संशयः" ॥*॥)

उल्का, स्त्री, (ओपतेति । उप दाहे "शुकवल्कोल्का" ३।४२। इति उणादिसूत्रेण क-प्रत्ययात् साधुः।) तेजःपुञ्जः। इत्यमरटीकायां भरतः ॥ अग्निशिखा ॥ अग्निः । इत्यादिकोषः ॥ (यथा,

"तुलाराशिं गते भानौ अमावस्यां नराधिपः ।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च ॥
कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुडादिभिः ।
ततोऽपराह्णसमये घोषयेन्नगरे नृपः ॥
लक्ष्मीः संपूज्यतां लोका उल्काभिरपि वेष्यताम्" ।
इति तिथितत्त्वे अमावस्याप्रकरणे ।) आकाशात् पतिताग्निः । इति रायमुकुटादयः ॥
("तच्चेदायौ सरति सरलस्कन्धसङ्घट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः" ।
इति मेघदूते पूर्व्वमेघे ५४ श्लोकः ।
"उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च"
इति मनुः । १ । ३८ ।) अस्या लक्षणम् ।
"दृष्टच्छिखा च सूक्ष्माग्रा रक्तनीलशिखोज्ज्वला ।
पौरुषीयप्रमाणेन उल्का नानाविधा स्मृता" ॥
इति काश्यपः ॥

(अस्याः कारणमाह गर्गसंहितायाम् ।
"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः ।
नरापचारात् नियतमुपसर्गः प्रवर्त्तते ॥
ततोऽपराधात् नियतमपवर्त्तन्ति देवताः ।
ताः स्रवन्त्यद्भुतांस्तांस्तु दिव्यानभसभूमिजान् ॥
तत्र त्रिविधा लोके उत्पाता देवनिर्म्मिताः ।
विचरन्ति विनाशाय रूपैः संबोधयन्ति च" ॥
अस्या लक्षणादिकमुक्तं बृहत्संहितायां ३२ अध्याये । तद्यथा,—

"दिविभुक्तऋभफलानांपततांरूपाणियानिताल्युल्काः ।
धिष्ण्योल्काशनिविद्युत्तारास्तिस्रधा भिन्नाः ॥ १ ॥
उल्का पतेच्च फलं तद्वद्धिष्ण्याशनिस्निग्धैः पतैः ।
विद्युद्दहोभिः षड्भिस्तद्वत्तारा विपाचयति ॥ २ ॥
तारा फलप्रदकरी फलार्द्रदात्री प्रकीर्त्तिता धिष्ण्या ।
तिक्तः सम्पूर्णफला विद्युदथोल्काशनिश्चेति ॥ ३ ॥
अशनिःस्वनेन महताऽगजाश्वमृगाश्चवेश्मतरुपशुषु ।
निपतति विदारयति धरातलं चक्रसंस्थाना ॥ ४ ॥
विद्युत्तत्त्वत्रासं जनयन्ती तटतटस्वना सहसा ।
कुटिलविशालानिपततिजीवेन्धनराशियुज्ज्वलिताप्
धिष्ण्याशनिरूपपुच्छाधनूंषिदृष्टदृश्यतेऽन्तराभ्रधिकं ।
ज्वलिताङ्गारनिकाशा दीर्घस्तो सा प्रमाणेन ॥ ६ ॥
तारा ह्रस्वं दीर्घा शुक्ला ताम्राऽतन्तुरूपा वा ।
तिर्य्यगधश्चोर्द्धं वा याति वियत्यूह्यमानेव ॥ ७ ॥
उल्काशिरसिविशालानिपतन्ती वर्द्धतेप्रतनुपुच्छा ।
दीर्घा भवति च पुरुषं भेदा बहवो भवन्त्यस्याः ॥ ८ ॥
प्रेतप्रहरणखरकरभनक्रकपिदंष्ट्रिलाङ्गलमृगाभाः ।
गोधाहिधूमरूपाः पापा या चोभयशिरस्काः ॥ ९ ॥
ध्वजभूषकरिगिरिकमलेन्दुतुरगसन्नभरजतहंसाभाः । श्रीवत्सवज्रशङ्खस्वस्तिकरूपाः शिवसुमित्राः ॥ १० ॥

अमरसधाद्रुक्षो निपतन्त्यो राजराष्ट्रनाशाय ।
सम्भ्रमतिगगनोपरिविभ्रममाख्याति लोकस्य ॥ ११ ॥
संस्पृशती चन्द्रार्कौ तद्विहता वा सभूप्रकम्पा च ।
परचक्रागमनभयवधदुर्भिक्षार्त्तिभयजननी ॥ १२ ॥
पौरेतरघ्नमुल्कापसव्यकरणं दिवाकरहिंसाभ्योः ।
उल्का सुभदा पुरतो दिवाकरविनिःसृता यातुः ॥ १३ ॥
शुक्ला रक्ता पीता कृष्णा चोल्का द्विजादिवर्णघ्नी ।
क्रमशश्चैतान् हन्युर्मूर्द्धोरःपार्श्वपुच्छस्थाः ॥ १४ ॥
उत्तरदिगादिपतिता विप्रादीनामनिष्टदा रूक्षा ।
ऋज्वी स्निग्धा खण्डा नीचोपगता च तद्वृद्ध्यै ॥ १५ ॥
श्यामा वारुणनीलाऽरुणदहना सितभसन्निभा रूक्षा ।
सन्ध्या दिनजा वक्रा दलिता च परागमभयाय ॥ १६ ॥
नक्षत्रयहघाते तद्भक्तीनां क्षयाय निर्दिष्टा ।
उदये घ्नती रवीन्दू पौरेतरमृत्यवेऽस्ते वा ॥ १७ ॥
भाग्यादित्यर्धनिष्ठामूलेषूल्काहतेषु युवतीनाम् ।
विप्रक्षत्रिपीड़ा पुष्यानिलविण्डुदेवेषु ॥ १८ ॥
ध्रुवसौम्येषु नृपाणां उग्रेषु सदारुणेषु चैराणां ।
छिद्रेषु कलाविदुषां पीड़ा साधारणे च हते ॥ १९ ॥
कुर्व्वन्त्येताः पतिता देवप्रतिमासु राजराष्ट्रभयम् ।
शुक्लोपरि नृपतीनां म्लेच्छपतत्स्वामिनां पीड़ाम् ॥ २० ॥
आशायहोपघाते तद्देश्यानां खले क्षयिस्तानाम् ।
चैत्यतरौ सम्पतिता सत्कृतपीड़ां करोत्युल्का ॥ २१ ॥
हरिपुरस्यपुरक्षयमथेन्द्रकीले जनक्षयोऽभिहितः ।
ब्रह्मायतने विप्रान् विनिहन्याद्गोमिनोगोष्ठे ॥ २२ ॥
क्ष्वेड़ास्फोटितवादितगीतोत्क्रुष्टस्वना भवन्तियदा ।
उल्कानिपातसमये भयाय राष्ट्रस्य सन्दृश्य ॥ २३ ॥
यस्याखिरं तिष्ठति खेऽनुबद्धो दण्डाकृतिः सा नृपतेर्भयाय । या चोह्यते तन्तुवृतेव खस्था या वा महेन्द्रध्वजतुल्यरूपा ॥ २४ ॥
ऐक्ष्विनः प्रतीपगा तिर्य्यगा नृपांक्षनाः ।
हन्त्यधोमुखी नृपान् ब्राह्मणानर्ध्वगा ॥ २५ ॥
वर्हिपुच्छरूपिणी लोकसंक्षयावहा ।
सर्पवत् प्रसर्पिणी योषितामनिष्टदा ॥ २६ ॥
हन्ति मण्डलापुर कृत्तवत्पुरोहितम् ।
वंशगुल्मवत् स्थिता राष्ट्रदोषकारिणी ॥ २७ ॥
व्यालसूकरोपमा विस्फुलिङ्गमालिनी ।
खड्गशोऽथ वा गता सस्वना च पापदा ॥ २८ ॥
सुरपतिचापप्रतिमा राज्ञां नभसि विलीना जलदान् हन्ति । पवनविलोमा कुटिलं याता न भवति शस्ता विनिहन्ता वा ॥ २९ ॥
अभिभवति यतः पुरं बलं वा भवति भयं ततएव पार्थिवस्य । निपतति च यया दिशा प्रदीप्ता जयति रिपूनचिरात् तया प्रयातः" ॥ ३० ॥)

उल्कामुखी, स्त्री, (उल्का अग्निशिखावत् तेजः मुखे यस्याः ।) जन्तुविशेषः । खँकशृङ्गालि इति भाषा । तत्पर्य्यायः । भद्रगालिका २ लोमालिका ३ दीप्तजिह्वा ४ किखिः ५ । इति त्रिकाण्डशेषः ॥

उल्मुकं, क्ली, (ओवतीति । उप दाहे + उल्मुकदर्वीति निपातनात् धातोः वस्य लः मुकप्रत्ययश्च ।) अङ्गारः । इत्यमरः ॥ (यथा, शतपथब्राह्मणे ६ । २ । ७ "अन्वाहार्य्यपचनादुल्मुकमादाय" । ऋषिवंशीयराजा । यथा, महाभारते २ । निमन्त्रितराजागमने ३४ । १६ ।
"उल्मुको निशठश्चैव वीरश्चाङ्गावहस्तथा ।
ऋषयो निखिलास्तत्रे समाजग्मुर्महारथाः" ॥)

उल्लङ्घनं, क्ली, (उत् + लघि + ल्युट्।) अतिक्रमणम् । इति पुराणम् । डिङ्गान इति भाषा । (यथा, कुमारे ३ सर्गे २५ श्लोकस्य टीकायां मल्लिनाथः । "समयोल्लङ्घनेन पराङ्मुनासकृतिं प्रवृत्ते सति" ॥)

उल्लसः, त्रि, (उत् + लस् + अच् ।) बहुरोमयुक्तः । तत्पर्य्यायः । रोमशः २ । इति हारावली ॥

उल्लसितः, त्रि, (उत् + लस् + क्त ।) तरलितः । आन्दोलितः । इति जटाधरः ॥

उल्लसनकं, क्ली, (उल्लसन + स्वार्थे कन् ।) रोमाञ्चः । इति हेमचन्द्रः ॥

उल्लाघः, त्रि, (उत् + लाघ् + गत्यर्थेति क्त । निपातनात् सिद्धम् ।) गदान्निर्गतः । नीरोगः । इत्यमरः ॥ शुचिः । दक्षः । क्षणम् । मरीचमितियावत् । इति विश्वमेदिन्यौ ॥ क्षणमित्यत्र क्वचिदिति कस्याश्चिन्मेदिन्यां पाठः ॥

उल्लापः, पुं, (उत् + लप् + घञ् ।) शोकरोगादिना ध्वनिविकारः । तत्पर्य्यायः । काकुवाक् २ । इति हेमचन्द्रः ॥ (यथाह, भर्त्तृहरिः । ३ । ६ ।
"खलोल्लापाः सोढाः कथमपि तदाराधनपरैः ॥")

उल्लासः, पुं, (उत् + लस् + घञ् ।) ग्रन्थपरिच्छेदः । इति भूरिप्रयोगः ॥ यथा काव्यप्रकाशे प्रथम-उल्लास इति प्रयोगः । वृद्धिः । इति श्रीभागवतम् ॥ आह्लादः । प्रकाशः ॥
("निपतन्ति कन्दलदुल्लासाः पयोविन्दवः" ।
इति अमरशतके । ४८ ।)

उल्लिखितः, त्रि, (उत् + लिख + क्त ।) उत्कीर्णः । तनूकृतः । इति मेदिनी ॥ चित्रितः । इति शब्द-

रत्नावली॥ ऊर्द्धं लिखितः॥ (यथा, रघुः।६।३२।)
"क्वचिद्वेव यन्नोल्लिखितो विभाति" ॥)

उल्लेखः, पुं, (उत्+लिख्+घञ्।) उद्धारणम्। कथनम्। इति स्मार्त्ताः॥ (अलङ्कारभेदः॥ तल्लक्षणं यथा, साहित्यदर्पणे १० परिच्छेदे।
"क्वचिद्वेदादृहीतृणां विषयाणां तथा क्वचित्।
एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते" ॥
उदाहरणम्। "प्रियइति गोपवधूभिः शिशुरिति वृद्धैरधीशइति देवैः। नारायणइति भक्तैर्ब्रह्मेत्ययमहि योगिभिर्देवः" ॥)

उल्लेखनं, क्ली, (उत्+लिख्+ल्युट्।) वमनम्। इति रत्नमाला॥ खननम्। यथा "भूमेरुल्लेखनं कुर्य्यात्"। उक्तिः स्मृतिः॥ (यथा, मनुः ५।१२४। "सम्मार्जनोपाञ्जनेन सेकेनोल्लेखनेन च"।)
उद्धारणम्। यथा,—
"मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वशः।
उल्लेखनमकुर्व्वाणो न तस्य फलभाग्भवेत्"॥
इति तिथ्यादितत्त्वम्॥

उल्लोचः, पुं, (ऊर्द्धं लोचति। उत्+लोच्+घञ्। यद्वा ऊर्द्धं लोच्यते। लोच्+घञ्। कुत्त्वन्तु न निष्ठायामनिट इति वचनात्। अस्य तु तन्न सेट्त्वात्।) चन्द्रातपः। चाँदोया इति भाषा। तत्पर्य्यायः। वितानम् २। इत्यमरः॥

उल्लोलः, पुं, (उल्लोड़यतीति। लोडृ उन्मादे+णिच्+पचाद्यच्। डलयोरैक्यात् डस्य लः।) महातरङ्गः। बड़ ढेउ इति भाषा। तत्पर्य्यायः। कल्लोलः २। इत्यमरः॥

उल्व, क्ली, (उल्लीयते इति। उत्+लीङ् श्लेषणे उल्वादयश्च ४।९५। इति उणादिसूत्रेण साधुः।) जरायुः। इत्यमरः॥ (यथा, गीतायां ३।३८।
"यथोल्वेनावृतो गर्भस्तथा तेनेदमावृतम्"।
"जातमात्रं विशोध्योल्वाद्घृतं सैन्धवसर्पिषा।
प्रसूतिक्लेशितत्वानु बलातैलेन सेचयेत्"॥
इति वाभटः उत्तरस्थाने १ अध्याये उक्तवान्॥
"अथ जातस्योल्वं मुखञ्च सैन्धवसर्पिषा विशोध्य घृताक्तं मूर्द्धि पिचुं दद्यात् ततो नाभिनाड़ीमत्राकृतमायम्य सूत्रेण बद्धा छेदयेत्तत्सूत्रैकदेशञ्च कुमारस्य ग्रीवायां सम्यग् बध्नीयात्। इति सुश्रुते शारीरस्थाने १० अध्याये॥)

उल्व्य, त्री, (उत्+वण+अच्। पृषोदरादित्वात् साधुः।) व्यक्तम्। स्पष्टम्। इत्यमरः॥
("श्लेष्मोल्वका महामूला घना मन्दरुजः सिताः"॥
इति वाभटे निदानस्थाने ७ अध्याये॥
"हेतुलक्षणसंसर्गविद्याद्वोल्व्यानि च"।
इति रविनिश्चयरत्ने अर्थाधिकारे॥
प्रकाशः। निर्बाधः। यथा, रघुः। ४।३३।
"तस्यासीदुल्व्यो मार्गः पादपैरिव दन्तिनः"॥)

उशती, त्रि, (वश्+शतृ+ङीप्। सम्मसारणम्।) अकल्याणवाक्। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे १०।९८।५। "आपो हिष्ठा मयोभुवः स्थान ऊर्जे दधातन महेरणाय चक्षसे। ॐ यो वः शिवतमोरसस्तस्य भाजयतेह नः। उशतीरिव मातरः"॥)

उशनाः, [स्] पुं, (वश् कान्तौ+"वशेः कनसिः" ।४।२३८। इति उणादिसूत्रेण कनसिः। ग्रहादित्वात् सम्प्रसारणम्।) शुक्राचार्य्यः। इत्यमरः॥ (यथा, कुमारे ३।६।
"अध्यापितस्योशनसापि नीतिं
प्रयुक्तरागप्रणिधिर्दिधक्षुः"॥
स च दैत्यगुरुः। तथा च महाभारते ययातिसंवादे १।७६।६।
"पौरोहित्येन याज्यत्वे काव्यस्योशनसं परे"॥)

उशीक्, [ज्] पुं, (वह्नि उश्यते वा। वश् कान्तौ+"वशः किति" ।२।७१। इति उणादिसूत्रेण इजिः। सम्प्रसारणम्।) अग्निः। घृतं। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

उशिक्, त्रि, (वश् कान्तौ+इजि+सम्प्रसारणम्।) कमनीयम्॥
"न यद्वचश्चित्रपदं हरेर्यशो
जगत्पवित्रं प्रगृणीत कर्हिचित्।
तद्वायसं तीर्थमुशन्ति मानसाः
न यत्र हंसा निरमन्त्युशिक्क्षयाः"॥
इति श्रीभागवते १ स्कन्धे ५ अध्यायः। "चित्रपदमपि यद्वचो हरेर्यशो न प्रगृणीत तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानं उशन्ति मन्यन्ते कुतः मानसाः सत्त्वप्रधाने मनसि वर्त्तमाना हंसाः यतयो यत्र न निरमन्ति कर्हिचिदपि नितरां न रमन्ते। उशिक्क्षयाः उशिक् कमनीयं ब्रह्म क्षयो निवासो येषां ते यथा। प्रसिद्धा हंसाः मानससरसि चरन्तः कमनीयपद्मषण्डनिवासास्यक्तविचित्रान्नादियुक्ते उच्छिष्टगर्त्ते काकक्रीड़ास्थाने न रमन्ते इति श्लेषः"। इति तट्टीकायां श्रीधरस्वामी॥ (कामयमानम्। यथा ऋग्वेदे १।१३१।५ "आदित्ते अस्य वीर्य्यस्य चर्किरन्मदेषु दधन्नुशिजो यदाविथ सखीयतो यदाविथ"। "उशिजो धर्म्मं कामयमानाः जनाः"। इति भाष्यम्॥)

उशी, स्त्री, (वश्+ई। सम्प्रसारणम्।) वाञ्छा। इत्युणादिकोषः॥

उशीनरः, पुं, (उशीरप्रदो वाञ्छाप्रदो नरो यत्र।) देशभेदः। तत्पर्य्यायः। गान्धारः २। इति जटाधरः॥ चन्द्रवंशोद्भवराजविशेषः। स तु शिविराजपिता। इति श्रीभागवतम्॥ (एतद्वंशीयो नृपभेदः। यथा महाभारते। श्येनकपोतीये। ३। १३०। २१-२३।
"उशीनरो वै यज्ञेषु वासवादत्यरिच्यत॥
तां देवसमितिं तस्य वासवश्च विगाह्यते।
अभ्यगच्छन्नृपवरं ज्ञातुमग्निव भारत॥
जिज्ञासमानौ वरदौ महात्मानमुशीनरं।
इन्द्रः श्येनः कपोतोऽग्निर्भूत्वा यज्ञेऽभिजग्मतुः"॥
तस्य चरित्रं तत्रैव १३१ अध्याये द्रष्टव्यम्॥)

उशीरः, पुं क्ली, (वश् कान्तौ+"वशः किति" ।४।३१ इति उणादिसूत्रेण ईरन्। सम्प्रसारणम्।) वीरणमूलम्। वेनार मूल् खस् इत्यादि भाषा। तत्पर्य्यायः। अभयम् २ नलदम् ३ सेव्यम् ४ अमृणालम् ५ जलाश्रयम् ६ लामज्जकम् ७ लघुलयम् ८ अवदाहम् ९ इष्टकापथम् १०। इत्यमरः। उशीरम् ११ मृणालम् १२ लघु १३ लयम् १४ अवदानम् १५ इष्टम् १६ कापथम् १७ अवदाहेष्टकापथम् १८ इन्द्रगुप्तम् १९। इति तट्टीकायां भरतादयः॥ जलवासम् २० हरिप्रियम् २१ वीरम् २२ वीरणम् २३ समगन्धिकम् २४ रणप्रियम् २५ वीरतरु २६ शिशिरम् २७ शीतमूलकम् २८ वितानमूलकम् २९ जलमेदम् ३० सुगन्धिकम् ३१ सुगन्धिमूलकम् ३२ कम्भ ३३। इति राजनिर्घण्टः॥ अस्य गुणाः। घर्म्मदौर्गन्ध्यदाहपित्तरक्तरोगनाशित्वम्। इति राजवल्लभः॥ अपिच। शीतलत्वम्। तिक्तत्वम्। मोहभ्रमापहृतम्। ज्वरार्त्तिपित्तश्रमनकारित्वम्। जलसौगन्ध्यदायकत्वञ्च। इति राजनिर्घण्टः॥ (यथा, शाकुन्तले ३ अङ्के। "प्रियंवदे! कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीदलानि नीयन्ते"। अस्य पर्य्यायगुणाः यथा,
"वीरणस्य तु मूलं स्यादुशीरं नलदञ्च तत्।
अमृणालञ्च सेव्यञ्च समगन्धिकमित्यपि॥
उशीरमम्बुशीतं स्तम्भनं लघु तिक्तकम्।
मधुरं ज्वरहृद्दाहपित्तमदनुत्कपित्तहृत्।
व्रणास्रविषवीसर्पदाहहृच्छ्रमापहम्"।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

उशीरकं, क्ली, (उशीर+स्वार्थे कन्।) वीरणमूलं। इति रत्नमाला॥ (उशीरशब्देऽस्य विशेषो ज्ञेयः।)

उशीरी, स्त्री, लघुकाशः। छोट काशा इति भाषा। तत्पर्य्यायः। मिसिः २ गुड़ा ३ अश्वालः ४ नीरजः ५ शूरः ६। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। पित्तदाहक्षयरोगनाशित्वञ्च। इति राजनिर्घण्टः॥

उष उ वधे, दहि। इति कविकल्पद्रुमः॥ (भ्वादिः-परं-सकं-सेट्।) ऋवादिः। उ ओषित्वा उष्ट्वा। ओषति। क्त्वावेट्त्वान्नेमडौत्वादिना इमो निषेधे निष्ठायां उष्टः। दहि भस्मीकरणे। इति दुर्गादासः॥

उष वधे। दहि। इति कविकल्पद्रुमः॥ (भ्वादिः-परं-सकं-सेट्।) ओषति। उषितः। दहि भस्मीकरणे। इति दुर्गादासः॥ (यथा, मनुः।९।२७३।
"यद्यपि धर्म्मसमयात् प्रच्युतो धर्म्मजीवनः।
दण्डेनैव तमप्योषेत् स्वकाद्धर्म्माद्धि विच्युतम्"॥)

उष, क्ली, (उष+क।) पांशुजलवणम्। इति रत्नमाला॥

उषः, पुं, (उष+क।) कामी। गुग्गुलुः। राजिश्लेषः। दिनम्। इति मेदिनी॥ (दहनधर्म्मकर्त्तरि, त्रि।) क्षारमृत्तिका। इति शब्दरत्नावली॥

उषः, [स्] क्ली, (ओषति नाशयत्यन्धकारम्। उष+"उषः किदिति" ४।२२१। उणादिसूत्रेण असिः।) प्रत्यूषः। इत्यमरः।
("आसीदासन्निर्व्याजाः प्रदीपार्चिरिवोषसि"।
इति रघुः। १२।१। तथा, माघे। ११।१७।
"पुनरुषसि विविक्तैर्मातरिश्वावधूय"॥)

उषी

उषणं, क्ली, (उष्+बाहुलकात् क्युन्। ल्युट् वा।) मरिचम्। इत्यमरः। पिप्पलीमूलम्। इति राजनिर्घण्टः॥

उषणा, स्त्री, (उषण+टाप्।) पिप्पली। इत्यमरः॥ शुण्ठी। इति राजनिर्घण्टः॥ चविकम्। इति रत्नमाला॥ ("उषकुल्योषणा शौण्डी" इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे पर्य्याय उक्तः।)

उषती, स्त्री, (उष्+शृट। आगमशासनस्यानित्यत्वात् नुमभावः।) अकाल्याणवाक्। इत्यमरः॥ (यथा, महाभारते १।८७।८।

"यया स्य वाचा पर उद्विजेत
न तां वदेदुषतीं पापलोक्याम्"॥)

उषपः, पुं, (ओषतीति। उष्+"उषिकुटिदलिकचिखजिभ्यः कपन्"। ३।१४२। इति कपन्।) सूर्य्यः। अग्निः। इत्युणादिकोषः॥

उषर्बुधः, पुं, (उषसि प्रातर्बुध्यते प्रकाश्यते। उषस्+बुध्+क।) अग्निः। इत्यमरः॥ रक्तचित्रकः। सांचिता इति भाषा॥

उषसी, स्त्री, (उषं दिवसं स्यति दूरीकरोतीति। उष+सो+क+ङीप्।) सन्ध्याकालः। इति मेदिनी॥

उषा, स्त्री, (उष+क+टाप्।) बाणराजसुता। सा तु अनिरुद्धभार्य्या। (यथा, हरिवंशे १७४। बाणयुद्धे १२।

"बाणस्य दुहिता कन्या तत्रोषा नाम भाविनी"।

विस्तृतिस्तु बाणयुद्धशब्दे द्रष्टव्या।) रात्रिः। इति मेदिनी॥ स्त्रीगवी। इति हेमचन्द्रः॥ उखा। स्थालीति यावत्। इत्यमरटीकायां रमानाथः॥ (रात्रिशब्देः। यथा ज्योतिषे।

"उषां गोधूलियोगं वा स्त्रीक्षत्य गमनं चरेत्"॥)

उषा, थ, (ओषतीति। उष+क+टाप्।) रात्रिशब्देः। रात्र्यवसानम्। इत्यमरमेदिन्यौ॥ सा तु नक्षत्रतेजःपरिहानिमारभ्य भानोरुदयं यावत् भवति। यथा,—

"अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्। तेजःपरिहानिरुषा भानोरुदयं यावत्"॥ इति तिथितत्त्वे वराहवचनम्॥

उषाकालः, पुं, (उषायां कालो यस्य।) कुक्कुटः। इति त्रिकाण्डशेषः॥

उषापतिः, पुं, (उषायाः पतिः।) अनिरुद्धः। स तु कामदेवपुत्रः। इत्यमरः॥ (एतत्कथा बाणयुद्धशब्दे द्रष्टव्या॥)

उषारमणः, पुं, (उषाया रमणः।) अनिरुद्धः। इति हलायुधः॥

उषितः, त्रि, (उष वा वस+क्त।) व्युषितः। दग्धः। इति मेदिनी॥ त्वरितम्। इति धरणिः॥ स्थितः। इति त्रिकाण्डशेषः॥

उषितकक्षीवान्, त्रि, (उषिताः स्थिता गावो यत्र।) आश्रितकक्षीवान्। यत्र पुरा गावो भोजिताः। इत्यमरटीकायां रमानाथः॥

उषीरः, पुं क्ली, (उष्+कीरच्।) उशीरः। वीरणमूलम्। इत्यमरटीकायां रायमुकुटः॥

उष्ट्र

उषेशूरः, पुं, (उषायाः बाणकन्यायाः ईशूरः।) अनिरुद्धः। इति हेमचन्द्रः॥

उष्ट्रः, पुं, (उष+"उषिखनिभ्यां कित्"। ४।१६१। इत्युणादिसूत्रेण ष्ट्रन् किच्च।) वाह्यरथः। इति धरणी॥ प्रसुविशेषः। उट् इति भाषा। तत्पर्य्यायः। क्रमेलकः २ मयः ३ महाङ्गः ४। इत्यमरः॥ दीर्घगतिः ५ बली ६ करभः ७ दासेरकः ८ धूसरः ९ लम्बोष्ठः १० रवणः ११ महाजङ्घः १२ जवी १३ जाङ्घिकः १४ दीर्घः १५ पृष्ठकूलकः १६ महान् १७ महाग्रीवः १८ महानादः १९ महाध्वगः २० महापृष्ठः २१ बलिष्ठः २२। इति राजनिर्घण्टः॥ दीर्घजङ्घः २३ ग्रीवी २४ धूसरकः २५ शूरभः २६। इति जटाधरः॥ क्रमेलः २७ कण्टकाशनः २८ भोलिः २९ वङ्क्रकरः ३० अध्वगः ३१ मरुद्विपः ३२ वक्रग्रीवः ३३। इति शब्दरत्नावली॥ वासन्तः ३४ कुलनाशूरः ३५। इति त्रिकाण्डशेषः॥ कुशूनामा ३६ मरुप्रियः ३७ द्विककुत् ३८ दुर्गलङ्घनः ३९ भूतघ्नः ४० दासेरः ४१ दीर्घग्रीवः ४२ केलिकीर्णः ४३। इति हेमचन्द्रः॥ (यथा मनुः ४।१२०।

"नाधीयिताश्वमारूढो न रथं न च हस्तिनम्।
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः"॥
"उष्ट्रयानं समारुह्य खरयानं तु कामतः"।
इति च मनुः। ११।२९॥)

उष्ट्रकाण्डी, स्त्री, (उष्ट्रइव काण्डोऽस्य। जातित्वात् ङीष्।) पुष्पजातिभेदः। उँटाटी इति ख्याता। तत्पर्य्यायः। रक्तपुष्पी २ करभकाण्डिका ३ रक्ता ४ लोहितपुष्पी ५ कर्णपुष्पी ६। अस्या गुणाः। तिक्तत्वम्। उष्णत्वम्। रुचिकारित्वम्। हृद्रोगहारित्वञ्च। अस्या बीजगुणाः। मधुरत्वम्। शीतत्वम्। ग्रीष्मत्वम्। दृष्यत्वम्। सन्तर्पणत्वञ्च। इति राजनिर्घण्टः॥

उष्ट्रधूसरपुच्छिका, स्त्री, (उष्ट्रस्य धूसरः पुच्छइव पुच्छो मञ्जरी यस्याः।) वृक्षविशेषः। इति रत्नमाला॥ विचिटीइति भाषा॥

उष्ट्रपादिका स्त्री, (उष्ट्रस्य पाद इव पादो यस्याः।) वृक्षविशेषः। मदनमालीति ख्याता। तत्पर्य्यायः। शातभीरुः २ भद्रवल्ली ३ भूमिमत्ता ४। इति रत्नमाला॥

उष्ट्रग्रिरोधरं, क्ली, (उष्ट्रस्य ग्रिरोधरः ग्रीवा इव आकृतिर्यस्य।) भगन्दररोगविशेषः। तस्य लक्षणम्।

"प्रकोपनैः पित्तमतिप्रकोपितं
करोति रक्तां पिड़कां कदाचित्।
तदाशुपाकां हिमपूतवाहिनीं
भगन्दरन्तूष्ट्रग्रिरोधरं वदेत्"॥

इति निदानम्। (अस्य लक्षणं चिकित्साञ्चोक्तवान् वाग्भटे उत्तरस्थाने २८ अध्याये। अस्य नामान्तरमुष्ट्रग्रीवः। यथा।

"पित्तादुष्ट्रग्रीववदुच्छ्रिता॥
रागिणी तनुरुग्राह्या ज्वरधूमायनान्विता"।
"उष्ट्रग्रीवस्तु पित्तजः"।
"अग्निना वा भिषक् साधूच्चारेणैवोष्ट्रकन्धरम्"।

उष्णी

सुश्रुतेन निदानस्थाने ४ अध्याये यत् सम्प्राप्तिपूर्ब्बकं लक्षणमस्योक्तं तद्यथा॥ पित्तन्तु प्रकुपितमनिलेनाधः प्रेरितं पूर्ब्ववदवस्थितं रक्तां तन्वीमुच्छ्रितामुष्ट्रग्रीवाकारां पिड़कां जनयति। सास्यचोषादीन् वेदनाविशेषान् जनयत्यप्रतिक्रियमाणा च पाकमुपैति व्रणञ्चाग्निक्षाराभ्यामिव दह्यते दुर्गन्धमुष्णमास्रावं स्रवत्युपेक्षितञ्च वातमूत्रपुरीष-रेतांसि विसृजति तं भगन्दरमुष्ट्रग्रीवमित्याचक्षते"॥ इति।*॥ सुश्रुते चिकित्सितस्थाने ८ अध्याये चिकित्सा यथा,—

"उष्ट्रग्रीवे क्रियां शृणु।
अधोष्ट्रग्रीवमेषित्वा क्षिप्त्वा क्षारं निपातयेत्।
पूतिमांसव्यपोहार्थमग्निञ्च न पूजितः।
अथैनं घृतसक्तैस्तिलैः पिण्डैः प्रलेपयेत्॥
बन्धं ततोऽनुकुर्व्वीत परिषेकन्तु सर्पिषा।
तृतीये दिवसे मुक्त्वा यथास्वं शोधयेद्भिषक्॥
ततः शुद्धं विदित्वा च रोपयेत्तु यथाक्रमं।
उत्क्लेत्यास्रावमार्गन्तु परिस्रावित्रि बुद्धिमान्॥
क्षारेण वा स्रावगतिं दहेद्घृतवहेन वा।
मुखोष्णेनागुतैलेन सेचयेदनुदमण्डलम्॥
उपनाहाः प्रदेहाश्च मूत्रक्षारसमन्वितः।
वामनीयौषधैः कार्य्याः परिषेकाश्च मात्रया"॥)

उष्ट्रिका, स्त्री, (उष्ट्रस्याकृतिरिवावयवो यस्याः। उष्ट्रस्त्री वा॥) मृत्तिकाभाण्डभेदः। (यथा माघे १२।१६

"धूर्भङ्गक्षिप्तेषविदारितोष्ट्रिका"।) उष्ट्रभार्य्या इति मेदिनी॥ वृश्चिकालीवृक्षः। इति राजनिर्घण्टः॥

उष्ट्री, स्त्री, (उष+ष्ट्रन्+ङीष्।) मृत्तिकाभाण्डः उष्ट्रस्त्री। इति हेमचन्द्रः॥ तस्याः क्षीरगुणाः कुष्ठशोथपित्तार्शःकफाटोपानाहोदरस्रंसजन्तुगुल्मश्वासोल्लासनाग्नित्वम्। तद्दधिगुणाः। अर्शःकुष्ठकृमिशूलोदररोगनाशित्वम्। कटुत्वम्। स्वादुत्वञ्च। तन्नवनीतगुणाः। विषाके शीतलत्वम्। लघुत्वम्। व्रणकृमिकफास्रवातविषनाशित्वञ्च। तद्घृतगुणाः। मधुरत्वम्। विषाके कटुत्वम्। शीतलत्वम्। कुष्ठकृमिविषवातकफगुल्मोदरनाशित्वञ्च। तन्मांसगुणाः॥ स्निग्धिरत्वम्। त्रिदोषशमनत्वम्। लघुत्वम्। बलपुष्टिप्रदत्वम्। रुचिकारित्वम्। मधुरत्वम्। वीर्य्यवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ (अस्या दुग्धगुणा यथा,—

"ईषदूष्णोष्णलवणमौष्ट्रकं दीपनं लघु।
श्लक्ष्णं वातकफानाहक्रिमिशोथोदरार्शसाम्"॥
इति वैद्यकचक्रपाणिदत्तद्रव्यगुणे पानीयवर्गे।
"औष्ट्रं दुग्धं लघु स्वादु लवणं दीपनन्तथा।
क्रिमिकुष्ठकफानाहशोथोदरहरं सरम्"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥
"रूक्षं तथोष्णं लवणं कफस्य
निवारणं वातविकारहारि।
लघु प्रशस्तं कटुकं क्षमीणां
शोफार्शिनामौष्ट्रपयोऽनुकूलम्"॥
इति हारीते प्रथमस्थानेऽष्टमेऽध्याये॥
"रूक्षोष्णं क्षीरमुष्ट्रीणामीषत् लवणं लघु।

शूलं वातकफानाहकृमिमेदोविदाहार्शसाम्" ॥
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥
"रूक्षोष्णं लवणं किञ्चिदौष्ट्रं स्वादुरसं लघु ।
श्लोकगुल्मोदरार्शघ्नं कृमि-कुष्ठ-विषापहम्" ॥
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः ॥)

उष्णः, पुं, (उष दाहे + "इगुपधज्ञीरीकः" ।३।२। इति उणादिसूत्रेण नक् ।) ग्रीष्मऋतुः । तत्पर्य्यायः । ग्रीष्मः २ उष्मकः ३ निदाघः ४ उष्णोपगमः ५ उष्णागमः ६ तपः ७ । इत्यमरः ॥ आतपः । इति हेमचन्द्रः ॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्यायः ।
"उष्णे हैमे वसन्ते च कामं ग्रीष्मे तु शीतलम्" ।
क्वचित् स्त्रीलिङ्गान्तोऽपि दृश्यते ।
यथा महाभारते संवर्त्तमरुत्तीये ।१४।८।९ ।
"नोष्णं न शिशिरस्तत्र न वायुर्न च भास्करः" ।
अग्निः । सूर्य्यः । यथा, मनुः ११ । ११३ ।
"उष्णे वर्षति शीते वा मारुते वाति वा सदा" ।
("उष्णे आदित्ये मेघे च वर्षति" इति तट्टीकायां कुल्लूकभट्टः ॥) पलाण्डुः । इति राजनिर्घण्टः ॥ उष्णवीर्य्यद्रव्यगुणाः । पित्तबलकारित्वम् । लघुत्वम् । वातश्लेष्मनाशित्वञ्च । इति राजवल्लभः ॥

उष्णः, त्रि, (उष् + नक् ।) निरालस्यव्यक्तिः । तत्पर्य्यायः । दक्षः २ चतुरः ३ पेशलः ४ पटुः ५ सूत्यानः ६ । इत्यमरः । अशीतः । इति मेदिनी ॥ (यथा मनुः । ३ । २३७ ।
"यावदुष्णं भवत्यन्नं यावन्नाति वाग्यतः" ॥)

उष्णकः, पुं, (उष्णं करोतीति । उष्ण + शीतोष्णाभ्यां कारिणीति कन् ।) ग्रीष्मकालः । चंक्रमादिः । इति धरणी ॥ (ज्वरः । इति पाणिनिः ५ । २ । ८१ ॥)

उष्णकः, त्रि, (उष्णं कार्य्यमस्य । उष्ण + कन् ।) त्रिप्रकारी । आतुरः । इदि मेदिनी ॥ प्रगतः । इति धरणी ॥ क्रोधोदीप्तः इति पाणिनिः ५ । २ । ७२ ॥)

उष्णनदी, स्त्री, (उष्णा नदी ।) वैतरणी नदी ॥

उष्णरश्मिः, पुं, (उष्णा रश्मयो यस्य ।) सूर्य्यः । अर्कवृक्षः । इत्यमरः ॥ (यथा, कुमारे ३ । २५ ।
"कुबेरगुप्तां दिशमुष्णरश्मौ
गन्तुं प्रवृत्ते समयं विलङ्घ्य" ॥)

उष्णवारणः, पुं, क्ली, (उष्णमातपं वारयति । उष्ण + वृ + णिच् + ल्युट् ।) छत्रम् । इति हारावली ॥ (यथा, कुमारे ५ । ५२ ।
"यदर्थमम्भोऽभिरवोष्णवारणं
कृतं तपःसाधनमेतया वपुः" ।
छत्रशब्देऽस्य गुणादिकं ज्ञेयम् ॥)

उष्णवीर्य्यः पुं, (उष्णमुग्रं वीर्य्यं यस्य ।) शिशुमारः । इति हेमचन्द्रः ॥ तीक्ष्णतेजोयुक्तद्रव्यादिः ॥ (प्रचण्डवीर्य्यगुक्ते, त्रि ॥)

उष्णा, स्त्री, (उष्यते बध्यते यया । उष बधे + नक् + टाप् ।) क्षयव्याधिः । सन्तापः । पित्तम् । इति राजनिर्घण्टः ॥ [हेमचन्द्रः ॥

उष्णांशुः, पुं, (उष्णा अंशवो यस्य ।) सूर्य्यः । इति

उष्णागमः, पुं, (उष्णस्यागमो यस्मिन् ।) ग्रीष्मकालः । इत्यमरः ॥

उष्णाभिगमः पुं, (उष्णस्यातपस्याभिगमो यत्र ।) ग्रीष्मऋतुः । इति शब्दरत्नावली ॥

उष्णासहः पुं, (उष्णं आतपं आसह्यते यत्र । उष्ण + आ + सह + अच् ।) हेमन्तऋतुः । इति राजनिर्घण्टः ॥ (उष्णासह्यकारिणि, त्रि ॥)

उष्णिक्, [ह्] स्त्री, (उत् + स्निह् + क्विन् । निपातनात् उपसर्गान्तलोपः षत्वं च ।) समाक्षरच्छन्दः । (यथा छन्दोमञ्जर्य्याम्,—
"उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुपूर्व्विका ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च" ॥
उष्णिक् समाक्षरा वृत्तिः । सा च त्रिधा मधुमती-कुमारललिता-मदलेखाभेदात् । उदाहरणपूर्व्वकं तल्लक्षणं यथा तत्रैव । "ननगि मधुमती" ।
"रविदुहितटते घनकुसुमनतिः ।
व्यधित मधुमती मधुमथनमुदम्" ॥ १ ॥
"कुमारललिता जसगाः" ॥
"मुरारितनुवल्ली कुमारललिता सा ।
व्रजेशनयनानां ततान मुदमुच्चैः" ॥ २ ॥
"मसगौ स्यान्मदलेखा" ॥) "रङ्के बाऽवविरुमात् कुम्भीन्द्रान्मदलेखा । लग्नाभून्मरशत्रोः कस्तूरीरसचर्चा" ॥

उष्णिका, स्त्री, (अल्पमन्नमस्याम् । ब्राह्मणकोष्णिके संज्ञायामिति कन् । निपातनादन्नशब्दस्योष्णादेशः ।) यवागूः । इत्यमरः ॥ याउ इति भाषा ।

उष्णीषः, पुं, क्ली, (उष्णमीषते हिनस्ति । ईष गतिहिंसादर्शनेषु । इगुपधेति कः । शकन्ध्वादिः ।) शिरोवेष्टः । इत्यमरः ॥ पाग इति भाषा । अस्य गुणाः । केशचक्षुरायुर्व्वर्द्धकत्वम् । धूलिशीतोष्णनिवारकत्वञ्च । इति राजवल्लभः ॥ यथा ।
"उष्णीषं कान्तिकृत् केश्यं रजोवातकफापहम् ।
लघु चेच्छस्यते यस्मात् गुरुपित्तात्तिरोगकृत्" ॥
इति भावप्रकाशः ॥ किरीटः । (यथा, महाभारते सौभवधोपाख्याने ३ । २१ । २४ ।
"विशीर्णमणिनोष्णीषः प्रकीर्णाम्बरमूर्द्धजः" ।
रजोऽवश्यायसूर्य्यांशुहिमानिलनिवारणं ।
प्रतिश्यायशिरःशूल-हरत्वोष्णीषधारणम् ।
इति वैद्यकचक्रपाणिदत्तद्रव्यगुणे गुणानां क्रियाभिधानादिवर्गे ॥
"बाणवारं मृजावर्णतेजोबलविवर्द्धनम् ।
पवित्रं केश्यमुष्णीषं वातातपरजापहम्" ॥
इति सुश्रुते चिकित्सितस्थाने २४ अध्याये ॥)
चिक्कान्तरम् । इति मेदिनी ॥

उष्णोदकं, क्ली, (उष्णञ्च तत् उदकञ्चेति ।) तप्तजलम् । क्वाथ्यमानपादावशेषार्द्धावशेषपादहीनं जलम् । तद्विधिर्यथा ।
"अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा ।
अथवा क्वथनेनैव सिद्धमुष्णोदकं वदेत्" ॥
अस्य गुणाः । सदा पथ्यत्वम् । कासज्वरविबन्धकफवातामदोषनाशित्वम् । दीपनत्वम् । वस्तिशोधनत्वञ्च ।

"श्लेष्मामवातमेदोघ्नं वस्तिशोधनदीपनम् ।
कासश्वासज्वरान् हन्ति पीतमुष्णोदकं निशि" ।
इति भावप्रकाशे प्रथमखण्डम् ॥ * ॥ अथोष्णोदकस्य लक्षणं गुणाश्च ।
"क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलन्तथा ।
अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते ॥
ज्वर-कास-कफ-श्वास-वात-पित्तास-मेदसाम् ।
नाशनं वस्तिसंशोधि पथ्यमुष्णोदकं सदा ॥ * ॥
अथर्त्तुभेदे जलस्य पाकभेदः । यदाह,
त्रिपादशेषं सलिलं ग्रीष्मे शरदि शस्यते ।
"हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः" ॥
अन्ये तु ।
"निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम् ।
शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम् ॥
अष्टमांशावशेषन्तु वारि वर्षासु शस्यते ।
इति केचिद्बुधाः प्राऽर्जेज्जटागमदर्शनात्" ॥
केचित्तु ।
"वसुव्यङ्गेषु बाणेषु वेदेषु त्रिषु पक्षयोः ।
एकभागावशेषं स्यादम्बु वर्षादिषु क्रमात्" ॥
अत्र दोषाणां यथोल्बणता हीनता वा तथा व्यवस्था कल्पनीया ॥
"तत्पादहीनं पित्तघ्नमर्द्धहीनन्तु वातनुत् ।
त्रिपादहीनं श्लेष्मघ्नं संयाह्यग्निप्रदं लघु" ॥ * ॥
त्रिपादहीनस्य तन्नान्तरे आरोग्याम्बुसंज्ञा ।
तस्य लक्षणगुणाः ।
"पादशेषन्तु यत्तोयमारोग्याम्बु तदुच्यते ।
आरोग्याम्बु सदा पथ्यं कास-श्वास-कफापहम् ॥
सद्यो ज्वरहरं ग्राहि दीपनं पाचनं लघु ।
आनाहपाण्डुशूलार्शोगुल्मश्लीपोदरापहम्" ॥
इति भावप्रकाशे मध्यमखण्डम् ॥ रात्रौ उष्णोदकपानगुणाः । श्लेष्मसङ्घातमेदकत्वम् । मारुतापकर्षित्वम् । आशु जरीर्णकारित्वञ्च ।
"तत्पादहीनं वातघ्नं मध्यहीनं तु पित्तनुत् ।
कफघ्नं पादशेषन्तु पानीयं लघु दीपनम्" ॥
इति राजनिर्घण्टः ॥
("शरदीह तथा ग्रीष्मे क्वाथे पादावशेषितम् ।
शिशिरे च वसन्ते च कुर्य्यादर्द्धावशेषितम्" ॥
विपरीतमृतुं दृष्ट्वा प्राहुषं वार्द्धभागिकम् ।
क्वाथ्यमानञ्च निर्व्वेगं निष्फेनं निर्म्मलञ्च यत् ॥
अर्द्धावशिष्टं भवति तदुष्णोदकमुच्यते ।
तत्पादहीनं वातघ्नमर्द्धं पित्तविकारजित् ॥
कफघ्नं पादशेषन्तु पानीयं लघु पाचनम्" ।
"दिवसे क्वथितं तोयं रात्रौ तदगुरुतां व्रजेत् ।
रात्रौ श्रृतन्तु दिवसे गुरुत्वमधिगच्छति" ॥
इति हारीते प्रथमस्थाने ७ अध्याये ।
"दीपनं पाचनं कण्ठ्यं लघुष्णं वस्तिशोधनम् ॥
हिक्काध्मानानिलश्लेष्म सद्यःशुद्धे नवज्वरे ।
कासामपीनसश्वासपार्श्वरुग्घ्न श्रस्यते" ॥
"अवभिस्यन्दि लघु च तोयं क्वथितशीतलम् ।
पित्तगुल्मे हितं दोषे व्युषितं तन्विदोषकृत् ॥
इति वाभटे सूत्रस्थाने ५ अध्याये ॥
"कफमेदोऽनिलाम्घ्न दीपनं वस्तिशोधनम् ॥

श्वास-कास-ज्वर-हरं पथ्यमुष्णोदकं सदा ।
यत् क्वाथ्यमानं निर्व्वेगं निःफेनं निर्म्मलं लघु ॥
चतुर्भागावशेषन्तु तत्तोयं गुणवत् स्मृतम् ।
न च पर्य्युषितं देयं कदाचिद्वारि जानता ॥
अस्त्रीभूतं कफोत्क्लेशि न हितं तत् पिपासवे ।
मद्यपानात् समुद्भूते रोगे पित्तोत्थिते तथा ॥
सन्निपातसमुत्थे च हृतशीतं प्रशस्यते" ।
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)
तमुवाच भगवानात्रेयो ज्वरितस्य कायसमुत्थान-देश-कालानभिसमीक्ष्य पाचनार्थं पानीयमुष्णं प्रयच्छन्ति भिषजः। ज्वरो ह्यामाशयसमुत्थः प्रायो भेषजानि चामाशयसमुत्थानां विकाराणां पाचन-वमनापतर्पणानि शमनानि भवन्ति पाचनार्थञ्च पानीयमुष्णं तस्मादेतज्ज्वरितेभ्यः प्रयच्छन्ति भिषजो भूयिष्ठम्। तद्धेयं .प्रोतं वातमनुलोमयति अग्निमुदीर्य्यमुदीरयति। क्षिप्रं जरां गच्छति श्लेष्माणञ्च परिशोषयति स्वल्पमपि च पीतं हृष्णा-प्रशमनायोपपद्यते तथा युक्तमपि चैतन्मात्रार्थात्-सन्निपित्ते ज्वरे सदाहभ्रमप्रलापातिसारे वा प्रदेयमुष्णं हि दाह-भ्रम-प्रलापातिसारा भूयो-ऽभिवर्द्धन्ते शीतेनोपशाम्यन्तीति" ।
इति चरके विमानस्थाने ३ अध्यायः ॥)

उष्णोपगमः, पुं, (उष्णः उपगमो यत्र ।) ग्रीष्मकालः । इत्यमरः ॥

उष्णः, पुं, (उष + मक् ।) ग्रीष्मकालः । वसन्तकालः । इत्युणादिकोषः ॥ उष्णः । क्रोधः ॥

उष्णकः, पुं, (उष्ण + कन् ।) ग्रीष्मऋतुः । इत्यमरः ॥

उष्णा, [न्] पुं, (उष् + मनिन् ।) ग्रीष्मकालः । उत्तापः । इत्यमरटीकायां नीलकण्ठः ॥
(यथा कुमारे । ५ । २३ ॥
"तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्णागममुद्वहद्भगम्" ।
"उष्णा पित्ताहते नास्ति ज्वरो नास्त्यव्रणा विना ।
तस्मात्पित्तविरुद्धानि त्यजेत्तत्ताधिकेऽधिकम्" ॥
इति वाभटे चिकित्सास्थाने १म अध्याये ॥)

उष्णागमः, पुं, (ओषतीति उष्णा । आगच्छतीति आगमः । उष्णा आगमो यत्र ।) ग्रीष्मकालः । इत्यमरटीकायां गायमुकुटः ॥

उषः, पुं, (वस + "स्फायितञ्चिवञ्चिप्रुङ्किन्विलीति" । २ । १३ । उणादिसूत्रेण रक् ।) वृषः । (यथा, ऋग्वेदे । ६ । १२ । ४ । "वन्वन्त्सावानार्वोषः पितेव" । "उषः वृषभः"। इति भाष्यम् ॥) रश्मिः । इति मेदिनी ॥ (यथा रघुः । ४ । ६६ ।
"अरैरुषैरिवोदीच्यानुदरिष्यन् रसानिव" ।
लताभेदः । सूर्य्यः । यथा, ऋग्वेदे । ३ । ५८ । १ ।
"प्र मित्रासो न ददुषो अर्य्ये" । "वसति नभसीत्युषः सूर्य्यः"। इति भाष्यम् । अश्विनीपुत्रौ । यथा तत्रैव । ४ । ४५ । ५ ॥
"अयमु उषा अरन्ते प्रतिवस्तोरश्विनौ" ॥)

उषा, स्त्री, (उष + टाप् ।) अर्ज्जुनी । गाइ इति भाषा । उपचित्रा । इन्दुरकाणीति भाषा । इति मेदिनी ॥ (सुरभी गौः । इत्युणादिकोषः ॥)

उह इर् अर्दे । इति कविकल्पद्रुमः ॥ (भ्वादिः-परं-सकं-सेट् ।) क्रुसादिः । इर् औहत् औहीत् । अर्द इह वधः । इति दुर्गादासः ॥
उहानः, पुं, देशविशेषः । इति भूरिप्रयोगः ॥

ऊ

ऊ, दीर्घोकारः । स च षष्ठस्वरवर्णः । अस्य उच्चारणस्थानं ओष्ठः ॥ ("उपूपध्मानीयानामोष्ठौ" । स च (द्विमात्रत्वात्) दीर्घः (त्रिमात्रत्वात्) प्लुतश्च भवति । (प्रत्येकं उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि अनुनासिकानुनासिकभेदात् षड्-विधोऽपि भवति ॥
"स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्" ।
इति शिक्षावचनात् अस्योच्चारणे विवार आभ्यन्तरप्रयत्नः । विवृतं जिह्वाग्रादेः स्पर्शनाभावः । यदुक्तं तत्रैव " अचोऽस्पृष्टायणश्चीषत् नेमस्पृष्टाः शूलः स्मृताः" । इति ।)
"शङ्खकुन्दसमाकारं ऊकारं परमकुण्डली ।
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा ॥
पञ्चप्राणयुतं वर्णं पीतविद्युल्लता तथा ।
धर्म्मार्थकाममोक्षञ्च सदा सुखप्रदायकम्" ॥
इति कामधेनुतन्त्रम् ॥ तस्य (वङ्गीयभाषायाम्) लेखनप्रकारो यथा,—
"तद्रूपाधोगता रेखा कुञ्चिता वामतः शुभा" ।
तद्रूपा पूर्व्वोक्तोकाररूपा ।
"तिष्ठन्ति तासु रेखासु यमाग्निवरुणाः क्रमात् ॥
अधोर्द्ध्वगामिनी माया लक्ष्मीर्वाणी च सा स्मृता" ।
इति वर्णोद्धारतन्त्रम् ॥ तस्य नामानि यथा,—
"ऊः करण्डको रतिः शान्तिः क्रोधनो मधुसूदनः ।
कामराजः कुजेशश्च महेशो वामकर्णकः ॥
अर्द्धीशो भैरवः सूक्ष्मो दीर्घघोणा सरस्वती ।
विलासिनी विघ्नकर्त्ता लक्ष्मणो रूपकर्षिणी ॥
महाविद्येश्वरी षष्ठा षण्ढोभूः कान्यकुब्जकः" ।
इति तन्त्रम् ॥ (माढकान्यासेऽस्य वामकर्णे न्यस्यतया तदाख्ययाप्यभिधानम् । यथा, माढकान्यासमन्त्रे "ऊं नमो दक्षिणकर्णे ऊं नमो वामकर्णे" । अनुबन्धविशेषः । यथाह कविकल्पद्रुमे ।
"ऊः क्लावेभूस्त्वेटकः । तेन सिध् शास्त्रे इत्यस्य लुडि क्ते असेधीत् असेत्सीत् इति स्यात् ॥)

ऊ, व्य, (वेञ् + क्विप् ।) वाक्यारम्भः । रक्षा । अनुकम्पा । इति मेदिनी ॥ (सम्बोधनम् ॥)

ऊः, पुं, (अवति रक्षतीति । अव् + क्विप् । ज्वरत्वरेत्यूट् । ६ । ४ । २० ।) महेश्वरः । इति पुरुषोत्तमः ॥ चन्द्रः । इति शब्दरत्नावली ॥ (रक्षाकर्त्तरि, त्रि॥)

ऊढ़ः, त्रि, (उह्यते स्म । वह् + क्त ।) विवाहितः । इति स्मृतिः ॥
("भार्य्याढ़ं तमवज्ञाय तस्थे सौमित्रयेऽसकौ" । इति भट्टिः । ४ । १५ ।) क्षतवहनः ॥

ऊढ़कङ्कटः, त्रि, (ऊढ़ो धृतः कङ्कटो येन ।) कवचधारी । तत्पर्य्यायः । सन्नद्धः २ वर्म्मितः ३ सज्जः ४ दंशितः ५ । इत्यमरः ॥

ऊढ़ा, स्त्री, (वह + क्त + टाप् ।) भार्य्या । इति हेमचन्द्रः ॥ (विवाहिता कन्या । यथा,—
"ऊढ़ानूढ़ासमवायेऽनूढ़ैव प्रथमं धनहारिणी" ।
इति स्मृतिः ॥)

ऊतं, त्रि, (वे + क्त ।) तन्तुसन्ततम् । तत्पर्य्यायः । स्यूतम् २ उतम् ३ । इत्यमरः ॥ कापड़ बोना इति भाषा ॥ (ग्रथितम् । अव + क्त । ज्वरत्वरेत्यूट् ६ । ४ । २० । रक्षितम् ॥)

ऊतिः, स्त्री, (अव् + क्तिन् । ज्वरत्वरेत्यूट् । ६ । ४ । २० ।) रक्षणम् । (वे + क्तिन् ।) स्यूतिः । इति मेदिनी ॥ बोना सेलाइ इति भाषा । ज्ञानम् । इति शब्दरत्नावली ॥ जवनम् । इत्यमरटीकायां स्वामी ॥ लीला । इति श्रीभागवतम् ॥ (कर्त्तरि क्तिचि । रक्षाकर्त्ता । यथा, ऋग्वेदे । ४ । ४ । २ ॥
"उरुष्यन्तम् माध्वी दक्षा न ऊतीः" । कर्म्मणि क्तिन् । पुराणस्य दशविधलक्षणमध्ये कर्म्मवासना-रूपो लक्षणभेदः । यथा, भागवते । २ । २० — १४ ।
श्रीशुक उवाच ।
"यत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥
दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥
भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः ।
ब्रह्मणो गुणवैषम्यात् विसर्गः पौरुषः स्मृतः ॥
स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः ।
मन्वन्तराणि सद्धर्म्म ऊतयः कर्म्मवासनाः" ॥
"कर्म्मवासना ऊतयः" । इति चूर्णिकाटीका ॥)

ऊधः, [स्] क्ली, (उन्द + असुन् । ऊधसो नडिति निर्देशात् ऊधादेशः ।) आपीनम् । इत्यमरः ॥ गाइर पालान् इति भाषा । (यथा महाभारते । चैत्ररथपर्व्वणि । १ । १७६ । १३ ॥
("मण्डूकनेत्रां स्वाकारां पीनोधसमनिन्दिताम्" ।
"यदैव स्त्रियै स्तनावाप्यायेते ऊधः पशूनाम्" ।
इति श्रुतपथब्राह्मणे । २ । ५ । १ । ५ ॥)

ऊधस्यं, क्ली, (ऊधसि भवम् । ऊधस् + यत् ।) दुग्धम् । इति हेमचन्द्रः ॥

ऊन, त् क परिहाने । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) दीर्घादिदन्त्योपधः । तथा च । "क्षोभमासु हृदयं न यदूनां रागरुद्धिमकरोन्न यदूनाम्" । इति माघयमकम् । परिहानं न्यूनक्रिया । ऊनयति वणिक् स्वर्णं प्रथमपरिमाणात् । परिमाणमात्रेऽयमिति केचित् । मा भवान् ऊनिनत् । ऊनधोर्ज्झिः अड् द्वित्वे स्वस्थानमेव नास्ति अतो नाग्लोपित्वमिति सन्देहनिरासार्थमाह । ओनेर्झदनुबन्धज्ञापकबलात् द्वित्वात् प्राक् प्राप्तो झसो अग्लोपित्वान्न स्यात् । इति दुर्गादासः ॥

ऊन, त्रि, (अवतीति । अव + "इण्शिक्षिदीङ्ष्व्यविभ्यो नक्" । ३ । २ । इति उणादिसूत्रेण नक् । "ज्वरत्वरेति" । ६ । ४ । २० ऊट् । सर्व्वत्रे तु ऊनयतेरूनमिति साधितम् ।) हीनम् । न्यूनम् ॥ ("ऊनं न सत्वेष्वधिको बबाधे" । इति रघुः । २ । १४ ॥ तत्रैव । ११ । १ ।

"किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ"।
"ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः"।
इति मनुः। ५। ६८॥)

ऊनविंशः, त्रि, ऊनविंशतेः पूरणः। यथा,—
"तिथ्यङ्कवेदैकदशोनविंश-
भैकादशाष्टादशविंशसंख्याः।
इष्टोड़ना सूर्य्ययुतोड़ुना च
योगादमूस्वेद्दशयोगभङ्गः"॥
इति ज्योतिस्तत्त्वम्॥

ऊनविंशतिः, स्त्री, (एकेन ऊना विंशतिः।) एकोनविंशतिः। ऊनिश इति भाषा। यथा। "ऊनविंशतिदास्यमानपिण्डस्थानानि"। इति तिथ्यादितत्त्वे आमावस्याप्रकरणे॥

ऊम्, य (ऊय्यते। ऊय्+मुक्।) रोषोक्तिः। इच्छा। इति मेदिनी॥ निन्दा। स्पर्द्धा। इति शब्दरत्नावली॥

ऊमं, क्ली, (अवतीति। अव+"अविसिविमिशुभिभ्यः कित्"। १।१४३। इति उनादिसूत्रेण मन्। कित् ऊठ् च।) देशविशेषः। इति सिद्धान्तकौमुदी॥

ऊय, ई ङ खेदने। तन्तुसन्ताने इति यावत्। इति कविकल्पद्रुमः (भ्वादिः-आत्मं-सकं-सेट्।) दीर्घादिः। सेवनमिह सिव्युतन्तुततावित्यस्य रूपं ईऊतः। ङ ऊयते पटं सौचिकः। इति दुर्गादासः॥

ऊररी, य (ऊय्+बाहुलकात् ररीक्।) विस्तारः। अङ्गीकारः। इति भरतो द्विरूपकोषश्च॥

ऊरयः, पुं, (ऊरोर्जातः। ऊरु+शरीरावयवात् यदिति यत्। वैश्यस्य ब्रह्मणः ऊरोर्जातत्वात् तथात्वम्।) वैश्यः। इत्यमरः॥ (यदुक्तं यजुषि। ३१। ११॥
"ब्राह्मणोऽस्य मुखमासीत् बाहूराजन्यः कृतः।
ऊरू तदस्य यत् वैश्यः पद्भ्यां शूद्रोऽजायत"॥ इति॥)

ऊरी, य (ऊर+बाहुलकात् रीक्।) विस्तारः। अङ्गीकारः। इत्यमरः॥ (यथा हितोपदेशे विग्रहे। "ऊरीकृत्य प्रस्थितः"॥)

ऊरीकृतः, त्रि, (ऊरी+कृ+क्त।) अङ्गीकृतः। विस्तृतः। इत्यमरः॥

ऊरुः, पुं, (ऊर्णायते आच्छाद्यते इति। ऊर्णा+(ऊर्णोतेर्नुलोपः। १। ३१। इति उणादिसूत्रेण कर्म्मणि कुः नुलोपश्च।) जानूपरिभागः। उरत् इति भाषा। तत्पर्य्यायः। सक्थि २। इत्यमरः॥ (यथा, साहित्यदर्पणे।
"भुवनत्रितये न विभर्त्ति तुलामिदमूरुयुगं न चमूरुदृशः"।
"भुजमूर्द्धास्यबाहुल्यादेकोऽपि धनदानुजः"।
इति रघुः। १२। ८८। तथा मनुः। १। ३१।
"लोकानान्तु विवृद्ध्यर्थं मुखबाहूरुपादतः"॥)

ऊरुजः पुं, (ऊरोर्जायते इति। ऊरु+जन्+ड।) वैश्यः। स तु ब्रह्मण ऊरुभ्यां जातः। इत्यमरः॥ (यथा, विष्णुपुराणे। १। ६। ४।
रजसा तमसा चैव समुद्रिक्तास्वथोरुजाः"।

भृगुवंशीय ऋषिभेदः। स च और्व्व इति नाम्ना ख्यातः। तस्य जन्मकथा और्व्वशब्दे द्रष्टव्या॥)

ऊरुपर्व्वा, [न्] पुं, क्ली, (ऊरोः पर्व्वेव।) जानु। इत्यमरः॥ हाँटु इति भाषा।

ऊररी, य, (ऊर+ररीक्।) विस्तारः। अङ्गीकारः। इति भरतो द्विरूपकोषश्च॥

ऊरुस्तम्भः, पुं, (ऊरू स्तम्भाति इति ऊरु+स्तम्भ+अण्।) ऊरुरोगविशेषः। यथा। अथोरुस्तम्भाधिकारः। तत्रोरुस्तम्भस्य विप्रकृष्टसन्निकृष्टनिदानसम्प्राप्तिपूर्व्वकं लक्षणमाह।
"प्रीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्न्निषेवितैः।
जीर्णाजीर्णे तथायासंक्षोभस्वप्नजागरैः॥
सश्लेष्ममेदः पवनः स्तानमत्यर्थसञ्चितम्।
अभिभूयेतरं दोषमूरू चेत् प्रतिपद्यते॥
सक्थ्यस्थिनी प्रपूर्य्यान्तःश्लेष्मणा स्तिमितेन सः।
तदा स्तभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ॥
परकीयाविव गुरू स्यातामतिशयव्यथौ।
ध्यानाङ्गमर्द्दस्तैमित्यतन्द्राच्छर्द्दारुचिज्वरैः॥
संयुतौ पादसदनक्लक्ष्वोड्डरणसुप्तिभिः।
तमूरुस्तम्भमित्याढ्यवातमाचार्य्यरे"॥
जीर्णाजीर्णे किञ्चिज्जीर्णं किञ्चिदजीर्णं तस्मिन् भोजनमित्यर्थः। अतएव दृढ़बलेन जीर्णाजीर्णे समश्नत इति पठितम्। तत्र प्रीतादिभिर्निषेवितैर्भुक्तैः। संक्षोभेण सङ्घलनेन। स्वप्नेन दिवा। जागरणेन रात्रौ। अभिभूय दूषयित्वा। इतरं दोषं पित्तम्। स्तिमितेन आर्द्रेण द्रुतेनेति यावत्। न तु घनेन। एवंविधेन श्लेष्मणा। सः पवनः। तदा ऊरू स्तभ्नाति तेन स्तम्भेन। अचेतनौ शून्यौ। परकीयाविव अक्रियावित्यर्थः। ध्यानं संमूढ़ता। पादसम्बन्धिनीभिः सदनक्लक्ष्वोड्डरणसुप्तिभिश्च संयुक्तौ। अयं सुश्रुतेन महावातव्याधिषु पठितः॥* प्राग्रूपमाह।
"प्राग्रूपं तस्य निद्रातिध्यानं स्तिमितता ज्वरः।
रोमहर्षोऽरुचिश्छर्द्दिर्जङ्घोर्व्वोः सदनं तथा"॥*॥
तस्योपशयमाह।
"वातघ्नक्रियानात्तत्र स्यात् स्नेहनात् पुनः।
पादयोः सदनं सुप्तिः क्लक्ष्वाद्दरणं तथा॥
जङ्घोरुस्तानित्यर्थं शूनश्वदाहवेदना।
पदश्च व्यथते न्यस्तं शीतस्पर्शं न वेत्ति च॥
संस्थाने पीड़ने गत्यां चालने चाप्यनीश्वरः।
अन्यनेयौ हि संभ्रान्तावूरू पादौ च मन्यते"॥
अन्यनेयौ अन्यपुरुषचाल्यौ भवत इत्यर्थः। अज्ञानात् अनिश्चयात् स्तम्भ-सुप्ति-कम्पादि-दर्शनेन। वातग्रन्थिभिः वातव्याधिग्रन्थिभिः। तत्र ऊरुस्तम्भे। स्नेहनात् स्नेहादिना स्नेहन्या चिकित्सया। पादसदनादय ऊरुभ्रंशोपमत्वात् ते विकाराः स्युः। जङ्घोरुस्तानिः जङ्घोर्व्वोर्गमनादावशक्तिः। आदाहवेदना ईषद्दाहेन सह वेदना॥*॥
ऊरुस्तम्भस्यारिष्टं लक्षणमाह।
"यदा दाहार्त्तितोदार्त्ता वेपनः पुरुषो भवेत्।
ऊरुस्तम्भस्तदा हन्यात् साधयेदन्यथा नवम्"॥
अन्यथा दाहाद्युक्तोपद्रवरहितं तमपि नवमुत्पन्न-

मात्रं साधयेत्॥*॥*॥
अथोरुस्तम्भस्य चिकित्सा।
"स्नेहाक्तस्वाववमनं वस्तिकर्म्मविरेचनम्।
वर्जयेदाढ्यवाते तु यतस्तत्तस्य कोपनम्॥
तस्मादत्र सदा कार्य्यं स्वेदनं घनरूक्षजम्।
आमभेदःकफाधिक्यान्मारुतं नयता समम्॥
यत् स्वीत् कफप्रशमनं न तु मारुतकोपनम्।
तत्सर्व्वं सर्व्वदा कार्य्यमूरुस्तम्भस्य भेषजम्॥
सर्व्वो रूक्षक्रमः कार्य्यस्तत्रादौ कफनाशनः।
पश्चाद्वातविनाशाय विधातव्याखिला क्रि॥
भोज्याः पुराणाः श्यामाकयवोद्दालशालयः।
जाङ्गलैरर्द्दतैर्म्मांसैः शाकैश्चालवणैर्हितैः"॥
उद्दालो वनकोद्रवः।
"दद्याद्दाल्लूकशाकेन हीनेन लवणेन तु।
जीर्णशाल्योदनं रूक्षमूरुस्तम्भवते भिषक्॥
रूक्षणाद्वातकोपश्चेन्निद्रानाशादिसम्भवः।
स्नेहस्वेदक्रमस्तत्र कार्य्यो वातामयापहः॥
प्रतारयेत् प्रतिस्रोतः सरितं शीतकोदकाम्।
सरश्च विमलं शीतं स्थिरलोयं पुनः पुनः॥
मूलैर्व्वा वाजिगन्धायाः अथवार्कस्य कारयेत्।
गाढ़मुत्सादनं वैद्य ऊरुस्तम्भे सवेदने॥
त्रिफलायश्चिकयोषचूर्णं लिह्यात् समाक्षिकम्।
ऊरुस्तम्भविनाशाय पुरं मूत्रेण वा पिबेत्॥
नागरं पिप्पलीक्षारं गुग्गुलुं वा शिलाजतु।
ऊरुस्तम्भी पिबेन्मूत्रैर्द्दशमूलीरसेन वा"॥
इत्यूरुस्तम्भाधिकारः। इति भावप्रकाशः॥
अपि च।
"त्रिफला चित्रकं चित्रं तथा कटुकरोहिणी।
ऊरुस्तम्भहरो ह्येष उत्तमन्तु विरेचनम्॥
हरीतकीं गुडूचीवेरं देवदारु च चन्दनम्।
क्वाथयेच्छागदुग्धेन अपामार्गस्य मूलकम्॥
जङ्घाशूलमूरुस्तम्भं सन्नराजे तु नाशयेत्"॥*॥
इति गारुड़े १८७ अध्यायः॥
("एक ऊरुस्तम्भ इति आमचिदोषसमुत्थानः"।
इति चरके सूत्रे ऊनविंशोऽध्यायः॥
अस्य सकारणलक्षणसम्प्राप्तिचिकित्सितानि यथा,
"श्रिया परमया ब्राह्म्या परया च तपःश्रिया।
अहीनं चन्द्रसूर्य्याभ्यां सुमेरुमिव पर्व्वतम्॥
धीर्धृतिस्मृतिविज्ञानज्ञानकीर्त्तिक्षमालयम्।
अग्निवेशो गुरुं काले संशयं परिपृष्टवान्॥
भगवन्! पञ्च कर्म्माणि समस्तानि पृथक्पृथक्।
निर्द्दिष्टान्यामयानान्तु सर्व्वेषामेव भेषजम्॥
दोषजोऽस्यामयः कश्चिदयस्यैतानि भिषग्वर!।
न स्युः शुद्धा निशमने साध्यस्य क्रियया ततः॥
अस्यूरुस्तम्भ इत्युक्तो गुरुणा तस्य कारणम्।
सलिङ्गं भेषजं भूयः पृष्टस्तेनाब्रवीद्गुरुः"॥*॥
निदानं सम्प्राप्तिलक्षणं च यथा॥
"स्निग्धोष्णलघुशीतानि जीर्णाजीर्णे समश्नतः।
दध्यशुष्कदधिक्षीरान्युपानूपौदकामिषैः॥
पिष्टान्नपिण्याकतिलवास्तूप्रजागरैः।
लङ्घनाध्यशनायासभयवेगविधारणैः॥
स्नेहाक्तामस्थितङ्कोष्ठे वातादीन् भेदसा सह।

रुद्धात्तु गौरवादूरू यात्यधोगैः शिरादिभिः ॥
पूरयन् सक्थिजङ्घोरुशोषो मेदोबलोत्कटः ।
अविधेयं परिस्पन्दं जनयत्यल्पविक्रमम् ॥
महासरसि गम्भीरे पूर्णोऽम्बु स्तिमितं यथा ।
तिष्ठति स्थिरमक्षोभ्यं तद्वदूरुगतः कफः ॥
गौरवायाससङ्कोचदाहरुक्सुप्तिकर्म्मनैः ।
भेदस्फुरणतोदैश्च युक्तो देहं निहन्त्यसून् ॥
गुरुः श्लेष्मासमेदस्को वातपित्तेऽभिभूय तु ।
स्तम्भयेत् स्पर्शशैत्याभ्यामूरुस्तम्भस्ततो मतः" ॥

पूर्व्वरूपाणि यथा ॥

"प्रायुपं ध्याननिद्रातन्द्रिमिश्यानोचकज्वराः ।
रोमहर्षश्च हृद्धिश्च जङ्घोर्व्वोः सदनन्तथा" ॥

अन्यदप्येव प्रागुक्तम् ॥ * ॥

चिकित्सा-यथा ॥

"तस्य न स्नेहनं कार्य्यं न वस्तिर्न विरेचनम् ।
न चैव वमनं यस्मात्तन्निबोधत कारणम् ॥
हृदये श्लेष्मणो नित्यं स्नेहनं वस्तिकर्म्म च ।
तत्स्थस्योदरगे चैव न समर्थं विशोधनम् ॥
श्लेष्मस्थानगतः श्लेष्मा पित्तञ्च वमनात्सुखम् ।
हर्त्तुमाशयशुद्धौ च स्वेदनात्तावुभावपि ॥
पक्वाशयस्थाः सर्व्वेऽपि वस्तिभिर्मूलनिर्जयात् ।
शुद्धा न त्वामदोषाभ्यां स्तब्धा जङ्घोरुसंस्थिताः ॥
वातस्थाने हितं स्नेह्यात्तयोस्तम्भाच्च तद्गताः ।
न शुद्धाः सुखमुद्धर्त्तुं जलं निम्नादिव स्थलात् ॥
तस्य संशमनं कुर्य्यात् लघणं शोधनन्तथा ।
व्याधिक्षयादामकफयोर्युक्त्यपेक्षः सदा भिषक् ॥
सदा रूक्षोपचाराय यवश्यामाककोद्रवान् ।
शाकैरलवणैर्दद्याज्जलतैलौषसाधितैः ॥
सुनिषण्णकनिम्बार्कवेत्राग्रवधपल्लवैः ।
वायसीवास्तुकैरन्यैस्तिक्तैश्च कुलकादिभिः ॥
क्षारारिष्टप्रयोगैश्च हरीतक्यास्तथैव च ।
मधूदकस्य पिप्पल्या ऊरुस्तम्भविनाशनम् ॥
समङ्गा शाल्मली बिल्वं मधुना सह नापिबेत् ।
तथा ग्रीवेयकोदीच्यदेवदारुनतान्यपि ॥
चन्दनं धातकीकुष्ठं तालीशं नलदन्तथा ।
मुस्तं हरीतकी लोध्रं पद्मकं तिक्तरोहिणी ॥
देवदारु हरिद्रे द्वे वचा कटुकरोहिणी ।
पिप्पली पिप्पलीमूलं सरलं देवदारु च ॥
चव्यं चित्रकमूलानि देवदारु हरीतकी ।
भल्लातकं समूला च पिप्पली पञ्च तान् पिबेत् ॥
सक्षौद्रानर्द्धश्लोकोक्तान् कल्कान्नूरुग्रहापहान्" ॥
"सूर्य्यास्तिविषां कुष्ठं चित्रकं कटुरोहिणीम् ।
पूर्ववद्वा पिबेत्तोये शृतिस्थितमथापि वा ॥
सप्तपर्णीरोमतिविषां मुस्तं तेजोवतीं वचाम् ।
समङ्गां चित्रकं कुष्ठं पाठां कटुकरोहिणीम् ॥
लेहयेन्मधुना घृतेन सक्षौद्रं वा जलप्लुतम्" ॥
"अपतर्पणजस्य स्याद्दोषः सन्तर्पयेत्तु तम् ।
यूषा जाङ्गलजैर्मांसैः पुराणैश्चैव शालिभिः ॥
रूक्षणाद्वातकोपश्चेन्निदानाशान्तिपूर्व्वकः ।
स्नेहस्नेहकमस्तत्र कार्य्यो वातामयापहः" ॥
"कुष्ठं श्रीवेष्टकोदीच्यं सरलं दारुकेशरम् ।
अजगन्धाश्वगन्धा च तैलज्ञैः सार्षपं पचेत् ।
सक्षौद्रं माक्षया तच्चाप्यूरुस्तम्भार्दितः पिबेत्" ॥
इति कुष्ठाद्यं तैलम् ॥ * ॥
"पलाभ्यां पिप्पलीमूलनागराद्दशकट्टरः ।
तैलप्रस्थः समो दध्ना यवस्थूरुग्रहापहः" ॥
इति यवकट्टरं तैलम् ॥ * ॥
"इत्यभ्यन्तरमुद्दिष्टमूरुस्तम्भस्य भेषजम् ।
श्लेष्मणः क्षपणन्त्वन्यद्वाह्यं शृणु चिकित्सितम् ॥
वल्मीकमृत्तिकामूलं करञ्जात् सफलत्वचम् ।
इष्टकानां ततश्चूर्णैः कुर्य्यादुत्सादनं भृशम् ॥
मूलैर्वाप्यश्वगन्धाया मूलैरर्कस्य वा भिषक् ।
पिचुमर्दस्य वा मूलैरथवा देवदारुणः ॥
क्षौद्रसर्षपवल्मीकमृत्तिकासंयुतैर्भिषक् ।
गाढ़मुत्सादनं कुर्य्यादूरुस्तम्भे प्रलेपनम्" ॥
"श्योनाकं खदिरं बिल्वं वृहत्यौ सरलासनौ ।
अग्निमन्थाढ़कीशिग्रुश्वदंष्ट्रासुरसार्जकान् ॥
तर्कारीं नक्तमालञ्च जलेनोत्क्वाथ्य सेचयेत् ।
प्रलेपो मूत्रपिष्टैर्वाप्यूरुस्तम्भनिवारणः ॥
कफक्षयार्थं व्यायामैर्व्वेगं शक्त्येषु चोत्सृजेत् ।
स्खलान्याक्रामयेत् कल्यं शर्करां सिकतास्तथा ॥
प्रतारयेत् प्रतिस्रोतो नदीं शीतजलां शिवाम् ।
सरश्च विमलं शीतं स्थिरतोयं पुनः पुनः ॥
तथा विशुष्केऽस्य कफे शान्तिमूरुग्रहो व्रजेत् ।
श्लेष्मणः क्षपणं यत्स्यान्न च मारुतकोपनम् ॥
तत् सर्व्वं सर्व्वदा कार्य्यमूरुस्तम्भस्य भेषजम् ।
शरीरं बलमग्निञ्च कार्य्येषा रक्षता क्रिया" ॥
इति चरके चिकित्सास्थाने २७ अध्यायः ॥ * ॥
"निष्कत्रयं शुद्धसूतं निष्कद्वादशगन्धकम् ।
गुञ्जाबीजत्रयं मरिचं निम्बबीजं जया तथा ॥
प्रत्येकं निष्कमात्रन्तु निष्कं जैपालबीजकम् ।
जया जम्बीरधुस्तूरकाकमाचीद्रवैर्दिनम् ॥
भावयित्वा वटीं कृत्वा दद्याद्गुञ्जाचतुष्टयम् ।
गुञ्जाभद्ररसो नाम हिङ्गुसैन्धवसंयुतः ॥
शूलमत्यूर्द्धगं दुःखमूरुस्तम्भं सुदारुणम्" ॥
इति गुञ्जाभद्रो रसः ॥ इति वैद्यकरत्नेन्द्रसार-संग्रहे ऊरुस्तम्भाधिकारः ॥ * ॥)

ऊरुस्तम्भा, स्त्री, (ऊरुस्तम्भ इव व्याकृतिर्यस्याः ।) कदलीवृक्षः । इति राजनिघण्टः ॥ (कदलीशब्देऽस्या गुणादयो व्याख्येयाः ॥)

ऊर्ज्ज, क जीवने । बले । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) दीर्घादिः । क ऊर्जयति जनो जीवति बली स्यादित्यर्थः । इति दुर्गादासः ॥

ऊर्ज्ज, क्ली, (उर्ज्यते जीयतेऽनेन । ऊर्ज्ज + घञ् ।) जलम् । इति शब्दरत्नावली ॥ (यथा, भागवते । ४ । २४ । ३८ ॥
"नम ऊर्ज इषे एष्याः पतये यज्ञरेतसे ।
वृत्तिदाय च जीवानां नमः सर्व्वरसात्मने" ॥)

ऊर्ज्जः, पुं, (ऊर्ज्जयति उत्साहयति जिगीषून् इति । ऊर्ज्ज + णिच् + अच् ।) कार्त्तिकमासः । उत्साहः । बलम् । (यथा, ऋग्वेदे । १ । २६ । १ ।
"वसिष्ठा हि मित्रेथ्य वस्त्राण्यूर्जां पते" । "ऊर्जां बलपराक्रमादीनाम्" । इति भाष्यम् ।) प्राणनम् । इति मेदिनी ॥ (वीर्य्यम् । यथा, मनुः । २ । ५५ ।
"पूजितं ह्यशनं नित्यं बलमूर्जञ्च यच्छति" ॥
"यस्मात् पूजितमन्नं सामर्थ्यं वीर्य्यं च ददाति" ॥)
इति कुल्लूकभट्टः ॥) कान्तिकनामसंवत्सरः ॥
(स्वारोचिषस्य मनोः पुत्रभेदः । यथा हरिवंशे ७ । १४ ।
"प्रथितश्च नभस्यश्च नभ ऊर्ज्जस्तथैव च ।
स्वारोचिषस्य पुत्रास्ते मनोस्तात महात्मनः" ॥
स्त्री, हिरण्यगर्भकन्या । यथा, हरिवंशे ७ । १७ ।
"हिरण्यगर्भस्य सुता ऊर्ज्जा नाम सुतेजसः" ॥)

ऊर्ज्जस्वलः, त्रि, (अतिशयितः ऊर्जो बलं अस्यास्तीति । ऊर्जस् + ज्योत्वातमिसेति वलच् ।) अतिशयबलवान् । इत्यमरः ॥ ("ऊर्जस्वलं हस्तिनुरङ्गमेतत्" । इति भट्टिः । ३ । ५५ । "भोक्तारमूर्जस्वलमात्मदेहम्" । इति रघुः । २ । ५० ॥)

ऊर्ज्जस्वि, [न्] क्ली, (ऊर्जस् + विनि ।) अलङ्कारविशेषः । तस्य लक्षणम् । साहङ्कारवस्त्वभिधानम् । तथा चोक्तम् । ऊर्जस्वि रूढ़ाहङ्कारम् । तस्योदाहरणं यथा । "प्रथयन्नमगुरुं भरासहिष्णुं जनमसमानमनूर्जितम् विवर्ल्य । क्षतवसतिमिवार्णवोपकण्ठे स्थिरमतुलोन्नतिमूढ़तुङ्गमेधम्" ॥ इति भट्टिः ॥

ऊर्ज्जस्वी, [न्] त्रि, (अतिशयितं ऊर्जो बलमस्यास्तीति + ऊर्जस् + विनि ।) अतिशयबलवान् । इत्यमरः ॥ (यथा, भारते ।)
"अन्नमूर्जस्करं लोके दत्त्वोर्जस्वी भवेन्नरः" ॥)

ऊर्णनाभः, पुं, (ऊर्णेव तन्तुर्नाभौ यस्य । यद्वा मृदुत्वादूर्णेव नाभिर्यस्य । नाभेरुपसङ्ख्यानमित्यच् । ड्याप्संज्ञेति ङीप् । रूक्षः ।) कीटविशेषः । माकड़सा इति भाषा । तत्पर्य्यायः । लूता २ तन्तुवायः ३ मर्कटकः ४ । इत्यमरः ।
(यथाह उज्ज्वलदत्तः । ५ । ४७ ।
"नाचारेण विना सृष्टिरूर्णनाभेरपीष्यते ।
न च निःसाधनः कर्त्ता कचित् सृजति किञ्चन" ॥
अत्र ऊर्णनाभिरिति चिन्त्यम् ।) (स्वनामख्यातो धृतराष्ट्रपुत्रभेदः । यथा, महाभारते । १ । ६७ । ८७ ।
"ऊर्णनाभः सुनाभश्च तथा नन्दोपनन्दकौ" ।
स्वनामख्यातो दैत्यभेदः । यथा, हरिवंशे । ३ । ८६ ।
"सूक्ष्मश्चैव निचन्द्रश्च ऊर्णनाभो महागिरिः" ॥)

ऊर्णनाभिः, पुं, (ऊर्णावत् नाभौ यस्य ।) मर्कटकः । इति शब्दरत्नावली ।
(यथा, भागवते । २ । ५ । ५ ।
"यात्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्रमः" ॥)

ऊर्णा, स्त्री, (ऊर्णोति । ऊर्णु + "ऊर्णोतेर्डः" । ५ । ४७ । इति उणादिसूत्रेण डः । ङित्वात् टिलोपः ।) मेषादिलोम । पसम् इति भाषाभ्रु । वोरन्तरावर्त्तः । इत्यमरः ॥ स तु भ्रूद्वयमध्ये मृदुतन्तुसूक्ष्मः शुभायत एकः प्रशस्तावर्त्तो महापुरुषलक्षणम् चक्रवर्त्त्यादीनां महायोगिनाञ्च भवति । इति भरतः ॥ (चित्ररथपत्नी । यथा, भागवते । ५ । १५ । १२ । "चित्ररथ्यादूर्णायां सम्राडजनिष्ट" ॥)

ऊर्णायुः, पुं, (ऊर्णा अस्यास्तीति । ऊर्णा युस् ।) मेषलोमकम्बलः । मेषः । इत्यमरः ॥ ऊर्णनाभः ।

इति हेमचन्द्रः ॥ त्रुणभङ्गः । इति मेदिनी ॥ (गन्धर्वविशेषः । यथा, हरिवंशे ।
"ऊर्णायुश्चित्रसेनश्च हाहा ऊहश्च भारत! ॥)
ऊर्णु, अ ल आच्छादने । इति कविकल्पद्रुमः ॥ (अदां-उभं-सकं-सेट् ।) दीर्घादिर्दन्त्योपधः । रेफयोगान्मूर्द्धन्यः । तेन ऊर्णुनाव इत्यादौ निमित्ताभावान्मूलधातोर्णत्वाभावः । लज ऊर्णोति ऊर्णोति ऊर्णुते दिशं मेघः । इति दुर्गादासः ॥ (यथा, भट्टिः । १४ । १०३ ।
"ऊर्णुनाव स घ्रस्रोधैर्वानराणामनीकिनीम्" ॥)
ऊर्दरः, पुं, (ऊर्जेन बलेन दृणाति विदारयति । ऊर्ज + दृ + "ऊर्जिदृणातेरलचौ पूर्ब्बपदान्त्यलोपश्च" । ५ । ४० । उणादिसूत्रेण अल् अत् वा । स्वरभेदार्थं प्रत्ययद्वयम् ।) शूरः । राक्षसः । इत्युणादिकोषः ॥ (कुसूलम् । धान्याद्याधारः । यथा, ऋग्वेदे । ३ । १४ । ११ ॥ "ऊर्दरं एतता यवेनेडम्" । "ऊर्दरं कुसूलम्" इति भाष्यम् ॥)
ऊर्द्धः, त्रि, उपरि । उच्छ्रितः । तुङ्गः । इति अन्त्यस्यवकारान्तोर्द्धशब्दार्थे मेदिनी ॥
अत्र ऊर्द्धशब्दो निर्व्वकारः । तदुक्तं वर्णदेशनायां । उल्लिहीते उद्गच्छति उदो हाडो डप्रत्ययः आदिवर्णस्य ऊरादेशः । इति मधुमाधवादयः ॥ इति भरतभेदोर्द्धकशब्दस्य टीकायां भरतः ॥ (यथा, महाभारते । मुद्गलज्ञानप्राप्तौ । ३ । २६० । २ ।
"ऊर्द्धगः सत्पथः शश्वद्देवयानचरो मुनेः" ॥)
ऊर्द्धकः, पुं, (ऊर्द्धः सन् कायतीति । ऊर्द्ध + कै शब्दे + क ।) ऊर्द्धकः । मृदङ्गविशेषः । इत्यमरटीकायां भरतमुकुटौ । (यथा शब्दार्णवे ।
"ऊर्द्धको गोपुच्छवत् सचितालोऽष्टाङ्गलो मुखे ।
घृतोर्द्धं वाद्यते तेषां वादनं दुर्जनं न वा" ॥
तथाच चिन्तामणौ ।
"हरीतक्याकृतिस्त्वङ्गस्तथालिङ्गो यवाकृतिः ।
ऊर्द्धको दग्धतुल्यः स्यात् मुरजा भेदतो मताः" ॥)
ऊर्द्धः, पुं, दण्डवत्स्थितः । यथा,—
"आसीन ऊर्द्धः प्रक्षो वा नियमो यत्र नेदृशः ।
तदासीनेन कर्त्तव्यं न प्रक्षेन न तिष्ठता" ॥
इत्यादि छन्दोगपरिशिष्टात् ॥ आसीनः उपविष्टः ।
"ऊर्द्धो दण्डवत् स्थितः प्रक्षोऽवनतपूर्ब्बकायः" ।
इति श्राद्धतत्त्वम् ॥
ऊर्द्धः, त्रि, (उत + हा + ड । आदिवर्णस्य ऊरादेशः ।) उच्छ्रितः । तुङ्गः । उपरिस्थात् । इति मेदिनी ॥ ऊर्द्धशब्दो दीर्घादिः सवकारो निर्व्वकारश्च । तथाच उपरि भन्यते इति व्युत्पत्तिरूर्द्धशब्दो वकारवानिति सुभूत्यादयः ॥
"कुर्व्वतीरुपलैस्तुङ्गैर्भुवनं नीचमूर्द्धजैः ।
तस्या चलालीवान्वेति चित्रानागचमूर्द्धजैः" ॥
इति कीचकवधयमकम् ॥ (यथा, कुमारे १ । १६ ।)
"पद्मानि यस्यायसरोरुहाणि
प्रबोधयत्यूर्द्धमुखैर्मयूखैः" ।
ऊर्द्ध शब्दो मकारान्तोऽव्ययो दीर्घादिर्वकारवान् तथा अदन्तोऽनव्ययोऽपीति जयादित्यादयः ॥

ऊर्द्धकः, पुं, (ऊर्द्धः सन् कायति शब्दायते इति । ऊर्द्ध + कै + क ।) मृदङ्गविशेषः । यथा,—
"ऊर्द्धको गोपुच्छवत् स चितालोऽष्टाङ्गलो मुखे ।
घृतोर्द्धं वाद्यते तेषां वादनं दुर्जनं नना" ॥
इति भरतधृतशब्दार्णवः ॥ अपिच । "हरीतक्याकृतिस्त्वङ्गस्तथालिङ्गो यवाकृतिः । ऊर्द्धको दग्धतुल्यः स्यान्मुरजा भेदतो मताः" ॥ अन्यटीकायान्तु । "यवमध्यस्तथोर्द्धकः" । इत्यमरटीकासारसुन्दरी ॥
ऊर्द्धकराटी, स्त्री, (ऊर्द्धे कराटः कराटको यस्याः ।) महाशृतावरी । इति राजनिर्घण्टः ॥
("महाशृतावरी चान्या घृतमूल्यूर्द्धकण्टिका" । इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
ऊर्द्धजानुः, त्रि, (ऊर्द्धे स्थूले जानुनी यस्य ।) उपरिभागे स्थूलजानुकः । तत्पर्य्यायः । ऊर्द्धजुः २ । इत्यमरः ॥ (यथा, सांख्यायनश्रौतसूत्रम् १ । ५ । ८ ।
"उपविश्योर्द्धजानुः" । इति ॥)
ऊर्द्धजुः, त्रि, (ऊर्द्धे जानुनी यस्य । पृषोदरादित्वात् साधुः ।) ऊर्द्धजानुः । इति भरतो द्विरूपकोषश्च ॥
ऊर्द्धजुः, त्रि, (ऊर्द्धे जानुनी यस्य । "ऊर्द्धात् विभाषा" । ५ । ४ । १३० । इति पक्षे च्वुः ।) ऊर्द्धजानुः । इत्यमरः ॥ (यथा, सांख्यायनश्रौतसूत्रम् । "ऊर्द्धजुरनवानं यजति" ॥
तथाच माघे ११ । २१ ।
"त्रुणमयमनुभूय स्वप्नमूर्द्धजुरेव" ॥)
ऊर्द्धदेवः, पुं, (ऊर्द्धः तुङ्गः श्रेष्ठो देवः ।) विष्णुः । इति शब्दरत्नावली ॥
ऊर्द्धन्दमः, त्रि, (ऊर्द्धम् + दम् + अच् ।) ऊर्द्धस्थः ॥ इति विकाण्डशेषः ॥ ऊर्द्धक्रम इति युक्तिसिद्धपाठः ॥
ऊर्द्धपादः, पुं, (ऊर्द्धाः पादा यस्य ।) शरभः । इति शब्दरत्नावली ॥ (ऊर्द्धपदे, त्रि ॥)
ऊर्द्धपुण्ड्रः, पुं, (ऊर्द्धः पुण्ड्रः इव ।) तिलकविशेषः । स तु ब्राह्मणललाटे पुण्ड्रेक्षुवत् चन्दनादिना कृतोर्द्धरेखाचयः । यथा । "ऊर्द्धपुण्ड्रे त्रिपुण्ड्रं स्यात् त्रिपुण्ड्रे नोर्द्धपुण्ड्रकमिति" ।
"ऊर्द्धपुण्ड्रं द्विजः कुर्य्याद्वारिमृद्भस्मचन्दनैः" ।
इत्यादि च बहवः ॥
"ऊर्द्धपुण्ड्रं सदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा ।
तिलकं वै द्विजः कुर्य्याच्चन्दनेन यदृच्छया ॥
ऊर्द्धपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियस्तु त्रिपुण्ड्रकम् ।
अर्द्धचन्द्रन्तु वैश्यस्य वर्त्तुलं शूद्रयोनिजः" ॥
इति आह्निकतत्त्वधृतब्रह्मखण्डपुराणम् । (ऊर्द्धपुण्ड्रधारिप्रशंसा यथा, ब्रह्मपुराणे ।
"अशुचिर्वाप्यनाचारो मनसा यत्पमाचरेत् ।
शुचिरेव भवेन्नित्यमूर्द्धपुण्ड्राङ्कितो नरः ॥
ऊर्द्धपुण्ड्रधरो मर्त्यो म्रियते यत्र कुत्रचित् ।
स्वपाकोऽपि विमानस्थो मम लोके महीयते" ॥
अस्य धारणे वैदिकद्विजभिन्न एवाधिकारी यदुक्तं देवीभागवते नारायणेन ॥
"ऊर्द्धपुण्ड्रं त्रिशूलं च वर्त्तुलं चतुरस्रकम् ।
अर्द्धचन्द्रादिकं लिङ्गं वेदनिष्ठो न धारयेत् ॥

जन्मना सर्व्वजातिस्तु वेदपठ्यागमाश्रितः ।
पुण्ड्रान्तरं ललाटादि सर्व्वथा नैव धारयेत् ॥
ख्यातिकान्त्यादिसिद्ध्यर्थं चापि विष्णुवशमादिषु ।
स्थितं पुण्ड्रान्तरं नैव धारयेत् वैदिको नरः" ॥
श्राद्धे ऊर्द्धपुण्ड्रादिविधिनिषेधव्यवस्था ।
यथा, निर्णयसिन्धौ हेमाद्रिः ।
"जपे होमे तथा दाने स्वाध्याये पितृकर्म्मणि ।
तत्सर्व्वं नश्यति क्षिप्रमूर्द्धपुण्ड्रं विना कृतम्" ॥
तथा च नारदः ।
"यज्ञो दानं जपो होमः स्वाध्यायः पितृकर्म्म च ।
वृथा भवति विप्रेन्द्राः! ऊर्द्धपुण्ड्रं विना कृतम्" ॥
इत्यादिवचनात् पैत्रे कर्म्मणि ऊर्द्धपुण्ड्रधारणं विहितम् । केचित्तु ।
'ऊर्द्धपुण्ड्रो द्विजातीनामग्निहोत्रसमो विधिः ।
श्राद्धकाले च संप्राप्ते कर्त्ता भोक्ता च वर्जयेत्" ॥
तथा,—
"वामहस्ते च ये दर्भा गृहीते रक्तचन्दनात् ।
ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः" ॥
इति संग्रहोक्तवचनात् तथा,—
"ऊर्द्धपुण्ड्रं त्रिपुण्ड्रं वा चन्द्राकारमथापि वा ।
श्राद्धकर्त्ता न कुर्व्वीत यावत् पिण्डान्न निर्वपेत्" ।
इति विश्वप्रकाशवचनाच्च श्राद्धकाले ऊर्द्धपुण्ड्रादिकं न धार्य्यमित्याहुः । तन्न, यतः कुलाचारादेव व्यवस्था । यत्तु,—
"ललाटे पुण्ड्रकं दृष्ट्वा स्वर्ग्ये मार्ग्ये तथैव च ।
निराशाः पितरो यान्ति दृष्ट्वा च हरलीपतिम्" ॥
इति हेमाद्रिधृतवचनम् तत् गन्धत्रिपुण्ड्रकविषयम् । अतः श्राद्धकाले गन्धत्रिपुण्ड्रकस्यैव न धार्य्यः । अन्यरूपस्तु धार्य्य एव । तथा च व्यासः ।
"वर्जयेत्तिलकं भाले श्राद्धकाले च सर्व्वदा ।
ऊर्द्धपुण्ड्रं त्रिपुण्ड्रं वा धारयेत्तु प्रयत्नतः" ॥)
ऊर्द्धरेताः, [स्] पुं, (ऊर्द्धं रेतो यस्य न पतति वीर्य्यं यस्यत्यर्थः ॥) महादेवः । इति त्रिकाण्डशेषः । (अष्टोत्तरसहस्रनामान्तर्गतो महादेवस्य नामभेदः । यथा महाभारते १३ । १७ । ४५ ।
"ऊर्द्धरेता ऊर्द्धलिङ्ग ऊर्द्धशायी नभस्थलः" ॥)
भीष्मः । (कृतसमावर्त्तनोऽपि भीष्मदेवः पितुः काम्यविवाहार्थं वैवाहिकधर्म्मं त्यक्तवान् अतस्तस्य ऊर्द्धरेतस्त्वं ज्ञातम् । एतद्विवरणन्तु महाभारते १ । सत्यवतीलाभोपाख्याने १०० अध्याये द्रष्टव्यम् ॥)
मुनिविशेषः । तद्यथा । सनक-सनन्द-सनातन-सनत्कुमारादयः । (यथा, महाभारते २ । ब्रह्मसभावर्णने । ११ । ४९ ॥
"अशीतीनि सहस्राणि मुनीनामूर्द्धरेतसाम्" ॥
त्रि, विषयासक्तरहितः । सन्न्यासी । यथा भारते शुकोत्पत्तिपाख्याने,—
"ऊर्द्धरेता महाभागो भगवान् लोकपूजितः ।
चलेद्धि कृत्ताधर्म्मोऽपि न चलेत् संयितव्रतः" ॥)
ऊर्द्धलिङ्गः, पुं, (ऊर्द्धं लिङ्गं यस्य ।) महादेवः । इति हेमचन्द्रः ॥ (यथा, महाभारते १३ । १७ । ४५ ।
"ऊर्द्धरेता ऊर्द्धलिङ्ग ऊर्द्धशायी नभःस्थलः" ॥)
ऊर्द्धलोकः, पुं, (ऊर्द्धः उपरिस्थो लोकः ।) स्वर्गः । इति

क्षेमचन्द्रः ॥ (यथा, मुग्धबोधे कारकप्रकरणे। ५ सूत्रम्।
"रक्षांस्यखादयदनायदूर्द्धलोक-
माक्रन्दयत्कपिभिरायदादशु रामः" ॥)

ऊर्द्धस्थः, त्रि, (ऊर्द्धे तिष्ठति यः। ऊर्द्ध + स्था + क।) उपरिस्थितः। तत्पर्य्यायः। ऊर्द्धन्दमः २। इति त्रिकाण्डशेषः।

ऊर्द्धस्थितिः, स्त्री, (ऊर्द्धा स्थितिर्यत्र।) ऊर्द्धावस्तः। स तु अश्वस्य एकस्थानम्। तत्पर्य्यायः। पुरुषकम् २। इति त्रिकाण्डशेषः॥ उपरिस्थितिः। उपरिस्थानम्॥

ऊर्द्धासितः, पुं, (ऊर्द्धं आसितः।) कारवेल्लः। इति त्रिकाण्डशेषः॥ करला इति भाषा॥

ऊर्म्मिः, स्त्री, पुं, (ऋच्छतीति। ऋ गतौ। "अर्त्तेरूच्च" । ४। ४४। इति उणादिसूत्रेण मिः। अर्त्तेरूरादेशश्च॥) तरङ्गः। (यथा, रघुः। १२। ८५। "तमाधूतध्वजपटं क्षोमगङ्गोर्म्मिवायुभिः" ॥) प्रकाशः। वेगः। भङ्गः। वस्त्रसङ्कोचरेखा। वेदना। पीड़ा। इति मेदिनी॥ उत्कण्ठा। इति क्षेमचन्द्रः॥ "शोकमोहौ शरीरस्य जरामृत्यू क्षुत्पिपासे षड़ूर्म्मयः"। इति श्रीभागवतटीका॥ (बुभुक्षादयः षट्, यथा;—
"बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतौ।
शोकमोहौ शरीरस्य जरामृत्यू षड़ूर्म्मयः" ॥
(अश्वगतिभेदः। तल्लक्षणं यथा वैद्यजयन्त्याम्।
"प्रकीर्णकानामश्वानां नमनोन्नमनाकृतिः।
अतिवेगसमायुक्ता गतिरूर्म्मिरुदाहृता" ॥
तथा च माघे ५। ४।
"तूर्णं पयोधर इवोर्म्मिभिरायतन्त्याः" ॥)

ऊर्म्मिका, स्त्री, (ऊर्म्मिरिव। इवे प्रतिकृताविति-कन्। ऊर्म्मिं प्रकाशं कायतीति वा। आतोनुपेति कः।) उत्कण्ठा। भङ्गनादः। वस्त्रभङ्गः। अङ्गुलीयकम्। वीचिः। इति क्षेमचन्द्रः॥

ऊर्म्मिमान्, [त्] त्रि, (ऊर्म्मिरस्यास्तीति। ऊर्म्मि + मतुप्।) वकः। इत्यमरः॥ ढेउखेलानिया इति भाषा। तरङ्गयुक्तः॥ (यथा, महाभारते २। द्रौपदीप्रश्ने ६३। २८।
"दीर्घेषु नीलेष्वच ऊर्म्मिमत्सु
जग्राह केशेषु नरेन्द्रपत्नीम्" ॥)

ऊर्म्मिमाली, [न्] पुं, (ऊर्म्मीणां माला विद्यतेऽस्य। इनिः।) समुद्रः। इति त्रिकाण्डशेषः॥ ("चन्द्रं प्रदक्षोर्म्मिरिवोर्म्मिमाली"। इति रघुः ५। ६१॥)

ऊर्व्वरा, स्त्री, उर्व्वरा। सर्व्वशस्याढ्या भूमी। इति शब्दरत्नावली। (व्युत्पत्तिस्तु ऋकारादौ उर्व्वराशब्दे द्रष्टव्या॥)

ऊर्व्वशी, स्त्री, (ऊरुमश्नुते स्वकारणत्वेन व्याप्नोति या। ऊरु + अश् + अच् + ङीप्। नारायणोरुसम्भवत्वात् तथात्वम्।) उर्व्वशी। स्वर्गवेश्याविशेषः। इत्यमरटीकायां रायमुकुटः॥ (विस्तृतिस्तु ऋकारादौ उर्व्वशीशब्दे द्रष्टव्या॥)

ऊर्व्वसी, स्त्री, (ऊरौ उषिता इति। एषोदरादित्वात् साधुः।) उर्व्वशी। इत्यमरटीकासारसुन्दरी॥

ऊर्ष्यकं, क्ली, (ऊर्ष्याः एषिष्या अकृमिव।) गोमयच्छिका। तत्पर्य्यायः। दिलीरम् २ श्लिलीन्ध्रकम् ३ वशारोहम् ४ गोलासम् ५। इति हारावली॥

ऊर्षा, स्त्री, देवताड़कृदाम्। इति शब्दचन्द्रिका॥

ऊलुपी, [न्] पुं, उलूपी। शिशुमारः। इत्यमरटीकासारसुन्दरी॥ (जलजन्तुविशेषः॥)

ऊलूकः, पुं, (उलुकशब्देऽस्य व्युत्पत्तिर्द्रष्टव्या।) उलुकः पेचकः। इत्यमरटीकायां रायमुकुटः॥
(यथा, पञ्चतन्त्रे ३। ७७।
"ऊलूकं नृपतिं कृत्वा का नः सिद्धिर्भविष्यति" ॥)

ऊष रोगे। इति कविकल्पद्रुमः॥ (भ्वादि-परं सकं-सेट्।) दीर्घादिः। "ऊषति सन्तं खलः"। इति दुर्गादासः॥ [वली॥

ऊषं, क्ली, (ऊष् + क।) प्रभातम्। इति शब्दरत्नावली।

ऊषः, पुं, क्षारमृत्तिका। इत्यमरः॥
(यथा मनुः ५। १२०।
"कौषेयाविकयोरूर्ध्वैः कुतपानामरिष्टकैः"।
"ऊषैः क्षारमृत्तिकाभिः" इति कुल्लूकभट्टः।
कर्णविलम्। चन्दनादिः॥)

ऊषकं, क्ली, (ऊष + स्वार्थे कन्।) प्रत्यूषम्। इति शब्दरत्नावली।

ऊषणं, क्ली, (ऊष्+ल्युट्।) मरिचम्। इति क्षेमचन्द्रः॥ (मरिचार्थे पर्य्यायो यथा,—
"मरिचं वेल्लजं कृष्णमूषणं धर्म्मपत्तनम्"॥
गुणास्चास्य मरिचशब्दे ज्ञेयाः॥ शुण्ठी च। एतदर्थे पर्य्यायो यथा,—
"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम्।
ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम्"॥
गुणाश्च शुण्ठीशब्दे ज्ञातव्याः॥ पिप्पलीमूलञ्च। एतदर्थे पर्य्यायो यथा,—
"ग्रन्थिकं पिप्पलीमूलमूषणं घटकाशिरः"।
अस्य गुणाश्च पिप्पलीमूलशब्दे बोद्धव्याः। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

ऊषणा, स्त्री, उषणा। पिप्पली। इति शब्दरत्नावली॥ (चविका। अस्याः पर्य्यायो यथा,—
"भवेच्चयन्ती चविका कथिता सा तथोषणा"।
गुणाश्चास्याश्चविकाशब्दे बोध्याः। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

ऊषरः, पुं, (ऊष् + र।) क्षारभूमी। लोणा जायगा इति भाषा। तत्पर्य्यायः। ऊषवान् २। इत्यमरः॥ ("तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे"। इति मनुः। २। ११२। ऊषरा मृत्तिका कोपयेत्। प्रमाणं यथा॥ "पित्तमूषरा" इति वैद्यकमाधवकृतरोगनिश्चये पाण्डुरधिकारे॥)

ऊषरजं, क्ली, (ऊषर + जन् + ड।) पांशुलवणम्। रोमकलवणायस्कान्तभेदः। इति राजनिर्घण्टः॥

ऊषवान्, [त्] त्रि, (ऊषो विद्यतेऽस्य। ऊष् + मतुप्। मस्य वः।) ऊषरभूमी। इत्यमरः॥

ऊषा, स्त्री, (उष् + क + टाप्।) उषा। अनिरुद्धभार्य्या। इति शब्दरत्नावली॥ (तत्कथा च भागवते १० स्कन्धे ६२ अध्याये तथा हरिवंशे १७४ अध्याये बाणयुद्धे द्रष्टव्या॥)

ऊह ड वितर्के। सन्देहादिचारे। इति कविकल्पद्रुमः॥ (भ्वादि-आत्मं-सकं-सेट्।) दीर्घादिः। सन्देहादिचारस्तर्कः। ड ऊहते धर्म्मं धीरः। यशः समूहइव दिग्विकीर्णमिति गेर्व्वाणोर्हाढे चेति परस्मैपदविधानाच्छत्वन्तम्। "अनुक्तमप्यूहति पण्डितो जनः"। इति गणकृतानित्यत्वादिति रमानाथः। वस्तुतस्तु पचादित्वादनि ऊह इवाचरतीति क्वौ साध्यम्। इति दुर्गादासः॥

ऊहः, त्रि, (ऊह् + घञ्।) पूर्व्वप्राप्तस्य उत्क्षेपणम्। तत्पर्य्यायः। अध्याहारः २ तर्कः ३। इत्यमरः॥ वितर्कः ४। वूहः ५ व्यूहः ६ वितर्कणम् ७ अध्याहरणम् ८ ऊहनम् ९ प्रतर्कणम् १०। इति शब्दरत्नावली॥ अपूर्व्वोत्क्षेपणम्। इति जैमिनिः॥ असमवेतार्थकपदत्यागपूर्व्वकसमवेतार्थकपदसमभिव्याहारकरणम्। इति श्राद्धतत्त्वटीका॥ साकाङ्क्षवाक्यस्य पदान्तरेण आकाङ्क्षापूरणम्॥ (ऊहनम्। आरोपः। यथा, महाभारते १३। उमामहेश्वरसंवादे १४५। ४३॥
"इमे मनुष्या दृश्यन्ते ऊहापोहविशारदाः।
ज्ञानविज्ञानसम्पन्नाः प्रज्ञावन्तोऽथ कोविदाः" ॥
परीक्षणम्। सिद्धिभेदः॥)

ऊहनी, स्त्री, (ऊह् + ल्युट् + ङीप्।) सम्मार्জनी। इति शब्दरत्नावली॥ झाँटा इति भाषा॥

ऋ, ऋकारः। सप्तमस्वरवर्णः। अस्योच्चारणस्थानं मूर्द्धा। (ऋटुरषाणामूर्द्धा"। इत्युक्तेः। तथाच शिक्षायां "स्मूर्द्धन्या ऋटुरषाः"। तथा च मुग्धबोधे। "ऋत्वयं टठडढणरषा मूर्द्धन्याः"। इति।) स तु ह्रस्वो दीर्घः प्लुतश्च भवति॥ (एवं त्रिधापि उदात्तानुदात्तस्वरितभेदात् नवविधस्ततः प्रत्येकं अनुनासिकानुनासिकभेदादष्टादशविधश्च।)
"ऋकारं परमेशानि कुण्डली मूर्त्तिमान् स्वयम्।
अत्र ब्रह्मा च विष्णुश्च रुद्रश्चैव वरानने॥
सदाशिवयुतं वर्णं सदा ईश्वरसंयुतम्।
पञ्चवर्णमयं वर्णं चतुर्ज्ञानमयं तथा॥
रक्तविद्युल्लताकारं ऋकारं प्रणमाम्यहम्"।
इति कामधेनुतन्त्रम्॥ (वक्ष्यीयभाषायाम्) तस्य लेखनप्रकारादि यथा।
"ऊर्द्धदक्षगता वक्रा त्रिकोणा वामतस्ततः।
पुनस्त्वधोदक्षगता मात्रा ऋत्रिः परा स्मृता॥
मात्रासु ब्रह्मविष्ण्वीशास्तिष्ठन्ति क्रमतः पराः"।
इति वर्णोद्धारतन्त्रम्॥ * ॥ तस्य नामानि यथा।
"ऋः पूर्व्वेमुखी वज्री देवमाता त्रिविक्रमः।
भावभूतिः क्रिया क्रूरा रेचिका नाशिका मृतः॥
एकपादशिरो माला मण्डला ग्लानिनी जलम्।
कर्णः कामलता मेधो निवृत्तिर्गणनायकः॥
रोहिणी शिवदूती च पूर्णगिरिश्च सप्तमी"।
इति तन्त्रम्॥ (माढकान्यासेऽस्य दक्षिणग्रामेऽवस्थितिलाक्षदाख्ययाप्यभिधानम्। यथा, माढका-

न्यासधृतमन्त्रे "ऋं नमो दक्षिणघ्राणे ॠं नमो वामघ्राणे"। इति। अनुबन्धविशेषः। यथा, कविकल्पद्रुमः। "उः क्लावेडस्तु वेट्क ऋः। चडा-ऋक्षः"। एतेन ढौक्रड् गत्यामित्यस्य लुडि अडृौकदिति सिद्धम्।)

ऋ, प्रापे। गत्याम्। इति कविकल्पद्रुमः॥ (भ्वादि-परं-सकं-अनिट्।) प्रापः प्राप्तिः। "ऋच्छति धनं क्षतौ"। इति दुर्गादासः॥

ऋ, इर ल गत्याम्। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अनिट्॥)

ऋ, र लि गत्याम्। (जुहों-परं-सकं-अनिट्।) र वैदिकः। लि इयर्त्ति। ग्रपो लुङरण्यादस्य ग्रहण्यनयोरेव ऋच्छादेशः। इयृच्छत् समियृच्छानः। इति दुर्गादासः॥

ऋ, र ग हिंसने। इति कविकल्पद्रुमः। (स्वां-परं-सकं-अनिट्।) र वैदिकः। ग ऋणोति। रेफादि-स्तृतीयस्वरान्तोऽयमिति केचित्। इति दुर्गादासः॥

ऋ, य गईगाम्। वाक्यम्। देवमातरि स्त्री इति मेदिनी॥ (सम्बोधनम्।) परिहासः। वाक्यविकारः। इति शब्दरत्नावली॥ (पुं, स्वर्गः॥)

ऋक्, [च्] स्त्री, (ऋच्यन्ते स्तूयन्ते देवा अनया। ऋच्+क्विप्।) वेदविशेषः। ऋग्वेदः। इत्यमरः॥ अस्य एकविंशतिशाखाः। वेदमन्त्रविशेषः। तस्य लक्षणम्। यत्रार्थवशेन पादव्यवस्थितिः। अस्यार्थः। यत्रार्थवशेन एकान्वयित्वेनानुश्रुवादिपादस्थितिः। इति जैमिनिः॥ (ऋग्यजुःसामाथर्व्ववेदाभिहितैरपरैश्चाग्नीर्विधानैरधीयाना भिषजश्च सन्त्यथोः रक्षां कुर्य्युः॥ इति सुश्रुते सूत्रस्थाने ऊनविंशेऽध्याये।)

ऋक्थं, क्ली, (ऋच् स्तुतौ ऋच्+"पाटृतुदिवचि-रिचिसिचिभ्यस्थक्"।२।७। इत्युणादिसूत्रेण थक्।) धनम्। इत्यमरः॥ स्वर्गम्। इत्युणादिकोषः॥ (यदुक्तं शब्दार्णवे। "हिरण्यं द्रविणं द्युम्नं विक्रम-मृक्थं धनं वसु"॥) पुंस्त्वहीनस्य ऋक्थिनः"। इति याज्ञवल्क्यः। "ऋक्थमूलं हि कुटुम्बं"। इति दायभागे पित्रधनविभागकालेऽभिहितम्॥)

ऋक्ष, न र बधे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) र वैदिकः। न ऋक्णोति। इति दुर्गादासः॥

ऋक्षं, क्ली, पुं, (ऋच्+स। "ऋज्रक्षिभ्यत्यधिभ्यः कित्"। ३। ६६। इत्युणादिसूत्रेण कित्।) नक्षत्रम्। इति मेदिनी॥ (यथा, मनुः।२।६१। "पूर्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमार्कदर्शनात्। पश्चिमान्तु समासीनः सम्यगृक्षविभावनात्"॥ तच्च अश्विन्यादिभेदेन सप्तविंशतिः।) राशिः। इति ज्योतिषम्॥ (राशयश्च मेषवृषादिभेदेन द्वादश। अस्मिन्नर्थे प्रमाणं यथा रघौ। १२।२५। "प्रययावातिथेयेषु वसतिर्विकुलेषु सः। दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः"॥ "ऋक्षेषु नक्षत्रेषु राशिषु वा भास्कर इव"। इति तट्टीकायां मल्लिनाथः॥)

ऋक्षः, पुं, (ऋक्ष्+अच्।) पर्व्वतविशेषः। (अयं हि कुलाचलानामेकः। यथा, सिद्धान्तशिरोमणौ॥ "माल्येन्द्रमुक्तिमलयर्क्षकपारियात्राः सह्यः सविन्ध्य इह सप्त कुलाचलाख्याः"॥) भल्लूकः। (यथा मनुः। १२। ६७। "रक्षो मृगेभं व्याघ्रोऽश्वं फलमूलन्तु मर्कटः। स्त्रीमृक्षस्तोकवारि यानान्युष्ट्रः पशूनजः"॥) ग्रोणाकक्षत्तः। इति मेदिनी। ग्रक्षोनाकप्रभेदः। इति राजनिर्घण्टः॥ (खनामख्यातोऽजमीढ़पुत्रः। यथा, हरिवंशे पुरुवंशानुकीर्त्तने। ३२। ८७। "धूमिन्या स तया देव्या त्वजमीढ़ः समेयिवान्। ऋक्षं स जनयामास धूमवर्णं सुदर्शनम्"॥ खनामख्यातो विदूरथस्य पुत्रः। यथा, तत्रैव ३२। १०४। "विदूरथस्य दायद ऋक्ष एव महारथः"॥ तथा खनामख्यातोऽरिहस्य पुत्रः। यथा, महा-भारते १। पुरुवंशानुकीर्त्तने। ९५। २४। "अरिहः खल्वाङ्गेयीमुपयेमे सुदेवां नाम तस्यां पुत्रमजीजनदृक्षम्"॥ एतेन पुरुवंशे त्वयैव ऋक्षनामानो राजानः सम्भूताः॥)

ऋक्षगन्धा, स्त्री, (ऋक्षस्येव गन्धो यस्याः।) वृक्ष-विशेषः। वीरतरु इति ख्यातः। तत्पर्य्यायः। कृगवान्ती २ आवेगी ३ वृद्धदारकः ४ जुङ्गः ५। इत्यमरः॥ ऋषिजाङ्गल इति ख्यातो वृक्षश्च। तत्पर्य्यायः। ऋष्यगन्धा २ ऋषिजाङ्गलिको ३ इति रत्नमाला। क्षीरविदारीवृक्षः। तत्पर्य्यायः। महाश्वेता २। क्षीरिका ३। ऋक्षगन्धिका ४। इति शब्दरत्नावली॥ (वृद्धदारकशब्देऽस्याः गुणादयो ज्ञेयाः॥)

ऋक्षगन्धिका, स्त्री, (ऋक्षगन्धा+स्वार्थे कन्। अत इत्वम्।) क्षुद्राभूमिकुष्माण्डः। तत्पर्य्यायः। क्षीर-विदारी २ महाश्वेता ३। इत्यमरः॥

ऋक्षरं, क्ली, (ऋषी गतौ। ऋष्+"तन्यृषिभ्यां क्सरन्" ।३।७५। इत्युणादिसूत्रेण क्सरन्।) वारि-धारा। इति मेदिनी॥

ऋक्षरः, पुं, (ऋष+"तन्यृषिभ्यां क्सरन्"। ३। ७५। इत्युणादिसूत्रेण क्सरन्।) ऋत्विक्। इति मेदिनी॥

ऋक्षराजः, पुं, (ऋक्षाणां भल्लूकानां राजा। राजाहःसखिभ्यष्टच्।) जाम्बवान्। इति रामा-यणम्॥ (यथा, हरिवंशे। ३८। ४१।

"लेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मताम्"॥)

ऋक्षेशः, पुं, (ऋक्षाणां नक्षत्राणामीशः।) चन्द्रः। इति हलायुधः॥

ऋच, ग्र स्तुत्याम्। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र ऋचति। आनर्च। इति दुर्गादासः॥

ऋचीषं, क्ली, (ऋचतीति। ऋच्+बाहुलकात् कीषन्।) पित्तकभर्जनपात्रम्। इति हेमचन्द्रः॥

ऋच्छ, ग्र मूर्त्तौ। गमने। मोहे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-अकच्छ-सेट्।) ग्र ऋच्छति ऋच्छन्ती। मूर्त्तिः कठिनीभावः। "मूर्त्तिः काठिन्य-कायथोरित्यमरात्। ऋच्छति वृत्तं कठिनं स्यादि-त्यर्थः। ऋच्छति वृद्धो गच्छति सुच्छति वेत्यर्थः। मोहस्थाने इन्द्रियप्रलयं पठन्ति प्राच्यः। ऋच्छति वृद्धस्येन्द्रियं प्रलीयते इत्यर्थः। इति रमानाथः"॥ इति दुर्गादासः॥

ऋच्छरा, स्त्री, (ऋच्छति परपुरुषं प्राप्नोतीति। ऋच्छ+"ऋच्छेररः" ३।१३१। इत्युणादिसूत्रेण अरः। अरन् इति प्रमाद इति पारायणीयम्।) वेश्या। इत्युणादिकोषः॥ (यथा, अथर्व्ववेदे १०। ९२०। "ऋच्छरा ये च ते ग्रपाः"॥)

ऋज, ङ गत्याम्। स्थैर्य्ये। ऊर्ज्जने। अर्ज्जने। इति कविकल्पद्रुमः॥ (भ्वादि-ग्रात्मं-सकं-अकच्छ-सेट्।) ङ अर्ज्जते। ऊर्ज्जनं जीवनं बलवद्भावश्च। इति दुर्गादासः॥

ऋज, इ ङ भर्जि। इति कविकल्पद्रुमः॥ (इदित् भ्वादि-ग्रात्मं-सकं-सेट्।) क्रखादिः। भर्जि भर्त्सने। इ ऋञ्जते। ङ ऋञ्जते मत्स्यं सूपकारः। इति दुर्गादासः॥

ऋजीषं, क्ली, (अर्जते रसोऽस्मादिति। ऋज्+"अर्जे-र्ऋजश्च" इत्युणादिसूत्रेण ईषन्।) पित्तकभर्जनपात्रम्। पित्तकभर्जनपात्रम्। इति हेमचन्द्रामरौ॥ नरक-विशेषः। अत्र पित्तपचनप्रक्षेपः। (यथा, मनुः ४।९०। "लोहशङ्कुमृजीषञ्च पञ्चानां ग्रासमेव नदीम्"॥ घनम्। सोमलतायां उद्भूतो रसः। यथा, ऋग्वेदे ३। ४३। ५। "कुविदाजानं मघवन्नृजीषिन्"। "ऋजीषिन् सोमवन्"। इति भाष्यम्"॥)

ऋजु, त्रि, (अर्जयति गुणान्। अर्ज अर्जने। "अर्जि-वृषीति"। १। २८। उणादिसूत्रेण साधुः।) अवक्रम्। सोजा इति भाषा। तत्पर्य्यायः। अजि-ह्मम् २ प्रगुणम् ३। इत्यमरः॥ प्राञ्जलः ४ सरलः ५। इति जटाधरः॥ ("उमां स पक्षन् ऋजुनेव चक्षुषा"। इति कुमारे ५। ३२॥ यथा, मनुः। २। ४७। "ऋजवस्ते तु सर्व्वे स्युरव्रणाः सौम्यदर्शनाः"॥ स्त्रियां ङीष्पक्षे यथा, माघे १२। १८।

"ऋज्वीर्दधानैरवतत्य कन्धरा-श्चलावचूड़ाः कलघर्घरारवैः॥

अनुकूलम्। यथा, ऋग्वेदे ५। ४१। १५। "ऋजुहस्ता ऋजुवनिः"। "ऋजुहस्तस्तदनुकूल-हस्तः"। इति भाष्यम्॥ शोभनम्। यथा ऋग्वेदे ५। ४४। ५। "धारवाकेष्वृजुगाथः"। "ऋजु-माथः शोभनस्तुतिकः"। इति भाष्यम्॥ वसुदेव-पुत्रभेदे पुं। यथा भागवते ९। २४। ५४। "ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरम्"॥)

ऋजुकायः, पुं, (ऋजुः सरलः कायो यस्य।) ग्रक्षप-मुनिः। इति जटाधरः॥ अवक्रशरीरे त्रि॥ ("तस्मिन् खल्विसमासीन ऋजुकायः समभ्यसेत्"। इति भागवते ३। २८। ८॥)

ऋञ्चः, पुं, (ऋञ्च्+"ऋत्विग्दधृगवचेति"। ३। २८॥ उणादिसूत्रेण निपातनात् क्विन् गुणाभावश्च।) गायकः। इत्युणादिकोषः॥ (सरलगामिनि, त्रि। यथा ऋग्वेदे १। ११७। १४। "युवं भुज्यु-मर्णसो निः समुद्रादिभिरूहथुः पड्भिरश्वैः"।

"ऋचेभिः ऋजुगामिभिः"। इति माध्यम्"॥)

ऋक्षासनः, पुं, (ऋजि + "ऋजिदृधिसन्दिसहिभ्यः कित्"। २। ८७। इत्युणादिसूत्रेण असानच्। किच्च।) मेघः। इति सिद्धान्तकौमुदी॥ उणादिकोषेऽप्य॥)

ऋज, द उ ञ गतौ। इति कविकल्पद्रुमः॥ (तनां-उभं-सकं-सेट्।) द ञ ऋणोति अर्णोति ऋणुते अर्णुते। उ अर्णित्वा ऋत्वा। इति दुर्गादासः॥

ऋणं, क्ली, (ऋ + क्त। ऋणमाधमर्ण्ये इति वक्तव्यम्।) धारः। देना इति भाषा। तत्पर्य्यायः। पर्य्युदञ्चनम् २ उद्धारः ३। इत्यमरः॥ पुनर्देयत्वेन स्वीकृत्य यत् गृहीतम्। इति जगदीशः॥ अस्य विवरणं ऋणादानशब्दे द्रष्टव्यम्॥ *॥

कुसीदाख्यं ऋणं यथा।

"स्थानलाभनिमित्तं यद्दानग्रहणमिष्यते।
तत्कुसीदमिति ज्ञेयं तेन वृत्तिः कुसीदिनाम्"॥

इति नारदः॥ अस्यार्थः। स्थानं मूलधनावस्थानम्। लाभो वृद्धिः। दानग्रहणपदे कर्म्मण्यनटा साध्ये तेन मूलधनावस्थाने सत्येव यो लाभस्तदर्थं यद्दानं धनिकेन दीयमानं मूलधनं अधमर्णेन च ग्रहणं तथा स्वीकृत्य ग्रह्यमाणं यत्तदृणम्। इति रत्नाकरादयः॥ कलाशून्ये तु अवश्यापाकरणीयत्वरूपगुणयोगाद्गौणप्रयोगः। अतएव वाणिज्यार्थप्रयुक्तस्य नर्णत्वं इति मिश्राः॥ *॥ अपि च।

"कुत्सितात् सीदतश्चैव निर्विशङ्कैः प्रगृह्यते।
चतुर्गुणं वाऽगुणं कुसीदाख्यमृणं स्मृतः"॥

इति बृहस्पतिः॥ अस्यार्थः। कुत्सितात् सीदतश्चाधमर्णात् सकलं धनं यत् गृह्यते निर्विशङ्कैरुत्तमर्णैः। चतुर्गुणं वेति वाकारोऽनास्थायां तेन द्वैगुण्यादिनामः॥ *॥ ऋणत्रयविशेषो यथा।

"देवानाञ्च पितॄणाञ्च ऋषीणाञ्च तथा नरः।
ऋणवान् जायते यस्मात्तन्मोक्षे प्रयतेत् सदा॥*॥

तत्परिशोधनमाह।

"देवानामृणवो जन्तुर्यज्ञैर्भवति मानवः।
ऋषित्वञ्च पूजामिश्चोपवासव्रतैस्तथा॥
श्राद्धेन प्रजया चैव पितॄणामृणवो भवेत्।
ऋषीणां ब्रह्मचर्य्येण श्रुतेन तपसा तथा"॥

इति विष्णुधर्म्मोत्तरम्॥ (जलदुर्गमभूमिः। यथा मुग्धबोधे १। २८ सूत्रस्य टीकायां दुर्गादासः। "दुर्गार्णो देशः दुर्गार्णा नदी उभयत्र ऋणशब्देन जलदुर्गमभूमिरुच्यते"॥ अङ्गशास्त्रोक्तः कुतश्चिदपि राशयन्तरात् वियोज्य संख्यावान् पदार्थः। यथा बीजगणिते।

"धनर्णसङ्क्रमने करणसूत्रं वृत्तार्द्धम्।
योगे युतिः स्यात् क्षययोः क्षयोर्व्वा
धनर्णयोरन्तरमेव योगः"॥

ऋणतीति। ऋण गतौ तस्मात्कः। इति उत्पत्त्या वाचस्पतिः। गन्ता। गमनशीलः। यथा, ऋग्वेदे ६। १२। ५। "सद्यो यः स्मन्नो बिबिषो यवीया-ऋणो न तायुरतिधन्वा राट्"। "ऋणः शीघ्रगन्ता" इति भाष्यम्॥)

ऋणमल्कयः, पुं, (ऋणे मल्कुयइव।) जलकः। इति शब्दरत्नावली॥ जामिन इति भाषा॥

ऋणमार्गणः, पुं, (ऋणं मार्गयति यः सः। ऋण + मार्ग + ल्युः।) प्रतिभूः। इति हारावली॥ जामिन इति भाषा॥

ऋणमुक्तिः, स्त्री, (ऋणस्य ऋणात् वा 'मुक्तिर्मोचनं भवत्यस्मात्'।) ऋणपरिशोधनम्। तत्पर्य्यायः। विगणनम् २। इति त्रिकाण्डशेषः॥

ऋणमोक्षः, पुं, (ऋणात् मोक्षः।) ऋणपरिशोधनम्। इति हारावली॥

ऋणादानं, क्ली, (ऋणस्य आदानम् ग्रहणम्।) अधमर्णात् उत्तमर्णेन सलाभधनग्रहणम्। तत्तु अष्टादशविवादान्तर्गताद्यविवादः। (यदाह मनुः। ८।४। "तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः"। इत्यादि।) तच्च सप्तविधं यथा। ईदृशमृणं देयम् १ ईदृशमदेयम् २ अनेनाधिकारिणा देयम् ३ अस्मिन् समये देयं ४ अनेन प्रकारेण देयं ५ इत्यधमर्णे पञ्चविधम्। उत्तमर्णे तु दानविधिः ६ आदानविधिश्च ७ इति द्विविधम्। तथाच नारदः।

"ऋणदेयमदेयञ्च येन यत्र यथा भवेत्।
दानग्रहणधर्म्माश्च ऋणादानमिति स्मृतम्॥
अदेयमिति यदुक्तं तदाह कात्यायनः।
न स्त्रीभ्यो दासबालेभ्यः प्रदद्यात् किञ्चिदुद्धृतम्।
दाता न लभते तत्तु तेभ्यो दत्तन्तु यद्वसु"॥

तत्र विशेषमाह बृहस्पतिः।

"परिपूर्णं गृहीत्वाधिं बन्धं वा साधुसम्मतम्।
लेख्यारूढं साक्षिमद्वा ऋणं दद्यात् धनी सदा"॥

इति विवादार्णवसेतुः॥ अस्य यदवश्यं ऋणोद्ग्राहणशब्दे द्रष्टव्यम्॥

ऋणान्तकः, पुं, (ऋणमन्तयति यः। ऋण + अन्ति नामधातु + ण्वुल्। मङ्गलग्रहाराधनेन ऋणापनयनात् तथात्वम्।) मङ्गलग्रहः। इति शब्दरत्नावली॥

ऋणापनोदनं, क्ली, (ऋण + अप + नुद + ल्युट्। ततः षष्ठीतत्पुरुषः।) ऋणापनयनम्। धारशोधनम्॥

ऋणी, [न्] त्रि, (ऋणमस्यास्तीति। ऋण + इनि।) ऋणग्रस्तः। धारी॥

("जायमानो वै ब्राह्मणः त्रिभिर्ऋणैर्ऋणी भवति"। इति श्रुतिः। "ऋणी न स्यात् यथा पिता"। इति दायभागे॥)

ऋणोद्ग्राहणं, क्ली, (ऋणस्य उद्ग्राहणं।) अधमर्णात् गृहीतर्णग्रहणं। यत्र ऋणं प्रार्थनकाले प्रार्थितोऽपि ऋणी न ददाति तत्र धनिकेन यत् कर्त्तव्यं तदाह मनुः। ८।४८—४९।

"यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः।
तैस्तैरुपायैः संगृह्य साधयेदधमर्णिकम्"॥
धर्म्मेण व्यवहारेण छलेनाचरितेन च।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च"॥

अयमर्थः। पूर्व्वपूर्व्वसामर्थ्याभावे उत्तरोत्तरम् संगृह्य वशीकृत्य। धर्म्मे बृहस्पतिराह।

"सुहृत्सम्बन्धिसन्दिष्टैः सामोक्तानुगमेन च।
प्रादेयो वा ऋणी दाप्यो धर्म्म एष उदाहृतः"॥

अस्यार्थः। ऋणिकस्य ये सुहृत्सम्बन्धिनस्तेषु सन्देशो यो यत्र सामवचनं यत्रानुगमनं प्रायोपवेशनं वा धनिकस्य सधर्म्म ऋणोद्ग्राहणोपायः॥ व्यवहारे कात्यायनः।

"धार्य्योऽविरुद्ध ऋणिकः प्रकाशं जनसंसदि।
यावन्न दद्याद्देयञ्च देशाचारस्थितिर्यथा"॥

अस्यार्थः। यावद्दानं जनसंसदि ऋणिकस्य धनिकेन धारणं व्यवहारः॥ छलाचरितबलात्कारेषु बृहस्पतिः।

"छद्मना याचयित्वार्थमानीय ऋणिकाद्धनी।
अन्नाहितादि वाहृत्य दाप्यते यत्र सोपधिः"॥

अस्यार्थः। ऋणिकस्य धनमन्नाहितादि वा छद्मना आहृत्य वा यत्र दाप्यते तत्र साधनोपायः सोपधिः सच्छलमुच्यते॥

"पुत्रदारपशून् रुद्धा क्षात्वा द्वारोपवेशनम्।
यत्रर्णी दाप्यतेऽर्थं स्वं तदाचरितमुच्यते॥
बद्धा स्वयंहमानीय ताड़नाद्यैरुपक्रमैः।
ऋणिको दाप्यते यत्र बलात्कारः स उच्यते"॥

अनयोरर्थः। पुत्रदारपशुरोधो द्वारोपवेशनञ्च य उद्ग्राहणोपायस्तदाचरितमुच्यते। स्वयंहमानीय ताड़नादिकञ्च उद्ग्राहणोपायो बलात्कार उच्यते॥ *॥ कोऽधमर्णः केनोपायेन साध्यस्तदाह कात्यायनः।

"राजानं स्वामिनं विप्रं सान्त्वेनैव प्रसाधयेत्।
ऋत्थिनं दुर्हृदं वापि छलेनैव प्रसाधयेत्"॥

ऋत्थिनं दायादम्॥ तथा

"वणिजः कर्षकांश्चैव शिल्पिनश्चाप्रवीद् भृगुः।
देशाचारेण दाप्याः स्युर्दुष्टान् संपीड्य दापयेत्॥*॥

यत्र धनं न लभ्यते तत्राह बृहस्पतिः।

"निर्धनं ऋणिकं कर्म्म ग्रहमानीय कारयेत्।
शौल्किकाद्यं ब्राह्मणस्तु दापनीयः शनैः शनैः"॥

याज्ञवल्क्यः,—

"हीनजातिं परिक्षीणमृणार्थं कर्म्म कारयेत्।
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्॥
यथोदयं यथा धनोत्पत्तिरित्यर्थः॥ *॥ व्यापारद्वारा न ब्राह्मणस्य ऋणशोधनमाह कात्यायनः।
"कर्म्मणा क्षत्रविट्शूद्रान् समर्हीनांस्तु दापयेत्"॥*
ऋणशोधनाय निन्दितं कर्म्म कारयितुरुत्तमर्णस्य दण्डमाह कात्यायनः।

"यदि ह्यावनादिदुष्टमशुभं कर्म्म कारयेत्।
प्राप्नुयात् साहसं पूर्व्वमृणान्मुच्येत वर्णिकः॥ *॥
यदि परमबुद्धिप्राप्तं धनमृणिको दातुं न शक्नोति तदा चक्रबुद्ध्या लेख्यां धारयेत्। यथा बृहस्पतिः।
"पूर्णावधौ ग्राह्यलाभमृणमुद्ग्राहयेद्धनी।
कारयेद्वा धनी लेख्यं चक्रबुद्ध्यवधारया"॥

तथा च बृहस्पतिः।

"हिरण्ये द्विगुणीभूते मृते नष्टेऽधमर्णिके।
द्रव्यं तदीयं संगृह्य विक्रीणीत सचाधिकम्॥
रत्नेष्वा क्षतमूल्यन्तु दशाहं जनसंसदि।
ऋणानुरूपं परतो गृहीतान्यानि वर्जयेत्॥
स्वधनञ्च स्थिरीकृत्य गवानुग्रहणैर्नरैः।
तद्बन्धुज्ञातिविदितं प्रग्रहान्नापराध्नुयात्"॥*॥

यथाविधयं धर्म्मादीन् धनसाधनोपायान् प्रयुञ्जानो

न राज्ञा निवर्त्तनीय इत्याह मनुः।
"यः स्वयं साधयेदर्थमुत्तमर्णोऽधमर्णिकात्।
स राज्ञा नाभियोक्तव्यः स्वकं संसाधयन् धनम्"॥*॥
धनवता ऋणिकेनादत्ते ऋणे राजा स्वयं विंशतितमभागं गृहीत्वा उत्तमर्णाय दापयेत् इत्याह नारदः॥
"ऋणिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति।
राज्ञा दापयितव्यः स्यात्गृहीत्वांशन्तु विंशकम्"॥*॥
यदा अधमर्णिकः सकलमृणं दातुमसमर्थः शक्त्यनुसारेण दत्त्वा पूर्व्वलिखितस्य लेखस्य एष्ठेऽभिलिखेत् एतावद्दत्तं उत्तमर्णेन उपगतं प्राप्तमिति धनी तस्यैव लेखस्य एष्ठे दद्यादभिलिखेत् इत्याह याज्ञवल्क्यः।
"लेखस्य एष्ठेऽभिलिखेत् दत्त्वा दत्त्वाधनं ऋणी।
धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम्"॥
इति विवादार्णवसेतुः॥

ऋत, गत्याम्। स्पर्द्धने। ऐश्वर्य्ये। दृष्ट्यायाम्। इति कविकल्पद्रुमः॥ (भ्वादिं-परं-ईयड्पक्षे आत्मं-गत्यर्थे सकं, अन्यार्थे-अकं-सेट्।) दृष्ट्या दया। ऋतीयते जनः स्पर्द्धते ईश्वरो भवति। किञ्चिद्दयते गच्छति वेत्यर्थः। अरे तु ईयङोऽप्राप्तिपक्षे परस्मैपदमेव। आर्त्तोत् आनर्त्त इत्यादि। इति दुर्गादासः।

ऋतं, क्ली, (ऋ + क्त।) उञ्छशिलम्। (यथा, मनुः। ४। ४—५॥
"ऋताभ्यां जीवेत्तु मृतेन प्रमृतेन वा।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्।
मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम्"॥)
जलम्। (यथा, ऋग्वेदे। ७। १०१। ६। "तन्न ऋतं पातु शृतशारदाय"। "ऋतमुदकम्"। इति भाष्यम्॥) सत्यं इति मेदिनी॥ (यथा, मनुः। ८। ८२।
"साक्ष्येऽनृतं वदन् पाशैर्बध्यते वारुणैर्भृशम्।
"विवशः शतमाजातीस्तस्मात् साक्ष्यं वदेदृतम्"॥
कर्म्मफलं। यथा, "ऋतं पिबन्तौ सुकृतस्य लोके"। इति श्रुतिः॥ विष्णुः॥ यथा, महाभारते। १। १। २५३।
"भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः।
स हि सत्यमृतश्चैव पवित्रं पुण्यमेव च।
शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम्"॥
पुं, सूर्य्यः। यथा, शतपथब्राह्मणे। "ब्रह्म वा ऋतं ब्रह्म हि मित्रो ब्रह्म ऋतं ब्रह्म वरुणः"। परब्रह्म। यथा, श्रुतिः। "ऋतमेकाक्षरं ब्रह्म"॥ सत्याचारः। यथा, ऋग्वेदे। १। १३७। २। "सुतो मित्राय वरुणाय पीतये शार्ङ्ऋताय पीतये"॥ "ऋताय सत्याचाराय"। इति दयानन्दभाष्यम्॥ रजः। यथा, सामगानां सन्धामन्त्रे रजोपख्याने। "ऋतमित्यस्य कालाग्नी रुद्र ऋषिरनुष्टुप्छन्दो रुद्रो देवता रजोपख्याने विनियोगः"॥ देवभेदः। यथा, ऋग्वेदे। ४। २३। ८। "ऋतस्य हि सुवधः सन्ति पूर्व्हीर्ऋतस्य धीतिर्वृजिनानि हन्ति"। "ऋतस्य ऋतदेवस्य"। इति भाष्यम्॥ यज्ञः। यथा, ऋग्वेदे। १। १४५। ५। "ऋतचिद्धि सत्यम्"। "ऋतस्य यज्ञस्य जलस्य वा चित् ज्ञाता"। इति भाष्यम्॥ अग्नेर्ऋषिभेदः। यथा, यजुषि। १७। ८२। "ऋतञ्च सत्यञ्च"। इति॥)

ऋतः, त्रि, (ऋ + क्त।) दीप्तः। पूजितः। इति मेदिनी॥

ऋतजित्, पुं, (ऋतं जयति ऋत + जि + क्विप्।) यज्ञविशेषः। यथा,—
"त्वष्टा च जमदग्निश्च कम्बलोऽथ तिलोत्तमा।
ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रश्च सप्तमः॥
माघमासे वसन्त्येते सप्त मैत्रेय भास्करे।
श्रूयतां चापरे सूर्य्ये फाल्गुने निवसन्ति ये"॥
इति श्रीविष्णुपुराणे २। १०। १५—१६। "त्वष्टा सूर्य्यः। कम्बलः सर्पः। ब्रह्मापेतो राक्षसः। ऋतजिदयज्ञः। धृतराष्ट्रो गन्धर्व्वः। इति तट्टीकायां श्रीधरस्वामी॥ (त्रि, यज्ञजेता। यथा, यजुषि १७। ८२। "ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च"॥)

ऋतधामा, [न्] पुं, (ऋतं सत्यं धाम भवनं यस्य।) विष्णुः। इति त्रिकाण्डशेषः॥ (यथा यजुर्व्वेदे ५।३२। "हव्यसूदन ऋतधामासि स्वर्ज्योतिः"॥ इन्द्रभेदः। स तु रुद्रसावर्णिके मनौ भविता। यथा,—
भागवते। ८। १३। २८।
"भविता रुद्रसावर्णी राजन्! द्वादशमो मनुः।
ऋतधामा च देवेन्द्रो देवाश्च हरितादयः"॥
यदुवंशीयो नृपतिभेदः। यथा, भागवते।
"कङ्कश्च कर्णिकायां वै ऋतधामाजयावपि"॥
अविनश्वरस्थानवति, त्रि। यथा यजुर्व्वेदे।१८।३८।
"ऋतावाड्ऋतधामाग्निर्गन्धर्वस्तौषधयः"॥)

ऋतिः, स्त्री, (ऋ + करणे + क्तिन्।) कल्याणम्। वर्त्म। जुगुप्सा। स्पर्द्धा। इति मेदिनी॥ (भावे + क्तिन्।) गमनम्। अशुभम्। इति धरणी॥ (पुरुषमेधयज्ञीयदेवभेदः। यथा, यजुर्व्वेदे। ३०। १३। "ऋतये स्वेन हृदयम्"। ग्रन्थौ पुं, इति निरुक्तिः।)

ऋतीया, स्त्री, (ऋत + ईयङ् + टाप्।) दृष्ट्यर्थकः। जुगुप्सा। तत्पर्य्यायः। आर्त्तनम् २ क्रिणीया ३। इत्यमरः॥

ऋतुः, पुं, (ऋ + "अर्त्तेश्च तुः"। इति उणादिसूत्रेण १।७२। तुः चकारात् कित् च।) कालविशेषः। स तु षड्विधः यथा। मार्गपौषौ हिमः १ माघफाल्गुनौ शिशिरः २ चैत्रवैशाखौ वसन्तः ३ ज्यैष्ठाषाढ़ौ ग्रीष्मः ४ श्रावणभाद्रौ वर्षाः ५ आश्विनकार्त्तिकौ शरत् ६। इत्यमरः॥ स त्रिविधोऽपि। कार्त्तिकाग्रहायणपौषमाघाः शीतः १ फाल्गुनचैत्रवैशाखज्यैष्ठाः ग्रीष्मः २ आषाढ़श्रावणभाद्राश्विनाः वर्षाः ३। द्विविधोऽपि। कार्त्तिकादिषण्मासाः शीतः १ वैशाखादिषण्मासाः ग्रीष्मः २। इति स्मृतिः॥ *॥
(यदुक्तम्।
"मासद्वयात्मकः कालः ऋतुः प्रोक्तो विचक्षणैः"।
यच्च तु "द्वादश मासाः पञ्चर्त्तवः" इति श्रुतं तच्च हेमन्तशिशिरयोरेकत्रीकरणं विवक्षितम्॥
"चयकोपसमा यस्मिन् दोषाणां सम्भवन्ति हि।
ऋतुषट्कं तदाख्यातं रवेः राशिषु संक्रमात्॥
ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृड्मिथुनकर्कटौ।
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत्॥
धनुर्म्मकरौ च हेमन्तौ वसन्तः कुम्भमीनयोः"।
मेषवृषौ रविणा संक्रान्तौ। एवं मिथुनकर्कटावित्यादि। अन्ये तु।
"शिशिरः पुष्पसमयो ग्रीष्मो वर्षाशरद्भिमाः।
माघादिमासयुग्मेः स्युर्ऋतवः षट् क्रमादमी"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।
"वर्षाः शरच्च हेमन्तः शिशिरश्च वसन्तकः।
ग्रीष्मश्चेति क्रमादेते ऋतवः षट् प्रकीर्त्तिताः॥
एषक् एषक् प्रवक्ष्यामि रवेर्गतिविशेषतः"।
इति प्रथमस्थाने चतुर्थेऽध्याये हारीतेनोक्तम्॥
"मासैर्द्विसङ्ख्यैर्माघाद्यैः क्रमात् षड्ऋतवः स्मृताः।
शिशिरोऽथ वसन्तश्च ग्रीष्मवर्षा शरद्भिमाः"॥
इति सूत्रस्थाने द्वतीयेऽध्याये वाग्भटेनोक्तम्॥
"इह खलु संवत्सरं षड्ऋतुविभागेन विद्यात्"।
इति सूत्रस्थाने षष्ठेऽध्यायः।
"तत्र खलु तावत् षोढ़ा प्रविभज्य कार्य्यमुपदेक्ष्यते।
हेमन्तो ग्रीष्मो वर्षाश्चेति शीतोष्णवर्षलक्षणाख्यः ऋतवो भवन्ति। तेषामन्तरेष्वितरे साधारणलक्षणाख्याय ऋतवः प्रावृट्शरद्वसन्ता इति। प्रावृडिति प्रथमः प्रवृष्टेः कालस्तस्यानुबन्धो वर्षाः। एवमेते संशोधनमधिकृत्य षड् विभज्यन्ते ऋतवः"।
इति च विमानस्थानेऽष्टमेऽध्याये चरकेणोक्तम्।
"तत्र माघादयो द्वादशमासा द्विमासिकमृतुं कृत्वा षड्ऋतवो भवन्ति। ते शिशिर-वसन्त-ग्रीष्म-वर्षा-शरद्धेमन्ताः। तेषां तपस्तपस्यौ शिशिरः। मधुमाधवौ वसन्तः। शुचिशुक्रौ ग्रीष्मः। नभोनभस्यौ वर्षाः। इषोर्जौ शरत्। सहःसहस्यौ हेमन्त इति॥ तत्र ते शीतोष्णवर्षलक्षणाख्या आदित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च"।
"इह तु वर्षा-शरद्धेमन्त-वसन्त-ग्रीष्म-प्रावृषः षड्ऋतवो भवन्ति दोषोपचय-प्रकोपोपशम-निमित्तम्। ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः। तद्यथा। भाद्रपदाश्वयुजौ वर्षाः। कार्त्तिकमार्गशीर्षौ शरत्। पौषमाघौ हेमन्तः। फाल्गुन-चैत्रौ वसन्तः। वैशाख-ज्यैष्ठौ ग्रीष्मः। आषाढ़-श्रावणौ प्रावृडिति"। इति सूत्रस्थाने ६ अध्याये सुश्रुतेनोक्तम्॥)
स्त्रीकुसुमम्। इति विश्वमेदिन्यौ। तत्पर्य्यायः। रजः १ पुष्पम् २ आर्त्तवम् ३। इत्यमरः॥
यथाह मनुः। ३। ४५-४६।
"ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा।
पर्व्ववर्ज्यं व्रजेचैनां तद्व्रतो रतिकाम्यया॥
ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोड़श स्मृताः।
चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः॥
तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या।

चयोदशी च शेषासु प्रशस्ता दशरात्रयः ॥
युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्मात् युग्मासु पत्न्यर्थी संविशेदार्त्तवे स्त्रियम् ॥
पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः ।
समेऽपुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्य्ययः" ॥
"रजः सप्तदिनं यावत् ऋतुश्च भिषजां वर"! ।
इति शारीरस्थाने प्रथमेऽध्याये हारीतेनोक्तम् ॥
"ऋतुस्तु द्वादशरात्रं भवति दृष्टार्त्तवम् ॥"
"नियतं दिवसेऽतीते सङ्कुचत्यम्बुजं यथा ।
ऋतौ व्यतीते नार्य्यास्तु योनिः संव्रियते तथा ।
मासेनोपचितं काले धमनीभ्यान्तदार्त्तवम् ।
ईषत् स्रवं विगन्धञ्च वायुर्योनिमुखं नयेत् ॥
तदर्द्धाद्वादशात्काले वर्त्तमानमसृक् पुनः ।
जरायुशरीरजां याति पश्चाच्छुचयम्" ॥
इति शारीरस्थाने तृतीयेऽध्याये सुश्रुतेनोक्तम् ॥
"द्वादशादत्सरादूर्द्धं मायस्त्रावात् समाः स्त्रियः ।
मासि मासि भगद्वारा प्रह्लत्यैवार्त्तवं स्रवेत् ॥
आर्त्तवस्रावदिवसात् ऋतुः षोड़शरात्रयः ।
गर्भयहणयोग्यस्तु स एव समयः स्मृतः" ॥
"सर्व्वासामेव चतुर्वर्णस्त्रीणां सर्व्वादिसम्मतः ।
पूर्व्वोक्तसमयः प्रायान्तरेषु विषयः । तद्यथा ।
स्नानदिवसादूर्द्धं द्वादशरात्रावधि ब्राह्मण्याः । दश-
रात्रावधि क्षत्रियायाः । अष्टरात्रावधि वैश्यायाः ।
सप्तरात्रावधि शूद्रायाः गर्भधारणे शक्तिः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"पद्मं सङ्कुचमायाति दिनेऽतीते यथा तथा ।
ऋतावतीते योनिः सा शुक्रं नातः प्रतीच्छति ॥
मासेनोपचितं रक्तं धमनीभ्यामृतौ पुनः ।
ईषत्स्रवं विगन्धञ्च वायुर्योनिमुखन्नयेत्" ॥
"ऋतुस्तु द्वादशनिशाः पूर्व्वोक्तिश्च निन्दिताः" ॥
इति शारीरस्थाने प्रथमेऽध्याये वाभटेनोक्तम् ॥
शिवः । यथा महाभारते १३ । महादेवसहस्र-
नामकथने १७ । १३९ ।
"ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः" ॥
विष्णुः । यथा, महाभारते १३ । विष्णुसहस्रनाम-
कथने १४९ । ५८ ।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः" ॥)
दीप्तिः । इति मेदिनी । मासः । सुवीरः । इति विश्वः ॥
ऋतुप्राप्तः, त्रि, (ऋतुः प्राप्तोऽनेन ।) पक्षेयहिः ।
अपत्यरक्षादिः । इति शब्दचन्द्रिका ।
ऋतुमती, स्त्री, (ऋतुरस्या अस्तीति । ऋतु + मतुप्
+ ङीप् ।) ऋतुयुक्ता स्त्री । तत्पर्य्यायः । रज-
स्वला २ स्त्रीधर्म्मिणी ३ अवी ४ आर्त्तवी ५
मलिनी ६ पुष्पवती ७ उदक्या ८ । इत्यमरः ।
(यथा, महाभारते १ । ३ । ८७ । "उपाध्यायानी
ते ऋतुमती उपाध्यायश्च प्रोषितोऽस्या यथाय-
मृतुर्व्यर्थो न भवति तथा क्रियताम्" ॥
ऋतुमतीकृत्यमाह ।
"आर्त्तवस्रावदिवसात् यद्यं सा ब्रह्मचारिणी ।
शयीत दर्भशय्यायां पश्येदपि पतिं न च ।
करे शरावे पर्णे वा हविष्यं यद्यमाचरेत् ।
अभुञ्जाता नखच्छेदमभ्यङ्गमनुलेपनम् ॥

नेत्रयोरञ्जनं स्नानं दिवास्वप्नं प्रधावनम् ।
अत्युच्चशब्दश्रवणं हसनं बहुभाषणम् ॥
आयासं भूमिखननं प्रवातञ्च विवर्जयेत् ।
ततश्चतुर्थे दिवसे स्नाता सदृशमादिभिः ।
भूषिताः सुमनाः पश्येत् भर्त्तारं समलङ्कृतम् ॥
पूर्व्वं पश्येत् ऋतुस्नाता यादृशं नरमङ्गना ।
तादृशं जनयेत् पुत्रं ततः पश्येत् पतिं प्रियम्" ॥
एतदकरणे प्रत्यवायमाह ।
"अज्ञानात् वा प्रमोदाद्वा लौल्याद्वा दैवतश्च वा ।
सा चेत् कुर्य्यात् निषिद्धानि गर्भदोषांस्तदाप्नुयात् ॥
एतस्या रोदनात् गर्भो भवेद्विकृतलोचनः ।
नखच्छेदेन कुनखी कुष्ठी स्वभ्यङ्गतो भवेत् ॥
अनुलेपात् तथा स्नानात् दुःखशीलोऽञ्जनादन्धक ।
स्वापशीलो दिवास्वापात् चञ्चलः स्यात् प्रधावनात् ॥
अत्युच्चशब्दश्रवणात् बधीरः खलु जायते ।
तालुदन्तौष्ठजिह्वासु श्यावो हसनतो भवेत् ॥
प्रलापी भूरिकथनात् उन्मत्तस्तु परिश्रमात् ।
खलतिर्भूमिखननात् उन्मत्तो वातसेवनात्" ॥
इति ।
"श्यामप्रसन्नवदनां क्षुरक्षोणिपयोधराम् ।
खञ्जाक्षिकुक्षिं पुंस्कामां विद्यादृतुमतीं स्त्रियम्" ॥
इति शारीरस्थाने प्रथमेऽध्याये वाभटेनोक्तम् ॥
"गते पुराणे रजसि नवे चावस्थिते पुनः शुद्ध-
स्नातां स्त्रियमव्यापन्नयोनिशोणितगर्भाशयामृतु-
मतीमाचक्षते" ।
इति शारीरस्थाने चतुर्थेऽध्याये चरकेणोक्तम् ॥
"पीनप्रसन्नवदनां प्रस्निग्धात्मसुखद्विजाम् ।
नरकामां प्रियकथां खञ्जकुक्ष्यक्षिमूर्द्धजाम् ॥
स्फुरदभ्रुकुचश्रोणिनाभ्यूरुजघनस्फिचम् ।
हृष्टोत्सुकपराञ्चापि विद्यादृतुमतीमिति" ॥
इति शारीरस्थाने तृतीयेऽध्याये,—
"ततः शुद्धस्नातां चतुर्थेऽहन्यहतवाससमलङ्कृतां
कृतमङ्गलस्वस्तिवाचनां भर्त्तारं दर्शयेत् । तत्-
कस्य हेतोः ।
पूर्व्वं पश्येदृतुस्नाता यादृशं नरमङ्गना ।
तादृशं जनयेत् पुत्रं भर्त्तारं दर्शयेदतः ॥
ततो विधानं पुत्रीयमुपाध्यायः समाचरेत् ।
कर्म्मान्ते च क्रमं क्षीणमारभेत विचक्षणः" ॥
"तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमनायु-
ष्यं पुंसां भवति । यच्च तत्राधीयते गर्भः स
प्रसवमानो विमुच्यते । द्वितीयेऽप्येवं सूतिकागारे
वा । तृतीयेऽप्येवमसम्पूर्णाङ्गोऽल्पायुर्व्वा भवति ।
चतुर्थे तु सम्पूर्णाङ्गो दीर्घायुश्च भवति । नच
प्रवर्त्तमाने रक्ते बीजं प्रविशं गुणकरं भवति यथा
नद्यां प्रतिस्रोतः स्रावि द्रव्यं प्रक्षिप्तं प्रतिनिव-
र्त्तते नोर्द्धं गच्छति तद्वदेव द्रष्टव्यम् । तस्मान्नि-
यमवतीं चिरात्रं परिहरेत् । अतः परं मासा-
दुपेयात्" । इति च शारीरस्थाने द्वितीयेऽध्याये
सुश्रुतेनोक्तम् ।)
ऋतुराजः, पुं, (ऋतूनां राजा । "राजाहःसखिभ्यः
टच्" । ५ । ४ । ९१ । इति टच् ।) वसन्तकालः ।
इति राजनिर्घण्टः ॥

ऋतुवृत्तिः, पुं, (ऋतुषु वृत्तिर्वर्त्तनं यस्य ।) वत्सरः ।
इति त्रिकाण्डशेषः ॥
ऋतुसन्धिः, पुं, (ऋत्वोः सन्धिर्मेलनम् ।) ऋतुद्वयसन्धि-
कालः । स च ऋत्वोरन्त्यादिसप्ताहौ । तथाच
वाभटः ।
"ऋत्वोरन्त्यादिसप्ताहावृतुसन्धिरिति स्मृतः ।
तत्र पूर्व्वो विधिस्त्याज्यः सेवनीयः परो विधिः" ।
ऋतुस्नानं, क्ली, (ऋतौ स्नानम् ।) रजस्वलास्त्रियाः
चतुर्थाहकर्त्तव्यस्नानम् । इति स्मृतिः । तत्स्ना-
नानन्तरं भर्त्तृवदनं द्रष्टव्यं नान्यस्य भर्त्तृसन्निधाने
भर्त्तारं मनसि ध्यात्वा सूर्य्यं विलोकयेत् । इति
काशीखण्डम् ॥
("ततः पुण्येक्षणादेव कन्याराध्यायिनी व्यहम् ।
मृज्जालङ्काररहिता दर्भसंस्तरशायिनी ॥
क्षौरेयं यावकं स्तोकं कोष्णोदनकदर्यकम् ।
पर्णे शरावे हस्ते वा भुञ्जीत ब्रह्मचारिणी ।
चतुर्थेऽह्नि ततः स्नात्वा शुक्लमाल्याम्बरा शुचिः ।
इच्छन्ती भर्त्तृसदृशं पुत्रं पश्येत् पुरः पतिम्" ।
इति शारीरस्थाने प्रथमेऽध्याये वाभटेनोक्तम् ॥)
ऋते, व्य, (ऋत + के ।) विना । वर्জ্জनम् । इत्यमरः ॥
("अवेहि मां प्रीतमृते तुरङ्गमात्" ।
इति रघुवंशे । ३ । ६३ । तथा, कुमारे २ । ५७ ।
"अंशादृते निषिक्तस्य नीललोहितरेतसः" ॥)
ऋत्विक्, [ज्] पुं, (ऋतौ यजतीति । ऋतु + यज् +
ऋत्विगादिना क्विन्तो निपातितः ।) पुरोहितः ।
यथा,—
"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान् ।
यः करोति ऋतौ यस्य स तस्यर्त्विगिहोच्यते" ॥
इति मानवे २ । १४३ । तत्पर्य्यायः । याजकः २ ।
इत्यमरः । भरतः ३ कुरवः ४ वाग्यतः ५ इक्ष-
वर्हिषः ६ यतश्रुचः ७ मरुतः ८ सवाधः ९ देव-
यवः १० । इत्यष्टाऋत्विङ्नामानि । इति वेदनि-
र्घण्टौ ३ अध्यायः ॥
अयं हि नायकस्य धर्म्मसहायः । यदुक्तं साहि-
त्यदर्पणे । १ । ५१ । "ऋत्विक्पुरोधसः स्युर्ब्रह्म-
विदस्तापसास्तथा धर्म्मे" ॥)
ऋद्धं, क्ली, (ऋध् + क्त ।) सम्पन्नधान्यम् । इति मे-
दिनी ॥ परिपक्वमर्हितधान्यम् । इत्यमरटीकायां
भरतः ॥ वर्द्धितधान्यम् । इति सुभूतिः ॥ तत्प-
र्य्यायः । आवसितम् २ । इत्यमरः ॥ अवसितम् ३ ।
इति तट्टीका । सिद्धान्तः । इति हेमचन्द्रः ॥
(पुं, विष्णुः । यथा, महाभारते विष्णुसहस्रनाम-
कीर्त्तने १३ । १४९ । ४३ ।
"ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः" ॥)
ऋद्धः, त्रि, (ऋध् + क्त ।) समृद्धः । सम्पन्नः । इति
मेदिनीकरहेमचन्द्रौ ॥ (यथा, गीतायाम् । २ । ८ ।
"अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम्" ॥)
ऋद्धिः, स्त्री, (ऋध् + क्तिन् ।) अष्टवर्गान्तर्गतौषध-
विशेषः तत्पर्य्यायः । योग्यम् २ सिद्धिः ३ वृद्धिः
४ । इत्यमरः ॥ प्राणप्रदा ५ दृश्या ६ । इति रत्न-
माला । प्राणदा ७ जीवदात्री ८ सिद्धा ९ योग्या

१० चेतनीया ११ रथाङ्गी १२ मङ्गल्या १३ लोककान्ता १४ जीवश्रेष्ठा १५ यशस्या १६। अस्याः गुणाः। मधुरत्वम्। सुस्निग्धत्वम्। अतितिक्तत्वम्। शीतलत्वम्। रुचिमेधाकारित्वम्। श्लेष्मकुष्ठकृमिनाशित्वञ्च। इति राजनिर्घण्टः॥ अस्या रूपं यथा,—
"ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोशयामले।
श्वेतलोमान्वितः कन्दो लताजालः सरन्ध्रकः॥
स एव ऋद्धिर्वृद्धिश्च भेदमप्येतयोर्वदे।
तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा॥
वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः"।
औषधकरणे ऋद्धिवृद्धिस्थाने वाराहीकन्दः अथवा बला देया। इति परिभाषा॥*॥ समृद्धिः। इति मेदिनी॥ (यथा, कुमारे २। ५८॥
"परिच्छिन्नप्रभावर्द्धिं मया न च विशुना"।)
पार्व्वती। इति शब्दरत्नावली॥ (लक्ष्मीः॥)

ऋध, उ य न इर वृद्धौ। इति कविकल्पद्रुमः॥ (दिवां, खां-परं-सकं-सेट्।) य ऋद्ध्यति। उ अर्द्धित्वा ऋद्धा। न ऋध्नोति। इर आर्धत्। आर्धीत्। क्वचित्तृतौ चायम्। सोऽहं प्राग्भवतेव भूतजगतीमभ्योमीति भवभूतिः॥ अन्तर्भूतण्यर्थत्वादिदं सिद्धमिति केचित्। इति दुर्गादासः॥

ऋष, शृ दाने। श्लाघायाम्। हिंसायाम्। निन्दायाम्। यज्ञे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं, अकं च-सेट्।) शृ ऋषति जनो ददाति श्लाघते हिनस्ति निन्दति युद्धते वेत्यर्थः। आगर्ष। हिंसायामप्ययमित्यन्ये। इति दुर्गादासः॥

ऋषुः, पुं, (ऋ स्वर्गे देवमातुरदितेर्व्वा भवति यः। ऋ+भू+डु।) देवता। इत्यमरः॥ (यथा, ऋग्वेदे। ६। २१। ६।
"ऋषुर्न रथ्यं नवं दधतो केतुमादिशे"॥
देवानामपि देवः। यथा, महाभारते वनपर्व्वणि।
"ऋभवो नाम तत्रान्ये देवानामपि देवताः।
तेषां लोकाः परतरे यान्यजन्तीह देवताः"॥)
चाक्षुषमन्वन्तरे देवगणभेदः। यथा,—
"आद्याः प्रभूता ऋभवः पृथुकाश्च दिवौकसः"।
इति हरिवंशे। ७। ३२॥)

ऋभुक्षः, पुं, (ऋभवो देवाः क्षियन्ति वसन्ति यत्र। ऋभु+क्षि+ड।) स्वर्गः। वज्रम्। इन्द्रः। इति। राजमुकुटः॥ (देवमात्रे। यथा ऋग्वेदे। ४। ३७। १। "उप्रो राजा अध्वरमृभुक्षाः"।
"ऋभुक्षाः ऋभवः"। इति भाष्यम्॥)

ऋभुक्षाः, [न्] पुं, (ऋभुक्षः स्वर्गः वज्रं वा अस्यास्तीति इनिः। "पथिमथ्यृभुक्षामात्"। ७।१।८५। "इतोत्सर्व्वनामस्थाने"। ७।१।९९। इत्यादिना सिद्धम्। यद्वा ऋच्छति इति अर्त्तेर्भुक्षिनक् प्रत्ययः।) इन्द्रः। इत्यमरः॥ (यथा, ऋग्वेदे। ७। ४७। ३। "इन्द्रो विभां ऋभुक्षा वाजो अर्य्यः"। इति॥)

ऋम्फ, प शृ बधे। (सुचादि-तुदां-परं-सकं-सेट्।) इति रिम्फधातोष्टीकायां दुर्गादासः॥

ऋश, गतिस्तुत्योः। सौत्रधातुरयम्। (परं-सकं-सेट्।) ऋश्यः। इति दुर्गादासः॥

ऋश्यः, पुं स्त्री, (ऋश्+क्यप्।) मृगविशेषः। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८। ४। १०।
"ऋश्यो न तृष्यन्नवपानमागहि"॥)

ऋष, ई शृ गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) क्रुत्वादिः। ई ऋष्टः। शृ ऋषति। इति दुर्गादासः॥

ऋषभः, पुं, (ऋष्+"ऋषिवृषिभ्यां कित्"। इति उणादिसूत्रेण ३।१२३। अभच्। कित्च।) वृषः। (यथा, ऋग्वेदे ६। २८। ८। "उप ऋषभस्य रेतस्युपेन्द्र तव वीर्य्ये"॥) कर्कारुन्धम्। कुम्भीरपुच्छः। उत्तरपदे श्रेष्ठः। इति मेदिनी॥
("सुरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः"॥
इत्यमरवाक्यात्। यथा पुरुषर्षभः पुरुषश्रेष्ठः इत्यर्थः। असमस्तोऽप्ययं श्रेष्ठार्थवाचकः। यथा, भागवते २। ४। २२॥
"खलक्षणा प्रादुरभूत् किलास्यतः
स मे ऋषीणामृषभः प्रसीदताम्"॥
"ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः"। इति तट्टीका॥ गयविशेषः। आकृतिगणोऽयम्। यथा पाणिनिः तत्पुरुषसमासप्रकरणे २। १। ५६॥
"उपमितं व्याघ्रादिभिः सामान्याप्रयोगे"॥ व्याघ्रादिराकृतिगणः। "व्याघ्र-सिंह-ऋक्ष-ऋषभ-चन्दन-वृक-वृष-वराह-हस्तिन्-तरु-कुञ्जर-शर-पृषत्-पुण्डरीक-पलाश-कितवाः"। इत्येते व्याघ्रादयः॥) पर्व्वतविशेषः। इति धरणी॥ वराहपुच्छः। आदिजिनः। इति हेमचन्द्रः॥ भगवदवतारविशेषः। (यथा, भागवते ५।६।७। "तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन चंक्रममाणः"।) स तु सत्ययुगे अग्नीध्रसुतनाभिराजपुत्रत्वेन जातः। तस्य पुत्रः जड़भरतः। इति श्रीभागवतं।
(तथा, मार्कण्डेये ५३। ३८।
"अग्नीध्रसूनोर्नाभेस्तु ऋषभोऽभूत् सुतो द्विज!।
ऋषभाद्भरतो जज्ञे वीरः पुत्रशताग्रजः"।
खारोचिषे मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये ६७। ४।
"उर्जस्तम्बस्तथा प्राणो दत्तोलिर्ऋषभस्तथा"॥
ऋषभसङ्खदक्षिण एकाहनिष्पाद्यो यागभेदः। यथाह गर्गः "पूर्व्व ऋषभसंज्ञो राज्ञः"। खनामख्यातः यज्ञतुरपुत्रो नृपभेदः। यथा, शतपथब्राह्मणे १३। ५। ४। १५। "एकविंशस्तोमेन ऋषभो याज्ञतुर ईजे शिल्पानां राजा तदेतदृचाभ्याऽभिगीतम्"॥) अष्टवर्गान्तर्गतौषधविशेषः। तत्पर्य्यायः। वृषः १ ऋषभकः २ वीरः ३। इति रत्नमाला॥ गोपतिः ४ धीरः ५ विषाणी ६ दुर्द्धरः ७ ककुद्मान् ८ पुङ्गवः ९ वोढा १० प्रष्ठी ११ धूर्य्यः १२ भूपतिः १३ कामी १४ रूक्षप्रियः १५ उक्षा १६ लाङ्गूली १७ गौः १८ बन्धुरः १९ गोरक्षः २० वनवासी २१। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। रक्तपित्तविरेकनाशित्वम्। शुक्रश्लेष्मकारित्वम्। दाहक्षयज्वरहरत्वञ्च। इति राजनिर्घण्टः॥*॥

ऋषिः, पुं, (ऋषति प्राप्नोति सर्व्वान् मन्त्रान् ज्ञानेन पश्यति संसारपारं वा इति। ऋष्+"इगुपधात् कित्" ४।११९। इति उणादिसूत्रेण इन्। कित्च।) ज्ञानसंसारयोः पारगन्ता। शास्त्रकृदाचार्य्यः। (यथा, ऋग्वेदे १। १। २। "अग्निः
("जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ।
रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ"॥
"ऋषभो वृषभट्टङ्कवत्"॥
"ऋषभो वृषभो धीरो विषाणी द्राक्षइत्यपि"॥
अनयोर्गुणा यथा॥
"जीवकर्षभकौ वल्यौ शीतौ शुक्रकफप्रदौ।
मधुरौ पित्तदाहास्रकार्श्यवातक्षयापहौ"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) सप्तस्वरान्तर्गतद्वितीयस्वरः। (अयं स्वरः त्रिश्रुतिः। अस्यः तिस्रः श्रुतयो यथा, (१) दयावती, (२) रञ्जनी, (३) रतिका। तिस्रश्च श्रुतिजातयो यथा, (१) करुणा, (२) मध्या, (३) मृदुः। अयञ्च ऋषिवंश्यीयः, क्षत्रियजातिः, पिङ्गवर्णश्च। अस्यो त्पत्तिः शाकद्वीपे। अस्य ऋषिः देवता च ब्रह्मा; छन्दो गायत्री। यथा सङ्गीतरत्नाकारे,—
"ऋषभस्त्रिश्रुतिस्तस्तः ... ...।
दयावती रञ्जनी च रतिका चर्षभे स्थिता॥
दीप्तायता मृदुर्मध्या षड्जे स्यात् ऋषभे पुनः।
संस्थिता करुणा मध्या मृदुः ... ...॥
पञ्चमः पितृवंश्यस्त्रि-धातृविकुलोद्भवौ।
ऋषौ तु क्षत्रियौ ज्ञेयौ वैश्यजाती निगौ मतौ"॥
रि-धौ ऋषभधैवतौ इत्यर्थः। इत्यादि।)
स तु गोस्वरतुल्यस्वरः। चातकस्वरतुल्यस्वर इति केचित्। नारदमते गावः ऋषभस्वरं वदन्ति यथा,—
"षड्जं रौति मयूरो हि गावो नर्दन्ति चर्षभम्"।
इति नारदसंहितायाम्। दर्पणरत्नाकरादिमते तु चातकः ऋषभं वदति। यथा सङ्गीतदर्पणे,—
"स्वरमृषभं चातको ब्रूते"।) अस्योत्पत्तिः।
"नाभिमूलादयदा वर्ण उत्थितः कुरुते ध्वनिम्।
ऋषभस्येव निर्घोषो हेलया ऋषभः स्मृतः"॥
इति सङ्गीतदामोदरः॥
("नाभेः समुदितो वायुः कण्ठशीर्षसमाहतः।
ऋषभस्येव नादं यत् तस्मादृषभईरितः"॥
इति च सङ्गीतसमयसारे। अस्योत्पत्तिः ऋग्वेदात्। यथा रत्नावल्यां,—
"ऋग्वेदात् षड्ज-ऋषभौ यजुषो मध्यधैवतौ।
सामवेदात् समुद्भूतौ तथा गान्धारपञ्चमौ"॥
इति॥)

ऋषभध्वजः, पुं, (ऋषभः ध्वजचिह्नमस्य ध्वजेऽस्य वा।) शिवः। अर्हद्विशेषः। इति मेदिनी॥

ऋषभी, स्त्री, (ऋषभ+जातौ ङीष्।) नराकारस्त्री। सूकशिम्बी। शिराला। विधवा। इति मेदिनी॥ (सूकशिम्ब्यर्थे व्यवहारो यथा॥
"रेन्नृषभ्यतिरसेत्यादिषु"।
इति चरके सूत्रे चतुर्थेऽध्याये॥ अत्र हि ऋषभी सूकशिम्बी इत्यस्य शिवदासीयटीका॥*॥)

ऋषिः, पुं, (ऋषति प्राप्नोति सर्व्वान् मन्त्रान् ज्ञानेन पश्यति संसारपारं वा इति। ऋष्+"इगुपधात् कित्" ४।११९। इति उणादिसूत्रेण इन्। कित्च।) ज्ञानसंसारयोः पारगन्ता। शास्त्रकृदाचार्य्यः। (यथा, ऋग्वेदे १। १। २। "अग्निः

पूर्व्वेभिर्ऋषिभिरीड्यो नूतनैरुत स देवा एह वक्षति"॥) रिभिर्हसादिच्च। "विद्याविदग्धमतयो ऋषयः प्रसिद्धाः"। इति प्रयोगात्। इति भरतः॥ तत्पर्य्यायः। सत्यवचाः २ ग्रापान्त्यः ३। स तु सप्तविधः यथा। व्यासाद्या महर्षयः १ भेलाद्याः परमर्षयः २ कण्वादयो देवर्षयः ३ वशिष्ठाद्या ब्रह्मर्षयः ४ सुश्रुताद्याः श्रुतर्षयः ५ ऋतपर्णादयो राजर्षयः ६ जैमिन्याद्याः काण्डर्षयः। इति त्रिकाण्डशेषः॥ तथा च रत्नकोषे।

"सप्त ब्रह्मर्षि-देवर्षि-महर्षि-परमर्षयः।
काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः॥ ॥"

मन्वन्तरभेदे सप्तर्षिनामानि यथा।

१ स्वायम्भुवमन्वन्तरे मरीचिः। अत्रिः। अङ्गिराः। पुलस्त्यः। पुलहः। क्रतुः। वशिष्ठः। (यथा हरिवंशे। ७। ८।

"मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः।
पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः"॥)

२। स्वारोचिषे ऊर्जस्तम्भादयः। (यथा, मार्कण्डेये ९७। ४।

"ऊर्जस्तम्भस्तथा प्राणो दत्तोलिर्ऋषभस्तथा।
निश्चरश्चार्वरीराश्च तत्र सप्तर्षयोऽभवन्"॥)

३। उत्तमे वशिष्ठसुताः प्रमदादयः। (यथा, मार्कण्डेये ७३। १३।

"खतेजसा हि तपसो वशिष्ठस्य महात्मनः।
तनयास्तान्तरे तस्मिन् सप्त सप्तर्षयोऽभवन्"॥)

४। तामसे ज्योतिर्धामादयः। (यथा मार्कण्डेये ७४। ५९।

"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वनकस्तथा।
पीवरश्च तथा ब्रह्मन् सप्त सप्तर्षयोऽभवन्"॥)

५। रैवते हिरण्यरोमा वेदश्रिरा ऊर्द्धबाहुरित्यादयः। (यथा मार्कण्डेये ७५। ७३-७४।

"हिरण्यरोमा वेदश्रीरूर्द्धबाहुस्तथापरः।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः॥
वशिष्ठश्च महाभागो वेदवेदान्तपारगः।
एते सप्तर्षयश्चासन् रैवतस्यान्तरे मनोः"॥)

६। चाक्षुषे हर्य्यश्वादीरकादयः। (मार्कण्डेयमतानुयायिन उचन्ते तत्रैव।७६।५४।

"सुमेधा विरजाश्चैव हविष्मानुत्तमो मधुः।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्चयः"॥)

७। वैवस्वताख्यवर्त्तमानमन्वन्तरे कश्यपः। अत्रिः। वशिष्ठः। विश्वामित्रः। गौतमः। जमदग्निः। भरद्वाजः। (यथा मार्कण्डेये ७८। ९-१०।

"अत्रिश्चैव वशिष्ठश्च काश्यपश्च महानृषिः।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः॥
तथैव पुत्रो भगवान्रुचीकस्य महात्मनः।
जमदग्निस्तु सप्तैते मुनयोऽत्र तथान्तरे"॥)

८। सावर्णिके गालवः। दीप्तिमान्। परशुरामः। अश्वत्थामा। कृपः। ऋष्यशृङ्गः। व्यासः। (यथा, मार्कण्डेये ८०। ४।

"रामो व्यासो गालवश्च दीप्तिमान् कृपश्च च।
ऋष्यशृङ्गस्तथा द्रौणिस्तत्र सप्तर्षयोऽभवन्"॥

रामः परशुरामः। द्रौणिरश्वत्थामा॥)

९। दक्षसावर्णिके द्युतिमदाद्याः। (यथा मार्कण्डेये ९४।८।

"मेधातिथिर्व्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा।
सप्तर्षयोऽन्यः सवलस्तथान्यो हव्यवाहनः"॥)

१०। ब्रह्मसावर्णिके हविष्मत्सुकृतसत्यनयमूर्त्याद्याः। (यथा मार्कण्डेये ९४। १०, १३, १४।

"मनोस्तु दशमस्यान्यच्छृणु मन्वन्तरं द्विज!॥
सप्तर्षींस्तान् निबोध त्वं ये भविष्यन्ति वै तदा।
आपो भूतिर्हविष्मांश्च सुकृती सत्यएव च।
नाभागोऽप्रतिमश्चैव वाशिष्ठश्चैव सप्तमः"॥)

११। धर्म्मसावर्णिके अरुणादयः। (यथा मार्कण्डेये ९४। १९-२०।

"हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः।
निश्चरश्चानघश्चैव विष्णुकान्तो महामुनिः॥
सप्तर्षयोऽन्तरे तस्मिन्नग्निदेवश्च सप्तमः"॥)

१२। रुद्रसावर्णिके तपोमूर्त्त्यादयः। (यथा मार्कण्डेये ९४। २५।

"द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः।
तपोरतिस्तपोधैर्य्यान्यः सप्तमस्तु तपोधृतिः"॥)

१३। देवसावर्णिके निर्म्मोहतत्त्वदर्शाद्याः। (मार्कण्डेयपुराणमते अयं त्रयोदशमनुः रौच्याख्ययाभिहितः। यथा, तत्रैव ९४। २७-३०।

"त्रयोदशस्य पर्य्याये रौच्याख्यस्य मनोः सुतान्।
सप्तर्षींश्च नृपांश्चैव गदतो मे निशामय॥
सधर्म्माणः सुरास्तत्र सुकर्म्माणस्तथापरे।
सुधर्म्माणः सुरा ह्येते समस्ता मुनिसत्तम!॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः।
भविष्यानघ सप्तर्षीन् गदतो मे निशामय॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः।
निर्म्मोहः सुतपास्यान्यो निष्प्रकम्पश्च सप्तमः"॥)

१४। इन्द्रसावर्णिके अग्निबाहुशुचिशुद्धमागधाद्याः सप्तर्षयः। (मार्कण्डेयपुराणमतेऽयं भौत्याख्ययाभिहितः। यथा तत्रैव ९९। १।

"ततः परन्तु भौत्यस्य समुत्पत्तिं निशामय।
देवान्सर्षींस्तथा पुत्रांस्तथैव वसुधाधिपान्"॥
ततः परं त्रयोदशमन्वन्तरान्तरम्॥ अस्मिन् मन्वन्तरे सप्तर्षिनामान्याह तत्रैव १००। ११।

"अग्नीध्रबाह्वग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः"॥

पुराणान्तरे मतभेदात् मन्वन्तरसप्तर्षीणां नामभेदोऽपि दृश्यते। हरिवंशे ७ अध्याये तथा विष्णुपुराणे ३ अंशे अस्य विवरणादिकं द्रष्टव्यम्॥ ॥*॥ ज्योतिःशास्त्रमते वशिष्ठपत्नारुन्धतीसहितवर्त्तमानमन्वन्तरीयसप्तर्षीणां मघानक्षत्रे स्थितिः तस्योदये तेषामुदयो भवति। काश्योखण्डमते ग्रनिलोकादूर्द्ध ध्रुवलोकात् अधः तेषां स्थितिः ॥*॥ वेदः। किरणः। इति मेदिनी॥ भ्रग्वादिमहर्षिसन्तानः। यथा।

"भृगुर्भरीचिरत्रिश्च अङ्गिराः पुलहः क्रतुः।
मनुर्दक्षो वशिष्ठश्च पुलस्त्येति ते दश॥
ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः।
परत्वेनर्षयस्तस्माद्भूतास्तस्मान्महर्षयः॥

ईश्वराणां सुतास्तेषामृषयस्तान् निबोधत।
काव्यो बृहस्पतिश्चैव कश्यपश्चावनस्तथा।
उतथ्यो वामदेवश्च अगस्त्यश्चौशिजस्तथा"॥
औशिजस्थाने कौशिक इति वा पाठः।
"कर्दमो वालिखिल्याश्च विश्ववाः शक्तिवर्चसः।
इत्येते ऋषयः प्रोक्तास्तपसा ऋषिताकृताः"॥
इति। तस्य व्युत्पत्तिर्यथा।
"ऋषि हिंसागतौ धातुर्व्विद्यासत्यतपःश्रुतिः।
एष सन्निचयो यस्मात् ब्राह्मणश्च ततः स्मृतः॥
विवृत्तिसमकालन्तु बुद्ध्या व्यक्तिमधिस्वरम्।
ऋवन्ते परमां यस्मात् परमर्षिस्ततः स्मृतः॥
गत्यर्थाद्दृषतेर्धातोर्नामनिर्वृतिकारणम्।
यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता"॥
इति मत्स्यपुराणे १२० अध्यायः॥

ऋषिकः, पुं, (ऋषेः पुत्रः। ऋषि + कन्।) काव्यादिः। इति हेमचन्द्रः॥

ऋषीकः, पुं, (ऋषेः पुत्रः। ऋषि + कन्।) काव्यादिः। इति हेमचन्द्रः॥ (यथा।

"ऋषिपुत्रा ऋषीकास्तु मैथुनादूर्ध्वसम्भवात्।
परत्वेनर्षयस्ते वै भूतादिऋषिकास्ततः॥
ऋषीकाणां सुता ये वै विज्ञेया ऋषिपुत्रकाः।
इत्येते ऋषयः प्रोक्तास्तपसा ऋषिताकृताः॥
तेषां पुत्रान्ऋषीकांस्तु गर्भोत्पन्नाग्निबोधत।
वत्सरो नऊषश्चैव भारद्वाजश्च वीर्य्यवान्।
ऋषिर्दीर्घतपाश्चैव बृहदुक्थः शरत्वतः॥
वाजिश्रवाः सुचित्तश्च श्यावोऽश्वश्च पराशरः।
धृष्णुश्च कश्यपश्चैव राजा वैश्रवणस्तदा॥
इत्येते ऋषिकाः सर्व्वे सत्येन ऋषिताकृताः"।
इति मात्स्ये १२० अध्यायः॥

ऋषिकुल्या, स्त्री, (ऋषीणां कुल्या क्षत्रियाल्या सरित् इव।) नदी। इति हेमचन्द्रः॥

("ऋषिकुल्यां समासाद्य नरः स्नात्वा विकल्मषः।
देवान् पितॄन् चार्चयित्वा ऋषिलोकं प्रपद्यते"॥
इति भट्टाभारते। तीर्थयात्रापर्व्वणि ३। ८४। ४६॥

ऋषिकुलाय हितम्। ऋषिकुल + यत्। ऋषिकुलहिते, त्रि। यथा, भागवते ३। १६। १३।

"अथ तस्योपवर्त्तौ देवोमृषिकुल्यां सरस्वतीम्।
नाखाद्य मन्युदशानां तेषामात्मापपद्यत"॥)

ऋषिजाङ्गलिकी, स्त्री, (ऋषिप्रिया जाङ्गलिकी।) ऋक्षगन्धाख्यः। इति रत्नमाला॥ ऋषिजाङ्गलइति ख्यातः। (रुद्रदारकशब्देऽस्या विशेषो ज्ञेयः॥)

ऋषिप्रोक्ता, स्त्री, (ऋषिणा प्रोक्ता औषधार्थम्।) माषपर्णीवृक्षः। इति रत्नमाला॥ (माषपर्णीशब्देऽस्या गुणादिकं ज्ञेयम्॥)

ऋष्टिः, स्त्री, (ऋष् हिंसायां + क्तिन्।) खड्गः। इत्यमरः। (यथा, ऋग्वेदे। ५। ५७। २।

"वाग्मीमन्त ऋष्टिमन्तो मनीषिणः।
सुधन्वान इषुमन्तो निषङ्गिणः"॥

आयुधमात्रम्। यथा ऋग्वेदे १। १६६। ४।

"भयन्ते विश्वाभुवनानि हर्म्मया।
चित्रो वो यामः प्रयताखृष्टिषु"॥

"ऋष्टिषु युद्धस्येति"। इति भाष्यम्। तथा तत्रैव। ५। ५२। ६।

"या रक्षैरायसा नर ऋष्वा ऋष्टीरहन्वत"।

"ऋष्टीरायुधविशेषान्"। इति भाष्यम्।
तथा मनुः ३। १३३।
"यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्।
तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्टयोगुडान्" ॥
"ज्वलितशूलर्ष्टाख्यायुधलोहपिण्डान्"। इति तट्टीका। दीप्तिः। यथा, ऋग्वेदे ३। ५४। १६।
"विद्युद्रथा मरुत ऋष्टिमन्तो
दिवो मर्या ऋतजाता अयासः"।
"ऋष्टिमन्तो दीप्तिमन्तः"। इति भाष्यम्॥ गमनागमनशीलः। यथा, ऋग्वेदे १। ६४। ४॥ "अंसेष्वेषां निमिमिक्षुर्ऋष्टयः साकं यक्षिरे स्वधया दिवो नरः"। "ऋष्टयः गमनागमनशीलाः"। इति दयानन्दभाष्यम्॥ पुं, धर्म्मसावर्णिके मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये। ९४। १९।
"हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः" ॥)

ऋष्यः, पुं स्त्री, (ऋष्+यत्। निपातनात् सिद्धम्।) मृगविशेषः। इत्यमरः॥ (यथा महाभारते ऋष्यशृङ्गोपाख्याने। ३। ११०। २७।
"ऋष्यशृङ्गः कथं मृग्यामुत्पन्नः काश्यपात्मजः"।
ऋष्यस्य मृगविशेषस्य शृङ्गमिव शृङ्गं यस्य स ऋष्यशृङ्गः।
"ऋष्यो नीलाङ्गको लोके सरोह्य इति कीर्त्तितः"॥ इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥)
खगामख्यातः कुरुवंशीयो देवातिथिपुत्रः। यथा, भागवते। ९। २२। ११।
"ततश्च क्रोधनस्तस्माद् देवातिथिरमुष्य च।
ऋष्यस्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः" ॥

ऋष्यकेतुः, पुं, (ऋष्यः केतौ यस्य।) अनिरुद्धः। इति त्रिकाण्डशेषः॥ अस्य रूपान्तराणि। ऋक्षकेतुः। ऋष्यकेतनः। रिष्यकेतुः। विश्वकेतुः॥

ऋष्यगता, स्त्री, (ऋष्येण ऋषिसमूहेन गता ज्ञाता।) ऋष्यप्रोक्तावल्लः। इति शब्दरत्नावली॥

ऋष्यगन्धा, स्त्री, (ऋष्यस्य मृगविशेषस्य गन्ध इव गन्धो यस्याः।) वृक्षविशेषः। ऋषिशाकुल इति ख्यातः। तत्पर्य्यायः। ऋक्षगन्धा २ ऋषिशाकुलिकी ३। इति रत्नमाला॥
("महासहा-ऋद्धि-ऋष्यगन्धाश्वगन्धेत्यादिषु" ॥ इति चरके विमानस्थाने अष्टमेऽध्याये॥)

ऋष्यप्रोक्ता, स्त्री, (ऋष्येण ऋषिसमूहेन प्रोक्ता।) घृतभूली। स्रुक्चिम्बी। अतिबला। इति मेदिनी॥ (अस्याः पर्य्यायो यथा॥
"अतिबला महाघृतावरी कपिकच्छुश्च"।
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥
व्यवहारो यथा॥
"ऐन्द्र्यभ्यतिरसर्ष्यप्रोक्तापयस्येत्यादिषु"।
इति चरके सूत्रस्थाने चतुर्थेऽध्याये॥ अत्र तु ऋष्यप्रोक्ता माषपर्णी इति शिवदासीयटीका॥)
"कुक्कुटी सर्पगन्धा च तथा काणविषाणिके।
ऋष्यप्रोक्ता वयस्था च शृङ्गी मोहनवल्लिका" ॥
इति उत्तरतन्त्रे बलितमेऽध्याये सुश्रुतेनोक्तम्॥)

ऋष्यमूकः, पुं, (ऋष्यो मृगो मूको यत्र।) पर्ब्बतविशेषः। इति जटाधरः॥ स तु दक्षिणदेशे पम्यासरोवरकूले स्थितः। यत्र बालिभयात् सुग्रीवादयः प्लवगवानराः स्थिताः॥ इति रामायणम्॥
("तार्ष्यमूकस्य समीपचारी
चरन् ददर्शादितदर्शनोयौ"।
इति रामायणे। ४। १। १२८॥)

ऋष्यशृङ्गः, पुं, (ऋष्यस्य मृगस्य शृङ्गमिव शृङ्गमस्य।) मुनिविशेषः। स तु विभाण्डकसुतः। तस्य भार्य्या लोमपादराजकन्या शान्ता। इति रामायणम्॥ ("मान्यो मुनिः सां पुरमृष्यशृङ्गः"। इति भट्टिः। १। १०॥ अस्य जन्मनः प्रभृति विवरणमुच्यते।

आसीत्पुरा महातेजास्तपस्विसत्तमः काश्यपो विभाण्डको नाम ऋषिः। स च महाह्रदं समासाद्य दीर्घकालं तपसि स्थितः। एकदाप्सरसमुर्ब्बशीं दृष्ट्वा चलितचित्तस्यास्य रेतः अम्भु प्रचस्कन्द। ततः काचित् मृगी हृषिता तोयेन सह तत्पीत्वा गर्भिणी अभवत्। इयं हि मृगी पुरा काचित् देवकन्यासीत् शापवशात् मृगरूपधारिणी वने विचरन्ती स्थिता। अथामोघत्वात् ब्रह्मरेतसस्तस्यां मृग्यामेकः पुत्रः समभवत्। मृगीगर्भजातत्वादस्य शिरसि शृङ्गमजायत तेनास्य ऋष्यशृङ्ग इति नाम समभवत्। अनेन हि पितुरन्यः कोऽपि मानुषो न दृष्टपूर्ब्बस्तस्मादनन्यविषयं अस्य मनः सदा ब्रह्मचर्य्ये एवाभवत्। एतस्मिन्नेव काले दशरथस्य बन्धुर्लोमपाद इति ख्यातोऽङ्गानामीश्वरः समभवत्। तेन कामात् ब्राह्मणस्य मिथ्याकृतम्। अस्मात् सर्व्वे ब्राह्मणास्तं परित्यजुः। प्रणश्यद्यज्ञस्यास्य राज्ये न ववर्ष शतक्रतुः। अतः क्लिष्टचित्तः स राजा ब्राह्मणान् सन्तोषयित्वा कश्चिदुपायं पर्य्यपृच्छत्। तेन एतास्ते ब्राह्मणा यज्ञार्थं ऋष्यशृङ्गमानेतुं उपदिदिशुः। अथ स राजा दुष्करत्वादस्य कार्य्यस्य ऋष्यशृङ्गमानेतुं शापाद्यभीतामिर्वाराङ्गनाभिर्बलमकरोत्। अथ रूपयौवनसम्पन्नाः काश्चित् वाराङ्गना बहूनि उपायनद्रव्याणि गृहीत्वा जलपथेन तं तपोधनम् लोभयित्वानेतुं प्रतस्थिरे। अथ ताः काश्यपस्याश्रमं समासाद्य आजग्मुस्तामां नावमदूरे निबध्य तत्रोत्तस्थुः। अथ कदाचित् तासां काचित् कुशला ऋषेः सुतं तं दृष्ट्वा वाग्भिर्मोहयित्वा विचित्राणि माल्यानि वासांसि च दत्त्वा पेयानि च पाययित्वा तेन सह चिक्रीड प्रजहास च। एतादृशेन विविधोपायेन तं प्रापयित्वा कामवशतां अग्निहोत्रस्योपदेशं ज्ञात्वा च स्वस्थानमाजगाम। गतायाञ्च तस्यां मदेन मत्तो विचेतनस्वाभवदृष्यशृङ्गः। अथ विभाण्डकस्तपसः प्रतिनिवृत्य स्वसुतं तथाविधं दृष्ट्वा प्रबोधयामास। प्रबोध्य तपस्यार्थं प्रस्थिते च तस्मिन् पुनः सा ऋषिरूपधारिणी वेश्या तं विभाण्डकसुतं प्रबोध्य नाथाश्रममानीय कृततरं लोमपादराज्यमाययौ। अथ स राजा तं प्राप्य विभाण्डकसुतं प्रहृष्टमना अन्तःपुरं निवेशयामास। प्रविष्टे च तस्मिन् तपोधने समस्तराज्यं प्रहृष्टं जलेनापूर्य्यमाणमभवत्। एवं स लोमपादः परिपूर्णकामः तपोधनायगण्यात् विभाण्डकात् शापमुक्तिमिच्छन् स्वमित्रस्य दशरथस्य सुतां शान्तां ऋष्यशृङ्गाय प्रददौ। अथ विभाण्डको मुनिः तपसः प्रतिनिवृत्तः सुतमनवलोक्य ध्यानधिया सर्व्वमवगम्य क्रुधा ज्वलन्निव लोमपादराज्यं आजगाम। आगते च तस्मिन् विभीतैः सर्व्वैः ऋष्यशृङ्गस्य राज्यमिदमिति आचख्ये। पूजितश्च तेन राजर्षिणा दिवि इन्द्रमिव पुत्रं शचीमिव शान्तां स्नुषाञ्चावलोक्य ग्रामांश्च घोषांश्च सुतस्य दत्त्वागम्य शान्तकोपः स्वाश्रमं प्रति प्रययौ। अथ स ऋष्यशृङ्गः शान्तया सह तस्मिन् राज्ये सुखमतिचिरमवसत्॥

अथ गच्छति काले सूर्य्यवंशावतंसो राजा दशरथः अनपत्यतया क्लिश्यमानहृदयो निजगुरुं वशिष्ठदेवं पुत्रलाभोपायं प्रपच्छ। एवमुक्तस्तेन ऋषिप्रवरो वशिष्ठः लोमपादराज्यात् ऋष्यशृङ्गं तपोधनं समानीय पुत्रेष्टिं कर्त्तुं समादिशत्। अथासौ राजा एवमभिहितः स्वजामातरमसुं ऋष्यशृङ्गमानेतुं यत्नमकरोत्। तत आगतेन तेन क्रियमाणे यज्ञे दैवस्वर्ब्बस्निधाद्युदतिष्ठत्। एतच्चरुभक्षणात् नारायणावतारस्वरूपा रामादयश्चत्वारो दशरथस्य तनया जाताः। अयं विभाण्डकसुतस्तु महाप्रतापवान् यज्ञनिष्ठश्चेति प्रसिद्धः। एतत्कथा च महाभारते। ३। ११० अध्यायतश्च रामायणे। १। ९ अध्यायमारभ्य द्रष्टव्या॥ * ॥ सावर्णिके मन्वन्तरे ऋषिभेदः। यथा, मार्कण्डेये ८०। ४।
"रामो व्यासो गालवश्च दीप्तिमान् कृपश्च च।
ऋष्यशृङ्गस्तथा द्रोणिश्च सप्तर्षयोऽभवन्" ॥)

ऋ

ऋ दीर्घऋकारः। स तु अष्टमस्वरवर्णः। अस्योच्चारणस्थानं मूर्द्धा। (यथा, सिद्धान्तकौमुद्यां "ऋटुरषाणां मूर्द्धा"। पाणिनीयशिक्षायामपि। "स्युर्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः"।) स प्लुतश्च भवति॥ इति व्याकरणम्॥
(स च उदात्तानुदात्तस्वरितभेदात् त्रिधापि पुनः प्रत्येकमनुनासिकाननुनासिकभेदेन द्विधेति षड्विधः।)
ऋकारं परमेशानि स्वयं परमकुण्डलम्।
पीतविद्युल्लताकारं पञ्चदेवमयं सदा॥
चतुर्भागमयं वर्णं पञ्चप्राणयुतं सदा।
त्रिशक्तिसहितं वर्णं प्रणमामि सदा प्रिये"।
इति कामधेनुतन्त्रम्॥
(वर्णीयभाष्यायाम्।) तस्य लेखनप्रकारो यथा,—
"तद्वयाधोमता दत्ता वामतः कुत्सिता तथः।
पुनर्ह्रस्वगता रेखा तासु ब्रह्मेशविष्णवः॥
मात्रा शक्तिः परा ज्ञेया ध्यानमस्य प्रवक्ष्यते"।
इति वर्णोद्धारतन्त्रम्॥ * ॥ तस्य नामानि यथा।
"ऋः क्रोधोऽतिथिपो वाणी वामनो गोऽथ श्रीर्धृतिः।
ऊर्द्धमुखी निशानाथः पद्ममाला विनश्वधीः॥
अग्निनी मोचिका मेधा दैत्यमाता प्रतिष्ठिता।

ल्ट

एकदन्ताङ्कयो माता हरिता मिथुनोदया ॥
कोमलः श्यामला मेधी प्रतिष्ठा पतिरष्टमी ।
ब्रह्मण्यमिव कीलाले पावको गन्धकर्षिणी" ॥
इति तन्त्रशास्त्रम् ॥ वामनासिका । इति बीजवर्णाभिधानम् ॥ (माढकन्यासेऽस्य वामनासिकया न्यस्यतया तथात्वम् । यदुक्तं माढकान्यासमन्त्रे । "ऋं नमो दक्षिणघ्राणे ऋं नमो वामघ्राणे" । इति । अनुबन्धविशेषस्तेन षडाक्षरो वा स्यात् । यदुक्तं कविकल्पद्रुमे । "षडाक्षरोऽथ ऋर्वा ल्रस्ङ्वानिर्वाथ एः सिचि" ॥ (एतेन कमु आर्त्तस्वरे लुङि क्ते अचीकमत् अचकमत् इति स्यात् ॥)

ऋ गि गत्यां । इति क्रविकल्पद्रुमः । (घादि-ऋयादिः परं-सकं-सेट् ।) गि ऋणाति । ईर्णः ईर्णिः । इति दुर्गादासः ॥

ऋ, य, (ऋ + क्विप् ।) वाक्यारम्भः । रत्ना । इति मेदिनी ॥ निन्दा । भयम् । इति शब्दरत्नावली ॥

ऋ, स्त्री, (ऋच्छतीति । ऋ + क्विप् ।) वल्गः । इति मेदिनी ॥

ऋः, स्त्री, देवमाता । दानवमाता । (ऋ + भावे क्विप् ।) स्मृतिः । गतिः । इति मेदिनी ॥

ऋः, पुं, (ऋच्छति प्राप्नोति विश्वमिति । ऋ + क्विप् ।) भैरवः । (यथा, "ऋनन्दादि ! प्रमथेशसङ्गैः ! ।" इत्युद्भटः ॥) दनुजः । इति मेदिनी ॥

ल्ट

ऌ ऌकारः । स तु नवमस्वरवर्णः । अस्योच्चारणस्थानं दन्तः । (यदुक्तम् सिद्धान्तकौमुद्याम् "ऌतुलसानान्दन्ताः" । शिक्षायामपि यथा,—
"सुमूर्द्धन्या ऋटुरसा दन्त्या ऌतुलसाः स्मृताः" ।)
स ह्रस्वो दीर्घः प्लुतश्च भवति । इति व्याकरणम् ॥ (अयन्तु उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं पुनरनुनासिकाननुनासिकभेदेन द्विधेति षड्विधएव ॥)
"ऌकारं चञ्चलापाङ्गि कुण्डली परदेवता ।
अत्र ब्रह्मादयः सर्व्वे तिष्ठन्ति सततं प्रिये ॥
पञ्चदेवमयं वर्णं चतुर्ज्ञानमयं सदा ।
पञ्चप्राणप्लुतं वर्णं तथा गुणत्रयात्मकम् ॥
विन्दुत्रयात्मकं वर्णं पीतविद्युल्लता तथा" ।
इति कामधेनुतन्त्रम् । (वङ्गीयभाषायां) अस्य लेखनप्रकारो यथा,—
"रेखाधःकुण्डली वक्रा दक्षतो वामतो गता ।
वक्रीभूतायवत्लासु निम्नं सन्ति च नित्यशः" ॥
इति वर्णोद्धारतन्त्रम् । * ॥ अस्य नामानि यथा,—
"ऌः स्याद्भूधरः शुद्धो मेघो धूम्रावको वियत् ।
देवयोनिर्दृढच्छायो महेन्द्रः कौन्तरत्नकौ ॥
विश्वेश्वरो दीर्घजिह्वा महेन्द्रो वाक्प्रविः परा ।
चन्द्रिका पार्थिवो धूम्रा हिदन्तः कामवर्द्धनः ।
शुचिस्मिता च नवमी कान्तिरायातकेश्वरः ।
चित्राकर्षिणी काश्यश्च तृतीयकुलसुन्दरी" ।
इति तन्त्रशास्त्रम् । (माढकान्यासे दक्षिणगण्डे न्यस्यतया दक्षिणगण्डेनाप्यभिधानम् । यथा माढकान्यासमन्त्रे । "ऌं नमो दक्षिणगण्डे ऌं नमो वामगण्डे" । अनुबन्धविशेषः । एतेन लुङि अड् स्यात् । यदुक्तम् कविकल्पद्रुमे ।
"षडाक्षरोऽथ ऋर्वा ल्रस्ङ्वानिर्वाथ एः सिचि" ।
एतेन गम् ऌ औ गतौ इत्यस्य लुङि अगमदिति स्यात् ॥)

ऌ, य, देवमाता । इति मेदिनी एकाक्षरकोषश्च ॥ भूमिः । कुभ्रः । पर्व्वतः । इति मेदिनी ॥

ल्ट

ॡ दीर्घ ऌकारः । स तु दशमस्वरवर्णः । अस्योच्चारणस्थानं दन्तः । (यथा मुग्धबोधे । "ऌत्रयं तयदधनलसाः वो दन्त्याः" ।) स प्लुतश्च भवति । इति व्याकरणम् ॥ (उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं पुनरनुनासिकानुनासिकभेदात् षड्विधएव ।)
"ॡकारं परमेशानि पूर्णचन्द्रसमप्रभम् ।
पञ्चदेवात्मकं वर्णं पञ्चप्राणात्मकं सदा ॥
गुणत्रयात्मकं वर्णं तथा विन्दुत्रयात्मकम् ।
चतुर्व्वर्गप्रदं देवि स्वयं परमकुण्डली" ॥
इति कामधेनुतन्त्रम् ॥ (वङ्गीयभाषायां) अस्य लेखनप्रकारो यथा,—
"तत्क्रोडतुल्यरूपा च रेखा सा वैष्णवी स्मृता ।
तासु वन्द्याः सुरेशानि दुर्गा वाणी सरस्वती" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ तन्नामानि यथा,—
"ॡकारः कमला हर्षा हृषीकेशो मधुव्रतः ।
सूक्ष्मा कान्तिर्व्वामगण्डो रुद्रः कामोदरी सुरा ॥
शान्तिकृत् स्तम्भिका शुक्लो मायावी लोलुपो वियत् ।
कुक्षिमी तुस्थिरो माता नीलपीतो गजाननः ॥
कामिनी विश्वधा कालो नित्या शुद्धः शुचिः क्षती ।
सूर्य्यो धैर्य्योत्कर्षिणी च एकाकी दनुजप्रसूः" ॥
इति तन्त्रशास्त्रम् ॥ (माढकान्यासे वामगण्डे न्यस्यतया तन्नाम्नाप्यभिधानम् । माढकान्यासमन्त्रो यथा ॥ "ॡं नमो दक्षिणगण्डे ॡं नमो वामगण्डे" ॥ मुग्धबोधमते तन्त्रमते च ऌकारस्य दीर्घत्वमस्ति पाणिनिमते तु नास्ति । अत्रेदं ज्ञातव्यं ऌकारस्य दीर्घत्वाभावेऽपि "ऌति ह्वा" इति वार्त्तिकोक्तेः ऌकार एव तत्र विधेयः । तेन होत्ऌकार इत्यादौ ऌकारस्य व्यवहारः । मुग्धबोधेऽपि एतदनुसारेण एकमात्रद्विमात्रत्रिमात्रापेक्षा "ऌत्रयम्" इत्युक्तेन न विरोधः ॥)

ॡ, य, देवनारी । गार्य्यात्मा । माता । इति मेदिनी ॥

ॡः, स्त्री, दैत्यस्त्री । इत्येकाक्षरकोषः ॥ दनुजमाता । कामधेनुमाता । इति कश्चिदेकाक्षरकोषः ॥

ॡः, पुं, सर्व्वः । महादेवः । इति कश्चिदेकाक्षरकोषः ॥

ए

ए एकारः । स तु एकादशस्वरवर्णः । अस्योच्चारणस्थानं तालुकण्ठश्च । (यदुक्तं सिद्धान्तकौमुद्याम् ।

एकं

"एदैतोः कण्ठतालु" । तथाच शिक्षायाम् ।
"ए ऐ तु कण्ठतालव्यावो औ कण्ठोष्ठजौ स्मृतौ" ॥)
स दीर्घः प्लुतश्च भवति । इति व्याकरणम् ॥ (उदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि प्रत्येकं पुनरनुनासिकाननुनासिकभेदात् षड्विधएव ॥)
"एकारं परमं दिव्यं ब्रह्मविष्णुशिवात्मकम् ।
रङ्गिनीकुसुमप्रख्यं पञ्चदेवमयं सदा ॥
पञ्चप्राणात्मकं वर्णं तथा विन्दुत्रयात्मकम् ।
चतुर्व्वर्गप्रदं देवि स्वयं परमकुण्डली" ॥
इति कामधेनुतन्त्रं ॥ (वङ्गीयभाषायां) अस्य लेखनप्रकारो यथा ।
"कुञ्चिता वामतो रेखा दक्षकोणायता त्वधः ।
पुनर्व्वामगता सैव तासु वङ्गीशवायवः" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ अस्य नामानि यथा ।
"एकारो वास्तवः शक्तिर्भिरुटी सोष्ठो भगं मरुत् ।
सूक्ष्मा भूतोऽर्द्धकेशी च व्योत्खा श्रद्धा प्रमर्द्दनः ।
भयं ज्ञानं क्षमा धीरा जङ्घा सर्व्वसमुद्भवः ।
वह्निर्विष्णुर्भगवती कुण्डली मोहिनी वसुः ।
योषिदाधारशक्तिश्च त्रिकोणा दैशसंज्ञकः ।
सन्धिरेकादशी भद्रा पद्मनाभः कुलाचलः" ॥
इति तन्त्रशास्त्रम् ॥ * ॥ अन्यच ।
"एकारो वामगण्डान्तः शक्तिर्भिरुटी भगन्तथा ।
मात्तवीजञ्च विजया ओष्ठ एकादशस्वरः" ॥
इति बीजवर्णाभिधानम् ॥ (माढकान्यासेऽस्य ओष्ठस्थाने न्यस्यतया ओष्ठशब्देनाप्यभिधानम् । माढकान्यासमन्त्रो यथा,—
"एं नम ओष्ठे ऐं नमोऽधरे" ॥ इति । अनुबन्धविशेषः । तेन लुङि सिचि अदृद्धिः स्यात् । यथाह कविकल्पद्रुमे ॥
"ल्रस्ङ्वानिर्वाथ एः सिचि ।
अदृद्धिः स्यैयजादिः स्यात्" ॥
एतेन कटे वर्षावर्णयोरित्यस्य लुङि अकटीदिति स्यात् ॥)

ए, य, स्मृतिः । असूया । अनुकम्पा । आमन्त्रणम् । आह्वानम् । इति मेदिनी ॥

एः, पुं, (एति प्राप्नोति सर्व्वं विश्वमिति । इण् + अच् ।) "सर्व्वं विष्णुमयं जगत्" इति वाक्यादस्य तथात्वम् ॥) विष्णुः । इत्येकाक्षरकोषः ॥

एकं क्लि, (एतीति । इण् गतौ । "इण्भीकापाशल्यतिमर्चिभ्यः कन्" ॥ ३ । ४३ । इत्युणादिसूत्रेण कन् ।) मुख्यम् । अन्यत् । केवलम् । इत्यमरः ॥ ("त्वमेको ह्यस्य सर्व्वस्य विधानस्य स्वयम्भुवः" । इति मनौ १ । ३ । "अजामेकां लोहितशुक्लकृष्णाम्" । इति श्रुतिः ॥ "एकातपत्रं जगतः प्रभुत्वम्" । इति रघुवंशे २ । ४७ । "समाधि भावैकरसं मनः स्थिरम्" इति कुमारे ५ । ८२ ॥) आदिसंख्या । इति मेदिनी । अथैकवाचकानि । परमात्मा १ विधुः २ क्षितिः ३ गणेशदन्तः ४ शुक्रचक्षुः ५ । इति कविकल्पलता ॥ अग्निः ६ सूर्य्यः ७ देवराजः ८ यमः ९ । इति महाभारते वनपर्व्व ॥ (सर्व्वनामशब्दोऽयम् । तथा च सिद्धान्तकौमुद्यां "सर्व्वादयश्च पञ्चभिंशत्" इत्युक्ता "यद्-तद्-एद् एतद्-इदम्-अदस्

एक-द्वि-युष्मद्-अस्मद्-भवत्-किम्" इत्युक्तवान्। यथा शाकुन्तले २ अङ्के। "विश्रान्तेन भवता ममाप्येकस्मिन् कर्म्मणि सहायेन भवितव्यम्"। पुं, स्वनामख्यात ऐलवंशीयो नृपतिभेदः। यथा, भागवते ९।१५।२।

'श्रुतायोर्वसमान् पुत्रः सत्यायोश्च श्रुतं जयः। रयस्य सुतरयस्य जयस्य तनयोऽमितः'॥

परमेश्वरः। विष्णुः। यथा विष्णुसंहितायाम्। "एको नैकः सवः कः किम्"। "परमार्थतः सजातीयविजातीयस्वगतभेदराहित्यादेकः"। इति भाष्यम्। घटे घटान्तरात् भेदः सजातीयभेदः। घटे कपालादेर्भेदः स्वगतभेदः॥)

एककः त्रि, ("एकादाकिनिच्चासहाये"। ५।३। ५२। इत्यत्र चकारात् पक्षे कन्।) असहायः। एकला इति भाषा। तत्पर्य्यायः। एकः २ एकाकी ३। इत्यमरः॥

("महानप्येकको वृक्षः सर्व्वतः सुप्रतिष्ठितः। प्रसह्यैव हि वातेन शक्यो धर्षयितुं यतः"॥ इति पञ्चतन्त्रे ३।५२।। तथा नैषधे। २। ३६।

"विधिरेककचक्रचारिणम्
किमु निर्म्मिमीत सान्मयं रथम्"॥)

एककुण्डलः पुं, (एकं कुण्डलं यस्य।) बलरामः। कुबेरः। इति मेदिनी॥

एकगुरुः, पुं, (एको गुरुर्यस्य।) सतीर्थः। इत्यमरः॥ एकगुरुर् शिष्य इति भाषा॥

एकचक्रं, क्ली, (एकं चक्रं यस्य।) पुरीविशेषः। तत्पर्य्यायः। हरिपिण्डम्२ शुम्भपुरी३। इति त्रिकाण्डशेषः॥ सूर्य्यरथः। त्रि, असहायचारी। यथा, ऋग्वेदे १।१६४।२।

"सप्त युञ्जन्ति रथमेकचक्र-
मेको अश्वो वहति सप्तनामा।
त्रिनाभिचक्रमजरमनर्व्वं
यत्रेमा विश्वा भुवनाधितस्थुः"॥

अत्र भाष्यकृता यद्याख्यातन्तदाह।

"एकचक्रमेकरथाङ्गोपेतम्। यद्यपि चीणि चक्राणि तथापि तेषामेकरूपत्वादेकचक्रमित्युच्यते रथं रंहणस्वभावं भर्य्यस्य सम्बन्धिनं सप्तैतत्संज्ञका अश्वा युञ्जन्ति अनुबध्नन्ति वहन्त्यहोरात्रनिर्वाहाय। किं वस्तुतः सप्त नेत्याह। एकोऽश्वः सप्तनामा। एक एव सप्ताभिधानः सप्तधा गमनप्रकारो वा एक एव वायुः सप्तरूपं धृत्वा वहतीत्यर्थः। वाह्यधीनत्वादन्तरीक्षसञ्चारस्य एकचक्रमित्युक्तम्। कीदृशन्तदित्यत आह। त्रिनाभि बलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतम्। अजरममरणधर्म्मकम्। अनर्व्वमश्रिथिलं पुनस्तदेव विशेष्यते। यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि प्रसिद्धानि सर्व्वाणि भूतजातान्यधि आश्रित्य तस्थुस्तिष्ठन्ति। यद्वा एकचक्रमेकचारिणमसाहाय्येन सञ्चरन्तं रथमादित्यं सप्त युञ्जन्ति सर्पणस्वभावाः सप्तसंख्या वा रश्मयः सप्तप्रकारकार्य्या असाधारणाः परस्परविलक्षणाः षड्ऋतवः एकः साधारण इत्येवंरूपा यद्वा मासद्वयात्मकाः षट् अपरोऽधिमासात्मक एक इत्येवं सप्तर्त्तवो युञ्जन्ति एतस्य कार्य्यं निर्व्वहन्तीत्यर्थः। स चैकोऽसहायोऽश्वो ल्यापनशील आदित्यः सप्तनामा सप्तरसानां सप्तमयितारो रश्मयो यस्य तादृशः। सप्तर्षिभिः स्तूयमानो वादित्यो वहति धारयति भ्रमतीत्यर्थः। किं भूतम्। त्रिनाभि चक्रम्। त्रयो नाभिस्थानीयाः सन्ध्यासम्बद्धा वा एव ऋतवो यस्य तत्तादृशम्। के ते ग्रीष्मवर्षाहेमन्ताख्याः यद्वा भूतभविष्यद्वर्त्तमानाख्यास्त्रयः कालाख्यिनाभयः। तद्विशिष्टं चक्रं चक्रवत् पुनः पुनः परिभ्रममाणं संवत्सराख्यचक्रमजरममरणम्। न हि कदाचिदपि कालो म्रियते अनादिनिधनः कालः इति श्रुतेः। अनर्व्वमप्रतिहतम्। ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतमयमादित्यः पुनः पुनरावर्त्तयति संवत्सरादर्वाचीनानां तच्चैवान्तर्भावात् युगादीनां तदाकृत्तिसाध्यात् संवत्सरस्य चक्रत्वेन रूपणम्। पुनः कीदृशं तत्। यत्र यस्मिंश्चक्रे इमा विश्वा भुवना इमानि सर्व्वाणि भूतान्यधितस्थुः आश्रित्य तिष्ठन्ति कालाधीनत्वात् सर्व्वस्याः स्थितेः। ईदृशस्य कालस्य कारणभूतपरमेश्वरपरिज्ञानेन मोक्षसद्भावात् ज्ञानमोक्षोत्तरप्रशंसा च"॥ नृपतिद्वयविशिष्टम्। एकराजविशिष्टम्। यथा, भागवते ३।१।२०।

"इत्थं व्रजन् भारतमेव वर्षं
कालेन यावत् गतवान् प्रभासम्।
तावच्छशास क्षितिमेकचक्रा-
मेकातपत्रामजितेन पार्थः"॥

पुं, असुरभेदः। यथा, हरिवंशे ३। ८४।

"एकचक्रो महाबाहुस्तारकस्य महाबलः"।

अयं हि प्रतिविन्ध्य इति नाम्ना प्रसिद्धः। यथा। महाभारते १। सम्भवपर्व्वणि शकुन्तलोपाख्यानपर्व्वणि ६७। २२।

"एकचक्र इति ख्यात आसीद्यस्तु महासुरः। प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ"॥

स्त्री, स्वनामख्याता पुरी। अत्रस्थो भीमसेनो महाबलं बकनामानमसुरं हतवान्॥ यथा,— महाभारते। १। अंशावतारपर्व्वणि भारतसूत्रे। ६१। २६-२८।

"ते तत्र नियता कालम् कञ्चिदूषुर्नरर्षभाः। माद्र्या सहैकचक्रायां ब्राह्मणस्य निवेशने॥ तत्राससाद क्षुधितं पुरुषादं बकोदरः। भीमसेनो महाबाहुर्ब्बकं नाम महाबलम्॥ तस्यापि पुरुषव्याघ्रो बाहुवीर्य्येण पाण्डवः। निहत्य तरसा वीरो नागराज्ञं पर्य्यसान्त्वयत्"॥)

एकचरः, पुं, (एकश्चरति यः। चर + पचाद्यच्।) हिंसपशुविशेषः। गण्डार इति भाषा। तत्पर्य्यायः। वार्द्धनिसः २ गण्डोत्साहः ३ गण्डकः ४। इति त्रिकाण्डशेषः॥

(सर्पादिः। यथा, मनुः। ५। १७।

"न भक्षयेदेकचरान्नृजातांश्च मृगद्विजान्"।

"ये एकाकिनः प्रायेण चरन्ति सर्पादयस्तानेकचरान्"। इति तट्टीकायां कुल्लूकभट्टः॥ (त्रि, एकाकिचारी। यूथभ्रष्टः। यथा, "अयमेकचरोऽभिवर्त्तते माम्"। इति किराते। १३।३। "एकचरो यूथादपेतः"। इति तट्टीका॥)

एकचारी, [न्] पुं, (एकः सन् चरतीति। चर् + णिनि।) ब्रुडसहचारी। इति त्रिकाण्डशेषः॥ (एकचारिणि, त्रि॥)

एकजटा, स्त्री, (एका जटा यस्याः।

"एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका'। इति श्रवणात्। यद्वा एका मुख्या जटा यस्याः। "खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम्"। इति च श्रवणात्तथात्वम्।) उग्रतारा। तस्या आविर्भावो यथा,—

"सर्व्वे सुरगणाः सेन्द्रास्ततो गत्वा हिमाचलम्। गङ्गावतारनिकटे महामायां प्रतुष्टुवुः॥ अनेकसंस्तुता देवी तदा सर्व्वामरोत्करैः। मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत॥ युष्माभिरमरैरत्र स्तूयते का च भाविनी। किमर्थमागता यूयं मातङ्ग्यास्याश्रमं प्रति॥ एवं ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषतः। समुद्भूतात्रवोद्देवी मां स्तुवन्ति सुरा इति॥ शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान्। तस्मात्तयोर्व्वधायाहं स्तूयेऽत्र सकलैः सुरैः॥ विनिःसृतायां देव्यान्तु मातङ्ग्याः कायतस्तदा। भिन्नाञ्जननिभा कृष्णा साभूत् गौरी कृष्णादपि॥ कालिकाख्याभवत् सापि हिमाचलकृताश्रया। तामुग्रतारामृषयो वदन्तीह मनीषिणः॥ उग्रादपि भयात् त्राति यस्माद्भक्तान् सदाम्बिका। एतस्याः प्रथमं बीजं कथितं तन्त्रमेव च॥ एषैवैकजटा ख्याता यस्मात्तस्या जटाधिका। शृणुतं चिन्तनं चास्याः सम्यक् वेतालभैरवौ॥ यथा ध्यात्वा महादेवीं भक्ताः प्राप्नोत्यभीप्सितम्। चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम्॥ खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं त्वधः। कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम्॥ खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम्। मुण्डमालाधरां ग्रीवे ग्रीवायामपि सर्व्वदा॥ वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम्। कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम्॥ वामपादं शवहृदि संस्थाप्य दक्षिणं पदम्। विन्यस्य सिंहपृष्ठे तु लेलिहानासवं स्वयम्॥ साट्टहासमहाघोरा रावयुक्तातिभीषणा। चिन्त्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः॥ एतस्याः संप्रवक्ष्यामि यो अष्टौ योगिनीस्तु ताः। महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च॥ घोरा च भामरी चैव महारात्रिश्च सप्तमी। भैरवी चाष्टमी प्रोक्ता योगिनीस्ताः प्रपूजयेत्"॥ इति कालिकापुराणे ६१ अध्यायः॥

एकजन्मा, [न्] पुं, (एकं मुख्यं जन्म यस्य। दिक्पालांशसम्भूतत्वादस्य तथात्वम्।) राजा। इति त्रिकाण्डशेषः॥ (एकं न द्वितीयं जन्म यस्य इत्यर्थे। शूद्रः। तस्य अद्विजत्वात् तथात्वम्।)

एकतमः, त्रि, (एक + "एकाच प्राचाम्"। ५। ३। ९४। इति डतमच्।) बहूनां मध्ये एकः। इति व्याकरणम्॥ (यथा महाभारते आदिपर्व्वणि। "अस्थानि वा शरीरं वा ब्रह्मन्नेकतमं कुरु"॥)

एकतरः, त्रि, (एक + "एकाच प्राचाम्"। ५। ३। ९४। इति डतरच्।) द्वयोर्म्मध्ये एकः। इति व्याकरणम्। भिन्नः। इत्यमरटीकायां भरतः॥ (यदाह कात्यायनः।

"यदि ह्येकतरो ह्येषां स्त्रीधनं भक्षयेद्बलात्"॥)

एकता, स्त्री, (एकस्य भावः। एक + तल् + टाप्।) एकत्वम्। ऐक्यम्। इति व्याकरणम्॥ (यथा, रामायणे ६६। १३।

"बहुरपि मतीर्गत्वा मन्त्रिणो मन्त्रनिर्णये।
पुनर्यत्रैकतां प्राप्ताः स मन्त्रो मध्यमः स्मृतः"॥)

एकतानः, त्रि, (एकेन भावरसेन तन्यते विस्तीर्य्यते इति। तन इञ विस्तारे। कर्म्मण्यण्।) एकाग्रः। एकविषयासक्तचित्तः। इत्यमरः॥ (यथा भागवते ७। ९। ८।

"ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः
सत्त्वैकतानमतयो वचसां प्रवाहैः।
नाराधितुं पुरगुणैरधुनापि पिप्रुः
किं तोष्टुमर्हति स मे हरिरुग्रजातेः"॥

एकस्मिन् तानो विस्तृतिर्यस्येति।) एकताले पुं। इत्यमरटीकायां स्वामी॥

एकतालः, पुं, (एकस्तुल्यस्तालो मानं यत्र।) समन्वितलयः। नृत्यगीतवाद्यानां साम्यं यत्र। समतालं इति यस्याख्या। इत्यमरभरतौ॥ (सङ्गीतशास्त्रे खनामख्यातः तालभेदः। त्रि, एकतालयुक्तसमन्वितः। यथा रघौ १५। २३।

"एकताल इवोत्तालपवनप्रेरितो गिरिः"॥)

एकतीर्थी, [न्] पुं, (एकं समं तीर्थमाश्रमो यस्य।) सतीर्थः। गुरुभाइ इति भाषा॥ ("एकतीर्थी एकाश्रमो" इति मिताक्षरा॥)

एकत्र, व्य, (एक + त्रल्।) एकस्मिन्। इति व्याकरणम्॥ एकसङ्गे इति भाषा। (एकत्र निर्णीतः शास्त्रार्थो बाधकं विनान्यत्रापि प्रयुज्यते"। इति दुर्गादासः। यथा मनुः। ५। १२६।

"एका क्रिये गुदे तिस्रस्तथैकत्र करे दश।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता"॥)

एकदंष्ट्रः, पुं, (एका दंष्ट्रा यस्य। परशुरामेणैकदन्तस्य उत्पाटनात् तथात्वम्।) गणेशः। इति त्रिकाण्डशेषः। (अस्य परशुरामक्षतदन्तोत्पाटनकथा एकदन्तशब्दे द्रष्टव्या॥)

एकदन्तः, पुं, (एको दन्तो यस्य।) गणेशः। इत्यमरः॥ (परशुरामक्षतगजेशदन्तोत्पाटनकथा ब्रह्मवैवर्त्ते उक्ता। एकदा रहसि स्थितयोः शिवाशिवयोर्द्वारपालत्वमङ्गीकृतं गजाननेन। एतस्मिन्नन्तरे परशुरामः शिवं द्रष्टुमागतः। शिवदर्शनव्याकुलस्यान्तर्जिगमिषोर्द्वाररोधे कृते गजपतिना सह तस्य तुमुलं युद्धमभवत्। परशुरामस्त्रिभिन परशुना च गजाननस्य एको दन्तः भग्नः। तदा प्रभृत्येव एकदन्तोऽसौ कथ्यते॥)

एकदा, व्य, (एक + "सर्व्वैकान्यकिंयत्तदः काले दा"। ५। ३। १५। इति दा।) एकस्मिन् काले। तत्पर्य्यायः। युगपत् २। इत्यमरः॥ (यथा भागवते ६। ३। २९।

"जिह्वा न वक्ति भगवद्गुणनामधेयं
चेतश्च न स्मरति चरणारविन्दम्।
कृष्णाय नो नमति यच्छिर एकदापि
तानानयध्वमसतोऽकृतविष्णुकृत्यान्"॥)

एकदृक्, [ग्] पुं, (एकं सर्व्वमभिन्नं पश्यति यः। एकादृश् + क्विप्।) महादेवः। (एका दृक् यस्य। रामबाणमोक्षणेन नष्टे एकचक्षुषि काकस्य तथात्वम्।) काकः। काणे त्रि। इति हेमचन्द्रः॥ (एकमेव सर्व्वं ब्रह्मत्वेन पश्यति यः इति व्युत्पत्त्या तत्त्ववेत्ता। ब्रह्मज्ञानी॥ एकमेव पक्षं पश्यतीत्यर्थे एकपक्षाश्रयी॥)

एकदेहः, पुं, (एकः मुख्यो देहो यस्य। ग्रहेषु सौम्यत्वादस्य तथात्वम्।) बुधग्रहः। इति त्रिकाण्डशेषः॥ (एको मेदरक्तादीनां साम्यात् तुल्यो देहः शरीरं यत्र। गोत्रम्। वंशः। यथा, हरिवंशे ४६ अध्याये।

"बह्वनि विप्र गोत्राणि मुनीनां भावितात्मनाम्।
एकदेहानि तिष्ठन्ति विभक्तानि विना प्रजाः"॥

दम्पती। "अस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचमिति श्रुतेः"। तथा,—

"शरीरार्द्धं स्मृता जाया पुण्यापुण्यफले समा"।
इति स्मृत्युक्तेश्च जायापत्योरेकदेहत्वम्"॥)

एकधा, व्य, (एक + "एकाद्धोध्यमुञ्"। ५। २। ४२॥ इति धा।) एकप्रकारम्। इति व्याकरणम्॥ (यथा महाभारते अनुगीतापर्व्वणि १४। ४२। ६०।

"सर्व्ववित् सर्व्वभूतेषु विन्दत्यात्मानमात्मनि।
एकधा बहुधा चैव विकुर्व्वाणस्ततस्ततः"॥)

एकधुरः, त्रि, (एका धूः। ऋक्पूरब्धूःपथामानक्षे"। ५। ४। ७४। इति अः समासान्तः।) एकभारवाहकगवादिः। एकपिठा गरु इति भाषा। तत्पर्य्यायः। एकधुरीणः २ एकधुरावहः ३। इत्यमरः॥ (यथा, पाणिनिः। ४। ४। ७६। "एकधुरान्नुक्"।)

एकधुरावहः, त्रि, (वहतीति वहः। वह् + अच्। एकधुरायाः वहः।) एकधुरः। इत्यमरः॥

एकधुरीणः, त्रि, (एकधुरां वहति यः। "एकधुरान्नुक् च"। ४। ४। ७६। चकारेण स्वस्यानुकर्षणसामर्थ्यात् पक्षे अवगम्॥) एकधुरः। एकभारवोढा। इत्यमरः॥ एकस्य रथस्य लाङ्गलादेर्वा धुरं वहति यः। इत्यमरटीकायां भरतः॥

एकनटः, पुं, (एको मुख्यो नटः।) मुख्यनटः। तत्पर्य्यायः। कथकः २। इति त्रिकाण्डशेषः॥ कथाप्राणः ३। इति शब्दरत्नावली॥

एकपक्षः, त्रि, (एकः पक्षो यस्य।) सहायः। इति त्रिकाण्डशेषः॥ (एकः पक्षः इति विग्रहे। अद्वितीयः पक्षः॥ यथा, रघौ १४। ३४।

"इत्येकपक्षाश्रयविक्लवत्वात्
आसीत् स दोलाचलचित्तवृत्तिः॥)

एकपत्नी, स्त्री, (एकोऽद्वितीयः पतिर्यस्याः इति विग्रहे "नित्यं सपत्न्यादिषु" इति एकपतिशब्दस्य नकारान्तादेशे "ऋन्नेभ्यः" इति ङीप्।) पतिव्रता। इति त्रिकाण्डशेषः॥ (यथा, मेघदूते। १०॥

"ताञ्चावश्यं दिवसगणनातत्परामेकपत्नीम्"॥)

एकः समानः पतिर्यस्या इति विग्रहे। सपत्नी। यथा मनुः। ९। १८५।

"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत्।
सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः"॥)

एकपत्रिका, स्त्री, (एकं गन्धवत्त्वात् श्रेष्ठं पत्रं यस्याः।) गन्धपत्रशुक्लः। इति राजनिर्घण्टः॥

एकपदं, क्ली, (एकं पदं पदमात्रोच्चारणकालो यस्मिन्।) तत्कालः। इति मेदिनी॥ (तत्पर्य्यायः। तत्क्षणम्२ इति विश्वः। यथा, रघुः ८। ४८। "कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे"॥ "एकपदे तत्क्षणे। स्यात् तत्क्षणे एकपदमिति विश्वः"। इति तट्टीका॥ एकं प्रशस्तं पदं स्थानम्। "पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरोक्तेस्तथात्वम्। वैकुण्ठम्। सुप्तिङन्तरूपपदम्। यथा माघे २। ९५।

"निहन्त्यरीनेकपदे य उदात्तः स्वरानिव"॥

एकं श्रेष्ठं पदं कोष्ठरूपपूजास्थानम्। वास्तुमण्डलस्थमेककोष्ठात्मकस्थानम्। यथा, वास्तुयागतत्त्वधृतदेवीपुराणम्।

"इन्द्रेन्द्रात्मजशोभावैकैकपदसंस्थितौ"॥)

एकपदः, पुं, (एकं पदं पदविन्यासो यस्मिन्।) ष्टङ्कारबन्धविशेषः। तस्य लक्षणम्।

पादमेकं हृदि स्थाप्य द्वितीयं स्कन्धसंस्थितम्।
स्तनौ धृत्वा रमेत् कामी बन्धस्त्वेकपदः स्मृतः"॥

इति रतिमञ्जरी॥ (वास्तुयागमण्डलैककोष्ठपूजनीयो देवभेदः। यथा वास्तुयागतत्त्वधृतदेवीपुराणवचनम्। "भृगुश्चैकपदो ज्ञेयः"। इति। एकं पदं चरणं यस्य इति विग्रहे वाच्यलिङ्गः। एकपदविशिष्टः। यथा भागवते १। १६। २०।

"पादैर्न्यूनं शोचसि मैकपाद-
मात्मानं वा दयलैर्भाष्यमाणम्"॥

एकेन पदा चरन् वृषरूपधरो धर्म्मो गोरूपधरां पृथ्वीं रुदतीं दृष्ट्वोवाच। हे भद्रे! पादैर्न्यूनं एकपादं मां तथा शूद्रैर्भाष्यमाणमात्मानं वा शोचसि किम्। इति तट्टीका॥)

एकपदी, स्त्री, (एकः पादो यस्याम्। कुम्भपदीषु चेति निपातः। यद्वा संख्यासु पूर्व्वस्येति पादस्यान्तलोपः। पादोऽन्यतरस्यामिति ङीप्। स्वाङ्गाच्चेति ङीष् वा। पादः पत्।) पद्याः। इत्यमरः॥

एकपर्णिका, स्त्री, (एकपर्णा + कन्। तपःसाधनार्थं पार्व्वत्याः पत्रमात्रभक्षणात् तथात्वम्।) दुर्गा। देवीपुराणे देवीनिरुक्तं नाम ४५ अध्यायः॥

"अपर्णाशा निराहारा एकाग्नी एकपर्णिका।
पाटला पाटलाहारा देवी लोकेषु गीयते"॥

एकपात्, [द्] पुं, (एकः पादो यस्य। संख्यासु पूर्व्वस्येति अन्त्यलोपः।) शिवः। इति त्रिकाण्डशेषः॥ (रुद्रः। यथा, महाभारते सम्भवपर्व्वणि १। १२९। ६५।

"अजैकपादहिर्बुध्नः पिनाकी च परन्तपः" ॥
विष्णुः । यथा, विष्णुसंहितायाम् ।
"चतुरात्मा चतुर्भावश्चतुर्व्वेदविदेकपात्" ॥
एकः पादो यस्य इति विग्रहे वाच्यलिङ्गः ॥)

एकपिङ्गः, पुं, (एकं पिङ्गं पिङ्गलवर्णं नेत्रं यस्य ।) कुबेरः । इत्यमरः ॥ (कुबेरस्य पिङ्गनेत्रकथा उक्ता काशीखण्डे । यथा, —
"प्रसार्य्य नयने पूर्व्वमुमामेव व्यलोकयत् ।
शम्भोः समीपे का योषिदेषा सर्व्वाङ्गसुन्दरी ॥
अनया किं तपस्तप्तं ममापि तपसोऽधिकम् ।
अहो रूपमहो प्रेम सौभाग्यश्रीरहो भगम् ।
क्रूरदृग्वीक्षते यावत् पुनः पुनरिदं वदन् ।
तावत् प्रस्फोटितं नेत्रं वामं वामविलोकनात् ॥
अथ देव्यब्रवीद्देवं किमसौ दुष्टतापसः ।
असह्यक्षितिजेनाक्ष्णा पुनर्मामेव पश्यति ॥
असूयमानो मे रूपं प्रेमसौभाग्यसम्पदः ।
इति देवीगिरं श्रुत्वा प्रहस्य प्राह तां प्रभुः ॥
उमे ! त्वदीयपुत्रोऽयं न च क्रूरेण चक्षुषा ।
संपश्यते तपोलक्ष्मीं तव किन्त्वधिदर्शयन् ॥
इति देवीं समाभाष्य शमीशः पुनरब्रवीत् ।
वरं ददामि ते वत्स ! तपसानेन तोषितः ॥
निधीनामधिनाथस्त्वं गुह्यकानां भवेश्वरः ।
यक्षाणां किन्नराणाञ्च राजा राज्ञाञ्च सुव्रत ! ॥
पतिः पुण्यजनानाञ्च सर्व्वेषां धनदो भव ।
मया सख्यञ्च ते नित्यं वत्स्यामि च तवान्तिके ॥
अलकां निकषामिच ! तव प्रीतिं विवर्द्धयन् ।
आगच्छ पादयोरस्याः पत ते जननी त्वियम् ॥
इति दत्त्वा वरान् देवः पुनराह शिवः शिवाम् ।
प्रसादं कुरु देवेशि ! तपस्विन्यङ्गजे तव ।
देव्युवाच ।
वत्स ! ते निर्म्मला भक्तिर्भवे भवतु सर्व्वदा ।
भवैकपिङ्गो नेत्रेण वामेन स्फुटितेन च ॥
देवदत्तास्तु ये तुभ्यं वराः सन्तु तथैव ते ।
कुबेरो भव नाम्ना त्वं मम रूपेर्ष्यया सुत" ॥)

एकपिङ्गलः, पुं, (एकं पिङ्गलं नेत्रं यस्य ।) कुबेरः । इत्यमरटीकायां भरतः ॥ (अस्य पिङ्गलनेत्रकथा एकपिङ्गशब्दे द्रष्टव्या ॥)

एकभक्तव्रतं, क्ली, (एकं भक्तं भोजनं यत्र तत् व्रतम् ।) रात्रिभोजनाभावविशिष्टदिवाभोजनम् । तथा च स्कन्दपुराणे ।
"दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तं रात्रौ तन्न कदाचन" ॥
(अस्य व्रतस्य नियमफलादिकञ्चोक्तं विष्णुधर्म्मोत्तरे । तद्यथा, —
"चैत्रं विष्णुपरो मासमेकभक्तेन यः क्षिपेत् ।
सुवर्णमणिमुक्तानां गार्हस्थ्यं समवाप्नुयात् ॥
अहिंसकः सर्व्वभूतेषु वासुदेवपरायणः ।
नमोऽस्तु वासुदेवायेत्यष्टाक्षरजपं जपेत् ॥
अतिरात्रस्य यज्ञस्य ततः फलमवाप्नुयात् ।
यस्तु संवत्सरं पूर्णमेकभक्तो भवेन्नरः ॥
अहिंसकः सर्व्वभूतेषु वासुदेवपरायणः ।
नमोऽस्तु वासुदेवायेत्यष्टाक्षरजपं जपेत् ॥
पौण्डरीकस्य यज्ञस्य ततः फलमवाप्नुयात् ।
दशवर्षसहस्राणि स्वर्गलोके महीयते ॥
तत्क्षयादिह चागत्य साम्राज्यं प्रतिपद्यते" ॥ इति ॥)

एकमूला, स्त्री, (एकं मूलं यस्याः ।) शालपर्णी । अतसी । इति वैद्यकम् ॥ (एकमेव मूलं यस्य इति विग्रहे एकमूलविशिष्टे, त्रि ॥)

एकयष्टिका, स्त्री, (एका यष्टिरिव ।) हारविशेषः । एकनरि हार इति भाषा । तत्पर्य्यायः । एकावली २ । इत्यमरः ॥

एकरजः, पुं, (रज्यते इति रजः । एको मुख्यो रजः । रञ्जनद्रव्यम् ।) भृङ्गराजवृक्षः । इति जटाधरः ॥ (भृङ्गराजशब्दोऽस्य गुणादयो बोद्धव्याः ॥)

एकलः, त्रि, (एक + ला + क ।) एक की । इति पद्यावली ॥ एकला इति भाषा । (यथा भागवते ५ । ७ । १० । "तस्मिन् वाव किल स एकलः पुनर्हाश्रमोपवने विविधकुसुमकिसलयतुलसिकाम्बुभिः कन्दमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्तउपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमाप" ॥)

एकलिङ्गं, क्ली, (एकं लिङ्गं यस्य ।) स्थानविशेषः । तथा च आगमे ।
"पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते ।
तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा" ॥

एकलिङ्गः, पुं, (एकं लिङ्गं पिङ्गलनेत्ररूपं चिह्नं यस्य सः ।) कुबेरः । इति शब्दरत्नावली ॥ (पिङ्गलनेत्रकथा एकपिङ्गशब्दे द्रष्टव्या ॥)

एकवर्णी, स्त्री, (एकमेव शब्दं वर्णयति या । एक + वर्ण + अच् । गौरादित्वात् ङीष् ।) वाद्यभेदः । तत्पर्य्यायः । करतालो २ कङ्कमाला ३ कलङ्कषा ४ इति शब्दरत्नावली ॥

एकवर्षिका, स्त्री, (एको वर्षो यस्याः । कः । इत्वम् ।) एकहायनी गौः । इति हेमचन्द्रः ॥ एकवत्सरेर वकना इति भाषा ॥

एकवादः, पुं, (एकोऽभिन्नस्वरो वादः वाद्यम् । डिण्डिम इति एकरूपवाद्यत्वादस्य तथात्वम् ।) डिण्डिमवाद्यम् । इति शब्दरत्नावली ॥

एकविंशतिः, स्त्री, (एकाधिका विंशतिः ।) एकाधिकविंशतिसंख्या । एकुश इति भाषा । यथा । मनुः ५ । ३५ ।
"नियुक्तस्तु यथान्यायं यो मांसं नात्त्यलोलुपः ।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम्" ॥

एकवीरः पुं, वृक्षभेदः । तत्पर्य्यायः । महावीरः २ सहदीरः ३ सुवीरकः ४ । अस्य गुणाः । मदकारित्वम् । अत्युष्णत्वम् । कटुत्वम् । तोदवातनाशित्वम् । चटुलोकटिएण्डादिचलपत्त्राभिघातहारित्वञ्च । इति राजनिर्घण्टः ॥ (त्रि, एकः अद्वितीयो वीरः । वीरवरः । प्रशस्तवीर्य्यशाली । यथा भागवते ३ । १ । ४० ।
"अहो एषापि श्रियतेऽर्भकार्थे
राजर्षिवर्य्येण विनापि तेन ।
यस्त्वेकवीरोऽधिरथो विजिग्ये
धनुर्द्वितीयः ककुभश्चतस्रः" ॥)

एकशृङ्गः, पुं, (एकः शृङ्गः खुरो यस्य । अखण्डखुरत्वात् तथात्वम् ।) घोटकः । इति त्रिकाण्डशेषः ॥ एकखुरजन्तुमात्रम् । यथा ।
"खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशृङ्गाः स्युस्तः शृङ्गी पञ्चनखान् पशून्" ॥
इति श्रीभागवतम् ॥ ३ । १० । २२ ॥ (अस्य दुग्धदधि-मूत्र-मांसादिगुणा अश्वशब्दे ऐकशृङ्गशब्दे च ज्ञातव्याः ॥)

एकशृङ्गः, पुं, (एकं शृङ्गं यस्य ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (स्वायम्भुवमन्वन्तरे अकालप्रलयात् मत्स्यरूपधरस्यास्य शृङ्गे मनोर्नौर्बद्धा । तत्कथा यथा कालिकापुराणे ३२ अध्याये ।
"स्वायम्भुवस्तदा मत्स्यं हरिं सस्मार वै तदा ।
ततो जलागमुपरि सशृङ्ग इव पर्व्वतः ॥
उद्दीप्तश्चैकशृङ्गेण विष्णुर्मत्स्यस्वरूपधृक् ।
आगतस्तत्र न चिरात् यत्रास्ते समनुर्हरिः" ॥
विस्तृतिस्तु आकालिकशब्दे द्रष्टव्या ।) एकशृङ्गयुक्तपशुमात्रम् ॥ (पितृगणभेदः । यथा, महाभारते २ । ११ । ४१-४३ ।
"पितृंश्चाप गणान् विद्धि सप्त वै पुरुषर्षभ ! ।
मूर्त्तिमन्तो हि चत्वारस्त्रयश्चाप्यशरीरिणः ॥
वैराजाश्च महाभागा अग्निष्वात्ताश्च भारत ।
गार्हपत्या नाकधराः पितरो लोकविश्रुताः ॥
सोमपा एकशृङ्गाश्च चतुर्व्वेदाः कलास्तथा ।
एते चतुर्षु वर्णेषु पूज्यन्ते पितरो नृप" ॥)

एकषष्टिः, स्त्री, (एकाधिका षष्टिः ।) संख्यासंख्येयविशेषः । इत्यमरः ॥ ६१ एकसट्ठि इति भाषा । (यथा भागवते ६ । ६ । ३० ।
"सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु" ।)

एकसर्गः, त्रि, (एकस्मिन् विषये सर्गो निश्चयो यस्य ।) एकाग्र्यः । इत्यमरः ॥

एकसूत्रः, पुं, (एकं सूत्रं यस्य । एकसूत्रेण वादनात् तथात्वम् ।) डमरुवाद्यम् । इति शब्दरत्नावली ॥

एकहायनी, स्त्री, (एकः हायनो यस्याः । "दामहायनान्ताच्च" । ४ । १ । २६ । इति ङीष् ।) एकवर्षीयगवी । एकवत्सरेर वाकुर इति भाषा । तत्पर्य्यायः । एकाब्दा २ । इत्यमरः ॥ (ऐसि प्रमाणं यथा, मनुः ११ । १३६ ।
"वासो दद्याद्धयं हत्वा पञ्च नीलान् हयान् गजम् ।
अजमेषावनड्वाहं खरं हत्वैकहायनम्" ॥
"अश्वं हत्वा वस्त्रं दद्यात् हस्तिनं हत्वा पञ्च नीलान् वृषभान् दद्यात् प्रत्येकं छागमेषौ हत्वा वृषभं दद्यात् गर्दभं हत्वा एकवर्षं वत्सं दद्यात्" इति कुल्लूकभट्टः ॥)

एका, स्त्री, (एक + टाप् ।) दुर्गा । यथा ।
"एका गुणार्धा त्रैलोक्ये तस्मादेका स उच्यते" ।

देवी सा परमार्थेति वदन्ते ब्रह्मवर्द्धिनः ॥ इति"।
"एका सा तु पृथक्त्वेन विना सर्व्वत्र विश्रुता।
यथा तु व्यज्यते वर्णैर्विचित्रैः स्फटिको मणिः ॥
तथा गुणवशाद्देवी नानाभावेषु वर्ण्यते" ॥
इति च देवीपुराणे देवीनिरुक्तं नाम ४५ अध्यायः॥
(अद्वितीया। यथा, मार्कण्डेये ९०।७।
"एकैवाहं जगत्यत्र द्वितीया का ममापरा"।
"अजामेकां लोहितशुक्लकृष्णां"। इति श्रुतिः॥
एकैव। स्त्री। यथा भट्टिः १।१४।
"प्रासोढ़ शत्रुघ्नमुदारचेष्टम्
एका सुमित्रा सह लक्ष्मणेन" ॥)
एकाकी, [न्] त्रि, (एक + "एकादाकिनिच्चासहाये"। आकिनिच्।) सहायरहितः। असहायः। एकला इति भाषा। तत्पर्य्यायः। एकः २ एकक ३। इत्यमरः॥ एकलः ४। इति शब्दरत्नावली॥ (यथा मनुः। ४।२५८।
"एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः।
एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति" ॥)
एकाक्षः, पुं, (एकमक्षि यस्य। सक्थ्यक्ष्णोः साङ्गात् षच्।) काकः। इति शब्दचन्द्रिका॥ (काकस्य यथा एकनेत्रत्वं जातम्। तत् पाद्मे भरतस्यायोध्यां प्रतिनिवृत्त्यनन्तरमुक्तम्। तद्यथा,—
"राघवश्चित्रकूटाद्रौ सानुजोऽरमत स्त्रिया।
कदाचिदङ्के वैदेह्या निद्राणे रघुनन्दने ॥
ऐन्द्रः काकः समागम्य जानकीं वीक्ष्य कामुकः।
विददार नखैस्तीक्ष्णैः पीनोन्नतपयोधरम् ॥
तत् दृष्ट्वा राघवः क्रुद्धः कुशं जग्राह पाणिना।
ब्राह्मेणास्त्रेण संयोज्य चिक्षेप धाङ्कमारणे ॥
तत् दृष्ट्वा घोरसङ्काशं ज्वलत्कालानलोपमम्।
दृष्ट्वा काकः प्रदुद्राव निनदन् दारुणास्वनम् ॥
वायसस्त्रिषु लोकेषु बभ्राम भयपीड़ितः।
यत्र यत्र ययौ काकः शरणार्थी च वायसः ॥
तत्र तत्र तदस्त्रं तु प्रविवेश भयावहम्।
ब्रह्मणमिन्द्रं रुद्रं मां शरणार्थी जगाम सः ॥
तत् दृष्ट्वा वायसं भीतं देवता न ररक्षिम।
न शक्ताः स्म वयं त्रातुं राघवास्त्राद्भयङ्करात् ॥
इत्यब्रूम महादेवा अन्यत्रास्त्रं दहेच्च नः।
पुनस्त्वागात् विधिं काको दयया विधिराह तम् ॥
भो भो बलिभुजां श्रेष्ठ तमेव शरणं व्रज।
स एव रक्षकः श्रीशः शरणागतवत्सलः ॥
इत्युक्तः सोऽथ बलिभुक् ब्रह्मणा रघुनन्दनम्।
उपेत्य सहसा भूमौ निपपात भयातुरः ॥
प्रायसंशयमापन्नं दृष्ट्वा सीता तु वायसम्।
त्राहि त्राहीति भर्त्तारमुवाच दयिता विभुम् ॥
तच्छिरः पादयोस्तस्य युयुजे चाथ जानकी।
तमुत्थाप्य करेणाथ कृपासीयूषसागरः।
ररक्षासौ निजास्त्राय तदेकाक्षि ददौ तदा ॥
वायसोऽपि मुक्तर्नत्वा सीतायै राघवाय च।
स्वर्लोकं प्रययौ हृष्टो राघवेणाभिपालितः" ॥)
एकनेत्रविशिष्टे काणे त्रि॥
एकाग्रः, त्रि, (एकं एकस्मिन् वा अग्रं पुरोगतं ज्ञेयमस्य।) अनन्यचित्तः। तत्पर्य्यायः। एकतानः २ अनन्यवृत्तिः ३ एकायनः ४ एकसर्गः ५ एकाग्र्यः ६ एकायनगतः ७। इत्यमरः॥ (यथा, मनुः। १।१।
"मनुमेकाग्रमासीनमभिगम्य महर्षयः"।
"एकाग्रं विषयान्तरात्याक्षिप्तचित्तम्"। इति कुल्लूकभट्टः। तथा भागवते ८।१६।३।
"मनश्चैकाग्र्यया बुद्धा भगवत्यखिलात्मनि।
वासुदेवे समाधाय चचार ह परव्रतम्"॥
तथा गीतायाम् ६।१२।
"तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्जाद्योगमात्मविशुद्धये"॥
"एकाग्रं चित्तेपरहितं मनः कृत्वा"। इति स्वामिटीका।) अनाकुलः। इति मेदिनी॥
एकाग्र्यः, त्रि, (एकं अग्रं अस्य।) एकाग्रः। इत्यमरः॥
एकाङ्गं, क्ली (एकं सुन्दरमङ्गं यस्य। 'एकं सुन्दरमङ्गं भवत्यस्माद्वा।) चन्दनम्। इति हारावली॥ (एकमद्वितीयमङ्गम्। एकस्मिन्नपि अङ्गे। यथा, महाभारते १३। दानधर्म्मकथने। ८२। २१।
"माननामहमिच्छामि भवत्यः सततं शुभाः।
अप्येकाङ्गेऽप्यधोवस्त्रमिच्छामि च सुकुत्सिते"॥
एकं श्रेष्ठमङ्गमिति विग्रहे मस्तकम्। अस्य पर्य्याये उत्तमाङ्गशब्ददर्शनात्॥)
एकाङ्गः, पुं, (एकं सुन्दरम् अङ्गं यस्य। सौम्यत्वादस्य तथात्वम्।) बुधग्रहः। इति त्रिकाण्डशेषः॥
एकादश, [न्] त्रि, (एकाधिका दश।) संख्याविशेषः। ११ अगार इति भाषा। तद्वाचकौ। रुद्रः १ दुर्य्योधनसेनापतिः २। इति कविकल्पद्रुमः॥ (यथा मनुः २।३६।
"गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः"॥)
एकादशी, स्त्री, (एकादशानां पूरणी। एकादश + ङीप्।) तिथिविशेषः। सा तु शुक्लपक्षे सूर्य्यमण्डलात् चन्द्रमण्डलस्य निर्गमरूपैकादशकलाक्रियारूपा। कृष्णपक्षे सूर्य्यमण्डले चन्द्रमण्डलस्य प्रवेशरूपैकादशकलाक्रियारूपा। तत्पर्य्यायः। हरिवासरम् २। हरिदिनम् ३। इति स्मृतिः॥ तत्र जातफलम्।
"क्रोधोत्कटः क्रोशसहः सुभाषी
यागादिकर्त्ता स्वजनैकभर्त्ता।
महामतिर्देवगुरुप्रियः स्या-
देकादशीजो मनुजोऽतिहृष्टः"॥
इति कोष्ठीप्रदीपः॥*॥ तत्र उपवासविधिः। पारणादिने द्वादशीलाभे सर्व्वएव पूर्णां त्यक्त्वा खड्गमुपवसेयुः। तदलाभे मही पूर्व्वां तनयः परां विधवापि उपवसेत्। पूर्णा तु।
"उदयात् प्राक् यदा विप्र मुहूर्त्तार्द्धयसंयुता।
संपूर्णैकादशी ज्ञेया तत्रैवोपवसेद्बुधः"॥
इति गारुडोक्ता॥ यदा तु पूर्व्वदिने दशम्या परदिने द्वादश्या युक्तैकादशी तदा उत्तरामुपोष्य द्वादश्यां पारणं कुर्य्यात्। परदिने द्वादश्यनिर्गमे त्रयोदश्यामपि। यदा तु सूर्य्योदयानन्तरं दशमीयुतैकादशी अथ च परदिने न निःसरति तदा तां विहाय द्वादशीमुपवसेत्। यदा तु सूर्य्योदयप्राक्कालीनदशमीविद्धैकादशी परदिने च न निःसरति तदा तामुपवसेत्। यदा तद्विधा सती परदिनेऽपि निःसरति तत्परदिने च द्वादशी तदा तां विहाय खड्गामुपोष्य द्वादश्यां पारयेत्। यदा तूभयदिने तद्विधैकादशी परदिने च न द्वादशी तदा षष्टिदण्डात्मिकां विद्धामुपोष्य परदिने द्वादश्यादयादमुत्तीर्य्य पारयेत्। वैष्णवस्तु तत्रापि शुक्लपक्षे परामुपोष्य त्रयोदश्यां पारयेत्। सर्व्वस्यां कृष्णैकादश्यां वैष्णवानां सपुत्त्रायां गृहस्थानामप्युपवासो नित्यः। ब्राह्मणस्य विशेषतो नित्यः। वैष्णवेतरेषां तादृशानां हरिशयनमध्यवर्त्तिनीषु कृष्णैकादशीषु उपवासो नित्यः। अपुत्त्रवतां गृहिणान्तु सर्व्वास्वेव नित्याधिकारः। काम्योपवासे त्वविशेषेणैव सर्व्वेषामधिकारः। नित्योपवासे रविशुक्रादिदोषो नास्ति। अष्टाब्दादधिको मर्त्योऽपूर्णाशीतिवत्सरो नित्याधिकारी। विधवानान्तु सर्व्वास्वेव नित्याधिकारः तत्र मलमासादिदोषो नास्ति। इत्येकादशीतत्त्वोक्तव्यवस्था॥*॥
अथ हरिभक्तिविलासोक्तैकादशीव्यवस्था लिख्यते। तत्रादौ उपवासपूर्व्वदिनकृत्यम्।
"प्रातःस्नानादिकं कृत्वा सुवेशो धौतवस्त्रकः।
व्रतं संकल्प्य कुर्व्वीत वैष्णवैश्च महोत्सवम्"॥
इति कारिका॥ संकल्पमन्त्रः।
"दशमीदिनमारभ्य करिष्येऽहं व्रतं तव।
त्रिदिनं देवदेवेश निर्व्विघ्नं कुरु केशव"॥*॥
तत्र रुक्माङ्गदराजवाक्यं नारदीये।
"प्रातर्हरिदिनं लोकास्तिष्ठध्वं चैकभोजनाः।
अत्तारस्तवशाः सर्व्वे हविष्यान्ननिषेविणः॥
अवनीतलशयनाः प्रियासङ्गविवर्जिताः।
स्मरध्वं देवमीशानं पुराणं पुरुषोत्तमम्"॥*॥
अथान्यनियमाः। स्कान्दे।
"कांस्यं मांस्यं मसूरञ्च चौद्रं चानृतभाषणम्।
पुनर्भोजनमायासं दशम्यां परिवर्জ্জयेत्"॥
पारणादिनोक्तनिषिद्धद्रव्याण्यत्रापि निषिद्धानि॥*॥
ततो व्रतस्य नित्यत्वमाह कण्वः।
"एकादश्यामुपवसेन्न कदाचिदतिक्रमेत्"।
आग्नेयेच्च।
"उपोष्यैकादशीं राजन् यावदायुःप्रवृत्तिभिः"॥*॥
भोजननिषेधो नारदीये पाद्मोत्तरखण्डे च।
"रटन्तीह पुराणानि भूयोभूयो वरानने!।
न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे"॥
प्रसङ्गेऽपि नित्यत्वम्। विष्णुरहस्यम्।
"शुक्ले वा यदि वा कृष्णे विष्णुपूजनतत्परः।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि"॥*॥
संक्रान्त्यादावपि नित्यत्वम्। कात्यायनः।
"संक्रान्तौ रविवारे वा यदा चैकादशी भवेत्।
उपोष्या सा महापुण्या सर्व्वपापहरा तिथिः"॥*॥
उपवासदिने श्राद्धनिषेधः। पाद्मोत्तरखण्डे।
"एकादश्यान्तु प्राप्तायां मातापित्रोर्म्रतेऽहनि।
द्वादश्यां तत्प्रदातव्यं नोपवासदिने क्वचित्"॥*॥
अथ अधिकारिणः। पाद्मोत्तरखण्डे।
"वर्णानामाश्रमाणाञ्च स्त्रीणाञ्च वरवर्णिनि।

एकादश्युपवासस्तु कर्त्तव्यो नात्र संशयः" ॥
कात्यायनस्मृतौ च ।
"अष्टवर्षाधिको मर्त्यो ह्यपूर्णामीतिवत्सरः ।
एकादशामुपवसेत् पक्षयोरुभयोरपि" ॥ * ॥
अशक्तौ प्रतिनिधिः । वायुपुराणे ।
"उपवासे त्वशक्तस्य आहिताग्नेरथापि वा ।
पुत्रान् वा कारयेदन्यान् ब्राह्मणान् वापि कारयेत्॥
अथवा विप्रमुख्येभ्यो दानं दद्यात् स्वशक्तितः ।
उपवासन्तु कुर्व्वाणः पुण्यं भूतगुणं भवेत्" ॥
मार्कण्डेयपुराणे च ।
"एकभक्तेन नक्तेन बालवृद्धातुरः क्षिपेत् ।
पयोमूलफलैर्व्वापि न निर्द्वादशिको भवेत्" ॥*॥
अनुकल्पापवादः । गरुड़पुराणे ।
"मच्छयने मदुत्थाने मत्पार्श्वपरिवर्त्तने ।
फलमूलजलाहारी हृदि मूर्त्यं समर्पयेत्" ॥ * ॥
एकादशीमाहात्म्यम् । तत्त्वसागरे ।
"एकादशीसमं किञ्चित् पावनं न च विद्यते ।
स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्रप्रदायिनी" ॥
गारुड़े च ।
"एकादशीव्रतं भक्त्या यः करोति नरः सदा । [॥*॥
स विष्णुलोकं व्रजति यांति विष्णोः सरूपताम्" ।
उपवासदिननिर्णयः । सौरधर्म्मोत्तरे ।
"एकादशीमुपवसेत् द्वादशीमथवा पुनः । [॥*॥
विमिश्रां वापि कुर्व्वीत न दशम्या युतां क्वचित्"
विद्धोपवासदोषमाह वशिष्ठः ।
"दशम्येकादशी यत्र तत्र नोपवसेद्बुधः ।
अपत्यानि विनश्यन्ति स्वर्गलोकं न गच्छति" ॥*॥
द्वादश्युपवासफलम् । स्कान्दे ।
"ऊर्द्ध हरिदिनं न स्यात् द्वादशीं ग्राह्येत्ततः ।
द्वादशामुपवासोऽत्र त्रयोदश्यान्तु पारणम् ॥
एवं कुर्व्वन् नरो भक्त्या विष्णुसायुज्यमाप्नुयात् ।
अन्यथा कुरुते यस्तु स याति नरकं ध्रुवम्" ॥*॥
सपूर्णालक्षणेन विद्धालक्षणम् । भविष्यपुराणे ।
"आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता ।
एकादशी च संपूर्णा विद्वान्या परिकीर्त्तिता" ॥*॥
अरुणोदयविद्धापरित्यागमाह कण्वः ।
"अरुणोदयवेलायां दशमीसंयुता यदि ।
अतोपोष्या द्वादशी स्यात् त्रयोदश्यान्तु पारणं" ॥
वेधश्चतुर्विधः । ब्रह्मवैवर्त्ते ।
"अरुणोदयवेधः स्यात् सार्द्धन्तु घटिकात्रयम् ।
अतिवेधो द्विघटिकः प्रभासन्दर्शनाद्रवेः ॥
महावेधोऽपि तत्रैव दृश्यतेऽर्कोन दृश्यते ।
तुरीयस्तत्र विहितो योगः सूर्य्योदये बुधैः" ॥*॥
अरुणोदयविद्धोपवासदोषः । पाद्मे ।
"अरुणोदयकाले तु वेधं दृष्ट्वा चतुर्व्विधम् ।
मद्दिनं ये प्रकुर्व्वन्ति यावदाहूतनारकाः" ॥*॥
गुद्धाविशेषपरित्यागः । गारुड़े ।
सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
वैष्णवी च त्रयोदश्यां घटिकैकापि दृश्यते ॥
गृहस्थोऽपि परां कुर्य्यात् पूर्व्वां नोपवसेत्तदा" ॥*॥
अथाष्टमहाद्वादशीनां विशेषतो निरूपणम् ।
"उन्मीलनी वञ्जुली च त्रिस्पृशा पक्षवर्द्धिनी ।
जया च विजया चैव जयन्ती पापनाशिनी ॥
द्वादश्योऽष्टौ महापुण्याः सर्व्वपापहरा द्विज ।
तिथियोगेन जायन्ते चतस्रश्चापरास्तथा ॥
नक्षत्रयोगाच्च बलात् पापं प्रघ्नमयन्ति ताः" ॥ * ॥
अथोन्मीलनी । यथा ब्रह्मवैवर्त्ते ।
"एकादशी च संपूर्णा वर्द्धते पुनरेव सा ।
द्वादशी च न वर्द्धेत कथितोन्मीलनी च सा" ॥
पद्मपुराणे ॥
"सर्व्वत्रैकादशी कार्य्या द्वादशीमिश्रिता नरैः ।
प्रातर्भवतु वा मा वा यतो नित्यमुपोषणम्" ॥*॥
अथ वञ्जुली । ब्रह्मवैवर्त्ते ।
"द्वादश्येव विवर्द्धेत नचैवैकादशी यदा ।
वञ्जुलीति भृगुश्रेष्ठ ! कथिता पापनाशिनी" ॥
भागवतादित्यन्ते ।
"संपूर्णैकादशी त्याज्या परतो द्वादशी यदि ।
उपोष्या द्वादशी शुद्धा द्वादशामेव पारणम्" ॥ * ॥
अथ त्रिस्पृशा । ब्रह्मवैवर्त्तपुराणे ।
"अरुणोदय आद्यां स्यात् द्वादशीं सकलं दिनम् ।
अन्ते त्रयोदशी प्रातस्त्रिस्पृशा सा हरेः प्रिया" ॥
नारदीये ।
"एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
त्रिस्पृशा नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहति" ॥
अथ पक्षवर्द्धिनी । ब्रह्मवैवर्त्ते ।
"दर्शश्च पौर्णमासी च संपूर्णा वर्द्धते यदि ।
द्वितीयेऽह्नि द्विजश्रेष्ठ सा भवेत् पक्षवर्द्धिनी"॥*॥
ब्रह्मवैवर्त्ते ।
"कुहूरके यदा वृद्धिं प्रयाते पक्षवर्द्धिनी ।
विहायैकादशीं तत्र द्वादशीं समुपोषयेत्" ॥ * ॥
अथ जयादिः । ब्रह्मवैवर्त्ते ।
"पुष्यश्रवणपुष्याद्यरोहिणीसंयुतास्तु ताः ।
उपोषिताः समफला द्वादश्योऽष्टौ पृथक् पृथक्" ॥
अथोपवासदिनकृत्यम् । देवलः ।
"गृहीत्वौडुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासन्तु गृह्णीयादृषीन् संकल्पयेद्बुधः" ॥
तत्र सङ्कल्पमन्त्रः ।
"एकादश्यां निराहारः स्थित्वाहमपरेऽहनि ।
भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत" ॥ * ॥
पुष्पाञ्जलित्रयदानं मन्त्रपूतजलपानञ्चाह मार्कण्डेयः ।
"अशक्तश्चेत्तु मन्त्रेण त्रिजप्तेनाभिमन्त्रितम् ।
उपवासफलं प्रेप्सुः पिबेत्तोयं समाहितः ॥
देवार्चनं ततः कृत्वा पुष्पाञ्जलिमथापि वा ।
संकल्पमन्त्रमुच्चार्य्य देवाय विनिवेदयेत्" ॥ * ॥
संकल्पादौ विशेषः । नारदीये ।
"पूर्व्वायाः सङ्गदोषेणैकादश्याः स्नानपूजने ।
वर्ज्जयन्ति नराः पूर्व्वान् यामांश्च चतुरो द्विज ॥
तदूर्द्धं स्नानपूजादि कर्त्तव्यं तदुपोषितैः ।
न दिवा शुद्धिमाप्नोति तदा रात्रौ विधीयते ॥
दिनकार्य्यमशेषञ्च कर्त्तव्यं पूर्व्वरीमुखे" ॥ * ॥
पूजाजागरणविधिः । ब्राह्मे ।
स्नात्वा सम्यग्विधानेन धौतवासा जितेन्द्रियः ॥
संपूज्य विधिवद्विष्णुं श्रद्धायातिसमाहितः ।
पुष्पैर्गन्धैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः ॥
उपहारैर्ब्रह्मविधैर्नृत्यगीतवादैर्मनोरमैः ॥
एवं संपूज्य विधिवद्रात्रौ कुर्य्यात् प्रजागरम्" ॥*॥
अथ जागरणलक्षणम् । स्कान्दे ।
"शृणु नारद वक्ष्यामि जागरस्य तु लक्षणम् ।
येन विज्ञातमात्रेण दुर्लभो न जनार्दनः ॥
गीतं वाद्यञ्च नृत्यञ्च पुराणपठनन्तथा ।
धूपं दीपञ्च नैवेद्यं पुष्पगन्धानुलेपनम् ॥
फलमर्घ्यञ्च श्रद्धा च दानमिन्द्रियनिग्रहः ।
सत्यान्वितं विनिद्रञ्च मुदायुक्तं क्रियान्वितम् ॥
सातूर्य्यञ्चैव सोत्साहं पाषाणस्यादिवर्ज्जितम् ।
प्रदक्षिणाभिः संयुक्तं नमस्कारपुरःसरम् ॥
नीराजनसमायुक्तमनिर्व्विण्णेन चेतसा ।
यामे यामे महाभागे कुर्य्यादारात्रिकं हरेः ॥
एतैर्गुणैः समायुक्तं कुर्य्याज्जागरणं हरेः' ॥ * ॥
अथ पारणदिनकृत्यम् । कात्यायनः ।
"प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत् ।
पारणन्तु ततः कुर्य्यात् व्रतसिद्धौ हरिं स्मरन्" ॥
तत्र समर्पणमन्त्रः ।
"अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव" ॥ * ॥
अथ पारणे द्वादशीलङ्घने दोषः । स्कान्दे ।
"पारणाहनि संप्राप्ते द्वादशीं यो व्यतिक्रमेत् ।
त्रयोदश्यान्तु भुञ्जानः शतजन्मानि नारकी" ॥ * ॥
अथ द्वादश्यल्पत्वे कृत्यसमाधानम् । देवीरहस्ये ।
"अल्पा चेद्द्वादशी कुर्य्यात् नित्यकर्म्मारुणोदये ।
अत्यल्पा चेन्निशीथोर्द्धमामध्याह्निकमेव तत्" ॥*॥
अथ सङ्कटे पारणासमाधानम् । कात्यायनः ।
"मन्त्रं जपित्वा हरये निवेद्योपोषणं व्रती ।
अद्भिस्तु पारणं कुर्य्यात् सङ्कटे विषमे सति" ॥ * ॥
अथ हरिवासरकालपारणानिषेधः । विष्णुधर्म्मोत्तरे ।
"द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः ।
तमतिक्रम्य कुर्व्वीत पारणं विष्णुतत्परः" ॥ * ॥
अथ द्वादशीदिने वर्ज्जनीयानि । स्कान्दे ।
"क्षौद्रं मांसं सुरां तैलं व्यायामं क्रोधमैथुने ।
परान्नं कांस्यताम्बूले लोभं निर्म्माल्यलङ्घनम् ॥
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्ज्जयेत्" ॥
अपि च । वितथभाषणम् । प्रवासः । दिवास्वप्नः । अञ्जनम् । म्रक्षणम् । मसूरम् । द्यूतम् । हिंसा । जृम्भकम् । कोरद्रूषकम् । औषधम् । एतानि पुराणान्तरोक्तान्यपि वर्ज्जनीयानि ॥ * ॥ इति श्रीहरिभक्तिविलासोक्तैकादशीव्यवस्था समाप्ता ॥*॥
अथ पञ्चमदेशप्रसिद्धनागपुराणोक्तषड्विंशत्येकादशीनामानि लिख्यन्ते । अयहायनस्य कृष्णैकादशी उत्पन्ना १ शुक्ला मोक्षा २ । पौषस्य कृष्णैकादशी सफला ३ शुक्ला पुत्रदा ४ । माघस्य कृष्णैकादशी षट्तिला ५ शुक्ला जया ६ । फाल्गुनस्य कृष्णैकादशी विजया ७ शुक्ला आमलकी ८ ।

चैत्रस्य कृष्णैकादशी पापमोचनी ९ शुक्ला कामदा १०। वैशाखस्य कृष्णैकादशी वरूथिनी ११ शुक्ला मोहनी १२। ज्येष्ठस्य कृष्णैकादशी अपरा १३ शुक्ला निर्जला १४। आषाढस्य कृष्णैकादशी योगिनी १५ शुक्ला पद्मा १६। श्रावणस्य कृष्णैकादशी कामिका १७ शुक्ला पुत्रदा १८। भाद्रस्य कृष्णैकादशी अजा १९ शुक्ला वामना २०। आश्विनस्य कृष्णैकादशी इन्दिरा २१ शुक्ला पापाङ्कुशा २२। कार्त्तिकस्य कृष्णैकादशी रमा २३ शुक्ला प्रबोधिनी २४। मलमासस्य शुक्लैकादशी सुमङ्गा २५ कृष्णा कमला २६॥ *॥ इत्येकादशीप्रकरणं समाप्तम्॥ (संख्याविशेषः। एगार इति भाषा। यथा महाभारते ६।१६।२१।

"एकादशी धार्त्तराष्ट्री कौरवाणां महाचमूः"॥)

एकाङ्गविंशतिः, त्रि, (एकेन न विंशतिः। "एकादिरेकस्य चादुक्"। ६।३।७६। नञो विंशत्या समासे, ङीप्। एकोनविंशतिः १९। इति व्याकरणम्॥

एकानंशा, स्त्री, (एको न अंशो यस्याः।) पार्व्वती। इति त्रिकाण्डशेषः॥ (इयं हि यशोदागर्भसम्भवा। यदुक्तं हरिवंशे। ५९।१४ ४७।

"देवक्यजनयत् विष्णुं यशोदा तां तु कन्यकाम्"।

"विद्धि चैनामथोत्पन्नां अंशाद्देवीं प्रजापतेः।

एकानंशां योगकलां रक्षार्थं केशवस्य तु"॥)

एकान्तं, क्ली, (एकस्मिन्नेव अन्तः समाप्तिर्यस्य।) अत्यन्तम्। तत्पर्य्यायः। अतिशयः २ भरः ३ अतिवेलम् ४ भृशम् ५ अत्यर्थम् ६ अतिमात्रम् ७ उद्गाढम् ८ निर्भरम् ९ तीव्रम् १० नितान्तम् ११ गाढम् १२ बाढम् १३ दृढम् १४। (यथा माघे २। ८३।

"तेनः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः"॥

तदति, त्रि। यथा कुमारे १। ३६।

"नागेन्द्रहस्तास्त्वचि कर्कशत्वा-

देकान्तशैत्यात् कदलीविशेषाः"॥

तथा भागवते। २। ४। ४।

तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः।

एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते"॥)

भेद्यगामिनि त्रि। इत्यमरः॥ (सर्व्वत्र यदवधारणोच्यते स एकान्तः॥ यथा "ढदद्रिरेचयति मदनफलं वामयतीति"॥ इत्युत्तरतन्त्रे ६५ अध्याये सुश्रुतेनोक्तम्॥) निर्ब्बन्धम्॥ (यथा हितोपदेशे विग्रहे। १५। "अथ केनापि ग्रस्तरक्तेक्षो धूसरकम्बलकृततनुत्राणेन धनुःकाण्डं सज्जीकृत्यावनतकायेन एकान्ते स्थितम्"॥)

एकान्ती [न्] (एकान्तमस्यास्य। एकान्त + इनि।) विष्णुभक्तविशेषः। यथा, गारुडे १११ अध्याये।

"एकान्तेनासमो विष्णुर्यस्मादेषां परायणः।

तस्मादेकान्तिनः प्रोक्ता भागवतचेतसः॥

प्रियाणामपि सर्व्वेषां देवदेवस्य स प्रियः।

आपत्स्वपि तदा यस्य भक्तिरव्यभिचारिणी"॥

एकान्नः, त्रि, (एकं एककालपक्वं अन्नं यत्र।) एकभक्तः। यथा। काशीखण्डे।

"ऊर्द्धं यवान्नमश्नीयादेकान्नमथवा पुनः।

दत्तात्रेयं सूरगणैव सूकरिम्बीञ्च वर्ज्जयेत्"॥

इति तिथ्यादितत्त्वम्॥ एकं अविभक्तमन्नं यस्य इति व्युत्पत्त्या एकपाकावस्थितः। अविभक्तः। यथा,

"एकपाकेन वसतां पिण्डदेवद्विजार्चनम्।

एकं भवेद्विभक्तानां तदेव स्यादृणे ऋणे"॥

इति प्रायश्चित्ततत्त्वधृतदक्षस्मृतिवचनम्॥

एकान्नविंशति, त्रि, (एकेन न विंशतिः। "एकादिरेकस्य चादुक्"। ६।३।७६। नञो विंशत्या समासे, क्ते एकशब्देन सह क्तीयेति योगविभागात् समासः। अनुनासिकविकल्पः।) एकोनविंशतिः १९। इति व्याकरणम्॥

एकाब्दा, स्त्री, (एकोऽब्दो यस्याः सा।) एकहायनी। एकवत्सरवयस्कागवी। इत्यमरः॥

एकायनः, त्रि, (एकं अयनं विषयो यस्य।) एकायः। एकविषयासक्तचित्तः। इत्यमरः। (यथा छान्दोग्योपनिषदि। ७। ४। २। तानि हृतानि संकल्पैकायनानि सङ्कल्पात्मकानि संकल्पे प्रतिष्ठितानि"। एकमयनं गतिर्यत्र। एकमाश्रयमनयोग्यः। यदुक्तं महाभारते ३। १४६। ६६।

"अनेनैव पथा मा वै गच्छेदिति विचार्य्य सः।

आस्त एकायने मार्गे कदलीषण्डमण्डिते"॥)

एकायनगतः त्रि, (एकायनं गतः प्राप्तः। एकस्मिन्नयने गतं ज्ञानमस्येति वा।) एकायः। इत्यमरः॥

एकावली, स्त्री, (एका श्रेष्ठा आवली माला।) एकयष्टिका। इत्यमरः॥ एकनर हार इति भाषा। (अलङ्कारविशेषः। तल्लक्षणादिकमुक्तं साहित्यदर्पणे १० परिच्छेदे। १०१। यथा,—

"पूर्व्वं पूर्व्वं प्रति विशेषणत्वेन परं परम्।

स्याप्यतेऽपोह्यते वा चेत्स्यात्तदैकावली द्विधा"॥

क्रमेणोदाहरणम्। तत्रैव।

"सरो विकसिताम्भोजमम्भोजं भृङ्गसङ्गतम्।

भृङ्गा यत्र ससङ्गीताः सङ्गीतं सस्मरोदयम्"॥

"न तज्जलं यन्न सुचारुपङ्कजं

न पङ्कजं तद्यदलीनषट्पदम्।

न षट्पदोऽसौ न जुगुञ्ज यः कलं

न गुञ्जितं तन्न जहार यन्मनः"॥

भट्टिः। २। १९॥ क्वचिद्विशेष्यमपि यथोत्तरं विशेषणतया स्थापितमपोहितञ्च दृश्यते। यथा,—

"वाप्यो भवन्ति विमलाः स्फुटन्ति कमलानि वापीषु।

कमलेषु पतन्त्यलयः करोति सङ्गीतमलिषु पदम्"॥

एवमपोहनेऽपि॥)

एकाश्रितगुणः, पुं, (एकस्मिन् पदार्थे आश्रितो गुणः।) एकवृत्तिधर्म्मः। तद्यथा। रूपम् १ रसः २ गन्धः ३ स्पर्शः ४ एकत्वम् ५ एकपृथक्त्वम् ६ परिमाणम् ७ परत्वम् ८ अपरत्वम् ९ बुद्धिः १० सुखम् ११ दुःखम् १२ इच्छा १३ द्वेषः १४ यत्नः १५ गुरुत्वम् १६ द्रवत्वम् १७ स्नेहः १८ संस्कारः १९ अदृष्टम् २० शब्दः २१। इति सिद्धान्तमुक्तावली॥ ९०॥

एकाष्ठीलः, पुं, (एकमस्मि जाति। ला + क। सुधामादित्वात् षत्वं दीर्घत्वञ्च।) वकवृक्षः। इति कश्चिदमरः॥

एकाष्ठीला, स्त्री, (एकाष्ठील + टाप्।) वकवृक्षः। इत्यमरः॥ पाठा। इति राजनिर्घण्टः॥ आक्नादि इति भाषा। (अस्याः पर्य्यायो यथा॥

"अम्बष्ठाम्बष्ठकी पाठा कुचेला पारचेलिका।

एकाष्ठीला वरा तिक्ता प्राचीनौका शिवाबुका"॥

इति वैद्यकरत्नमाला॥)

एकाहः, पुं, (एकमहः। "उत्तमकाभ्याञ्च"। ५।४। ९० इत्यनेन सिद्धम्।) एकदिनम्। इति व्याकरणम्॥ (यथा, मनुः ५। ५९।

"अर्व्वाक् सञ्चयनादस्थ्नां त्र्यहमेकाहमेव च"॥)

एकाहारः, पुं, (एकः न द्वितीय आहारः।) एकदिनवर्त्त्येकवारभोजनम्। यथा।

"एकाहारः सदा कार्य्यो न द्वितीयः कदाचन।

पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम्"॥

इति शुद्धितत्त्वधृतस्मृतिः॥

एकीयः, त्रि, (एकस्मिन् तिष्ठतीति। एक + छ।) एकपक्षः। सहायः। सहभावी। इति त्रिकाण्डशेषः॥

एकोद्दिष्टं, क्ली, (एकः प्रेत एव उद्दिष्टो यत्र।) प्रेतोद्देश्यकश्राद्धम्। यथा। गोभिलः अथैकोद्दिष्टमेकं पवित्रमेकोऽर्घ्यः एकः पिण्डो नावाहनं नाम्नीकरणं नात्र विश्वे देवाः खदितमिति क्षत्रिप्रश्नः सुखदितमिति प्रत्युत्तरम्। उपतिष्ठतामित्यत्र अस्य स्थाने अभिरम्यतामिति विसर्गोऽभिरतोऽस्मीति प्रतिवचनमेतत् प्रेतश्राद्धमिति॥ *॥ एतत् प्रेतश्राद्धमित्युपसंहारात् एकं प्रेतमुद्दिश्य यदीयते श्राद्धं तदेकोद्दिष्टमिति वैदिकप्रयोगाधीनं यौगिकम्। अतएव प्रतिसांवत्सरिकस्य नैकोद्दिष्टत्वं किन्त्वेकोद्दिष्टविधिकत्वं अत्रार्घ्यैक्याद्विद्धरूपसङ्केतितपवित्रैक्यप्राप्तौ एकं पवित्रमिति पुनरभिधानसार्थक्याय तदवयवैकदलपरम्। अत्र नावाहनं नाम्नी करणमिति निषेधयोः पौर्व्वापर्य्यादग्नौ करणपूर्व्वकालीनं प्रधानसम्बन्धि श्राद्धसूत्रोद्दिष्टं श्राद्धार्थावाहनमेव निषिध्यते न तत्प्रधानसम्बन्धि पिण्डयज्ञवदित्यतिदेशप्राप्तं पिण्डार्थावाहनमिति। एतेन पिण्डार्थावाहननिषेधो मैथिलोक्तो हेयः। अत्राग्नौ करणनिषेधेन ऊनश्राद्धस्यालाभे ऊनश्राद्धं दत्त्वा पात्रमालभ्य जपति एधिवीत्यादि स्वाहा इत्यन्तसूत्रोक्तपात्रालम्भनस्यापि बाधः। आनन्तर्य्याभावात् अमन्तमिति मन्त्रलिङ्गविरोधाच्च। खदितमिति क्षत्रिप्रश्न इति क्षत्राः स्थ इति क्षत्रिप्रश्ने खदितमिति प्रश्नः। कुशमयब्राह्मणपक्षे तु प्रतिवचनानुपपत्त्या प्रश्नस्यापि निवृत्तिः। अत्तव्यशब्दस्थाने उपतिष्ठतामिति प्रयोगः अत्रोपतिष्ठतामित्यनेन अन्नादिकमित्यस्यान्वये अस्त्वित्यस्य अन्वयानुपपत्त्या तस्याप्यप्रयोगः। अतएव पिण्डदयितायामन्नादिकमुपतिष्ठतामिति लिखितम्। अभिरम्यतामिति वाजे वाजे इति स्थाने अभिरम्यतामित्यनेन विसर्जनमिति। एतदिति पूर्व्वोक्तिकर्त्तव्यताकश्राद्धमित्यर्थः। प्रेतश्राद्धं प्रेतस्य श्राद्धं न तु पार्व्वणविकृतित्वेन प्राप्तपिण्डलोकरूपपितुः श्राद्धं अकृतसपिण्डीकरणस्य तथाविधपिण्डत्वाभावात्। अतएवैतन्न्यायमूलकमेवाश्वलायनगृह्यपरिशिष्टेऽपि पिण्ड-

शब्दं न युञ्जीत पिण्डश्च चोपजायते इत्युक्तम्। अतएव विष्णुना प्रेतस्य नामगोत्राभ्यां दत्तात्र्यौदकेषु इत्यत्र प्रेतनामगोत्राभ्यामित्यनेन प्रेतस्येत्युक्तं न तु सम्बन्धिन इत्युक्तम्। तत्तश्च मन्वे प्राप्तपिण्डलोकोपाधिकएव पिण्डपदस्थाने प्रेतपदोक्तो न तु अग्निस्वात्ताद्युपाधिके एवमभिलापवाक्येऽपि सम्बन्धिनोऽपि मातृश्वात्रादेरपि प्रेतश्राद्धाधिकारित्वात्। सांवत्सरिकश्राद्धे एकोद्दिष्टविकृतीभूतेऽपि प्राप्तपिण्डलोकोपाधिकपिण्डपदवन्मन्वे अभिलापे च सम्बन्धिबोधकपिण्डत्वेनैवोल्लेखः। एवञ्च देवताभ्यः पितृभ्यश्च इत्यत्र न प्रेतपदोक्तः पितृपदस्य दिव्यपितृपरत्वात्। एवं नैकवचनोक्तोऽपि तथा मधु द्यौरस्तु नः पिता इत्यस्य द्यौः स्वर्गः पिता पितेव सर्व्वस्याधिगम्यत्वात् मध्वस्तु मधुमयी भवत्विति भाष्यव्याख्याने द्यौरिति पितेति पदयोः सामानाधिकरण्यं प्रतीयते अत्र च द्युत्वपितृत्वयोर्भेदेऽपि सामानाधिकरण्येनाभेदावगमात् दिवः पितृसाधर्म्म्यप्राप्तिरिति पितृपदं पितृतुल्यपरं न तु जनकपरं प्राप्तपिण्डलोकपरं वेति। तेनात्र मन्वे पितेत्येव वक्तव्यं न तु प्रेतपदोक्तः। न वा पिण्डशब्दं न युञ्जीत इत्यनेन निषेधः। एवमामावेति मन्वे पितरा इत्यत्र नोक्तः। एवं वृद्धिश्राद्धेऽप्येतेषु नान्दीमुखविशेषणं न देयमेवेति। अन्यत्र सर्व्वत्रोत्सर्गवाक्ये मन्वे च पिण्डपदप्रयोगनिषेधात् प्रेतपदोक्तः कार्य्यः। विष्णुः। एकवन्मन्वानूद्देह एकोद्दिष्टे इति एकवत् एकवचनवत् यथा स्यात्तथोक्तेत यथा पवित्रे स्थो वैष्णव्यावित्यत्र पवित्रास्थ वैष्णवीति एवं विष्णोर्मनसा पूते स्थ इत्यत्रापि पूतमसीति। अत्र पितरो मादयध्वं यथाभागं मा वृषायध्वं इति मन्वे अत्र प्रेतमादयस्व यथाभागं मा वृषायस्व इत्यूह्यम्। अमी मदन्तः पितर इत्यत्र अमी मदत् प्रेत इति। वृषायिषत इत्यत्र वृषायिष्टेति। एत पितर इति पिण्डार्थावाहनमन्वे एहि प्रेत इति। सौम्यास इत्यत्र सौम्येति। दत्तास्मभ्यमित्यत्र देह्यस्मभ्यमिति। नियच्छत इत्यत्र नियच्छेति। नमो व इत्यादिमन्त्रेषु पितर इति स्थानचतुष्टये प्रेतेत्यूह्यम्। एवं व इत्यत्र ते इति। आग्नीःप्रार्थने येभ्य इत्यत्र यस्मै इति। तेषामित्यत्र तस्मैत्यूह्यम्। एतदः पितर इत्यत्र तु प्रेता इति विकृतावूहो न तु बऋवचनस्य। एतदः पितरो वास इति जल्पन् पृथक् पृथक् इति ब्रह्मपुराणेन प्रकृतावेव पार्व्वणे पित्रादिषु प्रत्येकमेतदः पितर इति बऋवचनान्तमन्वप्रयोगात् अत्रानर्थक्येन तद्विकृतावेकोद्दिष्टेऽप्यसमवेतार्थबऋवचनस्यैव युक्तत्वात्। ततश्च प्रकृतौ समवेतार्थस्यैव विकृतावूहः। सांवत्सरिके त्वेकवचनस्यैवोहो न तु पिण्डपदस्य तत्र प्राप्तपिण्डलोकत्वेन तस्यैव युक्तत्वात्। स्मृतिः।

"प्रेतश्राद्धे यदुच्छिष्टं गृहे पर्य्युषितञ्च यत्।
दम्पत्योर्भुक्तशेषञ्च न भुञ्जीत कदाचन"॥

उच्छिष्टं पाकपात्रे अवशिष्टम्। गृहे उपरागे पर्य्युषितं स्थितम्। दम्पत्योराश्रमस्वामिनोर्भोजनानन्तरं पाकस्थाल्यामवशिष्टमिति श्राद्धचिन्तामणिः॥ यत्तु देवलवचनम्।

"एकोद्दिष्टस्य शेषन्तु ब्राह्मणेभ्यः समुत्सृजेत्।
पश्चात् स्वयञ्च भुञ्जीत पुनर्मङ्गलभोजनम्"॥

इति। तस्यैकोद्दिष्टशेषं ब्राह्मणेभ्यः समुत्सृजेत् न त्ववशेषयेत् पुनर्मङ्गलभोजनं पाकान्तरकृतान्नं भुञ्जीतेत्यन्वय इति॥ * ॥ तत्करणकालो यथा। ब्रह्मपुराणम्।

"पूर्व्वाह्णे मातृकं श्राद्धमपराह्णे तु पैत्रिकम्।
एकोद्दिष्टन्तु मध्याह्ने प्रातर्दैविनिमित्तकम्"॥

मध्याह्ने तु विशेषमाह कालमाधवीये व्यासः।

"कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत्।
आवर्त्तनसमीपे वा तत्रैव नियतात्मवान्"॥

आवर्त्तनं पश्चिमदिगवस्थितच्छायायाः पूर्व्वदिग्गमनारम्भकालः। तत्समीपे कुतपशेषदण्डे।

यदाह गौतमः।

"आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत्"।

तेन पूर्व्वदिवसीयकुतपरौहिणयोस्तत्तत्तिथेर्लाभे परत्र कुतपमात्रलाभे शुक्लपक्षेऽपि पूर्व्वदिने एकोद्दिष्टं उभयप्राप्त्यनुरोधात्। पूर्व्वदिने कुतपालाभे परत्र तल्लाभे कृष्णपक्षेऽपि परदिनएव समाप्तिकालादारम्भकालस्य बलवत्त्वात्। तथा च बौधायनः।

"यो यस्य विहितः कालः कर्म्मणस्तदुपक्रमे।
तिथिर्यामिता सा तु कार्य्या नोपक्रमोज्झिता"॥

उभयत्र कुतपमात्रालाभे शुक्लपक्षेऽपि पूर्व्वदिने समाप्तिकालानुरोधात् पूर्व्वदिने रौहिणालाभे परत्र सप्तमसुहूर्त्तलाभे कृष्णपक्षेऽपि परदिने मध्याह्नानुरोधात्। इति श्राद्धतत्त्वम्॥ * ॥ एकोद्दिष्टविधिकसांवत्सरिकश्राद्धम्। यथा,—

"एकोद्दिष्टं पुरावृत्तं तद्विशेषं वदे पृथक्"।

प्रथमं निमन्त्रणं यादप्रक्षालनं आसनं अर्घ्य अमुकगोत्रस्य मत्पितुरमुकदेवशर्म्मणः प्रतिसांवत्सरिकमेकोद्दिष्टं श्राद्धं सिद्ध्यर्थेन युष्माभिरहं करिष्ये श्राद्धकरणानुज्ञापनम्। आसनं अर्घ्यं। गन्धादिदानं नित्यश्राद्धम्। अन्नसङ्कल्पनं जप्यं निवीती उत्तराभिमुखीभूयातिथिश्राद्धं कुर्य्यात्। ततस्तृप्तिं ज्ञात्वा दक्षिणाभिमुखो वामोपवीती उच्छिष्टसमीपे ये अग्निदग्धा इति अन्नविकिरणम्। ॐ अमुकगोत्र मत्पितरमुकदेवशर्म्मन् एतत्ते जलमवने निक्ष्व ये चात्र त्वामनुयांश्च त्वमनु तस्मै ते स्वधा। इति रेखोपरि दक्षिणामुखवारिधारादानम्। इति गारुडे २२३ अध्यायः॥

एकोष्मिका, स्त्री, (एका मुख्या उष्मिका कमनीया।) वृक्षविशेषः। इति रत्नमाला॥ आम्रादि इति भाषा॥

एज, ऋ ङ दीप्तौ इति कविकल्पद्रुमः॥ (भ्वादिः-आत्मं-अकं-सेट्।) ऋ मा भवान् एजिजत्। ङ एजते। इति दुर्गादासः।

एज, ऋ कम्पे। इति कविकल्पद्रुमः। (भ्वादिः-परं-सकं सेट्।) ऋ मा भवान् एजिजत्। एजति वायुना वृक्षः। इति दुर्गादासः॥

एठ, ङ बाधने। इति कविकल्पद्रुमः॥ (भ्वादिः-आत्मं सकं-सेट्।) बाधनं विहृतिः। ङ एठते वत्सरं लोकः। इति दुर्गादासः॥

एड़ः, त्रि, (इलति। इल क्षेपे। अच्। डलयोरैक्यम्। यद्वा आ सर्व्वतः ईड्यते। ईड़ स्तुतौ। घञ्।) वधिरः। इत्यमरः॥ (मेषः। यथाह काश्यायनः।

"स्वैड़वराहेषूदधारा प्राचीदं विष्णुः"॥)

एड़कः, पुं (एड़+स्वार्थे कन्। यद्वा इलति एलयति वा इल+खुल्।) मेषः। इत्यमरः॥ वनच्छागलः। इति चिकाण्डशेषः॥

एड़का, स्त्री, (एड़कस्य स्त्री। अजादित्वात् टाप्। ह्रस्वपकादित्वान्नेत्वम्।) मेषी। इत्यमरटीकायां रायमुकुटः॥

एड़गजः, पुं, (एड़ो मेष एव गजो यस्य मङ्गकत्वात्।) चक्रमर्द्दकः। इत्यमरः॥ चाकुन्दिया इति भाषा। अस्य गुणाः। वायुकफकुष्ठव्रणदोषगुल्मोदररोगार्शोनाशित्वम्। कटुत्वञ्च। इति राजवल्लभः॥ (पर्य्यायाः यथा,—

"चक्रमर्द्दः प्रपुन्नाटो दद्रुघ्नो मेषलोचनः।
पद्माटः स्यादेड़गजश्चकी पुन्नाट इत्यपि"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे। गुणाश्चास्य चक्रमर्द्दशब्दे ज्ञेयाः॥ व्यवहारो यथा,—

"सलोमशूः सैड़गजः करञ्जः"।

इति चरके सूत्रस्थाने त्रयोविंशेऽध्याये॥)

एड़मूकः, त्रि, (एड़ो वधिरो मूकश्च।) वधिरः मूकश्च। वक्तुं श्रोतुमशक्तितः। वाक्श्रुतिवर्जितः। इत्यमरः॥ मूढः। इति मेदिनी॥

एड़ूकं, क्ली, (ईड़+उलूकादयश्चेति ४। ४१। उणादिसूत्रेण साधु। निपातनात् क्रूकम्।) एड़ूकम्। इति भरतो द्विरूपकोषश्च॥

एड़ूकं, क्ली, (ईड्यते इति। "उलूकादयश्च" ४। ४१। उणादिसूत्रेण साधु।) अन्तर्न्यस्तकीकसकुड्यम्। इत्यमरः॥ कीकसमिव कीकसं यत् कुड्यम् छिटावेड़ा इति ख्यातमित्यन्ये। इति सारसुन्दरी॥ कीकसमस्थि एतत् काष्ठादिकठिनद्रव्योपलक्षणं कीकसमिव कीकसं किलिञ्जादीति मधुः॥

"मध्यसंस्थापितास्थादि कुड्यमेड़ूकमुच्यते"।

इति माधवः॥ (यथा महाभारते वनपर्व्वणि।

"एड़ूकिन्ना एधिवी न देवयूहभूषिता"॥

अस्य शब्दस्य पुंस्त्वमपि दृश्यते महाभारते ३। १९०। ६३। यथा,—

"एड़ूकान् पूजयिष्यन्ति वर्जयिष्यन्ति देवताः।
शूद्राः परिचरिष्यन्ति न द्विजान् युगसंक्षये"॥)

एड़ोकं, क्ली, एड़ूकम्। इति भरतधृतद्विरूपकोषः॥

एणः, पुं स्त्री, (एति इतं गच्छतीति। इ+बाहुलकात् णः।) हरिणः। इति राजनिर्घण्टः॥ मृगविशेषः। इत्यमरः॥ अस्य मांसगुणाः। कषायत्वम्। मधुरत्वम् पित्तरक्तकफज्वरनाशित्वम्। संग्राहित्वम्। रोचनत्वम्। हृद्यत्वम्। बलकारि-

त्वञ्च। इति राजवल्लभः॥ (यथा मनुः ३। २६९।
"अश्रावेणस्य मांसेन रौरवेण नवेन तु"॥
अस्य लक्षणं यथा॥ "एणः कृष्णः प्रकीर्त्तितः"।
इति भावप्रकाशस्य पूर्ब्बखण्डे २ भागे॥)

एणकः, पुं, (एण+स्वार्थे कन्।)एणः। इति शब्द रत्नावली॥

एणतिलकः,पुं, (एणो मृगस्तिलकमिव यस्य। चन्द्रस्य मृगाङ्कत्वात्तथात्वम्।) चन्द्रः। इति हारावली॥

एणभृत्, पुं, (एणं बिभर्त्तीति। एण+भृ+क्विप्।) चन्द्रः। इति हेमचन्द्रः॥

एतं, त्रि, (आ+इण्+क्त।)आगतम्। इति मेदिनी॥ कर्ब्बूरवर्णयुक्तम्। इत्यमरः॥ (स्त्रियां एनी एता। पाणिनिः ४। १। ३९॥)

एतः, पुं, (आ सम्यक् एति गच्छतीति। आ+इण्+क्त।) मृगः। इति शब्दरत्नावली॥ कर्ब्बूरवर्णः। इति मेदिनी॥

एतद्, त्रि, (इण्+"एतेस्तुट् च" इति उणादिसूत्रेण १। १३२। अतोऽदि स्वात्तस्य तुड़ागमः।) पुरोवर्त्तिवाचकसर्ब्बनामशब्दः। इति व्याकरणम्॥ एइ इति भाषा।
("एते वयमसी दाराः कन्येयं कुलजीवितम्"। इति कुमारे ६। ६३॥ "एतान् महाराज विशेषधर्म्मान्"। इति शुद्धितत्त्वम्। उक्तस्य पश्चादुक्तौ "द्वितीयाटौस्वेनः" २। ४। ३४। इति एणादेशः स्यात्। यथा "य एनामाश्रमधर्म्मे नियङ्क्ते"। इति शाकुन्तले प्रथमाङ्के॥) [हेमचन्द्रः॥

एतनः, पुं, (आङ्+इ+तन।) निश्वासः। इति

एतर्हि, व्य, (इदम्+"इदमोर्हिल्"। ५। ३। १६। इति र्हिल् ततो "एतेतौ रथोः" ५। ३। ४। इति एतादेशः।) एतस्मिन् काले। सम्प्रति। इत्यमरः॥ (यथा भागवते १। १७। ४२।
"स वय एतर्ह्यध्वन्त आसनं पार्थिवोचितम्"॥)

एतशः, पुं, (इण्+"इणस्तशस्तशसुनौ" ३। १४९। इति उणादिसूत्रेण तशन्।) ब्राह्मणः। इत्युणादिकोषः॥

एतशाः, [स्] पुं, (इण्+"इणस्तशस्तशसुनौ" ३। १४९ इति उणादिसूत्रेण तशसुन्।) ब्राह्मणः। इत्युणादिकोषः॥

एतावत्,त्रि, (एतद्+"यत्तदेतेभ्यः परिमाणे वतुप्"। ५। २। ३९। इति परिमाणे वतुप्। (एतत्परिमाणम्। इति व्याकरणम्॥ (यथा रघुः २। ५१।
"एतावदुक्त्वा विरते मृगेन्द्रे
प्रतिस्वनेनास्य गुहागतेन"॥)

एध, ऽ, वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वादिरात्मं-अकं-सेट्।) ऽ एधते। इति दुर्गादासः॥ (यथा मनुः ४। १७०।
"हिंसारतश्च यो नित्यं नेहासौ सुखमेधते"॥)

एधः, पुं, (इध्यतेऽनेनाग्निः। इन्ध+"हलश्च" ३। ३। १२१। इति करणे घञ्। अवोदैधौद्मप्रश्रथहिमश्रथा" इति घञि नलोपो गुणश्च निपातितः॥) इन्धनम्। इत्यमरः॥ जालानि काठ इति भाषा। (यथा रघौ ९। ८१
"एधान् ऋताग्नयवतः स मुनिर्यथाचे"॥)

एधः, [स्] क्ली, (एध्+असुन्।) इन्धनम्। इत्यमरः॥ (यथा गीतायाम्। ४। ३७।
"यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्জ্জुन"॥)

एधतुः, त्रि, (एध् वृद्धौ "एधिवह्योश्चतुः" १। ७९ उणादिसूत्रेण चतुः।) वर्द्धितम्। वृद्धियुक्तम्। इति शब्दरत्नावली॥

एधतुः, पुं, (एध+"एधिवह्योश्चतुः"। १। ७९। उणादिः चतुः।) पुरुषः। अग्निः। इति मेदिनी॥

एधितः, त्रि, (एध वृद्धौ+क्त।) वर्द्धितः। वृद्धिप्राप्तः। इत्यमरः॥

एनः, [स्] क्ली, (एति गच्छति प्रायश्चित्तेन। इण् आगसीत्यसुन् नुड़ागमश्च।) पापम्। अपराधः। इति मेदिनी॥ निन्दा। इति शब्दरत्नावली॥
("एनोनिवृत्तेन्द्रियवृत्तिरेनम्
जगाद भूयो जगदेकनाथः॥
इति रघुः। ५। २३॥)

एरका, स्त्री, तृणविशेषः। तत्पर्य्यायः। गुन्द्रमूला २ गुन्द्री ३ गुन्द्रा ४ मुरी ५। यथा भागवते १। ३। १८।
"चतुर्दंष्ट्रं नारसिंहं बिभ्रद् दैत्येन्द्रमूर्জ্জितम्।
ददार करजैर्वक्षस्येरकां कटकृद् यथा"॥)
अस्या गुणाः। हिमत्वम्। शुक्रवर्द्धिकारित्वम्। चक्षुर्हितत्वम्। वातकोपनत्वम्। मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशित्वञ्च। इति राजनिर्घण्टः॥ (यथा वैद्यके,
"एरका गुन्द्रिरा दृष्या चतुष्या वातकोपिनी।
मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशिनी"॥
एषा यत्र व्यवक्रियते तदुयथा,—
"निर्व्वापणाः स्याज्जलमेरका च"।
इति चरके सूत्रस्थाने तृतीयऽध्याये॥ "एरका होग्गलः"। इति चरकस्य शिवदासीयटीका॥)

एरङ्गः, पुं, (एरति सम्यक् भ्रमति यः। आ+ईर् गतौ कम्पने+अङ्गच्।) मत्स्यभेदः। रङ्गा इति ख्यातः। अस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। विष्टम्भित्वम्। शीतलत्वम्। गुरुत्वञ्च। इति भावप्रकाशः॥

एरण्डः पुं, (एरयति वायुम्। आ+ईर् गतौ कम्पने च+बाहुलकात् अण्डच्।) वृक्षविशेषः। भेरेण्डा इति भाषा। तत्पर्य्यायः। व्याघ्रपुच्छः २ गन्धर्व्वहस्तकः ३ उरुवूकः ४ रुवूकः ५ चित्रकः ६ चञ्चुः ७ पञ्चाङ्गुलः ८ मण्डः ९ वर्द्धमानः १० षण्ड्मबकः ११। इत्यमरः॥ उरुवुकः १२ रुवुकः १३ रूवुकः १४ रुवकः १५ वुकः १६ अमण्डः १७ आमण्डः १८ षण्ड्मनः १९। इति तट्टीकायां भरतः॥ कान्तः २० तरुणः २१ शुक्रः २२ वातारिः २३ दीर्घपत्रकः २४। इति राजनिर्घण्टः॥ अस्य तैलस्य गुणाः। मधुरत्वम्। गुरुत्वम्। अतिश्लेष्मवर्द्धनत्वम्। वातरक्तगुल्महृद्रोगजीर्णज्वरनाशित्वञ्च। इति राजवल्लभः॥ अपि च। कृमिदोषसकलाङ्गशूलकुष्ठनाशित्वम्। स्वादुत्वम्। रसायनोत्तमत्वम्। पित्तप्रकोपनत्वम्। अतिदीपनत्वम्। आमवातनाशित्वञ्च। इति राजनिर्घण्टः॥ अस्य भेदकत्वगुणोऽप्यस्ति॥ श्वेतैरण्डगुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफार्त्तिज्वरवायुकासनाशित्वम्। रसार्हत्वञ्च। इति राजनिर्घण्टः॥ अस्य मूलगुणाः। शूलवायुकफनाशित्वम्। शुक्रकारित्वञ्च। इति राजवल्लभः॥
(शुक्लरक्तैरण्डयोः पर्य्यायगुणा यथा,—
"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः।
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते॥
रक्तोऽपरो रुवुकः स्यादुरुवूको रुवूस्तथा।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः॥
एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत्।
शूलशोथकटीवस्तिशिरःपीड़ोदरज्वरान्॥
ध्मध्मश्वासकफानाहकासकुष्ठाममारुतान्।
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम्॥
मूत्रकृच्छ्रहरश्चापि पित्तरक्तप्रकोपनम्।
वातार्श्यदलं गुल्मं वस्तिशूलहरं परम्॥
कफवातक्रिमीन् हन्ति वृद्धिं सप्तविधामपि।
एरण्डफलमत्युष्णं गुल्मशूलानिलापहम्॥
यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम्।
तद्बन्मज्जा च विड्भेदी वातश्लेष्मोदरापहः"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"सतिक्तोषणमेरण्डतैलं स्वादु सरं गुरु।
ब्रध्नगुल्मानिलकफानुदरं विषमज्वरम्॥
रुक्शोफौ च कटीगुह्यकुक्षिष्ठाश्रयाञ्जयेत्।
तीक्ष्णोष्णं पिच्छिलं विस्रं रक्तैरण्डोद्भवन्विति"॥
इति शार्ङ्गधरस्य पूर्ब्बखण्डे चतुर्थेऽध्याये॥
"एरण्डतैलं मधुरमुष्णं तीक्ष्णं दीपनं कटुकषायानुरसं सूक्ष्मं स्रोतोविशोधनं त्वच्यं दृष्यं मधुरविपाकं वयःस्थापनं योनिशुक्रविशोधनमारोग्यमेधाकान्तिस्मृतिबलकरं वातकफहरमधोभागदोषहरञ्च"॥
इति सुश्रुते सूत्रस्थाने पञ्चचत्वारिंशत्तमेऽध्याये॥)

एरण्डकः, पुं, (एरण्ड+स्वार्थे कन्।) एरण्डवृक्षः। इति भरतो द्विरूपकोषश्च॥ (एरण्डशब्देऽस्य विशेषो ज्ञेयः॥)

एरण्डजं, त्रि, (एरण्डात् एरण्डवृक्षात् जायते इति। एरण्ड+जन्+ड।) एरण्डवृक्षजातम्। तत्तैलं स्नेहमध्ये श्रेष्ठविरेचकम्। यथा।
"चूर्णमध्ये त्रिवृच्चूर्णं स्नेहेषु स्नेहमुत्तमम्।
स्नेहेष्वेरण्डजं तैलं फलेष्वेव हरीतकी"॥
इति वाभटः॥
("एरण्डजं घनञ्चापि स्वादुमेव मृदु स्मृतम्।
हृद्वस्तिजङ्घाकट्यूरुशूलानाहविबन्धनुत्॥
आनाहाष्ठीलवान्तारुक्प्लीहोदावर्त्तशूलिनाम्।
वातपित्तविकाराणां विदध्याच्च प्रशान्तये।
तीक्ष्णोष्णं पिच्छिलं विस्रं रक्तैरण्डसमुद्भवम्"॥
इति प्रथमस्थाने अष्टमेऽध्याये हारीतेनोक्तम्॥)

एरण्डपत्रिका, स्त्री, (एरण्डस्य पत्रमिव पत्रमस्याः।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

एरण्डफला, स्त्री, (एरण्डस्य फलमिव फलमस्याः।)

दन्तीवृक्षः । इति राजनिर्घण्टः ॥
(अस्याः पर्य्याया यथा,—
"लघुदन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि ।
तथैरण्डफला श्रीघ्रा श्वेनघण्टा घुणप्रिया ।
वाराहाङ्घ्री च कथिता निकुम्भश्च मकूलकः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

एरण्डः, स्त्री, (आ + ईर् + बाहुलकात् अण्डच् + टाप् ।) पिप्पली । इति शब्दचन्द्रिका ॥

एर्व्वारुः, पुं, (एरणमिति । आ + ईर् + सम्पदादित्वात् क्विप् । एरं इणोति वारयति वा । इण् + बाहुलकात् उण् ।) कर्कटीभेदः । तत्पर्य्यायः । व्यालपत्रा २ लोमशा ३ स्थूला ४ तोयफला ५ हस्तिदन्तफला ६ कर्कटी ७ । अस्य गुणाः । पित्तहरत्वम् । सुशीतलत्वम् । मधुरत्वम् । मूत्रामयघ्नत्वम् । रुचिप्रदत्वम् । सन्तापमूर्च्छायहरत्वम् । दाहनाशित्वम् । अतिसेवितत्वेत् वातप्रकोपकारित्वञ्च । इति राजनिर्घण्टः ॥
("एर्व्वारुकं स्वादु शीतं सक्षारं कफवातहृत् ।
नातिपित्तकरं रुच्यं दीपनं दाहनाशनम्" ॥
इति प्रथमस्थाने दशमेऽध्याये हारीतेनोक्तम् ॥
"त्रपुषैर्व्वारुकं स्वादु गुरु विष्टम्भि शीतलम् ।
एर्व्वारुकञ्च सम्यक्तं दाहटष्णाक्लमार्त्तिनुत्" ॥
इति सूत्रस्थाने सप्तविंशेऽध्याये चरकेणोक्तम् ॥)

एलकः, त्रि, (एलति विग्रहादिस्थले आत्मानं क्षिपतीति इल् + ण्वुल् ।) मेषः । इति राजनिर्घण्टः ॥

एलङ्गः, पुं, (एरङ्गः + रस्य लः ।) मत्स्यभेदः । रायकड़ा इति भाषा । रायखाँड़ा एलाङ्गा इत्यपि ख्यातः । अस्य गुणाः । मधुरत्वम् । दृष्यत्वम् । संग्राहित्वम् । कफवातनाशित्वम् । मेधाग्निपुष्टिकारित्वम् । शीतलत्वम् । गुरुत्वम् । श्लेष्मप्रसादनत्वञ्च । इति राजनिर्घण्टः ॥ (यथा वैद्यकचक्रपाणिदत्तद्रव्यगुणे मांसवर्गाधिकारे ॥
"एलङ्गः स्निग्धो मधुरो गुरुर्विष्टम्भिशीतलः" ॥)

एलबालु, क्ली, (एलतीति । इल प्रेरणे पचाद्यच् । टाप् । एलेव बलते । बल प्राणने । बाहुलकात् उण् । डयापोरिति ङीष्लुक् ।) एलबालुकम् । इति शब्दरत्नावली ॥ (यत्र व्यवक्रियते तदयथा, रोध्रादिगणे ॥
"शैलबालु परिपेलवमोचाः" ॥
इति वाभटे सूत्रस्थाने षष्ठदशेऽध्याये ॥)

एलबालुकं, क्ली, (एलबालु + स्वार्थे कन् ।) सुगन्धिद्रव्यविशेषः । लालुका इति ख्यातम् । तत्पर्य्यायः । ऐलेयम् २ सुगन्धि ३ हरिबालुकम् ४ बालुकम् ५ इत्यमरः ॥ हरिवासुकम् ६ । इति तट्टीका ॥ आलुकम् ७ एलबालुकं ८ कपित्थत्वक् ९ गन्धत्वक् १० कुष्ठगन्धि ११ । अस्य गुणाः । व्यग्र्यत्वम् । कषायत्वम् । कफवातमूर्च्छातिज्वरदाहनाशित्वम् । परमरुचिकारित्वञ्च । इति राजनिर्घण्टः ॥ कक्कोलसदृशं कुष्ठगन्धि ॥ अस्य पर्य्यायगुणाः ॥
"एलबालुकमैलेयं सुगन्धि हरिबालुकम् ।
ऐलबालुकमेलालु कपित्थं पञ्चमीरितम् ॥
एलालु कटुकं पाके कषायं शीतलं लघु ।
हन्ति कण्डूव्रणाच्छर्द्दिटट्कासारुचिहृद्रुजः ॥
बलासविषपित्तास्रकुष्ठमूत्रगदक्रिमीन्" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

एलविलः, पुं, ऐलविलः । कुबेरः । इत्यमरटीका ॥

एला, स्त्री, (इल् + अच् + टाप् ।) फलवृक्षविशेषः । एलाचि इति भाषा । तत्पर्य्यायः । बहुलगन्धा २ ऐन्द्री ३ द्राविड़ी ४ कपोतपर्णी ५ बाला ६ बलवती ७ हिमा ८ चन्द्रिका ९ सागरगामिनी १० गन्धालीगर्भः ११ एलीका १२ कायस्था १३ । इति राजनिर्घण्टः ॥ सा द्विविधा सूक्ष्मा । गुजराटी एलाचि इति भाषा । स्थूला च । वड़ एलाचि इति भाषा । आद्यायाः पर्य्यायः । उपकुञ्चिका १ तुत्था २ कोरङ्गी ३ त्रिपुटा ४ त्रुटिः ५ । इत्यमरः ॥ वयस्था ६ तीक्ष्णगन्धा ७ सूक्ष्मैला ८ त्रिपुटी ९ । इति रत्नमाला ॥ द्वितीयायाः पर्य्यायः । एष्वीका २ चन्द्रबाला ३ निष्कुटिः ४ बहुला ५ । इत्यमरः ॥ स्थूला ६ मालेया ७ ताड़काफलम् ८ । इति रत्नमाला ॥ एलाद्वयगुणाः । शीतलत्वम् । तिक्तत्वम् । उष्णत्वम् । सुगन्धित्वम् । पित्तरोगकफनाशित्वम् । हृद्रोगकारित्वम् । मलार्त्तिवान्तिपुंस्त्वघ्नत्वम् । स्थविरस्य गुणाधिक्यत्वञ्च । इति राजनिर्घण्टः ॥ अपिच । शूलकोष्ठवह्निदग्धाच्छर्द्दिवायुनाशित्वम् । इति राजवल्लभः ॥ सूक्ष्मैलाविशेषगुणाः । कफश्वासकासार्शोमूत्रकृच्छ्रनाशित्वम् । इति राजनिर्घण्टः ॥
("एला स्थूला च बहुला एष्वीका त्रिपुटापि च" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

एलापत्रः, पुं, (एलापत्रमिवाकारोऽस्यस्य । अर्शआदेरच् ।) नागभेदः । इति जटाधरः ॥
(यथा महाभारते आस्तीके पर्व्वणि १ । ३५ । ६ ।
"नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः" ॥)

एलापर्णी, स्त्री, (एलाया इव पर्णमस्याः । "पाकर्णेति" । ४ । १ । ६४ । ङीष् ।) वृक्षविशेषः । काँटा आमरुली एलानी इति च भाषा । तत्पर्य्यायः । सुवहा २ राखा ३ युक्तरसा ४ । इत्यमरः ॥

एलीका, स्त्री, (आ + इल् + ईकन् + टाप् ।) सूक्ष्मैला । इति राजनिर्घण्टः ॥ (द्राविड़ीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

एव, अ, (अयनमिति । इण् + "इणशीभ्यां वन्" । १ । ५२ । उणादिः वन् ।) अवधारणम् । यथा । त्वमेव जानासि । तत्पर्य्यायः । एवम् २ तु ३ पुनः ४ वा ५ । इत्यमरः ॥ व ६ च ७ । इति सुभूतिः ॥ साटश्यम् । इति भरतः । नियोगः । वाक्यपूरणम् । चारनियोगः । विनिग्रहः । इति मेदिनी ॥ (अनियोगः । यथा "अद्येव" इति मुग्धबोधव्याकरणम् । एवकारस्त्रिविधः । विशेष्यसङ्गतः विशेषणसङ्गतः क्रियासङ्गतश्चेति । तत्र विशेष्यसङ्गतस्य एवकारस्य अन्ययोगव्यवच्छेदोऽर्थः । पार्थ एव धनुर्द्धर इत्यादौ विशेषणे धनुर्द्धरे पार्थान्ययोगव्यवच्छेदबोधात् । धनुर्द्धरपदस्य उत्कृष्टधनुर्द्धरे लाक्षणिकत्वात् तथैव तात्पर्य्यात् । पार्थान्ययोगव्यवच्छेदादाप्तम् । विशेषणसङ्गतस्य एवकारस्य अयोगव्यवच्छेदोऽर्थः । शुक्लः पाण्डुर एव इत्यादौ विशेष्ये शुक्ले पाण्डुत्वायोगव्यवच्छेदबोधात् । क्रियासङ्गतस्य एवकारस्य चात्यन्तायोगव्यवच्छेदोऽर्थः । सम्भवाभिप्रायके नीलं सरोजं भवत्येव इत्यादौ अन्वयितावच्छेदकसरोजत्वसामानाधिकरण्येन सरोजनीलभवनकर्त्तृत्वात्यन्तायोगव्यवच्छेदबोधादिति सम्प्रदायः ॥) गमनकर्त्तरि चि । इति सिद्धान्तकौमुदी (यथा ऋग्वेदे ६ । ५१ । २ । "ऋजुमर्त्तेषु वृजिन च पश्यन्नभिचष्टे शूरो अर्य एवान्" ॥ अश्वे पुं, यथा, ऋग्वेदे १ । १५८ । ३ । "उप वामवः शरणम् गमेयं शूरो नाज्म पतयद्भिरेवैः" ॥ "एवैरश्वैः" इति भाष्यम् । गमने क्ली । यथा, ऋग्वेदे १ । १२९ । ३ । "एवेन सद्यः पर्य्येति पार्थिवम्" । "एवेन गमनेन" । इति । भाष्यम् ॥)

एवं, अ, साम्यम् । साटश्यम् । यथा । अग्निरेवं विप्रः । अग्निरिवेत्यर्थः । तत्पर्य्यायः । वत् २ वा ३ यथा ४ तथा ५ इव ६ । वत्स्थाने व इति केचित् पठन्ति । अयं प्रकारः । (यथा, कुमारे । ६ । ८४ ।
"एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी" ॥)
तत्पर्य्यायः । इत्थम् २ । अवधारणम् । इत्यमरः ॥ यथा । एवमेतत् । अस्य पर्य्यायः एवशब्दे लिखितः । अङ्गीकारः । अर्थप्रश्नः । परशक्तिः । इच्छा । इति मेदिनी ॥

एष ऋ ऊ गतौ । इति कविकल्पद्रुमः ॥ भ्वादिः आत्मं-सकं-सेट् ।) ऋ मा भवान् एषिषत् ।
ऊ एषते । इति दुर्गादासः ।
(यथा, भागवते ३ । १४ । ४५ ।
"स वै बत भ्रष्टमतिस्तवैषते
यः कर्म्मणां पारमपारकर्म्मणाम्" ॥)

एषः, पुं, पुरोवर्त्तिपुरुषः । एतद्शब्दस्य पुंलिङ्गे प्रथमैकवचने रूपमिदम् ॥

एषणः, पुं, (इष् + ल्यु ।) लौहमयबाणः । इति हलायुधः ॥ (यथा, भागवते ७ । ९ । ३९ ।
"कामातुरं हर्षशोकभयैषणार्त्तं
तस्यैष कथं तव पतिं विसृजामि दीनः" ॥)

एषणिका, स्त्री, (इष्यतेऽनया । इष् गतौ + ल्युट् + स्वार्थे कन् ततो टाप् इत्वञ्च ।) स्वर्णकारादीनां तुला । निक्ति इति भाषा । तत्पर्य्यायः । नाराची २ । इत्यमरः ॥

एषणी, स्त्री, (इष्यते अनया, इष् + ल्युट् + ङीष् ।) व्रणमार्गानुसारिणी । बेलकार इति भाषा । तुलाभेदः । इति मेदिनी ॥ निक्ति इति भाषा ॥

एषा, स्त्री, (इषु शु वाञ्छे + टाप् ।) इच्छा । इति जटाधरः ॥ एतद्शब्दस्य स्त्रीलिङ्गेऽपि रूपमिदम् ॥

ऐ

ऐ ऐकारः । स तु द्वादशस्वरवर्णः । अस्योच्चारणस्थानं तालु कण्ठश्च । ("एदैतोः कण्ठतालु" इ-

त्युक्तः। तथाच शिक्षायाम्। "ए ऐ तु कण्ठ-तालव्यावौ क्रण्ठौष्ठजौ स्मृतौ"॥) स च ह्रस्वो न भवति। (द्विमात्रत्वात् दीर्घस्त्रिमात्र-त्वात् प्लुतश्च भवति। उदात्तानुदात्तस्वरितभेदै-स्त्रिविधोऽपि पुनः प्रत्येकमनुनासिकाननुनासिक-भेदाभ्यां षड्विध एव॥)

"ऐकारं परमं दिव्यं महाकुण्डलिनी स्वयम्।
कोटिचन्द्रप्रतीकाशं पञ्चप्राणमयं सदा॥
ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं प्रिये।
सदाशिवमयं वर्णं विन्दुत्रयसमन्वितम्"॥
इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायाम्) तस्य लेखनप्रकारो यथा,—
"एकाररूपमधो तु किञ्चिदूर्द्ध्वे तदोर्द्ध्वतः।
चन्द्रेन्द्रभानवस्तासु मात्रा शक्तिः क्रमात् स्मृताः॥
त्रिधा शक्तिमयी पूर्व्वा दुर्गा वाणी सरस्वती"।
इति वर्णोद्धारतन्त्रम्॥ * ॥ तन्नामानि यथा,—
"ऐलब्जा भौतिकः कान्ता वायवी मोहिनी विभुः।
दत्ता दामोदरप्रज्ञोऽधरो विलतमुख्यपि॥
क्षमात्मको जगद्योनिः परः परनिबोधकृत्।
ज्ञानामृता कर्पदिश्रीः पीठेशोऽग्निः समाहकः॥
त्रिपुरा लोहिता राज्ञी वाग्भवो भौतिकासनः।
महेश्वरो द्वादशी च विमलश्च सरस्वती॥
कामकोटो वामजानुरंशुमान् विजयो जटा"।
इति तन्त्रशास्त्रम्॥ दन्त्यान्तः। योनिः। इति बीजवर्णाभिधानम्॥ (अनुबन्धविशेषः। यथाह कविकल्पद्रुमः। ("ऐर्यजादिः स्यादोर्निष्ठातन औरनिट्"। एतेन यजादिगणीयत्वात् "ऐ वसौ निवासे इत्यस्य लिटिप्रभृतिषु सम्प्रसारणे कृते उवास इत्यादयो भवेयुः"॥ माहकान्यासे अधरे न्यस्तया तदाख्यया व्यभिधानम्। माहकान्यास-मन्त्रो यथा। "ऐं नम ओष्ठे ऐं नमोऽधरे"॥ इति॥)

ऐ, अ, (एतीति। आ + इण् + विच्।) आङ्गनम्। स्मरणम्। आमन्त्रणम्। इति मेदिनी॥

ऐः पुं, (एति प्राप्नोति सर्व्वम्। आङ् + इण् + विच्।) महेश्वरः। इति एकाक्षरकोषः॥

ऐकागारिकः, त्रि, (एकमसहायमगारं प्रयोजनमस्य। "ऐकागारिकट् चौरे" ५। १। ११३ इति इकट् टच्च निपातनात्।) चौरः। इत्यमरः। एका-गारवासी॥

ऐकाहिकं, त्रि, (एकाहे भवम्। एकाह + ठक्।) एकाहनिष्पन्नम्। एकदिनान्तरभवम्। इति वैद्य-कम्॥ (वैद्यकगोपालकृष्णकविभूषणकृतकषाय-संग्रहे दास्यादिपाचने यथा। "भूतोत्थं विषमं चिरोषजनितञ्चैकाहिकं द्याहिकम्॥
"काकजङ्घा बला श्यामा ब्रह्मदण्डी कृताञ्जलिः।
एभिपर्णी त्वपामार्गस्तथा भृङ्गराजोऽष्टमः॥
एषामन्यतमं मूलं पुष्येणोद्धृत्य यत्नतः।
रक्तसूत्रेण संवेष्ट्य बद्धमैकाहिकं जयेत्"॥
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे।) एकाहभवम्। यथा,—
"ऐकाहिकं द्वितीयस्यं तृतीयकचतुर्थकम्"।
इत्यादि माहेश्वरकवचम्॥

ऐकाहिकज्वरः, पुं, (ऐकाहिक एकाहभवो ज्वरः।) एकदिनान्तरागतज्वरः। तस्यौषधं यथा,—
"पीतं दधिकमूलन्तु पर्य्युषितजलेन वै।
सार्द्धं विनाशयेद्याशु ज्वरञ्च परमेश्वर!॥
शिखायाश्चैव तद्वद्धं भवेदैकाहिकादिनुत्।
एतत् सकाञ्जिकं पीतं रक्तकुष्ठज्वरादिनुत्॥
वास्योदकेन पीतं तत् दृढद्विषहरं भवेत्"।
इति गारुड़े १९३ अध्यायः॥
("ऐकाहिको द्याहिकश्च स्याहिकश्च तथापरः"।
"मुस्ताम्रतामलक्यश्च नागरं कण्टकारिका।
कणाचूर्णान्वितः क्वाथस्तथा मधुसमन्वितः॥
ऐकाहिकं वा वेलाद्यं ज्वरजातं व्यपोहति।
वानरेन्द्रमुखं दिव्यं तरुणादित्यतेजसम्॥
ज्वरमैकाहिकं घोरं तत्क्षणादेव नश्यति।
वानराकृतिमालिख्य खटिकाभिः पुनः पृथु॥
गन्धपुष्पाक्षतैर्धूपैरर्च्चयेद्विधजां वरः"।
मन्त्रो यथा,
ॐ ह्रां ह्रीं श्रीं सुग्रीवाय महाबलपराक्रमाय सूर्य्यपुत्राय अमिततेजसे ऐकाहिक-द्याहिक-त्र्याहिक-चातुर्थिक-महाज्वर-भूतज्वर-भयज्वर-श्लेष्मज्वर-क्रोधज्वर-वेलाज्वर-प्रभृतिज्वराणां बन्ध बन्ध ह्रां ह्रीं ह्रूं फट् स्वाहा। इति हारीते चि-कित्सास्थाने। २ अध्याये॥)

ऐक्यं, क्ली, (एक + भावे ष्यञ्।) एकस्य भावः। एकता। एकत्वम्। एकीभावः। यथा। शारदा-यां।
"गुरोर्लब्ध्वा पुनर्व्विद्यामकृत्वो जपेत् सुधीः।
गुरुविद्यादेवतानामैक्यं सम्भावयन् धिया॥
प्रणमेद्दण्डवद्भूमौ गुरुं तं देवतात्मकम्"।
इति दीक्षातत्त्वम्॥

ऐक्षवं, त्रि, (इक्षोर्विकारः। इक्षु + अण्।) इक्षु-विकारः। इक्षुसम्बन्धिगुड़ादि। इति स्मृतिः॥ (अस्य गुणादय इक्षुशब्दे ज्ञातव्याः॥)

ऐक्षवं, क्ली, (इक्षोर्भवम्। इक्षु + अण्।) इक्षुभव-गुड़ादि। यथा,—
"कदली लवणी धात्री फलान्यगुड़मैक्षवम्।
अतैलपक्वं मुनयो हविष्यान्नं विदुर्बुधाः"॥
इति तिथ्यादितत्त्वम्॥ इक्षुगुड़ादिगुणा इक्षुशब्दे ज्ञातव्याः॥)

ऐक्षुदं, क्ली, (इक्षुणा इदम्। "इक्षादिभ्योऽण्" ४। ३। १६४। विधानसामर्थ्यान्नाणो लुक्।) इक्षु-दीक्षस्य फलम्। इत्यमरः॥
("स्निग्धोष्णं तिक्तमधुरं वातश्लेष्मघ्नमैक्षदम्"॥
इति सूत्रस्थाने। ४६ अ। सुश्रुतेनोक्तम्॥)

ऐड़कं, क्ली, (एड़क एव। स्वार्थे अण्।) एड़कम्। इति भरतो द्विरूपकोषश्च॥

ऐणं, त्रि, (एणस्य इदम्। एण + अण्।) एणस्य चर्म्मादि। इत्यमरः॥

ऐणिकः, त्रि, (एणं मृगं हन्तीति। एण + ठक्।) एणहन्ता। इति व्याकरणम्॥

ऐणेयं, त्रि, (एण्या इदम्। एणी + ढक्।) एण्या-श्चर्म्मादि। इत्यमरः॥ स्त्रीणां रतिबन्धविशेषः। इति हेमचन्द्रः॥

ऐतिह्यं, क्ली, (इतिह उपदेशपारम्पर्य्यम्। तदेव। इतिह "अनन्तावसथेतिहभेषजाञ् ञ्यः"। ५। ४। २३। इति स्वार्थे ञ्यः।) पारम्पर्य्योपदेशः। तत्पर्य्यायः। इतिह। इत्यमरः॥ (यथा रामायणे। ५। ८७। २३।
"ऐतिह्यमनुमानञ्च प्रत्यक्षमपि चागमम्।
ये हि सम्यक् परीक्षन्ते कुतस्तेषामबुद्धिता"॥
"ऐतिह्यं नाम आप्तोपदेशो वेदादिः"।
इति विमानस्थाने। ८ अ। चरकेणोक्तम्॥)

ऐन्दवं, क्ली, (इन्दुर्देवता यस्य। इन्दु + अण्।) मृग-शिरोनक्षत्रम्। इति ज्योतिषम्॥ यथा। मात्स्ये।
"अश्विनी रेवती मूलमुत्तरत्रयमैन्दवम्।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते"॥
ऐन्दवं मृगशिरः। इति मठप्रतिष्ठातत्त्वम्॥ (इन्दोश्चन्द्रस्य इदम्। चन्द्रसम्बन्धिनि, त्रि। यथा, मनुः ११। १२५।
"सङ्क्रान्तावन्नभुक्त्वासु मासं शोधनमैन्दवम्।
मक्षिनीकरणीयेषु तप्तः स्याद्यावकैस्त्र्यहम्"॥)

ऐन्दवी, स्त्री, (ऐन्दव + ङीप्।) सोमराजी। इति वैद्यकम्॥

ऐन्द्रं, क्ली, (इन्द्रो देवता यस्य। इन्द्र + अण्।) ज्येष्ठा-नक्षत्रम्। इति जटाधरः॥ मूलविशेषः। वन आदा इति भाषा। तत्पर्य्यायः। वनार्द्रका २ वनजा ३ अरण्यजार्द्रका ४। अस्य गुणाः। कटु-त्वम्। अम्लत्वम्। रुचिवह्नाग्निकारित्वञ्च। इति राजनिर्घण्टः॥ (इन्द्रस्य इदम्।) इन्द्रसम्बन्धिनि त्रि। (यथा मनुः ५। ९३।
"न राज्ञामधदोषोऽस्ति व्रतिनां न च सत्रिणाम्।
ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा"।
"ऐन्द्रं स्थानं राज्याभिषेकाख्यं आधिपत्यकारणम्"
इति तट्टीकायां कुल्लूकभट्टः॥ तथा रघुः २। ५०।
"महीतलस्पर्शनमात्रभिन्न-
मूर्द्धं हि राज्यं पदमैन्द्रमाज्ञः"॥
"ऐन्द्रमम्बु सुपात्रस्थमविपन्नं सदा पिबेत्"॥
इति वाभटे सूत्रे। ५ अ॥)
(इन्द्रस्यापत्यं पुमान्।) वालिवानरे (अर्ज्जुने जयन्ते च पुं॥ जलविशेषः।)

ऐन्द्रजालिकः, पुं, (इन्द्रजालेन दीव्यतीति। इन्द्रजाल + ठक्।) इन्द्रजालकारकः। तत्पर्य्यायः। प्रती-हारकः २ मायाकारकः ३ कौहुतिकः ४ मायावी ५ वंशकः ६ मायी ७ मायिकः ८। इति जटा-धरः॥

ऐन्द्रलुप्तिकः, त्रि, केशभ्रंशरोगविशिष्टः। टेको इति भाषा। तत्पर्य्यायः। खल्लीटः २ खलतिः ३। इति भूरिप्रयोगः॥

ऐन्द्रिः, पुं, (इन्द्रस्यापत्यं पुमान्। इन्द्र + इञ्।) जयन्तनामा इन्द्रपुत्रः। काकः। इति मेदिनी॥ ("ऐन्द्रिः किल नखैस्तस्याः विददार स्तनौ द्विजः"। इति रघुवंशे। १२। २२॥) वालिनामवानराजः। इति त्रिकाण्डशेषः॥ अर्ज्जुनः। इति हेमचन्द्रः॥

ऐन्द्रियकं, त्रि, (इन्द्रियेणानुभूयते। इन्द्रिय + वुञ्।) प्रत्यक्षम्। इन्द्रियग्राह्यम्। इत्यमरः॥ (व्याधिविशेषः। यथा,—
"मिथ्याभियोगहीनेभ्यो यो व्याधिरुपजायते।
शब्दादीनां स विज्ञेयो व्याधिरैन्द्रियको बुधैः॥
वेदनानामशान्तानामित्येते हेतवः स्मृताः।
सुखहेतुर्मतस्त्वेकः समयोगः सुदुर्लभः॥
नेन्द्रियाणि न चैवार्थाः सुखदुःखस्य हेतवः।
हेतुस्तु सुखदुःखस्य योगो दृष्टश्चतुर्विधः॥
सन्तीन्द्रियाणि सन्त्यर्था योगो न च न चास्ति रुक्।
न सुखं कारणं तस्मात् योगश्चव चतुर्विधः॥
नात्मेन्द्रियमनोबुद्धिगोचरं कर्म्म वा विना।
सुखं दुःखं यथा यच्च बोद्धव्यं तत्तथोच्यते॥
स्पर्शनेन्द्रियसंस्पर्शः स्पर्शो मानस एव च।
द्विविधः सुखदुःखानां वेदनानां प्रवर्त्तकः।
इच्छा द्वेषात्मिका तृष्णा सुखदुःखात् प्रवर्त्तते॥
तृष्णा च सुखदुःखानां कारणं पुनरुच्यते।
उपादत्ते हि सा भावान् वेदनाश्रयसंज्ञकान्॥
स्पृश्यते नानुपादाने न स्पृष्टो वेत्ति वेदनाः।
वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः॥
केशलोमनखाद्यान्नमलद्रवगुणैर्विना"।
इति चरके शारीरे १अः॥)

ऐन्द्री, स्त्री, (इन्द्रस्य शक्रस्य इयम्। इन्द्र + "तस्येदम्"। ४।३। १२०। इत्यण्। टिड्ढेति। ४।१। १५। ङीप्।) शची। (यथा, मार्कण्डेये ८८। २०।
"वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता"।
इन्द्रस्य योगैश्वर्य्यशालिनो महादेवस्य पत्नी।) दुर्गा। इति शब्दरत्नावली॥ अलक्ष्मीः। इति चिकाण्डशेषः॥ इन्द्रवारुणी। इति रत्नमाला॥ राखाल गसा इति भाषा। पूर्ब्बा दिक्। इत्यमरटीकायां रमानाथः॥ एला। इति राजनिर्घण्टः॥ एलाचि इति भाषा।
"यष्ट्याह्वमैन्द्री नलिनानि दूर्व्वा"।
इति सूत्रे २ अध्याये। चरकेणोक्तम्॥)

ऐभी, स्त्री, (इभ इत्याख्यास्यस्याः। इभ + "प्रज्ञादिभ्यश्च"। ५। ४। ३८। इति अण् + ङीप्।) हस्तिघोषा लता। इति राजनिर्घण्टः॥

ऐरावणः, पुं, (इरया जलेन वणति शब्दायते इति। इरा + वण + पचाद्यच्। तत इरावणश्चव स्वार्थे प्रज्ञाद्यण् ५। ४। ३८। यदा इरा·सरा वनमुदकं यस्मिन्। पूर्ब्बपदादिति ८। ४। ३। णत्वम्। तत्र भवः। इरावण + अण्।) ऐरावतहस्ती इत्यमरः॥ यथा, महाभारते १। १८। ४१।
"श्वेतैर्दन्तैश्चतुर्भिस्तु महाकायस्ततःपरम्।
ऐरावणो महानागोऽभवद्यच्छता धृतः"॥)

ऐरावतं, क्ली, (इरा जलानि सन्त्यस्मिन्। इरा + मतुप्। इरावान् मेघः। तत्र भवः। इत्यण्। जलवति मेघे सूर्य्यकरपतनादस्योत्पत्तेस्तथात्वम्॥) इन्द्रस्य ऋतुदीर्घधनुः।
इति मेदिनी॥ रामधनुक् इति भाषा॥

ऐरावतः, पुं, (इरा जलानि विद्यतेऽस्मिन्। मतुप्। इरावान् समुद्रः। तत्र भवः इति। इरावत् + अण्। समुद्रमथनोत्थितत्वादस्य तथात्वम्। यद्वा इरावत्या विद्युत अयं तस्येदमित्यण् ४। ३। १२०।) इन्द्रहस्ती। स तु शुक्लवर्णः चतुर्दन्तः समुद्रमथनोत्थितः पूर्ब्बदिग्गजश्च। तत्पर्य्यायः। अभ्रमातङ्गः २ ऐरावणः ३ अभ्रमुवल्लभः ४। इत्यमरः॥ श्वेतहस्ती ५ चतुर्दन्तः ६ मल्लनागः ७ इन्द्रकुञ्जरः ८ हस्तिमल्लः ९ सदादानः १०। इति जटाधरः॥ सुदामा ११ श्वेतकुञ्जरः १२ गजाग्रयोधीः १३ नागमल्लः १४। इति शब्दरत्नावली॥ (यथा, कुमारे। ३। २२॥ ("ऐरावतास्फालनकर्कशेन"।
"प्रावृषेण्यं पयोवाहं विद्युदैरावताविव"।
इति रघौ। १। ३६॥)
नागरङ्गः। लकुचवृक्षः। नागभेदः। इति मेदिनी॥ ("ऐरावतं दन्तशठमक्षं शोणितपित्तजित्"। इति सूत्रे। ४६ अः। सुश्रुतेनोक्तम्॥) (इरावत्या नद्याः सन्निकृष्टो देशः। इरावती + अण्। यथा, महाभारते ३। १६२। ३३।
"बभूव परमाश्वानामैरावतपथे यथा"॥)

ऐरावती, स्त्री, (इरा जलानि विद्यन्तेऽस्य इरावान् मेघस्तस्य इयं। इरावत् + "तस्येदम्"। ४। ३। १२०। इति अण् + ङीप्।) विद्युत्। विद्युद्विशेषः इति मेदिनी॥ ऐरावतभार्य्या। इत्यमरटीकायां स्वामी॥ वटपत्रीवृक्षः। इति राजनिर्घण्टः॥ पञ्चालदेशीयनदीविशेषः। अधुना रावी इति ख्याता॥ (उत्तरभागे नक्षत्रविशेषाणां संज्ञाभेदः यथा।
"पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता"॥)

ऐरिणं, क्ली, (इरिणे उषरभूमौ भवम्। इरिण + अण्।) पांशुलवणम्। इति राजनिर्घण्टः॥ (पांशुलवणेऽस्य विवरणं ज्ञेयम्॥)

ऐरेयं, क्ली, (इरा + ढक्।) मद्यम्। इरा एव ऐरेयं स्वार्थे छेयप्रत्यये वृद्धिः॥ (यत्रास्य व्यवहारस्तद्यथा,—
"ऋतेऽप्यूर्द्धमधश्चैवमैरेयास्वसुरासवैः"।
इति वैद्यकचक्रपाणिसंग्रहे विरुध्याधिकारे॥)

ऐलः, पुं, (इलाया अपत्यं पुमान्। इला + अण्।) इलापुत्रः। स तु चन्द्रवंशीयो राजा पुरूरवाः। इति हेमचन्द्रः॥ (यथा महाभारते। १। ७५। १७।
"पुरूरवास्ततो विद्वानिलायां समपद्यत।
स वै तस्याभवन्माता पिता चैवेति नः श्रुतम्"॥
"षट् सुता जज्ञिरेऽयैलादायुर्द्धीमानमावसुः"॥ २४॥

ऐलबालुकं, क्ली, (ऐलबालुकमेव। स्वार्थे अण्।) एलबालुकम्। इति शब्दरत्नावली॥

ऐलविलः, पुं, (ऐलविलाया अपत्यं पुमान्। ऐलविल + अण्।) ऐलविलापुत्रः। स तु कुबेरः। इत्यमरः॥ तस्य रूपान्तराणि। ऐड़विड़ः। ऐड़विलः। ऐलविलः॥

ऐलेयं, क्ली, ऐलबालुकनामगन्धद्रव्यम्। इत्यमरः॥ (ऐलबालुकशब्देऽस्य विशेषो ज्ञातव्यः॥) (पुं, इलाया अपत्यम्। इला + ढक्। मङ्गलः। भौमः। पुरूरवाः॥)

ऐशानी, स्त्री, (ईशानस्य महादेवस्य इयम्। ईशान + "तस्येदम्"। ४। ३। १२०। इति अण् + ङीप्।) ईशानकोणः। इति जटाधरः॥ ("ऐशानीक्रमतो रेखा" इति स्मृतिः। "ऐशान्यां मरणं ध्रुवं निगदितं दिग्गजत्वं खड्गने"। इति तिथितत्त्वम्॥)

ऐशिकः, त्रि, (ईशस्य अयम्। ईश + ठक्।) ईश्वरसम्बन्धी। ईश्वरेर इति भाषा॥

ऐशी } त्रि, (ईशस्य ईश्वरस्य च इयम्।
ऐश्वरी } ईश + ईश्वर + अण् + ङीप्।) ईश्वरसम्बन्धी। ईश्वरेर इति भाषा॥

ऐश्वर्य्यं, क्ली, (ईश्वरस्य भावः। ईश्वर + ष्यञ्।) ईश्वरधर्म्मः। तत्पर्य्यायः। विभूतिः २ भूतिः ३। स चाष्टविधो यथा। अणिमा १ लघिमा २ प्राप्तिः ३ प्राकाम्यम् ४ महिमा ५ ईशित्वम् ६ वशित्वम् ७ कामावशायिता ८। इत्यमरः॥
("ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना"॥
इति पुराणम्। "ऐश्वर्य्यम प बुद्धिधर्म्मैः यतोऽणिमादिप्रादुर्भावः"। इति वाचस्पतिमिश्रः।
सम्पत्तिः। प्रभुत्वम्। नियन्तृत्वम्।
यथा रघुवंशे। १२। ६९॥
"तस्मै निशाचरैश्वर्य्यं प्रतिसुश्राव राघवः"॥)
इति॥

ऐश्वर्य्यकर्म्मा, [न्] पुं, (ऐश्वर्य्यं कर्म्म यस्य।) ईश्वरसम्बन्धिकर्म्मयुक्तः। तत्पर्य्यायः। इरज्यति १ पत्यते २ क्षयति ३ राजति ४। इति चत्वार ऐश्वर्य्यकर्म्माणः। इति वेदनिर्घण्टौ २ अध्यायः॥

ऐषमः, [स्] त्र्य, (अस्मिन् वत्सरे इति। "सद्यःपरुत्परार्य्यैषमः" ५। ३। २२। इति इदम इश् समसन्प्रत्ययश्च संवत्सरे निपात्यते।) वर्त्तमानवत्सरः। इत्यमरः॥

ऐषमस्तनः, त्रि, (ऐषमोभवः। "ऐषमोह्यःश्वसोऽन्यतरस्याम्"। ४। २। १०५। इति शैषिकेष्वर्थेषु पक्षे खुञ् तुट् च।) ऐषमःसम्बन्धी। एइ वत्सरेर इति भाषा। इति पाणिनिः॥ ७। २। १०५॥

ऐषमस्त्यः, त्रि, (ऐषमोभवः। ऐषमस् + ऐषमोह्यसिति पक्षे त्यप्।) ऐषमस्तनः इति पाणिनिः॥

ऐहिकं, त्रि, (इह + ठञ्।) इह भवम्। इहकालेर इति भाषा। इति व्याकरणम्॥ (यथा भागवते ५। १४। ३२। "क्वचिदृहमवदैहिकार्थेषु रंस्यन् यथा वानरः सुतदारवत्सलो व्यवायच्छवः"॥)

ओ

ओ ओकारः। स तु त्रयोदशस्वरवर्णः। अस्योच्चारणस्थानं ओष्ठः कण्ठश्च। ("ओदौतोः कण्ठौष्ठम्" इत्युक्तेः। तथा च शिक्षायामुक्तम्।
"ए ऐ तु कण्ठतालव्यावोऔ कण्ठौष्ठजौ स्मृतौ"॥)
स तु ह्रस्वो न भवति। दीर्घः प्लुतश्च भवति। (प्रत्येकं उदात्तानुदात्तस्वरितभेदैस्त्रिविधोऽपि अनुनासिकाननुनासिकभेदाभ्यां षड्विधः। एतेन द्वादशविध एव निर्णीतः।)

ओख

"ओकारं चञ्चलापाङ्गि! पञ्चदेवमयं सदा।
रक्तविद्युल्लताकारं त्रिगुणात्मानमीश्वरम्॥
पञ्चप्राणमयं वर्णं नमामि देवमातरम्।
एतद्वर्णं महेशानि स्वयं परमकुण्डली"॥
इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायां) तस्य लेखनप्रकारो यथा,—
"वामतः कुण्डली भूत्वा दत्तान्मध्ये तु कुञ्चिता।
किञ्चिद्वक्रगता या तु कुञ्चिता वामतस्त्वधः॥
ब्रह्मग्रविष्णवस्तास् मात्रा तु ब्रह्मरूपिणी।
शक्तिश्च परमा सैव ध्यानमस्य प्रवक्ष्यते"॥
इति वर्णोद्धारतन्त्रम्॥ * ॥ तस्य नामानि यथा,—
"ओकारः सत्यपीयूषो पश्चिमास्यः श्रुतिः स्थिरा।
सद्योजातो वासुदेवो गायत्री दीर्घनङ्गकः।
आप्यायनी चोर्द्धदन्तो लक्ष्मीर्वाणी मुखी द्विजः॥
उद्देश्यदर्शकस्तीव्रः कैलासो वसुधात्तरः।
प्रणवांग्रो ब्रह्मसूत्रमलेशः सर्व्वमङ्गला॥
त्रयोदशी दीर्घनासा रतिबाधो दिगम्बरा।
त्रैलोक्यविजया प्रज्ञा प्रीतिवीजादिकर्षिणी"॥
इति तन्त्रशास्त्रम्॥ (अनुबन्धविशेषः। यथाह कविकल्पद्रुमे। "ऐर्यजादिः स्यादोर्निष्ठातन औरनिट्"॥ तेन ओ दी क्षये इत्यस्मात् क्षतायां निष्ठायां दीनं दीनवत् इति स्यात्॥ माढकान्यासे ऊर्द्धदन्तपङ्क्तौ न्यसतया तदाख्ययाप्यभिधानम्। माढकान्यासमन्त्रो यथा,—
"ॐ नम ऊर्द्धदन्तपङ्क्तौ औं नमऽधोदन्तपङ्क्तौ"॥)

ओ, य, सम्बोधनम्। आह्वानम्। स्मरणम्। अनुकम्पा। इति मेदिनी॥

ओं, य, ओम्। प्रणवः। इति वेदागमौ॥

ओः, पुं, ब्रह्मा। इत्येकाक्षरकोषः॥

ओकं, क्ली, (उचेरिगुपधलक्षणे के गुणः कुत्वञ्च "ओक उचः के"। ७। १। ६। ४। इति निपात्यते।) गृहम्। आश्रयः। इत्यमरटीकायां भरतादयः॥ (पुं। पक्षी। वृषलः॥)

ओकः, [स्] क्ली, (उच्यते समवैति अस्मिन्। उच + असुन्। गुणः। न्यङ्क्वादित्वात् कुत्वम्॥) आश्रयः। गृहम्। इत्यमरः॥ ("जलौका अथ भल्लके"। इति अमरकोषः। तथा विष्णुपुराणम् १। ६। ३७। "सप्तधीयान्तु यत् स्थानं स्मृतं तद्वै वनौकसाम्"॥)

ओकणः, पुं, केशकीटः। इति शब्दरत्नावली॥ उकुण् इति भाषा॥

ओकणिः, पुं, यूकः। इति शब्दरत्नावली॥ उकुण् इति भाषा॥

ओकुलः, पुं, (उच् + उलच्। निपातनात् सिद्धम्।) गोधूमशततापकः। अस्य गुणाः। गुरुत्वम्। वृष्यत्वम्। मधुरत्वम्। बलकारित्वम्। रक्तवातापहत्वम्। स्निग्धत्वम्। हृद्यत्वम्। मदविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥

ओकोदनी, स्त्री, (ओकः मस्तकरूपाश्रयस्थानमदनं भक्ष्यं यस्याः।) यूकः। इति शब्दरत्नावली॥

ओक्कणी, स्त्री, (ओच् + कण् + अच् + ङीप्।) ओकणः। इति शब्दरत्नावली॥ उकुण् इति भाषा॥

ओख, ऋ, शोषणे। भूषणे। सामर्थ्ये। निवारणे। इति कविकल्पद्रुमः॥ (भ्वादिः-अकं-सकं च परंसेट्।) ऋ मा भवान् ओचिखत्। अत्र द्वित्वात् प्राक् प्राप्तो ऋख ऋदित्त्वान्न स्यात्। शोषः स्नेहरहितीभावः। ओखति पङ्क आतपात्। अलमर्थो भूषणं सामर्थ्यं वारणञ्च। इति दुर्गादासः॥

ओघः, पुं, (उच् समवाये + घञ्। एषोदरादित्वात् साधुः।) द्रुतनृत्यगीतवाद्यम्। समूहः। इत्यमरः॥ जलवेगः। (यथा कुमारे ४। ४४।
"रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी"॥) परम्परा। उपदेशः। इति मेदिनी॥

ओङ्कारः, पुं, (ओम् + कारप्रत्ययः।) प्रणवः। इत्यमरः॥ (यथाह स्मृतिः।
"ओङ्कारः पूर्व्वमुच्चार्य्यस्ततो वेदमधीयते"।
"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्ज्जातौ तस्मान्माङ्गलिकावुभौ"।
इति व्याकरणटीकायां दुर्गादासः।
"प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति"॥
इति मनुः। २। ७५॥ अत्राह आवस्तम्बः,
"ओङ्कारः स्वर्गद्वारं तद्ब्रह्म अधीयमाणा एतदापि प्रतिपद्येत विकथां चान्यां कृत्वा एवं लौकिक्या वाचा व्यावर्त्तते"। लौकिक्या वाचा व्यावर्त्तते तया मिश्रितं न भवतीत्यर्थः।)

ओङ्कारा, स्त्री, बुद्धशक्तिविशेषः। इति चिकाण्डशेषः॥

ओज त्क, बले। तेजसि। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-अकं-सेट्।) मा भवान् ओजिजत्! इति दुर्गादासः॥

ओजः, [स्] क्ली, (उज्यतेनेन। उज्ज आर्जवे उञ्छेर्बले "बलोपश्च" ४।१६१। उणादिः असुन्। बलोपश्च। गुणः।) दीप्तिः। अवष्टम्भः। प्रकाशः। बलम्। इति मेदिनी॥ (यथा रघौ २। ५४।
"तदौजसा तु प्रहृतं त्वयास्याम्"। यथा च मानवे १। १६।
"तेषामिदन्तु सप्तानां पुरुषाणां महौजसाम्"॥) प्रथमतृतीयपञ्चमसप्तमनवमैकादशद्वादशाश्रयः। इति ज्योतिषम्॥ गौड़ी रीतिः काव्यगुणः। तस्य लक्षणम्। बद्धसमासासंयुक्तवर्णपदाडम्बरः। यथा,
"ओजःप्रसादमाधुर्य्यगुणाश्चितयभेदतः।
गौड़वैदर्भपञ्चालीरीतयः परिकीर्त्तिताः॥
ओजः समासभूयस्त्वं मांसलं पदडम्बरम्"।
तस्योदाहरणम् यथा,—
"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रशाग्रत्फणि-
स्फुर्जत्स्फुल्लकृतिभीतिसम्भृतचमत्कारस्फुरत्सम्भ्रमा।
आनन्दामृतवापिकां विदधती चित्तं गिरीशप्रभोस्त्वां पायान्नवसङ्गमे भगवती लज्जावती पार्व्वती"॥
इति काव्यचन्द्रिका॥ * ॥ रसादिसप्तधातुसारभागजधातुविशेषः। तस्य गुणाः। सर्व्वशरीरस्थितत्वम्। स्निग्धत्वम्। शीतलत्वम्। स्थिरत्वम्। शुक्लवर्णत्वम्। कफात्मकत्वम्। शरीरस्य बलपुष्टिकारित्वञ्च॥
"हृदि तिष्ठति यच्छुद्धं रक्तमीषत् सपीतकम्।
ओजः शरीरे संजातं तन्नाशान्नाशमृच्छति॥
भ्रमरैः फलपुष्पेभ्यो यथा संभियते मधु।
तद्वदोजः शरीरेभ्यो धातुः संभियते नृणाम्"॥
इति वैद्यकम्॥ ओजोऽदन्तोऽपि। इति भरतः॥
"हृदयं चेतनास्थानमोजसश्चाश्रयं मतम्"।
इति पूर्व्वखण्डे। ५अ। शार्ङ्गधरेणोक्तम्॥
"तत्परस्यौजसः स्थानं तच्च चैतन्यसंग्रहः"॥
"ओजोवहाः शरीरे वा विधमन्ते समन्ततः।
येनौजसा वर्त्तयन्ति प्रीणिताः सर्व्वदेहिनः॥
यदृते सर्व्वभूतानां जीवितं नावतिष्ठते।
यत्सारमादौ गर्भस्य योऽसौ गर्भरसादृसः॥
संवर्त्तमानं हृदयं समाविशति यत्पुरा।
यस्य नाशान्न नाशोऽस्ति धारि यद्धृदयाश्रितम्॥
यच्छरीरबलं देहः प्राणा यच्च प्रतिष्ठिताः।
तत्फला विविधा वाताः फलन्तीति महाफलाः॥
घ्राणाद्वमन्यः खवणात् स्रोतांसि सरणात्सिराः॥
तन्महत्ता महामूलास्तच्चौजः परिरक्षता।
परिहार्य्या विशेषेण मनसा दुःखहेतवः॥
हृद्यं यत्स्यादृयदौजस्यं स्रोतसां यत्सादजम्।
तत्तत्सेव्यं प्रयत्नेन प्रशमो ज्ञानमेव च"॥
इति सूत्रस्थाने त्रिंशेऽध्याये चरकेणोक्तम्॥
"गुरु शीतं मृदु श्लक्ष्णं बहलं मधुरं स्थिरम्।
प्रसन्नं पिच्छिलं स्निग्धं ओजो दशगुणं तथा"॥
मद्यसेवनतोऽन्ये ये गुणा नश्यन्ति तद्यथा॥
"गुरुत्वं लाघवाच्छैत्यं चौष्ण्यमस्नेहभावतः।
माधुर्य्यं मार्दवं तैक्ष्ण्यात् प्रसादश्चाशुभावनात्॥
शैत्यात् स्नेहं व्यवायित्वात् स्थिरत्वं श्लक्ष्णतामपि।
विकासिभावात् पैच्छिल्यं वैशद्यं सान्द्रतान्तथा॥
सौक्ष्म्यान्मद्यं विहन्त्येवमोजसः स्वगुणैर्गुणान्"।
"रसधात्वादिमार्गाणां सत्त्ववद्धीन्द्रियात्मनाम्।
प्रधानस्यौजसश्चैव हृदयस्थानमुच्यते"॥
"नैवं विघातं जनयेन्मद्यं पैच्छिकमोजसः।
विकाश-रूक्ष-विशदा गुणास्तच्च हि नोल्बणाः"॥
इति च चरके चिकित्सास्थाने। १२ अः॥
"ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं सरम्।
विविक्तं मृदु मृत्स्नञ्च प्राणायतनमुत्तमम्॥
देहस्यावयवस्तेन व्याप्तो भवति देहिनाम्।
तदभावाच्च शीर्य्यन्ते शरीराणि शरीरिणाम्॥
अभिघातात् क्षयात्कोपाच्छोकाद्ध्यानाक्षयात् क्षुधः।
ओजः संक्षीयते क्षोभ्यो धातुग्रहणनिःसृतम्।
तेजः समीरितं तस्मादिभंशयति देहिनः"॥
इति सूत्रस्थाने। १५ अः। सुश्रुतेनोक्तम्॥)

ओड़वः, पुं, पञ्चस्वरयुक्तरागः। स तु ऋ-प-वर्ज्जितः। ध-ग-म-ध-नि-युक्तः। यथा मल्लारादयः। इति संगीतदामोदरः॥ (यदुक्तं संगीतरत्नाकरे स्वराध्याये जातिप्रकरणे।
"वान्ति यान्युडवोऽनेति ओमोक्तमुडवं बुधैः।
पञ्चमं तच्च भूतेषु पञ्चसंख्या तदुद्भवा।
ओड़वी सास्ति येषाञ्च स्वरास्तेषोड़वा मताः"॥
"औड़वा मताः" इति क्वचित् पाठः॥ "उडवः नक्षत्राणि वान्ति यान्ति यस्मिन् इत्युडवं ओम, तच्च भूतेषु पञ्चमम्। तेन पञ्चसङ्ख्या लक्ष्यन्ते। औड़वी सङ्ख्या विद्यते येषां स्वराणां ते औड़वाः पञ्चस्वराः" इत्यादिसिंहभूपालटीका॥)

ओड़

ओड़िका, स्त्री, धान्यविशेषः। उड़ि धान इति भाषा। तत्पर्य्यायः। ओड़ी २ नीवारः ३। इति रत्नमाला॥ अस्या गुणाः। श्लेषणत्वम्। रूक्षत्वम्। कफवायुवर्द्धकत्वम्। पित्तनाशित्वञ्च। इति राजवल्लभः॥

ओड़ी, स्त्री, ओड़िकाधान्यम्। इति रत्नमाला॥ (नीवारशब्देऽस्या विवरणं ज्ञातव्यम्॥)

ओड्रः पुं, (आ ईषदुनत्ति। उन्दी + स्फायितञ्चीति रक्। वाऽलकात् दस्य डत्वम्।) जवापुष्पवृक्षः। देशविशेषः। उड़िस्या इति ख्यातः। तत्र बहुवचनान्तः। इति मेदिनी॥ (तद्देशवासिनि, त्रि। यथा, मनुः १० । ४४।

"पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः"।

"पौण्ड्रादिदेशोद्भवाः क्षत्रियाः सन्तः क्रियालोपादिना शूद्रत्वमापन्नाः"।

इति तट्टीकायां कुल्लुकभट्टः॥)

ओड्रपुष्पं, क्ली, (ओड्रं पुष्पम्।) जवा। इत्यमरः॥ वृद्धास्तु "ओड्रपुष्पशब्देन तथा जवाशब्देन ओड्रवृक्षः ओड्रस्य पुष्पञ्चोच्यते" इत्याहुः। वृक्षे व्युत्पत्तिर्यथा। ओड्रं पुष्पमस्य इति।

"ओड्रः स्यादोड्रपुष्पञ्च जवाथ हयमारकः"।

इति रायमुकुटः॥ "ओड्रपुष्पकुसुमप्रियेऽम्बिके"। इति हरानन्दः॥ इत्यमरटीकायां भरतः॥

ओड्राख्या, स्त्री, (ओड्रमाख्या यस्याः।) जवापुष्पवृक्षः। इति राजनिर्घण्टः॥

ओण, ऋ अपसारणे। दूरीकरणे॥ इति कविकल्पद्रुमः॥ (भ्वादिं-परं-सकं-सेट्।) अपसारणमपनयनम्। मा भवान् ओणिनत्। ओणति धनम् चौरः। इति दुर्गादासः॥

ओतुः, पुं स्त्री, (अवति रक्षति मूषिकादिभ्यः। अव रक्षणे + "सितनिगमिमसिसचयतीति" १ । ७०। उणादिः तुन्। "ज्वरत्वरेति" ६ । ४ । २०। ऊट् ततो गुणः।) विड़ालः। इत्यमरः। (यथा मुग्धबोधे। "स्थूलोतुः। स्थूलौतुः॥)

ओदनः, पुं क्ली, (उन्द + "उन्देर्नलोपश्च" इति २। ७६। उणादिः युच् + नलोपश्च।) अन्नम्। भक्तम्। इत्यमरः॥ भात इति भाषा।

(यथा मनुः। ८। ३२६।

"अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च"॥

"ओदनः क्वालितः स्विन्नः प्रसृतो विशदो लघुः। भ्रष्टतण्डुलजोऽत्यर्थमन्यथा स्यादगुरुश्च सः"॥

इति वैद्यकचक्रपाणिकृतद्रव्यगुणे मद्यादिवर्गे॥

"ओदनस्तैः शृतो दिव्यैः प्रयोक्तव्यो यथायथम्। दोषदूष्यादिबलतो ज्वरघ्नः क्वाथसाधितः"॥

इति वाभटे चिकित्सास्थाने। १ अध्याये॥

अस्य पर्य्यायश्चाह भावप्रकाशकारः॥

"भक्तमन्नं तथान्यच्च क्वचिक्कूरश्च कीर्त्तितम्। ओदनोऽस्त्री स्त्रियां भिक्षा दीदिविः पुंस्यि भाषितः"॥

अस्य विवरणान्तरञ्चान्नशब्दे द्रष्टव्यम्॥)

ओदनाक्ता, स्त्री, (ओदनस्याक्ता इव आक्ता यस्याः।) महासमङ्गा। इति राजनिर्घण्टः॥

ओल्ल

ओदनिका, स्त्री, महासमङ्गा। बला। इति राजनिर्घण्टः॥

ओदनी, स्त्री, (ओदन इवाचरति। ओदन + क्विप् + ङीष्।) बला। इति मेदिनी॥ वेलेड़ा इति भाषा। (बलाशब्देऽस्या गुणादयो ज्ञातव्याः॥)

ओम्, अ, (अवति रक्षति इति। "अवतेष्टिलोपश्च"। १। १४१। उणादिः मन् टिलोपश्च। ज्वरत्वरेत्यूट् ६। ४। २०॥ ततो गुणः।) प्रणवः। स तु अकारोकारमकारवर्णत्रयात्मकः। तथा च उक्तम्।

"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः। मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः॥

("यथा पर्णे पलाशस्य पुटकेनैव धार्य्यते। तथा जगदिदं सर्व्वमोङ्कारेणैव धार्य्यते"॥

इति याज्ञवल्क्यः। तथा, मनुः। २। ७६।

"अकारश्चाप्युकारश्च मकारश्च प्रजापतिः। वेदत्रयात् निरदुहत् भूर्भुवस्वरितिति त्रिधा"॥

"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मात् माङ्गलिकावुभौ"॥

इति दुर्गादासः। योगी याज्ञवल्क्यश्च।

"सिद्धानाञ्चैव सर्व्वेषां वेदवेदान्तयोस्तथा। अन्येषामपि शास्त्राणां निष्ठाऽयोङ्कार उच्यते॥ प्रणवाद्या यतो वेदा प्रणवे पर्य्यवस्थिताः। वाङ्मयं प्रणवः सर्व्वं तस्मात् प्रणवमभ्यसेत्"॥)

अनुमतिः। इति विश्वः॥ उपक्रमः। अङ्गीकारः। (यथा, भागवते ११। ४। १५।

"ओमित्यादेशमाश्राय नत्वा तं सुरवन्दिनः। उर्व्वशीमप्सरःश्रेष्ठां पुरःकृत्य दिवं ययुः"॥)

अपाकृतिः। मङ्गलम्। इति मेदिनी॥

ओम्, क्ली, ब्रह्मणो नामविशेषः। यथा,—

"ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः। ब्राह्मणाश्चैव वेदाश्च यज्ञाश्च विहिताः पुरा॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्"॥

इति श्रीभगवद्गीतायां १७ अध्यायः॥

ओलं त्रि, (आड् + उन्द + क। पृषोदरादित्वात् साधु।) आर्द्रम्। इति त्रिकाण्डशेषः॥ भिजा इति भाषा॥

ओलः, पुं, खनामख्यातमूलविशेषः। सूरणः। इति त्रिकाण्डशेषः॥ (अस्य पर्य्यायो यथा॥

"सूरणः कन्द ओलश्च कन्दलोऽर्शोघ्न इत्यपि"।

गुणा अस्य सूरणशब्दे ज्ञेयाः।)

ओलज, इ, क्षेपणे। इति कविकल्पद्रुमः॥ (भ्वादिं-परं-सकं-सेट्।) अन्तस्थतृतीययुक्तः। इ ओलज्जते धूलिर्वायुना। इति दुर्गादासः॥

ओलड, इ कि उत्क्षेपे। इति कविकल्पद्रुमः॥ (वा चुरां-उमं-सकं-सेट्।) अन्तस्थतृतीयोपधः। इ ओलण्डते। कि ओलण्डयति ओलण्डति तण्डुलं लोकः। कर्पूरमोलण्डयतीति दर्पणात्। इति दुर्गादासः॥

ओल्लः, पुं, ओलः। तत्पर्य्यायः। सूरणः २ कन्दः ३ अर्शोघ्नः ४ चित्रदण्डकः ५। इति रत्नमाला॥

ओष

अस्य गुणाः। अग्निदीपनत्वम्। रुचिकारित्वम्। कफनाशित्वम्। विशदत्वम्। लघुत्वम्। अर्शोरोगपथ्यत्वञ्च। ग्राम्यकन्दस्तु दोषलः॥ इति राजवल्लभः॥

ओषः, पुं, (उष + दाहे घञ्।) दाहः। तत्पर्य्यायः। प्रोषः २। इत्यमरः॥ श्लोषः ३। इति भरतः॥ (पित्तविकाराश्चत्वारिंशदत ऊर्द्ध व्याख्यास्यन्ते। यथा ओषश्च श्लोषश्च इत्यादि। चरके सूत्रे। २० अः॥)

ओषणः, पुं, (उष + ल्युट्।) कटुरसः। इति हेमचन्द्रः॥ झाल इति भाषा॥

ओषणी, स्त्री, (ओषण + ङीष्।) शाकविशेषः। पुदीना इति भाषा। अस्या गुणाः। कफवायुनाशित्वम्। इति राजवल्लभः॥

ओषधिः, स्त्री, (ओषो धीयतेऽत्र। ओष + धा + कि।) फलपाकान्तवृक्षादिः। कदली धान्यमित्यादिः। इत्यमरः॥ (यदाह मनुः। १। ४६।

"उद्भिज्जाः स्थावरा ज्ञेया बीजकाण्डप्ररोहिणः। ओषध्यः फलपाकान्ताः बहुपुष्पफलोपगाः"॥

तथा, कुमारे १। १०। "भवन्ति यत्रौषधयो रजन्याम्"। तथा ७। १ "अथौषधीनामधिपस्य वृद्धौ"। "ओषधयः प्रसूयन्ति गवादीनां पयांसि च। इति हारीते प्रथमस्थाने॥ ४ अध्याये॥

"ओषधीर्नामरूपाभ्यां जानते ह्यृषयो वने। अविपास्चैव गोपास्च ये चान्ये वनवासिनः॥ न नामज्ञानमात्रेण रूपज्ञानेन वा पुनः। ओषधीनाम्यराप्नोति कश्चिद्वेदितुमर्हति॥ योगविज्ञानरूपज्ञास्तासां तत्त्वविदुच्यते। किं पुनर्यो विजानीयादोषधीः सर्व्वथा भिषक्॥ योगमासान्तु यो विद्याद्देशकालोपपादितम्। पुरुषं पुरुषं वीक्ष्य स विज्ञेयो भिषक्तमः"॥

इति चरके सूत्रस्थाने॥ १ अध्याये॥)

ओषधिप्रस्थः, पुं, (ओषधिवद्भूलं प्रस्थं यत्र। ओषधीनामाकरत्वात् हिमालयस्य तथात्वम्।) हिमालयस्य नगरम्। (यथा, कुमारे ६। ३३।

"तत्प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरम्"।

तत्रैव ६। ३६। "आसेदुरोषधिप्रस्थम्" इति।)

तथा,—कालिकापुराणे ४१ अध्यायः।

"ततस्तिस्रन्तरे शम्भुः शिप्रं त्यक्त्वा तदा सरः। गङ्गावतारमगमद्धिमवत्प्रस्थमुत्तमम्॥ यत्र गङ्गा निपतिता पुरा ब्रह्मपुरात् च्युता। ओषधिप्रस्थनगरस्यादूरे सानुरुत्तमः॥ तत्र भर्गः स्वमात्मानमक्षरं परमात्परम्। एकाग्रं चिन्तयामास भगवान् वृषभध्वजः"॥

ओषधी, स्त्री, (ओषधि + ङीष्।) ओषधिः। इति भरतः॥ (फलपाकान्तवृक्षः। स च कदलीधान्यादिः। यथाह मनुः। १। ४६।

"उद्भिज्जाः स्थावराः सर्व्वे बीजकाण्डप्ररोहिणः। ओषध्यः फलपाकान्ताः बहुपुष्पफलोपगाः"॥

ओषधिशब्देऽस्या विवृतिर्द्रष्टव्या॥)

ओषधीपतिः, पुं, (ओषधीनां पतिः।) चन्द्रः। इति हेमचन्द्रः॥ (कर्पूरं। चन्द्रसंसृष्टत्वादस्य तथात्वम्॥)

ओष्ठ

ओषधीशः, पुं, (ओषधीनामीशः) चन्द्रः। कर्पूरम्। इत्यमरः॥ (यथा, हरिवंशे ७६। ८।
"ओषधीशः क्रियायोनिरम्भोयोनिरनुष्णभाक्"॥)

ओष्ठः, पुं, (उष्यते दह्यते उष्णाहारेणेति। उष दाहे + "उषिकुषीति"। २। ४। थन्॥)
दन्ताच्छादकावयवः। उपर ठोंट इति भाषा। तत्पर्य्यायः। रदनच्छदः २ दशनवासः ३। इत्यमरः। दन्तवासः ४ दन्तवस्त्रम् ५ रदच्छदः ६ इति राजनिर्घण्टः॥ तस्य द्विवचने ओष्ठौ ओष्ठाधराविति यावत्॥ (यथा, ऋग्वेदे। २। ३६। ६।
"ओष्ठाविव मध्वास्ये वदन्ता स्तनाविव पिप्यतं जीवसे नः"। तथा मनुः। ८। २८२।
"अवनिष्ठीवतो दर्पाद्द्वौ ओष्ठौ छेदयेन्नृपः"॥
तथा, कुमारे ३। ६०।
"उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि"॥)

ओष्ठपुष्पः, पुं, (ओष्ठ इव पुष्पं यस्य।) बन्धूकपुष्पवृक्षः। इति राजनिर्घण्टः॥

ओष्ठरोगः, पुं, (ओष्ठस्य रोगः।) आस्यरोगान्तर्गतोष्ठभवव्याधिः। स च वातपित्तकफसन्निपातरक्तमांसमेदोऽभिघातजत्वेनाष्टविधः। तेषां यथाक्रमं लक्षणानि यथा,—
"कर्कशौ परुषौ स्तब्धौ संप्राप्तानिलवेदनौ।
दाल्येते परिपाट्येते ओष्ठौ मारुतकोपतः॥
चीयेते पिड़काभिश्च सरुजाभिः समन्ततः।
सदाहपाकपिड़कौ पीताभासौ च पित्ततः॥
सवर्णाभिस्तु चीयेते पिड़काभिरवेदनौ।
भवतस्तु कफादोष्ठौ पिच्छिलौ शीतलौ गुरू॥
सकृत् क्षय्यौ सकृत् पीतौ सकृत् श्वेतौ तथैव च।
सन्निपातेन विज्ञेयावनेकपिड़काचितौ॥
खर्ज्जूरफलवर्णाभिः पिड़काभिर्निपीड़ितौ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ॥
गुरू स्थूलौ मांसदुष्टौ मांसपिण्डवदुन्नतौ।
जन्तवश्चात्र मूर्च्छन्ति नरस्योभयतो मुखात्॥
सर्पिर्मण्डप्रतीकाशौ मेदसा कण्डुरौ गुरू।
स्वच्छं स्फटिकसङ्काशमास्रावं स्रवतो भृशम्॥
तयोर्व्रणो न संरोहेन्मृदुत्वच्च न गच्छति।
ओष्ठौ पर्य्यवदीर्य्येते पाट्येते चाभिघाततः"॥
इति निदानम्॥
("ओष्ठौ च स्फुटितौ यस्य वातिवाहेन वातिकात्।
तस्य सर्पिर्मक्षणञ्च ओष्ठदारणवारणे॥
सदाहञ्च भवेत्सौख्यं पैत्तिकं तं विनिर्दिशेत्।
मधुना नवनीतेन ओष्ठयोर्म्रक्षणं मतम्।
लेपनञ्चौष्ठरोगेषु शर्करासहितं दधि।
सरक्तमोष्ठरोगञ्च दृष्ट्वा रक्तावसेचनम्॥
धवार्ज्जुनकदम्बानां प्रलेपः स्यात् सुखावहः"॥
इति हारीते चिकित्सिते। २५ अध्याये॥
चिकित्सा यथा॥
"तत्र खण्डौष्ठ इत्युक्तो वातेनोष्ठो द्विधा कृतः॥
ओष्ठकोपे तु पवनात् स्तब्धावोष्ठौ महारुजौ।
दाल्येते परिपाट्येते परुषासितकर्कशौ॥
पित्तात्तीक्ष्णासहौ पीतौ सर्षपाकृतिभिश्चितौ।
पिटिकाभिर्भृशक्लेदावास्रुपाकौ कफात्मनः॥
शीतासहौ गुरू स्निग्धौ सवर्णपिटिकाचितौ।
सन्निपातादनेकाभौ दुर्गन्धास्रावपिच्छिलौ॥
अकस्मात् स्खलनसंशून्यरुजौ विषमप्राकिनौ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ॥
खर्ज्जूरसदृशश्चात्र क्षीणे रक्तेऽर्ब्बुदं भवेत्।
मांसपिण्डोपमौ मांसात्स्यातां मूर्च्छत्कृमीक्रमात्॥
तैलाभश्यश्लथक्लेदौ सकण्डूौ मेदसा मृदु।
क्षतजावदरीर्य्येते प्राप्येते चासकृत्पुनः॥
ग्रथितौ च पुनः स्यातां कण्डूलौ दशनच्छदौ।
जलबुद्बुदवद्घातकफादोष्ठे जलार्ब्बुदम्"॥
इति वाभटे उत्तरस्थाने। २१ अध्याये॥
"खण्डोष्ठस्य विलिख्यान्तौ स्रुवा व्रणवदाचरेत्।
यष्टी ज्योतिष्मती-रोध्र-श्रावणी-सारिवोत्पलैः॥
पटोल्या काकमाच्या च तैलमभ्यञ्जनं पचेत्।
नस्यञ्च तैलं वातघ्नमधुरस्कन्धसाधितम्॥
महास्नेहेन वातौष्ठे सिद्धे नाक्तः पिचुर्हितः।
देवधूपमधूच्छिष्टगुग्गुल्वमरदारुभिः॥
यष्ट्याह्वचूर्णयुक्तेन तेनैव प्रतिसारणम्।
नाड्योष्ठं खेदयेद्दुग्धसिद्धैरेरण्डपल्लवैः॥
खण्डोष्ठविहितं नस्यं तस्य मूर्द्ध्नि च तर्पणम्।
पित्ताभिघातजावोष्ठौ जलौकोभिरुपाचरेत्॥
रोध्रसर्जरसक्षौद्रमधुकैः प्रतिसारणम्।
गुड़ूची यष्टिपत्तङ्गसिद्धमभ्यञ्जने घृतम्॥
पित्तविद्रधिवच्चात्र क्रियाश्शोणितजेऽपि च।
इदमेव भवेत्कार्य्यं कर्म्मौष्ठे तु कफोत्तरे॥
पाठाक्षारमधुयोर्घैर्हृताक्षे प्रतिसारणम्।
धूमनावनगण्डूषाः प्रयोज्याश्च कफच्छिदः॥
स्निग्धं भिन्नं विमेदस्कं दग्ध्वा मेदोजमग्निना।
प्रियङ्गुरोध्रत्रिफलामाक्षिकैः प्रतिसारयेत्॥
सक्षौद्रावघर्षणम् तीक्ष्णा भिन्नशुद्धे जलार्ब्बुदे।
अवगाढ़ेऽतिशुद्धे वा क्षारोऽग्निर्वा प्रतिक्रिया"॥
इति च वाभटे उत्तरस्थाने। २२ अध्याये॥
चिकित्सादिविवृतिस्तुमुखरोगशब्दे द्रष्टव्या॥)

ओष्ठी, स्त्री, (ओष्ठ इवाचरति पक्वावस्थायाम्। ओष्ठ + क्विप्। ततोऽच् + ङीप् च।) बिम्बफलम्। इति रत्नमाला॥ तेलाकुचा इति भाषा॥

ओष्ठोपमफला, स्त्री, (ओष्ठोपमानि ओष्ठसदृशानि फलानि यस्याः।) विम्बिका। इति शब्दरत्नावली॥ (तेलाकुचा इति भाषा॥)

औ

औ, औकारः। स तु चतुर्दशस्वरवर्णः। अस्योच्चारणस्थानं ओष्ठः कण्ठश्च। (ओदौतोः कण्ठौष्ठम्"। इत्युक्तेः। तथा च शिक्षायाम्।
"एऐ तु कण्ठ-तालव्यावोऔ कण्ठौष्ठजौ स्मृतौ"।)
स दीर्घः प्लुतश्च भवति न ह्रस्वः॥ (प्रत्येकमुदात्तानुदात्तस्वरितभेदात् त्रिविधोऽपि पुनरनुनासिकाननुनासिकभेदात् षड्विध एतेन द्वादशविध एव।)
"रक्तविद्युल्लताकारं औकारं कुण्डली स्वयम्।
अत्र ब्रह्मादयः सर्व्वे तिष्ठन्ति सततं प्रिये॥
पञ्चप्राणमयं वर्णं सदाशिवमयं सदा।
सदा ईश्वरसंयुक्तं चतुर्व्वर्गप्रदायकम्"॥
इति कामधेनुतन्त्रम्॥ (वङ्गभाषायां) तस्य लेखनप्रकारो यथा,—
"ओकारमधदक्षे तु गता तूर्द्धगतायता।
किञ्चित् सा वामतो वक्रा तासु ब्रह्मेशविष्णवः॥
शक्तिमध्यगता रेखा ध्यानमस्य प्रचक्षते"।
इति वर्णोद्धारतन्त्रम्॥ * ॥ अस्य नामानि यथा,
"औकारः शक्तिको नादस्त्रेजसो वामजङ्घकः।
मनुरर्द्धग्रहेशश्च शङ्खकर्णः सदाशिवः॥
अधोदन्तश्च कण्ठौष्ठौ सङ्घर्षणः सरस्वती।
आज्ञा चोर्द्ध्वमुखी शान्तो व्यापिनी प्रकृतः पयः॥
अनन्ता ज्वालिनी व्योमा चतुर्दशी रतिप्रियः।
नेत्रमात्मकर्षिणी च ज्वालामालिनिका भृगुः"॥
इति तन्त्रशास्त्रम्॥ घोषदशनः। सत्यान्तः।
इति बीजवर्णाभिधानम्॥ (माहकान्यासेऽधोदन्तपङ्क्तौ न्यस्यतया तच्छब्देनाप्यभिधानम्। माहकान्यासमन्त्रो यथा,—
ओं नमः ऊर्द्धदन्तपङ्क्तौ औं नमोऽधोदन्तपङ्क्तौ"॥
अनुबन्धविशेषः। यदुक्तं कविकल्पद्रुमे। "ओर्निष्ठातन औरनिट्"। तेन दृशि रौ प्रेक्षणे इत्यस्य ल्युटि कृते द्रक्ष्यति इति स्यात्॥)

औ, व्य, आह्वानम्। सम्बोधनम्। इति मेदिनी॥ विरोधः। निर्णयः। इति शब्दरत्नावली॥ (गर्ग्यभेदः। स च चादिः। इति पाणिनिः। १। ४। ५७॥)

औँ, व्य, शूद्राणां प्रणवः। यथा,—
"चतुर्दशस्वरो योऽसौ सेतुरौकारसंज्ञितः।
स चानुस्वारनादाभ्यां शूद्राणां सेतुरुच्यते"॥
इति तन्त्रसारधृतकालिकापुराणम्॥

औः, पुं, अनन्तः। इत्येकाक्षरकोषः॥ निखनः। इति मेदिनी॥

औः, स्त्री, विश्वम्भरा। इति मेदिनी॥

औक्षकं, क्ली, उक्षणां समूहः। ("गोचोक्षोष्ट्रोरभ्रेभ्यः"। ४। २। ३६॥ वुञ्।) वृषसमूहः। इत्यमरः॥ एँड़े गरुर पाल इति भाषा॥

औखं, त्रि, (उखायां निष्पन्नं, उखा + यत् + स्वार्थे + अण्।) स्थालीपक्वान्नादि। उखायां निष्पन्नम् इत्यर्थे प्राग्वत्ययः॥

औचिती, स्त्री, (उचितस्य भावः। ब्राह्मणादित्वात् ष्यञ् + ङीष्। "हलस्तद्धितस्य"। ६। ४। १५०। इति यलोपः॥) औचित्यम्। इति लिङ्गादिसंग्रहे अमरः॥
("सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः"। इति साहित्यदर्पणम्॥)

औचित्यं क्ली, (उचित + ष्यञ्।) उचितस्य भावः। उपयुक्तता। योग्यत्वम्। इत्यमरः॥
(यथा साहित्यदर्पणे ३य परिच्छेदे।
"एता अपि यथौचित्यादुत्तमाधममध्यमाः"॥)

औडवः, पुं, (औडवी संख्या विद्यते यस्य स औडवः। यद्वा ओडव एव + स्वार्थे अण्।) ओड़वस्वरः। स च रागस्य जातिविशेषः। पञ्चस्वरमिश्रित-

रागरागिण्य इति यावत्। यथा,—
"औडवः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाड़वः।
सम्पूर्णा सप्तभिः प्रोक्ता रागजातिस्त्रिधा मता" ॥
इति सङ्गीतरत्नाकरः॥ अपि च। सम्पूर्णस्वराः
ष ऋ ग म प ध नि॥ षाड़वस्वराः निषादोज्झिताः ष ऋ ग म प ध॥ औड़वस्वराः ऋ-पवर्जिताः ष ग म ध नि॥ सम्पूर्णरागाः सप्तभिः स्वरैर्यथा। नटवसन्तादयः। षाड़वरागाः षड्भिः स्वरैर्यथा। सैरिन्ध्रीप्रभृतयः। औड़वरागाः पञ्चभिः स्वरैर्यथा मल्लारादयः। इति सङ्गीतदामोदरः॥ (तथा च सङ्गीतरत्नाकरे स्वराध्याये जातिप्रकरणे। ५३—५४॥
"वान्ति यान्त्युड़वोऽत्रेति व्योमोक्तमुड़वं बुधैः।
पञ्चमं तच्च भूतेषु पञ्चसंख्या तदुद्भवा॥
औड़वी सास्ति येषाञ्च स्वरास्ते त्वौड़वा मताः।
ते संजाता यत्र गीते तदौड़वितमुच्यते॥
तत्सम्बन्धादौड़वञ्च पञ्चस्वरमिदं विदुः"।
"क्रमादल्पाल्पतरते षाडवौडवकारिणोः"॥)

औड़ुम्बरं, क्ली, कुष्ठरोगविशेषः। इति मेदिनी॥ तस्य लक्षणम्।
"रक्तदाहरागकण्डूभिः परीतं रोमपिञ्जरम्।
उड़ुम्बरफलाभासं कुष्ठमौड़ुम्बरं वदेत्"॥
इति निदानम्॥ ताम्रम्। इति जटाधरः॥ ताम्रपात्रादौ च॥ (उड़ुम्बरस्य विकारः। उड़ुम्बर + अण्। उड़ुम्बरपात्रम्। यज्ञाङ्गलक्षविकारः। यथाह देवलः।
"गृहीत्वौड़ुम्बरं पात्रं वारिपूर्णमुदङ्मुखः"॥)

औड़ुम्बरः, पुं, चतुर्दशयमान्तर्गतयमविशेषः। इति मेदिनी॥ मुनिविशेषः। यथा,—
"वैखानसा बालिखिल्यौड़ुम्बराः फेनपा वने।
न्यासे कुटीचकः पूर्वं वक्षोदो हंसनिष्क्रियौ"॥
इति श्रीभागवते ३। १२। ४३। "औड़ुम्बराः प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति तत आहृतैः फलादिभिर्जीवन्तः"। इति तट्टीकायां स्वामी॥

औत्कर्ष्यं, क्ली, (उत्कर्षस्य भावः। उत्कर्ष + ष्यञ्।) उत्कर्षता॥

औत्तानपादिः, पुं, (उत्तानपादस्यापत्यम् पुमान्। उत्तानपाद + इञ्।) ध्रुवः। इत्यमरः॥ स तु उत्तानपादराजपुत्रः। स्वायम्भुवमनुपौत्रः। (यथा भागवते। ४। १०। ३०।
"औत्तानपादे भगवांस्तव शार्ङ्गधन्वा
देवः क्षिणोत्ववनतार्त्तिहरो विपक्षान्॥
उत्तानपादात् सुरुचां जात उत्तमः। इति महाभारतम्॥) ग्रहाणामुपरिस्थितनिश्चलतारा च॥

औत्सर्गिकः, त्रि, (सामान्यविधिरुत्सर्गस्तस्य भावः। उत्सर्ग + ठञ्।) सामान्यत्वम्। इति स्मार्त्ताः॥

औत्सुक्यं, क्ली, (उत्सुकस्य भावः। उत्सुक + ष्यञ्।) उत्कण्ठा। इति हेमचन्द्रः॥ (यथा रत्नावली।
"औत्सुक्येन क्षतत्वरा सहभुवा व्यावर्त्तमाना क्रिया"॥ "रथचरणसमाक्रान्तावदौत्सुक्यमुद्रा"।
इति माघे ११। २६। तथा मेघदूते पूर्व्वमेघे ॥५॥
"इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे"।

व्यभिचारिभावभेदः।
यथा साहित्यदर्पणे ३। १३७। "औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसन्त्रासलज्जाः"॥
तल्लक्षणं तत्रैव ३। १५६।
"इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता।
चित्तताप-त्वँरा-खेद-दीर्घनिश्वसितादिकृत्"॥
उदाहरणं यथा तत्रैव।
"यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्तेचोन्मीलितमालतीसुरभयः प्रौढ़ाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते"॥
इच्छा। यथा, तत्त्वकौमुद्याम्।
"औत्सुक्यमिच्छा सा च इष्यमाणप्राप्तौ निवर्त्तते इष्यमाणश्च स्वार्थ इष्टलक्षणत्वात् फलस्य"॥)

औदनिकः, त्रि, (ओदनं शिल्पमस्य। ओदन + ठञ्।) सूपकारः। इत्यमरः॥

औदरिकः, त्रि, (उदरे प्रसितः। उदर + ठक्।) विजिगीषाविवर्ज्जितः। उदरमात्रपूरकः। पेटुक इति भाषा। तत्पर्य्यायः। आद्यूनः २। इत्यमरः॥ (यथा किराते। ११। ५ श्लोकस्य टीकायां मल्लिनाथः। "अतएवाद्यून औदरिकः। आद्यूनः स्यादौदरिके विदिगीषाविवर्ज्जिते। इत्यमरः"॥)
"विजिगीषाव्यवहारः कश्चित् प्रकर्षो वा आलस्यात् तेन विहीनो यः केवलमुदराधीनः"। इति भरतः॥ "खोदरपूरणाप्रवृत्तिनिमित्तकनिन्दात्याजेच्छा विजिगीषा तया रहितः"।
इति रमानाथः॥

औदश्वित्तं, क्ली, (उदश्वित् + "उदश्वितोऽन्यतरस्याम्"। ४। २। १६। इति पक्षे अण्।) अर्द्धजलयुक्तघोलं। इति हेमचन्द्रः॥ (उदश्वित्छब्देऽस्य विशेषो ज्ञातव्यः॥)

औदश्वित्कं, क्ली, (उदश्वितं संस्कृतम्। "उदश्वितोऽन्यतरस्याम् ४। २। १६ इति ठक्। "इसुसुक्तान्तात् कः"। ७। ३। ५१। इति ठस्य कः।) अर्द्धजलमिश्रितघोलम्। इति हेमचन्द्रः॥

औदार्य्यं, क्ली, (उदारस्य भावः। उदार + ष्यञ्।) उदारता। इति हेमचन्द्रः॥ (वागुणभेदः। यथा किराते १। ३॥ "स सौष्ठवौदार्य्यविशेषशालिनीम्" इति "औदार्य्यं अर्थसम्पत्तिः" इति मल्लिनाथः॥ सात्त्विको नायकगुणभेदः। यथा साहित्यदर्पणे ३। ५८।
"शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी।
ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः"॥
तल्लक्षणं यथा तत्रैव ३। ६३।
"दानं सप्रियभाषणमौदार्य्यं शत्रुमित्रयोः समता"॥
नायिकालङ्कारभेदः। यथा, तत्रैव ३। ९४।
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः"॥
शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता।
औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः"॥
तल्लक्षणं यथा तत्रैव ३। १०३। "औदार्य्यं विनयः सदा"॥ अस्य उदाहरणं यथा तत्रैव।

"न ब्रूते परुषं गिरं वितनुते न भ्रूयुगं भङ्गुरं
नोत्संक्षिपति स्थितौ श्रवणतः सा मेक्षुटेऽयागसि
कान्ता गर्भगृहे गवाक्षविवरव्यापारिताक्ष्या बहिः
सख्या वक्त्रमभिप्रयच्छति परं पर्य्यश्रुणी लोचने"॥
मनसो वृत्तिभेदः। यथा पञ्चदश्याम्। १५। ३।
"शान्ता घोरास्तथा मूढ़ा मनसो वृत्तयस्त्रिधा।
वैराग्यं क्षान्तिरौदार्य्यमित्याद्या घोरवृत्तयः"॥)

औदास्यं क्ली, (उदास + ष्यञ्।) उदासस्य भावः। वैराग्यम्। अनुरागादिशून्यता। यथा।
"औदास्यसंविदवलम्बितशून्यमुद्रा-
मस्मिन् दृशोः पतिततामवलोक्य भैम्याः"।
इत्यादि नैषधम्॥ "क्षौमादिविलिखनहेतोर्वयमपि कुड्याः किमौदास्यम्"। इति पद्यावली॥

औद्दालकं, क्ली, (उद्दालेन कीटेन सञ्चितम्। उद्दाल + अण् + संज्ञायां कन्।) वल्मीककारिकीटनिर्म्मितमधु।
तस्य गुणाः। कषायत्वम्। उष्णत्वम्। कटुत्वम्। कुष्ठविषरोगनाशित्वञ्च। इति राजवल्लभः॥
(अथौद्दालकस्य लक्षणं गुणाश्च यथा।
"प्रायो वल्मीकमध्यस्थाः कपिलाः खल्पकीटकाः।
कुर्व्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु॥
औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम्।
कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तकृत्"॥
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
तीर्थविशेषः। यदुक्तं महाभारते ३। ८४। १५१।
"औद्दालकं महाराज तीर्थं मुनिनिषेवितम्।
तत्राभिषेकं कृत्वा वै सर्व्वपापैः प्रमुच्यते"॥

औद्गत्रं, क्ली, (उद्गत्र + ष्यञ्।) उद्गत्रस्य भावः। यथा। "असूयान्यगुणार्द्धीनामौद्गत्र्यादसहिष्णुता। भ्रूभङ्गदोषसंघोषरक्षात्विङ्मितादिकृत्"। इति साहित्यदर्पणे ३ परिच्छेदः॥

औद्भिज्जं, क्ली, (उद्भिद् + जन + ड + स्वार्थे अण्।) पांशुलवणं। इति राजनिर्घण्टः॥

औद्भिदं, क्ली, (उद्भिद + स्वार्थेऽण्।) सामुद्रिलवणम्। अस्य गुणाः। (यथा सुश्रुते। सूत्रस्थाने ४६ अः॥
"लघु तीक्ष्णोष्णमुत्क्लेदि सूक्ष्मं वातानुलोमनम्।
सुतिक्तं कटुसंस्कारं विद्याल्लवणमौद्भिदम्"॥)
तीक्ष्णत्वम्। उत्क्लेदकारित्वम्। क्षारयुक्तत्वम्। कटुत्वम्। तिक्तत्वम्। कोष्ठबद्धतानाहशूलनाशित्वञ्च। इति राजवल्लभः॥ (अस्य पर्य्यायो गुणाश्च यथा—
"औद्भिदं पांशुलवणं यज्जातं भूमितः स्वयं।
क्षारं गुरु कटु स्निग्धं शीतलं वातनाशनम्"॥
इति भावप्रकाशस्य पूर्व्वखण्डे। १ भागे॥
"सतिक्तकटुकक्षारं तीक्ष्णमुत्क्लेदि चौद्भिदम्"।
इति वाभटे सूत्रस्थाने। ६ अ॥)
उद्भिदो जातं जलम्। तस्य गुणाः। मधुरत्वम्। पित्तशमनत्वम्। अविदाहित्वम्। इति राजवल्लभः॥
("औद्भिदं पित्तशमनं मधुरं न विदाहि च"॥
इति वैद्यकचक्रपाणिदत्तव्यगुणे प्राणीयवर्गे॥

ऋस्य व्याख्यायां शिवदासेनोक्तं यथा।
"औद्विदं निम्नप्रदेशादूर्द्ध्वमुत्तिष्ठज्जलम्" ॥
उद्विदो जातं द्रव्यादि। यथा ॥
"तत् नखिविधं ज्ञेयं जाङ्गलौद्विदपार्थिवम्"।
"भौममौषधमुद्दिष्टमौद्विदन्तु चतुर्व्विधम्।
वनस्पतिर्वीरुधश्च वानस्पत्यस्तथौषधिः" ॥
"मूलत्वक्सारनिर्यासनाड़स्वरसपल्लवाः।
क्षाराः क्षीरं फलं पुष्पं भस्मतैलानि कण्टकाः ॥
पत्राणि शुङ्गाः कन्दाश्च प्ररोहश्चौद्विदो गणः"।
इति चरके सूत्रस्थाने। १ अः ॥)

औदाहिकं, क्ली, (उदाहसमये लब्धम्। उदाह + ठञ्।) भार्य्याप्राप्तिकाले लब्धं भार्य्याधनम्। इति दायभागः ॥ तत् भ्राढभिरविभाज्यम्। यथा।
"पिढद्रव्याविनाशेन यदन्यत् स्वयमर्জ্জयेत्।
मैत्रमौदाहिकञ्चैव दायादानां न तद्भवेत्।
इति याज्ञवल्क्यः ॥ (यथा च मनुः। ९। २०९।
"विद्याधनन्तु यद्यस्य तत्तस्यैव धनं भवेत्।
मैत्रमौदाहिकञ्चैव माधुपर्किकमेव च" ॥)

औपगवः, पुं, उपगोरपत्यम्। इति भरतः ॥ उप समीपे गौर्य्यस्य इति उपगुर्गोपः। लक्षणया तत्पुरोहिते उपगुशब्दः। यथा हारीतः।
"यं वर्षे याजयेद् यस्तु स तद्वर्षमाप्नुयात्
सद्योवर्षेण वर्षेणैवमेवान्नवीद्भगः"॥* तथाच लक्षणया ब्राह्मण उपगुरुदवाच्यः। तस्यापत्यमौपगवः। इति श्रीभागवतटीकायां स्वामी। (उपगोरिदमिति युत्पत्त्या उपगुसम्बन्धिनि, त्रि- उपगु + "तस्येदम्"। ४। ३। १२०। इत्यण्।)

औपगवकं, क्ली, (औपगवानां समूहः। "गोचोष्ट्रोष्ट्रेति"। ४। २। ३९। वुञ्।) औपगवसमूहः। इत्यमरः ॥

औपग्रस्तिकः, पुं, (उपग्रस्तं ग्रासकालं भूतः। उपग्रस्त + "तमधीष्टो भृतो भूतो भावी"। ५। १। इति ठञ्।) राऽग्रस्तखगः सूर्य्यश्च। इति शब्दरत्नावली ॥

औपनिधिकं, क्ली, (उपनिधि + स्वार्थे ठञ्।) उपनिधिः। प्रीत्या भोगार्थमर्पितद्रव्यम्। इति स्मृतिः ॥

औपम्यं, क्ली, (उपमैव। चतुर्वर्णादित्वात् स्वार्थे ष्यञ्।) सादृश्यम्। तत्पर्य्यायः। अनुकारः २ अनुहारः ३ साम्यम् ४ तुला ५ उपमा ६ कक्षः ७ उपमानम् ८। इति हेमचन्द्रः ॥ (यथा, हितोपदेशे १। ७३ ॥
"प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतानां दयां कुर्व्वन्ति साधवः" ॥
"औपम्यं नाम यदन्येनान्यस्य सादृश्यमधिकृत्य प्रकाश्यते। यथा दण्डेन दण्डकस्य धनुषा धानुष्कस्येष्वासेनारोग्यदस्येति"। इति विमानस्थाने। ८ अध्याये ॥ चरकेणोक्तम् ॥)

औपयिकः, त्रि, (उपायेन सञ्जातः। उपाय + ठक् + ऋस्य।) न्याय्यः। उपयुक्तः। इत्यमरः॥ (यथा, महाभारते विदुरागमनपर्व्वणि १। २०५। १२।
"इदन्तव महाराज तेषु पुत्रेषु चैव ह।
वृत्तमौपयिकं मन्ये भीष्मेण सह भारत"! ॥
तथा रामायणे २। ५४। ३९।
"वासमौपयिकं मन्ये तव राम महावन"।
स्त्रियां तु ङीप्। यथा महाभारते वैवाहिकपर्व्वणि १। १९४। ११।
"न वैश्यसूद्रौपयिकीः कथास्ता
न च द्विजानां कथयन्ति वीराः"॥
स्वार्थे विनयादिभ्यष्ठक्प्रत्यये कृते उपायस्यैव औपयिकम्। यथा भारविः, ३५।
"शिवमौपयिकं गरीयसीम्" इति ॥

औपरोधिकः, पुं, (उपरोधः प्रयोजनमस्य। उपरोध + ठक्।) पीलुदण्डः। तत्पर्य्यायः। पैलवः २। इति हेमचन्द्रः ॥ उपरोधसम्बन्धिनि त्रि ॥

औपवस्त्रं, क्ली, (उपवस्त्र + प्रज्ञाद्यण्।) उपवासः। इति हेमचन्द्रः ॥

औपसर्गिकः, पुं, (उपसर्ग + ठक्।) सन्निपातरोगविशेषः। तस्य लक्षणम्। यथा,—
"कफोऽनुलोमवातेन यदि पित्तानुगो भवेत्।
खेदग्लैत्यादिभिर्जुष्टस्तदा भवति मानवः ॥
प्रतिलोमः पुनस्तेन खास्यमायाति तत्क्षणात्।
औपसर्गिक एवान्यः सन्निपात उदाहृतः" ॥
इति वैद्यकम् ॥ उपसर्गसम्बन्धिनि त्रि ॥
("तत्रौपसर्गिको यः पूर्व्वोत्पन्नव्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूलश्चोपद्रवसंज्ञः"। इति सुश्रुते सूत्रस्थाने। ३५ अध्याये ॥
"प्रसङ्गात् गात्रसंस्पर्शान्निश्वासात् सहभोजनात्।
सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात् ॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्" ॥
इति च सुश्रुते निदानस्थाने। ५ अध्याये ॥
माधवसंग्रहस्य व्याख्यायां कुष्ठाधिकारे यथा।
"औपसर्गिकरोगा इति औपसर्गिकाः पापरोगादयो भूतोपसर्गजाः संक्रामन्ति आविशन्ति" ॥)

औपस्थ्यं, क्ली, (उपस्थाद्भवम्। उपस्थ + ष्यञ्।) उपस्थेन्द्रियसुखम्। इति श्रीभागवतम् ॥ (यथा, तत्रैव ७। ६। १३।
"औपस्थ्यजैह्व्यं बत मन्यमानः
कथं विरज्येत दुरन्तमोहः" ॥)

औमीनं, त्रि, (उमानां भवनं क्षेत्रं वा। "विभाषातिलमाषोमेति"। ५। २। ४। यत्ते खञ्।) उमम्। उमाक्षेत्रम्। इत्यमरटीकायां भरतः ॥ मसिनार क्षेत इति भाषा ॥

औरगं, क्ली, (उरगस्य इदम्। उरग + अण्।) अश्वेषानलक्षणम्। इति जटाधरः। सर्पसम्बन्धिनि त्रि ॥

औरभ्रः, पुं, (उरभ्रस्य मेषस्य इदम्। उरभ्र + अण्।) कम्बलः। तत्पर्य्यायः। उर्णायुः २ आविकः ३ रल्लकः ४। इति हेमचन्द्रः ॥ (मेषमांसम्। यथा मनुः। ३। २६८।
"द्वौ मासौ मत्स्यमांसेन त्रीन् मासान् हारिणेन तु।
औरभ्रेणाथ चतुरः शाकुनेनाथ सप्त वै" ॥
मेषदुग्धम्। यथा,—
"औरभ्रं मधुरं रूक्षमुष्णं वातकफापहम्।
न श्लक्ष्णं रक्तपित्तानां वातिकानां हितं भवेत्" ॥
इति हारीते प्रथमस्थाने। ८ अध्याये ॥
धन्वन्तरिं प्रति प्रश्नकारकः ऋषिभेदः। यथा सुश्रुते सूत्रस्थाने १। "अथ खलु भगवन्तममरवरमृषिगणपरिवृतमाश्रमस्थं काशीराजं दिवोदासं धन्वन्तरिमौपधेनवगैतरणौरभ्रपौष्कलावतकरवीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः" ॥)

औरभ्रकं, क्ली, (उरभ्राणां समूहः। उरभ्र + "गोचोष्ट्रोष्ट्रोरभ्रेति"। ४। २। ३९। वुञ्।) मेषसमूहः। इत्यमरः ॥ भेड़ार पाल इति भाषा ॥

औरसः, पुं क्ली, (उरसा निर्म्मितः। उरस् + अण्।) स्वजातपुत्रः। तत्पर्य्यायः। औरस्यः २। इत्यमरः ॥ उरस्यः ३। इति तट्टीका ॥ द्वादशविधपुत्रान्तर्गतश्रेष्ठपुत्रोऽयम्। स तु सवर्णायां भार्य्यायां स्वयं जनितः। यथा। "सवर्णायां संस्कृतायां स्वयमुत्पादितमौरसं विद्यात्"। इति बौधायनः ॥ (तथा मनुः। ९। १६६।
"क्षेत्रे क्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेद्धि यम्।
तमौरसं विजानीयात् पुत्रं प्रथमकल्पितम्" ॥)
"औरसो धर्म्मपत्नीजः" इत्यादि याज्ञवल्क्यः ॥ २। १३१ ॥

औरस्यः, पुं क्ली, (उरसो भवः। उरस् + यत्। ततः स्वार्थेऽण्।) औरसपुत्रः। इत्यमरः ॥ (क्ली, उरसो वक्षस उत्पन्नम्। वक्षोभवम्। यथा शिक्षायाम्। १६।
"इकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्"।
औरस्यं तं विजानीयात् कण्ठाभ्याञ्च संयुतम्" ॥)

और्द्धदेहिकं, त्रि, (ऊर्द्धदेहाय भवम्। ऊर्द्धदेह + ठञ्।) मृतार्थं तदहर्दानम्। इत्यमरः ॥ यदङ्गि मृतस्तदहःप्रभृति सपिण्डीकरणात् पूर्व्वं प्रेतत्वनिर्हेतुकं यत् पिण्डादिदानं तत्। इति भरतः ॥ (पुत्रदाराद्यवश्यभर्त्तव्यपीड़नेन यत्पारलौकिकधर्म्मबुद्धा दानादि करोति तस्य दातुर्जीवतो मृतस्य च तद्दानं दुःखफलं भवति।
यथा मनुः ११। १०।
"कृत्वानामुपरोधेन यत्करोत्यौर्द्धदेहिकम्।
तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च" ॥
तथा रामायणे २। ७७। ३।
"दासीदासांश्च यानानि वेश्मानि सुमहान्ति च।
ब्राह्मणेभ्यो ददौ पुत्रो राज्ञस्तस्यौर्द्धदेहिकम्"॥
(और्द्धदेहिकम् इत्यपि स्यात् ॥)

और्द्धस्रोतसिकः, त्रि, (ऊर्द्धस्रोतस् + ठञ्।) ग्रैवः। इति शिकाण्डशेषः ॥ (और्द्धस्रोतसिकः। इत्यपि स्यात् ॥)

और्व्वं, क्ली, (उर्व्व्या भवम्। उर्व्वी + अण्।) पांशुवज्रवयम्। इति राजनिर्घण्टः ॥

और्व्वः, पुं, (और्व्वात् भृगुवंशीयात् ऋषेर्जातः। और्व्व + अण्। और्व्वर्षिक्रोधजत्वात्तथात्वम्।) वाड़वानलः। इत्यमरः ॥ स तु भूगोलस्य दक्षिणसीमा। तत्र सर्व्वे नरकाः दैत्याश्च वसन्ति। इति सिद्धान्तशिरोमणिः ॥ स्वनामख्यातो भृगुवंशीय ऋषिभेदः। तज्जन्मादिकथा, महाभारते चैत्ररथपर्व्वणि १७९ अध्याये। उक्ता। यथा,—

"ततो महीतलं तात क्षत्रियेण यदृच्छया ।
खनताधिगतं वित्तं केनचिद्भृगुवेश्मनि ॥
तद्वित्तं ददृशुः सर्व्वे समेताः क्षत्रियर्षभाः ।
अवमन्य ततः क्रोधाद्भृगूंस्तान्करणागतान् ॥
निजघ्नुः परमेष्वासाः सर्व्वांस्तान्निशितैः शरैः ।
आगर्भादवशेषान्तस्तेषां सर्व्वां वन्धसुराम् ॥
तत उच्छिद्यमानेषु भृगुष्वेवं भयात्तदा ।
भृगुपत्नी गिरिं दुर्गं हिमवन्तं प्रवेदिरे ॥
तासामन्यतमा गर्भं भयाद्भृगोर्महौजसम् ।
ऊरुणैकेन वामोरुर्भर्त्तुः कुलविवृद्धये ॥
तद्गर्भमुपलभ्याशु ब्राह्मणी या भयार्दिता ।
गत्वैका कथयामास क्षत्रियाणामुपक्करे ॥
ततस्ते क्षत्रिया जग्मुस्तं गर्भं हन्तुमुद्यताः ।
दृष्ट्वर्ब्राह्मणीं तेऽथ दीप्यमानां स्वतेजसा" ॥
"अथ गर्भः स भित्त्वोरु ब्राह्मणा निर्ज्जगाम ह ।
सूर्य्यान् दृष्ट्वा क्षत्रियानां मध्याह्नइव भास्करः ॥
ततश्चक्षुर्विहीनास्ते गिरिदुर्गेषु बभ्रमुः" ॥

अयमौर्व्वस्तु पितृवधामर्षात् क्षत्रियवधे कृत-प्रतिज्ञ उग्रे तपसि वर्त्तमानः पितृभिर्निवारितः । ततो यथाप्रतिज्ञो नाहं भवितुमुत्सहे इति जातग्रङ्गः अमोघत्वाच्च क्रोधवङ्केः पितॄनुक्तवान् । यथा तत्रैव १८१ अध्याये ।

"यश्चायं मन्युजो मेऽग्निर्लोकानादातुमिच्छति ।
दहेदेव च मामेव निगृहीतः स्वतेजसा ॥
भवताञ्च विजानामि सर्व्वलोकहितैषिणाम् ।
तस्माद्विधध्वं यच्छ्रेयो लोकानां मम चेश्वराः ॥

पितर ऊचुः ।

य एव मन्युजस्तेऽग्निर्लोकानादातुमिच्छति ।
अप्सु तं मुञ्च भद्रन्ते लोका ह्यप्सु प्रतिष्ठिताः ॥
आपोमयाः सर्व्वरसाः सर्व्वमापोमयं जगत् ।
तस्मादप्सु विमुञ्चेमं क्रोधाग्निं द्विजसत्तम ॥
अयं तिष्ठतु ते विप्र यदिच्छसि महोदधौ ॥
मन्युजोऽग्निर्दहन्नापो लोका ह्यापोमयाः स्मृताः ॥
एवं प्रतिज्ञा सत्येयं तवानघ भविष्यति ।
नचैवं समरा लोका गमिष्यन्ति पराभवम् ॥

वशिष्ठ उवाच ।

ततश्च क्रोधजं तात और्व्वोऽग्निं वरुणालये ।
उत्ससर्ज्ज स चैवाप उपयुङ्क्ते महोदधौ ॥
महद्ययश्चिरो भूत्वा यत्तद्वेदविदो विदुः" ॥)

(उर्व्वस्यापत्यम् ।) षष्ठप्रवरान्तर्गतमुनिविशेषः । इति पुराणम् ॥

और्व्वशेयः, पु, (उर्व्वस्याः अपत्यम् । उर्व्वशी + ढक् ।) अगस्त्यमुनिः । इति हेमचन्द्रः ॥

(अस्य जन्मकथा पुराणेषूक्ता यथा,

"तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् ।
रेतश्चस्कन्द तत् कुम्भे न्यपतद्दाशतीवरे ॥
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वशिष्ठश्च द्वावृषी संबभूवतुः" ॥
उर्व्वश्यां गर्भजाताः पुरूरवसः सप्त पुत्राः ।
तत्कथा हरिवंशे २५ अध्याये दृश्या ॥)

और्वूक, क्ली, (उलूकानां समूहः । अण् ।) उलूक-समूहः । इति जटाधरः ॥ पेचार भाँक् इति भाषा ॥

और्लूक्यः, पुं, (उलूकस्य मनेरपत्यं पुमान् । उलूक + गर्गादित्वात् यञ् ।) वैशेषिकः । वैशेषिकदर्शन-वेत्ता । इति हेमचन्द्रः ॥ (अयं खलु कणाद-इत्याख्यया प्रसिद्धः ॥)

और्णीरं, क्ली, (उश्यते । वप् + ईरन् । प्रज्ञाद्यण् । ५ । ४ ३९ । यद्वा उर्णीरस्येदं "तस्येदम्" । ४ । ३ । १२० । इत्यण् ।) शयनासनम् । इत्यमरः ॥ शयनं खापः शय्या वा आसनं पीठादि । शयनासनं समुदितमिति स्वामी । एषणमिति सुभूतिः । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते राज-धर्म्मानुशासनपर्व्वणि १२ । ६० । ३१ ।
"क्षौमं वैकृतमौर्णीरमुपानद्यजनानि च ।
यातयामानि देयानि शूद्राय परिचारिणे" ॥)
उर्णीरजम् । चामरम् । दण्डः । इति हेमचन्द्रः ॥

और्णीरः, पुं, (उर्णीरस्यायम् । उर्णीर + अण् ।) चामरदण्डः । इत्यमरः ॥

और्वण्यं, क्ली, (उर्वण + भावार्थे ष्यञ् ।) कटुरसः । उर्वणं मरीचं तस्य भावः ॥

और्वधं, क्ली, (ओषधेरिदम् । ओषधिरेव वा "ओ-षधेरजातौ" ५ । ४ ३७ । इत्यण् ।) रोगनाशकद्रव्यं । ओषधिभवं भवार्थे ष्यञ्प्रत्ययः । तत्पर्य्यायः । भेष-जम् २ भैषज्यम् ३ अगदः ४ जायुः ५ । इत्यमरः ॥ जैत्रम् ६ आयुर्य्यागः ७ गदारातिः ८ अमृतम् ९ आयुर्द्धयम् १० । इति वैद्यकम् ॥
("औषधं शमनञ्चेति समासादौषधं द्विधा ।
शरीरजानां दोषाणां क्रमेण परमौषधम् ॥
वह्निर्विरेको वमनं तथा तैलं घृतं मधु ।
धीर्धैर्य्यात्मादिविज्ञानं मनोदोषौषधमग्र्यम्" ॥
इति वाभटे सूत्रस्थाने । १ अध्याये ॥
"धन्वसाधारणे देशे समे सम्मृत्तिके शुचौ ।
श्मशानचैत्ययतनस्वभ्रवल्मीकवर्ज्जिते ॥
मृदौ प्रदक्षिणजले क्षुरशोभिहरिद्वति ।
अफालकृष्टेऽनाक्रान्ते पादपैर्बहुलवत्तरैः ॥
ग्रस्यते भेषजं जातं युक्तवर्णरसादिभिः ।
जन्वदग्धं दवादग्धमविदग्धञ्च वैजातैः ॥
भूतैश्छायातपाभ्याञ्चैर्यथाकालञ्च सेवितम् ।
अवगाढ़महामूलमुदीचीं दिशमाश्रितम् ॥
अथ कल्याणचरितः आद्यः शुचिरुपोषितः ।
मन्त्रौषादौषधं सम्यक् खितं काले च कल्पयेत् ।
सन्तीरं तदसम्पत्तावनतिक्रान्तवत्सरम् ।
ऋते गुड़ूचतक्षौद्रधान्यलाजाविड़ङ्कृतः" ॥
इति तत्रैव कल्पस्थाने । ६ अध्याये ॥
"यथाविधं यथाशस्त्रं यथाग्निरग्निर्यथा ।
तथौषधमविज्ञातं विज्ञातममृतं यथा ॥
औषधं ह्यनभिज्ञातं नामरूपगुणैस्त्रिभिः ।
विज्ञातमपि दुर्युक्तमनर्थायोपपद्यते ॥
योगादपि विषं तीक्ष्णमुत्तमं भेषजं भवेत् ।
भेषजं वापि दुर्युक्तं तीक्ष्णं सम्पद्यते विषम् ॥
तस्मान्न भिषजा युक्तं युक्तिवाह्येन भेषजम् ।
धीमता किञ्चिदादेयं जीवितारोग्यकाङ्क्षिणा ॥
कुर्य्यान्निपतितो मूर्द्धि सप्तेषं वासवाग्निजः ।
सप्तेषमातुरं कुर्य्यान्नत्वज्ञमतमौषधम् ॥

तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।
स एव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत्" ॥
इति चरके सूत्रस्थाने । १ अध्याये ॥

"करणं पुनर्भेषजम् । भेषजं नाम तद्द्रव्यदुपकर-णायोपकल्पते भिषजो धातुसाम्याभिनिर्वृत्तौ प्रयतमानस्य विशेषतश्चोपायात्तेभ्यः तद्विविधं व्यपाश्रयभेदात् । दैवव्यपाश्रयं युक्तिव्यपाश्रयञ्च । तत्र दैवव्यपाश्रयं मन्त्रौषधमणिमङ्गलबल्युपहार-होमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगम-नादि । युक्तिव्यपाश्रयं संशोधनोपशमने चेष्टाश्च दृष्टफलाः एतदेव भेषजमङ्गमेदादपि द्विविधं । द्रव्यभूतमद्रव्यभूतञ्च । तत्र यद्द्रव्यभूतं तदुपायाभि-धास्यते । उपायो नाम भयदर्शन-विस्मापन-क्षोभ-ण-हर्षण-भर्त्सन-बध-बन्ध-खप्न-संवाहनादिरमूर्त्तो भावः यथोक्ताः सिद्धुपायाश्च । यत्तु द्रव्यभूतं तद्दमनादिषु योगमुपैति ।

तस्यापीयं परीक्षा इदमेवं प्रकृत्या एवंगुणमेवं प्रभावमस्मिन् देशे जातमस्मिन्नृतौ एवं गृहीत-मेवं निहितमेवमुपस्कृतमनया मात्रया युक्तमस्मिन् ऋतौ एवंविधस्य पुरुषस्यैतावन्तदोषमपकर्षयति उपशमयति वा अन्यदपि चैवंविधं भेषजमभूचा-नेनानेन वा विशेषेण युक्तमिति" । इति च तत्रैव विमानस्थाने ८ अध्याये ॥

पर्य्यायानाह चरकः सिद्धिस्थाने । १अः ।
"चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम् ।
प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम् ॥
विद्याद्भेषजनामानि भेषजं द्विविधञ्च तत् ।
स्वस्यस्यौजस्करं किञ्चिल्लिखिदार्त्तस्य रोगनुत् ॥
अभेषजञ्च द्विविधं बाधनं सानुबाधनम्" ।
तथा, सुश्रुते सूत्रस्थाने ३७ अध्याये यथा,—

"स्रुतभग्नार्करोगमिषमवल्मीकक्षश्मशानाद्यतनदे-वतायतनसिक्ताभिरनुपहतामनूषरामभङ्गुराम-दूरादेकां स्निग्धां प्ररोहवतीं मृदीं स्थिरां समां श्लक्ष्णां गौरीं लोहितां वा भूमिमौषधार्थं परी-क्षेत तस्यां जातमपि क्षुमि-विष-ग्रस्तातप-पवन-दहन-तोयसम्बाध-मार्गैरनुपहतमेकरसं पुष्टं पुष्प-वगाढ़मूलमुदीच्यां चौषधमाददीतैतौषधभूमिप-रीक्षाविशेषसामान्यं ॥

विशेषस्तु । तत्राम्रवती स्थिरा गुर्व्वी श्यामा श्लक्ष्णा वा शूलहस्तग्रस्तप्राया खगुणभूयिष्ठा ॥ स्निग्धा मृदीतला सम्मोदका स्निग्धशस्यलताकोमलह-स्तप्राया शुक्लाम्बुगुणभूयिष्ठा ॥ नानावर्णा लम्बाम्र-वती प्रविरलाल्पापाण्डुवृक्षप्ररोहाम्रिगुणभूयिष्ठा ॥ रूक्षा भस्मरासभवर्णा तनुरूक्षकोटरास्थिरसवृक्ष-प्रायाऽनिलगुणभूयिष्ठा ॥ मृदी समा शुभ्रवल्मीकरसजला सर्व्वतोऽसारवृक्षा महापर्व्वतवृक्ष-प्राया श्यामा चाकाशगुणभूयिष्ठा ॥

तत्र केचिदाङ्गराचार्य्याः । प्रावृट्-वर्षा-शर-द्धेमन्त-वसन्त-ग्रीष्मेषु यथासङ्ख्यं मूल-पत्र-त्वक्-क्षीरसार-फलान्याददीतेति तत्तु न सम्यक् कस्मात् सौम्याग्नेयत्वाज्जगतः । सौम्यान्यौषधानि सौम्येषु ऋतुषु आददीताग्नेयान्याग्नेयेष्वेवमशेषगुणानि

भवन्ति । सौम्यान्यौषधानि सौम्येषु ऋतुषु गृहीतानि सोमगुणभूयिष्ठायां भूमौ जातान्यतिमधुरस्निग्धगृहीतानि जायन्ते । एतेन ग्रहेण व्याख्यातम् ॥

तत्र एथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि विरेचनद्रव्याण्यादित्याग्नेयाकाशमारुतगुणभूयिष्ठायां वमनद्रव्याणि । उभयगुणभूयिष्ठायामुभयतो भागानि । आकाशगुणभूयिष्ठायां संशमनान्येवं बलवत्तराणि भवन्ति । सर्व्वाण्येव चाभिनवान्यन्यत्र मधु-घृत-गुड़-पिप्पली-विड़ङ्गेभ्यः । सर्व्वाण्येव सक्षीराणि वीर्य्यवन्ति तेषामसम्यक्त्वावनतिक्रान्तसंवत्सराण्यादीतेति" ॥)

नानारोगहरौषधादिर्यथा । रुद्र उवाच ।

"एवं धन्वन्तरिर्विष्णुः सुश्रुतादीनुवाच ह ।
हरिः पुनर्हरायाह नानारोगान् रुगर्दनान्" ॥

हरिरुवाच ।

"सर्व्वज्वरेषु प्रथमं कार्य्यं शृङ्गवर! लङ्घनम् ।
क्वथितोदकपानञ्च तथा निर्व्वातसेवनम् ॥
अग्निसेदो ज्वरास्त्वेवं नाशमायान्ति हीश्वर! ।
वातज्वरहरः क्वाथो गुडूच्या मुस्तकेन च ॥
दुरालभयैव कृतं पित्तज्वरहरं भृगु ।
शुण्ठीपर्पटमुस्तैश्च बालकोशीरचन्दनैः ॥
साध्यः क्वाथः श्लेष्मजन्तु सशुण्ठिः सदुरालभः ।
सबालकः सर्व्वज्वरं सशुण्ठिः सहपर्पटः ॥
किराततिक्तकैर्वापि गुडूचीसुण्ठितिक्तकैः ।
पित्तज्वरहरः स्याच्च भृगवत्र्यं योगमुत्तमम् ॥
बालकोशीरपाठाभिः कण्टकारिकमुस्तकैः ।
ज्वरनुच्च कृतक्वाथस्तथा वै सुरदारुणा ॥
धन्याकनिम्बमुस्तानां समधुः स च शृङ्गवर! ।
पटोलपत्रयुक्तश्च गुडूचीत्रिफलायुतः ॥
पीतोऽखिलज्वरहरः क्षुधाकृद्दीपनोत्तिदम् ।
हरीतकीपिप्पलीनामामलीचित्रकोद्भवम् ॥
चूर्णं गुडश्च क्वथितं धन्याकोशीरपर्पटैः ।
आमलक्या गुडूच्या च मधुयुक्तं सचन्दनम् ॥
समस्तज्वरनुत् स्याच्च सन्निपातहरं भृगु ।
हरिद्रानिम्बत्रिफलामुस्तकैर्देवदारुणा ॥
कषायं कटुरोहिण्या सपटोलं सपञ्चकम् ।
त्रिदोषज्वरनुत् स्याच्च पीतन्तु क्वथितं जलम् ॥
कण्टकारिनागरेण गुडूच्या एष्करेण च ।
जग्ध्वा नागबलाचूर्णं श्वासकासादिनुद्भवेत् ॥
कफवातज्वरे देयं जलमुष्णं पिपासिने ।
मण्डो वा मुद्गयूषं वा शाल्यन्नं वाथ यूषवत् ॥
ज्वरार्त्तमानुषे देयं ज्वरहानिस्तदा भवेत् ।
विल्वपर्पटकोशीरघनचन्दनसाधितम् ॥
दद्यात् सुशीतलं वारि छर्दिकृद्दिव्यरदाहनुत् ।
विल्वादिपञ्चमूलस्य क्वाथः स्यादातिके ज्वरे ॥
पाचनं पिप्पलीमूलं गुडूचीविल्वभेषजम् ।
वातज्वरे त्वयं क्वाथो दत्तः शान्तिकरः परः ॥
पित्तज्वरनुत् समधुः क्वाथः पर्पटनिम्बयोः ।
विधाने क्रियमाणेऽपि यस्य संज्ञा न जायते ॥
पादयोस्तु ललाटे वा दहेल्लोहशलाकया ।
तिक्ता पाठा पटोलश्च विशाला त्रिफला त्रिवृत् ॥
सत्तोरो भेदनः क्वाथः सर्व्वज्वरविशोधनः" ॥
इति गारुड़े १७९ अध्यायः ॥ * ॥

भगवानुवाच ।

"सप्तरात्रात् प्रजायन्ते खल्वीटस्य कचाः शुभाः ।
दग्धहस्तिदन्तलेपात् साजात्क्षीररसाञ्जनात् ॥
भृङ्गराजरसेनैव चतुर्भागेण साधितम् ।
केशरञ्जिकरं तैलं गुञ्जाचूर्णान्वितेन च ॥
एला मांसी कुष्ठमुशीरयुक्तमभ्यङ्कृतः शिव! ।
गुञ्जाफलं ममाप्येव लेपनं चेन्द्रलुप्तनुत् ॥
आम्रास्थिचूर्णलेपाद्धि केशाः स्निग्धा भवन्ति वै ।
वटमूला घना दीर्घाः स्निग्धाः स्युर्नात्यन्ति च ॥
विड़ङ्गगन्धपाषाणसाधितं तैलमुत्तमम् ।
सचतुर्गुणगोमूत्रं समनःशिलमेव च ॥
शिरोऽभ्यङ्गात्क्षिरोजन्मयूकालिक्षाश्चयं नयेत् ।
नवदग्धशङ्खचूर्णं रसोसकलेपितः ॥
कचाः श्लक्ष्णा महाश्लक्ष्णा भवन्ति वृषभध्वज! ।
भृङ्गराजं लोहचूर्णं त्रिफला बीजपूरकम् ॥
नीली च करवीरश्च गुड़मेतैः समैः पृतम् ।
पलितानीह कृष्णानि कुर्य्यात्तेषान्महौषधम् ॥
आम्रास्थिमज्जा त्रिफला नीली च भृङ्गराजकम् ।
जीर्णं पङ्कलौहचूर्णं काङ्क्षिकं कृष्णकेशकृत् ॥
चक्रमर्दकबीजानि कुष्ठमेरण्डमूलकम् ।
अत्युष्णकाङ्क्षिकं पिट्वा लेपान्मस्तकरोगनुत् ॥
सैन्धवश्च वचा हिङ्गु कुष्ठं नागेश्वरं तथा ।
घृतपुष्पा देवदारु एभिस्तैलन्तु साधितम् ॥
गोपुरीषरसेनैव चतुर्भागेण संयुतम् ।
तत्कर्णभरणाद्रुद्र! कर्णशूलं क्षयं नयेत् ॥
मेषमूत्रसैन्धवाभ्यां कर्णयोर्भरणात् शिव! ।
कर्णयोः पूतिनाशः स्यात् क्षमिसावादिकस्य च ॥
मालतीपुष्पदलयो रसेन भरणात् तथा ।
गोजलेनैव पूरेण कर्णस्रावो विनश्यति ॥
कुलत्थाधमरीबीजानि तगरं मधु पिप्पली ।
अपामार्गोऽश्वगन्धा च वृहती सितसर्षपाः ॥
यवाश्चिञ्चाः सैन्धवश्च पादिकोद्वर्त्तनं शुभम् ।
लिङ्गबाऊस्तनानाञ्च कर्णयोर्च्छिद्रदूषवेत् ॥
कटुतैलं भल्लातकं वृहतीफलदाड़िमम् ।
वल्कलैः साधितं लिप्तं लिङ्गं तेन विवर्द्धते" ॥
इति गारुड़े १८० अध्यायः ॥ * ॥

हरिरुवाच ।

"श्लोमाञ्जनपत्ररसं मधुयुक्तं हि चक्षुषोः ।
भरणाद्रोगहरणं भवेन्नात्रास्त्यच संशयः ॥
अशीतितिलपुष्पाणि जात्याश्च कुसुमानि च ।
मया निम्बामला मुण्ठी पिप्पली तण्डुलीयकम् ॥
क्वाथमुष्णां वटिं कुर्य्यात् पिट्वा तण्डुलवारिणा ।
मधुना सह सा चाक्ष्णोरञ्जनात्तिमिरादिनुत् ॥
विभीतकास्थिमज्जा तु शृङ्गनाभिर्मनःशिला ।
निम्बपत्रमरीबीजानि अजामूत्रेण पेषयेत् ॥
पुष्पं राज्यन्धतां हन्ति तिमिरं पटलं तथा ।
चतुर्भागाणि शृङ्गस्य तदर्द्धेन मनःशिला ॥
सैन्धवश्च तदर्द्धेन एतत् पिष्टोदकेन तु ।
क्वाथमुष्णान्तु वटिकां कृत्वा नयनमञ्जयेत् ॥
तिमिरं पटलं हन्ति पिटकस्य महौषधम् ।
त्रिकटु त्रिफला चैव करञ्जस्य फलानि च ॥
सैन्धवं रजनी द्वे च भृङ्गराजरसेन हि ।
पिट्वा तदञ्जनादेव तिमिरादिविनाशनम् ॥
अटरूषकमूलन्तु काञ्जिकापिष्टमेव च ।
तेनालिभूरिलेपाच्च चक्षुःशूलं विनश्यति ॥
सतक्रं बदरीमूलं पीतमल्पिन्यथां हरेत् ।
सैन्धवं कटुतैलञ्च अपामार्गस्य मूलकम् ॥
क्षीरकाञ्जिकसंपृक्तं ताम्रपात्रे च तेन च ।
अञ्जनात् पिटकस्यैव नाशो भवति शृङ्गर! ॥
विल्वनीलीकारमूलं पिष्टमम्बुजलेन च ।
अनेनाञ्जितमात्रेण नश्यन्ति तिमिराणि हि ॥
पिप्पलीकृतकञ्चैव हरिद्रामलकं वचा ।
खदिरपिण्डवर्त्तिश्च अञ्जनं नेत्ररोगनुत् ॥
नीरपूर्णमुखो धौति वृहद्वातेन योऽक्षिणी ।
प्रभाते नेत्ररोगेभ्य नित्यं सर्व्वैः प्रमुच्यते ॥
शुक्लैरण्डस्य मूलेन पत्रेणापि प्रसाधितम् ।
छागदुग्धं सेकयुक्तं चक्षुषोर्वातरोगनुत् ॥
चन्दनं सैन्धवं रक्तपलाशश्च हरीतकी ।
पटोलकुसुमं नीली चक्रिका हरतेऽञ्जनात् ॥
गृञ्जामूलं छागमूत्रपृष्टं तिमिरनुच्च तत् ।
रौप्यताम्रसुवर्णानां हस्तपृष्टं शलाकया ॥
घृतं तद्वमनं रुद्र! कामलाव्याधिनाशनम् ।
घोषाफलमधाभ्रातं पीतं कामलनाशनम् ॥
दूर्व्वादाड़िमपुष्पन्तु व्यल्पकहरीतकी ।
नासाशिरारक्तनुत् स्यान्नस्यादे खरसेन हि ॥
सुपिष्टं जिङ्गिनीमूलं तद्रसेन वृषध्वज! ।
नस्यदानाद्दिनश्येत नासार्शो नीललोहित! ॥
गव्यं घृतं सर्व्वरसं रुद्र! धन्याकसैन्धवम् ।
धुस्तूरकं गैरिकञ्च एतैः साधितसिक्थकम् ॥
सतैलं व्रणनुत् स्याच्च स्फुटितोचटितोधरे ।
जातीपत्रञ्च चर्व्वित्वा विक्षतं मुखरोगनुत् ॥
भक्ष्यात् केशरबीजस्य दन्ताः स्युश्चलिताः स्थिराः
मुस्तकं कुष्ठमेला च यष्टीमधुकवालुकम् ॥
धन्याकमेतद्दन्तान्मुखदुर्गन्धनुत् हर! ।
कषायं कटुकं वापि तिक्तं वै तस्य भक्षणात् ॥
तैलयुक्तस्य नित्यं स्यात् मुखदुर्गन्धनाशयः ।
दन्तव्रणानि सर्व्वाणि क्षयं गच्छन्त्यनेन तु ॥
काङ्क्षिकस्य सतैलस्य गण्डूषकवलास्थितिः ।
ताम्बूलचूर्णदग्धस्य मुखस्य व्याधिनुच्छिव! ॥
परित्यक्तः श्लेष्मगणः शुण्ठीचर्वणतो यथा ।
मातुलुङ्गदलान्वेला यष्टीमधु च पिप्पली ॥
जातीपत्रमथैषाञ्च चूर्णं लीढ़ं तथा घृतम् ।
श्वेपालिकाजटायाश्च चर्वणं गलगुण्ठिनुत् ॥
नासाशिरारक्तकर्षान्नश्येत् शृङ्गर! जिङ्गिका ।
रसः शिरीषबीजानां हृदस्य चतुर्गुणः ॥
तेन पक्वेन भूतेश! नस्यं मस्तकरोगनुत् ।
गलरोगा विनश्यन्ति नस्यमात्रेण तत्क्षणात् ।
दन्तकीटविनाशः स्यात् गुञ्जामूलस्य चर्व्वणात् ।
काकजङ्घा खुही नीली कषायाम्लकमूलकम् ॥
दन्ताक्रान्तं दन्तशूलं क्रिमीन्नाशयते शिव! ।
घृतं कर्कटपादेन दुग्धोन्मिश्रेण साधितम् ।
तेन चाभ्यञ्जिता दन्ताः कुर्य्युः कटकटाम्हि ।

लिप्ताः कर्कटपादेन केवलेनाथ वा द्विजाः ॥
त्रिसप्ताहं वारिपिष्टा ज्योतिष्मत्याः फलस्य हि ।
मञ्जाभया च शुक्रस्य लेपादङ्गकलङ्गनुत् ॥
लोध्रकुङ्कुममञ्जिष्ठा लोहकालीयकानि च ।
यवतण्डुलमेतैश्च यष्टीमधुसमन्वितैः ॥
वारिपिष्टैर्वक्त्रलेपः स्त्रीणां क्षोभनवक्त्रकृत् ।
द्विभागच्छागदुग्धेन तैलप्रस्तन्तु साधितम् ॥
रक्तचन्दनमञ्जिष्ठालाक्षाणां कर्षकेण वा ।
यष्टीमधुकुङ्कुमाभ्यां सप्ताहान्मुखकान्तिकृत् ॥
शुण्ठी च पिप्पलीचूर्णं गुडूची कणटकारिका ।
एभिश्च क्वथितं वारि पीतञ्चाग्निं करोति वै ॥
वातशूलक्षयश्चैव सुरयक्ष्मखेश्वर !।
करञ्जपर्पटोशीरं दहती कटुरोहिणी ॥
गोचुरं क्वथितं त्वेभिर्वारि पीतं अमापहम् ।
दाहपित्तज्वरं क्षोभं मूर्च्छाञ्चैव क्षयं नयेत् ॥
मध्वाज्यपिप्पलीचूर्णं क्वथितं क्षीरसंयुतम् ।
पीतं हृद्रोगकासस्य विषमज्वरनुद्भवेत् ॥
क्वाथौषधीनां सर्व्वासां कर्षार्द्धं ग्राह्यमेव च ।
वयोऽनुरूपतो ज्ञेयो विशेषो वृषभध्वज !॥
दुग्धं पीतन्तु संयुक्तं गोपुरीषरसेन च ।
विषमज्वरनुत् स्याच्च काकजंघारसस्तथा ॥
सशुण्ठीक्वथितं क्षीरमजाया ज्वरनुद्भवेत् ।
यष्टीमधु मुस्तकञ्च सैन्धवं दहतीफलम् ॥
एतैर्नस्यप्रदानाच्च निद्रा स्यात् पुरुषस्य च ।
मरीचमधुशुण्ठीनां नस्यान्निद्रा भवेच्छिव !॥
मूलन्तु काकजङ्घाया निद्राकृत् स्यात् शिरःस्थितम् ।
सिद्धं तैलं काञ्जिकेन तथा सर्ज्जरसेन च ॥
शीतोदकसमायुक्तं लेपात् सन्तापनाशनम् ।
शोणितज्वरदाहेभ्यो जातसन्तापनुत्तथा ॥
शूकशैवालमञ्जाश्च शुण्ठीयाषाणभेदकम् ।
शोभाञ्जनं गोचुरं वा वरुणच्छदमेव च ॥
शोभाञ्जनस्य मूलञ्च एतैः क्वथितवारि च ।
दत्त्वा हिङ्गु यवक्षारं पीतं वातविनाशनम् ॥
पिप्पली पिप्पलीमूलं तथा भल्लातकं शिव !।
वार्य्येतैः क्वथितं पीतं वरशूलापसारकृत् ॥
अश्वगन्धामूलकाभ्यां सिद्धा वल्मीकमृत्तिका ।
एतया मर्द्दनात् रुद्र ! उरस्तम्भः प्रशाम्यति ॥
दहतीकस्य वै मूलं संपिष्टमुदकेन च ।
पीतं भिञ्जिनिवातस्य विपाटनकृदेव च ॥
पीतं तक्रेण मूलं च आर्द्रस्य तगरस्य च ।
हरेत् भिञ्जिनिवातं वै दत्तमिन्द्राग्निर्यथा ॥
अस्थिसंहारमेकेन भल्लेन सह खादितम् ।
पीतं मांसरसेनापि वातनुच्छास्थिभङ्गकृत् ॥
घृतलिप्तं शल्लकञ्च छागक्षीरेण संयुतम् ।
तल्लेपात् पादयोर्न्नश्येत् सन्तापो नात्र संशयः ॥
मध्वाज्यं सैन्धवं सिक्थं गुडगैरिकगुग्गुलैः ।
ससर्ज्जरस-स्फटितः कोमलोऽङ्घ्रेश्च लेपनात् ॥
कटुतैलेन लिप्तो वै विधुमाग्नौ प्रतापितः ।
मृत्तिकाखादितः पादः समः स्याद्वृषभध्वज !॥
सर्ज्जरसः सिक्थकञ्च जीरकञ्च हरीतकी ।
तत्साधितघृताभ्यङ्गो ह्यग्निदग्धव्यथापनुत् ॥
तिलतैलञ्चाग्निदग्धव्रणभस्मसमन्वितम् ।
व्यग्निदग्धं व्रणं नश्येद्वृक्षशृङ्गः कृतलेपतः ॥
नवनीतं माहिषञ्च दुग्धपिष्टतिलानि च ।
भल्लातकव्रणं नश्येत् दृच्छल्यं तस्य लेपतः ॥
शूरपुङ्खा लज्जालुका पाठा चैषान्तु मूलकम् ।
जलपिष्टं तस्य लेपात् शस्त्राघातः प्रशाम्यति ॥
मूलञ्च काकजङ्घायास्तिराचैव शेषतः ।
पाकपूतिवेदनाघ्नं हन्ति वै रोहिते व्रणे ॥
सजलं तिलतैलञ्च अपामार्गस्य मूलकम् ।
तत्लेकदानान्नश्येत प्रहारोद्भववेदना ॥
अभया सैन्धवं शुण्ठिरेतत् पिष्टोदकेन तु ।
भक्षयित्वा ह्यजीर्णस्य नाशो भवति शङ्कर !॥
कटिबद्धं निम्बमूलमस्थिशूलहरं भवेत् ।
शूणमूलं सताम्बूलं पीतमिन्द्रियकम्पहृत् ॥
अन्नसिद्धं हरिद्रा च श्वेतसर्षपमूलकम् ।
बीजानि मङ्कुलदिने एषामुद्वर्त्तनं समम् ॥
सप्तरात्रप्रयोगेण शुभदेहकरं भवेत् ।
श्वेतापराजितापत्रं निम्बपत्ररसेन तु ॥
नस्यदानात् डाकिनीनां मातॄणां ब्रह्मरक्षसाम् ।
मोक्षः स्यान्मधुसारेण नस्याच्च वृषभध्वज !॥
मूलं श्वेतजयन्त्यास्च पुष्यर्क्षे तु समाहृतम् ।
श्वेतापराजितार्कस्य तथा चित्रस्य मूलकम् ॥
कृत्वा तु वटिकां नारी तिलकेन वशी भवेत् ॥
पिप्पली लोहचूर्णन्तु शुण्ठिश्यामलकानि च ।
समानि रुद्र ! जानीयात् सैन्धवं मधु शर्करा ॥
उदुम्बरप्रमाणेन सप्ताहं भक्षणात् समम् ।
पुमांश्च बलवान् स्याच्च जीवेद्वर्षशतद्वयम् ॥
ॐ ठ ठ ठ इति ।
सर्व्ववश्यप्रयोगेषु प्रयुक्तः सर्व्वकामकृत् ॥
संगृह्य कृत्तात् काकस्य निलयं प्रदहेच्च तत् ।
चितामौ भस्म तच्छ्रोर्दत्तं शिरसि शङ्कर !॥
तमुचाटयते रुद्र ! पृथग् तं योगमुत्तमम् ।
निक्षिप्तञ्च पुरीषं वै वनमूषिकचर्म्मणि ॥
कक्षां तन्तु निबद्धं वै कुर्य्यान्मलनिरोधनम् ।
कृष्णकाकस्य रक्तेन यस्य नाम प्रलिख्यते ॥
चूतदलेऽमेध्यमध्ये ततो निक्षिप्यते हर !।
स खाद्यते काकवृन्दैर्नारी पुरुष एव वा ॥
शर्क्करा मध्वजाक्षीरं तिलगोचुरकं समम् ।
पाण्डुत्वं नाशयेद्रुद्र ! आस्वादितमिदं हर !॥
उलूककृष्णकाकस्य चिह्नस्याथ समिश्रितम् ।
रुधिरेण समायुक्तं यथोर्न्नाभा च दृश्यते ॥
तयोर्दृयोर्महद्वैरं भवेन्नास्त्यत्र संशयः ।
भावितं कृत्तदुग्धेन रोहितस्य शुशस्य च ॥
मांसं तत्साधितं तैलं तदभ्यङ्क्ष रोगनुत् ।
चन्दनोदकनस्याच्च रोमोत्थानं भवेत् पुनः ॥
हस्ते लाङ्गलिकाकन्दं गृहीतं तेन लेपितम् ।
शरीरं येन स पुमान् बुद्धेर्दर्पं व्यपोहति ॥
पराक्रमेण युक्तस्य शूरस्य पुरुषस्य हि ।
वर्त्तिर्य्यस्य पुरीषेण कृतगर्भा तु भाविता ॥
मयूररुधिरेणैव जीवमाहरते शिव !।
व्यरितानां भुजङ्गानां विलस्थानामधीश्वर !॥
देहस्थितामौ दग्धस्त सर्पस्याजगरस्य हि ।
तद्भस्म सम्मुखे क्षिप्तं शत्रूणां भङ्गदृभवेत् ॥
मन्त्रेणानेन तत् क्षिप्तं महाभङ्गकरं रिपोः ।
ॐ ठ ठ ठ ठाही ठाही ठाही स्वाहा ।
ॐ उदरः पाही पाही स्वाहा ॥
सुदर्शनाया मूलन्तु पुष्यर्क्षे तु समाहृतम् ।
निःक्षिप्तं गृहमध्ये तु भुजङ्गा वर्जयन्ति तम् ॥
मार्ज्जारपललं विष्ठा हरितालञ्च भावितम् ।
छागमूत्रेण तल्लिप्तो मूषिको मूषिकान् हरेत् ।
युक्तो हि मन्दिरे रुद्र ! नात्र कार्य्या विचारणा ।
त्रिफलार्ज्जुनपुष्पाणि भल्लातकशिरीषकम् ॥
लाक्षा सर्ज्जरसश्चैव विड्ङ्गश्चैव गुग्गुलुः ।
एतैर्धूपो मक्षिकाणां मशकानां विनाशनः" ॥
इति गारुडे १८१ अध्यायः ॥ * ॥

हरिरुवाच ।

"ब्रह्मदण्डी वचा कुष्ठं प्रियङ्गुर्नागकेशरम् ।
दद्यात्ताम्बूलसंयुक्तं स्त्रीणां मन्त्रेण तद्वशम् ॥
ॐ नारायणायेति स्वाहा ।
ताम्बूलं यस्य दीयेत स वशी स्यात् समन्ततः ।
ॐ हरि हरि स्वाहा ॥
गोदन्तहरितालञ्च संयुक्तं काकजिह्वया ।
चूर्णं कृत्वा यस्य शिरे दीयते स वशी भवेत् ॥
श्वेतसर्षपनिर्म्मोक्यं यद्गृहे तद्विनाशकृत् ।
वैभीतकं शाखोटकं मूलं पत्रञ्च संयुतम् ॥
स्थाप्यते यद्गृहद्वारे तत्र वै कलहो भवेत् ॥
खञ्जरीटस्य मांसन्तु मधुना सह पेषयेत् ।
ऋतुकाले योनिलेपात् पुरुषो दासतामियात् ॥
अगुरु गुग्गुलुञ्चैव नीलोत्पलसमन्वितम् ।
गृहेन धूपयित्वा तु राजद्वारे प्रियो भवेत् ॥
श्वेतापराजितामूलं पिष्टं रोचनया युतम् ।
यं पश्येत्तिलकेनैव वशी कुर्य्यान्नृपाणये ॥
काकजिह्वा वचा कुष्ठं निम्बपत्रं सकुङ्कुमम् ।
आत्मरक्षं सभावेयं वशी भवति मानवः ॥
आरण्यस्य विड़ालस्य गृहीत्वा रुधिरं शुभम् ।
करञ्जतैले तद्भाव्य रक्ताग्नेः कज्जलं ततः ॥
पातयेत् पद्मसूत्रेण अदृश्यः स्यात् तदञ्जनात् ॥
ॐ नमः खड्गवज्रपाशाय महायक्षसेनापतये स्वाहा । ॐ वज्र क्रीं क्रीं वरसंयुक्ता त्वरिता विद्या ॐ मातङ्गीरि स्तम्भय स्वाहा ।
सहस्रं परिजप्या तु विद्येयं चौरवारिणी ।
महासुगन्धिकामूलं शुक्लं स्तम्भेत् कटौ स्थितम् ॥
ॐ नमः सर्व्वसत्त्वेभ्यो नमः सिद्धिं कुरु कुरु स्वाहा ।
सप्ताभिमन्त्रितं कृत्वा करवीरस्य पुष्पकम् ।
स्त्रीणामग्रे भ्रामयेच्च लग्नाद्वै सा वशा भवेत् ॥
ब्रह्मदण्डी वचा पत्रं मधुना सह पेषयेत् ।
अङ्गलेपाच्च वनिता नान्यं भर्त्तारमिच्छति ॥
पुत्रदण्डीशिफा वक्त्रे क्षिप्ता शुक्रस्य स्तम्भनम् ।
मूलं जयन्त्या वक्त्रस्थं व्यवहारे जयप्रदम् ॥
अपराजिताशिफां दद्यान्नीलोत्पलसमन्विताम् ।
ताम्बूलेन प्रदानाच्च वशीकरणमुत्तमम् ॥
रोचनागागपुष्पाणि बिल्वपुष्पं प्रियङ्गवः ।
कुङ्कुमं चन्दनञ्चैव तिलकेन जगद्वशेत् ॥
ॐ क्रां गौरि देवि सौभाग्यं पुत्रवश्यादि देहि मे ।

ॐ क्रीं लक्ष्मि! देहि सौभाग्यं सर्व्वत्रैलोक्यमोहनम्।
दुरालभा वचा कुष्ठं कुङ्कुमञ्च शतावरी।
तिलतैलेन संयुक्तं योनिलेपादशो नरः॥
निम्बकाष्ठस्य धूपेन धूपयित्वा भगं स्त्रियाः।
सुभगा स्यात् सा च रुद्र! पतिर्दासो भविष्यति॥
माहिषं नवनीतञ्च कुष्ठञ्च मधुयष्टिका।
सौभाग्यं भगलेपाच्च पतिर्दासो भवेत्तदा॥
मधुयष्टिञ्च तैर्दद्याद्गोक्षीरं कण्टकारिका।
एतानि समभागानि पिबेदुष्णेन वारिणा॥
चतुर्मासावशेषेण गर्भसम्भवमुत्तमम्॥
मातुलुङ्गस्य बीजानि क्षीरेण सह भावयेत्॥
तत्पीत्वा लभते गर्भं नात्र कार्य्या विचारणा।
मातुलुङ्गस्य बीजानि मूलान्येरण्डकस्य च॥
घृतेन सह संयोज्य पाययेत् पुत्रकाङ्क्षिणीम्।
अश्वगन्धाकृतं दुग्धं क्षयित पुत्रकारकम्॥
पलाशस्य तु बीजानि क्षौद्रेण सह पेषयेत्।
रजस्वला तु पीत्वा स्यात् पुष्पगर्भविवर्जिता"॥
इति गारुड़े १८२ अध्यायः॥*॥

हरिरुवाच।

"हरितालं यवक्षारं पञ्चाङ्गं रक्तचन्दनम्।
जाती हिङ्गुलकं लाक्षा पक्वतैलेन पेषयेत्॥
हरीतकीकषायेण घृष्ट्वा दन्तान् प्रलेपयेत्।
दन्ताः स्युर्लोहिताः पुंसः श्वेता रुद्र! न संशयः॥
मूलकं खेदमग्नौ तु रसं तस्य प्रपेषयेत्।
कर्णयोः पूरणात्तेन कर्णस्रावो विनश्यति॥
अर्कपत्रं ग्रहीत्वा तु मन्दाग्नौ तापयेच्छनैः।
निष्पीड्य पूरयेत् कर्णौ कर्णशूलं विनश्यति॥
प्रियङ्गुमधुकाम्बष्ठाधातक्युत्पलपत्रिभिः।
मञ्जिष्ठालोध्रलाक्षाभिः कपित्थस्य रसेन च॥
पचेत्तैलं तथा शुल्कक्षारौ हिङ्गु महौषधम्।
घृतपुष्पा वचा कुष्ठं दारु शिग्रु रसायनम्॥
सौवर्चलं यवक्षारं तथा सर्ज्जिकसैन्धवम्।
भृङ्गरञ्जि विड़ं मुस्तं मधुयुक्तं चतुर्गुणम्॥
मातुलुङ्गरसस्तद्वत् कदल्याश्च रसो हि तैः।
पक्वतैलं हरेदाशु खादीश्च न संशयः॥
कर्णयोः क्षमिनाशः स्यात् कटुतैलस्य पूरणात्।
हरिद्रा निम्बपत्राणि पिप्पल्यो मरिचानि च॥
विड़ङ्गं भद्रमुस्तञ्च सप्तमं विल्वमेवञ्च।
गोमूत्रेण च पिष्ट्वैव कृत्वा च वटिकां हर!॥
अक्षीणाक्षद्वयेनैका दृश्यं विलम्बिकापहम्।
पटलं मधुना हन्ति गोमूत्रेण तथार्ब्बुदम्॥
एषा च शङ्करी वर्त्तिः सर्व्वनेत्रामयापहा"।
इति गारुड़े १८३ अध्यायः॥*॥

हरिरुवाच।

"वचा मांसी च विल्वञ्च तगरं पद्मकेशरम्।
नागपुष्पं प्रियङ्गुञ्च समभागानि चूर्णयेत्॥
अनेन धूपितो मर्त्यः कामवद्विचरेन्महीम्।
कर्पूरं देवदारुञ्च मधुना सह योजयेत्।
लिङ्गलेपाच्च तेनैव वशीकुर्य्यात् स्त्रियं किल।
मैथुनं पुरुषो गच्छेत् यत्कीर्य्यात् स्वकमिन्द्रियम्॥
वामहस्तेन वामञ्च हस्तं यस्याः स्त्रिया लिखेत्।
आलिङ्गिता स्त्री वशं याति नान्यं पुरुषमिच्छति॥
ओम् रक्तवासुखड्गे अमुकं मे वशमानय वशमानय क्रीं क्रीं फट्।
इमं जप्त्वायुतं मन्त्रं तिलकेन च शङ्कर!।
गोरोचनासंयुतेन खरक्तेन वशीभवेत्॥
सैन्धवं क्षणलवणं सौवीरं मत्स्यपित्तकम्।
मधु सर्पिः सितायुक्तं स्त्रीणां तद्भगलेपनम्॥
यः पुमान् मैथुनं गच्छेत् नान्यां नारीं गमिष्यति।
शङ्खपुष्पी वचा मांसी सोमराजी च कृष्णकम्॥
माहिषं नवनीतञ्च गाढीकरणमुत्तमम्।
सनालानि च पद्मानि क्षीरेणाज्येन पेषयेत्॥
गुटिकां शोणितां कृत्वा नारी योन्यां प्रवेशयेत्।
दशवारं प्रसूतापि पुनः कन्या भविष्यति॥
सर्षपास्य वचा चैव मदनस्य फलानि च।
मार्जारविष्ठाधुस्तूरःस्त्रीकेशेन समन्वितः॥
चातुर्थकहरो धूपो डाकिनीज्वरनाशनः।
अर्ज्जुनस्य तु पुष्पाणि भल्लातकविड़ङ्गके॥
क्षीरेरकं सर्जरसं सौवीरं सर्षपास्तथा।
सर्षपैकामक्षिकाणां धूपो मशकनाशनः॥
भूलतायाश्च चूर्णेन स्तम्भः स्याद् योनिपूरणात्।
तेन लेपयतो योनौ भगस्तम्भश्च जायते"॥
इति गारुड़े १८४ अध्यायः॥*॥

हरिरुवाच।

"साज्यञ्च घृतं क्षौद्रं लवणं ताम्रभाजने।
घृष्टं पयःसमायुक्तं चक्षुःशूलहरं परम्॥
हरितकी वचा कुष्ठं पिप्पल्यो मरिचानि च।
विभीतकस्य बीजानि हरितालं मनःशिला॥
सर्व्वाक्षिरोगान्नश्येयुरजाक्षीरसमन्विताः।
तत्क्षणात् पुष्पनाशः स्यात् मालतीकुसुमाञ्जनात्॥
विड़ङ्गं सैन्धवं कुष्ठं श्वेतं हिङ्गु मनःशिला।
कासे श्वासे च हिक्कायां लिह्यात् क्षौद्रं घृतप्लुतम्॥
पिप्पलीचिफलाचूर्णं मधुना लेहयेन्नरः।
नश्यते पीनसः कासः श्वासश्च बलवत्तरः॥
समूलचित्रकं भस्म पिप्पलीचूर्णकं हरेत्।
कासं श्वासञ्च हिक्काञ्च मधुमिश्रं दृषध्वज!॥
नीलोत्पलं शर्करा च मधुकं पद्मकं समम्।
तण्डुलोदकसंमिश्रं प्रसादं रक्तविक्रियाम्॥
शुण्ठी च शर्करा चैव तथा क्षौद्रेण संयुता।
कोकिलस्वरएव स्यात् गुलिकाभक्षणाच्चतः॥
हरितालं शङ्खचूर्णं कदलीदलभस्मना।
एतद्द्वयेन चोद्वर्त्य लोमशातनमुत्तमम्॥
लवणं हरितालञ्च तण्डुल्याश्च फलानि च।
क्षारोरससमायुक्तं लोमशातनमुत्तमम्॥
सुधा च हरितालञ्च शङ्खश्चैव मनःशिला।
सैन्धवेन सहैकत्र काकमूत्रेण पेषयेत्॥
तत्क्षणोद्वर्त्तनादेव लोमशातनमुत्तमम्।
शङ्खमामलकीपत्रं धातक्याः कुसुमानि च॥
पिष्ट्वा तत् पयसा सार्द्धं सप्ताहं धारयेन्मुखे।
स्निग्धाः श्वेताश्च दन्ताश्च भवन्ति विमलप्रभाः"॥
इति गारुड़े १८५ अध्यायः॥*॥

हरिरुवाच।

"शरदृतौ वसन्तेषु प्रायशो दधि गर्हितम्।
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते॥
शुक्ले तु शर्करा पीता नवनीतेन बुद्धिदम्।
गुड़स्य तु पुराणस्य पलमेकन्तु भक्षयेत्॥
प्रत्यहं वर्षमेकन्तु निरन्तरमथो हर!।
स्त्रीसहस्रञ्च गच्छेच्च पुमान् बलयुतो हर!॥
कुष्ठं सुचूर्णितं कृत्वा घृतमाक्षिकसंयुतम्।
भक्षणात् खप्नवेलायां वलीपलितनाशनम्॥
अतसीमाषगोधूमं चूर्णं कृत्वा च पिण्डीम्।
घृतेन लेपयेद्गात्रमेभिः सार्द्धं विचक्षणः॥
कन्दर्पसदृशो मर्त्यो भवते नित्यभक्षणात्।
यवान्तिला अश्वगन्धा मुषला शूरला गुड़म्॥
एभिश्च वटिकां जग्ध्वा तरुणो बलवान् भवेत्।
हिङ्गु सौवर्चलं शुण्ठीं पीत्वा तु क्षयितोदकैः॥
परिणामाख्यशूलञ्च अजीर्णञ्चैव नश्यति॥
धातकीं सोमराजीञ्च मधुना सह पेषयेत्।
दुर्ब्बलस्य भवेत् स्थूलो नात्र कार्य्या विचारणा।
शर्करामधुसंयुक्तं नवनीतं बली लिहेत्॥
क्षीराशी च क्षयी पुष्टिमेवाप्नोत्यतुलां लभेत्॥
कुक्कुरीचूर्णं सक्षीरं पीतञ्च क्षयरोगनुत्।
भल्लातकं विड़ङ्गञ्च यवक्षारञ्च सैन्धवम्।
मनःशिला शङ्खचूर्णं तैलपक्वं तथैव च॥
लोमानि शातयत्येव नात्र कार्य्या विचारणा।
मालूरस्य रसं गृह्य जलौकां तत्र पेषयेत्।
हस्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमम्॥
शाल्मलीरसमादाय खरमूत्रे निधाय तम्।
अग्नागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमम्॥
वायसी-उदरं गृह्य मण्डूकवसया सह।
गुटिकां कारयेत्तेन ततोऽग्नौ प्रक्षिपेद्गुटीं।
एवमेतत् प्रयोगेण अग्निस्तम्भनमुत्तमम्॥
मुण्डोलकवचायुक्तं मरीचं नागरं तथा।
चर्व्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत्॥
गोरोचनाभृङ्गराजं चूर्णक्षैव घृतं समम्।
दिव्याम्भसस्तु स्तम्भः स्यात् मन्त्रेणानेन वै तथा॥
ॐ ह्रां अग्निस्तम्भनं कुरु। ॐ नमो भगवते जलं स्तम्भय स्तम्भय संस संस केक केक चर चर।
जलस्तम्भनमन्त्रोऽयं जलं स्तम्भयते शिव!॥
शङ्खास्थि च गवास्थि च शतनिर्म्मल्यमेव च।
अरेर्यो निखनेत् द्वारे पक्षत्वमुपयाति सः॥
ब्रह्मदण्डो तु पुष्येण खाने पाने वशीकरा॥
यष्टीमधुपलैकेन पक्वमुष्णोदकं पिबेत्।
विल्वभिक्काच्च हृच्छूलं हरत्येव महेश्वर!॥
ॐ क्रः जः।
मन्त्रोऽयं हरते रुद्र! सर्व्वहिक्कजं क्षिपम्।
पिप्पली नवनीतञ्च शृङ्गवेरञ्च सैन्धवम्॥
मरीचं दधि कुष्ठञ्च नस्ये पाने विषं हरेत्।
त्रिफलार्द्रककुष्ठञ्च चन्दनं घृतसंयुतम्॥
एतत्पानाच्च लेपाच्च विषनाशो भवेच्छिव!।
पारावतस्य चाक्षीणि हरितालं मनःशिला॥
एष योगो विषं हन्ति वैनतेय इवोरगान्॥
सैन्धवं त्र्यूषणं चूर्णं दधिमध्वाज्यसंयुतम्।
दृष्टिकस्य विषं हन्ति लेपोऽयं दृषभध्वज!।
ब्रह्मदण्डीतिलान् क्षाप्य चूर्णं त्रिकटुकं पिबेत्।
नाशयेद्रुद्र! गुल्मानि निरोधं रक्तमेव च॥

पीत्वा क्षीरं क्षौद्रयुतं नाशयेद्धृदरक्षयुजम् ॥
अटरूषकमूलेन भगं नाभिञ्च लेपयेत् ।
सुखं प्रसूयते नारी नात्र कार्य्या विचारणा ॥
शर्करा मधुसंयुक्ता पीता तण्डुलवारिणा ।
रक्तातिसारशमनं भवतीति वृषध्वज!" ॥
इति गारुडे १८६ अध्यायः ॥ * ॥

हरिरुवाच ।

"मरीचं भृङ्गवेरञ्च कुटजत्वचमेव च ।
पानाच्च ग्रहणी नश्येत् शशाङ्कक्षतशेखर! ॥
पिप्पलीं पिप्पलीमूलं मरीचं तगरं वचाम् ।
देवदारुरसं पाठां क्षीरेण सह पेषयेत् ॥
अनेनैव प्रयोगेण अतीसारो विनश्यति ॥
मरीचतिलपुष्पाभ्यामञ्जनं कामलापहम् ।
हरीतकीसमगुड़ा मधुना सह योजिता ।
विरेचनकरी रुद्र! भवतीति न संशयः ॥
त्रिफला चित्रकं चित्रं तथा कटुकरोहिणी ।
ऊरुस्तम्भहरो ह्येष उक्तस्तन्त्रे विरेचनम् ॥
हरीतकीं भृङ्गवेरं देवदारु च चन्दनम् ।
क्वाथयेच्छागदुग्धेन अपामार्गस्य मूलकम् ॥
जङ्घाशूलमरुस्तम्भं सप्तरात्रेण नाशयेत् ॥
नाटाच्च भृङ्गवेरञ्च सूक्ष्मचूर्णानि कारयेत् ॥
गुग्गुलं गुड़तुल्यञ्च गुलिकामुपयुज्य तु ।
वायुं खायुगतञ्चैव अग्निमान्द्यञ्च नाशयेत् ॥
शृङ्गपुष्पीं तु पुष्येण समुद्धृत्य सपत्रिकाम् ।
समूलीं क्वागदुग्धेन अपस्मारहरां पिबेत् ॥
अश्वगन्धाभये चैव उदकेन समं पिबेत् ।
रक्तपित्तं विनश्येत नात्र कार्य्या विचारणा ॥
हरीतकीकुष्ठचूर्णं कृत्वा आस्यञ्च पूरयेत् ।
शीतं पीत्वाथ पानीयं सर्व्वच्छर्द्दिनिवारणम् ॥
गुड़ूची पद्मकारिष्टं धन्याकं रक्तचन्दनम् ।
पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाघ्नमग्निकृत् ॥
ॐ भ्रूं नम इति ।
श्रोत्रे बद्धा शृङ्गपुष्पीं ज्वरं मन्त्रेण वै हरेत् ।
ॐ जम्भनि स्तम्भनि विमोहय सर्व्वव्याधीन् मे वज्रेण ठ ठ सर्व्वव्याधीन् मे वज्रेण फट् । इति ॥
पुष्यमभृतं जप्त्वा हस्ते दत्त्वाथ न स्पृशेत् ।
चातुर्थको ज्वरो रुद्र! अन्ये चैव ज्वरास्तथा ॥
जम्बूफलं हरिद्रा च सर्पस्यैव च कञ्चुकम् ।
सर्व्वज्वराणां धूपोऽयं हर! चातुर्थकस्य च ॥
करवीरं भृङ्गपत्रं लवणं कुष्ठकर्कटम् ।
चतुर्गुणेन मूत्रेण पचेत्तैलं हरेच्च तत् ॥
यामां विचर्चिकां कुष्ठमभ्यङ्गाद्धि व्रणानि वै ॥
पिप्पलीमधुपानाच्च तथा मधुरभोजनात् ॥
प्लीहा विनश्यते रुद्र! तथा सूरणसेवनात् ॥
पिप्पलीञ्च हरिद्राञ्च गोमूत्रेण समन्विताम् ॥
प्रक्षिपेच्च गुदद्वारे अर्शांसि विनिवारयेत् ।
अजादुग्धमार्द्रकञ्च पीतं प्लीहापहं भवेत् ॥
सैन्धवञ्च विड़ङ्गानि सोमराजी तु सर्षपाः ।
रजनी दे विभाङ्गैव गोमूत्रेण च पेषयेत् ॥
कुष्ठनाशञ्च तत्क्षेपान्निम्बपत्रादनात्तथा" ॥
इति गारुडे १८७ अध्यायः ॥ * ॥

हरिरुवाच ।

"रजनीकदलीक्षारलेपः सिध्मविनाशनः ।
कुष्ठस्य भागमेकन्तु पथ्याभागद्वयं तथा ॥
उष्णोदकेन संपीत्वा कटिशूलविनाशनम् ।
अभया नवनीतञ्च शर्करा पिप्पलीयुतम् ॥
पानादग्नेर्हरं स्याच्च नात्र कार्य्या विचारणा ।
अटरूषकपत्रेण घृतं मर्द्दयित्वा पचेत् ॥
चूर्णं कृत्वा तु लेपोऽयं अर्शोरोगहरः परः ।
गुग्गुलुं त्रिफलाशुण्ठीं पीत्वा नश्येत् भगन्दरम् ॥
अजाजीं भृङ्गवेरञ्च दधिमण्डेन पाययेत् ।
लवणेन तु संयुक्तं मूत्रकृच्छ्रविनाशनम् ॥
यवक्षारः शर्करा च मूत्रकृच्छ्रविनाशनम् ॥
चिताग्निः खञ्जरीटस्य विष्ठा फेनो हयस्य च ।
ग्रीभाञ्जनं नासनेत्रं नरः एतैस्तु धूपितः ।
अदृश्यस्त्रिदशैः सर्व्वैः किं पुनर्मानवैः शिव! ॥
तिलतैलं यवान्दग्ध्वा मस्मं कृत्वा तु लेपयेत् ।
तेनैव सह तैलेन अग्निदग्धः सुखी भवेत् ॥
लज्जालुः शरपुंखा च लेपः साज्यो हराग्निहा ।
पञ्चाङ्गं कनकं शल्ल्या श्लक्ष्णचूर्णन्तु कारयेत् ॥
दुग्धं धूपं तच्च दत्त्वा तत्क्षणात् पतते ध्रुवम् ।
ॐ नमो भगवते क्रिन्द क्रिन्द ज्वरस्य शिरः प्रज्वलितपरशुपाणिपुरुषाय फट् ।
करे बद्धा तु निर्गुण्ड्या मूलं ज्वरहरं ततः ।
मूलञ्च श्वेतगुञ्जायाः कृत्वा तत् सप्तखण्डकम् ॥
हस्ते बद्धं नाशयेच्च अर्शांस्येव न संशयः ॥
विष्णुक्रान्ताजमूत्रेण चौरव्याघ्रादिरक्षणम् ।
ब्रह्मदण्डान्तु मूलेन सर्व्वकर्म्माणि कारयेत् ॥
त्रिफलायान्तु चूर्णन्तु साज्यं कुष्ठं विनाशयेत् ॥
आज्यं पुनर्णवाबिल्वैः पिप्पलीभिश्च साधितम् ।
हरेत् हिक्काश्वासकासं पीतं स्त्रीणाञ्च गर्भकृत् ॥
भक्षयेच्चैवमादीनि पयसाज्येन साधितम् ।
घृतशर्करया युक्तं शुक्रं स्यादक्षयं ततः ॥
विड़ङ्गं मधुकं पाठां मांसीं सर्ज्जरसन्तथा ।
हरिद्रा त्रिफलाश्चैव अपामार्गं मनःशिलाम् ॥
उड़ुम्बरं धातकीपुष्पं तिलतैलेन पेषयेत् ।
योनिं लिङ्गञ्च मृक्षेत स्त्रीपुंसोः स्यात् प्रियं मिथः ॥
पुनर्णवामृता दूर्व्वा कनकं चेन्द्रवारुणी ।
बीजेनैषां जातिकाया रसेन रसमर्द्दनम् ॥
कृत्वा धमेच्च मूषायां रसमारणमीरितम् ॥
मध्वाज्यसहितं दुग्धं बलीपलितनाशनम् ॥
मध्वाज्यं गुड़ताम्रञ्च करेणामाक्षिकं रसम् ।
धमनाच्च भवेद्रौप्यं सुवर्णकरणं परम् ॥
पीतं धुस्तूरपुष्पञ्च सीसकस्य पलं मतम् ।
पांठा लाङ्गलशाखा च मूलमावर्त्तनाङ्गवेत् ॥
तैलं धुस्तूरजस्य तेन दीपं प्रदापयेत् ।
समाधावुपविशन्तु गगनस्थो न पश्यति ॥
रात्रौ च सार्षपं तैलं कर्णे खद्योतसम्भवम् ।
तद्दीपः प्रज्वलेत् सम्यक् अग्निज्वालाकलापवत् ॥
कुञ्जरस्य मदार्त्तस्य खयं नेत्रे शिवाङ्गयेत् ।
संग्रामं जयते सोऽपि महाशूरश्च जायते ॥
दन्तं दुग्धमसर्पस्य मुखे संगृह्य वै क्षिपेत् ।
तिष्ठते जलमध्ये तु निर्विकल्पं स्थले यथा ॥
कुम्भीरनेत्रदंष्ट्राणि साक्षीणि रुधिरं तथा ।

वज्रतैलसमायुक्तमेकत्र तन्नियोजयेत् ॥
आत्मानं भक्षयेत्तेन जले तिष्ठेद्दिनत्रयम् ।
कुम्भीरकस्य नेत्राणि हृदयं कच्छपस्य च ॥
मूषकस्य वज्रास्थीनि शिशुमारवज्रा तथा ।
एतान्येकत्र संस्थानि जले तिष्ठेत् यथा गृहे ॥
लोहचूर्णं तक्रपीतं पाण्डुरोगहरं भवेत् ।
तण्डुलीयकगोक्षुरमूलं पीतं पयोऽन्वितम् ॥
कामलादिहरं प्रोक्तं मुखरोगहरं तथा ।
जातीमूलं तक्रपीतं कोलिमूलन्तु जीर्णकृत् ॥
सतक्रकाशमूलं वा वाकुचीमूलमेव वा ।
काञ्जिकेन च वाकुच्या मूलं वै दन्तरोगनुत् ॥
अथेन्द्रवारुणीमूलं वारिपीतं विषादिहृत् ।
बला चातिबला यष्टी शर्करा मधुसंयुता ॥
बन्ध्यागर्भकरं पीतं नात्र कार्य्या विचारणा ॥
श्वेतापराजितामूलं पिप्पलीशुण्ठिसंयुतम् ।
परिपिष्टं शिरोलेपात् शिरःशूलविनाशनम् ।
शिरोरोगहरं लेपात् गुञ्जामूलं सकाञ्जिकम् ॥
निर्गुण्डिकाशिफां पीत्वा गण्डमालाविनाशनम्
केतकीपत्रजं क्षारं गुड़ेन सह भक्षयेत् ॥
तक्रेण शूरणुञ्जां वा पीत्वा प्लीहां विनाशयेत् ॥
मातुलुङ्गस्य निर्य्यासं गुड़ाज्येन समन्वितम् ।
वातपित्तजशूलानि हन्ति वै पानयोगतः ।
शुण्ठीं सौवर्चलं हिङ्गु पीत्वा हृदयरोगनुत्" ॥
इति गारुडे १८८ अध्यायः ॥ * ॥

हरिरुवाच ।

ॐ गं गणपतये स्वाहेति ।
"अयं गणपतेर्मन्त्रो धनविद्याप्रदायकः ।
इममष्टसहस्रञ्च जप्त्वा बद्धा शिखान्ततः ॥
व्यवहारे जयः स्याच्च द्यूतं जाप्यानृणां प्रियः ।
तिलानान्तु घृताक्तानां क्षौद्राणां रुद्र! होमयेत् ॥
अष्टोत्तरसहस्रन्तु राज्ञा वश्यस्त्रिभिर्दिनैः ।
अष्टम्याञ्च चतुर्दश्यामुपोष्याभ्यर्च्य विघ्नराट् ॥
तिलाक्तानां जुहुयादष्टोत्तरसहस्रकम् ।
अपराजितः स्याद्युद्धे च अथ चेदुद्यमे शिव! ॥
जप्त्वा चाष्टसहस्रन्तु ततश्चाष्टशतेन हु ।
शिखां बद्धा राजकुले व्यवहारे जयो भवेत् ॥
क्रीकारं सविसर्गञ्च प्रातःसूर्य्यससद्युतिम् ।
स्त्रीणां ललाटे विन्यस्य वश्यतां नयते ध्रुवम् ॥
तथैव नासामुरसि ध्यात्त्वैवोपकारकृत् ।
सुसमाहितचित्तेन न्यस्तन्तु प्रमदालये ॥
सकामां कामिनीं कुर्य्यात् स्खलन्मदजलाकुलाम् ।
यस्तु जुहुयादयुतं शुचिः प्रयतमानसः ॥
दृष्टिमात्रे सदा तस्य वशमायान्ति योषितः ॥
मनःशिला पत्रकञ्च सगोरोचनकुङ्कुमम् ॥
एभिः कृते च तिलके सदा स्त्री वशतामियात् ॥
सहदेवो भृङ्गराजः सितापराजिता वचा ।
तेनैव तिलकं कृत्वा त्रैलोक्यं वशतां नयेत् ।
गोरोचना मीनमित्तमाभ्याञ्च कृतवर्त्तिकाम् ॥
यः पुमांस्तिलकं कुर्य्याद्वामहस्तकनिष्ठया ।
स करोति वशं सर्व्वं त्रैलोक्यं नात्र संशयः ॥
गोरोचना महादेव! ऋतुस्नोगितभाविता ।
ततो या कृततिलका सा नारी यं निरीक्षते ॥

तत्र शूर्व्व! वक्ष्यं कुर्य्याद्वाच कार्य्या विचारणा।
नागेश्वरस्य शूलेयं त्वक्पत्रस्य हरीतकी॥
चन्दनं कुष्ठसूक्ष्मैला रक्तशालिसमन्विता।
एतैर्धूपो वशकरः स्मरबाण इवेश्वर!॥
रतिकाले महादेव! पार्व्वतीप्रिय! शङ्कर!।
निजशुक्रं गृहीत्वा तु वामहस्तेन यः पुमान्॥
कामिनीचरणं वामं लिम्पेत् स स्यात् स्त्रियाः प्रियः।
सैन्धवस्य महादेव! पारावतमलं मधु॥
एभिर्लिम्पन्तु लिङ्गं वै कामिनीवशकृद्भवेत्।
पुष्पाणि पञ्चरक्तानि गृहीत्वा यानि कानि च॥
तण्डुलस्य प्रियङ्गोश्च पेषयेदेकयोगतः।
अनेन लिम्पलिङ्गस्य कामिनीवशतामियात्॥
हयलाला च मल्लिका मालतीकुसुमानि च।
श्वेतसर्षपाख्यैश्च लिम्पलिङ्गः स्त्रियाः प्रियः॥
मूलन्तु काकजङ्घाया दुग्धपीतन्तु शोधनम्।
अश्वगन्धानागबलागुडमांसनिषेविणाम्॥
रूपं भवेत् यथा तद्वन्नवयौवनचारिणाम्॥
लौहचूर्णसमायुक्तं त्रिफलाचूर्णमेव वा।
मधुना खादितं रुद्र! परिणामाख्यशूलनुत्॥
क्वथितोदकपानन्तु शम्बुकाक्षारकं तथा।
मगधङ्कं ह्यभिदग्धं गव्याज्येन समन्वितम्।
पीतं तृत्पृष्ठशूलानां भवेन्नाशकरं शिव!॥
हिङ्गु सौवर्चलं रुद्र! वृषध्वज! महौषधम्।
एभिस्तु क्वथितं वारि पीतं वै सर्व्वशूलनुत्॥
अपामार्गस्य वै मूलं सामुद्रलवणान्वितम्।
आस्वादितमजीर्णस्य शूलस्य स्याद्विमर्द्दकम्॥
वटरोहाङ्कुरो रुद्र! तण्डुलोदकघर्षितः।
पीतः सतक्रोऽतीसारं क्षयं नयति शङ्कर!॥
अङ्कोठमूलं कर्षार्द्धं पिष्टं तण्डुलवारिणा।
सर्व्वातिसारग्रहणीं पीतं हरति भूतप!॥
मरीचशुण्ठिकुटजत्वक्चूर्णन्तु गुडान्वितम्।
क्रमात्तद्विगुणं पीतं ग्रहणीव्याधिनाशनम्॥
श्वेतापराजितामूलं हरिद्रासिक्थतण्डुलम्।
अपामार्गतिक्तकमेषान्तु वटिकां शिव!।
विसूचिकामहाव्याधिं हरत्येव न संशयः॥
त्रिफला त्रिकटुश्चव शिलाजतु हरीतकी।
एकैकमेषां चूर्णन्तु मधुना च विमिश्रितम्।
पीतं सर्व्वप्रमेहन्तु क्षयं नयति शङ्कर!॥
अर्कक्षीरं प्रस्थमेकं तिलतैलं तथैव च।
मनःशिला मरीचानां सिन्दूरस्य पलं पलम्॥
चूर्णं कृत्वा ताम्रपात्रे क्षातपे शोषयेत्ततः।
पीतं खदीगतं दुग्धं सैन्धवं शूलनुद्भवेत्॥
त्रिकटुत्रिफलायुक्तं पलाशक्षारसैन्धवम्।
मनःशिला निम्बपत्रं जातीपुष्पमजापयः॥
तन्मूत्रं शङ्खनाभिश्च चन्दनं घर्षयेत्ततः।
एभिश्च वटिकां कृत्वा अक्षिणी चाञ्जयेत्ततः॥
नश्यते पटलं काचं पुष्पञ्च तिमिरादिकम्॥
विभीतकस्य वै चूर्णं समधु श्वासनाशनम्॥
पिप्पलीत्रिफलाचूर्णं मधुसैन्धवसंयुतम्।
सर्व्वरोगज्वरश्वासशोषपीनसहृद्भवेत्॥
देवदारोश्च वै चूर्णं त्रिगुणेन भावयेत्।
यक्ष्मविंशति वै वारमक्षिणी तेन चाञ्जयेत्॥

राजन्यता पटलता नश्येदिति विनिश्चयः।
पिप्पली केतकं रुद्र! हरिद्रामलकं वचा॥
सर्व्वाक्षिरोगा नश्येयुः सक्षीरादञ्जनात्ततः॥
काकजङ्घाशिग्रुमूले मुखेन विश्वते शिव!।
चर्व्वित्वा दन्तरोगाणां विनाशो हि भवेद्ध्रुवं"!॥
इति गारुडे १८९ अध्यायः॥*॥

हरिरुवाच।

"पीतं सारं गुडूच्याश्च मधुना च प्रमेहनुत्।
पीतं गोहालियामूलं तिलदध्याज्यसंयुतम्॥
निरुद्धमूत्रं क्षथितं प्रवर्त्तयति शङ्कर!।
तथा हिक्कां हरेत् पीता सौवर्चलयुता सुरा॥
गोरक्षकर्कटीमूलं पिष्टं वास्योदकेन च।
पीतं दिनत्रयेणैव नाशयेत् दन्तशर्क्कराम्॥
पिष्टं वै मालतीमूलं ग्रीष्मकाले समाहृतम्।
साधितं छागदुग्धेन पीतं शर्क्करयान्वितम्॥
हरेन्मूत्रनिरोधञ्च हरेद्वै पाण्डुशर्क्कराम्॥
द्विजयष्ट्याश्च वै मूलं पिष्टं तण्डुलवारिणा।
गण्डमालां हरेल्लेपात् कुरुगण्डगलगण्डकम्॥
रसाञ्जनहरीतक्याक्षूर्णं तेनैव गुडनात्।
नश्येद्वै पुरुषव्याधिं नात्र कार्य्या विचारणा॥
करवीरमूललेपात् लेपात् प्लक्षफलस्य च।
पुंव्याधिर्नश्यते रुद्र! योगमन्यं वदाम्यहम्॥
दन्तीमूलं हरिद्रा च चित्रकं तस्य लेपनात्।
भगन्दरविनाशः स्यादन्ययोगं वदाम्यहम्॥
जलौकाजगधरक्तन्तु भगन्दरमुमापते!॥
त्रिफलाजलघृष्टञ्च मार्जारास्थिविलेपितम्।
ततो न प्रसवेत् रुद्र! नात्र कार्य्या विचारणा॥
हरिद्रा त्वेकवारन्तु स्नुहीक्षीरेण भाविता।
भल्लातशूर्णं निपतति तल्लेपात् वृषभध्वज!॥
घोषाफलं सैन्धवञ्च तल्लिप्तार्शः पतेत्तथा।
गव्याज्यं साधितं पीतं पलाशक्षारवारिणा॥
त्रिगुणेन त्रिकटुकमर्शांसि क्षययेच्छिव!।
बिल्वस्य च फलं दग्धं रक्तार्शसो विनाशनम्॥
जग्ध्वा क्षणतिलान्येव नवनीतयुतानि च।
यवक्षारं शुण्ठिचूर्णं युक्तं तुल्यघृतान्वितम्॥
लीढ्वाग्निं करोत्येष प्रत्यूषे वृषभध्वज!।
शुण्ठ्या च क्वथितं वारि पीतञ्चाग्निं करोति वै॥
हरीतकी सैन्धवञ्च त्रिकं रुद्र! पिप्पली।
चूर्णमुष्णोदकेनैषां पीतञ्चातित्रुधाकरम्॥
साज्यं शूकरमांसं वै पीतं चातित्रुधाकरम्"॥
इति गारुडे १९० अध्यायः॥*॥

हरिरुवाच।

"हस्तिकर्णस्य वै मूलं गृहीत्वा चूर्णयेद्धर!।
सर्व्वरोगविनिर्मुक्तं चूर्णं पलशतं शिव!॥
सक्षीरं भक्षितं कुर्य्यात् सप्ताहेन वृषध्वज!।
नरं श्रुतिधरं शूरं मृगेन्द्रगतिविक्रमम्॥
पद्मगौरप्रतीकाशं युक्तं दशशतायुषा।
षोड़शाब्दाङ्गतिं रुद्र! सततं दुग्धभोजनम्॥
मधुसर्पिःसमायुक्तं जग्धमायुस्करं भवेत्।
तज्जग्धं मधुना सार्द्धं दशवर्षसहस्रिणम्॥
कुर्य्यान्नरं श्रुतिधरं प्रमदाजनवल्लभम्।
दृष्ट्वा नित्यं भक्षितन्तु वज्रदेहकरं शिव!॥

क्षणकेशसमायुक्तं नरं वर्षसहस्रिणम्।
तच्च काञ्जिकसंयुक्तं नरं कुर्य्याच्च भक्षितम्॥
घृतशर्षं दिव्यदेहं बलीपलितवर्जितम्।
जग्धं त्रिफलया युक्तं चक्षुष्मन्तं करोति वै॥
अन्धः पश्येत्तु चूर्णस्य साज्यस्यैव तु भक्षणात्।
महिषक्षीरसंयुक्तं तल्लेपः क्षणकेशकृत्॥
खल्वाटस्य च वै केशा भवन्ति वृषभध्वज!।
तैलयुक्तेन चूर्णेन बलीपलितवर्जितम्॥
तदुद्वर्त्तनमात्रेण सर्व्वरोगैः प्रमुच्यते।
सक्षीरगव्यचूर्णेन दृष्टिः षण्मासतोऽञ्जनात्॥
पलाशस्य तु बीजानि श्रावणे वितुषाणि च।
गृहीत्वा नवनीतेन तेषां चूर्णन्तु भक्षयेत्॥
कर्षार्द्धमेव कुल्माषं नत्वा नित्यं हरिं प्रभुम्।
यष्टिं पुराणधान्यं स्यादम्बुवर्ज्जं वृषध्वज!॥
जीवेद्वर्षसहस्राणि बलीपलितवर्जितः॥
भृङ्गराजस्य वै चूर्णं पुष्यर्क्षे तु समाहृतम्।
विड़ालपदमात्रन्तु ससौवीरञ्च भक्षयेत्।
मासमात्रप्रयोगेण बलीपलितवर्जितः॥
घृतानि पञ्च जीवेच्च नवनागबलो भवेत्।
भवेत् श्रुतिधरो रुद्र! पुष्यर्क्षे चैव भक्षयेत्"॥
इति गारुडे १९१ अध्यायः॥*॥

हरिरुवाच।

"निर्व्रणः स्यात् पूयहीनः प्रहारो घृतपूरितः।
अपामार्गस्य वै मूलं हस्ताभ्याञ्च विमर्द्दयेत्॥
तद्रसेन प्रहारस्य रक्तस्रावो न पूरयात्।
रुद्र! लाङ्गलिकामूलं हिज्जलस्य तथैव च॥
तेन व्रणमुखं लिप्तं शल्यो निःसरति व्रणात्।
चिरकालप्रविष्टोऽपि तेन मार्गेण शङ्कर!॥
दग्ध्वा भाहिषेण युक्तं जग्धं कोद्रवभक्तकम्।
कट्फलस्य वै चूर्णं दत्तं नाड़ीव्रणापहम्॥
ब्रह्मयष्टिफलं पिष्टं वारिणा वेन लेपतः।
तेन वृद्धं रक्तदोषः प्रणश्यति न संशयः॥
यवभस्म विड़ङ्गञ्च गन्धपाषाणमेव च।
शुण्ठिरेषाञ्चैव चूर्णं भावितं रुधिरेण वै।
क्षतलाभस्य तल्लिप्तं अर्व्वुदं विद्धवेच्छिव!॥
शोभाञ्जनस्य बीजानि अतसीसर्षपान् सह।
गोरसन्तु प्रपिष्टान्यत् ग्रन्थिकं नाशयेद्धि वै॥
श्वेतापराजितामूलं पिष्टं तण्डुलवारिणा।
तेन नस्यप्रदानात् स्यादभ्रुवन्दस्य विद्रधेः॥
अगस्त्यपुष्पनस्यो वै स्मरीचञ्च भूतहृत्।
भुजङ्गवर्म्म वै हिङ्गु निम्बपत्राणि वै यवाः।
गौरसर्षप एभिः स्यालेपो भूतहरः कृतः॥
गौरोचना मरीचानि पिप्पली सैन्धवं मधु।
अञ्जनं कृतमेभिः स्यात् ग्रहभूतहरं शिव!॥
गुग्गुलूकुकपुच्छाभ्यां धूपो ग्रहहरः कृतः।
चातुर्थिकज्वरैर्मुक्तः क्षणवस्त्रावगुण्ठितः"॥
इति गारुडे १९२ अध्यायः॥*॥

हरिरुवाच।

"श्वेतापराजितामूध्वरसेनाङ्गोश्च पूरणे।
पटलं नाशमायाति क्षतदुग्धमौषधम्॥
मूलं गोचुरकस्यैव चर्व्वित्वा नीललोहित!।
दन्तकीटव्यथां नश्येदन्यासुरविमर्द्दन!॥

नारी पुष्पदिने पीत्वा गोक्षीरेणोपवासतः ॥
श्वेतार्कस्य तु वै मूलं तस्यास्तद्गुल्मशूलनुत् ॥
श्वेतार्कमूलं विधिना गृहीतं पूर्व्वसंस्थितम् ।
ऋतुस्नाता च ललना कटौ बद्धा नरोऽथ वा ।
नारी पुत्रं हि लभते सुरते वृषभध्वज ! ।
हस्तबद्धं पलाशस्य अपामार्गस्य वा हर ! ।
मूलं सर्व्वज्वरहरं भूतप्रेतादिनुद्भवेत् ॥
पीतं रुक्मिकमूलन्तु पर्य्युषितजलेन वै ।
साद्धं विनाशयेद्दाहज्वरञ्च परमेश्वर ! ।
शिखायाश्चैव तद्वद्धं भवेदेकाह्निकादिनुत् ॥
एतत् सकाह्निकं पीतं रक्तकुष्ठज्वरादिनुत् ।
वास्योदकेन पीतं तद्वृद्धदिनहरं भवेत् ॥
यस्य लक्ष्मालुकामूलं दीयते बद्धवेतसा ।
साद्धं स वै व्रजं याति पुमान् स्त्री वा न संशयः ॥
पिष्ट्वा गव्यघृतेनैव पाठामूलं पिबेत्तु यः ।
गरं विषं तस्य नश्येन्नात्र कार्य्या विचारणा ॥
वास्योदकयुतं मूलं शिरीषस्य यथा तथा ।
रक्तचित्रकमूलस्य शमनं भरणाद्धर ! ॥
कार्य्ययोः कामलाव्याधिविनाशः स्यान्न संशयः ॥
श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम् ।
त्रिसप्ताहेन वै पीतं क्षयरोगं क्षयं नयेत् ।
नारिकेलस्य वै पुष्पं छागीक्षीरेण संयुतम् ।
पिबेच्च त्रिविधस्तस्य रक्तवातो विनश्यति ॥
कुर्य्यात् सुदर्शनामूलं आदित्ये तु समाहृतम् ।
कण्ठबद्धं व्याहिकादिग्रहभूतविनाशनम् ॥
पुष्ये धवलगुञ्जाया गृहीतं मूलमुत्तमम् ।
मुखे तु निहितं रुद्र ! हरेत् गरविषं बलु ॥
हस्ते बद्धं कण्ठनुच्च कण्ठबद्धं ग्रहादिनुत्" ॥
इति गारुडे १९३ अध्यायः ॥ * ॥

हरिरुवाच ।

"अपराजिताया मूलञ्च गोमूत्रेण समन्वितम् ।
पीतञ्चापि हरत्येव गण्डमालां न संशयः ॥
तथेन्द्रवारुणीमूलं विधिना पीतमीश्वर ! ।
त्रिस्निग्धेरण्डकं रुद्र ! शूकशिम्बीसमन्वितम् ॥
क्षीरोदकञ्च तन्नस्यो बाऽग्र्यीवाथवा हरेत् ॥
माहिषं नवनीतञ्च अश्वगन्धा च पिप्पली ।
वचा कुष्ठं त्वयं लेपो लिङ्गोच्चस्तनर्द्धिकृत् ॥
कुष्ठनागबलाचूर्णं नवनीतसमन्वितम् ।
तल्लेपो युवतीनाञ्च कुर्य्यान्मनोहरं स्तनम् ॥
विटपेन्द्रवारुणीमूलं यस्य नाम्ना सुदूरतः ।
निक्षिप्यते समुत्पाद्य तस्य क्षीघ्रा विनश्यति ॥
पुनर्नवायाः शुक्लाया मूलं तण्डुलवारिणा ।
पीतं विद्यधि नश्येच्च नात्र कार्य्या विचारणा ॥
कदली यवक्षारन्तु पानीयेन प्रसाधितम् ।
तदाखादनान्नश्यन्ति उदरव्याधयोऽखिलाः ॥
वदरीकारवीमूलं गुडाज्येन समन्वितम् ।
अग्निना साधितं जग्ध्वा क्षमीन् सर्व्वान् हरेत् शिव ! ॥
नित्यं निम्बदलानाञ्च चूर्णमामलकस्य च ।
प्रत्यूषे भक्षयेच्चैव तस्य कुष्ठं विनश्यति ॥
हरीतकी विडङ्गञ्च हरिद्रा सितसर्षपाः ।
सोमराजस्य बीजानि करञ्जस्य च सैन्धवम् ।
गोमूत्रपिष्टान्येतानि कुष्ठरोगहराणि च ॥
एकञ्च त्रिफलाभागस्तथा भागद्वयं शिव ! ।
सोमराजस्य बीजानां जग्धं पथ्या च दद्रुनुत् ॥
अम्लतक्रं सगोमूत्रं क्षपितं लवणान्वितम् ।
कांस्यपृष्ठं खरं लेपात् कुष्ठदद्रुविनाशनम् ॥
हरिद्रा हरितालञ्च दूर्व्वागोमूत्रसैन्धवम् ।
अयं लेपो हन्ति दद्रु पामानं वै गरं तथा ॥
सोमराजस्य बीजानि नवनीतयुतानि च ।
मधुनाक्तादितानि स्युः शुक्लकुष्ठहराणि वै ।
तक्रानुपानतो रुद्र ! नात्र कार्य्या विचारणा ॥
सितापराजितामूलं वर्त्तितं वास्यवारिणा ।
तल्लेपो रुद्र ! मासेन शुक्लकुष्ठविनाशनः ॥
माहिषं नवनीतञ्च सिन्दूरञ्च मरीचकम् ।
पामा विलेपिता नश्येद्वृद्धोऽपि वृषध्वज ! ॥
विशुष्कगम्भारिमूलं पक्वक्षीरेण संयुतम् ।
भक्षितं शुक्रपित्तस्य विनाशकरमीश्वर ! ॥
मूलकस्य च बीजानि अपामार्गरसेन वै ।
पिष्टानि तेन लेपेन सिक्किका रुद्र ! नश्यति ॥
कदलीक्षारसंयुक्ता हरिद्रा सिक्किकापहा ।
रम्भापामार्गयोः क्षार एकस्तैलविमिश्रितः ॥
तदभ्यङ्गान्महादेव ! सद्यः सिध्म विनश्यति ।
कुष्माण्डनालक्षारस्तु सगोमूत्रश्च तत्त्वतः ॥
जलपिष्टा हरिद्रा च सिद्धा मन्दानलेन हि ।
माहिषेण घृतेनैव वेष्टिता वृषभध्वज ! ॥
अस्या उद्वर्त्तनं कुर्य्यादङ्गगौरत्वमीश्वर ! ।
तिलसर्षपसंयुक्तं हरिद्राद्वयकुष्ठकम् ॥
तेनोद्वर्त्तितदेहः स्याद्ज्वलः सुरभिः पुमान् ।
मनोहरश्चानुदिनं दूर्व्वाणां काकजङ्घया ॥
अर्ज्जुनस्य तु पुष्पाणि जम्बुपत्रयुतानि च ।
सलोध्राणि च तल्लेपो देहदुर्गन्धतां हरेत् ॥
मन्दोष्णलोध्रनीरं वै चूर्णन्तु कणकस्य च ।
तेनोद्वर्त्तितदेहस्य हरेदग्रीष्मप्रसारिकाम् ॥
त्वग्दोषञ्चैव देवेन्द्र ! घर्म्मदोषञ्च नश्यति ।
काकजङ्घोद्वर्त्तनञ्च अङ्गरागकरं भवेत् ॥
यष्टीमधु शर्करा च वासकस्य रसो मधु ।
एतत् पीतं रक्तपित्तकामलापाण्डुरोगनुत् ॥
रक्तपित्तं हरेत् पीतो वासकस्य रसो मधु ।
क्षयकासे तोयपानात् पीनसं प्रक्षितं हरेत् ॥
विभीतकस्य वै चूर्णं पिप्पलीसैन्धवस्य च ।
पीतं सकाह्निकं हन्ति खरभेदं महेश्वर ! ॥
चूर्णमामलकस्यैव पीतं शूलहरं परम् ॥
मनःशिला बलामूलं काकपक्षञ्च गुग्गुलुम् ।
जातीपत्रं कोलिपत्रं तथा चैव मनःशिला ।
एभिश्चैव कृता वर्त्तिर्वदराग्नौ महेश्वर ! ॥
धूमपानं काशहरं नात्र कार्य्या विचारणा ॥
त्रिफलापिप्पलीचूर्णं भक्षितं मधुना युतम् ॥
भोजनादौ हि समधु पिपासां त्वरितं हरेत् ।
विल्वमूलञ्च समधु गुडूचीक्षपितं जलम् ॥
पीतं हरेच्च त्रिविधं छर्दिं वै नात्र संशयः ।
पीता दूर्व्वा छर्दिनुत् स्यात् पिष्टा तण्डुलवारिणा" ॥
इति गारुडे १९४ अध्यायः ॥ * ॥

हरिरुवाच ।

"पुनर्नवाया मूलञ्च श्वेतं पथ्ये समाहृतम् ।
वारिपीतं तस्य पार्श्वे भवनेषु न पन्नगाः ॥
तार्क्ष्यमूर्त्तिं वहेद्यो वै भक्षकदन्तनिर्मिताम् ।
स पन्नगैर्न दश्येत यावज्जीवं वृषध्वज ! ॥
पिबेद्वृद्धमूलं यः पुष्यर्क्षे रुद्र ! वारिणा ।
तस्मिन्नपास्तदशना नागाः स्युर्नात्र संशयः ॥
पुष्ये लक्ष्मालुकामूले हस्तबद्धे तु पन्नगान् ।
गृहीत्वालेपतो वापि नात्र कार्य्या विचारणा ॥
पुष्ये श्वेतार्कमूलञ्च पीतं घृतेन वारिणा ।
नश्येत दन्तकविषं करवीरादिजं विषम् ॥
महाकालस्य वै मूलं पिष्टं तत् काञ्जिकेन वै ।
वोढ्रमण्डलिकानाञ्च तल्लेपो हरते विषम् ॥
तण्डुलीयकमूलञ्च पिष्टं तण्डुलवारिणा ।
घृतेन सह पीतन्तु हरेत् सर्पविषाणि च ॥
नीली लक्ष्मालुकामूलं पिष्टं तण्डुलवारिणा ।
पीत्वा दष्टकविषं नश्येदेकेन चोभयोः ॥
कुष्माण्डकफलरसः सगुडः सहशर्करः ।
पीतः सदुग्धो मोहन्तु तद्दष्टस्य विषस्य वै ॥
तथा काद्रवभूतस्य मोहस्य हर एव च ।
यष्टीमधुसमायुक्ता पीता च सितशर्करा ।
सदुग्धा च चिराच्चैव मूषाविषहरा भवेत् ॥
घृतकुम्भपयोनाम्ना वारिणः शीतलस्य वै ।
ताम्बूलजग्धरोमाञ्च मुखलाला विनश्यति ॥
घृतं सशर्करं पीत्वा मद्यपानमदो न वै ।
क्षणाद्भल्लातकस्य मूलेन पीतमृतक्षपितं जलम् ।
ततो नश्येद्गरविषं चिराच्चैव महेश्वर ! ॥
उष्णं गव्यघृतं पीतं सैन्धवेन समन्वितम् ।
नाशयेत्तन्महादेव ! वेदनां दष्टिकोद्भवाम् ॥
कुसुम्भं कुङ्कुमञ्चैव हरितालं मनःशिला ।
करञ्जपिप्पलीचैव अर्कक्षीरञ्च शाल्मली ॥
विषं नृणां विनश्येत एतेषां भक्षणाच्छिव ! ।
दीपतैलप्रदानाच्च दंशे दष्टिकजे शिव ! ॥
खर्ज्जुरकविषं नश्येत्तदा वै नात्र संशयः ।
दंशस्थानं दष्टिकस्य रुद्र ! गुग्गुलुधूपितम् ॥
विषं नश्येत्ततो रुद्र ! नात्र कार्य्या विचारणा ॥
अङ्कोठपत्रधूपेन नश्येन्मूषिकजं विषम् ॥
नागेश्वरमरीचानि शुण्ठी तगरपादिका ।
नश्येन्मधुमक्षिकाया एतेषां लेपतो विषम् ॥
घृतपुष्पा सैन्धवञ्च साज्यं वा तेन लेपतः ।
शिरीषस्य च बीजं वै सितक्षीरेण घर्षितम् ॥
तल्लेपेन महादेव ! नश्येदुन्दुरजं विषम् ॥
ज्वलिताग्निना विसेकी तथा दर्दुरजं विषम् ॥
धुस्तूरकरसोन्मिश्रं क्षीराज्यगुडपायनतः ।
मूनां विषं विनश्येत शशाङ्कक्षतशेखर ! ॥
वटनिम्बशमीनाञ्च वल्कलैः क्षपितं जलम् ।
तल्लेकान्नखदन्तानां नश्येद्द विषवेदनाम् ॥
देवदारु हरिद्रा च गैरिकस्य च लेपनात् ।
नागेश्वरं हरिद्रे द्वे मञ्जिष्ठा देवदारुकम् ।
एभिर्लेपाद्विनश्येत लूताविषमुमापते" ! ॥
इति गारुडे १९५ अध्यायः ॥ * ॥

हरिरुवाच ।

"एकं पुनर्नवामूलं अपामार्गस्य वा शिव ! ।
सरसं योनिविक्षिप्तं वराङ्गस्य यथां हरेत् ॥

प्रसूतिवेदनाश्चैव तरुणीनां व्यथां हरेत् ॥
भूमिकुष्माण्डमूलं वै शालितण्डुलवारिणा ।
सप्ताहं दुग्धपीतं स्यात् स्त्रीणां बहुपयस्करम् ॥
रुद्रेन्द्रवारुणीमूललेपात् स्त्रीस्तनवेदना ।
नश्येत् घृतविपक्वा च कार्य्यावश्यं तु पालिका ।
भक्षिता सा महेशान ! योनिशूलं विनाशयेत् ॥
प्रलेपिता कारवेल्लमूलैर्नैव विनिर्गता ।
योनिः प्रवेशमायाति नात्र कार्य्या विचारणा ॥
नीलीपटोलमूलानि साध्यानि तिलवारिणा ॥
पिष्ट्वान्येषां प्रलेपो वै ज्वालागर्हभरोगनुत् ॥
पाठामूलं रुद्र ! पीतं पिष्टं तण्डुलवारिणा ।
पापरोगहरं स्याच्च कुष्ठपानान्नथैव च ॥
वास्योदकञ्च समधु पीतमन्तर्गतस्य वै ।
पापरोगस्य सन्तापनिवृत्तिं कुरुते शिव ! ॥
कदलीमेकुचं पीतं पिष्ट्वा तण्डुलवारिणा ।
स्त्रीणाञ्चैव महादेव ! रक्तस्रावं हि वारयेत् ॥
घृततुल्या रुद्र ! जाता पीता क्षीरेण वै सह ।
प्रदरं हरते रोगं नात्र कार्य्या विचारणा ॥
दिव्ययष्टीचिकटुकं चूर्णं पीतं हरेच्छिव ! ।
तिलक्काथेन संयुक्तं रक्तगुल्मं स्त्रिया हर ! ॥
कुसुमस्य निबद्धञ्च तरुणीनां महेश्वर ! ।
रक्तोत्पलस्य वै कन्दं शर्करातिलसंयुतम् ॥
पीतं सशर्करं स्त्रीणां धारयेत् गर्भपातनम् ।
रक्तस्रावस्य नाशः स्यात् शीतोदकनिषेवणात् ॥
पीतन्तु काञ्जिकं रुद्र ! क्षपितं शरपुंखया ।
हिङ्गुसैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥
मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत् ।
अपामार्गस्य वै मूलं योनिस्थञ्च प्रसूतिकृत् ॥
अपामार्गस्य वै मूले गर्भवत्यास्तु नामतः ।
उत्पाट्यमाने सकले पुत्रः स्यादन्यथा सुता ॥
अपामार्गस्य वै मूले नारीणां शिरसि स्थिते ।
गर्भशूलं विनश्येत नात्र कार्य्या विचारणा ॥
कर्पूरमदनफलमधुकैः पूरितः शिव ! ।
योनिः शुभा स्याद्बद्धाया युवत्याः किं पुनर्हर ! ॥
यस्य बालस्य तिलकः कृतो गोरोचनाख्यया ।
शर्करोकुष्ठपानञ्च दत्तं स स्याच्च निर्भयः ॥
विषभूतग्रहादिभ्यो व्याधिभ्यो बालकः शिव ! ।
शङ्खनाभिवचाकुष्ठलोहानां धारणं सदा ॥
बालानामुपसर्गेभ्यो रुद्र ! रक्षाकरं भवेत् ।
पलाशचूर्णं समधु गव्याज्यामलकान्वितम् ॥
सविड्कं पीतमात्रं नरं कुर्य्यान्मेधामतिम् ।
सैकेन महादेव ! जरामरणवर्ज्जितम् ॥
पलाशबीजं सघृतं तिलमध्वन्वितं समम् ।
सप्ताहं भक्षितं रुद्र ! जरां नयति संक्षयम् ॥
रुद्रामलकचूर्णं वै मधुतैलघृतान्वितम् ।
जग्ध्वा मांसं युवा स्याच्च नरो वागीश्वरो भवेत् ॥
शिवामलकचूर्णं वै मधुना उदकेन वा ।
बलानि कुर्य्यान्नासायाः प्रत्यूषे भक्षितं शिव ! ॥
कुष्ठचूर्णं साज्यमधु प्रातर्जग्ध्वा भवेन्नरः ।
साक्षात् सुरभिदेहो वै जीवेद्वर्षसहस्रकम् ॥
माषस्य विदलान्येव वितुषाणि महेश्वर ! ।
घृतभावितशुष्काणि पयसा साधितानि वै ॥
शर्करान्नयुतैर्भिश्च भक्षयित्वा च कामयेत् ।
स्त्रीणां शतं महादेव ! तत्क्षणान्नात्र संशयः ॥
रसस्नैरण्डतैलेन गन्धकेन शुभो भवेत् ।
चिकलोदकसंदृष्टो बलकृद्बल्यकृद्भवेत् ॥
दुग्धं वितुषमार्द्रञ्च शिम्बीबीजैश्च साधितम् ।
अपामार्गस्य तैलेन पीतं स्त्रीशतकामकृत्" ॥
इति गारुडे १९६ अध्यायः ॥ * ॥

हरिरुवाच ।

"या गौर्दैहि सकं वत्सं तस्या देयं सकं पयः ।
लवणेन समायुक्तं तस्या वत्सः प्रियो भवेत् ॥
शुनोऽस्थि करणबद्धं हि महिषीणां गवान्तथा ।
क्षमिजालं पातयति सकलं नात्र संशयः ॥
गोजङ्घाभिघातः स्यात् गुञ्जामूलस्य भक्षणात् ।
वरणफलस्य रसं करेण मथितं शिव ! ॥
चतुष्पादद्विपदयोः क्षमिजालं निपातयेत् ।
व्रणञ्च शमयेद्रुद्र ! यवानां पूरणात्तथा ॥
गजमूत्रस्य वै पानं गोमहिष्युपसर्गनुत् ।
समसूरं शालिबीजं पीतं तक्रेण घर्षितम् ॥
क्षीरं गोमहिषस्यैव गोः पुंसश्च हितं भवेत् ।
पत्रञ्च शरपुंङ्खाया दत्तं सलवणं शिव ! ॥
वारिस्फोटं हयानाञ्च वेशराणां विनाशयेत् ।
अश्वाश्च सुन्दरच्छाया भवन्ति च न संशयः ॥
स्पृहकुमारीपत्रं वै दत्तं सलवणं हर ! ।
तुरङ्गमवेशराणां कण्डुनुत् स्याद्गृहतः" ॥
इति गारुडे १९७ अध्यायः ॥ * ॥

हरिरुवाच ।

"चित्रकस्याष्टभागानि शूरणस्य च षोडश ।
शुण्ठ्याश्चत्वारि भागानि मरीचानां दशं तथा ॥
पिप्पली पिप्पलीमूलं विडङ्गानां चतुष्टयम् ।
अष्टौ सुवर्चलीभागाश्च त्रिफलायाश्चतुष्टयम् ॥
द्विगुणेन गुडेनैषां मोदकानि हि कारयेत् ।
तद्भक्षणमजीर्णं हि पाण्डुरोगञ्च कामलाम् ॥
अतिश्रोणिं च मन्दाग्निं प्लीहाद्यञ्च निवारयेत् ।
बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकम् ॥
प्रसारणश्वगन्धा च रुहती कण्टकारिका ।
बला चातिबला राला श्वदंष्ट्रा च पुनर्नवा ॥
एरण्डशारिवा पर्णी गुडूची कपिकच्छुरा ।
एषां दशपलान् भागान् क्वाथयेत् सलिलेऽमले ॥
तेन पादावशेषेण तैलपात्रे विपाचयेत् ।
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ॥
घृतावरीरसञ्चैव तैलतुल्यं प्रदापयेत् ।
द्रव्याणि यानि पेयानि तानि वक्ष्यामि तच्छृणु ॥
घृतपुष्पा देवदारु बला पर्णी वचागुरु ।
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्नवा ॥
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ।
वृक्कशूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ॥
अपस्मारं वातरक्तमागुम्फांश्च पुमान् भवेत् ।
गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी शिव ! ॥
अश्वानां वातभग्नानां कुञ्जराणां नृणां तथा ।
तैलमेतत् प्रयोक्तव्यं सर्व्ववातविकारिणाम् ॥
हिङ्गु तुम्बुरु शुण्ठ्या च साध्यं तैलन्तु सार्षपम् ।
एतद्धि पूरणं श्रेष्ठं कर्णशूलापहं परम् ॥
शुष्कमूलकशुण्ठीनां चारो हिङ्गुलनागरम् ।
शुष्कं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावश्च कर्णयोः ।
क्रमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥
शुष्कमूलकशुण्ठीनां चारो हिङ्गुलनागरम् ।
घृतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्चलं यवक्षारं सामुद्रं सैन्धवं तथा ।
भृङ्गराजं विड्ं मुस्तं मधु शुक्लं चतुर्गुणम् ॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम् ॥
व्याधिजः कर्णनादश्च पूयस्रावश्च दारुणः ।
पूरणादस्य तैलस्य क्रमयः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति शृणाद्भूतप्रेश्वर ! ।
क्षारतैलमिदं श्रेष्ठं सुखदन्तामयापहम् ॥
चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीकङ्कोलपूगानां लवङ्गस्य फलानि च ॥
अगुरुश्रीरकस्तुर्य्यः कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च चोलो दमनकं नखम् ॥
सरलः सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्पूरकः पद्मकश्च एतैस्तैलं प्रसाधितम् ॥
प्रस्वेदमलदौर्गन्ध्यकण्डुकुष्ठहरं परम् ।
पुमान् युवा स्यात् शुक्राढ्यः स्त्रीणां चात्यन्तदुर्लभः ॥
स्त्रीशतं गच्छते रुद्र ! वन्ध्यापि लभते सुतम् ॥
यमानी चित्रकं धान्यं व्युषणं जीरकं तथा ।
सौवर्चलं विड्ं वयं पिप्पलीमूलराजिकम् ।
एभिः पचेत् घृतप्रस्थं जलप्रस्थाष्टसंयुतम् ॥
मर्म्मार्शोगुल्मश्वयथुं हन्ति वह्निं करोति वै ॥
मरीचं चित्रतं कुष्ठं हरितालं मनःशिला ।
देवदारुहरिद्रे द्वे कुष्ठं मांसी च चन्दनम् ।
विशाला करवीरश्च अर्कक्षीरं शुक्लद्रसम् ॥
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत् ।
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत् ॥
मत्स्याज्ये वौष्ट्रयाज्ये वा शनैर्मृद्वग्निना पचेत् ।
पामा विचर्चिका चैव दद्रुविष्फोटकानि च ॥
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते ।
प्रसूतान्यपि स्त्रीचक्षूंषि तैलमानेन स्नेहयेत् ॥
चिरोत्थितमपि स्त्रैत्यं विवर्णं तत्क्षणाद्भवेत् ।
पटोलपत्रं कटुका मञ्जिष्ठा शारिवा निशा ॥
जाती शमी निम्बपत्रं मधुकं क्वथितं घृतम् ।
एभिर्लेपात् सुररुजो व्रणा वै खादिताः शिव ! ॥
शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला ।
अभया च गुडूची च अटरूषकवासकुची ॥
एतैरेतत्समैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
कण्टकार्य्या रसं प्रस्थं क्षीरप्रस्थसमन्वितम् ।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम् ॥
अग्निजिह्वा वचा वासा पिप्पली मधु सैन्धवम् ।
सप्तरात्रप्रयोगेण किन्नरैः सह गीयते ॥
अपामार्गो गुडूची च कुष्ठं शतावरी वचा ।
शङ्खपुष्याभया साध्यं विड्ं मक्षितं समम् ।
त्रिभिर्दिनैर्नरं कुर्य्यादृग्यजुःसामपारगम् ॥
अद्भिर्वा पयसाज्येन मासमेकन्तु सेवितः ।
वचा कुर्य्यान्नरं प्राज्ञं श्रुतिधारणसंयुतम् ॥

ओष

चन्द्रसूर्य्यग्रहे पीतं पलमेकं पयोऽन्वितम् ।
वचायास्तत्तृतीयं कुर्य्यात् महाप्रज्ञान्वितं नरम् ॥
भूनिम्बनिम्बचिरायापर्पटैश्च हृतं जलम् ।
पटोलीमुस्तकाभ्याञ्च वासकेन च नाशयेत् ।
विस्फोटकानि व्यक्तानि नात्र कार्य्या विचारणा ।
कतकस्य पलं शुङ्गं सैन्धवं त्र्यूषणं वचा ॥
क्षेनो रसाञ्जनं क्षौद्रं विड्ङ्गानि मनःशिला ।
एषां वर्त्तिर्हरेन्नाशं तिमिरं पटलं तथा ॥
प्रस्थे द्वे गव्यमाजानां क्षाथयेद्दोषसम्मसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ॥
काञ्जिकस्याढकं दत्त्वा पिष्ट्वान्येतानि दापयेत् ।
पुनर्नवा गोक्षुरकं सैन्धवं त्र्यूषणं वचा ॥
सरलं सुरदारुश्च मञ्जिष्ठा कण्टकारिका ।
नस्यपानाञ्जनैश्चैव कर्णशूलं हनुग्रहम् ॥
वाधिर्य्यं सर्व्वरोगांश्च अभ्यङ्गाच्च महेश्वर ! ॥
पलद्वयं सैन्धवञ्च शुण्ठी चित्रकपञ्चकम् ।
पञ्चप्रस्थं क्षारनालं तैलप्रस्थं पचेत्ततः ।
ग्रहगुल्मखरश्लीहसर्व्ववातविकारनुत् ॥
उदुम्बरं वटक्षत्तं जम्बुद्वयमधार्ज्जुनम् ।
पिप्पलञ्च कदम्बञ्च पलाशं लोध्रतिन्दुकम् ॥
मधुकमाम्रसर्जञ्च वदरं पद्मकेशरम् ।
शिरीषबीजं कतकमेतत्क्षाथेन साधितम् ।
तैलं हन्ति व्रणाक्षेपाचिरकालभवानपि"॥
इति गारुडे १९८ अध्यायः ॥ * ॥

हरिरुवाच ।

"पाठा द्वे रजनी कुष्ठमश्वगन्धाजमोदकम् ।
वचा चिकटुकश्चैव लवणं चूर्णमुत्तमम् ॥
ब्राह्मीरसे भावितञ्च सर्पिर्मधुसमन्वितम् ।
सप्ताहं भक्षितं कुर्य्यान्मेधाश्रुतिं मतिं पराम् ॥
सिद्धार्थकवचाहिङ्गुकरञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बचिकटु गोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥
निम्बकुम्भे हरिद्रे द्वे शिग्रु सर्षपजस्तरुः ।
देवदारु पटोलञ्च धान्यं तक्रेण घर्षितम् ॥
देहं तलाक्तगात्रं वै अनेनोद्वर्त्तयेत्ततः ।
पामाः कुष्ठानि नश्येयुः कण्डूं पिटकसक्थिकीम्॥
सामुद्रं सैन्धवं क्षारौ राजिका लवणं विड्म् ।
कटुकोद्भवजः कीटं क्षिपेत् शूरणकं समम् ।
दधिरोमूत्रपयसा मन्दपावकपाचितम् ।
एतच्चाग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥
जीर्णे जीर्णे च भुञ्जीत मासादिघृतभोजनम् ।
नाभिशूलं मूत्रशूलं गुल्मप्लीहभवञ्च यत् ।
सर्व्वशूलहरं चूर्णं जठरानलदीपनम् ।
परिणामसमुत्थस्य शूलस्य च हितं परम् ॥
अभयामलकं द्राक्षा पिप्पली कण्टकारिका ।
गुडूचीं पुनर्नवा शुण्ठी जम्ब्वा काथं निहन्ति वै ॥
अभयामलकं द्राक्षा पाठा चैव विभीतकम् ।
शर्क्करा च समञ्चैव जलं ज्वरहरं भवेत् ॥
त्रिफला वदरं द्राक्षा पिप्पली च विरेचनम् ।
हरीतकी सोष्णनीरा लवणञ्च विरेचनम् ॥
कूर्म्ममत्स्याखुमहिषगोघ्नगोनासा वानराः ।
विड़ालवर्हिकाकाश्च वराहोलूककुक्कुटाः ॥
हंस एषाश्च विण्मूत्रं मांसं वा रोमशोणितम् ।
धूपं दद्यात् ज्वरार्त्तस्य उन्मत्तस्यश्च शान्तये ।
अपस्माराभिभूतेभ्यो ग्रहार्त्तेभ्यश्च शान्तये ।
एतान्यौषधजातानि कथितानि महेश्वर ! ॥
निहन्ति यानि रोगाणि स्तुतिभिन्द्राग्निर्यथा ।
औषधे भगवान् विष्णुः स्मृतोऽसौ रोगनुद्भवेत् ॥
ध्यातोऽर्चितः स्तुतो वापि नात्र कार्य्या विचारणा"॥
इति गारुडे १९९ अध्यायः ॥
(विष्णुः । यथा महाभारते विष्णोः सहस्रनामकीर्त्तने । १३ । १४९ । ४४ ।
"अमृतांशूद्भवो भानुः शृङ्गबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्म्मः पराक्रमः" ॥)

औषरं, क्ली, (उषरे भवं । उषर + अण् ।) पांशुवलवणम् । अयस्कान्तभेदः । इति राजनिर्घण्टः ॥
(पांशुवलवणशब्देऽस्य गुणादिकं ज्ञेयम् ॥)

औषरकं, क्ली, (औषर + स्वार्थे कन् ।) मृत्तिकालवणम् । खारी लूण इति भाषा । तत्पर्य्यायः । सार्व्वगुणम् २ सर्व्वसंसर्गलवणम् ३ उषरकम् ४ साम्बरम् ५ वङ्कलवणम् ६ मेलकलवणम् ७ मिश्रम् ८ । अस्य गुणाः । कटुत्वम् । क्षारत्वम् । तिक्तत्वम् । वातकफनाशित्वम् । विदाहित्वम् । पित्तमलबन्धमूत्रसंशोषकारित्वञ्च । इति राजनिर्घण्टः ॥

औष्ट्रकं, क्ली, (उष्ट्राणां समूहः । उष्ट्रस्य विकारः अवयवो वा । उष्ट्र + "गोत्रोक्षोष्ट्रोरभ्रेति" । ४ । २ । ३९ । वुञ् ।) उष्ट्रसमूहः । इत्यमरः ॥ उटेर पाल इति भाषा । (उष्ट्रदुग्धार्थे यथा ॥ वाभटे सूत्रस्थाने । ५ अ ॥
"ईषदूष्णोष्णलवणमौष्ट्रकं दीपनं लघु ।
श्लक्ष्णं वातकफानाहकृमिश्लीपदोदरार्शसाम्" ॥)

औष्ण्यं, क्ली, (उष्णस्य भावः । उष्णता ॥ (यथा रघुः । १७ । ३२ ।
"पूर्व्वराजवियोगौष्ण्यं क्षत्रस्य जगतो हृतम्"॥)

अं

अं अंकारः । स तु अनुस्वारः । तन्त्रमते पञ्चदशस्वरवर्णः । (स तु पाणिन्यादिमते अयोगवाह एव "अयोगवाहा विज्ञेया आश्रयस्थानभागिनः" । इत्यक्तेः । नास्ति योगः अक्षरसमाम्नायसूत्रेषु येषां ते अयोगास्तथापि वाहयन्ति स्वस्वकार्य्यं निर्व्वाहयन्तीति वाहाः अयोगाश्च ते वाहाश्चेति अयोगवाहा अनुस्वारविसर्गजिह्वामूलीयोपध्मानीया इत्यर्थः ।)
बिन्दुमात्रानुनासिकवर्णोऽयं अकार उच्चारणार्थः। वोपदेवेनास्य नुरिति संज्ञा कृता । स तु नकारमकारस्थानेऽपि भवति ॥ * ॥
"नुवीपूर्ब्बेण संबद्धौ मूर्ध्नौ तु परगामिनौ ।
चत्वारोऽयोगवाहाख्या यत्कर्म्मेणयजो मताः" ॥
इति दुर्गादासः ॥ * ॥

अः

"अंकारं विन्दुसंयुक्तं पीतविद्युत्समप्रभम् ।
पञ्चप्राणात्मकं वर्णं ब्रह्मादिदेवतामयम् ॥
सर्व्वज्ञानमयं वर्णं विन्दुत्रयसमन्वितम्" ॥
इति कामधेनुतन्त्रम् ॥ (वङ्गीयभाषायाम् ।) तस्य लेखनप्रकारो यथा ।
"अकाररूपमूर्द्धे तु दक्षिणे विन्दुरूपिणी ।
ब्रह्मा विष्णुश्च रुद्रश्च क्रमशस्तासु तिष्ठति ॥
या तु विन्दुमयी रेखा सैवाद्या शक्तिरीरिता" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ अस्य नामानि यथा ।
"अंकारश्चतुरो दन्तो घटिका समगुह्यकः ।
प्रद्युम्नः श्रीमुखी प्रीतिर्वीजयोनिर्दशध्वजः ॥
परं ब्रह्मी प्रभावीशः सोमविन्दुः कलानिधिः ।
अक्रूरश्चेतना नादपूर्णा दुःखहरः शिवः ॥
शिवः शम्भुर्नरेशश्च सुखदुःखप्रवर्त्तकः ।
पूर्णिमा रेवती शुद्धः कन्याचरवियद्रविः ॥
अमृताकर्षिणी सूक्ष्मं विचित्रा व्योमरूपिणी ।
केदारो राधिनाशश्च कुब्जिका चैव वुद्बुदः" ॥
इति तन्त्रशास्त्रम् ॥

अं, क्ली, परं ब्रह्म । इत्येकाक्षरकोषः ॥ (महेश्वरः । यदुक्तम् महाभारते १३ । १७ । १२६ ।
"विन्दुर्विसर्गः सुमुखः शरः सर्व्वायुधः सहः" ॥)

अः

अः अकारः स च विसर्गः। द्विविन्दुमात्रकण्ठावस्थाऽयं अकार उच्चारणार्थः। तन्त्रमते स च षोड़शस्वरवर्णः। (पाणिन्यादिमते अयं अयोगवाहश्च । अयोगवाहस्य व्युत्पत्तिस्तु अनुस्वारशब्दे द्रष्टव्या ।) वोपदेवेनास्य विरिति संज्ञा कृता । स तु सकाररकारयोः स्थानेऽपि भवति ॥ * ॥
"अःकारं परमेशानि ! विसर्गसहितं सदा ।
अःकारं परमेशानि ! रक्तविद्युत्समामयम् ॥
पञ्चदेवमयो वर्णः पञ्चप्राणमयः सदा ।
सर्व्वज्ञानमयो वर्णः आत्मादितत्त्वसंयुतः ॥
विन्दुत्रयमयो वर्णः शक्तित्रयमयः सदा ।
किशोरवयसः सर्व्वे गीतवाद्यादितत्पराः ॥
शिवस्य युवती एताः स्वयं कुण्डली मूर्त्तिमान्" ॥
इति कामधेनुतन्त्रम् ॥ (वङ्गीयभाषायां) तस्य लेखनप्रकारो यथा ।
"अकाररूपदक्षे तु द्विविन्दुरध ऊर्द्धतः ।
ब्रह्मेशविष्णवस्तासु मात्रा शक्तिः समीरिता ॥
विन्दुद्वयान्विता रेखा सैवाद्या शक्तिरीरिता" ॥
इति वर्णोद्धारतन्त्रम् ॥ * ॥ अस्य नामानि यथा ।
"अः कण्ठको महासेनः कालापूर्णामृता हरिः ।
इच्छा भद्रा गजेशश्च रतिर्विद्यामुखी सुखम् ॥
द्विविन्दुरसना सोमोऽग्निरुद्रो दुःखसूचकः ।
द्विजिह्वः कुण्डलं वह्निः सर्गः शक्तिर्निशाकरः ।
सुन्दरी सुयशानन्ता गजनाथो महेश्वरः" ॥
इति तन्त्रशास्त्रम् ॥

अः, पुं, महेश्वरः । इत्येकाक्षरकोषः ॥ (यदुक्तम्,— महाभारते १३ । १७ । १२६ ।
"विन्दुर्विसर्गः सुमुखः शरः सर्व्वायुधः सहः" ॥)

Reprinted by
Skylark Printers (photo-Offset), Delhi-6 (Phone : 266595)

PK
925
D47
1967
v.1

Deva, (Sir) Radhakanta
Sabdakalpadrumah

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

॥ श्रीः ॥

शब्दकल्पद्रुमः

द्वितीयो भागः

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९३



शब्दकल्पद्रुमः

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन-संपरिवर्द्धितः ।

द्वितीयो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : तृतीय, सं० २०२४ वि०
मूल्य : सम्पूर्ण ग्रन्थ १–५ भाग रु० १५०–००



PK.
925
D47
1967
V.2

©
चौखम्बा संस्कृत सीरीज आफिस
पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी–१ (उ० प्र०)
भारतवर्ष
फोन नं० ३१४५

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 93

SHABDA-KALPADRUM

OR

AN ENCYCLOPÆDIC DICTIONARY OF SANSKRIT WORDS ARRANGED IN ALPHABETICAL ORDER GIVING THE ETYMOLOGICAL ORIGIN OF THE WORDS ACCORDING TO PANINI, THEIR GENDER, VARIOUS MEANINGS AND SYNONYMS, AND ILLUSTRATING THEIR SYNTACTICAL USAGE AND CONNOTATION WITH QUOTATIONS DRAWN FROM VARIOUS AUTHORITATIVE SOURCES SUCH AS VEDAS, VEDANTA, NYAYA, OTHER DARSHANAS, PURANETIHAS, MUSIC, ART, ASTRONOMY, TANTRA, RHETORICS AND PROSODY AND MEDICINE ETC.

BY
RAJA RADHA KANTA DEVA

PART TWO

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1

Publisher : The Chowkhamba Sanskrit Series Office, Varanasi.
Printer : Vidya Vilas Press, Varanasi.
Edition : Third, 1967
Price : 1–5 Vols. Complete Rs. 150–00

© The Chowkhamba Sanskrit Series Office
Oriental and Foreign Book-Sellers and Publishers
P. O. Chowkhamba, Post Box 8,
Varanasi–1 (India)
1967
Phone : 3145



शब्दकल्पद्रुमः।

द्वितीयकाण्डम्।

क

क, ककारः। (वर्णस्य स्वरूपग्रहणाय कारः।) स तु व्यञ्जनप्रथमवर्णः। अस्योच्चारणस्थानं कण्ठः। इति व्याकरणम्॥ (तथा चोक्तम् "तुल्यास्य प्रयत्नं सवर्णं"। १। १। ९। सिद्धान्तकौमुद्याम्। "अकुहविसर्जनीयानाङ्कण्ठः"॥ इति॥ *॥) (वङ्गीयभाषायां) तस्य लेखनप्रकारो यथा,—

"वामरेखा भवेद्ब्रह्मा विष्णुर्दक्षिणरेखिका।
अधोरेखा भवेद्रुद्रो माचा साक्षात् सरस्वती॥
कुण्डली चाङ्कुशाकारा मध्यशून्यं सदाशिवः।
कदम्बगोलकाकारं ककारं भावयेत् सुधीः"॥

इति वर्णोद्धारतन्त्रम्॥ *॥ तस्य नामानि यथा,—

"कः क्रोधीशो महाकाली कामदेवप्रकाशकः।
कपाली तेजसः शान्तिर्वासुदेवो जयानलः॥
चक्री प्रजापतिः सृष्टिर्दक्षस्कन्धो विशाम्पतिः।
अनन्तः पार्थिवो विन्दुस्तापिनी परमात्मकः॥
वर्णाद्यश्च सुखी ब्रह्मा सखाद्योऽम्भः शिवो जलम्।
माहेश्वरी तुला पुष्या मङ्गलश्चरणं करः॥
नित्या कामेश्वरी मुख्यः कामरूपो गजेन्द्रकः।
श्रीपुरं रमणो रङ्गकुसुमा परमात्मकः"॥

इति तन्त्रशास्त्रम्॥

"अधुना संप्रवक्ष्यामि ककारतत्त्वमुत्तमम्।
रहस्यं परमाश्चर्यं त्रैलोक्यानाञ्च संप्लवम्॥
वामरेखा भवेद्ब्रह्मा विष्णुर्दक्षिणरेखिका।
अधोरेखा भवेद्रुद्रो माचा साक्षात् सरस्वती॥
कुण्डली अङ्कुशा कारा मध्ये शून्यः सदाशिवः।
जवायावकसंकाशा वामरेखा वरानने!॥
शरच्चन्द्रप्रतीकाशा दक्षरेखा च मूर्त्तिमान्।
अधोरेखा वरारोहे! महामरकतद्युतिः॥
शङ्खकुन्दसमा कीर्त्तिर्माचा साक्षात् सरस्वती।
कुण्डली अङ्कुशा या तु कोटिविद्युल्लताकृतिः॥
कोटिचन्द्रप्रतीकाशो मध्ये शून्यः सदाशिवः।
शून्यगर्भे स्थिता काली कैवल्यपददायिनी॥
ककाराज्जायते सर्व्वं कामं कैवल्यमेव च।
अर्थश्च जायते देवि! तथा धर्म्मश्च नान्यथा॥
ककारः सर्व्ववर्णानां मूलप्रकृतिरेव च।

कं

ककारः कामदा कामरूपिणी स्फुरदक्षया॥
कामनीया महेशानि! स्वयं प्रकृतिसुन्दरी।
माता सा सर्व्वदेवानां कैवल्यपददायिनी॥
ऊर्द्धकोणे स्थिता कामा ब्रह्मशक्तिरितीरिता।
वामकोणे स्थिता ज्येष्ठा विष्णुशक्तिरितीरिता॥
दक्षकोणे स्थिता विन्दू रौद्री संहाररूपिणी।
ज्ञानात्मा स तु चार्व्वङ्गि! कलाचतुष्टयात्मकः॥
इच्छाशक्तिर्भवेद्ब्रह्मा विष्णुश्च ज्ञानशक्तिमान्।
क्रियाशक्तिर्भवेद्रुद्रः सर्व्वे प्रकृतिमूर्त्तिमान्॥
आत्मविद्या शिवस्तत्र सदा मन्त्रः प्रतिष्ठितः।
आसनं त्रिपुरादेव्याः ककारं पञ्चदैवतम्॥
ईश्वरो यस्तु देवेशि! त्रिकोणे तस्य संस्थितिः।
त्रिकोणमेतत् कथितं योनिमण्डलमुत्तमम्॥
केवलं प्रपदे यस्याः कामिनी सा प्रकीर्त्तिता।
ॐ जवायावकसिन्दूरसदृशीं कामिनीं परम्॥
चतुर्भुजां त्रिनेत्राञ्च बाऽवस्त्रीविराजिताम्।
कदम्बकोरकाकारस्तनद्वयविभूषिताम्॥
रत्नकङ्कणकेयूरमञ्जीरैरुपशोभिताम्।
रत्नहारैः पुष्पहारैः शोभितां परमेश्वरीम्॥
एवं हि कामिनीं ध्यात्वा ककारं दशधा जपेत्।
प्रफुल्लश्च ततो ध्यात्वा जपस्य फलभाग्भवेत्॥
एतत्ते कथितं देवि! ककारतत्त्वमुत्तमम्"॥

इति कामधेनुतन्त्रम्॥ (अनुबन्धविश्लेषः। यथाह कविकल्पद्रुमः। "कच्छुरादिः किन्तु वा"। एतेन गणात् क संख्याने गणयति कथत् क वाक्यप्रबन्धे कथयति इत्यादि स्यात्॥)

कं, क्ली, (कायति शब्दो निर्गच्छति यतः यस्मिन् सतीत्यर्थः सजिह्वदनस्य शिरोऽन्तर्वर्त्तित्वात्। यद्वा कायति वर्णात्मकं ध्वन्यात्मकं वा शब्दं करोति जीवः यस्मिन् सतीति यावत्॥ कै शब्दे "अन्येभ्योऽपि दृश्यते" डः। ३। २। १०१।) शिरः॥ (यथा, तन्त्रसारे।

"हाभ्यामोष्ठौ दिरुन्मृज्य चैकेन ह्रासयेत्करम्।
मुख-घ्राण-नेत्र-श्रोत्र-नाभ्युरस्कं भुजौ क्रमात्"॥

अत्र कं शिरः इति तट्टीका॥ कायति शब्दायते स्रोतोवेगेनालोड़नेन वेति यावत्।) जलम्॥

कः

(यथा, भागवते ६। १। ४२।

"सूर्य्योऽग्निः खं मरुद्भावः सोमः सन्ध्याहनीदिशः।
कं कुः कालो धर्म्म इति ह्येते दैह्यस्य साक्षिणः"॥

कायन्ति ध्यानन्दोत्सवध्वनिं कुर्व्वन्ति यस्मिन् समागते उपस्थिते इत्यर्थः गृहिण इति शेषः। ध्यानन्द्ध्वनेस्तु सुखानुवर्त्तित्वात्।) सुखम्। इति मेदिनी॥

(यथा, छान्दोग्योपनिषदि। ४। १०। ५।

"प्राणो ब्रह्मेकं ब्रह्म खं ब्रह्मेति स होवाच विजानाम्यहं यत् प्राणो ब्रह्मेकं तु खञ्च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणञ्च ह्यस्मै तदाकाशञ्चोचुः"॥

"तमेवमुक्तवन्तं ब्रह्मचारिणं ते ह्यूचुः। यद्वाव यदेव वयं कमवोचाम तदेव खमाकाशम् इत्येवं खेन विशेष्यमाणं कं विषयेन्द्रियसंयोगजातसुखान्निवर्त्तितं स्यान्नीलेनेव विशेष्यमाणमुत्पलं रक्तादिभ्यः॥ यदेव खमाकाशमवोचाम तदेव च कं सुखमिति जानीहि एवञ्च सुखेन विशेष्यमाणं खं भौतिकादचेतनात् खान्निवर्त्तितं स्यान्नीलोत्पलवदेव"॥ इति भाष्यम्॥ कचते दीप्यते मस्तकोपरि शोभते इति भावः। यद्वा कच्यते बध्यते संयम्यते कराभ्याम्। कच् बन्धने डः।) केशः॥ इति धरणी॥

कः, पुं, (कचति दीप्यते खेन ज्योतिषा ज्योतिर्म्मयत्वात् कच्+ड।) ब्रह्मा (यथा, भागवते। ३। १२। ५१।

"एवं युक्तक्रतस्तस्य दैवं चावेक्षतस्तदा।
कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते"॥)

विष्णुः। (यथा महाभारते। १३। विष्णोः सहस्रनामकथने। १४९। ९१।

"एको नैकः सवः कः किं यत् तत्पदमनुत्तमम्"॥

प्रजापतिः। यथा भागवते। ८। ५। ३९।

"खेभ्यश्च छन्दांस्यृषयो मेढ्रतः कः
प्रसीदतां नः स महाविभूतिः"॥)

दक्षः। (यथा भागवते। ९। १०। १०॥

"जघ्नेऽद्भुतैणवपुषाऽश्रमतोऽपकृष्टो

कंसका

मारीचमाश्रु विशिखेन यथा कमुग्रः" ॥)
कामदेवः । अग्निः । वायुः । यमः । सूर्य्यः । आत्मा । राजा । ग्रन्थिः ॥ मयूरः । इति मेदिनी । मनः । शरीरम् । काजः । धनम् । शब्दः । इत्यनेकार्थकोषः । प्रकाशः ॥ इत्येकाक्षरकोषः ॥

कः, त्रि, सर्व्वनाम । इति विश्वः । के किं इति भाषा ॥ (यथा विष्णुपुराणे । १ । १७ । २० ।
"तस्ते परमात्मानं तात ! कः केन ग्रास्यते" ॥)

कंशः, पुं क्ली, कंसः । पानपात्रम् । इत्यमरटीका ॥

कंसं, क्ली पुं, (कामयति काम्यते वा अनेन पातुमितिग्रैवः । "इदृवदिहनिकमीति" सः । उणां । ३ । ६२ ।) मद्यादिपानपात्रम् । तत्पर्य्यायः । पानभाजनम् २ । इत्यमरः ॥ २ । ६ । ६२ । कंशम् ३ । कांस्यम् ४ । इति तट्टीका । तैजसद्रव्यम् । स्वर्णरजतादिनिर्म्मितपात्रमात्रम् । मानविशेषः तत्तु षाढ़कपरिमाणम् । इति मेदिनी ॥ (चतुःषष्टिपलात्मकाढ़करूपम् ॥ यथा भावप्रकाशे ।
"शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ।
शरावाभ्यां भवेत् प्रस्थश्चतुः प्रस्थैस्तथाढ़कः ।
भाजनं कांसपात्रञ्च चतुःषष्टिपलञ्चसः" ॥
ताम्रवङ्गमिश्रितधातुविशेषः। काँसा इति भाषा । तत्पर्य्यायः । कांस्यम् २ । कंसास्थि ३ । ताम्रार्द्धम् ४ । इति चिकाण्डशेषः ॥ (वर्तुलाकारयज्ञियपात्रभेदः । यथा शतपथब्राह्मणे ।१४।६।३।१ ।
"औडुम्बरे कंसे चमसे वा" ।)

कंसः, पुं, (कामयति पित्रादिबन्धुवर्गान् अभिभूय पापात्मकं राज्यविषयादिभोगं यः । कम् + सः । यद्वा कंसे ग्रास्ति ग्रचून् कंस ग्रासने इत्यस्मात् सः ।) विष्णुद्वेष्टसुरविशेषः । इति हेमचन्द्रः ॥ स तु मथुरादेशराजा । यदुवंशीयोग्रसेनराजपुत्रः । श्रीकृष्णमातुलः । तेन वधः प्राप्तः । (एतद्विवरणं भागवते । १० । ४४ अध्याये विशेषेण द्रष्टव्यम् ॥ कंसनामकारणं हरिवंशे यथा,
"कस्य त्वमिति यच्चाहं त्वयोक्तो मत्तकाशिनि ।
कंसस्तस्माद्रिपुध्वंसी तव पुत्रो भविष्यति" ॥
अतएव कंसधातुनिष्पन्नत्वमेव प्रशस्यते ॥)

कांसकं, क्ली, (कामयतेऽनेन चक्षुर्दृष्ट्यादिकमिति ग्रैवः । कम् + सः । ततो जातौ संज्ञायां वा कन् ।) चक्षुरौषधधातुविशेषः । स तु हीराकसीप्रभेदः । तत्पर्य्यायः । पुष्पकासीसम् २ । नयनौषधम् ३ । इति हेमचन्द्रः ॥

कंसकारः, पुं, स्त्री, (कंसं तन्मयपात्रादिकं करोति यः । कंस + ञ + "कर्म्मण्यण्" । ३ । २ । १ । केचित्तु तालव्यशकारमिच्छन्त्यत्र ।) जातिविशेषः । काँसारि इति भाषा । तस्योत्पत्तिर्यथा ।
"वैश्यायां ब्राह्मणाज्जातः अम्बष्ठो गान्धिको वणिक् ।
कंसकारश्शकारौ ब्राह्मणात् सम्बभूवतुः" ॥
इति ब्रह्मवैवर्त्तपुराणम् ॥ अपि च ।
"विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्राश्च षड़ेते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कंसकारः षड़ेते शिल्पिनो नराः" ॥

ककुत्

इति ब्रह्मवैवर्त्तपुराणम् ॥
कंसजित्, पुं, (कंसं जयति जितवान् वा कंस + जि + कर्त्तरि क्विप् ।) श्रीकृष्णः । इति हलायुधः ॥
कंसवती, स्त्री, (कंसः ग्रासनग्रक्तिरस्यस्याः । कंस + मतुप् मस्य वत्वम् । यद्वा कंसः भाद्यत्वेनास्यस्याः ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च । (यथा भागवते । ६ । २४ । २५ ।
"कंसा कंसवती कङ्का ग्रूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)
कंसहा, [न्] पुं, (कंसं हन्ति हतवान् वा । कंस + हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥
कंसा, स्त्री, (कंस + टाप् ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च ।
(यथा भागवते । ६ । २४ । २५ ।
"कंसा कंसवती कङ्का ग्रूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)
कंसारातिः, पुं, (कंसस्य अरातिः ।) विष्णुः । इत्यमरः ॥ १ । १ । २१ ॥
कंसारिः, पुं, (कंसस्य अरिः ग्रत्रुः ।) श्रीकृष्णः । इति ग्रब्दरत्नावली ॥ (यथा राजतरङ्गिण्यां । १ । ५६ ।
"साहायकार्थमाकृतो जरासन्धेन बन्धुना ।
समं ररोध कंसारेर्मथुरां पृथुभिर्बलैः" ॥)
कंसास्थि, क्ली, (कंसस्य अस्थि । अस्थि रूपमित्यर्थः ।) कांस्यधातुः । इति चिकाण्डशेषः ॥
कंसोद्भवा, स्त्री, (कंसात् तैजसधातुविशेषसम्बन्धात् उद्भवति या । यद्वा कंसायाः निर्झरिण्या उद्भवो कंसायां उद्भवो यस्या वा । कंस + उत् + भू + अच् । कंस इव शुभत्वात् उद्भवतीति केचित् ।) सुगन्धिमृत्तिकाविशेषः । तत्पर्य्यायः । षाढ़की २ तुवरी ३ काक्षी ४ मदाक्ष्या ५ सौराष्ट्री ६ पार्व्वती ७ कालिका ८ पर्पटी ९ सती १० । इति हेमचन्द्रः ॥
कक इ ड वञ्चने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) इ कर्म्मणि ककते । ड ककते । इति दुर्गादासः ॥
कक ड इच्छायां । गर्व्वे । चापले । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अकं-च-सेट् ।) इच्छेह दृष्ट्या । चापलं चञ्चलीभावः । ड ककते काकः । सदृष्ट्यञ्चलो वा स्यादित्यर्थः । गर्व्वः कैश्चिन्न पठ्यते । इति दुर्गादासः ॥
ककन्दः, पुं, (कको गर्व्वश्चापल्यं वा भवत्यस्मात् । कक + अन्दच् । यद्वा कं गर्व्वं चापल्यं दृष्ट्यां वा ददातीति । कं + दा + डः ।) स्वर्णः । इत्युणादिकोषः ॥
ककुञ्जलः, पुं क्ली, (कं जलं कूजयति याच्ञयते इति यावत् । क + कूज् + अलच् । एषोदरादित्वात् नुम् ह्रस्वश्च ।) चातकपक्षी । इति राजवल्लभः ॥
ककुत्, [द्] स्त्री, (कं सुखं कावयति शब्दयत्यस्य औन्नत्यं प्रापयतीति यावत् । दृषाणां हि ककुत् शब्दस्यस्य सुखलक्षणमिति भावः । ककुड्डीनदृषपालने दरिद्रता इति स्मरणात् । क + कु +

ककुद

णिच् + एषोदरादित्वात् ह्रस्वः तुगागमश्च ।) वृषाङ्कविशेषः । षाँड़ेर झुँट इति भाषा । (यथा, अथर्व्ववेदे । ६ । ८६ । ३ । "सम्राड़स्य सुरामो ककुन् मनुष्याणाम् । देवानामर्द्धभागसि त्वमको वृषो भव" ॥ स्कन्धभागः ॥
यथा, भागवते ५ । २५ । ७ । "ध्यायमानः सुरासुरोरगसिद्धगन्धर्व्वविद्याधरमुनिगणैरनवरतमदमुदितविलसविक्लवलोचनः सुललितसुखरिकामृतेनाप्यायमानः सपार्षदवर्षयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्त्ति" ॥) ध्वजः । वरः । इति मेदिनी ॥ (यथा, ऋग्वेदे । ८ । ४४ । १६ ।
"अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्" ॥)

ककुत्स्थः, पुं, (वृषरूपधरस्य देवेन्द्रस्य ककुदि तिष्ठति यः सः । ककुत् + स्था + कः ।) सूर्य्यवंशीयराजविशेषः । स तु अयोध्याधिपतिः । (पुरञ्जयनामायं ।) शशादराजपुत्रः । इक्ष्वाकुराजपौत्रश्च । (येन चासौ ककुत्स्थनामासीत् तत्कथा हरिवंशे श्रेलोत्त्तौ । ११ । १६—२० ॥
"शशादस्य तु दायादः ककुत्स्थो नाम वीर्य्यवान् ।
इन्द्रस्य वृषभूतस्य ककुत्स्थोऽजयतासुरान् ॥
पूर्व्वं देवासुरे युद्धे ककुत्स्थस्तेन सः स्मृतः ।
अनेनास्तु ककुत्स्थस्य पृथुरानेनसः स्मृतः" ॥
तथा च महाभारते १ । १ । २२६ ।
"पुरुः कुरुर्यदुः शूरो विश्वगश्वो महाद्युतिः ।
अणुहो युवनाश्वश्च ककुत्स्थो विक्रमी रघुः" ॥
स्कन्धदेशस्थिते चि ॥)

ककुदः, पुं क्ली, (कं सुखं उत्कर्षं वा कौति प्रकाशयति धातूनामनेकार्थत्वात् कुधातुरत्र प्रकाशनार्थः अन्तर्णीतार्थश्च । कु + क्विप् तुक् च एषोदरादित्वात् तस्य दः । यद्वा कस्य सुखस्य शरीरस्य वा कुं भूमिं मूलं आकरमिति यावत् ददातीति । कक + दा + कः । यद्वा "ककुदस्यावस्थायां लोपः" । ५ । ४ । १४६ । अर्द्धर्चादि-पां । २ । ४ । ३१ ।) प्राधान्यम् । (यथा अथर्व्ववेदे । १० । १० । १६ ।
"ऊर्द्धो विन्दुरुदचरद् ब्रह्मणः ककुदादधि" ।
रघुश्च । ६ । ७१ ॥
"इक्ष्वाकुवंश्यः ककुदं नृपाणां
ककुत्स्थ इत्याहितलक्षणोऽभूत् ।
काकुत्स्थशब्दं यत उन्नतेच्छाः
श्लाघ्यं दधत्युत्तरकोशलेन्द्राः" ॥)
राजचिह्नम् । तत्तु श्वेतच्छत्रादि । (यथा रघुः । ३ । ७० ।
"अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम् " ॥)
वृषाङ्कम् । झुँट इति भाषा । इत्यमरः ॥ १ । ३ । ६१ ॥ (यथा महाभारते । १३।१४ । २३६-२३६ ।
"वृषरूपधरं साक्षात् क्षीरोदमिव सागरम् ।
कृष्णपुच्छं महाकायं मधुपिङ्गलोचनम् ॥

ककुभ्

वज्रसारमयैः पृष्ठैर्निष्प्रकनकप्रभैः ।
सुतीक्ष्णैर्मन्दुरक्षाग्रैरुत्किरन्तमिवावनिम् ॥
जाम्बूनदेन दाम्ना च सर्व्वतः समलङ्कृतम् ।
सुवक्त्रखुरनासञ्च सुकर्णं सुकटीतटम् ॥
सुपार्श्वं विपुलस्कन्धं सुरूपं चारुदर्शनम् ।
ककुदं तस्य चाभाति स्कन्धमापूर्य्य धिष्ठितम्" ॥)
पर्व्वताग्रभागः । इति अमरटीकायां स्वामी ॥

ककुद्मान् [त्] पुं, (ककुदस्यास्तीति । मतुप् इति "मादुपधायाश्च मतो र्वो यवादिभ्यः" । ८।२।९ । न मस्य वकारत्वम् ।) वृषभः । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । ५६ ।
"तुषारसंघातशिलाः खुराग्रैः
समुल्लिखन् दर्पकलः ककुद्मान्" ॥)
पर्व्वतः । इत्यमरटीकायां स्वामी ॥ (यथा, विष्णुपुराणे २ । ४ । २७ ।
"ककुद्मान् पर्व्वतवरः सरिन्नामानि मे शृणु" ॥)
ऋषभौषधम् । इति राजनिर्घण्टः॥ अत्र क्वचिदपवादविषयेऽप्युत्पत्तेर्गोऽभिनिविशते इति न्यायात् वतुप्राप्तौ मतुप्रत्ययः ॥ इति मुग्धबोधमतम् ॥ (ऊर्म्मिः । यथा, यजुर्व्वेदे । ९ । ६ ।
"ऊर्म्मिः प्रतूर्त्तिः ककुद्मान्" ॥)

ककुद्मती, स्त्री, (ककुदिव वृषस्कन्धवत् अतिप्रशस्तो मांसपिण्डः अस्त्यस्याम् । मतुप् । यवादित्वात् न मस्य वत्वं स्त्रियां ङीप्।) कटिः । इत्यमरः ॥ २।६ । ७४ । पाछा इति भाषा ॥

ककुन्दरं, क्ली, (कस्य शरीरस्य कुं भूमिं नितम्बस्थलविशेषं दृणातीति । ककु + दृ + खच् मुम् च ।) कुकुन्दरम् । नितम्बस्थकूपकहृदयम् । इत्यमरटीकायां रमानाथः राजनिर्घण्टश्च ॥ (यथाह, याज्ञवल्क्यः । ३ । ९६ ।
"कनीनिके चाक्षिकूटे भ्रुकुलीकर्णपत्रकौ ।
कर्णौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे" ॥
"सक्थ्नश्चतुरस्रः ककुन्दरविभागश्रोभी रथाङ्गाकारसंस्थितश्च नितम्बभागः" ।
इति दक्षकुमारे ॥)

ककुभ्, [भ्] स्त्री, (कं वातं स्तुभ्नाति विस्तारयति या । स्तुभ इति सौत्रः । क्विप् । एषोदरादित्वात् सलोपः ।) दिक् । इत्यमरः ॥ १ । ३ । १ । प्रवेणी । शोभा । चम्पकमाला । इति मेदिनी ॥ शाखम् । इति विश्वः ॥

ककुभ्, स्त्री, (कं सुखं आनन्दं स्तुभ्नाति विस्तारयति या एषोदरादित्वात् सलोपः ।) रागिणीविशेषः । तस्या नामान्तरम् । कुङ्कः । तस्या लक्षणम् ।
"पीतं वसाना वसनं सुकेशी
वने रुदन्ती पिकनादहीना ।
विलोकयन्ती ककुभोऽतिभीता
मूर्त्तिः प्रदिष्टा ककुभस्तथेयम्" ॥
इति सङ्गीतदामोदरः ॥ (दिक् । यथा, भागवते । २ । ७ । २५ ।
"वक्षःस्थलस्पर्शरुजमहेन्द्रवाहदन्तैर्विडम्बितककुब्भिरुपाढहासम्" ॥ दक्षकन्या । सैव धर्म्मपत्नी । यथा तत्रैव । ६ । ६ । ४ ।
"भानुर्लम्बा ककुब् जामिर्विश्वा साध्या मरुत्वती" ॥)

ककुभः, पुं, (कस्य वातस्य कुः भूमिः स्थानं प्रकाशरूपविशेष इति यावत् भात्यस्मात् । ककु + भा + कः । यद्वा कं वातं स्तुभ्नाति विस्तारयति । क + स्तुभ + कः + एषोदरादित्वात् सलोपः ॥) अर्জ্জुनवृक्षः । (यथा, चक्रपाणिदत्तकृतसंग्रहे ॥
"गोधूमककुभचूर्णं क्षीरयोगव्यसर्पिषा पक्वम् ।
मधुशर्करासमेतं समयति हृद्रोगमुद्धतं पुंसाम् ॥
मूलं नागबलायास्तु चूर्णं दुग्धेन पाययेत् ।
हृद्रोगश्वासकासघ्नं ककुभस्य च वल्कलम् ॥
रसायनं परं बल्यं वातघ्नमग्निसयोजितम् ।
संवत्सरप्रयोगेन जीवेत् वर्षशतं नरः" ॥)
वीणादण्डम् । तत्पर्य्यायः । प्रसेवकः २ । इत्यमरः ॥ १ । ७ । ७ ॥ वीणाप्रान्तवक्रकाष्ठम् । दण्डाधःशुष्कगाम्भीर्य्यार्थं दारुमयं भाण्डं यच्चर्म्मणाच्छाद्य दीयते तच्चेत्यन्ये । वीणास्थितालावुफले इत्यपरे । इति भरतः ॥ रागविशेषः । इति मेदिनी ॥ (शिवः । यथा महाभारते १३ । शिवसहस्रनामकीर्त्तने १७ । १३० ।
"हर्य्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात्" ॥)

ककुभा, स्त्री, (केन आदित्येन कुत्सितानि भानिनक्षत्राण्यस्याम् । टावन्तोऽपीति कश्चित् तन्न । व्यधिकरणबहुव्रीहिप्रसङ्गात् ।) दिक् । इत्यमरटीकायां रायमुकुटः ॥ (केन सूर्य्येण दिनप्रकाशेनेति भावः कुत्सिता भाति । भा दीप्तौ । इति धातोः सुपीति कः । भिदाद्यङ् वा । रात्रावेवास्या माधुर्य्यस्याधिक्यमिति तात्पर्य्यार्थः ।) रागिणीविशेषः । इति हलायुधः ॥

ककुभादनी, स्त्री, (ककुभः अर्জ্জुन इव अद्यतेऽसौ तुल्यगुणत्वात् । ककुभ + अद् + कर्म्मणि ल्युट् + स्त्रियां ङीप् ।) नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कक्का हासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कोपधः । कक्कति । इति दुर्गादासः ॥

कक्कोलः, पुं क्ली, (ककते गच्छति दिशि प्रकाशते इत्यर्थः ततः क्विप् कक्कोलति संख्यायति कुलधातोर्ज्वलादित्वात् णः । कक्वासौ कोलश्चेति । "पूगकक्कोलकर्पूरलवङ्गसुमनःफलैरित्युक्तेः" ।) सुगन्धिद्रव्यविशेषः । काँकला इति भाषा । अस्य गुणाः । कटुत्वम् । हृद्यत्वम् । सुगन्धित्वम् । कफवातनाशित्वञ्च । इति राजवल्लभः ॥ (यथा रामायणे ३ काण्डे ।
"वनानि च सुरम्याणि कक्कोलानां लवस्य च" ॥)

कक्कोलकं, क्ली, (कक्कोलस्य + इदमर्थे स्वार्थे वा कन् । शाल्मलिद्वीपान्तर्गतसप्तमवर्षपर्व्वतः । तद्विवरणं विष्णुपुराणे २ अंशे ४ अध्याये द्रष्टव्यम् ॥) गन्धद्रव्यविशेषः । काँकला इति ख्यातम् । तत्पर्य्यायः कोलकम् २ कोषफलम् ३ । इत्यमरः ॥ क्षुतफलम् ४ कटुकफलम् ५ हृद्यम् ६ स्थूलमरिचम् ७ कक्कोलम् ८ माधवोचितम् ९ कालम् १० कटफलम् ११ मरिचम् १२ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वक्त्रजाड्यहरत्वम् । दीपनत्वम् । पाचनत्वम् । रुचिकारित्वम् । कफवातरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ ("कक्कोलकं लवङ्गञ्च तिक्तं कटुकषायहम् । लघुष्णापहं वक्त्रक्लेददौर्गन्ध्यनाशनम्" ॥ इति सुश्रुतः ॥)

कक्खं हासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कोपधः । कक्खति । इति दुर्गादासः ॥

कक्खटः, त्रि, (कक्खति हसति यः ॥ प्रफुल्लमुखो जनः । इति व्युत्पत्त्यर्थः । अन्यस्तु रूक्षार्थः । कक्ख अटन् । अथवा कक्खं प्रसन्नभावं अटति अर्द्दयति कर्कशान्तर्दृत्तित्वात् कक्ख + अट् + अच् । यद्वा कठिण्यां वर्त्तते तदा कक्खति हृष्ट्या प्रकाशयति वर्णान् । अन्तर्णिजर्थः ।) कठिनः । इत्यमरः ॥

कक्खटपञ्चकः, पुं, (कक्खटानि प्रकाशान्वितानि पञ्चाणि यस्य । कप् ।) वृक्षविशेषः । पाट इति भाषा । तत्पर्य्यायः । षट्टः २ वाजशृङ्गः ३ शाणिः ४ चिमः ५ । इति शब्दमाला ॥

कक्खटी, स्त्री, (कक्खति भूकर्षणेन प्रकाशयति वर्णान् । अचाप्यन्तर्णिच् शकादिभ्योऽटन् गौरादित्वात् ङीष् ।) खटिका । खड़ी इति भाषा । तत्पर्य्यायः । वर्णलेखा २ कठिनी ३ खटी ४ । इति त्रिकाण्डशेषः ॥

कक्षः, पुं, (कषतीति । कष् हिंसायां "वृतृवदिहनिकमिकषिभ्यः सः" । उणां ३ । ६२ । इति सः ।) बाहुमूलम् । इत्यमरः । २ । ६ । ७९ ॥ काँख् बगल् इति च भाषा ॥ (यथा, महाभारते ४ । ६ । १ ।
"वदर्य्यरूपान् प्रतिमुच्य काञ्चना-
नङ्गान् स कक्षे परिरभ्य वाससा" ॥)
वृक्षम् । वीरुत् । इत्यमरः ॥ ३ । ३ । २१८ । (यथा, मनुः ७ । ११० ।
"यथोद्धरति निर्द्दाता कक्षं धान्यञ्च रक्षति" ॥
"यथा क्षेत्रे धान्यवृक्षादिकयोः सहोत्पन्नयोरपि धान्यानि लवनकर्त्ता रक्षति वृक्षादिकञ्चोद्धरति" । इति तट्टीकायां कुल्लूकभट्टः ॥) शुष्कवृक्षम् । इति धरणी ॥ (यथा, माघः । २ । ४२ ।
"प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम्" ॥)
कक्षः । (यथा महाभारते । ९ । वारणावतगमने । १४६ । २२ ॥
"कक्षघ्नः शिशिरघ्नश्च महाकक्षे विलौकसः ।
न दहेदिति चात्मानं यो रक्षति स जीवति" ॥
विलौकसो महाकक्षे वृहत्कक्षे इत्यर्थः ॥) शुष्कवनम् । पापम् । इति हेमचन्द्रः ॥ अरण्यम् । इति रुद्रः ॥ (यथा महाभारते १ । खाण्डवदहनपर्व्वणि । २३१ । ३ ।
"अयमग्निर्दहन् कक्षमित आयाति भीषणः" ॥)
भित्तिः । पार्श्वः । इति भरतधृताजयः ॥ (यथा, रामायणे । ५ । ५ । २५ ।
"तस्य वानररिंहस्य क्रममाणस्य सागरम् ।
कक्षान्तरगतो वायुर्जीमूत इव गर्জ্জति" ॥)

कक्षरुहा, स्त्री, (कक्षे कक्षे जलप्राये रोहति इति । कक्ष + रुह + क । अस्या व्यूपजातत्वात् तथात्वम् ।) नागरमुस्ता । इति राजनिर्घण्टः ॥

कक्ष्या

कक्षा, स्त्री, (कक्ष-हिंसादौ + सः टाप् च।) हस्तिरज्जुः। काञ्ची। गेहप्रकोष्ठकः। (यथा, भागवते ३। १५। २७।
"तस्मिन्नतीत्य मुनयः षड़सञ्जमानाः
कक्षाः समानवयसावथ सप्तमायाम्" ॥)
भित्तिः। साम्यम्। रथभागः। अन्तरीयपश्चिमाञ्चलम्। परिधानवस्त्रस्य एकतो निहितान्तवस्त्रम्। उदग्राहिणी। इति हेमचन्द्रः॥ (काछा काँचा आँचल इत्यादि भाषा॥ यथाह योगियाज्ञवल्क्यः।
"परिधानात् बहिः कक्षा निबद्धा ह्यासरी भवेत्"॥)
"वामे एके तथा नाभौ कक्षात्रयमुदाहृतम्।
एभिः कक्षैः परीधत्ते यो विप्रः स शुचिः स्मृतः"॥
इति स्मृतिः॥
स्पर्द्धापदम्। इति मेदिनी रभसः॥ कक्षा। हस्तिमध्यदेशबन्धनरज्जुः। इत्यमरटीकायां भरतः॥ क्षुद्ररोगविशेषः। तस्य लक्षणं यथा,—
"बाऽथार्श्वांसकक्षेषु क्षुण्णस्फोटां सवेदनाम्।
पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्दिशेत्"॥
इति माधवकरः॥ तच्चिकित्सा यथा,—
"कक्षाञ्च गन्धनाम्नीञ्च चिकित्सति चिकित्सकः।
पैत्तिकस्य विसर्पस्य क्रियया पूर्व्वमुक्तया"॥
इति भावप्रकाशः॥

कक्षापटः, पुं, (कक्षाकारः हस्तिरज्जुतुल्यः पटोवस्त्रम्।) कौपीनम्। इति हलायुधः॥ (कक्षायाः गृहप्रकोष्ठकस्य पटः इति विग्रहे गृहभित्तिस्थपटः॥)

कक्षावान्, [त्] पुं, (कक्षा सर्व्ववस्तुनि साम्यं सा विद्यते यस्य। कक्षा + मतुप् मस्य वः।) मुनिविशेषः। इति हेमचन्द्रः॥

कक्षावेक्षकः, पुं, (कक्षायाः अवेक्षकः यद्वा कक्षां वनोपवनादिकं राजान्तःपुरं वा अवेक्षते इति। अव + ईक्ष् + ण्वुल्।) उद्यानपालः। उद्यानजीवः। कविः। खिड़्गः। द्वाःस्थः। इति मेदिनी॥

कक्षोत्था, स्त्री, (कक्षात् जलप्रायदेशात् उत्तिष्ठति जायते या। कक्ष + उत् + स्था + कः टाप् च।) भद्रमुस्ता। इति राजनिर्घण्टः॥

कक्ष्यं, क्ली, (कक्षायै साम्याय भवम्। कक्षा + यत्।) एषणिकास्यकटोरा। इति मिताक्षरा। निक्षिर वाटी इति भाषा॥ (त्रि, कक्षापूरकः। यथा, ऋग्वेदे ५। ४४। ११।
"ग्रैवेण आसामदितिः कक्षो मदो-
विश्ववारस्य यजतस्य मायिनः"॥)

कक्ष्या, स्त्री, (कक्षे भवा। कक्ष + शरीरावयवात् + यत् टाप् च।) कक्षरज्जुः। काछड़ड़ी इति ख्याता। चर्म्मरज्जुः। इत्यन्ये। इति भरतः॥ गजमध्यबन्धनचर्म्मरज्जुः इति सारसुन्दरी॥ तत्पर्य्यायः। चूषा २ वरत्रा ३। इत्यमरः॥ २।८।४२। वृषा ४ दृश्या ५ दृष्या ६ कक्षा ७। इति तट्टीका। हर्म्म्यादिप्रकोष्ठः। राजगृहादेर्वेष्टनावच्छिन्नो देशः। (महल इति भाषा। यथा रामायणे। २। २०। ११।
"प्रविश्य प्रथमां कक्ष्यां द्वितीयायां ददर्श सः।
ब्राह्मणान् वेदसम्पन्नान् वृद्धान् राज्ञाभिसत्कृतान्"॥)
काञ्ची। इत्यमरः॥ ३।३।१५७। अन्तर्गृहमिति सुभूतिः। (यथा, कुमारे ७। ७०।
"क्रान्तानि पूर्व्वं कमलासनेन
कक्ष्यान्तराण्यद्रिपतेर्विवेश"॥)
सादृश्यम्। उद्योगः। दृढतिका। उत्तरीयवस्त्रम्। इति हेमचन्द्रः॥ गुह्या। इति शब्दरत्नावली॥

कक्ष र म हासे। इति कविकल्पद्रुमः॥ (भां-परं-अकं-सेट्।) एदित् घटादिः इति वोपदेवः। पाणिनीमते तु एदित्वं न तेन अकक्षीत् अकाक्षीत् इति स्यात्।) म कक्षयति र अकक्षीत्। इति दुर्गादासः॥

कक्षा, स्त्री, (कक्षति हसतीव प्रकाशते शोभते। कक्ष + यत् + स्त्रियां टाप्।) कक्षा। हर्म्म्यादिप्रकोष्ठः। इति शब्दरत्नावली॥

कग म र क्रियासु। क्रियामात्रे। इति कविकल्पद्रुमः॥ (भां-परं-सकं-अकं च-सेट्। घटादि एदित् इति वोपदेवः। नैदित् इति पाणिनिः। अकागीत् अकागीत्॥) तेन म कगयति। रं अकगीत्। क्रियामात्रे। कगति लोकः गच्छतीत्यर्थः। इति दुर्गादासः॥

कङ्कः, पुं, (कङ्कते उद्गच्छति इति। ककि गतौ। कक् + अच् + इदित्वान्नुम्।) पक्षिविशेषः। काँक् इति भाषा। तत्पर्य्यायः। लोहपृष्ठः २। इत्यमरः। २। ५। १६॥ सदंशवदनः ३ खरः ४ रक्तालङ्गरवाः ५ क्रूरः ६ आमिषप्रियः ७। इति राजनिर्घण्टः॥ अरिष्टः ८ कालपृष्ठः ९ किंशारुः १० लोहपृष्ठकः ११। इति जटाधरः॥ दीर्घपादः १२ दीर्घपात् १३। इति शब्दरत्नावली॥ (यथा भागवते ३। १०। २३। "कङ्कगृध्रवटश्येनभासभासकवर्हिणः"।) यमः। कृष्णद्विजः। इति मेदिनी॥ युधिष्ठिरराजः। इति चिकाण्डशेषः॥ (यथा, महाभारते। ४। ६। १४।
"पृच्छन्तु मे जानपदाः समागताः
कङ्के यथाहं विषये प्रभुस्तथा"॥
शालमलिद्वीपान्तर्गतपञ्चमवर्षपर्व्वतः। तद्विवरणं विष्णुपुराणे २ अंशे ४ अध्याये द्रष्टव्यम्। क्षत्रियः। इति शब्दमाला॥ कंसासुरभ्राता। स तु उग्रसेनपुत्रः। (यथा, भागवते ९। २४। २४। "कंसः सुनामा न्यग्रोधः कङ्कः शङ्कुः सुहूस्तथा"॥) महाराजचूतः। इति राजनिर्घण्टः॥

कङ्कटः, पुं, (कं देहं कटति आवृणोतीति। क + कट + अच्। अथवा-ककि लौल्ये इति कङ्कते क्षयेण नाशतां याति अचिरस्थायित्वात् ककि + अटन्।) (कवचः। इत्युणादिकोषः॥ प्रतिसंस्कृतेनामरश्च॥ (यथा, रघुः। ७। ५९। "सर्व्वायुधैः कङ्कटभेदिभिश्च"॥)

कङ्कटकः, पुं, (कङ्कट + स्वार्थे कन्।) सन्नाहः। इत्यमरः। २। ८। ९४। साँजोया इति भाषा॥

कङ्कणं क्ली, (कं सुखं कणतीति। क + कण शब्दे + कर्त्तरि अच्-एषोदरादित्वात् णत्वम्।) स्वनामख्यातहस्ताभरणम्। तत्पर्य्यायः। करभूषणम् २॥ इत्यमरः २। ६। १०८॥ कौशुकम् ३। इति शब्दरत्नावली॥ (यथा, भागवते ६। १६। ३०।
"म्लायत्सजौरं सितिवाससं स्फुरत्
किरीटकेयूरकटिचकङ्कणम्"॥)
हस्तसूत्रम्। मङ्गलम्। शेखरम्। इति विश्वः॥

कङ्कणी, स्त्री, (ककि गतौ घञ् कङ्कः तस्मिन् अणति-अण शब्दे ततः अच् गौरादित्वात् ङीष्। शकन्ध्वादिवत् सन्धिः। यद्वा कं सुखं कणति इति कण + पचाद्यच्।) किङ्किणी। क्षुद्रघण्टिका। इत्यमरटीकायां भरतः॥

कङ्कणीका, स्त्री, (चङ्क्रम्यते पुनः पुनः कणति। कण शब्दे अस्मात् यङ्लुगन्तात् "चङ्क्रिणः कङ्कण च"॥ ४। १८। उणां इति ईकन् धातोः कङ्कणादेशश्च।) क्षुद्रघण्टिका। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कङ्कतं, क्ली, (कङ्कते शिरोमलं प्राप्नोतीति। ककि गतौ + अतच्।) कङ्कतिका। इत्यमरटीकायां भरतः॥ चिरुणी इति ख्यातम्॥

कङ्कतः, पुं, (कङ्कते भूमिं भित्त्वा उद्गच्छति झटिति नाशं गच्छति वा। ककि गतौ इति धातोः अतच्।) वृक्षः। इत्युणादिकोषः॥ (केशप्रसाधनी कङ्कती। चिरुणीइति भाषा। यथा, अथर्व्ववेदे १४। २। ६८। "क्षत्रियस्य कङ्कतः शतदन्य एषः। अपास्याः केशं मलमपशीर्षण्यम् लिखात्"॥ अल्पविषप्राणिविशेषः। यथा, ऋग्वेदे। १। १६१। १। "कङ्कतो नकङ्कतोऽथो सतीनकङ्कतः"॥)

कङ्कतिका, स्त्री, (कङ्कते मूर्द्धजेन सम्बन्धं गच्छतीति। ककिगतौ बाहुलकादतच्। गौरादित्वात् ङीष् स्वार्थे कन् केश इति ह्रस्वः। यद्वा कस्य शिरसोऽङ्गानि। शकन्ध्वादित्वात् सन्धिः। कङ्केषु अतति ततः कुन्। तत इत्वं टाप् च।) केशप्रसाधनार्थकाष्ठादिनिर्म्मितद्रव्यम्। चिरुणी काँकुइ इत्यादि भाषा। तत्पर्य्यायः। प्रसाधनी २। इत्यमरः। २। १९०॥ कङ्कती ३ कङ्कतम् ४ प्रसाधनम् ५। इति तट्टीका। केशमार्জनम् ६। इति जटाधरः॥ फली ७ फलिका ८ फलिः ९। इति शब्दरत्नावली॥ अस्य गुणाः। धूलीजन्तुमलकण्डुशिरोरोगनाशित्वम्। कान्तिकेशवृद्धिकेशप्रसन्नताकारित्वञ्च। इति राजवल्लभः। नागबला। इति वैद्यकम्॥

कङ्कती, स्त्री, (कङ्कते शिरोरुहं प्राप्नोति। ककि गतौ + बाहुलकादतच् गौरादित्वात् ङीष्।) कङ्कतिका। इत्यमरटीकायां भरतः॥

कङ्कचोटः, पुं, (कङ्कात् पक्षिविशेषात् आत्मानं त्रायति। कङ्क + त्रा + अटन् एषोदरादित्वात् साधुः। यद्वा कङ्कवत् चोटयति कङ्क + चुट् + णिच् + कर्त्तर्य्यच्।) मत्स्यविशेषः। काँकिला इति भाषा। तत्पर्य्यायः। जलशूचिः २। इति जटाधरः॥

कङ्कचोटिः, पुं, (कङ्कस्य चोटिरिव चोटिश्चञ्चुर्यस्य।) मत्स्यविशेषः। काँकिला इति भाषा। तत्पर्य्यायः। जलशूचिः २। इति जटाधरः॥

कङ्कपत्रः, पुं, (कङ्कस्य पक्षिविशेषस्य पत्रमेव पत्रं पक्षो यस्य ।) बाणविशेषः । इति हलायुधः ॥ (यथा रामायणे ६ । २८ । ४ ।
"विद्यधुर्घोररूपाक्षे कङ्कपत्रैरजिह्मगैः" ॥
कङ्कस्य पक्षिविशेषस्य पत्रम् । यथा,
"नखप्रभाभूषितकङ्कपत्रैः" ॥ रघुः २ । ३१ ॥)

कङ्कमाला, स्त्री, (कङ्कं चापल्यं करचाञ्चल्यं मलते धारयति । ककि चापल्ये + घञ् । कङ्क + मल धृतौ । मलधातोः उपपदे कर्म्मण्यण् टाप् च ।) करतालीवाद्यम् । इति शब्दरत्नावली ॥

कङ्कमुखः, पुं, (कङ्कस्य मुखमिव मुखं यस्य ।) सन्दंशः । इति हेमचन्द्रः ॥ साँड़ाशि इति भाषा । (स्त्री, नाल्योद्धरणार्थं यन्त्रभेदः । स तु अस्थिविनष्टशल्योद्धरणार्थमुपदिश्यते ॥) अस्य प्रशंसा यथा,
"निर्व्वर्त्तते साध्ववगाहने च
शल्यं प्रगृह्योद्धरते च यस्मात् ।
यन्त्रेष्वतः कङ्कमुखं प्रधानं
स्थानेषु सर्व्वेष्वविकारि चैव" ॥ सुश्रुते ॥
(त्रि, यथा रामायणे ६ । ७६ । ६६ ॥
"व्याघ्र-सिंहमुखान् बाणान् काककङ्कमुखानपि" ॥)

कङ्करं, क्ली, (कं जलं कीर्य्यतेऽत्र । कं + कॄ आधारे अप् ।) तक्रम् । इति हेमचन्द्रः ॥

कङ्करः, त्रि, (कं सुखं किरति क्षिपतीति । कं + कॄ + अच् ।) कुत्सितः । इति हेमचन्द्रः ॥

कङ्करोलः, पुं, (कङ्क इव लोलः लस्य रः ।) निकोचकवृक्षः । इति शब्दचन्द्रिका ॥ काँकरोल इति ख्याता लता च ॥

कङ्कलोह्यं, क्ली, (कङ्क इव लोह्यते आलोह्यते । इति कङ्क + लोड् + ण्यत् ।) कङ्कलोहम् । चटिचिता चिचोड़मूल इति च भाषा । अस्य गुणाः । गुरुत्वम् । अजीर्णकारित्वम् । शीतलत्वञ्च । इति कश्चिद्राजवल्लभः ॥

कङ्कशुचुः, पुं, (कङ्कस्य शुचुः । एतन्निपात्यन्तु कङ्कनामकत्वमाङः अत अस्य तथात्वम् ।) एतन्निपर्णी । इति शब्दचन्द्रिका ॥

कङ्कशायः, पुं, (कङ्क इव शेते । शीङ् + घञ् ।) कुक्कुरः । इति शब्दमाला ॥

कङ्का, स्त्री, (कङ्कते चापल्यं गच्छति या पित्राद्यादरवशात् । ककि + अच् ।) उग्रसेनराजकन्या । सा तु वसुदेवानुजपत्नी । (यथा, श्रीभागवते । ९ । २४ । २५ ।
"कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)
गोशीर्षचन्दनम् । तद्यथा ।
"गोशीर्षं चन्दनं क्षय्याताम्रसुत्पलगन्धिकम् ।
कङ्का" इत्यादि शब्दमाला ॥

कङ्कालः, पुं, (कं सुखं श्लिष्यो वा कालयति क्षिपतीति कं + काल + अच् ।) शरीरास्थि । इत्यमरः । २ । ६ । ६६ ॥ समुदितशरीरास्थिसंघातरक्तमांसरहितः । इति भरतः ॥ तत्पर्य्यायः । करङ्गः २ अस्थिपञ्जरः ३ । इति वैद्यकम् ॥ (यथा, सुन्दोपसुन्दोपाख्याने २ । २४ । "अस्थिकङ्कालसङ्घीर्णां भूर्बभूव" ॥)

कङ्कालमाली, [न्] पुं, (कङ्कालानां माला अस्ति अस्य व्रीह्यादित्वादिनिः ।) महादेवः । इति शब्दरत्नावली ॥

कङ्कुः, पुं, (कङ्कते औद्धत्यं लौल्यं वा प्राप्नोतीति । ककि गतौ + उन् ।) उग्रसेनपुत्रः । स तु कंसासुरभ्राता । (यथा, श्रीभागवते ९ । २४ । २४ ॥
("कंसः सुनामा न्यग्रोधः कङ्कः कङ्कुः सुहूस्तथा" ॥)
क्वचित् शब्दकुरितिपाठः ।) कङ्कटशम् । इति हिरूपकोषः ॥

कङ्कुष्ठं, क्ली, (कङ्कुस्तृणविशेषः तस्य समीपे तिष्ठति । कङ्कु + स्था + क + षत्वम् ।) पर्व्वतीयमृत्तिकाविशेषः । तत्पर्य्यायः । कालकुष्ठम् २ विरङ्गम् ३ रङ्गदायकम् ४ रेचकम् ५ पुलकम् ६ शोधकम् ७ कालपालकम् ८ । तद्द्विधा रजताभं स्वर्णाभञ्च । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातव्रणशूलनाशित्वम् । रेचकत्वञ्च । इति राजनिर्घण्टः ॥ अपिच ।
"पीतप्रभं गुरु स्निग्धं श्रेष्ठं कङ्कुष्ठमादिमम् ।
श्यामं पीतं लघु व्यक्तसत्त्वं नेष्टं हि रेणुकम्" ॥
(इदञ्च हिमालयशिखरे जायते । यदुक्तं —
"हिमवत् पादशिखरे कङ्कुष्ठमुपजायते ।
तच्चैकं नालिकाख्यं स्यात्तदन्य रेणुकं स्मृतम्" ॥
"कङ्कुष्ठं रेचनं तिक्तं कटूष्णं वर्णकारकम् ।
क्षमिशोथोदरश्लीपगुल्मानाह कथापहम्" ॥)

कङ्केरः, पुं, (कङ्कते भक्षणाय लौल्यं गच्छति । ककि + एरः ।) काकविशेषः । तत्पर्य्यायः । द्वारवलिभुक् २ । इति त्रिकाण्डशेषः ॥

कङ्केलिः, पुं, (कं सुखं तस्मै केलिः यत्र ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

कङ्केल्लः, पुं, (ककि + एल्लप्रत्ययः ।) वास्तूकम् । इति शब्दमाला ॥

कङ्केल्लिः, पुं, (कङ्क + बाहुलकात् एलिः एषोदरादित्वात् लच्च ।) अशोकवृक्षः । इति त्रिकाण्डशेषः ॥

कङ्कं, क्ली, (कं सुखं खलत्यनेन । खल + बाहुलकात् डः ।) भोगः । इति शब्दमाला ॥ (कं + खं । ब्रह्म । यथा छान्दोगोपनिषदि ४ । १० । ५ ।
"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति सहोवाच विजानाम्यहं यत्प्राणो ब्रह्म कच्चतु खच्च न विजानामीति ते होचुर्यदेव कं तदेव खं यदेव खं तदेवकमिति प्राणच्च ह स्मै तदाकाशच्चोचुः" ॥)

कङ्कुः, स्त्री, (कं सुखं अङ्कति अङ्कयति वा अगि गतौ + ण्यन्तादस्मात् मृगय्वादित्वात् कुः शुकनृभ्वादित्वात् अकारस्य लोपश्च ।) पीतशण्डला । काङ्गनि इति भाषा । तत्पर्य्यायः । प्रियङ्गुः २ । इत्यमरः ॥ २ । ६ । २० । कङ्गूः ३ प्रियङ्गुः ४ । इति तट्टीका ॥ (तथाचोक्तम् ।
"स्त्रियां कङ्गुप्रियङ्गू द्वे क्षण्यरक्तसितास्तथा ।
पीता चतुर्व्विधा कङ्गुस्तासां पीता वरा स्मृता" ॥)

कङ्कुका, स्त्री, (कं सुखं अङ्कयति प्रापयति ज्ञापयति वा । अगि गतौ ण्यन्तान् मृगय्वादित्वात् कुः इदित्वात् नुम् शुकनृभ्वादित्वात् अलोपे सन्धिः । स्वार्थे कन् ततष्टाप् ।) कङ्कुः अस्य गुणाः । धातुशोषणत्वम् । पित्तश्लेष्मनाशित्वम् । रूक्षत्वम् । वायुवर्द्धकत्वम् । पुष्टिकारित्वम् । गुरुत्वम् । भग्नसन्धानकारित्वञ्च । इति राजवल्लभः ॥

कङ्कुनी, स्त्री, (कंवा नीयते कङ्कुशब्देन ज्ञायते इत्यर्थः । कङ्क + नी + बाहुलकात् कर्म्मणि डः । गौरादित्वात् ङीष् ।) धान्यविशेषः । काङ्गनि इति भाषा । तत्पर्य्यायः । प्रियङ्गुः २ कङ्गुः ३ चीनकः ४ पीततण्डुलः ५ अत्यन्तसुकुमारः ६ । अस्या गुणाः । मधुरत्वम् । रुचिकारित्वम् । कषायत्वम् । स्वादुत्वम् । शीतलत्वम् । वातकारित्वम् । पित्तदाहनाशित्वम् । रूक्षत्वम् । भग्नास्थिबन्धकारित्वञ्च । इति राजनिर्घण्टः ॥

कङ्कुनीपत्रा, स्त्री, (कङ्कुन्याः पत्रमिव पत्रमस्याः ।) पण्यान्धाढ्यम् । इति राजनिर्घण्टः ॥

कङ्कुलः, पुं, (कङ्कुं जाति गृह्णाति अनेन कङ्कु + ला + बाहुलकात् घञर्थे करणे कः ।) पाणिः । इति शब्दचन्द्रिका ॥

कच रवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कचति । रवः शब्दः । इति दुर्गादासः ॥

कच इ बन्धे । त्विषि । इति कविकल्पद्रुमः ॥ (भ्वां-परं बन्धे सकं दीप्तौ अकं-इदित्-सेट् ।) इ कचति । इति दुर्गादासः ॥

कच उ बन्धे । त्विषि । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं बन्धे सकं दीप्तौ अकं-सेट् ।) उ कचते कचते । त्विट् दीप्तिः । इति दुर्गादासः ॥

कचः, पुं, (कचते शोभते शिरसीति । कच् + घञ् अच् वा । कच्यते बध्यते इति कच बन्धे + कर्म्मणि अप् वा ।) केशः । इत्यमरः ॥ २ । ६ । ६५ ॥ (यथा, महाभारते १ । १२८ । १६ ॥)
"कचेषु च निगृह्यैतान् निविहत्य बलाद्बली ।
चकर्ष क्रोशतो भूमौ दृढमानुशिरोरुहान्" ॥)
बृहस्पतिपुत्रः । (कचते दीप्यते तपस्तेजसेति कच् + दीप्तौ + घञर्थे अच् । पुरा किल सुरासुरसंग्रामे असुराणां यानेव देवा निजघ्नुस्तांश्चासुरगुरवगृणाः सञ्जीवनीविद्यया पुनर्जीवयामास । सुरगुरर्बृहस्पतिः पुनस्तद्विद्यानभिज्ञतया सुरान् रणनिहतान् जीवयितुं न शशाक । तद्दर्शनभीता देवा गुरुसुतं कचमुपागम्य अर्थ्यामिर्वाग्भिः सन्तोष्य तं सञ्जीवनीलाभाय शुक्रसकाशं प्रेरयामासुः । कचो ऽपि सुरकार्य्यसिद्धये गुरुत्वेनाङ्गीकृत्य नितरां भक्त्या परिचर्य्यया च काव्यं परितोषयन् ब्रह्मचर्य्यमालम्बाधीतवान् । क्रूरप्रकृतयो दैत्याः खलु कचाभिसन्धिं विज्ञाय तं वारद्वयं निहत्यापि यदा पूर्णकामा नासन् तदा भूयोऽपि तन्मांसादिकं लवशः कृत्वा शुक्रमेव सुरयासह भोजयामासुः शुक्रस्तु स्वदुहितुर्देवयान्याः सस्नेहनिर्ब्बन्धातिशयेन खोदरगतं कचं सञ्जीवनीविद्यां प्रदायाजीवयत् । ततः प्राप्तजीवः कृतार्थश्च कचोऽतीवहृष्टचित्तया देवयान्या पतित्वेन अनुरुद्धोऽपि सम्बन्धानुरोधात् नैव स्वीचकार । सुतरां क्रोधपरतन्त्रया तया निष्फलविद्यो भवेत्यभि-

कच्चरं

शप्रभृतेनापि त्वमपि क्षत्रियभार्य्या भविष्यसीति शप्ता देवयानी ॥ एतद्विवरणं सविस्तरं महाभारतीयसम्भवपर्व्वणि १ । ७६ अध्याये दर्शनीयम् ॥) वन्धः । शुष्कवल्लः । इति मेदिनी ॥ मेघः । इति शब्दमाला ॥

कचङ्गलं, क्ली, (कचस्य जनकोलाहलरवस्य अङ्गनम् । प्रकम्ध्यादित्वात् सन्धिः ।) विक्रयस्थानम् । तत्पर्य्यायः । निर्म्मुटः २ पण्याजिरम् ३ । इति त्रिकाण्डशेषः ॥

कचङ्गलः, पुं, (कच्यते बध्यते वेलया अथवा कच्यते आत्मानं वेलाभूमिं न लङ्घयतीति यावत् बाहुलकात् अङ्गलच् ।) समुद्रः । इति त्रिकाण्डशेषः ॥

कचपं, क्ली, (कच्यते शोभते । "उषिकटिदलिकचिखजिभ्यः कपन्" इति उणां । ३ । १४२ । कच + कपन् ।) हयम् । शाकपत्रम् । इत्युणादिकोषः ॥

कचपक्षः, पुं, (कचानां केशानां पक्षः समूहः ।) केशसमूहः । इत्यमरः । २ । ६ । ८८ ॥

कचपाशः, पुं, (कचानां केशानां पाशः । समूहः ।) केशसमूहः । इत्यमरः । २ । ६ । ८८ ॥

कचमालः, पुं, (कचं कचवत् वर्णं मलते धारयतीति । कच + मल् + कर्म्मण्यण् ।) धूमः । इति हारावली ॥ खतमाल इति च पाठः ॥

कचरिपुफला, स्त्री, (कचस्य रिपुः फलमस्याः ।) शमीवृक्षः । इति राजनिर्घण्टः ॥

कचहस्तः, पुं, (कचानां हस्तः समूहः ।) केशसमूहः । इत्यमरः । २ । ६ । ८८ ॥

कच्चा, स्त्री, (कच्यते बध्यते लौहशृङ्खलादिभिरिति यद्वा कच्यते शोभते राजगृहे इति ।) कच + अच् + टाप् ।) हस्तिनी इति मेदिनी ॥ शोभा । इति शब्दरत्नावली ॥

कचाकु, त्रि, (कच इव अकति वक्रं गच्छति । अक + उन् ।) दुराधर्षम् । दुःशीलम् । इति मेदिनी ॥

कचाकुः, पुं, (कच इव कचनिर्म्मितवेणीवत् अकति कौटिल्यं यथा तथा गच्छतीति अक + उन् ।) सर्पः । इति मेदिनी ॥

कचाटुरः, पुं, (कचवदटति मेघवत् शून्ये विहरतीति । कच + अट् + उरच् ।) पक्षिविशेषः । डाक् इति भाषा । तत्पर्य्यायः । शितिकण्ठः २ दात्यूहः ३ काकमर्दुकः ४ । इति त्रिकाण्डशेषः ॥

कचामोदं, क्ली, (कचं आमोदयतीति-आ-मुद्-णिच्-अच् ।) वालकम् । इति राजनिर्घण्टः ॥ वाला इति भाषा ।

कचुः, स्त्री, (कच्यते शोभते । कच् + उन् ।) कञ्ची । स्वनामख्यातगुल्मः । इति शब्दरत्नावली ॥ मूलशाकविशेषः । यथा,—

"कटली टोडिमी खाद्यं हरिद्रा माणकं कचुः ।
विल्वोऽग्नोकी जयन्ती च विशेया नवपत्रिका" ॥

इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम् ॥

कचटं, क्ली, (कु कुत्सितं चटतीति । चट् + अच् । बाहुलकात् कोः कत् । कुत्सितम् ।) जलपिप्पली । इति वैद्यकम् ॥

कचरं, त्रि, (कु कुत्सितं चरतीति । कु + चर + अच् कोः कदादेशः । अथवा चरेष्टः ।) मलिनम् । इत्यमरः ॥ ३ । १ । ५५ । कुत्सितम् । इति मेदिनी ॥

कचरं, क्ली, (कु कुत्सितं चर्य्यते आचर्य्यते यत् यद्वा केन जलेन चर्य्यते व्यवक्रियते यत् एषोदरादित्वात् चकारस्य छत्वम् ।) तक्रं । इति मेदिनी ॥

कचित्, य, (कच चिच्च अनयोः समाहारः । कोः कदादेशः । अथवा कान्यते इति कद् चीयते निश्चीयते यस्मात् । कम + क्विप् । चि + क्विप् ततः एषोदरादित्वात् मस्य दकारत्वम् ।) कामप्रवेदनम् । इष्टपरिप्रश्नः । इत्यमरः । ३ । ४ । १ । यथा, "कच्चित् जीवति मे तातः" ॥ (तथा, रघुः । ५ । ५ । "आपद्यते न व्ययमन्तरायैः
कच्चिन्महार्घे स्त्रिविधं तपस्तत्" ॥)

कच्छः, पुं, (केन जलेन छृणाति दीप्यते क्षायते वा, उच्छृदिर दीप्तिदेवनयोः छृद् वा अन्येभ्योऽपि इति डः । कं जलं च्यति परिच्छिनत्ति इति वा, छो छेदने + आतोऽनुपेति कः" । ३ । २ । ३ । इति कः ।) अनूपप्रायस्थानम् । इत्यमरः । २ । १ । २ । काछाड् इति भाषा । (यथा, किराते १२ । ५४ ।
"कच्छान्ते सरसरितो निधाय सेना-
मन्वीतः स कतिपयैः किरातवर्य्यैः" ॥)
सिन्धूनां सरसाञ्च प्रान्तभागः । इति मधुः ॥ जलाशयप्रान्तदेशः । इति रमानाथः । नदीपर्व्वतादिसमीपम् । इति साङ्ख्यः ॥ (यथा महाभारते । १ सम्भवपर्व्वणि शाकुन्तले ७० । १६ । "नदीकच्छोद्भवं कान्तमुक्षितध्वजसन्निभम्" ॥)
तुन्नरुक्षः । इत्यमरः । २ । ४ । १२८ तुंद इति भाषा । परिधानाञ्चलम् । इत्यमरमेदिनीकरौ ॥ काछा कौंचा कँड़सी इतिभाषा । शेफस्य पर्य्यायः । कक्षा २ कच्छा ३ कच्छोटिका ४ । इति हेमचन्द्रः ॥ कच्छटिका ५ कच्छाटिका ६ । इति शब्दरत्नावली ॥ नौकाङ्गम् । इति हेमचन्द्रः ॥ (देशविशेषः । यथोक्तञ्च ।
"गङ्गेश्वरात् पूर्व्वभागे समुद्रादुत्तरे शिवे ।
कच्छदेशः समाख्यातस्तत्रे श्रीशक्तिसङ्गमे" ॥)

कच्छः, त्रि, (केन जलेन छृणाति दीप्यते इति । छृद् + बाहुलकात् डः ।) जलप्रान्तः । इति नानार्थे अमरः ॥

कच्छटिका, स्त्री, (कच्छं कच्छस्थं अटति प्राप्नोति प्रकम्ध्यादित्वात् अलोपे सन्धिः । अट् अच् संज्ञायां कन् अत इत्वं च । यद्वा कच्छेन पश्चाद्भागस्थवस्त्रावयवविशेषेण अश्यते प्राप्यते ज्ञायते वा अट् कर्म्मणि अप् । ततः कन् इत्वं च ।) कच्छः । इति शब्दरत्नावली । काछा इति भाषा ॥

कच्छपः, पुं, (कच्छं आत्मनो मुखसम्पुटं पाति स हि किञ्चिददृश्या शरीरे एव मुखसम्पुटं प्रवेशयति सम्पुटे हि कच्छशब्दः प्रसिद्धः । यद्वा कच्छे अनूपदेशे पाति आत्मानं रक्षतीति । कच्छ + पा + कर्त्तरि डः ।) स्वनामख्यातजलजन्तुः । काछिम् इति भाषा । तत्पर्य्यायः । कूर्म्मः २ कमठः ३ । इत्यमरः ॥ १ । १० । २१ । गूढाङ्गः ४ धरणीधरः ५ कच्छेशः ६ पल्वलावासः ७ कठिनेषुकः ८ । पञ्चनखः ९ क्रोडाङ्गः १० । इति शब्दरत्नावली ॥ पञ्चनखः ११ गुह्यः १२ पीवरः १३ जलगुल्मः १४ । इति जटाधरः । अस्य मांसगुणाः ।
वातहरत्वम् । शुक्रवर्द्धिकारित्वम् । चक्षुर्हितत्वम् । बलवर्द्धनत्वम् । मेधास्मृतिकारित्वम् । पथ्यत्वम् । शोथदोषनाशित्वञ्च । तस्य चर्म्म पित्तनाशकम् । पादः कफहारकः । अण्डं स्वादु वाजीकरञ्च ॥ (अवतारविशेषः । यथा भागवते ८ । ७ । १० ।
"सुरासुरेन्द्रैर्भुजवीर्य्यवेपितं
परिभ्रमन्तं गिरिमङ्गएठतः ।
बिभ्रत्तदावर्त्तनमादिकच्छपो
मेनेऽङ्गकण्डूयनमप्रमेयः" ॥)
नन्दीवृक्षः । इति राजनिर्घण्टः । कुबेरस्य निधिविशेषः । मत्स्यस्य बन्धविशेषः । इति मेदिनी ॥ मदिरायन्त्रविशेषः । इति शब्दचन्द्रिका ॥ (ऋषिविशेषः स तु विश्वामित्रपुत्रः ॥ यथा हरिवंशे २७ । ४७ — ५० ॥
"विश्वामित्रस्य एवात्तु देवराजादयः सुताः ।
विख्यातास्त्रिषु लोकेषु तेषां नामानि मे शृणु ॥
देवश्रवाः कतिश्चैव यस्मात् कात्यायनाः स्मृताः ।
शालावत्यां हिरण्याक्षो जज्ञे रेणौ तु रेणुमान् ॥
साङ्कृतिर्गालवश्चैव मुद्गलश्चेति विश्रुताः ।
मधुच्छन्दादयश्चैव देवलश्च तथाष्टकः ॥
कच्छपः पूरितश्चैव विश्वामित्रस्य वै सुताः ।
तेषां ख्यातानि गोत्राणि कौशिकानां महात्मनां" ॥
नागविशेषः । यथा महाभारते १ । १२१ । ६८ ।
"कर्क्कोटकोऽथ सर्पश्च वासुकिश्च भुजङ्गमः ।
कच्छपश्चाथ कुण्डश्च तक्षकश्च महोरगः" ॥)

कच्छपिका, स्त्री, (कच्छेन पातीति कच्छ + पा + डः + स्वार्थे कन् । अत इत्वं टाप् च । कफवाताभ्यां जातानि कच्छप इव पञ्च षट् वा दारुणानि उन्नतानि यस्यां संज्ञायां कन् टापि इत्वं च ।) क्षुद्ररोगविशेषः । तस्य लक्षणम् ।
"ग्रथिता पञ्च वा षड्वा दारुणाः कच्छपोन्नताः ।
कफानिलाभ्यां जातानि कच्छपा ज्ञेयाः कच्छपिका बुधैः" ॥
प्रमेहोपेक्षया जातदृश्यपिड़कान्तर्गतपिड़काविशेषः । तस्य लक्षणम् ।
"सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः" ।
इति सुश्रुतः ॥
("अवगाढ़ार्त्तिनिस्तोदा महावास्तुपरिग्रहा ।
मृदुण्या कच्छपएठाभा पिड़का कच्छपी मता" ॥
इति चरकः ॥ चिकित्सा तु कच्छपीशब्दे द्रष्टव्याः ॥)

कच्छपी, स्त्री, (कच्छं कच्छेन वा पाति । पा + सुपीति कः । ३ । २ । ४ । अथवा कच्छेन पिबति । अत्र तु गापोष्टक् न पिबतेः सुराशीध्वोरिति वचनात् ङीषेरिति ङीष् । ४ । १ । ६३ ।) कूर्म्मी । तत्पर्य्यायः । डुलिः २ दुलिः ३ कमठी ४ । वीणाविशेषः । सा तु सरस्वतीवीणा । इत्यमरः ॥ ३ । ३ । ३१ । क्षुद्ररोगविशेषः । इति मेदिनी । कच्छपिकारोगः । तच्चिकित्सा यथा,
"कच्छपीं खेदयेत् पूर्व्वं तत एभिः प्रलेपयेत् ।
कल्कीकृतैर्निशाकुष्ठसितातालकदारुभिः ॥

तां पक्वां साधयेच्छीघ्रं भिषग्व्रणचिकित्सया" ॥
इति भावप्रकाशः ॥

कच्छगुहा, स्त्री, (कच्छे रोहति या । कच्छ + रुह् + इगुपधेति कः । ३ । १ । १३५ । स्त्रियां टाप् च ।) दूर्व्वा । इति जटाधरः ॥

कच्छा, स्त्री, (कच्छं पश्चात्प्रदेशं छादयतीति । छद् + णिच् + डः एषोदरादित्वात् ह्रस्वः । टाप् च । कच्यच्छाद्यतेऽनया वा ।) परिधानापरावस्त्रम् । इति हेमचन्द्रः ॥ चीरिका । झिंझी पोका इति भाषा । वागाही । इति मेदिनी ॥

कच्छाटिका, स्त्री, (कच्छ एव स्वार्थे अटन् ततः स्वार्थे कन् टाप् च ।) कच्छटिका । इति शब्दरत्नावली ॥

कच्छुः, स्त्री, (कर्षति देहं । कष हिंसायां + "कषेश्छः" १ । ८ । ६ । उणां ऊ छान्तादेशश्च ।) एषोदरादित्वात् वा ह्रस्वः । रोगविशेषः । तस्य लक्षणम् ।

"सूक्ष्मा बह्व्यः पिडकाः सावयव्यः
पामेत्युक्ता कण्डूमत्यः सदाहाः ।
सैव स्फोटैस्तीव्रदाहैरुपेता
ज्ञेया पाण्योः कच्छुरत्यङ्गिचोच्चैः" ॥

इति निदानम् ॥ तच्चिकित्सा यथा ।

"अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतम् ।
नाशयेत् सार्षपं तैलं पामाकच्छूविचर्चिकाम्" ॥
इति अर्कतैलम् ॥१॥

"मनःशिलालं कासीसं गन्धाश्मा सिन्धुजन्म च ।
सर्जक्षीरी शिलाभेदी शुण्ठी कुष्ठञ्च मागधी ॥
नाकुलीरनखश्च दद्रुघ्नः क्षमिहानलः ।
दन्ती निम्बदलैश्चैभिः पृथक् कर्षमितैर्भिषक् ॥
कल्कीकृतैः पचेत्तैलं कटुप्रस्थद्वयोन्मितम् ।
अर्कक्षीरद्रुदुग्धेन पृथक् पलमितेन च ॥
गोमूत्रस्याढकेनापि प्रतैर्मर्दनिना पचेत् ।
अभ्यङ्गेन हरेदेतत् कच्छूदुःसाध्यतामपि ॥
पामानञ्च तथा कण्डूं त्वग्व्याधिबधिरामयान् ।
कच्छुराक्षसनामेदं तैलं हारीतभाषितम्" ॥
कच्छुराक्षसनाम तैलम् ॥२॥ इति भावप्रकाशः ॥
("अवल्गुजं कासमर्दं चक्रमर्दं निशायुतम् ।
भार्गिमञ्चेन तुल्यांशं मस्तुकाम्लिकपेषितम् ।
कच्छुं कण्डूं क्षयन्त्याशु सिद्धतैलप्रयोगराट् ॥
कोमलं सिंहास्यदलं सनिशं सुरभिजलेन पिष्टम् ।
दिवसत्रयेण नियतं क्षपयति कच्छुं विलेपनतः ।
हरिद्राकल्कसंयुक्तं गोमूत्रस्य पलद्वयम् ।
पिबेन्नरः कामचारी कच्छुपामाविनाशनम् ॥
श्लोथयावद्व्रामयहरी गुह्यमेहकफापहा ।
कच्छुपामाहरी चैव पथ्या गोमूत्रसाधिता ॥*॥
खरसेऽपि च दूर्व्वायाः पचेत्तैलं चतुर्गुणम् ।
कच्छूर्विचर्चिका-पामा अभ्यङ्गादेव नाशयेत्" ॥
इति दूर्व्वाद्यं तैलम् ॥*॥

"सोमराजी हरिद्रे द्वे सर्षपारग्वधं गदम् ।
कण्डूबीजैडगजं गर्भं दत्त्वा विपाचयेत् ॥
तैलं सर्षपसम्भूतं गाढ़ीदुग्धप्रयापयेत् ।
अनेनाशु प्रणश्यन्ति कुष्ठान्यष्टादशैव तु ॥
नीलिकापि पुरोथङ्गमीरं वातशोणितम् ।
कण्डूकच्छूप्रशमनं कच्छुपामा विनाशनम्" ॥
इति सोमराजीतैलम् ॥*॥
इति चक्रपाणिदत्तसंग्रहः ॥)

कच्छुघ्नी, स्त्री, (कच्छुं हन्ति या । कच्छु + हन् + टक् + ङीप् ।) घण्टोलः । इक्षुपाभेदः । इति राजनिर्घण्टः ॥

कच्छुरः, त्रि, (कच्छूरस्यास्य । "कच्छ्वा ह्रस्वश्चेति" रः ह्रस्वश्च । पां । ५ । २ । १०७ । वार्त्तिके ।) कच्छुरोगयुक्तः । खोसरोगी इति भाषा । तत्पर्य्यायः । पामनः २ । इत्यमरः ॥ २ । ६ । ५८ पुंस्यलः । इति मेदिनी ॥

कच्छुरा, स्त्री, (कच्छुं कण्डूरोगं राति ददातीति । आत इति कः । टाप् च । एषोदरादित्वात् ह्रस्वः पूर्ब्बस्य । यद्वा कच्छूः साध्यत्वेनास्ति अस्यां ह्रस्वश्चेति केषाञ्चिन्मतम् ।) शूकशिम्बी । शटी । दुरालभा । इति मेदिनी ॥ यवासः । इति राजनिर्घण्टः ॥ ग्राहिणीवृक्षः । इति रत्नमाला ॥ छी गइ इति भाषा ॥

कच्छूः, स्त्री, (कच्छति हिनस्ति देहं "कषेश्छश्च" । इति ऊः । १ । ८ । उणां ।) रोगविशेषः । खोस् पाँचड़ा इति भाषा । तत्पर्य्यायः । पामा २ पामा ३ विचर्चिका ४ । इत्यमरः ॥ २ । ६ । ५६ ॥

कच्छूमती, स्त्री, (कच्छूः साधनत्वेनास्त्यस्यां अस्यर्थे मतुप् ततो ङीप् ।) शूकशिम्बी । इति शब्दचन्द्रिका ॥

कच्छोटिका, स्त्री, (कच्छ + अटन् वा कन् । अत इत्वं टाप् च । एषोदरादित्वात् ओकारादेशः ।) कच्छः । इति हेमचन्द्रः । काछा इति भाषा ॥

कच्छोरं, क्ली, (केन शिरसा शरीरेण वा कुर्य्यते लिप्यते इति । क + कुर लेपे + कर्म्मणि घञ् ।) शटी । इति रत्नमाला ॥

कच्ची, स्त्री, (कचते दीप्यते श्लोभते । कच् उन् । ततः कचुशब्दात् ङीप् ।) कन्दविशेषः । कचु इति ख्याता । तत्पर्य्यायः । वितण्डा २ । इति जटाधरः ॥ अस्या गुणाः । भेदकत्वम् । गुरुत्वम् । कटुत्वम् । आमवातपित्तकारित्वम् । पिच्छिलत्वञ्च । इति राजवल्लभः ॥
("कच्ची सरा गुरुः सामवातहृत् कटुपित्तला" ॥ इति वैद्यकद्रव्यगुणे ॥) कचु इति हिन्दीभाषा ॥
"महिषासुरयुद्धेषु कचीरूपासि सुव्रते ।
मम विघ्नविनाशाय पूजां गृह्ण प्रसीद मे" ॥
इति शारदीयदुर्गार्च्चापद्धतिः ॥

कज, इ रुहे । जन्मनि । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ इ कङ्कारः । रुहो जन्म । छान्दोः कभावे इति भावे कः । इति दुर्गादासः ॥

कजं, क्ली, (के जले जायते जातं वा । अज + कर्त्तरि + डः ।) कमलम् । इति राजनिर्घण्टः ॥

कज्जलं, क्ली, (कु कुत्सितं जलं यस्मात् शुभ्रमपि जलं संयोगात् स्ववर्णत्वं नयतीति यावत् यद्वा कुत्सितं ऊर्द्ध्वगं चक्षुर्धोर्जलं दूरीभूतं भवत्यस्मात् । कोः कादेशः ।) अञ्जनम् । इति हेमचन्द्रः ॥ काजल इति भाषा । तत्पर्य्यायः । घोचकः २ । इति चिकित्साशब्दरत्नावली ॥
("ततः साकारयद्भूरि चेटीभिः कुङ्कुमस्थितम् ।
कस्तूरिकादिसंयुक्तं कज्जलं तैलमिश्रितम्" ॥
इति कथासरित्सागरे । ४ । ४७ ॥ तथा, भागवते ६ । २ । २७ ।
"धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम्" ॥)

कज्जलः, पुं, (कत् कुत्सितं यथा तथा जालयति आच्छादयति आतपादिकं । यद्वा कुत्सितमपि लतागुल्मादिकञ्चेति यावत् जालयति जीवयति वर्द्धयतीति श्लेषः । कु + जल + णिच् अच् ततो ह्रस्वः ।) मेघः । इति शब्दमाला ॥

कज्जलध्वजः, पुं, (कज्जलं ध्वज इव यस्य ।) दीपः । इति चिकित्साशब्दश्लेषः ॥

कज्जलरोचकः, पुं क्ली, (कज्जलं रोचयति । दीपेनोद्भासयति । कज्जल + रुच् + णिच् ततोऽच् स्वार्थे कन् । यद्वा ।) दीपाधारः । सिलसुज् देरको इत्यादि भाषा । तत्पर्य्यायः । कौमुदीवृक्षः २ दीपवृक्षः ३ शिखातरुः ४ दीपध्वजः ५ । इति जटाधरः ॥ ज्योत्स्नावृक्षः ६ । इति चिकित्साशब्दश्लेषः ॥

कज्जली, स्त्री, (कु कुत्सितं जलति जीवतीति । जल + टक् ङीप् च कोः कत् । यद्वा कुत्सितं रोगयुक्तम् जालयति आरोग्यं नयति । जल + णिच् + अच् गौरादित्वात् ङीप् ह्रस्वश्च । यद्वा कज्जलमिवाचरतीति कृ + जल + क्विप् + अच् ङीप् च ।) मत्स्यविशेषः । तत्पर्य्यायः । कज्जला २ अनन्ता ३ इति शब्दरत्नावली ॥ मिश्रितरसगन्धकम् । (यथा
"गन्धकेन रसं प्राज्ञः सुदृढं मर्द्दयेद्बिधक् ।
कज्जलाभो यथा सूतो विहाय घनचापलम् ॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः ।
असौ रोगचयं हन्यादनुपानस्य योगतः" ॥
इति वैद्यकरसेन्द्रसारसंग्रहः ॥)

कज्जलं क्ली, (कं ऊर्द्ध्वगतं चक्षुर्धोर्जलं चक्षुरोगविशेषं ज्वालयति श्लोषयति नाशयतीति यावत् । ज्वल + णिच् + अच् ह्रस्वश्च ।) कज्जलम् । इति चिकित्साशब्दश्लेषः ॥

कच्चटं, क्ली, (कचते दीप्यते लतादामादिभिः श्लोभते इति भावः । कचि + अटच् ।) जलजशाकविशेषः । काँचड़ादाम इति भाषा । तत्पर्य्यायः । जलभूः २ नाकुली ३ । इति शब्दचन्द्रिका ॥ शारदी ४ तोयपिप्पली ५ शुकुलादनी ६ । इति रत्नमाला ॥ जलतगडुलीयम् ७ । इति भावप्रकाशः ॥ तस्य गुणाः । श्लेष्मकारित्वम् । धारकत्वम् । हिमत्वम् । पित्तरक्तनाशित्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ अपि च । तिक्तत्वम् । वायुहरत्वञ्च । इति भावप्रकाशः ॥

कच्चड़ः, पुं, (कचते वध्नाति मध्यगतं मनुष्यादिजीवम् । कचि धातोरड् बाहुलकात् इदित्वान्नुम् । कच्चते श्लोभते वा ।) कच्चटप्रभेदः । तत्पर्य्यायः । कच्चटः २ काचः ३ चक्रमर्दः ४ अम्बुपः ५ । इति शब्दचन्द्रिका ॥

कच्चारः, पुं, (कचेर्भावे घञ् कच्चं प्रकाशं तं अटच्छति प्राप्नोतीति अट + कर्म्मण्यण् । अथवा कं ऊर्द्ध्वं चारयति चालयति यद्वा कं जलं चारयति निजरश्मिभिरितिश्लेषः । कचि + णिच् अच् । कर्म्मणि उपपदे अण् वा ।) सूर्य्यः । इति जटाधरः ॥

कञ्चुलि

कञ्चिका, स्त्री, (कञ्चते वेष्टौ प्रकाशते। कञ्चि + ण्वुल् स्त्रियां टाप् इत्वञ्च।) वेशशाखा। कञ्ची इति भाषा। तत्पर्य्यायः। कुञ्चिका २ क्षुद्राणुः ३। इति शब्दचन्द्रिका। क्षुद्रस्फोटः। इति वैद्यकम्॥

कञ्चुकः, पुं, (कञ्चते आपुच्छात् सर्पशरीरमुखपर्य्यन्तं व्याप्तो दीप्यते प्रकाशते श्लेष्मते वा कञ्चते आच्छादयति शुनुत्रिप्तास्त्रादिनिवारणाय। कञ्चि + बाहुलकादुकन्।) सर्पत्वक्। सापेर खोलोस इति भाषा। तत्पर्य्यायः। निर्म्मोकः २।

(यथा पञ्चतन्त्रे। १। ६६।

"भोगिनः कञ्चुकाविष्टाः कुटिला क्रूरचेष्टिताः।
सदुष्टा मन्त्रसाध्याश्च राजानः पन्नगा इव" ॥)

भटादेस्त्वोलाङ्गतिसन्नाहः। साँजोया इति भाषा। तत्पर्य्यायः। वारवाणः २ वाणवारः ३। इत्यमरभरतौ॥ (तथा हि रामायणे ६। ६६। २३।

"कञ्चुकोष्णीषिणस्तत्र वेत्रकर्कशपाणयः।
उत्सारयन्तः सहसा समन्तात्परिचक्रमुः" ॥)

चोलकम्। काँचलि इति भाषा। तत्पर्य्यायः। चोलः २ कञ्चुलिका ३ कूर्पासकः ४ अङ्गिका ५। वर्ज्जापकस्यहीतार्द्धस्थितवस्त्रम्। इति हेमचन्द्रः॥

(यथाऽमरशतके ८२।

"सख्यः किं करवाणि यान्ति
मृतधा यत् कञ्चुके सन्त्यसवः" ॥)

वस्त्रम्। इत्युणादिकोषः॥ (यथा भागवते ८।७।१५।

"देवांश्च तत्प्रभाभिन्नाञ्छतमन्यूनिवोद्यतान्
धर्म्मान्वरत्नवरकञ्चुकानगात्" ॥)

कञ्चुकालुः, पुं, (कञ्चुकोऽस्यास्य। कञ्चुक + आलुच्।) सर्पः। इति शब्दचन्द्रिका॥

कञ्चुकी, [न्] पुं, (कञ्चुकोऽस्यास्तीति। कञ्चुक + अस्त्यर्थे इनिः।) महत्तरत्वकः। अन्तःपुराध्यक्षः। स तु वहिःसञ्चरन्तीनां पुरस्त्रीणां प्रेक्षकपुरुषान्तरवारणाय राज्ञा स्त्यागारे यो वेत्रधरो नियुक्तः। तत्पर्य्यायः। सौविदल्लः २ स्त्यापत्यः ३ सौविदः ४। इत्यमरः॥ २।८। ८॥ (यथा रत्नावल्यां नाटिकायां २ अङ्के।

"नहं वर्षवरैर्मनुष्यगणनाभावादधस्य त्रया-
मन्तःकञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः"॥

अस्य कञ्चुमुल्लं भरतेन।

"अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः।
सर्व्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते" ॥)

यवः। चणकः। सर्षपः। इति राजनिर्घण्टः। विष्वक्सेनः। जोङ्गकद्रुमः। इति मेदिनी॥

कञ्चुकी, स्त्री, (कञ्चयति शरीरकान्त्यादिकं प्रकाशयति रोगादिकमुपशमयति वा। कञ्च णिच् बाहुलकादुकन् गौरादित्वात् ङीष् जातिवाचकत्वात् ङीप् वा।) ओषधिभेदः। इति मेदिनी॥ क्षीरीवृक्षः। इति रत्नमाला॥

कञ्चुलिका, स्त्री, (कञ्चते हृदयाद्यङ्गान्याच्छादयतीति। कञ्चि + उलच् + स्वार्थे कन् गौरादित्वात् ङीष् ह्रस्वः। टाप् च।) कञ्चुकः। स्त्रीणामङ्गरक्षिणी। इति हेमचन्द्रः॥ काँचुलि इति भाषा॥

(यथा अमरशतके। २३। "त्वं मुग्धाक्षि विनैव-

कटः

कञ्चुलिकया धत्से मनोहारिणीम्।)

कञ्जं, क्ली, (कम् क्षीरोदधौ जायते सागरस्यापि जलमयत्वात् तदति इति क्वच्यते। कम् जले जातम्। जनेः कर्त्तरि डः।) अमृतम्। पद्मम्। इति मेदिनी॥ (यथा, भागवते। ८। ६। ३।

"विरिञ्चो भगवान् दृष्ट्वा सह पुत्रैर्व्वेण तां तनुम्।
खच्छामरकतश्यामां कञ्जगर्भारुणेक्षणाम्" ॥)

कञ्जः, पुं, (कम् के जले शिरसि च जायते। जनेर्डः।) ब्रह्मा। केशः। इति मेदिनी॥

कञ्जकः, पुं, (कञ्जते मनुष्यवत् प्रायेणोच्चारयितुं शक्नोतीति। कञ्जि + कर्त्तरि ण्वुल्।) पक्षिविशेषः। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जजः, पुं, (कञ्जात् विष्णोर्नाभिपद्मात् जातः। जन + कर्त्तरि डः।) ब्रह्मा। इति शब्दरत्नावली॥

कञ्जनः, पुं, (कं सुखं जनयतीति। कम् + जनि + अच्।) कन्दर्पः। इति त्रिकाण्डशेषः॥ पक्षिविशेषः। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जरः, पुं, (कं जलं एकार्णवस्यसलिलं जरयति शोषयति। कम् ज्वलति रश्मिभिराकर्षति। कञ्जि + अरन्।) ब्रह्मा। सूर्य्यः। उदरम्। हस्ती। इत्युणादिकोषः॥

कञ्जलः, पुं, (कञ्जते उपदिष्टविषयं पठितुं शक्नोति। कञ्जि + कलच्।) मदनपक्षी। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जारः, पुं, (कम् जलं शुक्लरसादिकं जारयति। कम् + जलं जारयति शोषयति रश्मिभिः। कम् एकार्णवस्यप्रलयसलिलं जारयति योगबलेन जापयति। कं जलं जारयति शोषयति सुखेनेतिवा शेषः। कम् + जॄ + णिच् + अण्। यद्वा "कञ्जिमृजिभ्यां चित्"। इति आरन्। ऊणां ३।१३७।) जठरम्। सूर्य्यः। विरिञ्चिः। वारणः। मुनिः। इति मेदिनी॥ (मयूरः। व्यञ्जनम्। इत्युणादिकोषः॥ ४।१३७॥ कम् जलं सागरं जारयति शोषयति गण्डूषीकृत्य योगबलेन इति विग्रहे अगस्त्यमुनिः॥)

कञ्चिका, स्त्री, (कञ्चते तरसा भूमिं भित्त्वा उत्पद्यते। कञ्जि + कर्त्तरि + ण्वुल् + टाप् इत्वञ्च।) ब्राह्मणयष्टिकाशस्त्रः। इति शब्दरत्नावली॥ वामनहाटी इति भाषा॥

कट गत्यां। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कटति। इति दुर्गादासः॥

कट इ गत्यां। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्। इ-कटयते। इति दुर्गादासः॥

कट ई गत्यां। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। कटति अकटीत् अकाटीत् चकाट। ई कट्टः इति दुर्गादासः॥

कट ए हतौ। एषि। इतिरावरत्वम्। एट् वर्त्मम्। (भ्वां-परं-सकं-अकं च सेट्।) कटति। एदित् अकटीत् चकाट।) ए अकटीत् पटो गात्रम्। कटति मेघः। इति दुर्गादासः॥

कटः, पुं, (कटति मदवारि वर्षति यः। कट वर्षणे-कर्त्तर्य्यच्।) हस्तिगण्डस्थलम्। "कण्डू य-

कटकी

मानेन कटं कदाचित् वन्यद्विपेनोन्मथिता लगस्य"। इति रघुः"। २।३७।) कटिदेशः तत्पार्श्वश्च। किञ्जिल्कः। इत्यमरः॥ माँदुर् दर्म्मा इत्यादि भाषा। काशादिरचितरज्जुः येन कुसूलं वेष्ट्यते। कुसूलश्च मराय्यि इति टीकान्तरम्॥ दृषरचितटाटी इतिख्यात इत्यन्ये। इति तट्टीकायां भरतः॥

(यथा भागवते। १। ३। १८।

"चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्ज्जितम्।
ददार करजैर्वक्षस्येरकां कटकृद्यथा" ॥)

अतिशयः। प्रकरः। समयः। इति मेदिनी॥ दृढम्। इति धरणी॥ (यथा मनु २। २०४।

"गोऽश्वोष्ट्रयानप्रासादस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च" ॥

"कटेषु दृढादिनिर्म्मितेषु" इति कुल्लूकभट्टः॥) शवः। शवरथः। ओषधी। श्मशानम्। इति हेमचन्द्रः॥ तक्षितकाष्ठम्। तक्ता इति भाषा। इति शब्दरत्नावली॥ (यथा,—रामायणे। २। ५६। २१।

"तां निष्ठितां वङ्गकटां दृष्ट्वा रामः सुदर्शनाम्।
सुश्रूषमाणमेकाग्रमिदं वचनमब्रवीत्" ॥

"वङ्गकटां वङ्गकवाटाम्" इति तट्टीका॥ खनामप्रसिद्धराक्षसः। यथा,—रामायणे। ५। १२। १३।

"शुकनासस्य वक्त्रस्य कटस्य विकटस्य च।
रक्षसो लोमहर्षस्य दंष्ट्रालक्रकर्कशयोः" ॥)

कटः, चि, (कटयति प्रकाशयति क्रियामिति शेषः। कट् + णिच् + अच्।) क्रियाकारः। इति हेमचन्द्रः॥

कटकः, पुं क्ली, (कटति वर्षति अस्मिन् मेघ इति। अथवा कट्यते निर्गम्यते अस्मात् निर्झरिण्यादिभिः "कृञादिभ्यः संज्ञायां वुन्"। ५। ३५। उणां इति वुन्।) पर्व्वतमध्यभागः। तत्पर्य्यायः। नितम्बः २। इत्यमरः॥ २। ३। ५॥ मेखला ३ इति भरतः॥ (यथा रघुः। १६। ३१। "मार्गे विशौ सा कटकान्तरेषु वैन्ध्येषु सेना बहुधा विभिन्ना"॥) वलयः। चक्रम्। इत्यमरः॥ २। ६। १०७। हस्तिदन्तमयङ्गनम्। सामुद्रलवणम्। राजधानी। इति मेदिनी॥ नगरी। इति शब्दरत्नावली॥ सेना। इति हेमचन्द्रः॥ (यथा हितोपदेशे १। ३३२। "स च दिग्विजयकमेणागत्य चन्द्रभागानदीतीरे समावेशितकटको वर्त्तते"॥) सानुः। पर्व्वतस्य समभूभागः। इति विश्वः॥

("गिरिकूटेषु दुर्गेषु नानाजनपदेषु च।
जगाकौर्ज्जेषु देशेषु कटकेषु परेषु च" ॥
इति महाभारतम्। ४। २४। १२।)

कटकी, [न्] पुं, (कटकोऽस्यास्य अस्त्यर्थे इनिः।) पर्व्वतः। इति त्रिकाण्डशेषः॥

कटकोलः, पुं, (कटति वर्षति स्रवति इति। कट् + अच्। कटस्य निष्ठीवनरूपजलस्य कोलः घनीभावो यत्र। कुल संख्याने अधिकरणे घञ्।) निष्ठीवनपात्रम्। इति त्रिकाण्डशेषः॥ पिकदानी इति भाषा॥

कटभा

("स्यादाचामनकः प्रोक्तः कटकोलः पतद्ग्रहः"।)
कटखादकं, त्रि, (कटं दृश्यादिकं सर्व्वमपि खादति इत्यर्थः। कट्+खाद्+ण्वुल्। सर्व्वभक्षम्।) खादकम्। भक्षकम्। इति मेदिनी॥
कटखादकः, पुं, (कटस्य आवरणस्य खं मध्यस्थितच्छिद्रं अत्ति। कट+ख+अद्+ण्वुल्।) काचकलसः। काकः। जम्बूकः। इति मेदिनी॥ (कटं शवं खादतीति व्युत्पत्त्या शवखादके त्रि।)
कटङ्कटः, पुं, (कटं शवं कटति च्छालया आवृणोतीति। कट+कट्+बाहुलकात् खच्।) अग्निः। यथा,—
"कटङ्कटाय भीमाय नमः पञ्चमुखाय च।
अघोरघोररूपाय घोरघोरतराय च"॥
इति वह्निपुराणे अग्निस्तवनामाध्यायः॥
कटङ्कटेरी, स्त्री, (कटङ्कटं वह्निजं सुवर्णं तत्कान्तिमितिशेषः ईरयति प्रापयति द्योतयति वात्मानं सुवर्णकान्तितुल्यपीतवर्णत्वात्। कटङ्कट+ईर गतौ+अण्। ङीप् गौरादित्वात् ङीष् वा।) हरिद्रा। इति चिकाण्डशेषः॥ दारुहरिद्रा। इति रत्नमाला॥
कटपूः, पुं, (कटे श्मशाने पवते। कटं कटेन वा पवते। पुङ् गतौ क्विप् निपातनात् दीर्घः। पां। ३। २। १७। "क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसम्प्रसारणञ्च"।) उणां २। ५७।) महादेवः। राक्षसः। विद्याधरः। अक्षदेवनः। इति मेदिनी। कीटः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
कटभङ्गः पुं, (कटानां ग्रस्यानां ओषधीनामितियावत् हस्तेन भङ्गः छेदनम्। कटस्य सैन्यसंघस्य भङ्गः यस्मात् हेतोः सैन्यभङ्गस्तु राजमरणहेतुरेव।) ग्रस्यानां हस्तच्छेदः। हात दिया ग्रस्य छेंड़ा कुड़न इत्यादि भाषा। नृपात्ययः। राजविनाशः। इति मेदिनी॥
कटभी, स्त्री, (कटवद् भाति। कट+भा+डः। गौरादित्वात् ङीष्।) ज्योतिष्मती लता। इत्यमरः। २। ४। १५०॥ नया फटिकी इति भाषा। अपराजिता। वृक्षभेदः। तत्पर्य्यायः। नाभिका २ शौण्डी ३ पाटली ४ किणिही ५ मधुरेणुः ६ क्षुद्रश्यामा ७ कैडर्य्यः ८ श्यामला ९। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। गुल्मविषाध्मानशूलदोषनाशित्वम्। वातकफाजीर्णरोगश्रमताकारित्वम्। श्वेता चेत् गुणयुक्तत्वञ्च। "तत्फलं तद्गुणं श्वेतं विशेषात् कफशुक्रजित्"। इति राजनिर्घण्टः॥ (यथा भावप्रकाशे।
"कटभी तु भवेच्छ्वेतानाड़ीव्रणविषक्रिमीन्।
हन्त्युष्णा कफकुष्ठघ्नी कटुरुक्षा च कीर्त्तिता"॥)
वृक्षभेदः। काँटाशिरीष इति ख्यातः। इति रत्नमाला॥
कटमालिनी, स्त्री, (कटानां किण्वाद्योषधीनां माला साधनत्वेनास्ति अस्याः अस्त्यर्थे इनिः ततो ङीप्। मदिरामादकतायास्तु किण्वाद्योषधीगणप्रभवत्वात्। "मद्यादौ किण्वशक्तिवत्"। इति चार्व्वाकदर्शनं १ अध्यायः।) मदिरा। इति शब्दमाला॥

कटि

कटम्बः, पुं, (कटतीति "शकदिकडिकटिभ्योऽम्बच्"। उणां। ४। ८२। इति अम्बच् धातूनामनेकार्थत्वात् अत्र वादनेऽपि।) वाद्यभेदः। (कट्यते आव्रियते शूचुरनेनेति करणे अम्बच्।) वाणः। इत्युणादिकोषः॥
कटम्बरा, स्त्री, (कटं गुणातिशयम् दधाति धारयतीति। दृ+अच्+टाप् च।) कटुकी। इत्यमरः। २। ४। ८५॥ कटम्भरा इति च पाठः॥
कटम्भरः, पुं, (कटं गुणातिशयं बिभर्त्ति। भृ+धारणपोषणयोः संज्ञायां भृञृजिधारिसहितपिदमीति खच् मुम् च यां ३। २। ४६।) श्लोनाकवृक्षः। इति राजनिर्घण्टः॥ कटभीवृक्षः। इति वैद्यकम्॥
कटम्भरा, स्त्री, (कटं बिभर्त्ति या। भृ+खच् मुम् टाप् च।) राजबला। इत्यमरः। २। ४। १५३॥ प्रसारणी। गन्धभादालिया इति भाषा। रोहिणी। कट्की इति भाषा। हस्तिनी। कलम्बिका। गोला। वर्षाभूः। मूर्व्वा। इति मेदिनी॥
कटव्रणः, पुं, (कटः उत्कटो व्रणो युद्धक्षतरूपो यस्य।) भीमसेनः। इति त्रिकाण्डशेषः॥
कटशर्करा, स्त्री, (कटः नलः मिष्टरसत्वात् शर्करेव यस्याः।) गाङ्गेरीलता। इति हारावली॥ नाटा इति ख्याता।
कटाकुः पुं, (कटति छक्छेन जीविकां निर्व्वाहयति॥ कट् छक्छजीवने "कटिकथिभ्यां काकुः" उणां ३। ७७। इति काकुः।) पक्षी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
कटाच्छः, पुं, (कटावतिशयितौ अक्षिणी यत्र। कट+अक्षिन्+घच्। यद्वा कटं गण्डं अक्षति व्याप्नोति। अक्षु व्याप्तौ+अच् कर्म्मण्यण् वा।) अपाङ्गदर्शनम्। आड़चके देखन इति भाषा। इत्यमरः। २। ६। ८४॥ (यथा, मेघदूते ३७। "आमोक्ष्यन्ति त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान्"॥)
कटाधनं, क्ली, (कटस्य खनामख्यातासनस्य अयनं उत्पत्तिस्थानम्।) वीरणम्। इति शब्दरत्नावली॥
कटारः, पुं, (कटं कन्दर्पमदं ऋच्छति। कट+ऋ+अण्।) नागरः। कामी। इति शब्दमाला।
कटाहः, पुं, (कटं उत्तापादिकं आहन्ति निवारयतीति। कट्+आ+हन्+ड।) कूर्म्मकर्परः॥ दीपप्रभेदः। (कटं कटुगन्धादिकं आहन्ति तैलादिकटुगन्धः आहन्यतेऽत्र वा।) तैलादिपाकपात्रम्। (कटं शवं आहन्यतेऽसौ जायमानविषाद्याग्रमहिषीग्राहकः। इति मेदिनी॥ (कटः पापी आहन्यतेयत्र।) नरकः। इति हारावली॥ कर्व्वूरः। इति जटाधरः॥ कूपः। इति शब्दरत्नावली॥ (यथा सिद्धान्तकौमुद्याम्। ५। १। ५२। "प्रस्थं सम्भवति प्राप्तिकः कटाहः"॥)
कटिः, पुं, स्त्री, (कट्यते वस्त्रादिना त्रियतेऽसौ सर्व्वधातुभ्य इन् इति कट्+इन्।) शरीरावयवविशेषः। काँकालि इति भाषा। तत्पर्य्यायः। कटः २ श्रोणिफलकं ३ श्रोणी ४ ककुन्मती ५। इत्यमरः। २। ६। ७४॥ श्रोणिफलम् ६ कटी ७ श्रोणिः ८।

कटी

इति तट्टीका॥ कलत्रम् ९ कटीरम् १० काञ्ची-पदम् ११। इति हेमचन्द्रः। करभः १२। इति जटाधरः॥ अत्र पूर्व्वार्द्धयं कटिपार्श्वः। इति भरतः॥ (यथा, भागवते। ३। १५। २०।
"येषां दृष्ट्वा कटितटाः स्मितघ्नोभिमुख्यः"।
दृष्ट्वात्मनां न रज आदधुरुत्स्मयाद्यैः"॥)
कटिचं, स्त्री, (कटिं चयते इति। कटि+चै+कः।) रसना। कटिवस्त्रम्। कटिवर्म्म। इति मेदिनीकरहेमचन्द्रौ॥ (यथा भागवते। ६। १६। ३०।
"मृणालगौरं श्रितिवाससं स्फुरत्
किरीटकेयूरकटिच्चकङ्कणम्"।)
कटिप्रोथः, पुं, (प्रोथतीति प्रोथृ+पर्य्याप्तौ पुंसीति घः। कट्याः प्रोथः मांसपिण्डः।) कटिदेशस्थमांसपिण्डम्। गुद्दला पेदेर पेलो इति भाषा। तत्पर्य्यायः। स्फिक् २। इत्यमरः। २। ६। ९५॥ पूषकः ३ कटीप्रोथः ४। इति रभसः॥ कटिः ५ प्रोथः ६। इति केचित्॥ पूलः ७। इति भरतः॥
कटिरोहकः, पुं, (कटिं हस्तिपश्चाङ्गागं रोहतीति। कटि+रुह्+ण्वुल्।) हस्तिपश्चाङ्गारोहकः। इति शब्दमाला॥
कटिल्लकः, पुं, (कटति लतायां प्रकाशते उत्पद्यते वा। कट+बाहुलकादिल्लप्रत्ययः। ततः स्वार्थे कन्।) कारवेल्लः। इत्यमरः। करला इति भाषा॥
कटिशीर्षकः, पुं, (कटिः शीर्षमिव। संज्ञायां कन्।) कटिदेशः। इति हलायुधः॥
कटिशूलः, पुं, (कटिस्थः शूलः शूलरोगः।) कटिदेशस्थशूलरोगः। तस्यौषधं यथा।
"रजनीकदलीक्षारलेपः सिध्यविनाग्रनः।
कुलस्य भागमेकन्तु पथ्याभागद्वयं तथा॥
उष्णोदकेन संपीत्वा कटिशूलविनाशनम्"।
इति गारुड़े १८८ अध्यायः॥
("गुड़ूच्यारग्वधश्चैव क्वाथमेषां विपाचयेत्।
गुग्गुलीचूर्णेन संयुक्तं पिबेच्छूलकटिग्रहे"॥
इति श्राद्धधरः॥)
कटिशृङ्खला, स्त्री, (कट्यां धार्य्या शृङ्खला। यद्वा कट्याः शृङ्खला।) चितिका। कटिधार्य्यक्षुद्रघण्टिका। इति हारावली॥
कटिसूत्रं, क्ली, (कट्यां धार्य्यं सूत्रम्। शाकपार्थिवादित्वात् मध्यपदलोपः।) कनकलङ्कारविशेषः। इति हलायुधः। चन्द्रहार गोट् इत्यादि भाषा॥ (यथा, भागवते। ५। ३। ४। "स्फुटकिरण प्रवरमणिमयमुकुटकुण्डलकटकादिसूत्रहारकेयूरनूपुरादिभूषणविभूषितमतिकमनीयदर्शनायतचतुर्दशभुजोपशोभितगरुडवाहमभिपतन्तमुपलभ्य" ॥)
कटी, [न्] पुं, (कटः गण्डस्थलं प्राशस्त्येनास्यास्तीति अस्त्यर्थे इनिः।) हस्ती। इति त्रिकाण्डशेषः॥
कटी, स्त्री (कट्यते कटुरसेषु गृह्यतेऽसौ। कट्यते आव्रियते वस्त्रादिना। सर्व्वधातुभ्य इन्। कटात् श्रोणिवचन इति गौरादिषु पाठाद्वा ङीष्। यो ४। १। ४१।) पिप्पली। श्रोणिदेशः। इति मेदिनी॥ (यथा, महाभारते। १। बकवधपर्व्वणि १६४। २७।

कटु

"सद्येन च कटीदेशे गृहीत्वा वाससि पाण्डवः।
तद्रक्षो द्विगुणं चक्रे रवन्तं भैरवं रवम्" ॥)

कटीतलः, पुं, (कट्यां तलमास्पदमस्य। अस्य कटिदेशे धारणप्रसिद्धेस्तथात्वम्।) न्युब्जखड्गः। इति चिकित्साशेषः। बाँका खाँड़ा इति भाषा॥

कटीरं, क्ली, (कट्यते आव्रियतेऽसौ वाससेति शेषः। कट् + "कृषृघृकटिपटिशौटीभ्यः ईरन्" । उणां। ४। ३०॥ इति ईरन्।) कटिः। इति हेमचन्द्रः॥

कटीरः, पुं, (कट्यते आव्रियतेऽसौ अथवा कट्यते गम्यते अनेन। कर्म्मणि करणे वा ईरन्। उणां। ४। ३०।) जघनम्। कन्दरः। इत्युणादिकोषः॥ कटिः। इति जटाधरः॥

कटीरकः, पुं, (कटीर एव स्वार्थे संज्ञायां वा कन्।) नितम्बः। इति चिकित्साशेषः॥

कटु, क्ली, (कटति सदाचारमाच्छादयतीति। कट् + उन्।) अकार्य्यम्। इत्यमरः। ३। ३। २५॥ दूषणम्। इति विश्वः॥

कटुः, पुं, (कटति तीक्ष्णतया रसनां मुखं वा आच्छादयति यद्वा कटति वर्षति चक्षुर्मुखनासादिभ्यो जलं स्रावयतीति। कट् + उन्। "कटिवटिभ्यां च"। उणां। १। ९।) सर्षपशेषः इत्यमरः। १। ५। ९। झाल इति भाषा॥ अस्य गुणाः कफजदोषशोथमन्दाग्निश्वित्ररोगनाशित्वम्। अस्य बह्वसेवने क्षयदाहत्वम्। वीर्य्यबलापहृत्वञ्च। इति राजनिर्घण्टः॥ अपि च। आरोग्यपित्ताग्निवायुकारित्वम्। कृमिकण्डुविषरोगस्तनदुग्धमेदःस्थौल्यनाशित्वम्। लघुत्वम्। अतिशूयमत्वञ्च अमस्थैर्य्यतालुशोषादिदाहकारित्वञ्च। इति राजवल्लभः॥ (तथा चोक्तम्। भावप्रकाशे।

"कटूरूक्षः स्तन्यमेदःश्लेष्मकण्डूविषापहः।
वातपित्तप्रदाग्नेयः शोथी पाचनरोचनः" ॥
अस्य लक्षणं यथाह वाग्भटः॥
"उद्वेजयति जिह्वाग्रं कुर्व्वन्निमिचिमां कटुः।
स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च" ॥
गुणकर्म्माणि च यथा, तत्रैव।
"कटुर्गलामयोदर्दकुष्ठालसकशोफजित्।
व्रणावसादनः स्नेहमेदःश्लेष्मोपशोषणः॥
दीपनः पाचनो रुच्यः शोषणोऽग्नस्य कर्षणः।
क्लिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः॥
कुरुते सोऽतियोगेन दृष्टिं शुक्रबलक्षयम्।
मूर्च्छामाकुञ्चनं कम्पं कटीपृष्ठादिषु व्यथाम्" ॥*॥
कटुको रसो वक्त्रं शोधयति अक्षिं दीपयति, मुखं शोधयति, घ्राणमास्रावयति, चक्षुर्विरेचयति, स्फुटीकरोतीन्द्रियाणि अनलकश्चयशूपचयोदर्द्दाभिष्यन्द-स्नेह-स्वेद--श्लेष्मलानुपहन्ति, रोचयत्यन्नं, कण्डूर्विनाशयति, व्रणानवसादयति, क्रिमीन् क्षिनत्ति, मांसं विलिखति, शोणितसङ्घातं भिनत्ति, बन्धांश्छिनत्ति, मार्गान् विवृणोति, श्लेष्माणं शमयति, लघुरुष्णो रूक्षश्च॥ स एवंगुणोऽप्येकएवात्यर्थमुपयुज्यमानो विपाकप्रभावात् पैत्यमुपहन्ति, रसवीर्य्यप्रभावान्मोहयति, ग्लापयति, सादयति, कर्षयति, मूर्च्छयति, नमयति, क्लमयति, भ्रमयति, कण्ठं परिदहति शरीरतापमुपजनयति, बलं क्षिणोति, तृष्णां जनयति, वाय्वग्निवाङ्ल्याद् भ्रम-मद-दवथु-क्रम्य-तोद-भेदैश्चरण-भुजपार्श्व-एष्ठप्रभृतिषु मारुतजान् विकारानुपजनयति॥) चम्पकवृक्षः। इति शब्दचन्द्रिका॥ चीनकर्पूरः। पटोलः। कट्फलता। इति राजनिर्घण्टः॥

कटुः, स्त्री, (कट्यते कटुत्वेनास्वाद्यते इति। कट् + उ।) कटुकी। इत्यमरः॥ प्रियङ्गुवृक्षः। राजिका। इति विश्वमेदिन्यौ॥

कटुः, त्रि, (कटति परलक्ष्मीदर्शनेन क्षयमेतां गच्छतीति। कट् + उः।) मत्सरः। तीक्ष्णः। इत्यमरः। ३।३।२५॥ (यथा, महाभारते १। पौष्यपर्व्वणि ३। ५५। "क्षारतिक्तकटुरूक्षैस्तीक्ष्णविपाकैश्चक्षुष्यैरुपहतोऽन्धो बभूव"।) कटुरसयुक्तः। (यथा, भागवते। ३। २६। ४२।

"कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा।
भौतिकानां विकारेण रस एको विभिद्यते" ॥)
सुगन्धिः। इति मेदिनी॥ (यथा, रघुः। ५। ४८।

"क्षणच्छदच्छीरकटुप्रवाह-
मसह्यमाघ्राय मदं तदीयम्" ॥)
व्यप्रियः। इति चिकित्साशेषः॥ (यथा, रघुः। ६। ८५

"इति समग्रगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः" ॥)
दुर्गन्धः। इत्यमरटीकायां स्वामी॥

कटुकं, क्ली, (कटुकानां कटुरसानां चयं कटोः संज्ञायां कन्।) त्रिकटु। इति मेदिनी॥ तच्च शुण्ठी पिप्पली मरिचञ्च॥ (कटु एव। स्वार्थे कन्। इति विश्वे वाचस्पतिः। अप्रियम्। यथा, महाभारते। २। अनुद्यूतपर्व्वणि ७७। १६।

"दुर्य्योधनश्च कर्णश्च कटुकान्यभ्यभाषताम्।
इति सर्व्वमिदं राजन्नाकुलं प्रतिभाति मे" ॥)

कटुकः, पुं, (कटुरेव कटुकः स्वार्थे कन्।) कटुरसः। (यथा, सुश्रुते "यो जिह्वाग्रं बाधते उद्वेगं जनयति शिरो गृह्णीते नासिकाञ्च स्रावयति स कटुको रसः" ॥) पटोलः। इति राजनिर्घण्टः॥ सुगन्धिद्रव्यम्। इति शब्दरत्नावली॥ कुटजवृक्षः। अर्कवृक्षः। इति शब्दचन्द्रिका॥ राजसर्षपः। इति हारावली॥

कटुकन्दः, पुं, (कटुः कन्दोमूलमस्य।) शिग्रुवृक्षः। आर्द्रकम्। लशुनम्। इति मेदिनी॥

कटुकफलं, क्ली, (कटुकं फलमस्य।) कक्कोलकम्। इति राजनिर्घण्टः॥

कटुका, स्त्री, (कटु + संज्ञायां कन्। स्त्रियां टाप्।) क्षुद्रचक्षुर्वृक्षः। वृक्षविशेषः। कटकी इति भाषा। तत्पर्य्यायः। जननी २ तिक्ता ३ रोहिणी ४ तिक्तरोहिणी ५ चक्राङ्की ६ मत्स्यपित्ता ७ वकुला ८। शकुलादनी ९ सादनी १० शतपर्व्वा ११ द्विजाङ्गी १२ मलभेदिनी १३ अशोकरोहिणी १४ कृष्णा १५ कृष्णभेदी १६ महौषधी १७ कट्वी १८ अम्लनी १९ काण्डरुहा २० कटुः २१ कटुरोहिणी २२ केदारकटुका २३ अरिष्टा २४ पाम्नी २५। इति राजनिर्घण्टः॥ कटम्भरा २६ कटुम्भरा २७ अशोका २८। इत्यमरः तट्टीका च॥ (अस्य गुणाः।

"कटुका कटुका पाके तिक्ता रूक्षा हिमा लघुः।
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा।
प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत्" ॥
इति शब्दार्थचिन्तामणिधृतवैद्यकवचनम्॥)
अतिकटुत्वम्। तिक्तत्वम्। शीतत्वम्। पित्तरक्तदाहबलाशुरोचकश्वासज्वरनाशित्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः। सारकत्वम्। रूक्षत्वम्। कफनाशित्वञ्च। इति राजवल्लभः॥ ताम्बूली। इति शब्दचन्द्रिका॥ कुक्किरवृक्षः। इति रत्नमाला॥

कटुकालाबुः, पुं, (कटुका अलाबुः।) कटुतुम्बी। इति रत्नमाला॥ तित्लाउ इति भाषा॥

कटुकी, स्त्री, (कटु + स्वार्थे कन्। गौरादित्वात् ङीष्।) कटुका। इति मेदिनीशब्दरत्नावल्यौ। कट्की इति भाषा॥ (अस्या गुणाः।

"कटुकी तु सरा रूक्षा कफपित्तज्वरापहा"।
इति वैद्यकद्रव्यगुणग्रन्थे॥
"कट्वी तु कटुका पाके तिक्ता रूक्षा हिमा लघुः।
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा।
प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत्" ॥
इति भावप्रकाशः॥)

कटुकीटकः, पुं, (कटुः तीक्ष्णः दंशनेन दुःखप्रदत्वात् कीटः। ततः स्वार्थे कन्।) मशकः। इति जटाधरः॥

कटुकाख्यः, पुं, (कटुः कर्कशः काख्यः काशब्दो यस्य।) टिट्टिभपक्षी। इति हेमचन्द्रः॥

कटुग्रन्थि, क्ली, (कटुस्तीव्रो ग्रन्थिर्मूलमस्य।) पिप्पलीमूलम्। शुण्ठी। इति राजनिर्घण्टः॥

कटुचातुर्जातकं, क्ली, (चतुर्भ्यो जातकं ततः स्वार्थे अण् ततः कर्म्मधारयः।) एलात्वक्पत्रकमरिचात्मकचतुष्कम्। इति राजनिर्घण्टः॥

कटुच्छदः, पुं, (कटुश्छदः पत्रं यस्य।) तगरवृक्षः। इति शब्दरत्नावली॥

कटुतिक्तकः, पुं, (कटुश्चासौ तिक्तश्चेति। अस्यार्थे कन्।) शुण्ठीवृक्षः। इति राजनिर्घण्टः॥ भूनिम्बः। इति वैद्यकम्॥

कटुतिक्तका, स्त्री, (विपाके कटुः स्वादे तिक्ता। स्वार्थे कन्। अत इत्वम्॥) कटुतुम्बी। इति शब्दरत्नावली॥

कटुतुण्डी, स्त्री, (कटु तीव्रं तुण्डमस्याः।) जलाप्रभेदः। कटुतराइ इतिख्याता। तत्पर्य्यायः। तिक्ततुण्डी २ तिक्ताख्या ३ कटुका ४ कटुतुण्डिका ५ विषा ६॥ अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। कफवान्तिविषारोचकरक्तपित्तनाशित्वम्। सदा पथ्यत्वम्। रेचनत्वञ्च। इति राजनिर्घण्टः॥

कटुतुम्बी, स्त्री, (कटुश्चासौ तुम्बी चेति।) जलाविशेषः। तित्लाउ इति भाषा। तत्पर्य्यायः। इक्ष्वाकुः २। इत्यमरः। २। ४। १५६॥ कटुकालाबुः ३ नृपात्मजा ४। इति रत्नमाला॥ कटुतिक्तिका ५। इति शब्दरत्नावली॥ कटुफला ६

तुम्बिनी ७ कटुतुम्बिनी ८ बृहत्फला ९ राजपुत्री १० तिक्तबीजा ११ तुम्बिका १२ ॥ अस्या गुणाः । कटुत्वम् । तीक्ष्णत्वम् । वान्तिकारित्वम् । श्वास-वातकासश्लेष्मव्रणश्लूकविषनाशित्वम् । श्लेष्मन-त्वञ्च । इति राजनिर्घण्टः ॥ पाण्डुरामिकफवार्य-नाशित्वम् । लघुपाकित्वञ्च । इति राजवल्लभः ॥ ("कटुतुम्बी हिमा हृद्या पित्तकासविषापहा । तिक्ता कटुर्विपाके च वातपित्तज्वरान्तकृत्" ॥)

कटुत्रयं, क्ली, (कटूनां कटुरसानां त्रयम् ।) त्रिकटु । इति राजनिर्घण्टः ॥ (अस्य गुणाः । "त्रयं त्रिक-टुकं जयेत् । स्थौल्याग्नि-सदन-श्वास-कास-श्लीपद-पीनसान्" ॥ इति वाभटः ॥)

कटुदला, स्त्री, (कटु दलं पत्रं यस्याः ।) कर्कटी । इति राजनिर्घण्टः । काँकुड़ इति भाषा ॥

कटुनिष्पावः, पुं, (कटुश्चासौ निष्पावश्चेति ।) नदी-निष्पावधान्यम् । इति राजनिर्घण्टः ॥

कटुपत्रः, पुं, (कटु तीव्रं पत्रं यस्य ।) पर्पटः । सिता-र्जकः । इति राजनिर्घण्टः ॥

कटुपत्रिका, स्त्री, (कटु पत्रं यस्याः । ततः कप् । अत इत्वं टाप् च ।) कारीवृक्षः । इति राजनिर्घण्टः ॥

कटुफलः, पुं, (कटु फलं यस्य । अस्य पत्रस्यतिक्तत्वेपि फले कटुपाकत्वात् ।) पटोलः । इति राजनिर्घण्टः ॥

कटुफला, स्त्री, (कटु फलं यस्याः ।) श्रीवल्लीवृक्षः । इति राजनिर्घण्टः ॥

कटुभङ्गः, पुं, (कटुः एकैकदेशभङ्गश्च यस्य ।) शुण्ठी । इति त्रिकाण्डशेषः ॥

कटुभद्रं क्ली, (कट्वपि भद्रं सेवनेन हितजनकम् ।) शुण्ठी । इति राजनिर्घण्टः ॥ आर्द्रकम् । इति केचित् ॥

कटुमञ्जरिका, स्त्री, (कटुः तीक्ष्णा मञ्जरी अस्ति अस्याः । अच् गौरादित्वात् ङीष् संज्ञायां कन् टाप् पूर्व्वह्रस्वश्च ।) अपामार्गः । इति राजनिर्घण्टः ॥

कटुमोदं, क्ली, (कटुरेव मोदः गन्धो यस्य तत् ।) जवादिनामसुगन्धिद्रव्यम् । इति राजनिर्घण्टः ॥

कटुरं, क्ली, (कटति मथ्यनेन रसान्तरं गुणान्तरं वा वर्षतीति । कट + उरन् । यद्वा कथ्यते प्रकथ्यते मथ्यनात् रसान्तरेण गुणान्तरेण च प्रकाश्यते इति ।) तक्रम् । इति जटाधरः ॥ कट्वरं इत्यपि पाठः ॥

कटुरवः, पुं, (कटुः कर्कशो रवः ध्वनिर्यस्य ।) मण्डूकः । इति राजनिर्घण्टः ॥

कटुरोहिणी, स्त्री, (कटुश्चासौ कट्वी चासौ वा रो-हिणी चेति । केचित्तु कटुः सती रोहतीति + रुह + णिनिः ततो ङीप् ।) कटुकी । इत्यमरः । २ । ४ । ४५ ॥

कटुवार्त्ताकी, स्त्री, (कटुः कट्वी वार्त्ताकी ।) श्वेत-कण्टकारी । इति राजनिर्घण्टः ॥

कटुवीजा, स्त्री, (कटु वीजं यस्याः ।) पिप्पली । इति राजनिर्घण्टः ॥

कटुशृङ्गाग्रं क्ली, (कटूनां शृङ्गाय प्राधान्याय अञ्चति पर्य्याप्नोतीति । अञ् + अच् ।) गौरसुवर्णग्रा-कम् । इति राजनिर्घण्टः ॥

कटुस्नेहः, पुं, (कटुः तीक्ष्णः स्नेहः रसविशेषो यस्य ।) सर्षपः । इति त्रिकाण्डशेषः ॥ गौरसर्षपः । इति राजनिर्घण्टः ॥

कटूत्कटं, क्ली, (कटुषु उत्कटम् ।) आर्द्रकम् । इति रत्नमाला ॥

कटूत्कटकं, क्ली, (कटुषु उत्कटम् । ततः संज्ञायां कन् ।) शुण्ठी । इति राजनिर्घण्टः ॥

कटोरं, क्ली, (कथ्यते दृश्यते निधिश्यते वा भक्ष्यद्रव्यं यत्र । कट + अधिकरणे ओलच् । रलयोरैक्यात् लस्य रत्वम् ।) पात्रविशेषः । कटोरा इति भाषा । यथा,—मेरुतन्त्रे पञ्चमप्रकाशः ॥ * ॥

"मत्कर्पटे संयुतकाचकूप्यां
दत्त्वा मुखं लोहपलोहसूत्रैः ।
निष्कासितो धूमरसस्तु तस्य
सौगन्धिकैः काचकटोरके यः" ॥

किञ्च ।

"रम्यान्नं देवकीदत्तं पात्रे काञ्चननिर्म्मिते ।
कटोराणां चतुःषष्टिः पात्रस्योभयतः स्थिता" ।

इति जैमिनिभारते आश्वमेधिके पर्व्वणि ६अध्यायः ॥

कटोरा, स्त्री, (कथ्यते दृश्यते दीयते स्थाप्यते वा भक्ष्यद्रव्यादिकमस्याम् । कट + ओलच् । लस्य रत्वम् ।) खनामख्यातपात्रम् । इति ब्रह्मवैवर्त्त-पुराणम् । वाटि इति भाषा ॥

कटोलः, पुं, (कटति सदाचारं मिथ्याद्यन्नरसञ्च आद-त्तोतीति । "कपिगतिगर्ग्गिकटिपटिभ्य ओलच्" । उणा १ । ६७ । इति ओलच् ।) चण्डालः । इत्युणादिकोषः ॥ कटुरसः । इति सिद्धान्तकौमु-द्यामुणादिवृत्तिः ॥

कटोलवीणा, स्त्री, (कटोलस्य चाण्डालस्य वीणा वाद्ययन्त्रविशेषः ।) वीणाविशेषः । इति शब्द-रत्नावली । केन्दुड़ा इति ख्याता ॥

कट्फलः, पुं, (कटति कटुतया अन्यरसमाहत्तोती-तीति । कट् + क्विप् । कट् फलं यस्य सः ।) खनाम ख्यातफलवृक्षविशेषः । कायफल इति भाषा । तत्पर्य्यायः । श्रीपर्णिका २ कुमुदिका ३ कुम्भी ४ कैटर्य्यः ५ । इत्यमरः २ । ४ । ४० ॥ सोमवल्कः ६ ६ सोमवृक्षः ७ रोहिणी ८ । इति रत्नमाला ॥ कृष्णगर्भः ९ प्रचेतसी १० भद्रावती ११ महा-कुम्भी १२ रामसेनकः १३ कुमुदा १४ उग्रगन्धः १५ भद्रा १६ रञ्जनकः १७ लघुकाम्रपर्य्यः १८ श्री-पर्णी १९ कायफलः २० परमः २१ कुमुदो २२ । इति शब्दरत्नावली ॥ अपि च ।

"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च ॥
कट्फलस्तुवरस्तिक्तः कटुर्व्वातकफज्वरान् ।
हन्ति श्वासप्रमेहार्शःकासकण्ठामयारुचीः" ॥

इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कासश्वासज्वरोग्रदाहनाशित्वम् । रुचि-कारित्वम् । मुखरोगघ्नम्लपदत्वञ्च । इति राजनि-र्घण्टः ॥ कफरोगनाशित्वम् । इति राजवल्लभः ॥ ("कट्फलः कफरोगघ्नः कासश्वासज्वरापहः" ॥ इति वैद्यकद्रव्यगुणाः ॥)

कट्फला, स्त्री, (कटति इति । कट् + क्विप् तदेव फल-मस्याः ।) गम्भारीवृक्षः । इति रत्नमाला ॥ बृ-हती । काकमाची । देवदाली । वार्त्ताकी । मृगे-र्व्वारुः । इति राजनिर्घण्टः ॥

कट्वङ्गः, पुं, (कटु अङ्गमस्य ।) श्योनाकवृक्षः । इत्य-मरः । २ । ४ । ५६ ॥ कटूनि उग्राणि वीर्य्यवह्निकानि अङ्गानि यस्य ।) दिलीपराजः । इति त्रिकाण्डशेषः ॥

कट्वरं, क्ली, (कटति वर्षति रसान्तरम् । "क्त्वर-च्छत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वर-कट्वरसंवदराः" उणा ३ । १ । इति कट् + वरच् । निपातनात् साधु ।) दधिसरः । इति रत्नमाला ॥ व्यञ्जनम् । इत्युणादिकोषः ॥

तक्रम् । यथा ।

"दध्नः ससारकस्याच्च तक्रं कट्वरमुच्यते" ।

इति चक्रपाणिदत्तसंग्रहे ॥

("सुवर्चिका-नागर-कुष्ठ-मूर्व्वा
लाक्षा-निशा-जोहितयष्टिकाभिः ।
तक्रं ज्वरे षड्गुणतक्रसिद्ध-
मभ्यङ्गनाच्छीतविदाहनुत् स्यात्" ॥

इति षट्कट्वरं तैलम् ॥)

कट्वी, स्त्री, (कथ्यते कटुरसतया स्वाद्यते अनुभूयते वा । कट् + उन् । ततः स्त्रियां ङीप् । वोतो-गुणवचनादिति ङीष् वा । पां । ४ । १ । ४४ ।) कटुका । लताविशेषः । तत्पर्य्यायः । कटुकवल्ली २ सकाण्डा ३ काण्डवल्लिका ४ सुवल्ली ५ महावल्ली ६ पशुमोहनिका ७ कटुः ८ ॥ अस्या गुणाः । मधु-रत्वम् । शीतत्वम् । कफश्वासनाशित्वरहारित्वम् । रुचिकारित्वम् । राजयक्ष्मनिवारणत्वञ्च । इति राजनिर्घण्टः ॥ (कटुकाशब्देऽस्या गुणादयो व्या-ख्याताः ॥)

कठ ङ कि आध्याने । उत्कण्ठापूर्व्वकस्मरणे इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भां-परं-सकं-सेट्-इदित् ।) ङ कर्म्मणि कण्ठ्यते । कि कण्ठयति । आध्यानं स्मृ म औत्के इत्यत्र व्याख्यातम् । इति दुर्गादासः ॥

कठ तङ्गने । तङ्गनं दुःखेन जीवनम् । इति कवि-कल्पद्रुमः ॥ (भां-परं-अकं-सेट् ।) कठति दीनः । इति दुर्गादासः ॥

कठ ङ ड आध्याने । इति कविकल्पद्रुमः ॥ (भां-आत्मं-सकं-सेट्-इदित् ।) ङ कर्म्मणि कण्ठ्यते । ड कर्त्तरि कण्ठते । "रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते" । इति दुर्गादासः ॥

कठः, पुं, (कठेन प्रोक्तमधीते यः । कठशाखां अभि-जानाति वा "कठचरकात् लुक्" । इति लुक् । ४ । ३ । १०७ ।) मुनिविशेषः । कठशाखाध्ययनकर्त्ता कठशाखाज्ञः । (यथा महाभारते । १ । पौलमे ८ । २४ ।

"उद्दालकः कठश्चैव श्वेतश्चैव मुनिप्रवरः" ॥

ऋग्भेदः । स्वरः ।

("कठो मुनौ तदाख्यातवेदाध्येऽप्यथोः स्वरे" ।)

इति हेमचन्द्रः ॥ ब्राह्मणः । इति त्रिकाण्डशेषः ॥ (उपनिषद्भिशेषः । यदुक्तं मुक्तिकोपनिषदि ।

"ईषा-क्षेत्र-कठ-प्रश्न-मुण्ड-माण्डव्य-तित्तिरि" ॥)

कठमर्दः, पुं, (कठं कण्ठजीवनं मर्दतीति। कठ मर्द्+अण्।) शिवः। इति चिकाण्डशेषः॥

कठरः, त्रि, (कठ+अरन्।) कठिनः। इति जटाधरः॥

कठशाखा, स्त्री, (यजुर्वेदान्तर्गता कठेन प्रोक्ता शाखा।) यजुर्व्वेदस्य शाखाविशेषः। एतद्विवरणं वेदशब्दे द्रष्टव्यम्॥

कठाहकः, पुं, (कठं कठिनमाहन्तीति। आ+हन्+डः। कठाहः तादृशं कं शिरो यस्य।) दात्यूहपक्षी। इति शब्दरत्नावली॥

कठिञ्जरः, पुं, (कठिं कठिनं जरयति। जॄष् वयोहानौ तस्मात् अण्। पृषोदरादित्वात् साधुः। यद्वा जॄ+क्विप्+वाऊलकात्+खच् मुम् च।) तुलसीवृक्षः। तत्पर्य्यायः। पर्णासः २ कुठेरकः ३। इत्यमरः। २। ४। ७९॥ ("कोशिका-जातुकपर्णिका-पत्तूर-जीवक-सुवर्चला-कुरुवक-कठिञ्जर-कुन्तिका-कुरण्टिकाप्रभृतीनि"॥ इति सुश्रुते द्रष्टव्यम्॥)

कठिनं, त्रि, (कठ्+इनन्। उणादिमते तु इनच्। "बहुलमन्यत्रापि"। उणां। २। ४। ९।) कठरम्। तत्पर्य्यायः। कर्कखटम् २ क्रूरम् ३ कठोरम् ४ निष्ठुरम् ५ दृढम् ६ जठरम् ७ मूर्त्तिमत् ८ मूर्त्तम् ९। इत्यमरः। ३। १। ७९॥ खर्कखटम् १० कठोलम् ११ जरठम् १२। इति तट्टीका। कर्करम् १३ कठरम् १४। इति जटाधरः॥ काठरम् १५ कमठायितम् १६। इति शब्दरत्नावली॥ स्तब्धम्। इति मेदिनी॥ ("उन्मूलयंश्च कठिनान् नृपान् वायुरिव द्रुमान्"। कथासरित्सागरे १९। ८९॥ तथा कुमारे ४। ५। "न विदीर्य्ये कठिनाः खलु स्त्रियः"॥ अपि च "भक्ष्यांश्चातिकठिनान् दन्तरोगी विवर्जयेत्"। सुश्रुते॥)

कठिनं, क्ली, स्त्री, (कठ्+"बहुलमन्यत्रापि"। उणां २। ४९। इति इनच्।) स्थाली। इति मेदिनीशब्दरत्नावल्यौ॥

कठिनष्ठकः, पुं, (कठिनं ष्ठकमस्य। ष्ठ स्वार्थे संज्ञायां वा कन्।) कच्छपः। इति राजनिर्घण्टः॥

कठिना, स्त्री, (कठ+इनच्। स्त्रियां टाप्।) गुडशर्करा। इति विश्वमेदिन्यौ॥

कठिनिका, स्त्री, (कठ+इनच्+गौरादित्वात् ङीष् स्वार्थे कन्। टापि ह्रस्वश्च।) कठिनी। इति हारावली। खड़ी इति भाषा॥

कठिनी, स्त्री, (कठिन+गौरादित्वात् ङीष्।) खड़िका। इति मेदिनी। खड़ी इति भाषा॥ तत्पर्य्यायः। पाकशुक्ला २ श्वेतिलाधातुः ३ कक्खटी ४ खटी ५ खड़ी ६ वर्णलेखिका ७। इति रत्नमाला। धातुपलः ८ कठिनिका ९। इति हारावली॥ (तथा च हितोपदेशे १। १८। "गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद् यस्य। तेनाम्बा यदि सुतिनी वद बन्ध्या कीदृशी नाम"॥)

कठिल्लः, पुं, (कठति भोजने दुःखं उद्वेगं वा जनयति। अतीवतिक्तत्वात् तथात्वं। कठ शोके इति धातोर्बाहुलकादिल्लप्रत्ययः।) कारवेल्लः। इत्युणादिकोषः। करला इति भाषा॥ (वाभटे शाकवर्गाणां मध्ये गणितम्॥ यथा,—

"कठिल्लं केम्बुकं प्रोक्तं स कोशातक कर्कशम्। तिक्तं पाके कटुग्राहि वातलं कफपित्तजित्"॥)

कठिल्लकः, पुं, (कठिल्ल+स्वार्थे कन्।) कारवेल्लः। पुनर्नवा। तुलसी। इति चिकाण्डशेषः॥

कठी, स्त्री, (कठेन प्रोक्तमधीते या शाखाध्येतवाचित्वेन जातित्वात् ङीष्। कठप्रोक्तमधीयाना इत्यर्थः।) ब्राह्मणी। इति जटाधरः॥

कठेरः, पुं, (कठति क्लेशेन जीवति जीविकां निर्व्वाहयति। "पतिकठिकुठिगडिगुडिदंशिभ्यरक्"। उणां। १। ५९ इति रक्।) क्लेशजीवी। दरिद्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कठोरः, त्रि, (कठति पारुष्यमाचरति। "कठिरकिभ्यामोरन्" उणां १। ६५। इतिकठ+ओरन्॥) कठिनः। इत्यमरः। ३। १। ७९॥ (यथा, भागवते ३। १९। १५।

"प्रहृष्टरोषः स कठोरसृष्टिना
नदन् प्रहृत्यान्तरधीयतासुरः"॥

दारुणः। तथाहि भागवते। ५। १३। ३। "कठोरदंशैर्मशकैरुपद्रुतः"॥ अतिविस्तृतः। तत्रैव ६। १२। २। "युगान्ताग्निकठोरजिह्वं"॥ पूर्णः। तथाहि।

"स तप्तकार्त्तस्वरभास्वराम्बरः
कठोरताराधिपलाञ्छनच्छविः"।

इति माघः। १। २०॥ "कठोरताराधिपस्य पूर्णेन्दोः" इति तट्टीकायां मल्लिनाथः॥)

कठोलः, त्रि, (कठ+ओलच् "कपिगतिगडिकटिपटिभ्य ओलच्" उणां। १। ६७।) कठोरः। इत्यमरटीकायां नीलकण्ठः॥

कड इ ड अ दर्पे। हर्षे इत्यर्थः। इति कविकल्पद्रुमटीकायां दुर्गादासः। (भ्वां-आत्मं-अकं-सेट्-पक्षे उभं-इदित्।) इ कर्म्मणि कण्डते। अ कण्डति कण्डते। ड कण्डते जनो हृष्टः स्यादित्यर्थः। अयमात्मनेपदीत्यन्ये। कदाचित् परस्मैपदार्थो अकारः। अनेकार्थत्वात् तुदादावयं च। (भ्वां-आत्मं-सकं।) "कण्डते तण्डुलं लोकः"। इति दुर्गादासः॥

कड प्र अदने। दर्पे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-दर्पे अकं-सेट्।) प्र कड़ती कड़न्ती। प्राच्यस्तु वेदे तूच्चारणभेदार्थं भ्वादावप्येवं पठन्ति। तथा च। "कड मद इति धातुः पठ्यते भूतुदादयोः कड़ति कड़ति रूपं तुल्यमेव द्वयोः स्यात्। तदुभयगणपाठे किं पदं नेति वाच्यं स्वरक्षत इह भेदः प्रपूर्व्वयोरस्ति यस्मात्" इति। स्वरक्षत इति उदात्तानुदात्तस्वरितविरिञ्चिसंज्ञकचतुर्व्विधस्वरक्षत इत्यर्थः। इति दुर्गादासः॥

कड इ क भेदे। रक्षणे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्-इदित्।) इ कण्डयति। इति दुर्गादासः॥

कड़ः, त्रि, (कड़ति माद्यतीति। कड़ मदे+पचाद्यच्।) मूर्खः। इति हलायुधः॥

कड़कं, क्ली, (कण्ड्यते अद्यते इति। कड अदने+अच् संज्ञायां कन्। कर्म्मणि अप् स्वार्थे संज्ञायां वा कन्।) लवणविशेषः। करकच इति भाषा॥ तत्पर्य्यायः। सामुद्रम् २ त्रिकूटम् ३। इति रत्नमाला॥ अस्य गुणाः सामुद्रशब्दे द्रष्टव्याः॥

कड़ङ्करः, पुं, (कड़ं मादकतारूक्षिं गमयति जनयति वा कड़ात् गमेर्डः। अन्तर्भूतो णिजन्तो वा।) सुराविशेषः। इत्युणादिकोषः॥

कड़ङ्करः, पुं, (कड़ात् भक्षणीयतण्डुलादेः सकाशात् क्षिप्यते क्षिप्यते दूरीक्रियते इति भावः। कड़+गिरतेः कर्म्मणि खच्। यद्वा कड़ं भक्षणीयं शूकादि गिरति उद्गिरति आत्मनः सकाशात्। गॄ+अच्।) वुषं इत्यमरः। २। ९। २२। आगड़ा इति भाषा॥

("नीवारपाकादि कड़ङ्करीयै-
रास्मद्यते जानपदैर्न कश्चित्"।

इति रघुः। ५। ९॥ कड़ङ्करं वुषम् अर्हन्तीति कड़ङ्करीया इति तट्टीकायां मल्लिनाथः॥)

कड़ञ्चं, क्ली, (गद्यते सिच्यतेऽत्र जलादिकम्। गड़+अचन् गड़ेरादेश्च कः।) पात्रविशेषः। इति उणादिकोषः॥ (गद्यते सिच्यतेऽनेन।गड़+सेचने "गड़ेरादेश्च कः" उणाम्।३।१०६। इति अचन् प्रत्ययः ङलयोरैकात्म्यस्मरणात् कलञ्चम्॥

कड़म्बः, पुं, (कड़+"ऋकदिकडिकटिभ्योऽम्बच्" उणाम्। ४। ८२। इति कड़धातोरम्बच् प्रत्ययः।) शाकनाड़िका। डाँटा इति भाषा॥ तत्पर्य्यायः। कलम्बः २। इत्यमरः। २। ९। ३५॥ कोशम्। प्रान्तभागः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (कलम्बशब्दे विशेषो ज्ञेयः॥)

कड़म्बी, स्त्री, (कड़म्बः कलम्बो भूयसा विद्यते अस्याः। इति अर्शआदित्वात् अच् ततः गौरादित्वात् ङीष्।) कलम्बीशाकम्। इति शब्दरत्नावली॥ (कलम्बीशब्दे गुणादयोऽस्या वक्तव्याः॥)

कड़ारः, पुं, (गड़ सेचने इति+"गड़ेः कड़ च"। उणाम्। ३। १३५। इति आरन् कड़ादेशश्च धातोः।) पिङ्गलवर्णः। तद्वर्णयुक्ते त्रि। इत्यमरः। २। ५। १६॥ (यथा माघः। ५। ३।

"सविद्युरम्बरविकाशि घमूसमुत्थं
पृथ्वीरजः करभकण्ठकड़ारमाभाः"॥)

कड़ारलुब्धवत् क्रियते इत्यन्ये इति भरतः॥ दासः। इति मेदिनी॥

कड़ितुलः, पुं, (कड्यां तुला तोलनं ग्रहणं यस्य पृषोदरादित्वात् टस्य डः।) खड्गः। इति शब्दरत्नावली॥

कडु कार्कश्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) टवर्गद्वतीयोपधः। क्विपि संयोगान्तलोपे कड्। कड्डति पद्मस्यानं कर्कशं स्यादित्यर्थः। इति दुर्गादासः॥

कण क्षुद्र आर्त्तस्वरे। इति कविकल्पद्रुमः॥ (भ्वां-

कषाटी

परं–अकं–सेट्।) भ्वा० अचीकषत्। अचकाषीत्। कषति भीतः। इति दुर्गादासः॥

कष, म गतौ। इति कविकल्पद्रुमः। (भ्वां–परं–सक्–सेट्–घटादि।) म कषयति। इति दुर्गादासः॥

कष, क निमीलने। इति कविकल्पद्रुमः॥ (चुरां–परं–सकं–सेट्।) निमीलनं पक्ष्मावरणम्। क काषयति चक्षुः पक्ष्मभिराहृतं स्यादित्यर्थः। इति दुर्गादासः॥

कषः, पुं, (कषति अतिसूक्ष्मत्वं गच्छति। कष + पचाद्यच्।) अतिसूक्ष्मः। ("आनन्दाश्रुकषान् पिबन्ति शकुना निःशङ्कमङ्केशयाः"। इति भ्रान्तिशतकम् ५॥) धान्याङ्गः। इत्यमरः। ३। १। ६२॥ (यथा, मनुः। ११। ६२।

"कषान् वा भक्षयेदब्दं पिन्याकं वा सकृन्निशि"॥) तस्य स्त्रीलिङ्गे कषी कषिका। वनजीरकः। इति राजनिर्घण्टः॥

कषगुग्गुलुः, पुं, (कषोऽस्यासौ गुग्गुलुश्चेति।) गुग्गुलुप्रभेदः। तत्पर्य्यायः। गन्धराजः २ सर्वकषः ३ सुवर्चः ४ कनकः ५ वंशप्रीतः ६ सुरभिः ७ पलङ्कषः ८॥ अस्य गुणाः। कटुत्वम्। उष्णत्वम्। सुगन्धित्वम्। वातश्लेष्मगुल्मोदराध्मानकफनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

कषजीरः, पुं, (कषोऽस्यासौ जीरश्चेति नित्यकर्म्मधारयः।) श्वेतजीरकः। इति राजनिर्घण्टः। (श्वेतजीरकशब्देऽस्य गुणा ज्ञेयाः॥)

कषजीरकं, क्ली, (कषं क्षुद्रं जीरकम्। कषजीरः + स्वार्थे कन्।) क्षुद्रजीरकम्। तत्पर्य्यायः। क्षुद्रगन्धि २ सुगन्धम् ३। इति रत्नमाला शब्दचन्द्रिका च॥

कषभक्षकः, पुं, (कषान् भक्षयति भक्षति वा। कष + भक्ष + ण्वुल्।) भारिटपक्षी। इति राजनिर्घण्टः॥

कषलाभः, पुं, (कषाणां लाभो यस्मात् सः। पेषणस्वाधनयन्त्रविशेषः स सादृश्येनास्यास्य। अर्शआदिभ्यः अच्।) आवर्त्तः। इति त्रिकाण्डशेषः। जलेर घूर्णा इति भाषा॥

कषा, स्त्री, (कष + स्त्रियां टाप्।) जीरकम्। कुम्भीरमल्लिका। पिप्पली। इति मेदिनी॥ ("द्राक्षां कषां पक्वमूलं दाडिमाख्यञ्च पञ्चेच्चले। तेन क्षीरं घृतं पीतं पिबेत् समधुशर्करम्"॥ इति पित्तकासचिकित्सायां वाग्भटेनोक्तम्।) श्वेतजीरकम्। इति राजनिर्घण्टः॥ ("कषा स्याद्दीर्घजीरकः"॥ इति भावप्रकाशः॥*॥) अल्पम्। यथा,—

"कदलीफलमध्यस्थं कषामात्रमपक्वकम्"। इति तिथ्यादितत्त्वम्॥

कषाटीनः, पुं, (कषाय घटतीति। कष + घट + ख्युन् दीर्घत्वञ्च एषोदरादित्वात्।) खञ्जनपक्षी। इति त्रिकाण्डशेषः॥

कषाटीरः, पुं, (कषाय घटति। कष + घट + ईरन्।) खञ्जनपक्षी। इति शब्दरत्नावली॥

कषटक

कषाटीरकः, पुं, (कषाटीर + स्वार्थे कन्।) खञ्जनपक्षी। इति शब्दरत्नावली॥

कषादः, पुं, (कषं अत्ति भक्षयति। कष अद + कर्म्मणि उपपदे अण्।) स्वनामख्यातमुनिविशेषः। तत्पर्य्यायः। काश्यपः २। इति त्रिकाण्डशेषः॥ स च वैशेषिकदर्शनकर्त्ता। स्वर्णकारः। कलादो रूपकारक इत्यमरोपरि कषाद इत्यपि पाठः। इति भारतसुन्दरी॥

कषिकः, पुं, (कषोऽव इति स्वार्थे कन् अत इत्वम्।) कषा। शुक्रुः। नीराजनविधिः। इति भारतसुन्दरी॥ शुष्कगोधूमचूर्णम्। इति राजनिर्घण्टः॥ (कषा विद्यतेऽस्य अस्त्यर्थे ठन्। स्वार्थे ठन् वा। "नाभेरभूत् सकषिकाद् वटवन्महाजं" इति भागवतम्। ७। ६। ३३॥ धृतराष्ट्रमन्त्रिविशेषः। यथा महाभारते। १। सम्भवपर्व्वणि १४१। २।

"तत आहूय मन्त्रज्ञं राजशास्त्रार्थवित्तमम्। कषिकं मन्त्रिणां श्रेष्ठं धृतराष्ट्रोऽब्रवीद्वचः"॥)

कषिका, स्त्री, (कषाः सन्त्यस्याः। "अत इनठनाविति ठन्" ५। २। ११५। कषति स्थूलरूपात् क्रमशो गच्छति अत्यन्तसूक्ष्मतां प्राप्नोति इत्यर्थः। पचाद्यच् स्वार्थे कन् अत इत्वं टाप् च।) अत्यन्तसूक्ष्मवस्तु। अभिमत्यश्चः। इति मेदिनी। कषा। तण्डुलविशेषः। इत्यमरटीकायां रायमुकुटः॥ (जलादीनां सूक्ष्मांशः। यथा, मेघदूते ६६।

"तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्"॥)

कषितं, क्ली, (कष आर्त्तनादे + भावे क्तः।) पीड़ितानां शब्दः। इति हेमचन्द्रः॥

कषिर्ण्य, क्ली, (कष्यो विद्यतेऽस्य इति इनिः तं श्यति। कषि + श्यो + कः। यद्वा कषिनः श्रेरतेऽस्मिन्। कषिन् + श्री + डः। कषाः सन्त्यस्य इत्यमरटीका छत्र।) शस्यमञ्जरी। इत्यमरः। २। ६। २१। धान्यादिर शिष इति भाषा॥

कषी, स्त्री, (कष + स्त्रियां ङीष् गौरादित्वात् ङीष् वा।) कषिका। इत्यमरटीकायां भरतः॥

कषीकं, त्रि, (कष + ईकन्।) अल्पम्। इत्युणादिकोषः॥

कषीयः, [स्] त्रि, (कष + ईयसुन्।) अत्यल्पम्। इत्यमरः॥ कनिष्ठम्। इति तट्टीका॥ (यथा हठयोगदीपिकायां १।१२। "कषीयसि भवेत् खेदः कम्पो भवति मध्यमे"॥)

कषेरः पुं, (कष + एरप्रत्ययः।) कर्षिकारवृक्षः। इत्युणादिकोषः॥

कषेरा, स्त्री, (कष + एरच् + टाप् च।) वेश्या। हस्तिनी। इत्युणादिकोषः॥

कषेरुः स्त्री, (कष + एरु।) वेश्या। करिणी। कर्षिकारवृक्षे पुं। इति मेदिनी॥

कषटकः, पुं, क्ली, (कषटति इति कटि ण्वुल्। अर्द्धर्चादिपां २। ४। ३१।) क्षुद्रशत्रुः। (यथा विष्णुपुराणे १। १६। ३१। "प्रह्लादः कथ्यतां सम्यक् तथा कषटकशोधने'॥) मत्स्याद्यस्थि। नैयायिकादिदोषोक्तिः। रोमाञ्चः। द्रुमाङ्कुरः। इति मेदिनी॥

कषटका

काँटा इति भाषा॥ (तथा चोक्तं चाणक्यशतके २२।

"उपकारग्रहीतेन शत्रुणा शत्रुमुद्धरेत्। पादलग्नं करस्थेन कषटकेनेव कषटकम्"॥) केन्द्रम्। इति दीपिका॥

कषटकः, पुं, (कटि + ण्वुल्।) सूच्यग्रम्। क्षुद्रशत्रुः। (यथा, मनुः। ६। २५२।

"सम्यङ्निविष्टदेशश्च कृतदुर्गश्च शास्त्रतः। कषटकोद्धरणे नित्यमातिष्ठेद्यत्नमुत्तमम्"॥) लोमहर्षः। इत्यमरः ३। ५। ३२॥ कर्म्मस्थानम्। दोषः। इति जटाधरः॥ मकरः। इति विश्वः॥ वेणुः। इति हेमचन्द्रः॥ (लोकोपद्रवकारी। यथा, भागवते। ३। १८। २३।

"अन्वेषन्नप्रतिरथो लोकानटति कषटकः"॥)

कषटकद्रुमः, पुं, (कषटकप्रधानो द्रुमः। कषटकैराचितो द्रुमो वा।) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥ (यथा मृच्छकटिके। १४०। ४।

"किं कुलेनोपदिष्टेन शीलमेवात्र कारणम्। भवन्ति नितरां क्षीताः सुवृत्तेषु कषटकद्रुमाः"॥

"दैतेयचन्दनवने जातोऽयं कषटकद्रुमः"। इति भागवतम्। ७। ५। १७॥ शाल्मलीशब्दे विशेषोऽस्य ज्ञेयः॥)

कषटकप्रावृता, स्त्री, (कषटकैः प्रावृता व्याप्ता। कषटक + प्र + वृ + आ + क + कर्म्मणि क्त + टाप्।) यष्टिकन्या। इति राजनिर्घण्टः। धृतकुमारी इति भाषा॥

कषटकफलः पुं, (कषटकैराचितं व्याप्तं फलं यस्य। शाकपार्थिवादिवत् मध्यपदलोपी समासः।) पनसवृक्षः। इत्यमरटीकायां भरतः॥ गोदुरवृक्षः। इति रत्नमाला॥ (अस्य गुणादयः कषटकफलशब्दे ज्ञेयाः॥)

कषटकबल्लाकी, स्त्री, (कषटकाचिता बल्लाकी। शाकपार्थिवादित्वात् मध्यपदलोपश्च।) वार्त्ताकी। इति राजनिर्घण्टः॥

कषटकश्रेणी, स्त्री, (कषटकानां श्रेणिर्यत्र। श्रेणी यस्यां वा।) कषटकारी। इति शब्दचन्द्रिका॥

कषटकागारः, पुं, (कषटका आगारो यस्य। यद्वा कषटकं आगिरति। या + गृ + अच्।) सरटजन्तुः। इति राजनिर्घण्टः॥

कषटकाह्वः, पुं, (कषटकैराह्वयः।) कुब्जकवृक्षः। इति राजनिर्घण्टः॥

कषटकारिका, स्त्री, (कषटकान् इयर्त्ति ऋच्छति वा कषटक + ऋ + कर्त्तरि + ण्वुल्। स्त्रियां टाप् इत्वं च। यद्वा कषटकं ऋच्छति + ऋ कर्म्मण्यण् ततः कन् च ततः प्राग्वत्। तत्फले तु अणि कृते हरीतक्यादित्वात् लुक्।) स्वनामख्यातक्षुद्रवृक्षः। तत्पर्य्यायः। निदिग्धिका २ स्पृग्वी ३ व्याघ्री ४ दहती ५ प्रचोदनी ६ कुली ७ क्षुद्रा ८ दुष्पर्शा ९ राष्ट्रिका १०। इत्यमरः॥ व्रणाक्रान्ता ११ भण्टाकी १२ सिंही १३ धावनिका १४। इति रत्नमाला॥ कषटकारी १५ कषटकिनी १६ दुष्पर्षिणी १७ निदिग्धा १८ धावनी १९ क्षुद्रकण्टिका २० बृहत्कण्टा २१ क्षुद्रफला २२ कषटा-

चिका २३ चित्रफला २४। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। श्वास-कास-प्रतिश्याय-दोष-कफ-वात-ज्वर-नाशित्वञ्च। इति राजनिर्घण्टः। दद्यानाशित्वम्। इति राजवल्लभः॥ तस्याः फलगुणाः। पित्तकफकण्डूकुष्ठकृमिनाशित्वम्। लघुत्वम्। उष्णत्वम्। कटुत्वम्। तिक्तत्वञ्च। इति राजनिर्घण्टराजवल्लभौ॥

("मुस्तान्तामलक्यञ्च नागरं कण्टकारिका। कषायचूर्णान्वितः क्षायस्तथा मधुसमन्वितः। एकाह्निकं वा वेलायां ज्वरजातं व्यपोहति"॥ इति हारीतः॥*॥ अस्या विशेषस्य कण्टकारीशब्दे ज्ञातव्यः॥)

कण्टकारी, स्त्री, (कण्टकं ऋच्छति। कण्टक + ऋ + अण् + ङीप् वा।) कण्टकारिकावृक्षः। इति राजनिर्घण्टः॥ शाल्मलीवृक्षः। इति जटाधरः॥ विकङ्कतवृक्षः। इति शब्दरत्नावली वँइचि इति भाषा॥ तत्पर्य्यायगुणाः।

"कण्टकारी तु दुष्पर्शा क्षुद्रा व्याघ्री निदिग्धिका। कण्टालिका कण्टकिनी धावनी वृहती तथा"॥ उभे च वृहत्यौ। यदाह शाश्वतः॥

"क्षुद्रायां क्षुद्रमूलायां वृहतीति निगद्यते। श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षीरदूतिका॥ गर्भदा चन्द्रभा चन्द्रा चन्द्रपुष्पा प्रियङ्करी। कण्टकारी स्मरा तिक्ता कटुका दीपनी लघुः॥ रूक्षोष्णा पाचनी कासश्वासज्वरकफापहा। निहन्ति पीनसं पार्श्वपीडाहृल्लिङ्गदामयान्॥ तयोः फलं कटुरसे पाके च कटुकं भवेत्। मुखस्य रेचनं भेदि तिक्तं पित्तास्रदाहघ्नं॥ हन्यात् कफमरुत्कण्डूकाग्निमेदःक्रिमिज्वरान्। तद्वत् प्रोक्ता सिता क्षुद्रा विशेषाद्गर्भकारिणी"॥ इति भावप्रकाशः॥ (शब्दार्थचिन्तामणिधृत-वैद्यकम्। यथा

"कण्टकारी कण्टकिनी तथा स्वादुश्च मुक्तया। चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत्। दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारजित्"॥ "कण्टकार्य्यम्लतामार्गी नागरेन्द्रयवासकम्। भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणी॥ कषायं पाययेदेतत् पित्तश्लेष्मज्वरापहम्। दाहहृल्लासरुचिच्छर्दिकासहृत् पार्श्वशूलनुत्"॥ इति वैद्यकचक्रपाणिसंग्रहः॥

"कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकम्। पादशेषं गृहीत्वा च तस्मिंश्चूर्णानि दापयेत्॥ एषक् पलांशान्येतानि गुडूचीधन्वयवचित्रकाः। मुस्तं कर्कटशृङ्गी च व्योषं धन्वयासकम्॥ भार्गी रास्ना यष्टीचैव शर्करा पलविंशतिः। प्रत्येकञ्च पलान्यष्टौ प्रदद्यात् घृततैलयोः॥ पक्त्वा लेहत्वमानीय घृते मधुपलाष्टकम्। चतुष्पलं तु गाङ्गेर्याः पिप्पलीनां चतुष्पलम्॥ क्षिप्त्वा निदध्यात् सुदृढे मृण्मये भाजने शुभे। लेहोऽयं हन्ति हिक्कार्त्तिश्वासकासानजेयतः"॥ कण्टकार्य्यवलेहः॥*॥ इति च शार्ङ्गधरः॥)

कण्टकालुः, पुं, (कण्टकैः कण्टकाकीर्णैः फलैः अलति

शोभते। कण्टक + अल् + अच्। कण्टं कण्डकाकारं फलं कालयति वा। कल् + अण्।) पनसवृक्षः। इति शब्दचन्द्रिका॥

कण्टकालुकः, पुं, (कण्टकैरलति पर्य्याप्नोति कण्टंकालयति वा कण्टक + अल् + उकञ्।) यवासवृक्षः। इति राजनिर्घण्टः॥ (यवास-शब्देऽस्य गुणादयो बोद्धव्याः॥)

कण्डकाशनः, पुं, (कण्टकं अश्नातीति। कण्टक + अश् भोजने + कर्त्तरि + ल्युः।) उष्ट्रः। इति चिकाण्डशेषः॥

कण्टकाष्ठीलः, पुं, (कण्टकः अष्ठीलेव यस्य।) मत्स्यविशेषः। तत्पर्य्यायः। कुलिशम् २। इति चिकाण्डशेषः॥

कण्डकिनी, स्त्री, (कण्डकाः सन्त्यस्याः। इनिः। ईप् च।) वार्त्ताकी। प्रोयाभिधाने। मधुखर्ज्जुरी। इति राजनिर्घण्टः॥

कण्टकिफलः, पुं, (कण्टकि कण्टकयुक्तं फलं यस्य।) वृक्षविशेषः। काँटाल इति भाषा। तत्पर्य्यायः। पनसः २। इत्यमरः। २। ४। ६१॥ पलसः ३ कण्टकीफलः ४ कण्टकफलः ५। इति तट्टीकायां भरतः॥ महासर्जः ६ फलिनः ७ फलवृक्षकः ८ स्थूलः ९ कण्टाफलः १० मूलफलदः ११ अपुष्पफलदः १२ पूतफलः १३ चम्पकोषः १४ चम्पालुः १५ रसालः १६ मदङ्गफलः १७ पानसः १८। इति शब्दरत्नावली॥ अस्य गुणाः कण्टाफलशब्दे पनसशब्दे च द्रष्टव्याः॥ समस्थिफलवृक्षः। इति राजनिर्घण्टः॥

कण्टकिलः, पुं, (कण्टकोऽस्यास्य। कण्टक + अस्यर्थे इलच्।) वंशविशेषः। इति शब्दचन्द्रिका। वेड़ुवाँश इति भाषा॥

कण्टकिलता, स्त्री, (कण्टकिनी चासौ लता चेति।) चणुवी। इति राजनिर्घण्टः। घुसा इति भाषा॥ (चणुवीशब्दे विशेषोऽस्या द्रष्टव्यः॥)

कण्टकी, [न्] पुं, (कण्टकोऽस्यास्य अस्त्यर्थे इनिः।) मत्स्यः। इति शब्दरत्नावली॥ खदिरवृक्षः। इति शब्दमाला॥ मदनवृक्षः। इति रत्नमाला॥ गोक्षुरवृक्षः। वंशः। वदरवृक्षः। इति राजनिर्घण्टः॥ (यथा, महाभारते १। शाकुन्तले ७०।७।

"नापुष्पः पादपः कश्चिन्नाफलो नापि कण्टकी"॥)

कण्टकी, स्त्री, (कण्टक + अर्श आदित्वात् अच् गौरादित्वात् ङीष्।) वार्त्ताकीविशेषः। काँटा वेगुन इति भाषा। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। रक्तपित्तप्रकोपणत्वम्। कण्डूकच्छुहरत्वम्। दोषघ्नत्वञ्च। इति राजवल्लभः॥

कण्टकीद्रुमः, पुं, (कण्टकी द्रुमः। एषोदरादित्वात् दीर्घः।) खदिरवृक्षः। इति रत्नमाला॥ (खदिरशब्दे विशेषो वक्तव्यः॥ कण्डकी एव द्रुमः। वार्त्ताकीवृक्षः॥)

कण्टकीफलः, पुं, (कण्टकि कण्टकाचितं फलमस्य। एषोदरात् साधुः।) कण्टकिफलः। इत्यमरटीकायां भरतः॥ काँटाल इति भाषा॥

कण्टकुरण्टः, पुं, (कण्टः कण्टकप्रधानः कुरण्टः।)

झिण्टी। इति राजनिर्घण्टः॥ (झिण्टीशब्दे ऽस्य विशेषो ज्ञेयः॥)

कण्टतनुः, स्त्री, (कण्टा कण्टकान्विता तनुर्यस्याः।) वृहती इति राजनिर्घण्टः॥ (एषा हि तिक्त-कटुका। इति वैद्यकद्रव्यगुणाः॥)

कण्टदला, स्त्री, (कण्टं कण्टकाचितं दलं यस्याः। प्राकृपार्थिवादित्वात् मध्यपदलोपः।) केतकी। इति राजनिर्घण्टः॥

कण्टपत्रः, पुं, (कण्टं कण्टकान्वितं पत्रं यस्य।) विकङ्कतवृक्षः। इति शब्दमाला। वँइचि इति भाषा॥

कण्टपत्रफला, स्त्री, (कण्टं कण्टकान्वितं पत्रं फलञ्च यस्याः। कण्डकान्विते पत्रफलेऽस्य वा।) ब्रह्मदण्डीवृक्षः। इति राजनिर्घण्टः॥

कण्टपादः, पुं, (कण्टः कण्टकान्वितः पादो मूलं यस्य।) विकङ्कतवृक्षः। इति राजनिर्घण्टः॥

कण्टफलः, पुं, (कण्टं कण्टकान्वितं फलं यस्य।) क्षुद्रगोक्षुरः। पनसः। धुस्तूरः। लताकरञ्जः। इति राजनिर्घण्टः॥ तेजःफलः। एरण्डः। इति केचित्॥

कण्टफला, स्त्री, (कण्टं कण्टकाकीर्णं फलं यस्याः।) देवदालीलता। इति राजनिर्घण्टः॥ (देवदालीशब्दे ऽस्या गुणादयो ज्ञेयाः॥)

कण्टलः, पुं, (कण्टः अस्यास्य। मत्वर्थे अलच्। यद्वा कण्टेन कण्टकेन अलति पर्य्याप्नोति शोभते वा। कण्ट + अल् + अच्। प्रकन्ध्वादिवत् अस्य लोपः।) वृक्षविशेषः। बाबला इति भाषा। तत्पर्य्यायः। बाबलः २ स्वर्णपुष्पः ३ सुपत्रः ४। इति शब्दचन्द्रिका॥

कण्टवल्ली, स्त्री, (कण्टा कण्टकान्विता वल्ली।) श्रीवल्लीवृक्षः। इति राजनिर्घण्टः॥

कण्टवृक्षः, पुं, (कण्टप्रधानः कण्टकमयः कण्टकवल्लो वा वृक्षः। मध्यपदलोपी।) तेजःफलवृक्षः। इति राजनिर्घण्टः॥

कण्टाफलः, पुं, (कटि + भावे + अप्। कण्टा कण्टकमयवेष्टनं तदुपलक्षितं फलमस्य।) पनसवृक्षः। इति शब्दमाला। काँटाल इति भाषा॥ अस्य पक्वफलगुणाः। सुमधुरत्वम्। रक्तवर्द्धकत्वम्। स्निग्धत्वम्। प्रीतलत्वम्। दुर्ज्जरत्वम्। वायुपित्तनाशित्वम्। श्लेष्मशुक्रबलप्रदत्वञ्च। इति राजवल्लभः॥ पिच्छिलत्वम्। गुरुत्वम्। हृद्यत्वम्। भ्रमदाहविशोषनाशित्वम्। रुचिकारित्वम्। ग्राहित्वञ्च। इति राजनिर्घण्टः॥*॥ तद्बीजगुणाः। रक्तपित्तनाशित्वम्। स्वादुत्वम्। पक्वतुल्यगुणत्वञ्च। इति राजवल्लभः॥ ईषत् कषायत्वम्। मधुरत्वम्। रुचिवायुवृद्धिकारित्वम्। गुरुत्वम्। त्रिदोषतत्फलविकारनाशित्वञ्च। इति राजनिर्घण्टः॥*॥ तस्यापक्वस्य गुणाः। कषायत्वम्। स्वादुत्वम्। वायुकारित्वम्। इति राजवल्लभः॥ प्रीतलत्वञ्च॥०॥ घृतयुक्तस्य तस्य गुणाः॥ स्निग्धत्वम्। हृद्यत्वम्। बलप्रदत्वम्। क्रिमिनाशित्वम्। अचक्षुष्यत्वम्। शुक्रकारित्वम्। वातपित्तनाशित्वञ्च॥ तन्मज्जगुणाः। शुक्रकारित्वम्। वातपित्तकफनाशित्वम् च॥ विशेषात् पनसं वर्ज्यं

गुल्मिभिर्मन्दवह्निभिः ॥ इति राजनिर्घण्टः ॥ (अन्यत्सर्व्वं पनसशब्दे द्रष्टव्यम् ॥)

कण्टार्त्तगला, स्त्री, (कण्टा कण्टयुक्ता आर्त्तगला ॥ आर्त्तः क्षीणः गलदेशो यस्याः ।) नीलझिण्टी । इति राजनिर्घण्टः । (नीलझिण्टीशब्देऽस्य गुणादयो ज्ञेयाः ॥)

कण्टालुः, पुं, (कण्टाय कण्टकाय अलति पर्य्याप्नोति । कण्ड + अल् + उन् ।) वंशः । दहती । वार्त्ताकी । वर्व्वूरः । इति राजनिर्घण्टः ॥

कण्टाक्षयं, क्ली, (कण्टं कण्टकमाक्षयते स्पर्द्धते । कण्ट + आ + क्षे + कः ।) पद्मकन्दः । इति राजनिर्घण्टः ॥

कण्टी, [न्] पुं, (कण्टः कण्टकः अस्यास्य । अस्यर्थे इनिः ।) कषायः । अपामार्गः । खदिरः । गोक्षुरः । इति राजनिर्घण्टः ॥

कण्ठः, पुं, (कठि + अच् + इदित्वात् नुम् ।) मदनवृक्षः । इति मेदिनी ॥ होमकुण्डाद्दक्षिरङ्गुलिपरिमितस्थानम् । यथा,—

"खाताद्दक्षोऽङ्गुलः कण्ठः सर्व्वकुण्डेष्वयं विधिः" ॥

इति तिथ्यादितत्त्वम् ॥ (कण्ठशब्द "कण्ठेष्ठः" । इति ठः । उणां १ । १०५ ।)

ग्रीवापुरोभागः ॥ तत्पर्य्यायः ।

गलः २ । इत्यमरः । २ । ६ । ८८ ॥

(यथा, शाकुन्तले । १म अङ्के ।

"विकचसरसिजायाः स्तोकनिर्मुक्तकण्ठं
निजमिवकमलिन्याः कर्कशं वन्तजालम्" ॥)

अत्र विशुद्धनामषोड़शदलपद्ममस्ति । यथा,—

"तदूर्द्धन्तु विशुद्धाख्यं दलषोड़शपङ्कजम् ।
स्वरैः षोड़शभिर्युक्तं धूमवर्णैर्महाप्रभम् ॥
विशुद्धपद्ममाख्यातमाकाशाख्यं महाद्भुतम्" ॥

इति गौतमतन्त्रम् ॥ निकटः । ध्वनिः । इति मेदिनी ॥

कण्ठकूणिका, स्त्री, (कण्ठ इव कण्ठध्वनिरिव कूणयतीति । कण्ठ + कूण् + ण्वुल् । टापि अत इत्वं च वीणायाः कण्ठतुल्यस्वरध्वनिरितिप्रसिद्धेः ।) वीणा । इति हेमचन्द्रः ॥

कण्ठतलासिका, स्त्री, (कण्ठतले अश्वानां कण्ठदेशे आस्ते इति । कण्ठ + आस + ण्वुल् + टापि अत इत्वं च ।) अश्वग्रीवावेष्टकरज्जुचर्म्मादि । इति शब्दमाला ॥

कण्ठनीड़कः, पुं, (कण्ठे निकटस्थे नीड़े शकुन् दृष्ट्वा कायति शब्दायते । कण्ठ + कै + कः । यद्वा कण्ठे प्रासादशृङ्गादीनां शिरोभागे नीड़ं यस्य + कप् ।) चिल्लपक्षी । इति त्रिकाण्डशेषः । चिल् इति भाषा ॥

कण्ठनीलकः, पुं, (कण्ठं धारकस्य कण्ठादिकमूर्द्धस्थानं नीलयति स्वशिखाकज्जलेन नीलवर्णं करोतीति । कण्ठ + नील् + णिच् + ण्वुल् । अथवा कण्ठे शिखाग्रभागे नीलवर्णोऽस्य कप् ।) उल्का । इति शब्दमाला । मसाल इति भाषा ॥

कण्ठप्राशकः, पुं, (कण्ठे प्राश इव कायति प्रकाशते । कण्ठप्राश + कै + कः ।) हस्तिगलवेष्टकरज्जुः । इति शब्दमाला ॥

कण्ठभूषा, स्त्री, (भूष्यतेऽनया इति भूषा । कण्ठस्य भूषा ।) ग्रीवालङ्कारः । तत्पर्य्यायः । ग्रैवेयकम् २ । इत्यमरः । २ । ६ । १०४ ॥ ग्रैवेयम् ३ ग्रैवम् ४ । इति शब्दरत्नावली ॥ रुचकः ५ निष्कम् ६ । इति जटाधरः ॥

कण्ठमणिः, पुं, (कण्ठे कण्ठस्थले धारणीयो मणिः । कण्ठस्य मणिर्वा ।) गलदेशधारणीयमणिः । तत्पर्य्यायः । काकलम् २ । इति त्रिकाण्डशेषः ॥

कण्ठ्यः, त्रि, (कण्ठे + भवः । शरीरावयवत्वात् यत् । ६ । १ । २१३ ।) कण्ठोद्भवशब्दादिः । इति व्याकरणम् ॥ "अकुहविसर्ज्जनीयानां कण्ठ्यः" । पां । १ । १ । ९ वार्त्तिके ॥)

कण्ठाग्निः, पुं, (कण्ठे कण्ठाभ्यन्तरे अग्निः पाचनरूपाग्निर्यस्य ।) पक्षी । इति त्रिकाण्डशेषः ॥

कण्ठाजः, पुं, (कठि + आलच् ।) शूरणः । युद्धम् । नौका । खनित्रम् । इति विश्वः ॥ क्रमेलकः । गोणीप्रभेदः । इति मेदिनी ॥

कण्ठाला, स्त्री, (कटि + आलच् + टाप् ।) जालगोणीका । इति त्रिकाण्डशेषो मेदिनी च ॥

कण्ठिका, स्त्री, (कण्ठो भृत्यतयास्त्यस्याः । कण्ठ + ठन् टाप् च । यद्वा कण्ठयति कण्ठं भूषयति या । कठि + णिच् + ण्वुल् + टाप् अत इत्वञ्च ।) कण्ठाभरणम् । इति हेमचन्द्रः ॥ एकनरी कण्ठी इति भाषा ॥

कण्ठी, स्त्री, (कण्ठ + अल्पार्थे ङीप् ।) अश्व कण्ठवेष्टनरज्जुचर्म्मादि । इति शब्दमाला ॥ गलः । इत्यमरटीकायां भरतः ॥

कण्ठीरवः, पुं, (कण्ठ्यां रवो यस्य ।) सिंहः । इति त्रिकाण्डशेषः ॥ पारावतः । इति राजनिर्घण्टः ॥ मत्तहस्ती । इति सारस्वतः ॥

कण्ठीरवी, स्त्री, (कण्ठीरव + गौरादित्वात् ङीषि वा ङीष् ।) वासककक्षः । इति राजनिर्घण्टः ॥

कण्ठेकालः, पुं, (कण्ठे + कालः क्षीरोदमथनोद्भवविषपाननिदर्शनरूपनीलवर्णो यस्य । सप्तम्या अलुक् ।) महादेवः । इति त्रिकाण्डशेषः ॥ (कण्ठे जीवानां कण्ठदेशं कालः कालस्वरूपेण वर्त्तते । यद्वा कण्ठदेशपर्य्यन्तं आक्रम्य तमःप्रधाना माया अस्त्यस्य । परमात्मनः मायाश्रवलितचिपादत्वात् तथात्वम् । एष सर्व्वज्ञः सर्व्वान्तर्यामीश्वरः । एतस्मात् पादत्रयादन्यत् तुरीयं निष्कलं निरुपाधिकं शिवपादमस्ति ।

यथा, माण्डुक्योपनिषदि ।

"सर्व्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्" ॥ २ ॥

"जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुक् वैश्वानरः प्रथमः पादः" ॥ ३ ॥

"स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः" ॥ ४ ॥

"यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः" ॥ ५ ॥

"एष सर्व्वेश्वरः एष सर्व्वज्ञ एषोऽन्तर्याम्येष योनिः सर्व्वस्य प्रभावाप्ययौ हि भूतानाम्" ॥ ६ ॥

"नान्तः प्रज्ञं न बहिःप्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्राज्ञमदृष्टमव्यवहार्य्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थमन्यन्ते स आत्मा स विज्ञेयः" ॥ ७ ॥)

कण्डनं, क्ली, (कडि + भावे ल्युट् ।) उदूखलादिना तण्डुलादेर्निर्म्मलीकरणं । इति हेमचन्द्रः । काँड़ान इति भाषा ॥

कण्डनी, स्त्री, (कण्ड्यते तुषादिरपनीयतेऽनया । कडि + करणे ल्युट् । ङीप्च ।) उदूखलम् । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ३ । ६८ ।

"पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करम् ।
कण्डनीचोदकुम्भश्च बध्यते यास्तुवाहयन्" ॥)

कण्डरा, स्त्री, (कडि + अरन् टापच् ।) महास्नायुः । महानाड़ी । इति हेमचन्द्रः ॥

("महत्यः स्नायवः प्रोक्ताः कण्डरास्तासु षोड़श ।
प्रसारणाकुञ्चनयोर्दृष्टं तासां प्रयोजनम् ॥
चतस्रो हस्तयोस्तासां तावत्यः पादयोः स्मृताः ।
ग्रीवायामपि तावत्यस्तावत्यः पृष्ठसङ्गताः" ॥

"तत्र पादहस्तगतानां कण्डराणां नखाः प्ररोहाः ग्रीवानिबन्धनानामधोभागगतानां प्ररोहा मेढ्रपृष्ठनिबन्धनां प्ररोहो नितम्बमूर्द्धोरुवङ्क्षोऽन्त्रनपिण्डाः" ॥ इति भावप्रकाशः ॥

"तलं प्रत्यङ्गुलीनां याः कण्डरा बाहुपृष्ठतः ।
बाह्वोः कर्म्मक्षयकरी विश्वक्षेति हि सोच्यते" ॥
इति च सुश्रुतः ॥)

कण्डुः, स्त्री, (कण्डते शरीरं माद्यति अस्मात् उष्णशोणितत्वात् । यद्वा कण्डयति कण्डयुक्तं करोति शरीरम् । कडि + मदे । "मृगय्वादयश्च" । उणां १ । ३८ । इति कुः ।) कण्डूः । इति रायमुकुटः ॥ (ऐं ऋषिविशेषः ।

(यथा, विष्णुपुराणे १ । १५ । ११ ।

"कण्डुर्नाम मुनिः पूर्व्वमासीद् वेदविदां वरः ।
सरय्वे गोमतीतीरे स तेपे परमं तपः" ॥

तद्विवरणं तत्रैव १मांशे १५ अध्याये द्रष्टव्यम् ।)

कण्डुरः, पुं, (कण्डूं राति ददातीति । "आतोनुपसर्गे कः" । ३ । २ । ३ । एषोदरादित्वात् क्रस्वः ।) कारवेल्ललता । कुन्दरलगम् । इति राजनिर्घण्टः ॥

कण्डुरा, स्त्री, कण्डूं राति । कण्डू + रा + कः । क्रस्वः । ततष्टाप् ।) कपिकच्छूः । अत्यङ्गपर्णी । इति राजनिर्घण्टः ॥ (शूकशिम्बीशब्दे विशेषोऽस्य वक्तव्यः ॥

कण्डूः, स्त्री (कण्डूय + सम्प्रदादित्वात् क्विप् यलोपः यलोपौ ।) रोगविशेषः । चुल्कनि खोस् इत्यादि भाषा । (यथा, भागवते । २ । ७ । १३ ।

"षष्ठेन कच्छपवपुर्विदधार गोत्रं
निद्राक्षणोऽद्रिपरिवर्त्त कषाण कण्डूः" ॥)

तत्पर्य्यायः । खर्জ्जुः २ कण्डूया ३ । इत्यमरः । २ । ६ । ५३ ॥ कण्डूति ४ । इति तट्टीका ॥ कण्टूय नम् ५ । इति राजनिर्घण्टः ॥

तच्चिकित्सा यथा,—

कण्डोल

"दूर्व्वानिशायतो लेपः कण्डूघ्नविनाशनः।
क्षमिदद्रुहरश्चैव शीतपित्तापहः स्मृतः ॥१॥
हरिद्रायाः पलान्यष्टौ षट्पलं हविषस्तथा।
क्षीराढ़केन संयुक्तं खण्डस्यार्द्धशतं तथा ॥
पचेन्मृदग्निना वैद्यो भाजने मृण्मये दृढ़े।
त्रिकटुत्रिजातकश्चैव क्षमिघ्नं त्रिफला तथा ॥
त्रिफला केशरं मुस्तं लौहं प्रति पलं पलम्।
संचूर्ण्य प्रक्षिपेत्तत्र कर्षमेकन्तु भक्षयेत् ॥
कण्डूविष्फोटदद्रूणां नाशनं परमौषधम्।
प्रतप्तकाक्षनाभासो देहो भवति नान्यथा ॥
शीतपित्तोदर्दकोठान् सप्ताहादेव नाशयेत्।
हरिद्रानामतः खण्डः कण्डूनां परमौषधम्"॥
इति हरिद्राखण्डः ॥ २ ॥
"अमृतरुषपटोलं मुस्तकं सप्तपर्ण
खदिरमसितवेत्रं निम्बपत्रं हरिद्रे।
विविधविषविसर्पान् कुष्ठविष्फोटकण्डू
रपनयति मसूरीं शीतपित्तं ज्वरञ्च" ॥
इति अमृतादि ॥ ३ ॥ इति भैषज्यरत्नावली।
("द्विधा ते कोठपिड़का कण्डू गण्डान् प्रकुर्व्वते"।
इति वाभटः ॥ * ॥ "चन्दननलदछतमालनक्त-
मालनिम्बकुटजसर्षपमधूकदारुहरिद्रामुस्तानीति
दशेमानि कण्डूघ्नानि भवन्ति"॥ इति चरकः॥)

कण्डूकरी, स्त्री, (कण्डूं करोति इति। कण्डू + कृ + टः। स्त्रियां ङीप्।) शूकशिम्बीवृक्षः। इति शब्द चन्द्रिका॥

कण्डूघ्नः, पुं, (कण्डूं हन्ति। कण्डू + हन् + टक्।) आरग्वधः। गौरसर्षपः। इति राजनिर्घण्टः॥

कण्डूतिः, स्त्री, (कण्डूय + भावे क्तिन्। अयोपधत्वात् नेत्वं।) कण्डूः। इति भरतश्चक्रपाणी॥ चुलकनि इति भाषा॥("राज्ञां वघ्नटदेव्याः स निर्दयैः सुरतोत्सोत्वैः। खण्डयामासकण्डूतिम् शाण्यस्यार्थेबलां धनैः"॥ इति राजतरङ्गिण्याम्। ५। २८६॥)

कण्डूयनं, क्ली, (कण्डूय + भावे ल्युट्।) कण्डूः। इति हलायुधः॥ (यथा, भागवते। ७। ६। ३५।
"यन्मैथुनादि गृहमेधिसुखं हि तुच्छं
कण्डूयनेन करयोरिव दुःखदुःखम्" ॥)

कण्डूया, स्त्री, (कण्डू + "कण्ड्वादिभ्योयक्" ३। १। २७। अप्रत्ययात् स्त्रित्वात् टाप् च।) कण्डूः। इत्यमरः। २। ६। ५३॥

कण्डूरा, स्त्री, (कण्डूं राति। कण्डू + रा + कः। टाप्।) रक्तविशेषः। आमकुष्ठी इति भाषा। तत्पर्य्यायः। आमगुप्ता २ जटा ३ अव्यथा ४ प्राक्षयायणी ५ कृष्यपोल्का ६ शूकशिम्बिः ७ कपिकच्छूः ८ मर्कटी ९। इत्यमरः। २। ४। ६॥ अजटा १० अव्यथा ११ कण्डूरा १२ शूकशिम्बी १३ शूकशिम्बा १४ कपिकच्छूः १५। इति तट्टीका॥ ऋषभः १६ खगुप्ता १७। इति रत्नकोषः॥

कण्डूलः पुं, (कण्डू + अस्यर्थे + लच्। कण्डूतिकारकत्वात् तथात्वम्।) शूरणः। इति राजनिर्घण्टः॥ कण्डूयुक्ते त्रि॥

कण्डोलः, पुं, (कण्डि + बाहुलकात् ओलच्।) नलवंशादिरचितधान्यादिस्थापनपात्रम्। ङीप् इति भाषा। तत्पर्य्यायः। पिटः २। इत्यमरः। २। ९। २६॥ पिटकः ३ पेटकः ४। इति भरतः॥ उड़्डः। इत्युणादिकोषः॥

कण्डोलकः, पुं, (कण्डि + बाहुलकादोलच्। स्वार्थे कन्।) कण्डोलः। इति हेमचन्द्रः॥

कण्डोलवीणा, स्त्री (कण्डोल इव वीणा। कण्डोलस्य वीणा वा।) चण्डालवीणा। कँड़ड़ा इति ख्याता। तत्पर्य्यायः। चाण्डालिका २ चण्डालवल्लकी ३। इत्यमरः। २। १०। ३२॥ चण्डालिका ४ कटोलवीणा ५। इति भरतः॥

कण्डोली, स्त्री, (कण्डोलस्तदाकारोऽस्त्यस्याः। अर्श आदित्वात् अच् + गौरादित्वात् ङीष्।) कण्डोलवीणा। इतिशब्दरत्नावली॥

कण्डूषोघः, पुं, (कण्डूनामोघः संघोयस्मात् शूककीटस्तस्मै कण्डूयऊजत्वमिति प्रसिद्धेस्तथात्वम्।) शूककीटः। इति शब्दचन्द्रिका॥ शूयापोका इति भाषा॥

कण्वं, क्ली, (कण्व्यते अपोह्यते इति। कण्व् + क्वन्।) पापम्। इति मेदिनी॥

कण्वः, पुं, (कण्व् + क्वन्।) मुनिविशेषः। इति मेदिनी। स तु पुरुवंशजाताप्रतिरथनामक्षत्रियपुत्रः। यथा,—
"सुमतिर्भ्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः।
तस्य मेधातिथिस्तस्मात् प्रस्कण्वाद्या द्विजातयः"॥
इति श्रीभागवते। ९। २०। ६॥ (अपर ऋषिभेदः। अनेनैव मुनिशार्दूलेन यजुर्व्वेदीयकाण्वशाखा प्रणीता। यथा, यजुर्व्वेदे १७। ७४।
"धामस्य कण्वोऽदुहत् प्रयोनां
सहस्रधारां पयसा महीं गाम्"।
तथा, भागवते च १२। ६। ७४।
"यजुर्भिरकरोच्छाखा दशपञ्चचतुर्विभुः।
जगृहुर्वाजसन्नास्ताः काण्वमाध्यन्दिनादयः"॥
अयन्तु काश्यपवंशोद्भवः शकुन्तलायाः प्रतिपालकपिता। यथा, महाभारते १। शाकुन्तले। ७०। ३०।
"महर्षिं काश्यपं द्रष्टुमथ कण्वं तपोधनम्"।
एतस्य सविस्तरन्तु तत्रैव ७१ अध्याये द्रष्टव्यम्। अयमेव गोत्रप्रवर्त्तकः। ऋग्वेदे १। ४४—५० सूक्तेषु ऋषिगोत्रप्रवर्त्तक काण्वशब्दान्तभवश्चेयम्॥ कण्व इत्यस्यार्थः कण्वः सुखमयः तत्त्वविद्याप्रभावात् नत्वयं संसारजन्यसुखमयः नहि तत्त्वज्ञानिनां क्वचित् संसारासक्तिः अविद्याधर्म्माभावादिति गौडकण्ठः। विद्या क्रियाकुशलः मेधावी च। इति ऋग्वेदभाष्यहट्टयागन्दः॥ स्वनामाख्यातीर्थविशेषः। यथा, महाभारते। ३। ८२। ४४।
"कण्वाश्रमं ततो गच्छेत् श्रीजुष्टं लोकपूजितम्।
धर्म्मारण्यं हि तत्पुण्यमाश्रयेद्धर्म्मभृद्भवेत्"॥)

कण्वः, पुं, मुनिविशेषः। इत्युणादिकोषः॥ (अयन्तु विश्वामित्रपुत्रानामेकतमः। कं जलं शुद्धं तनोति कं + तन + ड।) कतकवृक्षः। इति राजनिर्घण्टः॥

कतकः, पुं, (तक् + हासे + बाहुलकाद्वुः। कस्य जलस्य तकः हासः प्रकाशः प्रसाद इति यावत् यस्मात्।) वृक्षविशेषः। निर्म्मली इति भाषा। तत्पर्य्यायः। अम्बुप्रसादः २ कतः ३ तिक्तफलः ४ रजः ५ क्षेदनीयः ६ गुच्छफलः ७ कतफलः ८ तिक्तमरिचः ९। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। चक्षुर्हितत्वम्। रुचिकारित्वम्। क्षमिदोषशूलदोषनाशित्वञ्च। तस्य बीजं अम्बुप्रसादनम्। इतिराजनिर्घण्टः॥ (यथा, मनुः। ६। ६७।
"फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम्।
न नामग्रहणादेव तस्य वारिप्रसीदति"॥
"पयः प्रसादि कतकैस्तकं तत्फलञ्च तद्।
कतकस्य फलं नेत्र्यं जलनिर्म्मलता करम्।
वातश्लेष्महरं शीतं मधुरं तुवरं गुरु"॥
इति भावप्रकाशः॥)

कतफलः पुं, (कं जलं तनोति प्रसन्नं सम्पादयति। क + तन् + ड। तादृशं फलमस्य।) कतकवृक्षः। इति राजनिर्घण्टः॥

कतमाक्षः, पुं, (तम + घञ् क्षः। कस्य जलस्य तमाय शोषणाय अलति पर्य्याप्नोति। क + तम + अल् + अच्।) अग्निः। इति शब्दमाला॥ कचमाक्षः खतमालश्च पाठः॥

कति, त्रि, (का सङ्ख्या किं परिमाणं वा यस्यां "किमः सङ्ख्यापरिमाणे डति" ५। २। ४१। इति डति) कियत्परिमाणम्। इति व्याकरणम्॥ कत इति भाषा। (यथा, अथर्ब्ववेदे १०। २। ४।
"कति देवाः कतमे त आसन् य उरोरोवाचिक्लृपुः पुरुषस्य कतिस्तनौ व्यदधुः कः कपोड़ौ कतिस्कन्धान् कतिष्टधौ रचिन्वन्"॥ पुं। विश्वामित्रस्य पुत्रानामेकतमः। यदवंशोद्भूत सूक्तकृत् कात्यायनर्षिः॥)

कतिपयः, त्रि, (किम् + डति कति अयच् पुक्च।) कति। इति व्याकरणम्। कतकगुलि इति भाषा। (यथा, मेघदूते २५।
"सम्पत्स्यन्ते कतिपयदिनस्थायिहंसादशार्णाः"॥)

कर्त्तृ, क्ली, (कृ कुत्सितं तृच् इति। अच कृ स्वार्थे कोः कादेशः "तृच च जातौ"। ६। ३। १०२।) सुगन्धिद्रव्यविशेषः। रामकर्पूर इति ख्यातम्। तत्पर्य्यायः। पौरम् २ सौगन्धिकम् ३ ध्याम ४ देवजग्धकम् ५ रौहिषम् ६। इत्यमरः। २। ४। १६६॥ सुगन्धम् ७ दृश्यगीतम् ८ सुगीतकम् ९। इति रत्नमाला॥ रोहिषद्रव्यम् १० कर्त्तृणम् ११ भूति १२ भूतिकम् २३ श्यामकम् १४ ध्यामकम् १५ पूति १६ मुद्गजम् १७ देवजग्धकम् १८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कफग्रहण्यादिदोषनाशकत्वहिनाग्नित्वञ्च। इति राजनिर्घण्टः॥ (तुवरत्वम्। हृत्कण्ठव्याधिपित्तास्रशूलकासज्वरनाशित्वञ्च। इति भावप्रकाशः॥)

कर्त्तोयं, क्ली, (कु कुत्सितं तोयं यत्र।) मद्यम्। इति त्रिकाण्डशेषः॥

कत्थ, ङ श्लाघे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्। क्वचित् अकं च।) दन्त्यवर्गाद्योपधः।

कथा

श्लाघः प्रशंसा । ङ कत्थते गुणिनं गुणी । इति दुर्गादासः ॥

कथ, त् क श्रैथिल्ये । इति कविकल्पद्रुमः । (चुरां-परं-अकं-सेट् ।) कत्थयति कत्थापयति । इति दुर्गादासः ॥

कत्सवरं, क्ली, (कद् वैकल्ये + स । कत्सः विकलता तया त्रियते शिर एवान्तःकरणस्थानं स्कन्धस्य शिरोऽन्तवर्त्तित्वात् तथात्वम् । कत्स + ट + अप् ।) स्कन्धः । इति शब्दचन्द्रिका ॥

कथ, त् क वाक्यप्रबन्धे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) कथयति । इति दुर्गादासः ॥ ("हन्त ! ते कथयिष्यामि सेतिहासं पुरातनम्" । इति भागवतम् ॥)

कथं व्य, कथम् । किंप्रकारम् । इति व्याकरणम् ॥ (यथा, मनुः ५ । २ ।
"कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो" ! ॥)

कथकः, त्रि, (कथयति यः । कथ + कर्त्तरि ण्वुल् ।) वक्ता । कथोपजीवी । नाटकवर्णनकर्त्ता । तत्पर्य्यायः । एकनटः २ कथाप्राणः ३ । इति शब्दरत्नावली ॥ (यथा महाभारते १ । २१५ । ३ ।
"कथकाञ्चापरे राजन् श्रमणाञ्च वनौकसः" ॥
ग्रन्थकर्त्तृविशेषः । (यथा, अनुमानचिन्तामणिः ।
"वाचस्पतिसाधनियमच्युतोऽपि कथकैरयाधि-
बद्धाद्यः" ॥)

कथङ्कथिकः, त्रि, (कथं कथमिति प्रश्नतेनास्यास्य इति । कथंकथं + वाऽलङ्कात् ठन् ततस्त्रिलोपः ।) प्रश्नः । प्रश्नकर्त्ता । इति त्रिकाण्डशेषभूरिप्रयोगौ ॥

कथङ्कथिकता, स्त्री, (कथङ्कथिक + भावे तल् ।) पृच्छा । प्रश्नः । इति हेमचन्द्रः ॥

कथनं, क्ली, (कथ्यते इति । कथत्वा वाक्यप्रबन्धे । भावे + ल्युट् ।) कथा । इति हलायुधः ॥ कहन इति भाषा । (यथा पञ्चतन्त्रे १ । १३ ।
"मिथ्याक्रमकथनं कूटतुलामानम्" ॥)

कथम्, व्य, (कस्मिन् प्रकारे इति प्रकारार्थे + "किमस्येति" । ५ । ३ । २५ । थमुः कादेशश्च ।) हर्षः । गर्हा । प्रकारार्थः । सम्भ्रमः । प्रश्नः । सम्भावना । इति मेदिनी ॥ (यथा शाकुन्तले १ अङ्के
"कथमिदानीमात्मानं निवेदयामि
कथं वा आत्मापहारं करोमि" ॥)

कथा, स्त्री, (कथ + "चिन्तिपूजिकथिकुम्बिचर्चि-रेति" । ३ । ३ । १०५ । अङ् । टाप् च ।) प्रबन्धकल्पना । इत्यमरः । १ । ६ । ६ । प्रबन्धेन कल्पना अथवा प्रबन्धस्य अभिधेयस्य कल्पना स्वयं रचना इति भारतसुन्दरी ॥ "प्रबन्धस्य कल्पना रचना बहुन्तत्तालोकसत्या" । इति भरतः ॥
"प्रबन्धकल्पनां श्लोकसत्यां प्राज्ञाः कथां विदुः ।
परम्पराश्रया या स्यात् सा मताख्यायिका क्वचित्" ॥
इति कोलाहलाचार्य्यः ॥ ("नैयायिकमते हि नानावक्तृकपूर्व्वपक्षसिद्धान्तवान् वाक्यसन्दर्भः" । यथा, मनुः । ३ । २३१ ।
"यदयद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः ।
ब्रह्मोद्याञ्च कथाः कुर्य्यात्पितॄणामेतदक्षयम्" ॥

कदन

वार्त्ता । वाक्यम् । यथा, रघुः । ८ । ४३ ।
"अभितप्तमयोऽपि मार्द्दवं
भजते कैव कथा शरीरिषु" ॥
विवरणम् । यथा, रामायणे । १ । ८ । ६ ।
"सनत्कुमारो भगवान् पुरा कथितवान् कथाम् ।
भविष्यं विदुषां मध्ये तव पुत्रसमुद्भवम्" ॥)

कथाप्रसङ्गः, त्रि, (कथायां प्रसङ्गो यस्य ।) जल्पाकः । इति शब्दरत्नावली ("तेन सह नानाकथाप्रसङ्गेनावस्थितः" ॥ इति हितोपदेशः ॥)
वातूलः । विषवैद्यः । इति मेदिनी । (किरातार्জ্জुनीये । १ । २४ । "कथाप्रसङ्गेन जनैरुदाहृता-दनुस्मृताऽखण्डलसूनुविक्रमः" ॥ वार्त्ता । गोष्ठी-वचनम् । उक्तञ्च कथासरित्सागरे २२ । १८१ ।
"मिथः कथाप्रसङ्गेन विवादं किल चक्रतुः" ॥)

कथाप्राणः, त्रि, (कथया प्राणिति जीवति कथां आवर्त्तयित्वैव जीवनोपायं करोतीत्यर्थः । प्र + अण् + अच् । यद्वा कथायां प्राणाः जीवनोपायाः यस्य ।) कथकः । स तु नाटकवक्ता । इति शब्दरत्नावली ॥

कथितः, त्रि, (कथ्यतेऽसौ । कथ + कर्म्मणि + क्तः ।) उक्तः । (यथा, श्रीभागवतम् । १० । १ । १ ।
"कथितो वंशविस्तारो भवता सोमसूर्य्ययोः" ॥
कथ + भावे क्तः । कथनम् । यथा रघुः । ११ । १० ।
"पूर्व्वसूक्तकथितैः पुराविदः
सानुजः पिहितसखस्य राघवः" ॥)

कद, इ रोदने । आह्वाने । वैक्लव्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं अकं च-सेट्-इदित् ।) इ कर्म्मणि कन्यते । इति दुर्गादासः ॥

कद, ष म ङ वैक्लव्ये । विक्लवीभावे । इति कविकल्पद्रुमः । (स्वादिं-आत्मं-अकं-सेट्-घटादि ।) ष कदा । म कदयति । ङ कदते । इति दुर्गादासः ॥

कदः, पुं, (कं जलं ददाति । क + दा + क ।) मेघः । इति शब्दरत्नावली ॥

कदकः, पुं, (कदः मेघ इव कायति प्रकाशते उपरिभागे । कद् + कै + क ।) वितानम् । इति हेमचन्द्रः ॥ चाँदोया इति भाषा ॥

कदक्षरं, क्ली, (कुत्सितं अक्षरं । कोः कादेशः ।) कुत्सितवर्णः ॥

कदध्वा, [न्] पुं, (कुत्सितोऽध्वा । कुगतीति समासः । कोः कत् तत्पुरुषेचेति कादेशः ।) निन्दितपथः । तत्पर्य्यायः । अध्वः २ दुरध्वः ३ विपथः ४ कापथः ५ । इत्यमरः २ । १ । १६ ॥

कदनं, क्ली, (कदयति दुःखं वैक्लव्यं वा प्राप्नोत्यनेन कथ्यते दुःखं प्राप्यतेऽनेन वा । कद् + णिच् + करणे ल्युट् । घटादित्वात् न वृद्धिः । कथ्यते इति भावे ल्युट् । कथ्यते आहन्यते विक्लवीक्रियते निहन्यते वा यत्र । अधिकरणे णिच् ल्युट् यद्वा कथ्यते म्रियते यत्र ।) पापम् । (यथा, भागवते ७ । ६ । १६ ।
"त्वत्तोऽस्म्यहं कृपणवत्सल ! दुःसहोग्र-
संसारचक्रकदनात् ग्रसतां प्रणीतः" ॥)
मर्द्दः । (यथा, रामायणे । ६ । २८ । २० ।
"क्रोधेन कदनं चक्रे वानराणां युयुत्सताम्" ॥)
युद्धम् । इति मेदिनी ॥ (यथा, भागवते । ७ । २ । १३ ।

कदम्ब

"इति ते भर्त्तृनिर्द्देशमादाय शिरसाऽऽदृताः ।
तथा प्रजानां कदनं विदधुः कदनप्रियाः" ॥)
मारणम् । इति भूरिप्रयोगः जटाधरश्च ॥

कदन्नं क्ली, (कुत्सितं अन्नं । कोः कादेशश्च ।) कुत्सितान्नम् । इति व्याकरणम् ॥
(यथा, भागवते । ५ । ६ । ८ । "मिश्रं कदन्नं वा अभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तम्" ॥
"इविर्विना हरिर्याति विना पीठेन माधवः ।
कदन्नैः पुण्डरीकाक्षः प्रहारेण धनञ्जयः" ॥ इत्युद्भटः ॥)

कदम्बं, क्ली, ("कदादिकडिकटिभ्योऽम्बच्" । उणां । ४ । ८२ । कद् + अम्बच् ।) निकुरम्बम् । समूहः । इति मेदिनी ॥

कदम्बः, पुं, (कद्यते दर्शनात् विरहिणां चित्तवैक्लव्यं जायतेऽनेन । कद् + करणे अम्बच् ।) वृक्षविशेषः । कदम् इति भाषा । तत्पर्य्यायः । नीपः २ प्रियकः ३ हलिप्रियः ४ । इत्यमरः । २ । ४ । ८६ ॥ कादम्बः ५ । इति तट्टीका ॥ षट्पदेष्टः ६ प्रावृषेण्यः ७ हरिप्रियः ८ । इति रत्नमाला ॥ वृत्तपुष्पः ९ सुरभिः १० ललनाप्रियः ११ कादम्बर्य्यः १२ सीधुपुष्पः १३ महाद्रुः १४ कर्णपूरकः १५ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । कषायत्वम् । वातपित्तकफार्त्तिनाशित्वम् । शीतलत्वम् । शुक्रबर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ (यथा भावप्रकाशे ।
"कदम्बो मधुरः शीतो कषायो लघवो गुरुः ।
सरो विरूक्षणदूक्तः कफरक्तव्रणापहः" ॥
तथा च सुश्रुतः ।
"गरदोषहरं नीपं प्राचीनामलकं तथा" ॥)
अत्र नीपहलिप्रियौ धाराकदम्बवाचिनावपि कदम्बसाम्यात् पठितौ । यथा साङ्गः ॥
"नीपो महाकदम्बः स्याद्धाराकदम्ब इत्यपि ।
द्वितीयोऽल्पप्रसरश्च वृत्तपुष्पः कदम्बकः" ॥
इत्यस्य भेदः । तथा रत्नेऽपि । हारिद्रस्तु रजो बलः । यथामरटीकायां भरतः ॥
"धूलीकदम्बका धारा कदम्बः षट्पदप्रियः ॥
वृत्तपुष्पः केशराढ्यः प्रावृषेण्यः कदम्बकः ।
नीपो महाकदम्बोऽपि तथा बहुफलो मतः" ॥
(यथा, —साहित्यदर्पणम् । "यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः" ॥ कविभिस्तु प्रायशो वर्षाकाले एव अस्य वर्णनं क्रियते । माघे रैवतकपर्व्वतवर्णने द्रष्टव्यम् ॥*॥) सर्षपः । इति मेदिनी ॥ देवताड़काष्ठम् । इति रत्नमाला ॥
(कं प्रजापतिमधिष्ठातृकं श्रोत्रमिन्द्रियं दमयति इति व्युत्पत्त्या जितेन्द्रियतत्त्वज्ञानी । कदं कदनं विनाशं बाति गच्छति प्रलये इति शेषः । इति व्युत्पत्त्या जगत् । यथा,—
"स एव सौम्य नित्यं राजते मूले विश्व कदम्बस्य परमो वै पुरुष आत्मा" ॥ इति श्रुतौ ॥)

कदम्बकं, क्ली, (कदम्ब + संज्ञायां कन् ।) समूहः । इत्यमरः । २ । ५ । ४० ॥ (यथा, शाकुन्तले २ अङ्के । "गाहन्तां महिषा निपानसलिलं शृङ्गै-

मुष्टस्ताड़ितं क्वाथबद्धकदम्बकं मृगकुलं रोमश्यमभ्यस्यतु" ॥)

कदम्बकः, पुं, (कदम्ब इव कायति प्रकाशते । हरिद्रा पीतवर्णत्वात् कदम्बकोरकोपरिस्थितसूक्ष्मांशुतुल्यफलत्वाच्च सर्षपस्यापि तथात्वम् । यद्वा तु कदम्ब एव स्वार्थे कन् ।) सर्षपः । हरिद्रुः । इति राजनिर्घण्टः ॥ कदम्बवृक्षः । इति शब्दरत्नावली ॥

कदम्बदः, पुं, (कदम्बः कदम्बस्योपरिस्थः सूक्ष्मांशुरिव दीयतेऽसौ । कदम्ब + दो खण्डने + कर्म्मणि + घञर्थे कः । सर्षपस्य कदम्बकोरकोपरिस्थसूक्ष्मांशुतुल्यफलत्वात् तथात्वम् ।) सर्षपः । इति शब्दचन्द्रिका ॥

कदम्बपुष्पा, स्त्री, (कदम्बस्येव पुष्पमस्यस्याः । अर्श आदित्वात् अच् ततष्टाप् ।) मुण्डितिकावृक्षः । इति रत्नमाला । मुण्डिरी इति भाषा ॥ (विशेषोऽस्या मुण्डितिकाशब्दे ज्ञातव्यः ॥)

कदम्बपुष्पी, स्त्री, (कदम्बपुष्पमिव पुष्पमस्याः । कदम्बपुष्प + ङीप् ।) महाश्रावणिकावृक्षः । इति राजनिर्घण्टः शब्दचन्द्रिका च । मुण्डिरी इति भाषा ॥

कदम्बी, स्त्री, (कद् + करणे अम्बच् गौरादित्वात् ङीष् ।) देवदालीलता । इति राजनिर्घण्टः ॥ (देवदालीशब्दे गुणादयोऽस्या ज्ञातव्याः ॥)

कदरं, क्ली, (कं जलं दृणाति विदारयति नाशयतीत्यर्थः । क + दॄ + अच् ।) पायसभेदः । इति शब्दमाला ॥

कदरः, पुं, (कं जलं दृणाति श्लेष्मणा संहतजलं नाशयतीत्यर्थः । क + दॄ + अच् ।) श्वेतखदिरः । काँटा बाबला इति भाषा । तत्पर्य्यायः । सोमवल्कः २ । इत्यमरः । २ । ४ । ४० ॥ ब्रह्मशल्यः ३ खदिरोपमः ४ । इति रत्नमाला ॥ (श्वेतसारः ५ । खदिरः ६ । सोमवल्कलः ७ । इति भावप्रकाशः ॥

गुणानाह तत्रैव ।

"कदरो विशदो वर्ण्यो मुखरोगकफास्रजित्" ॥

व्यवहारो यथा, चरके ।

"तिन्दुकपियालबदरकदरखदिरसप्तपर्णार्ष्ककर्ण्यर्ज्जुनासनारिमेदा इति दशेमान्युदर्दप्रशमनानि भवन्ति" ॥) क्रकचः । करात् इति भाषा ॥ व्याधिभेदः । इति मेदिनी ॥ कड़ा जामुड़ा इति भाषा ॥ तस्य लक्षणम् । यथा निदाने ।

"गुर्करोन्मथिते पादे क्षते वा कण्टकादितः ।
ग्रन्थिः कोलवदुत्पन्नो जायते कदरस्तु सः" ॥
("गुर्करोन्मथिते पादे क्षते वा कण्टकादिभिः ।
मेदोरक्तानुगैश्चैव दोषैर्वा जायते नृणाम् ॥
सकोलः कठिनो ग्रन्थिर्निःसमध्योन्नतोपि वा ।
कोलमात्रः सरक्तस्रावी जायते कदरस्तु सः" ॥
इति सुश्रुतः ॥) तच्चिकित्सा यथा भावप्रकाशे ॥

"दहेत् कदरमुद्धृत्य तैलेन दहनेन वा" ॥

अद्भुतः । इति हारावली ॥

कदर्य्यः, त्रि, (कुत्सितोऽर्थः स्वामी ॥ कुगतीतिसमासः ।) क्षुद्रः । कृपणः । इत्यमरः । ३ । १ । ४८ ॥

"आत्मानं धर्म्मकृत्यञ्च पुत्रदारांश्च पीड़यन् ।
यो लोभात् सञ्चिनोत्यर्थान् स कदर्य्य इति स्मृतः" ॥
इति स्मृतिः ॥ (तथा, छान्दोग्योपनिषदि । ५ । ११ । ५ । "तेभ्योऽप्राप्तेभ्यः एधमहार्षि कारयाञ्चकार । सहप्रातः सञ्जिहान उवाच नमेत्तेनो जनपदे न कदर्य्यो न मद्यपो नानाहिताग्निर्नाविद्वानिति" ॥)

कदलः, पुं, (कद + दृमादित्वात् कलच् ।) कदलीवृक्षः । एरण्डलता । इति मेदिनी ॥ (यथा, अमरशतके । ९५ ।

"ऊरुद्वयं मृगदृशः कदलस्य काण्डौ
मध्यश्च वेणिरतुलं स्तनयुग्ममस्याः" ॥)

कदलकः, पुं, (कदल + स्वार्थे कन् ।) कदलीवृक्षः । इति शब्दरत्नावली ॥

कदला, स्त्री, (कदल + टाप् ।) एरण्डी । चाकुलिया इति भाषा । डिम्बिका । शाल्मलीवृक्षः । इति मेदिनी ॥

कदली, स्त्री, (कदल + गौरादित्वात् ङीष् । यद्वा कायजलाय दल्यते लवस्य गौरादित्वात् ङीष् ।) स्वनामप्रसिद्धौषधिविशेषः । कला इति भाषा । तत्पर्य्यायः । वारणवृसा २ रम्भा ३ मोचा ४ अंशुमत्फला ५ काण्डीला ६ । इत्यमरः ॥ कदलः ७ वारणवुषा ८ वारवुषा ९ । इति तट्टीकायां भरतः ॥ सुफला १० सुकुमारा ११ सद्यःफला १२ गुच्छफला १३ हस्तिविषाणी १४ गुच्छदन्तिका १५ निःसारा १६ राजेष्टा १७ बालकप्रिया १८ ऊरुस्तम्भा १९ भानुफला २० वनलक्ष्मीः २१ । कदलकः २२ मोचकः २३ रोचकः २४ लोचकः २५ वारवुषा २६ । इति शब्दरत्नावली ॥ वारणवल्लभा २७ चर्म्मरुहती २८ । इति जटाधरः ॥ (यथा, महाभारते २ । दूतपर्व्वणि ६६ । १२ ।

"कदलीसुगुप्तसदृशं सर्व्वलक्षणसंयुतम् ।
गजहस्तप्रतीकाशं वज्रप्रतिमगौरवम्" ॥)

अस्याः पक्वफलगुणाः । कषायत्वम् । मधुरत्वम् । शीतलत्वम् । पित्तास्रविमर्दनत्वम् । गुरुतरत्वम् । मन्दानले अपथ्यत्वम् । सद्यः शुक्रविवर्द्धनत्वम् । क्षमाक्षयाहरत्वम् । कान्तिदाढ्यत्वम् । दीप्ताग्नौ सुखदत्वम् । कफामयकरत्वम् । सन्तर्पणत्वम् । दुर्ज्जरत्वञ्च ॥ * ॥ (यथा हारीते ।

"हृद्यं मनोज्ञं कफवर्द्धिकारि
शीतञ्च सन्तर्पणमेव वल्यम् ।
रक्तं सपित्तं श्वसनञ्चदाहं
रम्भाफलञ्चापि नरस्य हन्ति ॥
अपक्वकं याहि च शीतलञ्च
कषायकं वातकफं करोति ।
विरूक्षि बल्यं गुरु दुर्ज्जरञ्च
आरण्यरम्भाफलमेव तद्वत्" ॥)

मोचकगुणाः । हृद्यत्वम् । कफक्षमिनाशित्वम् । कुष्ठक्षीद्दज्वरहरत्वम् । अग्निदीपनत्वम् । वस्तिशोधनत्वञ्च ॥ * ॥

("मोचाफलं स्वादु शीतं विरूक्षि कफनुद्गुरु ।
स्निग्धं पित्तासृग्दाहज्वरक्षयसमीरजित् ॥
पक्वं स्वादु हिमं पाके स्वादु दृष्यञ्च बृंहणम् ।
क्षुत्तृष्णानेत्रगदहृन्मेहघ्नं रुचिमांसकृत्" ॥
इति भावप्रकाशः ॥ कदली पुष्पगुणांश्चाह ॥
"कदल्याः कुसुमं स्निग्धं मधुरन्तुवरं गुरु ।
वातपित्तहरं शीतं रक्तपित्तक्षयप्रणुत्" ॥)

अस्या मूलगुणाः । बलकारित्वम् । वातपित्तनाशित्वम् । गुरुत्वञ्च ॥ * ॥

"माणिक्यमर्त्यामृतचम्पकाद्या
भेदाः कदल्या बहवोऽपि सन्ति ।
उक्ता गुणास्तेष्वधिका भवन्ति
निर्दोषता स्वाल्पघुता च तेषाम्" ॥

इति राजनिर्घण्टः ॥ * ॥ चम्पकाख्यकदलीफलगुणाः । वातपित्तहरत्वम् । गुरुत्वम् । शुक्रवृद्धिकारित्वम् । अतिशीतलत्वम् । रसे पाके मधुरत्वञ्च । दुग्धदधितक्रताजयुक्तं कदलं दुर्ज्जरम् । इति राजवल्लभः ॥ * ॥ हरिणविशेषः । पताका । इति मेदिनी ॥ करिवैजयन्ती । इति हलायुधः ॥ हातिर उपरेर निशान इति भाषा ॥

कदा, व्य, (किम् + काले दा । "सर्व्वैकान्यकिंयत्तदः काले दा" । ५ । ३ । १५ ।) कस्मिन् काले । इति व्याकरणम् ॥ कबे कखन इति भाषा ॥ (यथा, ऋग्वेदे १ । ८४ । ८ । "कदा नः शुश्रवद्गिर इन्द्रो अङ्ग" ॥ तथा हितोपदेशे । १ । १२२ ।

"जातिद्रव्यबलानाञ्च साम्यमेषां मया सह ।
मत्प्रभुत्वफलं ब्रूहि कदा किन्तद्भविष्यति" ॥)

कदाकारः, पुं, (कुत्सितः आकारः । नैवाच नञ्ब्रीहिः निषिद्धत्वात् । यथा, "कोः कत्तत्पुरुषेऽचि" । ६ । ३ । १०१ ।) कुत्सिताकारः ॥ (कुत्सिताकारविशिष्टे, त्रि ॥)

कदाख्यं, क्ली, (कुत्सिता आख्या नाम यस्य ।) कुष्ठवृक्षः । कुड़ इति भाषा । तत्पर्य्यायः । कौबेरम् २ दुरुष्कम् ३ व्याघ्रम् ४ । इति शब्दचन्द्रिका ॥

कदाचन, व्य, (कदा + अनिर्द्धारिते चनप्रत्ययः ।) कस्मिन् काले । इति व्याकरणम् । कोन समये इति भाषा । (यथा, मनुः । २ । ५८ ।

"ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् ।
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन" ॥)

कदाचित्, व्य, (कदा + अनिर्द्धारिते चित् ।) कस्मिंश्चित् काले । तत्पर्य्यायः । जातु २ । इत्यमरः । ३ । ४ । ४ ॥ कर्हिचित् ३ । इति हेमचन्द्रः ॥ (यथा, मनुः । ४ । ७४ ।

"नाद्यैः क्रीड़ेत् कदाचित्तु स्वयं नोपानहौ हरेत् ।
शयनस्थो न भुञ्जीत न प्राणिस्थं नचासने" ॥)

कदुष्णं, क्ली, (कद् ईषत् उष्णं ईषदर्थे कोः "कवषोष्णे" ६ । ३ । १०७ । चकारात् । कदादेशः ।) ईषदुष्णम् । तत्पर्य्यायः । कोष्णम् २ कवोष्णम् ३ मन्दोष्णम् ४ । (यथा भट्टिः । ३ । १८ ।

"ससीतयोराघवयोरधीयन्
श्वसन् कदुष्णं पुरमाविवेश" ॥)

तद्वति त्रि । इत्यमरः । १ । ४ । ३५ ॥

कदड कार्कश्ये । (भ्वां-परं-चकं-सेट्) ववर्गलतोथोपधः । क्विपि संयोगान्तलोपे कद् इति । कडुति पद्मभग्नालं कर्कशं स्यादित्यर्थः । इति दुर्गादासः ॥

कद्रथः, पुं, (कुत्सितः रथः । कोः कदादेशः । "रथवदयोश्च" । ६ । ३ । १०२ ।) कुत्सितरथः । इति व्याकरणम् ॥ (यथा, भट्टिः ५ । १०३ ।

"युधिकदधवङ्गीमं वमञ्ज ध्वजग्रालिनम्" ॥)

कद्रुः, पुं, (कद्+रुः।) पिङ्गलवर्णः। तदति चि। इत्यमरः। १। ५। १६ ॥

कद्रुः, स्त्री, (कद्+रुः। यद्वा मृगय्वादित्वात् साधुः।) नागमाता। इति मेदिनी ॥ सा तु दक्षकन्या कश्यपपत्नी च। इति पुराणम् ॥ (यथा, रामायणम्। ३। २०। २९।

"रोहिण्यां जज्ञिरे गावो गन्धर्व्यां वाजिनस्तथा। सुरसाऽजनयन्नागान् राम! कद्रुश्च पन्नगान्" ॥)

कद्रुपुत्रः, पुं, (कद्रोः पुत्रः।) नागः। इति शब्दचन्द्रिका ॥

कद्रुसुतः, पुं, (कद्रोः सुतः।) नागः। तत्पर्य्यायः। काद्रवेयः २। इति शब्दरत्नावली ॥ कम्बुकालुः ३ कद्रुपुत्रः ४। इति शब्दचन्द्रिका ॥

कददः, त्रि, (कुत्सितं वदति यः। वदेः पचाद्यच्। कुत्सितः वदः इति वा "रथवदयोश्च"। ६। २। १०२। इति कादादेशः।) कुत्सितवक्ता। तत्पर्य्यायः। गर्ह्यवादी २। इत्यमरः। ३। १। ३७ ॥ दुर्व्वाक् ३। अतिकुत्सितः। इति हेमचन्द्रः ॥ (यथा, भट्टिः ६। ७५।

"सर्व्वत्र दयिताधीनं सुव्यक्तं रामशीयकम्। येन जातं प्रियापाये कदर्दं हंसकोकिलम्" ॥)

कन, ई णि प्रीतौ। गतौ। द्युतौ। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकं च-सेट् ईदित्।) ई णि कान्तोऽस्ति। इति दुर्गादासः ॥

कनकं, क्ली, (कनति दीप्यते इति। कनी दीप्तौ+ऋज्वादिभ्यो वुन्।) स्वर्णम्। इत्यमरः। २। ९। ९४ ॥ (यथा, मेघदूते। २।

"तस्मिन्नद्रौ कतिचिदबला विप्रयुक्तः स कामी नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः" ॥)

कनकः, पुं, (कनति दीप्यते यः। कनी दीप्तौ+ऋज्वादिभ्यो वुन्।) धत्तूरवृक्षः। नागकेशरवृक्षः। धूस्तूरवृक्षः। (यथा, इन्द्रजालतन्त्रे।

"कपालं मानुषं गृह्य कनकस्य पलानि च" ॥)

काञ्चनारवृक्षः। कासीसवृक्षः। चम्पकवृक्षः। इति मेदिनी। कासमर्द्दवृक्षः। कणगुग्गुलुवृक्षः। इति राजनिर्घण्टः ॥ खाक्षातरुः। इति शब्दमाला ॥ (शिवः। यथा, महाभारते। १३। १७। ९२।

"उपकारः प्रियः सर्व्वः कनकः काञ्चनच्छविः" ॥

यदुवंशीयस्य दुर्द्दमस्य पुत्रः।

यथा, हरिवंशे ३३। ६।

"दुर्द्दमस्य सुतो धीमान् कनको नाम नामतः" ॥)

कनकक्षारः, पुं, (कनकस्य द्रावणार्थं क्षारः।) टङ्कणः। इति राजनिर्घण्टः। सोहागा इति भाषा ॥ (टङ्कणशब्दस्य गुणा व्याख्येयाः ॥)

कनकदण्डकं, क्ली, (कनकस्य कनकनिर्म्मितो वा दण्डः यत्र। कप् स्वार्थे कन् वा।) राजच्छत्रम्। इति त्रिकाण्डशेषः ॥

कनकपलः, पुं, (कनकस्य कर्षचतुष्टयरूपपलं तत्परिमाणम्।) पलपरिमाणम्। तच्च सुवर्णादिपरिमाणकषोड़शमाषकम्। तत्पर्य्यायः। कुरुविन्दः २। इति हारावली ॥ (कनकमिव पलं मांसमस्य इति व्युत्पत्त्या मत्स्यविशेषः ॥)

कनकप्रभा, स्त्री, (कनकस्य प्रभेव प्रभा यस्याः।) महाज्योतिष्मती। इति राजनिर्घण्टः ॥ (स्वनामख्यातो ज्वरातीसाररोगस्यौषधविशेषो यथा।

"सुवर्णवीजं मरिचं विराल-पत्रं कणा टङ्कणकं विषञ्च। गन्धं जयाद्विस्त्रिदिनं विमर्द्य गुञ्जा प्रमाणा वटिका विधेया॥ रक्तातिसारग्रहणीज्वराग्नि-मान्द्यादि हन्यात् कनकप्रभेयम्। दध्योदनं भोज्यमनुव्रजारि-मांसं भजेत्तित्तिरिलावकानाम्" ॥

इति वैद्यकरत्नेन्द्रसारसंग्रहः ॥ *॥)

कनकप्रसवा, स्त्री, (कनकवत् प्रसवः पुष्पं यस्याः।) स्वर्णकेतकी। इति राजनिर्घण्टः ॥

कनकरम्भा, स्त्री, (कनकवर्णरम्भा। यद्वा कनकवर्णाभिनी रम्भा।) सुवर्णकदली। इति राजनिर्घण्टः ॥

कनकरसः, पुं, (कनकवर्णो रसः।) हरितालम्। इति राजनिर्घण्टः ॥ ("कतमोऽयं पूर्व्वापरसमुद्रावगाढः कनकरसनिस्यन्दी सान्ध्य इव मेघपरिघः सानुमानालोक्यते"। इति शाकुन्तले ७ अङ्के ॥)

कनकलोद्भवः, पुं, (कनति दीप्यते इति। कना दीप्ता कला अवयवः तया उद्भवतीति। कनकला+उद्+भू+अच्।) राजः। इति राजनिर्घण्टः। धुगा इति भाषा ॥

कनकाचलः, पुं, (कनकमयो अचलः पर्व्वतः।) अस्ताचलः। सुमेरुपर्व्वतः। इति सिद्धान्तशिरोमणिः ॥ दानविशेषः। इति स्मृतिः ॥ (अस्य परिमाणमुक्तं ब्रह्माण्डपुराणे यथा,—

"अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम्। यस्य प्रसादाद्भवनं विरिञ्चेर्याति मानवः ॥ उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः। तदर्द्धेनाधरस्तद्वत् अल्पवित्तोऽपि शक्तितः ॥ दद्यादेकपलादूर्द्धं यथा शक्त्या विमत्सरः। धान्यपर्व्वतवत् सर्व्वं विदध्यात् विधिमुत्तमम् विप्रमभ्यर्च्य लाक्षाद्यैश्च ऋत्विग्भ्यः प्रतिपादयेत्" ॥)

कनकाध्यक्षः, पुं, (कनकस्य रूप्यस्य अध्यक्षः मध्यपदलोपः।) सुवर्णरक्षकः। तत्पर्य्यायः। भौरिकः २। इत्यमरः। २। ८। ७ ॥

कनकारकः, पुं, (कनकं दीप्तस्वर्णदीप्तिमिव सर्व्वतो ऋच्छति व्याप्नोतीति। कनक+ऋ+अण्; स्वार्थे+कन्।) कोविदारवृक्षः। इति राजनिर्घण्टः ॥ (कोविदारशब्दस्य गुणादिकं ज्ञातव्यम् ॥)

कनकालुका, स्त्री, (कनकनिर्म्मितं आलुः। सलिलाद्याधारपात्रविशेषः संज्ञायां कन् टाप् च।) स्वर्णकलसः। तत्पर्य्यायः। भृङ्गारः २। इत्यमरः। २। ८। ३२ ॥

कनकाङ्गं, क्ली, (कनकस्याङ्गा नाम यस्य।) नागकेशरपुष्पम्। इति राजनिर्घण्टः ॥ (नागकेशरशब्दे-ऽस्य विशेषो द्रष्टव्यः ॥)

कनकाङ्क्षयः, पुं, (कनकं आङ्क्षयोऽस्य। कनकमाङ्क्षयते स्पर्द्धते वा। कनक+आ+अङ्क्ष+कः।) धुस्तूरवृक्षः। इत्यमरः। २। ४। ७७ ॥ नागकेशरवृक्षः। इति शब्दचन्द्रिका ॥

कननः, त्रि, (कन्+युच्।) कामुकः। इति हेमचन्द्रः ॥

कनिष्ठः, त्रि, (अतिशयेन युवा अल्पो वा। इष्ठन्। कनादेशश्च।) अतियुवा। अल्पः। पश्चाज्जातः। तत्पर्य्यायः। जघन्यजः २ यवीयान् ३ अवरजः ४ अनुजः ५। इत्यमरः। २। ६। ४३ ॥ कनीयान् ६ कन्यसः ७ यविष्ठः ८। इति तट्टीकासारसुन्दरी ॥ (यथा, मनुः। ९। ११३।

"ज्येष्ठस्यैव कनिष्ठश्च संहरेतां यथोदितम्। येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम्" ॥ शिवः। यथा, महाभारते। १३। १७। १३१।

"पवित्रं चिरकुन्मन्त्रः कनिष्ठः क्षयाधिकृलः" ॥)

कनिष्ठकं, क्ली, (कनिष्ठमिव कायति प्रकाशते। कनिष्ठ+कै+कः।) सूक्ष्मटङ्गम्। इति राजनिर्घण्टः ॥

कनिष्ठा, स्त्री, (कनिष्ठ+ङीषादिकं बाधित्वा अजादित्वात् टाप्।) दुर्बलाङ्गुलिः। इत्यमरभेदिनीकरौ ॥ कड़े आङ्गुल इति भाषा। (यथा, रामायणे ३। ५१। ७।

"कनिष्ठायामपत्यानां भ्रातुर्म्मम स राक्षसः। दुःखं कर्त्तुमपर्य्याप्तो देवि! कस्माद्विधीदसि" ॥)

धीरादितिरुद्यां द्विधाभेदान्तर्गतनायिकाविशेषः। अस्या लक्षणम्। परिणीतत्वे सति भर्त्तुर्न्यूनस्नेहा। इति रसमञ्जरी ॥ (त्रि, मनुः ९। १२२ ॥

पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायाञ्च पूर्व्वजः"।

"यदि प्रथमोढ़ायां कनीयान् पुत्रो जातः पश्चादूढ़ायाञ्च ज्येष्ठः" ॥ इति कुल्लूकभट्टः ॥)

कनी, स्त्री, (कन+अच्+गौरादित्वात् ङीष्।) कन्या। इति हेमचन्द्रः ॥

कनीचिः, स्त्री, (कन्+बाहुलकात् इचि प्रत्ययः। एषोदरादित्वात् दीर्घश्च।) गुञ्जा। इति शब्दरत्नावली ॥ कुँच इति भाषा। पुष्पयुक्तलता। शकटः। इत्युणादिकोषः ॥ मूर्द्धन्यणमध्योऽपि पाठः ॥

कनीनिका, स्त्री, (कन्+ईन। संज्ञायां कन्। ततष्टाप्+अत इत्वम्।) चक्षुस्तारा। कनिष्ठाङ्गुलिः। इति मेदिनी ॥

कनीनी, स्त्री, (कन्+ईन् ततो ङीष्।) कनिष्ठाङ्गुलिः। इत्यमरटीका ॥

कनीयसं, क्ली, (कन् दीप्तौ+अच्। कनः सूर्य्यः तस्येदम्। कन+छः कनीयम्। तद्रूपत्वेन सीयते अवसीयते इति। सो+घञर्थे कर्म्मणि कः। सूर्य्यदेवाधिष्ठातृत्वमिति तात्पर्य्यात्।) ताम्रम्। इति हेमचन्द्रः ॥

कनीयान्, [स्] त्रि, (अयमनयोरतिशयेन युवा अल्पो वा इत्यर्थे ईयसुन्। ततः कनादेशः।) अनुजः। अतियुवा। अत्यल्पः। इति मेदिनी ॥ (यथा, ऋग्वेदे। ४। २४। ९। "स भूयसा कनीयो नारिरेचीद्दीनां दत्ता विदुह्रन्ति प्रवाणम्" ॥

"मातुः पितुः कनीयांसं न नमेद् वयसाऽधिकः। प्रणमेच्च गुरोः पत्नीं ज्येष्ठभार्य्यां विमातरम्" ॥ इति स्मृतिः ॥)

कन्तुः, पुं, ("कंशंभ्यां वभयुस्तितुतयसः इति तुः"। ५। २। १३८। कम्+तुः। कामयते इति कमु कान्तौ। अर्जिदृशीत्यादिना कुप्रत्यये तुकि सिद्धत्वात्। "कमिमनिजनिगामायाहिभ्यश्च"। उणां १। ७३।) कामदेवः। इति चिकाण्डशेषः॥ हृदयम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (चित्रम्। इति उज्ज्वलदत्तः। कं सुखं अस्यास्तीति व्युत्पत्त्या सुखी जनः॥)

कन्था, स्त्री, (कम्+बाहुलकात् थन्+टाप्।) स्यूतकर्पटः। इति स्त्रीलिङ्गसंग्रहे अमरः॥ काँथा इति भाषा। (यथा, यतिपञ्चके २। "कन्थामिव श्रीमपि कुत्सयन्तः कौपीनवन्तः खलु भाग्यवन्तः"॥) मृगमयभित्तिः। इति मेदिनी। काँथ् इति भाषा॥ उसीनराख्यजनपदप्रसिद्धयामाख्यां नामसु विषयभूतेषु षष्ठ्यन्तात् परा कन्था स्त्रीवे स्यात्। यथा सौसमीनां कन्था सौसमिकन्थम्। आङ्गीनां कन्था आङ्गिकन्थम्। इत्यमरटीकायां भरतः॥

कन्थारी, स्त्री, (कम्+आरन्। एषोदरादित्वात् थुक् गौरादित्वात् ङीष्।) वृक्षविशेषः। तत्पर्य्यायः। कन्थरी २ कन्था ३ दुर्द्धर्षा ४ तीक्ष्णकण्टका ५ तीक्ष्णगन्धा ६ क्रूरगन्धा ७ दुष्पूवेशा ८। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातव्रणोदरकृमिश्वित्रनाशित्वम्। दीपनत्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥

कन्दं, क्ली पुं, (कन्दयति शिक्षायां वैक्लव्यं जनयति रोदयति वा भक्षयन्तं जनम्। कदि+णिच्+अच्। यद्वा कन्द्यते कन्द इति नाम्ना ज्ञायते। कदि+कर्म्मणि+घञ्।) शूरणः। इत्यमरः। २। ४। ६॥ गुह्यमूलम्। इति मेदिनी॥ गृञ्जनम्। इति राजनिर्घण्टः॥ (यथा, महाभारते १३। १७। ११६॥
"वने निवसतां नित्यं कन्दमूलफलाशिनाम्"॥
यथा च, भ्रान्तिशतके। २। २०।
"प्रीतं निर्झरवारिपानमशनं कन्दः सहाया मृगाः"॥
शूरणशब्दे अस्य विशेषो ज्ञेयः॥)

कन्दः, पुं, (कं जलं ददातीति। क+दा+कः। कन्दति कन्दयति कन्द्यते वा। कदि आह्वाने रोदने च। अच् घञ् वा।) मेघः। इति मेदिनी॥ योनिरोगविशेषः। तस्य निदानलक्षणे। यथा,—
"दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात्।
क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा॥
पूयशोणितसङ्काशं सकुचाक्षतिसन्निभम्।
उत्पद्यते यदा योनौ नाम्ना कन्दस्तु योनिजः"॥
स चतुर्विधः। वातिकः १ पैत्तिकः २ श्लैष्मिकः ३ सान्निपातिकश्च ४। एषां यथाक्रमं लक्षणानि।
"रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत्।
दाहरागज्वरयुतं विद्यात् पित्तात्मकन्तु तम्॥
नीलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम्।
सर्व्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः।
सन्निपातात्मकोऽसाध्यः शेषाः कृच्छ्रप्रसाधनाः"॥
इति माधवकरः॥ (अस्य चिकित्सामाह भावप्रकाशः॥
"गौरिकामाक्षिकं जन्तुघ्नं रजन्यञ्जनकट्फलाः।
परूषेद्योनिमेतेषां चूर्णैः क्षौद्रसमन्वितैः॥
चिपलायाः कषायेण सक्षौद्रेण च सेवयेत्।
प्रमदा योनिकन्देन व्याधिना परिमुच्यते"॥
अन्यत्सर्व्वं योनिशब्दे द्रष्टव्यम्॥)

कन्दगुडूची, स्त्री, (कन्दोद्भवा गुडूची। शाकपार्थिवादिवत् समासः। मध्यपदलोपश्च।) गुडूचीविशेषः। तत्पर्य्यायः। कन्दोद्भवा २ कन्दास्ता ३ बल्लिच्छिन्ना ४ बल्लरुहा ५ पिण्डालुः ६ कन्दरोहिणी ७। इति राजनिर्घण्टः॥

कन्दटं, क्ली, (कदि+अटन्।) श्वेतोत्पलम्। इति शब्दरत्नावली। सादा सुँदि इति भाषा॥

कन्दफला, स्त्री, (कन्दात् कन्दमारभ्य वा फलं यस्याः।) क्षुद्रकारवेल्ली। इति राजनिर्घण्टः॥

कन्दबल्ला, स्त्री, (कन्दादारभ्य कन्देन कन्देषु बल्ला वा।) चिपर्णिका। इति राजनिर्घण्टः॥

कन्दमूलं, क्ली, (कन्द एव कन्दरूपं वा मूलं यस्य।) मूलकम्। इति राजनिर्घण्टः॥ (मूलकशब्देऽस्य गुणा वक्तव्याः॥)

कन्दरं, क्ली, (केन जलेन दीर्य्यते। दृ+विदारे+कर्म्मणि अप्। कं जलं श्लेष्मजनितं दृणाति नाशयतीति वा। दृ+अच्।) आर्द्रकम्। इति राजनिर्घण्टः॥ (आर्द्रकशब्देऽस्य गुणादयो ज्ञेयाः॥)

कन्दरः, पुं स्त्री, (केन जलेन दीर्य्यते विदीर्य्यतेऽसौ। दृ+कर्म्मणि अप्।) गुहा। इति मेदिनी॥
"निष्कादीचेन्मुरज इव ते कन्दरेषु ध्वनिः स्यात्"।
इति मेघदूते ५८॥) क्षत्रिमोऽकृत्रिमो वा सजलो निर्जलो वा महाकारो गिरिनितम्बदेशः। इति भरतः॥ तत्पर्य्यायः। दरी २ कन्दरा ३ इत्यमरः। २। ३। ६॥ कन्दरी ४। इति पङ्क्तिका॥ दरः ५। इति स्वामी॥ (यथा, भागवते। ४। ६। ११।
"नानाऽमलप्रस्रवणोर्ज्जनाकन्दरसानुभिः"॥)

कन्दरः, पुं, (कं मातङ्गशिरो दीर्य्यतेऽनेन। दृ+करणे अप्।) अङ्कुशः। इति मेदिनी॥

कन्दरा, स्त्री, (कन्दर+टाप्।) गुहा। इत्यमरः। २। ३। ६॥

कन्दराकरः, पुं, (कन्दरस्य आकरः।) पर्व्वतः। इति हारावली॥

कन्दराजः, पुं, (कन्दराय अङ्कुराय अलतीति। कन्दर+अल+अच्॥) गर्द्दभाण्डवृक्षः। शल्लवृक्षः। इति मेदिनी॥ आखोटवृक्षः। इति राजनिर्घण्टः॥

कन्दरालकः, पुं, (कन्दराल एव स्वार्थे कन्।) शल्लवृक्षः। इति शब्दरत्नावली॥ (शल्लशब्दे विशेषोऽस्य ज्ञातव्यः॥)

कन्दरी, स्त्री, गुहा। इत्यमरः। २। ३। ६॥

कन्दरोद्भव, स्त्री, (कन्दरे उद्भवतीति। कन्दर+उद्+भू+अच्+टाप्।) क्षुद्रपाषाणभेदीवृक्षः इति राजनिर्घण्टः॥

कन्दर्पः, पुं, (कमित्यव्ययं कुत्सायां, कं कुत्सितो दर्पः यस्मात्। यद्वा कं सुखं तेन तत्र वा दृप्यति। दृप्+अच्। कं ब्रह्माणं प्रति दर्पितवान् वा।) कामदेवः। इत्यमरः। १। १। २६॥ (यथा, महाभारते १। २१५। १८।
"सोहन्तमभिषेकार्थमवतीर्णं समुद्रगाम्।
दृष्ट्वैव पुरुषव्याघ्र! कन्दर्पेणाभिमूर्च्छिता"॥)
ध्रुवकभेदः। यथा,—सङ्गीतदामोदरः॥
"जयोविघ्नतिवर्णाद्धिर्ध्रुवः कन्दर्पसंज्ञकः।
वीरे वा करुणे वा स्यात् खण्डताले विधीयते"॥

कन्दर्पकूपः, पुं, (कन्दर्पस्य कूप इव।) योनिः। इति जटाधरः॥

कन्दर्पजीवः, पुं, (कन्दर्पं जीवयति परिवर्द्धयतीति। कन्दर्प+जीव+अच्।) कामलक्षिनामवृक्षः। इति राजनिर्घण्टः॥

कन्दर्पमुषलः, पुं, (कन्दर्पस्य मुषल इव।) लिङ्गः। इति चिकाण्डशेषः॥

कन्दर्पभृङ्गुलः, पुं, (कन्दर्पः भृङ्गुलः यत्र। यद्वा कन्दर्पाय भृङ्गुलः।) भृङ्गारबन्धविशेषः। तस्य लक्षणम्। यथा रतिमञ्जरी।
"नारी पदद्वयं स्याप्य कान्तस्योरुद्वयोपरि।
कटिश्चेद्दोलयेदाशु बन्धः कन्दर्पभृङ्गुलः"॥

कन्दलं, क्ली, (कदि+अलच्।) कषायः। उपरागः। नवाङ्कुरः। कलध्वनिः। इति मेदिनी॥ अपवादः। इति शब्दरत्नावली॥ (कदलीविशेषः। यथा, अमरशतके ४८। "प्रारम्भे निपतन्ति कन्दलदलोल्लासाः पयोविन्दवः"॥)

कन्दलः, पुं, (कदि+अलच्।) कनकम्। युद्धम्। कपालः। इति धरणी॥

कन्दलता, स्त्री, (कन्दप्रधाना लता।) मालाकन्दः। इति राजनिर्घण्टः॥

कन्दली, स्त्री, (कन्दल+गौरादित्वात् ङीष्।) मृगविशेषः। यस्य चर्म्म व्यवह्रियते। गुल्मप्रभेदः। (यथा, मेघदूते २१।
"आविर्भूतप्रथमसुकुलाः कन्दलीश्चानुकच्छम्"॥)
कदली। इति मेदिनी॥ (यथा, विक्रमोर्व्वश्यां। ७८।
"आरक्तराजिभिरियं कुसुमैर्नवकन्दलीसलिलगर्भैः"। इति॥)
पताका। इति चिकाण्डशेषः॥ पद्मबीजम्। इति राजनिर्घण्टः॥

कन्दलीकुसुमं, क्ली, (कन्दल्या इव कुसुममस्य।) शिलीन्ध्रम्। इति जटाधरः॥

कन्दवर्द्धनः, पुं, (कन्देन वर्द्धते इति। वृध्+ल्युः।) शूरणः। इति राजनिर्घण्टः॥ (शूरणशब्देऽस्य गुणादयो द्रष्टव्याः॥)

कन्दवल्ली, स्त्री, (कन्दाकारा+वल्ली।) वन्याकर्कोटकी। इति राजनिर्घण्टः॥

कन्दशूरणः, पुं, (कन्देषु शूरणः श्रेष्ठः।) ओल्लः। इति राजनिर्घण्टः॥ (ओल्लशब्देऽस्य गुणादयो व्याख्याताः॥)

कन्दसंज्ञं, क्ली, (कन्द इति संज्ञा यस्य कन्दनाम्ना संज्ञायते वा।) योनिरक्तरोगविशेषः। तत्पर्य्यायः। योन्यर्शः २। इति चिकाण्डशेषः॥ तस्य निदानादि कन्दशब्दे द्रष्टव्यम्॥

कन्दसारं, क्ली, (कन्दानां सारो यत्र।) नन्दनवनम्। इति चिकाण्डशेषः॥ [राजनिर्घण्टः॥

कन्दाढ्यः, पुं, (कन्देन आढ्यः।) धरणीकन्दः। इति

कन्यका

कन्दार्हः, पुं, (कन्देषु अर्हः आदरणीयः।) शूरणः। इति राजनिर्घण्टः॥

कन्दालुः, पुं, (कन्दमय आलुः।) कासालुः। धरणी-कन्दः। त्रिपर्णिका। इति राजनिर्घण्टः॥

कन्दिरी, स्त्री, (कन्द + इरच् + गौरादित्वात् ङीष्।) लज्जालुवृक्षः। इति वैद्यकम्॥ (लज्जालुशब्दे विशेषोऽस्या ज्ञातव्यः॥)

कन्दी, [न्] पुं, (कन्दोऽस्यास्य। अस्त्यर्थे इनिः।) शूरणः। इति राजनिर्घण्टः॥

कन्दुः, पुं स्त्री, (स्कन्दति स्रोषयति जलादिकं स्कन्देः सलोपश्चेत्युः।) लौहमयपाकपात्रम्। ताओया इति लोहता इति च भाषा। तत्पर्य्यायः। खेदनी २। इत्यमरः। २। ९। ३०॥

कन्दुकः, पुं, (कं सुखं ददातीति। कम् + दा + मितद्वादित्वात् डुः संज्ञायां कन्।) गेण्डुकः। इत्यमरः। २। ७। १३८॥ गेँड़ु इति भाषा॥ (यथा, कुमारे। १। २९। "सा कन्दुकैः क्षुचिमपुच्चकेश्च"॥)

कन्दुपक्वं, क्ली, (कन्दौ पक्वम्।) जलोपसेकं विना केवलपाचे यत् वह्निना पक्वं भक्ष्यतण्डुलादि। यथा,—
"कन्दुपक्वानि तैलेन पायसं दधि घृक्तवः।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि"॥
इति तिथ्यादितत्त्वे कूर्म्मपुराणम्॥

कन्दोटं, क्ली, (कदि + ओटन्।) नीलोत्पलम्। इति शब्दरत्नावली॥

कन्दोटः, पुं, (कदि + ओटन्।) शुक्लोत्पलम्। इति शब्दरत्नावली॥

कन्दोतः, पुं, (कन्दे मूले उतः। कन्द + वेञ् + क्तः।) कुमुदम्। इति चिकाण्डशेषः॥

कन्धः, पुं, (कं जलं दधाति धारयति। कं + धा + कः।) मेघः। इति शब्दरत्नावली॥

कन्धरः, पुं, (कं जलं धरति धारयति वा। कम् + धृ + अच्।) मेघः। इति मेदिनी॥ मारिषवृक्षः। इति राजनिर्घण्टः॥ (कं शिरो धरतीति।) ग्रीवा। इत्यमरटीकासारसुन्दरी॥ (भागवते ६। १२। ३३।
"वध्यस्तु तत्कन्धरमाशु वेगः
क्षुन्मन्मन्तात् परिवर्त्तमानः"॥)

कन्धरा, स्त्री, (कं शिरो धरतीति। कम् + धृ + अच् + टाप्।) ग्रीवा इत्यमरः। २। ६। ८८॥ (यथा, याज्ञवल्क्यः। २। २२३।
"कन्धरा बाहुसक्थ्नां च भङ्गे मध्यमसाहसः"॥)

कन्धिः, स्त्री, (कं शिरः समुद्वहत्ते जलं धियते यत्र। धृ + अधिकरणे + किः।) ग्रीवा। समुद्रे पुं। इति राजनिर्घण्टः॥

कन्नं, क्ली, (कन्यते प्राप्यते दुःखमनेन। कन गत्यां + करणे क्तः।) पातकम्। मूर्च्छा। इति शब्दमाला॥ कल्लमिति च पाठः॥

कन्यका, स्त्री, (कन्या + अज्ञातादौ कन् पूर्ब्बहृस्वश्च।) कुमारी। इति चिकाण्डशेषः॥ यथा।
"अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी।
दशमे कन्यका प्रोक्ता अत ऊर्द्धं रजस्वला"॥
इति स्मृतिः॥ परकीयनायिकाविशेषः। यथा।
"अप्रकटपरपुरुषानुरागा परकीया। सा च द्विविधा परोढ़ा कन्यका च। कन्यायाः पित्राद्यधीनतया परकीयत्वम्। अस्या गुप्तैव सकला चेष्टा"। इति रसमञ्जरी॥

कन्यकाजातः, पुं स्त्री, (कन्यकायां अनूढ़ायां जातः। कन्यका + जन + कर्त्तरि क्तः।) अविवाहितापुत्रः। तत्पर्य्यायः। कानीनः २। इत्यमरः। २। ६। १३७॥ (यथाह याज्ञवल्क्यः। २। १३२।
"कानीनः कन्यकाजातो मातामहसुतो मतः"॥
कर्णः। स तु अनूढ़ायां कुन्त्यां जातः॥)

कन्यकापतिः, पुं, (कन्यकायाः पतिः।) जामाता। इति शब्दरत्नावली॥

कन्यसः, पुं, (कन + अन्नादित्वात्। ४। १११। उणां।) निपातनात् कन्यः। कन्यत्वेन कामयत्वेन सीयते अवसीयते इति। कन्य + सो + घञर्थे कः।) कनिष्ठभ्राता। इत्यमरटीकासारसुन्दरी॥ (यथा रामायणम्। ५। ३३। १०।
"रामस्य कन्यसो भ्राता सुमित्रा येन सुप्रजाः"॥)

कन्यसा, स्त्री, (कन्यस + टाप्।) कनिष्ठभगिनी। इत्यमरटीका॥

कन्या, स्त्री, (कन् दीप्तौ + अन्नादित्वात् यक् इत्युणादौ ४। १११। कन्यायाः कनीन् चेति निर्देशात् पाणिनिमतानुसारेण न ङीष् अतश्टाप्।) कुमारी। इत्यमरः॥ २। ६। ८। सा तु दशमवर्षीया। इति स्मृतिः॥ (यथा महाभारते वनपर्ब्बणि।
"यस्मात् कामयते सर्व्वान् कमेर्धातोश्च भाविनि!।
तस्मात् कन्येह सुश्रोणि! खतन्त्रा वरवर्णिनि!"॥)
नारी। ओषधीविशेषः। घृतकुमारी इति ख्याता। इति मेदिनी॥ यथा सुश्रुते निदानस्थाने॥
("कान्तैर्दादशभिः पत्रैर्मयूराङ्घ्रिरुहोपमैः।
कन्दजां काञ्चनक्षीरी कन्या नाम महौषधीं"॥
"ग्रोथघ्नी कासहा कन्या"॥ इति वैद्यकद्रव्यगुणः॥ विशेषगुणादयोऽस्या घृतकुमारीशब्दे द्रष्टव्याः॥) स्थलैला। वाराहीकन्दः। वन्याकर्कोटकी। इति राजनिर्घण्टः॥ •॥ मेषादिद्वादशराशेरन्तर्गतषष्ठराशिः। सा तु उत्तरफल्गुनीशेषपादत्रयहस्तासमुदाययुक्तचित्राप्रथमार्द्धेन भवति। तदधिष्ठातृदेवतायाः स्वरूपं यथा। जले।नौकास्थस्त्रीधारिणी स्त्री। इति दीपिका॥ अपि च। नीलकण्ठीजातके॥
"पाण्डुर्द्विपात् स्त्रीदितनुर्यमाशा-
निशामरुच्छोतसमोदयच्छा।
कन्यार्द्धशब्दा शुभभूमिवैश्य-
रूक्षाल्पसङ्गप्रसवा शुभा च"॥*॥
मतान्तरे सा तु शीर्षोदया। दिनबला। पिङ्गलवर्णा। दक्षिणदिक्स्वामिनी। वायुप्रकृतिः। प्रीतस्वभावा। शुद्रभूमिचरा। वैश्यवर्णा। रूक्षा। स्त्यधाङ्गा। खटच्छन्दा। अल्पसन्तानाः अल्पपुंसङ्गा च॥*॥ तत्र जातफलम्। "वेदशास्त्रे श्रद्धावान् स्थानरोषे खेदितः भार्य्यायां। सदा विरसश्च"। इति ज्योतिषम्॥*॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम्। यथा कोष्ठीप्रदीपः॥

कन्या

कन्याट

"युवतिगे शशिनि प्रमदाजन-
प्रबलकेलिविलासकुतूहलैः।
विमलशीलयुता जननोत्सवैः
सुविधिना विधिना सहितः पुमान्"॥*॥
तस्या उदये तन्नामकलग्नं भवति। तस्य गणितप्राप्तपरिमाणं दशत्यङ्कलाधिकपञ्चाङ्कुलप्रभे देशे वर्त्तमानोनविंशायनांशे ऊनचिंशत्पलाधिकपञ्चदण्डाः। इति ज्योतिषम्॥*॥ तत्र जातफलम्।
"कन्याजन्मोद्भवो मर्त्यो नानाशास्त्रविशारदः।
सौभाग्यगुणसम्पन्नः सुन्दरः सुरतप्रियः"॥
इति कोष्ठीप्रदीपः॥*॥ सुता। तस्या विवाहं विनान्यसंस्कारकर्म्मणि वृद्धिश्राद्धनिषेधो यथा,—
"कन्याया निष्क्रमो नास्ति वृद्धिश्राद्धं न विद्यते।
नामान्नप्राशनं चूड़ां कुर्य्यात् स्त्रीणाममन्त्रकम्"॥
"जातकर्म्मादिचूड़ान्तं कुमार्य्यास्याप्यमन्त्रकम्।
कर्त्तव्यं पञ्चभिर्व्वर्षैरेकं निष्क्रमणं विना"॥
इति च महानिर्व्वाणतन्त्रे नवमोल्लासः॥
(तीर्थविशेषः। यथा महाभारते ३। ८३। १०४।
"ततो गच्छेत धर्म्मज्ञ! कन्यातीर्थमनुत्तमम्।
कन्यातीर्थे नरः स्नात्वा गोसहस्रफलं लभेत्"॥)

कन्याका, स्त्री, (कन्यैव इति स्वार्थे कन् अनुक्तपुंस्कत्वात् न ह्रस्वः।) कुमारी। इति शब्दरत्नावली॥

कन्याकुब्जः, पुं, (कन्याः कुब्जाः यत्र देशे सः। वायुना हि अस्मिन् देशे कन्याः कुब्जीकृता अतोऽस्य तथात्वम्।) कान्यकुब्जदेशः। इति हेमचन्द्रः॥ (यथा, महाभारते। वनपर्ब्बणि॥
"कन्याकुब्जेऽपिबत्सोममिन्द्रेण सह कौशिकः"॥
वायुना हि अस्मिन् देशे पुरा कन्याः कुब्जीकृताः। तद्विवरणमुच्यते। पुरा किल कुशनाभो राजर्षिर्घृताच्यां कन्याशतं जनयामास। रूपयौवनसम्पन्नास्तास्तु कदाचित् उद्यानभूमिमागम्य परमानन्दसन्तप्ता विक्रीड़ुः। अथ सर्व्वगो वायुस्ताश्चसर्व्वाक्रीड़िता अवलोक्य कामशरपीड़ितोऽब्रवीत्। अहं वः कामये, भवत्यो मे भार्य्या भवन्तु। अथ ता अङ्गनास्तस्य तदचनं श्रुत्वा उच्चैर्विहस्य तमब्रुवन् भो वायो! त्वं भूतानां अन्तश्चरसि तत्कथमस्माकं मनोभावं न वेत्सि। वयं किल कुशनाभसुताः कथं पितरं कामतः समतिक्रम्य स्वयं वरमभिलषामः। पिता हि अस्मान् यस्मै दास्यति स नो भर्त्ता भविष्यतीति। अतः क्षान्तयाः खलु भवन्नियोगं कर्त्तुमशक्ता वयम्। वायुस्तु तासामेतद्वचनमाकर्ण्य कोपसमन्वितः स्वतेजसा तासां शरीरेषु प्रविश्य मध्ये ववल्ग। ततः प्रभृति देशोऽयं कन्याकुब्ज इत्येव ख्यातः॥ अस्य विस्तृतिस्तु रामायणे आदिकाण्डे ३५ अध्याये द्रष्टव्या।
अयन्तु काशीनदीतटे स्थितः। अधुना कुशस्थल इत्याख्यया प्रसिद्धः। इति कनिंहामेनोक्तम्॥ अस्य समीपे जाह्नवीप्रवहमाना वर्त्तते। इति महाभारते अनुशासनपर्ब्व॥)

कन्याटः, पुं, (कन्या अटति अत्र। कन्या + अट् + अधिकरणे घञ्।) वासगृहम्। इति चिकाण्डशेषः॥

कन्यादा

कन्यादानं. क्ली, (कन्याया दानं वराय सम्प्रदानम् ।) वराय कन्यासम्प्रदानम् । तद्दानफलादि यथा ।

यम उवाच ।

"कन्यां ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम् ।
ब्रह्मदेया द्विजश्रेष्ठ ! ब्रह्मलोकं व्रजन्ति ते ॥
कन्यादानन्तु सर्व्वेषां दानानामुत्तमं स्मृतम्" ॥*॥

तद्ग्रहणे दशकुलत्यागो यथा,—

"महान्यपि समृद्धानि गोऽजाविधनधान्यतः ।
स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् ॥
हीनक्रियातिषु पाषण्डे सूने उद्वेगकारिणाम् ।
क्षयामयसदावाप्तचित्रिकुष्ठिकुलानि च ॥
यस्यास्तु न भवेत् भ्राता न च विज्ञायते पिता ।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्म्मशङ्कया" ॥*॥

ततोऽष्टप्रकारविवाहानन्तरम् ।

"कन्यां ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम् ।
विवाहकाले संप्राप्ते यथोक्ते सदृशे वरे ।
क्रमात् क्रमं क्रतुशतमनुपूर्व्वं लभन्ति ते ॥
श्रुत्वा कन्याप्रदानन्तु पितरः प्रपितामहाः ।
विमुक्ताः सर्व्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते ॥
ब्राह्मेण तु विवाहेन यस्तु कन्यां प्रयच्छति ।
ब्रह्मलोकं व्रजेच्छीघ्रं ब्रह्मर्षैः पूजितः सुरैः ॥
दिव्येन तु विवाहेन यस्तु कन्यां प्रयच्छति ।
भित्त्वा द्वारन्तु सूर्य्यस्य स्वर्गलोकञ्च गच्छति ॥
गान्धर्व्वेण विवाहेन यस्तु कन्यां प्रयच्छति ।
गन्धर्व्वलोकमासाद्य क्रीड़ते देववच्चिरम् ॥
शुल्केन दत्त्वा यः कन्यां तां पश्चात् सत्यगर्च्चयेत् ।
स किन्नरैश्च गन्धर्व्वैः क्रीड़ते कालमक्षयम् ॥
न मन्युं कारयेत्तासां पूज्याश्च सततं गृहे ।
ब्रह्मदेया विशेषेण ब्राह्मभोज्या सदा भवेत् ॥
कन्यायां ब्रह्मदेयायामश्नन् सुखमश्नुते ।
अथ भुङ्क्ते यो मोहात् सुक्ता स नरकं व्रजेत् ॥
अप्रजायाश्च कन्यायां न सुञ्जीयात् कदाचन ।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि ॥
महासत्रसमाकीर्णान्नास्ति ते नरकाद्भयम् ।
तीर्थत्वं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि ॥
दौहित्रस्य तु दानेन नन्दन्ति पितरः सदा ।
यत्किञ्चित् कुरुते दानं तदानन्त्याय कल्पते ॥
मातापितृक्षयं विद्येयं तच्छुश्रूषाभिगामिनः ।
मातुः पितुर्हिरण्यस्य दौहित्रोऽर्हमवाप्नुते ॥
दत्त्वा कन्यां न शोचेत क्षुधितां मुदितां तथा ।
नग्नां दुःखाभिभूतां वा तथैव क्षपणां क्षुधाम् ।
कुर्य्यान्मन्युं नचैवास्या आगताद्यापि पोषयेत् ॥
यद्भूतमर्थयेत् किञ्चित् सर्व्वं तत् प्रतिपादयेत् ।
अप्रयच्छन् पतेत् ब्रह्मन्! नरके नात्र संशयः" ॥*॥

"शोचन्ति यामयो यत्र विनश्यत्याशु तत्कुलम् ।
न भुञ्जन्ति च यत्रैव निर्दहन्त्यप्रपूजिताः ॥
तस्मादेताः समभ्यर्च्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सुतयुक्तास्तु सर्व्वदा ॥
संदृश्याः स्युस्तथा पूज्याः श्राद्धे चैवोत्सवेषु च ।
यस्मिन्नेवं कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥
इह कीर्त्तिर्भवेत् स्वर्गे परत्र द्विजसत्तम ! ।
तिष्ठराशिः कृतो यावत् दिवाकरसमं कृतः ॥

कपटी

वर्षान्ते गृह्यमाणस्तु तिल एको भवेद् यदा ।
सोऽक्षयं लभते तावत् ब्रह्मलोकं सनातनम् ॥
शतगव्याः प्रमाणेन सङ्गते रोमसञ्चये ।
विशीर्य्यते तु वा लोकं वर्षे पूर्णे सताप्रदः ।
तावत् स्वर्गं लभेत् सोऽपि यावल्लोमस्य संक्षयः ॥
महीदातुश्च गोदातुः कन्यादातुस्त्रयो रथाः ।
कन्यादानुगाः पश्चात्सर्म यान्ति त्रयो रथाः ॥
कन्यादानं दरिद्रस्य यो ददाति सुसत्कृतैः ।
पूर्व्वं धर्म्ममवाप्नोति यथावत् विधिकल्पितम् ।
तस्मात्कन्या प्रयत्नेन दातव्या श्रेय इच्छता" ॥

इत्याद्ये वह्निपुराणे कन्यादाननामाध्यायः ॥

कन्यापतिः, पुं, (कन्यायाः पतिः ।) जामाता । इति जटाधरः ॥

कन्यापालः, पुं, (कन्याप्रधानः पालः । पालाख्यवणिगिति यावत् ।) पालवणिक् । शूद्रजातिविशेषः । इति चिकाण्डशेषः ॥

कन्यारामः, पुं, बुद्धभेदः । इति चिकाण्डशेषः ॥

कन्यिका, स्त्री, (कन्या एव स्वार्थे कन् टाप् अतइत्वम् ।) कन्यका । इति शब्दरत्नावली ॥

कन्युषं, क्ली, (कन + इन् । कन्या दीप्या कान्त्या तेजसा वा ओषति इव । कनि + उष् + कः ।) हस्तपुच्छः । इति हारावली । हातेर पाँछा इति भाषा ॥

कप चलने । सौत्रधातुरयं । इति कविकल्पद्रुमः ॥ (भ्वां—परं—चकं—सेट् ।) कपोलः । इति दुर्गादासः ॥

कप इ ड सञ्चलने । इति कविकल्पद्रुमः ॥ (भ्वां—आत्मं—चकं—सेट्—इदित् ।) इ कर्म्मणि कम्पते ॥ ड कम्पते वायुना वृक्षः । इति दुर्गादासः ॥

कपटः, पुं, क्ली, (पटतीति पटः । पट् + अच् । कस्य सतो ब्रह्मणोऽपि पटः आवरकः । यद्वा कप + अटन् ।) अयथार्थव्यवहारः । प्रतारणा । तत्पर्य्यायः । व्याजः २ दम्भः ३ उपधिः ४ क्रुद्म ५ कैतवम् ६ । इत्यमरः । १ । ७ । ३० ॥ कूटम् ७ कल्कम् ८ छलम् ९ मिषम् १० कैरवम् ११ । इति शब्दरत्नावली ॥

("नरेन्द्रसिंह ! कपटं न वेद्मि त्वमिहार्हसि" । इति महाभारते १ । ७४ । १०१ ॥ दनुपुत्रः । यथा महाभारते १ । ६१ । २५ ।

"निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा ।
एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः" ॥)

कपटिकः, त्रि, (कपटः विद्यतेऽस्मिन् अस्यस्य वा । कपट + मत्वर्थे + ठन् ।) कपटविशिष्टः । इति शब्दरत्नावली ॥

कपटिनी, स्त्री, (कपटिन् + गौरादित्वात् ङीष् ।) चोड़ानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

कपटी, स्त्री, (कप + अटन् । गौरादित्वात् ङीष् ।) परिमाणविशेषः । इति शब्दरत्नावली । एक आँकाड़ इति भाषा ॥

कपटी, [न्] त्रि, (कपटोऽस्यस्य अस्मिन् वा अस्यर्थे + इनिः ।) कपटविशिष्टः । कपटधारी । इति शब्दरत्नावली ॥

कपाटं

कपटेश्वरी, स्त्री, (कमिव सुखः पटः वसनं तत्तुल्यं फलं ईष्टे + प्रेरयतीति । कपट + ईश् + क्वरप् + स्त्रियां ङीप् ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

कपर्दः, पुं, (पर्व्व पूरणे + सम्पदादित्वात् भावे क्विप् । "रात् सोपः" । ६ । ४ । २१ । इति वलोपे पर् पूर्त्तिः । केन सुखेन जलेन वा परं पूर्त्तिं ददातीति । क + पर् + दा + सपीति योगविभागात् कः । कस्य गङ्गाजलस्य परा पूरणेन दापयति शुध्यति वा । क + पर् + दैप् शोधने "आतोऽनुपसर्गे कः" । ३ । २ । ३ । इति कः ।) शिवजटा । इत्यमरः । १ । १ । ३७ ॥ (यथा काश्मिखण्डे । २६ । ४४ ।

"कमनीयजलाकाङ्क्षा कपर्दिसुकपर्दगा" ॥)

वराटकः । इति मेदिनी ॥ ("पञ्चभिः कपर्दः पञ्चिका नाम द्यूतमस्ति" । इति पां २ । १ । १० । सूत्रस्य सरला टीका ॥)

कपर्दकः, पुं, (कपर्द + कन् ।) शिवस्य जटाजूटः । वराटकः । इति मेदिनी । कड़ि इति भाषा ॥ ("यद्यहमिमं शक्रशरावं विक्रीय दश कपर्दकान् प्राप्नोमि" ॥ इति हितोपदेशः ॥) शेषस्य पर्य्यायः । वराटः २ कपर्दः ३ वराटिका ४ चराचरः ५ चरः ६ वर्व्वः ७ बालक्रीड़कः ८ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कर्म्मशूलव्रणगुल्मशूलनेत्रदोषनाशित्वञ्च ॥ तस्य भेदाः । सुवर्णवर्णा सिंही १ धूम्रवर्णा व्याघ्री २ पीतरक्तासितेदरा मृगी ३ श्वेतवर्णा हंसी ४ नातिदीर्घिका विदन्ता ५ । इति राजनिर्घण्टः । (वराटकशब्देऽस्य गुणादयो व्याख्येयाः ॥)

कपर्दी, [न्] पुं, (कपर्दो जटाजूटोऽस्यस्य । इनिः ।) शिवः । इत्यमरः । १ । १ । ३४ ॥ (यथा, महाभारते १३ । १७ । ४५ ।

"अजश्च वृक्षरूपश्च गन्धधारी कपर्द्यपि" ॥

"कपर्दी कैलासं करिवरमधोऽयं कुलिशभृत्" ।
इति कालिदासः ॥

यथा, ऋग्वेदे । १० । १०२ । ८ ।

"सुमङ्गल्य चरद् कपर्दी" ॥)

कपाटं, क्ली, (कं वायुं मस्तकं वा पाटयतीति । पट गतौ + णिच् + कर्म्मणि उपपदे अण् ।) स्त्रनामख्यातद्वाराच्छादककाष्ठफलकविशेषः । तत्पर्य्यायः । अररम् २ । इत्यमरः । २ । २ । १७ ॥ कवाटः ३ कपाटी ४ कवाटी ५ अररी ६ अरटिः ७ । इति तट्टीका ॥ द्वारकण्टकम् ८ असारम् ९ । इति शब्दरत्नावली ॥ (यथा महाभारते १ । जतुगृहदाहे । १४८ । १७ ।

"चक्रे च वेश्मनस्तस्य मध्ये नातिमहाबिलम् ।
कपाटयुक्तमच्छातं समं भूम्याञ्च भारत" ! ॥

कं शिरः इत्युपलक्षणेन मनुष्यादीनां ग्रहणमिति बोध्यम् । कं वातं वा पाटयति वारयति गृहद्वारदेशं आवृणोतीत्यर्थः । मनुष्यवातादीनां गतिं रुणद्धि वा । क + पट् + णिच् + अण् । यथा,

"द्वाराणि समुपाहृत्य कपाटान्यवघट्टयन्" ।
इति रामायणम् ।

कपालः, पु क्ली, (कं मस्तकं पालयतीति । क + पालि + अण् । यद्वा कम्पते यः । कपि चलने + "तमि विशिविडिभ्यिकुलिकपिपलिपक्षिभ्यः कालन्" । उणां १ । ११७ । इति कालन् । कपिर्निर्देशाद् नलोपः ।) शिरोऽस्थि । माथार खुलि इति भाषा । तत्पर्य्यायः । कर्परः इत्यमरः । २ । ६ । ६८ ॥ (यथाह याज्ञवल्क्यः । ३ । ६० ।

"द्वौ शङ्खौ कपालानि चत्वारि शिरसस्तथा" ॥) घटादेः खण्डम् । खापरा खोला इत्यादि भाषा ॥ (यथा, भाषापरिच्छेदे । ११ ।

"घटादीनां कपालादौ द्रव्येषु गुणकर्म्मणोः । तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः" ॥) समूहः । इति मेदिनी ॥ (मत्स्यकर्परादिभिक्षापात्रम् । यथा, मनुः । ६ । ४४ ।

"कपालं वृक्षमूलानि कुचेलमसहायता । समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥) पुरोडाशः । यथा शतपथब्राह्मणे ।

"कपालानि चोपदधातिपुरोडाशं चाधिश्रयति" ॥) कुष्ठरोगविशेषः । इति हेमचन्द्रः ॥ तस्य लक्षणम् । यथा, माधवकरः ॥

"क्षणाक्षणकपालाभं यद्भूतं परुषं तनु । कापालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम्" ॥

कपालनालिका, स्त्री, (कपालस्य सूत्रसंघस्य नालिका ।) तकुः । इति चिकाण्डशेषः ॥ टेको इति भाषा ॥

कपालभृद्, पुं, (कपालं भिक्षापात्रं ब्रह्मकपालं वा बिभर्त्ति धारयति । कपाल + भृ + क्विप् तुक् च ।) शिवः । इत्यमरः । १ । १ । ३४ ॥

कपालिका, स्त्री, (कपाल + कन् + टाप् ।) दन्तरोगविशेषः । तस्य लक्षणम् ।

"कपालेष्विव दीर्य्यन्ते दन्ता नानैव पूर्व्वकाः । कपालिकेति पठिता सदा दन्तविनाशिनी" ॥ इति माधवकरः ॥ तस्याचिकित्सा दन्तरोगशब्दे द्रष्टव्या ॥ (घटकपालिका । यथा, विष्णुपुराणे । २ । १२ । ४१ ।

"मही घटत्वं घटतः कपालिका कपालिकाचूर्णरजस्ततोऽणुः । अनैः स्वकर्म्मस्तिमितात्मनिश्चयैः आलक्ष्यते ब्रूहि किमत्र वस्तु" ॥)

कपालिनी, स्त्री, (कपालोऽस्यास्य । कपाल + इनि + स्त्रियां ङीप् ।) दुर्गा । इति हेमचन्द्रः ॥

कपाली, [न्] पुं, (कपालोऽस्यास्य । कपाल + इनिः ।) महादेवः । इति हलायुधः ॥ स्वनामख्यातजातिविशेषः । स तु ब्राह्मणकन्यायां तीवराज्जातः । इति पराशरपद्धतिः ॥ (चि, कपालविशिष्टः । यथा, कुमारे । ५ । ७८ ।

"कपालि वा स्यादथवेन्दुशेखरं न विश्वमूर्त्तेरवधार्य्यते वपुः" ॥

"नटी कपालिनी वेश्या कुलटा नापिताङ्गना" ॥ इति च तन्त्रम् ॥ योगिविशेषः । यथा, हठयोगदीपिकायां १ । ७ ।

"कपाली भिन्दुनाथश्च कालचण्डीश्वराह्वयः" ॥)

कपिः, पुं, (कम्पते यः सदा । कपि चलने । "कुण्डिकम्योर्नलोपश्च" उणां । ४ । १४३ । इ प्रत्ययः ।) वानरः । इत्यमरः । २ । ५ । ३ ॥ (यथा, मनुः । ११ । १५४ ॥

"विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः । प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणञ्चरेत्" ॥) सिङ्गकः । मधुसूदनः । इति मेदिनी ॥ (यथा, महाभारते १३ । १४६ । १०६ ।

"सनात्सनातनतमः कपिलः कपिरव्ययः" ॥) धाचिका । इति शब्दमाला ॥ करञ्जभेदः । इति शब्दचन्द्रिका ॥ (कादुदकात् एत्वीं पाति इति । वराहः । रक्तचन्दनम् । पिङ्गलम् । तद्वर्णवति च ॥)

कपिकच्छुः, स्त्री, (कपीनामपि कच्छुर्यस्याः कण्डूहेतुत्वात् ।) वृक्षविशेषः । आलकुशी इति भाषा । केवाँचा इति हिन्दीभाषा । तत्पर्य्यायः । आत्मगुप्ता २ जङ्घा ३ अधर्ष्णा ४ कण्डूरा ५ प्रावृषायणी ६ ऋष्यप्रोक्षा ७ शूकशिम्बिः ८ मर्कटी ९ । इत्यमरः । २ । ४ । ८७ ॥ स्वगुप्ता १० । अजहा ११ कण्डुरा १२ प्रावृषायिणी १३ प्रावृषा १४ शूकशिम्बी १५ शूकशिम्बा १६ कपिकच्छूः १७ । इति भरतः ॥ स्वयंगुप्ता १८ महर्षभी १९ लाङ्गली २० कुण्डली २१ चण्डा २२ दुरभिग्रहा २३ कपिरोमफला २४ गुप्ता २५ दुष्पर्षा २६ अजड़ा २७ प्रावृषेण्या २८ वदरी २९ गुरुः ३० आर्षभी ३१ शिम्बी ३२ वराहिका ३३ तीक्ष्णा ३४ रोमालुः ३५ वनशूकरी ३६ कोशरोमा ३७ रोमवल्ली ३८ । शूकशिम्बिः ३९ वानरी ४० कपीकच्छुः ४१ शुकपिण्डी ४२ शूकपिण्डी ४३ कपिप्रभा ४४ । इति शब्दरत्नावली ॥ अस्या गुणाः । स्वादुरसत्वम् । शुक्रवृद्धिकारित्वम् । वातत्वयपित्तास्रविक्षततत्रयनाशित्वम् । शीतत्वञ्च । तस्या बीजगुणौ । वातशमनत्वम् । परमवाजीकरत्वञ्च । इति राजनिर्घण्टः ॥ (शूकशिम्बीशब्देऽस्या विशेषश्च ज्ञेयः ॥)

कपिकच्छुफलोपमा, स्त्री, (कपिकच्छुफलस्य उपमाच ।) जतुकालता । इति राजनिर्घण्टः ॥

कपिकच्छुरा, स्त्री, (कपिभ्यः कच्छुं कण्डूं राति ददाति । कपिकच्छु + रा + कः ।) कपिकच्छुः । इति शब्दमाला ॥ (यथा, गारुड़े १९७ अध्याये ।

"एरण्डशारिका पर्णी गुडूची कपिकच्छुरा । एषां दशपलान् भागान् क्वाथयेत् सलिलेऽमले" ॥)

कपिकन्दुकं, क्ली, (कपि + कदि + उकः । अतोलोपः । कस्य शिरसः पिकन्दुकं अस्थि । यद्वा कपिः परमात्मा विष्णुः कन्दति क्रीड़ति यत्र तच्चत्रं अस्थि ।) शिरोऽस्थि । इति शब्दचन्द्रिका । माथार खुलि इति भाषा ॥

कपिका, स्त्री, (कपिरिव कायति यद्वराहवत् नीलवर्णतया प्रकाशते शोभते वा । एकदेशसाम्यात् तथात्वम् ।) नीलसिन्दुवारवृक्षः । इति राजनिर्घण्टः ॥ (नीलसिन्दुवारशब्देऽस्या गुणादयो व्याख्येयाः ॥)

कपिकोलिः, पुं, (कपीनां प्रियः कोलिः ।) कोलिविशेषः । इति रत्नमाला । शेयाकुल इति भाषा ॥

कपिचूड़ा, स्त्री, (कपीनां चूड़ा इव । आम्रातकमुकुलस्य कपिचूड़ातुल्यत्वात् ।) आम्रातकवृक्षः । इति राजनिर्घण्टः । (आम्रातकशब्दे विशेषोऽस्या ज्ञेयः ॥)

कपिचूतः, पुं, (कपीनां चूत इव अत्यन्तप्रियत्वात् ।) आम्रातकवृक्षः । इति चिकाण्डशेषः ॥

कपिजः, पुं, (कपेः शिलायाः जायते । जन् + डः । कपितैलम् ॥) तुरुष्कः । इति राजनिर्घण्टः । शिलारस इति भाषा ॥

कपिजङ्घिका, स्त्री, (कपेः वानरस्य जङ्घा इव जङ्घा यस्याः । संज्ञायां कन् । कपिसदृशजङ्घाया दैर्घ्यात् इत्वेवम् ।) तैलपिण्डिका । इति राजनिर्घण्टः ॥

कपिञ्जलः, पुं, (कपिरिव जवते वेगेन गच्छति यद्वा कम् श्रुतिसुखदं शब्दम् पिञ्जयति कपिवत् पिञ्जलो वा । ईषत्पिङ्गलवर्णो हरितावर्णो वा । एषोदरादित्वात् साधुः ।) चातकपक्षी । तन्मांसगुणाः । लघुत्वम् । शीतत्वम् । कफरक्तपित्तनाशित्वम् । अग्निदीप्तत्वञ्च । इति राजवल्लभः ॥ पक्षिविशेषः । तत्पर्य्यायः । तेजलः २ ॥ तस्य मांसं शुक्रवृद्धिकरम् । इति राजनिर्घण्टः ॥ तित्तिरिपक्षी । इति चिकाण्डशेषः ॥ (यथा,—

"कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरः । कपिञ्जल इति ख्यातो लोके कपिञ्जतित्तिरः" ॥ इति भावप्रकाशः ॥

"पित्तश्लेष्मविकारेषु सरक्तेषु कपिञ्जलाः । मन्दवातेषु शस्यन्ते श्लैष्मधार्य्यबाधत्वात्" ॥ इति चरकः । तथा सुश्रुतश्च ।

"रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः । कफोत्थेषु च रोगेषु मन्दवाते च शस्यते" ॥ ऋषिकुमारभेदः । अयन्तु श्वेतकेतुपुत्रस्य पुण्डरीकस्य बन्धुः । यथा कादम्बर्य्यां महाश्वेतोपाख्याने ।

"सखे ! कपिञ्जल ! किं मामन्यथा सम्भावयसि" ॥)

कपितैलं, क्ली, (कपिभिर्वानरैः शिलायाः विदारणात् सम्पादितं यत् तैलम् ।) तुरुष्कनामगन्धद्रव्यम् । इति भावप्रकाशः ॥ (तथाचोक्तम् ।

"सिक्थकस्तु तुरुष्कः स्याच्चतो यवनदेशजः । कपितैलञ्च सङ्ख्यातं तथा च कपिनामकः" ॥)

कपित्थः, पुं, (कपिः तिष्ठति फलप्रियत्वात् लोभात् वा यत्र । कपि + स्था + कः । एषोदरादित्वात् सलोपे साधुः ।) वृक्षविशेषः । कत्बेल इति भाषा तत्पर्य्यायः । दधित्थः २ ग्राही ३ मन्मथः ४ दधिफलः ५ पुष्पफलः ६ दन्तशठः ७ । इत्यमरः २ । ४ । २१ ॥ कगित्थः ८ । इति भरतः ॥ मालूरः ९ मङ्गल्यः १० नीलमल्लिका ११ ग्राहिफलः १२ चिरपाकी १३ ग्रन्थिफलः १४ कुचफलः १५ कपीरुः १६ गन्धफलः १७ दन्तफलः १८ करभवल्लभः १९ काठिन्यफलः २० करञ्जफलकः २१ । अस्यामफलगुणाः । अम्लत्वम् । उष्णत्वम् । कफनाशित्वम् । ग्राहित्वम् । वायुवर्द्धकत्वम् । कण्ठरोगजिह्वाधिकजड़ताकारित्वम् । त्रिदोषवर्द्धकत्वम् । विषहरत्वम् । रोचकत्वञ्च । तत्पक्वफलगुणाः । दोषत्रयहरत्वम् । मधुरास्वरसत्वम् ।

गुरुत्वम्। श्वासवमिश्वमलक्षमहरत्वम्। हिक्कापनोदक्षमत्वम्। ग्राहित्वम्। रुचिप्रदत्वम्। ततः सर्व्वदा सेव्यम्। इति राजनिर्घण्टः॥

"कपित्थमामं कण्डघ्नं विषघ्नं ग्राहि वातलम्।
मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम्"॥

इति राजवल्लभः॥ (तथा च चरके॥

"कपित्थं विषकण्ठघ्नमामं संग्राहि वातलम्॥
मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम्।
परिपक्वं सदोषघ्नं विषघ्नं ग्राहि गुर्व्वपि"॥

"कुशद्वीपेश्वरस्य राज्ञो ज्योतिष्मत्प्रभृतस्य सप्तपुत्राणामेकतमः। तद्वर्षमपि तन्नाम्ना ख्यातम्। तद्विवरणन्तु विष्णुपुराणे २ यांशे ४ अध्याये द्रष्टव्यम्")

कपित्थत्वक्, क्ली, (कपित्थस्य मालूरस्य त्वगिव त्वग् यस्य।) एलवालुकम्। इति राजनिर्घण्टः॥ (एलवालुकशब्देऽस्य विशेषगुणा ज्ञातव्याः॥)

कपित्थपर्णी, स्त्री, (कपित्थस्य पर्णमिव पर्णं पत्रं यस्याः। कपित्थपर्ण+गौरादित्वात् ङीष्।) वृक्षविशेषः। कपित्थानीति ख्याता। तत्पर्य्यायः। विरजा २ सुरसा ३ चित्रपत्रिका ४। इति रत्नमाला॥

कपित्थास्यः, पुं, (कपित्थवत् कपित्थफलवत् वर्त्तुलाकारं आस्यं मुखं यस्य।) वानरविशेषः। तत्पर्य्यायः। गोलाङ्गूलः २ दधिग्रीवः ३ नगाटनः ४। इति चिकाण्डशेषः॥

कपिध्वजः, पुं, (कपिर्हनूमान् ध्वजे यस्य सः। प्रतिज्ञापालनपरतन्त्रेण महावीरेण हनूमताधिष्ठितध्वजत्वात् वानरलाञ्छनध्वजत्वाद्वा तथात्वम्।) अर्জ্জুनः। इति चिकाण्डशेषः॥
(यथा गीतायाम्। १। २०।
"अथ व्यवस्थितान् दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः"॥)

कपिनामा, [न्] पुं, (कपेर्नामेव नाम यस्य।) सिल्हकः। इति रत्नमाला॥ (स्वार्थे कन् प्रत्ययेनास्य प्रमाणमुक्तं भावप्रकाशे यथा,—
"कपित्तैलञ्च संख्यातं तथा च कपिनामकः"॥)

कपिपिप्पली, स्त्री, (कपिः कपिवत् रक्तवर्णा पिप्पलीव रक्तवर्णपिप्पलीत्युच्यते यावत्।) रक्तापामार्गः। इति वैद्यकम्॥ सूर्य्यावर्त्तवृक्षः। इति रत्नमाला॥

कपिप्रभा, स्त्री, (कपिष्वपि प्रभा निजप्रभूतगुणप्रसारणं यस्याः। कपीनामपि जगद्वयनादस्यात्तथात्वम्।) कपिकच्छूः। इति शब्दरत्नावली॥

कपिप्रभुः, पुं, (कपीनां हनूमदादीनां प्रभुः नियन्ता।) रघुनाथः। इति शब्दरत्नावली॥ (वानरराजः बाली सुग्रीवश्च॥)

कपिप्रियः, पुं, (कपीनां प्रियः।) आम्रातकः। इति राजनिर्घण्टः॥ कपित्थः। इति जटाधरः॥

कपिरथः, पुं, (कपिर्हनूमान् रथ इव वहनकारी वाहनं वा यस्य।) श्रीरामः। इति शब्दरत्नावली॥ (कपिः महावीरः हनूमान् रथे यस्य इति व्युत्पत्त्या कपिलाञ्छितध्वजः अर्জ্জुनः॥)

कपिलः पुं, (कमु कान्तौ "कमेः पच्च"। उणां १।

५६। इलच्। पच्चान्तादेशः।) मुनिविशेषः। स तु ज्ञानभक्तिसांख्ययोगप्रचारार्थभगवदवतारः। कर्दमप्रजापतेरौरसाद्देवहूतिगर्भजातः। इति श्रीभागवतम्॥ (यथा गीतायां १०। २६।
"गन्धर्व्वाणां चित्ररथः सिद्धानां कपिलो मुनिः"॥
सगरराजसन्ततिध्वंसकारी रसातलस्थः कपिलो मुनिः केषाञ्चिन्मते साङ्ख्ययोगप्रचारकर्त्ता न। अयन्तु अपरः कश्चित् खनामख्यातो मुनिः। एतदर्थं प्रमाणं यथा, रघुः ३। ५०।

"अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः"॥)

अग्निः। कुक्कुरः। इति हेमचन्द्रः॥ सिक्थकनामगन्धद्रव्यम्। इति रत्नमाला॥ पिङ्गलवर्णः। तद्युक्ते त्रि। इत्यमरः। १।५।१६—१९॥ नीलपीतः। कपिलः। इति रभसः॥ "कपिलो रोचनाच्छविरित्यन्ये"। इतिभरतः॥ (यथा, महाभारते ३।३।२४।
"अनन्तः कपिलो भानुः कामदः सर्व्वतोमुखः"॥
महादेवः। यथा तत्रैव १३। १७। ९७।
"कपिलः कपिशः शुक्लः आयुश्चैव परोऽपरः"॥
विष्णुः। यथा तत्रैव १३। १४९। १०९।
"सनात्सनातनतमः कपिलः कपिरव्ययः"॥
नागविशेषः। यथा, हरिवंशे ३। ११४।
"शङ्खश्च शङ्खपालश्च कपिलो वामनस्तथा"।
दानवभेदः। यथा तत्रैव ३। ८२।
"अयोमुखः शम्बरश्च कपिलो वामनस्तथा"॥)

कपिलद्युतिः, पुं, (कपिला रक्ता पिङ्गलवर्णा वा द्युतिः यस्य।) सूर्य्यः। इति शब्दचन्द्रिका॥

कपिलद्राक्षा, स्त्री, (कपिला द्राक्षा।) द्राक्षाविशेषः। तत्पर्य्यायः। मृद्वीका २ गोस्तनी ३ कपिलफला ४ अमृतरसा ५ दीर्घफला ६ मधुवल्ली ७ मधुफला ८ मधुली ९ हरिता १० हारहारा ११ सुफला १२ मृद्वी १३ द्विमोत्तरा १४ पथिका १५ हेमवती १६ शतवीर्य्या १७ काश्मरी १८। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। हृद्यत्वम्। मदहर्षदाहत्वम्। दाहमूर्च्छाज्वरश्वासतृष्णाछर्द्यासनाशित्वञ्च। इति राजनिर्घण्टः॥ (मृद्वीकाशब्देऽस्या गुणादयो ज्ञातव्याः॥)

कपिलद्रुमः, पुं, (कपिलः कपिलवर्णो द्रुमः।) काञ्चीनामसुगन्धिकाष्ठम्। इति शब्दचन्द्रिका॥

कपिलाधारा, स्त्री, (कपिलानां धारा इव दुग्धधारा-सदृशी शुद्धा धारा यस्याः। यद्वा कपिलानां दुग्धधाराभिः सम्भृता निर्म्मला धारा यस्याः। संज्ञायां ङाप्पोरिति पाणिनिसूत्रानुसारेण ह्रस्वः।) स्वर्णदी। तीर्थभेदः। इति हेमचन्द्रः॥

कपिलाश्रिंशपा, स्त्री, (कपिला रक्तपीतमिश्रितवर्णा श्रिंशपा।) श्रिंशपावृक्षविशेषः। तत्पर्य्यायः। कपिला २ पीता ३ सारिणी ४ कपिलाह्वी ५ भस्मगर्भा ६ कृष्णिंशपा ७। अस्या गुणाः। तिक्तत्वम्। शीतवीर्य्यत्वम्। श्लेष्मवातपित्तज्वरच्छर्द्दिहिक्कानाशित्वञ्च इति राजनिर्घण्टः॥

कपिला, स्त्री, (कपिलो वर्णोऽस्त्यस्याः अर्শ आद्यच्। टाप् च।) पुण्डरीकनामदिग्गजपत्नी। इत्यमरः।

१। ३। ४॥ भस्मगर्भा शिंशपा। रेणुकानाम गन्धद्रव्यम्। इत्यमरः। २। ६३—१२०॥
(यथाह राजवल्लभः।
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा।
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका"॥
अस्या गुणादिकं रेणुकाशब्दे द्रष्टव्यम्॥) गोविशेषः॥ इति हेमचन्द्रः॥ सा तु सवर्णवर्णा। इति पुराणम्॥ (यथा, महाभारते १। ८४। ८२।
"कपिला सहवत्सा वै पर्व्वते विचरत्युत"॥
दक्षकन्या। यथा, महाभारते १। ६५। १२॥
"क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः"॥
कपिलवर्णयोगात्। अनुदात्तत्वाभावात् वर्णादिति न ङीप्।) मद्यकन्या। शिंशपा। राजरीतिः इति राजनिर्घण्टः॥ नदीविशेषः। यथा,—
"कज्जला चलशैलाच्च पूर्ब्बस्मिन् शुभपर्व्वतः।
पुण्या सह पुरा रेमे यत्र शक्रः सुरेश्वरः॥
तत्पूर्ब्बस्यां महादेवी नदी कपिलसंज्ञिता।
तस्यां स्नात्वा नरो गङ्गास्नानजं फलमाप्नुयात्"॥
इति कालिकापुराणे ८१ अध्यायः॥ (तीर्थविशेषः। यथा, महाभारते ३। ८३। ४५।
"कपिलातीर्थमासाद्य ब्रह्मचारी समाहितः।
तत्र स्नात्वार्च्चयित्वा च पितॄन् स्नान् दैवतान्यपि।
कपिलानां सहस्रस्य फलं विन्दति मानवः"॥
कपिलानां पयस्विनीधेनूनाम् इत्यर्थः॥ पिङ्गलवर्णा। यथा, विष्णुपुराणे २यांशे। ४। ११।
"कपिलाश्चाश्वयाः पीताः शुभ्राश्चैव पृथक् पृथक्"॥
कपिला कन्या गोपयन्तया यदुक्तं मनुना ३। ८।
"नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्"॥)

कपिलाक्षी, स्त्री, (कपिलं अक्षि तद्वत् पुष्पं यस्याः।) मृगेर्व्वारुः। कपिलशिंशपा। इति राजनिर्घण्टः॥

कपिलाश्वः, पुं, (कपिलाः कपिलवर्णाः अश्वाः यस्य।) इन्द्रः। इति चिकाण्डशेषः॥

कपिलोमफला, स्त्री, (कपिलोमवत्यपि फलति कण्डूप्रदानाय प्रभवति या।) कपिकच्छूः। इति राजनिर्घण्टः॥ (शूकशिम्बीशब्देऽस्या गुणा ज्ञेयाः॥)

कपिलोमा, स्त्री, (कपिलोमवत् लोममञ्जरी यस्याः।) रेणुका। इति राजनिर्घण्टः॥ (विस्तृतिस्तु रेणुका शब्दे द्रष्टव्या॥)

कपिलोहं, क्ली, (कपिरिव कपिवर्णतुल्यं लोहम्।) पित्तलम्। इति हेमचन्द्रः॥ (पित्तलशब्देऽस्य गुणा ज्ञातव्याः॥)

कपिल्लिका, स्त्री, (कपिवर्णा वल्लिका। पृषोदरादित्वात् वर्णोपे साधुः।) गजपिप्पली। इति रत्नमाला॥ (गजपिप्पलीशब्देऽस्या गुणा ज्ञेयाः॥)

कपिवक्त्रः, (कपेर्वानरस्य वक्त्रमिव वक्त्रं यस्य भागिनेयपर्व्वतमुनिशापप्रभावात् मातुलस्य देवर्षेस्तथात्वम्।) नारदः। इति चिकाण्डशेषः॥ (यथा हि नारदस्य कपिवक्त्रत्वं जातम् तदुच्यते।

पुरा किल मातुलभागिनेयौ द्वादशिमत्तमौ नारदपर्व्वतौ मानुषेषु सम्प्रीत्या विहर्त्तुकामौ देवलोकादिहागतवन्तौ। आगत्य च सञ्जयं राजानमभ्येत्य तदाज्ये ऊषतुः। आसीच

जिज्ञासयोः समयः शुभमशुभं वा हृदि जातं सङ्कल्पं परस्परेण कथनीयमिति। अथ कदाचित् राजा तावभ्युपेत्य स्वसुतां तदाराधनाय नियोजितवान्। अथ गच्छति काले नारदस्तु कन्दर्पबाणवशगः राजदुहितरि मनो निदधे। धर्म्मविदपि नारदः व्रीड़मानः तीव्रमिदं मनोभावं भागिनेयाय न शशंस। भागिनेयः पर्व्वतस्तु इङ्गितादिभिर्मातुलं कामार्त्तं वीक्ष्य समयभङ्गादतिक्रुद्धः "इयं नृपसुता तव भार्य्या भविष्यति त्वमपि वानरमूर्त्तिधरोऽत्र विचरिष्यति" इति तं शशपवान्। एतच्छापात् खलु नारदो वानरमुख आसीत् इति पौराणिकी कथा अत्र अनुसन्धेया॥ विस्तृतिस्तु महाभारते शान्तिपर्व्वणि ३० अध्याये द्रष्टव्या॥)

कपिवल्ली, स्त्री, (कपिरिव कपिलोमसदृशी वल्ली।) गजपिप्पली। इत्यमरः। १। ५। १६॥

कपिशः पुं, (कपिः वर्णविशेषः अस्त्यस्य कपिनामास्त्यस्ति वा लोमादित्वात् शः।) श्यावः। कृष्णपीतमिश्रितवर्णः। तद्युक्ते च। इत्यमरः १।५।१६॥ (यथा, रघुः १२। २८।

"सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः।
अतिरुन्मार्गमारेभे रामस्येन्दोरिव ग्रहः"॥

सर्व्ववर्णमयत्वात् शिवः। यथा, महाभारते १३। शिवसहस्रनामकीर्त्तने १७। ९७।

"कपिलः कपिशः शुक्लः आयुश्चैव परोऽपरः"॥)

सिक्थकनाम गन्धद्रव्यम्। इति मेदिनी॥

कपिशाङ्गनः, पुं, (कपिशं अङ्गनं कपिशयुक्तं अङ्गनं वा यत्र। अङ्गनस्य कृष्णवर्णतया तस्य श्वेतवर्णत्वाच्च एवमुच्यते।) शिवः। इति त्रिकाण्डशेषः॥

कपिशापुत्रः पुं, (कपिशायाः मदोन्मत्तायाः पिशाच्याः पुत्रः।) पिशाचः। इति शब्दमाला॥

कपिशी, स्त्री, (कपिश इति वर्णवाचितया ङीष्।) माधवी। मदिरा। इति मेदिनी जटाधरश्च॥ (हलायुधमतेऽस्य स्त्रीत्वमपि दृश्यते॥)

कपिशीका, स्त्री, (कपिश + स्वार्थे बाहुलकात् ईकन् टाप् च।) मदिरा। इति त्रिकाण्डशेषः॥

कपिशीर्षं, क्ली, (कपीनां प्रियस्थानं शीर्षं वृक्षप्राकारादीनां शिर्षदेश्य एव कपिप्रियत्वात् प्रसिद्धः। शाकपार्थिवादित्वात् समासः।) प्राकाराग्रम्। तत्पर्य्यायः॥ खोड़कशीर्षकम् २ क्रयशीर्षम् ३। इति त्रिकाण्डशेषः॥

कपिशीर्षक, क्ली, (कपीनां शीर्षवर्णवत् कायति प्रकाशते। कै + कः।) हिङ्गुलम्। इति शब्दचन्द्रिका॥ (हिङ्गुलशब्दे अस्य गुणादयो ज्ञातव्याः॥)

कपीकच्छुः, पुं, (कपिकच्छुरिति संज्ञायां वा दीर्घः।) कपिकच्छुः। इति शब्दरत्नावली॥

कपीज्यः, पुं, (कपिभिर्वानरैरतिप्रियत्वात् इज्यते पूज्यते। कपि + यज् + क्यप्।) क्षीरिकावृक्षः। इति जटाधरः॥ (रामचन्द्रः। इति व्युत्पत्त्यर्थः॥)

कपीतः, पुं, (कं जलं तत्तुल्यश्वेतवर्णं अपि इतः प्राप्तः अपेरल्लोपः। यद्वा कपिभिरितः प्रियत्वेन प्राप्तः।) श्वेतवृक्षवृक्षः। इति रत्नमाला॥

कपीतनः, पुं, (कपीनां ईं लक्ष्मीं तनोति विस्तारयतीति। कपि + ईं + तन् + पचाद्यच्। कपीनां कपेर्वर्णस्य वा तनः। अन्येषामपीति। ६। ३। १३७। दीर्घः।) आम्रातकवृक्षः। गर्दभाण्डवृक्षः। शिरीषवृक्षः। इत्यमरः। २। ४। २७॥ अश्वत्थवृक्षः। इति मेदिनी। गुवाकवृक्षः। विल्ववृक्षः। इति शब्दरत्नावली॥ (आम्रातकशब्दे शिरीषशब्दे अश्वत्थशब्दे विल्वशब्दे चास्य गुणादयो ज्ञातव्याः॥)

कपीन्द्रः, पुं, (कपिश्चासौ इन्द्रश्चेति कपिरिन्द्र इव इति वा।) हनूमान्। इति शब्दरत्नावली॥ (कपीनां वानराणामिन्द्रः। सुग्रीवः। वाली। इति रामायणम्॥ विष्णुः। यथा, महाभारते। १३। विष्णुसहस्रनामकीर्त्तने १४९। ६६।

"शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः"॥)

कपीष्टः, पुं, (कपीनां इष्टः प्रियः।) राजादनीवृक्षः। कपित्थः। इति राजनिर्घण्टः॥ (कपित्थशब्देऽस्य गुणादय उक्ताः॥)

कपोतः, पुं, (को वायुः पोतः गौरिवास्य। यद्वा कः वर्णे + "कवेरोतच् पक्ष" । उणां। १। ६३। इति ओतच् + वस्य पश्च।) गृहकपोतः। पायरा इति भाषा। तत्पर्य्यायः। कलरवः २ पारावतः ३। इत्यमरः। २। ५। १४॥ पारापतः ४ क्रव्यः ५ रक्तलोचनः ६। इति रभसः॥ गृहकुक्कुटः ७। यथा,—

"मार्जारस्तिष्ठते दुःखं यादृशं गृहकुक्कुटे"।
इति प्रयोगात् इति सारसुन्दरी॥
(यथा, रामायणे। ५। ६१। ४।

"श्रूयते हि कपोतेन शत्रुः शरणमागतः।
अर्च्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः"॥)

वनकपोतः। घुघु इति भाषा। तत्पर्य्यायः। चित्रकण्ठः २। इति मेदिनी॥ कोकदेवः ३ धूसरः ४ धूम्रलोचनः ५ दहनः ६ अग्निसहायः ७ भीषणः ८ गृहनाशनः ९। तन्मांसगुणाः। वीर्य्यबलवृद्धिकारित्वम्। स्वादुत्वम्। कफपित्तास्रनाशित्वञ्च। इति राजनिर्घण्टः॥ मधुरत्वम्। शीतत्वम्। कषायत्वम्। वातपित्तनाशित्वम्। सार्षपतैलभर्জनेन विरूक्षत्वञ्च। इति राजवल्लभः॥
(अस्य गुणान्तरं यथा,—

"पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः।
संग्राही शीतलस्तज्ज्ञैः कथितो वीर्य्यवर्द्धनः"॥
इति भावप्रकाशः॥

"कपोतो वृंहणो बल्यो वातपित्तविनाशनः।
तर्पणः शुक्रजननो हितो नृणां रुचिप्रदः"॥
इति हारीतः॥ कपोतविशेषस्य गुणाः॥ यथा,—

"गुरुः सलवणः काशकपोतः सर्व्वदोषहृत्"॥
इति वाभटः॥

"कषायमधुराः शीता रक्तपित्तनिवर्हणाः।
विपाके मधुराश्चैव कपोता गृहवासिनः॥ १॥
तेभ्यो लघुतराः किञ्चित् कपोता वनवासिनः।
शीताः संग्राहिणश्चैव स्वल्पं मदुतराश्च ते"॥ २॥
इति चरकः॥

"सर्व्वदोषहरस्तेषां भेदाग्नी मलदूषकः।
कषायस्वादुलवणो गुरुः काशकपोतकः"॥
इति सुश्रुतः॥)

कपोतकं, क्ली, (कपोत इव कपोतवर्णवत्त्वायति प्रकाशते। कै + कः।) सौवीराञ्जनम्। इति राजनिर्घण्टः॥

कपोतचरणा, स्त्री, (कपोतचरणः चरणाकारो अस्त्यस्याः।) नलीनामगन्धद्रव्यं। इति जटाधरः॥

कपोतपालिका, स्त्री, (पालयति इति। पाल रक्षणे + कर्त्तरि ण्वुल्। कपोतानां पालिका कपोतान् पालयति इति वा कर्म्मण्यण्।) विटङ्कः। सौधादिप्रान्तकाष्ठादिरचितपक्षिस्थानम्। इत्यमरः। २। २। १५॥ पायरार खोप इति भाषा॥

कपोतपाली, स्त्री, (कपोतान् पालयति इति। पाल कर्म्मण्यण् ङीप् च। केचित्तु पाल + अच् गौरादित्वात् ङीष्।) कपोतपालिका। इति हलायुधः॥ (यथा माघे ३। ५१।

"चित्रांसया क्षत्रिमपत्रिपङ्क्तेः
कपोलपालीषु निकेतनानाम्"॥)

कपोतवङ्गा, स्त्री, (कपोतो वङ्ग्यते प्रत्यर्थतेऽनया। वन्च + करणे घञ् कुत्वं टाप् च।) ब्राह्मीवृक्षः। इति राजनिर्घण्टः॥ (यथा सुश्रुते।

"कपोतवङ्गामूलं हि पिबेदश्वसुरादिभिः"॥)

कपोतवर्त्मी, स्त्री, (कपोतस्य वर्त्म इव वर्त्मी यस्याः गौरादित्वात् ङीष्।) सूक्ष्मैला। इति राजनिर्घण्टः॥ (सूक्ष्मैलाशब्देऽस्या विशेषो ज्ञेयः॥)

कपोतवाशा, स्त्री, (कपोतपाद इव येा वाशः तद्वदाकारोऽस्याः।) नलिकानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

कपोतसारं, क्ली, (कपोतः कपोतवर्ण इव सारः कृष्णवर्णो यत्र।) सोतोऽञ्जनम्। इति राजनिर्घण्टः॥

कपोताङ्घ्रिः, स्त्री, (कपोतस्य पक्षिण इव।) नलीनामगन्धद्रव्यम्। इत्यमरः। २। ४। १२१॥

कपोताभः, पुं, (कपोतस्य आभा इव आभाऽस्य।) कपोतवर्णः। इति हेमचन्द्रः॥ (मूषिकभेदः।

"मूषिकश्च कपोताभस्त्वेवाष्टादश स्मृताः"।
इति सुश्रुतः॥)

कपोतारिः, पुं, (कपोतानां अरिः शत्रुः।) श्येनपक्षी। इति शब्दरत्नावली॥

कपोलः, पुं, (कम्यते "कपिगडि कटिपटिभ्य ओलच्"। उणां १। ६७। इति ओलच् कपि इति निर्देशात् नलोपः। कं सुखं पोलयतीति वा पुलमहत्त्वे कर्म्मण्यण्।) हनुसन्धिसन्निधिभागः। गाल इति भाषा। तत्पर्य्यायः। गण्डः २। इत्यमरः। २। ६। ९०॥ गल्लः ३। इति राजनिर्घण्टः॥ (यथा रघुः। ४। ६८।

"तत्र क्षणावरोधानां भर्त्तृषु व्यक्तविक्रमम्।
कपोलपाटलादेशि बभूव रघुचेष्टितम्"॥)

कफः, पुं, (केन जलेन फलति इति। फल निष्पत्तौ "अन्येभ्योऽपि" ३। २। १०१। इति डः। केशिरसि फलति वा प्राग्वदुः।) शरीरस्थधातुविशेषः। तत्पर्य्यायः। श्लेष्मा २ संघातः ३ सौम्यधातुः ४

घनः ५ बली ६। अस्य गुणाः। गुरुत्वम्। सन्धिविश्लेषकारित्वम्। मृदुत्वम्। प्रमर्दनत्वम्। स्निग्धत्वम्। कठुत्वम्। शीतत्वम्। जड़ताकारित्वम्। शुक्लत्वम्। शीते वसन्ते निशामुखे पूर्ब्बाह्णे भुक्ते च प्रकोपणत्वम्। इति राजनिर्घण्टः॥*॥ अस्य प्रकोपहेतुः। "गुरुमधुरस्रसातिस्निग्धदुग्धेक्षुभक्ष्यदधिदिननिद्रापूपसर्पिःप्रपूरैः। तुहिनपतनकाले श्लेष्मणः संप्रकोपः प्रभवति दिवसादौ भुक्तमात्रे वसन्ते"॥•॥ तस्य कर्म्माणि। "स्तमित्यं मधुरास्यता स्निग्धिरता शैत्यं प्रसेको मलाधुर्य्यं स्थिरता रसस्य लवणः कण्डूरतिस्वप्नता। आलस्यं चिरकारिता कठिनता श्लेष्मोद्गिरणस्निग्धता तन्द्राहृल्लासगुरुता एताः कफोत्था रुजः"॥*॥

अस्य प्रशमताकारणम्।

"गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः। श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः"॥ "रूक्षोत्तारकषायतिक्तकटुकव्यायामनिष्ठीवनस्त्रीसेवाध्वनियुद्धजागररतिक्रीड़ापदाघातनम्। धूमात्युष्णसिरोविरेकवमनस्वेदोपनाहादिकं पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं जयेत्"॥

स च पञ्चविधो यथा,—

"अवलम्बक इत्येकः क्लेदकः श्लेषकोऽपरः। बोधकस्तर्पकश्चेति श्लेष्मा पञ्चविधः स्मृतः"॥*॥

एतेषां लक्षणानि यथा,—

"कफधाम्नान्तु श्लेष्माणां यत्करोत्यवलम्बनम्। ततोऽवलम्बकाख्यातिं श्लेष्मा प्राप्तोत्युरःस्थितः॥१॥ आमाशयाश्रितः सोऽन्नक्लेदनात् क्लेदकः स्मृतः॥२॥ श्लेषकश्लेषणात् सन्धेः स च सन्धौ व्यवस्थितः॥३॥ रसनावस्थितश्चैष बोधको रसबोधनात्॥४॥ शिरसि प्रस्थितश्चासौ तर्पको नेत्रतर्पणात्॥५॥"•॥

अस्य स्थानानि।

"उरःकण्ठशिरः क्लोमपर्ब्बणामाशयो रसः। मेदो घ्राणञ्च जिह्वा च कफस्थानमुरः परम्"॥*॥

(सन्धिसंश्लेषणस्नेहरोपणपूरणबलश्लेष्मार्थत्वात् श्लेष्मा पञ्चधा प्रविभक्त उदकवन्मेघवानुग्रहं करोति। इति तु प्रकारभेदेनास्य कार्य्यमुक्तम्॥

अतः परमस्य क्षीणलक्षणमाह।

श्लेष्मक्षये कण्ठतालुहृदय आमाशयेतराश्रयशिरसां शून्यता सन्धिशैथिल्यं क्लमा दौर्ब्बल्यं प्रजागरणञ्च। तत्र स्वयोनिवर्द्धनद्रव्याण्येव प्रतीकारः॥ अतःपरमस्यातिवृद्धौ यल्लक्षणं तदाह॥

श्लेष्मवृद्धौ शैत्यं श्लैत्यं गौरवमवसादस्तन्द्रानिद्रासन्ध्यस्थिविश्लेषश्च॥)

तत्प्रकृतिकस्य लक्षणम्।

"गम्भीरबुद्धिः स्थूलाक्षः स्निग्धकेशो महाबलः। स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः"॥*॥

(अपरञ्च यथाह हारीतः।

"सुस्निग्धवर्णः सितनेत्रदीप्तः श्यामः सुकेशो न च दीर्घरोमा। गम्भीरबुद्धिः श्रुतशास्त्रनिद्रा-तन्द्राप्रियस्तिक्तकटूष्णभोजी॥ सुमांसलः स्निग्धरसप्रियश्च

संगीतवाद्योऽतिसहिष्णुचित्तः। व्यायामशीलो रतलालसोऽसौ भवेत् कफात्मप्रकृतिर्मनुष्यः॥ शुक्लाक्षः स्थिरकुटिलातिनीलकेशो बह्वीवान् जलदमदङ्गसिंहघोषः। सुप्तः सन् सकमलहंसचक्रवाकान् सम्पश्येदपि च जलाशयान् मनोज्ञान्॥ रक्तान्तनेत्रः सुविभक्तगात्रः स्निग्धच्छविः सत्त्वगुणोपपन्नः। श्लेष्मोत्तमोमानयिता गुरूणां ज्ञेयो बलासप्रकृतिर्मनुष्यः॥ दृढ़ग्राह्यमतिः स्थिरमित्रधनः परिगण्य चिरात् प्रददाति बहु। परिनिश्चितवाक्यपदः सततं गुरुमानकरश्च भवेत् स सदा॥

ब्रह्मरुद्रेन्द्रवरुणैः सिंहाश्वगजगोवृषैः। तार्क्षहंससमानूकाः श्लेष्मप्रकृतयो नराः"॥

इति सुश्रुतश्च॥

श्लेष्मस्थानान्यत ऊर्द्धं वक्ष्यामः। तत्रामाशयपित्ताशयस्योपरिष्टात् तत्प्रत्यनीकत्वादूर्द्धगतित्वात् तेजसत्वच्च इवादितस्य स चतुर्विधस्याहारस्याधारः। स च तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसंघातः सुखजरश्च भवति।

"माधुर्य्यात् पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च। आमाशये सम्भवति श्लेष्मामधुरशीतलः"॥

स तत्रस्थ एव स्वप्नतया शेषाणां श्लेष्मस्थानानां शरीरस्य चोदककर्म्मणानुग्रहं करोति। उरस्यः स्निग्धसन्धारणमात्मवीर्य्येणाग्नरससहितेन हृदयावलम्बनं करोति। जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वात् सम्यग्रसज्ञाने वर्त्तते। शिरस्थः स्नेहसन्तर्पणाधिष्ठितत्वादिन्द्रियाणामात्मवीर्य्येणानुग्रहं करोति। सन्धिस्थस्तु श्लेष्मा सर्व्वसन्धिसंश्लेषात् सर्व्वसन्धनुग्रहं करोति॥ भवति चात्र।

"श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च। मधुरस्तवविदग्धः स्यादिदग्धो लवणः स्मृतः"॥)

तस्याविज्ञतस्य कर्म्म।

"स्नेहो बन्धः स्थिरत्वञ्च गौरवं क्षमता बलम्। क्षमा धृतिरलोभश्च कफकर्म्माविकारजम्॥*॥

इति सुखबोधः॥ पेनः। यथा अग्निकफः इत्यादि॥

कफकूर्चिका, स्त्री, (कफं कूर्चयति विज्ञतं करोतीति। कफ+कूर्च+विकारे+स्वुल्+टाप् इत्वञ्च।) जाला। जाल् युतु सिकनि इत्यादि भाषा॥ तत्पर्य्यायः। श्लेष्मिका २ स्यन्दिनी ३ जाला ४ आस्रावः ५। इति हेमचन्द्रः॥

कफघ्नी, स्त्री, (कफं कफविज्ञतिं हन्तीति। कफ+हन्+टक्+ङीप्।) हपुषाभेदः। इति राजनिर्घण्टः॥ (यथा, राजनिर्घण्टे गुडूच्यादिवर्गचतुर्थे।

"डीहग्रपुर्विषघ्नी च कफघ्नी चापराजिता"॥)

कफजिः, पुं, स्त्री, (केन सुखेन गच्छति अनायासेन सङ्कोचविकोचगत्वं प्राप्नोति स्मरति वा। गम गतौ, स्मर सञ्चलने इति वा धातोः इन् एषोदरादित्वात् साधुः।) कफोजिः। इति हेमचन्द्रः॥

कफवर्द्धनः, पुं, (कफं कफजनितं विकारं वर्द्धयतीति। कफ+वृध्+णिच्+ल्युः।) पिण्डीतगरवृक्षः। इति चिकित्साशेषः॥ श्लेष्मवर्द्धिकारके त्रि। इति वैद्यकं॥ (दिवास्वप्नाद्यायामाजसमधुरास्लवणगुरुस्निग्धगुरुपिच्छिलाभिष्यन्दिहायनकयवनैषधेक्षुकटमाषमहामाष-गोधूमतिलपिण्याकविष्टम्भिदधिदुग्धक्षीरापायसेक्षुविकारानूपौदकमांसवसाविसमृणालकशेरुकभृष्टाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्माप्रकोपमापद्यते॥

"सशीतैः शीतकाले च वसन्ते च विशेषतः। पूर्ब्बाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति"॥

इति सुश्रुतः॥)

कफविरोधि, क्ली, (कफं विशेषेण रुणद्धीति। कफ+वि+रुध्+णिनिः।) मरिचम्। इति राजनिर्घण्टः॥ (श्लेष्मनाशके, त्रि। मरिचशब्देऽस्य गुणा ज्ञेयाः॥)

कफान्तकः, पुं, (कफस्य अन्तकः नाशकः। यद्वा। कफं अन्तयतीति। कफ+अन्त+करोत्यर्थे णिच्+ण्वुल्।) वर्व्वुरवृक्षः। इति राजनिर्घण्टः॥ (अस्य गुणादिकं वर्व्वूरशब्दे द्रष्टव्यम्॥ कफनाशके, त्रि॥)

कफारिः, पुं, (कफस्य अरिः दमयितेत्यर्थः।) मुस्तः। इति राजनिर्घण्टः॥ (श्लेष्मनाशके, त्रि। मुस्तशब्देऽस्य विशेषो ज्ञेयः॥)

कफी, [न्] त्रि, (कफोऽस्यास्य। कफ+अस्त्यर्थे। "इन्दोपतापेति"। ५। २। १२८। इनिः।) श्लेष्मयुक्तः। तत्पर्य्यायः। श्लेष्मलः २ श्लेष्मलः ३। इत्यमरः। २। ६। ६०॥ गजे पुं। इति शब्दरत्नावली॥

कफेलुः, त्रि, (कफं लाति आदत्ते इति। कफ+ला आदाने+"सन्दू-दृग्धू-जम्भु-क्रम्भू-कफेलु-कर्कन्धू-दिधिषु"। उणां १। ६५। इति कुप्रत्ययान्तो निपातितः।) कफयुक्तः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (पुं, श्लेष्मातकवृक्षः। "कफेलुः श्लेष्मातकतरौ पुंस्यौषधिमञ्जरी"। इति "उज्ज्वलदत्तधृतवचनात्"॥ १। ६५॥)

कफोजिः, पुं, (कं सुखं स्फोरयति। स्फुर स्फुरणे सञ्चलने च औणादिकात् अच इः। अथवा केन सुखेन गच्छति स्फुरतीति वा। स्फुर, गम वा+इन् उभयतः एषोदरादित्वात् साधुः।) सुजमध्यग्रन्थिः। कनुइ इति भाषा॥ तत्पर्य्यायः। कुर्परः २। इत्यमरः। २। ६। ८०॥ (कुर्परशब्दे ऽस्य विशेषो ज्ञेयः॥)

कव, ऋ ङ स्तुतौ। वर्णे। इति कविकल्पद्रुमः। (भ्वां-आत्मं-सकं-सेट्-ऋदित्।) वर्णः शुक्लादिक्रिया। ऋ अचकावत्। ङ कवते कविर्विद्वान्। कवते पतिमां चित्रकारः। इति दुर्गादासः॥

कवन्धं, क्ली, (कस्य प्राणवायोः बन्धः आश्रयः। जलयानमेव प्राणधारणकारणम्। कदापि प्राणस्थितिः जलं विना नैव स्यात्। यथा, स्मृतिः।

"मद्यदग्राहानि माऽग्नीः काममपः पिबापोमयः प्राणो न पिबतस्ते विच्छेत्स्यते"।) जलम्। इत्यमरः। १। १०। ४॥ (यथा, ऋग्वेदे ५। ८५। ३॥ "नीचीनबारं वरुणः कबन्धं प्रससर्ज रोदसी अन्तरीचम्"॥)

कबन्धः, पुं, (कं सुखं बध्यते रुध्यतेऽस्मात्। क + बन्ध + घञ्।) राजः। रक्तोविशेषः। (यथा, रघुः १२। ५७।

"बधनिर्द्धूतशापस्य कबन्धस्योपदेशतः।
मुमूर्च्छसख्यं रामस्य समानव्यसने हरौ"॥

अस्य विवरणादिकमुच्यते। पुरा किल दनुनामा कश्चिद्दानवः उग्रेण तपसा पितामहं सन्तोषयन् दीर्घमायुः प्राप्तवान्। प्राप्तदीर्घायुरतिगर्व्वः सुरराजेन सह योद्धुं सुरपुरमगच्छत्। शक्रस्तु रणभूमिगतः प्रसुप्तेन वज्रेणास्य सक्थिनी शिरश्च शरीरमध्ये प्रावेशयत्। न त्वसौ पितामहवरप्रभावतया प्राणान् मुमोच। अथ स एवं विक्षतविग्रहोऽनाहारादितया क्लिश्यमानो बाहुधा यातमानः सुरपतिं प्रसादयामास। इन्द्रस्तु प्रसन्नो योजनमायतौ बाहू तीक्ष्णदंष्ट्रञ्च वदनमस्मै वक्षसि प्रादात्। तदा प्रभृत्येवासौ वने विचरन् सुदीर्घबाहुभ्यां वनजादीन् प्राणिनो गृहीत्वा भक्षयन् विचचार। अथ गच्छति काले दशरथात्मजो रामः ससीतालक्ष्मणः पितृसत्यपालनार्थं वने भ्रममुना कबन्धेन सम्प्राप्तः। प्रभूतबलशालिनानेन गृहीतोऽपि रामः खड्गेनैनं व्यापादयामास। अथ रामहस्तनाशात् प्राप्तशापमोचनसमयोऽयं कबन्धः विक्षतरूपं विहाय दिव्यमूर्त्तिधरः स्वर्लोकं ययौ। इति वाल्मीकियरामायणम्। महाभारतमते तु अयं विश्वावसुनामा गन्धर्व्व आसीत् ब्राह्मणशापेन राक्षसयोनिं प्राप्तवान्। यदुक्तं तत्रैव ३। २७८। ४२।

"तस्माच्चयत्ते गन्धर्व्वो विश्वावसुरहं नृप!।
प्राप्तो ब्राह्मणशापेन योनिं राक्षससेविताम्"॥)

उदरम्। इति मेदिनी॥ (केन वायुना बध्यते संबध्यते वा। धूमकेतुः। प्रवहवायुगोपचीयमानत्वात् तथात्वं तस्य च लोकसुखनाशकत्वं प्रसिद्धम्॥)

कबन्धः, पुं, क्ली, (केन प्राणवायुना पुनर्बध्यते सम्बध्यते मस्तकहीनस्यापि दैवेन प्राणावेशात् जीवतो नरस्येव क्रियाकारित्वप्रक्तित्वात्तथात्वम्। क + बन्ध + घञ्।) क्रियायुक्तापमूर्द्धकलेवरम्। इत्यमरः २। ८। ११८॥ यथा, मार्कण्डेये ८२। ६३।

"कबन्धाच्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः"॥

अपि च। "नागानामयुतं तुरङ्गनियुतं सार्द्धं रथानां शतं पत्तीनां दशकोटयो निपतिता एकः कबन्धो रणे। तादृक्कोटिकबन्धनर्त्तनविधौ खेलच्चलत् खे शिरस्तेषां कोटिनिपातने रघुपतेः कोदण्डघण्टारवः"॥ इति प्राचीनाः॥

कबित्थः, पुं, (कपित्थस्येदमत्र। "सुपित्स्थः" इति कः। एषोदरादित्वात् साधुः।) कपित्थवृक्षः। इत्यमरटीका॥ कगित्थः। इत्यमरमालायां पाठः॥

कबिलः, पुं, (कद्रुवर्णे + इलच्।) कपिलवर्णः। इति भरतो द्विरूपकोषश्च॥

कम, उ क ड स्तुहि। इति कविकल्पद्रुमः॥ (पुरां-आत्मं-सकं-सेट्।) उ कमिता कान्त्वा। क ड कामयते। अन्यैर्भादौ पठ्यमानस्याप्यस्य कित्करणं कम ऋत इत्यादिना विहितस्य ञिङो ज्ञापनार्थं तेन चरे ञिङोऽप्राप्तिपक्षेऽचकमत। चकमे कमिता इत्यादि सिद्धम्। इति दुर्गादासः॥

कम, उ ड कान्तौ। इति मुग्धबोधव्याकरणम्। (भां-आत्मं-अकं-सेट्॥)

कम्, थ (कमुकान्तौ ञिङभावे विच्।) जलम्। शिरः। सुखम्। मङ्गलम्। पादपूरणम्। इति शब्दरत्नावली॥ (यथा ऋग्वेदे। १। १२३। ११॥ "सुसंकाशा मातृमृष्टेव योषा विस्नेव्यं दधुषे दृशे कम्"। "अत्र कमिति पादपूरणे अथवा कमिति सुखवचनं सुखं यथा भवतीति" भाष्यम्॥)

कमठं, क्ली, (कम + 'कमेरठः"। उणां १। १०२। इति + अठ।) भाण्डभेदः। तत्तु मुनीनां जलपात्रम्। इति मेदिनी॥

कमठः, पुं, (के जले मठति वसतीति। क + मठ वासे + पचाद्यच्।) कच्छपः। इत्यमरः। १। १०। २१॥ (यथा महानाटके।

"कमठपृष्ठकठोरमिदं धनु-
र्मधुरमूर्त्तिरसौ रघुनन्दनः"॥

मकठात्कामठं मांसं रामठेन समन्वितम्।
यदि सर्पिःसमायुक्तं का सुधा वसुधातले"॥
इत्युद्भटः॥*॥ गुणादयोऽस्य कच्छपशब्दे ज्ञातव्याः॥ भगवद्विष्णोर्द्वितीयावतारः। यथा हटयोगदीपिकायाम्। १। १०।

"अथेदानीं प्रवक्ष्यामि समाश्रयमठो दृढः।
अथेदयोगयुक्तानामाधारकमठो दृढः"॥)

वंशः। इति शब्दरत्नावली॥ दैत्यविशेषः। मुनिभाजनम्। इति हेमचन्द्रः॥ शङ्खकी इति ख्यातौ॥ (नृपविशेषः। यथा महाभारते। २। ४। २२।

"कच्छसेनः क्षितिपतिः क्षेमकश्चापराजितः।
काम्बोजराजः कमठः कम्पनश्च महाबलः"॥)

कमठी, स्त्री, (कमठ + ङ्योगादिति जातेरिति वा ङीष् प्रत्ययः।) कच्छपी। इत्यमरः। १। १०। २४॥ (यथा भागवते ४। १२।

"इदानीमस्माकं जठरकमठीदृष्टकठिना-
मनोदृत्तिस्तत् किं व्यसनिविमुखैव क्षपयसि"॥)

कमण्डलुः, पुं, क्ली, (कस्य प्रजापतेः जलस्य वा मण्डः सारः तं लाति आदत्ते। कं + मितद्वादित्वात् डुः।) सन्न्यासिनां मृत्काष्ठादिमयपात्रम्। तत्पर्य्यायः। कुण्डी २। इत्यमरः ७। २। ४६॥ करकः ३। (यथा मनुः २। ६४॥

"मेखलामजिनं दण्डमुपवीतं कमण्डलुम्।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवित्"॥)

शुक्लदृक्षः। इति मेदिनी॥

कमण्डलुतरुः, पुं, (कमण्डल्वाकारफलत्वात्।) शुक्लदृक्षः। इति रत्नमाला॥

कमनं, त्रि, (कम + णिङ्भावे युच्। अनुदात्तङेति कमेर्युच् वा।) कामुकम्। अभिरूपम्। इति मेदिनी॥ (यथा भागवते १। ६। ३३।

"त्रिभुवनकमनं तमालवर्णं
रविकरगौरवराम्बरं दधाने"॥)

कमनः, पुं, (काम्यतेऽनेन। कमेः + करणे + युच्।) कामः। अशोकवृक्षः। इति मेदिनी। ब्रह्मा॥ इति हेमचन्द्रः॥

कमनच्छदः, पुं, (कमनः कमनीयः छदः पत्रो यस्य।) कङ्कपक्षी। इति हेमचन्द्रः॥

कमनीयं, त्रि, (काम्यते यत् कमेः कर्म्मणि अनीयर्।) कामनायोग्यम्। तत्पर्य्यायः। चारु २ हारि ३ रुचिरम् ४ मनोहरम् ५ वरणु ६ कान्तम् ७ अभिरामम् ८ वल्गुरम् ९ वामम् १० रुच्यम् ११ सुषमम् १२ शोभनम् १३ मञ्जु १४ मञ्जुलम् १५ मनोरमम् १६ साधु १७ रम्यम् १८ मनोज्ञम् १९ पेशलम् २० हृद्यम् २१ सुन्दरम् २२ काम्यम् २३ कम्रम् २४ सौम्यम् २५ मधुरम् २६ प्रियम् २७। इति हेमचन्द्रः॥ (यथा, कुमारे १। ३७।

"आरोपितं यद्गिरिशेन पश्चात्
अनन्यनारीकमनीयमङ्गम्"॥)

कमन्धं, क्ली, (कम् शिरः अन्धं शून्यं यस्य।) कबन्धम्। (कमं कान्तिं जीवनं वा दधाति विदधातीति। कम + धा + ड। एषोदरादित्वात् साधुः।) जलम्। इत्यमरटीकायां रायमुकुटः॥

कमरः, त्रि, (कामयते इति। कम् + "अर्त्तिकमिभमीति" उणां ३। १३२। अरच्चित्।) कामी। इत्यादिकोषः॥

कमलं, क्ली, (कमेः ञिङ् भावे एषादित्वात् कलच्। कम् जलं अलति अलंकरोति वा। अल् + अच्। अन्तश्चिज्जन्तो वा।) जलजपुष्पविशेषः। तत्पर्य्यायः। पद्मम् २ पाथोजम् ३ नलम् ४ नलिनम् ५ अम्भोजम् ६ अम्बुजन्म ७ अम्बुजम् ८ श्रीः ९ अम्बुरुहम् १० अम्बुपद्मम् ११ सुजलम् १२ अम्भोरुहम् १३ सारसम् १४ पङ्कजम् १५ सरसीरुहम् १६ कुटपम् १७ पाथोरुहम् १८ पुष्करम् १९ वार्ज्जम् २० तामरसम् २१ कुशेशयम् २२ कञ्जम् २३ कजम् २४ अरविन्दम् २५ शतपत्रम् २६ विसकुसुमम् २७ सहस्रपत्रम् २८ महोत्पलम् २९ वारिरुहम् ३० सरसिजम् ३१ सलिलजम् ३२ पङ्केरुहम् ३३ राजीवम् ३४। (यथा रघुः। ३। ३६।

"अगच्छदंशेन गुणाभिलाषिणी
नवावतारं कमलादिवोत्पलम्"॥)

अस्य गुणाः शीतलत्वम्। स्वादुत्वम्। रक्तपित्तभ्रमार्त्तिनाशित्वम्। सुगन्धित्वम्। भ्रान्तिसन्तापशान्तिपरमहृद्यकारित्वञ्च। इति राजनिर्घण्टः॥ (तथाच भावप्रकाशः।

"कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित्।
दृष्णादाहास्रविस्फोटविषवीसर्पनाशनम्॥
विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम्।
रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम्॥
धवलं कमलं शीतं मधुरं कफपित्तजित्।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम्"॥)

जलम्। ताम्रम्। लोम। औषधम्। इति मेदिनी॥ सारसपक्षी। इत्यमरः।१।१०।४०॥

कमठः, पुं, (कमेः+कलच्। यद्वा को वायुः तस्य अमः गतिः तं लाति आदत्ते। क+अम+ला+कः।) मृगविशेषः। इति मेदिनी॥ ध्रुवकभेदः। यथा, सङ्गीतदामोदरः॥

"उत्तो मलयताखेन जघनमध्ये स्फुरेद्गुरुः।
सप्रदग्धाक्षरैर्युक्तः कमठोऽयं भयानके"॥

कमला, स्त्री, (काम्यतेऽसौ कमेः दृषादित्वात् कलच् कमलं अस्त्यस्याः इति वा। अर्श+आद्यच्। टाप् च।) लक्ष्मीः। ("कमला श्रीर्हरिप्रिया" इत्यमरः।१।१ २८।) वरस्त्री। इति मेदिनी॥ खनामख्यातनिम्बुकः। कमलालेबु इति भाषा। यथा,—

"रम्भाफलं तिन्तिड़ीकं कमला नागरङ्गकम्।
फलान्येतानि भोज्यानि रुच्योऽन्यानि विवर्ज्जयेत्"॥

इति तन्त्रसारे पुरश्चरणप्रकरणम्॥

(छन्दोविशेषः। यथा, वृत्तरत्नाकरे।

"दिगुणनगणसहितः सगण इह हि विहितः।
पक्षिपतिमतिविमला क्षितिपमवति कमलेति"॥

नर्त्तकीविशेषः। यथा राजतरङ्गिण्याम् ४।४२४।

"नर्त्तकी कमला नाम कान्तिमन्तं ददर्श तम्।
असामान्याकृतेः पुंसः सा ददर्श सविस्मया"॥

पुरीविशेषः। यथा तत्रैव ४। ४८३।

"राजा मङ्गाख्यपुरतश्चक्रे विपुलकेशवम्।
कमला सा खनाम्नापि कमलाख्यं पुरं व्यधात्"॥

गङ्गा। यथा काशीखण्डे २९। ४४।

"कमला कल्पलतिका काली कलुषवैरिणी"॥)

कमलासनः, पुं, (कमलमासनमस्य। विष्णोर्नाभिपद्मजातत्वात् तथात्वम्।) ब्रह्मा। इत्यमरः। १। १। १७॥ (यथा भागवते ५।२०। ३०। "यस्मिन् इदमुष्कं व्यजनग्रिखामलकनकपत्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितम्"॥ स्त्री, कमलाया लक्ष्म्या आसनं क्षेपणं दानमित्यर्थः। यथा, ग्रन्थविरचिते रालेन्द्रकर्णपूरे ५३।

"तात्पर्य्यं कमलासने विचरितं गौरिहितैः पालितं"॥

"कमलाया लक्ष्म्या आसने क्षेपणे याचकेभ्यो दाने इत्यर्थः। अथच कमलरूपे विस्तरे ब्रह्मणः पद्मासनत्वात्"। इति तट्टीका॥)

कमलिनी, स्त्री, (कमलानि सन्त्यत्र। पुष्करादिभ्यो देशे इति इनिः।) पद्मिनी। (यथा रघुः ९।२७।

"अभियुः सरसो मधुसम्भृतां कमलिनीमलिनीरपतत्त्रिणः"॥) पद्माकरः। इति शब्दरत्नावली॥ (गङ्गा यथा काशीखण्डे २९। ४०।

"कुमुदती कमलिनी कान्तिः कल्पितदायिनी"॥)

कमलोत्तरं, क्ली, (कमलमिव उत्तरं। यदा कमलादुत्तरं उत्कृष्टमिव।) कुसुम्भपुष्पम्। इत्यमरः। २। ६। १०६॥

कमा, स्त्री, (कम क्विबभावे बाहुलकात् स्त्रियां भावे अः। टाप्।) शोभा। इति राजनिर्घण्टः॥

कमिता, [ऋ] त्रि, (कम+क्विबभावे इटच्।) कामुकः। इत्यमरः। ३। १। २३॥

कम्पः, पुं, (कपि चलने+भावे घञ्।) गात्रादिचलनम्। तत्पर्य्यायः। वेपथुः २। इत्यमरः १।७। ३८॥ वेपनम् ३ वेपः ४ कम्पनम् ५। इति राजनिर्घण्टः॥ (यथा विक्रमोर्व्वश्याम्। "सुचिरेण तावदस्या भयकम्पः कुसुमकोमलं हृदयम्"। "न कम्पो वायुना विना"। इति वैद्यकम्॥)

कम्पनं, त्रि, (कपि चलनशब्दार्थादिति युच्।) कम्पयुक्तः। काँपुने इति भाषा। तत्पर्य्यायः। चलनम् २ कम्पम् ३ चलम् ४ लोलम् ५ चलाचलम् ६ चञ्चलम् ७ तरलम् ८ प्रास्रिस्रवम् ९ परिस्रवम् १०। इत्यमरः। ३। १। ७४॥ चपलम् ११ चटुलम् १२। इति तट्टीका॥

(यथा महाभारते १३। १४। ७२।

"हिरण्यकशिपुर्योऽभूद्दानवो मेरुकम्पनः"॥

यथा सिद्धान्तकौमुद्याम्॥ "कम्पा कम्पना भाषा"। पा ३।२। १५३॥ कपि+भावे+ल्युट्।) कम्पे क्ली। इति मेदिनी॥

कम्पनः, पुं, (कम्पयति वेपथुयुक्तं करोति शिशिरेऽवेति यावत् कपि+णिच्+युच्। ल्युर्वा।) शिशिरऋतुः। इति राजनिर्घण्टः॥

(नृपविशेषः। यथा महाभारते २। ४। २२।

"काम्बोजराजः कमठः कम्पनश्च महाबलः।
सततं कम्पयामास यवनानेक एव यः"॥)

कम्पनशस्त्रा, [न्] पुं, (कम्पः चलनं यस्त्रा शस्त्रं यस्य।) वायुः। इति शब्दरत्नावली॥

कम्पाकः, पुं, (कम्पया चलनेन कायति प्रकाशते इति। कम्प+कै+कः।) वायुः। इति हेमचन्द्रः॥

कम्पितं, क्ली, (कपि+भावे+क्तः।) चलनम्। तत्पर्य्यायः। कम्पनम् २ कम्पः ३ वेपनम् ४ वेपथुः ५। इति शब्दरत्नावली॥ (कपि+कर्त्तरि+क्तः।) कम्पयुक्ते त्रि॥ (यथा रघुः। २। १३।

"एकस्तम्बरेणिरिनिर्झराम्बु-
मनोकहाकम्पितपुष्पगन्धी"॥)

कम्पिलः, पुं, (कम्प+इलच्।) रोचनी। कमला गुँड़ि इति भाषा। तस्य रूपान्तराणि काम्पिल्लः। कम्पिल्लः। कम्पीलः। कम्पिल्यः। इत्यमरटीकायां सुकुटादयः॥

कम्पिल्लकः, पुं, (कम्पिल्ल+स्वार्थे+कन्।) वृक्षविशेषः। कमिला इति देशान्तरभाषा। तत्पर्य्यायः। रक्ताङ्गः २ रेची ३ रेचनकः ४ रक्तकः ५ लोहिताङ्गः ६ कम्पिल्लः ७ रक्तचूर्णकः ८। तस्य गुणाः। विरेचकत्वम्। कटुत्वम्। उष्णत्वम्। व्रणकफकासतन्तुकृमिनाशित्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ (अस्य तैलगुणाः। तुम्बीकोशाम्रदन्तीद्रवन्तीश्यामासप्तला नीलिकाकम्पिल्लकशुद्धिनीस्नेहाक्तिक्तकटुककषाया अधोभागदोषहराः क्रिमिकफकुष्ठानिलहरा दुष्टव्रणविशोधनाश्च॥ इति सुश्रुतः॥)

कम्प्यः, त्रि, (कपि+णमि-कम्पीति रः।) कम्पयुक्तः। कम्पान्वितः। इत्यमरः। ३। १। ७४॥ (यथा नैषधे। १। १४२।

"सुताः कमाङ्क्य चिराय चूडते-
विधाय कम्राणि सुखानि कं प्रति"॥)

कम्र, गतौ। इति कविकल्पद्रुमः॥ (भां–परं–सकं–सेट्।) कम्रति। इति दुर्गादासः॥

कम्बरः, पुं, (कम्ब+अरन्।) चित्रवर्णः। कर्ब्बुरवर्णः। तद्वति त्रि। इति शब्दरत्नावली॥

कम्बलं, क्ली, (कम्यते। इति कमु कान्तौ+कमेर्बुक् चेति कलः। कम्बगतौ इषादित्वात् वलच् वा।) जलम्। इति शब्दरत्नावली॥

कम्बलः, पु, (कं कुत्सितं शिरो वा कं सलिलं वा बलते बल संवरणे सञ्चारणे च अच्। यद्वा कम्ब+गतौ इति धातोः इषादित्वात् कलच्।) खनामख्यातमेषादिलोमरचितवस्त्रासनादि। तत्पर्य्यायः। रङ्कवः २। इत्यमरः। २। ६। ११६॥ वेषकः ३ रोमयोनिः ४ रेवुका ५। इति शब्दरत्नावली॥ प्रावारः ६। इति जटाधरः॥

(यथा महाभारते ३। ३। ५१।

"न तथा सुखयत्यग्निर्न प्रावारा न कम्बलाः।
शीतवातार्दितं लोकं यथा तव मरीचयः"॥)

नागराजः। साक्षा। प्रावारः। क्षमिः। इत्यमरः। ३। ३। १९३। मेदिनी च॥ उत्तरासङ्गः। इति मेदिनी॥ मृगविशेषः। इति जटाधरः॥

(नागभेदौ। अनयोरेकः अधस्तात् पाताले वासुकिप्रमुखो निवसति अपरस्तु वरुणदेवसभास्थः।

यथाक्रमं उदाहरणे द्रष्टव्ये।

यथा, भागवते ५। २४। ३१।

"ततोऽधस्तात् पातालेषु नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति"॥

यथा महाभारते। २। ९। ९।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ"॥

कम्बलाद्यधिष्ठितप्रयागान्तर्वर्त्तितीर्थविशेषः। यथा, महाभारते। ३। तीर्थयात्रापर्व्वणि ८५। ७५।

"प्रयागं सम्प्रतिष्ठानं कम्बलाश्वतरौ तथा।
तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः"॥

कम्बलिवाह्यकं, क्ली, (कम्बलः साक्षा अस्ति एषाम् इति इनिः। कम्बलिभिर्वहैरह्यते। वह+कर्म्मणि ण्यत् स्वार्थे संज्ञायां वा कन्।) दृषदङ्गीयशकटम्। तत्पर्य्यायः। गल्ली २। इत्यमरः। २। ८। ५२॥ गाल्ली ३। इति तट्टीका॥

कम्बिः, स्त्री, (कमु+बाहुलकात्+विन्। यद्वा कम्बति प्राप्नोति जानाति वा अन्नादि अनया। कम्ब+करणे इन्।) दर्व्वी। इत्यमरः। २।९।३४। हाता इति भाषा॥ इति मेदिनी। वंशांशः। बाँशेर पाव् इति भाषा॥

कम्बुः, पुं क्ली, (कमु+जवादयश्चेति नियातनात्। साधुः। कमु+उन् वुक्चेति वा।) शङ्खः। इत्यमरः।१।१०।२३॥ (यथा भागवते।४।७। २०।

"कम्बलचक्रशरचापगदासिचर्म-
श्येनैर्हरन्मयमुजैरिव कर्णिकारः"॥)

कम्बुः, पुं, (कम्ब गतौ इति भ्वादित्वात् उन् वुगागमो वा। निपातनात् वा साधुः॥) वलयम्।

(यथा महाभारते ३ । २३२ । ४४ ।
"ग्रतं दासीसहस्राणि कौन्तेयस्य महात्मनः ।
कम्बुकेयूरधारिण्यो निष्कग्रीवाः सुवाससः" ॥)
शम्बूकः । हस्ती । इत्यमरः ।३।३ १३३। मेदिनी च॥
कर्व्वूरवर्णः । ग्रीवा । मलकम् । इति हेमचन्द्रः ।
काँपा हाड़ इति भाषा ॥
कम्बुका, स्त्री, (कम्बरिव कायति ग्रीभते प्रकाशते वा । कै + कः टाप् च ।) अश्वगन्धावृक्षः । इति रत्नमाला । (गुणादयोऽस्या अश्वगन्धाशब्दे ज्ञेयाः ॥)
कम्बुकाष्ठा, स्त्री, (कम्बु चिह्नवर्णं काष्ठं यस्याः ।) अश्वगन्धावृक्षः । इति राजनिर्घण्टः ॥
कम्बुग्रीवा, स्त्री, (कम्बुवत् रेखात्रयग्रोभिता ग्रीवा ।) कम्बादृतिरेखात्रययुक्तग्रीवा । इत्यमरः ।२।६।८८॥
(कम्बुःशङ्खस्तद्वत् रेखात्रययुक्ता ग्रीवा यस्येति विग्रहे वाच्यलिङ्गः । यथा महाभारते । १ । १५३ । १८ ।
"कम्बुग्रीवः पुण्यराज्यो भर्त्ता युक्तोभवेन्मम" ॥)
कम्बुपुष्पी, स्त्री, (कम्बुः शङ्खः तद्वत् शुक्लं पुष्पं यस्याः ।) शङ्खपुष्पीवृक्षः । इति राजनिर्घण्टः । (शङ्खपुष्पीशब्देऽस्या गुणा ज्ञातव्याः ॥)
कम्बुमालिनी, स्त्री, (कम्बुतुल्यपुष्पाणां माला समूहः अस्ति अस्याः ।) शङ्खपुष्पी । इति राजनिर्घण्टः ॥
कम्बोजः, पुं, (कम्ब + ओज ।) शङ्खविशेषः । देशभेदः । (यथा तन्त्रशास्त्रम् ।
"पश्चनदं समारभ्य क्लेच्छाद्यत्रियपूर्व्वतः ।
कम्बोजदेशो देवेशि ! वालिराश्रिपरायणः" ॥)
हस्तिप्रभेदः । इति मेदिनी ॥ (तद्देशवासिनि त्रि॥)
कम्बोजातायी, [न्] पुं, (कम्बुः शङ्खः स इव आतायी । शङ्खतुल्यशुक्लपूर्व्वकायत्वात्तथात्वम् ।) शङ्खचिल्लः । इति महाभारतम् ॥
कम्भारी, स्त्री, (कं जलं बिभर्त्ति धारयतीति । डु भृ धारणपोषणयोः + कर्म्मण्यण् + ङीप् गौरादित्वात् ङीष् वा ।) गम्भारीवृक्षः । इति शब्दमालाराजनिर्घण्टौ । (गम्भारीशब्देऽस्या गुणादयो वक्तव्याः ॥)
कम्भु, क्ली, (कं जलं तत्तुल्यं श्वेतं बिभर्त्ति । भृ + डुः ।) उशीरम् । इति राजनिर्घण्टः ॥
कम्रः, त्रि, (कामयतीति । कम् + नमिकम्मीति रः । ३ । २ । १६७ ।) कामुकः । मैथुनेच्छाविशिष्टः । इत्यमरः । ३ । १ । २४ ॥
(स्त्री, गङ्गा । यथा काशीखण्डे २९ । ४४ ।
"कमनीयजला कम्रा कपर्द्दिसुकपर्द्दगा" ॥
जङ्घं प्रतीयं ग्राम्तनुं कामितवती कम्रा कामुका ॥
इति तट्टीका । काम्यतेऽसौ इति ।)
कमनीयम् । यथा,—
"लोलां दृष्टिमितस्ततो वितनुते सभ्रूलताविभ्रमामाभुग्नेन विवर्त्तिता बलिमता मध्येन कम्रस्तनी" ।
इति ग्राकुन्तले १ अङ्के ॥
कयस्या, स्त्री, (को वायुः स इव वेगेन याति अथवा कं जलं तस्य स्रोत इव याति । क + या + डः । तत्र तिष्ठति । स्था + कः टाप् च ।) वयस्या । इत्यमरटीकायां स्वामी ॥ काकोली इति ख्याता ॥
करः, पुं, (कं सुखं राति ददातीति । रा + कः ।) राजस्वम् । खाजाना इति पारस्यभाषा । तत्पर्य्यायः । भागधेयः २ बलिः ३ । इत्यमरः । २ । ८ । २७ ॥
कारः ४ । इति तट्टीका ॥ प्रत्यायः ५ । इति मेदिनी । * ॥
अथ राज्ञां करग्रहणप्रकारः । क्रयविक्रयादिना लाभादीन् संप्रेक्ष्य राज्ञा करो ग्रहीतव्यः ।
यथा, मनुः । ७ । १२७-१३३ ।
"क्रयविक्रयमध्वानं भक्तञ्च सपरिव्ययम् ।
योगक्षेमञ्च संप्रेक्ष्य वणिजो दापयेत् करान् ॥
यथा फलेन युज्येत राजा कर्त्ता च कर्म्मणा ।
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान्" ॥*॥
राज्ञा राज्ञात् वार्षिकः करोऽल्पाल्पं ज्ञात्वा ग्रहीतव्यः । यथा,—
"यथाल्पाल्पमदन्त्याद्यं वार्य्योकोवत्सषट्पदाः ।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः" ॥
मूलादधिकयोः पशुहिरण्ययोः पञ्चाशद्भागरूपः करो ग्राह्यः । धान्यानां भूम्युत्कर्षापेक्षया कर्षकाणां क्लेशलाघवगौरवापेक्षया च षष्ठोऽष्टमो द्वादशो वा भागो राज्ञा ग्रहीतव्यः ।
यथा,—
"पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा" ॥*॥
द्रुमाश्ममधुसर्पिरादीनां
षड्भागो लाभात् ग्रहणीयः । यथा,—
"आददीताथ षड्भागं द्रुमाश्ममधुसर्पिषाम् ।
गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च ॥
पत्रशाकतृणानाञ्च चर्म्मणां वैदलस्य च ।
मृण्मयानाञ्च भाण्डानां सर्व्वस्याश्ममयस्य च" ॥*॥
अतिक्लीयधनोऽपि राजा
श्रोत्रियब्राह्मणात् करं न गृह्णीयात् । यथा,—
"त्रियमाणोऽप्याददीत न राजा श्रोत्रियात् करम् ।
न च क्षुधास्य संसीदेच्छोत्रियो विषये वसन्" ॥*॥
(कीर्य्यते विक्षिप्यतेऽसौ कर्म्मभि + अप् । हस्तकरिशुण्डयोस्तु करेऽपि अप् ॥) वर्षोपलः । किरणः । (यथा रामायणे ६ । ११ । ४४ ।
"तीक्ष्णः षट्दिनकरः करैस्तापयते जगत्" ॥)
हस्तः । (अमरः । ३ । ३ । १६३ ।) हस्तिशुण्डः । इति मेदिनी ॥ (यथा, महाभारते ३ । ११ । २८ ।
"एवन्तु ब्रुवतस्तस्य मैत्रेयस्य विशाम्पते ।
ऊर्द्धं गजकराकारं करेणाभिजघान सः" ॥)
कर्म्मोपपदे कर्त्तृवाचकः । यथा । सुखकर इत्यादि ॥
(यथा, रामायणे ६ । ११ । ४४ ।
"तीक्ष्णः षट्दिनकरः करैस्तापयते जगत् ।
प्रतिलोमस्त ते वायुस्त्वत्पराभवलक्षणम्" ॥)
करकं, क्ली पुं, (किरति विक्षिपति जलं अस्मात् करोति जलमत्र वा । कृ + वा क "क्षुत्रादिभ्यः संज्ञायां वुन्" । उणां ५ । ३५ । इति वुन् ।) करङ्गः । कमण्डलुः । इति मेदिनी ॥
(यथा, मनुः । ४ । ६६ ।
"उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च" ॥)
करकः, पुं, (करोति वाय्वादिजनितदोषामावं क्षणोति फलपत्रादिभिः वायुपित्तादिदोषं नाशयति वा क्षण् हिंसायां "क्षुत्रादिभ्यः संज्ञायां वुन्" । उणां ५ । ३५ । इति वुन् ।) दाड़िमवृक्षः । राजकरः । पक्षिविशेषः । भङ्गाकरञ्जवृक्षः । इति हेमचन्द्रः ॥ फलाशवृक्षः । इति हारावली ॥ कोविदारवृक्षः । वकुलवृक्षः । करीरवृक्षः । नारिकेलास्थि । इति राजनिर्घण्टः । माला इति भाषा ॥ (यथा, रामायणे ५ । १४ । ४८ ।
"हिरण्मयैश्च करकैर्भाजनैः स्फाटिकैरपि" ॥)
करकच्छपिका, स्त्री, (कच्छपस्यादातिरस्त्यस्याः ठन् । करे स्थिता कच्छपिका कच्छपाकारमुद्रा ।) कूर्म्ममुद्रा । यथा,—कालिकापुराणे ५६ अध्यायः ॥
"करकच्छपिकां कुर्य्यात् कूर्म्ममन्त्रेण साधकः ।
तत्र संस्कृतपुष्पेण पूजयेदात्मनो वपुः" ॥
करकराटकः, पुं, (करे हस्ते कराटक इव ।) नखः । इति त्रिकाण्डशेषः ॥
करका, स्त्री पुं, (क्षणोति हिनस्ति आत्मादिफलम् । "क्षुत्रादिभ्यो वुन्" । वुनन्तात् टापि क्षिपकादित्वात् प्रत्ययस्यादिति इत्वेन किरति क्षिपति जलं वा ।) मेघभवक्षिला । शिल इति भाषा । तत्पर्य्यायः । वर्षोपलः २ । इत्यमरः । १ । ३ । १२ ॥ मेघोपलः ३ । इति मेदिनी ॥ वीजोदकम् ४ घनकफः ५ मेघास्थि ६ वार्षरः ७ करः ८ करकः ९ । इति शब्दरत्नावली ॥ राधरजुः १० धाराशुरः ११ । इति जटाधरः ॥ मेदिन्यां राधरज्ज इति पाठः ॥ (यथा मेघदूते ५६ ।
"ताम्कुर्व्वीथास्तुमुलकरकावृष्टिहासावकीर्णान्" ॥)
करकाम्भाः, [स्] पुं, (करकावत् शीतलं चम्भो जलं यत्र ।) नारिकेलवृक्षः । इति त्रिकाण्डशेषः ॥
करग्रहः, पुं, (करः इयं मम भार्य्या इति प्रतिज्ञया गृह्णातेऽत्र वरेणेति यावत् । ग्रह + अधिकरणे अप् ।) विवाहः । इति त्रिकाण्डशेषः ॥ (यथा, आर्य्यासप्तशती । ६०३ ।
"सा गुणमयी स्वभावस्वच्छा सतनुः करग्रहायत्ता ।
भ्रमिता वज्रमन्त्रविदा भवता काश्मीरमालव" ॥)
करग्रहणञ्च ॥ (यथा, आर्य्यासप्तशती । ६२६ ।
"सकरग्रहं सरदितं
साक्षेपं सनखमुष्टि सजिगीषम्" ॥)
करग्रहारम्भः, पुं, (करग्रहस्य करादानस्य आरम्भः प्रज्ञाभ्यः ।) राज्ञां प्रज्ञाभ्यो नववर्षीयकरस्य प्रथमादानम् । तद्दिनं पुण्याह इति ख्यातम् । तस्यापभाषा पुण्या । तस्य शुभदिननिरूपणम् यथा,—
"तीक्ष्णोग्रवज्रीतरभेषु लग्ने
शुक्रेर्ज्यदृष्टे भानुदिने शुभाह्ने ।
कुर्य्यादनुक्तानि समीहितानि
करग्रहारम्भमपि प्रजाभ्यः" ॥
इति ज्योतिषम् ॥ अस्यार्थः । आश्लेषार्द्राज्येष्ठामूलपूर्व्वफल्गुनीपूर्व्वाषाढ़ापूर्व्वभाद्रपदमघाभरणीकृत्तिकाभिन्नलग्नेषु । मिथुनसिंहकन्यातुलाधनुःकुम्भमीनलग्नेषु । रविसोमबुधबृहस्पतिशुक्रवारेषु करग्रहारम्भः कर्त्तव्यः ॥
करघर्षणः, पुं, (कराभ्यां घृष्यतेऽसौ । कर + घृष् +

कर्म्मणि ल्युट्।) दधिमन्थनदण्डः। तत्पर्य्यायः। वैशाखः २ दधिचारः ३ तक्राटः ४। इति हारावली। इक्षुघर्म्मजे स्त्री।

करघर्मी, [न्] पुं, (कराभ्यां करयोर्वा घर्मः घर्षणं अस्ति अस्यास्मिन् वा। करघर्म + इनिः।) मन्थानदण्डः। इति शब्दमाला।

करञ्जः, पुं, (कस्य शिरस इव।) मस्तकम्। (कीर्य्यते जलमत्र इति करः। कॄ + अप्। जलाधारः अङ्गे गर्भो यस्य शकन्ध्वादित्वात् सलोपे साधुः।) अग्निशिखनारिकेलफलास्थि। इति मेदिनी। नारिकेलेर खोल इति भाषा। अरीरास्थि। इति हेमचन्द्रः। इक्षुभेदः। इति राजनिर्घण्टः। (पात्रविशेषः। यथा, "ताम्बूलकरङ्कवाहिनी" इति कादम्बरी।)

करङ्कशालिः, पुं, (करङ्क इति नाम्ना शाकते शोभते इति। करङ्क + शाक + इन्।) करङ्कनामेक्षुः। इति राजनिर्घण्टः।

करञ्छदः, पुं, (करवत् आवरणकारी छदो यस्य।) शाखोटवृक्षः। शेओड़ा इतिभाषा। इति भावप्रकाशः। (अस्य गुणादिकं शाखोटशब्दे द्रष्टव्यम्।)

करञ्छदा, स्त्री, (कर इव किरण इव लोहितवर्णः छदः पुष्पं यस्याः। कर इव आवरकश्छदो वा यस्याः।) सिन्दूरपुष्पीवृक्षः। इति राजनिर्घण्टः।

करजं, क्ली, (करे जायते इति। कर + जन् + ड। आम्रनखवदस्यावृतेस्तथात्वम्।) आम्रनखनामगन्धद्रव्यम्। इत्यमरः।२।४।११९। (नवमीशब्देऽस्य गुणा वक्तव्याः।)

करजः, पुं, (कं सुखं जलं वा रुन्धयतीति। रुधेः कर्म्मण्यण्।) करञ्जवृक्षः। ("करञ्जकः स्यात् करजः पत्रसूची पलाशनः"। इति शब्दरत्नावली। करे जायते इति। जन + ड।) नखः। इति मेदिनी। (यथा, मनुः। ४। ७०।

"नखलोष्टमृदोवापि छिन्द्यात् करजैर्यवम्"॥)

करजाख्यः, पुं, (करजस्याख्या एव आख्या यस्य।) नखीनामगन्धद्रव्यम्। इति रत्नमाला।

करण्डोड्रिः, पुं, इक्षुण्डोड्रिवृक्षः। इति राजनिर्घण्टः। (केचित् करञ्जोड्रिरिति वदन्ति।)

करञ्जः, पुं,(कं सुखं शिरो जलं वा रुन्धयतीति। क + रुन्ध + विच् + अच्।) खगनामख्यातवृक्षविशेषः। करमुचा इति भाषा। तत्पर्य्यायभेदौ यथा,—

"करञ्जकः स्यात् करजः पत्रसूची पलाशनः।
अङ्गारमञ्जी षड्ग्रन्थो मर्कटाङ्गारवल्लरी।
करञ्जभेदाश्चत्वारो विज्ञेया लोकतस्त्रिमे"॥

इति शब्दरत्नावली। अपि च।

"शिरविल्वो नक्तमालः करजश्च करञ्जकः।
सोमवल्कः कबिल्लस्तु पूतिकः कबिकारकः॥
प्रकीर्य्यः पूतिकरजः पट्टिजः सुभगा अपि।
करञ्जभेदाः षड्ग्रन्थो मर्कटाङ्गारवल्लरी"॥

इति जटाधरः। स षड्विधः। तत्र डरकरञ्जपर्य्यायः। नक्तमालः २ पूतिकः ३ शिरविल्वकः ४ पूतिमर्कः ५ षड्ग्रन्थः ६ रोचनः ७। इति राजनिर्घण्टः॥ शिरविल्वः ८ करजः ९ करञ्जकः १०। इत्यमरः।२।४।४७॥ शिरिविल्वः ११। इति तट्टीका॥ उदकीर्य्यः १२। इति रत्नमाला॥*॥ अस्य फलगुणाः। कटुत्वम्। उष्णत्वम्। चक्षुर्हितत्वम्। वातनाशित्वञ्च। इति राजनिर्घण्टः॥ वातकफमेहव्रणकृमिकुष्ठनाशित्वञ्च॥*॥ तत्पत्रगुणाः। कफवातार्शःकृमिशोथनाशित्वम्। भेदकत्वम्। पाके कटुत्वम्। वीर्य्योष्णत्वम्। पित्तवर्द्धकत्वम्। लघुत्वञ्च। इति भावप्रकाशः॥*॥ तत्तैलगुणाः। अतिस्निग्धत्वम्। वातनाशित्वम्। स्निरदीप्तिदाढत्वम्। नयनामयवातरोगकुष्ठकण्डूविसूचिकानाशित्वम्। तीक्ष्णत्वम्। उष्णत्वम्। लेपेन नानाविधचर्म्मदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ किटिभत्वम्। कृमिनाशित्वम्। रक्तपित्तदोषकारित्वञ्च। इति राजवल्लभः॥*॥ अथ नाटाकरञ्जपर्य्यायः। प्रकीर्य्यः १ पूतिकरजः २ पूतिकः ३ कलिकारकः ४। इत्यमरः २।४।४८॥ पूतीकरञ्जः ५ सकण्टकः ६। इति रत्नमाला॥*॥ षड्ग्रन्थः। काँटाकरञ्ज गाँटिया करञ्ज इति भाषा॥*॥ मर्कटी। माकड़ाकरञ्ज इति भाषा॥*॥ अङ्गारवल्लरी। इत्यमरभरतौ विषकरञ्ज इति भाषा॥*॥ अथ अम्लकरञ्जपर्य्यायः। करमर्दी १ वनेक्षुका २ कराम्लः ३ करमर्दकः ४। इति रत्नमाला। क्षय्यपाकफलः ५ अविग्नः ६ सुघेणुः ७। इत्यमरः।२।४।६७॥ अस्य फलगुणाः। पिपासानाशित्वम्। रुचिपित्तकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ करमर्दकशब्दे द्रष्टव्यौ॥

(यथा, महाभारते ३। २२९। ३५।

"पादपानाञ्च या माता करञ्जनिलया हि सा।
वरदा सा हि सौम्या च नित्यं भूतानुकम्पिनी।
करञ्जे तां नमस्यन्ति तस्मात् पुत्रार्थिनो नराः"॥

किरति विक्षिपति धार्म्मिकानिति। कॄ विक्षेपे + बाहुलकादौणादिकोऽञ्जन्प्रत्ययः। धर्म्मदेवेऽपि, त्रि। यथा ऋग्वेदे। १। ५३। ८।

"त्वं करञ्जमुत पर्णयं वधी-
स्तेजिष्ठयातिथिग्वस्य वर्त्तनी"॥)

करञ्जकः, पुं, (करञ्ज + स्वार्थे कन्।) करञ्जवृक्षः। इत्यमरः।२।४।४७॥ भृङ्गराजवृक्षः। इति जटाधरः॥ (यथा महाभारते। १३। १२८। ८।

"यस्तु संवत्सरं पूर्णं दद्यादीपं करञ्जके।
सुवर्चलामूलहस्तः प्रजास्तस्य विवर्द्धते"॥)

करञ्जफलकः, पुं, (करञ्जफलमिव फलं यस्य। ततः स्वार्थे कन्। करञ्जफलमिव कायते इति वा। कै + कः।) कपित्थवृक्षः। इति राजनिर्घण्टः॥

करटः, पुं, (कं कुत्सितं रटति शब्दं करोतीति। रट शब्दे + पचाद्यच्।) काकः। (यथा गङ्गास्तोत्रे।

"वरमिह गङ्गातीरे सरटः करटः।" इति॥

किरति विक्षिपति मदवारि इति। कॄ + अटन्।) हस्तिगण्डः। इत्यमरः। २। ३। ३४॥ (यथा महाभारते। ३। २७७ द्रौपदीहरणपर्व्वणि १८।

"कथं हि भिन्नकरटं पद्मिनं वनगोचरम्।
उपस्थाय महानागं करेणुः शूकरं स्पृशेत्"॥)

कुसम्भवृत्तः। निन्द्यजीवनः। एकादशाहादिश्राद्धम्। दुर्दुरूटः। नास्तिक इति यावत्। (अयं तु क्षत्रियभेदाभिप्रायेणोक्तः। तथा च महाभारते ६। ९। ६२।

"मागधा वल्लवाश्चैव तथैवापरवर्त्तकाः।
कुलिन्दाः कालदाश्चैव दण्डकाः करटास्तथा"॥)

वाद्यविशेषः। इति मेदिनी॥

करटकः, पुं, (करट + स्वार्थे कन्।) काकः। इति शब्दरत्नावली॥ (पिङ्गलकनाम्नः सिंहस्य मन्त्रिपुत्रविशेषः। यथा हितोपदेशे २।२५।

"स च तथाविधः करटकदमनकाभ्यां तन्मन्त्रिपुत्राभ्यां भ्रष्टगालाभ्यां दृष्टः"॥ स्तेयशास्त्रप्रवर्त्तकः कर्णीसुतः। यथा कादम्बरीटीकायाम्।

"कर्णीसुतः करटकः स्तेयशास्त्रप्रवर्त्तकः"॥)

करटा, स्त्री, (करट + "अजाद्यतष्टाप्"। ४। १। ४। इति टाप्।) दुःखदोह्या गवी। इति हेमचन्द्रः॥

करटी, [न्] पुं स्त्री, (करटः मदस्रवणशीलगण्डः प्राशस्त्येन अस्ति अस्य। करट + इनिः।) हस्ती। इति हेमचन्द्रः॥ (यथा, खड्गेश्वरविरचितशिवस्तुतौ। ४।

"कपर्दिनि कुमुदतीरमयखण्डचूड़ामणौ
कटोतटमटाभवत्करटिचर्मणि ब्रह्मणि॥)

करटुः, पुं, (कॄ + अटुः।) पक्षिविशेषः। इति हेमचन्द्रः। करकटिया इति भाषा॥

करणं, क्ली, (क्रियतेऽनेन। कॄ + करणे + ल्युट्।) साधकतमम्। इत्यमरः। १। ३। ५४॥ तच्च षट्कारकान्तर्गतकारकविशेषः। तस्य लक्षणम्।

"क्रियायां साध्यायां बहूनां कारणानां मध्ये कारणान्तरव्यवधानाभावे यद्वस्तु क्रियानिष्पत्तिकारकं विवक्षितं तस्मिन् करणत्वं प्रकीर्त्तितम्। तेन दात्रेण धान्यं लुनातीत्यत्र हस्तादेः कारणत्वेऽपि दात्रस्यैव करणत्वं विवक्षितम्। तथाचोक्तम्।

"कारणान्यवधानेऽपि क्रिया निष्पत्तिकारणम्।
यद्वै विवक्षितं तेषु करणत्वं प्रकीर्त्तितम्"॥

इति मुग्धबोधटीकायां दुर्गादासः॥*॥ तिथ्यर्द्धपरिमितववादेकादशसंख्यककालविशेषः। तेषां नामानि। ववः १ बालवः २ कौलवः ३ तैतिलः ४ गरः ५ वणिजः ६ विष्टिः ७ शकुनिः ८ चतुष्पदः ९ किन्तुघ्नः १० नागः ११। तेषां यथाक्रमेणाधिष्ठातृदेवाः। इन्द्रः १ कमलजः २ मित्रः ३ अर्य्यमा ४ भूः ५ श्रीः ६ यमः ७ कलिः ८ रुद्रः ९ पाणी १० मारुतः ११। एकैकस्मिन् तिथौ द्वे द्वे करणे भवतः। तेषां ववादयः सप्त अष्टावृत्त्या शुक्लप्रतिपच्छेषार्द्धमारभ्य कृष्णपक्षीयचतुर्दशीप्रथमार्द्धपर्य्यन्तं भवन्ति। शेषाश्चत्वारः कृष्णचतुर्दशीशेषार्द्धावधिशुक्लप्रतिपत्प्रथमार्द्धपूर्य्यन्तं नियमेन भवन्ति अतो ध्रुवाणि करणानि। पूर्व्वे सप्ताध्रुवाणि॥ तेषामानयनक्रमो यथा।

"तिथिर्द्विघ्ना करोनागशिष्टाकरणमादिमे।
परे दले तु सैकं तत्करणं ववपूर्व्वकम्"॥

इति ज्योतिषम्॥*॥ क्षेत्रम्। गात्रम्। इन्द्रि-

यम्। इत्यमरः। ३। ३। ५४॥ (यथा गीतायां १८। १४।
"अधिष्ठानं तथाकर्त्ता करणञ्च पृथग्विधम्"॥)
हेतुः। कर्म्म। इस्तलेपः। नृत्यप्रभेदः। गीतविशेषः। (तले व्यवस्थापकस्ताड़नविशेषः।
यदुक्तं राजकन्दर्पेण।
"नृत्यवादित्रगीतानां प्रयोगावग्रभेदिनां।
संस्थानं ताड़नं रोधः करणानि प्रचक्षते"॥
अस्य प्रमाणं यथा कुमारे ६। ४०।
"शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम्।
अनुगर्जितसन्दिग्धाः करणैर्मुरजस्वनाः"॥)
क्रियाभेदः। संवेशनम्। कायस्थः। इति मेदिनी॥ कायस्थसंहतिः॥ वर्णानां स्पष्टतादि। योगिनामासनादि। कृतादि। इति हेमचन्द्रः॥ (सर्व्वेषामादिकारणत्वात् विष्णुः। यथा, महाभारते १३। १७६। ५४।
"कारणं कारणं कर्त्ता विकर्त्ता गहनो गुहः"॥
लेख्यपत्रसाक्षिदिव्यादि। यथा मनुः ८। ४१।
"अर्थेऽपव्ययमानन्तु करणेन विभावितम्।
दापयेदधिकस्यार्थं दण्डलेशञ्च शक्तितः"॥
भावे ल्युट्। कृतिः। यथा रामायणे ४।१७।५६॥
"धर्म्मतः प्रेषकरणे प्रतीच्छिष्यामहे वयम्"॥)
करणः, पुं, शूद्रावैश्ययोर्जातजातिविशेषः। इत्यमरः। २। १०। २॥ अयं लिखनवृत्तिः कायस्थ इति ख्यातः। इति भरतः॥ यथा,—
"शूद्राविशोस्तु करणोऽम्बष्ठो वैश्यादिजन्मनोः"।
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः॥ *॥
अपि च।
"कायस्थे साधने क्लीवं पुंसि शूद्राविशोः सुते"।
इति करणशब्दार्थे मेदिनी॥ *॥ अन्यच्च।
"झल्लो मल्लश्च राजन्याद् व्रात्यान्निच्छिविरेव च।
नटश्च करणश्चैव खसद्रविड़ एव च"।
इति मानवे १०। २२॥ झल्लोमल्लश्चेति। "क्षत्रियात् व्रात्यात् सवर्णायां झल्लमल्लनिच्छिविनटकरणखसद्रविड़ाख्या जायन्ते। एतान्यपेक्षयैव नामानि"। इति तट्टीकायां कुल्लूकभट्टः॥ *॥
तस्य कर्म्मविपाको यथा,—
"तैलचौरस्तैलकीटो मूर्द्धि कीटस्त्रिजन्मकम्।
ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः॥
तमःकुण्डे वर्षशतं स्थित्वा स्वर्णवणिग् भवेत्।
जन्मैकञ्च दुराचारो जन्मैकं करणो भवेत्॥
विन्दैकलिपिकर्त्ता च भक्ष्यदातुर्धनं हरेत्॥
कायस्थेनोदरस्थेन मातुर्म्मांसं न खादितम्।
तत्र नास्ति क्षमा तस्य दन्ताभावेन केवलम्॥
स्वर्णकारः स्वर्णवणिक् कायस्थश्च व्रजेश्वर।
नरेषु मध्ये ते धूर्त्ताः क्षमाहीना महीतले॥
हृदयं क्षुरधाराभं तेषाञ्च नास्ति सादरम्।
व्रतेषु सज्जनः कोऽपि कायस्थो नेतरौ च तौ॥
सुबुद्धिः शिवयुक्तिश्च शास्त्रज्ञो धर्म्ममानसः।
न विन्यसेत्तेषु तात स्वात्मकल्याणहेतवे"॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः॥
करणाध्यं, क्ली, (करणं ज्ञानकर्म्मादिरूपं इन्द्रियं चायतेऽनेन। करण + चै + करणे + ल्युट्। मस्तकस्य प्रधानकरणैकादशस्य मनसः स्थलत्वात्। करणैर्हस्तादिकर्म्मेन्द्रियादिभिः चायते वा इति कर्म्मणि ल्युट्।) मस्तकम्। इति हेमचन्द्रः॥
करणीयं, त्रि, (कर्त्तुमुचितं कर्त्तुमर्हं वा। कृ + अनीयर्।) कर्त्तव्यम्। कार्य्यम्। इति व्याकरणम्॥ (यथा रामायणे ३। १४। १०।
"मया किं करणीयञ्च इत्युक्ते द्विजसन्निधौ।
सर्व्वैरेव च तैरार्त्तैर्वागियं समुदाहृता"॥)
करण्डः, पुं, (कृ + "कृञ्भृञ्जः"। इत्यण्डन्। उणां। १।१२८।) मधुकोषः। मौचाक् इति भाषा। असिः। कारण्डवपक्षी। दलाढ़कम्। इति मेदिनी हेमचन्द्रश्च॥ वंशादिरचितभाण्डविशेषः समुद्गश्च। इत्यमरः। ३। ५। १८॥ साजि झाँपि इत्यादि भाषा। (यथा भागवते ५। १४। ४। "एवमेव गृहाश्रमः कर्म्मक्षेत्रं यस्मिन् न हि कर्म्माण्युत्सीदन्ति यदयं कामकरण्ड एव आवसथः"॥)
करण्डी, [न्] पुं (करण्डस्येव आकारोऽस्यास्तीति। करण्ड + इनिः।) मत्स्यः। इति त्रिकाण्डशेषः। (मत्स्यशब्दे ऽस्य गुणादिकथनं द्रष्टव्यम्॥)
करतलः, पुं, (करस्य हस्तस्य तलः।) हस्ततलः। हातेर तेलो इति भाषा। (यथा। जयदेवः। १।४५॥
"करतलतालतरलवलया वलिकलितलसनवंशे"
अपि च। यथा, श्रीभागवते। ८। ७। ४२॥
"ततः करतलीकृत्य व्यापि हालाहलं विषम्।
अभक्षयन् महादेवः कृपया भूतभावनः"॥)
करतालं, क्ली, (कराभ्यां हस्ताभ्यां दीयमानस्तालो यत्र।) वाद्यविशेषः। यथा,—
"शिवागारे झल्लकञ्च सूर्य्यागारे च शङ्खकम्।
दुर्गागारे वंशिवाद्यं मधुरीञ्च न वादयेत्"॥
झल्लकं कांस्यनिर्म्मितकरतालकम्। इति तिथ्यादितत्त्वे रघुनन्दनभट्टाचार्य्येण व्याख्यातम्॥
करताली, स्त्री, (करताल + गौरादित्वात् ङीष्।) वाद्यविशेषः। करताल खरताल इति ख्याता। तत्पर्य्यायः। कर्त्तरिः २। इति त्रिकाण्डशेषः॥ करतलध्वनिः। तथा च। "यथा न स्यादाजीकपटकरतालीपटुरवः"। इति उद्भटः॥
करतोया, स्त्री, (करात् शङ्करस्य हस्तात् च्युतं तोयं जलं अस्ति यत्र। अर्श आद्यच्।) खनामख्यातउत्तरदेशस्थनदीविशेषः। तत्पर्य्यायः। सदानीरा २। इत्यमरः। १। १०। ३३॥ सदानीरवहा ३। इति शब्दरत्नावली॥ *॥ गौरीविवाहसमये शङ्करकरगलितसंप्रदानतोयप्रभवत्वात्करस्य तोयं विद्यतेऽत्र इति करतोया। आवश्ये एतदर्थं सर्व्वा नद्यो रजस्वलाः इयं तु न रजस्वला अतएव सदा सर्व्वदा नीरमस्या इतिसदानीरा। तथा च स्मृतिः।
"अषाढी कर्कटे देवी त्यहं गङ्गा रजस्वला।
सर्व्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी"॥
इत्यमरटीकायां भरतः॥ (इयं हि तीर्थविशेषः। यथा महाभारते ३। तीर्थयात्रापर्व्वणि। ८५। ३॥
"करतोयां समासाद्य त्रिरात्रोपोषितो नरः।
अश्वमेधमवाप्नोति प्रजापतिकृतो विधिः"॥)
करद्रुमः, पुं, (किरति शाखाः सर्व्वतः यः। स चासौ द्रुमश्चेति।) कारस्करवृक्षः। इति राजनिर्घण्टः॥
करपत्रं, क्ली, (करेण कराद् वा पततीति। पत + "सर्व्वधातुभ्यः ष्ट्रन्" इति ष्ट्रन्।) क्रकचः। इत्यमरः। २। १०। ३५॥ कराद् इति भाषा। (करौ पत्रमिव नौरिव यत्र।) जलक्रीड़ा। इति जटाधरः॥
करपत्रवान्, [त्] पुं, (करपत्राकारपत्रमस्ति यस्मिन् मतुप् मस्य वः।) तालवृक्षः। इति शब्दचन्द्रिका॥
करपत्रिका, स्त्री, (करौ पत्रं नौरिव यस्याः। पत्र + कप् + टाप् + अत इत्वम्।) जलक्रीड़ा। इति जटाधरः॥
करपर्णः, पुं, (करो हस्तः तदर्थं पर्णं यस्य।) भिण्डावृक्षः। रक्तैरण्डः। इति राजनिर्घण्टः॥ (एरण्डशब्देऽस्य विशेषः उक्तः॥)
करपल्लवः, पुं, (करस्य पल्लव इव।) अङ्गुलिः। यथा, मार्कण्डेये ८४। २६।
"करपल्लवसङ्कीर्णैः तैरस्मान्नृत्त सर्व्वतः"॥
करपात्रं, क्ली, (करः पात्रमिव यत्र।) जलक्रीड़ा। इति हारावली॥
करपालः, पुं, (करं पालयति रक्षति। पाल + कर्म्मण्यण्।) खड्गः। इत्यमरः। २। ८। ८६॥
करपालिका, स्त्री, (करपाल् + ण्वुल् + टाप् अत इत्वम्।) क्रकचदारुहस्तदण्डः। खोंटा इति ख्यातः। इति भरतः॥ एकधाराखड्गम्। इति खामी। तत्पर्य्यायः। ईजी २। इत्यमरः। २। ८। ८६॥ ईजी ३ इजिः ४ करवालिका ५। इति तट्टीका॥
करबालः, पुं, (करस्य बालः पुत्र इव। नखस्य करजातत्वात् तथात्वम्।) नखम्। इति शब्दमाला॥ (करं बलति संवृणोति बल + अण्।) खड्गः। इत्यमरटीकायां भरतादयः। करवाल इति भाषा। (यथा, गीतगोविन्दे। १। १०॥
"क्ष्वेल्लिवहनिधने कलयसि करवालम्"॥)
करबालिका, स्त्री, (कर + बल + ण्वुल् + टाप् + अत इत्वम्।) करपालिका। इत्यमरटीकायां रायमुकुटादयः॥
करभः, पुं, (क्षरति क्षीर्य्यतेऽनेन वा। क्षर् हिंसायां कृञ् विक्षेपे वा "कृभृवृक्षिकलिगर्दिभ्योऽभच्"। उणां। ३।१२२। इति अभच्। करे भाति शोभते इति वा। भा + कः।) मणिबन्धावधिकनिष्ठापर्य्यन्तं करस्य बहिर्भागः। (यथा, रघुः। ६। ८३।
"धात्री कराभ्यां करभोपमोरुः"॥)
उष्ट्रशिशुः। इत्यमरः॥ २। ९। ७५।
करिशावकः। इत्यमरटीकासारसुन्दरी॥ (यथा भागवते ८।२।२२।
"सघर्म्मतप्तः करिभिः करेणुभिर्-
वृतोमदच्युत्करभैरनुद्रुतः"॥)
उष्ट्रः। इति मेदिनी॥ नखनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ कटिः। इति जटाधरः॥
करभकाण्डिका, स्त्री, (करभप्रियं काण्डमस्याः।

करमकाण्ड + कप् + अत इत्वम् ।) उष्ट्रकाण्डीवृक्षः । इति राजनिर्घण्टः ॥

करभप्रिया, स्त्री, (करभस्य करिशावकस्य उष्ट्रस्य वा प्रिया ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

करभवल्लभः, पुं, (करभस्य हस्तिशावस्य वल्लभः प्रियः ।) कपित्थवृक्षः । पीलुवृक्षः । इति राजनिर्घण्टः ॥

करभादनी, स्त्री, (करभेण उष्ट्रेण अद्यतेऽसौ । अद् + कर्म्मणि ल्युट् । ततो + ङीप् ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

करभी, [न्] पुं, (कर इव भाति करभः शुण्डः स अस्यास्ति । करभ + इनिः । यद्वा करभः हस्तावयवविशेषः सोऽस्य शुण्डावच्छेदे अस्तीति इनिः ।) हस्ती । इति राजनिर्घण्टः ॥

करभी, स्त्री, (करभ + ङीप् ।) उष्ट्री । तत्पर्य्यायः । वामी २ । इति जटाधरः ॥

करभीरः, पुं, (करभिणं हस्तिनं ईरयति प्रेरयति मृत्युमुखम् । करभि + ईर् + अच् ।) सिंहः । इति शब्दरत्नावली ॥

करभूषणं, क्ली, (करस्यभूषणम् ।) कङ्कणम् । इत्यमरः । २ । ६ । १०८ ॥ हस्ताभरणमात्रञ्च ॥

करमट्टः, पुं, (करं करिशुण्डमपि अट्टति तुच्छीकरोति । अस्य सरलकाण्डत्वात् तथात्वम् । अट्ट अनादरे + खसुम् प्रत्ययः ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः । (गुवाकशब्देऽस्य गुणा द्रष्टव्याः ॥)

करमरी, [न्] पुं, (किरति क्षिपति अत्र दण्डान् इति करः कारागारः । कृ + अधिकरणे अप् । तस्मिन् करे मरः मरणं मृत्युवत् यातना यस्य वाऽलकात् इनिः । तच्च म्रियते वा ।) बन्दी । इति त्रिकाण्डशेषः । कयेदी इति भाषा ॥

करमर्दः, पुं, (करं मृद्नातीति । करमृद + घञ् ।) करमृद्दोदे + कर्म्मण्यण् । करेण मृद्यते इति कर्म्मणि अप् वा ।) करमर्दकवृक्षः । इति शब्दरत्नावली ॥ (यथा भावप्रकाशे,—अस्य गुणा उक्ताः ।

"लघुर्दीपनलाभ्यान्तु करमर्दद्वयं मतम् ।
करमर्दद्वयं त्वाममम्लं गुरुत्वाद्धरम् ॥
उष्णं रुचिकरं प्रोक्तं पित्तरक्तकफप्रदम् ।
तत्पक्वं मधुरं वृष्यं लघुपित्तसमीरजित् ॥
करमर्दः सुमेधाः स्यात् क्षुद्व्याधाक्रमलस्तथा ।
तस्माल्लघुफलायास्तु सा ज्ञेया करमर्दिका ॥)

करमर्दकः, पुं, (कर + मृद + ण्वुल् । करमर्द एव स्वार्थे कन् इति वा ।) वृक्षविशेषः । इत्यमरटीकासारसुन्दरी । पाखि आमला इति भाषा ॥ इति रत्नमालाराजनिर्घण्टादयः । करौन्दा इति करमुचा इति च भाषा । तत्पर्य्यायः । क्षुद्व्याधाकफलः २ अविग्नः ३ सुमेधाः ४ । इत्यमरः । २ । ४ । ६७ ॥ क्षुद्व्याधाकः ५ पाकफलः ६ क्षुद्व्याफलः ७ पाकक्षुद्व्याफलः ८ क्षुद्व्याफलयाकः ९ पाकफलक्षुद्व्याः १० फलक्षुद्व्याः ११ पाकफलक्षुद्व्याः १२ वनालयः १३ वनालकः १४ करान्धकः १५ वोलः १६ वग्रः १७ अविग्नः १८ । इति तट्टीकायां भरतः ॥ करमर्दी १९ तनेच्छुदा २० कराक्षः २१ । इति रत्नमाला ॥

करमर्दुः २२ पाखिमर्दः २३ । तद्वालफलगुणाः । तिक्तत्वम् । अम्लत्वम् । दीपनत्वम् । दाहदाढत्वञ्च । तत्पक्वफलगुणाः । त्रिदोषघ्नमनत्वम् । अरुचिविषनाशित्वञ्च । इति राजनिर्घण्टः ॥ पिपासानाशित्वम् । अम्लत्वम् । रुचिपित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ (यथा, वामटः ।

"गुरूष्णवीर्य्यं वातघ्नं सरञ्च करमर्दकम् ॥)

करमर्दी, स्त्री, (करं मृद्नातीति । कर + मृद् + अण् ङीप् ।) करमर्दकवृक्षः । इति रत्नमाला ॥

करमालः, पुं, (करः करिशुण्डः तदाकारा माला समूहः यस्य मेघस्य धूमस्य वा क्रमशः करिशुण्डवत् प्रसरत्वात् तथात्वम् ।) खतमालः । धूमः । इति हेमचन्द्रः ॥

करमाला, स्त्री, (कराङ्गुलीभिर्मालयेव जपनात् करूपा माला । कराङ्गुल्य मालेव वा ।) करपर्व्वरूपमाला । यथा,

"अनामिकात्रयं पर्व्व कनिष्ठाच्चितयं तथा ।
तर्ज्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता" ॥
इति शुद्धमाद्यातन्त्रे सामान्यविषयम् ॥ * ॥
"तर्ज्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात् ।
तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका ।
पर्व्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत्" ॥
इति शिवरहस्ययं शक्तिभिन्नविषयम् ॥ * ॥
"अनामामूलमारभ्य कनिष्ठादिक्रमेण तु ।
तर्ज्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत्" ॥
इति सनत्कुमारसंहितावचनं शक्तीतरेषामष्टवारविषयम् ॥ * ॥
"अनामिकात्रयं पर्व्व कनिष्ठा च त्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्व्विका ॥
करमाला समाख्याता आरभ्यानामिकान्तरात् ।
तर्ज्जन्यग्रे तथा मध्ये यो जपेत् स तु पापहृत्" ॥
इति शक्तिविषये सुद्धमाद्यातन्त्रम् ॥ * ॥ तथा ।
"अनामामूलमारभ्य प्रादक्षिण्यक्रमेण तु ।
मध्यमामूलपर्य्यन्तं जपेदष्टसु पर्व्वसु" ॥
इदमपि शक्तिविषये अष्टवारपरम् । इति श्यामारहस्यम् ॥

करमुक्तं, क्ली, (करेण सुदृढं धृत्वा शत्रुं प्रति मुच्यते । कर + मुच् + कर्म्मणि क्तः ।) अस्त्रविशेषः । इति हलायुधः । बरछी भाला इत्यादि भाषा ॥

करम्बः, पुं, (क्लम् करणे + "क्लकदि कडीत्यम्बच्" । उणा० । ४ । ८२ ।) करम्भः । इत्यमरटीकायां नीलकण्ठः ॥ मिश्रिते च । इति हेमचन्द्रः ॥

करम्बितः, त्रि, (करम्बः मिश्रणं जातोऽस्य । करम्ब + इतच् ।) मिश्रितः । खचितः । इति त्रिकाण्डशेषः ॥ ("ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे" ॥ इति गीतगोविन्दः । १ । २ ॥)

करम्भः, पुं, (केन जलेन रभ्यते मिश्रीक्रियते । रभिधातोरनेकार्थत्वात् "अकर्त्तरि चेति" घञ् । ३ । ३ । १९ । रभेरशव्लिटोः । ७ । १ । ६३ । इति नुम् ।) दधिमिश्रितशक्तुः । इत्यमरः । २ । ९ । ४८ ॥ (यथा शतपथब्राह्मणे । २ । ५ । २ । ४ ।

"अतुषानिव यवान् क्षत्वा तानोषदोषोप्तप्य तेषां करम्भपाचानि कुर्व्वन्ति" ॥ उदमन्थः । यथा, यजुर्व्वेदे १९ । २१ ।

"धानाः करम्भः सक्तवः परिवापः पयोऽधि" ।

"करम्भः उदमन्थः । इति वेददीपिनिः ॥ भक्तयवमात्रम् । यथा मनुः १२ । ७९ ।

"करम्भवालुकातापान् कुम्भीपाकांश्च दारुणान्" । करम्भवालुकातापान् करम्भैर्यवैः सह भक्ष्या या वालुकाः तद्वत्तप्तवालुकादीन् इत्यर्थः ॥ मिश्रगन्धः । यथा भागवते ३ । २६ । ४५ ।

"करम्भपूतिसौरभ्य शान्तोदग्रादिभिः पृथक् ।
द्रव्यावयववैषम्याद् गन्ध एको विभिद्यते" ॥)

करम्भकं, क्ली, (करम्भ एव स्वार्थे कन् ।) करम्भः । दधिसक्तवः । तत्पर्य्यायः । कर्कसारम् २ । इति हारावली ॥

करम्भा, स्त्री, (केन जलेन रभ्यते सिच्यते इति । अथवा केन वायुना रभ्यते मिश्रीक्रियते नानागन्धो यस्याः । रभेर्नानार्थत्वात् क + रभ + घञ् + नुम् टाप् च ।) घृतावरी । प्रियङ्गुवृक्षः । इति राजनिर्घण्टः ॥ (खनामख्याता कलिङ्गदेशोत्पन्ना रमणी । सा तु पूरुवंशीयस्याक्रोधनस्य पत्नी । यथा महाभारते १ । ९५ । २२ ।

"अक्रोधनः खलु कालिङ्गीं करम्भां नामोपयेमे । तस्यामस्य जज्ञे देवातिथिः" ॥)

करवहः, पुं, (करे रोहति कराङ्गुलीभ्य उत्पद्यते इत्यर्थः । कर + रुह + "इगुपधेति" । ३ । १ । १३४ । कः ।) नखः । इत्यमरः । २ । ६ । ८३ ॥ (यथा आर्य्यासप्तशती ३७ । "अस्याः करवहखण्डितकाण्ड-पटप्रकटनिर्गता दृष्टिः" ॥)

करर्द्धिः, स्त्री, (करस्य ऋद्धिः करेण ऋद्ध्यिर्यस्य वा । करसम्पत् ।) करतली । इति त्रिकाण्डशेषः ॥

करवालिका, स्त्री, (करं वलते । वल हिंसादानयोः अच् । करेण वाह्यते वा । स्वार्थे कन् + टाप् च ।) करपालिका । इत्यमरटीकायां भरतः ॥

करवी, स्त्री, (कस्य वायोः रवो यत्र । गौरादित्वात् ङीष् ।) कवरी । शिरुपत्रम् । इति शब्दचन्द्रिका ॥

करवीरः, पुं, (करं वीरयति । वीर + विक्रान्तौ + कर्म्मण्यण् ।) खड्गः । दैत्यविशेषः । इति मेदिनी । प्रसङ्गानम् । इति हेमचन्द्रः ॥ ब्रह्मावर्त्ते दृषद्वतीनदीतीरे चन्द्रशेखरराजपुरम् । इति कालिकापुराणे ४६ अध्यायः ॥ (पर्व्वतविशेषः । यथा, भागवते ५ । १९ । २८ ।

"एवमपरेण यवनपारियात्रौ
दक्षिणेन केवास करवीरौ प्रगायतौ" ॥

नागविशेषः । यथा, महाभारते १ । ३५ । १२ ।

"करवीरः पुष्पदंष्ट्रो विल्वको विल्वपाण्डरः" ॥)
वृक्षविशेषः । करवी इति भाषा ॥
(यथा रामायणे ३ । १७ । १० ।

"दाडिमान् करवीरांश्च अशोकांस्तिलकांस्तथा" ॥)
तत्पर्य्यायः । प्रतिहासः २ घृतप्रासः ३ चण्डातः ४ हयमारकः ५ । इत्यमरः । २ । ४ । ७६ ॥ प्रतीहासः

ई । इति तट्टीका ॥ अश्वघ्नः ७ हयारिः ८ अश्वमारकः ९ शीतकुम्भः १० तुरङ्गारिः ११ । इति रत्नमाला ॥ अश्वहा १२ वीरः १३ हयमारः १४ हयघ्नः १५ शतकुन्दः १६ अश्वरोधकः १७ वीरकः १८ कुन्दः १९ शकुन्दः २० श्वेतपुष्पकः २१ अश्वान्तकः २२ नखराङ्कः २३ अश्वनाशनः २४ स्थलकुमुदः २५ दिव्यपुष्पः २६ हरिप्रियः २७ गौरीपुष्पः २८ सिद्धपुष्पः २९ । अस्य गुणाः । कटुत्वम् । तीक्ष्णत्वम् । कुष्ठकण्डूतिनाशित्वम् । व्रणार्त्तिविषविस्फोटकश्रमनत्वम् । अश्मरीतिप्रदत्वञ्च । इति राजनिर्घण्टः ॥ (श्वेतरक्तभेदेन यथा,—

"करवीरः श्वेतपुष्पः शीतकुम्भोऽश्मारकः ।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा ॥
करवीरदयं तिक्तं कषायं कटुकञ्च तत् ।
व्रणालाघवकृन्मेध्यं कोपकुष्ठव्रणापहम् ।
वीर्य्याणां क्रिमिकण्डूघ्नं भक्षितं विषवन्मतम्" ॥

इति भावप्रकाशः ॥ नागविशेषः । इति भारतम् ॥)

करवीरकः, पुं, (करवीर इव कायति प्रकाशते । कै + कः । करं वीरयतीति । कर + वीर विक्रान्तौ + खुण् ।) अर्जुनवृक्षः । इति राजनिर्घण्टः ॥ खड्गः । इति शब्दमाला ॥ (करवीर एव स्वार्थे कन् ।) करवीरः । विषभेदः । स तु करवीरस्य मूलम् । इति हेमचन्द्रः ॥

करवीरकन्दसंज्ञः, पुं, (करवीरकन्दसंज्ञया संज्ञा यस्य । करवीरकन्द इति संज्ञा यस्य वा ।) तैलकन्दः । इति राजनिर्घण्टः ॥

करवीरभुजा, स्त्री, (करवीरस्य भुज इव शाखावत् भुजः शाखाऽस्याः ।) आढकीवृक्षः । इति राजनिर्घण्टः ॥ अरहर इति भाषा ॥

करवीरी, स्त्री, (किरति क्षिपति राक्षसासुरादीन् इति । कृ + अच् । करः तादृशः वीरः पुत्रो यस्याः । यद्वा करं सुखं राति ददातीति क + रा + कः । सुखप्रदः वीरपुत्रो यस्याः ।) अदितिः । मेषजवती । पुत्रवती । इति मेदिनी ॥

करशाखा, स्त्री, (करस्य शाखा इव ।) अङ्गुली । इत्यमरः । २ । ६ । ८१ ॥ तासां परिमाणं यथा ।

"अष्टभिस्तैर्भवेत् ज्येष्ठं मध्यमं सप्तभिर्यवैः ।
कन्यसं षड्भिरद्दिष्टमङ्गुलं मुनिसत्तम ॥
मानन्तु पार्श्वेन । षड्यवाः पार्श्वसम्मिताः । इति कात्यायनदर्शनात्" । इति तिथ्यादितत्त्वम् । तत्पर्य्यायः । अयुवः १ अस्थ्यः २ क्षिपः ३ त्रिप्रः ४ शर्य्याः ५ रश्मनाः ६ धीतयः ७ अथर्य्यः ८ विपः ९ काण्डाः १० अवनयः ११ हरितः १२ खसारः १३ नामयः १४ सनाभयः १५ योक्त्राणि १६ योजनानि १७ धुरः १८ शाखाः १९ अभीशवः २० दीधितयः २१ गभस्तयः २२ । इति हारावलिरङ्गुलिनामानि । इति वैद्यनिघण्टौ २ अध्यायः ॥

करशीकरः, पुं, (करात् करिशुण्डात् निःसृतः शीकरः । करस्य गजशुण्डस्य शीकरो वा ।) हस्तिशुण्डनिर्गतजलकणा । तत्पर्य्यायः । वमथुः २ । इत्यमरः । २ । ८ । ३७ ॥ (यथा रघुः । ७ । ४८ ।

"उद्यन्तमग्निं शमयाम्बभूवु-
गंजा विविग्नाः करशीकरेण" ॥)

करशूकः, पुं, (करस्य शूकः सूच्याय इव सूचय इव वा ।) नखः । इति त्रिकाण्डशेषः ॥

करहाटः, पुं, (करेण किरणेन सूर्य्यस्येति यावत् हाट्यते दीप्यते इति । हट् + घञ् + कर्म्मण्यण् ।) पद्ममूलम् । मदनवृक्षः । इति मेदिनी ॥ महापिण्डीतरुः । इति राजनिर्घण्टः ॥

करहाटकः, पुं, (करहाट एव इति स्वार्थे कन् । करं हाटयतीति ण्वुल् वा ।) मदनवृक्षः । इत्यमरः । २ । ४ । ५२ ॥ हस्तोपस्कर इति भाषा ॥

करामर्दः, पुं, (करं आमृद्नातीति । कर + आ + मृद् + अच् ।) करमर्दवृक्षः । इति शब्दरत्नावली ॥ करमचा इति भाषा ॥

करास्फुकः, पुं, (कीर्य्यते क्षिप्यते । कॄ + कर्म्मणि अप् । करं अम्बु यस्मात् कप् ।) क्षय्यपाकपक्वफलवृक्षः । इति शब्दचन्द्रिका भरतधृतवाचस्पतिश्च ॥ आमि आमला इति भाषा ॥

करास्फुकः, पुं, (कीर्य्यते इति करं कीर्य्यमाणं अस्यं यतः । अस्य + कप् ।) करमर्दवृक्षः । इति राजनिर्घण्टः ॥

कराविका, स्त्री, (करावि आचरति उष्ट्रीवादिकाले करवल्लम्बमानत्वात्तथात्वम् । कर + आचारे क्यङ् । ततो + ण्वुल् + टाप् च ।) बलाकापक्षी । लम्बकः । इति भूरिप्रयोगः ॥

कारारोटः, पुं, (करे आरोटते दीप्यते । आ + रट् + अच् ।) अङ्गुरीयकम् । इति त्रिकाण्डशेषः ॥

कराशं, क्ली, (कराय क्षतरोगादिनाशाय अलति पर्य्याप्नोतीति । अल् + अच् ।) क्षयकुठेरकः । इति मेदिनी ॥ काल तुलसी इति भाषा ॥

कराशः, पुं, (करं आलाति गृह्णाति । आ + ला + कः । कराय क्षेपाय अलति पर्य्याप्नोति वा ।) सर्जरसयुक्ततैलम् । इति मेदिनी ॥ गर्जनतेल इति भाषा ॥ तैले हृते वा यक्षवेसवारः । इति पाकराजेश्वरः ॥ (क्वचित् क्लीवेऽपि दृश्यते । यथा,

"तप्तस्नेहे पचेत् पूर्वं वेसवारकसंज्ञकम् ।
पाकप्रापितसौरभ्यं कराशं खदकैर्मतम्" ॥

गन्धर्व्वभेदः ॥ यथा, महाभारते । १ । १२३ । ५४ ।

"सङ्घा हुहुङ्घा हुहुकः कराशश्च महामगः" ॥)

कराशः, त्रि, (कराय क्षेपाय भयप्रदर्शनाय अलति पर्य्याप्नोति ।) दन्तुरः । दाँतो इति भाषा ॥ (यथा,

"कराश वदनां घोरां मुक्तकेशीं चतुर्भुजां" ।

इति चामुण्डाध्यानम् ॥) तुण्डः । उचु इति भाषा ॥ भीषणः । इति मेदिनी ॥ भयानक इति यावत् ॥ (यथा, रघुः । १२ । ९८ ।

"तद्योधि शतधा भिन्नं ददृशे दीप्तिमन्मुखम् ।
वपुर्महोरगस्येव करालपतगक्षतम्" ॥)

करालकः, पुं, (कराल एव स्वार्थे कन् । करालवत् कायति वा ।) क्षयतुलसी । इति रत्नमाला । करालशब्दार्थश्चात्र ॥

करालचिपुटा, स्त्री, (करालानि त्रीणि पुटानि यस्याः ।) लङ्गधान्यम् । इति राजनिर्घण्टः ॥

कराला, स्त्री, (करालनाम्ना नाम यस्याः ।) शारिवा । अनन्तमूल इति ख्याता । इति रत्नमाला ॥ (शारिवाशब्दे अस्या गुणा व्याख्येयाः ॥)

करालिकः, पुं, (कराणां करसदृशशाखानां आलिः श्रेणिर्यत्र । कप् ।) वृक्षः । इति हेमचन्द्रः ॥

करालो, स्त्री, (कराल + गौरादित्वात् ङीष् ।) अग्नेः सप्तजिह्वान्तर्गतजिह्वाविशेषः । इति जटाधरः ॥ (यथा मुण्डकोपनिषदि । १ । २ । ४ ।

"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरूपी च देवी
लेलायमाना इति सप्त जिह्वाः' ॥)

करिकावल्ली, स्त्री, (करिकायाया इव वल्ली ।) चविकाख्यवृक्षः । इति राजनिर्घण्टः । घइ इति भाषा ॥ (चविकाशब्देऽस्या विशेषो ज्ञेयः ॥)

करिकुसुमः, पुं, (करीति नागकेशरः त्वदत् कुसुमः ।) नागकेशरचूर्णकम् । इति हारावली ॥

करिगर्ज्जितं, क्ली, (करिणः गर्ज्जितं गर्ज्जनं । करि + गर्ज्ज + भावे क्तः ।) हस्तिगर्जनम् । तत्पर्य्यायः । हंहितम् २ । इत्यमरः । २ । ८ । १०७ ॥

करिजः, पुं, (करिणो जायते इति । करि + जन् + कर्त्तरि डः ।) हस्तिशिशुः । इति शब्दमाला ॥

करिणी, स्त्री, (करिन् + स्त्रियां ङीप् ।) हस्तिनी । तत्पर्य्यायः । धेनुका २ वशा ३ । इत्यमरः । २ । ८ । ३६ ॥ करेणुः ४ करेणुः ५ करेणुका ६ रेणुका ७ वासिता ८ वासा ९ हस्तिनी १० । इति शब्दरत्नावली ॥ कटभरा ११ पुष्करिणी १२ कषा १३ गणिका १४ गजयोषित् १५ । इति जटाधरः ॥ पद्मिनी १६ इत्यमरटीका ॥ (यथा भागवते । ४ । ६ । ५३ ।

"आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत्पुरम्" ॥)

करिदारकः, पुं, (करिणं दृणाति छिनत्ति दारयतीत्यर्थः । दॄ विदारे + ण्वुल् ।) सिंहः । इति शब्दरत्नावली ॥

करिपत्रं, क्ली, (करिणः कर्णवत् पत्रं यस्य ।) ताडीवृक्षपत्रम् । इति राजनिर्घण्टः ॥

करिपिप्पली, स्त्री, (करिसंज्ञया संज्ञा यस्याः पिप्पल्याः सा । करिनामिका पिप्पली ।) गजपिप्पली । इत्यमरः । २ । ४ । ९७ ॥

करिपोतः, पुं, (करिणः पोतः शिशुः ।) करिशावकः । इति हलायुधः । २ । ६९ ॥

करिबन्धः, पुं, (करी बध्यते बध्यतेऽत्र । यद्वा करिणं हस्तिनं बध्नाति अत्र । बन्ध + अधिकरणे घञ् ।) हस्तिबन्धनस्तम्भः । तत्पर्य्यायः । प्रारब्धिः २ । इति हारावली ॥

करिमाचलः, पुं, (मच शब्दमभयो रितिधातोः भावे घञ् । करिणि हस्तिबधविषये माचं शब्दं लाति गृह्णातीति । ला + कः ।) सिंहः । इति त्रिकाण्डशेषः ॥

करिमुखः, पुं, (करिणो मुखमिव मुखं यस्य ।) गणेशः । इति त्रिकाण्डशेषः ॥

करिरः, पुं, क्ली, (कॄ + इरन् ।) करीरः । इति शब्दरत्नावली ॥

करिशावकः, पुं, (करिणः शावकः शिशुः ।) हस्तिशिशुः । तत्पर्य्यायः । कलभः २ । करभ इत्यपि पाठः । इत्यमरः । २ । ८ । ३५ ॥ करिपोतः ३ । इति हलायुधः ॥ करिजः ४ । इति शब्दमाला ॥ विक्कः ५ । धिक्कः ६ । यथा, शब्दरत्नावली ॥

"यावत् पञ्चाब्दमेतस्मिन् करभः कलभोऽपि च ।
विक्कधिक्कौ तथा स्त्री तु करभी कलभीत्यपि" ॥

करी, [न्] पुं, (करः शुण्डः अस्यास्तीति इनिः ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा भागवते । ८ । २ । २२ ।

"स घर्म्मतप्तः करिभिः करेणुभि-
र्वृतो मदच्युत्कलभैरनुद्रुतः" ॥)

करीरः, पुंक्ली, (किरति विक्षिपति स्वदेहजावरणादीनिति । "कॄशॄपॄकटिपटि ग्रौटिभ्य ईरन्" । उणां । ४ । ३० । इति ईरन् ।) वंशाङ्कुरः । इत्यमरः । २ । ४ । १७३ ॥ बाँसेर कोँड़ा इति भाषा ॥ (यथा, माघे ४ । १४ ।

"रन्ध्रैः पुनर्यत्र रुचा रुचंखा-
मानिन्यिरे वंशकरीरनीलैः" ॥

"वंशशब्दस्याज्ञानताहेतोरलूनतायाः प्रतिपत्यर्थत्वादपौनरुक्त्यम् ॥ अतएवैकार्थपदमप्रयोज्यमित्युक्ता करिकलभकर्णावतंसादिषु प्रतिपत्तिविशेषकरेषु न दोष इत्याह वामनः" ॥ इति तट्टीकायां मल्लिनाथ ॥)

अस्य गुणाः । श्लेष्मनाशित्वम् । कषायत्वम् । दाहजनकत्वञ्च । इति राजवल्लभः ॥ (यथाह वाभटः ।

"करीरमाध्मानकरं कषायस्वादुतिक्तकम्" ॥
"वेणोः करीराः कफला मधुरा रसपाकतः ।
विदाहिनो वातकराः स कषाया विरूक्षणाः" ॥

इति सुश्रुतः ॥)

करीरः, पुं, (कीर्य्यते क्षिप्यते जलमत्र "कॄशॄपॄकटीति" ईरन् । उणां । ४ । ३० ।) घटः । इति मेदिनी ॥ (कीर्य्यते दूरे निक्षिप्यते दूरतः त्यज्यते करटकादिभयादिति यावत् ।) मरुभूमिज उष्ट्रप्रियः करटकिवृक्षः । करील इति भाषा । तत्पर्य्यायः । ककरः २ ग्रन्थिलः ३ । इत्यमरः । २ । ४ । ७७ ॥ ककचः ४ । इति तट्टीका ॥ निष्पत्रिका ५ करिरः ६ गूढपत्रः ७ करकः ८ तीक्ष्णकण्टकः ९ । अस्य गुणाः । (यथा भावप्रकाशे ।

'करीरः कटुकस्तिक्तः श्लेष्मघ्नो भेदनः स्मृतः ।
दुर्नामकफवातामगरग्रोथव्रणप्रणुत्' ॥)

आध्मानकारित्वम् । कषायत्वम् । कटुत्वम् । उष्णत्वम् । क्षतिशयकफकारित्वम् । श्वासानिलारोचकसर्व्वशूलविच्छर्द्दिखर्जूव्रणदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

करीरा, स्त्री, (करिर + "अजाद्यतष्टाप्" । ४ । १ । ४ । इति टाप् ।) चीरिका । भिँभि पोका इति भाषा ॥ हस्तिदन्तमूलम् । इत्युणादिकोषः ॥

करीरिका, स्त्री, (करीरमिवाकृतिरस्त्यस्याः । करीर + ठन् + टाप् च ।) हस्तिदन्तमूलम् । इति चिकाण्डशेषः ॥

करीरी, स्त्री, (कॄ + ईरन् + गौरादित्वात् ङीष् ।)

चीरिका । हस्तिदन्तमूलम् । इति मेदिनी ॥

करीषः, पुं क्ली, (कीर्य्यते विक्षिप्यते इति । "कृतॄभ्यामीषन्" । उणां । ४ । २६ । इति कॄ + ईषन् ।) शुष्कगोमयम् । इत्यमरः । २ । ६ । ५१ ॥ घूँटे इति भाषा । तत्पर्य्यायः । गोऽग्निः २ छगणः ३ । इति हेमचन्द्रः ॥ (यथा, रामायणे । २ । १०० । ७ ।

"ददर्श च वने तस्मिन् महतः सञ्चयान् कृतान् ।
मृगाणां महिषीणाञ्च करीषैः श्वीतकारणात्" ॥)

करीषाग्निः, पुं, (करीषे करीषस्थितो वा अग्निः ।) शुष्कगोमयवह्निः । घूँटेर आगुन इति भाषा । तत्पर्य्यायः । छागणः २ । इति चिकाण्डशेषः ॥

करुणः, पुं, (करोति मनः आनुकूल्याय । कृ + "कृदारिभ्य उनन्" । उणां । ३ । ५३ । इति उनन् ।) वृत्तविशेषः । करुणा लेबुर गाछ इति भाषा । तत्फलगुणाः । कफवाय्वाममेदोनाशित्वम् । पित्तप्रकोपकत्वञ्च । इति राजवल्लभः । बुद्धभेदः । इति चिकाण्डशेषः ॥ षट्कारादयश्चरमान्तर्गतदशमीयरसः । इत्यमरः । १ । ७ । १७ । तस्य लक्षणादि । "इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ॥
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् ।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ॥
अनुभावा दैवनिन्दा भूपातक्रन्दितादयः ।
वैवर्ण्योच्छ्वासनिश्वासस्तम्भप्रलपनानि च ॥
निर्व्वेदमोहापस्मारव्याधिग्लानिस्मृतिभ्रमाः ।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥
शोकं विनश्वरबन्धुप्रभृति । यथा राघवविलासे ।

विपिने च जटानिबन्धनं
तव चेदं च मनोहरं वपुः ।
अनयोर्घटना विधेः स्फुटं
ननु खड्गेन शिरीषकर्त्तनम् ॥

अत्र रामवनवासजनितशोकार्त्तस्य दशरथस्य दैवनिन्दा । एवं बन्धुवियोगवित्तनाशादावपि उदाहार्य्यम् ॥ परिपोषस्तु महाभारते स्त्रीपर्व्वणि बोद्धव्यः" । इति साहित्यदर्पणे ३ । १९९ ॥ (सर्व्वजीवेषु दयावान् । यथा भागवते । ३ । २७ । ८ ।

"यदृच्छयोपलब्धे सन्तुष्टो मितभुग् मुनिः ।
विविक्तशरणः शान्तो मैत्रः करुण आत्मवान्" ॥)

करुणमल्ली, स्त्री, (करुणा करुणाया अर्हा मल्ली ।) नवमल्लिका । इति शब्दचन्द्रिका ॥

करुणविप्रलम्भः, पुं, (करुणयुक्तो विप्रलम्भः ।) पूर्व्वरागादिचतुर्भेदविप्रलम्भशृङ्गारमध्ये विप्रलम्भविशेषः । अस्य लक्षणम् । यथा साहित्यदर्पणे ३ परिच्छेदे १९३ ।

"यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये ।
विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः" ॥

यथा, कादम्बर्य्याम् । "पुण्डरीकमहाश्वेतावृत्तान्ते पुनरलभ्ये पुरीरान्तरे वा लभ्ये करुणाख्य एव रसः ॥ किञ्चाकाशसरस्वतीभाषानन्तरमेव शृङ्गारः । सङ्गमप्रत्याशायां रतेरुद्भावात् प्रथमस्तु करुण एवेत्यभियुक्ता मन्यन्ते यच्चाच सङ्गमप्रत्याशानन्तरमपि भवतो विप्रलम्भशृङ्गारस्य

प्रवासाख्यो भेद एवेति केचिदाहुः तदन्ये मरणरूपविशेषसम्भवात्तद्भिन्नमपि मन्यन्ते" ॥

करुणा, स्त्री, ("कृदारिभ्य उनन्" । उणां । ३ । ५३ । इति कृ + उनन् । टाप् च ।) परदुःखहानीच्छा । तत्पर्य्यायः । कारुण्यम् २ घृणा ३ कृपा ४ दया ५ अनुकम्पा ६ । अनुक्रोशः ७ । इत्यमरः । १ । ७ । १ ॥ शूकः ८ । इति हेमचन्द्रः ॥ (यथा रघुः ८ । ६७ ।

"करुणाविमुखेन मृत्युना
हरता त्वां वद किं न मे हृतम्" ॥

गङ्गानामविशेषः । यथा काशीखण्डे २९ । ४३ ।

"कूटस्था करुणा कान्ता कूर्म्मयाना कलावती" ॥
करुणा दयास्वरूपा । इति तट्टीका ॥)

करुणापरः, त्रि, (करुणा परा यस्य करुणायां परः अनुरागी वा ।) दयापरः । तत्पर्य्यायः । दयालुः २ कृपालुः ३ सूरतः ४ । इति हेमचन्द्रः ॥

करुणी, स्त्री, (कृ + उनन् + ङीप् ।) पुष्पवृक्षविशेषः । ककरखिरणि इति लोकाग्रे प्रसिद्धा । तत्पर्य्यायः । ग्रीष्मपुष्पी २ रक्तपुष्पी ३ चारिणी ४ राजप्रिया ५ राजपुष्पी ६ सूक्ष्मा ७ ब्रह्मचारिणी ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफमारुताध्मानविषविच्छर्द्दिजन्तृच्छ्वासनाशित्वञ्च । इति राजनिर्घण्टः ॥

करेटः, पुं, (करे कराङ्गुलीषु अटति उत्पद्यते इति अट + अच् अलुक्समासः ।) नखः । इति चिकाण्डशेषः ॥

करेटया, स्त्री, (करे अटं अटनं अस्यतीति । अस् + डः ततष्टाप् ।) धनच्छूपक्षी । इति चिकाण्डशेषः ॥

करेटुः, पुं, (के जले वायौ वा रेटतीति । रेटृ भाषणयाचनयोः + सृगृधिकत्थ्यादित्वात् कुः ।) पक्षिविशेषः । करकटिया इति भाषा । तत्पर्य्यायः । कर्करेटुः २ । इत्यमरः । २ । ५ । १९ ॥ करटुः ३ कर्कराटुकः ४ । इति हेमचन्द्रः ॥

करेणुः, पुं, ("कृहृभ्यामेणुः" । उणां । २ । १ । इति कृ + एनुः । के मस्तके रेणुः पांशुर्यस्य वा । मस्तके शुण्डाकृष्टधूलीनिक्षेपणात् तथात्वम् ।) हस्ती । इत्यमरः । ३ । ३ । ५२ ॥ (यथा माघे १२ । ५ ।

"उत्क्षिप्तगात्रः स्म विडम्बयन्नभः
समुत्पतिष्यन्तमगेन्द्रमुच्चकैः ।
आकुञ्चितप्रोद्धनिरूपितक्रमं
करेणुरारोहयते निषादिनम्" ॥)

कर्णिकारवृक्षः । इति विश्वः ॥

करेणुः, स्त्री, (कृ + एनुः ।) हस्तिनी । इत्यमरः । ३ । ३ । ५२ ॥ (यथा रामायणे २ । ४० । २९ ।

"शुश्रुवे चाग्रतः स्त्रीणां रुदतीनां महास्वनः ।
यथा नादः करेणूनां बद्धे महति कुञ्जरे" ॥

अस्या दुग्धगुणा यथोक्ताः सुश्रुते ।

"हस्तिन्याः [दुग्धं] मधुरं हृद्यं कषायानुरसं गुरु ।
स्निग्धं श्लेष्मार्थकरं शीतं चक्षुष्यं बलवर्द्धनम्" ॥)

करेणुभूः, पुं, (करेणौ करेणुविषये भवति हस्त्यायुर्व्वेदप्रवर्त्तनाय प्रभवतीत्यर्थः । भू + क्विप् ।) पालकाप्यमुनिः । इति हेमचन्द्रः ॥

कर्कट

करेणुसुतः, पुं, (करेणुश्चासौ करेणाय उत्पन्नः सुतः।) मुनिविशेषः। इति चिकाण्डशेषः॥ (करेणोः सुतः। इति व्युत्पत्त्या करभः॥)

करेणुः, पुं स्त्री, (कृ + एनुः।) हस्ती। हस्तिनी। इत्यमरटीकायां रायमुकुटः॥

करेन्दुकः, पुं, (करेण रश्मिना दीप्त इति यावत् इन्दुरिव कायति शोभते। कै + कः।) भूतृणम्। इति राजनिर्घण्टः॥ (भूतृणशब्देऽस्य गुणादयो ज्ञेयाः॥)

करेवरः, पुं, (कीर्य्यते क्षिप्यते पाषाणैः कपिभिरिति यावत् करः तस्मिन् ब्रियते उत्पद्यते।) तुरङ्गः। इति राजनिर्घण्टः॥ शिलारस इति भाषा॥

करोटं, क्ली, (कं वायुं अन्तर्वायुम्। रोटते प्रतिहन्ति के मस्तके रोटते दीप्यते वा। रुट् + अच्।) शिरोऽस्थि। इति भरतो द्विरूपकोषश्च॥

करोटिः, स्त्री, (केन वायुना अन्तर्वायुना रुध्यते प्रतिहन्यते। के शिरसि रोटते दीप्यते शोभते वा। रुट् + इन्।) शिरोऽस्थि। इत्यमरः। २। ६। ६६॥ मातारं खलि इति भाषा॥

करोटी, स्त्री, (करोट + गौरादित्वात् ङीष्।) शिरोऽस्थि। इति भरतो द्विरूपकोषश्च॥

कर्क, हासे। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) कर्कायः। इति दुर्गादासः॥

कर्कः, पुं, (करोति व्यादिष्टं पालयति "ऋदाधारार्च्चिकलिभ्यः कः"। उणां ३। ४०। इति कः। वज्रलवचनान्न ककारस्येत् संज्ञा।) शुक्राम्बः। इत्यमरः। २। ८। ४६॥ कुलीरः। दर्पणः। (क्रियतेऽसौ) घटः। कर्कटराशिः। (कृणोति हिनस्ति) अग्निः। इतिहेमचन्द्रः शब्दरत्नावली च॥ कर्कटवृक्षः। इति राजनिर्घण्टः॥

कर्कचिर्भिटी, स्त्री, (कर्कवत् कर्करूपा चिर्भिटी वा। कर्कवर्णा वा चिर्भिटी।) चिर्भिटा। कर्कटीभेदः। इति राजनिर्घण्टः॥

कर्कटः, पुं, (कर्क + अटन् प्रत्ययः।) वृक्षविशेषः। तत्पर्य्यायः। कर्कः २ क्षुद्रधात्री ३ क्षुद्रामलकसंज्ञः ४ कर्कफलम् ५॥ * ॥ जलजन्तुविशेषः। काँकड़ा इति भाषा। तत्पर्य्यायः। कर्कटकः २ कुलीरः ३ कुलीरकः ४ सदंशकः ५ पञ्चवासः ६ तिर्य्यग्गामी ७। (यथाह आर्य्याशप्तती। ३२२। "अयमुद्धृतवड़िशः कर्कट इव मर्कटः पुरतः"॥) अस्य गुणाः। वृक्षविषमूत्रत्वम्। भस्मसन्धाटत्वम्। वायुपित्तनाशित्वञ्च॥ क्षुद्रकर्कटगुणाः। बलकारित्वम्। ईषदुष्णत्वम्। अनिलापहत्वञ्च। इति राजनिर्घण्टः॥ * ॥ पक्षिविशेषः। इति मेदिनी करकटिया इति भाषा॥ पद्मकन्दः। तुम्बी। इति जटाधरः॥ * ॥ मेषादिद्वादशराश्यन्तर्गतचतुर्थराशिः। स तु पुनर्व्वसुश्लेषपादेन सह पुष्याश्लेषाभ्यां भवति। अस्य देवता कुलीरात्मतिः। स तु पृष्ठोदयः। श्वेतवर्णः। कफप्रकृतिः। स्निग्धः। जलचरः। विप्रवर्णः। उत्तरदिक्स्वामी। वज्रस्त्रीसङ्गः। वज्रसन्तानश्च। अत्र जातस्य फलम्। कपटमनस्त्वं मृदुभाषित्वं मन्त्रित्वं अप्रवासित्वं

कर्कटि

अक्षणित्वञ्च। इति ज्योतिषम्॥ * ॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम्।

"श्रुतकलामलनिर्म्मलवृत्तयः
सुहृदगन्धजलाशयकेलयः।
किल नरास्तु कुलीरगते विधौ
वसुमतः सुमतोऽर्थिलब्धयः"॥

इति कोष्ठीप्रदीपः॥ ०॥ तस्योदये तन्नामकलग्नं भवति। तस्य गणितप्राप्तपरिमाणं यथा। दशव्यङ्गुलाधिकपञ्चाङ्गुलप्रभे कलिकाताख्यदेशे वर्त्तमानोनविंशायनांशे चत्वारिंशदधिकपञ्चदण्डाः। इति ज्योतिषम्॥ तत्र जातफलम्।

"कर्किलग्ने समुत्पन्नो भोगी सर्व्वजनप्रियः॥
मिष्टान्नपानभोगी च जायते स्वजनप्रियः"॥

इति कोष्ठीप्रदीपः॥ (नागविशेषः। यथा पुराणम्।

"अनन्तो वासुकीः पद्मो महापद्मस्तु तक्षकः।
कुलीरः कर्कटः शङ्खश्चाष्टौ नागाः प्रकीर्त्तिताः"॥)

कर्कटकः, पुं, (कर्कट एव स्वार्थे कन्।) कुलीरः॥ इत्यमरः। १। १०। २१॥ (यथाह सुश्रुतः।

"क्षयकर्कटकस्त्वेषां बल्यः कोष्णोऽनिलापहः।
शुक्रः सन्धानकृत् स्वप्न-विष्मूत्रोऽनिलपित्तहा"॥)

कर्कटपृष्ठिका, स्त्री, (कर्कटतुल्यं पृष्ठं अस्याः कर्कट पृष्ठेव स्वार्थे कन् ततस्यापि इत्वम्।) कर्कटपृष्ठीवृक्षः। इति शब्दरत्नावली॥

("नीलोत्पलं मृणालञ्च यष्टी कर्कटपृष्ठिका।
गोक्षीरैश्च हितीये च पीत्वा शाम्यति वेदना"॥
इति इन्द्रजाले गर्भस्रावचिकित्सा॥)

कर्कटपृष्ठी, स्त्री, (कर्कटस्य पृष्ठमिव दंशकमिवेत्यर्थः पृष्ठमयभागो यस्याः।) वृक्षविशेषः। काँकड़ाशिङ्गी इति भाषा। तत्पर्य्यायः। कर्कटाख्या २ महाघोषा ३ शृङ्गी ४ कुलीरशृङ्गी ५ चक्राङ्गी ६ कुलिङ्गी ७ कासनाशिनी ८। इति रत्नमाला॥ घोषा ९ वनमूर्द्धजा १० चक्रा ११ शिखरी १२ कर्कटाङ्गा १३ कर्कटी १४ विषाणिका १५ कौलीरा १६ चन्द्रास्पदा १७ बलाङ्गा १८। अस्या गुणा। तिक्तत्वम्। गुरुत्वम्। उष्णत्वम्। वायुहिक्कातिसारकासश्वासपित्तास्रनाशित्वञ्च। इति राजनिर्घण्टः॥

कर्कटाख्या, स्त्री (कर्कटस्याख्येव आख्याऽस्याः।) कर्कटपृष्ठीवृक्षः। इति रत्नमाला॥

कर्कटाङ्गः, पुं, (कर्कटं आह्वयते स्पर्द्धते कराटकमयत्वात्। आ + ह्वे + कः। कर्कट इति नाम्ना आह्वयते वा।) बिल्ववृक्षः। इति राजनिर्घण्टः॥

कर्कटाङ्गा, स्त्री, (कर्कटाङ्ग + टाप्।) कर्कटपृष्ठीवृक्षः। इति वैद्यकम्॥

कर्कटिः स्त्री, (करं कटति प्राप्नोति। कटः + "सर्व्वधातुभ्य इन्"। उणां ४।११७। इति इन्। कं परिणामे शुष्कतां अटति गच्छति वा कर्क + अट् + इन्। पृषोदरादित्वात् अलोपे साधुः।) कर्कटी। इति शब्दरत्नावली। काँकुड़ इति भाषा॥

कर्कटिनी, स्त्री, (कर्कटाकारः अस्यस्याः। कर्कट + इन् ततो ङीप्।) दारुहरिद्रा। इति राजनिर्घण्टः॥

कर्कन्धु

कर्कटी, स्त्री, (कर्कं कराटकं अटति गच्छति। कर्क + अट् + इन्। पृषोदरादित्वात् साधुः ततो ङीष्। करं कटति वा कटेः इन् ततो ङीष्।) शालमलिफलम् इति मेदिनी॥ सर्पः। इति शब्दरत्नावली॥ देवदालीलता। कर्कटपृष्ठीवृक्षः। एर्व्वारुः। वड़ काँकुड़ इति भाषा। घोटिकावृक्षः। फललताविशेषः। काँकुड़ इति भाषा॥ तत्पर्य्यायः। कदुफली २ कूर्म्मापत्निका ३ पीलुसा ४ मूत्रफला ५ त्रपुषा ६ हस्तिपर्णी ७ लोमशकाण्डा ८ मूत्रला ९ वज्रकन्दा १०। इति राजनिर्घण्टः॥ कर्कटाक्षः ११ शान्तनुः १२। इति रत्नमाला॥ चिर्भटी १३ वालुकी १४ एर्व्वारुः १५ त्रपुषी १६। इति हेमचन्द्रः॥ अस्या गुणाः। मधुरत्वम्। शीतत्वम्। तिक्तायास्तु रक्तपित्तनाशित्वम्। कफदोषकारित्वञ्च। पक्वायास्तु मूत्रशोधार्त्तिनाशित्वम्। इति राजनिर्घण्टः॥ (तथा च भावप्रकाशे।

"कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः।
रुच्या पित्तहरा सामा पक्वा तृष्णाग्निपित्तहृत्"।

अस्याः पाकप्रकारस्तु।

"त्वग्बीजरहिता पौढ़ा गुलिकाकारखण्डिता।
तलिता सुपृते तप्ते कर्कटी वाऽवलेहिता॥
विपाण्डुखण्डं घृतदुग्धसार्द्धं
विभावितं वल्लजशर्करार्द्धं।
घृतैलवासञ्च कदुष्णमेतत्
प्रतिश्यायं रोचनमातनोति॥)

कर्कटुः, पुं, (कर्क निपातनात् साधुः। कर्कट + मृगय्यादित्वात् कुः वा।) करेटुपक्षी। इति शब्दरत्नावली॥ करकटिया इति भाषा॥

कर्कन्धुः, पुं स्त्री, (कर्कं कराटकं दधातीति। धा + निपातनात् कुः नुम् च।) कोलिवृक्षः। इत्यमरटीकायां स्वामी॥ (बदरीफलम्। अस्य पर्य्यायगुणा यथा, भावप्रकाशस्य पूर्व्वखण्डे १मभागे॥

"पुंसि स्त्रियाञ्च कर्कन्धुर्बदरी कोलमित्यपि।
फेनिलं कुवलं घोटा सौवीरं बदरं महत्।
अजप्रिया कुहा कोली विषमोभयकण्टका"॥

तत्र बदरविशेषाणां लक्षणानि गुणाश्च।

"पक्वमानं सुमधुरं सौवीरं बदरं महत्।
सौवीरं बदरं शीतं भेदनं गुरुशीतलम्॥
रूक्षणं पित्तदाहास्रक्षयतृष्णानिवारणम्।
सौवीरं लघु सम्पक्वं मधुरं कोलमुच्यते॥
कोलन्तु बदरं ग्राहि रुच्यमुष्णञ्च वातलम्।
कफपित्तकरञ्चापि गुरु सारकमीरितम्॥
कर्कन्धुः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः।
अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक्॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम्।
मुष्कं भेद्यग्निकृत्सर्व्वं लघुतृष्णाक्लमाखजित्"।

क्वचित् स्त्रीत्वेऽपि दृश्यते यथा,

"कर्कन्धुकोलबदरमामं पित्तकफावहम्।
पक्वं पित्तानिलहरं स्निग्धं संमधुरं सरम्॥
पुरातनं वृष्यगमनं श्रमघ्नं दीपनं लघु।
सौवीरं बदरं स्निग्धं मधुरं वातपित्तजित्"॥
इति सुश्रुते सूत्रस्थाने। ४६ अध्याये॥)

कर्कन्धु

कर्कन्धुः, पुं स्त्री, (कर्कं कण्टकं दधातीति। धा + "अन्दू दृन्भू सम्भू कम्भूकर्मूलूकर्कन्धूदिधिषु"। उणा-१। ९५। इति कुः निपातनात् साधुः।) बदरीवृक्षः। इत्यमरः। २। ४। ३६॥ (यथा भागवते। ३। ३१। २।

"कालनं लेकराजेश पञ्चराजेश बुद्बुदम्।
दृष्ट्वाहेन तु कर्कन्धूं पेशयञ्जं वा ततः परम्"॥

कर्कन्धुशब्देऽस्या विवरणं द्रष्टव्यम्॥)

कर्करं, त्रि, (कर्क + अरन्।) कठिनम्। इति मेदिनी॥

कर्करं, क्ली, (कर्कं चूर्णजनकत्वेन हास्यवत् शुक्लता-प्राकाश्यं रातीति। कर्क + रा + कः।) चूर्णजनक-द्रव्यपाषाणखण्डम्। तत्पर्य्यायः। चूर्णखण्डम् २। इति हारावली। काँकर घुटि इत्यादि भाषा॥ ("किन्नोवर्णरकर्करैः प्रियशतैराक्रम्य विक्रीयते"॥ इति अमरशतके ७॥)

कर्करः, पुं, (कर्कं हासं प्रतिबिम्बप्रकाशं राति। रा + कः। कर्क + अरन् वा।) दर्पणः। इति मेदिनी॥ (नागभेदः। इति भारते १। ३५। १६॥)

कर्कराङ्गः, पुं, (कर्करतुल्यं अङ्गं यस्य।) कालकण्ठ-पक्षी। इति शब्दमाला॥

कर्कराटुः, पुं, (कर्कं हासं रटति प्रकटयतीव। रट + कुः। कुच् वा। ञिजन्तात् कुर्वा।) कटाहः। इति जटाधरः॥

कर्कराटुकः, पुं, (कर्कं कठिनं कर्कशमित्यर्थः रटति रौतीति रट + उकञ्।) कर्करेटुपक्षी। इति शब्दरत्नावली। करकटिया इति भाषा॥

कर्करान्धुकः, पुं, (कर्करः कठोरः अन्धुः। अत्यन्तान्ध-कारतया दुर्दृश्यत्वात्। संज्ञायां कन्।) अन्धकूपः। इति त्रिकाण्डशेषः॥

कर्करालः, पुं क्ली, (कर्करः रूक्षतया कठिनोपि व्यलति पर्य्याप्नोति। अल + अच्।) चूर्णकुन्तलः। इति हेमचन्द्रः॥

कर्करी, स्त्री, (कर्कं हासं हास्यप्रकाशवत् निर्म्मल-सलिलं रातीति। रा + कः + गौरादित्वात् ङीष्।) स्वल्पवारिधानिका। झारी इति भाषा। तत्पर्य्यायः। आलुः २ गलन्तिका ३। इत्यमरः। २। ९। ३१॥ अलुः ४ आरः ५। इति तट्टीका॥

कर्करीका, स्त्री, (कर्करी + स्वार्थे कन् ह्रस्वो ण।) कर्करी। इत्युणादिकोषः॥

कर्करेटं, क्ली, (कर्कं कर्क इतिशब्दं गलेहस्तमाधाय दूरीकुरु इत्याकारं रेटते यत्र। रेट् + अधिकरणे घञ्।) गलेहस्ताधानम्। गलाटिपि इति भाषा। तत्पर्य्यायः। अर्द्धचन्द्रम् २ अङ्गुलितो-रणम् ३। इति हारावली॥

कर्करेटुः, पुं, (कर्कं कर्केतिशब्दं वा रेटते भाषते रौति इत्यर्थः। रेट् भाषार्थे याचने च + मृगय्वा-दित्वात् साधुः।) करेटुपक्षी। इत्यमरः। २। ५। १९। करकटिया इति भाषा॥

कर्कशः, पुं, (कर्कशब्दात् मत्वर्थे लोमादित्वात् शः।) काम्पिल्यवृक्षः। इत्यमरः। २। ४। १४९। गुँड़ा रोचनी इति भाषा॥ (व्यवहारोऽस्य यथा, चरके

कर्काट

विमाने ८ अध्याये॥ "कर्कोटकवार्त्ताकुकर्कश-काकमाचीकारवल्लीत्यादिषु"॥) कासमर्दः। इद्धुः। (कृणोति हिनस्ति शत्रुं कृच् हिंसायां + अन्येभ्यो-ऽपीति विच्। कशति कश्शब्दे इति पचाद्यच्। कर्च्चासौ कशखेति। करे कशति वा।) खड्गः॥ इति हेमचन्द्रः॥

कर्कशः, त्रि, (कर्कात् लोमादित्वात् शः। ततः प्राग्-वत् ज्ञानादिभ्योनिर्य्यादितार्थे च।) साहसिकः। कठोरः। (यथा भागवते। ३। १७। ११।

"खराश्च कर्कशैः क्षत्तः खुरैर्भिन्नो धरातलम्"॥)

अमरशब्दः। (यथा रघौ। ३। ४५।

"हरेः कुमारोऽपि कुमारविक्रमः
सुरद्विषस्कालनकर्कशाकुलौ"॥)

दुर्ग्रहः। इत्यमरः। ३। ३। २१९॥ क्रूरः। निर्दयः। इति मेदिनी॥ (यथा रामायणे। ५। ४९। ५।

"तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्कशाः"॥)

क्षपणकः। इति विश्वः॥

कर्कशच्छदः, पुं, (कर्कशः छदः पत्रं यस्य।) पटोलः। इति शब्दमाला॥ शाकोटवृक्षः। शेओड़ा इति भाषा। इति त्रिकाण्डशेषः॥

कर्कशच्छदा, स्त्री, (कर्कशः अमरशच्छदो यस्याः।) कोशातकी। झिङ्गाः इति भाषा। दग्धावृक्षः। इति राजनिर्घण्टः॥ (झिङ्गाकेऽस्या विवरणं ज्ञातव्यम्॥)

कर्कशदलः, पुं, (कर्कशं दलं पत्रं अस्य।) पटोलः। इति रत्नमाला॥

कर्कशदला, स्त्री, (कर्कशं दलं यस्याः।) दग्धावृक्षः। इति राजनिर्घण्टः॥ कोशातकी। झिङ्गा इति भाषा॥

कर्कशवाक्यं, क्ली, (कर्कशं च तत् वाक्यञ्चेति।) निष्ठु-रवचनम्। परुषा वाक्। इति शब्दरत्नावली॥

कर्कशा, स्त्री, (कर्कशब्दात् लोमादित्वात् शः ततः टाप् च।) दुश्चिकालीवृक्षः। इति राजनिर्घण्टः॥

कर्कशिका, स्त्री, (कर्कश + संज्ञायां कन् ततष्टाप् अत इत्वम्।) वनकोलिः। इति रत्नमाला॥

कर्कसारं, क्ली, (कर्कः कर्कशः कठिनो वा सक्तुकादिः सारो यत्र।) करम्भकम्। दधिसक्तुः। इति हारावली॥

कर्कारुः, पुं, (कर्कं हास्यवत् शौक्ल्यं ऋच्छति प्राप्नो-तीति। कर्क + ऋ + बाहुलकात् उण्।) कुष्माण्डः। इत्यमरः। २। ४। १५५॥ (अस्य पर्य्यायो गुणाश्च यथा,—

"कुष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता।
कर्कारुर्ग्राहिणी शीता रक्तपित्तहरा गुरुः॥
पक्का तिक्ताग्निजननी सत्क्षारा कफवातनुत्"॥

इति भावप्रकाशस्य पूर्ब्बखण्डे १ मे भागे॥ एर्व्वारु-योगेनास्य गुणभेदोऽपि दृश्यते। तथाच सुश्रुते सूत्रस्थाने ४६ अध्याये।

"एर्व्वारुकं सकर्कारु सम्यक्कं कफवातक्षत्।
सत्क्षारं मधुरं रुच्यं दीपनं नातिपित्तलम्"॥)

कर्कारुकः, पुं, (कर्कं हासं भोजने हितकारित्वात् स्वादुत्वाच्च आनन्दं अर्पयतीति। कर्क + ऋ +

खिच् + उकञ्। कर्कं हासं हितजनकत्वात् आह्लादकरत्वम् ऋच्छति वा।) कालिङ्गवृक्षः। इति हारावली॥ (तत्फलगुणा यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।

"त्रपुषैर्व्वारुकर्कारुकशीर्णाफलप्रभृतीनि।
गुरुविष्टम्भिशीतानि स्वादूनि कफकृन्ति च॥
वृष्यमूत्रपुरीषाणि सत्क्षारमधुराणि च"॥)

कर्किः, पुं, (कर्क + इन्।) कर्कटराशिः। इति ज्यो-तिषम्॥

कर्केतनं, क्ली पुं, (कर्कं हास्यादौ तनोतीति। कर्कं + तन् + अच्। सप्तम्या अलुक्।) रत्नविशेषः। तदु-त्पत्त्यादि यथा, गारुड़े ७५ अध्यायः॥

सूत उवाच।

"वायुर्नखान् दैत्यपतेर्गृहीत्वा
चिक्षेप सम्यग्व वनेषु हृष्टः।
ततः प्रसूतं पवनोपपन्नं
कर्केतनं पूज्यतमं पृथिव्याम्॥
वर्णेन तद्रुधिरसोममधुप्रकाश-
मात्राम्रपीतदहनोज्ज्वलितं विभाति।
नीलं पुनः खलसितं परुषं विभिन्नं
व्याध्यादिदोषकरणेन न तद्विभाति॥
स्निग्धा विशुद्धाः समरागिणश्च
आपीतवर्णा गुरवो विचित्राः।
त्रासव्रणव्याधिविवर्जिताश्च
कर्केतनास्ते परमाः पवित्राः॥
पत्रेण काञ्चनमयेन तु वेष्टयित्वा
हस्ते गलेऽथ धृतमेतदतिप्रकाशम्।
रोगप्रणाशनकरं कलिनाशनञ्च
आयुष्करं कुलकरञ्च सुखप्रदञ्च॥
एवंविधं बहुगुणं मणिमावहन्ति
कर्केतनं शुभमलं क्षतये नरा ये।
ते पूजिता बहुधना बहुबान्धवाश्च
नित्योज्ज्वलाः प्रमुदिता अपि ते भवन्ति॥
एकेऽपनह्य विद्रुताकुलनीलभासः
प्रस्नानरागमुलिताः कलुषा विरूपाः।
तेजोऽतिदीप्तिकुलपुष्टिविहीनवर्णाः
कर्केतनस्य सदृशं वपुरुद्वहन्ति॥
कर्केतनं यदि परीक्षितवर्णरूपं
प्रत्यग्रभासरदिवाकरसुप्रकाशम्।
तस्योत्तमस्य मणिशास्त्रविदा महिम्ना
तुल्यन्तुमूल्यमुदितं तुलितस्य काय्यम्"॥

हस्ते गलेऽथ धृतमेतदतिप्रकाशमित्यत्र तप्तं यदा ऊतवस्ते भवति प्रकाशमिति पुस्तकान्तरे पाठः॥

कर्कोटः, पुं, (कर्क + ओटप्रत्ययः।) नागराजविशेषः। इति त्रिकाण्डशेषः॥

कर्कोटकः पुं, (कर्कं कण्टकमयत्वात् कठोरं घटति प्राप्नोति तद्रूपतया कायति प्रकाशते। एषोदरा-दित्वात् ओकारादेशे साधुः।) विम्बवृक्षः। (कर्कोट + संज्ञायां कन्।) कद्रुपुत्रनागराज-विशेषः। इति मेदिनी॥ (यथा, महाभारते। १। आस्तीके। ३५। ५।

"ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ"॥)

इक्षुः। इति राजनिर्घण्टः॥ फलजतादिविशेषः॥ काँकरोल इति भाषा। तत्पर्य्यायः। किलासघ्नः २ तिक्तपत्रः ३ सुगन्धकः ४। इति हेमचन्द्रः॥ अस्य गुणाः। शुक्रकफपित्तनाशित्वम्। रुचिकारित्वञ्च। इति राजवल्लभः॥ ("तद्वत् कर्कोटकं प्रोक्तम्"॥ इति सुश्रुते। सूत्रे। ४६ अध्याये॥ विरेचनाम्नैर्व्वारुकशब्दे प्रदर्शितः॥)

कर्कोटकी, स्त्री, (कर्कोटक+गौरादित्वात् ङीष्।) पीतघोषा वृक्षः। इति रत्नमाला॥ (अस्याः पर्य्यायमाह चरकः कल्पे ४ अध्याये।

"कर्कोटकी कटुफला महाजालिनिरेव च।
धामार्गवस्य पर्य्याया राजकोशातकी यथा"॥

विशेषविवरणञ्चास्या धामार्गवशब्दे ज्ञातव्यम्॥ फललताविशेषः। काँकुड़ इति भाषा॥ एतद्-फलगुणपाकादि उक्तं वैद्यके। यथा,—

"कर्कोटकी गुरुं कुष्ठश्लासागरुचिनाशनम्।
श्वासकासज्वरान् हन्ति कटुपाकञ्च दीपनम्।
ईषद्विभिन्नमरिचैः परिपूर्णगर्भं
तैलेन रन्धितसुसैन्धवपातयोगम्।
वाक्कीकयुक्तपयसा विहिताभिषेकं
कर्कोटकीफलमिदं रुचिकृत्तरुण्याम्"॥)

कर्कोटिका, स्त्री, (कर्कोट+स्वार्थे कन् तत स्त्रीत्वे टाप् अत इत्वञ्च।) कर्कोटकः। काँकरोल इति भाषा। तत्पर्य्यायः। कुष्माण्डी २ कर्कोटी ३। तत्फलम् कारवेल्लकतुल्यगुणम्। इति राजनिर्घण्टः॥

कर्चरिका, स्त्री, कं सुखं यथा तथा चर्य्यते उपयुज्यते यद्वा कं जलं चुर्य्यते स्रुन्थीक्रियतेऽत्र। क+चर्+वा चुर्+एषोदरादि रेफादेशे कनादिभिः साधुः।) पिष्टकविशेषः। इति पाकरानेश्वरः। कचरी इति भाषा॥

कर्चूरं, क्ली, (कर्च्च+खर्ज्जूरादित्वात् ऊरः। एषोदरादित्वात् ककारस्य चकारे साधुः।) कर्व्वुरम्। खर्जम्। कचुरमपिपाठः। इत्यमरटीका॥

कर्चूरः, पुं, (कर्च्च+ऊरः। एषोदरादित्वात् साधुः।) वृक्षविशेषः। कचूर इति भाषा। तत्पर्य्यायः। द्राविड़ः २ कार्ष्यः ३ दुर्लभः ४ गन्धमूलकः ५ वेधमुख्यः ६ गन्धसारः ७ जटालः ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफकासगलगण्डादिदोषनाशित्वम्। मुखवैशद्यजननत्वञ्च। इति राजनिर्घण्टः॥ (यथा चरके सूत्रे २७ अध्याये।

"रोचनो दीपनो हृद्यः सुगन्धित्वविवर्जितः।
कर्चूरः कफवातघ्नः श्वासहिक्कार्शसां हितः"॥)

कर्चूरकः, पुं, (कर्चूरं स्वर्णमिव कायति प्रकाशते। कर्चूर+कै+कः। कर्चूर+स्वार्थे कन् वा।) कर्व्वूरकः। इत्यमरटीकायां स्वामी। काँचा हलुद इति भाषा॥

कर्च्च पीड़े। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कर्चति। इति दुर्गादासः॥

कर्च त् क भिदि। इति कविकल्पद्रुमः॥ (अदन्त-चुरां-परं-सकं-सेट्।) कर्चयति कर्चापयति। आङ्पूर्व्वोऽयं अवखे। देवाकर्षय येन येन सहसा यत्यत् समासादितमिति। उपसर्गात्तत्तदर्थानां द्योतका एव न तु वाचकाः। केवलधातोरनेकार्थेऽवश्यवक्तव्ये उपसर्गपूर्व्वस्याप्यन्यार्थो धातोरेव कथ्यते लाघवात्। क्वचिदुपसर्गा धात्वर्थमेवानुवर्त्तन्ते। तथा च।

"धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा"॥

इति विस्तरवृत्तिः॥ क्रमेणोदाहरणानि। आदत्ते गृह्णातीत्यर्थः। प्रसूयतेऽत्र प्रसव एव धात्वर्थः। प्रशब्दस्तमेवार्थं द्योतयति। प्रणमति प्रकर्षेण नमतीत्यर्थः। केचित्तु अनर्थकोऽन्यः प्रयुज्यते। इति चतुर्थचरणं पठन्ति तच्चिन्त्यम्। इति दुर्गादासः॥

कर्णः, पुं, (कीर्य्यते क्षिप्यते। शब्दो वायुना यत्र। किरति शब्दग्रहणेन मनसि सुखं क्षिपति ददातीत्यर्थः। कॄ वित्तेपे+"कॄदृञ्भ्यो नः" नञ् निच्च। उणा ३। १०। यद्वा कर्ण्यते आकर्ण्यते अनेन। कर्ण+करणे अप्।) श्रवणेन्द्रियम्। काण इति भाषा। तत्पर्य्यायः। शब्दग्रहः २ श्रोत्रम् ३ श्रुतिः ४ श्रवणम् ५ श्रवः ६। इत्यमरः। २। ६। ९४॥ श्रौत्रम् ७। इति तट्टीका॥ वचोग्रहः ८। इति राजनिर्घण्टः॥

(यथा रघुः। १। ९।

"तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः"॥)

कर्णस्तु श्रवणेन्द्रियस्य गोलकं स्थानम्। तच्च श्रोत्रमिन्द्रियम्। तत्तु कर्णशष्कुल्यवच्छिन्नभोभागः। तस्य देवता दिक्। विषयः शब्दः। इति श्रीभागवतम्॥ युधिष्ठिरायजः। स तु कुन्त्याः कन्याकाले सूर्य्यौरसजातः। एतेन कानीन इत्याख्यापि प्रसिद्धः। अस्य जन्मादिविवरणन्तु महाभारते १। १११ अध्याये द्रष्टव्यं॥ तत्पर्य्यायः। राधेयः २ वसुषेणः ३ अर्कनन्दनः ४ घटोत्कचान्तकः ५ चाम्पेयः ६ सूतपुत्रकः ७। इति त्रिकाण्डशेषः॥ चाम्पाधिपः ८ अङ्गराट् ९ राधासुतः १० अर्कतनयः ११। इति हेमचन्द्रः॥ अङ्गाधिपः १२। इति भूरिप्रयोगः॥ (यथा महाभारते। १। सम्भवपर्व्वणि १११। ३१।

"प्राप्तुनाम तस्य कथितं वसुषेण इति क्षितौ।
कर्णो वैकर्त्तनश्चैव कर्म्मणा तेन सोऽभवत्"॥

अयं हि दातॄणामग्रगण्यः। अस्य किमपि नादेयमासीत्। अन्यैरमेयं सहजमपि खदेहकवचं शरीरात् समुत्कृत्य ब्राह्मणरूपधारिणे याचमानाय इन्द्राय दत्तवान् तथा उपोषितं द्विजरूपधारिणं विष्णुं खपुत्रमांसेन प्रीणयामास। एतद्विवरणन्तु जैमिनिभारते सुप्रसिद्धमेव। अयं परशुरामशिष्यो महावीर्य्यः भारतयुद्धे दुर्य्योधनपक्षावलम्बी आसीत्। अष्टादशदिवसव्यापे भारतसंग्रामे भीष्मदेवः सेनापतिपदमधिरूढ़ दशाहं यावत् युद्धमकरोत्। ततः परञ्चाह्नि गते तस्मिन् द्रोणश्चतुर्दिनानि अयुध्यत। एतस्मिन्नेव समयेऽयं कर्णोऽपि स्वसैन्यावलमादाय पाण्डवैः सह युयुधे। ततो गतजीविते द्रोणे सैनापत्यमधिरूढ़ोसौ दिवसद्वयं विबुधराजसहायेनाव्यूनेन निहत आसीत्॥) सुवर्णाभिदत्तः। इति मेदिनी॥ (धृतराष्ट्रशतपुत्रेषु एकः पुत्रः। यथा महाभारते १। ११७। ३।

"दुर्म्मर्षणो दुर्म्मुखश्च दुष्कर्णः कर्ण एव च"।

नौकायाः क्षेपणीविशेषः। (दाँड़ इति भाषा॥ यथा रामायणे ६। २२। ३०।

"हतप्रवीरा विध्वस्ता निरुत्साहा निरुद्यमा।
सेना भवति संग्रामे हतकर्णेव नौर्जले"॥

कर्णः अस्यस्य प्राग्रूपेण। अर्ण आद्यच्। दीर्घकर्णे त्रि, यथा यजुर्व्वेदे। २। ४। ४०।

"खड्गो वैश्वदेवः श्वाक्ष्णया कर्णो गर्दभः"॥)

कर्णकण्डुः, पुं, (कर्णस्य कर्णे वा जातो कण्डुः।) कर्णरोगविशेषः। तस्य निदानम्। "मारुतः कफसंयुक्तः कर्णकण्डूं करोति च"। इति माधवकरः॥

("कर्फेन कण्डूः प्रचितेन कर्णयो-
र्भृशं भवेत् स्रोतसि कर्णसंश्रिते"॥

इति सुश्रुते उत्तरतन्त्रे २० अध्याये॥

चिकित्सास्य यथा।

"विधिश्च कफहृत्कर्म्म कर्णकण्डूमपोहति"॥

इति तत्रैवोत्तरतन्त्रे २१ अध्याये॥)

कर्णकीटी, स्त्री, (कर्णस्थितः कर्णस्य भेदकः क्षुद्रः कीटी कीटविशेषः। यद्वा कर्णयति भिनत्ति तादृशी कीटी। कर्ण+अच्। स्वल्पः कीटः कीटी स्वल्पार्थे ङीष् ततः कर्म्मधारयः।) कीटविशेषः। कानकोटारी केर्केड इत्यादि भाषा। तत्पर्य्यायः। कर्णजलौका २ घृतपदी ३। इतिहेमचन्द्रः॥ चिचाड़ी ४। इति राजनिर्घण्टः॥ एथिका ५ कर्णदुन्दुभिः ६। इति शब्दमाला॥

कर्णक्ष्वेड़ः, पुं, (कर्णस्य कर्णे जातः क्ष्वेड़ो वा।) कर्णरोगविशेषः। (तस्य लक्षणम्।

"वायुः पित्तादिभिर्युक्तो वेणुघोषोपमं स्वनम्।
करोति कर्णयोः क्ष्वेड़ं कर्णक्ष्वेड़ः स उच्यते"॥

इति माधवकरः॥ कर्णरोगशब्देऽस्यापि विस्तृतनिदानचिकित्सितादिकं ज्ञेयम्॥)

कर्णगूथं, क्ली, (कर्णस्य कर्णे स्थितं कर्णजातं वा गूथं मलम्।) कर्णमलम्। इति हारावली। कानेर खलि इति भाषा॥

कर्णगूथकः, पुं, (कर्णगूथ+संज्ञायां कन्। कर्णगूथमिव कायति वा। कै+कः।) कर्णरोगविशेषः। तस्य निदानम्। यथाह माधवकरः।

"पित्तोष्मशोणितः श्लेष्मा जायते कर्णगूथकः"॥

("विशोषिते श्लेष्मणि पित्ततेजसा
न्यां भवेत् स्रोतसि कर्णगूथकः"॥

इति सुश्रुते उत्तरतन्त्रे २० अध्याये॥ चिकित्सास्य वैद्यकचक्रपाणिसंग्रहे। यथा,

"क्लेदयित्वा तु तैलेन स्नेहेन प्रविलाप्य च।
शोधयेत् कर्णगूथन्तु भिषक् सम्यक् शलाकया"॥)

कर्णजलूका, स्त्री, (कर्णस्य कर्णे वा जलूका इव।) कर्णकीटी। इति शब्दरत्नावली॥

कर्णजलौका, स्त्री, (कर्णे जलौकेव।) घृतपदी। इत्यमरः। २। ५। १९॥

कर्णजलौकाः, [स्] स्त्री, (कर्णे जलौका इव।) कर्ण-

जलौका । इत्यमरटीकायां भरतः ॥

कर्णजाहं, क्ली, (कर्णस्य मूलम् । "तस्य पाकमूले" ५ । २ । २४ इत्यादिना जाहच् ।) कर्णमूलम् । इति व्याकरणम् ॥

कर्णजित्, पुं. (कर्णं जितवान् । कर्ण + जि + क्विप् भूते वर्त्तमाने च इति भूते क्विप् तुगागमश्च ।) अर्জ্জুনः । इति हेमचन्द्रः ॥

कर्णटर्पणः, पुं. (कर्णे दर्पण इव ।) ताड़ङ्कनामकर्णभूषणम् । इति चिकाण्डशेषः । कानतड़का इति भाषा ॥

कर्णदुन्दुभिः, स्त्री, (कर्णे कर्णाभ्यन्तरे प्रविश्य ध्वनिजनकतया दुन्दुभिरिव ।) कर्णकोटी । इति शब्दमाला ॥

कर्णधारः, पुं, (कर्णं धरति धारयति वा । कर्ण + धृ + "कर्म्मण्यण्" ३ । २ । १ । इति अण् ण्यन्तादच् वा ।) नाविकः । इत्यमरः । १ । १० । १२ ॥ काण्डारि माझि इत्यादि भाषा ॥ (यथा हितोपदेशे । ३ । ४ ।

"यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा ।
अकर्णधारा जलधौ विप्लवेतेह नौरिव" ॥)

कर्णपाली, स्त्री, (कर्णं पालयति स्त्रीयौज्ज्वल्येन अतीव शोभां सम्पादयतीति । कर्ण + पाल + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् । गौरादित्वात् ङीष् ।) कर्णान्दूः । इति हारावली । कानबाला इति भाषा ॥

कर्णपिशाची, स्त्री, (कर्णं स्वरूपं पिनष्टीति । कर्ण + पिश् + क्विप् । कर्णपिट् अक्षानं तदाचयति नाशयति स्वरूपदर्शनेन । ततः आ + चि + णिच् अच् ङीष् च ।) देवीविशेषः । तन्मन्त्रादि यदुक्तं तन्त्रान्तरे ।

"कर्णास्त्रेत्यणवोद्दितो वकगतोऽनन्तस्थिकारो वदा-
तीतानागतशब्दयुक्तभुवनेशी वह्निजायान्विता ।
तारादो मनुरेष लक्षजपतो व्यासेन संसेवितः
सार्व्वज्ञं लभतेऽचिरेण नियतं पैशाचिकी मक्षितः" ॥

अस्यार्थः । कर्णः स्वरूपः । आस्ये आदौ ईत्थं इकारः । तत्युक्तो द्वोहितः एकारः । वक्त्रः णकारः । स अनन्तयुक्त आकारयुक्तः । चि स्वरूपम् । वदातीतानागतं स्वरूपम् । ततो ङीं स्वाहा । एतेन ॐ कर्णपिशाचि वदातीतानागतं ङीं स्वाहा ॥ * ॥ मन्त्रान्तरम् ।

"कङ्क युग्मं कालिके च यक्ष युग्मं तथैव च ।
पिशितं पिशाचि स्वाहेति नृपार्णः कथितः प्रिये" ॥

कङ्क कङ्क कालिके यक्ष यक्ष पिशितं पिशाचि स्वाहा ॥ * ॥ ध्यानं यथा ।

"श्यामां रक्तविलोचनां त्रिनयनां खर्व्वाञ्च लम्बोदरीं
वन्धूकारुणजिह्विकां वरवराभीयुक्तकरामुन्मुखीम् ।
धूम्राविंशटिलां कपालविलसत्पाणिद्वयां चञ्चलां
सर्व्वज्ञां शवहृत्कृताधिवसतीं पैशाचिकीं तां नुमः" ॥

अथ पूजा ।

"निशायामर्द्धरात्रौ च हृदि न्यस्य पिशाचिकीम् ।
दग्धमीनं बलिं दत्त्वा रात्रौ संपूज्य संजपेत्" ॥

ॐ कर्णपिशाचि दग्धमीनबलिं यक्ष यक्ष मम सिद्धिं कुरु कुरु स्वाहेति दग्धमीनं बलिं दद्यात् ।

"रक्तचन्दनवन्यूकजवापुष्पादिकञ्च यत् ।
अमृतं कुरु देवेशि स्वाहेति प्रोक्तयेज्जलैः" ॥

पूर्व्वाह्णे किञ्चिज्जप्त्वा मध्याह्ने एकभक्तं निरामिषं भुक्त्वा रात्रावपि तत् संख्यं जपेत् । अन्यत् किञ्चिन्न भोक्तव्यं ताम्बूलादिकं विना । जपस्य दशांशं तर्पणम् । ओम् कर्णपिशाचीं तर्पयामि स्त्रीं स्वाहा । एवं क्रमेण लक्षमेकं पुरश्चरणं कृत्वा दशांशं होमयेत् । तदभावे दशांशं तर्पणं कृत्वा वरं प्रार्थयेत् । मूलं रक्तचन्दनेन लिखित्वा यन्त्रोपरि इष्टदेवतां पूजयेत् ॥ * ॥

अथ सिद्धिलक्षणमुच्यते । गगने हूंकारादिश्रवणदीर्घामिश्रिखारूपसन्दर्शनात् सिद्धिर्भविष्यतीति ज्ञात्वा तथाविधमाचरेत् ॥ * ॥

मन्त्रान्तरम् । "प्रणवं माया कर्णपिशाचि मे कर्णे कथय हूं फट् स्वाहा" । इति प्रदीपतैलं पादयोर्दत्त्वा रात्रौ लक्षं जपेत् । ततः सर्व्वज्ञो भवति । नास्याः पूजा ध्यानम् ॥ * ॥ तथा तारं कामबीजं जयादेवी स्वाहा । अस्या अपि ऋष्यादिन्यासादेरभावः । पूर्व्वं लक्षं जप्त्वा गुहगोधिकां निधाय तदुपरि जयादेवीं यथाशक्ति सम्पूज्य तावत् जपेत् यावत् सा जीवति । ततः सिध्यति । सिद्धिस्तु मानसादिप्रश्ने कृते सा आयाति ततस्तस्याः एष्टे सर्व्वं भूतभविष्यदादिकं पश्यति । इति ज्ञानानन्दकृततन्त्रसारः ॥

कर्णपुष्पः, पुं, (कर्णवत् कर्णाकृति पुष्पं यस्य । यद्वा कर्णभूषणार्हं पुष्पं यस्य ।) मोरटलता । इति राजनिर्घण्टः ॥

कर्णपूः, [ऊ] स्त्री, (कर्णस्य सूर्य्यैरसजातस्य कुन्त्याः प्रथमपुत्रस्य पूः पुरम् ।) कर्णराजपुरम् । तत्पर्य्यायः । चम्पा २ मालिनी ३ लोमपादपूः ४ । इति हेमचन्द्रः ॥

कर्णपूरः, पुं, (कर्णं पूरयति अलंकरोतीति । कर्ण + पूर् + उपपदेकर्म्मण्यण् इति अण् ।) शिरीषवृक्षः । नीलोत्पलम् । अवतंसः । इति मेदिनी ॥ (यथा, अमरशतके १ ।

"व्याक्षिप्तद्विरदखटकामुखपाणिएष्ठ-
प्रेङ्खन्नखांशुचयसम्वलितोऽम्बिकायाः ।
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभट्टकाट्टाः" ॥)

अशोकवृक्षः । इति राजनिर्घण्टः ॥

कर्णपूरकः, पुं, (कर्णं पूरयति अवतंसयति । कर्ण + पूर + ण्वुल् । यद्वा कर्णपूर स्वार्थे कन् । शिरीषवृक्षः । नीलोत्पलम् । अशोकवृक्षः । एतेषां सर्व्वेरेव कुसुमैः कामिनीनां कर्णाभरणं स्यात् अतोऽस्य तथात्वम् ।) कदम्बवृक्षः । इति राजनिर्घण्टः ॥ (कदम्बशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कर्णप्रतिनाहः, पुं, (कर्णे जातः प्रतिनाहः रोगविशेषः ।) कर्णरोगविशेषः । तस्य सम्प्राप्तिरूपे ।

"सकर्णगूथो द्रवतां यदा गतो
विलायितो घ्राणमुखं प्रपद्यते ।
तदा स कर्णप्रतिनाहसंज्ञितो
भवेद् विकारः शिरसोऽर्द्धभेदवत्" ॥

इति माधवकरः ॥ (अस्य चिकित्सा यथा,—

"अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत्
ततो विरिक्तशिरसः क्रियां प्राप्तां समाचरेत्" ॥

इति वैद्यचक्रपाणिसंग्रहे कर्णरोगाधिकारः ॥

कर्णफलः, पुं, (कर्णः फलमिव यस्य ।) मत्स्यविशेषः काणलि माछ इति भाषा ॥ अस्य गुणः । अजीर्णरोगश्लेष्मकारित्वम् । इति राजवल्लभः ॥

कर्णमलं, क्ली, (कर्णस्य मलं गूथम् ।) कर्णजमलम् तत्पर्य्यायः । कर्णगूथम् २ । इति हारावली ॥

कर्णमुकुरः, पुं, (कर्णे मुकुरः दर्पण इव ।) ताड़ङ्कनामकर्णभूषणम् । इति भूरिप्रयोगः ॥

कर्णमोटी, स्त्री, (कर्णं कर्णोपलक्षितरोगविशेषं मोटयति नाशयतीति । यद्वा कर्णं शरीरभेदिरोगविशेषं मोटयतीति । कर्ण + मुट् + इन् वा ङीप् ।) चामुण्डादेवी । इति हेमचन्द्रः ॥

कर्णरोगः, पुं, (कर्णस्य कर्णे गतः कर्णे जातो वा रोगः ।) श्रवणव्याधिः । यथा । अथ कर्णरोगाधिकारः । तत्र कर्णरोगाणां नामानि सङ्ख्यामाह ।

"कर्णशूलं प्रणादश्च बाधिर्य्यं क्ष्वेड एव च ।
कर्णस्रावः कर्णकण्डूः कर्णगूथस्तथैव च ॥
प्रतिनाहो जन्तुकर्णो विद्रधिर्विविधस्तथा ।
कर्णपाकः पूतिकर्णस्तथैवार्शश्चतुर्व्विधम् ॥
तथार्ब्बुदं सप्तविधं ग्रीवाश्चापि चतुर्व्विधः ।
एते कर्णगता रोगा अष्टाविंशतिरीरिताः" ॥ * ॥

तेषु कर्णशूलस्य संप्राप्तिपूर्व्वकं लक्षणमाह ।

"समीरणः श्रोत्रगतोऽन्यथा चरन्
समन्ततः शूलमतीव कर्णयोः ।
करोति दोषैश्च यथास्वमाहतः
स कर्णशूलः कथितो दुराचरः" ॥

अन्यथाचरन् प्रतिलोमं चरन् । दोषैः पित्तकफरक्तैः । रक्तस्यापि रुजादिकर्त्तृत्वेन दोषसाम्यात् दोषत्वमेव । यथास्वं यथात्मीयनिदानं कुपितैः अथवा यथास्वमिति शूलविशेषणम् । दुराचरः दुरुपचरः मूर्च्छाद्युपद्रवयोगात् ॥ * ॥

कर्णशूलस्यासाध्यतां चाह ।

"मूर्च्छा दाहो ज्वरः काश्यः क्लमोऽथ वमयुस्तथा ।
उपद्रवाः कर्णशूले भवन्त्येते मरिष्यतः" ॥ * ॥

कर्णनादस्य लक्षणमाह ॥

"कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वनान् ।
भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते" ॥ * ॥

बाधिर्य्यलक्षणमाह ।

"यदा शब्दवहो वायुः स्रोतसात्य तिष्ठति ।
शुद्धश्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते" ॥ * ॥

असाध्यबाधिर्य्यमाह ।

"बाधिर्य्यं बालवृद्धोत्थं चिरोत्थञ्च विवर्জ্জयेत्" ॥ * ॥

क्ष्वेडमाह ।

"वायुःपित्तादिभिर्युक्तो वेणुघोषसमस्वनम् ।
करोति कर्णयोः क्ष्वेडं कर्णक्ष्वेडः स उच्यते" ॥

क्ष्वेडशब्दार्थं व्यनक्ति । वेणुघोषसमस्वनमिति । यत उक्तम् । क्ष्वेडनं वेणुघोषवदिति । ननु कर्णनादकर्णक्ष्वेडयोः को भेदः । उच्यते । कर्णनादः केवलेन वातेन जन्यते तत्र नानाशब्दांश्च शृणोति।

कर्णच्छेदन्तु पित्तादियुक्तेन वातेन जन्यते तच्च नियमेन वेणुघोषमिव शृणोतीति भेदः ॥ * ॥

कर्णस्रावमाह ।

"शिरोऽभिघातादथवा निमज्जतो
जलप्रपाकादथवापि विव्यधेः ।
स्रवेद्विपूयं श्रवणोऽनिलादितः
स कर्णसंस्राव इति प्रकीर्त्तितः" ॥

पूयमित्युपलक्षणं जलं रसञ्च स्रावयेत् ॥ श्रवणशब्दः पुंलिङ्गोऽप्यस्ति ॥ * ॥ कर्णकण्डूमाह ।

"मारुतः कफसंयुक्तः कर्णे कण्डूं करोति हि" ॥*॥

कर्णगूथमाह ।

"पित्तान्वितः श्लेष्मा कुरुते कर्णगूथकम्" ॥
कर्णे गूथं यस्मात् स कर्णगूथव्याधिः ॥ * ॥

प्रतिनाहमाह ।

"स कर्णगूथो द्रवतां यदा गतो
विलापितो घ्राणमुखं प्रपद्यते ।
तदा स कर्णप्रतिनाहसंज्ञितो
भवेद्विकारः शिरसोऽर्द्धभेदकृत्" ॥

घ्राणञ्च मुखञ्च एकत्वं द्वन्द्वे । शिरसोऽर्द्धभेदकृत् अर्द्धविभेदकाख्यशिरोरोगकृत् ॥ * ॥

कृमिकर्णमाह ।

"यदा तु मूर्च्छत्यथवाऽन्त्र जन्तवः
कृमत्यपत्यान्यथवापि मक्षिकाः ।
तदक्षनत्वात् श्रवणो निरुध्यते
भिषग्भिराद्यैः कृमिकर्णको गदः" ॥

तदक्षणत्वात् कृमिलक्षणत्वात् ॥ श्रवणे कृमिकर्णको गदो निरुध्यत इत्यन्वयः ॥ * ॥

पतङ्गादिषु कर्णप्रविष्टेषु लक्षणमाह ।

"पतङ्गाः घृतपद्यञ्च कर्णश्रोत्रं प्रविश्य हि ।
अरतिं व्याकुलत्वञ्च भृशं कुर्व्वन्ति वेदनाम् ॥
कर्णो निस्तुद्यते तस्य तथा फरफरायते ।
कोटे चरति रुक् तीव्रा निस्यन्दे मन्दवेदना" ॥
निस्यन्दे निस्रवे ॥ * ॥ द्विविधकर्णविद्रधिमाह ।

"क्षतात्यभिघातप्रभवस्तु विद्रधि-
र्भवेत्तथा दोषकृतोऽकरः पुनः ।
सरक्तपीतारुणमस्रमास्रवेत्
प्रतोदधूमायनदाहचोषवान्" ॥

क्षतप्रभवोघातप्रभवश्च तयोरथागन्तुजत्वादैक्यम् ॥ अस्रं आस्रावमित्यर्थः ॥ * ॥ कर्णपाकमाह ।

"कर्णपाकस्तु पित्तेन कोथविस्फोटकृद्भवेत्" ।
कोथः पूतिभावः । स्फोट आर्द्रता ॥ * ॥

पूतिकर्णमाह ।

"कर्णविद्रधिपाकाद्वा सकर्णो वारिपूरणात् ।
पूयं स्रवति यत् पूतिं स ज्ञेयः पूतिकर्णकः" ॥ * ॥

कर्णस्रावाद्भेदार्थमाह ।

पूतन्ति नियमेन पूति यथा स्यादेवं स्रवति ॥ * ॥

कर्णगतानां श्लोथार्व्बुदार्शसां लक्षणान्याह ।

"कर्णश्लोथार्व्बुदार्शांसि जानीयादुक्तलक्षणैः" ॥

कर्णश्लोथास्तु चत्वारो वातपित्तकफरक्तजाः ।
एवमर्शोऽपि चतुर्व्विधम् । अन्येषां श्लोथानामर्शसाञ्चासम्भव आधारप्रभावात् ॥ अर्व्बुदं सप्तविधम् । वातपित्तकफरक्तमांसमेदःसिराजम् ॥

एते कर्णरोगा अष्टाविंशतिः सुश्रुतोक्ताः ॥*॥
इदानीं चरकोक्तकर्णरोगचतुष्टयं वातपित्तकफसन्निपातजमाह । तत्र वातजमाह ।

"नादोऽतिरुक् कर्णतले तु शोथः
स्रावस्तनुश्यावरुणश्च वातात्" ॥*॥

पित्तजमाह ।

"शोथः सरागो दरुणं विदाहः
सपूतिपीतस्रवणश्च पित्तात्" ॥ * ॥

कफजमाह ।

"वैसुत्य कण्डूस्थिरशोथमुक्त-
श्लिष्मस्रवतिस्वल्परुजः कफाच्च" ॥

वैसुत्यं अन्यथा स्रावणम् ॥ * ॥

त्रिदोषजमाह ।

"सर्व्वाणि रूपाणि च सन्निपातात्
स्रावश्च तत्राधिकदोषवर्णः" ॥ * ॥

कर्णपाल्याः सङ्कर्णावयवत्वात् तद्विकारमप्यत्रैवाह ।
तत्र सनिदानं परिपोटकलक्षणमाह ॥

"सौकुमार्य्यात् चिरोत्सृष्टे सहसैवातिवर्द्धिते ।
कर्णशोथो भवेत् पाल्यां सरुजः परिपोटवान् ॥
क्षणारुणनिभः स्रस्रः सवातात् परिपोटकः" ॥*॥

उत्पातमाह ।

"गुर्व्वाभरणसंयोगात् ताड़नात् घर्षणादपि ।
शोथः पाल्यां भवेत् स्रावो दाहपाकरुजान्वितः ॥
रक्ते वा रक्तपित्ताभ्यामुत्पातः स गदः स्मृतः" ॥*॥

उन्मथ्यकमाह ।

"कर्णं बलाद्दर्द्दयतः पाल्यां वायुः प्रकुप्यति ।
कफं संगृह्य कुरुते शोथस्तब्धमवेदनम् ॥
उन्मथ्यकः सकण्डूको विकारः कफवातजः" ।
अवेदनं ईषद्वेदनम् ॥ * ॥ दुःखवर्द्धनमाह ।

"संवर्द्धमाने दुर्व्विद्धे कण्डूदाहरुजान्वितः ।
शोथो भवति पाकश्च चिरोषो दुःखवर्द्धनः" ॥
संवर्द्धमाने दुर्व्विद्धे कर्णे इति शेषः ॥ * ॥

परिलेहिनमाह ।

"कफासृक् कृमयः क्रुद्धाः सर्षपाभा विसारिणः ।
कुर्व्वन्ति पिड़कां पाल्यां कण्डूदाहसमन्विताम् ॥
कफासृक्कृमिसम्भूतः स विसर्पान्वितस्ततः ।
लिह्यात् सशुष्कुलीं पालीं परिलेही स च स्मृतः" ॥
स पीड़कात्मकः परिलेहिसंज्ञो गदः । लिह्यात् निर्मांसीकुर्य्यात् ॥ * ॥

अथ कर्णरोगाणां चिकित्सा ।

"कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड़ एव च ॥
चतुर्ष्वपि च रोगेषु सामान्यं भेषजं स्मृतम् ।
शृङ्गवेरञ्च मधु च सैन्धवं तैलमेव च ।
कटुष्णं कर्णयोर्धार्य्यमेतत् स्याद्वेदनापहम्" ॥ १ ॥

"लशुनार्द्रकशिग्रूणां वारुणा मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कटुष्णः कर्णपूरणे" ॥
वारुणी वरुणः ॥ २ ॥

"अर्कादुरानस्रपित्तान् सतैलान् लवणान्वितान् ।
सन्निधाप्य सुधाकाण्डे कोरिते मृतयाहृते ॥
पुटपाकक्रमस्विन्नं पीड़येदारसागमात् ।
सुखोष्णं तदसं कर्णे प्रक्षिपेच्छूलशान्तये" ॥ ३ ॥

"अर्कस्य पत्रं परिणामपीत-

माज्येन स्निग्धं शिखियोगतप्तम् ।
आधीद्य तस्याम्बुसुखोष्णमेव
कर्णे निषिक्तं हरतेऽतिशूलम्" ॥ ४ ॥

"तीव्रशूलातुरे कर्णे सशब्दे क्लेदवाहिनि ।
छागमूत्रं प्रशंसन्ति कोष्णं सैन्धवसंयुतम् ॥ ५ ॥
तैलं शोणाकमूलेन मन्देऽग्नौ विधिना पचेत् ।
हरेदाशु चिरोत्थं कर्णशूलं प्रपूरणात् ॥ ६ ॥
हिङ्गुसैन्धवशुण्ठीभिस्तैलं सर्षपसम्भवम् ।
विपक्वं हरतेऽवश्यं कर्णशूलं प्रपूरणात् ॥ ७ ॥
कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड़ एव च ।
पूरणं कटुतैलेन हितं वातघ्नमौषधम् ॥ ८ ॥
शिखरीक्षारजवारा तत्कृतक्षत्रेण साधितं तैलम् ।
अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणतः" ॥
शिखरी अपामार्गः ॥ ९ ॥

"गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ।
सजलञ्च सदुग्धञ्च तद्बाधिर्य्यहरं परम्" ॥
क्षीरमात्रं ग्राह्यम् । बिल्वतैलम् ॥ १० ॥

"कर्णस्रावे पूतिकर्णे तथैव कृमिकर्णके ।
सामान्यं कर्म कुर्व्वीत योगान् वैद्येधिकानपि ॥११॥
खर्जिकाचूर्णसंयुक्तवीजपूररसं क्षिपेत् ।
कर्णस्रावरुजा दाहास्तेन नश्यन्त्यसंशयम् ॥ १२ ॥
आम्रजम्बूप्रवालानां मधुकस्य वटस्य च ।
एभिस्तु साधितं तैलं पूतिकर्णगदं हरेत् ॥ १३ ॥
जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ॥ १४ ॥
शुद्धं रसाञ्जनं नार्य्याः क्षीरं क्षौद्रेण संयुतम् ।
प्रशस्यते चिरोत्थे तत् सस्रावे पूतिकर्णके ॥ १५ ॥
कुष्ठहिङ्गुवचादारुघृताक्षाविश्वसैन्धवैः ।
पूतिकर्णापहं तैलं वस्तमूत्रेण साधितम्" ॥
कुष्ठादितैलम् ॥ १६ ॥

"गुम्बूकस्य तु मांसेन कटुतैलं विपाचयेत् ।
तस्य पूरणमात्रेण कर्णनाड़ी प्रशाम्यति" ॥
गुम्बूकाख्यं तैलम् ॥ १७ ॥

"चूर्णेन गन्धकशिलारजनीभवेन
मुष्ट्यंशकेन कटुतैलपलाष्टके तु ।
धत्तूरपत्ररसतुल्यमिदं विपक्वं
नाड़ीं जयेच्चिरभवामपि कर्णजाताम्" ॥
मुष्टिः पलम् । निशा तैलम् ॥ १८ ॥

"कृमिकर्णविनाशाय कृमिघ्नीं कारयेत् क्रियाम् ।
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ॥ १९ ॥
पूरणं हरितालेन गव्यमूत्रयुतेन च ।
धूपने कर्णदौर्गन्ध्ये गुग्गुलुः श्रेष्ठ उच्यते ॥ २० ॥
चिकित्सा कर्णशोथानां तथा कर्णार्शसामपि ।
कर्णार्व्बुदानां कुर्व्वीत शोथार्शोऽर्व्बुदवद्भिषक्" ॥*॥

अथ कर्णपालीविकाराणां चिकित्सा ।

"पालीसंशोषणे कुर्य्यात् वातकर्णरुजक्रियाम् ।
खेदयेत्यत्नतस्ताञ्च स्निग्धं संवर्द्धयेत्तिलैः ॥ १ ॥
घृतावरीवाजिगन्धापयस्यैरण्डबीजकैः ।
तैलं विपक्वं सक्षीरं पालीं संवर्द्धयेत् सुखम्" ॥
पयस्यत्र क्षीरकाकोली । घृतावरीतैलम् ॥ २ ॥

"जीवनीयस्य कल्केन तैलं दुग्धेन पाचयेत् ।
चिकित्सेत्तेन तैलेन क्षतास्रं परिपोटकम् ॥ ३ ॥
शीतलैर्व्रजलौकाभिरुत्पातं समुपाचरेत् ॥ ४ ॥

हरिणीसुरसाभ्यां च गोधाकङ्कवसान्वितम् ।
तैलं विपक्वमभ्यङ्गादुन्मादं नाशयेद्ध्रुवम् ॥ ५ ॥
दुःखवर्द्धनकं सिक्ता जम्ब्वाम्रविल्वपत्रजैः ।
क्षारतैलेन सुस्निग्धं तत्कर्णं स्वावधूनयेत् ॥
बङ्गधो गोमयैस्तप्तैः स्वेदितं परिलेपितम् ।
घनसारैः समालिङ्गेदशामूत्रेण कल्कितैः" ॥ ६ ॥
इति कर्णरोगाधिकारः । इति भावप्रकाशः ॥*॥

("प्रतिश्यायजलक्रीड़ाकर्णनक्रयुनैर्भवत् ।
मिथ्यायोगेन शब्दस्य कुपितोऽन्यैश्च कोपनैः ॥
प्राप्य श्रोत्रशिराः कुर्याच्छूलं स्रोतसि वेगवत् ।
अर्द्धविभेदकं तत्स्यं शिरशिराभिनन्दनम् ॥
चिराच्च पाकं पक्वन्तु वसिकामल्पशः स्रवेत् ।
श्रोत्रं शून्यमकस्माच्च स्यात् सञ्चारविचारवत् ॥
शूलं पित्तात् सदाहोषा शीतेच्छात्यर्थं ज्वरम् ।
आशुपाकं प्रपक्वञ्च स पीतसिकास्रुतिः ॥
सा वसीकास्यशब्देद्यद्यत्तत्पाकमुपैति च ।
कफाच्छिरोरुहनुयोवा गौरवं मन्दतारुजः ॥
कण्डूः श्वयथुरल्पोष्मा पाकात् श्वेतघनास्रुतिः ।
करोति श्रवणे शूलमभिघातादिदूषितम् ॥
रक्तं पित्तसमानार्त्ति किञ्चिदाधिक्यलक्षणम् ।
शूलं समुदितैर्दोषैः सशोफज्वरतीव्रकम् ॥
पर्य्यायादुल्बणैरुक्तं जायते श्रुतिजाध्ववत् ।
पक्वं सितासितारक्तघनपूय प्रवाहि च ॥
शब्दवाहिशिरासंस्थे शब्दोति पवने मुहुः ।
नादानकस्मादिविधान् कर्णनादं वदन्ति तम् ॥
श्लेष्मानुगतो वायुर्नादो वा समुपेक्षितः ।
उग्रैः क्षुच्छ्रुतिं कुर्य्यादधिरत्वं क्रमेण च ॥
वातेन स्रोतसि श्लेष्मा स्रोतो लिम्पेत्ततो भवेत् ।
रुग्गौरवं पिधानञ्च सप्रतीघाह संज्ञितः ॥
कण्डूशोफौ कफात् श्रोत्रे स्थिरौ तत्संज्ञया स्मृतौ ।
कफो विदग्धः पित्तेन सरुजं नीरुजन्वपि ।
वमति बङ्गशोदं कुरुते पूतिकर्णकम् ।
वातादिदूषितं श्रोत्रं मांसासृक्क्लेदजां रुजम् ॥
स्रादन्तो जन्तवः कुर्युस्तीव्रां सक्रिमिकर्णकः ।
श्रोत्रकण्डूयनाज्जाते क्षते स्यात् पूर्व्वलक्षणः ॥
विद्रधिः पूर्व्ववच्चान्यः शोफोऽर्शोऽर्बुदमीरितम् ।
तेषुरुक् पूतिकर्णत्वं बधिरत्वञ्च बाधते ॥
गर्भेऽनिलात्सदुचिता शष्कुलीकुचिकर्णकः ।
एको नीरुगनेको वा गर्भे मांसाङ्कुरः स्थिरः ॥
पिप्पली पिप्पलीमानः सन्निपातादिदारिका ।
सर्व्वः सरुजलक्ष्यः श्वयथुः स उपेक्षितः ॥
कटुतैलनिभं पक्वः स्रवेत् क्षुच्छ्रेण रोहति ।
सङ्कोचयति रूढ़ा च सा ध्रुवं कर्णशष्कुली ॥
शिरास्थः कुरुते वायुः पालीशोषं तदाह्वयम् ।
शुष्का दृढ़ा च तन्त्रीवत् पालीवातेन तन्त्रिका ॥
सुकुमारशिरोत्पातात् सहसैव प्रवर्द्धते ।
कर्णशोफः सरुक्पाल्यामरुगाः परिपोटवान् ॥
परिपोटः सपवनादुत्पातः पित्तशोणितात् ।
गुर्व्वाभरणभागाद्यैः स्रावो बहुदाह पाकवान् ॥
श्वयथुः स्फोटपिटका रागोष्माक्लेदसंयुतः ।
पाल्यां शोफोऽनिलकफात् सर्व्वतो निर्व्यथःस्थिरः ॥
स्तब्धः सर्व्वः कण्डूमान् उन्मन्थो गल्लिरश्च सः ।
दुर्व्विद्धे वर्द्धिते कर्णेसकण्डूदाहपाकरुक् ॥
श्वयथुः सन्निपातोत्थः स नाम्ना दुःखवर्द्धनः ।
कफाद्रक्तं क्रिमिजाः सूक्ष्माः सकण्डूक्लेदवेदनाः ॥
लेह्याख्याः पिटिकास्ताहि लिह्युः पालीमुपेक्षिताः ।
पिप्पली सर्व्वजं शूलं विदारीकुचिकर्णकः ॥
श्यामसाध्या याप्येका तन्त्रिकान्यांस्तु साधयेत् ।
पञ्चविंशतिरित्युक्ताः कर्णरोगविभागतः" ।
इत्युत्तरस्थाने सप्तदशेऽध्याये वाभटेनोक्तम् ॥*॥
अस्य चिकित्सा तेनोक्ताष्टादशेऽध्याये, यथा,—
"कर्णशूले पवनजे पिबेद्राज्ञौ रसाघृतम् ।
वातघ्नसाधितं सर्पिः कर्णं स्निग्धञ्च पूरयेत् ॥
पत्राणां एरण्डस्यार्त्यविल्वार्कैरण्डजन्मनाम् ।
तैलसिन्धूत्थदिग्धानां स्निग्धानां पुटपाकतः ॥
रसैः कवोष्णैस्तद्वच्च मूलकस्यारुजोरपि ।
गण्डे वातहरैःश्लेषु मूत्रेषु च विपाचितः ॥
महास्नेहो द्रुतं हन्ति सुतीव्रामपि वेदनाम् ।
महतः पञ्चमूलस्य क्वाथात् क्षौमेण वेष्टितात् ।
तैलसिक्तात् प्रदीप्तायात् स्नेहः सद्यो रुजापहः ।
योज्यस्त्वेवं भद्रकाष्ठात् कुष्ठात् काष्ठाच्च सारणात् ॥
वातव्याधि प्रतिश्याय विहितं हितमत्र च ।
वर्ज्ययेच्छिरसा स्नानं शीताम्भःपानमक्रमम् ॥
पित्तशूले सितायुक्तं घृतस्निग्धं विरेचयेत् ।
प्राज्ञायस्त्रिफलं स्नेह्यं ग्रस्यते कर्णपूरणम् ॥
यष्ट्याह्वनन्ता हिमोशीरकाकोलीरोध्रजीवकैः ।
मधुकाम्बुविषमञ्जिष्ठासारिवाभिश्च साधयेत् ॥
यष्टीमधुरसप्रस्थं क्षीरदिप्रस्थसंयुतम् ।
तैलस्य कुडवं नस्यपूरणाभ्यञ्जनैरिदम् ॥
निहन्ति शूलदाहोषाः केवलं क्षौद्रमेव वा ।
यष्ट्यादिभिश्च सघृतैः कर्णौ दिह्यात् समन्ततः ॥
वामयेत् पिप्पलीसिद्धसर्पिः स्निग्धं कफोद्भवे ।
धूमगण्डूषखेदान् कुर्य्यात् कफापहान् ॥
वचुगार्कश्रियूषां सुरस्या मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कटुक्षः कर्णपूरणे ॥
अर्कानुरागस्त्रिफलाक्षौद्रतैलाक्षौद्रवाम्बितान् ।
सन्निधाय घृतीकाग्रे कोरिते तच्छदाहृतान् ।
खेदयेत् पुटपाकेन स रसः शूलजित्परम् ।
रसेन बीजपूरस्य कपित्थस्य च पूरयेत् ।
सूक्ष्मेण पूरयित्वा वा फेनेनाम्लवचूर्णयेत् ।
अजाऽविमूत्रवंशत्वक् सिद्धं तैलञ्च पूरणम् ।
सिद्धं वा सार्षपं तैलं हिङ्गुतुम्बुरुनागरैः ।
रक्तजेपित्तवत् कार्य्यं शिराद्यासु विमोक्षयेत् ।
पक्वे पूयवहे कर्णे धूमगण्डूषलेपनम् ।
युञ्जाद्व्राढ़ी विधानञ्च दुष्टव्रणहरञ्च यत् ।
स्रोतः प्रमृज्य दिग्धन्तु दौ कालौ पिचुवर्त्तिभिः ।
पूरयेदूषयित्वा तु माक्षिकेण प्रपूरयेत् ॥
सुरसादिगणक्वाथफाणिताभ्यां च योजयेत् ।
पिचुवर्त्तिसुसूक्ष्मैश्च तत्कर्णैरवचूर्णयेत् ॥
शूलक्लेदगुरुत्वानां विधिरेषनिवर्त्तकः ।
प्रियङ्गु मधुकाम्बष्ठा धातक्युत्पलपर्पटैः ॥
मञ्जिष्ठलोध्रलाक्षाभिः कपित्थस्य रसेन च ।
पचेत्तैलं तदाख्यं निगदत्यभ्यङ्गतो रुजाम् ॥
नाद्यबाधिर्य्ययोः कुर्य्यादातशूलोक्तमौषधम् ।
श्लेष्मानुबन्धे श्लेष्माणं प्राग्जयेद्वमनादिभिः ॥
एरण्डशिग्रुवरुणमूलकात् पञ्चमे रसे ।
चतुर्गुणे पचेत्तैलं क्षीरे चाष्टगुणोन्मिते ॥
यष्ट्याह्वाक्षीरकाकोलीकल्कयुक्तं निहन्ति तत् ।
नादबाधिर्य्यशूलानि नावनाभ्यङ्गपूरणैः ॥
पक्वं प्रतिविधाहिङ्गुमिश्रितक् खर्ज्जिकोद्भवैः ।
सक्षौद्रैः पूरणात्तैलं रक्तस्रावश्रुतिनादनुत् ॥
कर्णनादे हितं तत्तं सर्षपोत्थञ्च पूरणे ।
शुष्कमूलकखण्डानां क्षारो हिङ्वमहौषधम् ॥
घृतपुष्पावचाकुष्ठदारुशिग्वग्रसाङ्गनम् ।
सौवर्चलयवक्षारखर्ज्जिकौद्भिदसैन्धवम् ॥
भूर्ज्जग्रन्थिविड़ं मुक्ता मधुस्रक्तं चतुर्गुणम् ।
मातुलुङ्गरसस्तद्वत् कदलीस्वरसस्तथैः ॥
पक्वं तैलं जयत्याशु सूक्ष्मक्लानपि पूरणात् ।
कण्डूं क्लेदञ्च बाधिर्य्यं पूतिकर्णञ्च रक्तजिन् ॥
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयेषु च ।
अथ सुप्तावविस्रावितां कर्णौ रक्तं हरेत्ततः ॥
सशोफक्लेदयोर्मन्दस्रुतेर्वमनमाचरेत् ।
बाधिर्य्यं वर्ज्ययेद्बालवृद्धयोश्चिरजञ्च यत् ॥
प्रतिनाहे परिक्लेद्य स्नेहस्वेदैर्विशोधयेत् ।
कर्णशोधनकेनानु कर्णौ तैलस्य पूरयेत् ॥
सक्षौद्रसैन्धवमधोर्मांसुलुङ्गरसस्य वा ।
शोधनाद्घृतोत्थत्वौघृतमण्डस्य पूरणम् ॥
क्रमोऽयं सर्वपूर्णेऽपि कर्णे कार्य्यो कफापहम् ।
नस्यादितद्धोपेऽपि कटूष्णैश्चाच्च लेपनम् ॥
कर्णस्रावोदितं कुर्य्यात् पूतिक्रिमिकर्णयोः ।
पूरणं कटुतैलेन विशेषात् क्रमिकर्णके ॥
वमिपूर्णाहितार्कर्ण विद्रधौविद्रधिक्रिया ।
पित्तोत्थकर्णशूलोक्तं कर्त्तव्यं क्षतविद्रधौ ॥
अर्शोऽर्बुदेषु नासावदामार्कर्णविदारिका ।
कर्णविद्रधिवत्साध्या यथा दोषोदयेन च ॥
पालीशोथेऽनिलश्लेष्मशूलवन्नस्य लेपनम् ।
खेदञ्च कुर्य्यात् स्निग्धाच्च पालीमुद्वर्त्तयेत्तिलैः ॥
प्रियालबीजयष्ट्याह्वहृयगन्धा यवान्वितैः ।
ततः पुष्टिकरैः स्नेहैरभ्यङ्गं नित्यमाचरेत् ॥
घृतावरी वाजिगन्धा पयस्यैरण्डजीवकैः ।
तैलं विपक्वं सक्षीरं पालीनां पुष्टिवत्परम् ॥
कल्केन जीवनीयेन तैलं पयसि पाचितम् ।
आनूपमांसखाद्येन च पालीपोषणं वर्द्धनम् ॥
पालीं छित्त्वातिसंक्षीणां श्लेष्मां सन्धाय पोषयेत् ।
याप्येवं तन्त्रिकाख्यापि परिपाटेऽप्ययं विधिः ॥
उत्पाते घृतलैर्लेपो जलौको हृतशोणिते ।
जम्ब्वाम्रपल्लवबलायष्टीरोध्रतिलोत्पलैः ॥
सधान्यक्षैः संमक्षिकैः सकदम्बैः ससारिवैः ।
सिद्धमभ्यञ्जनं तैलं विसर्पोक्तघृतानि च ॥
उन्मन्थेऽभ्यञ्जनं तैलं गोधाकङ्कवसान्वितम् ।
तालपत्र्याश्वगन्धार्कवाकूचीतिलसैन्धवैः ॥
सुरसाजक्षीभ्याञ्च सिद्धं तीक्ष्णञ्च नावनम् ।
दुर्व्विद्धेऽभ्रमन्तजम्ब्वाम्रपल्लवाद्येन सेचितम् ॥
तैलेन पालीं स्वभ्यक्तां सुस्नग्धैरपि चूर्णयेत् ।
चूर्णैर्मधुकमञ्जिष्ठा प्रपुण्ड्राञ्जनिशोद्भवैः ॥
नाड्याविड़ङ्गसिद्धञ्च तैलमभ्यञ्जने हितम् ।

स्निग्धां गोमयजैः पिण्डैर्बद्धग्रः परिलेहिकाम् ॥
विड्वराहारैरालिम्पेदुरभ्रीमूत्रकल्कितैः ।
कोटजेङ्गुदकारञ्जबीजशिग्म्याकवल्कलैः ॥
अथवाभ्यञ्जने तैर्वा कटुतैलं विपाचयेत् ।
सनिम्बपत्रमरिचमदनैर्लेहिकावणे ॥
छिन्नन्तु कर्णं शुद्धस्य बन्धमालोच्य यौगिकम् ।
शुद्धाखं लागयेल्लग्ने सद्यश्छिन्ने विशोधनम् ॥
अथ ग्रथित्वा केशान्तं कृत्वा छेदनलेखनम् ।
निवेश्य सन्धिं सुषमं न निम्नं न समुन्नतम् ॥
अभ्यज्य मधुसर्पिर्भ्यां पिचुस्रोतावगुण्ठितम् ।
सूत्रेणागाढ़ग्रथितं बद्धा चूर्णैरवाकिरन् ॥
ग्रोथितस्यापनेर्व्रणमाचारस्त्वादिशेत्ततः ।
संप्राहादामतैलाक्तं घनैरपनयेत् पिचुम् ॥
सुरूढ़ं जातरोमाणं श्लिष्टसन्धिसमस्थिरम् ।
सुवर्णाभं सरागञ्च घनैः कर्णं विवर्द्धयेत् ॥
जलसूकाः स्वयं गुप्ता रज्ज्वो रुहतीद्वयम् ।
अश्वगन्धा बला हस्तिपिप्पली गौरसर्षपाः ॥
मूलं कोशातकास्वघ्नरूपिका सप्तपर्णजम् ।
कुक्कुन्दरी कालमृता गृहं मधुकरीक्षतम् ॥
जन्तुका जलजन्मा च तथा स्थावरकन्दकम् ।
एभिः कल्कैः खरं पक्वं सतैलं माहिषं घृतम् ॥
हस्त्यश्वमूत्रेण परमभ्यङ्गात् कर्णवर्द्धनम् ।
अथ कुर्याद्यस्यास्य छिन्नां शुद्धस्य नासिकाम् ॥
छिन्द्यान्नासासमं पत्रं तत्तुल्यञ्च कपोलतः ।
त्वङ्मांसं नासिकासन्ने रज्जुस्तत्तनुतां नयेत् ॥
सीव्येद्वयं ततः सूच्या सेविन्या पिचुयुक्तया ।
नासाच्छेदे च लिखिते परिवर्त्योपरिस्थितम् ॥
कपोलबन्धं सन्दध्यात् सीव्येन्नासाञ्च यत्नतः ।
नाड़ीभ्यामुत्क्षिपेदन्तः सुखोच्छ्वासप्रवृत्तये ॥
आमतैलेन लिप्ता तु प्रतङ्गमधुकाञ्जनैः ।
ग्रोथितस्यापनेचान्यैः सस्यवर्णैरवचूर्णयेत् ॥
ततो मधुघृताभ्यक्तं बद्धाचारिकमादिशेत् ।
स्थानस्थान्तरं कुर्यात् सद्यो व्रणविधिन्ततः ॥
छिन्द्याद्बहुऽधिकं मांसं नासोमान्ते च चर्म्मवत् ।
सीव्येत्तच्च सुसूक्ष्मं हीनं संवर्द्धयेत् पुनः ॥
निवेशिते यथान्यासं सद्यश्छेदेऽप्ययं विधिः ।
नाड़ीयोगादिनौक्तस्य नासासन्धानविद्विधिः" ॥
इति वाभटे उत्तरस्थाने १८ अध्यायः ॥ * ॥
"सामान्यं कर्णरोगेषु घृतपानं रसायनम् ।
अध्यायामो ऽशिरःस्नानं ब्रह्मचर्य्यमकत्थनम् ॥
कर्णशूले प्रणादे च बाधिर्य्यक्ष्वेड़योरपि ।
चतुर्णामपि रोगाणां सामान्यं भेषजं विदुः ॥
स्निग्धं वातहरैः स्वेदैर्नरं स्नेहविरेचितम् ।
नाड़ीस्वेदैरुपचरेत् पिण्डस्वेदैस्तथैव च ॥
विल्वैरण्डार्कवर्षाभूदधित्योन्मत्तशिग्रुभिः ।
वस्तगन्धाश्वगन्धाभ्यां तर्कारीपत्रवेणुभिः ॥
आरनालः घृतैरेभिर्नाड़ीस्वेदः प्रयोजितः ।
कफवातसमुत्थानं कर्णशूलं निरस्यति ॥
मीनकुक्कुटलावानां मांसजैः पयसापि वा ।
पिण्डैः स्वेदञ्च कुर्वीत कर्णशूलनिवारणम् ।
अश्वत्थपत्रखण्डं वा विधाय बद्धपत्रकम् ।
तप्ताक्तमस्तसम्भूर्णं निदध्याच्छ्रवणोपरि ॥
यत्तैलं च्यवते तस्मात् खल्लादङ्गारसाधितात् ।
तत्प्राप्तं श्रवणस्रोतः सद्यो गृह्णाति वेदनाम् ॥
क्षौमगुग्गुल्वगुरुभिः सघृतैर्धूपयेच्च तम् ।
भक्तोपरि हितं सर्पिर्वस्तिकर्म्म च पूजितम् ॥
निरन्नो निशि तत्सर्पिः पीत्वोपरि पयः पिबेत् ।
मूर्द्धवस्तिषु नस्ये च मस्तिष्के परिषेचने ॥
घृतपाकं बलातैलं प्रयुक्तञ्चापि भोजने ।
कण्टकारीमजाक्षीरे पक्वा क्षीरेण तेन च ॥
विपचेत् कुक्कुटवसां कर्णयोस्तत्प्रपूरणम् ।
तगड़ुलीयकमूलानि फलमङ्कोठजन्तथा ॥
ग्रहिंसाकेन्द्रकामूलं सरलं देवदारु च ।
लसुनं गृष्टवेरञ्च तथा वंशावलेखनम् ॥
कल्कैरेषां तथाक्षैश्च पचेत् स्नेहं चतुर्विधम् ।
वेदनायाः प्रशान्त्यर्थं हितं तत्कर्णपूरणम् ॥
लसुनार्द्रकशिग्रूणां मुरङ्गा मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कटुष्णः कर्णपूरणे ॥
गृष्टवेररसः क्षौद्रं सैन्धवं तैलमेव च ।
कटुष्णं कर्णयोर्देयमेतद्धा वेदनापहम् ॥
वंशावलेखसंयुक्ते मूत्रे चाजाविके भिषक् ।
सर्पिः पचेत्तेन कर्णं पूरयेत् कर्णशूलिनः ॥
मधूकस्य पञ्चमूलस्य काण्डमध्यादशाङ्गुलम् ।
क्षौमेणावेष्ट्य संसिच्य तैलेनादीपयेत्ततः ॥
यत्तैलं च्यवते तेभ्यो घृतेभ्यो भाजनोपरि ।
क्षेयं तद्दीपिकातैलं सद्यो गृह्णाति वेदनाम् ॥
कुर्य्यादेवं भद्रकाष्ठे कुष्ठे काष्ठे च सारवे ।
मतिमान्दीपिकातैलं कर्णशूलनिवर्हणम् ॥
अर्कांकुरान्सपिप्पलीसैलाक्षान् लवणान्वितान् ।
सन्निदध्यात् खड़ीकाखे कोरिते तच्छदाहृते ॥
पुटपाकक्रमस्विन्नान् पीड़येदारसागमात् ।
सुखोष्णां तप्तसं कर्णे दापयेच्छूलशान्तये ॥
कपित्थमातुलुङ्गास्थ्नृष्टवेररसैः शुभैः ।
सुखोष्णैः पूरयेत् कर्णं तच्छूलविनिवृत्तये ॥
कर्णं कोष्णेन चुक्रेण पूरयेत् कर्णशूलिनः ।
समुद्रफेनचूर्णेन युक्ता वाप्यवचूर्णयेत् ॥
अङ्गानामिह मूत्राणां मूत्रेणाभ्यन्तरेण वा ।
कोष्णेन पूरयेत् कर्णं कर्णशूलोपशान्तये ॥
मूत्रेष्वलेषु वातघ्ने गवां च क्षथिते भिषक् ।
पचेच्चतुर्विधं स्नेहं पूरणं तच्चकर्णयोः ॥
एता एव क्रियाः कुर्य्यात् पित्तघ्नैः पित्तसंयुते ।
काकोल्यादौ दशक्षीरं तिक्तक्षाञ्च हितं हविः ॥
क्षीरवृक्षप्रवालेषु मधुके चन्दने तथा ।
कल्कक्काथे परं पक्वं घृतं क्षीरासधूकैः सरैः ॥
इक्षुदीसर्षपस्नेहौ सकफे पूरणे हितौ ।
तिक्तौषधानां यूषाश्च स्वेदाश्च कफनाशनाः ॥
सुरसादौ कृतं तैलं पञ्चमूले महत्यपि ।
मातुलुङ्गरसः शुक्तं लसुनार्द्रकयो रसः ॥
एकैकः पूरणे पथ्यस्तैलं तेष्वथवा कृतम् ।
तीक्ष्णा मूर्द्धविरेकाश्च कवलाश्चाच पूजिताः ॥
कर्णशूलविधिः कृत्स्नः पित्तघ्नः ग्रोथितार्हते ।
शूलप्रशादबाधिर्य्यस्नेहानान्तु प्रकीर्त्तितम् ॥
सामान्यतो विशेषेण बाधिर्य्ये पूरणं हितम् ।
गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ॥
सजलञ्च सदुग्धञ्च बाधिर्य्ये कर्णपूरणम् ।
सितामधुकबिल्वैर्भिः सिद्धं वाजे पयस्यथ ॥
सिद्धं वा बिल्वनिर्य्यासे ग्रीतीभूतं तदुद्धृतम् ।
पुनः पचेद्ग्रक्षीरं सितामधुकचन्दनैः ॥
बिल्वाम्बुगाढ़ं यत्तैलं बाधिर्य्ये कर्णपूरणम् ।
वक्ष्यते यः प्रतिश्याये विधिः सोऽप्यत्र पूजितः ॥
वातव्याधिषु यश्चोक्तो विधिः स च हितो भवेत् ।
कर्णस्रावे पूतिकर्णे तथैव क्रिमिकर्णके ॥
समानं कर्म कुर्वीत योगान् वैद्योऽधिकानपि ।
शिरोविरेचनञ्चैव धूपनं पूरणन्तथा ॥
प्रमार्जनं धावनञ्च वीक्ष्य वीक्ष्यावचारयेत् ।
राजवृक्षादितो येन सुरसादिगणेन वा ॥
कर्णप्रक्षालनं कार्य्यं चूर्णैरेषाञ्च पूरणम् ।
चूर्णं पञ्चकषायोत्थं कपित्थरसयोजितम् ॥
कर्णस्रावे प्रशंसन्ति पूरणं मधुना सह ।
सर्ज्जत्वक्चूर्णसंयुक्तः कार्पासीफलजो रसः ॥
योजितो मधुना वापि कर्णस्रावे प्रशस्यते ।
लाक्षासर्ज्जरसौ वापि चूर्णितौ कर्णपूरणम् ॥
सघृतैलमहाहृद्यगन्धव्यप्रसवायुतम् ।
कुलीरक्षौद्रमण्डूकी सिद्धं तैलञ्च पूजितम् ॥
तिन्दुकान्यभयारोध्रं समङ्गामलकं मधु ।
पूरणञ्चात्र पथ्यं स्यात् कपित्थरसयोजितम् ॥
रसमाक्षिकपित्थानां मधूकधवशाल्मजम् ।
पूरणार्थं प्रशंसन्ति तैलं वा तैर्विपाचितम् ॥
प्रियङ्गुमधुकाम्बष्ठा धातकी ग्रीतपर्णिभिः ।
मञ्जिष्ठाशोधवाच्छाभिः कपित्थस्य रसेन वा ॥
पचेत्तैलं तदाखावमवश्यहति पूरणात् ।
वृद्धं रसाञ्जनं गार्य्याः क्षीरेण क्षौद्रसंयुतम् ॥
प्रशस्यते चिरोत्थेऽपि स्रावे पूतिकर्णके ।
निर्गुण्डीस्वरसे तैलं सिन्धूर्धूसरजोगुड़ः ।
पूरणः पूतिकर्णस्य शमनो मधुसंयुतः ।
क्रमिकर्णकनाशार्थं क्रिमिघ्नं योजयेद्विधिम् ।
वार्त्ताकुधूमश्च हितः सार्षपश्चेह एव च ।
क्रिमिघ्नं हरितालेन गवां मूत्रयुतेन च ।
गुग्गुलुः कर्णदौर्गन्ध्ये धूपनं श्रेष्ठमुच्यते ।
क्षुद्रघ्नं धूमपानञ्च कवड़स्य च धारणम् ।
कर्णश्लेड़े हितं तैलं सार्षपञ्चैव पूरणम् ।
विद्रधौ वापि कुर्वीत विद्रधुक्तं चिकित्सितम् ।
प्रक्षोद्यधीमांस्तेन खेदेन प्रविलाप्य च ।
शोधयेत् कर्णविट्कन्तु भिषक् सम्यक् प्रयत्नतया ।
नाड़ीस्वेदोऽथ वमनं धूमो मूर्द्धविरेचनम् ।
विधिश्च कर्णदृत्सर्व्वः कर्णकण्डूमपोहति ।
अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत् ।
ततोऽतिरिक्तशिरसः क्रियां प्राप्तां समाचरेत् ।
कर्णपाकस्य भेषज्यं कुर्य्यात् पित्तविसर्पवत् ।
कर्णच्छिद्रे वर्त्तमानं कीटं क्लेदमलादि वा ।
गृष्टवेरार्कपत्रैरुद्धीमानयवापि प्रयत्नतया ।
शेषाण्वन्तु विकाराणां प्राक्चिकित्सितमीरितम्" ।
इति सुश्रुते उत्तरतन्त्रे एकविंशतितमोऽध्यायः ॥*॥
चिकित्सितस्थाने ४२ अध्याये सविदानलक्षण-
चिकित्सितान्युक्तानि हारीतेन यथा,—
"सिक्थेन वा तोयविपूरणेन

मक्षेण वा याति भवेद्भुजा च ।
उच्छ्वासरोधाद्भवते तथापि
वातादिकैर्वा कुपितैरथापि ॥
संसर्गदोषैरपि सर्व्वदोषैः
क्रिमिप्रजेनापि तथैव चान्या।
सञ्जायते कर्णरुजा नरस्य
प्रस्रवति तेनापि बहुस्रवांश्च ॥
निःस्रावमेघध्वनिदन्तशब्दान्
शूलं सदाहञ्च शिरोव्यथा च ।
वेगुखनं वत्स ! प्रस्रवति सर्व्वं
पित्तेन तं विद्धि भिषग्वरिष्ठ ! ॥
तथा च मूर्च्छां प्रतनोति शब्दं
मेघस्वनं वा कफजे प्रस्रवति ॥
क्रिमिदोषे स्रवेत् पूयं सरक्तं याति सप्तम ! ।
तथा चैवाभिघातेन जायते तीव्रवेदना ॥
स्रुतेन पूयं स्रवते बाह्याद्भवति चापरः ।
तस्मादिमूलितदोषेण जायते कर्णजा रुजा ॥
न कर्णरोगे जलपूरणञ्च
न चूर्णमेतत् कथितं विधिज्ञैः ।
तैलं हितं स्वेदनमेव कर्णे
स बाष्पबिन्दुश्च हितो मतश्च ॥
समुद्गपेनं सिन्धूत्थं सूक्ष्मचूर्णञ्च कारयेत् ।
सौवीरकरसेनापि वातिके कर्णपूरणम् ॥
आर्द्रसौवीरकरसं शुण्ठीसैन्धवशुण्गुलुम् ।
माक्षिकाज्यावतोयेन तैलं पक्वातिचोष्यकम् ॥
तुम्बीरसञ्च धार्य्यते कर्णरोगे प्रशस्यते ।
यष्टीमधुः कुष्ठमरिष्टपत्रं
निशाविशाला सुमनः प्रवालाः ।
विपाठितं कर्णभवे च शूले
च पैत्तिके वा हृतमेव शस्तम् ॥
ब्राह्मीरसं सैन्धवकं विड़ङ्गं
सक्षौद्रराजस्य हृतेन युक्तम् ।
तथैव सौवीररसञ्च पथ्या
स्रुतञ्च वस्त्रं परिपूर्यमेतत् ॥
हितञ्चभवेत्तत् श्रुतिपूरणाय
पूयं सरक्तं क्रिमिजं निहन्ति ॥
सर्व्वे प्रोक्ताः शिरोरोगास्तैलानि च घृतानि च ।
जात्यादिकान् वा युञ्जीत शिरोरोगविदाम्वरः ।
वातहारीणि पथ्यानि विदाहीनि गुरूणि च"॥१॥)

कर्णजलिका, स्त्री, (कर्णस्य जलिका जलेव ।) पालिः । इति हेमचन्द्रः । कानेर पाता इति भाषा ॥

कर्णबंशः, पुं, (कर्णः कर्णाकृतिः कर्णवत् सञ्जो वा बंशो यत्र ।) मक्षः । इति शब्दरत्नावली ॥

कर्णवर्जितः, पुं, (कर्णेन श्रवणेन्द्रियेण वर्जितः हीनः । अस्य दर्शनेन्द्रियेणैव श्रोत्रकार्य्यकारित्वात् तथात्वम् ।) सर्पः । इति शब्दचन्द्रिका । कर्णहीने त्रि ॥

कर्णवेधः, पुं, (कर्णयोः कर्णस्य वा वेधः वेधनम् ।) कर्णयोश्छिद्रकरणम् । काणबधान इति भाषा । तस्य विधिर्यथा । मदनरत्ने वशिष्ठश्रीधरौ ॥

"मासे षष्ठे सप्तमे वाष्टमे वा
वेध्यौ कर्णौ द्वादशे षोड़शेऽब्दि ।
मध्येनाह्नः पूर्व्वभागे न रात्रौ
नक्षत्रे द्वे द्वे तिथी वर्ज्जयित्वा" ॥
अत्र जन्ममासो वर्ज्यः । ज्योतिर्निबन्धे गर्गः ।
"मासे षष्ठे सप्तमे वाप्यष्टमे मासि वत्सरे ।
कर्णवेधं प्रशंसन्ति पुष्ट्यायुःश्रीविवृद्धये" ॥
मदनरत्ने ।
"प्रथमे सप्तमे मासि अष्टमे दशमेऽथवा ।
द्वादशे च तथा कुर्य्यात् कर्णवेधं शुभावहम्" ॥
हेमाद्रौ व्यासः ।
"कार्त्तिके पौषमासे वा चैत्रे वा फाल्गुनेऽपि वा ।
कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने" ॥
श्रीधरः ।
"हरिहरकरचित्रासौम्यपौष्णोत्तरार्या-
दितिवसुषु घटाली सिंहवर्ज्ज्येषु लग्ने ।
शशिगुरुबुधकाव्यानां दिने पर्व्वरिक्ता-
रहिततिथिषु शुद्धे नैधने कर्णवेधः" ॥
मदनरत्ने बृहस्पतिः ।
"द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी ।
द्वादशी पञ्चमी श्रेष्ठा तृतीया कर्णवेधने ॥
सौवर्णी राजपुत्रस्य राजती विप्रवैश्ययोः ।
शूद्रस्य चायसी स्रष्टी मध्यमाष्टाङ्गुलात्मिका" ॥
हेमाद्रौ देवलः ।
"कर्णरन्ध्रं रवेश्छाया न विशेदयजन्मनः ।
तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः"॥ शङ्खः ।
"अङ्गुष्ठमात्रसुषिरौ कर्णौ न भवतो यदि ।
तस्मै श्राद्धं न दातव्यं दत्तश्चेदासुरं भवेत्" ॥
इति निर्णयसिन्धुः । कर्णवटकदोषनिवारणार्थं कर्णस्य वेधनम् । सोदरभ्रातॄणां संस्काराद्याश्च पौर्व्वापर्य्यक्रमः कर्णवेधस्यासंस्काररूपत्वात् न तथा नियमः । यथा,—
"यदापत्यद्वयं तिष्ठेत् सम्भवोऽप्यपरस्य च ।
कर्णवटकं विजानीयादूर्द्ध्वं तत्तयस्य च ॥
इत्याद्यञ्च तयोर्म्मध्ये शुद्धिर्यस्याथ वत्सरे ।
कर्णवेधो हितस्तस्य तस्य व्यूढविचारणा ॥
षट्कर्म्मोत्पत्तिमाद्यञ्च भानोः शुद्धासमेऽपि च ।
कर्णौ वेध्यौ न दोषः स्यादन्यथा मरणं भवेत्"॥
इति मलमासतत्त्वे माधवधृतवचनम् । अस्य कालनियमो यथा,—राजमार्त्तण्डे ।
"न जन्ममासे न च चैत्रपौषे
न वर्षयुग्मे न हरौ प्रसुप्ते ।
रवौ च दुष्टे न च कृष्णपक्षे
न जन्मभे कर्णविधिः प्रशस्तः" ॥
तथा दीपिकायाम् ।
"नो जन्मेन्दुभमासस्थसूर्य्यरविजप्राजाहसुप्ताच्युते
प्रस्तेऽर्के लघुविद्धयुग्ममृदुभस्वात्युत्तरादित्रयैः ।
सौम्यैस्स्थायिचरोग्रकरतैः पापैस्त्रिलाभारिगै
रोजोऽब्दे श्रुतिवेध इष्यसितभे लग्ने तु काले शुभे ॥
अत्रापि तिथ्यृक्षादिविदुष्टं वर्जयेत् ॥
यथाह गर्गः ।
"कर्णवेधव्रते कुर्य्यादुदक्सार्गस्थिते रवौ ।
दक्षिणाशास्थिते भानौ नैव कुर्य्यात् कथञ्चन" ॥
इति ज्योतिषतत्त्वम् ॥

कर्णवेधनी, स्त्री, (विध्यतेऽनया । विध + करणे ल्युट् । ततो ङीप् ।) कर्णवेधनास्त्रम् । इति त्रिकाण्डशेषः ॥

कर्णवेष्टकं, क्ली, (कर्णौ वेष्टयति । वेष्ट् + ण्वुल् ।) कुण्डलम् । इति हेमचन्द्रः ॥

कर्णवेष्टनं, क्ली, (कर्णौ वेष्ट्येतेऽनेन । वेष्ट् + करणे ल्युट् ।) कुण्डलम् । इत्यमरः । २ । ६ । १०३ ॥

कर्णशष्कुली, स्त्री, (कर्णयोः कर्णस्य वा शष्कुलीव ।) कर्णगोलकम् । तत्पर्य्यायः । वेष्टनम् २ । इति हेमचन्द्रः ॥

कर्णशूलः, पुं, (कर्णस्य शूलः शूलवत् यन्त्रणादायकः ।) कर्णरोगविशेषः । तस्यौषधं यथा,—
"हिङ्गुतुम्बुरुशुण्ठ्या च साध्यं तैलन्तु सार्षपम् ।
एतद्धि पूरणं श्रेष्ठं कर्णशूलापहं परम् ॥ १ ॥
शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शुक्तं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
क्षमयञ्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥२॥
शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
घृतपुष्पी वचा कुष्ठं दारु ग्रियु रसाञ्जनम् ।
सौवर्चलं यवक्षारः सामुद्रं सैन्धवं तथा ।
भृङ्गराजस्य विड्रं मुस्तं मधु शुक्तचतुर्गुणम् ।
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम् ॥
बाधिर्य्यं कर्णनादञ्च पूयस्रावञ्च दारुणः ।
पूरणादस्य तैलस्य क्षमयः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति श्रद्धाङ्क्षतश्चेश्वर ! ।
क्षारतैलमिदं श्रेष्ठं सुखदन्तामयापहम् ॥३॥
प्रस्थे द्वे गव्यमात्राणां क्षारयेत् क्षीरमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ॥
काञ्जिकस्याढकं दत्त्वा पिण्डान्येतानि दापयेत् ।
पुनर्नवा गोक्षुरकं सैन्धवं शुषवं वचा ॥
खरकं सुरदारुञ्च दहती कण्टकारिका ।
नस्यपानाञ्जनैश्चैव कर्णशूलं हनुग्रहम् ।
बाधिर्य्यं सर्व्वरोगांश्च अभ्यङ्गाच्च महेश्वर !"॥ ४ ॥
इति गारुड़े १९८ अध्यायः ॥ (कर्णरोगशब्देऽस्य विवरणं ज्ञेयम् ॥)

कर्णसंस्रावः, पुं, (कर्णस्य कर्णयोर्वा संस्रावः पूयश्लेष्मितादेः निःस्रावणम् यत्र रोगे ।) कर्णरोगविशेषः । तस्य निदानसम्प्राप्तिरूपाणि ।
"शिरोऽभिघातादथवा निमज्जतो
जले प्रपाकादथवापि विद्रधेः ।
स्रवेद्धि पूयं श्रवणोऽनिलार्दितः
सकर्णसंस्राव इति प्रकीर्त्तितः" ॥
इति माधवकरः ॥

कर्णस्फोटा, स्त्री, (कर्णस्य स्फोटेव स्फोटा विदारणं यस्याः ।) लताविशेषः । काणफाटा इति भाषा । तत्पर्य्यायः । अतिस्फोटा २ त्रिपुटा ३ क्षणात ४ गुहा ५ चित्रपर्णी ६ कोपलता ७ चन्द्रिका ८ अर्द्धचन्द्रिका ९ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । हिमत्वम् । सर्व्वविषग्रहभूतादिदोषसर्व्वव्याधिनाशित्वञ्च । इति राजनिर्घण्टः ॥

कर्णाटः, पुं, (कर्णेषु अटति प्रभूतयशस्त्विन एतद्देशस्यराज्ञो गुणादिकीर्त्तनेन सर्व्वेषां कर्णेषु

भ्रमतीति। कर्ण + अट + अच्। शकन्ध्वादिवत्-साधुः।) खनामख्यातदेशविशेषः। इति शब्द-रत्नावली। यथा कर्णाटवर्णने राजपुत्तिः।

"अर्व्वन्तो यदि गद्यपद्यनिपुणा खेतचमत्कुर्व्वते तेषां मूर्द्धिददानि वामचरणं कर्णाटराजप्रिया"॥

अयं देशः कूर्म्मविभागे दक्षिणस्यां दिशि वर्त्तते॥)

कर्णाटी, स्त्री, (कर्णाट + स्त्रियां ङीष्। पारिभाषिको ऽयं शब्दः।) रागिणीविशेषः। इति हनुमुधः॥ सा तु मालवरागस्य पत्नी। इति सङ्गीतदामोदरः॥ हंसपरीहृद्यः। इति राजनिर्घण्टः॥

कर्णानुजः, पुं, (कर्णस्यानुजः कर्णमनुजातवानित्यर्थः। अनु + जन् + ड।) युधिष्ठिरराजः। इति त्रिकाण्डशेषः॥

कर्णान्दुः, स्त्री, (कर्णस्य आन्दुरिव।) कर्णपाली। कानतड़का इति भाषा। उत्क्षिप्तिका। इति हेमचन्द्रः। कानकड़ा इति ख्याता॥

कर्णान्दूः, स्त्री, कर्णान्दुः। कर्णपाली। इति हारावली॥

कर्णाभरणकः, पुं, (कर्णस्य आभरणमिव पुष्पैः कायति प्रकाशते। के + कः।) आरग्वधवृक्षः। इति राजनिर्घण्टः॥

कर्णारा, स्त्री, (अर्य्यते विध्यतेऽनया। कर्ण + ऋ + करणे घञ् टाप् च। धातूनामनेकार्थत्वात् ऋधातोरत्र वेधनार्थः।) कर्णवेधनी। इति त्रिकाण्डशेषः॥

कर्णारिः पुं, (कर्णस्य अरिः शत्रुः।) अर्জ্জুनः। इति पुरुषम्॥ नदीसर्जवृक्षः। इति राजनिर्घण्टः। खाजन् इति भाषा॥

कर्णाक्षालः, पुं, (कर्णयोराक्षालः आक्षालनम्।) भ्रमजलाला। इक्षिकर्णाक्षालनम्। इति त्रिकाण्डशेषः॥

कर्णिका, स्त्री, (कर्ण + इकन् + टाप् च। यद्वा कर्ण + खुल्। ततष्टाप् अत इत्वम्।) कर्णाभरण-विशेषः। कानतड़का इति भाषा। तत्पर्य्यायः। तालपत्रम् २। इत्यमरः। २। ६। १०३॥ ताड़ङ्कः ३ दन्तपत्रम् ४। इति भरतः॥ करि-हस्ताकृतिः। करिणः शुण्डाग्रवर्त्तिशुण्डाकृतिः। पद्मबीजकोषी। इत्यमरः। ३। ३। १५॥ (यथा भागवते। ३। ८। १६।

"तस्यां सचाम्भोरुहकर्णिकाया-मवस्थितो लोकमपश्यमानः"॥)

करमध्याङ्गुलिः। क्रमुकादिच्छटाङ्गः। इति मेदिनी। वोंटा इति भाषा॥ लेखनी। इति हारावली॥ अग्निमन्थवृक्षः। अजशृङ्गीवृक्षः। इति राजनिर्घण्टः॥ (अस्रोभेदः। यथा, महाभारते १। १२३। ६१।

"मेनका सहजन्या च कर्णिका पुञ्जिकस्थला"॥

सेवती। गोलाबफुल इति भाषा।

"शतपत्री तरणुका कर्णिका चारुकेशरा। महाकुमारी गन्धाढ्या लक्षपुष्पातिमञ्जुला"॥

अस्या गुणा यथा,—

"शतपत्री हिमा हृद्या याहिनी शुक्रला लघुः। दोषत्रयास्रजिद्वर्ण्या तिक्ता कटी च याचनी"॥

इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥

योनिरोगविशेषः। यथा,

"अकाले वाह्यमानाया गर्भेण पिडितोऽनिलः। कर्णिकाञ्जनयेद्योनौ श्लेष्मरक्तेन मूर्च्छितः"॥

इति चरके चिकित्सास्थाने। ३० अध्याये॥)

कर्णिकाचलः, पुं, (कर्णिकायां स्थितः अचलः।) सु-मेरुपर्व्वतः। इति हेमचन्द्रः॥ (अस्य विवरणं यथा भागवते। ५। १६। ७। "यस्य नाभ्यामव-स्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्दीपा-यामसमुन्नाहः कर्णिकाभूतः कुबलयकमलस्य"॥)

कर्णिकारः, पुं, (कर्णिं भेदनं करोतीति। कर्णि + कृ + कर्म्मण्यण्। उदरमलभेदकतत्वात् अस्य तथात्वम्।) वृक्षविशेषः। कणियार इति भाषा॥ (यथा, महाभारते। १। सम्भवे। १२५। २।

"कर्णिकारैरशोकैश्च केशरैरतिमुक्तकैः"॥)

तत्पर्य्यायः। द्रुमोत्तमः २ परिव्याधः ३। इत्यमरः। २। ४। ६०॥ दृढ़त्वक्सः ४। इति रत्नमाला॥ (यथा, महाभारते ३। २४। १७।

"तत्शालतालाम्रमधूकबीप-कदम्बसर्ज्जार्জ্জुनकर्णिकारैः।
तमालये पुष्पधरैरुपेतं
महावनं राष्ट्रपतिर्ददर्श"॥

कर्णिकारस्य पुष्पम्। "अवयवे च प्राण्योषधि वृक्षेभ्यः"। ४। ३। १३५। इति उत्पन्नस्य तद्धि-तस्य "पुष्पमूलेषु बहुलम्"। इति लुक्। तथा कुमारसम्भवे। ३। २८। "वर्षाप्रकर्षे सति कर्णिकारम्"॥ कर्णिकारस्य कुसुममित्यर्थः।॥)

आरग्वधविशेषः। छोट सोनालु इति भाषा। तत्पर्य्यायः। राजतरुः २ प्रघ्राहः ३ शतमालकः ४ सुफलः ५ चक्रः ६ परिव्याधः ७ व्याधिरिपुः ८ पिच्छबीजकः ९ लम्बारग्वधः १०। अस्य गुणाः। सारकत्वम्। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। कफशूलोदरकृमिमेहनाशित्वम्। वातगुल्मनिवा रकत्वञ्च। इति राजनिर्घण्टः॥

कर्णिकी, [न्] पुं, (कर्णिका हस्तिशुण्डाग्रभूषा अस्त्यस्य इनिः।) हस्ती। इति जटाधरः॥

कर्णी, [न्] पुं, (कर्णौ पक्षौ स्तः अस्य। पुरा किल पर्व्वतानां पक्षाः सन्ति इति पौराणिकी गाथा। "तुन्दादिभ्य इलच्च"। ५। २। ११७। इति अकारा-दिनिः।) वर्षपर्व्वतसप्तकान्तर्गतपर्व्वतविशेषः। यथा। "हिमवान् हेमकूटश्च निषधो मेरुरेव च। चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्व्वताः"॥ इति हारावली॥ वाद्यविशेषः। यथा।

"करोति कर्णिनो यत्तु यत्तु खड्गादिहन्नरः। प्रयान्ति ते विशसने नरके भृशदारुणे"॥

इति विष्णुपुराणे २। ६। १६॥ कर्णिनो वाद्य-विशेषान्। इति तट्टीका॥

कर्णीरथः, पुं, (कर्णसाधा अवयवक्रिया उपचारात् कर्णः। कर्णोऽस्यास्ति इनिः। कर्णी चासौ रथ-श्चेति शब्दमात्रेण रथो न वस्तुतः। यद्वा साभी प्यात् कर्णशब्देनस्कन्धो लक्ष्यते। सोऽस्यास्य वाह-त्वेन इनिः। कर्णी चासौ रथश्च। अन्येषामपीति दीर्घः।) क्रोडार्थनिर्म्मितक्षुद्ररथः। पुरुषस्कन्ध-नीयमानरथः। इति भगीरथः॥ स्त्रीवहनार्थमुप-रि वस्त्राच्छादितरथविशेषः। इति मञ्जरी॥ चतुर्दोल इति ख्यात इति पिटरथाः॥ इति सारसुन्दरी॥ स्त्रीरत्नवहनार्थमुपरिवस्त्राच्छादि-तमनुष्यवाह्ययानविशेषः। इति भरतः॥ तत्प-र्य्यायः। प्रवहणम् २ वहनम् ३। इत्यमरः। २। ८। ५२॥ प्रहरणम् ४ डयनम् ५। इति तट्टीका॥

कर्णीसुतः, पुं, (कर्णस्य सुतः।) मूलदेवः। इति त्रिकाण्डशेषः॥ (यथा हारावली ३२।

"कर्णीसुतो मूलदेवो मूलभद्रः कलाकुरः"॥

तथा च कादम्बरीटीकायाम्।

"कर्णीसुतः करटकः लेषशास्त्रप्रवर्त्तकः॥)

कर्णेजपः, त्रि, (कर्णे जपति यः। जपादित्वात् खश्च-कर्णयोरित्वच् हलदन्तात्सप्तम्यलुक्।) अप्रकाशे-नानुचितप्रबोधकः। कर्णेजपित्वा परापकारं वदति यो जनः। ठक् इति ख्यातः। तत्पर्य्यायः। सूचकः २ पिशुनः ३ दुर्जनः ४ खलः ५। इत्यमरः। ३। १। ३७॥ कर्णेजपादिद्वयं परापकारवादिनि। पिशुना-दित्रयं परस्परभेदनशीले॥ कर्णेजपादिपञ्चकं सूचके इति केचित्। त्रयमिति मेदिनी। इति भरतः॥

कर्णेन्दुः पुं, (कर्णयोः कर्णे वा इन्दुरिव।) कर्णान्दुः। अर्द्धचन्द्राकृतिकर्णभूषणम्। इति शब्दरत्नावली॥

कर्त्त, तृ क श्रैथिल्ये। इति कविकल्पद्रुमः॥ (अदन्तपुरां-परं-अकं-सेट्।) रेफस्याधस्कारः कर्त्तयति कर्त्तापयति धूर्ज्जिर्व्वेग। इति दुर्गा-दासः॥

कर्त्तः, पुं, (कर्त्त + भावे + अप्।) भेदः। यथा।

"सध्र्यङ् नियम्य यतयो यमकर्त्तहेतिं जह्युः खराड़िव निपानखनित्रमिन्द्रः"॥

इति श्रीभागवते २। ७। ३८॥ "कर्त्तो भेदः तन्नि-रासो ऽकर्त्तः तत्र हेतिं साधनं जह्युः"। इति तट्टीकायां श्रीधरस्वामी। (कर्त्तयति श्रिथिलीक-रोति भिनत्ति वा। कर्त्त + अच्। भेदके, त्रि॥)

कर्त्तनं, क्ली, (कृत् + भावे + ल्युट्।) छेदनम्। नारीणां सूचनिर्म्मितिः। इति मेदिनी। काट्না काटा। इति भाषा॥

कर्त्तरी, स्त्री, (कृन्ततीति। कृति छेदने + बाहुलका-दरप्रत्ययः ततो ङीष्। यद्वा कृत् + वन्। कर्त्तं रातीति। "आतोनुपेति"। ३। २। ३। कः। गौरादित्वात् ङीष्।) कपाली। इत्यमरः। २। १०। ३४॥ पत्रीकृतस्वर्णादेः कर्त्तनास्त्रम्। काति इति ख्यातिः॥ केशकर्त्तनिका। इति भरतः। काँचि इति भाषा। काटारी इति ख्याता च॥ (योगविशेषः। यथा, ज्योतिषशास्त्रे।

"क्रूरमध्यगतश्चन्द्रो लग्नं वा क्रूरमध्यगम्। कर्त्तरी नाम योगोऽयं कन्या निधनकारकः"॥)

कर्त्तव्यं, क्ली, (कृ + तव्य।) करणीयम्। करणयोग्यम्। कार्य्यम्। इति व्याकरणम्॥

कर्त्तव्यः, त्रि, (कर्त्तुं योग्यं कर्त्तुं उचितं वा। वेदा

अवश्यं करणीयं यत् तत् कर्त्तव्यमिति स्मृतम्। (कृ+योग्यार्थे तव्यः।) करणयोग्यः। यथा, हितोपदेशे॥
"हीनसेवा न कर्त्तव्या कर्त्तव्यो महदाश्रयः।
अजा सिंहप्रसादेन वने चरति निर्भयम्"॥

कर्त्ता, [ऋ] त्रि, (करोति क्रिया निष्पादयतीति वा। करोति यः कर्म्मेति शेषः। कृ+कर्त्तरि तृच्।) कारकः। इति मेदिनी॥ षट्कारकान्तर्गतकारकविशेषः। वोपदेवेनास्य घसंज्ञा कृता। अत्र उक्तार्थे प्रथमा अनुक्तार्थे तृतीया विभक्तिर्भवति॥ तस्य लक्षणम्। "क्रियानुकूलकृतिमत्त्वम्"। इति सारमञ्जरी॥ "यः करोति सः"। इति सर्व्ववर्म्मा॥ "कृत्याश्रयः"। इति तार्किकाः॥ "चेतनान्तरव्यापाराव्यवधानेन धात्वर्थनिष्पादकचेतनः कर्म्मकरणादिकारकचक्रप्रयोक्ता वा"। इति प्रायश्चित्तविवेकः॥ "क्रियामुख्यप्रयोजको कर्त्ता"। इति क्रमदीश्वरः॥ स तु पञ्चविधः। क्रियामुख्यः १ हेतुकर्त्ता २ प्रयोजकः ३ अनुमन्ता ४ ग्रहीता ५। तथा च।
"क्रियामुख्यो भवेत् कर्त्ता हेतुकर्त्ता प्रयोजकः।
अनुमन्ता ग्रहीता च कर्त्ता पञ्चविधः स्मृतः"।
इति गोयीचन्द्रटीकाकृद्दोषाजचक्रवर्त्ती॥ स च त्रिविधः। सात्त्विकः १ राजसः २ तामसः ३।
सात्त्विको यथा,—
"मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते"॥
राजसो यथा,—
"रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः"॥
तामसो यथा,—
"अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते"॥
इति श्रीभगवद्गीता। १८। २६-२८॥

कर्त्ता, [ऋ] पुं, (करोति सृजति चतुर्दशभुवनानि यः सर्व्वलोकसृष्टेति यावत्। कृ+तृच्।) परमेष्ठी। ब्रह्मा। इति मेदिनी॥ क्रियानुकूलकृतिमान्। स च त्रिविधः। यथा,—
"त्रिधैव जायते कर्त्ता विशेषेण प्रतिक्रियाम्।
योग्यत्वप्रतिपिपादयिषाविशेषपदान्वयैः"॥
अस्यार्थः। क्रियां प्रति प्रकारत्रयेण कर्त्ता विज्ञायते तस्य विवरणम्। स्वाध्यायोऽध्येतव्य इत्यत्र योग्यत्वेन लब्धविधिस्त्रैवर्णिकः॥१॥ अहरहर्दद्यात् दीक्षितो न ददातीत्यत्र प्रतिषिद्धत्वेन दीक्षितेतरपरः॥२॥ स्वर्गकामो यजेतेत्यत्र विशेषपदान्वयेन स्वर्गकामः कर्त्ता ज्ञायते॥३॥*॥
नित्ये नित्यधे च यद्यत् साधनं तदभावस्तदभावसाधनं इत्यनुभवसिद्धा नित्याकरणं निषिद्धाचरणञ्च प्रत्यवायसाधनं शास्त्रावगतं अतस्तदभावो नित्याचरणं निषिद्धाकरणञ्च प्रत्यवायाभावसाधनमिति प्रत्यवायपरिहारार्थी नियोज्योऽन्वेति तद्बोधकविशेषपदाध्याहारादिति गोथं ततस्त्रेयं विधिवाक्यशब्दधीः। यथा, काम्ये स्वर्गकामो यजेतेत्यत्र स्वर्गकामस्य कर्त्तुर्यागविषयकं कार्य्यम्। नित्ये अहरहः सन्ध्यामुपासीत इत्यत्र प्रत्यवायपरिहारार्थिनः कर्त्तुः प्रत्यहं सन्ध्यावन्दनविषयकं। कार्य्यम्। न कलञ्जं भक्षयेदित्यत्रापि प्रत्यवायपरिहारार्थिनः कर्त्तुः कलञ्जभक्षणाभावविषयकं कार्य्यमित्येवं रूपा। इति धर्म्मदीपिका॥
(महादेवः। यथा, महाभारते। १३। १७। ६४।
"संग्रहो निग्रहः कर्त्ता सर्गश्चौरनिवासनः"॥
विश्वसृष्टब्रह्मणोऽपि कर्त्तृत्वात् आदिकर्त्ता विष्णुः॥
यथा महाभारते १३। १४९। ४७।
"क्रोधहा क्रोधकृत् कर्त्ता विश्वबाहुर्महीधरः"॥)

कर्त्तृका, स्त्री, (कृन्तति छिनत्तीति। कृत्+तृच्। स्वार्थे कन् टाप् च।) क्षुद्रखड्गः। यथा,—
"हास्ययुक्तां चिनेत्राञ्च कपालकर्त्तृकाकराम्"॥
इति तन्त्रसारे श्यामाध्यानम्॥

कर्त्तृत्वं, क्ली, (कर्त्तुर्भावः। कर्त्तृ+भावे त्वम्।) कर्त्तृधर्म्मः। यथा, श्रीभगवद्गीतायां। ५। १३॥
"न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः"॥

कर्त्र, तृ क शैथिल्ये। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-अकं-सेट्।) रेफहययुक्तकारः। कर्त्रयति कर्त्राययति धूलिर्जलेन। इति दुर्गादासः॥

कर्त्री, स्त्री, (करोति या कर्म्माणीति शैषिकः। कृ+तृच्+ङीप् च।) कर्त्तरी। इति शब्दरत्नावली॥ कारिका। इति मुग्धबोधव्याकरणम्॥

कर्द, कुत्सितरवे। इति कविकल्पद्रुमः। (भां-परं-अकं-सेट्।) उदरशब्दे। इति रमानाथः॥ एकोऽर्थः। कर्दति काकः। रमानाथस्तु कौत्तेः कर्दतीति भट्टमल्लदर्शनादुदरसम्बन्धिशब्द एव अस्य प्रयोग इति मन्वानः कर्दति गिरतीति यदुदाजहार तज्ज्ञेयम्। यत्तन्मते कर्दत्युदरमित्येव स्यात्। इति दुर्गादासः॥

कर्दः, पुं, (कर्द+अच्।) कर्दमः। इति शब्दरत्नावली॥ कादा इति भाषा॥

कर्दटः, पुं, (कर्दं कर्दमं अटति कारयत्वेन प्राप्नोतीति। कर्द+अट्+अच्। प्रकन्ध्वादित्वात् अलोपे साधुः।) करहाटः। पङ्कः। पङ्कारः। इति मेदिनी॥

कर्दनं, क्ली, (कर्दते इति। कर्द+भावे ल्युट्।) उदरशब्दः। इति हेमचन्द्रः। पेटेर डाक इति भाषा॥

कर्दमं, क्ली, (कर्द+"कलिकर्द्दोरमः"। उणां। ४। ८४ इति अमः।) मांसम्। इति शब्दचन्द्रिका॥

कर्दमः, पुं, (कर्द कुत्सितरवे+"कलिकर्द्दोरमः"। उणां ४। ८४ इति अमः।) कर्दः। कादा इति भाषा। तत्पर्य्यायः। निषदरः २ जम्बालः ३ पङ्कः ४ शादः ५। इत्यमरः। १। १०। ६॥ (तथाहि याज्ञवल्क्यः। १। १६७।
"रथ्याकर्दमतोयानि स्पृष्ठान्यन्यश्वपायसैः।
मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि च"॥)
अस्य गुणाः। शीतलत्वम्। रूक्षत्वम्। विषरोगवेदनादाहशोथनाशित्वम्। व्रणशोधनरोपणत्वञ्च। इति राजवल्लभः॥
("कर्दमो दाहपित्तास्रशोथघ्नः शीतलः सरः"। इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥) स्वायम्भुवमन्वन्तरे प्रजापतिविशेषः। स तु ब्रह्मणश्छायायां जातः। तस्य भार्य्या स्वायम्भुवमनुकन्या देवहूतिः। पुत्रः कपिलदेवः कन्याः कलाद्या नव। इति श्रीभागवतम्। ३। १२। २७॥ पापम्। इत्युणादिकोषः। ४। ८४॥ छाया। यथा,—
"त्रेतेषु कर्दमः शब्दश्छायायां वर्त्तते स्मृतम्।
बभूव कर्दमाद्भालः कर्दमस्तेन कीर्त्तितः"॥
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २२ अध्यायः॥ (नागविशेषः। यथा महाभारते १। ३५। १६।
"कर्दमश्च महानागो नागश्च बहुमूलकः"॥)

कर्दमाटकः, पुं, (कर्दमो मलादिः अत्यते निक्षिप्यते यत्र। कर्दम+अट्+अधिकरणे घञ्। ततः कप्। यद्वा कर्दमस्य मलादेः आटो निक्षेपोऽत्र। कर्दमे इव आटोगतिरत्रेति केचित्। ततः कप्।) विष्ठादिनिक्षेपस्थानम्। इति शब्दरत्नावली॥

कर्दमी, स्त्री, मुद्गरवृक्षः। इति वैद्यकम्॥

कर्पटः, पुं, (कीर्य्यते क्षिप्यते इति। कृ+कर्म्मणि विच्। कर् चासौ पटश्च इति कर्म्मधारयः। यद्वा करस्य पटः। प्रकन्ध्वादित्वात् अलोपे साधुः।) मलिनत्वादिदुष्टजीर्णवस्त्रखण्डम्। नेकड़ा इति ख्याता। (यथा कथासरित्सागरे ४। ६१।
"चीरखण्डैककर्पटः"॥) तत्पर्य्यायः। लक्षकः २। इत्यमरः। ३। ५। ३३॥ नक्षकः ३। इति भरतः॥ पर्व्वतविशेषः। यथा, कालिकापुराणे ८१ अध्यायः॥
"नीलशैलस्य पूर्व्वस्मिन् स्वरूपं प्रतिपादितम्।
नाभिमण्डलपूर्व्वस्यां भस्मकूटस्य दक्षिणे॥
पूर्व्वस्यां कर्पटो नाम पर्व्वतो यमरूपधृक्।
तत्र याम्यशिला कृष्णा नीलाञ्जनसमप्रभा॥
अधित्यकायां राजेन्द्र यामपञ्चसु विस्तृता।
पूजयेत्तत्र शमनं याम्यो दण्डं सदैव यः॥
धत्ते तु प्राणिनां नित्यं प्राणदण्डस्य साधनम्।
कृष्णवर्णान्तु दिभुजं किरीटमुकुटोज्ज्वलम्॥
दधतञ्चासिपुत्रीञ्च वामपार्श्वे सदैव हि।
कृष्णवस्त्रं स्थूलपदं वह्निनिःसृतदन्तकम्॥
वराभयकरं नित्यं नृणां महिषवाहनम्।
पूजयेत् परया भक्त्या याम्यबीजेन साधकः॥
उपान्त्यवर्गस्यादिर्यो वर्णो विन्दुसंयुतः।
यमबीजमिति ख्यातं यमस्य प्रीतिकारकम्॥
अनेनैव तु मन्त्रेण शमनं यस्तु पूजयेत्।
कर्पटाख्येऽचलवरे नापमृत्युं समाप्नुयात्"॥

कर्पटधारी, [न्] त्रि, (कर्पटं धरति धारयति शीलमस्य वा। कर्पट+धृ+णिनिः।) मलिनजीर्णवस्त्रखण्डधारी। भिक्षुकः। इति शब्दरत्नावली॥

कर्पटिकः, त्रि, (कर्पटोऽस्त्यस्य। कर्पट+अस्त्यर्थे ठन्।) कर्पटधारी। इति शब्दरत्नावली॥

कर्पटी, [न्] त्रि, (कर्पटोऽस्त्यस्य। कर्पट+इनिः।) भिक्षुकः। कर्पटधारी। इति शब्दरत्नावली॥

कर्परः, पुं, (कृप्+बाहुलकात् अरन्। लत्वाभावश्च।) कपालः। इत्यमरः। २। ६। ६८॥ मातार खुलि इति भाषा। शस्त्रभेदः। कटाहः। इति मेदिनी॥ उड़म्बरः। इति शब्दचन्द्रिका॥

कर्पूर

कर्परांशः, पुं, (कर्परस्य अंशः।) शर्करा। इति शब्दरत्नावली। खोलाकुचि इति भाषा॥

कर्पराजः, पुं, (कर्पर इवालति पर्य्याप्नोति। कर्पर + अल् + अच्। कर्परं अलति इति केचित्। अल् + कर्म्मण्यण्।) कन्दराजः। पर्व्वतजातपीलुवृक्षः। इत्यमरटीकायां रमानाथः। आखरोट् इति भाषा॥

कर्परिकातुल्य, स्त्री, (कर्पर्येव इति स्वार्थे कन् तत स्त्रीत्वम् अत इत्वं कर्परिकैव तुल्यम्।) तुल्यविशेषः। कर्परी। इति हेमचन्द्रः॥

कर्परी, स्त्री, (क्षुप् + बाहुलकादरट्। लत्वाभावश्च। टित्त्वात् ङीप्। केचित्तु क्षुपधातोरदन् प्रत्ययेन निष्पादितोऽयं तन्मते गौरादित्वात् ङीष्।) कार्पासवृक्षतुल्यम्। दारुहरिद्रा कार्पासतुल्या इति भाषा। तत्पर्य्यायः। दार्व्विका २। इत्यमरः। २। ९। १०१॥ तुल्याङ्गनम्। इति तट्टीकायां स्वामी॥

कर्पासः, पुं स्त्री, ("क्षुञः पासः"। उणां ५। ४५ इति क्षुधातोः पासः।) कार्पासः। इत्यमरटीका। कापास् इति भाषा॥

कर्पासी, स्त्री, (कर्पास इति जातित्वात् गौरादित्वात् वा ङीष्।) कार्पासी। इति भरतः॥ कापासगाछ इति भाषा॥

कर्पूरः, पुं, क्ली, (क्षुप् + "खर्जूरादित्वात्" उणां ४। ९०। इति ऊरः।) खनामख्यातसुगन्धिद्रव्यम्। काफुर इति पारस्य भाषा। कपूर् इति हिन्दी भाषा। (यथा,—राजेन्द्रकर्णपूरे ३३।

"कर्पूरैरिव पारदैरिव सुधास्यन्दैरिवाप्लाविते जाते हन्त! दिवापि देव! ककुभां गर्भे भवत्कीर्त्तिभिः"॥) तत्पर्य्यायः। घनसारः २ चन्द्रसंज्ञः ३ सिताभः ४ हिमवालुका ५। इत्यमरः २। ६। १३०॥ सिताभः ६। इति तट्टीका॥ घनसारकः ७ सितकरः ८ शीतः ९ शशाङ्कः १० शिला ११ शीतांशुः १२ हिमवालुकः १३ हिमकरः १४ शीतप्रभः १५ शशभवः १६ शुभांशुः १७ स्फटिकाभः १८ कारमिहिका १९ ताराभः २० चन्द्रार्द्धकः २१ चन्द्रः २२ लोकतुषारः २३ गौरः २४ कुमुदः २५ हनुः २६ हिमाङ्गयः २७ चन्द्रभस्म २८ वेधकः २९ रेणुसारकः ३०। इति शब्दरत्नावली॥ अस्य गुणाः शिशिरत्वम्। तिक्तत्वम्। कटुत्वम्। श्लेष्मरक्तपित्तव्रण्याविदाहकण्ठस्यदोषाण्यारोगनाशित्वञ्च॥

"कर्पूरो नूतनस्तिक्तः स्निग्धश्चोष्णाखदाहदः। चिरस्थो दाहघ्नोषघ्नः स धौतः शुभकृत्परः"॥ इति राजनिर्घण्टः॥

अपि च। पाके शीतलत्वम्। पक्वदूषितकारित्वम्। पक्वकर्पूरादपक्वस्याधिकगुणत्वञ्च। इति राजवल्लभः॥ तद्भेदा यथा। पोतासः १ भीमसेनः २ सितकरः ३ शशिवासासंज्ञः ४ पांशुः ५ पिङ्गः ६ अब्दसारः ७ हिमवालुकः ८ जूतिका ९ तुषारः १० हिमः ११ शीतलः १२ पचिकाख्यः १३। इति राजनिर्घण्टः॥

कर्ब्बुदा

(तत्रादौ कर्पूरस्य नामगुणाश्च।

"कर्पूरः शीतलो दृश्यश्चक्षुष्यो लेखनो लघुः। सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः। दाहहृद्व्रास्यवैरस्यमेदो दौर्गन्ध्यनाशनः॥ कर्पूरोद्विविधः प्रोक्तः पक्वापक्वप्रभेदतः। पक्वात् कर्पूरतः प्राङ्गरपक्वं गुणवत्तरम्"॥ अथ चीनाककर्पूरः। चीनेकर्पूर इति भाषा। "चीनाकसंज्ञः कर्पूरः कफहृद्यकरः स्मृतः। कुष्ठकण्डूविषहरस्तथा तिक्तरसश्च सः"॥ इति भावप्रकाशस्य पूर्व्वखण्डे १ म भागे॥ "सतिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः। व्रण्यायां मुखशोषे च वैरस्ये चापि पूजितः"॥ इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

कर्पूरकः, पुं, (कर्पूर इव कायति प्रकाशते शोभते वा। कर्पूर + कै + कः।) कर्ब्बुरकः। कर्पूरकः। इति शब्दचन्द्रिका॥

कर्पूरतिलकः, पुं, (कर्पूर इव शुक्लं तिलकं ललाट् चिह्नं यस्य। खनामख्यातो हस्ती। यथा-हितोपदेशे १। ३४६।

"अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती"॥) स्त्री, उमासखिभेदः। जया। इति शब्दमाला॥

कर्पूरतैलं, क्ली, (कर्पूराज्जातं तैलं स्नेहः। कर्पूरस्य तैलमिव स्नेहो वा।) कर्पूरस्नेहः। तत्पर्य्यायः। हिमतैलम् २ सुधांशुतैलम् ३ शीतांशुतैलम् ४ तुहिनांशुतैलम् ५ सितांशुतैलम् ६। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातामयनाशित्वम्। दन्तदार्ढ्यपित्तकारित्वञ्च। इति राजनिर्घण्टः॥

कर्पूरनालिका, स्त्री, मद्यान्नविशेषः। कर्पूरनारि इति नेओयाला इति च ख्याता। यथा भावप्रकाशः।

"घृताढ्यया समितया क्षौद्रया सम्पुटं ततः। लवङ्गोषणकर्पूरयुतया सितयान्वितम्। पचेदाज्येन सिद्धेषा ज्ञेया कर्पूरनालिका। संयावसदृशी ज्ञेया गुणैः कर्पूरनालिका"॥

कर्पूरमणिः, पुं, (कर्पूरवर्णो मणिः।) पाषाणभेदः। "कर्पूरमणिनामायं युक्तया वातादिदोषनुत्"॥ इति राजनिर्घण्टः॥

कर्परः, पुं, (कीर्य्यते क्षिप्यते इति। कॄ + विच्। कर्। पल्यते इति पलः प्रतिबिम्बः। पल + कः। लस्य रः। कीर्य्यमाणः पलः प्रतिबिम्बः यत्र। दर्पणे हि मुखादीनां प्रतिबिम्बपतनात् तथा बोध्यते।) दर्पणः। इति जटाधरः॥

कर्ब्ब गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) रेफोपधः। कर्ब्बति। इति दुर्गादासः॥

कर्ब्बुदारः, पुं, (कर्ब्बुरिव कर्ब्बुः सन् वा श्लेष्माणं मलं वा दारयतीति। कर्ब्बु + दॄ + णिच् + अच्।) कोविदारवृक्षः। इति शब्दमाला॥ श्वेतकाञ्चनः। अस्य गुणौ। ग्राहित्वम्। रक्तपित्तरोगे विशेषेण पथ्यत्वञ्च। इति राजवल्लभः॥ ("पथ्यस्य कोविदारस्य कर्ब्बुदारस्य शाल्मलेः। पुष्पं ग्राहि प्रशस्तस्य रक्तपित्ते विशेषतः"॥ इति चरके सूत्रस्थाने। २७ अध्याये॥) नीलझिण्टी। इति शब्दचन्द्रिका॥

कर्म्म

कर्ब्बुदारकः, पुं, (कर्ब्बुदारवत् कायति। कै + कः। यद्वा कर्ब्बुः सन् कर्ब्बुरिव वा श्लेष्माणं कफं दारयति। दॄ + णिच् + ण्वुल्।) श्लेष्मान्तकवृक्षः। इति राजनिर्घण्टः॥

कर्ब्बुरं, क्ली, (कर्ब्बति गर्ब्बत्यस्मात् यस्मिन् सति वा गर्ब्बो भवति कर्ब्बयत्यनेन वा। कर्ब्ब दर्पे इति "मद्गुरादयश्च" उणां १। ४२। इति उरच्।) स्वर्णम्। धुस्तूरवृक्षः। इत्यमरः। २। ९। ९४॥ जलम्। इति मेदिनी॥

कर्ब्बुरः, पुं, (कर्ब्बति हिनस्ति जीवम्। कर्ब्ब हिंसायां + "मद्गुरादयश्च"। उणां। १। ४२। इति उरच्।) राक्षसः। ("कर्ब्बुरः श्वेतरक्षसोः" उणाम्। १। ४२। कर्ब्बति नानावर्णान् गच्छति। कर्ब्ब गतौ + उरच्। उणां १। ४२।) नानावर्णः। तत्पर्य्यायः। चित्रम् २ किर्म्मीरः ३ कल्माषः ४ शबलः ५ एतः ६॥ (यथा कुमारे। ४। २७।

"इति चैनमुवाच दुःखिता सुहृदः पश्य वसन्त! किं स्थितम्। तदिदं कथमग्नौ विकीर्य्यते पवनैर्भस्म कपोतकर्ब्बुरम्"॥)

तद्यति चि। इत्यमरः। १। ६। १७॥ शटी। इत्यमरटीका॥ पापम्। इति मेदिनी॥ नदीनिष्पावधान्यम्। इति राजनिर्घण्टः॥

कर्ब्बुरपत्रः, पुं, (कर्ब्बुरं चित्रवर्णं पत्रं यस्य।) साकुवृक्षवृक्षः। इति राजनिर्घण्टः॥

कर्ब्बुरा, स्त्री, (कर्ब्बुर + टाप्।) क्षुद्रवृन्ताकवृक्षः। इति मेदिनी। पारल इति भाषा॥ बर्ब्बरा। इति जटाधरः॥ वावुइ तुलसी इति भाषा॥ (अजौकोजातिविशेषः।

"वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्ब्बुरा"॥ इति सुश्रुते। १३ अध्याये॥)

कर्ब्बुरी, स्त्री, (कर्ब्बुर + गौरादित्वात् ङीष्।) दुर्गा। इति चिकाण्डशेषः॥

कर्ब्बूरं, क्ली, (कर्ब्बति गर्ब्बं प्राप्नोति यस्मात् कर्ब्ब दर्पे गतौ वा खर्ज्जूरादित्वात् ऊरः। उणां ४। ९०। एषोदरादौ दीर्घो वा।) स्वर्णम्। इति मेदिनी॥ हरितालम्। इति चिकाण्डशेषः॥

कर्ब्बूरः, पुं, (कर्ब्बति गर्ब्बति हिनस्ति वा। कर्ब्ब + ऊरः।) शटी। इत्यमरः। २। ९। ९४॥ राक्षसः। इत्युणादिकोषः॥ द्राविड़कः। इति शब्दरत्नावली। काँचहल्दि इति भाषा॥

कर्ब्बूरकः, पुं, (कर्ब्बूर + स्वार्थे कन्।) हरिद्राभवृक्षः। काँचहल्दि इति ख्यातः। इति भरतः॥ काललहरिद्रा। इति सारसुन्दरी॥ कर्पूरहरिद्रा। इति सारमञ्जरी॥ काकवसन्तः। इति भगीरथः॥ काञ्चिला हरिद्रेति ख्याता। इति टीकासर्ब्बस्वम्॥ हरिद्राभकचोरा इति ख्याता। इति मधुमाधवी॥ तत्पर्य्यायः। द्राविड़कः २ काल्यकः ३ वेधमुख्यकः ४। इत्यमरः। २। ४। १९५॥ काल्यकः ५। इति टीका सर्ब्बस्वम्॥

कर्म्म, [न्] क्ली, (यत्क्रियते तत्। कृ + मनिन्। कर्तुः क्रियया यदाप्यते तदा क्रियाशाप्यं कर्म्मेति

केचित्। तत्तु मतभेदेन त्रिधा चतुर्धेति विभक्तमुच्यते।) यट्कारकान्तर्गतकारकविशेषः। वोपदेवेनास्य ढ इति संज्ञा कृता। अत्र द्वितीया विभक्तिर्भवति। तस्मिन् उक्ते प्रथमा। तस्य लक्षणम्। "परसमवेतधात्वर्थजन्यफलशालित्वं कर्म्मत्वम्"। इति सारमञ्जरी॥ "यत्क्रियते तत्"। इति प्रतिज्ञम्। करोतेर्निखिलक्रियावाचकत्वात् कर्त्तुर्व्यापारैर्यत् साध्यते तदित्यर्थः। अतएव "क्रियाव्याप्यं कर्म्म"। इति क्रमदीश्वरः। तच्चतुर्व्विधम् निर्व्वर्त्यम् १ यथा घटं करोति पुत्रं प्रसूते। विकार्य्यम् २ तच्च द्विविधम्। प्रकृतेरुच्छेदकं प्रकृतेर्गुणान्तराधायकञ्च। आद्यं यथा काष्ठं भस्म करोति। अन्यं यथा सुवर्णं कुण्डलं करोति। यथा चोक्तं भर्त्तृहरिणा।

"यदसञ्जायते पूर्व्वं जन्मना यत् प्रकाश्यते।
तन्निर्व्वर्त्यं विकार्य्यञ्च कर्म्म द्वेधा व्यवस्थितम्॥
प्रकृत्युच्छेदसम्भूतं विकार्य्यं काष्ठभस्मवत्।
अन्यद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्"॥

प्राप्यम् ३ यथा ग्रामं गच्छति चन्द्रं पश्यतीत्यादि॥ अनीप्सितञ्च ४ यथा पापं त्यजति इत्यादि। इति कारके २ मुग्धबोधसूत्रस्य टीकायां दुर्गादासः॥ *॥

सप्तपदार्थान्तर्गतद्वितीयपदार्थः। तत्तु पञ्चविधम्। यथा,—भाषापरिच्छेदे ६, ७।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च॥
भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च।
तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते"॥

कुसुमाञ्जलिमते यागहिंसादि॥ तत्तु त्रिविधम्। सात्त्विकम् १ राजसम् २ तामसम् ३।

सात्त्विकं यथा,

"नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म्म यत्तत् सात्त्विकमुच्यते"॥

राजसं यथा,—

"यत्तुकामेप्सुना कर्म्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम्"॥

तामसं यथा,—

"अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म्म यत्तत्तामसमुच्यते"॥

इति श्रीभगवद्गीता। १८। २३-२५॥

क्रमात् दशमलवम्। इति ज्योतिषम्॥ क्रिया। इत्यमरः। तच्च पञ्चविधम्। नित्यनैमित्तिककाम्यप्रायश्चित्तनिषिद्धभेदात्। तत्र आद्यानि चत्वारि धर्म्माणि। अन्त्यं अधर्म्माम्। तच्च जन्मभेदात् चतुर्व्विधम् सञ्चितं प्रारब्धं क्रियमाणं भावि च। इति वेदान्तसारम्॥ ०॥

ब्राह्मणादीनां स्वाभाविककर्म्माणि यथा।

"शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म्म स्वभावजम्॥
शौर्य्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रकर्म्म स्वभावजम्॥
कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म्म स्वभावजम्।

परिचर्य्यात्मकं कर्म्म शूद्रस्यापि स्वभावजम्"॥ ०॥

स्वकर्म्माभिरतस्य फलं यथा।

"स्वे स्वे कर्म्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्म्मनिरतः सिद्धिं यथा विन्दति तच्छृणु॥
यतः प्रवृत्तिर्भूतानां येन सर्व्वमिदं ततम्।
स्वकर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥
श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात्।
स्वभावनियतं कर्म्म कुर्व्वन्नाप्नोति किल्बिषम्॥
सहजं कर्म्म कौन्तेय सदोषमपि न त्यजेत्।
सर्व्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥
असक्तबुद्धिः सर्व्वत्र जितात्मा विगतस्पृहः।
नैष्कर्म्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति"॥

इति श्रीभगवद्गीतायाम्। १८। ४२-४९॥

कर्म्मकरः, त्रि, (कर्म्म करोति मूल्येन। डुकृञ् करणे + "कर्म्मणि भृतौ"। ३। २। २२। इति टः।) मूल्यं गृहीत्वा कर्म्मकारकः। मजुर ठिकाचाकर इत्यादि भाषा। तत्पर्य्यायः। भृतकः २ भृतिभुक् ३ वैतनिकः ४॥ वेतनोपजीवी। तत्पर्य्यायः॥ भरण्यभुक् २। इत्यमरः। ३। १। १९॥ कर्म्मण्यभुक् ३। इति तट्टीका॥ कर्म्मकर्त्तृमात्रञ्च॥ (यथा, मिताक्षरायां नारदः। "शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्म्मकृत्। एते कर्म्मकरा ज्ञेयाः"॥)

कर्म्मकरः, पुं, (कृञ् हिंसायां + मन्। कर्म्म हिंसां करोतीति। कृ + हेत्वादौ टः। यद्वा, जीवद्भूतकर्म्माधिष्ठित्य करोति सुखदुःखयोर्व्यवस्थां निष्पादयति नरकस्वर्गादिव्यवस्थां करोति वा। धर्म्माधर्म्मात्मकं कर्म्म समीक्ष्य सर्व्वान् शास्तीत्यर्थः। कर्म्मफलानुसारेण पापात्मनां दण्डप्रदानरूपहिंसायामधिकारित्वात् अस्य तथात्वम्।) यमः। इति मेदिनी॥

कर्म्मकरी, स्त्री, (कर्म्म + कृ + टः। टित्त्वात् + ङीप्।) मूर्व्वा लता। बिम्बिका लता। इति मेदिनी॥ दासी। इति शब्दरत्नावली॥

(यथा भागवते ३। २३। २७।

"वयं कर्म्मकरीस्तुभ्यं प्राग्धि नः करवाम किम्"॥)

कर्म्मकारः, पुं, (कर्म्म वेतनं गृहीत्वा लोहादिभिः खड्गकर्त्तरिकादिकं करोति निर्म्मातीति। कर्म्म + कृ + उपपदे "कर्म्मण्यण्"। ३। २। १। इति अण्।) वर्णसङ्करविशेषः। लौहकारः। कामार इति भाषा। स तु शूद्रायां विश्वकर्म्मणो जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ वृषः। इति शब्दचन्द्रिका॥

कर्म्मकारः, त्रि, (कर्म्म करोति भृतिमृते। कर्म्म + कृ + अण्।) वेतनं विना भारवहनादिकर्म्मकारकः। वेगार इति भाषा॥ तत्पर्य्यायः। कर्म्मक्रियः २। इत्यमरः। ३। १। १९॥

कर्म्मकीलकः, पुं, (कर्म्मणा कीलक इव वस्त्रक्षालनरज्जनादिना गृहस्थानां मानरक्षाकपाटकीलकस्वरूपः।) रजकः। इति त्रिकाण्डशेषः॥

कर्म्मजः, पुं, (कर्म्मणो जातः। विषयभोगवासनावशात् क्रमशः मलिनायमानो वृत्तिभिर्जात इत्यर्थः। जन + ड।) कलियुगः। इति शब्दरत्नावली॥

वटवृक्षः। इति जटाधरः॥ क्रियाजन्ये त्रि। (यथा, मनुः। १२। १०१।

"तपा दहति वेदज्ञः कर्म्मजं दोषमात्मनः"॥

कारणभेदेन रोगभेदो यथा।

"बहुभिरुपचारैस्तु येन यान्ति समन्ततः।
ते कर्म्मजाः समुद्दिष्टा व्याधयो दारुणाः पुनः"॥

इति हारीते चिकित्सितस्थाने २ अध्यायः॥)

कर्म्मजगुणः, पुं, (कर्म्मणो जायते यो गुणः क्रियाहेतोर्जातो गुण इत्यर्थः।) क्रियाजन्यगुणः। तद्यथा।

"संयोगश्च विभागश्च वेगश्चेते तु कर्म्मजाः"।

इति भाषापरिच्छेदे॥ ८७॥

कर्म्मठः, त्रि, (कर्म्मणि घटते इति। "कर्म्मणि घटोऽठच्"। ५। २। ३५। इति अठच्।) कर्म्मकुशलः। यथा। मट्टिः। १। ११।

"ज्ञाताशेषस्य ततो यतानीत्
स कर्म्मठः कर्म्मसुतानुबन्धम्"॥

प्रयत्नेन प्रारब्धं कर्म्म समापयति यः। तत्पर्य्यायः। कर्म्मशूरः २। इत्यमरः। ३। १। १८॥

कर्म्मण्यः, त्रि, (कर्म्मणि साधुः तत्र साधुरिति यत्। यद्वा कर्म्मणा सम्पादि।) कर्म्मयोग्यः। क्रियार्हः। कामुया इति भाषा। कर्म्मणा व्याप्तते इत्यर्थे यप्रत्ययः। इति संक्षिप्तसारव्याकरणम्॥ (यथा, ऋग्वेदे १। ९१। २०। "सोमोवीरं कर्म्मण्यं ददाति"॥)

कर्म्मण्यभुक्, त्रि, (कर्म्मण्यं वेतनं भुङ्क्ते। भुज् + क्विप्।) भरण्यभुक्। वेतनोपजीवी। इत्यमरटीकायां स्वामी॥

कर्म्मण्या, स्त्री, (कर्म्मणा सम्पद्यते तत्र साधुरिति यत्। टाप् च।) वेतनम्। मूल्यम्। इत्यमरः। २। १०। ३८॥

कर्म्मन्दी, [न्] पुं, (कर्म्मन्देन भिक्षुसूत्रकारेण स्वनामख्यातऋषिविशेषेण प्रोक्तं भिक्षुसूत्रमधीते यः। कर्म्मन्द + इनिः।) भिक्षुः। सन्न्यासी। इत्यमरः। २। ७। ४२॥

कर्म्मफलं, क्ली, (कर्म्मणः जीवकृतशुभाशुभस्य शास्त्रविहितस्य निषिद्धस्य वा सुखदुःखादिरूपं फलं परिणाम इत्यर्थः।) कर्म्मविपाकः। (यथा, विष्णुपुराणे १। १९। ७१।

"समस्तकर्म्मभोक्ता च कर्म्मोपकरणानि च।
त्वमेव विष्णो! सर्व्वापि सर्व्वकर्म्मफलञ्च यत्"॥

तथा च मनुः। ११। २३१।

"एवं सञ्चित्य मनसा प्रेत्य कर्म्मफलोदयम्"॥)

कर्म्मरङ्गफलम्। इति मेदिनी॥ कामरांगा इति भाषा॥

कर्म्मभूः, स्त्री, (कर्म्मणः क्षत्रियकार्य्यस्य कर्म्मणि वा उचिता उपयोगिनी वा या भूः।) क्षत्रभूमिः। तत्पर्य्यायः। कर्म्मान्तः २। इति हेमचन्द्रः॥ (आर्य्यावर्त्तदेशः। यथा, विष्णुपुराणम्।

"तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने!।
यतो हि कर्म्मभूरेषा यतोऽन्या भोगभूमयः"॥)

कर्म्मभूमिः, स्त्री, (कर्म्मणः पुण्यात्मसम्पाद्यस्वर्गादिरूपक्रियायाः भूमिः।) आर्य्यावर्त्तदेशः। इति

हेमचन्द्रः ॥ (भारवर्षं यथा, विष्णुपुराणे २।३।१-२।
"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने!।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्" ॥
तथा च रामायणे २।१०९।२८। हेमा।
"कर्म्मभूमिमिमां प्राप्य कर्त्तव्यं कर्म्म यत् शुभम्"॥)

कर्म्ममूलं, क्ली, (कर्म्म यज्ञादिक्रियाजन्यं सत्कर्म्महेतुकं वा मूलं यस्य। कर्म्मणो मूल मिव मूलं यस्य वा।) कुशटङ्गम्। इति शब्दचन्द्रिका ॥

कर्म्मयुगं, क्ली, (क्रियाति हिनस्ति अन्योन्यं यत्र युगे तत् कर्म्म। क्त हिंसायां + मनिन्प्रत्ययः। कर्म्म हिंसाप्रधानं युगं इति कर्म्मधारयः। कलेः हिंसाप्रधानत्वात् तथात्वम्।) कलियुगम्। इति चिकाण्डशेषः ॥

कर्म्मयोगः, पुं, (कर्म्मसु योगस्तत्कौशलम्।) चित्तशुद्धिजनकवैदिककर्म्म। यथा। निष्कामकर्म्मणात्मज्ञानमित्युक्तं यथा।
"अयमेव क्रियायोगो ज्ञानयोगस्य साधकः।
कर्म्मयोगं विना ज्ञानं कस्यचिन्नैव दृश्यते ॥
सोऽपि दुरितक्षयद्वारा न साक्षात्"। इति मलमासतत्त्वम् ॥ *॥ तदनुष्ठानस्यावश्यकत्वं यथा।
श्रीभगवानुवाच ॥
"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ!।
ज्ञानयोगेन सांख्यानां कर्म्मयोगेण योगिनाम् ॥
न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥
न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत्।
कार्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः ॥
कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढ़ात्मा मिथ्याचारः स उच्यते ॥
यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्জ্জुन!।
कर्म्मेन्द्रियैः कर्म्मयोगमसक्तः स विशिष्यते ॥
नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः ॥
यज्ञार्थात् कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धनः।
तदर्थं कर्म्म कौन्तेय! मुक्तसङ्गः समाचर ॥
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥
देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥
यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्व्वकिल्बिषैः।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥
अन्नाद्भवन्ति भूतानि पर्জ্জन्यादन्नसम्भवः।
यज्ञाद्भवति पर्জ্জन्यो यज्ञः कर्म्मसमुद्भवः ॥
कर्म्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात् सर्व्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥
एवं प्रवर्त्तितं चक्रं नानुवर्त्तयतीह यः।
अघायुरिन्द्रियारामो मोघं पार्थ! स जीवति ॥
यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।

आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यते ॥
नैव तस्य कृते नार्थो नाकृतेनेह कश्चन।
न चास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥
तस्मादसक्तः सततं कार्य्यं कर्म्म समाचर।
असक्तो ह्याचरन् कर्म्म परमाप्नोति पूरुषः ॥
कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन् कर्त्तुमर्हसि ॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥
न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं वर्त्त एव च कर्म्मणि ॥
यदि ह्यहं न वर्त्तेयं जातु कर्म्मण्यतन्द्रितः।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ! सर्व्वशः ॥
उत्सीदेयुरिमे लोका न कुर्य्यां कर्म्म चेदहम्।
सङ्करस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः ॥
सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत।
कुर्य्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥
न बुद्धिभेदं जनयेदज्ञानां कर्म्मसङ्गिनाम्।
योजयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन् ॥
प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः।
अहङ्कारविमूढ़ात्मा कर्त्ताहमिति मन्यते ॥
तत्त्ववित्तु महाबाहो गुणकर्म्मविभागयोः।
गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते ॥
प्रकृतेर्गुणसंमूढ़ाः सज्जन्ते गुणकर्म्मसु।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥
मयि सर्व्वाणि कर्म्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्म्ममो भूत्वा युध्यस्व विगतज्वरः ॥
ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्म्मभिः ॥
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।
सर्व्वज्ञानविमूढ़ांस्तान् विद्धि नष्टानचेतसः ॥
सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥
इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥
श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात्।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः"॥
इति श्रीभगवद्गीतायां कर्म्मयोगो नाम ३ अध्यायः ॥*॥ अन्यत् भगवन्मन्दिरादिकरणं वह्निपुराणे यमानुग्रासननामाध्याये द्रष्टव्यम् ॥

कर्म्मरङ्गः, पुं, क्ली, (कर्म्मणे हिंसाक्रियायै तत्फलभक्षणकारिणां रोगादिजननक्रियायै इत्यर्थः रज्यते पर्य्याप्यते। क्त हिंसायां इति धातोर्मनिन् प्रत्ययेन निष्पन्नत्वात् ततो कर्म्मन् + रञ्ज + घञ्।) फलवृक्षविशेषः। कामरङ्गा इति भाषा ॥ (यथा, रामायणे। ३।१७।८। गौ।
"सोमवल्लान् कर्म्मरङ्गान् प्रियालांश्चकचित् कचित्"॥)
तत्पर्य्यायः। शिराल: २ हृद्यफलः ३ दशाकरः ४। इति शब्दचन्द्रिका ॥ कर्म्मारः ५ कर्म्मरकः ६ पीतफलः ७ कर्म्मरः ८ सुङ्गरकः ९ सुङ्गरः १० धराफलः ११ कर्म्मारकः १२। अस्य गुणाः। अम्लत्वम्। उष्णत्वम्। वातहारित्वम्। पित्तकारित्वञ्च। इति राजनिर्घण्टः ॥ तीक्ष्णत्वम्। कटुपाकित्वम्। अम्लपित्तकारित्वञ्च। इति राजवल्लभः ॥ तत्पक्वफलगुणाः। मधुराम्लत्वम्। बलपुष्टिरुचिप्रदत्वञ्च। इति राजनिर्घण्टः ॥
("कर्म्मरङ्गं हिमं ग्राहि स्वादम्लं कफवातहृत्"॥ इति भावप्रकाशस्य पूर्व्वखण्डे १म भागे ॥)

कर्म्मरी, स्त्री, (कर्म्म भैषज्योपयोगक्रियां राति ददाति। रा + कः। ततो गौरादित्वात् ङीष्।) वंशरोचना। इति राजनिर्घण्टः। (वंशरोचनाशब्देऽस्या विवृतिर्ज्ञातव्या ॥)

कर्म्मवश्यः, पुं, (कर्म्म श्रौतस्मार्त्ताद्यनुष्ठानं तत्तच्छास्त्रादेरध्ययनमाचरणादिकं वा वश्यं वश्य तुल्यदृढ़ं यस्य। द्विजेतरजातेः श्रौतादिकर्म्माश्रुतिगोचराज्ञेयतादिहेतुकत्वात् वश्यवत् कठिनं प्रतिभातीति भावः।) शूद्रः। इति महाभारतम् ॥

कर्म्मवाटी, स्त्री, (कर्म्मणां शास्त्रोक्ततिथिनिमित्तीभूतक्रियाणां चन्द्रकलाक्रियाणां वा वाटीव। पुष्पवाटिका यथा पुष्पादेराधारस्तद्वदित्यर्थः। तिथीनां हि कर्म्मनिमित्ततया तथात्वम्।) तिथिः। इति हेमचन्द्रः ॥

कर्म्मविपाकः, पुं, (कर्म्मणः अधर्म्ममूलकस्य अशुभफलजनकस्येति यावत् विपाकः परिणामः। इह रोगादिभोगजनकदुःखमयपरिणामः। अमुत्र नरकभोगादिजनकदुःखमयपरिणामश्च।) अशुभकर्म्मजन्यफलस्य विपाकः। रोगादिरूपजन्मान्तरीयाशुभकर्म्मफलभोग इति यावत्। तद्विवरणं यथा,—
"नरकात् प्रतिमुक्तस्तु पापयोनिषु जायते।
पतितात् प्रतिगृह्याधावरयोनिं व्रजेद्बुधः ॥
नरकात् प्रतिमुक्तस्तु क्षमिर्भवति पातकः।
उपाध्यायस्थलीकन्तु हत्वा श्वा भवति द्विजः ॥
तल्पायां मनसा वाञ्छंस्तद्दग्धं वाप्यसंशयम्।
गर्दभो जायते जन्तुर्म्मित्रस्त्रैवायमानहृत् ॥
मात्रादीतरमाक्रम्य शारिका संप्रजायते।
पितरौ पोड़यित्वा तु कच्छपत्वञ्च गच्छति ॥
भर्त्तुः पिण्डमुपाश्नन्तो हित्वान्यानि निषेवयेत्।
सोऽपि मोहसमापन्नो जायते वानरो मृतः ॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते क्षमिः।
असूयकश्च नरकान्मुक्तो भवति राक्षसः ॥
विश्वासहर्त्ता च नरो मीनयोनौ प्रजायते।
यवधान्यानि हत्वा तु जायते मूषिको मृतः ॥
परदारांभिमर्षात्तु कृको घोरोऽभिजायते।
भ्रातृभार्य्याप्रसङ्गे कोकिलो जायते नरः ॥
गुर्व्वादिभार्य्यागमनात् शूकरो जायते नरः।
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् क्षमिः ॥
देवतापितृविप्राणामदत्त्वा योऽन्नमश्नुते।
प्रमुक्तो नरकाद्यापि वायसः स प्रजायते ॥
ज्येष्ठभ्रातरमानाद्य कौशयोनौ प्रजायते।
सूनश्च ब्राह्मणीं गत्वा क्षमियोनौ प्रजायते ॥
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत्।
हतघ्नः क्षमिकः कीटः पतङ्गो दंशिकस्तथा ॥
अश्वं पुरुषं हत्वा नरः संजायते खरः।
क्षमिः क्षीरवधकर्त्ता च नागहन्ता च जायते।

भोजनं चोरयित्वा तु मक्षिका जायते नरः ।
हत्वान्नमेव मार्ज्जारश्चिलहश्चैव मूषिकः ॥
घृतं हृत्वा च नकुलः काको मद्गुरमामिषम् ।
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलकः ॥
अपो हृत्वा तु पापात्मा वायसः सम्प्रजायते ।
हृते कांस्ये च हारीतः कपोतो वा प्रजायते ॥
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ।
कार्पासिके हृते कौशो वल्गिहर्त्ता बकस्तथा ॥
मयूरो वर्णकं हृत्वा शाकं पचस्य जायते ।
जीवञ्जीवकतां याति रत्नवस्त्रापहारकः ॥
कुकुन्दरिः सुधान् गन्धान् वंशं हृत्वा शशो भवेत् ।
षण्डः कलापहरणे काष्ठहृत् काष्ठकीटकः ॥
पुष्पापहारिद्रस्तु पक्षुर्वापहारकः ।
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः ॥
गृहोपस्करकान् गत्वा रौरवादीन् सुदारुणान् ।
तृणगुल्मलतावल्लीत्वक्सारतरुतां व्रजेत् ॥
एष एव क्रमो दृष्टो गोसुवर्णादिहारिणां ।
विद्यापहारी मूकश्च गत्वा च नरकान् बहून् ॥
असमिद्धेऽग्नौ हुते च मन्दाग्निः सम्प्रजायते ।
परनिन्दा कृतघ्नत्वं परमर्म्मविघातनम् ।
नैष्ठुर्यं निर्घृणत्वञ्च परदारोपसेवनम् ।
परस्वहरणाशौचं देवतानाञ्च कुत्सनम् ।
निरूप्य वक्षणं नृणां कार्पण्यञ्च दृशां बुधः ।
उपलक्षणादि जानीयात् मुक्तानां नरकादनु ॥
दयाभूतेषु सम्वादः परलोकं प्रतिक्रिया ।

सत्यं हितार्थता चोक्तिर्वेदप्रामाण्यदर्शनम् ॥
गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः ।
सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः ।
अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिकं फलम्" ॥
इति गारुडे कर्म्मविपाकः २२९ अध्यायः ॥

ज्ञातातपश्रुतरुक्तः पापरोगप्रायश्चित्तानां विवरणग्रन्थः । प्रायश्चित्तविहीनपापिनां नरकान्ते प्रतिजन्म तत्पापसूचितरोगयुक्तं शरीरं भवति । तद्यथा दुष्कर्म्मजा रोगा जपदेवार्चनहोमदानादिभिः शमं यान्ति ॥* महापातकजा रोगाः सप्तजन्मसु जायन्ते । तद्यथा—कुष्ठम् । राजयक्ष्मा । प्रमेहः । ग्रहणी । मूत्रकृच्छ्रम् । अर्शरी । कासः । अतीसारः । भगन्दरः । दुष्टव्रणः । गण्डमाला । पक्षाघातः । अङ्गिनाशनम् । इत्यादयः । अत्र सम्पूर्णं प्रायश्चित्तम् ॥* उपपापोद्भवा रोगाः षड्जन्मसु जायन्ते । तद्यथाः—जोलदरम् । यक्ष्मा । प्लीहा । शूलम् । व्रणः । श्वासः । जीर्णज्वरः । हृद्रोगः । भ्रमः । मोहः । ग्रहणी । रक्तार्बुदम् । विसर्पः । इत्यादयः । अत्र अर्द्धं प्रायश्चित्तम् ॥*॥

पापसमुद्भवा रोगाः त्रिषु जन्मसु जायन्ते । तद्यथाः—दण्डापतानकः । चित्रवपुः । कम्पः । विचर्चिका । वल्मीकः । पुण्डरीकम् । इत्यादयः । अत्र षडांशं प्रायश्चित्तम् ॥* अतिपापात् अर्शं आद्याः रोगा भवन्ति अन्ये बहुधा रोगसङ्कराश्च ॥* अथ दानादिषु साधारणविधिः ।

गोदाने सुशीला सवत्सा पयस्विनी गौः । वृषदाने शुक्लवस्त्रकाञ्चनसहितः सुबोऽनड्वान् । भूदाने दशनिवर्त्तनपरिमिता भूः । सुवर्णदाने घृतनिष्कं स्वर्णं तदर्द्धार्द्धं वा । अश्वदाने उपस्करसहितसुशीलाश्वः । महिषदाने स्वर्णायुधयुक्तमहिषी । गजमहादाने सुवर्णघण्टसहितगजः । देवार्चने लक्षोद्धारपुष्पदानम् । ब्राह्मणभोजने सहस्रद्विजेभ्यो मिष्टान्नदानम् । रुद्रजपे लक्षसङ्ख्यकपुष्पकरवीरकल्हारकपूजनानन्तरं एकादशरुद्रजपः तद्दशांशघृतगुग्गुलहोमः वरुणमन्त्रैरभिषेचनञ्च । धान्यदाने यष्टिसङ्ख्यकखारी परिमितधान्यम् । वस्त्रदाने कर्पूरमिश्रितण्डवस्त्रद्वयम् ॥*॥

अथ प्रायश्चित्तग्रहणानुष्ठानादि । दश पञ्चाश्चतुरो वा ब्राह्मणानुपवेश्य तेषामनुज्ञया प्रायश्चित्तमुपक्रम्य विष्णुं सम्पूज्य निजकाम्यया सङ्कल्प्य द्विजेभ्यो धेनुं शक्तितो दक्षिणाञ्च दत्त्वा तान् वस्त्रालङ्कारैरलङ्कृत्य दण्डप्रमाणेन प्रायश्चित्तं याचेत । तेषामनुज्ञया प्रायश्चित्तं यथाविधि कृत्वा परिपूर्णार्थान् तान् यथाविधि अर्चयित्वा तेभ्योऽनुज्ञामाशिषञ्च प्रतिगृह्य ब्राह्मणान् भोजयित्वा बन्धुभिः सह भोक्तव्यम् । इति ज्ञातातपीयकर्म्मविपाकप्रथमाध्यायविवरणम् ॥* जन्मान्तरीयमहापातकप्रेषचिह्नकुनखादिरोगाणां प्रायश्चित्तं पराकव्रतं महापातकादतिपातकस्य गुरुत्वात्तच्छेषजन्यगलत्कुष्ठरोगस्य प्रायश्चित्तं द्विगुणम् । इति स्मार्त्ताः ॥*॥

अथ ज्ञातातपोक्तहिंसास्तेयाऽगम्यागमनाऽगतिप्रायश्चित्तानि क्रमेण लिख्यन्ते ॥

पापी	रोगी	प्रायश्चित्तम्
१ अजाघाती	१ अधिकाङ्गः	१ विचित्रवस्त्रयुक्तां अजां दद्यात् ॥
२ अश्वहन्ता	२ वक्रतुण्डः	२ घृतपलानि चन्दनानि दद्यात् ॥
३ उरभ्रघाती	३ पाण्डुरोगी	३ ब्राह्मणाय पलपरिमितकस्तूरिकां दद्यात् ॥
४ उष्ट्रहन्ता	४ विकृतस्वरः	४ कर्पूरकं पलं दद्यात् ॥
५ काकघाती	५ कर्णहीनः	५ छण्णां गां दद्यात् ॥
६ कारुहन्ता	६ रूक्षः	६ शुक्लवर्णवृषभं दद्यात् ॥
७ खरहन्ता	७ खररोमा	७ छणगुल्मिवत् प्रायश्चित्तं कुर्य्यात् ॥
८ गजघाती	८ सर्व्वकार्य्येष्वसिद्धार्थः ...	८ प्रासादं कारयित्वा गणेशप्रतिमां स्थापयेत् अथवा कृतप्रशस्तैः पूपैश्च गणशान्तिपूर्व्वकं लक्षसंख्यकगणेशमन्त्रं जपेत् ॥
९ गोघ्नहा	९ कुष्ठी निर्व्वंशश्च	९ घृतप्राजापत्यव्रतञ्चरित्वा ब्राह्मणाय भूमिं दक्षिणां दत्त्वा भारतं शृणुयात् ॥
१० गोवधी	१० कुष्ठी	१० पञ्चपल्लवसंयुक्तपञ्चवर्णसमन्वितरक्तचन्दनलिप्ताङ्गरक्तपुष्पाम्बरान्वितैकरक्तकुम्भं दक्षिणस्यां दिशि संस्थाप्य तत्र तिलचूर्णपूरितताम्रपात्रं विन्यस्य तदुपरि निष्कमितसुवर्णनिर्म्मितयमदेवं पुरुषसूक्तमन्त्रेण संपूज्य पापं मे शाम्यतामिति प्रार्थयेत् । ततः सामविद् ब्राह्मणस्तच्च कलसे सामपारायणं कुर्य्यात् । ततो दशांशं सर्व्वं दत्त्वा पात्रमाच्याभिषेचनं कुर्य्यात् । ततो "यमोऽपि महिषारूढो दण्डपाणिर्भयानकः । दक्षिणाशापतिर्देवो मम पापं व्यपोहतु" ॥ इति मन्त्रेण यजमानो यमं विसृज्य तं आचार्य्याय निवेद्य सद्दक्षिणामाचरेत् ॥
११ तरक्षुहन्ता	११ केकरेक्षणः	११ गुल्ममयीं धेनुं दद्यात् ॥

पापी	रोगी—	प्रायश्चित्तम्
१२ पिटहा	१२ चेतनाहीनः	१२ त्रिंशत् प्राजापत्यानि कृत्वा पलपरिमितां सुवर्णनावं कारयित्वा ताम्रपात्रे रूप्यमयं ऊर्ध्वं स्थापयित्वा निष्कपरिमितसुवर्णनिर्म्मितं विष्णुं पट्टवस्त्रेण संवेष्य विधानतः पूजयेत्। तत् सर्व्वं ब्राह्मणाय दत्त्वा ब्राह्मणं विसर्जयेत्। अन्येभ्योऽपि विप्रेभ्यो भूयसीं दक्षिणां दद्यात्॥
१३ बालघाती	१३ मृतवत्सः	१३ ब्राह्मणोद्वाहनं यथाविधि हरिवंशश्रवणञ्च कुर्य्यात्। महाद्यज्ञपात्रान् कारयेत्। तद्द्यांशेन अयुतसंख्यकदूर्व्वया च कृत्वा दक्षिणासहितनिष्कपरिमितैकादशसुवर्णानि द्विजानुसारतः एकादशपलानि च दद्यात्। अन्यब्राह्मणेभ्यो यथाशक्ति दक्षिणां दद्यात्। तत आचार्य्यो वरुणदैवतमन्त्रैर्दम्पतीः स्नापयेत्। यजमान आचार्य्याय वस्त्राभरणानि दद्यात्॥
१४ ब्रह्महा	१४ पाण्डुकुष्ठी	१४ यजमानश्चतुर्दिक्षु पञ्चपल्लवपञ्चवर्णसंयुक्तचतुरः कलसान् संस्थाप्य तन्मध्ये कुम्भोपरि रौप्यमयदलपद्मं विन्यस्य तदुपरि पलार्द्धार्द्धपरिमितसुवर्णनिर्म्मितदशहस्तं चतुर्म्मुखदेवं संन्यस्य प्रत्यहं त्रिकालं पुरुषसूक्तेन पूजयेत्। ततः पूर्व्वादिकुम्भेषु ब्रह्मचारिणो ब्राह्मणाः ऋग्वेदप्रभृतीन् स्वस्ववेदान् मन्त्रैः पठेयुः। ततो मध्यकुम्भे तिलाक्तघृतहोमैरभिर्यङ्ग्रहशान्ति-पुरःसरं दशांशेन होमं कुर्य्यात्। ततो ब्राह्मणो द्वादशाहेनेदं कर्म्म समाप्य तत्र पीठे यथाविधि यजमानमभिषिञ्चेत्। ततो यजमानो ब्राह्मणेभ्यो यथाशक्ति गोभूहेमतिलोदकानि दत्त्वा कुम्भादीन् आचार्य्याय निवेदयेत्॥
१५ मातृहा	१५ मूकः	१५ चान्द्रायणव्रतं चरित्वा "सरस्वति जगन्मातः शब्दब्रह्मादिदेवते। दुष्कर्म्मकरणात् पापात् पाहि मां परमेश्वरि"॥ इमं मन्त्रमुच्चार्य्य पलपरिमितसुवर्णसहितपुस्तकं ब्राह्मणाय दत्त्वा तं ब्राह्मणं विसर्জ্জयेत्।
१६ महिषीघाती	१६ ह्रस्वगुल्मी	१६ निष्कत्रयपरिमितस्वर्णमयीं प्रकृतिं दद्यात्॥
१७ मातृहा	१७ अन्धः	१७ पितृहवत् प्रायश्चित्तं कुर्य्यात्॥
१८ मार्जारहा	१८ पीतपायिः	१८ निष्कमितस्वर्णनिर्म्मितं पारावतं दद्यात्॥
१९ राजहा	१९ क्षयरोगी	१९ गोभूहिरण्यमिष्टान्नवस्त्राणि घृतधेनुं तिलधेनुञ्च दद्यात्॥
२० वकघाती	२० दीर्घनसः	२० शुक्लां गां दद्यात्॥
२१ वैश्यहन्ता	२१ रक्तार्बुदी	२१ चत्वारि प्राजापत्यव्रतानि चरित्वा सप्तधान्यानि उत्सृजेत्॥
२२ शुकसारिकाघाती... ...	३२ स्खलितवाक्	२२ ब्राह्मणाय सदक्षिणं सच्छास्त्रपुस्तकं दद्यात्॥
२३ शूकरहन्ता...	२३ दन्तुरः	२३ सदक्षिणं घृतकुम्भं दद्यात्॥
२४ शूद्रहन्ता	२४ दण्डापतानकः	२४ एकं प्राजापत्यव्रतञ्चरित्वा सदक्षिणैकधेनुं दद्यात्॥
२५ गुरुतल्पहा	२५ विषादकः	२५ खड्गवत् प्रायश्चित्तं कुर्य्यात्॥
२६ स्त्रीहन्ता	२६ अतिसारी	२६ दशाश्वत्थरक्षान् रोपयेत् घृतधेनुं दद्यात् शतं ब्राह्मणांश्च भोजयेत्॥
२७ हरिणघाती...	२७ खञ्जः	२७ पलपरिमितसुवर्णाश्वं दद्यात्॥ * ॥ "हिंसायां निष्कृतिरियं ब्राह्मणे समुदाहृता। तदर्द्धार्द्धप्रमाणेन क्षत्रियादिष्वनुक्रमात्"॥ इति श्रीतातपोक्तकर्म्मविपाकद्वितीयाध्याय-हिंसाप्रायश्चित्तविवरणम्॥ * ॥
१ अभक्ष्यभोक्ता	१ क्रमिकोदरः	१ भीमपञ्चकोपवास कुर्य्यात्॥
२ असृग्रसस्पृष्टान्नभोक्ता ...	२ क्रमिकोदरः	२ त्रिरात्रमुपवसेत्॥
३ गर्भपातकर्त्ता	३ यकृत्प्लीहजलोदररोगी ...	३ पलत्रयपरिमितसुवर्णरूप्यताम्रान्वितजलधेनुदानं कुर्य्यात्॥
४ दावाग्निदः	४ रक्तातिसारी	४ उदपानं वटवृक्षरोपणञ्च कुर्य्यात्॥
५ दुष्टवाग्मी	५ खण्डितः	५ दुग्धसमन्वितघटद्वयं पलद्वयपरिमितरूप्यञ्च द्विजातये दद्यात्॥
६ द्रव्ये सति कदन्नदः... ...	६ मन्दोदराग्निः	६ प्राजापत्यत्रयं कृत्वा शतं द्विजान् भोजयेत्॥
७ धूर्त्तः...	७ अपस्मारी	७ ब्रह्मकूर्म्मयीं धेनुं दत्त्वा सदक्षिणां गां दद्यात्॥
८ परनिन्दावान्	८ खल्लीटः	८ काञ्चनसहित धेनुं दद्यात्॥
९ परान्नविघ्नकर्त्ता	९ अजीर्णी	९ यथाविधि लक्षहोमं कुर्य्यात्॥
१० परोपतापी	१० शूली	१० अन्नदानं रुद्रजपञ्च प्रकुर्व्वीत॥
११ परोपहासकृत्	११ काणः	११ सकाञ्चनां गां दद्यात्॥
१२ मिथुनः	१२ श्वासकासी	१२ सहस्रपलसम्मितं घृतं दद्यात्॥

पापी	रोगी	प्रायश्चित्तम्
१३ प्रतिमाभङ्गकारी	१३ अप्रतिष्ठः	१३ वत्सरत्रयपर्य्यन्तं प्रतिदिनं अश्वत्थसेचनानन्तरं शास्त्रोक्तविधिना समां गम्यामुद्वाहयेत् सुपूजितं विप्रराजञ्च संस्थापयेत् ॥
१४ मद्यपः	१४ रक्तपित्ती	१४ सर्पिषो घटं सहिरण्यं मधुनोऽर्द्धघटञ्च दद्यात् ॥
१५ मार्गहा	१५ पादरोगी	१५ अश्वं दद्यात् ॥
१६ रजस्वलाद्यन्नभोक्ता ...	१६ क्रमिलोदरः	१६ चिरात्तं गोमूत्रयावकं भुञ्जीत ॥
१७ विघदः	१७ कर्दिरोगी	१७ दश पयस्विनीर्गा दद्यात् ॥
१८ सभायां पक्षपाती	१८ पक्षघातवान्	१८ सत्यवर्त्तिने निष्कत्रयपरिमितं हेम दद्यात् ॥
१९ सुरापः	१९ श्यावदन्तः	१९ प्राजापत्यव्रतञ्चरित्वा सप्ततुलापरिमितशर्करां दत्त्वा महारुद्रं जप्त्वा तद्गवांगं तिलैर्हुत्वा वरुणदैवतमन्त्रैरभिषेकं कुर्य्यात् ॥
२० सुरालये जले वा मूत्रपुरीषकारी ...	२० गुदरोगी	२० मासं व्याप्य सुरार्चनं गोदयदानं प्राजापत्यमेकञ्च कुर्य्यात् ॥ * ॥ इति शातातपोक्तकर्म्मविपाकाष्टतीयाध्यायप्रकीर्णप्रायश्चित्तविवरणम् ॥ * ॥
१ अगम्याभिगामी	१ ध्रुवमण्डली	१ कार्पासभारकांस्यदोहसंयुक्तसवत्सकतिलषष्टिमितहेमधेनुं "सुरभी वैष्णवी माता मम पापं व्यपोहतु" इमं मन्त्रमुच्चार्य्य दद्यात् ॥
२ अश्वयोनिगामी	२ गुदभ्रंशी	२ मासं व्याप्य प्रतिदिनं सहस्रसङ्ख्यकमलकरवकशिरःस्नानं कुर्य्यात्। स्त्रीणामपि तत्तत्पुरुषसंसर्गात्तत्तत्प्रायश्चित्तम् ॥
३ आमान्नहारी	३ हीनदीप्तिः	३ निष्कद्वयस्वर्णनिर्म्मिताश्विनीकुमारौ दद्यात् ॥
४ इक्षोर्विकारहारी... ...	४ उदरगुल्मवान्	४ गुडधेनुं प्रदद्यात् ॥
५ ऊर्णाहारी	५ लोमशः	५ कम्बलान्वितनिष्कमितस्वर्णनिर्म्मितवह्निमूर्तिं अर्चयित्वा ब्राह्मणाय दद्यात् ॥
६ औषधापहर्त्ता	६ सूर्य्यावर्त्तरोगी	६ मासं व्याप्य सूर्य्यार्घ्यं काञ्चनञ्च दद्यात् ॥
७ कन्दमूलहारी	७ रूक्षपाणिः	७ यथाशक्ति देवगृहं उद्यानञ्च कुर्य्यात् ॥
८ कांस्यहारी	८ पुण्डरीकसमन्वितः ...	८ ब्राह्मणमलङ्कृत्य तस्मै घृतपलं कांस्यं दद्यात् ॥
९ गुरुजायाभिगामी... ...	९ मूत्रकृच्छ्री	९ नीलमाल्यादिभूषितनीलवस्त्राच्छन्नघटं पश्चिमस्यां दिशि संस्थाप्य तदुपरि ताम्रपात्रे षड्गुणिष्कस्वर्णनिर्म्मितवरुणं पुरुषसूक्तेन यजेत। सामवेदी ब्राह्मणस्तच्च सामवेदमाचरेत् विंशतिनिष्कमितसुवर्णपुत्तलिकां निष्यापोऽहमित्युच्चार्य्य ब्राह्मणाय दद्यात्। "यादसामधिपो देवो विश्वेषामधिपो वरः। संसारनौकर्णधारो वरुणः पावनोऽस्तु मे" ॥ इति मन्त्रेण आचार्य्याय स्वर्णवरुणं दद्यात् ॥
१० चाण्डालीगामी	१० हीनमुष्कः	१० मातृगामिवत् प्रायश्चित्तं कुर्य्यात् ॥
११ तपस्विनीप्रसङ्गी	११ प्रमेहगदी	११ मासं व्याप्य रुद्रं जपेत् यथाशक्ति काञ्चनञ्च दद्यात् ॥
१२ तपस्विनीसङ्गमी	१२ अश्मरीगदी	१२ मधुधेनुं हिरण्यसहितघृतद्रोणपरिमिततिलञ्च दद्यात् ॥
१३ ताम्बूलहारी...	१३ श्वेतौष्ठः	१३ सदक्षिणोत्तमविद्रुमहयं दद्यात् ॥
१४ ताम्रचौरः	१४ औडुम्बरी	१४ प्राजापत्यव्रतं घृतपलपरिमिततास्रदानञ्च कुर्य्यात् ॥
१५ तैलचौरः	१५ कण्डूादिपीडितः	१५ उपोष्य विप्राय तैलघटद्वयं दद्यात् ॥
१६ त्वग्घारी	१६ नेत्ररोगवान्	१६ उपोष्य विधिवद्घृतधेनुं दद्यात् ॥
१७ दधिचौरः	१७ मदवान्	१७ विप्राय दधिधेनुं दद्यात् ॥
१८ दारुहारी	१८ खिन्नपाणिः	१८ विदुषे पलद्वयपरिमितकुङ्कुमं दद्यात् ॥
१९ दीक्षितस्त्रीप्रसङ्गी... ...	१९ दुष्टरक्तदृक्रोगी	१९ प्राजापत्यद्वयं कुर्य्यात् ॥
२० दुग्धहारी	२० बभ्रुमूत्रकः	२० ब्राह्मणाय यथाविधि दुग्धधेनुं दद्यात् ॥
२१ देवहारी	२१ विविधज्वरी	२१ तत्र ज्वरे कर्णे रुद्रं जपेत् महाज्वरे महारुद्रं रौद्रज्वरे अतिरौद्रं वैष्णवज्वरे महारुद्रातिरौद्रौ च जपेत् ॥
२२ नानाविधद्रव्यचौरः ...	२२ ग्रहणीयुक्तः	२२ घृतत्रयानुसारेणाज्योदकवस्त्राणि हेम च दद्यात् ॥
२३ पक्वान्नहारी	२३ जिह्वारोगी	२३ लक्षसंख्यकगायत्रीं जपेत् तिलकरवकं तद्गवांगहोमञ्च कुर्य्यात् ॥
२४ पट्टसूत्रहर्त्ता	२४ विलोमा	२४ धेनुं दद्यात् ॥
२५ पशुयोनिगामी	२५ मूत्राघाती...	२५ तिलपात्रद्वयं दद्यात् ॥
२६ पिठ्यस्त्रगन्ता	२६ दक्षिणांगभ्रंशी	२६ शक्तितः अजां दद्यात् ॥
२७ पुत्रजायाभिगामी... ...	२७ क्षयकुष्ठी	२७ खसुतागमनप्रायश्चित्तस्यार्द्धं घृताक्ततिलकरवकदशांगहोमञ्च कुर्य्यात् ॥

पापी	रोगी	प्रायश्चित्तम्
२८ फलहारी	२८ ग्रन्थिताङ्गुलिः	२८ द्विजातये अयुतसंख्यकनानाफलं दद्यात् ॥
२९ भ्रातृजायाभिगामी ...	२९ गुल्मकुष्ठी	२९ स्वसुतागमनप्रायश्चित्तस्यार्द्धं घृताक्ततिलकरणकदशांशहोमञ्च कुर्य्यात् ॥
३० मधुचौरः	३० नेत्ररोगवान्	३० उपवासं कृत्वा मधुधेनुं दद्यात् ॥
३१ मातुलानीगन्ता	३१ एकुब्जः	३१ कृष्णाजिनं प्रदद्यात् ॥
३२ भ्रातृगामी	३२ लिङ्गहीनः	३२ उत्तरतः कृष्णमाल्यादिभूषितकृष्णवस्त्रसमाच्छन्नकुम्भं विन्यस्य तदुपरि कांस्यपात्रे निष्कषट्कमितसुवर्णनिर्म्मितनरवाहनकुबेरं पुरुषसूक्तेन यजेत् । अथर्ब्ववेदविद्ब्राह्मणस्तत्र अथर्ब्वोक्तकर्म्म कुर्य्यात् । ब्राह्मणाय विंशतिनिष्कपरिमितसुवर्णनिर्म्मितपुत्रिकां निष्पापोऽहमिति ब्रुवन् दद्यात् । "निधीनामधिपो देवः शङ्करस्य प्रियः सखा । सौम्याद्रेरधिपतिः श्रीमान् मम पापं व्यपोहतु" ॥ इति मन्त्रेण तं कुबेरं आचार्य्याय दद्यात् ॥
३३ भ्रातृस्वसृगन्ता	३३ नानाङ्गे व्रणवान्	३३ दासदानं अगम्यागमनप्रायश्चित्तञ्च कुर्य्यात् ॥
३४ मृतभार्य्याभिगामी... ...	३४ मृतभार्य्यः	३४ एकब्राह्मणं विवाहयेत् ॥
३५ रक्तवस्त्रप्रवालहारी ...	३५ रक्तवातवान्	३५ मणिरागसमन्वितां सवस्त्रां महिषीं दद्यात् ॥
३६ लौहहारी	३६ कर्ब्बुराङ्गः	३६ एकदिनमुपोष्य घृतपललौहं दद्यात् ॥
३७ वस्त्रहारी	३७ कुष्ठी...	३७ निष्कमितहेमनिर्म्मितप्रजापतिं वस्त्रयुग्मञ्च दद्यात् ॥
३८ विद्यापुस्तकहारी... ...	३८ मूकः	३८ ब्राह्मणाय सदक्षिणं न्यायेतिहासं दद्यात् ॥
३९ विप्ररत्नापहारी	३९ अनपत्यः	३९ महारुद्रजपादिकं कुर्य्यात् तद्दशांशघृतपलाशसमिद्भिर्यथाविधि जुहुयात् मृतवत्सोक्तसर्व्वकर्म्म च कुर्य्यात् ॥
४० विप्रहेमहृत्	४० कुलघ्नः	४० चान्द्रायणव्रतानन्तरं सुवर्णघृतं दद्यात् ॥
४१ शाकहारी	४१ नीललोचनः	४१ ब्राह्मणाय महानीलमणिदयं दद्यात् ॥
४२ शुक्तिहारी	४२ पाण्डुमूर्द्धजः	४२ उपवासानन्तरं पलघृतशुक्तिं दद्यात् ॥
४३ सौगन्धिकहारी	४३ दुर्गन्धाङ्गः	४३ अग्नौ लक्षसंख्यकपद्मैर्होमं कुर्य्यात् ॥
४४ खगोवस्त्रीप्रसङ्गी... ...	४४ भगन्दररोगी	४४ महिषीं दद्यात् ॥
४५ स्वजातिस्त्रीगामी	४५ हृदयव्रणी	४५ प्राजापत्यदयं कुर्य्यात् ॥
४६ स्वसुतागामी	४६ रक्तकुष्ठी	४६ पूर्ब्ववत् पीतमाल्यादिभूषितपीतवस्त्रसमाच्छन्नकलसं संस्थाप्य तस्योपरि स्वर्णपात्रं निष्कषट्कमितसुवर्णनिर्म्मितवासवं पुरुषसूक्तेन यजेत् । तत्र ऋग्यजुःसामानि समाचरेत् ब्राह्मणं सम्पूज्य निष्पापोऽहमिति ब्रुवन् तस्मै घृतसुवर्णनिर्म्मितपुत्रिकां दद्यात् । "देवानामधिपो देवो वज्री विष्णुनिकेतनः । घृतयज्ञः सहस्राक्षः पापं मम निकृन्ततु" ॥ इति मन्त्रं पठेत् ॥*॥

इति घृतावपीयकर्म्मविपाके चतुर्थाध्यायोक्तस्यैप्रायश्चित्तस्य तथा पञ्चमाध्यायोक्तागम्यागमनप्रायश्चित्तस्य च विवरणम् ॥*॥

पापयुक्तः—	मरणविशेषविशिष्टः—	और्द्धदेहिकपूर्ब्वकालीनतत्पुत्रादिकर्त्तव्यप्रायश्चित्तम् ।
१ अनध्यायेऽध्ययनकर्त्ता ...	१ विद्युदाहतः	१ विद्यादानं कुर्य्यात् ॥
२ अस्पृश्री	२ अस्पृश्यसङ्गी मृतः... ...	२ वेदपारायणं कुर्य्यात् ॥
३ करवृत्तिः	३ एकहृतः द्वयहृतः ...	३ यथाशक्ति काञ्चनं दद्यात् ॥
४ कुमतिप्रदः	४ विषहृतः	४ क्षेत्रसंयुतां मेदिनीं दद्यात् ॥
५ कुमारीगन्ता	५ व्याघ्रादिहृतः	५ परकन्यां विवाहयेत् ॥
६ क्षत्तवासाः निक्षन्तनश्च ...	६ क्षुभितहृतः	६ द्विजाय गोधूमान्नं दद्यात् ॥
७ क्रतुनिन्दकः श्रुतिनिन्दकोऽपि पाठः ...	७ शस्त्रहृतः	७ सदक्षिणां महिषीं दद्यात् ॥
८ गुरुघाती	८ शय्यामृतः	८ निष्कमितसुवर्णनिर्म्मितपात्रस्थितविष्णवधिष्ठिततूलीसमन्वितशय्यां दद्यात् ॥
९ दक्षिणाचौरः	९ दवहृतः दारुहृतः ...	९ सदने सभां कुर्य्यात् ॥
१० दोही	१० संस्कारहीनमृतः	१० कुमारं विवाहयेत् ॥
११ द्विजनिन्दाकर्त्ता	११ प्रस्तरहृतः	११ सवत्सां पयस्विनीं गां दद्यात् ॥
१२ द्विजवस्त्रहृत्	१२ अनपत्यमृतः	१२ नवतिं क्षुच्छाणि चरेत् ॥

पापयुक्तः—	नरकविशेषविशिष्टः—	और्द्ध्वदेहिकपूर्व्वकालीनपुत्रादिकर्त्तव्यप्रायश्चित्तम् ।
१३ नित्यपहारकः	१३ कुक्कुरहतः	१३ अत्र प्रायश्चित्तस्यानुक्तत्वात् व्याघ्रादिहत इत्यत्रादिपददर्शनाच्च तत्रोक्तप्रायश्चित्तं युक्तम् ॥
१४ स्त्रपनाशकः...	१४ गजहतः	१४ चतुर्निष्कमितहेमगजं दद्यात् ॥
१५ पशुहिंसकः	१५ चौरहतः	१५ धेनुं दद्यात् ॥
१६ पाखिकः	१६ अरण्ये शूकरहतः ...	१६ कुक्कुरहतवत् ॥
१७ मत्सरी	१७ शौचहीनमृतः	१७ द्विनिष्कस्वर्णजहरिं दद्यात् ॥
१८ मद्यविक्रेता...	१८ पतितमृतः...	१८ षोड़शप्राजापत्यानि कुर्य्यात् ॥
१९ मित्रभेदी	१९ वैरिहतः	१९ वृषं दद्यात् ॥
२० मेदिनीचौरः	२० भृगुपातहतः	२० धान्यपर्व्वतं दद्यात् ॥
२१ यज्ञहानिकर्त्ता	२१ वह्निहतः	२१ स्वशक्तित उपानहं दद्यात् ॥
२२ राजकुमारघ्नः	२२ राजहतः	२२ हिरण्मयपुरुषं दद्यात् ॥
२३ राजदन्तिहृत्	२३ वृक्षहतः	२३ स्वर्णसंयुतं सौवर्णवृक्षं दद्यात् ॥
२४ गौहृत्	२४ अतीसारमृतः	२४ संयतो वक्षसङ्कगायत्रीं जपेत् ॥
२५ विषदः	२५ सर्पदष्टः	२५ नागबलिदानं काञ्चनदानञ्च कुर्य्यात् ॥
२६ ग्रहरन्ध्रोदी...	२६ ग्रहक्षिप्तः	२६ वस्त्रसंयुक्तवृषभं दद्यात् ॥
२७ ग्राम्यहृत्	२७ वान्तमाश्रित्य मृतः-असपश्यस्पर्शनमृतश्च ...	२७ सच्छास्त्रपुस्तकं दद्यात् ॥
२८ सूचकः	२८ शकटहतः...	२८ उपस्करान्वितं अश्वं दद्यात् ॥
२९ सेतुभेदी	२९ जलहतः	२९ निष्कत्रयमितस्वर्णवृषभं दद्यात् ॥
३० खदर्पकार्य्यकारकः... ...	३० साकिन्यादिहतः	३० यथोचितं रुद्रं जपेत् ॥
३१ हिंसः	३१ उद्बन्धनमृतः	३१ पयस्विनीं गां दद्यात् ॥
	३२ हयाहतः	३२ निष्कत्रयमितं स्वर्णं दद्यात् ॥
	३३ कपिहतः	३३ कनकनिर्म्मितकपिं दद्यात् ॥
	३४ विसूचिकामृतः	३४ घृतं द्विजान् भोजयेत् ॥
	३५ कण्ठकबलमृतः	३५ तिलधेनुं दद्यात् ॥
	३६ केशरोगमृतः	३६ अष्टौ शक्तान् समाचरेत् ॥ * ॥
		इति ज्ञातातपीयकर्म्मविपाके अगतीनां विशेषप्रायश्चित्तम् ॥ * ॥

अगतीनां साधारणप्रायश्चित्तम् ।

सपलसप्तधान्योपरि पञ्चपल्लवसव्यैर्घधिसंयुक्तं क्षौमवस्त्रसमाच्छन्नमकालमृतं कलसं संस्थाप्य तत्र महिषासनसंस्थितं चतुर्भुजं दण्डहस्तं स्वर्णकुण्डलसंयुतं निष्कपरिमितं प्रेतरूपिणं पुरुषं संस्थाप्य पूजयेत् । प्रत्यहं पुरुषसूक्तेन दुग्धेन तर्पयेत् तत्र कलसे षड़ङ्गयजं जपेत् । यमसूक्तेन यमपूजादिकं आत्मविशुद्ध्यर्थं गायत्रीजपं ग्रहशान्तिपूर्व्वकदशांशतिलहोमञ्च कुर्य्यात् । अज्ञातगोत्रविप्राय सतिलमुदकं दद्यात् ।

"इमं तिलमयं पिण्डं मधुसर्पिःसमन्वितम् ।
ददामि तवैे प्रेताय यः पीड़ां कुरुते मम" ॥

इति मन्त्रेण मधुघृतसंयुक्तप्रस्थमितकृष्णतिलपिण्डपिण्डं प्रेतरूपाय दद्यात् । यजमानः प्रेतमुद्दिश्य तिलपात्रसंयुतान् द्वादशक्षौमाच्छादितकलसान् विष्णुमुद्दिश्यैकं कलसञ्च दद्यात् । वरायुधधरः शुचिराचार्य्यः वरुणदेवतमन्त्रैः कलसोदकैर्दम्पती अभिषिञ्चेत् । ततो यजमान आचार्य्याय दक्षिणां दद्यात् नारायणबलिञ्च कुर्य्यात् ॥ * ॥

"एवं कृते विधानेन प्रकुर्य्यादौर्द्ध्वदेहिकम् ।
ततः प्रेतत्वनिर्म्मुक्ताः पावितास्तर्पितास्तथा ॥
दद्युः पुत्रांश्च पौत्रांश्च आयुरारोग्यसम्पदः" ॥

इति ज्ञातातपीयकर्म्मविपाकषष्ठाध्यायोक्तागतिप्रायश्चित्तविवरणम् ॥ * ॥

(मार्कण्डेयोक्ताः कर्मविपाकाश्च । यथा, तत्रैव १५ अध्याये उक्ताः ।

"पतितात् प्रतिगृह्यार्थं खरयोनिं व्रजेद्द्विजः ।
नरकात् प्रतिमुक्तस्तु कृमिः पतितयाजकः ॥
उपाध्यायस्यलीकन्तु कृत्वा श्वा भवति द्विजः ।
तल्पायां मनसा वाऽपि तद्द्रव्य चाप्यसंशयम् ॥
गर्द्दभो जायते जन्तुः पित्रोश्चाप्यवमानकः ।
मातापितरावाक्रुश्य शारिका सम्प्रजायते ॥
भ्रातुः पत्न्यवमन्ता च कपोतत्वं प्रपद्यते ।
तामेव पीड़यित्वा तु कङ्कत्वं प्रपद्यते ॥
भर्त्तपिण्डमुपाश्नन् यस्तदिष्टं न निषेवते ।
सोऽपि मोहसमापन्नो जायते वानरो मृतः ॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते कृमिः ।
असूयकश्च नरकात् मुक्तो भवति राक्षसः ॥
विश्वासघ्नन्ता च नरो मीनयोनौ प्रजायते ।
धान्यं यवांस्तिलान्माषान् कुलत्थान् सर्षपांस्तथा ॥
कलायान् कलमान् मुद्गान् गोधूमानतसीस्तथा ।
शस्यान्यन्यानि वा हृत्वा मोहाच्छन्तुरचेतनः ॥
सञ्जायते महावक्त्रो मूषिको वभ्रुसन्निभः ।
परदारानभिमर्षात्तु एको घोरोऽभिजायते ।
श्वा गृध्रश्च वको गृध्रो व्याड़ः काङ्क्षस्तथा क्रमात् ।
भ्रातृभार्य्याञ्च दुर्बुद्धिर्योधर्षयति पापकृत् ॥
पुंस्कोकिलत्वमाप्नोति स चापि नरकाच्युतः ।
सखिभार्य्यां गुरोर्भार्य्यां राजभार्य्याञ्च पापकृत् ।
प्रधर्षैव हि कामात्मा शूकरो जायते नरः ।
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् कृमिः ॥
पुनर्दाता च कन्याया कृमिरेवोपजायते ।
देवता पितृविप्राणामदत्त्वा योऽन्नमश्नुते ।
प्रमुक्तो नरकात् सोऽपि वायसः सम्प्रजायते ॥
श्लेष्मं पित्तसमं वापि भ्रातरं योऽवमन्यते ।
नरकात् सोऽपि विभ्रष्टः क्रौञ्चयोनौ प्रजायते ॥
शूद्रस्य ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ।
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत् ।

सूकरः कृमिको मद्गुखण्डालस्य प्रजायते ॥
अक्षतश्चोऽधमः पुंसां विमुक्तो नरकान्नरः ।
क्षतघ्नः कृमिकः कीटः पतङ्गो वृश्चिकस्तथा ।
मत्स्यस्तु वायसः कूर्म्मः पुक्कशो जायते ततः ॥
अश्रस्रं पुरुषं हत्वा नरः सञ्जायते खरः ॥
कृमिः स्त्रीवधकर्त्ता च बालहन्ता च जायते ॥
भोजनं चोरयित्वा तु मक्षिका जायते नरः ॥
तत्राप्यस्ति विशेषो वै भोजनस्य गुणव्रतत् ।
हृत्वान्नन्तु स मार्जारो जायते नरकाच्युतः ॥
तिलपिण्याकसंमिश्रमन्नं हृत्वा तु मूषिकः ॥
घृतं हृत्वा तु नकुलः काको मद्गुरजामिषम् ॥
मत्स्यमांसापहृत् काकः श्येनो मार्गामिषापहृत् ।
वीचीकाकस्त्वपहृते लवणे दधनि कृमिः ॥
चोरयित्वा पयस्त्वापि बलाका सम्प्रजायते ॥
यस्तु चोरयते तैलं तैलपायी स जायते ॥
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिकः ।
चोरयित्वा तु निष्पावान् जायते गृहगोलदः ॥
आसवस्त्वोरयित्वा तु तित्तिरित्वमवाप्नुयात् ॥
अयो हृत्वा तु पापात्मा वायसः सम्प्रजायते ।
हृते कांस्ये च हारीतः कपोतो रूप्यभाजने ।
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ॥
पत्नीर्वा चोरयित्वा तु ककरत्वञ्च गच्छति ।
कोषकारस्य कौषेये हृते वस्त्रेऽभिजायते ॥
दुकूले शार्ङ्गिके पापो हृते चैवांशुके शुकः ।
तथैवाजाविकं हृत्वा वस्त्रं क्षौमञ्च जायते ॥
कार्पासिके हृते क्रौञ्चो वाल्कहर्त्ता वकस्तथा ।
मयूरो वर्णकान् हृत्वा शाकपक्षश्च जायते ॥
जीवञ्जीवकतां याति रक्तवस्त्रापहृन्नरः ।
कुकुन्दरिः शुभान् गन्धान् वासो हृत्वा शुभो भवेत् ॥
गृध्रः फलापहरणात् काष्ठस्य घुणकीटकः ।
पुष्पापहृद्विहङ्गश्च पङ्गुर्यानापहृन्नरः ॥
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः ।
भूहर्त्ता नरकान् गत्वा रौरवादीन् सुदारुणान् ।
तृणगुल्मलतावल्लित्वक्सारतरुजां क्रमात् ।
प्राप्य क्षीणाल्पपापस्तु नरो भवति वै ततः ॥
कृमिः कीटः पतङ्गोऽथ पक्षी तोयचरो मृगः ।
गोत्वं प्राप्य च चण्डालपुक्कशादि जुगुप्सितम् ।
षण्ढवन्धो बधिरः कुष्ठी यक्ष्मणा च प्रपीड़ितः
मुखरोगात्शिरोगैश्च गुदरोगैश्च बाधते ॥
अपस्मारी च भवति शूद्रत्वं च स गच्छति ॥
एष एव क्रमो दृष्टो गोसुवर्णापहारिणाम् ।
विद्यापहारिणश्चोग्रा निष्कृयश्चिनो गुरोः ॥
जायामन्यस्य पुरुषः पारक्यां प्रतिपादयन् ।
प्राप्नोति गृध्रतां मूढ़ो यातनाभ्यः परिच्युतः ॥
यः करोति नरो हीममसमिद्धे विभावसौ ।
सोऽजीर्णाद्याधिदुःखार्त्तो मन्दाग्निः संप्रजायते" ॥१॥
नानापुराणोक्तकर्म्मविपाकसंक्षेपमाह ।

१ । अकिञ्चनता । यः किल प्रभूतधनवानपि धर्म्मनिन्दको देवाग्निब्राह्मणदरिद्रेभ्यः किञ्चिदपि धनं न दत्तवान् । स तु आयुषोऽवसाने मृतो यमदूतैः प्रपीड़िती लोलाख्यनरके, सर्व्ववस्त्वान् पशुव्रपि निराशः परमं दुःखमाप्नोति । ततो जन्मान्तरं परिगृह्याकिञ्चनत्वमासाद्य जीर्णवस्त्रधरः बहुना क्लेशेनापि स्वजीविकां निष्पादयेत् ॥

२ । अपुत्रता बहुपुत्रता च । यस्तु गवीमुखात् भोजनीयद्रव्यं आहृत्य दूरतो विसर्जयेत् । स मन्वन्तरत्रयं निर्जने घोरे मरुप्रभृतिस्थले उषित्वा पुनर्जन्मान्तरं प्राप्य पुत्रविहीनो बहुपुत्रो वा भवेदिति ॥

३ । अर्शोरोगः । यः खलु पतिव्रतां धर्म्मनियतां ऋतुस्नातां पत्नीं नोपगच्छेत् । यश्च आत्महा भ्रूणहा गोहन्ता च स्यात् । स मृतः गाढ़ान्धतमसावृतं तामिस्राख्यं नरकं गत्वा कर्म्मक्षयम् प्राप्य जन्मान्तरेण पुनर्मानुषयोनिमभिगम्य अर्शोरोगेणाक्रान्तो भवेदिति ॥

४ । अल्पायुःसन्तानता । यो हि तृषार्त्तां वारिपानरतां गां निवारयति । अनेनैव पापेन तस्य अल्पायुषः सन्ताना भवेयुः ॥

५ । अस्रशरीरोगः । यस्तु ऋतुस्नातां स्त्रियं क्रोधादप्रीत्या वा नोपगच्छति । स मृतः पूयशोणितसंमिश्रे नरके प्रपीड़ितः पुनर्मानुषत्वं प्राप्य अस्रशरीरोगाक्रान्तो जायते इति ॥

६ । उन्मादरोगः । यस्तु ब्राह्मणं वैद्यवं पितरौ द्विजादिकं मार्गार्हं नार्चयेत् परं निन्देत् स मृतः पुरीषाख्ये नरके अधःशिरा नाना दुःखभाक् भवेत् । ततः कर्म्मक्षये मानुषीं तनुमुपलभ्य उन्मादरोगवान् जायते । तथा येन च ब्राह्मणेषु गुरौ च दम्भाचारः कृतः तेभ्यः स्मृतिभ्रमकराणि द्रव्याणि च दत्तानि सोऽपि जन्मान्तरे उन्मादरोगवान् भवेदिति ॥

७ । कासः । कासस्तु पञ्चविधः । येन कर्म्मणा यद्रूपो भवेत्तदुच्यते । अतिकठोरैर्मिथ्यावाक्यैर्यस्तु लोकं पीड़येत् स पित्तप्रबलकेन कासेन पीड़ितो भवेत् । यो हि ब्राह्मणस्थानविनष्टकारी स वातकासेन पीड़ितो भवेत् । यस्तु जलाशयध्वंसकारी स श्लेष्मकासेन पीड़ितः स्यात् । यो हि ब्रह्म विष्णुं शिवञ्च भेदबुद्ध्या पश्यति स सन्निपातोत्थकासपीड़ितः स्यात् । यश्च विना पशुं हत्वा तन्मांसभक्षणकारी सर्व्वदोषोत्थकासेन गृह्यते । यदुक्तं तन्त्रे पुराणे च,—
"अयज्ञेन पशुं हत्वा भुङ्क्ते मांसन्तु यो नरः ।
सर्व्वदोषोत्थकासेन गृह्यते गृध्रराट् भूपते!" ॥

८ । कुब्जत्वम् । यदुक्तं पुराणेषु ।
"देवतापतिमां दृष्ट्वा यस्तां नैवाभिवादयेत् ।
ब्राह्मणञ्च गुरुं श्रेष्ठं ब्रह्मचारितपस्विनम् ।
श्मशाने जायते दुष्टः काकगृध्रोपसेवितः ॥
भुक्त्वा कालमशेषञ्च मानुषत्वमवाप्य सः ।
कुब्जत्वमश्नुते तस्मात् कर्म्मणो मानुषं भुवम्" ॥

९ । गर्भस्रावः । या काचित् नारी हिंसापरतन्त्रा सती सपत्नादीनामन्यासां स्त्रीणां दुष्टौषधादिभिर्दुर्म्मन्त्रैर्वा गर्भं अपत्यानि च नाशयति सा नरकान्निर्मुक्ता पुनर्मानुषीं योनिमासाद्य पुत्रान्तरेण ऐश्वर्य्यवत्यपि गर्भस्रावदुःखैः प्रपीड़िता भवेत् ।

१० । गलगण्डः । यः खलु मोहाद् गुरुस्त्रीकण्ठदर्शनं कृतवान् । स मृतो यमकिङ्करैः निर्जने प्रान्तरे देशे दिव्यवर्षायुतत्रयं पात्यते । पुनर्जन्म समासाद्य च गलगण्डरोगाक्रान्तः सीदेत् ॥

११ । ग्रहणी । ये च धनलुब्धकाः प्रभूतधनसंग्रहं कृत्वा न यच्छन्ति न चाश्नन्ति न किमपि धर्म्मकार्य्यं कुर्व्वन्ति । तथा ये च परस्वापहारिणः तथा अदुष्टामपतितां भार्य्यां ये च यौवने परित्यजन्ति ते मृताः पूरीषाख्ये नरके कल्पकोटिशतं दग्धाः कर्म्मान्ते मानुषीं योनिमासाद्य ग्रहणीरोगाक्रान्ता अवसीदेयुः ॥

१२ । छिन्ननासिकता । श्रुतिस्मृतिकथाविघ्नकारी देवनिन्दको हि मृत्युं प्राप्य नैर्ऋते पश्चिमे भागे स्थितायां पिङ्गलेति नगर्य्यां पिशाचैः सह बहुकालमुषित्वा महाघोरं दुःखञ्च भुक्त्वा कर्म्मान्ते मानुषयोनिमासाद्य छिन्ननासिको जायते ॥

१३ । छिन्नहस्तता, छिन्नपादता च । यस्तु पितरौ गुरुं विनापराधतो दृढ़ं वा ताड़येत् स मृतो यमलोके बहूनि कष्टान्यनुभूय छिन्नहस्तश्छिन्नपादो वा इह जायते ॥

१४ । जलोदरः । यदुक्तं पुराणेषु ।
"ब्रह्मविष्णुमहेशेषु भिन्नभावं करोति यः ।
भक्षते स तु दुष्टात्मा जलोदररुजा ततः" ॥

१५ । दौर्भाग्यम् । येन च सर्व्वासु ऋतौयासु वेलासु तैलस्पर्शः क्रियते स दुर्भगत्वमाप्नोतीति ॥

१६ । नेत्ररोगः । दीपहरणकर्त्ता परस्त्रीप्रेक्षकः कामतः पररतिदर्शनकारी च नेत्ररोगेणाक्रान्तो भवेत् ॥

१७ । पक्षरोगः । यो हि सशस्त्रः सन् शस्त्ररहितं पुरुषं हन्ति । स मूढ़ः आयुःशेषे क्लेशाख्ये निरये उषित्वा महादुःखेन पच्यते । ततो रासभयोनौ ततः क्रमशो मृगव्याघ्रयोनौ सम्भूय शस्त्रेण हन्यते । ततः सारमेयो भूत्वा मत्स्ययोनौ जायते । ततो मानुषीं योनिमासाद्य अनेनैवरोगेण पीड्यते ॥

१८ । पाण्डुरोगः । यः खलु परभार्य्यारतः परस्त्रीरमणप्रियः स मृतो यमकिङ्करै बहुधा दुःखं प्रापितः पुनः कर्म्मपाकेन मानुषीं योनिमासाद्य पाण्डुरोगेण म्रियते ॥

१९ । प्रदरम् । या योषित् बुभुक्षितं पतिं त्यक्त्वा पत्यनुमतिं विना पूर्व्वं भुङ्क्ते सा मृता नरकं भुक्त्वा दशवर्षाणि वायसी ततः शुकी ततो मानुषी भूत्वा श्वेतप्रदरयुक्ता भवेत् ॥

२० । वन्ध्यता । येन जलपिपासुर्वत्सः प्रतिनिवृत्तः । यस्तु अदक्षिणं व्रतं करोति यो हि मिश्रफलादिकं प्राप्य देवायानिवेद्य भुङ्क्ते यः खलु मैथुनीभावमवलोक्य विघ्नं कुरुते ते सर्व्वे वन्ध्यत्वमाप्नुवन्तीति ॥

२१ । भगन्दररोगः । आचार्य्यभार्य्यागन्तारो-नराधमाः स्त्रीबालवृद्धधनापहारिणश्च मृत्युमधि

गम्य विण्मलाख्ये नरके बहुदुःखं प्राप्य जन्मान्तरे भगन्दररोगेणाक्रान्ता भवन्ति ॥

२२। मूचक्षुरम्। येन मूढ़ेन विधवागमनं मद्यपानं वा कृतम्। स मृतो नरकं प्राप्य कर्म्मान्ते शरीरनाशकारिणा अनेन रोगेणाक्रान्तो भवेत्।

२३। मृतभार्यता। यस्तु ज्येष्ठं भ्रातरमतिक्रम्य उद्वहेत् स मृतभार्य्यो जायेत। यस्तु सप्तम्यां तैलं स्पृशति तस्य ज्येष्ठा भार्य्या विनश्यति ॥

२४। मेहः। यदुक्तं पुराणेषु

"मेहाश्च विंशतिः ख्याताः पृथक्कर्म्मप्रभावजाः।
तेषां नामान्यहं वक्ष्ये क्रमादुत्पद्यते यतः ॥
मधुमेहः सान्द्रमेहः सुराशुक्रोदकस्तथा।
इक्षुः सिकतसीधुश्च सितमेहस्तथैव च ॥
फेनः क्षीरश्च नीलश्च हारिद्रः कालसंज्ञकः।
वसारक्तश्च माञ्जिष्ठो मञ्जाक्षारस्तथा गजः ॥
सदृश्यस्योपदेशेन ज्ञात्वा मेहान् पृथक् पृथक्।
नामानुसारतः पूर्व्वं कर्म्म ज्ञात्वा विधिश्चरन्।
पूर्व्वं मैथुनहृदयस्तु शौकरीयोनिमाव्रजेत् ॥
तस्यान्ते मानुषीं प्राप्य जलमेहार्दितो भवेत् ॥
माहागमी बलान्मोहात् मधुमेही भवेन्नरः।
रजकीगमनाच्चैव क्षारमेही प्रजायते ॥
सतीविपर्य्ययं कृत्वा सान्द्रमेहान्वितो भवेत्।
रोगिणीगमनान्मर्त्यो भवेन्माञ्जिष्ठमेहवान् ॥
मित्रस्त्री धर्षिता येन स भवेच्छुक्रमेहवान् ॥
चतुष्पदाभिगमने भवेत् सिकतमेहवान् ॥
स्वर्णहर्त्ता क्षीरमेही सितमेही सुरारतः।
कालमेहो भवेत्सोऽपि पुष्यवत्याश्च धर्षणात् ॥
रजस्वलायां रतिमद्रक्तमेहार्दितो भवेत्।
मज्जमेहयुतः सोऽपि योऽन्त्यजागमनञ्चरन् ॥
इक्षुमेहस्तिदुर्वृत्तो विधवागतिदोषतः।
ब्राह्मणीगमनाद्धेही हस्तिमेहेन मेहति ॥
अज्ञतागमनासक्तो हरिद्राभश्च मेहति ॥
मातरं येऽभिगच्छन्ति भगिनीश्चात्मनः सुताम् ॥
स्वश्रूञ्चैवाच्छतारक्तां भ्रातृभार्य्याश्च मातुलीम्।
गुरुस्त्रीं राजपत्नीश्च मित्रस्त्रीं वा कुटुम्बिनीम्।
मृता वैवस्वतपुरीं यान्ति भूतैः प्रपीड़िताः ॥
तावन्ते तत्र दुर्वृत्ता मत्तः शृणु वदामि ते ॥
अङ्गारराशौ प्रक्षिप्य तान् दहन्ति यमाज्ञया।
दूतास्तु महतीं घोरां ज्वलन्तीमायसीं शिलाम्।
खादयन्ति च तान् पश्चात् नरके च क्षिपन्ति वै ॥
नरकान्ते पुनस्तेऽपि मृताः स्युः शूकरा भृशम् ॥
शूकराः पञ्चवर्षाणि दशवर्षाणि कुक्कुराः।
पिपीलिकास्त्रयो मासा ऋक्षिकाश्चाब्दमात्रकम्।
भूत्वा प्रयान्ति गोयोनौ सरुजा विफलेन्द्रियाः ॥
तत्राधर्म्मक्षयं कृत्वा ततो मानुषयोनिषु।
प्रमेहगदवन्तः स्युः प्राप्नुवन्ति मनोव्यथाम्" ॥

२५। यक्ष्मरोगः। विप्रहन्ता न्यासापहर्त्ता वृत्तिच्छेदकारी प्रजापीड़को गुरुविद्वेषी मूढ़ो यक्ष्मकासाक्रान्तो भवेत् ॥

२६। रक्तपित्तम्। अतिदुराचारी परद्रव्याभिलाषी मित्रबन्धुघ्नश्चानेनैव रोगेण पीड़ितो भवेत् ॥

२७। श्वेत्यात्वम्। या नारी मृते भर्त्तरि परपत्यभिलाषिणी सा मृता यमलोके तप्तं आयसं पुरुषमालिङ्गन्ती अतिघोरं नरकदुःखमनुभूय जन्मान्तरे वेश्या भूत्वा अश्लेषपुरुषैः रममाणा अश्लेषश्लेष्मधिगच्छेत् ॥

२८। वैधव्यम्। या खलु यौवनेनातिगर्व्विता रमणी विरूपत्वात्स्वभर्त्तारं पतिं दिवा निन्दति रात्रौ शय्यां न भजते आज्ञप्ता च रुष्टा भवति सा जन्मान्तरं प्राप्य वैधव्ययन्त्रणया पीड़िता भवेत् ॥

२९। श्वासकासः। श्वासकासस्तु महोर्द्ध्वच्छिन्नतमकक्षुद्रभेदात् पञ्चधा। १। यस्तु यज्ञमनासाद्य श्वासं निरुध्य पशुं हन्ति मोहात् तन्मांसादिकं भक्षयति स महाश्वासेन पीड्यते। २। पुराणकथासमये यस्तु अन्यवाक्यं वदेत् स ऊर्द्ध्वश्वासेन निगृह्यते। ३। निषिद्धदानग्रहणात् छिन्नश्वासयुतो भवेत्। ४। यो हि ज्ञास्त्रार्थं मृषा दूषयति स तमकश्वासैः पीड्यते। ५। पापविप्लुतो हि जीवः क्षुद्रश्वासैर्गृह्यते ॥

३०। हृद्रोगः। यस्तु लोभात् द्वेषाद्वा परपीड़ाप्रदायको भवेत् यस्तु प्रजानां मर्म्मव्यथां जनयेत् स मृतो दुर्वहं नरकमधिगम्य कर्म्मान्ते अतिदारुणैर्हृद्रोगैः पीड़ितो भवेदिति ॥ * ॥)

कर्म्मशीलः, त्रि, (कर्म्म शीलं कर्म्मकरणरूपस्वभावो यस्य। कर्म्म शीलयतीति वा।) यः फलनिरपेक्षः स्वभावतः कर्म्म करोति सः। तत्पर्य्यायः। कार्म्मिः २। इत्यमरः। ३। १। १८॥

कर्म्मशूरः, त्रि, (कर्म्मणि शूरः दक्षः।) कर्म्मठः। फलपर्य्यन्तकर्म्मसमापकः। इत्यमरः। ३।१।१८॥

कर्म्मसचिवः, पुं, (कर्म्मणि कर्म्मसु वा सचिवः सहायः।) कर्म्मोपयुक्तसचिवः। अच्छपटलाध्यक्षादिः। इत्यमरः। २। ८। ४॥

कर्म्मसन्न्यासिकः, पुं, (कर्म्मणां सन्न्यासः स अस्यास्य इति ठन्।) यतिः। सन्न्यासी। इति हलायुधः। २। २३९॥

कर्म्मसाक्षी, [न्] पुं, (कर्म्मणां साक्षी। यद्वा कर्म्म साक्षात् पश्यति प्रतक्षं करोतिति।) सूर्य्यः। इति हेमचन्द्रः॥ (उक्तञ्च वैदिकक्रियापद्धतौ यथा, "सूर्य्यः सोमो यमः कालो महाभूतानि पञ्च च। एते शुभाशुभस्येह कर्म्मणो नव साक्षिणः" ॥ क्रियासाक्षात्कारिणि, त्रि। यथा,—महाभारते। १। ४७। २९।

"हृदि स्थितः कर्म्मसाक्षी क्षेत्रज्ञो यस्य तुष्यति"॥)

कर्म्मक्षमः, त्रि, (कर्म्मणि कर्म्मसु वा क्षमः समर्थः।) कर्म्मकरणसमर्थः। तत्पर्य्यायः। अलंकर्म्मीणः २। इत्यमरः। ३। १। १८॥

कर्म्मान्तः, पुं, (कर्म्मणः जीवकृतसुकृतदुष्कृतक्रियायाः अन्तो यत्र। कर्म्मणः कृषिकार्य्यस्य तत्फलस्य धान्यादिसंग्रहरूपक्रियायाः अन्तो यत्र वा।) कर्म्मभूः। कृषभूमिः। इति हेमचन्द्रः॥ ("अहन्यहन्यवेक्षेत कर्म्मान्तान् वाहनानि च" ॥ इति मनुः। ८। ४१९॥)

कर्म्मारः, पुं, (कर्म्म लोहनिर्म्माणादिकार्य्यं अर्हति गच्छति प्राप्नोति वा। कर्म्म + अर्ह + अण्।) कर्म्मकारः। कामार इतिभाषा॥ (यथा, अथर्व्ववेदे। ३। ५। ६।

"ये धीवानो रथकाराः कर्म्मारा ये मनीषिणः" ॥ तथा, मनुः। ४। २१५।

"कर्म्मारस्य निषादस्य रङ्गावतारकस्य च" ॥)

वंशजः। वाँश इति ख्यातः। कर्म्मरङ्गः। इति राजनिर्घण्टः। कामरङ्गः इति भाषा॥

कर्म्मार्हः, पुं, (कर्म्म अर्हतीति। अर्ह + अण्।) पुरुषः। इति राजनिर्घण्टः। क्रियायोग्ये त्रि॥

कर्म्मिष्ठः, त्रि, (अतिशयेन कर्म्म कर्तुं समर्थः कर्म्मी वा। कर्म्म + इष्ठन्। इनेर्लुक्।) क्रियावान्। अतिशयकर्म्मविशिष्टः। इति व्याकरणम्॥

कर्म्मी, [न्] त्रि, (कर्म्मास्यस्य "व्रीह्यादिभ्यश्च"। ५। २। ११६ इति इनिः।) कर्म्मविशिष्टः। ("यत्कर्म्मिणो न प्रवेदयन्ति रागात्तेनातुराः स्त्रीगलोकाश्चवन्ते" ॥ इति मुण्डकोपनिषदि। १। २। ९। यथा च, भागवते १। ३। ८।

"तृतीयमृषिसर्गञ्च देवर्षित्वमुपेत्य सः।
तन्त्रं सात्वतमाचष्ट नैष्कर्म्म्यं कर्म्मिणां यतः" ॥)

कर्म्मोरः, पुं, (कर्म्म + ईरन्।) किर्म्मीरवर्णः। इत्यमरटीका॥

कर्म्मेन्द्रियं, क्ली, (कर्म्मणां गमनादिपञ्चविधक्रियाणां सम्पादनाय इन्द्रियं कर्म्मनिमित्तं इन्द्रियं वा।) कर्म्मनिष्पादकविषयिपञ्चकम्। यथा। वाक् १ पाणिः २ पादः ३ पायुः ४ उपस्थः ५। इति वेदान्तः॥ (यथा च, मनुः। २। ९१।

"बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्व्वकाः।
कर्म्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते" ॥)

कर्व्व दर्पे। इति कविकल्पद्रुमः॥ (भ्वां-पं-अकं-सेट्।)

कर्व्वः, पुं, (किरति विक्षिपति चित्तं विषयेषु। कॄ + "कॄग-शॄदॄभ्यो वः"। उणां। १। १५५ इति वः।) कामः। (क्षणाति हिनस्तीति। कॄ + वः।) उन्दुरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कर्व्वटं, क्ली, (कर्व्वं सुन्दरत्वात् सर्व्वं चटति प्राप्नोतीति। पृषोदरादित्वात् चलोपे साधुः।) पुरम्। नगरम्। इति जटाधरः॥

कर्व्वटः, पुं क्ली, (कर्व्व + चटन्प्रत्ययः।) द्विशतग्राममध्ये मनोरमस्थानम्। ग्रामशतस्थजनाः क्रयविक्रयादिना सेवादिना वा येन ग्रामेण जीवन्ति सः। इति केचित्॥ चतुःसमग्रामः। इत्येके॥ चतुःसमं गृहस्थानम्। इत्यपरे॥ इत्यमरटीकायां भरतः॥ चतुःशतग्रामसंग्रहस्थानम्। इति सारसुन्दरी॥ (तथा हि याज्ञवल्क्यः। २। १६७।

"धनुःशतं परीहारो ग्रामक्षेत्रान्तरं भवेत्।
द्वे शते कर्व्वटस्य स्यात् नगरस्य चतुःशतम्" ॥

देशभेदः। यथा, महाभारते। २। ३०। २२।

"ताम्रलिप्तं च राजानं कर्व्वटाधिपतिं तथा।
सुह्मानामधिपञ्चैव ये च सागरवासिनः" ॥)

कर्व्वुरः, पुं, (क्षणाति हिनस्ति प्राणिनः। किरति विक्षिपति जीवानिति वा। कॄ + "कॄगशॄदॄच-

तिभ्यः ष्वरच्" । उणां । २ । १२३ । इति ष्वरच्।) राक्षसः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ व्याघ्रः । इति मेदिनी ॥ (यथा, उणादिटीकायां "कर्व्वुरो व्याघ्रराक्षसोः" । २ । १२३ ॥)

कर्व्वरी, स्त्री, (कर्व्वर + षित्वात् ङीष् ।) शिवा । इति विश्वमेदिन्यौ ॥ हिङ्गुपत्री । इति जटाधरः ॥ (व्याघ्री । राक्षसी । इत्युणादिवृत्तिः । २ । १२३ ॥)

कर्व्वुरः, पुं, (कर्व्वति हिनस्ति सदर्पो भवति वा । कर्व्व दर्पे हिंसायाञ्च । "मन्नुरादयश्चेति" + उरच् ।) राक्षसः । इति शब्दार्णवः ॥ चित्रवर्णः । इत्यमरः । २ । ९ । ९४ ॥ शटी । इति भरतः ॥

कर्व्वूरः, पुं, (कर्व्व + खर्व्वूरादित्वात् ऊरः । उणां १ । ८२ ।) राक्षसः । शटी । इत्यमरः । २ । ९ । ९४ ॥

कर्षूः, पुं, (कृष् + यत् ।) कर्चूरः । इति राजनिर्घण्टः । कचूर इति हिन्दीभाषा ॥

कर्षः, पुं क्ली, (कृष् विलेखने पचाद्यच् । कर्मणि करणे वा घञ् ।) षोडशमाषकपरिमाणम् । अष्टौतिरत्तिकाः । तत्पर्य्यायः । अक्षः २ । इत्यमरः । २ । ९ । ८९ ॥ वैद्यकमते तोलकद्वयम् । तत्पर्य्यायः । सुवर्णम् २ अक्षः ३ विड़ालपदकम् ४ पिचुः ५ पाणितलम् ६ उडुम्बरम् ७ तिन्दुकम् ८ कवड़ग्रहः ९ । इति परिभाषा ॥ दशमाषकः । इति राजनिर्घण्टः ॥

("कोलद्वयञ्च कर्षः स्यात् स प्रोक्ता पाणिमानिका। अक्षः पिचुः पाणितलं किञ्चिपाणिश्च तिन्दुकम्" ॥ इति भाग्डधरे पूर्व्वखण्डे । १ अध्याये ॥)

कर्षः, पुं, (कृष् + भावे घञ् ।) कर्षणम् । इति मेदिनी ॥ विभीतकवृक्षः । इति शब्दरत्नावली ॥

कर्षकः, त्रि, (कर्षति भूमिमिति । कृष् + ण्वुल् ।) कृषिजीवी । कृषाण इति भाषा ॥

("सुखमापतितं सेवेत् दुःखमापतितं सहेत् । कालप्राप्तमुपासीत ह्रस्यानामिव कर्षकः" ॥ इति महाभारते । ३ । २५८ । १५ ॥)

तत्पर्य्यायः । क्षेत्रजीवः २ कृषिकः ३ कृषीवलः ४ । इत्यमरः । २ । ९ ९ ॥ कार्षकः ५ । इति तट्टीका ॥ आकर्षणकर्त्ता च ॥

कर्षणं, क्ली, (कृष् + भावे ल्युट् ।) कृषिकर्म्म । लाङ्गलादिना भून्यादिखननम् । इति हेमचन्द्रः । चास इति भाषा ॥ आकर्षणम् । टानन् इति भाषा ॥ (प्रोषणम् । पीड़णम् । यथा मनुः ७ । ११२ । "शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा । तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात्" ॥)

कर्षणिः, स्त्री, (कृष् + अनिः ।) असती । इत्युणादिकोषः ॥

कर्षणी, स्त्री, (कर्षण + गौरादित्वात् ङीष् ।) स्त्रीरिणीवृक्षः । इति राजनिर्घण्टः ॥

कर्षफलः, पुं, (कर्षः कर्षमात्रं फलं यस्य ।) विभीतकवृक्षः । इत्यमरः । २ । ४ । ५८ ॥ (अस्य पर्य्यायाः यथा,—

"विभीतकस्त्रिफलकः स्यात्कर्षः कर्षफलस्तु सः । कलिद्रुमो भूतवासस्तथा कलियुगालयः" ॥

गुणाश्चास्य विभीतकशब्दे ज्ञेयाः । इति भावप्रकाशस्य पूर्व्वखण्डे । १ भागे ॥)

कर्षफला, स्त्री, (कर्षफल + टाप् ।) आमलकीवृक्षः । इति रत्नमाला ॥ (आमलकीशब्देऽस्या गुणादिकं ज्ञातव्यम् ॥)

कर्षार्द्धं, क्ली, (कर्षस्य अर्द्धम् ।) तोलकपरिमाणम् । इति वैद्यकपरिभाषा ॥ ("कर्षार्द्धं वा कणाशुण्ठ्योः" । "कर्षः कर्षार्द्धमथो पलं पलद्वयमथाकर्षश्च" ॥ इति वैद्यकचक्रपाणिसंग्रहव्याख्याधिकारकासाधिकारयोः ॥)

कर्षिणी, स्त्री, (कर्षति इति । कृष् + णिनिस्ततो ङीप् ।) स्त्रीरिणीवृक्षः । अश्वमुखबन्धनरज्जुस्थितलौहम् । तत्पर्य्यायः । खलीनः २ कवीयम् ३ कविका ४ । इति जटाधरः ॥ (त्रि । मनोहारी । यथा रघुः १९ । ११ ।

"घ्राणकान्तमधुगन्धकर्षिणीः
पानभूमिरचनाः प्रियासखः" ॥)

कर्षूः, पुं, (कृष् + "कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः" । उणां १ । ८२ । इति ऊः ।) वार्त्ता । करीषाग्निः । इत्यमरः । ३ । ३ । २२१ ॥ वार्त्ता अत्र कृषिः । इति रमानाथः ॥ जीविका । इति भरतः ॥

कर्षूः, स्त्री, (कृष् विलेखने + "कृषिचमितनीति" ऊः उणां १ । ८२ ।) कुल्या । अल्पा कृत्रिमा सरित् । इत्यमरः । ३ । ३ । २२१ ॥ नदीमात्रम् । इति रत्नकोषः ॥ इक्षुखातः । इति मेदिनी ॥ तद्यथा। चतुरङ्गुलपृथ्वीस्तावदन्तं रास्तथाधः खाता वितस्त्यायतास्तिस्रः कर्षूः कुर्य्यात् कर्षूसभीपे अग्नित्रयमुपसमाधाय परिस्तीर्य्य तत्रैकैकस्मिन्नाज्यतित्रयं जुहुयात् । इति आद्धविवेक धृतविष्णुसूत्रम् ॥

कर्हि, व्य, (किम् + "अनद्यतने र्हिलन्यतरस्याम्" । ५ । ३ । २१ इति । हिल् कादेशः ।) कदा । कस्मिन् काले । इति व्याकरणम् ॥ कखन कबे इति भाषा ॥ (यथा, ऋग्वेदे ६ । ३५ । २ ।

"कर्हिस्वित्तदिन्द्र यद्भिर्भवन्वी-
रैवीरान् नीलयासे जयाजीन्" ॥)

कर्हिचित्, व्य, (कर्हि च चिच्चेति विग्रहः । पाणिनिमतानुसारेण भिन्नपदद्वयम् मुग्धबोधमते तु "किमः क्यङ्क्याच्विनौ" । इति चित् ।) कस्मिंश्चित् काले । कोनकाले इति भाषा । तत्पर्य्यायः । जातु २ कदाचित् ३ । इति हेमचन्द्रः ॥ (यथा, भागवते १० । ८४ । १३ ।

"यस्यात्मबुद्धिः कुणपे त्रिधातुके
स्वधीः कलत्रादिषु भौम इज्यधीः ।
यत्तीर्थबुद्धिः सलिले न कर्हिचित्
जनेष्वभिज्ञेषु स एव गोखरः" ॥)

कल, त् क गतौ । सङ्ख्यायाम् । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) अन्त्यस्थलतीयोपधः । कलयति कालं धीरः । इति दुर्गादासः ॥

कल, ङ सङ्ख्यानयोः । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अकं च-सेट् ।) ङ कलते दिवसं दक्षः गणयतीत्यर्थः । रुत् शब्दः । इति दुर्गादासः ॥

कल, क नुदौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क कालयति । नुदिरिति नुद जौश् प्रेरणे इत्यस्य औणादिककिप्रत्यये रूपम् । इति दुर्गादासः ॥

कलं, क्ली, (कड़ति माद्यति अनेन । कड़ मदे + "हलश्च" । ३ । ३ । १२१ । इति घञ् । संज्ञापूर्व्वकत्वात् वृद्धभावः । डलयोरैक्यत्वम् ।) सुक्रम् । इति मेदिनी ॥ कोलिदन्तः । इति शब्दचन्द्रिका ॥

कलः, पुं, (कल + भावे घञ् वृद्धभावः ।) मधुरास्फुटध्वनिः । इत्यमरः । १ । ७ । २ ॥

("जगौ कलं वामदृशां मनोहरम्" ॥ इति भागवतम् । १० । २९ । ३ ॥) सालदन्तः । इति राजनिर्घण्टः ॥

कलः, त्रि, (कलयति मान्यं नयति ज्ञाठराग्निम् । कल + णिच् + अच् । धातूनामनेकार्थत्वात् विशेषतः कलिहलिरित्युक्तेश्च तथात्वम् ।) अजीर्णः । इति मेदिनी ॥ (अव्यक्तमधुरध्वनिः । यथा रघुः । १ । ४१ । "सारसैः कलनिर्हादैः क्वचिदुन्नमितानगौ" ॥)

कलकः, पुं, (कलते इति । कल + ण्वुल् । स्वार्थे कन् वा ।) शकुलमत्स्यः । इति हेमचन्द्रः ॥ (शकुलशब्देऽस्य गुणादयोऽवगन्तव्याः ॥)

कलकण्ठः, पुं, (कलप्रधानः कण्ठो यस्य ।) कलध्वनिः । हंसः । पारावतः । पिकः । इति मेदिनी ॥ (यथा, राजेन्द्रकर्णपूरे ३ । "युष्माकं रतिकान्तकाम्मुकलताक्रीड़ारकान्ते रुते, सोल्लासं कलकण्ठकण्ठकुहरोड्डूतेऽपि माभून्मनः" ॥)

कलकलः, पुं, (कलादपि कलः । युगपत्समसुत्थितबहुलशब्दानामेकीभूततया तुमुलत्वात्तथात्वम् । कलशब्दे + घञ् । वृद्धभावः । यद्वा कलः प्रकारः गुणवचनत्वात् प्रकारे द्वित्वम् ॥) कोलाहलः । (यथा, गीतगोविन्दे । १ । ३८ । "उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीड़त्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः" ॥) सालनिर्य्यासः । इति मेदिनी ॥

कलघोषः, पुं, (कलो मधुरो घोषो ध्वनिर्यस्य ।) कोकिलः । इति शब्दरत्नावली ॥

कलङ्कः, पुं, (कलयति इति । कल + क्विप् । कल् चासौ अङ्कश्चेति ।) चिह्नम् । अपवादः । ("उत्तमस्य विशेषेण कलङ्कोत्पादको जनः" ॥ इति कथासरित्सागरे । २४ । २०४ ॥) लौहमलम् । इति मेदिनी ॥

कलङ्कघः, पुं, (करेण कषति हिनस्ति नाशयति वा । बाहुलकात् खच् मुम् च रस्य लः कलेन गर्ज्जनेन कषति वा ।) सिंहः । इति शब्दमाला ॥

कलङ्घा, स्त्री, (कलङ्घ + टाप् ।) करतारी । इति शब्दरत्नावली ॥

कलङ्की, [न्] त्रि, (कलङ्कोऽस्यास्य । इनिः ।) अपवादग्रस्तः । यथा,—तिथ्यादितत्त्वे ।

"कलङ्की जायते विल्वे तिर्य्यग्योनिञ्च निम्बके" ।

चिह्नयुक्तः । लौहमलविशिष्टः ॥ चन्द्रः ॥

कलङ्करः, पुं, (कं जलं लङ्घयति गमयति भ्रामयतीत्यर्थः । लघि गतौ + णिच् + उरच् ।) आवर्त्तः । जलभ्रमः । इति त्रिकाण्डशेषः ॥

कलङ्कः, पुं, (कं जलं लङ्घयति । लघि + अच् ।) विभास्रहतमृगपक्षिणौ । इति त्रिकाण्डशेषः । ताम्रकूटः । दोक्ता तामाक् इति भाषा । यथा । विष्णुसिद्धान्तसारावल्यां वैद्यके । अथ धूमपानगुणाः ।

"कलङ्कसंवेष्टनधूमपानात्
स्याद्दन्तमुद्धिर्मुखरोगहानिः ।
कफघ्नमामञ्वरहानिरुक्तं
गान्धर्व्वविद्याप्रवणैकसेव्यम्" ॥

कलटं, क्ली, (कं जलं लटति आच्छादयति । आदयोतीति वा । क + लट् + अच् ।) गृहाच्छादनम् । इति शब्दरत्नावली । चाल इति भाषा ॥ कुटजमिति च पाठः ॥

कलतूलिका, स्त्री, (कं सुखं विषयत्वेन लाति गृह्णातीति कलः । कलं कामं तूलयति निष्कर्षति पूरयति वा या । कल + तूल निष्कर्षे पूरणे वा ण्वुल् । टापि अत इत्वम् ।) इक्षावली । कामुका । तत्पर्य्यायः । वाह्निनी २ लङ्घिका ३ । इति त्रिकाण्डशेषः ॥

कलत्रं, क्ली, (गड़ सेचने + "गड़ेरादेश्च कः" । उणां । ३ । १०६ । अत्रन् गकारस्य ककारश्च । डलयो रैकत्वस्मरणात् डस्य लः । यद्वा कलं जायते । जै + कः । यद्वा कल्यते ग्रिह्यते इति ।) कड़-ग्रासने बाहुलकात् अत्रन् । श्रोणिः । भार्य्या । इत्यमरः । ३ । ३ । १७८ ॥ (यथा मेघदूते । ४० ।

"तां कस्याश्चिद् भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः" ॥)

राज्ञां दुर्गस्थानम् । इति हेमचन्द्रः ॥

कलधृतं, क्ली, (कलेन अवयवेन धृतं शुद्धम् ।) रूप्यम् । इति राजनिर्घण्टः ॥

कलधौतं, क्ली, (कलेन अवयवेन धौतम् ।) स्वर्णम् । ("कन्येयं कलधौतकोमलरुचिः कीर्त्तिस्तु नातःपरा" । इति महानाटकम् ॥

महाभारते च ४ । गोहरणे ४० । ६ ।

"इमे च कस्य नाराचाः सहस्रं लोमवाहिनः ।
समन्तात्कलधौताया उपासङ्गे हिरण्मये" ॥)

रजतम् । इति मेदिनी ॥ कलध्वनिः । इति विश्वः ॥

कलध्वनिः, पुं, (कलः अस्फुटमधुरः ध्वनिर्यस्य ।) पारावतः । कोकिलः । मयूरः । इति मेदिनी ॥ मधुराव्यक्तशब्दः । इति कलशब्दार्थे अमरः । १ । ७ । २ ॥ (यथा महानिर्व्वाणतन्त्रे । १ । ३ ।

"अमरोरगगन्धर्व्वकलध्वनिनिनादिते" ॥)

कलनं, क्ली, (कल्यते लक्ष्यते दुष्यते वा । कल + ल्युट् ।) चिह्नम् । दोषः । इति हलायुधः ॥ (कल्यते शुक्रशोणिताभ्यामन्योन्यं मिश्रीयते ।) गर्भे मिश्रितं शुक्रशोणितम् ॥ यथा, भागवते । ३ । ३१ । २ ।

"कलनं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् ।
दशाहेन तु कर्क्कन्धूः पेश्यण्डं वा ततः परम्" ॥

क्वचित् कललं इत्यपि पाठो दृश्यते । कलयति जानात्यनेन । कल गतौ गत्यर्था ज्ञानार्थाश्च । कल + करणे ल्युट् । ज्ञानम् ॥)

कलनः, पुं, (कं जलं लाति । तथा सन् नमति ।

क + ला + कः ।) वेतसवृक्षः । इति राजनिर्घण्टः ॥

कलना, स्त्री, (कल + भावे युच् । टाप् च ।) वशीभूतत्वम् । वशता । यथा,—आनन्दलहर्य्याम् । २९ ।

"करारं यत् त्वेड़ कवलितवतः कालकलना" ।

जल्पना च ॥

कलन्दरः, पुं, (कलं ग्राम्यविहितवाक्यं गिरत्याचारं वा वृणाति । कल + दृ + खच् । मुम् च ।) वर्णशङ्करजातिविशेषः । स तु लेटात् तीवरकन्यायां जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥

कलन्दिका, स्त्री, (कं सुखं लाति विषयत्वेन इति । कलं कामं सर्व्वाभीष्टं ददाति । कल + दा + कः । सञ्ज्ञायां कन् । ततष्टाप् अत इत्वं एषोदरादित्वात् सुम् च ।) सर्व्वविद्या । इति हेमचन्द्रः ॥

कलन्धुः, स्त्री, (कलायाः मात्रायाः अन्धुरिव । प्रकन्ध्वादित्वात् अलोपे साधुः ।) घोलीशाकः । इति राजनिर्घण्टः ॥

कलभः, पुं, (कलेन करेण शुण्डेनेति यावत् भाति । कल + भा + कः । यद्वा + कल् गतौ "क्षुभ्नादिकलिगर्हिभ्योऽभच् । उणां । ३ । १२२ । इति । अभच् ।) करभः । हातिर छा इति भाषा । स तु पञ्चवर्षपर्य्यन्तम् । इति सुभूतिः ॥ तत्पर्य्यायः । करिशावकः २ । इत्यमरः । २ । ८ । ३५ ॥ दुर्ग्रान्तः ३ बालः ४ । (यथा रघौ । ३ । ३२ ।

"महोक्षतां वत्सतरः स्पृशन्निव
द्विपेन्द्रभावं कलभः श्रयन्निव" ।)

धत्तूरवृक्षः । इति राजनिर्घण्टः ॥

कलभवल्लभः, पुं, (कलभस्य हस्तिशावकस्य वल्लभः प्रियः ।) घोलुवृक्षः । इति राजनिर्घण्टः ॥

कलभी, स्त्री, (कं जलं श्रयतया लभते । लभ + अच् । गौरादित्वात् ङीष् ।) चञ्चुवृक्षः । इति राजनिर्घण्टः ॥

कलमः, पुं, (कलते कलयति वा अक्षरं प्रकाशयति जनयति वा । कल + "कलिकर्द्दारमः" । उणां । ४ । ८४ इति अमः ।) खनामख्यातलिपिसाधनवस्तु । तत्पर्य्यायः । लेखनी २ वर्णतूली ३ अक्षरतूलिका ४ । इति जटाधरः ॥ खनामख्यातशालिधान्यविशेषः । (यथा, रघु । ४ । ३७ ।

"आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः" ॥)

अस्य गुणाः । रक्तदोषत्रिदोषनाशित्वम् । चक्षुर्हितकारित्वम् । कषायत्वञ्च । इति राजवल्लभः ॥ "रक्तशालिर्महाशालिः कलमः षष्टिकोऽपरः" । इति हारीते प्रथमस्थाने १० अध्याये ॥ ("शूकजेषु वरस्तत्र रक्तषष्टिकदोषहा ॥ महांस्तस्यानुकलमस्तत्पाण्डु ततः परे" ॥ इति वामटे सूत्रस्थाने ६ अध्याये ॥) चौरः । इति मेदिनी ॥

कलमोत्तमः, पुं, (कलमेभ्यः कलमेषु वा उत्तमः ।) गन्धशालिः । इति राजनिर्घण्टः ॥

कलम्बः, पुं, (कल्यते क्षिप्यते शत्रुं प्रति । कलच्क्षेपे + अम्बच् ।) शरः । शाकनाड़िका । इत्यमरः । २ । ८ । ८७ । कदम्बः । इति विश्वः ॥

("कलम्बनालिका मार्वकुटिच्चरकुतुम्बकम्" ॥ इत्यादीनां समष्टिगुणा यथा,—

"शाकं गुरु च रूक्षञ्च प्रायो दृष्टभ्य जीर्य्यति ।
मधुरं शीतवीर्य्यञ्च पुरीषस्य च भेदनम्" ॥

इति चरके सूत्रस्थाने २७ अध्याये ॥)

कलम्बकः, पुं, (कलम्ब + संज्ञायां कन् ।) धाराकदम्बः । इति राजनिर्घण्टः ॥

कलम्बिका, स्त्री, (कलम्बी एव स्वार्थे कन् टाप् च अत इत्वम् ।) कलम्बीशाकः । इति शब्दरत्नावली ॥ (यथा चक्रपाणिदत्तस्य शाकवर्गे ।

"कलम्बिका गुरुर्वृष्या कषायास्तन्यवर्द्धिदा" ॥)

कलम्बीव कायते प्रकाशते निधीयते वा । कलम्बी + कै + कः । टाप् इत्वञ्च । संज्ञा हेतुत्वात् एषोदरादित्वात् । ह्रस्वः ।) ग्रीवापश्चान्नाड़ी । तत्पर्य्यायः । मन्या २ । इति हेमचन्द्रः ॥

कलम्बी, स्त्री, (कं जले लम्बते । लबि संसने + अच् ङीष् ।) जलजलताशाकविशेषः । कलमी इति भाषा । तत्पर्य्यायः । कड़म्बी २ कलम्बूः ३ कलम्बिका ४ । इति शब्दरत्नावली ॥ अस्या गुणाः । स्तन्यदुग्धशुक्रश्लेष्मकारित्वम् । मधुरत्वम् । कषायत्वम् । गुरुतरत्वञ्च । इति राजवल्लभः ॥

कलम्बुटं, क्ली, (कं जले लम्बते भासते । क + लम्ब + बाहुलकात् उटन् ।) हैयङ्गवीनम् । नवनीतम् । इति हारावली ॥

कलम्बूः, स्त्री, (कं जले लम्बते । लम्ब + बाहुलकात् ऊङ् ।) कलम्बीशाकः । इति शब्दरत्नावली ॥

कलरवः, पुं, (कलः मधुरास्फुटो रवः ध्वनिर्यस्य ।) कपोतः । पायरा इति भाषा । इत्यमरः । २ । ५ । १४ ॥ (यथा आर्य्यासप्तशती ५६७ ।

"प्रीर्णप्रासादोपरि जिगीषुरिव कलरवः जागर्ति" ॥)

कोकिलः । इति राजनिर्घण्टः ॥ (यथा, ब्रह्मपुराणे ५२ । ३४ । "कोकिलैः कलरवैश्च" ॥) मधुराव्यक्तध्वनिः । इति कलशब्दार्थे अमरः ॥ (कलश्चासौ रवः । कर्म्मधारयः ॥ यथा कलाविलासे १ । ६ ।

"नवविसकिसलयकवलन-
कषायकलहंसकलरवो यत्र" ॥)

कललः, पुं क्ली, (कल्यते वेष्ट्यतेऽनेन । कल + रुषादिभ्यः कलच् ।) जरायुः । गर्भवेष्टनचर्म्म । इत्यमरः । २ । ६ । ३८ ॥

("ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥
मासि मासि विवर्द्धते गर्भिण्या गर्भजलवम् ।
कललं जायते तस्या वर्द्धितं मेदकैर्गुणैः" ॥
इति सुश्रुते शारीरस्थाने २ अध्याये ॥)

कललजः, पुं, (कललमिव जायते । जन + डः ।) राजः । इति राजनिर्घण्टः ॥ धुना इति भाषा ॥

कललजोद्भवः, पुं, (कद्भवत्यस्मात् उद्भवः । कललजस्य उद्भवः ।) सालवृक्षः । इति राजनिर्घण्टः ॥

कलविङ्कः, पुं, (कलं मधुरास्फुटं वङ्कते रौति । वकि वा गतौ + अच् एषोदरादित्वात् अत इत्वे साधुः ।) चटकः । इत्यमरः । २ । ५ । १८ ॥

(यथा, मनुः। ५। १२।
"कलविङ्कं प्लवं हंसं चक्राङ्कं ग्रामकुक्कुटम्" ॥)
कलिङ्गकलच्चः। इति मेदिनी ॥ कलङ्कः। श्वेतचामरः। इति सारस्वतः। (त्वष्टृपुत्रविश्वरूपस्य शिरोभेदः। पुरा किल कदाचित् ऐश्वर्य्यमत्तेन सुरेश्वरेण यदा समागतः सुराचार्य्यो गीष्पतिरसम्मानितोऽन्तरधीयत। तदा ब्रह्मोपदिष्टैरसुरप्रपीड़ितैरमरैस्त्वाष्ट्रं विश्वरूपं पौरोहित्ये वरयित्वा भूयः सङ्गैरसुरा बबाधिरे। विश्वरूपस्तु मातामहकुलस्यापेक्षया परोक्षमसुरेभ्योऽपि यज्ञभागं प्रददौ तदभिज्ञाय सुरपतिर्भीतः क्रुद्धश्च विश्वरूपस्य शिरांस्यक्षिनत्। तस्य खलु त्वाष्ट्रस्य कपिञ्जलः कलविङ्कस्तित्तिरिरिति चीणि शिरांस्यासन् तेषु सुरापायि शिर एव कलविङ्क इति बोध्यम्। एतद्विवरणन्तु श्रीमद्भागवते ६। ९ अध्याये सविस्तरं दर्शनीयम् ॥)
कलशः, त्रि, (कलं मधुराव्यक्तशब्दं शवति जलपूरणसमये प्राप्नोति। कल + शु गतौ + डः।) जलाधारविशेषः। कलशी इति ख्यातः। (यथा आर्य्यासप्तशती ६९०।
"प्रबलो विदरविध्यति जलकलशं नीरलेखेव" ॥)
तत्पर्य्यायः। घटः २ कुटः ३ निपः ४। इत्यमरः। २। ९। ३२ ॥ कलसः ५ कलसिः ६ कलसी ७ कलसम् ८ कलशिः ९ कलशीः १० कलशम् ११। इति तट्टीका ॥ कुम्भः १२ करीरः १३। इति हेमचन्द्रः। कलावतीदीक्षाप्रकरणोक्तं तस्य परिमाणं। यथा, तन्त्रसारे।
"पञ्चाशदङ्गुलव्याम उत्सेधः षोड़शाङ्गुलः।
कलशानां प्रमाणन्तु मुखमष्टाङ्गुलं स्मृतम् ॥
षट् त्रिंशदङ्गुलं कुम्भं विस्तारोन्नतिशालिनम्।
षोड़शं द्वादशं वापि ततो न्यूनं न कारयेत्" ॥
कलशिः, स्त्री, (कलं शरीरमालिन्यं श्यति नाशयति। कल + शो + बाहुलकात् इन्। कं जलं लाति आदत्ते तथा सती शीर्य्यते। कल + शृ + डिः।) एन्द्रिपर्णी। चाकुलिया इति भाषा। इत्यमरः। २। ४। ९३ ॥ (एन्द्रिपर्णीशब्देऽस्या गुणावली ज्ञातव्या ॥) घटः। इत्यमरटीकायां रायमुकुटः ॥ यथा, माघे ११। ८।
"कलशिमुदधिगुर्व्वीं वल्लवा जोड़यन्ति" ॥)
कलशी, स्त्री, (कलशि ङीदिकारान्तत्वात् वा ङीप्।) खनामख्यातजलपात्रम्। एन्द्रिपर्णी। इत्यमरटीकायां रायमुकुटः ॥
कलसः, त्रि, (केन जलेन लसति शोभते। क + लस् + अच्।) कलशः। घटः। इति हेमचन्द्रः ॥ द्रोणपरिमाणे, पुं। इति वैद्यकपरिभाषा ॥
("चतुर्भिराढ़कैर्द्रोणः कलसो नल्वणोन्मितः" ॥
इति शार्ङ्गधरे पूर्ब्बखण्डे १ अध्याये ॥
"स एव कलसः ख्यातो घटस्तन्मानमेव च" ॥
इति चरके कल्पस्थाने १२ अध्याये ॥)
कलसः, पुं, (केन जलेन लसतीति। कल + लस् + अच्।) कुम्भः। अस्योत्पत्त्यादिर्यथा,—
"सागरे मथ्यमाने तु पीयूषार्थं सुरासुरैः।

पीयूषधारणार्थाय निर्म्मिता विश्वकर्म्मणा ॥
कलाः कलास्तु देवानामसितास्ताः पृथक् पृथक्।
यतः कृतास्तु कलसास्ततस्ते परिकीर्त्तिताः ॥
नवैव कलसाः प्रोक्ता नामतस्तान्निबोधत।
गोघ्नोपगोघ्नो मरुतो मरुत्वश्च तथापरः ॥
मनोहा क्षुधिभद्रश्च विजयस्तनुशोधकः।
इन्द्रियघ्नोऽथ विजयो नवमः परिकीर्त्तितः ॥
तेषामेव क्रमाद्रूप नव नामानि यानि तु।
शृणु तान्यपराण्येव शान्तिदानि सदैव हि ॥
क्षितीन्द्रः प्रथमः प्रोक्तो द्वितीयो जलसम्भवः।
पवनाग्नी ततो द्वौ तु यजमानस्ततः परः।
कोषसम्भवनामा तु षष्ठः स परिकीर्त्तितः ॥
सोमस्तु सप्तमः प्रोक्तश्चादित्यस्तु तथाष्टमः।
विजयो नाम कलसो योऽसौ नवम उच्यते ॥
स तु पञ्चमुखः प्रोक्तो महादेवस्वरूपधृक्।
घटस्य पञ्चवक्त्रेषु पञ्चवक्त्रः स्वयं तथा ॥
यथा काष्ठास्थितः सम्यक् वामदेवादिगामतः।
मण्डलस्य च पद्मान्तः पञ्चवक्त्रघटं न्यसेत् ॥
क्षितीन्द्रं पूर्ब्बतो न्यस्य पश्चिमे जलसम्भवम्।
वायव्ये वायवं न्यस्य आग्नेये ह्यग्निसम्भवम् ॥
नैर्ऋते यजमानन्तु ऐशान्यां कोषसम्भवम्।
सोममुत्तरतो न्यस्य सौरं दक्षिणतो न्यसेत् ॥
न्यस्येवं कलसांश्चैव तेषु चैतान् विचिन्तयेत्।
कलसानां मुखे ब्रह्मा ग्रीवायां शङ्करः स्थितः।
मूले तु संस्थितो विष्णुर्म्मध्ये मातृगणाः स्थिताः ॥
दिक्पाला देवताः सर्व्वे वेष्टयन्ति दिशो दश।
कुक्षौ तु सागराः सप्त सप्तद्वीपास्च संस्थिताः ॥
नक्षत्राणि ग्रहाः सर्व्वे तथैव कुलपर्व्वताः।
गङ्गाद्याः सरितः सर्व्वा वेदाश्चत्वार एव च।
कलसे संस्थिताः सर्व्वे तेषु तानि विचिन्तयेत् ॥
रत्नानि सर्व्वबीजानि पुष्पाणि च फलानि च ॥
वज्रमौक्तिकवैदूर्य्यमहापद्मेन्द्रस्फाटिकैः।
सर्व्वधाममयं बिल्वं नागरोडुम्बरं तथा ॥
बीजपूरकजम्बीरकाम्रामातकदाड़िमान्।
यवं शालिञ्च नीवारं गोधूमं सितसर्षपम् ॥
कुङ्कुमागुरुकर्पूरमदनं रोचनं तथा।
चदनञ्च तथा मांसीमेलां कुष्ठं तथैव च ॥
कर्पूरपत्रचण्डञ्च जलं निर्य्यासकाम्बुदम्।
ग्रैलेयं वदरं जातीपत्रपुष्पे तथैव च ॥
कालशाकं तथा एक्षां देवीं पर्णकमेव च।
वचां धात्रीं समङ्गिळां तुरुष्कं मङ्गलाष्टकम् ॥
दूर्व्वां मोहनिकां भद्रां शतमूलीं शतावरीम्।
पर्णानां शवलां क्षुद्रां सहदेवां गजाशुग्राम् ॥
पूर्णकोषां सितां पाठां गुडूचीं सरसिकालसौ।
श्यामकं गजदन्तञ्च शतपुष्पां पुनर्णवाम् ॥
ब्राह्मीं देवीं शिवां रुद्रां सर्व्वौषधानिकां तथा।
समाहृत्य शुभानेतान् कलसेषु निधापयेत् ॥
कलसस्य यथा देवान् विधिं शृणु गदाधरम्।
यथाक्रमं पूजयित्वा शृणु मुख्यतया यजेत् ॥
प्रासादेन तु मन्त्रेण शृणुतन्त्रेण शङ्करम्।
प्रथमं पूजयेन्मध्ये नानानैवेद्यवेदनैः ॥
दिक्पालानां घटेष्वेव दिक्पालानपि पूजयेत्।

पूर्व्वं बहिःस्थापितेषु ग्रहाणां कलसेषु च ॥
नवग्रहान् पूजयेत्तु मातृर्म्माढघटेषु च।
सर्व्वे देवा घटे पूज्या घटस्तेषां पृथक् पृथक् ॥
नवैव तत्र पूर्व्वोक्ताः स्मृता मुख्यतमा नृप।
भक्ष्यैर्भोज्यैश्च पेयैश्च पुष्पैर्नानाविधैः फलैः ॥
यावकैः पायसैश्चापि यथासम्भवयोजितैः।
पुण्याहवाचनं कृत्वा पूजयेत् सकलान् सुरान्" ॥
इति कालिकापुराणे पुण्याभिषेकः ८७ अध्यायः ॥ * ॥ अन्यत् धारकशब्दे द्रष्टव्यम् ॥
कलसिः, पुं, (केन जलेन लसतीति। क + लस् + इन्।) एन्द्रिपर्णी। इत्यमरटीका शब्दरत्नावली च ॥ गर्गरी। इत्यमरटीका हारावली च ॥
कलसी, स्त्री, (कलस + स्त्रियां ङीप्।) एन्द्रिपर्णी। इति शब्दरत्नावली ॥ (कलसी वृहतीद्राक्षेत्यादिव्यस्या व्यवहारः ॥ इत्युत्तरतन्त्रे। ३९ अध्याये सुश्रुतेनोक्तम् ॥) कलसः। इत्यमरटीका ॥ (स्वार्थे कन्प्रत्ययेनोक्तं यथा, नैषधे। २। ८।
"अलम्बितकर्ब्बशस्खलीकलसीकं रचयन्नवोचत" ॥)
कलसीसुतः, पुं, (कलस्यां जातः सुतः।) अगस्त्यमुनिः। इत्यमरटीकायां वाचस्पतिः ॥
कलसोदधिः, पुं, कलस इव उदधिः। मन्थनाधारत्वात्। समुद्रः। इति महाभारतम् ॥
कलहः, पुं क्ली, (कलं कामं हन्त्यत्र। हन् + अधिकरणे डः।) विवादः। लड़ाइ झगड़ा इति भाषा ॥ (यथा मनुः ४। १२१।
"न विवादे न कलहे न सेनायां न सङ्करे" ॥)
तथा विष्णुपुराणे १ मांशे ९। १४५।
"अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन" ॥)
तत्पर्य्यायः। युद्धम् २ आयोधनम् ३ जन्यम् ४ प्रधनम् ५ प्रविदारणम् ६ मृधम् ७ आस्कन्दनम् ८ संख्यम् ९ समीकम् १० साम्परायिकम् ११ समरः १२ अनीकः १३ रणः १४ विग्रहः १५ सम्प्रहारः १६ अभिसम्पातः १७ कलिः १८ संस्फोटः १९ संयुगः २० अभ्यामर्द्दः २१ समाघातः २२ संग्रामः २३ अभ्यागमः २४ आहवः २५ समुदायः २६ संयत् २७ समितिः २८ आजिः २९ समित् ३० युध् ३१। इत्यमरः। २। ८। १०४ ॥ शृमीकम् ३२ साम्परायकम् ३३ संस्फोटः ३४ युत् ३५। इति तट्टीका ॥
कलहः, पुं, (कल + हन् + "अन्येभ्योऽपीति" ३। २। १०१। डः।) वाटः। खड्गकोषः। भण्डनम्। इति मेदिनी ॥
कलहंसः, पुं, (कलेन मधुरास्फुटध्वनिना विशिष्टो हंसः। शाकपार्थिवादित्वात् मध्यपदलोपि समासः।) हंसविशेषः। बालिहाँस इति भाषा। तत्पर्य्यायः। कादम्बः २। इत्यमरः। २। ५। २३ ॥ कलनादः ३ मरालकः ४। इति राजनिर्घण्टः ॥ राजहंसः। (यथा भट्टिः। २। १८।
"कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः" ॥)
नृपोत्तमः। इति विश्वमेदिन्यौ ॥ परात्मा। ब्रह्म। इति शब्दरत्नावली ॥ (अतिजगती छन्दः। सा

च त्रयोदशाक्षरा। लक्षणमुक्तं यथा, छन्दोमञ्जर्य्याम् ७।
"सजसाः सगौ च कथितः कलहंसः"।
अस्योदाहरणमुक्तं तत्रैव। यथा,
"यमुनाविहारकुतुके कलहंसो
व्रजकामिनी कमलिनीलतकेलिः।
जनचित्तहारिकलकण्ठनिनादः
प्रमदं तनोतु तव नन्दतनूजः"॥
सिंहनादोऽपि॥)
कलहनाशनः, पुं, (कलहं नाशयतीति। कलह + नश् + णिच् + ल्युः। अस्य कलहनाशकता कामंदकविद्यायां प्रसिद्धा।) पूतिकरञ्जः। इति शब्दमाला॥
कलहप्रियः, पुं, (कलहः प्रियो यस्य।) नारदः। इति महाभारतम्॥ (कलहप्रिये त्रि।) यथा गोः रामायणे ५। १७। २७।
"दुर्म्मुखीः कपिलाः क्षुद्राः क्रोधनाः कलहप्रियाः"॥)
कलहप्रिया, स्त्री, (कलहस्य कलहे वा प्रिया।) शारिकापक्षी। इति राजनिर्घण्टः॥
कलहान्तरिता, स्त्री, (कलहादन्तरिता पश्चात् परितापमाप्ता।) नायिकाभेदः। अस्या लक्षणम्। पतिमवमन्य पश्चात् परितप्ता। अस्याः क्रिया। भ्रान्तिः। सन्तापः। सम्मोहः। निश्वासः। ज्वरः। प्रलापादिः। इति रसमञ्जरी॥ (तथा च साहित्यदर्पणे ३। ८६।
"चाटुकारमपि प्राणनाथं रोषादपास्य या।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा"॥
उदाहरणमाह तत्रैव। "नो चाटुश्रवणं कृतं न च दृष्टा हारोऽन्तिके वीक्षितः, कान्तस्य प्रियहेतवे निजसखीवाचोऽपि दूरीकृताः। पादान्ते विनिपत्य तत्क्षणमसौ गच्छन्मया मूढ़या, पाणिभ्यामवरुध्य हन्त! सहसा कण्ठे कथं नार्पितः"॥)
कला, स्त्री, (कलयति क्षुद्रितो धनं संगृह्णाति सञ्चिनोतीत्यर्थः। कल + अच् + टाप्।) मूलधनक्षुद्रिः। सुद इति भाषा। शिल्पादि। (यथा रामायणे २। ६। ८।
"गीतवादित्रकुशला नृत्येषु कुशलास्तथा।
उपायज्ञाः कलाज्ञाश्च वैश्यिके परिनिष्ठिताः"॥)
अंशुमात्रम्। चन्द्रस्य षोड़शांशः। (यथा, वक्रोक्तिपञ्चाशिकायाम्। "सालङ्कारतया त्वया मम कथं नेन्दोः कला दृश्यते, पश्यामीन्दुकलां स्फुटं पुनरिदं लङ्कारता नास्ति यत्"॥) कालमानः। स तु त्रिंशत्काष्ठात्मकः। इति मेदिनी॥ ("त्रिंशत् काष्ठाः कलाः"। इति सुश्रुते सूत्रे ६ अः॥ शरीरस्यांशविशेषो यथा,—
"मांसास्रङ्मेदसां तिस्रो यकृत्प्लीह्नोस्तुरीयिका।
पञ्चमी च तथान्त्राणां षष्ठी चाग्निधरा मता।
रेतोधरा सप्तमी स्यादिति सप्तकलाः स्मृताः"॥
इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम्॥) स्त्रीरजः। नौका। कपटः। इति विश्वः। राशेस्त्रिंशद्भागोऽंशस्तस्य षष्टिभागः। यथा,—
"विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते।
तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते"॥
इति सूर्य्यसिद्धान्तः॥ अथ शैवतन्त्रोक्ताश्चतुःषष्टिकला लिख्यन्ते। गीतम् १ वाद्यम् २ नृत्यम् ३ नाट्यम् ४ आलेख्यम् ५ विशेषकच्छेद्यम् ६ तण्डुलकुसुमबलिविकाराः ७ पुष्पास्तरणम् ८ दशनवसनाङ्गरागाः ९ मणिभूमिकाकर्म्म १० शयनरचनम् ११ उदकवाद्यम् १२ उदकघातः १३ चित्रायोगाः १४ माल्यग्रथनविकल्पाः १५ शेखरापीड़योजनम् १६ नेपथ्ययोगाः १७ कर्णपत्रभङ्गाः १८ गन्धयुक्तिः १९ भूषणयोजनम् २० ऐन्द्रजालम् २१ कौचुमारयोगाः २२ हस्तलाघवम् २३ चित्रशाकपूपभक्ष्यविकारक्रिया २४ पानकरसरागासवयोजनम् २५ सूचीवापकर्म्माणि २६ सूत्रक्रीड़ा २७ प्रहेलिका २८ प्रतिमाला २९ दुर्व्वचकयोगाः ३० पुस्तकवाचनम् ३१ नाटिकाख्यायिकादर्शनम् ३२ काव्यसमस्यापूरणम् ३३ पट्टिकावेत्रवाणविकल्पाः ३४ तर्कुकर्म्माणि ३५ तक्षणम् ३६ वास्तुविद्या ३७ रूप्यरत्नपरीक्षा ३८ धातुवादः ३९ मणिरागज्ञानम् ४० आकरज्ञानम् ४१ वृक्षायुर्व्वेदयोगाः ४२ मेषकुक्कुटलावकयुद्धविधिः ४३ शुकशारिकाप्रलापनम् ४४ उत्सादनम् ४५ केशमार्জ্জনकौशलम् ४६ अक्षरमुष्टिकाकथनम् ४७ म्लेच्छितकविकल्पाः ४८ देशभाषाज्ञानम् ४९ पुष्पशकटिकानिमित्तज्ञानम् ५० यन्त्रमातृका ५१ धारणमातृका ५२ सम्पाठ्यम् ५३ मानसीकाव्यक्रिया ५४ क्रियाविकल्पाः ५५ छलितकयोगाः ५६ अभिधानकोषच्छन्दोज्ञानम् ५७ वस्त्रगोपनानि ५८ द्यूतविशेषः ५९ आकर्षक्रीड़ा ६० बालकक्रीड़नकानि ६१ वैनायिकीनां विद्यानां ज्ञानम् ६२ वैजयिकीनां विद्यानां ज्ञानम् ६३ वैतालिकीनां विद्यानां ज्ञानम् ६४। इति श्रीभागवतटीकायां श्रीधरस्वामी॥ क्वचित् पुस्तके सूचीवापकर्म्मसूत्रक्रीड़ा इत्येकं पदं तदुत्तरं वीणाडमरुकवाद्यानि-वैतालिकीनामित्यत्र वैयासिकीनामिति च पाठः॥ (जिह्वा। यथा हठयोगप्रदीपिकायाम् ३। ३७।
"कलां पराङ्मुखीं कृत्वा त्रिपथे परियोजयेत्"॥
"कलां जिह्वां पराङ्मुखमास्यं यस्याः सा तथा तां प्रत्यङ्मुखीं कृत्वा तिस्रणां नाड़ीनां पथ्यां तस्मिन् कपालकुहरे संयोजयेत्"। इति तट्टीका॥ शिवः। यथा महाभारते १३। १७। १४०।
'कलाःकाष्ठा लवा मात्रा मुहूर्त्ताहः क्षणाःक्षणाः'॥)
कलाकूलं, क्ली, (कलया माचयापि व्याकूलयति व्याकूलयतीति। व्याकूलि इति नामधातोः + अच्।) विषम्। इति राजनिर्घण्टः॥
कलाकेलिः, पुं, (कलाभिः केलिः विलासो यस्य। कलासु केलिर्यस्य वा।) कामदेवः। इति त्रिकाण्डशेषः॥
कलाङ्कुरः, पुं, (कलानां अङ्कुरो यत्र।) सारसपक्षी। (स्त्रैणशास्त्रप्रवर्त्तककर्णसुतः।) कंसासुरः। इति त्रिकाण्डशेषः॥
कलाचिका, स्त्री, (कलामर्हति गच्छति प्राप्नोति वा। कला + अच + उपपदे कर्म्मण्यण्। ततः स्वार्थे कन् + टाप्। अत इत्वञ्च।) प्रकोष्ठः। स तु कफोणेरधो मणिबन्धपर्य्यन्तः। इति हेमचन्द्रः॥
कलाची, स्त्री, (कलां अर्हति। कला + अच् + अण्। गौरादित्वात् ङीष्।) कलाचिका। इति हारावली॥
कलादः, पुं, (अलङ्कारनिर्म्माणाय गृहस्थैः समर्पितानां सुवर्णादीनां कलां अंशं आदत्ते गृह्णाति। अलङ्कारनिर्म्माणहेतुना गृहस्थोपार्জ্জितधनांशं वा आदत्ते। आ + दा + कः।) सुवर्णकारः। इत्यमरः। २। १०। ८॥
कलानिधिः, पुं, (कलाः निधीयन्तेऽस्मिन्। कला + नि + धा + अधिकरणे किः।) चन्द्रः। इत्यमरः। १। ३। १४॥ (यथाह कश्चित्।
"अहो महत्त्वं महतामपूर्व्वं
विपत्तिकालेऽपि परोपकारः।
यथाऽस्य मध्ये पतितोऽपि राहोः
कलानिधिः पुण्यचयं ददाति"॥)
कलानुनादी, [न्] पुं, (कलं अनुनदतीति। कल + अनु + नद् + णिनिः।) रोलम्बः। भ्रमरः। कलविङ्कः। चटकः। कपिञ्जलः। चातकः। इति मेदिनी॥
कलान्तरं, क्ली, (अन्या कला अंशः। सुप्सुपेति समासः।) वृद्धिः। लाभः। इति बीजावती॥ सुद इति भाषा। (चन्द्रस्य अन्या कला। यथा कुमारे १। २५।
"पुपोष लावण्यमयान् विशेषान्
ज्योत्स्नान्तराणीव कलान्तराणि"॥)
कलापः, पुं, (कलां मात्रां आप्नोति। कला + आप् + "कर्म्मण्यण्"। ३। २। १। इति अण्। यद्वा कला आप्यतेऽनेन "हलश्च"। ३। ३। १२१। इति घञ्।) समूहः। (यथा भागवते ४।२४।६२।
"क्रियाकलापैरिदमेव योगिनः
श्रद्धान्विताः साधु यजन्ति सिद्धये"॥)
मयूरपिच्छः। (यथा, गोः रामायणे। ५।५२। १३
"संप्रदीप्तकलापाया विप्रकीर्णाश्च वर्हिणः"॥)
काञ्ची। भूषणम्। (यथा कुमारे। १। ४२।
"कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य"॥
"मुक्ताकलापस्य मुक्ताभूषणस्य"। इति मल्लिनाथः॥)
तूणः। (यथा हेः रामायणे २। ५२। ११।
"ततः कलापान् सन्नह्य खड्गौ बद्ध्वा च धन्विनौ"॥)
चन्द्रः। विदग्धः। व्याकरणविशेषः। इति मेदिनी॥ (यथा, बृहत्कथासारः।
"अधुना स्वल्पतन्त्रत्वात् कातन्त्राख्यं भविष्यति।
तद्बाहनकलापस्य नाम्ना कालापकं तथा"॥)
ग्रामविशेषः। यथा, भागवते। ९। १२। ६।
"देवापिर्योगमास्थाय कलापग्राममाश्रितः।
सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति"॥
(अस्त्रविशेषः। यथा महाभारते ४। ५। २८।
"खड्गांश्च दीप्तान् दीर्घांश्च कलापांश्च महाधनान्।
विपाठान् क्षुरधारांश्च धनुर्भिर्निदधुः सह"॥)
कलापकः, पुं, (कलाप + संज्ञायां कन्।) हस्तिकण्ठ-

बन्धः । इति हेमचन्द्रः ॥ (स्वार्थे कन् । कलापार्थः । स्त्री, यस्मिन् काले मयूराः कलापिनी भवन्ति स उपचारात् कलापी तत्र देयमन्नम् । "कलाप्यश्वत्थयवबुसाट्टन्" । ४ । ३ । ४८ । ऋणविशेषः । इति सिद्धान्तकौमुदी ॥ पद्यविशेषः । यथा, साहित्यदर्पणे ६ । २४७ ।

"छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम् ।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते ।
कलापकं चतुर्भिस्तु पञ्चभिः कुलकं स्मृतम्" ॥)

कलापिनी, स्त्री, (कलापश्चन्द्रः अस्ति अस्याम् । कलाप + मत्वर्थे इनिः + ततो ङीप् ।) रात्रिः । नागरमुस्ता । इति राजनिर्घण्टः ॥

कलापी, [न्] पुं, (कलापाः फलपत्रसमूहाः सन्त्यस्मिन् । कलाप + इनिः ।) वृक्षविशेषः । (कलापोवर्हः अस्ति अस्य इनिः ।) मयूरः । इति मेदिनी ॥ (यथा रघुः ६ । ६ ।

"पुरोपकण्ठोपवनाश्रयाणां
कलापिनामुद्धतनृत्तहेतौ" ॥)

कोकिलः । इति धरणी ॥ (त्रि, तूणवान् । कलापव्याकरणाध्यायी ॥)

कलापूर्णः, पुं, (कलाभिः पूर्णः ।) चन्द्रः । इति शब्दचन्द्रिका ॥ (त्रि, कलापरिपूर्णः । यथा महाभारते । ४ । ६७ । १३ ।

"सदा भवान् क्षात्रगुणस्य गुर्वैरस्मान् विकत्थते ।
न चाप्नुनः कलापूर्णो मम दुर्योधनस्य वा" ॥)

कलाभृत्, पुं, (कलां बिभर्त्ति । कला + भृ + क्विप् । तुगागमश्च ।) चन्द्रः । इति हेमचन्द्रः ॥ (कलां गीतादिकं बिभर्त्तीति । गीतादिकलाभिज्ञे वाच्यलिङ्गत्वम् । यथा मनुः २ । १३४ ॥

"दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम् ।
त्र्यब्दपूर्वं श्रोत्रियाणां सख्येनापि सयोनिषु" ॥)

कलामकः, पुं, (कलम + कनि एषोदरादित्वात् साधुः ।) कलमधान्यम् । इति हेमचन्द्रः ॥ (कलमशब्देऽस्य विशेषो ज्ञातव्यः ॥)

कलाम्बिका, स्त्री, (कला अर्थः विकायते प्रयुज्यते अस्याम् । कला + वि + कै + क + टाप् । एषोदरादित्वात् मुमि साधुः ।) अर्थानां प्रयोगः । ऋणदानम् । इति त्रिकाण्डशेषः ॥ धार देओया इति भाषा ॥

कलायः, पुं, (कलां अयते । "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) शमीधान्यविशेषः । मटर वाँटुला इति भाषा । तत्पर्य्यायः । सतीलकः २ हरेणुः ३ खण्डिकः ४ । इत्यमरः । २ । ६ । १६ ॥ त्रिपुटः ५ अतिवर्त्तुलः ६ । इति रत्नमाला ॥ मुण्डचणकः ७ शमनः ८ नीलकः ९ कराटी १० सतीलः ११ हरेणुकः १२ सतीनः १३ सतीनकः १४ । (यथा, माघः । १३ । २१ । "विकसत्कलायकुसुमास्तितद्युतेः" ॥) अस्य गुणाः । वातश्लेष्मपुष्टामदोषकारित्वम् । पित्तदाहकफनाशित्वम् । शीतलम् । कषायत्वञ्च ॥ (अस्य पर्य्यायोगुणाश्च यथा, भावप्रकाशस्य पूर्ब्बखण्डे धान्यवर्गे ।

"कलायो वर्त्तुलः प्रोक्तः सतिलश्च हरेणुकः ।
कलायो मधुरः स्वादुःपाके रूक्षश्च वातलः" ॥)

अस्य गुणागुणाः । मधुरत्वम् । पित्तश्लेष्महरत्वम् । गुरुत्वम् । कषायानुरसत्वम् । रूक्षत्वम् । मलभेदित्वम् । वायुकोपनत्वञ्च । इति राजनिर्घण्टः ॥ ("भेदनं मधुरं रूक्षं कषायमतिवातलम्" ॥ इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ॥)

कलायनः, पुं, (कलानां नृत्यगीतादीनां अयनं प्राप्तिर्यत्र ।) नर्त्तकः । इति शब्दरत्नावली ॥

कलायी, स्त्री, (कलाय + स्त्रियां टाप् ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥ (गण्डदूर्व्वाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

कलालापः, पुं, (कलं मधुरास्फुटं आलपतीति । कल + आ + लप् + उपपदे "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) भ्रमरः । इति राजनिर्घण्टः ॥ (मधुरालापकर्त्तरि त्रि ॥)

कलावती, स्त्री, (कला गान्धर्व्वकलाः संगीतरागरागाद्यादयः सन्ति अस्याम् । कला + मतुप् मस्य वः स्त्रियां ङीप् ।) तुम्बुरुगन्धर्व्वस्य वीणा । इति हेमचन्द्रः ॥ (यथा माघस्य १ । १० श्लोकस्य टीकायां मल्लिनाथधृतवैजयन्तीवचनम् ।

"विस्रावसोक्तु वहती तुम्बुरोस्तु कलावती ।
महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी" ॥

खनामख्याता द्रुमिलस्य राज्ञः पत्नी । यथा ब्रह्मवैवर्त्ते ब्रह्मखण्डे । २० । १२ ।

"कान्यकुब्जे च देशे च द्रुमिलो नाम राजकः ।
कलावती तस्य पत्नी वन्द्या चापि पतिव्रता" ॥)

श्रीराधामाता । सा तु वृषभानुपत्नी । इति ब्रह्मवैवर्त्तपुराणम् ॥ अप्सरोविशेषः । यथा रतिस्तव कलावतीति श्लिष्टकाव्ये जयदेवः ।

(कलाः चतुःषष्टिकलाः विद्यन्ते यस्याः । गङ्गा । यथा, काशीखण्डे २९ । ४७ ।

"कूटस्था करुणा कान्ता कूर्म्मयाना कलावती" ॥)

दीक्षाविशेषः । तस्याः क्रमो मन्त्रं विना लिख्यते । शिष्यः पूर्ब्बमुपोषितः कृतनित्यक्रियः स्वस्तिवाचनपूर्ब्बकं सङ्कल्पं कुर्य्यात् । ततो गुरुं वृणुयात् । अथ गुरुराचम्य द्वारदेशे सामान्यार्घ्यं कुर्य्यात् । तदर्घ्यजलेन द्वारमभ्युक्ष्य द्वारपूजां कुर्य्यात् । ततो दक्षिणपादपुरःसरं द्वारवामशाखां स्पृशन् दक्षिणाङ्गं सङ्कोचयन् मण्डपान्तः प्रविश्य नैर्ऋत्यां वास्तुपुरुषं ब्रह्माणञ्च संपूज्य देयमन्त्रेण दिव्यदृष्ट्यावलोकनेन दिव्यान् विघ्नानुत्सार्य्य अस्त्रमन्त्रेण जलेनान्तरीक्षगान् विघ्नानुत्सार्य्य वामपार्ष्णिघातत्रयेण भौमान् विघ्नानुत्सार्य्य सप्तधास्त्रमन्त्राभिमन्त्रितविकिरानादाय भूतनिवारणार्थमस्त्रमन्त्रेण तान् विकिरेत् । तत आसनशुद्धिं कृत्वा मन्त्रेण स्वस्तिकादिक्रमेणोपविशेत् । उपविश्य वा विघ्नानुत्सारयेत् । ततः पञ्चगव्येन मूलेन मण्डपं प्रोक्षयेत् । ततः खदक्षिणे पूर्णाद्रथाग्नि वामे सुवासिताम्बुपूर्णकुम्भं हस्तप्रक्षालनार्थं पात्रमेकं एतद्देशे स्थापयेत् । सर्व्वत्र घृतप्रदीपांश्च स्थापयित्वा पुटाञ्जलिर्भूत्वा वामे गुरुपरमगुरुपरापरगुरून् प्रणम्य दक्षिणे गणेशं मध्ये स्वेष्टदेवताञ्च प्रणम्य अस्त्रमन्त्रेण गन्धपुष्पाभ्यां करौ संप्रोक्ष्य ऊर्द्धोर्द्धतालत्रयं दत्त्वा क्षोटिकाभिर्दशदिग्बन्धनं कृत्वा वह्निबीजेन जलधारया वह्निप्राकारं विचिन्त्य भूतशुद्धिं कुर्य्यात् । ततो मातृकान्यासः प्राणायामः पीठन्यासः ऋष्यादिन्यासः मन्त्रन्यासः । ततो मुद्रां प्रदर्श्य ध्यानं मानसपूजां अर्घ्यस्थापनञ्च कुर्य्यात् । ततोऽर्घ्यपात्रात् किञ्चित् जलं प्रोक्षणीपात्रे निक्षिप्य तेनोदकेनात्मानं पूजोपकरणञ्च मूलेन चिरभुक्त्वा पीठमन्त्रेण शरीरे धर्म्मादीन् पूजयेत् । ततो हृत्पद्मस्य पूर्ब्बादिकेशरेषु पीठशक्तीः संपूज्य मध्ये पीठमनुं यजेत । तत्र हृदये मूलदेवतां नैवेद्यं विना गन्धाद्यैः पूजयेत् । तत उत्तमाङ्गहृदयमूलाधारपादसर्व्वाङ्गेषु मूलेन पञ्चपुष्पाञ्जलीन् दत्त्वा यथाशक्ति मन्त्रं जप्त्वा जपं समर्पयेत् । सर्व्वमेतत् प्रोक्षणीपात्रस्थवारिणा विदध्यात् । ततः प्रोक्षणीस्थोयं विलोक्य पूर्ब्ववदर्घ्यं वह्निःपूजामारभेत । तत्र शारदोक्तसर्व्वतोभद्रमण्डलाद्यन्यतममण्डलं विधाय तत्र घटं संस्थाप्य मण्डलं संपूज्य शालिभिः कर्णिकामापूर्य्य तदुपरि तण्डुलानास्तीर्य्य तेषु दर्भानास्तीर्य्य विस्तरं चाक्षतसंयुक्तं तदुपरि न्यसेत् । ततो मण्डले पीठोक्तदेवताः पूजयेत् । ततो मण्डले प्रादक्षिण्येन वह्नेर्दशकला विन्यस्य पूजयेत् । ततो हेमादिरचितं कुम्भं अस्त्रमन्त्रेण प्रक्षाल्य चन्दनागुरुकर्पूरैर्धूपयित्वा त्रिगुणतन्तुना संवेष्ट्य कुम्भं संपूज्य तत्र विस्तराक्षतं नवरत्नानि च प्रक्षिप्य प्रणवमुच्चरन् कुम्भपीठयोरैक्यं विभाव्य पीठे स्थापयेत् । कुम्भे प्रादक्षिण्येन सूर्य्यस्य द्वादशकला विन्यस्य संपूजयेत् । ततः क्षीरिद्रुमकषायेण पलाशत्वम्बेन वा तीर्थजलैर्व्वा सुवासितजलैर्व्वा आत्ममन्त्रेण वा तीर्थजलैर्व्वा सुवासितजलैर्व्वा आत्ममन्त्रेण मातृकां मन्त्रञ्च प्रतिलोमतो जपन् पूरयेत् कुम्भं देवताधिया । ततश्चन्द्रस्यामृतादिषोडशकला जले प्रादक्षिण्येन विचिन्त्य मन्त्रेण संपूज्य शङ्खान्तरं क्षीरिद्रुमकषायादिद्रव्येणापूर्य्य गन्धाद्यङ्कं विलोप्य तस्मिन् जले सकलाः कला आवाह्य पूजयेत् । तत्रादौ वह्नेर्दशकलाः पूजयेत् । ततो मूलमन्त्रं प्रतिलोमेन जपन् मन्त्रस्य देवतां मनसा ध्यायन् आसां प्राणप्रतिष्ठां कृत्वा गन्धादिभिः पूजयेत् । ततः प्रत्येकेन पूजयेत् । ततः सूर्य्यस्य तपिन्यादिद्वादशकलाः आवाहनादिकं कृत्वा संपूज्य प्रत्येकं पूजयेत् । ततश्चन्द्रस्यामृतादिषोडशकलाः प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततः पञ्चाग्नेयकलाः पूजयेत् । यथा वह्न्यादिकचवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा पूर्ब्ववत् संपूज्य प्रत्येकेन पूजयेत् । ततो जरादिटतवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततस्तीक्ष्णादिपयवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततः शीतादिवर्गपञ्चकलाः (वं-सं-हं-क्षं) प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततो निवृत्त्यादिअवर्गषोडशकलाः प्राणप्रतिष्ठादिकं कृत्वा पूजयेत् । शक्तेश्च प्रत्येकमावाह्य पाद्यादिभिः पूजयेत् ।

ततः कलात्मकं तत्पञ्चकस्यं क्वाथं कुम्भे निःक्षिपेत्। ततोऽश्वत्थपनसचूतपल्लवैरिन्द्रवल्लीवेष्टितैः कल्पवृक्षबुद्ध्या कुम्भवक्त्रं पिधाय तस्मिन् वक्त्रे सफलाक्षतं चषकं कल्पवृक्षफलबुद्ध्या स्थापयेत्। ततः कुम्भं निर्म्मलेन क्षौमयुग्मेन संवेष्ट्य मूलेन कुम्भे मूर्त्तिं सङ्कल्प्य यथोक्तरूपेण देवतां ध्यात्वा तस्यामावाहनादिकं कृत्वा पूजयेत्। देवताङ्गे अङ्गन्यासं कृत्वा धेनुमुद्रापरमीकरणमुद्रे प्रदर्श्य प्राणप्रतिष्ठां कृत्वा षोड़शोपचारादिभिः पूजयेत्। ततोऽष्टोत्तरं सहस्रं शतं वा संजप्य जपं समर्पयेत्। ततो मन्त्रस्य दशसंस्कारान् कृत्वा गुरुः शिष्यमानीय मन्त्रेण शिष्यनेत्रं वस्त्रेणाच्छाद्य शिष्याञ्जलिं पुष्पैः पूरयित्वा गुरुः स्वयमेव मन्त्रं जपन् कलसे देवतामावाह्य क्षिपेत्। ततो नेत्रबन्धनं दूरीकृत्य दर्भान्तरे आसीनं शिष्यं स्वकृतपूजाकर्म्माद्भुतशुद्धादिकं विधाय तत्तन्मन्त्रोक्तन्यासान् शिष्यस्य देहे कुर्य्यात्। कुम्भस्थां देवतां पुनः षष्ठोपचारैः संपूज्याग्रतः स्थितं शिष्यमन्यस्मिन्नुपवेशयेत्। ततो मङ्गलाचारपूर्ब्बकं तत्कुम्भं समुद्धृत्य तन्मुखस्थान् सुरद्रुमरूपान् पल्लवान् शिष्यशिरसि निधाय माष्टकां मनसा जपन् मूलेन साधितैस्तोयैर्वैशिष्ठसंहितोक्ताभिषेकमन्त्रैस्तमभिषिञ्चेत्। शिष्योऽवशिष्टजलेनाचम्य वाससी परिधाय गुरोः सन्निधावुपविशेत्। ततस्तामेव गुरुरात्मनो देवतां शिष्यसंक्रान्तां तयोरैक्यं विभाव्य गन्धादिभिः पूजयेत्। ततो मन्त्रेण शिष्यस्य शिखां बद्ध्वा संरक्ष्य शिष्यशरीरे कलान्यासं कुर्य्यात्। ततः शिष्यशिरसि हस्तं दत्त्वा अष्टोत्तरशतं जप्त्वा अमुकमन्त्रं तेऽहं ददामीति शिष्यहस्ते जलं दद्यात्। ददस्वेति शिष्यो ब्रूयात्। तत ऋष्यादियुक्तं मन्त्रं गुरुर्द्दिजातीनां दक्षिणकर्णे त्रिः श्रावयेत् वामे सकृत्। स्त्रीशूद्राणां वामकर्णे त्रिः श्रावयेत् दक्षिणे सकृत्। ततः शिष्यो गुरुचरणे पतित एव तिष्ठेत्। ततो गुरुर्म्मन्त्रेण तमुत्थापयेत्। ततः शिष्यो लब्धमन्त्रं अष्टोत्तरशतं जपेत्। ततः शिष्यः कुशतिलजलान्यादाय गुरवे दक्षिणां सवर्णं काञ्चनं वा दद्यात्। दीक्षायज्ञसामग्रीश्च निवेदयेत्। अन्यांश्च ब्राह्मणान् परितोषयेत्। गुरुः स्वशक्तिरक्षणार्थाय अष्टाधिकं सहस्रं शतं वा मन्त्रं जपेत्। ततः शिष्यो मिष्टान्नपानादिना ब्राह्मणान् परितोष्य स्वयं भुञ्जीत। दीक्षादिवसे गुरुशिष्ययोरुपवासे दोषः। इति तन्त्रसारोक्ता कलावतीदीक्षा समाप्ता॥

कलाविकः, पुं, (कलं आविकायति विशेषेण रौतीति कल + आ + वि + कै + कः।) कुक्कुटः। इति त्रिकाण्डशेषः॥

कलाविकलः, पुं, (कलः मधुराव्यक्तः आविकलः रवो यस्य सः। यद्वा कलया कामावेशेन विकलः चञ्चलः।) चटकः। इति शब्दरत्नावली॥

कलाशकः, पुं, (कलमाशन्तीति। कल + आ + शक् + डः। संज्ञायां कन्।) काङ्गवाद्यम्। इति शब्दरत्नावली॥

कलिः, पुं, (कलते कलेराश्रयत्वेन वर्त्तते इति। कल + "सर्व्वधातुभ्य इन्"। उणां ४। ११७। इति इन्।) विभीतकवृक्षः। (विभीतकस्य कलिद्रुमत्वकारणमुक्तं यथा, वामने २७ अध्याये।

"इत्येवमुक्तो देवेन ब्रह्मणा कलिरव्ययः।
दीनान् दृष्ट्वा च शक्रादीन् विभीतकवनं ययौ"॥

अस्य गुणादिकं विभीतकशब्दे द्रष्टव्यम्॥*॥

कलते स्पर्द्धते इति कल + "सर्व्वधातुभ्यः इन्"। उणां-४।११७। इति इन्।) शूरः। (कलन्ते स्पर्द्धमाना भावन्तेऽस्मिन्निति। कल + "सर्व्वधातुभ्य इन्"। उणां ४। ११७। इति इन्।) विवादः। (यथा, भागवते ६। ६। ४४।

"तासां कलिरभूद्भूयांस्तदर्थऽपोह्य सौहृदम्।
समानरूपो नायं व इति तद्गतचेतसाम्"॥)

युद्धम्। (कल्यते पापेषु निक्षिप्यते अनेन यद्वा कलयति पापेन जड़यति कलुषितं करोति। कल + इन्।) अन्त्ययुगम्। इति हेमचन्द्रः॥

तस्योत्पत्तिर्यथा।

"प्रलयान्ते जगत्स्रष्टा ब्रह्मा लोकपितामहः।
ससर्ज्ज घोरं मलिनं पृष्ठदेशात् सपातकम्॥
सत्यधर्म्म इति ख्यातस्तस्य वंशानुकीर्त्तनात्।
श्रवणात् स्मरणाल्लोकः सर्व्वपापैः प्रमुच्यते॥
अधर्म्मस्य प्रिया रम्या मिथ्या माय्यार्लोचना।
तस्याः पुत्रोऽतितेजस्वी दम्भः परमकोपनः॥
स मायायां भगिन्यान्तु लोभं पुत्रञ्च कन्यकाम्।
निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत्॥
स हिंसायां भगिन्यान्तु जनयामास तत्कलिम्।
वामहस्तधृतोपस्थं तैलाभ्यक्ताञ्जनप्रभम्॥
काकोदरं करालास्यं लोलजिह्वं भयानकम्।
पूतिगन्धं द्यूतमद्यस्त्रीसुवर्णक्षताश्रयम्॥
भगिन्यान्तु दुरुक्त्यां स भयं पुत्रञ्च कन्यकाम्।
मृत्युं संजनयामास तयोश्च निरयोऽभवत्॥
यातनायां भगिन्यान्तु लोभपुत्रायुतायुतम्।
इत्थं कलिकुले जाता बहवो धर्म्मनिन्दकाः"॥

इति कल्किपुराणे १ अध्यायः॥*॥

कलिधर्म्मो यथा।

"यदा सदाऽन्तं तन्द्रानिद्रा हिंसा विषादनम्।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः॥
यस्मिन् जनाः कामिनः स्युः श्वश्वत्कटुकभाषिणः।
दस्युग्रस्ता जनपदा वेदाः पाषण्डदूषिताः॥
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः।
व्रता वटवो ऽशौचा भिक्षवश्च कुटुम्बिनः॥
तपस्विनो ग्रामवासा न्यासिनो ऋर्थलोलुपाः।
कृशकाया महाहाराश्चौर्य्यमायोरुसाहसाः॥
त्यक्ष्यन्ति भृत्याश्च पतिं तापसान्त्वखिलं व्रतं।
शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः॥
उदिमाख्यानलङ्काराः पिशाचसदृशाः प्रजाः।
श्वश्रूश्वशुरभोजनेनाग्निदेवतातिथिपूजनम्॥
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम्।
स्त्रीपराश्च जनाः सर्व्वे शूद्रप्रायाश्च शौनक॥
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः।
शिरःकण्डूयनपरा आढ्यां भेत्स्यन्ति सत्पतेः॥

विष्णुं न पूजयिष्यन्ति पाषण्डोपहता जनाः॥
कलेर्द्दोषनिधेर्विप्र अस्ति ह्येको महान् गुणः।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतः क्रतुम्।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्॥
तस्मात्कलौ हरिर्नित्यं ध्येयः पूज्यश्च शौनक"॥

इति गारुड़े युगधर्म्मे २२७ अध्यायः॥

(माघपूर्णिमायां शुक्रवारे कलियुगोत्पत्तिः।) तद्युगमानम्। द्वात्रिंशत्सहस्राधिकचतुर्लक्षवत्सराः (४३२०००)।

(आर्य्यभट्टमते ऽब्द १५७७९१७५० दिवसाः। सूर्य्यसिद्धान्तमते १५७७९१७८२। ४८ दिवसाः। ज्योतिषसैद्धान्तिकमते च १५७७९१७८२ दिवसाः॥ अतो वर्षमाणमार्य्यभट्टमते ३६५। १५। ३१। १५। दिवसाः।

सूर्य्यसिद्धान्तमते ३६५।१५।३१।३१।२४। दिवसाः। ज्योतिषसैद्धान्तिकमते च ३६५। १५। ३१। ३० दिवसाः।)

तस्यातीताब्दाः १८०९ शाकपर्य्यन्तं ४९८८॥

(कलेस्त्रिपञ्चाशदधिकषट्शतमितेषु (६५३) वत्सरेषु गतेषु युधिष्ठिरादयो जाताः। यदुक्तं राजतरङ्गिण्यां १। ५१।

"शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः"॥

ऋतुपक्षशरद्विमितेषु (२५२६) युधिष्ठिराब्देषु कलेर्ग्रहसिन्धिन्दुनेत्रमितेषु (३१७९) वत्सरेषु गतेषु च महाविषुवसंक्रान्त्यां शालिवाहनस्य राज्ञो जन्मदिनमारभ्य शकाब्दः प्रवर्त्तितः। यदुक्तं तत्रैव १। ५६।

"आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ। षड्द्विपञ्चद्वियुतः शककालस्तस्य राज्यस्य"॥ अयन्तु महाविषुवसंक्रान्तिमधिगम्य परिगणितो भवति॥

कलेश्चतुश्चत्वारिंशदधिकत्रिसहस्रपरिमितेषु (३०४६) वत्सरेषु गतेषु चैत्रशुक्लप्रतिपदि उज्जयिनीपतेर्विक्रमादित्यस्य राज्यप्राप्तिकालमारभ्य संवत् इत्याख्यया प्रसिद्धो वत्सरः प्रचलितः। अयन्तु चैत्रशुक्लप्रतिपत्तिथिमधिगम्य परिगणितो भवति॥

कलेरेकोर्द्धशताधिकत्रिसहस्रपरिमितेषु (३१०१) वत्सरेषु गतेषु प्रायशो सौरपौषस्य अष्टादशदिवसे यीशुखीष्टोब्दः प्रचलितः॥

पञ्चनवत्यूर्द्धषट्शताधिकत्रिसहस्रपरिमितेषु (३६९५) कलेरतीताब्देषु सप्तदशाधिकपञ्चशतमिते (५१७) च शकाब्दे प्रचलति भाद्रशुक्लादशम्यां उत्कलदेशप्रचलितः विजयति इत्याख्यया प्रसिद्धो वत्सरः प्रवर्त्तितः। अयन्तु भाद्रशुक्लादशमीमधिगम्य परिगणितो भवति॥

त्र्योविंशत्यूर्द्धसप्तशताधिकत्रिसहस्रपरिमितेषु (३७२३) कलेरतीताब्देषु पञ्चचत्वारिंशदधिकपञ्चशतमिते (५४५) च शकाब्दे प्रचलति ज्यैष्ठस्य विंशतितमदिवसीय शुक्रवारात् महम्मदस्य मक्का-

प्रस्थानकालमारभ्य "हिज्रि" इति प्रसिद्धो ह्ययनः प्रचलितः। अयन्तु चान्द्रमासेन परिगणितो भवति। अतः प्रायशः सौरसप्ननवतितमवर्षैरस्य शततमा वत्सरा भवेयुः॥

पञ्चाशीत्यूर्द्धपञ्चशताधिकचतुःसहस्रपरिमितेषु कलेरतीताब्देषु (४५८५) सप्ताधिकचतुर्दशशतपरिमिते (१४०७) च शकाब्दे प्रवर्त्तति फाल्गुनीयोनविंशदिवसे शुक्रवारे पूर्णिमायां भगवांश्चैतन्यदेवः प्रादुर्बभूव। अस्य जन्मदिनमारभ्य चैतन्याब्दः प्रचलितः॥)

अस्मिन् युगे धर्म्मः एकपादः। अधर्म्मस्तुर्य्यादः। आयुः शतवर्षाणि। अवतारः श्रीकृष्णः। तद्युगशेषे पापिनां विनाशाय भगवद्यशमावतारः कल्किर्भविष्यति। तद्युगधर्म्मो यथा।

"कलौ तु धर्म्मपादानां तुर्य्यांशोऽधर्म्महेतुभिः। एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति॥ तस्मिन् लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः। दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः"॥

"यदा मायान्वितं तन्द्रा निद्रा हिंसा विषादनम्। शोकमोहौ भयं दैन्यं स कलिस्तामसः स्मृतः॥ यस्मात् क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः। कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः॥ दस्युप्रायाः जनपदा वेदाः पाषण्डदूषिताः। राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः॥ अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बिनः। तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपाः॥ रूक्षकाया महाहारा वृकपत्या गतह्रियः। शश्वत्कटुकभाषिण्यश्चौर्य्यमायोरुसाहसाः॥ प्रयास्यन्ति वै क्षुद्राः किराटाः कुटकारिणः। अनापद्यपि मंस्यन्ते वार्त्तां साधुजुगुप्सिताम्॥ पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम्। भृत्यं विपन्नं पतयः कौलं गात्रापयस्विनीः॥ पितॄन् भ्रातॄन् सुहृद्ज्ञातीन् हित्वा सौरतसौहृदाः। ननान्दृश्यालसम्वादा दीनाः स्त्रैणाः कलौ नराः॥ शूद्राः प्रतिग्रहीष्यन्ति तपोवेषोपजीविनः। धर्म्मं वक्ष्यन्त्यधर्म्मज्ञा अधिरुह्योत्तमासनम्॥ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्षिताः। निरन्ने भूतले राजन्नाहृष्टिभयातुराः॥ वासोऽन्नपानशयनव्यवायस्नानभूषणैः। हीनाः पिशाचसन्दर्शा भविष्यन्ति कलौ प्रजाः॥ कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः। त्यक्ष्यन्ति हि प्रियान् प्राणान् हनिष्यन्ति स्वकानपि॥ न रक्षिष्यन्ति मनुजाः स्थविरौ पितरावपि। पुत्रान् भार्य्याश्च कुलजां क्षुद्राः शिश्नोदरम्भराः॥

कलौ न राजन् जगतां परं गुरुं
त्रिलोकनाथानतपादपङ्कजम्।
प्रायेण मर्त्या भगवन्तमच्युतं
यक्ष्यन्ति पाषण्डविभिन्नचेतसः"॥ *॥

कलिकृतदोषविनाशोपायः। यथा,

"यन्नामधेयं म्रियमाण आतुरः
पतन् स्खलन् वा विवशो गृणन् पुमान्।
विमुक्तकर्म्मार्गल उत्तमां गतिं
प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः॥
पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसम्भवान्।
सर्व्वान् हरति चित्तस्थो भगवान् पुरुषोत्तमः॥
श्रुतः संकीर्त्तितो ध्यातः पूजितश्चादृतोऽपि वा।
नृणां क्षिणोति भगवान् हृत्स्थो जन्मायुताशुभम्॥
यथा हैम्नि स्थितो वह्निर्दुर्व्वर्णं हन्ति धातुजम्।
एवमात्मगतो विष्णुर्योगिनामशुभाशयम्॥
विद्यातपःप्राणनिरोधमैत्री
तीर्थाभिषेकव्रतदानजप्यैः।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा
यथा हृदिस्थे भगवत्यनन्ते॥
तस्मात् सर्व्वात्मना राजन् हृदिस्थं कुरु केशवम्।
म्रियमाणो ह्यवहितस्ततो याहि परां गतिम्"॥
"कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः।
कीर्त्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत्॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्"॥
इति श्रीभागवते महापुराणे १२। ३ अध्यायः॥*॥
तद्युगशेषधर्म्माः यथोक्तास्तत्रैव १२।१।३६-४७॥
"सौराष्ट्रावन्त्याभीराश्च शूरा अर्ब्बुदमालवाः।
व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः॥
सिन्धोस्तटं चन्द्रभागां कान्तीं काश्मीरमण्डलम्।
भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छा ब्रह्मवर्च्चसः॥
तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः।
एतेऽधर्म्मोत्तरा पापा दाम्पत्यधनमन्यवः॥
स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः।
उदितास्तमितप्राया अल्पसत्वाल्पकायुषः॥
असंस्कृताः क्रियाहीना रजसा तमसा वृताः।
प्रजास्ते भक्षयिष्यन्ति म्लेच्छा राजन्यरूपिणः॥
तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः।
अन्योन्यतो राजभिश्च क्षयं यास्यन्ति पीडिताः"॥
तत्रैव १२। २। १-१६।
"ततश्चानुदिनं धर्म्मः सत्यं शौचं क्षमा दया।
कालेन बलिना राजन् नङ्क्ष्यत्यायुर्बलं स्मृतिः॥
वित्तमेव कलौ नृणां जन्माचारगुणोदयः।
धर्म्मन्यायव्यवस्थायां कारणं बलमेव हि॥
दाम्पत्येऽभिरुचिर्हेतुर्मायैव व्यवहारिके।
स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि॥
लिङ्गमेवाश्रमाख्यातावन्योन्यापत्तिकारणम्।
अलक्ष्या न्यायदौर्ब्बल्यं पाण्डित्ये चापलं वचः॥
अनाढ्यतैवासाधुत्वे साधुत्वे दम्भ एव हि।
स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनम्॥
दूरे वार्य्ययनं तीर्थं लावण्ये केशधारणम्।
उदरम्भरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि॥
दाक्ष्ये कुटुम्बभरणं यशोऽर्थे धर्म्मसेवनम्।
एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले॥
ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः।
प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्म्मभिः॥
आच्छिन्नदारद्रविणा यास्यन्ति गिरिकाननम्।
शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः॥
अनाढ्यता विनङ्क्ष्यन्ति दुर्भिक्षकरपीडिताः॥
शीतवातातपप्रावृड्हिमैरन्योऽन्यतः प्रजाः।
क्षुत्तृट्भ्यां व्याधिभिश्चैव सन्तप्स्यन्ते च चिन्तया॥
त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणाम्॥
क्षीयमाणेषु देहेषु देहिनां कलिदोषतः।
वर्णाश्रमवतां धर्म्मे नष्टे वेदपथे नृणाम्॥
पाषण्डप्रचुरे धर्म्मे दस्युप्रायेषु राजसु।
चौर्य्यानृतवृथाहिंसानानावृत्तिषु वै नृषु॥
शूद्रप्रायेषु वर्णेषु च्छागप्रायासु धेनुषु।
गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बन्धुषु॥
अनुप्रायासोषधीषु शमीप्रायेषु स्थास्नुषु।
विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु॥
इत्थं कलौ गतप्राये जनेषु खरधर्म्मिषु।
धर्म्मत्राणाय सत्वेन भगवानवतरिष्यति"॥
(देवगन्धर्व्वविशेषः। स तु कश्यपात् दनुकन्यायां मुनौ जातः। यथा, महाभारते १। ६५। ४४।
"तथा शालिशिरा राजन् पर्ज्जन्यश्च चतुर्दश।
कलिः पञ्चदशस्त्वेषां नारदश्चैव षोड़शः"॥
शिवः। यथा महाभारते। १३। १७। ७८।
"दम्भोद्भवो वैदम्भो वशो वशकरः कलिः"॥)

कलिः, स्त्री, (कलयति ईषत्प्रकाशते उद्भवति वा कल + ततः इन्।) कलिका। इति मेदिनी॥

कलिकः, पुं, (कलौ मन्दगम्भीरध्वनिरस्त्यस्मिन्। कल + मत्वर्थे ठन्।) क्रौञ्चपक्षी। इति शब्दरत्नावली॥

कलिका, स्त्री, (कलिरेव। स्वार्थे कन् टाप् च।) अस्फुटितपुष्पम्। तत्पर्य्यायः। कोरकः २। इत्यमरः। २। ४। १६॥ कलिः ३ कली ४। कोरकम्। ५ इति तट्टीका॥ (यथा, साहित्यदर्पणे ३। १६८।
"मुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः"॥)
वीणाभूषणम्। इति हेमचन्द्रः॥ पदसन्ततियुक्तरचनाविशेषः। तद्विवरणम् यथा,—
"सुश्लिष्टकलिकारम्भे श्लोकान्तं युगपद्यः स्मृताः।
अन्यासां कलिकानान्तु भवन्त्येकैकशो हि ते॥
पूर्त्तौ द्वौ कलिकाभिस्तु विरदास्तुल्यसङ्ज्ञकाः"॥*॥

कलिकालक्षणम्।

"कला नाम भवेत्कालनियता पदसन्ततिः।
कलाभिः कलिका प्रोक्ता तद्भेदाः षट् समीरिताः।
कलिका चण्डवृत्ताख्या द्विगादिगणवृत्तका।
तथा त्रिभङ्गी वृत्ताख्या मधा मिश्रा च केवला"॥

चण्डवृत्ते दशधा संयुक्तवर्णाः।

"अत्र संयुक्तवर्णानां नियमो दशधा च ते।
मधुरं श्लिष्टविश्लिष्टग्रथितक्रादिनस्वमौ॥
भिद्यन्ते ह्रस्वदीर्घाभ्यां ते दर्श्यन्ते स्फुटं यथा।
ह्रस्वान्मधुरसंयोगाः शङ्खराङ्कुशकिङ्कराः॥
तस्मात्तु श्लिष्टसंयुक्ता दर्पकर्परसर्पवत्।
ततो विश्लिष्टसंयुक्ता भल्लकन्यायचिह्नयः॥
तथा ग्रथितसंयुक्ताः पद्म कश्यप वज्रवत्।
प्रोक्ता क्रादियुता मद्यं सद्यं गृह्यं प्रसज्यवत्॥
गर्हादीन् क्रादिसंयुक्तभेदान् केचित् समूचिरे।
दीर्घात्तुक्राङ्कार्पाशं वाद्यं वैश्यश्च वाह्यकम्"॥

कषायपरिमाणमुक्तम्।

"अधिकास्वेचतुःषष्टिर्न्यूना द्वादश ताः कलाः।
एताभ्यो नाधिकाः कार्य्या न्यूनाप्यि न पण्डितैः"॥
तत्र तावच्चतुःषष्टिकलिका द्विधा। नखो विग्रिख-
श्चेति भेदात्। तत्र रम्भादि-विंशतिभेदस्य नखश्चेह
वर्ज्जितादयो नव भेदा गृहीताः।
"वर्ज्जितं वीरभद्रञ्च समयोऽच्युत उत्पलम्।
तुरङ्गः श्रीगुरुरतिस्तथा भातङ्गखेलितम्।
तिलकश्चेति कलिका नखश्चेहोदिता नव"॥इत्युक्तेः॥

अथ विग्रिखः। पद्मकुन्दचम्पकबञ्जुलभेदात् पञ्च-
विधः। तेष्वादिमं पद्मं षड्रेखहसितकल्पाख्यभूपलेन-
न्दीवरादयाम्भोरुहकङ्कारभेदात् षड्विधम्। द्वितीयं वकुलन्तु भासुरमङ्गलभेदात् द्विविधमित्थे
कादशभेदो विग्रिखः।
"षड्रेखहं सितकल्पं तथा पाण्डूत्पलं परम्।
इन्दीवराख्याम्भोजे कङ्कारश्चेति षड्विधम्॥
ईषद्भेदेन कथितं पद्ममेव मनीषिभिः।
चम्पकं वञ्जुलं कुन्दं वकुलं द्विविधं तथा"॥
इति पञ्चविधस्यापि विग्रिखस्येहोक्तिः।
एवं चतुःषष्टिकलिका विंशतिधा गृहीताः॥ *॥

अथ षष्टिधा द्विगादिगजदन्तकाकलिका मञ्जरी-
त्यभिहिता क्रमात् कोरकगुच्छकसंपुष्पकुसुम-
गन्धाख्या। तस्याश्चाच कोरकगुच्छकुसुमानि
गृहीतानि। कोरको गुच्छकुसुमैर्मञ्जरी त्रिविधाच
त्रित्युक्तेः। त्रिभङ्गी कलिका तु शिखरिण्यादि-
पूर्व्या सोढ़ा। तस्याश्चाच दण्डकपूर्व्या विदग्धपूर्व्या
च गृहीता। दण्डकाख्या विदग्धाख्या त्रिभङ्गीह
द्विधा मतेत्युक्तेः॥ *॥ अथ मिश्रकलिका तु
कलिकागद्यसंपृक्ता सप्तविभक्तिका वा। चत्व-
मयी सर्व्वलघ्वी चेति द्विभेदा केवला चेत्यष्टौ।
तदेवं षड्भ्यो महाकलिकाभ्यो ऽष्टाविंशतिरिह
कलिका गृहीताः। रम्भादय एकादश नखभेदाः।
संपुष्पगन्धौ मञ्जरीभेदौ। शिखरिण्यादयः त्रिभ
ङ्गीभेदा मध्यकलिका च त्वत्राश्चाद्यताधिक्यविर-
हात्। इति रूपगोस्वामिभक्तगोविन्दविरुदावली-
भाष्ये बलदेवविद्याभूषणः॥ (छन्दोभेदः। यदुक्तं
हलायुधकोषे ४ अध्याये।
"प्रथममपरचरणयुगमपि
अयति स यदि वक्त्र।
इतरदितरगदितमपि यदि च तूर्य्यम्
चरणयुगलकमविलम्बितमपरमिति कलिका सा"॥
कला। यथोक्तं सिद्धान्तशिरोमणौ।
"तन्यन्ते कलिका यस्मात्तस्मात्तास्तिथयः स्मृताः"॥)

कलिकापूर्व्व, क्ली, (कलिकया यंत्रेण जन्यं अपूर्व्व अदृष्टम्।) अङ्गप्रधानान्यतरयज्ञकर्म्मसाध्यस्वर्गा-
दिफलजनकापूर्व्वोत्पत्तौ तत्तत्फलैककर्म्मजन्यमदृ-
ष्टम्। इति स्मृतिः॥

कलिकारः, पुं, (कलिं चिचिकुचीतिशब्देन कलहं
करोतीति। कलि + कृ + अण्।) धूम्राटपक्षी।
पीतमस्तकपक्षी। (कलिं खदेहस्थकण्टकैरनिष्टं
करोतीति।) पूतिकरञ्जः। इति मेदिनी॥

कलिकारकः, पुं, (कलिं कण्टकैरनिष्टं करोति।
कलि + कृ + णिच् + ण्वुल्।) पूतिकरञ्जः। काँटा-
करञ्ज गाटाकरञ्ज इति च भाषा। इत्यमरः। २।
४। ४८॥ (कलिं कलहं कारयति। कलि + कृ +
णिच् + ण्वुल्।) नारदमुनिः। इति हेमचन्द्रः॥

कलिकारी, स्त्री, (कलिं गर्भपातान्यनिष्टं करोतीति।
कलि + कृ + अण्। जातित्वात् ङीष्।) उप-
विषभेदः। विषलाङ्गलीया इति भाषा। तत्प-
र्य्यायः। लाङ्गली २ हलिनी ३ गर्भपातनी ४
दीप्ता ५ विशल्या ६ अग्निमुखी ७ हली ८ नक्ता
९ इन्द्रपुष्पिका १० विद्युज्ज्वाला ११ अग्निशिखा
१२ ग्रन्थहृत् १३ पुष्पसौरभा १४ खर्ज्जपुष्पा
१५ वह्निशिखा १६। अस्या गुणाः। कटुत्वम्।
उष्णत्वम्। कफवातनाशित्वम्। गर्भान्तःशल्यनि-
ष्क्रामकारित्वम्। परमसारित्वञ्च। इति राज-
निर्घण्टः॥

कलिङ्ग, क्ली, (कलि + गम् + ड। निपातनात्
साधुः।) इन्द्रयवम्। इत्यमरः। २। ४। ६७।

कलिङ्गः, पुं, (कलिं पूतिगन्धादिकं गच्छति प्राप्नोति
कलि + गम् + ड। निपातनात् साधुः।) पूतिक-
रञ्जवृक्षः। (के मस्तके लिङ्गं पीतादिचिह्नमस्य।)
धूम्राटपक्षी। देशविशेषः। इति हेमचन्द्रः॥
(खनामख्यातो नृपतिविशेषः। अस्य नामानुसारे-
णैव कलिङ्ग इति देशाख्या जाता। यदुक्तं महा
भारते। १। १०४। ४६,५०।
"अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सह्यश्च ते सुताः।
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि॥
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः"॥)
मेदिनीमते जलपदार्थे पुं भूम्नि। (यदुक्तं तत्रैव
गत्रिके ३३।
"कलिङ्गः पूतिकरञ्जे धूम्राटे भूम्नि नीहृति"॥
अस्य प्रमाणं यथा, गोरामायणे। ४। १०। २१।
"ततः शकपुलिन्दांश्च कलिङ्गांश्चैव मार्गतः"॥
तद्देशवासिमानवादयः। यथा, महाभारते। ३।
११४। ३।
"ततः समुद्रतीरेण जगाम बहुधाधिपः।
भ्रातृभिः सहितो वीरः कलिङ्गान् प्रति भारत"॥)
कुटजवृक्षः। (अस्यपर्य्यायो यथा भावप्रकाशे
पूर्व्वखण्डे १ भागे।
"उक्तं कुटजवीजन्तु यवभिन्द्रयवस्तथा।
कलिङ्गश्चापिकालिङ्गं तथा भद्रयवा अपि"॥
इन्द्रयवशब्दे अस्य गुणावली ज्ञेया॥
अवहारो यथा तद्यथा।
"बिल्वं छागपयः सिद्धं सितामोचरसान्वितम्।
कलिङ्गचूर्णसंयुक्तं रक्तातीसारनाशनम्"॥
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे॥)
शिरीषवृक्षः। शुक्लवृक्षः। इति राजनिर्घण्टः॥

कलिङ्गकः, पुं, (कलिङ्ग + संज्ञायां कन्। कलिङ्ग
इव कायति वा। कै + कः।) इन्द्रयवम्। इति
रत्नमाला॥ (यथा, वैद्यकचक्रपाणिसंग्रहे ज्वरा-
धिकारे।
"कलिङ्गकाः पटोलस्य पाठा कटुकरोहिणी"॥)

कलिङ्गा, स्त्री, (कं सुखं लिङ्गतीति। क + लिङ्ग
अच् टाप्।) नितम्बिनी। महिषी। इति मेदिनी
कोषहेमचन्द्रौ। चिरटा। इति शब्दचन्द्रिका।
तेउड़ि इति भाषा॥

कलिङ्गः, पुं, (कं वातं लङ्घति तिरस्करोति रोधने-
नेति यावत्। क + लङ्घि भर्त्सने + "कर्म्मण्यण्"
३। २। १। इति अण्। निपातनात् साधुः।)
कटः। इति हेमचन्द्रः॥ चाँच् दरमा इत्यादि
भाषा॥

कलितं, त्रि, (कल् + कर्म्मणि क्त।) विदितम्।
आप्तम्। इति मेदिनी॥ मेदितम्। गणितम्।
इति शब्दरत्नावली॥ श्रुतम् यथा,—
"करकलितकपालः कुण्डली दण्डपाणिः"। इति
भैरवध्यानम्॥
(प्राप्तः। यथा आर्य्यासप्तशती ३५५।
"विग्रिख इव कलितकरः प्रविशति हृदं न
निःसरति"॥ भावे + क्त। ज्ञानम्॥)

कलिद्रुमः, पुं, (कलिना आश्रितो द्रुमः शाकपार्थि-
वादिवत् मध्यपदलोपः।) विभीतकवृक्षः। इत्य-
मरः। २। ४। ५८। बयड़ा इति भाषा॥ (अस्य
पर्य्यायो यथा भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"विभीतकस्त्रिफलिङ्गः स्याद्भाक्षः कर्षफलस्तु सः।
कलिद्रुमो भूतवासस्तथा कलियुगालयः"॥
विशेषविवरणमस्य विभीतकशब्दे ज्ञेयम्॥)

कलिन्दः, पुं, (कलिं ददाति श्यति वा खच् मुम् च।)
विभीतकवृक्षः। इति राजनिर्घण्टः॥ (विभीतक-
शब्देऽस्य विशेषो ज्ञातव्यः॥) सूर्य्यः। पर्व्वत-
विशेषः। यस्मात् यमुना निर्गता। इति काली-
शब्दव्युत्पत्तौ भरतः॥ (यथा रघुः ६। ४८।
"कलिन्दकन्या मथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति"॥)

कलिन्दकन्या, स्त्री, (कलिन्दस्य पर्व्वतविशेषस्य कन्या
तदुत्पन्नत्वात्।) यमुनानदी। इति राजनिर्घण्टः॥
("कलिन्दकन्यामथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति"॥
इति रघुः। ६। ४८॥)

कलिन्दनन्दिनी, स्त्री, (कलिन्दं नन्दयति। कलिन्द +
नन्द + णिनिः ङीप् च। कलिन्दस्य नन्दिनी वा।)
यमुनानदी। इति शब्दरत्नावली॥

कलिप्रियः, पुं, (कलिः कलहः प्रियो यस्य।) नारद-
मुनिः। यथा। "कलिप्रियस्य प्रियशिष्यवर्गः"।
इति रघुः॥ (कलेः प्रियः। दुष्टप्रकृतिकः।) वा-
नरः। इति शब्दरत्नावली॥

कलिमारकः, पुं, (कलीनां कलिकानां माला यत्र।
अस्य रः कप् संज्ञायां कन् वा। यद्वा कलिना
खदेहस्थकण्टकाघातदुःखेन मारयतीति। कलि
+ मृ + णिच् + ण्वुल्।) कलिकारकः। इत्यमर-
टीकायां रमानाथः। २। ४। ४८॥

कलिमालकः, पुं, (कलीनां माला यत्र। कप् कलिना
मारयति वा रस्य लः।) कलिकारकः। इति
स्वामी इत्यमरटीकायां भरतः॥

कलिमाल्यः, पुं, (कलीनां माल्यं यत्र।) पूतिकरञ्जः।
इति राजनिर्घण्टः॥

कलियुगं, क्ली, (कलिरेव युगम्। अन्ये: शिरा राहोः शिर इति वत् कलेर्युगं वा।) चतुर्थं युगम्। (यथा मनुः १। ८५।

"अन्ये कृतयुगे धर्म्मा स्त्रेतायां द्वापरे परे।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः" ॥)

तस्योत्पत्त्यादि यथा। माघीपूर्णिमायां शुक्रवारे कलियुगोत्पत्तिः। तत्र अवतारः कल्किः। पुण्यमेकपादम्॥ पापं त्रिपादम्। गङ्गा तीर्थम्। ब्राह्मणो निरग्निः। अन्नगताः प्राणाः। सार्द्धत्रिहस्तपरिमितो मनुष्यदेहः। अशीत्यधिकशतवर्षं परमायुः। भोजनपात्रस्य नियमो नास्ति। इति कलियुगस्य लक्षणम्॥ कलियुगाब्दाः ४३२०००। आदौ कलिराजा धर्म्मपुत्रो युधिष्ठिरः। हरिश्चन्द्रः मुनिचन्द्रः तेजशेखरः विक्रमादित्यः विक्रमसेनः लाउसेनः बल्लालसेनः देवपालः भूपालः महीपालः। एते राजचक्रवर्त्तिनः।

तन्माहात्म्यं यथा,—

'धर्म्मः सङ्कुचितस्तपो विरहितं सत्यञ्च दूरं गतम्।
लोका धर्म्महता द्विजाश्च लुलिता नारीवशा मानवाः'।

तत्र तारकब्रह्मनाम।

"हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।
हरे राम हरे राम राम राम हरे हरे"।

इति केचित्॥

कलियुगाद्या, स्त्री, (कलियुगस्य आद्या आद्यतिथिः।) माघीपौर्णमासी। तत्रमासं युगाद्याशब्दे द्रष्टव्यम्॥

कलिलः, त्रि, (कल्यते मिश्र्यते इति। "सलिकलि" उणां १। ५५। इति इलच्।) गहनः। इत्यमरः। ३। १। ८५॥ (यथा गीतायाम् २। ५२।

"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति" ॥)

मिश्रः। इत्युणादिकोषः॥ (यथा भागवते ६। २। ३६।

"न यत्पुनः कर्म्मसु सज्जते मनो
रजस्तमोभ्यां कलिलं ततोऽन्यथा" ॥)

कलिद्रुहः, पुं, (कलिराश्रयरूपो द्रुहः।) कलिद्रुमः। वहेडुकवृक्षः। इति हेमचन्द्रः॥

कली, स्त्री, (कल्+"सर्व्वधातुभ्य इन्" ततः वा ङीप्।) कलिका। इत्यमरटीकायां भरतः॥

कलुषं, क्ली, (कं सुखं लुषति हिनस्ति। क+लुष्+अण्। यद्वा कल्+"पुनष्टिकलिभ्य उषच्"। उणां ४। ७५। इति उषच्।) पापम्। इत्यमरः। १। ४। २८॥ (यथा शङ्करार्य्यकृतात्मबोधे ५।

"अज्ञानकलुषं जीवं ज्ञानाभ्यासादिनिर्म्मलम्।
कृत्वा ज्ञानं स्वयं नश्येत्कतकेरेणुवत्"।

मालिन्यं यथा ऋतुसंहारे। ३। २३।

"विगतकलुषमम्भः प्राणिपक्षा धरित्री।
विमलकिरणचन्द्रं व्योम ताराविचित्रम्" ॥)

कलुषः, पुं क्ली, (कस्य जलस्य लुषः हिंसकः। आविलकारक इत्यर्थः। क+लुष्+क।) महिषः। इति राजनिर्घण्टः॥ (वञ्जः। यथा शुकुन्तलायां "कण्ठः स्खलितवाष्पवृत्तिकलुषः"। निन्दितः। यथा मनुः १। ५७।

"वर्षापेतमविज्ञातं नरं कलुषयोनिजम्" ॥)

कलुषः, त्रि, (कल्+उषच्।) अनच्छः। आविलः। इत्यमरः। १। १०। १४॥ ("निर्म्मलकलुषे नेत्रे" इति सुश्रुते उत्तरतन्त्रे। ३१ अध्याये॥)

कलेवरं, क्ली, (कले शुद्धे वरं श्रेष्ठं देहोत्पत्तिहेतुकत्वात् पवित्रम्। समासे अलुक्।) शरीरम्। इत्यमरः। २। ६। ७०॥ (यथा गीतायाम्। ८। ६।

"यं यं भावं स्मरन् देवी त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय! सदा तद्भावभावितः" ॥)

कल्कः, पुं क्ली, (कल् गतौ+"कृ दाधारार्च्चिकलिभ्यः कः"। उणां ३। ४०। इति कः।) धृततैलादिपेष्यः। (यथा याज्ञवल्क्यः। १। २७७।

"स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्व्वकम्।
गौरसर्षपकल्केन साज्येनोत्सादितस्य च" ॥)

दम्भः। (यथा महाभारते १। १। २७१।

"तपो न कल्कोऽध्ययनं न कल्कः
स्वाभाविको वेदविधिर्न कल्कः।
प्रसह्यवित्ताहरणं न कल्कः
तान्येव भावोपहतानि कल्कः" ॥)

विभीतकवृक्षः। विष्ठा। किट्टम्। पापम्। इति मेदिनी॥ (यथा भागवते २। २। २४।

"विधूतकल्कोऽथ हरेरवस्रजात्
प्रयाति चक्रं नृप! पृष्ठतोऽनुगम्" ॥

यस्य कस्यचित् वस्तुनो चूर्णम्। यथा कुमारे। ७। ६।

"तां लोध्रकल्केन कृताङ्गतैजा-
मालोकयानकालेयकृताङ्गरागाम्" ॥)

कर्द्दमः। इति शब्दरत्नावली॥ तुरुष्कनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ धृततैलादिपाके देयमौषधद्रव्यम्। तत्तु पञ्चकषायान्तर्गतदशमूलादि वेदितम्। अस्य पूर्णवीर्य्यं यावन्मेकं तिष्ठति। यथा,—

"द्रव्यमात्रं घृतापिष्टं शुष्कं वा जलमिश्रितम्।
तदेव सूरिभिः पूर्व्वैः कल्क इत्यभिधीयते" ॥

तत्पर्य्यायः। पिष्ट २ विनीयः ३। इति रत्नमाला॥ आवापः ४ प्रक्षेपः ५। इति वैद्यकपरिभाषा॥ ("द्रव्यमार्द्रं घृतापिष्टं शुष्कं वा सजलं भवेत्। प्रक्षेपावापकल्कास्ते तन्मानं कर्षसम्मितम्॥ इति मध्यखण्डे। ५। १। शार्ङ्गधरेणोक्तम्॥ यस्तु धृततैलपयुज्यते सभूयः कल्क इति संज्ञां लभते निरुद्गालेपनसंश्लेषनासावसंनिरोधो मृदुता पूतिमांसापकर्षणमन्तर्निर्दोषतान्नग्रहणशुद्धिश्च भवति"॥ इति सुश्रुते सूत्रस्थाने। १८ अध्याये॥) ग्राह्यम्। इति मोक्षधर्म्मटीकायां नीलकण्ठः॥

कल्कः, त्रि, (कलयति पापमाचरति। कल्+कः।) पापाशयः। पापात्मा। इति मेदिनी॥

कल्कफलः, पुं, (कल्कस्य विभीतकस्य फलमिव फलं यस्य अवयवसादृश्यात्।) दाड़िमवृक्षः। इति राजनिर्घण्टः॥ (दाड़िमशब्देऽस्य गुणादयो ज्ञातव्याः॥)

कल्किः, पुं, (कल्कः पापं हार्य्यतया अस्ति अस्य। कल्क+इन्।) विष्णोर्दशमावतारः। स तु कलिशेषे पापात्मनां विनाशाय सम्भलग्रामे भविष्यति। यथा,—

"सम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः।
भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति" ॥

तस्य कर्म्म यथा,—

"अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः।
असिनाऽसाधुदमनमष्टैश्वर्य्यगुणान्वितः॥
विचरन्नाशुना क्ष्मौणां हयेनाप्रतिमद्युतिः।
नृपलिङ्गच्छदो दस्यून् कोटिशो निहनिष्यति" ॥

इति श्रीभागवतम्॥ तस्योत्पत्तिर्यथा,—

"स्तुत्वा प्राह पुरो ब्रह्मा देवानां हृदयेप्सितम्।
तं श्रुत्वा पुण्डरीकाक्षो ब्रह्माणमिदमब्रवीत्॥
सम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम्।
सुमत्यां मातरि विभो धन्यायां तन्निदेशतः॥
चतुर्भिर्भ्रातृभिर्देव करिष्यामि कलिच्छिदम्।
भवन्तो बान्धवा देवाः स्वांशेनावतरिष्यथ॥
इयं मम प्रिया लक्ष्मीः सिंहले संभविष्यति।
बृहद्रथस्य भूपस्य कौसुद्यां कमलेक्षणा।
भार्य्यायां मम भार्य्यैषा पद्मा नाम्नी भविष्यति॥
यात यूयं भुवं देवाः स्वांशावतरणे रताः॥
राजानो मरुदेवाद्या स्मापयिष्याम्यहं भुवि।
पुनः कृतयुगं कृत्वा धर्म्मान् संस्थाप्य पूर्व्ववत्।
कलिव्याजं संनिरस्य प्रयास्ये स्वालयं विभो॥
इत्युदीरितमाकर्ण्य ब्रह्मा देवगणेश्वरः।
जगाम ब्रह्मसदनं देवाश्च त्रिदिवं ययुः॥
महीमाश्रास्य भगवान् निजजन्मक्षतोद्यमः।
सम्भलग्रामविप्रस्य विवेश परात्मकः॥
सुमत्यां विष्णुयशसो गर्भमाधत्त वैष्णवम्।
यद्गन्धर्व्वचराद्यादिसेवितश्रीपदाम्बुजम्॥
सरित् समुद्रा गिरयो लोकाः सस्याम्बुजङ्गमाः।
सहर्षा ऋषयो देवा जाते विष्णौ जगत्पतौ॥
बभूव सर्व्वसत्त्वानामानन्दो विविधाश्रयः।
नृत्यन्ति पितरो हृष्टास्तुष्टा देवा जगुर्यशः॥
चक्रुर्व्वाद्यादि गन्धर्व्वा ननृतुश्चाप्सरोगणाः।
द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः।
जातो ददृशतुः पुत्रं पितरौ हृष्टमानसौ॥
धात्री माता महाषष्ठी नाड़ीच्छेत्री तदम्बिका।
गङ्गोदकक्लेदमोक्षा सावित्री मार्ज्जनोद्यता॥
तस्य विष्णोरनन्तस्य वसुधादात् पयः सुधाम्।
माद्रका माङ्गल्यवचः कृष्णजन्मदिनेऽभवत्॥
ब्रह्मा तदुपधार्य्याशु स्वासुगं प्राह सेवकम्।
याहीति सूतिकागारं गत्वा विष्णुं प्रबोधय॥
चतुर्भुजमिदं रूपं देवानामपि दुर्लभम्।
त्यक्त्वा मानुषवद्रूपं कुरु नाथ विचारितम्॥
इति ब्रह्मवचः श्रुत्वा पवनः सुरभिः सुखम्।
सुप्रीतः प्राह तरसा ब्रह्मणो वचनादृतः।
तच्छ्रुत्वा पुण्डरीकाक्षस्तत्क्षणात् द्विभुजोऽभवत्।
तदा तत्पितरौ दृष्ट्वा विस्मयापन्नमानसौ॥
भ्रमसंस्कारवत्तत्र मेनाते तस्य मायया।
ततस्तु सम्भलग्रामे सोत्सवा जीवजातयः॥
सङ्गलाचारवङ्गाद्याः पापतापविवर्ज्जिताः।
सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्पतिम्॥
पूर्णकामा विप्रमुख्यानाहूयादाद्धनं शतम्।

हरेः कल्याणकृद्विष्णुयशाः शुद्धेन चेतसा ॥
सामर्ग्यजुर्व्विद्विरयोक्तनामकरणे रतः ।
तदा रामः क्रमो व्यासो द्रौणिर्भित्तुः शरीरियः ॥
समायाता हरिं द्रष्टुं बालकत्वमुपागतम् ।
तानागतान् समालोक्य चतुरः सूर्य्यसन्निभान् ।
हृष्टरोमा द्विजवरः पूजां चक्रे स ईश्वरान् ॥
पूजितास्ते स्वासनेषु संविष्टाः स्वसुखाश्रयाः ।
हरिं क्रोडगतं तस्य दृष्टयुः सत्त्वमूर्त्तयः ॥
तं बालकं नराकारं विष्णुं नत्वा मुनीश्वराः ।
कल्किं कल्किविनाशार्थमाविर्भूतं विदुर्बुधाः ।
नामाकुर्व्वंस्ततस्तस्य कल्किरित्यभिविश्रुतम् ॥
कृत्वा संस्कारकर्म्माणि ययुस्ते हृष्टमानसाः ।
ततः स ववृधे तत्र सुमत्या परिपालितः ॥
कालेनाल्पेन कंसारिः शुक्लपक्षे यथा शशी ।
कल्किर्व्वेदैश्चतुःषष्ठ्यः शूराः कविप्राज्ञसुमन्त्रकाः ॥
तातमाद्यप्रियकरा गुरुविप्रप्रतिष्ठिताः ।
कल्केरंशाः पुरो जाताः साधवो धर्म्मतत्पराः ॥
गार्ग्यभर्ग्यविशालाद्या ज्ञातयस्तदनुव्रताः ।
विशाखयूपभूपालपालितास्तापवर्ज्जिताः ।
ब्राह्मण्याः कल्किमालोक्य परां प्रीतिमुपागताः ॥
ततो विष्णुयशाः पुत्रं धीरं सर्व्वगुणाकरम् ।
कल्किं कमलपत्राक्षं प्रोवाच पठनादृतम् ।
तात ते ब्रह्मसंस्कारं यज्ञसूत्रमनुत्तमम् ।
सावित्रीं वाचयिष्यामि ततो वेदान् पठिष्यसि ॥
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कल्कि-
जन्मोपनयनम् २ अध्यायः ॥

कल्की, [न्] पुं, (कल्कः पापं नाशतया अस्ति अस्य । कल्क + इनि ।) कल्किः । भगवतो दशावतारेषु चरमोऽवतारः । यथा पुराणे ।
"मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्चरामश्च बुद्धः कल्की च ते दश" ।
(अस्य जन्मादिविवरणन्तु कल्किशब्दे द्रष्टव्यम् ॥)

कल्पः, पुं, (कल्प्यते विधीयते असौ । क्लृप् + कर्म्मणि घञ् ।) विधिः । (यथा मनुः १ । १४७ ।
"एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः ।
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः" ।
(कल्पयति कृप्तिं नाशं वा अत्र । क्लृप् + णिच् + अधिकरणे घञ् ।) प्रलयः ।
("युगानां सप्ततिः सैकामन्वन्तरमिहोच्यते" ।
"कृताब्दसंख्यस्यान्ते सन्धिः प्रोक्तो जलप्लवः" ।
"सप्तसप्तते मनवः कल्पे ज्ञेयास्तुर्दश ।
कृतप्रमाणकल्पादौ सन्धिः पञ्चदशस्मृतः" ।
ते एकसप्ततियुगरूपा मनवः सायम्भुवाद्याः सप्तन्यूनयः सप्तसन्धिसहिताः कल्पकाले ज्ञातव्याः । सप्तसन्धियुक्तचतुर्दशमनुभिः कल्पो भवेदित्यर्थः । इति सूर्य्यसिद्धान्तोक्तकल्पपरिमाणम् । आकालिकनैमित्तिकदैनन्दिनमहाप्रलयानां विवृतिस्तु ततश्छब्दे द्रष्टव्यम् ॥ *)

कल्प्यते स्वक्रियायै समर्थो भवत्यत्र । क्लृप् + अधिकरणे घञ् ।) ब्राह्मं दिनम् । तत्तु दैवदिसहस्रयुगम् । इत्यमरः । १ । ४ । २१ ॥ (यथा विष्णुपुराणे १, मांशे २ । १२ ।
"कल्पान् कल्पविकल्पांश्च चतुर्युगविकल्पितान् ।
कल्पान्तस्य स्वरूपञ्च युगधर्म्मांश्च तत्त्वज्ञः" ॥)
त्रिंशत्कल्पैर्ब्रह्मण एको मासो भवति तेषां नामानि यथा । श्वेतवाराहः १ नीललोहितः २ वामदेवः ३ गाथान्तरः ४ रौरवः ५ प्राणः ६ बृहत्कल्पः ७ कन्दर्पः ८ सद्यः ९ ईशानः १० ध्यानः ११ सारस्वतः १२ उदानः १३ गरुडः १४ कौर्म्मः १५ अयं ब्रह्मणः पौर्णमासी । नारसिंहः १६ समाधिः १७ आग्नेयः १८ विष्णुजः १९ सौरः २० सोमकल्पः २१ भावनः २२ सुप्तमाली २३ वैकुण्ठः २४ आर्चिषः २५ वल्मीकल्पः २६ वैराजः २७ गौरीकल्पः २८ माहेश्वरः २९ पितृकल्पः ३० अयं ब्रह्मणोऽमावास्या । इति क्रमसन्दर्भे प्रभासखण्डम् । एतादृशैर्दादशमासैर्ब्रह्मणः सम्वत्सरो भवति । एवं वर्षशतं ब्रह्मण आयुः । तत्र पञ्चाशद्वर्षाणि व्यतीतानि एकपञ्चाशदारम्भे अधुना श्वेतवाराहकल्पः । इति महाभारतम् ॥ (कल्पारम्भकालश्च ब्रह्मसिद्धान्ते उक्तस्तद्यथा,—
"चैत्रसितादेर्भानोर्वर्षं तुमासयुगकल्पाः ।
सृष्ट्यादौ ब्रह्मायामिह प्रवृत्ता दिनैर्वत्स !" ॥
चैत्रसितादेश्चैत्रशुक्लप्रतिपदमारभ्य इत्यर्थः ।
तथा च ब्रह्मपुराणम् ।
"चैत्रे मासि जगत् ब्रह्मा ससर्ज्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति ।
प्रवर्त्तयामास तदा कालस्य गणनामपि" ।
इति कालसामान्यगणनायास्तदारभ्य कथनात् ॥
एवं चैत्रशुक्लप्रतिपदि कल्पारम्भेऽपि ।
"माघसुक्लाष्टतीयायां कृष्णायां फाल्गुनस्य च ।
पञ्चमी चैत्रमासाद्या यथैवाद्या तथा परा ।
शुक्ला त्रयोदशी माघे कार्त्तिकस्य तु सप्तमी ।
नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम् ।
कल्पनामादयो ह्येता दत्तस्याक्षयकारकाः" ॥
इति वराहवाक्यानि समूलानि चेत् तदा कल्पभेदादविरुद्धानि कल्पादित्वेन तत्तत् तिथिषु श्राद्धकर्त्तव्यतोपयोगिपारिभाषिकपरत्वेन वा समर्थनीयानि । अत एव सूर्य्यसिद्धान्ते उक्तम् । यथा—
"सुरासुराणामन्योन्यमहोरात्रविपर्य्ययात् ।
यत् प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात् ॥
मन्वन्तरस्यवस्था च प्राजापत्यमुदाहृतम् ।
न तत्र युगसन्धेर्भेदो ब्राह्मकल्पः प्रवर्त्तितः" ॥
इत्यादीनां युगमन्वन्तरकल्पानां सौरत्वेन उक्तिः सौरमाने च नियतयुगादिकालेषु क्वचियततिथिसम्भवेऽपि सर्व्वेषां कल्पानामादौ चैत्रसितादितिथिरेव नियता प्रागुक्तवचनप्रामाण्यात् । किन्तु प्रागुक्तसप्तसु ब्राह्मकल्पानां चान्द्रत्वकथनात् तिथिभेदसम्भवः । इति सूर्य्यसिद्धान्तवाक्यं ग्रहस्पष्टीकरणोपयोगीत्यविरोधः ।) विकल्पः । कल्पदत्तः । न्यायः । शास्त्रविशेषः । स तु वेदषडङ्गान्तर्गतो यागक्रियाणामुपदेशकः । इति हेमचन्द्रः ॥ (यथा रघुः १ । ९४ ।
"कल्पवित् कल्पयामास वन्यामेवास्य संविधाम्" ॥)
व्याकरणस्य प्रत्ययविशेषः । स च स्याद्यन्तत्याद्यन्तपदाभ्यामीषदूनार्थे भवति । तत्र वाच्यलिङ्गत्वे यथा, ईषदूनो विद्वान् विद्वत्कल्पः । ईषदूनं पचति पचतिकल्पम् । इति मुग्धबोधव्याकरणम् । (तथा महाभारते १ । १२६ । ५ ।
"ते परस्परमामन्त्र्य देवकल्पा महर्षयः" ॥)

कल्पकः, पुं, (कल्पयति क्षौरकर्म्मादिना वेषादिकं रचयतीति । क्लृप् + णिच् + ण्वुल् ।) नापितः । इति शब्दमाला ॥ कर्ब्बूरः । इति भावप्रकाशः ॥ (कल्पयति गद्यपद्यादिकमुद्ग्राह्य रचयतीति वाक्येरचयिता । ग्रन्थकर्त्ता ॥)

कल्पनं, क्ली, (क्लृप् + भावे ल्युट् ।) कृप्तिः । छेदनम् । इति त्रिकाण्डशेषः ॥

कल्पना, स्त्री, (क्लृप् + णिच् + भावे युच् टाप् ।) हस्तिसज्जना । नायकस्यारोहणार्थं गजसज्जीकरणम् । इत्यमरः । २ । ८ । ४२ ॥ अनुमितिः । इति न्यायशास्त्रम् ॥ रचना । यथा "प्रबन्धकल्पना कथा" । इत्यमरः । १ । ६ । ६ ॥

कल्पनी, स्त्री, (कल्पयति केशानीन् छिनत्ति अनया । क्लृप् छेदने + करणे ल्युट् । ततो ङीप् ।) कर्त्तनी । इति हेमचन्द्रः । काँचि इति भाषा ॥

कल्पपादपः, पुं, (कल्पयति सर्व्वकामं सम्पादयति । इति कल्पः । स चासौ पादपश्चेति कर्म्मधारयः ।) कल्पवृक्षः । यथा नैषधे । १ । १५ । "मत्वा न चक्रेऽल्पितकल्पपादपः" ॥

कल्पपादपदानं, क्ली, (कल्पपादपस्य सुवर्णनिर्म्मितपादपाच्छतेर्दानम् ।) महादानविशेषः । तद्विधानं यथा,
"कल्पपादपदानाख्यमतः परमनुत्तमम् ।
महादानं प्रवक्ष्यामि सर्व्वपातकनाशनम् ॥
पुण्यन्दिनमथासाद्य तुलापुरुषदानवत् ।
पुण्याहवाचनं कृत्वा लोकेशावाहनन्तथा ॥
ऋत्विक्पूजापरिभ्रारभूषणाच्छादनादिकम् ।
कार्य्यन्तु कारयेद्वृक्षं नानाफलसमन्वितम् ॥
नानाविहगवस्त्राणि भूषणानि च कारयेत् ।
शक्तितस्त्रिपलादूर्द्धं मासहस्रात् प्रकल्पयेत् ॥
अर्द्धकृष्णं सुवर्णस्य कारयेत् कल्पपादपम् ।
गुडप्रस्थोपरिष्टाच्च सितवस्त्रयुगावृतम्" ॥
अर्द्धकृष्णं यावदुपात्तसुवर्णस्यार्द्धेन निर्म्मितम् ।
"ब्रह्मविष्णुशिवोपेतं पञ्चशाखं सभास्करम् ।
कामदेवमधस्ताच्च सकलत्रं प्रकल्पयेत् ॥
सन्तानं पूर्व्वतस्तद्वत्तुरीयांशेन कल्पयेत् ।
मन्दारं दक्षिणे पार्श्वे श्रिया सार्द्धं ततोपरि" ॥
सन्तानं पूर्व्वतस्तद्वदिति गुडप्रस्थं सितवस्त्रयुगावृतमित्यर्थः । कामदेवमधस्ताच्चेति सन्तानवृक्षस्याधस्तात् सकलत्रं कामदेवं प्रकल्पयेदिति योजनम् । मन्दारादिवृक्षैकैकदेवतासम्बन्धश्रुतेः ॥
"पश्चिमे पारिभद्रन्तु सावित्र्या सह शौरकेः ।
सुरभीसंयुतं तद्वत्तिलेयं हरिचन्दनम् ॥
तृतीयांशेन कुर्व्वीत सौम्येन पञ्चसंयुतम् ।
कौशेयवस्त्रसंयुक्तानित्यमाल्यफलान्वितान्" ॥
तृतीयांशेन सन्तानघटनावस्थितसुवर्णतृतीयभागेन ।
सौम्येन उत्तरदिग्विभागेन ॥

"तथाष्टपूर्णकलसान् पादुकासनभाजनान् ।
दीपिकोपानद्दच्छत्रचामरासनसंयुतम्" ॥

पादुकासनभाजनान् पादुकासनभाजनसहितानित्यर्थः । आसनपदञ्चात्र कलसावस्थानोचितासनपरम् । चामरासनसंयुतमिति पुनरासनपदश्रवणात् ।

"फलपत्तियुतं तद्वदुपरिष्टादितानकम् ।
तथाष्टादशधान्यानि समन्तात् परिकल्पयेत् ॥
होमाधिवासनान्ते तु स्थापितो देवपुङ्गवैः ।
त्रिःप्रदक्षिणमाहृत्य मन्त्रमेतमुदीरयेत् ॥
नमस्ते कल्पवृक्षाय चिन्तितान्नप्रदाय च ।
विश्वम्भराय देवाय नमस्ते विश्वमूर्त्तये ॥
यस्मात्त्वमेव विश्वात्मा ब्रह्मा स्थाणुर्दिवाकरः ।
मूर्त्तामूर्त्तपरं बीजमतः पाहि सनातन ! ॥
त्वमेवामृतसर्व्वस्वमनन्तपुरुषोऽव्ययः ।
सन्तानाद्यैरुपेतः सन् पाहि संसारसागरात् ॥
एवमामन्त्र्य तं दद्यादृत्विजे कल्पपादपम् ।
चतुर्थ्यन्तापि ऋत्विग्भ्यः सन्तानादीनि कल्पयेत्" ॥

एतेन चत्वार एवर्त्विजः कर्त्तव्याः । कृच्छ्रमयाश्चत्वारो ब्रह्माद्य इत्युक्तं सम्भवति ॥

"स्वल्पेष्वेकाग्निवत् कुर्य्यात् गुरुरेवाभिपूजितः ।
न वित्तशाठ्यं कुर्व्वीत न च विस्मयवान् भवेत्" ॥

न च विस्मयवान् इदमया दत्तमिति गाङ्गारवान् भवेदित्यर्थः ॥

"अनेन विधिना यस्तु महादानं निवेदयेत् ।
सर्व्वपापविनिर्मुक्तः सोऽश्वमेधफलं लभेत् ॥
अप्सरोभिः परिवृतः सिद्धचारणकिन्नरैः ।
भूतान्भव्यांश्च मनुजांस्तारयेदात्मसम्मितान् ॥
स्तूयमानो दिवः एष्टे पुत्रपौत्रप्रपौत्रवान् ।
विमानेनार्कवर्णेन विष्णुलोकं स गच्छति ।
दिवि-कल्पशतं तिष्ठेदाजराजो भवेत्ततः ॥
नारायणबलोपेतो नारायणपरायणः ।
नारायणकथासक्तो नारायणपुरं व्रजेत् ॥
यो वा पठेत् कनककल्पतरुप्रदानं
यो वा शृणोति पुरुषोऽल्पधनः स्मरेद्वा ।
सोऽपीन्द्रलोकमधिगम्य सहाप्सरोभि-
र्म्मन्वन्तरं वसति पापविमुक्तदेहः" ॥ * ॥

अत्र यजमानः समुपजातकल्पपादपमहादानदानेच्छुस्तुलापुरुषलिखितं खड्गचर्म्ममयाच्छत्रसन्नाहतुलास्थाप्यहरिप्रतिमालङ्कारतुलाहस्तग्राह्यप्रतिमाऋत्विक्चतुष्टयवस्त्रादिदक्षिणासामग्रीवहिः सर्व्वसम्भारं अधिकत्वेन पलत्रयाद्धसहस्रपलावधियथेष्टकाञ्चनमुपादाय तस्यार्द्धेन कल्पपादपमपरार्द्धेन समभागेन सन्तानं मन्दारं पारिभद्रं हरिचन्दनमेवं पञ्चतरून् पञ्चशाखान् सौवर्णानाफलपक्षिसुवर्णनिर्म्मितानेकवसनाकारसहितान् केयूरकुण्डलाद्यभिमतालङ्कारभूषितान् एषामाच्छादनार्थं श्वेतवस्त्रयुगपञ्चकं तरूणामवस्थापनार्थं गुड़प्रस्थद्वयं प्रत्येकं प्रस्थपरिमितान् पाचस्रुतशीरकतिलांश्च कल्पवृक्षाधःस्थापनार्थमभीरुसुवर्णान्तरयन्त्रोत्खाटिता ब्रह्मविष्णुग्निवभास्करप्रतिमाः ग्रथोक्तक्रमतरुचतुष्टयाधःस्थापनार्थमभिमतसुवर्णान्तरयन्त्रोत्खाटिताः सरतिकामदेवलक्ष्मीसावित्रीसुरभिप्रतिमाश्च कल्पतरुपार्श्वस्थापनार्थमष्टौ कुम्भान् तदधःस्थापनार्थं कुशादिनिर्म्मितासनाष्टकं कुम्भाच्छादनार्थं कौषेयवस्त्राष्टकं कुम्भपार्श्वस्थापनार्थमिक्षुदण्डाष्टकं पुष्पमालाष्टकसामग्रीं यथेष्टफलाष्टकं पादुकायुगाष्टकं कांस्यभाजनाष्टकञ्च कल्पतरुपार्श्वार्पणार्थं दीपिकोपानद्युगच्छत्रचामरासनाष्टादशधान्यानि च उत्पादयेत् । ततस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्व्वतरदिने यजमानगुर्व्वृत्विग्जापकास्तुलापुरुषवद्विधिभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने कल्पपादपपदं प्रक्षिप्य यथायथं निवेदनं सङ्कल्पञ्च कुर्य्युः । ततोऽपरदिने यजमानस्तुलापुरुषवदोविन्दाद्याराधनादिमधुपर्कदानान्तं गोविन्दाद्यभ्यर्चनब्राह्मणानुज्ञापनदानसङ्कल्पपुण्याहादिवाचनवरव्रतबन्धेषु तुलापुरुषपदस्थाने कल्पपादपपदं प्रक्षिप्य कुर्य्यात् । ततो गुर्व्वृत्विग्यजमानजापका उपवसेयुः । अपरदिने च कृतनित्यास्तुलापुरुषवदग्निस्थापनादिमध्यब्राह्मणवाचनान्तं कर्म्म यथायथं कुर्य्युः । एवञ्च मध्यब्राह्मणवाचनान्तं कर्म्म तुलापुरुषव्रतं अनुसन्धावानुष्ठातव्यम् । तत ऋत्विजः कल्पतरुमानीय प्रधानवेद्यां लिखितचक्रमध्ये गुड़प्रस्थं दत्त्वा तदुपरि स्थापयेयुः । ततस्तस्याधो गुड़प्रस्थोपरि पद्मक्रमेण सुवर्णयन्त्रोत्खाटिता ब्रह्मविष्णुग्निवभास्करप्रतिमाः स्थापयेयुः । तत्पूर्व्वतः अधस्तादारोपितसरतिकामदेवप्रतिमां गुड़प्रस्थोपरि सन्तानं कल्पतरुदक्षिणतः अधःसमारोपितलक्ष्मीप्रतिमां घृतप्रस्थोपरि मन्दारं कल्पतरोः पश्चिमतः अधःसमारोपितसावित्रीप्रतिमां शीरकप्रस्थोपरि पारिभद्रं कल्पतरूत्तरतः अधःसमारोपितसुरभिप्रतिमां तिलप्रस्थोपरि हरिचन्दनञ्चारोपयेयुः । सर्व्वांश्च वृक्षान् प्रत्येकं सितवस्त्रयुगेनाच्छादयेयुः । अथास्य दिक्षु प्रत्येकं कौषेयवस्त्राच्छादितान् इक्षुदण्डफलान्वितान् माल्यालङ्कृतानष्टौ पूर्णकुम्भान् पार्श्वारोपितपादुकायुगभाजनासनेष्वारोप्य कल्पतरुपार्श्वे पूर्व्वोक्तदीपिकाद्युपकरणमारोपयेयुः । ततो मङ्गलतूर्य्यगीतवन्दिघोषेषु सत्सु ऋत्विजः कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नापयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो घृतसर्व्वालङ्कारः पुष्पाञ्जलिमादाय कल्पपादपं त्रिः प्रदक्षिणीकृत्य नमस्ते कल्पवृक्षायेत्यादि पाहि संसारसागरादित्यन्तमन्त्रान् पठित्वा पुष्पाञ्जलिनाभ्यर्च्य गुर्व्वृत्विग्भ्यो यथायथं दद्यात् ॥ ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्यः अमुकामुकदेवशर्म्मभ्यो युष्मभ्यं मत्पुराणोक्तकल्पपादपमहादानदानफलप्राप्तिकामोऽहं मत्पुराणोक्तभागव्यवस्थया एतं गुड़प्रस्थारोपितसौवर्णब्रह्मविष्णुमहेश्वरभास्करप्रतिमासितवसनयुगान्वितगुड़प्रस्थारोपितसौवर्णसरतिकामदेवप्रतिमासितवसनयुगान्वितसौवर्णसन्तानसहितं घृतप्रस्थारोपितसौवर्णलक्ष्मीप्रतिमासितवस्त्रयुगान्वितसौवर्णमन्दारसहितं शीरकप्रस्थारोपितसौवर्णसावित्रीप्रतिमासितवसनयुगलान्वितसौवर्णपारिभद्रसहितं तिलप्रस्थारोपितसौवर्णसुरभिप्रतिमासितवसनयुगान्वितसौवर्णहरिचन्दनसहितं कौषेयवस्त्रयुगवेष्टितग्रीवेक्षुमाल्यफलान्वितकुशासनयादुकायुगकांस्यभाजनयुतपूर्णकुम्भाष्टकदीपिकोपानद्युगच्छत्रचामरासनफलमाल्ययुतपञ्चवर्णवितानकाष्टादशधान्ययुतं कल्पपादपमहादानमहं ददे ॥ प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा यथायथं अमुकपादपोऽयं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । ततो दक्षिणादानम् ।

ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहंसम्प्रदक्षिणामिमां यदुत्पत्तियोग्यां भूमिमेतानि च रत्नानि ददे ॥ प्रतिग्रहीतारः स्वस्तीत्युक्त्वा प्रत्येकं किञ्चिन्मूलेषु सृग्घ्नेयुः । ततो यजमानस्तुलापुरुषवत् जापकेभ्यो दक्षिणादानं दीनानाथादितर्पणं ब्राह्मणवाचनञ्च कुर्य्यात् । ततः कल्पपादपं गुरवे सन्तानकादींश्चतुरो वृक्षान् ऋग्वेदादिक्रमेण चतुर्भ्य ऋत्विग्भ्यो निवेदयेत् । स्वल्पकल्पपादपदाने तु गुरवेवैकाग्निवत् स्वगृह्योक्तविधिना सर्व्वं ब्रह्माण्डदानवत् कुर्य्यात् । इति कल्पपादपमहादानं समाप्तम् ॥ * ॥ इति महाराजाधिराजनिःशङ्कशङ्करश्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे महादानदानावर्त्तः ॥

कल्पलतादानं, क्ली, (महादानान्तर्गता सुवर्णकल्पिता लता तस्या दानम् ।) महादानविशेषः ।

तस्य विधिर्यथा ।

"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
महाकल्पलतं नाम पातकावलिनाशनम् ॥
पुण्यान्तिथिमथासाद्य स्नात्वा ब्राह्मणवाचनम् ।
ऋत्विक्चतुष्टयसम्भारभूषणाच्छादनादिकम् ॥
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनादिकम् ।
चामीकरमयीः कुर्य्याद्दशकल्पलताः शुभाः ॥
नानापुष्पफलोपेता नानांशुकविभूषिताः ।
विद्याधरसुपर्णानां मिथुनैरुपशोभिताः" ॥

सुपर्णागां किन्नराणाम् ॥

"हारानादित्सुभिः सिद्धैः फलानि च विहङ्गमैः ।
लोकपालानुसारिण्यः कर्त्तव्यास्ताश्च देवताः" ॥

लोकपालानुसारिण्य इति लोकपालसमानाङ्कतयः ॥

"ब्राह्मीमनन्तशक्तिञ्च लवणस्योपरि न्यसेत् ।
अधस्ताच्च तयोर्मध्ये महाखड्गधरे शुभे" ॥

पद्मशङ्खकरे इति क्वचित् पाठः ॥

"स्वर्णासनस्था माहेन्द्री पूर्व्वतः कुलिशायुधा ।
रजनीसंस्थिताग्नेयी श्रुवपाणिरथाचला" ॥

रजनी हरिद्रा ॥

"याम्या तु महिषारूढ़ा गदिनी तण्डुलोपरि ।
नैर्ऋत्यां नैर्ऋती स्थाप्या सखड्गा च घृतोपरि ॥
वारुणे वारुणी क्षीरे सर्पस्था नागपाशिनी ।
पताकिनी च वायव्ये मृगस्था मूर्करोपरि ॥
सौम्या तिलेषु संस्थाप्या कौबेरदिशि संस्थिता ।
माहेश्वरी वृषगता नवनीते तु शूलिनी ॥

मौलिन्यो वरदास्तदत् कर्त्तव्या बालकान्विताः। शक्त्या पञ्चपलादूर्द्धमासहस्रात् प्रकल्पयेत्" ॥

मौलिन्यो मुकुटवत्यः। वरदाः प्रसन्नमूर्त्तयः। बालकान्विताः क्रोड़निहितपुत्रकाः। एतेन क्रोड़निविष्टवामकरधृतपुत्रका दक्षिणहस्तविधृत यथोक्तशस्त्राः प्रसन्नमूर्त्तयो बद्धमुकुटाः सवाहना घटनीयाः। अनुक्तवाहनानान्तु ब्राह्मामेयी नैर्ऋतीनान्तत्तल्लोकपालवाहनानि। लोकपालानुसारिण्य इति श्रुतेः। तेन हंसारूढ़ा ब्राह्मी छागारूढ़ामेयी नरारूढ़ा नैर्ऋती घटनीया। अनन्तस्य तु क्वचिदाहनादर्शनात् अनन्तशक्तिर्व्वाहनमूत्वैव कर्त्तव्या ॥

"सर्व्वासामुपरिष्टाच्च पञ्चवर्णवितानकम्। धेनवो दशकुम्भाश्च वस्त्रपुष्पाणि चैव हि ॥ मध्यमे हे तु गुरवे ऋत्विग्भ्योऽन्यास्तथैव च। ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो बुधः। त्रिः प्रदक्षिणमादृत्य मन्त्रमेतमुदीरयेत्" ॥

"नमो नमः पाशविनाशिनीभ्यो ब्रह्माच्युतेशेश्वरपालनीभ्यः। आसंशितार्थिक्षयपक्षदाभ्यो दिग्भ्यस्तथा कल्पलतावधूभ्यः ॥ इति सकलदिगङ्गनाप्रदानं भवभयसूदनकारि यः करोति। अभिमतफलदे स नाकलोके वसति पितामहवत्सराणि विंशत् ॥ पितृशतमथ तारयेदभव्ये- र्गुरुदुरितौघविघातशुद्धदेहम्। सुरपतिवनितासहस्रसंघः परिवृतमम्बुरुहोद्भवाभिनन्द्यम् ॥ इति विधानमिदं सदिगङ्गना कनककल्पलतविनिवेदने। पठति यः स्मरतीह तथेच्छते स पदमेति पुरन्दरसेवितम्" ॥ * ॥

अथ यजमानः समुपजातमहाकल्पलतामहादानदानेच्छः तुलापुरुषलिखितं खड्गचर्म्म मषाच्छन्नसन्नाहतुलापुरुषस्थापनीयहरिप्रतिमासालङ्कारतुलाहस्तग्राह्मप्रतिमाबहिः सर्व्वसम्भारमधिकलेन पलपञ्चकादूर्द्धपलसहस्रावधिवयेच्छ हेमनिर्म्मिता स्थानस्थानघटितविद्याधरकिन्नरमिथुनसिद्धगणाः पञ्चवायनिर्म्मितयथेच्छाकृतिफलकुसुमपल्लवशोभितपत्रिण्यः सिद्धहस्तासक्तयथेच्छसङ्कुसुक्ताहारसहिता नानाविधचित्रनेत्रादिवस्त्रोपशोभिता दशलताः। तासामधः स्थापनार्थं यथेच्छहेमयन्त्रोत्खाटिता यथोक्तरूपा ब्राह्मादिदशप्रतिमाः। तदारोपणार्थं लवणगुड़हरिद्रातण्डुलघृतक्षीरशर्करातिलनवनीतानि। लतापार्श्वस्थापनार्थं धेनुदशकं कुम्भदशकञ्च वस्त्रयुगदशकञ्चोत्पादयेत्। ततो यजमानस्तुलापुरुषोक्तसमयानामन्यतमस्य पूर्व्वतरदिने गुर्व्वृत्विग्यजमानजापकास्तुलापुरुषवत्हविष्यभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्यस्तुलापुरुषपदस्थाने महाकल्पलतापदं निवेश्य निवेदनं सङ्कल्पञ्च कुर्य्युः। अपरदिने च यजमानः पूर्व्ववदृत्विन्दाद्याराधनादिमधुपर्कदानान्तं कर्म्म गोविन्दाद्यभ्यर्चनब्राह्मणानुज्ञापनदानसङ्कल्पपुण्याहादिवाचनवरणवाक्येषु तुलापुरुषपदस्थाने महाकल्पलतामदं प्रक्षिप्य कुर्य्यात्। ततो गुर्व्वृत्विग्यजमानजापका उपवेशेयुः। अपरदिने कृतनित्यास्तुलापुरुषवदग्निस्थापनादि मध्यब्राह्मणवाचनान्तं कर्म्म यथायथं कुर्य्युः। एवञ्च मध्यब्राह्मणवचनान्तं कर्म्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम्। तत ऋत्विजः प्रधानवेद्यां लिखितचक्रोपरि लतानां मध्ये पूर्व्वादिदिक्क्रमेणाष्टौ लताः समारोप्य लतामण्डलमध्ये लताद्वयमारोप्य तदधोलवणं दत्त्वा तत्र ब्राह्मीमनन्तशक्तिञ्च आरोप्य पूर्व्वादिदिक्क्रमारोपितान्यलताधःक्रमेण गुड़ादिद्रव्याणि दत्त्वा तेषु क्रमात् कुलिशायुधादिशक्तिप्रतिमाः समारोपयेयुः। लतापार्श्वे दशधेनूः पूर्णकुम्भदशकं दशवस्त्रयुगानि च स्थापयेयुः। ततो मङ्गलगीतवाद्यवन्दिघोषेषु सत्सु कुण्डसमीपस्थकुम्भचतुष्टयजलेन यजमानं स्नापयेयुः। ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्व्वालङ्कारः पुण्याञ्जलिमादाय लताः त्रिः प्रदक्षिणीकृत्य नमो नमः पाशविनाशिनीभ्य इत्यादिमन्त्रेण पुण्याञ्जलिनार्घ्यं गुर्व्वृत्विग्भ्यो दद्यात्। तद्यथा। ॐ अद्यामुकामुकसगोत्रेभ्यः अमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्म्मभ्यो युष्मभ्यं मत्स्यपुराणोक्तकल्पलतामहादानदानफलप्राप्तिकामोऽहं मत्स्यपुराणोक्तभागत्रयस्थयैता लवणगुड़हरिद्रातण्डुलघृतक्षीरशर्करातिलनवनीतार्पितकलधौतब्रह्मानन्तकुलिशायुधवज्रिशमननिर्ऋतिवरुणवायुसोममहेश्वरशक्तिप्रतिमासहिताः पञ्चवर्णवितानकधेनुदशककुम्भदशकवसनयुगदशकान्विताः दशकल्पलता सम्प्रददे ॥ प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठेयुः। ततो गुरुः कल्पलतेयं विष्णुदैवतेति ब्रूयात्। ऋत्विजस्तु प्रत्येकं कल्पलतेयं विष्णुदैवतेति ब्रूयुः। ततो यथाशाखं कामस्तुतिं पठेयुः। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामिमां यदुत्पत्तियोग्यां भूमिमेतानि च रत्नानि सम्प्रददे ॥ ब्राह्मणाः स्वस्तीत्युक्त्वा कल्पलताः स्पृशेयुः। ततस्तुलापुरुषवज्ज्यापकेभ्यो दक्षिणां दीनानाथादितर्पणं ब्राह्मणवाचनं त्वरया कल्पलतानां यथायथं प्रतिपादनञ्च कुर्य्यात्। इति कल्पलतामहादानं समाप्तम्। इति दानसागरः ॥

कल्पवृक्षः, पुं, कल्पस्य सङ्कल्पस्य दाता वृक्षः। कल्पस्थायी वृक्ष इति वा। इति सारसुन्दरी। देवतरुः। इत्यमरः। १। १। ५३ ॥ (यथा, दानसागरे।

"नमस्ते कल्पवृक्षाय चिन्तितान्नप्रदाय च। विश्वम्भराय देवाय नमस्ते विश्वमूर्त्तये" ॥)

कल्पान्तः, पुं, (कल्पस्य अन्तो यत्र।) ब्रह्मणो दिनान्तः। प्रलयः। इत्यमरः। १। ४। २२ ॥ (यथा, गोः रामायणे ३। १०। ४।

"उषवासरताश्चैव जले कल्पान्तवासिनः" ॥)

कल्पितः, पुं, (कल्प्यते सञ्जीक्रियते असौ। कृप् + णिच् + कर्म्मणि क्तः।) सज्जितहस्ती। इति हेमचन्द्रः ॥ रचिते त्रि ॥ (यथा, महानिर्व्वाणोक्ता ब्रह्मज्ञाननिर्णये।

"ब्रह्मादिस्तम्बपर्य्यन्तं मायया कल्पितं जगत्। सत्यमेकं परं ब्रह्म विदित्वैवं सुखी भवेत्" ॥)

कल्मषं, क्ली, (कर्म्म शुभकर्म्म स्यति नाशयति रस्य लत्वे षत्वे च षोदरादित्वात् साधुः।) पापम्। इत्यमरः। १। ४। २३ ॥ (यथा, मनुः १२। २२।

"यामीस्ता यातनाः प्राप्य सजीवो वीतकल्मषः। तान्येव पञ्चभूतानि पुनरप्येति भागशः" ॥)

हस्तपुच्छम्। इति त्रिकाण्डशेषः ॥ (मालिन्यम्। यथा, हेः रामायणे २। ३६। २७।

"न हि कञ्चन पश्यामो राघवस्यागुणं वयम्। दुर्जनोऽप्यस्य निरयः शशाङ्कस्येव कल्मषम्" ॥)

कल्मषः, पुं, (कर्म्म शुभकर्म्म स्यति नाशयति। कर्म्म + सो + कः। रस्यः लः सस्य षत्वञ्च निपातनात्।) नरकविशेषः। इति मेदिनी ॥ मलिने त्रि। इति जटाधरः ॥

कल्माषः, पुं, (कलयति इति क्विप् कल्। माषयति खभासा अभिभवति अन्यवर्णान्। मष् हिंसायां णिच् + अच्। कल् चासौ माषश्चेति।) चित्रवर्णः। तद्वति त्रि। इत्यमरः। १। ६। १७ ॥ कृष्णपाण्डुरवर्णः। कृष्णवर्णः। (कलं शुभकर्म्म माषयति हिनस्ति। कल + मष् + णिच् + अच् वा।) राक्षसः। इति मेदिनी। गन्धशालः। इति राजनिर्घण्टः ॥ (नागविशेषः। यथा, महाभारते १। ३५। ७।

"नीलानीलौ तथा नागौ कल्माष शबलौ तथा" ॥)

कल्माषकण्ठः, पुं, (कल्माषः कृष्णवर्णः कण्ठो यस्य।) शिवः। इति हारावली ॥

कल्माषपादः, पुं, (कल्माषौ शापजलप्रक्षेपणात् कृष्णवर्णौ पादौ यस्य।) सौदासराजः। इति श्रीभागवतम् ॥ (यथा, महाभारते १। १७७। १।

"कल्माषपाद इत्येवं लोके राजा बभूव ह। इक्ष्वाकुवंशजः पार्थ तेजसासदृशो भुवि" ॥)

अस्य यथा कल्माषपादत्वं जातं तदुच्यते।

नलसखस्य ऋतुपर्णस्य वंशजः सौदासनामा नृपतिः पुरा मृगयां चरन् एकं राक्षसमवधीत्। अस्य रक्षसो भ्राता तु वैरशोधनं चिकीर्षुः सूदरूपधरोऽस्य राज्ञो गृहं प्रत्युवास। एकदा तु असौ राक्षसः भोक्तुकामाय नृपतेः सौदासस्य गुरवे वशिष्ठाय नरामिषं पक्त्वा ददौ। वशिष्ठस्तु तदभोज्यं दृष्ट्वातिक्रुद्धः "राक्षसो भविष्यतीति" राजानमशपत्। राजा तु शापवृत्तान्तं विदित्वा विनापराधेन प्रदत्तः शापः इति विचिन्त्य जलमादाय गुरुं प्रतिशप्तुं समुद्यतः। एतस्मिन्नन्तरेऽस्य पत्नी मदयन्ती दृष्ट्वैवमकरणोद्योद्यतं पतिं निवारयामास। राजा तु तया निवारितः स्वपादयोः शापजलं प्रक्षिप्तवान्। एतदारभ्यायं पादयोः कल्माषतां प्राप्तवान्॥ अस्य अन्या विस्तृतिस्तु भागवते ९। ९ अध्याये, तथा महाभारते १। १७७ अध्याये द्रष्टव्या ॥)

कल्यं, क्ली, (कल्यते आगम्यते। कल गतौ + कर्म्मणि यत्। प्रत्यूषः। इत्यमरः। १। ४। २ ॥ (यथा,

भागवते ४ । २४ । ७८ ।
"इदं यः कल्य उत्थाय प्राञ्जलिः श्रद्धयान्वितः ।
शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्म्मबन्धनैः" ॥
कलयति मिश्रतां सम्मादयतीति । अन्नादित्वात् यक् ।) मधु । इति हेमचन्द्रः ॥
कल्यः, त्रि, (कलासु साधुः इति यत् ।) सज्जः । (यथा, महाभारते १ । ५ । ३ ।
कथयस्व कथामेतां कल्याः स्म श्रवणे तव" ॥)
निरामयः । इत्यमरः । ३ । ३ । १५९ ॥ वाक्श्रुतिवर्जितः । दक्षः । कल्याणवचनम् । उषायवचनम् । इति मेदिनी ॥
कल्यजग्धिः, स्त्री, (कल्ये प्रातर्जग्धिर्भोजनम् ।) प्रातराशः । प्रातर्भोजनम् । इति जटाधरः ॥
कल्यत्वं, क्ली, (कल्य + भावे "तस्य भावस्त्वतलौ" । इति त्वम्) आरोग्यम् । इति जटाधरः ॥
कल्यपालः, पुं, (कल्यं मद्यमित्यर्थः पालयतीति । कल्य + पाल् + अण् ।) शौण्डिकः । इति हेमचन्द्रः ॥
कल्यपालकः, पुं, (कल्यं पालयति । कल्य + पाल् + ण्वुल् ।) शौण्डिकः । इति शब्दमाला ॥
कल्यवर्त्तः, पुं, (कल्ये प्रातः वर्त्तते प्राप्यते ग्रहीतुं इति वा यद्वा वर्त्त्यते जीव्यते अनेन । वृत् + घञ् + कर्म्मणि करणे वा अप् ।) प्रातर्भोजनम् । इति त्रिकाण्डशेषः ॥
कल्या, स्त्री, (कड्यति मादयति । कड मदे घञ् अन्नादित्वात् यक् टाप् च । ड्यस्य लत्वम् । कलयति मादयति वा । कल् + घञ् + यक् टाप् च ।) मद्यम् । इति मेदिनी । शुभात्मिका वाणी । कल्याणवचनम् । इत्यमरः । १ । ६ । १८ ॥ हरीतकी । इति शब्दरत्नावली ॥
कल्याणं, क्ली, (कल्ये प्रातः अश्नुते शब्द्यते इति । कल्य + अण् + "अकर्त्तरि चेति" ३ । ३ । १९ । घञ् ।) मङ्गलम् । (यथा, विष्णुपुराणे १ । १२ । १०२ ।
"स्थानभ्रंशं न चाप्नोति दिवि वा यदि वा भुवि ।
सर्व्वकल्याणसंयुक्तो दीर्घकालञ्च जीवति" ॥)
तत्पर्य्यायः । स्वः २ श्रेयसम् ३ शिवम् ४ भद्रम् ५ शुभम् ६ मावुकम् ७ भविकम् ८ मद्यम् ९ कुशलम् १० क्षेमम् ११ शस्तम् १२ । तद्युक्ते त्रि । इत्यमरः । १ । ४ । २५, २६ ॥ (यथा, मनुः ८ । १९२ ।
"प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे" ॥)
स्वर्णम् । इति मेदिनीकरहेमचन्द्रौ ॥
कल्याणबीजः, पुं, (कल्याणं बीजं यस्य ।) मसूरः । इति राजनिर्घण्टः ॥ (मसूरशब्दे विशेषोऽस्य ज्ञेयः ॥)
कल्याणिका, स्त्री, (कल्याण + संज्ञायां कन् ततष्टाप् अत इत्वम् ।) मनःशिला । इति राजनिर्घण्टः ॥ (मनःशिलाशब्देऽस्या विवृतिर्ज्ञेया ॥)
कल्याणिनी, स्त्री, (कल्याणमस्यास्तीति इनिः ततः स्त्रियां ङीप् ।) वला । इति राजनिर्घण्टः ॥ कल्याणविशिष्टे त्रि ॥
कल्याणी, स्त्री, (कल्याण + स्त्रियां ङीप् । माषपर्णी । गौः । इति राजनिर्घण्टः ॥ (यथा, रघुः १ । ८७ ।
"उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत्" ॥
कल्याणवती । यथा महाभारते । ३ । ७४ । ५ ।
"दमयन्त्यपि कल्याणी प्रासादस्था ह्यपेक्षत" ॥)
कल्यापालः, पुं, (कल्यां मद्यं पालयतीति । कल्या + पालि + अण् ।) शौण्डिकः । इति त्रिकाण्डशेषः ॥
कल्क, ड कल्कने । श्लेष्मे । अशुद्धे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) लटयान्तः । ड कल्कते लोकः अन्यत्कश्मलं करोति श्लेष्मं न करोतीत्यर्थः । कल्कने इति चान्द्रा जौमराश्च ॥ श्लेष्ममात्रे इति केचित् । अशुद्धे इति कालापाः । इति दुर्गादासः ॥
कल्कः, त्रि, (कल्कते श्लेष्मं न मुञ्चति इति । कल्क + अच् ।) बधिरः । इति त्रिकाण्डशेषः । काला इति भाषा ॥
कल्कत्वं, क्ली, (कल्कस्य भावः । कल्क + त्वम् ।) स्वरभेदः । इति हेमचन्द्रः । बधिरता च ॥
कल्लोलः, पुं, (कल्क + वाऊलकात् ओलच् । यद्वा कं जलं लोलं चपलं यस्मात् निपातनात् साधुः ।) महातरङ्गः । बड़ ढेउ इति भाषा । तत्पर्य्यायः । उल्लोलः २ । इत्यमरः । १ । १० । ६ ॥
("कालिन्दीजलकल्लोलकोलाहलकुतूहली" ॥
इत्युद्भटः ॥) हर्षः । मद्यौ त्रि । इति मेदिनी ॥
कव, ऋ ड स्तुतौ । वर्णे । इति कविकल्पद्रुमः । (भ्वां-आत्मं-सकं-सेट् । ऋदित् ।) ऋ अचकावत् । ड कवते । इति दुर्गादासः ॥
कवकं, क्ली, (कवते आच्छादयति विस्तारयति वा ॥ कव् + अच् । संज्ञायां कन् ।) छत्राकम् । यथा,—
"देवतार्थं हविः शिग्रुं शोहितान् ब्रह्मणांस्तथा ।
अनुपाकृततमांसानि विड्जानि कवकानि च" ॥
कवकानि छत्राकाराणि । वर्ज्यानीति प्रत्येकमभिसम्बध्यते । इति मिताक्षरायामाचाराध्यायः ॥
कवकः, पुं, (कव + अच् + संज्ञायां कन् ।) कवलः । ग्रासः । इति हेमचन्द्रः ॥
कवचः, पुं क्ली, (कं देहं वध्नाति विपक्षास्त्राणि वञ्चयित्वा रक्षति इति शेषः । क + वन्च् + अच् । यं वातं वञ्चते वा अन्तर्ध्यर्थो वा । यद्वा कवते इति कुधातोरच् प्रत्यय इति केचित् इत्युणादिकोषः ४२ । २ ।) सन्नाहः । साँजोया इति भाषा । (यथा, विष्णुपुराणे । १ । १३ । ४० ।
"शरांश्च दिव्या नभसः कवचञ्च खमापत ह" ॥)
तत्पर्य्यायः । तनुत्रम् २ वर्म्म ३ दंशनम् ४ उरश्छदः ५ काङ्कटकः ६ जगरः ७ । इत्यमरः । २ । ८ । ६४ ॥ दंसनम् ८ जागरः ९ अजगरः १० । इति तट्टीका ॥ कटकः ११ योगः १२ सन्नाहः १३ कञ्चुकः १४ । इति जटाधरः । * । तस्य युक्तिर्यथा ।
खड्गादीनान्तु गणना पूर्व्वमेव निदर्शिता ।
अस्त्रात्मनैव निर्द्दिश्य कवचादिरपीष्यते ॥
तस्मात्तस्यं संग्रहेण प्रवक्ष्यामि निबोधत ।
काष्ठं चर्म्म च सकणं त्रयमेतत्तु दुस्तरम् ॥
यथोत्तरं गुणयुतं तथा पूर्व्वन्तु निन्दितम् ।
शरीरावरकत्वन्तु लघुत्वं दृढ़ता तथा ॥
दुर्भेद्यतेति कथितः कवचे गुणसंग्रहः ।
सच्छिद्रतातिगुरुता तनुता सुखभेद्यता ॥
कवचानां विनिर्द्दिष्टैः समासाद्दोषसंग्रहः ।
अत्र वर्णो विनिर्द्दिष्टः क्रमादेव चतुर्व्विधः ॥
सितो रक्तस्तथा पीतः कृष्णो ब्रह्मादिषु क्रमात् ।
केचित् कुर्व्वन्ति कुशलाः कवचं धातुसम्भवम् ॥
कनकं रजतं ताम्रं लौहं तेषु यथाक्रमम्" ॥
इति युक्तिकल्पतरुः ॥ * ॥
"यथा शस्त्रप्रहाराणां कवचं प्रति वारणम् ।
तथा दैवोपघातानां शान्तिर्भवति वारणम्" ॥
इति मलमासतत्त्वम् ॥ लौहादिवर्म्मवत् अङ्गादिरक्षणार्थं देवतामन्त्रविग्रहम् । तच्च पूजायां पाद्यं भूर्ज्जे विलिख्य कण्ठादौ धार्य्यञ्च । इति तन्त्रम् ॥ गर्द्दभाण्डलक्षः । पटहवाद्यम् । इति मेदिनी ॥
कवचपत्रं, क्ली, (कवचलेखनसाधनपत्रमिव पत्रं वल्कलं यस्य ।) भूर्ज्जपत्रम् । इति शब्दचन्द्रिका ॥
कवटी, स्त्री, (कौति शब्दायते इति । कु + अटन् + गौरादित्वात् ङीष् ।) कवाटः । इति भरतो द्विरूपकोषश्च ॥
कवयी, स्त्री, (कात् जलात् वयते गच्छति इति । क + वय् गतौ + इन् "इदिकारान्तत्वात्" वा ङीष् ।) मत्स्यविशेषः । कयी माछ इति भाषा ॥ तत्पर्य्यायः । ककचष्ठी २ । इति त्रिकाण्डशेषः ॥ अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । बलकारित्वम् । वायुकफनाशित्वञ्च । इति राजवल्लभः ॥ किञ्चित्पित्तकरीति केचित् ॥ ("कवय्याः स्निग्धमधुराः" । इति चक्रपाणिदत्तद्रव्यगुणे ॥)
कवरं, त्रि, (के मस्तके वरं श्रेभमानत्वात् श्रेष्ठम् ।) केशपाशः । इत्यमरटीका ॥ (यथा भागवते ५ । २ । ७ । "वस्त्रस्रग्गन्धमाल्यमणिकनकवरभारभरणानां देवीम्" ॥) संश्लिष्टम् । खचितम् । इति हलायुधः ॥
कवरः, पुं क्ली, (कं जलं वृणोति । क + वृ + अच् ।) शैवलः । अस्त्रः । इति मेदिनी हेमचन्द्रश्च । (कौतीति । कुशब्दे + "कोरन्" । उणां ४ । १५४ । इति अरन् । पाठकः । इत्युज्ज्वलदत्तः ॥ कर्बुरवर्णः । इति हलायुधः । यथा, माघे ५ । १६ ।
"दृष्टैव निर्व्वर्तितकालापभरामधस्रा-
ह्याकीर्णमाल्यकवरां कवरीं तरुण्याः" ॥)
कवरकी, स्त्री, (कवरं केशपाशं किरति विक्षिपति यत्र इति । कवर + कॄ + वाऊलकात् ड गौरादित्वात् ङीष् । कारावासदुःखेन केशादिपारिप्लवराहित्यात् तथात्वम् ।) कारागारवद्धः । इति हारावली । कयेदी इति भाषा ॥
कवरा, स्त्री, (कवर + अजादित्वात् टाप् ।) खरशुष्या । इति शब्दचन्द्रिका । वायुड इति भाषा ॥
कवरी, स्त्री, (कं शिरः वृणोति आच्छादयति । क + वृ + अच् + जानपदेत्यादिना ङीप् । कु + अरन् ङीष् वा ।) केशविन्यासः । चुलेर खोपा टिकी इति भाषा । तत्पर्य्यायः । केशवेषः २ कवरः ३ केशगर्भकः ४ । इति शब्दरत्नावली ॥
("गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी विस्रसन्ती विशालम्" ॥
इति पदाङ्कदूते । १ ॥) भ्रमरा । वायुड इति

भाषा। कारवी। इत्यमरो मेदिनी च। हिङ्गेर पाता इति भाषा॥

कवलः, पुं, (केन जलेन वलते चलतीति। वल्+अच्।) ग्रासः। इत्यमरः। २। ९। ५४॥ ("चिकटुकमजमोदा सैन्धवं जीरकं हे समधरयुतानामष्टमो हिङ्गुभागः। प्रथमकवलभुक्तं सर्षपा चूर्णमेत-ज्जनयति जठराग्निं वातरोगांश्च हन्ति"॥ इति वैद्यकचक्रपाणिसंग्रहे अग्निमान्द्याधिकारे॥ "अक्षन्न् कवलान्नागा गावोवत्सान् न पाययन्"। इति हेःरामायणे। २। ४१। ९॥) मत्स्यविशेषः। इति शब्दचन्द्रिका॥ वेले माच इति भाषा॥

कवलितः, त्रि, (कवलं करोति। कवल+णिच्+कर्म्मणि क्तः।) भुक्तः। इति जटाधरः॥ ("ग्रस्यत् कवलितानेकजीवम्"। इति कथासरित्सागरः। २६। १४२॥)

कवसः, पुं, (कौति कवते वा। कुशब्दे+"ऋतनी-त्यादिना" उणां ४। २। असु।) कवचः। इत्यु-णादिकोषः॥

कवाटः, त्रि, (कुशब्दे+भावे अप्। कवं शब्दं अटतीति। कव+अट्+अच्। यद्वा कं वातं वटति रुणोति वारयतीत्यर्थः क+वट्+अण्।) कपाटः। इत्यमरटीकायां वाचस्पतिः। (यथा हेःरामायणे २। ७१। ३७।

"असंयतकवाटानि श्रीविहीनानि सर्व्वशः"॥)

कवाटवक्त्रं, क्ली, (कवाटं वक्त्रं यस्मात्।) रुक्षविशेषः। कवाटवेडु इति भाषा। कवाडवेरुया इति केचित्॥ तत्पर्य्यायः। वक्राग्रम् २ कपोतवक्त्रम् ३ अक्षजित् ४। इति रत्नमाला॥

कवाटी, स्त्री, (कवाट+अल्पार्थे+ङीप्।) कपाटम्। इत्यमरटीकायां भरतः॥

कवारं, क्ली, (कं जलं आश्रयत्वेन वृणोति। क+वृ+अण्।) पद्मम्। इति त्रिकाण्डशेषः॥

कविः, पुं, (कवते सर्व्वं जानाति सर्व्वं वर्णयति सर्व्वं सर्व्वतो गच्छति वा। कव्+इन्। यद्वा कुशब्दे+"अचः इः"। उणां ४। १३८। इति इः।) ब्रह्मा। इति हेमचन्द्रः॥ (अयमादिकविः यथा, "तेने ब्रह्महृदा य आदिकवये" इति भागवते। १। १।) "वाल्मीकिमुनिः। (एकोऽभून्निलनात् ततस्तु पुलिनात् वल्मीकतश्चापरस्त्र एव प्रथिताः कवीन्द्रगुरवस्तेभ्यो नमस्कुर्म्महे"। इत्युद्भटः॥) शुक्राचार्य्यः। (यथा महाभारते १। ६६। ४२। "ब्रह्मणो हृदयं भित्त्वा निःसृतो भगवान् भृगुः। भृगोः पुत्रः कविर्विद्वान् शुक्रः कविसुतो ग्रहः"॥) सूर्य्यः। काव्यकरः। (यथा रघुः १। ३।

"मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्"॥) खलीने स्त्री। इति मेदिनी॥ (विष्णुः। यथा महाभारते १३। १४९। २७।

"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः"॥) कल्किदेवस्य ज्येष्ठभ्राता। यथा,—

"कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्तकाः। तातमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः"॥

इति कल्किपुराणे २ अध्यायः॥ * अपि च।

"विप्राखयूपभूपालः प्रायात् साधुजनप्रियः। कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च सम्भले॥ कविं प्राज्ञं सुमन्तञ्च पुरस्कृत्य महाप्रभम्। गार्ग्यभर्ग्याविशालैश्च ज्ञातिभिः परिवारितम्। विप्राखयूपो ददृशे चन्द्रं तारागणैरिव"॥ इति तत्रैव ३ अध्यायः॥ * ॥ चौरयोद्धा। यथा।

"वेधस्थाने रणे भङ्गो दुर्गे खण्डिः प्रजायते। कविप्रवेशनं तत्र योधाघातश्च तत्र वै"॥ इति सर्व्वतोभद्रचक्रे ज्योतिस्तत्त्वम्॥

कविः, त्रि, (कवते श्लोकान् ग्रथते वर्णयति वा। कव्+इन्।) पण्डितः। इत्यमरः। २। ७। ५॥ (यथा मनुः २। १५१।

"अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः"॥)

कविः, स्त्री, (कवति शब्दायते इति। कुशब्दे "अच इः"। उणां। ४। १३८ इति इः। अश्वमुखे शब्दायमानत्वात्तथात्वम्।) खलीनः। इति मेदिनी। लागाम इति भाषा॥

कविकं, स्त्री, (कवि+स्वार्थे कन्।) खलीनः। इति हलायुधः॥

कविका, स्त्री, (कवि+स्वार्थे कन् टाप् च।) खलीनः। इत्यमरः। २। ८। १९॥ लागाम इति भाषा। केविकापुष्पम्। इति राजनिर्घण्टः॥ कवची मत्स्यः। इति भावप्रकाशः॥ (अस्या गुणा यथा,—

"कविका मधुरा स्निग्धा कफघ्ना रुचिकारिणी। किञ्चित् पित्तकरी वात-नाशिनी वह्निवर्द्धिनी"॥ इति च भावप्रकाशस्य पूर्व्वखण्डे मांसवर्गे॥)

कविज्येष्ठः, पुं, (कविषु ज्येष्ठः।) वाल्मीकिमुनिः। इति त्रिकाण्डशेषः॥

कविता, स्त्री, (कवेः रचयितुर्भावः तल्।) कवित्वम्। काव्यम्। यथा,—

"कविता वनिता वापि आयाता सुखदायिनी"। इत्युद्भटः॥

कविवेदी, [न्] त्रि, (कविं कवित्वं वेत्ति। कवि+विद्+णिनिः।) कविः। इति जटाधरः॥

कविर्य, क्ली पुं, (कं सुखं अजति। क+अज्+क। अजस्थाने विः।) खलीनः। इति त्रिकाण्डशेषः॥

कविरामायणः, पुं, (कविना कवितया कविषु काव्येषु वा रामः अयनं आश्रयो यस्य।) वाल्मीकिमुनिः। इति शब्दरत्नावली॥

कविलासिका, स्त्री, (कं सुखं विलासयति उद्दीपयतीति। क+वि+लस्+णिच्+एषुल् टाप् अत इत्वम्।) वीणाविशेषः। इति शब्दरत्नावली॥

कविवाल्मीकिः, पुं, (कविश्चासौ वाल्मीकिश्चेति।) वाल्मीकिमुनिः। इति शब्दरत्नावली॥

कवी, स्त्री, (कवि वा ङीष्।) खलीनः। इति मेदिनी भरतश्च॥ [जटाधरः॥

कवीर्य, क्ली, (कवि+स्वार्थे घ्यः।) खलीनः। इति कवेलं, क्ली, (कं जलं विलति स्तृणाति। क+विल्+अच्।) कुवलयम्। उत्पलम्। इति शब्दचन्द्रिका॥

कवोष्णं, क्ली, (कुत्सितं उष्णं ईषदुष्णं वा।) ईषदुष्णम्। (यथा रघुः १। ६०।

"मत्परं दुर्लभं मत्वा नूनमावर्ज्जितं मया। पयः पूर्व्वैः सुनिश्वासैः कवोष्णमुपभुज्यते"॥) तद्वति त्रि। इत्यमरः। १। ४ ३५॥

कव्यं, क्ली, (क्रूयते पितृभ्यः। पितृदेशेन दीयते यदन्नादिकम्। कु+"अचो यत्" ३। १। ९७। इति यत्।) पित्रन्नम्। पितृसम्प्रदानकान्नम्। इत्यमरः। २। ७। २४॥ (यथा, मनुः ३। २८५॥

"यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः। कव्यानि चैव पितरः किम्भूतमधिकं ततः"॥

कव्यानि तु वेदतत्त्वविदे ब्राह्मणाय दातव्यानि अन्यथा तद्दानं निष्फलं स्यात्यदुक्तं मनौ ३ अध्याये।

"श्रोत्रियायैव देयानि हव्यकव्यानि दाक्षभिः। अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम्॥ एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्। पुष्कलं फलमाप्नोति नामन्त्रज्ञान् बहूनपि॥ दूरादेव परीक्षेत ब्राह्मणं वेदपारगम्। तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः॥ सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते। एकस्तान् मन्त्रवित् प्रीतः सर्व्वानर्हति धर्म्मतः॥ ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च। न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः॥ यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्। तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्ट्यायोगुडान्॥ ज्ञाननिष्ठा द्विजाः केचित् तपोनिष्ठास्तथापरे। तपःस्वाध्यायनिष्ठास्तु कर्म्मनिष्ठास्तथापरे॥ ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः। हव्यानि तु यथान्यायं सर्व्वेष्वेव चतुर्ष्वपि॥ एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः। अनुकल्पस्त्वयं ज्ञेयः सद्भिरनुष्ठितः॥ मातामहं मातुलञ्च स्वकीयं श्वशुरं गुरुम्। दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत्॥ येष्वेतत्पतितस्त्रीवा ये च नास्तिकवृत्तयः। तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्॥ चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा। विपणेन च जीवन्तो वर्ज्यास्युर्हव्यकव्ययोः"॥ इत्यादि। विस्तृतिस्तु तत्रैव द्रष्टव्या॥)

कव्यवाडः, पुं, (कव्यं वह्यते दीयते अस्मै। कव्य+वह् दाने+सम्प्रदाने घञ्।) पितृगणविशेषः। इति त्रिकाण्डशेषः॥ (यथा, वायुपुराणे।

"कव्यवाडोऽनलः सोमः यमश्चैवार्य्यमा तथा। अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः"॥)

कश, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) कशति। इति दुर्गादासः॥

कशा, स्त्री, (कशति शब्दायते ताड्यति वा। कश्+करणस्य कर्त्तरि अच् टाप् च। ताड्यत्यनया वा।) अश्वादेस्ताड़नी। इत्यमरः। २। १०। ३१। कोड़ा चाबुक् इति च भाषा॥ ("जघान कशया मोहात् तदा राक्षसवन्मुनिम्"। इति महाभारते। १। १७७। १०॥) मांसरोहिणी। इति भावप्रकाशः॥

कशार्हः, त्रि, (कशां अर्हति इति। कशा+अर्ह+

अण् ।) कशाघातयोग्यः । कोड़ा मारिवार उपयुक्त इति भाषा । तत्पर्य्यायः । कश्यः २ । इत्यमरः । २ । १ । ४४ ॥

कश्मिपुः, पुं, (कश्यति दुःखं कश्यते वा कश्यगतिशासनयोः । कश + मगण्वादित्वात् निपातनात् साधुः ।) भक्तम् । आच्छादनम् । एकोत्तरान्नवस्त्रे कश्मिपू इति द्विवचनान्तम् । इति मेदिनी ॥ (यथा । यथा, भागवते २ । २ । ४ ।

"सत्यां क्षितौ किं कश्मिपोः प्रयासैः" ॥)

कश्मीर, क्ली पुं, (के देहे श्रीर्यते । क + श्रृ + "केऽश्रः रड चास्य" । उणां १ । ६० । इति उः रड्चान्तादेशः ।) एष्टाक्षि । पिठेर दाँड़ा इति भाषा । इति हलायुधः ॥ (पुं सि उदाहरणं ।

"किं कुर्व्वता वराङ्गेण खाद्यन्ते हि कश्मीरवः" । इत्युणादिकाधृतचन्द्रवचनम् ।)

कश्मीर, क्ली, (कं जलं वातं वा श्रृणाति । क + श्रृ + उणादित्वात् उः । रड्चान्तादेशः ।) कश्मीरजा । केशुर इति भाषा । इति रत्नमाला ॥

राजनिर्घण्टे दन्त्यसकारवान् पुंलिङ्गोऽप्ययं शब्दः ॥ ("कश्मीर द्विविधं तत्तु महद्राजकश्मीरकम् ।

सुस्वादुतिक्तघः स्यात् यत् तच्चिवोटमिति स्मृतम्" ॥ इति वैद्यकम् ॥)

कश्मीरः, पुं, (क + श्रृ + उ + रड् ।) जम्बुद्वीपस्य खण्डविशेषः । इति शब्दमाला ॥

कश्मीरकं, क्ली, (कश्मीर + स्वार्थे कन् ।) द्रव्यकन्दः । केशुर इति भाषा । अस्य गुणाः । गुरुत्वम् । विष्टम्भकारित्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥

("तरुठविसप्रालूकक्रौञ्चादनकश्मीरजम् ।

पट्टकाटकं कलोड्यञ्च गुरु विष्टम्भि शीतलम्" ॥ इति चरके सूत्रस्थाने २७ अध्याये ॥)

कश्मीरका, स्त्री, (कश्मीर + स्वार्थे कन् टाप् च ।) एष्टाक्षि । इति रत्नमाला । पिठेर दाँड़ा इति भाषा ।

कश्मीरूः, स्त्री, (क + श्रृ + "केऽश्रः रड्चास्य" । उणां १ । ६० । इति ऊः । रड्चान्तादेशः ।) द्रव्यकन्दः इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ केशुर इति भाषा ।

कश्मन, व्य, (किम् + चन् इति मुग्धबोधमतम् । पाणिनिमते एथक् पदमिति भेदः ।) कञ्चित् । इति व्याकरणम् ॥ कोन । केह इति च भाषा । (यथा माघः १६ । १ ।

"दमघोषसुतेन कश्मन

प्रतिशिश्रुः प्रतिभानवानघ" ॥)

कश्चित्, व्य (किम् + चित् । पाणिनिमते एथक् पदम् ।) कश्मन । इति व्याकरणम् ॥ (यथा मेघदूते १ ।

'कश्चित्कान्ता विरहगुरुणा स्वाधिकारप्रमत्तः' ॥)

कश्मर्ण, क्ली, (कश्र् गतिशातनयोः + कर्ण । "कुटिकशिकौतिभ्यः प्रत्ययस्य मुट्" ॥ उणां १ । १०८ इति मुट् ।) मूर्च्छा । इत्यमरः । २ । ८ । १०६ । (मोहः । यथा, गीतायाम् २ । २ ।

"कुतस्त्वाकश्मलमिदं विषमे समुपस्थितम्" ॥)

पापम् । इति शब्दमाला ॥ मलिने त्रि । इति हेमचन्द्रः ॥

कश्मीरः, पुं, (कश्र् + "कश्रेर्मुट् च । उणां ४ । ३० इति ईरन् मुट् च ।) काश्मीरदेशः । इति त्रिकाण्डशेषः ॥ (अस्य सीमादि यथा,—शक्ति सङ्गमतन्त्रे ७ पटले ।

"शारदामठमारभ्य कुङ्कुमादितटान्तकः ।

तावत् कश्मीरदेशः स्यात् पञ्चाशद्योजनात्मकः" ॥)

कश्मीरजन्मा, [न्] पुं, (कश्मीरे कश्मीरदेशे जन्म यस्य ।) काश्मीरजन्मा । कुङ्कुमम् । इत्यमरटीकायां रायमुकुटः ॥

कश्यं, क्ली, (कश्यं अर्हतीति । कश्य + दन्त्यादित्वात् । ५ । १ । ६६ । यत् ।) अश्वमध्यभागः । (कश्यति अनेन । कश्र् + बाहुलकात् करणे यत् ।) मद्यम् । यथा,—मार्कण्डेयपुराणे १०४ । ३ ।

"ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुतः ।

कश्यपस्तस्य पुत्रोऽभूत् कश्यपानात् स कश्यपः" ॥

कश्यार्हे त्रि । इत्यमरः । ३ । १ । ४४ ॥

कश्यपः, पुं, (कश्यं सोमरसादिजनितं मद्यं पिबतीति । कश्य + पा + क । अस्य नामनिरुक्तिर्यथा मार्कण्डेयपुराणे । १०४ । ३ ।

"ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुतः ।

कश्यपस्तस्य पुत्रोऽभूत् कश्यपानात् स कश्यपः" ।)

मुनिभेदः । कलागर्भजो मरीचिमुनेरौरसः पुत्रः । अस्य भार्य्या दक्षस्य सप्तदशकन्याः । तासां तत्पुत्रादयश्च नामानि यथा । अदितेर्देवाः १ दितेर्दैत्याः २ दनोर्दानवाः ३ काष्ठायाः अश्वादयः ४ अरिष्टायाः गन्धर्व्वाः ५ सुरसायाः राक्षसाः ६ इलायाः वृक्षाः ७ मुनेरप्सरोगणाः ८ क्रोधवशायाः सर्पाः ९ ताम्रायाः श्येनगृध्रादयः १० सुरभेर्गोमहिषाः ११ सरमायाः श्वापदाः १२ तिमेर्यादोगणाः १३ विनतायाः गरुड़ारुणौ १४ कद्रोर्नागाः १५ पतङ्ग्याः पतङ्गाः १६ यामिन्याः शलभाः १७ । इति श्रीभागवतम् ॥ * ॥

(मार्कण्डेयपुराणमते अस्य त्रयोदशभार्य्याः । यदुक्तं तत्रैव १०४ अध्याये । अदितिः १ दितिः २ दनुः ३ विनता ४ खसा ५ कद्रुः ६ मुनिः ७ क्रोधा ८ रिष्टा ९ इरा १० ताम्रा ११ इला १२ प्रधा १३ । महाभारतमतेऽपि अस्य त्रयोदश भार्य्या । यदुक्तं तत्रैव १ । ६५ । ११—१३ ।

"मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः ।

प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥

अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा ।

क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः ।

कद्रुश्च मनुजश्रेष्ठ ! दक्षकन्यैव भारत" ! ॥

परमेश्वरस्यैव कश्यप इति नामास्ति । यथा,

"तेनेमाः सर्व्वाः प्रजाः उत्पादितास्तस्मात् सर्व्वा इमाः प्रजाः काश्यप्य इत्युच्यन्ते । कश्यपः कस्मात् पश्यको भवतीति निरुक्त्या पश्यतीति पश्यः सर्व्वज्ञतया सकलं जगद्विजानाति स पश्यः । पश्य एव निर्भ्रमतयातिसूक्ष्ममपि वस्तु यथार्थं जानात्येवातः पश्यक इति । आद्यन्ताक्षरविपर्य्यासिद्धेः सिंहः क्षतेस्तर्कुरित्यादिवत् कश्यप इति इयवरट् इत्येतस्योपरि महाभाष्यप्रमाणेन पदं सिध्यति" ॥ इति दयानन्दभाष्यायां वेदभाष्योपक्रमणिकायां २९१ सङ्ख्यकपत्रे ॥ कश्यं अज्ञानं अविद्यामित्यर्थः । तत्पिबति शोषयति नाशयति । यद्वा कश्यं विज्ञानघनम् पाति रक्षति स्वात्मनेति । परब्रह्म । तथा च तापनिश्रुतिः २ । ११ ॥

"सा होवाच गान्धर्व्वी ऋषिं वै दुर्व्वाससं कोऽयं ब्रह्मन् ! वा एतस्य प्रजालोकस्य पालयिता भर्त्ता वा जगतः । सहोवाच तत्त्ववित् प्रवरो महान् दुर्व्वासाः । तदेव ब्रह्म वा आत्मा एतस्य पाता हर्त्ता प्रजानां गोप्ता वावह कश्यपो ह योऽयमज्ञानभोक्ता गान्धर्व्वि" ॥

कच्छपः । तथा च शतपथब्राह्मणे—

"स यत्कूर्म्मो नाम । प्रजापतिः प्रजा असृजत यदसृजताकरोत्तद्यदकरोत्तस्मात् कूर्म्मः कश्यपो वै कूर्म्मस्तस्मादाहुः सर्व्वाः प्रजाः काश्यप्यः" ॥

यथा यजुर्व्वेदे २४ । २७ ।

"अपामुद्रो मासां कश्यपः" । "कश्यपः कच्छपः" । इति वेददीधितिः ॥ कश्यं मद्यं पिबतीति । कश्य + पा + क । "सुरायः श्यावदन्तः स्यात्" । इति वचनात्तथात्वम् । श्यावदन्ते त्रि, यथा, कात्यायनश्रौतसूत्रे १० । २ । ३५ ।

"प्रक्षतेभ्यश्चान्यत् कश्यकाश्यपयाचमानवर्ज्जम्" ॥) मृगविशेषः । इति मेदिनी । मत्स्यभेदः । इति विश्वः ॥

कश्यपनन्दनः, पुं, (कश्यपस्य नन्दनः ।) गरुड़ः । इति हलायुधः ॥ (देवासुरादयोऽपि ॥)

कष वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) कषति । अयमुभयपदीति चतुर्भुजसुरौ ॥ रमानाथसरौ तु इमं परस्मैपदिनं मत्वा उभयपदिनं तारानाथस्तं अन्यं मन्येते । इति दुर्गादासः ॥

कषः, पुं, (कष्यतेऽनेन वा । कष् + अच् ।) कषपट्टिका । कष्टिपाथर इति भाषा । तत्पर्य्यायः । शानः २ निकषः ३ । इत्यमरः । २ । १० । ३२ ॥

कषणः, त्रि, (कष्यते. विलाद्यते । कष् + कर्मणि ल्युट् ।) अपक्वः । इति शब्दचन्द्रिका ॥ (पुं, कषत्यत्र । अधिकरणे ल्युट् । निकषोपलम् । यथा, आर्य्यासप्तशती ४१८ ।

"भूषणतां भजतः सखि ! कषणविशुद्धस्य जातरूपस्य" ॥ भावे ल्युट् । क्ली, कषणं यत्नम् । यथा किराते ५ । ४७ ।

"कषणकर्म्मनिरस्तमहाहिभिः

त्वगविभक्तमतङ्गजवर्जितैः" ॥

"इहादौ कषणेन कार्ड्ययोगेन यः कर्म्मस्तेन निरस्ता महाहयो येभ्यस्तैः" ॥ इति तट्टीकायां मल्लिनाथः ॥)

कषा, स्त्री, (कष्यते ताड्यते अनया । कष् + बाहुलकात् करणे अच् । ततष्टाप् ।) कशा । इत्यमरटीकायां रमानाथः ॥ चाबुक् इति भाषा ॥ (यथा गीतरा ॥ यशे ६ । ३७ । ४१ ।

"उद्दान् हयान् खरान् नागान् जघ्नुर्दण्डकषाङ्कुशैः"॥)
कषाकुः, पुं, (कष् + आकुः।) सूर्य्यः। अग्निः। इत्युणादिकोषः॥
कषायः, पुं क्ली, (कषति कण्ठम्। कष् + आयः।) रसविशेषः। कषा इति भाषा। एथिव्यनिलगुणाद्धस्वात्तस्योत्पत्तिः। इति शिवदासः॥
(यथा, मनुः ११। १५३।
"मुक्तानि च कषायांश्च पीत्वामेध्यान्यपि द्विजः"॥)
तत्पर्य्यायः। तुवरः २ तद्युक्ते त्रि। इत्यमरः। १। ५। ९॥ कुवरः ३ तूरवः ४। इति तट्टीका॥ अस्य गुणाः। ब्रणादिरोपणत्वम्। ग्राहित्वम्। शोषणत्वम्। वायुकोपकारित्वञ्च। अतियुक्तस्य तस्य गुणाः। मलमूत्रग्रहाध्मानहृत्पीड़ाक्षेपणादिरोगकारित्वम्। अन्यच्च।
"कषायः शोषणः स्तम्भी व्रणपाकार्त्तिनाशनः।
कफशोणितवातघ्नो रूक्षः शीतो गुरुस्तथा"॥
इति राजवल्लभः॥ अपि च।
"कषायनामा निरगुड्डि शोफं
वर्णान्तनोर्दीपनपाचनञ्च।
सत्त्वापहोऽसौ शिथिलत्वकारो
निषेवितः पाशु करोति मांसम्"॥
इति राजनिर्घण्टः॥ * ॥ पाचनादिः। तस्य पूर्णवीर्य्यं यामेकं तिष्ठति। तत्पर्य्यायः। क्वाथः २ निर्य्यूहः ३। स तु पञ्चविधो यथा। खरसः १ कल्कः २ क्वथितः ३ शीतः ४ फाण्टम् ५। इति वैद्यकपरिभाषा॥ * ॥
("जिह्वां कण्ठं ग्रसति नितरां ग्राहकत्वातिसारे श्लेष्माधिक्यप्रशमकरः श्वासकासापहर्त्ता।
हिक्कां शूलं हरति नितरां शोधनं स्याद्व्रणानां प्रोक्तस्वायं समधिकगुणो नाम श्रेष्ठः कषायः"॥
इति हारीते प्रथम स्थाने ७ अध्याये॥
"कषायो जड़येच्जिह्वां कण्ठस्रोतो विबन्धकृत्"॥
"कषायः पित्तकफहा गुरुरक्तविशोधनः।
पीड़नो रोपणः शीतः क्लेदमेदो विशोषणः।
आमसंस्तम्भनो ग्राही रूक्षोऽतित्वक्प्रसादनः॥
करोति शीलितः सोऽति विष्टम्भाध्मानहृद्रुजः।
दृष्टकार्श्यं पौरुषभंशस्रोतोरोधमलग्रहान्"॥
इति वामटे सूत्रस्थाने १० अध्याये॥
"कषायो रसः संग्रहनः संग्राही सन्धारणः पीड़नो रोपणः शोषणः स्तम्भनः श्लेष्मरक्तपित्तप्रशमनः शरीरक्लेदस्योपयोक्ता रूक्षः शीतो गुरुश्च।
स एवं गुणोऽप्येक एवात्यर्थमुपयुज्यमानः आस्यं शोषयति, हृदयं पीड़यति, उदरमाध्मापयति, वाचं निगृह्णाति, स्रोतांस्यवबध्नाति, ग्लानत्वमापादयति, पौंस्त्वमुपहन्ति, विष्टभ्य जरां गच्छति, वातमूत्रपुरीषाण्यवष्टभ्नाति, कर्षयति, ग्लापयति, तर्षयति, स्तम्भयति, खरविषदरूक्षत्वात् पञ्चवध-ग्रहापतानकार्दितप्रभृतींश्च वातविकारानुपजनयतीति"।
"वैद्यस्तम्भजाड्यौ रसनं योजयेद्रसः।
बध्नातीवचयः कण्ठं कषायः स विकास्यपि"॥
"पवन एथिव्यतिरेकात् कषायः"॥
इति चरके सूत्रस्थाने २६ अध्याये॥)
निर्य्यासः। (यथा, महाभारते अनुशासनपर्व्वणि।
"दृष्टो वटकषायेण अनुलिप्तः प्रियङ्गुणा।
क्षीरेण यष्टिकान् भुक्त्वा सर्व्वपापैः प्रमुच्यते"॥)
विलेपनम्। (यथा कुमारे ७। १७।
"कर्णार्पितो लोध्रकषायरूक्षे
गोरोचनाश्लेषनिताम्तगौरे"॥
"लोध्रस्य रूक्षविश्लेषस्य कषायेण विलेपनेन"॥
इति मल्लिनाथः॥) अङ्गरागः। इति मेदिनी॥
कषायः, पुं, (कष् + आयः।) श्योनाकवृक्षः। इति धरणी॥ रागः। इत्यमरटीकायां स्वामी॥
(यथा छान्दोग्योपनिषदि।
"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः। स्मृतिलम्भे सर्व्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसः पारं दर्शयति"।
"तस्मै मृदितकषायाय वार्त्तारादिरिव कषायो रागद्वेषादिदोषः सत्त्वस्य रञ्जनरूपत्वात् ज्ञानवैराग्याभ्यासरूपक्षारेण क्षालितो मृदितो विनाशितो यस्य नारदस्य तस्मै"। इति भाष्यम्॥)
कलियुगम्। इत्यमरटीकासारसुन्दरी॥ (निर्व्विकल्पसमाधेर्विघ्नभेदः। यथा, वेदान्तसारे समाधिकल्पे ८१।
"लयविक्षेपाभावेऽपि चित्तवृत्तेरागादिवासनया स्तब्धीभावात् अखण्डवस्त्वनवलम्बनम्"। तत्रानेकजन्माभ्यस्तबाह्याभ्यन्तररागाद्यनुभवजनितसंस्कारैः कलुषीकृतं चित्तं कथञ्चित् श्रवणादिसाधनेनान्तर्मुखमपि चैतन्यग्रहणसामर्थ्याभावात् मथ्य एव स्तब्धीभवति यथा राजदर्शनाय खण्डद्वारिर्गतः, राजमन्दिरं प्रविशन्त्र कस्यचित् पुरुषस्य द्वारपालनिरोधेन स्तब्धीभावः तथा परित्यक्त बाह्यविषयस्य अखण्डवस्तुग्रहणप्रवृत्तस्योद्भुद्धरागादिसंस्कारैः स्तब्धीभावादखण्डवस्त्वग्रहणं कषायः॥)
कषायः, त्रि, (कष + आयः।) सरभिः। (यथा मेघदूते ३३।
"प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः"॥)
लोहितः। इति मेदिनी॥ (यथा कुमारे ३। ३२।
"चूताङ्कुराखादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज"॥)
रक्तपीतमिश्रितवर्णः। इत्यमरटीकायां स्वामी॥ धवरूक्षः। इति राजनिर्घण्टः॥
कषायकृत्, पुं, (कषायं कषायरागं करोति इति। कषाय + कृ + क्विप् तुगागमश्च॥) रक्तगोध्रः। इति जटाधरः॥
कषाययावनालः, पुं, (कषायः रक्तवर्णः यावनालः।) तुवरयावनालधान्यम्। इति राजनिर्घण्टः॥
कषाया, स्त्री, (कष + आय टाप् च।) क्षुद्रदुरालभालता। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"यासोपवासो दुर्ध्यर्शो धन्वयासः कुनाशकः।
दुरालभादुरालम्भा समुद्रान्ता च रोदिनी॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा"।)
यिकषातः, त्रि, (कषायो रक्तपीतवर्णादिर्जातोऽस्य। कषाय + तारकादित्वात् इतच्।) क्षतजोहितः। (यथा कुमारे ४। ३४।
"अमुनैव कषायितस्तनी
सभगेन प्रियगात्रभस्मना"॥)
कषायी, [न्] पुं, (कषायो विद्यते अस्य। कषाय + इनिः।) श्लेष्मवृक्षः। इति जटाधरः॥ लकुचवृक्षः। खर्जूरीवृक्षः। इति राजनिर्घण्टः॥
कषिः, त्रि, (कषति हिनस्ति यः। कष + "खनि कषि" इत्यादिना इः। उणां ४। १३९।) हिंसकः। इत्युणादिकोषः॥
कषीका, स्त्री, (कषतीति। कष + "कषि घृषिभ्यां ईकन्"। उणां ४। १९। इति ईकन् + टाप् च।) पक्षिजातिः। यदुक्तं उणादिकोषे॥
"कषीका पक्षिजातौ स्यात् दूषिका नेत्रयोर्म्मले"॥
कषेरुका, स्त्री, (कष + एरक् + ततः उः। संज्ञायां कन् टाप् च।) कशेरुका। एष्ठाख्यि। इत्यमरटीकायां रायमुकुटः॥
कष्टं, क्ली, (कष्यते इति। कष् + भावे क्तः। "क्तक्तवतूनयोः कमः"। ७। २।२२। इति नेट्।) पीड़ामात्रम्। तत्पर्य्यायः। पीड़ा २ बाधा ३ व्यथा ४ दुःखम् ५ अमानस्यम् ६ प्रसूतिजम् ७ क्लेशम् ८ आभीलम् ९। इत्यमरः। १। ९। ३। आबाधा १० वेदना ११ दुःखम् १२ आमानस्यम् १३। इति तट्टीकायां भरतः। कलाकलम् १४। इति वाचस्पतिः॥ आर्त्तिः १५ आर्त्तिः १६ पीड़नम् १७ बाधनम् १८ आमनस्यम् १९ विबाधनम् २० विश्लेषनम् २१ विधानकम् २२ पीड़ितम् २३। इति शब्दरत्नावली॥ क्वाथः २४ अग्रम्मं २५। इति जटाधरः॥ (यथा महानिर्व्वाणोक्तात्मज्ञानिर्णये।
"कुर्व्वाणः सततं कर्म्म ज्ञात्वा कष्टशतान्यपि।
तावन्न लभते मोक्षं यावज्ज्ञानं न जायते"॥)
कष्टः, त्रि, (कष्यतेऽसौ। कष् + कर्म्मणि + क्तः।) पीड़ायुक्तः। गहनः। इत्यमरमेदिनीकरौ॥ (यथा मनुः १२। ७८।
"बन्धनानि च कष्टानि परप्रेष्यत्वमेव च"॥
अतिकष्टकरम्। विषादादौ प्रयोक्तव्यम्। यथा, महाभारते १। १। २१५।
"कष्टं! युद्धे दशग्रीवाः श्रुता मे।
वयोऽस्माकं पाण्डवानाञ्च सप्त"॥)
कष्टकारकः, पुं, (कष्टं करोति उत्पादयति बन्धकत्वात्। कष्ट + कृ + कर्म्मण्यण्। ततः कन्। कष्टं करोतीति। कृ + ण्वुल् वा।) संसारः। इति त्रिकाण्डशेषः॥ पीड़ाकरे त्रि।
कष्टस्थानं, क्ली, (कष्टं कष्टकरं स्थानम्।) दुःखजनकस्थानम्। इति हारावली॥
कस ज गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-ज्वलादिः।) ज कासः कसः। विपूर्व्वोऽयं प्रफुल्लीभावे। तथा च।
"प्रफुल्लोत्फुल्लसंफुल्लव्याकोषविकचस्फुटाः।
फुल्लश्चैते विकसिते" इत्यमरः। २। ४। ७-८।

कस्तूरी

विकसित पङ्कजकलिका। इति दुर्गादासः॥
कस इ ल ड ध्वंसे। गतौ। इति कविकल्पद्रुमः॥ ग्राते च। (अदां–आत्मं–सकं–सेट्। इदित्।) इ कंस्ते। ल ड कंस्ते हरिः कंसम्। चकारात् गतौ च। ग्रात इह ध्वंसना। इति दुर्गादासः॥
कस ल ड ध्वंसे। गतौ। इति कविकल्पद्रुमः॥ (अदां–ग्राते च। आत्मं–सकं–सेट्।) ल ड कस्ते हरिः कंसम्। चकारात् गतौ च। ग्रात इह ध्वंसना। इति दुर्गादासः॥
कसः, पुं, (कसति विकसतीति। कस + अच्। कसति विकसति खर्गादिरत्र वा। कस + आधारे अच्।) कमः। इत्यमरटीकायां भरतः॥ कष्टिपातर इति भाषा। पूर्ब्बोक्तधात्वर्थोऽप्यत्र॥
(यथा नैषधे २। ६६।
"कसपाषाणनिभे नभस्तले"॥)
कसनोत्पाटनः, पुं, (उत्पाटयतीति उत्पाटनः। उत् + पाटि + ल्युः। कसनस्य कासरोगस्य उत्पाटनः नाशकः।) वासकवृक्षः। इति शब्दचन्द्रिका॥
कसिपुः, पुं, (कश्यति शास्ति दुःखम्। कश गतिशासनयोः निपातनात् सिद्धम्।) कशिपुः। अन्नम्। इति जटाधरः॥
कसेरुः, पुं, (कं शृणातीति शृगिहिंसायां बाहुलकादुप्रत्यये प्रकृतेरेरङादेशः। निपातनात् शस्य सत्वम्।) कशेरुः। केशुर इति भाषा। तत्पर्य्यायः। गुण्डकन्दः २ क्षुद्रमुस्ता ३ कसेरुका ४ शूकरेष्टः५। सुगन्धिः ६ सुकन्दः ७ कसेरुकः ८। अस्य गुणाः। कषायत्वम्। मधुरत्वम्। अल्पकटुत्वम्। रक्तपित्तप्रशमनत्वम्। शीतत्वम्। दाहश्रमापहत्वञ्च। इति राजनिर्घण्टः॥
कसेरुका, स्त्री, (कसेरुरेव। स्वार्थे कन् स्त्रियां टाप्।) कसेरुः। एषास्थि। इति राजनिर्घण्टः॥
कस्तीरं, क्ली, रङ्गम्। इति हेमचन्द्रः॥ (अस्य पर्य्यायो यथा,—वैद्यकरत्नमालायाम्।
"रङ्गं वङ्गञ्च कस्तीरं सुदृढं पुत्रपिचठम्"॥)
कस्तुरिका, स्त्री, (कसति गन्धोऽस्याः दूरतः। कस + ऊर। तुट् च। स्वार्थे कन् टाप् च पृषोदरादित्वात् साधुः।) कस्तूरी। इति भूरिप्रयोगः॥
कस्तूरिका, स्त्री, (कस्तूरी + स्वार्थे कन् टाप् पृषोदरादित्वात् साधुः।) कस्तूरी। इति रत्नमाला॥ (यथा, माघे। ४। ६१।
"कस्तूरिकामृगविमर्दसुगन्धिरेति"॥
अस्या गुणादयः कस्तूरीशब्दे ज्ञातव्याः। वैद्यकरसेन्द्रसारसंग्रहे दृढबलचूड़ामणिरसे अस्याः प्रयोगो यथा "कस्तूरिकाविद्रुमरौप्यलौहं"। इत्यादि॥)
कस्तूरी, स्त्री, (कसति गन्धोऽस्याः। कस + खर्च्चू रादित्वात् ऊरः। ङीप् तुटि पृषोदरादित्वात् साधुः।) मृगस्य नाभीजातसुगन्धिद्रव्यम्। तत्पर्य्यायः। मृगनाभिः २ मृगमदः ३। इत्यमरः। २। ६। १२६। मृगः ४ मृगी ५ नाभिः ६ मदः ७। इति भरतः॥ वातामोदः ८ योजनगन्धिका ९। इति रभसः॥

कांस्यं

मदनी १० गन्धकेलिका ११ वेधमुख्या १२ मार्जारी १३ सुभगा १४ वङ्गगन्धदा १५ सहस्रवेधी १६ श्यामा १७ कामान्धा १८ मृगाङ्गजा १९ कुरङ्गनाभिः २० ललिता २१ श्यामला २२ मोदिनी २३ कस्तूरिका २४ कस्तूरिका २५ नाभी २६ लता २७ योजनगन्धा २८ मार्गः २९ गन्धबोधिका ३० कालाङ्गी ३१ धूपसञ्चारी ३२ मिश्रा ३३ गन्धपिशाचिका ३४ इति शब्दरत्नावली॥ अस्या गुणाः। सुरभित्वम्। तिक्तत्वम्। चतुर्हितत्वम्। मुखरोगकिलासकफदौर्गन्ध्यवन्ध्यालक्ष्मीमलापहत्वञ्च। इति राजनिर्घण्टः॥ रक्तपित्तच्छर्द्दिनाशित्वम्। इति राजवल्लभः॥ तद्भेदाः। खरिका १ तिलका २ कुलत्था ३ पिण्डा ४ नायिका ५। अपि च।
"कपिला पिङ्गला कृष्णा कस्तूरी त्रिविधा क्रमात्। नेपालेऽपि च काश्मीरे कामरूपेऽपि जायते॥ कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत्। काश्मीरदेशसम्भूता कस्तूरी ह्यधमा स्मृता"॥ इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो गुणा उत्पत्तिश्च यथा,—भावप्रकाशस्य पूर्ब्बखण्डे १ भागे।
"मृगनाभिर्मृगमदः कथितस्तु सहस्रभित्। कस्तूरिका च कस्तूरी वेधमुख्या च सा स्मृता॥ काश्मीरकपिलच्छाया कस्तूरी त्रिविधा स्मृता। कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत्॥ कामरूपोद्भवा कृष्णा नैपाली नीलवर्णयुक्। काश्मीरदेशसम्भूता कस्तूरीह्यधमा मता॥ कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः। कफवातविषच्छर्द्दिशीतदौर्गन्ध्यशोषहृत्"॥)
कस्तूरीमल्लिका, स्त्री, (कस्तूरीगन्धयुक्ता मल्लिका।) मृगमदवासा। इति राजनिर्घण्टः॥
कस्मलं, क्ली, (कश गतिशातनयोः + कल + सुट् च। निपातनात् शस्य षः।) कश्मलम्। मोहः। इत्यमरटीकायां रायमुकुटः॥
कङ्कारं, क्ली, (कस्य जलस्य हार इव के जले क्वादते वा इति। क + क्वाद + पचाद्यच् पृषोदरादित्वात् साधुः।) श्वेतोत्पलम्। सुँदि इति भाषा। तत्पर्य्यायः। सौगन्धिकम् २। इत्यमरः। १। १०। ३६॥ (कत्तृणम् ३। गन्धकञ्च ४। इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥ यथा, भागवते ४। ६। १८।
"कुमुदोत्पलकङ्कारशतपत्रवनर्द्धिभिः"॥)
तत्पुष्पगुणाः। कषायत्वम्। मधुरत्वम्। शीतत्वम्। पित्तकफरक्तनाशित्वञ्च। इति राजवल्लभः॥
कङ्कः, पुं, (के जले क्रथति शब्दायते स्पर्द्धते वा। क + क्रै + कः।) वकपक्षी। इत्यमरः॥ २। ५। २२॥
कांसीयं, क्ली, (कंसस्य विकारः इति छः।) कांस्यम्। इति राजनिर्घण्टः॥
कांस्यं, क्ली, (कंसाय पानपात्राय हितं कंसीयं तस्य विकारः इति। "कंसीयपरिखय्ययोरिति"। ४। ३। १६८ यञ् कृस्य लुक् च। यद्वा कंसमेव इति स्वार्थे यञ् प्रत्ययः।) ताम्ररङ्गमिश्रितधातुः। काँसा इति भाषा। तत्पर्य्यायः। कंसम् २ कंसास्थि ३ ताम्रार्द्धम्

काकः

४। इति चिकाण्डशेषः॥ सौराष्ट्रकम् ५ घोषम् ६ कांसीयम् ७ वह्निलोहकम् ८ दीप्तिलोहम् ९ घोरघुष्यम् १० दीप्तिकांस्यम् ११ कास्यम् १२। अस्य गुणाः तिक्तत्वम्। उष्णत्वम्। चतुर्हितकारित्वम्। वातकफविकारनाशित्वम्। रूक्षत्वम्। कषायत्वम् रुचिकारित्वम्। लघुत्वम्। दीपनत्वम्। पाचनत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥ अम्लरसत्वम्। विशदत्वम्। लेखनत्वम्। सारकत्वम्। पित्तनाशित्वम् इति राजवल्लभः॥ दृढ़देहायुर्वृद्धिकारित्वम्। इति सुखबोधः॥
("उपधातुर्भवेत् कांस्यं द्वयोस्तरशिरक्ष्ययोः। कांस्यस्य तु गुणा ज्ञेयाः स्वयोनिसदृशा जनैः। संयोगजप्रभावेण तस्यान्येऽपि गुणाः स्मृताः॥ कांस्यङ्कषायमुष्णं लेखनं विशदं सरम्। गुरुनेत्रहितं रूक्षं कफपित्तहरम्परम्"॥ इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥)
तत्शोधनमारणमाह।
"अनेनैव विधानेन कांस्यं विड्गन्धलेपितम्। मारयेद्बुद्धिमान् वैद्यो मृतं भवति चूर्णवत्"॥
अन्यच्च।
"द्विसारं पञ्चलवणं संग्रधास्तेन भावयेत्। कांस्यारकूटपत्राणि तेन कल्केन लेपयेत्। बद्धा गजपुटे पच्याच्छुद्धिमायाति नान्यथा"॥
अन्यच्च।
"ताम्रवच्छोधनं कृत्वा ताम्रवन्मारयेद्बुधः"॥
अन्यच्च।
"कञ्चलीं तत्समां दत्त्वा मर्द्दयेन्निम्बुकद्रवैः। एवं पुटत्रयेणैव निरुत्थं भस्म जायते"॥
इति सुखबोधः॥
कांस्यकारः, पुं, (कांस्यं तत्पात्रं करोतीति। कांस्य + कृ + अण्।) कंसकारः। इति जटाधरः। काँसारि इति भाषा॥
कांस्यनीलः, पुं, (कांस्येन कृतः नीलः।) अञ्जनभेदः। नीलतुत्थम्। तत्पर्य्यायः। मूषातुत्थम् २ हेमतारम् ३ वितुन्नकम् ४ इति हेमचन्द्रः॥ (कांस्योद्भवाञ्जनवन्नीलः इति विग्रहे वाच्यलिङ्गत्वम्। यथा, गोः रामायणे ४। ३६। २३।
"कांस्यनीलो हरिर्नीलः कोटिभिर्दृश्यभिर्वृतः"॥ क्वचित् कांस्यनील इति पाठः॥)
काङ्कं, क्ली, सुरतवन्धः। (काकस्य समूहः इति सङ्घार्थे अण्।) काकसमूहः। इति मेदिनी॥ (ईषत्कं जलम् कोः कादेशः। ईषज्जलम्। इति व्याकरणम्॥)
काकः, पुं, (कायते शब्दायते। कै शब्दे "इगुपधज्ञाप्राकृल्यतिमर्च्छिभ्यः कन्"। उणा-३। ४३। इति कन्।) खगामख्यातपक्षिविशेषः। काग् इति भाषा। तत्पर्य्यायः। करटः २ अरिष्टः ३ बलिपुष्टः ४ सङ्कल्पजः ५ घ्राङ्क्षः ६ आत्मघोषः ७ परभृत् ८ बलिभुक् ९ वायसः १०। इत्यमरः। २। ५। २०॥ वातजवः ११ बलः १२ दीर्घायुः १३ सूचकः १४ कृष्णः १५ ग्रामीणः १६ पिशुनः १७ कटखादकः १८ द्विजः १९ कागः २०। इति

जटाधरः । काकः २१ धूलिजङ्घः २२ निमित्तज्ञः २३ कौशिकारिः २४ चिरायुः २५ मुखरः २६ खरः २७ महालोलः २८ चिरञ्जीवी २९ चलाचलः ३० करटकः ३१ नागवीरकः ३२ गाढ़मैथुनः ३३ लुण्टाकः ३४ आवकः ३५ रतञ्चरः ३६ । इति शब्दरत्नावली ॥ * ॥ अथ शाकुनं काकचरित्रम् । तद्यथा ।

"अथोच्यते काकरुतं रुतानां
मूर्द्धि स्थितं शाकुनभाषितानाम् ।
अचिन्तितावेदितकार्य्यसिद्धिं
पूर्व्वादिकाष्ठाप्रहरक्रमेण ॥
ये ब्राह्मणक्षत्रियवैश्यशूद्राः
काका भवन्त्यन्यजपक्षमास्ते ।
वर्णाकृतिभ्यां ऋषिभाषिताभ्यां
सदाभियुक्तैरुपलक्षणीयाः ॥
दृढ़त्रमाणो गुरुदीर्घतुण्डो
दृढ़स्वरः कृष्णवपुः स विप्रः ।
पिङ्गाञ्जनीलाञ्जविमिश्रवर्णः
स्यात् क्षत्रियस्तीक्ष्णरवोऽतिशूरः ॥
यः पाण्डुनीलः सितनीलचञ्चु-
र्नात्यर्थरूढ़ो रटितश्च वैश्यः ।
भयच्छविर्भूरिककारशब्दः
शूद्रः कृशाङ्गश्चपलो निरुक्तः ॥
विरूक्षसूक्ष्मास्यतनुर्विशङ्को
यः कन्धरादीप्तनवं बिभर्त्ति ।
स्थिरारवः स्वोर्थसमेतबुद्धिः
काकोऽन्यजातिः खलु पक्षमोऽत्र ॥
द्रोणाभिधः कृष्णवपुर्द्विजो यो
याच्ञाः स काकः खलु मुख्यरुत्या ।
तस्माद्दृते श्यामगलो निरीक्ष्यः
श्वेतस्य निन्द्योऽद्भुतदर्शनोऽसौ ॥
विप्रः स्फुटे जल्पति रूक्षमाणे
न्यूनं ततः क्षत्रियजातिराजः ।
आख्यातिवैश्यस्त्वधिवासनेन
ब्रवीति शूद्रो बलिदानलोभात् ॥
प्रश्नं हतं जल्पति कृष्णवर्णः
सदा सशब्दं विहगोऽन्यजातिः ।
सद्यस्त्रिमप्याहदशाहपक्षैः
पक्षापि काकाः फलदाः क्रमेण ॥
प्रान्ते प्रदीप्ते च रटन् विहङ्गः
शुभप्रदो दीप्तपराङ्मुखः सन् ।
न क्वापि रौद्रो रटितः प्रशस्तः
सर्व्वत्र शस्तो मधुरश्च रक्तः ॥
दीप्तस्थितो यः परुषस्वरेण
विरौति दीप्ताभिमुखः स कार्य्यम् ।
निष्पाद्य निर्नाशयते च सद्य-
र्दीप्तोन्मुखः शान्तरवो हि सिद्धौ ॥
शान्तप्रदीप्ताभिमुखो विधाय
शब्दं प्रविश्याथ पुनः प्रदीप्तम् ।
यो रौति काको मधुरस्वरेण
हत्वा विरुद्धं स ददाति सिद्धिम् ॥
विधाय दीप्ताभिमुखो विरावं

ततः प्रशान्ताभिमुखो विरौति ।
यो वायसोऽसौ विनिहन्त्यसम्यक्
कार्य्याणि सर्व्वाणि पुनः करोति ॥
सूर्य्योदये पूर्व्वदिशि प्रशस्त-
स्थाने स्थितो योऽभिमुखं विरौति ।
नाशं रिपोश्चिन्तितकार्य्यसिद्धिं
स्त्रीरत्नलाभं स करोति काकः ॥
प्राङ्मुः प्रभाते यदि वह्निभागे
विरौति तिष्ठन् रमणीयदेशे ।
प्रचून् प्रयश्यत्यचिराद्विशङ्कः
प्रयाति योषित्समवाप्यते तत् ॥
रुवन् प्रभाते दिशि दक्षिणस्यां
काकः समावेदयतेऽतिदुःखम् ।
रोगार्त्तिमृत्युं परुषस्वरेण
रम्येण चेष्टागमयोषिदाप्तिम् ॥
नैर्ऋत्यभागे यदि च प्रभाते
करोति काकः सहसा विरावम् ।
क्रूरं ततः कर्म्म समभ्युपैति
दूतागमो मध्यमिका च सिद्धिः ॥
प्रातः प्रतीच्यां यदि रौति काको
ध्रुवं तदा वर्षति वारिवाहः ।
स्त्रीवस्त्रभूभृत्पुरुषागमश्च
कलिः कलत्रेण समं तदा स्यात् ॥
ध्वाङ्क्षस्य शब्दे पवनालयस्थे
वस्त्रान्नयानाभिमतागमाः स्युः ।
प्राच्यागमः प्राक्तनवृत्तिनाशः
स्यादन्यदेशे गमनं स्वदेशात् ॥
दिशुत्तरस्यां सुरवः प्रभाते
निरीक्षमाणो बलिभुग् नराणाम् ।
ददाति दुःखं भुजगाच्च भीतिं
दरिद्रतां नष्टधनेष्टलाभम् ॥
दिशीशवत्यां यदि रौति काक
आगच्छतस्तद्दयितान्त्यजाती ।
व्याधेर्निमित्तं प्रियवस्त्रलाभो
भवेत्तदा रोगबलेऽवसानम् ॥
ब्रह्मप्रदेशे स्थितवायसस्य
प्रभातकाले मधुरस्वरेण ।
अभीप्सितार्थागमनं ध्रुवं स्यात्
स्वामिप्रसादो द्रविणस्य लाभः" ॥
इति वसन्तराजे दिक्प्रहरे सूर्य्योदयः ॥ * ॥
"पूर्व्वेऽथ यामे प्रथमे सशब्दः
काको भवेच्चिन्तितकार्य्यसिद्धौ ।
अभीष्टलोकागमनं तथास्या-
न्नष्टार्थलाभो नियतं नराणाम् ॥
आग्नेयभागे यदि चाद्ययामे
स्त्रीलाभविद्वेषिवधौ भवेताम् ।
हतान्तभागे बलिभुग् विरावः
स्त्रीलाभसौख्यप्रियसङ्गकारी ॥
नैर्ऋत्यकोणे प्रिययोषिदाप्ति-
र्मिष्टान्नलाभो रिपवो न सन्ति ।
दिशि प्रतीच्यां विरुते भवेता-
मभ्यर्थनीयागमनाम्बुहृष्टौ ॥

वायव्यकोणे करटः शुभः स्यात्
नृपप्रसादोऽश्वगदर्शनं च ।
सौम्ये च भीक्ष्णरुशोकवार्त्ता
सौम्या च वार्त्ता धनलाभवार्त्ता ॥
ईशानदेशेऽभिमतेन भ्रंस-
स्त्रासो ऋताशाद् बहुलोकसङ्गः ।
ब्रह्मप्रदेशे सुखकामभोगः
सम्मानसम्पद्द्रविणाऽसिद्धिः" ॥
इति प्रथम प्रहरः ॥ * ॥
"प्राच्यां द्वितीये प्रहरे विरावैः
काकस्य कश्चित् पथिकोऽभ्युपैति ।
चौराङ्गयं व्याकुलता च वङ्गे
जायेत काचिन्महती च भङ्गा ॥
ऋताग्रदेशे नियतं कलिः स्यात्
प्रियागमाकर्षणयोषिदाप्तिः ।
याम्ये तु वृष्टिर्महती च भीतिः
प्रियस्य चेष्टस्य समागमः स्यात् ॥
रक्षोदिशि प्राणभयं तदा स्यु-
स्त्रीभोज्यलाभाखिलरक्तप्रसादाः ।
भवेत् प्रतीच्यां प्रबलाबलाग्नि-
र्योगागमो वृद्धि कुवर्षणञ्च ॥
समीरभागे ध्वजचौरसङ्गो
दूतागमस्त्रीपिशिताम्बलाभः ।
सौम्ये गणेशागमनं जयश्च
रम्ये रवे चौरभयं त्वरण्ये ॥
महेश्वराशाविरुतस्य काक-
स्त्रौराग्निसन्त्रासविरुद्धवार्त्ताः ।
ब्रवीति रूक्षैरटनैररूक्षैः
सदार्थगर्व्वागमनं जयश्च ॥
ब्रह्मप्रदेशे प्रहरे द्वितीये
काकः सुशब्दो नृपतिप्रसादम् ।
मिष्टान्नभोज्यञ्च ददाति पुंसां
करोत्यसौ चौरभयं कुशब्दः" ॥
इति द्वितीयप्रहरः ॥ * ॥
"ऐन्द्र्यां विरूक्षः प्रहरे तृतीये
वृद्धिं तथा चौरभयं ब्रवीति ।
क्रव्यास्तु राज्ञागमनं जयश्च
करोति याच्ञां शुभकार्य्यसिद्धिम् ॥
अग्नेर्विभागेऽग्निभयं कलिश्च
विरुद्धवार्त्ता विफला च याच्ञा ।
भवेद्विरुद्धैर्बलिभुग्विरावै-
र्जयादिवार्त्ता च भवेद्विशुद्धिः ॥
काकुभ्यवाचां कुरुतेऽतितूर्णं
रोगं तथाप्यागमनं विहङ्गः ।
क्षुद्राणि कार्य्याणि च यान्ति सिद्धिं
सर्व्वाणि तन्मुखतया नराणाम् ॥
क्रव्याददेशे जलदागमः स्या-
न्मिष्टान्नलाभो रिपवो न सन्ति ।
शूद्रागमः स्वामिविरुद्धवार्त्ता
भवन्ति याच्ञासु च कार्य्यनाशः ॥
स्यात् पश्चिमे नष्टधनस्य लाभो
दूराध्वयानं सुहृदागमश्च ।

योगागमोऽभीष्टजयादिवार्त्ता
याम्यासु रम्ये रटितेऽर्थसिद्धिः ॥
वातालये दुर्दिनमेव वार्त्ता
चौराभिनष्टार्थसमागमश्च ।
सन्तोषवार्त्ता वरयोषिदाभि-
र्याम्या रवे स्यान्मधुरे प्रशस्ता ॥
यामे तृतीये विरुवन्युदीच्यां
कार्यार्थलाभो नृपसेवकानाम् ।
भोज्यप्रवृद्धौ शुभदा च वार्त्ता
प्रयाणकं वैश्यसमागमश्च ॥
दिग्धूम्रकारैः कुरुते सुशब्दं
भोज्यं जयं हानिकरी कुशब्दम् ।
ब्रह्मप्रदेशे तिलतण्डुलाभ्यां
भोज्यं च ताम्बूलयुतं ददाति" ॥
इति तृतीयप्रहरः ॥ * ॥
ऐन्द्र्यां तुरीयप्रहरेऽर्थलाभो
भूमीशपूजाभयवृद्धिरोगाः ।
वह्नेर्विभागे भयरोगमृत्युः
श्लिष्टागमो वायसरासितेन ॥
याम्ये रवे तस्करवैरिभीती
स्यातां विश्लिष्टागमरोगमृत्युः ।
स्यात् यातुधान्यां महती प्रवृद्धि-
रभीष्टसिद्धिः यदि चौरवृद्धम् ॥
दिशि प्रतीच्यां प्रहरे चतुर्थे
द्विजातिरभ्येति ततोऽर्थलाभः ।
आयाति योषिद्विजयाम्बुवृष्टिः
सिद्धिः प्रयाणे नृपतेर्वरश्च ॥
वायव्यभागे करटस्य शब्दै-
रायाति योषित् प्रियमानिनी या ।
ध्रुवं प्रवासो दिनसप्तकेन
शीघ्रागमः स्यात् गमने कृते च ॥
कुबेरभागे पथिकोऽभ्युपैति
ताम्बूललाभः कुशलस्य वार्त्ता ।
वैश्याङ्गनाप्रस्तुरगादिरूढ़ा
यात्राविरुद्धे म्रियते च रोगी ॥
स्याद्यौ स्थितश्चेद् बलिभुग् विरौति
सुवर्णवार्त्ता सरजो विनाग्रः ।
ब्रह्मप्रदेशे प्रहरे चतुर्थे
वार्त्ता भवेन्मध्यमिका च सिद्धिः" ॥
इति चतुर्थप्रहरः ॥ * ॥
"यद्भाषितं शाकुनिकैर्विमिश्रं
शुभाशुभं दिक्प्रहरक्रमेण ।
तत्राशुभं यच्छति दीप्तशब्दः
श्रेयस्करः शान्तरवश्च काकः ॥
रम्यं स्वं दीप्तदिशि प्रसर्पन्
शान्तां दिशं भूरि फलं ददाति ।
तदैव तुच्छं वितरत्यसौ वै
दीप्तस्थितः पश्यति दीप्तकाष्ठाम् ॥
यद्योपदिष्टं फलमत्र दुष्टं
तथैव तद्दीप्तदिशि स्थितः सन् ।
ध्वाङ्क्षोऽधिरूढ़ो विरुवन् करोति
निरीक्षमाणः ककुभं प्रदीप्ताम् ॥

काकः प्रशान्ताभिमुखोऽतितुच्छं
दीप्ताश्रितो दुष्टफलं ददाति ।
शाखाश्रितः शान्तदिगोचरेण
रूक्षारवोऽल्पं कथयत्यनिष्टम् ॥
शान्तस्वरः शान्तककुप्प्रदेशे
तिष्ठन् प्रदीप्तां ककुभञ्च पश्यन् ।
दरात्यभीष्टं फलमेवमल्पं
दीप्तां स पश्यंस्तु तदेव तूर्णम् ॥
आकारचेष्टारवभागविज्ञा-
त्यारि काष्ठादिनयोः क्रमेण ।
सदाभियुक्ताश्च निरूपयन्ति
यस्माच्च ते काकरुतं मनुष्याः" ॥
इति काकरुते दिक्चक्रप्रकरणम् ॥ * ॥
"वर्षाकालमधिकृत्य किञ्चन
प्रोच्यते बलिभुजो यथाक्रमात् ।
आलग्नाण्डकविचारसुन्दरं
शाकुनं सकलशाकुनोत्तमम् ॥
वैशाखमासे निरुपद्रवेषु
द्रुमेषु काकस्य शुभाय नीड़म् ।
निम्नेषु शुष्केषु सकण्टकेषु
द्रुमेषु दुर्भिक्षभयायहेतुः ॥
प्रशस्तवृक्षे यदि पूर्वशाखा-
माश्रित्य काकेन कृतं कुलायम् ।
तदृद्धिरिष्टाशकुनप्रमोदो
नीरोगता स्याद्विजयश्च राज्ञः ॥
आग्नेयशाखारचिते च नीड़े
स्याद्वृष्टिरिष्टाप्ति भयं कलिश्च ।
दुर्भिक्षशस्त्रक्षुदवग्रभङ्गो
भवन्ति रोगाश्च चतुष्पदानाम् ॥
याम्यासु शाखासु च वायसेन
नीड़े कृतेऽल्पं जलपातमाऽऽः ।
व्याधिप्रकोपं मरणं समन्ता-
दन्नक्षयं शस्त्रविरोधिताश्च ॥
नैर्ऋत्यशाखारचिते च नीड़े
यस्माच्छनैर्वर्षति वर्षकाले ।
पीड़ा नृणां विध्वरचौरभीति-
दुर्भिक्षयुद्धानि भवन्त्यवश्यम् ॥
नीड़े कृते पश्चिमवृक्षशाखा-
माश्रित्य काकैः कथिता च वृष्टिः ।
नीरोगताक्षेमसुभिक्षवृद्धि-
सम्पत्प्रमोदाश्च भवन्ति लोके ॥
वायव्यशाखासु कृते च नीड़े
प्रभूतवाताब्दजलाश्च मेघाः ।
सुदुर्भिक्षोपद्रवशस्यनाश-
पक्षद्वयोद्वेगमहाविरोधाः ॥
कौबेरशाखामधिकृत्य नीड़े
कृते भवेत् प्राकृषि वृष्टिरिष्टा ।
भवन्ति च क्षेमसुभिक्षसौख्य-
नीरोगताहृद्विसम्पद्वयोऽस्मिन् ॥
ईशानशाखासु च वृष्टिरल्पा
वैरं प्रजानामुपसर्गदोषः ।
स्याद्बान्धवानां कलहप्रवृत्ति-

र्मर्य्यादया क्षीयत एव लोकः ॥
वृक्षाग्रनीड़े त्वतिवर्षकाले
मध्ये पुनर्मध्यमतोयपातः ।
तुच्छापि वृष्टिर्न प्रवत्यधस्तात्
स्फुटं दिशोक्तं न दिशः स्फुटत्वम् ॥
अवृष्टिरोगादिभयादिवृद्धिं
विद्याच्च भूमौ बलिभुक्कुलाये ।
शुष्के च वृक्षे डमराननाशौ
प्राकारस्रन्धेषु भयं प्रभूतम् ॥
निम्नप्रदेशे तरुकोटरे वा
वल्मीकरन्ध्रे व्रततिष्वधीह ।
काकस्य नीड़े रुगवृष्टिदोषै-
र्भवन्ति शून्या नियमेन देशाः" ॥
इति वसन्तराजे काकरुतप्रकरणम् ॥ * ॥
अथकाकाण्डविचारः ।
"एकं भवेदारुणमग्निसंज्ञं
द्वितीयकं मारुतकं तृतीयम् ।
ऐन्द्रं तथा नाम चतुर्थमेव-
मण्डानि काक्याः परिकीर्त्तितानि ॥
काक्या भवेदारुणमण्डकं चेत्
पृथ्वी तदा नन्दति सर्व्वशस्यैः ।
मन्दप्रवर्षोऽनलसंज्ञकेऽण्डे
नोप्तस्य बीजस्य भवेत् प्ररोहः ॥
जातानि शस्यानि समीरणेऽण्डे
खादन्ति कीटाः शलभाः शुकाद्याः ।
क्षेमं सुभिक्षं सुखिता धरित्री
स्यादैन्द्रजेऽण्डेऽभिमता च सिद्धिः" ॥
इत्यण्डप्रकरणम् ॥ * ॥
"यात्रा निमित्तानि च कीर्त्तयामः
सत्तत्त्वज्ञानां शकुनानि तानि ।
विज्ञाय यानि प्रजहात्यनर्था-
नर्थांश्च सर्व्वान् कुरुतेऽध्वगीनः ॥
भुङ्क्ते बलिं पक्षिषु मन्त्रपूतं
त्वं प्राणिषु प्राणिषि वर्मवज्रम् ।
गुप्तेन च स्त्रीं भजसे नमोऽस्तु
तुभ्यं खगेन्द्राय सत्तत्त्वज्ञाय ॥
विलोक्य काकं विनिवेद्य तस्मै
मन्त्रेण पूजां दधिभक्तयुक्ताम् ।
उदीर्य्य कार्य्यं निजमध्वगेन
विलोकनीयं शकुनं तदर्थम् ॥
वामेन शब्दं मधुरं विमुञ्चन्
व्रजंस्तवामेन करोति काकः ।
सर्व्वार्थसिद्धिं पुनरागमञ्च
शुभप्रदेशे तु तदन्यरूपः ॥
प्रदक्षिणं संप्रविधाय मार्ग
वामेन काको विनिवर्त्ततेऽसौ ।
यातुः करोतीहितकार्य्यसिद्धिं
क्षेमञ्च शीघ्रं पुनरागमञ्च ॥
वामे कृजं रौत्यनुलोमयायी
यो वायसोऽसौ सकलार्थसिद्धौ ।
स्यातां क्रमाद्दक्षिणवामशब्दौ
सिद्धौ विरुद्धौ विपरीतभूतौ ॥

काक

एष्ठे विरावं मधुरं विमुञ्च-
न्ननुव्रजंश्चापि मतो हिताय ।
प्रायेण यातारमनुव्रजन्तः
सर्व्वेऽपि काकैः कथिता विहङ्गाः ॥
ज्ञात्वा स्वं यः पुरतः प्रयाति
उपस्थितो यो मुदमादधाति ।
कण्डूयते यः खशिरोऽङ्घ्रिघासौ
पुंसां तदाभीष्टफलं ददाति ॥
स्तम्भे गजानां नियतं गजाग्निं
गजेऽधिरूढः पृथिवीपतित्वम् ।
तुरङ्गमे वाहनभूमिलाभं
करोति काको विजयं ध्वजेन ॥
प्रणष्टलाभं विजयं च कूपे
क्षिप्रं नदीरोधसि कार्य्यसिद्धिम् ।
पूर्णे घटेन्द्रे च धनाग्निवृद्धिं
ध्वाङ्क्षोऽधिरूढः कुरुते सगुब्दः ॥
प्रासादधान्योक्षयहर्म्यशृङ्ग-
निष्पन्नशस्यावनिशाद्वलादौ ।
ध्वाङ्क्षोऽधिरूढो धनसाधनाय
रौति श्रियं यच्छति युग्मरावः ॥
एष्ठे पुरो वा यदि गोमयस्थो
तथा वटाग्रेषु तरुष्वपीह ।
स्थितो रवन् भोजनपानमिष्टं
विष्ठां च कुर्व्वन् वितरत्यवश्यम् ॥
अन्नाग्रविष्ठाफलमूलपुष्प-
मत्स्यादिभिः पूर्णमुखः सदैव ।
संदृष्टमात्रोऽभिमतार्थसिद्धौ
मिष्टान्नभोज्याय सदैव काकः ॥
गारोग्निरःपूर्णघटस्थितस्य
काकस्य शब्दैर्व्वनिताधनाग्निः ॥
शृङ्गाधिरूढस्य च तस्य शब्दैः
समागमः स्यात् सुजनेन सार्द्धम् ॥
गोपृष्ठदूर्व्वातरुगोमयेषु
तुङ्गानि घर्षन्नवलोकितानि ।
आहारमन्यस्य तथा ददानो
ददाति भोज्यं बलिभुग्विचित्रम् ॥
धान्यं यवं वा दधि वापि चाज्यं
विरौति पश्यन्निधिलाभकारी ।
करोति लाभं पुरतः स दृष्टो
यस्यास्ति वक्त्रे दृषदन्यशुष्कम् ॥
वृक्षेषु रम्याङ्कुरपत्रपुष्प-
च्छायाफलाढ्येषु सदात्मजस्य ।
शब्देन सिध्यन्त्यसकृन्नराणां
सदैव सर्व्वाणि समीहितानि ॥
प्रशान्तनादः शिखरे तरूणां
स्त्रीसङ्गसौख्यं करटोऽभिधत्ते ।
धान्यादिकूटेषु तथान्नलाभो
गोपृष्ठगो गोवनिताधनाग्निम् ॥
क्षेमं विधत्ते करभस्य एष्ठे
खरस्य एष्ठेऽरिभयं वधश्च ।
क्रोड़स्य एष्ठे वधमर्थलाभं
तस्यैव एष्ठे घनलाभमग्रे ॥

काक

सद्यो ज्वरं सैरिभपृष्ठसंस्थो
मृताङ्गसंस्थो मरणं करोति ।
कार्य्यक्षतिं रिक्तघटस्थ संस्थः
काकः कलिं काष्ठमधिष्ठितश्च ॥
यो दक्षिणं कूजति दक्षिणेन
प्रयाति यश्चाभिमुखोऽभ्युपैति ।
यो याति एष्ठे प्रतिलोमगत्या
क्षतारवः पातयते स रक्तम् ॥
वामे रवो दक्षिणतस्ततो यः
सोऽनर्थहेतुर्ब्बलिभोजनस्य ।
वामप्रदेशे प्रतिलोमयानं
विघ्नाय लाभो गृह एव तेन ॥
प्रयाति एष्ठे यदि दक्षिणेन
क्षतारवस्तन्मुधिरं पुरः स्यात् ।
वल्लीवरत्रादि च यो गृहीत्वा
प्रदक्षिणं याति स सर्पभीत्यै ॥
गोपुच्छवल्लीकृतास्पदश्च
रवन् भवेत् सर्पविलोकनाय ।
स्यान्मृत्यवेऽङ्गारचिताग्निसंस्थः
काकः प्रकुर्व्वन् करचर्व्वणं च ॥
रवन् पुरो हानिरजौ करोति
मृत्युं पुनर्निष्ठुरएष्ठशब्दः ।
प्रसार्य्य रिक्तं वदनं य आस्ते
सर्व्वत्र निन्द्यो बलिभोजनोऽसौ ॥
वामोऽप्यरण्यातभयं मृतिं वा
संताड़यित्वा रसचर्म्मखण्डम् ।
चञ्चाग्निभङ्गं ध्रुवमग्निभङ्ग-
बन्धे वधं जल्पति युध्यमानः ॥
वामोऽपि रोगं कुरुते विमुञ्चे
तिक्तेऽपि वृक्षे कलिकार्य्यलाभौ ।
पक्षौ विधुन्वन् विरवंश्च रूक्षं
सकण्टके मृत्युमुपाददाति ॥
वधो भवेद्भूरुहभग्नशाखे
बन्धो जलाभिः परिवेष्टिते स्यात् ।
रम्ये तरौ कण्टकयुक्तवृक्षे
सदा भवेतां कलिकार्य्यसिद्धी ॥
क्षुन्नाधिरूढो न रवेण यायात्
प्रयाति चेत् स्यात् खलु रक्तपातः ।
अवस्करं भूस्तृणकाष्ठकूप-
भस्मादिसंस्थो विनिहन्ति कार्य्यम् ॥
वल्लीवरत्राकचमुष्ककाष्ठ-
चर्म्मास्थिनीर्याम्बरवल्कजानि ।
अङ्गारराक्षोत्पलकर्परांश्च
दृष्टानि चेत् काकमुखे तदानीम् ॥
पुण्यक्षयः पापसमागमश्च
मद्वद्वयं रोगसमुद्भवश्च ।
बन्धो वधः सर्व्वधनापहार
इत्यादिकं स्यात् पथि मन्दिरे च ॥
ऊर्द्धानगच्चञ्चलपक्षयुग्मः
काकः कुनादो विदधाति मृत्युम् ।
छायायुधच्छत्रघटास्थियान-
वादिच्चकाष्ठादिकुटुम्बकानि ॥

काक

सङ्गोचितैकाङ्घ्रिरुपेतचित्तो
दीनस्वरो भास्करमीक्षते च ।
काष्ठादिकं कुट्टयतेऽथवा यो
युद्धाधिकानर्थकरः खगोऽसौ ॥
तुण्डेन पिच्छं विलिखन् रवेण
यो रौति तूर्णञ्च निरीक्षते कम् ।
एकेन पादेन तथोपविष्टो
ब्रूते स बन्धं पुरतो जनस्य ॥
विड्गोमयौ न्यस्यति यस्य मूर्द्धि
तस्यानलत्रासरुजौ भवेताम् ।
यस्यास्थिखण्डं विहगत्यसौ तु
प्रयाति तूर्णं नगरीं यमस्य ॥
ब्रह्मप्रदेशे विरवन् धियासोः
कलत्रदोषं जनयत्यवश्यम् ।
मनुष्यमातङ्गतुरङ्गमाणां
शिरोऽधिरूढो निधनाय तेषाम् ॥
नदीतटे वाथ रटन्नटव्यां
खरस्वरो व्याघ्रभयाय गन्तुः ।
नैवातुरः क्वापि मतो हिताय
न दुष्टचेष्टो वितनोति भ्रान्तिम् ॥
यात्रोद्यमे सैन्यवधाय काको
दृष्टो रथे साश्वनरस्तकेषु ।
आयाति यस्याभिमुखो बलस्य
युद्धोद्यमे तस्य पराजयः स्यात् ॥
सगुग्रकङ्कैः कटके नृपस्य
काकैः प्रविष्टैः पिशितं विनापि ।
संयुध्यमानैररिभिः समं स्या-
न्महाहवः सन्धिरयुध्यमानैः ॥
चिरध्वजच्छन्नलताधिरोहः
समुद्यतं शत्रुबलं प्रपश्यन् ।
आजौ जयं जल्पति भूमिपानां
कृतध्वनिः क्षीरतरौ च काकः ॥
गतिस्वरौ वायससंप्रयुक्तौ
प्राच्यां फलायोदितवैपरीत्यात् ।
एवं जनोऽप्याचरति प्रभूतौ
यथोदितं तत्र तथागमार्थम् ॥
दिग्यामचक्रोऽपि शुभाशुभानि
फलानि यानि प्रतिपादितानि ।
प्रतिष्ठमानस्य भवन्ति यानि
तथाविधानीति वदन्ति तज्ज्ञाः" ॥
इति काकरुते यात्राप्रकरणम् ॥ * ॥
"स्थानस्थितानां कथयन्ति काका-
श्चेष्टाविशेषैश्च शुभाशुभानि ।
प्रबोधिताः प्राक्तनकर्म्मभिर्ये
तल्लक्षणाय क्रियते प्रयत्नः ॥
निष्कारणं संवलिता रवन्तो
ग्रामेऽन्ननाशाय भवन्ति काकाः ।
रोधश्च चक्राङ्कतयो वदन्ति
सद्यापसव्यभ्रमणाद्भयञ्च ॥
विघातमाऽर्ब्बूडवर्गसंस्था
रात्रौ रवन्तो जनताविनाशम् ।
लोकश्च चञ्चूचरणप्रहारै-

रुद्वेजयन्तः परचक्रवद्भिम् ॥
यः खाति धूल्यान्तु विलोक्य रौति
वृष्टिं समाशंसति वायसोऽसौ ।
जलस्थलप्राणिविपर्य्ययेण
वर्षासु वृष्टिं भयमन्यदा तु ॥
मध्यं दिने वेश्मनि यस्य काको
विरौति रौद्रं विधुनोति वाक्षे ।
हरन्ति चौरा द्रविणानि तस्य
ध्रुवं तथान्यो भवति प्रमादः ॥
रवन्नटत्पक्षतृणपूर्णवक्त्रो
ऊताग्नभीतिं करटः करोति ।
स्यात् प्रस्थितस्याप्यथवा स्थितस्य
दुःखं प्रभूतं दिवसत्रयेण ॥
छायासु लाभं भुवि भूमिलाभं
विघ्नं जले ग्रावणि कार्य्यनाशम् ।
करोति काको विरवन्नरस्य
प्राख्यायिनः स्थानगतस्य वापि ॥
द्वारप्रदेशेरुधिरानुलिप्तो
विरौति काकः शिशुनाशनाय ।
पक्षौ विधुन्वन् विरवंश्च रूक्षं
ग्लाने च दीप्ते भवने न ग्रस्तः ॥
भूयस्तथोर्द्धे प्रविधाय पक्षौ
काकः कुलादं प्रलयं करोति ।
क्रुद्धोऽधिरूढः करटान्तरश्च
रोगेण मृत्युं कुरुते नराणाम् ॥
द्रव्ये हृते वापहृते खगेन
विनाशलाभावपि तादृशस्य ।
रक्तस्य पीते रजतस्य शुक्ले
चौलस्य कार्पासमये भवेताम् ॥
प्रश्ने कृते रोगविनाशबुद्धया
हन्यात्तु रोगं सरवः प्रदीप्ते ।
ग्लाने प्रदेशे करटस्विरेण
वल्यारवो रोगमपाकरोति ॥
प्रश्ने शुभे ग्लानदिगाश्रयस्थः
ग्लानस्वरो यः शुभमादधाति ।
यो वायसस्तं शुभदं वदन्ति
तद्व्यये व्ययहेतुरुक्तः ॥
विरौति कुम्भे मणिकेऽथवा यः
स गर्भवत्याः सुतजन्महेतुः ।
उड्डीयते करटकिनीश्च शाखा-
मादाय राजागमनाय काकः ॥
अन्नादिविष्ठापिशितादिभिर्यः
पूर्णाननोऽभीष्टफलप्रदोऽसौ ।
मन्त्रादिसिद्धौ बलिजादिलाभे
ग्रस्तो विवाहादिविधौ च काकः ॥
इष्टार्थदोऽन्यादिकवाहनस्य-
स्वजादिसंस्थस्तदवाप्तकारी ।
वध्वागमं जल्पति तोरणस्थो
दृष्टार्थदो दृष्टतरुस्थितश्च ॥
वायसः कुलकुलध्वनिं यदा
आहरेद्भवनसंमुखं तदा ।
अभ्युपैति पथिकस्तदा ध्वनिं

सर्व्वकार्य्यशुभदं वदत्यसौ ॥
इदं त्विहोत्पातयुगं पृथिव्यां
महाभयं शाकुनिका वदन्ति ।
यद्वायसो मैथुनसन्निविष्टो
दृश्येत यद्वा धवलः कदाचित् ॥
उद्वेगविद्वेषभयप्रवास-
धनक्षयव्याधिभयप्रहाराः ।
बुद्धिप्रणाशाकुलताप्रवादा
नृणां भवन्त्यद्भुतदर्शनेन ॥
शमाय तत्सूचितदुःखराशेः
स्नानं वहित्वत्त्रयमेव कुर्य्यात् ।
आत्मीयशक्त्या च सदक्षिणानि
द्विजाय दद्यात् वसनानि तानि ॥
नयेदहःशेषमपुण्यहान्या
शयीत भूमावशुतान्नभक्तः ।
हविष्यभोजी न भजेच्च नारीं
दिनानि सप्त त्रिगुणानि यावत् ॥
अकाकघातव्रतमादधीत
बलिं च दद्याद्बलिभोजनेभ्यः ।
स्नात्वा प्रभाते विदधीत शान्तिं
दद्यात् स्वशक्त्या द्रविणं गुणिभ्यः ॥
देशे तु यच्चाद्भुतमेतदुग्र-
माशोक्तये तत्र समापतन्ति ।
अस्थिदुर्भिक्षभयोपसर्ग-
चौराग्निशस्त्रध्रुवधर्म्मनाशाः ॥
कर्म्माणि तस्योपशमाय राजा
प्रवर्त्तयेत् शान्तिकपौष्टिकानि ।
अन्नाद्यगोभूमिवसूनि दद्याद्
युद्धं विदध्यान्न च यावदन्तम्" ॥
इति काकरुते स्थानस्थितप्रकरणं पञ्चमम् ॥ * ॥

अथ स्वरविचारः ।

"काकामिति क्षेमविधौ विरावः
कोकामितीष्टाशनयानहेतुः ।
करोति कूं कूमिति चार्थलाभं
कां कां ध्वनिः काञ्चनलाभमाह ॥
कें केमिति स्त्रीवरयोर्विदार्थे
भोगाय कां कामिति शब्दितः स्यात् ।
अपत्यलाभः कु कु इत्यनेन
गन्तुः फलं केकव इत्यनेन ॥
कौं कोमितीदं शुभलाभकारि
कुं कुं निनादः प्रियसङ्गमाय ।
क्रां क्रूमिति क्रामिति च त्रयोऽमी
क्रां क्रामिति द्वौ च रवौ रणाय ॥
क्रां क्रामिति क्रौमिति च दिवक्तं
क्रूं क्रूमिति क्रौ कुकु कू इतीदम् ।
वर्त्तं प्रदिष्टं मरणाय नृणां
गन्तुः प्रणाशं कुरुते खगाख्यः ॥
क्रौ क्रौमितीष्टार्थविनाशनाय
व्यवस्थितेत्यभिधाय शब्दः ।
कोकीति कोकाविति यः कथञ्चिन्-
मुऊर्मुऊः स्यात् स मतो वधाय ॥
स्यात् का इतीदं विपणं सदैव

मित्राप्तये स्यात् क इतीष्टशस्त्र ।
काका इतीदं तु विघातकारि
करोति काको वदति स्वतुष्ट्यै ॥
आहारदोषाय च काकटीति
स्यादाकुलं कुक्कुनिभं रणाय ।
केकेध्वनिश्काकुटि किं टिकीति
त्रयं त्विदं स्यात् पुरदूषणाय ॥
यत् का इति त्रिस्रदनुस्वरेण
शब्दद्वयं स्यान्महते रणाय ।
कामित्ययं वाहननाशनश्च
ददाति हर्षं कुकुकुर्व्वितीदम् ॥
यत्का इतीदं विरुतं सुदीर्घ-
प्लुतस्वरेणोच्चरितं प्रमादात् ।
उत्साहहीनः श्रमदैन्ययुक्तः
स वायसः कार्य्यविनाशनाय ॥
सामिषं वक्रवक्रेति भोजये-
दारयेत् कलिकलीति राशनम् ।
अभ्युपैति स्वररूक्षभाषिते
प्रोषितः शवशवारवे शवः ॥
स्यात् कलिः कवकवध्वनौ नृणां
जायते कलकलाध्वनौ स्वरः ।
आव्रजेत् कुलुकुलुध्वनौ प्रियः
सौदनं कटकटध्वनौ दधि ॥
एवं प्रकारा बहवोऽपरेऽपि
प्रश्नान्तदीप्तावलिभोजनानाम् ।
भवन्ति शब्दाः खलु तेषु केचि-
दस्माभिरुक्ताः खलु लक्षणीयाः" ॥
इति काकरुते स्वरप्रकरणं षष्ठम् ॥ * ॥

"हितं नरेभ्यो सुनिभिः पुराणै-
र्ज्ञानं यदुक्तं बलिभिर्द्विजुष्टया ।
तदुच्यते संप्रति येन काका
वदन्ति नित्यं बलिजामतुष्टाः ॥
यदक्षिगस्यां दिशि यत्र काके-
ष्युतो भवेत् क्षीरतरुः प्रभूतौ ।
गत्वा निशान्तेऽहनि तत्र काका
निमन्त्रणीया बलिभिर्द्विजाग्र्ये ॥
प्रातस्ततः क्षीरतरोरधस्ता-
द्विशोध्य लिखेत् सह गोमयेन ।
भूमिप्रदेशे चतुरस्रमस्य
मध्येऽर्चयेत् ब्रह्ममुरारिभानून् ॥
इन्द्राग्निवैवस्वतयातुधान-
जलेशवायुद्रविशेशशम्भून् ।
अभ्यर्चयेदस्य दिशु क्रमेण
चाष्टावपि लोकपालान् ॥
नमोयुतैः सप्रणवैश्च सर्व्वा-
न्निजाभिधानैः प्रयतो मनुष्यः ।
अर्घासनाद्यैरुपपुष्पधूप-
नैवेद्यदीपाक्षतदक्षिणाभिः ॥
आव्रह्मकाकांस्तदसन्निविष्टा-
नाध्याय तत्प्राक्षमनन्ययुग्या ।
ततस्तदर्थं बलिमाज्यसिक्तं
मन्त्रेण दद्यात् दधिपिण्डयुक्तम्" ।

मन्त्रः। इन्द्राय यमाय वरुणाय धनदाय भूतवाय-
साय बलिं गृह्णातु मे स्वाहा ॥
"उदीर्य्य कार्य्यं समधावरुह्य
ततः प्रदेशे करटस्य चेष्टाः
स्पृष्टीकृताङ्गानि शुभाशुभार्थं
संलक्ष्येन्निश्चलपाणिपादः ॥
पूर्व्वेण खादन् सुखवित्तवृद्धिं
करोति वह्निर्दिशि वह्निभीतिम् ।
काकोऽर्थनाशं दिशि दक्षिणस्यां
नैर्ऋत्यगो दिग्वरलक्ष्यदिष्टः ॥
जलेशदेशेऽभिमतार्थसिद्धि-
र्व्वायोर्दिशीति प्रभवाख्यदृष्टिः ।
सौम्ये सुखारोग्यसमीहितार्थ-
मीशानदेशे वितरत्यभीष्टम् ॥
बली विलुप्ते करटः समन्तात्
कार्य्ये विमिश्रं परिभावनीयम् ।
बलिं विकीर्य्यापि न भक्षयन्ति
काकास्तदानीं भयदा भवन्ति ॥
क्षीरद्रुमारामचतुष्पदेषु
सरित्समीपे चिदगारयेषु ।
देयो बलिर्भूतदिनाष्टमीषु
कुल्माषदध्योदनतण्डुलाद्यैः" ॥
इति काकरुते पिण्डप्रकरणं सप्तमम् ॥ * ॥
"पिण्डत्रयस्याथ विधानमेत-
दाख्यायते यत् किल नारदाद्यैः ।
दृष्टं मुनीन्द्रैरशुभं शुभञ्च
यथावदस्मिन् कथयन्ति काकाः ॥
गत्वा शुभेऽह्नि प्रहरे चतुर्थे
देशेषु पूर्व्वप्रतिपादितेषु ।
नरेण पिण्डत्रयभोजनार्थं
काकाः प्रयत्नेन निमन्त्रणीयाः ॥
ततः प्रभाते ह्युपलिप्य भूमिं
तस्याञ्च पूर्व्वादितमन्त्रयुक्त्या ।
ब्रह्माच्युतेशाप्यतिलोकपालाः
काकाश्च पुंसां क्रमतोर्चनीयाः ॥
दध्योदनाद्यैर्विहितं प्रवेश्य
पिण्डत्रये मण्डलकस्य मध्ये ।
अभ्यर्च्चयेदत्ततपुष्यधूपै-
र्मनोहरैर्यत्नपरो मनुष्यः ॥
तेषु क्षिपेत् प्राग्दिगनुक्रमेण
पिण्डेषु हेमप्रथमे द्वितीये ।
रूप्यं तथा लौहलवं तृतीये
न्यसेच्च कुर्य्याद्बलिपिण्डतुल्यम् ॥
त्रिःसप्तकृत्वो विनिवेश्य पिण्डे
पिण्डा निवेश्या बलिभोजनेभ्यः ।
मन्त्रोक्तभावाहननोचितेभ्यः
कार्य्यं विचार्य्यापसरेत्ततश्च" ॥
मन्त्रः। ॐ हिवि टिमि विटि काकचण्डालाय
स्वाहा । इति पिण्डाभिमन्त्रणार्थम् । ॐ ब्रह्मणे
विष्णवे काकचण्डालाय स्वाहा । काकाह्वानमन्त्रः ॥
"काकेन भुक्ते सलवर्णपिण्डे
श्रेयं नरेणोत्तममात्मकार्य्यम् ।
भुक्ते सरूप्ये खलु मध्यमं स्याद्-
भुक्ते सलौहे त्वधमं प्रदिष्टम् ॥
विवादवाणिज्यविवाहदृष्टि-
क्षेमाश्च वित्ताः क्षतिभोगरोगाः ।
संग्रामसेवान्यकार्य्यदेशा
इत्यादयोऽस्मिन् परिभावनीयाः ॥
चेष्टामवामां विदधाति यात्रि
प्रदक्षिणं दक्षिणपक्षमुच्चैः ।
ग्रीवां तथोचां कुरुते सशब्दः
स्थानं मनोज्ञं श्रयति द्रुमञ्च ॥
एवंविधां यो विदधाति चेष्टां
पिण्डं समादाय शुभं खगोऽसौ ।
अभीष्टकार्य्यादधिकं करोति
चेष्टाविपर्य्यासतयान्यथात्वम् ॥
पिण्डं समादाय यदि प्रधानं
म्लानं दिशं गच्छति काकपक्षी ।
पूर्णं फलं तत् कुरुते नराणां
चिकीर्षितं वस्तुनि यत्र तत्र ॥
काको गृहीत्वा यदि मुख्यपिण्डं
प्रयाति दीप्तां ककुभं तदानीम् ।
अत्युत्तमं कार्य्यफलं प्रदर्श्य
ततः समस्तं विनिहन्त्यवश्यम् ॥
द्वितीयकं यद्यपहृत्य पिण्ड-
मुड्डीयते म्लानदिगाश्रयेण ।
फलं तदानीं शुभदं नराणाम्
याप्यं खगो जल्पति कार्य्यजातम् ॥
काके समादाय जघन्यपिण्डं
याते प्रदीप्तां ककुभं वदन्ति ।
कार्य्यं जघन्यादधिकं जघन्यं
स्यान्मध्यमं मध्यमपिण्डभागे" ॥
इति वसन्तराजे पिण्डत्रयप्रकरणमष्टमम् ॥ * ॥
"मङ्कर्षयो वायसशाकुनस्य
वदन्ति सारादपि सारभूतम् ।
पिण्डाष्टकं यत्तदशेषमेत-
दाख्यायते कार्य्यविनिश्चयार्थम् ॥
शुभेऽह्नि काकानधिवास्य सायं
पिण्डाष्टकं भोक्तुमथ प्रभाते ।
तत्कालयोग्यानि समस्तवस्तू-
न्यादाय यायाद्बहिरप्रमत्तः ॥
एकान्तदेशे तरुपार्श्वभूमौ
मृद्गोमयाभ्यामुपलेपितायाम् ।
सत्पक्षगण्येन समुक्षितायां
सौम्योपहारैरुपशोभितायाम् ॥
विधाय पूजां कुलदेवतानां
मध्ये ततोऽष्टस्वपि दिक्षु देयम् ।
भक्तेन सर्पिर्दधिमिश्रितेन
पिण्डाष्टकं प्रागादिगनुक्रमेण ॥
पक्षीन्द्रवक्त्रान्तकरात्सेन्द्रान्
विष्णुं विरिञ्चिं धनदं महेशम् ।
पूर्व्वादिकाष्ठाक्रमयोजितेषु
न्यसेत् क्रमादष्टसु पिण्डकेषु ॥
नमोयुतैस्तान् प्रणवञ्च सर्व्वां-
स्ततोऽर्च्चयेत्तन्निजनाममन्त्रैः ।
अर्घ्यासनालेपनपुष्यधूपै-
र्नैवेद्यदीपाच्छतदक्षिणाभिः ॥
अभ्यर्च्चितेभ्यो विधिनोदितेन
पिण्डाष्टकं तत् ददतु द्विजेभ्यः ।
मन्त्रेण संमन्त्र्य निवेदनार्थं
कार्य्यं विचिन्त्यापसरेच्च किञ्चित्" ॥
अथ मन्त्रः । ॐ नमः खगपतये गरुड़ य
त्रोगाय पक्षिराजाय स्वाहा ॥
"त्रोगाढ़कसमं पिण्डं गृहाण त्वमधृङ्गितः ।
यथादृष्टं निमित्तं च कथयस्वाधमे स्फुटम् ॥
काकेन पिण्डे प्रथमे गृहीते
तिष्ठन् व्रजन् वापि भवेत् कृतार्थः ।
उद्वेगशोकौ विफलः प्रयासे
हानिः कलिर्व्वा भवति द्वितीये ॥
याम्ये रुगापद्भयमृत्यवः स्युः
पिण्डे चतुर्थे विजयो रणेषु ।
स्यादैशवेऽभीष्टमकृष्टसाध्यं
भवेत् प्रवासो विफलश्च मध्ये ॥
नास्तीह तन्निश्चयमेव कार्य्यं
भुक्ते न यत् सिध्यति सौम्यपिण्डे ।
सन्तापशोकौ विफला च याचा
पिण्डेऽष्टमे वायसभक्षिते च ॥
पिण्डं न गृह्णात्यथवा न भुङ्क्ते
चञ्चूनखैर्व्विक्षिपति द्विजो यः ।
कार्य्येषु सर्व्वेषु स न प्रशस्तो
ब्रवीति घोरं समरं स पुंसाम्" ॥
इति वसन्तराजे काकरुते पिण्डाष्टकप्रकरणं
नवमम् ॥ ० ॥
"आद्यं पञ्चाशता द्वाभ्यां वृत्तैर्दिक्चक्रमीरितम् ।
काकालयपरीक्षा च द्वितीये दशभिस्त्रिभिः ॥
वृत्तैस्त्रिभिस्तृतीये च काकाश्रुकनिरूपणम् ।
द्वाचत्वारिंशता वृत्तैर्याचा तुर्य्ये प्रकीर्त्तिताः ॥
वृत्तानि विंशतिस्त्रीणि स्थानं स्थाप्ये च पञ्चमः ।
खरप्रकरणं षष्ठं वृत्तैर्द्वादशभिस्ततः ॥
एकादशभिराख्यानं बलिसंज्ञञ्च सप्तमम् ।
पिण्डत्रयविधानाय चतुर्द्दशभिरष्टमम् ॥
पिण्डाष्टकविधानाय नवमे यदुदाहृतम् ।
अन्यप्रकरणं तच्च वृत्तान्येकादशैव तु ॥
वसन्तराजशाकुने सदागमार्थशोभने ।
समस्तसत्कौतुके विचारितोऽत्र वायसः" ॥ * ॥
समुदायेन १८१ वृत्तानि । इति वसन्तराजशाकु-
नान्तर्गतवायसशाकुननामकाकचरित्रं समाप्तम् ॥
काकमांसगुणाः। दोषत्वयापहृत्वम्। चक्षुर्हितत्वम्।
दृंहणत्वम्। बलायुर्हितकारित्वम्। लघुत्वम्।
दीपनत्वञ्च। इति राजनिर्घण्टः ॥
("काकः कोकिलशूकरास्त्वथ खरो-
ष्ट्राश्वादयो मक्षिका
व्यालाः सौरभयो दृकप्रभृतयो
ये चान्यजीवा नृणाम् ।
मण्डूकाश्च सरीसृपादिकगणा
यूका कलिङ्गाश्च ये

कोकः सारसशारिका शुक इमे
भक्ष्या न शस्तास्तथा ॥
श्येनचटकचकोराः काकजात्याश्च श्येनाः
पिकशुकविषघ्नकङ्कोभङ्गदात्यूहकल्काः ।
जलकरटकपोता प्रोतकी खञ्जरीटाः
कलविकमशकाद्या यूकपिङ्गादयोऽन्ये ॥
एते भक्ष्या नैव भक्ष्या न चेष्टा
ये चाप्यन्येऽज्ञातनामाश्वजाश्च ।
अन्ये चापि श्वापदा ये च निन्द्या-
स्ते चाखाद्या वर्ज्जिताश्चात्र सर्व्वे" ॥
इति हारीते प्रथमशशाने । ११ अः ॥
"काककङ्कुररचाषभासशशघातुलूकचिल्लिश्ये-
नशशघ्रभशतयः प्रसहाः ॥
"एते सिंहादिभिः सर्व्वे समाना वायसादयः ।
रसवीर्य्ये विपाकेषु विशेषाच्छोषिणे हिताः" ॥
इति सुश्रुते सूत्रस्थाने । ४६ अः ॥) पीठसर्पी ।
खोंड़ा इति भाषा ॥ द्वीपविशेषः । परिमाणभेदः ।
वृक्षविशेषः । शिरोऽवच्छादनम् । इति हेमचन्द्र-
मेदिनीकरौ ॥ तिलकः । अतिवृद्धः । इति शब्द-
रत्नावली ॥

काककङ्कुः, स्त्री, (काकप्रियः कङ्कुः ।) चीनकः । इति
हेमचन्द्रः ॥

काककला, स्त्री, (काकस्य कला अङ्गं जङ्घावयवः
तद्वत् अङ्गं यस्याः ।) काकजङ्घावृक्षः । इति
शटाधरः ॥

काकघ्नी, स्त्री, (काकं हन्तीति । काक + हन् + टः
टित्त्वात् ङीप् ।) महाकरञ्जः । इति राज-
निर्घण्टः ॥

काकचिञ्चा, स्त्री, (काकवर्णा चञ्चा प्रान्तभागः फले
यस्याः । पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
शब्दरत्नावली । कूँच् इति भाषा । (गुञ्जाशब्दे-
ऽस्या विवरणं बोद्धव्यम् ॥)

काकचिञ्चिः, स्त्री, (काकवर्णा चञ्चा प्रान्तभागः फले
यस्याः । पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
शब्दरत्नावली ॥

काकचिञ्ची, स्त्री, (काकचिञ्चि + वा ङीप् ।) गुञ्जा ।
इत्यमरः । २ । ४ । ९८ ॥ (अस्याः पर्य्यायो भाव-
प्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । यथा,—
"श्वेता रक्तोचटा प्रोक्ता कृष्णा चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात् काकानन्ती च रक्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी" ।
गुञ्जाशब्दे विवरणान्तरं ज्ञेयम् ॥)

काकच्छदः, पुं, (काकस्य छदः पक्ष इव छदो यस्य ।)
खञ्जनपक्षी । इति शब्दरत्नावली ॥

काकच्छदिः, पुं, खञ्जनपक्षी । इति चिकाण्डशेषः ॥
(खञ्जरीटशब्देऽस्य विवृतिर्ज्ञेया ॥)

काकजङ्घा, स्त्री, (काकस्य जङ्घेवाकृतिर्यस्याः ।)
स्वनामख्यातवृक्षविशेषः । केउया ठेङ्गा इति
भाषा । तत्पर्य्यायः । काकाङ्घोरु २ काकाङ्घी ३ काक-
नासिका ४ । इति शब्दरत्नावली ॥ कृष्णवर्णः । इति
रत्नमाला ॥ भृङ्गजङ्घा ६ काकाङ्घा ७ सुलोमशा
८ पारावतपदी ९ दासी १० नदीकान्ता ११ ।
अस्या गुणाः । तिक्तत्वम् । उष्णत्वम् । कृमिव्रण-
कफबाधिर्य्याजीर्णजीर्णविषमज्वरनाशित्वञ्च । इति
राजनिर्घण्टः ॥
("काकजङ्घा वला श्यामा ब्रह्मदण्डी सुताङ्गुलिः ।
एतस्मिन्पर्य्यायेषामार्गस्तथा भृङ्गरजोऽष्टमः ॥
एषामन्यतमं मूलं पुष्येणोद्धृत्य यत्नतः ।
रक्तसूत्रेण संवेष्ट्य बद्धमेकाहिकं जयेत्" ॥
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥
मसीति लोके । अस्याः पर्य्यायो गुणाश्च यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता ॥
काकजङ्घा हिमा तिक्ता कषाया कफपित्तजित् ।
निहन्ति ज्वरपित्तास्रज्वरकण्डूविषक्रिमीन्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गुञ्जा । इति रत्नमाला ॥

काकजम्बुः, स्त्री, (काकवर्णा जम्बुः ।) भूमिजम्बुः ।
क्षुद्रजम्बुः । इति शब्दमाला । वनजाम् इति
भाषा ॥

काकजम्बूः, स्त्री, (कं जलं अकति आश्रयत्वेन गच्छ-
तीति । क + अक् + अण् + टाप् च । काका
जम्बूः । यद्वा काकवर्णा जम्बूः ।) जम्बूप्रभेदः ।
तत्पर्य्यायः । काकफला २ नादेयी ३ काकवल्लभा
४ भृङ्गेष्टा ५ काकनीला ६ भृङ्गजम्बूः ७ धन-
प्रिया ८ । अस्या गुणाः । कषायत्वम् । अम्लत्वम् ।
पाके मधुरत्वम् । गुरुत्वम् । दाहश्रमातिसार-
नाशित्वम् । वीर्य्यवर्द्धिबलप्रदत्वञ्च । इति राज
निर्घण्टः ॥

काकणं, क्ली, (कु ईषत् कणति निमीलति इति ।
अच् काकणं गुञ्जाफलं तद्वदाकृतिरस्यास्तीति
कृष्णरक्तचिह्नितत्वादस्य तथात्वम् ।) कुष्ठविशेषः ।
तस्य लक्षणम् । यथा,—
"यत् काकणन्तिकावर्णमपाकं तीव्रवेदनम् ।
त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिध्यति" ॥
इति माधवकरः ॥ ("काकणं तीव्रदाहरुक् ॥
"पूर्व्वं रक्तञ्च कृष्णञ्च काकणन्तीफलोपमम् ।
कुष्ठलिङ्गैर्युतं सर्व्वैर्नैकवर्णं ततो भवेत् ॥
दोषभेदीयविहितैरादिशेल्लिङ्गकर्म्मभिः" ॥
इति वाभटे निदानस्थाने १४ अः ॥
"काकणन्तिका वर्णान्यादौ पश्चात् सर्व्वकुष्ठ-
लिङ्गसमन्वितानि पापीयसां सर्व्वकुष्ठलिङ्गसम्भवे
नानेकवर्णानि काकणानीति विद्यात् ।
इति निदानस्थाने ५ अः । चरकेऽप्युक्तम् ॥)

काकणन्तिका, स्त्री, (कु ईषत् कणन्ती निमीलन्ती ।
कन् निमीलने शृङ् ङीप् कोःकादेशः । ततः कन्
टाप् च पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
रत्नमाला । कुँच् इति भाषा ॥
("यत्काकणन्तिकावर्णमपाकं तीव्रवेदनम्" ।
इति चरके चिकित्सास्थाने ७ अः ॥)

काकतिक्ता, स्त्री, (काकमांसवत् तिक्ता इति मध्यपद-
लोपि समासः ।) काकचिञ्चा । इति रत्नमाला ।
कुँच् इति भाषा । (अस्याः पर्य्यायो यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

काकतिन्दुकः, पुं, (कं जलं अकति इत्यण् । काकः
तिन्दुकः काकवर्णो वा तिन्दुकः काकप्रियस्तिन्दुको
वा ।) वृक्षविशेषः । माकड़ा केन्दु । माकड़ो
गाछ् । काकतेँदु इति च भाषा । तत्पर्य्यायः । का-
केन्दुः २ कुलकः ३ काकपीलुकः ४ । इत्यमरः
। २ । ४ । १९ ॥ काकपीलुः ५ काकाण्डः ६ काक
स्फूर्ज्जः ७ काकाङ्कः ८ काकबीजकः ९ । अस्य
गुणाः । कषायत्वम् । अम्लत्वम् । गुरुत्वम् ।
वातविकारनाशित्वञ्च । पक्वस्य तस्य गुणाः ।
मधुरत्वम् । किञ्चित्कफकारित्वम् । वान्तिपित्त-
नाशित्वञ्च । इति राजनिर्घण्टः ॥ (काकाण्डशब्दे-
ऽस्य विवरणं ज्ञेयम् ॥)

काकतुण्डः, पुं, (काकतुण्डस्येव वर्णोऽस्यास्य । अर्श-
आदित्वात् अच् ।) कालागुरु । इति हेमचन्द्रः ॥

काकतुण्डिका, स्त्री, (काकतुण्डस्येव वर्णः फलांश्चेऽस्याः
इति ठन् । स्त्रियां टाप् च ।) काकचिञ्चा । गुञ्जा ।
इति हलायुधः ॥

काकतुण्डी, स्त्री, (काकं ईषदुःखं तुण्डते नाशयतीति ।
तुण्ड् ड वधे + अण् । गौरादित्वात् ङीष् ।)
राजरीतिः । राजपितव इति भाषा । इति राज-
निर्घण्टः ॥ (काकतुण्डस्येवाकृतिर्विद्यते ऽस्याः ।
अर्श आदित्वादच् । गौरादित्वात् ङीष् ।) वृक्ष-
विशेषः । कौआड़ोड़ी । इति हिन्दी भाषा ।
तत्पर्य्यायः । काकादनी २ काकपीलुः ३ काक-
श्रिम्बी ४ रक्तफला ५ भृङ्गादनी ६ वक्रशल्या ७
दुर्म्मोहा ८ वायसादनी ९ भृङ्गनखी १० वायसी
११ काकदन्तिका १२ भृङ्गदन्ती १३ । अस्य
गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । द्रव-
त्वम् । रसायनत्वम् । वातदोषहारित्वम् । रुचि-
कारित्वम् । पलितलम्बितञ्च । इति राज-
निर्घण्टः ॥

काकध्वजः, पुं, (काकमीषल्लम्बं वासं ध्वज इवास्य ।)
वाड़वाग्निः । इति त्रिकाण्डशेषः ॥

काकनामा, [न्] पुं, (काकस्य नाम नाम यस्य ।)
वकवृक्षः । इति रत्नमाला ॥ (काकशीर्षशब्दे-
ऽस्य विवरणं बोधम् ।)

काकनासः, पुं, (काकस्य नासाया वर्णः इव फले यस्य ।)
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

काकनासा, स्त्री, (काकस्य नासा इव फलमस्याः ।)
काकजङ्घावृक्षः । इति शटाधरः । (अस्याः पर्य्याया
गुणाश्च यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
"काकनासा तु काकाङ्घ्री काकतुण्डफला च सा ।
काकनासा कषायोष्णा कटुका रस पाकयोः ।
कफघ्नी वामनीतिक्ता व्रणशोथार्शः श्वित्रकुष्ठहृत्" ॥

काकनासिका, स्त्री, (काकनासा ततः स्वार्थे कन्
टाप् अत इत्वम् ।) काकजङ्घावृक्षः । इत्यमरः ।
२ । ४ । ११८ ॥ रक्तचित्रकः । इति राजनिर्घण्टः ।

काकपक्षः, पुं, (काकस्य पक्ष इव आकारोऽस्यास्य ।
काकपक्ष + अच् ।) मस्तकपार्श्वद्वये केशरचना-
विशेषः । काकपाटा जुल्पी इति च भाषा ।

तत्पर्य्यायः। शिखण्डकः २। इत्यमरः। २। ६। ९९॥ शिखाखण्डकः ३ शिखण्डः ४। इति तट्टीका॥ (यथा, रघुः। १९। १।

"कौशिकेन स किल क्षितीश्वरो
राममध्वरविघातशान्तये।
काकपक्षधरमेत्य याचित-
स्तेजसां हि न वयः समीक्ष्यते"॥)

काकपदः, पुं, (बन्धस्य काकपदवदाकारवत्त्वात् काकपद इव आकृतिरस्यस्य।) रतिबन्धविशेषः तस्य लक्षणम्। यथा,—

"पादौ द्वौ स्कन्धयुग्मस्थौ क्षिप्त्वा शिरःभगे जघ्नु।
कामयेत् कामुकी कामी बन्धः काकपदो मतः"॥

इति रतिमञ्जरी॥

काकपर्णी, स्त्री, (काक इव श्यामं पर्णं यस्याः। गौरादित्वात् ङीष्।) मुद्गपर्णी। इति भावप्रकाशः॥ ("मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला। चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत्। दोषत्रयहरी मध्वी ग्रहणीगोऽतिसारजित्"॥ इति च भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे॥)

काकपीलुः, पुं, (काकप्रियः पीलुः।) काकतिन्दुकः। काकतुण्डी। श्वेतगुञ्जा। इति राजनिर्घण्टः। (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे।

"श्वेता रक्तोत्कटा प्रोक्ता शाखाला चापि सा स्मृता।
रक्ता सा काकचिञ्ची स्यात् काकानन्दी च रक्तिका।
काकादनी ककापीलुः सा स्मृता काकवल्लरी"।

विशेषविवरणमस्य च गुञ्जाशब्दे ज्ञेयम्॥)

काकपीलुकः, पुं, (काकपीलु + संज्ञायां कन्।) काकतिन्दुकवृक्षः। इत्यमरः। २। ४। १९। माकड़ाकेन्दु इति भाषा॥

काकपुच्छः, पुं, (काकस्य पुच्छ इव पुच्छो यस्य।) कोकिलः। इति शब्दरत्नावली॥

काकपुरुषः, पुं, (काकेन पुरुषः। कोकिलया हि निजाण्डस्फोटनाशङ्कतया काकाण्डं तन्नीड़ात् निक्षिप्य तत्र स्वकीयाण्डं स्थापयित्वा काकद्वारा स्वापत्यपोषयात् अस्य तथात्वम्।) कोकिलः। इति त्रिकाण्डशेषः॥

काकपुष्पं, क्ली, (काकवत् श्यामं पुष्पमस्य।) गन्धपर्णम्। इति राजनिर्घण्टः॥

काकफलः, पुं, (काकप्रियं फलमस्य।) निम्बवृक्षः। इति राजनिर्घण्टः॥ (निम्बशब्देऽस्य गुणादयो ज्ञातव्याः॥)

काकबलिः, पुं, (काकेभ्यो देयो बलिरन्नादिकम्।) काकसम्प्रदानकान्नादि। तद्दानविधिर्यथा।

ॐ यमदारावस्थितनानादिग्देशीयवायसेभ्यो नमः इति पाद्यादिभिरभ्यर्च्च प्रार्थयेत्।

"ॐ काकत्वं यमदूतोऽसि प्रदत्तं बलिमुत्तमम्।
यमलोकगतं प्रेतं त्वमाप्यायितुमर्हसि॥
ॐ काकाय काकपुरुषाय वायसाय महात्मने।
अत्र पिण्डं प्रयच्छामि कथ्यतां धर्म्मराजनि"॥

इति पूरकपिण्डदानान्ते हलायुधः॥ *॥

बलिवैश्वदेवान्तर्गततद्विधिर्यथा,—

"ऐन्द्रवारुणवायव्याः सौम्या वै नैर्ऋतास्तथा।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम्"॥
ॐ काकेभ्यो नमः। इति दद्यात् तदुपरि अद्भिः सिञ्चेत्। इत्याह्निकाचारतत्त्वम्॥ *॥

गयायां तद्विधिर्यथा,—

"बलिः काकशिलायाञ्च काकमोक्षणमोक्षदः"।

इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये ४ अध्यायः॥ तत्र तृतीयदिनकृत्ये काकबलिदानं यथा,—

"ततः काकबलिं क्षिप्त्वा पुनः स्नानं समाचरेत्।
ऐन्द्रवारुणवायव्या याम्या वै नैर्ऋतास्तथा॥
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम्"॥

इति श्रीवायुपुराणे ७ अध्यायः॥

काकभाण्डी, स्त्री, (काकस्य मुखोष्ठवरस्कारणस्य ईषच्चलस्य भाण्डी क्षुद्रभाण्डमिव। तत्फलभक्षणेन मुखात् ईषच्चलत्वरणात् अस्यास्तथात्वम्।) महाकरञ्जः। इति राजनिर्घण्टः॥

काकभीरुः, पुं, (काकात् भीरुर्भयशीलः।) पेचकः। इति त्रिकाण्डशेषः॥

काकभङ्गुः, पुं, (काक इव श्यामो भङ्गुर्जलचरपक्षिविशेषः) दात्यूहपक्षी। इति त्रिकाण्डशेषः। (डाउकपाखी इति भाषा॥ यथा, महाभारते १३। दानधर्म्मे संसारचक्रकथने १११। १२१।

"घृतं हृत्वा तु दुर्ब्बुद्धिः काकभङ्गुः प्रजायते"॥)

काकभद्रः, पुं, (काकं भद्रयतीति। काक + भद्र + अण्।) महाकालभद्रः। इति राजनिर्घण्टः॥

काकभद्रकः, पुं, (काकभद्र + संज्ञायां कन्।) महाकाललता। इति रत्नमाला। माकाल इति भाषा॥

काकमाचिका, स्त्री, (काकमाची + स्वार्थे कन्।) काकमाचीवृक्षः। इति शब्दरत्नावली॥

काकमाची, स्त्री, (काकान् मञ्चते अर्चयति फलदानेनेति। मचि + अण् + गौरादित्वात् ङीष् एषोदरादित्वात् न लोपः।) क्षुद्रवृक्षविशेषः। गुड़कामाइ इति भाषा। तत्पर्य्यायः। वायसी २। इत्यमरः। २। ४। १५१॥ ध्वाङ्क्षमाची ३ वायसाङ्गा ४ सर्व्वतिक्ता ५ वञ्जुफला ६ कटफला ७ रसायनी ८ गुच्छफला ९ काकमाता १० स्वादुपाका ११ सुन्दरी १२ तिक्तिका १३ वञ्जुतिक्ता १४। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफशूलार्शोग्रहोषदोषकुष्ठकण्डूनाशित्वञ्च। इति राजनिर्घण्टः॥ त्रिदोषघ्नमतानाकारित्वम्। रुच्यत्वम्। रसायनत्वम्। नातिशीतत्वम्। नात्युष्णत्वम्। हृद्यत्वम्। भेदकत्वञ्च। इति राजवल्लभः॥ (तथाच भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥

"काकमाची त्रिदोषघ्नी स्निग्धोष्णाक्षरसप्रदा॥
तिक्ता रसायनी शोथकुष्ठार्शोज्वरमेहजित्।
कटुर्नेत्रहिता हिक्काच्छर्द्दिहृद्रोगनाशिनी"॥)

काकमाता, स्त्री, (काकस्य मातेव पोषिका। काकस्य तत्फलप्रियत्वात्।) काकमाची। इति राजनिर्घण्टः॥ (काकमाचीशब्दे पर्य्यायगुणादिकं द्रष्टव्यं॥

काकमुद्गा, स्त्री, (काकेन ईषच्चलेन मुद्गं गच्छतीति। काकमुद् + गम् + ड + टाप्।) मुद्गपर्णीवृक्षः। इत्यमरः। २। ४। ११३॥ मुगाणी इति भाषा॥

(अस्याः पर्य्यायो यथा,—

"मुद्गपर्णी काकपर्णी सूर्य्यपर्ण्येल्पिका सहा।
काकमुद्गा च सा प्रोक्ता तथा मार्ज्जारगन्धिका"॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ गुणादयोऽस्या मुद्गपर्णीशब्दे ज्ञेयाः॥)

काकयवः, पुं, (काकमीषच्छ्यामं यत्र तादृशो यव इव नीरसत्वात्, यद्वा काकवन्निर्गुणो यवः।) तण्डुलशून्यधान्यम्। आगड़ा इति भाषा॥

("यथा फलाः वनस्तिलाः यथा चर्म्ममया मृगाः।
तथैव पाण्डवाः सर्व्वे यथा काकयवा इव"॥ इति महाभारते सभापर्व्व। तथा पद्मतन्त्रे २। ९५।

"यथा काकयवाः प्रोक्ता यथारण्यभवास्तिलाः।
नाममात्रा न सिद्धौ हि धनहीनास्तथा नराः"॥)

काकरुहा, स्त्री, (काक इव रोहति मूलशून्यतया वृक्षाद्यवलम्बनेन जायते इति। काक + रुह + कः। काकवत् परपुष्टतयास्यास्तथात्वम्। यद्वा काकपुरीषात् रोहति उत्पद्यते वृक्षोपरीत्यर्थः अतएव तत् संज्ञयाख्यायते।) वन्दाकृक्षः। इति त्रिकाण्डशेषः॥

काकरूकः, पुं, (कुं कुत्सितं करोतीति। कु + रु + ऊकः। कोः कादेशः।) स्त्रीजितः। उलूकः। दम्भः। दिगम्बरभीरुकनिर्धनेषु त्रि। इति हेमचन्द्रः॥

काकलं, क्ली, (ईषत्कालो यस्मात्। कोः कादेशः।) कण्ठमणिः। इति त्रिकाण्डशेषः॥ (ग्रीवास्थोन्नतदेशः। इति सुश्रुतः॥ टुँटि इति भाषा।)

काकलः, पुं, (का इत्याकारः कालो यस्य।) क्रोडकाकः। इति शब्दरत्नावली॥

काकलकः, पुं, (काकलं ततः कप् पुंस्त्वञ्च।) कण्ठमणिः। इति हेमचन्द्रः॥

काकलिः, स्त्री, (कल् + इन् कलिः। कु ईषत् कलिः। कोः कादेशः।) सूक्ष्ममधुरास्फुटध्वनिः। इत्यमरटीकायां भरतः॥ ("कोकिलकाकलिकूजितकुञ्जम्"। इति शिशुप्रयोगः॥)

काकली, स्त्री, (काकलि + ऋदिकारान्तत्वात् वा ङीप्।) सूक्ष्ममधुरास्फुटध्वनिः। इत्यमरः। १। ७। २॥ (यथा, गीतगोविन्दे। १। ४। ११।

"उन्मीलन् मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीड़त्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः"॥

काकलीद्राक्षा, स्त्री, (काकलीव सूक्ष्मा द्राक्षा।) द्राक्षाप्रभेदः। किसमिस् इति ख्याता। तत्पर्य्यायः। जम्बूका २ फलोत्तमा ३ लघुद्राक्षा ४ निर्वीजा ५ सुदत्ता ६ रसाधिका ७। तस्या गुणाः। मधुरत्वम्। अम्लत्वम्। रसालत्वम्। रुचिकारित्वम्। स्निग्धित्वम्। श्वासकासनाशित्वम्। जनवल्लभत्वञ्च। इति राजनिर्घण्टः॥

काकलीरवः, पुं, (काकली मधुरास्फुटो रवो यस्य।) कोकिलः। इति राजनिर्घण्टः॥ (सूक्ष्ममधुरास्फुटध्वनौ तु कर्म्मधारयः॥)

काकवल्लरी, स्त्री, (काकप्रिया वल्लरी।) सर्व्ववल्ली।

इति राजनिर्घण्टः ॥

काकशीर्षः, पुं, (काकः शीर्षे अग्रेऽस्य । काकस्य तदग्रे वासयोग्यत्वात् ।) वकवृक्षः । इति जटाधरः ॥ (पर्य्यायोऽस्य यथा,—वैद्यकरत्नमालायाम् ।

"वकपुष्पः काकशीर्षः स्थूलपुष्पः शिवप्रियः ।
वसुकः काकनामा च वसुहृट्टः खपूरकः" ॥)

काकस्फूर्ज्जः, पुं, (काकः स्फूर्ज्जति यत्र । काक + स्फूर्ज्ज + आधारे घञ् ।) काकतिन्दुकवृक्षः । इति राजनिर्घण्टः ॥

काकी, स्त्री, (काकवदाकारोऽस्यस्या इति अच् ततष्टाप् ।) काकनासालता । काकोलीवृक्षः ॥ काकजङ्घावृक्षः । पर्य्यायो यथा भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ।

"काकजङ्घा नदी कान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काकी चापि प्रकीर्त्तिता" ॥

गुणादयोऽस्याः काकजङ्घाशब्दे बोद्धव्याः ॥) रक्तिकालता । मलपूवृक्षः । काकमाचीवृक्षः । इति मेदिनी ॥

काकाङ्गा, स्त्री, (काकस्य अङ्गं जङ्घेवाकारो यस्याः वा ङीष् । पक्षे टाप् ।) काकाङ्गीवृक्षः । इत्यमरटीकायां रमानाथः ॥

काकाङ्गी, स्त्री, (काकस्य अङ्गं जङ्घा इव आकृतिर्यस्याः । ङीष् ।) काकजङ्घावृक्षः । इत्यमरः । २ । ४ । १८ ॥ (अस्याः पर्य्यायो यथा,—भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ।

"काकनासा तु काकाङ्गी काकतुण्डफला च सा" ॥)

काकाच्ची, स्त्री, (काकं तज्जङ्घाकारं अञ्चति गच्छतीति । काक + अन्च् + अण् + ङीप् ।) काकजङ्घावृक्षः । इति शब्दरत्नावली ॥

काकाण्डः, पुं, (काक्या अण्ड इव फलं यस्य । काकीत्यस्य पुंवद्भावः ।) महानिम्बः । काकतिन्दुः । इति राजनिर्घण्टः ॥

("मायैः समानं फलमात्मगुप्त-
मुक्तञ्च काकाण्डफलन्तथैव" ॥

इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ॥ यस्मिन् व्यवक्रियते तद्यथा,—

"काकाण्डसुरसगवाच्या
पुनर्नवा वायसी शिरीषफलैः ।
उद्बुद्धविषजलमते
लेपौषधनस्यपानानि" ॥

इति चरके चिकित्सास्थाने । २५ अध्याये ॥)

काकाण्डा, स्त्री, (काकस्याण्डमिव बीजमस्याः ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

काकाण्डी, स्त्री, (काकाण्ड + गौरादित्वात् ङीष् ।) महाज्योतिष्मती लता । इति राजनिर्घण्टः ॥ (महाज्योतिष्मतीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

काकाण्डोला, स्त्री, (काकाण्डमोरति तत्सादृश्यं बीजे प्राप्नोतीति । उर गतौ + अच् । रस्य लत्वम् ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

काकादनी, स्त्री, (काकैरद्यते सुच्यतेऽसौ इति । काक + अद + कर्म्मणि ल्युट् ततो ङीप् च ।) गुञ्जा । इति शब्दरत्नावली ॥ श्वेतगुञ्जा । इति राजनिर्घण्टः ॥ वृक्षविशेषः । कालियाकड़ा इति भाषा । तत्पर्य्यायः । हिंसा २ गृध्रनखी ३ तुण्डी ४ काला ५ अहिंसा ६ कटुका ७ पाण्डिः ८ कापासः ९ कुलिकः १० । इति रत्नमाला ॥ (अस्याव्यवहारो यत्र तद्यथा,—

"विकङ्कतारग्वधकाकजन्ती
काकादनीतापसवृक्षमूलैः ।
आलेपयेदेनम्" ॥

इति वैद्यकचक्रपाणिसंग्रहे गण्डमालाद्यधिकारे ॥ अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ॥

"श्वेता रक्तोचटा प्रोक्ता कृष्णाला चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात् काकान्तीच रक्तिका ॥
काकादनी काकपीलुः सा स्मृता काकवल्लरी" ॥)

काकायुः, पुं, (काकस्य आयुर्यस्मात् ।) स्वर्णवल्ली । इति राजनिर्घण्टः ॥

काकारिः, पुं, (काकः अरिर्यस्य । काकस्यारिर्व्वा ।) पेचकः । इति हेमचन्द्रः ॥

काकालः, पुं, (का इति शब्दं कलते रौति । का + कल + अण् ।) द्रोणकाकः । इति शब्दरत्नावली ॥

काकिणी, स्त्री, (ककलौल्ये । ककते गमनाकाले चञ्चलीभवतीति । कक + णिनि + ङीप् । एषोदरादित्वात् नस्य णः ।) पञ्चचतुर्थांशः । पाँच गण्डाकड़ि इति भाषा ॥ यथाह लीलावती ।

"वराटकानां दशकद्वयं यत् सा काकिणी" ॥)

मानदण्डः । काठा गज इत्यादि भाषा । कृष्णला । कुँच इति भाषा । एकवराटी । एक कड़ा इति भाषा ।

("तस्मात्पणं काकिणीं वा फलं पुष्पमथापि वा ।
प्रदद्याद् दक्षिणां यज्ञे यया स सफलो भवेत्" ॥

इति शुद्धितत्त्वे वृहस्पतिः ॥) उन्मानसंज्ञकः । इति मेदिनी ॥

काकिनी, स्त्री, (ककलौल्ये । ककते गमनाकाले चञ्चलीभवतीति । कक + णिनि + ङीप् ।) काकिणी । इत्यमरटीकायां रायमुकुटः ॥ (यथा,—पद्मतन्त्रे २ । ७४ ।

"ईश्वरा भूरिदानेन यज्ञमन्ते फलं किल ।
दरिद्रस्तञ्च काकिन्या(ण्या)प्राप्नुयादिति नःश्रुतिः" ॥)

काकिलः, पुं, (कु–ईषत् किलतीति । कु + कृ + कः । कोः कादेशः रस्य लत्वम् ।) काकणः । कगड़मणि । इति शब्दमाला ॥

काकुः, स्त्री, (कक लौल्ये + उण् ।) शोकभयादिभिर्ध्वनिविकारः । इत्यमरः । २ । ६ । १२ ॥ (यथा, साहित्यदर्पणे । २ । २३ ।

"भिन्नकण्ठध्वनिर्घोरः काकुरित्यभिधीयते" । इति काकुं लक्षीकृत्य उदाहरणं यथा, तत्रैव

"गुरुपरतन्त्रतया वत दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिलललिते नैष्यति सखि! सुरभिसमयेऽसौ ॥ नैष्यति, अपि तु एष्यति एवेति-काक्षा व्यज्यते" ॥) जिह्वा । इति चिकाण्डशेषः ॥

काकुत्स्थः, पुं, (ककुत्स्थस्य नृपतेरपत्यम् । शिवादित्वात् ४ । १ । २१२ । अण् ।) श्रीरामचन्द्रः । इति

रामायणम् ॥ (यथा, रघुः १२ । ४६ ।

"असञ्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम् ।
न चक्षमे शुभाचारः स दूषणमिवात्मनः" ॥

ककुत्स्थवंशोद्भवमात्रम् । अजराजार्थे यथा रघुवंशे ६ । २ ।

"काकुत्स्थमालोकयतां नृपाणां
मनो बभूवेन्दुमतीनिरागम्" ॥

दशरथार्थे यथा रामायणे ६ । १०५ । १ ।

"प्रतिप्याते काकुत्स्थे महेन्द्रः पाकशासनः" ॥

ककुत्स्थ एव स्वार्थे अण् । पुरा किल महोक्षरूपधारिणो महेन्द्रस्य ककुदि स्थित्वा असुरान् जितवानतोऽस्य तथात्वम् ।) पुरञ्जयराजः । इति चिकाण्डशेषः ॥ (विवरणन्तु ककुत्स्थशब्दे द्रष्टव्यम् ॥)

काकुदं, क्ली, (काकुं ददातीति । काकु + दा + क ।) तालु । इत्यमरः २ । ६ । ९१ ॥

काकेक्षुः, पुं, (काकमीषच्चक्षमञ्च कोः कादेशः । ततः कर्म्मधारयः ।) खगड़ः । इति रत्नमाला चिकाण्डशेषश्च ॥ खागड़ा आक् इति भाषा ॥ काशः । इति राजनिर्घण्टः ॥

काकेन्दुः, पुं, (काकस्य इन्दुराह्लादकः ।) कुलकवृक्षः माकड़ा केन्दु इति ख्यातः । इत्यमरः । २ । ४ । ३९ ॥

काकेष्टः, पुं, (काकस्य इष्टः ।) निम्बवृक्षः । इति राजनिर्घण्टः ॥ (निम्बशब्देऽस्य गुणादयो ज्ञेयाः ॥)

काकोचिकः, पुं, (कु ईषत् कोची सङ्कोचो । कुच + णिन् स्वार्थे कन् । कोः कादेशः ।) काकोची मत्स्यः । इति हारावली ॥ काउची इति भाषा ॥

काकोची, स्त्री, (काकोच + ङीष् ।) काकोचिमत्स्यः । इति हारावली ॥

काकोडुम्बरः, पुं, (काकप्रियः उडुम्बरः इति मध्यपदलोपी कर्म्मधारयः ।) काकोडुम्बरिका । इति शब्दरत्नावली । काकडुमुर इति भाषा ॥

काकोडुम्बरिका, स्त्री, (काकोडुम्बरस्वतः स्वार्थे कन् टाप् च अत इत्वम् ।) वृक्षविशेषः । कोठडुमुरि डुमुरि इति च ख्याता । काकडुमुर इति भाषा । तत्पर्य्यायः । फल्गुः २ मलभूः ३ जघनेफला ४ । इत्यमरः । २ । ४ । ६२ ॥ मलयुः ५ फल्गुफला ६ काकोडुम्बरः ७ । इति शब्दरत्नावली ॥ फलवाटिका ८ वज्रफला ९ । इति जटाधरः ॥ अस्या गुणाः । काकोडुम्बरिकाशब्दे द्रष्टव्याः ॥ (अस्याः व्यवहारो यत्र तद्यथा,—वैद्यकचक्रपाणिसंग्रहे मुखरोगाधिकारे ।

"काकोडुम्बरिका गोजी पचैर्विस्रावयेद्भिषक् ।
क्षौद्रयुक्तैश्च लवणैः सद्योघैः प्रतिसाधयेत्" ॥)

काकोदरः, पुं, (कु कुत्सितं अकति । कु + अक वक्रगतौ + अच् । कोः कादेशः । काकं कुटिलगतिकारि उदरं यस्य बहुव्रीहिः ।) सर्पः । इत्यमरः । १ । ८ । ७ ॥ (यथा, राघवपाण्डवीये ।

"यः पूतनामारणलब्धवर्णः
काकोदरो येन विनीतदर्पः ।
यशोदयालङ्कृतमूर्त्तिरस्या-
ह्यादो यदूनामथवा रघूणाम्" ॥)

काकोदुम्बरिका, स्त्री, (काकप्रिया छाया वा उदुम्ब-

रिका ।) काकोडुम्बरिका । काकडुमुरि इति भाषा । अस्याः पर्य्यायः । क्षुद्रोदुम्बरिका २ खरपत्री ३ राजिका ४ क्षुद्रोदुम्बरिका ५ कुरुण्टी ६ पत्रगुवाटिका ७ अजाजी ८ फल्गुनी ९ मलपूः १० चित्रभेषजा ११ भ्राङ्गनाम्नी १२ । अस्या गुणाः । शीतत्वम् । कषायत्वम् । व्रणनाशित्वम् । गर्भरक्षाहितत्वम् । स्तनदुग्धप्रदत्वञ्च । इति राजनिर्घण्टः ॥

काकोलं, क्ली, (काकयति शोषयति दुःखदत्वात् । कक शौल्ये + णिच् + ओल । काकेन उल्लायते भक्ष्यते अत्र वा आधारे घञर्थे कः पृषोदरादित्वात् साधुः ।) नरकविशेषः । इति मेदिनी ॥ (यथा, मनुः ॥

"महानरककाकोलं सञ्जीवनमहायसम्" ॥)

काकोलः, पुं क्ली, (कुः कुत्सितं तीव्रतरं यथा स्यात् तथा कोलति पीड़यति विह्वलीकरोति वायुना करणे घञ् ।) क्षुद्वर्गस्थावरविषविशेषः । इत्यमरः । २ । ८ । १० ॥

"काकोलमुग्रतेजः स्यात् क्षुद्राच्छविमहाविषम्" । इति वैद्यकम् ॥ (अस्य पर्य्यायो यथा,—

"काकोलो क्रूरलक्ष्मेड़ो वत्सनाभः प्रदीपनः ।
शौक्लिकेयो ब्रह्मपुत्रो विषं स्याद्धरणो विषः" ॥
इति वैद्यकरत्नमाला ॥)

काकोलः, पुं, (कं जलमाकोलति संस्त्यायतीति । आ + कुल संस्त्याने + अण् ।) कुलालः । (कक लौल्ये स्वार्थे णिच् + वाऽलकात् ओल ।) द्रोणकाकः । इति मेदिनी । (यथा, मनुः ५ । १४ ।

"वकश्चैव बलाकाश्च काकोलं खञ्जरीटकम् ।
मत्स्यादान् विप्लवाहांश्च मत्स्यानेव च सर्व्वशः" ॥)

सर्पः । सूकरभेदः । इति शब्दरत्नावली ॥ काकोली नामख्यातौषधिविशेषः । इति धरणी ॥

काकोली, स्त्री, (काकोल + गौरादित्वात् ङीष् ।) अष्टवर्गे प्रसिद्धौषधविशेषः । तत्पर्य्यायः । मधुरा २ काकी ३ कालिका ४ वायसोली ५ क्षीरा ६ भ्राङ्गिका ७ वीरा ८ मुक्ता ९ धीरा १० मेदुरा ११ भ्राङ्गोली १२ स्वादुमांसी १३ वयःस्था १४ जीवनी १५ शुक्लक्षीरा १६ पयस्विनी १७ । इति राजनिर्घण्टः ॥ पयस्या १८ शीतपाकी १९ । इति रत्नमाला ॥ अस्या गुणाः । शीतत्वम् । मधुरत्वम् । क्षयपित्तानिलार्त्तिरक्तदाहज्वरनाशित्वम् । कफशुक्रवर्द्धकत्वञ्च । इति राजनिर्घण्टः ॥

(क्षीरकाकोलीशब्दे चास्या विशेषविवरणं ज्ञातव्यम् । काकोल्यादिगणोयथा, "काकोलीक्षीरकाकोलीजीवकर्षभकमृद्वीपर्णीमाषपर्णीमेदामहामेदाद्विरुद्रवृद्धिकर्कटशृङ्गीतुगाक्षीरीशतावरीप्रपौण्डरीकऋद्धिवृद्धिमधुकाजीवन्त्योमधुकेति" ।

"काकोल्यादिरयं पित्तशोणितानिलनाशनः ।
जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा" ॥
इति सुश्रुते सूत्रस्थाने । ३८ अध्याये ॥)

काकोलूकिका, स्त्री, (काकश्च उलूकश्च नित्यविरोधित्वात् द्वन्द्वः । ततो वरे वुञ् स्त्रियां टाप् च ।) काकोलूकयोर्वैरता । इति शब्दरत्नावली ॥

काक्ष इ काङ्क्षणे । आकाङ्क्षायामिति यावत् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट्-इदित् ।)

इ काङ्क्षति धनं लोकः । नमथ्यपाठेनैवेऽसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थः । इति दुर्गादासः ॥

काक्षः, पुं, (कु कुत्सितं अक्षं अत्र । "का पथ्यक्षयोः" ६ । ३ । १०४ । इति कोः कादेशः ।) कटाक्षः । इति हेमचन्द्रः ॥ (यथा, भट्टिः । ८ । २४ ।

"आज्ञालाभोन्मुखो दूरात् काक्षेणानादरेक्षितः" ॥)

काक्षी, स्त्री, (कक्षे कक्षे भवः । "तत्र भवः" । ४ । ३ । ५३ । इत्यण् ततो ङीप् च ।) तुरङ्गिका । अड़र इति भाषा । सौराष्ट्रमृत्तिका । इति मेदिनी ॥

काक्षीवः, पुं, (कु ईषत् क्षीवयति । क्षीव + णिच् + अच् । कोः कादेशः ।) श्लोभाञ्जनवृक्षः इत्यमरः । (गौतमात् शूद्रायामौशीनर्य्यां जातः पुत्रविशेषः । यथा महाभारते २ पर्व्वणि ।

"शूद्रायां गौतमो यत्र महात्मा संशितव्रतः ।
औशीनर्य्यामजनयत् काक्षीवाद्यान् सुतान्मुनिः" ॥)

काक्षीवकः, पुं, (काक्षीव + स्वार्थे कन् । यद्वा ईषत् क्षीवयतीति । क्वुन् ।) श्लोभाञ्जनः । इति शब्दरत्नावली ॥

कागः पुं, (का इति शब्दं गायतीति । का + गै + कः ।) काकः । इति जटाधरः ॥

कागदं, क्ली, (कागः काकवर्णः मस्यादिर्दीयते अत्र इति । काग + दा + घञर्थे आधारे कः । कस्य चित्तस्य आगदो विस्तारितभावगंत्र वा ।) लेखनपत्रविशेषः । कागज इति आर्व्वी भाषा । यथा,

"भूर्जे वा वसने रक्ते क्षौमे वा तालपत्रके ।
कागदे चाऽगन्धेन पङ्कगन्धेन वा पुनः ॥
चिरन्नेनाथवैकेन विलिख्य धारयेन्नरः ।
पञ्च सप्तत्रिकोकैर्व्वा शोधितं कवचं शुभम्" ॥
इति श्रीघनानन्ददासविरचितमन्त्रकल्पद्रुमे हनूमत्कवचम् ॥

काङ्क्षा, स्त्री, (कुत्सितं अङ्क्षं यस्याः । काङ्क्ष + टाप् ।) वधा । इति शब्दचन्द्रिका ॥

काचं, क्ली, (कथ्यते बध्यते अनेन इति । कच बन्धने + घञ् ण कुत्वम् । तस्य बन्धनहेतुत्वात् तथात्वम् ।) सिक्थकम् । मोम इति भाषा । (काचः क्षारमृत्तिकाऽस्यस्याकरत्वेन इति अच् ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचः, पुं, (कच दीप्तौ + णिच् + घञ् ।) मृत्तिकाविशेषः । काँच् इति भाषा । तत्पर्य्यायः । क्षारः २ । इत्यमरः । २ । ९ । ९९ ॥ अस्य गुणाः । क्षाररसत्वम् । उष्णवीर्य्यत्वम् । अन्नपाचनात् दृष्टिकारित्वञ्च । इति राजवल्लभः ॥ स्निग्धम् । स्निग्धा इति भाषा ॥ मणिविशेषः । (यथा,

"आकरे पद्मरागाणां जन्म काचमणेः कुतः" ।
इत्युद्भटः ॥) नेत्ररोगविशेषः । इति मेदिनी ॥ तस्य लक्षणम् ।

"अस्मिन्नपि तमोभूते नाति रूढे महागदे ।
चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतः ॥
निर्म्मलानि च तेजांसि भास्विन्मणीव पश्यति ।

स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः" ॥
इति माधवकरः ॥

("प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते ।
तेनोर्द्धमीक्षते नाधस्तनुच्छेदाहतोपमम् ॥
यथावर्णञ्च रज्येत दृष्टिर्हीयेत च क्रमात् ।
तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः ॥
लिङ्गनाशं मनः कुर्व्वन् हृदयेदृष्टिमण्डलम् ।
तच्च वातेन तिमिरे व्याविद्धमिव पश्यति ॥
चलाविलारुणाभासं प्रसन्नेक्षेत मुह्यतः ।
जालानि केशान् मक्षिकान् रज्जूंश्चोपेक्षितेऽपि च ॥
काचीभूते दृगरुणापश्यत्यास्यमनासिकम् ।
चन्द्रदीपाद्यनेकत्वं वक्त्रमप्येवमन्यते ॥
दृङ्नःकाचोदृशं कुर्य्याद्भजोधूमसदामिव ।
स्यात्तारणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनाम् ॥
सलिङ्गनाशो वाते तु सङ्कोचयति दृक्शिराः ।
दृङ्मण्डलं विशत्यन्तर्गम्भीरा दृगसौ स्मृता ॥
पित्तजे तिमिरे विद्युत् खद्योतोद्योतदीपितम् ।
शिखितित्तिरिपिच्छाभं प्रायोनीलञ्च पश्यति ॥
काचे दृक् काचनीलाभा ताप्तेगेव च पश्यति ।
अर्केन्दुपरिवेषाग्निमरीचीन्द्रधनूंषि च ॥
भृङ्गनीला निराजोका दृङ्निर्गच्छालिङ्गनाशतः ।
दृष्टिःपित्तेन कक्षाख्या सा कक्षा कक्षदर्शना ॥
भवेत्पित्तगुविदग्धाख्या पीतापीताभदर्शना ।
कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति ॥
अक्षेन्दुकुन्दकुसुमैः कुमुदैरिव चाचितम् ।
काचे तु निष्प्रभेन्दुकंप्रदीपाद्यैरिवाचितम् ॥
सिताभा सा च दृष्टिः स्यालिङ्गनाशे तु लक्ष्यते ।
मूर्त्ततः कफोदृष्टिगतः स्निग्धोदर्शननाशनः ॥
विन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः ।
उष्णे सङ्कोचमायाभिश्छायायां परिसर्पति ॥
अक्षकुन्देन्दु कुमुदस्फटिकोपमशुक्लिमा ।
रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति ।
काचेन रक्ता क्षुण्णा वा दृष्टिस्ताद्दक् च पश्यति" ॥
इति वाभटे उत्तरस्थाने । १२ अध्याये ॥
विस्तृतविवरणमस्य नेत्ररोगशब्दे ज्ञातव्यम् ॥)

काचनं, क्ली, (कचबन्धने + स्वार्थे णिच् + भावे ल्युट् ।) पत्रनिबन्धनम् । इति त्रिकाण्डशेषः ॥ काचेल इत्यपि पाठो दृष्टः ॥ (मुग्धबोधमते "किमः क्षेपे" इति । का + चनप्रत्ययेन) स्त्रीलिङ्गकिम्शब्दार्थे क्षेपे च । इति व्याकरणम् ॥ (यथा, प्रबोधचन्द्रोदये । "मूढा काचन कन्यका खलु मया तेनास्मि वाताधिकः" ॥)

काचनकं, क्ली, काच्यते लेखो निबध्यते येन (कच् + णिच् + ल्युट् । ततः स्वार्थे कन् ।) पत्रनिबन्धनम् इति हारावली ॥

काचनकी, [न्] पुं, (काचनक + अस्त्यर्थे इनिः ।) लिपिः । तत्पर्य्यायः । वर्णदूतः २ खस्तिमुखः ३ लेखः ४ वाचिकहारकः ५ तात्रिकः ६ । इति जटाधरः ॥

काचभाजनं, क्ली, (काचनिर्म्मितं भाजनम् ।) काचपात्रम् । काँचेर बासन इति भाषा । तत्पर्य्यायः । शिक्यानम् २ । इति त्रिकाण्डशेषः ॥

काञ्चनं

काचमर्णं, क्ली, (काचस्य क्षारमृत्तिकाया मलमिव ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचलवणं, क्ली, (काचात् क्षारमृत्तिकाया जातं लवणम् ।) लवणविशेषः । कालालुण इति भाषा । तत्पर्य्यायः । नीलम् २ काचोद्भवम् ३ काचम् ४ नीलकम् ५ काचसम्भवम् ६ काचसौवर्च्चलम् ७ क्षाराम्लवणम् ८ पाकजम् ९ काचोत्थम् १० हयगन्धम् ११ काललवणम् १२ कुरुविन्दम् १३ काचमलम् १४ क्षत्रिमम् १५ । अस्य गुणाः । रुचिकारित्वम् । ईषत्क्षारत्वम् । पित्तवह्निकारित्वम् । दाहदाढत्वम् । कफवातगुल्मशूलनाशित्वम् । अग्निदीपनत्वञ्च । इति राजनिर्घण्टः ॥

काचसम्भवं, क्ली, (सम्भवत्यस्मादिति सम्भवः । काचः क्षारमृत्तिका सम्भव उत्पत्तिस्थानमस्य ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचसौवर्च्चलं, क्ली, (काचस्यानिकं सौवर्च्चलं लवणम् ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचस्थाली, स्त्री, (काचस्य क्षारस्य स्थालीव ।) क्षारवृक्षः । पारल गाछ इति भाषा । इत्यमरः । २ । ४ । ५४ ॥ (अस्याः पर्य्यायो यथा—

"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
काचस्थाली कालस्थाल्यलिवल्लभा ॥
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता ।
मुक्तको मोचकोवृक्षः पाटलिः काहपाटला" ॥

कालस्थालीत्यत्र काचस्थालीत्येके ।

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ गुणादयोऽस्याः पाटलिशब्दे ज्ञेयाः ॥ काचनिर्म्मिता स्थाली ।) काचपात्रम् ॥

काचिघः, पुं, (कचते दीप्यते इति बाहुलकात् इन् । काचिं कान्तिं हन्ति गच्छति । हन गतौ + ड । एषोदरादित्वात् हस्य घः ।) काचनम् । छैमड़ः । छिमड़ा । इति भाषा । सूचिकः । इति मेदिनी ॥

काचित्, अ (पाणिनिमते पदद्वयमेतत् । मुग्धबोधमते "किमःक्यन्ताच्चिच्चनौ" इति का + चित्प्रत्ययः ।) काचन । कापि स्त्री । इति व्याकरणम् । (यथा, पदाङ्कदूते १ ।

"गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकबरी निःश्वसन्ती विषण्णम्" ॥)

काचितं, क्ली, (कच्यते बध्यतेऽसौ । कच् + क्विप् + कर्म्मणि क्तः ।) श्लिक्वितम् । श्लिक्वारोपितवस्तु । इत्यमरः । २ । १ । ८९ ॥ श्लिकाय तोला द्रव्य इति भाषा ॥

काचिमः, पुं, (कच बन्धे + क्विप् + इमन् ।) देवकुलोद्भववृक्षः । तत्पर्य्यायः । भङ्गरः २ । इति त्रिकाण्डशेषः ॥

काञ्चनं, क्ली, (काञ्चते दीप्यते इति । कचि ड दीप्तौ + ल्युः ।) स्वर्णम् । इत्यमरः । २ । ६ । ९५ ॥ (यथा मनुः । २ । २३९ ।

"अभिचाद्यपि सङ्घुष्टमेध्यादपि काञ्चनम्" ॥)

पद्मकेशरम् । इति मेदिनी ॥ धनम् । नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥ (भावे ल्युट् । दीप्तिः । काञ्चनमये त्रि, यथा, मनुः । ५ । ११२ ।

काञ्चना

"निर्ल्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति" ॥)

काञ्चनः, पुं, (काञ्चते दीप्यते इति कर्त्तरि ल्युः ।) स्वनामख्यातपुष्पवृक्षविशेषः । रक्तश्वेतभेदेन स द्विविधः । आद्यस्य पर्य्यायः । रक्तपुष्पः २ कोविदारः ३ युग्मपत्रः ४ कुद्दालः ५ ॥ द्वितीयस्य पर्य्यायः । काञ्चनालः २ कर्ब्बुदारः ३ धाकारिः ४ । इति रत्नमाला ॥ अस्य राजनिर्घण्टोक्तगुणपर्य्यायौ कोविदारशब्दे द्रष्टव्यौ ॥ * ॥ चम्पकः । नागकेशरः । उदुम्बरः । धुस्तूरः । इति मेदिनी ॥ (गुरुरवसो वंश उद्भवस्य भीमस्य पुत्रः । यथा, भागवते । ९ । १५ । ३ ।

"भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः" ॥)

काञ्चनकं, क्ली, (काञ्चन + संज्ञायां कन् ।) हरितालम् । इति राजनिर्घण्टः ॥

काञ्चनकः, पुं, (काञ्चन + स्वार्थे कन् ।) कोविदारवृक्षः । इति वैद्यकम् ॥

("काञ्चनारः काञ्चनको गण्डारिः श्रोणपुष्पकः" । इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ गुणादयोऽस्य कोविदारशब्दे ज्ञेयाः ॥)

काञ्चनकदली, स्त्री, (काञ्चनवर्णा कदली ।) सुवर्णकदली । इति राजनिर्घण्टः । चाँपाकला इति भाषा ॥

काञ्चनकारिणी, स्त्री, (काञ्चनं बन्धमूलेन बन्धनं करोति । काञ्चन + कृ + णिनिः । स्त्रियां ङीप् ।) शतमूली । इति शब्दचन्द्रिका ॥ (शतावरी शब्दे ऽस्या विवरणं बोद्धव्यम् ॥)

काञ्चनक्षीरी, स्त्री, (काञ्चनमिव क्षीरमस्याः । गौरादित्वात् ङीष् । काञ्चनवृक्षस्य क्षीरमिव क्षीरमस्य वा ।) क्षीरिशोभना । इति राजनिर्घण्टः ॥

काञ्चनगिरिः, पुं, (काञ्चनमयो गिरिः । शाकपार्थिवादित्वात् समासः ।) सुमेरुपर्व्वतः । इति हेमचन्द्रः । (यथा भागवते । ५ । १६ । २८ ।

"जठरदेवकूटौ मेरुं पूर्ब्बेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृङ्गमकरौ अष्टाभिरेतैः परिस्तृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः" ॥ दानाय ज्ञातः सुवर्णपर्व्वतः ॥)

काञ्चनपुष्पकं, क्ली, (काञ्चनमिव पीतं पुष्पं यस्य । काञ्चनपुष्प + कप् ।) आङ्खल्यवृक्षः । इति राजनिर्घण्टः ॥

काञ्चनपुष्पी, स्त्री, (काञ्चनमिव पुष्पं यस्याः ङीप् ।) गजिकारीवृक्षः । इति राजनिर्घण्टः ॥ (गजिकारिका शब्दे ऽस्या विशेषो ज्ञातव्यः ॥)

काञ्चनारः, पुं, (काञ्चनं वर्णं ऋच्छति पुष्पैः । काञ्चन + ऋ + अण् ।) कोविदारवृक्षः । इति राजनिर्घण्टः ॥ कचनार इति हिन्दी भाषा ॥ ("काञ्चनारः काञ्चनकः" इत्यादि पर्य्यायाः काञ्चनकशब्दे गुणाश्च कोविदारशब्दे ज्ञातव्याः ॥ व्यवहार्य्यते यत्र तद्यथा,—

"काञ्चनारत्वचः क्वाथः सुरठीचूर्णेन नाशयेत् ।
गण्डमालान्तथाक्वाथः क्षौद्रेण वदरत्वचः" ॥

काञ्जिकं

इति मध्यखण्डे २ अः शार्ङ्गधरेणोक्तम् ॥)

काञ्चनालः, पुं, (काञ्चनं काञ्चनवर्णं अलति । काञ्चन + अल + अण् ।) कोविदारवृक्षः । इति शब्दरत्नावली ॥ (काञ्चनारशब्देऽस्य गुणादयो ज्ञेयाः ॥ अस्य विवृतिः कोविदारशब्दे द्रष्टव्या ॥)

काञ्चनाक्षयः, पुं, (काञ्चनं स्वर्णं आक्षयते स्पर्द्धते स्वभासा । आ + क्षे + कः । काञ्चन इत्याक्षयो नाम यस्य वा ।) नागकेशरवृक्षः । इत्यमरः । २ । ४ । ६५ ॥

काञ्चनी, स्त्री, (काञ्चते दीप्यते अनया । कचि ल्युट् ङीप् ।) हरिद्रा । इति मेदिनी ॥ स्वर्णक्षीरीवृक्षः । गोरोचना । इति राजनिर्घण्टः ॥

काञ्चनीया, स्त्री, (काञ्चनाय हिता । काञ्चन + छः टाप् च ।) गोरोचना । इति राजनिर्घण्टः ॥

काञ्चिः, स्त्री, (काञ्चते इति "सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् ।) काञ्ची । इत्युणादिकोषः ॥ (यथा आर्य्यासप्तशती ६९३ ।

"हृतकाञ्चिवल्लिबन्धोत्तरजघनादपरभोगसुक्षायाः ।
उल्लसति रोमराजिः स्तनशृम्भोर्गरलरेखेव" ॥)

काञ्चिकं, क्ली, (काञ्चि + संज्ञायां कन् ।) काञ्जिकम् । इति हेमचन्द्रः ॥

काञ्ची, स्त्री, (काञ्चि, "शृदिकारादिन्तत्वात्" वा ङीष् ।) स्त्रीकट्याभरणम् । चन्द्रहार गोट् इत्यादि भाषा । तत्पर्य्यायः । मेखला २ सप्तकी ३ रसना ४ सारसनम् ५ । इत्यमरः । २ । ६ । १०८ ॥ काञ्चिः ६ रशना ७ कक्षा ८ कक्ष्या ९ सप्तका १० सारशनम् ११ रसनम् १२ बन्धनम् १३ । इति शब्दरत्नावली ॥

("वीचिक्षोभस्खलितविहगश्रेणिकाञ्चीगुणायाः" । इति मेघदूते । ३० ॥) केचित्तु

एकयष्टिर्भवेत् काञ्ची मेखला सप्तयष्टिका ।
रसना षोड़श ज्ञेया कलापः पञ्चविंशकः" ॥

इति पठन्ति इह त्वमेदात् पर्य्यायता । इति तट्टीका ॥ मोक्षदसप्तपुर्य्यन्तर्गतपुरीविशेषः । इति मेदिनी ॥ (यदुक्तम् ।

"अयोध्या मथुरा माया काञ्ची काञ्ची ह्यवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः" ॥

इयं हि कूर्म्मविभागे दक्षिणस्यां दिशि स्थिते द्राविड़देशे अनुमीयते ॥) गुह्या । इति विश्वः ॥

काञ्चीपदं, क्ली, (काञ्च्याः पदं स्थानम् ।) जघनम् । इति हेमायुधहेमचन्द्रौ ॥

काञ्जिकं, क्ली, (अम्ल + धात्वर्थनिर्द्देशे ण्वुल् + टाप् अत इत्वञ्च । अञ्जिका । कु कुत्सिता अञ्जिका यस्मिंस्तस्य कोः कादेशः ।) वारिपर्य्युषिताम्लाञ्जनम् । काँजी इति भाषा । तत्पर्य्यायः । धारनाशकम् २ सौवीरम् ३ कुल्माषम् ४ अभियुतम् ५ अवन्तिसोमम् ६ धान्याम्लम् ७ कुल्मलम् ८ । इत्यमरः । २ । ९ । ९९ ॥ कुल्माषम् ९ कुल्माषाभियुतम् १० काञ्जिकम् ११ काञ्जीकम् १२ काञ्जिका १३ कञ्जिकम् १४ काञ्जी १५ भक्तवारि १६ धान्यमूलम् १७ धान्ययोनि १८ तुषाम्बु १९ । इति तट्टीका ॥ मूलाम् २०

महारसम् २१। इति रत्नमाला॥ तुषोदकम् २२ शुक्लम् २३ चुक्रम् २४ धातुघ्नम् २५ उन्नाहम् २६ रक्तोघ्नम् २७ कुष्ठगोलकम् २८ सवीरारसम् २९। इति हेमचन्द्रः॥ वीरम् ३० अभिशुक्लम् ३१ अम्लसारकम् ३२। अस्य गुणः। वातशोथपित्तज्वरदाहमूर्च्छाशूलाध्मानविबन्धनाशित्वम्।

"काञ्जिकं दधि तैलन्तु बदरीपलितनाशनम्। दाहकं गात्रशैथिल्यं वस्त्यं सन्तर्पणं परम्"॥ मर्दनान्न च भक्षणात्। इति राजनिर्घण्टः॥ अपि च। भेदकत्वम्। तीक्ष्णत्वम्। उष्णत्वम्। पित्तरुधिरवस्तिशुद्ध्यग्निहृद्धिकारित्वम्। स्पर्शे शीतत्वम्। अमक्षमनाशित्वञ्च। पुरातनस्य तस्य गुणः। कृत्याकुष्ठकृमिरोगनाशित्वम्। अग्निहृद्धिकारित्वञ्च। इति राजवल्लभः॥*॥

"कुल्माषधान्यमण्डेन चाप्लुतं काञ्जिकं भवेत्॥ यन्मस्त्वादिप्लुतौ भाण्डे स गुडश्चौद्रकाञ्जिकम्। धान्यराशौ चिरात्स्थं शुक्लं चुक्रं तदुच्यते"॥ इति वैद्यकपरिभाषा॥

काञ्जिकवटकः, पुं, (काञ्जिकयोगेन कृतो वटकः।) वटकविशेषः। काँजि वड़ा इति भाषा। तस्य पाकप्रकारो यथा,—

"मञ्जनी नूतना धार्य्या कटुतैलेन लेपिता। निर्म्मलेनाम्बुनापूर्य्य तस्माच्चूर्णं विनिक्षिपेत्॥ राजिकाजीरवणहिङ्गुसुरठीनिशाक्षतम्। निक्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्रयेत्॥ ततो दिनत्रयादूर्द्धमस्माः स्युर्वटका ध्रुवम्"॥ अस्य गुणाः।

"काञ्जिकवटको रुच्यो वातहरः श्लेष्मकारकः शीतः। दाहं शूलमजीर्णं हरते नेत्रामयेष्वहितः"॥ इति भावप्रकाशः॥

काञ्जिका, स्त्री, (कुत्सिता ईषदा अञ्जिका।) जीवन्तीलता। पलाशीलता। इति राजनिर्घण्टः॥

काञ्ची, स्त्री (कं जलं अनक्ति। क + अन्ज + कर्म्मणि + अण्। गौरादित्वात् ङीष्।) महाद्रोणवृक्षः। इति राजनिर्घण्टः॥ काञ्जिकम्। इत्यमरटीका॥ ("तुम्बीबीजं सौद्भिदन्तु काञ्जीपिण्डं गुडीचयम्। अर्शोहरं गुदस्रंसाद्धिमाहिषमश्नुतः"॥ इति तु काञ्जिकार्थे ज्ञेयम्। इति वैद्यकचक्रपाणिसंग्रहे अर्शोऽधिकारे।)

काठः, पुं, (काष्ठते वक्ष्यते इति। कठ + कर्म्मणि घञ्।) पाषाणः। इति त्रिकाण्डशेषः॥

काठिन्यं, क्ली, (कठिनस्य भावः। कठिन + ष्यञ्।) कठिनता। यथा। "शीते मा कुरु सम्भ्रमञ्च मृदुना काठिन्यमङ्गीकृतम्"। इत्युद्भटः॥ (यथा च कुमारे। ६। ७३।

"काठिन्यं खावरे काये भवता सर्व्वमर्पितम्"॥)

काठिन्यफलः, पुं, (काठिन्यं फले यस्य।) कपित्थवृक्षः। इति राजनिर्घण्टः॥ (कपित्थशब्देऽस्य गुणादयो बोद्धव्याः॥)

काणः, पुं, (कणति एकचक्षुर्निमीलतीति। कण संज्ञायां कर्त्तरि घञ्।) काकः। इति मेदिनी॥

काणः, त्रि, (कणति एकचक्षुषा पश्यति। कण् + घञ्।) एकचक्षुः। इति मेदिनी॥ काणा इति भाषा। (यथा, मनुः। ३। २४२।

"खञ्जो वा यदि वा काणो दातुः श्रेष्ठोऽपि वा भवेत्"॥)

काणकः, पुं, (कणति शब्दायते। कण शब्दे + "शृकणिभ्यामूकोकणौ"। उणां ४। ३९। इत्यूकण्।) काकः। इत्युणादिकोषः॥

काण्डं, क्ली, (कण्यतीति। कण शब्दे + डः। बाहुलकात् दीर्घः।) सन्धिविच्छिन्नैकखण्डास्थि। यथा।

"भग्नं समासाद्विविधं ऋजाग्र-काण्डे च सन्धौ च हि तत्र सन्धौ। उत्पिण्डविश्लिष्टविवर्त्तितञ्च तिर्य्यग्गतं च्छिन्नमधश्च षट् च"॥

इति रोगविनिश्चयः॥ सन्धिविच्छिन्नमेकखण्डमस्थि-काण्डम्। काण्डेन च जलककपालवलयतरणयश्च-कानां ग्रहणम्। तच्च भग्नं काण्डभग्नम्। इति तट्टीकाव्याख्यामधुकोषः॥

काण्डः, पुं क्ली, (कण्डि दीप्तौ + अमन्तात् डः। ञ्नादिभ्यः कित् अनुनासिकस्येति दीर्घः।) दण्डः। (यथा, कात्यायनश्रौतसूत्रे ८। ७। २७।

"एषता वरत्राकाण्डेनाहन्ति"।

"वरत्राकाण्डेन वंशदण्डेन"। इति कर्कः॥) नालम्। वाणः। (यथा, महाभारते १३। ५। ३।

"विषये काशिराजस्य ग्रामान्निष्क्रम्य लुब्धकः। सविषं काण्डमादाय मृगयामास वै मृगम्"॥) शरस्तम्बः। अर्व्वा। कुत्सितः। वर्गः। (वर्गश्च एकजातीयसमवायः। यथा, भागवते। ४। २४। ९।

"क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह॥) परिच्छेदः। (यथा, अथर्व्ववेदे १२। ३। ४५।

"इदं प्रापमुत्तमं काण्डमस्य यस्माल्लोकात्परमेष्ठी समाप"॥) अवसरः। प्रस्तावः। वारि। जलम्। इत्यमरः। ३। ३। ४३॥ (यथा, हेः रामायणे २। ८९। १८।

"तान्तु गत्वा परं तीरमवरोप्य च तं जनम्। निवृत्ताः काण्डचित्राणि क्रियन्ते दाशबन्धुभिः"॥

"क्रीडार्थं काण्डचित्राणि काण्डे जले चित्राणि चित्रगमनानि लघुत्वात् क्रियन्ते स्रोतसोर्थः"॥ इति तट्टीका॥) स्तम्बः। (यथा, अमरशतके ९५।

"उरुदयं मृगदृग्भः कदलस्य काण्डौ मध्यश्च वेधिरतुलं स्तनयुग्ममस्याः"॥) इत्यादिगुच्छः। (यथा, भट्टिः ५। १८।

"दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला"॥) तरुस्कन्धः। गुँड़ि इति भाषा। (यथा, रामायणे।

"वृक्षकाण्डमितो भाति"॥ वृक्षाणां शाखा। यथा, मनुः १। ४९।

"उद्भिज्जाः स्थावराः सर्व्वे बीजकाण्डप्ररोहिणः"। "केचित्काण्डात् शाखा एव रोपिता वृक्षतां यान्ति"॥ इति तट्टीका॥ वृन्दः। समूहः। रङ्गः। निर्जनस्थानम्। इति मेदिनी॥ श्लाघा। इति हेमचन्द्रः॥ पापीयान्। इति धरणिः॥

काण्डकटुकः, पुं, (काण्डे स्तम्बे लतायामित्यर्थः कटुकस्तिक्तः।) कारवेल्लः। इति राजनिर्घण्टः॥ (कारवेल्लशब्देऽस्य विवरणं ज्ञेयम्॥)

काण्डकाण्डकः, पुं, (काण्डस्य शरस्तम्बस्य काण्डमिव काण्डं यस्य। काण्डकाण्ड + कप्।) काशतृणम्। इति राजनिर्घण्टः॥

काण्डकारं, क्ली, (काण्डं स्तम्बं किरति दीर्घतया उत्क्षिपति। काण्ड + कृ + अण्।) गुवाकः। इति शब्दमाला॥ (पुंसि तु काण्डं वाणं करोति इति काण्डकारः। वाणकारकः॥)

काण्डकीलकः, पुं, (काण्डे स्तम्बे कीलकमिव यस्य। काण्डकील + कप्।) लोध्रः। इति राजनिर्घण्टः। लोधकाठ इति भाषा॥

काण्डगुण्डः, पुं, (काण्डेन गुच्छेन गुण्डयति वेष्टयति भूमिम्। काण्ड + गुडि वेष्टने + अण्।) गुण्ड-नामतृणम्। इति राजनिर्घण्टः॥

काण्डगोचरः, पुं, (काण्डस्य वाणस्य गोचर इव गोचरो यस्य।) नाराचः। लौहमयवाणः। इति त्रिकाण्डशेषः॥

काण्डयी, स्त्री, (काण्डेन स्तम्बेन नीयतेऽसौ काण्डं नयति आत्मानं वा। काण्ड + नी + क्विप्। एषोदरादित्वात् यत्वम्।) सूक्ष्मपर्णलता। रामदूती इति ख्याता। इति शब्दचन्द्रिका॥

काण्डतिक्तः, पुं, (काण्डे स्तम्बे तिक्तः।) भूनिम्बः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—

"किराततिक्तः कैरातः कटुतिक्तः किरातकः। काण्डतिक्तो नार्य्यतिक्तो भूनिम्बो रामसेनकः"॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे। गुणादयोऽस्य किराततिक्तशब्दे ज्ञेयाः॥)

काण्डतिक्तकः, पुं, (काण्डतिक्त + स्वार्थे कन्।) भूनिम्ब वृक्षः। इति शब्दचन्द्रिका। चिराता इति भाषा॥

काण्डनीलः, पुं, (काण्डे स्तम्बे नीलः।) लोध्रः। इति राजनिर्घण्टः॥

काण्डपटः, पुं, (काण्डे काष्ठादिनिर्म्मितस्तम्भे आवरकत्वात् स्थितः पटः।) यवनी। तिरस्करिणी। इति हेमचन्द्रः। कानात् इति भाषा॥

काण्डपृष्ठा, स्त्री, (काण्डस्य वाणस्य पृष्ठ इव पृष्ठो यस्याः।) शरपुङ्खा। इति राजनिर्घण्टः॥

काण्डपुष्पं, क्ली, (काण्डात् स्तम्बं त्यक्त्वा पुष्पं यस्याः।) क्षुद्रसुगन्धिपुष्पविशेषः। इति शब्दचन्द्रिका। दोना इति भाषा॥

काण्डपृष्ठं, क्ली, (काण्डं तरुस्कन्ध इव स्थूलं पृष्ठं यस्य।) कार्म्मुकधनुः। इति महाभारतम्॥

काण्डपृष्ठः, त्रि, (काण्डः वाणः पृष्ठे यस्य।) काण्डस्पृक्। शस्त्राजीवः। इत्यमरटीकायां स्वामी॥ ("स्त्रीपूर्व्वाः काण्डपृष्ठाश्च यावन्तो भरतर्षभ!। अजया ब्राह्मणास्तेव श्राद्धे नार्हन्ति केतनम्"॥ इति महाभारते। १३। २३। २२॥) वैश्यापतौ पुं। इति दानधर्म्मः॥

काण्डवारिणी, स्त्री, (काण्डान् संग्रामापतितान् वाणान् स्मरणादेव निवारयतीति। काण्ड + वृ + णिच् + णिनिः।) दुर्गा। यथा,—

"महागजघटाटोपसंयुगे नरवाजिनाम्। स्मरणादारते वाणान् तेन सा काण्डवारिणी"॥ इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः॥

काण्डरुहा, स्त्री, (काण्डात् छिन्नस्कन्धात् रोहतीति। काण्ड + रुह + कः टाप् च।) कटुकी। इति रत्नमाला॥ (अस्याः पर्य्यायो यथा,—
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे। अस्याः गुणाः कटुकाशब्दे ज्ञेयाः॥)

काण्डर्षिः, पुं, (काण्डस्य वेदविभागस्य ऋषिः। यद्वा काण्डेषु एकजातीयक्रियादिसमवायेषु ऋषिर्विचारकः।) वेदकाण्डविभागाध्यापकमुनिभेदः। स तु जैमिन्यादिः। इति चिकाण्डशेषः॥ (जैमिनिस्तु पूर्ब्बमीमांसाशास्त्रप्रणयनेन क्रियाकाण्डस्य विचारकः। तथा वेदव्यासः उत्तरमीमांसारूपवेदान्तशास्त्रप्रणयनेन ज्ञानकाण्डस्य विचारकः। इत्यादि सूरिभिर्निरूपणम्॥)

काण्डवान्, [त्] त्रि, (काण्डः शरःप्रहरणतया अस्त्यस्य इति। काण्ड + मतुप्। मस्य वः।) काण्डीरः। इत्यमरः। २। ८। ६९॥ तीरान्दाज इति भाषा॥

काण्डसन्धिः, पुं, (काण्डस्य स्कन्धस्य सन्धिः मेलनस्थानम्।) ग्रन्थिः। इति राजनिर्घण्टः॥ पाव् गाँट इति च भाषा॥

काण्डस्पृक्, त्रि, (स्पृष्टं गृहीतं काण्डं येन निष्कान्तत्वात् परनिपातः।) काण्डपृष्ठः। शस्त्रजीवी। इत्यमरः। २। ८। ६७॥

काण्डहीनं, क्ली, (काण्डेन स्कन्धेन हीनम्।) भद्रमुस्तकम्। इति शब्दचन्द्रिका॥

काण्डिका, स्त्री, (काण्डः गुच्छः प्राशस्त्येन अस्त्यस्याः। काण्ड + ठन् + टाप्।) लङ्गानामकधान्यविशेषः। वालुकीनामकर्कटीभेदः। इति राजनिर्घण्टः॥

काण्डीरः, त्रि, (काण्डः वाणः अस्त्यस्य। काण्ड + "काण्डाण्डादीरन्नीरचौ"। ५। २। ११९। इति ईरन्।) काण्डास्त्रवान्। इत्यमरः। २। ८। ६९॥ तीरान्दाज इति भाषा॥ (यथा भट्टिः ४। १०।
"काण्डीरः खाण्डिकः शार्ङ्गी रक्तन् विप्रस्तनुत्रवान्"॥)

काण्डीरः, पुं, (काण्डः स्तम्बः अस्यास्तीति। काण्ड + "काण्डाण्डादीरन्नीरचौ"। ५। २। ११९। इति ईरन्।) अपामार्गवृक्षः। लताप्रभेदः। काण्डवेल इति ख्यातः। तत्पर्य्यायः। काण्डकटुकः २ नासासंवेदनः ३ षट्पुः ४ अग्रकाण्डः ५ स्तोमवल्ली ६ कारवल्ली ७ सुकाण्डिका ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। सारकत्वम्। दुष्टव्रणलूतागुल्मोदरकीटमूलमन्दाग्निनाशित्वञ्च। इति राजनिर्घण्टः॥

काण्डीरी, स्त्री, (काण्डीर + गौरादित्वात् ङीष्।) मक्षिका। इति रत्नमाला॥ काण्डीरा इत्यपि पाठः॥ (मक्षिकाशब्देऽस्या गुणादयो ज्ञातव्याः॥)

काण्डेक्षुः, पुं, (काण्डे इक्षुरिव।) कोकिलाक्षवृक्षः। इत्यमरः। २। ४। १०४॥ कुलिया खाड़ो इति भाषा॥ (अस्य पर्य्यायाः। यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥
"कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः।
भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षु वाटिका"॥
गुणाऽस्य क्षुरकशब्दे ज्ञेयाः॥) काण्डेक्षवम्। इति राजनिर्घण्टः॥

काण्डेरी, स्त्री, (काण्डं वाणाकारं पृष्ठं ईर्त्ते। काण्ड + ईरङ् गतौ + अण्। गौरादेराकृतिगणत्वात् ङीष्।) नागदन्तीवृक्षः। इति रत्नमाला॥

काण्डेरुहा, स्त्री, (काण्डे रोहति इति कः टाप्। सप्तम्या अलुक्।) कटुकी। इति रत्नमाला॥ (कटुकीशब्दे ऽस्या विशेषो बोध्यः॥)

कातरः, त्रि, (कु कष्टेन तरतीति। कु + तॄ + अच्। कोः कादेशः।) व्यसनाकुलचित्तः। व्याकुलः। तत्पर्य्यायः। अधीरः २। इत्यमरः। ३। १। २६॥ (यथा रघुः ११। ७८।
"कातरोऽसि यदि वोढुतार्चिषा
तर्ज्जितः परसुधारया मम"॥)

कातरः, पुं, (कं जलं आतरति। क + आ + तॄ + अच्।) कातलमत्स्यः। इति शब्दरत्नावली॥

कातलः, पुं, (कातर एव स्वार्थे कः। अयं हि रोहितादिवत् न तेजस्वी अतोऽस्य तथात्वम्। यद्वा, कस्य जलस्य तलं स्पृश्यत्वेन न अस्ति अस्य। अर्शआदित्वादच्।) मत्स्यविशेषः। कात्ला इति भाषा। तस्य गुणाः। उष्णत्वम्। मधुरत्वम्। गुरुपाकित्वम्। चिदोषकारित्वञ्च। इति राजवल्लभः॥ (यथा, वैद्यके।
"कातलो मधुरस्निग्धो गुरुपाकी चिदोषजित्"॥)

कात्यं, क्ली, (कुत्सितं त्यं त्सुं त्रं वा। कोः कादेशः।) रोहितमत्स्यम्। इति राजनिर्घण्टः॥

कात्यः, पुं, (कतस्य ऋषेर्गोत्रापत्यं। कत + "गर्गादिभ्यो यञ्"। ४। १। १०५। इति यञ्।) कात्यायनमुनिः। इति चिकाण्डशेषः॥

कात्यायनः, पुं, (कतस्य गोत्रापत्यम्। गर्गादित्वात् यञ् यञन्तत्वात् यनिञ्।) धर्म्मशास्त्रकर्त्तृमुनिविशेषः। (यथोक्तं याज्ञवल्क्येन १। ४। ५।
"मन्वत्रि विष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसम्वर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः"॥
वररुचिः। इति मेदिनी॥

कात्यायनी, स्त्री, (कतस्यापत्यं स्त्री। "गर्गादिभ्यो यञ्"। ४। १। १०५। इति यञ्। "सर्व्वत्रौहितादिकतस्तेभ्यः"। ४। १। १८। इति ङ्यः। ङित्वात् ङीष्।) दुर्गा। (यथा मार्कण्डेये ९१। २३।
"एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्।
पातु नः सर्व्वभूतेभ्यः कात्यायनि नमोऽस्तुते"॥)
अर्द्धऋचा कात्यायवसगा विधवा। इत्यमरः। २। ६। १७॥ (याज्ञवल्क्यमुनेः पत्नीरेका पत्नी। यदुक्तं बृहदारण्यकोपनिषदि। "याज्ञवल्क्यस्य द्वे भार्य्ये बभूवतुः मैत्रेयी कात्यायनी च। तयोर्हि मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायनी"॥ पत्न्यां ङीष्। कात्यायनस्य नप्तरि पत्नी"॥)

कादम्बः, पुं, (कदम्बे समूहे भवः। कदम्ब + अण्।) कलहंसः। वालि हाँस इति भाषा। इत्यमरः। २। ५। २३। (यथा रघुः। १३। ५५।
"क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पङ्क्तिः"॥)
अस्य मांसस्य गुणाः। वायुरक्तपित्तनाशित्वम्। भेदकत्वम्। शुक्रकारित्वम्। शीतत्वञ्च। इति राजवल्लभः॥ (कदम्ब एव। स्वार्थे अण्।) कदम्बवृक्षः। इत्यमरटीकायां भरतः॥ (कदम्बस्येदमिति व्युत्पत्त्या अण्। कदम्बसम्बन्धिनि, त्रि। कदम्बकुसुमम्। यथा रघुः १३। २७।
"गन्धर्व्व धाराहतपल्वलानां
कादम्बमर्द्धोद्धृतकेसरञ्च"॥)
वाणः। इति मेदिनी॥

कादम्बकः, पुं, (कादम्ब + स्वार्थे कन्।) वाणः। इति हारावली॥

कादम्बरं, क्ली, (कादम्बम् कदम्बोद्भवं रसं ज्ञाति गृह्णातीति। कदम्ब + ज्ञा + कः। ज्ञस्य रः।) कदम्बपुष्पोद्भवमद्यम्। इति मेदिनी॥ (यथा, माघे।
"निषेव्य मधुमाधवाः सरसमत्र कादम्बरम्"॥)
दधिसारः। इति हेमचन्द्रः॥ घृतम्। इति विश्वः॥ (इक्षुजातगुड़ादि। इति मल्लिनाथः॥)

कादम्बरः, पुं, (कादम्बं कदम्बरसवत् ज्ञाति गृह्णातीति। ज्ञा + कः। ज्ञस्य रश्च।) दध्यम्। दधिसरः। इति मेदिनी॥

कादम्बरी, स्त्री, (कु शब्दवर्णं नीलवर्णमित्यर्थः अम्बरं वस्त्रं यस्याः। कोः कादेशः। कादम्बरो बलरामस्तस्य प्रिया। कदम्बर + अण् ततः स्त्रियां ङीप्। यद्वा कादम्बे जाते रसः कादम्बः। "तत्र जातः"। ४। ३। २५। इत्यण्। कादम्बं राति ददातीति। रादाने + "आतोऽनुपसर्गे कः"। ३। २। ३। इति कः। गौरादित्वात् ङीष्।) मदिरा। इति मेदिनी॥ (यथा,—
"कादम्बरीमदविघूर्णितलोचनस्य
युक्तं हि लाङ्गलभृतः पतनं पृथिव्याम्"॥
इत्युद्भटः॥) कोकिला। सरस्वती। शारिकापक्षिणी। इति मेदिनी॥ (बाणभट्टविरचितकाव्यविशेषः। स्वनायिकानाम्नैव प्रसिद्धोऽयं ग्रन्थः। इयं कादम्बरी तु बाणभट्टेनासमाप्ता पुनरस्य पुत्रेण समाप्तिं नीता॥ नायिकाविशेषः। सातु तुम्बुरुप्रभृतीनां कन्यां गन्धर्व्वाणां ज्येष्ठस्य हंस इत्याख्यया प्रसिद्धस्य गन्धर्व्वस्य कन्या। अस्या जननी मेनामयूखसम्भवाप्सरसां कुले जाता गौरीति नाम्ना प्रसिद्धा। अस्या अन्यद्विवरणन्तु कादम्ब्यां द्रष्टव्यम्॥)

कादम्बरीबीजं, क्ली, (कादम्बर्य्याः बीजं आसवः।) सुरावीजम्। इति रत्नमाला॥

कादम्बर्य्यः, पुं, (कादम्बर्य्यै हितः इति यत्।) कदम्बवृक्षः। इति जटाधरः॥

कादम्बा, स्त्री, (कादम्ब इव आचरति। कादम्ब + आचारे क्विप् + अच् + टाप्।) कदम्बपुष्पीवृक्षः।

इति शब्दचन्द्रिका ॥ मुखिरी इति भाषा ॥

कादम्बिनी, स्त्री, (कादम्बाः कलहंसाः सन्ति अस्यां । कादम्ब + इनि ङीष् ।) मेघमाला । मेघश्रेणिः । इत्यमरः । १ । ३ । ८ ॥

कादाचित्कं, क्ली, कदाचिद्भवम् । इति मुग्धबोधव्याकरणम् ७ । १५ ॥ (यथा, साहित्यदर्पणे ३ । २७ ।
"यद्यपि रसाभिन्नतया चर्व्वणस्यापि न कार्य्यत्वं तथापि तस्य कादाचित्कतया उपचरितेन कार्य्यत्वेन कार्य्यत्वमुपचर्य्यते" ॥)

कादवेयः, पुं, (कद्रोरपत्यं पुमान् । कद्रु + "सुभ्रादिभ्यश्च" । ४ । १ । १२३ । इति ढक् । "ढे लोपोऽकाद्वाः" । ६ । ४ । १४ । इति न लोपः ।) कद्रुसन्तानः । नागः । इत्यमरः । १ । ८ । ४ ॥
(यथा, महाभारते १ । ६५ । ४१ ।
"शेषोऽनन्तो वासुकिश्च तक्षकश्च सुजङ्गमः ।
कूर्म्मश्च कुलिकश्चैव कादवेयाः प्रकीर्त्तिताः" ॥)

कानकं, क्ली, (कनकं फलमिव उग्रं फलं अस्यास्य । कनक + अण् ।) जयपालवीजम् । अस्य गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । सारकत्वम् । उत्क्लेदकारित्वञ्च । इति राजवल्लभः ॥ (वैद्यकचक्रपाणिसंग्रहे दन्तिखिंनादगुग्गुलौ व्यवहारोऽस्य यथा ।
"सहस्रं कानकफलं सिद्धे संचूर्ण्य निक्षिपेत् ।
ततो मासद्वयं जग्ध्वा पिबेत्तप्तजलादिकम्" ॥)

काननं, क्ली, (कं जलं अननं जीवनमस्य । यद्वा काननयति दीपयति । कनदीप्तौ + णिच् + ल्युट् ।) वनम् । (यथा, मेघदूते ४४ ।
"प्रीतो वायुः परिणमयिताकाननोदुम्बराणाम्" ॥
कस्य ब्रह्मणः आननं मुखम् ।) ब्रह्मणो मुखम् । गृहम् । इति मेदिनी ॥

काननारिः, पुं, (काननस्य अरिरिव । अग्नीगर्भोत्थितेनाग्निना सर्व्वकाननस्य दहनात् तथात्वम् ।) अग्नीवृक्षः । इति शब्दचन्द्रिका ॥ (अस्य गुणादयः अग्नीशब्दे द्रष्टव्याः ॥)

कानीनः, पुं स्त्री, (कन्यायां अनूढायां जातः कन्याया जातो वा । कन्या + "कन्यायाः कनीन च" । ४ । १ । ११६ । इति अण् कनीनादेशश्च ।) अनूढापुत्रः । तत्पर्य्यायः । कन्यकाजातः २ । इत्यमरः । २ । ६ । २४ ॥ सा कन्या यदनूढा पितृगृह एव तिष्ठति तदा तत्पुत्रो मातामहस्यैव यथा,—
"कानीनः कन्यकाजातो मातामहसुतो मतः" ॥
इति याज्ञवल्क्यः ॥ यदूढा तदा वोढुरेव यथा,—
"पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुःकन्यासमुद्भवम्" ॥
इति मनुः ॥ व्यासे कर्णे च पुं । इति मेदिनी ॥

कान्तं, क्ली, (कनते दीप्यते इति । कन + कर्त्तरि क्तः ।) कुङ्कुमम् । इति राजनिर्घण्टः ॥ लौहविशेषः । तस्य लक्षणं यथा,—
"स्वादुर्यत्र भवेन्निम्बकल्को रात्रिन्दिवोषितः ।
कान्तं तदुत्तमं यत्र रूप्येणावर्त्तितं भिद्येत्" ॥
तस्य परीक्षा । यथा ।
पात्रे यस्मिन् विसरति जले तैलबिन्दुर्निबिद्धो
विद्वं गन्धं विसृजति निजं रूपितं निम्बकल्कैः ।
पाके दुग्धं भजति शिखराकारतां नैति भूमौ
कान्तं लौहं तदिदमुदितं लक्षणोक्तं न चान्यत्" ॥
इति सुखबोधः ॥ अपि च ।
"यत्पात्रे न प्रसरति जले तैलबिन्दुर्निबिक्तो
हिङ्कुर्गन्धं त्यजति भजते स्वादुतां निम्बकल्कः ।
पाथः दुग्धं भवति सिकतापुञ्जवन्नैति भूमौ
लक्षाङ्कः स्यात् सजलचणकः कान्तलौहं वदन्ति" ॥
इतिवैद्यकम् ॥ (वैद्यकरसेन्द्रसारसंग्रहे दृहत्सर्व्वज्वरहरलौहेऽस्य व्यवहारो यथा,—
"पारदं गन्धकं शुद्धं ताम्रमभ्रञ्च माक्षिकम् ।
हिरण्यं तारताक्ष्यञ्च कर्षमेकं पृथक् पृथक् ॥
मृतं कान्तं पलं देयं सर्व्वमेकीकृतं शुभम्" ॥)

कान्तः, त्रि, (काम्यते इति । कम् + कर्म्मणि क्तः "यस्य विभाषा" । ७ । २ । १५ । इति नेट् । अनुनासिकस्येति दीर्घः ।) मनोरमः । शोभनः । इत्यमरमेदिनीकरौ ॥ (यथा,
"मलिनमपि मृगाक्ष्या वल्कलं कान्तरूपं
न मनसि रुचिभङ्गं खल्वमप्यादधाति" ।
इति शाकुन्तले १ अङ्के ॥)

कान्तः, पुं, (कम् + क्तः ।) श्रीकृष्णः । चन्द्रः । इति शब्दरत्नावली ॥ पतिः । (यथा मेघदूते । १०९ ।
'कान्तोदन्तः सुहृदुपनतः सङ्गमात् किञ्चिदूनः' ॥)
चन्द्रसूर्य्ययोः पर्य्यायान्तः शिला । यथा । चन्द्रकान्तसूर्य्यकान्तायस्कान्तादयः । इति मेदिनी ॥ हिज्जलवृक्षः । वसन्त ऋतुः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते १३ । १४९ । ४५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥
शिवः । यथा, तत्रैव १३ । १७ । १४८ ।
"गुरुः कान्तो निजः सर्गः पवित्रं सर्व्वपावनः" ॥
कार्त्तिकेयः । यथा, तत्रैव २ । २३१ । ४ ।
"कामजित् कामदः कान्तः सत्यवागनुवनेश्वरः" ॥)

कान्तपत्री, [न्] पुं, (कान्तस्य कार्त्तिकेयस्य पत्री । मयूरस्य कार्त्तिकेयवाहनत्वात्तथात्वम् ।) मयूरः । इति शब्दचन्द्रिका ॥

कान्तपुष्पः, पुं, (कान्तानि मनोरमाणि पुष्पाण्यस्य ।) कोविदारवृक्षः । इति राजनिर्घण्टः ॥

कान्तलकः, पुं, (कान्तं लक्ष्यते आस्वाद्यते । कान्त + लक आस्वादने + घञर्थे कः । यद्वा काम्यते इति "मति बुद्धिपूजार्थेभ्यश्च क्तिः" । ३ । २ । १८८ । इति क्तिः । कान्तिः । ततः लकतीति । लक + अच् । कान्तिरासौ लकश्चेति ।) नन्दीवृक्षः । इत्यमरः । २ । ४ । १२८ ॥ तुँद इति भाषा ॥

कान्तलोहं, क्ली, (कान्तं लौहश्रेष्ठत्वात् कमनीयं लोहम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥ (अस्य परीक्षादिकं कान्तशब्दे द्रष्टव्यम् ॥ अस्य निरुत्थीकरणं यथा, ॥
"शुद्धस्य सूतराजस्य भागौ भागद्वयं बलेः ।
द्वयोः समं लौहचूर्णं मर्द्दयेत् कन्यकाद्रवैः ॥
यामद्वयं ततो गोलं स्थापयेत्ताम्रभाजने ।
आच्छाद्यैरण्डजैः पत्रैरुच्चो यामद्वयाद्भवेत् ॥
चिदिदं धान्यराशिस्थं तत्ततोमर्द्दयेद्दृढम् ।
रजताद्दलगणितं नीरे तरति हंसवत् ॥

कान्तारः

तोद्भूतं सुखं कान्तलोहं निरुत्थं जायते भद्रम्"
"ततः कोटिसहस्रैर्व्वा कान्तलोहं महागुणम्" ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

कान्ता, स्त्री, (काम्यते असौ । कम् + णिच् + कर्म्मणि क्तः + टाप् ।) नारी । (यथा मृच्छकटिकायां ६ ।
"झटिति प्रविश गेहं मावहिस्तिष्ठ कान्ते !
ग्रहणसमयवेला वर्त्तते भीतरक्ष्णोः ।
अयि ! सुविमलकान्तिं वीक्ष्य नूनं स राजयक्ष्मसति तव मुखेन्दुं पूर्णचन्द्रं विहाय" ॥) प्रियङ्गुवृक्षः । इति मेदिनी ॥ सर्व्वाङ्गसुन्दरी स्त्री । इत्यमरः । २ । ६ । ३ ॥
(गङ्गा यथा, काशीखण्डे २९ । ४३ ।
"कूटस्था करुणा कान्ता कूर्म्मयाना कलावती" ॥)
वृहदेला । रेणुका । नागरमुस्ता । इति राजनिर्घण्टः ॥

कान्ताङ्घ्रिदोहदः, पुं, (कान्तायाः स्वङ्घ्रिणा चरणस्पर्शेनैव दोहदः पुष्पोद्गमो यस्य । "पादाघातादशोको विकशति" इति कविप्रौढोक्तेस्तथात्वम् ।) अशोकवृक्षः । इति त्रिकाण्डशेषः ॥

कान्ताचरणदोहदः, पुं, (कान्ताचरणेन रमणीचरणस्पर्शेन दोहदः पुष्पोद्गमो यस्य । "पादाघातादशोको विकशति" । इति कविप्रौढोक्तेस्तथात्वम् ।) अशोकवृक्षः । इति भूरिप्रयोगः ॥

कान्तायसं, क्ली, (अय एव आयसम् । कान्तं कमनीयं आयसम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥

कान्तारं, क्ली, (कस्य सुखस्य अन्तं ऋच्छति गच्छतीति । कान्त + ऋ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) उपसर्गादि । (कान्तं मनोज्ञं ऋच्छति प्राप्नोतीति । कर्म्मण्यण् ।) काननम् । (यथा, रघेः रामायणे २ । २८ । ५ ।
"सीते विमुञ्चतामेषा वनवासकृता मतिः ।
बहुदोषं हि कान्तारं वनमित्यभिधीयते" ॥)
पद्मविशेषः । इति हेमचन्द्रः ॥

कान्तारः, पुं, (कान्तं मनोज्ञं रसं ऋच्छति प्राप्नोति । कान्त + ऋ + अण् ।) इक्षुविशेषः । कतारे इति हिन्दी भाषा । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"कान्तार तावसाविक्षुवंशकानुगुणौ मतौ" ।)
अस्य गुणाः । गुरुत्वम् । शुक्रश्लेष्मरक्तकारित्वम् । दृंहणत्वम् । सारकत्वञ्च । इति भावप्रकाशः ॥ कोविदारवृक्षः । वंशः । इति राजनिर्घण्टः ॥

कान्तारः, पुं, क्ली, (कस्य सुखस्य अन्तं ऋच्छति यत्र । हिंसकजन्तुत्वात् । कान्त + ऋ + आधारे घञ् ।) महावनम् । (यथा, गोः रामायणे । ४ । ४३ । ११ ।
"कैकेयान् सिन्धुसौवीरान् कान्तारगिरयश्च ये ।
गिरिजालावृतां दुर्गां मार्गध्वं पश्चिमां दिशम्" ॥)
दुर्गमपथः । इत्यमरः । ३ । १ । ७१ ॥ (उक्तञ्च—
"सिंहद्विपकरीन्द्रकपोतमूषकलिलं रक्षाक्षसुक्षाफलम् कान्तारे वदरीभमादभुतमगाद्विच्छस्य पत्नी मुदा" इति ।) विलम् । छिद्रम् । इति मेदिनी ॥

कान्यकु

कान्तारकः, पुं, (कान्तार + स्वार्थे कन् । इक्षुविशेषः । इत्यमरः । २ । ४ । १६३ ॥ काजले आक् इति भाषा ॥

कान्तारी, स्त्री, (कान्तार + गौरादित्वात् ङीष् ।) इक्षुभेदः । काजले आक् इति भाषा । अस्या गुणाः । मधुरत्वम् । लघुत्वम् । क्षाररसत्वम् । कफवातकारित्वञ्च । इति राजवल्लभः ॥

कान्तिः, स्त्री, (कमु कान्तौ क्तिन् दीप्तौ वा + भावे क्तिन् ।) दीप्तिः । तत्पर्य्यायः । शोभा २ द्युतिः ३ छविः ४ । इत्यमरः । १ । ३ । १० ॥ प्रभा ५ दीप्तिः ६ भा ७ श्रीः ८ भासा ९ भाः १० । इति शब्दरत्नावली ॥ अभिख्या ११ । इति जटाधरः ॥ * ॥ (यथा, विष्णुपुराणे १ मांशे ८ । २३ ।

"शशाङ्कः श्रीधरः कान्तिः श्रीरस्यैवानपायिनी" ॥)

कान्तिकारकपर्य्यायो यथा । रश्मि १ उष्मसि २ वेति ३ वेनति ४ वेसति ५ वाञ्छति ६ वष्टि ७ वनोति ७ भूषते ९ हर्षति १० आचके ११ उशिक् १२ मन्यते १३ क्लन्तसत् १४ चाकनत् १५ चकमानः १६ कमति १७ कानिषत् १८ इत्यष्टादशकान्तिकर्म्माणः । इति वेदनिघण्टौ २ अध्यायः ॥ स्त्रीशोभा । इति हेमचन्द्रः ॥ (यथा साहित्यदर्पणे ।

"रूपयौवनलावण्यं भोगाद्यैरङ्गभूषणम् ।
शोभा प्रोक्ता सैव कान्तिर्मन्मथाप्यायिता द्युतिः" ॥)

इच्छा । स्पृहार्थकमधातोर्भावे क्तिन् प्रत्ययः । दुर्गा । यथा,—देविपुराणे देवीनिरुक्तनाम ४५ अध्याये ॥

"स्तुतिः सिद्धिरिति ख्याता श्रिया संश्रयणाच्च या ।
लक्ष्मीर्वा लसना वापि क्रमात् सा कान्तिरुच्यते" ॥

(गङ्गा । यथा, काशीखण्डे गङ्गास्तोत्रे २९ । ४० ।

"कुमुदती कमलिनी कान्तिः कल्पितदायिनी" ॥

"कान्तिश्चन्द्रतेजोरूपा" । इति तट्टीका ॥)

कान्तिदं, क्ली, (कान्तिं याति नाशयतीति । कान्ति + दो + क ।) पित्तम् । इति शब्दचन्द्रिका ॥ (कान्तिं ददातीति । कान्ति + दा + कः ।) शोभादायके त्रि ॥

कान्तिदा, स्त्री (कान्तिद + टाप् ।) वाकुचीवृक्षः । सोमराजी इति ख्याता । इति राजनिर्घण्टः ॥

कान्तिदायकं, क्ली, (कान्तिं ददातीति । कान्ति + दा + ण्वुल् ।) कालीयकवृक्षः । इति जटाधरः ॥ शोभादायके त्रि ॥

कान्दविकः, त्रि, (कन्दौ संस्कृतं कान्दवं । कन्दु + अण् । कान्दवं पण्यं अस्य "तदस्य पण्यम्" । ४ । ४ । ५१ । इति ठक् ।) आपूपिकः । पूपविक्रयकर्त्ता । इत्यमरः । २ । ९ । २८ ॥

कान्दिगभूतः, त्रि, (कां दिशं गच्छामि इत्याकुलीभूतः । कान्दिश + भू + कर्त्तरि क्तः ।) भयेन पलायितः । इति पुराणम् ॥

कान्दिशीकः, त्रि, (कां दिशं यामि इत्याह । तदा हेति मा शब्दादिश्य उपसङ्ख्यानमिति ठक् एषोदरादित्वात् साधुः ।) भयद्रुतः । भयेन पलायितः । इत्यमरः । ३ । १ । ४२ ॥

कान्यकुब्जं, क्ली, (कन्याः कुब्जा न्युब्जीकृता वायुना यत्र । ततः स्वार्थे अण् ।) गङ्गातीरस्थपुरविशेषः । कनौज इति भाषा । तत्पर्य्यायः । महोदयम् २ कन्याकुब्जम् ३ गाधिपुरम् ४ कौशम् ५ कुशस्थलम् ६ । इति हेमचन्द्रः ॥ (यथा, महाभारते ३ । ११५ । १९ ।

"एतस्मिन्नेव काले तु पृथिव्याः पृथिवीपतिः ।
कान्यकुब्जे महानासीत् पार्थिवः सुमहाबलः ।
गाधीति विश्रुतो लोके वनवासं जगाम ह" ॥

एतद्पुरविवरणं कन्याकुब्जशब्दे द्रष्टव्यम् ॥)

कान्यजा, स्त्री, (कात् जलात् अन्यस्मिन् जायते । कान्य + जन + डः + टाप् ।) नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कापटिकः, पुं, (कपटेन चरति इति ठक् ।) क्षपणः । अन्यमर्म्मज्ञः । ("तत्र परमर्म्मज्ञः प्रगल्भश्चारः कपटव्यवहारित्वात् कापटिकः । तं वृत्त्यर्थिनमर्थमानाभ्यामुपगृह्य रहसि राजा ब्रूयात् यस्य दुर्वृत्तं पश्यसि तत् तदानीमेव मयि वक्तव्यम् । इति मनुसंहितायां ७ । १५४ । श्लोकस्य टीकायां कुल्लूकभट्टः ।) शठे त्रि । इति मेदिनी ॥

कापट्यं, क्ली, (कपटस्य कार्य्यं भावो वा । कपट + ष्यञ् ।) कपटता । शठता । कपटशब्दात् भावार्थे ष्यञ्प्रत्ययः ॥ इति मुग्धबोधव्याकरणम् ।

कापथः, पुं, (कुत्सितः पन्थाः । कु + पथिन् + अच् । "कापथ्यक्षयोः" । ६ । ३ । १०४ । इति कादेशः ।) कुत्सितपथः । तत्पर्य्यायः । अध्वः २ दुरध्वः ३ विपथः ४ कदध्वा ५ । इत्यमरः । २ । १ । १६ ॥ कुपथः ६ असत्पथः ७ कुत्सितवर्त्म ८ । इति शब्दरत्नावली ॥ ("आख्यातुं कापथं दुःखं विषमम् वङ्कटकण्टकम्" ॥ इति हेः रामायणे । २ । १०८ । ७ ॥)

कापालं, क्ली, (कपालमेव कपालस्येदं वा । कपाल + अण् ।) अष्टादशकुष्ठान्तर्गतवातिककुष्ठम् । इति माधवकरः ॥ अस्य निदानं कपालशब्दे द्रष्टव्यम् ॥

कापालः, पुं, (कपाल + अण् ।) कर्कटः । इति शब्दचन्द्रिका रत्नमाला च ॥ काकड़ा इति भाषा ॥

कापालिकः, पुं, (कपालेन नृकपालेन चरति अभ्यवहारादिकं करोतीति । कपाल + ठक् ।) वर्णसङ्करजातिविशेषः । इति तन्त्रसारः ॥ कापालि इति भाषा । वामाचारिविशेषः । यथा,—

"अथ तीर्थकरायणीं प्रतस्थे
कापालिकजालकं विजेतुम्" ।

इति शङ्करविजयः ॥ (योगिविशेषः । यथा हठयोगदीपिकायां १ । ८ ।

"भानुको नारदेवश्च खण्डः कापालिकस्तथा" ॥

तत्सम्प्रदायश्च यथा तत्रैव ३ । ९९ ।

"निषेव्यते शीतलमध्यधारा
कापालिके खण्डमते ऽमरोली" ॥

"कापालिकस्यायं कापालिकस्तस्मिन् कापालिके खण्डकापालिकसम्प्रदाये इत्यर्थः" ॥ इतितट्टीका ॥)

कापाली, स्त्री, (कपाल + ङीष् ।) विड्लवणम् । इति राजनिर्घण्टः ॥ (शिवः । यथा महाभारते । १३ । १७ । १०२ ।

"अजैकपाच्च कापाली त्रिशङ्कुरजितः शिवः" ॥)

कापाली

कामः

कापिलः, पुं, (कपिलेन प्रोक्तं शास्त्रं वेत्ति अधीते वा इति अण् ।) साङ्ख्यशास्त्रज्ञः । इति हेमचन्द्रः ॥ (कपिलमधिकृत्य कृतो ग्रन्थः । अण् । कपिलाधिकारेण कृत उपपुराणभेदः । यथा कूर्म्मपुराणे ।

"कापिलं मानवञ्चैव तथैवोशनसेरितम्" ॥)

पिङ्गलवर्णः । तद्वति त्रि । इत्यमरटीकायां भरतः ॥

कापिशं, क्ली, (कापिशा माधवी तत्पुष्पमधूद्भवम् । कपिशा + अण् ।) मद्यम् । इति हेमचन्द्रः ॥

कापिशायनं, क्ली, (कपिशैव स्वार्थे अण् । तत्र जातम् । "कापिशायाः ष्फक्" । ४ । २ । ९९ । इति ष्फक् ।) मद्यम् । इति जटाधरः ॥ देवता । इति धरणी ॥

कापिशेयः, पुं, (कपिशायाः अपत्यम् । ढक् ।) पिशाचः । इति चिकाण्डशेषः ॥

कापुरुषः, पुं, (कुत्सितः पुरुषः । "विभाषा पुरुषे" । ६ । ३ । १०९ । इति कोः कादेशः ।) कुपुरुषः । कुत्सितपुरुषः । इति व्याकरणम् ॥ यथा हितोपदेशे ॥

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति" ॥

कापेयः, त्रि, (कपेर्भावः कर्म्म वा । कपि + ढक् । कपिसम्बन्धी । इति हलायुधः ॥ (स्त्रियां प्रमाणं यथा, गोः रामायणे । ६ । १११ । १९ ।

"कचिन्न खलु कापेयी सैव ते चलचित्तता" ॥)

कापोतं, क्ली, (कपोतानां समूहः । अण् ।) कपोतगणः । इत्यमरः । २ । ५ । ४७ । पायरा झाँक् इति भाषा ॥ (कपोतस्येदम् । "तस्येदम्" । ४ । ३ । १२० । इत्यण् । यथा भागवते । ६ । १८ । २५ ॥

"दुर्म्मना भगवान् काव्यः पौरोहित्यं विगर्हयन् ।
स्तुवन् वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात्" ॥

कापोतीं कपोतसम्बन्धिनीं वृत्तिं परदत्तोपजीवित्वमित्यर्थः ॥) सौवीराञ्जनम् । इति राजनिर्घण्टः ॥

कापोतः, पुं, (कपोत + अण् ।) सर्जिकाक्षारः । इत्यमरः । २ । ९ । १०९ ॥ रुचकः । इति मेदिनी । कपोताभवर्णः । तद्वति त्रि । इति हेमचन्द्रः ॥

कापोताञ्जनं, क्ली, (कापोतञ्च तत् अञ्जनञ्चेति ।) सौवीराञ्जनम् । स्रोतोञ्जनम् । इत्यमरः । २ । ९ । १०० ॥

काप्यकरः, पुं, (कुत्सितं काप्यं कापं पापं करोतीति । काप्य + क्व + ताच्छील्यादौ टः ।) स्वयं कृतं पापं चित्ते आधाय यः कथयति सः । इति शब्दरत्नावली ॥

काप्यकारः, पुं, (काप्यं करोतीति । काप्य + क्व + अण् । चित्ते पापं आधाय यः शंसति सः । इति चिकाण्डशेषः ॥ स्वपापवक्ता । इति शब्दरत्नावली ॥

कापथः, पुं, (कुत्सितं फलं यस्य । कोः कादेशः ।) कटफलः । इति शब्दरत्नावली ॥

काम, अ, अभ्यनुज्ञा । इति विश्वः ॥

कामं, क्ली, (कामाय हितम् । कम + अण् ।) रेतः । निकामः । काम्यम् । इति मेदिनी ॥ बाढ़म् । अनुमतिः । इति हेमचन्द्रः ॥ (यथा माघे २ । ४३ ।

"मगागनभ्याहृत्या वा कामं क्षाम्यतु यः क्षमी" ॥

कामः पुं, (काम्यते असौ कर्म्मणि घञ् ।) काम्य

इच्छा । इति हेमचन्द्रः ॥ (यथा मनुः २ । ९४ ।
"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" ॥)
कामस्तु ब्रह्मणो हृदयाज्जातः । यथा ।
"हृदि कामो भ्रुवोः क्रोधो लोभश्चाधोरदच्छदात्" ।
इति श्रीभागवतम् ॥ (काम्यते इति । कम्मार्थे घञ् वरः । यथा रघुः २ । ६५ ।
"सन्तानकामाय तथेति कामं
राज्ञे प्रतिश्रुत्य पयस्विनी सा" ॥
कामं वरं प्रतिश्रुत्य प्रतिज्ञाय इत्यर्थः । मनोरथः । यथा तत्रैव ३ । ६७ ।
"तथेति कामं प्रतिशुश्रुवान्
रघोर्यथागतं मातलिसारथिर्ययौ" ॥
महादेवः । यथा महाभारते । १३ । १७ । ४१ ।
"गणकर्त्ता गणपतिर्दिग्वासाः काम एव च" ॥
विष्णुः । यथा तत्रैव १३ । १४९ । ७५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥)
वसुदेवः । इति शब्दरत्नावली । महाराजचूतः । इति राजनिर्घण्टः । कामदेवः । (यथा कुमारे ३ । ६४ ।
"कामस्तु वाचामवसरं प्रतीक्ष्य
पतङ्गवद्ग्निमुखं विविक्षुः" ॥)
स तु श्रीकृष्णपुत्रः । तत्पर्य्यायः । मदनः २ मन्मथः ३ मारः ४ प्रद्युम्नः ५ मीनकेतनः ६ कन्दर्पः ७ दर्पकः ८ अनङ्गः ९ पञ्चशरः १० स्मरः ११ शम्बरारिः १२ मनसिजः १३ कुसुमेषुः १४ अनन्यजः १५ पुष्पधन्वा १६ रतिपतिः १७ मकरध्वजः १८ आत्मभूः १९ ब्रह्मसूः २० विश्वकेतुः २१ । इत्यमरः १ । १ । २६–२८ ॥ * ॥ स तु पञ्चशब्दिधो यथा । कामः १ कामदः २ कान्तः ३ कान्तिमान् ४ कामगः ५ कामचारः ६ कामी ७ कामुकः ८ कामवर्द्धनः ९ रामः १० रमः ११ रमणः १२ रतिनाथः १३ रतिप्रियः १४ राज्ञिनाथः १५ रमाकान्तः १६ रममाणः १७ निष्णातरः १८ नन्दकः १९ नन्दनः २० नन्दी २१ नन्दयिता २२ पञ्चबाणः २३ रतिसखः २४ पुष्पधन्वा २५ महाधनुः २६ भामणः २७ भमणः २८ भममाणः २९ भमोऽपरः ३० भान्तः ३१ भामकः ३२ भट्टः ३३ भान्तचारः ३४ भमावहः ३५ मोहनः ३६ मोहकः ३७ मोहः ३८ मोहवर्द्धनः ३९ मदनः ४० मन्मथः ४१ मातङ्गः ४२ भट्टनायकः ४३ नायनः ४४ गीतिजः ४५ नर्त्तकः ४६ खेलकः ४७ उन्मत्तोन्मत्तकः ४८ विलासः ४९ लोभवर्द्धनः ५० ॥
"दाड़िमीकुसुमाभाश्च वामाङ्गे शक्तिसंयुताः ।
सौम्या रक्ताम्बराः सर्व्वे पुष्पबाणेक्षुकार्म्मुके ॥
बिभ्राणाः सर्व्वभूषाढ्याः कामाः पञ्चाग्रदीरिताः" ।
इति शारदातिलकटीकायां राघवभट्टः । तेषामेकपञ्चाशत्प्रकृतयो रतिशब्दे द्रष्टव्याः ॥ * ॥
तस्य स्थानानि यथा ।
"पादे गुल्फे तथोरौ च भगे नाभौ कुचे हृदि ।
कण्ठे कण्ठे च ओष्ठे च गण्डे नेत्रे श्रुतावपि ।
ललाटे शीर्षकेशेषु कामस्थानं तिथिक्रमात् ।

दक्षे पुंसां स्त्रिया वामे शुक्ले कृष्णे विपर्य्ययः ॥
पादाङ्गुष्ठे प्रतिपदि द्वितीयायाञ्च गुल्फके ।
ऊरुदेशे तृतीयायां चतुर्थ्यां भगदेशतः ॥
नाभिस्थाने च पञ्चम्यां षष्ठ्यान्तु कुचमण्डले ।
सप्तम्यां हृदये चैव अष्टम्यां कण्ठदेशतः ॥
नवम्यां कण्ठदेशे च दशम्यां ओष्ठदेशतः ।
एकादश्यां गण्डदेशे द्वादश्यां नयने तथा ॥
त्रयोदश्यां च चतुर्दश्यां ललाटके ।
पौर्णमास्यां शिखायाञ्च ज्ञातव्यञ्च इति क्रमात् ॥
यत्र स्थाने वसेत् कामस्तत्रैव नखक्षतम् ।
मन्त्रेणानेन कर्त्तव्यं ज्ञातव्यं रतिकोविदैः" ॥
इति शारदीपिका ॥ मन्त्रस्तु प्रणवादिसविन्दुप्रत्येकषोड़शस्वरयुक्तनमोऽन्तप्रत्येकचन्द्रषोड़शकलारूपः ॥ उत्पन्नमात्रशरीरिषु कामस्यानुत्पत्तिकारणं यथा । मार्कण्डेय उवाच ।
"ब्रह्मापि तनयां सन्ध्यां दृष्ट्वा पूर्व्वमथात्मनः ।
कामायाशु मनश्चक्रे त्यक्त्वा सा च सुतेति वै ॥
तस्याश्च चलितं चित्तं कामबाणविशोड़ितम् ।
ऋषीणां प्रेक्षतां तेषां मानसानां महात्मनाम् ॥
भर्गस्य वचनं श्रुत्वा सोपहासं विधिं प्रति ।
आत्मनश्चलचित्तत्वममर्ष्यादमृषीन् प्रति ॥
कामस्य तादृशं भावं मुनिमोहकरं मुहुः ।
दृष्ट्वा सन्ध्या स्वयं तत्र त्रपामापातिदुःखिता ॥
ततस्तु ब्रह्मणा ग्रस्ते मदने तदनन्तरम् ।
अन्तर्भूते विधौ ग्रस्तौ गते चापि निजास्पदे ॥
अमर्षवशमापन्ना सन्ध्या ध्यानपराभवत् ।
ध्यायन्ती क्षणमेवात्र पूर्व्वरूपं मनस्विनी ॥
इदं विमृश्य सन्ध्या तस्मिन् काले यथोदितम् ।
उत्पन्नमात्रां मां दृष्ट्वा युवतीं मदनेरितः ॥
अकार्षीत्तानुरागोऽयमभिलाषं पितामहः ।
दृष्ट्वैव माममर्य्यादं सकाममभवन्मनः ॥
ममापि मथितं चित्तं मदनेन दुरात्मना ।
येन दृष्ट्वा मुनीन् सर्व्वांश्चलितं मन्मनो भृशम् ॥
फलमेतस्य पापस्य मदनः स्वयमाप्तवान् ।
यत्तं शशाप कुपितः शम्भोरग्रे पितामहः ॥
ममोचितं फलमहमाप्नुमिच्छामि साध्वसम् ।
यस्मां पिता भ्रातरञ्च सकामामधरोक्षतः ॥
दृष्ट्वा चक्षुः स्पृहां तस्मान्न मत्तः कापि यास्यति ।
ममापि कामभावोऽभूदमर्य्यादं समीक्ष्य तान् ॥
पत्यावित्र स्वके तातेसर्व्वेषु सहजेष्वपि ।
करिष्याम्यस्य पापस्य प्रायश्चित्तमहं स्वयम् ॥
आत्मानमग्नौ होष्यामि वेदमार्गानुसारतः ।
किन्त्वेकां स्थापयिष्यामि मर्य्यादामिह भूतले ॥
उत्पन्नमात्रा न यथा सकामाः स्युः शरीरिणः ।
एतदर्थमहं ज्ञात्वा तपः परमदारुणम् ।
मर्य्यादां स्थापयित्वैव पश्चात् त्यक्ष्यामि जीवितम् ।
यस्मिन् शरीरे पित्रा मे क्षमिलाषः स्वयं कृतः ॥
त्याज्यमित्येन कायेन किञ्चिन्नास्ति प्रयोजनम् ।
येन येन शरीरेण तातेऽथ सहजे सके ॥
उद्भावितः कामभावो न तत्सुकृतसाधनम् ।
इति संचिन्त्य मनसा सन्ध्या ब्रह्मवरं ततः ।
जगाम चन्द्रभागाख्यं चन्द्रभागा यतः स्रुता ॥

तया स ब्रह्मणः समधिष्ठितः सदा
सौवर्णगौर्य्यादिसमप्रभाश्रितः ।
सोमेन सन्ध्यासमयोदितेन
यथोदयाद्रिर्व्विरराज शश्वत्" ॥
इति कालिकापुराणे १९ अध्यायः ॥ * ॥
मार्कण्डेय उवाच ।
"अथ तस्याः शरीरन्तु वल्कलाजिनसंवृतम् ।
परिच्छीर्णं जटाग्रातैः पवित्रं मूर्द्धि राजितम् ॥
हिमागौतर्च्छिताम्भोजसदृशं वदनं तदा ।
निरीक्ष्य तपसाविष्टो हरिः प्रोवाच तामिदम्" ॥
श्रीभगवानुवाच ।
"प्रीतोऽस्मि तपसा भद्रे भवत्याः परमेण वै ।
तवेन च शुभे ब्रूहि वरं वरय साम्प्रतम् ॥
येन ते विद्यते कार्य्यं वरेणास्मि मनोगतम् ।
तत् करिष्ये च भद्रं ते प्रसन्नोऽहं तव व्रतैः" ॥
सन्ध्योवाच ।
"यदि देव प्रसन्नोऽसि तपसा मम संप्रति ।
कृतस्तदायं प्रथमं वरो मम विधीयताम् ॥
उत्पन्नमात्रा देवेश प्राणिनोऽस्मिन् भुवःस्थले ।
न भवन्तु क्रमेणैव सकामाः सम्भवन्तु वै" ॥
श्रीभगवानुवाच ।
"प्रथमं शैशवो भावः कौमाराख्यो द्वितीयकः ।
तृतीयो यौवनो भावश्चतुर्थं वार्द्धकं तथा ॥
तृतीयेष्वथ संप्राप्ते वयोभागे शरीरिणः ।
सकामाः स्युर्द्वितीयान्ते भविष्यन्ति क्वचित् क्वचित् ॥
तपसा तव मर्य्यादा जगति स्थापिता मया ।
उत्पन्नमात्रा न यथा सकामाः स्युः शरीरिणः" ॥
इत्यादि श्रीकालिकापुराणे २२ अध्यायः ॥ * ॥
अभिलाषः । तस्य रजोगुणादुत्पत्तिर्यथा,—
"काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्" ॥
इति श्रीभगवद्गीतायां ३ । ३७ ॥
कामकला, स्त्री, (कामस्य कला प्रिया ।) रतिः । कामदेवपत्नी । इति शब्दरत्नावली । चन्द्रस्य यः षोड़शकलात्मा एव कामकलाः ॥
कामकूटः, पुं, (काम एव कूटं प्रधानं यस्य ।) वेश्या प्रियः । वेश्यातिभ्रमः । इति मेदिनी ॥
कामकेलिः, पुं, (कामे तद्धेतुकरतौ केलिर्यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥ (कामनिमित्ता केलिः ।) सुरते क्लीं । इति हेमचन्द्रः ॥
कामकन्दला, स्त्री, (कामं कमनीयं स्कन्द इव दर्शं पत्रं यस्याः ।) स्वर्णकेतकी । इति राजनिर्घण्टः ॥
कामगामी, [न्] त्रि, (कामं यथेष्टं योनिविचारमकुर्व्वन्नेव वा गच्छतीति । काम + गम + णिनिः ।) कामङ्गामी । स्वेच्छागमनशीलः । इत्यमरटीकायां ॥
कामगुणः, पुं, (कामञ्जनो गुणः ।) रागः । विषयः । आभोगः । इति मेदिनी ॥
कामङ्गामी, [न्] त्रि, (कामं यथेच्छं गमनशीलः । सुपीति णिनिः । काममव्ययम् ।) स्वेच्छागमनशीलः । तत्पर्य्यायः । अनुकामीनः २ । इत्यमरः ॥ २ । ८ । ७६ ॥
कामचारी, [न्] त्रि, (कामेन स्वेच्छया चरति ।

काम + चर + णिनिः ।) कामुकः । (यथा "पुरन्दरं च जानीते परस्त्रीकामचारिणम्" ॥ इति महाभारतम् ॥) स्वच्छन्दः ॥ कणविशुः । इति मेदिनी ॥

कामचारी, [न्] पुं, (कामेन इच्छानुसारेण चरति विहरति । काम + चर + णिनिः ।) गरुडः । इति शब्दरत्नावली ॥

कामजागः, पुं, (कामं जनयति कुरुध्वनिना । काम + जन + णिच् + अच् । निपातनात् न ह्रस्वः । यद्वा कामजं कन्दर्पभावं आनयति । कामज + आ + नी + ड ।) कोकिलः । इति शब्दरत्नावली ॥ कामजनि इति च पाठः ॥

कामतालः, पुं, (कामं तालयति प्रतिष्ठापयति । काम + तल प्रतिष्ठायां + णिच् + अच् ।) कोकिलः । इति त्रिकाण्डशेषः ॥

कामदः, त्रि, (कामं अभिलाषं ददाति । काम + दा + कः ।) कामदाता । अभिलाषदः । इति मेदिनी ॥ (यथा हरेः रामायणे २ । ३३ । ७ ।
"ऐश्वर्य्यस्य रसज्ञः सन् कामानाञ्चैव कामदः" ॥
कामं कामस्य रूपं खसौन्दर्य्येण द्यति अवखण्डयतीति । यद्वा कामं मदनं द्यति लाघयतीति । ऊर्द्धरेतस्त्वादस्य तथात्वम् । काम + दो + कः । कार्त्तिकेयः । यथा, महाभारते ३ । २३१ । ४ ।
"कामजित् कामदः कान्तः सत्यधाम्नुवनेश्वरः" ॥)

कामदा, स्त्री, (कामं अभीष्टं ददाति या । काम + दा + कः + टाप् ।) कामधेनुः । इति मेदिनी ॥

कामदुघा, स्त्री, (कामं दोग्धि । काम + दुह + "इगुपधज्ञाप्रीकिरः कः" । ३ । १ । १३५ । इति कः । ततष्टाप् ।) कामधेनुः । इति सुग्धबोधव्याकरणम् ॥ (यथा, भागवते २ । १० । ४ ।
"कामं ववर्ष पर्জन्यः सर्व्वकामदुघा मही" ॥)

कामदूतिका, स्त्री, (कामस्य उद्दीपकत्वात् दूतिकेव ।) नागदन्तीवृक्षः । इति रत्नमाला ॥

कामदूती, स्त्री, (कामस्य दूतीव कामोद्दीपकत्वात् ।) पाटलावृक्षः । इति शब्दरत्नावली ॥

कामधरः, पुं, (कामरूपं कामस्य संज्ञां वा धरति धारयति वा । काम + धृ + अच् ।) कामरूपस्थ मत्स्यध्वजपर्व्वतस्थसरोवरः । यथा,—
"मणिकूटाचलात् पूर्व्वं मत्स्यध्वजकुलाचलः ।
निर्दग्धो यत्र मदनो हरनेत्राग्निना पुनः ॥
शरीरं प्राप्य तपसा समाराध्य हरध्वजम् ।
तत्र मत्स्यस्वरूपस्तु कामदेवेन संस्थितः ॥
अधिकायां पृथिव्यां वीक्ष्यमाणः सनन्ततः ।
तदा तु शाश्वती नाम तत्राप्ते दक्षिणश्रवा ॥
सरः कामधरो नाम तस्मिन् शैले व्यवस्थितः ।
शान्तयां विधिवत् स्नात्वा पीता कामधराम्भसि ॥
विमुक्तपापः शुद्धात्मा शिवलोके महीयते" ॥
इति श्रीकालिकापुराणे ८२ अध्यायः ॥

कामधेनुः, स्त्री, (कामप्रतिपादिका धेनुः ।) स्वनामख्यातगौः । तस्या उत्पत्तिर्यथा,—
"दक्षस्य तनया बाभ्रुः सुरभिर्नाम नामतः ।
गवां माता महाभागा सर्व्वलोकोपकारिणी" ॥

तस्यान्तु तनया जज्ञे काश्यपात्तु प्रजापतेः ।
गान्धा सा रोहिणी शुभ्रा सर्व्वकामदुघा शुभा ॥
तस्यां जज्ञे शूरसेनाद्वसोरतितपोज्ज्वलात् ।
कामधेनुरिति ख्याता सर्व्वलक्षणसंयुता" ॥
"तस्यां जज्ञे शुनःशेफान्मुनेरतितमोज्ज्वलात्" ।
इति पुस्तकान्तरे पाठः ॥
"सा सिताभ्रप्रतीकाशा चतुर्व्वेदचतुष्पदा ।
स्तनैश्चतुर्भिर्धर्म्मार्थकामप्रस्रवकारिणी" ॥ * ॥
तस्या गर्भे शिववाहनवृषोत्पत्तिर्यथा,—
"सा स्वयम्भुशरीरात्तु कालेन महता सती ।
निर्म्मलं यौवनं कामधेनुरूपं मनोहरम् ॥
तां चरन्तीं मेरुपृष्ठे चारुरूपां मनोहराम् ।
ददर्श स तु वेताल: कामुकस्त्वाभ्यपद्यत ॥
तं कामुकन्तु वेतालं विदित्वा कामधेनुका ।
पशुधर्म्मात् स्वयं भेजे तं पुत्रं शृङ्गभृद्भृतः ॥
सोऽवाप तस्यां परममामोदं शृङ्गरात्मजः ।
सा चापि परमं तस्मिन् मदनात् प्रतिहर्षिता ॥
तयोः प्रवृत्ते सुरते तस्या गर्भोऽभवत्तदा ।
काले प्राप्ते तु सुषुवे कामधेनुर्म्महाबलम् ॥
सोऽचिरेणैव कालेन महान् वृषभोऽभवत् ।
महाकुदंसंयुक्तश्चारुवृहत्कुदयान्वितः ॥
उत्तिष्ठन्विचलत्कर्णयुगलो दीर्घवालधिः ।
ककुदेन च शृङ्गाभ्यां कर्णाभ्यां स सिताभवत् ॥
विचरन् ददृशे देवैः शृङ्गैरिव हिमाचलः ।
वेतालस्तत्करोत्तस्य नाम शृङ्ग इति द्विजाः ! ॥
स तु शृङ्गो जागराजी समाराधयदीश्वरम् ।
तोऽपि तुष्टो वरं तस्मै ददावित्थं महेश्वरः ॥
तमेव वाहनं चक्रे ज्ञात्वा देवतनुं वृषम् ।
स चिरायुश्च बलवान् पृथिवीधरवत्क्षमः ॥
शृङ्गो नाम महातेजाः केतुश्चाप्यभवत् पतेः ।
शृङ्गोऽभूद्वाहनो यस्माच्छङ्करस्य महात्मनः ॥
अतो भङ्गिरिति ख्यातिं स च प्राप महेश्वरात्" ॥
इति श्रीकालिकापुराणे ९१ अध्यायः ॥ * ॥
अभीष्टप्रदा धेनुः । तद्दानफलं यथा,—
"वर्षौ हरिः सर्व्व एव पवित्र-
स्तत्रापि वर्षे शरदेव शुद्धा ।
तस्यां शुभः कार्त्तिको नाम मास-
स्तत्रापि पुण्यो हि बभूव दर्शः ॥
यस्यां हरेर्दैत्यभयादिमुक्ता
उरःस्थलं प्राप्य सुखं सुषुप्ते ।
लक्ष्मीः पुराप्यापि विनिर्म्मिता वै
कामप्रदा धेनव एव यत्र ॥
अहर्मुखे यत्र दिने समस्ता:
सुधेनवो भूमितले भ्रमन्ति ।
गृहे न यस्मिन् कथयन्ति जीवां
हानिः क्षयस्तत्र च प्रत्ययो मे ॥
तस्मात्त्वमत्रैव च कामधेनुं
दद्याः समुद्दिश्य तु केशवस्य ।
विप्राय वै सर्व्वगुणोपपन्नां
ज्ञात्वा व्रतं कृष्णमतो हरेस्तु ॥
सम्यक् प्रदत्तैस्तु गवां सहस्रैः
सवत्सवस्त्रैः सहितैश्च हेम्ना ।

काले फलं यल्लभते मनुष्यो
न कामधेनोश्च समं द्विजेभ्यः ॥
कन्यारथानां करिवाजियुक्तैः
शतैः सहस्रैः सततं द्विजेभ्यः ।
दत्तैः फलं यल्लभते मनुष्यः
समं तथा स्यान्नतु कामधेनोः" ॥ * ॥
तद्भेदाः तद्दानविधिश्च यथा,—
"नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा
निर्गता मथ्यमानेऽब्धौ उपःस्नानं शुभप्रदम् ॥
तत्र स्नात्वा समभ्यर्च्च्य धेनुं पूज्य प्रयत्नतः ।
गोदानफलमाप्नोति नरो विगतकल्मषः ॥
एकादश्यामुपोष्याथ नरो दिनचतुष्टयम् ।
घृतेन स्नापयेद्विष्णुं गव्येन पयसापि वा ॥
नक्ताशी गोरसैर्हविष्यैः पूजयेन्मधुसूदनम् ।
गन्धपुष्पैः सुनैवेद्यैर्वस्त्राभरणकुण्डलैः ॥
शङ्खासिचक्रोद्यतबाहुविष्णो-
र्गदाब्जहस्तस्य तु शङ्खपाणेः ।
अर्घं प्रयच्छामि जनार्द्दनस्य
श्रिया युतस्यापि धराधरस्य ॥
श्रियः पतिं श्रीधरमेव कान्तं
श्रियाः सखायं हि श्रियोऽधिमूलम् ।
नमाम्यहं श्रीधरं श्रीनिवासं
समर्च्चितो मे प्रददातु कामान् ॥
एवं पूज्य विधानेन श्रिया युक्तैस्तु नामभिः ।
एषक् जागरणं कुर्य्यात् श्रिया सार्द्धं जगत्पतेः ॥
या देवी भार्गवं भेजे कुलं सर्व्वत्र पूजिता ।
आयातु सा गृहं नन्दा सुप्रीता वरदा मम ॥
याङ्गिरसञ्च सा देवी सुनन्दा प्रत्यपद्यिता ।
आयातु मे गृहे सा तु सुप्रीता वरदा सती ॥
सुरभी या भरद्वाजं कामधेनुः सुकामदा ।
सदाभवद्गृहं साच्च ममायातु सुरार्च्चिता ॥
सुशीला काश्यपं या तु भेजे सर्व्वत्र कामदा ।
सा मे भवतु सुप्रीता कामधेनुर्गृहे सदा ॥
सुमना या वशिष्ठन्तु संप्राप्य मुमुदे शुभा ।
सा मे गृहं सदायातु कामदा देवपूजिता ॥
एवं पूज्य विधानेन प्रभाते विमले शुभे ।
शुक्लाम्बरधरः स्नातः शुक्लमाल्यानुलेपनः ॥
कृतनित्यक्रियो हृष्टः कुण्डलाङ्गदभूषितः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनसुसंस्तृते ॥
तिलप्रस्थेन धाकीर्णे चतुःस्वर्णविभूषिते ।
क्षौमवस्त्रान्विते शुभे मध्याह्नपात्रसंयुते ॥
शुभवस्त्रैः समाच्छन्ने सर्व्वरत्नैरलङ्कृताम् ।
सुवर्णशृङ्गीं सुखुरां चतुःस्वर्णां मनोरमाम् ॥
क्षीराब्धिपयसोपेतां धेनुं मन्त्रैः प्रपूजयेत् ।
या धेनुः सर्व्वदेवानां ऋषीणां भावितात्मनाम् ॥
क्षीराब्धेर्निर्गता या च सा मे भवतु सुस्थिरा ।
घृतक्षीराभिषेकञ्च कृत्वा विष्णोः प्रयत्नतः ॥
समभ्यर्च्च्य यथान्यायं गन्धपुष्पादिभिः क्रमात् ।
गावो ममाग्रतः सन्तु गावः पार्श्वे च पृष्ठतः ॥
गावो मे हृदये नित्यं गवां मध्ये वसाम्यहम् ।
प्राङ्मुखोदङ्मुखो वापि सितयज्ञोपवीतिनीम् ॥
इमां त्वं प्रतिगृह्णीष्व देवदेव ! जगत्पते ! ।

सवत्साङ्कृतां धेनुं गोविन्द ! प्रीयतामिति ॥
एवं विप्राय तां दद्यात् ध्यात्वा चैव प्रदक्षिणम् ।
अनुव्रजेच्च गच्छन्तं पदान्यष्टौ नराधिप ! ॥
अनेन विधिना यस्तु कामधेनुं प्रयच्छति ।
सर्व्वकामसमृद्धार्थः स्वर्गलोकञ्च गच्छति ॥
किं दत्त्वा घृतशोर्वीन्तु राऽयस्ते दिवाकरे ।
तत्फलं प्राप्यते राजन् कामधेन्वा यदद्भुते" ॥
इत्याग्नेये वह्निपुराणे कामधेनुप्रदाननामाध्यायः॥*॥
अन्यत् वाल्मीकीयरामायणे बालकाण्डे ५३ सर्गे महाभारते १ । १०१ अध्याये च द्रष्टव्यम् ॥ * ॥

अथ कामधेनुमहादानम् ।

"अथातः संप्रवक्ष्यामि कामधेनुविधिं परम् ।
सर्व्वकामफलं नृणां महापातकनाशनम् ।
लोकेशावाहनं तद्वद्धोमकर्म्माधिवासनम् ।
तुलापुरुषवत्कार्य्यं कुम्भमण्डपवेदिकम् ।
स्वल्पे होकाग्निवत् कुर्य्यात् गुरुरेव समाहितः ।
ब्राह्मणस्यातिमुद्रस्य धेनुं वत्सञ्च कारयेत्" ॥
धेनुं वत्सञ्चेत्यनेन धेन्वर्थोपात्तसुवर्णेनैव स्वेच्छया वत्सकल्पनमुक्तम् ॥
"उत्तमा पलसाहस्री तदर्द्धेन तु मध्यमा ।
कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता ॥
शक्तितस्त्रिपलाद्यर्द्धमशक्तोऽपीह कारयेत् ।
वेद्यां कृष्णाजिनं न्यस्य गुड़प्रस्थसमन्वितम् ॥
न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम् ।
कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्" ॥
महारत्नैरित्यत्र रत्नैः ॥
"तथाष्टादश धान्यानि समन्तात् परिकल्पयेत् ।
इक्षुदण्डाष्टकं तद्वन्नानाफलसमन्वितम् ।
भाजनासनं तद्वत्ताम्रदोहनकन्तथा ॥
कौषेयवस्त्रद्वयसंप्रयुक्तां
दीपातपत्राम्बरशोभिरामाम् ।
सचामरां कुण्डलिनीं सघण्टां
मणिचिकां चन्द्रकरौप्यपादाम्" ॥
मणिचिका घण्टमाला ।
"रसैश्च सर्व्वैः पुरतोऽभिजुष्टां
हरिद्रया पुष्पफलैरनेकैः ।
अजाजिकुसुम्भुरुधान्यकैराभि-
र्व्वितानकक्षोपरि पञ्चवर्णम्" ।
रसैः सर्व्वैरिति लवणादिभिः षड्भिः । अजाजी जीरकः । कुसुम्भुरु धान्यकम् ॥
"ज्ञातस्ततो मङ्गलवेदघोषैः
प्रदक्षिणीकृत्य सपुष्पहस्तः ।
आवाहयेत्तां गुड़धेनुमग्रे-
द्विजाय दद्यादथ दर्भपाणिः" ॥
बह्वतरमत्स्यपुराणपुस्तकेषु गुड़धेनुमग्रेरिति पाठदर्शनात् गुड़धेनूनया लक्ष्मीरित्यादिमन्त्रपाठस्त्रात्र कर्त्तव्यः । द्विजाय दद्यादिति श्रुतेः ऋत्वेव कामधेनुर्गुरवे देया ऋत्विग्भ्यस्तु दक्षिणामात्रम् ॥
"त्वं सर्व्वदेवगणमन्दिरमङ्गभूता
विश्वेश्वरत्रिपथगोदधिपर्व्वतानाम् ।
तद्दानयज्ञसुकृतोक्षितपातकौघः

प्राप्तोऽस्मि निर्वृतिमतीव परां नमामि ॥
लोके यथेप्सितफलार्थविधायिनीं त्वा-
मासाद्य को हि भवदुःखमुपैति मर्त्यः ।
संसारदुःखशमनाय यतश्च कामं
त्वां कामधेनुमिति देवगणा वदन्ति ॥
आमन्त्र्य शीलकुलरूपगुणान्विताय
विप्राय यः कनकधेनुमिमां प्रदद्यात् ।
प्राप्नोति धाम स पुरन्दरदेवजुष्टं
कन्यागणैः परिवृतः पदमिन्दुमौलेः" ॥*॥
अत्र यजमानः समुपजातकामधेनुमहादानेच्छः तुलापुरुषलिखितं खड्गचर्म्ममयाच्छन्नसन्नाहतुलापुरुषस्थापनीयहरिप्रतिमासालङ्कारतुलाहस्तप्रापणप्रतिमावहिःसर्व्वसम्भारमधिकत्वेन सुवर्णपलसहस्रनिर्म्मितामुत्तमां सुवर्णपलशतपञ्चकनिर्म्मितां मध्यमां सुवर्णार्द्धपलशतदयनिर्म्मितां कनीयसीं अशक्तौ पलपञ्चादूर्द्धं यथाशक्त्युपात्तसुवर्णघटितामुत्क्षुरत्नालङ्कृतां सवत्सां धेनुम् । धेन्ववस्थापनार्थं कृष्णाजिनं गुड़प्रस्थञ्च धेन्वलङ्करणार्थं यथेच्छकाञ्चनघटितचन्द्रतिलकललाटपट्टिकाकुण्डलयुगघण्टारौप्यखुरचतुष्टयस्फाटिकाक्षमालाचामराणि । धेन्वाच्छादनार्थं कौषेयवस्त्रयुगम् । धेनुपार्श्वस्थापनार्थं कुम्भाष्टकातिप्रसूरविविधफलाक्षुदण्डधान्येक्षुदण्डाष्टककांस्यपात्रासनताम्रदोहनदीपसामग्रीकृतपादुकायुगानि । धेन्वग्रतः स्थापनार्थं मधुरादिरसषट्कहरिद्रानानाविधकुसुमार्हणद्रव्यजीरकधन्याकशर्करोद्धृतादेयेत् । ततस्तुलापुरुषोक्तसमयानानन्यतमस्य पूर्व्वतरदिने गुर्व्वृत्विग्यजमानजापकास्तुलापुरुषवद्वविध्यभोजनादिकं कृत्वा निवेदनसङ्कल्पवाक्ययोस्तुलापुरुषपदस्थाने हिरण्यकामधेनुपदं प्रक्षिप्य निवेदनं सङ्कल्पञ्च कुर्य्युः । अपरदिने च यजमानस्तुलापुरुषवद्गोविन्दाद्याराधनादिमधुपर्कदानान्तं गोविन्दाद्यभ्यर्चनब्राह्मणानुज्ञापनदानसंकल्पपूर्णाहादिवाचनवरणवाक्येषु तुलापुरुषपदस्थाने हिरण्यकामधेनुपदं प्रक्षिप्य कुर्य्यात् । ततो गुर्व्वृत्विग्यजमानजापका उपवसेयुः । अपरदिने च कृतनित्यास्तुलापुरुषवदग्निस्थापनादिमध्यब्राह्मणवाचनान्तं कर्म्म यथान्यं कुर्य्युः । एवञ्च मध्यब्राह्मणवाचनान्तं कर्म्म तुलापुरुषग्रन्थमनुसन्धायानुष्ठातव्यम् । तत ऋत्विजः सवत्सां धेनुं प्रधानवेदीमध्यलिखितचक्रोपरि कृष्णाजिनमास्तीर्य्य तदुपरि गुड़प्रस्थं निधाय तत्रारोप्य पूर्व्वोक्तालङ्कारैरलङ्कृत्य कौषेयवस्त्रयुगेनाच्छाद्य धेनुपार्श्वे च पूर्णकुम्भाष्टकं नानाविधफलानि अष्टादशधान्यानि रत्ननानाविधफलमिक्षुदण्डाष्टककांस्यभाजनपट्टिकाताम्रदोहनदीपातपत्रपादुकायुगान्यारोपयेयुः । धेन्वग्रतः मधुरादिरसषट्कहरिद्राविविधपुष्पार्हणसामग्रीजीरकधन्याकशर्करोद्धारोप्य मङ्गलगीतवाद्यवन्दिघोषेषु यज्ञकुण्डसमीपस्थकुम्भचतुष्टयजलेन स्ववेदोक्ताभिषेचनिकमन्त्रैर्यजमानं स्नापयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो धृतसर्व्वाभरणः कुशहस्तः पुण्याह्वमिमादाय कामधेनुं प्रद-

क्षिणीकृत्य या लक्ष्मीरित्यादि देवगणा वदन्तीत्यन्तं पठित्वा कामधेनुं पुण्याह्वलिना सम्पूज्य गुरवे दद्यात् । तद्यथा,ओं अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिने अमुकशर्म्मणे तुभ्यं मत्स्यपुराणोक्तहिरण्यकामधेनुमहादानपलप्राप्तिकामोऽहं एतां कृष्णाजिनन्यस्तगुड़प्रस्थारोपितां उत्कृष्टरत्नसौवर्णचन्द्रतिलकपट्टकुण्डलयुगलघण्टारौप्यखुरस्फाटिकाक्षमालाचामरालंकृतां कौषेयवस्त्रयुगाच्छादितां पूर्णकुम्भाष्टकनानाफलाष्टादशधान्यफलसहितेक्षुदण्डाष्टककांस्यपात्रासनताम्रदोहनदीपकृतपादुकायुगधर्व्वरसहरिद्रानानाविधकुसुमफलजीरकधन्याकशर्करायुतां पञ्चवर्णवितानकसहितां सवाससां हिरण्यकामधेनुं ददे । गुरुः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा हिरण्यकामधेनुरियं विष्णुदैवतेति उक्त्वा यथाज्ञानं कामस्तुतिं पठेत् । ततो गुर्व्वृत्विग्भ्यो दक्षिणान्दद्यात् । ओं अद्य कृतैतद्दानदक्षिणामिमां उत्पत्तियोग्यां भूमिमेतानि च रत्नानि ददे । स्वस्तीति ब्राह्मणा ब्रूयुः । गुरुस्तु स्वस्त्ययनान्तरं धेनुमुच्छं गृह्णीयात् । ततो यजमानस्तुलापुरुषवज्जापकेभ्यो दक्षिणां दत्त्वा दीनानाथादींस्तर्पयित्वा ब्राह्मणवाचनञ्च श्रुत्वा त्वरया गुरवे कामधेनुं प्रतिपादयेत् । पलशतपादूर्द्धं यथाशक्ति स्वल्पमहादानदाने तु गुरुरेव सत्कृत्योक्तविधिना सर्व्वं ब्रह्मार्पणवत् कुर्य्यात् ॥ इति हिरण्यकामधेनुमहादानं समाप्तम् । इति दानसागरः ॥

कामध्वंसी, [न्] पुं, (कामं कन्दर्पं ध्वंसयतीति । काम + ध्वंस् + णिच् + णिनिः ।) शिवः । इति हेमायुधः ॥

कामनः, त्रि, (कामयति इति । कम् + णिच् + युच् ।) कामुकः । इत्यमरः । २ । १ । २४ ॥

कामना, स्त्री, (कम + अनुदात्तादेरिति णिच्लात् भावे युच् टाप् च ।) इच्छा । इति हेमायुधः ॥

कामन्धमी, [न्] पुं, (कामं यथेष्टं धमति । काम + धमा + णिनिः । बाहुलकात् धमादेशः । निपातनात् सुमि साधुः ।) कांस्यकारः । इति जटाधरः ॥

कामपत्नी, स्त्री, (कामस्य पत्नी ।) रतिः । इति शब्दरत्नावली ॥

कामपालः, पुं, (कामान् पालयति । काम + पाल + अण् ।) बलदेवः । इत्यमरः । १ । १ । २४ ॥

कामप्रदः, पुं, (कामं कामरतिभेदं प्रददाति । काम + प्र + दा + कः ।) रतिबन्धविशेषः । यथा,—
"द्वौ पादौ स्तन्यसंलग्नौ शिक्षा शिक्षं भगे तथा ।
कामयेत् कामुकः प्रीत्या बन्धः कामप्रदो हि सः" ॥
इति स्मरदीपिका ॥ (कामानां सर्व्वेषां पुरुषार्थानां प्रदः । विष्णुः । यथा महाभारते । १३ । १४९ । ४५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥)

कामफलः, पुं, (कामं यथेष्टं फलमस्य ।) महाराजाम्रवृक्षः । इति राजनिर्घण्टः ॥

कामम्, व्य (कमेर्णिजन्तात् असुं ।) अकामानुमतिः । इत्यमरः । ३ । ३ । १३ ॥ (यथा, शाकुन्तले ५ अङ्के

कामलः

"महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्दर्शानामपथमपन्नष्टोऽपि भजते" ॥)
अनुमतिः। प्रकामम्। असूया। अनुगमनम्।
इति मेदिनीकरहेमचन्द्रौ ॥

कामभङ्गः, पुं, (कामस्य भङ्गः उत्सवो यत्र।) चैत्री पूर्णिमा। इति चिकाण्डशेषः ॥

कामयिता, [तृ] त्रि, (कामयते। काम्+णिच्+तृच्।) कामुकः। इत्यमरः। १।१।२४॥

कामरूपः, पुं, (मूलप्रकृतिर्भगवती कामरूपिणी सती यत्र देशे विराजमाना स देशस्तन्नाम्ना एव उच्यते।) खनामख्यातदेशः। तत्पर्य्यायः। प्राग्ज्योतिषः २। इति चिकाण्डशेषः ॥ तत्र कामगिरौ योनिपीठे कामाख्या देवी वर्त्तते। यथा।
"योनिपीठं कामगिरौ कामाख्या तत्र देवता"।
"सर्व्वत्र विरजा चाहं कामरूपे त्वहं गृहे" ॥
इति तन्त्रचूड़ामणौ पीठमाला॥ (अयं हि गयेशगिरिश्चिखरस्थो देशः। यदुक्तं तन्त्रे।
"कालेश्वरं श्वेतगिरिं चैत्रं नीलपर्व्वतम्।
कामरूपाभिधो देशो गयेशगिरिमूर्द्धनि" ॥
कालेश्वरं श्वेतगिरिं चैत्रं नीलपर्व्वतं यावत् ॥
अयं खलु वङ्गदेशस्य ईशानभागे आसामप्रदेशस्य पश्चिमभागे वर्त्तते॥)

कामरूपः, त्रि, (कामं काम्यं मनोहरं रूपं यस्य।) मनोज्ञरूपः। स्वेच्छारूपः। (यथा महाभारते। १। सुपर्णस्तुतौ २३। ६।
"कामरूपः कामगमः कामवीर्य्यो विहङ्गमः" ॥)
तथा च। मेघदूते ६।
"जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः" ॥

कामरूपिणी, स्त्री, (कामं मनोज्ञं रूपं अस्यास्याः। कामरूप+इनि+ङीप्।) अश्वगन्धाख्यः। इति राजनिर्घण्टः ॥

कामरूपी, [न्] पुं, (कामं कमनीयं रूपमस्यास्तीति। कामरूप+इनिः।) विद्याधरः। इति चिकाण्डशेषः ॥ नाट्यज्ञजन्तुः। इति राजनिर्घण्टः ॥ (कामेन स्वेच्छया रूपं धार्य्यतेनास्यस्य इनिः।) मनोज्ञरूपिणि स्वेच्छारूपिणि च त्रि। यथा,—
"सर्व्वमास्तु विचेतव्यं हरिभिः कामरूपिभिः" ॥
इति रामायणम् ॥

कामरेखा, स्त्री, (कामानां कामव्यापाराणां रेखा चिह्नं लक्षणं राजिर्वा यत्र।) वेश्या। इति शब्दमाला ॥

कामलः, पुं, स्त्री, (कम+णिच्+कलच्।) रोगविशेषः। काँओल कामला इति च प्रसिद्धिः। इति मेदिनी ॥ तस्य निदानसम्प्राप्ती यथा,—
"पाण्डुरोगी च योऽत्यर्थं पित्तलानि निषेवते।
तस्य पित्तमरक्तांसं दग्ध्वा रोगाय कल्पते" ॥
तस्य लक्षणम्।
"हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्नखाननः।
रक्तपीतशकृन्मूत्रो भेकवर्णो हतेन्द्रियः ॥
दाहाविपाकदौर्ब्बल्यसदनादधिकर्षितः।
कामला पञ्चधैवा कोष्ठशाखाश्रया मता।
कालान्तरात् खरीभूता कष्टा स्यात्तुभ्रकामला"॥

कामला

तस्यारिष्टलक्षणम्।
"शुक्लापीतशकन्मूत्रो भृशं श्यावनखो मानवः।
सरक्ताक्षिमुखच्छर्द्दिविष्मूत्रो यक्ष्म ताम्यति ॥
दाहारुचिबढ़ाशाहतन्द्रामोहसमन्वितः।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली" ॥
इति माधवकरः ॥

कामलः, पुं, (कामयते अभीष्टमस्मिन्। कम+अधिकरणे+कलच्।) वसन्तकालः। मदभूमिः। (कामं जाति गच्छतीति। काम+जा+कः।) कामुके त्रि इति मेदिनी ॥

कामलता, स्त्री, (कामस्य लतेव।) स्त्रियः। इति हेमचन्द्रः ॥

कामला, स्त्री पुं, (कामल+टाप्।) खनामख्यातरोगः। अथ पाण्डुरोगभेदस्य कामलाया निदानपूर्ब्बिकां संप्राप्तिमाह।
"पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते।
तस्य पित्तमरक्तांसं दग्ध्वा रोगाय कल्पते" ॥
पित्तं कटुं। दग्ध्वा संदूष्य। रोगाय कामलाख्याय। पाण्डुरोगिण एवातिप्रयतिपित्तलसेवया कामला भवति। नायं नियमः। किन्तु कामला खतन्त्रापि भवति। यथा राजयक्ष्मा कासादुपेक्षिताद्भवति। नायं नियमः। किन्तु राजयक्ष्मा खतन्त्रापि भवति। तद्वदेषापि। *।
कामलाया लक्षणमाह।
"हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्नखाननः।
पीतरक्तशकन्मूत्रो भेकवर्णो हतेन्द्रियः॥
दाहाविपाकदौर्ब्बल्यसदनादधिकर्षितः"॥
हारिद्रं हरिद्रावर्णम्। पीतरक्तशकन्मूत्रः। पीते रक्ते वा शकन्मूत्रे यस्य सः। भेकवर्णः दर्दुरैकवर्णः। तस्या भेदानाह। "कामला पञ्चपित्तैवा कोष्ठशाखाश्रया मता"। एषा कोष्ठाश्रया अपरा शाखाश्रया। तत्र कोष्ठकामलामाह। "कालान्तरात् खरीभूता कष्टा स्यात् कुम्भकामला"। कालान्तरात् खरीभूता अतिरूक्षीकृतसर्व्वधातुः। कुम्भकामला कोष्ठकामलेत्यर्थः। सा कष्टा कष्टसाध्या। *। कुम्भकामलिनोऽरिष्टलक्षणमाह।
"हर्षरोचकहृल्लासज्वरश्वासनिपीड़ितः।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली"॥
उभयोरपि कामलयोररिष्टलक्षणमाह।
"शुक्लापीतशकन्मूत्रो भृशं श्यावनखो मानवः।
सरक्ताक्षिमुखच्छर्द्दिविष्मूत्रो यक्ष्म ताम्यति ॥
दाहारुचिबढ़ाशाहतन्द्रामोहसमन्वितः।
नश्यत्यसंज्ञः क्षिप्रं हि कामलावान् विपद्यते"॥*॥
अथ कामलाचिकित्सा।
"त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसः।
प्रातर्म्माक्षिकसंयुक्तः प्रीतजः कामलापहः॥
अन्नेन कामलार्त्तानां प्रोक्षणीयुष्णीरसौ हितः।
गुडूचीपत्रकल्कं वा पिबेत्तक्रेण कामली॥
धात्रीलोहरजोयोनिशाक्षौद्राण्यूर्ब्बरारजाः।
जीर्णा निवारयन्त्याशु कामलामुद्धतामपि॥
कुम्भाख्यकामलायान्तु हितः कामलिको विधिः।
गोमूत्रेण पिबेत् कुम्भकामलार्त्तो विजानता॥

कामाख्या

दग्ध्वाक्षकालैर्मलमायसन्तु
गोमूत्रनिर्ब्बापितमष्टवारान्।
विचूर्णजीर्णं मधुनाविरेच्य
कुम्भाह्वयं पाण्डुगदं निहन्ति" ॥
इति भावप्रकाशः ॥ *॥
"मरीचतिलपुष्पाभ्यामञ्जनं कामलापहम्" ॥
इति गारुड़े १८७ अध्यायः ॥
"तद्वत्पीयकगोक्षुरमूलं पीतं पयोऽन्वितम्।
कामलादिहरं प्रोक्तं मुखरोगहरं तथा"॥
इति तत्रैव १८८ अध्यायः ॥

कामवती, स्त्री, (कामः कमनीयता अस्त्यस्याः। काम+मतुप्। मस्य वः। ङीप् च।) दाक्षहरिद्रा। इति राजनिर्घण्टः। (कामः कन्दर्पभावः अस्त्यस्याः। मैथुनानुरागयुक्ता स्त्री। यथा महाभारते १। आस्तीकपर्व्वणि ६७। ५।
"त्यागः कामवतीनां हि स्त्रीणां सद्भिर्विगर्हितः"॥)

कामवल्लभः, पुं, (कामः कमनीयः स्पृहणीय इत्यर्थः अत एव वल्लभः प्रियः। यद्वा कामस्य कन्दर्पस्य वल्लभः। कन्दर्पप्रियवसन्तकालोद्भवत्वात् तथात्वम्।) आम्रः। इति राजनिर्घण्टः ॥

कामवल्लभा, स्त्री, (कामस्य कन्दर्पस्य वल्लभा प्रिया। कामोद्दीपकत्वात् तथात्वम्।) ज्योत्स्ना। इति राजनिर्घण्टः ॥

कामवृक्षः, पुं, (कामस्य वृक्षियंस्मात्।) क्षुपविशेषः। कामण इति कर्णाटके प्रसिद्धः। तत्पर्य्यायः। स्मरवृक्षिसंज्ञः २ मनोवृक्षिः ३ मदायुधः ४ कन्दर्पजीवः ५ जितेन्द्रियाङ्गः ६ कामैकजीवः ७ जीवसंज्ञः ८। अस्य बीजगुणाः। मधुरत्वम्। मदवर्द्धनत्वम्। कामवृक्षिवृष्यविकारित्वम्। वङ्क्षेन्द्रियवर्द्धित्वञ्च। इति राजनिर्घण्टः ॥

कामवृन्ता, स्त्री, (कामं कमनीयं वृन्तं यस्याः।) पाटलावृक्षः। इति शब्दमाला ॥

कामवृक्षः, पुं, (कामं यथेष्टं बीजाद्यनपेक्षतया उत्पन्नो वृक्षः।) वन्दाकः। इति राजनिर्घण्टः ॥

कामशरः, पुं, (कामस्य कन्दर्पस्य शर इव कामोद्दीपकत्वात्।) आम्रः। इति राजनिर्घण्टः ॥

कामसखः, पुं, (कामस्य सखा। "राजाहःसखिभ्यष्टच्"। ५। ४। ९१। इति टच्।) वसन्तकालः। इति राजनिर्घण्टः ॥

कामसुतः, पुं, (कामस्य सुतः।) अनिरुद्धः। इति हेमचन्द्रः ॥

कामाख्या, स्त्री, (कामयते भक्तानां कामं पूरयति यद्वा भक्तैः साधकैः काम्यतेऽसौ इति कामा। कामा आख्या यस्याः।) देवीविशेषः। तन्त्रान्तरे यथा।

श्रीभगवानुवाच।
"कामार्थमागता यस्मात्मया सार्द्धं महागिरौ।
कामाख्या प्रोच्यते देवी नीलकूटे रहोगता॥
कामदा कामिनी कामा कान्ता कामाङ्गदायिनी।
कामाङ्गनाशिनी यस्मात् कामाख्या तेन चोच्यते॥*॥
तत्पीठकारश्च यथा,—
"अथ वक्ष्ये वङ्गतिथौ वसतीते प्राक्षिवर्ज्जने।

अग्रहां दक्षतनयां मार्य्यार्थेऽहं वधूवराम् ॥
सा मेऽभूत् प्रेयसी भार्य्या प्रदाय समयं पितुः ।
अनिष्टकारी त्वद्वेत् स्याः प्राणांस्त्यक्ष्ये तदा त्वहम्॥
ततो यज्ञे समस्तान्तु स च वव्रे चराचरम् ।
न मां नापि सतीं वव्रे तदनिष्टान्मृता तु सा ॥
ततो मोहसमापन्नस्तामादाय मृतामहम् ।
प्राप्तः पीठवरं तन्तु भ्रममाण इतस्ततः ॥
तस्यास्त्वङ्गानि पर्य्यायात् पतितानि यतो यतः ।
तत्तत् पुण्यतमं जातं योगनिद्राप्रभावतः ॥
तस्मिंस्तु कुब्जिकापीठे सत्यास्तद्योनिमण्डलम् ।
पतितं तत्र सा देवी महामाया व्यलीयत ॥
लीनायां योगनिद्रायां मयि पर्व्वतरूपिणि ।
स नीलवर्णः शैलोऽभूत् पतिते योनिमण्डले ॥
स तु शैलो महातुङ्गः पातालतलमाविशत् ।
तस्या आक्रमणाद्दार्ढ्यं ततस्तं द्रुह्यिणोऽभ्ययात् ॥
स तु पूर्व्वं ब्रह्मशक्तिशिलां धर्त्तुं चतुर्मुखः ।
शैलरूपोऽभवत्तेन शैलरूपेण मामधात् ॥
ब्रह्मा पर्व्वतरूपेण मयि पर्व्वतरूपिणि ।
संसक्तोऽधोऽगमद्गाढ़माक्रान्तो मायया विधेः ॥
ततो वराहः संसक्तो मयि मां स तु माधवः ।
शैलरूपः शैलरूपं धर्त्तुं समुपचक्रमे ॥
सोऽप्यधोऽगान्मया सार्द्धं तदा पर्व्वतरूपिणा ।
आक्रम्य देवीं पृथिवीं स्थितो भुवि निखातकः ॥
श्रुतं श्रुतं योजनानां तुङ्गमासीद्विचित्रयम् ।
तदाक्रान्तं महादेव सर्व्वमेव ह्यधोगतम् ॥
क्रोशमात्रे स्थितं तुङ्गं शैलं तत्रितयस्य तु ।
एका समस्तजगतां प्रकृतिः सा यतस्ततः ॥
ब्रह्मविष्णुशिवैर्देवैर्वेष्टिता सा जगतां प्रसूः ।
तत्र पूर्व्वो ब्रह्मशैलः श्वेत इत्युच्यते बुधैः ॥
मध्यरूपधारी शैलस्तु नील इत्युच्यते तथा ।
स तु मध्यगतः शैलस्त्रिकोणोद्भूखण्डाकृतिः ॥
विभ्राजमानः सततं मध्ये ब्रह्मवराहयोः ।
वराहः शैलरूपो यः स चित्र इति कथ्यते ॥
स सर्व्वेषां स्थितः पश्चात् दीर्घः सर्व्वेभ्य एव तु ।
ऐशान्यां योऽभवत् कूर्म्मः शैलरूपो महाद्युतिः ॥
मणिवर्णः स नाम्ना तु ख्यातो देवौघसेवितः ।
योऽनन्तरूपः शैलस्तु वायव्यां समवस्थितः ॥
मणिपर्व्वतसंज्ञोऽसौ पर्व्वतो माधवप्रियः ।
महामायागिरिर्यस्तु नैर्ऋत्यां समवस्थितः ॥
स गन्धमादनो नाम्ना सर्व्वदा गन्धरप्रियः ।
वराहस्योत्तमवने यत्र स्थितौ महासुरौ ॥
हरिश्चा तत्र संजातः पुरुहूत इति स्मृतः ।
ब्रह्मशक्तिशिलायास्तु पूर्व्वभागे तु मध्यतः ॥
यस्तु पर्व्वतरूपोऽहं स तु भस्माचलाह्वयः ।
एवं पुण्यतमे पीठे कुब्जिकापीठसंज्ञके ॥
नीलकूटे मया सार्द्धं देवी रहसि संस्थिता ।
सत्यास्तु पतितं तत्र विशीर्णं योनिमण्डलम् ॥
शिलात्वमगमत् शैले कामाख्या तत्र संस्थिता ।
संस्पृश्य तां शिलां मर्त्यो ह्यमर्त्यत्वमवाप्नुयात् ॥
अमर्त्यो ब्रह्मसदनं तत्स्थो मोक्षमवाप्नुयात् ।
तस्याः शिलाया माहात्म्यं यत्र कामेश्वरी स्थिता ॥
अदृश्यं यस्य गुह्ये तु जोषं मक्ष भवेदृतम् ।

सा चापि प्रत्यहं तत्र पञ्चमूर्त्तिधरा भवेत् ॥
मोहार्थं सर्व्वलोकानां ममापि प्रीतये शिवा ।
अहं पञ्चमुखेनास्तु पञ्चभागे व्यवस्थितः ॥
ईशानः पूर्व्वभागस्थः कामेश्वर्य्याः प्रधानतः ।
ऐशान्यां वै तत्पुरुषो ह्यघोरस्तस्य सन्निधौ ॥
सद्योजातोऽथ वायव्यां वामदेवस्तु सङ्गतः ।
देव्याश्चापि नरश्रेष्ठ पञ्चरूपाणि भैरव ! ॥
शृणु वेताल ! गुह्यानि देवैरपि सदैव हि ।
कामाख्या त्रिपुरा चैव तथा कामेश्वरी शिवा ॥
सारदाथ महोत्साहा कामरूपगुणैर्युता ।
मयि तिष्ठत्वमापन्ने शिलायां योनिमण्डले ॥
सर्व्वे शिलात्वमगमन् शैलरूपाश्च निर्झराः ।
यथाहं निजरूपेण रेमे वै सह कामया ॥
शिलारूपप्रतिच्छन्नास्तदा सर्व्वास्तु देवताः ।
शिलारूपप्रतिच्छन्नाः शैले शैले व्यवस्थिताः ॥
रमन्ते च स्वरूपेण नित्यं रहसि सङ्गताः ।
ब्रह्माविष्णुरुद्रश्चात्र दिक्पालाः सर्व्व एव ते ॥
अन्येऽप्यत्र स्थिता देवाः सानुकूलाः सदा मयि ।
उपासितुं तदा देवीं कामाख्यां कामरूपिणीम् ॥
नीलशैलस्त्रिकोणस्तु मध्ये निम्नः सदाशिवः ।
तन्मध्ये मण्डलं चारु मणिशक्तिसमन्वितम् ॥
गुहा मनोभवा तत्र मनोभवविनिर्म्मिता ।
योनिरूपास्थां शिलायान्तु शिलारूपा मनोहरा ॥
वितस्तिमात्रविस्तीर्णा एकविंशाङ्गुलायता ।
क्रमसूक्ष्मविनिर्म्माणभक्तशैलानुगामिनी ॥
सिन्दूरकुङ्कुमाराक्ता सर्व्वकामप्रदायिनी ।
तस्यां योनौ पञ्चरूपा नित्यं तिष्ठति कामिनी ॥
महामाया जगद्धात्री मूलभूता सनातनी ।
तत्राष्टौ योगिनीर्नित्यं मूलभूताः सनातनीः ॥
पूर्व्वोक्ताः शैलपुत्र्याद्याः स्थिता देव्याः समन्ततः ।
तासान्तु पीठनामानि शृणु चैकत्र भैरव ! ॥
गुप्तकामा च श्रीकामा तथा च विन्ध्यवासिनी ।
कटीश्वरी धनश्चा तु पाददुर्गा तथापरा ॥
दीर्घेश्वरी क्रमादेव प्रकटा भुवनेश्वरी ।
खयोगिन्यः पीठनाम्ना ख्याता अष्टौ च देवताः ॥
सर्व्वतीर्थानि चैकत्र जलरूपाणि भैरव ! ।
स्थितानि नाम्ना सौभाग्या वरेण्या प्राणिपुण्यदा ॥
विष्णुस्तु तीरे तस्याः स नाम्ना कमल इत्युत ।
कामुकायान्तु वटुकः कामाख्याभ्यर्णसंस्थितः ॥
लक्ष्मीः सरस्वती देव्यौ देव्या अङ्के व्यवस्थिते ।
जलिताख्याऽभवल्लक्ष्मीर्मातङ्गी तु सरस्वती ॥
गयाध्यक्षः पूर्व्वभागे तस्य शैलस्य संस्थितः ।
सिद्धः स नाम्ना विख्यातो हरि देव्याः प्रियः सुतः॥
कल्पवृक्षः कल्पवल्ली तिन्तिड़ी चापराजिता ।
भूतास्तस्मिन्महाशैले स्थिते देव्या धृतप्रिये ॥
वराहः पाण्डनाथाख्यः स्थितस्तत्र हरिर्यतः ।
जघने शिरसी क्षत्वा जघान मधुकैटभौ ॥
तस्यासन्ने ब्रह्मकुण्डं ब्रह्मणा निर्म्मितं पुरा ।
ऐशानाख्यं शिरोरत्नं तत् सिद्धेश्वरसंज्ञकम् ॥
शिलारूपं सिद्धकुण्डं मध्यस्थं विद्धि भैरव ! ।
तस्यासन्न गयाक्षेत्रं क्षेत्रं वाराणसी यथा ॥
योनिमण्डलसङ्काशं कुण्डं भूत्वा व्यवस्थितम् ।

तत्रैवास्तकुण्डन्तु सुधासंघप्रपूरितम् ॥
मम प्रियार्थमिन्द्रेण स्थापितं सह निर्ज्जरैः ।
वामदेवाकृयं श्रीमं श्रीकामेश्वरसंज्ञकम् ॥
कामकुण्डं महापुण्यं तस्यासन्ने व्यवस्थितम् ।
केदारसंज्ञकं क्षेत्रं मध्यस्थं सिद्धकामयोः ॥
दीर्घं चतुर्हस्तमानं छायाच्छाकृयं तु तत् ।
तस्यासन्ने शैलपुत्री गुप्तकामाकृया तु सा ॥
गुप्तकुण्डस्य मध्यस्था कामेशग्न्याख्या सङ्गता ।
कामेश्वरशिलासङ्गा कामाख्यासंज्ञिता सदा ॥
पूर्व्वभागेन संसक्ता योनेस्तु परभागतः ।
कामकामाख्ययोर्म्मध्ये कालरात्रिर्व्यवस्थिता ॥
पीठे दीर्घेश्वरी नाम्ना सीमाभागे प्रचण्डिका ।
कामाख्या प्रस्तरप्रान्ते कुब्जाख्डी नाम योगिनी ॥
पीठे कोटीश्वरी नाम्ना योनिरूपेण संस्थिता ।
यच्चाधोराकृयं श्रीमं तत् कामायास्तु दक्षिणे ॥
पीठे भैरवनामा तु गीयते परमर्षिभिः ।
वामुण्डाभैरवी नाम्ना भैरवासन्नसंस्थिता ॥
नायिका कामदा भक्ते चण्डमुण्डविनाशिनी ।
कामाभैरवयोर्म्मध्ये स्वयं देवी सुरायगा ॥
हिताय सर्व्वजगतां देव्यास्तु प्रीतये स्थिता ।
सद्योजाताकृयं श्रीमं पीठे त्वात्मातकेश्वरम् ॥
भैरवाख्ये गह्वरे तु स्थितं देवर्षिसेवितम् ।
विद्धि तत्रैव दुर्गाख्यां नायिकां योगरूपिणीम् ।
सिद्धकामेश्वरी नाम्ना ख्याता देवेषु नित्यशः ।
अजीर्णपत्रः सुच्छायो वृक्षस्तत्र तु संस्थितः ॥
आत्मातकः कल्पवृक्षः कल्पवल्लीसमन्वितः ।
पीठे तु सिद्धगङ्गाख्या स्वयं गङ्गा समुत्थिता ॥
आत्मातकस्य निकटे मम प्रीतिविवृद्धये ।
पुष्करास्यन्तु तत् क्षेत्रं पीठे त्वात्मातकाकृयम् ॥
ऐशान्यां तत्पुरुषाख्यं मम श्रीमं व्यवस्थितम् ।
भुवनेश्वरनाम्ना तु पीठे ख्यातश्च भैरव ! ॥
गह्वरं भुवनेशस्य भुवनानन्दसंज्ञकम् ।
तस्यासन्ने तु सुरभिः शिलारूपेण संस्थिता ॥
कामधेनुरिति ख्याता पीठे कामप्रदायिनी ।
योऽसौ सरभमूर्त्तिर्म्मे मध्यखण्डः प्रचण्डकः ॥
महाभैरवनामाभूत् कोटिलिङ्गाकृयस्तु सः ।
मूर्त्तिभिः पञ्चभिः पञ्चभागेषु सममास्थितः ॥
अहं प्रसादतिप्रीत्या भैरवाख्यः स्थितोऽधरे ।
महागौरी तु या देवी योगिनी सिद्धरूपिणी ॥
सा ब्रह्मपर्व्वते चास्ते शिलारूपेण चोर्द्धतः ।
अतीवरूपसम्पन्ना नाम्ना सा भुवनेश्वरी ॥
यत्र ब्रह्मा तु संसक्तो मयि पर्व्वतरूपिणि ।
कल्पवल्ली तु तत्रास्ते नाम्ना सा त्वपराजिता ॥
कामधेनोरदूरस्था पूर्व्वभागे महेश्वरी ।
श्रीकामाख्या योनिरूपा चण्डिका सा तु योगिनी ॥
आमेय्यां विद्धि तां संस्थां सर्व्वकामप्रदां शुभाम् ।
योगिनी चण्डघण्टाख्या पीठेऽभूत् विन्ध्यवासिनी ॥
योगिनी स्कन्दमाता तत्पीठेऽभूदनवासिनी ।
कात्यायनी पीठनाम्ना पाददुर्गेति गद्यते ॥
नैर्ऋत्यां नीलशैलस्य प्रान्ते सा संस्थिता शिवा ।
योऽसौ नन्दी मम तनुः स तु पाषाणरूपधृक् ॥
संस्थितः पश्चिमद्वारि हनूमान् पीठगामतः" ॥ *॥

कामाख्या

श्रीऔर्व्व उवाच ।
"इति तस्य वचः श्रुत्वा शम्भोरमिततेजसः ।
भैरवस्तं तु पप्रच्छ वेतालोऽपि समुत्सुकः" ॥
श्रीवैतालभैरवावूचतुः ।
"श्रुतः पीठक्रमस्तात देव्याः पूजाक्रमस्ततः ।
श्रोतुमिच्छामि मूर्त्तीनां पञ्चानामपि शङ्कर ! ॥
रूपाणि पञ्चमूर्त्तीनां मन्त्राणि च समन्ततः ।
तथा यन्त्राणि तन्त्राणि वद नौ वृषभध्वज !" ॥
ईश्वर उवाच ।
"शृणु वक्ष्यामि वेताल मन्त्रं तन्त्रं पृथक् पृथक् ।
कामाख्यापञ्चमूर्त्तीनां रूपं कल्पञ्च भैरव ! ॥
कामस्थं काममध्यस्थं कामदेवपुटीकृतम् ।
कामेन कमयेत् कामी कामं कामे नियोजयेत् ॥
व्योमेन्तु व्यञ्जनं ब्रह्म न परः शान्त उच्यते ।
प्रथमं क्रमतः कुर्य्यात् तत्संसक्तं सुधामयम् ॥
प्रजापतिस्तथा शुक्रबीजसंस्थादिसंयुतम् ।
चन्द्रार्द्धसहितं बीजं कामाख्यायाः प्रचक्षते ॥
इदं धर्म्मप्रदं काममोक्षार्थानां प्रदायकम् ।
इदं रहस्यं परममन्यत्र तु सुदुर्लभम् ॥
श्रोत्रेणेदं यः शृणुयाद्भक्त्या श्रद्धान्वितोत्तमः ।
स कामानखिलान् प्राप्य शिवलोके महीयते ॥*॥
"श्रुतिसकलितसारं देवकण्ठौघहारं
सकलकलुषहारि श्रीधरामर्त्यकारि ।
सुनयसुभयशोभिर्योजयेद्यस्तु गोभि-
स्तदिह शिवसमस्तं विघ्नधर्म्माङ्कितास्तम् ॥
नयनकलितकारि ध्यानिनां दत्तयारि
प्रणयसुनयसंस्थं देवमत्यादिकस्थम् ।
परमपदविशीर्णं शुद्धदौर्भाग्यजीर्णं
शृणु शिवपदरूपं कामदेव्याः स्वरूपम् ॥
श्रवणगमनमात्राच्चान्मार्गितं यस्य नाम
प्रभवति बहुभूत्यै नीतिमार्गैकधाम ।
सुरगणगणसंघा कुण्डली यस्य शक्ति-
स्तदिह परमरूपं चिन्तनीयं कृतीशैः ॥
रविशशियुतकर्णा कुङ्कुमापीतवर्णा
मणिकनकविचित्रा लोलकर्णा त्रिनेत्रा ।
अभयवरदहस्ता साक्षसूत्रप्रशस्ता
प्रणतसुरवरेशा सिद्धकामेश्वरी सा ॥
अरुणकमलसंस्था रक्तपद्मासनस्था
नवतरुणशरीरा मुक्तकेशी सुहारा ।
शुभहृदि पृथुतुङ्गन्यस्तयुग्मा मनोज्ञा
शिशुरविसमवस्त्रा सिद्धकामेश्वरी सा ॥
विपुलविभवदात्री क्षेत्रवक्त्रा सुकेशी
दलितकरकदम्बा सासिचन्द्रावतम्बा ।
मनसिजदृगदिष्टा योनिमुद्रां दधन्ती
पवनचलनशक्ता संश्रुतस्थानभागा ॥
चिन्त्या चैवं विद्युदग्निप्रकाशा
धर्म्मार्थाद्यैः साधिता वाञ्छितार्थैः ।
कव्यं तन्त्रं शृणिदं सम्यगर्थं
वेतालत्वं भैरवत्वं प्रतिष्ठम् ।
तस्मिन्नाद्यं मण्डलं विद्धि पश्चात्
कार्य्यं तद्वै चन्दनैः पुष्पगन्धैः ।
तत्पर्य्यन्ते लेखने पूर्व्वमुक्तो

कामान्धः

देवीतन्त्रे सोऽत्र पूर्वं विधेयः" ॥
इति श्रीकालिकापुराणे ६१ अध्यायः ॥
कामाग्निसन्दीपनमोदकं, क्ली, (सन्दीप्यते अनेनेति सन्दीपनम् । कामाग्नीनां सन्दीपनमुद्दीपकम् । कामाग्निसन्दीपनञ्च तत् मोदकञ्चेति ।) औषध-विशेषः । यथा,—
"कर्षौ रसो गन्धकमभ्रकञ्च
द्वित्रारचित्रे लवणानि पञ्च ।
शुण्ठी यमानीद्वयकीटहारि
ताक्षीशुपत्राण्यपरं द्विकर्षम् ।
जीरं चतुर्ज्जातलवङ्गजाती-
फलञ्च कर्षत्रयमेवमन्यत् ।
सदड्दारं कटुकत्रयञ्च
तथा चतुःकर्षमितं निबोध ।
धन्याकयष्टीमधुकं कषेण-
कर्षाः पृथक् पञ्च वरी विदारी ।
वरेभकर्णोभवलात्मगुप्ता-
बीजं तथा गोक्षुरबीजयुक्तम् ।
सबीजपत्रेन्द्ररजःसमानं-
समाक्षिता क्षौद्रहृतञ्च तुल्यम् ।
कर्षैकमिन्दोरथमोदकं तत्
कामाग्निसन्दीपनमेतदुक्तम्" ॥ * ॥
"श्रुत्वं ततः परतरं शतं न दृष्ट-
मेनं निषेव्य मनुजः प्रनंदासहस्रम् ।
गच्छन्न लिङ्गशिथिलत्वमवाप्नुयाच्च
नागाधिपं विजयते बलतः प्रमत्तः ॥
कान्त्या ऊलाग्नमपि खरतो मयूरान्
वाहं यवेन नयनेन महाविहङ्गम् ।
बातानशीतिमथपित्तगदं समग्रं
श्लेष्मोत्थविंशतिरुजः परमग्निमान्द्यम् ॥
दुर्नामकामलभगन्दरपाण्डुरोग-
मेहातिसारशमिहृद्ग्रहणीप्रदोषान् ।
कासज्वरश्वसनपीनसपार्श्वशूल-
शूलाश्मपित्तसहितांश्चिरजान् समस्तान् ॥
हत्वा गदानपि च तत् पुनरत्वकारि
सर्व्वन्तुपथ्यमथ सर्व्वसुखप्रदायि ।
दृश्यं वलीपलितहारि रसायनं स्यात्
श्रीभूजदेवकथितं परमं प्रशस्तम्" ॥
इति भैषज्यरत्नावली ।
कामाङ्गुशः, पुं, (कामे कामोद्दीपने अङ्गुश इव । नखाघातेन कामोद्दीपनादस्य तथात्वम् ।) नखः । इति चिकाण्डशेषः ॥ (कामस्य अङ्गुश इव ।) शिश्नः । इति जटाधरः ॥
कामाङ्गः, पुं, (कामं कामोद्दीपकं अङ्गं सुकुमारं यस्य ।) आम्रवृक्षः । इति जटाधरः ॥
कामातुरः, त्रि, (कामेन आतुरः ।) कामार्त्तः । यथा ।
"अर्थीलाघवमुज्झितो निपतनं कामातुरो लाम्ब-
नम्" ॥ इति नवरत्नमध्ये धन्वन्तरिः ॥
कामान्धः, पुं, (कामेन अन्धयति निजध्वनिजनित-मन्मथोद्दीपनेन हतज्ञानं करोतीति । काम + अन्ध + णिच् + अच् ।) कोकिलः । इति राज-निर्घण्टः ॥ (कामेन अन्धः । स्मरान्धः । कामवेगेन

कामिनी

कर्त्तव्यताज्ञानशून्यः ॥)
कामान्धा, स्त्री, (कामं यथेष्टं अन्धयति । अन्ध + णिच् + अच् + टाप् ।) कस्तूरी । इति राजनिर्घण्टः । (स्मरेण अन्धा । कर्त्तव्यज्ञानशून्या । प्रगल्भा-नायिकाविशेषः । यथा, साहित्यदर्पणे ३ । ७० ।
"स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीड़ा प्रगल्भाभान्तनायका" ॥
अस्या उदाहरणं यथा तत्रैव ।
"धन्यासि या कथयसि प्रियसङ्गमेऽपि
विश्रब्धचाटुकशतानि रतान्तरेषु ।
गीर्वी प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किञ्चिदपि स्मरामि" ॥)
कामायुः [स्] पुं, (कामं यथेष्टं आयुर्यस्य ।) गवयः । इति चिकाण्डशेषः ॥
कामायुधः, पुं, (कामस्य आयुधमिव सुकुले आकारो-ऽस्ति अस्य । अर्श आदित्वात् अच् ।) महा-राजचूतः । आम्रः । इति राजनिर्घण्टः ॥ काम-देवास्त्रे क्ली ॥
कामारण्यं क्ली, (कामं मनोज्ञं अरण्यम् ।) मनोज्ञ-वनम् । इति शब्दमाला ॥
(कामस्य अरण्यमिति विग्रहे कन्दर्पवनम् ॥)
कामारिः, पुं, (कामस्य अरिः ।) विटमाल्लिकधातुः । इति हेमचन्द्रः ॥ महादेवः कन्दर्पनाशकत्वात् ॥
कामार्त्तः, त्रि, (कामेन ऋतः ।) कामपीड़ितः । कामातुरः । यथा, मेघदूते ५ ।
"कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु" ॥
कामालुः, पुं, (कामं यथेष्टं अलति पुष्पविकाशेन पर्य्याप्नोतीति । अल पर्य्याप्तौ + उण् ।) रक्तका-ञ्चनवृक्षः । इति शब्दचन्द्रिका ॥
कामावसायिता, स्त्री, (कामेन स्वेच्छया अवसाययति सर्व्वाणि अविद्याबासनाजालानि । काम + अव + सो + णिच् णिनि ततो भावार्थे तल् ।) कामान् स्वेच्छया अवसाययितुं शीलमस्य कामावसायी तस्य भावः । इति सारसुन्दरी ॥ शिवस्यामिमा-दयष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । इत्यमरः शब्द-रत्नावली च ॥ सा तु सत्यसङ्कल्पता ॥ (अष्टैश्व-र्य्याणि यथा,
"अणिमा लघिमा व्याप्तिः प्राकाम्यं गरिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता" ॥)
कामावसायित्वं, क्ली (कामावसायिनो भावः । त्व-प्रत्ययः ।) कामावसायिता । इति हेमचन्द्रः ॥
कामिः, पुं, (कामयते इति । कम् + णिच् + इञ् ।) कामुकः । स्त्यां स्त्री । इति मेदिनी ॥
कामिकः, पुं, (कामः अस्त्यस्य ठन् ।) कारण्डवपक्षी । इति शब्दरत्नावली ॥ (कामेन निर्वृत्तम् । ठन् । कामनिर्वृत्तकर्म्मणि क्ली । यथा, महाभारते अनुशासनपर्व्वणि ।
"देवतास्तस्य तुष्यन्ति कामिकं तस्य सिध्यति" ॥)
कामिनी, स्त्री, (अतिशयेन कामः अस्या अस्ति इति । काम + इनिः + ङीप् ।) अतिशयकामयुक्ता नारी । इत्यमरः । २ । ६ । ३ । (यथा, मनुः ८ । ११२ ।
"कामिनीषु विवाहेषु गवाञ्चैव हिरण्यके ।

ब्राह्मणाभ्युपपत्तौ च ग्रपधे नास्ति पातकम्" ॥) भीरवी। वन्दा। इति मेदिनी ॥ दारुहरिद्रा। मदिरा। स्त्रीसामान्यम्। इति राजनिर्घण्टः ॥ (यथा, आर्य्यासप्तशती २७०।

"कर्णं इव कामिनीनां न श्रोभते निर्भरः प्रेमा"॥)

कामिनीग्रः, पुं, (कामिन्याः कामिनीप्रियाङ्गनस्य ईग्रः तत्साधनत्वात्।) श्रोभाञ्जनवृक्षः। इति शब्दचन्द्रिका ॥

कामी, [न्] पुं, (अतिशयेन कामयते। काम + णिच् + इनिः।) चक्रवाकः। पारावतः। कामुकः। इति मेदिनी ॥ (यथा, मेघदूते। ७४।

"सभ्रूभङ्गं प्रहितनयनैः कामिचक्षोव्यमोचैः" ॥)

चटकः। इति शब्दरत्नावली ॥ चक्रः। इति त्रिकाण्डशेषः ॥ ऋषभौषधिः। सारसपक्षी। इति राजनिर्घण्टः ॥ (सर्व्वकामवत्त्वात् विष्णुः। यथा, महाभारते १३। १४९। ८३।

"कामदेवः कामपालः कामी कान्तः कृतागमः" ॥)

कामीकः, पुं, (कामयतुं इच्छति इति खः। एषोदरादित्वात् साधुः।) रामशुवाकः। इति त्रिकाण्डशेषः ॥ (कामीन इत्यपि दृश्यते ॥)

कामुकः, त्रि, (कामयते इति। "वषपतपदेत्यादिना"। ३। २। १५४। उकञ्।) कामी। तत्पर्य्यायः। कमिता २ अनुकः ३ कम्यः ४ कामयिता ५ अभीकः ६ कामनः ७ कामनः ८ अभिकः ९। इत्यमरः। ३। १। २०। (यथा, भागवते ९। २३। १७।

"दुष्यन्तः स पुनर्मेने स्वर्गं राज्यकामुकः" ॥)

कामुकः, पुं, (कम + उकञ्।) श्वशोकवृक्षः। अतिमुक्तकवृक्षः। इति मेदिनी ॥ चटकः। इति राजनिर्घण्टः ॥

कामुककान्ता, स्त्री, (कामुकानां कान्ता प्रिया।) अतिमुक्तकवृक्षः। इति राजनिर्घण्टः ॥

कामुका, स्त्री, (कम + उकञ् + स्त्रियां टाप्। न ङीप्।) धनादीच्छाविशिष्टा। तत्पर्य्यायः। इच्छावती २। इत्यमरः। ३। ६। ९॥

कामुकी, स्त्री, (कम + उकञ् + "नागपदकुण्डेति"। ४। १। ४२। ङीप्।) मैथुनेच्छावती। तत्पर्य्यायः। इच्छन्ती २। इत्यमरः। ३। ६। ९॥ (यथा, नैषधे १९। २४।

"अग्निभवदङ्गरागादेनं जनः खलु कामुकी सुभगमभिधास्यत्युद्दामपराङ्मुखवदावः" ॥)

कामेश्वरी, स्त्री, (काम्यन्ते इति कामा विषयास्तेषां भोग्यानां प्रदायित्वेन ईश्वरी।) कामाख्यापश्चमूर्त्यन्तर्गतमूर्त्तिविशेषः। यथा,—

"देव्याश्चापि नरश्रेष्ठ! पञ्च रूपाणि भैरव!। श्रृणु वेताल! गुह्यानि देवैरपि सदैव हि॥
कामाख्या त्रिपुरा चैव तथा कामेश्वरी शिवा। सारदाथ महोत्साहा कामरूपगुणैर्युता"॥

इति कालिकापुराणे ६१ अध्यायः ॥ *॥

अस्या मन्त्रं यथा, श्रीभगवानुवाच।

"देव्याः कामेश्वरीं मूर्त्तिं श्रृणु वक्ष्यामि भैरव!। यस्याश्चिन्तनमात्रेण साधको नमते प्रियान्॥
तन्त्रं तस्याः प्रथमतस्ततोऽनुध्यानगोचरम्।
ततः पूजाक्रमं वक्ष्ये क्रमादेतालभैरव!॥
प्रणवस्तिस्रतो वह्निरिन्द्रवीजं ततः परम्॥
चूड़ाचन्द्रार्द्धसहितं चतुर्थस्वरसंयुतम्।
इदं कामेश्वरीमन्त्रं सर्व्वकामार्थसाधनम्"॥ *॥

तस्या ध्यानं यथा,—

"रूपन्तु चिन्तयेद्देव्याः कामेश्वर्या मनोहरम्।
प्रभिन्नाञ्जनसंकाशां नीलस्निग्धशिरोरुहाम्॥
षड्वक्त्रां द्वादशभुजां अष्टादशविलोचनाम्।
प्रत्येकं षट्सु शीर्षेषु चन्द्रार्द्धकृतशेखराम्॥
मणिमुक्तादिमाणिक्यखचितां मालामुरःस्थले।
कण्ठे च बिभ्रतीं नित्यं सर्व्वालङ्कारभूषिताम्॥
पुस्तकं सिद्धसूत्रञ्च पद्मवाणवरं तथा।
खड्गं शक्तिञ्च शूलञ्च बिभ्रतीं दक्षिणैः करैः॥
अक्षमालां महापद्मं कोदण्डाभयं तथा।
चर्म्म पाशात् पिनाकञ्च बिभ्रतीं वामपाणिभिः॥
शुक्लं रक्तञ्च पीतञ्च हरितं श्यामलं च।
विचित्रं क्रमतः शीर्षं ऐशान्यां पूर्व्वमेव च॥
दक्षिणं पश्चिमञ्चैव तथैवोत्तरशीर्षकम्।
मध्यचेति महाभाग! क्रमात् शीर्षाणि वर्णतः॥
शुक्लं माहेश्वरीवक्त्रं कामाख्यारक्तमुच्यते।
त्रिपुरापीतसंकाशं सारदाहरितं तथा॥
श्यामं कामेश्वरीवक्त्रं चण्डायाश्चित्रमिष्यते।
धम्मिल्लसंयतकचं प्रतिशीर्षं प्रकीर्त्तितम्।
सिंहोपरिसितप्रेतं तन्निर्लोहितपङ्कजम्।
कामेश्वरी स्मिता तत्र ईषत्प्रहसितानना॥
विचित्रांशुकसंप्रीता व्याघ्रचर्म्माम्बरा तथा।
एवं कामेश्वरीं ध्यायेद्धर्म्मकामार्थसिद्धये"॥

इत्यादि कालिकापुराणे ६२ अध्यायः ॥

कामोदकं, क्ली, (कामेन स्वेच्छया दत्तं उदकम्।) मृतोद्देशे स्वेच्छया दत्तोदकम्। इति मिताक्षरा।

कामोदा, स्त्री, (कुत्सितो मोदो यस्याः। सहृदयमनोहरत्वाभावात्।) रागिणीविशेषः। इति हलायुधः ॥

काम्पिल्यः, पुं, (कम्पिलः नदीविशेषः तस्य अदूरे भवः ण्यञ्।) काम्पिल्यदेशः। इति शब्दरत्नावली ॥ (अयन्तु पाञ्चालस्य दक्षिणांशे वर्त्तते। इति हरिवंशः ॥)

काम्पिल्यः, पुं, (कम्पिल + जातार्थे ण्यञ्।) गुग्गुलोचनीनामसुगन्धिद्रव्यम्। इत्यमरटीकायां भरतः॥ (काम्पिलाया अदूरे भवः इति सङ्गच्छादित्वात् ण्यः।) उत्तरदेशविशेषः। इति शब्दरत्नावली ॥ (यथा, महाभारते। १। १३९। ६८।

"माकन्दीमथगङ्गायास्तीरे जनपदायुताम्।
सोऽध्यवात्सीत् दीनमनाः काम्पिल्यञ्च पुरोत्तमम्।
दक्षिणांश्चापि पाञ्चालान् यावच्चर्म्मण्वती नदी" ॥)

काम्पिल्लः, पुं, (काम्पिल्य + अण् निपातनात् साधुः।) गुग्गुलोचनी। कमलागुंड़ी इति भाषा। इत्यमरः। २। ४। १४६ ॥ तस्य रूपान्तराणि काम्पिल्लः। कम्पीलः। कम्पिलः। काम्पिल्यः। इति भरतः ॥

काम्पिल्लका, स्त्री, (काम्पिल्ल + स्वार्थे कन् टाप् च।) काम्पिल्लः। इति द्वारावली। (क्वचित् क्लीवेऽपि दृश्यते। यथा सुश्रुते सूत्रस्थाने ४५ अः।

"चूर्णं काम्पिल्लकं वापि तत्पीतं गुटिकाकृतम्"।)

काम्पीलः, पुं, (काम्पिल + अण् निपातनात् साधुः।) काम्पिल्लः। इति शब्दरत्नावली ॥ ("देवीं काम्पीलवासिनीम्"। इति यजुर्व्वेदे ॥)

काम्पीलकः पुं, (काम्पील + स्वार्थे कन्।) काम्पिल्लः। इति रत्नमाला ॥

काम्बलः, पुं, (कम्बलेनाहृतः। कम्बल + अण्।) कम्बलाहृतरथः। इत्यमरः। २। ८। ५४ ॥

काम्बविकः, पुं, (कम्बु शङ्खं भूषणत्वेन शिल्पमस्य ठक्।) शङ्खकारः। इत्यमरः। २। १०। ८। शाँखारी इति भाषा ॥

काम्बुका, स्त्री, (कुत्सितं अम्बु यस्याः कम्। कोः कादेशः।) अम्लगन्धा। इति रत्नमाला ॥

काम्बोजः, पुं, (कम्बोजदेशे भवः इति। अण्।) कम्बोजदेशजघोटकः। इत्यमरः। २। ८। ४५ ॥ सोमवल्कः। पुन्नागवृक्षः। इति मेदिनी ॥ (कम्बोजः अभिजनो यस्य सिन्ध्वादित्वात् अण्।) म्लेच्छजातिविशेषः। स तु यवनतुल्यः सगररोजेनास्य सर्व्वशिरोमुण्डनं कृतम्। यथा। हरिवंशे ॥

"अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्। यवनानां शिरः सर्व्वं काम्बोजानां तथैव च"।

काम्बोजी, स्त्री (कम्बोजेषु भवः कम्बोजादित्वात् अण् ङीप्।) माषपर्णी। माषाणी इति भाषा। इत्यमरः २। ४। १९८॥ वलक्षखदिरः। इति मेदिनी। पापिड़ि खएर इति भाषा। गुञ्जा। कुँच इति भाषा। वाकुची। हाकुच् इति भाषा। इति राजनिर्घण्टः ॥

काम्यं, त्रि, (काम्यते इति। कम् + णिच् + कर्म्मणि यत्।) कमनीयम्। सुन्दरम्। इति हेमचन्द्रः ॥ ("काम्यानां खण्डनार्थञ्च दोषघातार्थमेव च। अतः काम्यं नैमित्तिकं प्रायश्चित्तमिति स्थितिः"। इति जावालः ॥) कामनायुक्तव्यक्तिः। कर्त्तव्यकर्म्म। यथा, सुग्धबोधटीकाद्रामतर्कवागीशधृता स्मृतिः

"यत् किञ्चित् फलमुद्दिश्य यज्ञदानजपादिकम्। क्रियते कायिकं यच्च तत्काम्यं परिकीर्त्तितम्" ॥

काम्यदानं, क्ली, (काम्यञ्च तत् दानञ्चेति।) कमनीयस्य वस्तुनो वरस्त्रीरत्नादिनो दानं कामनया वा दानं। इति भरतः ॥ तत्पर्य्यायः। प्रवारणम् २। इत्यमरः। ३। २। ३ ॥ (यथा, गरुड़पुराणे।

"अपत्यविजयैश्वर्य्यस्वर्गार्थं यत्प्रदीयते। दानं तत् काम्यमाख्यातं ऋषिभिर्धर्म्मचिन्तकैः"॥)

कायं, क्ली, मनुष्यतीर्थम्। इति मेदिनी ॥ (कः प्रजापतिर्देवतास्य। "कस्येत्"। ४। २। २५। इत्यण् इदन्तादेशश्च ततः आदिवृद्धिः।) प्राजापत्यतीर्थम्। तच्च खल्वांङ्गुल्योर्मूलम्। कनिष्ठानामिकयोरधोभाग इति यावत्। इत्यमरभरतौ ॥ (यथा मनुः २। ५९।

"अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते। कायमङ्गुलिमूले ऽग्रे दैवं पित्र्यं तयोरधः" ॥)

कायः, पुं, (को ब्रह्मास्य देवता "कस्येत्"। ४। २।

२५ । इत्यण् । इदन्तादेशश्च । यस्येतिलोपात् परस्यादादिर्द्विः कदैवतम् । स तु ब्राह्मतीर्थम् । (कायति प्रकाशते इति अच् ।) मूर्त्तिः ।
("कायः सन्निहितापायः सम्पदः पदमापदाम् ।
समागमाः सापगमाः सर्व्वमुत्पादि भङ्गुरम्" ॥
इति हितोपदेशः ॥) संघः । सङ्घः । स्वभावः । इति मेदिनी ॥ प्राजापत्यविवाहः । इति स्मृतिः ॥ (यथा मनुः ३ । ३८ ।
"आर्षेगवाजः सुतस्त्रीन्
षट् षट् कायोऽजः सुतः" ॥)
अस्य तच्छब्दं उदाहरणशब्दे द्रष्टव्यम् ॥ मूलधनम् । यथा,—नारदः ।
"कायविरोधिनी ग्रस्यत् पणार्द्धाद्या तु कायिका" ॥
कायमानं, क्ली, (कायस्य मानमिव मानमस्य ।) द्रव्यकुटीरः । इति त्रिकाण्डशेषः ॥
कायवन्धनं, क्ली, (कायो वध्यते आच्छाद्यते अनेन । वन्धस्तौ करणे ल्युट् ।) कवचम् । इति हारावली । ७२ ॥
कायस्थः, पुं, (कायेषु सर्व्वभूतशरीरेषु अन्तर्यामितया तिष्ठतीति । काय + स्था + कः ।) परमात्मा । (यथा उत्तरगीतायाम् ।
"कायस्थोऽपि न कायस्थः कायस्थोऽपि न जायते ।
कायस्थोऽपि न भुञ्जानः कायस्थोऽपि न बध्यते" ॥
काये ब्रह्मकाये तिष्ठतीति । काय + स्था + कः ।) नरजातिविशेषः । इति मेदिनी ॥ तत्पर्य्यायः । कूटज्ञत् २ पञ्चीकरः ३ । इति त्रिकाण्डशेषः ॥ करणः ४ पञ्चिकारकः ५ । इति जटाधरः ॥ तस्योत्पत्त्यादिर्यथा* ।

श्रीहर उवाच ।
"भूयश्चेदं प्रवक्ष्यामि वगश्चेति मनूत्तमम् ।
यस्य ग्रहणमात्रेण कायस्थो विप्रसेवकः ॥
पार्व्वत्युवाच ।
अतीव चित्रं ब्रह्मो ! त्वमुक्तवानावयोरपि ।
शूद्रात् कनीयसी जातिरभवद्विप्रसेवकः ॥
ओथ्याम्यादौ हि कायस्थवृत्तान्तं ब्रूहि विस्तरात् ।
कायस्थः क्षत्त्रविट्शूद्रान्वते विप्रार्चकः कथम् ॥
केन प्रकारेण च वा वगश्चेति गृहीतवान् ।
ततश्च सिद्धविद्यायो वगणाया वरेश्वर ! ॥
श्रोष्यामि महिमानञ्च साधनं त्वत्त एव हि ॥
हर उवाच ।
ब्रह्मपादांशतो जन्म जातः कायस्थनामभृत् ।
ककारं ब्राह्मणं विद्यादाकारं नित्यसंज्ञकम् ।
यायन्तु निकटं ज्ञेयं तत्र काये हि तिष्ठति ।
कायस्थोऽतः समाख्यातो मसीग्रं प्रोक्तवांश्च यम् ॥
जीवेच्छये भृगुपदे जन्मलाभात् शोभना श्रियः ।
गृहत्व शूरता किञ्चिदनेकप्रतिपालनात् ॥
जन्मावधि द्विजार्चायां मतिरेव निरन्तरम् ।
कुशासनादि सकलं गृहीत्वा मस्तकोपरि ॥
अनुगच्छामि सततमिति चिन्तामनाः सदा ।
गृहत्वाच्चतुरत्वाच्च विप्रसेवामनुत्तमाम् ॥
वाक्छत्वेन मसीग्रः स सदोद्गीतिभावहन् ।
ब्राह्मणं ईश्वरं ज्ञात्वा भक्त्या स्तौति पुटाञ्जलिः ॥
यं यं गच्छति विप्रस्य मसीग्रस्यानुगच्छति ।
नद्यादौ गत्वा वेद्विप्रः स्नात्वा कुर्य्यात्तर्पोऽपि च ॥
यावत्तावच्च तिष्ठेत् स क्षुधया पीड़ितोऽपि च ।
तथापि नासनं याति शिरे धर्त्तुं, द्विजोऽपि च ।

मसीग्रायादीक्षिताय क्षत्त्रवैश्योपमाय च ।
अमूद्रायेति वोढुं न ददात्येवासनादिकम् ॥
पार्व्वत्युवाच ।
चित्रं ब्रवीषि हे नाथ कायस्थोऽमूद्र एव किम् ।
जाने शूद्रकनिष्ठं तं शूद्रतुल्यः कथं स न ॥
क्षत्त्रवैश्योपमो क्षुत्क्षत्त्रयैव कथमीश्वर ! ॥
हर उवाच ।
ब्रह्मपादांशतः शूद्रमसीग्रौ द्वौ बभूवतुः ।
शूद्रात् परः कनिष्ठः स जातः काले ! ऋतश्च तत् ।
किन्तु सामादिवेदान् हि क्षत्त्रो विट् शूद्र एव हि ।
गृहीतवान्न तं किञ्चिन्मसीग्रोऽसतः शिवे ! ॥
अतो यज्ञोपवीती न ते हि यज्ञोपवीतिनः ।
एते स्वर्वेदिकाचारा मसीग्रो हि स्वभावतः ॥
मस्या सह तु लेखन्या सर्व्वं लेखितुमीश्वरः ।
लेखितुं नैव शक्नोति वैदिकं किञ्चितं क्वचित् ॥
अतो हृदि विचार्य्याथ खेदेन विप्रमीश्वरम् ।
ज्ञात्वा भक्त्यानुगच्छेद्धि यत्र याति धरासुरः ॥
क्षतत्रेताद्वापरेषु गतेष्वपि मसीग्रकः ।
तदपि क्षत्त्रवाक्चैव दृढां भक्तिं द्विजेषु च ॥
ततो हि कृपया विप्रः कायस्थमनुगृह्य हि ।
सावसं प्रादददिद्यां वगश्चेति तव प्रिये ! ॥
यतो दीक्षामात्रमेव पवित्रः कार्य्यसिद्धिदा ।
ततः कुशासनादींश्च वोढुं प्रादात् शिरोपरि ॥
एवं प्रकारेण काले ! विप्राणामनुगाः कलौ ॥
कायस्थाः कालिके ! देवि ! पुनस्तद्भिन्नं शृणु ।
कलिप्रथमतो राजा क्षत्त्रियाणां महाबलः ।
सुयज्ञनामा गोमेधमखमारब्धवान् प्रिये ॥
आहूतवांश्च सर्व्वान् स चतुर्योजनमध्यतः ।

---

* कायस्थोत्पत्त्यादौ मन्यतया राज्ञा यानि प्रमाणानि संगृहीतानि तद्विदराज्यधुना प्राप्तानि । कतिपयप्रख्यातप्रामाण्यप्रमाण्यबोधकानीति । तद् यथा,—
"चर्त्रं ध्यानस्थितस्यास्य सर्व्वकायाद्विनिर्गतः ।
दिव्यरूपः पुमान् हस्ते मसीपात्रञ्च लेखनी ॥
चित्रगुप्त इति ख्यातो धर्म्मराजसभीपतः ।
प्राह्निणां सदसत्कर्म्मलेखाय स निरूपितः ।
ब्रह्मजातौन्द्रियग्रामो देवाग्न्यर्थंसभुक् स वै ।
भोजनाच्च सदा तस्माद्भोजनादीयते द्विजैः ॥
ब्रह्मकायोद्भवो यस्मात् कायस्थो वर्ण उच्यते ।
नानागोत्राश्च तद्वंश्याः कायस्था भुवि सन्ति वै" ॥
इति पद्मपुराणे सृष्टिखण्डम् ॥ * ॥
दक्षायेण उवाच ।
"चित्रगुप्तं महाप्राज्ञं पुलस्त्यमुनिपुङ्गवम् ।
उपसङ्गम्य पप्रच्छ भीक्षः शक्षद्भताम्बरः ॥
चतुरामपि पर्व्वानामाश्रमाणां तथैव च ।
सम्भवः सङ्करादीनां श्रुतो विस्तरतो मया ॥
कायस्थोत्पत्तयो लोकेष्वातायैव महामने ।
भूय एव महाप्राज्ञ ! श्रोतुमिच्छामि तत्त्वतः ॥
वैश्याया दानशीलाश्च पितृयज्ञपरायणाः ।
सुधियः सर्व्वशास्त्रेषु कायस्थद्वारबोधकाः ॥
पोद्धारो निजवर्णानां ब्राह्मणानां विशेषतः ।
तानहं श्रोतुमिच्छामि कथयस्व महामुने ! ॥
रतस्य संशयं विप्र ! वक्तुमर्हस्यशेषतः ।
इति पृष्टो मुनिप्राज्ञः, गाङ्गेय ! शृणु तत्त्वतः ॥
पुलस्त्य उवाच ।
शृणु गाङ्गेय ! वक्ष्यामि कायस्थोत्पत्तिकारणम् ।
न श्रुतं यत् त्वया पूर्व्वं तत्ते कथयतः शृणु ॥
येनेदं सकलं विश्वं स्थावरं जङ्गमं तथा ।
उत्पाद्य पाल्यते भूयो निधनाय प्रकल्पते ॥
अव्यक्तः पुरुषः शान्तो ब्रह्मा लोकपितामहः ।
यथाऽसृजत् पुरा विश्वं कथयामि तव प्रभो" ॥
"मुखतोऽस्य द्विजा जाता बाहुभ्यां क्षत्त्रियास्तथा ।
जघनाच्च तथा वैश्याः पद्भ्यां शूद्राः समुद्भवाः ॥
द्विचतुःषट्पदादींश्च सर्व्वसत्त्वसरीसृपान् ।
एकाकीऽसृजत् सर्व्वं चन्द्रसूर्य्यप्रभाविभुः ॥
एवं बहुविधानेन विश्वमुत्पाद्य भारत ! ।
उवाच तं सुतं ज्येष्ठं कायपंक्तिविवेजसम् ॥
प्रतियत्नेन भोः पुत्र जगत् पालय सुव्रत ! ।
इत्याज्ञाप्य सुतं ज्येष्ठं ऋषिसङ्घवचेतुकम् ॥
ततश्च ब्रह्मणा येन यत् कृतं तन्निबोध मे" ॥
"दशवर्षसहस्राणि दशवर्षशतानि च ।
समाधिस्थोऽभवत् प्राज्ञः संयम्य ज्ञानमानसः ॥
ततः समाहितमतिर्यत्कृतं तद्दधामि वै ।
तच्छरीरान्महाबाहुः श्यामः कमललोचनः ॥
कम्बुग्रीवो गूढशिराः पूर्णचन्द्रनिभाननः ।
लेखनीखेदनोद्भूतो मसीभाजनसंयुतः ॥
निःसृत्य दक्षिणे तस्मो ब्रह्मणोऽव्यक्तजन्मनः ।
उत्तमः सुविचित्राङ्गः श्यामस्निग्धसलोचनः ॥
त्यक्त्वा समाधिं गाङ्गेय ! तं ददर्श पितामहः ।
अधोऽर्द्धसन्निरीक्ष्याथ पुरुषस्याग्रतः स्थितः ॥
नामधेयं हि मे तात ! वक्तुमर्हस्यतःपरम् ।
यथोचितञ्च यत् कार्य्यं तत् त्वं मामनुशास्य" ॥
पुलस्त्य उवाच ।
"इत्याकर्ण्य ततो ब्रह्मा पुरुषं समरीरजम् ।
प्रहृष्य प्रत्युवाचेदमानन्दितमतिः पुनः ॥
शिरश्चिह्नं समाधाय ध्यानस्थमतिसुन्दरम् ।
मच्छरीरात् समुद्भूतत्वात् कायस्थसंज्ञकः ॥
चित्रमुक्तेति नाम्ना वै ख्यातो भुवि भविष्यसि ।
धर्म्माधर्म्मविवेकार्थं धर्मराजपुरे सदा ॥
स्थितिर्भवतु ते वत्स ! समाज्ञां प्राप्य सिद्धताम् ।
चन्द्रवर्णोचितो धर्म्मः पालयोचो यथाविधि ॥
प्रजाः सृजस्व भोः पुत्र भुवि भारसमन्विताः ।
तस्मै दत्त्वा वरं ब्रह्मा तत्रैवान्तरधीयत" ॥
पुलस्त्य उवाच ।
"चित्रगुप्ताय वै ज्ञाताः शृणु ताः कथयामि ते ।
सौमङ्गा नागरा गौराः सौवस्तसक्षेन मातुराः ॥
चटिचराः सौरसेनाः श्रैवसेनाश्चैव च ।
वर्षावर्षेश्वरश्चैव चन्द्रध्वाक्ष सप्तम ! ॥
शृणु वेषाञ्च कर्म्माणि कुलधर्म्मविवर्द्धन ! ।
पुत्रान् वै स्वापयामास चित्रगुप्तो मसीतले ॥
धर्म्माधर्म्मविवेकज्ञचित्रगुप्तो महामतिः ।
भूस्थानं वेधयामास सर्व्वसाधनमुत्तमम् ॥
पूजनं देवतानाञ्च पितृणां यज्ञसाधनम् ।
वर्द्धनं ब्राह्मणानाञ्च सर्व्वदातिथिसेवनम् ॥
प्रजानां करमादाय धर्म्माधर्म्मविशोधनम् ।
कर्त्तव्यं हि प्रयत्नेन पुत्राः सर्व्वेण काम्यया ॥
या माया प्रकृतिः सृष्टिरुक्ता चण्डप्रमर्दिनी ।
तस्याश्च पूजनं कार्य्यं सिद्धिं प्राप्य दिवं गताः ॥
स्वर्गाधिकारमासाद्य यतो यज्ञभुजः सदा ।
भवद्भिः सा सदा पूज्या ज्ञात्वा सप्तशतादिभिः ॥
भवन्तो सिद्धिदा नित्यं पूजदा सा तु चण्डिका ।

कायस्थः

ब्राह्मणान् भ्रान्तिवशतः केवलं सुतपसं विना ॥
प्राप्ताङ्गानद्विजान् यातो दृष्ट्वा सुतपसः प्रिया ।
धवं तिरस्कृतवती यथैतच्छृणु कालिके ! ॥
हे स्वामिंस्त्वां नृपो मूर्खं मत्वा नाद्रृतवान् मखे ।
केवलं तव पाण्डित्यं मत्समीपे न शोभते ॥

सुतपा उवाच ।

कान्ते ! ब्रवीमि विप्राणां यत् कर्त्तव्यं शृणुष्व तत् ।
याचामाचं वहन्नन्नं काङ्क्षितव्यं न चाधिकम् ॥
विद्यांचेद्विद्या दातव्या क्वापि नार्ज्जवं चरेत् ।
मूर्खश्चेत् केवला सन्धा सदोपास्या प्रयत्नतः ॥
प्रिये तेन च वक्तव्यमृतमेवाप्रियन्त्वपि ।
विप्रेण सततं कार्य्यं वैद्यमागमिकञ्च तत् ॥
ऋतौ गच्छेच्च स्वां कान्तां मुदा कालञ्च पालयेत् ।
कालीं कालादिकं वापि जपेद्विप्रो निरन्तरम् ॥
स्वयं स्वभावतो नृणां क्षत्रादीनां शिवे वचः ।
वक्तव्यं चेन्न गृह्णन्ति विप्रहानिर्न तत्क्षतिः ॥

ब्राह्मण्युवाच ।

समानुवर्त्तं ते कान्त ! सुविप्रत्वं ध्रुवं ! त्वयि ।
तिष्ठत्येव चिरं विप्र तेऽस्तौ मे मरणं शिवम् ।
कांस्यकङ्कणवत्यौ सङ्गिनौ मे मृतावधि ॥

सुतपा उवाच ।

प्रिये ते क्षुधुना तीव्रं धनान्तःकरणं सदा ।
विना निमन्त्रितेनापि गत्वा चानीयते धनम् ॥
इत्युक्त्वा सुतपाः कान्तां गत्वा राजसभां प्रिये ! ।
रान्तं सुयज्ञं वरणं प्रोवाच नृपतिं द्विजः ॥
रे सुयज्ञ ! विनाङ्गानैरगच्छं ते सभामहम् ।
विप्राणां वरणं राजन् ! क्षत्रियाणां तथैव च ॥
कृतं तदपि नाहं रे त्वया दृष्टः स्वचक्षुषा ।

कायस्थः

भ्रष्टो भवतु ते यज्ञः शीघ्रं यातु स्वस्थान्तरम् ॥
क्रुधैतदुक्त्वा सुतपास्ततो नृपसदः स्वस्थात् ।
विप्रो निःसृतवान् राजा भीतेन मनसाब्रवीत् ॥
हे पुरोहित ! हे विप्र ! हेऽङ्गिरोऽसौ गतः सकः ।
रे इत्युक्त्वा सभामध्ये वृत्तान्तं वद विस्तरात् ॥
नृपाज्ञया क्षत्रियार्थं षट्टादिवस्त्रसंकुलम् ।
स्वर्णाङ्गुरीयकमपि चानेतुं गतवान् हि यः ।
कोषमन्दिरमालोक्य राजान्तिकमथागतः ॥
इत्यब्रवीच्च राजानं चित्रन्ते कोषमन्दिरे ।
किञ्चिच्च वस्तु दृष्टं न दृष्टं भस्मट्टणादिकम् ॥
श्रुत्वैतत् विस्मितो राजाऽब्रवीच्चैतत् पुरोहितम् ।
हे पुरोहित ! विप्र ! त्वं कृतवान् यत्त्वभूच्च तत् ॥
कोऽपराधोऽस्ति मे विप्रः कथं शप्ता गतः प्रभो ! ।
कोषमन्दिरसंपातसंवादं दत्तवानयम् ॥
कोषे नास्ति धनं किञ्चित् सर्व्वं भस्मट्टणादिकम् ।
श्रुत्वेतदङ्गिरा ब्रूते सुतपा यत्र तत्पटे ॥
ततो दुर्गे स राजा च तूर्णं स्वर्णकुठारकम् ।
गले बद्धा द्विजकुलैर्गतवान् सुतपोऽन्तिकम् ॥
अङ्गिरादिद्विजाः सर्व्वे तत्राद्य सुतपोद्विजम् ।
स्तुतिञ्चक्रुः स राजा च दूरस्थो भक्तितोऽस्तवीत् ॥

अङ्गिरःप्रभृतय ऊचुः ।

धरामरवर ! प्राज्ञ ! नो वरस्त्वं धरातले ।
राज्ञः शिवं नो मानं त्वदयाचामह उमेशवृत् ! ॥
देवस्त्वं देवताश्चस्त्वं पण्डितानाञ्च पण्डितः ।
दयालो ! नो दयस्व त्र ! नमस्ते वरतो वर ! ॥
ब्रह्म ब्रह्मत्र एव त्वं ब्राह्मणेश्वर मानद ! ।
राज्ञः शिवं नो मानं त्वद्याचामह उमेशवृत्" ! ॥

सुयज्ञराज उवाच ।

कायस्थः

हे नाथ ! हे धरेशेश ! धर्म्मकर्म्मविधायक ! ।
वर्णेश्वर ! नमस्तुभ्यं वन्दे ते चरणाम्बुजम् ॥
हे ब्रह्मण्यदेव ! हे नाथ हे धरामर हे प्रभो ! ।
कृपां कुरु नमस्तुभ्यं प्रणमामि पदं तव ।
नाहं जानामि ते पूजां नाहं जानामि ते स्तुतिम् ॥
नाहं जानामि ते ध्यानं मूढ़ं मां कृपया दय ॥

सुतपा उवाच ।

किमर्थं स्तुथ हे विप्राः किमर्थं स्तौषि हे नृप ! ।
गच्छ यात मखं गत्वं सुखेन सफलं कुरु ॥
श्रुत्वेति सुतपोवाक्यं सुयज्ञः सुखमानसः ।
कृताञ्जलिपुटो राजा चाब्रवीदिदमुत्तमम् ॥

राजोवाच ।

निमन्त्रयन्तु विप्रेन्द्र ! भोज्यञ्च सकलोत्तमम् ।
यज्ञापराधसाहस्रं क्षमस्व मे कृपां कुरु ॥
अपराधसहस्राणि कृतवानहमव्यय ! ।
यज्ञ मद्राजतीं मुद्रामयुतां मां कृपां कुरु ॥
मत्सभास्था द्विजा ह्येते प्रोचुः पाण्डित्यगद्गुतम् ।
गुणांश्च ते बहुविधान् श्रुत्वाहं सुखमानसः ॥
क्षमस्व नाथ ! मे दोषमेकं प्रश्नोत्तरं वद ।
मत्सभास्थो बुधः कोऽपि न ब्रवीति विदाम्बर ! ॥
आगच्छति कलिर्घोरस्तत्र के भक्षितो द्विजान् ।
अर्च्चिष्यन्तीति श्रुत्वा मे वरञ्च मरणं शिवम् ॥
श्रुत्वैतत् सुतपा विप्रोऽब्रवीच्च सदयो नृपम् ॥

सुतपा उवाच ।

हे सुयज्ञ नृपश्रेष्ठ ! ब्राह्मणातिप्रियो नृपः ।
पश्यैतान् विप्रभृत्यांस्त्वमासनादिग्निरोधृतान् ॥
एतद्घोरकलावेते भविष्यन्ति द्विजार्च्चकाः ।
ज्ञात्वा मसीग्राः कायस्था ब्राह्मणेश्वरमानसाः ॥

तथाचीना सुरापेया यानपेया द्विजातिभिः ॥
वैश्यं धर्मेमाश्रित्य मदाज्ञां प्रतिपालय ।
कर्मेणं हि प्रयत्नेन लोकदयर्थितायं वै ॥
श्रुत्वेति सुतपावैं चित्रगुप्तो दिवं ययौ ।
धर्मराजाज्ञाधिकारी चित्रगुप्तो बभूव ह ॥
अथ भीष्म ! समुत्पन्नाः कायस्था ये प्रकीर्त्तिताः ।
ये श्रुताश्चे मया ज्ञाताः संवादं शृणु तत्परः ॥
अहं ते कथयिष्यामि विचित्रं परमाद्भुतम् ।
प्रभावं चित्रगुप्तस्य समुद्भूमं यथा पुनः" ॥

पुलस्त्य उवाच ।

"सौदासो नाम राजाभूत् समस्ते क्षितिमण्डले ।
सदा पापरतः सोऽथ धर्माधर्मं न विन्दति ॥
स यथा स्वर्गमासाद्य क्रमे पुण्यफलं भुवि ।
सर्व्वपापी दुराचारः सर्वधर्मविवर्जितः ॥
राजनीतिगतं धर्मं स जानाति कथञ्चन ।
क्षात्रियजयकर्माणि तत्साधनमुत्तमम् ॥
न कर्त्तव्यं द्विजैः क्वापि मयाग्रेमेदीतले ।
स्वमाज्ञप्तवतीलोके दैवपित्र्यकर्मणि ॥
परित्यज्य स्वकं देशं ततो देशान्तरं ययौ ।
ये केचिद्यतिं चक्रुर्लोकेषु ब्राह्मणादिषु ॥
ततः प्रभृति राजेन्द्र ! न यज्ञस्वमं क्वचित्" ॥
"न कोऽपि कुरुते भीष्म ! पूजां तव निवेदितम् ।
यद्दोषा ब्राह्मणादिभ्यः करं कर्मविदूषकः ॥
यदो धर्मभृतां श्रेष्ठ शृणु कर्म विपाकजम् ॥
कालेनानेन राजेन्द्र सौदासो विचरन् महीम् ।
कार्त्तिके शुक्लपक्षे च द्वितीया चोत्तमा तिथिः ।
तस्यां कार्य्यश्च कायस्थैश्चित्रगुप्तस्य पूजनम् ॥

मद्यतीर्थाभिषेकेण धूपदीपादिभिस्तथा ॥
दैवयोगात्तथायातः सौदासः पर्य्यटन्महीम् ।
श्रद्धायुक्तशरीरेण दृष्ट्वा च पूजनं ततः ।
कृत्वा सुपूजनं तत्र चित्रगुप्तस्य भक्तिमान् ॥
गतपापोऽभवत् सद्यः सौदासोऽसौ महीपतिः ।
चित्रगुप्तप्रभावेण गतो लोकं सुरालयम् ॥
दृष्टं चित्रमहाश्चर्यं चित्रगुप्तप्रभावजम् ।
कथितं नृपशार्दूल ! किमन्यत् श्रोतुमिच्छसि ॥
इत्याकर्ण्य ततो भीष्मः प्रत्युवाच मुनिं ततः ।
विधिना केन तत्रापि पूजा कार्य्या महामुने ! ॥
को मन्त्रः को विधिश्चत्र सर्व्वं तद्वद मे प्रभो ।
यामासाद्य मुनिश्रेष्ठ ! सौदासः स्वर्गमाप्तवान् ॥

पुलस्त्य उवाच ।

चित्रगुप्तस्य पूजाया विधानं कथयाम्यहम् ।
नैवेद्यैर्दृप्तपक्वैश्च यथाकालोद्भवैः फलैः ॥
गन्धपुष्पोपहारैश्च धूपदीपैः समाहितः ।
चित्रगुप्तञ्च संपूज्य श्रद्धाभक्तिसमन्वितः ॥
नवकुम्भं समानीय पानीयपरिपूरितम् ।
शर्करापूरितं कृत्वा पात्रं तस्योपरि न्यसेत् ॥
पूजान्ते च प्रयत्नेन दातव्यञ्च द्विजन्मने ।
ब्राह्मणान् भोजयेत्तत्र कायस्थानपि मन्त्रवित् ॥
मसीभाजनसंयुक्तः सदा चरसि भूतले ।
लेखनीच्छेदनीदक्षचित्रगुप्त ! नमोऽस्तु ते ॥
चित्रगुप्त नमस्तुभ्यं नमस्ते धर्मरूपिणे ।
तेषां त्वं पालको नित्यं नमः शान्तिं प्रयच्छ मे ॥
मन्त्रेणानेन राजेन्द्र चित्रगुप्तस्य पूजनम् ।
एवं संपूज्य विधिवत् सौदासो भक्तिभावतः ॥

चिरात् पापसमुद्भूतो राज्यं कृत्वा ततो नृपः ।
भौतोऽसौ यमदूतैश्च यमलोकमथानकम् ॥
चित्रगुप्तस्तदाश्चर्य्यं धर्मराजोऽपि भारत ! ॥

धर्मराज उवाच ।

सौदासोऽसौ दुराचारः पापकर्मसदारतः ।
यानि कानि च पापानि राजासौ कृतवान् भुवि ॥
दृष्टोऽसौ यमराजेन धर्माधर्मविशारदः ।
धर्मराजं ततः प्राह चित्रगुप्तो महामतिः ॥
विपाकं धर्मजं ज्ञात्वा तं प्रश्नाब्रवीद्दचः ॥

चित्रगुप्त उवाच ।

जानेऽहं पापकर्मासौ राजार्थं विदितः सदा ।
त्वत्प्रसादादहं सौरे ! पूज्योऽस्मि वसुधातले ॥
त्वया दत्तं वरं ज्ञानं भक्तोऽहं सदा प्रियः ।
इति ज्ञात्वा वदाम्यत्र राजापापोऽयि मे मतिः ॥
पूजां चकार राजासौ दृष्ट्वा पूजाञ्च मामकीम् ।
अतश्चाहोऽस्मि हे देव ! यातु विष्णुपदं नृपः ॥
यमेनाज्ञापितो राजा वैश्यत्वं पदमाप्तवान् ।
ये चान्ये पूजयिष्यन्ति चित्रगुप्तं महीतले ॥
कायस्थाः पापनिर्मुक्ता यास्यन्ति परमां गतिम् ।
तस्मात् त्वमपि राजेन्द्र ! पूजां कुरु विधानतः ॥

दत्तात्रेय उवाच ।

मुनेर्वचनमाकर्ण्य भीष्मः प्रयतमानसः ।
चकार पूजनं तत्र चित्रगुप्तस्य तत्परः ॥
कार्त्तिके शुक्लपक्षे तु द्वितीयायाञ्च भारत !
यमश्च चित्रगुप्तश्च यमदूतांश्च पूजयेत् ॥
अतो यमद्वितीयेति संज्ञा लोके बभूव ह ।
सैनैव भगिनीहस्ते भोक्तव्यं पृथिवर्दनम् ॥

कायस्थः

महाविद्योपासकाश्च गुणतः क्षत्रियोपमाः ।
कलौ हि क्षत्रियाभावात् वैश्याभावाच्च सुव्रत ! ॥
एते भक्त्या भविष्यन्ति विप्रामानसहिष्णवः ।
विप्रप्रिया विप्रभक्ता विप्रमानप्रदा यतः ॥
महाविद्याप्रितप्तैते क्षत्रकर्म्मव्रतः कलौ ।
मय्या एवेश इत्यस्मात् मसीशोऽसौ निगद्यते ॥
ब्रह्मणो विप्रमूर्त्तस्तु पादांशे सम्भवन्ति तत् ।
कायस्था इति संज्ञाः स्युः सुयज्ञैषां शिवा मतिः ॥
श्रुत्वैतत् सकलं राजा वृत्तान्तं सुतपोमुखात् ।
प्रेमाश्रुभिर्न्हत्यकारी कृताञ्जलिपुटोऽब्रवीत् ॥

राजोवाच ।

इतः परम्यदेऽहञ्चेत् स्थिये तदपि मच्छिवम् ।
श्रुतं यत्तव जातीनां क्षत्रहीनकलौ सुखम् ॥
ततो ऽतितुष्टः सुतपा उवाच मधुरं वचः ।
सुयज्ञ ! सुमतिस्त्वं हि त्वत्तो विप्रप्रियो न हि ॥
मानेन ब्राह्मणानां हि वरञ्च मरणं नयेः ॥

सुयज्ञोवाच ।

हे नाथ सुतपो विप्र ! श्रुतं यन्मेऽङ्गजन्मुखात् ।
कृपया ब्रूहि तत् सर्व्वं ते जातेर्म्महिमानमु ॥
ब्राह्मणो ब्रह्म जानाति नान्यजातिरिति श्रुतिः ।
ब्रह्मज्ञानी सदा विप्रो न चेद्ब्राह्मणसंज्ञकः ॥
विना प्रयुक्तिं यो विप्र उपकारी स्वयं भवेत् ।
आशीः करोति ब्रूते च क्षत्रादीनां शिवं वचः ॥
स एव साक्षाद्ब्रह्मेति विप्राणां जातिलक्षणम् ।
ब्राह्मणाज्ञावचो ये न गृह्णन्ति पालयन्ति च ॥
गुर्व्वाज्ञालङ्घनं पापं स्पृशेत्तेषां शरीरतः ।
पित्रेति सकलं चोक्तं ते च सन्दिग्धजातयः ॥
वशीकारादि सकलं सृष्टिस्थितिलयश्च यत् ।
शक्नुवन्ति हि कर्त्तुं ते विप्राः पित्रेति चोक्तमु ॥
विनायासैर्मुदा यो यत् विप्राय शक्तितो ददत् ।
मुदा तदेव गृह्णाति विप्राणामिति लक्षणम् ॥
केषामपि न कापट्यं कुरुते ब्राह्मणः क्वचित् ।
विनापराधैर्न शपेदिति तज्जातिलक्षणम् ॥
हिंसे भवति हिंसः स शठे शाठ्यं समाचरेत् ।

कायस्थः

आर्जवञ्चेन्द्रियग्रामान् खवशे स्थापयेच्चिरम् ॥
दयालुश्च सदा विप्र इति पुत्र हृदि स्मरन् ।
भीत्या भक्त्या सदा पूज्यः पितेति ब्रूतवांश्च मे ॥
कटूक्त्या यदि गृह्णाति हृदा दुःखेन राति चेत् ।
तद्विप्रो दुःखं भजते दातुर्नैव शिवं क्वचित् ॥
वित्तशाठ्यं गृहशाठ्यं कार्य्यं नोभयतः क्वचित् ।
इत्यप्यात्मज विप्राच्च श्रुतं शासनसम्मतम् ॥
शृणु पुत्र प्रवक्ष्यामि सावधानं समाचर ।
भ्रान्तं बऊशपन्नं वा नैव दुष्यति भूसुरम् ॥
सुतपो नाथ मे पित्रा यद्यदुक्तं तदुक्तवान् ।
त्वयापि ब्राह्मण ब्रह्म यथारुचि तथा कुरु ॥
श्रुत्वैतत् सुतपा विप्र उवाच परमादरम् ।
राजन् वरं वृणु वृणु यत्ते मनसि वाञ्छितम् ॥

सुयज्ञ उवाच ।

ऋषे ! वरेण ते नैक उपकार इहाधुना ।
यज्ञे समाप्ते मे मस्तच्छेत्ता रामो भविष्यति ॥

सुतपा उवाच ।

यज्ञं समाप्य सुखतः प्रगच्छेर्विघ्ननैर्ऋतिम् ! ।
तत्र वै स्वर्गदानाद्या मध्ये द्रोपोऽस्ति सुन्दरः ॥
द्वादशक्रोशमानी हि तदूत्वा वसतिं कुरु ।
यदा परशुरामस्ते कच्चिच्छेत्ता भविष्यति ॥
भविष्यति च कार्य्यः स नय ते वाञ्छितं वरम् ।
ततः पुनः कृते राजन् जम्बूद्वीपेश्वरो भवान् ॥
भविष्यतीति त्वं वोजरूपेण तिष्ठ तत्र हि ।
वरं ते वाञ्छितं गृह्ण तुष्टोऽहं भक्तितस्तव ॥
इहतः परतो यद्यत् परमानन्द मुत्तमम् ॥

सुयज्ञराजोवाच ।

नाथ ! नाहं वरं याचे याचे केवलमङ्घ्रिते ।
चिरं मम मतिस्तिष्ठेदिति देहि वरोत्तमम् ॥
तेऽङ्घ्री पवित्रे परमे सर्व्वत्र सुखदे किल ।
तदेवास्तु इति प्रोच्य सुतपा गतवान् गृहम् ॥
राजापि च मखं कृत्वा विप्रेभ्यो दक्षिणां ददत् ।
परिवारयुतोऽगच्छद्वीपे काञ्चनदान्तरे ॥
वसतिं वरतः प्राप्तां चतुर्हिक्षु जलप्लुताम् ।

कायस्थः

अवस्थाः प्रापटन् विप्राः पण्डिताः सखवासभूम् ॥
एको मसीशः सर्व्वाख्यः सर्व्वाणीहृदयद्विजात् ।
कुलप्रदीपः स्वीयानां जातीनां पूततास्पृहः ॥
वगलेति महाविद्यां गृहीत्वा साधयन् मुदा ।
सर्व्वाणीहृदयाख्यस्य पण्डितस्य प्रसादतः ॥
वरं याचितवान् भक्त्या त्रिलोकाधिपतिं गुरो ! ।
कृपया कुरु मां नाथ ! त्वमेव वगला मम ॥
गुरुस्त्वपि वरं दत्तो राज्यं भुक्त्वा पुनर्भवन् ।
त्रिलोकाधिपतिर्भूय मुदा तत्र सुखिष्यसि ॥
गुर्व्वाज्ञया मसीशः स राज्यभोगी द्विजार्चितः ।
विहाय देहं भूयश्च त्रिधारूपो बभूव ह ॥
चित्रगुप्तश्चित्रसेनश्चित्राङ्गद इति त्रयः ।
स्वर्गे मर्त्ये च पाताले राजते चिरमुत्तमः ॥
चित्रगुप्तो महाविद्यां प्राप्य कुलाख्यविव्रतः ।
पुत्रान् याचितवान्नैव गुरोर्दैवत्वमावहन् ॥
यमान्तिस्थो बभूवापि स्वर्म्मर्त्याधोविवेचकः ।
चिरं शुभाशुभं कर्म्म विविच्य शमनान्तिके ॥
यद्ददेत् सकलानां तु तदेवाभोजयेत् यमः ।
चित्रसेनो महाविद्यां वगलेति गुरोर्नयन् ॥
जप्त्वा संतोष्य पुत्रादीन् याचित्वा प्राप्य मर्त्यतः ।
राज्यं चकार सुदृयुक्तश्चित्राङ्गद अधोगतः ॥
अधोगतस्य हेतुं त्वं वगले शृणु कालिके ! ।
वगलेति मनुं प्राप्य विप्रोऽस्मि इति वाञ्छया ॥
तपश्चकार पद्माब्दं नान्नं किञ्चित् गृहीतवान् ।
फलमूलादिकं किञ्चित् सायमस्ति यथा मिलेत् ॥
विहाय विप्रस्य गुरोरपि पूजाञ्च पार्व्वति ! ।
जपेन्नित्यं हि वगलामन्यविप्रञ्च नेक्षयन् ॥
ज्ञात्वेति ब्राह्मणाः सर्व्वे ऊचुश्चित्राङ्गदं क्रुधा ।
वचो हि मधुरं किञ्चित् प्रियादभक्ताच्च सुन्दरि ! ॥
रे चित्राङ्ग ! अवस्त्वं वत्स विप्रत्वमिच्छसि ।
कदाप्युपानन्मस्तश्चो नैवेति न हि बुध्यसि ॥
वत्स ! शीघ्रमधो गच्छ चिरं कुरु तपो मुदा ।
ततः श्रुत्वेति शापं स भक्त्यातिशयमानसः ॥
कृताञ्जलिपुटो ब्रूते चित्राङ्गद इतीश्वरि ! ॥

नित्यं यशस्यमायुष्यमर्व्वैकामार्थसिद्धिदम् ।
दानानि दापयेत्तस्तु भक्तिं च विशेषतः ॥
काले तत्र च संपूज्य चित्रगुप्तञ्च लेखकम् ।
चित्रैश्च चित्रपुष्पैश्च रक्तचन्दनमिश्रितैः ॥
नैवेद्यं दीयते तस्मै मोदकं गुडमिश्रितम् ॥
श्रीशीतलाप्रार्थना यथा.—
उत्पत्तौ प्रलये चैव भोग्ये दाने कृताकृते ।
लेखकस्त्वं सदा श्रीमांश्चित्रगुप्त नमोऽस्तु ते ॥
त्रिया सह समुत्पन्न समुद्रमथनोद्भव ! ।
चित्रगुप्त महाबाहो ! ममाद्य वरदो भव ॥
चित्रगुप्तस्तु सन्तुष्टो भीषाय च वरं ददौ ।
मत्प्रसादान्महाबाहो मृत्युस्ते न भविष्यति ॥
स्मरिष्यसि यदा मृत्युं तदा मृत्युर्भविष्यति ।
इति तस्मै वरं दत्त्वा चित्रगुप्तो दिवं ययौ ॥
अनेन विधिना यस्तु चित्रगुप्तस्य पूजनम् ।
करिष्यति महाबुद्धे तस्य पुण्यफलं शृणु ॥
इहैव विपुलान् भोगान् भुक्त्वा सर्व्वान् मनोरथान् ।
अन्तय विष्णुलोकञ्च नरो याति न संशयः ॥
चित्रगुप्तकथां दिव्यां कायस्थोत्पत्तिसंयुताम् ।

भक्तियुक्तेन मनसा ये शृण्वन्ति नरोत्तमाः ॥
दीर्घायुषो भविष्यन्ति सर्व्वव्याधिविवर्जिताः ।
सर्व्वे विष्णुपदं यान्ति यत्र यान्ति तपोधनाः" ॥
इति भविष्यपुराणे चित्रगुप्तकायस्थोत्पत्तिमाहात्म्यकथा समाप्ता ॥ * ॥
"एवं श्रुत्वार्जुनं रामः सन्त्राय निशितान् शरान् ।
एक एव ययौ हन्तुं सर्व्वानेवासुरान् रणान् ॥
केचित् गह्वरमाश्रित्य केचित् पातालमाविशन् ।
सगर्भा चन्द्रसेनस्य भार्य्या दाल्भ्याश्रमं ययौ" ॥
"ततो रामः समायातो दाल्भ्याश्रममनुत्तमम् ।
पूजितो मुनिना सद्यः पाद्यार्घ्याचमनादिभिः ॥
ददौ मधाऽऽसमये तस्मै भोजनमादरात् ।
रामस्तु याचयामास कृदिदं क्षमनीरथम् ॥
याचयामास रामाय कामं दाल्भ्यो महामुनिः ।
ततस्तो परमप्रीतो भोजनं चक्रतुर्मुदा ॥
भोजनानन्तरं दाल्भ्यः पप्रच्छ भार्गवं प्रति ।
यज्ञया प्रार्थितं देव तत् त्वं शंसितुमर्हसि ॥

राम उवाच ।

तवाश्रमे महाभाग शर्मा स्त्री समागता ।

चन्द्रसेनस्य राजर्षेः क्षत्रियस्य महात्मनः ॥
तस्मै त्वं प्रार्थितं देहि हिंसेयं तां महामुने ।
ततो दाल्भ्यः प्रत्युवाच ददामि तव वाञ्छितम् ॥

दाल्भ्य उवाच ।

स्त्रियो गर्भमुं बालं तस्मै त्वं दातुमर्हसि ।
ततो रामोऽब्रवीद्दाल्भ्यं यदर्थमहमागतः ॥
क्षत्रियाणकरस्थाहं तत् त्वं याचितवानसि ।
प्रार्थितश्च त्वया विप्र ! कायस्थो गर्भ उत्तमः ॥
तस्मात् कायस्थ इत्याख्या भविष्यति शिशोः शुभा ॥
एवं रामो महाबाऊर्हिला तं गर्भमुत्तमम् ।
निर्जगामाश्रमात् तस्मात् क्षत्रियाणकरः प्रभुः" ॥
"कायस्थ एव उत्पन्नः क्षत्रियां क्षत्रियाणकः ।
रामाज्ञया च दाल्भ्येन चक्रधर्माद्विनिष्कृतः ॥
कायस्थधर्मोऽयं दत्तश्चित्रगुप्तेन यः कृतः ।
तद्वोजजाश्च कायस्था दाल्भ्यगोत्रास्ततोऽभवन् ॥
दाल्भ्योपदेशतस्ते वै धर्मिष्ठाः सत्यवादिनः ।
सदाचारपरा नित्यं रता हरिहरार्चने ॥
देवद्विजपितृभक्ताश्च अतिथीनाञ्च पूजकाः" ॥
इति स्कान्दे रेणुकामाहात्म्ये ॥ * ॥

चित्राङ्गद उवाच ।
"हे ब्राह्मणा हे गुरवो ! मामेवातिनिरागसम् ।
कथं श्रेयुर्भवन्तो हि विप्ररूपा ह ईश्वराः ।
मुखाद्वो श्रुतवान् यच्चल्लतिः का तत्समाचरन् ।
उपास्तो यच्छ्रुवितुं सर्व्वे ऋषयोगिनः स्फुट ।
जानेऽहं ब्राह्मणो ब्रह्म खेच्छया विविधाकृतिः ।
नानालीलामाचरितुं मानुषाकृतिरप्यभूत् ।
तद्ब्रह्म ब्राह्मणं जाने जाने तत् सर्व्वरूपधृक् ।
राजेति संज्ञाधारी कः किं वा तच्च प्रणामिधम् ।
तदेव सकलव्यापि तदेव सर्व्वकर्तृ च ।
तदेव सर्व्वपाद्य स्यात्तदेव सर्व्वहर्तृ च ।
पुंरूपं चैव स्त्रीरूपं जीवरूपच्च नान्यथा ।
आत्मा एवैकरूपं तत् स्वमेवानेकमाकरोत् ।
नानाप्रकारजीवादि चात्मनात्मानमेव हि ।
व्यावरं जङ्गमं विप्राश्चदेव नात्र संशयः ।
भवन्तो ह्रीश्वराः सर्व्वे किमर्चयथ तत् कथम् ।
कथं चिन्तयथात्मानं देवमर्चनकाजतः ।
कृत्वेन भूतशुद्धादि ज्ञात्वा देवाः स्फुरेव किम् ।
ईशोऽपि मानुषाज्ञात्वा ईशत्वप्राप्तये पुनः ।
यद्युद्योगी भवेत्तत् किं मानुषोऽहं न तत्परे ।
अन्यायि न भवेद्ब्रह्म यूयमन्यायिनः कथम् ।
वगलापि च या जप्या सा च ब्राह्मण एव हि ।
कश्चिद्विशेषो भेदोऽपि वगलायां द्विजेऽपि न ।
अतस्तद्भवितुं विप्रा अहमप्येव तापसः ।
गुर्व्वाज्ञा मे पुराभूच्च सर्व्वं त्यक्त्वा जपं कुरु ।
अतोऽहं सकलं त्यक्त्वा केवलां वगलां जपे ।
वगलायां द्विजे नैव कश्चिद्भेदोऽस्ति शासने ।
अतो विप्रोऽस्मीति कामं ज्ञातवान् जपकर्म्मणि ।
गुरौ विप्रे मनौ चापि देवे चात्मनि भूसुराः ।
मसीग्रजातिः किञ्चिच्च न विशेषं विचिन्तयेत् ।
ब्राह्मणोऽप्यविशेषेण तस्मिंस्तस्मिंश्च भूसुराः ।
आत्मन्यात्मनि कीटेऽपि चेति वेदा जातिलक्षणम् ।
मूर्खोऽहं यच्च श्रुतवान् प्रभवो ब्राह्मणास्ततः ।
तदाचरितवान् मे को दोषोऽस्ति वदत द्विजाः ।
विनापराधतो विप्रा यूयं वामनरूपतः ।
बलिश्चातिप्रियं भक्तमधः प्राक्षापयन् यदि ।
अहं कीटोऽत्र नाश्चर्य्यं किमधो न पटे कथम् ।
ज्ञताज्ञविकृटोऽहं वत्सरं व्रतसंख्यया ।
प्रथमे सप्तहं विप्रा गच्छताहमधः पटे ।
अधोगच्छाम्यहं तत्र किञ्चित् खेदं करोमि न ।
वाग्व्ययामीति चाशा वो न व्यर्था भवतु क्वचित् ।
इत्यादि श्रुत्वा हे वाग्मि ! जल्पां प्राप्यातिखेदिताः ।
ब्रुवन्ति चातिमधुरं क्रन्दन्त इव ते द्विजाः ।
हे चित्राङ्गद ! हे विद्वन् ! दौर्म्बल्यं त्यज वत्सक !
दुश्चिन्तां कुरु मा तात भद्रं ते कथयामि ते ।
जनस्योपकरेणैव सर्व्वं भवितुमर्हति ।
नार्हतीशं विना तात ब्राह्मणो भवितुं क्वचित् ।
इतीश्वराज्ञा वेदेऽस्ति प्रतिजानीहि तत्त्वतः ।
वरं प्राप्नोति देवत्वं ब्राह्मणत्वं कदापि न ।
यथामरत्वमीशेन विना क्वापि न आसने ।
मा दुःखी त्वमधो गच्छ सुखेन वगलां जप ।
कल्पेऽष्टसहस्राब्दि राजर्षीश्वरो भव ।

ततस्त्रिलोकनाथस्त्वमिन्द्रतुल्यो भविष्यसि ।
राज्यं भुक्त्वा ततो नैव पुनरावर्त्तनं तव ।
सदा वयं तव शिवं चिन्तयामो न भीं कुरु ।
के जानन्तीदृशं त्वां हि भक्ताश्रेष्ठं विवेचकम् ।
आपं दास्यमाऽऽत्मधुना तन्न खण्डति ।
तात गच्छ सुखं सुहृत्स नागलोकेऽपि विस्तरात् ।
तत आनन्दमनसा गतचित्राङ्गदस्तमम् ।
स्वस्थानं ब्राह्मणाश्चापि जगच्छन् लब्धितान्तराः ।
भूयो मसीग्रः सर्व्वोऽपि विप्रदासाभिधोऽभवत् ।
विप्रप्रसादात् शूद्राणामपि श्रेष्ठो बभूव ह ।
वगलेति महामन्त्रं सर्व्वेषां सर्व्वकामदम् ।
केवलेन जपेनैव लक्षेण कालि ! सिध्यति ।
वशीकरणकर्म्मादि दशसाहस्रतो भवेत् ।
अथ वक्ष्ये महेशानि ! वगलासाधनं तव ।
वगलेति मनोः संख्या पुरश्चरणकर्म्मणि ।
लक्षेण मन्त्रसिद्धिः स्यात् गास्यत्र युगसंख्यकम् ।
ततो वश्यादि कर्त्तव्यं दशसाहस्रसंख्यया ।
शरीरारोग्यतो वापि धनेच्छुश्चायुतं जपेत् ।
कलावेतस्य हि मनोः प्रभावं किं ब्रवीमि ते ॥
सहस्रमात्रहोमेन सर्व्वसिद्धिर्न चान्यथा ।
नास्त्यपेक्षा हि ऋष्यादेः स्तुतिपाठादिकस्य वा ।
स्तुतिर्व्वा कवचं वापि ऋष्यादिन्यास एव वा ।
वगलेति स्वयं सर्व्वं सिद्धविद्या इति प्रिये ! ।
त्वयाद्यारूपया काले ! स्वयमुक्तं पुरैकदा ।
शरीरारोग्यतो देवि ! वैरिनिग्रहतोऽपि वा ॥
दिवा नक्तञ्च कर्त्तव्या सहस्रमानतो ऽवधिः ।
केवलाऽऽहुतिमात्रेण राजावारोग्यतां जयेत् ।
वगले इति यो विद्यामाद्यामादौ विचैर्यंच धारयेत् ।
पथिस्था विघ्नदाः सर्व्वे पलायन्ते तमीक्षिताः ।
भवेद्धि सपदं कर्म्म वगलेति स्मरन् जनः ।
वगलाजापिनं दृष्ट्वा सर्व्वे भीतिमवाप्नुयुः ।
केवलं पटजमिदं पठन् ह्रदयन् मनोरथम् ।
जपेत् कालि ! वशुस्थस्था वगलाञ्च न संशयः ।
एषा विद्या मसीग्रेण सदोपास्या न संशयः ।
ब्राह्मणे वगलायाञ्च चिन्तयेदेकरूपतः ।
विना प्रयुक्तिमपि च मसीग्रं आवयेद्विजः ।
आवयायां धनाकाङ्क्षी न भवेद्ब्राह्मणोत्तमः ।
आलस्याद्वा प्रमादाद्वा आवयेद्यदि द्विजः ।
मसीग्रहत्यामागी स्याच्छावयित्वा तव प्रियः ।
ब्राह्मणोऽपि वरारोहे ! ह्रदयुयात् भक्तितत्परः ।
निर्व्याजं लभते काले ! निष्कामी कोऽपि चेत् पठेत् ।
एतदुक्तेऽपि कायस्थः ह्रदयुयान्न यदि प्रिये ! ।
पटजं काम्यदाद्यु ब्रह्महत्यापजं लभेत्" ।
इति आचारनिर्णयतन्त्रे वासुदेवसम्मते हर-पार्व्वतीसंवादे सप्तचिंशत्तमः पटलः ॥
"चाटचारणचौरेभ्यो वधबन्धभयादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थेभ्यो विशेषतः" ।
इति वह्निपुराणे मायुपतदानाध्यायः ॥ * ॥

गौड़देशे तेषामागमनकारणम् । तत्रादौ मङ्गलाचरणं यथा,—
"यस्याभूद्भूमिदेवो वदनसरसिजेयद्भुजेभूमिपालो वक्षोर्व्वैश्यश्च एव द्विजसजनरतिर्यस्य शूद्रःपदाब्जे ।

कृत्वा पातिव्यतीदं जगदिति प्रकृतिर्यः स्वयं पूजयन्तं
वन्देऽहं देवदेवं त्रिगुणमयवरं सर्व्वलोकानुकम्पम्" ॥

अथ आदिशूरराजप्रशंसा ।
"श्रीमद्राजादिशूरोभवदवनिपतिर्धर्म्मराजो व आज्ञा
सल्लोकः सद्विचारैरदितिसुतपतिः स्वर्यथासीदतथासीत् । प्रातापादित्यतप्ताखिलतिमिररिपुस्तत्त्ववेत्ता महात्मा जित्वा बुद्धांश्चकार स्वयमपि नृपतिर्गौड़राज्यान्निरस्तान्" ॥ * ॥ अथादिशूरस्य पात्रं प्रति क्षतुब्राह्मणकुलीनशूद्रयोः प्रश्नस्योत्तरञ्च ।"पात्रं पप्रच्छ पूतं परमसुरपदद्वन्द्वपद्मार्चकोऽसौ कासन्ते काश्यपीशाः क्षतुक्षतिकुशलाः क्षापि शूद्राः कुलीनाः । पात्रन्तेभ्यः सवोचत् परिचयमखिलं भूपवाक्यात् द्विजाग्रे कोलाक्ष्याः कुरङ्गा इव किल तपसा नैव केषामधीनाः ॥ कोलाक्ष्य मह्मीपतिः क्षितिभुजामेकप्रधानः प्रधी खेष्टे निष्कलंतिमंहाग्रयवरं श्रीवीरसिंहः स्वभूत् । तद्देशवासिनः समाधिक्षतिनः पापाक्षिसंहारिणः सन्ति व्यासक्षमाः समासद्य तो गौड़ेन्द्रभूमीश्वराः" ॥ * ॥

अथ वीरसिंहं प्रति जिपिप्रेरणम् ।
"भूपोऽभूद्भवने स्वचेष्टितपरः सद्भृत्यभार्य्यान्वितान् भूदेवान् स्वयवान् विचिन्त्य जिखनैरानेतुकामः स्वयम् । याचेय प्रणयप्रमोदरचितां श्रीवीरसिंहे जिपिं गौड़श्चापतिरेव पुण्यसमतिर्दूतेन प्राक्षापयत्" ॥*॥

अथ जिपिप्रकारः ।
"सज्जातसज्जातसंज्ञाः सर्व्वशास्त्रार्थदक्षा
जपितहुतविपक्षाः खस्तिवाक्याः श्रुतिज्ञाः ।
सजितसुगतछन्दे गौड़राज्ये मदीये
द्विजकुलवरजाताः सानुकम्याः प्रयान्तु ।
नृपतिसुक्षतिसारः खीयवंशावतारः
प्रवलबलविचारो वीरसिंहोऽतिवीरः ।
मयि वरसखिताक्षे भूमिदेवान् सभूमान्
पुनरपि मम गौड़े प्रापय त्वं जिताक्षम्" ॥*॥

अथ ब्राह्मणशूद्राणां गौड़देशे गमनेच्छा ।
"मुदा गन्तुकामाः पुरावासगौड़ाः
समाहाय कोलाक्षदेशं क्षितीशम् ।
नृपाच्चाप्य लब्ध्वा सदारादिभत्वा
मखायोगिनस्ते बभूवुः सशूद्राः" ॥ * ॥

अथादिशूरसभीपे ब्राह्मणप्रेरणम् ।
"महाराजराजादिशूरो महात्मा
त्वया वीरसिंहस्य मेऽख्यादिसख्यम् ।
तवाज्ञानुसारात्रि प्रक्षापयामि
द्विजान् पञ्चगोत्रान् सदारादिभत्यान्" ॥*॥

अथ ब्राह्मणानां गमनम् ।
"बलबलजलाम्बुधियानाः प्रधाना
दृढतुरगमृगेन्द्राक्षितिश्रोमानलाभाः ।
क्षतुज्ञाः श्रुतिज्ञाः प्रतिज्ञासमाधाः
सवर्म्मोऽग्रगण्याः प्रयाताः प्रयागम् ।
ततः स्नानदानादि कृत्वा च विप्राः
ययस्तेऽपि वाराणसीं पञ्चगोत्राः ।
ततो विश्वनाथं समालोक्य दानैर्-
यंशः प्राप्य तस्मादयाभू मिमाशुः" ॥ * ॥

अथ ब्राह्मणानां गौड़राज्यप्रवेशो राजसमीपे आग्निरर्थं गमनञ्च ।

"पितृन् बान्धवांस्तारयित्वा गयायां
गताः ग्रासितं गौड़राज्येग्नराज्यम् ।
ततस्तेजसा ते दिग्नो भासयन्तः
श्रुतिं व्याहृतिं भारतीं पाठयन्तः ॥
ततो हस्तदूर्व्वाक्षतः पञ्चगोत्रा
नृपश्चाग्निमं कर्त्तुमेव प्रतस्थुः ।
अमी पञ्च मध्याह्नमार्त्तण्डतुल्या
द्विजाः स्थापिताश्चाः परश्रेयसञ्च" ॥ * ॥

अथैषां वेग्नं दृष्ट्वा राज्ञोऽवज्ञा तेषां शुष्कदत्ते आग्निरो निक्षेपञ्च । "दृष्ट्वैवं वेग्नमेषामवनिपतिरसौ भ्रान्तचित्तो द्विजानां तैरालापं न कृत्वा स्वगृहमपि ययौ गन्तुकामाः पुनस्ते । बुद्धा भूपालबुद्धिं च्यगमपि च बुधाः शुष्कदत्ताग्निपस्ते तद्धस्तात् प्राप्य दूर्व्वाक्षतंमपि स वभौ शुष्कदत्तः सुदत्तः" ॥ * ॥ अथ राज्ञा ब्राह्मणानां प्रश्नान्तनं गोत्रनामप्रश्नञ्च ।

"सविस्मया वै गजबद्धवक्त्रा
भूपादयस्ते चरणारविन्दम् ।
पवित्रकीर्त्तिं भुवि भूसुराणां
श्रुत्वा च येतुः सकलाः प्रणम्य ॥
क्षमध्वमस्माकमुचित्तवादं
मूढ़ात्मनाचापराधं हि विप्राः ।
भो ब्रूत विप्राः किमु नाम गोत्रं
ततश्च सर्व्वे गदितुं प्रवृत्ताः" ॥ * ॥

अथ पञ्चब्राह्मणानां परिचयः ।

"अभूदन्ध्रवंग्नोद्भवो भट्टनारायणोऽयञ्च ग्राणिल्यगोत्रे गरीयान् । तपस्वान् यग्नस्वान् दयावान् सुविद्वान् विवस्वानिवास्यां सभायां विभाति ॥ श्रुतितत्त्वतदङ्गविचारकरोऽवनिपालक काश्यपगोत्रवरः । क्रतुदत्तसमः किल दत्तमहाग्नयो नाम इति भुवि भाति यतिः ॥ समस्तग्नास्त्रपण्डितस्तथागतप्रखण्डितः प्रचण्डसर्व्ववैरिदर्पगर्व्वखर्व्वकारकः । सावर्णगोत्रसम्भवोऽत्र भाति वेदगर्भकः छान्दड़ः प्रभाति भूप वात्स्यगोत्रसम्भवः ॥ यग्नःसुधाकरोत्तमत्पत्नित्सङ्कयोषितानन्दाब्जे महातपस्तपोवग्नीकृतेन्द्रियः ॥ अयं श्रीलहर्षोऽनिग्नं दानहर्षो महर्षिर्यस्यां तपोभिः प्रभाति । क्षितीन्द्र! क्षितौ यो भरद्वाजगोत्रेश्वरो विप्रवर्य्यः प्रतापारिग्नौर्य्यः" ॥ * ॥

अथ शूद्रपरिचयप्रश्नः ।

"के यूयं नाम किं वा कथयत क्षतिनः स्वागताः क्वापि देग्नात् ? कोलाच्चात् पञ्चशूद्रा वयमपि नृपते! किङ्करा भूसुराणाम्। धन्या यूयं एथिव्यां परिचयमखिलं ब्रूत भो विप्रभक्ताः श्रुत्वोचुर्व्विप्रवर्य्याः सकलपरिचयं भूपतेरन्ति चैषाम् ॥ * ॥

अथ पञ्चशूद्राणां परिचयः ।

"सुक्षतालिक्षतास्बर एष क्षती
क्षितिदेवपदाम्बुजचारुरतिः ।
मकरन्द इति प्रतिभाति यति-
र्द्विजवन्द्यकुलोद्भवभट्टगतिः ॥

स च घोषकुलाम्बुजभानुरयं
प्रथिमेन्दुयग्नःसुरलोकवग्नः ।
सततं ससुखी सुमतिश्च सुधीः
ग्नरदिन्दुपयोऽम्बुधिकुन्दयग्नाः ॥
वसुधाधिपचक्रवर्त्तिनो
वसुतुल्या वसुवंग्नसम्भवाः ।
वसुधाविदिता गुणार्णवै-
र्नियतं ते जयिनो भवन्तु नः ॥
दग्नरथो विदितो जगतीतले
दग्नरथग्रथितः प्रथमः कुले ।
दग्नदिग्नां जयिनां यग्नसा जयी
विजयते विभवैः कुलसागरे ॥
यग्नस्विनां यग्नोधरः सदा हि सर्व्वेसादरः
प्रमत्तसत्वमत्तहःग्नरत्सुधांसुवद्यग्नः ।
प्रतापतापनोत्तपद्दिधालियोविदालिको
विभाति मित्रवंग्नसिन्धुकालिदासचन्द्रकः ॥
द्विजालिपालनार्थकोऽप्यसौ च हर्षसेवकः ।
कुलाम्बुजप्रकाग्नको यथान्धकारदीपकः ॥
अयं गुहकुलोद्भवो दग्नरथाभिधानो महान्
कुलाम्बुजमधुव्रतो विविधपुण्यपुञ्जान्वितः ।
निगृम्य गुहमाधितं सकलसभ्यहास्यं अभूत्
स वङ्गगमनोद्यतो विविधमानभङ्गो यतः ॥
अहञ्च पुरुषोत्तमः कुलभट्टयगणः क्षतो
सदत्तकुलसम्भवो निखिलग्नास्त्रविद्योत्तमः ।
विलोकितुमिहागतो द्विजवरैश्च राज्यं प्रभो!
चकार नृपतिः सतं विनयहीनतो निष्कुलम्" ॥ * ॥

अथाष्टौ सिद्धमौलिकाः ।

"गौड़ेऽष्टौ कीर्त्तिमन्तस्तिरवसतिक्षता मौलिका
ये हि सिद्धास्ते दत्ताः सेनदासाः करगृहसहिताः
पालिताः सिंहदेवाः । ये वापाद्याभिमुख्याः स्थितिविनयजुषः सप्रतिस्ते द्विपूर्व्वा होड़ाद्या वीक्ष्य
राज्ञा चरणगुणयुता मौलिकत्वेन साध्याः" ॥ * ॥

अथ द्विसप्रतिः साध्यमौलिकाः ।

"होड़ः खर धर धरणीवान आदृच सोमः पै सुर सामः । भद्रो विन्दो गुह वस लोधः शर्म्मा वर्म्मा ऊढ़ भुद्र चन्द्रः ॥ रुद्रो रक्षित राजादित्यो विष्णुर्नागः खिल पिल गूतः । इन्द्रो गुप्तः पालो भद्र ओमत्राङ्कुर बन्धुर नाथः ॥ शाँड़ हेग्नश्च मनो गण्डो राहा राणा राऊत साना दाहा दाना गण उपमाना । खामः क्षोमो धर वैद्योमो वीरस्तेजस्वार्णव आग्नः ॥ अग्निर्भूतो ब्रह्मः ग्नानः क्षेमो हेमो वर्द्धन रङ्गः । गुहः कीर्त्तिर्यग्नः कुण्डुर्नन्दी ग्रीलो धनुर्गुप्तः ॥ * ॥ इति दक्षिणराढ़ीयषटकारिका ॥ * ॥ * ॥ * ॥

अथ वङ्गजकुलाचार्य्यकारिका लिख्यन्ते ।

अथ शूद्रोत्पत्तिः ।

तथा चाग्निपुराणोक्तजातिमालायाम् ।

"आदौ प्रजापतेर्जाता मुखाद्विप्राः सदारकाः ।
बाहोश्च क्षत्रिया जाता उर्व्वोर्व्वैश्या विजज्ञिरे ॥
पादाच्छूद्रश्च सम्भूतस्त्रिवर्णस्य च सेवकः ।
होमनामा सुतस्तस्य प्रदीपस्तस्य पुत्रकः ॥
कायस्थस्तस्य पुत्रोऽभूद्भभूव लिपिकारकः ।

कायस्थस्य त्रयः पुत्राः विख्याता जगतीतले ॥
चित्रगुप्तश्चित्रसेनो विचित्रश्च तथैव च ।
चित्रगुप्तो गतः स्वर्गे विचित्रो नागसन्निधौ ॥
चित्रसेनः एथिव्यां वै इति शूद्रः प्रचक्षते" ॥ * ॥

अथ चित्रसेनादिसुतः ।

"वसुर्घोषो गुहो मित्रो दत्तः करण एव च ।
मृत्युञ्जयश्च सप्तैते चित्रसेनसुता भुवि ॥
करणस्य सुता जाता नागो नाथश्च दासकः ।
मृत्युञ्जयतनूद्भूता देवः सेनश्च पालितः ॥
सिंहश्चैव तथा ख्यातश्चैते पञ्चतिकारकाः ।
एते पञ्चतिकाराश्च मुनिभिः कथिताः पुरा" ॥ * ॥

अथ द्वादशशुद्धवंग्नजाः ।

"वसुर्घोषो गुहो मित्रो दत्तो नागश्च नाथकः ।
दासो देवस्तथा सेनः पालितः सिंह एव च ॥
एते द्वादशनामानः प्रसिद्धाः शुद्धवंग्नजाः" ॥ ॥

अथ सप्ताग्नीतिः पञ्चतिकाराः ।

"मृत्युञ्जयवंग्नभूतो नित्यानन्दो नृपेग्वरः ।
तस्यापि वंग्नसंजाताः सप्ताग्नीतिः प्रकीर्त्तिताः ॥
तेऽपि पञ्चतिकाराश्च मुनिभिः कथिताः पुरा" ॥ * ॥

तेषां नामानि ।

करो भद्रो धरो नन्दी पालश्चाङ्कुरदामकः ।
सारो धरश्चिहोड़ौ च वानश्चाच्चसोमकौ ॥
पै सुरः ग्रोणकश्चैव भद्रो विन्दुर्गुहस्तथा ।
वलश्च लोदकश्चैव शर्म्मा वर्म्मा च भूमिकः ॥
ऊढ़श्च रुद्रकश्चैव चन्द्रो रक्षितराजकौ ।
आदित्यविष्णुगुप्ताश्च खिलश्च पीलकस्तथा ॥
चाग्निर्हेग्नश्च बन्धुश्च नाग्निश्च सुमनुस्तथा ।
गण्डको राहकश्चैव राणाराऊतदाहकाः ॥
दाना गणश्च मानाश्च खामापत्तेमधारकाः ।
वैतोषवेदकाश्चैन्द्रवार्णवश्चावग्नक्तिकः ॥
भूतो ब्रह्मः संज्ञः क्षोमो वर्द्धनो हेमरङ्गौ ।
भूग्निः कीर्त्तिर्यग्नः कुण्डुः ग्रीलश्चैव धनुर्गुप्तः ॥
दाँड़िर्मनोरितिश्चैव चाकिश्च नन्दनस्तथा ।
ग्यामश्चाङ्कुश पूजिश्च तेजको नाद एव च ॥
रोहर्क्षोमश्च हाथिश्च ढोलश्च दूतकस्तथा ।
एते पञ्चतिकाराश्च सप्ताग्नीतिः प्रकीर्त्तिताः" ॥
एताः सप्ताग्नीतिपञ्चतयः द्वादशशुद्धपञ्चतयश्च मिलित्वा नवाधिकनवतिपञ्चतयो भवन्ति । एतेषां पुरोहितगोत्रप्रवरेण गोत्रप्रवरत्वं मुनिभिरुक्तम् ॥ *।

अथ कान्यकुब्जात् पञ्चानां ब्राह्मणां शूद्राणाञ्चागमनमाह देवीवरः ।

"अम्बष्ठकुलसम्भूत आदिग्नूरो नृपेग्वरः ।
राढ़गौड़वरेन्द्राश्च वङ्गदेग्नस्तथैव च ॥
एतेषां नृपतिश्चैव सर्व्वभूमीग्वरो यथा ।
अमात्यैर्बान्धवैश्चैव मन्त्रिभिर्द्विजवन्दकैः ॥
एतैः सह महीपाल एकदा स निजालये ।
उपविष्टो द्विजान् प्रष्टुं धर्म्मग्नास्त्रपरायणः ॥
केन यज्ञेन भगवत्प्रीतिर्भवति निश्चितम् ।
तत् सर्व्वं श्रोतुमिच्छामि कथयध्वं द्विजोत्तमाः ॥
इति श्रुत्वा द्विजाः सर्व्वे खर्व्वीकृतकलेवराः ।
कथयन्ति नृपाग्रे तु सर्व्वे विकृतमानसाः ॥
केन केन विधानेन यज्ञो वा क्रियते बुधैः ।

कायस्थः

वयं सर्व्वे न जानीमो विधानं कीदृशं क्रतोः ॥
इति तेषां वचः श्रुत्वा चिन्तायुक्तो महीपतिः ।
किं करोमि क्व गच्छामि विललाप पुनः पुनः ॥
कान्यकुब्जात् समानीतान् दूतेन द्विजयज्ञकान् ।
वेदशास्त्रेष्ववगतान् सर्व्वास्त्रे च विशारदान् ॥
गोयानारोहितान् विप्रान् खड्गचर्म्मादिभिर्युतान् ।
पत्तिवेशान् समालोच्य विषादो जायते हृदि ॥
अश्रद्धा जायते राज्ञ इति ज्ञात्वा द्विजोत्तमाः ।
आशीर्व्वादार्थनिर्म्माल्यं मल्लकाळोपरि स्थितम् ॥
तदा काष्ठं सजीवं स्यात् फलपल्लवसंयुतम् ।
इति दृष्ट्वा नृपस्तस्मिन् कम्पान्वितकलेवरः ॥
लोचञ्च वङ्कधा तेषामकरोत् स नृपोत्तमः ।
आसनं पाद्यमानीय ददौ विनयपूर्व्वकम् ।
उपविष्टा द्विजाः पञ्च तथा च शूद्रपञ्चकाः ॥
राजंस्ते कुशलं सर्व्वं प्रोचुस्तेत्यवदत् स तान् ।
अद्य मे सफलं जन्म जीवितञ्च सुजीवितम् ॥
पूतञ्च भवनं जातं युष्माकं गमनं यतः ।
एवञ्च क्रियते स्तोत्रं दृष्टान्यत् शूद्रपञ्चके ॥
युष्माकं गोत्रमाख्या च किमर्थं वा द्विजैः सह ।
तत् सर्व्वं श्रोतुमिच्छामि ब्रूत भोः शूद्रपुङ्गवाः ॥
इति राज्ञो वचः श्रुत्वा कथयन् नामगोत्रके ।
काश्यपे चैव गोत्रे च दत्तनामा महामतिः ॥
तस्य दासो गौतमस्य गोत्रे दशरथो वसुः ।
शाण्डिल्यगोत्रे सम्भूतो भट्टनारायणः स्मृतौ ॥
सौकालिनस्य दासोऽयं घोषः श्रीमकरन्दकः ।
भरद्वाजेषु विख्यातः श्रीहर्षो मुनिसत्तमः ॥
दासस्तस्य विराटाख्यो गुहकः काश्यपः स्मृतः ।
सावर्णगोत्रनिर्द्दिष्टो वेदगर्भमुनिस्त्वयम् ॥
तस्य दासो मित्रवंशो विश्वामित्रस्य गोत्रकः ।
कालिदास इति ख्यातः शूद्रवंशसमुद्भवः ॥
वात्स्यगोत्रेषु सम्भूतश्चान्द्रसेति संज्ञितः ।
मौद्गल्यगोत्रजो दत्तः पुरुषोत्तमसंज्ञकः ॥
एतेषां रक्षणार्थाय आगतोऽस्मि तवालये ।
इति श्रुत्वा नृपस्तत्र मनसा हर्षमागतः ॥
विधानेनैव निर्व्वर्त्त्य क्रतुञ्च धर्म्मसंज्ञितम् ।
ग्रामं सुवर्णं गाञ्चैव वस्त्राणि विविधानि च ॥
दक्षिणार्थे द्विजातिभ्यः प्रददौ स नृपोत्तमः ।
अत्र देशे कृतावासाः सर्व्वे च द्विजशूद्रकाः ॥
बहवश्च प्रजा जाता नानादेशनिवासिनः" ॥ * ॥

अथ वङ्गजकृतश्रेणिविभागः ।

"अथ वल्लालभूपश्च अम्बष्ठकुलनन्दनः ।
कुरुतेऽतिप्रयत्नेन कुलशास्त्रनिरूपणम् ॥
आदिशूरादीनतिविप्रान् शूद्रांश्चैव तथापरान् ।
एतेषां सन्ततीः सर्व्वा आनयत् स निजालये ॥
यत्र यत्र स्थिता विप्रास्तत्र ग्रामे निरोपिताः ।
श्रेणीश्चयन्तु निर्णीतं राढ़ीवारेन्द्रसंज्ञितम् ॥
तथैव द्विविधं प्रोक्तं कुलञ्च सद्विजोत्तमे ।
शूद्रस्याथ चतस्रश्च नृपेण श्रेणयः कृताः ॥
उदग्दक्षिणराढ़ौ च वङ्गवारेन्द्रकौ तथा ।
इति चतस्रः संज्ञाः स्युस्तत्तद्देशनिवासनात् ।
कुर्णं चतुर्व्विधं तेषां श्रेणीश्रेणीविशेषतः" ॥ * ॥

अथ वङ्गजकायस्थश्रेणिनिर्णयः ।

कायस्था

"तत्र वङ्गेषु यैः शूद्रैर्निवासः क्रियतेऽधुना ।
तेषां निर्णयमाचक्षे कुलञ्चैव विशेषतः ॥
वसुवंशे च मुख्यौ द्वौ नाम्ना लक्ष्मणपूषणौ ।
घोषेषु च समाख्यातश्चतुर्भुजमहाद्युती ॥
गुहे दशरथश्चैव मित्रे तारापतिस्तथा ।
दत्ते नारायणश्चैव एते च वङ्गजाः स्मृताः" ॥

अपरन्तु ।

"नागे दशरथश्चैव महानन्दस्तु नायकः ।
चन्द्रशेखरदासस्तु सेने गङ्गाधरस्तथा ॥
दामोदरकरः ख्यातो दामस्तूषापतिस्तथा ।
पालिते जनसंज्ञः स्यात् चन्द्रे नारायणाख्यकः ॥
पाले आवः समाख्यातो राहावंशे च लक्ष्यकः ।
भद्रे दिगम्बरश्चैव धरे तु व्याससंज्ञकः ॥
प्रभाकरस्तु नन्दी स्यात् केशवो देववंशजः ।
अवीपतिरिति ख्यातः कुण्डुवंशे प्रकीर्त्तितः ॥
सोमे वंशधरश्चैव सिंहे रत्नाकरस्तथा ।
नारायणः समाख्यातो रक्षिते च तथापरे ॥
वेदगर्भाङ्कुरश्चैव दैत्यारिर्विष्णुसंज्ञकः ।
आढ्ये त्रिलोचनः ख्यातो नन्दने च उमापतिः ॥
एते वङ्गजनिर्द्दिष्टा वल्लालेन महात्मना ।
अन्येऽपि शूद्रा विख्यातास्तत्र देशनिवासिनः ॥
ते वङ्गजाः समाख्याताः करणेषु प्रतिष्ठिताः" ॥ * ॥

अथ वङ्गजकुलीनादिनिरूपणम् ।

"कुलीन इति संज्ञा स्यात् मध्यन्यश्च तथापरः ।
महापात्रोऽचलश्चैव इति संज्ञाश्चतुष्टयम्" ॥

तद्यथा ।

"वसुर्घोषो गुहो मित्रो दत्तो नागश्च नायकः ।
दासः सेनः करो दामः पालितश्चन्द्रपालकौ ॥
राहो भद्रो धरो नन्दी देवः कुण्डुश्च सोमकः ।
रक्षिताङ्कुरसिंहाश्च विष्णुराशाश्च नन्दनः ॥
चत्वारोऽग्र्याख्यया मध्या महापात्राः परे तथा ।
सप्तविंशतिः शूद्राणां वल्लालेन प्रशंसिताः" ॥ * ॥

इति कुलीनमध्यन्यमहापात्राः । अचलान् वक्ष्यामि ।

"होड़श्च सारकश्चैव धरणीधान एव च ।
आइचः पैसुरश्चैव ज्ञानश्च भञ्जविन्दुकौ ॥
गुहश्च बलभोधौ च शर्म्मा च भूमिकः ।
ऊड़श्च रक्षकश्चैव राणादित्यौ च पीलकः ॥
खिलश्च गुप्तचाकी च बन्धुश्च शाण्डिसंज्ञकः ।
हेमश्च सुमगुर्गण्डो राणाराऊतदाहकाः ॥
दानागणापमानाख्याः खामः क्षेमश्च तोषकः ।
वैद्यापि घरवेदौ च भूतार्णवकवक्षकाः ॥
एन्दश्च श्रुतिसङ्करौ च क्षेमाग्नौ वर्द्धनस्तथा ।
हेमश्च बन्धकश्चैव भूजिः कीर्त्तिश्च श्रीलकः ॥
धनुर्गुणो यशश्चैव मनोरीतिश्च दाड़िकः ।
चाकिश्च श्याम पूजिश्च गरुड़को नादकस्तथा ॥
रोहश्च होमकश्चैव चाशकश्च तथैव च ।
ढोलश्च दृतकश्चेति द्विसप्तत्यचलाः स्मृताः" ॥

एतेषां प्रतिपुरुषक्रमेण कुलार्च्चनात् महापात्रभावो जायते ॥ * ॥ इति वङ्गजघटकरामानन्दशर्म्मकृतकुलदीपिका ॥

कायस्था, स्त्री, (कायस्तिष्ठत्यनया । काय + स्था + घञर्थे कः ।) हरीतकी । इति मेदिनी ॥ धात्री-

कारक

वृक्षः । इति जटाधरः ॥ काकोली । इत्यमरटीकायां भरतः ॥ एलादयम् । तुलसी । इति राजनिर्घण्टः ॥ कायस्थस्त्रीजातिः । कायस्थपत्न्यां कायस्थी ॥

कायिकः, त्रि, (कायेन निष्पादितः निष्पन्नो वा कायेन निर्वृत्त इति वा । काय + ठक् ।) शारीरिकः । कायनिष्पन्नः । यथा ।
"अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम्" ॥
इति तिथ्यादितत्त्वम् ॥ (स्त्री, शरीरसम्बन्धिनी चक्रवृद्धिः । यथा मनुः ८ । १५३ ।
"चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या" ॥)

कायिकावृद्धिः, स्त्री, (गोबलीवर्द्दादीनां कायपरिश्रमसाध्या या वृद्धिः ।) गवादिबलीवर्द्दादिकर्म्मयुता वृद्धिः । यथा ।
"दोह्यवाह्यकर्म्मयुता कायिका समुदाहृता" ॥
इति व्यासः ॥ मूलधनाविरोधिनी प्रत्यब्ददेयपणतदर्द्धादिरूपा वृद्धिः । यथा ।
'कायाविरोधिनी शश्वत् पणार्द्धाद्या तु कायिका" ।
इति नारदः ॥ हलायुधस्तु पणार्द्धाद्या इत्यत्र पणवाह्येति पठित्वा पणस्य मूलधनस्य यावदवस्थानं तावत् शश्वत् वर्षसहस्रमपि उत्तमर्णेन या वाह्यते प्राप्यते सा कायिकेति व्याख्यातवान् तन्नाद्या भोगलाभान्तर्गता अपरा च तद्भिन्ना इति मिश्राः । इति विवादार्णवसेतुः ॥

कारः, पुं, (कृ हिंसायां + भावे घञ् ।) वधः । निश्चयः । (धातूनामनेकार्थत्वात् अत्र निश्चयार्थेऽपि॥ कं सुखं ऋच्छत्यनेन । क + ऋ + करणे + घञ् ।) बलिः । यत्नः । यतिः । (कं सुखं निर्वृतिं ऋच्छतीति । क + ऋ + कर्त्तरि अण् ।) पतिः । इति शब्दरत्नावली ॥ (कं निष्यन्दजलमृच्छतीति ।) तुषारश्लेलः । इति मेदिनीकरहेमचन्द्रौ॥ कर्म्मोपपदे कर्त्रर्थवाचकः । यथा कर्म्मकारः स्वर्णकार इत्यादि । इति व्याकरणम् ॥ क्रिया । यथा करणं कारः क्रिया । इति रामतर्कवागीशाः ॥ (अक्षरान्ते तदक्षरवाचकः । यथा ककारः । मकारः । इत्यादिः ॥)

कारकं, स्त्री, (क्रियाभिरन्वितं इति । भाष्यमते तु करोति क्रियां निर्वर्त्तयतीति । कृ + कर्त्तरि ण्वुल् ।) क्रियानिमित्तं लोकतः सिद्धम् । इति दुर्गसिंहः ॥ फणिभाष्यमते पुं, यथा भवितुः स प्रयोजकः कारकः । तच्च षड्विधम् । कर्म्म १ यथा रामं नमति । करणम् २ यथा नेत्रैः शिवो दृष्टः । कर्त्ता ३ यथा जनैः शिवो दृष्टः । सम्प्रदानम् ४ यथा हरिः सद्भ्यः सुखं ददातु । अपादानम् ५ यथा विभीषणः पदाद्भ्रष्टः । अधिकरणम् ६ यथा रेमे शरदि गोविन्दः । इति बोपदेवः ॥ वर्षोपलोदकं जलम् । इति राजनिर्घण्टः ॥

कारकः, त्रि, (करोति कर्म्मादिकम् । कृ + "ण्वुल्तृचौ" । ३ । १ । १३३ । इति ण्वुल् ।) कर्त्ता । इति मेदिनी ॥ (यथा मनुः ७ । २०४ ।
"आदानमप्रियकरं दानञ्च प्रियकारकम्" ॥)

कारकुचीयः, पुं, (कारकुचि + छः ।) शाक्यदेशः ।

(तत्र भवः अण् बहुषु तस्य लुक्।) तद्देशीयजने बहुवचनान्तः। इति हेमचन्द्रः॥

कारणं, क्ली, (कार्य्यतेऽनेन। णिजन्तात् ल्युट्।) येन विना यन्न भवति तत्। तत्पर्य्यायः। हेतुः २ बीजम् ३। इत्यमरः। १। ४। २८॥ निमित्तम् ४ प्रत्ययः ५। इति जटाधरः॥ (यथा, विष्णुपुराणे। १। १७। ३०।

"यतः प्रधानपुरुषौ यतश्चैतत् चराचरम्।
कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु"॥)

कारणत्वमाह। अन्यथासिद्धिशून्यत्वे सति नियतपूर्ब्ववर्त्तित्वम्। तच्चिविधम्। समवायिकारणत्वम् १ असमवायिकारणत्वम् २ निमित्तकारणत्वम् ३ परमाणुपरिमाणभिन्नानां कारणत्वम्। इति भाषापरिच्छेदः। १६-१७॥ अणुपरिमाणान्तु न कस्यापि कारणम्। इति सिद्धान्तमुक्तावली (यथा, हेः रामायणे। १। ६४। ११।

"बहुभिः कारणैर्देव! विश्वामित्रो महामुनिः।
लोभितः क्षोभितश्चैव तपसा चाभिवर्द्धते"॥)

करणम्। (क्त वधे + स्वार्थे णिच् भावे ल्युट्।) बधः। इति मेदिनी॥ (आदिः। मूलम्। यथा, मनुः। ११। ८४।

"ब्राह्मणः सम्भवेनैव देवानामपि दैवतम्।
प्रमाणञ्चैव लोकस्य ब्रह्मात्रैव हि कारणम्"॥

प्रमाणम्। यथा, मनुः। ८। २००।

"सम्भोगो दृश्यते यत्र न दृश्येतागमः क्वचित्।
आगमः कारणं तत्र न सम्भोग इति स्थितिः"॥)

इन्द्रियम्। (यथा, गीतायाम्। १३। २०।

"कार्य्यकारणकर्त्तृत्वे हेतुः प्रकृतिरुच्यते।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते"॥

"कार्य्यं शरीरं कारणानि सुखदुःखसाधनानीन्द्रियाणि तेषां कर्त्तृत्वे तदाकारपरिणामे"। इति तट्टीकायां श्रीधरस्वामी॥) देहः। (यथा, शार्ङ्गधरपद्धतौ। १३।

"अनाद्यविद्याऽनिर्व्वाच्या कारणोपाधिरुच्यते।
उपाधिचितयादन्यमात्मानमवधारयेत्"॥)

साधनम्। (करणमेव स्वार्थे अण्।) कर्म्म। (यथा, चाणक्ये। २३।

"न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचित् रिपुः।
कारणेन हि जायन्ते मित्राणि च रिपूंस्तथा"॥)

कायस्थः। (करणशब्दोऽस्य विशेषो ज्ञेयः॥) वाद्यप्रभेदः। गीतप्रभेदः। इति भरतधृतरत्नकोषः॥ (आदिकारणत्वात् विष्णुः। यथा महाभारते। १३। १७६। ५४।

"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः"॥

शिवः। यथा शङ्करः शते वेदसारशिवस्तवे ७।

"अजं शाश्वतं कारणं कारणानाम्
शिवं केवलं भासकं भासकानाम्"॥)

कारणगुणोद्भवगुणः, पुं, (कारणगुण उद्भवो यस्य। स चासौ गुणश्चेति कर्म्मधारयः।) कारणगुणपूर्ब्वकगुणः। तद्यथा। रूपम् १ रसः २ गन्धः ३ अपाकजस्पर्शः ४ द्रवत्वम् ५ स्नेहः ६ वेगः ७ गुरुत्वम् ८ एकत्वम् ९ एथक्त्वम् १० परिमाणम् ११ स्थितिस्थापकसंस्कारः १२। इति भाषापरिच्छेदे। ६६॥

कारणशरीरं, क्ली, (कारणं अविद्या सैव शरीरम्। अनाद्यविद्याऽनिर्व्वचनीयं शरीरद्वयकारणमात्रम्। सत्स्वरूपाज्ञानं यदस्ति तत्कारणशरीरमित्याहुः।) सत्त्वप्रधानमज्ञानम्। (किन्तु बीजावस्थायां सूक्ष्मवृत्तित्वात् विषयव्यापाररहितस्यान्तःकरणस्य सतरां सुखस्वरूपेणानुभूयतेऽसौ दशा।) तत्पर्य्यायः। आनन्दमयकोषः २ सुषुप्तिः ३। (यदुक्तं वेदान्तसारे। १६।

"अस्यापीयमहङ्कारादिकारणत्वात् कारणशरीरं आनन्दप्रचुरत्वात् कोषवदाच्छादकत्वाच्च आनन्दमयकोषः सर्व्वोपरमत्वात् सुषुप्तिः अतएव स्थूलसूक्ष्मशरीरलयस्थानमिति घोष्यते"॥ अत्र सुबोधिनी यथा।

"प्रलयकाले हिरण्यगर्भादिप्रपञ्चोत्पादकेश्वरगतमूलप्रकृतिवत् सुषुप्तिकाले अहङ्कारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्वं इन्द्रियतद्विषयाभावे व्यासङ्गाभावादानन्दबाहुल्यादानन्दमयत्वं आच्छादकत्वात्कोषत्वञ्च युक्तमितिभावः। ननु स्थूलसूक्ष्मशरीरलयस्थानस्य कथं सुषुप्तिशब्दवाच्यत्वमित्याशङ्क्य पूर्ब्ववत् संज्ञाभेद इति वक्तुं तत्र युक्तिमाह सर्व्वोपरमत्वादिति। पञ्चीकृतस्थूलशरीरस्य व्यावहारिकस्य खाप्रपञ्चस्य स्वकारणेऽज्ञाने लीनत्वात् सर्व्वोपरतिरित्यर्थः। तथा चोक्तम्।

"लये कोनस्य तद्धर्म्मा द्रव्याद्याः स्युस्तरङ्गके।
तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा॥
व्यवहारिक देहस्य लयः स्यात् प्रतिभासिके।
तल्लये सच्चिदानन्दाः पर्य्यवस्यन्ति साक्षिणि"॥)

कारणा, स्त्री, (कृ हिंसायाम्। णिजन्तात् ल्युट्। "ण्यासश्रन्थेति"। ३। ३। १०७। युच् ततः टाप्।) यातना। गाढ़वेदना। इत्यमरः। १। ८। ३॥ नरकरुजा यमयातना। इति केचित्। इति भरतः॥

कारणिकः, त्रि, (कारणैः कारणैर्वा चरति। "चरतीति"। ४। ४। ८। ठक्।) परीक्षकः। इत्यमरः। ३। १। ७॥

कारणोत्तरं, क्ली, (कारणेन उत्तरम्।) प्रत्यवस्कन्दनम्। सत्यत्वेनाङ्गीकृत्य तत्प्रतिकूलरूपकारणं ब्रूयात् तदा तदुत्तरम्। तच्चिविधम्। बलवत् १ तुल्यबलम् २ दुर्ब्बलम् ३। आद्यं यथा मया त्वत्तः शतं गृहीतमिति सत्यं किन्तु तत् परिशोधितम्। द्वितीयं यथा मदीयेयं भूमिः क्रमागतत्वादिति वाद्युक्ते प्रतिवादिनोऽपि तथोत्तरम्। तृतीयं यथा ममेयं भूमिः क्रमागतत्वात् इति वाद्युक्ते ममेयं भूमिः दशवर्षोपभुज्यमानत्वात् इति प्रत्युत्तरम्। इति व्यवहारतत्त्वम्॥

कारण्डवः, पुं स्त्री, (जमनाडड इति रमेर्ड। रण्डः। ईषत् रण्डः। "ईषदर्थे" ६। ७। १०५। इति कोः कादेशः। कारण्ड वाति। वा गतौ + "आतोनुपेति"। ३। २। ३। कः। कारण्डस्येदं कारण्डं तदाकारं वाति वा।) हंसविशेषः इत्यमरः। २। ५। ३४॥ खड़हाँस इति भाषा। (यथा ऋतुसंहारे। प्रावृड्वर्णने ८।

"कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसकुलाकुलतीरदेशाः"॥)

कारण्डव्यूहः, पुं, (बुद्धभेदः। इति त्रिकाण्डशेषः। (बौद्धशास्त्रविशेषः॥)

कारन्धमी, [न्] पुं, (कर एव कारन्धं धमतीति। ध्मा + इनिः। एषोदरादित्वात् साधुः।) कांस्यकारः। धातुवादरतः इति मेदिनी॥

कारम्भा, स्त्री, (ईषत् रम्भा। कोः कादेशः।) प्रियङ्गुवृक्षः। इत्यमरः। २। ४। ५६॥

कारवः, पुं, (का इति रवो यस्य। कुत्सितो वो यस्येति वा।) काकः। इति त्रिकाण्डशेषः॥

कारवल्ली, स्त्री, (कारा इतस्ततो विच्छिन्ना वल्ली यस्याः। यद्वा कुत्सित आरो गतिर्यस्याः। सा चासौ वल्ली चेति।) कारवेल्लः। काण्डीरः। इति राजनिर्घण्टः॥

कारवी, स्त्री, (कारं वाति। वा + कः। के जलोपलक्षितवर्षाकाले रवो यस्य। कारवः केकावरो मयूरस्तस्य पुच्छमिवाकारोऽस्यस्य अच्। यद्वा क्त हिंसायां स्वार्थे णिच्ततः क्विप्। कारमवति। कर्म्मण्यण्। गौरादित्वात् ङीष्।) मधुरा। मौरी इति भाषा। दीप्यः। मयूरशिखा। वनजटा इति भाषा। क्षेत्रयमानिका इति केचित्। सवयी। केचे जीरा इति भाषा। हिङ्गुपत्री। हिङ्गेर पाता इति भाषा। इत्यमरभरतौ॥ क्षुद्रकारवेल्ली। इति राजनिर्घण्टः। छोट करला इति भाषा।

कारवेल्लं, क्ली, (कारं वेल्लति। वेल्ल चलने कर्म्मण्यण्। यद्वा कारेण वातगमनेन वेल्लति चलति गच्छति वा वेल्ल चलने अच्।) कठिल्लकम्। करला इति भाषा। तत्पर्य्यायगुणाः।

"कारवेल्लं कठिल्लं स्यात् कारवेल्ली ततो लघुः।
कारवेल्लं हिमं भेदि लघु तिक्तमवातलम्।
ज्वरपित्तकफास्रघ्नं पाण्डुमेहकृमीन् हरेत्।
तदूषा कारवेल्ली स्यादिशेषाद्दीपनी लघुः"।

इति भावप्रकाशः॥ अमरे ऐजिङ्गोऽयम्॥

कारवेल्लः, पुं, (कारेण वायुवत् गत्वा वेल्लति चलतीति। कार + वेल्ल + अच्।) लताविशेषः। करला इति भाषा। तत्पर्य्यायः। कठिल्लकः २ सुषवी ३। इत्यमरः। २। ४। १५४॥ सुषवी ४ सुग्रवी ५। इति तट्टीका॥ कण्डुरः ६ काण्डकटुकः ७ सुकाण्डः ८ उग्रकाण्डः ९ कठिल्लः १० गात्रासम्वेदनः ११ पटुः १२। इति राजनिर्घण्टः। तत्पुष्पगुणाः। धारकत्वम्। रक्तपित्तरोगे सुपथ्यत्वञ्च। तत्फलगुणाः। शुक्रकफपित्तनाशित्वम्। रुचिकरत्वञ्च। इति राजवल्लभः॥

कारवेल्लकः, पुं, (कारवेल्ल एव। स्वार्थे कन्।) कारवेल्लः। इति रत्नमाला॥ (स्त्रीत्वमपि दृश्यते। यथा सुश्रुते सूत्रस्थाने ४६ अध्याये।

"तद्वत् कर्कोटकं प्रोक्तं कारवेल्लकमेव च"॥)

कारवेल्ली, स्त्री, (कारवेल्ल + अल्पार्थे ङीष्।) क्षुद्र-

कारवेल्लम्। करेलो इति हिन्दी भाषा। उच्चे इति वङ्गभाषा॥ (यदुक्तं पाकराजेश्वरे।
"कारवेल्लीफलं तिक्तं श्लेष्मितं हिक्कमर्दितम्।
भर्त्सितं नवनीतेन सैन्धवेन समन्वितम्॥
विदलितमुखमीषत् कारवेल्लीकठोरं
पुलकितमिव तैले साधितं रामठेन।
रुचितमरिचचूर्णं सैन्धवेनातिपूर्णम्
सुललितरसनाग्रं लोलता मातनोति"॥
अन्यत् कारवेल्लशब्दे द्रष्टव्यम्॥)

कारमिहिका, स्त्री, (कारस्य तुषारशैलस्य मिहिका नीहार इव।) कर्पूरम्। इति राजनिर्घण्टः॥

कारस्करः, पुं, (कारं वधं करोतीति। कृ+"कृञो हेतुताच्छील्यानुलोम्येषु"। ३। २। २०। इति टः निपातनात् सुट्।) वृक्षविशेषः। तत्पर्य्यायः। किम्पाकः २ विषतिन्दुः ३ करद्रुमः ४ रम्यफलः ५ कुपीलुः ६ कालकूटः ७। (यथा महाभारते २। द्यूतपर्व्वणि ६६। २१।
"आवर्त्तिता इवाभान्ति नीपाश्चित्रककौकुराः।
कारस्करा लौहजङ्घा युधिष्ठिरनिवेशने"॥)
अस्य गुणाः। कटुत्वम्। उष्णत्वम्। तिक्तत्वम्। कुष्ठवातामयास्रकण्डूतिकफार्शोव्रणनाशित्वञ्च।
इति राजनिर्घण्टः॥

कारस्कराटिका, स्त्री, (कारस्कर इव अटति। अट्+ण्वुल्टाप् अत इत्वञ्च।) कर्णजलौका। इति त्रिकाण्डशेषः॥ केर्णो केनुइ इति च भाषा॥

कारा, स्त्री, (कीर्य्यते क्षिप्यते दण्डार्हो यस्याम्। कॄ विक्षेपे भिदादित्वात् अङ्। "ऋदृशोऽङीति" ७। ४। १६। गुणे दीर्घत्वं निपात्यते।) कारागारम्। तत्पर्य्यायः। बन्धनालयः २ इत्यमरः। २। ८। ११६॥ दूती। प्रसेवकः। सुवर्णकारिका। बन्धनम्। इति मेदिनी॥ पीड़ा। इति त्रिकाण्डशेषः॥

कारागारं, क्ली, (कारैव आगारं कारायै बन्धनाय आगारं वा।) बन्धनगृहम्। यथा। "रिपुः कारागारं कलयति च तं केलिकलया"। इति तन्त्रसारे श्यामारहस्योक्तम्॥

कारागुप्तः, त्रि, (कारायां बन्धनागारे गुप्तः रक्षितो वा।) कारागारस्थः। इति हेमचन्द्रः। कयेदी इति भाषा॥

कारायिका, स्त्री, (कं जलं आरातिं आदत्ते प्रचरणस्थानतया इति यावत्। आ+रा+ण्वुल् टाप् इत्वञ्च।) बलाका। इति जटाधरः॥

कारावेश्म, [न्] क्ली, (कारैव कारायै वा वेश्म गृहम्।) कारागारम्। तत्पर्य्यायः। वधाङ्गकम् २। इति त्रिकाण्डशेषः॥

कारिः, स्त्री, (क्रियतेऽसौ। कृ+"विभाषाख्यानपरिप्रश्नयोरिञ्च"। ३। ३। ११। इति इञ्।) क्रिया। (यदुक्तं सिद्धान्तकौमुद्यां। "त्वं कां कारिमकार्षीः। सर्व्वां कारिमकार्षम्"॥) करोतीति डु कृञ् करणे। "कृञ उदीचां कारुषु" उणां। ४। १२८। इति इञ्।) श्लिष्यनि चि। इति मेदिनी॥

कारिका, स्त्री, (धात्वर्थे निर्द्देशे करोतेर्ण्वुल् इत्त्वादृद्धिः। यद्वा करोतीति ण्वुल् प्रत्ययस्यादिति इत्वम्।) नटस्त्री। क्षतिः। विवरणश्लोकः। (यथा, महाभारते। २।११। ३३।
"नाटका विविधाः काव्याः कथाख्यायिकाकारिकाः"॥)
श्लिष्यम्। ग्रातना। इति मेदिनी॥ वृद्धिः। इत्यमरटीकायां रमानाथः। सुद इति भाषा॥ स्वल्पाक्षरत्वेन बह्वर्थज्ञापिका कविता। यथा,—
"कारिका तु स्वल्पवृत्तौ बह्वोरर्थस्य सूचनी"।
इति हेमचन्द्रः॥

कारित, त्रि, (कृ+णिच्+कर्म्मणि क्तः।) कुर्व्वन् प्रेरितः। कराय इति भाषा। यथा, मार्कण्डेये। देवीमाहात्म्ये ८१। ६५।
"विष्णुः शरीरग्रहणमहमीशान एव च।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्"॥

कारिता, स्त्री, (कारित+टाप्।) ऋणिकेन या स्वकार्य्यसाधकतया अशीतितमभागाद्धिकशतादितोऽधिका वृद्धिर्व्यवस्थापिता सा। अधिक् सुद इति भाषा। यथा, विवादार्णवसेतौ कात्यायनः॥
"ऋणिकेन तु या वृद्धिरधिका संप्रकीर्त्तिता।
आपत्कालकृता नित्यं दातव्या सा तु कारिता"॥
(तथा च मनुः ८। १५३।
"नाति सम्वत्सरीं वृद्धिं न चाटां पुनर्हरेत्।
चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या"॥)
तत्पर्य्यायः। कारिका २ कारितावृद्धिः ३। इति मिताक्षरा॥

कारी, स्त्री, (कृणाति हिनस्ति कण्टकैः। कॄ हिंसायां+इन् ततो ङीष्।) वृक्षविशेषः। कण्टकारी आकर्षकारीत्येषा द्विधा। तत्पर्य्यायः। कारिका २ कार्य्या ३ गिरिजा ४ कटुपत्रिका ५। अस्या गुणाः। कषायत्वम्। मधुरत्वम्। पित्तनाशित्वम्। दीपनत्वम्। ग्राहित्वम्। रुचिकरवृक्षौषधकारित्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

कारीषं, क्ली, (करीषाणां समूहः। भिदादित्वात् अण्।) करीषसमूहः। इत्यमरः। ३। २। ४३॥ घुटेर राशि इति भाषा। (यथा, हरिवंशे।
"कारीषेषु प्रदीप्तेषु दीप्यमानेषु सर्व्वशः"॥

कारुः, पुं, (करोति इति। "कृवापाजिमीति"। उणां १। १। उण्।) विश्वकर्म्मा। इति मेदिनी॥ (भावे उण्।) श्लिष्यम्। इति हेमचन्द्रः॥

कारुः, त्रि, (करोति इति। कृ+उण्। उणां। १। १।) कारकः। (यथा, भट्टिः ७। २८।
"राघवस्य ततः कार्य्यं कारुर्व्वानरपुङ्गवः।
सर्व्ववानरसेनानामाश्वागमनमादिशत्"॥)
श्लिष्यी। इति मेदिनी॥ (यथा, कूर्म्मपुराणे।
"कारयित्वा तु कर्म्माणि कारुं पश्चान्न वञ्चयेत्"॥)

कारुकः, त्रि, (कारु+स्वार्थे कन्।) श्लिष्यी। (यथा मनुः। ४। २१६।
"कारुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च
गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति"॥)

कारुजः, पुं, (कं जलं आरुजति। आ+रुज+कः।) करभः। फेनः। वल्मीकः। नागकेशरः। गैरिकम्॥

कार्त्तस्व (कारोः कारुतो जायते। कारु+जन+डः।) श्लिष्यिनां चित्रम्। स्वर्णं जातरूपम्। इति हेमचन्द्रः॥

कारुणिकः, त्रि, (करुणा शीलमस्य। शीलमिति ठक्।) दयालुः। इत्यमरः। ३। १। १५॥ (यथा, रघुः। १५। ७१।
"कविः कारुणिको वव्रे सीतायाः सम्परिग्रहम्"॥)

कारुण्डी, स्त्री, (कुत्सितः ईषत् वा रण्डी मूर्द्धहीना इव।) जलौकाः। इति शब्दचन्द्रिका॥ कारुण्डिका इति च पाठः॥

कारुण्यं, क्ली, (करुणः करुणावान्। तस्य भावः। करुणैव वा ष्यञ्।) करुणा। इत्यमरः। १। ७। १८॥ (यथा गोः रामायणे १। २। १५।
"मुनेः श्रित्यसहायस्य कारुण्यं समजायत"॥)

कारूषाः, पुं, (करूषो अभिजन एषाम्। भर्गादित्वात् अण् बहुषु न तस्य लुक्।) करूषदेशवासिनः। तत्पर्य्यायः। दक्षदृहाः २। इति हेमचन्द्रः॥ बहुवचनान्तोऽयं शब्दः॥ (यथा, विष्णुपुराणे २। ३। १६।
"कारूषा मालवास्चैव पारियात्रनिवासिनः"।)

कारोत्तमः, पुं, (कारेण सुरागालनेन उत्तमः। मद्यस्य उत्तमतया तथात्वम्।) कारोत्तरः। इत्यमरटीकायां स्वामी॥

कारोत्तरः, पुं, (कारेण सुरागालनक्रियया उत्तरति। उत्+तॄ+अच्।) सुराग्रभागः। तत्पर्य्यायः। सुरामण्डः २। इत्यमरः। २। १०। ४३॥ कूपः। इति हारावली॥

कार्कश्यं, क्ली, (कर्कशस्य भावः। कर्कश+ष्यञ्।) कर्कशता। (यथा, अमरुशतके २४।
"कार्कश्यंगमितेपि चेतसि तनू रोमाञ्चमालम्बते"॥)

कार्त्तवीर्य्यः पुं, (कृतवीर्य्यस्य अपत्यं अण्।) चन्द्रवंशीयकृतवीर्य्यराजपुत्रः। तत्पर्य्यायः। हैहयः २ दोःसहस्रभृत् ३ अर्জ্জुनः ४। (यथा, भागवते ६। २३। २४।
"न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति पार्थिवाः।
यज्ञदानतपोयोगश्रुतवीर्य्यजयादिभिः"॥
अस्य खलु माहिष्मती नाम पुरी राजधान्यासीत्। भुजवीर्य्येणायं सप्तद्वीपां धरामजयत्। दत्तात्रेययोगात् बाहुसहस्रप्रभावं लब्धवान्। दिग्विजये आगतो रावणोऽनेन पराजितो निगडे बद्धः पितामहेन पुलस्त्यमुनिना ततो मोचितः। अथन्तु जमदग्नेराश्रमं गत्वा दनात् सवत्सां होमधेनुं जहार। ततः क्रुद्धेन जामदग्नेन सबलोनिहतोऽसौ कार्त्तवीर्य्यः। अथ वैरशुद्धिं चिकीर्षुभिः दुरात्मभिः कार्त्तवीर्य्यपुत्रैरागत्य स्वाश्रमे ध्यानस्थो जमदग्निर्निपातितः। ततोऽनेन पितृवधामर्षात् जातक्रोधेन परशुरामेण सर्व्वे हैहयाः निपातिताः॥
जैनराजचक्रवर्त्तिविशेषः। तत्पर्य्यायः। सुभूमः २। इति हेमचन्द्रः॥

कार्त्तस्वरं क्ली, (कृतस्वरे आकरभेदे भवम् अण् कृताः पठिताः स्वरा येन सः कृतस्वरः सामगानकर्त्ता तस्मै दक्षिणात्वेन देयं वा। "श्रेये"। ४। २

६२ इत्यण्।) स्वर्णम्। (यथा, माघे १। २०। "स तप्तकार्त्तस्वरभास्वराम्बरः"॥)
धुस्तूरः। इत्यमरः। २। ४। ७७॥

कार्त्तान्तिकः, पुं, (कृतान्तं वेत्ति। "कृतूक्थादि सूत्रान्ताट्ठक्"। ४। २। ३०। इति ठक्।) ज्योतिर्व्वित्। दैवज्ञः। इत्यमरः। २। ८। १४॥

कार्त्तिकः, पुं, (कृत्तिकानक्षत्रयुक्ता पौर्णमासी यत्र मासे इति पाक्षिको अण्।) वैशाखादिद्वादश मासान्तर्गतसप्तममासः। कृत्तिकानक्षत्रयुक्ता पौर्णमासी यत्र मासे सः। अयं तुलास्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तरूपमुख्यचान्द्रः। सौरस्तु तुलाराशिस्थरविककालः। इति स्मृतिः॥ तत्पर्य्यायः। बाऽलः २ ऊर्ज्जः ३ कार्त्तिकिकः ४। इत्यमरः। १। १७॥ कौमुदः ५। इति शब्दरत्नावली॥ *॥

अथ कार्त्तिककृत्यम्।

पद्मपुराणे।

"तुलामकरमेषेषु प्रातःस्नानं विधीयते"।

तत्र संकल्पः अरुणोदयकाले मज्जनं कृत्वाचम्य ॐ तत्सदद्य कार्त्तिके मासि अमुकपक्षे अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रः श्री अमुकदेवशर्म्मा श्रीविष्णुप्रीतिकामः प्रातःस्नानमहं करिष्ये इति संकल्प्य यथोक्तविधिना इतिकर्त्तव्यतां विधाय—

"ॐकार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्द्दन!। प्रीत्यर्थं तव देवेश! दामोदर! मया सह"॥

इति स्नायात्। मया सहेत्यत्र। प्रतिदिनसंकल्पे तु आरभ्य तुलास्थरविं यावत् प्रत्यहं इति न वक्तव्यम्। किन्तु मासीत्यनन्तरं तुलास्थरवाविति विधिकं वक्तव्यम्। चान्द्रस्नानवाक्यन्तु वैशाखकृत्ये अनुसन्धेयम्। तथा वायुपुराणे।

"यदीच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान्। कार्त्तिकं सकलं व्याप्य प्रातःस्नायी भवेन्नरः"॥ *॥

तथा च गारुडे।

"गवामयुतदानेन यत् फलं लभते खग!। तुलसीपत्रकैकेन तत् फलं कार्त्तिके स्मृतम्"॥

ॐअद्येत्यादि तुलसीपत्रकैकसमसंख्यायुतधेनुदानजन्यफलसमफलप्राप्तिकामः एतानि तुलसीपत्राणि श्रीविष्णवेऽहं ददे। इत्यभिलप्य एतानि तुलसीपत्राणि श्रीविष्णवे नमः। इत्यनेन दद्यात्॥ *॥

ब्रह्माण्डपुराणे।

"विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम्। अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः॥
ॐदामोदराय नमसि तुलायां लोलया सह। प्रदीपन्ते प्रयच्छामि नमोऽनन्ताय वेधसे"॥

लोलया लक्ष्म्या।

"इति मन्त्रेण यो दद्यात् प्रदीपं सर्पिरादिना। आकाशे मण्डपे वापि स चाक्षयफलं लभेत्"॥

स्नानवत्। ॐअद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा अक्षयदीपदानफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा आकाशे मण्डपे वापि श्रीविष्णवे दीपदानमहं करिष्ये। इति संकल्प्य दामोदरायेत्यादिना दद्यात्। द्वितीयादिदिने ॐदामोदरायेत्यनेनेति विशेषः। विष्णुगृहे तु। ॐअद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा अग्निष्टोमसहस्रजन्यफलसमफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा श्रीविष्णवेश्मनि श्रीविष्णवे दीपदानमहं करिष्ये। इति संकल्प्य ॐ दामोदरायेत्यादिना दद्यात्। द्वितीयादिदिने ॐ दामोदरायेत्यनेनेति विशेषः॥ *॥

हविष्यान्नादौ तु ब्रह्मपुराणे।

"व्रतोपवासनियमैः कार्त्तिको यस्य गच्छति। देवो वैमानिको भूत्वा स याति परमं पदम्"॥

तत्र अद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा वैमानिकदेवत्वभवनपूर्ब्बकपरमपदप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा हविष्येतरभोजननिवृत्तिमहं करिष्ये। इत्यादिवाक्ये विशेषः। एवं फलाहारादावपि॥ *॥ हविष्यद्रव्याणि च।

"हैमन्तिकं सितासिद्धं धान्यं मुद्गास्तिला यवाः। कलायकङ्गुनीवारा वास्तूकं हिलमोचिका॥
यष्टिका कालशाकञ्च मूलकं केमुकेतरत्। लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी। तिन्तिड़ी जीरकञ्चैव नागरङ्गञ्च पिप्पली॥
कदली लवली धात्री फलान्यगुड़मैक्षवम्। अतैलपक्वं मुनयो हविष्यान्नं विदुर्ब्बुधाः"॥

हैमन्तिकमित्यभिधायागस्त्यसंहितायाम्।

"नारिकेलफलञ्चैव कदलीं लवलीन्तथा। आम्रमामलकञ्चैव पनसञ्च हरीतकीम्॥
व्रतान्तरप्रशस्तञ्च हविष्यं मन्वते बुधाः"।

अत्र च आरब्धव्रतोपवासादौ फलजलादिभक्षणमप्याहतुरुद्योगपर्व्ववैधायनौ।

"अहौ तान्यव्रतघ्नानि आपो मूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरोर्व्वचनमौषधम्"॥ *॥

फलाहारादावपि तुलसीराहित्ये दोषमाह।

"तुलसीं विना या क्रियते न पूजा स्नानं न तद्यत् तुलसीं विना कृतम्।
भुक्तं न तद्यत् तुलसीविवर्ज्जितं पीतं न तद्यत्तुलसीविवर्ज्जितम्"॥ *॥

नारदीये।

"न मात्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि। चण्डालो जायते राजन् कार्त्तिके मांसभक्षणात्"॥

तथा च महाभारते।

"कौमुदन्तु विशेषेण शुक्लपक्षे नराधिप!। वर्ज्जयेत् सर्व्वमांसानि धर्म्मो ह्यत्र विधीयते"॥

कौमुदं कार्त्तिकम्। कार्त्तिकमधिकृत्य ब्रह्मपुराणम्।

"एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु। दिने दिने च स्नातव्यं शीतलासु नदीषु च।
वर्ज्जितव्या तथा हिंसा मांसभोजनमेव च"॥

ततश्च मांसभोजननिषेधे कार्त्तिकमासतत्शुक्लपक्षतदेकादश्यादिपञ्चदिनानि शुक्लाशुक्लभेदात् पाप्मतारतम्याद्वा निषिद्धानि।

"कार्त्तिके शौकरं मांसं यस्तु भुङ्क्ते दुर्म्मतिः। षष्टिवर्षसहस्राणि रौरवे परिपच्यते"॥ ओलपटोलकदम्बस्तनाककांस्यसन्धिजानि वर्ज्जयेत्।

"पटोलानि कदम्बानि स्तनाकसहितानि च। भुञ्जानः कार्त्तिके मासि यावदाभूतसंप्लवं"॥ *॥

भूतचतुर्द्दशीकृत्यं तत्शब्दे द्रष्टव्यम्। तत्र दीपदाने विशेषो यथा,—

"ततः प्रदोषसमये दीपान्दद्यात् प्रयत्नतः। ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च।
कूटागारेषु चैत्येषु गृहासु च नदीषु च"॥

दीपदानमन्त्रः।

"ॐ नमः पितृभ्यः प्रेतेभ्यो नमो धर्म्माय विष्णवे। नमो धर्म्माय रुद्राय कान्तारपतये नमः"॥ *॥

दीपान्विताङ्गत्यं तत्शब्दे द्रष्टव्यम्। तत्र विशेषो यथा। तत्र बालातुरवृद्धव्यतिरेकेण दिवा न भोक्तव्यम्। तत्र पार्ब्बणश्राद्धं कृत्वा प्रदोषे प्राचीनावीती दक्षिणामुखो ज्वलदुल्काम्।

"ॐ अस्माच्चास्मत्कुलानाञ्च भूतानां भूतदर्शयोः। उज्ज्वलज्योतिषा देहं दह्येयं यामवह्निना"॥

इत्यनेन गृह्णीयात्।

"ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम। उज्ज्वलज्योतिषा दग्धास्ते यान्तु परमां गतिम्"॥

इत्यनेन भूमौ क्षापयेत्।

"ॐ यमलोकं परित्यज्य आगता ये महालये। उज्ज्वलज्योतिषा वर्त्म प्रपश्यन्तो व्रजन्तु ते"॥

इत्यनेन पितॄन् विसर्ज्जयेत्। यद्येवं पूर्ब्बदिन एव प्रदोषव्यापिन्यमावास्या तदा पूर्ब्बदिन एव श्राद्धमङ्गत्वापि उल्कादानं कर्त्तव्यम्। आचारात् पञ्चभूतोपाख्यानञ्च श्रोतव्यम्। उभयतः प्रदोषव्याप्तौ परदिन एव युग्मात्। उभयतः प्रदोषाप्राप्तावपि उल्कादानं परदिने पार्ब्बणानुरोधात्। अत्रैव पूर्ब्बदिने लक्ष्मी रात्रौ पूज्या।

"अमावस्या यदा रात्रौ दिवाभागे चतुर्द्दशी। पूजनीया तदा लक्ष्मीर्व्विज्ञेया सुखरात्रिका"॥

इति वचनात्। लक्ष्मीपूजाविषयेऽप्येवं व्यवस्था। ततो गृहमध्ये उत्तराभिमुखो लक्ष्मीं पूजयेत्। ततः स्वस्तिवाचनपूर्ब्बकं ॐ सूर्य्यः सोम इति ॐ तद्विष्णोरिति च पठित्वा तिलपुष्पजलान्यादाय ॐ तत्सदित्युच्चार्य्य ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्म्मा परमविभूतिलाभकामो लक्ष्मीपूजनमहं करिष्ये। इति संकल्प्य शालग्रामे घटादिस्थजले वा भूतशुद्ध्यादिकं कृत्वा लक्ष्मीं पूजयेत्। तद्यथा। ॐ पाद्मासनायै नमः इत्यादिना ध्यात्वा। ॐ भूर्भुवःस्वर्म्महालक्ष्मि! इहागच्छ इत्याद्यावाह्य एतत्पाद्यं ॐ लक्ष्म्यै नमः। एवमर्घ्याचमनीयगन्धपुष्पधूपदीपनैवेद्यपुनराचमनीयताम्बूलादि प्रत्येकं दद्यात्।

"ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये!। या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात्"॥

इत्यनेन पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत्।

ॐ विश्वरूपस्य भार्य्यासि पद्मे पद्मालये ! शुभे ! ।
सर्व्वतः पाहि मां देवि महालक्ष्मि ! नमोऽस्तु ते" ॥
ततः । "सुखरात्र्याः प्रदोषे तु कुबेरं पूजयन्ति ये" ॥
इति स्कन्दधरवचनात् । कुबेरमपि पाद्यादिभिः
पूजयेत् ।
"ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः" ॥
इति पठित्वा । ॐ कुबेराय नम इति चिः पूज-
येत् । ततो गृहादिषु दीपान्दद्यात् । तत्र मन्त्रः ।
ॐ अग्निर्ज्योती रविर्ज्योतिश्चन्द्रर्ज्योतिस्तथैव च ।
उत्तमः सर्व्वज्योतीनां दीपोऽयं प्रतिगृह्यताम् ॥
ततो ब्राह्मणान् बन्धून् भोजयित्वा स्वयं भुञ्जीत ।
तत्र प्रत्यूषे भविष्योक्तं कर्म्म कर्त्तव्यम् । गोरोचना-
तिलकधारणं प्रदीपवन्दनं कृत्वा लक्ष्मीं चिः पूज-
येत् । तत्र मन्त्रः ।
"ॐ विश्वरूपस्य भार्य्यासि पद्मे पद्मालये ! शुभे ! ।
महालक्ष्मि ! नमस्तुभ्यं सुखरात्रिं कुरुष्व मे ॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम् ।
सुखरात्रि ! प्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु ॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता ।
सम्वत्सरप्रिया या च सा ममास्तु सुमङ्गला ॥
माता त्वं सर्व्वलोकानां देवानां कीर्त्तिसम्भवा ।
आख्याता भूतले देवि ! सुखरात्रि ! नमोऽस्तु ते" ॥
ॐ लक्ष्म्यै नमः इति चिः पूजयेत् । अन्यत् सुख-
रात्रिशब्दे द्रष्टव्यम् ॥ * ॥

अथ द्यूतप्रतिपत् । तत्र प्रभाते अक्षक्रीड़ादिकं
कार्य्यम् । तत्र जयेवर्षं शुभम् । पराजये वर्षम-
शुभम् । ततः संकल्प्य ग्रामे जले वा एतत्
पाद्यं ॐ बलये नमः । इत्यादि संपूज्य ।
"ॐ बलिराज ! नमस्तुभ्यं विरोचनसुत प्रभो ! ।
भविष्येन्द्र सुरारते ! पूजेयं प्रतिगृह्यताम्" ॥
अनेन पुष्पाञ्जलित्रयं दद्यात् ।
"यो यो यादृग्भावेन तिष्ठत्यस्यां युधिष्ठिर ! ।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि" ॥
तथा ।
"मद्दःपुण्या तिथिरियं बलिराज्यविवर्द्धिनी ।
स्नानं दानं व्रतयुग्यं कार्त्तिकेऽस्यां तिथौ भवेत् ॥*॥

अथ भ्रातृद्वितीया । तत्राष्टधाविभक्तदिनपञ्चम-
यामार्द्धप्राप्तायां द्वितीयायां उभयदिने तथा
चेत्परदिने कृत्स्नं युग्मात् । तत्र ॐ तत्सदि-
त्युच्चार्य्य ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्म्मा
सहोदरभगिनीकामो यमादिपूजनमहं करिष्ये । इति
संकल्प्य ग्रामे घटादिस्थजले वा पूजयेत् ।
एतत् पाद्यं ॐ यमाय नमः । एवं क्रमेण संपूज्य ।
"एह्येहि मार्त्तण्डज ! पाशहस्त !
यमान्तकालोकधरामरेश ! ।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते" ॥
इदमर्घ्यं ॐ यमाय नमः तत आचमनीयादिकं
दत्त्वा प्रणमेत् ।
"ॐ धर्म्मराज ! नमस्तुभ्यं नमस्ते यमुनाग्रज ! ।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्र ! नमोऽस्तु ते" ।
तत ॐ चित्रगुप्ताय नमः । इत्यनेन पूजयेत् । तत
ॐ यमदूतेभ्यो नमः । इत्यनेन पाद्यादिभिः
पूजयेत् । यमुनाञ्च पाद्यादिभिः संपूज्य प्रणमेत् ।
"ॐ यमस्वसर्नमस्तेऽस्तु यमुने ! लोकपूजिते ।
वरदा भव मे नित्यं सूर्य्यपुत्रि ! नमोऽस्तु ते" ॥
ततो भ्रातृभोजनकाले अन्नादिकं दत्त्वा भगिनी
पठेत् ।
"भ्रातस्त्वयानुज्ञाताहं भुञ्जे भक्तमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषतः" ॥
ज्येष्ठा चेत् तवाग्रजाताहमिति वदेत् । ततः
पुष्टिकामो भ्राता भुञ्जीत । "यत्नेन भगिनीहस्तात् भोक्तव्यं पुष्टिवर्द्धनं" इति वचनात् ॥ * ॥

विष्णुत्यागं उत्थानैकादशीशब्दे द्रष्टव्यम् । तत्र
कार्त्तिकशुक्लैकादश्यादितिथित्रयवृद्धौ वृद्धपद्मकम् ।
"वृद्धोऽपि तत्र नाम्नीयान्मत्स्यश्चैव कदाचन" ।
इति वचनात् ॥ कार्त्तिक्यां गोदानादौ फलाधि-
क्यम् । "कार्त्तिक्यां गोप्रदो भवेत्" । इति वच-
नात् । इति कृत्यतत्त्वम् ॥ * ॥ * ॥ अपि च ।
अथ कार्त्तिकव्रतनित्यता । स्कान्देब्रह्मनारदसंवादे ।
"दुर्ल्लभ्यं प्राप्य मानुष्यं कार्त्तिकोक्तं चरेन्न हि ।
धर्म्मं धर्म्मभृतां श्रेष्ठ ! स महापातकः ॥
अव्रतेन क्षिपेद्यस्तु मासं दामोदरप्रियम् ।
तिर्य्यग्योनिमवाप्नोति सर्व्वधर्म्मबहिष्कृतः ॥
स ब्रह्महा स गोघ्नश्च स्वर्णस्तेयी सदाऽशुची ।
न करोति मुनिश्रेष्ठ ! यो नरः कार्त्तिके व्रतम् ॥
विधवा च विशेषेण व्रतं यदि न कार्त्तिके ।
करोति मुनिशार्दूल ! नरकं याति सा ध्रुवम् ॥
व्रतन्तु कार्त्तिके मासि यदा न कुरुते गृही ।
इष्टापूर्त्तं वृथा तस्य यावदाहूतनारकी ॥
संप्राप्ते कार्त्तिके मासे द्विजो व्रतपराङ्मुखः ।
भवन्ति विमुखाः सर्व्वे तस्य देवाः सवासवाः ॥
इष्ट्वा च बहुभिर्यज्ञैः कृत्वा श्राद्धशतानि च ।
स्वर्गं नाप्नोति विप्रेन्द्र ! अकृत्वा कार्त्तिके व्रतम् ॥
यतिश्च विधवा चैव विशेषेण वनाश्रमी ।
कार्त्तिके नरकं यान्ति अकृत्वा वैष्णवं व्रतम् ॥
वेदैरधीतैः किं तस्य पुराणपठनैश्च किम् ।
हुतं यदि न विप्रेन्द्र ! कार्त्तिके वैष्णवं व्रतम् ॥
जन्मप्रभृति यत्पुण्यं विधिवत्समुपार्ज्जितम् ।
भस्मी भवति तत्सर्व्वमकृत्वा कार्त्तिके व्रतम् ॥
यद्दत्तञ्च परं जप्तं हुतञ्च सुमहत्तपः ।
सर्व्वं विफलतामेति अकृत्वा कार्त्तिके व्रतम् ॥
सप्तजन्मार्ज्जितं पुण्यं वृथा भवति नारद ! ।
अकृत्वा कार्त्तिके मासि वैष्णवं व्रतमुत्तमम् ॥
पापभूतास्तु ते ज्ञेया लोके मर्त्या महामुने ! ।
वैष्णवाख्यं व्रतं यैस्तु न कृतं कार्त्तिके शुभम्" ॥
किञ्च ।
"अकृत्वा नियमं विष्णोः कार्त्तिकं यः क्षिपेन्नरः ।
जन्मार्ज्जितस्य पुण्यस्य फलं नाप्नोति नारद !" ॥
किञ्च ।
"नियमेन विना चैव यो नयेत् कार्त्तिकं मुने ! ।
चातुर्म्मास्यं तथा चैव ब्रह्महा स कृताधमः" ॥
किञ्च ।
"पिण्डदानं पितृणाञ्च पिण्डपक्षे न वै कृतम् ।
व्रतं न कार्त्तिके मासि श्रवणाभ्यधितर्पणम् ॥
चैत्रे नान्दोलितो विष्णुर्भाद्रखानं न सञ्चले ।
न कृता मद्दकी पुण्ये श्रावणे रोहिणाष्टमी ॥
सङ्क्रमे न कृता येन द्वादशी श्रवणान्विता ।
कुत्र यास्यन्ति ते मूढ़ा नाहं जानामि नारद !" ॥
पाद्मे च । श्रीसौनकादिमुनिगणसंवादे ।
"मानुषः कर्म्मभूमौ यः कार्त्तिकं नयते मुधा ।
चिन्तामणिं करे प्राप्य क्षिपते कर्दमाम्बुनि ॥
नियमेन विना विप्राः कार्त्तिकं यः क्षिपेन्नरः ।
कृष्णः पराङ्मुखस्तस्य यस्मादूर्ज्जोऽस्य वल्लभः" ॥*॥
तत्र विशेषेण स्नानदानादिसत्कर्म्मनित्यता ।
स्कान्दे तत्रैव ।
"यैर्न दत्तं हुतं जप्तं न स्नानं न हरेर्व्रतम् ।
न कृतं कार्त्तिके पुत्र ! द्विजास्ते वै नराधमाः" ।
किञ्च ।
"यैर्न दत्तं हुतं जप्तं कार्त्तिके न व्रतं कृतम् ।
तेनात्मा हारितो नूनं न प्राप्तं प्रार्थितं फलम्" ।
किञ्च ।
"संप्राप्ते कार्त्तिके मासि ये रता न जनार्द्दने ।
तेषां सौरिपुरे वासः पितृभिः सह नारद" ॥
किञ्च ।
"कार्त्तिके नार्च्चितो यैस्तु भक्तिभावेन केशवः ।
नरकं ते गमिष्यन्ति यमदूतैस्तु यन्त्रिताः ॥
जन्मकोटिसहस्रैस्तु मानुष्यं प्राप्य दुर्ल्लभम् ।
कार्त्तिके नार्च्चितो विष्णुर्हारितं तेन जन्म वै ॥
विष्णोः पूजा कथा विष्णोर्विष्णवानाञ्च दर्शनम् ।
न भवेत् कार्त्तिके यस्य हन्ति पुण्यं दशाब्दिकम्" ॥
अथ कार्त्तिकमाहात्म्यम् । स्कान्दे ।
"कार्त्तिकस्य तु माहात्म्यं प्राक् सामान्येन लिख्यते ।
ततो विशेषतस्तत्र कर्म्म देशादिभेदतः" ॥
अथ सामान्यतः स्कान्दे तत्रैव ।
"कार्त्तिकस्य तु मासस्य कोट्यंशेनापि नार्हति ।
सर्व्वतीर्थेषु यत् स्नानं सर्व्वदानेषु यत् फलम् ॥
एकतः सर्व्वतीर्थानि सर्व्वे यज्ञा सदक्षिणाः ।
एकतः पुष्करे वासः कुरुक्षेत्रे हिमाचले ॥
मेरुतुल्यसुवर्णानि सर्व्वदानानि चैकतः ।
एकतः कार्त्तिको वत्स ! सर्व्वदा केशवप्रियः ॥
यत् किञ्चित् क्रियते पुण्यं विष्णुमुद्दिश्य कार्त्तिके
तदक्षयं भवेत्सर्व्वं सत्योक्तं तव नारद ! ॥
कार्त्तिकं खलु वै मासं सर्व्वमासेषु चोत्तमम् ।
पुण्यानां परमं पुण्यं पावनानाञ्च पावनम् ॥
यथा नदीनां विप्रेन्द्र शैलानाञ्चैव नारद ! ।
उदधीनाञ्च विप्रर्षे ! क्षयो नैवोपपद्यते ॥
पुण्यं कार्त्तिकमासे तु यत् किञ्चित् क्रियते मुने !
न तस्यास्ति क्षयो ब्रह्मन् प्रायश्चाप्येवमेव च ॥
न कार्त्तिकसमो मासो न कृतेन समं युगम् ।
न वेदसदृशं शास्त्रं न तीर्थं गङ्गया समम् ॥
कार्त्तिकः प्रवरो मासो वैष्णवानां प्रियः सदा ।
कार्त्तिकं सकलं यस्तु भक्त्या सेवेत वैष्णवः ॥
पितॄनुद्धरते सर्व्वान् नरकस्थान् महामुने" ॥
पाद्मे च तत्रैव ।

"द्वादशस्वपि मासेषु कार्त्तिकः कृष्णवल्लभः।
तस्मिन् संपूजितो विष्णुरखर्वैरप्युपायनैः॥
ददाति वैष्णवं लोकमित्येवं निश्चितं मया।
यथा दामोदरो भक्तवत्सलो विदितो जनैः॥
तस्मायन्नादृशो मासः खल्पमप्युपकारकः।
दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः॥
तत्रापि दुर्लभः कालः कार्त्तिको हरिवल्लभः।
दीपेनापि हि यत्रासौ प्रीयते हरिरीश्वरः॥
सुगतिञ्च ददात्येव परदीपप्रबोधनात्"॥*॥

अथ व्रतमाहात्म्यं स्कान्दे तत्रैव।

"व्रतानामिह सर्व्वेषामेकजन्मानुगं फलम्।
कार्त्तिके तु व्रतस्योक्तं फलं जन्मशतानुगम्॥
अक्रूरतीर्थे विप्रेन्द्र! कार्त्तिक्यां समुपोष्य च।
स्नात्वा यत् फलमाप्नोति तच्छ्रुत्वा वैष्णवं व्रतम्॥
वाराणस्यां कुरुक्षेत्रे नैमिषे पुष्करेऽर्ब्बुदे।
गत्वा यत् फलमाप्नोति व्रतं कृत्वा तु कार्त्तिके॥
अनिद्रो च सदा यज्ञैर्न कृत्वा पिढभिः सधाम्।
व्रतेन कार्त्तिके मासि वैष्णवन्तु पदं व्रजेत्॥
प्रदत्तानाञ्च भक्ष्याणां कार्त्तिके नियमे कृते।
अवश्यं कृष्णरूपत्वं प्राप्यते मुक्तिदं शुभम्"॥

किञ्च।

"ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मुनिसत्तम!।
वियोनिं न व्रजत्येव व्रतं कृत्वा तु कार्त्तिके"॥

किञ्च।

"कार्त्तिके मुनिशार्दूल! सकृत्स्नात्वा वैष्णवं व्रतम्।
यः करोति यथोक्तन्तु मुक्तिस्तस्य करे स्थिता॥
सुपुण्ये कार्त्तिके मासि देवर्षिपिढसेविते।
क्रियमाणे व्रते नृणां स्वल्पेऽपि स्यान्महाफलम्"॥*॥

अथ कर्म्मविशेषमाहात्म्यम्। स्कान्दे तत्रैव।

"दानं दत्तं हुतं जप्तं तपश्चैव तथा कृतम्।
तदक्षयफलं प्रोक्तं कार्त्तिके च द्विजोत्तम"!॥

किञ्च।

"यत् किञ्चित् कार्त्तिके दत्तं विष्णुमुद्दिश्य मानवैः।
तदक्षयं लभ्यते वै अन्नदानं विशेषतः"॥

किञ्च।

"यस्तु सम्वत्सरं पूर्णमग्निहोत्रमुपासते।
कार्त्तिके स्नपनं कृत्वा सममेतन्न संशयः॥
कार्त्तिके या करोत्येवं केशवालयमण्डनम्।
स्वर्गस्था श्लोभते सा तु कपोती पक्षिणी यथा॥
यः करोति नरो नित्यं कार्त्तिके पत्रभोजनम्।
न स दुर्गतिमाप्नोति यावदिन्द्राश्चतुर्दश॥
जन्मप्रभृति यत्पापं मानवैश्च कृतं भवेत्।
तत्सर्व्वं नाशमाप्नोति ब्रह्मपत्रेषु भोजनात्॥
सर्व्वकामफलं तस्य सर्व्वतीर्थफलं लभेत्।
न वापि नरकं पश्येत्ब्रह्मपत्रेषु भोजनात्॥
ब्रह्म चैव स्मृतः साक्षात् पलाशः सर्व्वकामदः।
मध्यमं वर्ज्जितं पत्रं शूद्रस्य मुनिसत्तम!॥
भुञ्जन्नरकमाप्नोति यावदिन्द्राश्चतुर्दश।
तिलदानं नदीस्नानं सत्कथा साधुसेवनम्॥
भोजनं ब्रह्मपत्रेषु कार्त्तिके मुक्तिदायकम्।
जागरं कार्त्तिके मासि यः करोत्यरुणोदये॥
दामोदराग्रे विप्रेन्द्र! गोसहस्रफलं लभेत्।।

जागरं पश्चिमे यामे यः करोति महामुने!॥
कार्त्तिके सन्निधौ विष्णोस्तत्पदं करसंस्थितम्।
साधुसेवा गवां ग्रासः कथा विष्णोरथार्च्चनम्।
जागरः पश्चिमे यामे दुर्लभः कार्त्तिके कलौ"॥

किञ्च।

"जलधेनुसहस्रञ्च हृषसंस्थे दिवाकरे।
तोयं दत्त्वा यदाप्नोति स्नानं कृत्वा तु कार्त्तिके॥
सन्निहत्यां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे।
सूर्य्यवारेण यत्स्नानं तदेकाहेन कार्त्तिके॥
पिढनुद्दिश्य यद्दत्तं कार्त्तिके कृष्णवल्लभे।
अन्नोदकं मुनिश्रेष्ठ! अक्षयं जायते ध्रुवम्"॥*॥

किञ्च।

"गीतशास्त्रविनोदेन कार्त्तिकं यो नयेन्नरः।
न तस्य पुनरावृत्तिर्मया दृष्टा कलिप्रिय!"॥

किञ्च।

"प्रदक्षिणञ्च यः कुर्य्यात् कार्त्तिके विष्णुसन्निधौ।
पदे पदेऽश्वमेधस्य फलभागी भवेन्नरः॥
गीतं वाद्यञ्च नृत्यञ्च कार्त्तिके पुरतो हरेः।
यः करोति नरो भक्त्या लभते चाक्षयं फलम्॥
हरेर्नाम सहस्राख्यं गजेन्द्रस्य च मोक्षणम्।
कार्त्तिके पठते यस्तु पुनर्जन्म न विद्यते॥
कार्त्तिके पश्चिमे यामे स्तवं गानं करोति यः।
वसते श्वेतद्वीपे तु पिढभिः सह नारद!॥
नैवेद्यदानेन तु हरेः कार्त्तिके यवसंख्यया।
युगानि वसते स्वर्गे तावन्ति मुनिसत्तम!॥
अगुरुन्तु सकर्पूरं यो दहेत् केशवाग्रतः।
कार्त्तिके तु मुनिश्रेष्ठ! युगान्ते न पुनर्भवः"॥

किञ्च।

"नियमेन कथां विष्णोर्ये शृण्वन्ति च भाविताः।
श्लोकार्द्धं श्लोकपादं वा कार्त्तिके गोशतं फलम्॥
सर्व्वधर्म्मान् परित्यज्य कार्त्तिके केशवाग्रतः।
शास्त्रस्योच्चारणं पुण्यं श्रोतव्यञ्च महामुने!॥
श्रेयसा लोभबुद्ध्या वा यः करोति हरेः कथाम्।
कार्त्तिके मुनिशार्दूल! कुलानां तारयेच्छतम्॥
नित्यं शास्त्रविनोदेन कार्त्तिकं यः क्षिपेन्नरः।
निर्दहेत् सर्व्वपापानि यज्ञायुतफलं लभेत्॥
न तथा तुष्यते दानैर्न यज्ञैर्नागजादिकैः।
यथाशास्त्रकथालापैः कार्त्तिके मधुसूदनः॥
कार्त्तिके मुनिशार्दूल! यः शृणोति हरेः कथाम्।
स नित्यरति दुर्गाणि जन्मकोटिशतानि च॥
यः पठेत् प्रयतो नित्यं श्लोकं भागवतं मुने!।
अष्टादशपुराणानां कार्त्तिके फलमाप्नुयात्"॥

किञ्च।

"सर्व्वान् धर्म्मान् परित्यज्य इष्टापूर्त्तादिकान्नरः।
कार्त्तिके परया भक्त्या वैष्णवैः सह संवसेत्"॥

पाद्मे च तत्रैव।

"कार्त्तिके भूमिशायी यो ब्रह्मचारी हविष्यभुक्।
पलाशपत्रे भुञ्जानो दामोदरमथार्च्चयेत्॥
स सर्व्वपातकं हित्वा वैकुण्ठे हरिसन्निधौ।
मोदते विष्णुसदृशो भजनानन्दनिर्वृतः"॥

किञ्च।

"कार्त्तिकं सकलं मासं प्रातःस्नायी जितेन्द्रियः।

जपन् हविष्यभुक् दान्तः सर्व्वपापैः प्रमुच्यते॥
कार्त्तिकन्तु नरो मासं यः कुर्य्यादेकभोजनम्।
सूरश्च बलवीर्य्यञ्च कीर्त्तिमांश्च स जायते"॥

किञ्च।

"पलाशपत्रभोजी च कार्त्तिके पुरुषो नरः।
निष्पापः स्यात्तु नैवेद्यं हरेर्भुक्त्वा विमुच्यते॥
मध्यमैश्वरं पत्रं वर्जयेद्ब्राह्मणेतरः"।

किञ्च।

"अपराधसहस्राणि पातकानि महान्त्यपि।
क्षमतेऽस्य हरिर्देवः पूजितः कार्त्तिके प्रभुः॥
नैवेद्यं पायसं विष्णोः प्रियं खण्डं घृतान्वितम्।
विभज्य तच्च भुञ्जानो यज्ञसाम्यं दिने दिने"॥

तत्रैव श्रीकृष्णसत्या संवादे।

"स्नानं जागरणं दीपं तुलसीवनपालनम्।
कार्त्तिके ये प्रकुर्व्वन्ति ते नरा विष्णुमूर्त्तयः॥
इत्थं दिनत्रयमपि कार्त्तिके ये प्रकुर्व्वते।
देवानामपि ते वन्द्याः किंपुनराजन्मतः कृतम्"॥*

तत्रैव कार्त्तिकव्रताङ्गानि।

"हरिजागरणं प्रातःस्नानं तुलसिसेवनम्।
उद्यापनं दीपदानं व्रतान्येतानि कार्त्तिके"॥

किञ्च।

"पञ्चभिर्व्रतकैरेभिः सम्पूर्णं कार्त्तिके व्रती।
फलमाप्नोति तत् प्रोक्तं भुक्तिमुक्तिफलप्रदम्॥
विष्णोः शिवस्य वा कुर्य्यादालये हरिजागरम्।
कुर्य्यादश्वत्थमूले वा तुलसीनां वनेषु च॥
आपद्गतो यदाप्यम्भो न लभेत् सवनाय सः।
व्याधितो वा पुनः कुर्य्याद्विष्णोर्नामापमार्ज्जनम्॥
उद्यापनविधिं कर्त्तुमशक्तो यो व्रते स्थितः।
ब्राह्मणान् भोजयेच्छक्त्या व्रतसम्पूर्णहेतवे॥
अशक्तो दीपदानस्य परदीपान् प्रबोधयेत्।
तेषां वा रक्षणं कुर्य्याद्दातादिभ्यः प्रयत्नतः॥
अभावे तुलसीनाञ्च पूजयेद्वैष्णवं द्विजम्।
सर्व्वाभावे व्रती कुर्य्याद्ब्राह्मणानां गवामपि॥
सेवां वा बोधिवटयोर्व्रतसम्पूर्णहेतवे"॥*॥

अथ दीपदानमाहात्म्यम्। स्कान्दे तत्रैव।

"कृत्वा कोटिसहस्राणि पातकानि बहून्यपि।
निमेषार्द्धेन दीपस्य विलयं यान्ति कार्त्तिके"॥

किञ्च।

"शृणु दीपस्य माहात्म्यं कार्त्तिके केशवप्रियम्।
दीपदानेन विप्रेन्द्र! न पुनर्जायते भुवि॥
रविग्रहे कुरुक्षेत्रे नर्म्मदायां शशिग्रहे।
तत् फलं कोटिगुणितं दीपदानेन कार्त्तिके॥
घृतेन दीपको यस्य तिलतैलेन वा पुनः।
ज्वलते मुनिशार्दूल! अश्वमेधेन तस्य किम्॥
मन्त्रहीनं क्रियाहीनं श्रौषहीनं जनार्द्दने।
सर्व्वं सम्पूर्णतां याति कार्त्तिके दीपदानतः॥
तेनेष्टं क्रतुभिः सर्व्वैः कृतं तीर्थावगाहनम्।
दीपदानं कृतं येन कार्त्तिके केशवाग्रतः॥
तावद्गर्ज्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले।
यावन्न ज्वलते ज्योतिः कार्त्तिके केशवाग्रतः॥
श्रूयते चापि पिढभिर्गाथा गीता पुरा द्विज!।
भविष्यति कुलेऽस्माकं पिढभक्तः सुतो भुवि॥

कार्त्तिके दीपदानेन यत्तोषयति केशवम् ।
मुक्तिं प्राप्स्यामहे नूनं प्रसादाच्चक्रपाणिनः" ॥
किञ्च ।
"मेरुमन्दरमात्राणि कृत्वा पापान्यशेषतः ।
दहते नात्र सन्देहो दीपदानात्तु कार्त्तिके ॥
गृहे वायतने वापि दीपं दद्याच्च कार्त्तिके ।
पुरतो वासुदेवस्य महाफलविधायिनः ॥
स जातो मानुषो लोके स धन्यः स च कीर्त्तिमान् ।
प्रदत्तः कार्त्तिके मासि दीपो वै मधुहायतः ॥
निमिषार्द्धार्द्धमात्रेण दीपदानेन कार्त्तिके ।
न तत् क्रतुशतैः प्राप्यं फलं तीर्थशतैरपि ॥
सर्व्वानुष्ठानहीनोऽपि सर्व्वपापरतोऽपि सन् ।
पूयते नात्र सन्देहो दीपं दत्त्वा तु कार्त्तिके ॥
तन्नास्ति पातकं किञ्चित् त्रिषु लोकेषु नारद ! ।
यन्न शोधयते दीपः कार्त्तिके केशवाग्रतः ॥
पुरतो वासुदेवस्य दीपं दत्त्वा तु कार्त्तिके ।
प्राप्नोति शाश्वतं स्थानं सर्व्वाबाधाविवर्जितम् ॥
यः कुर्य्यात् कार्त्तिके मासि कर्पूरेण तु दीपकम् ।
द्वादशाब्द विशेषेण तस्य पुण्यं वदामि ते ॥
कुले तस्य प्रसूता ये ये भविष्यन्ति नारद ! ।
समतीताश्च ये केचिद् येषां सङ्ख्या न विद्यते ॥
क्रीड़ित्वा सुचिरं कालं देवलोके यदृच्छया ।
ते सर्व्वे मुक्तिमायान्ति प्रसादाच्चक्रपाणिनः" ॥
किञ्च ।
"घृतस्यालेन विप्रेन्द्र ! कार्त्तिके केशवालये ।
द्योतयेद् यो महाभाग ! पुनात्यासप्तमं कुलम् ॥
कार्त्तिके दीपदानन्तु कुर्य्याद् यो वैष्णवालये ।
धनं पुत्रो यशः कीर्त्तिर्भवेत्तस्य च सर्व्वदा ॥
यथा च मथनाद्धिः सर्व्वकालेषु दृश्यते ।
तथा च दृश्यते धर्म्मो दीपदाने न संशयः" ॥
किञ्च ।
"निर्द्धनेनापि विप्रेन्द्र ! कृत्वा चैवात्मविक्रयम् ।
कर्त्तव्यं दीपदानन्तु यावत् कार्त्तिकपूर्णिमा ॥
वैष्णवो न स मन्तव्यः संप्राप्ते कार्त्तिके मुने ! ।
यो न यच्छति मूढ़ात्मा दीपं केशवसन्निधौ" ॥
नारदीये श्रीवत्साङ्कदमोहिनीसंवादे ।
"एकतः सर्व्वदानानि दीपदानानि चैकतः ।
कार्त्तिके न समं प्रोक्तं दीपदो ह्यधिकः स्मृतः" ॥
पाद्मे च तत्रैव ॥
"कार्त्तिके खण्डदीपं यो ददाति हरिसन्निधौ ।
दिव्यकान्तिविमानाग्रे रमते स हरेः पुरे" ॥ * ॥
अथ तत्र परदीपप्रबोधनमाहात्म्यम् ।
स्कान्दे तत्रैव ।
"विष्टपस्थेऽग्रदानेन ज्येष्ठाषाढ़े च वारिणा ।
कार्त्तिके तत् फलं पुंसां परदीपप्रबोधनात् ॥
बोधनात् परदीपस्य वैष्णवानाञ्च सेवनात् ।
कार्त्तिके फलमाप्नोति राजसूयाश्वमेधयोः ॥
दीयमानन्तु ये दीपं बोधयन्ति हरेर्गृहे ।
परेऽह्नि दृषच्छादूर्ज ! निस्तीर्णा यमयातनां ॥
न तद्भवति विप्रेन्द्र ! इष्टैरपि महामखैः ।
कार्त्तिके यत् फलं प्रोक्तं परदीपप्रबोधनात् ॥
एकादश्यां परैर्दत्तं दीपं प्रज्वाल्य मूषिका ।
मानुष्यं दुर्ल्लभं प्राप्य परां गतिमवाप सा" ॥ * ॥
अथ शिखरदीपमाहात्म्यम् ।
स्कान्दे तत्रैव ।
"यदा यदा भासयते दीपकः कलसोपरि ।
तदा तदा मुनिश्रेष्ठ ! द्रवते पापसञ्चयः ॥
यो ददाति द्विजातिभ्यो महीमुदधिमेखलाम् ।
हरेः शिखरदीपस्य कलां नार्हति षोड़शीम् ॥
यो ददाति गवां कोटिं सवत्सां क्षीरसंयुताम् ।
हरेः शिखरदीपस्य कलां नार्हति षोड़शीम् ॥
सर्व्वस्वदानं कुरुते वैष्णवानां महामुने ! ।
शिखरोपरि दीपस्य कलां नार्हति षोड़शीम्" ॥
किञ्च ।
"यः करोति परं दीपं मूल्येनापि महामुने ! ।
शिखरोपरि मध्ये च कुलानां तारयेच्छतम् ॥
विमानं ज्योतिषा दीप्तं ये निरीक्षन्ति कार्त्तिके ।
केशवस्य महाभक्त्या कुले तेषां न नारकी ॥
दिवि देवा निरीक्षन्ते विष्णुदीपप्रदं नरम् ।
कदा भविष्यत्यस्माकं सङ्गमः पुण्यकर्म्मणा ॥
कार्त्तिके कार्त्तिकीं यावत् प्रासादोपरि दीपकम् ।
यो ददाति मुनिश्रेष्ठ ! तस्येन्द्रत्वं न दुर्ल्लभम्" ॥ * ॥
अथ तत्र दीपमालामाहात्म्यम् ।
स्कान्दे तत्रैव ।
"दीपवृक्षेषु रचनां सवाह्याभ्यन्तरे हरेः ।
विष्णोर्विमाने कुरुते स नरः शङ्खचक्रधृत् ॥
दीपवृक्षेषु रचनां कुरुते केशवालये ।
तस्यालये प्रसूतानां लक्षाणां नरकं न हि ॥
विष्णोर्विमानं दीपाढ्यं सवाह्याभ्यन्तरे मुने ! ।
दीपोद्यतकरे मार्गे तेन प्राप्तं परं पदम्" ॥
भविष्ये च ।
"यः कुर्य्यात् कार्त्तिके मासि शोभनां दीपमालिकाम् ।
प्रबोधे चैव द्वादश्यामेकादश्यां विशेषतः ॥
सूर्य्यायतप्रकाशस्तु तेजसा भासयन् दिशः ।
तेजोराशिविमानस्थो जगदुद्योतयंस्त्विषा ॥
यावत्यदीपसङ्ख्या तु हृतेनापूर्य्य बोधिता ।
तावदर्षसहस्राणि विष्णुलोके महीयते" ॥ * ॥
अथ आकाशादिदीपमाहात्म्यम् ।
पाद्मे तत्रैव ।
"उच्चैः प्रदीपमाकाशे यो दद्यात् कार्त्तिके नरः ।
सर्व्वं कुलं समुद्धृत्य विष्णुलोकमवाप्नुयात् ॥
विष्णुकेशवमुद्दिश्य दीपं दद्यात्तु कार्त्तिके ।
आकाशस्थं जलस्थञ्च गृहे तस्यापि यत्फलम् ॥
धनं धान्यं समृद्धिञ्च पुत्रवानीश्वरो गृहे ।
लोचने च शुभे तस्य विद्वानपि च जायते" ॥
किञ्च ।
"विप्रवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः ॥
चतुष्पथेषु रथ्यासु ब्राह्मणावसथेषु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारे गहनेषु च ॥
दीपदानादि सर्व्वत्र महाफलमवाप्नुयात्" ॥ * ॥
आकाशदीपदानमन्त्रः । तत्रैव ।
"दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपन्ते प्रयच्छामि नमोऽनन्ताय वेधसे" ॥

अथ देशविशेषे कार्त्तिकमाहात्म्यविशेषः ॥
पाद्मे तत्रैव ।
"यत्र कुत्रापि देशेऽयं कार्त्तिकः स्नानदानतः ।
अग्निहोत्रसमफलः पूजायाञ्च विशेषतः ॥
कुरुक्षेत्रे कोटिगुणो गङ्गायाञ्चापि तत्समः ।
ततोऽधिकः पुष्करे स्याद्वाराणस्यां च माधव ! ॥
त्रयाणामोक्षदो मासः पूजास्नानैश्च कार्त्तिकः ।
अन्याः पूर्य्यन्तसमाना मुनयो मथुरां विना ॥
दामोदरत्वं हि हरेस्तत्रैवासीदयतः किल ।
मथुरायां ततश्चोर्ज्जो वैकुण्ठप्रीतिवर्द्धनः ।
कार्त्तिको मथुरायां वै परमावधिरिष्यते ।
यथा माघे प्रयागः स्याद्वैशाखे जाह्नवी यथा ॥
कार्त्तिके मथुरा सेव्या ततोत्कर्षः परो न हि ॥
मथुरायां नरैरूर्ज्जे स्नात्वा दामोदरोऽर्च्चितः ।
त्रयारूपा हि ते ज्ञेया नात्र कार्य्या विचारणा ॥
दुर्ल्लभः कार्त्तिको विप्र ! मथुरायां त्रयामिह ।
यत्रार्च्चितः स्वकं रूपं भक्तेभ्यः संप्रयच्छति ॥
मुक्तिं मुक्तिं हरिर्द्यादर्च्चितोऽन्यत्र सेविनाम् ।
भक्तिञ्च न ददात्येव यतो वश्यकरी हरेः ॥
सा त्वङ्गसा हरेर्भक्तिर्लभ्यते कार्त्तिके नरैः ।
मथुरायां सकृदपि श्रीदामोदरपूजनात् ॥
मन्त्रद्रव्यविहीनञ्च विधिहीनञ्च पूजनम् ।
मन्यते कार्त्तिके देवो मथुरायां सदर्शनम् ॥
यस्य पापस्य युज्येत मरणान्ता हि निष्कृतिः ।
तच्छुद्ध्यर्थमिदं प्रोक्तं प्रायश्चित्तं सुनिश्चितम् ।
कार्त्तिके मथुरायां वै श्रीदामोदरपूजनम् ॥
कार्त्तिके मथुरायां वै पूजनाद्दुर्ल्लभं ध्रुवः ।
शीघ्रं संप्राप्तवान् बाको दुर्ल्लभं योगतत्परैः ॥
सुलभा मथुरा भूमौ प्रत्यब्दं कार्त्तिकस्तथा ।
तथापि संसरन्तीह नरा मूढ़ा भवाम्बुधौ ॥
किं यज्ञैः किं तपोभिश्च तीर्थैरन्यैश्च सेवितैः ।
कार्त्तिके मथुरायाञ्चेदर्च्चते राधिकाप्रियः ॥
यानि सर्व्वाणि तीर्थानि नदा नद्यः सरांसि च ।
कार्त्तिके निवसन्त्यत्र माथुरे सर्व्वमण्डले ॥
कार्त्तिके जन्मसदने केशवस्य च ये नराः ।
सङ्कल्पविद्याः श्रीकृष्णं ते यान्ति परमव्ययम् ॥
परोपहासमुद्दिश्य कार्त्तिके हरिपूजया ।
मथुरायां लभेद्भक्तिं किं पुनः श्रद्धया नरः" ॥ इति ॥
"इत्थं कार्त्तिककृत्यानि व्याख्यान्येव खतोऽभवन् ।
तत्र किञ्चिद्विशेषेण तदिधिर्लिख्यतेऽधुना" ॥ * ॥
अथ कार्त्तिककृत्यविधिः । तत्रोपक्रमकालश्चोक्तः
श्रीकृष्णसत्यासंवादीयकार्त्तिकमाहात्म्ये ।
"आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्त्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः ॥
नित्यं जागरणायान्ते यामे रात्रेः समुत्थितः ।
शुचिर्भूत्वा प्रबोध्याथ स्तोत्रैर्नीराजयेत् प्रभुम् ॥
निशम्य वैष्णवान् धर्म्मान् वैष्णवैः सह हर्षितः ।
कृत्वा गीतादिकं प्रातर्देवं नीराजयेत् पुनः ॥
नद्यादौ च ततो गत्वाचम्य सङ्कल्पमाचरेत् ।
प्रभुं प्रार्थ्याथ तस्मै च दद्यादर्घ्यं यथाविधि ॥
तत्र सङ्कल्पमन्त्रः ।
"कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ! ।

प्रीत्यर्थं तव देवेश दामोदर ! मया सह" ॥
प्रार्थनमन्त्रस्तु ।
"तव ध्यानेन देवेश ! जलेऽस्मिन् स्नातुमुद्यतः ।
तत्प्रसादाच्च मे पापं दामोदर ! विनश्यतु" ॥
अर्घ्यमन्त्रः ।
"व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन्मम" ।
अर्घ्यं गृहाण देवेश ! नमामि त्वां सुरेश्वर !" ॥
काशीखण्डे ।
"व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन्मम ।
दामोदर ! गृहाणार्घ्यं दनुजेन्द्रनिसूदन ! ॥
नित्ये नैमित्तिके प्राप्ते कार्त्तिके पापशोषणे ।
गृहाणार्घ्यं मया दत्तं राधया सहितो हरे !" ॥*॥
"तिलैरालिप्य देहं स्वं नामोच्चारणपूर्व्वकम् ।
स्नात्वा स विधिना सन्ध्यामुपास्य गृहमाव्रजेत् ॥
उपलिप्याथ देवाग्रे निर्म्माय स्वस्तिकं प्रभुम् ।
तुलसीमालतीपद्मागस्त्यपुष्पादिनार्चयेत् ॥
नित्यं वैष्णवसङ्गत्या सेवेत भगवत्कथाम् ।
सर्पिषाहर्निशं दीपं तिलतैलेन चार्चयेत् ॥
विशेषतश्च नैवेद्यान्यर्पयेदाचरेत्तथा ।
प्रणामांश्च यथाशक्त्या एकभक्तादिकं व्रतम्" ॥
तथा च पाद्मे तत्रैव ।
"प्रातरुत्थाय शौचादि कृत्वा गत्वा जलाशये ।
स्नात्वा च विधिवत् स्नानं ततो दामोदरार्चनम्" ॥
किञ्च ।
"मौनेन भोजनं कार्य्यं कार्त्तिके व्रतधारिणा ।
घृतेन दीपदानं स्यात्तिलतैलेन वा पुनः ॥
दिनञ्च कृष्णकथया वैष्णवानाञ्च सङ्गमैः ।
नीयतां कार्त्तिके मासि सङ्कल्पव्रतपालनम् ॥
आश्विने शुक्लपक्षस्य प्रारम्भो हरिवासरे ।
अथ वा पौर्णमासीतः संक्रान्तौ वा तुलागमे ॥
दीपदानमखण्डञ्च दद्याद्वै विष्णुसन्निधौ ।
देवालये तुलस्यां वा आकाशे वा तदुत्तमम्" ॥
किञ्च ।
"रजत कनकं दीपान् मणिमुक्ताफलादिकम् ।
दामोदरस्य प्रीत्यर्थं प्रदद्यात् कार्त्तिके नरः" ॥
स्कान्दे च श्रीवक्त्राङ्गदमोहिनीसंवादे ।
"न गृहे कार्त्तिके कुर्य्याद्विशेषेण तु कार्त्तिकीम् ।
तीर्थे तु कार्त्तिकीं कुर्य्यात् सर्व्वयत्नेन भाविनि !"॥*॥
अथ कार्त्तिके वर्ज्यानि ।
तत्रैव ब्रह्मनारदसंवादे ।
"कार्त्तिके तु विशेषेण राजमाषांश्च भक्षयन् ।
निष्पावान् मुनिशार्दूल ! यावदाहूतनारकी ॥
कलिङ्गानि पटोलानि वृन्ताकं सन्धितानि च ।
न त्यजेत् कार्त्तिके मासि यावदाहूतनारकी ॥
कार्त्तिके मासि धर्म्मात्मा मत्स्यमांसं न भक्षयेत् ।
तत्रैव यत्नतस्त्याज्यं ग्राम्यकं शौकरं तथा" ॥
किञ्च ।
"परान्नं परशय्याञ्च परवादं पराङ्गनाम् ।
सर्व्वदा वर्ज्जयेत् प्राज्ञो विशेषेण तु कार्त्तिके ॥
तैलाभ्यङ्गं तथा श्राद्धं परान्नं कांस्यभोजनम् ।
कार्त्तिके वर्ज्जयेद्यस्तु परिपूर्णव्रती भवेत् ॥
संप्राप्तं कार्त्तिकं दृष्ट्वा परान्नं यस्तु वर्ज्जयेत् ।
दिने दिने तु कृच्छ्रस्य फलं प्राप्नोति मानवः" ॥
तत्रैव श्रीवक्त्राङ्गदमोहिनीसंवादे ।
"कार्त्तिके वर्ज्जयेत्तैलं कार्त्तिके वर्ज्जयेन्मधु ।
कार्त्तिके वर्ज्जयेत् कांस्यं कार्त्तिके मुक्तसन्निभम् ॥
न मांस्यं भक्षयेन्मांसं स कौर्म्मं नान्यदेव हि ।
चाण्डालः स भवेत् सुभ्रु ! कार्त्तिके मांसभक्षणात्"॥
अथ श्रीराधादामोदरपूजाविधिः । पाद्मे तत्रैव ।
"ततः प्रियतमा विष्णो राधिका गोपिकासु च ।
कार्त्तिके पूजनीया च श्रीदामोदरसन्निधौ ॥
दृष्ट्वा दामोदरं स्नात्वा तत्पत्नीं राधिकां तथा ।
कार्त्तिके पूजनीयौ तौ वासोऽलङ्कारभोजनैः ॥
राधिकाप्रतिमां विप्राः पूजयेत् कार्त्तिके तु यः ।
तस्य तुष्यति तत्रीत्यै श्रीमान् दामोदरो हरिः" ॥
"दामोदराष्टकं नाम स्तोत्रं दामोदरार्चने ।
नित्यं दामोदराकर्षि पठेत् सत्यव्रतोदितम्" ॥*॥
अथ श्रीदामोदराष्टकम् । तत्रैव ।
"नमामीश्वरं सच्चिदानन्दरूपं
लसत्कुण्डलं गोकुले भ्राजमानम् ।
यशोदाभियोलूखलाद्धावमानं
परामृष्टमत्यन्ततो द्रुत्य गोप्या ॥
रुदन्तं मुहुर्नेत्रयुग्मं मृजन्तं
कराम्भोजयुग्मेन सातङ्कनेत्रम् ।
मुहुः श्वासकम्पत्रिरेखाङ्ककण्ठ-
स्थितग्रैवदामोदरं भक्तिबन्धम् ॥
इतीदृक् स्वलीलाभिरानन्दकुण्डे
स्वघोषं निमज्जन्तमाख्यापयन्तम् ।
तदीये ग्रिणत्रेषु भक्तैर्ज्जितत्वं
पुनः प्रेमतस्त्वं शतावृत्ति वन्दे ॥
वरं देव मोक्षं न मोक्षावधिं वा
न चान्यं वृणेऽहं वरेशादपीह ।
इदन्ते वपुर्नाथ गोपालबालं
सदा मे मनस्याविरास्तां किमन्यैः ॥
इदन्ते मुखाम्भोजमत्यन्तनीलै-
र्वृतं कुन्तलैः स्निग्धरक्तैश्च गोप्या ।
मुहुश्चुम्बितं बिम्बरक्ताधरं मे
मनस्याविरास्तामलं लक्षलाभैः ॥
नमो देव ! दामोदरानन्त ! विष्णो !
प्रसीद प्रभो ! दुःखजालाब्धिमग्नम् ।
कृपादृष्टिवृष्ट्यातिदीनं वतानु-
गृहाणेश मामज्ञ मेऽध्यक्षिदृश्यः ॥
कुबेरात्मजौ बद्धमूर्त्यैव यद्-
त्वया मोचितौ भक्तिभाजौ कृतौ च ।
तथा प्रेमभक्तिं स्वकां मे प्रयच्छ
न मोक्षे ग्रहो मेऽस्ति दामोदरेह ॥
नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने
त्वदीयोदराय विश्वस्य धाम्ने ।
नमो राधिकायै त्वदीयप्रियायै-
नमोऽनन्तलीलाय देवाय तुभ्यम्" ॥*॥
अथ तत्र श्रीकृष्णाष्टमीव्रतम् ।
पाद्मे तत्रैव ।
"गोवर्द्धने गिरौ रम्ये राधाकुण्डं प्रियं हरेः ।
कार्त्तिके बहुलाष्टम्यां तत्र स्नात्वा हरेः प्रियः ॥
नरो भक्तो भवेद्विप्राश्चक्रि तस्य प्रतोषणम् ॥
यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा ।
सर्व्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा" ॥
किञ्च । तत्रैव श्रीराधिकोपाख्यानान्ते ।
"वृन्दावनाधिपत्यञ्च दत्तं तस्याः प्रतुष्यता ।
कृष्णेनान्यच्च देवी तु राधा वृन्दावने वने ॥
तत्कुण्डे कार्त्तिकाष्टम्यां स्नात्वा पूज्यो जनार्दनः ।
सुबोधन्यां यथा प्रीतस्तथा प्रीततमो भवेत्" ॥*॥
अथ तत्र कृष्णत्रयोदशीव्रतम् ।
पाद्मे च तत्रैव ।
"कार्त्तिके कृष्णपक्षे तु त्रयोदश्यां निशामुखे ।
यमदीपं बहिर्द्द्याद्यमत्युर्विनश्यति" ॥
तत्र मन्त्रः ।
"मृत्युना पाशदण्डाभ्यां कालः श्यामलया सह ।
त्रयोदश्यां दीपदानात् सूर्य्यजः प्रीयतामिति" ॥*॥
अथ कृष्णचतुर्दशीव्रतम् । तत्रैव ।
"चतुर्दश्यां धर्म्मराजपूजा कार्य्या प्रयत्नतः ।
स्नानमावश्यकं कार्य्यं नरैर्नरकभीरुभिः ॥
अरुणोदयतोऽन्यत्र रिक्तायां याति यो नरः ।
तस्याब्दिकभवो धर्म्मो नश्यत्येव न संशयः" ॥
स्कान्दे च तत्रैव ।
"कार्त्तिके कृष्णपक्षे तु चतुर्दश्यां विधूदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः"॥
किञ्च । पाद्मे तत्रैव ।
"ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः ।
जीवत्पितृका न कुर्व्वीत तर्पणं यममीश्वरोः ॥
यज्ञोपवीतिना कार्य्यं प्राचीनावीतिना तथा ।
देवत्वञ्च पितृत्वञ्च यमस्यास्ते हि रूपता ॥
नक्तं यमचतुर्दश्यां यः कुर्य्याच्छिवसन्निधौ ।
न तत् क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् ॥
कुमारीवटुकान् पूज्य तथा श्वेतपोषणान् ।
राजसूयफलं तेन प्राप्यते नात्र संशयः ॥
कार्त्तिके भौमवारेण चित्रा कृष्णा चतुर्दशी ।
तस्यां भूतेशमभ्यर्च्य गच्छेच्छिवपुरं नरः" ॥
किञ्च ।
"अमावस्याचतुर्दश्योः प्रदोषे दीपदानतः ।
यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नरः" ॥*॥
अथामावास्याकृत्यम् । पाद्मे तत्रैव ।
"दिवा तत्र न भोक्तव्यं विना बालातुरान् जनान् ।
प्रदोषसमये लक्ष्मीं पूजयेच्च यथाक्रमम्" ॥
किञ्च ।
"प्रदोषसमये विप्राः कर्त्तव्या दीपमालिका ।
दीपदानात् ततः पश्चाल्लक्ष्मीं सुप्तां प्रबोधयेत् ॥
त्वं ज्योतिः श्रीरविश्चन्द्रो विद्युत् सौवर्णतारकाः ।
सर्व्वेषां ज्योतिषां ज्योतिर्दीपज्योतिःस्थिते नमः ॥
मन्त्रेणानेन कमलां दीपहस्ताः स्त्रियो द्विजाः ।
देवीं प्रबोधयेयुश्च ततः कुर्य्युश्च भोजनम् ॥
प्रदोषसमये लक्ष्मीं भोजयित्वा सुभक्ति यः ।
पुमान् संवत्सरं यावत् लक्ष्मीस्तं नैव मुञ्चति" ॥*॥
अथामावास्यानिर्णयः । यथा निर्णयामृते ।
उपवासादिरूपामावास्या प्रतिपदृयुतैव ग्राह्या तदुक्तम् ।

"अमावास्या तृतीया च सा उपोष्या परान्विता" ॥
इति । चतुर्दशीविद्धानिषेधश्च निगमे ।
"भूतविद्धा त्वमावास्या निष्फलं स्नानदानयं त्विदम्" ।
स्कान्देऽपि ।
"भूतविद्धा त्वमावास्या न ग्राह्या मुनिपुङ्गवैः" ॥
अथ शुक्लप्रतिपत्कृत्यम् । स्कान्दे ।
"प्रातर्गोवर्द्धनं पूज्य द्यूतञ्चैव समाचरेत् ।
भूमयोऽस्तथा गावः पूज्याश्च दोहवाहनाः ॥
श्रीकृष्णदासवर्य्योऽयं श्रीगोवर्द्धनभूधरः ।
शुक्लप्रतिपदि प्रातः कार्त्तिकेऽर्च्योऽत्र वैष्णवैः" ॥
"प्रातर्गोवर्द्धनं पूज्य रात्रौ जागरणं चरेत्" । इति
क्वचित् पाठः । तस्मात्तदिदं कर्म्म गोवर्द्धनप्राधान्येन गोप्राधान्येन च ख्यातमप्येकमेव ज्ञेयम् ।
अत्र दिननिर्णयः । यदाह देवलः ।
"प्रतिपद्दर्शसंयोगे क्रीड़नन्तु गवां मतम् ।
परविद्धान्तु यः कुर्य्यात् पुत्रदारधनक्षयः" ॥
निर्णयामृततृतीयपुराणान्तरवचनम् ।
" या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप ! ।
पूजामात्रेण वर्द्धन्ते प्रजा गावो महीपतेः" ॥
ततः प्रातर्गोवर्द्धनं पूज्येति पूर्व्वोक्तात्पर्य्यकम् ।
द्वितीयासमये तु सर्व्वथा निषिद्धम् ।
तत्रैव । तद्यथा ।
"नन्दायां दर्शने रात्रावलिदानदशासु च ।
भद्रायां गोकुलक्रीड़ा देशनाशाय जायते" ॥
पुराणसमुच्चये तु सम्भावितचन्द्रोदयद्वितीयासंयोग एव निषिध्यते ।
"गवां क्रीड़ादिने यत्र रात्रौ दृश्येत चन्द्रमाः ।
सोमो राजा पशून् हन्ति सुरभीपूजकांस्तथा" ॥
तदुदयसम्भावनञ्च निर्णयामृते निर्णीतम् । प्रतिपद्यपराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां चन्द्रदर्शनं सम्भाव्यते । तदुक्तमग्न्याधानविषये वृद्धशातातपेन ।
"द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी ।
अग्न्याधानञ्चतुर्दश्यां परतः सोमदर्शनात्" ॥ इति
अपराह्णश्च पञ्चधाविभक्तस्याह्नश्चतुर्थो भागः । ततश्च यत्र प्रतिपदि षण्मुहूर्त्तव्यापिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति । अन्यदा तूत्तरैव प्रतिपत्तत्र ग्रहीता । तथैव पुराणसमुच्चये ।
"वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका ।
द्वितीयाहद्विगामित्वादुत्तरा तत्र चोच्यते" ॥
किञ्च । यदा पूर्व्वप्रतिपत् परत्र च निष्क्रामति तदाप्युत्तरैव कार्य्या । यथोक्तं भविष्योत्तरे ।
"यथा द्वादशभिर्म्मासैर्म्मासो वृद्धो मलिम्लुचः ।
तथैवाहोरात्रिवृद्धा तिथिः प्रोक्तो मलिम्लुचः ॥
यथा मलिम्लुचः पूर्व्वो मासो देवैस्तथापरः ।
त्याज्या तिथिस्तथा पूर्व्वा ग्राह्या चैव तथोत्तरा" ॥
इति निर्णयामृतमतम् । किन्तु वह्निजीन्यायेन पूर्व्वैव मन्तुं शक्यते । तद्वदत्रापि देवलादि वचनप्रामाण्यमस्तीति ॥ * ॥
अथ गोवर्द्धनपूजाविधिः । पाद्मे तत्रैव ।
"मथुरायां तथान्यत्र कृत्वा गोवर्द्धनं गिरिम् ।
गोमयेन महास्नानं तत्र पूज्यो गिरिर्यथा ॥
मथुरायां तथा साक्षात् कृत्वा चैव प्रदक्षिणम् ।
वैष्णवं धाम संप्राप्य मोदते हरिसन्निधौ" ॥
पूजामन्त्रः ।
"गोवर्द्धनधराधार गोकुलत्राणकारक ! ।
विष्णुबाहुकृतोच्छ्राय गवां कोटिप्रदो भव" ॥ इति
गोपूजामन्त्रः । स्कान्दे तत्रैव ।
"लक्ष्मी र्या लोकपालानां धेनुरूपेण संस्थिता ।
घृतं वहति यज्ञार्थं यमपाशं व्यपोहतु ॥
अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे पार्श्वतः सन्तु गवां मध्ये वसाम्यहम्" ।
अथ गोक्रीड़ा तत्रैव ।
"क्रीड़ापयेद्धावयेच्च गोमहिष्यादिकं ततः ।
दृष्ट्वा कर्षापयेद्गोपैरक्षिप्रत्युक्तिवादनात्" ॥
पाद्मे च तत्रैव ।
"महिष्यादेस्तथा भूषा क्रीड़नं वारणन्तथा" ।
तन्माहात्म्यञ्च तत्रैव ।
"एवं गोवर्द्धनं गाश्च पूजनीया विधानतः ।
गोवर्द्धनमखो रम्यः सर्व्वसन्तोषकारकः" ॥*॥
अथ श्रीबलिदैत्यराजपूजा ।
"लिखित्वा श्रीबलिं पट्टे विन्ध्यावल्यान्वितं मुदा ।
प्रदोषे तत्प्रतिपदो भगवद्भक्तमर्च्चयेत्" ॥
तथा च स्कान्दे ।
"बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः ।
सर्व्वाभरणसम्पूर्णं विन्ध्यावल्या सहासितम् ॥
कुम्भाण्डमयजम्भोरु मुरदानवसंवृतम् ।
सम्पूर्णहृष्टवदनं किरीटोत्कटकुण्डलम् ॥
द्विभुजं दैत्यराजानं कारयित्वार्च्चयेन्नृप !" ।
तत्पूजाकारणम् । पाद्मे तत्रैव ।
"यथार्पितं देहमनेन विष्णवे
भीतेन भिक्षावचसो महात्मना ।
दैत्येन तेनाथ कठोरचेतसा
बद्धो बलिर्व्वामनमूर्त्तिना वत ॥
बद्धानीतोऽथ पातालं विमनाः खिन्नमानसः ।
नाभ्यसूयद्धरिं दैत्यस्यक्षाहंममतः सुधीः ॥
तदोवाच हरिः प्रीतस्तस्मै दैत्याय भागवत् ।
अश्रोत्रिये दत्तममन्त्रकं हुतं
जप्तं तथा व्यग्रधिया जनेन यत् ।
तथोर्ज्जशुक्लप्रतिपद्दिनेन तु
त्वामर्च्चयेत्तत्सुकृतं तवास्तु ॥
इति तस्मै वरो दत्तो हरिणा दितिजाय च ।
ततोऽवश्यं प्रपूज्योऽसौ बलिराजदिने मुदा ॥
क्षणसान्निध्यतश्चापि पूजनीयः प्रयत्नतः" ॥ * ॥
अथ बलिपूजाविधिः । स्कान्दे तत्रैव ।
"गृहस्य मध्ये शालायां विशालायां ततोऽर्च्चयेत् ।
भाद्रमाद्रजनैः सार्द्धं सन्तुष्टो बन्धुभिस्तथा ॥
कमलैः कुमुदैः पुण्यैः कह्लारैः रक्तकोत्पलैः ।
गन्धपुष्पादिनैवेद्यैरक्षतैर्गुड़पूपकैः" ॥
तत्र पूजामन्त्रः ।
"बलिराज ! नमस्तुभ्यं विरोचनसुतप्रभो ! ।
भविष्येन्द्रसुरारातेः ! पूजेयं प्रतिगृह्यताम् ॥
दीपोत्सवैर्जनितसर्व्वजनप्रमोदैः
कुर्व्वन्ति ये सुमतयो बलिराजपूजाम् ।
दानोपभोगसुखवृद्धिशताकुलानां
नूनं प्रयाति सकलं प्रमुदैव वर्षम्" ॥
अथ यमद्वितीयाकृत्यम् । स्कान्दे पाद्मे च ।
"ऊर्ज्जे शुक्लद्वितीयायां मध्याह्ने यममर्च्चयेत् ।
स्नानं कृत्वा मानुजायां यमलोकं न पश्यति" ॥
किञ्च ।
"तस्यां निजगृहे विप्र ! न भोक्तव्यं ततो बुधैः ।
स्वेच्छेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ॥
दानानि च प्रदेयानि भगिनीभ्यो विधानतः ।
सर्व्वा भगिन्यः संपूज्या अभावे प्रतिपत्सुताः" ॥
किञ्च ।
"यस्यां तिथौ यमुनया यमराजदेवः
संभोजितस्त्वतिशयस्वसृसौहृदेन ।
तस्यां स्वसुः करतलादिह यो भुनक्ति
प्राप्नोति वित्तसुभगं धनमुत्तमं सः" ॥ * ॥
अथ शुक्लाष्टमीकृत्यम् ।
पाद्मे तत्रैव कूर्म्मपुराणे च ।
"कार्त्तिके शुक्लपक्षे तु स्मृता गोपाष्टमी बुधैः ।
तद्दिने वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः ।
तत्र कुर्य्याद्गवां पूजां गोग्रासं गोप्रदक्षिणम् ।
गवानुगमनं कार्य्यं सर्व्वान् कामानभीप्सता ॥"
प्रबोधनीकृत्यं तत्रग्रन्थे द्रष्टव्यम् । इति श्रीगोपालभट्टविलिखिते लिखिते भगवद्भक्तिविलासे श्रीदामोदरप्रियो नाम १६ षोड़शविलासः ॥
तत्र जातस्य फलम् ।
"दत्तः क्रये विक्रयणे धनाढ्यः
स्यादावदूकोऽखिलकौशलज्ञः ।
यः कार्त्तिके कार्त्तिकरूपधारी
जातो भवेद्युद्धविशारदश्च" ॥
इति कोष्ठीप्रदीपः ॥* वर्षविशेषः । स च कृत्तिकारोहिण्योरेकतरस्मिन् वृहस्पतेरस्तोदयैकतरसम्बन्धे भवति । इति मलमासतत्त्वम् ॥ कार्त्तिकेयः यथा,—ब्रह्मवैवर्त्ते गणेशखण्डम् ॥
"दृष्ट्वा तान् कृत्तिकाः सर्व्वा भयविह्वलमानसाः ।
कार्त्तिकं कथयामासुर्ज्वलन्तं ब्रह्मतेजसा" ॥
कार्त्तिकिकः, पुं, (कार्त्तिकी पौर्णमासी अस्मिन् मासे इति । "विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः" । ४ । २ । २३ । इति ठक् ।) कार्त्तिकमासः । इत्यमरः । १ । ४ । १८ ॥
कार्त्तिकेयः, पुं, (कृत्तिकानामपत्यम् । "स्त्रीभ्यो ढक्" । ४ । १ । १२० । इति ढक् ।) शिवपुत्रः । यथा,—
"या बभूव रहःक्रीड़ा पार्व्वतीशिवयोः पुरा ।
दृष्टस्य च सुरैः शम्भोर्व्वीर्य्यं भूमौ पपात ह ॥
भूमिस्तदद्भिपत् वह्नौ वह्निश्च शरकानने ।
तत्त्वं लब्धःकृत्तिकाभिरधुना गच्छ साम्प्रतम् ॥
तवाभिधेकं विष्णुश्च करिष्यति सुरैः सह ।
हनिष्यसि तारकाख्यं सर्व्वशस्त्रं लभिष्यसि ॥
पुत्रस्त्वं विश्वसंहर्तुस्त्वां गोप्तुमक्षमा इमाः ।
नाग्निं गोप्तुं यथाशक्ताः शुष्कवृक्षाः खकोटरे" ॥
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥ * ॥
स एव कल्पभेदे अग्निपुत्रः । यथा,—
"कुमारश्चाभवत् तत्र तरुणार्कसमद्युतिः ।

वह्नितेजोभवः श्रीमान् गङ्गाकुक्षिपरिप्लुतः ॥
तं कुमारं ततो जातं दृष्ट्वा सेन्द्रा मरुद्गणाः ।
तदा क्षीरप्रदानार्थं कृत्तिकाः संन्ययोजयन् ॥
ताः क्षीरं तस्य देवस्य समयेन ददुस्तदा ।
स्यादस्माकमयं पुत्रः ख्यातो नाम्नेति राघव ! ॥
अन्योन्यं पिबतस्तासां तनयस्य मुखानि षट् ।
समभूवन् महाबाहो ! षण्मुखस्तेन विश्रुतः ॥
ततस्ता देवता ऊचुः कार्त्तिकेय इति प्रभुः ।
पुत्रोऽयं जगति ख्यातो भविष्यति न संशयः" ॥
इति वाल्मीकीयरामायणम् ॥*॥ तत्पर्य्यायः महासेनः २ शरजन्मा ३ षडाननः ४ पार्व्वतीनन्दनः ५ स्कन्दः ६ सेनानीः ७ अग्निभूः ८ गुहः ९ बाहुलेयः १० तारकजित् ११ विशाखः १२ शिखिवाहनः १३ षाण्मातुरः १४ शक्तिधरः १५ कुमारः १६ क्रौञ्चदारणः १७ । इत्यमरः । १ । १ । ४१-४३ ॥ आग्नेयः १८ दीप्तकीर्त्तिः १९ अनमेयः २० मयूरकेतुः २१ धर्म्मात्मा २२ भूतेशः २३ महिषार्दनः २४ कामजित् २५ कामदः २६ कान्तः २७ सत्यवाक् २८ भुवनेश्वरः २९ शिशुः ३० शीघ्रः ३१ शुचिः ३२ चण्डः ३३ दीप्तवर्णः ३४ शुभाननः ३५ असोघः ३६ अनघः ३७ रौद्रः ३८ प्रियः ३९ चन्द्राननः ४० दीप्तशक्तिः ४१ प्रशान्तात्मा ४२ भद्रकृत् ४३ कूटमोहनः ४४ बलीप्रियः ४५ पवित्रः ४६ मातृवत्सलः ४७ कन्याहर्त्ता ४८ विभक्तः ४९ खाद्येयः ५० देवतीसुतः ५१ प्रभुः ५२ नेता ५३ नैगमेयः ५४ सदुच्चरः ५५ सुव्रतः ५६ ललितः ५७ बालक्रीड़नप्रियः ५८ खचारी ५९ ब्रह्मचारी ६० शूरः ६१ शूरवणोद्भवः ६२ विश्वामित्रप्रियः ६३ देवसेनाप्रियः ६४ वासुदेवप्रियः ६५ प्रियकः । ६६ इति वनपर्व्व ॥ गाङ्गः ६७ स्वामी ६८ द्वादशलोचनः ६९ । इतिजटाधरः ॥ सिद्धसेनः ७० शम्भुतनयः ७१ देवसेनापतिः ७२ बालचर्य्यः ७३ शक्तवाकुध्वजः ७४ महाबाहुः ७५ युद्धदुर्म्मदः ७६ शिखिध्वजः ७७ । इति शब्दरत्नावली ॥ (पावकात्मजः ७८ । रुद्रसूनुः ७९ । षट्शिराः ८० । दितिजान्तकः ८१ । इति महाभारतम् ॥*॥)

अस्य ध्यानम् । यथा ।

"कार्त्तिकेयं महाभागं मयूरोपरिसंस्थितम् ।
तप्तकाञ्चनवर्णाभं शक्तिहस्तं वरप्रदम् ॥
द्विभुजं शत्रुहन्तारं नानालङ्कारभूषितम् ।
प्रसन्नवदनं देवं सर्व्वसेनासमावृतम्" ॥
इति कार्त्तिकेयपूजापद्धतिः ॥

कार्त्तिकेयप्रसूः, स्त्री, (कार्त्तिकेयं प्रसूते या । प्र + सू + क्विप् । कार्त्तिकेयस्य प्रसूर्वा ।) दुर्गा । इति शब्दरत्नावली ॥

कार्त्तिकोत्सवः, पुं, (कार्त्तिक्यां कार्त्तिकीपौर्णमास्यां भव उत्सवः । तत्सम्बन्धी तत्कर्त्तव्यः उत्सवो वा ।) कौमुदी । कार्त्तिकी पूर्णिमा । इति त्रिकाण्डशेषः ॥

कार्पटः, पुं, (कार्पट इव आकारोऽस्यस्य । कार्पाट + अच् ।) जतु । जौ इति भाषा । कार्य्यौ । इति हेमचन्द्रः ॥ दरवारी उमेदोयार इत्यादि पारस्यभाषा ॥ (कर्पट एव ! स्वार्थे अण् । जीर्णवस्त्रखण्डम् ॥)

कार्पटिकः, पुं, (कार्पटं अन्तस्तत्त्वं वेत्ति इति कर्पटेन चरति इति वा । ठक् । कार्पटोऽस्यास्य वा ठन् ।) मर्म्मवेत्ता । इति त्रिकाण्डशेषः ॥ तीर्थसेवी । इति काशीखण्डम् ॥
("सायं च तत्रैव वहिः सकुटुम्बस्तरोस्तले ।
समावसत् कार्पाटिकैः सोऽन्यदेशागतैः सह" ॥
इति कथासरित्सागरे ॥)

कार्पण्यं, क्ली, (कृपणस्य भावः । कृपण + ष्यञ् ।) कृपणता । तत्पर्य्यायः । दैन्यम् २ । इति हेमचन्द्रः ॥ (यथा, भगवद्गीतायाम् २ । ७ ।

"कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्म्मसंमूढ़चेताः" ॥)

कार्पासः, पुं, क्ली, (कर्पास एव । स्वार्थे अण् ।) कर्पासवृक्षः । कापास इति भाषा ॥ (अस्य पत्रादिना सर्पदष्टः पुरुषो नीरोगो भवति । इदानीं पत्रादीनां व्यवहारक्रम उच्यते ।

दंशनानन्तरमेव दष्टं पुरुषं सार्द्धद्वितोलकपरिमितः कार्पासपत्ररसः पाययितव्यः । अथ क्षतप्रदेशं विधौतं परिष्कृतञ्च विधाय तत्र पत्ररसः प्रदेयः । क्षतस्थानोपरि च कार्पासपत्रैः प्रलेपो दातव्यः । एवं कृतेऽपि यदि शरीरस्य कस्मिंदंशः क्षीतो भवेत् तदा तत्रैव क्षतपत्ररसेन पेषयितव्यम् । आसुस्थात् प्रतिसपाददण्डमेवं कृते सर्पदष्टः पुरुषः सुस्थो भविष्यतीति निश्चयः ॥)

कार्पासं, त्रि, (कर्पासस्याः विकारे अवयवे वा अण् विल्वादयण् वा ।) कार्पासजातवस्त्रादि । तत्पर्य्यायः । फालम् २ बादरम् ३ । इत्यमरः । २ । ६ । १११ ॥ (यथा, महाभारते २ । ५० । २४ ।

"क्षुण्णं वस्त्रमकार्पासमाविकं मृदु चाजिनम्" ॥)

कार्पासधेनुः, स्त्री, (दानार्थं कल्पिता कार्पासवस्त्रनिर्म्मिता धेनुः ।) दानार्थकार्पासादिनिर्म्मितधेनुः । यथा ।

होतोवाच ।

"अथातः संप्रवक्ष्यामि धेनुं कार्पासिकीं नृप ! ।
यत्प्रदानान्नरा यान्ति ऐन्द्रलोकमनुत्तमम् ॥
विधवे क्षयते पुण्ये युगादिग्रहणे तथा ।
ग्रहपीड़ासु घोरासु दुःखप्रारिष्टदर्शने ॥
पुण्ये क्षायतने राजन् शुचिदेशे गवां गणे ।
गोमयेनोपलिप्तायां दर्भानास्तीर्य्य वै तिलान् ॥
तन्मध्ये स्थापयेत् धेनुं वस्त्रमाल्यानुलेपनैः ।
नैवेद्यधूपदीपाद्यैः पूजयेच्च विमत्सरः ॥
उत्तमा चतुर्भिर्भारैस्तदर्द्धेन तु मध्यमा ।
भारेण चाधमा प्रोक्ता वित्तशाठ्यं विवर्जयेत् ॥
चतुर्थांशेन कृत्वा वै वत्सन्तु परिकल्पयेत् ।
कर्त्तव्या रूक्मशृङ्गैस्तु रजतक्षुरसंयुता ॥
नानाफलमया दन्ता रत्नगर्भसमन्विता ।
इत्येवं सर्व्वसंपूर्णां कृत्वा श्रद्धासमन्वितः ॥
आवाह्येत्तां कार्पासधेनुं मन्त्रैर्द्विजातये ।
दद्यादथ दर्भपाणिः प्रयतः श्रद्धयान्वितः ॥

पूर्व्वोक्तस्तु विधिः कार्य्यो दानमन्त्रपुरःसरः" ॥
पूर्व्वोक्तविधिः सवत्सधेनूक्तविधिः ।
"यथा देवगणः सर्व्वस्वया हीनो न वर्त्तते ।
तथा मामुद्धरेर्देवि ! पाहि संसारसागरात्" ॥
इत्यादिवराहपुराणे श्वेतोपाख्याने कार्पासधेनुमाहात्म्यम् ॥

कार्पासनासिका, स्त्री, (कार्पासस्य नासिका इव ।) तर्कुः । इति शब्दरत्नावली । टेको इति भाषा ॥

कार्पासिका, स्त्री, (कार्पासी + कन् । ततष्टाप् ।) कार्पासी । इति शब्दरत्नावली ॥ (त्रि, कार्पासाज्जातः । कार्पासनिर्म्मितम् । यथा गोः रामायणे । ५ । ४९ । ५ ।

"अवेष्टयन्त लाङ्गूलं जीर्णैः कार्पासिकैः पटैः" ॥)

कार्पासी, स्त्री, (कार्पास + जातित्वात् ङीष् । यद्वा कर्पासोऽस्यस्याः प्रज्ञाद्यण् ततो ङीप् ।) कार्पासवृक्षः । कापास इति भाषा ॥ तत्पर्य्यायः । बदरा २ तुण्डिकेरी ३ समुद्रान्ता ४ । इत्यमरः । २ । ४ । ११६ ॥ पटदः ५ । इति रत्नमाला ॥ सारिणी ६ चक्रा ७ तूला ८ गुडः ९ तुण्डकेरिका १० मरुद्भवा ११ पिचुः १२ बादरः १३ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । स्तनदुग्धकारित्वम् । पित्तकफछर्द्यादाहश्रमभ्रान्तिमूर्च्छानाशित्वम् । बलकारित्वञ्च । इति राजनिर्घण्टः ॥ तत्पत्रगुणाः । वायुनाशित्वम् । रक्तकारित्वम् । मूत्रवर्द्धकत्वम् । कर्णपिण्डिकादिपूयास्रावनाशित्वञ्च । तद्बीजगुणाः । स्तन्यदत्वम् । वृष्यत्वम् । स्निग्धत्वम् । कफकरत्वम् । गुरुत्वञ्च । इति भावप्रकाशः ॥

कार्म्मः, त्रि, (कर्म्मणि शीलं अस्य । कृत्यादित्वात् यः । "कार्म्मस्ताच्छील्ये" । ६ । ४ । १७२ । इति सूत्रानुसारेण निपातनात् टिलोपः । यद्वा मनपेक्ष्य कर्म्मणि प्रवृत्तः ।) कर्म्मशीलः । इत्यमरः । ३ । १ । १८ ॥

कार्म्मण्यं, क्ली, (कर्म्मैव इति । कर्म्मन् + "तदधीतवेत्ति कर्म्मणोऽण्" । ५ । १ । २९ । इति अण् । कर्म्मणे हितमिति अण् वा ।) मूलकर्म्म । इत्यमरः । ३ । २ । ४ ॥ औषधादिमूलेन यत् आसनोच्चाटनस्तम्भनवशीकरणादिकर्म्म तत् । इति भरतः ॥ (यथा माघे । १० । ३७ ।

"चाटु चाटुतकसम्भ्रममासां
कार्म्मणास्त्रमगमन् रमणेषु" ॥

तथा च, काशीखण्डे ४५ । ९ ।

"काचित्कार्म्मणतत्त्वज्ञा काचित्मौक्तिकगुम्फिका" ॥)
मन्त्रतन्त्रादियोजनम् । (कर्म्म साध्यत्वेन अस्त्यस्य इति अण् ।) कर्म्मठे त्रि । इति मेदिनी ॥

कार्म्मिकः, त्रि, (कर्म्मणा चित्रकर्म्मणा निर्वृत्तः । इति ठक् ।) विचित्रवस्त्रादि । ("कार्म्मिकं कर्म्मणा चित्रेण निर्म्मितं यत्र निष्पन्ने पटे चक्रसत्तिकादिकं चित्रसूत्रैः क्रियते तत्कार्म्मिकमित्युच्यते" ॥) इति मिताक्षरा । (तथा च याज्ञवल्क्यः । २ । १८१ । "कार्म्मिके रोमबद्धे च चिंगद्भागत्रयो मतः" ॥)

कार्म्मुकं क्ली, (कर्म्मणे प्रभवतीति । "कर्म्मण

उकञ्" । ५ । १ । १०३ । इति उकञ् ।) धनुः । इत्यमरः । २ । ८ । ८३ । धनुक् इति भाषा ॥ (यथा, माघे । २ । ९७ ।
"कार्म्मुकेज्येव गुणिना वाचः सन्धानमेष्यति" ॥)
कार्म्मुकः, पुं, (कार्म्मुकं धनुः साधयतेनास्यस्य इति अच्) वंशः । बाँश् इति भाषा । (कर्म्मणे कार्य्याय प्रभवतीति । कर्म्मन् + उकञ् ।) कर्म्मक्षमे त्रि । इति मेदिनी ॥ श्वेतखदिरः । हिज्जलः । महानिम्बः । इति राजनिर्घण्टः ॥
कार्य्यं, क्ली, (क्रियते यत् तत् । कृ + "विभाषा कृ दृषोः" । ३ । १ । १२० । इति व्यवभावे "ऋहलोर्ण्यत्" । ३ । १ । १२५ । इति ण्यत् । ततो वृद्धिः ।) क्रियते यत् । इति व्याकरणम् । काज इति भाषा । ("कार्य्यन्तु तच्चस्याभिनिर्वृत्तिरभिसन्धाय प्रवर्त्तते कर्त्ता" । इति चरके विमानस्थाने । ८ अध्यायः ॥ तथा मनुः । ९ । २९९ ।
"आरभेत ततः कार्य्यं सञ्चिन्त्य गुरुलाघवम्" ॥ कर्त्तव्यम् । यथा तत्रैव । ३ । ८० ।
"आज्ञासते कुटुम्बिभ्यस्तेभ्यः कार्य्यं विजानता" ॥) तत्पति कारणम् त्रिविधम् । समवायिकारणम् १ यथा घटकार्य्यं प्रति कपालम् । असमवायिकारणम् २ यथा घटकार्य्यं प्रति कपालसंयोगादि । निमित्तकारणम् ३ यथा घटं प्रति दण्डचक्रादि । इति तर्कशास्त्रम् ॥ हेतुः । प्रयोजनम् । इति मेदिनी ॥ ऋणादिविवादः यथा,—
"यस्मात् कार्य्यसमारम्भश्चिरात्तेन विनिश्चितः । तस्मान्न लभते कालमभियुक्तश्च कालभाक्" ॥
इति व्यवहारतत्त्वे कात्यायनः ॥
(तथा च मनुः । ८ । ४३ ।
"नोत्पादयेत् स्वयं कार्य्यं राजा नाप्यस्य पूरुषः" ॥) अपूर्व्वम् । यथा,—
"विधिप्रत्ययस्य कार्य्ये शक्तिरिति मीमांसकाः" ॥ व्याकरणमते आदेशप्रत्ययागमाः । इति दुर्गादासः ॥ (चि, करणीयम् । कर्त्तव्यम् । यथा मनुः । २ । २४८ ।
"सहपिण्डक्रियायान्तु ज्ञातायामस्य धर्म्मतः । अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः" ॥) -
कार्य्यकुशलः, त्रि, (कार्य्ये कर्म्मणि कुशलः निपुणः ।) कर्म्मठः । इति भूरिप्रयोगः ॥
कार्य्यपुटः, पुं, (कार्य्यां क्रियायां न पुटति । कारि + पुट् संश्लेषणे + कः ।) क्षपणः । उन्मत्तः । अनर्थकरः । इति विश्वमेदिन्यौ ॥
कार्य्यप्रदेशः, पुं, (कार्य्यं प्रदेष्टि अनेन । प्र + दिश् + करणे घञ् ।) आलस्यम् । इति राजनिर्घण्टः ॥
कार्य्या, स्त्री, (कृ + ण्यत् । टाप् ।) कारीवृक्षः । इति राजनिर्घण्टः ॥
कार्य्यी, [न्] पुं, (कार्य्यं अस्यस्य इति इनिः ।) यस्य निर्द्दिश्यते कार्य्यं सः । इति दुर्गादासः ॥ कर्म्मार्थी । इति कार्पटशब्दार्थे हेमचन्द्रः । (यथा मनुः । ८ । २ ।
"विनीतवेषाभरणः पश्येत्कार्य्याणि कार्य्यिणाम्" ॥)
कार्ष्मरी, स्त्री, (कृष् + स्वार्थे णिच् भावे मनिन् कार्ष्म तत् राति । रा + कः गौरादित्वात् ङीष् ।) काश्मरी । गम्भारीवृक्षः । इत्यमरटीकायां भरतः ॥
कार्ष्ण्यं, पुं, (कृष् + स्वार्थे ष्यञ् ।) कार्ष्यः । सालवृक्षः । इत्यमरटीकायां भरतः ॥ कचूरः । लकूचः । इति राजनिर्घण्टः ॥ (कृशस्य भावः । "वर्णदृढादिभ्यः ष्यञ्" । ५ । १ । १२३ । इति ष्यञ् ।) कृशतायां स्त्री ॥ (यथा, मेघदूते ३१ ।
"सौभाग्यन्ते सुभग ! विरहावस्थया व्यञ्जयन्ती कार्श्ण्यं येन त्यजति विधिना स त्वयैवोपपाद्यः" ॥)
कार्षकः, पुं, (कर्षति इति । कृष + "कृषेर्वृद्धिश्चोदीचां" । उणां । २ । ३८ । इति क्वुन् । यद्वा कृषिः शीलमस्य कृत्रादित्वात् णः स्वार्थे कन् ।) कर्षकः । इत्यमरटीकायां रायमुकुटः ॥
कार्षापणः, पुं क्ली, (कर्षस्यायं "तस्येदम्" । ४ । ३ । १२० । इत्यण् । नित्यं पणः परिमाणे इत्यप् गोचरसञ्चरेति घो वा कार्षस्य कार्षेण वा आपणः व्यवहारो यत्र । यद्वा कर्षस्येदं स्वार्थे वा अण् तेन आपण्यते । आ + पण कर्म्मणि घः ।) कार्षिकः । षोडशपणः । इति मेदिनी ॥ रूप्यकर्षकृतव्यवहारद्रव्यम् । लोके तु तन्मूल्ये षोडशपणसमुदाये कार्षापणस्योपचारेण प्रवृत्तिः । तथा हि शास्त्रीयो रजतमाषो द्विकृष्णलः । द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः । इति मनुः ॥ आद्ये कृतयुगे रजतकृष्णलयोर्द्दशगञ्जा मूल्यमिति दाक्षिणात्या कृष्णलाभौ रजतकर्षस्य षोडशपणा एव मूल्यम् । पुराणशब्दस्यात्र कार्षिकं पुराणञ्च कार्षापण इति वोपालितः । इत्यमरटीकायां भरतः ॥ (यथा, मनुः । ८ । १३६ ।
"कार्षापणस्तु विज्ञेयस्तात्रिकः कार्षिकः पणः" ॥)
कार्षिकः, पुं, (कर्ष + स्वार्थे ठक् ।) कार्षापणः । इत्यमरः । २ । ९ । ८८ ॥ (यथा याज्ञवल्क्यः । १ । ३६५ ।
"निष्कः सुवर्णाश्चत्वारः कार्षिकस्तात्रिकः पणः" ॥
कर्षः कर्षं शीलमस्य । कर्ष + ठक् ।) क्षपकः । इति हेमचन्द्रः ॥ (कर्षस्यायम् । कर्ष + ठञ् । शास्त्रीयपणचतुर्भागः । कर्षः परिमाणमस्य ठक् । कर्षपरिमितद्रव्यम् । कर्षेण क्रीतः । ठञ् । कर्षक्रीतः ॥)
कार्ष्णिः, पुं, (कृष्णस्यापत्यम् । अत इञ् ।) कामदेवः । इति त्रिकाण्डशेषः । (यथा हरिवंशे । १६३ । १९ ।
"तामापतन्तीं मायान्तु कार्ष्णिः कमललोचनः" ॥ गन्धर्व्वविशेषः । यथा महाभारते । १ । १२३ । ५३ ।
"युगपत्तृणपः कार्ष्णिर्नन्दिश्चित्ररथस्तथा" ॥)
कार्ष्णी, स्त्री, (कार्ष्ण + ङीप् ।) शतावरी । इति राजनिर्घण्टः ॥ (शतावरीशब्देऽस्या विवरणं ज्ञातव्यम् ।)
कार्ष्ण्यः, पुं, (कृष + "इगुपधेति" ३ । १ । १४५ । कः । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ।) सालवृक्षः ॥ इत्यमरः । २ । ४ । ४४ ॥ (अस्य पर्य्यायो यथा । "शालस्तु सर्ज्जकार्ष्यश्चकर्णिकाशस्यसम्बरः" । इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
काल त् क कालोपदेशे । इति करिकल्पद्रुमः । (अदन्तपुरां-परं-सकं-सेट् ।) यथा अचकालत् कालमियत्तया गणकः । एतावती वेलेति कथितवानित्यर्थः । इति दुर्गादासः ॥
कालं, क्ली, (ईषत् कृष्णत्वं लाति ग्रहाति । ला + कः धातुषु कुत्सितरूपतया चलति वा । अच् + अच् । कोः कादेशः ।) लौहम् । इति वाचस्पतिरित्यमरटीकायां भरतः ॥ कालोलकम् । इति राजनिर्घण्टः ॥ कालीयकम् । इति शब्दचन्द्रिका ॥
कालः, पुं, (कलयति आयुः । कल् संख्याने घञ् यद्वा घञ् ततः प्रज्ञादित्वात् स्वार्थे अण् । यद्वा कालयति सर्व्वाणि भूतानि । कल् प्रेरणे ण्यन्तात् घञ् यद्वा घञ् ।) क्षणदण्डमुहूर्त्तप्रहरदिनरात्रिपक्षमासायनवत्सरादिः । इति दुर्गादासः ॥ तत्पर्य्यायः । दिष्टः २ अनेहा ३ समयः ४ । इत्यमरः । १ । ४ । १ ॥ "जन्यानां जनकः कालो जगतामाश्रयो मतः । परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः" ॥ (यथा विष्णुपुराणे । १ । २ । १४ ।
"परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज ! । व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथा परम्" ॥)
अस्य गुणाः । सङ्ख्या १ परिमितिः २ पृथक्त्वम् ३ संयोगः ४ विभागः ५ । इति भाषापरिच्छेदः ॥
"अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः । कलनात् सर्व्वभूतानां स कालः परिकीर्त्तितः" ॥
इति तिथ्यादितत्त्वम् ॥ * ॥
("कालस्तु त्रिविधो ज्ञेयोऽतीतोऽनागत एव च । वर्त्तमानस्तृतीयस्तु वक्ष्यामि शृणु लक्षणम् ॥ कालः कलयते लोकं कालः कलयते जगत् । कालः कलयते विश्वं तेन कालोऽभिधीयते ॥ कालस्य वशगाः सर्व्वे देवर्षिसिद्धकिन्नराः । कालो हि भगवान्देवः स साक्षात्परमेश्वरः ॥ सर्गपालनसंहर्त्ता स कालः सर्व्वतः समः । कालेन कल्प्यते विश्वं तेन कालोऽभिधीयते ॥ येनोत्पत्तिश्च जायेत येन वै कल्प्यते कला । सोऽन्तश्च भवेत्कालो जगदुत्पत्तिकारकः ॥ यः कर्म्मणि प्रपश्येत प्रकर्षे वर्त्तमानके । सोऽपि प्रवर्त्तको ज्ञेयः कालः स्यात् प्रतिपालकः ॥ येन मृत्युवशं याति हृतं येन जयं व्रजेत् । संहर्त्ता सोऽपि विज्ञेयः कालः स्यात् कलनापरः ॥ कालः सृजति भूतानि कालः संहरते प्रजाः । कालः स्वपिति जागर्त्ति कालो हि दुरतिक्रमः ॥ काले देवा विनश्यन्ति काले चासुरपन्नगाः । नरेन्द्राः सर्व्वजीवाश्च काले सर्व्व विनश्यति ॥ त्रिकालात् परतो ज्ञेय आगन्तुर्गतचेष्टकः । तथा वर्षाद्विमोष्माख्या स्त्रयः काला इमे मताः ॥ तथा त्रयोऽन्येऽपि ज्ञेया उद्यन्मध्यास्तरूपिणः । सूक्ष्मोऽपि सर्व्वगः स वै व्यक्ताद्यक्ततरः शुभः" ॥
इति प्रथमस्थाने ४ अः । हारीतेनोक्तम् ॥)
यमः । (यथा गोः रामायणे । ३ । ३५ । ४३ ।
"आपतन्तीञ्च तां दृष्ट्वा कालदण्डोपमां गदाम्" ॥)
क्षणवर्गः । क्षणगुणवति त्रि । इत्यमरः । १ । ५ । १४, १६ । (यथा गोः रामायणे । ६ । ६७ । २ ।
"उद्यतायुधनिस्त्रिंशे रथे च समलङ्कृते । कालाभ्रयुक्ते महति स्थितः कालान्तकोपमः" ॥)
मृत्युः । (यथा भागवते । ९ । ९ । २ ।

"दिलीपस्तत्सुतस्तद्वदग्रक्षः कालमेयिवान्।
भगीरथस्तस्य पुत्रस्तेषे स सुमहत् तपः" ॥)
महाकालः। इति मेदिनी॥ भूनिः। इति दीपिका॥ कासमर्दः। रक्तचित्रकः। रालः। कोकिलः। इति राजनिर्घण्टः॥ (सर्व्वकलनात् ग्विव। यथा महाभारते। १३। १७। ४७।
"गजहा दैत्यहा कालो लोकधाता गुणाकरः"॥
कालनियन्तृत्वात् विष्णुः। यथा महाभारते। १३। १। १९। ५८।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः"॥
पर्व्वतविशेषः। यथा गोः रामायणे। ४। ४४। २१।
"ततो महाश्रमं गत्वा देवगन्धर्व्वसेवितम्।
कालं नाम सदा शान्तं गमिष्यथ गिरोत्तमम्"॥)
कालकं, क्ली, (काल + स्वार्थे कन्। यद्वा, कलयति गोदयति रक्षताम्। कल गोदने + ण्वुल्।) कालशाकम्। इति भावप्रकाशः॥ (कालशाकशब्देऽस्य गुणादिकं बोध्यम्॥) यकृत्। इति हेमचन्द्रः॥
कालकः, पुं, (कालयतीति। कलत्कालेपे + "ण्वुलृचौ" ३। १। १३३ इति ण्वुल्।) जतुकः। इत्यमरः। २। ४। ४९॥ जड़ुर इति भाषा॥ ("वर्णो वानित्ये"। "रक्ते"। "कालाच्च"। ५। ४। ३१, ३३ इति कन्। कालकः पटः। कालिका शाटी। कालकं मुखं इति सिद्धान्तकौमुदी॥) अलगर्दसर्पः। इति शब्दरत्नावली॥ (राक्षसविशेषः। यथा गोः रामायणे ३। २९। ३०।
"दुर्ज्जयः कालकाख्यश्च परघः कालिकामुखः"॥)
कालकटङ्कटः, पुं, (कालरूपः कटङ्कटः।) शिवः। शालकटङ्कटोऽपि पाठः। इति दानधर्म्मे शिवसहस्रनामसु पठितः॥ (यथा, महाभारते १३। शिवसहस्रनामकथने। १७। ५७।
"वैणवी पणवी तालो खली कालकटङ्कटः"॥)
कालकण्ठः, पुं, (कालः कृष्णवर्णः नीलो वा कण्ठोऽस्य।) शिवः। पीतसारः। मयूरः। खञ्जनः। कलविङ्कः। दात्यूहपक्षी। इति मेदिनी॥
कालकण्ठकः, पुं, (कालः कृष्णः कण्ठोऽस्य। ततः रूप् स्वार्थे कन् वा।) दात्यूहपक्षी। इत्यमरः। २। ५। २१॥ (दात्यूहशब्देऽस्य गुणपर्य्याया वक्तव्याः॥)
कालकन्दकः, पुं, (कालं कृष्णसर्पं कन्दति स्पर्द्धते यद्वा कालः सन् कन्दते वैक्लव्यं गच्छति। काल + कदि + अच्। स्वार्थे कन्।) जलसर्पः। इति शब्दरत्नावली॥
कालकर्णिका, स्त्री, (कालस्य कर्णिका इव।) अलक्ष्मीः। इति हेमचन्द्रः॥
कालकर्णी, स्त्री, (कालः कर्णोऽस्याः। अच् ततः स्त्रियां ङीप्।) अलक्ष्मीः। इति शब्दरत्नावली॥
कालका, स्त्री, (कालकेयाख्यासुराणां माता काला एव कन्। बाहुलकात् न ह्रस्वम्।) कालकेयनामासुरगणमाता। इति जटाधरः॥ (सा च वैश्वानरकन्या। यथा, भागवते ६। ६। ३२।
"वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः।
उपदानवी हयशिरा पुलोमा कालका तथा"॥)
कालकीलः, पुं, (कालं प्रकृतकालोपयुक्तं सत् प्रसङ्गादिकं कीलयति व्याहरणोति नाशयति वा। काल + कील + अण्। कोलाहलस्य सत्कथादिनाशकत्वात् तथात्वम्।) कोलाहलः। इति शब्दरत्नावली॥
कालकुण्ठः, पुं, (कालेन कालरूपिणा परमेश्वरेण कुण्ठ्यते असौ। कुण्ठ + कर्म्मणि घञ्।) यमः। इति शब्दमाला॥
कालकूटं, क्ली, (कालात् कृष्णपर्व्वतात् कुथ्यते निष्कृष्यते। कुथ् + कर्म्मणि क्तः।) कङ्कुष्ठम्। पर्व्वतीयमृत्तिकाविशेषः। इति राजनिर्घण्टः॥
कालकूटः, क्ली, (कालं शिवमपि कूटयति अवसादयति यद्वा कालस्य मृत्योः कूटं व्यायोजनसमष्टिः दूत इव वा।) वोलम्। विषम्। इति राजनिर्घण्टः॥ (यथा, भागवते ८। ६। २५।
"नभेतव्यं कालकूटात् विषाज्जलधिसम्भवात्"॥)
कालकूटः, पुं क्ली, (कालस्य मृत्योः कूटः कृष्णदूत इव।) स्थावरविषभेदः। इत्यमरः॥ १। ८। १०। (यथा भागवते ३। २। २३।
"अहो बकी यं स्तनकालकूटं
जिघांसयाऽपाययदप्यसाध्वी"॥
अस्य स्वरूपं यथा,—
"देवासुरराणे देवैर्हतस्य पृथुमालिनः।
दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः॥
निर्य्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः
सो हि क्षेत्रे पतद्भूवेरे कोङ्कणे मलये भवेत्"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे शोधनमारणाधिकारे॥*॥
देशविशेषः। यथा, महाभारते २। २०। २६।
"कुरुभ्यः प्रस्थितास्ते तु मध्येन कुरुजाङ्गलम्।
रम्यं पद्मसरो गत्वा कालकूटमतीत्य च"॥)
कालकूटकः, पुं, (कालस्य कूटमिव कायति प्रकाशते। कै + कः।) कारस्करवृक्षः। इति राजनिर्घण्टः॥ (यथा, महाभारते। १। १२८। ४४।
"ततो दुर्य्योधनः पापस्तद्भक्ष्ये कालकूटकम्।
विषं प्रक्षेपयामास भीमसेनजिघांसया"॥
कारस्करशब्दस्य गुणपर्य्याया ज्ञेयाः॥)
कालकृत्, पुं, (कालं करोतीति। कालस्य परिमाणं उदयास्ताभ्यां दण्डपलादिक्रमेण सम्पादयतीति। कृ + क्विप् तुगागमश्च।) सूर्य्यः। इति चिकाण्डशेषः॥
कालकृतः, पुं, (कालेन परमेश्वरेण कृतः सृष्टः। यद्वा कालं काष्ठाकलादिमानं कृतः कर्त्ता। कृ + कर्त्तरि + क्तः।) सूर्य्यः। इति शब्दरत्नावली॥ कालजाते, त्रि। यथा, पुराणे,—
"सर्व्वं कालकृतं मन्ये कालो हि बलवत्तरः"॥
कालखञ्जनं, क्ली, (कालेन कालान्तरेण खञ्जति विकृतिं गच्छतीति। काल + खञ्ज + ल्युः।) यकृत्। इति हेमचन्द्रः॥
कालखण्डं, क्ली, (कालं कृष्णं खण्डम्।) यकृत्। दक्षिणकुक्षिस्थमांसखण्डम्। इत्यमरः। २। ६। ६६॥ (यकृत्शब्दोऽस्य विशेषो ज्ञातव्यः॥)
कालग्रन्थिः, पुं, (कालस्य ग्रन्थिरिव।) वत्सरः। इति

चिकाण्डशेषः॥
कालङ्कृतः, पुं, (कुत्सितोऽपि अलङ्कृतः ईषदलङ्कृतो वा। कोः कादेशः।) वृक्षविशेषः। कालकासुन्दे इति भाषा। तत्पर्य्यायः। अरिमर्दः २ कासमर्दः ३ कर्कशः ४। इति रत्नमाला॥
कालचक्रं, क्ली, (कालस्य कालगतेश्चक्रमिव।) कालरूपचक्रम्। यथाह—हेमचन्द्रः।
"कालो द्विविधोऽवसर्पिण्युत्सर्पिणीषु भेदतः।
सागरकोटिकोटीनां विंशत्या स समाप्यते॥
अवसर्पिण्यां षड्रा उत्सर्पिण्यां त एव विपरीताः।
एवं द्वादशभिरैर्विवर्त्तते कालचक्रमिदम्"॥
ज्योतिश्चक्रविशेषः। यथा,—
"चिनाभिमति पञ्चारे षण्णेमिन्यक्षयात्मके।
सम्वत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितम्"॥
इति विष्णुपुराणे २। ८। ४। चक्रमेवोपासनार्थं विशिनष्टाह। चिनाभिमतीति। नाभिः नह्यः यत्राक्षः प्रोतः स च चिनेमखण्डः। अक्षस्याच नाभित्वेनोपास्यत्वात्। मेखलारूपान्तिस्रो नाभयः पूर्ब्बाह्णमध्याह्नापराह्णास्त्रयुक्ते। पञ्चारे पञ्च संवत्सरपरिवत्सरादयो वक्ष्यमाणा अराः पूलाका यस्य सः तस्मिन्। षण्णेमिनि षट् ऋतवो नेमयः प्रान्तवलयानि तद्वति। कालात्मकत्वादक्षयात्मके। संवत्सरमये संवत्सरावयवमासारब्धकत्वात् संवत्सरत्वेनोपास्यत्वाच्च तन्मयम्। तदुक्तं मात्स्ये।
"अहश्चिनाभिः सूर्य्यस्य त्वेकचक्रस्य वै स्मृतम्।
अराः संवत्सराः पञ्च नेमयः षड्ऋतवः स्मृताः"॥
इति। तस्मिन् कालचक्रं कालोपलक्षणभूतं कृत्स्नं ज्योतिश्चक्रं प्रतिष्ठितं आश्रितम्। सूर्य्यगत्यधीनत्वात् कालचक्रफलस्य। इति तट्टीकायां श्रीधरस्वामी॥ ("स एष निमेषादियुगपर्य्यन्तः कालचक्रवत् परिवर्त्तमानः कालचक्रमुच्यत इत्येके"॥ इति सुश्रुते सूत्रस्थाने ६ अध्याये॥)
कालज्ञः, पुं (कालं कालानुयायिकर्त्तव्यादिकं कालगतिं वा जानातीति। काल + ज्ञा + कः।) कुक्कुटः। इति राजनिर्घण्टः॥ (कालवेत्तरि त्रि, यथा, मनुः ७। २१७।
"तत्रात्मभूतैः कालज्ञैरार्य्यैः परिचारकैः"॥)
कालञ्जरः, पुं, (कालं जरयति। काल + जॄ + णिच् + अच्। बाहुलकात् मुम्।) योगिचक्रभेलकम्। (कालं मृत्युं जरयतीति।) भैरवः। (कालेन जीर्य्यति। जॄ + अच्।) पर्व्वतविशेषः। इति मेदिनी॥ (यथा, महाभारते ३। तीर्थयात्रापर्व्वणि ८५। ५६।
"अत्र कालञ्जरं नाम पर्व्वतं लोकविश्रुतम्।
तत्र देवह्रदे स्नात्वा गोसवफलं लभेत्"॥)
देशविशेषः। इति धरणी॥
कालञ्जरी, स्त्री, (कालं जरयति। कालं + जॄ + णिच् + अच्। मृत्युञ्जयः तस्य पत्नी ङीप्।) चण्डी। इति धरणी॥ (स्वयमेव कालं जरयतीति व्युत्पत्त्या टाबेव।) तदा कालञ्जरा इति रूपान्तरम्॥
कालतालः, पुं, (कालतायै कृष्णत्वात् अलति पर्य्याप्नोति। कालता + अल + अच्।) तमालवृक्षः।

इति राजनिर्घण्टः ॥ (अस्य गुणादिकन्तमालशब्दे-ज्ञेयम् ॥)

कालधर्म्मः, पुं, (कालस्य धर्म्मः । आयुषः परिणाम-काले पञ्चत्वप्राप्तिरूपो धर्म्मः ।) मृत्युः । इत्यमरः । २ । ८ । २१६ ॥ समयस्य स्वभावः ॥ (यथा, हरेः रामायणे । २ । ७२ । ३७ ।

"कालधर्म्मपरिक्षिप्तः पार्थैरिव महागजः" ॥)

कालनिर्य्यासः, पुं, (कालः कृष्णवर्णो निर्य्यासः ।) गुग्गुलुः । इति रत्नमाला ॥

कालनेमिः, पुं, (कालस्य मृत्योः नेमिरिव चक्रवत् ।) स्वनामख्यातराक्षसः । स च लङ्कापते रावणस्य मातुलः । यथा,—

"कालनेमिं दुराधर्षं रक्षःपरमदुर्जयम् ।
चतुरास्यं चतुर्हस्तमरुनेत्रं भयावहम्" ॥
इति गोः रामायणे ६ । ८२ । ६४ ॥ दैत्यविशेषः । यथा,—श्रीभागवते ।

"आत्मानमिह संजातं जानन् प्राग्विष्णुना हतम् ।
महासुरं कालनेमिं यदुभिः स वरुध्यत" ॥
स तु हिरण्यकशिपुपुत्रः । इति हरिवंशः ॥ (कालचक्रम् ॥)

कालनेमिरिपुः, पुं, (कालनेमेः कालनेमिसंज्ञकासुरस्य रिपुः हन्ता ।) विष्णुः । इति शब्दरत्नावली ॥ (कालनेमे रावणमातुलस्य रिपुः हन्ता । हनूमान् । इति व्युत्पत्तिलब्धोऽर्थः ॥)

कालनेमिहा, [न्] पुं, (कालनेमिं तन्नामानं असुरं हतवान् । हन् + क्विप् ।) विष्णुः । इति त्रिकाण्ड-शेषः ॥ (यदुक्तं महाभारते १३ । १४६ । ८२ ।

"कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः" ।
कालनेमिं स्वनामख्यातरावणमातुलं हतवानिति व्युत्पत्त्या हनूमान् ॥)

कालनेमी, [न्] पुं, (कालस्येव नेमिरस्यस्य श्रीह्या-देराकृतिगणत्वात् इनिः ।) कालनेमिः । इति द्विरूपकोषः ॥

कालनेम्यरिः, पुं, (कालनेमेः अरिः शत्रुः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

कालपर्णः, पुं, (कालं कृष्णं पर्णं पत्रं यस्य ।) तगर-वृक्षः । इति शब्दरत्नावली ॥

कालपालकं, क्ली, (कालं कृष्णवर्णं पालयति धार-यतीति । काल + पाल + ण्वुल् ।) कङ्गुयन्त्रिका । इति राजनिर्घण्टः ॥

कालपीलुकः, पुं, (कालः कृष्णः पीलुः । स्वार्थे कन् ।) कुपीलुः । इति भावप्रकाशः ॥ (गुणाः पर्य्यायाश्चास्य कुपीलुशब्दे बोद्धव्याः ॥)

कालपुरुषः पुं, (कालः कालचक्रं पुरुष इव ।) यम-सहायः । इति जटाधरः ॥ ज्योतिःशास्त्रम् । यथा

"किन्त्वस्य कालपुरुषाख्यमहार्थवस्य
गच्छेत् कदाचिदपि दर्शनमेव पारम्" ॥
कालपुरुषः स चाख्या नाम यस्यासौ तस्य ज्योतिःशास्त्रविस्तीर्णसमुद्रस्य । इति भट्टोत्पलः ॥*॥ नराणां शुभाशुभज्ञानार्थं जन्मलग्नादिद्वादशराशिकल्पितपुरुषाकारः । यथा,—

"शीर्षमुखबाहुहृदयोदरराशिकटिवस्तिगुह्यसंज्ञ-कानि । ऊरुजानुकजङ्घेचरणाविति च राशयो-ऽब्जाद्याः" ॥ इति दीपिका ॥ * ॥ नराणां शुभा-शुभज्ञानार्थं जन्मलग्नादिराशिद्वादशकाघटितपुरु-षाकारः । यथा, "कं दृक्श्रोत्रनसाकपोलहनवो वक्त्रञ्च होरादयस्ते करठांशूकबाहुपार्श्वहृदयक्रो-ड़ानिभास्ततः । वस्तिः शिश्नगुदे ततश्च वृषणा-वूरूततो जानुनी जङ्घाङ्घ्री ह्युभयत्र वाममुदितै-र्द्वादशभागैरेखिधा" ॥ इति "कालनरस्याङ्गेसद-सद्ग्रहयोगतः । पुंसामपि तदङ्गेषु शुभाशुभफलं वदेत्" ॥ इति बृहज्जातकम् ।

कालपृष्ठं, क्ली, (कालं कृष्णं पृष्ठं यस्य ।) कार्ष्णधनुः । धनुर्म्मात्रम् । इति हेमचन्द्रः ॥

कालपृष्ठः, पुं, (कालं कृष्णवर्णं पृष्ठं पृष्ठभागो यस्य ।) कङ्कपक्षी । मृगविशेषः । इति हेमचन्द्रः ॥

कालपेषी, स्त्री, (पिष्यतेऽसौ । पिष् + कर्म्मणि घञ् । पेषः । कालः पेषः । ततः स्त्रियां ङीष् ।) श्याम-लता । इति रत्नमाला ॥ (अस्या पर्य्यायो यथा ॥

"कालपेषी महाश्यामा सुमद्रोत्पलशारिवा ।
दीर्घमूला च पालिन्दीमसूरविदला च सा" ॥)

कालप्रभातं, क्ली, (कालं कृष्णं प्रभातं यत्र ।) शर-दृतुः । शरत्कालः । इति त्रिकाण्डशेषः ॥

कालभाण्डिका, स्त्री, (कालभाण्डे कृष्णप्रभाण्डे अण्डति उच्छ्रयति । अण्डि + ण्वुल् टाप् इत्वञ्च ।) मल्लिका । इति राजनिर्घण्टः ॥

कालमानः, पुं, (कालो मन्यते यः जनैरितिशेषः । काल + मन + कर्म्मणि घञ् ।) कृष्णार्ज्जकः । इति रत्नमाला ॥ कालतुलसी इति भाषा । राजनिर्घण्टे लान्तशब्दोऽयम् ॥ (लकारान्तस्यास्य व्यवहारो यत्र तद्यथा ॥ सुश्रुते सूत्रस्थाने । ३८ अः ॥

"सुरसा-श्वेतसुरसा-फणिज्झकार्ज्जक-भूस्तृण-सुग-न्धक-सुमुख-कालमाल-कासमर्द-बबुक-खरपुष्पा-विड्ङ्ग-कट्फल-सुरसीत्यादयः, सुरसादिगणे ॥)

कालमुष्ककः, पुं, (कालो मुष्क इव कायति प्रका-शते । कै + कः ।) घण्टापारलिवृक्षः । इति रत्न-माला ॥ (यस्मिन्नस्य व्यवहारस्तदयथा,—

"प्रशस्तेऽहनि नक्षत्रे कृतमङ्गलपूर्व्वकम् ।
कालमुष्ककमाहृत्य दग्ध्वा भस्म समाहरेत्" ॥
इति वैद्यकचक्रपाणिसंग्रहे अर्शोऽधिकारे कुच-चित्तारनामकौषधे ॥)

कालमूलः, पुं, (कालं मूलं यस्य ।) रक्तचित्रकवृक्षः । इति राजनिर्घण्टः ॥

कालमेण्ढिका, स्त्री, (कालः मिण्ढते कालोऽयमिति कथ्यते जनैरिति शेषः । मिण्ढ + कर्म्मणि घञ् गौरादित्वात् ङीष् ततः कन् टाप् ह्रस्वश्च ।) कालमेषिका । इत्यमरटीकायां रायमुकुटः ॥

कालमेषी, स्त्री, (कालमेष + ङीष्) कालमेषिका । इत्यमरटीकायां भरतः ॥

कालमेषिका, स्त्री, (कालं मिषति स्पर्द्धते स्वकाण्डेन । मिष + अण् । गौरादित्वात् ङीष् स्वार्थेकन् टाप् ह्रस्वश्च ।) मल्लिका । कृष्णचित्रता । इत्यमरः २ । ४ । १०६ ॥ अस्याः पर्य्याया यथा,—

"चित्रश्यामार्द्धचन्द्रा च पालिन्दी च सुषेणिका ।
मसूरविदला कोलकैषिकाकालमेषिका" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)

कालमेषी, स्त्री, (कालमेष + ङीष् ।) सोमराजी । इत्यमरः । २ । ४ । ६६ ॥ (अस्याः पर्य्यायो यथा,—

"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
अग्निलेखाकृष्णफला सोमा पूतिफलीति च" ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणा-स्वाम्या वाकुचीशब्दे ज्ञेयाः ॥) मल्लिका । इति शब्दरत्नावली ॥ चित्रक् । इति राजनिर्घण्टः ॥

कालरात्रिः, स्त्री, (कालः कालरूपा ब्रह्मैकदिने चतु-र्द्दशमन्वन्तराधिकारावसाने सृष्टिसंहारहेतुभूता रात्रिः ।) रात्रिविशेषः । सा तु कालः संहारः । मरणं तदुपलक्षिता रात्रिः कल्पान्तरात्रिरित्यर्थः । इति देवीमाहात्म्यटीकायां विद्यावागीशः ॥ भीम-रथी । इति हारावली ॥ दुर्गायाः शक्तिविशेषः । यथा,—

"सा दुर्गा शक्तिभिः सार्द्धं काशीं रक्षति सर्व्वतः ।
ताः प्रयत्नेन संपूज्याः कालरात्रिमुखा नरैः" ॥
इति काशीखण्डम् । (दीपावली । यथा,—

"दीपावली तु या प्रोक्ता कालरात्रिश्च सा मता" ।
इत्यागमवचनात् ।
क्रियायोग्यकालविशेषः । यदुक्तं दीपिकायाम् ।

"रवौ षष्ठं विधौ वेदं कुजवारे द्वितीयकम् ।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम् ॥
शनावाद्यं तथा चान्तं रात्रौ कालं विवर्जयेत्" ॥)

कालरुद्रः, पुं, (कालः कालरूपः सर्व्वसंहारको रुद्रः ।) कालाग्निरुद्रः । यथा, देवीपुराणे,—

"येषु नः कालरुद्रस्य नागास्त्रीशूलसङ्गता ।
विचित्रहर्म्म्यविन्यासा कृतस्ते मेरुपृष्ठतः ।
सा एव कालरुद्रस्य तनुरूपेण संस्थिता" ॥

कालवलयं, क्ली, (कालं कृष्णवर्णं वलयम् ।) विड्-लवणम् । इति रत्नमाला ॥

("न कालवलये गन्धः सौवर्च्चलगुणाश्च ते" ॥
इति चरके सूत्रस्थाने २७ अः ॥)

कालवलौहं, क्ली, (कालं कृष्णं लौहं आयसमित्यर्थः ।) कालायसम् । तिखा इति भाषा । तत्पर्य्यायः । कृष्णायसम् २ रुक्मम् ३ तीक्ष्णम् ४ । इति रत्न-माला । (कालायसशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कालवलनं, क्ली, (कलयति उपभुनक्ति विषयं । कल + णिच् + अच् । काल्यते प्रेर्य्यतेऽसौ कालेन वा णिच् कर्म्मणि घञ् । कालः कायः तस्य वलनं आव-रणम् । वल संवरणे + करणे ल्युट् ।) वर्म्म । इति त्रिकाण्डशेषः ॥ कायवलनमिति साधुपाठः ॥

कालवृन्तः, पुं, (कालं वृन्तं यस्य ।) कुलत्थवृक्षः । इति रत्नमाला ॥

कालवृन्ती, स्त्री, (कालवृन्त + गौरादित्वात् ङीष् ।) पाटलावृक्षः । इति राजनिर्घण्टः ॥

कालवेला, स्त्री, (कालस्य वेला ।) क्रियानर्हकालवि-शेषः । सा तु रव्यादिवारे कालस्य प्रहरोक्तस्तद्-यामार्द्धरूपवेला । यथा । रवौ दिवा पञ्चमयामार्द्धं नक्तं षष्ठयामार्द्धम् । सोमे दिवा द्वितीययामार्द्धं

नक्तं चतुर्थयामार्द्धम्। कुजे दिवा षष्ठयामार्द्धं नक्तं सप्तमयामार्द्धम्। बुधे दिवा तृतीय यामार्द्धं नक्तं सप्तमयामार्द्धम्॥ गुरौ दिवा सप्तमयामार्द्धं नक्तं पञ्चमयामार्द्धम्। शुक्रे दिवा चतुर्थयामार्द्धं नक्तं तृतीययामार्द्धम्। शनौ दिवा प्रथमाष्टमयामार्द्धं नक्तं तदेव। इति दीपिका॥

कालशाकं, क्ली, (कालं कृष्णं शाकम्।) खनामख्यातशाकम्। करचा इति हिन्दी भाषा। तत्पर्य्यायः। नाडिकम् २ आढ्यशाकम् ३ कालकम् ४। अस्य गुणाः। सारकत्वम्। रुचिवायुबलकारित्वम्। कफशोथरक्तपित्तनाशित्वम्। मेध्यत्वम्। हिमत्वञ्च। इति भावप्रकाशः॥ तिक्तपूतिका। कुलत्थशाकं इति केचित्। अस्य गुणाः। कटुत्वम्। अग्निदीपनत्वम्। गुरुत्वम्। श्लेष्मनाशित्वञ्च। इति राजवल्लभः॥ (यथा च वाभटे सूत्रस्थाने। ६ अध्याये।

"वर्षाभ्वौ कालशाकञ्च सक्षारं कटुतिक्तकम्।
दीपनं भेदनं हन्ति गरश्लीपदकफानिलान्" ॥)

कालश्यालिः, पुं, (कालः कृष्णः श्यालिः उत्कृष्टधान्यविशेषः।) कृष्णश्यालिः। इति राजनिर्घण्टः॥

कालश्येयं, क्ली, (कलश्यां भवम्। कलश्री + ढक्।) कालसेयम्। घोलम्। इत्यमरटीकायां भरतः॥

कालसंरोधः, पुं, (कालस्य संरोधः।) चिरकालावस्थानम्। इति मिताक्षरा॥ यथा।

"न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः"।
इति याज्ञवल्क्यः॥

कालसर्पः, पुं, (कालः कृष्णः सर्पः।) कृष्णसर्पः। तत्पर्य्यायः। अजगर्द्धः २ महाविषः ३। इति चिकित्साशेषः॥ (यथा काशीखण्डे १०० अध्याये।

"स दष्टः कालसर्पेण स दग्धो मत्युना स्फुटम्।
स मुक्तश्च दिवसे विश्वेशो यत्र नेक्षितः" ॥)

कालसारं, क्ली, (कालः सारः प्रधानं यस्य।) पीतचन्दनम्। इति भावप्रकाशः॥ (कालीयकशब्देऽस्य गुणादयो बोद्धव्याः॥)

कालसारः, पुं, (कालः सारः प्रधानं यस्य।) खनामख्यातहरिणः। तत्पर्य्यायः। कृष्णसारः २। इति शब्दरत्नावली॥

कालसूत्रं, क्ली, (कालस्य यमस्य बन्धनहेतुकायाः सूत्रमिव।) नरकविशेषः। इत्यमरः। १। ८। २॥ तत्तु कुलालचक्रसूत्रच्छेदनरूपम्। इति मनुः॥ (यथा मार्कण्डेये १४। ८६।

"कालसूत्रे तथाच्छेदमनेकाश्चैव यातनाः।
प्राप्य निष्कृतिमेतस्मात् न वेद्मि कदमेष्यति" ॥)

कालस्येयं, क्ली, (कलस्यां भवम्। कलसी + ढक्।) घोलम्। इत्यमरः। २। ९। ५३॥

कालस्कन्धः, पुं, (कालः कृष्णः स्कन्धो यस्य।) तमालवृक्षः। तिन्दुकवृक्षः। शीवकद्रुमः। इति मेदिनी॥ दुग्धखदिरः। उदुम्बरः। इति राजनिर्घण्टः॥ (अस्य व्यवहारो यथा,—सुश्रुते सूत्रस्थाने। ३८ अध्याये कालसादिवर्गे॥

"कालसारात्रजकर्णखदिरकदंरकालस्कन्धकसुकभूर्जमेषशृङ्गीत्यादिषु" ॥)

काला, स्त्री, (कालो वर्णोऽस्यस्य अर्श आदिभ्य अच् टाप् च। अच वर्णस्याविवक्षायां जानपदेति न ङीष्। अर्श आद्यजन्तात् न ङीष् इत्यर्थः।) नीलिनी। कृष्णत्रिवृता। कृष्णजीरकः। इत्यमरः। २। ४। ९४॥ मञ्जिष्ठा इति मेदिनी॥ कुलिकवृक्षः। कालियाकड़ा इति भाषा। इति रत्नमाला॥ अश्वगन्धावृक्षः। इति राजनिर्घण्टः॥ पाटलावृक्षः। इति भावप्रकाशः॥ (दक्षकन्याविशेषः। सा तु कश्यपपत्नी। यथा महाभारते १। सम्भवपर्व्वणि ६५। १२।

"अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा" ॥)

कालागुरु, क्ली, (कालं कृष्णं अगुरु।) कृष्णागुरु। इत्यमरः। २। ६। १२७॥ (यथा रघुः ४। ८१।

"चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः" ॥

कृष्णागुरुशब्दस्य पर्य्यायः गुणाश्चज्ञेयाः॥)

कालाग्निः, पुं, (कालः सर्व्वसंहारकः अग्निः। प्रलयाग्निः। यथा महाभारते १। ५४। २५।

"ब्रह्मदण्डं महाघोरं कालाग्निसमतेजसम्।
नाशयिष्यामि माञ्च त्वं भयं कार्षीः कथञ्चन" ॥

तदधिष्ठातृरुद्रदेवस्य प्रियत्वात् पञ्चमुखरुद्राक्षोऽपि कालाग्निनाम्नाख्यायते।) पञ्चमुखरुद्राक्षः। यथा स्कान्दे।

"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात्।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात्" ॥

इति तिथ्यादितत्त्वम्॥

कालाग्निरुद्रः, पुं, (कालः संहारकः अग्निः सम्वर्त्तकाग्निरित्यर्थः। तस्याधिष्ठाता रुद्रः। कालाग्निरिव रुद्रो वा।) संहारकारिरुद्रः। यथा। कालाग्निरुद्र ऋषिरित्यादि वैदिकसन्ध्यायां रुद्रोपस्थानम्॥ * ॥ तद्विवरणं यथा,—

शुक्र उवाच।

"भगवंस्तव वाक्यानां न तृप्तिर्भवते मम।
कालाग्निपार्थिवं मानं श्रोतुमिच्छामि तत्त्वतः" ॥

भगवानुवाच।

"न हि पार्थिवदीपेषु मेरुपृष्ठेऽपि वासव!।
भोगाकादकरा नृणां तथा पातालवासिषु ॥
येषु नः कालरुद्रस्य नानास्निग्धतसंकुला।
विचित्रहर्म्म्यविन्यासा कृतस्ते मेरुपृष्ठतः ॥
सा एव कालरुद्रस्य तनुरुपेण संस्थिता।
सा पराशिवभावेन परमापददायिका ॥
तस्या यदुःसहं तेजो ब्रह्मादीनां त्वयं करम्।
तं विद्धि कालरुद्रेति सौम्यरूपं सदाशिवम् ॥
कालाग्नियसनं लक्षं योजनानां प्रमाणतः।
अर्द्धोच्छ्रयतस्तस्य पादाः पादेन वासव!॥
सिंहरूपा महाघोरा महानका महाबलाः।
कालाग्निरुद्ररूपेण यो बहुरूपसमाहवः॥
अनन्तपद्मरूपस्य धातारः कारणेश्वरः।
दारुणाग्निश्च रुद्रस्य यमहन्ता क्षमान्तकः॥
लोहितः क्रूरतेजात्मा घनो दहिर्बलाहकः।

कालानु, पुं, (कल एव कालः अत्यल्पमधर-

विद्युतश्चलशीघ्रश्च प्रसन्नः शान्तसौम्यदृक्॥
सर्व्वज्ञो विविधो बुद्धो द्युतिमान् दीप्तिसुप्रभः।
एते रुद्रा महात्मानः कालिकाग्निरुद्रसंहिताः॥
संहरन्ति समस्तेदं ब्रह्माद्यं सचराचरम्।
कालाग्निभुवनग्रासोऽयं बज्रकोटिभिरावृतः॥
तस्याः पुरस्य विस्तारं शतकोटिमुवर्त्तुला।
देवगन्धर्व्वसिद्धानां तत्र भोगाः सुदुर्लभाः॥
पूर्व्वोत्तरपरा पश्चिर्याम्योत्तरस्थिता परा।
अनलानिलपरा च नैर्ऋतेशानगापरा॥
एतेषां मध्यतो राजन् कालरुद्रस्तु शोभने।
षड्भाकारैः पुरैः सर्व्वं कटकं तस्य संस्थितम्॥
समन्ताद्वेष्टितवनं प्राकाराट्टालगोपुरैः।
वज्रेन्द्रनीलवैदूर्य्यैः प्राकारैः सर्व्वतोऽन्वितम्॥
कालाग्निनरकान्ते तु पुरं कालस्य संस्थितम्।
पञ्चाशल्लक्षविस्तारं समन्तात् परिवर्त्तुलम्॥
जाम्बूनदमयैर्हेमैः खचितं रत्नधातुभिः॥
प्रमदाजनसंजुष्टं नानावर्णसमावृतम्॥
कामोन्मत्तप्रमत्तञ्च तद्भाति जनसंकुलम्।
कालस्य भुवनं दिव्यं वृत्ताकारं मनोहरम्॥
वेष्टितं हेमप्राकारैर्योजनायुतमुच्छ्रितम्।
प्राकारावहिरुद्यान्ते अन्तरं योजनायुतम्॥
अग्निज्वालैश्च निर्विड़ैर्भयदैः किंशुकप्रभैः।
हरितालनिभा ज्वाला सिन्दूरगैरिकाप्रभा॥
अत ऊर्द्धं प्रजज्वाल वातोद्भूताग्निभास्वरा।
वीचितरङ्गकल्लोलज्वालामालाकुलाम्बरा॥
प्रवृत्तास्ताः प्रमाणेन योजनद्वयकोटयः।
अष्टानवतिलक्षाणि ज्वाला ऊर्द्धन्ततः शिखा॥
वज्रभूता सदा तत्रा तस्य तेजोनियामिका।
चत्वारि कोटिमानेन कारणेन तु स्थापिता॥
तस्यार्द्धेन भवेत् किञ्चित् कोट्यश्चत्वारि वासव!।
एवं कालाग्निरुद्रस्य माहात्म्यं कीर्त्तितं मया॥
श्रवणात् सर्व्वपापानि शाम्यन्ति कालजान्यपि"॥
इत्याद्ये देवीपुराणे कालाग्निरुद्रपुरकथनम्॥
(कृष्णयजुर्व्वेदगतोपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि।

"कालाग्निरुद्रमैत्रेयी सुवालक्षुरिमन्त्रिका"॥

वटिकौषधविशेषः। यथा,—

"सूतकान्ताभ्रलौहानां भस्ममात्तिकगन्धकम्।
भूधराक्षे पुटे पक्त्वादिनैकं तद्विपाचयेत्॥
दशमांशं विषं योज्यं माषमात्रञ्च भक्षयेत्।
रसः कालाग्निरुद्रोऽयं दशाहेन विसर्पनुत्"॥

कालाग्निरुद्ररसः॥

इति रसेन्द्रसारसंग्रहे वीसर्पाधिकारे॥*॥)

कालाङ्गनी, स्त्री, (अज्यतेऽनया। अन्ज् + करणे ल्युट् + ङीप्। काली अङ्गनी ततः पुंवद्भावः।) क्षुपविशेषः। कालिकाख्यसिकिनी इति ख्याता। तत्पर्य्यायः। अङ्गनी २ रेचनी ३ शिलाङ्गनी ४ नीलाङ्गनी ५ कृष्णाभा ६ काली ७ कृष्णाङ्गनी ८। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। अमेध्यत्वम्। कृमिशोधनत्वम्। अपानावर्त्तशमनत्वम्। जाठरामयनाशित्वञ्च। इति राजनिर्घण्टः॥

कालानुनादी, [न्] पुं, (कल एव कालः अत्यल्पमधर-

ध्वनिः । तं अनुनदतीति । अनु + नद् + णिनिः ।) रोलम्बः । भ्रमरः । कलविङ्कः । चटा इति भाषा । कपिञ्जलः । चातकपक्षी । इति मेदिनी ॥

कालानुशारिवा, स्त्री, (कालेन कृष्णवर्णेन अनुकृता शारिवा ।) तगरपादिकम् । तगरमूल इति भाषा । श्वेतलोजटा । इति रत्नमाला । श्वीउलीक्षोप् इति भाषा ॥ (तगरशब्दे ऽस्या गुणादयो बोध्याः ॥)

कालानुसारकं, क्ली, (कालं कृष्णवर्णं मृगमदं अनुसरति गन्धेन । अनु + सृ + ण्वुल् ।) तगरम् । इति राजनिर्घण्टः ॥ पीतचन्दनम् । इति भावप्रकाशः ॥

कालानुसारिः, पुं, (कालं कृष्णवर्णं मृगमदं अनुसरतीति । काल + अनु + सृ + इञ् ।) शैलेयम् । शैलजनामगन्धद्रव्यम् । इति शब्दरत्नावली ॥

कालानुसार्य्यं, क्ली, (कालेन मृगमदेनानुसार्य्यते । अनु + सृ गतौ + "ऋहलोर्ण्यत्" ।३ । १ ।१२४ । इति ण्यत् ।) शैलेयम् । शैलज इति भाषा । कालीयकम् । कालीयानामपीतवर्णसुगन्धिकाष्ठम् । इत्यमरः । २ । ४ । १२२ ॥ ग्रिंग्रपाहृच्छः । इति मेदिनी । ग्रिंग्रु इति भाषा ॥ तगरम् । इति भावप्रकाशः ॥

कालानुसार्य्यकं, क्ली, (कालानुसार्य्य + कप् ।) शैलेयम् । इति राजनिर्घण्टः ॥

कालान्तरविषः, पुं, (कालान्तरे दंशनादन्यस्मिन् काले विषं विक्रतिकारि यस्य ।) मूषिकादिः । इति हेमचन्द्रः ॥

कालापः, पुं, (कालः मृत्युराप्यते यस्मात् । काल + आप् + अपादाने घञ् ।) सर्पभोगः । राक्षसः । इति धरणी । (कलापं स्वनामख्यातं व्याकरणं वेत्तीति । अण् ।) कलापव्याकरणवेत्तरि त्रि । (ऋषिविशेषः । यथा महाभारते । २ । ४ । १७ ।
"कुक्कुरो वेणुजङ्घोऽथ कालापः कठ एव च ।
मुनयो धर्म्मविदांसो धृतात्मानो जितेन्द्रियाः" ॥)

कालायसं, क्ली, (कालश्च तत् अयश्चेति । "अनोभ्रायः सरसां जातिसंज्ञयोः" । ५ । ४ । ९४ । इति टच् ।) लौहम् । इत्यमरः । २ । ९ । ९८ । (यथा, गोः रामायणे । ५ । ४९ । ३२ ।
"ददर्श वीक्षमाणश्च परिघं तोरणाश्रयम् ।
तमादाय महाबाहुः कालायसमयं दृढम्" ।
अस्य पर्य्याया यथा,—
"लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी" ।
अस्य सप्तदोषा यथा,—
"गुरुता दृढतोत्क्लेदः कश्मलं दाहकारिता ।
अश्मदोषः सुदुर्गन्धो दोषाः सप्तायसस्य तु" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कालिकं, क्ली, (कालः कृष्णो वर्णोऽस्यास्य इति ठन् ।) कृष्णचन्दनम् । तत्पर्य्यायः । कालेयम् २ कालायकम् ३ हरिप्रियम् ४ । इति शब्दचन्द्रिका ॥ (काले भवम् । ठञ् । कालेन निर्वृत्तं ठक् वा ।) सामयिके त्रि । (यथा, भाषापरिच्छेदे १२२ ।
"दैशिकं कालिकञ्चापि मूर्त्त एव तु दैशिकम्" ॥)

कालिकः, पुं, (काले वर्षाकाले चरति ठञ् । के जले अलति पर्य्याप्नोति । अल् + वाऽलकात् इकन् वा ।) क्रौञ्चः । इति शब्दरत्नावली ॥

कालिका, स्त्री, (कालो वर्णोऽस्यास्याः इनिठनाविति ठन् । यद्वा, काल + ज्ञानप्रदात् ङीष् स्वार्थे कन् हस्वश्च । चण्डिकाभेदः । काली । तन्नामकारणं यथा ।
"सर्व्वे सुरगणाः सेन्द्रास्ततो गत्वा हिमाचलम् ।
गङ्गावतारनिकटे महामायांप्रतुष्टुवुः ॥
अनेकसंस्तुता देवी तदा सर्व्वामरोत्तरैः ।
मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत ॥
युष्माभिरमरैरत्र स्तूयते का च भाविनी ।
किमर्थमागता यूयं मातङ्गस्याश्रमं प्रति ।
एवं ब्रुवन्त्या मातङ्ग्यास्तस्यास्तु कायकोषतः ।
समुद्भूताब्रवीद्देवी मां स्तुवन्ति सुरा इति ॥
शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान् ।
तस्मात्तयोर्व्वधायाहं स्तूयेऽद्य सकलैः सुरैः ॥
विनिःसृतायां देव्यान्तु मातङ्ग्याः कायतस्तदा ।
भिन्नाञ्जननिभा कृष्णा साभूत् गौरी कृशादपि ॥
कालिकाख्याऽभवत्सापि हिमाचलकृताश्रया ।
तामुग्रतारां ऋषयो वदन्तीह मनीषिणः ।
उग्रादपि भयात्राति यस्माद्रक्षान् सदाम्बिका ॥
एतस्याः प्रथमं बीजं कथितं तन्त्रमेव च ।
एषैवैकजटा ख्याता यस्मात्तस्या जटैकिका ।
पृथुतुण्डं चिन्तनं चास्याः सम्यग्वेतालभैरवौ ! ॥
यथा ध्यात्वा महादेवीं भक्तः प्राप्नोत्यभीप्सितम् ।
चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम् ॥
खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं त्वधः ।
कर्त्रीञ्च खर्परञ्चैव क्रमादामेन बिभ्रतीम् ॥
खं लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम् ।
मुण्डमालाधरां श्रीर्षे ग्रीवायामपि सर्व्वदा ॥
वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम् ।
कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम् ॥
वामपादं शवहृदि संस्थाप्य दक्षिणं पदम् ।
विन्यस्य सिंहपृष्ठे तु लेलिहानासवं स्वयम् ॥
साट्टहासमहाघोररावयुक्तातिभीषणा ।
चिन्त्योग्रतारा सततं भक्तिमद्भिः सुखेप्सुभिः ॥
एतस्याः संप्रवक्ष्यामि या अष्टौ योगिनीस्तु ताः ।
महाकाल्यथ रक्ताक्षी उग्रा भीमा तथैव च ॥
घोरा च भामरी चैव महारात्रिश्च सप्तमी ।
भैरवी चाष्टमी प्रोक्ता योगिनीस्ताः प्रपूजयेत्" ॥
इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः ।
कार्षापणम् । दक्षिकपक्षदक्षः । क्रमदेयवस्तुमूल्यम् । धूसरी । नवमेघः । पटोलशाखा । रोमाली ॥ मांसी । काकी । शिवा । मेघावलिः । इति मेदिनी ॥ (यथा रघुः ११ । १५ ।
"ताडका चक्रकपालकुण्डला
कालिकेव निविड़ा बलाकिनी" ॥)
स्वर्णदोषः । इति जटाधरः ॥ क्षीरकीटः । इति हारावली ॥ मसी । इति शब्दरत्नावली ॥ काकोली । श्यामापक्षी । इति राजनिर्घण्टः ॥ प्रतिमासीया वृद्धिः । यथा,—
"प्रतिमासं खवति या वृद्धिः सा कालिका मता" ।
इति विवादार्णवसेतौ नारदः ॥ सुरा । इति हेमचन्द्रः ॥ कुष्माण्डिका । इत्यमरटीकायां भरतः ॥ हिमाचलभवा चिञ्चिरा हरीतकी । सा गन्धयोगकरणे प्रशस्ता । इति राजवल्लभः ॥ (नदीविशेषः । यथा महाभारते ३ । ८४ । १४६ ।
"कालिकासङ्गमे स्नात्वा कौशिक्याश्चरणयोर्यतः ।
त्रिरात्रोपवितो विद्वान् सर्व्वपापैः प्रमुच्यते" ॥)

कालिकाव्रतं, क्ली, (कालिकायाः प्रीतये यद्व्रतं विहितनियमादिकम् ।) अमावास्यायां स्त्रीकर्त्तव्यव्रतविशेषः । यथा,—
युधिष्ठिर उवाच ।
"कालिकाव्रतमाहात्म्यं वद वेदविदाम्बर ! ।
किमेतस्य फलं देव को वा तद्विधिरेव च ॥
कस्माद्भूतमिदं भूतं सर्व्वं केन प्रकाशितम् ।
त्वत्तस्तत् श्रोतुमिच्छामि तत्सर्व्वं ब्रूहि केशव !" ॥
श्रीकृष्ण उवाच ।
"पुरा भविष्यशास्त्रेषु यदुक्तं धर्म्मसंहितम् ।
तत्सर्व्वं शृणु राजेन्द्र ! कालिकाव्रतमुत्तमम् ॥
स्वर्गे पुरन्दरश्चासीत्तस्यैव राजसद्मनि ।
यद्वृत्तान्तमभूत्तत्र तच्छृणुष्व युधिष्ठिर ! ॥
सभायां संस्थितो राजा नृत्यासक्तो हि नित्यशः ।
दिनैकस्य च वृत्तान्तं श्रुत्वा हृष्टो बभूव सः ॥
अत्यामोदं समभ्येत्य पुण्यवृष्टिरभूत्तदा ।
पुरन्दरः स्वयं प्राप्य पारिजातं गृहीतवान् ॥
घ्रात्वा राजा तदा पुष्पं प्रदत्तं तद्विजातये ।
लज्जितो ब्राह्मणः सोऽपि मानहीनोऽभवत्तदा ॥
क्रोधेन महताविष्टः शप्तुं कामसमन्वितः ।
वृत्तं विमृश्य चेन्द्राय शापो दत्तः सुदारुणः ॥
व्याधालयेषु मार्ज्जारो द्वादशाब्दं भविष्यसि ।
तेन कर्म्मविपाकेन मदयुक्तो विचेतनः ॥
प्राप्तमार्ज्जारदेहोऽसौ राजा विपिनमाश्रितः ।
पत्नी तस्य च तत्रासीत् पत्युः सर्व्वाधिकारिणी ॥
ततो व्याधगृहे राजा मार्ज्जारीभूय तिष्ठति ।
ततः पुरन्दरपुरं राजशून्यमभूत्तदा ॥
शची तु चिन्तायामास अन्नपानं विहाय सा ।
उपवासं समाचर्य्य मासमेकन्तु तिष्ठति ॥
ततो देवगणाः सर्व्वे चिन्तया व्याकुलेन्द्रियाः ।
गत्वा तु राजभवनं व्याकुलां तां विलोक्य च ॥
विमृश्य चामराः सर्व्वे शचीं वाक्यमुदाहरन् ।
शचि ! त्वं राजजायासि कथमेतत् करोषि च ॥
मासमेकमनाहारं कृत्वा तिष्ठसि सुव्रते ! ।
किं वा त्वदीप्सितं देवि ! सत्वरं वद पण्डिते ॥
तच्छ्रुत्वा तु तदा देवी कृताञ्जलिरभाषत ।
यूयमेव जगन्नाथाः सृष्टिस्थित्यन्तकारकाः ॥
क्व गतो मम भर्त्ता च तन्न जानामि कथ्यताम् ।
परिचिन्त्यामराः सर्व्वे ध्यानमास्थाय संस्थिताः ॥
मार्ज्जाररूपमास्थाय स्थीयते चान्यजात्रये ।
तच्छ्रुत्वा राजपत्नी च वेपमाना मुहुर्मुहुः ॥
उवाच कुशलं प्रश्नं राज्ञार्थं किं करोम्यहम् ।
पत्युर्यथा विमोक्षः स्यात् तत् कुरुष्वं सुधाशनाः ॥
प्रत्यूचुस्तामराः सर्व्वे याहि त्वं द्विजसन्निधिम् ।
संभाष्य मधुरं प्रश्नं द्विजसेवां समाचर ।
द्विजगेहं समागत्य द्विजसेवापराऽभवत् ॥

स तस्याः प्रियकार्य्येण सन्तुष्टो द्विजसत्तमः ।
हिंसाद्रोहविमुक्तश्च बलिहोमपरायणः ।
शान्तो दान्तः क्षमायुक्तः सदा मधुरभाषितः ॥
सर्व्वप्राणिहितार्थी च लोभमोहविवर्ज्जितः ।
जितेन्द्रियो जितक्रोधो दक्षोऽसौ ब्राह्मणोत्तमः ॥
राजपत्न्याः सुसेवाभिः प्रीतोऽसौ द्विजसत्तमः ।
प्रत्युवाच स तां प्रीत्या शुचि ! त्वं चातिदुर्ल्लभे ।
किं वा त्वदीप्सितं देवि ! सत्यं वद पतिव्रते" ॥
शुच्युवाच ।
"पापं यज्ज्ञानतो भर्त्रा समस्तं कर्म्मणा कृतम् ।
तत् क्षमस्व महाभाग ! रक्षस्व सुरपालकम् ।
वासवस्तव शापेन मार्ज्जारत्वमुपागतः ।
इन्द्रो व्याधगृहे देव ! विद्यते हि न संशयः ।
पुरन्दरस्य शापान्तः केनोपायेन सिध्यति" ॥
ब्राह्मण उवाच ।
"शुचि ! त्वं पतिभक्तासि महाक्यमवधारय ।
पतिव्रते ! महाभागे ! कालिकाव्रतमाचर ॥
दारुणं यत् कृतं तेन व्रतेनैव विमुच्यते ।
कोपात् शापो मया दत्तो तन्मोक्षं कुरु सुव्रते !"॥
शुच्युवाच ।
"विधानं ब्रूहि मे ब्रह्मन् कालिकाया व्रतस्य च ।
तदा तव प्रसादेन करोमि तद्व्रतं द्विज !" ॥
ब्राह्मण उवाच ।
"अश्वत्थतरुमूलेऽस्ति वटको नाम हिंसकः ।
तस्यैव भवनं गच्छ शापान्मोक्षं च कारय ॥
पत्नी सुभद्रा तस्यास्ति पतिशुश्रूषणे रता ।
तस्याः कुलव्रतं कर्म्म तत्परा भव शोभने ।
ततश्च प्राङ्मुखीभूय गता सा तस्य मन्दिरम् ॥
दृष्ट्वा व्याधः शुचीं देवीं प्रत्युवाच सुभद्रिकाम् ।
आयान्तीयं शुची देवी तस्याः सम्भाषणं कुरु ॥
इति तस्य वचः श्रुत्वा सुभद्रा हृष्टमानसा ।
तस्याः सम्भाषणार्थन्तु सुभद्रा त्वागता बहिः ।
तां च दृष्ट्वा शुचीं देवीं सार्घ्यपाद्यादिकं ददौ ॥
शुचि ! त्वं राजभार्य्यासि कस्मादागमनं तव ।
किं कार्य्यं कथय त्वं हि इत्युवाच शुचीं प्रति ॥
प्रत्युवाच शुची तान्तु भर्त्ता मे सुरपालकः ।
स च ब्राह्मणशापेन मार्ज्जारत्वाभवद्द्रुतम् ॥
क्व गतः प्राणनाथोऽसाविति चिन्तापरायणम् ।
ज्ञात्वा केनाप्युपायेन प्राप्ता च भवतीगृहम् ॥
इत्युक्ता राजपत्न्या च दृष्टो मार्ज्जारकस्तदा ।
सा ज्ञात्वा तं प्रियं शुक्रं चिन्तां प्राप्ता दुरत्ययाम् ॥
दृष्ट्वा मार्ज्जारतां प्राप्तं विललापाकुलेन्द्रिया ।
विलपन्तीं शुचीं दृष्ट्वा सुभद्रा प्रत्युवाच ताम् ॥
पतिव्रते महाभागे ! त्वमेव राजगेहिनी ।
त्वं दुःखेन विलिप्तासि सन्देहो नास्ति तत्र वै ॥
किन्तु तस्याप्युपायोऽस्ति कालिकाव्रतमाचर ।
अतिप्रत्यक्षरूपा सा अस्माकं कुलदेवता ॥
कालिका सा महादेवी शुभसन्ततिदायिनी ।
व्रतस्यास्य प्रभावेण साकल्यमुपजायते" ॥
शुच्युवाच ।
"विधानं चास्य मे ब्रूहि कालिकाया व्रतस्य च ।
ममोपदिश्यतामेव तद्व्रतञ्च करोम्यहम् ॥
शुक्लकाले समारभ्य कृष्णपक्षे चतुर्दशीम् ॥
सकल्प्य विधिना पूर्ब्बममावास्यां व्रतं चरेत् ।
समारभ्य गुरौकेन दिगुणं परिशोधयेत् ॥
न रात्रौ भोजनं कार्य्यं वामहस्ते भुजिक्रिया ।
सिद्धमन्नं रात्रिकाले दग्धमीनञ्च सर्व्वदा ॥
वर्ज्जयेत् पिष्टकं किञ्चित् रक्तशाकस्य चाखिलम् ।
द्विषट्कां विप्रजायाञ्च सधवां भोजयेत्ततः ॥
एवं क्रमेण कृत्वा तु कतिकालं नयेद्व्रतम् ।
ततः शुद्धदिने प्राप्ते भौमाह्ने मन्दवासरे ॥
यथाशक्त्युपचारैश्च पूजां कुर्य्याद्विधानतः ।
तथापराह्णकाले तु सन्ध्योपसमये तथा ॥
रात्रौ तु कदलीकाण्डे गृहं निर्म्माय प्राङ्गणे ।
तस्य मध्ये समारोप्य कालिकां पूजयेत् सदा ॥
पाद्यार्घ्याचमनीयैश्च गन्धपुष्पादिभिस्तथा ।
धूपैर्दीप्यप्रदीपैश्च नैवेद्यैर्विविधैस्तथा ॥
पिष्टकं चैव सिद्धान्नं व्यञ्जनं दग्धमीनकम् ।
निवेद्य सकलं देव्यै बलिं दत्त्वा प्रयत्न च ॥
तदन्नं व्यञ्जनं सर्व्वं नैवेद्यादिबलिं तथा ।
महारण्ये प्रदातव्यं कृत्वैतत् व्रतमुत्तमम् ॥
वैल्ववे कदलीमूले या कुर्य्यात् कालिकाव्रतम् ।
कार्य्यसिद्धिर्भवेत् तस्या भविता गतिरुत्तमा ॥
एतद्व्रतविधानन्तु कृत्वा सिद्धिर्भविष्यति ।
एतद्व्रतमिदं भद्रे कुरु गत्वा निजालयम् ॥
तस्यास्तद्वचनं श्रुत्वा सा शुची हर्षमानसा ।
गृहमागत्य सा तस्या वार्धिकं व्रतमाचरत् ॥
गन्धपुष्पैर्धूपदीपैर्नैवेद्यैश्चोत्तमैस्तथा ।
कृत्वा चाम्रमयीं देवीं पूजयेत् भक्तिसंयुता ॥
नानासुगन्धिपुष्पाणि दिव्यरत्नाद्यलङ्कृतम् ।
सिद्धान्नं पायसञ्चैव शर्करान्वितपिष्टकम् ॥
अमृतायुतहावञ्च दीयते च प्रयत्नतः ।
लुलापच्छागमेषादिबलिं दत्त्वा प्रभूतकम् ॥
नानावाद्योद्यमैर्गीतैः प्रणिपत्य पुनः पुनः ।
कृताञ्जलिपुटा स्तोत्रं भक्तिनम्रा चकार सा ॥
तुष्टा प्राह महाकाली वरं वृणु शुभानने ! ।
तत् श्रुत्वा राजपत्नी सा बभाषे च मुदान्विता ॥
मत्स्यमांसाशुभुक् भूतस्तन्मोक्षं कुरु चेश्वरि ! ।
वरं दत्त्वा हैमवती बभूवान्तर्हिता नृप ! ॥
द्वादशाब्दाच्च तत्शापान्मोचितो वत्सरे तदा ।
मार्ज्जाररूपं सन्त्यज्य स गतोऽन्तेऽमरावतीम् ॥
पुष्पवृष्टिश्च दुन्दुभ्या वाद्यं देवगणैः कृतम् ।
कालिकायाः प्रसादेन गतः शुक्रो निजालयम् ॥
अनेनैव विधानेन या कुर्य्यात् कालिकाव्रतम् ।
सत्वरं कार्य्यसिद्धिः स्यात्तस्या अत्र न संशयः" ॥
इति भविष्यपुराणे कालिकाव्रतकथा समाप्ता ॥

कालिङ्गं, क्ली, (केन जलेन आलिङ्ग्यतेऽसौ । आ + लिगि + कर्म्मणि घञ् ।) फलविशेषः । तरमुज् इति ख्यातम् । तत्पर्य्यायः । कालिन्दकम् २ कृष्णबीजम् ३ फलवर्त्तुलम् ४ । अस्य गुणाः । शीतलत्वम् । ग्राहित्वम् । स्वादुपाकरसत्वम् । गुरुत्वम् । विष्टम्भित्वम् । स्यन्दित्वम् । दृक्शुक्रपित्तनाशित्वम् । कफवातकारित्वञ्च । पक्वस्य तस्य गुणाः । पित्तरक्तविकारित्वम् । उष्णत्वम् । क्षारत्वम् । कफवातनाशित्वञ्च । तत्फलगुणौ । रुधिरस्रावनत्वम् । तिक्तत्वञ्च । इति पथ्यापथ्यविवेकः ॥

कालिङ्गः, पुं, (केन जलेनालिङ्ग्यते इति । क + आलिगि + कर्म्मणि घञ् ।) भूमिकर्कारुः । (कं जलमालिङ्गति । आ + लिगि + कर्म्मण्यण् ।) हस्ती । (कं वातं आलिङ्गति गृह्णाति अत्तीति वा ।) सर्पः । इति मेदिनी ॥ (कुत्सितं लिङ्गं अङ्गादिचिह्नं यस्येति कोः कादेशः ।) लौहभेदः । अस्य लक्षणम् । "कालिङ्गो लिङ्गवान् यः स्याद्दृढः सूक्ष्माङ्गको मतः" । इति सुखबोधः ॥ (कलिङ्गे भवः । अण् । कलिङ्गदेशोद्भवः । यथा महाभारते ८ । कर्णशल्यसंवादे ४५ । १४ ।
"कुरवः सहपाञ्चालाः शाल्वा मत्स्याः सनैमिषाः ।
कोसलाः काशयोऽङ्गाश्च कालिङ्गा मागधास्तथा" ॥
कलिङ्गदेशस्य राजा । अण् । कलिङ्गराजः ।
यथा रघुः ४ । ४० ।
"प्रतिजग्राह कालिङ्गः तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्व्वतः" ॥)

कालिङ्गिका, स्त्री, (कालिङ्ग + गौरादित्वात् ङीष् । स्वार्थे संज्ञायां वा कन् टाप् ह्रस्वश्च ।) त्रिवृत् । इति राजनिर्घण्टः ॥

कालिङ्गी, स्त्री, (कालिङ्ग + गौरादित्वात् ङीष् ।) राजकर्कटी । इति मेदिनी ॥ (कालिङ्गदेशोद्भवा । यथा महाभारते १ । ९५ । २२ ।
"अक्रोधनः खलु कालिङ्गीं कन्यां नामोपयेमे" ॥)

कालिदासः, पुं, (काल्याः दासः । संज्ञायां ह्रस्वः ।) खगानामख्यातकविः । तत्पर्य्यायः । रघुकारः २ मेधारुद्रः ३ कोटिजित् ४ । इति त्रिकाण्डशेषः ॥ स तु रघुकुमारसम्भवश्रुतबोधमेघदूताभिज्ञानशाकुन्तलोदयपुष्पबाणविलासादिग्रन्थकर्त्ता विक्रमादित्यराजसभास्थनवरत्नमध्ये सप्तमरत्नञ्च ॥ (यदुक्तम् ।
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य" ॥)

कालिदासकः, पुं, (कालिदास + स्वार्थे कन् ।) कालिदासः । इति शब्दरत्नावली ॥

कालिनी, स्त्री, (कालः शिवः अधिष्ठातृतया यद्वा कालः पुरुषाकारः आकाशस्थो लुब्धकः संश्लिष्टत्वेन अस्त्यस्याः ।) आर्द्रागन्धत्वम् । इतिहेमचन्द्रः ॥

कालिन्दकं, क्ली, (कालिं जलराशिं ददातीति । दा + कः । स्वार्थे कन् ।) कालिङ्गम् । इति राजनिर्घण्टः ॥

कालिन्दी, स्त्री, (कलिन्दाख्यपर्व्वते तत्सन्निहितदेशे वा जाता । कलिन्दात् निःसृता वा "तत्र भवः" । ४ । ३ । ५३ । इति अण् ततो ङीप् ।) यमुना नदी । इत्यमरः । १ । १० । ३२ ॥ (यथा रघुः १५ । २८ ।
"उपकूलं स कालिन्द्याः पुरीं पौरवभूषणः ।
निर्म्ममे निर्म्ममोऽर्थेषु मथुरां मधुराकृतिः" ॥)
रक्तचित्रवृत् । इति राजनिर्घण्टः ॥

कालिन्दीकर्षणः, पुं, (कालिन्दीं कर्षति यः । कृष + कर्त्तरि ल्युः । कालिन्द्याः कर्षणो वा ।) बलदेवः । इति हलायुधः ॥

(कालिन्दीसङ्गमकथा हरिवंशे १०२ अध्याये उक्ता। तद्यथा.—
"रामस्तु यमुनामाह क्षातुमिच्छे महानदि !।
एहि मामभिगच्छस्व रूपिणी सागरङ्गमे॥
सङ्गर्षणस्य मत्तोक्तां मारतीं परिभूय सा।
नाभ्यवर्त्तत तं देशं स्त्रीस्वभावेन मोहिता॥
ततश्चुकोध बलवान् रामो मदसमीरितः।
चकार स हलं हस्ते कर्षणाधोमुखं बली॥
तस्यामुपरि मेदिन्यां पेतुस्तामरसस्रजः।
मुमुचुः पुष्पकोषैश्च पुष्परेणवरुणं जलम्॥
स हलेनानताग्रेण कुले गृह्य महानदीम्।
चकर्ष यमुनां रामो युवतिं वनितामिव॥
सा विह्वलजलस्रोता क्रदप्रस्खलितसञ्चया।
व्यावर्त्तत नदी भीता हलमार्गानुसारिणी॥
लाङ्गलादिष्टमार्गा सा वेगगा वक्रगामिनी।
सङ्गर्षणभयत्रस्ता योषेवाकुलतां गता॥
पुलिनश्रोणिबिम्बोष्ठी स्खलितैस्तोयताडितैः।
फेनमेखलसूत्रेण वेगगाम्बुदगामिनी॥
तरङ्गविषमापीड़ा चक्रवाकोन्मुखस्तनी।
वेगगम्भीरवक्राङ्गी त्रस्तमीनविभूषणा॥
सितहंसेक्षणापाङ्गी काशशौमोक्षितांबरा।
तीरजोद्भूतकेशान्ता जलस्खलितगामिनी॥
लाङ्गलोल्लिखितापाङ्गी क्षुभिता,सागरङ्गमा।
मत्तेव कुटिला नारी राजमार्गेण गच्छती॥
क्षूयते सा स्म वेगेन स्रोतःस्खलितगामिनी।
उन्मार्गा गीतमार्गा सा येन वृन्दावनं वनम्॥
वृन्दावनस्य मध्येन सा नीता यमुना नदी।
रोरूयमाणेव खगैरन्विता तोयवासिभिः॥
सा यदा समभिक्रान्ता नदी वृन्दावनं वनम्।
तदा स्त्रीरूपिणी भूत्वा यमुना राममब्रवीत्॥
प्रसीद नाथ ! भीतास्मि प्रतिलोमेन कर्म्मणा।
विपरीतमिदं रूपं तोयञ्च मम जायते॥
असत्यहं नदीमध्ये रौहिणेय ! त्वया धृता।
कर्षणेन महाबाहो स्वमार्गव्यभिचारिणी॥
प्राप्तां मां सागरे नूनं सपत्नेया वेगगर्व्विताः।
फेनहासैर्हसिष्यन्ति तोयव्यालत्तगामिनीम्॥
प्रसादं कुरु मे वीर ! याचे त्वां शरणपूर्व्वज !।
सुप्रसन्नमना नित्यं भव त्वं सुरसत्तम !॥
कर्षणायुधशस्त्रास्त्रि रोषोऽयं विनिवर्त्त्यताम्॥
गच्छामि चरणौ मूर्द्धा तवैषा लाङ्गलायुध !।
मार्गमादिश्यमिच्छामि न गच्छामि महाभुज !"॥)

कालिन्दीभेदनः, पुं, (कालिन्दीं भिनत्ति। भिद्+कर्त्तरि ल्युः। कालिन्द्या भेदनो वा।) बलदेवः। इत्यमरः।१।१।२५॥ ("कालिन्दीभेदनो हली"ति पुराणम्॥)

कालिन्दीसूः, स्त्री,(सूते इति। सू+क्विप्। कालिन्द्याः यमुनायाः सूः माता प्रसवित्रीत्यर्थः। कालिन्दीं सूते सूतवती वा) सूर्य्यपत्नी। यमुनामाता। इति त्रिकाण्डशेषः॥

कालिन्दीसोदरः, पुं, (कालिन्द्याः सोदरः सहोदरः।) यमः। इति हेमचन्द्रः॥

काली, स्त्री,(कालः कृष्णवर्णोऽस्त्यस्याः। काल+'जातेरस्त्रीविषयादयोपधात्' इति ङीष्।) दुर्गा। (यथा, देवीभागवते ५।२८।४०।
"कालीकपर्दिनी प्रौढा विकटा घोणदंष्ट्रिका।
कालिका कमला कल्पा कपाला कुलपूजिता॥
कुरुकुल्ला विरोधिन्यां विप्रचित्ता तथोग्रया।
उग्रप्रभा दीप्तिरिति नीला घना बलाका॥
मात्रा मुद्रा मिता चैव एकानंशा च कुब्जिका।
कालरात्रिर्निशाचारी कान्ता दुर्गा सरस्वती॥
सावित्री जातवेदा च लक्ष्मीः पूर्णा विभूतिदा।
शाकम्भरी शिवा भीमा भ्रामरी चेति ता स्मृताः॥
एताभिः पाहि तनयान् सर्व्वदे सर्व्वमङ्गले !"॥
इति देवीपुराणे ४५ अध्यायः॥ (यथा, मुण्डकोपनिषदि १।२।४।
"काली करालीच मनोजवा च
सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वाः"॥
दक्षिणकालीशब्दे दृश्यम्। (कालिया विकाटी इति भाषा॥ लता। यथा वैद्यके।
"सप्तपर्णस्तथा काली गुडुची पिचुमर्दकम्"॥*॥
भीमसेनस्य पत्नीभेदः। यथा, भागवते ९।२२।३१।
"युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः।
भीमसेनात् हिडिम्बायां, काल्यां सर्व्वगतस्ततः"॥
माहकाध्यानं चामुण्डाशब्दे दृश्यम्। कालिकाया ध्यानं लिख्यते यथा—
"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम्।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम्॥
सद्यश्छिन्नशिरःखड्गवामाधोर्द्ध करांबुजाम्।
अभयं वरदञ्चैव दक्षिणोर्द्धाधपाणिकाम्॥
महामेघप्रभां श्यामां तथा चैव दिगम्बरीम्।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्चिताम्॥
कर्णावतंसतानीतशवयुग्मभयानकाम्।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम्॥
शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम्।
सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम्॥
घोररावां महारौद्रीं श्मशानालयवासिनीम्।
बालार्कमण्डलाकारलोचनत्रितयान्विताम्॥
दन्तुरां दक्षिणव्यापिमुक्तालम्बिकचोच्चयाम्।
शवरूपमहादेवहृदयोपरिसंस्थिताम्॥
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम्।
महाकालेन च समं विपरीतरतातुराम्॥
सुखप्रसन्नवदनां स्मेराननसरोरुहाम्।
एवं सञ्चिन्तयेत् कालीं सर्व्वकामार्थ सिद्धिदाम्"॥
इति तन्त्रसारधृतकालतन्त्रम्॥
(कालशक्त्या सर्व्वमिदं जगत् परिचाल्यते सैव काली प्रकीर्त्तिता यद्वा कालयति कलयति वा उत्पादयति पालयति प्रलये पुनरात्मन्येव विलापयतीति काली आद्या मूलप्रकृतिः महत्तत्वादेरुत्पत्तिलयादीनामाधारभूता। कलिहन्ति कामधेनुरिति कलधातुः बहुर्थबोधिनी स्वरूपतः ब्रह्मणः सकाशात् नानाविधजगद्विचित्रनिर्म्माणसमर्था बुद्धिरूपा ब्रह्मशक्तिरेव प्रकृतिः कालीति संज्ञया प्रकीर्त्यते। एतत् प्रबोधनाय समासतः कतिपयवचनान्युद्धृतानि यथायथं द्रष्टव्यानि। तथाहि ज्ञानसङ्कलिनीतन्त्रे। भागवते च।
"सा माया पालिनीशक्तिः सृष्टिसंहारकारिणी।
सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका॥
माया नाम महाभाग ! ययेदं निर्म्ममे विभुः"।
एषैव पारमेश्वरी मूलशक्तिः दुर्ब्बलाधिकारिणामुपासनासौकर्य्याय तन्त्रादिशास्त्रेषु कालीश्यामातारादिविविधनामरूपैः कल्पिता॥
यथा,—
"या देवी सर्व्वभूतेषु विष्णुमायेति शब्दिता"।
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगदिति"॥
इति मार्कण्डेयपुराणीयदेवीमाहात्म्ये देवकृतदेव्याः स्तुतौ। ८५। १२,१४। तथा च महानिर्व्वाणोक्ते ४र्थ उल्लासे। देवीं प्रति सदाशिववोक्तिः।
"त्वं परा प्रकृतिः साक्षात् ब्रह्मणः परमात्मनः।
महत्तत्त्वादिभूतान्तं त्वया सृष्टमिदं जगत्॥
निमित्तमात्रं तद्ब्रह्म सर्व्वकारणकारणम्।
तस्येच्छामात्रमालम्ब्य त्वं महायोगिनी परा॥
करोषि पासि हंस्यन्ते जगदेतच्चराचरम्।
कलनात् सर्व्वभूतानां महाकालः प्रकीर्त्तितः।
महाकालस्य कलनात् त्वमाद्या कालिकापरा॥
कालत्वादादिभूतत्वादाद्या कालीति गीयते॥
ध्यानन्तु द्विविधं प्रोक्तं स्वरूपारूपभेदतः।
स्वरूपं तव यद्ध्यानमवाङ्मनसगोचरम्॥
मनसोधारणार्थाय क्षीघ्रं स्वाभीष्टसिद्धये।
सूक्ष्मध्यानप्रबोधाय स्थूलध्यानं वदामि ते॥
अरूपायाः कालिकायाः कालमातुर्महाद्युतेः।
गुणक्रियानुसारेण क्रियते रूपकल्पना"॥
तस्या अरूपाया महाकाल्याः कथमेव रूप-

कल्पनादिकमिति जिज्ञासितवतीं पार्व्वतीं प्रति भगवतः शिवस्योत्तरदानं तत्रैव १३ उल्लासे ॥
"उपासकानां कार्य्याय पुरैव कथितं प्रिये ! ।
गुणक्रियानुसारेण रूपं देव्याः प्रकल्पितम् ॥
श्वेतपीतादिको वर्णो यथा कृष्णे विलीयते ।
प्रविशन्ति तथा काल्यां सर्व्वभूतानि शैलजे ! ॥
अतस्तस्याः कालशक्तेर्निर्गुणाया निराकृतेः ।
स्थितायाः प्राणयोगानां वर्णः कृष्णो निरूपितः ॥
नित्यायाः कालरूपाया अव्ययायाः शिवात्मनः ।
अमृतत्वात् ललाटेऽस्याः अग्निचिह्नं निरूपितम् ॥
अग्निसूर्य्याभिधिर्नित्यै रखिलं कालिकं जगत् ।
सम्ग्रसति यतस्तस्मात् कल्पितं नयनत्रयम्" ॥
तस्याः स्थूलध्यानं यथा तत्रैव ५म उल्लासे ।
"मेघाङ्गीं अग्निशैखरां त्रिनयनां रक्ताम्बरं बिभ्रतीं पाणिभ्यामभयं वरञ्च विलसद्रक्तारविन्द स्थिताम् ॥

मेघाङ्गीमिति वर्णेनास्याः कृष्णवर्णत्वं सूचितं परं अरूपाया निराकृतेः कालशक्तेरेव ध्यानालम्बनतया ज्ञापकत्वमिति यावत् ॥

अग्निशैखरेत्युक्त्या अग्नी चन्द्रः जीवसमष्टिः सर्व्वजीवबीजस्वरूपो हिरण्यगर्भो ब्रह्मा एव चन्द्रनाम्नाख्यायते अतएवास्या देव्या ललाटे ऊर्द्ध-देशे इति निर्देशात् समस्तजड़शक्तिभ्यः एथक् कृत्वा जीवशक्तेरुत्कर्षं बोधयति यथा,—
"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवरूपां महाबाहो ! ययेदं धार्य्यते जगत्" ॥

अतोऽस्या जीवशक्त्याधायकतया सैव परमात्म-रूपिणी चिदानन्दमयीति प्रबोध्यते । यदि च स्थानभेदे क्वचित् परब्रह्मणः सकाशादस्याः पार्थक्यं दृश्यते तत्तु केवलमज्ञानां क्रियाविशेषबोधनायैव स्वरूपतः अग्नेर्दाहिकाशक्तिवत् सर्व्वत्रैव शास्त्रतद्विदुषोरभेदः प्रतिपादितः । त्रिनयनमित्युक्त्या सर्व्वज्योतिःपदार्थानां प्रधानभूतानां चन्द्रसूर्य्याग्नयः प्रकाशशक्तेराधिक्यात् तैरेवास्या देव्या नयनत्रितयत्वेन प्रकल्पितं वस्तुतः सर्व्व-प्रकाशकानां सूर्य्यादीनां सैवान्तर्यामितयाधिष्ठात्री देवतात्मरूपिणीति बोध्यम् ॥

रक्ताम्बरं बिभ्रतीं इति खलिकरणार्थं सैव परमात्मरूपिणी रजोगुणोद्रेकरूपमम्बरं वस्त्रं आवरण-शक्तिमिति भावः बिभ्रतीं धारयीं । पाणिभ्यामभयं वरञ्च इति भक्तसाधकानां रक्षार्थं कुशलार्थञ्च वराभयदानरूपशक्तिद्वयस्य पाणिद्वयत्वेन कल्पितं रक्तारविन्दस्थितामिति रजोगुणसमुद्भवाया इच्छाशक्तेरेवारविन्दत्वेन प्रकल्पनं कृतमिति बोध्यम् । अतः स्थूलध्यानादीनां यदिचायातनतः स्थूलदृष्ट्या नामरूपादिस्थूलजड़भावो लक्ष्यते परं सर्व्वत्रैव तेषां सूक्ष्मार्थरूपपरमात्मन्येव गूढ़तात्पर्य्यार्थः प्रतिफलत्येव विज्ञानद्विरेव तत्सर्व्वतोज्ञातुं शक्यते । न ह्येतदस्माकं केवलं स्वकपोल-कल्पनामात्रं श्रीमद्भगवद्गीताप्रभृतितत्त्वज्ञान-प्रतिपादकशास्त्रेषु विशेषतोनिश्चितं किञ्च प्रकृति-पुरुषयोरपि तत्तच्छास्त्रे भूयोभूयोऽविनश्वरत्वमनादित्वं चाङ्गीकृतम् ।
"प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपीत्यादि" ।
भूरिभूरि प्रमाणानि सन्ति बाहुल्यभिया नैवा स्माभिस्तान्युद्धृतानि ॥)

कालीकः, पुं, (के जले अलति पर्य्याप्नोति प्रभवतीत्यर्थः । अल + इकन् पृषोदरादित्वात् दीर्घः । यद्वा के जले + अलीकः मत्स्यलाभाय कपटशान्त-मूर्त्तिरिव।) क्रौञ्चः । इति शब्दरत्नावली ॥

कालीची, स्त्री, (काल्या यमभगिन्या चीयतेऽत्र । चिञ् + बाहुलकात् अधिकरणे ङः । गौरादि-त्वात् ङीष् ।) यमविचारभूमिः । इति त्रिकाण्ड-शेषः ॥

कालीतनयः, पुं, (काल्याः यमरूपाया यमभगिन्याः यमत्वशक्तेर्वा तनयः इव यमवाहनत्वात्तथात्वम् । यद्वा, कालीं इतः प्राप्तः सन् बलिदानाय आत्मानं नयति प्रापयति । नी + अच् । कालीं प्रति उद्दिश्य वा इतः प्राप्तः उपस्थित इत्यर्थः आत्मनो नयः प्रापणं यस्य । महिषस्य कालीसन्निधाने बलिदानाय नीयमानतया तथात्वम् ।) महिषः । इति हेमचन्द्रः ॥

कालीयं, क्ली, (कालस्य कृष्णवर्णस्यायं कालस्थाने भवं वा "दृड्वाक्ष्यः" । ४ । २ । ११४ । इति छः ।) कृष्णचन्दनम् । इति शब्दचन्द्रिका ॥ (अस्य व्यव-हारो यथा, वैद्यकचक्रपाणिसंग्रहे एकादशशत-तिकप्रसारणीतैले । "कालीयोत्पलपद्मकाक्ष्य-निशेत्यादि" ॥)

कालीयकं, क्ली, (कालीय + स्वार्थे कन् । कालीयमिव कायति वा । कै + कः ।) कालिया इति ख्यातं पीतवर्णसुगन्धिकाष्ठम् । इत्यमरटीकासारसुन्दरी॥ (यथा, महाभारते २ । ५१ । १० ।
"चन्दनागुरुकाष्ठानां भारान् कालीयकस्य च ।
चर्म्मरत्नसुवर्णानां गन्धानाञ्चैव राशयः" ॥)
तत्पर्य्यायः । जायकं २ कालानुसार्य्यं ३ । इत्यमरः । २ । ६ । १२६ । जायकम् ४ । इति टीकासर्व्वस्वम् ॥ कालेयम् ५ वर्णकम् ६ कान्तिदायकम् ७ । इति भरतधृतव्याड़िः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ पीत-चन्दनशब्दे द्रष्टव्यौ ॥ कृष्णचन्दनम् । तत्पर्य्यायः । कालीयम् २ कालिकम् ३ हरिप्रियम् ४ । इति शब्दचन्द्रिका ॥ दारुहरिद्रा । इति राजनिर्घण्टः ॥ (अस्य व्यवहारो यथा तत्रैव, "सालसारा-जकार्ष्णखदिरकदरकालस्कन्धस्रुकभूर्जमेष वृक्षीति निम्बचन्दनकुचन्दनग्निंशपा शिरीषासनधवार्ज्जु-नतालप्रावनक्तमालपूतीकाम्बकार्ष्णागुरुषि कालीय-कक्षेति" ॥ इति सुश्रुते । सूत्रस्थाने । ३८ अध्यायः ॥)

कालीयकः, पुं, (कालीय + संज्ञायां स्वार्थे वा कन् ।) दारुहरिद्रा । इति शब्दरत्नावली ॥ (अस्य पर्य्याया यथा,—
"दार्व्वी दारुहरिद्रा च पर्ज्जन्यापर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव पचम्यचा ॥
सैवकालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कालेयं, क्ली, (कं सुखं आलेयं आदेयं यस्मात् ।) कालियानामपीतवर्णसुगन्धिकाष्ठम् । इति व्याड़िः रमानाथश्च ॥ (यथा, कुमारे ७ । ६ ।
"तां लोध्रकल्केन हृताङ्गतैला-
माश्यानकालेयकृताङ्गरागाम्" ॥
कालेये रक्तधारिण्यै 'हितं इति ठक् ।) काल-खण्डनम् । यकृत् इति यावत् । इति मेदिनी ॥

कालेयः, पुं, (कालाया अपत्यं ढक् ।) दैत्यभेदः । इति मेदिनी ॥ (यथा, महाभारते १ । ६५ । ६४ ।
"कालायाःप्रथिताः पुत्राः कालकल्पाः प्रहारिणः ।
प्रविख्याता महावीर्य्या दानवेषु परन्तपाः ॥
विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च ।
क्रोधशत्रुश्चतुर्थश्च कालेया इति विश्रुताः" ॥)

कालेयकं, क्ली, (कालेय + स्वार्थे कन् ।) कालीयकम् । कालियानाम पीतवर्णसुगन्धिकाष्ठम् । इत्यमर-टीका ॥ ("मधुकरकुलकलङ्ककालीलुतकालेयक-कुसुमकुञ्जलेषु" । इति कादम्बरी ॥)

कालेयकः, पुं, (कालेय + संज्ञायां स्वार्थे वा कन् ।) दारुहरिद्रा । इत्यमरः २ । ४ । १०१ । (यथा, सुश्रुते सूत्रस्थाने ३९ अध्यायः । "कालेयकागुरुतिल-पर्णी कुष्ठहरिद्रेति" ॥ कालीयकशब्देऽस्य विव-रणं ज्ञातव्यम् ॥ कलये विवादाय साधुः । कल + ढक् + संज्ञायां कन् । कुक्कुराणां हि अन्योन्य-कलहपरत्वं प्रसिद्धम् ।) कुक्कुरः । इति राज-निर्घण्टः ॥

काल्यः, पुं, (कल्पे विधौ भवः । "तत्र भवः" ४ । ३ । ५३ । इति यञ् ।) हरिद्राविशेषः । काँचा हलुद् इति भाषा । तत्पर्य्यायः । कर्व्वूरः २ द्राविड़कः ३ द्राविड़भूतिकः ४ । इति शब्दरत्नावली ॥

काल्यकः,पुं,(कल्पे विधौ भवः। "तत्र भवः"। ४।३।५३। इत्यणन्तात् संज्ञायां स्वार्थे वा कन् ।) कर्व्वूरकः। इत्यमरः २।४।१२५ ॥ काँचा हलुद् इति भाषा ॥

काल्पनिकः, त्रि, (कल्पनायाः आगतः । ठञ् ।) कल्पनाभवः । कल्पितः । यथा । "रसः खाद्यते इति काल्पनिकं भेदमुरीकृत्य कर्म्मकर्त्तरि वा प्रयोगः" । इति साहित्यदर्पणम् ॥

काल्यं, क्ली, (कलयति चेष्टाम् । अन्नादयश्चेति कलेर्यक् । ततः प्रज्ञाद्यण् ।) प्रत्यूषः । इति हेम-चन्द्रः॥ (यथा हेः रामायणे २ । ३४ । ३४ ।
"तर्पितः सर्व्वकामैस्त्वं नः काल्ये साधयिष्यसि" ॥)

काल्यकः, पुं, (काले साधुः । तत्र साधुरिति यत् । स्वार्थे कन् ।) काल्यकः । इति शब्दरत्नावली ॥

काल्या, स्त्री, (कालः प्राप्तोऽस्याः । कालादयत् । टाप् च ।) गर्भयन्त्रणप्राप्तकाला ऋतुमती गौः । तत्पर्य्यायः । उपसर्य्या २ । इत्यमरः । २ । ९ । ७० ॥ ("उपसर्य्या काल्या प्रजने"। इति वाचिनिः । ३ । १ । १०४ ॥)

कावचिकं, क्ली, (कवचिनां समूहः । "ठञ् कव-चिनश्च" । ४ । २ । ४१ । इति ठञ् ।) वर्म्मभृतां

गजः। कवचधारियोद्धृसमूहः। इत्यमरः। २। ८। ६६॥

कावारं, क्ली, (कं जलं आवृणोतीति। आ + वृ + अण्।) गैवलः। इति चिकाण्डशेषः॥

कावारी, स्त्री, (कावार + ङीष्।) वृत्तादिच्छत्रम्। तत्पर्य्यायः। जङ्गमकुटी २ भ्रमत्कुटी ३। इति चिकाण्डशेषः॥

काशकः, पुं, (कुत्सितः कः इव ईषत् कः इव वा। कोः कादेशः।) कुक्कुटः। चक्रवाकः। पीतमस्तकपक्षी। इति विश्वमेदिन्यौ॥

कावेरं, क्ली, (कस्य सूर्य्यस्येव आ ईषत् वेरं अङ्गं यस्य। ज्योतिर्मयत्वात् तथात्वम्।) कुङ्कुमम्। इति जटाधरः॥ (कुङ्कुमशब्देऽस्य विवरणं ज्ञातव्यम्॥)

कावेरी, स्त्री, (कं जलमेव वेरं शरीरं। तस्येयम्। "तस्येदम्" ४।३।१२०। इति अण्। ङीप्।) नदीविशेषः। इत्यमरः। १। १०। ३५॥ (यथा, महाभारते ३। ८५। २२।

"ततो गच्छेत कावेरीं दृतामप्सरसां गणैः।
तत्र स्नात्वा नरो राजन् गोसहस्रफलं लभेत्"॥

इयं हि सह्याद्रेः मलयपर्व्वतस्य च सानुसन्निकटस्था। इति रघुः॥ कुत्सितं अपवित्रं वेरं शरीरं यस्याः। कोः कादेशः।) वेश्या। हरिद्रा॥ इति मेदिनी॥

काव्यं, क्ली, (कवेरिदं कर्म्म भावो वा। ष्यञ्।) ग्रन्थः। इति मेदिनी॥ रसयुक्तवाक्यम्। यथा,—

"वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः।
उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः"॥

एषां प्रत्येकं लक्षणानि लिख्यन्ते। तत्रादौ वाक्यलक्षणं यथा,—

"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः"॥

रसलक्षणं यथा,—

"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्"॥

दोषलक्षणं यथा,—

रसापकर्षका दोषास्ते पुनः पञ्चधा मताः।
पदे तदंशे वाक्यार्थे सम्भवन्ति रसेऽपि यत्"॥

गुणलक्षणं यथा,—

"रसस्याङ्गित्वमाप्तस्य धर्म्माः शौर्य्यादयो यथा।
गुणा माधुर्य्यमोजोऽथ प्रसाद इति ते त्रिधा"॥

अलङ्कारलक्षणं यथा,—

"शब्दार्थयोरस्थिरा ये धर्म्माः शोभातिशायिनः॥
रसादीनुपकुर्व्वन्तोऽङ्गदारास्तेऽङ्गदादिवत्"॥

रीतिलक्षणं यथा,—

"पदसंघटनारीतिरङ्गसंस्थाविशेषवत्।
उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्व्विधा।
वैदर्भी चाथ गौड़ी च पाञ्चाली लाटिका तथा"॥

इति साहित्यदर्पणम्॥ *॥ तत् काव्यं त्रिविधं ध्वनिगुणीभूतव्यङ्ग्यचित्रभेदेन। तत्राद्यस्य लक्षणम्। "इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथितः"। द्वितीयस्य लक्षणम्।

"अतादृगि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यकम्"॥

तृतीयस्य लक्षणम्।

"शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्"।

इति काव्यप्रकाशः॥

"एतेषां विवरणानि तत्तच्छब्दे द्रष्टव्यानि"॥

काव्यः, पुं, (कवेः भृगोरपत्यं पुमान् इति "कुर्व्वादिभ्यो ण्यः" ४। १। १५१। इति ण्यः। यञ् इति केचित्।) शुक्राचार्य्यः। इति मेदिनी॥ (यथा, महाभारते १। सम्भवपर्व्वणि ७६। ६।

"जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम्।
पौरहित्येन याज्यत्वे काव्यं तूशनसं परे"॥

तामसमन्वन्तरीयऋषिविशेषः। यथा, मार्कण्डेये ७४। ५६।

"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्बलकस्तथा।
पीवरश्च तथा ब्रह्मन् सप्त सप्तर्षयोऽभवन्"॥)

काव्यचौरः, पुं, (काव्यस्य चौर इव। अन्यरचितकावस्य स्वकीयत्वेन प्रख्यापकत्वात् तस्य तथात्वं बोध्यम्।) चन्द्रः। इति त्रिकाण्डशेषः॥

काव्या, स्त्री, (कवेरपत्यं स्त्री। कवेर्वर्णने स्तुतिगाने च। बाह्वादित्वात् ण्यत्। टाप् च। पूतनायां हि वाक्विलासविन्यासादिना नारीणां मनो मोहयित्वा ताभ्यो शिशूनाक्षिप्य गाढ़कारितया तथात्वं बोध्यम्।) पूतना। बुद्धिः। इति मेदिनी॥

काश्च ऋ ड द्युतौ। कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ऋ अचकाश्यत्। ड काश्यते चन्द्रः। दन्त्यान्त इति केचित्। इति दुर्गादासः॥

काश्य उ ऋ ड द्युतौ। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-अकं-सेट्।) य ड काश्यते। उ काश्यित्वा काश्ता। ऋ अचकाश्यत्। इति दुर्गादासः॥

काश्मः, पुं क्ली, (काश्यते दीप्यते श्लोभते इति यावत्। काश्र ड दीप्तौ + पचाद्यच्।) वृक्षभेदः। केश्या इति भाषा। इति मेदिनी॥ (यथा रघुः ४। १७।

"पुण्डरीकातपत्रस्तं विकसत् काश्यचामरः।
ऋतुर्विडम्बयामास न पुनः प्राप तत्क्रियम्"॥)

तत्पर्य्यायः॥ इक्षुगन्धा २ पोटगलः ३। इत्यमरः। २। ४। १६२॥ कासः ४। इति भरतः॥ काश्मी। ५। इति मुकुटादयः॥ काश्या ६। इति नयनानन्दः॥ वायसेक्षुः ७ काण्डेक्षुः ८ अमरपुष्पकः ९। इति रत्नमाला॥ काशकः १० वनहासकः ११। इति शब्दरत्नावली॥ इक्षारिः १२ काकेक्षुः १३ इक्षुरः १४ इक्षुकाण्डः १५ शारदः १६ सितपुष्पकः १७ नादेयः १८ दर्भपत्रः १९ लेखनः २० काण्डकाण्डकः २१ कच्छलकारकः २२। अस्य गुणाः। शिशिरत्वम्। गौल्यत्वम्। रुचिकारित्वम्। पित्तदाहनाशित्वम्। दृष्टिबलशुक्रकारित्वम्। श्रमशोषकफापहत्वञ्च। इति राजनिर्घण्टः॥ कण्टकगुल्मनम्। इति शब्दरत्नावली॥ तत्पर्य्यायगुणाः।

"काश्मः काकेक्षुरुद्दिष्टः स स्यादिक्षुरसस्तथा।
इक्षालिकेक्षुगन्धा च तथा पोटगलः स्मृतः॥
काश्मः स्यान्मधुरस्तिक्तः खादुपाके हिमः सरः।
मूत्रवृक्ष्यश्मदाहासृक्क्षयपित्तज्वरोगजित्"॥

इति भावप्रकाशः॥

काश्मः, पुं, (केन जलेन कफात्मकेन व्यश्यते व्याप्यतेऽत्र। क + अश + अधिकरणे घञ्।) क्षुतम्। इति शब्दरत्नावली॥ स्वनामख्यातरोगविशेषः। काश्मी इति भाषा। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। क्षवथुः २ काश्निका ३। इति शब्दरत्नावली॥ कासः ४। इत्यमरः। २। ४। १६१॥ कासयति कुत्सितशब्दं कारयति कासः। कासृङ् कुशब्दे अन्तात् पचाद्यच् कासो दन्त्यान्तः। कश शब्दे इत्यस्मात् आन्तात् पचाद्यनि काशनस्तालव्यान्तश्च। शालूरकाशशब्दश्च इत्युभयभेदे दन्त्यतालव्यान्तमध्ये पाठात्।

"वाराह्यां भवेत् काशी क्षवथौ नाटके स्त्रिया"। मिति तालव्यान्तेषु रभसः। इति तट्टीकायां भरतः॥ *॥ तस्य निदानं यथा,—

धन्वन्तरिरुवाच।

"आशुकारी यतः काश्मः स एवातः प्रवक्ष्यते।
पञ्च काश्माः स्मृता वातपित्तश्लेष्मक्षतक्षयैः॥
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्।
तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः॥
शुष्ककर्णास्यकण्ठत्वं तत्राधो विहितोऽनिलः।
ऊर्द्धं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च संहजन्॥
शिरः श्रोतांसि संपूर्य्य ततोऽक्ष्यान्युत्क्षिपन्ति च।
क्षिपन्निवाक्षिणी एष्ठमुरः पार्श्वे च पीड़यन्॥
प्रवर्त्तते स वक्त्रेण भिन्नकांस्योपमध्वनिः।
हृत्पार्श्वोरःशिरःशूलमोहच्छोमक्षरक्षयान्॥
करोति शुष्ककाश्मश्च महावेगरुजा स्वनम्।
सोऽङ्गदर्शी कफं शुष्कं कृच्छ्रान्मुक्तोऽल्पतां व्रजेत्॥
पित्तात्तु पीताक्षिकता तिक्तास्यत्वं ज्वरो भ्रमः।
पित्तात्क्षयमनं तृष्णा वैस्वर्य्यं धूमको मदः॥
प्रततं काश्मवेगे च ज्योतिषामिव दर्शनम्।
कफादुरोऽल्परुक्शूर्द्धहृदयं स्तिमितं गुरु॥
कण्ठे प्लेष्मदमनं पीनसच्छर्द्यरोचकः।
रोमहर्षघनस्निग्धश्लेष्मश्च प्रवर्द्धनम्॥
युद्ध्यादैः साहसैस्तैस्तैः सेवितैरत्यबलम्।
उरस्यन्तःक्षितो वायुः पित्ते चानुगतो बली॥
कुपितः कुरुते काश्मं कफं तेन सशोणितम्।
पीतश्यावच्च शुष्कच्च ग्रथितं क्षथितं बहु॥
छीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा।
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना॥
पर्व्वभेदज्वरश्वासक्षणावैस्वर्य्यकम्पवान्।
पारावत इवोत्कूजन् पार्श्वशूली ततोऽस्य च॥
कफाद्यैर्वमनं पक्तिर्बलं वर्णश्च हीयते।
क्षीणस्य साहसूनत्वं श्यावपृष्ठकटीग्रहः॥
वायुप्रधानाः कुपिता धातवो राजयक्ष्मणः।
कुर्व्वन्ति यक्ष्मायतनैः काश्मं क्षीवेत् कफं ततः॥
पूतिपूयोपमं पीतं विस्रं हरितलोहितम्।
लुप्यते तुद्यत इव हृदयं पचतीव च॥
अकस्मादुद्यं प्रीतेच्छा बङ्गाग्नित्वं बलक्षयः।
स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्दर्शननेक्षता॥
ततोऽस्य क्षयरूपाणि सर्व्वाण्याविर्भवन्ति च।
इत्येवं क्षयजः काश्मः क्षीणानां देहनाशनः॥
याप्यो वा बलिनां तद्वत् क्षतजोऽपि नवौ च तौ।
सिध्येतामपि सामर्थ्यात् साध्यादौ च पृथक्क्रमः॥
मिश्रायाप्यास्तु ये सर्व्वे जरसः स्थविरस्य च।

काश्यश्वासक्षयच्छर्दिस्वरसादयो गदाः ॥
भवन्त्युपेक्षया यस्मात् तस्मात्तं त्वरया जयेत् ।
इति गारुडे काश्यरोगनिदानं १५४ अध्यायः ॥ * ॥

अथ काश्यस्य चिकित्सा ।

तत्र वातकाश्यस्य चिकित्सा ॥
"वास्तूको वायसीशाकं मूलकं सुनिषण्णकम् ।
स्नेहास्तैलादयो भक्ष्याः क्षीरेक्षुरसगौड़िकाः ॥
दध्यारग्वधास्फलं प्रसन्नापानमेव च ।
शस्यते वातकाश्येषु खादस्नलवणानि च ॥
वायसी काकमाची कवई इति लोके । सुनिषण्णकं सिनुवारि इति लोके शाकविशेषः । चाङ्गेरी-सदृशचतुष्पत्रा सजलदेशे भवति । चौपति इति लोके ॥
"ग्राम्यानूपोदकैः शालियवगोधूमषष्टिकान् ।
रसैर्मांसात्मगुप्तानां यूषैर्वा भोजयेद्धितान्" ॥
ग्राम्यानूपोदकैः रसैरित्यन्वयः । आत्मगुप्ता किवाच्छ इति लोके ॥
"दग्धमूलीकृता काश्यश्वासहिक्काजयप्रदा ।
यवागूर्दीपनी रुच्या वातरोगविनाशिनी ॥
रसः कर्कोटकानां वा घृतभृष्टः स नागरः ।
वातकाश्यप्रशमनः पटुक्रिमत्यस्य वा पुनः" ॥ * ॥

अथ पित्तकाश्यस्य चिकित्सा ।

"कण्टकारीयुगद्राक्षावासार्कचूरवालकैः ।
नागरेण च पिप्पल्या क्वथितं सलिलं पिबेत् ॥
शर्करामधुसंयुक्तं पित्तकाश्यहरं परम्" ॥ * ॥

अथ कफकाश्यस्य चिकित्सा ।

"पिप्पली कटुफलं शुण्ठी भृङ्गी भार्गी तथोषणम् ।
कारवी कण्टकारी च सिन्धुवारो यवानिका ॥
चित्रको वासकश्चैषां कषायं विधिवत् कृतम् ।
कफकाश्यविनाशाय पिबेत् क्षाराम्बुयोजितम्" ॥
पिप्पल्यादिक्वाथः ॥ * ॥

अथ क्षतजकाश्यस्य चिकित्सा ।

"इक्ष्विक्षुवालिकापद्ममृणालोत्पलचन्दनम् ।
मधुकं पिप्पली द्राक्षा लाक्षा भृङ्गी घृतावरी ॥
द्विगुणा च तुगाक्षीरी सिता सर्व्वचतुर्गुणा ।
लिह्यात्तन्मधुसर्पिर्भ्यां क्षतकाश्यनिवृत्तये" ॥
इक्ष्वालिका इक्ष्वभेदः । चन्द्र इति लोके । पद्मं पद्मकाष्ठम् । मृणालं विशम् । उत्पलं कमलम् । चन्दनमत्र धवलम् चूर्णत्वात् । भृङ्गी कर्कट-भृङ्गी । तुगाक्षीरी वंशलोचना । सा चेक्षोर्द्विगुणा ॥ * ॥ अथ क्षयकाश्यचिकित्सा । "चूर्णं काकु-भमिदं वासकरसभावितं बहून् वारान् । मधु-घृतसितोपलाभिर्लेह्यं क्षयकाश्यरक्तपित्तहरम्" ॥
काकुभं चूर्णं ककुभत्वक्चूर्णम् ॥ * ॥

अथ काश्यस्य सामान्यतश्चिकित्सा ।

"ताम्यमानस्य काश्येन नासाखावे स्वरे जड़े ।
क्षवधौ गन्धनाशे च धूमपानं प्रयोजयेत् ॥
मनःशिलालमरिचं मांसीमुस्तेङ्गुदैः पिबेत् ।
धूमं व्यहं च तस्यानु पयश्च सगुड़ं पिबेत् ॥
एष काश्यान् पृथक् द्वन्द्वसर्व्वदोषसमुद्भवान् ।
शूलैरपि प्रयोगाणामसाध्यान् साधयेत् ध्रुवम्" ॥
आलं हरितालम् । इङ्गुदमिह पुन्नजीवकफलम् ॥

"बदरीदलमालिप्तं शिलाया घर्म्मशोषितम् ।
तद्धूमपानं सक्षीरं महाकाश्यनिवारणम् ॥
कण्टकारिक्षतक्वाथः सक्षौद्रः सर्व्वकाश्यहा ।
कण्टकार्य्याः कषायाश्च चूर्णं समधु काश्यहृत् ॥
लवङ्गजातीफलपिप्पलीनां
भागान् प्रकल्प्याक्षसमानमीषाम् ।
पलार्द्धमानं मरिचं प्रदेयं
पलानि चत्वारि महौषधस्य ॥
सितासमक्षेन समाप्य चूर्णं
रोगांनिमानाशु बलाग्निहन्ति ।
काश्यज्वरारोचकमेहगुल्म-
श्वासाग्निमान्द्यग्रहणीविकारान्" ॥
समशर्करचूर्णं वटिका वा ॥
"कुनटीसैन्धवव्योषविड्भिर्भयहिङ्गुभिः ।
लेहः साज्यमधुः काश्यश्वासहिक्कानिवारणः" ॥ * ॥
"हरीतकीकणा शुण्ठी मरिचं गुड़संयुतम् ।
काश्यघ्नो मोदकः प्रोक्तः परं वह्नेः प्रदीपनः" ॥ * ॥
"कर्षः कर्षांशौ पलं पलद्वयं स्यात्ततोऽर्द्धकर्षश्च ।
मरिचस्य पिप्पलीनां दाड़िमगुड़यावशूकानाम्" ॥
सर्व्वौषधैरसाध्याः काश्या ये वैद्यनिर्म्मुक्ताः ।
अपि यूयं हृद्यतां तेषामिदमौषधम्" ॥
पथ्यम् ॥ वङ्गसेनस्तु कर्षांश इति पाठे कर्षांशः कर्षार्द्धमिति व्याचष्टे ॥
"मरिचं कर्षमात्रं स्यात् पिप्पली कर्षसंमिता ।
अर्द्धकर्षो यवक्षारः कर्षयुग्मञ्च दाड़िमम् ॥
एतच्चूर्णीकृतं युञ्जादष्टकर्षगुड़ेन हि ।
प्राणप्रमाणां गुटिकां कृत्वा वक्त्रे विधारयेत् ॥
अस्याः प्रभावात् सर्व्वेऽपि कासा यान्त्येव संक्षयम्" ॥
दाड़िमं दाड़िमफलवल्कलं ग्राह्यम् । मरिचादि-वटिका ॥ * ॥
"समूलवल्कच्छदकण्टकार्य्या-
स्तुलां ततो द्रोणमितं जलञ्च ।
हरीतकीनां शतमेकपात्रे
विपच्य कुर्य्याच्चरणाम्बुशेषम् ॥
तस्मिन् कषाये तनुवस्त्रपूते
हरीतकीभिः सहितो गुड़स्य ।
तुलां विनिःक्षिप्य पचेत् सुपक्व-
मेतत् समुत्तार्य्य सुशीतले च ॥
पलं पलञ्चापि कटुत्रयञ्च
तथा चतुर्जातपलं विचूर्ण्य ।
पलानि षट् पुष्परसस्य चापि
विनिःक्षिपेत्तत्र विमिश्रयेच्च ॥
प्रयुज्यमानो विधिनेष लेहो
यथाबलञ्चापि यथानलञ्च ।
वातात्मकं पित्तकृतं कफोत्थं
द्विदोषजातानपि च त्रिदोषम् ॥
क्षतोद्भवञ्च क्षयजञ्च काश्यं
श्वासञ्च हन्यात् सह पीनसेन ।
यक्ष्माणमेकादशमुग्ररूपं
हरीतकीयं भृगुणोपदिष्टा" ॥
पुष्परसो मधु । चतुर्जातं त्वगेलापत्रनागकेशराः ।
भृगुहरीतकी ॥ * ॥

"कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकम् ।
पादशेषं गृहीत्वा च तत्र चूर्णानि दापयेत् ॥
पृथक् पलांशान्येतानि गुड़ूचीचव्यचित्रकाः ।
मुस्तं कर्कटशृङ्गी च व्योषं धन्वयासकः ॥
भार्गी राना सटी चैव शर्करा पलविंशतिः ।
प्रत्येकञ्च पलान्यष्टौ प्रदद्यात् घृततैलयोः ॥
पक्त्वा लेहत्वमानीय शीते मधुपलाष्टकम् ।
चतुष्पलं तुगाक्षीर्य्याः पिप्पलीश्च चतुष्पलाम् ॥
क्षिप्त्वा निदध्यात् सुदृढ़े मृण्मये भाजने शुभे ।
लेहोऽयं हन्ति हिक्कार्त्तिकासश्वासानशेषतः" ॥
कण्टकार्य्यावलेहः । इति कासाधिकारः । इति भावप्रकाशः ॥ * ॥ अपि च ।
"हरीतकीकणा शुण्ठी मरिचं गुड़संयुतम् ।
काश्यघ्नो मोदकः प्रोक्तस्तृष्णारोचकनाशनः ॥
कण्टकारीगुड़ूचीभ्यां पृथक् त्रिंशत्पलादधे ।
प्रस्थसिद्धो घृताद्धातकाश्यनुद्वह्निदीपनः" ॥
इति गारुडे १७४ अध्यायः ॥
"मनःशिला बलामूलं काकपर्णञ्च गुग्गुलुम् ।
जातिपत्रं कोलिपत्रं तथा चैव मनःशिला ॥
एभिश्चैव कृता वर्त्तिर्बदरास्थो महेश्वर ! ।
धूमपानं काश्यहरं नात्र कार्य्या विचारणा" ॥
इति च गारुडे १९४ अध्यायः ॥
"कतकस्य फलं शृङ्गं सैन्धवं त्र्यूषणं वचा ।
फेनोरसाञ्जनं क्षौद्रं विड्भ्रानि मनःशिला ।
एषां वर्त्तिर्हन्ति काश्यं तिमिरं पटलं यथा" ॥
इति तत्रैव १९८ अध्यायः ॥
"अभयामलकं द्राक्षा पिप्पली कण्टकारिका ।
शृङ्गं पुनर्नवा शुण्ठी जग्ध्वा काश्यं निहन्ति वै" ॥
इति च तत्रैव १९९ अध्यायः ॥

काश्यकः, पुं, (काश्यते दीप्यते इति । काशृ + कर्त्तरि ण्वुल् ।) काशः । इति शब्दरत्नावली ॥ केश्या इति भाषा ॥

काश्यमर्द्दः, पुं, (काश्यं मृद्नाति उपशमयति नाश-यति वा । मृद् + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) कासमर्द्दवृक्षः । इत्यमरटीकायां रायमुकुटः ॥ (कासमर्द्दशब्दे ऽस्य गुणाः पर्य्या-याश्च ज्ञेयाः ॥)

काश्या, स्त्री, (काश्यते इति । काश् + यच् + टाप् ।) काश्यहरणम् । इत्यमर-टीकायां भरतः ॥

काश्यश्लेष्मलिः, स्त्री, (कुत्सिता श्लेष्मलिः । कोः कादेशः ।) कुटश्लेष्मलिः । इति जटाधरः ॥

काश्निः, स्त्री, (काश् + "सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् ।) काशी । इत्युणादिकोषः ॥ (यथा हैः रामायणे १ । १३ । २३ ।
"तथा काश्निपतिं स्निग्धं सतां प्रियवादिनम् ।
सदृशं देवसङ्काशं क्षयमेवान्वयुर्हि" ॥)
काश्निनगरोपलक्षिते जनपदे पुंभूम्नि ।
यथा महाभारते ६ । ९ । ४१ ।
"अत ऊर्द्धं जनपदान्निबोध गदतो मम" ।
"बोधा मद्राः कलिङ्गाश्च काश्यो दरकाश्यः" ॥
सुष्टिः । इति निरुक्तिः । यथा ऋग्वेदे ७ । १०४ । ८ । "आप इव काश्निना संगृभीतो असन्नस्त्वा-

सत इन्द्र वक्षा" ॥ "काशिना मुखिना" इति माध्यम् ॥) सूर्य्ये पुं । इति जुमरव्याकरणम् ॥

काशिका, स्त्री, (काशि + स्वार्थे कन् टाप् । यद्वा काश्यते ज्ञानं भक्तानां इति। काश् + णिच् + ण्वुल् टाप् अत इत्वञ्च ।) काशी। इति शब्दरत्नावली ॥ (पारिभाषिककाशिकाया लक्षणमुक्तं यथा शङ्कराचार्य्येण ।

"मनोनिवृत्तिः परमोपशान्तिः
सा तीर्थवर्य्या मणिकर्णिका वै ।
ज्ञानप्रवाहा विमला हि गङ्गा
सा काशिकाऽहं निजबोधरूपः" ॥ ० ॥

वामनकृता पारिभाषिकनिवृत्तिः ॥)

काशिकाप्रियः, पुं, (काशिकाप्रिया यस्य। काशिकायाः प्रियो वा ।) दिवोदासः । इति शब्दरत्नावली ॥

काशिराजः, पुं, (काश्याः राजा । "राजाहः सखिभ्यष्टच्" । ५ । ४ । ९१ इति टच् ।) वाराणसीराजः। तत्पर्य्यायः। धन्वन्तरिः २ दिवोदासः ३ सुधोद्भवः ४ । इति त्रिकाण्डशेषः ॥

(यदि च क्रमाख्येन तत्र बहवो राजान आसन्। तथापि तत्स्थानाधिकारित्वात् यदा योऽधिकारी स एव काशिराजः अतो नासाधुप्रयोग इति मन्यामहे ॥ "अथ खलु भगवन्तममरवरमधिगणपरिवृतमाश्रमस्थं काशिराजं दिवोदासं धन्वन्तरिमौपधेनव वैतरणौरभ्रपौष्कलावतकरवीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः" ॥

इति सुश्रुते सूत्रस्थाने १ अः ॥)

काशी, स्त्री, (काश्यते शिवत्रिशूलोपरि । काश्यते दीप्यते + अच् गौरादित्वात् ङीष् । काश् + इन् ङीप् वा । अथवा काश्यति प्रकाशयतीदं सर्व्वं या । काश् + णिच् अच् गौरादित्वात् ङीष् ।) खनामख्याततीर्थम् । शिवपुरी । तत्पर्य्यायः । वाराणसी २ तीर्थराजी ३ तपःस्थली ४ । इति जटाधरः ॥ काशिका ५ । इति शब्दरत्नावली ॥ काशिः ६ । इलुयादिकोषः ॥ अविमुक्तम् ७ आनन्दवनम् ८ आनन्दकाननम् ९ अपुनर्भवभूमिः १० रुद्रावासः ११ महाश्मशानम् १२ । तस्या उत्पत्तिर्यथा,—

"ततस्तदैकदेशेऽपि स्वैरं विहरता मया ।
स्वविग्रहात् स्वयं सृष्टा स्वशरीरानपायिनी ॥
प्रधानं प्रकृतिं त्वां तु मायां गुणवतीं पराम् ।
बुद्धितत्त्वस्य जननीमाऊर्व्विकृतिवर्जिताम् ॥
युगपच्च त्वया शक्त्या साकं कालस्वरूपिणा ।
मयाच्च पुरुषेणैतत् क्षेत्रञ्चापि विनिर्म्मितम्" ॥

स्कन्द उवाच ।

सा शक्तिः प्रकृतिः प्रोक्ता स पुमानीश्वरः परः । ।
ताभ्याञ्च रममाणाभ्यां तस्मिन् क्षेत्रे घटोद्भव ! ॥
परमानन्दरूपाभ्यां परमानन्दरूपिणि ! ।
पञ्चक्रोशपरीमाणे स्वपादतलनिर्म्मिते ॥
मुने प्रलयकालेऽपि न तत् क्षेत्रं कदाचन ।
विमुक्तं न शिवाभ्यां यदविमुक्तं ततो विदुः ॥
न यदा भूमिवलयं न यदापां समुद्भवः ।
तदा विहर्त्तुमीशेन क्षेत्रमेतत् विनिर्म्मितम् ॥
इति काशीखण्डम् ॥ तत्र कर्त्तव्ययात्राविधानं यथा,—

सूत उवाच ।

"यात्रापरिक्रमं ब्रूहि जनानां हितकाम्यया ।
यथावत् सिद्धिकामानां सत्यवत्याः सुतोत्तम ! ॥

व्यास उवाच ।

निशामय महाप्राज्ञ लोमहर्षण ! वच्मि ते ।
यथा प्रथमतो यात्रा कर्त्तव्या यात्रिकैर्मुदा ॥
सचेलमादौ संस्नाय चक्रपुष्करिणीजले ।
सन्तर्प्य देवान् सपितॄन् ब्राह्मणांश्च तपस्विनः ॥
आदित्यं द्रौपदीं विघ्नं दण्डपाणिमहेश्वरम् ।
नमस्कृत्य ततो गच्छेत् ढुण्ढिविनायकम् ॥
ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं समभ्यर्च्च्य महाकालेश्वरं ततः ॥
ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ।
देवनन्दिनी विधातव्या महाफलमभीप्सुभिः" ॥ * ॥
"ततो वैश्वेश्वरी यात्रा कार्य्या सर्व्वार्थसिद्धये ।
दिवसप्रायतनाच्च कार्य्या यात्रा प्रयत्नतः ॥
क्षणां प्रतिपदं प्राप्य भूतावधि यथाविधि ।
अथवा प्रतिभूतञ्च क्षेत्रशुद्धिमभीप्सुभिः ॥
तत्तत्तीर्थकृतस्नानस्तत्तल्लिङ्गकृतार्च्चनः ।
मौनेन यात्रां कुर्व्वाणः फलं प्राप्नोति यात्रिकः ॥
ओङ्कारं प्रथमं पश्येन्मत्स्योदर्य्यां कृतोदकः ।
चिपिरूपं महादेवं ततो वै कृत्तिवाससम् ॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः ॥
विश्वकर्म्मेश्वरं चाथ मणिकर्णीश्वरं ततः ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत् ॥
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः ।
यस्तु क्षेत्रमुषित्वापि नैतां यात्रां समाचरेत् ॥
विघ्नास्तस्योपजायन्ते क्षेत्रोच्चाटनसूचकाः" ॥ * ॥
"अष्टायतनयात्रान्या कर्त्तव्या विघ्नशान्तये ॥
दक्षेशः पार्व्वतीशश्च तथा पशुपतीश्वरः ।
गङ्गेशो गर्म्मदेशश्च गभस्तीशः सतीश्वरः ॥
अष्टमस्तारकेशश्च प्रत्यक्षमि विशेषतः ।
दृश्यान्येतानि लिङ्गानि महापापोपशान्तये" ॥*॥
"अपरापि शुभा यात्रा योगक्षेमकरी सदा ।
सर्व्वविघ्नोपहन्त्री च कर्त्तव्या क्षेत्रवासिभिः ॥
शैलेशं प्रथमं वीक्ष्य वरणासङ्गपूर्व्वकम् ।
स्नानन्तु सङ्गमे कृत्वा द्रष्टव्यः सङ्गमेश्वरः ॥
स्वर्गोत्तीर्थे सुस्नातः पश्येत् स्वर्गोत्तमीश्वरम् ।
स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्यो मध्यमेश्वरः ॥
पश्येद्धिरण्यगर्भेशं तत्र तीर्थकृतोदकः ।
पञ्चपूड्कदे स्नात्वा ज्येष्ठस्थानं ततोऽर्च्चयेत् ॥
चतुःसमुद्रकूपे तु स्नात्वा देवं ततोऽर्च्चयेत् ।
देवस्याग्रे तु या वापी तत्रोपस्पर्शने कृते ॥
शुक्रेश्वरं ततः पश्येत् तत्कूपविहितोदकः ।
दण्डखाते नरः स्नात्वा व्याघ्रेशं पूजयेत्ततः ॥
मौनकेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् ।
जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नरः ॥
क्वचिन्न जायते भूयः संसारे दुःखसागरे ॥
समारभ्य प्रतिपदं यावत्कृष्णां चतुर्दशीम् ॥
एतत्क्रमेण कर्त्तव्यान्येतदायतनानि वै ।
इमां यात्रां नरः कृत्वा न भूयोऽपिजायते" ॥*॥
"अन्या यात्रा प्रकर्त्तव्यैकादशायतनोद्भवा ।
अग्नीश्वरकुण्डे सुस्नातः पश्येदग्नीश्वरम् ॥
उर्व्वशीशं ततो गच्छेत्तत्रस्तु नकुलीश्वरम् ।
आषाढीशं ततो दृष्ट्वा भारभूतेश्वरं ततः ॥
शाङ्कलीशमथालोक्य ततस्तु त्रिपुरान्तकम् ।
ततो मनःप्रकामेशं प्रीतिकेशमथो व्रजेत् ॥
मदालसेश्वरं तस्मात् तिलपर्णेश्वरं ततः ।
यात्रैकादशलिङ्गानामेषा कार्य्या प्रयत्नतः ॥
इमां यात्रां प्रकुर्व्वाणो रुद्रत्वं प्राप्नुयान्नरः" ॥ ० ॥
"अतः परं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् ॥
शुक्लपक्षतृतीयायां या यात्रा विश्ववृद्धिका ।
गोप्रेक्षतीर्थे सुस्नाय मुखनिर्म्मालिकां व्रजेत् ॥
ज्येष्ठवाप्यां नरः स्नात्वा ज्येष्ठां गौरीं समर्च्चयेत् ।
सौभाग्यगौरीं संपूज्य ज्ञानवाप्यां कृतोदकैः ॥
ततः शृङ्गारगौरीञ्च तत्रैव च कृतोदकः ।
स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् ॥
सुस्नातो ललितातीर्थे ललितां पूजयेत्ततः ।
स्नात्वा भवानीतीर्थे तु भवानीं परिपूजयेत् ॥
मङ्गला च ततोऽभ्यर्च्या विन्दुतीर्थकृतोदकैः ।
ततो गच्छेन्महालक्ष्मीं स्थिरलक्ष्मीसमृद्धये ॥
इमां यात्रां नरः कृत्वा क्षेत्रेऽस्मिन् मुक्तिजन्मनि ।
न दुःखैरभिभूयेत इहामुत्रापि कुत्रचित् ॥
कुर्य्यात् प्रतिचतुर्थीह पूजां विघ्नेशितुः सदा ।
ब्राह्मणेभ्यस्तदुद्दिष्टादेया वै मोदका मुदे" ॥ ० ॥
"भौमे भैरवयात्रा च कार्य्या पातकहारिणी ।
रविवारे रवेर्यात्रां षष्ठां वा रविसंयुजि ॥
तथैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये ।
नवम्यामथवा षष्ठां चण्डीयात्रा शुभावहा" ॥ ० ॥
"अन्तर्गृहस्य यात्रा वै कर्त्तव्या प्रतिवत्सरम् ।
प्रातः स्नानं विधायादौ नत्वा पद्म विनायकान् ॥
नमस्कृत्याथ विघ्नेशं स्थित्वा निर्व्वाणमण्डपे ।
अन्तर्गृहस्य यात्रां हि करिष्येऽघौघशान्तये ॥
गृहीत्वा नियमञ्चेति गत्वाथ मणिकर्णिकाम् ।
स्नात्वा मौनेन चागत्य मणिकर्णीशमर्च्चयेत् ॥
कम्बलाश्वतरौ नत्वा वासुकीशं प्रणम्य च ।
पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशमवप्यथ ॥
ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं ततः ।
ततो वै सोमनाथञ्च वराहञ्च ततो व्रजेत् ॥
ब्रह्मेश्वरं ततो नत्वा नत्वागस्त्येश्वरं ततः ।
कश्यपेशं नमस्कृत्य हरिकेशवनन्ततः ॥
वैद्यनाथं ततो गत्वा ध्रुवेशमथ वीक्ष्य च ।
गोकर्णेशं ततोऽभ्यर्च्च्य हाटकेशमथो व्रजेत् ॥
अस्थिक्षेपतडागञ्च दृष्ट्वा वै कीकटेश्वरम् ।
भारभूतं ततो नत्वा चित्रगुप्तेश्वरं ततः ॥
चित्रघण्टां प्रणम्याथ ततः पशुपतीश्वरम् ।
पितामहेश्वरं गत्वा ततस्तु कलसेश्वरम् ॥
चन्द्रेशस्त्वथ वीरेशो विघ्नेशोऽग्नीश एव च ।
नागेश्वरो हरिश्चन्द्रश्चिन्तामणिविनायकः ॥
सेनाविनायकश्चाथ द्रष्टव्यः सर्व्वविघ्नहृत् ।

काशी

वशिष्ठवामदेवौ च मूर्त्तिरूपधरावुभौ ॥
द्रष्टव्यौ यत्नतः काश्यां महाविघ्नविनाशनौ ।
सीमाविनायकं नाथं करुणेशं ततो व्रजेत् ॥
त्रिसन्ध्येशो विशालाक्षी धर्म्मेशो विश्वराजका ।
आशाविनायकश्चाथ रुद्रादित्यस्ततः पुनः ॥
चतुर्व्वक्त्रेश्वरं लिङ्गं ब्रह्मेशस्तु ततः परम् ।
ततो मनःप्रकामेश ईशानेशस्ततः परम् ॥
चण्डीचण्डेश्वरौ दृष्ट्वौ भवानीशङ्करौ ततः ।
ढुण्ढिं प्रणम्य च ततो राजराजेशमर्च्चयेत् ॥
लाङ्गलीशन्ततोऽभ्यर्च्च्य ततस्तु नकुलीश्वरम् ।
परान्नेशमथो नत्वा परदण्डेश्वरं ततः ॥
प्रतिग्रहेश्वरञ्चापि निष्कलङ्केशमेव च ।
मार्कण्डेयेशमभ्यर्च्च्य ततश्चाघोरेश्वरम् ॥
गङ्केशोऽर्च्चास्ततो ज्ञानवाप्यां स्नानं समाचरेत् ।
नन्दिकेशं तारकेशं महाकालेश्वरं ततः ॥
दण्डपाणिं महेशञ्च मोक्षेशं प्रणमेत्ततः ।
वीरभद्रेश्वरं नत्वा अविमुक्तेश्वरं ततः ॥
विनायकान्ततः पश्चं विश्वनाथं ततो व्रजेत् ।
ततो मौनं विसृज्याथ मन्त्रमेनमुदीरयेत् ॥
अन्तर्गृहस्य यात्रेयं यथावत् या मया कृता ।
न्यूनातिरिक्तथा शम्भः क्षीयतामनया विभुः ॥
इति मन्त्रं समुच्चार्य्य त्र्यां वै मुक्तिमण्डपे ।
विश्राम्य यायात् भवनं निष्पापः पुण्यवान् नरः" ॥*
"संप्राप्य वासरं विष्णोर्विष्णुतीर्थेषु सर्व्वतः ।
कार्य्या यात्रा प्रयत्नेन महापुण्यसमृद्धये ॥
नभस्यपञ्चदश्याञ्च कुर्य्यात्स्नानं समर्च्चयेत् ।
दुःखं रुद्रपिशाचत्वं न भवेदस्य पूजनात् ॥
श्रद्धापूर्व्वमिमा यात्राः कर्त्तव्याः क्षेत्रवासिभिः ।
पर्व्वस्वपि विशेषेण कार्य्या यात्राश्च सर्व्वतः ॥
न वर्ज्यं दिवसं कुर्य्याद्विना यात्रां क्वचित् क्षती ।
यात्राद्वयं प्रयत्नेन कर्त्तव्यं प्रतिवासरम् ॥
आदौ स्वर्गतरङ्गिण्यान्ततो विश्वेशितुर्ध्रुवम् ।
यस्य वर्ज्यं दिनं यातं काश्यां निवसतः सतः ॥
निराशाः पितरस्तस्य तस्मिन्नेव दिने भवेत् ।
स दष्टः कालसर्पेण स दग्धो मदनेन स्फुटम् ॥
स मृतस्तच्च दिवसे विश्वेशो यत्र नेक्षितः ।
सर्व्वतीर्थेषु सस्नौ स सर्व्वयात्रा अथात् स च ॥
मणिकर्णान्तु यः स्नातो यो विश्वेशं निरैक्षत ।
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः ॥
दृष्टो विश्वेश्वरो नित्यं स्नातया मणिकर्णिका" ॥
इति श्रीस्कन्दपुराणे काशीखण्डे १०० अध्यायः ॥

(चिच्छक्तिः । सुषुम्नाख्या नाड़ी च । अन्या नाड़ी चिद्भासया सम्यगाभासिता सती प्रकाशते अतएव इयं हि ब्रह्मप्रकाशरूपिणी चिन्मयी ज्ञानप्रकाशकतया अस्यास्तथात्वं वेदतन्त्रादि-ज्ञानप्रतिपादकशास्त्रैः सुषुम्नाया एव ब्रह्मनाड़ीत्वं प्रतिपादितं तथा सर्व्वप्रकाशकतया चिच्छक्तेरेव स्वरूपकाशीत्वं विज्ञाप्यते यथा,—
"ययेदं काश्यते सर्व्वं सा काशी परिकीर्त्यते" ॥
यदि चिच्छक्तिरेव काश्याः स्वरूपार्थवाचिका तर्हि तस्या वाराणसीत्याख्यायां कामलिरिति संशयश्चेत् ततोऽवधीयताम् ।

काश्मरी

"तदिदं मन्ये देवानां देवयजनं सर्व्वेषां भूतानां ब्रह्मसदनं यत्र हि जन्तोः प्राणेषूत्क्रममाणस्य रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूत्वा मोक्षी भवति तस्मादविमुक्तमेव निषेवेत अविमुक्तं न विमुञ्चेदेवमेवैतद्याज्ञवल्क्यः । अथैनमत्रिः पप्रच्छ याज्ञवल्क्य । य एषोऽनन्तोऽव्यक्त आत्मा कथमहमिमं विजानीयामिति सोऽविमुक्त उपास्य इति सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति वरणायामस्यां च प्रतिष्ठित इति का च वरणा भवति का चासिर्भवति । सर्व्वान् इन्द्रियकृतान् दोषान् वारयति तेन वरणा भवति सर्व्वाणि इन्द्रियकृतानि पापानि नाशयति तेनासिर्भवति कतमन्नस्याः स्थानं भवति इति भ्रुवोर्घ्राणस्योभयसन्धिः स चौ-लौकिकस्य परस्य च सन्धिर्भवति । एवमेवैनं सन्धिं सन्ध्यां ब्रह्मविद उपासते कोऽसौ रुद्र इति रुद्र-स्तापचयात्मकं संसारदुःखं तद्धेतुर्वा तत्सर्व्वं द्राव-यति शरणागतानामुपासकानामिति अतएव चिच्छक्तिमयः सर्व्वज्ञः परमेश्वर एव रुद्रः । तथा हि "एको रुद्रो न द्वितीयायावतस्थुः" ॥ इति श्रीश्री-मद्भगवत्पूज्यपादपरमहंसपरिव्राजकाचार्य्यसुरे-श्वरसूरिप्रणीतकाशीमुक्तिविवेकः ॥)

काश्मलम् । इत्यमरटीकायां भरतः ॥ (मुष्टिः । इति निरुक्तिः ॥)

काश्मी, [न्] त्रि, (काश्मोऽस्यास्ति इति । इनिः । काश्मरोगयुक्तः । इति राजवल्लभः ॥ (काश्मते इति काश्म णिनिः । प्रकाशशीलः ॥)

काश्मीनाथः, पुं, (काश्म्याः नाथः ।) शिवः । इति शब्दरत्नावली ॥ (यथा काशीखण्डे,—
"काश्मीनाथं समाश्रित्य कुतः कालभयं नृणाम्" ॥)

काश्मीराजः, पुं, (काश्म्याः काश्मीरप्रदेशस्य राजा । "राजाहः सखिभ्यष्टच्" । ५ । ४ । ९१ । इति टच् ।) दिवोदासः । इति शब्दरत्नावली ॥ (अयं हि योगरूढ्यर्थः । यौगिकार्थेन तु सर्व्वस्मिन्नेव काश्मीरदेशाधिकारिणि प्रयोगो दृश्यते । यथा गीतायाम् १ । ५ ।
"धृष्टकेतुश्चेकितानः काश्मीराजश्च वीर्य्यवान्" ॥)

काश्मीरं, क्ली, (कुत्सितं ईषत् वा श्मीरमिव । कोः कादेशः । काश्मिं दीप्तिं इष्टे इति केचित् । ईश् + कः ।) उपधातुविशेषः । हिराकसी इति भाषा । तत् द्विविधम् । धातुकाश्मीरम् १ । तत् हरिद्वर्णं लोहितञ्च । पुष्पकाश्मीरम् २ । तत् शुक्लवर्णं क्षुण्णञ्च । इति रत्नमाला ॥
(अस्य पर्य्याया गुणाश्च यथा,—
"काश्मीरं धातुकाश्मीरं पांशुकाश्मीरमित्यपि ।
तदेव किञ्चित् पीतन्तु पुष्पकाश्मीरमुच्यते ॥
काश्मीरमम्लमुष्णञ्च तिक्तञ्च तुवरन्तथा ।
वातश्लेष्महरञ्चेयं नेत्रकण्डूविषप्रणुत् ॥
मूत्रकृच्छ्राश्मरीश्चिनाशनं परिकीर्त्तितम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
द्विदन्त्यसकारोऽपि पाठः ॥ (काश्मीदेशाधिपतौ शिवे च पुं ॥)

काश्मरी, स्त्री, (काश्यते इति । "अनेभ्योऽपि" । ३ । ३ । ९३ । इत्यण् । काश्मीरदेश उत्पत्तिस्थानत्वे-

काश्मीरा

२ । ७५ । इति वनिप् "वनोरच" । ४ । १ । ७ । इति ङीत्रौ । एषोदरात् वस्य मत्वम् ।) गम्भारी-वृक्षः । इत्यमरः । २ । ४ । ३५ ॥ (अस्याः पर्य्याया यथा,—
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ॥
काश्मरी काश्मरी धीरा काश्मर्य्यः पीतरोहिणी ।
कृष्णवृन्ता मधुरसा महाकुसुमिकापि च" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणा-स्तस्या यथाचैव ॥
"काश्मरी तु वरा तिक्ता वीर्य्योष्णा मधुरा गुरुः ।
दीपनी पाचनी मेध्या मेदिनी भ्रमशोषजित् ॥
दोषदृष्ट्याऽमशूलार्शोविषदाहज्वरापहा ।
तत्फलं कृमिहृद्यं दृश्यं गुरुकेश्यं रसायनम् ॥
वातपित्तदृवारक्तक्षयमूत्रविबन्धनुत् ।
स्वादु पाके हिमं स्निग्धं तुवरास्रविशुद्धिकृत् ॥
हन्याद्दाहदृवावातरक्तपित्तक्षयान् तथा" ॥ * ॥
यथा, महाभारते ३ । १५८ । ४४ ।
"विल्वान् कपित्थान् जम्बूंश्च काश्मरीबदरीस्तथा" ॥)

काश्मर्य्यः, पुं, (काश्मरीति शब्दोऽस्यास्ति अस्मिन् वा । अर्शेभ्योपीति यप् । स्वार्थे ष्यञ् इति केचित् ।) गम्भारी । इत्यमरः । २ । ४ । ३६ ॥ स्त्रीलिङ्गोऽयम् । इति भरतः ॥
("हृद्यं मूत्रविबन्धघ्नं पित्तास्रवातनाशनम् ।
केश्यं रसायनं मेध्यं काश्मर्य्यं फलमुच्यते" ॥
इति सुश्रुते सूत्रस्थाने । ४६ अध्यायः ॥)

काश्मीरं, क्ली, (काश्मीरे काश्मीरे वा भवं "कच्छा-दिभ्यश्च" । ४ । २ । १३३ । इति अण् ।) पुष्कर-मूलम् । इत्यमरः । २ । ४ । १४५ ॥ टङ्कः । कु-ङ्कुमम् । इति मेदिनी ॥ (शोधनमस्य यथा,—
"काश्मीरञ्चापि सर्षपैः" ॥
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे ॥)

काश्मीरः, पुं, (काश्मीर एव स्वार्थे अण् । काश्मीर इति नामाख्यायते वा ।) स्वनामख्यातदेशः । इति जटाधरः । (उक्तञ्च शक्तिसङ्गमतन्त्रे ।
"शारदामठमारभ्य कुङ्कुमाद्रितटान्तकम् ।
तावत्काश्मीरदेशः स्यात्सञ्चाशत्योजनात्मकः" ॥
अत्र कपिलेश्वरनाना महादेवो वर्त्तते शि-वनामकोर्त्तने "काश्मीरे कपिलेश्वरः" ॥ इति वचनात् ॥ (यथा गौः रामायणे ४ । ४३ । २२ ।
"काश्मीरमण्डलं चैव शमीपीलुवनानि च ।
पुराणि च सशैलानि विचिन्वन्तु वनौकसः" ॥
तद्देशवासिनि त्रि । यथा, महाभारते ६ । ९ । ५३ ।
'काश्मीराः सिन्धुसौवीरा गन्धारा दर्शकास्तथा' ॥)

काश्मीरजं, क्ली, (काश्मीरे जायते । जन + "सप्त-म्यां जनेर्डः" । ३ । २ । ९७ । इति डः ।) कुङ्कुम् । कुङ्कुमम् । इति मेदिनी ॥ पुष्करमूलम् । इति विश्वः ॥ (गुणाः पर्य्यायाश्चास्य कुङ्कुमशब्दे कुङ्कुमशब्दे च ज्ञातव्याः ॥)

काश्मीरजन्म, [न्] क्ली, (काश्मीरे जन्म यस्य तत् ।) कुङ्कुमम् । इत्यमरः । २ । ६ । १२ ॥

काश्मीरा, स्त्री, (काश्मीरे भवः । "तत्र भवः" । ४ । ३ । ५३ । इत्यण् । काश्मीरदेश उत्पत्तिस्थानत्वे-

नास्ति अस्याः। अच् टाप् च इति केचित्।) अतिविषा। इति मेदिनी॥ कपिलद्राक्षा। इति राजनिर्घण्टः॥

काश्मीरी, स्त्री, (काश्मीरदेशे भवः। "तत्र भवः"। ४।३।५३। इत्यण्। स्त्रियां ङीप्।) गम्भारी। इति भावप्रकाशः॥ (अस्याः पर्य्यायगुणाः काश्मरीशब्दे ज्ञेयाः॥)

काश्यं, क्ली, (कुत्सितं आश्यं यत्र। कं जलं आश्यं वा यत्र। (मद्यम्। इति राजनिर्घण्टः॥) नृपविशेषे पुं। यथा महाभारते १।१०२।४६।

"अक्षतः क्षययित्वारीन् संख्येऽसंख्येयविक्रमः।
आनयामास काश्यस्य सुताः सागरगासुतः"॥)

काश्यपं, क्ली, (काश्यं मद्यं पिबत्यत्र। पा+घञर्थे कः। मांसस्य हि मद्यपानाङ्गत्वेन प्रसिद्धेस्तथात्वम्।) मांसम्। इति हेमचन्द्रः॥

काश्यपः, पुं, (काश्यपस्य गोत्रापत्यम्। विदाद्यञ्।) कण्वादमुनिः। इति त्रिकाण्डशेषः॥ मृगभेदः॥ इति मेदिनी॥ गोत्रविशेषः। तत्प्रवरान्तर्गतमुनिविशेषः। इति स्मृतिः॥ काश्यपस्यापत्यमात्रञ्च॥ (विभाण्डकमुन्यर्थे यथा, महाभारते ३।१११।२०।

"स्वाध्यायवान् दत्तसमाधियुक्तो
विभाण्डकः काश्यपः प्रादुरासीत्"॥*॥

स्वनामख्यातो द्विजविशेषः। अयं हि विषविद्यापारदर्शी। अस्य विवरणमुच्यते।

यदा भूमीकपुत्रेण गरुडेण 'स कौरवाग्रमः सप्तमेऽहनि सर्पराजेन तक्षकेण दष्टो यमसदनं गमिष्यतीति' शप्तः परीक्षित्, तदा राज्ञ एतच्छापवृत्तान्तमाकर्ण्यासौ काश्यपो नाम ब्राह्मणः राजानं परीक्षितं तक्षकविषात् रक्षितुं धनार्थी हस्तिनापुरमुद्दिश्य प्रस्थितः। गच्छन्तमेनं पथि तक्षको दृष्टवानाह च को भवान् कुत्र वा गच्छति। अथ तक्षकेनैवमुक्तोऽसौ काश्यपः सर्व्वं निवेदयामास। एवमुक्तवति तु काश्यपे तक्षकस्तस्य विद्याप्रभावं विदृक्षुः सम्मुखस्थमेकं न्यग्रोधं अदशत्। दष्टो वृक्षस्तु प्रचण्डविषतेजसा क्षणात् प्रज्वाल। एवम्भूतेऽसौ काश्यपः स्वविद्याप्रभावं विज्ञापयितुकामो न्यग्रोधभस्मकणामादाय तरसा मन्त्रबलेन पुनर्वृक्षस्थितिं जीवयामास। अथ नागराजस्तक्षक एतदालोक्य सविस्मयस्तस्मै प्रभूतधनं दत्त्वा विसर्जयामास॥ एतद्विवरणन्तु महाभारते १।४३। अध्याये द्रष्टव्यम्॥)

काश्यपिः, पुं, (काश्यपस्यापत्यं वाङ्गलकात् इञ्।) अरुणः। "काश्यपिर्गरुडाग्रजः"। इत्यमरः १।३।३२॥ गरुडः। इति हेमचन्द्रः॥ (महाभारते १ पर्व्वणि तद्योत्पत्तिविवरणम्। यथा,—

"एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा।
विनता नाम कल्याणी पुत्रकामा यशस्विनी॥
तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः।
उपचक्राम भर्त्तारं तामुवाचाथ काश्यपः॥
आरम्भः सफलो देवि! भविता यस्त्वयेप्सितः।
जनयिष्यसि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ।
तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा"॥)

काश्यपी, स्त्री, (काश्यपस्येयं। "तस्येदम्"। ४।३।१२०। इत्यण् स्त्रियां ङीप्।) पृथिवी। इत्यमरः। २।१।२॥

("अथागम्य महाराज! नमस्कृत्य च काश्यपम्।
पृथिवी काश्यपी जज्ञे सुता तस्य महात्मनः"॥
इति महाभारते॥ दानधर्म्मे। १३।१५४। ७॥
प्रजा। एतद्विषयकप्रमाणं कूर्म्मशब्दे द्रष्टव्यम्॥)

काश्यपेयः, पुं, (काश्यपस्येयम्। काश्यप+अण् ङीप् च काश्यपी काश्यपपत्नी अदितिः। तत्र भवः इति ढक्।) सूर्य्यः। इति शब्दरत्नावली॥ (यथा,

"जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम्।
ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम्"॥
इति सूर्य्यप्रणामः॥ देवमात्रं। काश्यपीसुतत्वात्॥)

काश्मरी, स्त्री, (काश्म+वनिप् "वनोरच"। ४।१।७ इति ङीप् रुच्। जातौ ङीष् वा।) काश्मरी। इति भरतो दिरूपकोषश्च॥

काष्ठं, क्ली, (काश्यते दीप्यते काश्यत्यनेन वा। काश्+"इनिकुषीत्यादिना" उणां। २।२। क्थन्। ब्रश्चेति षत्वम् तितुत्रेति नेट्।) दारु। इत्यमरः। २।४।१३॥ काठ् इति भाषा। (उक्तञ्च।

"संसारमतिशुष्कं यत् मुष्टिमध्ये समेष्यति।
तत्काष्ठं काष्ठमित्याहुः खदिरादिसमुद्भवम्"॥)

काष्ठकं, क्ली, (काष्ठं सत्कायति। काष्ठ+कै+कः केचित्तु काष्ठं विद्यतेऽस्य नड़ादित्वात् च्छः कुक् च विल्वकादित्वात् च्छमाचस्य लुक्। प्रशस्तकाष्ठत्वात् अस्य तथात्वं।) अगुरु। इति राजनिर्घण्टः॥

काष्ठकदली, स्त्री, (काष्ठवत् कठिना कदली।) कदलीभेदः। काटकला इति भाषा। तत्पर्य्यायः। सुकाष्ठा २ वनकदली ३ काष्ठिका ४ शिलारम्भा ५ दारुकदली ६ फलाढ्या ७ वनमोचा ८ अश्मकदली ९। अस्या गुणाः। रुचिकारित्वम्। रक्तपित्तनाशित्वम्। हिमत्वम्। गुरुत्वम्। मन्दाग्निजनकत्वम्। दुर्ज्जरत्वम्। मधुरत्वम्। हितत्वञ्च। इति राजनिर्घण्टः॥

काष्ठकीटः, पुं, (काष्ठे जातः कीटः। काष्ठलेखकः कीटो वा।) घुणः। इति हेमचन्द्रः॥

काष्ठकुट्टः, पुं, (काष्ठं कुट्टतीति। कुट्ट+अण्।) पक्षिविशेषः। काठठोकरा इति भाषा। तत्पर्य्यायः। घृतच्छदः २। इति त्रिकाण्डशेषः॥

काष्ठकुद्दालः, पुं, (कुं भूमं उद्दालयति विदारयति निपातनात् साधुः। काष्ठस्य कुद्दालः काष्ठेन निर्म्मितः काष्ठमयः कुद्दालो वा।) नौकादेर्मलापनयनार्थं काष्ठघटितकुद्दालः। तत्पर्य्यायः। अवृश्चिः २। इत्यमरः॥

काष्ठजम्बूः, स्त्री, (काष्ठप्रधाना जम्बूः।) भूमिजम्बूः। इति राजनिर्घण्टः॥

काष्ठतक्षकः, पुं, (काष्ठं तक्षति। काष्ठ+तक्ष+ण्वुल्।) काष्ठतट्। इति शब्दरत्नावली॥

काष्ठतट्, [ट्] पुं, (काष्ठं तक्षति। तक्षू तनूकरणे क्विप्।) वर्णसङ्करजातिविशेषः। कुतार इति भाषा। तत्पर्य्यायः। तक्षा २ वर्द्धकिः ३ त्वष्टा ४ रथकारः। ५। इत्यमरः। २।१०।९॥

काष्ठतन्तुः, पुं, (काष्ठे तन्तुरिव विस्तृततयावस्थितत्वात्।) काष्ठकृमिः। तत्पर्य्यायः। कोषकारः २। इति हारावली॥

काष्ठदारुः, पुं, (काष्ठं दारुसंज्ञकं। काष्ठप्रधानो दारुरिति केचित्।) देवकाष्ठम्। इति राजनिर्घण्टः॥

काष्ठद्रुः, पुं, (काष्ठप्रधानो द्रुर्वृक्षः।) पलाशवृक्षः। इति राजनिर्घण्टः॥

काष्ठधात्रीफलं, क्ली, (काष्ठमिव शुष्कं धात्रीफलम्।) आमलकम्। इति राजनिर्घण्टः॥

काष्ठपाटला, स्त्री, (काष्ठवत् कठिना पाटला।) सितपाटलिका। इति राजनिर्घण्टः॥ (अस्याः पर्य्याया यथा॥ "अपरा स्यात्पाटला सिता। मुष्ककी मोचकी घण्टा पाटलिः काष्ठपाटला"। इति भावप्रकाशस्य पूर्व्वखण्डे १म भागे॥)

काष्ठमठी, स्त्री, (काष्ठरचिता मठीव।) चिता। इति त्रिकाण्डशेषः॥

काष्ठमल्लः, पुं, (काष्ठं मल्लः वाहक इव यत्र।) प्लवयानम्। इति हारावली॥

काष्ठलेखकः, पुं, (काष्ठं लिखति। कर्त्तरीनेन लेखनाकारं करोतीति। लिख+ण्वुल्।) घुणः। इति हारावली॥

काष्ठलोही, [न्] पुं, (काष्ठेन युक्तं लोहं विद्यते यत्र। यद्वा काष्ठं च लोहं च ते स्तोऽत्र। इनिः।) लौहयुक्तमुद्गरः। तत्पर्य्यायः। वातर्द्धिः २। इति त्रिकाण्डशेषः॥

काष्ठवल्लिका, स्त्री, (काष्ठवत् शुष्का वल्लिका।) कटुका। इति वैद्यकम्॥ (कट्वीशब्देऽस्या गुणादयो बोद्धव्याः॥)

काष्ठशारिवा, स्त्री, (काष्ठमिव शुष्का शारिवा।) शारिवा। इति राजनिर्घण्टः। अनन्तमूल इति भाषा॥

काष्ठा, स्त्री, (काश्यते प्रकाश्यते। काश् दीप्तौ। "इनिकुषिनीरमिकाशिभ्यःक्थन्"। उणां २।२। इति क्थन्। ब्रश्चेति षत्वं ततः टाप्।) दिक्। (यथा, माघे ११।१२।

"स्फुरति विशदमेषा पूर्व्वकाष्ठाङ्गनायाः"॥)

स्थितिः। सीमा। उत्कर्षः। (यथा, कठश्रुतौ।

"इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः॥
महतः परमव्यक्तं अव्यक्तात् पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः"॥

अष्टादशनिमेषात्मककालः। इत्यमरः। १।४।११॥ (यथा मनुः १।६४।

"निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला"॥

विष्णुपुराणमते पञ्चदशनिमेषात्मकः कालः। यदुक्तं, तत्रैव १।३।७।

"काष्ठा पञ्चदश ख्याता निमेषा मुनिसत्तम!॥)

दारुहरिद्रा। इति मेदिनी॥ (कश्यपपत्नीभेदः। यथा, भागवते ६।६।२५।

"अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला"॥)

काष्ठाम्बुवाहिनी, स्त्री, (अम्बूनां जलानां वाहिनी

अम्बुवाहिनी । काष्ठेन निर्म्मिता काष्ठस्य वा अम्बुवाहिनी ।) काष्ठादिरचितच्छिद्रान्नयनौकाकृति जलसेचनी । सेंच्योत् इति भाषा । तत्पर्य्यायः । द्रोणी २ । इत्यमरः । १ । १० । ११ ॥

काष्ठीलः, पुं, (काष्ठिना इल्यते क्षिप्यते इति । काष्ठि + इल् क्षेपणे + कर्म्मणि घञ् ।) राजार्कः । इति राजनिर्घण्टः ॥

काष्ठीला, स्त्री, (कुत्सिता ईषदर्था अष्ठीलेव । क्षुद्राष्ठीलेव इति वा ।) कदलीवृक्षः । इत्यमरः । २ । ४ । ११३ ॥

कास, ऋ ङ कुशब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट्-ऋदित् ।) कुशब्द इह रोगहेतुककुत्सितशब्दः । ऋ अचकासत् । ङ कासते शब्दः । इति दुर्गादासः ॥

कासः, पुं, (कासतेऽनेन । कास् शब्दकुत्सनयोः । "हलश्च" ३ । ३ । १२१ । इति घञ् ।) रोगविशेषः । कासी इति भाषा । तत्पर्य्यायः । क्षवथुः २ । इत्यमरः । २ । ६ । ५२ ॥ तस्य निदानं यथा,—

"धूमोपघाताद्रजसस्तथैव
व्यायामरूक्षान्ननिषेवणाच्च ।
विमार्गगत्वाच्च हि भोजनस्य
वेगावरोधात् क्षवथोस्तथैव" ॥

सम्प्राप्तिर्यथा । "प्राणो ह्युदानानुगतः प्रदुष्टः" ॥

लक्षणं यथा ।

"संभिन्नकांस्यस्वनतुल्यघोषः ।
निरेति वक्त्रात् सहसा सदोषो
ननोषिभिः कास इति प्रदिष्टः" ॥

स च पञ्चविधो यथा,—

"पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ।
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्" ॥

तेषां पूर्व्वरूपं यथा,—

"पूर्व्वरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते" ॥

वातिको यथा,—

"हृच्छङ्खमूर्द्धोदरपार्श्वशूली
क्षामाननः क्षीणबलस्वरौजाः ।
प्रसक्तवेगस्तु समीरणेन
भिन्नस्वरः कासति शुष्कमेव" ॥

पैत्तिको यथा,—

"उरोविदाहज्वरवक्त्रशोषै-
रभ्यर्दितस्तिक्तमुखस्तृषार्त्तः ।
पित्तेन पीतानि वमेत् कटूनि
कासेत् सधूमं परिदह्यमानः" ॥

श्लैष्मिको यथा,—

"प्रलिप्यमानेन मुखेन सोदन्
शिरोरुजार्त्तः कफपूर्णदेहः ।
श्यामक्षरुग्गौरवसादयुक्तः
कासेद्बृहत् सान्द्रकफः कफेन" ॥

क्षतजो यथा,—

"अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः ।
रूक्षस्योरः क्षतं वायुर्गृहीत्वा कासमावहेत् ।
स पूर्व्वं कासते शुष्कं ततः क्षीवेत् सशोणितम् ।

कण्ठेन रुजतात्यर्थं विरावेणेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
दुःखस्पर्शेन शूलेन भेदपीड़ाभितापिना ॥
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीड़ितः ।
पारावत इवाकूजन् कासवेगात् क्षतोद्भवात्" ॥

क्षयजो यथा,—

"विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात् ।
क्षणिनां क्षोचतां नृणां व्यापन्नेऽग्नौ चयो मलाः ।
कुपिताः क्षयजं कासं कुर्य्युर्हेतुक्षयप्रदम् ॥
सगात्रशूलज्वरदाहमोहान्
प्राणक्षयञ्चोपलभेत कासी ॥
शुष्यन् विनिष्ठीवति दुर्ब्बलस्तु
प्रक्षीणमांसो रुधिरं सपूयम् ।
तं सर्व्वलिङ्गं भृशदुश्चिकित्स्यं
चिकित्सितज्ञाः क्षयजं वदन्ति ॥

इत्येषः क्षयजः कासः क्षीणानां देहनाशनः ।
साध्यो बलवतां वा स्याद्व्याप्यक्षत्वं क्षतोत्थितः ॥
नवौ कदाचित् सिध्येतामपि प्रादशुगान्वितौ ।
स्थविराणां जराकासः सर्व्वो याप्यः प्रकीर्त्तितः ।
त्रीन् पूर्व्वान् साधयेत् साध्यान् पथ्यैर्य्याप्यांस्तु याप येत्" ॥ इति माधवकरः ॥ * ॥

("व्याशुकारी यतः कासस्तमेवातः प्रवक्ष्यति" ॥
अस्य प्रायूपसहितासंप्राप्ती रूपाणि च यथा ।
"तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः ॥
शूकपूर्णाभकण्ठत्वं, तत्राधो विहतोऽनिलः ।
ऊर्द्धं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च संसजन् ॥
शिरः स्रोतांसि संपूर्य्य ततोऽङ्गान्युत्क्षिपन्निव ।
क्षिपन्निवाक्षिणी एष्ठमुरः पार्श्वे च पीड़यन् ॥
प्रवर्त्तते सवक्त्रेण भिन्नकांस्योपमध्वनिः ।
हेतुभेदात् प्रतीघातभेदो वायोः सरंहसः ॥
यद्वुना शब्दवैषम्यं कासानां जायते ततः ।
कुपितो वातजैर्वातः शुष्कोरःकण्ठवक्त्रताम् ॥
हृत्पार्श्वोरःशिरःशूलं मोहक्षोभस्वरक्षयान् ।
करोति शुष्कं कासञ्च सहावेगरुजाक्षनम् ॥
सोऽल्पहर्षो कफं शुष्कं क्षक्षान्मुक्त्वान्तं व्रजेत् ।
पित्तात् पीतात्ति कफता तिक्तास्यत्वं ज्वरोभ्रमः ॥
पित्तास्रवमनंतृष्णा वैस्वर्य्यं धूमको मदः ।
प्रतंत कासवेगेन ज्योतिषामिव दर्शनम् ॥
कफादुरोऽल्परुड्मूर्द्धहृदयं स्तिमितं गुरु ।
कण्ठोपलेपः सदनं पीनसश्छर्द्यरोचकाः ॥
रोमहर्षोघनस्निग्धश्वेतश्लेष्मप्रवर्त्तनम् ।
युद्ध्याद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम् ॥
उरस्यन्तःक्षते वायुः पित्तेनानुगतो बली ।
कुपितः कुरुते कासं कफं तेन सशोणितम् ॥
पीतं श्यामञ्च शुष्कञ्च यद्यितं कुधितं बहु ।
क्षीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा ।
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यकम्पवान् ॥
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च ।
क्रमादीर्य्यं रुचिः पक्तिर्बलं वर्णश्च हीयते ॥
क्षीणस्य साहसमूक्तं स्याच्च एष्ठशिरोग्रहः ।
वायुप्रधानाः कुपिता धातवो राजयक्ष्मणः ॥

कुर्व्वन्ति यक्ष्मायतनैः कासं क्षीवेत् कफं ततः ।
पूतिपूयोपमं पीतं विस्रं हरितलोहितम् ॥
लुञ्चेते इव पार्श्वे च हृदयं पततीव च ।
अकस्मादुष्णशीतेच्छा वह्नाधिक्यं बलक्षयः ॥
स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्घ्राणनेत्रता ।
ततोऽस्य क्षयरूपाणि सर्व्वाण्याविर्भवन्ति च ॥
इत्येषः क्षयजः कासः क्षीणानां देहनाशनः ।
याप्यो वा बलिनां तद्वत् क्षतजोऽभिनवौ तु तौ ॥
सिध्येतामपि सागाच्यात् साध्यादोषैः पृथक्क्षयः ।
मिश्रा याप्या द्वयात् सर्व्वे जरसा स्थविरस्य च ॥
कासाक्षात्क्षयच्छर्द्दि स्वरसादयो गदाः ।
भवन्त्युपेक्षया यस्मात् तस्मात्तं त्वरया जयेत्" ॥
इति वाभटे निदानस्थाने । ३ अध्याये । * ॥

अथ कासस्य चिकित्सा यथा ॥

"केवलानिलजं कासं स्नेहैरादावुपाचरेत् ।
वातघ्नसिद्धैः स्निग्धैश्च पेयायूषरसादिभिः ॥
लेहैर्धूमैस्तथाभ्यङ्गैः स्वेदसेकावगाहनैः ।
वस्तिभिर्बृंहविड्वातं सपित्तन्तूर्द्धभक्तिकैः ॥
घृतैः क्षीरैश्च सकफं जयेत् स्नेहविरेचनैः ।
गुडूचीकण्टकारीभ्यां पृथक्त्रिंशत्पलाद्रसे ॥
प्रस्थः सिद्धो घृतादातकासनुत् वह्निदीपनः ।
क्षारराखावचाहिङ्गुपाठायष्ट्याह्वधान्यकैः ॥
द्विपलांशैः सर्पिषः प्रस्थं पचेत्कोलयुतैः पचेत् ॥
दशमूलस्य निर्य्यूहे पीतोमण्डानुपायिना ॥
सकासश्वासहृत्पार्श्वग्रहणीरोगगुल्मनुत् ।
द्रोणेऽपां साधयेद्राक्षा दशमूलशतावरीः ॥
पलोन्मितादिकुड़वं कुलत्थं बदरं यवम् ।
तुलार्द्धञ्चाजमांसस्य तेन साधं घृताढ़कम् ॥
समक्षीरं पलांशैश्च जीवनीयैः समीक्ष्य तत् ।
प्रयुक्तं वातरोगेषु पाननावनबस्तिभिः ॥
पञ्चकासान् शिरःकम्पं योनिबस्त्यक्षिवेदनाम् ।
सर्व्वाङ्गैकाङ्गरोगांश्च सद्यो हर्द्धानिलान् जयेत्" ॥ *॥
"दुरालभां शृङ्गवेरं शृङ्गीं द्राक्षां सितोपलाम् ।
लिह्यात् कर्कटशृङ्गीञ्च कासे तैलेन वातजे ।
दुष्पर्शां पिप्पलीं मुस्तां भार्गीं कर्कटकं शठीम् ॥
पुराणगुड़तैलाभ्यां चूर्णितान्यवलेहयेत् ।
तद्वत् सक्षणां शृङ्गीञ्च सभार्गीं तद्वदेव च ॥
पिबेच्च क्षणां कोष्णेन सलिलेन ससैन्धवाम् ।
मस्तुना सशितां शुण्ठीं दध्ना वा कफरेचकाम् ॥
पिबेद्दधरमज्ज्ञो वा मदिरा दधिमस्तुभिः ।
अथवा पिप्पलीकल्कं घृतभृष्टं ससैन्धवम् ॥
कासीसपीनसोधर्मं स्नेहिकं विधिना पिबेत्" ।
"यवानीपिप्पलीविल्वमध्यनागरचित्रकैः ।
राजाजाजी पृथक्पर्णी पलाशशठीपौष्करैः ॥
सिद्धां स्निग्धाम्लवर्गां पेयामनिलजे पिबेत् ।
कटिहृत् पार्श्वकोष्ठार्त्तिश्वासहिक्काप्रणाशनीं" ॥
"पित्तकासे तनुकफे चिरतां मधुरैर्युताम् ।
युञ्जाद्विरेकायुतां घनश्लेष्मणि तिक्तकैः ॥
घृतदोषो हिमं स्वादु स्निग्धं संसर्ज्जनं भजेत् ।
घने कफे तु शिशिरं रूक्षं तिक्तोपसंहितम् ॥
लेहः पैत्ते सिता धात्री क्षौद्रद्राक्षा हिमोत्पलैः ।
सकफे साब्दमरिचः सघृतः सानिले हितः ॥

मृद्वीकार्द्धशतं विंशतिपिप्पलीः शर्करापलम्।
लेहयेन्मधुना गोर्व्वा क्षीरस्य शृतशीतस्य ॥
त्वगेलाधोषमृद्वीकापिप्पलीमूलपौष्करैः।
लाजमुक्ता शृंगीराखा धात्रीफलविभीतकैः ॥
शर्करागुडक्षौद्रसर्पिर्भिर्लेहो हृद्रोगकासहा।
मधुरैर्भाजनसंस्थैर्यवश्यामाकोदवाः ॥
मुद्गादियूषैः शाकैश्च तिक्तकैर्मात्रया हिताः।
धन्वजैश्चापि लेहाश्च तिक्तकामधुसंयुताः ॥
शूलयः शुल्लनुकपे यष्टिकाश्च रसादिभिः।
शर्करामोऽनुपानार्थं द्राक्षेक्षुस्वरसाः पयः ॥
काकोली क्षीरशुक्लेमेदाद्वयैः स वृषनागरैः।
पित्तकासे रसक्षीरपेयायूषान् प्रकल्पयेत्" ॥
"पुनर्नवा शिवाटिका सरलकासमर्द्दामृता।
पटोलदहतीपर्णिन्यक्षरसैः पयः संयुतैः ॥
घृतं चिरबिल्वा च सिद्धमुपयुज्य सञ्जायते।
न कासविषमज्वरक्षयगुदाङ्गरेभ्यो भयम्" ॥ * ॥
"दशमूलं स्वयङ्गुप्तां शृङ्गपुष्पीं शठीं बलाम् ॥
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान्।
भार्गीं पुष्करमूलञ्च द्विपलांशान् यवाढ़कम् ॥
हरीतकीशतञ्चैकं जलेषड्द्रोणके पचेत्।
यवक्षिप्ते कषायं तं पूतन्तत्राभयाशतम् ॥
पचेद्गुड़तुलां दत्त्वा कुड़वञ्च पृथग्घृतात्।
तैलात् सपिप्पलीचूर्णात् सिद्धर्षीतिं च माक्षिकात् ॥
लेहं हे चाभये नित्यमतः खादेद्रसायनात्॥
तदग्नीपचितं हन्याद्वर्णायुर्बलवर्द्धनम् ॥
पञ्चकासान् क्षयं श्वासं सहिक्कं विषमज्वरम्।
मेहगुल्मव्रणार्शांसि प्लीहोगारुचिपीनसान् ॥
अगस्तिविहितं धन्यमिदं श्रेष्ठं रसायनम्" ॥

इति अगस्त्यरसायनम् ॥ * ॥

"विधिश्च यज्ञविहितो यथावस्थं क्षते हितः ॥
निहत्ते क्षतदोषे तु कफे रुद्धे उरः शिरः।
दाह्यते कासिनो यस्य धूमानापिबेदिमान् ॥
द्विमेदा द्विबलाबल्लीकल्कैः क्षौमे सुभाविते।
वर्त्तिं कृत्वा पिबेद्धूमं जीवनीयघृतानुपः ॥
मनःशिला पलाशाजगन्धात्वक्क्षीरिनागरैः।
तद्वदेवानुपानन्तु शर्करेक्षुगुड़ोदकम् ॥
पिष्ट्वा मनःशिलां तुल्यां मार्द्दया वटपट्टक्या।
सर्पिष्मन्तं पिबेद्धूमं तित्तिरिप्रतिभोजनम् ॥
क्षयजे कृच्छ्रं पूर्वं कुर्य्यादग्नेश्च वर्द्धनम्।
बद्धदोषाय सस्नेहं मृदुदद्याद्विरेचनम् ॥
शृङ्गाटकेन चिरतया मृद्वीकाश्मभल्लया।
तिल्वकस्य कषायेण विदारीस्वरसेन च ॥
सर्पिः सिद्धं पिबेद्युक्त्या क्षीणदेहो विशोधनम्।
पित्ते कफे धातुषु च क्षीणेषु क्षयकासवान् ॥
घृतं कर्कटकीक्षीरद्विबलासाधितं पिबेत्।
विदारीभिः कदम्बैर्वा तालशृङ्गैश्च साधितम् ॥
घृतं पयश्च सूत्रस्य वैवर्ण्ये क्षक्षनिर्गमे।
शूने सवेदने मेढ्रे पायौ सञ्जोगिवद्व्रणे ॥
घृतमण्डेन लघुनानुवास्यो भिश्रकेण वा।
जाङ्गलैः प्रतिभुक्तस्य वर्त्तकाद्या विलेशयाः ॥
क्रमशः प्रसहास्तद्वत् प्रयोज्याः पित्तिताग्निनः।
श्लेष्मणात्समाधिभावाच्च स्रोतोभ्यश्चयवन्ति ते ॥

कफं शुद्धेश्च तःपुष्टिं कुर्य्यात्सम्यग्वहन् रसः।
चविकाचित्रफलाभार्गी दशमूलः स चित्रकैः ॥
कुलत्थपिप्पलीमूलपाठाकाक्षयवैर्जले।
घृतैर्नागरदुस्पर्शा पिप्पलीशठिपौष्करैः ॥
पिष्टैः कर्कटशृङ्गा च समैः सर्पिर्विपाचयेत्।
सिद्धेऽस्मिंश्चूर्णितौ क्षारौ द्वौ पञ्च लवणानि च ॥
दत्त्वा युक्त्यापिबेन्मात्रां क्षयकासनिपीड़ितः।
कासमर्द्दोऽभयासुस्तापाठाकट्फलनागरैः ॥
पिप्पल्या कटुरोहिण्या काश्मर्य्याः स्वरसेन च।
अक्षमात्रैर्घृतप्रस्थं क्षीरद्राक्षा रसाढके ॥
पचेच्छोषज्वरश्वीहसर्व्वकासहरं शिवम्" ॥ * ॥
"वृषव्याघ्री गुड़ूचीनां पञ्चमूलफलाङ्कुरान् ॥
रसकल्कैर्घृतं पक्वं हन्ति कासज्वरारुचीः"।
"स्थूलैरघबद्धः कण्ठोरः स्रोतसाञ्च विशुद्धये ॥
प्रस्थोन्मिते यवक्षारे विंशतिर्विजयाः पचेत्।
खिन्नामदित्वा तास्तस्मिन् पुराणात्षट्पलं गुड़ात् ॥
पिप्पल्या द्विपलं कर्षं मनोक्षाया रसाञ्जनात्।
दत्त्वार्द्धांशं पचेद्भूयः सलेहः श्वासकासनुत्" ॥
"तद्वन्मरिचचूर्णं वा सघृतक्षौद्रशर्करम्।
पथ्यासुण्ठी घनगुड़ैर्गुटिकां धारयेन्मुखे ॥
सर्व्वेषु श्वासकासेषु केवलं वा विभीतकम्।
पक्वकल्कं घृतभृष्टं तिक्तकस्य सशर्करम् ॥
पेयावोल्लारिकाक्षर्द्दिहिक्काकासामातिसारनुत्।
कण्टकारीरसे सिद्धो मुद्गयूषः सुसंस्कृतः ॥
स गौरामलकः साक्षः सर्व्वकासभिषग्जितम् ॥
वातघ्नौषधनिक्काथे क्षीरं यूषान् रसानपि।
वैष्किरान् प्रातुदान् वेलान् दापयेत् क्षयकासिने ॥
क्षतकासे च वेधूमाः सानुपानानि दर्शिताः।
क्षयकासेऽपि ते योज्या वक्ष्यन्ते यच्च यच्छ्रुतम् ॥
रूक्षं दीपनक्षाग्नेः स्रोतसाञ्च विशोधनम्।
व्यत्यासात्क्षयकासिभ्यो बल्यं सर्व्वं प्रशस्यते ॥
सन्निपातोद्भवो घोरः क्षयकासो यतस्ततः।
यथादोषबलन्तस्य सन्निपातहितं हितम्" ॥
इति वाग्भटे चिकित्सास्थाने २ अध्याये ॥ * ॥

अस्य सकारणसम्प्राप्तिकं लक्षणं चिकित्सितञ्च यथा,—

"तपसा यशसा धृत्या धिया च परयान्वितः।
आत्रेयः कासशान्त्यर्थं सिद्धं प्राह चिकित्सितम् ॥
वातादिभिस्त्रयो ये च क्षतजः क्षयजस्तथा।
पञ्चैते सुर्दृशां कासा वर्द्धमानाः क्षयप्रदाः" ॥
"अधःप्रतिहतो वायुरूर्द्धस्रोतः समाश्रितः।
उदानभावमापन्नः कण्ठं सङ्गस्तथोरसि ॥
आविश्य शिरसः खानि सर्व्वाणि प्रति पूरयन्।
आभज्ञन्नाक्षिपन्देहं हनुमन्ये तथाक्षिणी ॥
नेत्रे एष्टमुरः पार्श्वे निर्भिन्द्य स्तम्भयंस्ततः।
शुष्को वा सकफो वापि कसनात् कास उच्यते।
प्रतिघातविशेषेण तस्य वायोः सरंहसः ॥
वेदनाशब्दवैषम्यं कासानामुपजायते।
रूक्षक्षीणकषायाल्पप्रमिताशनं स्त्रियः ॥
वेगधारणमायासो वातकासप्रवर्त्तकाः।
हृत्पार्श्वोरः शिरःशूलस्वरभेदकरो भृशम् ॥
शुष्कोरःकण्ठवक्त्रास्यहृत्शूलोद्गः प्रताम्यतः।

निर्घोषोत्क्लेशतो देन्यदौर्ब्बल्यक्षयमोहजित् ॥
शुष्ककासः कफं शुष्कं छिन्द्यान्मुक्ताल्पतां व्रजेत्।
स्निग्धाम्ललवणोष्णैश्च भुक्तमाशे प्रशाम्यति ॥
ऊर्द्धवातस्य जीर्णेऽन्ने वेगवान्मारुतो भवेत्।
कटूष्णाविदाह्यम्लक्षाराणामतिसेवनम् ॥
पित्तकासकरं क्रोधः सन्तापाग्निसूर्य्यजः।
पीतनिष्ठीवनाक्षित्वं तिक्तास्यत्वं क्षरामयः ॥
उरो धूमायनं दृष्ट्या दाहोमोहोऽरुचिर्भ्रमः।
प्रततं कासमानश्च ज्योतींषीव च पश्यति।
श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पैत्तिके ॥
गुर्व्वभिष्यन्दिमधुरस्निग्धस्वप्नाविचेष्टनैः।
रुद्धः श्लेष्मानिलं रुद्धा कफकासं करोति हि ॥
मन्दाग्निरुचिच्छर्द्दि पीनसोत्क्लेशगौरवैः।
लोमहर्षास्यमाधुर्य्यक्लेदसंसदनैर्युतम् ॥
हृद्रुजं मधुरं स्निग्धं निष्ठीवति घनं कफम्।
कासमानोऽतिरुग्वक्त्रः सम्मूर्च्छन्निव मन्यते" ॥
"दुर्गन्धं हरितं रक्तं क्षीवेत् पूयोपमं कफम्।
स्थानादुत्कासमानस्य हृदयं मन्यते च्युतम् ॥
अकस्माद्गुण्ठितार्त्तस्य बद्धाग्नेर्दुर्ब्बलस्य च।
स्निग्धाच्छमुखवर्णत्वक् श्रीमद्दशनलोचनैः ॥
पाणिपादतलौ श्लक्ष्णौ सततासूयकोदरी।
ज्वरो मिश्राकृतिस्तस्य पार्श्वरुक् पीनसोऽरुचिः ॥
भिन्नसङ्गातवर्चस्त्वं स्वरभेदोऽनिमित्ततः।
इत्येषः क्षयजः कासः क्षीणानां देहनाशनः" ॥
"रूक्षस्यानिलजं कासं आदौ स्नेहैरुपाचरेत्।
सर्पिर्भिर्वसाभिः पेयायूषक्षीररसादिभिः।
वातघ्नसिद्धैः स्नेहाद्यैर्धूमैर्लेह्यैश्च युक्तितः ॥
अभ्यङ्गैः परिषेकैश्च स्निग्धैः स्वेदैश्च बुद्धिमान्।
वस्तिभिर्बद्धविड्वातं शुष्कोद्धं चोर्द्धभक्तिकैः ॥
घृतैः सपित्तं सकफं जयेत् स्नेहविरेचनैः"।
"पिप्पली पिप्पलीमूलचव्यचित्रकनागरैः।
धान्यपाठाचविकासा यष्ट्याह्वक्षारहिङ्गुभिः।
कोलमात्रैर्घृतप्रस्थाद्दशमूली रसाढ़के ॥
सिद्धां चतुर्थिकां पीत्वा पेयामग्रं पिबेदनु।
तच्छ्वासकासहृत्पार्श्वग्रहणीदोषगुल्मनुत्" ॥
"भूधरं चिपलां द्राक्षां काश्मर्य्याणि परूषकम्।
हे पाटे सरलं व्याघ्रीं खगुप्ताचित्रकं शठीम्।
ब्राह्मीं तामलकीं मेदां काकनासां शतावरीम्।
चिरबिल्वां विदारीञ्च पिष्ट्वा कर्षसमं घृतात्।
प्रस्थं चतुर्गुणं क्षीरं सिद्धं कासहरं पिबेत्।
ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत् ॥
कामलार्शोऽनिलाष्ठीला क्षतशोषक्षयापहम्।
वृषभं नाम विख्यातमेतद्घृतमनुत्तमम्" ॥

इति वृषभाद्यं घृतम् ॥ * ॥

"द्रोणेऽपां साधयेद्राज्ञां दशमूलीं शतावरीम्।
पलिकां माषिकां शृंगीं कुलत्थान् वदरान् यवान् ॥
तुलार्द्धाजशकृत्स्वस्य पादशेषेण तेन च।
घृताढ़कं समक्षीरं जीवनीयैः पलोन्मितैः ॥
सिद्धं तद्गुणभिः कल्कैः नस्यपानानुवासनैः।
समीक्ष्य वातरोगेषु यथावस्थं प्रयोजयेत् ॥
पञ्च कासान् शिरःकम्पं शूलं वङ्क्षणयोनिजम्।
सर्व्वाङ्गैकाङ्गरोगांश्च सप्तीहोर्द्धनिलान् जयेत्" ॥

"दशमूलीं सवङ्गानां शृङ्गवेर्यौ शठीं बलाम् ।
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान् ॥
भार्गीं पुष्करमूलञ्च द्विपलांशयवाढकम् ।
हरीतकीशतञ्चैकं जलषट्काढके पचेत् ॥
यवे खिन्ने कषायन्तम्मूतन्तच्चाभयाशतम् ।
पचेत् गुडतुलां दत्त्वा कुडवञ्च एथग् घृतात् ॥
तैलात् सर्पिष्मलीचूर्णात् सिद्धघृतेऽ चमाक्षिकात् ॥
लिह्याद्दे चामये नित्यमतः खादेदसायनात् ॥
तद्वलीपलितं हन्ति वर्णायुर्बलवर्द्धनम् ।
पञ्चकासान् क्षयं कासं हिक्कां सविषमज्वराम् ॥
हन्यात्तथार्शोग्रहणीदोषोगारुचिपीनसान् ।
अगस्त्यविहितं श्रेष्ठं रसायनमिदं शुभम्" ॥

इत्यगस्त्यहरीतकी ॥ * ॥

"शिरसः सदने स्रावे नासाया हृदि तास्यति ।
कासप्रतिश्यायरसे धूमं वैद्यः प्रयोजयेत् ॥
दशाङ्गुलोन्मितां नाडीं अथवाष्टाङ्गुलोन्मिताम् ।
शरावसंपुटच्छिद्रे कृत्वाच्छां विचक्षणः ॥
वैरेचनं मुखेनैव कासवान् धूममापिबेत् ।
तमुरः केवलं प्राप्तं मुखेनैवोद्धमेत् पुनः ॥
सच्छस्य तैक्ष्ण्यादित्विप्य श्लेष्माणमुरसि स्थितम् ।
निष्कृष्य शमयेत् कासं वातश्लेष्मसमुद्भवम्" ॥
"मनःशिलालमधूकमांसीमुस्तैकुदैः पिबेत् ।
धूमं तस्यानु च क्षीरं सुखोष्णं सगुडं पिबेत् ॥
एष कासान् पृथग्दोषसन्निपातोद्भवान् जयेत् ।
प्रसह्य पर्य्यसंसिद्धानन्यैर्योगशतैरपि" ॥
"मनःशिलैलामरिचत्वाराङ्गनकुटन्नटैः ।
वंशलोचनपैवान्यच्छौमनक्तकरोहिषैः ॥
पूर्ब्बकल्पेन धूमोऽयं सानुपानो विधीयते ।
श्वासं मनःशिला तद्वत् पिप्पलीनागरैः सह ॥
त्वगेकदीहहत्यौ द्वे तालमूलं मनःशिला ।
कार्पासास्थ्यग्निगन्धा च धूमः कासविनाशनः" ॥
"पैत्तिके स कफे कासे वमनं सर्पिषा हितम् ।
तथा मदनकाम्पर्य्यमधूककृथितैर्जलैः ॥
यष्ट्याह्वफलकल्कैर्वा विदारीक्षुरसायुतैः ।
हृतदोषस्ततः पीतं मधुरञ्च क्रमं भजेत् ॥
पैत्ते तनुकफे कासे लिहतां मधुभैषजम् ।
दद्याद्वनकफे तिक्तैर्विरेकार्थे यतां भिषक् ॥
"शर्करा चन्दनद्राक्षा मधुधात्रीफलोत्पलैः ।
पैत्तिकसमुत्तमरिचः सकफे सहतोऽनिले ॥
मृद्वीकार्द्धशतं क्षिप्त्वा पिप्पलीशर्करापलम् ।
लेह्येन्मधुना गोर्व्या क्षीरस्य प्रस्थसंयुतम्" ॥
"वमिनं वमनैरादौ शोधयेत् कफकासिनम् ।
यवान्नैः कटुरूक्षोष्णैः कफघ्नैश्चाप्युपाचरेत् ॥
पिप्पलीत्रिफलाभार्गैर्यूषैः कौलत्थमूलकस्य च ।
लघून्यन्नानि भुञ्जीत रसैर्वा कटुकान्वितैः" ॥
कासमर्द्दस्विबिट्शुक्तशोवार्त्ताकुजारसाः ।
सक्षौद्राः कफकासघ्नाः सुरसस्यासितस्य च" ॥
"क्षतकासाभिभूतानां वृत्तिः स्यात् पित्तकासिकी ।
क्षीरसर्पिर्मधुप्रायो संसर्गे तु विशेषतः ॥
वातपित्तार्दितेऽभ्यङ्गो गात्रभेदहतेर्हितः ।
तैलैर्मारुतरोगघ्नैः पीड्यमाने च वायुना ॥
घृतात्त्रायन्तिषु प्रातं स्राज्जीवनीयस्य सर्पिषः ।

सदाहं कासिनो रक्तं क्षीवतः सबलेऽनिले ।
मांसोचितेभ्यः कामेभ्यो लावादीनां रसा हिताः" ॥
"निहते क्षतदोषे तु कफे रूढे उरः शिरः ।
दाह्यते कासिनो यस्य सधूमान्नापिबेदिमान् ॥
द्वे मेदे मधुकं द्वे च बलेतैः क्षौमवल्कजैः ।
वर्त्तितैर्धूममापीय जीवनीयघृतं पिबेत्" ॥
"सम्पूर्णरूपं क्षयजं दुर्ब्बलस्य विवर्ज्जयेत् ।
नवोत्थितं बलवतः प्रत्याख्यायाचरेत् क्रियाम्" ॥
"पित्ते कफे च संक्षीणे परिक्षीणेषु धातुषु ।
घृतं कर्कटकीक्षीरद्विबलासाधितं पिबेत्" ॥
"क्षतकासे च ये धूमाः सानुपाना निदर्शिताः ।
क्षतकासेऽपि तानेव यथावस्थं प्रयोजयेत्" ॥
"सन्निपातभवेऽप्येष क्षयकासः सुदारुणः ।
सन्नियातहितं तस्मात् सदा कार्य्यं भिषग्जितम् ॥
दोषानुबलयोगाच्च हरेद्रोगबलाबलम् ।
कासेष्वेषु गरीयांसं जानीयादुत्तरोत्तरम्" ॥

इति चिकित्साख्याने २२ अध्याये चरकेणोक्तम् ॥ * ॥

कासस्य निदानसम्प्राप्तिलक्षणसहितं प्रायूपं चिकित्सितञ्च यथा,—
"उक्ता ये हेतवो नृणां रोगयोः श्वासहिक्कयोः ।
कासस्यापि च ते ज्ञेयास्तत्र वोत्पत्तिहेतवः" ॥
"स वातपित्तप्रभवः कफाच्च
क्षतात्तथान्यः क्षयजोऽपरश्च ।
पञ्चप्रकारः कथितो भिषग्भि-
र्विवर्द्धितो यक्ष्मविकारलक्षणात् ॥
भविष्यतस्तस्य तु कण्ठकण्डू-
र्भोज्योपरोधोगलतालुभेदः ।
स्वरश्च वैक्लव्यमरोचकोऽग्नि-
सादश्च लिङ्गानि भवन्त्यमूनि" ॥
"वृद्धत्वमासाद्य भवत्यथो वै
याप्यन्तमाऽभिभवजस्तु कासम् ॥
पृष्ठग्रीवाच कट्यूरुफलकृत्तिग्राब्द-
धान्यामयाभाग्यैमरारुविश्वम् ।
उष्णाम्बुना हिक्कयुतं तु पीत्वा-
वङ्गास्यमप्याशु जहाति कासम् ॥
फलत्रिकथ्योषविडङ्गपट्वी
रास्नावचापद्मकदेवकाष्ठैः ।
लेहैः समैः क्षौद्रसिताघृताक्तैः
कासं निहन्यादचिरादुदीर्णम् ॥
पथ्यां सितामामलकानि लाजां
समागधीञ्चापि विचूर्ण्य गुग्गुलोम् ।
सर्पिर्मधुभ्यां विलिहीतकासी
स सैन्धवां वोष्णजलेन क्षुण्णाम् ॥
खादेद्गुडं नागरपिप्पलीभ्यां
द्राक्षाञ्च सर्पिर्मधुनावलिह्यात् ।
द्राक्षां सितां मागधिकाञ्च तुल्याम्
सपृक्तवेगं मधुकन्तुगाञ्च ॥
लिह्याद्घृतक्षौद्रयुतां समांसां
सितोपलां वा मरिचांशयुक्ताम् ।
धात्रीफलाबिल्वसितोपलाञ्च
सचूर्ण्य मद्येन पिबेच्च दध्ना ॥

हरेणुकां मागधिकाञ्च तुल्याम्
दध्ना पिबेत् कासगदाभिभूतः" ॥
"पिबेच्च सीधुं मरिचान्वितं वा
तेनाशु कासं श्रमनभ्युपैति ।
द्राक्षाम्बुमल्लिष्ठपुराङ्गयाभिः
क्षीरं श्रुतं माक्षिकसंप्रयुक्तम् ॥
निदिग्धिकानागरपिप्पलीभिः
खादेच्च मुद्गान् मधुना सुसिद्धान् ।
उत्कारिकां सर्पिषि नागराढ्याम्
पक्वां समूलैस्तुटिकोलयत्नैः ॥
एभिर्निषेवेत क्षतात्त्व पेयाम्
तन्वीं सुगीतां मधुना विमिश्राम् ।
यत्क्षीरि सर्पिर्विहितं षडङ्गम्
तद्धातकासं जयति प्रसह्य ॥
विदारि गन्धादिहृतं घृतं वा
रसेन वा वासकजेन पक्वम् ।
विरेचनं स्नैहिकमत्र चोक्त-
मास्थापनञ्चाप्यनुवासनञ्च ॥
धूमं पिबेत् स्नैहिकमप्रमत्तः
पिबेत् सुखोष्णं घृतमेव चात्र ।
हिता यवान्नञ्च रसेषु सिद्धाः
पयांसि लेहाः स घृतास्तथैव ॥
प्रच्छर्दनं कायशिरो विरेको
स्नेहैवधूमाकवलग्रहाश्च ।
उष्णाश्च लेहाः कटुकानि हन्युः
कफं विशेषेण विशोषणं वा" ॥
"खर्ज्जूरभार्गीमृगधार्पियाल-
मधूलिकैलामलकैः समांशैः ।
चूर्णं सिताक्षौद्रघृतप्रगाढ-
न्त्रीन् हन्ति कासानुपयुज्यमानः" ॥
"प्रस्थत्रयेणामलकीरसस्य
गुडस्य दत्त्वार्द्धतुलां गुडस्य ॥
चूर्णीकृतैर्यष्टिकचव्यशीर-
श्योषेभकर्णा ह पलाभमोदैः ।
विडङ्गसिन्धुत्रिफलाभयानी
पाठाग्निधान्यैश्च पिप्पलीभैः ॥
दत्त्वा चिल्लचूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेदयथावत् ।
तन्मात्रयेदक्षफलप्रमाणम्
यथेष्टचेष्टं त्रिसुगन्धि युक्तम् ॥
अनेन सर्व्वे ग्रहणी विकाराः
स श्वासकासस्वरभेदशोथाः ।
शाम्यन्ति चाशं चिरमन्तरग्ने-
र्हृतस्य पुंस्त्वस्य च वृद्धिहेतुः ॥
स्त्रीणाञ्च वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुडः प्रतीतः" ॥

इति कल्याणको गुडः ॥ * ॥

"कुलीर शुक्ती चटकैणलावा-
न्निःक्षाप्य वर्गैर्मधुरैस्तथान्यैः ॥
पचेद्घृतं तत्तु निषेव्यमाणम्
हन्यात् क्षतोत्थं क्षयजञ्च कासम्" ॥

इति सुश्रुते उत्तरतन्त्रे । ५२ अध्याये ॥ * ॥

कासः

"पारदं गन्धकं शुद्धं मृतलौहञ्च टङ्कणम् ।
शाखा विड्ङ्गचित्रला देवदारुकचित्रकम् ।
अमृतां पद्मकं क्षौद्रं विषञ्चैव विचूर्णयेत् ।
द्विगुञ्जं वातकासार्त्तिः सेवयेदमृतार्णवम्" ॥
इति अमृतार्णवो रसः ॥ * ॥
"भक्षताम्राभ्रकान्तानां कासमत्यर्द्दयो रसैः ।
मुनिभिर्वेतसाख्येन दिनं सर्पिः प्रयत्नतः ॥
निष्कार्द्धं पित्तकासार्त्तो भक्षयेच्च दिनत्रयम् ।
श्वासकासाग्निमान्द्यञ्च क्षयकासं निकृन्तति" ॥
इति पित्तकासान्तको रसः ॥ * ॥
"समुद्रं पारदं गन्धं प्रत्येकं शुक्तिसम्मितम् ।
ततः कज्जलिकां कृत्वा मर्द्दयेच्च पृथक् पृथक् ॥
विश्वाग्निमन्थशृङ्गीनाकाक्षस्यर्थः पाटला बला ।
मुस्तं पुनर्नवा धात्री वृहतीत्यपञ्चकम् ॥
विदारी वङ्गपुत्री च एवां कर्षरसैः पृथक् ।
सुवर्णं रजतं ताम्रं प्रत्येकं शाणमानकम् ॥
पलमात्रन्तु क्षाराभ्रं तदर्द्धन्तु शिलाह्वयम् ।
जातीकोषफलं मांसी तालीशैला लवङ्गकम् ।
प्रत्येकं कोलमानन्तु वासागीरैर्विमर्द्दयेत् ।
शोषयित्वा ततः पश्चादिदारी रसमर्दितः ॥
चिरुल्लां तां वटीं खादेत्पिप्पली मधुसंयुताम् ।
नाम्ना नित्योदयश्चायं रसो विष्णुविनिर्म्मितः ॥
पञ्च कासान्निहन्त्याशु चिरकालसमुद्भवम् ।
राजयक्ष्माणमत्युग्रमित्यादि बहवो गुणाः" ॥
इति नित्योदयो रसः ॥ * ॥
"शुद्धं क्षाराभ्रचूर्णद्विपलपरिमितं
शाणमानं यदन्यत्
कर्पूरं जातिकोषं सजलमिभकणा-
तेजपत्रं लवङ्गम् ।
मांसीतालीशचोचं गजकुसुमगदं-
धातकीचेति तुल्यम्
पथ्याधात्री विभीतं चिकटुरपि पृथक्
त्वर्द्धशाणं द्विशाणम् ॥
एला जातीफलाख्यं त्रिफलितजविधिना
शुद्धगन्धस्य कोलम्
कोलार्द्धं पारदस्य प्रतिपदविहितं
पिप्पलेकञ्च मिश्रम् ।
पाणीयेनैवकार्य्याः परिणतचणक-
स्निग्धतुल्याश्च वट्यः
प्रातःखादाच्चतस्तदनु खलु कियत्
पृष्ठकैरं सपर्णम् ॥
पाणीयं पीतमन्ते ध्रुवमपहरति-
त्रिप्रमेतान् विकारान्
कोष्ठे दुष्टाग्निजातान् ज्वरमुदररुजं-
राजयक्ष्मक्षतञ्च ।
कासं श्वासं सशोषं नयनपरिभवं-
मेहमेदो विकारान्
हृन्नादामानिलोत्थान् कफपवनकृतान्
पित्तरोगान् विशेषान् ॥
वल्योऽयञ्च योगश्चणकरवरः-
सर्व्वरोगप्रशस्तः
पथ्यं मांसैश्च यूषैर्घृतपरिलुलित-

कासः

र्गव्यदुग्धञ्च भूयः ।
भोज्यो योज्यो यथेष्टं ललितललनया-
दीयमानो मुदा यत्
पृष्ठकाराभ्रयोगक्रमो युवतिजनसृता-
भोगयोगादतुष्टः ॥
वर्ज्यं शाकाम्लमादौ न च कतिपयचित्-
सेच्छया भोज्यमानः" ॥
इति पृष्ठकाराभ्रः ॥ * ॥
"जीर्णं सुवर्णं लौहं वा यद्यत्रैव प्रदीयते ।
तदायं सर्व्वरोगाणां सार्व्वभौमो न संशयः" ॥
इति सार्व्वभौमो रसः ॥ * ॥
"चिकटु त्रिफलाधान्यं चव्यं चित्रकसैन्धवम् ।
दिव्यौषधिहृतञ्चापि सर्व्वतुल्यन्तयोरजः ॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वाम्बिकेश्वरीम् ॥
एकैकां वटिकां खादेत् रक्तोत्पलरसप्लुताम् ।
नीलोत्पलरसैर्व्वापि कुलत्थस्य रसेन वा ॥
निहन्ति विविधं कासं दोषत्रयसमुद्भवम् ।
वातिकं पैत्तिकञ्चैव गरदोषसमुद्भवम् ।
सरक्तमथवा रक्तं कासश्वाससमन्वितम् ॥
दृष्ट्वाहृभ्रमशूलघ्नी रुच्या वह्निप्रदीपनी ।
बलवर्णकरी हृद्या जीर्णज्वरविनाशिनी ॥
इयं चन्द्रामृता नाम्ना चन्द्रनाथेन निर्म्मिता ।
वासागुडूचिका भार्गी मुस्तकं कण्टकारिका ।
भोजनान्ते प्रकर्त्तव्या वटिका कार्य्यसिद्धये" ॥
इति श्रीचन्द्रामृता वटी ॥ चन्द्रामृतं लौहमित्यपि पाठः ॥ * ॥
"रसगन्धकलौहानां प्रत्येकं कार्षिकं क्षिपेत् ।
टङ्कणस्य पलं दत्त्वा मरिचस्य पलार्द्धकम् ॥
चिकटुत्रिफलाचव्य धान्यजीरकसैन्धवम् ।
प्रत्येकं तोलकं ग्राह्यं छागीदुग्धेन पेषयेत् ॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वाम्बिकेश्वरीम् ॥
एकैकां वटिकां खादेत् रक्तोत्पलरसप्लुताम् ।
नीलोत्पलरसेनापि कुलत्थस्य रसेन वा ॥
निहन्ति विविधं कासं वातरक्तकफोद्भवम् ।
सरक्तमथवा रक्तं ज्वरश्वाससमन्वितम् ॥
हृच्छूलं पार्श्वशूलञ्च जीर्णज्वरविनाशनः ।
चन्द्रामृतरसो नाम चन्द्रनाथेन भाषितः" ॥
इति वृहच्चन्द्रामृतो रसः ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे कासरोगाधिकारे ॥ * ॥ * ॥

अथ कासपथ्यम् ॥
"स्नेहो विरेचनं क्षुर्दिर्धूमपानं समाशनम् ।
शालिषष्टिकगोधूमयवाभाकयवकोद्रवाः ॥
आत्मगुप्ता मांसमुद्गकुलत्थानां रसाः पृथक् ।
ग्राम्यौदकानूपधन्वमांसानि विविधानि च ॥
सुरा पुरातनं सर्पिश्छागञ्चापि पयो घृतम् ।
वास्तुकं वायसी शाकं वार्त्ताकुं बालमूलकम् ॥
कण्टकारी कासमर्द्दी जीवन्ती सुनिषण्णकम् ।
द्राक्षाबिम्बी मातुलुङ्गं पौष्करं वासकस्फुटिः ॥
गोमूत्रं शुनं पथ्या व्योषसुण्ठोदकं मधु ।

कासरः

लाजा दिवसनिद्रा च लघून्यन्नानि यानि च ॥
पथ्यमेतद्यथा दोषमुक्तं कासगदातुरे" ॥
अथापथ्यमाह ॥
"वस्तिं नस्यमरुक्षोक्तं व्यायामं दन्तधर्षणम् ।
आतपं दूरपवनं रजोमार्गनिषेवणम् ॥
विरुग्भीनि विदाहीनि रूक्षाणि विविधानि च ।
शुक्तमूत्रोद्गारकासवमिवेगनिधारणम् ॥
मत्स्यं कन्दं सर्षपञ्च तुम्बीफलमुपोदिकाम् ।
दुष्टाम्बु चान्नपानञ्च विरुद्धान्यशनानि च ॥
गुरुशीतक्षान्नपानं कासरोगी परित्यजेत्" ॥
इति वैद्यकपथ्यापथ्यविधौ कासरोगाधिकारः ॥ ॥)
काशहरणम्। इत्यमरटीकायां भरतः॥ शोभाञ्जनः।
इति शब्दचन्द्रिका ॥
कासकन्दः, पुं, (कासहेतुः कन्दः।) कासालुः। इति राजनिर्घण्टः ॥
कासघ्नी, स्त्री, (कासं हन्ति। कास + हन् + टक्। स्त्रियां ङीप्।) कण्टकारी। इति शब्दचन्द्रिका॥ (कण्टकारीशब्देऽस्या गुणादिविवरणं ज्ञेयम्॥)
कासजित्, स्त्री, (कासं जयतीति। कास + जि + क्विप्।) भार्गी। इति राजनिर्घण्टः ॥
कासनाशिनी, स्त्री, (कासं नाशयतीति। कास + नश् + णिच् + णिनिः।) कर्कटशृङ्गीवृक्षः। इति रत्नमाला ॥
कासन्दीवटिका, स्त्री, (कासं यति नाशयतीति। दो + कः ततो ङीष्। कासन्दीं वटति वक्ति तन्नाम्ना प्रकाशते इत्यर्थः। वट् + णवुल्। टाप् ह्रस्वत इत्वम्। कासन्दीवटिका इति पारिभाषिकनाम्ना आख्यायते वा।) वेसवारविशेषः। गोटा कासुन् इति भाषा। अस्या गुणाः। हृद्यत्वम्। वातश्लेष्मरोगनाशित्वम्। रुच्यत्वम्। वायुमलानुलोमकारित्वञ्च। इति राजवल्लभः ॥
कासमर्द्दः, पुं, (कासं मृद्नाति। कास + मृद् + "कर्म्मण्यण्" ३।२।१। इति अण्।) पेषितजलमिश्रितवस्त्रगलितवेसवारः। इति पाकराजेश्वरः॥ कासन्दी इति ख्यातः। गुल्मभेदः। इत्यमरभरतौ॥ काल कासुन्दा इति भाषा॥ शोधस्य पर्य्यायः। अरिमर्द्दः २ कासारिः ३ कासमर्द्दकः ४ कालः ५ कनकः ६ जरठः ७ दीपनः ८। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। मधुरत्वम्। कफवातार्जीर्णकासपित्तनाशित्वम्। पाचकत्वम्। कण्ठशोधनत्वञ्च। इति राजनिर्घण्टः॥ अग्निदीपनत्वम्। स्वादुत्वञ्च। इति राजवल्लभः॥ अस्य पञ्चगुणाः। रुचिकारित्वम्। शुक्रवर्द्धकत्वम्। कासविषरक्तकफवातपित्तनाशित्वम्। मधुरत्वम्। पाचनत्वम्। कण्ठशोधनत्वम्। लघुत्वम्। विशेषतः कासहरत्वम्। ग्राहकत्वञ्च। इति राजनिर्घण्टः॥
कासमर्द्दनः, पुं, (कासं मृद्नाति। कास + मृद् + कर्त्तरि ल्युः। कासस्य मर्द्दनो वा।) पटोलः। इति राजनिर्घण्टः ॥
कासरः, पुं, (के जले आसरति। आ + सृ + अच्। महिषस्य प्रायेण जलवासात्तथात्वम्।) महिषः। इत्यमरः ।२।५।४॥ (यथा, आर्य्यासप्तशती ५२१।

"आरोषं मानिन्यास्तमोदिवः कासरं कलमभूमेः। वह्निमलिं च नलिन्याः प्रभातसन्ध्यापसारयति" ॥)

कासारः, पुं, (कास + "तुषारादयश्च" उणां ३।१३९ इति आरन् प्रत्ययः। कस्य जलस्य आसारो यत्र वा। अथवा कासं शब्दं ऋच्छति प्राप्नोति जलगमनपतनादिकाले। ऋ + "कर्म्मण्यण्" ।३।२।१। इति अण्।) सपद्मो निष्पद्मो वा महाजलाशयः। सरोवरः। इत्यमरः। १। १०। २८ ॥ (यथा,—गीतगोविन्दे २। २०।

"दुरालोकस्तोकस्तवकनवकाशोकलतिका-विकाशः कासारोपवनपवनोऽपि व्यथयति" ॥)

कासारिः, पुं, (कासस्य अरिः नाशकः।) कासमर्द्दः। इति राजनिर्घण्टः ॥

कासालुः, पुं, (कासहेतुः कासजनको वा आलुः।) कन्दविशेषः। कोङ्कणदेशे प्रसिद्ध आलुविशेषः। तत्पर्य्यायः। कासकन्दः २ कन्दालुः ३ आलुकः ४ आलुः ५ विशालपत्रः ६ पत्रालुः ७। अस्य गुणाः। उग्रत्वम्। कण्डुवातश्लेष्मामयारोचकनाशित्वम्। स्वादुत्वम्। पथ्यत्वम्। अग्निदीपनत्वञ्च। इति राजनिर्घण्टः ॥

कासीसं, क्ली, (कासौ क्षुद्रकासं स्यति नाशयतीति। सो + कः।) उपधातुविशेषः। हिराकसी इति भाषा। (यथा सुश्रुते सूत्रे ३६ अध्याये।

"कासीसकट्वोहिण्योर्जातीकन्दहरिद्रयोः" ॥)

तत्पर्य्यायः। धातुकासीसम् २ खेचरम् ३ धातुशेखरम् ४। इति हेमचन्द्रः ॥ केसरम् ५ हंसलोमशम् ६ शोधनम् ७ पांशुकासीसम् ८ शुभ्रम् ९। अस्य गुणाः। कषायत्वम्। शिशिरत्वम्। विषकुष्ठकृमिखर्ज्जूनाशित्वम् चक्षुर्हितत्वम्। कान्तिवर्द्धनत्वञ्च। इति राजनिर्घण्टः ॥ (विस्तृतविवरणमस्य काशीशब्दे ज्ञेयम् ॥)

कास्यः, स्त्री, (कश्यति कुत्सितशब्दं गच्छतीति। कश गतौ + "शित् कशिभ्यश्चेतेः"। उणां १। ८७। इति ऊः एषोदरादित्वात् सत्वम्।) विकलवाक्। शब्दयन्त्रम्। इति मेदिनी ॥ (कासते प्रकाशते इति कास् + ऊ।) दीप्तिः। भाषा। इति शब्दरत्नावली ॥ रोगः। बुद्धिः। इति हेमचन्द्रः ॥

काहका, स्त्री, (काहला इति। एषोदरादित्वात् लस्य कः।) काहलावाद्यम्। इति त्रिरूपकोषः ॥

काहलं, क्ली, (कुत्सितं अस्पष्टमव्यक्तं हलं वाक्यं ध्वनिर्वा यत्र। विलेखनार्थकस्यापि हलधातोरत्रधातूनामनेकार्थत्वात् तथात्वम्।) अव्यक्तवाक्यम्। इति हेमचन्द्रः ॥

काहलः, पुं, (कुत्सितं यथा स्यात् तथा हलति। लिखति नखैर्भूमिमिति शेषः। हल + अच्। कोः कादेशः।) कुक्कुटः। शब्दमात्रम्। इति मेदिनी ॥ विड़ालः। इति शब्दमाला ॥ दहद्ढक्का। तत्पर्य्यायः। महानादः २। इति हारावली ॥

काहलः, त्रि, (केन जलेन अहलः अस्पृष्टः।) शुष्कः। भग्नम्। खलः। इति मेदिनी ॥

काहला, स्त्री, (कुत्सितं अव्यक्तं वा हलति शब्दं करोति। हल + अच् टाप् च।) वाद्यभाण्डभेदः। (ईषदपि न हलं कुत्सितं अङ्गं यस्याः। कोः कादेशः।) अश्वरोविशेषः। इति मेदिनी ॥

काहलापुष्पः, पुं, (काहलाकृतिरिव पुष्पमस्याः।) धुस्तूरः। इति शब्दमाला ॥

काहली, स्त्री, (कं सुखं आहलति ददातीति। आ + हल + इन्। ततो ङीप्।) तरुणी। युवती। इति मेदिनी ॥

काहारकः, पुं, (कुत्सितं शिविकादिकमालम्ब्य जीवनयात्रामाहरति। आ + हृ + ण्वुल्।) शिविकावाहकजातिः। काहार इति वेहारा इति च भाषा। यथा,—

"तथा गारुड़िका वीराः क्षुरकर्म्मोपजीवकाः। व्याधाः काहारकाः पुष्टाः क्षणं संवाहयन्ति ये" ॥ इति जैमिनिभारते आश्वमेधिके पर्व्वणि १० अध्यायः ॥

काही, स्त्री, (केन वायुना आहन्यते। आ + हन् + ङः ङीप्। यद्वा कं सुखं आहन्ति ददाति प्रापयति। आ + हन् + अन्तर्णिजन्तात् ङः। ङीप् च।) कुटजवृक्षः। इति राजनिर्घण्टः ॥

कि र लि ज्ञाने। इति कविकल्पद्रुमः ॥ (क्र्यादिः परं-सकं-सेट्।) र वैदिकः। लि चिकेति। इति दुर्गादासः ॥

किं, य, किम्। इति मेदिनी ॥ (यथा विष्णुपुराणे १ मांशे १७। २४।

"न केवलं तात! मम प्रजानां
स ब्रह्मभूतो भवतश्च विष्णुः।
धाता विधाता परमेश्वरश्च
प्रसीद कोपं कुरुषे किमर्थम्" ॥)

किं, [म्] चि, जिज्ञासार्थम्। कि इति भाषा। सर्व्वनामकिम्शब्दस्य स्त्रीवलिङ्गे रूपमिदम्। इति व्याकरणम् ॥ अस्यार्थान्तराणि किम्शब्दे द्रष्टव्यानि ॥ (सर्व्वशब्दमयत्वात् विष्णुः। यथा, महाभारते १३। १४९। ९१।

"एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्" ॥)

किंवदन्तिः, स्त्री, (किं + वद + झिच्।) किंवदन्ती। इत्यमरटीकायां भरतः ॥

किंवदन्ती, स्त्री, (किम् + वद + झिच् ङीष् च।) जनश्रुतिः। सत्यमसत्यं वा लोकवादः। इत्यमरः। १। ६। ७ ॥ ("अस्ति किलैषा किंवदन्ती अस्माकं कुले कालरात्रिकल्पा विद्या नाम राक्षसी समुत्पत्स्यते"। इति प्रबोधचन्द्रोदयनाटकम् ॥)

किंवा, य, (किम् च वा च। इति द्वन्द्वसमासः।) विकल्पः। अथवा। तत्पर्य्यायः। उताहो २ यदि वा ३ यद्वा ४ नेति ५। इति चिकाण्डशेषः ॥

किंशारुः, पुं, (किं किञ्चित् कुत्सितं वा शृणातीति शॄ हिंसायां + "किञ्शॄस्थोः शिरुः"। उणां १। ४। इति चुरुः।) शूल्यशूकम्। सुँआ इति भाषा। इत्यमरः। २। ६। २१ ॥ वाणः। कङ्कपक्षी। इति मेदिनी ॥

किंशुकः, पुं, (किञ्चित् अवयवैकदेशः शुक इव शुकतुण्डाभपुष्पत्वात् तथात्वमिति बोध्यम्।) पलाशवृक्षः। इत्यमरः। २। ४। २६ ॥ (अस्य पर्य्यायो यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"पलाशः किंशुकः पर्णो याज्ञिको रक्तपुष्पकः। क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः" ॥

यथा गोः रामायणे ६। ६८। ३१।

"तयोः क्षतव्रणौ देहौ सुशुभाते महात्मनोः। पुष्पिताविव निष्पत्रौ यथा शाल्मलिकिंशुकौ" ॥

तत्पुष्पादयोऽपि। यथा चाणक्ये ७।

"रूपयौवनसम्पन्ना विशालकुलसम्भवाः। विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः" ॥)

विवरणमस्यान्यत् पलाशशब्दे ज्ञातव्यम् ॥ नन्दी वृक्षः। इति राजनिर्घण्टः ॥

किंशुलुकः, पुं, (किंशुक + निपातनात् साधुः।) पलाशवृक्षविशेषः। इति शब्दरत्नावली ॥

किकिः, पुं, (कक + इन्। एषोदरादित्वात् आदेरित्वम्।) किकीदिविः। इति शब्दमाला। नारिकेलः। इति राजनिर्घण्टः ॥

किकिदिविः, पुं, (किकीति अस्फुटनादेन दीव्यतीति। दिव् + इन्।) चाषपक्षी। इति शब्दमाला ॥

किकीदिवः, पुं, (किकीति अव्यक्तशब्देन दीव्यति। दिव + कः।) चाषपक्षी। इति शब्दमाला ॥

किकीदिविः, पुं, (किकी इति अस्फुटनादं कुर्व्वन् दीव्यति। "क्वचिदृच्छिच्छिखिवि किकीदिविः"। उणां ४। ५६ इति किन् निपातनात् सिद्धम्।) स्वर्णचातकः। सोनाचड़া इति भाषा। नीलकण्ठ इति क्वचित् ख्यातः। इति भरतः ॥ तत्पर्य्यायः। चाषः २। इत्यमरः। २। ५। १६ ॥ चासः ३ किकीदीविः ४। इति भरतः ॥ किकी ५ दिविः ६। इति स्वामी ॥ किकिः ७ किकिदिवः ८ किकिदीविः ९। इति शब्दमाला ॥ किकीदिवः १० स्वर्णचूड़ः ११ इति जटाधरः ॥

किकीदीविः, पुं, (किकी इत्यव्यक्तशब्देन दीव्यति क्रीड़ति। निपातनात् दीर्घत्वे साधुः।) चाषपक्षी। इति शब्दमाला ॥

किखिः, स्त्री, (खदति हिनस्ति। खद हिंसायां निपातनात् साधुः।) अधुष्टगालः। इति हेमचन्द्रः ॥ ख्याँक्शेयालि इति भाषा ॥

किखिः, पुं, (किखिरिति कुत्सितशब्दं करोति यः।) कपिः। इति भूरिप्रयोगः ॥

किङ्करः, त्रि, (किञ्चित् करोति। दिवाविभेत्यत्र किं यत्तद्भ्यश्चित्यच्।) दासः। इत्यमरः। २। १०। १७ ॥ (यदुक्तं पुराणे।

"विप्रस्य किङ्करो भूपो वैश्योभूपस्य भूमिप!। सर्व्वेषां किङ्करः शूद्रो ब्राह्मणस्य विशेषतः" ॥)

किङ्किणी, स्त्री, (किमपि किञ्चिद् वा कणति। कण शब्दे + इन् + ङीप् च। एषोदरात् साधुः।) कण्ठाभरणविशेषः। घाघर इति भाषा। तत्पर्य्यायः। क्षुद्रघण्टिका २। इत्यमरः। २। ६। ११० ॥ कङ्किणी ३। इति भरतः ॥ किङ्किणिका ४ किङ्किणिः ५। इति केचित् ॥ क्षुद्रघण्टी ६ प्रतिसरा ७ किङ्किणीका ८ कङ्किणिका ९ क्षुद्रिका १०। इति शब्दरत्नावली ॥ घर्घरी ११। इति जटा-

धरः ॥ (यथा, महाभारते १३ । ५३ । ३१ ।
"किञ्जिल्कोत्तरनिर्घोषो युक्तस्तोरणकल्पनैः" ॥)
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

किञ्जिरं, क्ली, (किं कुत्सितं मदवारि किरति विक्षिपति । कृ + कः ।) गजकुम्भः । इति सारस्वतः ॥

किञ्जिरः, पुं, (किमपि अनिर्व्यचनीयं मधुरास्फुटं किरति रौति । किञ्चित् किरति क्षिपति चित्तं विरहिणां वा ।) कोकिलः । भ्रमरः । घोटकः । कामदेवः । इति सारस्वतः ॥

किञ्जिरा, स्त्री, (किञ्चित् कुत्सितं वा किरति शरीरात् निःसरति । किं + कृ + कः टाप् च ।) रक्तम् । इति सारस्वतः ॥

किञ्जिरातः, पुं, (किञ्जिरं रक्तवर्णत्वं अतति पुष्पकाले निरन्तरं प्राप्नोति । अत + अण् ।) अशोकवृक्षः । कामदेवः । शुकपक्षी । कोकिलः । इति सारस्वतः ॥ रक्तास्नानः । राङ्गा झाँटी इति भाषा । इति जटाधरः ॥ पुष्पवृक्षविशेषः । तत्पर्य्यायः । हेमगौरः २ पीतकः ३ पीतभद्रकः ४ विप्रलोभी ५ पीतास्नानः ६ षट्पदानन्दः ७ । अस्य गुणाः । कषायत्वम् । उष्णत्वम् । तिक्तत्वम् । अग्निदीपनत्वम् । कफवायुकण्डूशोथरक्तव्रणदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"किञ्जिरातो हेमगौरः पीतकः पीतभद्रकः ।
किञ्जिरातो हिमस्तिक्तः कषायश्च हरेदसौ ॥
कफपित्तपिपासास्रदाहशोषवमिक्रिमीन्" ॥
इति भावप्रकाशः ॥

किञ्जिरालः, पुं, (किञ्जिराय रक्तत्वाय अलति । पर्य्याप्नोति । अल + अच् । किञ्जिरेण रक्तत्वेनालति वा । वर्ब्बूरवृक्षः । इति वैद्यकम् ॥

किञ्जिरी, [न्] पुं, (किञ्जिरं रक्तवर्णफलमस्त्यस्मिन् अस्य वा । किञ्जिर + इनिः ।) विकङ्कतवृक्षः । इति जटाधरः ॥ वँइचि इति भाषा ॥ (विकङ्कतशब्देऽस्या गुणादिकं बोद्धव्यम् ॥)

किञ्च, व्य, (किम् च, च च । द्वन्द्वसमासः ।) आरम्भः । साकल्यम् । इति मेदिनी ॥ अवान्तरम् । इति जटाधरः ॥

किञ्चन, व्य, (किम् च चन च । मुग्धबोधमते तु "किमः क्षेपान्ताव् चित् चनौ" । इति चनप्रत्ययः ।) असाकल्यम् । अकार्त्स्न्यम् । इत्यमरः । ३ । ४ । ३ ॥

किञ्चनः, पुं, (किम् + चन् + अच् ।) हस्तिकर्णपलाशः । इति शब्दरत्नावली ॥

किञ्चित् व्य, (किम् च चित् च प्रागिनिमते पदद्वयम् । मुग्धबोधमते तु "किमः क्षेपान्ताव् चित् चनौ" । इति चित्प्रत्ययः ।) अल्पम् । तत्पर्य्यायः । ईषत् २ मनाक् ३ । असाकल्यम् । यथा । असाकल्ये तु चिच्चन । इत्यमरः । ३ । ४ । ३ ॥
(यथा विवेकचूडामणौ ११ ।
"चित्तस्य शुद्धये कर्म्म न तु वस्तूपलब्धये ।
वस्तुसिद्धिर्विचारेण न किञ्चित् कर्म्मकोटिभिः" ॥)

किञ्चिलिकः, पुं, (किञ्चित् चुलुम्पति । चुलुम्प इति सौत्रधातुः । डुः संज्ञायां कन् । पृषोदरात् उभयत्र उस्याने इत्वम् ।) किञ्चुलुकः । इत्यमरटीका ॥

किञ्चुलुकः, पुं, (किञ्चित् चुलुम्पति । चुलुम्प् + डुः + संज्ञायां कन् ।) कीटविशेषः । केँचो इति भाषा । तत्पर्य्यायः । महीलता २ गण्डूपदः ३ । इत्यमरः । १ । १० । २२ । ("वाह्या यूकाः प्रसिद्धाः स्युः किञ्चुलूकास्त्वभ्यन्तराः" ॥ इति हारीते चिकित्सितस्थाने ५ अध्याये ॥)

किञ्जं, क्ली, (किञ्चिज्जलं यत्र । पृषोदरादित्वात् जलोपे साधुः ।) किञ्जल्कम् । इति राजनिर्घण्टः ॥

किञ्जल्कः, पुं, (किञ्चित् जलं अत्र ।) किञ्जल्कः । इति शब्दरत्नावली ॥

किञ्जल्कं, क्ली, (किञ्चित् जलति । जल् अपवारणे + बाहुलकात् कः ।) नागकेशरपुष्पम् । पद्माभ्यन्तरस्थं केशाकारं करहाटकवेष्टनम् । केसर इति ख्यातम् । (यथा, रघुः १५ । ५२ ।
"स तद्वक्त्रं हिमक्लिष्टकिञ्जल्कमिव पङ्कजम् ।
ज्योतिष्कणाहतप्रभ्रु कणठनालादपातयत्" ॥)
तत्पर्य्यायः । मकरन्दम् २ केशरम् ३ पद्मकेशरम् ४ किञ्जम् ५ पीतपरागम् ६ तुङ्गम् ७ चाम्पेयकम् ८ । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कटुत्वम् । आस्यव्रणापहत्वम् । शिश्निरत्वम् । रुच्यत्वम् । पित्तदाहादिनाशित्वञ्च । इति राजनिर्घण्टः ।

किञ्जल्कः, पुं, (किम् + जल + बाहुलकात् कः ।) केशरः । इत्यमरः । १ । १० । ४७ ॥ पद्मकेशरः । तत्पर्य्यायगुणाः ।
"किञ्जल्कः केशरः प्रोक्तश्चाम्पेयश्चापि स स्मृतः ।
किञ्जल्कः शीतलो रूक्षः कषायोग्राहकोऽपि सः ॥
कफपित्तदाहादहरक्तार्शोविषशोथजित्" ।
इति भावप्रकाशः । (वैद्यचक्रपाणिसंग्रहे रक्तपित्ताधिकारे दूर्व्वादितैले व्यवहारो यथा,—
"दूर्व्वासोत्पलकिञ्जल्कमञ्जिष्ठासैलवालुकाः" ॥)

किट गतौ । भयभीषयोः । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं अकच्च-सेट् ।) भीषा खतो भयोत्पादना । केटति जनो व्याघ्रो जनं भीषयतीत्यर्थः । इति दुर्गादासः ॥

किटिः, पुं, (केटति शब्दं प्रति वेगेन गच्छति मलादीनुद्दिश्य गच्छति वा । किट्-गतौ इन् इगुपधात् कित् च ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

किटिभः, पुं, (किटिरिव भाति । भा + कः ।) केशकीटः । इति हेमचन्द्रः । उकुण इति भाषा ॥

किट्ट, क्ली, (केटति लोहादिधात्ववयवात् निर्गच्छतीति । गत्यर्थेतिक्तः । आगमशास्त्रस्यानित्यत्वात् नेट् ।) मलः । इत्यमरः । ६ । २ । ६५ ॥
(यदुक्तं चिन्तामणौ ।
"ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते ।
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्" ॥
यस्य कस्यापि असारांशे । यथा,—)
"आहारस्य रसः सारः सारहीनो मलद्रवः ।
शिराभिस्तज्जलं नीतं वस्तिं मूत्रत्वमाप्नुयात् ॥
श्लेष्मं किट्टञ्च यत्तस्य तत्पुरीषं निगद्यते" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

किट्टवर्ज्जितं, क्ली, (किट्टेन मलेन वर्ज्जितम् ।) शुक्रम् । इति हेमचन्द्रः ॥

किट्टालः, पुं, (किट्टेन मलेन अलति पर्य्याप्नोति । अल + अच् ।) ताम्रकलसः । लोहगूथकम् इति मेदिनी ॥

किणः, पुं, (कण् गतौ + अच् । पृषोदरादित्वात् अत इत्वम् ।) मांसग्रन्थिः । निर्घर्षणजव्रणचिह्नम् । इति जिह्वादिसंग्रहे अमरभरतौ । कड़ा इति भाषा ॥ (यथा, रघुवंशे । १६ । ८४ ।
"तदेतदाजानुविलम्बिना ते
व्यायामरेखाकिणलाञ्छनेन ।
भुजेन रत्नापरिघेण भूमे-
रर्द्धं तु योगं पुनरंसलेन" ॥
यथा च—वाभटे उत्तरस्थाने ३७ अध्याये ॥
"राजकोषातकी मूलं किणो वा मथितोद्भवः" ॥)
घुणः । इति हारावली ॥

किणिः, स्त्री, (किणाय तन्निवृत्तये प्रभवति । बाहुलकात् इन् ।) अपामार्गः । इति शब्दरत्नावली । (अपामार्गशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

किणिही, स्त्री, (किणाः अस्त्यस्मिन् अस्य वा इति इनिः । किणिनो व्रणान् हन्ति । हन् + डः गौरादित्वात् ङीष् ।) अपामार्गवृक्षः । इत्यमरः । २ । ४ । ८६ । (यत्रास्य व्यवहारस्तद्यथा,—
"रसं शिरीषा किणिही पारिभद्रककेम्बुकात्" ॥
इति वाभटे चिकित्सास्थाने २१ अध्याये ॥
अस्याः पर्य्यायो यथा,—
"अपामार्गस्तु शिखरी ह्यधःशल्यो मयूरकः ।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

किण्वं, क्ली, (कण् + "उल्यादयश्च" । उणां ४ । ९५ ।
इति साधुः । यद्वा "अप्रूपुषि खटीति" । उणां १ । १५१ । इति क्वन् बाहुलवचनादित्वम् ।) सुराबीजम् । (यथा, मनुः । ८ । ३२६ ।
"सूचकार्पासकिण्वानां गोमयस्य गुड़स्य च" ॥)
पापम् । इति मेदिनी ॥

किण्वः, पुं, क्ली, (कण् + "अप्रूपुषीति" उणां १ । १५१ । इति क्वन् बाहुलवचनादित्वम् ।) सुराबीजम् । इति वाचस्पतिरित्यमरटीकायां भरतः ॥

कित संज्ञाने । इच्छायां । वासे । आरोग्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकच्च-सेट् ।) विचिकित्सति मनः सञ्जेते इत्यर्थः । आरोग्ये चिकित्सत्यातुरं वैद्यः । इच्छानिवासयोस्तु केततीति वोपदेवः ॥ तत्र तिवादयो न प्रयुज्यन्ते । इति रमानाथः ॥ इति न वनितामेतां हन्तुं मनो विचिकित्सते । इति तु व्यन्तभूतज्ञार्थतया कर्म्मकर्त्तरि सनश्चत्यग्रश्चत्यादिना यक्निषेधे सिद्धम् । इति दुर्गादासः ॥

कित र लि मतौ । इति कविकल्पद्रुमः ॥ (क्र्यादिपरं-सकं-सेट् ।) र वैदिकः । लि चिकेत्ति । इति दुर्गादासः ॥

कितवः, पुं, (कितं वायति कितेन वाति वा । कित + वा + कः ।) अक्षदेवी । (यथा, मनुः । ३ । १५१ ।
"जटिलञ्चानधीयानं दुर्ब्बलं कितवन्तथा ।

याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत्"।) धुस्तूरः। इत्यमरः। २। ४। ७७॥ ("कितवाङ्गयोर्वीजं नागरं सहरीतकम्। चूर्णीकृत्यार्द्रकरसैः" ॥ इति वैद्यकक्रियासंग्रहे कासाधिकारे शृङ्गभरीगुड़िकायाम्॥) मत्तः। वञ्चकः। इति मेदिनी॥ (यथा, भागवते। ८। २०। ३। "स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजम्। प्रतिश्रुत्य ददामीति प्राक्फादिः कितवो यथा" ॥ धूर्त्तः। यथा, आर्य्यासप्तशती ३३। "अस्थिररागः कितवो मानी चपलो विदूषकस्त्वमसि। मम सख्याः पतसि करे पश्यामि यथा ऋजुर्भवसि"॥) खलः। इति शब्दरत्नावली॥ (यथा महाभारते। १। १। १५६। "यदाश्रौषं वासस्तं तत्र राज्ञि समाक्षिपत् कितवो मन्दबुद्धिः" ॥) रोचननामगन्धद्रव्यम्। इति जटाधरः राजनिर्घण्टश्च॥

किन्नुः, पुं, (किं कुत्सिता तनुरस्य।) अश्वपादः। इति चिकाखड़ग्रेषः। माकड़सा इति भाषा॥

किन्तमाम्, व्य, (कुत्सितार्थे किम्। बहूनां मध्ये एकस्य अतिशये तमप्। "किमेत्तिङव्ययेति"। ५। ४। ११। इति आमुः।) एतैकतमम्। इति शब्दरत्नावली॥ इदमेषामतिशयेन किम्। इति व्याकरणम्॥

किन्तरां, व्य, (द्वयोर्मध्ये एकस्यातिशये तरप् आमुश्च।) एतैकतरम्। इति शब्दरत्नावली॥ इदमनयोरतिशयेन किम्। किम् शब्दोऽत्र कुत्सार्थः। अतिकुत्सितं रूपमित्यर्थः। इति मुग्धबोधटीकायां दुर्गादासः॥

किन्तु, व्य, (किं च तु च इति इन्द्रसमासः।) किम्पुनः। प्रागुक्तविरुद्धार्थम्। यथा,—
"भृत्याभावे भवति मरणं किन्तु सम्भावितानाम्"। इति प्राचीनाः॥

किन्तुघ्नः, पुं, ववाद्येकादशकरणान्तर्गतशेषकरणम्। इति दीपिका॥ तत्र जातफलम्।
"मिथामित्रे नैव किञ्चित् विशेषो धर्म्माधर्म्मे तुल्यता मानवस्य। स्तोत्रे वादे सर्व्वदा प्रीतियुक्तः किन्तुघ्नाख्ये यस्य नूनं जनिः स्यात्"॥
इति कोष्ठीप्रदीपः॥

किन्धी, [न्] पुं, (किं कुत्सिता धीरस्यस्य। इनिः।) अश्वः। इति चिकाखड़ग्रेषः॥

किन्नरः, पुं स्त्री, (किं कुत्सितो नरः। अश्वमुखत्वात्तथात्वम्।) खनामख्यातदेवयोनिः। स तु अश्वमुखत्वात् कुत्सितनरः स्वर्गगायकः तुम्बुरुप्रभृतिः। तत्पर्य्यायः। किम्पुरुषः २ तुरङ्गवदनः ३ मयुः ४। इत्यमरः। १। १। ७४॥ अश्वमुखः ५ गीतमोदी ६ हरिणान्तर्त्तकः ७। इति शब्दरत्नावली॥ (यथा,—
"राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा। यक्षाश्च मनुजश्रेष्ठ! पुत्रास्तस्य च धीमतः" ॥ इति महाभाते। १। ६६। ७॥)
अर्हदुपासकविशेषः॥ इति हेमचन्द्रः॥

किन्नरेशः, पुं, (किन्नराणां ईशो राजा।) कुबेरः। इत्यमरः। १। १। ७२॥

किन्नरेश्वरः, पुं, (किन्नराणां ईश्वरः।) कुबेरः। इति हलायुधः॥

किम्, व्य, (किं च नु च। इति इन्द्रसमासः।) प्रश्नः॥ (यथा ऋग्वेदे रामायणे। २। ७४। ३। "किन्न तेऽदोषयद्राजा रामो वा भद्रधार्म्मिकः। ययोर्भ्रत्युर्विवासश्च त्वत्कृते तुल्यमागतौ" ॥) वितर्कः। (यथा शकुन्तलायां १ अङ्के। "किन्नु खलु यथा वयमस्यामेवमियमस्मान् प्रति स्यात्" ॥) स्थानम्। सादृश्यम्। करणम्। इति जटाधरः॥

किम्, व्य, (कु + बाहुलकात् डिम्।) कुत्सा। (यथा गोः रामायणे। १। २२। २१। "देवदानवगन्धर्व्वा यक्षाः पतगपन्नगाः। न शक्ता रावणं सोढुं किं पुनर्मानवा युधि" ॥) वितर्कः। (यथा, हितोपदेशे। "किमनुरक्तो विरक्तो वा मयि स्वामीति शास्यामि तावत्" ॥) निषेधः। प्रश्नः। इतिमेदिनी॥

किम्, चि, क्षेपः। वितर्कः। निन्दा। परिप्रश्नः। इति मेदिनी॥ (यथा, मनुः ११। १६५। "प्रणतं परिपृच्छेयुः साम्यं सौम्येच्छसीति किम्"॥ किमपि अनिर्व्वचनीयम्। यथा, विष्णुपुराणे १। १६। ७५।
"तस्माच्च सूक्ष्मादिविशेषाणां अगोचरे यत् परमात्मरूपम्। किमप्यचिन्त्यं तव रूपमस्ति तस्मै नमस्ते पुरुषोत्तमाय"॥)

किमिच्छकः, पुं, (किमिच्छसीति प्रश्नेन दानार्थं कायति शब्दायतेऽत्र। निपातनात् साधुः।) व्रतविशेषः। तद्विवरणं यथा,—
मार्कण्डेय उवाच।
"अथ साऽवोचितो माता वीरा वीरप्रजावती। पुण्येऽहनि समाहूय प्राह पुत्रमवीचितम्॥ पुत्राहमभ्यनुज्ञाता तव पित्रा महात्मना। उपवासं करिष्यामि दुष्करोऽयं किमिच्छकः॥ स चायत्तस्तव पितुस्त्वया साधो मयापि वा। प्रतिज्ञाते त्वया पुत्र! ततस्तत्र यताम्यहम्॥ द्रव्यमाढ्यं महाकोषात् तव दास्याम्यहं पितुः। धनं ते पितुरायत्तमनुज्ञातासि तेन च॥ क्लेशसाध्यो ममायत्तः स हि श्रेयो भविष्यति। साध्यो भविष्यो यदि ते कश्चिद्बलपराक्रमैः॥ स ते साध्योऽन्यथा वापि दुःखसाध्यो भविष्यति। तत्त्वं प्रतिज्ञां कुरुषे यदि पुत्रात्र वै व्रते॥ तदेतदहमारप्ये कथयतां यन्मतं तव।
अवीचिरुवाच।
वित्तं मे पितुरायत्तं ममेशत्वं न तत्र वै। यन्मच्छरीरनिष्पाद्यं तत् करिष्ये त्वयोदितम्॥ किमिच्छकं व्रतं मातर्निश्चित्य भव निर्व्यथा। राज्ञा पित्राभ्यनुज्ञातं यदि वित्तेश्वरेण मे॥

मार्कण्डेय उवाच।
ततः सा राजमहिषी तद्व्रतं समुपोषिता। यथोक्तं साऽकरोत् पूजां राजराजस्य संयता॥ निधीनामप्यशेषाणां निधिपालबलस्य च। लक्ष्म्याश्च परया भक्त्या यतवाक्कायमानसा॥ विविक्ते तु गृहान्तःस्थः सोऽथ राजा करन्धमः। आसीन उक्तः सचिवैर्नीतिशास्त्रविशारदैः॥
सचिवा ऊचुः।
राजन् वयःपरिणतं तवैवं शासतो महीम्। एकस्ते तनयोऽवीचित् व्यक्तदारपरिग्रहः॥ अपुत्रः स वने निष्ठां यदा भूप! गमिष्यति। तदारिपक्षं पृथिवी निश्चितं तव यास्यति॥ वंशस्तवयस्ते भविता पिण्डपिण्डोदकक्रियाः। एतन्महत्ते विवरं क्रिया हान्या भविष्यति॥ तस्मात् कुरु तथा भूप! यथा ते तनयः पुनः। करोति सततं बुद्धिं पितॄणामुपकारिणीम्॥
श्रीमार्कण्डेय उवाच।
एतस्मिन्नन्तरे शब्दं शुश्राव जगतीपतिः। पुरोहितस्य वीराया गदतोऽर्धिजनं प्रति॥ कः किमिच्छति दुःसाध्यं कस्य किं साध्यतामिति। करन्धमस्य महिषी किमिच्छकमुपोषिता। राजपुत्रोऽप्यवीचित्तु श्रुत्वा पौरोहितं वचः। प्रत्युवाचार्धिनः सर्व्वान् राजद्वारमुपागतान्॥ मया साध्यं शरीरेण यस्य किञ्चित् ब्रवीतु सः। मम माता महाभागा किमिच्छकमुपोषिता॥ गृह्णन्तु मेऽर्थिनः सर्व्वे प्रतिज्ञातं मयाच्च वः। किमिच्छय ददाम्येष क्रियमाणे किमिच्छके॥
मार्कण्डेय उवाच।
ततो राजा निशम्यैतत् वाक्यं पुत्रमुखाच्युतम्। समुपेत्याब्रवीत् पुत्रमहमर्थी प्रयच्छ मे॥
अवीचिरुवाच।
दातव्यं यन्मया तात! भवते तद्ब्रवीहि माम्। कर्त्तव्यं दुष्करं वा ते साध्यं दुःसाध्यमेव च॥
राजोवाच।
यदि सत्यप्रतिज्ञत्वं ददासि च किमिच्छकम्। पौत्रस्य दर्शय मुखं ममोत्सङ्गगतस्य तत्॥
अवीचिरुवाच।
अहं तवैव तनयो ब्रह्मचर्य्यञ्च मे नृप!। न मे पुत्रोऽस्ति पौत्रस्य दर्शयामि कथं मुखम्॥
राजोवाच।
पापाय ब्रह्मचर्य्यं ते यदिदं धार्य्यते त्वया। तस्मात्त्वं मोचयात्मानं मम पौत्रं प्रदर्शय॥
अवीचिरुवाच।
विरमास्मान्महाराज! यदन्यत्तत् समादिश। वैराग्येण मया त्यक्तः स्त्रीसम्भोगस्तथा रसः॥
राजोवाच।
बहुभिर्युध्यमानस्य न दृष्टो वैरिभिर्जयः। तत्रापि यदि वैराग्यमुपैषि तदपण्डितः॥ किं वा नो बहुनोक्तेन ब्रह्मचर्य्यं परित्यज। मातुस्त्वमिच्छया वत्स! पौत्रस्य मम दर्शय॥
मार्कण्डेय उवाच।
यदा स बहुशस्तेन प्रोक्तः पुत्रेण पार्थिवः।

नान्यत् प्रार्थयते किञ्चित् तदा पुत्रोऽब्रीत् पुनः ॥
दत्त्वा किमिच्छकं तुभ्यं प्राप्तोऽहं तात! सङ्कटम् ।
तत् करिष्यामि निर्लज्जोभूयो दारपरिग्रहम् ॥
स्त्रिशः समस्तं विजितः पतितो धरणीतले ।
स्त्रीपतिर्भविता भूयस्तातैतदतिदुष्करम् ॥
तथापि किं करोम्येष सत्यपाशवशङ्गतः ।
करिष्यामि यथात्थ त्वं भुज्यतां निजशासनम्" ॥
इति श्रीमार्कण्डेयपुराणे अवीक्षिच्चरितनामाध्यायः ॥

किमु, व्य, (किम् च उच इति द्वन्द्वसमासः ।) सम्भावना । विमर्षः । इति मेदिनी ॥ (यथा,—
"निर्व्वाणदीपे किमुतैलदानं" इति शिशुपालवधे ॥)

किमुत, व्य, (किम् च उत् च इति द्वन्द्वसमासः ।) प्रश्नः । वितर्कः । विकल्पः । अतिशयः । इति मेदिनी ॥

किम्पचः, त्रि, (किं कुत्सितं अतिथ्यादिभ्योऽपदाय केवलं स्वोदरमात्रपूरणायैव पचतीति । किम् + पच् + अच् ।) किम्पचानः । इत्यमरटीकायां रायमुकुटः ॥

किम्पचानः, त्रि, (किं कुत्सितं कस्मैचिदपि न दत्त्वा केवलं आत्मार्थं पचतीति । पच् + आनच् ।) कृपणः । इत्यमरः । ३ । १ । ३८ ॥

किम्पाकः, त्रि, (किं कथमपि पाकः शिक्षाप्रकारो यस्य ।) माढशासितः । इति जटाधरः ॥

किम्पाकः, पुं, (कुत्सितः पाकः परिणामो यस्य ।) महाकाललता । इति रत्नमाला । माकाच इति भाषा ॥ (यथा, हैः रामायणे २ । ६६ । ६ ।
"न लुब्धो बुध्यते दोषान् किम्पाकमिव भक्षयन्" ॥
महाकालशब्देऽस्य विवरणं बोद्धव्यम् ॥)

किम्पुरुषः, पुं, (कुत्सितः पुरुषः ।) किन्नरः । इत्यमरः । १ । १ । ७४ । (यथा, कुमारे ३ । ३८ ।
"पुण्यासवाघूर्णितनेत्रशोभि
प्रियासुखं किम्पुरुषश्चुचुम्बे" ॥)
लोकभेदः । इति मेदिनी ॥(अग्निध्रस्य नवपुत्राणामेकः । यथा, विष्णुपुराणे २ । १ । १६, १९ ।
"जम्बुद्वीपेश्वरो यस्तु आग्नीध्रो मुनिसत्तम! ।
तस्य पुत्रा बभूवुस्ते प्रजापतिसमा नव ॥
नाभिः किम्पुरुषश्चैव हरिवर्षः इलावृतः" ॥
"हेमकूटं तथा वर्षं ददौ किम्पुरुषाय सः" ॥
किंपुरुष इति संज्ञा यस्य वर्षस्य ।) जम्बूद्वीपस्य नवखण्डान्तर्गतं हिमाचलहेमकूटयोर्मध्यवर्त्ति वर्षम् । इति श्रीभागवतम् । कुत्सितपुरुषः । इति व्युत्पत्तिलभ्योऽर्थः ॥

किम्पुरुषेश्वरः, पुं, (किम्पुरुषाणां ईश्वरः स्वामी राजा वा ।) कुबेरः । इति हेमचन्द्रः ॥

किम्पुरुषं, क्ली, (किम्पुरुष इत्याख्या यस्य वर्षस्य ।) किम्पुरुषवर्षम् । इति त्रिकाण्डशेषः ॥

किम्भरा, स्त्री, (किञ्चित् बिभर्त्ति । किम् + भृ + अच् ।) नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कियत्, त्रि, किम्परिमाणमस्य ("किमिदंभ्यां वो घः" । ५ । २ । ४० । इति वतुप् । किमः कादेशः । वस्य घः ।) कियत् परिमाणम् ॥ कतो इति भाषा ॥

("गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा" ॥
इति साहित्यदर्पणम् ॥)

कियदेतिका, स्त्री, उत्साहः । उद्योगः । इति हेमचन्द्रः ॥

कियाहः, पुं, (कियान् रक्तवर्णः हयः । एषोदरादित्वात् निपातनात् साधुः ।) रक्तवर्णघोटकः । इति हेमचन्द्रः ॥

किरः, पुं, (किरति विक्षिपति मलोपलक्षितस्थलम् । कॄ + कः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

किरकः, पुं, (किरति लिखतीति । कॄ + ण्वुल् ।) लेखकः । इति त्रिकाण्डशेषः ॥

किरणः, पुं, (कीर्य्यन्ते विक्षिप्यन्ते रश्मयः अस्मात् "कॄपॄवृजिमन्दिनिधाञः क्युः" । उणां २ । ८१ । इति क्युः ।) सूर्य्यः । इति हेमचन्द्रः ॥ (कीर्य्यते परितः क्षिप्यतेऽसौ । कॄ + कर्मणि क्युः ।) सूर्य्यरश्मिरिति भगीरथमाधवौ ॥ चन्द्रसूर्य्ययोरश्मिरिति रायमुकुटः ॥ रत्नरश्मौ गभस्तिशब्दप्रयोगात् सामान्यरश्मिः । तथा च भट्टिः । १ । ६ ।
"ऊर्द्धस्फुरद्रत्नगभस्तिभिर्या" । इति मल्लरी ।
इत्यमरटीकासारसुन्दरी ॥ तत्पर्य्यायः । अंशुः २ मयूखः ३ अंशुः ४ गभस्तिः ५ हृणिः ६ हृणिः ७ भानुः ८ करः ९ मरीचिः १० दीधितिः ११ । इत्यमरः । १ । ४ । ३३ ॥ त्विट् १२ द्युतिः १३ आभा १४ प्रभा १५ विभा १६ रुक् १७ रुचिः १८ भाः १९ रुविः २० दीप्तिः २१ रश्मिः २२ अभीषुः २३ महः २४ ज्योतिः २५ सहः २६ रोचिः २७ शोचिः २८ त्विषा २९ दृष्टिः ३० प्रकाशः ३१ आतपः ३२ द्योतः ३३ । इति शब्दरत्नावली ॥ पादः ३४ आलोकः ३५ वसुः ३६ ऋषिः ३७ भासः ३८ घर्म्मः ३९ लोकः ४० अर्चिः ४१ भासः ४२ वीचिः ४३ हेतिः ४४ धाम ४५ वर्चः ४६ सुग्म ४७ तेजः ४८ ओजः ४९ । इति जटाधरः ॥ (यथा, रघुवंशे ५ । ७४ ।
"भवति विरलभक्तिर्च्छानपुष्योपहारः
स्वकिरणपरिवेषोद्भेदशून्याः प्रदोषाः" ॥)

किरणमाली, [न्] पुं, (किरणानां माला अस्त्यस्य । किरणमाला + इनिः ।) सूर्य्यः । इति हारावली ॥

किरातः, पुं, (किरं शूकरादिकं अतति सततं अटतीति । अत + अण् । यद्वा किरं शूकरादिकं अतति हिनस्तीति । अच् ।) म्लेच्छभेदः ॥ (निषादः । यथा, किराते १२ । ५५ ।
"कच्छान्ते सुरसरितो निधाय सेना-
मन्वीतः स कतिपयैः किरातवर्य्यैः" ॥)
भूनिम्बः । (यथा, शार्ङ्गधरे मध्यखण्डे २ अः । १७ श्लोके ।
"पर्पटाम्बुदामृताविश्वकिरातैः साधितं जलम् ।
पञ्चभद्रमिदं ज्ञेयं वातपित्तज्वरापहम्" ॥)
अल्पतनुः । इति मेदिनी ॥ घोटकरक्तकः । इति सारस्वतः ॥

किरातकः, पुं, (किरात एव । स्वार्थे कन् ।) भूनिम्बः इति राजनिर्घण्टः ॥

किराततिक्तः, पुं, (किरातः भूनिम्बस्तद्वत् तिक्तः ।) रक्तविशेषः । चिरायता इति भाषा । तत्पर्य्यायः । भूनिम्बः २ अनार्य्यतिक्तः ३ । इत्यमरः । २ । ४ । १४३ ॥ कैरातम् ४ काण्डतिक्तकः ५ । इति रत्नमाला ॥ किरातकः ६ इति जटाधरः ॥ चिरतिक्तः ७ चिरातिक्तः ८ तिक्तकः ९ सुतिक्तकः १० । इति शब्दरत्नावली ॥ कटुतिक्तः ११ रामसेनकः १२ ॥ अस्य गुणाः । वायुवृद्धिकारित्वम् । रूक्षत्वम् । कफपित्तज्वरनाशित्वञ्च । इति राजवल्लभः ॥
"किरातकोऽन्यो नैपालः सार्द्धतिक्तो ज्वरान्तकः ।
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ॥
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ।
काश्यशोथव्रणकृमिज्वरव्रणकृमिप्रणुत्" ॥
इति भावप्रकाशः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ भूनिम्बशब्दे द्रष्टव्यौ ॥
("किराततिक्तममृतां ब्राह्मामामलकीं शठीं ।
निम्बाद्यं पित्तानिलजे क्वाथन्तं सगुडं पिबेत् ॥
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ।)

किरातादी, [न्] पुं, (किरातान् निषादान् अत्तीति । अद भोजने + णिनिः ।) गरुड़ः । इति शब्दरत्नावली ॥ (अस्य विवरणं यथा महाभारते १ । २८ अध्याये ।
"इत्युक्तो गरुड़ः सर्व्वैस्ततो मातरमब्रवीत् ।
गच्छाम्यमृतमाहर्त्तुं भक्ष्यमिच्छामि वेदितुम् ॥
विनतोवाच ।
समुद्रकुक्ष्यावेकान्ते निषादालयमुत्तमम् ।
निषादानां सहस्राणि तान् भुक्त्वाऽमृतमानय ।
नच ते ब्राह्मणं हन्तुं कार्य्या बुद्धिः कथञ्चन" ॥)

किरातिः, स्त्री, (किरेण शूकरेण समन्तात् जलक्षेपेण अतति गच्छतीति । अत + इन् ।) गङ्गा । इति जटाधरः ॥

किरातिनी, स्त्री, (किरातदेश उत्पत्तिस्थानत्वेनास्त्यस्याः । इनिः । ङीप् ।) जटामांसी । इति शब्दरत्नावली ॥ (जटामांसीशब्देऽस्या गुणादिविषयो ज्ञेयः ॥)

किराती, स्त्री, (किराति + वा ङीष् ।) दुर्गा । गङ्गा कुट्टिनी । इति मेदिनी ॥ स्वर्गगङ्गा । इति शब्दमाला ॥

किरिः, पुं, (किरति समस्तभूमिम् । "कॄगॄशॄपॄकुटिभिदिच्छिदिभ्यः" । उणां ४ । १४२ । इति इप्रत्ययः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

किरिटि, क्ली, (किरिणा शूकरेण टल्यते विक्षिप्यते । टल विक्षेपे + डिः ।) छिन्नालपलम् । इति त्रिकाण्डशेषः ॥

किरीटः, पुं क्ली, (किरति कीर्य्यतेऽनेन वा । "कॄतॄकमिभ्यः कीटन्" । उणां ४ । १८४ इति कीटन् ।) मुकुटः । इत्यमरः । २ । ६ । १०२ ॥

किरीटी, [न्] पुं, (किरीटोऽस्त्यस्य । किरीट + इनिः ।) अर्জ্জুनः । इति त्रिकाण्डशेषः । (यथा, महाभारते । ४ । ४२ । १७ ।
"पुरा शक्रेण मे दत्तं युध्यतो दानवर्षभैः ।
किरीटं मूर्द्धि सूर्य्याभं तेनाऽऽर्জ্জुनो किरीटिनम्" ॥)
किरीटयुक्ते त्रि । (यथा भगवद्गीतायां ११ । १७ ।
"किरीटिनं गदिनं चक्रिणञ्च तेजोराशिं सर्व्वतो

दीप्तिमन्तम्। पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्-
ज्वालानलार्कद्युतिमप्रमेयम्" ॥)

किम्मी, स्त्री, (कुत्सितं मीयते परिच्छिद्यते अनेन इति कुत्सा + कि + निपातनात् मुट्। ततो ङीप्।) पलालः। गृहम्। स्वर्णपुत्तलिका। इति मेदिनी ॥ लोहपुत्तलिका। इति विश्वः ॥

किम्मीरः, पुं, (कुत्सितं मीरयति हिनस्ति इति कुत्सा + गम्भीरादित्वात् ईरन् निपातनात् साधुः।) नागरङ्गवृक्षः। राक्षसविशेषः। (यथा महाभारते ३। ११। २२।
"प्रत्युवाचाथ तद्रक्षो धर्म्मराजं युधिष्ठिरम्।
अहं वकस्य वै भ्राता किम्मीर इति विश्रुतः" ॥)
कर्व्वूरवर्णः। इति मेदिनी ॥ तद्वर्णयुक्ते त्रि। इत्यमरः। १। ५। १७ ॥

किम्मीरजित्, पुं, (किम्मीरं जितवान्। जि + भूते क्विप्।) भीमसेनः। इति त्रिकाण्डशेषः ॥ (किम्मीरवधकथा महाभारते ३। ११ अध्याये उक्ता। तद्यथा,—
"प्रत्युवाचाथ तद्रक्षो धर्म्मराजं युधिष्ठिरम्।
अहं वकस्य वै भ्राता किम्मीर इति विश्रुतः ॥
वनेऽस्मिन् काम्यके शून्ये निवसामि गतज्वरः।
युधि निर्जित्य पुरुषानाहारं नित्यमाचरन् ॥
के यूयमभिसंप्राप्ता भक्ष्यभूता ममान्तिकम्।
युधि निर्जित्य वः सर्व्वान् भक्षयिष्ये गतज्वरः" ॥
वैशम्पायन उवाच।
"युधिष्ठिरस्तु तच्छ्रुत्वा वचस्तस्य दुरात्मनः।
आचचक्षे ततः सर्व्वं गोत्रनामादि भारत!" ॥
"किम्मीरस्त्वब्रवीदेनं दिष्ट्या देवैरिदं मम।
उपपादितमद्येह चिरकालान्मनोगतम् ॥
भीमसेनवधार्थं हि नित्यमभ्युद्यतायुधः।
चरामि पृथिवीं कृत्स्नां नैनञ्चासादयाम्यहम् ॥
सोऽयमासादितो दिष्ट्या भ्रातृहा काङ्क्षितस्त्वितम्।
अनेन हि मम भ्राता वको विनिहतः प्रियः ॥
वेचकीयस्य गेहे राजन्! ब्राह्मणच्छद्मरूपिणा।
विद्याबलमुपाश्रित्य न ह्यस्यस्यौरसं बलम्" ॥
"यदितेन पुरा मुक्तो भीमसेनो वकेन वै।
अद्येनं भक्षयिष्यामि पश्यतस्ते युधिष्ठिर!" ॥
"एवमुक्तस्तु धर्म्मात्मा सत्यसन्धो युधिष्ठिरः।
नैतदस्तीति संक्रुद्धो भर्त्सयामास राक्षसम् ॥
ततो भीमो महाबाहुरायुध्य तरसा द्रुमम्।
दण्डपाणिरिव क्रुद्धः समये प्रत्यधावत" ॥
"तावन्योन्यं समाश्लिष्य प्रकर्षन्तौ परस्परम्।
उभावपि चकाशेते प्रवृद्धौ दृषभाविव ॥
तयोरासीत्सुतुमुलः संप्रहारः सुदारुणः।
नखदंष्ट्रायुधवतोर्व्याघ्रयोरिव दीप्तयोः" ॥
"तयोर्भुजविनिष्पेषादुभयोर्बलिनोस्तदा।
शब्दः समभवद्घोरो वेणुस्फोटसमो युधि ॥
अथैनमाक्षिप्य बलाद्भ्रामयित्वा मुहुर्मुहुः।
धूनयामास वेगेन वायुश्चण्ड इव द्रुमम् ॥
स भीमेन परामृष्टो दुर्ब्बलो बलिना रणे।
व्यसृजत यथा प्राणं विचकर्ष च पाण्डवम् ॥
तत एनं परिश्रान्तमुपलक्ष्य वृकोदरः।
योक्त्रयामास बाहुभ्यां पशुं रसनया यथा ॥
विनदन्तं महानादं भिन्नभेरीस्वनं बली।
भ्रामयामास सुचिरं विष्फुरन्तमचेतनम् ॥
तं विसीदन्तमाज्ञाय राक्षसं पाण्डुनन्दनः।
प्रगृह्य तरसा दोर्भ्यां पशुमारममारयत् ॥
अथ जर्जरसर्व्वाङ्गं व्याविद्धनयनाम्बरम्।
भूतले भ्रामयामास वाक्यञ्चेदमुवाच ह ॥
हिडिम्बवकथोः पाप! न त्वमश्रुप्रमार्जनम्।
करिष्यसि गतस्यापि यमस्य सदनं प्रति ॥
इत्येवमुक्त्वा पुरुषप्रवीर-
स्तं राक्षसं क्रोधपरीतचेताः।
विसृज्य वस्त्राभरणं स्फुरन्त-
मुद्भ्रान्तचित्तं व्यसुमुत्ससर्ज" ॥ * ॥)

किम्मीरत्वक् [च्] स्त्री, (किम्मीरा चित्रा त्वक् यस्य।) नागरङ्गवृक्षः। इति त्रिकाण्डशेषः ॥ (नागरङ्गनागरङ्गशब्दयोरस्य गुणादयो बोध्याः ॥)

किम्मीरभित् [द्] पुं, (किम्मीरं राक्षसविशेषं भिन्नवान्। भिद् + क्विप् भूते।) भीमसेनः। इति भूरिप्रयोगः ॥ (अस्य विवरणं किम्मीरजित्-शब्दे द्रष्टव्यम् ॥)

किम्मीरसूदनः, पुं, (किम्मीरं सूदयति हन्तीति। सूद + णिच् + ल्युः। कर्त्तृविवक्षावशात् क्वचिद् भूतार्थे वा।) भीमसेनः। इति हेमचन्द्रः ॥ (अस्य विवरणं किम्मीरजित्-शब्दे द्रष्टव्यम् ॥)

किल क नुदौ। इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट्।) क केलयति। नुदिरिति शुद औण् प्रेरणे इत्यस्य औणादिककिप्रत्यये रूपम्। इति दुर्गादासः ॥

किल शृ शौल्ये। क्रीडे। इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सेट्।) शृ किलति प्रासादः शिशुर्वा। केलिता। इति दुर्गादासः ॥

किल, व्य, (किल + कः।) वार्त्ता। सम्भाव्यम्। इत्यमरः। ३। ३। २५३ ॥ निश्चयः। इति तट्टीकासारसुन्दरी ॥ (यथा शाकुन्तले १ अङ्के दुष्यन्तोक्तिः।
"इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति" ॥)
अनुनयार्थम् इति मेदिनी ॥

किलकिञ्चितं, क्ली, (किल अलीकेन किं ईषत् चितं रचितम्।) भावः। हर्षकारभावजा क्रिया। इति जटाधरः ॥ तस्य लक्षणम्।
यथा, अलङ्कारकौस्तुभे।
"गर्व्वाऽभिलाषरुदितस्मितासूयाभयक्रुधाम्।
सङ्करीकरणं यत् स्यादुच्यते किलकिञ्चितम्" ॥
(तथा च साहित्यदर्पणे ३। १०९।
"स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम्।
साङ्कर्य्यं किलकिञ्चितमभीष्टतमसङ्गमादिजाड्यार्त्ता" ॥
उदाहरणं तत्रैव यथा,—
"पाणिरोधमविरोधितवाञ्छं
भर्त्सनाञ्च मधुरस्मितगर्भाः।
कामिनः स्म कुरुते करभोरु
हारिसुष्करुदितञ्च सखेऽपि" ॥)

किलकिला, स्त्री, (किल + कः। प्रकारे वीप्सायां वा द्वित्वम्। स्त्रियां टाप्।) हर्षध्वनिः। किलकिल-शब्द इति यावत्। तत्पर्य्यायः। हर्षस्वनः २। इति त्रिकाण्डशेषः ॥
("आसीत् किलकिलाशब्दस्तस्मिन् गच्छति पार्थिवे"। इति महाभारते १। ६९। ६ ॥)

किलाटः, पुं, (क्षीरं विक्लृप्तिः। इति जटाधरः ॥ दधिकूर्चिकातक्रकूर्चिकयोः पिण्डः। अस्य गुणाः। शीतत्वम्। स्निग्धत्वम्। गुरुत्वम्। गौल्यत्वम्। हृद्यत्वम्। पित्तापहत्वञ्च। इति राजनिर्घण्टः ॥
("नष्टदुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटकः" ॥ इति भावप्रकाशः। तथा चरके सूत्रस्थाने। २७ अध्याये ॥
"पीयूषो मोरटश्चैव किलाटो विविधाश्च ये।
दीप्ताग्नीनामनिद्राणां सर्व्वे ते सुखप्रदाः ॥
गुरवस्तर्पणा हृद्या बृंहणाः पवनापहाः" ॥
अस्योत्पत्तिविवरणं यथा भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ किलाटकः गिजिरी इति लोके।
"अपक्वमेव यत्तप्तं क्षीरशाकं हि तत्पयः"।
क्षीरशाकं तुषिभरा इति लोके।
"दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सवाससा।
द्रवभावेन सहितं तक्रपिण्डः स उच्यते ॥
नष्टदुग्धं भवग्नीरं मोरटश्लेष्मलोऽब्रवीत्।
पेयूषश्च किलाटश्च क्षीरशाकं तथैव च ॥
तक्रपिण्डे इमे हृद्या बृंहणा बलवर्द्धनाः।
गुरवः श्लेष्मला हृद्या वातपित्तविनाशनाः ॥
दीप्ताग्नीनां विनिद्राणां विदधौ चाभिपूजिताः।
सुखशोषदवादाहरक्तपित्तज्वरप्रणुत्" ॥)

किलाटी, स्त्री, (किलाट + गौरादित्वात् ङीष्।) क्षीरविक्लृप्तिः। तत्पर्य्यायः। कूर्चिका २। इति हेमचन्द्रः ॥ (कूर्चिकाशब्देऽस्या गुणपर्य्याया ज्ञातव्याः ॥)

किलाटी, [न्] पुं, (किलतीति। किल + कः। अट + णिनिः। ततः। किलश्चासौ आटी चेति कर्म्मधारयः। यद्वा किलमटतीति।) वंशः। इति शब्दरत्नावली ॥ बाँश् इति भाषा ॥

किलासं, क्ली, (किलं वर्णं श्यस्यति क्षिपति विक्लृप्तिं करोति इति यावत्। किल + अस + "कर्म्मण्यण्" ३। २। १। इति अण्।) रोगविशेषः। कुष्ठी इति भाषा। तत्पर्य्यायः। सिध्मारः। इत्यमरः। २। ६। ५३ ॥ सिध्मम् ३। इति भरतः ॥ लक्ष्मपुष्पम् ४ लक्ष्मपुष्पी ५। इति हेमचन्द्रः ॥
("कुष्ठैकसम्भवं स्निग्धं किलासं दारुणञ्च तत्।
निर्दिष्टमपरिस्रावि चिधातूद्भवसंश्रयम् ॥
वातादुच्चारुणं पित्तात्ताम्रं कफसमुद्भवत्।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥
सकण्डु च क्रमाद्रक्तमांसमेदः सुचादिशेत्।
वर्णे नैवेदृगुभयं तच्छ्वेतोत्तरोत्तरम् ॥
अशुक्लरोमाण्डजमसंस्रष्टं मिथो गवम्।
अनग्निदग्धजं साध्यं स्निग्धं वर्ज्यमतोऽन्यथा" ॥

इति वाभटे निदानस्थाने १४ अध्याये ॥
अस्यौषधं यथा ॥
"कुष्ठं तमालपत्रं मरिचं समनःशिलं सकाशीशम्।
तैलेन युक्तमुचितं सप्ताहं भाजने ताम्रे ॥
तेनालिप्तं सिध्मं सप्ताहाद्येति तिष्ठतो घर्म्मे।
मासान्नवं किलासं स्नानं मुक्ता विशुद्धतनोः" ॥
इति सिध्मलेपः ॥*॥
"किलासहन्ता मूलान्यावल्गुजानि लाक्षा च।
गोपित्तमञ्जने दे पिप्पल्यः काललोहरजः" ॥
इति श्वित्रे प्रलेपः ॥
"दारुणं वारुणं श्वित्रं किलासं नामभिस्त्रिभिः।
विज्ञेयं त्रिविधं तच्च त्रिदोषं प्रायशश्च तत् ॥
दोषे रक्ताश्रिते रक्तं ताम्रं मांससमाश्रिते।
श्वेतं मेदः श्रिते श्वित्रं गुरुता चोत्तरोत्तरम्" ॥
असाध्यलक्षणमस्य यथा,—
"यत्परस्परतो भिन्नं बद्धं यद्रक्तलोमवत्।
यच्च वर्षगणोत्पन्नं तत्किलं नैव सिध्यति" ॥
अस्य निदानं यथा,—
"वचांस्यतथ्यानि हृतप्रभावो
निन्दा सुराणां गुरुधर्षणञ्च।
पापक्रिया पूर्व्वकृतञ्च कर्म्म
हेतुः किलासस्य विरोधिचान्नम्" ॥
इति चरके चिकित्सास्थाने ६ अध्याये ॥)

किलासघ्नः, पुं, (किलासं हन्तीति। हन्+टक्।) वृक्षविशेषः। काँकरोल इति भाषा। तत्पर्य्यायः। कर्कोटकः २ तिक्तपत्रः ३ सुगन्धकः४। इति हेमचन्द्रः ॥ (कर्कोटकशब्देऽस्य गुणपर्य्याया ज्ञेयाः ॥)

किलासी, [न्] त्रि, (किलासं अस्यास्तीति इनिः।) किलासरोगयुक्तः। तत्पर्य्यायः। सिध्मलः २। इत्यमरः। २। ६। ६१ ॥

किलिञ्जं, क्ली, (किल्यतेऽनेन। किल्+इन्। किलिं चिनोतीति। चि+डः। एषोदरात् साधुः।) सूक्ष्मदारु। इति जटाधरः ॥ किलिञ्जमिति च पाठः ॥

किलिञ्जः, पुं, (किलितो जायते। जन+डः। एषोदरादित्वात् सुम् च।) सूक्ष्मदारु। इति त्रिकाण्डशेषः ॥ (क्वचित् नपुंसकत्वमपि दृश्यते ॥)

किलिञ्जकः, पुं, (किलिञ्ज+स्वार्थे कः।) काशादिरज्जुः। येन कुशूलं वेष्ट्यते कुशूलश्च मरायिरिति टीकान्तरम्। दृषद्रचितटाटी इति ख्यात इत्यन्ये। इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः। कटः २। इत्यमरः। २। ६। २६ ॥

किलिम्बं, क्ली, (किल+इमन्।) देवदारु। इति शब्दरत्नावली राजनिर्घण्टश्च ॥
("मरिचं पिप्पलीमूलं मगधागजपिप्पली।
सरलः किलिमं हिङ्गु भार्गीतेजोवतीवचौ" ॥
इति चरके कल्पस्थाने ७ अध्याये ॥)

किल्बिषं, क्ली, ("किलेर्वुक् च"। उणां १। ५१ इति टिषच् वुकागमश्च।) पापम्। अपराधः। इत्यमरः। ३। ३। २२२ ॥ (यथा गीतायां ३। १३।
"यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्व्वकिल्बिषैः" ॥)
रोगः। इति मेदिनी ॥

किल्वी, [न्] पुं, (किल्+भावे क्विप् ततोऽस्यर्थे वाऽञ्चलकात् विनिः।) घोटकः। इति त्रिकाण्डशेषः ॥

किशलं, क्ली पुं, (किञ्चित् शलति। शल चलने गतौ वा+अच् एषोदरादित्वात् मलोपः।) पल्लवः। इति शब्दरत्नावली ॥

किशलयं, क्ली पुं, (किञ्चित् शलति। शल चलने+वाऽञ्चलकात् कयन् प्रत्ययः एषोदरात् मलोपे साधुः।) पल्लवः। इति शब्दरत्नावली ॥
("कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः
भिन्नो रागः किशलयरुचामाज्यधूमोद्गमेन" ॥
इति शाकुन्तले १माङ्कः। अत्र केचित् दन्त्यसकारमपि पठन्ति ॥)

किशोरः, पुं, (किञ्चित् शृणाति। शृ हिंसायाम्। "किशोरादयश्च"। उणां। १। ६६। इति ओरन्। निपातनात् साधुः।) अश्वशिशुः। ("किशोरं वड़वा यथा"। इति महाभारतम् ॥) तैल पर्णौषधिः। सूर्य्यः। तरुणावस्थः। स तु एकादशवर्षावधिपञ्चदशवर्षपर्य्यन्तवयस्कः। इति मेदिनी ॥ कैशोरावस्थायुक्ते वाच्यलिङ्गोऽपि ॥
(यथा, श्रीभागवतटीकायां श्रीस्वामिपादधृतवचनम्।
"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।
कैशोरमापञ्चदशात् यौवनञ्च ततः परम्" ॥)

किष्क क ङ वधे। इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट्।) मूर्द्धन्योपधः। क ङ किष्कयते। इति दुर्गादासः ॥

किष्किन्धः, पुं, (किं किं दधाति। धा+कः। पारस्कारादित्वात् पूर्ब्बस्य किमो मलोपः सुट् षत्वञ्च निपातनात्।) ओड्रदेशस्थपर्ब्बतविशेषः। तत्पर्ब्बतगुहा च। इति शब्दरत्नावली ॥

किष्किन्धी, स्त्री, (किष्किन्ध+गौरादित्वात् ङीष्।) किष्किन्धपर्ब्बतगुहा। इति शब्दरत्नावली ॥

किष्किन्थः,पुं,(किं किं दधातीति धा पारस्कारादिसुटि पूर्ब्बमलोपे च स्वार्थे यत् प्रत्ययेन निपातनात् साधुः।) स्वनामख्यातपर्ब्बतः। इति शब्दरत्नावली ॥

किष्किन्था, स्त्री, (किष्किन्थ+टाप्।) किष्किन्थपर्ब्बतगुहा। इति शब्दरत्नावली ॥ सा तु पुरा वालिनामवानरराजधान्यासीत् श्रीरामचन्द्रस्तं हत्वा सुग्रीवाय तद्राजधानीं दत्तवान्। इति रामायणम् ॥

किष्किन्थाधिपः, पुं, (किष्किन्थाया अधिपः।) वालिनामवानरराजः। इति जटाधरः ॥ (सुग्रीवः। इति रामायणम् ॥)

किष्कुः, पुं स्त्री, (कै+मृगय्वादित्वात् कुः। पारस्कारादित्वात् सुटि षत्वे च निपातनात् साधुः।) वितस्तिः। द्वादशाङ्गुलिपरिमाणम्। प्रकोष्ठः। कफोणेरधोमणिबन्धपर्य्यन्तः। हस्तः। इति मेदिनी ॥ (यथा महाभारते २। १। १६।
"सर्व्वर्त्तुगुणसम्पन्नां दिव्यरूपां मनोरमाम्।
दशकिष्कुसहस्रां तां मापयामास सर्व्वतः" ॥)
कुत्सिते त्रि। इति विश्वो हेमचन्द्रश्च ॥

किष्कुपर्ब्बा, [न्] पुं, (किष्कुमितं वितस्तिमितं हस्तमितं वा पर्ब्ब यस्य।) इक्षुः। वेणुः। मोटगल्लः। इति मेदिनी। नल इति भाषा ॥

किसलं, क्ली पुं, (किमीषत् सलति। सल गतौ+अच्। एषोदरादित्वात् मलोपे निपातनात् साधुः।) किसलयम्। इति शब्दरत्नावली भरतश्च ॥

किसलयं, क्ली पुं, (किञ्चित् ईषत् वा सलति। सल+वाऽञ्चलकात् कयन्। एषोदरात् मलोपे साधुः।) पल्लवः। इत्यमरः। २। ४। १४ ॥ स तु नवपत्रादियुक्तशाखाग्रपर्ब्बणि नवपत्रस्तबकः इति मधुः। इति भरतः ॥ (यथा गोः रामायणे। ४। ५०। २८।
"तरुणादित्यसङ्काशान् रक्तैः किसलयैर्वृतान्।
जातरूपमयैश्चापि चरद्भिर्मत्स्यकच्छपैः" ॥)

कीकटः,पुं, (की शब्दं कुत्सितं वा कटति गच्छति धावति। की+कट्+अच्।) घोटकः। देशभेदः। इति विश्वः ॥ (यथा शक्तिसङ्गमतन्त्रे।
"चरणादिं समारभ्य गृध्रकूटान्तकं शिवे!।
तावत् कीकटदेशः स्यात् तदन्तर्मगधो भवेत्" ॥
वेहार इति ख्यातः। अत्र बुद्धः समजनि।
इति भागवतम्। १। ३। २४ ॥ अस्य कीकट इति पुरातननाम आसीत् ततो जरासन्धेन मगध इत्याख्या प्रदत्ता ॥ स्वनामख्यातः सङ्कटपुत्रः। यथा, भागवते ६। ६। ६।
"ककुभः सङ्कटस्यासन् कीकटस्यनयो यतः" ॥)

कीकटः, त्रि, (की कुत्सितं धनाभावात् कटति प्रकाशते। की+कट्+अच्।) निर्धनः। (की कुत्सितं कटति वर्षति ददाति अर्थिने कार्पण्यात् इति।) कृपणः। इति मेदिनी ॥

कीकटाः, पुं, (की कुत्सितं ईषत् वा कटति वर्षति येषु इन्द्रः। ईषद्वर्षतया तद्देशानां तथात्वम्। की+कट्+अधिकरणे अच्।) देशविशेषः। बहुवचनान्तशब्दोऽयम्। इति मेदिनी ॥ वेहार इति ख्यातः। इति केचित् ॥ (यथा, भागवते १। ३। २४ ॥
"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम्।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति" ॥
देशोऽयं कुत्सिताचारपरिपूर्णः। यथा, भागवते। ७। १०। १८।
"साधवः समुदाचारास्ते पूयन्त्यपि कीकटाः" ॥)

कीकसं, क्ली, (की कुत्सितेन रक्तादिना देहाभ्यन्तरे कसति उत्पद्यते। की+कस+अच्।) अस्थि। इत्यमरः। २। ६। ६८ ॥ (अस्थिशब्दे विवरणं ज्ञातव्यम् ॥)

कीकसः, पुं, (की कुत्सितं यथा स्यात् तथा कसति। कस गतौ+अच्।) लूमिजातिः। इति मेदिनी ॥ कर्कशे त्रि। इति शब्दरत्नावली ॥

कीकसास्थः, पुं, (कीकसं अस्थि आस्येऽस्य।) पक्षी। इति हारावली ॥

कीकिः, पुं, (कीति शब्दं कायति। कै+वाऽञ्चलकात् डिः।) किकिः। चाषपक्षी। इत्यमरटीका ॥

कीचकः, पुं, (चीकयति शब्दायते। चीक मर्षणे "चीकयतेराद्यन्तविपर्य्ययश्च"। उणां ५। १६ इति वुन् आद्यन्तविपर्य्ययश्च।) अनिलयोगात् शब्दायमानवंशः। इत्यमरः। २। ४। १६१ ॥ सर-

न्मुकवंशजः। (यथा,कुमारे १।८।
"यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन" ॥)
राक्षसविशेषः। इति शब्दरत्नावली ॥ दैत्यभेदः। इति विश्वः ॥ नलः। इति राजनिर्घण्टः ॥ केकयराजपुत्रः। स च विराटराजस्य श्यालः सेनापतिश्च ॥ (यथा महाभारते ४। कीचकवधपर्व्वणि १३। ५।
"सेनापतिर्विराटस्य ददर्श द्रुपदात्मजाम्।
तां दृष्ट्वा देवगर्भाभां चरन्तीं देवतामिव।
कीचकः कामयामास कामबाणप्रपीडितः" ॥
अयन्तु छद्मवेशधारिणा विराटभवनस्थेन भीमसेनेन हतः। अस्य विवरणं महाभारते ४ पर्व्वणि १३ अध्यायमारभ्य द्रष्टव्यम्। देशविशेषः। तत्र बहुवचनान्तोऽयम् ॥ यथा,महाभारते १।१५७।२।
"मत्स्यान् चिरर्त्तान् पाञ्चालान्कीचकानन्तरेण च।
रमणीयान्वनोद्देशान् प्रेक्षमाणाः सरांसि च" ॥)
कीचकजित्, पुं, (कीचकं जितवान्। जि+भूते क्विप् तुक् च।) भीमसेनः। इति त्रिकाण्डशेषः ॥ (पुराकिल दुरात्मा कीचकः विराटभवनस्थां सैरिन्ध्रीरूपधारिणीं द्रौपदीमकामयत। द्रौपदी तु तस्य कामुकस्य दुरभिसन्धिं विज्ञाय तं बहुल कटूक्त्या निर्भर्त्सयामास। अथ कीचक एवमपमानितः क्रुधा तां पदा ताड़ितवान्। अथ साभिमानिनी द्रौपदी निजदुःखं भीमं निवेदयामास। भीमस्तु एतदाकर्ण्य संजातरोषः कीचकं हन्तुं मनो दधे। अथ सुबुद्धिर्भीमो द्रौपदीं उपदिदेश श्वो निशायां यथा स दुरात्मा राजश्यालकः मत्स्यराजसुद्धान्तकन्यानर्त्तनशालायां त्वन्नोभेन समुपसृत्येत तथाऽऽश्वास्य समयो विधीयताम्। ततस्त्वदेशेन तत्र सङ्गतोऽहमेनं कामार्त्तं दुष्कार्य्यस्य फलं अनुभावयामि। एवं स्थिरीकृते द्रौपदी पूर्व्वोक्तमन्त्रितं स्थानं कीचकं विज्ञापितवती। अथ निशायां मूढ़बुद्धिः कामुकवेशधारी तत्रैव गतः प्रच्छन्नोपविष्टेन बलीयसा भीमेन पशुमारं निपातितः॥ एतद्विवृतिस्तु महाभारते ४। २१ अध्याये द्रष्टव्या ॥)
कीचकनिसूदनः, पुं, (कीचकं निसूदयतीति। नि+सूद+णिच् ल्युः।) भीमसेनः। इति हेमचन्द्रः ॥ (अस्य विवरणं कीचकजिच्छब्दे द्रष्टव्यम् ॥)
कीचकभित्, पुं, (कीचकं भिन्नवान्। भिद्+क्विप्।) भीमसेनः। इति भूरिप्रयोगः ॥ (अस्य विवरणं कीचकजिच्छब्दे द्रष्टव्यम्।)
कीट, क बन्धे। वर्णे। इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट्।) क कीटयति कोटः। वर्णः केचिन्नमन्यते। इति दुर्गादासः ॥
कीटः, पुं, (कीट्+अच्।) कृमिजातिः। इति शब्दरत्नावली ॥ (यथा मनुः १। ४०।
"कृमिकीटपतङ्गांश्च यूकामत्कुणमक्षिकम्" ॥
"सर्पाणामेव विण्मूत्रशुक्लाण्डस्रवकोथजाः।
दोषैर्व्यस्तैः समस्तैश्च शुक्लाः कीटाश्चतुर्विधाः ॥
दष्टस्य कीटैर्वायव्यैर्दंशोद्देशोऽरुणोल्वणः।
आग्नेयैरल्पसंस्रावो दाहरागविसर्पवान् ॥
पक्वपीलुफलप्रख्यः खर्ज्जूरसदृशोऽथवा।
कफाधिकैर्मन्दरुजः पक्वोदुम्बरसन्निभः ॥
सावाक्षः सर्व्वलिङ्गस्तु विवर्ज्यः सान्निपातिकैः।
वेगाश्च सर्पवच्छोफो वर्द्धिष्णुर्विसरक्षता ॥
शिरोऽस्थि गौरवं मूर्च्छाभ्रमः श्वासोऽतिवेदना।
सर्व्वेषां कर्णिकाशोफो ज्वरः कण्डूररोचकः" ॥
अस्य चिकित्सा यथा।
"अर्कस्य दुग्धेन शिरीषबीजं
चिर्भावितं पिप्पलीचूर्णमिश्रम्।
एषो गदो हन्ति विषाणि कीट-
भुजङ्गलूतोन्दुरदष्टिकानाम्" ॥
इति च वाभटे उत्तरतन्त्रे ३७ अध्याये ॥
अस्यौषधं यथा ॥
"जतुसेव्यपत्रगुग्गुलुभल्लातककुभपुष्पसर्ज्जरसाः।
श्वेता एव धूम उरगाखुकीटवस्त्रकृमिनुदग्र्याः" ॥
"क्षीरिवृक्षत्वगालेपः सुद्धः कीटविषापहः" ॥
इति चरके चिकित्सास्थाने २५ अध्याये ॥
"सर्पाणां शुक्रविण्मूत्रश्रवपूत्यण्डसम्भवाः।
वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः ॥
सर्व्वदोषप्रकृतिभिर्युक्ताश्चापरिणामतः।
कीटलेऽपि सुघोरास्ते सर्व्व एव चतुर्व्विधाः ॥
कुम्भीनसस्तुण्डिकेरी भृङ्गीग्रतकुलीरकः।
उच्चिटिङ्गोऽग्निनामाच्च चिचिटिङ्गो मयूरिका ॥
आवर्त्तकस्तथोरभ्रसारिका मुखवेदलौ।
शरावकुर्द्दोऽभीराजी परुषश्चित्रग्रीवकः ॥
घृतवाऊश्च यद्यपि रक्तराजिः प्रकीर्त्तितः।
अष्टादशेति वायव्याः कीटाः पवनकोपनाः ॥
तैर्भवन्तीह दष्टानां रोगा वातनिमित्तजाः ॥ * ।
कौण्डिल्यकः कणभको वरटी पत्रवृश्चिकः ॥
विनासिका ब्रह्मणिका विन्दुलो भ्रमरस्तथा।
वाह्मकी पिचिटः कुम्भी वर्च्चः कीटोऽरिमेदकः ॥
पद्मकीटो दुन्दुभिको मकरः घृतपादकः।
पद्मालकः पाकमत्स्यः क्षणतुण्डोऽथ गर्द्दभी ॥
क्षीतःक्रमिसरारी च यद्यप्युत्केशकः स्मृतः।
एते ह्यग्निप्रकृतयश्चतुर्व्विंशाः प्रकीर्त्तिताः ॥
तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः ॥ * ।
"विश्वम्भरः पद्मशुक्लः पद्मक्षण्णोऽथ कोकिलः।
सैरेयकः प्रचलको वलभः किटिमस्तथा ॥
सूचीमुखा क्षणगोधा यश्च कामायवासिकः।
कीटगर्द्दभकश्चैव तथाचोटक एव च ॥
त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपजाः।
तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः ॥ * ॥
तुण्डीलासो विचिलकस्तालको वाहकस्तथा।
कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः ॥
तुङ्गलाभः सर्षपिकोऽवल्गुली शम्बुकस्तथा।
अग्निकीटश्च घोराः स्युर्दाहरुग्राणनाशनाः ॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्।
तास्ताश्च वेदनास्तीव्रा रोगा वै सान्निपातिकाः" ॥
"क्षाराग्निदग्धवद्दंशो रक्तपीतसितारुणः।
ज्वराङ्गमर्द्दरोमाञ्चवेदनाभिः समन्वितः ॥
कृष्णतीसारदृष्ट्या च दाहो मोहश्छिर्द्दिका।
वेपथुश्वासहिक्काश्च दाहः शीतश्च दारुणम् ॥
पिड़कोपचयः शोफो ग्रन्थयो मण्डलानि च।
दद्रवः कर्णिकाश्चैव विसर्पाः किटिभानि च ॥
तैर्भवन्तीह दष्टानां यथास्वाप्युपद्रवाः।
येऽन्ये तेषां विशेषास्तु तूर्णं तेषां समादिशेत् ॥
एकजातीयतस्तूर्द्धं कीटान् वक्ष्यामि भेदतः।
सामान्यतो दष्टलिङ्गैः साध्यासाध्यक्रमेण च ॥
चिकटकः कुणी चापि इल्लिकच्छोऽपराजितः।
चत्वार एते कथिता व्याख्यातास्तीव्रवेदनाः ॥
तैर्दष्टस्य श्वयथुरङ्गमर्द्दोगुरुता गात्राणां दंशः क्षणाच्च भवति ॥
"प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः।
तथा निरुपमश्चापि पञ्चगौधेरकाः स्मृताः ॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्।
रुजश्च विविधाकारा ग्रन्थयश्च सुदारुणाः ॥
गजगोली श्वेतक्षणा रक्तराजी रक्तमण्डला सर्व्वश्वेता सर्षपिकेत्येवं षट् तामिर्दष्टे सर्षपिकावर्ज्यं दाहश्लोफक्लेदा भवन्ति ॥ सर्षपिकया हृदय पीड़ातिसारश्च ॥
घृतपद्मस्तु परुषा क्षणा चित्रा कपिलिका पीतिका रक्ता श्वेता अग्निप्रभा इत्यष्टौ ताभिर्दष्टे शोफो वेदना दाहश्च हृदये। श्वेताग्निप्रभाभ्यामेतदेव दाहो मूर्च्छाचातिमात्रं श्वेतपिड़कोत्पत्तिश्च ॥
मण्डूकाः क्षण्णाः सारः कुहको हरितो रक्तो यववर्णाभो भ्रकुटी कोटिकश्चेत्यष्टौ तैर्दष्टस्य दंशःकण्डूर्भवति पीतफेणागमश्च वक्त्रात्। भ्रकुटी कोटिकाभ्यामेतदेव दाहश्छर्द्दिर्मूर्च्छाचाति मात्रम् ॥
विश्वम्भराभिदष्टे दंशः सर्षपाकाराभिः पिड़काभिश्चीयते घृतज्वरार्त्तश्च पुरुषो भवति ॥
अहितुण्डकाभिर्दष्टे तोददाहकण्डूश्वयथवो मोहश्च। कण्डूमकाभिर्दष्टे पीताङ्गस्तीव्रतीसारः ज्वरादिभिरभिहन्यते। शूकहताभिर्दष्टे कण्डूकोठाः प्रवर्द्धन्ते शूकक्षाच्च लक्ष्यते ॥
पिप्पीलिकाः स्थूलशीर्षा सम्बाहिका ब्रह्मणिकाकृष्णिका कपिलिका चित्रवर्णेति षट् ताभिर्दष्टे दंशे श्वयथुरग्निस्फोटवद्दाहश्चोमौ भवतः ॥
मक्षिकाः कान्तारिका क्षणा पिङ्गलिका मधूलिका कामायी स्यालिकेत्येवं षट् ताभिर्दष्टस्य दाहश्चोमौ भवतः स्यालिकाकामायीभ्यामेतदेव पिड़काश्च सोपद्रवा भवन्ति ॥
मशकाः सामुद्रः परिमण्डलो हस्तिमशकः क्षणाः पार्व्वतीय इति पञ्च तैर्दष्टस्य तीव्रकण्डूर्दंशश्चोपश्च पार्व्वतीयस्तु कीटैः प्रायशो हैस्तुल्यलक्षणः। नखावलूढेऽत्यर्थं पिड़काः सदाहपाका भवन्ति। जलौकसां दष्टलक्षणमुक्तं चिकित्सितञ्च ॥
भवन्ति चात्र ॥
गोधेरकः स्यालिका च ये च श्वेताग्निसंप्रभे।
भ्रकुटी कोटिकश्चैव न सिध्यन्त्येकजातिषु ॥
श्वमूत्रपुरीषैस्तु सविषैरवमर्षणात्।
स्युः कण्डूदाहकोठाङ्गपिड़कातोदवेदनाः॥
प्रलेदवांस्तथास्रावो भृशं सम्याचयेत्त्वचम् ॥

दिग्धविद्धक्रियास्तत्र यथावदवचारयेत् ॥
नावसन्नं नचोत्सन्नमतिसंरम्भवेदनम् ।
दंशाहौ विपरीतार्त्ति कीटदष्टं सुबाधकम् ॥
कीटैर्दष्टानुपविधैः सर्पवत् समुपाचरेत्" ॥
इति सुश्रुते कल्पस्थाने ८ अध्यायः ॥)

कीटकः, पुं, (कीट + संज्ञायां अल्पार्थे स्वार्थे वा कन् ।) मागधजातिः । इति धरणी ॥ क्षत्रियजातिः । निष्ठुरे त्रि । इति मेदिनी ॥

कीटघ्नः, पुं, (कीटं हन्ति । हन् + टक् ।) गन्धकः । इति राजनिर्घण्टः ॥ (गन्धकशब्देऽस्य गुणादयो बोद्धव्याः ॥)

कीटजा, स्त्री, (कीटेभ्यो जायते । जन् + डः । टाप् ।) लाक्षा । इति रत्नमाला ॥ (लाक्षाशब्दे ऽस्या गुणादिकं ज्ञेयम् ॥ कीटसम्भवे, त्रि, । यथा महाभारते २ । ५ । २२ ।
"वैरंच राजन्वस्त्रेव पट्टजं कीटजन्तथा" ॥)

कीटपादिका, स्त्री, (कीटाः पादे मूलेऽस्याः । कीटपाद + कप् । अत इत्वं टापि ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥

कीटमाता, स्त्री, (कीटानां माता इव । मूलदेशात् बहुलकीटोत्पन्नत्वात्तथात्वम् ।) हंसपदीवृक्षः । इति भावप्रकाशः ॥ (हंसपदीशब्दे ऽस्या गुणपर्य्याया बोध्याः ॥)

कीटमारी, स्त्री, (कीटं मारयति । मृ + णिच् + अण् । उपपदं मासः । गौरादित्वात् ङीष् ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥

कीडेरः, पुं, (कीड + एरच् । अस्य ङः ।) तण्डुलीयशाकः । इति भावप्रकाशः ॥

कीदृक्, [श्] त्रि, (कस्येव दर्शनमस्य क इव दृश्यते इत्यादि वा । किम् + दृश् + क्विन् । "इदं किमोरीश्की" ।६।३।९०। इति व्यादेशः ।) किम्प्रकारः । इति व्याकरणम् ॥ (यथा नैषधे १ । १३७ ।
"विलोकयन्त्या यदतोऽथ पत्तिणः
प्रिये स कीदृक् भविता तवेत्यसौ" ॥)

कीदृशः, त्रि, (कस्येव दृश्यते ऽसौ कस्येव वा दर्शनमस्य । किम् + दृश् + कञ् ।) किम्प्रकारः । इति व्याकरणम् ॥ (यथा, महाभारतम् ॥)
"कीदृशाः साधवो विप्राः केभ्यो दत्तं महाफलम् ।
कीदृशानाच्च भोक्तव्यं तन्मे ब्रूहि पितामह !" ॥)

कीनाशः, पुं, (क्लिश्नातीति । क्लिशू विबाधने वधे वा । "क्लिशेरीचोपधायाः लोपश्च लो नाम् च" । उणां ५ । ५६ ॥ इति कन् उपधाया ईत्वं लोपो नामागमश्च ।) यमः । इत्यमरः ३ । ३ । २१४ ॥ ("विधेर्हि कीनाशनिकेतनातिथिं ।" माघः । १ । ७३ ॥) वानरविशेषः । इति तट्टीकायां स्वामी ॥

कीनाशः, त्रि, (क्लिश्नातीति । क्लिशूविबाधने वधे च । "क्लिशेरीचोपधायाः लोपश्च लो नाम् च" । उणां ५ । ५६ । इति कन् उपधाया ईत्वं लोपो नामागमश्च ।) कर्षकः । (यथा मनुः ९ । १५० ।
"कीनाशो गोरथो यानमलङ्कारश्च वेश्म च ।
विप्रस्योद्धारिकं देयमेकांशश्च प्रधानतः" ॥)

क्षुद्रः । पशुघाती । इति मेदिनीकरहेमचन्द्रौ ॥

कीरं, क्ली, (कीलति बध्नाति शरीरम् । कील + अच् । लस्य रः ।) मांसम् । इति राजनिर्घण्टः ॥

कीरः, पुं, (कीति अव्यक्तं ईरयतीति । ईर + णिच् + अच् ।) शुकपक्षी । इत्यमरः २ । ५ । २१ ॥ (यथा, नैषधे २ । १५ । "खगवागियं इत्यतोऽपि किं न मुदं धास्यति कीरगीरिव" ॥)

कीरकः, पुं, (कीर + संज्ञायां कन् ।) वृक्षभेदः । क्षपणकः । प्रापणम् । इति धरणी ॥ (शुकपक्षी । इति आचार्याः ॥)

कीरवर्णकं, क्ली, (कीरस्येव वर्णो यस्य । वर्ण + कप् ।) स्त्रौणेयकनामसुगन्धिद्रव्यम् । इति राजनिर्घण्टः ॥ (स्त्रौणेयकशब्दे विवरणमस्य ज्ञातव्यम् ॥)

कीराः, पुं, (क + ईर + णिच् + अच् पृषोदरात् साधुः ।) काश्मीरदेशः । तद्देशस्थजनः । बहुवचनान्तोऽयं शब्दः । इति मेदिनीचिकाण्डशेषौ ॥

कीरेष्टः, पुं, (कीरस्य शुकस्य इष्टः प्रियः ।) आम्रवृक्षः । आखोटवृक्षः । जलमधूकवृक्षः । इति राजनिर्घण्टः ॥

कीर्य्यः, त्रि, (कीर्य्यतेऽसौ । कॄ + कर्म्मणि क्यः ।) आच्छन्नः । विक्षिप्तः । (यथा, शाकुन्तले १ अङ्के ॥
"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्व्वकायम् । दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वात् वियति बहुतरं स्तोकमुर्व्यां प्रयाति" ॥) हिंसितः । इति मेदिनी ॥

कीर्त्तनं, क्ली, (कृत् + भावे ल्युट् ।) कथनम् । वचनम् । इति जटाधरः ॥ (यथा, मार्कण्डेये ८२ । २२ ।
"रक्षां करोति भूतेभ्यो जन्मनां कीर्त्तनं मम" ॥)

कीर्त्तना, स्त्री (कृत् + कर्म्मणि युच् टाप् च ।) यशः । इति शब्दरत्नावली ॥

कीर्त्तिः, स्त्री, (कृत् + क्तिन् । यद्वा, कृत् संशब्दने "हृषिशिरुहीति" उणां ४ । ११८ । इरादिः कार्य्ये इन् ।) सुख्यातिः । तत्पर्य्यायः । यशः । समज्ञा ३ । इत्यमरः १ । ६ । ११ ॥ समाज्ञा ४ समाख्या ५ समज्या ६ । इति तट्टीकायां भरतः ॥ अभिख्या ७ श्लोकः ८ वर्णः ९ । इति जटाधरः ॥ कीर्त्तना १० । इति शब्दरत्नावली ॥
"दानादिप्रभवा कीर्त्तिः शौर्य्यादिप्रभवं यशः" ॥
इति माधवी ॥ अत एव यशःकीर्त्त्योर्भेदस्यादि दर्शनात् "यशःकीर्त्तिप्रविभ्रष्टो जीवन्नपि न जीवति" इति कस्यचित् प्रयोगः । जीवतः ख्यातिर्यशो मृतस्य ख्यातिः कीर्त्तिरिति केचित्तन्न साधु "कीर्त्तिस्ते दृषदूतिकेति" प्रयोगदर्शनात् । इति भरतः ॥ * ॥ प्रसादः । इति मेदिनी ॥ शब्दः । दीप्तिः । माढकविशेषः । इति शब्दरत्नावली ॥ विस्तारः । कर्दमः । इति विश्वः ॥

कीर्त्तितः, त्रि, (कृत् + क्तः ।) कथितः । ख्यातः । यथा,—भावप्रकाशे ॥
"कुम्भाण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता" ॥

कीर्त्तिभाक्, [ज्] पुं, (कीर्त्तिं भजते । भज + क्विप् ।) प्रेमाचार्य्यः । इति शब्दरत्नावली ॥ कीर्त्तियुक्ते त्रि ॥ यथा,—महाभारते १ । ८३ । ४१ ।
"राज्यभाक् स भवेद्बह्मन् ! पुण्यभाक् कीर्त्तिभाक् तथा" ॥)

कीर्त्तिमान् [त्] पुं, (कीर्त्तिरस्यास्तीति मतुप् ।) वसुदेवस्य देवक्यां अष्टमपुत्रः । (यथा भागवते ९ । २४ । ५३ ।
"वसुदेवस्तु देवक्यां अष्टमपुत्रानजीजनत् ।
कीर्त्तिमन्तं सुषेणञ्च भद्रसेनमुदारधीः ।
ऋजुं संमर्दनं भद्रं सङ्कर्षणमहीश्वरम्" ॥)
कीर्त्तिविशिष्टे त्रि ॥ (यथा, ह्रेः रामायणे १ । २ । ४२ ।
"उदारसत्त्वार्थपदैर्मनोरमै-
स्तदास्य रामस्य चकार कीर्त्तिमान् ।
समाक्षरैः श्लोकशतैर्यशस्विनो
यशस्करं काव्यमुदारदर्शनः" ॥)

कीर्त्तिशेषः, पुं, (कीर्त्तिः शेषो यस्य ।) मरणम् । इति जटाधरः ॥

कील, बन्धे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चतुर्थस्वरी । कीलति । इति दुर्गादासः ॥

कीलः, पुं क्ली, (कील्यते बध्यतेऽसौ अनेनाच वा । कील बन्धे + कर्म्मणि करणेऽधिकरणे च यथायथं घञ् पुंसीति घोवा ।) अग्निशिखा । शङ्कुः । इत्यमरः ३ । ३ । १९९ ॥ (यथा, महाभारते । ३ । १५ । १५ ।
"परिखास्वापि कौरव्य! कीलैः सुनिचिताः शताः" ॥
तथा च आर्य्यासप्तशती ३७४ ।
"या लुप्तकीलभावं याता हृदि वह्निरदृश्यापि" ॥)
स्तम्भः । लेष्टुः । कफोणिः । इति मेदिनी ॥ कफोणिनिर्घातः । इति विश्वः ॥ (भूगर्भस्य प्रकारभेदः । यथा । "तत्र ऊर्द्ध्वबाहुशिरः पादौ यो योनिमुखं निरुणद्धि कील इव स कीलः" ॥
इति सुश्रुते निदानस्थाने ८ अध्याये ॥)

कीलकः, पुं, (कीलति बध्नाति अनेन । करणे घञ् स्वार्थे कः ।) कीलः । खोंटा गोंज खिल इत्यादि भाषा । गवां गात्रकण्डूयनार्थं गोष्ठे निखातस्तम्भः । इति भूमिः ॥ कण्डूयनार्थं काष्ठम् । इति केचित् । बन्धनखण्टः । इति केचित् । यत्र बद्धा गौर्दुह्यते सः । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । शिवकः २ । इत्यमरः २ । ९ । ८३ ॥

कीलसंस्पर्शः, पुं, (कीलं संस्पृशति । सम् + स्पृश् + अच् ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ गाव इति भाषा ॥

कीला, स्त्री पुं, (कील + टाप् ।) कीलः । इत्यमरमेदिनीकरौ ॥

कीलालं, क्ली, (कीलं वह्निज्वालां अलति वारयतीति । कील + अल् + कर्म्मण्यण् । यद्वा कीलात् वह्निशिखायाः शिखायाश्चोभयत्र वह्निरेव ग्रहणमिति ध्येयम्, अतएवाग्नेः सकाशात् अलति-पर्य्याप्नोति उत्पद्यते इति यावत् "अग्नेरापः" इति श्रुतेः । अल् + अच् ।) जलम् । (यथा, शङ्करविजये अम्बाष्टके २ ।
"कूलातिगामिभयतूलावलिज्वलनकीलानिजस्तुति-

कुकुटः

विधाकोलाहलच्छपितकालामरी कुञ्जलकीलाल-पोषणभाः" ॥) रक्तम्। इत्यमरः ३। ३। १९९॥ (और्व्वाग्नेः कीलं आलाति। आला + कः।) अमृतम्। मधु। इति शब्दरत्नावली॥ (पुं कीलाय बन्धाय अलति पर्य्याप्नोतीति। पशुः॥)

कीलालधिः, पुं, (कीलालं जलं धीयतेऽस्मिन्। धा + किः।) समुद्रः। इति शब्दरत्नावली॥

कीलालपः, पुं, (कीलालं रुधिरं पिबति। पा + "आतोऽनुपसर्गे कः"। ३। २। ३। इति कः।) राक्षसः। इति शब्दरत्नावली॥

कीलितः त्रि, (कील्यतेऽसौ॥ कील + कर्म्मणि क्तः।) बद्धः। इत्यमरः। ३। १। ४२॥ (यथा, राजेन्द्र-कर्णपूरे ३०।

"किं वान्यत्तव देव! वेल्लति यदि भ्रूवल्लरीपल्लवः सोऽपि श्यामकपोलकीलितकरः संक्रन्दनः क्रन्दति"॥)

कीशः, पुं, (की इति शब्दं ईष्टे। ईश् + कः। यद्वा कस्य वायोरपत्यं अत इञ्। किः हनुमान् ईशो यस्य।) वानरः। इत्यमरः २। ५॥ ३॥ (यथा, काशीखण्डे ४२। ३१।

"रासभैः करभैः कीशैः श्वेनैरश्वतरैर्वकैः"॥

के आकाशे ईष्टे प्रभवतीति। क + ईश् + कः।) सूर्य्यः। पक्षी। इति शब्दरत्नावली॥ नभे त्रि। इति मेदिनी॥

कीशपर्णः, पुं, (कीशः वानरः तस्य लोमेव पर्णमस्य।) अपामार्गः। इति शब्दरत्नावली॥

कीशपर्णी, स्त्री, (कीशपर्ण + जातौ ङीष्।) अपामार्गः। इत्यमरः। २। ४। ८९॥

कु ङ शब्दे। इति कविकल्पद्रुमः॥ (भां-आत्मं-अकं-सेट्।) ङ कवते इति दुर्गादासः॥

कु ल शब्दे। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-सेट्।) ल कौति। इति दुर्गादासः॥

कु शि ङ आर्त्तस्वरे। इति कविकल्पद्रुमः॥ (तुदां-आत्मं-अकं-सेट्।) शि ङ कुवते अकुत। इति दुर्गादासः॥

कु, व्य, (कु + डुः।) पापम्। कुत्सा। ईषदर्थः। निवारणम्। इति मेदिनी॥

कुः, स्त्री, (कु + मितादित्वात् डुः।) पृथिवी। इत्यमरः। २। १। ७॥

कुक्, ङ आदाने। इति कविकल्पद्रुमः। (भां-आत्मं-सकं-सेट्।) ङ कोकते। इति दुर्गादासः॥

कुकभं, क्ली, (कुकेन आदानेन पानेनेत्यर्थः भातीति। भा + कः।) मद्यम्। इति शब्दचन्द्रिका॥

कुकरः, त्रिं, (कुत्सितः करोः यस्य।) कुत्सितहस्त-युक्तः रोगादिना कुञ्चितकरः। तत्पर्य्यायः। कुणिः २। इत्यमरः। २। ६। ४८॥ कूणिः ३ कोणिः ४। इति तट्टीका॥

कुकीलः, पुं, (कुः पृथिव्याः तस्याः कील इव।) पर्व्वतः। इति चिकाण्डशेषः॥

कुकुटः, पुं, (कु ईषत् कुत्सितं यथा स्यात् तथा वा कुटतीति। कुट् + कः।) सितावरः। इति राज-निर्घण्टः॥ सुबणि झाक इति भाषा॥ (अस्य पर्य्यायाः यथा भावप्रकाशस्य पूर्व्वखण्डे १ भागे।

"शितिवार शितिवरः खस्तिकः सुनिषण्णकः। श्रीवारकः सूचिपत्रः पर्णकः कुकुटः शिखी"॥ गुणास्यास्य सुनिषण्णकशब्दे ज्ञेयाः॥)

कुकुदः, पुं, (कुकु इत्यव्ययं अलङ्कृता कन्या। तां सत्कृत्य याचाय ददाति यः।) कूकुदः। सत्कारपूर्व्वक-कालङ्कृतकन्यादानकर्त्ता। इत्यमरटीकायां राय-मुकुटः॥

कुकुन्दरं, क्ली. (खुन्द्यते कामिनाऽत्र। खुदि आभ्र-वने मद्गुरादयश्चेति निपातनात् साधुः।) नितम्ब-स्थकूपकद्वयम्। एष्ठवंशादधोगर्त्तद्वयम्। इत्यमरः। २। ६। ७६॥ कुकुन्दरे इति द्विवचनान्तोऽपि प्रयोगः॥ (यथा सुश्रुते शारीरस्थाने। ६ अ॥

"पार्श्वजघनवहिर्भागे एष्ठवंशमुभयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च"॥)

कुकुन्दरः, पुं, (कुं भूमिं दरयति दारयति वा अन्त-र्भूतण्यन्तात् दृ अण् निपातनात् ह्रस्वाभावेन साधुः। कु ईषत् कुत्सितं वा कुन्दरमत्र।) कुक्कुरुः। कुकुरौंदा इति हिन्दी भाषा। तत्-पर्य्यायगुणाः। यथा भावप्रकाशे॥

"कुकुन्दरस्ताम्रचूड़ः सूक्ष्मपत्रो मृदुच्छदः। कुकुन्दरः कटुस्तिक्तो ज्वररक्तक्रिमापहः॥ तन्मूलमार्द्रं निश्चिक्षिप्तं वदने सुखशोषहृत्"॥ (पुंलिङ्गोऽयं शब्दोऽपि नितम्बस्थकूपकद्वये वर्त्तते यथा॥

"एष्ठवंशं च्युभयतो यौ सन्धी कटिपार्श्वयोः। जघनस्य बहिर्भागे मर्म्मणी तौ कुकुन्दरौ"॥ इति वाभटे शारीरस्थाने। ४ अध्याये॥)

कुकुभा, स्त्री, (कु ईषत् कुः पृथ्व्यधिष्ठात्री देवता इव भा यस्याः।) रागिणीविशेषः। इति हलायुधः॥

कुकुरः, पुं, (कु कुत्सितं कुरति शब्दायते। कुर् + अच्।) कुक्कुरः। (कुं पृथिवीं कुरति स्वामित्वेन आदत्तवान्। कुर् + कः। यद्वा—कुक्धातोः "मदुरादयश्च"। उणां १। ४२। इति साधुः।) क्षत्रियविशेषः। इत्युणादिकोषः। स तु यदुवंशी-यान्धकराजपुत्रः। इति श्रीभागवतम्॥ (यथा माघे १३। १६।

"परिफुल्लगण्डफलकाः परस्परम् परिरेभिरे कुकुरकौरवस्त्रियः"॥)

यश्चिपर्णीवृक्षः। इति त्रि काण्डशेषः॥

कुकुराः, पुं, (कुकुराः स्वनामख्याताः क्षत्रियाः तेषां जनपदः।) देशविशेषः। तद्देशस्थलोकश्च। तत्-पर्य्यायः। यदवः २ दशार्हाः ३ सात्वताः ४। बहुवचनान्तोऽयं शब्दः। इति चिकाण्डशेषः॥

कुकूटी, पुं, (कोः पृथिव्याः कूटोऽस्यस्याः। अच् गौरादित्वात् ङीष्।) शाल्मलिवृक्षः। इति राज-निर्घण्टः॥ (शाल्मलिशब्देऽस्य विवरणं ज्ञेयम्॥)

कुकूलं, क्ली, (कोः भूमेः कूलं। कुत्सितं कूलं वा।) शङ्कुभिः सङ्कीर्णं श्वभ्रम्। इत्यमरः। ३। ३। २०२। तनुत्रम्। इति हारावली॥

कुकूलः, पुं, (कु + ऊलच् कुगागमश्च।) तुषानलः। इत्यमरः। ३। ३। २०२॥

कुकूलः

कुक्कुटा

("शिरीषादपि मृदुको ज्ञेयमायतलोचना अयं च कुकूलाग्निकर्कशो मदनानिलः"। इति उज्ज्वलदत्तः। केचित्तु "कुकूलाग्निः कर्कशो मदनानलः" इत्येवमाहुः॥)

कुकोलं, क्ली, (कुत्सितं कोलति। कुल + अच्।) कोलिबृक्षः। इति शब्दचन्द्रिका॥

कुक्कुटः, पुं स्त्री, (कुक् + सम्पदादित्वात् क्विप्। कुका आदानेन कुटतीति। कुट + कः।) पक्षि-विशेषः। कुकुड़ा इति भाषा। तत्पर्य्यायः। कुक्कवाकुः २ ताम्रचूड़ः ३ चरणायुधः ४। इत्य-मरः। २। ५। १७॥ कालज्ञः ५ नियोद्धा ६ विष्किरः ७ नखरायुधः ८ ताम्रशिखी ९। इति जटाधरः॥ रात्रिवेदः १० उषाकरः ११ हताशः १२ काहलः १३। इति शब्दरत्नावली॥ दक्षः १४ यामनादी १५ शिखण्डिकः १६। तन्मांस-गुणाः। (यथा, भावप्रकाशे।

"कुक्कुटो वृंहणः स्निग्धो वीर्य्यौजोऽनिलक्रुद्गुरुः। चक्षुष्यः शुक्रकफकृद्बल्यो रूक्षः कषायकः॥ आरण्यकुक्कुटः स्निग्धो वृंहणः श्लेष्मलो गुरुः। वातपित्तक्षयविषविषमज्वरनाशनः"॥

अरण्यकुक्कुटमांसगुणाः। बृंहत्वम्। श्लेष्म-हरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ रूक्ष-त्वम्। कषायत्वम्। स्वादुत्वम्। शीतलत्वञ्च। इति राजवल्लभः॥ ग्राम्यकुक्कुटमांसगुणाः। स्निग्धत्वम्। वातहरत्वम्। दीपनत्वम्॥ गुरुत्वञ्च। इति राजनिर्घण्टः॥ बलकारित्वम्। उष्णत्वम्। मधुरत्वञ्च। इति राजवल्लभः॥ *॥ निषादपुत्रः। शूद्रपुत्रः। टङ्कोल्का। कुक्कुभपक्षी। इति मेदिनी॥ वञ्चिकायः। इति हेमचन्द्रः॥ (आसन-विशेषः। यथा हठयोगदीपिकायाम्। १। २३।

"पद्मासनन्तु संस्थाप्य जानूर्वोरन्तरे करौ। निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कटासनम्"॥)

कुक्कुटकः पुं, (कुक्कुट + सांज्ञायां कन्।) कुक्कुभपक्षी। इति शब्दरत्नावली॥ स्वार्थे कन् प्रत्यये कुक्कुट-शब्दार्थोऽप्यत्र॥)

कुक्कुटव्रतं, क्ली, (कुक्कुट इत्याख्यं व्रतम्।) सन्तानार्थं स्त्रीकर्त्तव्यव्रतम्। इति शब्दमाला॥ कुक्कुटीव्रत-मपि पाठः। ललितासप्तमीव्रतमिदम्। यथा,—

"भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या। स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम्॥ पूजयेच्च तदा तस्या दुष्प्रापं नैव विद्यते"॥ इति तिथ्यादितत्त्वे भविष्यपुराणम्॥

कुक्कुटमण्डपः, पुं, मुक्तिमण्डपः। यथा, काशीखण्डे।

"ततो लोकान्तदारभ्य कथयिष्यन्ति सर्व्वतः। मुक्तिमण्डपनामैतदेष कुक्कुटमण्डपः"॥

कुक्कुटमस्तकं, क्ली, (कुक्कुटस्येव मस्तकं शिखा यस्य।) चक्षम्। इति राजनिर्घण्टः। चौँइ इति भाषा॥ (चक्षशब्देऽस्य गुणादयो बोद्धव्याः॥)

कुक्कुटशिखः, पुं, (कुक्कुटस्य शिखेव शिखा यस्य।) कुसुम्भवृक्षः। इति शब्दचन्द्रिका॥

कुक्कुटाभः, पुं, (कुक्कुट इव आभाति। आ + भा + कः।) कुक्कुटतुल्यवर्णचरणसर्पविशेषः। तत्पर्य्यायः।

कुक्कुरः

कुक्कुटाहिः २। इति हेमचन्द्रः॥
कुक्कुटाहिः, पुं, (कुक्कुटः तच्चरण इव अहिः सर्पः।) कुक्कुटामसर्पः। इति हेमचन्द्रः॥
कुक्कुटिः, स्त्री, (कुक्कुट इव आचरति। आचारे क्विपि इन्।) दम्भचर्य्या। इति हेमचन्द्रः॥
कुक्कुटी, स्त्री, (कुक्कुटि+वा ङीप्।) अन्नतचर्य्या। इति मेदिनी॥ ज्येष्ठी। इति शब्दरत्नावली॥ टिक् टिकि इति भाषा शाल्मलीवृक्षः। इति जटाधरः। (यथा, सुश्रुते उत्तरतन्त्रे। ६० अ०॥)
"कुक्कुटी सर्पगन्धाच्च तथाकाण्डविषाणिके"॥
योषिद्विशेषः। इति चिन्तामणिः॥)
कुक्कुटीव्रतं, क्ली, (कुक्कुटी इति संज्ञकं व्रतं नियमविशेषः।) भाद्रशुक्लसप्तमीकर्त्तव्यनियमविशेषः। तद्विवरणं जलितासप्तमीशब्दे द्रष्टव्यम्॥
कुक्कुभः, पुं, (कुक्कुशब्दं भावयते। भाव्+बाहुलकात् डः। यद्वा कुक् इत्यव्यक्तं कौति शब्दायते। कु+बाहुलकात् भक्।) पक्षिविशेषः। इत्यमरः। २।५।३५। पात्कुका इति भाषा॥
कुक्कुरं क्ली, ग्रन्थिपर्व्वम्। इत्यमरः। २। ४।१३२। गाँठियाका इति भाषा॥ (अस्य पर्य्याया यथा,—
"स्यौणेयकं वह्निवैद्य शुष्कवर्षञ्च कुक्कुरम्।
ग्रीवारोम शुकच्छापि शुकपुच्छं शुकच्छदम्"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥ गुणास्यास्य स्यौणेयकशब्दे ज्ञेयाः॥)
कुक्कुरः, पुं, (कोकते आदत्ते इति। कुक्+क्विप्। कुक् यत्किञ्चिदपि भक्षणं जनं दृष्ट्वा करोति शब्दायते। कुर+कः।) जन्तुविशेषः। कुकुर इति भाषा॥ तत्पर्य्यायः। कौलेयकः २ सारमेयः ३ मृगदंशकः ४ शुनकः ५ भषकः ६ श्वा ७। इत्यमरः। २।१०। २१॥ कुक्कुरः ८ शुनः ९ शुनिः १० श्वानः ११। इति तट्टीका॥ भषणः १२ भक्षूकः १३ वक्रनासूनः १४ दकारिः १५ रात्रिजागरः १६ कालेयकः १७ ग्राम्यमृगः १८ मृगारिः १९ शूरः २० शूयालुः २१। इति राजनिर्घण्टः॥

तस्य गुणाः।

"वक्रग्रीवो खल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः।
प्रभुभक्तश्च शूरश्च बड़ेते च शुनो गुणाः"॥
इति चाणक्यम्॥ तस्य परीक्षा यथा।
"मृगयार्थं शाकुनार्थं कौतुकार्थिमहीच्छिता।
श्वानः पोष्यास्ततस्तेषामत्र वक्ष्यामि लक्षणम्॥
गुणजातिप्रभेदेन शुनो भेदो ह्यनेकधा"। तद्यथा।
"सात्त्विका राजसाश्चैव तामसाश्च त्रिधा मताः॥
अश्रान्ता अपरित्रीणाः पवित्राः खल्पभोजिनः।
श्वानस्ते सात्त्विकाः प्रोक्ता दृश्यन्ते च क्वचित् क्वचित्॥१
क्रुद्धा बड्डमुखो दीर्घा गुरुवल्कलनूदराः।
जाङ्घलस्था जात्विकाश्च श्वानस्ते राजसा मताः॥२
खल्पश्रमेण ये श्रान्ता जलक्लिन्ना गुरूदराः।
श्वानस्ते तामसा ज्ञेयाः सन्त्यावसथमाश्रयाः॥३
ब्रह्मादिजातिभेदेन चतुर्द्धा सर्व्व एव हि।
सुभा दीर्घा खल्पकर्णा लघुपुच्छास्तनूदराः॥
सुशुक्लखरदन्ताश्च श्वानस्ते ब्रह्मजातयः॥१
रक्ताक्षास्तनुलोमानो जलत्यक्तास्तनूदराः॥

कुङ्कुमं

दीर्घा दीर्घा नखरदाः श्वानस्ते क्षत्रजातयः। २
ये पीतवर्णा मृदवस्तनुलोमान एव च॥
क्रुद्धा क्रुद्धा ललज्जिह्वास्ते श्वानो वैश्यजातयः॥३
कृष्णवर्णास्तनुमुखा दीर्घरोमाण एव च॥
अक्रुद्धाः श्रमयुक्ताश्च ते श्वानः शूद्रजातयः॥४
लघुप्रमाणास्तु गुरूदरा ये
येऽमेध्यभक्षा वज्रपुच्छकाश्च।
प्रदष्टपुच्छा लघुसूक्ष्मदन्ता
स्तेचान्त्यजाः कुक्कुरजातयः स्युः॥५॥
द्विजातिचिह्नसंसर्गात् द्विजातिः श्वा भयावहः।
लक्षणचयसम्बन्धात् त्रिजातिर्धननाशनः॥

भोजोऽपि।

द्विजातिर्व्वा त्रिजातिर्व्वा विजातिः श्वा महीभृताम्।
भयं धनक्षयं शोकं विदधाति यथाक्रमम्॥
इति भोजराजकृततुल्लिकल्पतरुः॥ (मुनिविशेषः। यथा महाभारते। २। ४। १७।
"कुक्कुरो वेणुजङ्घोऽथ कालापः कठ एव च।
मुनयो धर्म्मविदांसो धृतात्मानो जितेन्द्रियाः"॥)
कुक्कुरदुः, पुं, (कुक्कुरः कुक्कुरगन्धोपलक्षितः दुर्वृक्षः।) वृक्षविशेषः। कुकुरशोंका इति भाषा। तत्पर्य्यायः। ताम्रचूडः २ सूक्ष्मपत्रः ३ मृदुच्छदः ४। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। ज्वररक्तकफनाशित्वञ्च। इति मदनविनोदः॥
"तन्मूलमार्द्रं निश्चिप्तं वदने मुखशोषहृत्"॥
इति भावप्रकाशः॥
कुक्कुरी, स्त्री, (कुक्कुर+स्त्रियां जातित्वात् ङीष्।) कुक्कुरस्त्री। कुत्ती इति भाषा। तत्पर्य्यायः। सरमा २ श्वानी ३ सारमेयी ४ शुनी ५ भषी ६। इति शब्दरत्नावली॥
कुक्कुवाक्, पुं, (कुक्कुरस्य वाक् शब्द इव शब्दो यस्य।) सारङ्गमृगः। इति राजनिर्घण्टः॥
कुक्षः, पुं, (कुषनिष्कर्षे+"उन्दिगुधिकुषिभ्यश्च"। उणां ३। ६८। इति स, कित्च।) कुक्षिः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
कुक्षिः, पुं, (कुषनिष्कर्षे+"क्षुधिकुषिशुषिभ्यःक्सिः"। उणां ३। १५५। इति क्सिः।) उदरम्। इत्यमरः। २। ६। ७७॥ (यथा, महाभारते १। ७७। १३।
"याचोषितं विश्राणाति! त्वया चन्द्रनिभानने!।
तच्चाहमुषितो भद्रे कुक्षौ काश्यस्य भाविनि!"॥
दानवविशेषः। यथा महाभारते १। ६७। ५७।
"कुक्षिस्तु राजन् विख्यातो दानवानां महाबलः"॥)
कुक्षिम्भरिः, त्रि, (कुक्षिं बिभर्त्तीति। भृ+खः+मुम् च।) आत्मम्भरिः। स्वोदरपूरकः। इत्यमरः। ३। १। २१॥
कुक्षिरन्ध्रः, पुं, (कुक्षौ रन्ध्रं छिद्रं यस्य।) नखः। इति निर्घण्टः।
कुङ्कुमं, क्ली, (कुम्कुम् इति शब्दोऽस्ति वाचकत्वेनास्य अर्थस्य आद्यच्। यद्वा कुक्यते आदीयतेऽसौ। कुक् आदाने उमक् निपतनात् मुम्।) खनामख्यातगन्धद्रव्यम्। कुम्कुम् इति केशर इति भाषा। (यथा माघे ११।१४।
"क्षतध्वजिमभेदैः कुङ्कुमेनेव किञ्चित्।

कुचः

मलयरुहरजोभिर्भूषयन् पक्षिमाशाम्"॥)
तत्पर्य्यायः। काश्मीरजन्म २ अग्निशिखम् ३ वरम् ४ वाह्लीकम् ५ पीतनम् ६ रक्तम् ७ सङ्कोचम् ८ पिशुनम् ९ धीरम् १० लोहितचन्दनम् ११। इत्यमरः। २। ६। १२४। चारु १२ वाह्लिकम् १३ वरवाह्लीकम् १४ रक्तचन्दनम् १५। इति तट्टीका॥ अग्निशेखरम् १६ अग्नकं १७ काश्मीरजम् १८ पीतकम् १९ काश्मीरम् २० रुचिरम् २१ शुभ्रम् २२ शोणितम् २३ वृहत्पुष्पम् २४ वरेण्यम् २५ अरुणम् २६ कालेयकम् २७ जागुड़म् २८ कान्तम् २९ वह्निशिखम् ३० केशरवरम् ३१ गौरम् ३२ केसरम् ३३ हरिचन्दनम् ३४ खलम् ३५ रजम् ३६ दीपकम् ३७ लोहितम् ३८ सौरभम् ३९ चन्दनम् ४० इति शब्दरत्नावली॥ अस्य गुणाः। सुरभित्वम्। तिक्तत्वम्। कटुत्वम् उष्णत्वम्। कासवातकफकण्ठरोगमूर्द्धशूलविषदोषनाशित्वम्। रोचनत्वम्। तनुकान्तिकरत्वञ्च। इति राजनिर्घण्टः॥ रेचकत्वम् विवर्णताकण्डूनाशित्वञ्च। इति राजवल्लभः॥ स्निग्धत्वम्। शिरोरुग्व्रणजन्तुवमिव्यङ्गदोषचयापहत्वम्। बल्यत्वञ्च। इति भावप्रकाशः॥ त्वग्दोषनाशित्वम्। इति रत्नावली तत्त्वचन्द्रिका च॥ देशभेदे तत् त्रिविधम्। यथा,—
"काश्मीरदेशजे क्षेत्रे कुङ्कुमम् यद्भवेद्धि तत्।
सूक्ष्मकेशरसारञ्च पद्मगन्धि तदुत्तमम्॥१॥
वाह्लीकदेशसंजातं कुङ्कुमं पाण्डुरं भवेत्।
केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेशरम्॥२॥
कुङ्कुमं पारसीकेयं मधुगन्धि तदीरितम्।
ईषत्पाण्डुरवर्णं तदधमं स्थूलकेशरम्"॥३॥
इति भावप्रकाशः॥
कुङ्कुमी, स्त्री, (कुङ्कुमवर्णोऽस्त्यस्याः। अच् गौरादित्वात् ङीष्। ततः पृषोदरादित्वात् साधुः।) महाज्योतिष्मती। इति राजनिर्घण्टः॥ (कुङ्कुमीति केचित्॥)
कुच, ज रोधपर्कर्कौटिल्यलेखने। इति कविकल्पद्रुमः॥ (भां-परं-सकं, अकं च-सेट्-ज्वलां।) ज कोचः कुचः। रोधः क्रियारोधः जड़ीभाव इत्यर्थः। अस्मिन्नर्थ एव प्रायो वर्त्तते। यस्मिन् प्रमुदिते राज्ञि तमः सङ्कोचति क्षितौ। पर्कः सम्पर्कः। इति दुर्गादासः॥
कुच, श्रि सङ्कोचे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं,सेट्।) प्रायः संपूर्व्वस्य प्रयोगः। श्रि संकुचति अकुचीत् चुकोच। इति दुर्गादासः॥
कुच, तारशब्दे। उच्चैःशब्द इति यावत्। इति कविकल्पद्रुमः॥ (भां-परं-अकं-सेट्।) कोचति ढक्का। भट्टमल्लस्तु तारे शब्दे च कोचति इति नानार्थे पठति। तन्मते तारश्चिक्काणता। कोचति काहौ वणिक् चिक्काणयतीत्यर्थः। इति दुर्गादासः॥
कुचः, पुं, (कुचति संकुचतीति। कुच् संकोचे। "इगुपधेति"। ३। १। १३५। कः।) स्तनः। इत्यमरः। २। ६। ७७। (यथा गीतः रामायणे। ५। १३। ५७।

"अन्या वक्षसि चान्यस्यास्तस्याश्चाप्यपराः कुचे।
उरूपार्श्वकटीपृष्ठमन्योन्यं समुपाश्रिताः" ॥
स्त्रीणां यौवने कुचपरिवृद्धिर्भवति ।
यथाह भावप्रकाशे ।
"पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते ।
तेषां तदपि तारुण्ये पुष्टत्वात् व्यक्तिमेति हि ॥
कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा ।
रोमराज्यादयः पुंसां नारीणामपि यौवने ॥
जायते ऽत्र च यो भेदो ज्ञेयो व्याख्यानतः स च"॥
व्याख्यानं यथा,—
"पुंसां रोमराजिश्मश्रुप्रभृतयः
नारीणान्तु रोमराजी स्तनार्त्तवादयः" ॥)

कुचिण्डिका, स्त्री, (कुत्सिता चण्डिका कोपना इव । विकृतिकारितया तथात्वम् ।) मूर्खाजता । इति शब्दचन्द्रिका ॥

कुचन्दनम्, क्ली, (कुत्सितं गन्धहीनतया चन्दनं यद्वा कौ पृथिव्यां चन्दनमिव ।) रक्तचन्दनम् । इत्यमरः । २ । ६ । १३२ ॥ पत्राङ्गम् । वकम् काठ् इति भाषा । वृक्षभेदः । इति मेदिनी ॥ कुङ्कुमम् । इति शब्दचन्द्रिका । (अस्य पर्य्यायो यथा,—वैद्यकरत्नमालायाम् ।
"पतङ्गं रञ्जनं रक्तं पत्राङ्गञ्च कुचन्दनम्" ॥)

कुचफलः, पुं, (कुच इव फलं यस्य । कुचसदृश्यात्तथात्वम् ।) दाड़िमवृक्षः । इति राजनिर्घण्टः ॥ (गुणपर्य्यायो दाड़िमशब्दे ऽस्य ज्ञातव्यः ॥)

कुचरः, त्रि, (कुत्सितं चरतीति । कु + चर् + अच् ।) कुवादः । परदोषकथनशीलः । इत्यमरः । ३ । १ । ३७ ॥ (दुर्गमदेशगन्ता । यथा, ऋग्वेदे १।१५४।२।
"प्र तद्दिवः स्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः" ॥ कुत्स्याने चरतीति । कान्तारादिपर्य्यटकः । कौ पृथ्व्यां चरतीति । भूमिचरः । यथा महाभारते । १४ । ३८ । १३,१४ ।
"दृष्ट्वा त्वादित्यमुद्यन्तं कुचराणां भयं भवेत् ।
अध्वगाः परितप्येयुरुद्यतो दुःखभागिनः ॥
आदित्यः सत्वमुद्दिष्टं कुचरास्तु तथा तमः ।
परितापोऽध्वगानाञ्च रजसो गुण उच्यते" ॥)

कुचाग्रं, क्ली, (कुचस्य कुचयोर्वा अग्रम् ।) स्तनाग्रभागः । तत्पर्य्यायः । चूचुकम् २ । इत्यमरः । २ । ६ । ७७ ॥ चुचुकम् ३ । इति तट्टीका ॥

कुचाङ्गेरी, स्त्री, (कुत्सिता चाङ्गेरी ।) इति रत्नमाला ॥ चुक्रिका । चुकापालं इति भाषा ॥

कुचिकः, पुं स्त्री, (कुच + बाहुलकात् इकन् ।) मत्स्यविशेषः । इति चिकाख्यशब्दे । कुँचिया इति भाषा ॥

कुचेलः, त्रि, (कुत्सितं चेलं वस्त्रं यस्य ।) कुवासाः । परिहितकुत्सितवस्त्रो जनः । इति मेदिनी ॥ (कुत्सितं चेलमिति विग्रहे । क्ली, जीर्णवस्त्रम् । यथा, मनुः ६ । ४४ ।
"कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥)

कुचेला, स्त्री, (कुचा सङ्कुचा इला भूमिः निद्रा वा यस्याः ।) विद्धकर्णी । इति मेदिनी (यथा, वैद्यवल्लभायाम् ।
"कुचेला कुलका रात्रिर्मेघनामा च ग्रन्थिका"॥
अस्याः पर्य्याया यथा ।
"अम्बष्ठाम्बष्ठकीपाटा कुचेला पाचचेलिका ।
एकाष्ठीला वरा तिक्ता प्राचीनौकाग्निवावुका" ॥
इति वैद्यकरत्नमालायाम् ॥)

कुचेली, स्त्री, (कुचेल + गौरादित्वात् ङीष् ।) अम्बष्ठा । इति रत्नमाला ॥ आकनादि इति भाषा ॥

कुच्छं, क्ली, (कोः पृथिव्याः दुःखं च्यति दर्शनाघ्राणादिना लुनातीति । कु + छो + कः ।) कुमुदम् । इति शब्दचन्द्रिका ॥ (कुमुदशब्देऽस्य गुणपर्य्याया बोद्धव्याः ॥)

कुज उ क्लेशे । इति कविकल्पद्रुमः ॥ (भ्वां–परं–सकं–सेट् ।) उ कोजित्वा कुक्षा । क्लेशं चौर्य्यम् । इति दुर्गादासः ॥

कुज, इ अव्यक्तशब्दे । इति चन्द्रः । (भ्वां–परं–अकं–सेट्–इदित् ।) कुञ्जति कुञ्जरः । इति दुर्गादासः ॥

कुजः, पुं, (कोः पृथिव्याः जायते । कु + जन् + डः ।) मङ्गलग्रहः । (यथा, मङ्गलग्रहस्तुतौ । "अङ्गारकः कुजो भौमः" इति ।) नरकासुरः । (यथा,—
"तत्राहृतास्ता नरदेवकन्याः
कुजेन दृष्ट्वा हरिमार्त्तबन्धुम्" ॥
श्रीमद्भागवते ३।३।८॥) वृक्षः । इति हेमचन्द्रः ॥

कुजम्भलः, त्रि, (कोः पृथिव्याः कौ वा जम्भलः मृत्तिकादिखननेन सन्धिचौरः ।) चौरविशेषः । इति हारावली । सिँदेल चोर इति भाषा ॥

कुजम्भिलः, त्रि, (कुजम्भोऽस्यास्तीति । इलच् ।) कुजम्भलः । इति शब्दरत्नावली ॥

कुजा, स्त्री, (कुजाः पृथिवीजाः वृक्षाः आश्रयत्वेन सन्ति अस्याः इति अच् ततष्टाप् । यथा,—
"कदली दाड़िमी धान्यं हरिद्रा मानकं कचुः ।
विल्वाम्रोकौ जयन्ती च विज्ञेया नवपत्रिका" ॥
इति मन्त्रोक्तनवपत्रिकासु "तव स्थानमिदं मर्च्चे" इत्यादि निर्देशेन चास्याः आश्रयत्वात् तथात्वम् ।) कात्यायनी देवी । इति मेदिनी ॥ (कोः पृथिव्याः जायते । जन + डः टाप् च । सीता देवी भूमेः तदुत्पत्तिकथा कालिका पुराणे ३७ अध्यायेः ।
"ततः पुरोधसं राजा गोतमं मुनिसत्तमम् ।
तत्पुत्रञ्च सुतानन्दं पुरोधायाकरोन्मखम् ॥
द्वौ पुत्रौ तस्य सञ्जातौ यज्ञभूमौ परौ स्मृतौ ।
एका च दुहिता साध्वी भूमध्यन्तरगता शुभा" ॥)

कुञ्जिशः, पुं, मत्स्यभेदः । अस्य गुणाः । मधुरत्वम् । हृद्यत्वम् । कषायत्वम् । दीपनत्वम् । बलकारित्वम् । स्निग्धत्वम् । गुरुत्वम् । ग्राहित्वम् । वाते हितत्वम् । रोचनत्वञ्च । इति राजनिर्घण्टः ॥

कुञ्झटिः, स्त्री, (कोऽजति व्यपहरति सूर्य्यप्रकाशम् । कुज् + क्विप् न कुत्वम् । झट् संघाते इन् । ततः कर्म्मधारयः ।) कुज्झटिका । कुया । कुयासा इति च भाषा । तत्पर्य्यायः । धूममहिषी २ रजान्ध्री ३ कुहेलिका ४ धूमिका ५ नभोरेणुः ६ । इति चिकाख्यशब्देः । अस्य गुणाः । रूक्षत्वम् । तमोगुणप्रायत्वम् । कफपित्तकारित्वञ्च । इति राजवल्लभः ॥

कुज्झटिका, स्त्री, (कुज्झटि + स्वार्थे कन् टाप् ।) कुज्झटिः । इति शब्दरत्नावली ॥

कुज्झटी, स्त्री, (कुज्झटि + स्त्रियां वा ङीप् ।) कुज्झटिः । इति शब्दरत्नावली ॥

कुञ्चनं, क्ली, (कुञ्चति अनेन । कुञ्च + करणे ल्युट् ।) नेत्ररोगविशेषः । तस्य लक्षणं यथा,—
"वाताद्या वर्त्मसङ्कोचं जनयन्ति यदा मलाः ।
तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः" ॥
इति माधवकरः ॥ (भावे ल्युट् । सङ्कोचः । यथा सुश्रुते ।
"कुर्य्यात् शिरागतं मूलशिरा कुञ्चनपूरणम्" ॥)

कुञ्चफला, स्त्री, (कुत्सितं कुञ्चितं फलं अस्याः ।) कुष्माण्डी । इति राजनिर्घण्टः ॥

कुञ्चिः, पुं, (कुञ्च + इन् ।) अष्टमुष्टिपरिमाणम् । यथा, स्मृतिः ॥
"अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्" ॥

कुञ्चिका, स्त्री, (कुञ्च + ण्वुल् + टाप् इत्वञ्च ।) गुच्छा । कुँच् इति भाषा । वंशशाखा । कुचि इति भाषा । इति शब्दचन्द्रिका ॥ क्षत्रजीरकः । इति जटाधरः ॥
(अस्या व्यवहारो यथा भरिचाद्यचूर्णे ।
"मरिचः कुञ्चिकाम्लष्ठा वृक्षाम्लाः कुक्षवः पृथक्"॥
इत्यादिषु द्रष्टव्यम् । इति चरके चिकित्सास्थाने । १६ अः ॥) कूर्चिका । कुँजि चावि इति च भाषा । इति हेमचन्द्रः ॥ मेथिका । इति राजनिर्घण्टः ॥ मत्स्यभेदः । कुँचे इति भाषा । यथा । "कुञ्चिकयैनं विस्राययति भाययति" । इति सुश्रुतोधम् ॥

कुञ्चितं, त्रि, (कुन्च + क्तः ।) वक्रम् । इत्यमरः । ३ । १ । ७१ ॥ (यथा, नैषधे ३ । १ ।
"आकुञ्चिताभ्यामथ पक्षतिभ्यां
नभोविभागान्तरसावतीर्य्य" ॥)
तगरपुष्पे क्ली । इति राजनिर्घण्टः ॥

कुञ्जः, पुं क्ली, (कौ जायते जन + डः । पृथोदरादित्वात् मुमि साधुः ।) पर्व्वतादेर्ध्वतापल्लवादिभिः समन्ताच्छादितगर्भो गह्वरादिदेशः । इति मधुप्रभृतयः ॥ उपरि चतुर्दिक्षु च लतादिभिराच्छादितस्य स्थानस्य मध्ये शून्यदेशः । इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । निकुञ्जः । इत्यमरः । २ । ४ । ८ ॥ (यथा, पदाङ्कदूते १ ।
"गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकबरी निःश्वसन्ती विषण्णम् ।
अद्यैवास्ते मुररिपुरिति भ्रान्तिदूतीसहाया
त्यक्त्वा गेहं झटिति यमुना मञ्जुकुञ्जं जगाम" ॥)
हनुः । हस्तिदन्तः । इति मेदिनी ॥

कुञ्जरः, पुं, (प्रशस्तः कुञ्जः हनुर्दन्तो वा अस्त्यस्य । कुञ्ज + "रप्रकरणे खमुखकुञ्जेभ्यः उपसंख्यानम्" । वार्त्तिकं इति रः ।) हस्ती । (यथा, महाभारते ३ । वैतवनप्रवेशे २६ । १५ ।
"कुञ्जरस्येव संग्रामे परिमृद्नाम्युरुद्यमम्" ॥)
उत्तरपदे श्रेष्ठवाचकः । यथा पुरुषकुञ्जर इत्यादि । इत्यमरः । २ । ८ । ३४ ॥ (सर्पविशेषः । यथा, महाभारते । ३५ । १५ ।

"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः" ॥) केशः। इति मेदिनी ॥ देशभेदः। इति शब्दरत्नावली ॥ (पर्व्वतविशेषः ॥ यथा गोः रामायणे ४। ४१। ५०।

"ततः शक्रध्वजाकारः कुञ्जरो नाम पर्व्वतः। अगस्त्यभवनं तत्र निर्म्मितं विश्वकर्म्मणा" ॥)

कुञ्जरपिप्पली, स्त्री, (कुञ्जरनाम्नी पिप्पली।) गजपिप्पली। इति शब्दमाला ॥ (गजपिप्पलीशब्देऽस्या विवृतिर्द्रष्टव्या ॥)

कुञ्जरशारमूलं, क्ली, (कुञ्जरपिप्पल्या इव क्षारं उग्रं मूलमस्य।) मूलकम्। इति राजनिर्घण्टः ॥

कुञ्जरा, स्त्री, (कुञ्जः हस्तिदन्त इव पुष्पं अस्यास्याः। स्वार्थे यच् तत आजादित्वात् टाप्।) धातकी। धाइफुल इति भाषा। (अस्याः पर्य्याया यथा,—

"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा। सुभिक्षा वह्निपुष्पी च वह्निज्वाला च सा स्मृता"। इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे। गुणाश्चास्या धातकीशब्दे ज्ञातव्याः ॥) पाटलावृक्षः। इति मेदिनी ॥ (कुञ्जर + टाप्।) हस्तिनी। इति शब्दचन्द्रिका ॥

कुञ्जरारातिः, पुं, (कुञ्जरस्य अरातिः शत्रुः।) शरभः इति हेमचन्द्रः ॥ (सिंहः। इति व्युत्पत्तिलभ्योऽर्थः।)

कुञ्जरालुकं, क्ली, (कुञ्जरसंज्ञकं आलुकम्।) आलुकविशेषः। हस्त्यालु। इति शब्दचन्द्रिका ॥

कुञ्जराशनः, पुं, (कुञ्जरेण अश्यते। अश भोजने + कर्म्मणि ल्युट्।) अश्वत्थवृक्षः। इत्यमरः। २। ४। २॥ (अश्वत्थशब्देऽस्य विवरणं द्रष्टव्यम् ॥)

कुञ्जरी, स्त्री, (कुञ्जर + जातित्वात् ङीष्।) हस्तिनी। इति शब्दचन्द्रिका ॥

कुञ्जलं, क्ली, (कुत्सितं जलमिव जलं यत्र। एषोदरात् साधुः।) काञ्जिकम्। इत्यमरः। २। ९। ३९॥

कुञ्जवल्लरी, स्त्री, (कुञ्जाकृतिरिव कुञ्जाकारा वा वल्लरी।) निकुञ्जिकास्लावृक्षः। इति राजनिर्घण्टः॥

कुञ्जिका, स्त्री, (कुन्ज + स्वार्थे कन् + टाप् इत्वं च।) क्षुद्रजीरकः। कुञ्चिका इति क्वचित् पाठः। इति जटाधरः। निकुञ्जिकास्लावृक्षः। इति राजनिर्घण्टः ॥

कुट इ वैकल्ये। इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट्। इदित्।) पञ्चमस्वरी। इ कुण्ठयते। वैकल्यमिह विकलीकरणम्। कुण्ठति जनं श्लोकः। इति दुर्गादासः ॥

कुट श्लि कौटिल्ये। इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सकच्च-सेट्।) श्लि कुटति अकुटीत् चुकोट कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च। इति दुर्गादासः ॥

कुट क ड प्रतापने। इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट्।) पञ्चमस्वरी। क ड कोटयते। एषोऽन्यैर्न मन्यते। इति दुर्गादासः ॥

कुटः, पुं क्ली, (कुट + कः।) कलशः। इत्यमरः। २। ९। ३२ ॥

कुटः, पुं, (कुट् + कः।) कोटः। इति मेदिनी। गड इत्यादि भाषा ॥ शिलाकुट्टम्। पातरभाङ्गा हातुड़ी इति भाषा। वृक्षः। इति हेमचन्द्रः ॥ पर्व्वतः। इति हारावली ॥ (कुटिले त्रि, यथा, ऋग्वेदे १। ४६। ४। "हविषाजारो अपां पिपर्त्ति पपुरिर्नरा। पिता कुटस्य चर्षणिः" ॥)

कुटङ्गः, पुं, (कुर्त्तेहभूमिः टङ्क्यते आच्छाद्यतेऽनेन। कु + टकि आच्छादने। करणे घञ्।) गृहाच्छादनम्। इति शब्दमाला ॥ चाल इति ख्यातः ॥

कुटङ्गकः, पुं, (कुटस्याङ्गमिव। शकन्ध्वादित्वात् साधुः।) वृक्षत्वगागहनम्। छदिः। चाल इति भाषा। गृहभेदः। इत्यमरटीकायां सुकुटादयः ॥ कुँड़े इति भाषा ॥

कुटचः, पुं, (कुटे गिरौ चीयते उत्पद्यते। चि + डः।) कुटजवृक्षः। इति शब्दचन्द्रिका ॥ (कुटजशब्दे गुणादयोऽस्य बोद्धव्याः ॥)

कुटजः, पुं, (कुटे पर्व्वते जायते। जन् + डः।) पुष्पवृक्षविशेषः। यस्य फलं इन्द्रयवः। कुड़ची इति भाषा ॥ (यथा, माघे ६। ३५।

"कुटजपुष्परागकषायाः स्फुटं
विदधिरे दधिरेणुविडम्बनाम्" ॥)

तत्पर्य्यायः। शक्रः २ वत्सकः ३ गिरिमल्लिका ४। इत्यमरः। २। ४। ६६॥ कौटजः ५। इति तट्टीका॥ वृक्षकः ६ शक्रपर्य्यायः ७। इति रत्नमाला ॥ कुटजः ८ काही ९ कालिङ्गः १० मल्लिकापुष्पः ११ प्रावृष्यः १२ शक्रपादपः १३ वरतिक्तः १४ यवफलः १५ संग्राही १६ पाण्डुरद्रुमः १७ प्रावृषेण्यः १८ महागन्धः १९ पाण्डुरः २०। इति शब्दरत्नावली ॥ अपि च।

"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका। कालिङ्गः शक्रपुष्पाख्यो च मल्लिकापुष्प इत्यपि। इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः। कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः" ॥ इति भावप्रकाशः ॥ अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कषायत्वम्। अतिसारनाशित्वञ्च। असितस्य तस्य गुणाः। रक्तपित्तत्वग्दोषार्शोनाशित्वम्। इति राजनिर्घण्टः ॥ कफनाशकत्वम्। इति राजवल्लभः ॥

("कुटजत्वक्कृतः क्वाथो घनीभूतः सुशीतलः। लेहितोऽतिविषायुक्तः सर्व्वातीसारमुद्धरेत्" ॥

"कुटजस्य फलं ग्राह्यमष्टभागजले पृथक्। तथैव विपचेद्भूयो दाड़िमोदकसंयुतम् ॥ यावच्चैवलसीकाभं पृथक् तमुपकल्पयेत्। तस्यार्द्धकर्षतक्रेण पिबेद्रक्तातिसारवान् ॥ अवश्यमरणीयोऽपि मृत्योर्याति न गोचरम्"। इति वैद्यकचक्रपाणिसंग्रहेऽतिसाराधिकारे ॥) अगस्त्यमुनिः। द्रोणाचार्य्यः। इति मेदिनी ॥

कुटन्नटं, क्ली, (कुटन् वक्रीभवन् सन् नटति। नट स्पन्दने + पचाद्यच्।) कैवर्त्तीमुस्तकम्। इत्यमरः। २। ४। १३१॥ केउटिया मुता इति ख्यातम्। केशर इति गौड़ोक्तिः। इति तट्टीका ॥

(अस्य व्यवहारो यत्र तत्र यथा।

"पद्मकं चन्दनोशीरं पाठां मूर्व्वां कुटन्नटम्" ॥

इति वाभटे चिकित्सास्थाने १० अध्याये।

अस्य पर्य्यायाः यथा।

"कुटन्नटं परं वल्क्यं मुस्ताभञ्च परीलवम्" ॥ इति वैद्यकरत्नमालायाम् ॥

कोसची मोथा। गुड़तजी इति च। इयन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्ताकृतिः ॥

पर्य्यायाश्च-यथा।

"कुटन्नटं दासपुरं बालेयं परिपेलवम्। शवगोपुरगोनर्दकैवर्त्तीमुस्तकानि च। मुस्तावत् पेलवपुटं शुक्राभं स्यादितुन्नकम्" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे ॥ गुणा अस्य वितुन्नकशब्दे ज्ञातव्याः ॥)

कुटन्नटः, पुं, (कुटन् सन् नटति। नट् + अच्।) श्योनाकवृक्षः। इत्यमरः। २। ४। ५७॥

(अस्य पर्य्याया यथा।

"श्योनाकः शोणशस्त्र स्यान्नटकट्वङ्गदुण्टुकः। मडूकपर्णपत्रोर्णं शुकनासकुटन्नटाः। दीर्घवृन्तो रक्तखापि पृथुशिम्बः कटम्भरः" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ श्योनाकशब्देऽस्य गुणाश्च बोद्धव्याः ॥)

कुटपः, पुं, (कुटात् विपच्यालात् पाति रक्षति। कुट् + पा + कः।) मुनिः। निष्कुटः। गृहसमीपोपवनम्। (कुट + "उषिकुटिदलीति"। उणां ३। १४२। इति कपन्।) मानभेदः। स तु कुड़वपरिमाणम्। इति हेमचन्द्रः ॥ कमले क्ली। इति राजनिर्घण्टः ॥

कुटरं, क्ली, (कुट + बाहुलकात् करन्।) कुठरः मञ्चानदण्डबन्धनस्तम्भः। इत्यमरटीकायां नीलकण्ठः ॥

कुटरुः, पुं, (कुट + "कुटः किच्च"। उणां ४। ८०। इत्यरुः किच्च।) वस्त्रगृहम्। इत्युणादिकोषः ॥ कानात् तांबु इति भाषा ॥

कुटरुषा, स्त्री, (कुटेषु वृक्षेषु रुषा। शकन्ध्वादित्वात् साधुः।) चिरता। इति रत्नमाला ॥ तेउड़ी इति भाषा ॥

कुटलं, क्ली, (कुटति आच्छादयत्यनेन। कुट् + करणे कलच्।) पटलम्। इति हारावली ॥ चाल छाद इति भाषा ॥

कुटहारिका, स्त्री, (कुटं कलशं हरति जलाद्यानयनार्थं गच्छति या। कुट + हृ + स्वुल् टाप् इत्वं च।) दासी। इति हेमचन्द्रः ॥

कुटिः, स्त्री, (कुट्यते सङ्घीयते द्रव्यादिभिः असौ। कुट् + "कृ गृ घृ घृ घृ कुटीति"। उणां ४। १४२। इति इः स च कित्।) गृहम्। इत्यमरटीकायां भरतः ॥

कुटिः, पुं, (कुट्यते छिद्यते ऽसौ। कुट छेदने + "कुटि कंप्योर्नलोपश्च"। उणां ४। १४३। इति इः। स च कित्। धातोर्नलोपश्च।) वृक्षः। इति शब्दरत्नावली ॥ शरीरम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पर्व्वतः। इत्युज्ज्वलदत्तः। ४। १४३॥)

कुटिचरः, पुं, (कुटिं कुटिलं जले चरतीति। कुटि +

चर + टः ।) जलशूकरः । इति शब्दरत्नावली ॥ शुशुक इति भाषा ॥

कुटितं, त्रि, (कुटं कौटिल्यं जातमस्य । कुट् + इतच् किच ।) कुटिलम् । इत्यमरटीकायां भरतः ॥

कुटिरं, क्ली, (कुत्सिते निर्म्मीयते यत् । कुट् + इरन् ।) कुटीरम् । लघुकुटी । इत्यमरटीकायां भरतः ॥

कुटिलं, त्रि, (कुट् वक्रीभावे + बाऽऊलकात् इलच् ।) अन्तर्जु । वाँका इति भाषा । तत्पर्य्यायः । अराजम् २ वृजिनम् ३ जिह्मम् ४ ऊर्म्मिमत् ५ कुञ्चितम् ६ नतम् ७ आविद्धम् ८ भुग्नम् ९ वेङ्कितम् १० वक्रम् ११ । इत्यमरः । ३ । १ । ७१ ॥ भङ्गुरम् १२ । इति हेमचन्द्रः ॥ वेणु १३ विनतम् १४ उन्दुरम् १५ । इति शब्दरत्नावली ॥

(यथा, विष्णुपुराणे १ । ९ । २३ ।

"व्यलञ्जटाकलापस्य भ्रकुटीकुटिलं मुखम् ।
निरीक्ष्य कस्मिन्भुवने मम यो न गतो भयम्" ॥)

तगरपुष्पे क्ली । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—

"कालानुसारिवा वक्रं तगरं कुटिलं शठम् ।
महोरगं नतं जिह्मं दीनं तगरपादिकम्" ॥

इति वैद्यकरत्नमालायाम् ॥ क्ली, छन्दोभेदः ॥)

कुटिला, स्त्री, (कुटति वक्रं व्रजतीति । कुट् + इलच् + स्त्रियां टाप् ।) नदीविशेषः । इति मेदिनी ॥ सरस्वती नदी । सुक्कानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ (राधिकाभर्त्तृभगिनी ॥ त्रि, असरलम् ॥)

कुटी, स्त्री पुं, (कुटि + वा ङीप् ।) कुटः । गृहम् । इत्यमरः । २ । २ । ६ ॥ (यथा मनुः । ११ । ७२ ।

"ब्रह्महा द्वादशसमाः कुटीं कृत्वा वने वसेत्" ॥)

कुटी, स्त्री, कुम्भदासी । कुटिनी इति भाषा ॥ सुरानामगन्धद्रव्यम् । चित्रगुप्तः । इति मेदिनी ॥

कुटीचकः, पुं, (कुत्सा क्लेशेन पुत्रान्नेन चकते दृप्नोति । कुटी + चक् + अच् ।) पुत्रान्नजीवी । तत्पर्य्यायः । पुत्रान्नादः २ । इति त्रिकाण्डशेषः ॥ (कुत्सां पर्णकुटीरे चकते दृप्नोति वसतीति । सन्न्यासिभेदः । स च कर्म्मनिष्ठः । यथा—महाभारते १३ । १४ अध्याये ।

"चतुर्विधा भिक्षवस्ते कुटीचकबहूदकौ ।
हंसः परमहंसश्च योऽत्र पश्चात् स उत्तमः" ॥)

कुटीचरकः, पुं, (कुत्सां चरति । कुटी + चर + टः स्वार्थे कन् ।) यतिविशेषः । इति यतिधर्म्मसंग्रहः ॥

कुटीरः, पुं, (कुटी + स्वल्पार्थे रः ।) क्षुद्रगृहम् । कुँड़े इति भाषा । तत्पर्य्यायः । स्वल्पवेश्म २ । इति जटाधरः ॥ (यथा, गीतगोविन्दे । १ । २८ ।

"लवङ्ग-लता-परिशीलन-कोमल-मलय-समीरे । मधुकर-निकर-करम्बित-कोकिल-कूजित-कुञ्ज-कुटीरे" ॥)

कुटुङ्गकः, पुं, (कुटुङ्ग + स्वार्थे कन् ।) वृक्षलतागृहम् । पिटः । डोल इति भाषा । छदिः । चाल इति भाषा । इत्यमरटीकायां भरतः ॥ वृक्षलता । गृहभेदः । इत्यमरटीकासारसुन्दरी ॥ कुँड़े इति भाषा ॥

कुटुम्ब, क ङ धृत्याम् । इति कविकल्पद्रुमः । (चुरां-आत्मं-अकं-सेट् ।) ओष्ठवर्गशेषोपधः । क ङ कुटुम्बयते । अयं कैश्चिन्न मन्यते । इति दुर्गादासः ॥

कुटुम्बः, पुं, (कुटुम्बयते पालयति । कुटुम्ब + अच् । यद्वा कुटुम्ब्यते पाल्यते सम्बध्यते वा । कुटुम्ब + कर्म्मणि घञ् ।) नाम । ज्ञातिः । बान्धवः । सन्ततिः । इति शब्दरत्नावली ॥ पोष्यवर्गः । इत्यमरमाला ॥ (यथा, मनुः । ११ । २२ ॥

"तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बान्महीपतिः ।
श्रुतशीले च विज्ञाय वृत्तिं धर्म्म्यां प्रकल्पयेत्" ॥)

कुटुम्बव्याप्तः, त्रि, (कुटुम्बभरणाय व्याप्तः नियुक्तः ।) कुटुम्बपोषणासक्तः । तत्पर्य्यायः । अभ्यागारिकः २ उपाधिः ३ । इत्यमरः । ३ । १ । ११ ॥ (कुटुम्बेन पुत्रदारादिपोष्यवर्गेण व्याप्तः संयुक्तः । बद्ध-परिवारविशिष्टः पुरुषः ॥)

कुटुम्बिनी, स्त्री, (कुटुम्बः अतिप्रशस्यः अस्त्यस्याः । अस्त्यर्थे इनिः । ततो ङीप् ।) कुटुम्बविशिष्टा । पतिपुत्रदुहित्रादिमती प्रतिष्ठिता स्त्री । तत्पर्य्यायः । पुरन्ध्रीः २ । इत्यमरः । २ । ६ । ६ ॥ पुरन्ध्रिः ३ । इति भरतः ॥ पुरन्ध्रिका ४ । इति शब्दरत्नावली ॥ (यथा रघुवंशे । ८ । ८६ ।

"अपश्लोकभयाः कुटुम्बिनीमनुगृह्णीष्व निवापदत्तिभिः" ॥) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । मयस्या २ क्षीरिणी ३ जलकाम्बुका ४ वक्रशल्या ५ दुराधर्षा ६ क्रूरकर्म्मा ७ सिरिग्विटिका ८ प्रीता ९ प्रहरकुटवी १० प्रीतला ११ जलेवहा १२ । अस्या गुणाः । मधुरत्वम् । ग्राहित्वम् । कफपित्तव्रणरक्तदोषकण्डूनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

कुटुम्बी, [न्] पुं, (कुटुम्बः अस्त्यस्य । अस्त्यर्थे इनिः ।) गार्हस्थ्याश्रमविशिष्टः । तत्पर्य्यायः । गृही २ गृहमेधी ३ गृहस्थः ४ । इति जटाधरः ॥ (यथा, कुमारे । ६ । ८ । ५ ।

"ग्लौः सम्पूर्णकामोऽपि मेनामुखमुदैक्षत ।
प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः" ॥)

कुटुम्बी [न्], त्रि, (कुटुम्बः पोष्यवर्गो ऽस्यास्य अस्त्यर्थे इनिः ।) क्षपकः । इति शब्दचन्द्रिका ॥ कुटुम्बविशिष्टश्च ।

कुटुम्बौकः, [स्] क्ली, (कुटुम्बानां ज्ञातिबान्धवानां दार-पुत्रादीनां ओकः वासस्थानम् ।) कुटुम्बवासस्थानम् । इति जटाधरः ॥

कुट्ट, क कुत्सायाम् । छिदि । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क कुट्टयति । इति दुर्गादासः ॥

कुट्ट, क ङ प्रतापने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) पञ्चमस्वरी । टवर्य्यान्तः । क ङ कुट्टयते । एषोऽन्यैर्न मन्यते । इति दुर्गादासः ॥

कुट्टकः, पुं, (कुट्टकः भाज्यभाजकादिगणनं यत्र ।) अङ्कविशेषः । तस्य सूत्रं यथा,

"भाज्यो हारः क्षेपकश्चापवर्त्तः
केनाप्यादौ संभवेत् कुट्टकार्थम् ।
येन च्छिन्नौ भाज्यहारौ न तेन

क्षेपश्चैतद्दृश्यमुद्दिष्टमेव" ॥

उदाहरणं यथा ।

"एकविंशतियुतं शतद्वयं
यद्गुणं गुणकपञ्चषष्टियुक् ।
पञ्चवर्जितशतद्वयोद्धृतं
शुद्धिमेति गुणकं वदाशु तम्" ॥

इति लीलावती ॥ (कुट्टयति उपलदन्तादिभिर्भिनत्ति छिनत्ति चूर्णयति वा । कुट्ट छेदे + ण्वुल् । छेदके, त्रि । यथा, याज्ञवल्क्यः । ३ । ४६ ।

"दन्तोलूखलिकः काणपक्षाग्नौ वाप्यकुट्टकः" ॥)

कुट्टनं, क्ली, (कुट्टते इति । कुट्ट छेदने + भावे ल्युट् ।) छेदनम् । कोटा इति भाषा । कुत्सनम् । प्रलापनम् ॥

कुट्टनी, स्त्री, (कुट्टयति छिनत्ति नाशयति स्त्रीणां कुलमनया । कुट्ट + स्वार्थे णिच् ततः ल्युट् ङीप् । यद्वा कुट्ट्यते छिद्यते स्त्रीणां कुलं अनया । कुट्ट छेदने + करणे ल्युट् ङीप् च ।) पुरश्चेट्या सह परस्त्रीयोगकर्त्री । कुट्नी इति भाषा । तत्पर्य्यायः । शम्भली २ । इत्यमरः । २ । ६ । १९ । कुट्नी ३ सम्भली ४ । इति तट्टीका ॥ माधवी ५ रङ्कमाता ६ अर्च्चुली ७ । इति जटाधरः ॥ कुम्भदासी ८ गणेरुका ९ । इति शब्दरत्नावली ॥ (यथा, हितोपदेशे । १ । २४३ ।

"तदाखिद्यनमवलोक्य समीपवर्त्तिनी कुट्टन्यचिन्तयत्" ॥)

कुट्टमितं, क्ली, स्त्रीणां दशधाश्रृङ्गारचेष्टान्तर्गतचेष्टाविशेषः । स्त्रीणां स्वाभाविकदशाश्रृङ्गारान्तर्गतमिदम् । इति हेमचन्द्रः ॥ तस्य लक्षणं यथा, साहित्यदर्पणे । ३ । १११ ।

"केशस्रक्नाधरादीनां यत्तु हर्षोऽपि सम्भमात् ।
प्राज्ञैः कुट्टमितं नाम शिरःकरविधूननम्" ॥

कुट्टारं, क्ली, (कुट्ट + आरन् ।) केवलम् । इति मेदिनी ॥ कम्बलम् । इति विश्वः ॥

कुट्टारः, पुं, (कुट्टते भिद्यते हन्यते वाऽस्मिन् यतनेनेति शेषः । कुट्ट + आरन् ।) पर्व्वतः । इति त्रिकाण्डशेषः ॥

कुट्टिमः, पुं क्ली, (कुट्ट + भावे घञ् । तेन निर्वृत्तः निष्पन्नः इत्यर्थे इमप् ।) मणिभूः । इत्यमरटीकायां भरतः ॥ (यथा रघुः ११ । ९ ।

"मरुत्सुतं मणिकुट्टिमोचितौ
माटप्पार्श्वपरिवर्त्तिनाविव" ॥)

सुधाघटितभूतलम् । इति सुधूतिः ॥ कुटीरः । इति मधुरानाथः ॥ दाड़िमवृक्षः । इति राजनिर्घण्टः ॥

कुट्टिहारिका, स्त्री, (कुट्टते यत् । कुट्ट + इन् । कुट्टिं मत्स्यमांसादिकं हरति । कुट्टि + हृ + ण्वुल् टाप् अत इत्वं च ।) दासी । इति हलायुधः ॥

कुट्टीरः, पुं, (कुट्टते ऽस्मिन् । कुट्ट + ईरन् ।) पर्व्वतः । इति हारावली ॥

कुड्मलं, क्ली, (कुट्टते नारकिभ्यो धनलक्षं दीयते यत्र । कुट + "कृषादिभ्यः"। उणां १ । १०८ । इति कलच् तस्य मुट् च ।) नरकभेदः । इति मेदिनी । यत्र

कुठेरः

रज्जुभिः पोड़नम्। इति मनुः॥

कुड्मलः, पुं, क्ली, (कुटति ईषत् विकासोन्मुखीभवतीति। कुटि + "इषादिभ्यश्चित्" । उणां १ । १०८ । इति कमच् ।) विकासोन्मुखप्रौढ़कलिका। ईषद्विकसिता कलिका। तत्पर्य्यायः। मुकुलः २। इत्यमरः॥ कोषः इ। इति जटाधरः॥ (यथा, माघे ।२।७। "द्योतिताशान्तरैः कुन्दकुड्मलायदतः स्मितैः"॥)

कुठ छिदि। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कुठेरः कुठारः कुठाकुः। इति दुर्गादासः॥

कुठ इ खोटने। वैकल्ये। आलस्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्-इदित्।) पञ्चमस्वरी। कर्म्मणि इ कुण्ठ्यते। वैकल्यं विकलीभावः। आलस्यं मन्दीभावः। कुण्ठति खड्गः शोकार्त्तो वृद्धो वा। इति दुर्गादासः॥

कुठः, पुं, (कुण्ठते क्रियतेऽसौ। कुठ छेदने + कर्म्मणि घञर्थे कः।) वृक्षः। इत्यमरः। २। ४। ५॥

कुठरः, पुं, (कुट + बाहुलकात् करन्।) मस्यान-दण्डबन्धनार्थलम्भः। तत्पर्य्यायः। दण्डविष्कम्भः २। इत्यमरः। २। ६। ७४॥ (नागविशेषः। (यथा, महाभारते १। ३५। १५।

"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः"॥

कुठाकुः, पुं, (कोठति आहन्ति भिनत्ति काष्ठम्। कुठ छेदने + आकुन् किच्च।) पक्षिविशेषः। इत्युणादिकोषः। काठ्ठोकरा इति भाषा॥

कुठाटङ्गः, पुं क्ली, (कुठारस्टङ्ग इव। एषोदरादित्वात् रूपे साधुः।) कुठारः। इति जटाधरः।

कुठारः, पुं क्ली, (कोठतीत्यनेन। कुठ + करणे आरन्।) अस्त्रविशेषः। कुड़ाल इति भाषा। तत्पर्य्यायः। सधितिः २ परश्वधः ३ परश्वधः ४। इत्यमरः। २। ८। ९२॥ कुठारी ५ पर्शुः ६ परश्वधः ७ पर्श्वधः ८। इति तट्टीका॥ कुठाटङ्गः ९ द्रुघणः १०। इति जटाधरः॥ (यथा, श्रीमद्भागवते ३। २५। १२।

"तं त्वागतार्हं प्रणतं प्रणम्य
स्वानां त्वसंसारतरोः कुठारम्"॥)

कुठारः, पुं, (कुण्ठते क्रियतेऽसौ। कुठ + कर्म्मणि आरन्।) वृक्षः। इति शब्दरत्नावली॥

कुठारः, पुं, (कुठ + आरच्।) वृक्षः। वागुरः। इति मेदिनी॥ शस्त्रकारः। इति शब्दरत्नावली॥

कुठिः, पुं, (कुठ + "कुठिकण्ठ्योर्नलोपश्च"। उणां ४। १४१। इति इन् किच्च।) पर्व्वतः। वृक्षः। इत्युणादिकोषः॥

कुठिकः, पुं, (कुठ + इकन् किच्च।) कुठम्। इति हारावली। कुड़ इति भाषा॥

कुठेरः, पुं, (कुण्ठति तापयति वैकल्यं करोति वा। कुठि खोटने वैकल्ये आलस्ये च + "पतिकठि-कुठीति"। उणां १। ५९। इति एरक् बाहुलकात् गुणोऽभावः।) अग्निः। इति शब्दमाला॥ तुलसी। इत्युणादिकोषः॥ अजैकः। इति राजनिर्घण्टः॥ वर्व्वरी इति ख्यातेः। (यथा, गीतः रामायणे १। १७। १०।

"दाड़िमान् करवीरांश्च अशोकांस्तिलकांस्तथा। अङ्कोटांश्च कुठेरांश्च नीलाशोकांश्च सर्व्वशः"॥)

कुठेरकः, पुं, (कुठेर इव कायति प्रकाशते। कै + कः।) पर्णासः। इत्यमरः। २। ४। ७६॥ तुलसी इति ख्यातः। श्वेतच्छदः। इति शब्दचन्द्रिका॥ श्वेततुलसी वाबुइ तुलसी इति च ख्यातः। (अस्य पर्य्यायाः। "अर्ज्जकः श्वेतपर्णासो गन्धपुत्रः कुठेरकः"। इति वैद्यकरत्नमालायाम्। वर्व्वरी। एतदर्थेऽस्य पर्य्याया यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।

"वर्व्वरी तुवरीतुल्यौ खरपुष्पाजगन्धिका।
पर्णाश्रस्तत्र ज्ञेयो तु कठिल्लककुठेरकौ"॥
गुणाश्चास्य वर्व्वरीशब्दे ज्ञेयाः॥) नन्दीवृक्षः। इति राजनिर्घण्टः॥

कुठेरजः, पुं, (कुठेर इव जायते। जन् + डः।) कुठेरकः। श्वेततुलसी। इति शब्दरत्नावली॥

कुठेरः, पुं, (कुठ + एरक्।) चामरवातः। चामरेर वातास इति भाषा। तत्पर्य्यायः। मरुत्यः २। इति त्रिकाण्डशेषः॥

कुड श्रि बाल्ये। वदने। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सकच्च-सेट्।) एतदाद्यास्चत्वारः पञ्चमस्वरिणः। बाल्यमिह श्रिमुच्यापारः। श्रि कुड़ति अकुड़ीत् सिताभिः श्रिमुः। इति दुर्गादासः॥

कुड़ इ वैकल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्।) इ कर्म्मणि कुण्ड्यते। कुण्डति जनं देवः विकलं करोतीत्यर्थः। इति दुर्गादासः॥

कुड इ ड दाहे। इति कविकल्पद्रुमः। (भ्वां-आत्मं-सकं-सेट्-इदित्।) इ कर्म्मणि कुण्ड्यते। ड कुण्डते इति दुर्गादासः॥

कुड इ क रक्षे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्-इदित्।) इ क कुण्डयति। इति दुर्गादासः।

कुड़पः, पुं, (कुड़ + कपन्।) कुड़वपरिमाणम्। इत्यमरटीकायां स्वामी॥

कुड़वः, पुं, (कुण्डति परिमाति अनेनास्मिन् वा। कुड़ + कवन्।) परिमाणविशेषः। (यथा, आर्य्यासप्तशत्याम्। १३०। "उपनीय कमलकुड़वं कथयति समयश्चिकित्सके हलिकः"॥) स तु प्रस्थचतुर्थांशः। इति लीलावती॥ वैद्यकमते विप्रः हतपरिमाणम्। द्वात्रिंशत्तोलकमिति यावत्। तत्पर्य्यायः। अञ्जलिः २ अष्टमारम् ३ शरावार्द्धम् ४। इति परिभाषा॥ (यदुक्तं वैद्यकपरिभाषायाम्॥

"रक्तिकादिषु मानेषु यावन्न कुड़वो भवेत्।
मुख्यद्रवार्द्रयोश्चापि तुल्यमानं प्रकीर्त्तितम्"॥
"प्रस्थतिभ्यामञ्जलिः स्यात् कुड़वोऽर्द्धशरावकः॥
अष्टमानश्च स ज्ञेयः"। इति शार्ङ्गधरस्य पूर्व्वखण्डे। १ अः॥)

कुड़ऊची, स्त्री, (कुड़ी क्षुद्रा ऊची कारवेल्ली।) क्षुद्रकारवेल्ली। इति राजनिर्घण्टः॥

कुड़िः, पुं, (कुण्ड्यते दह्यते इति। कुड़ि दाहे + इन्।) शरीरम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः।

कुड़िशः, पुं, (कुण्डते मन्यतेऽसौ। कुड़ वदने + बाहुलकात् शः तत इट्।) मत्स्यविशेषः। कुड़चि माच् इति भाषा। अस्य गुणाः। मधुरत्वम्। हृद्यत्वम्। कषायत्वम्। अग्निदीपनत्वम्। लघुत्वम्। स्निग्धत्वम्। वातरोगे पथ्यत्वम्। रोचनत्वम्। बलकफोष्णकारित्वञ्च। इति राजवल्लभः॥

कुड्मलः, पुं, (कुड़ बाल्ये + "इषादिभ्यश्चित्"। उणां १। १०८। इति कमच् कुड़ेरपि। मुट् च।) कुड्मलः। इत्यमरटीका सिद्धान्तकौमुदी च॥

कुड्यं, क्ली, (कुड़ि + तत्र साधुरिति यत्। कौतेरण्णादित्वात् यक् डुगागमश्च इत्युज्ज्वलदत्तादयः।) भित्तिः। भित् देयाल इत्यादि भाषा। इत्यमरः। २। २। ४॥ (यथा, महाभारते १। १४५। १०।

"सर्पिस्तैलवसाभिश्च मात्तया चाप्यनल्पया।
मृत्तिकां मिश्रयित्वा त्वं लेपयं कुड्येषु दापय"॥)

विलेपनम्। इति मेदिनी॥ कौतूहलम्। इति शब्दरत्नावली॥

कुड्यकं, क्ली, (कुड्य + स्वार्थे कन्।) कुड्यम्। भित्तिः। इति शब्दरत्नावली॥

कुड्यच्छेदी, [न्] पुं, (कुड्यं भित्तिं छिनत्ति विदारयतीति। कुड्य + छिद् + णिनिः।) चौरविशेषः। इति शब्दरत्नावली॥ सिंदेल चोर इति भाषा॥

कुड्यच्छेद्यं, क्ली, (कुड्यस्थितं कुड्यस्य वा छेद्यम्।) खानिकम्। इति त्रिकाण्डशेषः। देयालेर गर्त्त इति भाषा॥

कुड्यमत्स्यी, स्त्री, (कुड्ये मत्स्यी इव। मत्स्य + जातित्वात् ङीष् यणोपः।) गृहगोधिका। इति शब्दरत्नावली॥

कुड्यमत्स्यः, पुं, (कुड्ये मत्स्य इव।) गृहगोधिका। इति हेमचन्द्रः॥

कुण त् क आभाषे। मन्त्रे। इति कविकल्पद्रुमः॥ (अदन्त-चुरां-परं-सकं-सेट्।) क्रखो मूर्द्धन्योपधः। कुणयति। मन्त्रोऽभिमुखीकरणम्। गुणोक्तिरित्येके। इति दुर्गादासः॥

कुण श्र उपकरणे। शब्दे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) उपकरणं दानादिना पोषणम्। श्र कुणति दीनं दयालुः। कोशिता। इति दुर्गादासः॥

कुणक्षरः, पुं, (कुणं सुक्ताम्रादिकं क्षरयति। कुण + क्षु + बाहुलकात् खच्।) वृक्षविशेषः। वनवेतुया इति भाषा। तत्पर्य्यायः। कुणक्षा २ क्षणक्षः ३ अरण्यवालुकः ४। अस्य गुणाः। मधुरत्वम्। रुचिकारित्वम्। दीपनत्वम्। पाचनत्वम्। हितत्वञ्च। एतच्छाकगुणाः। त्रिदोषनाशित्वम्। मधुरत्वम्। रुचिकारित्वम्। दीपनत्वम्। ईषत्कषायत्वम्। संग्राहित्वम्। पित्तश्लेष्महरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥

कुणपः, पुं, (क्षणेः + कपन् सम्प्रसारणञ्च।) शवम्। मृतशरीरम्। इत्यमरः। २। ८। ११८॥ (यथा, महाभारते १४। ६। २२-२३।

नारद उवाच।

"उन्मत्तवेषं बिभ्रत् स चंक्रमीति यथासुखम्
वाराणस्यां महाराज! दर्शनेषुर्मुहेश्वरम्।

तस्या द्वारं समासाद्य न्यसेथाः कुणपं क्वचित्।
तं दृष्ट्वा यो निवर्त्तेत स सम्वर्त्तो महीपते!" ॥)
एतदर्थे नपुंसकलिङ्गोऽपीति नयनानन्दः॥ पूतिगन्धिः। इति मेदिनी॥ अस्रविशेषः। वड़्गा इति भाषा। इत्यमरटीकायां रायमुकुटः॥ पूतिगन्धौ त्रिलिङ्गोऽपि यथा,—
"कुणपं मस्तुलुङ्गाभं सुगन्धं क्षपितं बज्र"॥
इति माधवकरः॥ (रोगविशेषः। यथा॥"कुणपक्षाक्षपित्ताभ्याम्"। इति शार्ङ्गधरे मध्यखण्डे। १ अध्यायः॥)

कुणपी, स्त्री, (कुणप+गौरादित्वात् ङीष्।) विट्। शारिका। इति मेदिनी॥ गुयेशालिक इति भाषा॥

कुणालः, पुं, (क्रय+"पीयुक्षिभ्यामिति" उणां ३। ७६। इति। कालन्। सम्प्रसारणञ्च।) देशभेदः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (अशोकराजपुत्रभेदः। स च बौद्धः॥)

कुणिः पुं, (कुण+इन्।) तुम्बरुवृक्षः। इत्यमरमेदिनीकरौ॥ तुँद इति भाषा। (शरीरस्य स्थानविशेषः। "कक्षान्तमध्ये कक्षाधक्कुणिलं तच्च जायते"॥ इति वामटे शारीरस्थाने ४ अध्याये॥)

कुणिः, त्रि, (कुण+इन्।) कुकरः। इति मेदिनी॥ कोपा इति भाषा॥ (यथा, सुश्रुते।
"गर्भघातप्रकोपेण दोषदे चावमानिते।
भवेत् कुब्जः कुणिः पङ्गुः" इति॥)

कुण्डिन्दः, पुं, (कुण शब्दे+"कुणिपुल्योः किन्दच्"। उणां ४। ८५। इति किन्दच्।) शब्दः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कुण्टकः, त्रि, (कुटि+ण्वुल्।) स्थूलः। इति शब्दमाला। मोटा इति भाषा॥

कुण्ठः, त्रि, (कुण्ठति क्रियासु मन्दीभूतो भवति। कुठि+अच्।) क्रियासु मन्दः। अकर्म्मण्यः। इत्यमरः। २। १। १७॥
(यथा, भट्टारकविरचिते विष्णुस्तोत्रे ३०।
"वैकुण्ठोये ऽकण्ठे वसतु मम मतिः कुण्ठभावं विहाय"॥) मूर्खः। इति मेदिनी॥

कुण्ठकः, त्रि, (कुण्ठति कुण्ठयति वा आत्मानं जड़ीभूतं करोति। कुठि+ण्वुल्।) मूर्खः। इति शब्दमाला॥

कुण्ठितः, त्रि, (कुठि+कर्त्तरि क्तः।) सङ्कुचितः। यथा। "दग्धवदनसुजानां कुण्ठिता यत्र शक्तिः"॥ इति महानाटकम्।

कुण्डं, क्ली, (कुण्यतीति। "जमन्तात् डः"। उणां १। ११३। इति डः।) मानभेदः। (कुण्ड्यते रक्ष्यते जलं यत्र। कुडि+अधिकरणे अप्।) देवजलाधारः। इति मेदिनी॥ जलाधारविशेषः। चौबाचा इति भाषा॥
तज्जलगुणाः। अग्निकफकारित्वम्। रूक्षत्वम्। मधुरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ कफाजनकत्वम्। इति राजवल्लभः॥ *॥ (पात्रविशेषः। यथा, रघौ १। ८४।
"सुवं कोल्लेव कुण्डोघ्नी मेध्येनावभृतादपि"॥)

होमीयाज्यानयः। तत्तु प्रायश्चतुर्हस्तमितं भवति तस्य विधिः। तत्र मत्स्यपुराणम्।
"प्रागुदक्प्लवनां भूमिं कारयेद्यत्नतो नरः"॥
प्रागुदक्प्लवनां पूर्व्वनीचां उत्तरनीचां वा॥
तत्र वशिष्ठपञ्चरात्रे विज्ञानलक्षितायाञ्च।
"सर्व्वाधिकारिकं कुण्डं चतुरस्रन्तु सर्व्वदम्"।
चतुरस्रं चतुष्कोणम्॥ भविष्योत्तरम्।
"सहस्रे त्वथ होतव्ये कुर्य्यात् कुण्डं करात्मकम्।
द्विहस्तमयुते तच्च लक्षहोमे चतुष्करम्"॥
द्विहस्तादिके यामलः।
"पूर्व्वपूर्व्वस्य कुण्डस्य कोणसूत्रेण निर्म्मितम्।
उत्तरोत्तरकुण्डानां मानं तत्परिकीर्त्तितम्"॥
पूर्व्वपूर्व्वस्य कुण्डस्य हस्तद्विहस्तादिमितस्य कोणसूत्रेण ईशानाग्निर्ऋतिकोणदत्तसूत्रेण परिमितं यन्मानं उत्तरोत्तरकुण्डानां तदेव पारिभाषिकं द्विहस्तादिमानं न तु प्रकृतहस्तद्वैगुण्यादिमितम्। तथात्वे द्विहस्तादिमितस्य चतुर्हस्तपरिभाषापत्तेः। क्षयकस्य भूमेः परिमाणवत्॥
वशिष्ठपञ्चरात्रे।
"यावान् कुण्डस्य विस्तारः खननं तावदिष्यते।
हस्तैके मेखलास्त्रिस्रो वेदाग्निनयनाङ्गुलाः॥
कुण्डे द्विहस्ते ता ज्ञेया रसवेदगुणाङ्गुलाः।
चतुर्हस्ते तु कुण्डे ता वसुतर्कयुगाङ्गुलाः"॥
मेखला ब्रह्मचारिमेखलावत् कुण्डवेष्टिता मृत्तिकाः। ताश्च खातदेशादाद्ये एकाङ्गुलरूपं क्रमं परित्यज्य उच्छ्रायेण विस्तारेण चैतादृक्रमेण वेदाद्यङ्गुलाः। एतद्विपरीतास्तन्मान्तरोक्ता व्यवहारविदग्धाः। वेदाश्चत्वारः अयनञ्चयः नयने द्वे रसाः षट् गुणास्त्रयः वसुतर्कयुगानि अष्टषट्चत्वारि॥ विष्णुधर्म्मोत्तरे।
"खातादेकाङ्गुलं त्यक्त्वा मेखलानां विधिर्भवेत्"॥
एककुण्डस्य पश्चिमदिक्कर्त्तव्यतामाह महादाननिर्णये वशिष्ठपञ्चरात्रम्।
"सुस्रौ सुस्रौ तथा पुत्रौ जीर्णोद्धारे तथैव च।
सदा होमे सदा ग्राम्यावेकं वारुणदिग्मतम्"॥
शारदातिलके।
"होतुरग्र्य योनिरासामुपर्य्यन्त्यत्यपद्मवत्।
मुञ्जरज्जोरुकक्षाणां कुण्डानां योनिरीरिता॥
षट्चतुर्द्व्यङ्गुलायामविस्तारोन्नतिशालिनी।
एकाङ्गुलन्तु योन्यग्रं कुर्य्यादीषदधोमुखम्॥
एकैकाङ्गुलतो योनिं कुण्डेष्वन्येषु वर्द्धयेत्।
यवद्वयक्रमेणैव योन्यग्रमपि वर्द्धयेत्॥
स्त्रुवादारभ्य नाभं स्याद्योन्या मध्ये सरङ्गकम्"॥
आसां मेखलानां अश्वत्थपद्मवदित्यनेन चतुरङ्गुलविस्तृतमूलात् यथोक्तक्रमेण एकाङ्गुलान्तःसंकुचितविस्तारा॥ यामले।
"नाभिमेखलयोर्म्मध्ये परिधेः स्थापनाय च।
रन्ध्रं कुर्य्यात्तथा विद्वान् द्वितीयमेखलोपरि"॥
परिधौ स्तम्बिन्यासानाह छन्दोगपरिशिष्टे।
"बाह्वमार्चाः परिधय ऋजवः सत्वचोऽग्रयाः।
त्रयो भवन्त्यग्नीषोमीया एकेषान्तु चतुर्हिमम्॥
प्रागग्रावमितः पश्चादुदगग्रमथापरम्।
न्यसेत् परिधिमन्यञ्चेदुदगग्रः स पूर्व्वतः"॥
अग्रयाः छिद्ररहिताः अभितोऽग्नेः पार्श्वद्वये दक्षिणतः उत्तरतः पश्चात् पश्चिमे उदग्रं उत्तराग्रम्॥ त्रैलोक्यसारेऽपि।
"कुम्भद्वयसमायुक्ता अश्वत्थदलवन्नता।
अङ्गुष्ठमेखलायुक्ता मध्ये त्वाज्यस्थितिर्यथा"॥
कुम्भद्वयसमायुक्ता गजकुम्भाकारमूलदेशयुक्ता नता नम्रा अङ्गुष्ठमितमङ्गुलिमेखलावेष्टनयुक्ता तथात्वे हस्तगणिताज्यस्थित्या कुण्डे तत्पाता भवतीत्यर्थः॥ पञ्चरात्रे।
"कल्पयेदन्तरे नाभिं कुण्डस्याम्बुजसन्निभाम्।
मुञ्जरज्जोरुहस्तानां नाभिरुत्सेधविस्तृता॥
नेत्रवेदाङ्गुलोपेता कुण्डेष्वन्येषु वर्द्धयेत्।
यवद्वयक्रमेणैव नाभिं एषागुदारधीः॥
नाभिच्छेदं त्रिधा कृत्वा मध्ये कुर्व्वीत कर्णिकाम्।
वह्निरंशद्वये नाड्यौ पद्माभि परिकल्पयेत्"॥
तत्र कुण्डस्य दोषमाह विश्वकर्म्मा।
"खाताधिके भवेद्रोगी हीने धेनुधनक्षयः।
वक्रकुण्डे च सन्तापो मरणं छिन्नमेखले॥
मेखलारहिते शोको क्षधिके वित्तसंक्षयः।
भार्य्याविनाशकं कुण्डं प्रोक्तं योन्या विना कृतम्॥
अपत्यध्वंसगं प्रोक्तं कुण्डं यत् कण्ठवर्जितम्"॥
अत एव वशिष्ठसंहितायाम्।
"तस्मात् सम्यक् परीक्ष्यैवं कर्त्तव्यं शुभवेदिकम्।
हस्तमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्म्मणि"॥
इति तिथ्यादितत्त्वम्॥

कुण्डं, क्ली स्त्री, (कुण्ड्यते रक्ष्यते मक्षादि अस्मिन् कुडि रक्षणे+अच्।) स्थाली। इत्यमरभरतौ

कुण्डः, पुं, (कुण्ड्यते दह्यते कुलं अनेन। कुंडि-दाहे+करणे घञ्।) अमर्षे भर्त्तरि जारजः। जीवति भर्त्तरि उपपतिजातः। इत्यमरः। २। ६। ३६॥ स्वामी वाँचिया थाकिते उपपतिजात विजन्म सन्तान इति भाषा॥ (यथा मनुः ३। १७४।
"पत्यौ जीवति कुण्डः स्यान्मृते भर्त्तरि गोलकः"॥
सर्पविशेषः। यथा महाभारते। १। १२३। ६८।
"कक्षपश्चाथ कुण्डश्च तक्षकश्च महोरगः"॥)

कुण्डकीटः, पुं, (कुण्डे नरककुण्डे स्थितः कीट इव चार्व्वाकसंदृष्टत्वात्।) चार्व्वाकवचनाभिज्ञपुरुषः। पतितब्राह्मणीपुत्रः॥ (कुण्डे योनिकुण्डे कीट इव।) दासीकामुकः। इति मेदिनी॥

कुण्डगोलकं, क्ली, (कुण्डे पात्रविशेषे गोलं गोलाकारं कं जलं अत्र।) काञ्जिकम्। इति हेमचन्द्रः॥ (काञ्जी इति भाषा॥ *॥ कुण्डश्च गोलकश्च इति द्वन्द्वेऽते कुण्डगोलकौ। यथा मनुः ३। १७४।
"परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ।
पत्यौ जीवति कुण्डः स्याद् मृते भर्त्तरि गोलकः"॥)

कुण्डङ्गः, पुं, (कुण्डं तदाकारं गच्छति। गम+बाहुलकात् खः डिच्च।) कुलम्। इत्यमरभरतौ॥ (कुलशब्दार्थे तत्स्थानम्। इति हेमचन्द्रः॥

कुण्डपाय्यः, पुं, (कुण्डैः क्रमसैः पीयतेऽत्र सोमः। कुण्ड+पा+अधिकरणे यत् युगागमश्च निपात्यते।) क्रतुः। इति मुग्धबोधम्॥

कुण्डली

कुण्डलं, क्ली, (कुण्ड्यते रक्ष्यते इति कुडि रक्षायां + दृषादित्वात् कलच्। यद्वा कुण्डं तदाकारं लाति गृह्णातीति। ला + कः।) स्वनामख्यातकर्णभूषणम्। (यथा विष्णुधाने।

"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः
केयूरवान् कनककुण्डलवान् किरीटी" ॥)

तत्पर्य्यायः। कर्णवेष्टनम् २। इत्यमरः।२।६।१०३। पाशः। वलयः। इति मेदिनी॥ (पुं, कौरव्यकुलजसर्पविशेषः। यथा महाभारते १। ५७। १३।

"एरकः कुण्डलो वेणी वेणीस्कन्धः कुमारकः।
बाहुकः पृष्ठकेरश्च धूर्त्तकः प्रातरातकौ।
कौरव्यकुलजात्येते प्रविष्टा हव्यवाहनम्" ॥

पुंलिङ्गे उस्य रक्तकाक्षत्वबाचकता उक्ता। यथा, वैद्यकरत्नमालायाम्।

"रक्तपुष्पः कोविदारो युग्मपत्रस्तु कुण्डलः" ॥)

कुण्डलिनी, स्त्री, (कुण्डलिन् + स्त्रियां ङीप्।) कुलकुण्डलिनी शक्तिः। यथा,—

"ध्यायेत् कुण्डलिनीं सूक्ष्मां मूलाधारनिवासिनीम्।
तामिष्टदेवतारूपां सार्द्धत्रिवलयान्विताम्॥
कोटिसौदामिनीभासां स्वयम्भूलिङ्गवेष्टिनीम्।
तामुत्थाप्य महादेवीं प्राणमन्त्रेण साधकः॥
उद्यद्दिनकरोद्योतां यावच्छासं दृढ़ासनः।
अशेषाशुभशान्त्यर्थं समाहितमनाश्चिरम्।
तत्प्रभापटलज्यातं शरीरमपि चिन्तयेत्" ॥

इति तन्त्रसारः॥ *॥

गुडूची। इति राजनिर्घण्टः॥ मिष्टान्नविशेषः। जिलिपी इति भाषा। तस्य पाकप्रकारो यथा।

"नूतनं घटमानीय तस्यान्तः कुशलो जनः।
प्रस्थार्द्धपरिमाणेन दध्यस्रेण प्रलेपयेत्॥
द्विप्रस्थां समितां तत्र दध्यस्रं प्रस्थसम्मितम्।
घृतमर्द्धशरावञ्च घोलयित्वा घटे क्षिपेत्॥
आतपे स्थापयेत्तावद्यावद्याति तदस्रताम्।
तां सुपक्वां घृताक्तीत्वा सितापाके तनूद्भवे॥
कर्पूरादिसुगन्धे च क्षपयित्वोद्धरेत्ततः" ॥

अस्या गुणाः।

"एषा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा।
धातुवृद्धिकरी हृद्या रुच्या चेन्द्रियतर्पणी" ॥

इति भावप्रकाशः॥

कुण्डली, स्त्री, (कुण्डल + जातौ ङीष्।) मिष्टान्नविशेषः। जिलिपी इति भाषा। इति पाकराजेश्वरः॥ *। कुलकुण्डलिनी शक्तिः। यथा,—

"त्रिकोणं तत्तु विज्ञेयं शक्तिपीठं मनोहरम्।
तद्गह्वरे कामवायुर्जीवरूपोऽतिचञ्चलः॥
अधोमुखस्तत्र लिङ्गः स्वयम्भुस्तेन वाल्यते॥
नीवारशूकवत्तन्वी कुण्डली परदेवता॥
शुक्लतुल्यनिभा देवी सार्द्धत्रिवलयान्विता।
मुखेनाच्छाद्य ब्रह्मास्यं तया संवेष्टितः प्रभुः॥
डाकिनी ह्यत्र वसति द्वारपाली सयक्षिका।
यः साधकोऽत्र रमते स दिव्यो नैव मानुषः" ॥

इति सम्मोहनतन्त्रम्॥ (अस्याः पर्य्याया यथा, हठयोगदीपिकायाम्। ३। १०४॥ कुटिलाङ्गी २ कुण्डलिनी ३ भुजङ्गी ४ शक्तिः ५ ईश्वरी ६ अरुन्धती ७॥) गुडूची। काञ्चनलताः। इति मेदिनी। (अस्याः पर्य्याया यथा,—

"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कुण्डलीतामपुष्पश्च स्मन्तकः खल्पकेशरी" ॥

इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥)

कपिकच्छुः। सर्पिणीलताः। इति राजनिर्घण्टः॥

कुण्डली, [न्] पुं, (कुण्डलं अस्त्यस्य इति इनिः। कुण्डलाकारेण स्थितेरस्य तथात्वम्।) सर्पः। इत्यमरः। १। ८। ७॥ वरुणः। (कुण्डलं कुण्डलवदाकारं शरीरे अस्त्यस्य।) मयूरः। इति मेदिनी॥ चित्रलमृगः। इत्यजयपालः। (विष्णुः। यथा, महाभारते १३। १४६। ११०।

"अरौद्रः कुण्डली चक्री विक्रम्यूर्ज्जितशासनः" ॥)

कुण्डलयुक्ते, त्रि। इति मेदिनी। (यथा गोः रामायणे। ३। ६। ११।

"इमे च पुरुषा दिव्या यान्त्यस्य रथमन्तिकात्।
परं सुभाः कुण्डलिनो युवानः खड्गपाणयः" ॥)

कुण्डाग्नी, [न्] त्रि, (कुण्डं योनिकुण्डं तदुपलक्षीकृत्य अग्निं जीवनयात्रां यापयतीति। कुण्ड + अग्नि + णिनिः।) भगभक्तकः। कोट्टना इति भाषा। इति महाभारते दानधर्म्मः। (कुण्डस्य जारजातस्य अन्नं अश्नातीति।) कुण्डान्नभोजी। तस्य नरको यथा,—

"रङ्कोपजीवी कैवर्त्तः कुण्डाग्नी गरदस्तथा।
सूची माहिषकश्चैव पर्व्वकारी च यो द्विजः॥
आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः।
रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये" ॥

इति विष्णुपुराणे। २। ६। २०, २१॥ "रङ्कोपजीवी नटमल्लादिवृत्तिः। कैवर्त्तः धीवरवृत्तिः पत्नी जीवति जाराज्जातः कुण्डः तदन्नभोजी कुण्डाग्नी। सूची पिशुनः। माहिषो महिषोपजीवी। यद्वा।

'महिषीत्युच्यते भार्य्याभगेनोपार्ज्जितं धनम्।
उपजीवति यस्तस्याः स वै माहिषकः स्मृतः'।

इति स्मृतिप्रोक्तः। पर्व्वकारी धनादिलोभेनापर्व्वसु अमावस्यादिक्रियाप्रवर्त्तकः। पर्व्वगामीति पाठे पर्व्वसु स्त्रीगामी। ग्रामयाजकः यामार्थे यज्वा"। इति तट्टीकायां श्रीधरस्वामी॥ (धृतराष्ट्रपुत्रः। यथा महाभारते।१।११७।१३।

"कुण्डाग्नी क्षिप्रजाश्चैव दुःशला च शुनाधिका"॥)

कुण्डिका, स्त्री, (कुण्ड + स्वार्थे कन् टाप् अत इत्वं च।) कमण्डलुः। इति हेमचन्द्रः॥ पिठरः। इति शब्दचन्द्रिका। कुँड़ि इति भाषा॥ (ताम्रकुण्डम्। स्त्रीणी। सामवेदान्तर्गत उपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि।

"अथक्लैकाक्षरं पूर्णा सूर्य्याख्यध्यात्मकुण्डिका" ॥)

कुण्डिनं, क्ली, विदर्भनगरम्। इति हेमचन्द्रः। (यथा, हरिवंशे।

"कुण्डिने पुण्डरीकाक्ष! भोजपुत्रस्य शासनात्"॥)

कुण्डिनः, पुं, (कुडि रक्षायां दाहे च "बाहुलमन्यत्रापि"। उणां। २। ४६। इति इनच्।) मुनिविशेषः। इत्युणादिकोषः। (यथा, आश्वलायने।

"कुण्डिनानां वाशिष्ठमैत्रावरुणकौण्डिन्येति"॥

कुरुवंशीयनृपभेदः। स च धृतराष्ट्रस्य पुत्रः। यथा महाभारते १। ६४। ५६।

"हस्ती वितर्कः क्राथश्च कुण्डिनश्चापि पञ्चमः"॥)

कुण्डी, स्त्री, (कुडि + इन्। ततो वा ङीप्। कुण्ड + संज्ञायां वा ङीष्।) कमण्डलुः। इत्यमरः। २। ७। ४६॥ स्थाली। इत्यमरटीकायां भरतः॥

कुण्डीरः, पुं, (कुण्ड्यते दह्यते संसारानलसन्तापेन। कुडि + ईरन्।) मनुष्यः। (कुण्ड्यते रक्ष्यते दुर्ब्बलो येन।) बलवति त्रि। इति धरणी॥

कुत् आस्तृतौ। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कुतपः। इति दुर्गादासः॥ कुत् अपस्यः कुतपः कालविशेषः। क्षत्तिरचितस्नेहपात्रञ्च। इति केचित्॥

कुतः, [स्] अ, प्रश्नः। पञ्चम्यर्थः। निश्चयः। इति विश्वः। (यथा, विष्णुपुराणे। १। १६। ३७।

"सर्व्वभूतात्मके तात! जगन्नाथे जगन्मये।
परमात्मनि गोविन्दे मिथ्यामिश्रकथा कुतः" ॥)

कुतनुः, पुं, (कुत्सिता तनुर्यस्य। पिङ्गलनेत्रत्वात् तथात्वम्।) कुबेरः। इति त्रिकाण्डशेषः॥ (त्रि, कुत्सितशरीरः। इति व्युत्पत्तिलब्धोऽर्थः॥)

कुतपः, पुं क्ली, अष्टोऽष्टमोऽंशः। दिवसस्याष्टमो मूहूर्त्तः। यथा,—

"अष्टौ मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः"॥

इति आह्निकतत्त्वे मत्स्यपुराणवचनम्॥ *॥ पारिभाषिककुतपा यथा,—

"मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलः।
रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः।
अष्टावेते यतस्तस्मात् कुतपा इति विश्रुताः"॥

इति मिताक्षरायामाचाराध्यायः॥ स च त्रिंशद्दण्डदिनमाने द्वितीयप्रहरशेषदण्डावधि तृतीयप्रहरप्रथमदण्डपर्य्यन्तकालः। इत्यमरः।२।७।२१॥ स तु एकोद्दिष्टश्राद्धारम्भकालः। यथा,—

"आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत्"॥

इति आह्निकतत्त्वम्॥

"दिवसस्याष्टमे भागे मन्दीभवति भास्करः।
स कालः कुतपो ज्ञेयः पितृणामक्षयप्रदः"॥

इति शातातपः॥ *॥ दौहित्रः। वाट्यम्। कांसलोहजकम्बलम्। कुशदलम्। इति मेदिनी॥

कुतपः, पुं, (कुत्सितं पापं तपति कुं भूमिं तपति वा। तप + अच्। कुत् + कपन् वा।) सूर्य्यः। वैश्वानरः। द्विजन्मा। अतिथिः। गौः। भागिनेयः। इति हेमचन्द्रः॥

कुतुकं, क्ली, (कुत् + बाहुलकात् उकञ्।) कौतुकम्। इत्यमरः। १। ७। ३१॥ (यथा, शुभाङ्कविद्वत्तोषदेशशतके। १०२।

"कुतुकाय कोविदानां मूढ़मतीनां महोपकाराय।

निरमात्मविगुमानिः शृतोपदेशप्रबन्धमसुम्" ॥)
कुतुपं, क्ली पुं, (कुतप + एषोदरादित्वात् साधुः ।) कुतपः। दिनस्याष्टममुहूर्त्तः। इति शब्दरत्नावली ॥
कुतुपः, पुं, (कृषा कुतुः ततो डुप् च। ततः एषोदरात् अकारागमे साधुः।) चर्म्मनिर्म्मितालवणस्नेहपात्रम्। इत्यमरः। २। ९। ३३ ॥ छोट कुपो इति भाषा ॥
कुतूः, स्त्री, (कुत्सितं तन्यते। तन् बाहुलकात् कूः। टिलोपश्च।) चर्म्मनिर्म्मितस्नेहपात्रम्। इत्यमरः। २। ९। ३३ ॥ मसक इति कुपो इति च भाषा ॥
कुतूणकः, पुं, (कुः ईषत् तूणयति सङ्कोचयति चक्षुः यः। कु + तूण सङ्कोचे + ण्वुल्।) बालरोगविशेषः। स तु नेत्ररोगः। कतुया इति भाषा। तस्य लक्षणम् ॥
"कुतूणकः क्षीरदोषाच्छिशूनामेव वर्त्मनि।
जायते तेन तन्नेत्रं कण्डूरञ्च खवेन्मुहुः ॥
श्लिष्यः कुर्य्याल्ललाटात्तिकूटनासावधर्षणम्।
शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः" ॥
इति माधवकरः ॥ कुकूणक इत्यपि पाठः ॥
(यथा,—
"कुकूणकः शिशोरेव दन्तोत्पत्तिनिमित्तजः ॥
स्यात्तेन शिशुरक्ष्णोताम्राक्षो वीक्षणाक्षमः।
स वर्त्मशूलपैच्छिल्यकण्डूनासात्तिमर्हति" ॥
इत्युत्तरतन्त्रे ८ अध्याये वाभटेनोक्तम् ॥ * ॥
चिकित्सा यथा ॥
"मुस्तष्ठी भृङ्गनिशाकल्कः पुटपाकः ससैन्धवः।
कुकूणकेऽञ्जिरोगेषु भद्रमाश्योतनं हितम् ॥
क्रिमिघ्नालक्ष्मिलादार्व्वी लाक्षाकाञ्जिकगैरिकैः।
चूर्णाञ्जनं कुकूणे स्याच्छिशूनां योधकीषु च।
सदर्शनामूलचूर्णादञ्जनं स्यात् कुकूणके" ॥
इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे ॥)
कुतूहलं, क्ली, (कुतूं चर्म्ममयतैलादिपात्रवत् अन्तर्हलति सोत्सुकं करोति। हल् + अच्।) अपूर्ब्ववस्तुदिदृक्षाद्यतिशयः। तत्पर्य्यायः।
कौतूहलम् २ कौतुकः ३ कुतुकम् ४। इत्यमरः। १। ७। ३१ ॥ चित्रम् ५। इति शब्दरत्नावली। (यथा, नैषधे। १। ११९।
"प्रियावियोगादिधुरोऽपि निर्भरं
कुतूहलाक्रान्तमना मनागभूत्" ॥
नायिकालङ्कारविशेषः। तल्लक्षणं यथा साहित्यदर्पणे। ३। ११९।
"रम्यवस्तुसमालोके लोलता स्यात्कुतूहलम्" ॥)
कुतूहलः, त्रि, (प्रशस्तः। प्रशस्तः। इति क्षेमचन्द्रः ॥
कुटच्चं, क्ली, (कुत्सितं टच्चमिव।) कुम्भी। इति हारावली। पाना इति भाषा ॥ (कुम्भिकाशब्दे ऽस्य विवृतिर्द्रष्टव्या ॥)
कुत्र, अ, ("सप्तम्यास्त्रल्" । ५। ३। १०। इति त्रल्।) कस्मिन् इति व्याकरणम्। कोथाय इति भाषा ॥ (यथा, माघगाटके।
"हा! सीता केन नीता मम हृदयगता केन वा कुत्र दृष्टा" ॥)
कुत्रचित्, अ, (कुत्र च चित् च इति इन्द्रसमासः। सुग्धबोधमते "किमः क्यन्ताच्चिच्चनौ"। इतिचित्।) कोनखाने इति भाषा। इति व्याकरणम्। (यथा महाभारते। ३। १४२। ५३।
"असुरेभ्यो भयं नास्ति युष्माकं कुत्रचित् क्वचित्" ॥)
कुत्स ड क ञ अवज्ञेपे। इति कविकल्पद्रुमः ॥ चुरां-आत्मं-उभय-सकं-सेट्।) पञ्चमस्वरी। दन्त्यवर्गोपधः। अवज्ञेपो निन्दा। ड क, योः न कुत्सयते कुत्स्यमिति हलायुधः ॥ ञ, कुत्सयति कुत्सयते। अयमात्मनेपदीत्यन्ये। कदाचित् परस्मैपदार्थो ऽकारः। इति दुर्गादासः ॥
कुत्सनं, क्ली, (कुत्स् + भावे ल्युट्।) निन्दनम्। इति शब्दरत्नावली ॥ (यथा मनौ ४। १६३।
"नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम्" ॥
कुत्स्यते निन्द्यतेऽनेन। करणे ल्युट्। निन्दासाधनधर्म्मः। त्रि कुत्सायुक्तः ॥)
कुत्सला, स्त्री (कुत्सं क्रयविक्रययोर्निषिद्धतया निन्दां लाति। ला + कः + टाप्।) गोलोमलताः। इति शब्दचन्द्रिका ॥
कुत्सा, स्त्री, (कुत्स् निन्दने + भावे अप् - टाप् च।) कुत्सनम्। तत्पर्य्यायः। अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ अपवादः ६ उपक्रोशः ७ जुगुप्सा ८ निन्दा ९ गर्हणम् १०। इत्यमरः। १। ६। १३ ॥ गर्हा ११ निन्दनम् १२ कुत्सनम् १३ परिवादः १४ जुगुप्सनम् १५ अपक्रोशः १६ भर्त्सनम् १७ अपवादः १८। इति शब्दरत्नावली ॥ उपरागः १९ अवध्वंसः २० घृणा २१ धिक् २२ सामि २३। इति जटाधरः ॥
कुत्सितं, क्ली, (कुत्स + कर्म्मणि क्तः।) कुष्ठनामौषधम्। इति राजनिर्घण्टः ॥ (कुड् इति भाषा ॥)
कुत्सितः, त्रि, (कुत्स् + क्तः।) निन्दितः। तत्पर्य्यायः। निक्षुष्टः २ प्रतिक्षुष्टः ३ अर्व्वा ४ रेषः ५ याप्यः ६। अवमः ७ अधमः ८ कुपूयः ९ अवद्यः १० खेटः ११ गर्ह्यः १२ अणकः १३ इत्यमरः। ३। १। ५४ ॥ रेषः १४ अरमः १५ आणकः १६ अनकः १७। इति तट्टीका ॥ कुप्रियः १८। इति जटाधरः ॥ आखेटः १९ रेषसः २० काण्डः २१ गर्हितः २२ अपक्षुष्टकः २३। इति शब्दरत्नावली ॥
कुथ इ क्लेशे। वधे। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकञ्च-सेट् इदित्।) पञ्चमस्वरी। इ कर्म्मणि कुन्थ्यते। क्लेशः इह दुःखानुभवः। शीतार्त्तश्च न कुन्थतीति हलायुधः। इति दुर्गादासः ॥
कुथ य पूतित्वे। इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट्।) पूतित्वं दुर्गन्धीभावः। य, कुथ्यति मांसो दुर्गन्धः स्यादित्यर्थः। चुकोथ। इति दुर्गादासः ॥
कुथः, पुं क्ली, (कुथ्यति अशोभां क्लेशं वा। कुथ इ हिंसायां अच्। आगमविधेरनित्यत्वात् न नुमागमः।) गजपृष्ठस्थितचित्रकम्बलम्। हातिर पिठेर झुल इति भाषा। तत्पर्य्यायः। प्रवेणी २ आस्तरणम् ३ वर्षः ४ परिस्तोमः ५। इत्यमरः। २। ८। ४२ ॥ प्रवेणिः ६ परिस्तोमः ७ कुथा ८ कुथम् ९। इति तट्टीका ॥ वोढः १० आस्तरः ११। इति शब्दरत्नावली ॥
(यथा शब्दार्थचिन्तामणौ।
"कुथा कन्था समाख्याता कुथः स्यात् करिकम्बलम्।
कुथः कुशूः कुथः कीटः प्रातःस्नायी द्विजः कुथः" ॥
यथा महाभारते २। ५१। ३६।
"शतशश्च कुथास्तत्र सिंहलाः समुपाहरन्" ॥)
कुथः, पुं, (कुथ + अच्।) कुशूलम्। इत्यमरः। २। ४। १६६ ॥ (यथा हरेः रामायणे। २। ३०। १४।
"शार्दूलेषु यदा शिश्ये वनान्ते वनगोचरः।
कथास्तरशतल्पेषु किं स्यात् सुखतरं ततः" ॥)
कुथोदरी, स्त्री, (कुथं हिंसात्मकमुदरं यस्याः सा।) निकुम्भदुहिता। कुम्भकर्णभौत्री। सा च कल्किदेवेन हता। यथा।
मुनय ऊचुः।
"ब्रूहि विष्णुयशःपुत्र! कुम्भकर्णात्मजात्मजा।
कुथोदरीति विख्याता गगनार्द्रसमुत्थिता ॥
कीलकस्यास्य महिषी विकम्पजननी च सा।
हिमालये शिरः क्षिप्त्वा पादौ च निषधाचले ॥
शेते स्तनं पाययन्ती विवृतं प्रसृतस्तनी।
तस्या निश्वासवातेन विवशा वयमागताः ॥
दैवेनैव समानीताः प्राप्तास्तव पदाम्बुजम्।
मुनयो रक्षणीयास्ते रक्षःसु च विपत्सु च ॥
इति तेषां वचः श्रुत्वा कल्किः परपुरञ्जयः।
सेनागणैः परिवृतो जगाम हिमवद्गिरिम्" ॥
इत्यादि ॥
"सा क्रुधोत्थाय सहसा ननर्द परमाद्भुतम्।
तेन नादेन महता विचस्रास्तावभवन् जगाः।
निपेतुः सैनिकाः सर्व्वे मूर्च्छिता धरणीतले ॥
सा रथांश्च गजांश्चापि विवृतास्या भयानका।
जघास प्रश्वासवातैः समानीय कुथोदरी ॥
सेनागणास्तदुदरं प्रविष्टाः कल्किना सह।
यथर्त्तुसुखवातेन प्रविशन्ति पिपीलिकाः ॥
तद्दृष्ट्वा देवगन्धर्व्वा हाहाकारं प्रचक्रिरे।
तत्रस्था मुनयः शेषुर्जेषुस्तान्ये महर्षयः ॥
निपेतुरन्ये दुःखार्त्ता ब्राह्मणा ब्रह्मवादिनः।
रुरुदुः पृथ्वयोधा ये जहसुस्तन्निशाचराः ॥
जगतां कदनं दृष्ट्वा संसारात्मानमात्मना।
कल्किः कमलपत्राक्षः सुरारातिनिसूदनः ॥
वाय्वाग्निं चेलचर्म्मभ्यां कम्बलैर्यानदारुभिः।
प्रज्वाल्योदरमध्येन करवालं समाददे ॥
तेन खड्गेन महता कुक्षिं निर्भिद्य बन्धुभिः।
बलिभिर्भ्राट्भिर्व्वाहैर्वृतः शस्त्रास्त्रपाणिभिः ॥
बहिर्ब्बभूव सर्व्वेशः कल्किः कल्किविनाशनः।
सहस्राक्षो यथा वज्रकुक्षिं दम्भोलिनेमिना ॥
योनिरन्ध्राद्गजरथास्तुरगाश्चाभवन् बहिः।
नासिकाकर्णविवरात् केऽपि तस्या विनिर्गताः ॥
ते निर्गतास्ततस्तस्याः सैनिकाश्चधिरोचिताः।
तां विध्वनिःक्षिपन्तौ तरसा चरणौ करौ ॥
ममार सा भिन्नदेहा भिन्नकुक्षिशिरोधरा।
नादयन्ती दिशो द्यां खं चूर्णयन्ती च पर्व्वतान्" ॥
इति कल्किपुराणे १९ अध्यायः ॥
कुदाखः, पुं, (कुं भूमिं दारयति विदारयति। कु +

दल् विदारणे + णिच् + अण्।) कुद्दालः। इत्यमरटीकायां रमानाथः॥

कुदारः, पुं, (कुं पृथ्वीं दारयति विदारयति। कु + दृ + णिच् + कर्म्मण्यण्। पृषोदरात् साधुः।) कुद्दालः। इति जटाधरः॥ (काञ्चनवृक्षः। वृक्षमात्रम्। भूविदारणेन समुत्थितत्वात्॥)

कुद्दालः, पुं, (कुं भूमिं दालयति। कु + दल् + णिच् + अण्। पृषोदरात् द्विषे साधुः।) कोविदारवृक्षः। इत्यमरः। २।४।२२॥ (यथास्य पर्य्यायाः।

"कोविदारस्तमरिकः कुद्दालो युगपत्रकः।
कुण्डलीतामपुष्पश्च क्षन्तकः स्वल्पकेशरी"॥

इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे। गुणाश्चास्य काञ्चनारशब्दे उक्ताः॥) भूमिदारणात्तम्। इति मेदिनी॥ कोदाल इति भाषा। (यथा महाभारते। ३। १०७। २१।

"समासाद्य विषं तच्चाप्यखनन् सगरात्मजाः।
कुद्दालैर्दृषकैश्चैव समुद्रं यत्नमास्थिताः"॥)

कुद्यं, क्ली, (कुद् + क्यप्।) कुड्यम्। भित्तिः। इत्यमरटीका॥

कुद्र, इ क मिथोक्तौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्। इदित्।) पञ्चमस्वरी। दन्त्यवर्गतृतीयोपधः। इ क कुन्द्रयति नीचः। मिथ्यां वदतीत्यर्थः। कुन्द्र इत्यनेनैवेष्टसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थः। इति दुर्गादासः॥

कुन्द्रुः, पुं, (कुद्रं मिथ्येव कायते अनित्यत्वात् क्वचिभक्तुरत्वाच्च। कै + कः। निपातनात् साधुः।) मद्यविशेषः। मद्योपरिमण्डपः। तत्पर्य्यायः। उद्गाटः २ पिठरः ३। इति त्रिकाण्डशेषः॥

कुन्द्रः, पुं, (कुं ईषत् उद्गतो रसः रसनं यत्र अनित्यत्वात्। कु + उत् + रस् + अधिकरणे घञ्। पृषोदरादित्वात् साधुः।) मद्यमण्डपः। इति हारावली॥

कुन्द्रवः, पुं, (कुं भूमिं द्रावयति। कु + द्रु + अन्तर्णिच् अच्।) कोद्रवः। इत्यमरटीकायां भरतः॥ (कोदधान् इति भाषा॥)

कुन्द्रः, पुं, (कुं पृथ्वीं भूमिं धारयति। कु + धृ + मूलविभुजादित्वात् कः।) पर्व्वतः। इति हलायुधः॥ (यथा कालिदासोक्तौ।

"वार्धारेर्द्ध्वजगधृतोर्द्धिपतिः कुध्रेर्द्रजानिर्गयेर्द्
गोराड़ारुरुरःसरेर्द्रुतरयैर्वेयकभाडडम्।
उद्वीक्ष्यैनरकाग्निभिस्त्रिदृगिभेर्द्राक्षीज्जिगाक्षुच्छविः
स स्तादम्बुमदम्बुदालिगलरुद्देवो मुदे वो मरुः"॥)

कुनखः, पुं, (कुत्सितो नखो यत्र।) क्षुद्ररोगविशेषः। तस्य लक्षणं यथा।

"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम्।
कुर्व्वाते दाहपाकौ च तं व्याधिं क्ष्विण्यमादिशेत्।
तदेवाल्पतरैर्दोषैः प्रायं कुनखं वदेत्"॥

इति माधवकरः॥

(अस्य चिकित्सा यथा॥

"क्ष्विण्ये सटङ्कणक्षौद्रो मूलेपो नखप्रदः"।

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे॥ तथाच सुश्रुते।

"अभिघातात् प्रदुष्टो यो नखोरूक्षोऽसितःखरः।
भवेत्तु कुनखं विद्यात् कुलीनमिति संज्ञितम्"॥

अयं हि रोगः जन्मान्तरीयसुवर्णापहरणाद्यनुतप्रायश्चित्तस्य शुक्लावशिष्टमहापातकस्य चिह्नरूपः। यथा विष्णुसंहितायाम्।

"नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुष्ये लक्षणानि भवन्ति। कुब्जतिपातकी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तकः सुवर्णहारी कुनखी गुरुतल्पगो दुश्चर्म्मा"॥) कुत्सितनखयुक्ते, त्रि॥

कुनखी [न्] त्रि, (कुनख इति स्वनामविश्रुतरोगोऽस्यास्तीति।) कुनखरोगयुक्तः। सङ्कुचितनखः। यथा। "सुवर्णहारी कुनखी। कुनखी श्यावदन्तश्च द्वादशरात्रं व्रतं चरित्वा तदन्तनखावुद्धरेयाताम्"॥ इति शुद्धितत्त्वम्॥

कुनटः, पुं, (कुत्सितं नटतीति। कु + नट् + अच्।) श्लोणाकप्रभेदः। इति राजनिर्घण्टः॥ (कुत्सितो नटः इति विग्रहे नटाधमः॥

श्लोणाकशब्दे ऽस्य विवरणं ज्ञातव्यम्॥)

कुनटी, स्त्री, (कुनट + गौरादित्वात् ङीष्।) मनःशिला। इत्यमरः। २। ९। १०८॥ (अस्याः पर्य्यायाः॥

"मनःशिला मनोह्वा च नेपाली कुनटी शिला"।

इति वैद्यकरत्नमालायाम्॥

अन्यद्विवरणमस्य मनःशिला शब्दे व्याख्येयम्॥)

धान्याकम्। इति राजनिर्घण्टः॥

(पर्य्याया यथा॥

"धान्यकं धानकं धान्यं धानाधानेयकन्तथा।
कुनटी धेनुकाच्छन्ना कुस्तुम्बुरवितुम्बकम्"॥

गुणास्यास्य धन्याकशब्दे ज्ञातव्याः॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

नेपालदेशजमनःशिला। इति केचित्। इति भरतः॥ (कुत्सितो नर्त्तकी। अनिपुणा नर्त्तकी॥)

कुनखी, [न्] पुं, (कुत्सित ईषद् वा नखोऽस्यास्तीति इनिः।) वकवृक्षः। इति त्रिकाण्डशेषः॥

कुनाभिः, पुं, (ईषत् नाभिरिव आवर्त्तवत्त्वात्।) वातमण्डलः। इति त्रिकाण्डशेषः॥ घूर्णेवातास इति भाषा॥ निधिः। इति हेमचन्द्रः॥

कुनाम्रकः, पुं, (ईषत् नाम्रयति स्वप्नेन। कु + नम्र + णिच् + ण्वुल्।) यवासः। इत्यमरः। २। ४। ९१॥ (दुरालभा। आस्फुग्रीति भाषा॥

अस्य पर्य्याया यथा॥

"यासोपवासो दुष्पर्शो धन्वयासः कुनाम्रकः।
दुरालभादुरालभा समुद्रान्ता च रोदिनी॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा"॥

इति भावप्रकाशस्य पूर्ब्बखण्डे १ म भागे॥)

कुनृच वक्रणे। तौच्छ्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकं-सेट्।) पञ्चमस्वरी। वक्रणमिति वक्र इवाचरतीति क्यौ वक्रं करोतीति ण्यौ च रूपम्। तेन कुटिलीभावः कुटिलीकरणञ्च। तौच्छ्यमल्पीभावः अल्पीकरणञ्च। कुञ्चति खलः कुटिलोऽल्पो वा स्यादित्यर्थः। कुञ्चति जनां वायुः कुटिलामल्पां वा करोतीत्यर्थः। इति दुर्गादासः॥

कुन्तः, पुं, (कुं भूमिं उनत्ति क्लेदयति। कुं शरीरं उनत्ति भेदयति दारयति वा धातूनामनेकार्थत्वात् उन्द + घञ्जकात् तः। पृषोदरादित्वात् साधुः।) गवेधुकः। प्रासास्त्रम्। इति मेदिनी॥ (भल्लास्त्रम्। भाला इति भाषा। यथा कथासरित् सागरे।

"कुन्तदन्ता कथं कुर्य्यात् राक्षसीव हि सा शिवम्"॥) चण्डभावः। क्षुद्रजन्तुः। इति विश्वः॥ क्षुद्रकीटः। उलूनम्। (उकुण् इति भाषा॥)

कुन्तकः, पुं, (कुन्तं उत्कुणं लाति गृह्णाति। ला + कः।) केशः। (यथा साहित्यदर्पणे ३।१२४।

"कापि कुन्तलसंयानसंयमव्यपदेशतः।
बाऊमूलं स्तनौ नाभिपङ्क्तिं दर्शयेत् स्फुटम्"॥)

क्रोवेरम्। इत्यमरः २। ६। ९५॥ चषकः। यवः। इति मेदिनी॥ (कुन्तस्य अग्राकारमिव क्षाति।) बाकुलः। इति विश्वः॥ ध्रुवकभेदः। यथा,—

"वर्णैः घोड़शभिः कार्य्यः कुन्तलो लघुशेखरे।
षट्कारे च रसे प्रोक्तमानन्दप्रजदायकः"॥

इति सङ्गीतदामोदरः॥ (दाक्षिणात्यजनपदविशेषः। तदधिष्ठाता राजा च यथा महाभारते २। राजसूयिकपर्व्वणि ३४। ११।

"आकर्षः कुन्तलश्चैव मालवाश्चान्ध्रकास्तथा।
द्राविड़ाः सिंहलाश्चैव राजा काश्मीरकस्तथा"॥)

कुन्तलवर्द्धनः, पुं, (कुन्तलान् केशान् खरसेन वर्द्धयति। वृध् + णिच् + ल्युः।) भृङ्गराजवृक्षः। इति राजनिर्घण्टः॥

कुन्तलाः, पुं, (कुन्ता अस्त्रविशेषा गीयन्ते गृह्यन्ते यत्र। गा + घञर्थे कः।) देशविशेषः। बहुवचनान्तशब्दोऽयम्। इति मेदिनी॥ (स च दाक्षिणात्यप्रदेश इत्युच्यते। यथा महाभारते ६।९।५९।

"भिल्लिकाः कुन्तलाश्चैव सौहृदा नलकाननाः।
कोकुट्टकास्तथा चोलाः कोङ्कणा मालवा नराः"॥)

कुन्तलिका, स्त्री, (कुन्तलस्य बाकुलस्यायाकार इव विद्यतेऽस्याः इति ठन्। टाप् अत इत्वं च।) दध्यादिच्छेदनी। दहकाटा छुरी इति भाषा। तत्पर्य्यायः। पालिका २। इति हारावली॥ (बालानामौषधम्। यथा सुश्रुते।

"कुन्तलिका कुरण्टिका प्रभ्रष्टीनीलपुष्पकम्॥
अस्याः गुणास्तत्रैवोक्ताः।
"स्वादुपाकरसाः शीताः कफघ्नाश्चातिपित्तजाः।
लवणाम्लरसा रूक्षाः सक्षारा वातजाः सराः"॥
स्वादुतिक्ता कुन्तलिका"॥)

कुन्तलीशीरं, क्ली, (कुन्तल इव उशीरम्।) बालकम्। इति राजनिर्घण्टः॥ बाला इति भाषा॥

कुन्ती, स्त्री, (राज्ञा कुन्तिभोजेन बाल्यात् पालिता सती पृथा वसुदेवभगिनी कुन्तीति नाम्ना विख्याता। यथा, हरिवंशे ३४। २३-२४।

"पृथां दुहितरं वव्रे कुन्तिस्तु कुरुनन्दन!।
शूरः पूर्व्वाय दत्ताय कुन्तिभोजाय तां ददौ॥
तस्मात्कुन्तीति विख्याता कुन्तिभोजात्मजा पृथा"॥)

पाण्डुराजभार्य्या। सा च शूरसेनराजकन्या पृथा

नासा ख्याता। तत्सुता शूरसेनः तां राज्ञे कुन्तिभोजाय दत्तवान्। इयं हि कन्यावस्थायां मुनिदत्तविद्यापरीक्षार्थं मन्त्रबलाच्छतात् सूर्य्यात् कर्णं प्रासोष्ट। विवाहात् परञ्च सा मृगीभूतस्य मुनेः शापात् स्त्रीसङ्गमवञ्चितस्य स्वामिनो महाराजपाण्डोराज्ञया धर्म्मादयुधिष्ठिरं पवनाद्भीमं इन्द्रादर्ज्जुनं सुषुवे। इति महाभारते १।१११ अध्यायः॥ इयञ्च परमसाध्वीतया भगवद्वादरायणादिमहर्षिगणवरप्रभावेण प्रातःस्मरणीया रमणी।

यदुक्तम्,—

"अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा। पञ्चकन्याः स्मरेन्नित्यं महापातकनाशनम्"॥)

गुग्गुलुश्चः। शल्लकी। इति विश्वमेदिन्यौ॥ ब्राह्मणी। इति जटाधरः॥

कुच्य ग क्षिपि। क्षिपि। इति कविकल्पद्रुमः॥ (ऋयां-परं-सकं-अकं च-सेट्।) पञ्चमस्वरी। क्षिपि दुःखानुभवे। ग कुत्सिते बुभुक्षार्त्तः। इति हलायुधः। चुकुच्य। इति दुर्गादासः॥

कुच्युः, पुं, (कुत्सितं दुःखसहनत्वमो भवति। कुच्य + उन्।) बौद्धविशेषः। जिनचक्रवर्त्तिविशेषः। इति हेमचन्द्रः॥

कुन्दः, पुं क्ली, (कु कुत्सितं दुर्गन्धादिजनितक्लेशं द्यति नाशयति। कु + दो छेदने + कः। एषोदरात् नुम्। यद्वा कौतीति। "अन्दादयश्च"। उणां ४। ९८। इति निपातनात् सिद्धम्।) पुष्पवृक्षविशेषः। कुँदफुलेर गाछ इति भाषा। तत्पर्य्यायः। माध्यम् २। इत्यमरः। २। ४। ७३॥ मुक्तापुष्पः ३। इति रत्नमाला॥ मकरन्दः ४ महामोदः ५ मनोहरः ६ मुक्तापुष्पः ७ सदापुष्पः ८ तारपुष्पः ९ अट्टहासकः १० दमनः ११ वनहासः १२ मनोभूः १३ वोरटम् १४ वरटम् १५। इति शब्दरत्नावली॥

(यथा, नवग्रहस्तोत्रे शुक्रस्तुतिः।

"ॐ हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम्। सर्व्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्"॥)

अपि च। भावप्रकाशे॥

"कुन्दन्तु कथितं माध्यं सदापुष्पञ्च तत् स्मृतम्। कुन्दंशीतं गुरु श्लेष्मशिरोरुग्विषपित्तहृत्"॥

अस्य गुणाः। अतिमधुरत्वम्। शीतत्वम्। कषायत्वम्। कैशिष्यभावनत्वम्। कफपित्तहरत्वम्। सारकत्वम्। दीपनत्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ तत्पुष्पगुणौ। श्लेष्मकारित्वम्। ग्राहित्वञ्च। इति राजवल्लभः॥

कुन्दः, पुं, कुन्दुरुनामगन्धद्रव्यम्। (अस्य पर्य्याया यथा॥

"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भमियनम्। कुँद इति भाषा। कुबेरस्य निधिविशेषः। इति मेदिनी॥ करवीरवृक्षः। इति राजनिर्घण्टः॥ (कुन्दपुष्पवर्णं इव श्वेततया सत्ययुगे हंसावतारत्वाच्च। विष्णुः। यथा महाभारते १३।१४९।१००।

"कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पवनोऽनिलः"॥

यदा कुं पृथ्वीं कश्यपाय दत्तवान्। दा + कः। हितोयाया अलुक्। परशुरामावतारे क्षत्रियहत्यापापशुद्ध्यर्थं मारीचाय अश्वमेधयज्ञे महादानस्य दक्षिणास्वरूपवसुन्धरादानादस्य तथात्वम्। तत्कथा यथा हरिवंशे।

"सर्व्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवान्।
तस्मिन् यज्ञे महादाने दक्षिणां भृगुनन्दनः।
मारीचाय ददौ प्रीतः कश्यपाय वसुन्धराम्"॥)

कुन्दकः, पुं, (कुन्द + संज्ञायां कन्।) कुन्दुरुकः। इति राजनिर्घण्टः॥

कुन्दमः, पुं, (अनिष्टकारित्वात् कुत्सितं उन्दरादिकं दमयति नाशयतीति। दम + णिच् + अच् एषोदरात् मुमि साधुः। यद्वा कुन्देन मीयते प्रायेण शुभवर्णत्वात्। कुन्द + मा + घञर्थे कः।) विडालः। इति त्रिकाण्डशेषः॥

कुन्दरः, पुं, (कुं भूमिं दारयति। अन्तर्भूतण्यर्थे दृ + अच् एषोदरात् मुमि साधुः।) दशभेदः। कुन्दरा इति कलिङ्गे ख्यातः। तत्पर्य्यायः। कण्डूरः। २ भिण्टी ३ दीर्घपत्रः ४ खरच्छदः ५ रसालः ६ क्षेत्रसम्भूतः ७ सुदृढः ८ मृगवल्लभः ९। अस्य मूलगुणाः। गौल्यत्वम्। शीतत्वम्। पित्तातिसारनाशित्वम्। गोधनानां प्रशस्तत्वम्। बलपुष्टिविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ (कुन्दवत् निर्म्मलानि धर्म्मानुबन्धीनि धनानि राति ददाति। कुन्द + रा + कः। यद्वा कुं पृथ्वीं, हिरण्याक्षदैत्यं हन्तुकामो भगवान् विष्णुः वराहरूपेण दारयति। दृ + णिच् + अच् एषोदरात् मुमि साधुः। विष्णुः। यथा महाभारते १३।१४९।१००।

"कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पवनोऽनिलः"॥)

कुन्दिनी, स्त्री, (कुन्दानां पद्मानां समूहः। खनादित्वात् इनिः। स्त्रियां ङीप्।) पद्मिनी। पद्मसमूहः। इति त्रिकाण्डशेषः॥

कुन्दुः, स्त्री, (कुं भूमिं दृणातीति। कु + दृ + बाहुलकात् डुः।) कुन्दुरुनामगन्धद्रव्यम्। इति शब्दमाला अमरटीका च॥ (कुन्दुरुशब्दे ऽस्या विवरणं ज्ञातव्यम्॥) मूषिके पुं। इतिशब्दरत्नावली॥

कुन्दुरुः, पुं, (कुं भूमिं दारयति। दृ विदारे + उरन्।) कुन्दुरुनामगन्धद्रव्यम्। इत्यमरटीकायां भरतः॥

कुन्दुरुः, पुं, स्त्री, (कुं भूमिं उनत्ति। उन्द् + क्वन्वादित्वात् निपातनात् साधुः॥) खनामख्यातसुगन्धिद्रव्यम्। यस्य निर्य्यासे कुन्दुरुखोटि इति ख्यातिः। तत्पर्य्यायः। पालङ्गी २ मुकुन्दः ३ कुन्दः ४। इत्यमरः। २। ४। १२१॥ पालङ्गी ५ मुकुन्दुः ६ कुन्दुः ७ कुन्दुरः ८। इति तट्टीकायां भरतः॥ कुन्दुरुकः ९ सौराष्ट्रः १० शिखरी ११ कुन्दकः १२ तीक्ष्णः १३ गोपुरकः १४ वङ्गगन्धः १५ पालिन्दः १६ भीषणः १७ तीक्ष्णगन्धः १८ वली १९। इति जटाधरः॥ अपि च।

"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि।
कुन्दुरुर्मधुरस्तिक्तस्तीक्ष्णस्तच्चः कटुर्हरेत्।

ज्वरस्वेदग्रहाक्षश्रीमुखरोगकफानिलान्"॥

इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। कफपित्तार्त्तिदाहनाशित्वञ्च। अस्य पानलेपनयोर्गुणः। शिशिरत्वम्। प्रदरामयशान्तिकारित्वञ्च। इति राजनिर्घण्टः॥ अलक्ष्मीरक्षोज्वरनाशित्वम्। इति राजवल्लभः॥

(अस्य व्यवहारो यथा वैद्यकचक्रपाणि-संग्रहे ऽग्न्यादग्न्यतिकप्रसारणी तैले॥

"कर्पूरं कुन्दुरुनिशाजवकृष्णधामचन्दनम्"॥*॥)

कुन्दुरुकः, पुं, स्त्री, (कुन्दुरु + स्वार्थे कन्।) कुन्दुरुनाम सुगन्धिद्रव्यम्। इति राजनिर्घण्टः॥

कुन्दुरुकी, स्त्री, (कुन्दुरुक + जातित्वात् ङीष्।) शल्लकीवृक्षः। इत्यमरः। २। ४। १२४॥

कुप इ कि स्तुतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्-इदित्।) षष्ठस्वरी। इ कुप्यते। कि कुप्यति कुप्यति। स्तुतिराच्छादनम्। इति दुर्गादासः॥

कुप, क व्यथौ। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क कोपयति। इति दुर्गादासः॥

कुप य इर् कोपे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्-इरित्।) कोपो नेत्रजौहित्यादिहेतुश्चित्तविकारः। य, कुप्यति माता शिशवे। इर अकुपत् अकोपीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। "कदाचित् कुप्यते माता नोदरस्था हरीतकी"। इति तु कुप्यतीति कुप् ततः स इवाचरति इति ङेः साध्यम्। इति दुर्गादासः॥

कुपथः, पुं, कुत्सितः पन्थाः। (पाणिनिमते कापथ इति नित्यं स्यात्। वोपदेवमते तु "पथि पुरवे वा"। इति सूत्रेण विभाषया कोः कादेशः।) कापथः। इति शब्दरत्नावली। (यथा, श्रीमद्भागवते ५। ६। १०। "स्वधर्म्मपथमकुतोभयमपहाय कुपथपाषण्डमसमञ्जसं निजमनीषया मन्दः प्रवर्त्तयिष्यति"॥

कुपथः सेव्यत्वेनास्त्यस्य। अर्श आदित्वात् अच्। कुपथगामिनि, त्रि। यथा महाभारते।१।६७।२६।

"कुपथस्तु महावीर्य्यः श्रीमान् राजन्! महासुरः।
सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः"॥)

कुपाणिः, त्रि, (कुत्सितः पाणिर्यस्य।) वक्रहस्तः। इति जटाधरः। कोपा इति भाषा॥

कुपिनी, [नृ] पुं, (कुपिनी मत्स्यधानी अस्यास्तीति। ब्रीह्यादित्वात् इनिः।) कैवर्त्तः॥ इति त्रिकाण्डशेषः। जालिया इति भाषा॥

कुपिनी, स्त्री, (कुप्यते रक्ष्यते मत्स्योऽत्र। कुप इ कि स्तुतौ अधिकरणे बाहुलकात् इनि। किच्च ङीप् एषोदरादित्वात् साधुः।) मत्स्यमत्स्यधानी। इति शब्दरत्नावली। खालुइ इति भाषा॥

कुपिन्दः, पुं, (कुप्यति चिक्षारयति सूचयति। कुप इ कि स्तुतौ + "कुपेर्वा वच्च"। उणां ४। ८८। इति किन्दच्।) तन्तुवायः। इत्युणादिकोषः॥

कुपीलुः, पुं, (कुत्सितः पीलुः।) कारस्करवृक्षः तिन्दुकविशेषः। मधुरतेन्दु माकड़ार्केंदु इति च भाषा। तत्पर्य्यायः। जलजः २ दीर्घपत्रकः ३ कुपक्वः

४ कालतिन्दुकः ५ कालपीलुकः ६ काकेन्दुः ७ विषतिन्दुः ८ मर्कटतिन्दुकः ९। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। वातमदकारित्वम्। लघुत्वम्। व्यवाहरत्वम्। ग्राहित्वम्। कफपित्तास्रनाशित्वञ्च। इति भावप्रकाशः॥

कुपूयः, त्रि, (कुत्सितं पूयते। पूयोऽ विसरणे + पचाद्यच्।) कुत्सितः। आत्माचारादिनिन्दितः। इत्यमरभरतौ॥

कुप्यं, क्ली, (गुप्यते रक्ष्यते द्रव्यादिकमत्र। गुपू रक्षणे। "राजसूयसूर्य्यमरुद्वरुण्यकुप्यकृष्टपच्याव्यथ्याः"। ३। १। ११४। इति क्यवन्तो निपातितः। गुपेरादेः कत्वं च संज्ञायाम्।) स्वर्णरूप्यभिन्नधातुः। इत्यमरः। २। ९। ९१॥ (यथा, महाभारते। १५। ६। ११।

"भूमिरत्नपशून् देया विपरीतस्य भारत!।
हिरण्यं कुप्यभूयिष्ठं मित्रं क्षीणमधो बलम्"॥)

दला इति ख्यातधातुः। इत्यरुधातुमध्ये वैद्यकम्॥

कुप्यशाला, स्त्री, (कुप्यानां स्वर्णरूप्याभ्यामन्येषां भाजनादीनां शाला गृहम्।) स्वर्णरूप्यभिन्नधातुपात्रादिनिर्म्माणादिगृहम्। काँसारिर दोकान इति भाषा। तत्पर्य्यायः। सन्धानी २। इति हेमचन्द्रः॥

कुप्रियः, त्रि, (कुत्सितं प्रीणातीति। कु + प्री + "इगुपधज्ञेति"। ३। १। १३५। कः।) जघन्यः। इति हलायुधः॥ (बहुव्रीहौ तु कुत्सितप्रियः॥)

कुब इ कि स्तुतौ। इति कविकल्पद्रुमः। (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) पद्मसखरी। इ कुम्बते। कि कुम्बयति कुम्बति। स्तुतिराच्छादनम्। इति दुर्गादासः॥

कुबे(वे)रः, पुं, (कुम्बतीति। कुब इ कि आच्छादने "कुम्बेर्नलोपश्च"। उणां १। ६०। इति एरक्। नलोपश्च। यद्वा कुत्सितं वेरं शरीरं यस्य। पिङ्गलनेत्रत्वात्तथात्वम्।) यक्षराजः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (स च विश्रवस ऋषेरिलविलायां जातः। स तु त्रिपात् अष्टदन्तः केकरात्तश्च। यथा, वायुपुराणे।

"कुत्सायां क्षितिशब्दोऽयं शरीरं वेरमुच्यते।
कुवेरः कुशरीरत्वात् नाम्ना तेनैव सोऽङ्कितः"॥

तथा काशीखण्डे देवीदत्तशापोक्तौ च।

"कुवेरो भव नाम्ना त्वं मम रूपेर्य्यया सुत!"॥)

कुब्जः, त्रि, (कु ईषत् उज्ज आर्जवमस्य। उज्ज आर्जवे घञ्। प्रकृष्टादिवदलोपः।) वायुगोन्नतहृदयः। उन्नतपृष्ठश्च। कुजा इति भाषा। तत्पर्य्यायः। गडुः २ गडुलः ३ इत्यमरः॥ न्युब्जः ४ गडुरः ५ इति शब्दरत्नावली॥ तस्य लक्षणमाह।

"हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सशक्।
कुब्जो वायुर्यदा कुर्य्यात्तदा तं कुब्जमादिशेत्"॥

इति माधवकरः॥ यदेत्युक्त्या यदिवेति विकल्पार्थस्तेन न पुनरुक्तिदोषः। तच्चोन्नतायामः क्रोडनतो भवति बहिरायामः पृष्ठनतो भवति ताभ्यामस्य को भेदः। उच्यते। अन्तरायामबहिरायामयोः प्रकृतस्यैवान्तःशरीरस्य बहिःशरीरस्य चावनमनमत्र तु हृदयं पृष्ठं वा शरीराद्बहिर्भवतीति भेदः॥ *॥

अथ चिकित्सा।

"वाह्यायामेऽन्तरायामे धनुस्तल्ये च कुब्जके।
योज्यं प्रसारिणीतैलं तेन तेषां श्रमो भवेत्॥
वातव्याधिषु सामान्या याः क्रियाः कथिताः पुरा।
कर्त्तव्या एव ताः सर्व्वास्तैलमेतद्विशेषतः"॥

इति भावप्रकाशः॥ (यथा, हरिवंशे ८३। ३४।

"तान्तु कुब्जां स्फडोर्मध्ये शुक्लेनाग्र्यपाणिना।
अग्नेः सन्तोऽयामास क्षणो लीलाविधानवित्"॥

रोगविशेषस्यास्य चिकित्सार्थं वटिकौषधं यथा॥ *॥

"रसौ गन्धौ समौ शुद्धौ तालकक्षाभया तथा।
विषं व्योषञ्च कटुकीं बोलजेपालकौ समौ"॥

"भृङ्गराजरसैर्मर्द्द्यं खुर्ज्जकस्वरसैस्तथा।
गुञ्जाद्वयं प्रदातव्यं रसः कुब्जविनोदकः॥
आमवाताञ्ज्ञवातादीन् कटीशूलञ्च नाशयेत्।
अग्निञ्च कुरुते दीप्तं स्थौल्यानां नाशनं परम्"॥

कुब्जविनोदो रसः॥

इति वैद्यकरसेन्द्रसारसंग्रहे वातरोगाधिकारे॥ *॥)

कुब्जः, पुं, (कु ईषदुब्जं आर्जवमस्य। प्रकन्ध्वादित्वात् साधुः।) अपामार्गः। इति राजनिर्घण्टः॥ खड्गः। इति शब्दमाला॥

कुब्जकः, पुं, (कौ पृथिव्यां उब्जति। उब्ज + ण्वुल्। प्रकन्ध्वादित्वात् उलोपे साधुः।) पुष्पवृक्षविशेषः। कूजा इति ख्यातः। (यथा, शब्दार्थचिन्तामणिधृतवत्सिंहपुराणे।

"चम्पकात् पुष्पशतकादशोकं पुष्पमुत्तमम्।
अशोकात् पुष्पसाहस्रात् सेवतीपुष्पमुत्तमम्।
सेवतीपुष्पसाहस्रात् कुब्जकः पुष्पमुत्तमम्"॥

तत्पर्य्यायः। भद्रतरुणी २ वृत्तपुष्पः ३ अतिकेशरः ४ महासहः ५ कण्टकाढ्यः ६ खर्व्वः ७ अलिकुलसङ्कुलः ८ वारिकण्टकः ९। इति त्रिकाण्डशेषः॥ अपि च।

"कुब्जको भद्रतरुणिर्वृत्तपुष्पोऽतिकेशरः।
महासहः कण्टकाढ्यो नीलालिकुलसङ्कुला"॥

राजनिर्घण्टे महासहेत्यादिशब्दाः पुंलिङ्गाः।

अस्य गुणाः।

"कुब्जकः सुरभिः स्वादुः कषायानुरसः सरः।
त्रिदोषशमनो दृश्यः शीतवर्त्ता च स स्मृतः"॥

इति भावप्रकाशः॥ सुरभित्वम्। रक्तपित्तकफनाशित्वञ्च। तत्पुष्पगुणाः। शीतलत्वम्। वर्णकारित्वम्। दाहवातपित्तनाशित्वञ्च। इति राजनिर्घण्टः॥

कुब्जकण्टकः, पुं, (कुब्जः कण्टकोऽत्र।) श्वेतखदिरः। इति राजनिर्घण्टः॥

कुब्रं, (ब्रं)क्ली, (कुवि आच्छादने + "ऋज्रेन्द्राग्रवज्रेति"। उणां २। २८। इति निपातनात् रन्।) वनम्। इत्युणादिकोषः॥ कुरुम्। कुरुजम्। तन्तुः। शरणम्। शकटम्। इति सङ्क्षिप्तसारे उणादिवृत्तिः॥

कुमारः, त्रि क केलौ। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-अकं-सेट्।) क्रीडी। अचुकुमारत्। इति दुर्गादासः॥

कुमारं, क्ली, (कुमारयति नन्दति यत्र यस्मिन् सतीत्यर्थः।) जात्यकाञ्चनम्। इति मेदिनी। खाँटि सोणा इति भाषा॥

कुमारः, पुं, (कुत्सितो मारः कन्दर्पो यस्मात्।) कार्त्तिकेयः तदुत्पत्तिविवरणन्तु कार्त्तिकेयशब्दे द्रष्टव्यम्॥

(तथा महाभारते। १। ६६। २१-२४।

"अग्नेः पुत्रः कुमारस्तु श्रीमान् शरवणालयः।
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः।
कीर्त्तिकाभ्युपपत्तेश्च कार्त्तिकेय इति स्मृतः"॥

कौ पृथिव्यां मारयति दुष्टान्। कु + मृ + णिच् + अच्।) नाट्योक्तौ युवराजः। इत्यमरः॥ (राज. कुमारः। यथा, रघौ ७। ६३।

"ततः प्रियोपात्तरसेऽधरौष्ठे
निवेश्य दध्मौ जलजं कुमारः"॥)

शुकः। अश्ववारकः। (कुमारयति क्रीड़तीति। कुमार-तृ क क्रीड़ने + अच्।) पञ्चवर्षीयबालकः। (यथा मनौ ७। १७५।

"कन्यानां सम्प्रदानञ्च कुमाराणाञ्च रक्षणम्"॥

"तस्यास्तु खल्वमरायाः प्रयतनार्थे खल्वेवमेवकर्म्माणि क्रियमाणे जातमात्रे ऽस्यैव कुमारस्य कार्य्याण्येतानि कर्म्माणि भवन्ति तद्यथा-अग्नमोः सङ्घट्टनं कर्णयोर्मूले शीतोदकेनोष्णोदकेन वा सुखपरिषेकः। तथा संक्लेशविहतान् प्राणान् पुनर्जनेत क्षणकपालिका शूर्पेण चैनमभिनिष्पुनीयाद् यद्यचेष्टं स्यात् यावत् प्राणानां प्रत्यागमं तत्तत् सर्व्वमेव कुर्य्युः। ततः प्रत्यागतप्राणं प्रकृतिभूतमभिसमीक्ष्य स्नानोदकग्रहणाभ्यामुपपादयेत्। अथास्य तालोष्ठकण्ठ-जिह्वा-प्रमार्জ্জनमारभेत अङ्गुल्या सुपरिनिखितनखयासुप्रक्षालितोपधानकार्पासपिचुमत्या प्रथमं प्रमार्জ্জितस्यास्यच शिरस्तालू कार्पासपिचुना क्षौद्रगर्भेण प्रतिच्छादयेत्। ततो ऽस्यानन्तरं कार्यं सैन्धवोपहितेन सर्पिषा प्रच्छर्दनम्"।

"दशम्यां निष्क्रमतीतायां सपुत्रास्त्री सर्व्वगन्धौषधैर्गैरसर्षप-लोध्रैश्च स्नाता लघ्वहतवस्त्रं परिधाय पवित्रेऽलङ्कृतविचित्रभूषणवती संसृष्ट मङ्गल्यानुचितामर्च्चयित्वा च देवतां द्विजिनः शुक्लवाससोऽग्र्यांश्च ब्राह्मणान् स्वस्तिवाचयित्वा कुमारमहतेन शुचिवाससाच्छादयेत्। प्राक् शिरस उदक्शिरसं वा संवेश्य देवतापूर्व्वं द्विजातिभ्यः प्रणमतीत्युक्त्वा कुमारस्य पिता दे नामनी कारयेत् नाक्षत्रिकं नामाभिप्रायिकञ्च"।

"क्षते च नामकर्म्मणि कुमारं परीप्सितमुपक्रामेदायुषः प्रमाणं ज्ञान-हेतोः! तत्रेमान्यायुष्मतां कुमाराणां लक्षणानि भवन्ति तद्यथा—एकैकजा मृदवोऽल्पाः स्निग्धाः सुवर्णमूलाः कृष्णाः केशाः प्रश्लक्ष्णाः। स्थिरा बहला त्वक् प्रकृत्यातिसुसम्पन्नमीषत्प्रमाणातिरिक्तमनुरूपमात-

पद्मोपमं शिरः प्रशस्यते । घूढं दृढं समं सुश्लिष्टसन्धर्ह्रस्वाङ्गुलमुपचितं बलिनमर्द्धचन्द्राकृतिललाटं बहली विपुलसमपिठौ समौ नीचौ दृढौ एकतोऽवनतौ सुश्लिष्टकर्णपुटकौ महाच्छिद्रौ कर्णौ ईषत् प्रलम्बिन्यावसक्थते समे संहते महत्यौ भ्रुवौ समे समाहितदर्शने यक्ष्मभागविभागे बलवती तेजसोपपन्ने स्वाङ्गोपाङ्गे चक्षुषी । ऋज्वी महोच्छ्वासावंशसमन्नेवदवनताग्रा नासिका । महदृजु-सुनिविष्टदन्तमास्यम् । आयामविस्तरोपपन्ना स्निग्धा तन्वी प्रजातियुक्ता पाटलवर्णा जिह्वा । स्निग्धं युक्तोपचयमुष्णोपपन्नं रक्तं तालु । महानदीनः स्निग्धोऽनुनादी गम्भीरसमुत्थो धीरस्वरः । नातिस्थूलौ नातिश्लक्ष्णौ विस्तारोपपन्नावास्यप्रच्छादनौ रक्तावोष्ठौ । महत्यौ हनुकौ । नातिमहती ग्रीवा । घूढमुपचितमुरो गूढं जत्रु एकवंशश्च । विश्लक्षान्तरौ खलौ, अंसपातिनी स्थिरे पार्श्वे, उन्नतपरिपूर्णायतौ बाहू, सन्धिनौ अनुचयश्च । महदुपचितं पाणिपादम् । स्थिराङ्गुष्ठाः स्निग्धाताम्रास्वल्पकूर्म्माकाराः करजाः, प्रदक्षिणावर्त्ता सोत्सङ्गा च नाभिः । गाम्भीर्यस्थिरभागहीना समासमुपचितमांसा श्लक्ष्णोन्नता स्थिरोपचितमांसौ नात्युन्नतौ नात्यवनतौ स्निग्धावनुपूर्वसंहतौ उपचययुक्तावुरू । नात्युपचिते नात्यपचिते एकीभूते प्रगूढसिरास्नायुसन्धी जङ्घे । नात्युपचितौ नात्यपचितौ गुल्फौ पूर्व्वोपदिष्टगुणौ पादौ कूर्म्माकारौ । प्रजातियुक्तानि वात-मूत्र-पुरीषगुह्यानि तथा खप्नजागरव्यायामक्षितवदितलक्षणग्रहणानि । यच्च किञ्चिदन्यदपि अनुक्तमस्ति तदपि सर्व्वं प्रजातिसम्पन्नमिष्टं विपरीतं पुनरनिष्टमिति दीर्घायुर्व्वक्ष्यामि" । * ।

अतोऽनन्तरं कुमारागारविधिमनुव्याख्यास्यामः ।

"वास्तुविद्याकुशलः प्रशस्तं रम्यतमस्थं निवातं प्रवातैकदेशं दृढसमगतस्थावदपशुदंशिमूषिकाव्यालं सुसंविभक्तसलिलोदूखलमूत्रवर्च्चस्थानस्थानभूमिमहानससमेतसुखं यथर्त्तुप्रयनासनाशरणसम्पन्नं कुर्य्यात् । तथा सुविहितरक्षाविधानबलिमङ्गलहोमप्रायश्चित्तं शुचिरुद्यवैद्यानुरक्तजनसम्पूर्णमिति कुमारागारविधिः ।

प्रयनास्तरणप्रावरणानि कुमारस्य मृदुलघुशुचिसुगन्धीनि स्युः । खेदमलजन्तुमन्ति मूत्रपुरीषोपहतानि च वर्ज्जानि स्युः ।

अस्ति सम्भवेऽन्येषां तान्येव च सुप्रक्षालितोपधानानि सुधूपितानि सुमृदुलघ्वास्तृतोपयोगं गच्छेयुः ।

धूपनानि पुनर्वाससां प्रयनास्तरणप्रावरणानाञ्च यवसर्षपातसी-हिङ्गु-गुग्गुलुवचारोशीरवयःस्थागोजोमोचटिलायवशुण्ठाशाकरोहिणीसर्पनिर्म्मोकानि घृतसंप्रयुक्तानि स्युः ।

मद्यञ्च धात्रीयाः कुमारस्य खड्गशरभवयवदमाजां जीवतामेव दक्षिणेभ्यो विषाणेभ्यो ग्राह्यं गृहीतानि स्युः । मन्त्राद्यौषधयो जीवकर्षभकौ यान्यप्यन्यानि ब्राह्मणाः प्रशंसेयुः ।

क्रीड़नकानि खल्वस्य तु विचित्राणि घोषवत्यभिरामाणि अगुरूग्रतीक्ष्णाग्राणि अनास्रवप्रवेशीनि अप्राणहराणि अविश्वासनानि स्युः ।

गन्धस्य विश्वासनं साधु तस्मात्तस्मिन् बदत्वमुज्ञाने वान्यत्र विधेयतामगच्छति राक्षसपिशाचभूतनागानां नामान्याहृत्य कुमारस्य विश्वासनार्थं नामग्रहणं न कार्य्यं स्यात् ।

यदि त्वातुर्य्यं किञ्चित् कुमारमागच्छेत् तन्निमित्तपूर्व्वरूपविशेषोपशयविशेषैस्तत्तदनुबुध्यसर्व्वविशेषज्ञातुरौषध-देश-कालाभ्यासज्ञमाचिकित्सितुमारभेतैनं मधुरस्निग्धसुरभिप्रीतसुखं कर्म्मप्रवर्त्तयन्नेवं साध्याहि कुमारा भवन्ति तथा ते धर्म्मं लभन्ते चिराय रोगस्वरोगदृष्टमातिष्ठेत् देशकालात्मगुणविपर्य्ययेण वर्त्तमानः ।

क्रमेणाहाराद्यानि परिवर्त्तयिष्यन्नः सर्व्वाण्यहितानि वर्जयेत्तावद्यावद्वर्त्तशरीरायुषां सम्पदमवाप्नोतीति ।

एवमेनं कुमारमायौवनप्राप्तेर्धर्म्मार्थकुशलागमनायानुपालयेदिति पुनर्व्याख्यातम् । तदाचरन् यथोक्तैर्विधिभिः पूजां यथेष्टं लभते जनस्यक इति" ॥

इति शारीरस्थाने ऽष्टमेऽध्याये चरकेणोक्तम् ।*।

"अथ कुमारं क्षीराभिरद्भिरभ्यास्य जातकर्म्माणि कृते मधुसर्पिरनन्ता ब्राह्मीरसेन सुवर्चलामकुल्यनामिकया वेदमेवेत्ततो यथातैजेनाभ्यज्य क्षीरवृक्षकषायेण सर्व्वगन्धोदकेन वा रूप्यहेमप्रतप्तेन वा वारिणा स्नापयेदेनं कपित्थपत्रकषायेण वा कोष्णेन यथाकालं यथादेशं यथा विभवञ्च ।

क्षीराहाराय सर्पिः पाययेत् खिड्गार्थकवचामांसीपयस्यापामार्गशतावरीखारिवाब्राह्मीपिप्पलीहरिद्राकुरुण्टसैन्धवसिद्धं क्षीरान्नमादाय मधुकवचा पिप्पली चित्रकचिरिबिल्वा सिद्धमन्नमादाय दिनपञ्चमूलीक्षीर-तगर-मञ्जराज-मरिच-मधु-विड्ङ-ब्राह्मी-विश्राणी सिद्धम् । तेनारोग्यबलमेधायूंषि शिशोर्भवन्ति ॥

वाचं पुनर्गाधसुखं ग्रहीयात् नचैनं तर्जयेत् सहसा न प्रतिबोधयेत् विश्रासभयात् सहसा नापहरेदुच्चैर्वेषयेद्वा वातादिविघातभयात् नोपवेश्वयेत् कौड्यभयात् नित्यञ्चैनमनुवर्त्तेत प्रियैरनिष्टांसुः । एवमस्याभिहतमात्मबलिवर्द्धते नित्यमुदयस्तत्त्व-सम्पन्नो गीरोगः सुप्रसन्नमनाश्च भवति । वातातपविद्युत्प्रभावादभ्रतान्धागार-निम्नस्थानग्रहेभ्यादिभ्यो दुर्ग्रहोपसर्गतश्च वाचं रक्षेत् ।

"गात्रयष्टौ विरूक्षेद्वाचं नाग्रे विमर्शे न च ।
गोधूमाक्षतवर्षेषु रजोधूमोदकेषु च ॥
क्षीरसाम्यतयाक्षीरमाजं गव्यमथापि वा ।
दद्यादात्मप्रमाणेन वीक्ष्य मात्रया ॥
वयसास्वेनमन्नं प्राश्येच्चतुर्हायनञ्च । नित्यमवरोधरक्षञ्च स्यात् क्षतरक्ष उपसर्गभयात् । प्रयत्नतश्च ग्रहोपसर्गेभ्यो रक्षा बाला भवन्ति ॥

अथ कुमार उद्विजते त्रसति रोदिति गन्धसंज्ञो भवति गन्धदर्शनैर्धात्रीमात्मानञ्च परिवुदति दन्तान् खादति । जृम्भते ष्टम्भते भ्रुवौ विक्षिपत्यक्षि निरीक्षते पेनमुद्गमति सन्दष्टोष्ठः क्रूरो भिन्नाभवर्चा दीनार्त्तस्वरो निद्रां जागर्त्ति दुर्म्मनो म्लानाङ्गो मत्स्यकुक्कुन्दरिमत्स्यगन्धो यथा पुरा धात्र्याः स्तन्यमभिलषति तथा नाभिलषतीति सामान्येन ग्रहोपसृष्टलक्षणमुक्तं विस्तरेणोत्तरे वक्ष्यामः" ॥

इति सुश्रुतेनोत्तरतन्त्रे १० अध्याये उक्तम् ॥)

वयसस्थः । इति मेदिनी । अर्हदुपासकविशेषः । इति हेमचन्द्रः ॥ सिन्धुनदः । इति शब्दरत्नावली ॥ (सनत्कुमारसनत्सुधन्दा एते चत्वारोऽपि बाल्यत एव ब्रह्मचारित्वात् कुमारा इत्युच्यन्ते ॥ त इव ये च कौमारतो ब्रह्मचारित्वेऽपि विज्ञेयाः । यथा, मनौ । ५ । १५९ ।

"अनेकानि सहस्राणि कुमारब्रह्मचारिणाम् ।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम्" ॥

मङ्गलग्रहः । यथा, नवग्रहस्तोत्रे ।

"धरणीगर्भसम्भूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च तं वोहितामहं नमाम्यहम्" ॥

शक्तिमत्यर्व्वतोद्भूतऋषिकुल्याविशेषः ।

यथा, विष्णुपुराणे ।

"ऋषिकुल्याः कुमाराद्याः शक्तिमत्यादसम्भवाः" ॥

शाकद्वीपाधिपतेः सप्तपुत्राणामेकः । तन्नामा तद्वर्षस्यापि तथा संज्ञा ।

यथा, विष्णुपुराणे २ । ४ । ५९-६० ।

"शाकद्वीपेश्वरस्यापि भवस्य सुमहात्मनः ।
सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त सः ॥
जलदश्च कुमारश्च सुकुमारो मणीवकः ।
कुसुमोदश्च मौदाकिः सप्तमश्च महाद्रुमः ॥
तत्संज्ञान्येव तत्रापि सप्तवर्षाण्युक्तमात्" ॥

मन्त्रविशेषः । यथा, तन्त्रसारधृतविश्वसारवचनम् ।

"धृतवीर्य्यश्च भीमश्च प्रध्वस्तो बाणकः पुनः ।
कुमारश्च युवा प्रौढ़ो वृद्धो निष्किंशकस्तथा" ॥

खरोदयोक्तबाणचक्राख्यखरभेदः । बाणोपद्रवग्रहभेदः । यथा, सुश्रुते उत्तरतन्त्रे ३० अः ।

"स्कन्दः स्कन्दो भगवता देवेन त्रिपुरारिणा ।
बिभर्त्ति चापरां संज्ञां कुमार इति स ग्रहः" ॥

त्रि, सुन्दरः ॥)

कुमारकः, पुं, (कुमार + संज्ञायां स्वार्थे वा कन् ।) वयसस्थः । इत्यमरः । २ । ६ । २५ । बालकः । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १९८ । २२ ।

"प्रहारवेगाभिहता द्रुमा यावूर्विशातताः ।
तथा प्रपतन्ति स्म सुतं दृष्ट्वा कुमारकाः" ॥

राजकुमारः । यथा महाभारते । १ । १३१ । ७ ।

"ते तं दृष्ट्वा महात्मानमुपगम्य कुमारकाः ।
अभ्युत्थायाब्रियात्मानो ब्राह्मणं पर्य्यवारयन्" ॥)

कुमारी

कौरव्यवंशोद्भवो नागविशेषः। यथा, महाभारते १। आस्तीकपर्व्वणि ५७। १२।
"एरकः कुण्डलो वेणी वेणीस्कन्धः कुमारकः।
वाडुकः शङ्खवेरश्च धूर्त्तकः प्रातरातकौ।
कौरव्यकुलजात्येते प्रविष्टा हयवाहनम्" ॥)

कुमारजीवः, पुं, (कुमारं जीवयतीति। जीव + णिच् + अच्।) पुत्रजीवकवृक्षः। इति रत्नमाला। जीयापुता इति भाषा॥

कुमारपालः, पुं, (कुमारं पालयति। पाल् + णिच् + अच्।) शालिवाहनराजः। इति हेमचन्द्रः॥ (शिशुपालके, त्रि॥)

कुमारभृत्या, स्त्री, (कुमारस्य गर्भस्य निर्विघ्नप्रसवार्थं गर्भचिकित्साकुशलैः भिषग्भिः धार्य्या वा भृत्या पालनम्।) गर्भिण्याः परिचर्य्या। इति हारावली॥ तत्पर्य्यायः। बालतन्त्रम् २ गर्भिण्यवेक्षणम् ३। इति चिकित्साशब्दरत्नावलिः॥
(यथा, रघुः। ३। १२।
"कुमारभृत्याकुशलैरनुष्ठिते
भिषग्भिराप्तैरथ गर्भमर्म्मणि।
पतिः प्रतीतः प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभ्रितामिव" ॥)

कुमारयुः, पुं, (कुमारं कौमारं याति। मित्र्यादित्वात् कुः निपातनात् साधुः।) युवराजः। इत्युणादिकोषः॥

कुमारवाही, [न्] पुं, (कुमारं कार्त्तिकेयं वहति। वह + णिनिः।) मयूरः। इति शब्दरत्नावली॥

कुमारसूः, स्त्री, (कुमारं कार्त्तिकेयं सूते। सू + क्विप्।) गङ्गा। इति हेमचन्द्रः॥ दुर्गा। इति व्युत्पत्तिलभ्योऽर्थः॥ (पुं वह्निः। यथा, महाभारते। २। सहदेवदिग्विजये ३१। ४३।
"वैश्वानरस्त्वं पिङ्गेशः शुक्रो भूरितेजसः।
कुमारसूस्त्वं भगवान् रुद्रगर्भो हिरण्यकृत्" ॥)

कुमारिका, स्त्री, (कुमारयति आनन्देन क्रीड़ति। कुमार + णिच् + ण्वुल् + टाप् अत इत्वम्।) कुमारी। इति शब्दरत्नावली॥ नवमल्लिका। इति रत्नमाला॥ भारतवर्षस्य खण्डविशेषः। यथा,—
"वर्णाव्यवस्थितिरिहैव कुमारिकाख्ये
ग्रामेषु चान्त्यजनना निवसन्ति सर्व्वे"।
इति सिद्धान्तशिरोमणौ गोलाध्यायः॥ स्थूलैला। इति राजनिर्घण्टः॥ (ओषधिविशेषः। घृतकुमारी इति ख्याता। अस्या व्यवहारो यथा नैषोक्यचिन्तामणिरसे दृश्यः।
"खल्वे द्रवैरेव कुमारिकायाः"।
इति रसेन्द्रसारसङ्ग्रहे वातव्याध्यधिकारे। नेत्रमण्डलस्यप्रतिबिम्बविशेषः। यथा,—
"दृष्ट्वा यस्य विजानीयात् पद्मरूपां कुमारिकाम्।
प्रतिच्छायामयीमक्ष्णो नैनमिच्छेच्चिकित्सितुम्"॥
इति चरके इन्द्रियस्थाने ७ अध्याये॥)

कुमारी, स्त्री, (कुमार + प्रथमवयोवचनत्वात् स्त्रियां ङीष्।) द्वादशवर्षीया कन्या। यथा,—
"अष्टवर्षा भवेद्गौरी दशवर्षा च कन्यका।
सम्प्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते"॥
इति स्मृतौ भेदः। इह अभेदोपचारात् कन्या कुमारीत्यमरः॥ इति भरतः॥ आगमे तु कुमारीपूजने अजातपुष्पा चेत् तदा षोड़शवर्षपर्य्यन्तवयस्का। तस्या वयोभेदेन नामभेदाः। यथा,—
"एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती।
त्रिवर्षा तु त्रिधामूर्त्तिश्चतुर्व्वर्षा तु कालिका॥
सुभगा पञ्चवर्षा च षड्वर्षा च उमा भवेत्।
सप्तभिर्मालिनी साक्षादष्टवर्षा च कुब्जिका॥
नवभिः कालसङ्कर्षा दशभिश्चापराजिता।
एकादशे तु रुद्राणी द्वादशाब्दे तु भैरवी॥
त्रयोदशे महालक्ष्मीर्हिंसना पीठनायिका।
क्षेत्रज्ञा पञ्चदशभिः षोड़शे चाम्बिका मता॥
एवं क्रमेण सम्पूज्या यावत् पुष्पं न जायते।
पुष्पितापि च सम्पूज्या तत्पुष्पादानकर्म्मणि"॥*॥
तत्पूजाविधिर्यथा।
"अथान्यत् साधनं वक्ष्ये महाचीनक्रमोद्भवम्।
येनानुष्ठितमात्रेण शीघ्रं देवी प्रसीदति॥
अष्टम्यां चतुर्द्दश्यां कृष्णां वा रविसंक्रमे।
कुमारीपूजनं कुर्य्यादयथा विभवमात्मनः॥
वस्त्राभरणगन्धाद्यैश्च भक्त्यैर्भोज्यैः सुविस्तरैः।
पञ्चतत्त्वादिभिः सम्यग्देवीबुद्ध्या सुसाधकः"।
इत्यग्निदाकल्पः॥ * ॥ (स्वनामख्याता परीक्षित्पुत्रस्य भीमसेनस्य पत्नी। यथा,—महाभारते १। पूरुवंशानुकीर्त्तने ९५। ४३।
"भीमसेनः खलु कैकेयीमुपयेमे कुमारीं नाम तस्यामस्य जज्ञे प्रतिश्रवा नाम"॥)
पार्व्वती। नवमल्लिका। नदीविशेषः। (इयं हि शाकद्वीपान्तर्गतसप्तनदीनामेका। यथा, विष्णुपुराणे २। ४। ६५।
"नद्यश्चात्र महापुण्याः सर्व्वपापभयापहा।
सुकुमारी कुमारी च नलिनीधेनुका च या"॥)
सहा। घृतकुमारी इति ख्याता। अपराजिता। जम्बुद्वीपः। इति मेदिनी॥ सीता। इति हेमचन्द्रः॥ बन्ध्याकर्कोटकी। स्थूलैला। मोदिनीपुष्पम्। तरुणीपुष्पम्। श्यामापक्षी। इति राजनिर्घण्टः॥

कुमाल त् क केलौ। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-अकं-सेट्।) अकुमालत्। इति दुर्गादासः॥

कुमालकः, पुं, (कुमाल + संज्ञायां कन्। कुमाल त् क केलौ + ण्वुल् वा।) सौवीरदेशः। इति हेमचन्द्रः॥

कुमुत्, [द्] क्ली, (कौ पृथिव्यां मोदते इति। कु + मुद + क्विप्।) कुमुदम्। इति मेदिनी। हेला इति भाषा। रक्तोत्पलम्। इति चिकित्साशब्दरत्नावलिः॥
(यथा, भागवते ३। २३। ३८।
"बभ्राज उत्कचकुमुद्गवानपीच्य
स्वाराभिराहत इवोडुपतिर्नभस्यः"॥
कुमुदस्य कन्दविशेषः। शालुक इति यस्य ख्यातिः। अस्य पर्य्याया यथा,—
"कैरवं चन्द्रकान्तञ्च गर्दभं कुमुदं कुमुत्"॥

कुमुद्

इति वैद्यकरत्नमालायाम्॥)

कुमुत् [द्] त्रि, (कुत्सिते विषये मुत् हर्षो यस्य कुत्सिता मुद् अस्य वा।) क्षपणः। इति मेदिनी। अप्रीतः। इति शब्दरत्नावली॥

कुमुदं, क्ली, (कौ मोदते। मुद् "इगुपधेति"। ३। १। १३५। कः।) श्वेतोत्पलम्। हेला सूँदि इत्यादि भाषा॥ (यथा, रामायणे ५। ५५। १।
"सचन्द्रकुमुदं रम्यं सार्कारुणवं शुभम्।
पुण्यश्रवणकादम्बमनःशैवलशाद्वलम्"॥)
तत्पर्य्यायः। कैरवम् २। इत्यमरः। १। १०। ३७। चन्द्रकान्तम् ३ गर्दभम् ४ कुमुत् ५। इति रत्नमाला॥ धवलोत्पलम् ६ कह्लारम् ७ शीतलकम् ८ शशिकान्तम् ९ इन्दुकमलम् १० चन्द्रिकाम्बुजम् ११ गन्धसोमम् १२। इति शब्दरत्नावली॥ अपि च।
"श्वेतं कुवलयं प्रोक्तं कुमुदं कैरवं तथा।
कुमुदं पित्तच्छिल्लिघ्नं मधुरं ह्लादि शीतलम्"॥
इति भावप्रकाशः॥ अस्य गुणाः। शीतलत्वम्। स्वादुत्वम्। पाके तिक्तत्वम्। कफरक्तदोषदाहश्रमपित्तनाशित्वञ्च। इति राजनिर्घण्टः। रक्तपद्मम्। इति मेदिनी॥ रूप्यम्॥ इति हेमचन्द्रः॥

कुमुदः, पुं, (कुत्सिते नैर्ऋतकोणे मोदते इति। कु + मुद + कः।) नैर्ऋतकोणस्थदिग्गजः। इत्यमरः। १। ३। ३॥ वानरविशेषः। (अयं खलु रामचन्द्रस्य सेनापतिवानराणां एकतमः। यथा, रामायणे। ६। २। २८।
"नाम्ना संकोचनो नाम नानाद्विजयुतो गिरिः।
तत्र राज्यं प्रशास्त्येष कुमुदो नाम वानरः।
योऽसौ शतसहस्राणि सहस्रं परिवर्त्तति"॥)
नागविशेषः। (यथा, महाभारते। १। ३५। १५।
"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः।
कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा"॥)
दैत्यभेदः। सितोत्पलम्। इति हेमचन्द्रः॥ कर्पूरः। इति राजनिर्घण्टः॥ ध्रुवकभेदः। यथा,—
"एकाविंशतिवर्षास्त्रिभवेत् पञ्चारके रवे।
कुमुदोऽभोदश्चैव ताले तुरगलोलके"।
इति सङ्गीतदामोदरः॥ (कुं पृथ्वीं भूमिं वा मोदयति। अन्तर्भूतणिज्यन्तात् मुदः कः। विष्णुः। यथा, महाभारते। १३। १४९। ७६।
"शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः"।
विष्णुपार्श्वदः। यथा, भागवते। ८। २१। १०।
"कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्रिराट्"।
मेरोरुपरिस्थगिरिविशेषः। स चायुतयोजनविस्तृतः। यथा, भागवते ५। १६। १२।
"मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इति।
अयुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवस्थम्भगिरय उपकल्पाः"। शाल्मलद्वीपान्तर्गतप्रथमपर्व्वतः। यथा, विष्णुपुराणे २। ४। २६।
"कुमुदश्चात्रतश्चैव तृतीयश्च बलाहकः"।
आनूपजन्तुविशेषः। यथा,—
"हंससारसचक्राह्वाः कुमुदाश्च कपिञ्जलाः।

कुमुद

आनूपास्थेषु विज्ञेयाः श्लेष्मणा वातकोपनाः" ॥
इति हारीते प्रथमेस्थाने ११ अध्यायः ॥)

कुमुदबान्धवः, पुं, (कुमुदस्य बान्धवः ।) चन्द्रः । कर्पूरः । इत्यमरः । १ । ६ । १३ ॥

कुमुदवती, स्त्री, (कुमुदानि सन्त्यस्यां इति । मतुप् मस्य वः ङीप् ।) कुमुदती । कुमुदसमूहः । इत्यमरटीकायां भरतः ॥

कुमुदा, स्त्री, (कुत्सितं मोदते । कु + मुद् + कः । टाप् च ।) कुम्भिका । पाता इति भाषा । गम्भारीवृक्षः । इति मेदिनीकरहेमचन्द्रौ ॥
(अस्याः पर्य्याया यथा,—
"श्रीपर्णी काश्मरी भद्रा गाम्भारी गोपभद्रिका ।
कुमुदा च सदा भद्रा कट्फला क्षत्रवल्लिका" ॥
इति वैद्यकरत्नमालायाम् ॥) शालपर्णीवृक्षः । धातकीवृक्षः । कट्फलः । इति राजनिर्घण्टः ॥

कुमुदावासः, पुं, (कुमुदानां आवासः । कुमुदानि-आवसन्त्यत्र वा । आ + वस् + अधिकरणे घञ् ।) कुमुदप्रायदेशः । इति हेमचन्द्रः ॥

कुमुदिका, स्त्री, (कौ भूमौ मोदते इति । मुद् + कर्त्तरि ण्वुल् टाप् अत इत्वञ्च ।) कट्फलः । इत्यमरः । २ । ४ । ४० ॥ (अस्याः पर्य्याया यथा,—
"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्राभद्रवतीति च" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे । गुणास्तास्य कट्फलशब्दे वक्ष्यन्ते ॥)

कुमुदिनी, स्त्री, (कुमुदानि सन्त्यस्याम् । कुमुद + इनिः ङीप् ।) कुमुदयुक्तपुष्करिण्यादिः । कुमुदसमूहः । कुमुदलता । इति भरतः ॥
(यथा भ्रमरशतके । ७ ।
"अलिरसौ नलिनीवनवल्लभः
कुमुदिनी कुलकेलिकलारसः ।
विधिवशेन विदेशमुपागतः
कुटजपुष्परसं बत मन्यते" ॥)
तत्पर्य्यायः । कुमुदती २ । इत्यमरः । १ । १० । ३९ । उत्पलिनी । इति राजनिर्घण्टः ॥ छोट सुँदि इति भाषा ॥

कुमुदिनीपतिः, पुं, (कुमुदिन्याः पतिः वल्लभः ।) चन्द्रः । इति हेमचन्द्रः ॥

कुमुदी, स्त्री, (कुमुद + स्त्रियां ङीष् ।) कट्फलः । इति शब्दरत्नावली ॥
(अस्या गुणादयः कट्फलशब्दे ज्ञातव्याः ॥)

कुमुदेशः, पुं, (कुमुदानां ईशः ।) चन्द्रः । इति शब्दरत्नावली ॥

कुमुदती, स्त्री, (कुमुद + "कुमुदनडवेतसेभ्यो मतुप्" । ४ । २ । ८७ । इति मतुप् "मादुपधायाश्च" । ८ । २ । ९ । इति मस्य वः । उगितश्चेति ङीप् ।) कुमुदिनी । इत्यमरः । १ । १० । ३८ ॥
(यथा, भट्टिकाव्ये । २ । ६ ।
"प्रभाववातादितकम्पिताक्षतिः
कुमुदतीरेणुपिशङ्गविग्रहम् ।
निरास भर्त्तृं कुपितेव पद्मिनी

कुम्भः

न मानिनीभ्रं सहतेऽन्यसङ्गमम्" ॥
अस्याः पर्य्याया यथा,—
"कुमुदती कैरविका तथा कुमुदिनीति च" ।
गुणास्तास्या कुमुदिनीशब्दे ज्ञेयाः । इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
कुमुदाख्यनागराजस्य यवीयसी स्वसा सा तु रामचन्द्रपुत्रस्य कुशस्य पत्नी ।
यथा, रघुः १७ । ६ ।
"तं स्वसा नागराजस्य कुमुदस्य कुमुदती ।
अन्वगात् कुमुदानन्दं शशाङ्कमिव कौमुदी" ॥
क्रौञ्चद्वीपान्तर्गतानां सप्तनदीनामेका नदी ।
यथा, विष्णुपुराणे २ । ४ । ५५ ।
"गौरी कुमुदती चैव सन्ध्यारात्रिर्मनोजवा ।
क्षान्तिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः" ॥)

कुमुद्वान्, त्रि, (कुमुद् + "कुमुदनडवेतसेभ्यः" । ४ । २ । ८७ । इति मतुप् मस्य वः ।) कुमुदबहुलदेशः । इत्यमरः । २ । १ । ६ ॥
(यथा रघुवंशे ४ । १९ ।
"हंसश्रेणीषु तारासु कुमुदत्सु च वारिषु ।
विभूतयस्त्वदीयानां पर्य्याप्ता यशसामिव" ॥)

कुमोदकः, पुं, (कुं पृथ्वीं मोदयति । कु + मुद् + णिच् + ण्वुल् । पृथिव्याः भारावतारादिनीलाकर्म्मभिः सर्व्वेषामानन्दकारकत्वात् तस्य तथात्वम् ।) विष्णुः । इति हेमचन्द्रः ॥

कुम्भः, त्रि, (कुम्यति कुम्भयति वा । कुपि वेष्टने + अच् इदित्वात् नुम् ।) बाऽकुण्ठः । इति जटाधरः । कोपा इति भाषा ॥

कुम्भा, स्त्री, (कुबि वेष्टने + अच् टाप् च ।) सुगन्धनाडतिः । अस्पृश्यादिदर्शनवारणाय वेष्टनम् । इत्यमरः । २ । ७ । १८ ॥ (यथा तैत्तिरीयसंहितायाम् । "तस्मिन्नुदीचीनकुम्भां ग्रभ्यां निदधाति" ॥ तथा शुक्लयजुर्व्वेदे अभ्याधाने । ७ ।
"कुम्भावतीसमविड्भ्या गलेन गवतुम्भाभवीव्यसविधा ग्रं बाऽकुलेयग्रन्थिभिरामसुखसम्भाविततनभरा" ॥ इति ॥)

कुम्भं, क्ली, (कुं भूमिं उम्भति गन्धेन पूरयति । कु + उम्भ पूरणे + अच् ।। ग्रकन्ध्वादित्वात् साधुः ।) गुग्गुलुः । इत्यमरः । २ । ४ । १३४ ॥ चिह्नम् । इति हेमचन्द्रः ॥

कुम्भः, पुं, (कुं भूमिं उम्भति जलेन । उनृभ + अच् । ग्रकन्ध्वादित्वात् साधुः ।) घटः । अस्य परिमाणं कलसशब्दे द्रष्टव्यम् ॥ गजकुम्भः । हस्तिशिरसः पिण्डद्वयम् । इत्यमरः । २ । ४ । १३४ ॥
(यथा प्रसन्नराघवे,—"तैः किं मत्तकरीन्द्रकुम्भकुहरेणारोपयीथाः करान्" ॥) कुम्भकर्णपुत्रः ।
(यथा, गोः रामायणे । ५ । ७६ । १५ ।
"सुतोऽथ कुम्भकर्णस्य कुम्भः परमकोपनः ।
अब्रवीत् परमक्रुद्धो रावणं लोकरावणम्" ॥)
वेश्यापतिः । इति विश्वमेदिन्यौ ॥ समाधिविशेषः । प्राणायामाङ्गकुम्भक इति यावत् । इति धरणी ॥
(प्रह्लादपुत्रः । यथा महाभारते १ । ६५ । १९ ।
"प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत ! ॥

कुम्भकः

विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत !" ॥
विष्णुः । यथा महाभारते १३ । १४९ । ८२ ।
"अर्च्चिश्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः" ॥)
द्रोणद्वयपरिमाणम् । ६४ सेर इति भाषा । तत्पर्य्यायः । खारीं २ । इति वैद्यकपरिभाषा ॥ मेघादिदशराशयन्तर्गतैकादशराशिः । तस्य पर्य्यायः । हृद्रोगः २ । इति दीपिका ॥ स च धनिष्ठार्द्धे शतभिषायुक्तपूर्ब्बभाद्रपदा प्रथमपादत्रयेण भवति । अस्याधिष्ठात्री देवता कलसधारी पुरुषः । स तु श्रीर्म्मोदयः । चरणरहितः । मध्यसन्तानः । मध्यमस्त्रीसङ्गः । कर्ब्बूरवर्णः । वनचारी । वायुराशिः । खिन्नः । उष्णः । अर्द्धस्वरः । वातपित्तकफप्रकृतिः । शूद्रवर्णः । पश्चिमदिक्स्वामी । क्षुधाङ्गः । तत्र जातफलम् ॥ "मेधावी हस्तिघोटकधनेश्वरो दन्तपीड़ायुक्तः स्नेहशून्यः" । इति ज्योतिषम् । जन्मकालीनचन्द्राश्रितैतद्राशिफलम् ।
"अलसतासहितोऽन्यसुतप्रियः
कुशलताकलितोऽतिविचक्षणः ।
कलसगामिनि प्रीतकरे नरः
सदसि सज्जनमानसरोचनः" ॥
इति कोष्ठीप्रदीपः ॥ तस्योदये तन्नामकलग्नं भवति । तस्य गतिप्राप्तपरिमाणं यथा । दशव्यष्टाधिकः पञ्चाङ्कप्रभे देशे वर्त्तमानोनविंशायनांशे अष्टपञ्चाशत्पलाधिकत्रिदण्डाः । इति ज्योतिषम् । तत्र जातफलम् ।
"कुम्भलग्ने समुद्भूतश्चञ्चलचित्तोऽतिसौहृदः ।
परदाररतो नित्यं सत्त्वकायो महासुखी" ॥
इति कोष्ठीप्रदीपः ॥

कुम्भकः, पुं, (कुम्भ इव कायति प्रकाशते निश्चलत्वात् । कै + कः । यद्वा कुम्भ + स्वार्थे कः ।) दक्षिणहस्तेन नासापुटद्वयं धृत्वा प्राणायामाङ्गं वायुस्तम्भनम् । इति तन्त्रम् ॥ (पातञ्जलयाज्ञवल्क्यादौ तु ।
"कुम्भकः पूरको रेचः प्राणायामस्त्रिलक्षणः ।
पूरकं पूरणं वायोः कुम्भकः स्यादपानं क्वचित् ॥
वह्निनिःसारणं तस्य रेचकः परिकीर्त्तितः ॥
दक्षिणे रेचयेद् वायुं वामेन पूरितोदरः ।
कुम्भेन धारयेन्नित्यं प्राणायामं विदुर्बुधाः ॥
अङ्गुष्ठेन पुटं ग्राह्यं नासया दक्षिणं पुनः ।
कनिष्ठानामिकाभ्याञ्च वामं प्राणस्य संग्रहे ॥
अङ्गुष्ठतर्जनीभ्यान्तु ऋग्वेदी सामगायनः ।
अङ्गुष्ठानामिकाभ्यान्तु ग्राह्यं सर्व्वैरथर्व्वभिः" ॥)
(तथा च, हठयोगदीपिकायाम् । २ । ४३ ।
"तस्मिञ्जये विधानज्ञाश्चित्रान् कुर्व्वन्ति कुम्भकान् ।
विचित्रकुम्भकाभ्यासादिचित्रां सिद्धिमाप्नुयात्" ॥
"तस्मिञ्जये उज्जन्यवज्ञासिद्धये" । इति तट्टीका ॥ अस्य भेदाः यथा तत्रैव २ । ४४ ।
"सूर्य्यभेदनमुज्जायी सीत्कारी शीतली तथा ।
भस्त्रिकाभ्रामरीमूर्च्छा प्लाविनीत्यष्टकुम्भकाः" ॥
तथा पुनस्तत्रैव २ । ७१ ।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरकुम्भकः ।

कुम्भयो

सहितः केवलश्चेति कुम्भको द्विविधो मतः" ॥•॥)

कुम्भकारः, पुं, (कुम्भं करोति । कुम्भ + कृ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) जातिविशेषः । कुमोर इति भाषा । स तु शूद्रागर्भे विश्वकर्म्मोरसाज्जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । कुलालः २ । इत्यमरः । २ । १० । ६ ॥ चक्री ३ । इति जटाधरः ॥ (एतज्जातिविषये तु पुराणभेदेन मतभेदो दृश्यते । यथा ।

"वैश्यायां विप्रतश्चौरात् कुम्भकारः स उच्यते" ॥

"मालाकाराच्चर्म्मकार्य्यां कुम्भकारो व्यजायत" ॥

"पट्टीकाराच्च तैलिक्यां कुम्भकारो बभूव ह" ॥

इत्यादि बहुलमतमस्ति बाहुल्यभिया नास्माभिरुद्धियते ॥) कुक्कुभपक्षी । इति हेमचन्द्रः ॥

कुम्भकारिका, स्त्री, (कुम्भस्येव कार आकारो यस्याः । कुम्भकार + कप् + टाप् अत इत्वञ्च ।) कुलत्था । इति राजनिर्घण्टः ॥ (कुम्भं करोतीति । कुम्भ + कृ + ण्वुल् स्त्रियां टाप् अत इत्वम् । कुम्भकारस्त्री । इति व्युत्पत्तिलभ्योऽर्थः ॥)

कुम्भकारी, स्त्री, (कुम्भस्येव कार आकारो यस्याः । गौरादित्वात् ङीष् ।) कुलत्थाङ्गनम् । कुलत्थिका । इति राजनिर्घण्टः ॥ मनःशीला । इति जटाधरः ॥ (कुम्भकारस्य पत्नीति ङीष् ।) कुम्भकारभार्य्या ॥

कुम्भतुम्बी, स्त्री, (कुम्भ इव तुम्बी ।) घण्टाकृतितुम्बभेदः । गोल लाउ इति भाषा । तत्पर्य्यायः । कुम्भालाबुः २ गोरक्षतुम्बी ३ गोरक्षी ४ गोगालाबुः ५ घटाभिधा ६ घटालाबुः ७ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । पित्तश्लेष्मकफाखुज्वरकासाग्निनाशित्वम् । रम्यत्वञ्च । इति राजनिर्घण्टः ॥

कुम्भदासी, स्त्री, (कुम्भस्य वेश्यापतेर्दासी ।) कुट्टनी । इति शब्दरत्नावली ॥

कुम्भयोनिः, पुं, (कुम्भः योनिर्जन्मस्थानं यस्य ।) अगस्त्यमुनिः । (यथा रघुः ४ । २१ ।

"प्रसादोदयादभ्रः कुम्भयोनेर्महौजसः" ॥)

वशिष्ठमुनिः । (एतयोर्मुनिसत्तमयोरुत्पत्तिविवरणं तु उर्व्वशीक्षते कन्दर्पपीडितयोर्मित्रावरुणयोः स्खलितैकस्मिन् कुम्भे सङ्गतेन रेतसा यथा घटितं तथा तत् रामायणोत्तरकाण्डे ६६—६७ सर्गे विशेषतो द्रष्टव्यम् ॥) द्रोणाचार्य्यः । इति मेदिनी ॥ (अस्य उत्पत्तिकथा यथा महाभारते १ । १२१ । ६-१४ ।

"गङ्गाद्वारं प्रति महान् बभूव भगवानृषिः ।
भरद्वाज इति ख्यातः सततं संशितव्रतः ॥
सोऽभिषेक्तुं ततो गङ्गां पूर्व्वमेवागमन्नदीम् ।
महर्षिभिर्भरद्वाजो ह्यविज्ञाने चरन् पुरा ॥
ददर्शाप्सरसं साक्षाद् घृताचीमाप्लुतामपि ।
रूपयौवनसम्पन्नां मदहृष्टां मदालसाम् ॥
तस्याः पुनर्नदीतीरे वसनं पर्य्यवर्त्तत ।
व्यपक्रष्टाम्बरां दृष्ट्वा तामृषिश्चकमे ततः ॥
तत्र संसक्तमनसो भरद्वाजस्य धीमतः ।
ततोऽस्य रेतश्चस्कन्द तद्दृष्ट्वैव आदधे ॥
ततः समभवद्द्रोणः कलसे तस्य धीमतः ।
अधीतवेदो ह वेदांश्च वेदाङ्गानि च सर्व्वशः ॥)

द्रोणपुष्पोऽत्रः । इति राजनिर्घण्टः ॥ (स्त्री, अश्वरोविशेषः । यथा महाभारते । ३ । ४३ । ३० ।

"गोपाली सहजन्या च कुम्भयोनिः प्रजागरा ।
चित्रसेना चित्रलेखा संहा च मधुरस्वना" ॥)

कुम्भला, स्त्री, (कुम्भं कुम्भाकारं लाति आदत्ते । कुम्भ + ला आदाने + कः टाप् च ।) मुण्डितिका । इति रत्नमाला ॥ मुण्डिरी इति भाषा ॥ (मुण्डीशब्दे विवृतिरस्या ज्ञेया ॥)

कुम्भवीजकः, पुं, (कुम्भ इव वीजं यस्य । ततः स्वार्थे कः ।) रीठाकरञ्जः । इति राजनिर्घण्टः ॥

कुम्भशाला, स्त्री, (कुम्भाय कुम्भनिर्म्माणार्थं या शाला ।) कुम्भनिर्म्माणादिगृहम् । तत्पर्य्यायः । पाकपुटी २ । इति हेमचन्द्रः ॥

कुम्भसन्धिः, पुं, (कुम्भयोः सन्धिर्मिलनम् ।) हस्तिकुम्भद्वयमध्यस्थानम् । तत्पर्य्यायः । आरक्तः २ । इति त्रिकाण्डशेषः ॥

कुम्भसम्भवः, पुं, (कुम्भः सम्भव उत्पत्तिस्थानं यस्य ।) अगस्त्यमुनिः । इत्यमरः । १ । ३ । २० ॥ (यथा राजेन्द्रकर्णपुरे ७१ ।

"तदयुक्तं ननु कुम्भसम्भव ! भवत् प्रस्तारहस्तेन यत्
स्याच्च स्याच्च तिरोदधन्निरवधिर्विन्ध्योऽपि वन्ध्यः कृतः" ॥ वशिष्ठः । द्रोणः । एतयोरपि कुम्भोत्पत्तेस्तथात्वम् । एतद्विवरणन्तु कुम्भयोनिशब्दे द्रष्टव्यम् ॥)

कुम्भा, स्त्री, (कु कुत्सितया निन्दितवृत्त्या उम्भा पूर्त्तिर्देहादेर्भरणं यस्याः । अकन्ध्वादित्वात् साधुः ।) वेश्या । इति शब्दमाला ॥

कुम्भाण्डः, पुं, (कुम्भ इव अण्डं यस्य ।) बाणासुरस्यामात्यविशेषः । इति श्रीभागवतम् ॥ (यथा, हरिवंशे १७५ । १६३ ।

"कुम्भाण्डवचनैरेवं दानवेन्द्रः प्रचोदितः ।
वाचं रूक्षामतिक्रुद्धः प्रोवाच वदतांवरः" ॥

अयञ्च बाणराजयान्ते श्रीकृष्णप्रसादात् तद्राज्ञामी बभूव ॥ यदुक्तं तत्रैव १८३ । २७—३८ ।

श्रीकृष्ण उवाच ।

"कुम्भाण्ड ! मन्त्रिणां श्रेष्ठ ! प्रीतोऽस्मि तव सुव्रत !।
सुव्रतन्ते विजानामि राष्ट्रिकोऽस्तु भवानिह ॥
सज्ञातिपक्षः सुसुखी निर्व्वृतोऽस्तु भवानिह ।
राज्यञ्च ते मया दत्तं चिरं जीव ममाश्रयात्" ॥)

कुम्भाण्डम् । कुम्भाण्डीपर्य्याये कुम्भाण्डीदर्शनात् ॥

कुम्भाण्डी, स्त्री, (कुम्भाण्ड + स्त्रियां जातित्वात् ङीष्।) कुम्भाण्डी । इति राजनिर्घण्टः ॥

कुम्भिका, स्त्री, (कु कुत्सितरूपेण उम्भति पूरयति आच्छादयति वारि पुष्करिण्यादेः । अकनृध्वादित्वात् साधुः ।) जलजलजविशेषः । पाना इति भाषा । तत्पर्य्यायः । वारिपर्णी २ । इत्यमरः । १ । १० । ३८ ॥ श्वेतपर्णा ३ अग्रकुम्भी ४ पानीयपुष्पजः ५ । इति रत्नमाला ॥ आकाशमूली ६ कुटजम् ७ जलवल्लभम् ८ । इति शब्दावली ॥ वारिमूली ९ खमूलिका १० पर्णी ११ पृश्नी १२ खमूली १३ खमूलिः १४ वारिकर्णिका १५ । इति शब्दरत्नावली ॥ कुमुदा १६ दलाढ्यकः १७ । इति जटाधरः ॥ अस्य

कुम्भिका

गुणाः वारिपर्णीशब्दे द्रष्टव्याः । पाटलाद्यत्रः । द्रोणपुष्पी । इति राजनिर्घण्टः ॥ नेत्ररोगविशेषः । तस्य लक्षणं यथा,—

"वर्त्मान्ते पिडकाघाता भिद्यन्ते च स्रवन्ति च ।
कुम्भीकबीजसदृशाः कुम्भिकाः सन्निपातजाः" ॥

इति माधवकरः ॥ (कुम्भा + स्वार्थे कन् टाप् इत्वञ्च । वेश्या । इति शब्दमाला । कट्फलम् । भावप्रकाशे अस्याः पर्य्यायाः यथा,—

"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च" ॥

गुणाश्चास्याः कट्फलशब्दे बोद्धव्याः ॥)

कुम्भिनीबीजं, क्ली, (कुम्भिन्या बीजम् ।) जयपालः । इति राजनिर्घण्टः ॥

कुम्भिपाकी, स्त्री, (कुम्भिना पाकोऽस्याः । गौरादित्वात् ङीष् ।) कट्फलः । इति भावप्रकाशः ॥

कुम्भिमदः, पुं, (कुम्भोऽस्यास्ति कुम्भी हस्ती तस्य मदः ।) हस्तिमदः । इति राजनिर्घण्टः ॥ (गन्धद्रव्यविशेषः ॥)

कुम्भिलः, पुं, (कुम्भ + इलच् ।) चोरः । ज्ञानशून्यः । श्लोकार्द्धचौरः । श्लाघः । इति हेमचन्द्रः ॥

कुम्भी, [न्] पुं, (कुम्भोऽस्त्यस्येति । इनिः ।) हस्ती । कुम्भीरः । इति हेमचन्द्रः ॥ गुग्गुलुः । इति जटाधरः ॥ (अग्निप्रकृतिविषकीटविशेषः । यथा, "वाह्यकी पिप्पिटः कुम्भी" ॥ इति सुश्रुते कल्पस्थाने ८ अध्याये ॥)

कुम्भी, स्त्री, (कुम्भ + अल्पार्थे ङीष् । क्षुद्रकुम्भः ।) उखा पाटलाद्यत्रः । वारिपर्णी । कट्फलः । इति हेमचन्द्रः ॥ वृक्षविशेषः । कुम्भीपुष्प इति लोकाके प्रसिद्धा । तत्पर्य्यायः । रोमालुविटपी २ रोमशः ३ पर्पटद्रुमः ४ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । ग्राहित्वम् । वातकफापहत्वञ्च । दन्तीवृक्षः । इति राजनिर्घण्टः ॥

कुम्भीकः, पुं, (कुम्भीव कायते प्रकाशते । कै + कः ।) पुन्नागवृक्षः । इति रत्नमाला ॥ (यथा, सुश्रुते । "प्रियङ्गुसमङ्गाधातकीपुन्नागरक्तचन्दनचन्दनमोचरसरसाञ्जनकुम्भीकखोतोऽञ्जनपद्मकेसरयोजनवल्लयो दीर्घमूलाश्चेति" ॥) कुम्भिका । यथा,—

"दूर्व्वाकशेरुपूतीककुम्भीकस्नुहीबलम्" ।

इति चक्रपाणिदत्तः ॥ (विश्वतगर्भविशेषः । यथा, "पुंस्त्वदोषात्तु पक्वेषु प्रोक्तास्तत्रैव कीटकः स्मृतः ।
आसेचनस्तथैव कुम्भीकः सुगन्धिखरसंज्ञितः" ॥
इति गारुडधरेऽग्नि पूर्व्वखण्डे सप्तमेऽध्याये उक्तम् ॥
"स्त्रे गुदेऽब्रह्मचर्य्याद्याः स्त्रीषु पुंवत् प्रवर्त्तते ।
कुम्भीकः स च विज्ञेयः" । इति सुश्रुते शारीरस्थाने २ अध्याये ॥)

कुम्भीनसः, पुं, (कुम्भीव नसा नासा यस्य ।) क्रूरसर्पः । इति मेदिनी ॥ (वायुप्रकृतिकविषकीटविशेषः । यथा । "कुम्भीनसस्तुण्डिकेरी" ॥ इति सुश्रुते कल्पस्थाने ८ अध्याये उक्तम् ॥)

कुम्भीनसी, स्त्री, (कुम्भीनस + स्त्रियां ङीष् ।) लवणदानवमाता । इति मेदिनी ॥ (यथा, रामायणे । ७ । ३० । १६ ।

"ज्ञातीँस्तान् धर्षयित्वेमास्त्वया नीता वराङ्गनाः ।

कुरङ्ग

स्वामतिक्रम्य मधुना राजन् कुम्भीनसी हृता" ॥)

कुम्भीपाकः, पुं, (कुम्भ्यां उखायां पाक इव पाको यत्र ।) नरकविशेषः । इति जटाधरः । तत्पर्य्यायः। सम्प्रतापनः २ । इति मनुः ॥ "य इह पशून् मक्षिणो वा प्राणतो रन्धयति तं परत्र यमदूतास्तप्ततैले रन्धयन्ति यत्र । इति श्रीभागवते । ६ । २६ । ७ ॥

कुम्भीरः, पुं, (कुम्भिनं हस्तिनमपि ईरयति । ईर +"कर्म्मण्यण्" । ३ । २ । १ ।) जलजन्तुविशेषः । कुमीर इति भाषा । तत्पर्य्यायः । नक्रः २ । इत्यमरः । १ । १० । २१ ॥ कुम्भीलः ३ । इति तट्टीका ॥ गिलयाहः ४ महाबलः ५ । इति राजनिर्घण्टः ॥ वार्भटः ६ अम्बुकिरातः ७ अम्बुकण्टकः ८ । इति शब्दरत्नावली ॥

(यथा, महाभारते । १३ । १११ । ५८ ।
"गर्दभत्वन्तु संप्राप्य दशवर्षाणि जीवति ।
संवत्सरन्तु कुम्भीरस्ततो जायेत मानवः" ॥)

कुम्भीरमक्षिका, स्त्री, (कुम्भीर इवाख्या मक्षिका । यद्वा कुम्भीरोपमदयुक्ता मक्षिका ।) मक्षिकाविशेषः । कुमीरा पोका इति भाषा । तत्पर्य्यायः। कथा २ । इति शब्दरत्नावली ॥

कुम्भीलः, पुं, (कुम्भीर + रस्य लः ।) कुम्भीरः । इत्यमरटीका ॥

कुम्भीवीजं, क्ली, (कुम्भ्या वीजम् ।) जयपालः । इति राजनिर्घण्टः ॥ (जयपालशब्देऽस्य गुणादिकं ज्ञेयम् ॥)

कुर अ शब्दे । इति कविकल्पद्रुमः । (तुदां-परं-अकं-सेट् ।) अ कुरति कोरिता । इति दुर्गादासः॥

कुरका, स्त्री, (कुर् + कः । कुरः शब्दः कायति प्रकाशतेऽस्मिन् । कै + कः ।) सङ्कीर्णशब्दः । इति राजनिर्घण्टः ॥

कुरङ्गरः, पुं, (कुरमित्यव्यक्तशब्दं करोति । कुरम् + ङ + टः ।) सारसपक्षी । इति हेमचन्द्रः ॥

कुरङ्गुरः, पुं, (कुरं इत्यस्फुटशब्दं कुरति । कुर् + कः ।) सारसपक्षी । इति शब्दरत्नावली ॥

कुरङ्गः पुं, (कौ पृथिव्यां भूमौ वा रङ्गति । रगि + अच् । यद्वा, "विड्वनिमिमनिजनां शुक् च" । उणां १ । १२० । इति अङ्गच् वाऽङ्गकात् उतं रपरत्वञ्च । कुरङ्गविहङ्गादयः सर्व्वे निपात्यन्ते । इति वा ।) हरिणः । इत्यमरः । २ । ५ । ८ ॥ कुत्सितकोऽपि ॥
(यथा, भागवतटीकायां स्वामिना प्रोक्तम् ।
"कुरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च" ॥
अस्य गुणाः यथा,—
"कुरङ्गो वंशको वल्यः शीतलः पित्तदृग्दरुः ।
मधुरो वातहृद्याही किञ्चित्पवकरः स्मृतः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ * ॥
अस्य लक्षणं यथा,—
"न क्षयो न च ताम्रश्च कुरङ्गः सोऽभिधीयते" ॥
इति सूत्रस्थाने षट्चत्वारिंशेऽध्याये सुश्रुतेनोक्तम् ॥)

कुरङ्गनयना, स्त्री, (कुरङ्गस्य नयने इव नयने यस्याः ।)

कुरण्डः

मृगनयना नारी । इति राजनिर्घण्टः ॥ (उक्तञ्च, "किन्त्वेकायमृगा कुरङ्गनयना नेत्राम्बुभिर्वर्द्धते" ॥)

कुरङ्गनाभिः, पुं, (कुरङ्गस्य नाभिः ।) कस्तूरी । इति राजनिर्घण्टः ॥ (कस्तूरीशब्दे ऽस्य गुणादयो बोद्धव्याः ॥)

कुरङ्गमः, पुं, (कौ भूमौ रङ्गं मिनोति । मा + डः ।) हरिणविशेषः । तत्पर्य्यायः । एणः २ ऋष्यः ३ रिष्यः ४ चारुलोचनः ५ । इति चिकाण्डशेषः ॥

कुरङ्गिका, स्त्री, (कौ रङ्गेऽस्या अस्तीति । ठन् टाप् च ।) मुद्गपर्णी । इति राजनिर्घण्टः ॥

कुरचिल्लः, पुं, (कुरे शब्दे चिल्लति । चिल्ल ग्रैथिल्ये + अच् ।) कर्कटः । इति हेमचन्द्रः ॥

कुरटः, पुं, (कुर् + अटन् किच्च । कु कुत्सितरूपा रटति जीवति देहयात्रां सम्पादयति वा । रट + अच् ।) चर्म्मकारः । इति चिकाण्डशेषः ॥

कुरण्टकः, पुं, (कुर्य्यते शब्द्यते इति । कुर् + कर्म्मणि वाऽऽलकात् अण्टक् स्वार्थे कन् ।) पीताह्वानः । पीतझिण्टी । इति राजनिर्घण्टः॥ (अस्य पर्य्यायगुणा यथा,—
"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।
सहाचरः सहचरः स च भिन्न्यपि कथ्यते ॥
कुरण्टकोऽत्र पीते स्यादक्षे कुरवकः स्मृतः ।
नीले बाणादयोक्तो दासे आर्त्तगवश्च सः ॥
सैरेयः कुष्ठवातास्रकफकण्डूविषापहः ।
तिक्तोष्णो मधुरोऽनस्रः सुस्निग्धः केशरञ्जनः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"किंशुकं कफपित्तघ्नं तद्वदेव कुरण्टकम्" ॥
इति सुश्रुते सूत्रस्थाने ४६ अः । अन्यस्य नपुंसकत्वं वक्ष्यते ॥)

कुरण्डः, पुं, (कुर + अण्डक् ।) मुष्कवृद्धिरोगः । कोरड इति भाषा । तत्पर्य्यायः । वृद्धिः २ अण्डवर्द्धनः ३ । इति हेमचन्द्रः ॥ तस्य सम्प्राप्तिपूर्व्वकं लक्षणं यथा,—
"क्रुद्धोऽपानगतिर्वायुः श्रोणिमूषणकरश्चरन् ।
मुष्कौ वङ्क्षगतः प्राप्य पक्वकोशाभिवाहिनीः ॥
प्रपीड्य धमनीर्वृद्धिं करोति पक्वकोशयोः ।
दोषाक्तमेदोमूत्राम्बैः सदृद्धिः सप्तधा मतः ॥
मूत्राम्बजावप्यनिलाज्जेतुभेदश्च केवलम् ।
वातपूर्व्वैतिस्पर्शो रूक्षो वातादहेतुकः ॥
पक्वोऽम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान् ।
कफान्मीतो गुरुः स्निग्धः कण्डूमान्कठिनोऽल्परुक् ॥
क्षयस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः ।
कफवन्मेदसा वृद्धिर्मेदुस्त्राकफकोपमः ॥
मूत्रधारावृतो यस्य मूत्रजः स तु गच्छतः ।
अम्भोभिः पूर्व्ववृद्धिवत् क्षोभं याति सरक्षुद्रुः ॥
मूत्रक्षयमधः स्राव्य चालयन् पक्वकोशयोः ।
वातकोपिभिराहारैः शीततोयावगाहनैः ॥
धारणे रथमाराध्वविषमाक्षप्रवर्त्तनैः ।
क्षोभयैः क्षुभितस्थान्यैः क्षुब्धाम्बावयवं यदा ।
पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् ।
कुर्य्याद्वङ्क्षणसन्धिस्थो ग्रन्थाभं श्वयथुं तदा ।
उपेक्षमाणस्य च मुष्कवृद्धि-

कुरण्डः

माध्मानवत् स्तम्भवतीं स वायुः ।
प्रपीड्यितोऽन्तःस्रवणवान् प्रयाति
प्रश्नामयन्नेति पुनश्च मुक्तः ॥
अन्यवृद्धिरयाथोऽयं वातवृद्धिसमाकृतिः" ॥
इति वृद्धिनिदानम् ॥ इति माधवकरः ॥ * ॥
तस्यौषधं यथा,—
"दिव्यवृक्षाश्च वै मूलं पिष्टं तण्डुलवारिणा ।
गच्छतां हरेल्लेपात् कुरण्डगलगण्डकम् ॥
रसाञ्जनं हरीतक्याश्चूर्णं तेनैव गुग्गुलात् ।
नश्येद्वै पुरुषव्याधिं नात्र कार्य्या विचारणा" ॥
इति गारुडे १९० अध्यायः ॥ * ॥ अन्यच ।
"गव्यं घृतं सैन्धवसंप्रयुक्तं
ग्रम्बूकभाण्डे निहितं तदेव ।
सप्ताहमादित्यकरैर्विपक्वं
हन्यात् कुरण्डं चिरजं प्रदुष्टम्" ॥
गव्यघृत कर्ष १ । सैन्धव मा ४ । ग्रम्बूकभाण्डे क्षिप्त्वा सप्तदिनं यावत् रौद्रे भावयेत् तेन कुरण्डमक्षयम् ॥
"सैन्धवञ्च घृताभ्यक्तं ताम्रभाजन आतपे ।
प्रतप्तमूर्ब्बया घृष्टं तन्मलञ्च समाहरेत् ॥
कुरण्डं भक्षयेत्तेन स निर्व्विण्णं दिवानिशम् ।
कुरण्डं तेन संछिन्नं गात्रोत्थाह पुनर्व्वसुः ॥
ताम्रभाजने घृतं सैन्धवं दत्त्वा रौद्रे तप्तं कृत्वा मेषलोमलुष्टिकया घृष्ट्वा मलग्रहं कृत्वा तेन भक्षयेत् ॥
वज्रवारस्य वीजञ्च पिष्ट्वा तण्डुलैः सह ।
कुरण्डं नाशयेद्भक्षे लेपनान्नात्र संशयः ॥
घृतैर्नवोत्थितं मूलं पिष्ट्वा जिग्धेत् कुरण्डकम् ।
अथवा लेपनं कुर्य्यात् सहभक्षकशोधितैः" ॥
इति भैषज्यरत्नावली । * ॥ अपरञ्च ।
"गुग्गुलुं त्रपुसैलं वा गोमूत्रेण पिबेन्नरः ।
वातवृद्धिं निहन्त्याशु चिरकालानुबन्धिनीम् ॥
सक्षीरं वा पिबेत्तैलं मासमेरण्डसम्भवम् ।
पुनर्नवायास्तैलं वा तैलं नारायणन्तथा ॥
पाने वस्तौ त्रवोक्तैलं पेयं वा दशकाम्बसा ।
चन्दनं मधुकं पद्मसुधीरं नीलमुत्पलम् ॥
क्षीरपिष्टैः प्रदेहः स्याद्दाहशोथज्वरापहः ।
प्रलेपवल्कलक्वाथैः सक्षतैः प्रलेपनम् ॥
सर्व्वं पित्तहरं कार्य्यं रक्तजे रक्तमोक्षणम् ।
श्लेष्मवृद्धिं तूत्थवोर्य्यैर्मूत्रपिष्टैः प्रलेपयेत् ॥
पीतदारुकषायञ्च पिबेन्मूत्रेण संयुतम् ।
स्निग्धं मेदःसमुत्थान्तु लेपयेत् सुरसादिना ॥
शिरोविरेकद्रव्यैर्व्वा सुखोष्णैर्मूत्रसंयुतैः ।
संस्वेद्य मूत्रप्रभवां वस्त्रपट्टेन वेष्टयेत् ॥
सेवन्याः पार्श्वतोऽधस्तादिध्येदग्नीहिमुखेन वै ।
श्लक्ष्णोपरि च कर्त्तव्ये त्यक्त्वा सेवनिमादरात् ॥
त्यक्त्वासादा सिरां विध्येदन्तरवृद्धिनिवृत्तये ।
अक्षुण्णमध्ये त्वक् छित्वा दहेदग्निविपर्य्यये ॥
क्षाराग्निभस्मतैरण्डवणागोक्षुरसाधितः ।
क्षाराग्निस्त्रपुसैलेन मिश्रितः ।
तैलमेरण्डजं पीत्वा बलासिद्धपयोऽन्वितम् ।
आध्मानशूलोपचितामन्तरवृद्धिं जयेन्नरः ॥

हरीतकीं मूचसिद्धां सतैलक्षवणान्विताम् ।
प्रातःप्रातश्च सेवेत कफवातामयापहाम् ॥
गोमूत्रपिष्टां रवुतैलभृष्टां
हरीतकीं सैन्धवचूर्णयुक्ताम् ।
खादेन्नरः कोष्णजलानुपानां
निहन्ति वृद्धिं चिरजां प्रवृद्धाम् ॥
त्रिफलाक्षाधगोमूत्रं पिबेत् प्रातरतन्द्रितः ।
कफवातोद्भवं हन्ति श्वयथुं वृषणोत्थितम् ॥
सरलागुरुकुष्ठानि देवदारुमहौषधम् ।
मूत्रारनालसंपिष्टं श्रोणिघ्नं कफवातनुत् ॥
त्रिफलाक्षाधगोमूत्रं कक्षः पथ्यासमुद्भवः ।
क्षाससैन्धवसंयुक्तो वृद्धिरोगहरः परः ॥
गव्यं घृतं सैन्धवसंप्रयुक्तं
ग्रम्बूकभाण्डे निहितं प्रयत्नात् ।
सप्ताहमादित्यकरैर्विपक्वं
निहन्ति कुरण्डमतिप्रवृद्धम् ॥
ऐन्द्रीमूलभवं चूर्णं रवुतैलेन मर्दितम् ।
व्यहाद्वोपयसा पीतं सर्व्ववृद्धिनिवारणम् ॥
रक्तजटामूलसिद्धा करटव्यङ्गचर्म्मणा ।
वद्धा वृद्धिः शमं याति चिरजापि न संशयः ॥
निम्बिष्टेनारनालेन रूपिकामूलवल्कलम् ।
लेपोवृद्धामयं हन्ति वटमूलमपि दृढम् ॥
वचासर्षपकल्केन लेपो वृद्धिविनाशनः ।
लब्धाम्रभ्रमलाभ्यान्तु लेपो वृद्धिहरः परः" ॥ * ॥
"मूलं विल्वकपित्थयोरक्तकस्याग्नेरुहत्योर्द्वयोः
श्यामायूतिकरञ्जशिग्रुकतरोर्व्विश्वौषधाग्रस्करम् ।
क्षाराग्रन्थिकचव्यपञ्चलवणं क्षाराजमोदान्वितं
पीतश्चार्श्विककोष्णतोयमथितैश्चूर्णीकृतं भ्रम्रजित् ॥
अवीक्षीरेण गोधूमकल्कं कुन्दुरुकस्य वा ।
प्रलेपनं सुखोष्णं स्यात् भ्रम्रभूवहरं परम् ॥
मत्याक्षे तु वै काकोदरे तक्रं प्रवेशयेत् ।
भ्रम्रं सुदुर्जयं मेधावी तत्क्षणादवजो भवेत् ॥
अजाजी हवुषा कुष्ठं गोधूमं वदराणि च ।
काञ्जिकेन समं पिष्ट्वा कुर्य्याद्भ्रम्रप्रलेपनम् ॥
सैन्धवं मदनं कुष्ठं घृताक्तां निगुणं वचाम् ।
क्रीवेरं मधुकं भार्गीं देवदारु सनागरम् ॥
कट्फलं पौष्करं मेदां चविकां चित्रकं शटीम् ।
विड्वरातिविषे श्यामां रेणुकां नीलिनीं स्थिराम् ॥
विल्वाजमोदां क्षाराक्षे दन्तीं राखां प्रपिष्य च ।
साध्यमेरण्डजं तैलं तैलं वा कफवातनुत् ॥
भ्रम्रोदरार्त्तगुल्मार्शःश्रोणिमेढ्राण्मारुतान् ।
आनाहमप्यरीक्षैव हन्यात्तदनुवासनात्" ॥
वृहत्सैन्धवाद्यं तैलम् ।
"सौरेश्वरवृतं योज्यं भ्रम्रवृद्धिनिवृत्तये" ॥
इति भ्रम्रवृद्ध्यधिकारः । इति चक्रपाणिदत्तः ॥ * ॥

(अस्य सनिदानं पूर्व्वरूपसहितं लक्षणं संप्राप्तिश्च यथा। "वातपित्तश्लेष्मश्रोणितमेदो मूत्राग्ननिमित्ताः सप्त वृद्धयः। तासां मूत्राग्ननिमित्ते वृद्धी वातसमुत्थे केवलमुत्पत्तिहेतुरन्यसमः। अधः प्रकुपितोऽत्यतमो हि दोषः पक्वकोष्ठवाहिनीरभिप्रपद्यधमनीः पक्वकोष्ठवृद्धिं जनयति तां वृद्धिमित्याचक्षते। तासां भविष्यतीनां पूर्व्वरूपाणि वस्तिकटीमुष्कमेढ्रेषु वेदना मारुतनिग्रहः पक्वकोष्ठश्रोणक्षेति ।

तत्रानिलपरिपूर्णा वस्तिमिवाततां पक्वाशयनिमित्तानिलजां वातवृद्धिमाचक्षते, पक्वोडुम्बरसङ्काशां ज्वरदाहोष्मवतीं चासुखसमुत्थानपाकां पित्तवृद्धिं कठिनामल्पवेदनां श्वेतां कण्डूमतीं श्लेष्मवृद्धिं क्षणात्क्षोटवतां पित्तवृद्धिलिङ्गां रक्तवृद्धिं मृदुस्निग्धां कण्डूमतीमल्पवेदनां तालफलप्रकाशां मेदोवृद्धिम् । मूत्रसन्धारण-शीलस्य मूत्रवृद्धिर्भवति सा गच्छतोऽम्बुपूर्णा इतिरिव क्षुभ्यति मूत्रकृच्छ्रवेदनां वृषणयोःश्वयथुं कोथयोत्पादयति तां मूत्रवृद्धिं विद्यात् । भारहरणवलवद्विग्रहवृक्षप्रपतनादिभिरायासविशेषैर्बायुरतिप्रवृद्धः प्रकुपितश्च स्थूलान्त्रस्रोतस्येकदेशं द्विगुणमादायाधोगत्वा वङ्क्षणसन्धिमुपेत्य ग्रन्थिरूपेण स्थित्वाऽप्रतिक्रियमाणो च कालान्तरेण पक्वकोषं प्रविश्य मुष्कश्रोपमापादयत्याध्मातो वस्तिरिवाततः प्रदीर्घः श्रोणो भवति सङ्ग्रन्थवमवपीड़ितस्योर्द्धमुपैति विमुक्तश्च पुनराधमति तामन्त्रवृद्धिमसाध्यामाचक्षते" । * । इति सुश्रुते निदानस्थाने । १२ अध्याये ।

चिकित्सितशास्त्रं यथा,—
"अन्त्रवृद्धा विना बद्ध्वा वृद्धयस्तासु वर्जयेत् ।
अश्वादियानं व्यायामं मैथुनं वेगनिग्रहम् ।
व्यवायमध्वगमनमुपवासं गुरूणि च ।
तत्रादितो वातवृद्धौ स्नैहस्निग्धमातुरम् ।
स्विन्नस्नैहं यथान्यायं पाययेत विरेचनम् ।
कोष्णाम्बुतिल्वकैरण्डफलतैलानि वा नरम् ॥
सक्षीरं वा पिबेन्मासं तैलमैरण्डसम्भवम् ।
ततः कालेऽनिलघ्नानां क्वाथैः कल्कैश्च बुद्धिमान् ॥
निरूहयेन्निरूढञ्च भुक्तवन्तं रसौदनम् ।
यष्टीमधुकसिद्धेन ततस्तैलेन योजयेत् ।
स्नेहोपनाहौ कुर्य्याच्च प्रदेहांश्चानिलापहान् ।
विदग्धां पाचयित्वा वा स्नेहनीं परिवर्ज्जयेत् ।
भिन्द्यात्ततः प्रभिन्नायां यथोक्तं क्रममाचरेत् ।
पित्तजायामपक्वायां पित्तग्रन्थिक्रमो हितः ॥
पक्वां वा भेदयेद्भिन्नां श्रोधयेत् क्षौद्रसर्पिषा ।
शुद्धायाञ्च भिषग्दद्यात् तैलं कल्कञ्च रोपणम् ।
रक्तजायां जलौकोभिः श्रोणितं निर्हरेद्भिषक् ।
पिबेद्विरेचनं वापि शर्कराक्षौद्रसंयुतम् ॥
पित्तग्रन्थिक्रमं कुर्य्यादामे पक्वे च सर्व्वदा ।
वृद्धिं कफात्मिकामुष्णैर्मूत्रपिण्डैः प्रलेपयेत् ॥
पीतदारु कषायञ्च पिबेन्मूत्रेण संयुतम् ।
विस्रापनावृते वापि श्लेष्मग्रन्थिक्रमो हितः ।
पक्वायाञ्च विभिन्नायां तैलं श्रोधनमिष्यते ।
सुमनाबल्कराशोठसप्तपर्णैः साधितम् ।
मेदःसमुत्थां संवेद्य लेपयेत् सुरसादिना ॥
शिरोविरेकैर्व्वैर्व्वा सुखोष्णैर्मूत्रसंयुतैः ।
स्विन्नाङ्गावेष्य पट्टेन समाश्वास्य तु मानवम् ॥
रक्षेत् पक्वे सेवनीञ्च वृद्धिपत्रेण दारयेत् ।
मेदस्ततः समुद्धृत्य दद्यात्कासीससैन्धवे ॥
नम्रीयाञ्च यथोद्दिष्टं शुद्धे तैलञ्च दापयेत् ।

मनःशिलालजवर्षैः सिद्धमारुष्करेषु च ।
मूत्रजां स्वेदयित्वा तु वस्त्रपट्टेन वेष्टयेत् ।
सेवन्याः पार्श्वतोऽधस्ताद्विध्येद्वीक्षिमुखेन तु ।
अथात्र विमुखां नाडीं दत्त्वा विस्रावयेद्भिषक् ।
मूत्रं नाडीमधोकृत्य क्षारिकाबन्धमाचरेत् ॥
शुद्धायां रोपणं दद्याद्वर्ज्जयेदन्नहेतुकीम् ।
अप्राप्तपक्वकोशायां वातवृद्धिक्रमो हितः ।
तत्र यां वङ्क्षणस्थां तां दहेदर्द्धेन्दुवक्त्रया ।
सम्यग्मार्गावरोधार्थं कोशप्राप्तान्तु वर्जयेत् ।
त्वचं भित्त्वाऽस्थिमध्ये दहेच्चाङ्गविपर्य्ययात् ॥
अनेनैव विधानेन वृद्धी वातकफात्मिके ।
प्रदहेत् प्रयतः किन्तु स्नायुच्छेदोऽधिकस्तयोः ।
अस्थ्नोपरि च कर्त्तव्यान्ते त्वक्षा यत्नेन सेवनीम् ।
व्यत्यासाद्वा सिरां विध्येदन्त्रवृद्धिनिवृत्तये" ।
इति सुश्रुते चिकित्सितस्थाने २९ अः । * ॥)

भावप्रकाशोक्तचिकित्सादिः अन्त्रवृद्धिशब्दे दृश्यः।

साकवण्डवृक्षः । इति राजनिर्घण्टः ।

कुरण्डकः, पुं, (कुर्य्यते भृज्यते इति । कुर् + बाहुलकात् अण्टक् । एषोदरात् साधुः । ततः स्वार्थे कन् ।) कुरण्टकवृक्षः । इत्यमरटीकायां रायमुकुटः । (कुरण्टकशब्देऽस्य विवरणं ज्ञातव्यम् ।)

कुररः, पुं, (कुश् शब्दे + "कुवः क्रारच्" । उणां ३ । १३३ । इति क्रारच् प्रत्ययः ।) कुररपक्षी । तत्पर्य्यायः । उत्क्रोशः २ । इत्यमरः । २ । ५ । २३ । खरशब्दः ३ क्रौञ्चः ४ यंक्षिचरः ५ खरः ६ । इति राजनिर्घण्टः । (यथा महाभारते ३ नलोपाख्यानपर्व्वणि । ६४ । ११० ।
"प्रोद्घुष्टां क्रौञ्चकुररैश्चक्रवाकोपकूजिताम्" ।
अयं जलचरान्तर्गतपक्षिविशेषः । यथा,—
"कुररवकमकराः कञ्जटकपिकम्बुसारसाः ।
आड़िदात्यूहहंसा जलकरटिकपिञ्जा टिट्टिभाद्याः ।
जलेचरा विहङ्गास्ते मासकाः खञ्जरीटकाः ।
इत्येते जलजा जीवाः" । इति हारीते प्रथमे स्थाने ११ अध्याये ।)

कुरराद्रिः, पुं, (कुररस्य अद्रिरिव ।) देवसर्षपः । इति राजनिर्घण्टः ।

कुररी, स्त्री, (कुरर + स्त्रियां जातित्वात् ङीष् ।) मेषी । इति हेमचन्द्रः । कुररपक्षिस्त्री । इत्यमरः । (यथा, महाभारते । १ । ६ । १२ ।
"ततो मामनयद्वृद्धः क्रोशन्तीं कुररीमिव" ।)

कुरलः, पुं, (कुरर इति रस्य लः ।) कुररपक्षी । चूर्णकुन्तलः । इति धरणी ।

कुरवः, पुं, (कु ईषत् रवः शब्दनध्वनिर्मधुकराणां स्वल्पमधुतया यत्र ।) सितमन्दारः । इति राजनिर्घण्टः । कुरवकः । रक्तझिण्टी । इति शब्दरत्नावली । पीतझिण्टी । इति हेमचन्द्रः । (कुत्सितो रव इति कर्म्मधारयः ।) कुत्सितशब्दः । (कुत्सितो रवो यस्य ।) कुत्सितशब्दयुक्ते त्रि ।

कुरवकः, पुं, (कुरव + स्वार्थे कन् ।) रक्तास्थानः । रक्तझिण्टी । इति राजनिर्घण्टः । (यथा राजेन्द्रकर्णपूरे ६५ ।
"किञ्चिल्लुप्तलितैकलोचनपुटं कण्डूं मुहुर्गण्डयोः

भम्माकम्मितकुञ्जले कुरवके निर्वाप्य वन्यद्विषैः"॥ तस्य पुष्पादिरपि । यथा कुमारटीकायां मल्लिनाथः। "आलोकितः कुरवकः कुरुते विकाशम्" । अस्य पर्य्याया लक्षणञ्च यथा ॥ "सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका । सहाचरः सहचरः स च भिन्ध्यपि कथ्यते । कुरण्टकोऽत्र पीते स्यादक्ष्णे कुरवकः स्मृतः" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) कुत्सितरवे त्रि ॥

कुरसः, पुं, (कुत्सितो रसो यत्र ।) मद्यभेदः । इति हारावली ॥ कर्म्मधारये कुत्सितरसः । बहुव्रीहौ कुत्सितरसयुक्ते त्रि ॥

कुरसा, स्त्री, (कुत्सितः ईषत् वा रसो यस्याः ।) गोजिह्वा लता । इति शब्दचन्द्रिका ॥

कुराडः, पुं, कुत्साडः । ईषत्साडुः क्षत्रियजन्यो घोटकः । इति हेमचन्द्रः ॥

कुरी, स्त्री, (कुं भूमिं राति ददाति । कु + रा + कः । ततो गौरादित्वात् ङीष् ।) धान्यभेदः । इति राजनिर्घण्टः ॥

कुरीरं, क्ली, ("क्षुभ्र उच्च" । उणां ४ । ३३ । इति ईरन् उकारादेशश्च ।) मैथुनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुरुः, पुं, (क्षु + "क्षुभ्रोरुच्च" । उणां १ । २५ । इति कुः उच्च ।) आग्नीध्ररराजपुत्रः । स तु प्रियव्रतराजपौत्रः । (स्वायम्भुवमनोः प्रपौत्रः उत्तरकुरुराज्यं प्राप्तवांश्च । तत्पत्नी च भद्रेति नाम्ना विश्रुता । यथा विष्णुपुराणे । २ । १ । २६-२२ । "जम्बुद्वीपेश्वरो यस्तु आग्नीध्रो मुनिसत्तम ! । तस्य पुत्रा बभूवुस्ते प्रजापतिसमा नव ॥ नाभिः किम्पुरुषश्चैव हरिवर्षः इलावृतः । रम्यो हिरण्वान् भद्राश्च कुरुर्भद्राश्व एव च ॥ केतुमालस्तथैवान्यः साधुचेष्टो नृपोऽभवत् । जम्बुद्वीपविभागांश्च तेषां विप्र ! निबोधमे ॥ पित्रा दत्तं हिमाह्वन्तु वर्षं नाभेस्तु दक्षिणम् । हेमकूटं तथा वर्षं ददौ किम्पुरुषाय सः ॥ हतीयं नैषधं वर्षं हरिवर्षाय दत्तवान् । इलावृताय प्रददौ मेरुर्यत्र तु मध्यगः ॥ नीलाचलान्वितं वर्षं रम्याय प्रददौ पिता । श्वेतं तदुत्तरं वर्षं पित्रा दत्तं हिरण्वते ॥ यदुत्तरं भद्राश्वतो वर्षं तत्कुरवे ददौ । मेरोः पूर्व्वेण यद्वर्षं भद्राश्वाय प्रदत्तवान्" ॥ वैवस्वतमनुवंश्यक्षत्रवंशीयराजविशेषः । स तु सम्वरराजभार्य्यायां सूर्य्यकन्यायां तपत्यां जातः । अयमेव कुरुक्षेत्रपतिः । धार्त्तराष्ट्रपाण्डवानां पूर्ब्बपुरुषः । यथा,—

"योऽजमीढस्तस्यपुत्रो ऋक्षः सम्वरणस्ततः । तपत्यां सूर्य्यकन्यायां कुरुक्षेत्रपतिः कुरुः ॥ परीक्षित् सुधनुर्जह्नुर्निषधाश्च कुरोः सुताः" ॥ इति श्रीभागवते । ९ । २२ । ४ ॥) भद्रम् । देशविशेषः । इति मेदिनी ॥ स तु जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । इति ज्योतिषम् ॥ तद्देशवासी । तत्र भवश्चेत्यण्प्रत्ययान्तः । (यथा गीतायाम् १ । २५ ।

"उवाच पार्थ ! पश्यैतान् समवेतान् कुरूनिति" ॥) कण्टकारिका । इति शब्दचन्द्रिका ॥

कुरुकन्दकं, क्ली, (कुरुः इव विस्तीर्णः कन्दो यस्य । कप् ।) मूलकम् । इति शब्दमाला ॥

कुरुक्षेत्रं, क्ली, (कुरुणा चन्द्रवंशोद्भवेन राजविशेषेण भूरितपसोपार्ज्जितं धर्म्मक्षेत्रनाम्ना प्रसिद्धं कुरुदेशान्तर्गतं क्षेत्रम् । अत्राकपार्थिवादित्वात् मध्यपदलोपः ।) देशविशेषः । तत्तु धर्म्मक्षेत्रम् । (किञ्चास्मिन्नेव क्षेत्रे क्षत्रियकुलारण्यकुठारेण भृगुवंशधुरन्धरेण भगवता जामदग्न्यरामेण क्षत्रियशोणितैः पञ्च ह्रदाः कृताः तदारभ्य च क्षेत्रमेतत् समन्तपञ्चकनाम्नोच्यते । नितरामेवात्र युध्यतां क्षत्रियाणां शरीरविसर्ज्जनेन पुण्यप्राप्तुर्य्यात् वैकुण्ठप्राप्तिः । तत एवात्र कुरुपाण्डवानां समरद्युतं निर्वृत्तम् । एतद्विवरणं महाभारतीये १२ । ४८ अध्याये श्रीकृष्णयुधिष्ठिरसंवादे द्रष्टव्यम् ॥ यथा भगवद्गीतायाम् १ । १ ।

"धर्म्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । मामकाः पाण्डवाश्चैव किमकुर्व्वत सञ्जय !" ॥ एतत्क्षेत्रस्य सीमानिर्द्देशे बह्वनि मतानि लक्ष्यन्ते दिक्षात्रमुदाहृतमत्र । यथा, हेमचन्द्रः ।

"धर्म्मक्षेत्रं कुरुक्षेत्रं दादशयोजनावधि" ॥

तथा त्रिकाण्डशेषेऽपि ।

"कुरुक्षेत्रं प्रयागश्च हिमाद्रिं विन्ध्यमन्तरा" ॥

एष हि ब्रह्मर्षिदेशः । यथा, मनौ । २ । १९ ।

"कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः । एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः" ॥)

कुरुक्षेत्रीयोगः, पुं, एकस्मिन् सावनदिने तिथित्रयनक्षत्रत्रययोगत्रयाणाञ्च स्पर्शः । इति स्मृतिः ।

कुरुक्षेत्रे मृत्युयोगः । यथा,—

"पञ्चग्रहयुते मृत्यौ जन्मसंस्थे ग्रहस्तौ । सौम्यक्षेत्रगते लग्ने कुरुक्षेत्रे मृतिर्भवेत्" ॥

इति ज्ञातकामृतसंग्रहे योगाध्यायः ॥

कुरुटः, पुं, (कुत्सितं रोटते दीप्यते प्रतिहन्ति वा । रुट दीप्तौ प्रतिघातादिषु च + "हृग्रुपधेति" ३ । १ । १३५ । कः ।) सितावरणाकः । इति राजनिर्घण्टः ॥

कुरुरुटः, पुं, (कुत्सितं दुर्गन्धादिकं रुरुटति लुण्ठतीति । कु + रुटि स्तेये + अच् ।) पीतभिण्टी । पीताख्यानः । इति मेदिनी ॥ (कुरुरुटकशब्दोऽस्य विकृतिरूपः ॥)

कुरुरुटकः, पुं, (कुरुरुट + स्वार्थे कन् ।) पीताख्यानः । पीतभिण्टी । तत्पर्य्यायः । सहचरी २ सहचरः ३ । इत्यमरः । २ । ४ । ७५ ॥ सहाचरः ४ कुरंरुटकः । इति भरतः ॥

("वीरः सहचरः पीतपुष्पो दासीकुरुरुटकः" ॥ इति वैद्यकरत्नमालायाम् । यत्रास्य व्यवहारस्तद्यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये आरग्वधादिवर्गे ॥ "आरग्वधमदनगोपघोण्टा कुटजपाठा करटकीपाटलामूर्व्वेन्द्रयवसप्तपर्णनिम्बकुरुरुटकदासीत्यादिषु द्रष्टव्यः ॥)

कुरुरुटी, स्त्री, (कु कुत्सितं रुरुटति खभासा । कु + रुटि + अच् । गौरादित्वात् ङीष् ।) दासपुत्तलिका । इति मेदिनी ॥ (कु कुत्सितं पापं रुरुटति नाशयति ब्रह्मणः पत्न्यर्चा परिचर्य्यया ।) ब्राह्मणी । इति जटाधरः ॥

कुरुम्बं, क्ली, (कुर् + बाहुलकात् उम्बच् ।) कूलपालकम् । इति शब्दचन्द्रिका ॥ कमलालेवु इति भाषा ॥

कुरुम्बा, स्त्री, (कुरुम्ब + स्त्रियां टाप् ।) द्रोणपुष्पी । इति राजनिर्घण्टः ॥ (द्रोणपुष्पीशब्देऽस्या गुणादयो ज्ञेयाः ॥)

कुरुम्बिका, स्त्री, (कुरुम्बा + स्वार्थे कः टाप् इत्वं च ।) द्रोणपुष्पी । इति राजनिर्घण्टः ॥

कुरुम्बी, स्त्री, (कुरुम्ब + स्त्रियां गौरादित्वात् ङीष् ।) सैंहलीवृक्षः । इति राजनिर्घण्टः ॥

कुरुराट् [ज्] पुं, (कुरुषु राजते । राज् + क्विप् ।) दुर्य्योधनः । इति त्रिकाण्डशेषः ॥

कुरुलः, पुं, (कुर् + उलच् ।) भालस्थितचूर्णकुन्तलः । तत्पर्य्यायः । भ्रमरकः २ भ्रमरालकः ३ । इति हेमचन्द्रः ॥

कुरुवकः, पुं, (रौतीति रवो भ्रमरः । कुत्सितः स्वल्पमधुलाभात् विरक्तो रवो यत्र । स्वल्पमधुत्वादस्य तथात्वम् ।) रक्तभिण्टी । रक्ताख्यानः । इत्यमरः । २ । ४ । ७४ ॥ पीतभिण्टी । इति हेमचन्द्रः ॥ (कुरुवकशब्दे पीतभिण्टीशब्दे च अस्य विवृतिर्ज्ञातव्या ॥)

कुरुविन्दं, क्ली, (कुरून् विन्दति + विदिलाभे "अनुपसर्गात् लिम्पविन्दधारिपारिवेद्युदेजिचेति साति साहित्यञ्च" । ३ । १ । १३८ । इति ग्रः सुचादित्वात् नुम् च ।) काचलवणम् । माक्षिकम् । इति राजनिर्घण्टः ॥ कुरुविन्दरत्नम् । कुल्माषशस्यम् । इति मेदिनी ॥ (क्वचिदस्य पुंलिङ्गत्वमपि दृश्यते । यथा, सुश्रुते सूत्रस्थाने ३६ अध्यायः ।

"कासीससैन्धवं किण्वं कुरुविन्दो मनःशिला" ॥)

कुरुविन्दः, पुं, (कुर + विद् + ग्रः नुम् च ।) मुस्तकम् । इत्यमरः । २ । ४ । १५९ ॥ माषः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—

"मुस्तकं न स्त्रियां मुस्तं चिपु वारिदनामकम् । कुरुविन्दश्च सङ्घातेऽपरः क्रोडकसेरुकः । भद्रमुस्तश्च गुन्द्रा च तथा नागरमुस्तकः" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कुरुविल्वः, पुं, (कुरुषु विल्व इव ।) पद्मरागमणिः । इति त्रिकाण्डशेषः ॥

कुरुविल्वकः, पुं, (कुरुविल्व + संज्ञायां कन् ।) कुल्माषः । वनकुलत्थिका । इति रत्नमाला ॥ (गुणाश्चास्य कुल्माषशब्दे ज्ञेयाः ॥)

कुरुविल्वः, पुं, (कुरुषु विख्यातः विल्वः ।) खर्जूरफलम् । इत्यमरः । २ । ९ । ८९ ॥ चारि तोला सेरा । इति भाषा ॥

कुरूप्यं, क्ली, (कु ईषत् रूप्यमिव । रूप्यवत् शुभ्रत्वात्तथात्वम् ।) रङ्गम् । इति राजनिर्घण्टः ॥

कुर्कुरः, पुं स्त्री, (कुर् इत्यस्फुटं शब्दं कुरति शब्दायते । कुर् + कुर् + कः ।) कुक्कुरः । इत्यमरटीकायां रायमुकुटः ॥

कुर्णजः, पुं, कुलक्षनक्षत्रः । इति राजनिर्घण्टः ॥

कुलं ड क्रीडायाम्। इति कविकल्पद्रुमः॥(भां–आत्मं–अकं–सेट्।) पचमस्वरी। दीर्घेऽयं एथक् पाठसामर्थ्यात् पूर्वस्य वंशभूतयीति दीर्घो न स्यात्। ड कुलते। इति दुर्गादासः॥

कुलिं, क्ली, (कुलं+भावे क्युट्।) क्रीड़ा। इत्यमरटीकायां स्वामी॥

कुर्परः,पुं,(कुर्द्+क्विप् कुः। मिमीते। ए+अच् परः। ततः कर्म्मधारयः।) कफोणिः। जानु। इति मेदिनीकरहेमचन्द्रौ॥ (कुर्परशब्दोऽस्य विवरणं द्राक्षेयम्॥)

कुर्पासः, पुं, (कुर्परे अस्यते क्षिप्यते वा। अस्, क्षिप् वा+घञ् ततः एषोदरात् साधुः।) अर्द्धकोलकः। इति हारावली॥

कुर्पासकः, पुं, (कुर्पास+स्वार्थे कन्।) कञ्चुलिका। इत्यमरः॥ काँचुलि इति भाषा। (यथा रत्नावलीनाटके। "मनोज्ञकुर्पासकपीड़ितस्तना"॥)

कुर्व्वत्, त्रि, (करोति इति। कृ+शतृ।) कर्म्मकारः। भृत्यः। इति विश्वः॥

कुल न बन्धौ। संहतौ। इति कविकल्पद्रुमः॥ (भां–परं–अकं–सेट्। एवादिः।) न कोलः कुलः। कोलति कुलीनः सर्व्वेषां बन्धुः स्यादित्यर्थः। संहतौ राशीकरणमिति चतुर्भुजः। केचित्तु संहतिस्थाने संस्थानं पठित्वा कोलति कुलायः गच्छयति इत्यर्थः इत्याऽऽहुः। संस्थानं पठित्वा संस्थानं उपचयः। इति रामः॥ अन्ये तु बन्धुषु ज्ञातिषु वर्त्तमानोऽयं अन्यत्रास्य न प्रयोगः। गढ़ि गढ़े इतिवदित्याऽऽहुः। इति दुर्गादासः॥

कुलं, क्ली, (कुल्+"इगुपधेति"। ३।१।१३५। कः।) वंशः। (यथा, रघौ। १६। ८६।

"इत्यूचिवानुपहृतामरदुः क्षितीशं
स्थाप्यो भवान् खलु इत्यनुभाषितारम्।
संयोजयां विधिवदास समेतबन्धुः
कन्यामयेन कुमुदः कुलभूषयेव"॥

तस्य लक्षणं यथा, त्रिलोचनौ।

"आधारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम्।
निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम्"॥)

तन्त्रान्तरे यथा।

"गोभिश्च देवतैर्विप्रस्था राजोपसेवया।
कुलान्यकुलतां यान्ति यानि हीनानि वृत्ततः॥
कुविवाहः क्रियालोपैर्वेदानध्ययनेन च।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण वै॥
अस्तात् पारदार्य्याच्च तथाऽभक्षस्य भक्षणात्।
अमौनधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम्॥
अशौचिये वै वेदानां दूषणेषु तथैव च।
विहिताचारहीनेषु क्षिप्रं नश्यति वै कुलम्"॥
इति कूर्म्मपुराणे उपरिभागे १५ अध्यायः॥ सजातीयसमूहः। इत्यमरः।२।७।१॥ (कुं भूमिं लाति गृह्णाति। ला+कः।) जनपदः। यथा, (कौ भूमौ लीयते। अन्येभ्योपीति डः।) शरीरम्। इति मेदिनी॥ अग्रम्। इति भरतः॥ (मध्यम-कुलदयेन यावती भूमिः क्रियते तावती भूमिः। यथा, मनुः। ७। १२१।

"दश्यौ कुलन्तु सन्नीत विंश्यौ पञ्चकुलानि च"॥)

कुलः, पुं, (कुल्+कः।) कुलिकः। श्रिल्पिकुलप्रधानः। इत्यमरटीकायां भरतः॥

कुलकं, क्ली, (कौ भूमौ लीयते। कु+ली+डः। संज्ञायां कन्।) पटोलवता। सम्बद्धश्लोकसमूहः। इति मेदिनी॥ (यथा, साहित्यदर्पणे ६। २८७।

"कथायकं चतुर्भिश्च तदूर्द्धं कुलकं मतम्"॥

पटोलार्थे यथा,—"करीरं कुलकं नन्दी" इति वाभटे सूत्रस्थाने। ६ अः। कुलकं पटोलभेदः। तित्पल्ला इति ख्यातम्॥ इति तट्टीका॥)

कुलकः, पुं, (कुल्+संज्ञायां कन्।) कावेल्लुः। इत्यमरः। २। ४। ३९॥ वल्मीकः। कुलश्रेष्ठः। इति मेदिनी॥ मद्यवर्द्धकः। इति रत्नमाला॥ हरितसर्पः। इति राजनिर्घण्टः॥ कुमीलुः। इति भावप्रकाशः॥ श्रिल्पिकुलप्रधानः। इत्यमरटीकायां भरतः॥

कुलकर्कटी, स्त्री, (कुला कर्कटी इति नित्यकर्म्मधारयः।) चीनाकर्कटी। इति राजनिर्घण्टः॥

कुलकुण्डिनी, स्त्री, (कुले कुलवन्ते पृथिवीतलस्थे कुलकुण्डी, स्त्री, } रूपे मूलाधारे कुण्डलाकृत्या सार्द्धत्रिवलयाकारेण स्वयम्भुलिङ्गं वेष्टयित्वा तिष्ठतीति। कुल+कुण्डिन्+ङीष्। कुण्डल+ङीष्। यद्वा कौ पृथिवीतत्त्वाधारे मूलाधारे इत्यर्थः लीयते इति। कु+ली+अन्येभ्योपीति डः। ततः कर्म्मधारयः।) मूलाधारपद्मस्थितस्वयम्भुलिङ्गवेष्टनविशेषः। यथा। पूर्णानन्दकृतषट्चक्रप्रकाशः।

"कूजन्ती कुलकुण्डली च मधुरं मत्ताजिमाजास्फुटं
वाचः कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैः।
श्वासोच्छ्वासविवर्त्तनेन जगतां जीवो यया धार्य्यते
सा मूलाम्बुजगह्वरे विलसति प्रोद्दामदीप्तावली"॥

कूजन्तीति। सा मूलाम्बुजगह्वर इत्यादि व्याख्यातम्। कीदृशी कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैः कोमला कमनीयत्वविशिष्टा या काव्यबन्धरचना तस्याः भेदातिभेदक्रमैः भेदातिशयभेदक्रमैर्विशिष्टा वाचः मत्ताजिमाजास्फुटं मत्ता या अजिमाजा भ्रमरसमूहस्तद्वदस्फुटं यथा स्यात् एवं मधुरं यथा स्यात् तथा कूजन्ती अव्यक्तमधुरध्वनिं कुर्व्वन्तीत्यर्थः। सा का इत्याकाङ्क्षायामाह यथा कुलकुण्डलिन्या श्वासोच्छ्वासविवर्त्तनेन श्वासोच्छ्वासयोः परिवर्त्तनेन गमनागमनेन जगतां संसारिणां जीवः प्राणो धार्य्यते। पुनः कीदृशी प्रोद्दामदीप्तावली प्रकृष्टोत्तुङ्गदीप्तिमेणीस्वरूपा। तथा च मूलाधारपद्मे सार्द्धत्रिवलयाकारेण स्वयम्भुलिङ्गवेष्टनविशिष्टा विद्युत्समूहरूपा कुलकुण्डलिनी तिष्ठतीत्यर्थः। इति तट्टीका॥ *॥ अन्यत् चक्रशब्दे मूलाधारशब्दे षट्चक्रशब्दे च द्रष्टव्यम्॥

कुलक्षः, पुं, (कु+लक्ष+भावे घञ्।) भरताजी। तत्पर्य्यायः। ताजमर्द्दनः २। इति हारावली॥

कुलक्षया, स्त्री, (कुलस्य मूलस्य विस्तृतवल्लीजालस्य वा क्षयो यस्याः।) शूकशिम्बी। इति शब्दचन्द्रिका॥

कुलजः, पुं, (कुले सत्कुले जायते। जन्+डः।) कुलीनः। सत्कुलोद्भवः। इति शब्दरत्नावली॥ (यथा, मनुः ८। १७९।

"कुशले दृत्तसम्पन्ने धर्म्मज्ञे सत्यवादिनि।
महापक्षे धनिन्यार्य्ये निक्षेपं निक्षिपेद्बुधः"॥)

कुलञ्जः, पुं, (कुं पृथिवीं रञ्जयति। रञ्ज+क्विप्+अच् रस्य लः।) कुलञ्जनवृक्षः। इति राजनिर्घण्टः॥

कुलञ्जनः, पुं, (कु+रञ्ज+क्विप्+ल्युः। रस्य लः।) खनामख्यातवृक्षः। तत्पर्य्यायः। कुर्जनः २ गन्धमूलः ३ कुलञ्जः ४। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। दीपनत्वम्। मुखदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

कुलटा, स्त्री, (कुलात् व्यभिचारार्थं कुलान्तरं अटतीति। कुल+अट्+अच्। पृषोदरादित्वात् साधुः।) व्यभिचारिणी। भ्रष्टा। (यथाह, आर्य्यासप्तशती ३९३।

"परपतिनिर्द्दयकुलटाग्रोषितभट! नेर्मया न कोपेन।
दग्धमनसोपतप्ता रोदिमि तव लाघवं वीक्ष्य"॥)

तत्पर्य्यायः। पुंश्चली २ धर्षिणी ३ बन्धकी ४ असती ५ इत्वरी ६ स्वैरिणी ७ पांसुला ८। इत्यमरः।२।६।१०॥ धर्षणी ९ पांसुला १०। इति तट्टीका॥ पृश्ना ११ दुश्चा १२ धर्षिता १३। इति शब्दरत्नावली॥ जङ्घा १४ निशाचरी १५ भयारक्षा १६। इति जटाधरः॥०॥ परकीयान्यगंतनायिकाविशेषः। यथा,—

"एते वारिकलाप किरन्ति पृथक्वान् वर्षन्ति नाम्भोधराः ग्रैवाः ग्राहणमुद्वहन्ति न कलङ्कयन्ते पुलर्गायकान्। चैलोत्थे तरवः फलानि सृजते नैवारमन्ते जनान् धातः! कातरमानसापि कुलटाहेतोस्त्वया किं कृतम्"॥ इति रसमञ्जरी॥*॥ अस्या अन्नभोजनप्रायश्चित्तं प्रायश्चित्तशब्दे अभोज्यान्नभक्षणप्रकरणे द्रष्टव्यम्॥

कुलटी, स्त्री, (कुत्सितं रटते। रट भाषणे+अच्यर्थे कः। गौरादित्वात् ङीष् रस्य लः।) मनःशिला। इति रत्नमाला अमरटीका च॥ (अस्या गुणादयो मनःशिलाशब्दे वोढव्याः॥)

कुलतिथिः, स्त्री पुं, (कुला तिथिः।) चतुर्थ्यष्टमीदशमीचतुर्दश्यः। यथा, तन्त्रसारे।

"द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्।
विषमाख्याकुलाः सर्व्वे श्रेष्ठाश्च तिथयः कुलाः"।

कुलत्थः, पुं, (कुलं भूमिलग्नं सत् तिष्ठति। कुल+स्था+कः। एषोदरात् साधुः।) शस्यभेदः। कुलत्थकड़ाइ इति भाषा॥ (यथा, मार्कण्डेये। १५।७।

"धान्यं यवांश्चिनान्माषान्कुलत्थान्सर्षपांस्तथा"॥)

तत्पर्य्यायः। कालस्कन्धः २ ताम्रस्कन्धः ३ कुलत्थिका ४। इति रत्नमाला। ताम्रस्कन्धः ५। इति चिकित्साग्रन्थेषु। ताम्रबीजः ६ सितेतरः ७। इति राजनिर्घण्टः॥ अस्य गुणाः। कफवातगुल्मशुक्राश्मरीभेदश्वासकासप्रमेहनाशित्वम्। उष्णत्वम्। उष्णत्वम्। कटुत्वम्। ग्राहित्वञ्च। इति राजवल्लभः॥ कषायत्वम्। रूक्षत्वम्। रक्तपित्तकारित्वम्। वातनाशित्वञ्च। अस्य यूषगुणः। वायु-

शर्कराश्मरीनाशित्वम्। इति राजनिर्घण्टः॥ (अस्य अपरे पर्य्यायगुणा यथा,—

"कुलत्थिका कुलत्थश्च कथ्यन्ते तद्गुणा अथ।
कुलत्थः कटुकः पाके कषायः पित्तरक्तहृत्।
लघुर्विदाही वोर्य्योष्णः श्वासकासकफापहान्॥
हन्ति हिक्काश्मरीशुक्रदाहानाहान् सपीनसान्।
खेदसंग्राहको मेदोव्रणकृमिहरः परः"॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ * ॥

"उष्णः कुलत्थो रसतः कषायः
कटुर्विपाके कफमारुतघ्नः।
शुक्राश्मरीगुल्म-निषूदनश्च
संश्वासकः पीनसकासहारी॥
आनाहमेदोगुदकीलहिक्का
सापापहः शोणितपित्तहन्ता।
नाशस्य हन्ता नयनामयघ्नो
विश्लेषतो वन्यकुलत्थ उक्तः"॥

इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥ * ॥)

कुलत्था, स्त्री, (कुलत्थ + स्त्रियां टाप्।) वनकुलत्थः। तत्पर्य्यायः। इक्ष्वसादा २ अरण्यकुलत्थिका ३ कुलाली ४ सौवर्चलिका ५ चक्षुष्या ६ कुम्भकारिका ७ कुलत्थिका ८। इति राजनिर्घण्टः॥ कुल्माषः ९ कुसविल्वकः १०। इति रत्नमाला॥ अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। अर्शःशूलनाशित्वम्। विबन्धाध्मानशमनत्वम्। चक्षुर्हितत्वम्। व्रणरोपणत्वञ्च। कुलत्थाक्षनम्। अस्य पर्य्यायः मूल्यवत्तदधिकस्तु। कुम्भकारी १ प्रजापहा २। अस्य गुणाः। चक्षुर्हितत्वम्। कषायत्वम्। कटुत्वम्। हिमत्वम्। विषविस्फोटकश्वित्रदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

कुलत्थिका, स्त्री, (कुलत्था स्वार्थे संज्ञायां वा कन् अत इत्वम्।) कुलत्थाकाराक्षनप्रस्तरविशेषः। इत्यमरः।२।६।१०२। अस्य गुणपर्य्यायौ कुलत्थाशब्दे द्रष्टव्यौ। वनकुलत्थः। इति राजनिर्घण्टः॥

कुलधर्म्मः, पुं, (कुलस्य कुले वा आचरितो धर्म्मः।) स्वजातीयधर्म्मः। कुलाचारः। यथा,—

"उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन!।
नरके नियतं वासो भवतीत्यनुशुश्रुम"॥

इति श्रीमद्भगवद्गीतायाम्। १। ४३॥

कुलधारकः, पुं, (कुलं धारयति रक्षति यः। कुल + धृ + णिच् + ण्वुल्।) पुत्रः। इति त्रिकाण्डशेषः॥

कुलनायिका, स्त्री, (कुले कुलाचारयजनकाले पूज्या या नायिका।) पञ्च-मकारयजने पूज्या स्त्री। यथा,—

"रक्तमाल्येन रम्येतो रक्तपुष्पविभूषितः।
पञ्चीकरणसञ्जातैः पूजयेत् कुलनायिकाम्"॥

सा नवविधा यथा,—

"नटी कापालिनी वेश्या रजकी नापिताङ्गना।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका।
मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः"॥

इति तन्त्रसारः॥

कुलनक्षत्रं, क्ली, (तन्त्रसारोक्तपारिभाषिकनक्षत्रं कुलं तत्र तत्सम्बन्धि वा नक्षत्रम्।) भरण्यारोहिणी-पुष्यमघोत्तरफल्गुनीचित्राविशाखाज्येष्ठापूर्ब्बाषाढाश्रवणोत्तरभाद्रपदः। यथा,—

"वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम्।
कुलानि समधिष्ठानि ग्रेषाणि चाकुलानि च"॥

इति तन्त्रसारः॥

कुलनाशः, पुं, (कुलं मूलिलग्नं न अश्नाति। न + अश् + अच्। सप्तम्युपेति समासः। उद्गस्य हि उन्नतकन्धरत्वात् मूलिलग्नस्याभक्षकतया तथात्वम्।) उद्गः। इति हेमचन्द्रः। (कुलस्य नाशः ध्वंसः।) कुलध्वंसः॥

कुलपतिः, पुं, (कुलस्य वंशस्य गोत्रस्य वा पतिः स्वामी।) कुलस्वामी। गोत्रप्रधानः। कुलनाथः। यथा। "अथ सिन्धुसौवीरपतेरङ्गस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिविकावाहपुरुषान्वेषणसमये देवेनोपसादितः स द्विजवर उपलब्धः"। इति श्रीभागवते ५।१०।१। (कुलस्य छात्रवर्गस्य पतिः पालकः। अन्नदानपोषणपूर्ब्बकं अध्यापको मुनिविशेषः। उक्तञ्च।

"मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्।
अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृतः"॥)

कुलपत्रः, पुं, (कुलं भूलग्नं पत्रं पर्णमस्य।) दमनकवृक्षः। इति राजनिर्घण्टः॥

कुलपालकं, क्ली, (कुलं समूहं पालयतीति। पालि + ण्वुल्। वञ्चपलोत्पत्तेलधात्वम्।) कुलम्बम्। कुलपालनेषु इति भावा। इति शब्दचन्द्रिका॥ (कुलं वंशं पालयति। पाल + णिच् + ण्वुल्।) वंशप्रतिपालके, त्रि॥

कुलपालिः, स्त्री, (कुलं पालयति या। पालि + इन्।) कुलवती। इति शब्दमाला॥

कुलपालिका, स्त्री, (कुलं पालयति। पालि + ण्वुल् टाप् इत्वम्। यद्वा कुलपालि + स्वार्थे कन् टाप्।) कुलस्त्री। इत्यमरः। २। ६। ७॥

कुलभट्टा, स्त्री, (कुलैः वंशभवैः भट्टा भरणम्। कुल + भृ + भावे क्यप्।) गर्भिणीपर्य्युषासना। इति जटाधरः॥ (कुलस्य भट्टा। वंशभरणम्॥)

कुलभरः, पु, (कुलं सहं भवति हन्ति सन्धिकर्त्तनादिना इति। कुल + भव + अच्। निपातनात् मुम् लस्य रः।) कुलम्भलः। चौरः। इति हारावली॥

कुलवर्ज्या, स्त्री, (कुलेषु भिषक्कुलेषु वर्ज्या वर्জ্জनं गुणकथनं यस्याः।) रक्तचिल्लः। इति राजनिर्घण्टः॥

कुलवारः, पुं, (कुलसदाख्यया प्रसिद्धो वारः।) मङ्गलशुक्रवारौ। यथा।

"रविचन्द्रो गुरुः सौरिस्तवारश्चाकुला इमे।
भौमशुक्रौ कुलाख्यौ हि बुधवारः कुलाकुलः"॥

इति तन्त्रसारः॥

कुलविप्रः, पुं, (कुलपरम्परागतः कुलहिताय नियुक्तो वा विप्रः।) कुलपुरोहितः। इत्यमरटीकायां स्वामी॥

कुलश्रेष्ठी, [न्] त्रि, (कुलेषु ग्रन्थिककुलेषु श्रेष्ठी।) ग्रन्थिककुलप्रधानः। तत्पर्य्यायः। कुलिकः २। इत्यमरः। २। १०। ५॥ कुलकः ३ कुलः ४ श्रेष्ठी ५।

इति तट्टीकायां भरतः॥

कुलसम्भवः, पुं, (कुले कस्यचित् वंशे सम्भवः उत्पत्तिरस्य।) यस्य कस्यचित् कुले जातः। तत्पर्य्यायः। वीज्यः २। इत्यमरः। २। ७। २॥

कुलसौरभं, क्ली, (कुलं श्रेष्ठं सौरभं यस्य।) मरुवकवृक्षः। इति शब्दमाला॥

कुलस्त्री, स्त्री, (कुले कुलस्थिता स्त्री।) कुलपालिका। अनन्यगामिनी कुलस्त्रिका स्त्री। इत्यमरः। २। ६। ७॥ (तथा च चाणक्ये।

"असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः।
सलज्जा गणिका नष्टा निर्लज्जाश्च कुलस्त्रियः"॥

कुले कुलचक्रे मूलाधारे विराजते या स्त्री। कुलकुण्डलिनीशक्तिः। यथा, कुलार्णवे।

"कुलस्त्रीज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः"॥)

कुलहृच्छकः, पुं, (कुलाय संघाय ऊहते। ऊहि संघे + ण्वुल्। एषोदरात् उकारलोपः।) आरग्वधः। आवर्त्तः। इति हारावली॥

कुलाकुलतिथिः, पुं स्त्री, (तन्त्रोक्तकुलाकुलनाम्ना प्रसिद्धा तिथिः।) द्वितीयाषष्ठीदशम्यः। यथा।

"द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्"॥

इति तन्त्रसारः॥

कुलाकुलनक्षत्रं, क्ली, (तन्त्रोक्तकुलाकुलसंज्ञकं नक्षत्रम्।) आर्द्रामूलाभिजिच्छतभिषानक्षत्राणि। यथा, तन्त्रसारे॥

"वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम्"॥

कुलाकुलवारः, पुं, (तन्त्रोक्तकुलाकुलनामा वारः।) बुधवारः। यथा, तन्त्रसारे॥

"भौमशुक्रौ कुलाख्यौ हि बुधवारः कुलाकुलः"॥

कुलाचलः, पुं (कुलसंज्ञकः अचलः पर्व्वतः। शाकपार्थिवादिवत् मध्यपदलोपः।) कुलपर्व्वतः। यथा।

"अष्टकुलाचलसप्तसमुद्रा
ब्रह्मपुरन्दरदिनकररुद्राः।
न त्वं नाहं नायं लोकस्तदपि किमर्थं क्रियते शोकः"॥

इति मोहमुद्गरे ७॥ सप्तकुलपर्व्वता यथा।

"सप्त येऽस्मिन् महापर्व्वाः विश्रुताः कुलपर्व्वताः।
माहेन्द्रो मलयः सह्यः शुक्तिमान्ऋक्षवानपि॥
विन्ध्यश्च पारियात्रश्च इत्येते कुलपर्व्वताः"॥

इति मात्स्ये ६५ अध्यायः॥

कुलाचार्य्यः, पुं, (कुलस्य वंशस्य आख्यायां वर्णनादौ गुणकीर्त्तनविषये वा आचार्य्यः।) कुलज्ञः। कुलीनादीनां वंशांशव्याख्याकर्त्तृब्राह्मणः। अस्य विवरणं घटकशब्दे द्रष्टव्यम्॥

कुलाटः, पुं, (कुलेन संघेन घटतीति। घट् + अच्।) क्षुद्रमत्स्यभेदः। इति शब्दमाला॥

कुलाद्रिः, पुं, (कुलनाम्ना ख्यातोऽद्रिश्चलः।) कुलाचलः। इति सिद्धान्तशिरोमणिः॥

कुलाधारकः, पुं, (कुलस्य वंशस्य आधारकः प्रतिष्ठापकः।) पुत्रः। इति शब्दरत्नावली॥

कुलायं, क्ली, (कौ पृथिव्यां लायो लयो यस्य।) शरीरम्। इति पुराणम्॥

कुलायः, पुं, (कुलानां पक्षिसमूहानां लयः वास

स्थानम् ।) नीड़ः । (यथा, माघे ।
"खगकुलायकुथायनिजायिताम्" ॥)
स्थानमात्रम् । इति मेदिनी ।

कुलायस्थः, पुं, (कुलाये नीड़े तिष्ठति । स्था + कः ।) पक्षी । इति शब्दचन्द्रिका ॥

कुलायिका, स्त्री, (कुलायः पक्षिवासस्थानं विद्यते ऽस्याम् । ठन् ।) पक्षिशाला । इति त्रिकाण्डशेषः ॥

कुलालः, पुं, (कुलं घटादिनिर्म्माणोपयोगिम्रदादुपादानं आलाति सम्यगादत्ते । आ + ला + कः । कुलं वंशं घटादिसमूहं वा अलति पर्य्याप्नोति वा अल् + कर्म्मण्यण् । कुल् + "तमिविशि विड़ौति" उणां १ । ११७ । इति कालन् वा ।) कुम्भकारः । इत्यमरः । २ । १० । ६ ॥ तस्योत्पत्तिर्यथा ।
"माणाकारात् कर्म्मकार्य्यां कुम्भकारो व्यजायत" ॥
इति पराशरसंहिता ॥
"पट्टिकाराच्च तैलिक्यां कुम्भकारो बभूव ह" ॥
इति पराशरपद्धतिः ॥ ब्रह्मवैवर्त्तोक्ता च कुम्भकारशब्दे द्रष्टव्या ॥ कुलभयष्टी । इति मेदिनी ॥

कुलाली, स्त्री, (कुलं पर्व्वतकुलं कलायकुलं वा अलति परिवर्द्धयति । अल् + अण् । ङीप् ।) कुलत्थाकाराञ्जनप्रसरविशेषः । कुलत्थाञ्जनमिति ख्याता । इत्यमरः । २ । ६ । १०२ ॥ अरण्यकुलत्थिका वनकुलत्थकड़ाइ इति भाषा । इति राजनिर्घण्टः ॥ (कुलाय + स्त्रियां ङीष् ।) कुलायभार्य्या ॥

कुलाहः, पुं, (कुलं पालककुलं खलकुलं वा आहन्ति । आ + हन् + डः ।) ईषत्पीतवर्णः क्षुद्रजानुर्घोटकः । इति हेमचन्द्रः ॥

कुलाहकः पुं, (कुलाह + संज्ञायां कन् ।) क्षुद्रजानुः । इति शब्दमाला ॥ वृक्षविशेषः । राङ्गा कुले खाड़ा इति भाषा । अस्य गुणः । आमवात-वातरक्तरोगनाशित्वम् । इति राजवल्लभः ॥

कुलाहलः, पुं, (कुलं आहलति स्पृशति स्पर्द्धते वा । आ + हल विलेखने + अच् ।) क्षुद्रवृक्षविशेषः । कोकसीमा इति भाषा । तत्पर्य्यायः । अलम्बुषः २ गोच्छाणः ३ भूकदम्बः ४ । इति रत्नमाला ॥

कुलिः, पुं, (कुल् + इन् किच्च ।) हस्तः । इति त्रिकाण्डशेषः ॥

कुलिः, स्त्री, (कुल् इन् किच्च ।) कण्टकारी । इति शब्दरत्नावली ॥

कुलिकः, त्रि, (कुलं अधीनतया प्रशस्ततया वा अस्त्यस्य । इति ठन् ।) शिल्पिकुलप्रधानः । इत्यमरः । २ । १० । ५ ॥ कुलसत्तमः इति मेदिनी ॥

कुलिकः, पुं, अष्टमहानागान्तर्गतनागविशेषः ।
(यथा, भागवते । ५ । २४ । ३१ ।
"ततोऽधस्तात् पातालेनागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूड़कम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति" ।
अस्य रूपमप्युक्तं हेमाद्रौ यथा ।
"कुलिकोऽर्द्धचन्द्रमौलिर्ज्वालाधूमसमप्रभः" ॥)
वृक्षविशेषः । इति मेदिनी । केलेकड़ा इति भाषा ॥

कुलिकवेला, स्त्री, रव्यादिवारेषु शुभकर्म्मसु निषिद्धकालविशेषः । यथा । रवौ सप्तमयामार्द्धम् सोमे षष्ठयामार्द्धम् । मङ्गले पञ्चमयामार्द्धम् । बुधे चतुर्थयामार्द्धम् । गुरौ तृतीययामार्द्धम् शुक्रे द्वितीययामार्द्धम् । शनौ प्रथमयामार्द्धम् । राघवभट्टमते तु पूर्व्वोक्तयामार्द्धानां दिवाशेषभागः । रात्रौ प्रथमभागः । इति ज्योतिषतत्त्वम् ॥

कुलिङ्गः, पुं, (कौ पृथिव्यां लिङ्गति गच्छतीति । कु + लिगि + अच् + इदित्वात् नुम् । यद्वा कुत्सितं लिङ्गं वर्त्म लिङ्गं यस्य ।) पक्षिविशेषः । पिङ्गा इति भाषा । तत्पर्य्यायः । कलिङ्गः २ धुम्राटः ३ पिङ्गकः ४ । इति शब्दमाला ॥ भृङ्गः ५ । इत्यमरः ॥ अस्य मांसगुणाः । मधुरत्वम् । स्निग्धत्वम् । कफपित्तकारित्वञ्च । इति राजवल्लभः ॥

कुलिङ्गकः, पुं, (कुलिङ्ग + अल्पार्थे कन् ।) चटकपक्षी । इति हेमचन्द्रः ॥

कुलिङ्गाक्षी, स्त्री, (कुलिङ्गस्य अक्षिवत् फलं यस्य ।) पेटिकावृक्षः । इति रत्नमाला । पेटारी इति भाषा ॥

कुलिङ्गी, स्त्री, (कुलिङ्ग + स्त्रियां गौरादित्वात् ङीष् ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कुलिरः, पुं, (कुल् + बाहुलकात् इरन् किच्च ।) कर्कटः । इति शब्दरत्नावली ॥

कुलिशं, क्ली, पुं, (कुलौ हस्ते शेते अवतिष्ठते । कुल + शी + डः । यद्वा कुलिनः पर्व्वतान् श्यति दारयतीति । शो + डः । "आतोनुपसर्गे कः" । ३ । २ । ३ । इति को वा ।) वज्रम् । इत्यमरभरतौ ॥
(यथा, कुमारे । १ । २० ।
"क्रुद्धेऽपि पक्षच्छिदि दत्तशस्त्रा-
ववेदनार्त्तं कुलिशक्षतानाम्" ॥
कु ईषत् कुत्सितं वा लिशति । कु + लिश अल्पीभावे गतौ च + कः ।) मत्स्यविशेषः । तत्पर्य्यायः । कण्टकाकीर्णः २ । इति त्रिकाण्डशेषः ॥
(यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"तिमिमिङ्गिलकुलिशापाकमत्स्यनिराकलकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सासृग्राः" ॥ कौ भूमौ लिशति अल्पीभवति कुंभूमिं लिशति गच्छति क्षतया प्राप्नोति वा ।) अस्थिसंहारवृक्षः । इति रत्नमाला ॥

कुलिशनायकः, पुं, (कुलिशवत् नायको यस्मिन् ।) शृङ्गारबन्धविशेषः । तस्य लक्षणम् ।
"स्त्रीपादद्वयमाक्रम्य विमुञ्चित्तलिङ्गकः ।
योनिञ्च पीड़येत् कामी बन्धः कुलिशनायकः" ॥
इति रतिमञ्जरी ॥

कुलिशाङ्गुष्ठा, स्त्री, (कुलिशेनाङ्गुष्ठेन चैव निर्म्मीयते मनो यया । यद्वा कुलिशवत् दृढमङ्गुष्ठं यस्याः ।) बौद्धानां विद्यादेवीतिख्यातेः । इति हेमचन्द्रः ॥

कुलिशासनः, पुं, (कुलिशं वज्रं तद्वत् दृढमासनमस्य ।) शाक्यमुनिः । इति त्रिकाण्डशेषः ॥

कुली, स्त्री, (कुलि + ऋदिकारान्तत्वात् वा ङीष् ।) कण्टकारी । इत्यमरः । २ । ४ । ६४ ॥ पत्नीज्येष्ठभगिनी । इति हेमचन्द्रः ॥ दहती । इति राजनिर्घण्टः ॥

कुलीनः, पुं, (कुले प्रशस्तवंशे जातः । "कुलात् खः" । ४ । १ । १३६ । इति खः ।) श्रेष्ठघोटकः । तत्पर्य्यायः । आजानेयः २ । इत्यमरः ॥ आजानेयः ३ । इति तट्टीका ॥ खजानेयः ४ जात्यः ५ वाजाश्विः ६ । इति शब्दरत्नावली ॥ (तन्त्रशास्त्रोक्तकुलाचारव्रते स्थितः कौलः ॥) उत्तमकुलोद्भवे, त्रि । तत्पर्य्यायः । महाकुलः २ आर्य्यः ३ सभ्यः ४ सज्जनः ५ साधुः ६ । इत्यमरः । २ । ७ । ३ ॥ * ॥ अथाधुनिककुलीनलक्षणम् । कुलं उत्कर्षविशेषवंशः । इति सङ्क्षेपम् । अथवा रूढ्यर्थम् तस्मात्यत्वमित्यर्थे कुलशब्दादीनप्रत्ययेन कुलीन इति पदसिद्धिरिति केचित् । अर्थात् कुलीनशब्देन उत्कर्षविशेषवंशजातकत्वव्यक्तिरिति । तथा च लक्षणम् । उत्कर्षविशेषधर्म्मावच्छिन्नवंशजातकत्वे सति तद्धर्म्मवत्त्वं कुलीनत्वमिति । उत्कर्षविशेषस्तु नवधा गुणाः । ते च यथा ।
"आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् ।
निष्ठाऽऽवृत्तिस्तपो दानं नवधा कुललक्षणम्" ॥
अत एव उत्कर्षविशेषात्मकनवधागुणविशिष्टत्वं कुलीनत्वम् । एतेन इदानीं साधारणसामान्यजनानां यदि नवधा गुणा वर्त्तन्ते तदा तेऽपि कुलीनाः स्युस्तत्र । अनवच्छिन्नपर्य्यायत्वं कुलीनत्वम् । प्रमाणं यथा,—
"सपर्य्यायं समासाद्य दानग्रहणमुत्तमम् ।
कन्याऽभावे कुलस्यागः प्रतिष्ठा वा परस्परम्" ॥
तथा च ।
"कुलीनस्य सुतां लब्ध्वा कुलीनाय सुतां ददौ ।
पर्य्यायक्रमतश्चैव स एव कुलदीपकः" ॥
तथा च ।
"आदानञ्च प्रदानञ्च कुलस्यागस्तथैव च ।
प्रतिग्राहटकाग्रे च कुलकर्म्म चतुर्व्विधम्" ॥
इति कुलदीपिका ॥ * ॥ अथ वल्लालभूपालकृतात् पद्मगोत्रनराढ़ीयब्राह्मणस्य ग्रामविशिष्टस्य मुख्यगौणभेदेन द्वाविंशतिकुलीनाः यथा । ग्राविड़ल्यगोत्रे भट्टनारायणवंशज आदिवराहवन्द्यः स मुख्यः । रामगड़गड़ः निपकेश्वरकोली गुँयी कुलभी वटु दिर्घाटिः वैकुण्ठपारियाणः एते पञ्च गौणाः ॥ काश्यपगोत्रे दत्तवंशजः सुलोचनचट्टः स मुख्यः । जगद्दडः धीरगुड़ः काकपीतमखी एते त्रयो गौणाः ॥ भरद्वाजगोत्रे श्रीहर्षवंशजः धुरन्धर मुखयटी स च मुख्यः । विनायकदिग्घीसाँयी गन्धर्व्वरायी एतौ द्वौ गौणौ । सावर्णगोत्रे वेदगर्भवंशजः वीरव्रतगाङ्गुली सुधीरकुन्दः एतौ द्वौ मुख्यौ । वीरसूदनघण्टेश्वरः एव गौणः ॥ वात्स्यगोत्रे छान्दड़वंशजः सुरभिघोषवाजः कविकाञ्जिलालः रविपूतितण्डः एते मुख्याः । भानुघोटखण्डो पनिकालुमहिन्त्या वनमालिपिप्पली एते गौणाः ॥ अधुना एषां मध्ये मुख्या अष्टौ कुलीना गौणाश्चतुर्द्दशश्रोत्रियाः । अन्येऽपि पञ्चगोत्राज्ञाताः सप्तत्रिंशच्छ्रोत्रियाः सन्ति । ततो लक्ष्मणसेनेन मुख्याष्टकुलीनो न विंशतिपुत्राणां समीकरणं कृतम् । तत एतेषां नागादोषदर्शनात् देवीवरेण

मुलिया खड़दहवल्लवीसर्व्वानन्दी इत्याद्याः षट्-त्रिंशन्मेलाः स्मृताः। ततो भागयूथयाक इति त्रिस्रः संज्ञा जाताः कुलाचार्य्यग्रन्थात् ज्ञेयाः ॥*॥

अथ वारेन्द्रब्राह्मणकुलीनाः।

"आदौ मैत्रस्ततो भीमो वत्सः संग्रामिनिस्तथा।
लाहिड़िर्भादुड़िः साधुर्भादड़ाः षड्विधूरकाः"॥

एवां नागादोषदर्शनात् कुलाचार्य्येण अष्टौ घटी इति संज्ञा कृता। तद्यथा। निराविला १ रोहिला २ भूष्या ३ आलेखाली ४ कुलखानी ५ वेखी ६ जोनाली ७ भवानीपुर ८। एतेषां कुलाघातात् काप इति संज्ञा जाता ॥ * ॥

अथ वैद्यस्यादिकुलीनाः।

धन्वन्तरिगोत्रे विनायकसेनः। मौद्गल्यगोत्रे वस्त्यदासः। काश्यपे कायगुप्तः। वल्लालेनैषां कुलं मद्दामध्यमकनिष्ठकुलभेदेन त्रिधा कृतम्। तत्र मद्दाकुलीनाः षट्। यथा। छत्रसेनखानः १ हरिहरसेनखानः २ षष्ठीवरदासः ३ गजपतिदासः ४ दुर्जयदासः ५। अधुनैषां कुलस्य क्रासवृद्धिभङ्गा न सन्ति ॥ * ॥

अथ दक्षिणराढ़ीयकायस्थकुलीनाः।

तत्रादिशूरराजेन कान्यकुब्जदेशादानीतैर्ब्राह्मणपञ्चकैः सह घोषवसुमित्रदत्तगुहाः पञ्चागता आदिकुलीनाः यथा। सौकालीनगोत्रे मकरन्दघोषः १। गौतमे दशरथवसुः २। विश्वामित्रे कालिदासमित्रः ३। काश्यपगोत्रे दशरथगुहः खड्गप्रहारादवमानितो वङ्गे गतः ४। भरद्वाजगोत्रे पुरुषोत्तमदत्तः विनयहीनतो निष्कुलः ५। वङ्गजकुलाचार्य्यग्रन्थे स एव मौद्गल्यगोत्रः ॥ * ॥

अथ वल्लालसेनकृतसमाजादयः।

तथाचास्य षष्ठपुरुषयोर्निग्रहपतिप्रभाकरघोषयोर्वासस्थाने क्रमेण वाणीधाकनाख्यौ ग्रामौ। द्वितीयस्य पञ्चमपुरुषयोः शुक्लिगङ्गिवसुवोर्वासस्थाने क्रमेण वागाछिभाछिनगराख्यौ ग्रामौ। तृतीय. स्याष्टमपुरुषयोः धूँड़ गुँड़ मित्रयोर्वासस्थाने क्रमेण वड़िशाटेकानामग्रामौ। अपरेऽप्यादिशूरसमाजास्तत्स्थानां कुलाभावात् न लिखिताः ॥०॥ तेषां कुलन्तु नवविधम्। मुख्य १। कनिष्ठ २ छभाया ३ मध्यांश ४ तेञ्जोज ५ एतानि प्रधानानि। कनिष्ठद्वितीयपुत्र ६ छभायाद्वितीयपुत्र ७ मध्यांशद्वितीयपुत्र ८ तेञ्जोजद्वितीयपुत्र इति च ९। नवरङ्गानुरोधात् छभायाज्येष्ठपुत्रस्य मध्यश्रेष्ठ इति संज्ञा जाता ॥ * ॥

अथ कुलानां विवरणम्।

मुख्यकुलीनस्य प्रथमपुत्रः पितृतुल्यः द्वितीयः कनिष्ठनामकुलविशिष्टः तृतीयो मध्यांशनामकुलयुक्तः चतुर्थः तेञ्जोजनामकुलान्वितः पञ्चमादिद्यावत्पुत्राः मध्यांशद्वितीयपुत्रनामकुलयुक्ता भवन्ति। कनिष्ठकुलीनस्य ज्येष्ठपुत्रः छभायानामकुलयुक्तः तस्य ज्येष्ठपुत्रः मध्यश्रेष्ठनामकुलयुक्तः तस्य ज्येष्ठपुत्रः मध्यांशनामकुलविशिष्टः स एव अपरमध्यांशवारभायामध्यांश इति संज्ञायुक्तः ॥ * ॥ एवां कर्म्मणा दर्शितं यथा। मुख्यकुलीनस्य द्वितीयतृतीयपुत्रयोः कुलस्य वाड़िमुख्य इति संज्ञा चतुर्थपञ्चममष्ठपुत्राणां कुलस्य वाड़िकनिष्ठ इति संज्ञा सप्तमाष्टमनवमपुत्राणां कुलस्य वाड़िमध्यांश इति संज्ञा दशमैकादशद्वादशपुत्राणां कुलस्य वाड़িतेञ्जोज इति संज्ञा भवति ॥ कनिष्ठनामकुलीनस्य द्वितीयपुत्रस्य कुलस्य तेञ्जोज इति संज्ञा भवति। मुख्यकुलीनस्य तृतीयपुत्रस्य द्वितीयपुत्रस्य कुलस्य तेञ्जोज इति संज्ञा। मध्यांशद्वितीयपुत्र इति संज्ञं कुलं मुख्यकनिष्ठछभायामध्यश्रेष्ठमध्यांश इति कुलपञ्चकात् भवति ॥*॥ मुख्यकुलन्तु त्रिविधं यथा। प्रह्लतम् १ सहजम् २ कोमलम् ३। आदौ षट्समाजे षट् प्रह्लतामुख्या अभूवन्। ततस्तेषां द्वितीयतृतीयपुत्रयोः कुलस्य रूढ्या क्रमेण सहजकोमल इति संज्ञा जाता। प्रह्लतमुख्यकुले दानग्रहणाभ्यां सहज इति संज्ञा कोमलमुख्यकुले दानग्रहणाभ्यां कोमल इति संज्ञा भवति। सहजः सहजेन कोमलः कोमलेनापि कुलं कृत्वा तत्तद्भावापन्नौ भवतः। पितृकुलानुसारेण ज्येष्ठपुत्राणां कुलस्य जन्ममुख्यजन्मकनिष्ठादिसंज्ञा ॥ * ॥ प्रह्लतमुख्यकुलस्य क्रासवृद्धी न भवतः। सहजमुख्यकुलस्य क्रासवृद्धी भवतः। कोमलमुख्यकुलस्यापि क्रासवृद्धी न भवतः। कनिष्ठकुलस्य मुख्यत्वं छभायाकुलस्य कनिष्ठत्वं भवति। मध्यांशकुलस्य स्थिरतरत्वम्। कनिष्ठद्वितीयपुत्रः वाड़িतेञ्जोज इति संज्ञां प्राप्नोति। मुख्यतृतीयपुत्रस्य द्वितीयपुत्रः तेञ्जोज इति संज्ञामपि प्राप्तुमर्हति। छभायाद्वितीयपुत्रमध्यांशद्वितीयपुत्रयोः कुले क्रासवृद्धी न स्तः। सर्व्वे कुलीनाः कुलनाशात् वंशजभावायन्ना भवन्ति ॥ * ॥ आदौ यदि पितृपर्य्यायाय अथवा मौलिकाय कन्यां दद्यात् तदानं ग्रामाणिकसंज्ञं भवति। पश्चात् कुलकर्म्मकर्त्तव्यम्। तद्यथा। मुख्यस्य कन्यायाः प्रदाने तस्याः ह्रेड़ संज्ञा षष्ठकन्यावधि गरह्रेड़ इति संज्ञा भवति। अन्यकुलानां ज्येष्ठकन्यायाः प्रदाने तस्या आह्वतिरिति संज्ञा तदनन्तरं यावत्कन्यानां प्रदाने तासां क्रमेण प्रतिसारणी जघन्या इति संज्ञाद्वयं भवति ॥ आत्मसमकुलीनाय आह्वतिनामकन्यादाने कुलस्य श्रेष्ठत्वम्। अनुजकन्याग्रहणे तु कुलभ्रंशो भवति। मुख्यस्य गरह्रेड़ इति नाम्नीं कन्यां अन्यकुलीनस्य प्रतिसारणीञ्च कन्यां मौलिको वंशजस्य ग्रहीतुमर्हति। उत्तममध्यमाधमकर्म्मभिः शौर्य्यसमावेशनिन्दा इति त्रयं कुलस्यांशकर्म्म ॥ * ॥ पूर्व्वं विपर्य्याये विवाहो जातः। पुरन्दरवसुनैषां त्रयोदशपर्य्यायावधिश्रेणीपर्य्यायबन्धमकृतकुलोद्धरणे कृते। यथा।

"विपर्य्याये कुलं नास्ति न कुलं रक्तपिण्डयोः" ॥*॥

अथ मुख्येतरकुलीनानां पाञ्जिदोषाः।

"देवी गङ्गा तथा गौरी भैरवी भास्करी तथा।
वशायी चण्डिदासी च सप्तैते कुलकण्टकाः"।

अपि च।

"श्रीनाथो श्रीकरी विष्णुदासी हृदय एव च।
कन्दर्पी च सदानन्दी षड़ेते कुलकण्टकाः" ॥
इति कुलाचार्य्यकारिका ॥ * ॥

अथ मुख्यकुलीनस्य कार्य्यम्। स च आगछेद् अर्थादग्रिमां कन्यां आत्मतुल्याय द्वितीयां कनिष्ठकुलीनाय तृतीयां छभायानामकुलयुक्ताय चतुर्थीं मध्यश्रेष्ठनामकुलविशिष्टाय अथवा मुख्यतृतीयपुत्रमध्यांशकुलीनाय पञ्चमीं तेञ्जोजनामकुलयुक्ताय दद्यात्। तदनन्तरजातानां गरह्रेड़ इति संज्ञा ताः मौलिकमध्यांशद्वितीयपुत्रमुख्यकुलीनेभ्यो दातुमर्हति। स एवादौ मुख्यकुलीनस्याग्रिमां कन्यां ततः कनिष्ठकुलीनस्य कन्यां ततो मध्यांश इति नामकुलयुक्तस्य कन्यां ततो जन्मतेञ्जोज इतिनामकुलविशिष्टस्य कन्यां गृह्णीयात् ॥ * ॥ अथ कनिष्ठकुलीनस्य कार्य्यम्। स प्रथमां कन्यां आत्मतुल्यकुलीनाय द्वितीयां तेञ्जोज इति नामकुलयुक्ताय दद्यात्। मुख्यतृतीयपुत्राय मध्यांशनामकुलयुक्ताय अथवा मुख्यद्वितीयपुत्राय कन्यां दातुमर्हति। मुख्यकुलीनस्य द्वितीयां कन्यां अथवा कनिष्ठकुलीनस्य प्रथमां गृह्णीयात्। ततो मुख्यकुलीनस्य तृतीयपुत्रस्य मध्यांशनामकुलयुक्तस्य कन्यां गृह्णीयात् ॥ * ॥ अथ छभायाकुलीनस्य कार्य्यम्। स मध्यांशनामकुलविशिष्टाय प्रथमां कन्यां मध्यांश इतिकुलयुक्तानुजाय अर्थात् वाड़িतेञ्जोजनामकुलविशिष्टाय द्वितीयां दद्यात्। मुख्यकुलीनस्य तृतीयकन्यां अथवा कनिष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् ॥ * ॥ अथ मुख्यतृतीयपुत्रस्य मध्यांशनामकुलीनस्य कार्य्यम्। स प्रथमकन्यां जन्मतेञ्जोजनामकुलविशिष्टाय द्वितीयां मध्यांशकुलविशिष्टस्य द्वितीयपुत्राय दद्यात्। कनिष्ठस्य प्रथमां कन्यां ततस्तेञ्जोजकुलयुक्तस्य प्रथमां कन्यां ततस्तेञ्जोजानुजकुलीनस्य प्रथमां कन्यां गृह्णीयात् मुख्यस्य तृतीयकन्याग्रहणं तस्य महत् कर्म्म ॥ * ॥ अथ जन्मतेञ्जोजनामकुलीनस्य कार्य्यम्। स प्रथमां कन्यां मुख्यकुलीनस्य चतुर्थपुत्राय अथवा मध्यांशनामकुलविशिष्टस्य द्वितीयपुत्राय द्वितीयां तेञ्जोजनामकुलविशिष्टस्य द्वितीयपुत्राय दद्यात्। मुख्यकुलीनस्य पञ्चमकन्यां अथवा मध्यांशनामकुलीनस्य प्रथमकन्यां गृह्णीयात् ॥*॥ अथ कनिष्ठकुलीनस्य द्वितीयपुत्रस्य कार्य्यम्। स आत्मतुल्याय अथवा तेञ्जोजनामकुलविशिष्टद्वितीयपुत्राय प्रथमां कन्यां दद्यात्। मुख्यचतुर्थपुत्रजन्मतेञ्जोजनामकुलयुक्तस्य प्रथमां अथवा कनिष्ठनामकुलीनस्य द्वितीयां कन्यां गृह्णीयात् ॥ * ॥ अथ छभायानामकुलीनस्य द्वितीयपुत्रस्य कार्य्यम्। स आत्मतुल्याय अथवा तेञ्जोजनामकुलविशिष्टद्वितीयपुत्राय प्रथमां कन्यां दद्यात्। तेञ्जोजनामकुलविशिष्टस्य प्रथमां कन्यां अथवा छभायानामकुलयुक्तस्य द्वितीयां गृह्णीयात् ॥ *॥ अथ मध्यांशनामकुलीनस्य द्वितीयपुत्रस्य कार्य्यम्। स आत्मतुल्याय अथवा तेञ्जोजनामकुलविशिष्टस्य द्वितीयपुत्राय प्रथमां कन्यां दद्यात्। तेञ्जोज-

नामकुलविशिष्टस्य प्रथमां अथवा अन्यकुलीनानां मध्यांग्रनामकुलविशिष्टस्य वा द्वितीयां कन्यां गृह्णीयात् ।* । अथ तेओजनामकुलीनस्य द्वितीयपुत्रस्य कार्य्यम् । स आत्मतुल्याय अथवा वंशजाय प्रथमां कन्यां दद्यात् । मध्यांग्रनामकुलविशिष्टस्य द्वितीयपुत्रस्य प्रथमां कन्यां अथवा तेओजनामकुलविशिष्टस्य द्वितीयां गृह्णीयात् ।* । अथ मध्यश्रेष्ठनामकुलीनस्य कार्य्यम् । स मध्यश्रेष्ठपुत्रवारभायामध्यांग्रनामकुलीनाय प्रथमां मध्यांग्रकुलविशिष्टस्य द्वितीयपुत्राय तेओजनामकुलीनाय द्वितीयां कन्यां दद्यात् । मुख्यकुलीनस्य चतुर्थीं कन्यां अथवा कनिष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् । ततः तेओजनामकुलविशिष्टस्य प्रथमां कन्यां गृह्णीयात् । ततः तेओजानुजकुलीनस्य अग्रिमां कन्यां गृह्णीयात् ।* । अथ मध्यश्रेष्ठपुत्रवारभायामध्यांग्रनामकुलीनस्य कार्य्यम् । स तेओजनामकुलयुक्ताय प्रथमां कन्यां दद्यात् । कनिष्ठकुलविशिष्टस्य अथवा क्षुभायानामकुलयुक्तस्य किंवा मध्यश्रेष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् ।* । अथ चतुस्त्रिंशदधिकसप्तदशशतशकाब्दे मत्पित्रा तावत्कुलीनकुलाचार्य्यमतेन मुख्यकुलीनस्य द्वितीयदौहित्रयोः कन्ययोः क्रमेण ग्रहणेन तदलाभे श्रौर्य्यकुले दानेन समानकुले ग्रहणेन च कनिष्ठक्षुभायानामकुलयोः पुरुषानुक्रमेण स्थिरतरत्वं निर्णीतम् । तदयथा,—

"कनिष्ठकुलवेश्मनि क्वचन केऽपि केऽपीच्छया
परेऽपि पुरुषत्रयादगमनेव दोच्छेयिकाम् ।
निषेधमिह नेच्छते कमपि तत्र षड्भाटजः
सुतः पिटपदं कथं जननतो हि न प्राप्स्यति ॥
शाके पक्षगदक्षिसप्तवसुधागण्ये वरेण्ये तथा
पर्य्याये परिपूरिते हि विषमे धन्ये त्रयोविंशके ।
गोपीमोहनदेववंशतिलकेनापूर्व्वकं श्रीमता
निर्णीतं यदपीह तच्च घटकैः सर्व्वैः कुलीनैर्मतम् ॥
कनिष्ठषड्भाटकुलस्य तदृत्
खच्छेयिकायामिदमेव मूलम् ।
आदानतः पित्र्यपदस्य लाभो
ज्येष्ठत्वभावः पुरुषक्रमेण ॥
छेयिकायामग्रहस्य दानञ्चेत् प्रबलं भवेत् ।
पर्य्यायस्य समानस्य ग्रहणादपि तिष्ठति ॥
श्रौर्य्यं निन्दा समावेशस्त्रिविधोऽंशः कुलस्य वै
तस्य ध्वंसो न हि भवेच्चलतो रक्षितः स हि ॥
अत्र यद्यन्यथाभावो भवेदपि यथाविधि ।
क्रमागतेषु वर्गेषु तदा हानिर्भविष्यति ॥
सर्व्वैः कुलज्ञैस्च कुलीनवर्गै-
र्गोष्ठीपतीनां पुरतः सहर्षैः ।
इदं हि पत्रं लिखितं प्रयत्नात्
निर्णीतं एव प्रचलिष्यतीति" ॥* ॥

अथ वङ्गजकुलीनाः ।

"वसुवंशे च मुख्यौ द्वौ नाम्ना लक्ष्मणपूर्णकौ ।
घोषेषु च समाख्यातश्चतुर्भुजमहाद्युती ॥
दशरथो गुहश्चैव मित्रसारापतिस्तथा" ॥

एतेषामादिपुरुषनिर्णयो यथा । गौतमगोत्रे सर्व्वादौ दशरथवसुसुतौ लक्ष्मणवसुपरमवसुकौ लक्ष्मणवसुदक्षिणराढ़े ख्यातस्तस्य सुतः भववसुः तत्सुतः हंसवसुः तत्सुताः शुक्तिमुक्तयलङ्कारवसुकाः । अलङ्कारवसुः राढ़ात् वङ्गे गतः तस्य वङ्गे कुलहानिर्जाता तस्य सुतः मधुवसुः तत्सुतः गुणाकरवसुः तत्सुता अनन्तादयः । दशरथवसुतः परमवसुस्तत्सुतौ लक्ष्मणवसुपूर्णवसुकौ वङ्गे ख्यातौ । सौकालीनगोत्रे मकरन्दघोषसुतौ भवनाथघोषसुभाषितघोषौ भवनाथघोषो दक्षिणराढ़े ख्यातः सुभाषितघोषो वङ्गे ख्यातः तस्य सुतश्चतुर्भुजघोषः ॥ विश्वामित्रगोत्रे सर्व्वादौ कालिदासमित्रसुतौ अश्वपतिमित्रश्रीधरमित्रौ श्रीधरमित्रो दक्षिणराढ़े ख्यातः अश्वपतिमित्रो वङ्गे ख्यातस्तस्य सुतस्तारापतिमित्रः ॥ इति वङ्गकुलाचार्य्यग्रन्थः कुलदीपिका ॥

कुलीनकः, पुं, (कुलीन + संज्ञायां कन् ।) वनमुद्गः । इति हेमचन्द्रः ॥

कुलीनसं, क्ली, (कौ लीनं भूतलं ब्रध्नादिकं स्यतीति । सो + कः ।) जलम् । इति हेमचन्द्रः ॥

कुलीरः, पुं, (कुल् संख्याने + ईरन् किच्च ।) कर्कटः । इत्यमरः । १ । १० । २१ ॥ काँकड़ा इति भाषा । ("अथ कुलीरप्रभृतयो जलजन्तवस्तमभ्युपेत्य प्रोचुः"। इति हितोपदेशः ॥) कर्कटराशिः इति ज्योतिषम् ॥

कुलीरशृङ्गी, स्त्री, (कुलीरावयव इव शृङ्गं यस्याः । कुलीरशृङ्ग + गौरादित्वात् ङीष् ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कुलीरात्, [द्] पुं, (कुलीरं अत्तीति । अद् + क्विप् । उत्पत्तिमात्रेणैवात्मप्रसूतिभक्षणादस्य तथात्वम् ।) कर्कटशिशुः । तत्पर्य्यायः । स्रोगविः २ । इति त्रिकाण्डशेषः ॥

कुलीशः, पुं क्ली, (कुलिश + एषोदरात् दीर्घः ।) कुलिशम् । इत्यमरटीकासारसुन्दरी ॥

कुलुकं, क्ली, (कुल् + बाहुलकात् उलच् किच्च निपातनात् लस्य कः ।) जिह्मामलम् । इति हेमचन्द्रः ॥

कुलुकागुल्गा, स्त्री, (कौ भूमौ लुका गुल्गा गुल्गा इव ।) उल्काग्निः । इति हारावली ॥

कुलेश्वरः, पुं, (कुलस्य जगत्समूहस्य कुलचक्रस्य वा ईश्वरः ।) शिवः । (कुलस्य वंशस्य ईश्वरः नेता कर्त्ता वा ।) कुलपतिः । इति शब्दमाला ॥

कुलोत्कटः, पुं, (कुले कुलेन वा उत्कटः उद्रिक्त उग्रो वा ।) कुलीनाश्वः । इति शब्दचन्द्रिका ॥ उत्कटकुलोद्भवे त्रि ॥

कुल्पः, पुं क्ली, (कल संख्याने "कलिगलिभ्यां पगस्योच्च" । उणां ५ । २६ । इति पक् अस्य उत्वं ।) रोगः । गुल्फे पुं इत्युणादिकोषः ॥ (यथा, ऋग्वेदे ७ । ५० । २ । "यद्विजामनृपत्यपि वन्दनं सुवदस्रीवन्तौ परिकुल्पौ च देहत्" ॥)

कुल्मलं, क्ली, (कुल् निष्पत्तौ "कुलेर्लच्च" । उणां ४ । १८७ । इति मलन् लच्चान्तादेशः ।) पापम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, अथर्ब्ववेदे २ । ३० । ३ ।

"तत्र मे गच्छताद्धवं ग्रस्त्य इव कुल्मलं यथा" ॥)

कुल्माषं, क्ली, (कोलतीति । कुल् + क्विप् । ततः कुलं भक्षमिश्रितजलं मस्यतीति । मसीर्य्ये परिणामे + अण् एषोदरात् षत्वम् ।) काञ्जिकम् । इत्यमरः । २ । ९ । ३९ ॥

कुल्माषः, पुं, (कोलति इति । कुल् + क्विप् । कुल् अर्द्धखिन्नो माषोऽस्मिन् ।) यावकः । इत्यमरः । २ । ९ । १८ ॥

(यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ॥

"कुल्माषा वातला रूक्षा गुरवो भिन्नवर्चसः" ॥)

वोरवधान्यम् । कुलत्थ इत्यन्ये । माषाकृतिपत्रः । काश्मीरेषु तुलसी इति ख्यातः इति सुभूतिः । इति भरतः ॥ राजमाष इत्यन्ये । इति नयनानन्दः ॥ माषादिभिरर्द्धखिन्नमन्नम् । खिचड़ी इति ख्यातम् । इति लिङ्गादिसंग्रहटीकायां भरतः ॥ पाचितमाषादिरिति भीमः । इति सारसुन्दरी ॥ अर्द्धखिन्नगोधूमचणकादयः । (यथा, शब्दार्थचिन्तामणौ ।

"अर्द्धखिन्नास्तु गोधूमा अन्येऽपि चणकादयः ।
कुल्माषा इति कथ्यन्ते शब्दशास्त्रेषु पण्डितैः" ॥)

अस्य गुणाः । गुरुत्वम् । रूक्षत्वम् । वातकारित्वम् । मलभेदित्वञ्च । इति भावप्रकाशः ॥ रोगविशेषः । इति शब्दरत्नावली ॥ वनकुलत्थः । इति रत्नमाला ॥

कुल्माषाभिधुतं, क्ली, (कुल्माषैर्यवादिभिरर्द्धखिन्नैरभिधूयते स्म इति । अभि + धु + क्तः ।) काञ्जिकम् । इत्यमरटीकायां स्वामी ॥

कुल्मासं, क्ली, (कोलतीति कुल् भक्षमिश्रितजलम् । तत् मस्यति परिणामयतीति अण् ।) कुल्माषम् । इत्यमरटीकायां भरतः ॥

कुल्यं, क्ली, (कुल् बन्धे + क्यप् ।) अस्थि । इत्यमरः । २ । ६ । ४८ । अष्टद्रोणपरिमाणम् । द्रोणम् । आमिषम् । इति मेदिनी ॥

कुल्यः, त्रि, (कुलस्यापत्यम् । "अपूर्व्वपदादन्यतरस्यामिति" । ४ । १ । १४० । इति यत् । यद्वा कुले भवः कुलाय हितः कुले साधुर्वा दिगादित्वात् तत्र साधुरिति वा यत् ।) कुलोद्भवः । कुलहितः । (यथा, भागवते ७ । ६ । १३ ।

"यद्वान् मनोरौरसपरिक्षदांश
दत्तीश्च कुल्याः पशुभृत्यबर्गान्" ॥)

मान्ये पुं इति । मेदिनी ।

कुल्या, स्त्री, (कुले प्राब्बिगडे साधुः तत्र साधुरिति यत् ।) क्षुद्रा क्षत्रिमा नदी । इत्यमरः । १ । १० । ३४ । (यथा, शाकुन्तले १ अङ्के ।

"कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः" ॥)

पयःप्रणाली । पयनाला इति भाषा । जीवन्तिकौषधिः । नदीमात्रम् । इति मेदिनी ॥

(यथा, महाभारते ३ पर्व्वणि ।

"सैन्यवारण्यमासाद्य कुल्यानां कुरु दर्शनम्" ॥)

कुलस्त्री । इति हलायुधः ॥ शूलवार्त्ताकुः । इति रत्नमाला ॥

कुवादः

कुवं, क्ली, (कौ एथिव्यां वसते मण्डलाकारपुष्पावयवेन संस्त्यायतीव । वस संवरणे अन्येभ्योऽपीति डः। यद्वा कुं भूमिं वाति । कु + वा + कः ।) उत्पलम् । जलजपुष्पमात्रम् । इति हेमचन्द्रः ॥

कुवकालुका, स्त्री, (कुवमिव कायते प्रकाशते । कुव + कै + कः । कुवका आलुका इव ।) घोणीशाकम् । इति राजनिर्घण्टः ॥

कुवङ्गं, क्ली, (कुत्सितं वङ्गमिव गुणैः ।) सीसकम् । इति राजनिर्घण्टः ॥

कुवचः, त्रि, (कुत्सितं वचः यस्य ।) कुवादः । परदोषकथनशीलः । इत्यमरः ॥

कुवच्चकं, क्ली, (कु ईषत् वच्चं हीरकमिव कायते । कै + कः ।) वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

कुवरः, पुं, (कुत्सितं यथा स्यात् तथा व्रियते । व + अप् । यद्वा कुत्सितं रसं वृणोति गृह्णाति । कु + व + अच् ।) तुवरः । इत्यमरटीकायां रायमुकुटः॥

कुवर्णं, क्ली, (कौ वसते । वस् + पचाद्यच् ।) उत्पलम् । मुक्तापलम् । वदरीफलम् । इति मेदिनी ॥

कुवलयं, क्ली, (कोः एथिव्या भूमेर्वा वलयमिव शोभाकारकत्वात् ।) उत्पलम् । इत्यमरः । ६ । १० । ३७॥ नीलोत्पलम् । इति राजनिर्घण्टः ॥
(यथा,—मेघदूते ४६ ।
"ज्योतिर्लेखा वलयिगलितं यस्य बर्हं भवानी ।
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति" ॥)

कुवलयापीड़ः, पुं, (कुवलयं उत्पलं वा सम्यक् पीड़यति । कुवलयं सर्व्वं भूवलयं आपीड़यति वा आ + पीड़् + अच् ।) कंसस्य हस्तिरूपो दैत्यविशेषः । इति श्रीभागवतम् ॥ (यथा, हरिवंशे १०५ । २६-२७ ।
"शकुनिं केशिनञ्चैव यमलार्জ্জुनकावपि ।
नागं कुवलयापीड़ं चानूरं मुष्टिकं तथा ॥
कंसञ्च बलिनां श्रेष्ठं सगणं देवकीसुतः ।
निहत्य गोपवेशेन क्रीड़यामास केशवः" ॥
कुवलयं नीलोत्पलं आपीड़ः भूषणं यस्य इति व्युत्पत्त्या नीलोत्पलालङ्कृतो जनः ॥)

कुवलयिनी, स्त्री, (कुवलयानां समूहः ततः खलादित्वात् इनिः । यद्वा कुवलयानि सन्त्यस्यां इति इनिः ङीष् ।) उत्पलिनी । इति राजनिर्घण्टः ॥

कुवलाश्वः, पुं, (कौ एथिव्यां वसते विचरणसमर्थो भवति यद्वा कुं भूमिं एथिवीं वा वसते व्याप्नोतीव । वस् + अच् । कुवलः वेगगमनेन भूवलयभ्रमणक्षमः अश्वो यस्य ।) धुन्धुमाররाजः । इति हेमचन्द्रः ॥ (यथा, विष्णुपुराणे ४ । २ । १२ । "आवन्त्यस्य बृहदश्वस्यापि कुवलाश्वः योऽसावृतुध्वजस्य मर्षणैरपकारिणं धुन्धुनामानमसुरं वैष्णवेन तेजसाऽऽप्यायितः पुत्रसहस्रैरेकविंशतिभिः परिवृतो जघान धुन्धुमारसंज्ञामवाप च" । अयमेव कुवलयाश्व इति नामापि विश्रुतः ॥)

कुवली, स्त्री, (कुवल + स्त्रियां गौरादित्वात् ङीष् ।) कोलिबृक्षः । इति रत्नमाला ॥

कुवादः, त्रि, (कुत्सितो वादः भाषणं यस्य ।) कुवचः । परदोषकथनशीलः । इत्यमरः । ३ । १ । ३७ ॥

कुश

कुवाऊलः, पुं, (कुत्सितं वहतीति । कु + वह + उलच् ।) उष्ट्रः । इति शब्दचन्द्रिका ॥

कुविन्दः, पुं, (कुत्सितं भक्षादिमश्चितसूत्रादिकं कुत्सितवृत्त्या वा जीविकां विन्दतीति ।) तन्तुवायः । स तु शूद्रागर्भे विश्वकर्म्मौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥

कुवृत्तिकृत्, पुं, (कुवृत्तिं ईषदावरणरूपं चरणं करोति कुत्सितैः कण्टकादिभिर्वा वृत्तिं आवरणं करोति आत्मानमिति क्विप् ।) पूतिकः । इति शब्दचन्द्रिका ॥ काँटा करञ्ज इति भाषा ॥ (कुत्सितां वृत्तिं व्यवहारं करोतीति असद्व्यवहारकारी ॥)

कुवेणी, स्त्री (कु ईषत् वेणन्ते गच्छन्ति मत्स्या अस्याम् । कु + वेण् + इन् । ततः ङ्यादिकारान्तादिति वा ङीष् ।) मत्स्यधानी इत्यमरः । १ । १० । १६ ॥ खानइ इति भाषा । कुत्सिता वेणी यस्याः । निन्दितवेणी नारी च ॥

कुवेरः, पुं, (कुत्सितं वेरं शरीरमस्य ।) तथा च वायुमार्कण्डेयपुराणे ।
"कुत्सायां क्षिति शब्दोऽयं शरीरं वेरमुच्यते ।
कुवेरः कुशरीरत्वात् नाम्ना तेनैव सोऽङ्कितः" ॥
इत्यमरटीकायां भरतः ॥ देवताविशेषः । स तु विश्रवोमुनेरिड़विड़ाभार्য্যायां जातः । धनयक्षोत्तरदिग्भां पतिश्च । इति श्रीभागवतम् ॥ त्रिचरणोऽष्टदंष्ट्रोऽयं जातः । तत्पर्য্যायः । त्र्यम्बकसखः २ यक्षराट् ३ गुह्यकेश्वरः ४ मनुष्यधर्म्मा ५ धनदः ६ राजराजः ७ धनाधिपः ८ किन्नरेशः ९ वैश्रवणः १० पौलस्त्यः ११ नरवाहनः १२ यक्षः १३ एकपिङ्गः १४ ऐलविलः १५ श्रीदः १६ पुण्यजनेश्वरः १७ । इत्यमरः । १ । ३ । ६१—७३ । ईर्য্यक्षः १८ अलकाधिपः १९ । इति जटाधरः ॥ * ॥ नन्दीवृक्षः । इति मेदिनी ॥ अर्हदुपासकविशेषः । इति हेमचन्द्रः ॥

कुवेरः, त्रि, (कुत्सितं वेरं क्षेपणं दानादकं गतिर्वा यस्य ।) मन्दः । इति धरणी ॥ (कुत्सितं वेरं शरीरं यस्य ।) कुशरीरः । इति त्रिकाण्डशेषः ॥

कुवेरकः, पुं, (कुवेर + संज्ञायां कन् ।) नन्दीवृक्षः । इत्यमरः । २ । ४ । १२७ ॥

कुवेराक्षी, स्त्री, (कुवेरस्य अक्षीव पिङ्गलं पुष्पमस्याः ।) पाटलावृक्षः । इत्यमरः । २ । ४ । ५५ ॥ लताकरञ्जः । सितपाटलिकावृक्षः । इति राजनिर्घण्टः ॥

कुवेराचलः, पुं, (कुवेरस्य अचलः ।) कैलासपर्व्वतः । इति त्रिकाण्डशेषः ॥

कुवेराद्रिः, पुं, (कुवेरस्य अद्रिः पर्व्वतः ।) कैलासपर्व्वतः । इति जटाधरः ॥

कुवेलं, क्ली, (कुवेषु जलजपुष्पेषु मध्ये इंशोभां लाति गृह्णातीति । ला + कः ।) कुवलयम् । इति हेमचन्द्रः ॥

कुश इ कि द्युतौ । इति कविकल्पद्रुमः ॥ (घुरां परे भां-परं-अकं-सेट्-इदित् ।) पञ्चमस्वरी । इ कुंशयते । कि कुंशयति कुंशति । इति दुर्गादासः ॥

कुश य इर् श्लिषि । आलिङ्गन इति यावत् । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् ।) य कुश्यति वाला कान्तम् । इर् अकुशत् अकोशीत् । अस्मात् पृषादित्वान्नित्यं ड इत्यन्ये । इति दुर्गादासः ॥

कुश, क्ली पुं, (कु पापं श्यति नाशयति । कु + शो + डः । यद्वा कौ भूमौ शेते राजते शोभते इत्यर्थः ।) खनामख्यातदृणम् । तत्पर्য্यायः । कुथः २ दर्भः ३ पवित्रम् ४ । इत्यमरः । २ । ४ । १६६ । याज्ञिकः ५ क्रतुगर्भः ६ बर्हिः ७ क्रतुपः ८ । इति शब्दरत्नावली ॥ अपि च ।
"कुशो दर्भस्तथा बर्हिः सूच्यग्रो यत्र भूपगः ।
ततोऽन्यो दीर्घपत्रः स्यात् तृणपत्रस्तथैव च" ॥
तस्योत्पत्तिर्यथा,—
"बर्हिष्मती नाम पुरी सर्व्वसम्पत्समन्विता ।
न्यपतन् यत्र रोमाणि यज्ञस्याङ्गं विधुन्वतः ॥
कुशकाशास्त एवासन् शस्त्रह्रदितवर्चसः ।
ऋषयो यैः पराभाव्य यज्ञघ्नान् यज्ञमीजिरे" ॥
इति श्रीभागवतम् । अस्य गुणाः ।
"दर्भद्वयं चिदोषघ्नं मधुरं तुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीदाहपित्तरक्तप्रदरक्षुत्" ॥
इति भावप्रकाशः ॥ * ॥ तस्य धारणविधिस्तत्प्रतिनिधिश्च यथा,—
"पूजाकाले सर्व्वदैव कुशहस्तो भवेच्छुचिः ।
तर्জ্জन्या रजतं धार्য্यं स्वर्णं धार्য্यमनामया ।
कुशकार्য্यकरं यस्मान्न तु वन्याः कुशाः कुशाः ।
कुशेन रहिता पूजा विफला कथिता मया ।
नान्यस्य रजतं स्वर्णं धार्য্यं हि निजमङ्गले" ॥
इति वरदातन्त्रे १ पटलः ॥ * ॥
सधवायास्तत्स्पर्शनिषेधो यथा,—
"न स्पृशेत्तिलदर्भांश्च सधवा तु कथञ्चन" ॥
इति हलायुधकृतब्राह्मणसर्व्वस्वम् ॥ अन्यत् दर्भशब्दे द्रष्टव्यम् ॥

कुशं, क्ली, (कौ एथिव्यां भूमौ शेते । भूलग्नत्वात् तथात्वम् ।) जलम् । इति मेदिनी ॥

कुशः, पुं, (कु पापं श्यति नाशयति विहितराजधर्म्मानुष्ठानेन । कु + शो + डः । अपरा व्युत्पत्तिर्यथा यथा, रामायणे ।
"यस्तयोः पूर्व्वजो जातः स कुशेर्मन्त्रसत्कृतैः ।
निर्म्मार्জ্জनीयस्तु तदा कुश इत्यस्य नाम तत्" ॥)
रामसुतः । (यथा, रघुः १६ । ७२ ।
"यत् कुम्भयोनेरधिगम्य रामः
कुशाय राज्येन समं दिदेश ।
तदस्य जैत्राभरणं विहर्त्तु-
रज्ञातपातं सलिले ममज्ज" ॥)
योऽश्वम् । इति मेदिनी ॥ पुराणोक्तसप्तद्वीपेषु द्वीपभेदः । स तु घृतसमुद्रेणावृतः । तत्र देवनिर्म्मितोऽग्नितुल्यः कुशस्तम्बोऽस्ति । (अतः कुशद्वीप इति संज्ञया विख्यातः ।) तदधिपः प्रियव्रतराजपुत्रो हिरण्यरेताः तद्द्वीपं विभज्य सप्त-

पुत्रेभ्यो दत्तवान्। तेषां नामानि यथा। वसुः १ वसुदानः २ दृढ़रुचिः ३ नाभिगुप्तः ४ स्तुत्यव्रतः ५ विप्रनामा ६ देवनामा ७। एषां वर्षेषु सप्त सीमागिरयः। यथा। बभ्रुः १ चतुःशृङ्गः २ कपिलः ३ चित्रकूटः ४ देवानीकः ५ ऊर्द्धरोमा ६ द्रविणः ७। सप्त नद्यश्च यथा। रसकुल्या १ मित्रविन्दा २ श्रुतविन्दा ३ देवगर्भा ४ घृतच्युता ५ मधुः ६ माधवी ७। तत्र स्थिताः कुशलकोविदाभिमुक्तकुलकसंज्ञाः क्रमेण ब्राह्मणक्षत्रियवैश्यशूद्राः भगवन्तमग्निरूपिणं आसां नदीनां पयोभिर्यजन्ते। इति श्रीभागवतम्॥ (विष्णुपुराणे तु एतद्द्वीपाधिपतेस्तत्पुत्राणां गिरीणां नदीनाञ्च नामान्तराणि दृश्यन्ते। यथा २। ४। ३६—४४।

"ज्योतिष्मतः कुशद्वीपे सप्त पुत्राः प्रकीर्तिताः। उद्भिदो वेणुमांश्चैव वैरथो लम्बनो धृतिः॥ प्रभाकरोऽथ कपिलस्तन्नामा वर्षपद्धतिः। तस्मिन् वसन्ति मनुजाः सह दैतेयदानवैः॥ तत्रैव देवगन्धर्व्वयक्षकिंपुरुषादयः। वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः॥ दमिनः शुष्मिणः स्नेहा मन्देहाश्च महामुने!। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः॥ यथोक्तकर्म्मकर्तृत्वात् स्वाधिकारक्षयाय ते। तत्रैव तं कुशद्वीपे ब्रह्मरूपं जनार्द्दनम्॥ यजन्तः क्षपयन्त्युग्रमधिकारं फलप्रदम्। विद्रुमो हेमशैलश्च द्युतिमान् पुष्पवांस्तथा॥ कुशेशयो हरिश्चैव सप्तमो मन्दराचलः। वर्षाचलास्तु तत्रैते सप्तद्वीपे महामुने!॥ नद्यस्तु सप्त तासान्तु शृणु नामान्यनुक्रमात्। धृतपापा शिवा चैव पवित्रा सम्मतिस्तथा॥ विद्युदम्भा महीं चान्या सर्व्वपापहरास्त्विमाः। अन्याः सहस्रशश्चैव क्षुद्रनद्यस्तथाचलाः॥ कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत् स्मृतः। तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः"॥)

कुशः, त्रि, (कु कुत्सिते कर्म्मणि शेते अवतिष्ठते। कु + शी + कः।) पापिष्ठः॥ (कुत्सिते सदृशस्थायां शेते इति।) मत्तः। इति मेदिनी॥

कुशण्डिका, स्त्री, (कुशैः कण्डिका इव। कुशकण्डिका पृषोदरात् कस्य लोपः।) सर्व्वहोमार्थाग्निसंस्कारक्रिया। तत्र सर्व्वेषामाऊतियुक्तकर्म्मणां कुशण्डिकासंस्कृताग्निसाध्यत्वात् सैव प्रथममभिधीयते। तत्र हस्तप्रमाणं चतुरस्रं स्थण्डिलं शर्करोद्धारास्थिकेशतुषादिरहितं पूर्व्वोत्तरस्रवं समं वा छायामण्डपसहितं गोमयेनोपलिप्य स्नातः शुचिराचान्तः प्राङ्मुखः कुशसहितासनोपविष्टः कर्त्ता उत्तरस्यां दिशि भुक्त्यर्थं कुशकुसुमसहितजलपात्रं निधाय दक्षिणं जानु भूमौ पातयित्वा उत्तराग्रकुशोपरि सव्यहस्तप्रादेशमुत्तानं वह्निस्थापनपर्य्यन्तं भूमौ निधाय दक्षिणहस्तानामिकाकृष्टगृहीतकुशमूलेन स्थण्डिलदक्षिणप्रान्ते द्वादशाङ्गुलप्रमाणां प्राङ्मुखीं रेखामुल्लिख्य रेखेयं पृथ्वीदेवताका पीतवर्णा इति ध्यायेत्। तन्मूलतः प्रभृत्येकविंशत्यङ्गुलप्रमाणां उत्तराभिमुखीं रेखामुल्लिख्य रेखेयं अग्निदेवताका लोहितवर्णा इति ध्यायेत्। ततः प्रथमरेखायाः उत्तरतः सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं प्रजापतिदेवताका कृष्णवर्णा इति ध्यायेत्। ततः सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं इन्द्रदेवताका नीलवर्णा इति ध्यायेत्। ततोऽपि सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं सोमदेवताका शुक्लवर्णा इति ध्यायेत्। ततः क्रमेण दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां रेखासूत्करं गृहीत्वा प्रजापतिर्ऋषिस्तृषुपक्कन्दोऽग्निर्देवता रेखासूत्करनिरसने विनियोगः। ॐ निरस्तः परावसुरित्यैशान्यां दिशि अरत्निमात्रान्तरिते देशे प्रक्षिपेत्। ततः पूर्व्वस्थापितजलेन रेखाभुक्षणं कृत्वा दक्षिणदिक्स्थकांस्यपात्रस्थामेर्नवशरावस्थाग्नेर्व्वा ज्वलदिन्धनं गृहीत्वा प्रजापतिर्ऋषिस्तृषुपक्कन्दः अग्निर्देवताग्निसंस्कारे विनियोगः। ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः। अनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। ततोऽपरमग्निं गृहीत्वा प्रजापतिर्ऋषिर्बृहतीच्छन्दः प्रजापतिर्देवता अग्निस्थापने विनियोगः। ॐ भूर्भुवः स्वरोम्। इत्यनेनाग्निमात्माभिमुखं तृतीयरेखोपरि स्थापयेत् ततो वामहस्तमुत्तोल्याङ्गुलिं बद्धा षठेत्। प्रजापतिर्ऋषिस्तृषुपक्कन्दोऽग्निर्देवताग्निस्थापने विनियोगः। ॐ इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्॥ ततोऽग्ने! त्वं विश्वरूपनामासि इति नाम कृत्वा ध्यात्वाऽऽवाह्य विश्वरूपनाम्ने अग्नये नमः इति पाद्यादिनाभ्यर्च्य। ॐ सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः। विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु॥ इति पठेत्॥ ततः प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ ऊर्द्धा ब्रह्मस्थापनं कुर्य्यात्। समाग्यपक्षाग्यात्कुशपत्ररचितं हिर्दक्षिणावर्त्तमूर्द्धमुखं दर्भवटुं अधीतवेदं ब्राह्मणं वा क्षत्रमुत्तरासङ्गं वा कमण्डलुं वा ब्रह्मत्वेन परिकल्प्य धारासहितमुदकपात्रं गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन दक्षिणदेशं गत्वा अरत्निमात्रान्तरिते देशे पूर्व्वाभिमुखीं वारिधारां दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य पश्चिमाभिमुखोऽनुपविश्योत्तिष्ठेत्। वामहस्तानामिकाङ्गुष्ठाभ्यामास्तीर्णकुशपत्रमेकं गृहीत्वा प्रजापतिर्ऋषिरनुषृपुक्कन्दोऽग्निर्देवता ब्रह्मनिरसने विनियोगः। ॐ निरस्तः परावसुरित्यनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। ततोऽप उपस्पृश्य दक्षिणपादेन सव्यपादमवष्टभ्य उत्तराभिमुखोभूय आस्तीर्णकुशानुद्धृत्य प्रजापतिर्ऋषिरनुषृपुक्कन्दः अग्निर्देवता ब्रह्मोपवेशने विनियोगः। ॐ आवसोः सदने सीद इति। ब्राह्मणब्रह्मपक्षे तु ब्राह्मण एव सौदामीति ब्रूयात्। अनेन कुशोपरि पूर्व्वाग्रं कुशब्राह्मणं ब्राह्मणब्रह्मपक्षे तु उत्तराभिमुखं स्थापयित्वा तदुपरि कुशान् दत्त्वा अद्भिरभ्युक्ष्य कुशकुसुमैरर्च्चयेत्। ततस्तेनैव पथा प्रत्यागत्यासने पूर्व्वाभिमुख उपविशो भूमिजपादिकं कुर्य्यात्। यदि तु ब्रह्मत्वेनारोपितो ब्राह्मणः अयज्ञीयवाचं वदेत्तदा इमं मन्त्रं जपेत्। प्रजापतिर्ऋषिर्गायत्रीच्छन्दो विष्णुर्देवता अयज्ञीयवाग्वचननिमित्तजपे विनियोगः। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढ़मस्य पांसुले। इति जपेत्। कुशादिब्रह्मपक्षे तु कर्म्मकर्तुरेव कृताकृतावेक्षणादिब्रह्मकार्य्यकर्त्तृत्वादयज्ञीयवाग्वचननिमित्तं स एव जपेत्। यदि प्रकृते कर्म्मणि चरुहोमोऽस्ति तदा अस्मिन्नेव समये चरुं श्रपयित्वा तदुपरि घृतं दत्त्वा अग्नेरुत्तरतः कुशोपरि संस्थाप्य भूमिजपादिकं कुर्य्यात्। दक्षिणजानु भूमौ पातयित्वा दक्षिणहस्तोपरिभावेन अधोमुखौ हस्तौ भूमौ निधाय। परमेष्ठी ऋषिरनुषृपुक्कन्दोऽग्निर्देवता भूमिजपे विनियोगः। ॐ इदं भूमेर्भागमहं इदं भद्रं सुमङ्गलम्। परासपलान् बाधस्वान्येषां विन्दते धनम्। इति जप्त्वा रात्रौ चेत् कर्म्म तदा धनमितिस्थाने रक्षिति प्रयोक्तव्यम्। ततो दक्षिणहस्तेन कुशान् गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन वृत्तादिक्रमेण मन्त्रेण परिशोधयेत्। त्रयाणां मन्त्राणामृष्यादयः साधारणाः। कौत्सऋषिर्जगतीच्छन्दोऽग्निर्देवता एषस्य षड़्हस्य षष्ठेऽहन्यग्निमाहते शस्त्रे परिसमूहने विनियोगः। ॐ इमं स्तोममर्हते जातवेदसे रथमिव सम्महे मा मनीषया भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयन्तव। ॐ भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्व्वणा पर्व्वणा वयम्। जीवातवे प्रतरां साधया धियोऽग्ने सख्ये मा रिषामा वयन्तव। ॐ यक्केम त्वा समिधं साधया धियस्ते देवा हविरदन्त्याहुतं त्वमादित्यानावहतां ह्युग्रमस्मे सख्ये मा रिषामा वयन्तव। ततस्तान् कुशान् ऐशान्यां दिशि प्रक्षिपेत्। ततोऽग्नेः पूर्व्वतः उत्तरान्ताद्दक्षिणान्तं यावत् उपमूललूनान् एकपत्रीकृतान् कुशान् अग्नेय मूलमाच्छादयन् वारत्रयमास्तरेत्। एवं दक्षिणस्यां पूर्व्वान्तात् पश्चिमान्तं यावत्। प्रतीच्यास्तु दक्षिणादुत्तरान्तं यावत्। एवमुत्तरस्यां पश्चिमान्तात् पूर्व्वान्तं यावत् क्रमेणास्तरेत्। ततो घृताक्तस्रुक्स्रुवान् दक्षदिक्षु पूर्व्वादिक्रमेण दद्यात्। ॐ इन्द्राय लोकपालाय स्वाहा। एवं अग्नये इत्यादि। ततः प्रादेशदैर्घ्यप्रमाणां धवखदिरपलाशौदुम्बराणामन्यतमस्य विंशतिकाष्ठिकां मध्ये घृतप्लुतं दत्त्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ जुहुयात्। ततः स्रुवेण कुशादेव समाग्यकुशपत्रद्वयं गृहीत्वा प्रजापतिर्ऋषिः पवित्रे देवते पवित्रच्छेदने विनियोगः। ॐ पवित्रे स्थो वैष्णव्यौ इति मन्त्रेण प्रादेशप्रमाणं कृत्वा कुशान्तरेण वेष्टयित्वा नखव्यतिरेकेण छित्वा प्रजापतिर्ऋषिः पवित्रे देवते पवित्रमार्জ্জने विनियोगः। ॐ विष्णोर्म्मनसा पूते स्थः इत्यनेनाभ्युक्ष्य ताभ्यादिभ्यां पवित्रमुत्तराग्रं

निधाय तत्र होमार्थं घृतं निःक्षिपेत्। ततस्तत्कुशपत्रद्वयमग्रे दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां मूले च वामहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा दक्षिणहस्तोपरिभावेनाधोमुखयस्तपाणिः प्रजापतिर्ऋषिराज्यं देवता आज्योत्पवने विनियोगः। ॐ देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिः स्वाहा। इत्यनेन कुशपत्रद्वयमध्येन घृतमग्नौ सङ्गृह्णीयात्। तूष्णीं वारद्वयम्। ततस्तत्कुशपत्रद्वयमङ्गिरभुक्ष्याग्नौ निःक्षिपेत्। ततस्तस्याज्यपात्रस्योदकेनानुमार्ज्जनमग्नेरुपरि निधानं उत्तरस्यां दिशवतारणं इत्यमेव वारत्रयं संस्कुर्य्यात् इत्याज्यसंस्कारः। ततो ध्रुवखदिरपलाशोडुम्बराणामन्यतमस्य अरत्निमात्रं भ्रमिताङ्गुष्ठपर्व्वविणं नासारन्ध्रवन्मध्यस्थितमर्य्यादं स्रुवं इत्यमेव वारत्रयं संस्कुर्य्यादिति। स्रुवसंस्कारः। एवं स्रुक्चेत्यादिकं संस्कुर्य्यात्। ततो दक्षिणं जानु भूमौ पातयित्वा उदकाञ्जलिं गृहीत्वा प्रजापतिर्ऋषिरदितिर्देवता उदकाञ्जलिसेके विनियोगः। ॐ अदिते अनुमन्यस्व इत्यनेनाग्नेर्दक्षिणतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिर्ऋषिरनुमतिर्देवता उदकाञ्जलिसेके विनियोगः। ॐ अनुमते अनुमन्यस्व इत्यनेनाग्नेः पश्चिमतो दक्षिणान्तादुत्तरान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिर्ऋषिः सरस्वती देवता उदकाञ्जलिसेके विनियोगः। ॐ सरस्वत्यनुमन्यस्व इत्यनेनाग्नेरुत्तरतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिर्ऋषिः सविता देवता अग्निपर्य्युक्षणे विनियोगः। ॐ देव सवितः प्रसुवयज्ञं प्रसुवयज्ञपतिं भगाय दिव्यो गन्धर्व्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु इत्यनेनोदकाञ्जलिना दक्षिणावर्त्तेनाग्निं वेष्टयेत्। ततो दक्षिणं जानूत्थाप्य उपर्य्यधःस्थितदक्षिणवाममुष्टिभ्यां पवित्रपुष्पकुशान् गृहीत्वा विरूपाक्षजपं कुर्य्यात्। परमेष्ठी ऋषी वह्निरूपोऽग्निर्देवता विरूपाक्षजपे विनियोगः। ॐ भूर्भुवः स्वरोम् महान्तमात्मानं प्रपद्ये विरूपाक्षोऽसि दन्ताङ्गिरस्य ते ग्रथ्या पर्शू स्रहान्तरीक्षे विमितं हिरण्मयं तद्देवानां हृदयान्ययस्मये कुम्भेऽन्तः सन्निहितानि तानि बलञ्च बलसाक्ष रक्षतोऽप्रमत्तो अग्निमिन्धत्तं सत्यं यत्ते द्वादशपुत्रास्ते त्वा संवत्सरे संवत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्मवर्च्चसमुपयन्ति त्वं देवेषु ब्राह्मणोऽस्म्यहं मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावत्युपधावामि जपन्तं मा मा प्रतिजापीर्जुह्वन्तं मा मा प्रतिहौषीः कुर्व्वन्तं मा मा प्रतिकार्षीत्त्वां प्रपद्ये त्वया प्रसूत इदं कर्म करिष्यामि तन्मे राध्यतां तन्मे समृद्ध्यतां तन्म उपपद्यतां समुद्रो मा विश्वयचा ब्रह्माऽनुजानातु तुथो मा विश्ववेदा ब्रह्मणः पुत्रोऽनुजानातु स्वाचो मा प्रचेता मैत्रावरुणोऽनुजानातु तस्मै विरूपाक्षाय दन्ताङ्गये समुद्राय विश्वयचसे तुथाय विश्ववेदसे स्वाचाय प्रचेतसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः। इति जपित्वा गृहीतकुशान् प्रागुदीच्यां दिशि क्षिपेत्। फलपुष्पे ब्रह्मणे निवेदयेत्॥*॥ अथ काम्यकर्म्मार्थं कुशण्डिका तदा प्राणान् संयम्य प्रथमं पुटाञ्जलिः। ॐ तपश्च तेजश्च श्रद्धा च क्षीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्यञ्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु। इति जपित्वा पश्चात् विरूपाक्षजपं कुर्य्यात्। इति सामवेदिनां सर्व्वसाधारणी कुशण्डिका समाप्ता। इति भवदेवभट्टः॥*॥ अन्यत् रघुनन्दनभट्टाचार्य्यकृतसंस्कारतत्त्वे द्रष्टव्यम्॥ यजुर्व्वेदिनां कुशण्डिका पशुपतिकृतदशकर्म्मपद्धतौ ऋग्वेदिनां कुशण्डिका कालेशिकृतदशकर्म्मपद्धतौ च द्रष्टव्या॥*॥*॥ अथ कुशण्डिकानन्तरं प्रकृतं कर्म्म कर्त्तव्यम्। तत्र प्रथमं प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमं कुर्य्यात्। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भूः स्वाहा। प्रजापतिर्ऋषिरक्षिक्रुच्छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः। ॐ स्वः स्वाहा। इति स्रुवेणाज्याऽऽहुतित्रयन्दद्यात्। यदि प्रकृते कर्म्मणि चरुहोमोऽस्ति तदा आज्यतन्त्रोपक्रमविहितत्वात् महाव्याहृतिहोमस्य प्रथमं महाव्याहृतिहोमो न कर्त्तव्योऽन्ते तु कर्त्तव्य एव विहितत्वात्। ततः प्रकृतं कर्म्म समाप्य पुनर्महाव्याहृतिहोमं हुत्वा प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा ग्राह्यायनहोमादिवामदेव्यगानान्तं उदीच्यं साधारणं कर्म्म करणीयम्। तदभिधीयते। तत्र प्रथमं ॐ अद्येत्यादि अमुककर्म्मणि यत्किञ्चिद्दैगुण्यं जातं तद्दोषप्रशमनाय ग्राह्यायनहोममहं कुर्व्वीय इति सङ्कल्पं कृत्वा अग्ने त्वं विधुनामासि इति नाम कृत्वा संपूज्य पुनर्घृताक्तां प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमञ्च पूर्व्ववत् कृत्वा प्रायश्चित्तहोमं कुर्य्यात्। प्रजापतिर्ऋषिरग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नोऽग्न एनसे स्वाहा। प्रजापतिर्ऋषिर्विश्वेदेवा देवताः प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नो विश्ववेदसे स्वाहा। प्रजापतिर्ऋषिर्विभावसुर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ यज्ञं पाहि विभावसो स्वाहा। प्रजापतिर्ऋषिः घृतक्रतुर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ सत्यं पाहि घृतक्रतो स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नो अग्न एकया पाहूत द्वितीयया पाहि गीर्भिस्तिसृभिरूर्जाहुत पाहि चतसृभिर्वसो स्वाहा। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पुनरूर्ज्जा निवर्त्तस्व पुनरग्न इषायुषा पुनर्नः पाह्यंहसः स्वाहा। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवत प्रायश्चित्तहोमे विनियोगः। ॐ सहर्ज्जा निवर्त्तस्वाग्ने पिन्वस्व धारया विश्वप्स्याः विश्वतः परि स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ आज्ञायदनाज्ञातं यज्ञस्य क्रियते मिथः अग्ने तदस्य कल्पय त्वं हि वेत्थ यथायथं स्वाहा। प्रजापतिर्ऋषिः पङ्क्तिच्छन्दः प्रजापतिर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नोऽस्तु वयं स्याम पतयो रयीणां स्वाहा। ततः पूर्व्ववदेव महाव्याहृतिहोमः समित्प्रक्षेपश्च। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भूः स्वाहा। प्रजापतिर्ऋषिरक्षिक्रुच्छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः ॐ स्वः स्वाहा॥*॥

ततोनवग्रहहोमः। ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यं भवा वाजस्य सङ्गथे स्वाहा। ॐ अग्निर्मूर्द्धा दिवः ककुत् पतिः पृथिव्या अयं अपां रेतांसि जिन्वति स्वाहा। ॐ अग्ने विवस्वदुषसश्चित्रं राधोऽमर्त्य आदाशुषे जातवेदो वहा त्वमद्याँ देवाँ उषर्बुधः स्वाहा। ॐ बृहस्पते परिदीया रथेन रक्षोहाऽमित्राँ अपबाधमानः प्रभञ्जत्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां स्वाहा। ॐ शुक्रन्तेऽन्यद्यजन्तेऽन्यदस्मिन्नुरुपेऽहनी द्यौरिवासि। विश्वा हि माया अवसि स्वधावन् भद्रा ते पूषन्निह रातिरस्तु स्वाहा। ॐ शन्नो देवी रभीष्टये शन्नो भवन्तु पीतये। शंयोरभिस्रवन्तु नः स्वाहा। ॐ कयानश्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता स्वाहा। ॐ केतुं कृन्वन्नकेतवे पेशो मर्य्या अपेशसे समुषद्भिरजायथाः स्वाहा॥*॥ ततः इन्द्राद्यष्टलोकपालहोमं प्रकृतदेवताहोमञ्च हुत्वा घृताक्तां प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा उदकाञ्जलिसेकं कुर्य्यात्। प्रजापतिर्ऋषिः सविता देवताग्निपर्य्युक्षणे विनियोगः। ॐ देव सवितः प्रसुवयज्ञं प्रसुवयज्ञपतिं भगाय दिव्यो गन्धर्व्वः केतपूः केतन्नः पुनातु वाचस्पतिर्व्वाचन्नः स्वदतु। अनेनोदकाञ्जलिना दक्षिणावर्त्तेनाग्निं वेष्टयेत्। प्रजापतिर्ऋषिरदितिर्देवता उदकाञ्जलिसेके विनियोगः। ॐ अदितेऽन्वमंस्थाः अनेनाग्नेर्दक्षिणतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। प्रजापतिर्ऋषिरनुमतिर्देवता उदकाञ्जलिसेके विनियोगः। ॐ अनुमतेऽन्वमंस्थाः अनेनाग्नेः पश्चिमतो दक्षिणान्तादुत्तरान्तं यावदुदकाञ्जलिना सिञ्चेत्। प्रजापतिर्ऋषिः सरस्वती देवता उदकाञ्जलिसेके विनियोगः। ॐ सरस्वत्यन्वमंस्थाः। अनेनाग्नेरुत्तरतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। तत उत्तानहस्तहृदयेन कतिपयाक्षरम्-

कुशलं

कुशान् गृहीत्वा प्रजापतिर्ऋषिर्विष्णुर्देवता दर्भोत्पाटनाभ्युक्षने विनियोगः। ॐ अक्तां रिहा गावयन्तु वयः। अनेनाग्रमध्यमूलानि क्षतेनाभ्युक्षति वारत्रयं मन्त्रञ्च वारत्रयमेव पठनीयः। ततस्तान् कुशानङ्गिरस्युक्ष्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो रुद्ररूपोऽग्निर्देवता दर्भमुष्टिकाहोमे विनियोगः। ॐ यः पशूनामधिपती रुद्रस्तन्तिचरो दृषा। पशूनस्माकं मा हिंसीरेतदस्तु ऊतन्तव स्वाहा। अनेनाग्नौ क्षिपेत्। तत अग्ने त्वं मृडनामासीति नाम कृत्वा गन्धमाल्यवस्त्रताम्बूलैरग्निमभ्यर्च्य प्रजापतिर्ऋषिर्विराट्छन्द इन्द्रो देवता यज्ञस्थानस्य यजनीययज्ञे विनियोगः। ॐ पूर्णाहोमं यज्ञसे जुहोमि योऽस्मै जुहोति वरमस्मै ददाति वरं वृणे यज्ञसा भामि लोके स्वाहा। अनेन पूर्णाहुतिं दद्यात्। ततो ब्रह्मणे पूर्णपात्रादि दक्षिणां दत्त्वा होमदक्षिणां कुर्य्यात्। ततः प्रदक्षिणेन दक्षिणं देशं गत्वा ब्रह्मयज्ञिं मुक्त्वा प्रत्याहृत्यासने पुनरुपविश्य कुशकुसुमसहितजलपात्रे हस्तं निधाय महावामदेव्य ऋषिर्विराड्गायत्रीच्छन्द इन्द्रो देवता शान्तिकर्म्मणि जपे विनियोगः। ॐ कया न श्चित्र आभुवदूती सदा वृधः सखा कया शचीष्ठया वृता। ॐ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढाचिदारुजे वसु। ॐ अभीषुणः सखीनामविता जरितॄणां शतम्भवास्यूतये। ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु। "एता ऋचो गीत्वा शान्तिं कुर्य्यात्। गानाशक्तौ एता एव ऋचस्त्रिरावृत्या पठेदिति। ततो दक्षिणां दत्त्वा अच्छिद्रावधारणं कुर्य्यात्। इति सर्व्वकर्म्मसाधारणमुदीच्यं कर्म्म समाप्तम्॥

कुशपः, पुं, (कुश् य संश्लेषे + बाहुलकात् कपन्।) पानपात्रम्। इत्युणादिकोषः॥

कुशपुष्पं, क्ली, (कुशाकारं पुष्पमस्य।) ग्रन्थिपर्णम्। इति रत्नमाला। गाँठियाना इति भाषा॥

कुशलं, क्ली, (कुश् + इषादित्वात् कलन्। यद्वा कुं पापं तस्मात् शृणाति गच्छति एषणां प्राप्नोतीत्यर्थः। कु + शृ क् + अच्।) कल्याणम्। (यथा, रघुः १।५८। "प्रप्रच्छ कुशलं राज्ञे राज्याश्रममुनिं मुनिः"॥*॥

समागमे विहिते अभिवादकमवरवयस्कं समानवयस्कमनभिवादकमपि ब्राह्मणं कुशलमिति शब्दविशेषोच्चारणेनैव कल्याणप्रश्नं पृच्छेत्। यदुक्तं मनौ २।१२७।

"ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्। वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च"॥)

पर्य्याप्तिः। पुण्यम्। (तद्वति, त्रि। यथा, गीतायाम् १८।१०।

"नद्वेष्ट्यकुशलं कर्म्म कुशले नानुषज्जते"।

कौ पृथिव्यां शलति श्लाघां प्राप्नोतीति। शल + अच्।) श्लिष्टिते, त्रि। इत्यमरः। ३। ३। २०३॥ (यथा, मनुः ८। १५७।

"समुद्यानकुशला देशकालार्थदर्शिनः।

कुशाग्री

स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति"॥

कुशं याति गच्छति। कुश + ला + कः। कुशग्राहकः। इति व्युत्पत्तिलभ्योऽर्थः॥)

कुशलवौ, पुं, (पुण्यवतोरिव एकशब्दया तयोरेव बोधकत्वम् द्वन्द्वसमासे तु कुशश्च लवश्च तौ कुशीलवौ मित्रावरुणाविवादिवज्ज्ञेयम्।) एकयोक्त्या रामपुत्रौ। इति हेमचन्द्रः॥ तयोर्नामकारणं यथा,—

"यस्तयोः प्रथमं जातः स कुशैर्मन्त्रसंस्कृतैः।
निर्म्मार्ज्जनीयो नाम्ना हि भविता कुश इत्यसौ॥
यस्तावरज एवासील्लवणेन समाहितः।
निर्म्मार्ज्जनीयो वृद्धाभिर्नाम्ना स भविता लवः॥
एवं कुशलवौ नाम्ना यमौ तौ सम्बभूवतुः।
भगवत्कृतनामानौ सुखिनावत्वयौ च तौ"॥
इति रामायणम्।

कुशलप्रश्नः, पुं, (कुशलः शुभः प्रश्नः।) कुशलजिज्ञासा। तत्पर्य्यायः। कौशली २। इति चिकाण्डशेषः॥

कुशली, स्त्री, (कुश इव लीयते। ली + डः गौरादित्वात् ङीष्।) अश्मन्तकवृक्षः। क्षुद्राश्मिका। इति वैद्यकम्॥

कुशली, [न्] त्रि, (कुशलं अस्त्यस्य। कुशल + इनिः।) मङ्गलान्वितः। (यथा, रघौ ५। ४।

"अध्वरीर्मन्त्रलक्षतामधीवां
कुशाग्रबुद्धे! कुशली गुरुस्ते"॥)

कुशस्थलं, क्ली, (कुशप्रधानं स्थलम्।) कान्यकुब्जदेशः। इति हेमचन्द्रः॥ (यथा, वेणीसंहारे।

"कुशस्थलं सकलस्थलं माकन्दं वाराणवतम्।
देहि मे चतुरो ग्रामान् कञ्चिदेकञ्च पञ्चमम्"॥)

कुशस्थली, स्त्री, (कुशस्थल + स्त्रियां ङीष्।) द्वारिका। इति जटाधरः॥ (यथा,—महाभारते २। मन्त्रणापर्व्वणि १४। ४९।

"इति सञ्चिन्त्य सर्व्वे स्म प्रतीचीं दिशमाश्रिताः।
कुशस्थलीं पुरीं रम्यां रैवतेनोपशोभिताम्"॥

पुर्य्येषा तु पुरा रेवतनाम्ना केनचित् नरपतिना निर्म्मिता कालवशात् राक्षसैरुत्सादिता स्वापदायीभूताऽऽसीत् ततो देवप्रमुखैर्यादवैः संस्कृता सती तेषामेव वासभूमिरासीत्॥)

कुशा, स्त्री, (कुश् य संश्लेषे + कः टाप् च।) रज्जुः। इति मेदिनी। मधुकर्कटिका। इति शब्दचन्द्रिका॥ वल्गा। इति हेमचन्द्रः॥ (छन्दोगाः स्तोत्रीयागमनार्थानौदुम्बरान् यूपान् कुशा इति व्यवहरन्ति॥ इति चिन्तामणिः॥)

कुशाकरः, पुं, (कुशैराकीर्य्यते समन्तात् व्याप्यते मूलाच्छादनेन वेष्ट्यतेऽत्र। आ + कृ + अधिकरणे अप्।) कुशच्छिदकालसमये कुशैर्वेष्टनात् तथात्वम्।) अग्निः। इति शब्दमाला॥ (कुशां रज्जुं करोतीति व्युत्पत्त्या रज्जुकारकः॥)

कुशाक्षः, पुं, (कुश इव सूक्ष्मं क्षुद्रमित्यर्थः अक्षि यस्य। समासे अच्।) वानरः। इति शब्दमाला॥

कुशाग्रीयमतिः, त्रि, (कुशाग्रीया कुशानां अग्रवत् सूक्ष्मा मतिर्यस्य।) तीक्ष्णबुद्धिः। (यदुक्तं ऋग्वेदभाष्यकारेण कुशाग्रीयधियावभौ।

कुशूलः

नैव शब्दाम्बुधेः पारं किमन्ये जडबुद्धयः"॥)

तत्पर्य्यायः। सूक्ष्मदर्शी २ तत्कालधीः ३ प्रत्युत्पन्नमतिः ४। इति हेमचन्द्रः॥ सूक्ष्मायां बुद्धौ कर्म्मधारयस्त्र स्त्री॥

कुशारणिः, पुं, (कुशं शापप्रदानार्थं जलं अरणिरिव यस्य।) दुर्व्वासाः। इति त्रिकाण्डशेषः॥

कुशाल्मलिः, पुं, (कुत्सितः शाल्मलिः।) रोहितवृक्षः। इति राजनिर्घण्टः॥

कुशिंशपा, स्त्री, (कुत्सिता शिंशपा।) कपिलशिंशपा। इति राजनिर्घण्टः॥

कुशिकः, पुं, (कुशः कुशसंघको महीपालो जनकत्वेनास्त्यस्य। कुश + ठन्।) स्वनामख्यातन्नृपविशेषः। (स तु विश्वामित्रपितामहः गाधेः पिता। एतद्विवरणन्तु महाभारते १३। भीष्मयुधिष्ठिरसंवादे ५२ अध्यायमारभ्य द्रष्टव्यम्॥) पाशः। सर्पदण्डः। विभीतकवृक्षः। इति हेमचन्द्रः॥ अस्त्रकर्म्मोपजीवः। इति राजनिर्घण्टः॥ तैलपेषः। इति विश्वः॥ केकरे त्रि। इति शब्दमाला॥

कुशितं, त्रि, (कुश् + इतच्। यद्वा कुशसंश्लेषे + क्त इट् च।) जलमिश्रितम्। इत्युणादिकोषः॥

कुशी, स्त्री, (कुश + स्वार्थिकाण्प्रत्यये "जानपदेति" ४। १। ४२। इति ङीष्।) पाशः। इति मेदिनी॥

कुशी, [न्] पुं, (कुशाः सन्त्यस्य। समाधियोगकाले पङ्क्तिषु कुशोत्पत्तेस्तथात्वम्।) वाल्मीकिमुनिः। इति हेमचन्द्रः॥ (कुशनिर्म्मिते, त्रि। यथा, महाभारते १३। मेघवाहनोपाख्याने १४। ३७४।

"दिनेऽष्टमे तु विप्रेण दीक्षितोऽहं यथाविधि।
दण्डी मुण्डी कुशी चीरी क्षुतात्तो मेखलीकृतः"॥)

कुशीदं, क्ली, (कुसीद + स्वार्थेऽण् तस्य लुगभावः।) वृद्धिजीविका। इत्यमरटीकायां भरतः॥ रक्तचन्दनम्। इति मुग्धबोधव्याकरणम्॥

कुशीलवः, पुं, (कुत्सितं शीलं अस्य इति कुशीलः। कुगतीतिसमासः अन्यत्रापि दृश्यते इति वः। यद्वा कुशीलं वाति गच्छति प्राप्नोतीति यावत्। वा + कः।) चारणः। इत्यमरः। २। १०। १२॥ नटविशेषः। कथकादिः। इत्यन्ये। देशान्तरे कीर्त्तिं प्रचारयति यो नटः। इत्यन्ये। इति भरतः॥ (एते हि अपाङ्क्तेया इत्यत्र्यवर्ब्बर्य्याः। यथा, मनुः ३। १५५।

"कुशीलवोऽवकीर्णी च क्षयी पतिरेव च"॥

कुशीलवत्वार्थं नाट्यशास्त्रप्रचारकत्वात् वाल्मीकिमुनिः॥)

कुशीलवौ, पुं, (कुशश्च लवश्च तौ कुशीलवौ।) एकयोक्त्या रामपुत्रौ। इति हेमचन्द्रः॥ (यथा, रामायणे ७। १०७ सर्ग।

"अभिषिच्य महात्मानावुभौ रामः कुशीलवौ"॥)

कुशीलवः, पुं, (कुशीव कुशवान् सन् शेते समाधौ अवतिष्ठते इति। शी + ड।) वाल्मीकिमुनिः। इति चिकाण्डशेषः॥

कुशूलः, पुं, (कुसूल + स्वार्थेऽण् तस्य लुगभावः।) तुषानलः। इति जटाधरः॥ धान्यागारम्। तत्पर्य्यायः। अन्नकोष्ठकः २। इति हेमचन्द्रः॥ व्रीह्यगारम् २।

इति त्रिकाण्डशेषः ॥ (यथा, मनुः ४ । ७ ।
"कुशूलधान्यको वा स्यात् कुम्भीधान्यक एव वा ।
द्व्यहिको वापि भवेदश्वस्तनिक एव वा" ॥)

कुशेशयं, क्ली, (कुशे जले शेते । कुश + शी + अच् । अलुक् समासः ।) पद्मम् । (यथा, रघुः ६ । १८ ।
"कुशेशयातामतलेन कश्चित् करेण रेखाध्वजलाञ्छनेन" ॥) सारसपक्षी । इत्यमरः । १ । १० । ४० ॥

कुशेशयः, पुं, (कुशेशयं पद्ममिव आकृतिर्विद्यतेऽस्य । अर्शं आद्यच् ।) कर्णिकारवृक्षः । इति शब्दचन्द्रिका ॥ (कुशद्वीपस्थपर्व्वतविशेषः । इति विष्णुपुराणे । २ । ४ । ३६ ॥)

कुश ग निष्कर्षे । इति कविकल्पद्रुमः । (क्र्यां-परं-सकं-सेट् ।) ग कुश्नाति चुकोष । निष्कर्षः इयत्तापरिच्छेदः । तूलैरवकुश्नातीति वोपदेवः ॥ निष्कर्षोऽन्तःप्रकाशनमिति गोविन्दभट्टः ॥ "ततोऽकुश्नाद्गरुत्मतः क्रुद्धः प्राणान् वनौकसाम्" । इति भट्टौ अनेकार्थत्वान्निष्कोषणार्थः । इति दुर्गादासः ॥

कुशलः, त्रि, (कुश् + बाहुलकात् कलच् ।) कुशलः । इत्यमरटीकायां भरतः ॥

कुशाकुः, पुं, (कुश + "कठिकुशिभ्यां काकुः" । उणां ३ । ७७ । इति काकुः ।) कपिः । अग्निः । अर्कः । परोक्षायिनि, त्रि । इति मेदिनी ॥

कुशितः, त्रि, (कुश् निष्कर्षे + क्तः ।) जलमिश्रितः । इत्युणादिकोषः ॥

कुशीदं, क्ली, (कुसीद + एषोदरात् षत्वम् ।) कुसीदम् । इत्यमरटीकायां भरतः ॥

कुष्ठं, क्ली, (कुश्नाति रोगम् । कुश् + "इनि कुशीति" । उणां २ । २ । इति क्थन् ।) विषभेदः । इति हेमचन्द्रः ॥ औषधविशेषः । कुड् इति भाषा । तत्पर्य्यायः । व्याधिः २ पारिभव्यम् ३ वाप्यम् ४ पाप्मनम् ५ उत्पलम् ६ । इत्यमरः । २ । ४ । १२६ ॥ आप्यम् ७ । इति तट्टीका ॥ जरत्नम् ८ । इति रत्नमाला ॥ रजा ९ गदः १० आमयः ११ पारिभव्यकम् १२ रामम् १३ वाह्लीरजम् १४ पावनम् १५ कुत्सितम् १६ पद्मकम् १७ गदाङ्कम् १८ गदाङ्कयम् १९ कौवेरम् २० भासुरम् २१ । इति शब्दरत्नावली ॥ काकजम् २२ गौरजम् २३ । इति जटाधरः ॥
"कुष्ठं रोगाङ्कयं वाप्यं पारिभव्यं तथोत्पलम् ।
कुष्ठमुष्णं कटु खादु शुक्रलं तिक्तकं लघु ।
हन्ति वातास्रवीसर्पकासकुष्ठमरत्नपान्" ॥ * ॥

अथ कुष्ठभेदपुष्करमूलम् ।
"उक्तं पुष्करमूलन्तु पुष्करं पौष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिदं जगुः ॥
पौष्करं कटुकं तिक्तमुष्णं वातकफज्वरान् ।
हन्ति शोथाविषश्वासान् विशेषात् पार्श्वशूलनुत्" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । कफवायुकुष्ठरोगविसर्पविषकण्डूखर्ज्जूदद्रुनाशित्वम् । कान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ श्वासकासज्वरहिक्कानाशित्वम् । इति राजवल्लभः ॥ * ॥
खगामख्यातरोगः । कुट् इति भाषा । तत्पर्य्यायः । श्वित्रम् २ । इत्यमरः । २ । ४ । ५४ ॥ श्वेतम् ३ श्वेत्रम् ४ । इति तट्टीका ।

तस्य निदानपूर्ब्विका संप्राप्तिर्यथा ।
"विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च ।
भजतामागतां कृद्धिं वेगांश्चान्यान् प्रतिघ्नताम् ॥
व्यायाममतिसन्तापमतिमुक्ता निषेविणाम् ।
प्रीतोष्णाभ्यङ्गनाहारान् क्रमं मुक्ता निषेविणाम् ॥
घर्म्मश्रमभयार्त्तानां द्रुतं प्रीताम्बुसेविनाम् ।
अजीर्णाध्यशिनाञ्चैव पयसः कर्म्मापचारिणाम् ॥
नवान्नदधिमत्स्यातिसवाम्लनिषेविणाम् ।
मांसमूलकपिण्याम्लतिलक्षीरगुड़ाग्निनाम् ॥
व्यायामस्याप्यजीर्णेऽन्ने निद्राञ्च भजतां दिवा ।
विप्रान् गुरून् धर्षयतां पापं कर्म्म च कुर्व्वताम् ॥
वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमम्बु च ।
दूषयन्ति स कुष्ठानां सप्तको द्रव्यसंग्रहः ॥
अतः कुष्ठानि जायन्ते सप्त चैकादशैव तु ।
कुष्ठानि सप्तधा दोषैः पृथगद्वन्द्वैः समागतैः ॥
सर्व्वैश्च त्रिदोषेषु व्यपदेशोऽधिकत्वतः" ॥ * ॥

तस्य पूर्व्वरूपं यथा ।
"अतिस्निग्धः खरः स्पर्शः खेदासेदौ विवर्ण्यता ।
दाहः कण्डूस्त्वचि स्रावपरुतोदः कोठोन्नतिर्भ्रमः ॥
व्रणाद्यामधिकं सूनं श्रीव्रोत्पत्तिश्चिरस्थितिः ।
रूढ़ागमतिरूक्षत्वं निमित्तेऽल्पेऽपि कोपनम् ।
रोमहर्षोऽङ्गमः कार्ष्ण्यं कुष्ठलक्षणमग्रजम्" ॥ * ॥

तच्च वातादिभेदेन अष्टादशप्रकारम् ।
तच्च सप्तमहाकुष्ठानि यथा ।
"हरितारुणकपालाभं यत्कृष्णं पवनं तनु ।
कापालं तोदबहुलं तत्कुष्ठं विद्यमं स्मृतम् ॥ १ ॥
रक्तदाहरागकण्डूभिः परीतं रोमपिप्लरम् ।
उदुम्बरफलाभासं कुष्ठमौदुम्बरं वदेत् ॥ २ ॥
श्वेतं रक्तं स्थिरं स्थानं स्निग्धमुत्सन्नमण्डलम् ।
ताम्रमन्योन्यसंयुक्तं कुष्ठं मण्डलमुच्यते ॥ ३ ॥
कर्कशं रक्तपर्य्यन्तमन्तःस्रावं सवेदनम् ।
यदृष्यजिह्वासंस्थानमृष्यजिह्वं तदुच्यते ॥ ४ ॥
सश्वेतं रक्तपर्य्यन्तं पुण्डरीकदलोपमम् ।
सोत्सेधञ्च सरागञ्च पुण्डरीकं प्रचक्षते ॥ ५ ॥
श्वेतं ताम्रं तनु च यद्रुजो दृष्टं विमुञ्चति ।
प्रायशोरसि तत् सिध्मलावकुसुमोपमम् ॥ ६ ॥
यत् काकनिक्तिवर्णमपाकं तीव्रवेदनम् ।
त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिध्यति" ॥ ७ ॥

एकादशक्षुद्रकुष्ठानि यथा ।
"अस्खेदनं मण्डलास्तु यन्मत्स्यसकलोपमम् ।
तदेव कुष्ठं चर्म्माख्यं बृहत्त्वं हस्तिचर्म्मवत् ॥ १ ॥
स्रावं किणखरस्पर्शं पक्वं किटिभं स्मृतम् ॥ २ ॥
वैपादिकं पाणिपादस्फुटितं तीव्रवेदनम् ॥ ३ ॥
कण्डुमद्भिः सरागैश्च गण्डैरल्पकं चितम् ॥ ४ ॥
सकण्डुरागपिड़कं दद्रुमण्डलमुद्गतम् ॥ ५ ॥
रक्तं सस्रूषं कण्डूमत् सस्फोटं यद्भृशत्वपि ।
तच्चर्म्मदलमाख्यातं संस्पर्शासहमुच्यते ॥ ६ ॥

क्षुद्रा वक्राः पिड़काः स्रावयत्यः
पामेत्युक्ताः कण्डुमत्यः सदाहाः । ७ ॥
सैव स्फोटैस्तीव्रदाहैश्चयेता

श्वेया पाण्डोः कच्छुरयास्फिचोश्च ॥ ८ ॥
स्फोटाः स्रावाढ्या मासा विस्फोटाः क्षुत्तनुत्वचः ॥ ९ ॥
रक्तं स्रावं सदाहार्त्ति घृतारुः स्राद्बहुस्रवम् ॥ १० ॥
सकण्डुपिड़का स्रावा बहुस्रावा विचर्चिका" ॥ ११ ॥
इति माधवकरः ॥

कुष्ठः, पुं, (कुश्नाति शरीरस्थमोषितं विकुरुते इति । निष्कर्षार्थकस्य कुष् धातोरत्र विकारार्थत्वं बोध्यते धातूनामनेकार्थत्वात् । कुष् निष्कर्षे + "इनिकुशीति" । उणां २ । २ । इति क्थन् ।) खगामख्यातरोगः ।
तस्य निदानं पूर्व्वलिखितम् । औषधं यथा ।
"सर्व्वकुष्ठेषु वमनं रेचनं रक्तमोक्षणम् ।
वचावासापटोलानां निम्बस्य खदिरस्य च ॥
कषायो मधुना पीतो वातघ्नमदनान्वितः ।
विरेचनं प्रयोक्तव्यं त्रिवृद्दन्तीसप्तलाभिः ॥
मनःशिला मरीचानि तैलपाकं पयो हरेत् ।
सर्व्वकुष्ठानुलेपोऽयं शिवा पक्षगुडोदनम् ॥
करञ्जैड़गजौ कुष्ठं गोमूत्रेण प्रलेपतः ।
करवीरोदुम्बरञ्च तैलाक्तस्य तु कुष्ठहृत् ॥
हरिद्रामलयं राला गुड़ूचेड़गजस्तथा ।
आरग्वधः करञ्जश्च लेपः कुष्ठहरः परः ॥
मनःशिला विड़ङ्गानि वाकुची सर्षपस्तथा ।
करञ्जो मूत्रपिष्टोऽयं लेपः कुष्ठहरोऽर्कवत् ॥
विड़ङ्गैड़गजाकुष्ठनिशोन्मत्तसर्षपैः ।
मूत्राम्बुपिष्टो लेपोऽयं दद्रुकुष्ठविनाशनः ॥
प्रपुन्नाटकबीजानि धात्री सर्व्वरसः स्नुही ।
सौवीरपिष्टं दद्रूणामेतदुद्वर्त्तनं परम् ॥
आरग्वधस्य पत्राणि आरगालेन पेषयेत् ।
दद्रुक्रिट्टिमकुष्ठानि हन्ति सिध्मानमेव च ॥
उषा पीता वाकुची च कुष्ठजित् क्षीरभोजिनः ।
तिलाज्यक्षौद्रगोमक्षशर्कराः ॥
दध्यः सप्तसमो मेध्यः कुष्ठहा कामचारिणः ।
विड़ङ्गत्रिफलाक्षाधूर्त्तं लौहं समाक्षिकम् ॥
हन्ति कुष्ठं क्रमौन्मेहगण्डौद्रव्रणगन्दरान् ।
यः खादेदमयारिष्टामलकानि तथा निशा ।
स जयेत् सर्व्वकुष्ठानि मासादूर्द्धं न संशयः ।
दक्षमागाद्युतः कुम्भे मूलके खदिराङ्गुरः ॥
साक्षधात्रीरसक्षौद्रं हन्यात् कुष्ठं रसायनम् ।
धात्रीखदिरयोः क्वाथं पीत्वावश्यायसंयुतम् ॥
शुक्लेन्दुधवलं स्निग्धं हन्ति तूर्ध्वं न संशयः ।
पीत्वा भल्लातकं तैलं मांसखादिं जयेन्नरः ॥
सेवितं खादिरं वारि पानाद्यैः कुष्ठजिद्भवेत् ।
वासा गुड़ूची त्रिफला पटोलश्च करञ्जकम् ॥
निम्बासनं क्वाथयेत्तं क्वाथकल्केन यद्घृतम् ।
वत्सकं तद्धरेत् कुष्ठं घृतं वर्षाणि जीवति ॥
खरेण च दूर्व्वायाः पचेत्तैलं चतुर्गुणम् ।
कच्छुर्विचर्चिका पामा अभ्यङ्गादेव नश्यति ॥
द्रुमत्वगर्ककुष्ठानि जलजानि च मूत्रकम् ।
गण्डीरिका चित्रकैस्तैलं कुष्ठव्रणादिनुत्" ॥
इति गारुड़े १७५ अध्यायः ॥
"कुष्ठेन्द्रयवसिद्धार्थनिशा दूर्व्वा च कुष्ठजित्" ॥
इति तत्रैव १७६ अध्यायः ॥

कुष्ठः

"करवीरं भल्लराजं लवणं कुष्ठमर्कम् ।
चतुर्गुणेन मूत्रेण पचेत्तैलं हरेच्च तत् ।
पामां विचर्चिकां कुष्ठमभ्यङ्गाद्धि त्रयानि वै" ॥
"सैन्धवञ्च विड्ङ्गानि सोमराजी तु सर्षपाः ।
रजनी दे विषाञ्चैव गोमूत्रेण च पेषयेत् ।
कुष्ठनाशञ्च तत्तैलमाम्लपत्राद्यनात्तथा" ॥
इति च गारुडे १८७ अध्यायः ॥
"सतक्रकाग्रमूलं वा वाकुचीमूलमेव वा ।
काञ्जिकेन च वाकुच्या मूलं वै कुष्ठरोगनुत्" ॥
इति गारुडे १८८ अध्यायः ॥
"पीतं दक्षिणमूलन्तु पर्य्युषितजलेन वै ।
सार्द्धं विनाग्नयेद्दाहज्वरञ्च परमेश्वर ! ॥
शिखायाञ्चैव तद्भस्म भवेदैकाहिकादिनुत् ।
एतत् सकाञ्जिकं पीतं वातकुष्ठज्वरादिनुत्" ॥
इति गारुडे १९३ अध्यायः ॥
"नित्यं निम्बदलानाञ्च चूर्णमामलकस्य च ।
प्रत्यूषे भक्षयेच्चैव तस्य कुष्ठं विनश्यति ॥
हरीतकी विड्ङ्गञ्च हरिद्रा सितसर्षपाः ।
सोमराजस्य बीजानि करञ्जस्य च सैन्धवम् ।
गोमूत्रपिष्टान्येतानि कुष्ठरोगहराणि च" ॥
बीजानि स्थाने मूलानि वा पाठः ।
इति तत्रैव १९४ अध्यायः ॥
"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीकङ्कोलपूगानां लवङ्गस्य फलानि च ।
अगुरुश्चीरकस्तूर्य्यः कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च बोलं मदनकं नखम् ॥
सरलः सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्पूरकः पद्मकञ्च एतैस्तैलं प्रसाधितम् ।
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम्" ॥
इति गारुडे १९८ अध्यायः ॥ * ॥

अथ वैद्यकमते कुष्ठचिकित्सामाह ।
"वातोत्तरेषु सर्पिर्ब्भक्तं श्लेष्मोत्तरेषु कुष्ठेषु ।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं श्रेष्ठम् ॥
पुराणधान्यानि च जाङ्गलानि
मांसानि मुद्गाश्च पटोलयुक्ताः ।
यवादयश्चात्र हिताः पुराणा
घृतानि शाकानि च तिक्तकानि" ॥
तन्त्रान्तरे ।
"पुराणाः शालिगोधूममुद्गाद्याः कुष्ठिनो हिताः ।
तिक्तशाकं जाङ्गलञ्च पानादौ खदिरोदकम् ॥
ये लेपाः कुष्ठानां यज्यन्ते निर्गताखदोषाणाम् ।
संशोधितशरीराणां सद्यः सिद्धिर्भवेत्तेषाम् ॥
दूर्व्वाऽभयासैन्धवचक्रमर्द-
कुठेरकाः काञ्जिकतक्रपिष्टाः ।
एभिः प्रलेपैरपि बद्धमूलां
कण्डूञ्च दद्रुञ्च निवारयन्ति ॥
तुल्यो रसः शालतरोस्तथैव
सचक्रमर्दोऽप्यभयाविमिश्रः ।
पानीयमुष्णेन तदक्षपिष्टो
लेपः कृतो दद्रुगजेन्द्रसिंहः ॥
विड्ङ्गैर्दद्रुगजाकुष्ठनिम्बाग्निचूर्णसर्षपैः ।
धान्याम्लपिष्टैर्लेपोऽयं दद्रुकुष्ठविनाशनः ॥

कुष्ठः

एड़गजकुष्ठसैन्धवसौवीरसर्षपैः क्रिमिघ्नैः ।
क्रिमिसिध्मदद्रुमण्डलकुष्ठानां नाशनो लेपः ॥
पर्णानि पिष्ट्वा चतुरङ्गुलस्य
तक्रेण पर्णान्यथ काकमाच्याः ।
तैलाक्तगात्रस्य नरस्य कुष्ठा-
न्युद्वर्त्तयेदम्बहनच्छदेन ॥ ५ ॥
विड्ङ्गसैन्धवशिवाग्न्यग्निरेखा-
सर्षपकरञ्जरजनीभिश्च ।
गोजलपिष्टो लेपः
कुष्ठहरो दिवसनाथसमः ॥ ६ ॥
कासमर्दकमूलञ्च काञ्जिकेन प्रपेषितम् ।
दद्रुकिट्टिमकुष्ठानि जयेदेतत्प्रलेपनात् ॥ ७ ॥
आरग्वधस्य पत्राणि चारनालेन पेषयेत् ।
दद्रुकिट्टिमकुष्ठानि हन्ति सिध्मानमेव च ॥ ८ ॥
चक्राक्ष्यं क्षुद्दीक्षीरं भावितं मूत्रसंयुतम् ।
रवितप्तं हि किञ्चित्तु लेपनं किट्टिमापहम् ॥ ९ ॥
शिखरीरसेन सुपिष्टं मूलकबीजं प्रलेपतः सिध्म ।
क्षारेण वा कदल्या रजनीमिश्रेण नाशयति ॥१०॥
॥ ११ ॥
सक्षारं गन्धकं लेपात् कटुतैलेन सिध्मजित् ॥
कासमर्दकबीजानि मूलकानां तथैव च ॥१२॥१३॥
गन्धाश्मचूर्णमिश्राणि सिध्मानां परमौषधम् ॥
उपदेशात् काञ्जिकपिष्टैर्लेपः ॥ १४ ॥
गन्धपाषाणचूर्णेन यवक्षारेण लेपितम् ।
सिध्मनाशं व्रजत्याशु कटुतैलयुतेन च ॥
दधि समं कटुतैलेन लेपः ॥ १५ ॥
कुष्ठं मूलकबीजं प्रियङ्गवः सर्षपास्तथा रजनी ।
एतत् केशराख्यं निहन्ति बद्धवार्श्विकं सिध्म ॥१६॥
नीलकुवलयटकपत्रैरालिप्य गात्रमतिबद्धग्रः ।
लिम्पेन्मूलकबीजैः पिष्टैस्तक्रेण सिध्मनाशाय ॥१७॥
एड़गजातिलसर्षपकुष्ठं मागधिकालवङ्गयवमधु ।
पूतिह्रतं दिवसत्रयमेतद्धन्ति विचर्चिकदद्रुकुष्ठम्
॥ १८ ॥
सिन्दूरमरिचचूर्णं महिषीनवनीतसंयुतं बद्धग्रः ।
लेपान्निहन्ति पामां तैलं करवीरसिद्धं वा ॥१९॥२०॥
पारदं शुद्धगन्धञ्च शिलाचोत्तरवाग्वी ।
प्रपुन्नाड़ञ्च सर्पाक्षिमेघनादाग्निलाङ्गली ॥
उत्तरवाग्वी, राखालशशा इति ख्याता ॥
भल्लातं सहधूमञ्च सुनिगुप्ता क्षुद्दीपयेः ।
अरिष्टञ्च गुड़ः क्षौद्रं वागुजीबीजतुल्यकम् ॥
गोमूत्रैरारनालैर्व्वा पिष्ट्वा लेपञ्च कारयेत् ।
दद्रुमण्डलकण्डूञ्च विचर्चिञ्च विनाशयेत् ॥ २१ ॥
मनःशिलालं मरिचञ्च तैल-
माकं पयः कुष्ठहरः प्रलेपः ॥ २२ ॥
विमर्दबद्धहरिद्राक्षिचक्रागारधूम-
मनश्शमरिचदूर्व्वाक्षीरमर्कक्षुद्दीभ्याम् ।
दहति पतितमात्रात् कुष्ठजातीरशेषाः ।
कुणिग्रमिव सरोषाच्छक्रहस्तादिमुक्तम् ॥
अत्र अगदं भल्लातकः ॥ २३ ॥
भल्लातका दीपि सुधार्कमूलं
गुञ्जाफलञ्चूषणचञ्चुचूर्णम् ।
तुल्यं सकुष्ठं लवणानि पञ्च

कुष्ठः

क्षारद्वयं लाङ्गलिकाञ्च पक्वा ।
क्षुद्भार्कदुग्धं घनमायसस्थं
श्लक्ष्णकया तद्दिदधीत लेपम् ।
कुष्ठे किलासे तिलकालके च
अग्नेयदुर्नामसचर्म्मकीले ॥
भल्लातका दीपि चित्रकं तन्मूलम् ।
एषां समभागचूर्णं सिजार्कयोः क्षीरे दत्त्वा किञ्चित् पाकं कुर्य्यात् । अथ वा क्षीरद्वयं चतुर्गुणं चूर्णं पादिकं लेपयोग्यं पाकं कुर्य्यात् । श्लक्ष्णकया कुष्ठस्थाने दद्यात् ॥ २४ ॥
"क्षुक्काण्डशुण्ठिरे दग्ध्वा सहधूमं ससैन्धवम् ।
अन्तर्धूमं तैलयुक्तं लेपाद्धन्ति विचर्चिकाम्" ॥
सिजनलके सैन्धवसहधूमं समभागं प्रपूर्य्य स्थाल्यन्तरे क्षात्वा शरावेण पिधाय दग्ध्वा पिष्ट्वा कटुतैलेन लेपः ॥ २५ ॥
"क्षुक्काण्डे सर्षपात् कल्कः कुकूलानलपाचितः ।
लेपादिचर्चिकां हन्ति रागवेग इव त्रपाम्" ॥
सिजनलके राड्कल्कं प्रपूर्य्य शुष्कगोमयाग्नौ दग्ध्वा कटुतैलेन लेपः ॥ २६ ॥
"नारिकेलोदरे न्यस्तस्क्षुद्गुलः पूतितां गतः ।
लेपादिपादिकां हन्ति चिरकालानुबन्धिनीम् ॥२७
तिलकुसुमलवङ्गगोजलकटुतैलं लौहभाजने क्षात्वा ।
ग्रोषितमर्कमयूखैः यादस्कुटनं निहन्ति लेपेन" ॥२८
"उन्मत्तकस्य बीजेन माक्षिकक्षारवारिणा ।
कटुतैलं विपक्वं शीघ्रं हन्ति विपादिकाम्" ॥
कटुतैल शुं ४ माक्षिकलपत्राणां क्षार पल ६४ जल शुं ६४ श्वेत शुं १६ कल्क धुस्तूरबीज पल ८ । उन्मत्ततैलम् ॥ २९ ॥
"अवशुष्कं कासमर्दं चक्रमर्दं निशायुगम् ।
माक्षिकञ्चैव तुल्यांशं भल्लकाञ्जिकपेषितम् ।
कण्डूं कच्छूं जयत्येषां सिद्ध एष प्रयोगराट् ॥३०॥
कोमलसिंहास्यदलं सनिशं सुरभीजलेन पिष्टम् ।
दिवसत्रयेण नियतं क्षपयति कच्छूं विलेपनतः ॥३१
"वायसेड़गजाकुष्ठलाक्षाभिर्गुड़िका कृता ।
वस्तमूत्रेण संपिष्टा लेपाच्छित्रविनाशिनी" ॥
समभागचूर्णं छागमूत्रेण पिष्ट्वा गुड़िका कार्य्या । तेनैव लेपः ॥ ३२ ॥
"पूतिकार्कक्षुक्करेड़्गुमाणां
मूत्रैः पिष्टा पल्लवाः सौमनाश्च ।
लेपाच्छित्रं हन्ति दद्रुव्रणांश्च
कुष्ठान्यर्शांस्यङ्गनाडीव्रणांश्च" ॥
सौमना जातीपत्री । सर्व्वत्र पल्लवान् गोमूत्रेण पिष्ट्वा लेपो देयः ॥ ३३ ॥
"गजचिच्चव्याग्रचर्म्मसीतैलविलेपनात् ।
श्वित्रं नाशं व्रजेत् किं वा पूतिकीटविलेपनात्" ॥
गजचर्म्म चित्रकोमव्याघ्रचर्म्म अनयोर्भस्म कटुतैलञ्च लेपः । अथवा पादुड़ियाकीटं पिष्ट्वा लेपः ॥ ३४ ॥ ३५ ॥ "कुड़वोऽवशुजवीजात् हरितालचतुर्थभागसंमिश्रः । गवां मूत्रेण पिष्टः खदिरकरञ्जः परं श्वित्रे" ॥ आयुर्व्वेदसारेऽपि ।
"कुड़वो वागुजीबीजात् हरितालपलान्वितः ।
गवां मूत्रेण संपिष्य लेपनात् श्वित्रनाशनम् ॥३६॥

कुष्ठः

धात्रीखदिरयोः क्वाथं पीत्वा च मधुसंयुतम् ।
शङ्खकुन्देन्दुधवलं जयेच्छित्रं न संशयः ॥ ३७ ॥
धात्रीखदिरयोः क्वाथमवल्गुजरजोऽन्वितम् ।
पीत्वा शङ्खेन्दुकुन्दाभं हन्ति श्वित्रं न संशयः॥३८॥
क्षारे सुदग्धे गजलण्डजे च
गजस्य मूत्रेण बकश्रुते च ।
द्रोणप्रमाणं दशभागयुक्तं
दत्त्वा पचेत् वीजमवल्गुजस्य ॥
एतत्पुरा सिद्धजनैरुपात्तं
तदाशु सिद्धां गुडिकां प्रकुर्य्यात् ।
श्वित्रं प्रलिम्पेदथ तेन दृष्टं
तदा व्रजत्याशु खवर्णभावम् ॥ ३९ ॥
श्वेतजयन्तीमूलं पीतं पिष्ट्वा पयसैव ।
श्वित्रं विहन्ति नियतं रविवारे वैद्यनाथाज्ञा॥४०॥
गुञ्जापत्रामिचूर्णन्तु लेपितं श्वेतकुष्ठनुत् ।
शिखापामार्गभस्मापि लिप्त्वा श्वित्रं विनाशयेत् ॥
४१ ॥ ४२ ॥
एरण्डतुलसीवीजं वाकुची चक्रमर्दकम् ।
तिक्तकोशातकीवीजं छाग्याश्चोष्ठस्य वीजकम् ।
गोमूत्रदधिदुग्धैश्च पचेदज्याजमूत्रकैः ।
कल्कं दत्त्वा शिला काक्षी पथ्या कुष्ठं विड्ङ्गकम्।
कटुतैलञ्च तल्लेपाद्दृष्ट्वा दृष्ट्वा विलेपनैः ।
पञ्चाननमिदं तैलं श्वेतकुष्ठकुलापहम्" ॥
कटुतैल प्रं ४ क्षाग्यरण्डवीजादीनां मिलित्वा प्रं २ कल्कशिलाकाक्षादीनां मिलित्वा प्रं १ ।
इति श्वित्रे पञ्चाननतैलम् ॥ ४३ ॥
"आरग्वधं धवं कुष्ठं हरितालं मनःशिला ।
रजनीद्वयसंयुक्तं पचेत्तैलं विधानवित् ॥
एतेनाभ्यङ्गमादेव क्षिप्रं श्वित्रं विनश्यति" ।
तिलतैल प्रं ४ या प्रं १६ कल्कमिलित प्रं १ ।
इति आरग्वधाद्यं तैलम् ॥ ४४ ॥
"शुद्धसूतं समं गन्धं त्रिफला भृङ्गवागुजी ।
भल्लातकं तिलः क्षार्यो निम्बवीजं समं समम् ।
मर्द्दयेद्भृङ्गजद्रावैः श्लोक्ष्यं पेष्यं पुनः पुनः ॥
इत्थं कुर्य्यात्सप्ताहं रसः श्वेतारिको भवेत् ।
मध्याह्नेनिष्कमात्रन्तु खादेत् श्वेतं विनाशयेत्"॥
इति श्वेतारिः ॥ ४५ ॥
"पिबति सकटुतैलं गन्धपाषाणचूर्णं
रविकिरणसुतप्तं पामनो यः पलार्द्धम् ।
त्रिदिनतदनुभिक्षुः क्षीरभोजी च श्लोक्षं
भवति कनकदीप्तिः कामरूपी मनुष्यः"॥ ४६॥
"तीव्रेण कुष्ठेन परीतदेहो
यः सोमराजीं नियमेन खादेत् ।
संवत्सरं क्षार्यतिलद्वितीयां
स सोमराजीं वपुषाऽतिशेते ॥ ४७ ॥
धर्म्मसेवी कटुक्षीण वारिणा वागुजीं पिबेत् ।
क्षीरभोजी च सप्ताहात् कुष्ठी कुष्ठं व्यपोहति ॥४८
अवल्गुजवीजकल्कं पीत्वा कोष्णेन वारिणा ।
भोजनं सर्पिषा कार्य्यं सर्व्वकुष्ठविनाशनम् ॥ ४९ ॥
छिन्नायाः स्वरसो वापि सेव्यमानो यथाबलम् ।
जीर्णे घृतेन भुञ्जीत मुद्गयूषौदनेन च ॥
व्यपि पूतिशरीरोऽपि दिव्यरूपी भवेन्नरः ॥ ५० ॥

कुष्टः

यः खादेदभयारिष्टमरिष्टामलकानि वा ।
स जयेत् सर्व्वकुष्ठानि मासादूर्द्धं न संशयः ॥५१॥५२॥
निम्बस्य पञ्च मूलानि सत्वक्पुष्पफलानि च ।
चूर्णितानि घृतक्षौद्रसंयुतानि दिने दिने ॥
लिह्यात् पिबेद्वा मूत्रेण संयुक्तान्युदकेन वा ।
मदिरामलतोयेन पयसा वा यथाबलम् ॥
भुञ्जीत घृतयूषाद्यैः शाल्यन्नं पयसापि वा ।
सर्व्वकुष्ठविसर्पार्शोगाड़ीदुष्टव्रणानपि ॥
कामलाञ्च गदानन्यांस्तथा पित्तकफाश्रयान् ।
संवत्सरप्रयोगेण सर्व्ववर्ज्यैर्विवर्ज्जितैः ॥
जयत्येतत् पञ्चनिम्बं रसायनमनुत्तमम्" ॥
इति पञ्चनिम्बम् ॥ ५३ ॥
"पुष्पकाले च पुष्पाणि फलकाले फलानि च ।
संचूर्ण्य पिप्पलीसूक्ष्मचूर्णानि दलानि च ॥
दिरंफाणि समाहृत्य भागिकानि प्रकल्पयेत् ।
त्रिपलान्युद्धृतं ब्रह्मी स्वदंष्ट्राखरकारान्विताः ॥
विड्ङ्गसारवाराहीलौहचूर्णान्विताः समाः ।
हरिद्रादयावल्गुजाद्याधिघाताः सशर्करांशः ॥
कुष्ठेन्द्रयवपाठाश्च क्षौद्रं चूर्णं सुसंयुतम् ।
खदिरासननिम्बानां घनक्वाथेन भावयेत् ॥
सप्तधा पञ्चनिम्बस्य मार्कवस्वरसेन च ।
स्निग्धशुद्धतनुर्धीमान् योजयेच्च शुभे दिने ॥
अधुना तिक्तकविधा खदिरासनवारिणा ।
सेव्यमुष्णाम्बुना वापि कोलदक्षौ पलं पिबेत् ॥
तिक्तकविधा वक्ष्यमाणपञ्चतिक्तघृतेन ॥
जीर्णे च भोजनं कार्य्यं स्निग्धं लघु हितञ्च यत् ॥
विचर्चिकोडुम्बरपुण्डरीक-
कपालदद्रूकिटिमालसादि ।
घृतासविस्फोटविसर्पपामां
कुष्ठप्रकोपं विविधं किलासम् ॥
भगन्दरं क्षीपदवातरक्तं
जड़ान्थ्यगाड़ीव्रणशीर्षरोगान् ।
सर्व्वप्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविषं मूलविषं निहन्ति ॥
स्थूलोदरः सिंहबलोदरश्च
सुश्लिष्टसन्धिर्मधुमेपयोगात् ।
समीपयोगादपि ये दशन्ति
सर्पादयो यान्ति विनाशमाशु ॥
जीवेच्चिरं व्याधिजराविमुक्तः
सुखे रतस्त्रक्समानकान्तिः" ॥
इति पञ्चनिम्बः ॥ ५४ ॥
"अमृतायाः पलशतं दशमूल्याश्च तथा घृतम् ।
पाठामूर्व्वावलातिक्तादार्व्वीगन्धर्व्वहस्तकाः ॥
एषां दशपलान् भागान् विभीतक्याः घृतं हरेत् ।
द्वे घृते च हरीतक्या आमलक्याश्च तथा घृतम् ॥
जलद्रोणद्वये पक्वा अष्टभागावशेषितम् ।
प्रस्थं गुग्गुलुमाहृत्य प्रस्थार्द्धञ्च घृतं पचेत् ॥
पाकसिद्धौ प्रदातव्यं गुड़ूच्याः सत्त्वमेव च ।
पलद्वयं तथा मुण्ड्याः पिप्पल्याश्च पलद्वयम् ॥
ततो मात्रां प्रयुञ्जीत ज्ञात्वा दोषबलाबलम् ।
अष्टादशसु कुष्ठेषु वातरक्तगदेषु च ॥
कामलामामवातञ्च अग्निमान्द्यं भगन्दरम् ।

कुष्ठः

पीनसञ्च प्रतिश्यायं शीघ्रमुदरं तथा ॥
एतान् रोगान्निहन्त्याशु भास्करस्तिमिरं यथा" ।
अमृतागुग्गुलुः । अयं वातरक्ते प्रशस्तः ॥ ५५ ॥
"निम्बामृतात्रपटोलनिदिग्धिकानां
भागान् पृथग्दशपलान् विपचेद्घटेऽपाम्।
अष्टांशशेषितरसेन सुनिश्चितेन
प्रस्थं घृतस्य विपचेत् पिप्पलीभागकल्कैः ॥
पाठाविड़ङ्गसुरदारुगजोपकुल्या-
दिन्द्रारुणागरनिशामिशिवश्यकुष्ठैः ।
तेजोवतीमरिचवत्सकदीप्यकाग्नि-
रोहिण्यरुष्करवचाकणमूलयुक्तैः ॥
मञ्जिष्ठयातिविषया वरया यमान्या
संशुद्धगुग्गुलुपलैरपि पञ्चसंख्यैः ।
तत् सेवितं विधमति प्रबलं समीरं
सन्धिस्थिमज्जगतमप्यथ कुष्ठमीदृक् ॥
नाड़ीव्रणार्बुदभगन्दरगण्डमाला-
जत्रूर्द्धसर्व्वगदगुल्मगुदोत्थमेहान् ।
वक्षोरुचित्रसनपीनसकासशोष-
हृद् पाण्डुरोगगलविद्रधिवातरक्तम्" ॥
इति पञ्चतिक्तघृतगुग्गुलुः ॥ ५६ ॥ * ॥
"श्वेतकरवीरमूलं विषांशुकं साधितं गोमूत्रे।
धर्म्मदलसिध्मपामाविस्फोटक्रिमिकिटिभजित्तैलम्"॥
तिलतैल ४ शेर, गोमूत्र १६ शेर, श्वेतकरवीरमूल ४ पल, विष ४ पल । करवीरतैलम् ॥ ५७ ॥
"मृतस्य क्षार्यसर्पस्य शिरःपुच्छान्ववर्ज्जितम् ।
अन्तर्धूमं घृतं भक्ष्य वागुजीतैलमिश्रितम् ।
एतेन सर्दगादेव गलत्कुष्ठं विनश्यति" ।
इति क्षार्यसर्पतैलम् ॥ ५८ ॥
"सूतकं गन्धकं कुष्ठं सप्तपर्णञ्च चित्रकम् ।
सिन्दूरञ्च रसोनञ्च हरितालमवल्गुजम् ॥
आरग्वधस्य वीजानि जीर्णतार्क्षं मनःशिला ।
प्रत्येकं कर्षमेतेषां कटुतैलं पलाष्टकम् ॥
साधयेत् सूर्य्यतापेना सर्व्वकुष्ठविनाशनम् ॥
श्वित्रमौड्डुम्बरं कच्छूं मांसदद्रिं भगन्दरम् ॥
विचर्चिकाञ्च धामानं वातरक्तं सदारुणम् ।
गम्भीरञ्च तथोत्तानं नाशयेत् यस्य भक्षणात् ॥
कुष्ठराक्षसनामेदं खवर्णकरणं परम् ।
अश्विभ्यां निर्म्मितं ह्येतत् लोकानुग्रहहेतवे" ॥
इति कुष्ठराक्षसतैलम् ॥ ५९ ॥
"सूतं गन्धं शिला तालं काक्षिकैर्मर्दयेद्दिनम् ।
तल्लिप्तवस्त्रवर्त्तीं तां तैलाक्तां ज्वालयेदधः ॥
स्थिते पात्रे पचेत्तैलं गृहीत्वा लेपयेत्ततः ।
कुष्ठस्थानं विशेषेण सर्व्वकुष्ठं हरत्वलम् ॥
इदं कालानलं तैलं वातकुष्ठे महौषधम्" ॥
"एषां समं काक्षिकं सर्व्वेषां द्विगुणं तिलतैलम् ।
कल्कं वस्त्रे संक्षिप्य संशोष्य वर्त्तीं कुर्य्यात् तां तैलाक्तां सन्दंशिकया ज्वालयित्वा उपरि तैलं दत्त्वा ततः पतितं तैलं अधःपात्रे गृह्णीयात् ततः कुष्ठस्थाने दद्यात्" ॥
इति कुष्ठकालानलतैलम् ॥ ६० ॥
"सिन्दूराभ्रतालगैरिकहलाजाजीगदध्यूषकै-
र्हृत्पाषाणरसोनवाणदहनक्षुद्रार्कदुग्धैर्विशा।

राजीगन्धकहिङ्गुभिः परिमितैः श्लक्ष्णा पचेत् सार्षपं
तैलं प्रस्थमितं घृतस्य कुडवं पात्रं तथार्कद्रवम्"।
हृत्वाद्यं मनःशिला।
"गोमूत्रञ्च तथा विनीय सकलं पूतं हृतं रोगिणा
दद्यात् कुष्ठविचर्चिकादिषु भिषक् नान्या तु षड्-
विन्दुकम्"। इति षड्विन्दुतैलम्॥ ६१॥
"सर्व्वकुष्ठे सर्व्वव्रणे सर्व्वत्र गलिते क्षते।
नक्तमालं हरिद्रे द्वे अर्कं तगरमेव च॥
करवीरवचाकुष्ठं आस्फोता रक्तचन्दनम्।
मालती सिन्धुवारञ्च मल्लिका सप्तपर्णकम्॥
एषामर्द्धपलान् भागान् विषस्य द्विपलं तथा।
चतुर्गुणे गवां मूत्रे तैलप्रस्थं विपाचयेत्॥
श्वित्रविस्फोटकिटिमकीटलूताविचर्चिकाः।
कण्डूकच्छुरिकाद्याश्च ये व्रणा विषदूषिताः॥
ते सर्व्वे नाशमायान्ति तमः सूर्य्योदये यथा॥
विषतैलमिदं नाम्ना सर्व्वव्रणविशोधनम्"॥
इति विषतैलम्॥ ६२॥
"सोमराजी हरिद्रे द्वे सर्षपाः कुष्ठमेव च।
करञ्जैड़गजावीजं यवाक्षारवधस्य च॥
विषपचेत् सार्षपं तैलं गाढ़ीदुग्धप्रलायहम्।
अनेनाशु प्रशाम्यन्ति कुष्ठान्यष्टादशैव तु॥
गौलिका पिड़का व्यङ्गा गम्भीरं वातशोणितम्।
कण्डूकच्छुप्रशमनं दद्रुपामानिवारणम्"॥
इति सोमराजीतैलम्॥ ६३॥
"सोमराजीतुलार्द्धाशे यथा दद्रुघ्नस्य च।
गोमूत्रस्य तथा पात्रे कल्कं दत्त्वा विचक्षणः॥
विपचेत् कार्षिकैर्भागैः कटुतैलाढ़कं भिषक्।
चित्रकं लाङ्गलाख्या च नागरं कुष्ठमेव च॥
हरिद्रा नक्तमालञ्च हरितालं मनःशिला।
आस्फोतार्ककरवीरं सप्तपर्णञ्च गोमयम्॥
खदिरो निम्बपत्रञ्च मरिचं कासमर्द्दकम्।
एतानि श्लक्ष्णपिष्टानि कल्कं दत्त्वा विचक्षणः॥
हन्ति सर्व्वाणि कुष्ठानि क्रिमिदुष्टव्रणानि च।'
किटिमं दद्रुजातञ्च गात्रवैवर्ण्यमेव च॥
विश्रीर्णचर्म्ममांसादिदृढ़ीकरणमुत्तमम्।
प्राक्तुरोगं तथा कण्डूं विसर्पं हन्ति दारुणम्।
ये चान्ये त्वगता रोगास्तांस्तु शीघ्रं व्यपोहति"॥
इति बृहत्सोमराजीतैलम्॥ ६४॥
"मरिचाक्षिकाब्दार्कपयोऽम्बारिजटाक्षिरत्।
श्लक्ष्णसविश्राणाक्षक् निश्यायुक्तदारुचन्दनैः॥
कटुतैलात् पचेत् प्रस्थं क्षुद्रैर्विषपलान्वितैः।
सगोमूत्रैस्तदभ्यङ्गाद्दुश्चित्रविनाशनम्॥
सर्व्वेष्वपि च कुष्ठेषु तैलमेतत् प्रशस्यते"॥
इति मरिचाद्यं तैलम्॥ ६५॥
"मरिचं चित्रता दन्ती क्षीरमार्कं श्लक्षदसः।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम्॥
विश्राणा करवीरञ्च हरितालं मनःशिला।
चित्रको लाङ्गलाख्या च विड़ङ्गं चक्रमर्द्दकम्॥
श्रीरीषं कुटजो निम्बः सप्तपर्णः क्षुद्रामृता।
अम्लाको नक्तमालोऽब्दं खदिरं पिप्पली वचा॥
ज्योतिष्मती च पलिका विषस्य द्विपलं भवेत्।
चाढ़कं कटुतैलस्य गोमूत्रञ्च चतुर्गुणम्॥

मृत्पात्रे लौहपात्रे वा अग्निमन्दमिना पचेत्।
यक्ष्मा तैलवरं क्षीतन्मन्दयेत् कुष्ठकान् व्रणान्॥
पामाविचर्चिकादद्रुकण्डूविस्फोटकानि च।
वलयः पलितं छाया नली अर्शं तथैव च॥
अभ्यङ्गेन प्रशाम्यन्ति सौकुमार्य्यञ्च जायते।
प्रथमे वयसि स्त्रीणां यासां नश्यन्ति दीयते॥
परामपि जरां प्राप्य न खलना यान्ति नम्रताम्।
बलीवर्द्दस्तरङ्गो वा गजो वा वायुपीड़ितः॥
त्रिभिरभ्यङ्गनैर्गाढ़ं भवेन्मारुतविक्रमः"॥
कटुतैल १६ शेर, गोमूत्र ६४ शेर, कल्कार्थं
मरिचादीनां प्रत्येकं १ पल, विष २ पल।
इति बृहन्मरिचाद्यं तैलम्॥ ६६॥
"सप्तपर्णत्वचा काली गुड़ूची पिचुमर्द्दकम्।
श्रीरीषञ्च महातिक्ता जया तुम्बी मृगादनी"॥
काली कालिया लता॥
"निशाद्वयपलान् भागान् जलद्रोणे विपाचयेत्।
तैलप्रस्थं समादाय गोमूत्रञ्च चतुर्गुणम्॥
आरग्वधो भृङ्गराजो जयाधुस्तूररास्नयः।
इन्द्राशनाग्निगर्व्वूरं गोमयार्कक्षुद्रीच्छदम्॥
तैलतुल्यं प्रदातव्यं खरसञ्च पृथक् पृथक्।
महाकालवचा ब्राह्मी तुम्बाग्निमन्थपुत्तिका॥
कुचेला कुलका रात्रिमेघनामा च ग्रन्थिका।
सम्याकमर्कक्षीरञ्च कासुन्देश्वरमूलकम्"॥
कासुन्दमूलकं कालकासुन्दामूलम्। कासुन्दः
खरमर्द्दकमिति क्वचित्पाठः तन्मते ईश्वरमूलस्थाने
अपामार्गमूलम्॥
"आखु जिङ्गी महातिक्ता विशाला कृपिपत्रकम्।
पूतिकास्फोत मूर्व्वा च सप्तपर्णं श्रीरीषकम्"॥
कृपिपत्रकं विष्कातिपत्रम्॥
"कुटजं पिचुमर्द्दञ्च महानिम्बं तथैव च।
गुड़ूची चक्ररेखा च सोमराट् चक्रमर्द्दकम्॥
तुम्बुरुभृङ्गबब्बाकन्दकं कटुरोहिणी।
शटीदार्व्वी चिरत् पद्मग्रन्थिकागुरुपुष्करम्॥
कर्पूरं कट्फलं मांसी सुरेशटशठामयम्।
एतेषां कार्षिकैः कल्कैर्नाशा कन्दर्प उच्यते॥
अष्टादशविधं कुष्ठं ग्रन्थिमज्जगतं तथा।
हस्तपादाङ्गुलीसन्धिगलितं सर्व्वसन्धिषु॥
अधिकानि च मांसानि यस्य गात्रे भविष्यति।
नासाकर्णास्यवैकल्यं भेकाकारवपुस्त्वचम्॥
श्वेतं रक्तं तथा कुष्ठं नानावर्णं विपादिकम्।
श्वित्रं बहुविधञ्चैव वातशोणितमेव च॥
कपालं क्रिमिजं कुष्ठं कण्डूदद्रुविचर्चिकाम्।
पामादिस्फोटकादीनि क्रिमिहृद्धिं तथैव च॥
कटीदद्रुं मसूरीञ्च किटिमं रक्तमण्डलम्।
कुष्ठमौड़ुम्बरं पद्मं महापद्मं तथैव च॥
गलगण्डार्व्बुदं हन्याद्गण्डमालां भगन्दरम्।
वातजं पित्तजञ्चैव श्लेष्मजं सान्निपातिकम्॥
एकोल्बणं द्व्युल्बणञ्च कुष्ठं हन्यान्न संशयः"॥
इति कन्दर्पसारतैलम्॥ ६७॥ *॥
"भल्लातकानां पवनोद्धतानां
दन्तच्युदाग्नाच्च यदाढ़कं स्यात्।
तच्चेरकाचूर्णकजैर्विदध्य

प्रक्षालयित्वा विक्षेत्रेत् प्रवाते।
शुल्बं पुनस्तद्विदलीकृतञ्च
ततः पचेदम्बु चतुर्गुणास्थ।
तत्पादशेषं परिपूतशीतम्
क्षीरेण तुल्येन पुनः पचेत्तु॥
तदर्द्धया शर्करया विकीर्णं
ततः खलेगोन्मथितं विधाय।
तत् सप्तरात्रादुपजातवीर्य्यं
सुधारसादप्यधिकत्वमेति॥
प्रातर्विबुद्धः कृतदेवकार्य्यो
मात्राञ्च खादेत् स्वशरीरयोग्याम्।
न चान्नपाने परिहार्य्यमस्ति
न चातपे चाध्वनि मैथुने च॥
यथेष्टचेष्टो विहितोपयोगा-
द्भवेन्नरः कान्तनराग्निगौरः।
अनन्यमेधा नरसिंहतेजा
हृषीन्द्रियोऽव्याहतबुद्धिसत्त्वः॥
दन्ताश्च शीर्य्यन्ति पुनश्चलन्ति
केशाश्च शुक्लाः पुनरेव दिव्याः।
नीलाञ्जनाभिप्रतिमा भवन्ति
त्वचो विवर्णाः पुनरेव दिव्याः॥
विश्रीर्णकर्णाकुलिनासिकोऽपि
क्रिम्यर्दितो भिन्नगलोऽपि कुष्ठी।
सोऽपि क्रमादङ्गुरितायशाख-
स्तरुर्यथा भाति नभोऽम्बुसिक्तः॥
उद्वान् मयूरान् जयति स्वरेण
बलेन नागस्तुरगो जवेन।
रसायनस्यास्य नरः प्रसादा-
द्बृहस्पतेरप्यधिकोऽपि बुद्ध्या॥
यद्यान् विशालान् पुनरक्षिदोषान्
सङ्क्षाति शीघ्रं न च नश्यते तु।
कुर्व्वन्निमं कल्पमनल्पबुद्धि-
र्जीवेन्नरो वर्षशतानि पञ्च॥
राजा ह्ययं सर्व्वरसायनानां
चकार योगं भगवानगस्त्यः"॥
इति अमृतभल्लातकम्॥ ६८॥
"निम्बं गोपाखा कक्षी जायन्ती त्रिफला घनम्।
पथ्टारग्वधजानन्तावचाखदिरचन्दनम्"॥
अरग्वधं शाकुचवीजम्।
"पाठा शुण्ठी शटी भार्गी वासा भूनिम्बवत्सकम्।
श्यामेन्द्रवारुणी मूर्व्वा विड़ङ्गेन्द्रयवानलम्॥
हस्तिकर्णाम्लता द्वेका पटोलं रजनीद्वयम्।
कर्णारग्वधसप्ताङ्गज्यावेल्लोवटाफलम्"॥
द्वेका महानिम्बम्। कर्णारग्वधः शोणालिमज्ञ
मज्जा।
"भूकन्दं दृषपर्णञ्च जिङ्गी पद्माटमूलकी।
विश्वक्सेना च कैटर्य्यं श्वरपुङ्खा क्षीरकाकुली॥
एषां द्विपलिकान् भागान् जलद्रोणे विपाचयेत्।
अष्टभागावशेषन्तु कषायमवतारयेत्॥
भल्लातकसहस्राणि त्रीणि क्षिप्तान्यत्र तस्मिंश्च।
चतुर्भागावशेषन्तु कषायमवतारयेत्॥
तौ कषायौ समादाय वस्त्रपूतौ च कारयेत्।

कुष्ठः

गुडस्य तु तुला ताभ्यां कषायं विपचेत् भिषक् ।
भल्लातकसहस्राणां मज्जानं तत्र दापयेत् ।
त्रिकटुत्रिफलासुस्तसैन्धवानां पलं पलम् ॥
दीपकस्य पलद्वैव धातुर्ज्ञातं पलांशिकम् ।
संचूर्ण्य प्रक्षिपेदत्र कन्दकल्कं चतुःपलम् ॥
स्निग्धभाण्डे विनिक्षिप्य स्थापयेत् कुशलो भिषक् ।
महाभल्लातको ह्येष महादेवेन निर्म्मितः ॥
जगतस्तु हितार्थाय जयेच्छीघ्रं न संशयः ।
स्निग्धमौद्गरं दक्षमृत्यञ्जिकं सकाकजम् ॥
पुष्करीकल्कं चर्म्माख्यं विस्फोटं मण्डलं तथा ।
कण्डूकपालं कण्डूश्च यामानं सविषादिकम् ॥
वातरक्तमुदावर्त्तं पाण्डुरोगं व्रणक्रिमीन् ।
अर्शांसि षट्प्रकाराणि कासं श्वासं भगन्दरम् ॥
सदाभ्यासेन पलितमामवातं सुदुस्तरम् ।
अनुपाने प्रयोक्तव्यं क्षिप्राक्षायं पयोऽथवा ।
भोजने च सदा भोज्यमुष्णाम्भं विधेयतः" ॥

इति महाभल्लातकगुडः ॥ ६६ ॥

"ऊताग्नमुखसंभूतं पलमेकं रसस्य वै ।
पलं लौहस्य ताम्रस्य पलं भल्लातकस्य च ॥
गन्धकश्च पलैकमभ्रकस्य च शुभ्रयोः ।
हरीतकीविभीतक्योश्चूर्णं कार्षद्वयं द्वयोः ॥
अष्टमाषाधिकं तत्र धात्र्याः पाचितजानि षट् ।
घृतं द्वादशगुणं लोहात् दार्विग्रन्थिपलाजलम् ॥
एवं ज्ञात्वा पचेत् पात्रे लौहे च विधिपूर्व्वकम् ।
पाकमेतस्य जानीयात् कुशलो लोहपाकविद् ॥
विबुद्धः प्रातरुत्थाय शुचिर्देवद्विजार्चकः ।
रक्तिकादिक्रमेणैव घृतभ्रामरमर्द्दितम् ॥
लौहे लौहस्य दर्व्वेण कुर्य्यादेतन्नशायनम् ।
अनुपानञ्च कुर्व्वीत नारिकेलोदकं पयः ॥
सर्व्वकुष्ठहरं श्रेष्ठं वलीपलितनाशनम् ।
पाण्डुमेहामवातघ्नं वातरक्तक्षयापहम् ॥
त्रिमिग्रोथाम्लरोमूलदुर्नामवातरोगनुत् ।
क्षयं हन्ति महाश्वासमत्यर्थं शुक्रवर्द्धनम् ।
अग्निसन्दीपनं हृद्यं कान्त्यायुर्बलदृद्धिकृत् ।
विवर्ण्य शाकाम्लमपि स्त्रियश्च
सेव्यो रसो जाङ्गलजाविकानाम् ।
शाल्योदनं मस्तिकमाढ्यसूद-
क्षौद्रं गुडः क्षीरमिह क्रियायाम् ।
शालिश्च गुर्व्वादिदृतत्वरघ्न-
स्त्रिफलाजतुक्षौद्रयुतं पयश्च ।
सर्पिर्युतं भक्षयतो विहङ्गान्
प्रपूर्य्यते दुर्ब्बलदेहधातुः ॥
शुक्लस्य पक्षस्य सिते तु पक्षे
त्रिपञ्चरात्रेण यथा शृणुष्व" ॥

पाकलक्षणं यथा,—

"वक्त्रे निष्पीड़ितं सूक्ष्मे सूत्रतन्त्रौ घने दृढ़े ।
समुद्गं जायते यत्नात् न निःसरति सन्धिभिः ।
न च शब्दायते वह्नौ तदा सिद्धिं विनिर्द्दिशेत्" ॥

इति अमृताद्यूरजोघृतम् ॥ ७० ॥

"गन्धकेन हृतं ताम्रं दग्धभागं समुद्धरेत् ।
उभयं पञ्चभागं स्यादमृतस्य विभागिकम् ॥
दातव्यं कुष्ठिने सम्यगनुपानस्य योगतः ।

कुष्ठः

गलिते स्फुटिते चैव विपुले मण्डले तथा ॥
विपर्च्चिकादद्रुयामाश्चर्व्वकुष्ठप्रशान्तये" ॥

इति उदयभास्करः ॥ ७१ ॥

"तालकं वंशपत्राख्यं कुम्भाग्रसलिले क्षिपेत् ।
सप्तधा वा त्रिधा वापि दग्धास्त्रेण तथैव च ॥
शोधयित्वा पुनः शुल्वं चूर्णयेत् तद्रजोन्नतिः ।
ततः शरावके यत्ने स्थापयेत् कुशलो भिषक् ॥
वदरीपल्लवोत्थेन लेपनं कारयेत् ततः ।
अदग्धामधःपात्रं तावच्छ्वाना प्रदीयते ॥
खाङ्गशीतं समुद्धृत्य माक्षिकाभो भवेद्रसः ।
हृतचौत्रेण संमर्द्द खादयेन्नस्तिकादयम् ।
संपूज्य देवदेवेशं कुष्ठरोगादिमुच्यते ।
स्फुटितं गलितं कुष्ठं वातरक्तं भगन्दरम् ॥
नाड़ीव्रणं व्रणं दुष्टमुपदंशं विपर्च्चिकाम् । [ज्ञान् ।
नासास्यसम्भवान् रोगान् क्षतान् हन्यात् सदारु-
पुष्करीकल्कं चर्म्माख्यं विस्फोटं मण्डलं तथा" ॥

इति रत्नमालिकम् ॥ ७२ ॥

"कुम्भाग्रचित्रफलातैलकन्याकाङ्क्षिकभावितम् ।
तालकं तुल्यगन्धं स्यादर्द्धपारदमर्द्दितम् ॥
अजाक्षीरेण निम्बूककन्यातोयैर्दिनत्रयम् ।
प्रत्येकं भावयेच्छुल्वं चक्रिकाकारतां गतम् ॥
विपचेत् हस्तिकामध्ये पलाग्रक्षारमध्यगम् ।
यामान् द्वादश ग्रीतेऽस्मिन् प्रयोक्तव्यं रक्तिकादयम् ।
हन्यस्तादश कुष्ठानि रोमविध्वंसनं तथा ।
द्विविधं वातरक्तञ्च नाड़ीदुष्टव्रणानि च" ॥

इति तालकेश्वरः ॥ ७३ ॥

"दद्रुघ्नवाताङ्घ्रिरसं दत्त्वा तालं सचूर्णितम् ।
पुनः पुनश्च संमर्द्द शुल्वं क्षात्वा पुटे दहेत्" ॥
वाताङ्घ्रिरसं शरपुङ्खपत्ररसम् ॥
दृढ़ाख्यां हृतं क्षारं पाताग्रक्षाण्यपर्य्यधः ।
ततो ज्वाला प्रदातव्या दिनरात्रे मृतं भवेत् ॥
शुक्लवर्णो यदा च स्यादग्नौ दत्ते न धूमकम् ।
तदा ज्ञातं मृतं तालं सर्व्वकुष्ठविनाशनम् ॥
गलत् कुष्ठं वातरक्तं ताम्रवर्णञ्च मण्डलम् ।
ग्रीतपित्तमहादद्रुकुच्छ्वन्दरविनाशनम् ।
पथ्यं मसूरचणकं मुद्गसूपं यथेच्छया" ॥

इति तालकेश्वरः ॥ ७४ ॥ अतिदृढ़पक्वोऽयम् ।

"संमर्द्द तालकं शुल्वं वंशपत्राख्यमुचकैः ।
कुम्भाग्रक्षीरे सम्भाव्य त्रिदिनं शोधयेत् पुनः ॥
हृतकन्याग्रवैर्भूयो भावयेच्च दिनत्रयम् ।
संमर्द्द काङ्क्षिकेणैव दग्धास्त्रेण विमर्द्दयेत् ॥
संमर्द्द चूर्णसलिले रसे पौनर्नवे पुनः ।
त्रिदिनं मर्द्दयित्वा तु कारयेत् खटिकाकृतिम् ॥
स्थाल्यां दृढ़तरायान्तु पलाग्रक्षारसञ्चयम् ।
उपर्य्यधस्तालकस्य क्षारं दत्त्वा शरावकैः ॥
पिधाय लेपयेत् यत्नात् पूरयेत् क्षारसञ्चयम् ।
पुनरर्द्धं शरावेण लेपयेत्तत् दृढ़ं ततः ॥
दाचिंग्रदयामपर्य्यन्तं वह्निज्वाला प्रदीयते ।
एवं सिद्धेन तालेन गन्धतुल्येन मेलयेत् ॥
दयोल्लुल्यं जीर्णताम्रं वालुकायन्त्रगं पचेत् ।
अयं तालेश्वरो नाम रसः परमदुर्लभः ॥
हन्यस्तादश कुष्ठानि वातग्रोत्थितनाशनः ।

कुष्ठारिः

रक्तमण्डलमाशुग्रं स्फुटितं गलितं तथा ॥
बहुरूपं सर्व्वजातं नाशयेदविकल्पतः ।
दुष्टव्रणञ्च वीसर्पं त्वग्दोषञ्च विनाशयेत् ॥
दृष्टो वारसहस्रञ्च रोगवारणकेशरी" ॥

इति महातालकेश्वरः ॥ ७५ ॥

"कुम्भाग्रचित्रफलातैलकन्याकाङ्क्षिकभावितम् ।
तालकं तुल्यगन्धं स्यादर्द्धपारदमर्द्दितम् ॥
अजाक्षीरेण निम्बूककन्यातोयैर्दिनत्रयम् ।
प्रत्येकं भावयेच्छुल्वं चक्रिकाकारतां गतम् ॥
विपचेत् हस्तिकामध्ये पलाग्रक्षारमध्यगम् ।
यामान् द्वादशग्रीतेऽस्मिन् प्रयोक्तव्यं रक्तिकादयम् ।
हन्यस्तादश कुष्ठानि रोमविध्वंसनादिकम्" ॥

इति तालकेश्वरः ॥ ७६ ॥

इति गोविन्दविशारदकृतभैषज्यरत्नावल्यां कुष्ठचिकित्सा समाप्ता ॥

कुष्ठकेतुः, पुं, (कुष्ठस्य नाशकः केतुरिव ।) भूम्याऽऽमलकः । इति राजनिर्घण्टः ॥

कुष्ठगन्धि, स्त्री, (कुष्ठस्येव गन्धोऽस्य । समासे इच् ।) एलवालुकम् । इति राजनिर्घण्टः ॥

कुष्ठघ्नः, पुं, (कुष्ठं हन्ति इति । हन् + टक् ।) हिताबली । इति राजनिर्घण्टः ॥

कुष्ठघ्नी, स्त्री, (कुष्ठघ्न + स्त्रियां टित्वात् ङीप् ।) काकोदुम्बरिका । इति राजनिर्घण्टः ॥
(वाकुची । अस्याः पर्य्याया यथा ।
"अवग्रुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
अग्निलेखा शशिलेखा सोमामृता बलीति च ।
सोमवल्ली कालमेघी कुष्ठघ्नी च प्रकीर्त्तिता" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अस्या व्यवहारो यथा—
"कुटजाग्निनिम्बतरुखदिरासनसप्तपर्णनिर्यूहे ।
सिद्धा मधु-घृतयुक्ताः कुष्ठघ्नीर्भक्षयेदभयाः" ॥
इति वामटे चिकित्सास्थाने १९ अध्याये ॥)

कुष्ठनाशनः, पुं, (कुष्ठं नाशयतीति । नश् + णिच् + ल्युः ।) वाराहीकन्दः । गौरसर्षपः । इति राजनिर्घण्टः । क्षीरीवृक्षः । इति रत्नमाला ॥

कुष्ठनाशिनी, स्त्री, (कुष्ठं नाशयतीति । नश् + णिच् + णिनिः । स्त्रियां नान्तत्वात् ङीप् ।) सोमराजिः । इति रत्नमाला ॥

कुष्ठं, क्ली, (कु कुत्सितं स्थानम् । अन्येष्वादित्वात् षत्वम् ।) कुत्सितस्थानम् । इति संक्षिप्तसारव्याकरणम् ॥

कुष्ठसूदनः, पुं, (कुष्ठं सूदयति नाशयतीति । सूदि + ल्युः ।) आरग्वधः । इति राजनिर्घण्टः ॥
(आरग्वधशब्दे गुणपर्य्याया अस्य ज्ञातव्याः ॥)

कुष्ठहन्ता, [ट्] पुं, (कुष्ठं हन्ति इति । कुष्ठ + हन् + टच् ।) इक्षिकन्दः । इति राजनिर्घण्टः ॥

कुष्ठहन्त्री, स्त्री, (कुष्ठहन्तृ + स्त्रियां ऋदन्तात् ङीप् ।) वाकुची । इति राजनिर्घण्टः । हाकुच् इति भाषा ॥

कुष्ठहृत्, पुं, (कुष्ठं हरतीति । कुष्ठ + हृ + क्विप् तुगागमश्च ।) खदिरवृक्षः । इति चिकित्साङ्गैषधः ॥

कुष्ठारिः, पुं, (कुष्ठस्य अरिः शत्रुः नाशक इत्यर्थः ।)

विट्खदिरः। इति शब्दचन्द्रिका॥ पटोलः। आदित्यपत्रः। खदिरः। गन्धकः। इति राजनिर्घण्टः॥

कुष्ठी, [न्] त्रि, (कुष्ठः अस्यास्तीति। कुष्ठ+इनिः।) कुष्ठरोगयुक्तः। (यथा, मनुः। ३। ७। "क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च"॥)

कुष्मलं, क्ली, (कुष्+"कुटिकुषिभ्यां कमलन्"। उणां ४। १८६। इति कमलन्।) छेदनम्। विकशितम्। इत्युणादिकोषः॥

कुष्माण्डः, पुं स्त्री, शिवस्य गणदेवताभेदः। (यथा, विष्णुपुराणे। १। १२। १३।

"कुष्माण्डा विविधै रूपैः सहेन्द्रेण महामुने!। समाधिभङ्गमत्यन्तं यतन्ते कर्त्तुमातुराः"॥)

भूतविशेषः इति मेदिनी॥ (कुष्माण्डाकारत्वात् शिवगणभूतयोस्तथात्वम्॥ कु ईषत् उष्मा अण्डेषु बीजेषु यस्य।) वृहत्फलतताविशेषः। कुम्ड़ा इति कोहड़ा इति च भाषा। तत्पर्य्यायः। इक्षावासः २ तिमिषः ३ ग्राम्यकर्कटी ४। इति त्रिकाण्डशेषः॥ कुष्माण्डकः ५ कर्कारुः ६। इत्यमरः॥ पुष्पफलः ७। इति रत्नमाला॥ कुष्माण्डी ८ कर्कोटिका ९ कुम्भाण्डी १० वृहत्फला ११ सुफला १२ कुक्षफला १३ नागपुष्पफला १४ सुनी १५ कूष्माण्डः १६ शिखिवर्द्धकः १७। इति शब्दरत्नावली॥ कूष्माण्डकः १८। इत्यमरटीका॥

अपि च।

"कुष्माण्डं स्यात् पुष्पफलं पीतपुष्पं वृहत्फलम्। कुष्माण्डं वृंहणं वृष्यं गुरुपित्तानिलापहम्॥ बालं पित्तापहं प्रोक्तं मध्यमं कफकारकम्। वृद्धं नातिहिमं स्वादु सक्षारं दीपनं लघु॥ वस्तिशुद्धिकरं चेतोरोगहृत् सर्व्वदोषजित्"॥*॥

अथ कोहड़ी।

"कुष्माण्डी तु भवेत् लघ्वी कर्कारुरपि कीर्त्तिता। कर्कारुर्ग्राहिणी प्रोक्ता रक्तपित्तहरा गुरुः। पक्वा तिक्तानिलजननी सक्षारा कफवातनुत्"॥

इति भावप्रकाशः॥ अस्य फलगुणाः। मूत्राघातप्रमेहहृल्लासशुक्रौजोनाशित्वम्। विण्मूत्रश्लेष्मत्वम्। दृष्ट्यार्त्तिश्रमनत्वम्। जीर्णज्वरपुष्टिप्रदत्वम्। शुक्रवृद्धिकारित्वम्। स्वादुतरत्वम्। अरोचकहरत्वम्। बलकारित्वम्। पित्तापहत्वम्। वल्लीफलानां मध्ये प्रवरत्वञ्च। इति राजनिर्घण्टः॥ तस्य बालफलगुणाः। पित्तहरत्वम्। मध्यमफलगुणौ। कफकारित्वम्। अतिगुरुपाकित्वम्॥ पक्वफलगुणाः। लघुपाकित्वम्। उष्णत्वम्। क्षाररसत्वम्। अग्निदीपनत्वम्। वस्तिशोधनत्वम्। सर्व्वदोषनाशित्वम्। हृद्यत्वम्। चित्तविकारिणः पथ्यत्वञ्च॥ अस्य नाड़िकागुणाः। क्षाररसत्वम्। मधुरत्वम्। गुरुत्वम्। रूक्षत्वम्। रुचिकारित्वम्। वायुकफाग्निरोगकरत्वम्। रोगनाशित्वञ्च॥ अस्य मज्जगुणाः। शुक्रकारित्वम्। पित्तनाशित्वम्। वस्तिशोधनत्वञ्च। इति राजवल्लभः॥

कुष्माण्डकः, पुं, (कुष्माण्ड+स्वार्थे कन्।) कुष्माण्डः। इत्यमरः। २। ४। १५५॥ (यथा, भावप्रकाशे।

"घृते तप्ते विनिःक्षिप्य खण्डान् कुष्माण्डसम्भवान्। वार्त्ताकुविधिना कुर्य्यात् प्रलेहतलनादिकम्॥ वेसवारास्ततक्रेण घृते तलनपूर्ब्बकम्। कुष्माण्डकं पक्वं सिद्धं विदुः सुस्वादु सुन्दरम्"॥

नागविशेषः। यथा, महाभारते। १। २५। ११। "नागः शङ्खमुखश्चैव तथा कुष्माण्डकोऽपरः"॥)

कुष्माण्डी, स्त्री, (कुष्माण्ड+स्त्रियां जातित्वात् ङीष्।) उमा। (मसिना।) ओषधी। इति हेमचन्द्रः॥ कर्कारुः। इति राजनिर्घण्टः॥ यागशिरायाविशेषः। इति शब्दरत्नावली॥

कुस इ कि भासने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भां-परं-अकं-सेट्-इदित्।) पद्ममञ्जरी। इ कुंसयते। किं कुंसयति कुंसति। भासनं दीप्तिः। इति दुर्गादासः॥

कुस य इर् श्लिषि। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्।) य, कुस्यति बाला कान्तम्। इर् अकुसत् अकोसीत्। अस्मात् पृषादित्वान्नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

कुसलं, क्ली, (कुस्+कलच्।) कुशूलम्। इत्यमरटीका॥

कुसितः, पुं, (कुस+"कुसेरुभोभेदेताः"। उणां ४। १०६। इति इतः।) जनपदः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कुसिदायी, स्त्री, (स्त्रीलिङ्गे "वृषाकप्यग्निकुसितकुसिदानामुदात्तः"। ४। १। १७। इति प्रकृतेरैकारादेशो ङीष् च।) कुसीदपत्नी। इति जटाधरः॥

कुसिम्बी, स्त्री, (कौ पृथिव्यां शिम्बीति ख्याता। पृषोदरात् सः।) शिम्बी। इति राजनिर्घण्टः॥ ("कुसिम्बिवल्लीप्रभवास्तु शिम्बाः"॥ इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

कुसीदं, क्ली, (कुस्+"कुसेरुभोभेदेताः" उणां। ४ १०६। इति ईदप्रत्ययः। इह सूत्रे द्वितीयप्रत्ययो वृक्षादिर्दीर्घादिश्चेति तन्त्रेणोपात्तः। वृषाकप्यग्नीति सूत्रे वृक्ष एवेति वृत्तिकारहरदत्तादयः। यद्वा कुत्सितं निन्द्यरूपवृद्धिदानेनेत्यर्थः सीदति-अधोमर्यो यत्र। पृषोदरात् साधुः। यथा वृहत्स्यामुलौ "कुत्सितात् सीदतश्चैव निर्विशङ्कैः प्रगृह्यते। चतुर्गुणं वाऽष्टगुणं कुसीदाख्यमुशन्तताः"॥) ऋणदानजीविका। वृद्धाजीवनम्। सुद् वाड़ि देओया इत्यादि भाषा। तत्पर्य्यायः। अर्थप्रयोगः २ वृद्धिजीविका ३। इत्यमरः। २। ९। ४॥ यथा,—

"कुसीदक्षत्रियाविप्यं प्रकुर्व्वीतास्वयंकृतम्। आपत्काले स्वयं कुर्व्वन्नैनसा युज्यते द्विजः॥ बहवो वर्त्तनोपाया ऋषिभिः परिकीर्त्तिताः। सर्व्वेषामपि चैवेषां कुसीदमधिकं विदुः॥ अनाख्या राजभयान्मूषिकाद्यैरपद्रवैः। क्षय्यादिके भवेद्बाधा सा कुसीदे न विद्यते॥ शुक्लपक्षे तथा कृष्णे रजन्यां दिवसेऽपि वा। उष्णे वर्षति शीते वा वृद्धिर्नं न निवर्त्तते॥ देशं गतानां या वृद्धिर्नानापण्योपजीविनाम्। कुसीदं सर्व्वतः सम्यक् संस्मृतस्यैव जायते॥

लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत्। ते वृप्तास्तस्य तद्दोषं शमयन्ति न संशयः॥ वणिक् कुसीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम्। क्षीरवृक्षोऽन्नपानानि यानशय्यासनानि च॥ पशुभ्यो विंशतिं दत्त्वा पशुस्वर्णादिकं शतम्। पादेनायस्य पारक्यं कुर्य्यात् सञ्चयमात्मवान्॥ अर्द्धेन चात्मभरणं नित्यनैमित्तिकान्वितम्। पादञ्च प्रार्थमायस्य मूलभूतं विवर्द्धयेत्॥ विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः कृषिः। वृत्तिर्भेक्षं कुसीदञ्च दश जीवनहेतवः"॥

इति गारुड़े २१५ अध्यायः॥*॥ गोतमः।

"क्षत्रियोरक्तवाणिज्यश्लाघयं कृतं कुसीदञ्चेति। कुसीदस्य पृथक् ग्रहणं स्वयंकृतस्याभ्यनुज्ञार्थम्"॥ कुसीदं वृद्धिकर्म्मेति प्रदेशान्तरेऽभिधानात् इति कल्पतरुः॥ वृहस्पतिः।

"कुसीदं क्षत्रियाविप्यं प्रकुर्व्वीतास्वयं कृतम्। आपत्काले स्वयं कुर्व्वन् नैनसा युज्यते द्विजः॥ लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव भोजयेत्। ते वृप्तास्तस्य तं दोषं शमयन्ति न संशयः॥ वणिक् कुसीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम्। क्षीरवृक्षोऽन्नपानानि यानशय्यासनानि च॥ पशुभ्यो विंशकं दत्त्वा पशुस्वर्णादिकं शतम्॥ वणिक् कुसीद्यदोषः स्यात् ब्राह्मणानाञ्च पूजनात्। राज्ञे दत्त्वा तु षड्भागं देवतानाञ्च विंशकम्॥ विंशद्भागञ्च विप्राणां क्षपिं कृत्वा न दोषभाक्"॥

तथा, मनुः।

"अशीतिभागं गृह्णीयात् मासाद्वार्द्धुषिकः शतात्। द्विकं शतं वा गृह्णीयात् सतां धर्म्ममनुस्मरन्॥ द्विकं शतस्य गृह्णानो न भवत्यर्थकिल्बिषी। शतकार्षापणे अशीतिभागं विंशतिं पणान्"॥

द्विकं पुराणोदयम्। एवंविधनियममतिक्रम्य अनापदि स्वयमन्यद्वारा वा यः खाच्छन्द्येन व्यवहरति तस्यैव प्रायश्चित्तम्। आपदि तु स्वयंकरणनियमातिक्रमे च न दोषः। इति प्रायश्चित्तविवेकः। इत्याह्निकाचारतत्त्वम्॥ कुसीदिके त्रि। इति मेदिनी॥

कुसीदायी, स्त्री, (कुसीदः कुसीदजीवी तस्य पत्नी। मुग्धबोधमते ईप् ऐङ्च। पाणिन्यादिमते तु कुसितकुसिदशब्दाभ्यां वृक्षमध्याभ्यामेव ङीप् ऐच इति विशेषः। तदा "वृषाकप्यग्निकुसितकुसिदानामुदात्तः"। ४। १ ३०। इति प्रकृतेरैकारादेशो ङीष् च।) कुसीदपत्नी। इति जटाधरः॥

कुसीदिकः, त्रि, (कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत् प्रयच्छति। "कुसीददशैकादशात् ठन्ठञौ"। ४। ४। २१। इति ठन्।) वृद्धिजीवी। तत्पर्य्यायः। वार्द्धुषिकः २ वृद्ध्याजीवः ३ वार्द्धुषिः ४। इत्यमरः। २। ९। ५॥ कुसीदः ५। इति शब्दरत्नावली॥ कुसीदी ६। यथा, आह्निकतत्त्वे॥

"वणिक् कुसीद्यदोषः स्यात् ब्राह्मणानाञ्च पूजनात्"॥

कुसुमं, क्ली, ("कुसेरुभोभेदेताः"। उणां ४। १०६। इति उमः। निपातनात् गुणाभावः।) पुष्पम्। (यथा; ऋतुसंहारे वसन्तवर्णने ४।

"वापीजलानां मणिमेखलानां
मृगाङ्कभासां प्रमदाजनानां।
चूतद्रुमाणां कुसुमानतानां
ददाति सौरभ्यमयं वसन्तः" ॥

पत्रकुसुमविशेषाणां द्रव्यान्तरसंयोजनादिसूचकत्वं दर्शितं यथा सुश्रुतसंहितायां २६ अध्याये।
"पत्रकुसुमसम्भवृद्धिं वनस्पतीनां विलोक्य विज्ञेयम्। सुखभक्ष्यं द्रव्याणां निष्पत्तिस्त्वापि मूलानाम्" ॥
केन कस्य वृद्धिर्ज्ञेया तदाह।
"मूलेन कन्दमूलोरुक्षाणोकेन रक्तमूलिश्च।
पाण्डूकः क्षीरिकया नीलाशोकेन मसूरकः ॥
न्यग्रोधेन तु यवकस्त्विन्दुकवृक्षा च यष्टिको भवति।
अश्वत्थेन ज्ञेया निष्पत्तिः सर्व्वमूलानाम् ॥
जम्बूभिस्तिलमाषाः श्रिरीषवृक्षा च कङ्गुनिष्पत्तिः।
गोधूमाश्च मधुकैर्यवबदरैः सप्तपर्णेन ॥
अतिमुक्तककुन्दाभ्यां कर्पासं सर्षपान् वदेदसनैः।
बदरीभिश्च कुलत्थांश्चिरविल्वेनादिशेन्मुद्गान् ॥
अतसीवेतसपुष्पैः पलाशकुसुमैश्च कोद्रवा ज्ञेयाः।
तिलकेन शङ्खमौक्तिकरजतान्यथ चेक्षुदेन मृगाः ॥
करिणश्च हस्तिकर्णैः शादेया वाजिनोऽश्वकर्णेन।
गावश्च पाटलाभिः कदलीभिरजाविकं भवति ॥
चम्पककुसुमैः कनकं विद्रुमसम्भव बन्धजीवेन।
कुरुवकवृक्षा वज्रं वैदूर्य्यं नन्दिकावर्त्तैः ॥
विद्याच्च सिन्धुवारेण मौक्तिकं कुङ्कुमं कुसुम्भेन।
रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः ॥
श्वेतो सुवर्णपुष्पैः पद्मैर्विप्राः पुरोहिताः कुसुदैः।
सौगन्धिकेन वणिजः कैवर्त्तः शिरीषपरिवृद्धिः ॥
आम्रैः क्षेमं भल्लातकैर्भयं पीलुभिस्तथारोग्यम्।
खदिरशमीभ्यां दुर्भिक्षमर्জ্জुनैः शोभना वृद्धिः ॥
पिचुमर्दनागकुसुमैः सम्भिक्षमधमारतः कपित्थेन।
निचुलेनावृष्टिभयं व्याधिभयं भवति कुटजेन ॥
दूर्व्वाकुशकुसुमाभ्यां भिक्षुर्वक्रिश्च कोविदारेण।
श्यामालताभिवृद्धा बन्धको वृद्धिमायान्ति" ॥) पद्मम्। क्षीरजः। (यथा, ज्योतिषशास्त्रे।
"यदा नार्य्याः पितुर्गेहे कुसुमस्खलनसम्भवः" ॥)
नेत्ररोगविशेषः। इति मेदिनी ॥

कुसुमपुरं, क्ली, (कुसुमाख्यं पुरम्।) पुरविशेषः। पाटना इति ख्यातम्। तत्पर्य्यायः। पाटलिपुत्रम् २। इति हेमचन्द्रः ॥ (यथा, मुद्राराक्षसे २य अङ्के। "सखे! विराधगुप्त! वर्त्तयेदानीं कुसुमपुरवृत्तान्तज्ञेयं अपि क्षमन्ते कुसुमपुरनिवासिनोऽस्मदुपजापं चन्द्रगुप्तप्रकृतयः" ॥)

कुसुममध्यं, क्ली, (कुसुमं मध्ये अभ्यन्तरे यस्य।) वृक्षविशेषः। इति शब्दचन्द्रिका। घाजिता गाछ इति भाषा ॥

कुसुमाञ्जनं, क्ली, (कुसुमाकारमञ्जनं प्राकृपार्थिवादिवत् समासः।) कुसुमाकाररीतिमलसम्भवमञ्जनम्। तत्पर्य्यायः। पौष्पकम् २ रीतिपुष्पम् ३ पुष्पकेतु ४। इत्यमरः। २। ६। १०१। राजनिर्घण्टोक्तगुणपर्य्यायौ पुष्पाञ्जनशब्दे द्रष्टव्यौ ॥

कुसुमात्मकं, क्ली, (कुसुममेवात्मा स्वरूपं यस्य। कप्।) कुङ्कुमम्। इति हारावली ॥

कुसुमाधिपः, पुं, (कुसुमेषु कुसुमप्रधानवृक्षेषु अधिपः श्रेष्ठः।) चम्पकवृक्षः। इति शब्दरत्नावली ॥ (चम्पकशब्दे ऽस्य विवृतिर्व्याख्येया ॥)

कुसुमाधिराट्, [ज्] पुं, (कुसुमेषु कुसुमप्रधानवृक्षेषु अधिराजते दूरव्याप्तिसुगन्धित्वात्। अधि + राज् + क्विप्।) चम्पकवृक्षः। इति त्रिकाण्डशेषः ॥

कुसुमायुधः, पुं, (कुसुमानि आयुधानि अस्त्राणि अस्य।) कामदेवः। इति शब्दरत्नावली ॥ (यथा, शाकुन्तले ३य अङ्के।
"भगवन् मन्मथ! कुतस्ते कुसुमायुधस्य सतस्तेजस्त्वमेतत्" ॥ तथा, कुमारे च। ४। ४०।
"कुसुमायुधपत्नि! दुर्लभ-
स्तव भर्त्ता न चिराद्भविष्यति" ॥ इति ॥)

कुसुमाजः, पुं, (कुसुमवत् शोभनीयं द्रव्यादिकं आजाति सम्यक् अगोचरेणैव गच्छति। आ + जा + कः।) चौरः। इति हारावली ॥

कुसुमासवं, क्ली, (कुसुमानां तत्रसानां आसवम् मद्यम्।) मधु। इति राजनिर्घण्टः ॥

कुसुमेषुः, पुं, (कुसुमानि इषवो बाणा यस्य।) कामदेवः। इत्यमरः। १। १। २७ ॥ (यथा, माघे। ८। ७०।
"स्वच्छाम्भः स्नपनविधौ तमङ्गमौक्ष
स्ताम्बूलद्युतिविशदो विलासिनीनाम्।
वासश्च प्रतनु विविक्तमस्विनीया-
नाकल्पो यदि कुसुमेषुणा न शून्यः" ॥)

कुसुम्भं, क्ली, (कौ पृथिव्यां सुम्भति शोभते दीप्तिं प्राप्नोतीत्यर्थः। कु + सुभि + अच् इदित्वात् नुम्।) स्वर्णम्। इति मेदिनी ॥ पुष्पविशेषः। कुसुमफुल इति भाषा ॥ (यथा, ऋतुसंहारे वसन्तवर्णने ६।
"कुसुम्भरागारुणितैर्दुकूलै
र्नितम्बबिम्बानि विलासिनीनाम्।
तन्वंशुकैः कुङ्कुमरागगौरैः
अलङ्क्रियन्ते स्तनमण्डलानि" ॥)
तत्पर्य्यायः। कमलोत्तमम् २ वह्निशिखम् ३ महारजनम् ४। इत्यमरः। २। ६। १०६ ॥ पावकम् ५ पीतम् ६ पद्मोत्तरम् ७ रक्तम् ८ लोहितम् ९ वस्त्ररञ्जनम् १० अग्निशिखम् ११। अस्य शाकगुणाः। मधुरत्वम्। कटुत्वम्। उष्णत्वम्। विष्मूत्रदोषमदनाग्नित्वम्। दृष्टिप्रसादनत्वम्। रुचिप्रदत्वम्। अग्निदीप्तिकारित्वञ्च। इति राजनिर्घण्टः ॥ रूक्षत्वम्। कफवायुनाशित्वम्। पित्तकारित्वञ्च। तत्तैलगुणाः। कटुत्वम्। उष्णत्वम्। चिरदोषकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः ॥ श्लेष्मवह्ममलनाशित्वम्। तेजोबलकारित्वञ्च। घर्म्मशोनास्य गुणाः। चिरदोषकारित्वम्। पुष्टिबलत्वयकत्वकारित्वञ्च। इति राजनिर्घण्टः ॥ (कुसुम्भशाकभक्षणे निषेधमाह तिथितत्त्वधृतोशनोवचने यथा,—
"कुसुम्भं जलिताशाकं डल्लाकं पूतिकां तथा।
भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः" ॥)

कुसुम्भः, पुं, ("कुसेरुम्भोमेदेताः"। उणा। ४। १०६। इति उम्भ प्रत्ययः।) कमण्डलुः। इत्यमरः। ३। ३। १२६ ॥ (यथा, मनौ। ६। ५२।
"क्षान्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान्" ॥)
महारजनवृक्षः। इति राजनिर्घण्टः ॥ (कुसुम फुल इति भाषा ॥ अस्य पर्य्याया यथा।
"पद्मोत्तमविकाशः स्यात् कुसुम्भः प्रवरस्तथा" ॥
इति वैद्यकरत्नमालायाम् ॥ अस्य गुणाश्च यथा।
"कटुर्विपाके कटुकः कफघ्नो
विदाहिभावादहितः कुसुम्भः" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कुसुः, पुं, (कुस् + कूप्रत्ययः।) किंशुलुकः। इति हेमचन्द्रः ॥

कुसूलः, पुं, (कुस् + कूलच्। यद्वा कुत्सितं शूलं निपातनात् सत्वम्।) कुत्सूलः। इति कटशब्दार्थे भरतः ॥

कुस्तिः, स्त्री, (कुत्सिता स्तिः उपायः व्यवहारो वा।) शाठ्यम्। इत्यमरः। १। ७। ३०। इन्द्रजालम्। इति हेमचन्द्रः। (कर्म्मधारये कुत्सितपथः। इति व्युत्पत्तिलभ्योऽर्थः ॥ कुत्सिता स्तिराचारो यस्येति विग्रहे, दुराचारे त्रि। यथा, भागवते ८। २३। ७।
"कस्मादयं कुस्तयः खलयोनयस्ते
दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः" ॥)

कुस्तुमः, पुं, (कुं भुवं स्तुभ्नोति। स्तुभ् + मूलादित्वात् कः।) विष्णुः। इत्यमरटीकायां भरतादयः ॥ (समुद्रः। तस्येदं अण् कौस्तुभम् इति शब्दार्थचिन्तामणिः।

कुस्तुम्बरी, स्त्री, (कुत्सिता तुम्बरी। पृषोदरात् सुटि साधुः।) धन्याकम्। इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्यायः।
"आर्द्रां कुस्तुम्बरीं कुर्य्यात् स्वादुसौगन्ध्यहृद्यताम्।
सा शुष्का मधुरा पाके स्निग्धा हृद्दाहनाशनी" ॥)

कुस्तुम्बुरु, क्ली, (कुत्सितं तुम्बति अर्द्दयति यत्। तुबि अर्द्दने + बाहुलकात् उरुप्रत्ययः। जातिनिर्द्देशात् सुट्।) धन्याकम्। इत्यमरः। २। ६। ३८ ॥ (अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ॥
"धन्याकं धान्यकं धान्यं कुस्तुम्बुरु धनीयकम्।
धन्या कुस्तुम्बुरी चान्या वेषजोया वितुन्नकम्" ॥)
(पुं, यज्ञविशेषः। यथा, महाभारते। २। १०। १५।
"कुस्तुम्बुरुः पिप्पलश्च गजकर्णो विशालकः।
एते चान्ये च बहवो यज्ञाः शतसहस्रशः" ॥)

कुह क ड मतीच्छिते। इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट्।) कुस्मिति च। (अत्र अकं) क्ली दन्त्योपधः। मतीच्छितं बुद्धिपूर्ब्बकदर्शनम्। कुस्मित् कुत्सितमीषद्वास्यम्। क ड, कुस्मयते जनः। बुद्ध्या पश्यति कुत्सितं स्मयते वेत्यर्थः। इति दुर्गादासः ॥

कुह त् क ड विस्मापने। इति कविकल्पद्रुमः ॥ (अदन्तपुरां-आत्मं-सकं-सेट्।) क्ली। विस्मापनमन्यतो विस्मयोत्पादनम्। ड कुहयते। कुहकेनेन्द्रजालिको लोकं विस्मापयति इत्यर्थः। स्यात् कुहयते विस्माप्यते हेतुतो भयमिति भट्टमल्लदर्शनादिस्मापने इति पाठ इत्येके। इति दुर्गादासः ॥

कुह, व्य, ("वा ह च छन्दसि"। ५। ३। १३।

इति ह्वः। "कु तिह्वोः"। ७।२।१०४।इति किमः कुः।) कुत्र। वैदिकप्रयोगोऽयम्। इति व्याकरणम्॥ (यथा, ऋग्वेदे २। १२। ५। "यं स्मा पृच्छन्ति कुह सेतिघोरमुतेमाहुर्नैषो अस्तीत्येनम्" ॥)

कुहः, पुं, (कुहयति विस्मापयति ऐश्वर्य्यप्रभावेण यः। कुह + क्विप् + अच्।) कुबेरः। इति हेमचन्द्रः॥ (स्त्री, माया। कुहकम्। यथा, रामायणे २।१०९।२७। सन्तुष्टपक्षवर्गोऽहं लोकयात्रां प्रवाहये। "अकुहः श्रद्दधानः सन् कार्य्याकार्य्यविचक्षणः" ॥)

कुहकं, क्ली, (कुह + "वञ्चलमन्यत्रापि"। उणां २। ३७ इति क्नुन्।) माया।

(यथा, भागवते। १। १। १।

"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः। तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि" ॥) तत्पर्य्यायः। इन्द्रजालम् २ जालम् ३ कुहटिः ४। तच्छीले त्रि। तत्पर्य्यायः। धूर्त्तः २ वञ्चकः ३ ध्वंसकः ४ दाम्भिनिकः ५ मायी ६ शालिकः ७। इति हेमचन्द्रः॥ दाम्भिकः। इत्युणादिकोषः। (सर्पविशेषः। यथा, विष्णुपुराणे १। १७। १८॥

"इत्युक्तास्तेन ते सर्पाः कुहकास्तक्षकान्वयाः। अदशन्त समस्तेषु गात्रेष्वतिविषोल्बणाः" ॥)

कुहकजीवी, [न्] त्रि, (कुहकेन इन्द्रजालविद्यया जीवति जीवनयात्रां सम्पादयतीति। कुहक + जीव् + णिनिः।) मायाजीवी। इति महाभारतम्॥ वाजिकर इति भाषा॥ (सर्वजीवि। इति व्युत्पत्तिलभ्योऽर्थः। साधुड़े इति भाषा॥)

कुहकस्वनः, पुं, (कुहकः विस्मापकः स्वनः शब्दोऽस्य।) कुक्कुटपक्षी। इति हेमचन्द्रः॥

कुहकस्वरः, पुं, (कुहकः विस्मापकः स्वरो यस्य।) कुक्कुटः। इति शब्दावली॥

कुहकः, पुं, तालभेदः। यथा, सङ्गीतदामोदरे। "द्रुतद्वन्द्वं लघुद्वन्द्वं तांत्रे कुहकसंज्ञके"॥

कुहनं, क्ली, (कु ईषत् प्रयत्नेन हन्यते इति। हन् + कर्म्मणि अप्।) मूढ़ाख्यविशेषः। काचमाजनम्। (कुत्सिताचारेण हन्तीति। हन् + अच्।) ईर्ष्यालौ त्रि। इति मेदिनी॥

कुहनः, पुं, (कुं एथ्वीं भूमिं वा हन्ति खनतीत्यर्थः। हन् + अच्।) मूषिकः। (कौ एथिव्यां कुत्सितं वा हन्ति दशतीति। हन् + अच्।) सर्पः। इति हेमचन्द्रः॥

कुहना, स्त्री, (कुह + "व्याधिभ्यो युच्"। ३। ३। १०७। इति युच्।) दम्भचर्य्या। इति मेदिनी॥ लोभाग्निहोत्रार्थायथाकथना। इत्यमरः। २। ७। ५३॥ अर्थविषया मिथ्याचारभेदस्य सम्पादना। दम्भमाचक्षतथानमौनादिः। अर्थविषया धर्म्मावयं इत्यन्ये। इति भरतः॥

कुहनिका, स्त्री, (कुह + युच् स्वार्थे कः टाप् अत इत्वम्।) कुहना। इति शब्दरत्नावली॥

कुहरं, क्ली, (कुं भूमिं हरतीति। कु + हृ + अच्।) गह्वरम्। छिद्रम्। इति मेदिनी॥ (यथा, प्रसन्नराघवे।

"तैः किं मत्तकरीन्द्रकुम्भकुहरे नारोपणीयाः करः"॥) कर्णः कण्ठशब्दः। गलः। अन्तिकम्। इत्यजयपालः॥

कुहरः, पुं, (कुह विस्मापने + कः। कुहं विस्मापनं भयमित्यर्थः राति ददाति भयं जनयतीति भावः। रा + कः।) नागविशेषः। इति मेदिनी॥

कुहरितं, क्ली, (कुहरयति कण्ठशब्दं करोति। कुहर + ज्ञतौ क्विप् + भावे क्तः।) पिकालापः। रतिध्वनिः। इति मेदिनी॥ रटितम्। इति विश्वः॥

कुहरिः, पुं, (कु + हरि + इन्।) पूगपुष्पिका। इति चिकाख्यग्रोषः। पान इति भाषा॥

कुहा, स्त्री, (कुह + कः टाप् च।) कटुकी। इति शब्दचन्द्रिका॥

(वदरी॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ गुणाद्याख्य वदरशब्दे ज्ञेयाः॥)

कुऊः, स्त्री, (कुह + अगव्यादित्वात् कुः।) कुहूः। इति हेमचन्द्रः॥ (यथा, महाभारते।

"कोकिलानां कुऊरवैः सुखैः श्रुतिमनोहरैः" ॥)

कुहूः, स्त्री, (कुह + बाहुलकात् कूप्रत्ययः।) नष्टेन्दुकलामावास्या। इत्यमरः। १। ४। ९॥ (यथा, श्रुतौ। "दे ह वा अमावास्या वा पूर्णमासी वा सिनीवाली योत्तरा सा कुहूरिति"। यज्ञमाह कामयाधवीये व्यासः।

"दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहूर्मता"॥ मतान्तरे तु।

"तिथिद्वये सिनीवाली नष्टचन्द्रा कुहूर्मता। वाजसनेयिभिः कुहूर्नाम्ना वेदवेदान्तवेदिभिः"॥ तत्र भाजाधिकारिभेदमाह। यथा, भावाधिः।

"अपराह्णव्यापिनी यदि दर्शसिनिवाल्यो। आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता"॥ आदिशब्दात् स्त्रीशूद्रयोरपि ग्रहणं यथाह लोमाधिः।

"सिनीवाली द्विजैः कार्य्या साग्निकैः पिण्डकर्म्मणि। स्त्रीभिः शूद्रैः कुहूः कार्य्या तथा चाग्निकैर्द्विजैः"॥ तदधिष्ठात्री देवपत्नी। यथा, तिथितत्त्वे।

"सिनीवाली कुहूरिति देवपत्न्यावितौ"॥ सा च अङ्गिरसः सुता। यथाह भागवते ४। १। २८।

"श्रद्धा त्वङ्गिरसः पत्नी चतस्रोऽसूत कन्यकाः। सिनीवाली कुहूराका चतुर्थ्यनुमतिस्त्वहा"॥) कोकिलालापः। इति मेदिनी॥ (यथा, आर्य्यासप्तशती ६२०।

"केनाम्बाबि पिकानां कुहूं विहायेतरः शब्दः"॥)

कुहूकण्ठः, पुं, (कुहूरितिशब्दः कण्ठे यस्य।) कोकिलः। इति शब्दरत्नावली॥

कुहूमुखः, पुं, (कुहूरिति शब्दः मुखे यस्य।) कोकिलः इति चिकाख्यग्रोषः॥

कुहूरवः, पुं, (कुहूरिति रवो यस्य।) कोकिलः। इति राजनिर्घण्टः॥ (यदुक्तम्।

"पिक! विधुस्तव हन्ति समं तमस्त्वमपि चन्द्रविरोधिकुहूरवः"॥)

कुहूलं, क्ली, (कुह + ऊलच् प्रत्ययः।) सशल्यभूरन्धम्। इति जटाधरः॥

कुहेड़िका, स्त्री, (कु ईषत् हेड़ते वेष्टते नेत्रसञ्चारोऽस्याम्। हेड़ ड वेष्टने + इन् ततः स्वार्थे कन् ततः टाप्।) कुज्झटिका। इति भूरिप्रयोगः॥

कुहेड़ी, स्त्री, (कु ईषत् हेड़ति वेष्टते नेत्रसञ्चारोऽस्याम्। हेड़ वेष्टने + "सर्व्वधातुभ्यः इन्" उणां ४। ११७। इति इन्। ततः ङीदिकारान्तात् वा ङीष्।) कुहेड़िका। इति शब्दमाला॥

कुहेलिका, स्त्री, (कु ईषत् हेड़ति वेष्टते नेत्रसञ्चारोऽस्याम्। हेड़ वेष्टने + इन्। ततः स्वार्थे कन्। टाप्। ह्रस्य लत्वम्।) कुज्झटिः। इति चिकाख्यग्रोषः॥

कू शि ड आर्त्तस्वरे। इति कविकल्पद्रुमः॥ (तुदां-आत्मं-अकं-सेट्।) शि ड कूवते अकूविष्ट। इति दुर्गादासः॥

कू अ ग शब्दे। इति कविकल्पद्रुमः॥ (क्र्यां-उभं-अकं-सेट्।) अ ग कूणाति कूणीते। क्रुक्षान्तोऽयमिति जैमिनिः। दन्त्यनोपधोऽपि। नकाररहितो क्रुक्षान्त इति रमानाथः। दीर्घान्त इति गौमराः। इति दुर्गादासः॥

कूः, स्त्री, (कूणाति शब्दायते इति। कू + क्विप्।) पिशाची। इति शब्दमाला॥

कूकुदः, त्रि, (कू शब्दे भावे क्विप्। कूवः शब्दस्य कीर्त्तेरित्यर्थः कुं भूमिं आस्पदस्वरूपामिति यावत् ददातीति। कूकु + दा + कः।) सत्कृत्याहूतां कन्यां यो ददाति सः। इत्यमरः। ३। १। १४॥

कूचः, पुं, (कु शब्दे "कुवचट् दीर्घश्च"। उणां ४। ९१। इति चट् दीर्घश्च।) स्तनः। इत्युणादिकोषः॥

कूचिका, स्त्री, (कूच + टित्वात् ङीप्। स्वार्थे कन्।) तूलिका। इति हेमचन्द्रः॥

कूज हिंसने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) दीर्घौ। हिंसनमव्यक्तशब्दः। कूजति कोकिलः। इति दुर्गादासः॥

कूजितं, क्ली (कूज् + भावे क्तः।) पक्षिध्वनिः। इति हेमचन्द्रः॥ (यथा, गीतगोविन्दे १। ४। २।

"जनितजवकृतापरिग्रहणकोमलमलयसमीरे। मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे"॥)

कूट क ड अप्रसादाप्रदोः। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-अकं-सेट्।) अप्रदा दानाभावः। क ड कूटयते खलः स्फुटमप्यर्थं प्रसन्नं न करोति। किञ्चिन्न ददाति वेत्यर्थः। इति दुर्गादासः॥

कूट वृ क दाहे। मन्थे। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) दीर्घौ। अचुकूटत्। इति दुर्गादासः॥

कूटः, पुं, (कूटयति दग्धीकरोति ग्रासप्रभावेण सापराधान् इति। कूट दाहे + णिच् + अच्।) अगस्त्यमुनिः। इति शब्दरत्नावली॥

कूटपू

कूटः, पुं, स्त्री, (कूट्यते दातुं न शक्यते स्थावर त्वादिति। कूट अप्रदाने + कर्म्मणि घञ्।) गृहम्। इति शब्दरत्नावली॥

कूटः, पुं, क्ली, (कूट् + घञ्।) निश्चलः। राशिः। (यथा, हेः रामायणे। १। १४। १५।
"अग्निकूटाश्च दृश्यन्ते बहवः पर्व्वतोपमाः" ॥)
लौहमुद्गरः॥ (यथा, भागवते। ४। २५। ८।
"एते त्वां संप्रतीक्षन्ते स्मरन्तो वैशसं तव।
संपरेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः" ॥)
माया। (यथा, महाभारते वनपर्व्वणि।
"नैव धर्म्मेण तद्राज्यं नार्জ্জवेन न चौजसा।
अक्षकूटमधिष्ठाय हृतं दुर्य्योधनेन वै" ॥)
पर्व्वतशृङ्गम्। (यथा, महाभारते आनुशासनिके।
"अश्मानमिव कूटानि धातुरत्नानि शेरते" ॥)
तुच्छः। सीरावयवः। यन्त्रम्। फाँद इति भाषा। (यथा, रामायणे।
"वागुराभिश्च पाशैश्च कूटैश्च विविधैस्तथा" ॥)
अन्धतमः। इति मेदिनी॥ भग्नशृङ्गवृषभः। इति हेमचन्द्रः॥ कैतवम्। इत्यमरः। ३। ३। ३६॥ (यथा, भागवते। ६। ५। १०।
"वाचः कूटन्तु देवर्षेः सत्यं विभ्रद्गुधिष्ठिया" ॥
तद्धति त्रि। यथा, मनुः। ७। ६०।
"न कूटैरायुधैर्हन्याद् युध्यमानो रणे रिपून्" ॥
मिथ्याभूते त्रि। यथा, याज्ञवल्क्यः।
"द्विगुणा वान्यथा ब्रूयुः कूटाःस्युः पूर्ব্বसाक्षिणः"॥
द्वारम्। यथा, महाभारते। ४। ५। १४।
"इयं कूटे मनुष्येन्द्र! गहने महती गमी।
भीमशाखा दुरारोहा ह्यज्ञानस्य समीपतः" ॥
अत्र कूटशब्दस्तु टीकाकृन्मतभेदेन अर्थान्तरेऽपि वर्त्तते। अग्रमात्रमात्रम्। यथा, रामायणे।
"किरीटकूटैर्व्वलितं शृङ्गारं दीप्तकुण्डलम्" ॥
भागवते च। ३। १३। २६।
"सवज्रकूटाङ्गनिपातवेग-
विशीर्णकुक्षिः स्तनयन्नुदन्वान्।
उत्सृष्टदीर्घोर्म्मिभुजैरिवार्त्त-
श्चुक्रोश यज्ञेश्वर! पाहि मेति" ॥)

कूटकं, क्ली, (कूट् + संज्ञायां कन्।) पाशम्। इत्यमरः। २। ६। १३॥

कूटकः, पुं, (कूट् + खुच्।) कबरी। इति त्रिकाण्डशेषः॥ सुरागमगन्धद्रव्यम्। इति शब्दमाला॥ (पर्व्वतविशेषः। यथा, भागवते। ५। १६। १७।
"भारते ऽस्मिन्वर्षे सरिच्छैलाः सन्ति बहवः"।
"त्रिकूट ऋषभः कूटकः कौङ्कः सङ्घः" इति॥)

कूटकृत्, पुं, (कूटं करोतीति। कूट + कृ + क्विप् तुगागमश्च।) शिवः। कायस्थः। इति त्रिकाण्डशेषः। कितवे, त्रि। (तुलाकर्म्मणि कैतवकारी। यथा, याज्ञवल्क्यः। २। २४३।
"तुलाप्रासनमानानां कूटकृन्नाशकस्य च"॥)

कूटजः, पुं, (कूटे पर्व्वते एव जायते। जन + डः।) कुटजवृक्षः। इति राजनिर्घण्टः। (कुटजशब्दे ऽस्य गुणादयो ज्ञेयाः।)

कूटमूर्द्धा, पुं, हस्तिनां चिह्नोवशब्दवरः। इति

कूटस्थः

त्रिकाण्डशेषः॥ कूटपर्व्वोऽपि क्वचित्पाठः॥

कूटपालकः, पुं, (कूटं मत्स्यलोमं पालयतीति। पालि + ण्वुल्।) कुशालस्य पवनम्। कुमारेर पोयान् इति भाषा। पित्तव्वरः। इति हारावली॥

कूटयन्त्रं, क्ली, (कूटं कैतववत् यन्त्रम्।) आमिषं दत्त्वा मृगपक्षिबन्धनार्थं यत् सन्धानयन्त्रं निवेश्यते तत्। फाँद इति भाषा। तत्पर्य्यायः। उन्नाथः २। इत्यमरः। २। १०। २६॥

कूटशाल्मलिः, पुं, (कूटः शाल्मलिः।) शाल्मलिविशेषः। काश्मिमाला इति ख्यातः। कुत्सितशाल्मलिः अन्नतशाल्मलिर्वा। इत्यन्ये। इति भरतः॥ तत्पर्य्यायः। रोचनः २। इत्यमरः। २। ४। ४७॥ (क्वचित् स्त्रीलिङ्गे ऽपि दृश्यते। कूटशाल्मलिरिव इति व्युत्पत्त्या यमस्य गदायाः गौणी संज्ञा। यथा, रघौ १२। ९५।
"अयःशङ्कुचितां रक्तैः शतघ्नीमथ शत्रवे।
हृतां वैवस्वतेनेव कूटशाल्मलिमक्षिपत्" ॥
नरकस्थकण्टकाचितलोहशाल्मलिवृक्षविशेषः। स च दुरारोहः। यथा, महाभारते १८। ३। ४।
"नादृश्यन्त च तास्तत्र यातनाः पापकर्म्मिणाम्।
नदी वैतरणी चैव कूटशाल्मलिना सह" ॥)
राजनिर्घण्टोक्तगुणपर्य्यायौ रोहितकशब्दे द्रष्टव्यौ॥

कूटसंक्रान्तिः, स्त्री, अर्द्धराशीतीते सूर्य्यस्य राश्यन्तरगमनम्। यथा,—
"संक्रान्तिर्द्विविधा यत्र पूर्ব্বं तत्र परित्यजेत्।
कर्त्तव्यं कूटसंक्रान्त्यां स्नानदानतपोव्रतम्॥
अर्द्धराशिव्यतीते तु यदा संक्रमते रविः।
सा ज्ञेया कूटसंक्रान्तिर्मुनिभिः परिकीर्त्तिता"।
इति विद्यानिधिधृतज्योतिःसागरसारधृतं वचनम्। *। अपि च।
"अर्द्धराशे व्यतीते तु संक्रान्तिर्यदहर्भवेत्।
पूर्ব্বेद्युः व्रतादिकं कुर्य्यात् परेद्युः स्नानदानयोः॥
इति भीमपराक्रमीयम्॥ स्नानदानयोरित्यत्र सप्तमीनिर्द्देशात् परदिवसीयस्नानदाननिमित्तकं पूर्ব্বदिने उपवाससंयमरूपव्रतादिकं कुर्य्यादित्यर्थः। इति तिथ्यादितत्त्वम्॥

कूटस्थः, त्रि, (कूटे मायायां तिष्ठतीति। यद्वा, कूटवत् निर्व्विकारेण तिष्ठतीति। कूट् + स्था + कः।) एकरूपतया यः कालव्यापी सः। इत्यमरः। (परमात्मा। यथा, मत्स्यपुराणे ६। २२-२७।
"अधिष्ठानतया देहदयावच्छिन्नचेतनः।
कूटवन्निर्व्विकारेण स्थितः कूटस्थ उच्यते॥
कूटस्थे कल्पिता बुद्धिस्तच्च चित्प्रतिबिम्बकः।
प्राणानां धारणाज्जीवः संसारेण स युज्यते॥
जलस्थोक्षा घटाकाशो यथा सर्व्वत्ररोहितः।
तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते॥
अयं जीवो न कूटस्थं विविनक्ति कदाचन।
अनादिरविवेकोऽयं मूलाविद्येति गम्यताम्॥
विक्षेपावृतिरूपाभ्यां द्विधा ऽविद्या प्रकल्पिता।
न भाति नास्ति कूटस्थ इत्यापादनमावृतिः॥
अज्ञानी विदुषा एवः कूटस्थं न प्रबुध्यते।
न भाति नास्ति कूटस्थ इति बुद्धा वदत्यपि"॥

कूणिः

कूटस्थचैतन्यस्य अविद्याध्यस्ततयैव जीवत्वं नतु स्वरूपतः नितरां तस्मादपि निरध्यस्तत्वात् निर्म्मलः सच्चिदानन्दस्वरूपावस्थः पुरुषोत्तमः परमात्मेत्युच्यते। यथा, गीतायां १५। १६-१७।
"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः" ॥)
एकेनैव स्वभावेन निरवधिकालस्य व्यापको य आकाशादिः। इति भरतः॥ (कूटे भयावहे तिष्ठति यः। स्था + कः।) व्याघ्रनखः। इति राजनिर्घण्टः॥ (व्याघ्रनख इति भाषा॥)

कूटस्थं, क्ली, (कूटस्थ इव प्रकाशते यत्। अर्শआदेरच्।) व्याघ्रनखाख्यगन्धद्रव्यम्। इति जटाधरः॥

कूटसाक्षी, [न्] त्रि, (कूटः मायावी मिथ्यावादी कपटीत्यर्थः साक्षी।) मिथ्यासाक्षी इति व्यवहारतत्त्वम्॥ (याज्ञवल्क्ये कूटसाक्षिलक्षणम्। यथा,—
"द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्ব্वसाक्षिणः"॥
ते तु गुरुदण्डार्हाः। अप्रतप्रायश्चित्ताः रौरवाख्यनरकं व्रजेयुः। यो हि जानन्नपि साक्ष्यं न ददाति स कूटसाक्षितुल्यः। तथा च तत्रैव।
"न ददाति तु यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि" ॥)

कूटागारं, क्ली, (कूटं आगारं गृहम्।) वड़भी। तत्पर्य्यायः। चन्द्रशालिका २। इति त्रिकाण्डशेषः॥ स्त्रीणां क्रीड़ागारम्। इत्यादिकाण्डटीका॥

कूटार्थभाषिता, स्त्री, (कूटार्थस्य दुर्ব্বোधार्थस्य कल्पितार्थस्य वा या भाषिता।) प्रबन्धकल्पनाकथा। इति शब्दरत्नावली॥ रूपकथा इति भाषा॥

कूड़, शि घात्ये। भक्षे। इति कविकल्पद्रुमः। (तुदां-परं-अकं-सकं-सेट्।) बकवरी। घञभावे ऽप्यस्य कूटादौ पाठः प्राचामनुरोधात्। प्राचोऽपि डान्तप्रस्तावादिमं कूटादौ पठितवन्तः। शि, कूड़ती कूड़न्ती। घात्यं घनीभावः। कूड़ति दुग्धं वह्नियोगात्। कूड़त्यन्नं लोकः। इति दुर्गादासः॥

कूड्यं, क्ली, (कूड़ति घनीभवति मृदादिना। कूड़् + ण्यत्।) भित्तिः। इति शब्दरत्नावली॥ देवाल इति भाषा॥

कूण, व् क सङ्कोचे। इति कविकल्पद्रुमः॥ (अदन्तपुरां-परं-अकं-सेट्।) दीर्घी मूर्द्धन्योपधः अनुकूणचच्चुः सङ्कुचितमभूदित्यर्थः। इति दुर्गादासः॥

कूश, क ङ सङ्कुचि। इति कविकल्पद्रुमः॥ (सुरां-आत्मं-अकं-सेट्।) बकवरी। क ङ, कूशयते चक्षुः सङ्कुचितं स्यादित्यर्थः। पञ्चमस्वरीतोऽयं। इति दुर्गादासः॥

कूशिः, त्रि, (कूशति कुत्सितो भवति रोगादिभिरिति शेषः। कूश सङ्कोचे "सर्ব্वधातुभ्य इन्"। उणां ४। ११७। इति इन्।) कूशिः। रोगादिना

कूपः

कुत्सितकरः। इत्यमरटीकायां भरतः॥

कूपिका, स्त्री, (कूप्+स्वार्थे कन् टाप् अत इत्वञ्च।) यष्टिकम्। वीणामूलस्थवंशशलाका। तत्पर्य्यायः। कलिका २। इति हेमचन्द्रः॥

कूदरः, पुं, (कुत्सितं उदरं यस्य। ऋतुदोषतः पायोदरजातत्वात् तथात्वम्।) जातिविशेषः। यथा,—ब्रह्मवैवर्त्तपुराणे।

"ब्राह्मण्यास्त्विवीर्य्येण ऋतोः प्रथमवासरे।
कुत्सिते चोदरे जातः कूदरस्तेन कीर्त्तितः॥
तदशौचं विप्रतुल्यं पतितो ह्यृतुदोषतः।
सद्यः कोटकसंसर्गादधमो जगतीतले"॥

कूद्दालः, पुं, (कुद्दाल+पृषोदरात् दीर्घत्वे साधुः।) कुद्दालवृक्षः। इत्यमरटीकायां रमानाथः॥

कूप, त् क दौर्ब्बल्ये। (अदन्तचुरां-परं-अकं-सेट्।) अयं वल्गखरी। इति त्रिलोचनः॥ सप्तमखरी। इति कविकल्पद्रुमटीकायां दुर्गादासः॥

कूपः, पुं, (कुं ईषत् आपो यत्र। "ऋकूपूरित्यः"। ५। ४। ७४। ऊदनोरित्यत्र दीर्घनिर्देशादन्यत्रापीति वा। यद्वा कुवन्ति मण्डूकाः अत्र। "कुपु भाषे"। उणां ३। २७ इति पो दीर्घश्च।) खनामख्यातो जलाधारः॥ कूया इति पात्कूया इति च भाषा। तत्पर्य्यायः। अम्भुः २ प्रहिः ३ उदपानम् ४। इत्यमरः। १। १०। २६॥ अवटः ५ कोट्टारः ६। इति जटाधरः॥ कात्तः ७ कर्त्तः ८ वप्रः ९ काटः १० खातः ११ अवतः १२ क्रिविः १३ खदः १४ उत्सः १५ ऋष्यदात् १६ कारोतरात् १७ कुण्डेषः १८ केवटः १९। इति वैद्यनिघण्टौ २ अध्याये त्रयोदशकूपनामानि॥ तस्य लक्षणं यथा,—

"भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः।
वृत्तोऽवृत्तः स कूपः स्यात्तदम्भः कौपमुच्यते"॥

इति भावप्रकाशः॥ तज्जलगुणाः। वातकफनाशित्वम्। अग्निदीपनत्वम्। लघुत्वम्। पित्तवर्द्धनत्वम्। क्षारत्वम्। शीतकाले उष्णत्वम्। उष्णकाले शीतत्वम्। वसन्तकाले प्रशस्तत्वञ्च। इति राजवल्लभः॥

("रूक्षं कफघ्नं लवणात्मकञ्च
सन्दीपनं पित्तकरं लघूष्णम्।
कूपोदकं वातहरं प्रदिष्टं
हितं न शस्तं शरदो वदन्ति"॥

इति हारीते प्रथमस्थाने ७ अध्याये॥

कूपादिकरणप्रणालादिकं जलाशयतत्त्वधृतादित्यपुराणवचनम्। यथा,—

"सेतुबन्धरता ये च तीर्थशौचरताश्च ये।
तडागकूपकर्त्तारो मुच्यन्ते ते दृषाभयात्"॥

विष्णौ च। "अथ कूपकर्त्तुरुत्पत्तिं पानीये दुष्कृतार्द्धं विनश्यति"। तत्प्रश्ने ऋतकूपादुत्थिते। विष्णुधर्म्मोत्तरे च।

"तडागकूपकर्त्तारस्तथा कन्याप्रदायिनः।
क्षीरोपानन्नदातारस्ते नराः स्वर्गगामिनः"॥

तथा, नन्दिकेश्वरपुराणे।

"यो वापीमथवा कूपं देशे तोयविवर्जिते।
खानयेत् स दिवं याति विन्दौ विन्दौ शतं समाः"॥

तत्संस्कारकर्त्तुरपि फलमुच्यते विष्णौ। यथा,—

"कूपारामतडागेषु देवतायतनेषु च।
पुनः संस्कारकर्त्ता च लभते मौलिकं फलम्"॥

परं जलशून्यदेशखनने एव प्रतिष्ठा न तु पङ्कोद्धारमात्रे। "अजले जलमुत्पाद्य" इति वचनात्॥) गर्त्तः। गुणवृक्षः। नदीमध्यस्थितो वृक्षः पर्व्वतो वा। इत्युणादिकोषः। कूपकः। कूपा इति भाषा। मन्मानम्। इति मेदिनी॥

कूपकः, पुं, (कूपे गर्त्ते कायते प्रकाशते इति। कै+कः।) नौकागुणबन्धनस्तम्भः। इत्यमरः। १। १०। १२। मास्तुल इति भाषा। तैलमात्रम्। कूपा इति भाषा। कुकुन्दरम्। उदपानम्। चिता। इति मेदिनी॥ (शुष्कनद्यादौ जलार्थं कृतो गर्त्तः। इत्यमरः। १। १०। १०॥)

कूपाङ्गः, पुं, (कूपाकारं अङ्गं अस्मिन्।) रोमाञ्चः। इति शब्दरत्नावली॥ कूपाङ्गोऽपि पाठः॥

कूपारः, पुं, (कुं पृथिवीं पिपर्त्ति पूरयति। पॄ+अण् पृषोदरात् उकारस्य दीर्घः।) अकूपारः। इत्यमरटीका॥ कूवारोऽपि पाठः॥

कूपिका, स्त्री, (कूप+संज्ञायां कन् ततष्टाप् अत इत्वञ्च।) अम्भोगतोपलम्। जलमध्यस्थितपर्व्वतादिः। इति मेदिनी॥

कूपी, स्त्री, (कूप्+इन् ततो ङीप्।) पात्रविशेषः। यथा, अजीर्णचिकित्सायां भावप्रकाशः॥

"भावयेत् सप्तकृत्वस्तच्चञ्चत्काञ्जजलेन च।
ततः संशोष्य संपिष्य कूपीमध्ये निधापयेत्"॥

कूमं, क्ली, (कोः पृथिव्याः भूमेर्वा उमा कान्तिर्यस्मात्।) सरोवरः। इति जटाधरः॥

कूरः, पुं, (वेञ् स्यूतौ+भावे क्विप् ऊः। कौ भूमौ उप्तं वपनं लाति गृह्णातीति। ला+कः। अस्य रः।) भक्तम्। इति हलायुधः॥

कूर्चं, क्ली, (कुर्य्यते इति कुर् बाहुलकात् चट् निपातनात् दीर्घः।) मलापकर्षार्थकेशादिमुष्टिः। कूँचि इति भाषा। यथा,—नरसिंहपुराणे।

"ततः समर्पयेत् कूर्चमुशीरादिविनिर्म्मितम्।
मलापकर्षणार्थाय श्रीमन्मूर्त्तेः सन्निधौ"॥

विष्णुधर्म्मोत्तरे च।

"उशीरकूर्चकं दत्त्वा सर्व्वपापैः प्रमुच्यते।
दत्त्वा गोवाजजं कूर्चं सर्व्वान्तापान् व्यपोहति।
दत्त्वा चामरकं कूर्चं श्रियमाप्नोत्यनुत्तमाम्"॥

इति श्रीहरिभक्तिविलासस्य ६ विलासे ४८ श्लोकः॥

कूर्चः, पुं क्ली, (कुर्+चट् निपातनात् दीर्घः।) भ्रुवोर्मध्यम्। भ्रूदयमध्यस्थानम्। इत्यमरः। २। ६। ९२॥ मयूरपुच्छमुष्टिः। कुशमुष्टिः। इति हरिवंशे पुष्पकन्यटीकायां नीलकण्ठः॥ कठिनम्। श्मश्रु। कैतवम्। इति मेदिनी॥ विकत्थनम्। दम्भः। ज्ञिप्रोपरिभागः। स तु अङ्गुष्ठाङ्गुलिमध्यस्य उपरिभागः। इति हेमचन्द्रः॥ हूं बीजम्। इति तन्त्रम्॥ (यथा, कर्पूरस्तवे "वर्गार्द्धं वह्निसंस्थं विधुरतिवलितं तत्त्रयं कूर्चयुग्मम्"॥ तथा, भैरवतन्त्रे।

"कालीबीजद्वयं देवि! दीर्घं हूंकारमेव च।
अक्षरो सा महाविद्या श्यामुण्डा कालिका स्मृता"॥)

कूर्चः, पुं, (कुर्+बाहुलकात् चट् निपातनात् दीर्घः।) शीर्षम्। इति धरणी॥

कूर्चशिरः, [स्] क्ली, (कूर्चस्य शिरः इव शिरोऽस्य।) अङ्घ्रिस्कन्धः। इति हेमचन्द्रः। गुड़मुड़ा इति भाषा॥ ("गुल्फसन्धेरध उभयतः कूर्चशिरो नाम तत्र रुजा शोफौ"॥ "दृढे कूर्चशिरांसि च"॥ इति सुश्रुते शारीरस्थाने ६ अध्याये॥)

कूर्चशीर्षकः, पुं, (कूर्चं श्मश्रु तद्वत् शीर्षं यस्य।) जीवकवृक्षः। स तु ऋषभवर्गमध्यपठितौषधिः। इत्यमरः। २। ४। १४२॥ (जीवकशब्दे ऽस्य विवरणं द्रष्टव्यम्॥)

कूर्चशीर्षकः, पुं, (कूर्चं श्मश्रु तद्वत् शीर्षं यस्य। कप्।) जीवकः। इति राजनिर्घण्टः। (नारिकेलवृक्षः। इति चिन्तामणिः॥)

कूर्चशेखरः, पुं, (कूर्चमिव शेखरमस्य।) नारिकेलवृक्षः। इति राजनिर्घण्टः॥

कूर्चिका, स्त्री, (कूर्चाकारोऽस्त्यस्याः। कूर्च+ठन्।) क्षीरविकृतिः। क्षीरसा इति भाषा। इत्यमरः। २। ९। ४४॥ सा द्विधा यथा,—

"दध्ना सह च यत् पक्वं क्षीरं सा दधिकूर्चिका।
तक्रेण पक्वं यत् क्षीरं सा भवेत्तक्रकूर्चिका"॥

इति भरतः॥

("कूर्चिका विकृता भक्ष्या गुरवो नातिपित्तलाः"॥ इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

सूचिका। सूँच इति भाषा। तूलिका। तुली इति भाषा। कुञ्चकः। कुँड़ि इति भाषा। कुञ्चिका। कुँजि इति भाषा। इति हेमचन्द्रो मेदिनी च॥

कूर्द्द उ क्रीडायाम्। इति कविकल्पद्रुमः। (भां-आत्मं-अकं-सेट्।) वल्गखरी। ड, कूर्द्दते। इति दुर्गादासः॥

कूर्द्दनं, क्ली, (कूर्द्द+भावे ल्युट्।) क्रीड़ा। खेला। इत्यमरः। १। ७। ३३॥

कूर्द्दनी, स्त्री, (कूर्द्दतेऽस्याम्। कूर्द्द+अधिकरणे ल्युट् ततो ङीप्।) चैत्रीपूर्णिमा। सा तु कामदेवोत्सवतिथिः। इति चिकाण्डशेषः॥

कूर्पं, क्ली, (कुरं पाति। पा+कः।) भूदयमध्यस्थलम्। इति हेमचन्द्रः॥

कूर्पासः, पुं, (कुर्परे शरीरे अश्नुते आस्ते वा। अश्+वञ्। पृषोदरात् रलोपः पूर्व्वदीर्घश्च।) कञ्चुकः। वारवाणः। इति हेमचन्द्रः॥ (स्वार्थे कन् प्रत्ययेनास्योदाहरणं यथा, माघे। ५। २३।

"प्रस्वेदवारिसविशेषविभक्तभङ्गे
कूर्पासकं क्षतनखक्षतमुद्विभन्ती"॥)

कूर्म्मः, पुं, (कुत्सितः ईषद् वा ऊर्म्मिः वेगो यस्य। के जले ऊर्म्मिर्यस्येति वा पृषोदरात् साधुः।) जलजन्तुविशेषः। काछिम् इति भाषा। (यथा, भगवद्गीतायाम्। २। ५८।

"यदा संहरते चायं कूर्म्मोऽङ्गानीव सर्व्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता"॥)

तत्पर्य्यायः। कच्छपः २ पञ्चनखः ३ गुह्यः ४ पूग-

कूर्च्चः

कूर्म्मः

गुल्मः ५ पीवरः ६ कमठः ७ जलगुल्मः ८। इति जटाधरः ॥ अस्य मांसादिगुणपर्य्यायान्तरौ कच्छपशब्दे द्रष्टव्यौ ॥ * ॥ (तल्लक्षणं यथा,— वृहत्संहितायाम् ६४ अध्याये।

"स्फटिकरजतवर्णो नीलराजीव चित्रः
कलशसदृशमूर्त्तिश्चारुवंशश्च कूर्म्मः।
अवयवसमवृद्धो सर्व्वपाकारचित्रः
सकलशुभलक्षं मन्दिरस्थः करोति ॥

अङ्गगुल्फश्यामवर्णा विन्दुविचित्रोऽत्यङ्गशरीरः। सर्वशिरा वा स्थूलगलो यः सोपि न पाल्यो राष्ट्रविवृद्धैः॥

वैदूर्य्यत्विट् स्थूलकण्ठस्त्रिकोणो
गूढ़स्निग्धश्चारुवंशश्च शस्तः।
क्रीड़ावाप्यां तोयपूर्णे मणौ वा
कार्य्यः कूर्म्मो मङ्गलार्थं नरेन्द्रैः" ॥

परमेश्वरः। यथाह ऋग्वेदभाष्योपक्रमणिकायां दयानन्दः।

"परमेश्वरेणेदं सकलं जगत्क्रियते तस्मात् तस्य कूर्म्म इति संज्ञा" ॥ प्रजापतेरवतारविशेषः। यथा, शतपथब्राह्मणे। ७। ५। १। ५।

"स यत् कूर्म्मो नाम एतद्वा रूपं कृत्वा प्रजापतिः प्रजा असृजत यदसृजताकरोत्तद् यदकरोत् तस्मात् कूर्म्मः काश्यपो वै कूर्म्मस्तस्मादाऽः सर्व्वाः प्रजाः काश्यप इति। स यः स कूर्म्मोऽस्य स आदित्यः"। इति ॥ * ॥)

वायुवायुविशेषः। यथा,—

"उन्मीलने स्मृतः कूर्म्मो भिन्नाञ्जनसमप्रभः"।

इति शारदातिलकटीका ॥ * ॥ मुद्राविशेषः। यथा,—

"वामहस्तस्य तर्जन्यां दक्षियस्य कनिष्ठया।
तथा दक्षियतर्जन्यां वामाङ्गुष्ठेन योजयेत् ॥
उन्नतं दक्षियाङ्गुष्ठं वामस्य मध्यमादिकाः।
अङ्गुलीर्योजयेत् पृष्ठे दक्षियस्य करस्य च ॥
वामस्य पिहतीर्येन मध्यमानामिके तथा।
अधोमुखे च ते कुर्य्याद्दक्षियस्य करस्य च ॥
कूर्म्मपृष्ठसमं कुर्य्याद्दक्षपार्श्वे सर्व्वतः।
कूर्म्ममुद्रेयमाख्याता देवताध्यानकर्म्मणि" ॥

इति तन्त्रसारः ॥ * ॥ (आसनविशेषः। यथा हठयोगदीपिकायाम्। १। २२।

"गुदं निरुध्य गुल्फाभ्यां व्युत्क्रमेण समाहितः।
कूर्म्मासनं भवेदेतदिति योगविदो विदुः" ॥)

सत्ययुगे समुद्रमन्थनकाले मन्दरपर्व्वतधारणार्थं कच्छपरूपभगवदवतारविशेषः। यथा,—

"क्षीरोदमध्ये भगवान् कूर्म्मरूपी स्वयं हरिः"।

इति पद्मपुराणम्। अपि च।

"विलोक्य विघ्नोत्पविधिं तदेश्वरो
दुरन्तवीर्य्योऽवितथोऽभिसन्धिः।
कृत्वा वपुः काच्छपमद्भुतं महत्
प्रविश्य तोयं गिरिमुज्जहार" ॥

इति श्रीभागवतम् ॥ * ॥ ("काश्यपस्यापत्यानां कद्रोः पुत्रेषु एकः। स च नागविशेषः। यथा, महाभारते। १। ६५। ४१।

"शेषोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः।
कूर्म्मश्च कुलिकश्चैव कादवेयाः प्रकीर्त्तिताः" ॥)

कूर्म्मचक्रं, क्ली (कूर्म्माकारं चक्रम्। मध्यपदलोपी कर्म्मधारयः।) क्षयिकर्म्मोक्तकच्छपाकारचक्रम्। तस्याकारो यथा,—

"प्राङ्मुखो भगवान् देवः कूर्म्मरूपी व्यवस्थितः।
आक्रम्य भारतं वर्षं नवभेदं यथाक्रमम्" ॥

तत्र नक्षत्रन्यासक्रमः।

"मध्यप्रागग्नियाम्यादिकृत्तिकादिचयत्रयैः।
क्रूरवेधयुतैस्तैस्तु पीड्यन्ते तन्निवासिनः" ॥

तत्र वेधो यथा,—

"पूर्व्वापरे भवेद्वेधो वेधश्चोत्तरदक्षिणे।
ईशाने राक्षसे वेधो वेध आग्नेयमारुते।
ताराक्षयान्वितं तत्र सौरिं यत्नेन चिन्तयेत्"॥

तत्र वेधादिजन्यदोषाः।

"अतिदुष्टिरनावृष्टिः शलभा मूषिकाः खगाः।
स्वचक्रं परचक्रञ्च सम्भवन्ति च ॥
एवं देशग्रहयामर्क्षवेधनामर्क्षतो वदेत्।
तथा च यत्र नक्षत्रे दिव्यार्थिवनाभसाः ॥
दृश्यन्ते सुमहोत्पाताः खां दिशं तत्र पीड़येत्।
सौरिर्बलाधिपो दुष्टः खल्पवीर्य्यः शुभावहः ॥
एकदा पीड़येद्यत्र भानुजः कूर्म्मपञ्चके।
तत्र स्थाने महाविघ्नो जायते नात्र संशयः ॥
दुष्टस्थाने गते चन्द्रे कर्त्तव्यं शान्तिपौष्टिकम्"॥

तच्चक्रमध्यस्था देशाः।

"मध्ये सारस्वता मत्स्याः शूरसेनाः समाधुराः।
पञ्चालशाल्वमाद्रेयकुरुक्षेत्रगजाह्वयाः ॥
मरुनैमिषविन्ध्याद्रिपाण्ड्यान्ध्रोषाः सयामुनाः।
काश्ययोध्या प्रयागश्च गया वैदेहकादयः"॥

तत्र पूर्व्वस्थदेशाः।

"प्राच्यां मागधशोणौ च वारेन्द्रोगौड़राढ़काः।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः"॥

तत्राग्निकोणस्थदेशाः।

"आग्नेय्यामङ्गवङ्गोपवङ्गचैपुरकोशलाः।
कलिङ्गौड्रान्ध्रकिष्किन्ध्याविदर्भाश्चवरादयः"॥

तत्र दक्षियस्थदेशाः।

"दक्षिणेऽवन्तिमाहेन्द्रमलया ऋष्यमूककाः।
चित्रकूटमहारण्यकाञ्चीसिंहलकोङ्कणाः।
कावेरी ताम्रपर्णी च लङ्काचिकूटकादयः"॥

तत्र नैर्ऋतकोणस्थदेशाः।

"नैर्ऋते द्रविड़ार्त्तमहाराष्ट्राश्च रैवतः।
यवनः पल्लवः सिन्धुः पारसीकादयो मताः"॥

तत्र पश्चिमस्थदेशाः।

"पश्चिमे हैहयाऽऽद्रिश्लेच्छवासशकादयः"॥

तत्र वायुकोणस्थदेशाः।

"वायव्ये गृध्रराटश्च नाटजालन्धरादयः"॥

तत्र उत्तरस्थदेशाः।

"उत्तरे चीननेपालङ्कनकैकेयमन्दराः।
गान्धारहिमवत्क्रौञ्चगन्धमादनमालवाः।
कैलासमङ्गकाश्मीरम्लेच्छदेशाः खसादयः"॥

तच्चेशानकोणस्थदेशाः।

"ऐशाने स्वर्णभौमश्च गङ्गाद्वारस्तु टङ्गणः।
वाह्लीकब्रह्मपुरकेकीराता दरदादयः"॥

इति ज्योतिस्तत्त्वम् ॥ * ॥ अपयज्ञकर्म्मोक्तकमठाकारचक्रम्। तस्य लिखनक्रमः।

"चतुरस्रं भुवं भित्त्वा कोष्ठानां नवकं लिखेत्।
पूर्व्वकोष्ठादि विलिखेत् सप्तवर्गानुक्रमात् ॥
लक्षमीशे मध्यकोष्ठे स्वरान् युग्मक्रमाल्लिखेत्।
दिक्षु पूर्व्वादितो यत्र क्षेत्राद्यक्षरसंस्थितिः॥
मुखं तत्तस्य जानीयात् हस्तावुभयतः स्थितौ ॥
कोष्ठे कुक्षी उभे पादौ द्वे शिरं पुच्छमीरितम् ॥
क्रमेणानेन विभजेन्मध्यस्थमपि भागतः" ॥ * ॥

तस्याङ्गविशेषे स्थितस्य जपादौ शुभदोषाः यथा।

"मुखस्थो लभते सिद्धिं करस्थः खल्पजीवनः।
उदासीनः कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात् ॥
पुच्छस्थः पीड्यते मन्त्री बन्धनोच्चाटनादिभिः।
कूर्म्मचक्रमिदं प्रोक्तं मन्त्रिणां सिद्धिदायकम्" ॥"॥

तदज्ञाने दोषो यथा, मिङ्गलायाम्।

"कूर्म्मचक्रमविज्ञाय यः कुर्य्यात् जपयज्ञकम्।
तस्य यज्ञफलं नास्ति सर्व्वानर्थाय कल्पते"॥

इति तन्त्रसारः॥ (तन्त्रोक्तग्रहणीयमन्त्रशुभादिसूचककूर्म्माकारचक्रविशेषः। तत्स्वरूपादि यामले उक्तम्। यथा।

"कूर्म्मचक्रं प्रवक्ष्यामि शुभाशुभफलात्मकम्।
यज्ज्ञात्वा सर्व्वशास्त्रार्थं जानाति पण्डितोत्तमः॥
अभेद्यं भेदकं चक्रं शृणुष्वादरपूर्व्वकम्।
कूर्म्माकारं महाचक्रं चतुष्पादसमन्वितम् ॥
तुण्डे स्वरान्, दक्षपादे कवर्गं, वामपादके।
चवर्गं, कीर्त्तितं पश्चात् अधःपादे टवर्गकम् ॥
तदधस्तु तवर्गः स्यादुदरे च पवर्गकम्।
यवान्तं हृदये प्रोक्तं शृङ्गान्तं पृष्ठमध्यके ॥
वालूले शक्रवीजञ्च क्षकारं लिङ्गमध्यके।
लिखित्वा गणयेन्मन्त्री चक्राकारं मनोहरम्॥
स्वरे लाभः कवर्गे श्रीश्चवर्गश्च विवेकदः।
टवर्गे राजपदवी तवर्गे धनवान् भवेत् ॥
उदरे सर्व्वनाशः स्यात् हृदये वन्धदुःखभाक्।
पृष्ठे च सर्व्वसन्तापः वालूले मरणं ध्रुवम् ॥
वैश्यादे पृष्ठदेशे तु दुःखञ्च वामपादके।
विरुद्धदशभे तु न कुर्य्याच्चक्रचिन्तनम् ॥
विरुद्धैके धर्म्मनाशो युग्मदोषे च मारणम्।
यत्र देवाक्षरञ्चास्ति तत्र चेन्निजवर्णकम् ॥
विरुद्धञ्च त्यजेच्चक्रमन्यमन्त्रं विचारयेत्।
पृथक् होमे यदि भवेत् वर्णमाला महेश्वर! ॥
यदि तत्सौख्यभावः स्यात् तत्सौख्यं नापि वर्ज्जयेत्।
विभिन्नगेहे दोषश्चेत् शुभमन्त्रञ्च संत्यजेत् ॥
इति ते कथितं देव! दृष्टादृष्टफलप्रदम्।
ये शोधयन्ति चक्रेन्द्रं मन्त्रसिद्धिप्रदं शुभम्" ॥ * ॥

कूर्म्मरूपी विष्णुः केन रूपेण विराजते तत्संस्थानविवरणं मार्कण्डेयपुराणे ५८ अध्याये उक्तम्। तद्-यथा। क्रोष्टुकिरुवाच।

"भगवन्! कथितं सम्यक् भवता भारतं मम।
सरितः पर्व्वता देशा ये च तत्र वसन्ति व।
किन्तु कूर्म्मस्वया पूर्व्वं भारते भगवान् हरिः।
कथितस्तस्य संस्थानं श्रोतुमिच्छाम्यशेषतः॥
कथं स संस्थितो देवः कूर्म्मरूपी जनार्द्दनः॥

कूर्मच

शुभाशुभं मनुष्याणां वक्ष्यते च ततः कथम् ।
यथामुखं यथापादस्तस्य तद्भूतभेषतः ॥

मार्कण्डेय उवाच ।

प्राङ्मुखो भगवान् ! देवः कूर्मरूपी व्यवस्थितः ।
आक्रम्य भारतं वर्षं नवभेदमिदं द्विज ! ॥
नवधा संस्थितान्यस्य नक्षत्राणि समन्ततः ।
विधयाश्च द्विजश्रेष्ठ ! ये सम्यक् तान्निबोध मे ॥
येवमन्ता विमाण्डव्याः शाल्वनीपास्तथा शकाः ।
उच्चिहानास्तथा वत्स ! घोषसङ्घास्तथा खशाः ॥
मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः ।
धर्म्मारण्या ज्योतिषिका गौरग्रीवा गुडाश्मकाः ॥
विदेहकाः समाच्छालाः सङ्केताः कङ्कमारुताः ।
काककोटिसपाषण्डाः पारियात्रनिवासिनः ॥
कापिङ्कलाः कुरुर्वाह्यास्तथैवोड्डम्बरा जनाः ।
गजाङ्ग्याश्च कूर्मस्य जलमध्यनिवासिनः ॥
कृत्तिका रोहिणी सौम्या एतेषां मध्यवासिनाम् ।
नक्षत्रचिंतयं विप्र ! शुभाशुभविपाटकम् ॥
दशध्वजोऽञ्जनश्चैव जम्बाख्यो मानवाचलः ।
सूर्यकर्णो व्याघ्रमुखः खर्मकः कर्व्वटाग्रनः ॥
तथा चन्द्रेश्वराश्चैव खशाश्च मगधास्तथा ।
गिरयो मैथिलाः शुभ्रास्तथा वदनदन्तुराः ॥
प्रागज्योतिषाः सलौहित्याः सामुद्राः पुरुषादकाः ।
पूर्णोत्कटो मद्रगौरस्तथोदयगिरिर्द्विज ! ॥
कक्षाया मेखलामुष्टास्ताम्रलिप्तैकपादपाः ।
वर्द्धमानाः कोशलाश्च मुखे कूर्मस्य संस्थिताः ॥
रौद्रः पुनर्व्वसुः पुष्यो नक्षत्रचिंतयं मुखे ।
पादे तु दक्षिणे देशाः क्रोष्टुके वदतः शृणु ॥
कलिङ्गवङ्गजठराः कोशला मूषिकास्तथा ।
चेदयश्चोर्द्धकर्णाश्च मत्स्याश्चा विन्ध्यवासिनः ॥
विदर्भा नारिकेलाश्च धर्म्मदीपास्तथैलिकाः ।
व्याघ्रग्रीवा महाग्रीवास्त्रैपुराः श्मश्रुधारिणः ॥
कैष्किन्धा हैमकूटाश्च निषधाः कंटकस्थलाः ।
दशार्णाहारिका नग्ना निषादाः काकुलालकाः ॥
तथैव पर्णशवराः पादे वै पूर्व्वदक्षिणे ।
अश्लेषर्क्षं तथा पैत्र्यं फाल्गुन्यः प्रथमास्तथा ॥
नक्षत्रचिंतयं पादमाश्रितं पूर्व्वदक्षिणम् ।
लङ्का कालाजिनाश्चैव श्रेलिका निकटास्तथा ॥
महेन्द्रमलयाद्रौ च दर्दुरे च वसन्ति ये ।
कर्वाटकवने ये च भृगुकच्छाः सकोङ्कणाः ॥
सर्व्वाश्चैव तथाऽऽभीरा वैणवास्तीरनिवासिनः ।
अवन्तयो दासपुरा स्तथैवाकाणिनो जनाः ॥
महाराष्ट्राः सकर्णाटा गोनर्दाश्चिक्कूटकाः ।
चोलाःकोलगिराश्चैव क्रौञ्चदीपजटाधराः ॥
कावेरी ऋष्यमूकस्था नासिक्याश्चैव ये जनाः ।
पुष्कुस्तुत्यादिवैदूर्य्यशैलप्रान्तचराश्च ये ।
तथा वारिचराः कोलाः चर्म्मषट्टनिवासिनः ।
गणवाह्याः परार्द्धाः क्षुद्रादीपवासनिवासिनः ॥
सूर्य्याद्रौ कुमुदाद्रौ च ते वसन्ति तथा जनाः ।
कौशावनाः सपिण्डिका स्तथा ये कर्म्मनायकाः ॥
दक्षिणाः कौरुषा ये च ऋषिकास्तापसाश्रमाः ॥
ऋषभाः सिंहलाश्चैव तथा काञ्चीनिवासिनः ।
तिलङ्गा कुञ्जरदरी कच्छवासाश्च ये जनाः ।

कूर्मच

ताम्रपर्णी तथा कुक्षिरिति कूर्मस्य दक्षिणः ।
फाल्गुन्यश्चोत्तरा हस्ता चित्रा चर्त्तव्यं द्विज ! ।
कूर्मस्य दक्षिणे कुक्षौ बाह्यपादस्तथापरम् ॥
काम्बोजाः पल्लवाश्चैव तथैव बडवामुखाः ।
तथा च सिन्धुसौवीराः सानर्त्ता वनितामुखाः ॥
द्रावणाः सार्गिगाः शूद्राः कर्णप्रावेयवर्वराः ।
किराताः पारदाः पाण्ड्यास्तथा पारशवाः कलाः ॥
धूर्त्तका हैमगिरिकाः सिन्धुकालकवैरताः ।
सौराष्ट्रा दरदाश्चैव द्राविडाश्च महाशवाः ॥
एते जनपदाः पादे स्थिता वै दक्षिणेऽपरे ।
स्वात्वो विशाखा मैत्रश्च नक्षत्रचयमेव च ॥
मणिमेघः क्षुरादिश्च खञ्जनोऽस्तगिरिस्तथा ।
अपरान्तिका हैहयाश्च शान्तिका विप्रशस्तकाः ॥
कोकङ्गणाः पद्मदकाः वसना ह्यवरास्तथा ।
तारक्षुरा ह्यश्मतकाः शर्कराः शाल्मवेष्मकाः ॥
गुप्तसराः फल्गुनकाः वेणुमत्याश्च ये जनाः ।
तथा फल्गुलुका घोरा गुरुहाश्च कलास्तथा ॥
एकेक्षणा वाजिकेशा दीर्घग्रीवाः सचूलिकाः ।
अश्वकेशास्तथा पुच्छे जनाः कूर्मस्य संस्थिताः ॥
ऐन्द्रमूलन्तथाषाढा नक्षत्रचयमेव च ।
माण्डव्याश्चण्डखाराश्च अश्वकालनतास्तथा ॥
कुन्यतालडहाश्चैव स्त्रीवाह्या बालिकास्तथा ।
नृसिंहा वेणुमत्याश्च बलावस्थास्तथापरे ॥
धर्म्मबद्धास्तथालूका उरुकर्म्मस्थिता जनाः ।
वामपादे जनाः पार्श्वे स्थिताः कूर्मस्य भागुरे ॥
आषाढाश्रवणे चैव धनिष्ठा यत्र संस्थिता ।
कैलासो हिमवांश्चैव धनुष्मान् वसुमांस्तथा ॥
क्रौञ्चाः कुरुवकाश्चैव क्षुद्रवीर्याश्च ये जनाः ।
रसालयाः सकैकेया भोगप्रस्थाः सयामुनाः ॥
अन्तर्द्वीपास्त्रिगर्त्ताश्च अग्नीव्याः सार्दना जनाः ।
तथैवाश्वमुखाः प्राग्ज्योतिषविड़ाः केशधारिणः ॥
दासेरका वाटधानाः शूलधानास्तथैव च ।
पुल्कसाधमकैराता स्तथा तक्षशिलाश्रयाः ॥
अम्बाला मालवा मद्रा वेणुकाः सवदन्तिकाः ।
पिङ्गला मानकलहा क्षुद्राः कोहलकास्तथा ॥
माण्डव्या भूतियुवकाः शातका हेमतारकाः ।
यज्ञोमत्याः सगान्धाराः खरसागररागयः ॥
यौधेया दासमेयाश्च राजन्याः श्यामकास्तथा ।
क्षेमधूर्त्ताश्च कूर्मस्य वामकुक्षिमुपाश्रिताः ॥
वारणश्चाश्च नक्षत्रं तत्र प्रौष्ठपदाद्वयम् ।
येन किन्नरराज्यश्च पशुपाशं सकोचकम् ॥
काश्मीरकं तथा राष्ट्रमभिसारजनस्तथा ।
दवदास्तङ्गणाश्चैव कुलटा वनराष्ट्रकाः ॥
सैरिष्ठा ब्रह्मपुरकास्तथैव वनवाह्यकाः ।
किरातकौशिकानन्दा जनाः पल्लवलोलनाः ॥
दार्वादा मरुकाश्चैव कुरटाश्चाम्रदारकाः ।
एकपादाः खशा घोराः स्वर्गभौमानवद्यकाः ॥
तथा सयवना हिङ्गाश्चीरप्रावरणाश्च ये ।
त्रिनेत्राः पौरवाश्चैव गन्धर्व्वाश्च द्विजोत्तम ! ॥
पूर्व्वोत्तरन्तु कूर्मस्य पादमेते समाश्रिताः ।
रेवत्याश्चाश्विदैवत्यं याम्यर्क्षमिति त्रयम् ॥
तत्र पादे समाख्यातं पाकाय मुनिसत्तम ! ।

कूर्मच

देशेष्वेतेषु चैतानि नक्षत्राण्यपि वै द्विज ! ॥
एतत्पीड़ा यमी देशाः पीड्यन्ते ये क्रमोदिताः ।
यान्ति चाभ्युदयं विप्र ! ग्रहैः सम्यगवस्थितैः ।
यस्यर्क्षस्य पतिर्यो वै ग्रहस्तद्भावितो भयम् ।
तद्देशस्य मुनिश्रेष्ठ ! तदुत्पर्त्ते शुभागमः ।
प्रत्येकं देशसामान्यं नक्षत्रग्रहसम्भवम् ॥
भयं लोकस्य भवति शोभनं वा द्विजोत्तम ! ।
स्वर्क्षैरशोभनैर्जन्तोः सामान्यमिति भीतिदम् ॥
ग्रहैर्भवति पीड़ोत्थमल्पायासमशोभनम् ।
तथैव शोभनः पाको दुःस्थितैश्च तथा ग्रहैः ॥
अल्पोपकाराय नृणां देशश्चैवात्मनो बुधैः ।
द्रव्ये गोष्ठेऽथ भृत्येषु सुहृत्सु तनयेषु वा ॥
भार्य्यायाश्च गृहे दुःस्थे भयं पुण्यवतां नृणाम् ।
आत्मन्यल्पपुण्यानां सर्वत्रैवातिपापिनाम् ।
नैकत्रापि ह्यपापानां भयमस्ति कदाचन ॥
दिग्देशजनसामान्यं नृपसामान्यमात्मजम् ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभम् ॥
परस्पराभिरक्षा च ग्रहादौस्थ्येन जायते ।
एतेभ्य एव विप्रेन्द्र ! शुभहानिस्तथाशुभैः ॥
यदेतत् कूर्मसंस्थानं नक्षत्रेषु मयोदितम् ।
एतत् तु देशसामान्यमशुभं शुभमेव च ।
तस्मात् विज्ञाय देशर्क्षं ग्रहपीड़ान्तथात्मनः ॥
कुर्व्वीत शान्तिं मेधावी लोकवादांश्च सत्तम ! ।
आकाशादेवतानाश्च दैत्यादीनाश्च दौर्हृदाः ॥
एष्यां पतन्ति ते लोके लोकवादा इति श्रुताः ।
तां तथैव बुधःकुर्य्यात् लोकवादान्न हापयेत् ॥
तेषान्तत्करणान्नृणां युक्तो दुष्टागमक्षयः ॥
शुभोदयं प्रहाणिश्च पापानां द्विजसत्तम ! ।
प्रज्ञाहानिं प्रकुर्य्युस्ते द्रव्यादीनाश्च कुर्वते ।
तस्माच्छान्तिपरः प्राज्ञो लोकवादस्तथा ।
लोकवादांश्च शान्तीश्च ग्रहपीड़ासु कारयेत् ॥
अद्रोहानुपवासांश्च श्रुतं चैत्यादिवन्दनम् ।
जपं होमं तथा दानं स्नानं क्रोधादिवर्जनम् ॥
अद्रोहः सर्व्वभूतेषु मैत्रीं कुर्य्याच्च पण्डितः ।
वर्जयेदसतीं वाचमतिवादांस्तथैव च ॥
ग्रहपूजाश्च कुर्व्वीत सर्व्वपीड़ासु मानवः ।
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ! ॥
प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यशेषतः ।
एष कूर्मो मया ख्यातो भारते भगवान् विभुः ॥
नारायणो ह्यचिन्तात्मा यत्र सर्व्वं प्रतिष्ठितम् ।
तत्र देवाः स्थिताः सर्व्वे प्रतिनक्षत्रसंश्रयाः ॥
तथा मध्ये ऋतवः पृथ्वी सोमश्च वै द्विज ! ।
मेषादयस्त्रयो मध्ये मुखे द्वौ मिथुनादिकौ ॥
प्राग्दक्षिणे तथा पादे कर्किसिंहौ व्यवस्थितौ ।
सिंहकन्यातुलाश्चैव कुक्षौ राशित्रयं स्थितम् ।
तुलाथ वृश्चिकश्चोभौ पादे दक्षिणपश्चिमे ॥
पृष्ठे च वृश्चिकश्चैव सह धन्वी व्यवस्थितः ।
वायव्ये चास्य वै पादे धनुर्म्राहादिकं त्रयम् ॥
कुम्भमीनौ तथैवास्य उत्तरां कुक्षिमाश्रितौ ।
मीनमेषौ द्विजश्रेष्ठ ! पादे पूर्व्वोत्तरे स्थितौ ॥
कूर्मे देशास्तथर्क्षाणि देशेष्वेतेषु वै द्विज ! ॥
राशयश्च तथर्क्षेषु ग्रहराशिष्ववस्थिताः ।

कूर्म्म

तस्मादयङ्कर्त्तृपीड़ासु देशपीड़ां विगर्हयेत् ॥
तत्र स्नात्वा प्रकुर्वीत दानहोमादिकं विधिम् ।
स एष वैष्णवः पादो ब्रह्मा मध्ये यज्ञस्य यः" ॥*॥
विष्णुः । स एव कश्यपसंज्ञया परिकीर्त्यते तत्समाचारादिकं यथा,—शतपथब्राह्मणे । ७ । ५ । १ । ५ ।
"स यत्कूर्म्मो नाम । प्रजापतिः प्रजा असृजत यदसृजताकरोत् तद् यदकरोत् तस्मात् कूर्म्मः काश्यपो वै कूर्म्मस्तस्मादाहुः सर्व्वाः प्रजाः काश्यप्य" इति ॥ अत्र सायणभाष्यम् । स यत् कूर्म्म इति । "परमेश्वरेणेदं सकलं जगत् क्रियते तस्मात्तस्य कूर्म्म इति संज्ञा । काश्यपो वै कूर्म्म इत्यनेन परमेश्वरस्यैव काश्यपनामाह्नि । तेनैव इमाः सर्व्वाः प्रजा उत्पादितास्तस्मात् सर्व्वा इमाः प्रजाः काश्यप्य इत्युच्यन्ते । काश्यपः कस्मात् पश्यको भवतीति निरुक्तया पश्यतीति पश्यः सर्व्वज्ञतया सकलं जगत् विजानाति स पश्यः पश्य एव निर्भ्रमतयातिसूक्ष्ममपि वस्तु यथार्थं जानात्येव अतः पश्यक इति । आद्यान्ताक्षरविपर्य्ययासिद्धेः सिंहः क्षतेस्तर्कुरित्यादिवत् काश्यप इति द्रष्टव्यम् इत्येतस्योपरि महाभाष्यप्रमाणेन पदं सिध्यति अतः सुष्ठु विज्ञायते काश्यप्यः प्रजा इति"॥०॥)

कूर्म्मएष्ठः, पुं, (कूर्म्मस्य एष्ठमिव । कठोरत्वात् तथात्वम् ।) अस्त्रानच्छः । इति शब्दचन्द्रिका ॥ कच्छपस्य एष्ठदेशः ॥ (यथा, महाभारते ३ । ४६ । ११ ।
"गूढ़गुल्फाङ्गुरौ पादौ ताम्रायतनखोज्ज्वलौ ।
कूर्म्मएष्ठोन्नतौ चापि श्लोभेते किङ्किणीकिणौ"॥)

कूर्म्मएष्ठकं, क्ली, (कूर्म्मएष्ठमिव कायते प्रकाशते इति । कै + कः ।) शरावम् । इति शब्दचन्द्रिका । शरा इति भाषा ॥

कूर्म्मराजः, पुं, (कूर्म्मरूपेण कूर्म्मेषु वा राजते यः । राज् + अच् ।) कच्छपराजः । तत्पर्य्यायः । अकूपारः २ परीवर्त्तः ३ । इति जटाधरः । तथाहि ।
"एष्वि ! स्थिरा भव भुजङ्गम ! धारयैनां
त्वं कूर्म्मराज ! तदिदं हितयं दधीथाः ।
दिक्कुञ्जराः कुरुत तन्निभये दिधीर्षा-
मार्य्याः करोतु हरकार्म्मुकमातनुध्वम्" ॥
इति महानाटकम् ॥ स एवादिकच्छपः । यथा ।
"विलोक्य विघ्नेशविधिं तदेश्वरो
दुरन्तवीर्य्योऽवितथोऽभिसन्धिः ।
हत्वा वपुः काञ्चनपर्व्वताभं महत्
प्रविश्य तोयं गिरिमुज्जहार ॥
सुरासुरेन्द्रैर्भुजवीर्य्यवेष्टितं
परिभ्रमन्तं गिरिमङ्ग ! एष्ठतः ।
बिभ्रत्तदावर्त्तनमादिकच्छपो
मेनेऽङ्गकण्डूयनमप्रमेयः" ॥
इति श्रीभागवते । ८ । ७ । ८, १० ॥

कूल, आहतौ । इति कविकल्पद्रुमः ॥ (भां–परं–सकं–सेट् ।) षण्ढस्त्री । कूलति वाटी प्राचीरम् । इति दुर्गादासः ॥

कूलं, क्ली, (कूलति जलप्रवाहं आहृणोतीति । कूल् + अच् ।) नद्या जलसमीपस्थानम् । (यथा, रघुः । १६ । ६५ ।
"इत्यध्वनः कैश्चिदहोभिरन्ते
कूलं समासाद्य कृशः सरय्वाः" ॥)
तत्पर्य्यायः । रोधः २ तीरम् ३ प्रतीरम् ४ तटम् ५ तटः ६ तटी ७ । इत्यमरः । १ । १० । ७ ॥ रोधम् ८ । इति शब्दरत्नावली ॥ वेला ९ । इति जटाधरः ॥ (कूल्यते आश्रियतेऽसौ । कूल + घञर्थे कः ।) स्तूपः । इति मेदिनी । तीरम् । इति विश्वः ॥

कूलकः, पुं, (कूल + संज्ञायां कन् ।) क्षमिपर्व्वतः । इति मेदिनी । उत्तर ढिपि इति भाषा ॥

कूलङ्कषः, पुं, (कूलं तीरं कषति भिनत्तीति । कष् + खश् मुम् च ।) समुद्रः । इति त्रिकाण्डशेषः ॥

कूलङ्कषा, स्त्री, (कूलङ्कष + टाप् ।) नदी । इति हलायुधः ॥ (यथा, श्राकुन्तले ५ माङ्के ।
"अपदेशमाविलयितुं समीहसे माघ नाम पातयितुम् । कूलङ्कषेव सिन्धुः प्रसन्नमोघं तटतरुञ्च"॥)

कूलभूः, स्त्री, (कूलस्य तीरस्य भूः भूमिः ।) तीरभूमिः । इति हेमचन्द्रः ॥

कूलवती, स्त्री, (कूलं तटः अस्त्यस्याः । अस्त्यर्थे मतुप् मस्य वः । ततो ङीप् ।) नदी । इति राजनिर्घण्टः ॥

कूलङ्कषकः, पुं, (कूले तड़ागादौ ऊर्द्धते संघीभवतीति । ऊर्द्ध सघे + ण्वुल् इदित्वात् नुम् च । एषोदरात् उकारलोपः ।) जलावर्त्तः । इति त्रिकाण्डशेषः ॥

कूवरः, पुं, क्ली, (कू शब्दे + वरच् ।) युगन्धरः । यत्र रथस्य यूपकाष्ठमासज्यते तत्र । इत्यमरसेदिनीकरौ । (यथा, रामायणे ३ । २८ । ३० ।
"हेमचन्द्रमसम्बाधं वैदूर्य्यमणिकूवरम्" ॥
रथमित्यर्थः ॥)

कूवरः, पुं, क्ली, (कू + वरच् ।) कुञ्जकः । कुँजा इति भाषा । मनोज्ञे, त्रि । इति मेदिनी ॥

कूवरी, स्त्री, (कूवर + गौरादित्वात् ङीष् ।) कम्बलाच्छादितरथः । इति हलायुधः ॥

कूष्माण्डः, पुं, (कु ईषत् ऊष्मा अण्डेषु बीजेषु यस्य ।) कर्कारुः । गणदेवताविशेषः । इति हेमचन्द्रः ॥ (कूष्माण्डाकारत्वात् शिवगणोऽपि तन्नाम्नाऽऽख्यायते । यथा, भागवते २ । ६ । ३२ । "अन्ये च ये प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः" ॥ ऋषिविशेषः । यथा, याज्ञवल्क्यः ।
"कूष्माण्डो राजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः" ॥
यजुर्वेदिकमन्त्रविशेषः । यथा, मनुः ८ । १०६ ।
"कूष्माण्डैर्वापि जुहुयाद् घृतस्यैतो यथाविधि" ॥
"कूष्माण्डमन्त्रा यजुर्वेदिकाः यद्देवा देवहेलनमित्येवमादयः । तैर्मन्त्रदेवतायै घृतस्यैतो जुहुयात्" । इति तट्टीकायां कुल्लूकभट्टः ॥)

कूष्माण्डकः, पुं, (कूष्माण्ड + स्वार्थे कन् ।) कूष्माण्डः । इत्यमरटीकायां स्वामी ॥

कूष्माण्डी, स्त्री, (कूष्माण्ड + गौरादित्वात् जातित्वात् वा ङीष् ।) ओषधिः । अम्बिका । इति हेमचन्द्रः । (अम्बिकायाश्च कूष्माण्डबलिप्रियत्वात् तथात्वम् ।
मन्त्रात्मकदेवतासु स्त्रक्षु तु स्त्रियां ङीष् । यथा, याज्ञवल्क्ये ।
"चिराज्ञोमोषितो भूत्वा कूष्माण्डीभिर्घृतं शुचिः ।
सुरापः स्वर्णहारी च ब्रह्मघ्नो जले स्थितः" ॥
"चिराज्ञमुमोषितः कूष्माण्डीभिर्यद्देवा देवहेड़नमित्याद्याभिः कूष्माण्डदृष्टाभिरनुवृद्भिर्मन्त्रलिङ्गदेवताभिर्दृग्भिस्तावारिंशदृचताऽऽहुतीर्जुहुत्वा शुचिर्भवेत्" ॥ तथा, मिताक्षरायाम् । "अथ कूष्माण्डीभिर्जुहुयादृग्भिरेऽपूतमिवात्मानं मन्येत यदर्व्वाचीनमेनोभूयुग्दृत्यायास्तस्मान्मुच्यते अथोनौ वा रेतः सिक्त्वा अन्यत्र स्नात्वादिति" । वशिष्ठस्मृतौ च ।
"सर्व्ववेदपवित्राणि वक्ष्यामहमतः परम् ।
येषां जपेन होमैश्च पूयन्ते नात्रसंशयः ॥
अघमर्षणं देवव्रतः शुद्धवत्यस्तरत् समाः ।
कूष्माण्ड्यः पावमान्यश्च दुर्गासावित्र्यथैव च" ॥)

कूहना, स्त्री, (कुह + युच् । एषोदरात् पूर्व्वदीर्घः ।) कुहना । इति शब्दरत्नावली ॥

कूहा, स्त्री, (कु कुत्सितं ईषदा ऊह्यतेऽत्र । ऊह वितर्के + अधिकरणे घञर्थे कः । यद्वा कुहयति मोहयति लोकान् । कुह + कः एषोदरादित्वाद् दीर्घः ।) कुज्झटिका । इति शब्दरत्नावली । कुया इति भाषा ॥

कृ, अ कृतौ । इति कविकल्पद्रुमः ॥ (भां–उभं–सकं–अनिट् ।) अ, करति करते । अयं कैश्चित् न मन्यते । इति दुर्गादासः ॥

कृ, अ ग वधे । इति कविकल्पद्रुमः ॥ (खां–उभं–सकं–अनिट् ।) अ ग, क्षणोति क्षणुते । इति दुर्गादासः ॥

कृ, अ द डु कृतौ । इति कविकल्पद्रुमः ॥ (तनां–उभं–सकं–अनिट् ।) अद, करोति कुरुते । डु, कृत्रिमम् । अस्मादगुणो मकारोऽप्यगुणो वा वक्तव्य इति वररुचिः ॥ "तेन किं करोमि कथं कुर्मि क्वानु गच्छामि माधव ! । दुर्योधनविहीनन्तु शून्यं सर्व्वमिदं जगत्" ॥ इति दुर्गादासः ॥

कृकः, पुं, (कृ + कक् ।) गलः । इति हेमचन्द्रः ॥

कृकणः, पुं, (कृ इति कणति शब्दं करोतीति । कृ + कण शब्दे + अच् ।) कृकरपक्षी । कयार इति भाषा । इत्यमरः । २ । ५ । १९ ॥ क्षत्रियः । इति शब्दरत्नावली ॥

कृकरः, पुं, (कृ करणं रुज्यादिकार्य्यं करोतीति । कृ + ट ।) शिवः । इति त्रिकाण्डशेषः ॥ (कृ इति स्तुत्यादिशब्दं करोतीति ।) शरीरवाह्यपञ्चवाय्वन्तर्गतवायुविशेषः । यथा,—
"कृकरस्तु स्तुते चैव जवाकुसुमसन्निभः" ।
इति शारदातिलकटीका ॥ कृकणपक्षी । इति शब्दरत्नावली ॥ चव्यकम् । करवीरवृक्षः । इति राजनिर्घण्टः ॥

कृकला, स्त्री, (कृकाकारं गलदेशान्तरं लातीति । ला + कः टाप् च ।) पिप्पली । इति राजनिर्घण्टः ॥ (कृकं श्लोभितगलं लातीति । कृकलासस्त्री । यथा, इन्द्रजालतन्त्रे ।
"सर्पदन्तं गृहीत्वा तु कृष्णवृश्चिककण्टकम् ।
कृकलासस्य संयुक्तं सूक्ष्मचूर्णन्तु कारयेत्" ॥)

छक्कं

छकलासः, पुं, (छकं कण्ठं लासयति श्लोभायुक्तं करोति । छक + लस + णिच् + अच् । एषोदरात् तालव्यशकारः ।) छकलासः । इति चिकाण्डशेषः ॥

छकलासः, पुं, (छकं कण्ठं लासयति श्लोभान्वितं करोतीति । छक + लस + णिच् अच् ।) जन्तुविशेषः । काँकलास् इति भाषा ॥ (यथा, भागवते । ८ । १० । ११ ।
"शिवाभिराखुभिः केचित् छकलासैः शशैरेरे" ।) तत्पर्य्यायः । सरटः २ । इत्यमरः । २ । ५ । १२ ॥ वेदारः ३ छकचपात् ४ दग्धाक्षनः ५ प्रतिसूर्य्यः ६ । इति चिकाण्डशेषः ॥ प्रतिसूर्य्यकथायामकः ७ दन्तिस्थः ८ कण्टकागारः ९ दुरारोहः १० द्रुमाश्रयः ११ । इति राजनिर्घण्टः ॥ (सूर्य्यवंशोद्भवो नृगनामको राजा ब्रह्मगोहरणेन कृकलासत्वं गतस्तद्विवरणं महाभारते १३ । ७० अध्याये । उक्तं यथा,—
"अत्रैव कीर्त्यते सद्भिर्ब्राह्मणस्वाभिमर्षणे ।
नृगेण सुमहत्कृच्छ्रं यदवाप्तं कुरूद्वह ! ॥
अदृश्यत महाकूपस्तृणवीरुत्समावृतः ।
प्रयत्नं तत्र कुर्व्वाणास्तस्मात् कूपाज्जलार्थिनः ॥
अमेया महता युक्तास्तस्मिंस्तोये सुसंवृते ।
ददृशुस्ते महाकायं छकलासमवस्थितम् ॥
तस्य चोद्धरणे यत्नमकुर्व्वंस्ते सहस्रशः ।
प्रग्रहैश्चर्म्मभिश्चैव तं बद्धा पर्व्वतोपमम् ।
नाशक्नुवन् समुद्धर्त्तुं ततो जग्मुर्जनार्द्दनम् ।
स्वमाहात्म्योदपानस्य छकलासः स्थितो महान् ।
तस्य नास्ति समुद्धर्त्तेत्येतत् कृष्णो न्यवेदयत्" ॥)

छकवाकुः, पुं, (छकेन गलेन वक्ति । "छके वचः कच्च" । उणां १ । ६ । इति छकशब्द उपपदे वच् कच्चान्तादेशः ।) कुक्कुटः । इत्यमरः । २ । ५ । १७ । (यथा, माघे ११ । ६ । "अनुनयमयष्टीत्वा त्याजसुप्ता पराची रतमथ छकवाकोत्तारमाकर्ण्य कल्ये" ॥) मयूरः । सरटः । इति मेदिनी ॥

छकवाकुध्वजः, पुं, (छकवाकुः मयूरः ध्वजे रथध्वजे यस्य ।) कार्त्तिकेयः । इति चिकाण्डशेषः ॥

छकाटिका, स्त्री, (छकं कण्ठं अटति आप्नोति कण्ठं व्याप्नोतीति भावः । अट् + ण्वुल् टाप् अत इत्वं च ।) घाटा । इत्यमरः । २ । ६ । ८८ ॥ घाड़ इति भाषा ॥ (यथा, सुश्रुते "अचूर्द्ध मर्म्माणि चतस्रो धमन्योऽधो मांसका द्वे छकाटिके" ।
"जानुकूर्परसीमन्ताधिपतिगुल्फमणिबन्धकुकुन्दरावर्त्तछकाक्षेति सन्धिमर्म्माणि" ॥)

छकूलासः, पुं, (छकलास + एषोदरात् दीर्घऊकारः ।) छकलासः । इत्यमरटीका ॥

छक्कं, क्ली, (छन्नति सुखम् । छदि छेदने "छतेरुक्कू च" । उणां । २ । २१ इति रक् कुक्कान्तादेशः ।) कपटम् । (यथा, मनुः ६ । ७८ ।
"नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ।
तथा त्यजन्निमन्देहं छक्काद्याप्ताद्विमुच्यते" ॥
"सितोपला वा समयावभूका
छक्केव सर्व्वेष्वपि भेषजं स्यात्" ॥

छत्

"रेतोविघातप्रभवे तु छक्के
समीक्ष्य दोषं प्रतिकर्म कुर्य्यात्" ॥
इति चरके चिकित्सास्थाने २६ अध्याये ॥)
तद्वति त्रि ॥ छन्तत्वेन पापमिति । सान्तपनादिव्रतम् । इत्यमरः । २ । ७ । ४२ ॥ (यथा, याज्ञवल्क्ये ।
"गोमूत्रं गोमयं क्षीरं दधिसर्पिःकुशोदकम् ।
अभ्यक्षा परेऽह्युपवसेत् छक्कं सान्तपनं चरन्" ॥)
स्तेये व्रते पुंस्यप्ययम् ॥
पापम् । इति मेदिनी ॥ मूत्रछक्करोगः । इति राजनिर्घण्टः ॥
("हरीतकीगोक्षुरराजवृक्ष-
पाषाणभिद्वन्नयवासकानाम् ।
क्वाथं पिबेन्मात्रिकसंप्रयुक्तम् ॥"
इति वैद्यकचक्रपाणिसङ्ग्रहे मूत्रछक्राधिकारे ॥
व्यसनम् । यथा, रामायणे ४ । १४ । १४ ।
"अव्रतं गोक्षपूर्व्वं मे चिरं छक्केऽपि तिष्ठता ।
धर्म्मलोभपरीतेन न च वध्ये कथञ्चन" ॥)

छक्कातिछक्कः, पुं, (छक्कात् कष्टादपि अतिछक्कः ।) व्रतविशेषः । यथा, वशिष्ठः । "अभक्षस्तृतीयः छक्कातिछक्को यावत् सकृदाददीत । यावदेकवारमुदकं हस्तेन ग्रहीतुं शक्नोति तावन्नवसु दिवसेषु भक्षयित्वा नवमुपवासः छक्कातिछक्कः" । सुमन्तुर्यथा । "द्वादशरात्रं निराहारः स छक्कातिछक्कः । एतत् छक्कातिछक्कद्वयं द्वादशाहसाध्यमशक्तविषयम्" । ब्रह्मपुराणम् ।
"चरेत् छक्कातिछक्कञ्च पिबेत्तोयञ्च शीतलम् ।
एकविंशतिरात्रन्तु कालेष्वेतेषु संयतः" ॥
कालेष्विति प्रातःसायंमध्याह्नेष्वित्यर्थः । इति प्रायश्चित्तविवेकः ॥ (यथा, मनुः ११ । २०८ ।
"अवगूर्य्य चरेत् छक्कमतिछक्कं निपातने ।
छक्कातिछक्कौ कुर्व्वीत विप्रस्योत्पाद्य शोणितम्" ॥)

छक्कारिः, पुं, (छक्कस्य मूत्रछक्करोगस्य कष्टस्य वा अरिर्नाशकः ।) विल्वान्तरवृक्षः । इति राजनिर्घण्टः ॥

छक्कार्द्धः, पुं, (छक्कस्य अतीवक्लेशसहव्रतविशेषस्य अर्द्धः अंशविशेषः । दिनषट्कसाध्यत्वात्तथात्वम् ।) दिनषट्कसाध्यव्रतविशेषः । यथा, आपस्तम्बः ।
"सायं प्रातस्तथैकैकं दिनद्वयमयाचितम् ।
दिनद्वयञ्च नाश्नीयात् छक्कार्द्धः सोऽभिधीयते" ॥
इति प्रायश्चित्तविवेकः ॥

छक्नुः, पुं, (करोति प्रतिमूर्त्त्यादिकम् । कृ + बाहुलकात् नु णत्वञ्च ।) चित्रकरजातिः । इति त्रिकाण्डशेषः ॥

छत्, ई ग्र प क्षिदि । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) ई, छत्तः । ग्र प, छन्तति । (यथा, हितोपदेशे,—
"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति" ॥)
छत्छत्वृदित्यादिसूत्रेण वेमत्वादेव निष्ठायां अनिमत्वे सिद्धे अस्य पूर्व्वस्य च ईदनुबन्धो नेमडीत्यस्य अभिचारसूचनार्थः । तेन धावुज् जवे मज्जीत्यादीनां धाविताः पाठ्यसार्था इत्यादि

छतकं

सिद्धमिति रमानाथः । मनितः यतितं इत्यादि सिद्धमिति क्रमदीश्वरः । ईदित्करणमाभ्यां यङ्लुकि निष्ठायां इम्निषेधार्थं इति केचित् । चरीछत्त इति । किञ्चैतन्मते धावितादीनां धावनं भावः धावोऽस्य जातः धावितः इत्यादि समाधानम् । "विरधिनिछन्ननक्षुन्नमुखाक्षतिकेतकिदन्तुरितार्त्ते" इत्यत्र निछन्तन इति जयदेवोक्तं निछन्नं करोति इति ग्रन्थान्तात् णौ नन्द्यादित्वादने साध्यम् । इति दुर्गादासः ॥

छत्, ई ध वेष्टे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् । ईर्निष्ठायामनिट् ।) ई, छत्तः । ध, छत्ताति चकर्त्त । इति दुर्गादासः ॥

छतं, क्ली, (क्रियते सत्यनेवानुष्ठीयतेऽस्मिन् यद्वा क्रियते सत्ये स्थाप्यते लोको यत्र । छ + क्तः ।) सत्ययुगम् । (यथा, विष्णुपुराणे । २ । १ । ४१ ।
"छतत्रेतादिसर्गेऽयं युगाख्यां लोकसन्ततिः" ॥)
पर्य्याप्तम् । इत्यमरः । ३ । ३ । ७६ ॥ बलम् । इति हेमचन्द्रः ॥ अलमर्थः । इति मेदिनी ॥ (यथा,—
शाकुन्तले १ अङ्के । "अथवा छतं सन्देहेन" ॥
पुं, वसुदेवस्य रोहिण्यां पत्न्यां जातः पुत्रविशेषः । यथा, भागवते ९ । २४ । ४६ ।
"बलं गदं सारणञ्च दुर्म्मदं विमलं ध्रुवम् ।
वसुदेवस्तु रोहिण्यां छतादीनुदपादयत्" ॥)

छतं, त्रि, (क्रियते विधीयते हन्यते निष्पाद्यते वा । छ + कर्म्मणि क्तः ।) विहितम् । (यथा, वेणीसंहारे ।
"छतमनुमतं दृष्टं वा यैरिदं गुरुपातकम्" ॥)
छिंसितम् । इति मेदिनी ॥ निष्पादितम् । इत्यमरटीकायां मथुरानाथः ॥

छतकं, क्ली, (छत + संज्ञायां कन् ।) विड्लवणम् । इत्यमरः ॥ (अस्य पर्य्याया यथा,
"विड्म्लेच्छञ्च छतकं तथा द्राविड्मासुरम्" ॥
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥
छन्ततीति छती छेदने + "वऊलमन्यत्रापि" । उणां २ । ३७ । इति कुन् । मिथा । ह्रस्वश्चलदत्तः ॥ पुं, वसुदेवस्य मदिरायां पत्न्यां जातः पुत्रविशेषः । यथा, भागवते ९ । २४ । ४८ ।
"नन्दोपनन्दछतकशूराद्या मदिरात्मजाः" ॥
त्रैलोक्यमेतत् कृतकमित्युच्यते कार्य्यत्वात् । यथा, विष्णुपुराणे । २ । ७ । १६-२० ।
"पादगम्यन्तु यत्किञ्चित् वस्तुस्ति पृथिवीमयम् ।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः ॥
भूमिसूर्य्यान्तरं यत्तु सिद्धादिमुनिसेवितम् ।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम ! ॥
ध्रुवसूर्य्यान्तरं यच्च नियुतानि चतुर्दश ।
स्वर्लोकः सोऽपि गदितो लोकसंस्थानचिन्तकैः ॥
त्रैलोक्यमेतत् कृतकं मैत्रेय ! परिपठ्यते ।
जनस्तपस्तथा सत्यमिति चाकृतकं त्रयम् ॥
कृताकृतकयोर्मध्ये मर्त्यलोक इति स्मृतः ।
शून्यो भवति कल्पान्ते योऽत्यन्तं न विनश्यति" ॥
अत्र व्याख्यायां श्रीमत्स्वामिपादेनोक्तम् ।
यथा,—
"त्रैलोक्यं कृतकं प्रतिकल्पं कार्य्यत्वात् ।

जगर्जोकादित्रयं अक्षतकं प्रतिकल्पमकार्य्यत्वात् ॥ महालाकस्य क्षताक्षतत्वे हेतुमाह शून्य इति" ॥)

क्षतकः, त्रि, (क्षन्तति स्वरूपम् । क्षत् + क्कुन् । करणाद्यात इत्यर्थः । क्षत्रिमस्य स्वरूपाच्छादकत्वात् तथात्वम् ।) क्षत्रिमः । इत्युणादिकोषः ॥ (यथा, महाभारते । ४ । २ । २९ ।

"एतेन विधिना क्षत्रः क्षतकेन यथानलः" ॥)

क्षतकर्म्मा, [न्] त्रि, (क्षतं कर्म्म येन सः ।) कार्य्यक्षमः । तत्पर्य्यायः । प्रवीणः २ शिक्षितः ३ निष्णातः ४ निपुणः ५ दक्षः ६ क्षतहस्तः ७ क्षतमुखः ८ कुशलः ९ चतुरः १० अभिज्ञः ११ विज्ञः १२ वैज्ञानिकः १३ पटुः १४ क्लेकः १५ विदग्धः १६ । इति हेमचन्द्रः ॥ (यथा, महाभारते १ । १५५ । २९ ।

"अथवाप्यहमेवैनं हनिष्यामि बलोदर ! । क्षतकर्म्मा परिश्रान्तः साधु तावदुपारम" ॥

पुं, विष्णुः । यथा, महाभारते १३ । १४९ । ९७ ।

"इन्द्रकर्म्मा महाकर्म्मा क्षतकर्म्मा क्षतागमः" ॥)

क्षतकृत्यः, त्रि, (क्षतं निष्पादितं कृत्यं कार्य्यं येन सः ।) निष्पन्नकर्म्मा । समाप्तकार्य्यः । यथा, माघे । २ । २२ ।

"क्षतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य ताम्" ॥

क्षतकोटिः, पुं, (क्षता विहिता कोटिः शास्त्राणां अन्तरर्थादिभेदने पूर्व्वपक्षविशेषो येन । यद्वा, क्षता लब्धा कोटिः श्रेष्ठता येन । धातूनामनेकार्थत्वात् लभधातुरत्र प्राप्त्यर्थे गृह्यते ।) काश्यपमुनिः । उपवर्षमुनिः । इति त्रिकाण्डशेषः ॥

क्षतक्रियः, त्रि, (क्षता क्रिया कार्य्यं येन सः ।) क्षतकार्य्यः । यथा, मनुः । ५ । ९९ ।

"विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम् । वैश्यः प्रतोदं रश्मीन् वा यष्टिं शूद्रः क्षतक्रियः" ॥

क्षतघ्नः, त्रि, (क्षतं येन केनचिज्जनेन उपक्षतं हन्ति नाशयति यः । अहङ्कारादिप्रयुक्तया दुष्टबुद्ध्या उपक्षतस्यानङ्गीकारकत्वात् तथात्वम् ।) क्षतहन्ता । अर्थात् येन केनचित्कृतस्य उपकारादेर्घातकः अस्वीकर्त्ता । नेमकहाराम इति पारस्य भाषा ॥ (यथा, मनुः ४ । २१४ ।

"पिशुनानृतिनोश्चार्थं क्रतुविक्रयिणस्तथा । ग्रैलूषतुन्नवायार्थं क्षतघ्नस्यान्नमेव च" ॥)

तस्य प्रायश्चित्ताभावो यथा,—

"ब्रह्मघ्ने च सुरापे च चौरे च गुरुतल्पगे । निष्कृतिर्विहिता सद्भिः क्षतघ्ने नास्ति निष्कृतिः" ।

स तु बहुविधो यथा,—

"भर्त्तृपिण्डापहर्त्ता च पितृपिण्डापहारकः । यस्मादुद्धरीता विद्याच दक्षिणां न प्रयच्छति ॥ पुत्रान् स्त्रियश्च यो हन्ति यश्च तान् घातयेन्नरः । क्षतस्य दोषं वदति सकामान् न करोति यः ॥ न स्मरेच्च क्षतं यस्तु आत्मनाः यस्तु दूषयेत् । सर्व्वान्नान्तविभिः सार्द्धं क्षतघ्नानग्रवीन्मनुः" ॥

इति प्रायश्चित्ततत्त्वे स्कन्दपुराणवचनम् ॥

क्षतच्छिद्रा, स्त्री, (क्षतं छिद्रं यस्याम् ।) कोशातकी लता । इति राजनिर्घण्टः ॥

क्षतज्ञः, त्रि, (क्षतं उपक्षतं जानाति स्वीकरोति यः । ज्ञा + कः ।) मर्य्यादी ।

(यथा, मनुः । ७ । २०९–२१० ।

"धर्म्मज्ञश्च क्षतज्ञश्च तुष्टिप्रकृतिमेव च । अनुरक्तः स्थिरारम्भः लघुमित्रः प्रशस्यते ॥ प्राज्ञं कुलीनं शूरञ्च दक्षं दातारमेव च । क्षतज्ञं धृतिमन्तञ्च कृतमाऽऽरभते बुधः" ॥)

कुक्कुरे, पुं । इति मेदिनी ॥

(पुं, विष्णुः । यथा, महाभारते १३ । १४९ । २२ ।

"अनुत्तमो दुराधर्षः क्षतज्ञः क्षतिरात्मवान्" ॥)

क्षतजा, स्त्री, (क्षतं जायते । क्षत + जै + कः ।) जायमाना जता । इति राजनिर्घण्टः ॥

क्षतदासः, पुं, (क्षतः विहितः क्षतनियमो वा दासः ।) नारदोक्तपञ्चदशदासान्तर्गतदासविशेषः । स तु केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दास इति क्षतसमयः । इति क्रमसंग्रहः ॥

क्षतपुङ्खः, त्रि, (क्षतः अभ्यस्तः पुङ्खः पुङ्खयुक्तो वाणो येन ।) वाणशिक्षाविचक्षणः । भाल तिरन्दाज इति भाषा । तत्पर्य्यायः । क्षतहस्तः २ सुप्रयोगविशिखः ३ । इत्यमरः । २ । ८ । ६८ ॥

क्षतपूर्व्वी, [न्] त्रि, (क्षतं निष्पादितं पूर्व्वमनेन । कृतपूर्व्व + "सपूर्व्वाच्च" । ५ । २ । ८७ । इति इनिः ।) पूर्व्वनिष्पन्नकर्म्मा । यथा । क्षतपूर्व्वी कटम् । इति संक्षिप्तसारव्याकरणम् ॥

क्षतफलं, क्ली, (क्षतं फलं अस्य ।) कक्कोलम् । इति राजनिर्घण्टः ॥

क्षतफला, स्त्री, (क्षतं फलं अस्याः ।) कोलवल्ली इति राजनिर्घण्टः ॥

क्षतमालः, पुं, (क्षता माला अस्य । मालावदुत्पन्नप्रसूनत्वादस्य तथात्वम् ।) आरग्वधवृक्षः । सोंदाल इति भाषा । इत्यमरः । २ । ४ । २४ ॥ कर्णिकारवृक्षः । स तु वर्ष्यारग्वधः । इति राजनिर्घण्टः । छोट शोणालु इति भाषा । (अस्य पर्य्याया यथा ।

"आरेवतो राजवृक्षः प्रग्रहश्च तुरङ्गमः । आरग्वधोऽथ शम्याकः क्षतमालः सुवर्णकः" ॥

इति वैद्यकरत्नमालायाम् ।

चरके कल्पस्थाने ऽष्टमेऽध्याये ऽस्य पर्य्याया यथा ।

"आरग्वधो राजवृक्षः सम्याकश्च तुरङ्गमः । प्रग्रहः क्षतमालश्च कर्णिकारोऽवघातकः" ॥)

क्षतमुखः, त्रि, (क्षतं संस्कृतं मुखं यस्य ।) क्षतकर्म्मा । क्षती । इत्यमरः । ३ । १ । ४ ॥

क्षतलक्षयः, त्रि, (क्षतानि लक्ष्याणि अस्य ।) गुणैः प्रतीतः । स्थैर्य्यादिगुणैः ख्यातः । इत्यमरः । ३ । १ । १० ॥ (पुं, सर्व्वलक्ष्यत्ववत्त्वात् विष्णुः । यथा, महाभारते । १३ । १४९ । ६४ ।

"अविज्ञाता सहस्रांशुर्विधाता क्षतलक्षयः" ॥)

क्षतवेतनः, त्रि, (क्षतं विहितं वेतनं यस्य ।) वेतनेन नियुक्तदासादिः । इति स्मृतिः ॥

क्षतवेधकः, पुं, (क्षतः वेधोऽस्य । ततः कप् ।) घोषातकी । इति रत्नमाला । श्वेतधोवा इति भाषा ॥

क्षतवेधना, स्त्री, (क्षतं वेधनं अस्याः ।) कोषातकी लता । इति राजनिर्घण्टः ॥

क्षतश्रमः, त्रि, (क्षतः श्रमो यत्र ।) महोत्साहः । येन श्रमः क्षतः सः । इति शब्दमाला ॥

क्षतसापत्निका, स्त्री, (क्षतं सापत्नं यस्याः । कप् टाप् ततः अत इत्वे य लोपः ।) क्षतसपत्नीभावा । प्रथमविवाहिता स्त्री । तत्पर्य्यायः । अध्यूढा २ अधिविन्ना ३ । इत्यमरः । २ । ६ । ७ ॥ क्षतसापत्नका ४ क्षतसापत्नी ५ क्षतसापत्नीका ६ । इति तट्टीकायां रमानाथः ॥

क्षतहस्तः, त्रि, (क्षतः अभ्यस्तः हस्तः बाणादिनिक्षेपलाघवरूपा शिक्षा येन सः ।) क्षतपुङ्खः । सुशिक्षितशरमोक्षयोधादिः । इत्यमरः २ । ८ । ६८ ॥ (यथा, महाभारते । ४ । ५६ । २० ।

"अप्राप्तांश्चैव तान्पार्थश्चिच्छेद क्षतहस्तवत्" ॥)

क्षताञ्जलिः, त्रि, (क्षतः अञ्जलिः येन सः । बद्धाञ्जलिः । यथा, छन्दोगपरिशिष्टे ।

"तदसंयुक्तपार्ष्णिर्वा एकपादर्द्धपादपि । कुर्य्यात्कृताञ्जलिर्वापि ऊर्द्धबाहुरथापि वा" ॥

इति सूर्य्योपस्थाने आङ्गिकाचारतत्त्वम् ॥ (क्षतः अञ्जलिरिव पत्रसङ्घातो येन ।) ओषधिभेदे, पुं । इति धरणी ॥

क्षतान्तः, पुं, (क्षतः अन्तः नाशः, शास्त्रनिर्णयः, विपर्य्ययो वा येन । यथायथं व्युत्पत्तिर्दर्शनीया ।) यमः । (यथा, गोः रामायणे । ५ । ३५ । ३ ।

"ऐश्वर्य्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे । रज्ज्वेव पुरुषो बद्धः क्षतान्तेनोपनीयते" ॥)

सिद्धान्तः । (यथा, भगवद्गीतायाम् । १४ । १३ ।

"पञ्चैतानि महाबाहो कारणानि निबोध मे । साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्व्वकर्म्मणाम्" ॥)

दैवम् । पूर्व्वदेहकृतं पापोन्मुखीभूतं शुभाशुभकर्म्म । अदृष्टकर्म्म । इत्यमरः । १ । १ । ६४ ॥ अनिवारः । इति शब्दचन्द्रिका ॥ (यथा, तिथितत्त्वधृतज्योतिर्वचने ।

"कृतान्तकुजयोर्वारे यस्य जन्मदिनं भवेत्" ॥

यमदैवत्यभरणीनक्षत्रम् । तेन द्वित्वसङ्ख्या ॥ अग्नियमदहनेति वचनात् ॥)

क्षतान्तजनकः, पुं, (क्षतान्तस्य यमस्य जनकः जन्मदाता ।) सूर्य्यः । इति हेमचन्द्रः ॥

क्षतान्ता, स्त्री, (क्षतान्त + टाप् ।) रेणुकानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

क्षतार्थः, त्रि, (क्षतः निष्पादितः प्राप्तो वा अर्थः प्रयोजनं येन ।) क्षतप्रयोजनः । क्षतकार्य्यः । यथा, माघे । १ । ९ । "विलोकनेनैव तवासुना मुने क्षतः क्षताधाऽस्मि निवर्हितांहसा" ॥

क्षतालयः, पुं, (क्षते अन्यक्षतगर्त्ते जलाशयादौ आलयः आश्रयो यस्य ।) भेकः । इति त्रिकाण्डशेषः ॥ (क्षतः आलयः येन । क्षतवासे, त्रि । यथा, रामायणे ।

"यत्र ते दयिता भार्य्या तनयाश्च क्षतालयाः" ॥)

क्षतावग्रन्थिका, त्रि, (क्षता आवग्रन्थिका येन ।) वस्त्रादिना क्षतस्कन्धानुजङ्घादिबन्धः । इति कात्यायनः ॥ (यथा, आङ्गिकतत्त्वधृतकात्यायनवचने ।

"प्रौढ़पादो न कुर्व्वीत स्वाध्यायपितृतर्पणम् । आसनाद्रूढ़पादस्तु जानुनोर्जङ्घयोस्तथा ।

क्षतावशक्थिको यस्तु प्रौढ़पादः स उच्यते" ॥)
क्षतिः, स्त्री, (क्षद + भावे क्तिन् ।) करणम् । हिंसा । इति मेदिनी ॥ (पुरुषप्रयत्नः । कर्त्तृव्यापारः । क्रिया । यथा, सुग्धबोधे ।
"जगतां कारकः क्षत्रा क्षतिर्मुररिपोरियम्" ॥ पुं, ऋषिविशेषः । यथा, विष्णुपुराणे । ३ । ६ । ७ ।
"हिरण्यनाभशिष्यस्य चतुर्विंशतिसंहिताः । प्रोवाच क्षतिनामासौ शिष्येभ्यः स महामतिः" ॥ नृपभेदः । यथा, मार्कण्डेयपुराणे । ८ । २१ ।
"सप्ताश्वमेधानाहृत्य राजसूयञ्च पार्थिवः । क्षतिर्नाम श्रुतः स्वर्गात् असत्यवचनात् क्षतः" ॥ स तु जनकवंशजातः । यथा, भागवते ९ । १३ । २६ ।
"बऊलाश्वो धृतेस्तस्य क्षतिरस्य महाबलः" ॥ विंशत्यक्षरपादकछन्दोभेदः ॥ यथा, "क्षतिः प्रकृतिराकृतिः" ॥ विंशतिसङ्ख्या । कर्त्तनी । यथा, ऋग्वेदे । १ । १६६ । ३ ।
"ऐषामंसेषु रम्भिणीव रारभे
हस्तेषु खादिश्च क्षतिश्च सन्दधे" ॥
विष्णुः । यथा, महाभारते । १३ । १४९ । २२ ।
"अनुत्तमो दुराधर्षः क्षतज्ञः क्षतिरात्मवान्" ॥)
क्षतिकरः, पुं, (क्षतिसङ्ख्याः विंशतिसङ्ख्या करा यस्य ।) रावणः । इति शब्दमाला ॥
क्षती, [न्] त्रि, (क्षतं धर्म्म प्रशस्तमस्यास्तीति । अत इनिः ।) निपुणः । पण्डितः । इत्यमरः । ३ । १ । ७ ॥ साधुः । पुण्यवान् । इति शब्दरत्नावली ॥ (क्षत + क्रियः । यथा, रघौ ३ । ५१ ।
"यद्याय शक्रं यदि स्वर्ग एव ते
नखक्षतैर्निर्जित्य रघुं क्षती भवान्" ॥)
क्षत्तं, त्रि, (क्षती प्र पृ क्षिदि + क्तः ।) क्षिप्तम् । चेष्टितम् । इति हेमचन्द्रः ॥
क्षत्तिः, स्त्री, (क्षत्रते इति । क्षद् + कर्म्मणि क्तिन् ।) क्षत्रसारादिधर्म्मः । इत्यमरः । २ । ७ । ३७ ॥ (यथा, महादेवध्याने ।
"समन्तात् क्षुतमारक्षत्रैर्व्याघ्रक्षत्तिं वसानम्" ॥) त्वक् । भूजः । क्षत्रियानखक्षतम् । इति मेदिनी ॥
क्षत्तिका, स्त्री, (क्षन्तति उग्रत्वात् । क्षद् + "क्षत्तिमिदिलतिभ्यः क्विप्" । उणां ३ । १७७ । इति तिकन् क्विप च ।) अश्विन्यादिसप्तविंशत्यन्तर्गतनक्षत्रतृतीयनक्षत्रम् । तत्पर्य्यायः । बऊला २ अग्निदेवा ३ । इति हेमचन्द्रः ॥ तस्या रूपम् । अग्निशिखाक्षतिघटतारकामयम् । इति कात्यायनः । क्षुरनिभघटतारामयम् । इति केचित् । तस्या अधिष्ठात्री देवता अग्निः । सा तु मिश्रगणान्तर्गता । इति दीपिका ॥ तत्र जातस्य फलम् ।
"क्षुधाधिकः सत्यधनैर्विहीनो
वृथाटनोत्पन्नमतिः क्षतघ्नः ।
कठोरवाक् चाहितकर्म्मकृत् स्यात्
चेत् क्षत्तिकायां मनुजः प्रसूतः" ॥
इति कोष्ठीप्रदीपः ॥
क्षत्तिकासुतः, पुं, (क्षत्तिकायाः सुतः तया पालितत्वात् ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥
क्षत्तिवासः, पुं, (क्षत्त्या गजासुरचर्म्मणा वस्ते स्वकटिदेशं आच्छादयति यः । वस् आच्छादने + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) शिवः । इति द्विरूपकोषः ॥
क्षत्तिवासः, [स्] पुं, (क्षत्तिर्गजासुरस्य चर्म्म वासोऽस्य ।) शिवः । इत्यमरः । १ । १ । ३३ ॥ (यथा च महादेवस्य चर्म्मवसनत्वं जातं तथा काशीखण्डे ६७ अध्याये वर्णितं यथा,—
"कोलाहलो महानासीत् त्रात त्रातेति सर्व्वतः । महिषासुरपुत्रोऽसौ समायाति गजासुरः ॥ प्रमथान् प्रमथान् सर्व्वान् निजवीर्य्यमदोद्धतः । यत्र यत्र धरायां स चरत्यं प्रमिमीति हि ॥ बाहुकान् दोलयाञ्चक्रे तत्र तत्रास्य भारतः । उत्पेतेरेव तरवः पतन्ति शिखरैः सह ॥ तस्य दोर्दण्डवातेन चूर्णाः स्युश्च शिलोच्चयाः । यस्य मौर्व्विज्यसंघर्षाद् घना व्योम त्वजन्त्यजम् ॥ गीर्व्वाणमं न चाद्यापि जऊस्तत्रेत्यसङ्गजम् । यस्य निःश्वाससम्भारैरुत्तरङ्गा महाब्धयः ॥ नाद्याप्यमन्दकल्लोला भवन्ति तिमिभिः सह । योजनानां सहस्राणि नव यस्य समुच्छ्रयः ॥ तावानेव हि विस्तारस्तनोर्मायाविनोऽस्य हि । यन्नेत्रयोः पिङ्गिमा तथा तरङ्गिमा पुनः ॥ विद्युता गोह्यतेऽद्यापि सोऽयमायाति सत्वरः । यां यां दिशं समभ्येति सोयं दुःसहदानवः ॥ नाद्य समीमवेदस्य साध्वसादिव दिग्भयम् । ब्रह्मण्यवरखायं हतीह्रतजगत्त्रयः ॥ अवध्योऽहं भवामीति स्त्रीपुंभिः कामनिर्जितैः । ततस्त्रिशूलहेतिस्तमायान्तं दैत्यपुङ्गवम् ॥ विधायावध्यमत्येन शूलेनाभिजघान तम् । प्रोतस्तेन त्रिशूलेन स च दैत्यो गजासुरः ॥ हृषीकृतमिवात्मानं मन्यमानो जगौ हरम् ॥
गजासुर उवाच ।
त्रिशूलपाणे ! देवेश ! जाने त्वां स्मरहारिणम् । तव हस्ते मम वधः श्रेयानेव पुरान्तक ! ॥ किन्विदिच्छामुमित्थां अवधेहि ममेरितम् ॥ सत्यं ब्रवीमि नासत्यं शम्भुशय ! विचारय । त्वमेको जगतीवन्द्यो ! विश्वस्योपरि संस्थितः ॥ अहं त्वदुपरिष्टाच्च स्थितोस्मीति जितं मया । धन्योस्मानुग्रहीतोस्मि त्वत्त्रिशूलाग्रसंस्थितः ॥ कालेन सर्व्वमेवैतत्त्यं श्रेयसे शम्भुरीदृशः ॥
इति तस्य वधः श्रुत्वा देवदेवः क्षपानिधिः । प्रोवाच प्रहसन् ब्रह्मशुर्घटोद्भवगजासुरम् ॥
ईश्वर उवाच ।
गजासुर ! प्रसन्नोस्मि मच्छौर्य्यसेवधे ! । वाञ्छितं वरं ब्रूहि ददामि सुमते ऽधुना ! ॥
इत्याकर्ण्य स दैत्येन्द्रः प्रत्युवाच महेश्वरम् ॥
गजासुर उवाच ।
यदि प्रसन्नो देवेश वासस्तदा नित्यं वसान मे । इमां क्षत्तिं विरूपाक्ष ! त्वत्त्रिशूलाभिपावितां । सुप्रभाभां सुखस्पर्शां रक्षाङ्गवपुषीकृताम् ।
इङ्गनिः सदैवास्तु सदैवास्त्वतिकोमला । सदैव निर्म्मला चास्तु सदैवास्त्वतिमङ्गलम् ॥ महातपानलज्वालां प्राप्यापि सुचिरं विभो ! । न दग्धा क्षत्तिरेषा मे पुण्यगन्धनिधिस्ततः ॥ यदि पुण्यवती नैषा मम क्षत्तिर्दिगम्बर ! । तदा त्वदङ्गसङ्गोऽस्याः कथं जातो रथाङ्गने ॥ अन्यच्च मे वरं देहि यदि तुष्टोऽसि शङ्कर ! । नाम्नात्तु क्षत्तिवासास्ते प्रारभ्याद्यतनं दिनम् ॥
इति तस्य वचः श्रुत्वा तथेत्युक्त्वा च शङ्करः । पुनः प्रोवाच तं दैत्यं भक्तिनिर्म्मलमानसम् ॥
ईश्वर उवाच ।
शृणु पुण्यनिधे ! दैत्य ! वरमन्यं सुदुर्लभम् । अविमुक्ते महाक्षेत्रे स्थातव्यं त्वयेव हि ॥ इदं पुण्यशरीरं ते क्षेत्रेऽस्मिन् मुक्तिसाधने । मम लिङ्गं भवत्वत्र सर्व्वेषां मुक्तिदायकम् ॥ क्षत्तिवासेश्वरं नाम महापातकनाशनम् । सर्व्वेषामेव लिङ्गानां शिरोभूतमिदं वरम् ॥ यावन्ति सन्ति लिङ्गानि वाराणस्यां महान्त्यपि । उत्तमं तावतामेतदुत्तमाङ्गवदुत्तमम्" ॥ * ॥
यदि चात्र गजासुरचर्म्मणाच्छादकत्वं वर्णितं तथापि कार्य्यावस्थाविशेषेण व्याघ्रचर्म्मणाप्यस्य परिधेयकत्वं दृश्यते यथा व्याघ्रक्षत्तिं वसानमिति ध्यानादौ स्फुटमेव वस्तुतस्तु नचैतत् बाह्यचर्म्मादिविषय एव ग्रन्थकारेण भगवता महर्षिणा वर्णितः त्रिगुणात्मिका प्रकृतिरेव तस्याच्छादिका इति आध्यात्मिकी स्वरूपोक्तिः । यथा, "गुणमयी मायैषा वावह तस्य परमस्य आच्छादनी" । व्याघ्रचर्म्मादेरपि तु मायाया वैचित्र्यप्रदर्शनायैव । अपि च कटिदेशपर्य्यन्तोक्तिरेवमाद एव मायाच्छादितत्वात् । यथा, श्रुतिः ।
"मादोऽस्य विश्वाभूतानि त्रिपादोऽस्य स्वयंप्रभः" ॥)
क्षत्नुः, त्रि, (क्षद + "क्षदिनिभ्यां क्त्नुः" । उणां ३ । १० । इति क्त्नुः ।) शिक्षी । इत्युणादिकोषः ॥ (यथा,—ऋग्वेदे १ । ६२ । १० । "यन्नीव क्षत्नुर्विज आमिनाना मर्त्तस्य देवी जरयन्त्यायुः" ॥)
क्षत्यं, क्ली, (क्षद + "विभाषा क्षविधोः" । ३ । १ । १२० । इति क्यप् तुगागमश्च ।) कार्य्यम् । (यथा, गोः रामायणे ३ । ६० । २७ ।
"तथा स राक्षसीवाक्यं राक्षसेन्द्रः प्रतापवान् । निश्चक्राम ततः क्षत्यं किं क्षत्यमिति चिन्तयन्" ॥) प्रयोजनम् । इति हेमचन्द्रः ॥
क्षत्यः, त्रि, (क्षद + क्यप् तुगागमश्च ।) विदितः । इति मेदिनी ॥ धनादिभिर्म्येयः । इति जटाधरः ॥ प्रत्ययविशेषः । यथा,—
"क्षत्याः षट्ते समाख्याताः क्यप् क्तौ भावकर्म्मणोः । तव्यानीयावनत्याद्यत्केलिमः कर्म्मकर्त्तरि" ॥
इति सुपद्मसम्मता कारिका ॥ कर्त्तरि कर्म्मणि चार्थे विहिताः क्षत्या वाक्यलिङ्गाः स्युः । क्षत्याख्यादयः वोपदेवमते "ते क्त्याः" "क्रुञो कर्माणे" इत्युक्तेः क्वचित् क्षत्याः कर्त्तर्य्यपि स्युः । कर्त्तरि यथा भक्ष्यस्तरुः भक्ष्या जता भक्ष्यं वनम् । कर्म्मणि यथा, ग्रामो गन्तव्यः नगरी गन्तव्या पुरं गन्तव्यम् ।

कर्त्तरि कर्म्मणि किं स्नातव्यं स्नेयं ब्रह्मभूयम् ॥ ब्रह्महत्या इह भावे कृत्याः । असंज्ञायामित्येव सूर्य्योऽर्कः भित्वोद्भौ नदौ । इत्यमरटीकायां भरतः ॥

कृत्या, स्त्री, (कृ + भावे क्यप् ।) क्रिया । यथा वां कृत्यामकार्षीः । देवता । यज्ञदेवताविशेषः । इत्यमरभरतौ ॥ यथा, प्रक्रादचरिते ।

"कृत्यामुत्पादयामासुर्ज्वालामालोज्ज्वलाकृतिम्" ॥
तस्या ध्यानं यथा,—

"क्रोधाज्ज्वलन्तीं ज्वलनं वमन्तीं
सृष्टिं दहन्तीं दितिजं ग्रसन्तीम् ।
भीमं नदन्तीं प्रणमामि कृत्यां
रोरूयमाणां क्षुधयोग्रकालीम्" ॥ * ॥

आभिचारिकी क्रिया । यथा,—

"रोगकृत्याग्रहादीनां निरासः शान्तिरीरिता ।
वश्यं जनानां सर्व्वेषां विधेयत्वमुदीरितम्" ॥
इति षट्कर्म्मदीपिका ॥

कृत्रिमं, क्ली, (कृ + क्त्रिः मप् च ।) विड्लवणम् । इति मेदिनी । काचलवणम् । जवादिनामगन्धद्रव्यम् । रसाञ्जनम् । इति राजनिर्घण्टः ॥

कृत्रिमः, पुं, सिक्थकः । (तुरुष्कनामगन्धद्रव्यविशेषः ।) इति मेदिनी । (कृ + "वृतः क्त्रिः" । कृत्या क्रियया निर्वृत्त इति "चेर्मप् नित्यम्" इति मप् ।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः । इति जटाधरः । (एतद्विषयकविवरणन्तु पुत्रशब्दे द्रष्टव्यम् ॥)

कृत्रिमः, त्रि, ("वृतः क्त्रिः" । ३ । ३ । ८८ । इति क्त्रिः । ततः कृत्या निर्वृत्तः । "चेर्मप् नित्यम्" ४ । ४ । २० । इति मप् ।) करणाज्जातः । रचितः । इति मेदिनी ॥ (यथा, रघौ १६ । ३७ ।

"प्रावर्षि प्रमदवर्हिणेष्वभूत्
कृत्रिमाद्रिषु विहारविभ्रमः" ॥)

कृत्रिमकः, पुं, (कृत्रिम + स्वार्थे संज्ञायां वा कन् ।) तुरुष्कनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

कृत्रिमधूपकः, पुं, (कृत्रिमः विविधसुगन्धिद्रव्यादिकल्पितो धूपः । ततः स्वार्थे कन् ।) नागासुगन्धिद्रव्यकृतदशाङ्गादिधूपः । तत्पर्य्यायः दशकधूपः २ । इत्यमरः । २ । ६ । १२८ ॥

कृत्रिमपुत्रः, पुं, (कृत्रिमश्चासौ पुत्रश्चेति ।) द्वादशपुत्रमध्ये पुत्रविशेषः । तथा च मनुः ।

"सदृशन्तु प्रकुर्य्याद्यं गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः" ॥
अस्यार्थः । "यः पुनः समानजातीयं पित्रोःपारलौकिकश्राद्धादिकरणाकरणाभ्यां गुणदोषौ भवत इत्येवमादिज्ञं पुत्रगुणैश्च मातापित्रोराराधनादिभिर्युक्तं पुत्रं कुर्य्यात् स कृत्रिमाख्यः पुत्रो बोध्यः" । इति कुल्लूकभट्टः ॥ पुत्रलिका । यथा । कुमारे । १ । २६ ।

"सा कन्दुकैः कृत्रिमपुत्रकैश्च
रेमे मुहुर्मध्यगता सखीनाम्" ॥

कृत्रिममित्रः, पुं, (कृत्रिमं मित्रं इति । पुं स्त्रं नियामकात् ।) रचितबन्धुः । इति स्मृतिः ॥

कृत्सं, क्ली, (कृन्तति कृणत्ति वा । कृत् छेदे वेष्टने च । "स्त्रस्त्रिकृत्यृषिभ्यः कित्" । उणां ३ । ६६ । इति सः कित्च ।) जलम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ समुदायः । इत्युणादिकोषः ॥

कृत्स्नं, क्ली, (कृत् + क्त्स्न प्रत्ययः ।) जलम् । सर्व्वम् । (यथा, गीतायाम् । ११ । १३ ।

"तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा" ॥)
कुत्सितः । इति मेदिनी ॥

कृत्स्नः, त्रि, (कृत् + "कृत्यसूभ्यां क्त्स्नः" । उणां ३ । १७ । इति क्त्स्नः ।) अशेषः । समस्तः । इत्यमरः । ३ । १ । ६५ ॥ (यथा, मनुः २ । १६५ ।

"तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना" ॥)

कृदरः, पुं, (कृ + अच् । "कृदरादयश्च" । उणां ५ । ४१ । इति साधुः ।) धान्यादिगृहम् । गोला इति भाषा ॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कृन्तत्रं, क्ली, (कृन्तति इति । "कृतेर्नुम् चेति" । उणां ३ । १०६ । इति कत्रन् नुम् च ।) लाङ्गलम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कृन्तनं, क्ली, (कृत्यते इति । कृत् + भावे ल्युट् ।) छेदनम् । यथा, कर्म्मलोचने नारदवचनम् ॥

"कृन्तनं नखकेशानां छेदनञ्च वनस्पतेः ।
श्रावणीचे न कर्त्तव्यं पाठनं पठनन्तथा" ॥
(तथा च गीतगोविन्दे, १ । ३२ ।

"विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे । विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे" ॥)

कृप, ऊ ङ व ल्ट कल्पने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) सप्तमस्वरी । कल्पनं सामर्थ्यम् । ऊ, चकल्पिष्ट अक्लृप्त । ङ, कल्पते कल्पयत्त्ववदिति हलायुधः ॥ व, कल्प्स्यति चिक्लृप्सति । ल्ट, अक्लृपत् । हते तस्मिन् प्रियं श्रुत्वा कल्पता प्रीतिं परां प्रभुरिति अनेकार्थत्वेऽन्तर्भूतण्यर्थत्वात् जनयितेत्यर्थः । इति दुर्गादासः ॥

कृप, त्क दौर्ब्बल्ये । इति कविकल्पद्रुमः ॥ (चदन्तचुरां-परं-अकं-सेट् ।) सप्तमस्वरी । कृपयति । षष्ठस्वरीति चिलोचनः । इति दुर्गादासः ॥

कृप, कि युतौ । चित्रे । कल्पने । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां-परं-अकं सकर्त्तृ-सेट् ।) सप्तमस्वरी । कि कल्पयति कल्पति । कृपः कृपोऽकृपादाविति कृपादेशः । इति दुर्गादासः ॥

कृपः, पुं, (कृपा अस्त्यस्य पालनसाधनत्वेन । अर्शआदित्वात् अच् ।) कृपाचार्य्यः । स तु द्रोणाचार्य्यश्यालकः । इति मेदिनी ॥ तथा चोक्तम् ।

"गौतमान्मिथुनं जज्ञे शरस्तम्बाच्छरद्वतः ।
अश्वत्थामश्च जननी कृपस्यैव महात्मनः" ॥
इति महाभारतम् ॥ (स तु गोतमवंश्यस्य शरद्वतः पुत्रः राज्ञा शान्तनुना कृपया पालितः अतः कृप इति नाम्ना प्रसिद्धः । सोऽसौ यावज्जीवं कौमारब्रह्मचर्य्यमालम्ब्य कुरुबालकानामाचार्य्यत्वे भीष्मादिभिर्नियोजितः । कुरुक्षेत्रयुद्धे दुर्य्योधनपक्षमाश्रित्य पाण्डवैः सह संग्रामं कृत्वा लोकक्षयकरे तस्मिन् समरे अमरत्वात् न निहतः ॥ अस्य उत्पत्तिविवरणन्तु महाभारते १ । १३० अध्याये द्रष्टव्यम् ॥) व्यासः । इति धरणी । (राजर्षिविशेषः । यथा, ऋग्वेदे । ८ । ३ । १२ ।

"शृणुधि यथा रशमं श्यावकं कृपमिन्द्र ! प्रावः सुदासम्" । "रशमं श्यावकं कृपं च एतन्नामकांस्त्रीन् राजर्षीन् यथा प्रावः" । इति भाष्यम् ॥)

कृपणः, त्रि, (कल्पते स्वल्पमपि दातुम् । कृप् + बाहुलकात् क्युन् अत एव न लत्वम् ।) अदाता । (यथा, व्यासोक्तौ ।

"दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति" ॥)
तत्पर्य्यायः । कदर्य्यः २ किम्पचानः ३ मितम्पचः ४ क्षुद्रः ५ । इत्यमरः । ३ । १ । ४८ ॥ किम्पचः ६ अनमितम्पचः ७ । इति तट्टीका ॥ मन्दः ८ कीकटः ९ कुसुत् १० कीणाशः ११ । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । २ । ७५ ।

"दाता लघुरपि सेव्यो भवति न कृपणो महानपि समृद्धा। कूपोऽन्तः खादुजलः प्रीत्यै लोकस्य न समुद्रः" ॥ दीनः । यथा, हैः रामायणे २ । ३२ । २८ ।

"ततः स पुरुषव्याघ्रस्तद्धनं सहलक्ष्मणः ।
द्विजेभ्यो बालवृद्धेभ्यः कृपणेभ्यो ह्यदापयत्" ॥
पारिभाषिककृपणानाह ॥ महाव्यसनप्राप्तो दीनः । यथा, रामायणे ४ । २१ । १९ ।

"आदित्यः कृपणस्तस्मात् कृपणो न स राघव ! ।
महात्मा व्यसनं प्राप्तो दीनः कृपण उच्यते" ॥
यो हि अक्षरं ब्रह्म अविज्ञाय लोकान्तरगामी भवति सः । यदुक्तं बृहदारण्यके याज्ञवल्क्यप्रकरणे । "यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात् प्रैति स कृपणः" इति ॥ दुहिता हि कृपापात्रत्वात् कृपणम् । यदुक्तं मनौ ४ । १८५ ।

"भ्राता ज्येष्ठः समः पित्रा भार्य्या पुत्रः स्वका तनुः ।
छाया स्वोदासवर्गश्च दुहिता कृपणं परम्" ॥)
कुत्सितः । इति मेदिनी ॥

कृपणः, पुं, क्लमिः । इति मेदिनी ॥

कृपा, स्त्री, (क्रपेः सम्भारणञ्चेति भिदादिपाठादङ् टाप् च ।) करुणा । इत्यमरः । १ । ७ । १८ ॥ (यथा, महाभारते ।

"उवाच भीमं कल्याणी कृपान्वितमिदं वचः" ॥)

कृपाणः, पुं, (कृपां नुदति प्रेरयति दूरीकरोतीत्यर्थः । नुद प्रेरणे + अन्येभ्योऽपीति डः । पूर्व्वपदादिति णत्वम् ।) खड्गः । इत्यमरः । २ । ८ । ८६ ॥ (यथा, कालिकापुराणे ।

"जघान दैत्यमतिरक्तलोचना
कृपाणपाशाङ्कुशशूलपट्टिशैः" ॥)

कृपाणकः, पुं, (कृपाण + स्वार्थे कन् ।) खड्गः । इति हारावली ॥

कृपाणिका, स्त्री, (कृपाणक + स्त्रियां टाप् अत इत्वं च ।) क्षुरिका । इति हेमचन्द्रः ॥

कृपाणी, स्त्री, (कृपाण + गौरादित्वात् ङीष् ।) कर्त्तरी । इत्यमरः । २ । १० । ३४ ॥ क्षुरिका । इति मेदिनी ॥

कृपादैतः, पुं, (कृपायां कृपावितरणे वा अद्वैतः अद्वितीयः ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥

कृपालुः, त्रि, (कृपां लाति आदत्ते। ला + डुः। यद्वा कृपाविद्यते ऽस्यास्मिन् वा। कृपा + आलुच्।) दयालुः। इत्यमरः। ३। १। १५॥ (यथा भागवते। ४। १२। ५१। कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते"॥)

कृपी, स्त्री, (कृप + ङीष्।) द्रोणाचार्य्यपत्नी। इति मेदिनी॥ (यथा, महाभारते। १। १३१। २२। "शारद्वतीं ततो भार्य्यां कृपीं द्रोणोऽन्यविन्दत"॥ अस्या जन्मविवरणं यथा,—

पुरा किल महर्षेर्गौतमस्य पुत्रः शरद्वान् नाम ऋषिः धनुर्व्वेदपरत्वात् विष्णुतेन तपसा च इन्द्रं सन्तापयामास। इन्द्रस्तु अस्य तपोविघ्नं चिकीर्षुर्जानपदीं नाम खर्व्वेक्षां प्राहिणोत्। अथ रूपयौवनाढ्यां तामवलोकयतस्तस्य सहसा रेतश्चस्कन्द तत्तु शरस्तम्बे स्थापितं सत् द्विधाऽभवत्। ततश्चस्मात् मिथुनं समजायत। तदैव राजा मृगयामागतः अपत्यमिथुनं समवलोक्य राजधानीमानीय संस्कारादिभिः संवर्द्धयामास। कृपया संवर्द्धनाच्च कृपः कृपीति तयोर्नाम चक्रे। सेयं कृपाचार्य्यस्य भगिनी। एवैव अश्वत्थाम्नो जननीत्यवगन्तव्या॥)

कृपीटं, क्ली, (कृप + "कृतृकृपिभ्यः कीटन्"। उणां। ४। १८४। इति कीटन्। वाऽलुक्कात् तत्वाभावः।) उदरम्। जलम्। इति मेदिनी॥ विपिनम्। इन्धनम्। इति शब्दरत्नावली॥

कृपीटयोनिः, पुं, (कृपीटं जलं पालयतीति। पालि + अच्।) केनिपातः। समुद्रः। इति मेदिनी। पवनः। इति शब्दरत्नावली॥

कृपीटयोनिः, पुं, (कृपीटस्य जलस्य योनिः कारणं। "वायोरग्निरभेरापः" इति श्रुतेस्तथात्वम्। यद्वा कृपीटं काष्ठं योनिरुत्पत्तिस्थानं यस्य।) अग्निः। इत्यमरः। १। १। ५६॥

कृपीपतिः, पुं, (कृप्याः कृपमग्निन्द्राः पतिर्भर्त्ता।) द्रोणाचार्य्यः। इति शब्दमाला॥

कृपीसुतः, पुं, (कृप्याः सुतः।) अश्वत्थामा। इति भूरिप्रयोगः॥

कृमिः पुं, (क्रामतीति। क्रमु पादविक्षेपे + "क्रमितमिग्रतिस्तम्भामत इच्च"। उणां। ४। १२१। इति इन् "भ्रमेः सम्भसारश्च" इति अनुवृत्तेः सम्भसारश्च।) कीटः। पोका इति भाषा। तत्पर्य्यायः। नीलाङ्गः २। इत्यमरः। २। ५। १३। निलाङ्गुः ३ क्रिमिः ४। इति तट्टीका॥ पुलुः ५। इति जटाधरः॥ लाक्षा। क्रमिजः। खरः। इति विश्वमेदिन्यौ॥ उदरजातकीटरोगः। तस्यौषधं यथा,—

"वदरीकारवीमूलं गुडाज्येन समन्वितम्। घर्म्मिना साधितं जग्ध्वा कृमीन्सर्व्वान् हरेच्छिवः!"॥ इति गारुडे १९४ अध्यायः॥

("कृमयो द्विविधाः प्रोक्ता बाह्याभ्यन्तरसम्भवाः। बाह्या यूकाः प्रसिद्धाः स्युः किण्वुलूकास्त्वभ्यन्तराः॥ सप्तधा हि भवेदाद्याः षड्धाश्चान्तः समुद्भवाः। तेषां वक्ष्यामि संभूतिं बाह्यानाभ्यन्तरे शृणु॥ रूक्षादतिबलात् क्षेदात् चिन्तया शोचनादपि। कफधातुसमुद्भूतास्तीक्ष्णा यूका भवन्ति हि॥ यूकाः कृष्णाः पराः श्वेतास्तृतीयास्तर्म्मणि स्थिताः। सूक्ष्मातिविकटा रूक्षास्तन्मांसास्तन्मयूकिकाः। चतुर्थी विन्दुकी नाम वर्तुला मूत्रसम्भवा॥ मत्कुणाद्याश्च पञ्चम्यो बाह्योपद्रवकारिणः। यूका मस्तकसंस्थाने श्वेता वस्त्रनिवासिनी॥ चर्म्मयूका नेत्रचर्म्मे सूक्ष्मे रोमणि यल्लिका। उष्णद्रव्यनिषेवाच्च अजीर्णे मधुरद्रवात्॥

रूक्षान्नगोधूमयवान्नपिण्ड-
गुँड़ेन वा क्षीरविपर्य्ययेण।
दिवाशयाने च सपिच्छलेन
घर्म्मेण पापोदकसेवनेन॥
सञ्जायते तेन मलाशयेषु
कृमिव्रजः कोष्ठविकारकारि॥

षड्विधास्ते समुद्दिष्टास्तेषां वक्ष्यामि लक्षणम्। कफकोष्ठे मलाधारे कोष्ठे सर्पन्ति सर्पवत्॥ एथुमन्तो भवन्त्येके केचित् किण्वुकसन्निभाः। धान्याङ्कुरनिभाः केचित् केचित् सूक्ष्मास्तथाणवः॥ सूचीमुखाः परिज्ञेयास्तान्त्वाणि रादयन्ति ते। वक्ष्यामि लक्षणं तेषां चिकित्साञ्च शृणुष्व मे॥ ज्वरोद्गारोगशूलं वा वमिर्वृत्तं क्लेदनं भ्रमः। अरुचिर्बन्धवैवर्ण्यमतीसारं सफेनिलम्॥ गर्ज्जनं जठरे चैव मन्दाग्नित्वञ्च जायते। पिपासा पीतता नेत्रे क्रिमुकैः पीड़ितस्य च॥

इति गण्डूपदलक्षणम्॥ *॥

सूचीवत्तुदतेऽत्यर्थं रक्तञ्चैवातिसार्य्यते। यद्यद्धा भक्षयत्यन्नं रक्तं वा वमते भृशम्॥ क्लेदो मुखेऽरुचिर्जाड्यं मन्दाग्नित्वञ्च वेपथुः। क्षुत्तृष्णा च ज्वरो ज्ञेयाः सूचीमुखकृमीरजाम्॥

इति सूचीमुखलक्षणम्॥ *॥

ये च धान्याङ्कुराकारास्तेषां वक्ष्याम्यथ च लक्षणम्। मलाशयस्थाः कृमयो मलं जग्धन्ति ते भृशम्॥ तैस्तु संपीड्यते देहे विविधैर्भेदं परुषता। कृमयश्चापि हृत्क्लेदं कृमयो जनयन्ति ते॥ हारीतः संशयापन्नः पादौ संगृह्य एच्छति। कथं देहे मनुष्यस्य मलमूत्रवसाश्रये॥ सम्भवन्ति कथञ्चादौ वर्द्धयन्ति कथं पुनः। कथं वा शीर्य्यते शस्त्रे नानाहारावभक्षणे॥ जायन्ते केन कृमयः सूक्ष्माधोगामिनोऽथव। नानाऽऽमपक्वमध्यस्थं दहते वा ऊताशनः॥ कथन्ते कृमयश्चान्ते न दह्यन्तेऽन्तराग्निना। एवं एको महाचार्य्यः प्रोवाच मुनिपुङ्गवः॥

आत्रेय उवाच!

शृणुपुत्र! महाबाहो! कृमिसम्भवकारणम्। विरुद्धान्नरसैः पुत्र! रक्तञ्चैवास्य कुप्यति॥ कफेनैकादिनं याति शुक्रेणाकारतां व्रजेत्। पञ्चभूतात्मके वायौ ते तु जाताः सचेतनाः॥ कोष्ठाग्निना न दह्यन्ते न शीर्य्यन्ते रसानिति। विषे जातो यथा कीटो न विषेण मृतिं व्रजेत्॥ तथा ऊताशनोद्भूतं न ऊताशेन शीर्य्यते। भेषजं संप्रवक्ष्यामि येन तेऽपि तरन्ति वै॥ पतन्ति वा शमं यान्ति भेषजानि शृणुष्व मे।

वचाऽजमोदा कृमिनित्यलाशु
बीजं शठी रामठकं चित्रञ्च।
उष्णोदके तत्परिपिष्य पेयं
पतन्ति शीघ्रं घृतधातुकीटाः॥
शठी यवानी पिचुमर्द्दपत्रान्
विड़ङ्गकृष्णातिविषा रसोनम्।
सम्पिष्य मूत्रेण चिरत्नयुक्तम्
विनाशनं सर्व्वकृमीरजानाम्॥

मरिचं पिप्पलीमूलं विड़ङ्गशिग्रुयवानिकाचित्रकः। गोमूत्रेण तु पेयं पानं शीघ्रं कृमीन् हन्ति॥

मुस्ता विशाला चित्रका सुपर्णा
शिग्रुः सुवाक्यं सलिलेन कल्कः।
पानं सहस्रा कृमिशूलचूर्णं
विनाशनं सर्व्वकृमीरजाञ्च"॥

"मातुलुङ्गस्य मूलानि रसोनं कृमिजित्तिलम्। अजमोदा निम्बपत्रं गोमूत्रेण तु पेषयेत्॥ पानमेतत् प्रशंसन्ति कृमिदोषनिवारणम्। ज्वरप्रोक्तानि पथ्यानि कृमिदोषे प्रदापयेत्॥

इति कृमिचिकित्सा"॥ *॥

इति महर्ष्याश्रेयभाषिते हारीतोत्तरे कृमिचिकित्सा नाम पञ्चमोऽध्यायः॥ *॥

अस्य निदानपूर्व्वकसमग्रचिकित्सितं यथा। "अजीर्णाध्यशनात्माव्यैर्विरुद्धमलिनाशनैः। व्यायामदिवास्वप्नगुर्व्वतिस्निग्धशीतलैः। माषपिण्याकविदलविसशालूकशेरुकैः॥ पर्णशाकसुवाशुक्तदधिक्षीरगुड़ेक्षुभिः। पलालानूपपिशितपिण्याकएथुकादिभिः॥ स्वादुस्निग्धव्यपानैश्च श्लेष्मा पित्तञ्च कुप्यति। कृमीन् बहुविधाकारान् करोति विविधाश्रयान्॥ आमपक्वाशयस्तेषां प्रसवः प्रायशः स्मृतः। विंशतेः कृमिजातीनां त्रिविधः सम्भवः स्मृतः॥ पुरीषकफरक्तानि तेषां वक्ष्यामि लक्षणम्। अथवा वियवाः किण्वाश्चिप्या गण्डूपदास्तथा। चूरवो दिसुखाश्चैव सप्तैवैते पुरीषजाः॥ श्वेताः सूक्ष्मास्तुदन्त्येते गुदं प्रतिसरन्ति च। तेषामेवापरे पृथ्वः एथवस्त्व भवन्ति हि॥ सूचामिमान्द्यपाण्डुत्वविरुग्भवलसंक्षयाः। प्रसेकारुचिहृल्लासविड़्भेदास्तु पुरीषजैः॥ रक्ता गण्डूपदा दीर्घा शुदकण्डूनिपातिनः। सूक्ष्माटोपशूलक्लेदपक्तिनाशकराश्च ते॥ दर्भपुष्पा महापुष्पाः प्रलूनाक्षिपिटास्तथा। पिपीलिका दारुणाश्च कफकोपसमुद्भवाः॥ रोमशा रोममूर्द्धानः सपुच्छाः श्यावमण्डलाः। मूढ़धान्याङ्कुराकाराः शुक्लास्ते तनवस्तथा॥ मञ्जादा नेचलेढ़ारस्तालुशोचमुखस्तथा। शिरोहृल्लासगौरवमयुप्रतिश्यायकराश्च ते॥ केशरोमनखादाश्च दन्तादाः किक्किशास्तथा। कुष्ठजाश्च परीसर्प्पाः ज्ञेयाः शोणितसम्भवाः॥ ते सरक्ताश्च कृष्णाश्च स्निग्धाश्च एथवस्तथा।

रक्ताधिष्ठानजान् प्रायो विकारान् जनयन्ति ते ॥
माषपिष्टान्नलवणगुड़शाकैः पुरीषजाः ।
मांसमाषगुड़क्षीरदधिसुक्तैः कफोद्भवाः ॥
विरुद्धा जीर्णशाकाद्यैः शोणितोत्था भवन्ति हि ॥
ज्वरो विवर्णताश्रूणं हृद्रोगः सदनं भ्रमः ॥
भक्तद्वेषोऽतिसारश्च सञ्जातकृमिलक्षणम् ।
दृष्ट्वास्त्रयोदशाद्यास्तु कृमीणां परिकीर्त्तिताः ॥
केशादाद्यास्त्वदृश्यास्ते द्वावाद्यौ परिवर्ज्जयेत् ।
एषामन्यतमं ज्ञात्वा जिघांसुः स्निग्धमातुरम् ॥
सुरसादिविपक्वेन सर्पिषा वान्तमादितः ।
विरेचयेत्तीक्ष्णतरैर्योगैरास्थापयेच्च तम् ॥
यवकोलकुलत्थानां सुरसादेर्गवस्य च ।
विड़ङ्गखेहयुक्तेन क्वाथेन लवणेन च ॥
प्रत्यागते निरूहे तु नरं स्नातं सुखाम्बुना ।
युञ्जीत कृमिघ्नैरन्नैस्ततः शीघ्रं भिषग्वरः ॥
खेहेनोल्बणे चैनन्तु योजयेत् खेहवस्तिना ।
ततः शिरीषकिणिही-रसं क्षौद्रयुतं पिबेत् ।
केचूकस्वरसं वापि पूर्ब्ववत्तीक्ष्णभोजनः ॥
पलाग्रवीजस्वरसं कल्कं वा तण्डुलाम्बुना ।
पारिभद्रकपत्राणां क्षौद्रेण स्वरसं पिबेत् ॥
पत्तूरस्वरसं वापि पिबेद्वा सुरसादिजम् ।
निम्बादन्यग्रहत्वचूर्णं विड़ङ्गं वा समाक्षिकम् ॥
पत्रैर्मूषिकपर्ण्या वा सर्पिष्टैः पिण्डमिश्रितैः ।
खादेत् पूपालिकान् पक्वान् धान्याम्लञ्च पिबेदनु ॥
सुरसादिगणे तैलं पक्वं वा पानमिष्यते ।
विड़ङ्गचूर्ण-पिण्याभ्यां तस्मिन् भक्ष्यन्तु कारयेत् ॥
तत्कषायप्रपीतानां तिलानां खेहमेव वा ।
स्राविधः ग्रहतत्वूर्णं सप्तरात्रं समावितम् ॥
विड़ङ्गानां कषायेण चैफलेन तथैव च ॥
क्षौद्रेण लिह्यानुपिबेदसमालकोद्भवम् ।
अद्यात्रया रसक्षापि विधिरेषोऽयसामपि ॥
यूतीकस्वरसं वापि पिबेद्वा मधुना सह ।
पिबेद्वा पिप्पलीमूलमजामूत्रेण संयुतम् ॥
सप्तरात्रं पिबेद्दृष्ट्वन्नवृवा दधिमस्तुना ।
पुरीषजान् कफोत्थांश्च हन्यादेव कृमीन् भिषक् ॥
शिरोहृद्ग्राणवक्त्राणि संस्पृशंश्च पृथग्विधान् ।
विशेषेणाश्नुनैर्नस्यैरवपीड़ैश्च साधयेत् ॥
ग्रहद्रसन्तरस्य सुग्रुक्तं भावयेदति । ।
निम्बाद्येन विड़ङ्गानां चूर्णं प्रथमनन्तु तत् ॥
अपस्यूर्णान्यनेनैव विधिना योजयेद्भिषक् ।
सकांस्यगोलं तैलञ्च नस्यं स्यात् सुरसादिके ॥
इक्ष्वलुप्तविधिश्चापि विधेयो रोमभोजिषु ।
दन्तादानां समुद्दिष्टं विधानं मुखरोगिकम् ॥
रक्तजानां समुद्दिष्टं कुर्य्यात् कुष्ठचिकित्सिते ।
सुरसादिन्तु सर्व्वेषु सर्व्वथैवोपयोजयेत् ॥
प्रथक्तिलकटुकं भोजनञ्च हितं भवेत् ।
कुष्ठत्यक्षायसंस्कृतं क्षीरपानञ्च पूजितम् ॥ * ॥

क्षीराणि मांसानि घृतानि चैव
दध्नीनि शाकानि च पर्ब्बवन्ति ।
समासतोऽम्लान् मधुरान् हिमांश्च
कृमीन् जिघांसुः परिवर्ज्जयेत्तु" ॥

इति सुश्रुत उत्तरतन्त्रे चतुःषष्ठ्यग्रतमोऽध्यायः ॥)

कृमिकण्टकं, क्ली, (कृमेः कृमिरोगस्य रोगे वा कण्टकमिव । तन्नाग्रकतया तथात्वम् ।) विड़ङ्गम् । चित्राङ्गः । उड़ुम्बरः । इति मेदिनी ॥

कृमिकोषोत्थं, त्रि, (कृमेः कृमिभिर्निर्म्मितो वा कोषः । शाकपार्थिववत् मध्यपदलोपः । तस्मात् उत्तिष्ठति उत्पद्यते । उत् + स्था + कः ।) कौषेयम् । इत्यमरः । २ । ६ । ११९ । रेसमिकापड़ इति भाषा ।

कृमिघ्नः, पुं, (कृमिं हन्ति इति । हन् + टक् । "हन्तेरत् पूर्ब्बस्य" । ८ । ४ । २२ । इति नियमात् न णत्वम् ।) विड़ङ्गः । इत्यमरः । २ । ४ । १०६ ॥ पलाण्डुः । कोविदारः । पारिभद्रः । भल्लातकः । इति राजनिर्घण्टः ॥ (विड़ङ्गहरिद्रा च । इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)

कृमिघ्नी, स्त्री, (कृमिघ्न + अजादित्वात् टाप् ।) हरिद्रा । इति भावप्रकाशः ॥

कृमिघ्नी, स्त्री, (कृमिघ्न + टित्वात् ङीप् ।) धूमपत्रा । विड़ङ्गः । इति राजनिर्घण्टः ॥

कृमिज, क्ली, (कृमिभ्यो जायते इति । अन्येभ्योपीति डः ।) अगुरु ॥ इत्यमरः । २ । ६ । १२६ ॥ (कृमिजातमात्रे, त्रि । यथा, पञ्चतन्त्रे । १ । १०३ । "कौषेयं कृमिजं सुवर्णमुपलाद्दूर्ब्बापि गोरोमतः पङ्गुत्तामरसं शृङ्गादुदधेरिन्दीवरं गोमयात्" । अस्य पर्य्याया यथा ।
"अगुरु प्रवरं लोहं राजार्हं योगजन्तथा ।
वंशिकं कृमिजं वापि कृमिजग्धमनार्य्यकम्" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
गुग्गुलास्यागुरुशब्दे ज्ञातव्याः ॥)

कृमिजग्धं, क्ली, (कृमिभिर्जग्धं भुक्तम् । उपचारात् तज्जनिततया तथात्वम् ।) अगुरु । इति राजनिर्घण्टः ॥ ("कृमिजग्धमनार्य्यकम्" ।
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कृमिजा, स्त्री, (कृमिभ्यो जायते या । जन + डः टाप् च । लाक्षा ।) इति राजनिर्घण्टः ॥
(अस्य पर्य्याया यथा,—
"कीटजा कृमिजा लाक्षा जतुका च गवाविका" ॥
इति वैद्यकरत्नमालायाम् ॥)

कृमिरिपुः, पुं, (कृमीणां रिपुर्नाशकः । तन्नाशकत्वात् तथात्वम् ।) विड़ङ्गः । इति शब्दरत्नावली ॥
(विड़ङ्गशब्देऽस्य विशेषो ज्ञेयः ॥)

कृमिला, स्त्री, (कृमीन् कृमिवत् सन्तानान् लाति आदत्ते । ला + कः टाप् च ।) बञ्जुलः । बञ्जुसन्तानप्रसवा । इति हेमचन्द्रः । कृमियुक्ते त्रि ॥

कृमिवृक्षः, पुं, (कृमिप्रधानः कृमिमयो वा वृक्षः ।) कोषाम्रः । इति भावप्रकाशः ॥
(कोषाम्रशब्दे ऽस्य विवृतिर्ज्ञातव्या ॥)

कृमिशत्रुः, पुं, (कृमिरिव जीवन् शत्रुः ।) जीवशत्रुः । तत्पर्य्यायः । कृमिजलजः २ कृमिवारिरुहः ३ जन्तुकन्धुः ४ । अस्य गुणः । रसवीर्य्यादौ शत्रुसदृशत्वम् । इति राजनिर्घण्टः ॥

कृमिशुक्तिः, स्त्री, (कृमिरिव शुक्तिः ।) जलशुक्तिः । इति राजनिर्घण्टः ॥

कृमिश्लेष्मकः, पुं, (कृमिनिर्म्मितः श्लेष्म इव । ततः स्वार्थे कन् ।) वल्मीकः । इति शब्दरत्नावली ॥

कृमीलकः, पुं, (कृमीन् ईरयति जनयतीति । ईर् + ण्वुल् । रस्य लत्वम् ।) वनमुद्गः । इति राजनिर्घण्टः ॥

कृव, इ न कृतौ । हिंसे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् । इदित् ।) क्रखी । न, कृणोति । इ, कर्म्मणि कृण्वते । इति दुर्गादासः ॥

कृविः, पुं, (क्रियते वल्मादिकमनेन । डु कृञ् करणे "कृविदृम्यिच्छविस्यविकिकीदिवि" । उणां ४ । ५६ । इति क्विन् निपातनात् ।) वापयन्त्रम् । इति उणादिवृत्तिः । तौं इति भाषा ॥

कृश, इर् य कार्श्ये । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् । इरित् ।) कार्श्यं कृशकरणम् । इरः, अकृशत् अकर्शीत् । अकृशात् पुषादित्वाद्विभाषेड इत्यत्र ये, कृशति चन्द्रं कलापक्षः । इति दुर्गादासः ॥

कृशः, त्रि, (कृश धातोः क्तप्रत्यये "अनुपसर्गात् फुल्लक्षीवेति" । ८ । २ । ५५ । निपातनात् साधुः ।) अल्पः । (यथा, मनौ । ४ । १८४ ।
"आकाशेशाश्च विज्ञेया बालवृद्धकृशातुराः" ॥)
सूक्ष्मः । इत्यमरः । ३ । १ । ६१ ॥
(यथा, आर्य्यासप्तशती । ४९५ ।
"राजसि कृशाङ्गि ! मङ्गलकलसी सद्दकारपल्लवेनेव । तेनैव चूम्बितमुखी प्रथमाविर्भूतरागेण" ॥
" व्यायाममतिसौहित्यं क्षुत्पिपासामधोवधम् ।
कृशो न सहते तद्वदतिशीतोष्णमैथुनम् ॥
क्षीहा कासः क्षयः श्वासो गुल्मार्शांस्युदराणि च ।
कृशं प्रायोऽभिधावन्ति, रोगाश्च ग्रहणीमताः" ॥
"सततं व्याधितावेतावतिस्थूलकृशौ नरौ ।
सततञ्चोपचर्य्यौ हि कर्षणैर्हणैरपि" ॥
"स्थौल्यकार्श्ये वरं कार्श्यं समोपकरणौ हितौ ।
यद्युभौ व्याधिरागच्छेत् स्थूलमेवाति पीड़येत्" ॥
इति चरके सूत्रस्थाने २१ अध्याये ॥
"कश्चिदन्यः कृशोऽतीव बलवान् दृश्यते तदा" ॥
तत्र हेतुमाह ।
"व्याधानसमये यस्य सुक्तभागोऽधिको भवेत् ।
मेदोभागस्तु हीनः स्यात् स कृशोऽपि महाबलः" ॥
यस्याधानसमये जनयितुः सुक्तस्याधिक्यं भवति । मेदसोऽल्पता तस्य कृशस्यापि बहु बलमित्यर्थः ॥
अथ कार्श्यस्य चिकित्सा ।
"रूक्षान्नादि निमित्ते तु कृशे युञ्जीत भेषजम् ।
दृंहणं बलवृद्ध्यर्थं तथा वाजीकरञ्च यत् ॥
पीताश्वगन्धा पयसार्द्धमासं
घृतेन तैलेन सुखाम्बुना वा ।
कृशस्य पुष्टिं वपुषो विधत्ते
बालस्य शुष्कस्य यथाम्बुवृष्टी ॥
अश्वगन्धस्य कल्केन क्षीरे तस्मिन् पयस्यपि ।
सिद्धं तैलं कृशाङ्गानामभ्यङ्गादङ्गपुष्टिदम्" ॥
इति अश्वगन्धातैलम् । * ॥
इति भावप्रकाशस्य मध्यखण्डे तृतीयभागे कार्श्याधिकारे ॥) (अल्पमः । यथा, मनौ । ७ । २१५ ।

कृशानुः

"क्षत्रियश्चैव सर्पश्च ब्राह्मणं वा बहुश्रुतम् ।
नावमन्येत वै भूष्णुः कृशानपि कदाचन" ॥
पुं, सर्व्वाकारवत्त्वात् विष्णुः । यथा, महाभारते ।
१३ । १४६ । १०३ ।
"अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान्" ॥
खनामख्यातो मुनिपुत्रः । स तु परीक्षिच्छाप-
प्रदातुः शृङ्गिणः सखा ।
यथा, महाभारते । १ । ४१ । २ ।
"स तं कृशमभिप्रेक्ष्य सृक्तां वाचमुदाजहार ।
अपृच्छत्तं कथं तातः स मेऽद्य मृतधारकः" ॥
ऐरावतकुलोत्पन्नो नागविशेषः । यथा, तत्रैव ।
१ । आस्तीकपर्व्वणि । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम्" ॥)

कृशरः, पुं, (कृशं अल्पमाचां राति । रा + कः ।
कृशयोऽपि बलं राति वा ।) तुल्यतिलान्नम् । तत्प-
र्य्यायः । चिसरः २ । इति हेमचन्द्रः ॥
(यथा, मत्स्यपुराणे,—
"गुडौदनं रवेर्दद्यात् सोमाय घृतपायसम् ।
संयावकं कुजे दद्यात् क्षीरान्नं सोमसूनवे ।
दध्योदनञ्च जीवाय शुक्राय तु घृतोदनम् ।
शनैश्चराय कृशरमाजमांसञ्च राहवे ।
चित्रौदनञ्च केतुभ्यः सर्व्वभक्षैः समर्च्चयेत्" ॥)

कृशरा, स्त्री, (कृशर + टाप् ।) तिलौदनम् । इति
हारावली ॥ द्विदलमिश्रितान्नम् । खिचड़ी इति
भाषा । यथा,—
"तण्डुला दालिसंमिश्रा लवणार्द्रकहिङ्गुभिः ।
संयुक्ताः सलिलैः सिद्धाः कृशराः कथिता बुधैः" ॥
अस्या गुणाः । शुक्रबलकारित्वम् । गुरुत्वम् ।
पित्तकफप्रदत्वम् । दुर्जरत्वम् । विष्टम्भमलमूत्र-
कारित्वञ्च । इति भावप्रकाशः ॥
("मांसेक्षुपिष्टकृशरा तिलगुल्खुलीभिः" ।
इति माधवकरीयरोगविनिश्चयस्य कफशूलव्या-
ख्यानेविजयेनोक्तं यथा,—
"कृशरा तिलतण्डुलमाषयवागूः" ॥)

कृशला, स्त्री, (कृशं काश्यं लातीति । ला + कः ।
टाप् ।) केशः । इति शब्दचन्द्रिका ॥

कृशशाखः, पुं, (कृशा क्षीणा शाखा यस्य ।) पर्णटः ।
इति राजनिर्घण्टः ॥

कृशाङ्गी, स्त्री, (कृशानि सूक्ष्माणि अङ्गानि यस्याः ।
स्वाङ्गादित्वात् ङीष् ।) प्रियङ्गुवृक्षः । इति
शब्दचन्द्रिका ॥ सूक्ष्माङ्गविशिष्टे, त्रि । (यथा,—
आर्य्यासप्तशती । ४६५ ।
"राजसि कृशाङ्गि ! मङ्गलकलशी सहकारपल्ल-
वेनेव । तेनैव चुम्बितमुखी प्रथमाविर्भूतरागेण"॥)

कृशानुः, पुं, (कृश्यति तनूकरोति हव्यकाष्ठादिवस्तु-
जातमिति । "कृतन्यञ्जीति" । उणां ।४।२। इति
आनुक् ।) अग्निः । इत्यमरः । १ । १ । ५७ ॥
(यथा, रघुः । ७ । २४ ।
"प्रदक्षिणप्रक्रमणात् कृशानो-
रुदर्चिषस्तन्मिथुनं चकाशे" ॥)
चित्रकवृक्षः । इति राजनिर्घण्टः ॥

कृशानुरेताः, [स्] पुं, (कृशानौ अग्नौ रेतः निःक्षिप्तं
तेजो यस्य ।) शिवः । इत्यमरः । १ । १ । ३५ ॥
(अस्य कृशानुरेतोनाम्नः कारणं कालिकापुराणे
४७ अध्याये दृश्यम् ॥)

कृशाश्वी, [न्] पुं, (कृशाश्वेन धुन्धुमारवंशस्थपवि
शेषेण प्रोक्तं गाथासूत्रादिकं अधीते वेत्ति वा
"कर्म्मन्दकृशाश्वादिनिः" । ४ । ३ । १११ । इति
इनिः ।) नटः । इत्यमरः । २ । १० । १२ ॥

कृशिका, स्त्री, (कृश इव कायतीति । कै + कः । टाप्
इत्वञ्च ।) आखुकर्णीलता । इति राजनिर्घण्टः ॥

कृष, औ आकर्षणे । विलेखने । इति कविकल्प-
द्रुमः । (भ्वां-परं-सकं-अनिट् ।) औ, अकार्क्षीत्
अकृक्षत् अकार्क्षीत् । आकृषि आकर्षणे । क-
र्षन्ति तुरगा रथम् । इति दुर्गादासः ॥
(यथा, मनुः । ३ । ६६ ।
"मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि ।
कुलसङ्ख्याञ्च गच्छन्ति कर्षन्ति च महद्यशः" ॥
आखुकर्णीशब्दे ऽस्या विशेषो ज्ञेयः ॥)

कृष, औ अ ग्र आकर्षणे । विलेखने । इति कवि-
कल्पद्रुमः । (तुदां-उभं-सकं-अनिट् । ग्र अ, कृ-
षति कृष्यते भूमिं कृषकः । औ, अकार्क्षीत् ।
अकार्क्षीत् अकृक्षत् । इति दुर्गादासः ।

कृषकः, त्रि, (कृषति भूमिं यः । "कृषेर्ण्वुल्तृचौ
दीचाम्" । उणां ।२।३८। इति क्वुन् ।) कर्षकः ।
इति मेदिनी ॥

कृषकः, पुं, (कृषति भूमिमनेन इति करणे क्वुन् ।)
फालः । इति मेदिनी ॥ दृषः । इति शब्दचन्द्रिका ॥

कृषाणुः, पुं, (कृष् + आनुक् । एषोदरात् षत्वम् ।)
कृशानुः । इत्यमरटीका ॥

कृषिः, स्त्री, (कृष् विलेखने । "सर्व्वधातुभ्य इन्" ।
उणां ४ । ११७ । इति इन् । "इगुपधात् कित्" ।
उणां । ४ । १ १९ । इति कित् ।) वैश्यवृत्ति-
विशेषः । कर्षणम् । चास इति भाषा । तत्प-
र्य्यायः । अन्नतम् २ । इत्यमरः । २ । ९ । २ ।
प्रन्नतम् ३ । इति जटाधरः ॥
(यथा, मेघदूते । १६ ।
"त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः" ॥)

कृषिकः, पुं, (कृषत्यनेन "दृक्षिकृष्योः किकन्" ।
उणां । २ । ४० । इति किकन् ।) फालः । इत्य-
मरः । २ । ९ । ६ ॥ कर्षकः । इति केचित् ॥

कृषीवलः, त्रि, (कृषिरस्यास्ति वृत्तित्वेन इति "रजः
कृष्यासुतिपरिषदो वलच्" ५ । २ । ११२ । इति
वलच् । "वले" ६ । ३ । ११८ । इति दीर्घः ।)
कर्षकः । कृषिजीवी । इत्यमरः । २ । ९ । ६ ॥
(यथा, महाभारते । २ । ५ । ७७ ।
"कच्चिन्न चौरैर्लुब्धैर्वा कुमारैः स्त्रीबलेन वा ।
त्वया वा पीड्यते राष्ट्रं कच्चित् तुष्टाः कृषीवलाः" ॥)
काकजङ्घावृक्षः । इति रत्नमाला ॥

कृष्करः, पुं, (कृषं करोति कृषिस्थित्यादिकं
शक्तियोगात् सम्पादयतीति । कृष + कृ + टक् ।)
शिवः । इति त्रिकाण्डशेषः ॥

कृष्णः

कृष्टं, त्रि, (कृष्यते यत् तत् । कृष् + कर्म्मणि क्तः ।)
कृष्टक्षेत्रम् । चसा क्षेत् इति भाषा । तत्पर्य्यायः ।
सीत्यम् २ हल्यम् ३ । इत्यमरः । २ । ९ । ८ ॥
(यथा, मनौ । ११ । १४५ ।
"कृष्टजानामोषधीनां जातानाञ्च स्वयं वने" ॥
भावे क्तः । कर्षणम् ॥)

कृष्टपच्यः, त्रि, (कृष्टे क्षेत्रे स्वयमेव पच्यते इति कर्म्म-
कर्त्तरि कृष्ट + पच् + "राजसूयसूर्य्यमृषोद्यरुच्य
कूप्य कृष्टपच्याधर्य्याः" । ३ । १ । ११४ । इति
क्यवन्तो निपातितः ।) व्रीहिः । धान्यम् । इति
व्याकरणम् ॥ (यथा, भागवते । ७ । १२ । १८ ।
"न कृष्टपच्यमश्नीयादकृष्टाप्यकालतः" ॥)

कृष्टपाक्यं, त्रि, (कृष्टे पच्यते इति । कृष्ट + पच् + क-
र्म्मणि ण्यत् । "चजोः कु घिण्यतोः" । ७ । ३ ।
५२ । इति चस्य कुत्वम् ।) कृष्टपच्यम् । इति व्याक-
रणम् ॥

कृष्टिः, पुं, (कृषत्यन्तर्भुवं विद्यालोचनाभ्यासादि-
भिरसौ । कृष् + कर्त्तरि क्तिच् बाहुलकात्
तिर्वा ।) पण्डितः । इत्यमरः । २ । ७ । ६ ॥
(यथा, ऋग्वेदे । ६ । १८ । २ । "बृहद्देणुश्चावनो
मानुषीणामेकः कृष्टीनामभवत् सहावा" ॥)
कर्षणे, स्त्री । इति मेदिनी ॥ (कृष् + भावे क्तिन् ।
आकर्षणम् ॥ जनमात्रम् । इति निरुक्तम् ।
यथा ऋग्वेदे । ८ । ६ । ४ । "विश्वा नमन्त कृष्टयः" ।
"कृष्टयः प्रजाः" । इति भाष्यम् ॥)

कृष्णं, क्ली, ("कृषेर्व्वर्णे" । उणां ३ । ४ । इति नक्
ततो णत्वम् ।) मरिचम् । इत्यमरः । २ । ९ । ३६ ॥
(अस्य पर्य्याया यथा,—
"मरिचं वेल्लजं कृष्णमूषणं धर्म्मपत्तनम्" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
गुणाश्चास्य मरिचशब्दे ज्ञातव्याः ॥)
लोहम् । इति जटाधरः ॥ नीलाञ्जनम् । इति
राजनिर्घण्टः ॥ कालागुरु । इति रत्नमाला ॥

कृष्णः, पुं, (कर्षत्यरीन् महाप्रभावशक्त्या । यद्वा,
कर्षति आत्मसात् करोति आनन्दत्वेन परिण-
मयतीति मनो भक्तानां इति यावत् "कृषे
र्व्वर्णः" । उणां । ३ । ४ । इति वाहुलकात् वर्णः
विनापि । नक् णत्वञ्च । यद्वा, कर्षति सर्व्वान्
स्वकुक्षौ प्रलयकाले । "कर्षणात् कृष्णो रमणात्
रामो व्यापनात् विष्णुः" । इति श्रुते स्तथात्वम् ॥
अपरा व्युत्पत्तिर्यथा,—
"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यात् परं ब्रह्म कृष्ण इत्यभिधीयते" ॥
इति श्रीधरस्वामी ॥ तथा च, महाभारते । ५ ।
यानसन्धिपर्व्वणि ७० । ५ ।
"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
कृष्णस्तद्भावयोगाच्च कृष्णो भवति सात्वतः" ॥)
भगवदवतारविशेषः । स च भूभारहरणार्थं द्वाप-
रयुगशेषे भाद्रकृष्णाष्टम्यां रोहिणीनक्षत्रे निशीथे
देवकीगर्भे आविर्भूतः । तस्य जन्मसमयो यथा,
"उच्चस्थाः शशिभौमचान्द्रिशनयो लग्नं वृषो लाभगो जीवः सिंहतुलालिषु क्रमवशात् पूषो-

ग्नोराहवः। नैशीथः समयोऽष्टमी बुधदिनं ब्रह्मर्क्षमत्रक्षणे श्रीकृष्णाभिधमम्बुजेक्षणमभू-दाविः परं ब्रह्म तत्" ॥ इति खमाणिक्यनाम-ज्योतिर्मय्यः ॥ (यदि च भगवतो विष्णोः कृष्णाव-तारकालः क्वचित् द्वापरयुगप्रथमे इत्ययं पाठो लक्ष्यते तथापि कलावेव कृष्णावतार इत्येव भूरि-सम्मतमिति बोध्यम्। तत्र भूरि भूरिप्रमाणानि च सन्ति तेषां कानिचिदुद्धृतानि।

तद्यथा, ब्रह्मपुराणे,—

"अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः" ॥

परं कस्मिन्नेव कलौ प्रादुर्बभूव भगवानिति जि-ज्ञासायां वैवस्वतमन्वन्तरीयाष्टाविंशतिमे युगे इत्युक्त्या वर्त्तमानकलेः प्रथम एव निर्णीयते। तथा च उच्चस्थाः शशिभौमचान्द्रिशनय इति। खमाणिक्यनाम्ज्योतिर्ग्रन्थोक्तेः कलियुगस्य ६४७ वर्षेषु गतेषु एतत्समयस्य सम्भवः ततः पूर्व्वं कलौ तादृशसमयासम्भवात्। किञ्च राजतरङ्गि-ण्याम्। १। ५१।

"शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः" ॥

इत्यनेन कलियुगस्य ६५३ वर्षेषु गतेषु तत्सम-कालीनयोः कुरुपाण्डवयोरुत्पत्तिः कथिता अतो भगवतः कृष्णस्यापि तत्कालोत्पत्तिकत्वं सूचितम्। अपि च कृष्णस्य नामकरणे यच्च गर्गर्षिराह ततोऽपि कलेरादावेव भगवदाविर्भावः सूच्यते। यथा, भागवते। १०। ८। ६।

"आसन् वर्णास्त्रयोह्यस्य गृह्णतोऽनुयुगं तनूः।
शुक्लो रक्तस्तथाऽपीत इदानीं कृष्णतां गतः" ॥

इदानीं कलावित्यर्थः। तथा, पुराणान्तरे,—

"कृते शुक्लं हरिं विद्याद् त्रेतायां रक्तवर्णकम्।
द्वापरे पीतवर्णञ्च कलौ कृष्णत्वमागतः" ॥

तथा तत्रैव ११ अध्याये युगावतारकथने।

"कृते शुक्लश्चतुर्बाऽजटिलो वल्कलाम्बरः।
कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डकमण्डलुम् ॥
हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः।
त्रेतायां रक्तवर्णोऽसौ चतुर्बाऽस्त्रिमेखलः ॥
द्वापरे भगवान् श्यामः पीतवासा निजायुधः।
श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः ॥
नानातन्त्रविधानेन कलावपि यथा शृणु।
कृष्णवर्णं त्विषाऽकृष्णं साङ्गोपाङ्गास्त्रपार्षदम्।
यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः" ॥

अपि चक्षते सुख इत्यादयो ये ये वर्णा निर्णीताः नतु केवलं तेषां वाह्यवर्णत्वेन पर्य्यवसीतत्वं किन्तु युगभेदानुसारेण लोकानां गुणधर्म्मत्वमेव निश्चीयते। यथा, कृते शुक्लं इति कथनात् सत्वगुणः प्रदर्शितः सत्वस्य हि शुक्लत्वं प्रसिद्धं यथा,—

"तत्र सत्त्वं निर्म्मलत्वात् प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ!" ॥

त्रेतायां रक्तवर्णकं इत्युक्त्या रजस एव निर्देशः कृतः यथा,—

"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय! कर्म्मसङ्गेन देहिनम्" ॥

द्वापरे पीतवर्णं इत्युक्त्या रजोमिश्रिततमसो निर्देशः। यथा,—

"वावहृ रजो वै यदा अन्धकारात्मकेन तमसा संगच्छते तदा ऽस्य घोरमौच्चादिबहवो दोषा प्रकाशन्ते" ॥ तथा, हरिवंशे वर्णभेदकथने वैश्य-त्वप्राप्तिहेतुमाह।

"गोभ्योवृत्तिं समास्थाय पीताः कृष्यनुजीविनः।
स्वधर्म्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः" ॥

पीताः रजस्तमःप्रधाना इति तट्टीका ॥

कलौ कृष्णतामागत इत्युक्त्या तु केवलं तमः प्राधान्यनिर्देशः यथा,—

"तमस्त्वज्ञानजं विद्धि मोहनं सर्व्वदेहिनाम्।
निद्रा तन्द्रा तथालस्यं प्रमादो दीर्घसूत्रिता" ॥

इतः दुरात्माक्रान्तायाः पृथिव्या भारहरणाय तमःप्रधानां मायामधिष्ठायैव कलावेव भगवतः प्रादुर्भावः सम्भवति ॥

यदा तु शालिवाहनस्य शकाब्दाख्याः प्रचलितु-मारब्धास्तदा वै पाण्डुकुलनन्दनमहाराजयुधि-ष्ठिरप्रवर्त्तिताब्दानां षड्विंशाधिकसार्द्धद्वि-सहस्राण्येवातीतानि। महाभारतभागवतादिशा-स्त्रोक्त्या भगवतः कृष्णस्य तृतीयपाण्डवेनार्জ্জুनेन तुल्यवयस्कत्वात् उपर्य्युक्तराजतरङ्गिणीमतानुसा-रेण च कलेः त्रिपञ्चाशदधिकषट्शतेषु वर्षेषु गतेषु युधिष्ठिराविर्भावकालः। तद्गणनया हि कलेः सप्तपञ्चाशदधिकेषु षट्शतेषु वर्षेषु गतेष्वेव कथञ्चित् कृष्णावतारसमयो निश्चीयते। किञ्च, एतावदपि निर्द्धारितं यत् विक्रमादित्याब्दा यिषु-खीष्टाविर्भावादेकोनाशीतिवर्षोत्तरकाल एव प्रव-र्त्तितुमारब्धाः। अतः षड्विंशाधिकचतुर्व्विंशति-शतवर्षेभ्य एकोनाशीतिवर्षेषु व्ययुक्तेषु यिष-खीष्टाविर्भावात् सप्तचत्वारिंशदधिकशतवर्षपूर्व्व-मेव युधिष्ठिराविर्भावकालः। ततो नितरामेव यिषुखीष्टात् सप्तचत्वारिंशदधिकषड्विंशतिशत-वर्षेभ्यः प्राग्भगवतः कृष्णस्य प्रादुर्भावः कथमपि निरूप्यते ॥)

अधुना अस्य ध्यानम् कथ्यते यथा,—

"स्मरेद्वृन्दावने रम्ये मोहयन्तमनारतम्।
गोविन्दं पुण्डरीकाक्षं गोपकन्याः सहस्रशः ॥
आत्मनो वदनाम्भोजे प्रेषिताक्षिमधुव्रताः।
पीड़िताः कामबाणेन चिरमाश्लेषणोत्सुकाः ॥
मुक्ताहारलसत्पीनतुङ्गस्तनभरानताः।
स्खलद्धम्मिल्लवसना मदस्खलितभाषणाः ॥
दन्तपङ्क्तिप्रभोद्भासिस्यन्दमानाधरान्विताः।
विलोभयन्ती विविधैर्विभ्रमैर्भावगर्व्वितैः ॥
फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम्।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे" ॥

इति तन्त्रसारः ॥ * ॥ अस्य पादचिह्नानि यथा, "चन्द्रार्द्धं कलसं त्रिकोणधनुषी खं गोष्पदं प्रोक्षिकां शङ्खं सव्यपदेऽथ दक्षिणपदे कोणाष्टकं खस्तिकम्।

चक्रं कूर्म्मयवाङ्कुशं ध्वजपवीजम्बूर्द्ध्वरेखाम्बुजं
विभ्राणं हरिमूनविंशतिमहालक्ष्मार्चिताङ्घ्रिं भजे" ॥

इति रूपचिन्तामणिः ॥ * ॥ अस्यावतारा ह्यसं-ख्येयाः। तत्र युगावताराश्चत्वारः। यथा,—

"कृते शुक्लश्चतुर्बाऽजटिलो वल्कलाम्बरः।
कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डकमण्डलुम् ॥
त्रेतायां रक्तवर्णोऽसौ चतुर्बाऽस्त्रिमेखलः।
हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः ॥
द्वापरे भगवान् श्यामः पीतवासा निजायुधः।
श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः ॥
नानातन्त्रविधानेन कलावपि यथा शृणु।
कृष्णवर्णं त्विषाऽकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ॥
यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः" ॥ * ॥

अस्य कल्पावतारा दश यथा। मत्स्यः १ कूर्म्मः २ वराहः ३ नृसिंहः ४ वामनः ५ परशुरामः ६ रामः ७ कृष्णः ८ बुद्धः ९ कल्की १०। इति श्रीभागवतम् ॥ * ॥ अस्य गुणाश्चतुःषष्टिर्यथा।

"अयं नेता सुरम्याङ्गः १ सर्व्वसल्लक्षणान्वितः २।
रुचिर-३ स्तेजसा युक्तो ४ बलीयान् ५ वयसान्वितः ६ ॥ विविधाद्भुतभाषावित् ७ सत्यवाक्यः ८
प्रियम्बदः ९। वावदूकः १० सुपाण्डित्यो ११ बुद्धि-मान् १२ प्रतिभान्वितः १३॥ विदग्ध-१४ श्च-तुरो १५ दक्षः १६ कृतज्ञः १७ सुदृढ़व्रतः १८।
देशकालसुपात्रज्ञः १९ शास्त्रचक्षुः २० शुचि-२१ र्व्वशी २२॥ स्थिरो २३ दान्तः २४ क्षमाशीलो २५
गम्भीरो २६ धृतिमान् २७ समः २८। वदान्यो २९ धार्म्मिकः ३० शूरः ३१ करुणो ३२ मान्य-मानकृत् ३३॥ दक्षिणो ३४ विनयी ३५ ह्रीमान् ३६ शरणागतपालकः ३७। सुखी ३८ भक्तसुहृत् ३९ प्रेमवश्यः ४० सर्व्वशुभङ्करः ४१॥ प्रतापी ४२ कीर्त्तिमान् ४३ रक्तलोकः ४४ साधुसमाश्रयः ४५।
नारीगणमनोहारी ४६ सर्व्वाराध्यः ४७ समृद्धि-मान् ४८॥ वरीया-४९ नीश्वरः ५० त्वेति गुणा-स्तस्यानुकीर्त्तिताः। सदास्वरूपसम्प्राप्तः ५१ सर्व्वज्ञो ५२ नित्यनूतनः ५३॥ सच्चिदानन्दसान्द्राङ्गः ५४ सर्व्वसिद्धिनिषेवितः ५५॥ अविचिन्यमहाशक्तिः ५६ कोटिब्रह्माण्डविग्रहः ५७॥ अवतारावलीबीजं ५८ हतारिगतिदायकः ५९। आत्माराम-गणाकर्षी-६० त्वमी कृष्णे किलाद्भुताः॥ सर्व्वा-द्भुतचमत्कारलीलाकल्लोलवारिधिः ६१। अतुल्य-मधुरप्रेममण्डितप्रियमण्डलः ६२॥ त्रिजगन्मान सार्कर्षी मुरलीकलकूजितः ६३। असमानोर्द्ध-रूपश्रीविस्मापितचराचरः ६४॥
लीलाप्रेम्नाप्रियाधिक्यं माधुर्य्ये वेणुरूपयोः।
इत्यसाधारणं प्रोक्तं गोविन्दस्य चतुष्टयम्।
एवं गुणाश्चतुर्भेदास्चतुःषष्टिरुदाहृताः'। * ॥

अस्य गदा कौमोदकी। खड्गः नन्दकः। धनुः शार्ङ्गम्। शङ्खः पाञ्चजन्यः। चक्रं सुदर्शनः। मणिः कौस्तुभः। वाहनं गरुड़ः। रथः गरुड़ध्वजः। रथस्याश्वाः शैव्यसुग्रीवमेघवाहनपुष्करोः। इति श्रीभागवतम् ॥ * ॥ अस्य पत्नयः गोलोके वृन्दा-वने च श्रीराधा। वैकुण्ठे लक्ष्मीः। इति ब्रह्म-वैवर्त्तम् ॥ द्वारकायां रुक्मिणी १ जाम्बवती २

सत्यभामा ३ कालिन्दी ४ मित्रविन्दा ५ नाग्नजिती ६ भद्रा ७ लक्ष्मणा ८ एताः प्रधानाः। अन्या अपि शतादिकषोड़शसहस्राणि स्त्रियः। इति श्रीभागवतम् ॥ * ॥ व्रजस्थितस्यास्य सखायस्तुर्व्विधाः। तत्र किञ्चिदयसाधिकाः सुहृदो यथा। सुभद्रः १ मण्डलीभद्रः २ भद्रवर्द्धनः ३ गोभटः ४ यक्षेन्द्रभटः ५ भद्राङ्गः ६ वीरभद्रः ७ महागुणः ८ विजयः ९ बलभद्रः १० इत्याद्याः ॥ वयसा न्यूनाः सखायो यथा। विशालः १ वृषभः २ ओजस्वी ३ देवप्रस्थः ४ वरूथपः ५ मणिबन्धः ६ करन्धमः ७ इत्याद्याः ॥ वयसा तुल्याः प्रियसखायो यथा। श्रीदामा १ सुदामा २ वसुदामकः ३ किङ्किणी ४ स्तोककृष्णः ५ अंशुः ६ भद्रसेनः ७ विलासी ८ पुण्डरीकविटङ्काक्षः ९ कलविङ्कः १० इत्याद्याः ॥ पूर्व्वतः श्रेष्ठा आत्यन्तिकरहस्येषु युक्ताः भावविशेषविशिष्टाः प्रियनर्म्मसखायो यथा। सुबलः १ अर्জ্জुनः २ गन्धर्व्वः ३ वसन्तः ४ उज्ज्वलः ५ इत्याद्याः ॥ इति भक्तिरसामृतसिन्धुः ॥ * ॥ वृन्दावनस्थितस्य अस्य सख्यः शतकोटयः। तत्र वेदमुनिदेवस्त्रियोऽपि कृष्णाराधनार्थं गोपाङ्गनारूपेण जाताः। व्रजे अस्य नित्यप्रिया यथा। राधा १ चन्द्रावली २ विशाखा ३ ललिता ४ श्यामा ५ पद्मा ६ शैव्या ७ भद्रिका ८ तारा ९ विचित्रा १० गोपाली ११ धनिष्ठा १२ पालिका १३ खञ्जनाक्षी १४ मनोरमा १५ मङ्गला १६ विमला १७ लीला १८ कृष्णा १९ शारी २० विशारदा २१ तारावली २२ चकोराक्षी २३ शङ्करी २४ कुङ्कुमादयः २५। एतासां मध्ये विशाखा ललिता पद्मा शैव्या एताश्चतस्रः सख्यः। अन्या यूथाधिपाः। तासां मध्ये राधादयोऽष्टौ सुभगाः। आसां राधाचन्द्रावल्यौ श्रेष्ठे। अनयोरपि राधाधिका। इत्युज्ज्वलनीलमणिः ॥ * ॥ अपि च। चन्द्रावली १ सुशीला २ तस्याः सहचर्य्यः चतुर्दशसहस्राणि। शशिकला ३ अस्याः सहचर्य्यः षोड़शसहस्राणि। चन्द्रमुखी ४ अस्याः सहचर्य्यः षोड़शसहस्राणि। माधवी ५ अस्याः सहचर्य्यः एकादशसहस्राणि। कदम्बमाला ६ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। कुन्ती ७ अस्याः सहचर्य्यः दशसहस्राणि। यमुना ८ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। जाह्नवी ९ अस्याः सहचर्य्यः नवसहस्राणि। पद्ममुखी १० अस्याः सहचर्य्यः नवसहस्राणि। सावित्री ११ अस्याः सहचर्य्यः पञ्चदशसहस्राणि। सुधामुखी १२ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। शुभा १३ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। पद्मा १४ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। गौरी १५ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। सर्व्वमङ्गला १६ अस्याः सहचर्य्यः षोड़शसहस्राणि। सरस्वती १७ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। भारती १८ अस्याः सहचर्य्यः दशसहस्राणि। अपर्णा १९ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। रतिः २० अस्याः सहचर्य्यः दशसहस्राणि। गङ्गा २१ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। अम्बिका २२ अस्याः सहचर्य्यः षोड़शसहस्राणि। सती २३ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। नन्दिनी २४ अस्याः सहचर्य्यः दशसहस्राणि। सुन्दरी २५ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। कृष्णप्रिया २६ अस्याः सहचर्य्यः षोड़शसहस्राणि। मधुमती २७ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। चम्पा २८ अस्याः सहचर्य्यः त्रयोदशसहस्राणि। चन्दना २९ अस्याः सहचर्य्यः चतुर्दशसहस्राणि। इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥ (महादेवः। यथा, महाभारते १३। १७। ४४। "दीर्घञ्च हरिकेशञ्च सुतीर्थः कृष्ण एव च" ॥) व्यासः। (अयन्तु द्वैपायनः वासव्यां सत्यवत्यां महर्षेः पराशरेणाजातः कृष्णवर्णत्वात् कृष्णकलावतीर्णत्वाद् वा कृष्ण इत्यभिधीयते। यथा, महाभारते १। १०५। १४। "यो अस्य वेदांश्चतुरस्तपसा भगवानृषिः। लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च" ॥) अर्জ্জुनः। (अयन्तु तृतीयपाण्डवः। अस्य दशनामस्वन्यतमं नाम। यथा, महाभारते ३। ४२। २२। "कृष्ण इत्येव दशमं नाम चक्रे पिता मम। कृष्णावदातस्य सदा प्रियत्वाद् बालकस्य वै" ॥ कृष्णो वर्णोऽस्यास्तीति। नगन्तात् गुणवचनेभ्यो मतुपो लुगिति लुक् ॥) कोकिलः। इति विश्वः ॥ काकः। इति मेदिनी ॥ करमर्दकः। इति शब्दरत्नावली ॥ वर्णविशेषः। कालवर्णः। तत्पर्य्यायः। नीलः १ असितः २ श्यामः ३ कालः ४ श्यामलः ५ मेचकः ६ बभ्रुलः ७ रामः ८ शितिः ९। इति जटाधरः ॥ तद्वति, त्रि। इत्यमरः ॥ (कर्षति पापानि स्मरणागतानां बाभ्रुलकात् ऋषेर्नेक् वर्णं विनापि णत्वञ्च। परब्रह्म। यथा, पौराणिकीगाथायाम्।

"कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते। भस्मीभवन्ति राजेन्द्र! महापातककोटयः" ॥

चन्द्रकलासकरप्रथमादिपञ्चदशकलाक्रियारूपः प्रतिपदादिदर्शान्तात्मकपञ्चदशतिथ्यात्मकः कालभेदोऽर्द्धमासः। यथा, तिथितत्त्वे ३६।

"चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः" ॥

कृष्णपक्षाभिमानिदेवताविशेषः। यथा, गीतायाम्।

"धूमो रात्रिस्तथाकृष्णः षण्मासा दक्षिणायनम्"।

कृष्णसारमृगः। यथा, महाभारते १। १३०। १५।

"धनुश्च सशरं दृष्ट्वा तथा कृष्णाजिनानि च" ॥

अशुभकर्म्म। वेदोक्तासुरविशेषः। अयन्तु इन्द्रेण समरो निहतः। ऋषिविशेषः। अयन्तु ऋग्वेदस्य अष्टममण्डलस्य ८५—८७ सूक्तानि, तथा दशम मण्डलस्य ४२—४४ सूक्तानि च प्रणिनाय। अथर्व्ववेदान्तर्गतोपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि। "गोपालतापनकृष्णहयग्रीवदत्तात्रेयगारुडानामथर्व्ववेदगतानामेकविंशत्युपनिषदां मध्ये कतिभिरिति भ्रान्तिः" ॥)

कृष्णकन्दः, क्ली, (कृष्णः कृष्णवर्णः कन्दो यस्य।) रक्तोत्पलम्। इति त्रिकाण्डशेषः ॥

कृष्णकर्म्मा, [न्] त्रि, (कृष्णं अशुभं कर्म्म यस्य।) पापाचारयुक्तः। तत्पर्य्यायः। शिग्विदानः २। इत्यमरः। ३। १। ४६ ॥ (श्वेतितुमिच्छति श्वितावर्णे इत्यस्य श्वितेर्दस्वेत्यानच् दत्वं सनो लुक् च इति शिग्विदानः। केचित्तु अकृष्णकर्म्मा इति पठन्ति। अकृष्णं निष्पापत्वात् शुक्लं कर्म्मास्य अकृष्णकर्म्मा शुक्लकर्म्मा इत्यर्थः। इति व्याचक्षते। इति भरतः ॥

"शिग्विदानः कृष्णकर्म्मा शुक्लकर्म्मेति कस्यचित्"॥ इति जटाधरः ॥ क्ली, व्रणानां कृष्णत्वसम्पादकक्रियाविशेषः। यथा, सुश्रुतोक्तौ "अथ व्रणस्योपक्रमा भवन्तीत्युपक्रम्य दारुणकर्म्मेत्यारभ्य कर्म्मेति कृष्णकर्म्मेपाण्डुकर्म्म"। इति ॥)

कृष्णकलिः, स्त्री, (कृष्णस्य चूड़ा इव कलिः कलिका यस्याः।) स्वनामख्यातपुष्पवृक्षः। तस्य शाखा रक्ततण्डुलीयनालवदग्रश्रियुक्ता पत्रं क्षुद्रताम्बूलदलवद्भवति। तस्य पुष्पं श्वेतरक्तपीतपाटलवर्णमिलितपञ्चदलं षट्केशरमध्यं खल्पसदृन्धयुक्तं अपराह्णे प्रस्फुटति। तस्य बीजं कृष्णमरिचतुल्यं पुष्पं सर्व्वकाले सुलभं वर्षाकाले प्रचुरं भवति। तदुत्पत्तिस्तस्य मूलतो बीजतश्च। इति लोकप्रसिद्धम् ॥ अस्याः पित्तपत्रमूलादिना व्रणस्फोटनं भवति इति वैद्यकम् ॥

कृष्णकाष्ठं, क्ली, (कृष्णं काष्ठं यस्य।) कालागुरु। इति राजनिर्घण्टः ॥ (अगुरुशब्दे ऽस्य विषयो ज्ञातव्यः ॥)

कृष्णकेलिः, स्त्री, (कृष्णस्य केलिः क्रीड़ा द्रव्यं चूड़ा इव पुष्पकलिका यस्याः।) स्वनामख्यातपुष्पवृक्षः। (अस्याः अन्यद्विवरणं कृष्णकलिशब्दे द्रष्टव्यम् ॥)

कृष्णकोहलः, पुं, (कृष्णकस्य कुत्सितकर्म्मण ऊहं वितर्कं लाति ग्रहातीति। ला + कः।) धूतहृत्। इति त्रिकाण्डशेषः ॥

कृष्णगन्धा, स्त्री, (कृष्णः उग्रो गन्धो यस्याः।) शोभाञ्जनः। इति राजनिर्घण्टः ॥

("इमांस्त्रीनपरान् वृक्षानाऊर्य्येषां स्थितांस्त्वचः।
पूतिकः कृष्णगन्धा च तिलकश्च तथापरः ॥
विरेचने प्रयोक्तव्याः पूतिकस्तिलकस्तथा।
कृष्णगन्धा परीसर्पे ग्रीवेष्वर्शःसु चोच्यते" ॥
इति चरके सूत्रस्थाने १ अध्याये ॥

कृष्णगर्भः, पुं, (कृष्णः कृष्णवर्णो गर्भः अभ्यन्तरदेशो यस्य।) कटफलः। इति राजनिर्घण्टः ॥

कृष्णचक्षुकः, पुं, (कृष्णा चक्षुरस्य। ततः कप्।) चणकः। इति राजनिर्घण्टः ॥

(चणकशब्दे विवरणमस्य व्याख्येयम् ॥)

कृष्णचतुर्द्दशी, स्त्री, (कृष्णा कृष्णपक्षसम्बन्धिनी चतुर्द्दशी।) कृष्णपक्षीयचतुर्द्दशी। तत्पर्य्यायः। भूतः २। इति त्रिकाण्डशेषः ॥

कृष्णचरः, त्रि, (कृष्णस्य भूतपूर्व्वो गौः चरट्।) कृष्णस्य भूतपूर्व्वो गवादिः। इति मुग्धबोधम् ॥

कृष्णचूड़ा, स्त्री, (कृष्णस्य चूड़ेव पुष्पचूड़ा यस्याः।) स्वनामख्यातसकण्टकपुष्पवृक्षः। तस्य पत्रं बद्ध-

दृच्चदलवद्भवति । तस्य पुष्पं पीतरक्तवर्णं उपर्य्यधः स्थूलसूक्ष्मदशदलं दीर्घदन्तं दशदीर्घकेशरमध्यं ईषत्सङ्गन्धयुक्तञ्च जायते । तत्फलं शिम्बीसदृशं पुष्पं सर्व्वकाले सुलभं वर्षाकाले प्रचुरं भवति । तदुत्पत्तिस्तस्य मूलतो बीजाच्च भवति इति लोकप्रसिद्धम् ॥

कृष्णचूड़िका, स्त्री, (कृष्णा चूड़ा अयं यस्याः । ततः कप् ततष्टाप् अत इत्वञ्च ।) गुञ्जा । इति राजनिर्घण्टः ॥ (कुँचफल इति भाषा ॥)

कृष्णचूर्ण, क्ली, (कृष्णस्य लोहस्य चूर्णम् । दग्धाङ्गो-ष्ठाग्निःक्षतकीट्टमित्यर्थः ।) लौहमलम् । इति राजनिर्घण्टः ॥

कृष्णजटा, स्त्री, (कृष्णा कृष्णवर्णा जटा यस्याः ।) जटामांसी । इति रत्नमाला ॥

कृष्णजीरकः, पुं, (कृष्णः कृष्णवर्णो जीरकः ।) कृष्ण-वर्णस्थूलजीरकः । केलेजीरा इति भाषा । तत्-पर्य्यायः । सुषवी २ कारवी ३ एथ्वी ४ एथुः ५ काला ६ उपकुञ्चिका ७ । इत्यमरः ॥ सुश्रवी ८ कुञ्चिका ९ । इति तट्टीकायां नयनानन्दः ॥ उपकुञ्चिः १० । इति रत्नमाला ॥ कृष्णा ११ जरणा १२ शाली १३ बङ्गगन्धा १४ । एथुका १५ एथिवी १६ भेषजम् १७ । इति शब्दरत्नावली ॥ अपि च ।

"कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः ।
कृष्णाजाजी तु सुषवी कालिका चोपकालिका ॥
एथ्वीका कारवी एथ्वी एथुः कृष्णोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च दृच्छ्रीरक इत्यपि ॥
जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु ।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ॥
ज्वरघ्नं पाचनं बल्यं हृद्यं रुच्यं कफापहम् ।
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्" ॥

इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफश्लेष्मजीर्णज्वरनाशित्वम् । रुचि-चक्षुर्हितकारित्वम् । ग्राहित्वञ्च । इति राज-निर्घण्टः ॥ स तु स्थूलसूक्ष्मभेदेन द्विधा ॥

कृष्णतण्डुला, स्त्री, (कृष्णः तण्डुलो बीजं यस्याः ।) कर्ण-स्फोटालता । इति राजनिर्घण्टः ॥

कृष्णताम्र, क्ली, (कृष्णं ताम्रम् । "वर्णो वर्णेन" । २ । १ । ६९ । इति कर्म्मधारयः ।) गोशीर्षचन्दनम् । इति शब्दमाला ॥

कृष्णतारः, पुं, (कृष्णा तारा यस्य ।) हरिणः । इति राजनिर्घण्टः ॥

कृष्णत्रिवृता, स्त्री, (कृष्णा त्रिवृता ।) कृष्णवर्णा त्रिवृत् । काल तेउड़ी इति भाषा ॥ तत्पर्य्यायः । श्यामा २ पाकिन्दी ३ कालमेषिका ४ काला ५ मसूरविदला ६ अर्द्धचन्द्रा ७ सुमेषिका ८ । इति जटाधरः ॥ (अस्या गुणा यथा,

कषायत्वम् । मधुरत्वम् । रूक्षत्वम् । विपाकेकटु-कत्वम् । कफपित्तप्रशमकारित्वम् । रूक्षत्वात् वात-कोपनत्वञ्च ॥ इति चरके कल्पस्थाने ७ अध्याये ॥)

कृष्णदन्ता, स्त्री, (कृष्णः कृष्णवर्णो दन्तः शिखरदेशो यस्याः ।) काश्मरीवृक्षः । इति राजनिर्घण्टः ॥

(कृष्णदन्तविशिष्टे, त्रि । दन्तस्तु मद्यपानादिना कृष्णत्वं प्राप्नोति ॥)

कृष्णदेहः, पुं, (कृष्णः कृष्णवर्णो देहो यस्य ।) भ्रमरः । इति सारस्वतः ॥ कृष्णवर्णशरीरे, त्रि ॥

कृष्णद्वैपायनः, पुं, (द्वीपे भव इत्यण् । यद्वा द्वीपः अयनं उत्पत्तिस्थानं यस्य । प्रज्ञाद्यण् । कृष्ण-श्चासौ द्वैपायनश्चेति ।) वेदव्यासः । इति चिकाण्ड-शेषः ॥ (यथा, महाभारते १ । १०५ । १३ ।

"ततस्तस्मिन् प्रतिज्ञाते भीष्मेण कुरुनन्दन ! ।
कृष्णद्वैपायनं काली चिन्तयामास वै मुनिम्" ॥

अस्य यमुनाद्वीपोत्पत्तिकथा यथा तत्रैव १ । १०५ । ७—१४ ।

"धर्म्मयुक्तस्य धर्म्मार्थं पितुरासीत्तरो मम ।
सा कदाचिदहं तत्र गता प्रथमयौवने ॥
अथ धर्म्मविदां श्रेष्ठः परमर्षिः पराशरः ।
आजगाम तरीं धीमांस्तरिष्यन् यमुनां नदीम् ॥
स तार्य्यमाणो यमुनां मामुपेत्याब्रवीत्तदा ।
सान्त्वपूर्व्वं मुनिश्रेष्ठः कामार्त्तो मधुरं वचः ॥
तमहं शापभीता च पितुर्भीता च भारत ! ।
वरैरसुलभैरुक्ता न प्रत्याख्यातुमुत्सहे ॥
अभिभूय स मां बाला तेजसा वशमानयत् ।
तमसा लोकमावृत्य नौगतामेव भारत ! ॥
मत्स्यगन्धो महानासीत् पुरा मम जुगुप्सितः ।
तमपास्य शुभं गन्धमिमं प्रादात् स मे मुनिः ॥
ततो मामाह स मुनिर्गर्भमुत्सृज्य मामकम् ।
द्वीपेऽस्या एव सरितः कन्यैव त्वं भविष्यसि ॥
पाराशर्य्यो महायोगी स बभूव महानृषिः ।
कन्यापुत्रो मम पुरा द्वैपायन इति श्रुतः" ॥

अन्यत् विवरणादिकमस्य व्यासशब्दे द्रष्टव्यम् ॥)

कृष्णधत्तूरकः, पुं, (कृष्णवर्णो धत्तूरकः ।) कृष्णवर्ण-धत्तूरः । कालधुतुरा इति भाषा । तत्पर्य्यायः । सिद्धः २ कनकः ३ शिवः ४ शिवः ५ कृष्ण-पुष्पः ६ विषारातिः ७ क्रूरधूर्त्तः ८ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कान्तिकारित्वम् । व्रणा त्तित्वग्दोषखर्जुकण्डूतिज्वरभ्रमनाशित्वञ्च ॥ "सि-तनीलकृष्णलोहितपीतप्रसवाश्च सन्ति धत्तूराः । सामान्यगुणोपेतास्तेषु गुणाश्चास्तु कृष्णकुसुमः स्यात्" ॥ इति राजनिर्घण्टः ॥

कृष्णपर्णी, स्त्री, (कृष्णवर्णानि पर्णानि यस्याः ।) कालतुलसी । इति रत्नमाला ॥

कृष्णपक्षः, पुं, (कृष्णस्तमसावृतश्चन्द्रक्षयात्मकः पक्षः ।) असितपक्षः । स तु प्रतिपदाद्यमावास्या-न्तानि पञ्चदश दिनानि । यथा, तिथ्यादितत्त्वम् ।

"तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि ।
चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः ॥
पक्षत्याद्यास्तु तिथयः क्रमात् पञ्चदश स्मृताः ।
दर्शान्ताः कृष्णपक्षे ताः पूर्णिमान्ताश्च शुक्लके" ॥

कृष्णपाकः, पुं, (पच्यतेऽसौ । पच + घञ् । पाक फलम् । कृष्णः कृष्णवर्णः पाकः फलं यस्य ।) कर मर्दकः । इति शब्दरत्नावली ॥

कृष्णपाकफलः, पुं, (कृष्णपाकरूपं फलं यस्य ।) कर मर्दकः । इत्यमरः । २ । ४ । ६७ ॥

कृष्णपिङ्गला, स्त्री, ("वर्णो वर्णेन" । २ । १ । ६९ । इति कर्म्मधारयः ।) दुर्गा । इति चिकाण्डशेषः ॥ (कृष्णपिङ्गलवर्णयुक्ते, त्रि ।

ॐ "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्द्धलिङ्गं विरूपाक्षं विश्वरूपं नमो नमः" ॥)

कृष्णपिण्डीतकः, पुं, (कृष्णः पिण्डीतकः । नित्यकर्म्म-धारयः ।) वृक्षविशेषः । तत्पर्य्यायः । वराहः २ कृष्णपिण्डीरः ३ । इति रत्नमाला ॥

कृष्णपिण्डीरः, पुं, (कृष्णः पिण्डीरः ।) कृष्णपिण्डीत-कवृक्षः । इति रत्नमाला ॥

कृष्णपिपीलो, स्त्री, (कृष्णा पिपीलो ।) कृष्णवर्णपिपी-लिका । कालपिपीड़ा इति भाषा । तत्पर्य्यायः । स्थूला २ वृक्षरुहा ३ । इति राजनिर्घण्टः ॥

कृष्णपुष्पः, पुं, (कृष्णं पुष्पं यस्य ।) कृष्णधत्तूरकः । इति राजनिर्घण्टः ॥ (कृष्णधत्तूरशब्दे ऽस्य पर्य्याया ज्ञेयाः ॥)

कृष्णपुष्पी, स्त्री, (कृष्णपुष्प + जातित्वात् ङीष ।) प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥

कृष्णफलः, पुं, (कृष्णं उग्रं कुत्सितं वा फलं अस्य ।) करमर्द्दकः । इत्यमरटीकायां भरतः ॥

कृष्णफलपाकः, पुं, (कृष्णं फलरूपेण पाको यस्य ।) करमर्दकः । इति द्विरूपकोषः ॥

कृष्णफला, स्त्री, (कृष्णं फलं यस्याः ।) सोमराजी । इत्यमरः । २ । ४ । ६६ ॥ (कोलशिम्बी । आल्कुशी इति भाषा । छोट जाम इति भाषा । अस्याः पर्य्याया यथा ।

"सूक्ष्मकृष्णफला जम्बू र्दीर्घपत्रा च मध्यमा" ॥

इति वैद्यकरत्नमालायाम् ॥ कोलशिम्बिः ॥ सुवरा शेंडि इति भाषा ॥ अस्याः पर्य्याया ।
यथा,—

"कोलशिम्बिः कृष्णफला तथा पर्य्यङ्गपट्टिका" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णभूमः, पुं, (कृष्णा कृष्णवर्णा भूमिर्मृत्तिका यत्र देशे । समासे अच् ।) कृष्णवर्णमृत्तिकायुक्तो देशः । इति हेमचन्द्रः ॥

कृष्णभूमिजा, स्त्री, (कृष्णाया भूमेर्जायते इति । जन + डः । ततष्टाप् ।) गोभूचिकाटङ्कम् । इति राज-निर्घण्टः ॥

कृष्णभेदा, स्त्री, (कृष्णवर्णेन भेदश्छेदोऽस्याः ।) कटु का । इति राजनिर्घण्टः ॥
(अस्याः पर्य्याया यथा ॥

"कट्वी तु कटुका तिक्ता कृष्णभेदा कटूल्बणा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ।
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णभेदी, स्त्री, (कृष्णेन वर्णेन भेदोऽस्याः । गौरादि-त्वात् ङीष् ।) कटुकी । इत्यमरः । २ । ४ । ८६ ॥ (कटुकीशब्दे ऽस्या गुणपर्य्याया बोद्धव्याः ।)

कृष्णमुद्गः, पुं, (कृष्णः कृष्णवर्णः निकृष्टो वा मुद्गः वन-जातत्वात् ।) मुद्गविशेषः । कालमुग् इति भाषा । तत्पर्य्यायः । वासन्तः २ माधवः ३ सुराष्ट्रजः ४ । अस्य गुणाः । त्रिदोषदाहनाशित्वम् । मधुर-त्वम् । लघुत्वम् । दीपनत्वम् । पथ्यत्वम् । बल-

वीर्य्याङ्कुष्ठिदाढ्यत्वञ्च । इति राजनिर्घण्टः ॥ (यथाह भावप्रकाशः ।
"मुद्गो रूक्षो लघुर्ग्राही कफपित्तरसो हि सः । स्वादुरम्लानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा ॥ मुद्गो बहुविधः श्यामो हरितः पीतकस्तथा । श्वेतो रक्तश्च तेषान्तु पूर्ब्बः पूर्ब्बो लघुः स्मृतः ॥ शुश्रुतेन पुनः प्रोक्तो हरितः प्रवरो गुणैः । चरकादिभिरप्युक्त एष एव गुणाधिकः" ॥)

कृष्णमूली, स्त्री, (कृष्णं मूलमस्याः । स्त्रियां ङीप् ।) शारिवाविशेषः । इति राजनिर्घण्टः ॥

कृष्णमृत्, स्त्री, (कृष्णा मृत् मृत्तिका ।) कालमृत्तिका । तत्पर्य्यायः । श्लक्ष्णभूमिः २ । अस्या गुणः । च्छर्दिदाहास्रप्रदरश्लेष्मपित्तहरत्वम् । इति राजनिर्घण्टः ॥

कृष्णमृत्तिकः, पुं, (कृष्णा मृत्तिका भूमिर्यत्र ।) कृष्णभूमः । इति हेमचन्द्रः ॥

कृष्णरुहा, स्त्री, (कृष्णा सती रोहतीति । रुह + कः ।) जतुका लता । इति राजनिर्घण्टः ॥

कृष्णरूप्यः, त्रि, (कृष्णस्य भूतपूर्ब्बा गौः भूतपूर्ब्बो रूप्यः । कृष्णचरः । कृष्णस्य भूतपूर्ब्बो गवादिः । इति मुग्धबोधव्याकरणम् ॥

कृष्णलकः, पुं, (कृष्णो वर्णोऽस्यस्यार्द्धफलेसिध्मादित्वात् लच् । ततः स्वार्थे कन् ।) गुञ्जा । परिमाणविशेषः । यथा, मनुः । ८ । १७ ।
"पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश" ॥

कृष्णलवणं, क्ली, (कृष्णं लवणम् ।) सौवर्चललवणम् । काचलवणम् । इति राजनिर्घण्टः ॥ (यथा, गारुडे १८४ अध्याये ।
"सैन्धवं कृष्णलवणं सौवीरं मत्स्यपित्तकम्" ॥ अस्य पर्य्याया यथा । वैद्यकरत्नमालायाम् ।
"रुचकं कृष्णलवणमच्छं सौवर्चलञ्च तत्" ॥)

कृष्णला, स्त्री, (कृष्णल + टाप् ।) गुञ्जा । इत्यमरः । २ । ४ । ९८ ॥ (क्ली, परिमाणविशेषः । यथा, मनुः । ८ । १३४ ।
"सर्षपाः षट् यवो मध्यस्त्रियवान्त्वेककृष्णलम् । पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश" ॥ अस्य टीकायां कुल्लूकभट्टेन यद्याख्यातं तद्यथा । "गौरसर्षपाः षट् मध्यो न स्थूलो नापि सूक्ष्मो यवो भवति । त्रिभिर्यवैः कृष्णलं रत्तिकेति प्रसिद्धं पञ्चभिः कृष्णलैर्माषाः षोडशमाषायाः सुवर्णः स्यात्" ॥ अस्याः पर्य्याया यथा ।
"साङ्कुष्ठा कृष्णला गुञ्जा रक्तिका काकणन्तिका । काकादनी काकतिक्ता काकजङ्घा शिखण्डनी" ॥ इति वैद्यकरत्नमालायाम् ॥)

कृष्णलोहं, क्ली, (कृष्णं लोहम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥
("त्रपुसीसताम्ररजतकृष्णलोहसुवर्णानि लोहमलञ्चेति" ॥ इति सुश्रुते सूत्रस्थाने ९ अध्याये ॥)

कृष्णलोहितः, पुं, (कृष्णः लोहितश्च । "वर्णो वर्णेन २ । १ । ६९ । इति समासः ।) कृष्णरक्तमिश्रवर्णः । धूम्रवर्णः । तद्वति त्रि । इत्यमरः २ । ५ । १६ ॥

कृष्णवक्त्रः, पुं, (कृष्णं कृष्णवर्णं वक्त्रं मुखं यस्य ।) वानरः । इति हलायुधः ॥

कृष्णवर्त्मा, [न्] पुं, (कृष्णं कृष्णवर्णं वर्त्म यस्य । वायुप्रसारितधूमपथाभ्यन्तर एव गतिरस्येति भावः ।) अग्निः । (यथा, महाभारते १ । ८५ । १२ ।
"हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" ॥) चित्रक वृक्षः । इत्यमरः ॥ (कृष्णं अपविद्धं कर्म्म आचरणं यस्य ।) दुराचारः । राजः । इति मेदिनी ॥ (कृष्णः वासुदेवः परब्रह्म इत्यर्थः वर्त्म गतिर्यस्य । ब्रह्मनिष्ठपुरुषः । इति व्युत्पत्तिलभ्योऽर्थः ॥)

कृष्णवल्ली, स्त्री, (कृष्णा वल्ली ।) कृष्णार्जकः । इति शब्दचन्द्रिका ॥ सारिवाविशेषः । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा ।
"कृष्णार्জ্জকः कृष्णवल्ली कालमालः करालकः" ॥ इति वैद्यकरत्नमालायाम् ॥)

कृष्णवल्लिका, स्त्री, (कृष्णा वल्लिका ।) जतुका लता । इति राजनिर्घण्टः ॥

कृष्णवर्व्वरकः, पुं, (कृष्णः वर्व्वरकः ।) वर्व्वरवृक्षः । इति राजनिर्घण्टः ॥ (वर्व्वरशब्दे ऽस्य विवृतिर्ज्ञेया ॥)

कृष्णवानरः, पुं, (कृष्णः वानरः ।) कालवानरः । तत्पर्य्यायः । गोलाङ्गूलः २ गौरास्यः ३ कपिः ४ कृष्णमुखः ५ । इति राजनिर्घण्टः ॥

कृष्णवीजं, क्ली, (कृष्णं वीजं यस्य ।) कालिङ्गम् । इति राजनिर्घण्टः ॥ (कालिन्दं तरवूज इति लोके । अस्य पर्य्याया गुणाश्च यथा ।
"कालिन्दकृष्णवीजं स्यात् कालिङ्गञ्च सुवर्त्तुलम् । कालिन्दं ग्राहिदृक्पित्तश्रमशुक्रहृच्छीतलं गुरु । पक्वन्तु सोष्णं सक्षारं पित्तलं कफवातजित्" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कृष्णवीजः, पुं, (कृष्णं उग्रं वीजं यस्य ।) रक्तशिग्रुवृक्षः । इति जटाधरः ॥

कृष्णवृन्ता, स्त्री, (कृष्णं वृन्तं अस्याः ।) पाटलावृक्षः । इत्यमरः । २ । ४ । ५५ ॥ (अस्याः पर्य्याया यथा ।
"पाटलिः पाटला मोघा मधुदूती फलेरुहा । कृष्णवृन्ता कुबेराक्षी कालस्कन्धविलक्षभा ॥ ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता" ॥ इति च तस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
माषपर्णी । इति मेदिनी (अस्याः पर्य्याया यथा ।
"सिंहपुच्छी ऋषिप्रोक्ता माषपर्णा महासहा । कृष्णवृन्ता च काम्बोजी पाण्डुलोमशपर्णिनी" ॥ इति वैद्यकरत्नमालायाम् ॥ * ॥ गम्भारीवृक्षः । अस्य पर्य्याया यथा ।
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्विका ॥ काश्मीरी काश्मरीहीरा काश्मर्य्यः पीतरोहिणी । कृष्णवृन्ता मधुरसा महाकुसुमिकाऽपि च" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
गुणाश्चास्याः पाटलामाषपर्णीगम्भारीशब्देषु व्याख्येयाः ॥)

कृष्णवृन्तिका, स्त्री, (कृष्णं वृन्तं अस्याः ततः संज्ञायां कन् ततष्टाप् अत इत्वञ्च ।) गम्भारीवृक्षः । पेटिकावृक्षः । इति रत्नमाला ॥

कृष्णशारः, पुं, (कृष्णः शारः शबलश्च ।) कृष्णसारमृगः । इत्यमरटीकायां रमानाथः ॥

कृष्णशालिः, पुं, (कृष्णः शालिर्धान्यविशेषः ।) काल धान इति भाषा । तत्पर्य्यायः । कालशालिः २ श्यामशालिः ३ सितेतरः ४ । अस्य गुणाः । चिरोषदाहनाशित्वम् । मधुरत्वम् । पृथिवीवर्द्धनत्वम् । वर्णकान्तिबलकारित्वञ्च । इति राजनिर्घण्टः ॥

कृष्णशिग्रुः, पुं, (कृष्णः रूक्षगुणयुक्तः शिग्रुः ।) शोभाञ्जनवृक्षः । इति राजनिर्घण्टः ॥

कृष्णशिम्बिका, स्त्री, (कृष्णा कृष्णवर्णा शिम्बिका कुत्सिता शिम्बिका वा ।) कृष्णवर्णशिम्बी । काल शिम इति भाषा । तत्पर्य्यायः । काकाण्डी २ । इति रत्नमाला ।
(अस्या गुणा गाम्भारीशब्दे ज्ञातव्याः ॥
"सितासिताः पीतकरक्तवर्णा भवन्ति येऽनेकविधास्तु शिम्बाः । यथोदितास्ते गुणतः प्रधाना ज्ञेया कटूष्णा रसपाकयोश्च" ॥ इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कृष्णशृङ्गः, पुं, (कृष्णं शृङ्गं विषाणो यस्य ।) महिषः । इति हेमचन्द्रः ॥

कृष्णसखः, पुं, कृष्णस्य सखा । ("राजाहःसखिभ्यष्टच्" । ५ । ४ । ९१ । इति टच् ।) अर्জ্জुनः । इति सुग्धबोधव्याकरणम् ॥ (अर्জ্জुनवृक्षः ॥)

कृष्णसखी, स्त्री, (कृष्णस्य सखी । द्रौपदी । सा तु पञ्चपाण्डवमहिषी पञ्चालराजदुहिता । कृष्णस्य सखी सहचरी इव कृष्णवर्णत्वात् ।) जीरकः । इति शब्दचन्द्रिका ॥

कृष्णसर्षपः, पुं, (कृष्णः कृष्णवर्णः सर्षपः ।) राजसर्षपः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायः ।
"त्रिवः त्रितामिजनकः क्षमिक्षत् कृष्णसर्षपः" ॥ अस्य गुणाश्च ।
"अति तीक्ष्णा विशेषेण तद्वत्कृष्णापि राजिका" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कृष्णसारः, पुं, (कृष्णासौ सारःशबलश्चेति ।) हरिण भेदः । इत्यमरः । २ । ४ । १० । कालसार इति भाषा ॥ (यथा, मनौ २ । २३ ।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः । स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः" ॥)
अस्य मांसगुणाः । संग्राहित्वम् । रूचिबलकारित्वम् । ज्वरनाशित्वञ्च । इति राजवल्लभः ॥ खेहीवृक्षः । शिंशपावृक्षः । इति मेदिनी ॥ खदिरवृक्षः । इति शब्दरत्नावली ॥

कृष्णसारङ्गः पुं, कृष्णवर्णः सारङ्गो मृगः । कृष्णसारः । (यथा, कात्यायनश्रौतवचने । ७ । ९ । २१ ।
"कृष्णसारङ्गं मेध्यमभावे लोहितसारङ्गम्" ॥ तथा, शतपथब्राह्मणे । ३ । ३ । ४ । १३ । "कृष्णसारङ्गः स्यादित्याह यदि कृष्णसारङ्गं न विन्देत अथो अपि लोहितसारङ्गम्" । "कृष्णसारङ्गः श्यामशबलः" । इति भाष्यम् । यच्चे परब्रह्म । यथा, "कृष्णः नित्यनिर्व्वाणरूपः तदङ्गं तत्स्वरूपं

यदि चेत् न विन्देत लभेत अथो अपि तर्हि लोहितसारङ्गं सगुणभावं उपासीत इत्यर्थः ॥)

कृष्णसारथिः, पुं, अर्জ্জুনवृक्षः । इति राजनिघण्टः ॥ (कृष्णः सारथिः युद्धे सहायोऽस्य इति विग्रहे ।) पार्थः । (स तु तृतीयपाण्डवः । भारतीयमहायुद्धे पार्थप्रार्थनया श्रीकृष्णस्य तत्सारथ्यस्वीकारः । यथा, महाभारते । ५ । ७ । ३५-३८ ।

अर्জ্জुन उवाच ।

"भवान् समर्थस्तान् सर्व्वान् निहन्तुं नात्र संशयः ।
निहन्तुमहमप्येकः समर्थः पुरुषर्षभ ! ॥
भवांस्तु कीर्त्तिमान् लोके तद्यशस्त्वं गमिष्यति ।
यशसा चाहमप्यर्थी तस्मादसि मया वृतः ॥
सारथ्यन्तु त्वया कार्य्यं इति मे मानसं सदा ।
चिररात्रेप्सितं कामं तदभवान् कर्तुमर्हति ॥

वासुदेव उवाच ।

उपपन्नमिदं पार्थ! यत् त्वर्द्धेया मया सह ।
सारथ्यं ते करिष्यामि कामः सम्पद्यतां तव" ॥)

कृष्णसारा, स्त्री, (कृष्णसार + अजादित्वात् टाप् ।) स्निग्धपाटला । इति रत्नमाला ॥ (अस्याः पर्य्यायाः यथा,

"स्निग्धपा पिच्छिला श्यामा कृष्णसारा च सा गुरुः ।
कपिला सैव मुनिभिर्भृङ्गभैति कीर्त्तिता" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णस्कन्धः, पुं, (कृष्णः कृष्णवर्णः स्कन्धो यस्य ।) कालस्कन्धः । तमालवृक्षः । इत्यमरटीकायां भरतः ॥

कृष्णा, स्त्री, (कृषे र्नक् च तत्वं ततः टाप् ।) द्रौपदी । (सा तु पञ्चपाण्डवमहिषी । कृष्णवर्णत्वादेव अस्याः नाम तथा जातम् । यथा, महाभारते १ । १६८ । ४४ ।

"कृष्णेत्येवाब्रुवन् कृष्णां कृष्णाऽभूत् सा हि वर्णतः ।
तथा तन्मिथुनं यज्ञे द्रुपदस्य महामखे" ॥)

नीलीवृक्षः । पिप्पली । (अस्याः पर्य्याया यथा ।
"पिप्पली चपला शौण्डी वैदेही मागधी कणा ।
कृष्णोपकुल्या मगधी कोला स्यात्तिक्ततण्डुला" ॥
इति वैद्यकरत्नमालायाम् ॥) द्राक्षा । इति मेदिनी ॥ नीलपुनर्नवा । कृष्णजीरकः । गम्भारी । कटुका । सारिवाविशेषः । राजसर्षपः । इति राजनिघण्टः ॥ पर्पटी । इति भावप्रकाशः ॥ काकोली । सोमराजी । इति जटाधरः ॥ (द्वादशप्रकाराणां जलौकसां मध्ये सविषप्रकारीयजलौकोविशेषः । तस्य लक्षणं यथा ।

"ताम्रवर्णवर्णा एणुश्चिराः कृष्णा" ॥

इति सुश्रुते सूत्रस्थाने १३ अध्याये ॥)

कृष्णागुरु, क्ली, (कृष्णं कृष्णवर्णं अगुरु ।) कृष्णवर्णसुगन्धिकाष्ठविशेषः । तत्पर्य्यायः । अगुरु २ भृङ्गारम् ३ विश्वरूपकम् ४ श्रीपर्णम् ५ कालागुरु ६ केशम् ७ वसुकम् ८ कृष्णकाष्ठम् ९ धूपार्हम् १० वल्लरम् ११ मिश्रवर्णम् १२ गन्धम् १३ । (यथा, भविष्यपुराणे आत्मतत्त्वोपदेशे ।

"विलिप्य कृष्णागुरुणा वाजपेयफलं लभेत्" ॥)

अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । लेपे शीतलत्वम् । पाने पित्तहरत्वम् । केषाञ्चित् मते त्रिदोषघ्नत्वम् । इति राजनिघण्टः ॥ तत्पर्य्यायगुणाः । अथ अगुरु कृष्णागुरु ।

"अगुरुप्रवरं लोहं राजार्हं जोङ्गजं तथा ।
वंशिकं कृमिजं चापि कृमिजग्धमनार्य्यकम् ।
अगुरूष्णं कटु त्वर्थं तिक्तं तीक्ष्णञ्च पित्तलम् ॥
लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत् ॥
कृष्णं गुणाधिकं तत्तु लौहवद्धारि मज्जति ।
अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः" ॥

इति भावप्रकाशः ॥

कृष्णाचलः, पुं, (कृष्णस्य प्रियः अचलः पर्व्वतः । तद्वसतेस्तथात्वम् ।) रैवतपर्व्वतः । इति जटाधरः ॥ (अस्मिन्नेव गिरौ भगवतः कृष्णस्य द्वारकाधाम । इति पुराणप्रसिद्धम् ॥)

कृष्णाञ्जनी, स्त्री, (अज्यतेऽनया इति । अनज् + करणे ल्युट् ततो ङीप् । कृष्णा कृष्णवर्णा अञ्जनी ।) कालाञ्जनीवृक्षः । इति राजनिर्घण्टः ॥

कृष्णानदी, स्त्री, (कृष्णा इत्याख्याता नदी ।) नदीभेदः । तत्पर्य्यायः । कृष्णसमुद्भवा २ कृष्णवेण्या ३ कृष्णगङ्गा ४ । (यथा, महाभारते ६ । ९ । ३३ ।

"सदा निरामयां कृष्णां मन्दगां मन्दवाहिनीम्" ॥

अस्य जलगुणाः । स्वच्छत्वम् । रुच्यत्वम् । दीपनत्वम् । पाचनत्वञ्च । इति राजनिर्घण्टः ॥

कृष्णाभा, स्त्री, (कृष्णा सती आभाति । आ + भा + कः । ततष्टाप् ।) कालाञ्जनी । इति राजनिर्घण्टः ॥

कृष्णायसं, क्ली, (कृष्णं कृष्णेन इत्यर्थः आयसति स्पर्द्धते वर्णेन । आ + यस् + कः ।) कृष्णायसम् । इति हेमचन्द्रः ॥

कृष्णायसं, क्ली, (कृष्णं कालं आयसम् ।) सार्थे अण् ।) कृष्णवर्णलौहम् । इति रत्नमाला ॥

कृष्णार्चिः, [स्] पुं, (कृष्णं कृष्णवर्णं अर्चिर्यस्य कृष्णवर्णधूमेन सह अर्चिर्यस्येति वा ।) अग्निः । इति भूरिप्रयोगः ॥

कृष्णार्जकः, पुं, (कृष्णः अर्जकः वनवर्व्वरः ।) कालतुलसी । तत्पर्य्यायः । कालमालः २ मालूकः ३ कृष्णमालुकः ४ कृष्णमल्लिका ५ गरघ्नः ६ वनवर्व्वरः ७ वर्व्वरी ८ जातिः ९ ।
(अन्ये पर्य्याया यथा, वैद्यकरत्नमालायाम् ॥

"कृष्णार्ज्जकः कृष्णवल्ली कालमालः करालकः" ॥)

अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयनेत्ररोगनाशित्वम् । रुचिसुखप्रसवकारित्वञ्च । इति राजनिर्घण्टः ॥

कृष्णालुः, पुं, (कृष्णः कृष्णवर्णः आलुः ।) नीलालुः । इति राजनिर्घण्टः ॥

कृष्णावासः, पुं, (आवसत्यस्मिन् इति । आ + वस् + अधिकरणे घञ् । कृष्णस्य आवासः आलयः ।) अश्वत्थवृक्षः । इति हेमचन्द्रः ॥ (रैवतपर्व्वतः ॥ इति भारतम् ॥ अश्वत्थशब्देऽस्य गुणादयो ज्ञेयाः ॥)

कृष्णाश्रितः, त्रि, (कृष्णं आश्रितः प्राप्ताश्रयः ।) यस्य आश्रयः कृष्णः सः । इति मुग्धबोधम् ॥

कृष्णिका, स्त्री, (कृष्णैव इति । कृष्ण + सञ्ज्ञायां कन टाप् अत इत्वम् । यद्वा, कृष्णवर्णो भूम्नाऽस्त्यस्य इति ठन् टाप् च ।) राजिका । इत्यमरः । २ । ९ । १९ ॥ राइ सर्षा इति भाषा ॥
("कृष्णिका राजिकासुरी कुष्ठको राजसर्षपः" ॥ इति वैद्यकरत्नमालायाम् ॥)
श्यामापक्षिणी । तस्या नामानि यथा,

"श्यामा वराही शकुनी कुमारी
दुर्गा च देवी चटिका तथोमा ।
त्वं पोतकी पाण्डविका त्वमेव
त्वं कृष्णिका त्वं सितपक्षिणी च ॥
त्वं ब्रह्मपुत्री शकुनैकदेवी
धनुर्द्धरी पाशसमूहमाता ।
प्रवच्चरूपा भगवत्यहोमा
नमोऽस्तु तुभ्यं कुरु मेऽर्थसिद्धिम्" ॥

इति वसन्तराजशाकुनम् ॥

कृष्णेक्षुः, पुं, (कृष्णः कृष्णवर्णः इक्षुः ।) इक्षुभेदः । काजली आक् इति भाषा । तत्पर्य्यायः । श्यामेक्षुः २ कोकिलेक्षुकः ३ कोकिलाक्षः ४ कान्तारकः ५ । इत्यमरः ॥ अस्य गुणाः । तिक्तत्वम् । पाके मधुरत्वम् । स्वादुत्वम् । सुरुचत्वम् । कटुत्वम् । रसाढ्यत्वम् । त्रिदोषहारित्वम् । समवीर्य्यं बहुवीर्य्यसवर्णदाढत्वञ्च । इति राजनिर्घण्टः ॥ अस्य भावप्रकाशोक्तगुणाः कान्तारशब्दे द्रष्टव्याः ॥

कृष्णोदुम्बरिका, स्त्री, (कृष्णस्य काकस्य प्रिया उदुम्बरिका । यद्वा कृष्णा कृष्णवर्णा उदुम्बरिका ।) काकोदुम्बरिका । इति राजनिर्घण्टः ॥

कृसरः, पुं, (कृ ङ कृञ् करणे + "कृधूमादिभ्यः कित्" । उणां ३ । ७३ । इति सरन् कित्व । वाऽजनकात् न धत्वम् ।) क्षीरः । इति जटाधरः ॥
(यथा, छन्दोगपरिशिष्टे—

"तिलतण्डुलसम्पक्वः कृसरः सोऽभिधीयते" ॥

खिचुड़ी इति भाषा । यथा, च मनौ ५ । ७ ।

"तथा कृसरसंयावं पायसापूपमेव च ।
अनुपाकृतमांसानि देवान्नानि हवींषि च" ॥)

कॄ, श्र विक्षेपे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श्र, किरति । अस्यापि निष्ठायां कीर्ण इति । सूत्राद्योदिदित्यत्र मूर्द्धन्यवर्जनसामर्थ्यात् येन केनापि प्रकारेण रेफान्तान्निष्ठातस्य न इति व्याख्यानात् ऋदिरस्यावीति इरि उरि च कृते रान्तत्वात् निष्ठा तस्य न स्यात् । एवं गॄ श्र निगरणे इत्यादेरपि गीर्ण इत्यादि बोध्यम् । इति दुर्गादासः ॥

कॄ, क गि हिंसे । इति कविकल्पद्रुमः ॥ (क्र्यां-उभं-सकं-सेट् ।) क गि, क्रयाति क्रयीते । कीर्त्तः किर्त्तिः । इति दुर्गादासः ॥

कॄ, क ड विज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) क ड, कारयते । इति दुर्गादासः ॥

कॄत्, क संशब्दे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) दीर्घी । क, कीर्त्तयति च

गोष्ठीषु यद्गुणानस्मरोगणाः। कीर्त्तादेशस्य नित्यत्वेऽपि कृतपाठः कीर्त्तादेशस्य व्यभिचारसूचनार्थः तेन अचीक्लृतदिति सिद्धम्। इति दुर्गादासः॥

क्लृप्तः, त्रि, (कल्पनार्थक्लृपधातोः कर्म्मणि क्ते क्लृपादेशः। नियतः। कृतकल्पनः। कल्पनं सामर्थ्यं तद्विशिष्टः। यथा, "अवश्यक्लृप्तामिः पर्व्वतत्वचलत्वादितत्तद्धर्म्मावच्छिन्नाधिकरणतावच्छिन्नैरेवोपपत्तौ"। इति जगदीशः॥ (यथा, मनौ। ११। २७।
"इष्टिं वैश्वानरीं नित्यं निर्व्वपेदन्दपर्य्यये।
क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसम्भवे"॥)

क्लृप्तकीला, स्त्री, (क्लृप्तं कीलयति। कील्+"कर्म्मण्यण्"। ३। २। १। इति अण्।) व्यवस्थापत्रम्। तत्पर्य्यायः। पट्टोलिका ३। इति त्रिकाण्डशेषः॥

क्लृप्तधूपः, पुं, (क्लृप्तः कृतः धूपो येन गन्धद्रव्यविशेषेण।) सिक्थकः। इति जटाधरः। (क्लृप्तश्चासौ धूपश्चेति विग्रहे क्षत्रियो धूपः॥)

क्लृप्तिकः, त्रि, (क्लृप्तं मूल्यदानेन सत्त्वं देयत्वेनास्त्यस्य। क्लृप्त+ठन्।) क्रीतः। इति हलायुधः॥

केकयः, पुं, (केकयस्तदाख्यया प्रसिद्धः प्रदेशो राज्यत्वेनास्त्यस्य।) सूर्य्यवंशीयराजविशेषः। इति श्रीभागवतम्। (स तु केकयदेशाधीश्वरः दशरथश्वशुरश्च। यथा, रामायणे १। १३। २३।
"तथा केकयराजानं वृद्धं परमधार्म्मिकम्।
श्वशुरं राजसिंहस्य सपुत्रन्तमिहानय"॥
जनपदवाचे तु बहुवचनान्तः। यथा, महाभारते। ६। भूमिखण्डविनिर्म्माणपर्व्वणि ९। ४८।
"उपावृत्तानुपावृत्तान् सुराष्ट्रान् केकयांस्तथा"॥)

केकयी, स्त्री, (केकयस्यापत्यं स्त्री। सङ्घोचे मागाभावात् केकयाञ्जन्यजनकभावेऽपि पुंयोग इति पुंयोगादाख्यायां ङीष्।) दशरथराजपत्नी। सा तु केकयराजपुत्री भरतमाता च। इति शब्दरत्नावली॥ (यथा, रामायणे।
"सत्कृत्य केकयीपुत्रं केकयो धनमादिशत्"॥)

केकरः, त्रि, (के शिरसि मूर्द्धि इत्यर्थः कर्तुं नेत्रतारां क्षीणमस्य। "छाजो हेतुताच्छील्यानुलोम्येषु"। ३।२।२०। इति टः। "हलदन्तात् सप्तम्याः संज्ञायाम्" ।६।३।९। इत्यलुक्।) वलीरः। इत्यमरः। २। ६। ३९॥ टेरा इति भाषा। (यथा, मनौ।
"मित्रा विवदमानश्च केकरो मद्यपस्तथा"॥
चतुर्वर्णात्मकमन्त्रः। यथा, विश्वसारतन्त्रे। "चतुर्वर्णस्तु केकरः"॥)

केका, स्त्री, (के मूर्द्धि कायति। कै+कः टाप्। अलुक् समासः। यद्वा, अन्येभ्योऽपीति कर्म्मणि डः। "हलदन्तात् सप्तम्याः संज्ञायाम्"। ६। ३। ९। इत्यलुक्।) मयूरवाणी। इत्यमरः। २। ५। ३१॥ (यथा, रघौ १। ३९।
"षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः"॥)

केकावलः, पुं, (केकां ध्वनिविशेषं वलते लृणातीति। केका+वल्+अच्। यद्वा, केका+अस्त्यर्थे बाहुलकात् वलच् प्रत्ययः।) मयूरः। इति शब्दचन्द्रिका॥

केकी, [न्] पुं, (केका ध्वनिभेदः अस्यास्तीति। व्रीह्यादित्वेति इनिः।) मयूरः। इत्यमरः २। ५। ३०॥ (यथा, काशीखण्डे। ३। ७१।
"केकी केकां परित्यज्य मौनं तिष्ठति तद्भयात्।
चकोरचन्द्रिकाभोक्ता नक्तव्रतमिवास्थितः"॥)

केकेयी, स्त्री, (कैकेयी एषोदरात् एकारत्वम्।) केकयी। इति शब्दरत्नावली॥

केचन, अ, (प्राणिनिमते पदद्वयम्। मुग्धबोधमते "किमः क्षेपे"। इति चनप्रत्ययः।) केचित्। इति व्याकरणम्॥
(यथा, पद्मपुराणे। ६। ५६।
"पूर्व्वापरपरामर्शविकलास्तत्र केचन"॥)

केचित्, अ, (प्राणिनिमते पदद्वयम्। मुग्धबोधमते तु "किमः क्षेपे"। इति चित् प्रत्ययः।) केचन। इति व्याकरणम्। कोन व्यक्तिरा इति भाषा॥ (यथा, रामगीतायाम्। १४। "केचिद्वदन्तीति वितर्कवादिनः"। केचिल्लापकोविदाः इति रामतर्कवागीशः॥)

केचुकं, क्ली, (कचु+स्वार्थे कन्। एषोदरात् एत्वे साधुः।) कचुः। इति त्रिकाण्डशेषः॥

केञ्जिका, स्त्री, (के शिरसि कुत्सितो वा अञ्जकः ततः टाप् अत इत्वम्। स्त्रीत्वं लौकिकम्।) पटकुटी। इति हेमचन्द्रः॥ कानात् इति भाषा॥

केत, तृ क मन्त्रणे। निःश्रावणे। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्। मन्त्रणे निमन्त्रणे। अचिकेतत्। निःश्रावणं समर्थोद्घाटनम्। इति दुर्गादासः॥

केतकः, पुं, (कितनिवासे+ण्वुल्।) केतकीवृक्षः। इति त्रिकाण्डशेषः॥ (यथा, रघुः ६। १७।
"विलासिनीविभ्रमदन्तपत्र-
भाषाङ्कुरं केतकवर्हमन्यः"॥
अस्य पर्य्यायो गुणाश्च यथा,—
"केतकः सूचिकापुष्पो जम्बुकः क्रकचच्छदः"॥
"केतकः कटुकः स्वादुर्लघुस्तिक्तः कफापहः"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

केतकी, स्त्री, (केतक+गौरादित्वात् ङीष्।) पुष्पवृक्षविशेषः। केया इति भाषा॥
(यथा, अमरोष्टके। १।
"गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा
पद्मभ्रान्त्या क्षुधितमधुपः पुष्पमध्ये पपात"॥)
तत्पर्य्यायः। सूचीपुष्पः २ हलीनः ३ जम्बुलः ४। इति रत्नमाला। केतकः ५ सूचिकापुष्पः ६ जम्बुकः ७ क्रकचच्छदः ८। इति भावप्रकाशः॥ तीक्ष्णपुष्पा ९ विपत्रा १० धूलिपुष्पिका ११ मेध्या १२ कण्टदला १३ शिवद्विष्टा १४ नृपप्रिया १५ क्रकचा १६ दीर्घपत्रा १७ शिरगन्धा १८ गन्धपुष्पा १९ इन्दुकलिका २० दलपुष्पा २१ पांसुला २२। अस्या गुणाः। मधुरत्वम्। तिक्तत्वम्। कफनाशित्वम्। कटुत्वम्। लघुत्वञ्च। तत्पुष्पगुणाः। वर्णत्वम्। केशदौर्गन्ध्यनाशित्वञ्च॥ हेमाभायास्तस्या गुणाः। मदनोन्मादकत्वम्। वंशहृत्वम्। सौरभकारित्वञ्च॥ तस्याः स्तनगुणाः। अतिशिशिरत्वम्। कटुत्वम्। पित्तकफापहत्वम्। रसायनत्वम्। वर्णदेहदार्ढ्यकारित्वञ्च। इति राजनिर्घण्टः॥

केतनं, क्ली, (कित् निवासार्थेषु+कर्म्मभावकरणाधिकरणादिषु यथायथं ल्युट्।) ध्वजः।
(यथा, रघुवंशे ६। ३६।
"अपतुद्वारतया विशृङ्खलप्रभैः
सुरतसङ्गपरिश्रमनोदिभिः।
कुसुमचापभृतेऽयदंशुभि-
र्हिमकरो मकरोर्ज्जितकेतनम्"॥)
कार्य्यम्। निमन्त्रणम्। इत्यमरः। ३। ३। ११३॥
(यथा, मनुः। ४। ११०।
"प्रतिगृह्य द्विजो विद्वान् एकोद्दिष्टस्य केतनम्।
यद्दं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके"॥)
चिह्नम्। गृहम्। इति हेमचन्द्रः।
(यथा, रामायणे १। ७४। ८।
"स त्वं धर्म्मपरो भूत्वा काश्यपाय वसुन्धराम्।
दत्त्वा वनमुपागम्य महेन्द्रकृतकेतनः"॥)
स्थानम्। इति शब्दरत्नावली॥
(यथा, विष्णुपुराणे १। ११। ६।
"एतद्राजासनं सर्व्वभूभृत्संश्रयकेतनम्"॥)

केतुः, पुं, नवग्रहान्तर्गतग्रहविशेषः। स तु राहोः शरीरम्। तत्पर्य्यायः। शिखी २। इति दीपिका॥ अयं पापग्रहः। यथा,—
"अर्क्की नेन्दर्कसौराराः पापाः सौम्यास्तथापरे।
पापयुक्तो बुधः पापो राहुकेतू च पापदौ"॥ इति॥
अयन्तु जन्मराशेरपेक्षया षष्ठत्रिदशैकादशस्थानस्थितश्चेत् शुभः। यथा,—
"केतूपचयभौमसन्दगतयः षष्ठत्रिसंस्थाः शुभा
श्चन्द्रार्कावपि तेच तौ च दशमौ चन्द्रः पुनः सप्तमः।
जीवः सप्तनवदिगस्तगतो युग्मेषु सोमात्मजः
शुक्रः षड्दशसप्तवर्जमितरे सर्व्वेऽप्युपान्त्ये शुभाः"॥
इति॥ * ॥ अस्य त्रिकोण उच्चस्थद्वादशचतुर्मित्रसमनीचा यथा,—
"सिंहस्त्रिकोणं धनुरस्तसंज्ञं
मीनो गृहं शुक्रशनी विपत्तौ।
सूर्य्यारचन्द्राः सुहृदः समानौ
जीवेन्दुजौ षट् शिखिनः परांशाः"॥ इति॥
"खोच्चात् सप्तमं नीचं प्राग्वद्बलविवर्जितं निर्द्दिशेत्"॥ इति॥ * ॥ अस्य रिष्टिर्यथा,—
"केतुर्यस्मिन्मुहूर्त्तेऽभ्युदितस्तस्मिन् प्रसूयते जन्तुः।
रौद्रे सर्पमुहूर्त्ते वा प्राणैः संत्यज्यते चासु"॥
इति च ज्योतिस्तत्त्वम्॥ * ॥ अस्य दशाफलं केरलीनामग्रन्थे द्रष्टव्यम्॥ * ॥ अथातः केतुचाराध्यायो व्याख्यायते। तत्रादावेवागमप्रदर्शनार्थमाह।
"गार्गीयं शिखिचारं पराशरमसितदेवलकृतञ्च।
अन्यांश्च बहून्दृष्ट्वा क्रियतेऽयमनाकुलस्सारः"॥
गार्गीयं गर्गप्रोक्तं केतूनां चारं तत् पराशरेण कृतं असितनामाचार्य्येण कृतं देवलविरचितं एतान् केतुचारान् अवलोक्य तथान्यानपि कश्यपपद्मभिपुत्रनारदवसिष्ठादिरचितान् बहून् दृष्ट्वा मया अयं

अनाकुलो निःसन्देहः केतुचारः क्रियते ॥ * ॥

अथोदयास्तमयलक्षणमाह ।

"दर्शनमस्तमयो वा न गणितविधिनास्य शक्यते ज्ञातुम् । दिव्यान्तरीक्षभौमास्त्रिविधाः स्युः केतवो यस्मात्"॥

अस्य केतोर्दर्शनं उदयः अस्तमयोऽदर्शनं गणितविधानेन ज्ञातुं न शक्यते । यस्मात् केतवस्त्रिविधास्त्रिप्रकाराः । दिवि आकाशे भवा दिव्याः । अन्तरीक्षे भवा आन्तरीक्षाः । ग्रहनक्षत्रस्थानं विहायान्यत्र आकाशे ये दृश्यन्ते ते आन्तरीक्षाः । भूमौ भवाः भौमाः । इति हेतोरुत्पातरूपत्वात् एषामुदयास्तमयौ न ज्ञायेते इति ॥*॥

अथ केतूनां दिव्यवर्ज्जितानां अन्येषां स्वरूपमाह ।

"अऊताग्नेऽनलरूपं यस्मिंस्तत्केतुरूपमेवोक्तम् । खद्योतपिशाचालयमग्निरत्नादीन् परित्यज्य" ॥

अऊताग्ने अनलवर्ज्जिते यस्मिन् देशे अनलरूपमग्निरूपं दृश्यते यत् तदेव केतुरूपमुक्तम् । किन्तु खद्योत इन्द्रगोपकाग्निविशेषः । पिशाचालयं यक्षस्थानम् । मणयश्चन्द्रकान्तप्रभृतयः । रत्नानि मरकतप्रभृतीनि । आदिग्रहणादन्यान्यपि काञ्चनप्रभृतीनि तेजोरूपाणि एतान् त्यक्त्वा । यत एषां स्वभावादेवानलरूपमऊताग्ने दृश्यते अतो न तत् केतुरूपमिति ॥ * ॥

अथ दिव्यान्तरीक्षभौमानां केतूनां लक्षणमाह ।

"ध्वजशस्त्रभवनतरुतुरगकुञ्जरादयेष्वान्तरीक्षास्ते। दिव्या नक्षत्रस्था भौमाः स्युरतोऽन्यथा शिखिनः"॥

ध्वजश्चिह्नम् । शस्त्रमायुधादि। भवनं गृहम् । तरवश्चूताः तुरगोऽश्वः । कुञ्जरो हस्ती। आदिग्रहणादन्येषु चतुष्पदेषु ये दृश्यन्ते ते आन्तरीक्षाः । दिव्या नक्षत्रस्थाः । अतोऽस्मादुक्तादन्यथा भूमौ ये दृश्यन्ते ते भौमाः । शिखिनः केतवः इति ॥*॥

अथ केतूनां संख्यानं मतान्तरेणाह ।

"शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् । बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम्" ॥

एके पराशरादयः एकाधिकं शतं केतूनां कथयन्ति । तथा च पराशरः । "शतमेकोत्तरं केतूनां भवन्ति तेषां षोड़श मत्युनिश्वासजाः । द्वादशादित्यसम्भवाः । दश दक्षमखविलयने रुद्रकोपजाः। सप्त पैतामहाः। पञ्चदश ऋषेरौद्दालिकस्य पुत्राः । सप्तदश मरीचिकश्यपजाटजाः । पञ्च च प्रजापतिसहजाः। त्रयो विभावसुजाः। धूमोद्भवश्चैकः। चतुर्दश मध्यमानेऽम्बुधेः सोमेन सह समुत्थिताः। एकस्तु ब्रह्मकोपजः" इति । * ॥ अपरे गर्गादयः सहस्रं केतूनां वदन्ति ।

तथा च गर्गः ।

"अनिलोदयचाराणामनुभावाच्च दर्शनम् । आगन्तूनां सहस्रं स्याद् ग्रहाणां सन्निबोध मे" ॥

बहुरूपमेकमेवेति नारदाख्यो मुनिरेकमेव केतुं बहुरूपं प्राह । तस्मते एक एव केतुस्तस्य बहूनि रूपाणि स एव दिव्यान्तरीक्षभौम इत्यर्थः।

तथा च नारदः।

"दिव्यान्तरीक्षभौमस्य एकः केतुः प्रकीर्त्तितः । शुभाशुभफलं लोके ददात्यस्तमयोदयैः" इति ॥*॥

एवं मतान्तराण्युक्ता स्वसिद्धान्तमाह ।

"यद्येको यदि बहवः किमनेन फलन्तु सर्व्वथा वाच्यम् । उदयास्तमयैः स्थानैः स्पर्शैराधूपनैर्वर्णैः"

यद्येक एव केतुः यदि वा बहवः केतवः किमनेन। सर्व्वथा तेषामुदयास्तमयैः स्थानैः स्पर्शैराधूपनैर्वर्णैश्च शुभाशुभं फलं पुनर्वक्तव्यम् । उदयः कस्यां दिशुदितः । अस्तमयः कस्यामेवास्तमितः । स्थानं यथा कस्मिन्नाकाशभागे कस्य नक्षत्रस्य वा समीपे उदितोऽस्तमितश्च । स्पर्शनं कस्येन ग्रहो नक्षत्रं वा स्पृष्टम् । आधूपनं कोऽपि शिखयाभिधूपितः। वर्णाः सितरक्तपीतकृष्णादिकाः । एवमादिभिस्तस्य फलं वाच्यं तस्मादेको बहवो वा भवन्तु का नः क्षतिरिति ॥ * ॥

अथ केतुचारे येषां केतूनामभिदृष्टानां कियन्तं कालं यावत् फलपाको भवति तेषां फलपाकनियमार्थमाह ।

"यावन्त्यहानि दृश्यो मासास्तावन्त एव फलपाकः। मासैरब्दांश्च वदेत् प्रथमात् पञ्चत्रयात् परतः"॥

दृश्यः केतुरिति सम्बध्यते । फलस्य पाकः फलपाकः । यः केतुर्यावन्त्यहानि दृश्यो भवति तस्य तावन्तो मासास्तस्य केतोस्तावतो मासान् फलपाको ब्रूयात् । यावत्सङ्ख्यकानि दिनानि दृष्टो भवति तत्तुल्यान् मासान् तस्य फलपाको वदेत् । मासैस्तु पुनरब्दान् संवत्सरान् ब्रूयात् । माससङ्ख्यादर्शने मासतुल्यानि वर्षाणि च वदेत् । यावत् सङ्ख्यान्मासान् दृश्यो भवति तावत्सङ्ख्यानि वर्षाणि तस्य फलपाको वदेत् । कस्मात् कालात् प्रभृतिरित्यत आह प्रथमात् पञ्चत्रयात् परतः । सर्व्वेषां केतूनां दिनसाम्यत्वम् । यावन्ति दिनानि दृश्यः केतुस्तस्मादर्शनादूर्द्धं प्रथमं पञ्चत्रयं पञ्चत्वारिंशद्दिनानि यावत् निष्फलानि तस्मात् पञ्चत्रयात् परतः तावतो मासान् फलपाकः । अथ मासान् वृक्षते तदा तस्मादेव दर्शनात् परतः पञ्चत्रयमतिक्रम्य मासतुल्यानि वर्षाणि वदेत् । प्रथमात् पञ्चत्रयात् परतः तच्च पञ्चत्रयं यावद्दिनसङ्ख्या यच्छते । पञ्चत्रयादूर्द्धं यदा दृश्यते केतुस्तदा मासतुल्यानि वर्षाणि वदेत् । अत्र सन्देहच्छेदार्थं गर्गोक्तं नियमकमभिलिख्यते ।

तथा च गर्गः ।

"यावन्त्यहानि दृश्यः स्यात्तावन्मासान् फलं भवेत् । मासांस्तु यावदृक्षेत तावतोऽब्दांस्तु वैक्षतान् ॥ त्रिपञ्चात् परतश्चापि कर्म्म केतोः प्रपच्यते ॥ तस्मात् कालात् परं ब्रूयात् फलमस्य शुभाशुभम्। यद्दिष्टमुदिते केतौ फलं नेहादिशेद्बुधः" ॥

तथा रुद्रगर्गः ।

"यावतो दिवसांल्लिङ्गेत्तावन्मासान् विनिर्दिशेत्। त्रिपञ्चात् परतश्चापि कर्म्म केतोः प्रपच्यते ॥ तस्मात् कालात् परं ब्रूयात् फलमस्य शुभाशुभम्। यद्दिष्टमुदिते केतौ फलं नेहादिशेद्बुधः" ॥

यद्येवं तदा द्वितीयव्याख्यानमत्र न घटते प्रथमव्याख्यानमेव न्याय्य इति । यथा प्रथमात् पञ्चत्रयात् परतः दर्शनादूर्द्धं पञ्चत्रयं यावन्निष्फलं पञ्चत्रयात् परतः फलपाकस्य कालसङ्ख्या प्रवर्त्तते तस्मादुक्तं यद्दिष्टमुदिते केतौ फलं नेहादिशेद्बुधः इति । यदुक्तं मासैरब्दांश्च वदेत् तदेकदेशेनापि प्रतिमासमेकदिनदर्शनेन माससङ्ख्या लभ्यत एवेत्यर्थः । सर्व्वथा किमनेनास्माकमसद्दिकल्पेन । दिवसैः पञ्चत्रयात् परतो मासान् वदेत् । मासैस्तस्मादेव पञ्चत्रयात् परतोऽब्दान् वदेत् । मासात् परतो दिनाधिक्यं दृष्ट्यनुपातवशात् वाच्यम् । यथा यदि दिनत्रिंशता वर्षं लभ्यते तदृष्ट्या दिनैकेन मासैकमिति ।

तथा च समासंहितायाम् ।

"केचित् केतुसहस्रं शतमेकसमन्वितं वदन्त्येके । नारदमतमेकोऽयं त्रिस्थानसमुद्भवो विविधरूपः॥ दिव्या ग्रहर्क्षजातास्त्रीव्रफलकरा भौमाः। प्राग्दिग्ध्वजादितुल्येषु चान्तरीक्षा न चाशुभाः॥ उदयास्तमयाधूपनसंयोगाकारमार्गदिक्पातैः। फलानि दिवसैर्म्मासान् मासैस्तु वर्षाणि सन्दिशेत् केतोः" ॥ * ॥

अथ शुभस्य केतोर्लक्षणमाह ।

"स्निग्धतनुः प्रसन्नः स्निग्धश्चटुरश्चिरसंस्थितः शुक्लः। उदितो वाप्यभिदृष्टः सुभिक्षसौख्यावहः केतुः" ॥

ऋजुरकुटिलः । अचिरसंस्थितः शीघ्रमेवादर्शनं याति । शुक्लः श्वेतः । उदितो वाप्यभिदृष्टः अथवोदित एवाभिदृष्टस्त्रिंशतु उदितमात्रे यदि दृष्टिर्भवति तदा शुभः । अन्यथा अशुभः ।

अशुभस्य केतोर्लक्षणमाह ।

"उल्काविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः। इन्द्रायुधानुकारी विशेषतो द्विश्चिचूलो वा" ॥

रूक्षतनुः प्रसन्न इत्यस्मादुक्तात् यो विपरीतरूपः केतुरुत्पन्नः स धूमकेतुः । स च न शुभकरः पापं करोतीत्यर्थः । इन्द्रधनुःसदृशो न शुभकर एव । तथा द्विश्चिखस्त्रिश्चिखश्च विशेषतः पापफलदः । तथा च समासंहितायाम् ।

"अचिरस्थितोऽभिदृष्टस्त्वनुः सितः स्निग्धमूर्त्तिरुदगुदितः । रूक्षतनुः प्रसन्नः केतुर्लोकस्य भवाय ॥ न शुभो विपरीतो विशेषतः शस्त्रधूमसंकाशः । द्विस्त्रिशतुस्त्रूणो वा दक्षित्रासंस्थश्च मृत्युकरः" ॥*॥

अधुना केतुसहस्रलक्षणं विवक्षुस्तत्रादावेव रविजाः पञ्चविंशतिः केतवो भवन्ति । तेषां लक्षणमाह ।

"हारमणिहेमरूपाः किरणाख्याः पञ्चविंशतिः सश्चिखाः । प्रागपरदिग्धोदृश्या नृपतिविरोधावहा रविजाः" ॥ हारो मुक्ताहारः । मणयश्चन्द्रकान्तप्रभृतयः । हेम सुवर्णम् । तत्समानवर्णा ये केतवस्ते किरणाख्याः किरणसंज्ञाः । सश्चिखाः सचूलाः । ते च पञ्चविंशतयो रविजाः सूर्य्यसुताः प्रागपरयोश्च दिशोर्दृश्याः । प्राक् पूर्व्वस्यामपरस्यां पश्चिमायां दिशि दृश्यन्ते । एतेषां मध्यादेक एव दृश्यते न सर्व्वे युगपदिति । सर्व्वत्रेय परिभाषा । ते च नृपते राज्ञो विरोधप्रदाः अनिष्टा इत्यर्थः ।

तथा च गर्गः ।

"शुद्धस्फटिकसंकाशा मृणालरजतप्रभाः ।

मुक्ताहारसवर्णाभाः सशिखाः पञ्चविंशतिः ॥
किरणाख्या रवेः पुत्रा दृश्यन्ते प्राग्दिशि स्थिताः।
तथा च परभागस्था नृपतेर्भयदाश्च ते" ॥ * ॥

अथाग्निपुत्रास्तावन्त आह ।

"शुकदहनबन्धुजीवकलाक्षातजोपमा ऊताग्नसुताः।
आग्नेय्यां दृश्यन्ते तावन्तस्तेऽपि शिखिनो भयदाः" ॥

शुकपर्क्षो नीलपीतवर्णः। दहनोऽग्निः। बन्धुजीवकः पुष्पविशेषोऽतिलोहितः। लाक्षा वृक्षनिर्यासः। क्षतजं रक्तम्। तदुपमास्तत्तुल्यवर्णाः। ते च तावन्तः पञ्चविंशतिः आग्नेय्यां दिशि दृश्यन्ते। ते च ऊताग्नसुताः अग्निपुत्राः अग्निभयदाः।

तथा च गर्गः।

"नानावर्णाग्निसङ्काशा दीप्तिमन्तोऽपि चूलिनः।
ह्रजन्त्यग्निमिवाकाशात् सर्व्वज्योतिषनाशनाः ॥
तेऽग्निपुत्रा ग्रहा ज्ञेया लोकेऽग्निभयवेदिनः।
आग्नेय्यां दिशि दृश्यन्ते पञ्चविंशाः प्रकीर्त्तिताः" ॥

अथ मृत्युसुतास्तावन्त एवाह ।

"वक्राग्रिखा मृत्युसुता रूक्षाः कृष्णाश्च तेऽपि तावन्तः।
दृश्यन्ते याम्यायां जनमरकावेदिनस्ते च" ॥

वक्राग्रिखाः अस्पष्टचूड़ाः। ते च रूक्षा अस्निग्धास्तेऽपि पञ्चविंशतिरेव। ते च मृत्योः पुत्रा दक्षिणस्यां दिशि दृश्यन्ते। ते च जनानां मरकं आवेदयन्ति।

तथा च गर्गः॥

"कृष्णा रूक्षा वक्राग्रिखा दृश्यन्ते याम्यदिक्स्थिताः।
पञ्चविंशा मृत्युसुताः प्रजाक्षयकराः स्मृताः" ॥

अथ भूपुत्रा द्वाविंशतिरेवाह।

"दर्पणवृत्ताकारा विग्रिखाः किरणान्विता धरातनयाः। क्षुद्भयदा द्वाविंशतिरैशान्यामम्बुतैलनिभाः" ॥ दर्पणवत् वृत्तं वर्त्तुलं आकारो येषां ते विग्रिखा विचूलाः रश्मिसंयुक्ताः भूमेः पुत्राः। ते च द्वाविंशतिरैशान्यां दृश्यन्ते। जलस्य तैलस्य च सदृशकान्तयः। एते दृष्टा दुर्भिक्षं ददति ॥

तथा च गर्गः।

"समन्तरूत्ता विग्रिखा रश्मिभिः परिवारिताः।
अम्बुतैलप्रतीकाशा द्वाविंशा भूसुताः स्मृताः।
ऐशान्यां दिशि दृश्यन्ते दुर्भिक्षभयदाश्च ते" ॥ * ॥

अथ चन्द्रसुतास्त्रय आह। 'ग्रग्निकिरणहिमरजतकुमुदकुन्दकुसुमोपमाः सुताः ग्रग्निनः। उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः ग्रिखिनः" ॥ एते सौम्यायां दिशि दृश्यन्ते। ते च सुभिक्षं कुर्व्वन्ति।

तथा च गर्गः।

"चन्द्ररश्मिसुवर्णाभा हिमकुन्देन्दुसुप्रभाः।
त्रयस्ते ग्रग्निनः पुत्राः सौम्याशाख्याः शुभावहाः"॥

अथ ब्रह्मदण्डाख्यस्य लक्षणमाह।

"ब्रह्मसुत एक एव चिग्रिखो वर्णैस्त्रिभिर्युगान्तकरः।
अनियतदिक्संप्रभवो विज्ञेयो ब्रह्मदण्डाख्यः" ॥

ब्रह्मपुत्र एक एव। स च चित्रचूड़ः। वर्णैः सितादिभिश्चोपलक्षितः। स तु ब्रह्मदण्डसंज्ञो ज्ञेयः। अनियतायां अनिश्चितायां दिशि संप्रभवः उत्पद्यते सर्व्वासु दिक्षु दृश्यत इत्यर्थः। स तु युगस्यान्तं करोति सर्व्वक्षयकरः इत्यर्थः।

तथा च गर्गः।

"एको ब्रह्मसुतः क्रूरस्त्रिवर्णस्त्रिग्रिखान्वितः।
सर्व्वाशाशासु दृश्यः स्यात् ब्रह्मदण्डः क्षयावहः"।

एकाधिकं शतं कथितं अन्यानि नवशतान्येकोनानि कथनीयानि इत्यत आह।

"शतमभिहितमेकसमेतमेकाधिकाच्छतात्परतः।
एकोनानि नवशतानि केतूनां स्पष्टैर्लक्षणैः कथयिष्ये"।

शतमभिहितमेकसमेतं एकेनाधिकं केतूनां शतमभिहितमुक्तम्। तस्मादेकाधिकाच्छतात् परतः एकोनानि एकेन विरहितानि नवशतानि केतूनां स्पष्टैर्व्यक्तैर्लक्षणैस्त्रिभिः कथयिष्ये॥

अथ शुक्रपुत्राश्चतुरशीतिसंख्याश्चाह।

"शुक्रसुता विसर्पकाः सौम्येशान्योरुदयं यान्ति चतुरशीत्याख्याः। विपुलसितताराक्ते स्निग्धाश्च भवन्ति तीव्रफलाः"॥ सौम्या उत्तरा। ऐशानी ईशानदिक्। तयोरुदयं दर्शनं गच्छन्ति। ते च विपुला विस्तीर्णाः सिताः शुक्लाः तारका येषाम्। स्निग्धा निर्म्मलदेहाः ते च तीव्रफला अनिष्टफला इति।

तथा च गर्गः।

"स्थूलैकतारकाः श्वेताः स्नेहवन्तश्च सुप्रभाः।
अर्चिष्मन्तः प्रसन्नाश्च तीव्रेण च सुखान्विताः ॥
एते विसर्पका नाम शुक्रपुत्राः प्रुरोदयाः।
अशीतिश्चतुरश्चैव लोकक्षयकराः स्मृताः" ॥*॥

अथ षष्टिशनैश्चरपुत्रानाह।

"स्निग्धाः प्रभासमेता दिग्रिखाः षष्टिः शनैश्चराङ्करुहाः। अतिकृष्णफला दृश्याः सर्व्वत्रैते कनकसंज्ञाः"॥ ईदृशाः षष्टिः शनैश्चरपुत्राः कनककेतवः सर्व्वत्र सर्व्वासु दिक्षु दृश्याः अत्यशुभफलाश्च ते।

तथा च गर्गः।

"सुस्निग्धा रश्मिसंयुक्ता दिग्रिखाः सिततारकाः।
षष्टिस्ते कनका घोरा शनैश्चरसुता ग्रहाः" ॥ * ॥

अथ गुरुसुताः पञ्चषष्टिराह।

"विकचा नाम गुरुसुताः सितैकतारा ग्रिखाप-रित्यक्ताः। षष्टिपञ्चभिरधिकाः स्निग्धा याम्याश्रिताः पापाः" ॥

पञ्चषष्टिः केतवो विकचा नाम बृहस्पतिपुत्राः। ते च सितः श्वेतः एकस्तारको येषां चूड़ारहिताः। ते च दक्षिणस्यां दृश्यन्ते पापा अनिष्टफलदा इत्यर्थः।

तथा च गर्गः।

"स्निग्धाः शुक्लाः प्रसन्नाश्च महारूपाः प्रभान्विताः।
एकतारा वपुष्मन्तो विग्रिखा रश्मिभिर्वृताः ॥
एते बृहस्पतेः पुत्राः प्रायशो दक्षिणाश्रयाः।
नामतो विकचा घोराः पञ्चषष्टिर्भयावहाः"॥

अथैकपञ्चाशदबुधपुत्रानाह ।

"नातिव्यक्ताः कृष्णा दीर्घाः शुक्ला यथेष्टदिक्प्रभवाः।
बुधजास्तस्करसंज्ञाः प्रायफलास्त्वेकपञ्चाशत्"॥

तस्करनामान एकपञ्चाशत् केतवो बुधस्य पुत्राः। नातिस्फुटाः अल्पदेहाः यथेष्टायां दिशि प्रभव उत्पत्तिर्येषां सर्व्वासु दिक्षु दृश्यन्त इत्यर्थः। ते चानिष्टफलाः।

तथा च गर्गः।

"अरुन्धतिसमा व्यक्ताः केचिदव्यक्ततारकाः।
पाण्डुवर्णाः सुदीर्घाश्च सूक्ष्मा रश्मिभिरावृताः ॥
एते बुधात्मजा ज्ञेयास्तस्कराख्या भयावहाः।
एकाधिकास्ते पञ्चाग्रदधोऽत्यर्थचरा ग्रहाः" ॥*॥

अथ षष्टिभौमपुत्रानाह।

"क्षतजानलानुरूपास्त्रिचूलतारा कुजात्मजाः षष्टिः। नाम्ना च कौङ्कुमास्ते सौम्याशासंस्थिताः पापाः"॥ कौङ्कुमनामानः षष्टिकेतवो मङ्गलपुत्राः रक्तवह्निसदृशाः लोहिता इत्यर्थः। त्रिचूलास्त्रिशिखास्तारा येषां ते च उत्तरस्यां दृश्यन्ते पापफलाश्च।

तथा च गर्गः।

"त्रिशिखाश्च सिताराश्च रक्तलोहितरश्मयः।
प्रायशस्तूत्तरामाशां सेवन्ते नित्यमेव ते ॥
लोहिताङ्गात्मजा ज्ञेया ग्रहाः षष्टिः समासतः।
नामतः कौङ्कुमा ज्ञेया राज्ञां संग्रामकारकाः"॥*॥

अथ त्रयस्त्रिंशद्राङ्पुत्रानाह।

"त्रिंशत्तु त्र्यधिका राहोस्ते तामसकीलका इति ख्याताः। रविशशिना दृश्यन्ते तेषां फलमर्कचारोक्तम्" ॥

त्रयस्त्रिंशत् स्वर्भानुपुत्रास्ते च नामतः तामसकीलका इति प्रसिद्धाः। ते च अर्कचन्द्रमण्डलस्था दृश्यन्ते तेषाञ्च फलं सूर्य्यचारे कथितं तामस कीलकसंज्ञा राङ्सुता इति।

तथा च गर्गः।

"कृष्णाभाः कृष्णपर्य्यन्ताः संकुलाः कृष्णरश्मयः।
राङ्पुत्रास्त्रयस्त्रिंशत् कीलकाख्यातिदारुणाः ॥
रविमण्डलगास्त्रैते दृश्यन्ते चन्द्रगास्तथा" ॥

तथा च पराशरः।

"अपर्व्वण्येव दृश्यन्ते ह्यङ्गिराः काककीलकाः।
रवेरिवाङ्गिरामध्ये ह्युभयोः काककीलकौ ॥
अङ्गिराः सरघो वापि दृश्यते पुरुषाकृतिः।
काकः काकाकृतिर्घोरस्त्रिकोणो वाथ लक्ष्यते ॥
मण्डलं कीलको मध्ये मण्डलस्यासितो ग्रहः।
महाभूपविरोधाय यस्यैतं तस्य मृत्यवे" इति ॥*॥

अथ विंशत्यधिकं शतमग्निपुत्रानाह।

"विंशत्यधिकमन्यच्छतमग्नेर्व्विश्वरूपसंज्ञानाम्।
तीव्रानलभयदानां ज्वालामालाकुलतनूनाम्" ॥

अन्यत् अपरं शतं विंशत्यधिकं केतूनामग्नेः सुतानां विश्वरूपनाम्नां कीदृशानां ज्वालामालाभिराकुला व्याप्तास्तनवो मूर्त्तयो येषाम्। तथा तीव्रं घोरमग्निभयं ददति।

तथा च गर्गः।

"नानावर्णा ऊताग्राभा दीप्तिमन्तो विचूलिनः।
ह्रजन्त्यग्निमिवाकाशे सर्व्वज्योतिर्व्विनाशनाः ॥
तेऽग्निपुत्रा ग्रहा ज्ञेया लोकेऽग्निभयवेदिनः।
विंशं ग्रहशतं घोरं विश्वरूपेति विश्रुतम्" ॥ * ॥

अथ सप्तसप्ततिवायुपुत्रानाह।

"श्यावारुणा वितारास्त्रामरूपा विकीर्णदीधितयः।
अरुणाख्या वायोः सप्तसप्ततिः पापदाः परुषाः" ॥

अरुणसंज्ञा वायोः पुत्राः श्यावलोहित वर्णाः तारकवर्जिताश्चामरूपा बालव्यजनाकृतयः

व्याच्छिखरश्मयः रूक्षाः दुष्टफलप्रदाः। अत्र येषां दिङ्नियमो नास्ति तेऽनियतदर्शनाः सर्व्वास्वपि दिक्षु दृश्यन्ते।

तथा च गर्गः।

"अतारारूपप्रतिमाः श्यावरक्तसुवर्णिनः।
वालरूपा इवाभान्ति शुक्लविस्फोर्जरश्मयः॥
सप्तसप्तति चैवान्ये वायोःपुत्राः प्रचक्षते।
लोकविध्वंसना रूक्षा नामतस्त्वरजा ग्रहाः"॥*॥

अथाष्टौ प्रजापतिसुता दे च शते चतुरधिके ब्रह्मणः पुत्रास्तानाह।

"तारापुञ्जनिकाशा गालवा नाम प्रजापतेरष्टौ।
दे च शते चतुरधिके चतुरस्रा ब्रह्मसन्तानाः॥
अष्टौ केतवो गालवा नाम प्रजापतेः पुत्राः"।

ते च तारायां नक्षत्रायां पुञ्जः समूहस्तदाकाराः। ते च अग्निमदायिनः। तथा च। दे शते चतुरधिके केतूनां ते च चतुरस्रसंज्ञाः चतुराकृतयस्ते च ब्रह्मणः पुत्राः पापफला एव ज्ञेयाः ते चाग्नेयदिग्भवाः। तथा च गर्गः।

"तारापुञ्जप्रतीकाशा थोमभञ्जनसंस्थिताः।
प्राजापत्या ग्रहास्त्वष्टौ गालवा भयवेदिनः॥
त्र्यस्राश्च चतुरस्रा वा सशिखाः श्वेतरश्मयः।
दे शते चतुरस्रैव ब्रह्मजा भयदाश्च ते"॥*॥

अथ दाक्षिंशद्वरणपुत्रानाह।

"कद्रा नाम वरुणजा दाक्षिंशत् गुल्मसंस्थानाः।
ग्रन्थिवत्प्रभासमेतास्तीव्रफलाः केतवः प्रोक्ताः"॥

ते वरुणपुत्राः वंशगुल्मवत् संस्थानमाकृतिर्येषां। गुल्म एकमूलजो जतासमूहः। ग्रन्थिवत् चन्द्रवत् प्रभया कान्त्या समेतास्ते च तीव्रफलाः कष्टफलाः प्रोक्ताः कथितास्ते चानियतदिक्प्रभवाः। तथा च गर्गः।

"वंशगुल्मप्रतीकाशा महान्तः पूर्वरश्मयः।
काकतुण्डनिभैश्चाभि रश्मिभिः केचिदावृताः॥
मयूखानुन्मृजन्तीव स्निग्धत्वात् सौम्यदर्शनाः।
एते कष्टफलाः कद्रा दाक्षिंशद्वरुणा ग्रहाः"॥*॥

अथ वसुवतिकालपुत्रानाह।

"वसुवतिः कालसूताः कवन्धसंज्ञाः कवन्धसंस्थानाः।
पुष्ट्याऽभयप्रदाः स्युर्व्विरूपतारास्ते शिखिनः"॥

कालपुत्राः कवन्धसंज्ञानाः वसुवतिः। कवन्धश्छिन्नशिरःपुरुषस्तद्वत् संस्थानमाकृतिर्येषां ते च विरूपा अस्फुटाकारका येषां ते शिखिनः केतवः पुच्छा नाम जनपदास्तेषां श्रेयस्कराः स्युः। अन्यत्र पुनर्भयदास्ते चानियतदिक्प्रभवाः।

तथा च गर्गः।

"तारापुञ्जविरूपाश्च कवन्धाकृतिसंस्थिताः।
पीतारुणाः सवर्णाश्च मस्तकपूररश्मयः॥
कालपुत्राः कवन्धाश्च नवतिः षट् प्रकीर्त्तिताः।
सोमरोगकरा घोराः पुच्छानामभयप्रदाः"॥*॥

अथ नवविदिक्पुत्राः सर्व्वेषाञ्च संस्थानमन्येषाञ्च वक्ष्यामीत्येतदाह।

"शुक्लविपुलैकतारा नवविदिशां केतवः समुत्पन्नाः।
एवं केतुसहस्रं विशेषमेषामतो वक्ष्ये"।

विदिशां दिग्नक्षत्राणाञ्च नव केतवः समुत्पन्नाः।

विदिक्पुत्रा इत्यर्थः। किम्भूताः शुक्लाः श्वेतवर्णाः। विपुलो विस्तीर्णः एकतारो येषां ते विदिक्केतवो दृश्यन्ते दृष्टाश्च पापफलाः।

तथा च गर्गः।

"शुक्लैकतारा विपुला विदिक्पुत्रा नवग्रहाः।
विदिक्षु संस्थिता एव दृश्यन्ते भयदायकाः"॥

एवं केतुसहस्रमिति। एवं केतूनां सहस्रं उक्तं एषामेव विशेषलक्षणं वक्ष्ये। एषां मध्यात् केचित् दृश्यन्ते न सर्व्व एव। तत्र ये दृश्यन्ते तेषां लक्षणं वक्तुकामस्तत्रादावेव केतोर्लक्षणमाह॥*॥

"उद्गायतो महान् स्निग्धमूर्त्तिरपरोदयी वसा केतुः। सद्यः करोति मरकं सुभिक्षमप्युत्तमं कुरुते"॥ उद्गायत उत्तरस्यां दिशायतो दीर्घः महातिस्थूलः निर्म्मलतनुः अपरोदयी पश्चिमायां दिशुदयं याति। स च नाम्ना वसाकेतुर्दृष्टः सद्य एव तस्मिन्नहनि मरणं करोति। उत्तममपि प्रधानं सुभिक्षञ्च कुरुते॥*॥

अथास्थिकेतोः ग्रस्ताख्यस्य च लक्षणमाह।

"तल्लक्षणोऽस्थिकेतुः स तु रूक्षः क्षुद्भयावहः प्रोक्तः स्निग्धस्ताट्क् प्राच्यां ग्रस्ताख्यो डमरमरकाय"॥

तदित्यनेन वसाकेतोः परामर्शः। अस्थिकेतुश्च तल्लक्षणैर्वसाकेतुसदृशैर्युक्तः। उदगायत इत्यादि किन्त्वयं विशेषः स तु रूक्षः स्नेहरहितः दृष्ट्वा क्षुद्भयावहः कथितः। स्निग्धस्ताट्गिति ताट्गवसाकेतुसदृशोऽन्यः स्निग्धो निर्म्मलदेहः प्राच्यां दृश्यते। स तु ग्रस्तनामा केतुर्दृष्टः डमरं ग्रस्तकलहं मरकञ्च करोति। तथा च पराशरः।

"एभिः षड्विंशतिरुदयैः फलमावेदयन्ति।
तन्नामतो रूपतः फलतः कालतोऽभिधास्यामः"॥

तत्र मार्त्तिवास्त्रय उदयं यान्ति। एकैकशो वसास्थिग्रस्तकेतुर्व्वा। तत्र वसाकेतुः स्निग्धो महानुदगायतश्चिरस्निग्धदर्शनं प्रोह्य संवत्सरे युगे पश्चिमोदितः सद्यो मरकफलः सौभिक्षकरः रूक्षोऽस्थिकेतुः सौभिक्षकरस्तुल्यप्रवासकालफलः पूर्व्वेण स्निग्ध एव ग्रस्तकेतूराजविरोधमरकफलः समोदयः॥*॥

अथ कपालकेतोर्लक्षणमाह।

"दृष्टोऽमावास्यायां कपालकेतुः सधूमरश्मिशिखः। प्राङ्नभसोऽर्द्धविचारी क्षुन्मरकाहिरोगकरः"॥

कपालकेतुर्नाम अमावस्यायां दृश्यते पूर्व्वदिशि उदयं याति। कीदृशः सधूमा रश्मिशिखा यस्य शिरश्छायान्तिर्धूम्रवर्णैत्यर्थः। नभस आकाशस्य अर्द्धं यावदिचरति। स च दुर्भिक्षमरकावर्षजरोगप्रदः।

तथा च पराशरः।

"अथादित्यजानां कपालकेतुरुदयते अमावास्यायां पूर्व्वस्यां दिशि सधूमार्चिश्चिखो नभसो विषयार्द्धचरो दृश्यते। पञ्चविंशवर्षशतं प्रोह्य त्रींश्च पञ्चान् ऋतिर्यस्य कुमुदकेतोश्चारान्ते स दृष्ट एव। दुर्भिक्षानावृष्टिव्याधिभयं प्रत्युपन्नवान् भवति। यावतो दिवसान् दृश्यते तावन्मासान्मासैः संव-

त्सरान् पञ्चप्रस्थं वर्षाधान्यस्यार्घं कृत्वा प्रजानामेकमुपयुङ्क्ते"॥

अथ रौद्रकेतोर्लक्षणमाह।

"प्राग्वैश्वानरमार्गे श्यूलाग्रः श्यावरूक्षताम्रार्चिः। नभसश्चिभागगामी रौद्र इति कपालतुल्यफलः"॥

रौद्रनामा केतुः पूर्व्वस्यां दिशि वैश्वानरमार्गे दहनतीथ्यां दृश्यते। पूर्व्वाषाढोत्तराषाढ्योः समीप इत्यर्थः। कीदृशः श्यूलाग्रः श्यूलाकृतिरग्रं यस्य केतोः स श्यूलाग्रः त्रिशिख इत्यर्थः। तस्यैव विशेषणं श्यावरूक्षताम्रार्चिः श्यावरूक्षं ताम्रं चार्चिस्तेजो यस्य स श्यावरूक्षताम्रार्चिः। नभस आकाशस्य त्रिभागगमनशीलः। स च कपालकेतोः समफलः। एतदुक्तं भवति क्षुन्मरकाहिरोगकृत्। आचार्य्येण शुक्राचारे वैश्वानरमार्गः प्रदर्शित एव आषाढाद्वयं दहन इति।

तथा च पराशरः।

"अथ दक्षयज्ञे रुद्रक्रोधोद्भवः कालकेतुस्त्रीणि वर्षशतानि नव च मासान् प्रोह्य उदयते। पूर्व्वेण वैश्वानरमार्गे इत्यमृतमयस्य मण्डिकेतोश्चारान्ते श्यावरूक्षताम्रारुणां श्यूलाकारसदृशीं शिखां कृत्वा नभसश्चिभागचारी स ग्रस्तभयरोगदुर्भिक्षाहिमरकैर्यावन्मासान् दृश्यते तावद्वर्षाणि त्रिभागशेषां प्रजां कृत्वा"॥ शारदधान्यस्याढ़कमर्घं कृत्वा चास्तं व्रजति।

तथा च रुद्रगर्गः।

"ज्येष्ठमूलमनुराधा या वीथी संप्रकीर्त्तिता।
तास्व वीथीं समारुह्य केतुश्चेत् क्रीड़ते भृशम्॥
दक्षिणाभिमतां कृत्वा शिखां घोरां भयङ्कराम्।
श्यूलाग्रसदृशीं तीक्ष्णां श्यावताम्रारुणप्रभाम्॥
पूर्व्वेण उदितश्चैव नक्षत्राण्युपधूपयेत्।
घोरं प्रजासृत्वृच्छति फलं मासे त्रयोदशे॥
त्रिभागं नभसो गत्वा ततो गच्छत्यदर्शनम्।
यावतो दिवसांस्तिष्ठेत् तावद्वर्षाणि तद्भयम्॥
ग्रस्ताग्निभयरोगैश्च दुर्भिक्षमरकैर्हताः।
घूर्ण्यमानाः प्रजाः सर्व्वा विद्रवन्ति दिशो दश"॥*॥

अथ चलकेतोर्लक्षणमाह।

"अपरस्यां चलकेतुः शिखया याम्यायया कुलोच्छितया। गच्छेत् यथोदक् तथा तया दैर्घ्यमायाति॥
सप्तमुनीन् संस्पृश्य ध्रुवमभिजितमेव प्रतिनिवृत्तः स्यात्। नभसोऽर्द्धभागमित्वा याम्येनास्तं समुपयाति॥ हन्यात् प्रयागकूलात् यावदवन्तीञ्च पुष्कारारण्यम्। उदगपि च देविकामपि भूयिष्ठं मध्यदेशाख्यम्॥ अन्यानपि च स देशान् क्वचित् क्वचिद्धन्ति रोगदुर्भिक्षैः। दश मासान् फलमाको ऽस्य कैश्चिदहादश प्रोक्ताः"॥

अपरस्यामिति पश्चिमायां दिशि चलकेतुनामा केतुर्दृश्यते। स च कीदृशः याम्यायां दिशि अयं यस्याः तया अकुलप्रमाणोच्छ्रितया यथा येन प्रकारेण उदक् उत्तरस्यां दिशि याति तथा तेनैव प्रकारेण दैर्घ्यं दीर्घतां प्राप्नोति। सप्तमुनीन् वशिष्ठादीन् संस्पृश्य तथा ध्रुवं ध्रुवतारकं अभिजितञ्च नक्षत्रं संस्पृश्य ततः प्रतिनिवृत्तः प्रत्या-

गतः नभस आकाशस्य अर्द्धभागमित्वा गत्वा प्राच्य याम्येन दक्षिणस्यां दिशि अदर्शनं याति। स एव चलकेतुः प्रयागकूलादारभ्य यावदवन्तीं पुष्करारण्यनामस्थानं तावत् नाशयेत्। उदगपि चोत्तरस्यां दिश्यपि च यावत् देविकां नदीं तावद्धन्यात्। मध्यदेशाख्यं मध्यदेशं भूयिष्ठमतिशयेन हन्यात्। अन्यानपि च स देशानिति। स चलकेतुः अन्यान् अपरान् देशानपि रोगदुर्भिक्षैः क्वचित् क्वचित् नाशयति न सर्व्वत्र। अस्य केतोर्दर्शमासान् यावत् फलपाकः। अदर्शनात् त्रिपक्षात् परतो यावद्दश मासांस्तावदशुभं फलं ददाति। कैश्चिदन्यैर्गर्गादिभिरष्टादश मासान् यावत् फलपाकः प्रोक्तः। तथा च पराशरः।

"अथ पैतामहश्चलकेतु. पञ्चदशवर्षशतं प्रोथ्य उदितः पश्चिमेनाङ्गुलिपर्व्वमात्रां शिखां दक्षिणाभिनतां कृत्वा चलकेतुस्वारान्ते नभसस्त्रिभागमनुचरन् यथा यथोत्तरां व्रजति तथा तथा शूलाग्राकारां शिखां दर्शयन् ब्राह्मं नक्षत्रमुपस्कृत्य मनाक् ध्रुवं व्रजराशिं सप्तर्षीन् संस्पृश्य नभसोऽर्द्धमात्रं दक्षिणमनुपरिक्रम्य अस्तं व्रजति। स स्वर्गे दारुणकर्म्मा स्वर्गप्राप्तित्वादेव वक्त्रास्त्रमभिनिहन्ति लोकमपि च। भूमिं कम्पयित्वा दश मासान् मध्यदेशे भूयिष्ठं जनपदमवश्यं कुरुते। तेष्वपि च क्वचित् क्वचित् शस्त्रदुर्भिक्षमरकव्याधिभयैः क्षिणात्यष्टादशमासानिति॥

तथा च गर्गः।

"क्षुच्छस्त्रमरकव्याधिभयैः संपीड़येत् प्रजाः।
मासान् दश तथाष्टौ च चलकेतुः सुदारुणः"॥*॥

ततः श्वेतकेतोर्लक्षणमाह।

"प्रागर्द्धरात्रदृश्यो याम्याग्रः श्वेतकेतुरन्यश्च।
क इति युगाकृतिरपरे युगपत्तौ सप्तदिनदृश्यौ॥
स्निग्धौ सुमिक्षशिवदौ अधाधिकं दृश्यते कनामा यः।
दशवर्षाण्युपतापं जनयति शस्त्रप्रकोपकृतं॥
प्रागर्द्धरात्रदृश्य इति। श्वेतकेतुनामा केतुः प्राक् पूर्व्वस्यां दिशि अर्द्धरात्रकाले दृश्यते याम्याग्रो दक्षिणशिखः अन्यश्च द्वितीयः क इति कनामा केतुरपरे पश्चिमायां दिशि दृश्यते। युगाकृतिः युगसंस्थानाकारः तौ द्वावपि युगपत्तुल्यकालं सप्त दिवसान् दृश्येते। तौ च द्वावपि स्निग्धवर्णौ निर्म्मलौ दृश्यौ च सुमिक्षशिवदौ। अथ यः कनामा स यदि सप्तभ्योऽधिकं दृश्यते तदा शस्त्रप्रकोपजं संग्रामजमुपतापं जनयति।

तथा च पराशरः।

"अधोदालकः श्वेतकेतुर्दक्षोत्तरं वर्षशतं प्रोथ्य भटकेतोस्वारान्ते पूर्व्वस्यां दक्षिणाभिनतशिखोऽर्द्धरात्रकाले दृश्यस्तेनैव सह द्वितीयः कः प्रजापतिपुत्रः। पश्चिमकेन ग्रहकेतूपसंस्थायी युगपद्दृश्येत। ततस्तावुभौ सप्तरात्रदृश्यौ दशवर्षाणि प्रजाः पीड़येते। कः प्रजापतिपुत्रो यद्यधिकं दृश्यते तदा दारुणतरं प्रजानां शस्त्रकोपं कुर्य्यात्। तथैव स्नेहवर्णयुक्तौ क्षेमारोग्यसुभिक्षदौ भवतः"।

अथ श्वेतस्य लक्षणमाह।

"श्वेत इति जटाकारो रूक्षः श्यावो वियत्त्रिभागगतिः। विनिवर्त्ततेऽपसव्यं त्रिभागशेषाः प्रजाः कुरुते"॥

श्वेतनामा केतुः जटाकारो जटासदृशः श्यावः कृष्णवर्णः वियत्त्रिभागं यावदूर्द्धमुच्छति ततोऽपसव्यं प्रदक्षिणं वामभागे निवर्त्तते तृतीयांशावशेषाः प्रजाः कुरुते।

तथा च पराशरः।

"अथ काश्यपः श्वेतकेतु पञ्चदशवर्षशतं प्रोथ्योग्रः सोमसहजस्य वपत्रकेतोस्वारान्ते श्यावरूक्षो नभसस्त्रिभागमाक्रम्यापसव्यं निवर्त्तयेद्धिं प्रदक्षिणजटाकारशिखः स यावन्मासान् दृश्यते तावद्वर्षाणि सुभिक्षमावहति। मध्यदेशे आर्य्यगया नामदो नामोदीच्यैर्भूमिस्त्रिभागशेषां प्रजामवशेषयति"॥*॥

अथ रश्मिकेतोर्लक्षणमाह।

"आधूम्रयातिशिखया दर्शनमायाति कृत्तिकासंस्थः। ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते"॥

यः केतुराधूम्रवर्णया शिखयोपलक्षितस्तथा कृत्तिकासंस्थः कविकानां समीपे दर्शनं गच्छति स रश्मिकेतुः श्वेतकेतोः सदृशं फलं धत्ते।

तथा च पराशरः।

"अथ रश्मिकेतुर्व्विभावसुजः प्रोथ्यवर्षशतमावर्त्तकेतोः। उदितस्वारान्ते कृत्तिकासु धूम्रकेतुः"॥*॥

ध्रुवकेतोर्लक्षणमाह।

"ध्रुवकेतुरनियतगतिः प्रमाणाकृतिर्भवति। विश्वक् द्विद्यान्तरीक्षभौमो भवत्ययं स्निग्ध इष्टफलः॥
सेनाकूलेषु नृपाणां ग्रहतरुशैलेषु चापि देशानाम्।
ग्रहिणामुपस्करेषु च विनाशिनां दर्शनं याति"॥

ध्रुवेति। अनियता अनिश्चिता गतिर्गमनं प्रमाणं स्थूलसूक्ष्ममध्यभावमाकृतिः आकारो यस्य स तथाभूतः। स च विश्वक् समन्ततो भवति सर्व्वासु दिक्षित्यर्थः। स च द्विद्यान्तरीक्षभौमस्त्रिविधो भवति। क्वचिद्विविधो नानाकारो भवति। स च स्निग्धो निर्म्मलशरीर इष्टफलः। एष च एवं विधानां विनाशिनां सुमूर्षूणां दर्शनमुदयं याति। नृपाणां विनाशिनां सेनाकूलेषु सोपस्करगजेषु खलीनतोरणादिषु दर्शनं याति। देशानां विनाशिनां ग्रहदृक्षपर्व्वतेषु च दृश्यते। तथा ग्रहिणामुपस्करेषु उपस्करभाण्डेषु दर्व्वीस्रुपर्माल्यन्यादिषु ग्रहतरुशैलेषु विनाशिनामेव दर्शनं याति।

तथा च पराशरः।

"अथानियतदिक्चक्ररूपवर्णप्रमाणसंस्थानो धूमकेतुः परा भविष्यता देशानां राज्ञां जनपदानाञ्च कृच्छ्रपुरपर्व्वतवेश्मध्वजपताकाशस्त्रवर्म्मायुधावरणरथनागोष्ट्रपुरुषशयनासनभाण्डेषु च दृश्यते। स एव दिवि स्निग्धो विमलः प्रदक्षिणशिखो गजनागवीथीनामुत्तरेण व्रजन् सुभिक्षक्षेमारोग्यं चावहति। दक्षेकविंशतिदिवसैष्ठिग्रतथा वा दर्शनमिच्छन्ति सुनयो धूमकेतोस्तस्य च प्रागुदयान्निमित्तान्यर्व्वाचीनचलनमग्नेः प्रभामत्स्यप्रधूपनं दिशां प्रीतोष्णविपर्य्यय इतिर्व्यत्तिर्बाऽसम्भवश्च"॥*॥

अथ कुमुदकेतोर्लक्षणमाह।

"कुमुद इति कुमुदकान्तिर्व्वारुण्यां प्राक्शिखो निशामेकाम्। दृष्टः सुभिक्षमतुलं दश किल वर्षाणि स करोति"॥ कुमुद इति श्वेतवर्ण इत्यर्थः। पश्चिमायां प्राक्शिखः पूर्व्वायो निशामेकां दृश्यते। किलेत्यागमसूचने। स च दृष्टो दश वर्षाण्यतुलमसमं सुभिक्षं करोति। तथा च पराशरः। "अथामृतजः कुमुदो मणिर्जलो भवः पद्मः आवर्त्तः सम्वर्त्तः शङ्खो हिमो रूक्षः कुक्षिः पलो विसर्पणः श्वेतश्चेति। तत्र कुमुदकेतुर्व्वसाकेतोस्वार्द्धसमानौ वारुण्यां दर्शनमुपैति। गोक्षीरविमलस्निग्धप्रभां पूर्व्वेणाभिगतां शिखां धृत्वैकरात्रिचरः स दृष्ट एव सुभिक्षमुत्पादयति दश वर्षाणि प्रजानामविरोधञ्च। प्रतीच्यानाञ्च मुखरोगारोचकप्रतिश्यायपाण्डुरोगज्वरैः प्रजानां बाधत इति"॥*॥

अथ मणिकेतोर्लक्षणमाह।

"सङ्घदेकयामदृश्यो सूक्ष्मतारः परिभ्रमति मणिकेतुः। ऋज्वी शिखाऽस्य शुक्ला स्तनोद्गता क्षीरधारेव॥ उदयन्नेव सुभिक्षं चतुरो मासान् करोत्यसौ सार्द्धान्। प्रादुर्भावं प्रायः करोति च क्षुद्रजन्तूनाम्"॥ सङ्घदिति। मणिकेतुः स च पश्चिमायां दिशि सूक्ष्मतारोऽल्पतारकः सङ्घदेकवारमेकयामदृश्यः। यामशब्देन रात्रिचतुर्भागः। अस्य केतोर्ऋज्वी स्पष्टा शिखा चूड़ा श्वेतवर्णा दृश्यते। कीदृशी स्तनोत्था क्षीरधारेव स्तनात् निःसृता क्षीरधारा यथा दृश्यते तद्वत्तच्छिखा। उदयन्नेवेति। असौ केतुरुदयन्नेवोदितमात्र एव चतुरः सार्द्धानर्द्धानपञ्चमासान् सुभिक्षं क्षेममुत्पादयति। प्रायो बाहुल्येन क्षुद्रजन्तूनां मकुलादीनां प्रादुर्भावमुत्पत्तिं करोति।

तथा च पराशरः।

मणिकेतुरपि कपालकेतोरवसाने प्रतीच्यासुदयं याति। स तु सूक्ष्मतारकः श्वेतवर्णया क्षीरप्रसेकया पूर्व्वाभिनतया शिखया शूर्व्वर्य्यामेकयामदृश्यः। स उदयात् प्रभृति पञ्च मासान् क्षेमं सुभिक्षमुत्पादयति॥ क्षुद्रजन्तूनां प्रादुर्भावं करोत्यतिभात्रकालदृश्यः"॥*॥

अथ जलकेतोर्लक्षणमाह।

"जलकेतुरपि च पश्चात् स्निग्धः शिखयाऽपरेण चोन्नतया। नव मासान् सुभिक्षं करोति लोकशान्तिञ्च लोकस्य"॥ पश्चात् पश्चिमायां दिशि दृश्यते अपरेण पश्चिमेन चोन्नतया उच्चया शिखया युक्तः। स च दृष्टः नवमासपर्य्यन्तं सुभिक्षं करोति लोकमङ्गलकरश्च। तथा च पराशरः। "अथ जलकेतुः पैतामहः यस्य चलकेतोर्नवमासावशिष्टे कर्म्मणि कृते प्रवर्त्तयति। पश्चिमेनोदितः स्निग्धः सुजातोऽनुपश्चिमाभिनतः। स च शिखी नवमासान्तात् क्षेमसुभिक्षारोग्याणि प्रजाभ्यो धत्ते।

अन्यग्रहक्षतानां चाशुभानां व्याघातायेति" ॥ * ॥

अथ भवकेतोर्लक्षणमाह ।

"भवकेतुरेकरात्रं दृश्यः प्राक् सूक्ष्मतारकः स्निग्धः । हरिताङ्गूलोपमया प्रदक्षिणावर्त्तया शिखया ॥ यावदेव मुहूर्त्तान् दर्शनमायाति निर्दिशेन्मासान् । तावदतुलं सुभिक्षं रूक्षे प्राणान्तिकान् रोगान्" ॥ भवकेतुः पूर्व्वस्यां दिशि एकां निशां दृश्यः सूक्ष्मोऽल्पः तारको यस्य स्निग्धो निर्म्मलदेहः शिखयोपलक्षितः । कीदृश्या हरिः सिंहलस्य बालूलं पुच्छं तदुपमया तदाकारया प्रदक्षिणेनावर्त्तो यस्याः तथाभूतया स च यावत्संख्यान् क्षणान् दृश्यते तावन्मासान् समं सुभिक्षं निर्दिशेत् यदि स्निग्धः । रूक्षे तु पुनः प्राणान्तिकान् रोगान् वदेत् । तथा च पराशरः । "अथ जलकेतोः कर्म्मसमाप्तेः धूमादयः प्रीतार्त्ता अर्थो प्रादुर्भवन्ति । तत्र त्रयोदशचतुर्दशाद्यमवर्षान्तात् दृश्यते । सुभिक्षा क्षेम्या विपर्य्यया विपरीताः क्षुद्रजन्तूनाञ्च वधाय तेषामस्थानां कर्म्मण्यतीते भवकेतुर्दृश्यते । पूर्व्वेणैकरात्रं यावत् कृत्तिकानामन्तरतो वा तत्समागया स्निग्धया रूक्ष्याभया सिंहलाङ्गूलसंस्थानया प्रदक्षिणतास्रया शिखयोदितः । स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् भवत्यतीव सुभिक्षाय । रूक्षः प्राणहराद्यान् रोगाणां प्रादुर्भावायेति" ॥ * ॥

अथ पद्मकेतोर्लक्षणमाह ।

"अपरेण पद्मकेतुर्नागवीथौ भवेद्विशामेकाम् । सप्त करोति सुभिक्षं वर्षाण्यतिहर्षयुक्तानि" ॥

पद्मकेतुः पश्चिमायां दिशि रात्रिमेकां दृश्यते कीदृशः मध्यरात्रे गौरः श्वेत इत्यर्थः । दृष्टः सप्तवर्षाणि अतिहर्षयुक्तानि सुभिक्षं करोति । तथा च पराशरः ।

"सप्तवर्षाण्यतुलितं हर्षमावहति जगतः" ॥ * ॥

अथावर्त्तकेतोर्लक्षणमाह ।

"आवर्त्त इति निशार्द्धेऽसव्यशिखोऽयजनिभोऽपरे स्निग्धः । यावत्क्षणान् स दृश्यस्तावन्मासान् सुभिक्षकरः" ॥ निशार्द्धे पश्चिमायां दिशि दक्षिणदिगाश्रितशिखः स्निग्धो निर्म्मलमूर्त्तिर्दृश्यते स तु यावत्संख्यान् मुहूर्त्तान् दृश्यते तावदेव मासान् सुभिक्षं करोति ।

तथा च पराशरः ।

"अथावर्त्तकेतुः श्वेतकेतोः कर्म्मण्यतीतेऽपरेऽर्द्धरात्रेऽसव्योदितादक्षाभया प्रदक्षिणेन ताम्रया शिखयोदितः । स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् अतीव सुभिक्षं नित्यमुत्सवं जगत्" ॥ *॥

अथ सम्वर्त्तकेतोर्लक्षणमाह ।

"पश्चात् सन्ध्याकाले सम्वर्त्तो नाम धूम्रताम्रशिखः । नभस्थिभागमाक्रम्य समूलाग्रस्थितो रौद्रः" ॥

यावत एव मुहूर्त्तान् दृष्टो वर्षाणि हन्ति तावन्ति । भूपांश्च शस्त्रनिपातैरुदर्यं चापि पीड़यति" ॥ पश्चादिति । पश्चिमायां दिशि यावतो मुहूर्त्तान् दृश्यस्तावन्ति तत्संख्यानि वर्षाणि नाशयति तथा नृपान् संग्रामैर्हन्ति । तथोदर्यं यस्मिन्नक्षत्रे उदितो दृश्यते तच्च पीड़यति । तथा च पराशरः । अथ सम्वर्त्तको वर्षसहस्रमुत्तरं प्रोह्य पश्चिमेनास्तं गते सवितरि सन्ध्यायां दृश्यते तन्वीं ताम्ररूपां श्लक्ष्णां धूमं विमुञ्चन्तीं दारुणां शिखां कृत्वा नभस्थिभागमाक्रम्य यावन्मुहूर्त्तान् निशि तिष्ठति तावदर्षाणि हन्ति परस्परं शस्त्रौघमपि पार्थिवाः । यानि नक्षत्राणि समाश्रयति यत्र वोदेति तानि दाहनतरं पीड़यति तदाश्रितांश्च देशानिति" ।

तथा च गर्गः ।

"येषां नक्षत्रविषये रूक्षः स ज्वालोहितः । दृश्यते वज्रमूर्त्तिश्च तेषां विद्यात् महाभयम् ॥ अवर्षशस्त्रपारुष्यकोपं दुर्भिक्षमेव च । कुर्य्यान्नृपतिपीड़ाञ्च सचक्रपरचक्रतः ॥ यत्र तिष्ठति नक्षत्रे प्रवासं यत्र गच्छति । धूपयेद्वा स्पृशेद्वापि हन्याद्देशांस्तथाश्रयान् ॥ यस्याभिषेकनक्षत्रं जन्मभं कर्म्मभं तथा । देशर्क्षं पीड़येद्वापि स शान्तिपरमो भवेत् ॥ स्निग्धः प्रसन्नो विमलः प्रदक्षिणशिखस्तथा । दृश्यते येषु देशेषु शिवं तेषु विनिर्दिशेत्" ॥ अथ शुभान् केतून् वर्ज्यित्वाशुभानां नक्षत्रस्पर्शनाधूपनादुत्फलं वक्ष्यामीत्याह ।

"ये शस्त्रास्तान् हित्वा केतुभिराधूपितेऽथवा स्पृष्टे । नक्षत्रे भवति वधो येषां राज्ञां प्रवक्ष्ये तान्" ।

ये केतवः शस्त्राः प्रशस्तफलाञ्छान् त्यक्त्वान्यैः केतुभिः नक्षत्रे धूपिते अथवा स्पृष्टे येषां नृपाणां वधो मरणं भवति तान् नृपान् कथयिष्ये तांश्चाधुनाह । "अश्विन्यामग्निकपं भरणीषु किरातपार्थिवं हन्यात् । बज्रलासु कलिङ्गेशं रोहिण्यां शूरसेनापतिम्" ॥ अश्विन्यामभिधूपितायां स्पृष्टायां वा केतुना अग्निकानां जनानामधिपतिं नाशयेत् एवं सर्व्वत्र । अन्येष्वाह । "उशीनरमपि भाग्ये उज्जयनीपमार्थमेत्रे । सावित्रे दण्डकाधिपतिं भौजङ्गे असिकेशम् । मघायां अङ्गाधिपं पूर्व्वफल्गुन्यां पाण्डुनाथम्" ॥ भाग्ये पूर्व्वफल्गुन्यां उशीनरम् । आर्य्यमे उत्तरफल्गुन्यां उज्जयनीपतिम् । सावित्रे हस्तायां दण्डकारण्यनाथम् । भौजङ्गे अश्लेषायां असिका जनास्तेषामीशम् ।

अन्येष्वाह ।

"चित्रासु कुरुक्षेत्राधिपस्य मरणं समादिशेत् । वाचा काश्मीरकाम्बोजौ नृपती ग्रामक्षने न स्तः" ॥

चित्रासु केतुनाभिधूपितासु स्पृष्टासु च कुरुक्षेत्राधिपस्य मरणं वधं केतूपघातजः समादिशेत् । ग्रामक्षने स्वात्यां काश्मीरकाम्बोजाधिपौ न स्तः न भवतः । अन्येष्वाह । "इक्ष्वाकुजनकनाथश्च हन्यते यदि भवेद्विशाखासु । मैत्रे पुलिन्दाधिपतिं ज्येष्ठासु च सार्व्वभौमकान्यकुब्जाधिपवधः" ॥ विशाखासु यदि केतूपघातो भवेत् तदा इक्ष्वाकुनाथोऽयोध्याधिपश्च हन्यते । इक्ष्वाकवो जनाः । अलका नगरी । अनुराधायां पुलिन्दाधिपतिं हन्यात् । ज्येष्ठासु च सार्व्वभौमस्य राज्ञो वधः कान्यकुब्जाधिपस्य च वधः । अन्येष्वाह । "मूले नृपमदकपती जलदेवे काग्निपो मरणमेति । यौधेयकार्ज्जुनायनाग्निविवैश्यान् वैश्वदेवे च" । मूले केतुनाभिधूपिते स्पृष्टे वा नृपतिं मद्रकपतिं च हन्ति । जलदेवे पूर्व्वाषाढायां काग्निपतिर्म्मरणमेति । वैश्वदेवे उत्तराषाढायां यौधेयकार्ज्जुनायनः अग्निविः वैश्यः एतान्नृपतीन् हन्ति । अथान्येष्वप्याह । "हन्यात् कैकयनाथं पालवदं सिंहलाधिपं वङ्गपम् । नैमिषदयं किरातपं श्रवणादिषु षट्सु षड्भिमान् क्रमशः" ॥ षट्सु श्रवणादिषु हतेषु षड्भिमान्नृपान् क्रमशः क्रमेण हन्यात् । तद्यथा ।

श्रवणे हते कैकयनाथम् । धनिष्ठायां पल्लवनाधिपतिम् । शतभिषायां सिंहलाधिपतिम् । प्रोष्ठपदायां वङ्गाधिपतिम् । उत्तरासु नैमिषनृपम् । रेवत्यां किराताधिपं हन्यात् ॥ * ॥

अथ केतोर्विशेषमाह ।

"उल्काभिताड़ितशिखः शिखी शिवः शिवतरोऽभिदृष्टः । अशुभः स एव चोलवङ्गसिंहलङ्गचीनानाम्" ॥ यः शिखी केतुः उल्काभिधुस्थेन ताड़िता हता शिखा चूड़ा यस्य स शिवः श्रेयस्करः योऽभिदृष्ट उदितमात्र एव दृष्टः स शिवतरः अतिशयेन शुभप्रदः केतुरेवं विधश्चोलानां वङ्गानां सिंहलानां चीनानां चाशुभः । चोलाद्याः सर्व्व एव जनाः ॥ * ॥

अन्यद्विशेषमाह ।

"नम्रा यतः शिखिशिखाभिहता यतो वा-
यर्क्षं च संस्पृशति तत्कथितांश्च देशान् ।
दिव्यप्रभावनिहतान् स यथा गरुत्मान्
भुङ्क्ते गतो नरपतिः परभोगिभोगान्" ॥

यतो यस्यां दिशि शिखिनः शिखा केतुशिखा नम्रा वक्रा तत्र ये देशा यस्यां वा गन्तुं प्रवृत्ता अथ यदि ऋक्षं नक्षत्रं संस्पृशति तत्कथितांश्च देशान् यस्यां दिशि शिखा नम्रा तत्र च ये देशा वक्ष्यमाणास्तांस्तत्कथितान् नरपती राजा गतो भुङ्क्ते स्वीकरोति । कीदृशान् दिव्येनाप्रतिहतेन प्रभावेण पराक्रमेण निहतान् निर्जितान् कीदृशान् परैरन्यैर्भोगिभिर्भुज्यन्ते भोगा यानास्तान् कथं स राजा भुङ्क्ते यथा गरुत्मान् गरुड़ः दिव्यप्रभावनिहतान् परभोगिभोगान् भुङ्क्ते परा उत्कृष्टा ये भोगिनः सर्पास्तेषां भोगाः शरीराण्यङ्गानि च तान् यथा येन प्रकारेण तथा ।

तथा च पराशरः ।

"यस्यां दिशि समुत्तिष्ठेत् तां दिशं नाभियोजयेत् ।
यतः शिखा यतो धूमस्ततो यायान्नराधिपः ॥
प्रतिलोमो यतः केतुर्यया ध्यायति पार्थिवः ।
सामान्यवाहनबलस्तन्नाशमधिगच्छति" ॥

इति भट्टोत्पलविरचितायां संहिताहोरायां केतुचाराध्यायः ॥ * ॥

अन्यच्च ।

"अनभ्रावह्निरूपं वा ध्वजशस्त्रहोपमम् ।
तुरङ्गगजवृक्षादिनारूपाणि केतवः ॥
शतमेकोत्तरं ज्ञेयं सहस्रमपरे विदुः ।

नानारूपमनेकस्थाप्येकमेवाह नारदः ॥
दिव्या नक्षत्रगा भौमाः केतवस्त्रिविधा मताः ।
शुक्लो रूक्षतनुः स्निग्ध ऋजुस्थाचिरसंस्थितः ॥
उदितोऽप्यतिदृष्टिः स्यात् सुभिक्षसुखदृष्टिखी ।
विपरीतस्वरूपस्तु धूमकेतुर्न शोभनः ॥
इन्द्रायुधानुकारी च द्विचूडो वा त्रिचूडकः ।
श्वेतः शस्याकुलं कुर्य्यात्लोहितस्त्वग्निजं भयम्॥
त्रुट्यं पीतकः कुर्य्यात् क्षयो रोगमथोल्वणम् ।
शस्त्राकारो विनाशाय सुखाय मुखलाङ्गुलिः ॥
दीर्घः सूक्ष्मः सुखायैव रूक्षः स्थूलो विनाशयेत् ।
मणिवर्णसुवर्णाभ्यां किरणाभ्यां शिखान्वितः ॥
प्राक् पश्चिमदिशोदृश्या नृपयुद्धाय तेऽर्कजाः ।
वह्निजाः शुक्लवर्णाश्च लाक्षाबन्धूकसन्निभाः॥
आग्नेय्यां दिशि दृश्यन्ते ते च वह्निभयप्रदाः ।
क्षणा वह्निशिखा रूक्षा मत्स्यजाः पञ्चविंशतिः ॥
याम्यायां ते च दृश्यन्ते नृणां मरकसूचकाः ।
आदर्शकृत्ताङ्गतयो विग्निखाः क्षितिसम्भवाः ॥
सांग्रवस्तैलतोयाभा ऐशान्यां त्रुट्यप्रदाः ।
चन्द्रजा हिमकुन्देन्दुकुमुदाभाश्च तैलवत् ॥
जलाभाश्चोत्तरे दृश्याः केतवस्ते सुभिक्षदाः ।
त्रिवर्णस्त्रिशिखश्चैको ब्रह्मणोऽसौ युगान्तकृत् ।
स चानियतदिक्संस्थो ब्रह्मदण्डः स उच्यते ।
अर्कजा वह्निजा याम्यास्तस्त्वसङ्ख्या (२५)॥
क्षितिजा जातिसङ्ख्याश्च(२२) त्रयोऽन्ये ब्रह्मणोऽप्ययं।
एकोत्तरशतं ह्येते सङ्ख्यातत्वेन नक्षत्रैः ।
शुक्लाश्चतुरशीत्याख्या विपुलाः सिततारकाः ।
स्निग्धास्तीव्रप्रभा ज्ञेयाः सप्रभा दिग्निखाः परे ॥
वह्निः ग्रनितनूद्भूतास्तेऽतिनक्षत्रप्रदाः ।
सर्व्वत्र कनकोद्भासा विकचा नाम जीवजाः ॥
क्षितिकेतारा विग्निखाः पापा याम्याश्रितास्तु ते ।
नातिस्थूलाः सूक्ष्मदीर्घाः शुक्ला बुधसमुद्भवाः ॥
पापदास्तस्कराख्यास्ते यथेष्टदिक्प्रभान्विताः ।
त्रिचूडतारा ज्ञतजा नानारूपाः कुजात्मजाः ॥
कौङ्कुमाख्या हि ते सौम्य दिक्ख्याः पापफलप्रदाः।
त्रिशिखास्त्र त्रितारास्त्र रक्तलोहितरश्मयः ॥
लोहिताङ्गात्मजाः वह्निः संग्रामभयकारकाः ।
तामसाः कीलकाख्याश्च राज्ञाः सूर्य्यविमर्गजाः ॥
दृष्टाः शुभफलास्ते च चन्द्रस्थाः पापदायिनः ।
कबन्धधूम्रसङ्काशाश्चन्द्रार्कोत्थशुभप्रदाः ॥
कृष्णाभाः कृष्णपर्य्यन्ताः संकुलाः कृष्णरश्मयः ।
राङ्कुपुत्रास्त्रयस्त्रिंशत् केतवश्चादिदारुणाः ॥
यत्रार्कबिम्बे दृश्यन्ते व्यसनन्तन्महीपतेः ।
सचक्रं परचक्रेण पीड्यते क्षुद्भयान्वितम् ।
अनोधनुःक्षेत्ररूपा नृपविक्षत्रयावहाः ।
धूम्रो वा कृष्णधूम्रो वा कबन्धो वार्कमण्डले ॥
दृश्यते यत्र तत्रापि भूमिपालो विनश्यति ।
दण्डकीलकपीठास्त्र दृश्यते सूर्य्यमण्डले ।
दुर्भिक्षेतिभयव्याधिवह्निचौरादिपीड़नम् ।
भृत्यामात्य गर्दभानश्व यांश्चान्यान् मृगपक्षिणः॥
आदित्यमण्डले दृष्ट्वा देशभङ्गं विनिर्दिशेत् ।
मण्डलाभ्यन्तरस्थैश्च क्रव्यादैर्मृगपक्षिभिः॥
परचक्रागमो वाऽपि प्रजानाशस्तथैव च ।

यत्रार्कबिम्बस्तच स्याद्रागोऽन्यच प्रजाक्षयः ।
एको दुर्भिक्षदात्यन्तनाशभयप्रदः ॥
सितरक्तहरित्पीतैर्व्विद्धो दिनदृष्टादिहा ।
वह्निजा विश्वरूपाख्या ज्वालामालाकुलाः शतम् ॥
श्यामारुणा वितारास्त्र विकीर्णामरसन्निभाः ।
ताराषट्कनिभा रूक्षा वायुजाः सप्तसप्ततिः ॥
ब्रह्मजास्त्वतुरस्रास्ते वेदाधिकशतद्वयम् ।
अत्रिंशद्ग्रहशस्त्राभाः कङ्काख्या वरुणोद्भवाः॥
प्रभाढ्याः ग्रन्थिवत्ते च ज्ञेयास्तीक्ष्णफलप्रदाः ।
विरूपतारास्त्रिंशा वा शिखिनस्तेऽशुभप्रदाः ॥
सर्व्वदिक्प्रभवाः शुक्लाः केतवो भयदायिनः ।
एवं केतुसहस्रस्त्र तद्विशेषस्त्र वक्ष्यते" ॥ * ॥
"उत्तरायतसुस्निग्धो महान् यस्यापरोदयी ।
करोति मरकं सद्यः सुभिक्षस्त्र तथोत्तमम् ।
रूक्षोऽस्निकेतुः त्रुट्टीत्वै प्राच्यां स्निग्धोऽप्युपप्लवः ।
कपालकेतुर्य्यो दर्शे सधूमांशुशिखो भवेत् ॥
प्रागर्द्धचारी नभसः क्षुन्मारदृष्टिकारकः ।
प्रागग्निमार्गाच्छूलाग्रो रूक्षः श्यामलताम्रकः ॥
त्रिभागचारी नभसो रौद्राख्यः पूर्व्ववत् फलम् ।
अपरस्यां चलकेतुः शिखया दक्षिणायया ॥
ऋजुरूक्षायया गच्छेदुत्तरायां यथा यथा ।
तथा दैर्घ्यं समायाति मुनीन् संस्पृश्य सप्त च ॥
ध्रुवं प्रतिनिवृत्तोऽभिमितस्त्र नभसोऽर्द्धकम् ।
गत्वाऽस्तं याति याम्येन स प्रयागकुलावधि ॥
अवन्तीं पुष्करारण्यं यावद्गन्यात्तथापरान् ।
देशान् क्वचित् क्वचिद्रोगदुर्भिक्षैः परिपीड़ितान् ॥
श्वेताख्यस्तु जटाकारो श्यामो व्योमत्रिभागगः ।
निवर्त्तेऽपसव्येन त्रिभागी कुरुते प्रजाः ॥
आधूम्रशिखया दृश्यः क्षत्तिकासंस्थितोऽपरः ।
रश्मिकेतुरिति ख्यातस्त्रिभागी कुरुते प्रजाः ॥
पश्चात् सन्यास्त सम्वर्त्तो धूमताम्रशिखो वियत् ।
त्र्यंशमाक्रम्य सूनाग्रावस्थितो रौद्रदर्शनः ॥
मुहूर्त्तान् यावतो दृश्यस्तावद्वर्षाणि हन्ति सः ।
भूमग्रस्तनिपाताद्यैरुदयर्क्षं निपीड़येत्" ॥ * ॥
"चैत्रवैशाखयोर्म्मध्ये कौबेरांस्तु विनिर्दिशेत् ।
उल्कितैर्यूपवेदीभिरुच्छ्रितैर्ध्वजतोरणैः ॥
हविर्धूमाकुला तच दृश्यते च वसुन्धरा ।
ज्यैष्ठे चैव तथाषाढे वायुपुत्रांस्त्र निर्दिशेत् ॥
वान्ति चैव तथा वाता महाभयं महाभयम् ।
श्रावणप्रौष्ठपदयोर्व्वारुणांस्तु विनिर्दिशेत् ॥
आरोहयन्ति ते मेघान् पूर्णां कुर्य्युर्व्वसुन्धराम् ।
धान्यं समार्घ्यतां याति ईतयो न भवन्ति च ॥
आश्विने कार्त्तिके चैव सूर्य्यपुत्रान् विनिर्दिशेत् ।
ततो दहति तीव्रांशुः सर्व्वाङ्गानि दिवाकरः ॥
म्रियन्ते च तदा गावः श्वापदाश्च विशेषतः ।
मार्गशीर्षे च पौषे च वह्निपुत्रान् विनिर्दिशेत् ॥
ग्रीष्मं भवति दुर्भिक्षं हाहाभूतमचेतनम् ।
माघे च फाल्गुने चैव यमपुत्रान् विनिर्दिशेत् ॥
कर्दिर्व्वरातिसारस्त्र ग्लानिस्त्रैवात्तिवेदना ॥ * ॥
कृत्तिका रोहिणी सौम्यं एथिव्या मध्यमुच्यते ॥
केतवो ह्यत्र दृश्यन्ते आग्नेया दश पञ्च च ।
आग्नेयेषु च दृष्टेषु लोकानां संक्षयो भवेत् ॥

नित्योदिग्राः प्रजाः सर्व्वा भवन्ति हि न संशयः ।
पुनर्व्वसुस्तथा पुष्यः एथिव्याः पूर्व्वमुच्यते ॥
केतवो ह्यत्र दृश्यन्ते रौद्राख्येऽप्येकविंशतिः ।
यदा रौद्राः प्रदृश्यन्ते दुर्भिक्षं निर्दिशेत्तदा ॥
घूर्णन्ते च प्रजाः सर्व्वा मृत्युक्षुद्रोगपीड़िताः ।
आश्लेषापित्र्यभाग्यानि विद्याद्वह्निभयपूर्व्वतः ॥
केतवो ह्यत्र दृश्यन्ते सौदासकिसुता दश ।
सुभिक्षं क्षेममारोग्यं सुवृष्टिः शस्यसम्पदः ॥
आर्य्यम्णादीनि च त्रीणि विद्याद्वह्निभयागतः ।
केतवो ह्यत्र दृश्यन्ते काश्यपेयास्तु दुर्दृशः ॥
अनावृष्टिमयं घोरं प्रजानामतिदारुणम् ।
स्वाती विशाखा मित्रस्त्र भागो दक्षिणपश्चिमः ॥
केतवो ह्यत्र दृश्यन्ते चत्वारो मृत्युसम्भवाः ।
दुर्भिक्षं मरकं घोरमनावृष्टिस्तथैव च ॥
उपद्रवस्त्र भूतानां तदा भवति दारुणः ।
ज्येष्ठा मूलमषाढा भाग उत्तरपश्चिमः ॥
केतवो ह्यत्र दृश्यन्ते चयस्ते सोमसम्भवाः ।
सुभिक्षस्त्र सुवृष्टिस्त्र मही यज्ञोत्सवाकुला ॥
उत्तरा श्रवणा चैव नक्षत्रं वसुदैवतम् ।
केतवो ह्यत्र दृश्यन्ते माहेयाः पञ्चविंशतिः ॥
माहेयेषु च दृष्टेषु लोकानां संक्षयो ध्रुवम् ।
तदा राजसहस्राणां मही पिबति शोणितम् ॥
वारुणश्चैव नक्षत्रं तथा भाद्रपदद्वयम् ।
केतवो ह्यत्र दृश्यन्ते वारुणास्त्रय एव ते" ॥ * ॥
"ऊर्म्मिकेतुः श्वेतकेतुर्धूमकेतुस्तृतीयकः ।
ऊर्म्मिकेतुर्यदा दृश्येत्तदाप्युदकजं भयम् ॥
श्वेतकेतुर्यदा दृश्येत् श्वेताश्च कुरुते महीम् ।
तदा मानुषमांसानि भक्षयन्तीह मानुषाः ॥
क्षुद्भयार्त्तं जगत् कृत्स्नं चक्रवद्भ्रमते तदा ।
धूमकेतुर्यदा दृश्येत्तस्य वक्ष्यामि लक्षणम् ॥
स हन्ति शिखया योधान् राजानं मन्त्रिणं जनान् ।
रेवत्याश्वयुजश्चैव नक्षत्रं यमदैवतम् ॥
केतवो ह्यत्र दृश्यन्ते यमपुत्राख्ययोदश ।
यमपुत्रेषु दृष्टेषु लोकानां संक्षयो ध्रुवम् ॥
चतुर्व्विधानां भूतानां संग्रयो जायते महान्" ॥ * ॥
"अपरे विविधाः सन्ति दृश्यस्त्यादिकेतवः ॥
नृपदेशविनाशाय दुर्भिक्षभयदायकाः ।
कुमुदाभस्तु कुमुदो वारुण्यां प्राक्शिखो निशाम् ॥
एकां दृष्टः सुभिक्षाय दशवर्षाणि सौख्यदः ।
पश्चिमाभ्युदिताश्चान्ये कुर्व्वन्ति प्रवरान् ज्वरान् ॥
पाण्डुरोगं प्रतिश्यायं मुखरोगमरोचकम् ।
क्षीरधारेव शुक्लाभा ऋज्वी सूक्ष्मतरा शिखा ॥
सङ्ख्ययैकदृशाक्षे चतुर्म्मासं सुभिक्षदाः ।
जलकेतुस्तु यः पश्चात् शिखया नतया परे ॥
सुभिक्षं कुरुते शान्तिं प्रजानां नवमासतः ।
भवकेतुस्त्वेकराजं दृश्यः प्राक् सूक्ष्मतारकः ॥
दक्षिणावर्त्तशिखया हरिताभूतुल्यया ।
मुहूर्त्तान् यावतो दृश्यस्तावन्मासान् सुभिक्षदः ॥
स एव रूक्षो दृश्यश्चेद्रोगप्राणान्तकारणम् ।
यज्ञकेतुर्म्महाज्वालाभो निशामेकां प्रदृश्यते ॥
सप्त मासान् सुभिक्षं स हर्षवर्षभदायकः ।
आवर्त्तः सव्यशिखयारुणाभश्च निशाङ्गमः ॥

स्निग्धो यावत्क्षयान् दृश्यस्तावन्मासान् सुभिक्षदः।
ध्रुवकेतुस्त्वनियतगतिवर्णाकृतिर्भ्रंशः ॥
दिव्यान्तरीक्षभौमोऽयं स्निग्ध इष्टः स नान्यथा।
सेनाक्षेषु महीभ्राणां देशस्य गिरिशाखिषु ॥
उपस्करेषु गृहियां दृश्यते च विनाग्रहात्।
हन्यादुल्का यदाग्रस्थं केतुर्व्याप्युपधूपयेत् ॥
दुर्भिक्षं मरकञ्चैव तदा जगति जायते।
यदा तु मार्गवं प्राप्य धूमकेतुः प्रधूपयेत् ॥
तदा सैन्यानि वध्यन्ते यत्नोद्युक्ता नराधिपाः।
यात्रागतास्च ये सार्था असमन्तश्च ये जनाः ॥
तथा चारगणाः सर्व्वे भयमृच्छन्ति दारुणम्।
यदा प्रधूपयेत् केतुः सप्तर्षीन् ध्रुवमेव च ॥
तदा लोकाः क्षयं यान्ति सलिलाश्चापि शुष्यति।
धूमकेतुर्यदा राज्ञो दृश्यते विषये क्वचित् ॥
सराष्ट्रः सपुरो राजा क्षिप्रमेव प्रणश्यति।
यावन्त्यहानि दृश्यन्ते तावन्मासान् फलप्रदाः ॥
मासैरब्दान् विजानीयात् प्रथमे तु त्रिपक्षतः"॥*॥
"केतूत्पाते तु सर्व्वस्मिन् सभये समुपस्थिते ॥
महाशान्तिं प्रकुर्व्वीत विविधां भूरिदक्षिणाम्।
धनं वा सर्व्वमुत्सृज्य मृत्योर्मुच्येत बन्धनात् ॥
दद्याद्वा पृथिवीं सर्व्वां राजा शान्तिं नियच्छति।
अकस्माद्दृश्यते केतुरुदयेऽस्तमयेऽपि वा ॥
निहन्त्यन्तःपुरे राज्ञो ज्वरः पित्तोद्भवो भवेत्।
दधिमधुघृताक्तानां पुष्पाणामयुतं ततः ॥
शुक्लयादिग्नीवस्य केतुं दद्याद्विशान्तये।
भूमिसूनं हेमरत्नाद्यैस्ततः सम्पूज्यते शुभम्" ॥
इति मथुरानाथविद्याभूषणभट्टाचार्य्यकृतसमयामृते केतूत्पातोनाम समाप्तः॥ केतुगणः कुशद्वीपगतः जैमिनिमुनेः सन्तानः षड्भुजः धूम्रवर्णः मेषवाहनः मूढवर्णः विकृताननः सूर्य्याभिमुखः दण्डः धूम्रवसनः वरदः गदाधरश्च। तस्याधिदेवता चित्रगुप्तः प्रत्यधिदेवता ब्रह्मा। इति ग्रहयागतत्त्वम्॥ अस्य स्वरूपं गृध्रराजवत्। स च शिखावान् अनेकरूपः। इति जातकम्॥ *॥
रोगः। पताका। (यथा, रघौ ७।६५।
"सप्तोत्तिलैस्तेन शिखीमुखाग्नै-
र्निक्षेपिताः केतुषु पार्थिवानाम्"॥)
उत्पातः। (यथा, मनुः १।३८।
"उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च"॥)
चिह्नम्। इति मेदिनी। (यथा, रघुः २।३३।
"तमार्य्यस्त्रं निगृहीतधेनु-
र्मनुष्यवाचा मनुवंशकेतुम्।
विस्मापयन् विस्मितमात्मशक्तौ
सिंहोरुसत्त्वं निजगाद सिंहः"॥)
दीप्तिः। इति हेमचन्द्रः॥ (सूर्य्यः। यथा, ऋग्वेदे १०।८।१। "प्रकेतुना बृहता यात्यग्निः"। तत्रैव। ३।३४।४ "प्रारोचयन् मनवे केतुमह्नाम्"। रश्मिः। यथा, ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्य्यम्"॥)
केतुमः, पुं, (केतुरिव भातीति। भा+कः।) मेघः। इति शब्दमाला॥
केतुमाणं, क्ली, जम्बुद्वीपस्य नवखण्डान्तर्गतखण्डविशेषः। इति त्रिकाण्डशेषः॥ (क्वचित् पुंलिङ्गोऽपि दृश्यते। यथा, महाभारते ६।६।३२।
"मेरोस्तु पश्चिमे पार्श्वे केतुमालो महीयते!।
जम्बुखण्डे च तत्रैव महाजनपदो नृप"॥
आग्नीध्रराजपुत्रः स्वायम्भुवमनोः प्रपौत्रश्च। यथा, भागवते ५।२।२०।
"तस्यामुह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिम्पुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान् नवपुत्रानजनयत्"॥
स्त्री, नदी। यथा, महाभारते। ३।८६।१४।
"ततः पुण्यतमा राजन्! सततं तापसैर्युता।
केतुमाला च मेध्या च गङ्गाद्वारञ्च भूमिप!"॥)
केतुरत्नं, क्ली, (केतोः रत्नं केतुभिः रश्मिभिः युक्तं वा रत्नम्।) वैदूर्य्यमणिः। इति राजनिर्घण्टः॥
केदरः, पुं, (के मस्तके दृणाति। दृ+अच्। केन दीर्य्यते वा। दृ+अप् कर्म्मणि।) वृत्तविशेषः। इति लिङ्गादिसंग्रहे अमरः। टेरके त्रि। इति शब्दरत्नावली॥
केदारः, पुं, (के जले दारं आदरो यस्य। यद्वा केन जलेन क्रियते आश्रियते इति। निपातनात् रत्वम्।) क्षेत्रम्। क्षेत् इति भाषा। इत्यमरः। २।९।११॥ (यथा, मनौ ९।३८।
"भूमावप्येकदेदारे कालोप्तानि कदीवलैः।
नानारूपाणि जायन्ते बीजानीह स्वभावतः"॥
क्षेत्रस्यक्षुद्रजलाधारविशेषः। यथा, रामायणे ३।२२।१८।
"हृष्टः पिबति केदारे निश्वासाकुलितं पयः"॥)
केदारजलगुणाः। सधुरत्वम्। विपाके गुरुत्वम्। दोषघ्नत्वम्। "तदेव बद्धमुक्तन्तु विशेषाद्दोषदं भवेत्"। इति राजनिर्घण्टः॥ (के मस्तके शिखरदेशे दारः प्रस्रवणादिकारणरूपविदीर्णस्थानं अस्य।) पर्व्वतविशेषः। (के मस्तके शिरःस्थितजटाभ्यन्तरे गङ्गारूपिणी दाराः पत्नी यस्य सर्व्वत्र निपातनात् रत्वम्।) शिवः। भूमिभेदः। आलवालम्। इति मेदिनी॥ (भूमध्यस्थानविशेषः। यथा, हठयोगदीपिकायाम्। ३।२४।
"कालपाशमहाबन्धविमोचनविचक्षणाः।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः"॥
"केदाराभ्रुवोर्मध्ये शिवस्थानं केदारशब्दवाच्यं तं मनः खान्तं प्रापयेत्"। इति तट्टीका॥ तीर्थविशेषः। यथा, महाभारते। ३।८३।६६।
"केदारे चैव राजेन्द्र! कपिलस्य महात्मनः।
ब्रह्मणामधिगत्वा च शुचिः प्रयतमानसः।
सर्व्वपापविशुद्धात्मा ब्रह्मलोकं प्रपद्यते"॥*॥
केदारपर्व्वतस्त्वशिङ्गभेदः। स तु लिङ्गमूर्त्या काश्यामाविर्भावात् तन्नाम्ना एवाख्यातः तद्विवरणं यथा, काशीखण्डे। ७७ अध्याये।
श्रीपार्व्वत्युवाच।
"नमस्ते देवदेवेश! प्रणतार्त्तिनिधे!।
वद केदारमाहात्म्यं भक्तानामनुकम्पया॥
तस्मिन् लिङ्गे सदा प्रीतिस्तव काश्यामनुत्तमा।
तद्भक्ताश्च जगा नित्यं देवदेव! महाधियः॥

श्रीदेवदेव उवाच।
शृणुष्वपर्णेऽभिधास्यामि केदारेश्वरसंकथाम्।
समाकर्णयितां यां पापोऽप्यपापो जायते क्षणात्॥
केदारं यातुकामस्य पुंसो निश्चितचेतसः।
आजन्मसञ्चितं पापं तत्क्षणादेव नश्यति॥
मृद्दादिनिर्म्मिते पुंसि केदारगतिनिश्चिते।
जन्मद्वयार्ज्जितं पापं शरीरादपि निर्व्रजेत्॥
मध्येमार्गं प्रपन्नस्य त्रिजन्मार्जितं त्वघम्।
देहगेहादिनिःसृत्य निराशं याति निश्चितम्॥
सायं केदार केदार केदारेति त्रिवारतः।
गेहेऽपि निवसन्नूनं यात्राफलमवाप्नुयात्॥
दृष्ट्वा केदारशिखरं पीत्वा तत्पयसस्तु च।
जन्मजन्मकृतात्पापात् मुच्यते नात्र संशयः॥
हरपापक्षदे स्नात्वा केदारेशं प्रपूज्य च।
कोटिजन्मार्ज्जितैर्नोभिर्मुच्यते नात्र संशयः॥
सङ्कल्पगम्य केदारं हरपापक्षतोदकः।
स्थाप्य लिङ्गं हृदम्भोजे प्राप्ते मोक्षं गमिष्यति॥
हरपापक्षदे स्नात्वा श्रद्धया यः करिष्यति।
उद्धृत्य सप्त पुरुषान् स मे लोकं गमिष्यति॥
पुरा रथन्तरे कल्पे यदभूत्तच्च तत् शृणु।
अपर्णे दत्तकर्णा त्वं वर्णयामि तवाग्रतः॥
एको ब्राह्मणदायाद उज्जयिन्या इहागतः।
कृतोपनयनः पित्रा ब्रह्मचर्य्यव्रते स्थितः॥
स्थण्डिलं पाशुपतीं काशीं स विलोक्य समन्ततः।
द्विजैः पाशुपतैः कीर्णां जटामुकुटमण्डितैः॥
कृतलिङ्गसमर्च्चैश्च भूतिभूषितवर्ष्मभिः।
भिक्षाहृतान्नसन्तुष्टैः पुण्यैर्गङ्गोदकाप्लुतैः॥
बभूवानन्दितमना व्रतं जग्राह चोत्तमम्।
हिरण्यगर्भादाचार्य्यान्महत्पाशुपताभिधम्॥
स च शिष्यो वशिष्ठोऽभूत् सर्व्वपाशुपतोत्तमः
स्नात्वा ह्रदे हरपापे नित्यं प्रातः समुत्थितः॥
विभूत्याहरहः स्नाति त्रिकालं लिङ्गमर्चयन्।
नान्तरं स विजानाति शिवलिङ्गे गुरौ तथा॥
स द्वादशाब्ददेशीयो वशिष्ठो गुरुणा सह।
ययौ केदारयात्रार्थं गिरिं गौरीगुरोर्गुरुम्।
यत्र गत्वा न शोचन्ति किञ्चित् संसारिणः क्वचित्
प्राश्योदकं लिङ्गरूपं लिङ्गरूपत्वमागताः।
असिधारं गिरिं प्राप्य वशिष्ठस्य तपस्विनः।
गुरुर्हिरण्यगर्भाख्यः पञ्चत्वमगमत् तदा॥
पश्यतां तापसानाञ्च विमाने सार्व्वकामिके॥
आरोप्य तं पारिषदाः कैलासमनयन् मुदा।
यस्तु केदारमुद्दिश्य गेहाद्दण्डेऽण्डजो॥
व्रजतेरस्यजेत् प्राणान् कैलासे स चिरं वसेत्।
तदाश्चर्य्यं समालोक्य स वशिष्ठस्तपोधनः॥
केदारमेव लिङ्गेषु बद्धमंस्त सुनिश्चितम्।
अथ स्नात्वा स केदारीं यात्रां वाराणसीमगात्॥
अग्रहीन्नियमं चापि यथार्थं चाकरोत् पुनः।
प्रतिचैत्रं सदा चैत्र्यां यावज्जीवमहं ध्रुवम्॥
विलोकयिष्ये केदारं वसन् वाराणसीं पुरीम्।
तेन यात्राः कृताः सम्यक् बहिरेकाधिका मुदा॥
आनन्दकानने नित्यं वसता ब्रह्मचारिणा।
पुनर्यात्रां स वै चक्रे मधौ निकटवर्त्मनि॥

परमोत्साहसन्तुष्टः पत्निताकलितोऽप्यहम् ।
तपोधनैस्तन्निधनं शृङ्गमानैर्निवारितः ॥
कारुण्यपूर्णहृदयैरन्यैरपि च सङ्गिभिः ।
ततोऽपि न तदुत्साहभङ्गोऽभूद्दृढचेतसः ॥
मध्ये मार्गं मृतस्यापि गुरोरिव गतिर्मम ।
इति निश्चितचेतस्के वशिष्ठे तापसे शुचौ ॥
अभूदन्नपरीपुष्टे तुष्टोऽहं चण्डिकेऽभवम् ।
स्वप्ने मया स संप्रोक्तो वशिष्ठस्तापसोत्तमः ।
दृढव्रत ! प्रसन्नोऽस्मि केदारं विद्धि मामिह ॥
अभीष्टञ्च वरं मत्तः प्रार्थयस्वाविचारितम् ।
इत्युक्तवत्यपि मयि स्वप्ने मिथ्येति सोऽब्रवीत् ॥
ततोऽपि स मया प्रोक्तः स्वप्नो मिथ्यासुचिन्मताम् ।
भवादृशामभिप्रेत एव स्वाध्यायवशवर्त्तिनाम् ॥
वरं ब्रूहि प्रसन्नोऽस्मि स्वप्नशङ्कां त्यज द्विज ! ।
तव सत्ववतः किञ्चित् मयाऽदेयं न किञ्चन ॥
इत्युक्तं मे समाकर्ण्य वरयामास मामिति ।
श्रियो हिरण्यगर्भस्य तपस्विजनसत्तमः ॥
यदि प्रसन्नो देवेश ! तदा मे सानुगा इमे ।
सर्व्वे भूलिङ्गनुग्राह्या एष एव वरो मम ॥
देवि ! तस्येदमाकर्ण्य परोपक्रतिशालिनः ।
वचनं नितरां प्रीतस्तथेति तमुवाच ह ॥
पुनः परोपकरणात् तत्तपोऽद्विगुणीकृतम् ।
तेन पुण्येन स मया पुनः प्रोक्तो वरं वृणु ॥
स वशिष्ठो महाप्राज्ञो दृढपातुपतव्रतः ।
देवि ! मे प्रार्थयामास हिमशैलादिहस्थितिम् ॥
ततस्तत्तपसा तुष्टः कलामात्रेण तत्र हि ।
हिमशैले स्थितस्तत्र सर्व्वभावेन संस्थितः ॥
ततः प्रभाते संजाते सर्व्वेषां पश्यतामहम् ।
हिमाद्रेः प्रस्थितः प्राप्तः स्तूयमानः सुरर्षिभिः ॥
वशिष्ठं पुरतः कृत्वा सर्व्वसार्थसमायुतम् ।
हरपापस्रदे तीर्थे स्थितोऽहं तदनुग्रहात् ॥
मत्परिग्रहतः सर्व्वे हरपापे कृतोदकाः ।
आराध्य मामनेनैव वपुषा सिद्धिमागताः ॥
तदाप्रभृति लिङ्गेऽस्मिन् स्थितः साधकसिद्धये ।
अविमुक्ते परे क्षेत्रे कलिकाले विशेषतः ॥
तुषाराद्रिं समारुह्य केदारं वीक्ष्य यत् फलम् ।
तत् फलं सप्तगुणितं काश्यां केदारदर्शने ॥
गौरीकुण्डं यथा तत्र हंसतीर्थञ्च निर्म्मलम् ।
यथा मधुस्रवा गङ्गा काश्यां तद्वत्किलं तथा ॥
इदं तीर्थ हरपापं सप्तजन्माघनाशनम् ।
गङ्गायां मिलितं पश्चाज्जन्मकोटिकृताघहृत्" ॥
केदाराख्यः पर्व्वतश्च तीर्थयात्रिभिः प्रायेण वदर्य्याश्रमात् सप्तदिनैः समागमनीयः ॥ * ॥)

केदारकटुका, स्त्री, (केदारस्य क्षेत्रस्य कटुका इव ।) कटुका । इति राजनिर्घण्टः । कटकी इति भाषा ॥ (कटुकाशब्दस्य विवरणं ज्ञातव्यम् ॥)

केदारजं, क्ली, (केदारात् जायते इति । जन् + डः ।) पद्मकाष्ठम् । इति राजनिर्घण्टः ॥

केदारेशः, पुं, (केदार एतन्नामा पर्व्वतः तत्र य ईशः लिङ्गरूपी महादेवः । यद्वा, केदाराख्यः ईशः ।) काश्मीस्थशिवविशेषः । यथा,—
"हरपापस्रदे स्नात्वा केदारेशं प्रपूज्य च ।
कोटिजन्मार्ज्जितैर्नोभिर्मुच्यते श्रद्धयान्वितः" ॥
इति स्कान्दे काश्मीखण्डे ७७ अध्यायः ॥

केदारेश्वरः, पुं, (केदाराख्य ईश्वरः । केदारपर्व्वतस्य ईश्वरो वा ।) काश्मीस्थशिवविशेषः । यथा,—
"भ्रष्टपर्व्वेऽभिधास्यामि केदारेश्वरसंकथाम् ।
समाकर्ण्यापि यां पापोऽप्यपापो जायते क्षणात्" ॥
इति स्कान्दे काश्मीखण्डे ७७ अध्यायः ॥

केनारः, पुं, (के मूर्द्धि नारः । अलुक्समासः ।) कुम्भिनरकः । इति हेमचन्द्रः । शिरः । कपोलः । सन्धिः । इति मेदिनी ॥

केनिपातः, पुं, (के जले निपात्यतेऽसौ । नि + पत् + णिच् + अप् ।) अरित्रम् । इति शब्दरत्नावली । हालि इति भाषा ॥

केनिपातकः, पुं, (केनिपात + स्वार्थे कन् ।) केनिपातः । इत्यमरः । १ । १० । १२ ॥

केन्दुः, पुं, (कु ईषत् इन्दुरिव । कोः कादेशः ।) तिन्दुकवृक्षः । इति शब्दरत्नावली ॥

केन्दुकः, पुं, (केन्दु + संज्ञायां कन् ।) गालवृक्षः । इति शब्दचन्द्रिका ॥ गाव् इति भाषा ॥ तालविशेषः । यथा । "लघुद्वयं विरामान्ततालेकेन्दुकसंज्ञके" । लघुद्वयं स्थाने द्रुतद्वयमिति च पाठः । अपरं नियमं विना । इति सङ्गीतदामोदरः ॥

केन्द्रं, क्ली, लग्नम् । लग्नात् चतुर्थसप्तमदशमस्थानानि । तत्पर्य्यायः । कण्टकम् २ । यथा,—
"लग्नाम्बुजूनकर्म्माणि केन्द्रमुक्तञ्च कण्टकम् ।
चतुर्थश्चात्र खेटो बली लग्ने विशेषतः" ॥
इति नीलकण्ठकृततर्षतन्त्राख्यजातकम् ॥ स्पष्टग्रहानयनार्थं शीघ्रमन्दसंज्ञकाङ्कद्वयम् । यथा,—
"मृदूच्चेन हीनो ग्रहो मन्दकेन्द्रं
चलोच्चं ग्रहाणां भवेच्छीघ्रकेन्द्रम्" ॥
इति भास्करीयसिद्धान्तशिरोमणौ स्पष्टाधिकारः॥ ग्रहं संशोध्य मन्दोच्चात् तथा शीघ्रात् विशोध्य च शिष्टं केन्द्रम् । इति सूर्य्यसिद्धान्तः ॥ गोलस्य मध्यस्थानम् । यथा,—
"वृत्तस्य मध्यं किल केन्द्रमुक्तम्
केन्द्रं ग्रहोच्चान्तरसञ्चयेऽतः ।
यतोऽन्तरे तावति तुङ्गदेशा-
न्नीचोच्चवृत्तस्य सदैव केन्द्रम्" ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥ (याचायोगविषेषः । यथा, शब्दार्थचिन्तामणिधृतवचने ।
"आपोक्लिमगते चन्द्रे केन्द्रस्थे सुरपूजिते ।
योगः केन्द्र इति ख्यातो यातुरिष्टार्थसिद्धिदः" ॥
प्रान्तसीमा । यथा, योगशास्त्रे ।
"एषिका उभयोः केन्द्रयोः स्थितौ द्वावेव योगिनौ ।
एकत्र सान्निध्यस्थितिवत् सन्निकर्षस्थिताविव वा
अन्योन्यमालपति" ॥)

केप, ऋ उ गत्याम् । चाले । इति कविकल्पद्रुमः । (भ्वां-आत्मं-सकं-सेट्-ऋदित् ।) ङ, केपते । ऋ, अचिकेपत् । इति दुर्गादासः ॥

केमद्रुमः, पुं, जन्मकालीनग्रहयोगविशेषः । यथा ।
"रविवर्ज्जं द्वादशगैरनफा चन्द्रात् द्वितीयगैः सुनफा ।
उभयस्थितैर्दुरधुरा केमद्रुमसंज्ञितो ऽन्यैः" ॥
अनफादियोगः । सच्छीलं विषयसुखान्वितं प्रभुख्यातियुक्तमनफायाम् । सुनफायां धीधनकीर्त्तियुक्तमात्मार्ज्जितैश्वर्य्यञ्च ॥ बद्धभृत्यकुटुम्बारम्भमुद्विग्नचित्तमपि दौरधुरे । भृतकं दुःखिनमधनं जातं केमद्रुमे विद्यात् ॥ अनफादिफलम् । इति ज्योतिस्तत्त्वम् ॥ (केमद्रुमयोगे जातस्य फलं यथा, जातकपद्धतौ ।
"नृपतेर्वंशजातोऽपि केमद्रुमभवो नरः ।
मलिनो दुःखितो नीचो निःस्वो दासो भवेत्खलः" ॥
तद्भङ्गस्तु तत्रैव । "चन्द्रे केन्द्रगतेऽथवा ग्रहयुते सर्व्वेषु दृष्टे विधौ सर्व्वैः कण्टकसंज्ञितैर्ग्रहयुतैः केमद्रुमो नेष्यते । तस्माद् विधो वा वृद्धिस्थैः शुभैः सर्व्वं शुभं फलं । द्वाभ्यां मध्यं तथैकेनाल्पं चेन्नास्ति दरिद्रता" ॥)

केमुकः, पुं, (के शिरोवच्छेदे अमयतीति । अम् रोगे + उक प्रत्ययः ।) वृन्तविशेषः । कैंउ इति भाषा । तत्पर्य्यायः । पेचुकः २ पेचुनी ३ पेचुः ४ पेचिका ५ दलसारिणी ६ केचुकः ७ । इति रत्नमाला ॥ तस्य मूलगुणाः । कफपित्तनाशित्वम् । रोचनत्वम् । अग्निदीपनत्वञ्च । इति राजवल्लभः ॥ कटुत्वम् । पाके तिक्तत्वम् । ग्राहित्वम् । हिमत्वम् । लघुत्वम् । पाचनत्वम् । हृद्यत्वम् । ज्वरकुष्ठकासप्रमेहास्रनाशित्वम् । वातलत्वम् । पटुत्वञ्च । इति भावप्रकाशः ॥ (एतत् फलं हविष्ये वर्ज्जनीयम् । क्ली, कन्दशाकविशेषः ॥)

केयूरं, क्ली, (के बाहुशिरसि भूषणतां याति । या गत्यां + ऊरः । अलुक् समासः ।) अलङ्कारविशेषः । ताड় इति भाषा । तत्पर्य्यायः । अङ्गदम् २ । इत्यमरः । २ । ६ । १०७ ॥ (यथा, महाभारते । ६ । ६७ । २१ ।
"पादानां भूषणानाञ्च केयूराणाञ्च सर्व्वशः ।
राज्ञश्चाश्च दृश्यन्ते भीष्मभीमसमागमे" ॥)

केयूरः, पुं, रतिबन्धविशेषः । यथा,—
"स्त्रीजङ्घे चैव संपीड्य दोर्भ्यामालिङ्ग्य सुन्दरीम् ।
कारयेत् स्थापनं कामी बन्धः केयूरसंज्ञकः" ॥
इति स्मरदीपिका ॥ अपि च ।
"स्त्रीणां जङ्घान्तराविष्टो गाढमालिङ्ग्य सुन्दरीम् ।
कामयेद्विपुलं कामी बन्धः केयूरसंज्ञकः" ॥
इति रतिमञ्जरी ॥

केरलः, पुं, देशभेदः । मालेओयार इति भाषा । यथा । उग्राः केरलपर्य्यायाः । इति हेमचन्द्रः ॥ वेदयागानधिकारित्रसप्तधारित्वेच्छविशेषः । पुरैते क्षत्रिया आसन् सगरेणैषां धर्म्मो नाशितः वेषान्यत्वञ्च कृतम् । यथा,—
"निःस्वाध्यायवषट्कारैः कृतास्तेन महात्मना ।
शूका यवनकाम्बोजाः पारदाः पह्लवास्तथा ॥
कोलिसर्पा माहिषका दर्व्वाश्चोलाः सकेरलाः ।
सर्व्वे ते क्षत्रियास्तात ! धर्म्मस्तेषां निराकृतः" ॥
इति हरिवंशः । (तथा च रघुवंशे । ४ । ५४ ।
"भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः" ॥)

केरली, स्त्री, (केरल + गौरादित्वात् ङीष् ।)

ज्योतिर्ग्रन्थविशेषः। होरा। इति शब्दरत्नावली॥ (केरलज्योतिर्विद्यायां सङ्केतविशेषो दिङ्मात्रं प्रदर्श्यते गर्गसंहितायां यथा,—

"वर्गवर्गप्रमाणञ्च सस्वरं ताड़ितं मिथः।
पिण्डसङ्ख्या भवेत्तस्य यथाभागैस्तु कल्पना"॥

अस्यार्थः क ख च ट त प य श्रा इत्यष्टौ वर्गा एतैरेव प्रश्नादयो यथायथं साङ्केतिकक्रमानुसारेण निरूप्यन्ते॥ केरलदेशोद्भवा स्त्री। यथा, राजेन्द्रकर्णपूरे। ६।

"चौड़ी चूड़ाभरणहरणः कीर्णकर्णावतंसः
कर्णाटीनां मुषितमुरली केरलीहारलीलः"॥)

केल, ऋ दाहे। गतौ। इति कविकल्पद्रुमः॥ (भां-परं-अकं-गत्यर्थे सकं-सेट्-ऋदित्।) ऋ, अचिकेलत्। चालः कम्पः। चालः कैश्चिन्न मन्यते। इति दुर्गादासः॥

केलकः, पुं, (केल्+कर्त्तरि ण्वुल्।) खड्गधारादिनर्त्तकः। तत्पर्य्यायः। श्वनकः २। इति त्रिकाण्डशेषः॥

केलिः, पुं स्त्री, (केल्+इन्।) परीहासः। तत्पर्य्यायः। श्रवः २ क्रीड़ा ३ लीला ४ नर्म्म ५। इत्यमरः। २। ७। ३२॥ (नायिकालङ्कारविशेषः। यथा, एतल्लक्षणं साहित्यदर्पणे। ३। १२२।

"विहारे सह कान्तेन क्रीड़ितं केलिरुच्यते"॥

यथा, भमरशतके। ४।

"मालत्याः कुसुमेषु येन सततं केलिः कृता हेलया"॥)

केलिः, स्त्री, (केलति सदा गच्छतीति। "सर्व्वधातुभ्य इन्"। इति इन्।) पृथिवी। इति शब्दमाला॥

केलिकः, पुं, (केलिर्विलासः प्रयोजनमस्य इति ठन्।) अशोकवृक्षः। इति राजनिर्घण्टः॥ (विवृतिरस्याशोकशब्दे ज्ञेया॥)

केलिकला, स्त्री, (केलिरूपा कला। शाकपार्थिवादिवत् मध्यपदलोपिसमासः।) सरस्वतीवीणा। इति शब्दरत्नावली॥ (केलिः क्रीड़ा तस्याः कला अंशविशेषः। यथा, भमरशतके। ७।

"अलिरसौ नलिनीवनवल्लभः
कुमुदिनीकुलकेलिकलारसः"॥)

केलिकिलः, पुं, (केलिना लीलया किलतीति। किल क्रीड़ायां+कः।) कुक्कुटकः। स तु शिवस्यानुचरः। नाट्ये नायकवयस्यः। तत्पर्य्यायः। विदूषकः २ वासन्तिकः ३ वैहासिकः ४ प्रहासी ५ प्रीतिदः ६। इति हेमचन्द्रः॥ (केलिना परीहासेन किलतीति विप्रहे वाक्यलिङ्गः। यथा, हरिवंशे।

"स तु केलिकिलो विप्रो भेदशीलश्च नारदः"॥)

केलिकिला, स्त्री, (केलिना विहारेण किलतीति किल्+कः। ततः टाप्।) रतिः। सा तु कामदेवपत्नी। इति त्रिकाण्डशेषः॥

केलिकीर्णः, पुं, (केलिनिमित्तकैः पांसुभिः कीर्णः।) उष्ट्रः। इति हेमचन्द्रः॥

केलिकुक्षिका, स्त्री, (केलीनां कुक्षिका इव। ह्रस्वत्वात्।) इक्षिका। इति त्रिकाण्डशेषः। शाकी इति भाषा॥

केलिकोषः, पुं, (केलीनां रहस्यानां क्रीड़ापरीहासादीनां वा कोष आधार इव।) नटः। इति शब्दरत्नावली॥

केलिनागरः, पुं, (केलिनिपुणः प्रधानको वा नागरः।) सम्भोगवान्। इति जटाधरः॥

केलिमुखः, पुं, (केलिः मुखं प्रधानमत्र।) परीहासः। इति त्रिकाण्डशेषः॥

केलिवृत्तः, पुं, (केलिनिमित्तको वृत्तः।) कदम्बविशेषः। इति शब्दरत्नावली॥ केलिकदम्ब इति ख्यातः॥

केलिसचिवः, पुं, (केलौ क्रीड़ाविषये सचिवः सहायः।) गर्म्मदः। क्रीड़ाविषयकमन्त्री। इति शब्दमाला॥

केव, ऋ ड सेवने। इति कविकल्पद्रुमः॥ (भां-आत्मं-सकं-सेट्-ऋदित्।) ड, केवते। ऋ, अचिकेवत्। इति दुर्गादासः॥

केवर्त्तः, पुं, (के जले वर्त्तते। वृत्+अच्। अलुक्समासः।) कैवर्त्तजातिः। इति हिरूपकोषः॥ (एषोऽन्त्यजशूद्रः। यथा, ब्रह्मवैवर्त्तपुराणे।

"रजकश्चर्म्मकारश्च नटो वरुड एव च।
कैवर्त्तो मेदभिल्लश्च षड़ेते अन्त्यजाः स्मृताः"॥)

केवलं, क्ली, (के शिरसि मूर्द्धावच्छेदे वलयति। वल्+अच्। अलुक्समासः।) निर्जीतम्। इत्यमरमेदिनीकरौ॥ ज्ञानभेदः। इति विश्वो हेमचन्द्रश्च॥ (साङ्ख्यकारिकायां यथा,—"अविपर्य्ययात् विशुद्धं केवलमुत्पद्यते ज्ञानम्"॥)

शुद्धम्। (यथा, रघौ २। ६३।

"न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नाम्"॥)

छत्त्वम्। (यथा, रघुवंशे १०। २६।

"केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन हेतवः श्लेषा निवेदितफलास्त्वयि"॥)

असहायः। इति संक्षिप्तसारे उणादिवृत्तिः॥ (अद्वितीयः। यथा, कुमारे ५। ८३।

"न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक्"॥)

केवलः, पुं, कुहनः। इति मेदिनी। (कुम्भकविशेषः। यथा, हठयोगदीपिकायाम्। २। ७१।

"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः।
सहितः केवलश्चेति कुम्भको द्विविधो मतः"॥)

केवलः, त्रि, एकः। (यथा, रघुवंशे। ११। १६।

"वाणभिन्नहृदया निपेतुषी
सा खगानमुवं न केवलाम्।
विद्रुमच्छदपरायशोरुचं
रावयञ्छ्रियमपि व्यकम्पयत्"॥)

छत्त्वः। इत्यमरमेदिनीकरौ। (यथा, रघुः १०। २६।

"केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन हेतवः श्लेषा निवेदितफलास्त्वयि"॥)

केवलज्ञानी, [न्] पुं, (केवलं शुद्धं ज्ञानं अस्यास्तीति। इनिः।) भूतार्हद्विशेषः। इति हेमचन्द्रः॥

केवलद्रव्यं, क्ली, (केवलं द्रव्यम्।) मरिचम्। इति शब्दचन्द्रिका॥

केवली, स्त्री, (केवल+ङीष्।) ज्ञानभेदः। इति मेदिनी। ग्रन्थविशेषः। इति हेमचन्द्रः॥

केवली, [न्] पुं, (केवलं शुद्धं ज्ञानमस्यास्तीति। इनिः।) जैनविशेषः। इति हलायुधः॥

केविका, स्त्री, (केव गतिचालनयोः+ण्वुल्+टाप् अत इत्वम्।) पुष्पविशेषः। केवेर इति भाषा लोकेषु प्रसिद्धा। तत्पर्य्यायः। कविका २ केवी ३ भृङ्गारिः ४ नृपवल्लभा ५ भृङ्गमारी ६ महागन्धा ७ राजकन्या ८ अलिवाहिनी ९। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। दाहपित्तश्रमवातश्लेष्मरोगपित्तच्छर्दिविनाशित्वञ्च। इति राजनिर्घण्टः॥

केशः, पुं, (के मस्तके श्लेते। श्लीञ्+अच्। अलुक्समासः।) मज्जातोपधातुविशेषः। चुल् इति भाषा। स तु गर्भस्थबालकस्य अष्टाभिर्मासैर्जायते। इति सुखबोधः। (केशादयस्तु पित्तो जायन्ते। यथा, सुश्रुते शारीरस्थाने तृतीयेऽध्याये। "गर्भस्य केशश्मश्रुलोमास्थिनखदन्तसिरास्नायुधमनीरेतःप्रभृतीनि स्थिराणि पित्तजानि"॥ भावप्रकाशे च।

"केशाः श्मश्रु च लोमानि नखा दन्ताः सिरास्तथा।
धमन्यः स्नायवः शुक्रमेतानि पित्तजानि हि"॥)

तत्पर्य्यायः। चिकुरः २ कुन्तलः ३ वालः ४ कचः ५ शिरोरुहः ६। इत्यमरः। २। ६। ९५॥ शिरसिजः ७ मूर्द्धजः ८ अस्रः ९ दृजिनः १०। इति जटाधरः॥ (रोगविशेषेणास्योत्पाटनानन्तरमुद्भवोपायाश्च। यथा,—

"वटावरोहकेशिन्योर्चूर्णेनादित्यपाचितम्।
गुड़ूचीस्वरसैस्तैलमभ्यङ्गात्तैर्शिरोरुहम्"॥

इति आदित्यपाकगुड़ूचीतैलम्॥ *॥

"मधुकेन्दीवरमूर्व्वा त्रिफलाव्यगोत्पीरभृङ्गसेवेन।
अचिराद्भवन्ति घनकेशा दृढ़मूलायतान्तवः"॥

"चन्दनं मधुकं मूर्व्वा त्रिफला नीलमुत्पलम्।
कान्तावटप्ररोहश्च गुड़ूचीविल्वमेव च॥
नीलचूर्णं तथाकेशी शारिवे द्वे तथैव च।
मार्कवस्वरसेनैव तैलं मृदग्निना पचेत्॥
शिरस्युत्पतिताः केशा जायन्ते घनकुञ्चिताः।
दृढ़मूलाश्च स्निग्धाश्च तथा भ्रमरसन्निभाः॥
नस्येनाकालपलितं निहन्यात्तैलमुत्तमम्"॥

इति चन्दनाद्यं तैलम्॥ *॥

"तैलं सयष्टीमधुकैः क्षीरे धात्रीफलैः शृतम्।
नस्ये दत्तं जनयति केशान् भ्रमरूपि चाप्यथ"॥

पक्वावस्थापन्नस्यास्य क्षयीकरणोपाया यथा,—

"त्रिफलाचूर्णसंयुक्तं नीलचूर्णं विनिक्षिपेत्।
ईषत्पक्वे नारिकेले भृङ्गराजरसान्विते॥
मासमेकन्तु निःक्षिप्य सम्यग्गर्भात् समुद्धरेत्।
ततः शिरो मुण्डयित्वा लेपं दद्याद्विभग्वरः॥
सम्वेष्ट्य कदलीपत्रैर्मोचयेत्सप्तमे दिने।
क्षालयेत्त्रिफलाक्वाथैः क्षीरमांसवसाग्निभः॥
कपालरञ्जनञ्चैव क्षयीकरणमुत्तमम्"॥

"उत्पलं पयसा सार्द्धं मासं भूमौ निधापयेत्।
केशानां क्षयकरणं लेहनञ्च विधीयते"॥

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे ॥)
तत्समूहार्थवाचकाः शब्दाः यथा, —
"बालाः स्युस्तत्पराः पाशो रचनाभार उच्चयः ।
हस्तः पद्मः कलापश्च केशभूयस्त्ववाचकाः" ॥
इति हेमचन्द्रः ॥ * ॥ (कस्य जलस्य ईशः ।) वरुणः । क्षीवेरम् । इति मेदिनी ॥ (अस्य पर्य्यायो यथा,—
"वारं क्षीवेरवर्हिष्ठोदीच्यं केशोम्बुनाम च" ॥
इति वैद्यकरत्नमालायाम् ॥) दैत्यविशेषः । इति हेमचन्द्रः ॥ (कस्य ब्रह्मणोऽपि ईशः । के जले शेते वा ।) विष्णुः । इति शब्दरत्नावली । (काशते प्रकाशते लोके लोकं काशयति वा । काश + अच् एषोदरात् एत्वे साधुः । सूर्य्याग्निप्रभृतिरश्मिः ।
"ब्रह्म-विष्णु-रुद्र संज्ञाः शक्तयः केशसंज्ञिताः" ॥
इति भागवतोक्तेः परब्रह्मशक्तिः । ब्रह्मा ।
"केशो योनौ तथा भावे ह्यवलावण्ययोरपि ।
जम्बटे पुरुषे चैव प्रमदायां विशेषतः" ॥
"प्रजापतौ कचे चैव केशशब्दः प्रकीर्त्तितः" ॥
इति महाभारतटीकायां नीलकण्ठः ॥)

केशकलापः, पुं, (केशानां कलापः समूहः ।) केशपाशः । केशसमूहः । इति हेमचन्द्रः ॥

केशकारः, पुं, (केशं केशवत् केशाकृतिं वा करोति आत्मानं केशाकारेण वर्द्धयति इति भावः । केश + कृ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) इन्द्रभेदः । करिया कुशियार इति हिन्दी भाषा । अस्य गुणाः । गुरुत्वम् । शीतत्वम् । रक्तपित्तक्षयापहत्वञ्च । इति भावप्रकाशः ॥

केशगर्भकः, पुं, (केशो गर्भे अभ्यन्तरेऽस्य । कप् ।) कवरी । इति त्रिकाण्डशेषः ॥

केशघ्नं, क्ली, (केशं हन्ति नाशयतीति । हन् + टक् ।) इन्द्रलुप्तकम् । इति हेमचन्द्रः ॥

केशच्छित्, [द्] पुं, केशं छिनत्ति । छिद् + क्विप् ।) नापितः । इति शब्दमाला ॥

केशटः, पुं, (को ब्रह्मा ईशः महादेवः तौ अटतः गच्छतः प्रलये यं । महाप्रलये मूर्त्तिविशेषात् तथात्वम् । यद्वा ब्रह्मशिवाभ्यां अटति गच्छति यः सः । त्रयाणामेकात्मत्वात् ।) विष्णुः । (केशेषु काशादिदेशजातेषु अटति चरतीति । अट् + अच् । शकन्ध्वादित्वात् साधुः ।) छागः । (केशेषु मूर्द्धजेषु अटतीति । अट् + अच् शकन्ध्वादित्वात् अलोपे साधुः ।) ओकशः । इति मेदिनी । भ्राता । इति शब्दरत्नावली ॥ (केशेषु कामार्त्तपुरुषनारीषु अटति । अट् + अच् ।) कामदेवस्य शोषणवाणः । इति विश्वः । (केश इव प्रतिमासु नटनस्थादिषु च अटति त्वगात्मनेति यावत् ।) शोणकवृक्षः । इति त्रिकाण्डशेषः ॥

केशदृत्, पुं, (केशमिव धरति । धृ + क्विप् ।) भूतकेशनामकवृक्षभेदः । इति शब्दचन्द्रिका ॥

केशनाम, [न्] क्ली, (केशनामेव नाम यस्य ।) बालम् । इत्यमरः ॥ बाला इति भाषा ॥

केशपक्षः, पुं, (केशानां पक्षः समूहः । बाहुलकात् पक्षादेशो वा ।) केशपाशः इत्यमरः । २ । ६ । ८८ ॥ (यथा, महाभारते । ४ । ३६ । ४१ ।
"उत्तरन्तु प्रधावन्तमनुद्रुत्य धनञ्जयः ।
गत्वा शूतपदं तूर्णं केशपक्षे परामृशत्" ॥)

केशपर्णी, स्त्री, (केश इव पर्णान्यस्य । जातित्वात् ङीष् ।) अपामार्गः । इति शब्दरत्नावली ॥

केशपाशः, पुं, (केशानां पाशः समूहः ।) केशसमूहः । यथा,—
"पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" ॥
इत्यमरः । २ । ६ । ८८ । (यथा, कुमारे । १ । ४८ ।
"तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्बालप्रियत्वं शिथिलं चमर्य्यः" ॥)

केशपाशी, स्त्री, (केशपाश + स्वार्थात् ङीप् ।) शिरो मध्यस्थशिखा । चूड़ा । इत्यमरः । २ । ६ । ९७ ॥

केशभूः, पुं, (केशानां भूरुत्पत्तिस्थानम् ।) शिरः । इति राजनिर्घण्टः ॥

केशमथनी, स्त्री, (केशा मथ्यन्तेऽनया । मथ विलोड़ने + करणे ल्युट् ततो ङीप् । अस्याः कण्टकैः समीपं गन्तुः केशोत्पाटनात् तथात्वम् ।) शूकशिम्बी । इति राजनिर्घण्टः ॥

केशमार्জकं, क्ली, (केशं मार्ष्टि । मृज् शोधने + कर्त्तरि ण्वुल् ।) कङ्कतिका । इति जटाधरः । चिरुणी इति भाषा ॥

केशमार्জनं, क्ली, (केशो मृज्यतेऽनेन, । मृज् + करणे ल्युट् वृद्धिश्च ।) कङ्कतिका । इति हेमचन्द्रः । केशस्य वृद्धिश्च । (भावे ल्युट् । केशशोधनक्रियामात्रम् ॥)

केशमुष्टिः, पुं, (केशानां मुष्टिरिव ।) विषमुष्टिवृक्षः । महानिम्बः । इति राजनिर्घण्टः ॥

केशरः, पुं क्ली, (के जले पद्मेशेरसि वा । सरतीति । सृ + अच् । एषोदरात् शूत्वम् । यद्वा केश इव केशाकारः अस्यास्तीति । केश + रः ।) किञ्जल्कः । इत्यमरः । १ । १० । ४३ ॥

केशरः, पुं, (केश इव केशाकृतिपदार्थः अस्यास्तीति मत्वर्थीयो रः ।) नागकेशरवृक्षः । (यथा,—गीतगोविन्दे । १ । ३१ । "मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकाशे" ॥ वकुलवृक्षः । (यथा, कुमारे । ३ । ५५ ।
"खस्रां नितम्बादवलम्बमाना
पुनः पुनः केशरदामकाञ्चीम्" ॥)
पुन्नागवृक्षः । (यथा, महाभारते । १ । १२५ । ३ ।
"पलाशैस्तिलकैश्चूतैश्चम्पकैः पारिभद्रकैः ।
कर्णिकारैरशोकैश्च केशरैरतिमुक्तकैः" ॥)
सिंहजटा । इति मेदिनी ॥ (यथा, कादम्बर्याम्
"मृगपतिरिव स्कन्धावलम्बितकेशरभारः" ॥)
हिङ्गुवृक्षः । इत्यमरटीकायां भरतः ॥ नीपः । केतकिकदम्ब इति भाषा । यथा, मेघदूते । २२ ।
"नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढैः" ॥)

केशरञ्जनः, पुं, (केशान् रञ्जयति । रञ्ज + णिच + ल्युः ।) भृङ्गराजवृक्षः । इति राजनिर्घण्टः । भीमराज इति भाषा ॥

केशराजः, पुं, (केशो राजतेऽनेन । राज + करणे घञ् ।) शाकभेदः । केशुरे इति भाषा । तत्पर्य्यायः । भृङ्गराजः २ भृङ्गः ३ पत्रङ्गः ४ मार्कवः ५ । इति रत्नमाला ॥ मार्कवः ६ । इत्यमरः ॥ नागमारः ७ पवनः ८ भृङ्गसोदरः ९ । इति त्रिकाण्डशेषः ॥ केशरञ्जनः १० केशयः ११ । कुन्तलवर्द्धनः १२ । इति वैद्यकम् ॥ अङ्गारकः १३ एकरजः १४ करञ्जकः १५ भृङ्गरजः १६ भृङ्गारः १७ । इति जटाधरः ॥ अगारः १८ भृङ्गरजाः १९ मकरः २० । इति शब्दरत्नावली ॥ अपि च ।
"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
भृङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत् ।
केशरक्तक्षयः कृमिश्वासकासशोथामयापहृत् ॥
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्तिजित्" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । अग्निकारित्वम् । केशवर्त्तुर्हितत्वम् । पाण्डुकफापहत्वम् । रसायनत्वञ्च । इति राजवल्लभः ॥

केशराङ्गः, पुं, (केशरे तदवच्छेदे अङ्गरसो यस्य ।) मातुलुङ्गवृक्षः । इति जटाधरः

केशरी, [न्] पुं, (केशराः सन्त्यस्य इति इनिः ।) सिंहः । इत्यमरः । २ । ५ । १ ॥ (यथा, रघुवंशे २ । २९ ।
"स पाटलायां गवि तस्थिवांसं
धनुर्द्धरः केशरिणं ददर्श" ॥)
घोटकः । पुन्नागवृक्षः । नागकेशरवृक्षः । इति मेदिनी ॥ बीजपूरकवृक्षः । इति जटाधरः ॥

केशरुहा, स्त्री, (केश इव रोहति अत्र । केशरुह + "इगुपधेति" । ३ । १ । १३५ । इति कः ।) भद्रदन्तिकावृक्षः । इति राजनिर्घण्टः ॥

केशरूपा, स्त्री, (केशवद्रूपमस्याः ।) वन्दाकवृक्षः । इति राजनिर्घण्टः । (परगाछा इति भाषा ॥)

केशवः, पुं, (को ब्रह्मा ईशः रुद्रः तौ आत्मनि स्वरूपे वयति प्रलये उपाधिरूपमूर्त्तित्रयं मुक्त्वा एकमात्रपरमात्मस्वरूपेणावतिष्ठते इति । यथा, भागवते २ अध्याये चतुःश्लोक्याम् ।
"अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ।
ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि
तद्विद्यादात्मनो मायां यथाभासो यथातमः ॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्व्वत्र सर्व्वदा ॥
एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित्" ॥
तथा, केशं केशिनं वाति हन्ति । केश + वा + कः । यथा, हरिवंशे । ८० । ६६ ।
"यस्मात्त्वया हतः केशी तस्मान्मच्छासनं शृणु ।
केशवो नाम नाम्ना त्वं ख्यातो लोके भविष्यसि" ॥
यद्वा, के जले शववत् भातीति । प्रलयकाले क्षीरोदशायितया तथात्वम् । कश्च अश्च ईशश्च ते केशा ब्रह्मविष्णुरुद्राः नियन्तृतया सन्त्यस्य । यद्वा, कश्च ईशश्च तौ केशौ पुच्छपौलत्वेन भवतोऽस्य । "केशादोऽन्यतरस्याम्" । ५ । २ । १०९ ।

इति वप्रत्ययः। अथवा वाति गच्छति तदत्तया। वा + कः। स्वरूपतस्तेषां भेदाभावादपि वासुदेवे सर्व्वात्मनि परमेश्वरेऽस्य वृत्तिः। अतो विष्णुसंहितायाम्।

"नरसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः"॥

किञ्च।

"त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः"॥

पूज्यपादैर्भाष्यकृद्भिरपि केशवशब्दस्य निरुक्तिद्वयमवलम्ब्य नामद्वयं समर्थितं तयोराद्ये। अभिरूपाः केशा यस्य स केशवः। कस्य अस्य ईशस्य केशास्त्रिमूर्त्तयस्ते वशे वर्त्तन्ते यस्य सः। केशिदानवहननाद्वा केशवः।

"यस्मात् त्वयैव दुरात्मा हतः केशी जनार्दन! तस्मात् केशवनाम्ना त्वं लोके ख्यातो भविष्यसीति"॥ भागवतादिषु। द्वितीये। केशसंज्ञिताः सूर्य्यादिसंक्रान्ता अंशवः तद्वत्त्वेन केशवो वा।

"अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः। सर्व्वज्ञाः केशवं तस्मात् प्राहुर्म्मां द्विजसत्तमाः"॥ इति महाभारतम्। "त्रयः केशिनः"। इति श्रुतेश्च ब्रह्मविष्णुशिवाख्या हि प्रकृतयः केशसंज्ञिताः। "मत्केशा वसुधातले" इति भागवते च। यथा, हरिवंशोक्तौ,—

"को ब्रह्मेति समाख्यातः ईशोऽहं सर्व्वदेहिनाम्। आवां तवांशसम्भूतौ तस्मात् केशवनामवान्"॥ तेनास्य बहुधा निरुक्तिः। विष्णुः। इत्यमरः। १। १। १८॥ पुन्नागवृक्षः॥ (केशाः प्रशस्ताः सन्त्यस्य। "केशाद्वोऽन्यतरस्याम्"। ५। २। १०९। इति वः।) केशवति त्रि। इति मेदिनी॥ (जलस्यांशवदेहः। यथा, विदग्धमुखमण्डनम्।

"केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः। ववन्दि पाण्डवाः सर्व्वे हा! हा! केशव! केशव!"॥

के जले शवं पतितं दृष्ट्वा द्रोणः काकः हर्षं प्राप्तवान् पाण्डवाः भृगालाः ववन्दि चीत्कारं कुर्व्वन्तीत्यर्थः॥)

केशववर्द्धिनी, स्त्री, (केशाः वर्द्धन्तेऽनया। केश + वृध + करणे ल्युट् टित्वात् ङीप्।) सहदेवीलता। इति राजनिर्घण्टः॥

केशवायुधः, (केशवस्य विष्णोरायुधाकारं मुकुलाग्रस्य।) आम्रवृक्षः। इति शब्दमाला। (केशवस्य विष्णोः आयुधं अस्त्रम्। इति विग्रहे पुं, विष्णोरस्त्रे, क्ली॥)

केशवालयः, पुं, (केशवस्य आलयः वासस्थानम्।) अश्वत्थवृक्षः। इति त्रिकाण्डशेषः॥

केशवावासः, पुं, (आवसत्यस्मिन् इति। आ + वस + अधिकरणे घञ्।) केशवस्य आवासः अश्वत्थवृक्षः। इति जटाधरः॥

केशवेष्टः, पुं, (केशस्य कुन्तलस्य वेष्टः बन्धनरूपवेण्यादिभिर्विन्यास इति यावत्।) कवरी। इत्यमरः॥ चुलेरखोँपा इति भाषा। (यथा, आश्वलायनगृह्ये। १। १७। १७। "कुलधर्म्मं केशवेष्टान् कारयेत्"। "एकशिखस्त्रिशिखः पञ्चशिखो वा" इति बौधायनः। "पूर्व्वशिखः परशिखः" इति कुलधर्म्माः। "तेषु यो यस्य कुलधर्म्मः तेन तस्य केशसन्निवेशान् कारयेत्" इति नारायणीवृत्तिः॥)

केशहन्त्री, स्त्री, (केशस्य हन्त्री नाशिनी। यद्वा केशान् हन्ति या। केश + हन् + टच् ततो ङीष्।) शमीवृक्षः॥ इति राजनिर्घण्टः॥

केशहस्तः, पुं, (केशानां केशस्य वा हस्तः समूहः। हस्तादयश्च केशात् समूहार्थे।) केशसमूहः। इत्यमरः॥

केशाकेशि, क्ली, केशेषु केशेषु गृहीत्वा प्रवृत्तं युद्धम्। ("तत्र तेनेदमिति सरूपे"। २। २। २७। इति कर्म्मव्यतिहारे इच् समासे पूर्व्वदीर्घः।) अन्योन्यकेशग्रहणपूर्व्वकप्रवृत्तयुद्धम्। इति व्याकरणम्॥ चुलाचुलि इति भाषा।

(यथा, महाभारते। ३। २८३। ३७।

"केशाकेशिभवद्युद्धं रक्षसां वानरैः सह"॥)

केशारुहा, स्त्री, (केशं आरोहत्यनया। आ + रुह + करणे घञर्थे कः।) सहदेवीलता। इति राजनिर्घण्टः॥

केशार्हा, स्त्री, (केशं केशवर्गं अर्हति इति। केश + अर्ह + "कर्म्मण्यण्"। ३। २। १। इति अण्।) महानीली। इति राजनिर्घण्टः॥

केशिकः, त्रि, (प्रशस्तः केशः अस्यास्तीति ठन्।) प्रशस्तकेशयुक्तः। इत्यमरः। २। ६। ४५॥

केशिका, स्त्री, (केशीव कायति प्रकाशते। केशिन् कै + कः।) शृतावरी। इति राजनिर्घण्टः॥

केशिनिसूदनः, पुं, (केशीत्याख्यः दानवः कंसासुरचरस्तं निसूदयति हन्ति। नि + सूद + कर्त्तरि ल्युः।) श्रीकृष्णः। (यथा, गीतायां १८। १।

"सन्न्यासस्य महाबाहो! तत्त्वमिच्छामि वेदितुम्। त्यागस्य च हृषीकेश! पृथक् केशिनिसूदन!"॥

केशिदानववधविवरणं हरिवंशे ८० अध्याये दृश्यम्।)

केशिनी, स्त्री, (केशाकाराः सन्त्यस्याः।) जटामांसी। इति राजनिर्घण्टः॥ चोरपुष्पी। प्रशस्तकेशविशिष्टा। इत्यमरः। २। ६। ४५॥

केशिसूदनः, पुं, (केशिनं तदाख्यया प्रसिद्धं दैत्यं सूदयतीति। केशिन् + सूद + कर्त्तरि ल्युः।) श्रीकृष्णः। इति त्रिकाण्डशेषः॥ (केशिदानव वधविवरणं हरिवंशे ८० अध्याये द्रष्टव्यम्॥)

केशिहा, [न्] पुं, (केशिनं हतवान्। हन् + क्विप्) श्रीकृष्णः। इति हेमचन्द्रः॥

केशी, [न्] त्रि, (प्रशस्ताः केशाः सन्त्यस्य।) प्रशस्तकेशयुक्तः। इत्यमरः। २। ६। ४५॥

केशी, [न्] पुं, (केशः सर्व्वज्ञा प्रकृतिरस्यास्तीति।) विष्णुः। इति त्रिकाण्डशेषः॥ दैत्यभेदः। इति मेदिनी॥ (यथा, हरिवंशे। ८०। ६५।

"यस्मात्त्वया हतः केशी तस्मात् मच्छासनं शृणु। केशवो नाम नाम्ना वै ख्यातो लोके भविष्यसि"॥

केशाः केसरा सन्त्यस्य।) सिंहः। इति शब्दरत्नावली॥

केशी, स्त्री, (केश + स्त्रियां गौरादित्वात् ङीष्।) नीली। इति राजनिर्घण्टः॥ भूतकेशीवृक्षः॥ अजशोणितवृक्षः। इति रत्नमाला॥

केशोच्चयः, पुं, (केशानां उच्चयः समूहः।) केशसमूहः। इति हेमचन्द्रः॥

केश्यं, क्ली, (केशाय हितं इति यत्।) कृष्णागुरु। भृङ्गराजे, पुं। इति राजनिर्घण्टः॥ (केशहितकारके, त्रि॥)

केसरं, क्ली, (के जले सरतीति। सृ + अच्।) हिङ्गुः इति हेमचन्द्रः॥ नागकेसरपुष्पम्। कासीसम्। स्वर्णम्। इति राजनिर्घण्टः॥

केसरः, पुं, (के वृक्षशिरोऽवच्छेदे उच्छ्रितदेशे इत्यर्थः सरति। सृ + अच्।) नागकेसरवृक्षः। तुरङ्गस्कन्धकेशः। (यथा, रघुवंशे। ४। ६७।

"विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः। दुधुवुर्वाजिनः स्कन्धान् लग्नकुङ्कुमकेसरान्"॥)

सिंहस्कन्धकेशः। (यथा, पद्मवन्ते। १। २०४।

"व्याकीर्णकेसरकरालमुखा मृगेन्द्रा नागाश्च भूरि मदराजि विराजमानाः"॥)

वकुलवृक्षः। (यथा, रघुवंशे। ९। ३६।

"ललितविभ्रमबन्धविचक्षणं सुरभिगन्धपराजितकेसरम्"॥)

पुन्नागवृक्षः। किञ्जल्कः। इति हेमचन्द्रः॥

केसरः, पुं क्ली, (के जले सरतीति। सृ + पचाद्यच्। हलदन्तादिति अलुक्समासः।) किञ्जल्कः। हिङ्गुनि, पुं क्ली। इति रभसः॥

केसरवरं, क्ली, (केसरेषु वरं श्रेष्ठं गुणाधिक्यात्। यद्वा, केसरेण किञ्जल्केन हरतीति। हृ + अच्।) कुङ्कुमम्। इति राजनिर्घण्टः॥

केसरासः, पुं, (के जलनिमित्तकः सरः अस्यः तद्रसो यस्य।) बीजपूरः। इति राजनिर्घण्टः॥

केसरिका, स्त्री, (के जले सरति खाद्यतया साधुकारितया वा। वुन् अलुक्समासः। ततष्टाप् अत इत्वम्।) सहदेवीलता। इति राजनिर्घण्टः॥

केसरिसुतः, पुं, (केसरी खगामख्यातो वानरभेदः तस्य सुतः पुत्रः।) हनूमान्। इति हेमचन्द्रः॥ (यथा, महाभारते ३। १४७। २७।

"अहं केसरिणः क्षेत्रे वायुना जगदायुना। जातः कमलपत्राक्ष! हनूमान् नाम वानरः"॥)

केसरी, [न्] पुं, (केसराः जटाः सन्त्यस्य। केसर + इनिः।) सिंहः। घोटकः। पुन्नागः। नागकेशरः। इति मेदिनी॥ रक्तशिग्रुः। इति राजनिर्घण्टः॥ वानरविशेषः। स तु हनूमत्पिता। (यथा, रामायणे। ७। ४०। १९।

"सूर्य्यदत्तवरः स्वर्गं सुमेरुर्नाम पर्व्वतः। यत्र राज्यं प्रशास्यस्य केसरी नाम वै पिता"॥)

कै, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) कायति। एषामादन्तत्वेन दिवादौ पाठेऽपीष्टसिद्धौ भ्वादावैकारान्तत्वेन पाठो गणस्थतनमित्यमिति ज्ञापयति। तेन अयधातोरात्मनेपदानित्यत्व शपो लुकि च ग्लेर्लोप इति यलोपे अयधातौ परे उपसर्गस्थेको ण इति वक्तव्यात् पराशब्दस्य रेफस्य णकारे "एष कालः समूत्पन्नो यः पलाति स जीवति" इति सिद्धम्। देवेशचारण-

भेदार्थो भ्वादौ पाठ इति केचित्। इति दुर्गादासः॥

कैकयी, स्त्री, (जनपदात् क्षत्रियात् अञ्। यद्वा, केकय + स्वार्थे अण्। कैकय + वाऽजबलात् न यादेरियादेशः। तस्यापत्यं स्त्री ङीप्।) केकयी। इति शब्दरत्नावली॥

कैकेयी, स्त्री, (कैकेयः केकयराजः तस्यापत्यं स्त्री ङीप्।) केकयी। सा तु केकयराजकन्या दशरथराजपत्नी च। इति शब्दरत्नावली॥
(यथा, रघौ १२। २।
"तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति।
कैकेयीग्रहणेवाह पलितच्छद्मना जरा"॥)

कैङ्कर्य्यं, क्ली, (किङ्करस्य भावः किङ्करस्येदं किङ्करस्य कर्म्म वा। किङ्कर + यञ्।) किङ्करत्वम्। दासत्वम्॥ (यथा, भागवते। ३। २। २२।
"तत् तस्य कैङ्कर्य्यमलं भृतान् नो
विघ्नापयत्यच्युत! यदुग्रसेनम्"॥)

कैटजः, पुं, (कुटज एव स्वार्थे अण् वृद्धिः। एषोदरात् औकारस्य ऐकारत्वम्।) कुटजवृक्षः। इति भावप्रकाशः॥

कैटभः, पुं, स्वनामख्यातो दैत्यविशेषः॥ (अयन्तु विष्णोः कर्णमलोद्भूतयोरसुरयोरन्यतरः। माङ्कल्पे जातः सन् एकार्णवे योगनिद्रायां स्थितस्य भगवतो नाभिपद्मादाविर्भूतं अजयोनिं ब्रह्माणं यदा हन्तुमुद्यतः तदा योगनिद्रां विहाय समुत्थितेन भगवता जघनोपरि समुत्थाप्य निहतोऽयं दुर्दान्तोऽसुरः॥) यथा,— मार्कण्डेयपुराणम्।
"योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् प्रभुः॥
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ"॥
(एतस्योत्पत्त्यादिकं सविस्तरं हरिवंशे ५२ अध्याये दर्शनीयम्॥)

कैटभजित्, पुं, (कैटभं स्वनामख्यातमसुरं जितवान्। जि + भूते क्विप्। तुगागमश्च।) विष्णुः। इत्यमरः॥ (अस्य विवरणं हरिवंशे ५२ अध्याये द्रष्टव्यम्॥)

कैटभहा, [न्] पुं, (कैटभं स्वनामख्यातं महासुरं हन्ति हतवान् वा। हन् + क्विप् भूते।) विष्णुः। इति हेमचन्द्रः॥ (स च सर्व्वशक्तिर्भगवान् स्वरूपतो निर्गुणोऽपि सृष्ट्यादिकार्य्यसम्पादनार्थं गुणाधिष्ठातृत्वमभ्युपेति, तच्च तु यदा जीवादृष्टवशात् यद्यद्गुणोद्रेकात्मिका क्रियाशक्तिरुपतिष्ठते तितरां गुणाधिष्ठातृतया भगवानपि तदा तत्तद्गुणोपयोगिक्रियावानिव प्रतिभाति। परं देहाभिमानवतां जीवानामिव तस्य प्रकृतेरद्रिक्तगुणे मनो न ह्यासज्यते हृषीकेशत्वात् गुणनियन्तृत्वादित्यर्थः देहाभिमानराहित्याच्च। अतएव स कैटभभिन्मधुजिदित्यादयुपाधिकतयोच्यते वस्तुतस्तु जीवैर्यत् किञ्चित् क्रियते तत् सर्व्वमेव गुणप्रवृत्तत्वेनैवगत एव। ईश्वरस्य तु भक्ता इव गुणा एवाधीनाः सन्तः तदाज्ञयैव क्रिया उत्पादयन्ति सम्पादयन्ति च॥)

कैटभी, स्त्री, (कैटभं तदाख्यया प्रसिद्धं असुरं प्रति इः हननक्रियारूपतेजःप्रकाशोऽस्याः।) यद्वा, कूटं तमःप्रधानभावमधिष्ठाय तामसी प्रकृतिरिति विश्रुता देवकार्य्यसाधनानुरोधात् तद्वत्तया भातीति। कूट + अणि वृद्धौ कौटं एषोदरात् औकारस्य ऐकारत्वं कैटं भा + कः। ततो ङीप् कैटभी तामसीत्यर्थः॥) दुर्गा। इति चिकाण्डशेषः। (मधुकैटभभीतब्रह्मणस्तुत्या प्रसादिततया तामस्या विमोहितौ तौ दुर्दान्तावसुरौ विष्णुना निहतौ। यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ८१ अध्याये।
"एवं स्तुता तदा देवी तामसी तत्र वेधसा।
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ॥
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः"॥
इत्युपक्रम्य।
"समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः।
पञ्चवर्षसहस्राणि बाहुप्रहरणोविभुः॥
तावप्यति बलोन्मत्तौ महामायाविमोहितौ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम्"॥)

कैटभेश्वरी, स्त्री, (कैटभस्य कैटभपूर्व्या ईश्वरी कर्त्री। पक्षे कैटभस्य तमोगुणस्य ईश्वरी नियन्त्री।) दुर्गा। यथा।
"कैटभन्तु वधं श्रुत्वा गृहीता तत्पुरी यथा।
तेन सा गीयते देवी पुराणे कैटभेश्वरी"॥
इति देवीपुराणे ४५ अध्यायः॥

कैटर्य्यः, पुं, (किट् भाषे + भावे घञ्। केटं भाषं राति ददाति तिल्लादीनामातिशय्यात्। रा दाने + कः। ततः स्वार्थे ष्यञ्।) कटफलः। इत्यमरः। २। ४। ४०॥ निम्बः। महानिम्बः। इति रत्नमाला॥ मदनवृक्षः। इति राजनिर्घण्टः॥

कैड़र्य्यः, पुं, (कैटर्य्य + एषोदरात् ड़त्वे साधुः।) कटफलः। यूतिकरञ्जः। कटभीवृक्षः। इति राजनिर्घण्टः॥

कैतकं, क्ली, (केतक्या इदं "तस्येदम्"। ४। ३। १२०। इत्यण्) केतकीपुष्पम्। यथा। कैतकं तिक्तकटुकमिति राजवल्लभः॥

कैतवं, क्ली, (कितव + स्वार्थे अण्।) कपटः। (कितवस्य भावः कर्म्म वा। युवादित्वादण्।) द्यूतः। इत्यमरः। २। १०। ४५॥ वैदूर्य्यमणिः। इति राजनिर्घण्टः॥ (कितवस्य भावः। कपटता। यथा, भागवते १। १। २। "धर्म्मः प्रोज्झितकैतवोऽत्रपरमो निर्म्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्"॥)

कैदारं, क्ली, (केदाराणां क्षेत्राणां समूहः। इति अण्।) क्षेत्रसमूहः। इत्यमरटीकायां भरतः॥ (केदारे क्षेत्रे प्रयत्नेनागीतं यज्जलं तत्केदारम्। तदुणादिकमुक्तं भावप्रकाशे यथा—
"केदारं क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम्।
कैदारं वार्य्यभिष्यन्दि मधुरं गुरुदोषकृत्"॥)

कैदारः, पुं, (केदारे क्षेत्रे भवः इत्यण्।) धान्यविशेषः। इति राजनिर्घण्टः॥ (केदारसम्बन्धिनो ये ते कैदारा इत्यर्थः। यथा, भावप्रकाशे।
"कैदारा वातपित्तघ्ना गुरवः कफशुक्रलाः।
कषाया अल्पवर्च्चस्का मेधास्त्रैव बलावहाः"॥)

कैदारकं, क्ली, (केदाराणां समूहः केदारस्य इदं वा। केदार + वुञ्।) केदारसमूहः। क्षेत्रगणः। इत्यमरः। २। ९। ११॥

कैदारिकं, क्ली, (केदाराणां समूहः केदारे भवं तस्येदं वा। केदार + ठञ्।) केदारकम्। इत्यमरः। २। ९। ११॥

कैदार्य्यं, क्ली, (केदाराणां समूहः। केदार + ष्यञ्।) क्षेत्रम्। क्षेत्रसमूहः। इत्यमरः। २। ९। ११॥

कैमुतिकः, पुं, (किमुत इत्यव्ययं तस्मात् आगतः। ठक्।) न्यायविशेषः। तथा च छन्दोगपरिशिष्टम्।
"वेदाश्छन्दांसि सर्व्वाणि ब्रह्मणाश्च दिवौकसः।
जलार्थिनोऽथ पितरो मरीच्याद्यास्तथर्षयः॥
उपाकर्म्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः।
पियासूनुनुगच्छन्ति संहृष्टा ह्यसुरारिणः॥
समवायश्च यत्रैषां तत्रान्ये बहवो मताः।
नूनं सर्व्वे त्वयं यान्ति किमुतैकं नदीरजः"॥
इति प्रायश्चित्ततत्त्वम्॥

कैरवं, क्ली, (के जले रौति कलनादं करोतीति। क + अच् केरवः हंसः तत्सम्बन्धे क्षत्रियत्वात् अञ्। तस्य प्रियमित्यण्।) कुमुदम्। श्वेतोत्पलम्। इत्यमरः। १। १०। ३७॥ (यथा, महाभारते १। १। ८६।
"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः।
नृबुद्धिकैरवाणाञ्च कृतमेतत् प्रकाशनम्"॥)

कैरवः, पुं, (कुत्सितो रवो यस्य स एव स्वार्थे अण्। एषोदरात् औकारस्य ऐकारत्वम्।) शत्रुः। कितवः। इति मेदिनी॥

कैरविणी, स्त्री, (कैरव पुष्करादित्वात् इनिः। ततो ङीप्।) कुमुदिनी। इति शब्दरत्नावली॥ (कैरवाणि सन्त्यस्यां इति इनि ङीप् च। कुमुदयुक्ता पुष्करिणी॥)

कैरवी, स्त्री, (कैरवस्य प्रिया इत्यण् ङीप् च।) चन्द्रिका। इति मेदिनी॥ मेथिका। इति राजनिर्घण्टः॥

कैरवी, [न्] पुं, (कैरवं प्रियत्वेन प्रकाशत्वेन वा अस्त्यस्य इति इनिः।) चन्द्रः। इति शब्दमाला॥

कैराटकः, पुं, (किरं पर्य्यन्तभुमिं चरमावस्थां मृत्युदशामित्यर्थः अटति प्राप्नोति यस्मात्। किर + अट् + अच्। ततः स्वार्थे कन् अण् च।) स्थावरविषभेदः। इति हेमचन्द्रः॥

कैरातं, क्ली, (किराते पर्य्यन्तभुमौ भवं इत्यण् ।) भूनिम्बः । इति शब्दचन्द्रिका ॥ शम्बरचन्दनम् । इति राजनिर्घण्टः ॥

कैरातः, पुं, (किराते पर्य्यन्तभूमौ भवः । इत्यण् ।) भूनिम्बः । इति राजनिर्घण्टः ॥ (किरात इव शूरः इवार्थे अण् ।) बलवान् पुरुषः । तत्पर्य्यायः । दोर्ग्रहः २ क्षामः ३ । इति हारावली ॥ (किरातस्य वेश इव वेशो यस्य । अर्शं आद्यच् ततः स्वार्थे अण् । किरातवेशधारिणि, त्रि । यथा, महाभारते १ । २ । ५० ।

"ईश्वरार्ज्जुनयोर्युद्धं पर्व्वकैरातसंज्ञितम्" ॥

तथा, मनसाख्याने । "कैरातीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे" ॥)

कैरालं, क्ली, (किरं पर्य्यन्तभूमिं अलति पर्य्याप्नोतीति । अल् + "कर्म्मण्यण्" इत्यण् । ततः स्वार्थे अण् ।) विड्लवणम् इति वैद्यकम् ॥

कैराली, स्त्री, (कैराल + स्त्रियां गौरादित्वात् ङीष् ।) विड्लवणं । इति राजनिर्घण्टः ॥

कैलासः, पुं, (के जले लासो लसनं दीप्तिरस्य । "हनदन्तात् सप्तम्याः" । ६ । ३ । ६ । इति अलुक् केलसः स्फटिकमणिः तद्वत् शुभ्रः इत्यण् । यद्वा, केलीनां समूहः । कैलं । "तस्य समूहः" । ४ । २ । ३७ । इत्यण् वृद्धिश्च । कैलेनासतेऽत्र । आस् + अधिकरणे घञ् ।) खनामख्यातपर्व्वतः । इत्यमरः । १ । २ । ७४ ॥ स च शिवकुबेरयोः स्थानम् । तस्य परिमाणं यथा । "जठरदेवकूटौ मेरोः पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः । एवमपरेण पवनपारिपात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ" । इति श्रीभागवतम् ॥ (अयं हि बृहत्संहितायां कूर्म्मविभागे उत्तरस्यामुक्तः ॥)

कैलासनिकेतनः, पुं, (कैलासः निकेतनं यस्य ।) शिवः । इति कविकल्पलता ॥

कैलासौकाः, [स्] पुं, (कैलासः ओकः स्थानं आलयोऽस्य ।) कुबेरः । इति हेमचन्द्रः ॥

कैवर्त्तः, पुं, (के जले वर्त्तते । वृत् + अच् असुक् समासः । ततः स्वार्थे अण् ।) खनामख्यातवर्णसङ्करजातिः । स तु वैश्यागर्भे क्षत्रियस्यौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । दासः २ धीवरः ३ । इत्यमरः । १ । १० । १५ ॥ दाशेरकः ४ जालिकः ५ । इति जटाधरः ॥ (यथा, मनुः । १० । ३४ ।

"निषादो मार्गवं सूते दाशं नौकर्म्मजीविनम् ।
कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः" ॥

अस्य टीकायां कुल्लूकभट्टेन यदुक्तं तदयथा । "ब्राह्मणेन शूद्रायां जातो निषादः प्रागुक्तः प्रकृतायामायोगव्यां मार्गवं दाशापरनामानं नौव्यवहारजीविनं जनयति । यमार्य्यावर्त्तदेशवासिनः कैवर्त्तशब्देन कीर्त्तयन्ति" ॥)

कैवर्त्तमुस्तं, क्ली, (के जले जलयुक्तभूमौ वर्त्तते जायते इति केवर्त्तं ततः स्वार्थे अण् । कैवर्त्तं च तत् मुस्तञ्चेति कर्म्मधारयः ।) कैवर्त्तमुस्तकम् । इति शब्दरत्नावली ॥

कैवर्त्तमुस्तकं, क्ली, (कैवर्त्तमुस्त + स्वार्थे कन् । यद्वा कैवर्त्तस्य प्रियं मुस्तकम् ।) कैवर्त्तीमुस्तकम् । इत्यमरटीकायां भरतः ॥

कैवर्त्तिका, स्त्री, (कैवर्त्ती जलस्था इव । इवार्थे कन् ततो ङीष् ।) मालवे प्रसिद्धो लताविशेषः । तत्पर्य्यायः । सुरङ्गा २ लता ३ वल्ली ४ दशाराख्या ५ रङ्गिणी ६ वल्लरङ्गा ७ सुभगा ८ । अस्या गुणाः । लघुत्वम् । दृष्यत्वम् । कषायत्वम् । कफकासश्वासमन्दाग्निदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

कैवर्त्तिमुस्तकं, क्ली, (कैवर्त्ताः कैवर्त्तपत्न्याः प्रियं मुस्तकम् । संज्ञायां "ङ्याप्नोः" । ६ । ३ । ६३ । इति वा ह्रस्वः ।) कैवर्त्तीमुस्तकम् । इत्यमरटीका ॥

कैवर्त्ती, स्त्री, (के जले वर्त्तते इति । वृत् + अच् । केवर्त्ता जलस्था सा एव इति स्वार्थे अण् ततो ङीष् ।) परिपेलम् । इति वैद्यकम् ॥ कैवर्त्तपत्नी च ॥

कैवर्त्तीमुस्तकं, क्ली, (केवर्त्ता कैवर्त्तपत्न्याः प्रियं मुस्तकम् । संज्ञायां "ङ्याप्नोः" । ६ । ३ । ६३ । इति विकल्पे ह्रस्वविधेरत्र ह्रस्वाभावः ।) मुस्ताप्रभेदः । इति भरतः ॥ केओटमुता इति भाषा । केशुर इति नीचोक्तिः । केशुरिया मुथा । इति सारसुन्दरी ॥ तत्पर्य्यायः । कुटन्नटम् २ दशपुरम् ३ वानेयम् ४ परिपेलवम् ५ भवम् ६ गोपुरम् ७ गोनर्दम् ८ इत्यमरः । २ । ४ । १३१ ॥ दाशपुरम् ९ दाशपूरम् १० दशपुरम् ११ दशपूरम् १२ परिपेलम् १३ पारिपेलम् १४ कैवर्त्तमुस्तकम् १५ कैवर्त्तिमुस्तकम् १६ । इति तट्टीका ॥ वनसम्भवम् १७ । इति रत्नकोषः ॥ धान्यम् १८ शीतपुष्पम् १९ जीर्णबुध्नकम् २० वन्यम् २१ सितपुष्पम् २२ । इति जटाधरः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवायुव्रणदाहामशूलरक्तदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ हिमत्वम् । तिक्तत्वम् । कषायत्वम् । कान्तिदत्वम् । पित्तविसर्पकुष्ठकण्डूविषनाशित्वञ्च । इदन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्ताकृति ॥ इति भावप्रकाशः ॥

कैवलं, क्ली, (के शिरोऽवच्छेदे वलते संवृणोति केशादेरतिसौरभ्यकरणात् के जले वलते गुणाधिक्यात् वर्द्धते वा । वल + अच् ततः स्वार्थे अण् ।) विड्लवणम् । इति रत्नमाला ॥ (केवलस्य भावः इति केवलशब्दात् ब्राह्मणादित्वात् ष्यञ् ॥)

कैवल्यं, क्ली, (केवलस्य सर्व्वोपाधिवर्ज्जितस्य भावः इति । केवल + ष्यञ् ।) मुक्तिः । इत्यमरः । १ । ५ । ६ ॥ (तथा च पातञ्जले कैवल्यपादे ३ सूत्रं यथा,

"निमित्तमप्रयोजकं प्रकृतीनां
वरणभेदस्तु ततः क्षेत्रिकवत्" ॥

निमित्तं धर्म्मादि तत्प्रकृतीनामर्थान्तरपरिणामेन प्रयोजकं न हि कार्य्येण कारणं प्रवर्त्तते । वरणभेदस्तु ततः क्षेत्रिकवत् ततस्तस्मादनुष्ठीयमानाद् धर्म्मात् वरणभावरणकं अधर्म्मादि तस्यैव विरोधित्वात् भेदः क्षयः क्रियते तस्मिन् प्रतिबन्धे क्षीणे प्रकृतयः स्वयमभिमतकार्य्याय प्रभवन्ति । क्षेत्रिकवत् । यथा, क्षेत्रिकः कृषीवलः केदारात् केदारान्तरं जलं निनीषुर्ज्जलप्रतिबन्धकवरणभेदमात्रं करोति । तस्मिन् भिन्ने जलं स्वयमेव प्रसरद्रूपं परिणामं यद्धाति न तु जलप्रसरणे तस्य कश्चित् प्रयत्नः । प्रकृतः यावत् योगादिप्रभावेण अधर्म्मावरणभेदो न भवेत् तावत् कुतस्तत्त्वज्ञानं किञ्च यावत्तत्त्वज्ञानप्रभावात् सर्व्वा वासना न क्षयं यान्ति तावत् दृष्टैव कैवल्याप्तिरिति ध्येयम् । तथा च तत्रैव । ११ ।

"हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः" ॥

वासनानामनन्तरानुभवो हेतुरस्यानुभवस्य रागादयस्तेषामविद्येति साक्षात् पारम्पर्य्येण च हेतुः । फलं शरीरादि सुखादि च । आश्रयो बुद्धिरालम्बनं यदेवानुभवस्य तदेव वासनानामतस्तैर्हेतुफलाश्रयालम्बनैरनन्तानामपि वासनानां संगृहीतत्वात्तेषां हेतूनामभावे ज्ञानयोगाग्न्या दग्धबीजकल्पत्वे विहिते निर्म्मूलत्वाच्च वासनाः प्ररोहं न यान्ति न वा कार्य्यमारभन्त इति तासामभावः ॥ अत्र भगवद्गीतायाम् । ४ । ३७ ।

"यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्জ্জুন ! ।
ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा" ॥

अतएव सत्त्वादिषु गुणेषु कृतार्थेषु भोगापवर्गादिलक्षणेषु पुरुषार्थेषु समाप्तेषु कैवल्यमित्येव सारसिद्धान्तवाक्यम् । यथा, पातञ्जले । ३३ ।

"पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति" ।

समाप्तभोगापवर्गलक्षणपुरुषार्थानां गुणानां यः प्रतिप्रसवः प्रतिलोमस्य परिणामस्य समाप्तौ विकारानुद्भवे क्षणेषु यदि वा चिच्छक्तेर्वृत्तिसारूप्यनिवृत्तौ स्वरूपमात्रेऽवस्थानं तत् कैवल्यमुच्यते । इत्थं सर्व्वेष्वेव दर्शनेष्वधिष्ठातृत्वं विहाय नान्यदात्मनोरूपमुपपद्यते । अधिष्ठातृत्वञ्च चिद्रूपत्वं तच्च जड़ात् वैलक्षण्यमेव चिद्रूपतया यदधितिष्ठति तदेव भोग्यतां नयति यच्च चेतनाधिष्ठितं तदेव सकलव्यापारयोग्यं भवति । एवञ्च सति नित्यत्वात् प्रधानस्य व्यापारनिवृत्तौ यदात्मनः कैवल्यमस्माभिरुक्तं तदिहाय दर्शनान्तराणां नान्या गतिः तस्मादिदमेव युक्तमुक्तं वृत्तिसारूप्यपरिहारेण स्वरूपे प्रतिष्ठा चितिशक्तेः कैवल्यम् । यथा, "पुरुषस्य भोक्तृत्वमुक्ता चित्तद्वारेण सकलव्यवहारनिष्पत्तिमुपपाद्य पुरुषसत्त्वे प्रमाणमुपदर्श्य कैवल्यनिर्णयाय दशभिः सूत्रैः क्रमेणोपयोगिनोर्थानभिधाय ग्राह्यान्तेऽप्येतदेव कैवल्यमित्युपपाद्य कैवल्यस्वरूपं निर्णीतम्" । परं जन्मौषधिमन्त्रसमाधिजन्यासु सिद्धिषु सतीष्वपि ज्ञानभक्त्यादियोगेन येन केनचिदुपायेन भगवदनुकम्पालाभ एव कैवल्योपायः । पातञ्जलदर्शनटीकाकृत् महाराजभोजाधीश्वरोऽप्येतदङ्गीकृत्य कैवल्यपादस्य टीकायां मङ्गलाचरणं कृतवान् । यथा,—

"यदाद्यैव कैवल्यं विनोपायैः प्रजायते ।
तमेकमजमीशानं चिदानन्दमयं स्तुमः" ॥

कृष्णयजुर्वेदान्तर्गतोपनिषद्विशेषः ।
यथा, मुक्तिकोपनिषदि । "कठवल्लीतैत्तिरीयक-ब्रह्मकैवल्यश्वेताश्वतरेत्युपक्रम्य कृष्णयजुर्वेदगतानां दात्रिंशदुत्तरशतोपनिषदां सङ्ग्रहावतरणम्" ॥)
कैशिकं, क्ली, (केशानां समूहः । "केशाश्वाभ्यां यञ्छावन्यतरस्याम्" । ४ । २ । ४८ । इति यञ्छे ठक् ।) केशसमूहः । इत्यमरः । २ । ६ । ६६ ॥
कैशिकः, पुं, (केशेषु केशविन्यासादौ साधुः । केश + ठक् ।) शृङ्गाररसः । इति शब्दरत्नावली जटाधरश्च ॥
कैशिकी, स्त्री, (कैशिक + स्त्रियां ङीप् ।) नाटक-वृत्तिविशेषः । यथा । "भारती सात्वती कैशिक्या-रभट्यौ च वृत्तयः" ॥ इति हेमचन्द्रः ॥
कैशोरं, क्ली, (किशोरस्य भावः । किशोर + अञ् ।) किशोरावस्था । इति शब्दरत्नावली ॥ सा तु दशमवर्षोत्तरषष्ठदशवर्षावधिः । इति स्मृतिः ॥
कैश्यं, क्ली, (केशानां समूहः । इति ष्यञ् ।) केश-समूहः । इत्यमरः । २ । ६ । ६६ ॥
कोकः, पुं, (कोकते आदत्ते चक्रसुधामिति । कुक् आदाने + घञ्यञ् ।) चक्रवाकः ।
(यथा, गीतगोविन्दे ५ । १७ ।
"कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना" ॥)
वृकः । (यथा, रामायणे । ५ । २६ । ६ ।
"वने यूथपरिभ्रष्टा मृगी कोकैरिवार्दिता" ॥)
ज्येष्ठः । खर्ज्जूरीवृक्षः । भेकः । इति मेदिनी ॥ विष्णुः । इति चिकाण्डशेषः ॥
कोकड़ः, पुं, (कोकं कोकरवं टकभ्वनिवत् ध्वनिमित्यर्थः खाति गच्छतीति । खा + कः । अस्य ड़त्वम् ।) विलेशयमृगविशेषः । तत्पर्य्यायः । अविनः २ कोकवाचः ३ विलेशयः ४ चमरपुच्छः ५ लोमशः ६ धूम्रवर्णकः ७ । तन्मांसगुणाः । श्वासानिल-कासहरत्वम् । पित्तदाहकरत्वञ्च । इति राज-निर्घण्टः ॥
कोकदेवः, पुं, (कोकश्चक्रवाकः स इव दीव्यति क्रीड़-तीति । दिव् + अच् ।) कपोतः । इति राज-निर्घण्टः ॥
कोकनदं, क्ली, (कोकान् चक्रवाकान् नदति नादयति वात्मविकासेन । कोक + नद् + अन्तर्णिच् ततोऽच् मूलविभुजादित्वात् को वा ।) रक्तकुमुदम् । रक्त-पद्मम् । इति मेदिनी । (यथा, गीतगोविन्दे । १०।५।
"नीलनलीनाभमपि तन्वि ! तव लोचनं धारयति कोकनदरूपम्" ॥ अस्य पर्य्याया यथा,—
"रक्तं कोकनदं पद्ममल्पमन्यदलोहितम्" ।
इति वैद्यकरत्नमालायाम् ॥)
कोकनदच्छविः, पुं, (कोकनदस्य रक्तोत्पलस्य छविरिव छविर्दीप्तिर्यस्य ।) रक्तवर्णः । तद्वति त्रि । इत्यमरः ।
कोकबन्धुः, पुं, (कोकयोः चक्रवाकयुगलयोर्दिवस-प्रभया संयोगकारितया बन्धुरिव ।) सूर्य्यः । इति शब्दचन्द्रिका ॥
कोकायः, पुं, (कोकः खर्ज्जूरीवृक्षस्तद्वदयमागोऽस्य ।) समस्थिलवृक्षः । इति राजनिर्घण्टः ॥
कोकाहः, पुं, (कोक इव आहन्ति वेगेन गच्छतीति । आ + हन् + डः ।) श्वेतघोटकः । तत्पर्य्यायः । कर्कः २ । इति हेमचन्द्रः ॥ क्वचित् पुस्तके काकाह इति पाठः ॥
कोकिलः, पुं, (कुक् आदाने + "सलिकल्यनिमहि भडि-मडिशडिपिण्डितुण्डिकुकिभूभ्य इलच्" । उणां १ । ५५ । इति इलच् ।) खगामख्यातकृष्णवर्णमधु-रस्वरपक्षी । (यथा, रामायणे । २ । ५२ । २ ।
"भास्करोदयकालोऽयं गता भगवती निशा ।
असौ सुकृष्णविहगः कोकिलस्तात ! कूजति" ॥)
तत्पर्य्यायः । वनप्रियः २ परभृतः ३ पिकः ४ । इत्यमरः । २ । ५ । १६ ॥ परपुष्टः ५ कालः ६ वसन्तदूतः ७ ताम्रचूडः ८ गन्धर्व्वः ९ मधुगायनः १० वासन्तः ११ कलकण्ठः १२ कामान्धः १३ काकलीरवः १४ कुहूरवः १५ अन्यपुष्टः १६ मत्तः १७ मदनपाठकः १८ । इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—हारीते १ स्थाने ११ अध्याये ।
"कोकिलः श्लेष्मलो ज्ञेयः पित्तसंशमनस्तथा" ॥
मूषिककल्पान्तर्गतशुक्र-विम-जातीयविशेषः । तद्भक्षणजनितलक्षणानि यथा,—
"यस्यायः कोकिलेनोग्रा ज्वरो दाहश्च दारुणः" ॥
इति सुश्रुतेन कल्पस्थाने षष्ठाध्याय उक्तम् ॥)
कुक्कारः । इति चिकाण्डशेषः । (छन्दोविशेषः । इति वृत्तरत्नाकरः ॥)
कोकिलनयनः, पुं, (कोकिलस्य नयनमिव रक्तवर्णं पुष्पमस्य ।) कोकिलाक्षवृक्षः । इत्यमरटीकायां रमानाथः ॥ (कोकिलाक्षशब्दोऽस्य विवृतिर्द्रष्टव्या ॥)
कोकिलाक्षः, पुं, (कोकिलस्याक्षीव रक्तं पुष्पमस्य । "अक्ष्णोऽदर्शनात्" । ५ । ४ । ७६ । इति अच् ।) वृक्षविशेषः । कुलियाखाड़ा इति भाषा । तालम खाना इति हिन्दी भाषा ॥ तत्पर्य्यायः । इक्षुगन्धा २ काण्डेक्षुः ३ इक्षुरः ४ क्षुरः ५ । इत्यमरः । २ । ४ । १०४ ॥ शृगाली ६ शृङ्खली ७ शुरकः ८ शृगालघण्टी ९ वज्रास्थिः १० शृङ्खला ११ वज्र-कण्टकः १२ इक्षुः १३ इक्षुरकः १४ वज्रः १५ शृङ्खलीका १६ पिकेक्षणा १७ पिच्छिला १८ । इति राजनिर्घण्टः ॥ श्वेतस्य तस्य पर्य्यायः । वीर-तरुः २ चित्रुरः ३ क्षुरकः ४ शुक्लपुष्पः ५ । रक्तस्य तस्य पर्य्यायः ॥ छत्रकः २ अतिच्छत्रः ३ । इति रत्नमाला ॥ सामान्यस्य तस्य गुणाः । आमवात-वातरक्तरोगनाशित्वम् । इति राजवल्लभः ॥ मधुरत्वम् । शीतत्वम् । पित्तातिसारनाशित्वम् । शुक्रकफबलरुचिकारित्वम् । सन्तर्पणत्वञ्च । इति राजनिर्घण्टः ॥ (श्वेतकोकिलाक्षमूलं छागीदुग्धेन पिष्टं सत् मक्षितं क्षयरोगं नाशयेत् । यदुक्तं गारुड़े १६३ अध्याये ।
"श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम् ।
त्रिस्नाहेन वै पीतं क्षयरोगं क्षयं नयेत्" ॥)
कोकिलाक्षकः, पुं, (कोकिलाक्ष + स्वार्थे कन् ।) कोकिलाक्षवृक्षः । इत्यमरटीकायां स्वामी ॥ (यस्मिन्नस्य व्यवहारस्तद्यथा,—
"कोकिलाक्षकनिर्य्यूहः पीतस्तच्छाकभोजिना ।
क्षणाभ्यास इव क्रोधं वातरक्तं नियच्छति" ॥
इति वाभटे चिकित्सास्थाने २२ अध्याये ॥)
कोकिलावासः, पुं, (आवसत्यस्मिन् इति । आ + वस् + अधिकरणे घञ् । कोकिलानां आवासः ।) आम्रवृक्षः । इति राजनिर्घण्टः ॥
कोकिलेक्षुः, पुं, (कोकिल इव कृष्णवर्णः इक्षुः ।) कृष्णेक्षुः । इति राजनिर्घण्टः ॥
कोकिलेष्टा, स्त्री, (कोकिलस्य इष्टा प्रिया ।) महा-जम्बूः । इति राजनिर्घण्टः ॥
कोकिलोत्सवः, पुं, (कोकिलानां उत्सवोऽत्र ।) आम्र-वृक्षः । इति राजनिर्घण्टः ॥
कोड्डयं, क्ली, (कोड्डयो भवं कोड्डयदेशस्यैः कर्म्म-कारैः निर्म्मितमिति भावः । "तत्र भवः" । ४ । ३ । ५३ । इत्यण् तस्य लुक् ।) शस्त्रभेदः । इति हेमचन्द्रः ॥
कोड्डयाः, पुं, देशविशेषः । इति निघण्टः । कोकण इति भाषा ॥ (यथा, आगमे ।
"अथाभ्यङ्गं समारभ्य कटिदेशस्य मध्यगे ।
समुद्रप्रान्तदेशो हि कोड्डयाः परिकीर्त्तितः" ॥
देशोऽयं कूर्म्मविभागे दक्षिणस्यां दिशि वर्त्तते ।
यथा, महाभारते । ६ । ६ । ५६ ।
"अथापरे जनपदा दक्षिणा भरतर्षभ" ! ।
"कौकुट्टकास्तथा चोलाः कोड्डयाः मलवा नराः" ॥
क्वचिदेकवचनत्वमपि दृश्यते ।
यथा, स्मृतिसंग्रहे ।
"मालवे गौड़देशे च सिन्धुदेशे च कोड्डये ।
व्रतं चूड़ां विवाहञ्च वर्ज्जयेत् मकरे गुरौ" ॥)
कोड्डयासुतः, पुं, (कोड्डये तदाख्यप्रदेशे भवः । अण् तस्य लुक् च । कोड्डया रेणुका तस्याः सुतः पुत्रः ।) परशुरामः । इति शब्दमाला ॥
कोचः, पुं, (कुच् + ज्वलादित्वात् कर्त्तरि घञ् ।) जातिविशेषः । स तु भांसच्छेदिगर्भ तीवरस्यौरस-जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥
कोजागरः, पुं, (को जागर्त्ति अस्यां पौर्णमासी-निशायां इति लक्ष्मीं देवीं उद्दिश्य यज्ञे समये । पृषोदरात् साधुः ।) आश्विनी पूर्णिमा । तत्पर्य्यायः । शारदी २ द्यूतपूर्णिमा ३ शरत्पर्व्व ४ कौमुदी ५ । इति चिकाण्डशेषः ॥ अथ कोजागरकृत्यानि । तत्र ब्रह्मपुराणम् ।
"आश्वयुज्यां पौर्णमास्यां निशुम्भो वालुकाश्रयात् ।
आयाति सेनया सार्द्धं कृत्वा युद्धं सुदारुणम् ॥
तस्मात् तत्र नरैर्मार्गाः खगेन्द्रस्य समीपतः ।
शोधितव्याः प्रयत्नेन भूषितव्याश्च सर्व्वतः ॥
पुष्पार्घ्यफलमूलौघसर्व्वपक्वरसैस्तथा ।
वेश्मानि भूषितव्यानि नानावर्णैर्विशेषतः ॥
सुस्नातैरनुलिप्तैश्च नरैर्भाव्यं सगन्धवैः ।
दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः ॥
स्त्रीबालवृद्धमूर्खैश्च भोक्तव्यं पूजितैः सुरैः ।
पूज्याश्च सर्व्वतैः पक्वैस्तथा द्वारोर्द्ध्वभित्तयः ॥
द्वारोपान्ते सुदीप्तस्तु संपूज्यो हव्यवाहनः ।
यवाज्यतृप्तो पेतैस्तद्वत्तैश्च सुतर्पितः ॥

संपूजितव्यः पूर्णेन्दुः पयसा पायसेन च ।
रुद्रः सभार्य्यः स्कन्दश्च तथा नन्दीश्वरो मुनिः ॥
गोमद्भिः सुरभिः पूज्या छागवद्भिर्ऋतावृतः ।
उरभ्रवद्भिर्वरणो गजवद्भिर्विनायकः ॥
पूज्याः साश्वैश्च रेवन्तो यथाविभवविस्तरैः ।
ततः पूज्यो निकुम्भोऽपि समाधेस्तिलतण्डुलैः ॥
सुगन्धिभिर्घृतोपेतैः क्षुरराख्यैश्च भूरिभिः ।
ब्राह्मणान् भोजयित्वा तु भोक्तव्यं मांसवर्जितम् ॥
वह्निपार्श्वगतैर्नैया दृष्ट्वा क्रीड़ाः पृथग्विधाः" ॥ *४
लिङ्गपुराणे यथा.—
"आश्विने पौर्णमास्यान्तु चरेज्जागरकं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतं स्थिरम् ।
सुगन्धिर्निशि सद्वेश्मश्वेतैर्नागरवारुणैः ॥
निशीथे वरदा लक्ष्मीः को जागर्त्तीति भाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षैः क्रीड़ां करोति यः ॥
नारिकेलैश्चिपिटकैः पितॄन् देवान् समर्चयेत् ॥
बन्धूंश्च प्रीणयेत्तेन स्वयं तदृणो भवेत्" ॥
इति तिथ्यादितत्त्वम् ॥ (अत्र निशायां बन्धुभिरक्षैः क्रीड़यित्वा लक्ष्मीप्रसादात् धनभाग्भवेत् । अक्षक्रीड़ानियमश्च चतुरङ्कशब्दे द्रष्टव्यः ॥)

कोटः, पुं, (कुट्यते प्रताप्यते शत्रुरत्र अनेन वा । दुर्गमाश्रित्य प्रबलविपक्षमपि प्रतापयितुं शक्यते इत्यर्थः । कुट प्रतापने + अधिकरणे करणे वा घञ् ।) दुर्गम् । इति कुटशब्दार्थे मेदिनी । गड़ कोल्লা इति च भाषा । (कुट् + भावे घञ् । कौटिल्यम् प्रतापनम् ॥)

कोटकः, पुं, (कुट् + कर्त्तरि ण्वुल् ।) गृहकारकः । घरामि इति भाषा । स तु कुम्भकार्य्या गर्भे अट्टालिकाकारस्त्रौरसजातः । इति ब्रह्मवैवर्त्ते पुराणम् ॥

कोटरं, क्ली पु, (कोटं कौटिल्याकारं स्थानं गच्छतीमिति यावत् । रातीति । रा + कः ।) वृक्षस्थितगह्वरम् । गाछेर खोड़ोल इति भाषा । तत्पर्य्यायः । निष्कुहः २ । इत्यमरः । २ । ४ । १३ ॥ निर्गूढः ३ कोटरः ४ । इति शब्दरत्नावली ॥ प्रान्तरम् ५ । तरुविवरम् ६ । इति जटाधरः ॥ (कोटशब्दात् मतुर्थ्यां अश्वादित्वात् रः । पा, ४ । २ । ८० ॥ दुर्गसन्निहितदेशादौ, त्रि ॥)

कोटरावत्, क्ली, (कोटरान्वितानां तरूणां वनम् । पूर्ब्बदीर्घत्वं मतुप्च ।) सकोटरवृक्षयुक्तवनम् । इति मुग्धबोधटीकायां दुर्गादासः ॥

कोटरी, स्त्री, (कोटं कौटिल्यं रीयाति गच्छतीति । रीगतौ + क्विप् ।) नम्रा स्त्री । इत्यमरः । २ । ६ । १७ । (कोटं कुटिलस्वभावं राक्षसासुरादिकं रीयाति हन्ति । री + क्विप् ।) चण्डिका ॥ इत्यमरटीका ॥

कोटवी, स्त्री, (कोटं कौटिल्यं निर्गच्छन्तां वाति गच्छतीति । कोट + वा गमनहिंसयोः "आतोऽनुपसर्गे कः" । ३ । २ । ३ । इति कः । ततो गौरादित्वात् ङीष् ।) विवस्त्रा स्त्री । इत्यमरटीका । (कोटं दुर्गं दुर्गनामानमसुरं वाति गच्छयतीति ।) दुर्गा । इति धरणी ॥

कोटिः, स्त्री, (कोट्यते क्रियतेऽनया । कुट छेदे । "सर्व्वधातुभ्य इन्" । उणां । ४ । ११७ । इति इन् । वाऽऽसकात् गुणः ।) अस्त्रादेः कोणः । (यथा, रघुवंशे । ७ । ४६ ।
"हतान्यपि श्येननखायकोटि
श्चासक्तकेशानि चिरेण पेतुः" ॥)
उत्कर्षः । शतलक्षसङ्ख्या । क्रोर इति भाषा ॥ (यदुक्तं अग्निपुराणे ।
"एकं दशं शतञ्चैव सहस्रमयुतन्तथा ।
लक्षञ्च नियुतञ्चैव कोटिरर्ब्बुदमेव च" ॥)
धनुरग्रम् । इत्यमरमेदिनीकरौ ॥ (यथा, महाभारते । १ । ४० । २२ ।
"तस्य स्कन्धे शतं सर्पं क्रुद्धो राजा समाहृनत् ।
समुत्क्षिप्य धनुष्कोट्या स चैनं समुपैक्षत" ॥)
(रेखा । यथा, कुमारे । २ । २६ ।
"आवर्ज्जितजटामौलिविलम्बिग्रन्थिकोटयः ।
स्वयमागमपि मूर्द्धानः च्युतङ्कारग्रंसिनः" ॥
वादविचारः । संशयनिर्णयाय पूर्ब्बपक्षः । यथा, गादाधरीसंग्रहहेतुक्तिः ।
"विप्रतिपत्तिवाक्यजन्यकोट्युपस्थितिः" ।
जीवावयवक्षत्रिकोणादिक्षेत्रावयवरेखाभेदः । यथा,
"इष्टाद्बाहोर्यः स्यात् तत्सदृङ्नियां दिशीतरोबाऽऽः ।
अक्षे चतुरस्रे वा सा कोटिः कोर्त्तिता तज्ज्ञैः" ॥
सिद्धान्तशिरोमण्युक्तराशिचक्रस्य क्षतीयांशः । यथा,
"त्रिभिर्भैः पदं तानि चत्वारि चक्रे क्रमात् स्याद्युगयुग्मसंज्ञा च तेषां । अयुग्मे पदे यातमेष्यन्तु युग्मे भुजबाऽऽहीनं त्रिभं कोटिरक्षा" ॥ छायानिरूपणार्थं कल्प्यमानक्षेत्रावयवरेखाविशेषः । यथा, सिद्धान्तशिरोमणौ ।
"दिक्सूत्रसम्पातगतस्य शङ्को-
श्छायाग्रपूर्ब्बापरसूत्रमध्यम् ।
दोर्दोः प्रभा वर्गवियोगमूलं
कोटिर्नरात् प्रागपरा ततः स्यात्" ॥ * ॥
"दिक्सम्पातस्थस्य शङ्कोर्भाग्रं यत्र पतति तस्य पूर्ब्बापरसूत्रस्य च यदन्तरं स दोरित्युच्यते । दोश्छाययोर्वर्गान्तरपदं पूर्ब्बपरा कोटिः" । इति ॥ चन्द्रस्य शृङ्गोन्नतिज्ञानार्थं क्षेत्रावयवविशेषः । यथा, तत्रैव "योऽधो नरो दिनशतः स विधोरुदग्रशृङ्गान्वितो मस मता खलु सैव कोटिः" ॥ अपि च अर्कस्य योऽसौ अधः शृङ्गोयस्य ऊर्द्धशृङ्गा युक्तश्चेत् तर्ह्येव कोटिर्भवतीति । यथा, तत्रैव ।
"यो रवेरधः शृङ्गोरसौ विधोरूर्द्धशृङ्गया युतः ।
सैव कोटिर्मम मता । अत्रोपपत्तिः । इष्टार्कचन्द्रोर्य्योस्तरभावेन यदन्तरं स भुजः । ऊर्द्धाधोभावेन यदन्तरं सा कोटिः । सा चैव भवति । उदयेऽस्ते वा यदि शृङ्गोन्नतिस्तदारविशृङ्गोरभावात् प्राग्विशृङ्गोरेव कोटिः । यदा निशि रवेरधः शृङ्गः तदा स शृङ्गोर्विधोरुदयशृङ्गया युतो यावान् तावत् तयोर्यच्छयोः ऊर्द्धाधरमन्तरं सैव कोटिरुचिता । यतो ग्रहा पूर्ब्बवेलात्समोऽवस्थानवशेन

शृङ्गिणः शृङ्गसुन्नतमवलोक्यम् । अतः खाव स्थानसमसूत्राद्दूर्द्धरूपिण्या कोट्या भवितव्यम् । भुजकोटिकर्णक्षेत्रं यथं दृक्षेत्रयत आदर्शवत् सम्मुखं यथा भवति तथा कल्प्यम् ॥ किञ्च, उदयास्तसूत्रकल्पितक्षेत्रावयवविशेषः । तत्रैव यथा,—
"सूत्राद्दिवा शृङ्गुतलं यमग्रं
याम्यां गतं हि द्युनिशं कुजोर्द्धे ।
अधश्च सौम्यां निशि सौम्यमस्मात्
सदृग्युक्तियुक्तं शृतलं निरुक्तम् ॥
सौम्याग्रकाग्राद्गृतलं हि याम्यं
याम्याग्रकाग्रात् पुनरेव याम्यम् ।
तदन्तरैक्यं समशृङ्गखेट-
मध्यांशजीवां क्षिति बाऽऽभाऽः ।
दृग्ज्यां श्रुतिं चाथ तयोस्तु कोटिं
पूर्ब्बापरां वर्गवियोगमूलम्" ॥
"क्षितिजस्याहोरात्रवृत्तसम्मातयोर्यद्यं सूत्रमुदयास्तसूत्रम् । यद्दक्षिणात् गच्छः शृङ्गः तस्य तलं उदयास्तसूत्रात् दक्षिणतो भवति । यतः क्षितिजादुपरि दक्षिणतोऽहोरात्रवृत्तं गतम् । अधस्तु उत्तरतो गतम् । अतो निशि उत्तरं शृतलम् । अथ भुज उच्यते । उत्तरगोलेऽग्रोत्तरं शृतलं याम्यम् । अतस्तेनोनाया बाऽऽभवति । बाऽऽर्नामशृङ्गः प्राचि अपरसूत्रयोरन्तरम् । यदाऽया शृङ्गतलादूना तदा तयोरन्तरं दक्षिणं शृङ्गुतलं बाऽऽः स्यात् । एवं समशृङ्गप्रवेशादुपरि दक्षिणगोले तु अया याम्या शृङ्गुतलं च याम्यं तयोर्योगे शृते बाऽऽः स्यात् रविसमसमशृङ्गयोरन्तरांशानां ज्या बाऽऽः । तत्र या दृग्ज्या स कर्णः । तयोर्वर्गान्तरपदं पूर्ब्बापरा कोटिः" ॥) एका । इत्यमरः ॥ पिड़िङ्ग शाक इति भाषा ॥

कोटिकः, पुं, (कोट्या बाऽऽसङ्ख्यया कायति प्रकाशते । कै + कः ।) इन्द्रगोपनामकीटः । इति जटाधरः ॥

कोटिजित्, पुं, (कोटिं पण्डितानां समूहं विचारयज्ञे कोटिपरिमितं ग्रन्थ वा जितवान् । कोटि + जि + क्विप् तुगागमश्च ।) कालिदासः । इति त्रिकाण्डशेषः ॥ (मेधाविनः । इति शब्दार्थचिन्तामणिः ॥)

कोटिपात्रः, पुं, (कोटिरग्रभागः पात्रं यस्याकारमस्य । यद्वा, कोटिरग्रं पात्रे जलांशेऽस्य जलक्षेपणादिति भावः ।) केनिपातकः । इति हेमचन्द्रः ॥ केरोआज इति भाषा ॥

कोटिरः, पुं, (कोटिं असङ्ख्यं राति ददातीति । रा + कः ।) इन्द्रः । गरुडः । इन्द्रगोपकनामकीटः । इति मेदिनी ॥

कोटिवर्षं, क्ली, (कोटिसङ्ख्यानि वर्षाणि उपस्थितान् शत्रून् प्रति वर्षमत्र । कोट + इच् + वप् ।) नगरपुरम् । इति शब्दरत्नावली ॥

कोटिवर्षा, स्त्री, (कोटिभिरग्रभागैर्वर्षति मधु कोटि + इच् + वप् । स्त्रियां टाप् ।) एका । इत्यमरः ॥ पिड़िङ्ग शाक इति भाषा ॥

कोट्टवी

(अस्याः पर्य्यायाः यथा।
"स्पृक्काख्यः ब्राह्मणी देवी मरुन्माला लता लघुः।
रुमुद्वान्ता वधूः कोटिवर्षा लङ्घोपिकेत्यपि" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
गुणाश्चास्याः स्पृक्काशब्दे ज्ञेयाः॥)

कोटिघ्नः, पुं, (कोट्या अग्रेण घ्नति नाशयति चूर्णीकरोतीत्यर्थः। कोटि + घ्नो + कः।) लोष्टभङ्गसाधनमुद्गरः॥ इति भरतः॥ मइ इति ख्यात इति केचित्। तत्पर्य्यायः। लेष्टुभेदनः २। इत्यमरः। २। ६। १२॥ लेष्टुघ्नः ३ कोटीघ्नः ४। इति रत्नकोषः॥ लेष्टुभेदी ५ चूर्णदण्डः ६ लोष्टभङ्गार्थमुद्गरः ७। इति शब्दरत्नावली॥ लोष्टघ्नः ८। इति जटाधरः॥ (कोटिरस्यास्तीति लोमादित्वात् घ्नः। कोटियुक्ते, त्रि॥ वासुकीवंशीयनागविशेषः। यथा, महाभारते। १। ५७। ५।
"कोटिघ्नो मानसः पूर्णः घ्नलः पालो हलीमकः"॥)

कोटिघ्नः, [स्] व्य, (कोटि + वारार्थे चघ्नस्।) कोटिः कोटिः। इति व्याकरणम्।
(यथा, रघौ। २। ४६।
"गाः कोटिघ्नः स्वगृह्यता घटोघ्नीः"॥)

कोटी, स्त्री, (कुट् + "सर्व्वधातुभ्य इन्"। उणां ४। ११७। इतीन् ततो वा ङीप्।) खड्गादेरग्रभागः। इत्यमरटीका॥ एकाघ्नाकम्। इति शब्दरत्नावली। कोटिसङ्ख्या। इति लिङ्गादिसंग्रहटीकायां भरतः॥ (यथा, महाभारते। ७। जयद्रथवधपर्व्वणि। ८७। ३०।
"प्रतोदेच्छापकोटीभिर्हलारैः साधु वाहितैः।
कशापार्ष्णाभिघातैश्च वाग्भिरश्वाभिरेव च"॥)

कोटीरः, पुं, (कोटीभिः ईरयति प्रेरयति। कोटी + ईर् + णिच् अच्।) जटा। इति चिकाण्डशेषः॥ (यथा, आनन्दलहर्य्याम्। ३०।
"किरीटं वैरञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम्"॥)
किरीटम्। इति हेमचन्द्रः॥

कोटीवर्षं, क्ली, (कोटीसङ्ख्यकानि वाणाद्यस्त्राणि विपक्षान् प्रति वर्षन्ति अत्र। कोटी + वृष् + अप्।) वाणपुरम्। इति चिकाण्डशेषः॥ (इदानीं देवीकोट इत्याख्ययाख्यायते॥)

कोटीवर्षा, स्त्री, (कोटीं कोटीर्वा वर्षति माधुर्य्यादिस्वादम्। वृष् + अच् + टाप्।) कोटिवर्षा। इति शब्दरत्नावली। पिड़िङ्ग शाक इति भाषा॥

कोटीघ्नः, पुं, (कोटीं लोष्ट्रादीनां कोटीसंख्यां घ्नति चूर्णयतीति। कोटी + घ्नो + कः।) कोटिघ्नः। इत्यमरटीकायां भरतः॥

कोट्टं, क्ली, (कुट्टयते विपक्षोऽस्मिन् अत्र वा। कुट्ट + अधिकरणे घञ्। निपातनात् गुणाभावः।) दुर्गम्। इति हेमचन्द्रः। केल्লা গড় इत्यादि भाषा॥

कोट्टः, पुं, (कुट्टान्ते घत्रवोऽत्र। कुट्ट छेदे + घञ्। निपातनात् गुणाभावः।) दुर्गपुरम्। इति लिङ्गादिसंग्रहे अमरः॥

कोट्टवी, स्त्री, दुर्गा। इति चिकाण्डशेषः॥ नग्ना स्त्री। इति शब्दरत्नावली॥ नग्नमुक्तकेशी नारी।
"या त्ववासा मुक्तकेशी कोट्टवी नग्निका च सा"॥
इति जटाधरः॥ (कोट्टं कुट्टनं छेदनं खण्डनमेति यावत् वाति हिनस्ति निवारयतीत्यर्थः। यद्वा, कोट्टे कुट्टने संग्रामे खण्डतस्य रक्षार्थं वाति गच्छतीति। कोट्ट + वा गमनहिंसयोः + कः गौरादित्वात् ङीष्॥) नग्ना स्त्रीरूपिणीदुर्गा।
"तन्माता कोट्टवी नाम नग्ना मुक्तशिरोरुहा।
पुरोऽवतस्थे क्षणस्य पुत्रप्राणैरिरक्षया"॥
इति भागवते। १०। ६३। २०॥
(नहीयं स्वयमाद्याशक्तिरूपिणी दुर्गा किन्त्वस्याः लम्बाख्योऽङ्गभो भागः। यथा, हरिवंशे वाणक्षयोषाख्ये १८२ अध्याये २२-२३।
"व्यादिश्यभाने चक्रे तु क्षणेनाप्रतिभौजसा।
कुमाररक्षणार्थाय बिभ्रती सुतनुं तदा॥
दिग्वासा देववचनात् प्रातिष्ठत्त कोट्टवी॥
लम्बा नाम महाभागा भागो देव्यास्तथाङ्गभः।
चित्राकनकशक्तिस्तु सा च नग्ना स्थितान्तरे"॥)

कोट्टवीपुरं, क्ली, (कोट्टव्याः पुरम्।) वाणपुरम्। इति शब्दरत्नावली॥

कोट्टारः, पुं, (कुट्ट + व्यारक्प्रत्ययः। पृषोदरात् साधुः। कोट्टं कोटं दुर्गमित्यर्थः ऋच्छति प्राप्नोति। कोट्ट + ऋ + "कर्म्मण्यण्"। इति अण्।) नागरः। कूपः। पुष्करिणीः पाटकः। इति मेदिनी॥ दुर्गपुरम्। इति लिङ्गादिसंग्रहटीकायां भरतः॥

कोठः, पुं, (कुठि + अच् निपातनात् नलोपे साधुः।) चक्राकारकुष्ठरोगः। तत्पर्य्यायः। मण्डलकम् २। इत्यमरः। २। ६। ५४॥ दुश्चर्म्मा ३ त्वग्दोषः ४ चर्म्मदूषिका ५। इति राजनिर्घण्टः॥ तस्य लक्षणं यथाह माधवकरः।
"असम्यग्वमनो दीर्णपित्तश्लेष्मान्नियन्त्रैः।
मण्डलानि सकण्डूनि रागवन्ति बहूनि च।
उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते"॥
अन्यच्च। "वरटीदष्टनिकाशूः कण्डूमान् लोहितोऽसकफपित्तात्। क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः"॥ इति रत्नितः॥
(अस्य चिकित्सा यथा, वैद्यकचक्रपाणिसंग्रहे पीतपित्तोदर्दाद्यधिकारे।
"अग्निमन्थभवं मूलं पिष्टं पीतञ्च सर्षपा।
पीतपित्तोदर्दकोठान् सद्यो हादेव नाशयेत्॥
उदर्दोक्तां क्रियाञ्चापि कोठरोगे समाचरेत्।
सर्पिः पीत्वा महातिक्तं कार्य्यं ग्रोणितमोक्षणम्"॥)

कोठरः, पुं, (कुठ्यते क्षिप्यतेऽसौ। कुठ + अरप्रत्ययः।) अङ्गोठवृक्षः। इति राजनिर्घण्टः॥ आँकोड़ इति भाषा॥

कोठरपुष्पी, स्त्री, (कोठरस्य पुष्पमिव पुष्पमस्याः। कोठरपुष्प + ङीप्।) वृद्धदारकः। इति राजनिर्घण्टः॥ (वृद्धदारकशब्देऽस्या गुणादयो ज्ञातव्याः॥)

कोणः, पुं, (कुणति वादयत्यनेन कुणति वादयतीति वा। कुण शब्दे + करणे घञ्। कर्त्तरि + अच् वा।) वीणादिवाद्यम्। भेरीप्रभृति यन्त्र वाजाइ-

कोणः

वार काठी इति भाषा॥ (यथा, रामायणे २। ७१। २६।
"भेरीमृदङ्गवीणानां कोणसंघट्टितः पुनः"॥)
अस्त्रादेरग्रभागः। तत्पर्य्यायः। पालिः २ अस्रिः ३ कोटिः ४। इत्यमरः। २। ८। ९३॥ (यथा, कादम्बर्य्याम्। "कनक कोणैरभिहन्यमानः"॥)
वाद्यप्रभेदः। स्फटादेरेकदेशः। (यथा, कथासरित्सागरे। १९। ३३।
"खण्डस्याङ्कने तेन चत्वारः खर्णपूरिताः।
कुम्भाश्चतुर्षु कोणेषु निगूढाः स्थापिता भुवि"॥)
लगुड़ः। इति मेदिनी। मङ्गलग्रहः। इति हेमचन्द्रः॥ शनिः। इति विश्वः॥ द्वयोर्दिशोर्म्मध्यभागः। इति राजनिर्घण्टः॥ अस्य विवरणं विदिक्शब्दे द्रष्टव्यम्॥ (कोणमात्रम्। यथा, तन्त्रसारे।
"विन्दुत्रिकोणवसुकोणदशारयुग्मम्"॥)

कोणकुणः, पुं, (कोणे मस्तकैकदेशभागे कुणति विचरतीति। कुण् + अच्।) उल्कुणः। इति हेमचन्द्रः॥ उकुण इति भाषा। (मत्कुणम्। छारपोका इति भाषा। खज्जल इति हिन्दीभाषा॥)

कोणिः, त्रि, (कुण + "सर्व्वधातुभ्य इन्"। उणां ४। ११७। इति इन् बाहुलकात् गुणः।) कुणिः। इत्यमरटीका॥ कोमा इति भाषा॥

कोथः, पुं, (कुथ्यते पूतित्वं गम्यते अनेन। कुथ् पूतित्वे + करणे घञ्।) नेत्ररोगभेदः। कथो इति भाषा। (कुथ्यति गुदं क्लिणोति। कुथ् कर्त्तरि अच्। गुह्यक्षयकारकभगन्दर रोगविशेषः। यथा, सुश्रुते।
"मूढ़ेन मांसलुब्धेन यदस्थिग्रस्यमन्नेन सहाभ्यवहृतं यदावगाढ़पुरीषोन्मिश्रमपानेनाधः प्रेरितं असम्यगागतं गुदं क्लिणोति तत्र क्षतनिमित्तः कोथ उपजायते"। भावे घञ्। गलनम्। यथा, तत्रैव।
"तस्मिन् क्षते पूयरुधिरावकीर्णमांसकोथे भूमाविव जलसिक्तायां क्षमयो जायन्ते"॥)
पूटिते मथिते च त्रि। इति मेदिनीकरहेमचन्द्रौ॥

कोदण्डं, क्ली, (कु शब्दे + विच्। कौः शब्दायमानो दण्डोऽस्य।) धनुः। इत्यमरः। २। ८। ८३॥ (यथा, भागवते ३। २१। ५२।
"विस्फूर्জ্জच্চণ্ডকোदण्डो रथेन चासयन्नघान्"॥)

कोदण्डः, पुं, (कोदण्डं धनुः तत्सदृशमाकारो विद्यते अस्य। अर्श आदित्वादच्।) भूः। जनपदविशेषः। इति मेदिनी॥

कोद्रवः, पुं, (कु + विच्। कौः सन् द्रवतीति। द्रु + अच्। द्रवः। कौ द्रव इति कर्म्मधारयः। केन वायुना द्रवति वा पृषोदरात् पूर्ब्बस्य ओकारादेशे साधुः।) धान्यविशेषः। कोदो इति भाषा। तत्पर्य्यायः। कोरदूषः २। इत्यमरः। २। ९। १३॥ कुद्रवः ३। इति तट्टीका॥ कुद्दालः ४ मदनायकः ५ कोद्रवः ६ कोरद्यकः ७। इति शब्दरत्नावली॥

कोद्रवः

(यथा श्रुतौ। "अयज्ञिया वै कोद्रवाः"॥) अपि च।
"कोद्रवः कोरदूषः स्यादुद्दालो वनकोद्रवः।
कोद्रवो वातलो ग्राही हिमः पित्तकफापहः।
उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम्" ॥
इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। व्रणिनां पथ्यकारकत्वम्। कफपित्तहरत्वम्। रूक्षत्वम्। मोहकारित्वम् नूतनस्य तु गुरुत्वञ्च। इति राजनिर्घण्टः॥ परमग्राहित्वम्। वातलत्वम्। इति राजवल्लभः॥

कोपः, पुं,- (कुप्यते इति। कुप् + भावे घञ्।) क्रोधः। इत्यमरः। १। ७। २६॥
(यथा, विष्णुपुराणे १। ११। १३।
"वत्स! कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति"॥)

कोपक्रमं, क्ली, (उपक्रम्यते आरभ्यते यत् तत् उपक्रमं क्षयादिकम्। उप + क्रम् + कर्म्मणि घञ्। कस्य ब्रह्मणः उपक्रमं सृष्टिः।) ब्रह्मणः सृष्टिः। इत्यमरटीकायां रायमुकुटः॥ (कोपेन क्रम्यते इति। यद्वा, कोपस्य क्रमः उद्योगोऽस्य।) कोपयुक्ते, त्रि॥

कोपनः, त्रि, (कुप् + युच्।) कोपविशिष्टः। इति जटाधरः॥ (यथा, महाभारते १। २९। १६।
"आसीद् विभावसुर्नाम महर्षिः कोपनो भृशम्" ॥
पुं, बलिवंशीयः कोपनो नामासुरः।
यथा, हरिवंशे। ४१। ८४।
"शूरभः शूलभस्मैव कुपनः कोपनः क्रथः" ॥
क्ली, कुप् + णिच् भावे ल्युट्। दोषविकारकारकव्यापारविशेषकोपनिष्पादनम्। यथा, महाभारते अनुगीतायाम्। १४। १७। १३।
"स्वदोषकोपनाद्रोगं लभते मरणान्तिकम्।
अपि वोद्बन्धनादीनि परीतानि व्यवस्यति" ॥)

कोपनकः, पुं, (कोपनः कोपशील इव कायति प्रकाशते। कै + कः।) चोरकनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

कोपना, स्त्री, (कुप्यतीति। कुप् + ताच्छील्ये युच् + टाप्।) कोपवती। तत्पर्य्यायः। भामिनी २। इत्यमरः। २। ६। ४॥ चण्डी ३। इति जटाधरः॥ भीमा ४। इति शब्दरत्नावली॥ (यथा, कुमारे। ३। ८।
"कथासि कामिन् सुरतापराधात्
पादानतः कोपनयावधूतः।
तस्याः करिष्यामि दृढ़ानुतापं
प्रवालशय्याशरणं शरीरम्" ॥)

कोपलता, स्त्री, (कोपहेतुर्लता।) कर्णस्फोटालता। इति राजनिर्घण्टः॥

कोपी, [न्] त्रि, 'अवश्यं कुप्यति इति आवश्यके णिनिः।) क्रोधनः। इत्यमरः। ३। १। ३२॥ (यथा, मार्कण्डेये २८। २९।
"सर्व्वसङ्कल्परित्यागो ब्रह्मचर्य्यमकोपिता।
यतेन्द्रियत्वमावासे नैकस्मिन् वसतिस्थिरम्" ॥)
जलपारावते, पुं,। इति राजनिर्घण्टः॥

कोमलं, क्ली,(कौति शब्दायते वाय्वादियोगेन स्रोतोवेगेन वा। कु शब्दे डुमादित्वात् कलच् तस्य मुट् च। वाऽलकात् गुणः।) जलम्॥ इति मेदिनी॥

कोमलः, त्रि, (कमु कान्तौ + वाऽलकात् कलच् अत उत्वं गुणश्च॥) अकठिनः। नरम इति भाषा। तत्पर्य्यायः। सुकुमारः २ मृदुलः ३ मृदुः ४। इत्यमरः। ३। १। ७८। पेलवः ५। इति जटाधरः॥ मनोज्ञः। इति शब्दरत्नावली॥
(यथा, रघुः। ९। ३५।
"श्रुतिसुखभ्रमरस्वनगीतयः
कुसुमकोमलदन्तरुचो वधुः।
उपवनान्तलताः पवनाहतैः
किसलयैः सलयैरिव पाणिभिः" ॥)

कोमलकं, क्ली, (कोमल + संज्ञायां कन्।) मृणालम्। इति शब्दचन्द्रिका॥ (स्वार्थे कन्। जलम्॥)

कोमला, स्त्री, (कोमल + स्त्रियां टाप्।) छीरिका। इति शब्दचन्द्रिका॥ (रत्नानुप्रासघटकवृत्तिभेदः। छीरिकाशब्देऽस्य विवरणं द्रष्टव्यम्॥)

कोमासिका, स्त्री, (कु ईषत् उमा अतसीवृक्षः स इव आस्ते। आस् + ण्वुल् + टाप् अत इत्वम्। कोः कादेशः।) जालिका। इति हारावली॥ फलेर जालि इति भाषा॥

कोयष्टिः, पुं, (कं जलं यष्टिरिवास्य एषोदरात् अत उत्वे गुणत्वे च साधुः।) जलकुक्कुभपक्षी। इति त्रिकाण्डशेषः॥ (यथा, मनौ। ५। १३।
"प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान्"॥)

कोयष्टिकः, पुं, (कोयष्टि + संज्ञायां कन्।) पक्षिभेदः। कोँड़ापक्षी इति भाषा। इत्यमरः। २। ५। ३५॥

कोरकः, पुं, (कुच संस्त्याने + कर्त्तरि ण्वुल्। लस्य रत्वम्।) कलिका। इत्यमरः। २। ४। १६॥
("कलिका कोरकः पुमान्" इत्यमरवाक्यं प्रायिकाभिप्रायेण इति बोध्यम्। यतः "कोरकं कुड्मलेऽपिस्यात् कक्कोलकमृणालयोरिति" "कोरकोऽस्त्री कुड्मले स्यादिति" च विश्वमेदिनीकाराभ्यामुक्तम्॥)

कोरकः, पुं क्ली, (कुच् + ण्वुल्। लस्य रः।) मुकुलम्। (यथा, माघे। ७। २६।
"मरुदवनिरुहां रजोवधूभ्यः
समुपहरन् विचकार कोरकाणि" ॥)
कक्कोलकम्। मृणालम्। इति मेदिनी॥ चोरनामगन्धद्रव्यम्। इति जटाधरः॥

कोरङ्गी, स्त्री, (कुरति कोरङ्गीत्याख्यां गच्छतीति कुर् + अङ्गच् गौरादित्वात् ङीष्।) सूक्ष्मैला। इत्यमरः। २। ४। १२५॥ (अस्याः पर्य्यायाः यथा, "सूक्ष्मोपकुञ्चिका तुच्छा कोरङ्गी द्राविड़ीगटिः"॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) पिप्पली। इति राजनिर्घण्टः॥

कोरदूषः, पुं, (कोलं संस्त्यानं दूषयति। दूष् + णिच् "कर्म्मण्यण्"। ३। २। १। इत्यण्। लस्य रत्वम्।) कोद्रवः। इत्यमरः। २। ९। १६॥ (यथा, महाभारते। ३। १९०। १८—१९।
"ईदृशो भविता लोको युगान्ते पर्य्युपस्थिते।
वस्त्राणां प्रवरा श्रेष्ठी धान्यानां कोरदूषकः।
भार्य्यामित्राश्च पुरुषा भविष्यन्ति युगक्षये" ॥

अस्य गुणा यथा,—
"स कोरदूषः श्यामाकः कषायमधुरो लघुः।
वातलः कफपित्तघ्नः प्रीतसंग्राहि शोषणः" ॥
इति सूचस्थाने सप्तविंशेऽध्याये चरकेणोक्तम्॥)

कोलं, क्ली, (कुल् अच् गौरादित्वात् ङीष्। कोली तस्याः फलमित्यण् तस्य लुक् "लुक्तद्धितलुकि"। १। २। ४९। इति ङीषो लुक्।) वदरीफलम्। तत्पर्य्यायः। कुवलम् २ फेनिलम् ३ सौवीरम् ४ वदरम् ५ घोण्टा ६। इत्यमरः। १। ४। ३९॥ पिच्छिलम् ७ स्वादुफलम् ८ वदरीफलम् ९। इति शब्दरत्नावली॥ कोकिलम् १०। इति जटाधरः॥ अपि च।
"पुंसि स्त्रियाञ्च कर्कन्धुर्वदरीकोलमित्यपि।
फेनिलं कुवलं घोण्टा सौवीरं वदरञ्च तत्॥
अम्लाप्रिया कुहा कोलिविषमो भयकण्टकः" ॥
अथ वदरविशेषाणां लक्षणानि गुणाश्च।
"पक्वमानं सुमधुरं सौवीरं वदरं महत्।
सौवीरं वदरं प्रीतं भेदनं गुरु शुक्लम्॥
वृंहणं पित्तदाहास्रक्षयक्षतानिवारणम्।
सौवीरास्तु लघु संपक्वं मधुरं कोलमुच्यते॥
कोलन्तु वदरं दाहि रूक्षमुष्णञ्च वातहृत्।
कफपित्तकरं चापि गुरु सारकमीरितम्॥
कर्कन्धुः क्षुद्रवदरं कथितं पूर्व्वसूरिभिः।
अम्लं स्यात् क्षुद्रवदरं कषायं मधुरं मनाक्॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम्।
शुष्कं भेद्यग्निकृत् सर्व्वं लघु दृष्यात्क्षमास्रजित्" ॥
इति भावप्रकाशः॥ वदरादिद्वयं वृक्षगालकोलौ। वदरीसदृशा घोण्टा वृक्षगालकोलिः। यदुक्तम्।
"वदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत्।
अटव्यामेव सा घोण्टा गोपघोण्टेति घोष्यते" ॥
इति सुभूतिः॥
"हस्तिकोलिर्गोपघोण्टा घोण्टा च वदरीच्छदा।
वृक्षगालकोलिः कर्कन्धुः" इति। रत्नकोषः॥ केचित्तु कोलादिद्वयं वदरीफले सौवीरादिद्वयं वृक्षगालकोलाविच्छन्ति॥ स्वामी तु "कर्कन्धुर्वदरी कोलिर्घोण्टा कुवलफेनिलौ। सौवीरं वदरं कोलम्" ॥ इति पठति। तत्राद्याश्चत्वारो वृक्षार्थाः अन्ये फलार्था घोण्टा तूभयसृगिति व्याचष्टे। "सौवीरं वदरं कोलं वदरीणां फलं मतम्"। इति क्षीरान्तरञ्च। इति भरतः॥ * ॥ अस्य गुणः। अम्लत्वम्। वायुकफनाशित्वञ्च॥ पक्वस्यास्य गुणाः। वायुपित्तनाशित्वम्। स्निग्धत्वम्। सुमधुरत्वम्। सारकत्वञ्च॥ शुष्कस्यास्य गुणाः। कफवायुनाशित्वम्। पित्तविरोधित्वञ्च॥ पुरातनस्यास्य गुणाः। श्रमदृष्यानाशित्वम्। स्निग्धत्वम्। लघुत्वञ्च॥ अस्य मज्जगुणाः। मधुरत्वम्। पित्तच्छर्द्दिदृष्यानाशित्वञ्च। इति राजवल्लभः॥ * ॥ तोलकपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, चरके कल्पस्थाने १२ अः।
"प्रस्थौ द्वौ द्रंक्षणं विद्यात् कोलं वदरमेव च"॥)
भल्लिचम्। इति राजनिर्घण्टः॥ चव्यम्। इति वैद्यकम्॥

कोलः, पुं, (कोलति कामपि बाधां न सहते इव शत्रुं प्रतिधावतीति। कुल + अच्।) शूकरः। (कोलति शब्दते

कोलव

जले इति।) ज्वरः। इत्यमरः। १। १०। २१॥ भेला माड़ इत्यादि भाषा। अङ्गपालिः। घृनिः। चित्रम्। चिता इति भाषा। (कोलन्ति आकिञ्चन्यं कुर्वन्त्यत्र। कुल + अधिकरणे हलश्चेति घञ्।) क्रोड़म्। इति मेदिनी। देशविशेषः। इति शब्दरत्नावली॥ अस्त्रभेदः। इति धरणी॥ वर्णसङ्करजातिविशेषः। (यथा, हरिवंशे। ३२। १२३।

"पाण्ड्राश्च चोलाश्चैव कोलसर्पाश्च पार्थिव!।
तेषां जनपदाः स्फीताः पाण्ड्याश्चोलाः सकेरलाः"॥)

स तु वेटात् तौवरकन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ अस्त्रधारिक्षेत्रजातिविशेषः। स च पूर्व्वं क्षत्रिय आसीत् सगररोषेणासौ वेदयागादावनधिकारी कृतः। एतद्विवरणं हरिवंशे १४ अध्याये द्रष्टव्यम्॥

(अयन्तु कोलः यजातिवंशीयस्य राज्ञो दुष्मन्तस्य पौत्रेष्वन्यतमः॥ इदानीं पार्व्वत्यः असभ्यजातिविशेषः। उत्कलदेशादुत्तरभागे ह्यस्य वसतिः। इयन्तु कोलजातिः सत्यप्रिया सरलप्रकृतिः अतिथिसत्कारप्रिया चेति उच्यते॥)

कोलकं, क्ली, (कोल् + संज्ञायां कन्। कुल् + ह्रस्वादित्वात् वुन् वा।) गन्धद्रव्यविशेषः। काँकला इति भाषा। मरिचम्। इत्यमरः। २। ९। ३६॥

कोलकः, पुं, (कुल् + कर्त्तरि ण्वुल् ह्रस्वादित्वात् वुन् वा।) अङ्गेष्ठवृक्षः। इति राजनिर्घण्टः॥ वड़वारवृक्षः। इति जटाधरः॥

कोलकन्दः, पुं, (कोल इव कन्दोऽस्य।) महाकन्दविशेषः। तत्पर्य्यायः। क्रमिघ्नः २ पद्मजः ३ वज्रपद्मजः ४ पुटालुः ५ सुपुटः ६ पुटकन्दः ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। क्रमिदोषनाशित्वम्। वान्तिविच्छर्द्दिशमनत्वम्। विश्रदोषनिवारणत्वञ्च। इति राजनिर्घण्टः॥

कोलकर्कटिका, स्त्री, (कोल इव कर्कटिका।) मधुखर्ज्जूरिका। इति राजनिर्घण्टः॥

कोलदलं, क्ली, (कोलं वदरीफलं तद्वद्दलमस्य।) नखीनामगन्धद्रव्यम्। इत्यमरः। २। ४। १३०॥ (नखीशब्देऽस्य गुणादयो ज्ञातव्याः॥)

कोलनासिका, स्त्री, (कोलस्य सूकरस्य नासिकेव नासिका।) नग्न + ङीष् टाप् अत इत्वम्।) वह्निशिखेक्षुः। इति हारावली॥

कोलपुच्छः, पुं, (कोलस्य सूकरस्य पुच्छ इव पुच्छोऽस्य।) क्षुद्रपक्षी। इति हारावली॥

कोलमूलं, क्ली, (कोलस्य वदरीफलस्य मूलवत् मूलमस्य। यद्वा, कोलं वदरीफलमिव मूलमस्य।) पिप्पलीमूलम्। इति राजनिर्घण्टः॥

कोलम्बकः, पुं, (कुल् + वाऽलकात् अम्बच्। ततः संज्ञायां कन्।) वीणायाः कायः। इत्यमरः। १। ७। ७॥ स तु तन्त्रीदण्डादिसमुदायः शरीरम्। अलाबुदण्डकुम्भसमुदायस्तन्त्रीहीन इत्यन्ये। इति भरतः॥

कोलवल्ली, स्त्री, (कोलो वराहः तल्लोमवत् वल्ली। वराहलोमतुल्यशूकावत्त्वात् तथात्वम्।) गजपिप्पली। इत्यमरः। २। ४। ९७॥ चव्यम्। इति राजनिर्घण्टः॥ (अस्याः पर्य्याया यथा,—

"चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली।
कपिवल्ली कोलवल्ली श्रेयसीवह्निरस्य सा"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

कोलशिम्बी, स्त्री, (कोलस्य सूकरस्य पादाकारा शिम्बिरस्याः। ततो वा ङीष्।) लताविशेषः। आलुकुसी इति भाषा। तत्पर्य्यायः। क्षुद्रफला २ खड्गा ३ सूकरपादिका ४ काकाण्डोला ५ दधिपुष्पा ६ काकाण्डा ७ पर्य्यङ्गपादिका ८। अस्या गुणाः। वायुनाशित्वम्। गुरुत्वम्। उष्णत्वम्। कफपित्तकारित्वञ्च। इति राजनिर्घण्टः॥ (तत्पर्य्यायगुणाः। यथा, भावप्रकाशे।

"कोलशिम्बी क्षुद्रफला तथा पर्य्यङ्गपालिका।
कोलशिम्बी समीरघ्नी गुरुरुष्णा कफवातहृत्।
शुक्राग्निबलदाक्षुद्रव्या रुचिकृत् वह्निविड्गुरुः"॥)

कोला, स्त्री, (कुल् + ज्वलादित्वात् णः ततष्टाप्।) कोलिशुद्धः। इति शब्दरत्नावली॥ पिप्पली। (अस्याः पर्य्याया यथा,—

"पिप्पली चपला ग्रौढ्री वैदेही मागधी कणा।
क्षुण्णोपकुल्या मगधी कोला स्यात्तिक्ष्णतण्डुला"॥)
चव्यम्। इति मेदिनी॥ (अस्याः पर्य्याया यथा,—

"चव्यं तेजोवती कोला नाकुली च विकोषणा"॥
इति वैद्यकरत्नमालायाम्॥)

कोलाहलः, पुं, देशविशेषः। इति शब्दरत्नावली॥ तत्र पुरं कान्यकुब्जम्॥

कोलाहलः, पुं, (कोल एकीभूताव्यक्तशब्दविशेषः तं आहलति आलिखतीति। हल विलेखने + अच्।) वड़विधदूरगाव्यक्तध्वनिः। तत्पर्य्यायः। कलकलः २। इत्यमरः। १। ६। २५॥ कालकीलः ३। इति शब्दरत्नावली॥ (यथा, रामायणे। ३। ३१। ४१।

"ततो हलहलाशब्दः पुनः कोलाहलो महान्।
महान् राक्षसनादस्तु पुनस्तूर्य्यरवो महान्"॥)

कोलिः पुं स्त्री, (कुल् + "सर्व्वधातुभ्य इन्"। उणां ४। ११७। इतीन्।) वृक्षविशेषः। कुलगाछ इति भाषा। तत्पर्य्यायः। कर्कन्धुः २ वदरी ३। इत्यमरः। २। ४। ३६॥ कर्कन्धुः ४ वदरः ५ कोली ६ कोला ७ कुवली ८। इति तट्टीकायां भरतः॥ कोलः ९। इति तट्टीका सारसुन्दरी॥ (यथा, गारुड़े १९४ अध्याये।

"जातीपत्रं कोलिपत्रं तथाचैव मनःशिला।
एभिश्चैव कृता वर्त्तिर्वदराभा महेश्वर!।
धूमपानं कासहरं नात्र कार्य्या विचारणा"॥)

कोली, स्त्री, (कोलति पीनत्वेन जायते वर्द्धते वा। कुल् + अच् + गौरादित्वात् ङीष्। यद्वा, कोलि + वा ङीष्।) कोलिशुद्धः इत्यमरटीकायां भरतः॥ (अस्याः पर्य्याया यथा,—

"पुंसि स्त्रियान्तु कर्कन्धुर्वदरी कोलमित्यपि।
फेनिलं कुवलं घोटा सौवीरं वदरं महत्।
अजप्रिया कुशा कोली विषमोभयकण्टका"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

कोली

न्यग्रोधादिगणे व्यवहारोऽस्य यथा,—
"कोली कदम्बविल्वा मधुकं मधूकम्"॥
इति सूत्रस्थाने पञ्चदशेऽध्याये वाभटेनोक्तम्॥)

कोल्या, स्त्री, (कोलमर्हतीति यत्।) पिप्पली। इति रत्नमाला॥

कोविदः, त्रि, (कुड् शब्दे विच् कौः वेदः तं वेत्ति जानातीति। विद् + "इगुपधेति"। ३। १। १३५। इति कः।) पण्डितः। इत्यमरः। २। ७। ५॥ (यथा, भागवते। १। १२। २९।

"इति राज्ञ उपादिश्य विप्रा जातककोविदाः।
लब्धोपचितयः सर्व्वे प्रतिजग्मुः स्वकान् गृहान्"॥)

कोविदारः, पुं, (कुं भुवं विदारयति विदारयति भूमिं विदार्य्योद्भवतीत्यर्थः। दृ + "कर्म्मण्यण्"। ३। २। १। इति अण्। ततः पृषोदरादि साधुः।) रक्तकाञ्चनवृक्षः। तत्पर्य्यायः। चमरिकः २ कुद्दालः ३ युगपत्रकः ४। इत्यमरः। ३। ४। २२॥ काञ्चनारः ५ कार्य्यकारकः ६ कान्तपुष्पः ७ करकः ८ कान्तारः ९ यमलच्छदः १० काञ्चनालः ११ ताम्रपुष्पः १२ कुदारः १३ रक्तकाञ्चनः १४। इति जटाधरः॥ विदलः १५। इति शब्दरत्नावली॥ अपि च।

"काञ्चनालः काञ्चनको गण्डारिः श्वेतपुष्पकः"॥
अथ कचनारभेदः।

"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कुण्डली ताम्रपुष्पश्चाम्रान्तकः स्वल्पकेशरी॥
काञ्चनालो हिमो ग्राही तुवरः श्लेष्मपित्तनुत्।
क्रिमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहः॥
कोविदारोऽपि तद्वत्स्यात् तयोः पुष्पं लघु स्मृतम्।
रूक्षं संग्राहि पित्तास्रप्रदरच्छर्य्यतीसारनुत्"॥
इति भावप्रकाशः। अस्य गुणाः। कषायत्वम्। संग्राहित्वम्। व्रणरोपणत्वम्॥ दीपनत्वम्। कफवातमूत्रकृच्छ्रनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पुष्पगुणाः। धारकत्वम्। रुचिकारित्वम्। रक्तपित्तरोगे सुपथ्यत्वञ्च। इति राजवल्लभः॥ (यथा, पाकशास्त्रे।

"कोविदारकलिकातिकोमला
तक्रसिद्धविलतैलभाविता।
हिङ्गुवासकसुवासवासिता
वेसवारसुलितातिशोभदा"॥

पारिजातः। हरिवंशे कोविदारस्य उत्पत्तिकथने एतद्विवृतिर्यथा। १२४। ७०-७१।

"कोऽप्ययं दारुरित्याऽऽरजानन्तो यतो जनाः।
कोविदार इति ख्यातस्ततः स सुमहातरुः॥
मन्दारः कोविदारश्च पारिजातश्च नामभिः।
स वृक्षो जायते दिव्यो यस्यैतत् कुसुमोत्तमम्"॥)

कोशः, पुं, (कुश्यते संश्लिष्यते। कुश संश्लेषणे + घञ्कर्त्तरि चेति अधिकरणादौ घञ्।) अण्डम्। इति शब्दरत्नावली॥ कुश्यते आच्छाद्यते आयस्थानेभ्यः कोशः। कुश ग निष्कर्षे घञ् कोषो मूर्द्धन्यान्तः तालव्यान्त इत्यन्ये। इति भरतः। खड्गाद्यावरणम्। तत्पर्य्यायः। हिरण्यम् २। इत्यमरः। २। ९। ९१॥ खड्गाद्यावरणं हेम-

रूप्यञ्च मिलितं प्रत्येकञ्च कोशादिद्वयवाच्यम्। क्षतमावर्त्तितं अक्षतमाकरोत्यं चूर्णं घटिताघटितमिति स्वामी॥ क्षतमाभरणीकृतं अक्षतं चूर्णादिरूपमाकरोत्यमिति केचित्। (आवरण-विशेषः। यथा, भागवते। २। १। ३४।

"अव्यक्तमाऽऽहृदयं मनश्च
स चन्द्रमाः सर्व्वविकारकोशः"॥

मुकुलम्। यथा, रघौ। ३। ८।

"तिरस्कार भ्रमराभिलीनयोः
सुजातयोः पङ्कजकोशयोः श्रियम्"॥)

कोशकारः, पुं, (कोशं करोति त्वक्पत्रादिभिरात्मानमाच्छादयति। कोश + कृ + अण्।) इक्षुः। इति शब्दरत्नावली॥ मूर्द्धन्यमध्योऽप्ययम्॥ (कोशं करोति स्वमुखलालारूपतन्तुभिरात्मानमाच्छादयतीति। कीटविशेषः। गुटिपोका इति भाषा। यथा, भागवते। ६। १। ५२।

"कोशकार इवात्मानं कर्म्मणाच्छाद्य मुह्यति"॥)

कोशफलं, क्ली, (कोशे फलं बीजं अस्य।) कक्कोलकम्। इत्यमरः। २। ६। १४०। (कक्कोलकशब्देऽस्य विवरणं ज्ञेयम्॥)

कोशफला, स्त्री, (कोशे फलं यस्याः।) महाकोशातकी। चिचिङ्गी। इति राजनिर्घण्टः॥

कोशलः, पुं क्ली, (कुश् + "दृषादिभ्यः" उयां। १। १०८। कषः वाऽऽलजकात् गुणः।) अयोध्यानगरी। इति शब्दमाला उणादिकोषश्च। मूर्द्धन्यमध्योऽप्ययम्। (यथा, रामायणे। १। ५। ५।

"कोशलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्"॥)

कोशलात्मजा, स्त्री, (कोशलस्य कोशलेन्द्रपतेरात्मजा दुहिता।) कौशल्या। सा तु श्रीरामभाता दशरथराजपत्नी च। इति शब्दरत्नावली॥

कोशलिकं, क्ली, (कुशलाय कर्म्मणे हितजनककार्य्यसिद्ध्यर्थमिति भावः दीयते यत्। कुशल + ठक् निपातनात् पूर्ब्बस्य ओकारत्वम्।) उत्कोचः। इति हेमचन्द्रः। घुस इति भाषा। मूर्द्धन्यमध्योऽप्ययम्॥

कोशाङ्कं, क्ली, (कोश इव अङ्कमस्य।) हत्कटः। इति हारावली॥ ओकड़ा इति भाषा॥ मूर्द्धन्यमध्योऽप्ययम्॥

कोशातकः, पुं, (कोशं शिरःकोशं अतति गच्छति सातत्येन प्राप्नोतीति। अत + क्विप्।) कचः। इति विश्वमेदिन्यौ॥ (कोशं वेदात्मकमाकरमतति प्राप्नोतीति वाक्ये। यजुर्व्वेदीयशाखाविशेषः। कठवल्ली उपनिषद्॥)

कोशातकी, स्त्री, (कोशं अततीति। अत + क्विप्। ततः कोशातक + गौरादित्वात् ङीष्।) पटोली। घोषकः। इति मेदिनी॥ फलशाकविशेषः। झिङ्गा इति भाषा। तत्पर्य्यायः। क्षतच्छिद्रा २ जालिनी ३ क्षतवेधना ४ क्ष्वेड़ा ५ सुतिक्ता ६ घण्टाली ७ मदङ्गफलिनी ८ कर्कशच्छदा ९। अस्या गुणाः। स्निग्धिरत्वम्। कटुत्वम्॥ कषायत्वम्। पित्तवातकफनाशित्वम्। मलाध्मानविशोधनत्वञ्च। इति राजनिर्घण्टः॥ मूर्द्धन्यमध्योऽप्ययम्। महाकोशातकी। राजकोशातकी। यथा।

अथ नेनुआ।

"महाकोशातकी प्रोक्ता हस्तिघोषा महाफला।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः॥
महाकोशातकी स्निग्धा सरा पित्तानिलापहा"॥

अथ तोरइ।

"धामार्गवो पीतपुष्पो जालिनी क्षतवेधना।
राजकोशातकी चेति तथोक्ता राजिमत्फला॥
राजकोशातकी शीता मधुरा कफवातला।
पित्तघ्नी दीपनी श्वासज्वरकासक्लमिप्रणुत्"॥

इति भावप्रकाशः॥ (अस्या गुणा यथा,—

"कोशातकी फलं स्वादु मधुरं वातपित्तनुत्।
विपाके च कफं हन्ति ज्वरे शस्तं प्रदिश्यते"॥

इति हारीते प्रथमस्थाने १० अध्याये॥)

कोशातकी, [न्] पुं, (कोशातकोऽस्यास्तीति। इनिः।) वाणिज्यम्। वणिक्। वाड़वाग्निः। इति विश्वः॥

कोशाम्रः, पुं, (कोशे + आम्र इव फलमस्य।) फलवृक्षविशेषः। कोशाम इति भाषा। तत्पर्य्यायः। क्षमिवृक्षः २ सुकेशकः ३। इति भावप्रकाशः॥ घनस्कन्धः ४ वनाम्रः ५ जन्तुपादपः ६ क्षुद्राम्रः ७ रक्ताम्रः ८ लाक्षावृक्षः ९ सुरक्तकः १०। अस्य गुणाः। कुलशोथास्रपित्तव्रणकफापहत्वम्। तत्फलगुणाः। ग्राहित्वम्। वातघ्नत्वम्। अम्लत्वम्। उष्णत्वम्। गुरुत्वम्। पित्तदत्वञ्च। इति भावप्रकाशः॥ कफार्त्तिप्रदत्वम्। विदाहित्वम् विशोषकारित्वञ्च॥ पक्वस्य तस्य गुणाः। मधुरत्वम्। अम्लत्वञ्च॥ पद्मादियुक्तस्य तस्य गुणाः। दीपनत्वम्। रुचिपुष्टिबलकारित्वञ्च। तत्तैलस्य गुणाः। सारकत्वम्। क्षमिकुलव्रणापहत्वम्। अम्लमधुरत्वम्। बल्यत्वम्। पथ्यत्वम्। रोचनत्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ (रोगविशेषेऽस्य व्यवहारो यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये।

"कारञ्जं वा सार्षपं वा क्षतेषु
क्षेप्यं तैलं श्रियुकोशाम्रयोर्वा"॥)

कोशिका, स्त्री, (कोशः कोश इव पदार्थो वा अस्याः अस्तीति। कोश + पिच्छादित्वात् इलच्।) मुद्गपर्णी। इति राजनिर्घण्टः॥

कोशी, स्त्री, (कुश् संश्लेषे + अच् गौरादित्वात् ङीष्।) उपानत्। जुता मोजा इति च भाषा। तत्पर्य्यायः। पन्नध्नी २ पादविरजाः ३ पादरक्षी ४। इति हारावली॥ शुक्ला। इति हेमचन्द्रः। धान्यादिर् शुँया इति भाषा॥

कोषः, पुं क्ली, (कुष्यन्ते आकृष्यन्ते फलपुष्पोत्पादकमधुमयपरागादयो यस्मिन्। कुष् ग निष्कर्षे + घञ्कर्त्तरि चेति अधिकरणे घञ्।) कुड्मलः। कुँड़ि इति भाषा। खड्गपिधानम्। खाप इति भाषा। (यथा, महाभारते। ४। ४०। १३-१५।

"कस्यायं विपुलः खड्गो रत्ने कोषे समर्पितः।
हेमसूत्ररनाहश्यो नैवश्यो भारसाधनः॥
कस्य पाण्डुनखे कोषे ग्रायको हेमविग्रहः।
प्रभाशरूपसम्पन्नः पीत आकाशसन्निभः॥
कस्य हेममये कोषे सुतीक्ष्णे पावकप्रभे।
निस्त्रिंशोऽयं गुरुः पीतः श्लक्ष्णः परमनिर्व्रणः"॥)

अर्थसमूहः। (यथा, रघौ। ५। १।

"तमध्वरे विश्वजिति क्षितीशं
निःशेषविश्राणितकोषजातम्"॥)

दिव्यम्। (यथा, राजतरङ्गिण्याम्। ५। ३३५।

"ततो निक्षिप्य चरणं रत्नाक्ते मेषचर्मणि।
कोषं चक्रतुरन्योऽन्यं सखड्गौ नृपडामरौ"॥)

अण्डम्। क्षताक्षतं हेमरूप्यम्। इत्यमरः। २। ९। ९९। अस्य विवरणं ताम्रशब्दान्ते द्रष्टव्यम्। पात्रम्। जातीकोषः। जायफल इति भाषा। (जातीपत्री। अस्याः गर्भचिन्तामणिरसे।

"रसं तालं तथा लौहं प्रत्येकं कर्षमात्रकम्।
कर्षद्वयन्तथाभ्रं कर्पूरं वङ्गतान्त्रकम्॥
जातीफलं तथा कोषं गोक्षुरस्य शतावरीम्।
बलातिबलयोर्मूलं प्रत्येकं तोलकं शुभम्॥
वारिणा वटिका कार्य्या द्विगुञ्जा फलमानतः।
सन्निपातं निहन्त्याशु स्त्रीणाञ्चैव विशेषतः॥
गर्भिण्या ज्वरदाहघ्नं प्रदरं क्षुतिकामयम्"॥

इति वैद्यकभैषज्यरत्नावल्यां स्त्रीरोगाधिकारे॥) शब्दादिसंग्रहः। इति मेदिनी। (यथा, अमरकोषः॥) भाण्डागारम्। पानपात्रभवकः। योनिः। शिम्बा। इति हेमचन्द्रः॥ धनसादिफलस्थानम्। इति धरणी॥ शब्दान्तरसंयोगे गोलकवाचकः। यथा सूत्रकोषः नेत्रकोष इत्यादि। इत्यमरटीकायां स्वामी॥ धनसंहतिः। इति जटाधरः॥ (यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये।

"कोषो बलस्यापहृतं तत्रापि खपुरे ततः"॥)

तत्सञ्चयगुणाः।

"कोषो महीप्रतेर्जीवो न तु प्राणाः कथञ्चन।
इयं हि राज्ञो भूमस्य न शरीरमिति स्थितिः॥
धर्म्महेतोः सुखार्थाय भृत्यानां भरणाय च।
आपदर्थञ्च संरक्ष्यः कोषः कोषवता सदा॥
धनात् कुलं प्रभवति धनाद्धर्म्मः प्रवर्त्तते।
साधनस्य भवेद्धर्म्मः कामश्चैव कथञ्चन॥
अधर्म्माच्च धनं कुर्य्यात्तद्धनं गृह्यते परैः।
स्वयं पापस्य पात्रं स्यात् सिंहो हस्तिवधादिव॥
तादात्मिको मूलहरः कदर्य्यस्त्रिविधोऽर्जकः।
उत्पन्नार्थव्ययकरो यो भविष्यद्धनाशया॥
स तादात्मिक आख्यातः कल्याणी तस्य मातृतिः।
यः पित्र्यमर्जितं वित्तमन्यायेन तु भक्षयेत्॥
स मूलहर आख्यातस्तुदुर्कोऽपि चासुभृत्।
स कदर्य्यस्तु भृत्वात्मपीड़नैरर्थसञ्चयी॥
तद्धनं राजदायादतस्करारणां निधिर्भवेत्।
भिक्षा च राजकोषश्च स्तोकस्तोकेन वर्द्धते॥
व्ययश्च धनवद्भिश्च स्तोकस्तोकेन क्षीयते।
कोषस्य साधनोपायो मुख्यं राष्ट्रमिति स्मृतम्।
भूगुर्व्वैर्व्वर्द्धते राष्ट्रं तदृद्धिर्द्धर्म्मवत्तता।
राज्ञोपायेन संरक्ष्या ग्रामे ग्रामे क्षधीवलाः॥
तेभ्यः क्षविस्तत्सार्था अर्थेभ्यः सर्व्वसम्पदः।
शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा
तथा वर्षेषु वर्षेषु कर्षणात् भूगुसञ्चयः।

मुग्धबोधमतम्। (यथा, श्रीमद्भागवते।५।१३।८।
"पदे पदेऽध्वन्तरवङ्गिनार्हितः
कौटुम्बिकः क्षुध्यति वै जनाय" ॥)
कौड़विकं, त्रि, (कुड़वस्य वापः। "तस्य वापः"। ५।१।४५। इति ठञ्।) कुड़वपरिमितबीजवपनयोग्यक्षेत्रम्। इत्यमरटीकायां रायमुकुटः॥
कौणपः, पुं, (कुणपस्त्रिधातुकं शरीरं शवो वा तं भक्षयितुं शीलमस्य। इत्यण्।) राक्षसः। इत्यमरः। १।१।६२॥ (यथा, महाभारते। १। १७१।१४।
"न कौणपाः क्षत्रियो वा न च देवाङ्गनासुजः"॥
वासुकिवंशोद्भवः सर्पविशेषः। यथा, महाभारते। १।५७।५।
"पिच्छलः कौणपश्चक्रः कालवेगः प्रकालनः।
हिरण्यबाहुः शरदः कपिलः कालदन्तकः।
एते वासुकिजा नागाः प्रविष्टा इत्यवाहने" ॥)
कौणपदन्तः, पुं, (कौणपस्य दन्ता इव दन्ता अस्य।) भीष्मः। इति त्रिकाण्डशेषः॥
कौण्डिन्यः, पुं, (कुण्डिनस्य स्वनामख्यातमुनिविशेषस्य गोत्रापत्यं इति। गर्गादित्वात् यञ्।) कुण्डिनमुनिपुत्रः। तत्पर्य्यायः। विष्णुगुप्तः२। इति त्रिकाण्डशेषः॥
कौतुकं, क्ली, (कुतुक+प्रज्ञादित्वात् स्वार्थे अण्। कुतुकस्य भावः इति युवादित्वात् अण् वा।) कुतूहलम् इत्यमरः।१।७।३१॥ (यथा, राजतरङ्गिण्यां। ५।३६४।
"चक्रतुः कौतुकोद्गीवां सभां चित्रार्पितामिव॥)
अभिलाषः। (यथा, कथासरित्सागरे।
"पश्यन्त्यास्तं नृपं तस्या बभ्राकौतुकयोर्द्वयं।
अभूदन्योन्यसंमर्दो रचयन्त्या गतागतम्"॥)
उत्सवः। (यथा, भागवते। ४।३।१३।
"कथं सुतायाः पितृगेहकौतुकं
निशम्य देहः सुरवर्य्य! नेङ्गते" ॥)
हर्षः। (यथा, भागवते। १।१७।२५।
"इत्थं भूमेर्भगवता न्यासितोऽभरा सती।
श्रीमद्भिरुत्पदन्यासैः सर्व्वतः कृतकौतुका" ॥)
परस्परायातमङ्गलम्। विवाहसूत्रम्। (यथा, कुमारे। ७।२।
"वैवाहिकैः कौतुकसंविधानै-
र्यूने मुने श्वशुरस्त्रीवर्गम्" ॥)
गीतादिभोगः। इति मेदिनी॥ गीतादिः। भोगकालः। इति हेमचन्द्रः॥
कौतूहलं, क्ली, (कुतूहलस्य भावः कर्म्म वा युवादित्वात् अण्। यद्वा, कुतूहलमेव इति प्रज्ञादित्वात् अण्।) कुतूहलम्। अपूर्ब्बवस्तुदिदृक्षाद्यतिशयः। इत्यमरः। १।८।३१। (यथा, मार्कण्डेये।८।१।
"भवद्भिरिदमाख्यातं यथाप्रश्नमनुक्रमात्।
महत् कौतूहलं मेऽस्ति हरिश्चन्द्रकथां प्रति" ॥)
कौदालीकः, पुं, (कुं भूमिं दारयतीति। कुदारः। तेन आचरतीति ईकन् रजयो रैक्यात् रस्य लत्वम्।) कुदालीकः ततः स्वार्थे अण्।) वर्णसङ्करजातिविशेषः। स तु रजक्यां तीवराज्जातः।
इति ब्रह्मवैवर्त्तपुराणम्॥
कौद्रविकं, क्ली, (कोद्रवं तत् निमित्तमस्य इति ठञ्।) सौवर्चलक्षवणम्। इति राजनिर्घण्टः॥
कौद्रवीर्यं, त्रि, (कुत्सितं यथा तथा द्रवति इति। एषोदरादित्वात् सिद्धे कोद्रवं कुत्सितधान्यभेदः तस्य भवनं उत्पत्तिस्थानं। "धान्यानां भवने क्षेत्रे खञ्"। ५।२।१। इति खञ्।) कोद्रवधान्योद्भवयोग्यक्षेत्रम्। इत्यमरः।२।९।८। कोदोर क्षेत इति भाषा॥
कौन्तिकः, पुं, (कुन्तास्त्रेण प्रासेन युध्यते। कुन्तः प्रासः प्रहरणमस्येति वा। ठञ्।) प्रासिकः। प्रासास्त्रधारी योद्धा। इत्यमरः।२।८।७०॥
कौन्ती, स्त्री, (कुन्तिषु देशविशेषेषु भवा। "तत्रभवः"। ४।३।५३। इति अण्। ततो ङीष्।) रेणुकानामगन्धद्रव्यम्। इत्यमरः।२।४।१२०॥
(अस्याः पर्य्यायाः यथा,—
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा।
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे॥
पर्य्यायान्तरञ्च यथा,—
"हरेणु रेणुका कौन्ती ब्राह्मणी हेमगन्धिनी"॥
इति वैद्यकरत्नमालायाम्। गुणाश्चास्या रेणुकाशब्दे बोद्धव्याः॥)
कौन्तेयः, पुं, (कुन्त्या अपत्यं इति ढक्।) कुन्तीपुत्रः। स तु युधिष्ठिरादिः। इति महाभारतम्। (यथा, भगवद्गीतायाम्। २।३।
"मा क्लैब्यं गच्छ कौन्तेय! नैतत्त्वय्युपपद्यते"॥)
अर्ज्जुनवृक्षः। इति राजनिर्घण्टः॥
कौपं, क्ली, (कूपे भवं कूपस्येदं वा इत्यण्।) कूपोदकम्। अस्य गुणाः यथा,—
"कौपं पयो यदि स्वादु त्रिदोषघ्नं हिमं लघु।
तत्क्षारं कफवातघ्नं दीपनं स्निग्धतत्परम्"।
इति भावप्रकाशः॥ (सुश्रुतोक्ता गुणा यथा,—
"सक्षारं पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु"॥
कौपसलिलसेवने कालनिर्द्देशः। यथा, तत्रैव।
"वसन्ते कौपं प्राक्षवणं वा ग्रीष्मेष्वेवम्"॥)
कौपीनं, क्ली, (कूपमतनमर्हतीति। "प्राचीनकौपीने अहता कार्ष्ण्योः"। ५।२।२०। इति साधुः।) पापम्। तत्साधनत्वात् तदङ्गोपचारात् गुप्तयज्ञिकमपि। तत्सम्बन्धात् तदाच्छादनमपि। इति सिद्धान्तकौमुदी॥ अकार्य्यम्। गुह्यदेशः। इत्यमरः॥ चीरम्। इति मेदिनी॥ तत्तु मेखलावद्ग्रथनपरिधेयवस्त्रखण्डम्। कपिनी इति भाषा। तत्पर्य्यायः। कच्छा २ कच्छटिका ३ कक्षा ४ घटी ५। इति त्रिकाण्डशेषः॥ (यथा, भागवते। ७।११।२।
"विभृयाद्यदयं वासः कौपीनाच्छादनं परम्"॥)
कौपोदकी, स्त्री, (कौमोदकी इति एषोदरादित्वात् मस्य पत्वम्।) कौमोदकी। इति भरतो द्विरूपकोषश्च॥
कौमारं, क्ली, (कुमारस्य कर्म्म भावो वा। वयोवचनत्वादण्।) कुमारावस्था।
("जातः कुं पृथिवीं पद्भ्यां मारयेत् तत्कुमारकः।
इति प्रमाणतो विद्धि कौमारं प्राग्वयोऽब्दतः"॥
इत्युक्तावधिके "कौमारं पञ्चमावधि"। इत्यन्ते वयोवस्थाभेदे। सा तु जन्मावधिपञ्चमवर्षपर्य्यन्ता। इत्यर्थः॥) तत्रमते षोड़शवर्षपर्य्यन्ता। (यथा, भगवद्गीतायाम्। २।१३।
"देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति"॥
पुं, कुमारस्य सनत्कुमारस्य इदं अण् सृष्टिभेदः। यथा, "कौमार आर्भवः प्राजापत्यो मानव इत्यादि सर्गनामानि"। इति श्रीधरः। तथा च भागवते। १।३।६।
"स एव प्रथमं देवः कौमारं सर्गमाश्रितः।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितम्"॥)
तद्वति पुं, स्त्री। इति शब्दमाला॥ अपूर्ब्बपतिं कुमारीं पतिरुपपन्नः "कौमारापूर्ब्बवचने"। ४।२।१३। इति द्वितीयान्तादुपसर्गकर्त्तर्य्यण्प्रत्ययेन साधुः॥ अपूर्ब्बपतिकुमारीपतिः। इति सिद्धान्तकौमुदी॥)
कौमारी, स्त्री, मातृकाविशेषः। सा तु कार्त्तिकेयशक्तिः। इति शब्दमाला॥ यथा,—
"कौमारी शक्तिहस्ता च मयूरवरवाहना।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी"॥
इति मार्कण्डेयपुराणे देवीमाहात्म्ये। ८२।१६॥
(अपूर्ब्बपतिः कुमारी पतिमुपपन्ना। "कौमारापूर्ब्बवचने"। ४।२।१३। इति स्वार्थे अण् प्रत्ययेन साधुः ततो ङीष्। अपूर्ब्बभार्य्यकुमारपत्नी। यथा, भट्टौ।७।६०।
"उपनम्रमाभयग्रन्थः कौमारीं पतताम्बरः"॥)
पञ्चमवर्षीया बालिका। कौमारी अवस्था। यथा, भागवते। ३।२।२८।
"कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयो व्रजौकसाम्"॥)
वाराहीकन्दः। इति राजनिर्घण्टः॥
कौमुदः, पुं, (कौ पृथिव्यां मोदन्ते जना यस्मिन्। मुद्+कः। सप्तम्या अलुक्।) कार्त्तिकमासः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते।
"एतैरन्यैश्च राजेन्द्रैः पुरा मांसं न भक्षितम्।
शारदं कौमुदं मासं ततस्ते स्वर्गमाप्नुयुः॥
कौमुदन्तु विशेषेण शुक्लपक्षं नराधिपः।
वर्ज्जयेत् सर्व्वमांसानि धर्म्मो ह्यत्र विधीयते"॥)
कौमुदिका, स्त्री, (कौमुदी+संज्ञायां कन् ततः स्वार्थे टाप् च।) उमासखीविशेषः। इति शब्दमाला॥ (स्वार्थे कन् स्वार्थे टाप् च। ज्योत्स्ना। त्रि, चतुर्थ्यां कुमुदादित्वात् ठक्। कौमुदिकः। कुमुदाख्यपर्व्वतसन्निहितदेशविशेषः॥)
कौमुदी, स्त्री, (कुमुदस्य इयं प्रकाशकत्वात् "तस्येदं"। ४।३।१२०। इत्यण् ततो ङीष्।) ज्योत्स्ना। इत्यमरः।१।३।१६। (यथा, कुमारे। ४ ३३।
"अग्निना सह याति कौमुदी॥
सह मेघेन तड़ित्प्रलीयते।
प्रमदाः पतिवर्त्मगा इति
प्रतिपन्नं हि विचेतनैरपि"॥)
उत्सवः। इति धरणी। (यथा, महाभारते १३ पर्व्वणि।

कौरव्यः

"अकालकौमुदीञ्चैव चक्रतुः सार्व्वकालिकीम्" ॥ कौमुदस्य कार्त्तिकमासस्य इयं "तस्येदम्" । ४ । ३ । १२० । इति अण् । ततो ङीप् । यदुक्तम् । "कुशब्देन मही ज्ञेया मुद हर्षे ततो द्वयम् । धातुसंज्ञैर्नियमैश्चैव तेन सा कौमुदी स्मृता" ॥ कार्त्तिकोत्सवः । स तु कार्त्तिकीपूर्णिमायां कर्त्तव्यः । इति त्रिकाण्डशेषः । कार्त्तिकीपूर्णिमा ॥ आश्विनीपूर्णिमा । इति शब्दरत्नावली । (यथा,— "आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि । कौमुदी सा समाख्याता कार्य्या लोकविभूतये" ॥ दीपोत्सवतिथिः । यथा, रघुभ्रष्टटीकायाम् । "कौ मोदन्ते जना यस्यां तेनासौ कौमुदी स्मृता" ॥ कुमुदान्येव कौमुदी । सुदी वा सालुक इति भाषा ॥)

कौमुदीचारः, पुं क्ली, (कौमुद्याः ज्योत्स्नायाः चारः प्राशस्त्यमत्र समये ।) कोजागरपूर्णिमा । इति त्रिकाण्डशेषः ॥

कौमुदीपतिः, पुं, (कौमुद्याः ज्योत्स्नायाः पतिः ।) चन्द्रः । इति हेमचन्द्रः ॥

कौमुदीवृक्षः, पुं, (कौमुद्याः इव प्रकाशिकायाः दीपशिखायाः वृक्ष इवाधारः ।) दीपवृक्षः । इति हारावली ॥ दीपशाका पिलसुज इत्यादि भाषा ॥

कौमोदकी, स्त्री, (कोः पृथिव्याः पालकत्वात् मोदकः । कुमोदको विष्णुः । तस्येयं इत्यण् ततो ङीप् ।) विष्णुगदा । इत्यमरः । १ । १ । ३० ॥ (यथा, भागवते । ८ । ४ । १९ । "श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम" ॥)

कौमोदी, स्त्री, (कुं पृथ्वीं मोदयति नन्दयतीति । कुमोदः विष्णुः तस्येयं इति अण् ततो ङीप् ।) विष्णुगदा । इति शब्दरत्नावली ॥

कौरवः, पुं स्त्री, (कुरोरपत्यमिति अण् । कुरोरयं इति कच्छादित्वादण् वा । कुरवराजसन्ततिः । इति महाभारतम् ॥ (यथा, महाभारते । १ । द्रुपदशासने १३९ । १६ । "तमुद्यतं रथेनैकमाशुकारिणमाहवे । अनेकमिव सन्त्रासान्निरे तत्र कौरवाः" ॥ कुरुसम्बन्धिदेशः । यथा, मेघदूते । ५० । "क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः" ॥ स्त्रियां ङीप् कौरवी कुरुसम्बन्धिनीत्यर्थः । यथा, महाभारते । १ । १३०१ । १५ । "द्रुपदः कौरवान् दृष्ट्वा प्राधावत समन्ततः । शरजालेन महता मोहयन् कौरवीं चमूम्" ॥)

कौरव्यः, पुं, (कुरोरपत्यम् । "कुर्व्वादिभ्यो ण्यः" । ४ । १ । १५१ । इति ण्यः ।) कौरवः । (यथा, महाभारते । ३ । २३२ । ५५ । "अनिष्टायां निष्टायाञ्च सहायाः क्षुत्पिपासयोः । आराधयन्त्याः कौरव्यांस्तुल्या रात्रिरहश्च मे" ॥ कौरव्याः ब्राह्मणाः कुरुसम्बन्धिनो ब्राह्मणा इत्यर्थः । क्षत्रिये तु । "कुर्व्वादिभ्यो ण्यः" । ४ । १ । १७२ । इति ण्ये कृते तद्राजस्य बहुषु तेनैवास्त्रियामिति बहुत्वे लुकि कुरव इति बोध्यम् ॥

कौलवः

नागविशेषः । यथा, महाभारते । १ । ३५ । १३-१४ । "कौरव्यो धृतराष्ट्रश्च शङ्खपिण्डश्च वीर्य्यवान् । विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्यवान्" ॥)

कौर्य्यः, पुं, (कुत्सिकराग्निः । यथा, दीपिकायाम् । "क्रियतावरिजित्तमकुलीरलेयपाथेयकुकौर्य्याख्याः । तौत्सिक आकोकेरो हृद्रोगस्यान्त्यभं चेत्यम्" ॥)

कौलः, त्रि, (कुले सत्कुले भव इत्यण् ।) सत्कुलोद्भवः । तत्पर्य्यायः । आन्वयिकः २ । इति त्रिकाण्डशेषः ॥ (कुले कुलाचारे रतः कुलं कुलतत्त्वं वेत्ति वा इत्यण् ।) दिव्यवीरपशुभावत्रयान्तर्गतदिव्यभावरतः । स तु ब्रह्मज्ञानी । तद्यथा,— "दिव्यभावरतः कौलः सर्व्वत्र समदर्शनः" ॥ इति कुलार्णवतन्त्रम् ॥ "पशोर्वै ब्राह्मणस्यमन्त्रः पशुरेव न संशयः । वीराक्षस्यमनुर्व्वीरः कौलाच्च ब्रह्मविद्भवेत्" ॥ इति महानीलतन्त्रम् ॥ (कुलमधिकृत्य कृतो ग्रन्थः । कुलाचारतत्त्वविधिप्रतिषेधोपदेशसाध्यसाधनव्यापारविशिष्टकुलोपनिषदादिग्रन्थविशेषः ॥)

कौलकेयः, त्रि, (कुले सत्कुले भव इति ढक् कुक् च ।) सत्कुलोद्भवः । (कुलटायाः अपत्यं इति ढक् । एषोदरादि ततः कच्च ।) असतीपुत्रे, पुं । इति शब्दरत्नावली ॥

कौलटिनेयः, पुं स्त्री, (कुलटाया अपत्यं । "कुलटायावा" । ४ । १ । १२७ । इति । इनङ् । स्त्रीभ्यो ढक् ।) असतीपुत्रः । तत्पर्य्यायः । कौलटेयः २ । इत्यमरः ॥ कौलटेरः ३ । इति तट्टीकासारसुन्दरी । २ । ६ । २७ ॥ सती या भिक्षार्थं कुलानि गृहाणि अटति न तु जारार्थं सापि कुलटा तत्पुत्रोऽपि ॥

कौलटेयः, पुं, स्त्री, (कुलटायाः असत्याः अपत्यं इति ढक् ।) कौलटिनेयः । असतीसुतः । इत्यमरः । २ । ६ । २६ ॥ (कुलानि गृहाणि भिक्षार्थं अटति या सती सापि कुलटा । तस्या अपत्येऽपि इति कश्चित् ॥ स्त्रियां ङीप् कौलटेयी ॥)

कौलटेरः, पुं स्त्री, (कुलानि गृहाणि व्यभिचारार्थं अटति सा कुलटा । तस्याः असत्याः अपत्यम् । "क्षुद्राभ्रो वा" । ४ । १ । १३१ । इति ढक् ।) असतीसुतः । इत्यमरः । २ । ६ । २६ ॥ कौलटिनेयः । इति सारसुन्दरी । (कुलानि गृहाणि भिक्षार्थमटति या सती सापि कुलटा तस्या अपत्येऽपि । इति कश्चित् । स्त्रियां ङीप् कौलटेरी ॥)

कौलत्यीनं क्ली, (कुलत्यस्य कुलत्याख्यकलायविशेषस्य भवनं क्षेत्रं वा इति । "धान्यानां भवने क्षेत्रे खञ्" । ५ । २ । १ । इति । खञ् ।) कुलत्यकलायोद्भवक्षेत्रम् । इत्यमरटीकायां भरतः ॥

कौलवः, पुं, ववाद्येकादशान्तर्गतद्वितीयकरणम् । तच्च जातस्य फलं यथा,— "वाग्मी विनीतो नितरां खलन्तः प्रागल्भ्ययुक्तो मनुजो महौजाः । सुसम्मतः स्याद्विदुषां कृतघ्न- श्चेत् कौलवाख्यं करणं प्रसूतौ" ॥ इति कोष्ठीप्रदीपः ॥

कौवेरं

कौलिकः, पुं, (कुलं सूचादिकं वयति वस्त्रत्वेनावरणादिकं आपादयतीति । ठक् ।) तन्तुवायः । इति शब्दमाला ॥ (कु कुत्सितं जघन्याचारं लातीति । कुलः दुःशीलः ततः स्वार्थे ठक् ।) पाषण्डः । इति त्रिकाण्डशेषः । (कुलादागतमिति ठक् ।) कुलपरम्परायाते, त्रि ॥ (यथा, पञ्चतन्त्रे । "वर्जयेत् कौलिकाचारं मित्रं प्राज्ञतरो नरः" ॥ कुले कुलागमे कुलतन्त्रे शिवोक्तशास्त्रे इति यावत् सिद्धः इति ठक् । कुलतन्त्रज्ञः ॥ कौलं कुलधर्म्मं प्रवर्त्तयति तत्त्वज्ञानं शिष्यपरम्परोपदेशेन विस्तारयति इति ठक् । कुलधर्म्मप्रवर्त्तकः शिवः ॥ कुलं कुलाचारः प्रयोजनमस्य इति ठक् । ब्रह्मतत्त्वज्ञः । यथा, श्रुतौ । "शून्यः कौलिकः" ॥)

कौलीनं, क्ली, (कौ पृथिव्यां लीनम् । भूलीनपदार्थानामिव एतेषामप्रकाशतया तथात्वम् ।) गुह्यम् । जघन्यम् । कुकर्म्म । (कुलीनस्य भावः । युवादित्वादण् ।) कुलीनत्वम् । (यथा, रामायणे । "सदृश्य इव मर्य्यादां कौलीनां नाभ्यवर्त्तत" ॥) पक्षद्विपक्षिणां युद्धम् । इति मेदिनी ॥ कौलेयकः । इति विश्वः ॥ (ली भावे क्तः तस्य नत्वम् । लीनं लयः । कौ पृथिव्यां लीनं लयो यस्मात् । कुलीनं भूमिलयमर्हतीति अण् वा ।) लोकवादः । इत्यमरः । ३ । ३ । ११६ । (यथा, रघौ । १४ । ८४ । "कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः" ॥ निन्दा । यथा, तत्रैव । १४ । ३६ । "कौलीनमात्माश्रयमाचचक्षे तेभ्यः पुनर्वेदमुवाच वाक्यम्" ॥)

कौलीरः, स्त्री, (कुलीरः कर्कटः तच्छृङ्गाकारोऽस्यस्या इत्यण् । ततष्टाप् ।) कर्कटशृङ्गी । इति राजनिर्घण्टः ॥ (कर्कटशृङ्गीशब्देऽस्या विवृतिर्द्रष्टव्या ॥)

कौलेयः, त्रि, (कुले सत्कुले भवः इति बाह्वलकात् ढक् ।) कुलीनः । इति भरतो द्विरूपकोषश्च ॥

कौलेयकः, पुं, (कुले भवः । "कुलकुक्षियोवाभ्यः श्यञ्ञञ्ढकञ्ढरेषु । ४ । २ । ९९ । इति ढकञ् ।) कुक्कुरः । इत्यमरः । २ । १० । २१ ॥ (कुलस्यापत्यम् । "अपूर्व्वपदादन्यतरस्यां यड्ढकञौ" । ४ । १ । १४० । इति ढकञ् ।) कुलीने त्रि । इति मेदिनी ॥

कौल्माषीयं, त्रि, (कुल्माषाणां धान्यकुलत्थादीनां भवनं क्षेत्रं इति खञ् ।) कुल्माषधान्योद्भवक्षेत्रम् । इत्यमरटीकायां रायमुकुटः ॥

कौल्यः, त्रि, (कुले सत्कुले भवः बाह्वलकात् ष्यञ् ।) कुलीनः । इति भरतो द्विरूपकोषश्च ॥

कौवलं, क्ली, (कुवलमेव इति । प्रज्ञादित्वात् स्वार्थे णः ।) कुवलम् । कोलिफलम् । इति भरतो द्विरूपकोषश्च ॥

कौवेरं, क्ली, (कुवेरो अधिष्ठात्री देवताऽस्य इत्यण् ।) कुष्ठम् । कुड् इति भाषा । इति शब्दरत्नावली ॥ (कुवेरस्य इदं इत्यण् ।) कुवेरसम्बन्धिनि तत्कार्य्ये च त्रि । यथा, मार्कण्डेये । ५५ । २ ।

"कौबेरमथ यास्यञ्च चकाते वरुणस्य च" ॥
कौबेरी, स्त्री, (कुबेरः अधिष्ठात्री देवता अस्या इत्यण् । ततो ङीप् ।) उत्तरा दिक् । यथा,—
"दिग्विभागे तु कौबेरी दिक् शिवा प्रीतिदायिनी" ॥
इति तिथ्यादितत्त्वम् । कुबेरशक्तिश्च ॥
कौशं, क्ली, (कुशाः प्राचुर्य्येण भूसा वा सन्त्यत्र इत्यण् ।) कान्यकुब्जदेशः । इति हेमचन्द्रः ॥ (कुश + स्वार्थे अण् । कुशद्वीपः । यथा, सिद्धान्तशिरोमणौ ।
"प्राक्कं ततः प्राक्लमलञ्च कौशम्" ॥
कोशे भवम् । क्षमिकोशोद्भवं पट्टवस्त्रम् । यथा, भागवते । ३ । ४ । ७ ।
"दोर्भिश्चतुर्भिर्विदितं पीतकौशाम्बरेण च" ॥
एतदुपलक्षितं क्षणं अद्राक्षमित्यन्वयः ॥
कुशस्येदं तद्विकारो वा अण् । कुशमयम् । कुशसम्बन्धि वा । यथा, महाभारते । १३ । १६ । २६ ।
"तत्र वासाय शयने कौशे सुखमुवास ह" ॥
स्त्रियां ङीप् । कौशी । तत्रैव । १३ । ५४ । २१ ।
"कौश्यां दृष्यां समासीनं जपमानं महाव्रतम्" ॥)
कौशलं, क्ली, (कुशलस्य भावः कर्म्म वा इति । युवादित्वात् अण् ।) कुशलता । यथा,—
"न चातिकर्कशः प्राज्ञः न चातिललितः शुचिः ।
एकत्र काव्ये व्याख्यातुस्तावद्धो कौशलं कवेः" ॥
इति अमरशतकटीका ॥ (नैपुण्यम् । यथा, भागवते । १ । १६ । २७ ।
"स्वातन्त्र्यं कौशलं कान्तिर्धैर्य्यं मार्दवमेव च" ॥
कुशलमेव इति । स्वार्थे अण् । मङ्गलम् । यथा, तत्रैव । ३ । १ । १३ ।
"स एष दोषः पुरुषद्विडास्ते
यद्दान् प्रविष्टोऽयमपत्यमत्या ।
पृष्ठासि क्षणाद् विमुखो गतश्री-
स्त्यजाश्वशैवं कुलकौशलाय" ॥
चातुर्य्यम् । यथा, भगवद्गीतायाम् । २ । ५० ।
"तस्माद्योगाय युज्यस्व योगः कर्म्मसु कौशलम्" ॥)
कौशलिका, स्त्री, (कुशलाय मङ्गलाय हिता । इति ठक् टाप् च ।) प्राभृतकम् । इति हारावली । नजर इति भाषा ॥ (कुशलस्य एच्छा इति ठक् टाप् च । कुशलप्रश्नः ॥)
कौशली, स्त्री, (कुशलस्य एच्छा कुशलाय दीयते वा । अण् ततो ङीप् ।) कुशलप्रश्नः । प्राभृतम् । इति चिकाण्डशेषः ॥
कौशलेयः, पुं, (कौशल्यायाः अपत्यं पुमान् इति ढक् । यलोपश्च ।) श्रीरामः । इति शब्दरत्नावली ॥ (यथा, रामायणे ।
उज्जहार प्रियां देवो हत्वा तु निकषात्मजम् ।
श्रीमान् दाशरथिर्वीरः कौशलेयः प्रतापवान्" ॥)
कौशल्या, स्त्री, (कोशलस्य राज्ञोऽपत्यं स्त्री । कोशल + ष्यञ् । यद्वा, कुशलैव स्वार्थे ष्यञ्) श्रीराममाता । सा तु कोशलराजकन्या दशरथपत्नी च । इति शब्दरत्नावली । (यथा, रामायणे १ । १६ । २६ ।
"सोऽन्तःपुरं प्रविश्यैव कौशल्यामिदमब्रवीत्" ॥
कोशले भवाः । तद्देशवासिन्यर्थे ञ्य । कोशलदेशीयाः । अत्र बहुवचनम् ।

यथा, महाभारते । ६ । ६ । ४० ।
"मत्स्याः कुशट्टाः कौशल्याः कुन्तयः काशिकोशलाः" ॥
कुशलस्य भावः कर्म्म वा कुशलमेव वा इति ब्राह्मणादित्वात् ष्यञ् । कुशलत्वे, क्ली । यथा, महाभारते । ३ । ४४ । ३० ।
"दृष्ट्वा कौशल्यमन्योन्यं रथेष्वेवावतस्थिरे" ॥)
कौशल्यानन्दनः, पुं, (कौशल्यायाः दशरथपत्न्याः नन्दनः पुत्रः ।) श्रीरामः । इति शब्दरत्नावली ॥
कौशल्यायनिः, पुं, (कौशल्याया अपत्यं । "कौशल्यकार्माय्यिभ्याञ्च" । ४ । १ । १५५ । इति फिञ् । फस्यायनादेशः ।) श्रीरामः । इति चिकाण्डशेषः ॥ (यथा, भट्टौ । ७ । ६० ।
"नियामहे न गच्छामः कौशल्यायनिबन्धनाम् ।
उपलम्भामपश्यन्तः कौमारीं पतितां वर !" ॥)
कौशाम्बी, स्त्री, (राज्ञः कुशस्य पुत्त्रेण स्वनामप्रसिद्धेन कुशाम्बेन निर्वृत्ता या । "तेन निर्वृत्तम्" । ४ । २ । ६८ । इति अण् ततो ङीप् ।) देशविशेषः । तत्पर्य्यायः । वत्सपत्तनम् २ । इति हेमचन्द्रः ॥ (यथा, रामायणे । १ । ३२ । ५ ।
("कुशाम्बस्तु महातेजाः कौशाम्बीमकरोत्पुरीम्" ॥
सा तु गौड़देशान्तर्गतमत्स्यराजभूमिगता नगरी ततः चागक्येन चन्द्रगुप्तादिसमये कुसुमपुरीत्याख्या प्रदत्ता इदानीं सैव पुरी पाटलीपुत्त्रनगरी पाटना इति भाषायां प्रसिद्धा जाता । यथा, कथासरित्सागरे । "अस्ति वत्स इति ख्यातोदेशः । इत्युपक्रम्य कौशाम्बी नाम तत्रास्ति मध्यभागे महापुरी" इत्युक्तम् ॥)
कौशिकः, पुं, (कुशिकस्यापत्यम् ऋष्यण् । कुशिके तद्वंशे भवो वा इत्यण् ।) इन्द्रः । (अयं हि तपस्विनः कुशिकराजस्तपःप्रभावं विचार्य्य त्रासात् तत्पुत्त्रतामङ्गीचकार ।
यथा, हरिवंशे । २७ । १३-१६ ।
"कुशिकस्तु तपस्तेपे पुत्त्रमिन्द्रसमं विभुः ।
जनयेयमिति तं शक्रस्त्रासादभेत्य जग्धिवान् ॥
पूर्णे वर्षसहस्रे वै तन्तु शक्रो ह्यपश्यत ।
अत्युग्रतपसं दृष्ट्वा सहस्राक्षः पुरन्दरः ॥
समर्थं पुत्त्रजनने स्वमेवांशमवासयत् ।
पुत्त्रत्वे कल्पयामास स देवेन्द्रः सुरोत्तमः ॥
स गाधिरभवद्राजा मघवान् कौशिकः स्वयम्" ॥
पक्षे तु देवेन्द्रस्य जन्मकाले कुशाहृतत्वात् कौशिकत्वमिति । कुशेन कृत इति ठञ् ।
यथा, हरिवंशे । २१६ । २—३ ।
"स वज्री कवची जिष्णुरदित्यामभिजज्ञिवान् ।
स्तूतेः सहायो द्युतिमान् यथा सोऽध्वर्युभिः स्तुतः ।
जातमात्रस्तु भगवान् अदित्यां स कुशैर्वृतः ।
तदाप्रभृति देवेशः कौशिकत्वमुपागतः" ॥)
गुग्गुलुः । उलूकः । व्यालग्राही । इत्यमरः । २ । ४ । ३४ ॥ नकुलः । कोशजः । (मगधराजजरासन्धस्य सेनापतिर्हंसनामा नरपतिरपि कौशिकनाम्ना विश्रुत आसीत् । यथा, महाभारते । २ । जरासन्धवधपर्व्वणि । २२ । ३१-३२ ।
"स तु सेनापतिं राजा सस्मार भरतर्षभ ! ।

कौशिकं चित्रसेनञ्च तस्मिन् युद्ध उपस्थिते ॥
ययोस्तु नामनी राजन् ! हंसेति डिभकेति च ।
पूर्व्वं संकथिते पुंभिस्त्रिलोके लोकसत्कृते" ॥
कुशिकस्य गोत्रापत्यं इति विदाद्यञ् । कुशिकस्य पुत्त्रो गाधिस्तत्पुत्त्रो विश्वामित्रोऽपि कुशिकवंशजातत्वात् कौशिकः । (विश्वामित्रमुनिः । इति मेदिनी । (यथा, रामायणे । १ । २१ । १ ।
"तच्छ्रुत्वा वचनं तस्य खेदपर्य्याकुलाक्षरम् ।
समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिम्" ॥
पुरुवंशीयनृपविशेषः । यथा, हरिवंशे ।
"प्रतिष्ठायाश्च द्वौ पुत्त्रौ पैप्पलादिश्च कौशिकः" ॥
कोशं करोतीति । कोश + ठक् ठञ् वा वाऽलकात् ।) कोषकारः । इति शब्दरत्नावली ॥ शृङ्गारः । इति चिकाण्डशेषः ॥ मज्जा । इति हेमचन्द्रः ॥ अश्वकर्णवृक्षः । इति राजनिर्घण्टः ॥ (कोशात् क्षमिकोशाज्जातम् । क्षमिकोशोद्भवे, त्रि । यथा, महाभारते । ३ । २७ । १४ ।
"या त्वाहं कौशिकैर्वस्त्रैः शुभैराच्छादितं पुरा ।
दृष्टवत्यस्मि राजेन्द्र ! सा त्वां पश्यामि चीरिणम्" ॥)
कौशिकप्रियः, पुं, (कौशिकस्य कुशिकपौत्त्रस्य राजर्षेः विश्वामित्रस्य प्रियः ।) श्रीरामः । इति शब्दरत्नावली ॥
कौशिकफलः, पुं, (कौशिकं कोशगतं फलमस्य ।) नारिकेलवृक्षः । इति शब्दरत्नावली ॥
कौशिका, स्त्री, (कोश एव स्वार्थे कः ततोऽण् ततः टाप् अत इत्वञ्च ।) चषकम् । पानभाजनम् । इति हेमचन्द्रः ॥
कौशिकात्मजः, पुं, (कौशिकस्य इन्द्रस्य आत्मजः । जयन्तः ॥ पाण्डुराजपत्न्यां कुन्त्यां इन्द्रौरसजातत्वात् अर्জ্জুনस्यापि तथात्वम् ।) अर्জ্জুनः । इति शब्दमाला ॥ (अस्य जन्मविवरणं यथा, महाभारते । १ । १२३ । ३२ ।
"एवमुक्ता ततः शक्रमाजुहाव यशस्विनी ।
अथाजगाम देवेन्द्रो जनयामास चार्জ্জुनम्" ॥
कौशिकस्य विश्वामित्रस्य आत्मजः । इति विग्रहे विश्वामित्रपुत्त्रः शुनःशेपादिः ॥)
कौशिकायुधं, क्ली, (कौशिकस्य इन्द्रस्य आयुधम् ।) इन्द्रधनुः । इति शब्दरत्नावली ॥
कौशिकारातिः, पुं, (कौशिकस्य पेचकस्य अरातिः शत्रुः ।) काकः । इति राजनिर्घण्टः ॥
कौशिकारिः, पुं, (कौशिकस्य उलूकस्य अरिः शत्रुः ।) काकः । इति राजनिर्घण्टः ॥
कौशिकी, स्त्री, (कौशिकस्य गोत्रापत्यम् । कुशिक + अण् + ङीप् । सुरराजस्य इन्द्रस्य कुशिकनृपतेः सकाशात् पुत्त्रत्वेनोत्पद्यमानत्वात् कौशिकाभिधानप्राप्तेस्तेनैवेन्द्रेणास्या योगमायाया भगिनीतयाङ्गीकृतत्वात्तथात्वम् ।) चण्डिका । (यथा, हरिवंशे । ५७ । ४८ ।
"तत्रैव त्वां भगिन्यर्थे ग्रहीष्यति स वासवः ।
कुशिकस्य तु गोत्रेण कौशिकी त्वं भविष्यसि" ॥
तत्रैवास्याः स्तुतौ । ५८ । ३ ।
"आर्य्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी ।

जननी सिद्धसेनस्य उग्रचारी महातपाः" ॥
कुशिकस्य गोत्रापत्यं इति विदाद्यञ्। कुशिकाख्यनरपतेः पौत्री गाधिराजस्य कन्या विश्वामित्रस्य भगिनी ऋचीकमुनिपत्नी। कुशिकवंशजातत्वात् तस्यास्तथात्वम्॥) नदीविशेषः। इति मेदिनी ॥ (यथा, रामायणे। १। ३४। ६–११।
"सपिता मम काकुत्स्थ! गाधिः परमधार्मिकः।
कुशवंशप्रसूतोऽस्मि कौशिको रघुनन्दन! ॥
पूर्ब्बजा भगिनी चापि मम राघव! सुव्रता।
नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥
सशरीरागता स्वर्गं भर्त्तारमनुवर्त्तिनी।
कौशिकी परमोदारा प्रवृत्ता च महा नदी ॥
दिव्या पुण्योदका रम्या हिमवन्तमुपाश्रिता।
लोकस्य हितकार्य्यार्थं प्रवृत्ता भगिनी मम ॥
ततोऽहं हिमवत्पार्श्वे वसामि नियतः सुखम्।
भगिन्यां स्नेहसंयुक्तः कौशिक्यां रघुनन्दन! ॥
सा तु सत्यवती पुण्या सत्ये धर्म्मे प्रतिष्ठिता।
पतिव्रता महाभागा कौशिकी सरितां वरा"॥
"कौशिकी सरितां श्रेष्ठा कुलोद्द्योतकरी तव"॥२१
असावेवेदानीं कुशी नदीति ख्याता। इयन्तु नेपालराज्यान्तर्गताया हिमवच्छाखाया निःसृता सती १६६ क्रोशान्तं गता गङ्गया सङ्गता॥)

कौशिकोजः, पुं, (कौशिका इव तीव्रं ओजो यस्य। एषोदरात् सलोपः।) शाखोटवृक्षः। इति राजनिर्घण्टः। शाखोड़ा इति भाषा॥

कौशीतकी, स्त्री, (कुशितकस्यापत्यम्। ऋष्यण् ततो ङीप्।) अगस्त्यपत्नी। इति चिकाण्डशेषः॥ (कुशीतकेनाधीता प्रणीता वा या शाखा सा कौशीतकी। स्वनामख्यातवेदान्तर्गतशाखाविशेषः॥ (ऋग्वेदान्तर्गत उपनिषद्विशेषः। यदुक्तं मुक्तिकोपनिषदि।
'मैत्रायणी कौशी(षी)तकी बह्वृचावालतापनी'॥)

कौशेयं, क्ली, (कोशे भवम्। इति ढक्।) कृमिकोशोत्थवस्त्रादि। इत्यमरः। २। ६। १११॥ मूर्द्धन्यमध्यश्च॥ (यथा, माघे। ८। ६।
"कौशेयं व्रजदपि गाढ़तामजस्रम्।
सस्नंसे विगलितनीविनीरजाढ्याः"॥)

कौषिकः, पुं, (कौशिक + एषोदरात् षकारादेशः।) कौशिकः। इति मेदिनी॥

कौषिकी, स्त्री, (कौशिकी + एषोदरात् षकारादेशः।) कौशिकी। इति मेदिनी॥ कालिकाकायकोषनिःसृतदेवीविशेषः। यथा,—
"कायकोषान्निःसृता या कालिकायास्तु भैरव!।
सा कौषिकीति विख्याता चारुरूपा मनोहरा॥
निःसृता हृदयाद्देव्या रसनायेण चण्डिका।
नैतस्याः सदृशी मूर्त्या चारुरूपेण विद्यते॥
त्रिषु लोकेषु कान्त्या वा नास्यास्तुल्या भविष्यति।
योगनिद्रा महामाया या मूलप्रकृतिः स्मृता॥
तस्याः प्राणस्वरूपेयं देवी सा कौषिकी स्मृता।
नेत्रबीजं तथैतस्या बीजन्तु परिकीर्त्तितम्॥
तन्त्रमस्याः प्रवक्ष्यामि सर्व्वकामप्रदं नृणाम्।
समाप्ति नान्यदन्यस्तु षष्ठवर्गादिविन्दुना॥
षष्ठस्वरेण संरूढो विन्दुना समलङ्कृतः।
कौषिकीतन्त्रमन्त्रोऽयं धर्म्मकामार्थदायकः॥
एतस्याः सम्प्रवक्ष्यामि मूर्त्तिरूपञ्च भैरव!।
गृहाणैकमना भूत्वा जगदाकर्षकारकम्॥
धम्मिल्लसंयतकचा विधोश्चाधोमुखीं कलाम्।
केशान्ते तिलकस्योर्द्धे दधती सुमनोहरा॥
मणिकुण्डलसंघृष्टगण्डा मुकुटमण्डिता।
सन्द्योतिःकर्णपूराभ्यां कर्णमापूर्य्य संस्थिता॥
सुवर्णमणिमाणिक्यनागहारविराजिता।
सदा सुगन्धिभिः पुष्पैरङ्गनैरतिसुन्दरी॥
मालां बिभर्त्ति ग्रीवायां रत्नकेयूरधारिणी।
मृणालायतदोर्दण्डैस्तु बाहुभिः कोमलैः शुभैः॥
राजन्ती कञ्चुकोपेतपीनोन्नतपयोधरा।
क्षीणमध्या पीतवस्त्रा चिबुकोपरिभूषिता॥
शूलं वज्रञ्च बाणञ्च खड्गं शक्तिं तथैव च।
दक्षिणैः पाणिभिर्देवी गृहीतातिविराजिता॥
गदां घण्टाञ्च चापञ्च चर्म्म शङ्खं तथैव च।
ऊर्द्धादिक्रमतो देवी दधती वामपाणिभिः॥
सिंहस्योपरि तिष्ठन्ती व्याघ्रचर्म्मणि कौषिकी।
बिभ्रती रूपमतुलं सुरासुरमनोहरम्॥
एतस्याः शृणु वत्स त्वं याः पूज्या अष्टयोगिनीः।
ताः पूजिताश्च कुर्व्वन्ति चतुर्व्वर्गं नृणां सदा॥
ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा।
कौमारी वैष्णवी चैव वाराही पञ्चमी तथा॥
नारसिंही तथैवेन्द्री शिवदूती तथाष्टमी।
एताः पूज्या महाभागा योगिनीः कामदायिनीः"॥
इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः॥*॥

अन्यच्च।
"शरीरकोषतश्चास्याः समुद्भूतास्त्रयीक्ष्विव।
श्लोकं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः॥
देवैः समेतैः समरे निशुम्भेन पराजितैः।
शरीरकोषाद्यत्तस्याः पार्व्वत्या निःसृताम्बिका॥
कौषिकीति समस्तेषु ततो लोकेषु गीयते"॥
इति मार्कण्डेयपुराणे देवीमाहात्म्ये ५ अध्यायः॥
अपरा व्युत्पत्तिर्यथा,—
"अल्पेनैवोपकारेण यस्माल्लोके सुखप्रदा।
कौषेयधारणाद्वापि सप्रसादाच्च कौषिकी"॥
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५॥

कौषेयं, त्रि, (कौशेय + एषोदरात् षकारादेशः।) कृमिकोशोत्थवस्त्रादि। रेसमी कापड़ इति भाषा। इत्यमरटीकायां भरतः॥ (यथा, मार्कण्डेयपुराणे। १५। २७।
"कोषकारस्य कौषेये हृते वस्त्रेऽभिजायते"॥)

कौसीद्यं, क्ली, (कुत्सितं सीदति अस्मिन् इति। सीद् + ग्यः। ततः स्वार्थे ष्यञ्।) आलस्यम्। तन्द्रा। इति हेमचन्द्रः। (कुसीदस्य कर्म्म भावो वा। इति ष्यञ्।) कुसीदत्वम्॥

कौसुमं, क्ली, (कुसुमेन निर्वृत्तम्। इत्यण्।) कुसुमाञ्जनम्। पुष्पाञ्जनम्। इति राजनिर्घण्टः॥ (कुसुमस्येदम्। तस्येदमित्यण्। कुसुमसम्बन्धि वस्तुजातम्। कुसुमेषु भवम्। यथा) माघे। ७। ५७।
"विनयति सुदृशो दृशः परागं
प्रणयिनि! कौसुममाननानिलेन"॥)

कौसुम्भः, पुं, (कुसुम्भ + स्वार्थे अण्।) अरण्यकुसुम्भः। इति राजनिर्घण्टः॥ (शाकविशेषः। यथा,—
"कौसुम्भं कोमलं शाकं कासमर्द्दविमर्द्दितम्।
पाचितं तप्तसर्पिषे माक्षिकमधुविमिश्रितम्"॥
इति शब्दार्थचिन्तामणिः॥ कुसुम्भेन रक्तम्। "तेन रक्तं रागात्"। ४। २। १। इत्यण्।) कुसुम्भपुष्परागयुक्ते त्रि। इत्यमरटीकायां रायमुकुटः। (यथा, माघे।
"कौसुम्भं एथुकुचकुम्भसङ्गिवासः"॥
कुसुम्भस्येदं तस्येदमित्यण्। कुसुम्भसम्बन्धिवस्तुमात्रम्। यथा, माघे। ११। ५२।
"दिनकरकरसङ्गथक्तकौसुम्भकान्ति"॥)

कौहटिकः, त्रि, (कुहट्या कुत्सितगत्या चरति इति ठक्।) मायाकारः। इति जटाधरः॥

कौस्तुभः, पुं, (कुं सुवं स्तुभ्नाति व्याप्नोति इति। कुस्तुभः सागरः तत्र भव इत्यण्। यद्वा, कुं भूमिं जगदित्यर्थं स्तुभते व्याप्नोति सर्व्वमाक्रम्य तिष्ठतीति भावः। कुस्तुभो विष्णुः तस्यायं मणिरित्यण्।) स्वनामख्यातो विष्णुवक्षःस्थो मणिः। इत्यमरः। १। १। ३०॥ (यथा, भागवते। ८। ८। ५।
"कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः।
तस्मिन् हरिः स्पृहां चक्रे वक्षोऽलङ्करणे मणौ"॥
"कौस्तुभस्तु महातेजाः कोटिसूर्य्यसमप्रभः।
इदं किमुत वक्तव्यं प्रदीप्तोद्दीप्तिमानिति"॥
इति भागवतामृतम्॥ मुद्राविशेषः। यथा,—
"अनामाङ्गुष्ठसंलग्ना दक्षिणस्य कनिष्ठिका।
कनिष्ठयान्यया बद्धा तर्जन्या दक्षया तथा॥
वामानामाञ्च वध्नीयात् दक्षिणाङ्गुष्ठमूलके।
अङ्गुष्ठमध्यमे भूयः संयोज्य सरलाः पराः।
चतस्रोऽप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका"॥
इति तन्त्रसारः॥

कौस्तुभवक्षाः, [स्] पुं, (कौस्तुभः वक्षसि उरःस्थले यस्य।) विष्णुः। इति हारावली॥

क्नथ, किं म वधे। इति कविकल्पद्रुमः। (चुरां पक्षे भां–परं–सकं–सेट्।) किं म, क्नथयति। इति दुर्गादासः॥


क्नस, उ म य क्वृतौ। भासने। इति कविकल्पद्रुमः॥ (दिवां–परं–अकं–सेट्।) एष दन्त्यनकारयुक्तः। उ, क्नसित्वा क्नस्वा। म, क्नसयति कान्त्या जगत्प्राज्यः। य, क्नस्यति खलः कुटिलः स्यादित्यर्थः। कृतिरिह कौटिल्यम्। इति दुर्गादासः॥

क्नस, इ कि भासने। इति कविकल्पद्रुमः॥ (चुरां पक्षे भां–परं–अकं–सेट्।) इ, क्नंसयते। कि, क्नंसयति क्नंसति। भासनं दीप्तिः। इति दुर्गादासः॥


क्नूय, ईं ङ दुर्गन्धे। आर्द्रत्वे। शब्दे। इति कविकल्पद्रुमः॥ दन्त्यनकारयुक्तो दीर्घी। (भां–आत्मां–अकं–सेट्–ईर्नित्यामनिट्।) तथा च। क्नूयो स्कायति ते विदेव य इमे सेविषु मेविरुता। इति शार्दूलविक्रीड़िते चण्डेश्वरः॥ ई, क्नूतः। ङ,

क्रूयते मत्स्यः दुर्गन्धः स्यादित्यर्थः। क्रूयते वस्त्रमम्भसा। इति दुर्गादासः॥
क्मर, कौटिल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ओष्ठवर्गशेषयुक्तः। क्मरति खलः कुटिलः स्यादित्यर्थः। इति दुर्गादासः॥
क्रकचः, पुं क्ली, यष्टिलवृक्षः। इति मेदिनी॥ (ज्योतिषोक्तयोगभेदः। तस्य लक्षणं यथा,—
"षष्ठादितिथयो मन्दाद् विलोमं क्रकचः स्मृतः"॥ अस्य विवृतिर्यथा।
"शनौ षष्ठी, शुक्रे सप्तमी, गुरौ अष्टमी, बुधे नवमी, भौमे दशमी, सोमे एकादशी, रवौ द्वादशी, एते योगाः क्रकचाख्या विज्ञेयाः"। यथा, नारदोक्तिः।
"त्रयोदशस्युर्मिलने संख्ययोक्तिथिवारयोः।
क्रकचो नाम योगोऽयं मङ्गलेष्वतिगर्हितः"॥*॥
क्र इति छत्वा कचति शब्दायते। कच शब्दे + पचाद्यच्।) करपत्रम्। काष्ठविदारणास्त्रविशेषः। करात् इति भाषा। इत्यमरः। १। १०। ३५॥ (यथा, महाभारते ३। २२। ३४।
"मध्येन पाटयामास क्रकचो दार्व्विवोच्छ्रितम्"॥)
"अथ क्रकचव्यवहारे करणसूत्रं वृत्तम्। पिण्डयोगदलमग्रमूलयोर्हैर्घसंगुणितमङ्गलात्मकम्। दारुदारणपथैः समाहतं षट्स्वरेषु विहृतं करात्मकम्॥ उदाहरणम्।
मूले नखाङ्गुलमितोऽथ नृपाङ्गुलोऽग्रे
पिण्डः शताङ्गुलमितं किल यस्य दैर्घ्यम्।
तद्दारुदारणपथेषु चतुर्षु किं स्या-
द्वल्लात्मकं वद सखे गणितं द्रुतं मे॥

न्यासः



पिण्डयोगदलम्। १८। दैर्घ्येण। १००। संगुणितम्। १८००। दारुदारणपथैः। ४। गुणितम्। ७२००। षट्स्वरेषु। ५७६। विहृतं जातं करात्मकं गणितम्। २५/६॥ क्रकचान्तरे करणसूत्रं सार्द्धवृत्तम्। क्रियते तु यदि तिर्य्यग्गुणवत् पिण्डविस्तृतिहृते फलं तदा। इष्टिकाचितिदृषच्चितिखातक्रकचव्यवहृतौ खलु मूल्यम्। कर्म्मकारजनसम्मतिपथा तन्मृदुत्वकठिनत्वयोगेन॥ उदाहरणम्।
यद्विस्तृतिर्द्वन्तमिताङ्गुलानि
पिण्डस्तथा षोडश यत्र कोष्ठे।
छेदेषु तिर्य्यङ्नवसु प्रचक्ष्य
किं स्यात् फलं तत्र करात्मकं मे॥



विस्तृतिहृतिः। ५१२। दारुदारणमार्गं। ६। घ्ना। १६०८। षट्स्वरेषु। ५७६। विहृतं जातं फलं हस्ताः। ८। इति लीलावत्यां क्रकचव्यवहारः॥ *॥
क्रकचच्छदः, पुं, (क्रकचः करपत्रमिव च्छदाः पत्राणि यस्य।) केतकीवृक्षः। इति चिकाण्डशेषः॥
क्रकचपत्रः, पुं, (क्रकचवत् पत्रं यस्य।) शाकवृक्षः। इति राजनिर्घण्टः॥ (केतकीवृक्षः॥)
क्रकचपात्, [द्] पुं, (क्रकच इव पादो यस्य। अन्त्यलोपः।) ढुकलासः। इति चिकाण्डशेषः॥
क्रकचपादः, पुं, (क्रकचमिव पादो यस्य।) ढुकलासः। इति हारावली॥
क्रकचषष्ठी, स्त्री, (क्रकचवत् षष्ठं षष्ठदेशो यस्याः। इति ङीष्।) कवयी मत्स्यः। इति शब्दरत्नावली॥
क्रकचा, स्त्री, (क्रकचस्तदाकारोऽस्त्यस्याः। अर्श आदिभ्यः अच् ततष्टाप्।) केतकी इति रत्नमाला॥
क्रकणः, पुं, (क्र इति कणति शब्दायते। कण शब्दे + अच्। जातित्वात् स्त्रियां ङीष्।) पक्षिविशेषः। इत्यमरः॥ कयार इति भाषा॥
क्रकरः, पुं, (क्र इति शब्दं कर्त्तुं शीलमस्य इति। क्र + ताच्छील्ये टः।) करीरवृक्षः। उटकाटार इति भाषा। क्रकणपक्षी। इत्यमरः। २। ५। १६॥ कयार इति करकरा इति च भाषा॥ (यथा,— महाभारते १३। १११। १०३।
"पत्त्रोर्णं चोरयित्वा तु क्रकरत्वं नियच्छति"॥)
अस्य मांसस्य गुणाः। लघुत्वम्। हृद्यत्वम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते।
"चकोरकलविङ्गमयूरक्रकर इत्याद्युपक्रम्य लघवः क्रकरा हृद्यास्तया चैवोपचक्रकाः"॥
इत्यन्तेनोपसंहृताः॥) दीनः। क्रकचः। इति मेदिनी॥
क्रतुः, पुं, (क्रियतेऽसौ इति। कृ + "कृञः कतुः" उणां १। ७८। इति कर्म्मणि कतु प्रत्ययः।) यज्ञः इत्यमरः॥ सप्तर्ष्यन्तर्गतब्रह्ममानसपुत्रमुनिविशेषः। इति मेदिनी। अयन्तु ब्रह्मणः कराज्जातः। (यथा, महाभारते। १। ६५। १०।
"ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः। मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः"॥)
एतस्य भार्य्या प्रजापतेः कर्दमस्य कन्या क्रिया। पुत्राः षष्टिसहस्रबालखिल्याख्याङ्गुष्ठमात्रा ऋषयः।
(यथा,—भागवते। ४। १। ३८।
"क्रतोरपि क्रिया भार्य्या वालखिल्यानसूयत।

ऋषीन् षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा"॥
विश्वेदेवविशेषः। यथा, हरिवंशे।
आत्मार्थे चाहृजत्पुत्रान् लोककर्त्तॄन् पितामहः॥
विश्वे प्रजानां प्रतयो येभ्यो लोका विनिःसृताः"॥
तत उक्तं "दक्षं मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुं। वशिष्ठं गौतमञ्चैव भृगुमङ्गिरसं मनुम्"। इत्याद्युपक्रम्य।
"अथर्व्वभूता इत्येते ख्याताश्चैव महर्षयः।
त्रयोदशसुता येषां वंशा वै संप्रतिष्ठिताः"॥
जटाधरेण तु "विश्वेदेवा दशस्मृताः"। इत्युक्तं तत्कल्पभेदादविरुद्धम्॥
यथा, शतपथब्राह्मणे १०। ६। ३। १।
"यावत् क्रतुरयमस्माल्लोकात् प्रेत्यैतं क्रतुमुं लोकं प्रेत्य सम्भवति"॥
यूपसहितः सोमसाध्यो यज्ञः। विष्णुः। यथा, विष्णुसंहितायाम्।
"यज्ञ ईज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः"॥
अस्य भाष्यं यथा,—
"अस्य सर्व्वयज्ञस्वरूपत्वात् यज्ञः यूपसहितो यज्ञः क्रतुरिति"। अतएव विष्णोः सर्व्वयज्ञमयत्वात् यज्ञत्वं क्रतुशब्दस्यापि यूपसहितयज्ञबोधकत्वं प्रसिद्धम्॥ तद्यागे शतपथब्राह्मणादावुल्लिखिता यूपविशेषाः। यथा, तत्र सोमसाध्ययागाश्च त्रयः क्रतवः। तथाहि श्रुतौ "त्रीन् क्रतूनन्वाहाग्नेयमुषस्यमाश्विनम्"। सङ्कल्पः। स सङ्कल्पस्तु कामनाधीनश्चित्तवृत्तिविशेषः। उक्तञ्च
"कामः क्रतुः कर्म्म जन्मेत्येवमेषां क्रमो भवेत्"।
पुंसो या विषयापेक्षा स काम इति भण्यते।
स एव वर्द्धमानस्तेत् क्रतुत्वं प्रतिपद्यते"॥
रुचेरतिशयम्। यथा,—
"रुचेरतिशयः काम्ये विषये क्रतुरीर्य्यते"॥
स्तुत्यादिकर्म्म। यथा, ऋग्वेदे। ४। २१। १०।
"पुरुष्टुत! क्रत्वा नः स्वस्ति"। "क्रत्वा कर्म्मणा स्तुत्यादिहेतुना"। इति भाष्यम्॥
प्रज्ञा। यथा, छान्दोग्योपनिषदि। "अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिन् लोके पुरुषो भवति। तथेतः प्रेत्य भवति स क्रतुं कुर्व्वीत"॥
अस्य भाष्यं यथा,—
"कथमुपासीत। स क्रतुं कुर्व्वीत क्रतुर्निश्चयोऽध्यवसायश्च एवमेव नान्यथेति अविचलः प्रत्ययस्तं क्रतुं कुर्व्वीतोपासीत इत्यनेन व्यवहितेन सम्बन्धः। किं पुनः क्रतुकरणेन कर्त्तव्यं प्रयोजनम्? कथं वा क्रतुः कर्त्तव्यः? क्रतुकरणं वाभिप्रेतार्थसाधनं कथम्? इत्यस्यार्थस्य प्रतिपादनार्थमथेत्यादिग्रन्थः। अथ खल्विति हेत्वर्थः। यस्मात् क्रतुमयः क्रतूपायोऽध्यवसायात्मकः पुरुषो जीवः। यथा क्रतुर्यादृग्यः क्रतुरस्य सोऽयं यथा क्रतुर्यथाऽध्यवसायो यादृङ्निश्चयोऽस्मिंल्लोके जीवन्निह पुरुषो भवति। तथेतोऽस्माद्देहात् प्रेत्य मृत्वा भवति। क्रत्वनुरूपफलात्मको भवतीत्यर्थः। एव ह्येतच्छास्त्रतो दृष्टम्। 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरमित्यादि'। यत एवं व्यवस्था शास्त्र-

दृष्ट्याऽतः स एवं जानन् क्रतुं कुर्व्वीत यादृशं क्रतुं वक्ष्यामस्तम्। यत एवं शास्त्रप्रामाण्यादुपपद्यते क्रत्वनुरूपं फलमतः स कर्त्तव्यः क्रतुः"। आषाढ़-मासः। अस्मिन्नेव मासे चातुर्म्मास्यादियागप्रा-चुर्य्यात् तस्य तथात्वम्। यथा, यजुर्व्वेदे। १८। २८।

"वाजाय स्वाहा, प्रसवाय स्वाहा, अपिजाय स्वाहा, क्रतवे स्वाहा, वसवे स्वाहा"। इति।"क्रतवे याग-रूपाय चातुर्म्मास्यादियागप्राचुर्य्यात् क्रतुराषाढ़ः"॥ इति वेददीधितिः॥ अश्वमेधयज्ञः। यथा, मनौ। ७। ७९।

"यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः।
धर्म्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च"॥)

क्रतुद्विट्, [ष्] पुं, (क्रतुं यज्ञं द्वेष्टीति। द्विष्+ "सत्सूद्विषेति"। ३। २। ६१। क्विप्।) असुरः। इति त्रिकाण्डशेषः॥

क्रतुध्रुक्, [ह्] पुं, (क्रतवे यज्ञाय द्रुह्यति द्रोहमा-चरतीति। द्रुह्+क्विप्।) असुरः। इति जटा-धरः॥ अस्य रूपान्तराणि। क्रतुध्रुग्। क्रतुधृट्। क्रतुध्रुड्॥

क्रतुध्वंसी, [न्] पुं, (क्रतुं दक्षयज्ञं ध्वंसयतीति। ध्वन्स्+णिनिः। खजटोत्पादितवीरभद्रेण क्रतु-ध्वंसकारितत्वादस्य तथात्वम्।) शिवः। इत्यमरः॥ (यथाहि अनेन दक्षयज्ञध्वंसः कृतस्तथा तद्विवरण-मुच्यते। पुरा किल कोपपरवशो दक्षः वैरनिर्या-तनाय शिवरहितयज्ञं चिकीर्षुस्तच्च सर्व्वान् देवेयदेवब्रह्मर्षिप्रभृतीन् आहूतवान्। अथ पत्यु-र्भवस्यावमाननामसहमाना भवानी सती दाक्षा-यणी पितुर्दक्षस्य यज्ञं दिदृक्षुरनाहूताऽपि दक्ष-यज्ञं समाययौ। दक्षस्तु तां शिवां दृष्ट्वा मोहान्धः कालप्रेरितः शिवनिन्दया सतीं तिरस्कार। सा तु शिवनिन्दामाकर्ण्य समाधियोगाग्निना स्वशरीरं परित्याज। एतच्छ्रुत्वा रुद्ररूपी देव-देवः स्वजाटातः वीरभद्रमुत्पादयन् दक्षयज्ञक्षय-मनैषीत्। एतद्विवरणन्तु काशीखण्डे ८६ अ-ध्याये तथा श्रीमद्भागवतप्रभृतिग्रन्थे च विस्त-रशो द्रष्टव्यम्॥)

क्रतुपशुः, पुं, (क्रतोरश्वमेधादेर्यज्ञस्य अङ्गविशेषः पशुः।) अश्वः। इति हारावली॥

क्रतुपुरुषः, पुं, (क्रतुः यज्ञः तन्मयः तदधिष्ठाता वा पुरुषः।) विष्णुः। इति त्रिकाण्डशेषः॥ (अयं हि वराहरूपियज्ञपुरुषः। यदुक्तं भाग-वते। ३। १३। २१—२४।

"किमेतत्सूकरव्याजं सत्त्वं दिव्यमवस्थितम्।
अहोबतास्यर्थ्यमिदं नासाया मे विनिःसृतम्॥
दृष्टोऽङ्गुष्ठशिरोमात्रः क्षणाद् गण्डशिलासमः।
अपिसिद्धभगवानेष यज्ञो मे खेदयन् मनः॥
इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः।
भगवान् यज्ञपुरुषो जगर्जाऽऽक्षेन्द्रसन्निभः॥
ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान्।
स्वगर्जितेन ककुभः प्रतिस्वनतया विभुः"॥
अस्य रूपवर्णनं यथा, तत्रैव। ३५—३८।

"रूपं तवैतन्ननु दुष्कृतात्मनां
दुर्दर्शनं देव! यदध्वरात्मकम्।
छन्दांसि यस्य त्वचि बर्हिरोम
स्वाज्यं दृशि त्वङ्घ्रिषु चातुर्होत्रम्॥
सुक् तुण्ड आसोत् स्रुव ईश! नासयो-
रिड़ोदरे चमसाः कर्णरन्ध्रे।
प्राशित्रमास्ये ग्रसने ग्रहास्तु ते
यच्चर्वणन्ते भगवन्नग्निहोत्रम्॥
दीक्षानुजन्मोपसदः शिरोधरं
ते प्रायणीयोदयनीयदंष्ट्रः।
जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः
सभ्यावसथ्यं चितयोऽसवो हि ते॥
सोमस्तु रेतः सवनान्यवस्थितिः
संस्थाविभेदास्तव देव! धातवः।
सत्राणि सर्व्वाणि शरीरसन्धय-
स्त्वं सर्व्वयज्ञक्रतुरिष्किबन्धनः"॥

अत्र श्रीधरस्वामिना यद्व्याख्यातं तदयथा, "यज्ञात्मतां प्रपद्यन्तः स्तुवन्ति रूपमित्यादि चतुर्भिः। छन्दांसि गायत्र्यादीनि यज्ञाङ्गभूतछन्द-आद्यनुवादेन भगवदवयवता विधीयते वर्हिः शब्दे दीर्घाभावः आर्षः। दृशि चक्षुषि चातु-र्होत्रं होत्रादिचतुष्टयं कर्म्म। सुक् जुह्वः। तुण्डे मुखाग्रे। स्रुवो नासिकयोः। इड़ा भक्षणा-र्हाः चमसा ग्रहाश्च सोमपात्राणि। प्राशित्रं ब्रह्मभागपात्रम्। ग्रस्यतेऽनेनेति ग्रसनं मुखान्त-र्वर्त्तिच्छिद्रं चर्व्वणं भक्षणम्। दीक्षा दीक्षणीयेष्टिः अनुजन्म वारंवारं अभिधानम्। उपसदस्तिस्र इष्टयः शिरोधरं ग्रीवा। प्रायणीया दीक्षानन्त-रेष्टिः। उदयनीया समाप्नीष्टिः ते एव दंष्ट्रे यस्य। प्रवर्ग्यो महावीरः प्रत्युपसदः पूर्व्वं क्रियते। सभ्यो होमरहितोऽग्निः। आवसथ्य औपासनाग्निः ततो द्वन्द्वैकं क्रतुजपस्य शीर्षकं शिरः। चितयः इष्ट-कावचयनानि पञ्च असवः प्राणाः। प्रातः सवना-दीनि अवस्थितिरासनं बाल्याद्यवस्था वा। अग्नि-ष्टोमो ह्यग्निष्टोमः उक्थ्यः षोड़शी वाजपेयो-ऽतिरात्रः आप्तोर्यामः इति सप्तसंस्थाविभेदाः सप्तलड्मांसादिधातवः। सत्राणि द्वादशाहा-दीनि बहुयागसङ्घातरूपाणि असोमा यज्ञाः ससोमाः क्रतवस्तद्रूपस्त्वं इष्टिर्यजनं अनुष्ठानञ्च तदेवबन्धनं यस्य सः"॥)

क्रतुभुक्, [ज्] पुं, (क्रतौ यज्ञे देयं आज्यादिकं भुङ्क्ते। क्रतु+भुज्+क्विप्।) देवता। इत्यमरः १।१।९॥

क्रतुराजः, पुं, (क्रतुषु यज्ञेषु राजते इति। राज्+ अच्। यद्वा, क्रतूनां राजा। राजन्+टच्।) राजसूययज्ञः। इति शब्दरत्नावली॥ (क्रतुराट्। अश्वमेधयज्ञः। यथा, मनौ ११। २६०।

"यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः।
यथाघमर्षणं सूक्तं सर्व्वपापापनोदनम्"॥)

क्रतूत्तमः, पुं, (क्रतुषु यज्ञेषु उत्तमः।) राजसूययज्ञः। इति त्रिकाण्डशेषः॥

क्रथ, म वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। घटां। क्रथति। म, क्रथयति।)

क्रथ, क प्रतिहर्षे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) रेफयुक्तः। प्रतिहर्षः पुनः पुनर्हर्षीकरणम्। क, क्रथयति शिशुं लोकः पुनःपुनर्हर्षयति इत्यर्थः। इति दुर्गादासः॥

क्रथ, कि वधे। इति कविकल्पद्रुमः॥ (चुरां पक्षे भ्वां-परं-सकं-सेट्।) रेफयुक्तः। कि, क्राथयति क्राथति। इति दुर्गादासः॥

क्रथ, कि म वधे। इति कविकल्पद्रुमः॥ (चुरां पक्षे भ्वां-परं-सकं-सेट्।) रेफयुक्तः। पुनः पाठात् पूर्व्वो न मित्। कि म, क्राथयति। इति दुर्गादासः॥

क्रथनं, क्ली, (क्रथ्यते इति। क्रथ् वधे+भावे ल्युट्।) मारणम्। इत्यमरः। २। ८। ११५॥ (शुक्लागुरु। इति शब्दार्थचिन्तामणिः॥ पुं, देवयोनिविशेषः। यथा, महाभारते। १। ३२। १८।

"अश्वक्रन्देन वीरेण रेंगुकेन च पक्षिराट्।
क्राथनेन च शूरेण तपनेन च खेचरः॥
प्रजनेन च संग्रामं चकार पुलिनेन च"॥
दानवविशेषः। यथा, महाभारते। १। ६७। ५८।
"क्राथनस्तु महावीर्य्यः श्रीमान् राजन् महासुरः"॥)

क्राथनकं, क्ली, (क्राथन+स्वार्थे कन्।) सितागुरु। इति शब्दचन्द्रिका॥ (पुं, क्राथने दन्तकरञ्जक-कण्टकच्छेदने प्रस्तः कन्। उष्ट्रः। इति पक्ष-तन्त्रम्॥)

क्राद, इ रोदने। आक्रन्दने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-आक्रन्दने सकं-सेट्। इदित्।) इ, क्रन्द्यते। ततोऽक्रन्दीद्दशग्रीव इति। क्रन्दति भर्त्तारमिवाभिपन्नम्। दुर्गादासमते तु यमडानु बन्धी। यथा, घ, क्रन्दा। म, क्रन्दयति। ङ, क्रन्दते। इति॥

क्राद, घ म ङ वैक्लव्यविकलत्वयोः। इति कविकल्प-द्रुमः॥ (भ्वां-आत्मं-अकं-सेट्-घटां।) घ, क्रदा। म, क्रदयति। ङ, क्रदते। इति दुर्गादासः॥

क्रान्द, क शब्दसातत्ये। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) रेफयुक्तः। आ उपसर्गपूर्व्वकः। क, आक्रन्दयति। शब्दसातत्यं निरन्तरशब्दक्रिया। इति दुर्गादासः॥

क्रान्दनं, क्ली, (क्रदि+भावे ल्युट्।) शोकादिनाऽस्रु-पतनम्। काँदन इति भाषा। तत्पर्य्यायः। क्रन्दि-तम् २ रुदितम् ३ क्रुष्टम् ४ रोदनम् ५। इति. शब्दरत्नावली॥ (यथा, पद्मतन्त्रे ४। ३१।

"तं भक्षितं मत्वा गङ्गदस्तत्सारस्येन धिग्धिक् प्रलापपरः कथञ्चिदपि न क्रन्दनात् विरराम"॥)

योधसंरावः। आक्रानम्। इत्यमरः। २। ८। १०७॥

क्रान्दनः, पुं, (क्रन्दनं रोदनमिव शब्दविशेषः अस्या-स्तीति अच्।) विड़ालः। इति शब्दमाला॥

क्रान्तिः, क्ली, (क्रदि+भावे क्तिः।) रोदनम्। इत्य-मरः। १। ७। ३५॥ आक्रानम्। इति मेदिनी॥ योधचीत्कारणम्। इति शब्दरत्नावली॥

क्राप, घ म ङ छद्मायाम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) छद्मा दया। घ, छद्मा। भीषि चिन्तीति ङे मनीषाद्या इति निपात-

नात् रेफस्य ऋकारः। म, क्रपयति। ड, क्रपते दयालुर्दीनम्। इति दुर्गादासः॥

क्रम, उ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) उ, क्रमित्वा क्रान्त्वा क्रन्त्वा। क्रामति। वारिपूर्णां महीं कृत्वा पश्चात् संक्रमते गुरुरिति संशब्दस्योपसर्गप्रतिरूपकत्वे वागेरित्यात्मनेपदम्। दृष्युत्साहतायनेषूपसर्गान्तरमूर्ध्वादध्यात्मनेपदमिति शरणदेवः। संक्रामयतीत्यादि तु संक्रामन्तं करोतीति शब्दान्तात् औ साध्यम्। अन्यथा अमन्तत्वाऽसम्भवः स्यात्। हरेर्यदक्रामि पदैकदेशेन खमिति तु धातुपारायणमते घुरादिविवक्षया सिद्धम्। तन्मतन्तु परिभाषायां लिखितम्। अथवा आत्मेति कर्म्मणोऽध्याहारे प्रेरणे औ साध्यम्। हरेः पदं आत्मानं यत् खं क्रामयामास। इत्यर्थः। इति दुर्गादासः॥

क्रम, य गतौ। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्।) य, क्रम्यति। गोविन्दभट्टक्रमदीश्वरौ तु दीर्घं विधाय। क्राम्यतीत्याहतुः। तथा च। "इष्यते श्यनि दीर्घत्वं दाक्षिलक्षयवेदिभिः। तेन क्राम्यति कौमारे श्यनीत्यस्योपलक्षणात्"॥ इति दुर्गादासः॥

क्रमः, पुं, (क्रम्यते प्राप्यते पाठभेदो ऽनेन। क्रम + घञ्। "नोदात्तोपदेशस्येति"। ७। ३। ३४। इति न वृद्धिः।) वैदिकविधानम्। तत्पर्य्यायः। कल्पः २ विधिः ३। इत्यमरः। २। ७। ४०॥ (क्रम + भावे घञ्।) अनुक्रमः। (यथा, रघुः। ११। २४।

"लोकमन्धतमसात् क्रमोदितौ
रश्मिभिः शशिदिवाकराविव"॥)

शुक्तिः। आक्रमणम्। इति मेदिनी॥ (क्रामत्यनेन घञ् न वृद्धिः।) चरणः। इति हेमचन्द्रः॥ (खनामख्यातो वत्सप्रीपुत्रः। यथा, मार्कण्डेये ११८। १।

"तस्य तस्यां सुनन्दायां पुत्रा द्वादश जज्ञिरे।
प्रांशुः प्रवीरः शूरश्च सुचक्रो विक्रमः क्रमः"॥

सर्व्वक्रमणात् रुद्रः।
यथा, महाभारते। १३। १७। १२९।

"क्रतुः सुक्रतुर्विख्यातो लोकः सर्व्वाश्रयः क्रमः"॥

त्रिपादेन सर्व्वक्रमणात् विष्णुः।
यथा, तत्रैव १३। १४९। २२।

"ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः"॥)

क्रमकः, पुं, (क्रमं वेदपाठभेदं अधीते वेत्ति वा। "क्रमादिभ्यो वुन्"। ४। २। ६१। इति वुन्।) क्रमज्ञः। इति मुग्धबोधम्॥

क्रमणः, पुं, (क्रामत्यनेन करणे ल्युट्।) चरणः। इति हेमचन्द्रः॥ (यदुवंशीयनृपविशेषः। यथा हरिवंशे।

"क्षमिश्च क्रमणश्चैव धृष्टः शूरः पुरञ्जयः"॥

क्लीं। भावे ल्युट्। पादविक्षेपः। यथा, भागवते ८। १०। २१।

"एष त्वधर्म्मः क्रमणेषु यज्ञम्"॥)

क्रमपूरकः, पुं, (क्रमेण पूरयति बीजम्। पूर + णिच् + ण्वुल्। पुष्पवन्ते क्रमेणास्य बीजपूरकत्वात् तथात्वम्।) वकवृक्षः। इति राजनिर्घण्टः॥

क्रमशः, [स्] व्य, (कारकार्थवृत्तेः क्रमात् + वीप्सायां शस्।) क्रमेण क्रमेण। क्रमेक्रमे इति भाषा। यथा। "भवति विज्ञतमः क्रमशो जनः"। इति प्राचीनाः॥ (तथा च मनौ। ३। १२।

"सवर्णाऽग्रे द्विजातीनां प्रशस्ता दारकर्म्मणि।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः"॥)

क्रमागतं, त्रि, (क्रमेणागतं आयातम्।) क्रमायातम्। पितृपितामहादिक्रमेण प्राप्तम्। यथा,—

"अखण्डन्यायः स्त्रियः सर्व्वाः पुत्रदासपरिग्रहाः।
अखण्डन्यायस्तच्च यच्च तत् स्यात् क्रमागतम्"॥

इति व्यवहारतत्त्वे नारदः॥ (तथा च मनुः। २। १८।

"तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः।
वर्णानां सान्तरालानां स सदाचार उच्यते"॥)

क्रमायातः, त्रि, (क्रमेणायातः आगतः।) क्रमागतः। इति मिताक्षरा॥

क्रमिः, पुं, (क्रम् + इन्।) कृमिः। इति भरतो द्विरूपकोषश्च। रोगविशेषः। तच्चिकित्सा यथा,

"विड्भक्षणोषसंयुक्तमन्नमश्नं पिबेन्नरः।
दीपनं क्रिमिनाशाय जठराग्निविवृद्धये॥
प्रत्यहं कटुकं तिक्तं भोजनं कफनाशनम्।
क्रिमीणां नाशनं रुच्यमग्निसन्दीपनं परम्॥
विड्भक्षणोत्थपानीयं विड्भक्षेणावधूलितम्।
पीतं क्रिमिहरं दृष्टं क्रिमिजांश्च गदान् जयेत्॥
लिह्याद्विड्भक्षचूर्णं वा मधुना क्रिमिनाशनम्।
पलाशबीजस्य रसं पिबेन्माक्षिकसंयुतम्॥
पिबेत्तद्बीजकल्कं वा तक्रेण क्रिमिनाशनम्।
काम्पिल्यचूर्णकार्द्धं गुडेन सह भक्षितम्॥
पातयेत क्रिमीन् सर्व्वानुदरस्थान्न संशयः।
विड्भं कौटजं बीजं तथा बीजं पलाशजम्॥
संचूर्ण्य खादेत् खण्डेन क्रिमीन्नाशयितुं नरः।
निम्बपत्रसमुद्भूतं रसं क्षौद्रयुतं पिबेत्॥
धूस्तूरपत्रजं वापि क्रिमिनाशमनुत्तमम्।
रसेनेक्ष्वा समायुक्तो रसो धुस्तूरपत्रजः॥
ताम्बूलपत्रजो वापि लेपाद्यूकाविनाशनः।
धत्तूरपत्रकल्केन तद्रसेनैव पाचितम्॥
तैलमभ्यङ्गमात्रेण यूकान्नाशयति क्षणात्।

क्रिमीणां विट्कफोत्थानामेतदुक्तं चिकित्सितम्॥
रक्तजानान्तु संहारं कुर्य्यात् कुष्ठचिकित्सया॥

क्षीराणि मांसानि घृतानि वापि
दधीनि शाकानि च पर्व्वजानि।
अन्नञ्च मिष्टञ्च रसं विशेषात्
क्रिमीन् जिघांसुः परिवर्ज्जयेद्धि"॥

इति क्रिम्यधिकारः। इति भावप्रकाशः॥

क्रमिकण्टकं, क्ली, (क्रमौ क्रमिनाशे कण्टकमिव। तस्य नाशकत्वात्तथात्वम्।) चित्राङ्गः। विड्भम्। उडुम्बरः। इति मेदिनी॥

क्रमिघ्नं, क्ली, (क्रमिं हन्ति। हन् + टः।) विड्भम्। इति रत्नमाला॥

क्रमिजं, क्ली, (क्रमेः क्रमिभ्यो वा जायते इति। जन् + डः।) अगुरु। इत्यमरः॥

क्रमिजा, स्त्री, (क्रमिज + टाप्।) लाक्षा। इति इति रत्नमाला॥

क्रमिशत्रुः, पुं, (क्रमेः क्रमीणां वा शत्रुरिव नाशकत्वात्।) विड्भङ्गः। इति रत्नमाला॥

क्रमुः, पुं, (क्रमु + बाहुलकादुः।) गुवाकः। इति भरतो द्विरूपकोषश्च॥

क्रमुकः, पुं, (क्रमु + संज्ञायां कन्।) पट्टिकालोध्रः। गुवाकवृक्षः। ब्रह्मदारुवृक्षः। इत्यमरः। २। ४। ४१॥ भद्रमुस्तकम्। कार्यासिकाफलम्। इति मेदिनी।

क्रमुकफलं, क्ली, (क्रमुक एव फलम्। क्रमुकस्य गुवाकादिवृक्षस्य फलं वा।) गुवाकम्। इति राजनिर्घण्टः॥ (यथा, माघे।

"आस्वादितार्द्रक्रमुकाः समुद्गात्"॥

क्रमुकाः क्रमुकफलानीत्यर्थः॥) अस्य गुणपर्य्यायौ गुवाकशब्दे द्रष्टव्यौ॥

क्रमुकी, स्त्री, (क्रमुक + स्त्रियां गौरादित्वात् ङीष्।) गुवाकः। इति शब्दरत्नावली॥

क्रमेलः, पुं, (क्रममालम्ब्य एलति गच्छतीति। एल् + अच्।) उष्ट्रः। इत्युणादिकोषः॥

क्रमेलकः, पुं, (क्रममालम्ब्य एलति गच्छति। एल् गतौ + ण्वुल्। यद्वा, क्रमेल + स्वार्थे कन्।) उष्ट्रः। इत्यमरः २। ९। ७५॥ (यथा पञ्चतन्त्रे। १। ४१४।

"भो ममाग्रेऽपि क्रमेलकहृदयं भक्षयित्वा अधुना मम मुखमवलोकयसि"॥)

क्रमोद्वेगः, पुं, (क्रमेण उद्गतः उत्कृष्टो वा वेगो यस्य।) वृषः। इति भूरिप्रयोगः॥

क्रयः, पुं, (क्री + भावे अच्।) पण्यपूरणादिमूल्यदानेन विक्रेतुः स्वत्वापनयनेन स्वत्वापादनव्यापारविशेषः। मूल्येन द्रव्यग्रहणम्। केना इति भाषा। यथा,—

"प्रकाशं वा क्रयं कुर्य्यात् मूल्यं वापि समर्पयेत्"॥

इति प्रायश्चित्ततत्त्वे बृहस्पतिः॥

क्रयलेख्यं, क्ली, (क्रयस्य क्रये क्रयमधिकृत्य वा लेख्यम्।) भूम्यादिक्रयलिपिः। कबाला इति पारस्य भाषा। यथा,

"गृहं क्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्।
पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते"॥

इति प्रायश्चित्ततत्त्वे बृहस्पतिः॥

क्रयविक्रयः, पुं, (क्रयेण सह विक्रयः।) वाणिज्यम्। केना वेचा इति भाषा। यथा,—

"ऋणदानं तथादानं वस्तूनां क्रयविक्रयम्।
न कुर्य्यात् गुरुणा सार्द्धं शिष्यो भूत्वा कदाचन"॥

इति तन्त्रसारः॥

(केचित्तु एतौ द्विवचनान्ताविच्छन्ति। तत्र द्वन्द्वः। यथा, क्रयश्च विक्रयश्च तौ क्रयविक्रयौ। यदुक्तं मनुसंहितायाम्।

"आगमं निर्गमस्थानं तथा वृद्धिक्षयावुभौ।
विचार्य्य सर्व्वपण्यानां कारयेत् क्रयविक्रयौ॥
पञ्चरात्रे पञ्चरात्रे पक्षे पक्षे ऽथवा गते।

कुर्व्वीत चैषां प्रत्यक्षमर्थसंस्थापनं नृपः" ॥

क्रयविक्रयानुशयः, पुं, (क्रये विक्रये च क्रयविक्रयौ वा अनुशयः पश्चात्तापः ।) अष्टादशविवादान्तर्गतविवादविशेषः । यथा ।

"वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः" ॥

अस्य विवरणम् । यथा, मनौ ।

"क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् ।
योऽन्तर्दशाहात् तद्द्रव्यं दद्याच्चैवाददीत वा" ॥

क्रयविक्रयिकः, पुं, (क्रयविक्रयाभ्यां जीवतीति । "वस्तुक्रयविक्रयात् ठन्" ।४।४।१३। इति ठन् ।) वणिक् । इत्यमरः । २ । ९ । ७८ ॥

क्रयशीर्षं, क्ली, (कपिशीर्षं + एषोदरात् साधुः ।) कपिशीर्षम् । इति त्रिकाण्डशेषः ॥

क्रयारोहः, पुं, (आ + रुह + अधिकरणे घञ् । क्रयार्थं आरोहः समारोहोऽत्र ।) हट्टः । इति त्रिकाण्डशेषः ॥

क्रयिकः, पुं, (क्रयः प्रयोजनमस्यास्य इति ठन् ।) क्रेता । तत्पर्य्यायः । क्रायकः २ । इत्यमरः ॥ क्रयी ३ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १३ । "धनेन क्रयिको हन्ति खादकस्त्वोपभोगतः" ॥

क्रयेण जीवतीति । "वस्तुक्रयविक्रयात् ठन्" । ४ । ४ । १३ । इति व्यत्ताद्यपि ठन्) क्रयजीवी । वणिक् । इत्यमरटीकायां भरतः ॥ (यथा, माघे । "पर्य्यापतत क्रयिकलोकमगण्यपण्या" ॥)

क्रयी, [न्] त्रि, (क्रयोऽस्यास्य इति । क्रय + इनिः ।) क्रयकर्त्ता । इति हेमचन्द्रः ॥

क्रय्यं, त्रि, (क्रुञ्चोऽन् क्रयपर्य्यये + "अतो यत्" । ३ । १ । ९७ । "क्रय्यस्तदर्थे" ६ । १ । ८२ । इति साधुः ।) क्रये प्रसारितम् । क्रयनिमित्तं हट्टादौ न्यस्तं यत् द्रव्यम् । इत्यमरः ॥ (यथा, शतपथब्राह्मणे । ३ । ३ । ३ । १ । "क्रय्यस्ते सोमो राजा इति क्रय इत्याह सोमविक्रयी" ॥)

क्रव्यं, क्ली, (क्रव + यत् । लस्य रत्वम् ।) मांसम् । इत्यमरः ॥ (यथा, भागवते । ४ । १८ । २४ । "क्रव्यादाः प्राणिनः क्रव्यं दुदुक्षन्ति कलेवरे । सुपर्णवत्सा विहगाश्चरं वाऽचरमेव च" ॥)

क्रव्यघातनः, पुं, (क्रव्यस्य क्रव्यार्थं वा घात्यतेऽसौ । हन् + स्वार्थे णिच् + कर्म्मणि ल्युट् ।) मृगः । इति शब्दचन्द्रिका ॥

क्रव्यात्, [द्] पुं, (क्रव्यं मांसं अत्तीति । "क्रव्ये च विट्" । ३ । २ । ६९ । इति ।) राक्षसः । इत्यमरः ॥ मांसाग्निनि त्रि । इति मेदिनी । (यथ्रादिमांसभुक् पक्षिविशेषश्चापि । यथा, रघौ । १५ । १६ ।

"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः ॥
क्रव्याद्गणपरीवारश्चितामिरिव जङ्गमः" ॥

"क्षुधानुषक्ते क्रव्यादो गृध्रादयः" । इति मल्लिनाथः । व्याघ्रादिहिंसपशुभेदः ।

यथा, मनुः ५ । १३१ ।

"अभिहंतस्य यन्मांसं शुचि तन्मनुरब्रवीत् ।
क्रव्याद्भिश्च हतस्यान्यैरुपघातात्तथैव हि दस्युभिः" ॥

"क्रव्याद्भिः व्याघ्रश्येनादिभिरिति" । कुल्लूकभट्टः ॥

ग्राम्यक्रव्यादो मार्ज्जारादयः ।
यथा, मनौ । ११ । १९९ ।

"श्वभृद्गोखरैर्दंष्ट्रो ग्राम्यैः क्रव्याद्भिरेव च" ।

"ग्राम्यैः क्रव्याद्भिरामांसादैर्मार्ज्जादिभिः" ।

इति कुल्लूकभट्टः ॥ गुरुपत्नीगामिनां नरकभोगावसाने क्रव्यादां आममांसाशिनां योनिप्राप्तिर्भवति । यथा, तत्रैव । १२ । ५८ ।

"तृणगुल्मलतानाञ्च क्रव्यादां दंष्ट्रिणामपि ।
क्रूरकर्म्मकृतामेव शतशो गुरुतल्पगः" ॥

शवदाहकाग्निभेदः । यथा, शतपथब्राह्मणे । १ । २ । १ । ४ ।

"अपाग्ने ! अग्निमामादं जहि निष्क्व्यादं सेध इत्यं वा आमाद् येनेदं मनुष्याः पक्वाऽन्नन्ति अथ येन पुरुषं दहन्ति स क्रव्याद् एतावेवैतदुभावतोऽपहन्ति" । "हे अग्ने ! गार्हपत्य ! आमादमग्निमपजहि परित्यज तथा,—

"क्रव्यादमग्निं निःसेधनिःशेषं दूरे गमय" ।

इति भाष्यम् ॥ ऋग्वेदे च । १० । १६ । १० ।

"योऽग्निं क्रव्यात् प्रविवेश्च यो गृहम्" ॥)

क्रव्यादः, पुं, (क्रव्यं मांसमत्ति । अद् उपपदे "कर्म्मण्यण्" । ३ । २ । १ । इति अण् । क्षत्तं छिन्नं तदेव पुनर्व्विशेषतः क्षत्तं पक्वञ्च भुङ्क्ते इति क्षत्तविक्षत्तपक्वशब्दस्य एषोदरात् क्रव्यादेशः । इति काशिका ।) राक्षसः । इत्यमरः ॥ सिंहः । श्येनः । इति राजनिर्घण्टः ॥ शवभक्षकाग्निः । यथा, "क्रव्यादो मृतभक्षणे" । इति तिथ्यादितत्त्वम् ॥ मांसाग्निनि त्रि । इति धरणी ॥ (पुरा किल केनचिद्भक्षसाग्निमुखादियमेव सा भृगुभार्य्या पुलोमेति विदितेनैवापहृतायान्तस्यां पुलोमायां महर्षिर्भृगुरत्यन्ताऽमर्षमाहरन् त्वं सर्व्वभक्षो भविष्यसीति तस्मै वह्नये शापं प्रददौ तेन हि तस्य क्रव्यादत्वं प्रसिद्धम् । ततः शप्तेनापि तेनाग्निदेवेनात्मनः सर्व्वभक्षकत्वरूपशापं परिहर्त्तुकामेन सर्व्वभक्षः सन्घृतं देवादीनां मुखं भविष्यामीति चिन्तयता अग्निहोत्रेषु यज्ञसत्रक्रियासु च आत्मनः संहारस्वके । पितामहस्तु देवादिभिरनुरुद्धो वह्नेः स्वप्रभावमनुस्मारयन् कौशलेन हुतभागग्रहणस्वीकारमकारयत् । एतद्विवरणन्तु महाभारते । १ । ९–७ अध्याययोर्द्रष्टव्यम् । तद्यथा,

भृगुरुवाच ।

"कोनासि रक्षसे तस्मै कथिता त्वं जिहीर्षते ।
न हि त्वां वेद तद्रक्षो मद्भार्य्यां चारुहासिनीम् ॥
तत्त्वमाख्याहि तं ह्यद्य शप्तुमिच्छाम्यहं रुषा ।
विभेति को न शापाग्ने कस्य चायं व्यतिक्रमः ॥

पुलोमोवाच ।

अग्निना भगवंस्तस्मै रक्षसेऽहं निवेदिता ।
ततो मामनयद्रक्षः क्रोशन्तीं कुररीमिव ॥
साहं तव सुतस्यास्य तेजसा परिमोक्षिता ।
भस्मीभूतन्तु तद्रक्षो मामुत्सृज्य पपात वै ॥

सूत उवाच ।

इति श्रुत्वा पुलोमाया भृगुः परममन्युमान् ।
शशापाग्निमतिक्रुद्धः सर्व्वभक्षो भविष्यसि" ॥

"शप्तस्तु भृगुणा वह्निः क्रुद्धो वाक्यमथाब्रवीत् ।
किमिदं साहसं ब्रह्मन् कृतवानसि मां प्रति" ॥
"अमावास्याञ्च पितरः पौर्णमास्याञ्च देवताः ।
मन्मुखेनैव भुञ्जते च हुतं हविः ॥
सर्व्वभक्षः कथं तेषां भविष्यामि मुखं तदहम्" ॥
"चिन्तयित्वा ततो वह्निश्चक्रे संहारमात्मनः ।
द्विजानामग्निहोत्रेषु यज्ञसत्रक्रियासु च ॥
निरोङ्कारवषट्कारः स्वधास्वाहाविवर्ज्जितः ।
विनाग्निना प्रजाः सर्व्वास्तत आसन् सुदुःखिताः ॥
अथर्षयः समुद्विग्ना देवान् गत्वाब्रुवन् वचः ।
अग्निशापात्क्रियाभ्रंशात् भ्रान्ता लोकास्त्रयोऽनघाः ।
विदध्वमत्र यत्कार्य्यं न स्यात् कालात्ययो यथा ।
अथर्षयश्च देवाश्च ब्रह्माणमुपगम्य तु ॥
अग्नेरावेदयच्छापं क्रियासंहारमेव च ।
भृगुणा वै महाभाग ! शप्तोऽग्निः कारणान्तरे ॥
कथं देवमुखो भूत्वा यज्ञभागान्यभुक् तथा ।
हुतभुक् सर्व्वभूतेषु सर्व्वभक्षत्वमेष्यति ॥
श्रुत्वा तु तद्वचस्तेषामग्निमाह्वय विश्वहृत् ।
उवाच वचनं श्लक्ष्णं भूतभावनमव्ययम् ॥
लोकानामिह सर्व्वेषां त्वं कर्त्ता चान्त एव च ।
त्वं धारयसि लोकांस्त्रीन् क्रियाणाञ्च प्रवर्त्तकः ॥
स तथा कुरु लोकेश ! नोच्छिद्येरन् क्रिया यथा ।
कस्मादेवं विमूढस्त्वमीश्वरः सन् हुताशन ! ॥
त्वं पवित्रः सदा लोके सर्व्वलोकगतिश्च ह ।
न त्वं सर्व्वशरीरेण सर्व्वभक्षत्वमेष्यसि ॥
अपाने ह्यर्चिषो यास्ते सर्व्वं भोक्ष्यन्ति तास्त्रिखिन् !!
क्रव्यादा च तनुर्य्या ते सा सर्व्वं भक्षयिष्यति ॥
यथा सूर्य्यांशुभिः स्पृष्टं सर्व्वं शुचि विभाव्यते ।
तथा त्वदर्चिर्निर्दग्धं सर्व्वं शुचि भविष्यति ॥
त्वमग्ने ! परमं तेजः स्वप्रभावादिनिर्गतम् ।
स्वतेजसैव तं शापं कुरु सत्यमृषेर्विभो ! ॥
देवानाप्यात्मनो भागं गृहाण त्वं मुखे हुतम्" ।
"एवमस्त्विति तं वह्निः प्रत्युवाच पितामहम् ॥
जगाम शासनं कर्त्तुं देवस्य परमेष्ठिनः" ॥ * ॥
अतएव ऋङ्मन्त्रेण क्रव्यादाख्याग्नेः शान्तिकर्म्मादिव्यपसारणं जातवेदोऽग्नेरादानं प्रोक्तम् ।
यथा, ऋग्वेदे । १० । १६ । ९ ।

"क्रव्यादमग्निं प्रहिणोमि दूरं
यमराज्ञो गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा
देवेभ्यो हव्यं वहतु प्रजानन्" ॥

"क्रव्यं आमिषं अत्ति क्रव्यादः तं तीव्रमग्निं दूरं विप्रकृष्टे देशे प्रहिणोमि प्रगमयामि । रिप्रं पापं तस्य वाहः वोढा यद्वा रिप्रं पापं वहति उपपदे "कर्म्मण्यण्" इति वह + अण् । सोऽग्निः यमराज्ञः यमो राजा येषां तान् यमराजकान् प्रदेशान् गच्छतु प्राप्नोतु । अथ शान्तिकर्म्मार्थं उपासने इतरः क्रव्यादादन्यः जातवेदा अग्निः इहैव देशे देवेभ्यः देवार्थं हव्यं वहतु" ॥ इति भाष्यम् ॥ क्रव्यं मांसं अत्ति । अद् + उपपदे "कर्म्मण्यण्" । ३ । २ । १ । इत्यण् । रुरुनामामांसाग्निग्रभेदः । यथा, भागवते । ५ । २९ । ११ ।

"एवमेव महाशौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति यः केवलं देहम्भरः" ॥)

क्रान्तः, पुं, (क्रम्यते आक्रम्यते इति । क्रम + क्तः ।) घोटकः । इति त्रिकाण्डशेषः ॥ (पादेन्द्रियम् । यथा, मनौ । १२ । १२१ ।

"मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम् । वाचमग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्" ॥

"क्रान्ते पादेन्द्रिये विष्णुमिति"। कुल्लूकभट्टः ॥ भावे + क्तः । क्ली, आरूढम् । क्रमणम् । यथा माघे ।

"क्रान्तं यथा काञ्चनपद्मराजा" ॥

यथा च शतपथब्राह्मणे ५ । ४ । २ । ६ ।

"विष्णोः क्रान्तमसीतीमे लोकाः विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तम्" ॥) आक्रान्ते च ॥

क्रान्ता, स्त्री, (क्रम + कर्त्तरि क्तः । स्त्रियां जातित्वेपि संयोगोपधत्वात् टाप् ।) दूर्व्वा । इति राजनिर्घण्टः ॥

क्रान्तिः, स्त्री, (क्रम + भावे क्तिन् ।) खगोलमध्यवर्त्तिसूर्य्यगमनार्थतिर्य्यग्गोलरेखा । यथा,—

"अयनादयनं यावत् कक्षा तिर्य्यक् तथापरा । क्रान्तिसंज्ञा तया सूर्य्यः सदा पर्य्येति भासयन्" ॥ इति सूर्य्यसिद्धान्ते गोलाध्यायः ॥ "नाड़ीमण्डलात् दक्षिणोत्तरं क्रान्तिमण्डलावधिर्यदन्तरं तत्" । इति तट्टीकायां रङ्गनाथविद्वान्वरः ॥ तत्पर्य्यायः । अपमण्डलम् २ अपवृत्तम् ३ अपक्रमः ४ अपक्रान्तिः ५ । इति सूर्य्यसिद्धान्तः ॥ अपमः ६ । इति सिद्धान्तशिरोमणिः ॥ इदं क्रान्त्यानयनक्रमो यथा,—

"परमापक्रमज्या च खखरन्ध्रगुणेन्दवः । तद्गुणाज्या त्रिजीवाप्ता तच्चापक्रान्तिरुच्यते" ॥ इति सूर्य्यसिद्धान्तः ॥ * ॥ आक्रमः । इति हेमचन्द्रः ॥ गतिः । गत्यर्थात् क्रमधातोर्भावे क्तिन्प्रत्ययात् तथात्वम् ॥

क्रान्तिवलयः, पुं, (सूर्य्यसिद्धान्तोक्ता क्रान्तिरेव वलयः वृत्तम् ।) क्रान्तिमण्डलम् । विषुवद्वृत्तात् चतुर्विंशतिभागैर्दक्षिणे चोत्तरे यद्वृत्तं तत् । इति सिद्धान्तशिरोमणिः ॥

क्रान्तृ, पुं, (क्रामतीति । "क्रमिगमिक्षमिभ्यस्तुन् दृद्भिश्चेति" । उणां ५ । ४३ । इति तुन् दृद्भिश्च ।) पक्षी । इत्युणादिकोषः ॥

क्रायकः, पुं, (क्रीणाति इति । कर्त्तरि ण्वुल् ।) क्रेता । इत्यमरः ॥ क्रयजीवी । इत्यमरटीकायां भरतः ॥

क्रिमिः, पुं, (क्रमु पादविक्षेपे । "क्रमितमिग्रतिस्तंभामत इच्च" । उणां ४ । १२१ । इति इन् कित् अत इच्च ।) कीटः । द्रुमामयः । इत्यमरटीकायां भरतः ॥ रोगविशेषः । तस्य प्रकारो यथा,—

"क्रिमयस्तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः । बहिर्मलकफाक्षग्विड्जन्मभेदाच्चतुर्व्विधाः ॥ नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः । तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ॥ बभ्रुपादास्च सूक्ष्माश्च यूका लिक्षाश्च नामतः । द्विधा ते कोठपिड़का कण्डूगण्डान् प्रकुर्व्वते ॥*॥

निदानम् यथा ।

"अजीर्णभोजी मधुराम्लनित्यो द्रवप्रियः पिष्टगुड़ोपभोक्ता । व्यायामवर्जी च दिवाशयानो विरुद्धभुक् संलभते क्रमींश्च" ॥

पुरीषजनिदानं यथा,—

"मांसपिष्टान्नलवणगुड़शाकैः पुरीषजाः" ॥ * ॥

कफजनिदानं यथा,—

"मांसमाषगुड़क्षीरदधिशुक्तैः कफोद्भवाः" ॥

रक्तजनिदानं यथा,—

"विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि" ।

अभ्यन्तरक्रिमिलक्षणं यथा,—

"ज्वरो विवर्णता शूलं हृद्रोगश्छर्द्दनं भ्रमः । भक्तद्वेषोऽतिसारश्च संजातक्रिमिलक्षणम्" ॥

कफजरूपं यथा,—

"कफादामाशये जाता वृद्धाः सर्पन्ति सर्व्वतः ॥ पृथुवृत्तनिभाः केचित् केचिद्दूर्व्वादूपमाः । रूढ़धान्याङ्कुराकारास्तनुदीर्घास्तथाणवः ॥ श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते । अन्त्रादा उदरावेष्टा हृदया महागुदाः ॥ चुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्व्वते । हृल्लासमास्यस्रवणमविपाकमरोचकम् ॥ मूर्च्छाच्छर्द्दिज्वरानाहकार्श्यक्लवथुपीनसान्" ॥ * ॥

रक्तजरूपं यथा,—

"रक्तवाहिशिराश्रिता रक्तजा जन्तवोऽणवः ॥ अपादा वृत्तताम्राश्च सौक्ष्म्यात् केचिददर्शनाः । केशादा रोमविध्वंसा रोमद्वीपा उड़म्बराः ॥ षट् ते कुष्ठैककर्म्माणः सहसौरसमातरः" ॥

विड्जरूपं यथा,—

"पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः । वृद्धास्ते सुषिरवेयुश्च ते यदामाशयोन्मुखाः । तदास्योद्गारनिश्वासविड्गन्धानुविधायिनः ॥ पृथुवृत्ततनुश्यामाः श्यावपीतसितासिताः । ते यत्र नाम्ना क्रिमयः ककेरुकमकेरुकाः ॥ सौसुरादाः सप्रलाख्या लेलिहा जनयन्ति हि" ॥

विमार्गगक्रिमिलक्षणं यथा,—

"विड्भेदशूलविष्मक्कार्श्यपारुष्यपायुतः । रोमहर्षाग्निसदनगुदकण्डूर्विमार्गगाः" ॥

इति माधवकरः ॥

(अस्य सहेतुकलक्षणचिकित्सितानि यथा,—

"इह खल्वभिवेश्यविंशतिविधाः क्रिमयः पूर्व्वमुक्ता नानाविधेन प्रविभागेनान्यत्र सहजेभ्यः । ते पुनः प्रकृतिभिर्भिद्यमानाश्चतुर्व्विधास्तद्यथा । पुरीषजाः श्लेष्मजाः शोणितजाः मलजाश्चेति । तत्र मलो बाह्यश्चाभ्यन्तरश्च । तत्र बाह्ये मले जातान् मलजान् सञ्चक्षते, तेषां समुत्थानं मलजावर्ज्जनं, स्थानकेशश्मश्रुलोमपक्ष्मवासांसि, संस्थानमणवस्तिलाद्यततयो बभ्रुपादा वर्णः कृष्णः शुक्लश्च, नामानि यूकाः पिपीलिकाश्चेति, प्रभावः कण्डूजननं कोठपिड़काभिनिर्व्वर्त्तनञ्च, चिकित्सितं त्वेषामपकर्षणं मलोपघातो मलकराणाञ्च भावानामुपसेवनमिति । शोणितजानान्तु कुष्ठैः समानं समुत्थानं, स्थानं रक्तवाहिन्यो धमन्यः, संस्थानमणवो वृत्ताश्चापादाश्च सूक्ष्मत्वाच्चैके भवन्त्यदृश्याः, वर्णास्ताम्राः, नामानि केशादा लोमादा लोमद्वीपाः सौरसा औदुम्बरा जन्तुमातर इति । प्रभावः केशश्मश्रुनखलोमापध्वंसो व्रणगतानाञ्च हर्षकण्डूतोदसंसर्पणान्यरुजानाञ्च त्वक्सिरास्नायुमांसतरुणास्थिभक्षणमिति, चिकित्सितमप्येषां कुष्ठैः समानं तदुत्तरकालमुपदेक्ष्यते ।

श्लेष्मजाः क्षीरगुड़तिलमत्स्यानूप-मांस-पिष्टान्नपरमान्नकुसुम्भशेहाजीर्ण-पूतिक्लिन्नसङ्कीर्ण-विरुद्धासात्म्यभोजनसमुत्थानाः । तेषामाशयः स्थानं प्रवर्द्धमानास्त्वधो वा विसर्पन्ति, उभयतो वा । संस्थानवर्णविशेषास्तु श्वेताः पृथुब्रध्नसंस्थानाः केचित्, केचिद्वृत्तपरिणाहाः गण्डूपदाकृतयश्च श्वेतास्ताम्रावभासाः, केचिदणवो दीर्घास्तन्वाकृतयः श्वेताः । तेषां त्रिविधानां श्लेष्मनिमित्तानां क्रिमीणां नामानि, अन्त्रादा, उदरादा, हृदयादाश्चुरवो दर्भकुसुमाः, सौगन्धिकाः, महागुदाश्च इति । प्रभावो हृल्लासास्यस्रवणमरोचका विपाको ज्वरो मूर्च्छाजृम्भाक्लवथुरानाहोऽङ्गमर्द्दः कार्श्यं पारुष्यमिति ।

पुरीषजास्तुल्यसमुत्थानाः श्लेष्मजैस्तेषां स्थानं पक्वाशयः । प्रवर्द्धमानास्त्वधो विसर्पन्ति । यस्य पुनरामाशयाभिमुखाः स्युस्तदनन्तरं तस्योद्गारनिःश्वासाः पुरीषगन्धिनः स्युः । संस्थानवर्णविशेषास्तु सूक्ष्मवृत्तपरीणाहाः श्वेता दीर्घाणुसंस्थानाः केचित् केचित् पुनः स्थूलवृत्तपरीणाहाः श्यावनीलहरित पीताः । तेषां नामानि ककेरुकमकेरुकाः लेलिहाः श्यामूलकाः सौसुरादाश्चेति । प्रभावः पुरीषभेदः कार्श्यं पारुष्यं रोमहर्षाभिनिर्व्वर्त्तनञ्च । तत्र वास्य गुदमुखं परितुदन्तः कण्डूक्षोपजनयन्तो गुदमुखं पर्य्यासते । स जातहर्षो गुदान्निष्क्रमणमतिवेलं करोति ।

इत्येषश्लेष्मजानां पुरीषजानाञ्च क्रिमीणां समुत्थानादिविशेषः । चिकित्सितन्तु खल्वेषां समासेनोपदिश्य पश्चाद्विस्तरेणोपदेक्ष्यते । तत्र सर्व्वक्रिमीणामपकर्षणमेवादितः कार्य्यम् । ततः प्रकृतिविघातोऽनन्तरं निदानोक्तानां भावानामनुपसेवनमिति ।

तत्रापकर्षणं हस्तेनाभिमृश्यानयनमुपधूपनावतानुपकरणेन वा । स्थानगतानान्तु क्रिमीणां भेषजेनापकर्षणं न्यायतश्चतुर्विधमिति । तद्यथा,—शिरोविरेचनं वमनं विरेचनमास्थापनमित्यपकर्षणविधिः ।

प्रकृतिविघातस्त्वेषां कटुतिक्तकषायक्षारोष्णानां द्रव्याणामुपयोगो यच्चान्यदपि किञ्चित् श्लेष्मपुरीषप्रत्यनीकभूतं तत्स्यादिति प्रकृतिविघातः ।

अनन्तरं निदानोक्तानां भावानामनुपसेवनम् । यदुक्तं निदानविधौ, तस्य वर्ज्जनं तथाविध-

प्रायाणां चापरेषां द्रव्याणामिति सल्लगतस्त्रिकित्सितमुपव्याख्यातमेतदेव पुनर्विस्तरेणोपदेक्ष्यते।

अथैनं क्रिमिकोष्ठमातुरमग्रे घृताक्तं सप्तरात्रं वा स्नेहस्वेदाभ्यामुपपाद्य स्थोभूते एनं संशोधनं पाययितास्त्रीभ्यः, क्षीरदधिगुडतिलमत्स्यानूपमांसपिष्टान्नपरमान्नकुसुम्भस्नेहरसमयुक्तैर्भोज्यैः सायंप्रातरुपपादयेत् समुदीरणार्थं चैव क्रिमीणाञ्चोष्ठाभिसरणार्थं च। भिषग्घ वृष्टायां रजन्यां सुखोषितं सुप्रजीर्णभुक्तवत्याश्चायाश्चापनयनविरेचनैस्तदहरेवोपपादयेत्। उपपादनीयस्येत्यात् सर्व्वान् परीक्ष्य विशेषान् समीक्ष्य सम्यक्। अथाहरेति ब्रूयात्। मूलक-सर्षपलशुनकरञ्ज-शिग्रु-खरपुष्पभूस्तृण-सुमुख-सुरस-कुठेरक-कण्डीर-कालमालपर्णासल्लवकपलिञ्जकानि सर्व्वाण्यथवा यथालाभम्। तान्याहृतान्यभिसमीक्ष्य खण्डशश्छेदयित्वा प्रक्षाल्य पानीयेन सुप्रक्षालितायां स्थाल्यां समावाप्य गोमूत्रेणार्द्रोदकेनाभ्यासिक्य साधयेत्। सततमवघट्टयन् दर्व्या तमुपयुक्तं भूयिष्ठेऽम्भसि। गतरसेष्वौषधेषु स्थालीमवतार्य्य सुपरिपूतं कषायं सुखोष्णं मदनफलविड्ङकल्कतैलोपहितं सर्ब्बिकालवणमभ्यासिक्य वस्तौ विधिवदास्थापयेदेनम्"।

"मदनफलपिप्पलीकषायेष्वञ्जलिमात्रेण चिरत्नं कल्काच्चमात्रामाक्षोद्य पातुमस्मै प्रयच्छेत्। तदस्य दोषमुभयतो निर्हरति साधु। एवमेव कल्पोक्तानि वमनविरेचनानि संस्कृत्य पाययेदेनं बुद्धा सर्व्वविशेषानवेक्षमाणः।

अथैनं सम्यग्विरिक्तं विज्ञायापराह्णे स्नैखरिकेण कषायेण सुखोष्णेन परिषेचयेत्। तेनैव च कषायेण वाह्याभ्यन्तरान् सर्व्वादकार्थान् कारयेत् प्रशस्तम्। तदभावे वा कटुकतिक्तकषायाणामौषधानां क्वाथैर्मूत्रक्षारैर्वा परिषेचयेत्। परिषिक्तञ्च एवं जिवातमागारमनुप्रवेश्य पिप्पलीपिप्पलीमूलचव्यचित्रकपटुपञ्चकैरसिद्धेन यवागूवादिना क्रमेणोपक्रामयेत्। विशेषाक्रमागतञ्चैनमनुवासयेत् विड्ङतैलेनैकान्तरं द्वित्रिर्वा। यदि पुनरस्यातिप्रवृद्धान् शीर्षादीन् क्रिमीन् मन्येत, शिरस्येवाभिसर्पतः कदाचित्। ततः स्नेहस्वेदाभ्यामस्य शिर उपपाद्य, विरेचयेदपामार्गतण्डुलादिना शिरोविरेचनेन।

यच्चभ्याहार्य्यविधिः प्रकृतिविघातोक्तः क्रिमीणां सोऽनुव्याख्यास्यते। मूषिकपर्णीं समूलाग्रपत्तानामपहृत्य खण्डशश्छेदयित्वा उदूखले क्षोदयित्वा पाणिभ्यां पीड़यित्वा च रसं संग्रहीयात्। तेन रसेन क्षौद्रसर्पिर्गुडतिलपिष्टं समाक्षोद्य पूपलिकां कृत्वा विधूमेष्वङ्गारेषूपकुल्य विड्ङतैलसंयुक्तोपहिता क्रिमिकोष्ठाय भक्षयितुमुपपादयेत्। तदनन्तरमुष्णकाञ्जिकमुदश्विद्वा पिप्पल्यादि पञ्चवर्गसंस्कृतं सलवणमनुपाययेत्"।

"अथास्यशुद्धदाहृत्य महति क्रिमिक्लेशे प्रतीर्य्यातपे शोधयित्वोदूखले क्षोदयित्वा वृश्चदि पुनः सूक्ष्माणि चूर्णानि कारयित्वा विड्ङकषायेण चित्रकाकषायेण वा अष्टगुणो दशगुणो वा ज्ञातपे सुपरिभावितानि भावयित्वा वृश्चदि पुनः सूक्ष्माणि चूर्णानि कारयित्वा नवे कलसे समवाप्यानुगुप्तं निधापयेत्। तेषान्तु खलु चूर्णानां पाणितलं पूर्णं यावदा साधु मन्येत क्षौद्रेण संसृज्य क्रिमिकोष्ठाय लेढ्यमुपक्लृप्तेत्॥

तथा भल्लातकास्थीन्याहार्य्य कलसप्रमाणेन सम्भोज्य स्नेहभाविते दृढ़े कलसे सूक्ष्मानेकच्छिद्रब्रध्ने मृदाविलिप्ते समवाप्योडुपेन पिधाय भूमावाकण्ठं निखातस्य स्नेहभावितस्यैव दृढ़स्योपरि कुम्भस्यारोप्य समन्तात् गोमयैरुपचित्य दाहयेत्। स यदा जानीयात् साधु दग्धानि गोमयानि विगतस्नेहानि भल्लातकास्थीनीति ततस्तं कुम्भमुद्धारयेत्। अथ तस्मात् द्वितीयात् कुम्भात्तं स्नेहमादाय विड्ङतण्डुलचूर्णैः स्नेहार्द्धमात्रैः प्रतिसंस्कृतापे सर्व्वमहः स्थापयित्वा ततोऽस्मै मात्रां प्रयच्छेत् पानाय। तेन साधु विरिक्तस्य पानुपूर्व्वी यथोक्ता"।

"अथाहरेति ब्रूयात् शारदान्नवांस्तिलान् सम्यदुपेतानाहृत्य सुनिष्पूतान्निष्पुय सशुङ्गान् शोधयित्वा विड्ङकषाये सुखोष्णे प्रक्षिप्य सुनिर्व्वापितान् निर्व्वापयेत् आदोषशमनात्। गतदोषानभिसमीक्ष्य सप्रक्षालनान् प्रक्षुद्य पुनरेव सुनिष्पूतान्निष्पुय सशुङ्गान् शोधयित्वा विड्ङकषाये चिःसप्तकृत्वः सुपरिभावितान् भावयित्वातपे शोधयित्वोदूखले संक्षुद्य दृश्चदि पुनः सूक्ष्मपिष्टान् कारयित्वा द्रोण्यामभ्यवधाय विड्ङकषायेण मुहुर्मुहुरवसिच्य पाणिमर्द्दं मर्द्दयेत्। तस्मिन् खलु प्रमीद्यमाने यत्तैलमुपदियात् तत्पाणिभ्यां पर्य्यादाय शुचौ दृढ़े कलसे समासिच्यानुगुप्तन्निधापयेत्। अथाहरेति ब्रूयात् तिल्वकोद्दालकयोर्द्वौ बिल्वमात्रौ पिण्डौ सूक्ष्मपिष्टौ विड्ङकषायेण, ततोऽर्द्धमात्रौ श्यामाचित्रतयोरर्द्धमात्रौ दन्तीद्रवन्त्योरतो अर्द्धमात्रौ चव्यचित्रकयोरित्येतत् सम्भारं विड्ङकषायस्यार्द्धाढ़कमात्रेण प्रतिसंस्कृत्य ततस्तैलप्रस्थमावाप्य सर्व्वमाक्षोद्य मृदति पर्य्योगे समासिच्यावधिश्रित्य मृदवासने सुखोपविष्टः सर्व्वतः स्नेहमवलोकयन्नसकृं मृदमिना साधयेद्दर्व्या सततमवघट्टयन्। स यदा जानीयादिरमति शब्दः, प्रशाम्यति च फेनः, प्रसादमापद्यते स्नेहो यथास्वन्नवर्णरसोत्पत्तिः संवर्त्तते, भेषजमङ्गुलिभ्यां मृद्यमानमनतिमृदुमनतिदारुणमनङ्गुलिग्राह्यि चेति। तत्कालज्ञस्यावतारणाय। ततस्तमवतीर्य्य तं शीतीभूतं महता वाससा परिपूय शुचौ दृढ़े कलसे समासिच्य पिधानेन पिधाय मुखेन वस्त्रपट्टेनाच्छाद्य सूत्रेण सुबद्धं अनुगुप्तन्निधापयेत्। ततोऽस्मै मात्रामाहरेत् पानाय। तेन साधु विरिक्तो। सम्यगपहृतदोषस्य चास्यानुपूर्व्वी यथोक्ता। ततश्चैनमनुवासयेदनुवासनकाले"॥

"इत्येतत् क्रियानां श्लेष्म-पुरीष-सम्भवानां क्रिमीणां समुत्थानस्थानसंस्थानवर्ण-नाम-प्रभावचिकित्सितविशेषा व्याख्याताः सामान्यतः। विशेषतस्त्वल्पमाक्षाख्यापनानुवासनानुलोमहरणं भूयिष्ठं तेष्वौषधेषु पुरीषजानां क्रिमीणां चिकित्सितं कार्य्यं मात्राधिकं पुनः शिरोविरेचनवमनोपशमनभूयिष्ठं तेष्वौषधेषु श्लेष्मजानां क्रिमीणां चिकित्सितं कार्य्यम्। इत्येष क्रिमिघ्नो भेषजविधिरनुव्याख्यातो भवति"॥ इति चरके विमानस्थाने सप्तमोऽध्यायः॥ * ॥

"सूतं गन्धं मृतं लौहं मरिचं विषमेव च।
मुस्तकं त्रिफला शुण्ठी धातकी रूक्ष्माञ्जनम्॥
चूर्णयां मुस्तकं पाठा बालकं बिल्वमेव च।
एतानि समभागानि खरसैर्भृङ्गजैस्तथा॥
वराटिका प्रमाणेन भक्षणाय विशेषतः।
क्रिमिरोगविनाशाय क्रिमिरोगविनाशनः"॥

इति क्रिमिरोगारिरसः॥ * ॥

"क्रमेण दृङ्गं रसगन्धकाजमोदा विड्ङं विषमुष्टिका च।
पलाग्रबीजञ्च विचूर्ण्यमस्य
निष्कप्रमाणं मधुनावलीढ़म्॥
पिबेत् कषाय घनजं तदूर्द्धं
रसोऽयमुक्तः क्रिमिमुद्गराख्यः।
क्रिमीन्निहन्यात् क्रिमिजांश्च रोगान्
सन्दीपयत्यग्निमयं चिराच्च"॥

इति क्रिमिमुद्गरो रसः॥

इति वैद्यकरसेन्द्रसारसंग्रहे क्रिमिरोगाधिकारे॥*॥

अथास्य पथ्यापथ्यविधिः। पथ्यानि यथा,—

"आक्षापनं कायशिरोविरेचनं
धूमः कवलग्रहाः शरीरमार्ज्जना।
चिरन्तना वैद्यवरक्षणाजयः
पटोलवेत्राग्ररसोनवास्तुकम्॥
ऊताशमन्दारदलानि सर्षपा
नवीनमोचं रुचकीफलान्यपि।
तिक्तानि नाली च दलानि मौषिकं
मांसं विड्ङं पिचुमर्द्दपल्लवम्॥
पथ्या च तैलन्तिलसर्षपोद्भवं
सौवीरशुक्तञ्च तुषोदकं मधु।
पचेलिमं तालमरुष्करं गवां
मूत्रञ्च ताम्बूलसुरामगाहनम्॥
क्षौद्राणि मूत्राव्यपयांसि रामठं
क्षाराजमोदा खदिरश्च वत्सकम्।
जलीरकीरं सवची यमानिका
क्षाराः सरास्ना गुरुभिंगणोद्भवाः॥
तिक्ताः कषायः कटुको रसोऽप्ययं
वर्गो नराणां क्रिमिरोगिणां सुखः"॥ *॥

अपथ्यानि यथा,—

"छर्द्दिञ्च तद्वेगविधारणञ्च
विरुद्धपानाशनवह्निनिद्राम्।
श्रवञ्च पिष्टान्नमजीर्णताञ्च
घृतानि मांसान् दधिपञ्चशाकम्॥
मांसं पयोऽम्लं मधुरं रसञ्च
क्रिमीन् जिघांसुः परिवर्जयेच्च"॥

इति वैद्यकक्रिमिरोगपथ्यापथ्यविधिग्रन्थे ॥)

क्रिमिकण्टकं, क्ली, (क्रिमौ कण्टकमिव ।) क्षुद्रक्रिमिकण्टकम् । इति मेदिनी ॥

क्रिमिघ्नः, पुं, (क्रिमिं हन्ति नाशयतीति । "क्रमनुक्रमिक्षि च" । ३ । २ । ५३ । इति टक् । मूलविभुजादित्वात् सिद्धः । यत् पूर्व्वस्येति नियमान्नात्वम् ।) क्षुद्रक्रिमिघ्नः । विड्गः । इत्यमरटीकायां रायमुकुटः ॥ (क्रिमिरोगनाशकौषधविशेषः ।

"क्रिमिघ्नं किंशुकारिष्टबीजं सरसभस्मकम् ।
वन्यद्वयक्षाखपर्णीरसैः क्रिमिविनाशनः" ॥

इति क्रिमिघ्नो रसः ॥

इति वैद्यकरसेन्द्रसारसंग्रहे क्रिम्यधिकारे ॥)

क्रिमिघ्नी, स्त्री, (क्रिमिघ्न + टित्वात् स्त्रियां ङीप् ।) सोमराजी । इति शब्दचन्द्रिका ॥

क्रिमिजं, क्ली, (क्रिमिभ्यः जायते इति । "अन्येष्वपि दृश्यते" ।३।२।१०१। इति डः ।) अगुरु । इत्यमरः ॥

क्रिमिजा, स्त्री, (क्रिमिज + स्त्रियां टाप् ।) लाक्षा । इति रत्नमाला ॥

क्रिमिशत्रुः, पुं, (क्रिमेः शत्रुरिव नाशकत्वात् ।) रक्तपुष्पकः । इति शब्दचन्द्रिका । पालिताआदार इति भाषा ॥

क्रिमिशात्रवः, पुं, (शत्रु + स्वार्थे अण् शात्रवः । क्रिमेः शात्रव इव तन्नाशकत्वात् ।) विट्खदिरः । इति रत्नमालिका ॥

क्रिमिश्लैष्मः, पुं, (क्रिमिभिर्निर्म्मितः श्लैष्म इव ।) वल्मीकः । इति चिकित्साश्लेषः ॥

क्रियः, पुं, (क्रिया ग्रहणमाद्यगतिक्रिया विद्यतेऽत्र अर्शआदेरच् ।) मेषराशिः । इति दीपिका ॥

क्रिया, स्त्री, (क्रियते अनया असौ अस्मिन् इति वा । डु कृ ञ् करणे करणकर्म्माधिकरणादौ च यथायथं श्र प्रत्ययः । "रिङ् शयग्लिङ्क्षु" । ७ । ४ । २८ । इति रिङादेशः । "अचिश्नुधातुभ्रुवां य्वोरियङुवङौ" । ६ । ४ । ७७ । इति इयङ् ।) आरम्भः । निष्कृतिः । शिक्षा । पूजनम् । सम्यधारणम् । उपायः । कर्म्म । तन्त्रविधम् । यथा,—

"आरम्भो निष्कृतिः शिक्षा पूजनं सम्यधारणम् ।
उपायः कर्म्म चेष्टा च चिकित्सा च नव क्रियाः" ॥

इति भावप्रकाशः ॥ चेष्टा । चिकित्सा । इत्यमरः । ३ । १ । १५६ ॥ कारणम् । इति हेमचन्द्रः ॥ आद्यम् । इत्यमरटीकायां स्वामी ॥ शौचम् । इति शब्दरत्नावली ॥ धात्वर्थः करोत्यर्थो वा । इति वैयाकरणाः ॥ क्रियाः साध्यरूपाः वस्तुधर्म्माः याकादयः एषु हि अधिश्रयणाद्यवयवान्नादिः पूर्व्वापरीभूतो व्यापारकलापः पाकादिशब्दवाच्यः । इति साहित्यदर्पणम् ॥ चतुःप्रकारव्यवहारपादान्तर्गतव्यवहारपादविशेषः । सा द्विधा मानुषी दैविकी च । तत्राद्या साक्ष्यलेख्यानुमानभेदेन त्रिधा । द्वितीया घटाद्यादकविषकोषतण्डुलतप्तमाषकपालधर्म्मभेदेन नवधा दिव्यानि । यथा,—

"द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी । तथा साक्ष्यलेख्यानुमानञ्च मानुषी त्रिविधा स्मृता ।
घटाद्या धर्म्मजान्ताश्च दैविकी नवधा स्मृता" ॥

इति व्यवहारतत्त्वे बृहस्पतिः ॥ (चिकित्साकार्य्यं यथा,—चरके सूत्रस्थाने १७ अध्याये ॥

"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म्मतद्विघ्नां मतम् ॥
कथं शरीरे धातूनां वैषम्यं न भवेदिति ।
समानाशानुबन्धः स्यादत्यर्थं क्रियते क्रियाः" ॥
"यान्यदोषं शमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्" ॥
"भीते प्रीतप्रतीकार उष्णोष्णनिवारणम् ।
ज्ञात्वा कुर्य्यात् क्रियां प्राज्ञां क्रियाकालं न हापयेत्" ॥

इति च सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

क्रियाकारः, पुं, (क्रियां शिल्पारम्भं करोतीति । कृ + उपपदे "कर्म्मण्यण्" ३ । २ । १ । इत्यण् ।) नवच्छात्रः । नूतन पड़ुया इति भाषा । इति चिकित्साश्लेषः ॥ कर्म्मकर्त्तरि च ॥

क्रियादेवी, [न्] पुं, (क्रियां व्यवहाराङ्गसाधनं साक्ष्यलेख्यादिकं देष्टि । दिव् + णिनिः ।) साक्ष्यलिखितयुक्तिप्रभृतयश्चतुष्पथदेवताः । स च व्यवहारविषये षड्विधः । हीनान्तर्गतहीनविशेषः । यथाह,—व्यवहारतत्त्वे नारदः ।

"अन्यवादी क्रियादेवी नोपस्थायी निरुत्तरः ।
आहूतप्रथमायी च हीनः षड्विधः स्मृतः" ॥

(तल्लक्षणं यथा । वीरमित्रोदयकात्यायनवचने ।

"लेख्यञ्च दाक्षिणाश्चैव क्रिया ज्ञेया मनीषिभिः ।
तां क्रियां देष्टि यो मोहात् क्रियादेवी स उच्यते" ॥)

कर्म्मदेवतरि त्रि ॥

क्रियापादः, पुं, (क्रिया विवादसाधनं पाद इव ।) चतुष्पादव्यवहारान्तर्गतद्वितीयपादः । यथा,—

"पूर्व्वपक्षः स्मृतः पादो द्वितीयश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः" ॥

इति बृहस्पतिः ॥ स च साक्ष्यलिखितभुक्तियुक्तिप्रभृतयरूपः । इति व्यवहारतत्त्वम् ॥

क्रियाभ्युपगमः, पुं, (क्रियायाः कर्य्यणादिक्रियार्थं अभ्युपगमः स्वीकारः ।) परस्परक्रियास्वीकारः । द्वयोः पुरुषयोः कस्मिंश्चिद्विषये परस्परस्वीकारेण अनुमतिः । यथा,—

"क्रियाभ्युपगमात् क्षेत्रं बीजार्थं यत् प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च" ॥

इति मनुः ॥ अस्यार्थः । "यदत्रापत्यं भविष्यति तदावयोरुभयोरेवेति नियमेनैतत् क्षेत्रस्वामिना बीजवपनार्थं यद्बीजिनो दीयते तस्यापत्यस्य लोके बीजिक्षेत्रिणौ द्वावपि भागिनौ दृष्टौ" । इति कुल्लूकभट्टः ॥ उपलक्षणमेतत् ॥

क्रियायोगः, पुं, (क्रियैव योगः योग उपायः ।) देवाराधनतदालयादिकरणरूपपुण्यक्रिया । यथा,—

नारद उवाच ।

"क्रियायोगः कथं प्रोक्तस्त्वया मे ब्रह्मितामह ! ।
तदहं श्रोतुमिच्छामि फलं चास्य यथातथम् ॥

ब्रह्मोवाच ।

ज्ञानयोगस्तु योगस्य यस्तु साधनमात्मना ।
यस्तु बाह्यार्थसंयोगः क्रियायोगः स उच्यते ॥
प्रधानं कारणं योगो मुक्तेर्मुनिवरोत्तम ! ।
क्रियायोगस्तु योगस्य परमं तात ! साधनम् ॥
यदेतद्भवता पृष्टं तदिहैकमनाः शृणु ।
यैस्तु देवालयं विष्णोः शुभं दारुमयं कृतम् ॥
कारयेन्मृण्मयं वापि शृणु तस्य फलं सुने ! ।
अहन्यहनि योगेन यजतो यन्महाफलम् ॥
प्राप्नोति तत् फलं विष्णोर्थः कारयति मन्दिरम् ।
कुलानां शतमागामि समतीतं तथा शतम् ॥
कारयेद्भगवद्धाम नयत्यच्युतमन्दिरम् ।
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥
विष्णोरालयविन्यासप्रारम्भादेव नश्यति ।
पतितं पतमानञ्च तथार्द्धपतितं तथा ॥
समुद्धृत्य हरेर्द्धाम द्विगुणं फलमाप्नुयात् ॥
"प्रतिमां लक्षणवतीं यः कुर्य्याच्चैव मानवः ॥
केशवस्य परं लोकमक्षयं प्रतिपद्यते ।
अनुज्ञातो मया राज्ये यमो राजाथ किङ्करान् ॥
केवलं ये जगद्धाममनन्तं समुपाश्रिताः ।
भवद्भिः परिहार्य्यास्ते नेषां नास्तीह संस्थितिः ॥
नमः कृष्णाच्युतानन्त वासुदेवेत्युदीरितम् ।
यैर्भावभावितैर्दूतास्ते च त्याज्याः सुदूरतः ॥
दानं ददद्भिर्यैरुक्तमच्युतः प्रीयतामिति ।
श्रद्धापुरःसरैर्नित्यं ते च त्याज्याः सुदूरतः" ॥

इत्याद्ये वह्निपुराणे वैष्णवक्रियायोगे यमानुशासननामाध्यायः ॥ तथा च पातञ्जले ।

"तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगाः" ॥)

क्रियावसन्नः, त्रि, (क्रियया अवसन्नः ।) साक्ष्यादिना प्राप्तपराजयः । यथा,—

"स्वयमभ्युपपन्नो हि स्वपक्षावसितोऽपि सन् ।
क्रियावसन्नो वादे तु परं सभ्यावधारणम्" ॥

इति व्यवहारतत्त्वम् ॥

क्रियावान्, [त्] त्रि, (क्रिया अस्यास्तीति मतुप् । मस्य वः ।) कर्म्मकृद्यतः । क्रियासु नियुक्तः । इत्यमरः । ३ । १ । १८ ॥ (यथा, भट्टिः । १ । १० ।

"पुत्रीयता तेन वराङ्गनाभि-
रानाथि विद्वान् क्रतुषु क्रियावान्" ॥)

क्रियावादी, [न्] पुं, (क्रियां क्रियासाध्यं वदति । वद + णिनिः ।) प्रमाणवादी । कार्य्यवादी । इति मिताक्षरा ॥ परिव्राजादी इति पारस्यभाषा ॥

क्रियेन्द्रियं, क्ली, (क्रियायाः कर्म्मणः साधनं इन्द्रियम् ।) कर्म्मेन्द्रियम् । इति हेमचन्द्रः ॥ (तानि च पञ्चसंख्यकानि ज्ञानकर्म्मभेदेन दशसंख्यकानि च प्रसिद्धानि मनस्तु उभयात्मकं सर्व्वेषां प्रवर्त्तकम् । यथा मनौ ।

"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं पाणिपादं वाक् चैव दशमी स्मृता" ॥)

क्री, द्रु ञ ग द्रव्यपर्य्याये । इति कविकल्पद्रुमः ॥ (क्र्यां—उभं-सृकं-व्यनिट् ।) पर्य्यायः परीवर्त्तः । द्रु, क्रीचिमम् । ञ ग, क्रीणाति क्रीयते धान्यं धनेन लोकः । इति दुर्गादासः ॥

क्रीड़, ऋ खेले । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) ऋ, अचिक्रीडत् । क्रीडति

क्रुञ्चः

बालः शिखिभिः । इति दुर्गादासः ॥
क्रीड़ः, पुं, (क्रीड़ + भावे घञ् ।) परीहासः । इति शब्दरत्नावली ॥
क्रीड़नं, क्ली, (क्रीड़ + भावे ल्युट् ।) खेला । यथा ।
"बालक्रीड़नमिन्दुशेखरधनुर्भङ्गावधि प्रक्रता
ताते काननसेवनावधि तपा सुग्रीवसख्यावधि" ।
इति महानाटकम् ॥
क्रीड़ा, स्त्री, (क्रीड़ + भावे अप् ततष्टाप् ।) परीहासः । खेला । इत्यमरः । १ । ७ । ३३ ॥
(यथा, भागवते । २ । ३ । १५ ।
"स वै भागवतो राजा पाण्डवेयो महारथः ।
बालक्रीड़नकैः क्रीड़न् कृष्णक्रीड़ां य आददे" ॥)
अवज्ञानम् । इति मेदिनी ॥
क्रीड़ातालः, पुं, (क्रीड़ानामकस्तालः ।) तालप्रभेदः । यथा,—
"एक एव प्लुतो यत्र क्रीड़ातालः स कथ्यते ।
अपरं नियमं विना" । इति सङ्गीतदामोदरः ॥
क्रीड़ारत्नं, क्ली, (क्रीड़ायां क्रीड़ायाः वा रत्नमिव ।) रतिः । इति चिकाण्डशेषः ॥ [हलायुधः ॥
क्रीड़ारथः, पुं, (क्रीड़ार्थे रथः ।) क्रीड़ार्थरथः । इति
क्रीतः, पुं, (क्री + कर्म्मणि क्तः ।) क्रीतकपुत्रः । स तु द्वादशविधपुत्रान्तर्गतपुत्रभेदः । इति जटाधरः ॥ (यथाह, याज्ञवल्क्यः ।
"दद्यात् माता पिता वा यं स पुत्रो दत्तको भवेत् ।
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात् स्वयं कृतः" ॥)
कृतक्रये च । केना इति भाषा । यथा,—
"दीयमानं न गृह्णाति क्रीतं भक्ष्यन्तु यः क्रयी ।
स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः" ॥
इति प्रायश्चित्ततत्त्वे नारदः ॥
क्रीतकः, पुं, (क्रीत + स्वार्थे कन् ।) क्रीतपुत्रः । यथा, मनुः । ९ । १७४ ।
"क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा" ॥
क्रीतानुशयः, पुं, (क्रीते क्रये अनुशयः पश्चात्तापः ।) द्रव्यं क्रीत्वा पश्चादनुतापः । यथा,—
"क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते ।
क्रीतानुशय इत्येतत् विवादपदमुच्यते" ॥
इति याज्ञवल्क्यः ॥
क्रुङ्, [ङ्], पुं स्त्री, (क्रुञ्चति वक्रं यथा स्यात् तथा गच्छति । "ऋत्विग् दृक् स्रगिति" । ३ । २ । ५९ । इति निपातनात् साधुः ।) क्रौञ्च । इत्यमरः । २ । ५ । २२ ॥ कोँच् वक इति भाषा । (यथा, यजुर्वेदे १६ । ७३ ।
"अश्मः क्षीरं व्यापिबत् क्रुङ्डाङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियम्" ।
"व्याङ्गिरसः अङ्गानां रसः प्राणो यथा, क्रुङ् हंसो भूत्वा धिया प्रज्ञया अश्मः सकाशात् क्षीरं दुग्धं व्यापिबत् पिबति संसृष्टाभ्यां क्षीरोदकाभ्यां क्षीरमेव हंसः पिबतीति जातिस्वभावः" । इति भाष्यम् ॥)
क्रुञ्चः, पुं, (क्रुञ्च + अच् ।) क्रौञ्चपर्व्वतः । इति हेमचन्द्रः ॥ (वकविशेषः । यथा, यजुर्वेदे २४ । २२ ।
"वायवे बलाका इन्द्राग्निभ्यां क्रुञ्चान्" ॥)
क्रुञ्चा, स्त्री, (क्रुञ्च + स्त्रियां संयोगोपधत्वात् टाप् ।) अजादित्वात् टाबित्येके । वीणाभेदः । इति शब्दरत्नावली ॥
क्रुत्, [ध्] स्त्री, (क्रुध् + सम्पदादित्वात् क्विप् भावे ।) क्रोधः । इत्यमरहेमचन्द्रौ ॥ अस्या रूपान्तराणि । क्रुद् । क्रुत्त क्रुद्ध । इति संक्षिप्तसारव्याकरणम् ॥
क्रुद्धः, त्रि, (क्रुध् + कर्त्तरि क्तः ।) क्रोधयुक्तः । यथा ।
"योऽभ्याययौ क्रुद्धो रक्तबीजो महासुरः" ॥
इति देवीमाहात्म्यम् ॥ (भावे क्तः ।) क्रोधे क्ली ॥
क्रुध, ल्ट य औ कोपे । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-अनिट् ।) ल्ट, अक्रुधत् । य, क्रुध्यति लोकः अग्नये । औ, क्रोद्धा । इति दुर्गादासः ॥ * ॥ रेलते १ हेलते २ भ्रामते ३ भ्रमीयते ४ भीजाति ५ भ्रेयति ६ दोधति ७ वनयति ८ कम्पते ९ भोजते १० । इति दश क्रुध्यतिकम्भ्राणाः । इति वेदनिघण्टौ २ अध्यायः ॥
क्रुधा, स्त्री, (क्रुध् + क्विप् स्त्रियां हलन्तत्वात् वा टाप् ।) क्रोधः । इत्यमरटीकायां भरतः ॥
क्रुनृच, गत्याम् । वक्रगे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अकं च-सेट् ।) रेफयुक्तादिः पञ्चमस्वरी । क्रुञ्चति । इति दुर्गादासः ॥
क्रुश्च, ग क्लिशि । क्लिशि । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) पञ्चमस्वरी रेफयुक्तः । क्लिशि दुःखानुभवे । ग, क्रुश्चाति बुभुक्षार्त्तः । इति हलायुधः । चुक्रुश्च । इति दुर्गादासः ॥
क्रुश, ज औ रोदे । क्षतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-रोदने अकं-आक्षाने सकं-अनिट् ।) ज, क्रोशः क्रुशः । औ, अक्रुक्षत् । रोदोऽश्रुविमोचनम् । क्षतिराक्षानम् । इति दुर्गादासः ॥
क्रुश्वा, [न्] पुं स्त्री, (क्रोशति रौतीति । क्रुश + "लीड् क्रुशिरुहीति" । उणां ४ । ११३ । इति क्वनिप् ।) गृहगोधा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
क्रुष्टं, क्ली, (क्रुश् + भावे क्तः ।) रोदनम् । इत्यमरः । १ । ७ । ३५ ॥ रावः । इति मेदिनी ॥
क्रूरः, त्रि, (क्षत् छेदने + "क्षतेष्कन्क्रूच" । उणां २ । २१ । इति रक्प्रत्ययः धातोः क्रादेशश्च ।) परद्रोहकारी । (यथा, मेघदूते । १०७ ।
"क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः" ॥)
निर्दयः । तत्पर्य्यायः । दृढ़संसः २ घातुकः ३ पापः ४ । (यथा, भागवते । ९ । १४ । ३७ ।
"स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः" ॥
यथा, च कुमारे । २ । ४८ ।
"तस्मिन्नुपायाः सर्व्वे नः क्रूरे प्रतिहतक्रियाः" ।
"क्रूरे धातुके" इति मल्लिनाथः ॥)
कठिनः । इत्यमरः । ३ । ३ । १९० ॥
(यथा, रघुवंशे । १२ । ४ ।
"तस्याभिषेकसम्भारं कल्पितं क्रूरनिष्यया" ॥)
घोरः । इति मेदिनी ॥ (यथा, पञ्चतन्त्रे २ । २५ ।
"क्रूरो लुब्धोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः" ॥)
उग्रः । इति हेमचन्द्रः ॥ प्रथमदृतीयपञ्चमसप्तमनवमैकादशराशयः । यथा,—
"ओजोऽथ युग्मं विषमः समश्च
क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः" ॥
इति दीपिका ॥
क्रूरः, पुं, (क्षत्तीति । "क्षतेष्कन्क्रूच" । उणां २ । २१ । इति रक् धातोः क्रादेशश्च ।) भूताङ्कुशवृक्षः । रक्तकरवीरवृक्षः । श्येनपक्षी । कङ्कपक्षी । इति राजनिर्घण्टः ॥
क्रूरकर्म्मा, [न्] पुं, (क्रूरं कर्म्म यस्य ।) भयानककर्म्मकर्त्तरि त्रि ॥ (यथा, पञ्चतन्त्रे । १ । १० ।
"दिजिह्वा क्रूरकर्म्माणो निष्ठाच्छिद्रानुसारिणः ।
दूरतोऽपि हि पश्यन्ति राजानो मुजगा इव" ॥)
कटुतुम्बिनीवृक्षः । इति राजनिर्घण्टः ॥ (अकपुष्पी । अस्याः पर्य्याया यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका" ॥)
क्रूरगन्धः, पुं, (क्रूरः उग्रो गन्धोऽस्य ।) गन्धकः । इति राजनिर्घण्टः ॥
क्रूरगन्धा, स्त्री, (क्रूरः उग्रो गन्ध एकदेशे ऽस्याः । स्त्रियां टाप् ।) कस्तूरीवृक्षः । इति राजनिर्घण्टः ॥
क्रूरदृक्, [श्] त्रि, (क्रूरा दृक् दृष्टिर्यस्य । क्रूरं यथा स्यात् तथा पश्यति वा । दृश् + क्विन् ।) पिशुनः । श्येनेश्वरे पुं । इति मेदिनी ॥ (यथा,—ज्योतिषतत्त्वे । "आरोवक्रः क्रूरदृक् चावनेयः" ॥)
क्रूरधूर्त्तः पुं, (क्रूरः क्रूरत्वयुक्ततया धूर्त्त इव ।) कृष्णधत्तूरकः । इति राजनिर्घण्टः ॥ (कृष्णधत्तूरकशब्दे ऽस्य गुणपर्य्याया ज्ञातव्याः ॥)
क्रूरराविन्, [न्] पुं, (क्रूरं कर्कशं उग्रं वा रौतीति । रु + णिनिः ।) द्रोणकाकः । इति राजनिर्घण्टः ॥
क्रूरलोचनः, पुं, (क्रूरे लोचने क्रूरं लोचनं वा अस्य ।) शुनिः । इति हारावली ॥
क्रूरस्वरः, त्रि, (क्रूरः कर्कशः स्वरोऽस्य ।) कर्कशध्वनियुक्तः । यथा,—
"क्रूरस्वरा काकोलूकधरट्टोष्ट्राश्वगर्दभाः" ॥
इति कविकल्पलतायां द्वितीयप्रसवके द्वितीयकुसुमम् ॥
क्रूरा, स्त्री, (क्रूर + स्त्रियां जातित्वेपि न ङीष् अतः टाप् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥
क्रूराक्षतिः, पुं, (क्रूरा आकृतिर्यस्य ।) रावकः । इति शब्दमाला ॥ (कठोरमूर्त्तौ, त्रि ॥)
क्रेणिः, पुं, (क्री + निः ।) क्रयधनम् । इत्युणादिकोषः ।
क्रेतव्यं, त्रि, (क्री + कर्म्मणि तव्यत् ।) क्रेयवस्तु । यथा,
"क्रेयं क्रेतव्यमाचके" । इत्यमरः । २ । ९ । ८२ ॥
क्रेता, [तृ] त्रि, (क्री + तृच् ।) क्रयकर्त्ता । यथा ।
"विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमम् ॥
क्रेता मूल्यमवाप्नोति तस्माद्यत्नस्य विक्रयी" ॥
इति प्रायश्चित्ततत्त्वे याज्ञवल्क्यः ॥
क्रेयं, त्रि, (क्री + कर्म्मणि यत् ।) क्रेतव्यमात्रकम् । इत्यमरः । १ । ९ । ८२ ॥ किनिवार उपवन इव इति भाषा ॥

क्रोधः

क्रोधदारगः, पुं, (क्रुध + अच् बाहुलकादगुणः। क्रोधः पर्व्वतविशेषः। तस्य दारगः दारक इत्यर्थः। क्रोधं दारयति वा। दृ + णिच् + ल्युः।) कार्त्तिकेयः। इत्यमरटीकायां रायमुकुटः॥

क्रोड़, क्ली, स्त्री, (क्रूड़ + घञ्।) वाक्कोर्मध्यम्। क्रोल इति भाषा। तत्पर्य्यायः। भूजान्तरम् २ उरः ३ वत्सम् ४ वक्षः ५। इत्यमरः। २। ६। ७७॥ उत्सङ्गः ६ भोगः ७ वपुषःप्राक् ८। इति राजनिर्घण्टः॥ (यथा, यजुर्व्वेदे। २५। ८। "इन्द्रस्य क्रोड़ोऽदित्यै-ऽजस्यम्"। कात्यायनश्रौतसूत्रे च। ६। ८। १३। "ग्रेषमिड़ा पात्यामासिच्य क्रोड़मनस्थीनि च पास्यति"॥ हितोपदेशे च। "तत्र तरोर्निम्नितनीड़क्रोड़े पक्षिणः सुखं वर्षास निवसन्ति"॥)

क्रोड़ः, पुं, (कूड़ + घञ्। क्रोड़ोऽस्यास्तीति अर्श आदिभ्यः अच् वा।) शूकरः। इत्यमरः। २। ५। २॥ अग्निः। इति मेदिनी॥ वाराहीकन्दः। इति राजनिर्घण्टः॥ (यथा, महाभारते। १३। ५०। २०। "नदी ग्रैवालदिग्धाङ्गं हरिश्मश्रुजटाधरम्। नखैः शङ्कनखैर्गात्रैः क्रोड़ैश्चित्रैरिवार्पितम्"॥)

क्रोड़कन्या, स्त्री, (क्रोड़स्य शूकरस्य कन्या इव।) वाराहीकन्दः। इति राजनिर्घण्टः॥

क्रोड़चूड़ा, स्त्री, (क्रोड़े चूड़ा यस्याः।) महाश्रावणिकावृक्षः। इति राजनिर्घण्टः॥ बड़ थुलकुड़ि इति भाषा।

क्रोड़पर्णी, स्त्री, (क्रोड़े कण्टकमध्ये पर्णं यस्याः।) कण्टकारिका। इति शब्दचन्द्रिका॥ (कण्टकारीशब्दे विवरणमस्य ज्ञेयम्॥)

क्रोड़पादः, पुं, (क्रोड़े शरीराभ्यन्तरे पादोऽस्य।) कच्छपः। इति हेमचन्द्रः॥

क्रोड़ाङ्गः, पुं, (क्रोड़े अङ्गानि अस्य।) कच्छपः। इति शब्दरत्नावली॥

क्रोड़ाङ्घ्रिः, पुं, (क्रोड़े अङ्घ्रिरस्य।) कच्छपः। इति त्रिकाण्डशेषः॥

क्रोड़ी, स्त्री, (क्रोड़ + जातिवाचकत्वात् गौरादित्वात् ङीष्।) वाराहीकन्दः। इति राजनिर्घण्टः॥

क्रोड़ीकरणं, क्ली, (क्रोड़ + च्वि + भावे ल्युट्। अभूततद्भावे चिः।) आलिङ्गनम्। इति हलायुधः॥

क्रोड़ीकृतिः, स्त्री, (क्रोड़ + च्वि + भावे + क्तिन्। अभूततद्भावे चिः।) आलिङ्गनम्। इति हेमचन्द्रः॥

क्रोड़ीमुखः, पुं, (क्रोड्याः शूकर्य्याः मुखमिव मुखं अस्य।) गण्डकः। गण्डारः। इति राजनिर्घण्टः॥ गण्डार इति भाषा।

क्रोड़ेष्टा, स्त्री, (क्रोड़स्य शूकरस्य इष्टा प्रिया।) मुस्ता इति राजनिर्घण्टः॥

क्रोधः, पुं, (क्रुध् हिंसने + भावे घञ्।) हननम्। इति हेमचन्द्रः॥

क्रोधः, पुं, (क्रुध् + भावे घञ्।) प्रतिकूले सति तैक्ष्ण्यस्य प्रबोधः। (यथा, भगवद्गीतायाम्। ३. अ० "काम एष क्रोध एष रजोगुणसमुद्भवः। महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्"॥) तत्पर्य्यायः। कोपः २ अमर्षः ३ रोषः ४ प्रतिघः ५ रट् ६ क्रुत् ७ क्रुद् ८। इत्यमरः। १। ७। २६॥ अमर्षः ९ इति तट्टीकासारसुन्दरी॥ भीमः १० क्रुधा ११ रुषा १२। इति शब्दार्णवः॥ स तु ब्रह्मणो भ्रुवो जातः शरीरस्यषड्विपोरन्तर्गतश्च। इति पुराणम्॥ हेतुः १ हरः २ हृणिः ३ त्वजः ४ भामः ५ ग्रहः ६ क्रूरः ७ तपुषी ८ जूर्णिः ९ मन्युः १० व्यथिः ११। इत्येकादश क्रोधनामानि। इति वेदनिघण्टौ २ अध्यायः॥ (वत्सरभेदः। यथा, "विषमस्थं जगत् सर्व्वं व्याकुलं समुदाहृतम्। जनानां जायते भद्रे! क्रोधे क्रोधः परस्परम्"॥ इति शब्दार्थचिन्तामणिः। स्त्रियां टाप्। दक्षकन्याविशेषः। यथा, महाभारते १। ६५। १२। "क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः"॥)

क्रोधजः, पुं, (क्रोधात् जायते। जन् + डः।) मोहः। यथा, भगवद्गीतायाम्। २। ६२।

"सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते। क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः"॥

द्विधाव्यसनगणान्तर्गतव्यसनगणः। यथा, मनुः।

"पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः"॥

क्रोधनः, त्रि, (क्रुध् + "क्रुधमण्डार्थेभ्यश्च"। ३। २। १५१। इति युच्।) क्रोधविशिष्टः। तत्पर्य्यायः। अमर्षणः २ कोपी ३। इत्यमरः। ३। १। ३२॥ क्रोधी ४ रोषणः ५। इति हेमचन्द्रः॥ (यथा, वेणीसंहारे द्वितीयाङ्के।

"यद्यामेण कृतं तदेव कुरुते सौभाग्यभाग्यः क्रोधनः"।

कुरुवंशीयनृपविशेषः। यथा, भागवते। ९। २२। ११।

"ततश्च क्रोधनस्तस्माद् देवातिथिरमुष्य च"॥

षष्टिवर्षान्तर्गतोनषष्टितमवर्षभेदः। यथा तन्त्रे।

"रोगो मरणदुर्भिक्षं विरोधोत्तरसङ्कुलम्। क्रोधने विषमं सर्व्वं समाख्यातं हरप्रिये!"॥

भैरवभेदः। यदुक्तं तन्त्रे।

"असिताङ्गो रुरुश्चण्ड उन्मत्तः क्रोधनस्तथा"॥)

क्रोधना, स्त्री, (क्रुध् + युच् + स्त्रियां टाप्।) कोपवती। तत्पर्य्यायः। भामिनी २ चण्डी ३। इति त्रिकाण्डशेषः॥ (यथा, रामायणे। २। ७०। १०।

"आत्मकामा सदा चण्डी क्रोधना प्राज्ञमानिनी"॥)

क्रोधमूर्च्छितः, पुं, (क्रोधः क्रोधमय इव मूर्च्छितः।) चोरनामगन्धद्रव्यम्। इति शब्दरत्नावली॥ (क्रोधेन मूर्च्छितः।) अतिकोपने त्रि॥ (यथा, रामायणे। १। १। ४९।

"रक्षसां निहतान्यासन् सहस्राणि चतुर्दश। ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः"॥)

क्रोधी, [न्] त्रि, (क्रोधोऽस्यास्तीति इनिः। यद्वा, क्रुध्यति इति। क्रुध् + णिनिः।) क्रोधयुक्तः इति हेमचन्द्रः॥ महिषः। इति राजनिर्घण्टः॥ (यथा सुश्रुते। "तत्र जागरूकः प्रीतदेवी दुर्भगस्त्रैणो मत्सर्य्यनार्य्यो गान्धर्व्वचित्तः स्फुटितकरचरणोऽतिरूक्षश्मश्रुनखकेशः क्रोधी दन्तनखखादी च"॥)

क्रोशः, पुं, (क्रोशति यतः। क्रुश् + अपादाने घञ्।) सहस्रधनुः। चतुःसहस्रहस्तपरिमाणम्। कोश इति भाषा। तत्पर्य्यायः। गव्यूतम् २। इति हेमचन्द्रः॥ (यथा, रघुवंशे। १३। ७९।

"क्रोशार्द्धं प्रकृतिपुरःसरेण गत्वा काकुत्स्थः स्तिमितजवेन पुष्पकेण"॥)

द्विसहस्रधनुः। अष्टसहस्रपरिमाणम्। इति लीलावती॥ मुहूर्त्तः। यथा,—

"दशदण्डे तु या पूजा तत्सर्व्वमक्षयं भवेत्। षष्टक्रोशे महेशानि तत्! सर्व्वमक्षतोपमम्॥ सप्तमक्रोशके देवि! सर्व्वं क्षीरोपमं भवेत्। अष्टमक्रोशके देवि! द्रव्यतुल्यं न संशयः॥ अतः परं महेशानि! विषतुल्यं न संशयः"। इति गुप्तसाधनतन्त्रे षष्ठः पटलः॥ क्रुश् + भावे घञ्। रोदनम्। आक्रानम्॥)

क्रोशतालः, पुं, (क्रोशं व्याप्य तालः शब्दभेदः यस्य।) ढक्का। इति हारावली॥

क्रोशध्वनिः, पुं, (क्रोशं व्याप्य ध्वनिरस्य।) ढक्का। इति हारावली॥

क्रोशयुगं, क्ली, (क्रोशस्य क्रोशपरिमिताध्वनो युगं युग्मम्।) क्रोशद्वयम्। तत्पर्य्यायः। गव्यूतिः २। इत्यमरः॥ गोरुतम् ३ गव्या ४ गव्यूतम् ५। इति हेमचन्द्रः॥

क्रोष्टा, [ष्टृ] पुं, स्त्री, (क्रोशति रौतीति। क्रुश् + "सितनिगमिमसीति"। उणां १। ७०। इति तुन्। "ष्ट्यत् क्रोष्टुः"। ७। १। ९५। इति ष्ट्यत्।) शृगालः। इत्यमरः। २। १। १८॥ (यथा, महाभारते। १। २१४। ८।

"ब्राह्मणस्य प्रशान्तस्य हविर्धाङ्केः प्लुप्यते। शार्दूलस्य गुहां शून्यां नीचः क्रोष्टाभिमर्दति"॥

यदुवंशीयो राजविशेषः। यथा, हरिवंशे ३३। ६१

"क्रोष्टोस्तु शृणु राजेन्द्र! वंशमुत्तमपौरुषम्। यदोर्वंशधरस्याथ यज्वनः पुण्यकर्म्मणः॥ क्रोष्टोर्हि वंशं श्रुत्वेमं सर्व्वपापैः प्रमुच्यते"॥)

क्रोष्टुकपुच्छिका, स्त्री, (क्रोष्टुकस्य शृगालस्य पुच्छमिव अस्त्यस्याः। ठन् टाप्।) एन्द्रिपर्णी। चाकुलिया इति भाषा। रामवासक इति ख्याता। इति केचित्। इत्यमरटीकायां स्वामी॥ गोजोमिका। इति राजनिर्घण्टः॥

क्रोष्टुकमेखला, स्त्री, (क्रोष्टुकस्येव मेखला कक्षधःपश्चाद्भागो वा अस्त्यस्याः "अर्शआदिभ्यः"। ५। २। १२७। इति अच् टाप्।) एन्द्रिपर्णी। इति रत्नमाला॥

क्रोष्टुपुच्छिका, स्त्री, (क्रोष्टोः शृगालस्य पुच्छमिव अस्त्यस्याः। ठन् टाप् अत इत्वं च।) एन्द्रिपर्णी। इति रत्नमाला॥

क्रोष्टुपुच्छी, स्त्री, (क्रोष्टोः पुच्छमिव अस्त्यस्याः इति "अर्शआदिभ्यः"। ५। २। १२७। इति अच् ङीष्।) एन्द्रिपर्णी। इति शब्दरत्नावली॥

क्रोष्टुफलः, पुं, (क्रोष्टोः प्रियं फलं अस्य अस्मिन् वा।) इङ्गुदीवृक्षः। इति राजनिर्घण्टः॥

क्रोष्टुविद्मा, स्त्री, (क्रोष्टुभिः विद्मा ज्ञाता वा लक्ष्मा इव।) एन्द्रिपर्णी। इत्यमरः। २। ४। ९३॥ विरालक्षाञ्जि इति ख्याता इति केचित्। इति भरतः॥ (अस्याः पर्य्यायाः। यथा,—

"एकपर्णी एकपर्णी चित्रपर्णश्चिपर्णपि ।
क्रोष्टुविन्ना सिंहपुच्छी कलशीद्रावनिर्गुण्डी" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

क्रोष्टेचुः, पुं, (क्रोष्टोः प्रियः इक्षुः । एषोदरात् उकारस्य अत्वे सन्धिः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

क्रोष्ट्री, स्त्री, (क्रोष्टु + "ष्टुञ्वत् क्रोष्टुः" । इति ऋदन्तात् स्त्रियां ङीप् ।) शुक्लभूमिकुष्माण्डः । इत्यमरः । २ । ४ । १९० ॥
('विदारी स्वादुगन्धा च सा तु क्रोष्ट्री सिता स्मृता' ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) श्वेतगायिका । क्षणविदारी । लाङ्गली । इति मेदिनी ॥

क्रौञ्चः, पुं, (क्रुञ्च + प्रज्ञाद्यण् स्वार्थे ।) पक्षिभेदः । कौंच वक इति भाषा । (यथा, रामायणे । १ । १ । १५ ।
"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ॥)
तत्पर्य्यायः । क्रुङ् २ क्रुञ्चः ३ क्रुञ्चा ४ क्रौञ्चा ५ । इत्यमरभरतौ ॥ कालिकः ६ कालीकः ७ कलिकः ८ । इति शब्दरत्नावली ॥ (अस्य गुणा यथा,—
"क्रौञ्चो हृद्योऽतिरुचिरुद्दभ्रीं हन्ति नित्यशः ।
श्लेष्ममूर्च्छाहरो दीप्यो हन्ति कासमरोचकम्" ॥
इति हारीते प्रथमस्थाने ११ अध्याये ॥)
पर्ब्बतविशेषः । इति मेदिनी ॥ (अयन्तु हिमवतः पौत्रः मैनाकस्य पुत्रः ।
यथा, हरिवंशे १८ । १३-१४ ।
"एतेषां मानसी कन्या मेना नाम महागिरेः ।
पत्नी हिमवतः श्रेष्ठा यस्या मैनाक उच्यते ॥
मैनाकस्य सुतः श्रीमान् क्रौञ्चो नाम महागिरिः ।
पर्ब्बतप्रवरः शुभ्रो नानारत्नसमन्वितः" ॥)
कुररपक्षी । इति राजनिर्घण्टः ॥ द्वीपभेदः । स च दधिमण्डोदसमुद्रेणावृतः षोड़शलक्षयोजनपरिमितः । (यथा, विष्णुपुराणे । २ । ४ । ५७-५८ ।
"क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च ।
आवृतः सर्ब्बतः क्रौञ्चद्वीपतुल्येन मानतः ॥
दधिमण्डोदकस्यापि शाकद्वीपेन संवृतः ।
क्रौञ्चद्वीपस्य विस्तारादिगुणेन महामुने !" ॥
तस्याधिपतिः प्रियव्रतराजपुत्रो घृतपृष्ठः । यथा, भागवते । ५ । २० । १८-२० ।
"तथा च बहिः क्रौञ्चद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परीत उपक्लृप्तो यथा, कुशद्वीपो घृतोदेन । यस्मिन् क्रौञ्चो नाम पर्ब्बतराजो द्वीपनामनिर्वर्त्तक आस्ते ॥ योऽसौ गुहप्रहरणोन्मथितनितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेरवरोधारविन्दमुपजगाम" । दैत्यविशेषः । स च मयदानवपुत्रः । यथा, हरिवंशे । ७६ । २१—२४ ।
"तान्पाशहस्तयमधिकांश्चादितान् प्रीतरश्मिना ।
मयो ददर्श मायां वै दानवानां महात्मनाम् ।
स शिखाजालवितता गण्डशैलाट्टहासिनीम् ।
पादपोत्कटकूटाग्रां कन्दराकीर्णकाननाम् ॥
सिंहव्याघ्रगजाकीर्णां नदन्तीमिव यूथपैः ।
ईहामृगगणाकीर्णां पवनाधूर्णितद्रुमाम् ॥
निर्म्मितां स्वेन पुत्रेण क्रौञ्चेन दिविकामगाम् ।
प्रहृतां पार्ब्बतीं मायां सहजे दानवोत्तमः" ॥
अयमेवासुरः क्रौञ्चद्वीपे क्रौञ्चपर्ब्बते हेमकन्दरे भगवता स्कन्देन निहतः । यथा,—मरीन्द्रसंहितायाम् ।
"क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हेमकन्दरे ।
स्कन्देन युद्धा सुचिरं चित्रमायी सुमायिना ।
स शैलस्तस्य दैत्यस्य ख्यातश्चैव कर्म्मणा ।
केतुतामगमत्तस्य नाम्ना क्रौञ्चः स उच्यते" ॥)
अर्हतां ध्वजः । राक्षसविशेषः । इति हेमचन्द्रः ॥

क्रौञ्चदारणः, पुं, (क्रौञ्चं स्वनामख्यातपर्ब्बतविशेषं दारयतीति । दृ + णिच् + ल्युः । क्रौञ्चस्य दारण इति केचित् ।) कार्त्तिकेयः । इत्यमरः । १ । १ । ४३ ॥ अस्य क्रौञ्चदारणकथा महाभारते ३ । मार्कण्डेयसमस्यापर्ब्बणि २२४ । ३१-३६ ।
"स तूत्थाय महाबाहुरुपसान्त्व्य च तान् जनान् ।
धनुर्विद्ध्य व्यसृजदाशान् श्वेते महागिरौ ॥
बिभेद स शरैः शैलं क्रौञ्चं हिमवतः सुतम् ।
तेन हंसाश्च गृध्राश्च मेरुं गच्छन्ति पर्ब्बतम् ॥
स विशीर्णोऽपतच्छैलो भग्नमार्त्तस्वरान् रुवन् ।
तस्मिन्निपतिते त्वन्ये नेदुः शैला भृशं तदा ॥
स तं नादं भृशार्त्तानां श्रुत्वापि बलिनाम्बरः ।
न प्रायुध्यदमेयात्मा शक्तिमुद्यम्य चानदत् ॥
सा तदा विमला शक्तिः क्षिप्ता तेन महात्मना ।
बिभेद शिखरं घोरं श्वेतस्य तरसा गिरेः ॥
स तेनाभिहतो दीर्णो गिरिः श्वेतोऽचलैः सह ।
उत्पपात महीं त्यक्त्वा भीतः स सुमहात्मनः" ॥
क्रौञ्चं असुरविशेषं दारयति नाशयतीति च । क्रौञ्चासुरवधकथा क्रौञ्चशब्दे द्रष्टव्या ॥)

क्रौञ्चा, स्त्री, (क्रौञ्च + टाप् ।) क्रौञ्चभार्य्या । कौंचवकी इति भाषा । इति जटाधरः ॥ (केचित्तु टाबन्तं न मन्यन्ते जीवन्तमेवेच्छन्ति । तथा च रामायणे १ । २ । १४ ।
"निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत्" ॥)

क्रौञ्चादनं, क्ली, (अद्यते इति । अद् + कर्म्मणि ल्युट् । क्रौञ्चस्य अदनं भक्ष्यम् ।) मृणालम् । घेचुली । घेँचु इति भाषा । चिञ्चोटकः । इति मेदिनी ॥ चेँचको इति भाषा । शैत्यस्य गुणाः । गुरुत्वम् । अजीर्णकारित्वम् । शीतत्वञ्च । इति राजवल्लभः ॥ ("क्रौञ्चादनं घेचुलिका" । इति वैद्यकरत्नमालायाम् ।) पिप्पली । इति शब्दरत्नावली ॥

क्रौञ्चादनी, स्त्री, (क्रौञ्चादन + ङीप् ।) पद्मबीजम् । इति राजनिर्घण्टः ॥

क्रौञ्चारातिः, पुं, (क्रौञ्चस्य स्वनामख्यातस्य पर्ब्बतस्य दैत्यस्य वा अरातिः शत्रुः ।) कार्त्तिकेयः । इति हलायुधः ॥

क्रौञ्चारिः, पुं, (क्रौञ्चस्य अरिः ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥ परशुरामः । इति शब्दमाला ॥

क्रौञ्चशतिकः, पुं, (क्रौञ्चशतं गच्छति । "क्रौञ्चशतयोजनशतयोरुपसंख्यानम्" । वार्त्तिं ५ । १ । ७४ । इति ठन् ।) शतक्रौञ्चगमनकर्त्ता । इति व्याकरणम् ॥ (क्रौञ्चशतादभिगमनमर्हतीति । "ततोऽभिगमनमर्हति" । इति ठञ् क्रौञ्चशतादागन्ता भिक्षुः ॥)

क्लथ् किं म वधे । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां-परं-सकं-सेट् ।) अन्तःस्थटतीययुक्तः । किं, क्लाथयति क्लथति । म, क्लाथयति । इति दुर्गादासः ॥

क्लद, इ ञ ड रदि । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-आत्मं च-अकं-सेट् ।) अन्तःस्थटतीययुक्तः । इ, कर्म्मणि क्लन्द्यते । ञ, क्लन्दति क्लन्दते । ड, क्लन्दते । रदि रोदने । इति दुर्गादासः ॥

क्लद, इ ष म ड रोदने । आह्वाने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-आह्वाने सकं-सेट् ।) इ, कर्म्मणि क्लन्द्यते । ष, क्लन्दा । म, क्लन्दयति । ड, क्लन्दते । इति दुर्गादासः ॥

क्लद, ष म ड वैक्लव्यविकलत्वयोः । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) वैक्लव्यं विकलीभावः । ष, क्लदा । म, क्लदयति । ड, क्लदते शोकार्त्तः । इति दुर्गादासः ॥

क्लम, उ भ इर् ग्लानौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् । उदित्वात् क्लावेट् ।) अन्तःस्थटतीययुक्तः । उ, क्लमित्वा क्लान्त्वा । म, क्लाम्यति । आदिपक्षेऽपि श्रमादित्वं "श्वितक्लमाचम" इति दीर्घत्वापनार्थम् । इर्, अक्लमत् अक्लमीत् । इवि दुर्गादासः ॥

क्लम, ञि य भ ग्लानौ । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट् ।) अन्तःस्थटतीययुक्तः । ञि, क्लान्तोऽस्ति । य भ, क्लाम्यति । इति दुर्गादासः ॥

क्लमः, पुं, (क्लम + भावे घञ् । "नोदात्तोपदेशस्येति" । ७ । ३ । ३४ । इति न वृद्धिः ।) आयासः । इत्यमरः । ३ । २ । १० ॥ (यथा, मनौ । ७ । २२५ ।
"तत्र मुक्त्वा पुनः किञ्चित् तूर्य्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्थिश्चेच्च गतक्लमः ॥ अस्य लक्षणं यथा,—
"योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्ज्जितः ।
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः" ॥
इति सुश्रुतेन शारीरस्थाने चतुर्थाध्याये उक्तम् ॥)

क्लमथः, पुं, (क्लम् + "श्रमादिभ्योऽथच् इति" अथच् ।) आयासः । इत्यमरः । ३ । २ । १० ॥

क्लव, ष म ड भये । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ष, क्लवा । म, क्लवयति । ड, क्लवते । विक्लवन्ति दिवि ग्रहाः । इति यजादित्वादनि विक्लवा इवाचरन्तीति क्वौ साध्यम् । इति दुर्गादासः ॥

क्लान्तः, त्रि, (क्लम + कर्त्तरि क्तः ।) क्लान्तियुक्तः । श्रान्तः । यथाह, जयदेवः ।
"मदनकदनक्लान्तः कान्ते ! प्रियस्तव वर्त्तते" ॥
(महाभारते च । ३ । ७३ । २७ ।
"विश्राम्यतामित्युवाच क्लान्तोऽसीति पुनःपुनः" ॥)

क्लिद, इ ञ ड रदि । इति कविकल्पद्रुमः ॥ (भ्वां उभं-आत्मं च-अकं-सेट् ।) अन्तःस्थटतीययुक्तः ।

इ, कर्म्मणि क्लिन्द्यते । अ, क्लिन्दति क्लिन्दते । ड, क्लिन्दते । रुदि रोदने । इति दुर्गादासः ॥

क्लिद, य ऊ इर् क्लेदे । इति कविकल्पद्रुमः । (दिवां-परं-अकं-वेट् ।) अन्तःस्थद्वितीययुक्तः । क्लेद आर्द्रीभावः । य, क्लिद्यति वस्त्रं पयसा । ऊ, क्लेदिष्यति क्लेत्स्यति । इर्, अक्लिदत् अक्लेदीत् । अस्मात् एषादित्वात् ड इत्यन्ये । इति दुर्गादासः ॥ (यथा, नारदपञ्चरात्रे ।

"सुवेषं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् ।
योनिः क्लिद्यति नारीणां सत्यं सत्यं हि नारद !" ॥)

क्लिन्न, त्रि, (क्लिद् + कर्त्तरि क्तः ।) आर्द्रम् । इत्यमरः । ३।१।९५॥ भिज्ञा इति भाषा । (यथा, रामायणे १ । ४२ । १९ ।

"गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम् ।
स्वर्गं गच्छेयुरत्यन्तं सर्व्वे च प्रपितामहाः" ॥)

क्लिन्नाक्षः त्रि, (श्लेष्मादिक्लेदेन क्लिन्ने क्लेदयुक्ते अक्षिणी यस्य ।) श्लेष्मादिना क्लिन्नचक्षुः । कफादिजनितक्लेदयुक्तं चक्षुर्यस्य सः । तत्पर्य्यायः । चुल्लः २ चिल्लः ३ मिल्लः ४ । कर्म्मधारयेण क्लिन्ने चक्षुषि क्ली । इत्यमरः । २ । ६ । ६० ॥

क्लिश, य उ अ उपतापे । इति कविकल्पद्रुमः ॥ (दिवां-उभं-अकं-सकं च-सेट् । उदित्वात् क्त्वा वेट् ।) य अ, क्लिश्यति क्लिश्यते । उ, क्लिशित्वा क्लिष्ट्वा । उपताप इह उपतप्तीभावः । तत्करणञ्च । क्लिश्यते न च निष्पद्यमिति हलायुधः । क्लिश्यते क्षपयः स्वर्गमपीति चतुर्भुजः । अन्ये त्वस्मात् परस्मैपदममन्यमानाः क्लिश्नन्नपि हि मेधावीति । प्रत्यासन्नतुषारदीधितिकरक्लिश्यत्तमो वल्लवीत्यादि च क्लिशं करोतीति कयङादित्वात् क्ये अचन्तनाङः । ण्यात्मजौ चिक्लिशतुः सचीताविति भट्टिप्रयोगश्च क्रैयादिकात् समादधते वक्ष्येयम् । क्रैयादिकस्य सकर्म्मकत्वात् । इति दुर्गादासः ॥

क्लिश, ऊ ग विहृतौ । इति कविकल्पद्रुमः ॥ (ग्र्यां-परं-सकं-वेट् ।) ऊ, अक्लेशीत् अक्लिशत् । ग, "इत्यमाराध्यमानोऽपि क्लिशाति भुवनत्रयम्" । इति दुर्गादासः ॥

क्लिष्टः, त्रि, (क्लिश् + कर्त्तरि क्तः इट् वा ।) क्लिशः । इत्यमरः । ३ । १ । ९८ ॥

क्लिष्टः, त्रि, (क्लिश् + क्तः पक्षे नेट् ।) क्लेशयुक्तः । (यथा, मेघदूते ८४ ।

"इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति" ॥)

तत्पर्य्यायः । क्लिमितः २ । पूर्व्वापरविरुद्धवाक्ये, क्ली । तत्पर्य्यायः । संकुलम् २ परस्परपराहतम् ३ । इत्यमरः । ३ । १ । ९८ ॥ (यथा,-भागवते । १ । ९ । १२ ।

"जीवितुं नार्हथ क्लिष्टं विप्रधर्म्माच्युताश्रयाः" ॥)

क्लिष्टिः, स्त्री, (क्लिश् + भावे क्तिन् ।) क्लेशः । सेवा । इति धरणी ॥

क्लीतकं, क्ली, (क्लीव + क्तः । निपातनात् वकारोपः । क्लीतमधार्ष्ट्यं कथतीति । कथ क्षेपे + अन्येभ्योऽपीति डः ।) यष्टिमधुका । इत्यमरः ।२।४।२०९ ॥ (अस्य पर्य्यायाः यथा ।

"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका" ॥
इति वैद्यकरत्नमालायाम् ॥
"आनूपं स्थलजञ्चैव क्लीतकं द्विविधं स्मृतम्" ॥
इति चरके सूत्रस्थाने प्रथमेऽध्याये ।

"श्यामा गिरिक्ष्वाञ्जनकी रसेषु
द्राक्षारसे सप्तलिकारसे च ।
घृतं पिबेत् क्लीतकसंप्रसिद्धम्
पित्तार्व्वुदी तज्जठरी च जन्तुः" ॥

इति सुश्रुते चिकित्सितस्थाने १८ अध्याये ॥)

क्लीतकिका, स्त्री, (क्लीतकं क्रियोऽस्यस्याः । "अत इनिठनौ" । ५ । २ । ११५ । इति ठन् रस्य लत्वम् ॥) नीलीवृक्षः । इत्यमरः । २ । ४ । ९४ ॥ (क्लीतक + स्वार्थे कन् टाप् अत इत्वं च । यष्टिमधुका ॥)

क्लीव, ऋ ड अधार्ष्ट्ये । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) अन्तःस्थद्वितीययुक्तः । अधार्ष्ट्यमप्रगल्भीभावः । ड, श्लोकेन क्लीवते सर्व्वः । इति हलायुधः । ऋ, अचिक्लीवत् । इति दुर्गादासः ॥

क्लीव, ऋ ड वान्तवत् । (भ्वां-आत्मं-अकं-सेट् ।) ऋ, अचिक्लीवत् । ड, क्लीवते । वान्तवदिति क्लीड्ड अधार्ष्ट्ये इत्यर्थः । इति दुर्गादासः ॥

क्लीवः, पुं स्त्री, (क्लीड्ड अधार्ष्ट्ये "इगुपधेति" । ३ । १ । १३५ । इति कः ।) क्लीपुरुषभिन्नः । तत्पर्य्यायः । षण्ढः २ नपुंसकम् ३ क्लतीयाप्रकृतिः ४ शण्ढः ५ । इत्यमरः ।२।६।३९॥ क्लतीयप्रकृतिः ६ षण्ढः ७ सण्ढः ८ शण्ढः ९ । इति तट्टीका ॥ पुरुषत्वहीनः । तस्य लक्षणम् । यथा, उद्वाहतत्त्वे ।

"न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति ।
मेढ्रश्चोन्मादशुक्राभ्यां हीनः क्लीवः स उच्यते" ॥

(यथा, पराशरसंहितायाम् ।

"नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते" ॥

क्लीवस्तु चतुर्दशप्रकारः । यथाह नारदः ।

"चतुर्दशविधः प्राक्ते षण्ढो दृष्टो मनीषिभिः ।
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् ॥
निसर्गषण्ढोऽनड्वश्च पक्षषण्ढस्तथैव च ।
अभिशापादगुरो रोगाद् देवक्रोधात् तथैव च ॥
ईर्ष्याषण्ढस्तथाऽसेक्यो वातरेता मुखेभगः ।
आक्षेप्ता मोघबीजश्च शालीनोऽन्यापतिस्तथा ॥
तत्राद्यावप्रतीकार्य्यौ पक्षाख्यं मासमाचरेत् ।
अनुक्रमात् चयस्याथ कालः संवत्सरः स्मृतः ॥
ईर्ष्याषण्ढादयो येऽन्ये चत्वारः समुदाहृताः ।
त्यक्त्वास्ते पतितवत् क्षतयोन्या अपि स्त्रियः ॥
आक्षेप्तृमोघबीजाभ्यां क्षतेपि पतिकर्म्मणि ।
पतिरन्यः स्मृतो नार्य्या वत्सरार्द्धं प्रतीक्ष्य तु ॥
शालीनस्यापि दृष्टस्त्री संयोगादुक्थ्येदध्वजः ।
तं हीनवेगसन्यस्त्रीबालाद्याभिरुपाचरेत् ॥
अन्यस्यां यो मनुष्यः स्यादमनुष्यः स्वयोषिति ।
लभेत स्वाम्यं भर्त्ता नो एतत्कार्य्यं प्रजाक्षते ॥
अप्रत्यार्थं स्त्रियः कृत्वा क्लीबेचं बीजिनो नराः ।
दत्तं बीजवते देयं सबीजो क्षेत्रमर्हति" ॥)

क्लीवः, त्रि, विक्रमहीनः । इत्यमरः । ३ । ३ । २१२ ।

(यथा, महाभारते ३ । अर्জ্জুनाभिगमने ।३३।१२ ।

"कच्चिदाजन् न निर्व्वेदादापन्नः क्लीवजीविकाम्" ॥

धर्म्मकार्य्यादौ निरुत्साहः । यथा, मनौ ३ । १६५ ।

"आचारहीनः क्लीवस्य नित्यं याचनकस्तथा" ॥)

क्लेदः, पुं, (क्लिद् + भावे घञ् ।) आर्द्रम् । यथा,—

"पदस्थितस्य पद्मस्य बन्धू वरुणभास्करौ ।
पदच्युतस्य तस्यैव क्लेदक्लेशकरावुभौ" ॥

इत्युद्भटः ॥ (यथा च याज्ञवल्क्यसंहितायाम् ।

"रसात्तु रसनं श्लैष्मं स्नेहं क्लेदं समार्द्दवम्" ॥

अत्र मिताक्षरा । "रसादुदकात् रसनेन्द्रियं श्लैष्मकफानां स्नेहं स्निग्धतां मृदुतासहितं क्लेदमार्द्रताम्" ॥)

क्लेदनः, पुं, (क्लेदयति श्लेष्मादिभिरिति । क्लिद् + णिच् + कर्त्तरि ल्युः ।) कफः । इति शब्दचन्द्रिका ॥ पञ्चप्रकारश्लेष्मान्तर्गतश्लेष्मविशेषः । इति सुश्रुतबोधः ॥ (भावे + ल्युट् । आर्द्रीकरणम् । यथा, भागवते ३ । २६ । ४३ ।

"क्लेदनं पिण्डनं तृप्तिः प्राणानाप्यायनोदनम्" ॥)

क्लेदा [न्] पुं, (क्लेदयति शीतरश्मिभिर्जनम् । क्लिद + णिच् + "श्वन् उक्षन् पूषन् शीर्षन्निति" । उणां १ । १५८ । इति कनिन् । न लोपे पूर्व्वदीर्घः ।) चन्द्रः । इत्युणादिकोषः ॥

क्लेदुः, पुं, (क्लेदयति इति । क्लिद + "पृषॄ स्नु क्षिहीति" । उणां १ । ११ । इति उन् ।) चन्द्रः । इति त्रिकाण्डशेषः ॥ सन्निपातः । इति संक्षिप्तसार उणादिवृत्तिः ॥

क्लेश, ड वधे । उपतापे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं उपतापार्थे अकं-सेट् ।) ड, क्लेशते चिक्लेशे । धातुप्रदीपे तु क्लेष व्यक्तायां वाचीति मूर्द्धन्यान्तो दृश्यते । क्लेषते न दयावाक्यमिति । हलायुधोऽपि । इति दुर्गादासः ॥

क्लेशः, पुं, (क्लिश् + भावे घञ् ।) दुःखम् । तत्पर्य्यायः । आदीनवः २ आस्रवः ३ । इत्यमरः ॥ (यथा, भगवद्गीतायाम् । १२ । ५ ।

"क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" ॥)

स तु पञ्चविधः । अविद्या १ विद्याविरोधिनी । अस्मिता २ अहमस्मीत्यहङ्कारः । रागः ३ इच्छाविशेषः । द्वेषः ४ वैरिता । अभिनिवेशः ५ मरणभयम् । इति कुसुमाञ्जलिः ॥ (तथाच पातञ्जले साधनपादे २ । २—३ ।

"समाधिभावनार्थः क्लेशतनूकरणार्थश्च । अविद्याऽस्मितारागद्वेषाभिनिवेशाः" ॥

"क्लेशतनूकरणार्थं इत्युक्तं तत्र के क्लेशा इत्याह । अविद्यादयो वक्ष्यमाणलक्षणाः पञ्च ते बाधनालक्षणं परितापमुपजनयन्तः क्लेशशब्दवाच्याः भवन्ति । ते हि चेतसि प्रवर्त्तमानाः संस्कारलक्षणं गुणपरिणामं दृढयन्ति" । इति तट्टीकाकृद्राजमार्त्तण्डः ॥) कोपः । व्यवसायः । इति मेदिनी ॥

क्लेशितः, त्रि, (क्लेशोऽस्य जातः । क्लेश + इतच् ।) क्लेशयुक्तः । यथा,—भट्टारतिलके ।

"निद्रा यातो मम पतिरसौ क्लेशितः कर्म्मदुःखी" ॥

क्षौत्रिकं, क्ली, (क्षौत्रेण यष्टिमधुकया निर्व्वृत्तं इति ठञ्।) मद्यम्। इति शब्दचन्द्रिका॥ (विवरणमस्य मद्यशब्दे ज्ञातव्यम्॥)

क्षौम, [न्] क्ली, (क्षुङ् गतौ + मनिन्।) फुप्फुसम्। फाँफड़ा इति फुसधरा इति च ख्यातम्। इति भरतः॥ तत्पर्य्यायः। तिलकम् २। इत्यमरः॥ २। ६। ९५॥ क्षौमम् ३ क्षौमम् ४। इति तट्टीका॥

"वाङ्मेदयोर्मध्ये वक्षः तन्मध्ये हृदयं तत्पार्श्वे क्षौम पिपासास्थानम्"। इति वैद्यकम्॥

("उदकवहे द्वे तयोर्मूलं तालु क्षौम च"॥

इति सुश्रुते शारीरस्थाने नवमाध्यायः॥)

क्ष, य, (कस्मिन्निति "किमोऽत्"। ५। ३। १२। इति यत् ततः "क्वाति"। ७। २। १०५। इति क्वादेशः।) कुच। कोथा इति भाषा। इति व्याकरणम्॥ अत्यन्तासम्भावनायां पण्डितैः क्षयं प्रयुज्यते। यथा, रघुः। १। २।

"क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः"॥

क्षङ्गुः, पुं, (कु + अगि + उन्।) कङ्गुः। इति हेमचन्द्रः॥

क्षचन, य, (पाणिनिमते पदद्वयमेतत्। मुग्धबोधमते तु "किमः क्वन्त्वाच्चनौ"। इति चनः।) क्वचित्। इति व्याकरणम्॥

क्षचित्, य, (पाणिनिमते पदद्वयम्। मुग्धबोधमते तु "किमः क्वन्त्वाच्चनौ"। इति चित्।) कस्मिंश्चित्। कुत्रचित्। कोनस्थाने इत्यादि भाषा। इति व्याकरणम्॥

(यथा, विष्णुपुराणे १। २२। ३८।

"हन्ति वा यत् क्वचित् किञ्चित् भूतं स्थावरजङ्गमम्"॥)

क्षण, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वकारयुक्तः। क्वणति वीणा। इति दुर्गादासः॥

क्वणः, पुं, (क्वण् + भावे घञ्।) क्वणकरोति शब्दविशेषः। इत्यमरटीकायां भारतसुन्दरी॥ वीणायाः शब्दः अन्यस्य च शब्दः। इति भरतः॥ तत्पर्य्यायः। निक्वाणः २ निक्वणः ३ क्वाणः ४ क्वणनम् ५। इत्यमरः। १। ७। २४॥

क्वणनं, क्ली, (क्वण् + भावे ल्युट्।) क्वणः। इत्यमरः। १। ७। २४॥

क्वणनः, पुं, (क्वणति इति। क्वण् + ल्युः।) धनिष्ठकासुतः। इति त्रिकाण्डशेषः॥ छोटहाँड़ी इति भाषा॥

क्वथ, ए, ञ निष्पचने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) वकारयुक्तः। य, अक्वथीत्। ज, क्वाथः क्वथः। क्वथति वैद्य औषधं निष्पचतीत्यर्थः। इति दुर्गादासः॥

क्वथितः, त्रि, (क्वथ्यते स्म इति। क्वथ + कर्म्मणि क्तः।) व्यतिपक्वव्यञ्जनदशमूलादिः। तत्पर्य्यायः। निष्पक्वः २। इत्यमरः। ३। २। ९५॥ कषायः ३ निर्य्यूहः ४ क्वाथः ५ प्रहतः ६। इति वैद्यकपरिभाषा॥

क्वाणः, पुं, (क्वण् + भावे कर्म्मणि वाच्ये च यथायथं घञ्।) क्वणः। इत्यमरः। १। ७। २४॥

क्ष

(यथा, राजेन्द्रकर्णपूरे १७॥

"सञ्जाते त्वयि हारिहारवलयक्वाणं क्वणत्कङ्कणं
चञ्चत्काञ्चनकाञ्चि सा भगवती नर्नर्त्ति वाग्देवता"॥)

क्वाथः, पुं, (क्वथ् + भावे घञ्।) दुःखम्। व्यसनम्। द्रव्यनिष्पाकः। इति हेमचन्द्रः॥ क्वाथ्यमानं तोयं त्रिविधम्। पादावशेषम् १ अर्द्धावशेषम् २ त्रिपादावशेषञ्च ३। अथ नाम पारिभाषिकोद्योदकम्। तच्च त्रिपादावशेषं वातनाशकम्। अर्द्धावशेषं पित्तनाशकम्। पादावशेषं कफनाशकम्। लघु अग्निवर्द्धकञ्च। तेषां मध्ये त्रिपादावशेषजलं हेमन्ते शिशिरे च प्रशस्तम्। वसन्ते पादावशेषजलं प्रशस्तम्। ग्रीष्मे च अर्द्धावशेषजलं प्रशस्तम्। वर्षायां अष्टमांशावशेषजलं प्रशस्तम्। तत्काले बहुदोषत्वात्। दिनपक्वजलं रात्रौ गुरु रात्रिपक्वजलं दिवा गुरु। इति राजवल्लभः। यथास्य करणप्रणाली॥

"पानीयं षोड़शगुणं क्षुण्णे द्रव्यपले क्षिपेत्।
मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितम्॥
तच्चार्द्धं पाययेद्धीमान् कोष्णं मृद्वग्निसाधितम्।
मृदुतः क्वाथः कषायश्च निर्य्यूहः स निगद्यते"॥

इति शार्ङ्गधरेण मध्यखण्डे द्वितीयाध्याये उक्तम्॥)

क्वाथोद्भवं, क्ली, (क्वाथादुद्भवो यस्य। क्वाथाद् उद्भवतीति वा।) तुत्थाञ्जनम्। इत्यमरः। २। ९। १०२॥

क्षेल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-गतौ सकं-सेट्।) वकारयुक्तः। ऋ, अचिक्वलत्। चालः कम्पः। चालः कैश्चिन्न मन्यते। इति दुर्गादासः॥

क्ष, क्षकारः। (अयन्तु ककारषकारयोगेन जातः। अतोऽस्य पृथक् वर्णत्वशङ्का नास्त्येव।) तन्त्रमते तु अञ्जनचतुस्त्रिंशद्वर्णाः। अष्टमवर्गीयपञ्चमवर्णः। एकयञ्चाशन्मातृकावर्णानां चरमवर्णश्च। यथा,—

"पञ्चाशत्पितृभिर्माता विहिता सर्व्वकर्म्मसु।
अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता॥
ज्ञानं मेरु मुखं तत्र कल्पयेन्मुनिसत्तमः।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः"॥

इति गौतमीयतन्त्रम्॥ *॥

कराटदेशोद्भवोऽयम्। यथा,—

श्रीशिव उवाच।

"विशेषं कथयाम्यद्य प्रोच्चार्य्याः कण्ठतः स्वराः।
कण्ठ्यं जिह्वया मूर्द्धा हृदयं जिह्वदन्तजम्।
मुखस्थानाज्जनो वाच्यः क्षकारः कण्ठघातजः"॥

इति वरदातन्त्रे १० पटलः॥ *॥

अस्य स्वरूपं यथा,—

"क्षकारं वृषभं चार्व्वङ्गि कुण्डलीत्रयसंयुतम्।
चतुर्व्वर्गमयं वर्णं पञ्चदेवमयं सदा।
पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा॥
त्रिबिन्दुसहितं वर्णमात्मादितत्त्वसंयुतम्।
शरच्चन्द्रप्रतीकाशं हृदि भ ए सुन्दरि!"॥

इति कामधेनुतन्त्रम्॥ *॥

अस्याभिधानानि यथा,—

"क्षः कोपस्तुम्बुकः काणो रूक्षः सम्वर्त्तकः परः।
नृसिंहो विद्युता माया महातेजा युगान्तकः॥

क्षण

परात्मा क्रोधसंहारी बलान्तो मेरुवाचकः।
सर्व्वाङ्गः सागरः कामः संयोगान्त्यस्त्रिपूरकः॥
क्षेत्रपालो महाक्षोभो मातृकान्तानलः क्षयः।
मुखं कथ्यवधानन्ता कालजिह्वा गणेश्वरः।
कायाग्नेस्तस्य संघातो भजयश्रीर्ललाटकः"॥

इति तन्त्रशास्त्रे वर्णाभिधानम्॥ *॥ अपि च।

"क्षकारो नरसिंहस्य मेरुः सम्वर्त्तकोऽपि च।
तव स्नेहान्मया देवि! कथितं मातृकोत्तरम्।
पर्य्यायैरपि विज्ञेयं न प्रकाश्यं कदाचन"॥

इति श्रीरुद्रयामले ८ पटले मन्त्राभिधानम्॥*॥

अस्य ध्यानं यथा,—

"चतुर्भुजां रक्तवर्णां मुक्ताम्बरविभूषिताम्।
रत्नालङ्कारसंयुक्तां वरदां पद्मलोचनाम्॥
ईषद्धास्यमुखीं लोलां रक्तचन्दनचर्चिताम्।
शरदाचीश्च चतुर्व्वर्गप्रदां सौम्यां मनोहराम्॥
गन्धर्व्वसिद्धदेवाद्यैर्ध्यातामाद्यां सुरेश्वरीम्।
एवं ध्यात्वा क्षकारन्तु तन्मन्त्रं दशधा जपेत्"॥

इति वर्णोद्धारतन्त्रम्॥ क्षकारस्य ककारषकारयोगजत्वेन केचित् पृथग्वर्णत्वेन न मन्यन्ते। तेषां मते तन्त्रोल्लिखितपञ्चाशद्वर्णानुपपत्तिः तन्त्रशास्त्रे तस्य मेरुत्वेन गणनानुपपत्तिश्च भवति। अतः पृथङ्निर्दिश्यते इति केचित्। तथा च।

"यान्ताः स्युर्यद्यपि क्षान्ता वर्णानामनुरोधतः।
पृथक्क्रमेण कथ्यन्ते तथाप्येते समन्वयात्"॥

इति विश्वप्रकाशः॥ अपि च।

"अकारादिकारान्ता वर्णाः पञ्चाशदीरिताः।
संयोगात् कथयोरेषः क्षकारो मेरुरीरितः"॥

इति क्षणानन्दधृततन्त्रशास्त्रम्॥

क्षः, पुं, (क्षयति लोकान् युगान्तकाले प्रलये सर्व्वाणि भूतानि महाकालोदरं प्रेरयतीति। क्षि क्षये + ड प्रत्ययः।) सम्वर्त्तः। (क्षिणोति हन्ति मनुष्यादिजीवानिति। राक्षसः। (क्षिणोति हन्ति हिरण्यकशिपुमिति।) नरसिंहः। (क्षयति क्षिणोति वा भूतानि स्वकीयाग्निना इति।) विद्युत्। (क्षयति प्रस्थाद्युत्पत्त्या क्रमशः इति। क्षि + डः।) क्षेत्रम्। क्षेत्रपालः। (क्षि क्षये + भावे डः।) नाशः। इति मुग्धावबोधिनी॥

क्षज, इ क तङ्के। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) तङ्को दुःखेन जीवनम्। इ क, क्षञ्जयति दीनः। इति दुर्गादासः॥

क्षज, इ ष म ड) दाहतोः। इति कविकल्पद्रुमः॥
क्षज, ष म ड) (भ्वां-आत्मं-सकं-सेट्।) इ, क्षज्जते। ष, क्षज्झा। सेमक्षात् सरोरित्यनेनैवसिद्धौ अस्य धातुबन्धस्वरूपर्य्यन्तघटादिभ्यो ड इति प्राचीनमतानुरोधात्। म, अक्षञ्जि अक्षाञ्जि क्षञ्जं क्षञ्जं क्षाञ्जं क्षाञ्जम्। मानुबन्धबलात् धातुपधाया अपि दीर्घः। समते तु अत्र दीर्घविधिरुपधां नापेक्षते। ड, क्षज्जते। ष, क्षज्झा। म, क्षञ्जयति। ड, क्षञ्जयते। दा दानम्। इति दुर्गादासः॥

क्षण, द ञ उ वधे। इति कविकल्पद्रुमः। (तनां-उभं-सकं-सेट्।) द ञ, क्षणोति क्षणुते। उ

क्षणित्वा क्षत्वा। इति दुर्गादासः॥

क्षणः, पुं, (क्षणोति हन्ति नाशयति वा सर्व्वं यथाकालं आयुरवसाने वा। काल एव युगान्ते सर्व्वमात्मसात् करोतीत्यर्थः। स एवांशभेदेन नानारूपो भवतीत्यर्थः।) निमेषक्रियावच्छिन्नः कालः। स च दशपलपरिमितः। (निमेषक्रियावच्छिन्नस्य कालस्य चतुर्थभागः। यथा,—

"आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिभिः॥
सचेत्तु विफलो याति का नो हानिस्ततोऽधिका"॥

इति शब्दार्थचिन्तामणिः। अपि च।

"क्वचिद्दृष्टः क्वचित्तुष्टो रुष्टस्तुष्टः क्षणे क्षणे।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयावहः"॥

इति हितोपदेशः॥ क्षणोति दुःखं नाशयति उत्सवकाले। क्षण-वधे-+अच्।) उत्सवः। (यथा, माघे १। ४।

"नवानधोऽधो वहतः पयोधरान्
समूढकर्पूरपरागपाण्डुरम्।
क्षणं क्षणोत्क्षिप्तगजेन्द्रवृत्तिना
स्फुटोपमं भूतिसितेन शम्भुना"॥)

निर्व्यापारस्थितिः। इत्यमरः। ३। ३। ४७॥ पर्व्व। अवसरः। परतत्त्वम्। मथम्। इति हेमचन्द्रः॥ (प्रशस्तमुहूर्त्तः। यथा, मनोपाख्याने। ५। १।

"अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा"॥)

क्षणतुः, पुं, (क्षण भावे + बाहुलकात् अतुप्रत्ययः।) क्षतः। इति हेमचन्द्रः। क्षणनुरिति च पाठः॥

क्षणदं, क्ली, (क्षणं उत्सवं ददातीति। दा + कः।) जलम्। इति मेदिनी॥

क्षणदः, पुं, (क्षणं याचादिशुभमुहूर्त्तं ददातीति। दा + कः।) गणकः। इति मेदिनी॥

क्षणदा, स्त्री, (क्षणद + स्त्रियां टाप्।) रात्रिः (यथा, भागवते। ३। ३। २१।

"इमं लोकममुं चैव रमयन् सुतरां यदून्।
रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः"॥)

हरिद्रा। इत्यमरः। १। ४। ४॥

(हरिद्राशब्देऽस्या विवृतिर्द्रष्टव्या॥)

क्षणनं, क्ली, (क्षण + भावे ल्युट्।) वधः। इत्यमरः॥

क्षणनिश्वासः, पुं, (क्षणात् क्षणकालात् परं निःश्वासोऽस्य।) शिशुमारः। इति शब्दरत्नावली॥

क्षणप्रभा, स्त्री, (क्षणं क्षण्य प्रभाऽस्याः।) विद्युत्। इत्यमरः। २। ८। ११४॥

क्षणभङ्गुरः, त्रि, (क्षणमात्र भङ्गुरः।) क्षणैकनाश्यः। यथा। "यदि पुनरस्मै किमपि नाहमास्वदमन्ति किञ्चिदपि वस्तु स्थिरं विश्वमेव क्षणभङ्गुरं क्षणिकं वेत्यवधारयेरन् न किञ्चिदपि कामयेरन् न कामयमानाः केचिदपि प्रवर्त्तन्ते"। इति बौद्धाधिकारे रघुनाथशिरोमणिः॥

क्षणरामी, [न्] पुं, (क्षणात् परं क्षणे क्षणे वा रमते इति। रम + णिनिः।) पारावतः। इति शब्दमाला॥ (चटकः। इति केचित्॥)

क्षणिकः, त्रि, (क्षणः स्वसत्तायाप्यतयाऽस्यास्य। ठन्।) क्षणमात्रस्थायी। यथा। "क्षणभङ्गे विप्रतिपत्तिः शब्दादिः क्षणिको न वा। क्षणिकत्वञ्च स्वाधिकरणसमयप्रागभावाधिकरणक्षणानुत्पत्तिकत्वे सति कादाचित्कत्वं उत्पत्तिमत्त्वं वा। उत्पत्तिश्च स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिक्षणसम्बन्धः। क्षणश्च स्वाधेयपदार्थप्रागभावानाधारः समयः। प्रसिद्धिस्तु विधेर्नैयायिकानां प्रागभावे चरमध्वंसे च निषेधस्य बौद्धानामलीके। स्वाधिकरणसमयप्रागभावाधिकरणक्षणावृत्तित्वं क्षणिकत्वमिति तु व्यायः"। इति बौद्धाधिकारे रघुनाथशिरोमणिः॥ अन्यच।

"ब्रह्मारम्भस्वतुर्थं स्यादयाकाष्ठशरीरिणाम्।
अवाप्यवृत्तिः क्षणिको विशेषगुण इष्यते"॥

इति भाषापरिच्छेदे २७॥ "क्षणिकत्वञ्च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्"। इति सिद्धान्तमुक्तावली॥

क्षणिका, स्त्री, (क्षणिक + स्त्रियां टाप्।) विद्युत्। इति हेमचन्द्रः॥ (क्षणकालमात्रस्थायिनी। यथा, हितोपदेशे। १। १५४।

"योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम्।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्वियुज्यते"॥)

क्षणिनी, स्त्री, (क्षणः उत्सवोऽस्त्यस्याम्। क्षण + इनि। ङीप्।) रात्रिः। इति शब्दरत्नावली॥ (उत्सववति, त्रि। यथा, महाभारते। २। मन्त्रणापर्व्वणि १३। ४४।

"तं विश्रान्तं शुभे देशे क्षणिनं कल्यमच्युतम्।
धर्म्मराजः समागम्याचापयत् स्वं प्रयोजनम्"॥)

क्षतं, क्ली, (क्षण्यते वध्यतेऽनेन। क्षण + करणे क्तः।) स्रवद्रक्तपूयादि। घा इति भाषा। तत्पर्य्यायः। व्रणः २ अरुः ३ हिंसम् ४ क्षतजुः ५। इति हेमचन्द्रः॥ तद्वति त्रि॥ *॥

क्षतेन मृतस्याशौचं यथा, व्याघ्रः।

"क्षतेन म्रियते यस्तु तस्याशौचं भवेद्दिधा।
आसप्ताहात् त्रिरात्रं स्याद्दशरात्रमतः परम्॥
शस्त्रघाते व्यहादूर्द्धं यदि कश्चित् प्रमीयते।
अशौचं प्राकृतं तत्र सर्व्ववर्णेषु नित्यशः॥

अत्र शस्त्रघातपदं क्षतेतरशस्त्रघातपरं पारिभाषिकशस्त्राघातपरमपि। अन्यथा क्षतं विना पतनादिभिर्विषमस्तानां दिनत्रयेऽशौचाधवसायः स्यात्"। इति शुद्धितत्त्वम्॥ *॥ चन्द्रग्रहणादौ क्षतदोषाभावो यथा,—पुलस्त्यः।

"चन्द्रसूर्य्यग्रहे चैव मृतानां पिण्डकर्म्मसु।
महातीर्थे च संप्राप्ते क्षतदोषो न विद्यते"।

अन्यच्च देवलः।

"सद्यः सूतकी सूती मत्तोन्मत्तरजस्वलाः।
मृतवन्धुरवन्ध्यश्च वर्ज्यान्यहौ स्वकालतः"॥

इत्यनेन वर्ज्यतामाह। अशुचित्वमप्याह।

"दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत्।
न तत्र बाह्यः कुर्य्यात् यत्नमुद्धरणे पुनः॥
भवेदशौचमत्यर्थं हृत्यवेधात् व्रणे क्षते"॥

इति प्रायश्चित्ततत्त्वम्॥ (विदारणम्। यथा, कुमारे। ३। २६।

"नखक्षतानीव वनस्थलीनाम्"॥

विनाशः। यथा, रघुः। २। ५३।

"क्षतात् किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढः"॥

त्रि, ताडितः। विद्धः। यथा, रघुः। ३। ५३।

"रघोरवष्टम्भमयेन पत्रिणा
हृदि क्षतो गोत्रभिदोऽप्यमर्षणः"॥

क्षतियुक्तः। यथा, कुमारे। २। २६।

"रुद्राणामपि मूर्द्धानः क्षतह्लारशंसिनः"॥

(रोगविशेषः। तस्य सकारणसम्भिन्नक्षणानि चिकित्सितञ्च यथा,—

"धनुर्व्यायस्यतोऽत्यर्थं भारमुद्वहतो गुरुम्।
पतितो विषमोच्चेभ्यो युध्यमानस्य चाधिकैः॥
वेगं हयं वा धावन्तं दम्यं वान्यं नियच्छतः।
शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः परान्॥
अधीयानस्य वात्युच्चैर्दूरं वा व्रजतो द्रुतम्।
महानदीं वा तरतो गजैर्वा सह धावतः॥
सहसोत्पतितो दूरं तूर्णञ्चातिप्रसृप्यतः।
तथान्यैः कर्म्मभिः क्रूरैर्भृशमभ्याहतस्य वा॥
विक्षते वक्षसि व्याधिर्बलवान् समुदीर्य्यते।
स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः॥
उरो विरुज्यते तस्य क्षिप्यतेऽथ विदह्यते।
प्रपीड्यते ततः पार्श्वे शूलैरङ्गं प्रवेपते॥
क्रमादीर्य्यं बलं वर्णो रुचिरग्निश्च हीयते।
ज्वरो यथा मनोदैन्यं विड्भेदाग्निवधावपि॥
दुष्टः श्यावः सदुर्गन्धः पीतो विग्रथितो बहुः
कासमानस्य च श्लेष्मा सरक्तः संप्रवर्त्तते॥
सक्षतः क्षीयतेऽत्यर्थं तथाशुक्रौजसोः क्षयात्"॥

पूर्व्वरूपं यथा,—

"अथाङ्गं लक्षयं तस्य पूर्व्वरूपमिति स्मृतम्।
उरोवक्त्रोगिणश्छर्दिः कासो वैशेषिकः क्षते"॥

अस्यासाध्यलक्षणादिकं यथा,—

"अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नवः।
गते संवत्सरे याप्यः सर्व्वलिङ्गन्तु वर्ज्येत्"॥

चिकित्सास्य यथा।

"उरोमल्लाक्षतं लाक्षां पयसा मधुसंयुताम्।
सद्य एव पिबेज्जीर्णे पयसाद्यात् सशर्करम्॥
पार्श्ववस्तिरुजास्वल्पपित्तास्रिक्षां सुरायुताम्।
भिन्नविट्कः समुस्तातिविषां पाठां सवत्सकाम्॥
लाक्षां सर्पिर्मधूच्छिष्टं जीवनीयगणं सिताम्।
त्वक्क्षीरी सम्मितं क्षीरे पक्त्वा दीप्तानलः पिबेत्॥
इक्ष्वालिकविसग्रन्थिपद्मकेशरचन्दनैः।
घृतं पयो मधुयुतं सन्धानार्थं पिबेत् क्षती॥
यवानां चूर्णमादाय क्षीरसिद्धं घृतप्लुतम्।
ज्वरदाहे सिताक्षौद्रशक्तून् वा पयसा पिबेत्॥
कासी पर्व्वास्थिशूली च जिघ्रात्सघृतमाक्षिकाः।
मधुकमधुकद्राक्षा त्वक्क्षीरादिप्यलीवकाः"॥
"रक्तेऽतिवृत्ते दध्यन्नं यूषैर्लोपेन वा पिबेत्।
घटकाम्बुरसं वापि रक्तं वा छागजाङ्गलम्॥
चूर्णं पौनर्नवं रक्तशालितण्डुलजार्करम्।
रक्तस्रोवी पिबेत् सिद्धं द्राक्षारसपयोघृतैः॥
मधूकमधुकक्षीरसिद्धं वा तण्डुलीयकम्॥
यष्ट्याह्वानागबलयोः क्वाथे क्षीरसमं घृतम्।
पयसा पिप्पलीवांशीकल्कसिद्धं क्षते शुभम्॥

कोलबाह्वारसे तद्वत् क्षीराष्टगुणसाधितम् ।
कल्कैः कट्वम्लदार्व्वीत्वग्वत्सकत्वक्फलैर्हृतम् ॥
जीवकर्षभकौ वीरां जीवन्तीं नागरं यष्टीम् ।
चतसः पर्णिनीर्मेदे काकोल्यौ द्वे निदिग्धिके ॥
पुनर्नवे द्वे मधुकं आत्मगुप्तां घृतावरीम् ।
ऋद्धिं परूषकं भार्गीं मृद्वीकां हृद्वतीन्तथा ॥
वृद्धाटकीं तामलकीं पयस्यां पिप्पलीं बलाम् ।
वदराक्षोटखर्जूरवातामाभिषुकाण्यपि ॥
फलानि चैवमाद्यानि कल्कान् कुर्व्वीत कार्षिकान् ।
धात्रीरसविदारीक्षु क्वागमांसरसं पयः ॥
कुर्य्यात्सर्व्वान्मितं तेन घृतप्रस्थं विपाचयेत् ।
प्रस्थार्द्धं मधुनः शीते शर्करार्द्धतुलान्तथा ॥
द्विकार्षिकाणि पचैला हेमत्वक्पत्रिचानि च ।
चूर्णितानि विनीयास्मात्क्षिप्त्वाऽऽमाञ्च सदा नरः ॥
अमृतप्राश्यमित्येतन्नराणामामृतं घृतम् ।
सुधामृतरसं प्राप्य क्षीरमांसरसाग्निना ॥
नष्टशुक्रक्षतक्षीणदुर्ब्बलत्वाधिकर्षितान् ।
क्षीप्रबलान् क्षुधान् वर्णस्वरहीनांश्च दंहयेत् ॥
कासहिक्काश्वरश्वासदाहच्छर्द्यरुचिपित्तनुत् ।
पुंस्त्वं वमिमूर्च्छाकृमीन्निमूत्रामयापहम्" ॥

इत्यमृतप्राश्यघृतम् ॥

"मधुकाष्टपलं द्राक्षा प्रस्थार्द्धे घृतं पचेत् ।
पिप्पल्यष्टपले कल्के प्रस्थं सिद्धे च शीतले ॥
एषगष्टपलं क्षौद्रशर्कराभ्यां विमिश्रयेत् ।
समं शक्नुक्षतक्षीणे रक्तगुल्मेषु तद्धितम्" ॥

इति शक्नुप्रयोगः ॥

"शक्नूनां वस्तपूतानां मध्यं क्षौद्रघृतान्वितम् ।
यावान्नसाक्ष्यो दीप्ताग्निः क्षतः क्षीणः पिबेन्नरः" ॥
"एका योढ़ग्निका धान्याद्वे ऽजाज्यजमोदयोः ।
ताभ्यां दाड़िमदृक्षाम्लद्विर्दिः सौवर्चलात्पलम् ॥
मुण्ढ्याः कर्षं दधित्थस्य मेथात्यच्च पलानि च ।
तच्चूर्णं षोड़शपले शर्करायां विमिश्रयेत् ॥
षाड़वोऽयं प्रदेयः स्यादन्नपानेषु पूर्ब्बवत्" ॥

इति षाड़वः ॥

"यद्योक्तं यच्चिरायां पथ्यं कासिनां रक्तपित्तिनाम् ।
तच्च कुर्य्यादपेक्ष्याग्निं व्याधिं साम्यबलांस्तथा" ॥

इति चरके चिकित्सास्थाने १६ अध्याये ॥)

क्षतकासः, पुं, (क्षतजः कासः । मध्यपदलोपी समासः ।) पञ्चविधकासरोगान्तर्गतकासरोगविशेषः । यथा,—

"पञ्चकासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ।
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्" ॥

एषां पूर्ब्बरूपमाह ।

"पूर्ब्बरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठेकण्डूश्च मोह्यानामवरोधश्च जायते" ॥

मोह्यानामवरोधः कवलगिलने कण्ठस्थश्च ।

अस्य निदानपूर्ब्बिकां सम्प्राप्तिमाह ।

"अतिव्यायामाराव्ययुद्धाध्वगजनियन्त्रणैः ।
रूक्षस्रोरक्षतं वायुर्व्यहीत्वा कासमावहेत्" ॥

अध्वगजन्योर्निग्रहो दमनम् । अध्वगमाह ।

"संपूर्ब्बं कासते मुक्तं ततः क्षीवेत् सशोणितम् ।
कण्ठेन वक्षताल्पर्थं विरुद्धेनेव घोरवा ॥

सूचीभिरिव तीक्ष्णाभिः तुद्यमानेन शूलिना ।
दुःखस्पर्शेन शूलेन भेदपीड़ाभितापिना ॥
पर्व्वभेदज्वरश्वासः क्षयावैस्वर्य्यपीड़ितः ।
पारावत इवाकूजेत् कासवेगात् क्षतो ध्रुवात्" ॥
कण्ठेनेत्युपलक्षणे क्षतीया एवमुरसाऽपि ॥
तस्य चिकित्सा यथा,—
"इक्ष्वित्क्षुवालिकापद्मभृङ्गोत्पलचन्दनम् ।
मधुकं पिप्पली द्राक्षा लाक्षा वृद्धी शतावरी ॥
द्विगुणा च तुगाक्षीरी सिता सर्व्वचतुर्गुणा ।
सिद्धात्तन्मधुसर्पिर्भ्यां क्षतकासनिषूदने" ॥
इक्ष्वालिका इक्षुभेदः । चन्द्र इति लोके । पद्मं पद्मकाष्ठम् । भृङ्गं विसम् । उत्पलं कमलम् । चन्दनमत्र धवजं चूर्णत्वात् । वृद्धी कर्कटवृद्धी । तुगाक्षीरी वंशरोचना । सा चेक्षोर्द्विगुणा । इति भावप्रकाशः ॥
("युद्धादैः साहसैस्तैस्तैः सेवितैरत्यथाबलम् ॥
उरस्यन्तः क्षते वायुः पित्तेनानुगतो बली ।
कुपितः कुरुते कासं कफं तेन सशोणितम् ॥
पीतं श्यामञ्च शुष्कञ्च ग्रथितं कुथितं बहु ।
क्षीवेत् कण्ठेन रुजता विभिन्नेनेव घोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
पर्व्वभेदज्वरश्वासक्षयावैस्वर्य्यकम्यवान् ॥
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च ।
क्रमाद्दीप्यं रुचिः पक्तिर्बलं वर्णश्च हीयते" ॥

अस्य चिकित्सा यथा—

"उरस्यन्तः क्षते सद्यो लाक्षां क्षौद्रयुतां पिबेत् ॥
क्षीरेण शालीन् जीर्णेऽद्यात् क्षीरेणैव सशर्करान् ।
पार्श्ववस्ति सरक्तास्यपित्तामिश्रां सुरायुताम् ।
भिन्नविट्कः समुल्लातिविषा पाठां सवत्सकाम् ॥
लाक्षा सर्पिर्मधूच्छिष्टं जीवनीयं गणं सितम् ।
त्वक्क्षीरी सक्षितं क्षीरे पक्त्वा दीप्तानलः पिबेत् ॥
इक्ष्वालिकाविषग्रन्थिपद्मकेक्षुरचन्दनैः ।
घृतं पयो मधुयुतं सन्धानार्थं क्षती पिबेत् ॥
क्षतकासे च ये धूमाः सानुपाना निदर्शिताः" ।
इति वामटे निदानस्थाने चिकित्सास्थाने च चतुर्थाध्याये ॥)

क्षतघ्नः, पुं, (क्षतं हन्ति नाशयतीति । हन् + "अमनुष्यकर्त्तृके च" । ३ । २ । ५३ । इति टक् ।) क्षुद्रविशेषः । इति शब्दचन्द्रिका ॥ कुकुरशोंखा इति भाषा ॥

क्षतघ्नी, स्त्री, (क्षतं हन्ति । हन् + "अमनुष्यकर्त्तृके च" । ३ । २ । ५३ । इति टक् स्त्रियां ङीष् ।) लाक्षा । यथा,—
"लाक्षा द्रुमामयो राक्षा रङ्गमाता पलङ्कषा ।
जतु क्षतघ्नी क्रमिजा यावालक्तौ तु तत्सतः" ॥
इति हेमचन्द्रः । क्षतघ्न्यामि पाठः ॥

क्षतजं, क्ली, (क्षतात् व्रणात् जायते उत्पद्यते इति । जन् डः ।) रक्तम् । इत्यमरः । २ । ६ । ६ ॥
(यथा, रघौ । ७ । ४२ ।
"स छिन्नमूलः क्षतजेन देवी-
स्तस्योपरिष्टात् पवनावधूतः" ॥)
पूयम् । इति शब्दचन्द्रिका ॥

क्षतजक्षया, स्त्री, (क्षतजा शुक्रादिभिः क्षताज्जाता या क्षया पिपासा ।) शुक्रादिक्षतयुक्तस्य पिपासा । तस्या निदानपूर्ब्बिकां सम्प्राप्तिमाह ।

"भयश्रमाभ्यां बलसंक्षयाद्वा
ऊर्द्धं क्षितं पित्तविवर्द्धनैश्च ।
पित्तं सवातं कुपितं नराणां
तालुप्रपर्वं जनयेत् पिपासाम् ॥
स्रोतःस्वपीवाहिषु दूषितेषु
दोषैश्च दुष्टसम्भवतीह तस्याः ।
तिस्रः सृतास्ताः क्षतजा चतुर्थी
क्षयात्तथान्यासमुद्भवा च ॥
भक्तोद्भवा सप्तमिकेति तासां
निबोध लिङ्गान्यनुपूर्ब्बशस्तु" ॥

नराणां क्षितं क्षयान एव सक्षितं पित्तं सवातं कट्वम्लोष्णापित्तविवर्द्धनैः । कट्वम्लोष्णादिभिः कुपितं भयश्रमाभ्यां बलसंक्षयाद् पवासादेश्च वातः कुपितः । तद्भयं ऊर्द्धं प्रसरत् तालुप्रपर्वं सत्पिपासां जनयेत् । न केवलं तालुन्येव दूषिते क्षतीया भवति । किन्तु जलवाहिस्रोतःस्वपि । अत आह स्रोतःस्वित्यादि नन्वत्र बहुवचनं न युक्तम् । यतो जलवहे द्वे स्रोतसी सुश्रुतेनोक्ते । उच्यते । तयोरेवानेकप्रतानयोगान्न दोषः । अथवा वाहिषु स्रोतःस्विति जिह्वादेरप्युपलक्षणम् । यत आह चरकः । रसवाहिनीश्च धमनीर्जिह्वाहृदयगलतालुओम च । संशोष्य क्षणं देहेषु कुपितः क्षयामतिप्रबलो पित्तानिलाविति ॥ संख्यामाह तिस्र इत्यादि । क्षयायाः सामान्यलक्षणमाह ।

"क्षतं यः पिबेत्तोयं न क्षतिमधिगच्छति ।
मुञ्चः काङ्क्षति तोयन्तु तं क्षयार्दितमादिशेत्" ॥

क्षतजामाह ।

"क्षतस्य रक्तं क्षोभितनिर्गमाभ्यां
क्षया चतुर्थी क्षतजा मता तु" ।

क्षतस्य शुक्रादिक्षतयुक्तस्य । यक्ष्मं पीड़ा ।

अथ क्षयायाश्चिकित्सा ॥

"वातघ्नमन्नपानं मृदु लघु शीतञ्च वातक्षयायाम् ।
क्षयायां पवनोत्थायां सगुड़ं दधि प्रशस्यते ।
स्वादु तिक्तं द्रवं शीतं पित्तक्षयाहरं परम् ।
मुक्तपर्पटकोदीच्यवाक्षोशीरचन्दनैः ।
घृतं शीतं जलं दद्याद् दृढ़दाहज्वरशान्तये" ॥

क्षुद्रा धान्याम्लम् । क्वचित् धात्रीञ्च दद्यात् चन्दनमत्र धवजं दद्यात् । तस्यातिक्षयाहरत्वात् । घृतं अर्द्धपलमत्र कर्त्तव्यम् । बड़ङ्गमानम् ।
"लाजोदकं मधुयुतं शीतं गुड़विमर्दितम् ।
काश्मरीशर्करायुक्तं पिबेत् क्षयार्दितो नरः ॥
क्षीरद्रुमाद्यैर्वासः प्रावरणं चार्द्रमेव स्यात् ।
तेन पिपासा शाम्यति दाहश्चोग्रोऽपि देहिनां नियतम् ॥
गोक्षनीक्षुरसक्षीरयष्टीमधुमधूत्पलैः ।
नियतं नासिकापीतैस्तृष्णा शाम्यति दारुणा ।
वैद्यश्च मयलास्ये सन्दधाति मुखे जलम् ।
क्षयादाहप्रशमनं मधुमद्भूधारणम् ॥

क्षतिः

जिह्वातालुगलस्रोमशोषे मूर्द्धनि दापयेत्।
केशरं मातुलुङ्गस्य घृतसैन्धवसंयुतम्॥
दाडिमं बदरं लोध्रं कपित्थं बीजपूरकम्।
पिष्ट्वा मूर्द्धनि लेपस्तु पिपासादाहनाशनः॥
वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम्।
पाययेद्वामयेच्चापि तेन तृष्णा प्रशाम्यति॥
प्रातः सशर्करः पेयो हिमो धान्याकसम्भवः।
जयेत् तृष्णां तथा दाहं भवेत् क्षोतोविशोधनम्॥
अमलं कमलं कुष्ठं वाजाञ्च वटरोहकम्।
एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे॥
तृष्णां प्रबलां हन्त्येषा मुखशोषञ्च दारुणम्।

क्षतोद्भवां रुधिरनिवारणेन
जयेत् क्षतानामसृजञ्च पातैः।
क्षयोत्थितां क्षीरजलं निहन्या-
न्मांसोदकं वा मधुकोदकं वा॥
आमोद्भवां विल्वबलायुतानां
जयेत् कषायैरथ दीपनानाम्।
गुर्व्वन्नजामुल्लिखनैर्जयेच्च
क्षयं विना सर्व्वक्षताच्च तृष्णाम्"॥

उल्लिखनैः लेखनद्रव्यैः। स्निग्धेऽन्ने भुक्ते वा तृष्णा स्यात्तां च गुडाम्बुना शमयेत्। अतिरोगदुर्ब्बलानां तृष्णां शमयेन्मृणालिहारसु पयः॥ पयोऽत्र दुग्धम्।

"मूर्च्छाच्छर्द्दितृषादाहक्लीमत्यग्लशकर्षिताः।
पिबेयुः शीतलं तोयं रक्तपित्ते मदात्यये॥
साम्यान्नपानभैषज्यैस्तृष्णां तस्य जयेत् पुनः।
तस्यां जितायामन्योऽपि व्याधिः शक्यश्चिकित्सितुम्॥
तृष्यन् पूर्व्वामयक्षीणो न लभेत जलं यदि।
मरणं दीर्घरोगं वा प्राप्नुयात् त्वरितं नरः॥
तृषितो मोहमायाति मोहात्प्राणान् विमुञ्चति।
तस्मात् सर्व्वास्ववस्थासु न क्वचिदारि वारयेत्॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम्।
तोयाभावात् पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते"।
इति तृष्णाधिकारः। इति भावप्रकाशः॥

क्षतविध्वंसी, [न्] पुं, (क्षतं व्रणं क्षवद्रक्तपूयादिकं विध्वंसयतीति। वि+ध्वंस+णिच्+णिनि।) वट्टदारुवृक्षः। इति शब्दचन्द्रिका॥

क्षतव्रणः, पुं, (क्षतजन्यः व्रणः क्षतजो व्रणो वा।) षट्प्रकारव्रणरोगान्तर्गतव्रणरोगविशेषः। इति भावप्रकाशः॥ तद्विवरणं व्रणशब्दे द्रष्टव्यम्॥

क्षतव्रतः, त्रि, (क्षतं भग्नं व्रतमस्य।) भ्रष्टनियमः। तत्पर्य्यायः। अवकीर्णी २। इत्यमरः।२।७।५६॥ तथा च याज्ञवल्क्यः।

"अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम्।
गर्द्दभं पशुमालभ्य नैर्ऋतं स विशुद्धति"॥
इति प्रायश्चित्ततत्त्वम्॥

क्षतहरं, क्ली, (क्षतं हरतीति। हृ+टः।) अगुरु। इति शब्दचन्द्रिका॥

क्षतिः, स्त्री, (क्षद+क्तिन्।) अपचयः। क्षयः। (यथा, महाभारते। ३। १७२। १९।

"इयानां न क्षतिः काचित् न रथस्य न मातलेः"॥)

"जलमुचि वितरत्यविमुञ्चे

क्षत्ता

का क्षतिरस्यखिलाम्बुपातुणाम्।
केवलघनरसभक्षी
चातकपक्षी कमाश्रयति"॥
इत्युद्भटश्च।

क्षतोदरः, पुं, (क्षतं शर्करादिभिन्नं उदरमत्र रोगे। अथवा क्षतात् क्षुतात् जातं उदरं उदररोगविशेषो यत्र।) उदररोगविशेषः। तस्य सामान्यरूपमाह।

"आध्मानं गमनेऽशक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता।
श्लेष्मः सदनमङ्गानां सङ्गो वातपुरीषयोः।
दाहश्चान्त्रा च सर्व्वेषु जठरेषु भवन्ति हि"॥
सन्निपातनिदानपूर्ब्बिकां संख्यामाह।
"पृथक्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः।
सम्भवन्त्युदरान्यष्टौ तेषां लिङ्गं पृथक् शृणु"।
क्षतोदरमाह।

"शूल्यं तथान्नोपहितं यदन्नं
भुक्तं भिनत्त्यागतमन्यथा वा।
तस्मात् क्षुतोऽन्त्रात् सलिलप्रकाशः
स्रावः स्रवेद्गुदतस्तु भूयः॥
नाभेरधश्चोदरमेति वृद्धिं
निस्तुद्यते दाल्यति चातिमात्रम्।
एतत् परिस्राव्युदरं प्रदिष्टं
दकोदरं कीर्त्तयतो निबोध"॥

शूल्यं कण्टककर्क्करादि अन्नोपहितं अन्ननिहितं भुक्तं यत् अन्नं भिनत्ति तथा अन्यथा आगतं भोजनं विना आगतं शरादि तदपि यदन्नं भिनत्ति एतदुपलक्षणम्। स्तम्भयामत्यन्नञ्च अत्र भिनत्ति। यत उक्तं चरके।

"शर्कराट्यकाष्ठास्थिकण्टकैरन्नसंयुतैः।
भिद्येतान्नं यदा भुक्तं स्तम्भयात्यन्नेन च"॥ इति तस्मात् भिन्नादन्त्रात्। गुदतस्तु भूयः अन्त्रात् संक्षुत्य पुनर्गुदतः स्रवेदित्यर्थः। दाल्यति विदीर्य्यत इव। पदसिद्धिरार्षत्वात्। एतत् क्षतोदरं तन्त्रान्तरे परिस्राव्युदरं प्रदिष्टम्॥

तस्य चिकित्सा।

"शालिषष्टिकगोधूमयवनीवारभोजनम्।
निरूहो रेचनं श्रेष्ठं सर्व्वेषु जठरेषु च॥
आनूपमौदकं मांसं शाकं पिण्डक्षतं तिलाः।
व्यायामाध्वदिवास्वप्नयानपानानि वर्ज्जयेत्॥
तथाम्लवल्गोष्णानि विदाहीनि गुरूणि च।
नाद्यादन्नानि जठरे तोयपानञ्च वर्ज्जयेत्॥
उदराणां बलाढ्यत्वात् गुल्मशः शोधनं हितम्।
क्षीरेणैरण्डजं तैलं पिबेन्मूत्रेण वा सकृत्"॥
इति भावप्रकाशः। (उदररोगशब्दे विशेषविवृतिरस्य ज्ञेया॥)

क्षत्ता, [क्षत्तृ] पुं, (क्षद् संवृतौ। सौत्रधातुरयम्।
"दृग्टृचौ ग्रंसिक्षदादिभ्यः संज्ञायां चानिटौ"।
उणां। २। ६४। इति संज्ञायां टृच् स चानिट्।)
सारथिः। द्वाःस्थः। इत्यमरः। ३। ३। ६२॥
दासीपुत्रः। (यथा, महाभारते। १। विदुरागमनपर्व्वणि। २०१। १७।
"ततः प्रीतमनाः क्षत्ता धृतराष्ट्रं विशाम्पते!।

क्षत्रियः

उवाच दिष्ट्या कुरवो वर्द्धन्त इति विस्मितः"॥)
नियुक्तः। ब्रह्मा। इति मेदिनी॥ क्षत्रियायां शूद्राज्जातः। (यथा, मनुः। १०। १२।
"शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः"॥)
मत्स्यः। इति संक्षिप्तसारोणादिवृत्तिः।

क्षत्रं, क्ली, (क्षतः त्रायते इति। क्षत्+त्रै+कः।) शरीरम् इत्युणादिकोषः। तगरम्। इति राजनिर्घण्टः। (क्षत्रियकुलम्। यथा, ऋग्वेदे। ५। ६२। ६।

"अक्रविहस्ता सुकृते परस्या
यं त्रासाथे वरुणोलास्तंतः।
राजाना क्षत्रमहृणीयमाना
सहस्रस्थूणं बिभृथः सह द्वौ"॥)

क्षत्रः, पुं, (क्षद्+"गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः"। उणां। ४। १६६। इति त्रः।) क्षत्रियः। इत्युणादिकोषः॥ (यद्वा, क्षतः क्षतात् त्रायते इति। त्रै+कः। यथा, रघुः। २। ५३।

"क्षतात् किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढः"।

"नाश्वकर्णादिवत् केवलरूढः किन्तु पङ्कजादिवत् योगरूढः" इत्यर्थः। इति मल्लिनाथः॥)

क्षत्रबन्धुः, पुं, (क्षत्रियस्य बन्धुरिव।) निन्दितक्षत्रियः। इत्यमरटीका। (यथा, मार्कण्डेये। ८। ७४।
"क्षत्रबन्धो! ममेतां त्वं सप्तर्षीं यद्यदक्षिणाम्।
मन्यसे यदि तत् क्षिप्रं पश्य त्वं मे बलं परम्"॥
क्षत्रं राज्यं देहो वा बन्धुरिवास्य।) क्षत्रमात्रम्। (यथा, मनुः। २। ३८।
"आषोडशात् ब्राह्मणस्य सावित्री नातिवर्त्तते"।
आद्वाविंशात् क्षत्रबन्धोराचतुर्विंशतेर्विशः॥)

क्षत्रकृत्तः, पुं, (क्षत्रसंज्ञकः कृत्तः।) मुचुकुन्दः। इति राजनिर्घण्टः। (पर्य्यायोऽस्य यथा,—
"मुचुकुन्दः क्षत्रकृत्तश्चिबुकः प्रतिविष्णुकः"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे। गुणाश्चास्य मुचुकुन्दशब्दे ज्ञातव्याः॥)

क्षत्रियः, पुं, (क्षत्रे राष्ट्रे साधुः। क्षत्रस्यापत्यं वा।
"क्षत्राद् घः"। ४। १। १३८। इति जातौ घः।)
क्षदति रक्षति जनान् क्षत्रः। क्षद संवृतौ सौत्रः ततस्त्रासुसिति चः। क्षतात् त्रायते इति डे मनीषादित्वात् क्षत्रन्यायकारलोपे वा क्षत्रः। क्षत्रो हितकारः। पुंनपुंसकयोः क्षत्रः। पतिर्मम क्षत्रमग्रेषभूषत् प्रभाभिरामो भरतश्च जिष्णुरिति राघवपाण्डवीये। क्षत्र एव क्षत्रियः स्वार्थे इयः। अपत्यार्थे इय इत्यन्ये। इति भरतः॥*।
ब्रह्मवाऽजवर्गविशेषः। क्षत्री इति भाषा। (यथा, मनुः। १। ३१।
"लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्"॥)
तत्पर्य्यायः। मूर्द्धाभिषिक्तः २ राजन्यः ३ बाहुजः ४ विराट् ५। इत्यमरः।२।८।१॥ क्षत्रः ६ द्विजलिङ्गी ७ राजा ८ नाभिः ९। इति जटाधरः॥ क्षयः १०

मूर्द्धकः ११। इति शब्दरत्नावली॥ पार्थिवः १२ सार्व्वभौमः १३। इति राजनिर्घण्टः। ते च सूर्य्यचन्द्रवंशीयराजानः कलेः सहस्रवर्षपर्य्यन्तं आसन् ततः महानन्दिसुतो नन्दः शूद्रायां समुत्पन्नः शतवर्षं राज्यं चकार तदन्ते चाणक्यनामा ब्राह्मणो नन्दं तत्पुत्रांश्च हत्वा मुरवंशजं चन्द्रगुप्तं राजानं कृतवान् कलौ नन्दान्तक्षत्रियवंशः। इति श्रीभागवते १२ स्कन्धे १ अध्यायात् संगृहीतम्॥ * ॥ शाल्मलद्वीपे क्षत्रियस्य नाम पतङ्गः। शाल्मलद्वीपे वीर्य्यधरः। कुशद्वीपे कोविदः। क्रौञ्चद्वीपे दृढमनः। शाकद्वीपे सत्यव्रतः पुष्करद्वीपे सर्व्वे एकवर्णाः॥ अस्य शास्त्रनिरूपितधर्म्मास्तयः। अध्ययनं यजनं दानञ्च। प्रजारक्षणं जीविका। अस्याश्रमास्तयः। गार्हस्थ्यं ब्रह्मचर्य्यं वानप्रस्थञ्च। इति तत्रैव २० अध्यायादितः संगृहीतम्॥ * ॥ तल्लक्षणं यथा,—

"क्षतात्रं सेवते कर्म्म वेदाध्ययनसंयुतः।
दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते"॥

तस्य धर्म्मो यथा,—

नारद उवाच।

"क्षत्रियस्यापि यो धर्म्मस्तं ते वक्ष्यामि पार्थिव!।
दद्याद्राजा न याचेत यजेत न च याजयेत्॥
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत्।
नित्योद्युक्तो दस्युवधे रणे कुर्य्यात् पराक्रमम्॥
ये तु क्रतुभिरीजानाः श्रुतवन्तश्च पार्थिवाः।
ये तु युद्धे विजेतारस्ते तु लोकजितो नृपाः॥
अविक्षतशरीरो हि संग्रामाद्यो निवर्त्तते।
क्षत्रियस्य तु तत् कर्म्म नोभयत्र यशःप्रदम्॥
क्षत्रियाणामयं धर्म्मो निर्द्दोषो मुनिभिः परः।
नास्य क्षत्यतमं किञ्चिद्राजो दस्युविनिग्रहात्॥
दानमध्ययनं यज्ञो राज्ञां क्षेमोऽभिधीयते।
तस्माद्राजा महाराज! योद्धव्यं धर्म्मशीलिना॥
प्रजाः क्षेमे च धर्म्मे च स्थापयेत महीपतिः।
धर्म्माख्येव हि कर्म्माणि कारयेत् सततं प्रजाः॥
परमां सिद्धिमाप्नोति नृपतिः परिपालनात्।
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो राजन्य उच्यते"॥
इति पाद्मे स्वर्गखण्डे २६ अध्यायः॥*॥ अपि च।
"राजन्यानां करादानं विना वैवाहिकञ्च यः।
प्रतिग्रहः स निन्द्योऽत्र परत्र चासुखप्रदः॥
युद्धे प्रजायनञ्चैव तथा कातरतार्थिषु।
अयाजनं प्रजानाञ्च दाने धर्म्मे विरक्तता॥
अनवेक्षा स्वराष्ट्रस्य ब्राह्मणानामनादरः।
अमात्यानामसम्मानं तेषां कर्म्मानवेक्षणम्।
भृत्यानाञ्च परीहासो निषिद्धः क्षत्रजन्मनाम्"॥
"राजन्यस्तु महाराज! यथाश्रममवाप्नुयात्।
तत् शृणुष्व तवाख्यास्ये धर्म्मसंग्रहतत्परः।
वेदानधीत्य धर्म्मेण राजशास्त्राणि चानघ!।
सन्तानादीनि कर्म्माणि कृत्वा सोमं निषेव्य च॥
पालयित्वा प्रजाः सर्व्वा धर्म्मेण जयताम्बर!।
राजसूयाश्वमेधादीन् मखानन्यांस्तथैव च॥
आनयित्वा यथापाठं विप्रेभ्यो दक्षदक्षिणाः।
संग्रामे विजयं प्राप्य तथाक्षयं यदि वा नृप॥

स्थापयित्वा प्रजापालं पुत्रं राज्ये च पार्थिव!।
अन्यगोत्रं प्रशस्तं वा क्षत्रियं क्षत्रियव्रतं!॥
अर्चयित्वा पितॄन् सम्यक् पितृयज्ञे यथाविधि।
देवान् यज्ञैर्ऋषीन् वेदैरर्चयित्वा प्रयत्नतः॥
अन्तकाले च सम्प्राप्ते य इच्छेदाश्रमान्तरम्।
सोऽनुपूर्व्याश्रमान्याजन् गत्वा सिद्धिमवाप्नुयात्॥
राजर्षित्वेन राजेन्द्र! भैक्षचर्य्याध्वसेवया।
अपेतदुःखधर्म्मोऽपि चरेज्जीवितकाम्यया॥
न चैतन्नैष्ठिकं कर्म्म त्रयाणां भूरिदक्षिणम्।
चतुर्णां राजशार्दूल! प्राऽऽश्रमवासिनाम्॥
वाङ्मायत्तं क्षत्रियैर्मानवानां
लोकश्रेष्ठं धर्म्ममासेवमानैः।
सर्व्वे धर्म्माः सोपधर्म्मास्त्रयाणां
राज्ञो धर्म्मादिति वेदात् ब्रवीमि॥
एवं धर्म्मान्राजधर्म्मेषु सर्व्वान्
सर्व्वावस्थं सम्प्रलीनान्निबोध।
अल्पश्रमानल्पफलान् वदन्ति
धर्म्मानिन्यान् वेदविदो मनुष्याः॥
महाश्रमं बहुकल्याणरूपं
क्षात्रं धर्म्मं नेतरं प्राऽऽर्याः।
सर्व्वे धर्म्मा राजधर्म्मप्रधानाः
सर्व्वे धर्म्माः पाल्यमानास्तरन्ति॥
सर्व्वत्यागो राजधर्म्मेषु राजं-
स्त्यागं धर्म्मज्ञाऽऽरण्यं प्रशस्यम्।
मज्जेत्रयी दण्डनीतौ हतायां
सर्व्वे धर्म्माः प्रक्षयेयुर्विबद्धाः॥
सर्व्वे धर्म्माश्चाश्रमाणां हृताः स्युः
क्षात्रे त्यक्ते राजधर्म्मे पुराणे।
सर्व्वे त्यागा राजधर्म्मेषु चोक्ताः
सर्व्वा विद्या राजधर्म्मेषु युक्ताः॥
सर्व्वे लोका राजधर्म्मे प्रविष्टा
यथा जीवाः प्राणतैर्व्यध्यमानाः।
धर्म्मश्रुतानामुपपीड़नाय
एवं धर्म्मा राजधर्म्मैर्विमुक्ताः॥
सन्निच्यन्ते नाम्रियन्ते सधर्म्मम्॥
चातुराश्रम्यधर्म्माश्च यतिधर्म्माश्च पार्थिव!।
लोकवेदोत्तरास्तैव क्षात्रे धर्म्मे समाहिताः॥
सर्व्वाण्येतानि धर्म्माणि क्षात्रे राजन्यसत्तम!।
अप्रत्तं बहुदारं धर्म्माश्रमवासिनाम्।
क्षात्रेणैव हि धर्म्मेण प्रत्तं क्रियते नृप!"॥
इति पाद्मे स्वर्गखण्डे २८ अध्यायः॥*॥ अपि च।
"द्विजार्चनं क्षत्रियाणां तथा नारायणार्चनम्।
राज्यानां पालनञ्चैव रणे निर्भयता तथा॥
नित्यं दानं ब्राह्मणेभ्यः शरणागतरक्षणम्।
पुत्रतुल्यं प्रजानाञ्च दुःखिनां परिपालनम्॥
शस्त्रास्त्राणाञ्च नैपुण्यं रणे सौन्दर्य्यमेव च।
तपश्च धर्म्मिष्ठत्वञ्च यत्नतः कुरुते मुदा॥
पण्डितं नीतिशास्त्रज्ञं नित्यञ्च परिपालयेत्।
नियोजयेत् सभामध्ये नित्यं सद्भिस्स संयुतः॥
हस्त्यश्वरथपादातं सेनाङ्गञ्च चतुष्टयम्।
पालयेत् यत्नतो नित्यं यशस्वी च प्रतापवान्॥
रणे निमन्त्रितश्चैव दाने न विमुखो भवेत्।

रणे यो वा त्यजेत् प्राणान् तस्य स्वर्गो यशस्करः"॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८२ अध्यायः॥*॥

अथ सूर्य्यवंशीय क्षत्रियविवरणम्।

परमेश्वरात् ब्रह्मा जातः तस्य पुत्रो मरीचिस्तस्य कश्यपस्तस्य सूर्य्यस्तस्य वैवस्वतो मनुः। सत्ययुगे मनुरेव राजासीत्। त्रेतायुगे तस्य पुत्र इक्ष्वाकुः अयोध्यायां राजा आसीत्। त्रेतायुगे त्रयोदीर्घायुषो राजानो बहुकालं राज्यं कृतवन्तः। द्वापरे ततः किञ्चित्-न्यूनायुषः। युगस्य प्रथमापेक्षया उत्तरोत्तरं आयुषो ह्रासः। कलियुगे अल्पमेवायुः शेषे अत्यल्पं भविष्यति। तस्य पुत्रो विकुक्षिस्तस्य ककुत्स्थः तस्य अनेनाः तस्य पृथुः तस्य विश्वगन्धिः तस्य चन्द्रः तस्य युवनाश्वः तस्य श्रावः तस्य बृहदश्वः तस्य धुन्धुमारः तस्य दृढाश्वः तस्य हर्य्यश्वः तस्य निकुम्भः तस्य बृह्याश्वः तस्य सेनजित् तस्य युवनाश्वस्तस्य मान्धाता चक्रवर्त्तीभूत्। तस्य पुरुकुत्सः तस्य त्रसदस्युः तस्य अनरण्यः तस्य हर्य्यश्वः तस्य प्राघणः तस्य त्रिबन्धनः तस्य सत्यव्रतः तस्य त्रिशङ्कुः तस्य हरिश्चन्द्रः यः राजसूयं कृतवान्। तस्य रोहितः तस्य हरितः तस्य चम्पः तस्य सुदेवः तस्य विजयः तस्य भरुकः तस्य वृकः तस्य बाहुकः तस्य सगरश्चक्रवर्त्ती। तस्य असमञ्जाः तस्य अंशुमान् तस्य भगीरथः। यत्तपः कृत्वा पृथिव्यां गङ्गामानीतवान्। तस्य श्रुतः तस्य नाभः तस्य सिन्धुद्वीपः तस्य अयुतायुः तस्य ऋतुपर्णः तस्य सौदासः तस्य अश्मकः तस्य मूलकः तस्य दशरथः तस्य ऐड़विड़िः तस्य विश्वसहः तस्य खट्वाङ्गश्चक्रवर्त्ती। तस्य दीर्घबाहुः तस्य रघुः तस्य अजः तस्य दशरथः। विष्णुः श्रीरामरूपेण तस्य पुत्रत्वं प्राप्तवान्। तस्यानुजा भरतलक्ष्मणशत्रुघ्नाः। श्रीरामचरितं बहुविस्तीर्णं वाल्मीकिव्यासादिमुनिभिर्वर्णितम्। असौ त्रेतादापरयोः सन्धौ अवतीर्णः। एते खट्वाङ्गमारभ्य श्रीरामपर्य्यन्ताश्चक्रवर्त्तिनः। द्वापरस्य प्रथमे तस्य पुत्रः कुशो जातः। तस्य अतिथिः तस्य निषधः तस्य नभः तस्य पुण्डरीकः तस्य क्षेमधन्वा तस्य देवानीकः तस्य हीनः तस्य पारियात्रः तस्य बलस्थलः तस्य वज्रनाभः तस्य अर्कः तस्य सगणः तस्य विधृतिः तस्य हिरण्यनाभः तस्य पुष्यः तस्य ध्रुवसन्धिः तस्य सुदर्शनः तस्य अग्निवर्णः तस्य शीघ्रः तस्य मरुः यो योगसिद्धः सन् सुमेरुनिकटे कलापग्रामे आस्ते कलेरन्ते नष्टं सूर्य्यवंशं पुनर्भावयिष्यति। मरोः पुत्रः प्रसुश्रुतः तस्य सन्धिः तस्य अमर्षणः तस्य महस्वान् तस्य विश्वबाहुः तस्य प्रसेनजित् तस्य तक्षकः तस्य बृहद्बलः। असौ युधिष्ठिरस्य समकालीनः भारतयुद्धे अभिमन्युना हतः। तस्य बृहद्रणः तस्य उरुक्रियः तस्य वत्सवृद्धः तस्य प्रतिव्योमः तस्य भानुः तस्य दिवाकरः तस्य सहदेवः तस्य वीरः तस्य बृहदश्वः तस्य भानुमान् तस्य प्रतीकाश्वः तस्य सुप्रतीकः तस्य मरुदेवः तस्य सुनक्षत्रः तस्य पुष्करः तस्य अन्तरीक्षः तस्य सुतपाः तस्य अमित्रजित्

क्षत्रियः

तस्य दृढहनुः तस्य वर्हिः तस्य कृतञ्जयः तस्य रणञ्जयः तस्य सञ्जयः तस्य शाक्यः तस्य शुद्धोदः तस्य लाङ्गलः तस्य प्रसेनजित् तस्य क्षुद्रकः तस्य सुमित्रः। एते राजानः कल्पेः सहस्रवत्सरपर्य्यन्तं राज्यं कृतवन्तः। एतत्पर्य्यन्तं सूर्य्यवंशविश्रान्तिः पुनः सत्ययुगे सूर्य्यवंशोत्पत्तिर्भविष्यति। इति श्रीभागवतनवमस्कन्धमतम्॥ चन्द्रवंशविवरणं चन्द्रवंशशब्दे द्रष्टव्यम्*॥

---

* क्षत्रियाद्यामन्यतराज्जाः कायस्थाः।
यथा प्रथमतः—वेदान्ते आपस्तम्बशाखायाम्।
"बाहोश्च क्षत्रिया जाताः कायस्था जगतीतले।
चित्रगुप्तः स्थितः स्वर्गे विचित्रो भूमिमण्डले॥
चैत्ररथः तुलस्यस्य यशस्वी कुलदीपकः।
ऋषिवंशे समुद्भूतो गौतमो नाम सत्तमः।
तस्य शिष्यो महाप्राज्ञश्चित्रकूटाचलाधिपः"॥
द्वितीयतः,—

माण्डव्यशापात् चित्रगुप्तस्य पुत्रचैत्ररथस्य क्षत्रियत्वमते पुनरुपनयनसंस्कारे कृते तेन क्षत्रियत्वं प्राप्तं यथा,—वेदान्ते प्रथमाध्याये तृतीयपादे ३५। ३० सूत्रे क्षत्रियत्वमते चोत्तरत्र चैत्ररथेन लिङ्गात् तदभावे निर्देशरथे च प्रवृत्तेः॥
तृतीयतः,—

"नाज्ञा तं चित्रगुप्तोऽसि मम कायादभूस्ततः।
तस्मात् कायस्थविख्यातिर्लोके तव भविष्यति॥
कायस्थः क्षत्रियो वर्णो न तु शूद्रः कदाचन।
ततो भवेयुः संस्कारा गर्भाधानादिका दश॥
गर्भाधानमतो कार्य्यं तृतीये मासि पुंस्त्रिया।
मासाष्टमे स्यात् सीमन्त उत्पत्तौ जातकर्म्म च॥
ततोब्दे नामकरणं पञ्चमे मासि निष्क्रमः।
षष्ठेऽन्नप्राशनं मासि चूडा कार्य्या यथाकुलम्॥
तथोपनयने भिक्षाचरणञ्चर्य्यव्रतादिकम्।
वासो मुञ्जकुशेषु स्यात् स्वाध्यायाध्ययनं तथा॥
स्नात्वा तु माष्टकापूजां वसोर्धारां विधाय च।
वास्तुयागञ्च शान्त्यर्थं जपेदग्न्यं समाहितः॥
कुर्य्यान्नान्दीमुखं श्राद्धं दधिमध्वाज्यसंयुतम्।
ततः प्रधानसंस्कारः कार्य्यो एष विधिः स्मृतः"॥
इत्यादि विज्ञानतन्त्रे॥
चतुर्थतः,—

कायप्रकाशो नाम्ना विज्ञानगर्य्येधिपतिः क्षत्रवंशजः कायस्थ आसीत्। यथा,—

"विराडकायजो ब्रह्मः कायस्थ इति विश्रुतः।
कार्य्योऽच्छन्दःप्रकाशात् तु कार्य्यावर्णः प्रभुच्यते॥
अयं तु नवमश्लोकां द्वीपसागरसंहतः।
योजनानां सहस्रं तु द्वीपोऽयं दक्षिणोत्तरात्"॥
इति मेदतन्त्रे १९९ पटले।
पञ्चमतः,—

"राजन्! ब्रह्मकायसमुद्भूतः कायस्थो वर्म्मसंज्ञकः कलौ हि क्षत्रियः स राज्याधिकारी जपपञ्चेषु"॥
इति श्रीमत्संहितायाम् साधवाचार्य्यधृतम्॥
षष्ठतः,—

यदा पृथिवीनिःक्षत्रियकाले परशुरामस्य भयात् चन्द्रसेनस्य नृपतेर्भार्य्या मुनेर्दाल्भ्यस्याश्रयं गता तदा परशुराम उवाच।

"तवाश्रमे महाभाग! सगर्भा स्त्री समागता
चन्द्रसेनस्य राजर्षेः क्षत्रियस्य महात्मनः॥
तन्मे देयं प्रार्थितं देहि शिशोर्यं तां महामुने!।

क्षत्रिया, } स्त्री, (क्षत्रियाणां स्त्रीजातिः। "अ-
क्षत्रियाणी, } र्य्यक्षत्रियाभ्यां वा"। वार्त्तिं इति स्वार्थे आनुगागमभावे टाप् ङीपभावात् न ङीष्। पक्षे आनुगागमः ङीष् च।) क्षत्रियस्त्रीजातिः। इत्यमरः॥ (यथा, मनुः। ३। ४४।
"शूद्रः क्षत्रियया याह्यः प्रतोदो वैश्यकन्यया"॥
दुर्गा। यथा, हरिवंशे विष्णुपर्व्वणि। ५८। २३।
"निद्रा च सर्व्वभूतानां मोहनी क्षत्रिया तथा"॥)
क्षत्रियी, स्त्री, (क्षत्रियस्य पत्नी इति। "पुंयोगादाख्यायाम्"। ४।१। ४८। इति ङीष्।) क्षत्रियपत्नी। इत्यमरः। २। ६। १५॥
क्षद, संहर्षे। इति कविकल्पद्रुमः॥ (सौत्रं-आत्मं-सकं-सेट्।) क्षत्ता। इति दुर्गादासः॥
(यथा, ऐतरेयब्राह्मणे। १। १५। "तद्यथैवादो मनुष्यराज आगतेऽन्यस्मिन् वाहितुद्यायं वा वेहतं वा क्षदन्त एवमेवाऽमा एतत्"॥)
क्षत्ता, [क्षद्] त्रि, (क्षम्+कर्त्तरि ष्टच्।) क्षमाशीलः। इत्यमरः।३।१।३१॥ अस्य पर्य्यायः सहिष्णुशब्दे द्रष्टव्यः॥ (यथा,महाभारते।१३।१०२।३१।
"ये क्षत्तारो नाभिजल्पन्ति चान्यान्
सत्रीभूताः सततं पुण्यशीलाः।
तथाविधानामेव लोको महर्षे!
परं गन्ता धृतराष्ट्रो न तत्र"॥)
क्षप, इ क प्रक्षौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्-इदित्।) प्रक्षिरिह क्षमा। इ क, क्षम्यति दुःखं मुनिः। सहत इत्यर्थः। इति दुर्गादासः॥
क्षप, त् क म क्षेपे। इति कविकल्पद्रुमः॥ (अदन्त चुरां-परं-सकं-सेट्।) म, अक्षपि अक्षापि क्षपं क्षापं क्षापम्। मानुबन्धसामर्थ्यात् स्थानिवत्त्वाभावे दीर्घः। क्षमते तु अत्र दीर्घविधिरुपधां नापेक्षते। इति दुर्गादासः॥
क्षपणः, त्रि, (क्षपयति क्षिपति दूरीकरोति लज्जां इति। क्षप क्षेपे+कर्त्तरि ल्युः।) निर्लज्जः। इति त्रिकाण्डशेषः॥ (क्षपयति विषयरागं इति। बौद्धसन्न्यासी॥ (भावे ल्युट् क्षपणम्। यथा, मनुः। ४। २२२।
"भुक्त्वाऽतोऽन्यतमस्यान्नममत्या क्षपणं व्रहम्"॥)
क्षपणकः, पुं, (क्षप्+ल्युः। स्वार्थे कन्।) बुद्धभेदः।

ततो दाल्भ्यः प्रत्युवाच ददामि वरमीप्सितम्॥
क्षिप्रं गर्भमुं बालं तत्र त्वं दातुमर्हसि।
ततो रामोऽब्रवीद्दाल्भ्यं यदर्थमहमागतः॥
क्षत्रियाणाकरत्वार्थं तत्र याचितवानसि।
प्रार्थितश्च त्वया विप्र! कायस्थो गर्भ उत्तमः॥
तस्मात् कायस्थ इत्याख्यो भविष्यति शिशूत्तमः।
एवं रामो महाबाहुर्दित्वा तं गर्भमुत्तमम्॥
निर्जगामाश्रमात्तस्मात् क्षत्रियाणाकरः प्रभुः।
कायस्थ एष उत्पन्नः क्षत्रियां क्षत्रियाततः॥
तद्गर्भजाश्च कायस्था धर्म्मिष्ठाः सत्यवादिनः।
सदाचारपरा नित्यं रता हरिहरार्चने॥
देवद्विजपितृभक्ताश्च अतिथीनाञ्च पूजकाः"॥
इति स्कन्दपुराणे रेणुकामाहात्म्ये परशुरामदाल्भ्यसंवादे॥

क्षपण

इति जटाधरः॥ सन्न्यासी। यथा। "एक क्षपणक श्राकाङ्क्षी तत्र क्षपणक दशश्राकाशा। यत्र क्षपणक दशश्राकाशा तत्र क्षपणक का श्राकाशा"॥ इत्युद्भटः॥ (यथा च महाभारते। १। ३। १२४।
"सोऽपश्यदथ पथि नग्नं क्षपणकमागच्छन्तम्"॥
विक्रमादित्यसभास्थनवरत्नानामेकः। यथा,—
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः"॥)
क्षपण्डः, पुं, (क्षप्+षाडलकात् अन्युः ततो णत्वम्।) अपराधः। इति शब्दमाला॥
क्षपा, स्त्री, (क्षपयति वारयति चेष्टामिन्द्रियाणाम्। क्षप्+अच्।) रात्रिः। (यथा, महाभारते। ३। अरण्यपर्व्वणि। १। ४३।
"राजानन्तु कुरुश्रेष्ठं ते हंसमधुरस्वराः।
आश्वासयन्तो विप्राग्र्याः क्षपां सर्व्वां व्यनोदयन्"॥)
हरिद्रा। इत्यमरः॥
क्षपाकरः, पुं, (क्षपां रात्रिं करोतीति। कृ+टः।) चन्द्रः। कर्पूरः। इत्यमरः। ४। ५३। ७॥
क्षपाचरः, पुं, (क्षपायां रजन्यां चरतीति। चर+टः।) राक्षसः। (यथा, महाभारते। ३। इन्द्रजिद्वधपर्व्वणि। २८८। ३३।
"निर्याणे स मतिं कृत्वा निधायासिं क्षपाचरः।
आज्ञापयामास तदा रथो मे कल्प्यतामिति"॥)
क्षपाटः, पुं, (क्षपायां अटतीति। अट् गतौ+अच्।) राक्षसः। इति त्रिकाण्डशेषः। (यथा, भट्टिः २। ३०।
"ततः क्षपाटैः पृथुपिङ्गलाक्षैः
खं प्राक्षपेणैरिव चानगेऽब्दैः"॥)
क्षपापतिः, पुं, (क्षपायाः रजन्याः पतिः।) चन्द्रः। कर्पूरः। इति निशापतिशब्ददर्शनात्॥
क्षम, उ इर् भ य मर्षे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्। उदित्वात् क्त्वावेट्।) मर्षः सहनम्। उ, क्षमित्वा क्षान्त्वा। षष्ठस्वरानुबन्ध इत्येके। इ र, अक्षमत् अक्षमीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। भ य, क्षाम्यति दोषं साधुः। इति दुर्गादासः॥
क्षम, ऊ ङ ञि ष मर्षे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सक-सेट्।) ऊ, अक्षमिष्ट अक्षंस्त। ङ क्षमते। ञि, क्षन्तोऽस्ति। ष, क्षमा। इति दुर्गादासः॥
क्षमं, क्ली, (क्षम्+पचाद्यच्।) युक्तम्। इत्यमरः। ३। ३। १२२॥ (यथा, शाकुन्तले ५ अङ्के।
"यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पुनरत्कुलया त्वया।
अथ तु वेत्सि शुचिव्रतमात्मनः
प्रतिगृहे तव दारसमर्पि क्षमम्"॥)
क्षमः, त्रि, (क्षमते इति। क्षम्+अच्।) शक्तः। हितः। इत्यमरः।३।३।१२२॥ आद्यस्य पर्य्यायः। सहः २ प्रभुष्णुः ३। इति हेमचन्द्रः॥
(यथा,शाकुन्तले १ अङ्के।
"इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति"॥

रघौ च । ११ । ६ ।
"आग्निर्मं प्रयुयुजे न वाहिनीं
सा हि रत्नप्रसविनी तयोः क्षमा" ॥)
क्षमता, स्त्री, (क्षमस्य भावः इति । क्षम + तल् ।) योग्यता । सामर्थ्यम् । यथा,—
"श्रुतिर्द्वितीया क्षमता च लिङ्गं
वाक्यं पदान्येव तु संहतानि ।
सा प्रक्रिया या करणस्य कार्य्या
स्थानं क्रमो योगबलं समाख्या" ॥
इति भट्टवार्त्तिकम् ॥ क्षमता अर्थप्रकाशनसामर्थ्यम् । यथा । बर्हिर्देवसदनं दामीत्यत्र दासीति पदस्य छेदनप्रकाशनसामर्थ्यात् बर्हिरित्यस्य आस्तृतदर्भप्रकाशनसामर्थ्यात् आस्तृतदर्भच्छेदने समुदायमन्त्रस्य नियोगोऽवगम्यते । इति धर्म्मदीपिका ॥
क्षमा, स्त्री, (क्षमते आत्मोपरिस्थितानां जीवानामपराधं या । क्षम् अच् षित्वादङ् वा ततष्टाप् ।) क्षितिः । (यथा, भट्टिः । ३ । २२ ।
"विभूषणान्युन्मुमुचुः क्षमायां
पेतुर्बभञ्जुर्वलयानि चैव" ॥)
क्षान्तिः । इत्यमरः ।३।३।१२२॥ क्षमालक्षणम् । यथाह, बृहस्पतिः ।
"वाच्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित् ।
न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता" ॥
इत्येकादशीतत्त्वम् । अपि च ।
"आक्रुष्टोऽभिहतो यस्तु नाक्रोशेन्न हनेदपि ।
अदुष्टैर्वाङ्मनःकायैस्तितिक्षुः क्षमा स्मृता" ॥
इति मात्स्ये १२० अध्यायः ॥ अन्यच्च ।
"विभागशीलः सततं क्षमायुक्तो दयात्मकः ।
गृहस्थस्तु क्षमायुक्तो न गृहेण गृही भवेत् ॥
क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः ।
अध्यात्मनित्यताज्ञानमेतद्ब्राह्मणलक्षणम् ॥
विगर्हातिक्रमत्यागहिंसाबन्धवधात्मनाम् ।
अन्यमन्युसमुत्थानां दोषाणां वर्জ্জनं क्षमा" ॥
इति कौर्म्मे १४ अध्यायः ॥ (अपरञ्च यथा, महाभारते ३ । द्रौपदी-युधिष्ठिरसंवादे । २६ । ३५—।
"अत्राप्युदाहरन्तीमा गाथा नित्यं क्षमावताम् ।
गीताः क्षमावता कृष्णे ! काश्यपेन महात्मना ॥
क्षमा धर्म्मः क्षमा यज्ञः क्षमा वेदाः क्षमा श्रुतम् ।
य एतदेव जानाति स सर्व्वं क्षन्तुमर्हति ॥
क्षमा ब्रह्म क्षमा सत्यं क्षमा भूतञ्च भावि च ।
क्षमा तपः क्षमा शौचं क्षमयेदं धृतं जगत् ॥
अतियज्ञविदां लोकान् क्षमिणः प्राप्नुवन्ति च ।
अतिब्रह्मविदां लोकानति चापि तपस्विनाम् ॥
अन्ये वै यजुषां लोकाः कर्म्मिणामपरे तथा ।
क्षमावतां ब्रह्मलोके लोकाः परमपूजिताः ॥
क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम् ।
क्षमा सत्यं सत्यवतां क्षमा यज्ञः क्षमा शमः ॥
तां क्षमामीदृशीं कृष्णे ! कथमस्मद्विधस्त्यजेत् ।
यस्यां ब्रह्म च सत्यञ्च यज्ञा लोकाश्च धिष्ठिताः ॥
क्षन्तव्यमेव सततं पुरुषेण विजानता ।
यदा हि क्षमते सर्व्वं ब्रह्म सम्पद्यते तदा ॥
क्षमावतामयं लोकः परश्चैव क्षमावताम् ।
इह सम्मानमर्हन्ति परत्र च शुभां गतिम् ॥
येषां मन्युर्मनुष्याणां क्षमयाभिहतः सदा ।
तेषां परतरे लोकास्तस्मात् क्षान्तिः परा मता" ॥)
रात्रिः । इति शब्दरत्नावली ॥*॥ दुर्गा । इत्यमरटीकायां मथुरानाथः ॥ तथा हि ।
"जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तुते" ॥
इति दुर्गाचीतत्त्वम् ॥ अपि च ।
"क्षमा तु श्रीमुखे कार्य्या योगपट्टोत्तरीयका ।
पद्मासनकृताधारा वरदोद्यतपाणिनी ॥
शूलमेखलसंयुक्ता प्रशान्ता योगसंस्थिता ।
सितपुष्पोपहारेण सितहोमेन सिद्धिदा" ॥
इति देवीपुराणे संवत्सरदेवताविंशतिविधिः प्रथमः ॥ खदिरः । इति राजनिर्घण्टः ॥ गोपीविशेषः । यथा । राधिकोवाच ।
"मया पूर्व्वञ्च त्वं दृष्टो गोप्या च क्षमया सह ।
सुवेशयुक्तो मालावान् गन्धचन्दनसंयुतः ॥
रत्नभूषितया गन्धचन्दनोक्षितया तया ।
सुखेन मूर्च्छितस्तल्पे पुष्पचन्दनसंयुते ॥
श्लिष्टो निद्रितया सद्यः सुखेन नवसङ्गमात् ।
मया प्रबोधिता सा च भवांश्च स्मरणं कुरु ॥
गृहीतं पीतवस्त्रन्ते मुरली च मनोहरा ।
वनमाला कौस्तुभश्चाप्यमूल्यं रत्नकुण्डलम् ॥
पश्चात् प्रदत्तं प्रेम्णा च सखीनां वचनादहो ।
लज्जया क्षणवर्णञ्च तेनाप्यद्यापि पश्यतः ॥
क्षमा देहं परित्यज्य लज्जया पृथिवीं गता ।
ततस्तस्याः शरीरञ्च गुणश्रेष्ठं बभूव ह ॥
संविभज्य त्वया दत्तं प्रेम्णा प्रणदता पुरा ।
किञ्चिद्दत्तं विष्णवे च वैष्णवेभ्यश्च किञ्चन ।
धर्म्मिष्ठेभ्यश्च धर्म्माय दुर्व्वृत्तेभ्यश्च किञ्चन ।
तपस्विभ्योऽपि देवेभ्यः पण्डितेभ्यश्च किञ्चन ॥
एतत्ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः ॥ * ॥
क्षमादंशः, पुं, (क्षमां पृथिवीं दंशतीति । दन्श + अच् । तीक्ष्णमूलत्वात् तथात्वम् ।) शिग्रुः । इति राजनिर्घण्टः ॥
क्षमावान्, [त्] त्रि, (क्षमा विद्यते अस्य अस्मिन् वा इति मतुप् मस्य वत्वम् ।) क्षान्तियुक्तः । यथा,
"एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः" ॥
इति गारुडे ११४ अध्यायः ॥
क्षमिता, [ऋ] त्रि, (क्षम् + तृच् ।) क्षमाशीलः । इत्यमरः । ३ । १ । ३१ ॥
क्षमी, [न्] त्रि, (क्षम् + "शमीत्यादिभ्यो णिनुण्" । ३।२।१४१। इति णिनुण् ।) क्षमाशीलः । तत्पर्य्यायः । सहिष्णुः २ सहनः ३ क्षान्ता ४ तितिक्षुः ५ क्षमिता ६ । इत्यमरः ।३।१।३१॥ क्षमः ७ शक्तः ८ सहः ९ प्रभूष्णुः १० । इति हेमचन्द्रः ॥ (यथा, भागवते । ६ । १५ । ४० ।
"क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः" ॥)
क्षयः, पुं, (क्षि क्षये । "नन्दिग्रहिपचादिभ्यः" । ३।१।१३४। इति अच् ।) नीतिवेदिनां त्रिवर्गान्तर्गतप्रथमवर्गः । स तु राज्ञामष्टवर्गस्यापचयः । यथा,—
"क्षयः स्थानञ्च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्" ॥
इत्यमरः ३।१।१३४ ॥ नीतिवेदिनां नीतिशास्त्रज्ञानां क्षयादिभिस्त्रिवर्गः अन्येषान्तु धर्म्मकामाद्यः पूर्व्वमुक्तः । अष्टवर्गस्यापचयः क्षयः । तस्यैवोपचयो वृद्धिः । तस्य नोपचयो नाप्यपचयः स्थानम् । अष्टवर्गो यथा,—
"ऋणिर्व्वणिक्पथो दुर्गं सेतुकुञ्जरबन्धनम् ।
कन्याकरबलादानं सैन्यानाञ्च निवेशनम् ।
अष्टवर्गः स्मृतो राज्ञां" । इति तट्टीकायां भरतः ॥
क्षयः । तत्पर्य्यायः । सम्वर्त्तः २ प्रलयः ३ कल्पः ४ कल्पान्तः ५ ॥ अपचयः । तत्पर्य्यायः । क्षिया २ ॥ निलयः । तत्पर्य्यायः गृहशब्दे द्रष्टव्यः ॥ काशरोगविशेषः । तत्पर्य्यायः । यक्ष्मा २ शोषः ३ । इत्यमरः ॥ राजयक्ष्मा ४ रोगराजः ५ गदाग्रणीः ६ उष्मा ७ अतिरोगः ८ रोगाधीशः ९ रुपामयः १० । इति राजनिर्घण्टः ॥
(लक्षणादि चिकित्सितञ्च यथा,—
"शृणुत गुणगरिष्ठा व्याधिघोरं नराणां
भवति रहितचेष्टो वातुजः प्राणिनां वै ।
चिरनिरयकरोऽयं प्राक्तनैः कर्म्मपाकै-
रिह परिभवकारी मानुषस्य क्षयोऽयम् ॥
देवानां प्रकरोति भङ्गमथवा भूसुरस्य सम्पातनं
गोएण्ड्यीधरविप्रबालहननस्त्रावासविध्वंसनम् ।
योऽयं स्थानविनाशनञ्च कुरुते स्त्रीणां वधो यो नरस्तस्यैतैर्गुरुकर्म्मभिः क्षयगदो देहार्थहारी महान् ॥
देवानां दमतो धनञ्च दहतो भूसुप्रपातेऽपि च
देवत्वं हरतो विषञ्च ददत आरामकं निघ्नतः ।
तेनासौ नियमेन सम्भवति वै नृणाञ्च तीव्रा रुजा
धातूनां क्षयकारिणी च मनुजस्यात्मापहा दारुणा
क्षयो दशविधश्चैव विज्ञातव्यो भिषग्वरैः ॥
श्रान्त्या भारादिषमशयनैर्दीर्घमार्गाक्रमैर्व्वा
भुक्तेर्दोषादतिशयरतेः सेवनाद्वै नरस्य ।
ज्वरेणातिक्रान्तो विषमशयनात् कूटनपरैः
जाता रोगा मनुजवपुषः क्षीणतां संनयन्ति ।
रोगाक्रान्तो विषमशयनात्तस्य मन्दज्वराद्या ।
श्लेष्मा पित्तं मरुदथ शयनैर्यातिदेहक्षयं वा ।
रसरक्तमांसमेदोऽस्थिमज्जानि शुक्रतः ॥
एवं दशविधा ज्ञेयाः क्षया नृणां वपुःषु च ।
पुनश्च लक्षणान्येषां वक्ष्यते शृणु साम्प्रतम् ।
अतिस्वेदातिधर्म्मेण चिन्ताशोकभयादिना ॥
वाताद्यैः सेवितैरापि जायते मारुतक्षयः ।
तेन तन्द्राक्लमश्च पिपासारुचिवैपथुः ॥
तमः भ्रमो भ्रमश्चैव भवेच्च मारुतक्षये ।
तस्मादिमानि सेव्यानि रसानि बलवानि च ॥
रसोनादिककल्कञ्च सेवयेद्घृतवर्द्धनम् ।
पित्तक्षयेऽग्निमान्द्यञ्च जायतेऽरुचिजाड्यता ॥
कासश्लेष्मप्रसेकश्च जायते मन्दचेष्टता ।
स्वेदाभ्यङ्गाग्नि पानानि दीपनानि प्रयोजयेत् ॥
जाङ्गलानि रसान्नानि सेवयेत् पित्तक्षये ।
व्यायामे च व्यवाये च रूक्षान्नाहारसेवनैः ॥

क्षयः

सन्तापक्रोधनैश्चापि जायते कफसंक्षयः।
तेनदाहोऽथवा पाण्डु शोथो निःश्वसनं भ्रमः॥
विनिद्रता क्षुत् दृष्ट्वा च स्त्रीसङ्गे नाभिनन्दति।
तस्य शीतान्नपानानि कन्दशाकादिकैरसैः॥
आनूपैर्देधिदुग्धैर्वा सेवनं न समीहितम्।
त्रिभिर्दोषैः क्षयं प्राहुस्तदा हि मरणं ध्रुवम्॥
तस्य क्रिया प्रयोक्तव्या साधारण्या महामते!॥
अथ धातुः क्षयं वक्ष्ये हारीत! शृणु साम्प्रतम्।
रसरक्तमांसमेदः प्रत्येकं क्षयलक्षणम्॥
रसक्षयेऽतिशोषश्च मन्दाग्नित्वञ्च वेपथुः।
शिरांसक्ष मन्दचेष्टत्वं जायते च क्लमो भ्रमः॥
रक्तक्षये क्षयः पाण्डु र्मन्दचेष्टो भवेन्नरः।
श्वासनिष्ठीवनं शोषो मन्दाग्नित्वञ्च जायते॥
मांसक्षयेऽतिक्षुधता चेष्टनञ्चाङ्गभङ्गता।
निद्रानाशोऽतिनिद्रास्य विसंज्ञो बधविक्रमः॥
मेदः क्षये मन्दबलो विसंज्ञता
श्वासस्य भङ्गो वमनं परूषता।
श्वासाभिकासोऽचिताग्निमन्दता
विश्लेषकम्पो वपुषश्च शुष्कता॥
अस्थिक्षये स्यात् अतिमन्दचेष्टता
मन्दश्च वीर्य्यं खलु मेदसः क्षये।
विसंज्ञता स्यात् क्षुधता च कम्पनं
श्वासस्य भङ्गो वमनं परूषता॥
शोषश्च देहे सदनञ्च शोषिता
विकम्पनं शोषबला च जायते।
भिषग्वरस्तत् परिवेदयज्ज्ञकं
मज्जक्षये कम्पनमेव जायते॥
भ्रमः क्लमः स्यादतिमन्दचेष्टः
शोषो निद्राजागरणञ्च तस्मात्।
मन्दश्वरः शोषसमो मनुष्ये
शुक्रक्षये चाह्य विचेष्टितानि।
रुग्णं भ्रमः कम्पनशोषरोधः
स्त्रीदेषितादीनि विरूपता च॥

इदानीं संप्रवक्ष्यामि भेषजानि यथाक्रमम्।
खेदनं रूक्षणञ्चैव तथा विस्रापनं हितम्।
जाङ्गलानि च मांसानि भोजनानि च सेवयेत्॥
गुडूची शृङ्गवेरञ्च यवागी क्षपितं जलम्।
मरिचैः क्षपितं दुग्धं पाने रात्रौ प्रशस्यते॥
रसानां तेन वृद्धिः स्यात् शीघ्रं तस्मादिमुच्यते।
रसाना वृद्धिकरणं गोधूमयवशालिभिः।
क्षपितानि भिषक् श्रेष्ठैर्जाङ्गलानि विशेषतः।
घृतदुग्धसिताक्षौद्रमरिचानि च पिप्पली।
पानं शस्तं मनुष्याणां रक्तवृद्धिकरं सतम्"॥

इति रसरक्तवृद्धिकरम्॥ * ॥

"आनूपानि च धान्यानि बधुनामानि भक्षयेत्।
भक्ष्यांश्च घृतदुग्धादीन् सेवयेन्मधुराणि च॥
रसाश्च जाङ्गलाः स्युः सेवनार्थे भिषग्वर!।
सितोपलादिकं चूर्णं अजाक्षीरं सकोलकम्॥
घृतं पानं क्षये चैव कल्पमप्राशने"॥

इति मांसमेदोवृद्धिकरम्॥ * ॥

"घृतानि च सुपक्वानि क्षीराणि विविधानि च।
चन्दनानि च द्राक्षादि-चूर्णानि च भिषग्वर!॥

क्षयः

जाङ्गलानि च सर्व्वाणि सेवनीयानि पुत्रक!।
अन्नानि मधुराणीह सर्व्वाणि च प्रयोजयेत्"॥

इत्यस्थिवृद्धिकरणम्॥ * ॥

"शुक्रक्षये प्रशाकानि रसानि च विशेषतः।
नवनीतं तथा क्षीरं मधुराणि च सेवयेत्॥
कर्कटी मूलपयसा विदारी कन्दशाल्मली।
सिताक्षौद्रं हितं पानं शस्यन्ते मधुराणि च"॥

इति शुक्रक्षयवृद्धिकरणम्॥ * ॥

"बला विदारी लघुपञ्चमूली
क्षीरद्रुमत्वक् च ततः प्रयोज्या।
पुनर्नवा मेघतुगारजन्यः
सञ्जीवनीयैर्मधुकैः समांशैः॥
अक्षप्रमाणानि समानि तानि
सर्व्वाणि चैतान्यपि चूर्णयित्वा।
विमिश्रयेत् तत्र कषायतानि
यवान्नगोधूमयवांश्च पिष्ट्वा॥
तुगासमांशा सितशर्कराणां
पेयं तु षट्पाटकमिश्रितञ्च।
प्रकीर्णकार्द्धेन वियोजनीयं
सर्व्वांशकेनापि सिता प्रयोज्या॥
विभावयेच्चामलकीरसेन
वारत्रयं गोपयसा विभाव्य।
ततोऽस्य सर्व्वैः सह शर्करामि
र्हृतेन चैवं पुनरेव भाव्यम्।
तं भक्षयेत् क्षौद्रयुतं पलार्द्धं
जीर्णे च भोज्यं कटुकास्लवर्ज्यम्॥
क्षीरं घृतं वा सितशर्करां वा
यवान्नगोधूमकशालिभक्षान्।
क्षात्वाग्निपाकं जठरे नरस्य
देयो विधिज्ञैः क्षयरोगशान्त्यै।
पथ्यक्षये आन्तचिराभितापं-
संपीड़िताना तथाग्निरोऽर्त्तौ।
"पित्तातुराणां रुधिरक्षयाणां
श्रमाध्वसंपीड़ितकामलानाम्।
श्वासातुराणां मधुमेहिनाञ्च
क्षीणेन्द्रियाणां बलकारिरसम्"॥

इति बलादिचूर्णम्॥ * ॥

"पिप्पली वर्द्धमानन्तु ज्वरे जीर्णे प्रशस्यते।
मन्दाग्नौ पीतमेवाथ गुदजे वा तथा पुनः"॥

इति पिप्पलीवर्द्धमानम्॥ * ॥

"दे पले मार्कवं धातु साज्यक्षं पुनर्नवा।
तुगा एका त्रायमाणा दुरालभा।
चूर्णार्द्धेन समं योज्यं त्रिगन्धं मरिचानि च।
ताक्षीरं मगधा चैव तदर्द्धेन त्रिकोद्भवम्॥
त्रिजाभेदन्तदर्द्धेन सर्व्वैश्चैकत्र मिश्रयेत्।
समेन तिलचूर्णन्तु शर्कराभिः समायुतम्॥
तेन क्षयो राजयक्ष्मा कासश्च विनश्यति।
अपस्मारं क्षयत्यासु बलवीर्य्याधिको भवेत्॥
श्राम्यन्ति च महारोगाः शुक्राश्वो जायते नरः"॥

इति त्रिजातचूर्णम्॥ * ॥

"बलाक्षदंष्ट्रा हरतीदयञ्च
मूर्व्वीदयं गोक्षुरकं स्थिरा च।

क्षयना

पटोलनिम्बस्य दलानि मुस्तम्
सञ्चायमाणा सदुरालभा च॥
क्वाथ्य कषायञ्च पदावशेषं
पूते ततस्तूर्णमिदं प्रयुञ्जात्।
द्राक्षा शठी पुष्करमूलधात्री
दुग्धं समं तामलकीकषायम्॥
सर्पिः प्रयक्तं नवनीतकञ्च
सर्पिस्तदर्द्धेन वियोजनीयम्।
सिद्धं घृतं पानमथैव वस्तौ
नस्ये तथाभ्यञ्जनभोजने च॥
स पाण्डुकाग्न्यक्षयकामलानाम्
राजक्षये क्षीणबलेन्द्रियाणाम्।
क्षतेषु शोफेषु व्रणेषु शस्तं
शिरोऽर्त्तिपार्श्वार्त्तिगुदामयघ्नम्"॥

इति बलाद्यं घृतम्॥ * ॥

"चन्दनं सरलं दारु पत्रैला बालकं शठी।
नलदञ्चैवेयकं एका पद्मकं नागकेशरम्॥
कक्कोलकं सुरामांसी ग्रैवेयं द्वे हरीतकी।
रेणुकात्वक् कुङ्कुमञ्च शारिवे द्वे निशागुरु॥
बला द्राक्षा च नलिका कषायं सुपरिस्रुतम्।
तैलमस्तु तथा क्षीरं रसेन समभागिकम्॥
मन्दाग्निना पचेत्तैलं सिद्धं पाने च वस्तिषु।
नस्ये चाभ्यञ्जने चैव योजयेत्तद्भिषग्वरः॥
हन्ति पाण्डु क्षयं कासं ग्रहणं बलवर्णकृत्।
मन्दज्वरतमस्कारकुष्ठपामं हरेत् पुनः।
करोति बलपुष्ट्योजःप्रज्ञायुर्बलवर्द्धनम्॥
रूपसौभाग्यदं पुंसां सर्व्वभूतग्रहारम्"॥

इति चन्दनाद्यं तैलम्॥

इति क्षयरोगचिकित्सा॥ इति हारीते चिकित्सितस्थाने दशमेऽध्याये॥ * ॥

"चिकटु त्रिफलैलाभिर्जातीफलजवङ्गकैः।
नवभागोन्मितं तुल्यं लौहं पारदसिन्दुरम्।
मधुना क्षयरोगाणां हन्तायं क्षयकेशरी"॥

इति क्षयकेशरी रसः॥

इति वैद्यकरत्नसारसंग्रहे यक्ष्माधिकारे॥ * ॥)

अस्य अन्यत् निदानादि यक्ष्मग्रन्थे द्रष्टव्यम्।
तस्यौषधान्तरं यथा,—

"श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम्।
त्रिसप्ताहेन वै पीतं क्षयरोगं क्षयं नयेत्"॥

इति गारुडे १९३ अध्यायः॥ (क्षयत्यक्षादनेन वा क्षि + क्षये + अप्। क्षयति विनाशयति इति। अन्तर्भूतणिच् ततोऽच्।) रोगमात्रम्। इति राजनिर्घण्टः॥

क्षयतरुः, पुं, (क्षयस्य क्षयार्थं वा तरुः।) खदिरवृक्षः। इति राजनिर्घण्टः॥ (यथास्य पर्य्यायाः।

"नन्दीवृक्षोऽक्षत्वभेदः प्ररोहो गजपादपः।
खदिरः क्षयतरुः क्षोरी च स्यादनन्तिः"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)

क्षयथुः, पुं, (क्षि + अथुच्।) कासः। इति हेमचन्द्रः॥

क्षयनाशिनी, स्त्री, (क्षयं क्षयाख्यरोगं नाशयतीति। क्षय + नश् + णिच् + णिनि + ङीप्।) जीवन्तीवृक्षः। इति शब्दमाला॥

क्षवः

(गुणादयोऽस्य जीवन्तीशब्दे ज्ञेया ॥)

क्षय्यं, त्रि, (क्षेतुं शक्यम्। क्षि + "ऋहलोर्ण्यत्" ३।१।१२४। इति ण्यत्।) क्षयशीलम्। क्षयितव्यम्। क्षययोग्यम्। इति व्याकरणम् ॥ "क्षेतुं नेतुं योग्यं क्षेयं पापं जेयं मनः"। इति सिद्धान्तकौमुदी ॥ (यथा, महाभारते।

"अपवर्गे तु वैश्यस्य श्राद्धकर्म्मणि भारत!। अक्षय्यमभिधातव्यम्" इति ॥)

क्षर, ण सञ्चलने। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्। क्वचित् सकच।) ज, क्षारः क्षरः। सञ्चलनमिह मोचनं स्रवणञ्च। आदौ सकर्म्मकः। "स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः"। इति किराते ७। ८॥ स्रवणे तु। क्षरत् क्षतजक्षतयः। इति दुर्गादासः ॥

क्षरं, क्ली, (क्षरति स्रवति वर्षति च। क्षर् + अच्।) जलम्। तथा च सत्यसाविद्योपनिषदि। १। ८। १०। "क्षरन्त्यविद्या ह्यमृतं तु विद्या" ॥) मेघे पुं। इति मेदिनी ॥

क्षरः, पुं, (क्षर् + अच्।) नश्वरवस्तु। यथा,—

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते" ॥ इति श्रीभगवद्गीतायाम्। १५। १७।

"क्षरश्चाक्षरश्चेति द्वाविमौ लोके प्रसिद्धौ। तावेवाह तत्र क्षरः पुरुषो नाम सर्व्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः। कूटो राशिः ज्ञिणा राशिः। पर्व्वत इव एकदेशेषु नश्यत्स्वपि निर्व्विकारतया तिष्ठतीति कूटस्थश्चेतनो भोक्ता स त्वक्षरः पुरुष उच्यते विवेकिभिः"। इति तट्टीकायां श्रीधरस्वामी ॥ (तथा, महाभारते। १४। अनुगीतापर्व्वाध्याये। १७। १७।

"ततः सवेदनः सद्यो जीवः प्रच्यवते क्षरात्" ॥)

क्षरणं, क्ली, (क्षर् + भावे ल्युट्।) मोचनम्। स्रवणम्। (यथा, रघुः। १६। १६।

"लौल्यमेत्य महिषीपरिग्रहात् नर्त्तकीष्वसुलभासु तद्गुणः। वर्त्तते स्म सकथश्चिदाखिल- भ्रूकुलीक्षरणसन्नवर्त्तिका" ॥)

क्षरी, (नृ) (क्षरः क्षरणं वर्षणं अस्त्यस्मिन् काले क्षरोऽस्यस्य वा। क्षर् + इनिः।) वर्षाकालः इति हेमचन्द्रः। क्षरणविशिष्टे त्रि॥

क्षल, क शौचे। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) शौचमिह शुद्धीकरणम्। क, क्षालयति पात्रं पयसा लोकः। इति दुर्गादासः ॥

क्षल, ज चाले। चये। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-सेट्।) ज, क्षालः क्षलः। चालः कम्पः। चयश्चयनम्। इति दुर्गादासः ॥

क्षवः, पुं, (क्षु शब्दे क्षुते च + भावे अप्।) क्षुतम्। राजिका। इत्यमरः ॥ कासः ॥ इति शब्दरत्नावली। राजिकाभेदः। तत्पर्य्यायः। क्षुधाभिजननः २ चपलः ३ दीर्घघ्रिण्विकः ४ सुकुमारः ५ उत्तबीजः ६ मधुरः ७ क्षवकः ८। अस्य गुणाः। कषायत्वम्। मधुरत्वम्। शीतत्वम्। कफपित्तश्रमहरत्वम्। दृश्यत्वम्। पवनाघ्मानपुष्टिदत्वञ्च। इति राजनिर्घण्टः ॥

क्षवकः, पुं, (क्षु + अप् + स्वार्थे कन्।) अपामार्गः। राजिका। भूताङ्कुशः। इति राजनिर्घण्टः। (व्यवहारोऽस्य यथा सुश्रुतादिगणपाठे।

"क्षवकसरसिभार्गी कासुका काकमाची कुलहलविषमुष्टी भूस्तृणो भूतकेशी" ॥ इति वामटे सूत्रस्थाने १५ अध्याये ॥)

क्षवक्षत्, क्ली, (क्षवं करोतीति। क्ष + क्विप्।) क्षिक्कणी। इति भावप्रकाशः ॥

क्षवथुः, पुं, (क्षु + अथुच्।) क्षुतम्। कासः। इति मेदिनी। कण्डूकण्डूयनम्। इति शब्दरत्नावली ॥ (क्षवथुर्नाम रोगविशेषः। तस्य सकारणसम्प्राप्तिलक्षणानि यथा,—

"तीक्ष्णाघ्राणोपयोगार्करश्मिसूक्ष्मरजादिभिः। वातकोपिभिरन्यैर्वा नासिका तरजास्यनि ॥ विघट्टितेऽनिलः क्रुद्धो रुद्धः श्लेष्माटकं व्रजेत्। निष्टप्तः कुरुतेऽत्यर्थं क्षवथुं स भृशं क्षवः" ॥ इति वामटे उत्तरस्थाने १९ अध्याये ॥

"घ्राणाश्रिते मर्म्मणि संप्रदुष्टे यस्यानिलो नासिकया निरेति। कफानुयातो बहुशः सशब्द- स्तं रोगमाहुः क्षवथुं विधिज्ञाः ॥ तीक्ष्णोपयोगादतिजिघ्रतो वा भावान् कटूनर्कनिरीक्षणाद्वा। सूक्ष्मादिभिर्वा तरजास्थिमर्म्म- ण्युद्घाटिते यः क्षवथुर्निरेति" ॥

इत्युत्तरतन्त्रे द्वाविंशेऽध्याये सुश्रुतेनोक्तम् ॥

चिकित्सा यथा।

"क्षेप्यं नस्यं मूर्द्धविरेचनीयै- र्नाड्याचूर्णं क्षवथौ भंग्यथो च" ॥

इति चात्रैव २३ अध्याये तेनोक्तम् ॥ अस्य विधारणाज्ज्ञातो यः स यथा,—

"भवन्ति गाढं क्षवयोर्विघाता- च्छिरोऽक्षिनासास्रवणेषु रोगाः। कण्ठास्यपूर्णत्वमतीवतोदः कूजश्च वायोरथवा प्रवृत्तिः" ॥

इति चोत्तरतन्त्रे पञ्चपञ्चाशत्तमेऽध्याये च तेनोक्तम् ॥)

क्षवपत्रा, स्त्री, (क्षवः क्षुतहेतुः पत्रं यस्याः। एतत् पत्राघ्राणेन हि क्षुतं जायते। अतस्तथात्वम्।) द्रोणपुष्पी। इति राजनिर्घण्टः ॥

क्षविका, स्त्री, (क्षवः क्षुतं साधयत्यस्यस्य इति ठन् + टाप् च।) वृहतीभेदः। तत्पर्य्यायः। सर्पतनुः २ पीतपत्रिका ३ पुष्पप्रदा ४ बहुफला ५ गोधिनी ६। अस्या गुणाः। "क्षविका वृहती तिक्ता कटुरुष्णा च तत्समा"। इति राजनिर्घण्टः ॥

क्षान्तः, त्रि, (क्षम् + कर्त्तरि क्तः।) सहनशीलः। तत्पर्य्यायः। सोढ़ः २। इत्यमरः ॥ क्षमान्वितः ३। इति शब्दरत्नावली ॥ तितिक्षितः ४। इति जटाधरः ॥ (यथा, हरिवंशे। २१। २१।

"निर्व्वैरो निर्व्वृतः क्षान्तो निर्म्मन्युः क्षतिरेव च" ॥)

क्षान्तिः, स्त्री, (क्षम + भावे क्तिन्।) सत्यपि सामर्थ्ये अपकारिणि अपकाराचिकीर्षा। इति देवीमाहात्म्यटीकायां नागभट्टः ॥ तत्पर्य्यायः। तितिक्षा २। इत्यमरः ॥ सहिष्णुता ३ क्षमा ४। इति जटाधरः ॥ (यथा, भगवद्गीतायाम् १८। ४२।

"शमो दमस्तपः शौचं क्षान्तिरार्জ্জবमेव च" ॥)

क्षान्तुः, त्रि, (क्षम् + "क्षमिरमिक्षमिभ्यस्तुन् दृड्डिच्च" । उणां। ५। ४१। इति तुन् दृड्डिच्च।) क्षमाशीलः। तत्पर्य्यायः। मर्षकः २। इत्युणादिकोषः ॥

क्षान्तुः, पुं, (क्षम् + तुन् दृड्डिच्च।) पिता। इति संक्षिप्तसारोणादिवृत्तिः ॥

क्षामः, त्रि, (क्षै + कर्त्तरि क्तः। "क्षायो मः" ८। २। ५३। इति निष्ठा तस्य मत्वम्।) क्षीणः। अवसः। इति शब्दरत्नावली ॥ (यथा, भागवते ३। २१। ४६।

"विद्योतमानं वपुषा तपस्युग्रयुजा चिरम्। नातिश्यामं भगवतः स्निग्धापाङ्गावलोकनात्" ॥ स्त्रियां टाप्। यथा, मेघदूते। ८६।

"आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वाम्" ॥ सर्व्वरूपवत्त्वात् विष्णुः। यथा, महाभारते। १३ विष्णुसहस्रनामकीर्त्तने। १४६। १०४।

"आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः" ॥)

क्षामवती } स्त्री, (क्षामं दोषक्षयः साध्यतया-
क्षामवतीद्विः } स्यस्या मतुप् मस्य वत्वम्। स्त्रियां ङीप्। पक्षे कर्म्मधारयः।) यागविशेषः। यथा, भविष्ये।

"क्षामवत्यादिना यद्यत् कर्म्मणा एतनाप्यते!। दैवदोषादकस्मे जाते दोषकदम्बके। होमेनैकेन दोषाणां सर्व्वेषां क्षयमादिशेत् ॥ एवञ्च एकप्रायश्चित्तेनानेकदोषक्षयाय क्षामवतीद्विः सर्व्वत्र दृष्टान्तः"। इति प्रायश्चित्ततत्त्वम् ॥

क्षामास्यं, क्ली, (क्षामस्य क्षयस्य आस्यं स्थानम्।) कुपथ्यम्। यथा, शब्दचन्द्रिकायाम्।

"अपथ्यमहितं रोग्यं क्षामास्यं परिकीर्त्तितम्" ॥ पुस्तकान्तरे क्षमस्यमिति च पाठः ॥

क्षारं, क्ली, (क्षरतीति। क्षर् सञ्चलने + "ज्वलितिकसन्तेभ्यो णः" ३। १। १४०। इति ज्वलादित्वात् णः।) विड्लवणम्। इति राजनिर्घण्टः ॥ यवक्षारः। इति त्रिकाण्डशेषः ॥

क्षारः, पुं, (क्षर् सञ्चलने + ज्वलादित्वात् णः ॥) रसविशेषः। (यथा, पञ्चतन्त्रे। १। ११५।

"तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरुषाः पिबन्ति" ॥

अस्य गुणा यथा।

"क्षारः क्षोदं जनयति मुखे स्वादुरुष्णो विदाही शूलश्लेष्मा रुचिभ्रंशहृषामूत्रशुक्रोषणश्च। आनाहं सञ्जनयति पुनर्वह्निसंस्तूद्गमः स्या- देवं प्रोक्तं विदितगुणकैः कोविदैः क्षारवीर्य्यम्" ॥

इति हारीते प्रथमस्थाने ६ अध्याये ॥) धूर्त्तः । जवक्षम् । (यथा, रामायणे । २ । ७३ । ३ ।
"दुःखे मे दुःखमकरोद्राज्ये क्षारमिवाददात् ।
राजानं प्रेतभावस्थं कृत्वा रामञ्च तापसम्" ॥)
काचः । भस्म । इति मेदिनी । गुड़ः इति हेमचन्द्रः ॥ टङ्कणः । (अस्य पर्य्याया यथा,—
"सौभाग्यं टङ्कणं क्षारो धातुद्रावकमुच्यते" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
सर्জিক্ষারः । इति राजनिर्घण्टः ॥ *॥

क्षारविशेषगुणाः ।

"पलाशधवपूतीकक्षारक्षपाटलादिजाः ।
क्षारास्तु पाचनाः सर्ब्वे रक्तपित्तकराः सराः ।
गुल्मार्शःकृमिमुंस्त्नघ्नाः शर्करााश्मरिनाशनाः" ॥
इति राजवल्लभः ॥ (क्षारसामान्यगुणा यथा,—
"क्षारः सर्ब्वत्र परमं तीक्ष्णोष्णः कृमिजिच्छुचुः ।
पित्तास्रगूदूषणः पाकी छेद्यभेद्यो विदारणः ।
अपथ्यः कटुनावत्वाच्चक्षुष्यः केशघ्नचक्षुषाम्" ॥
इति सूत्रस्थाने षष्ठेऽध्याये वामटेनोक्तम् ॥)

क्षारकः, पुं, (क्षरतीति । क्षर् + ण्वुल् ।) अचिरजातपलम् । तत्पर्य्यायः । जालकम् २ । इत्यमरः ॥ जालि इति भाषा । पच्चिमत्यादिपिटकम् । खाँचा इति भाषा । इति मेदिनी ॥ रजकः । इति शब्दमाला ॥ (स्वार्थे कन् । क्षारः । यथा, सुश्रुते ।
"तन्मात्रतो क्षारकसैन्धवायुतं
सदाञ्जनं स्यात्तिमिरेऽथ रागिणि" ॥)

क्षारतैलं, क्ली, (क्षारयुतं क्षाराख्यं वा तैलम् ।) पक्वतैलविशेषः । यथा,—
"मुष्कमूलकमुण्डीनां क्षारो हिङ्गुलनागरम् ।
शतपुष्पा वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्चलं यवक्षारं सामुद्रं सैन्धवन्तथा ।
सुरसञ्चि विडं मुस्तं मधु सुक्तं चतुर्गुणम् ॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम् ॥
बाधिर्य्यं कर्णनादञ्च पूयस्रावञ्च दारुणः ।
पूरकादस्य तैलस्य क्रमयः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति ग्रहाद्भुतग्रेखर ! ।
क्षारतैलमिदं श्रेष्ठं सुखदन्नामयापहम्" ॥
इति गरुड़े १९८ अध्यायः ॥

क्षारत्रयं, क्ली, (क्षाराणां त्रयम् ।) त्रिविधक्षारः । तद्यथा, राजनिर्घण्टे ।
"सर्জিকञ्च यवक्षारं टङ्कक्षारमेव च ।
क्षारत्रयञ्च विज्ञेयं क्षारत्रितयमेव च" ॥
("सर्জিকা यावशूकञ्च क्षारद्वयमुदाहृतम् ।
टङ्कणेन यतं तत्तु क्षारत्रयमुदीरितम् ।
मिलितन्तल्लगुडादिग्रेषाद् गुल्महृत् परम्" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

क्षारदला, स्त्री, (क्षारो दलेषु पत्रेषु अस्याः । क्षुद्रवास्तूकशाकविशेषः ।) चिल्ली । इति राजनिर्घण्टः ॥ (चिल्लीशब्देऽस्या विवृतिर्द्रष्टव्या ॥)

क्षारदशकं, क्ली, (दशविधाः क्षाराः अत्र । कप् क्षाराणां दशकमित्येके ।) दशविधक्षारः । यथा,—
"शिग्रुमूलकपलाशशुक्तिका-
चिचकार्कसनिम्बसम्भवैः ।
इक्षुशैखरिकमोचिकोद्भवैः
क्षारपूर्ब्बदशकं प्रकीर्त्तितम्" ॥
इति राजनिर्घण्टः ॥

क्षारदुः, पुं, (क्षारप्रधानको द्रुमः ।) घण्टापाटलिवृक्षः । इति रत्नमाला ॥ (घण्टापाटलिशब्देऽस्य गुणाः पर्य्यायाश्च ज्ञातव्याः ॥)

क्षारपत्रः, पुं, (क्षारः पत्रेषु यस्य ।) वास्तूकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—
"वास्तूकं वास्तुकञ्च स्यात् क्षारपत्रञ्च शाकराट्" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ गुणाश्चास्य वास्तूकशब्दे ज्ञातव्याः ॥)

क्षारपत्रकः, पुं, (क्षारपत्र + स्वार्थे कन् कप् वा ।) वास्तूकः । इति हेमचन्द्रः ॥

क्षारभूमिः, पुं, (क्षारोत्पादनक्षमा भूमिः ।) लवणमृत्तिकादेशः । यथा,—
"जीवनं जीवनं हन्ति प्राणान् हन्ति समीरणः ।
किमास्थेयं क्षारभूमौ प्राणदा यमदूतिका" ॥
इत्युद्भटः ॥ (क्षारस्य भूमिः स्थानम् ।) लवणभूम्यां स्त्री ॥

क्षारमध्यः, पुं, (क्षारो मध्येऽस्य ।) अपामार्गः । इति रत्नमाला ॥ (अपामार्गशब्दे अस्य गुणादयो व्याख्याताः ॥)

क्षारमृत्तिका, स्त्री, (क्षारयुक्ता मृत्तिका ।) लवणमृत्तिका । तत्पर्य्यायः । ऊषः २ । इत्यमरः ॥ उषः ३ । इति शब्दरत्नावली ॥

क्षारवृक्षः, पुं, (क्षारप्रधानो वृक्षः ।) मुष्ककः । इति राजनिर्घण्टः ॥

क्षारश्रेष्ठं, क्ली, (क्षारेषु श्रेष्ठम् ।) यवक्षारम् । इति राजनिर्घण्टः ॥

क्षारश्रेष्ठः, पुं, (क्षारःश्रेष्ठोऽत्र ।) पलाशः । मुष्ककः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा ।
"पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

क्षारषट्कं, क्ली, (क्षाराणां षट्कम् ।) षड्विधक्षारः । यथा,—
"धारापामार्गकुटजजलाङ्गलीतिलमुष्ककैः ।
क्षारैरेतैस्तु मिलितैः क्षारषट्कादयो गणाः" ॥
इति राजनिर्घण्टः ॥

क्षारसिन्धुः, पुं, (क्षारैर्युक्तः क्षारप्रधानः सिन्धुर्वा ।) लवणसमुद्रः । स तु जम्बुद्वीपस्य दक्षिणे शाकद्वीपस्य उत्तरे वर्त्तते । यथा,—
"भूमेरर्द्धं क्षारसिन्धोरवश्यं
जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलञ्च कौशं
कौशञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति" ॥

इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

क्षारसेलकः, पुं, (क्षाराणां सेलः संघः । ततः स्वार्थे कन् ।) सर्ब्वक्षारः । इति राजनिर्घण्टः ॥

क्षाराक्षं, क्ली, (क्षारेषु अक्षं निर्म्मलम् । समुद्रजातलवणस्य स्वच्छतया तथोक्तम् ।) सामुद्रलवणम् । इति हारावली ॥ (सामुद्रलवणशब्दे अस्य गुणादिकं ज्ञेयम् ।)

क्षाराष्टकं, क्ली, (क्षाराणां अष्टकम् ।) अष्टप्रकारक्षारः । तद्यथा, —
"पलाशवह्निशिखिरिचिक्षार्कतिलनालजाः ।
यवजः सर्জিকा चेति क्षाराष्टकमुदाहृतम् ॥
क्षारा एतेऽग्निना तुल्या गुल्मशूलहरा भृशम्" ॥
इति भावप्रकाशः ॥

क्षारिका, स्त्री, (क्षर् + ण्वुल् + टाप् च । अत इत्वम् ।) क्षुधा । इति हारावली ॥

क्षारितः, त्रि, (क्षर् + णिच् + कर्म्मणि क्तः ।) अभिशस्तः । अपवादयस्तः । इत्यमरः ॥ (यथा, महाभारते २ । युधिष्ठिरनारदसंवादे । ५ । १०५ ।
"क्वचिदार्य्यो विशुद्धात्मा क्षारितश्चौरकर्म्मणि ।
अदृश्यान्यकृतैर्नैनं लोभाद्ध्यते शुचिः" ॥)
खावितः । क्षारः । इति मेदिनी ॥

क्षारोदः, पुं, (क्षारं उदकं यस्मिन् । क्षार उदके यस्य वा । उत्तरपदस्य चेयुदकस्य उदादेशः ।) लवणसमुद्रः । यथा, "क्षारोदेक्षुरसोद-सुरोद-घृतोद-क्षीरोद-दधिमण्डोद-शुद्धोदाः सप्तजलधयः। सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकशेन यथानुपूर्व्वं सप्तापि बहिर्द्वीपेषु पृथक् परित उपकल्पिताः"। इति श्रीभागवते ६ स्कन्धे १ अः॥

क्षालनं, क्ली, (क्षल् + णिच् + भावे ल्युट् ।) प्रक्षालनम् । धौतकरणं यथा,—
"स्त्रीशूद्रौ याग नित्याभ्यःक्षालनाच्च करौष्ठयोः" ॥
इति ब्रह्मपुराणम् । इत्याह्निकाचारतत्त्वम् ॥
(यथा च, मार्कण्डेयपुराणे । १६ । १६ ।
"श्लेष्ममूत्रपुरीषास्रक्प्रवाहच्छालनेन च ।
रङ्गस्यैवोपचारेण प्रियसम्भाषणेन च" ॥)

क्षालितं, त्रि, (क्षल् + णिच् + क्तः ।) कृतप्रक्षालनम् । तत्पर्य्यायः निर्णिक्तम् २ शोधितम् ३ मृष्टम् ४ धौतम् ५ । इति हेमचन्द्रः ॥ (यथा, माघे । १० । १४ ।
"अप्रसन्नमपराद्धरि पत्यौ
कोपदीप्तमुररीकृतधैर्य्यम् ।
क्षालितम्रु श्रमितम्रु बधूना-
न्द्राविताम्रु हृदयम्मधुधारैः" ॥)

क्षि, क्षये ऐश्वर्य्ययोः । इति कविकल्पद्रुमः । (भां-परं-सकं, ऐश्वर्य्ये—अकं-अनिट् ।) क्षयति पापम् । इति दुर्गादासः ॥

क्षि, ग ग व हिंसायाम् । इति कविकल्पद्रुमः । (खां-क्ष्यां च-परं-सकं-अनिट् ।) न, क्षिणोति । ग, क्षिणाति । व, क्षिया । (यथा, श्रुतिः ५ ।
"धन्यानां गिरिकन्दरोदरभुवि ज्योतिः परं ध्यायतामानन्दाश्रुजलं शिवन्ति शकुना निःशङ्कमङ्गे

स्थिताः। अस्माकन्तु मनोरथोपरचितप्रासाद-वापीतटक्रीड़ाकाननकेलिमण्डपयुवामायुः परं क्षीयते"। इति कर्म्मकर्त्तरि साध्यम्। इति दुर्गादासः॥

क्षि, ग्र वासगत्योः। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सकंच-अनिट्।) ग्र, क्षियति। इति दुर्गादासः॥

क्षि, क्षि, (क्षि+बाऽलकात् डिः।) निवासः। गतिः। क्षयः। इति मेदिनी॥

क्षिञ, दु ञ वधे। इति कविकल्पद्रुमः॥ (तनां-उभ-सकं-सेट्-उदित्त्वात् क्त्वा वेट्।) द ञ, क्षिणोति क्षिणुते। उ, क्षिणित्वा क्षित्वा। इति दुर्गादासः॥

क्षितः, त्रि, (क्षि+कर्म्मणि क्तः।) हिंसितः। क्षितः कामो मया हिंसित इत्यर्थः। इति मुग्धबोधटीकायां दुर्गादासः॥

क्षितिः, स्त्री, (क्षियति वसत्यस्याम्। क्षि+अधिकरणे क्तिन्।) अस्या अपरा व्युत्पत्तिर्यथा,—
"महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता।
काश्यपी कश्यपस्येयमचला स्थिररूपतः"॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्यायः॥
पृथिवी। (यथा, मनौ ४।२४१।
"मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ।
विमुखा बान्धवा यान्ति धर्म्मस्तमनुगच्छति"॥)
वासः। क्षयः। इत्यमरः। ३।३।७०॥ कालभेदः। स तु प्रलयः। इति मेदिनी॥ रोचनानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥*॥

क्षितिकणः, पुं, (क्षितेः पृथिव्याः कणः।) धूलिः। इति त्रिकाण्डशेषः॥

क्षितिक्षमः, पुं, (क्षितिरिव क्षमते क्षितावित्र क्षमाकारणीभूता शक्तिरस्मिन् वा।) खदिरवृक्षः। इति राजनिर्घण्टः॥

क्षितिज, क्ली, (क्षिति+जन्+डः।) खगोले आकाशमध्यान्नवत्यंशान्तरे तिर्य्यग्वृत्तम्। यथा,—
"पर्व्वापरं विरचयेत् सममण्डलाख्यं
याम्योत्तरञ्च विदिशोर्व्वलयद्वयञ्च।
ऊर्द्धाध एवमिह वृत्तचतुष्कमेत-
दावेष्ट्य तिर्य्यगपरं क्षितिजं तदर्द्धे"॥
इति सिद्धान्तशिरोमणौ गोलबन्धाधिकारः॥

क्षितिजः, पुं, (क्षितेर्जायते इति। जन्+डः।) भूनागः। इति राजनिर्घण्टः। मङ्गलग्रहः। यथा,—
"परमैश्वर्य्यमतुलं नानाविधसुखाश्रयम्।
करोति सोमपुत्रस्तु क्षितिजान्तर्दशाकृतः"॥
इति ज्योतिस्तत्त्वम्॥ भूजाते त्रि॥

क्षितिजन्तुः, पुं, (क्षितौ क्षितेर्वा जन्तुरिव।) भूनागः। इति राजनिर्घण्टः॥

क्षितिधरः, पुं, (क्षितिं पृथ्वीं धरति धारयति वा। धृ धारि+वा अच् णिच्पक्षे पूर्ब्वह्रस्वः।) पर्व्वतः। इति हलायुधः॥ (यथा, कुमारे। ७।९४।
"अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य
क्षितिधरपतिकन्यामाददानः करेण"॥)

कूर्म्मवासुकिदिग्गजाश्च॥

क्षितिनागः, पुं, (क्षितिजातो नागः। मध्यपदलोपी समासः।) भूनागः। इति राजनिर्घण्टः॥

क्षितिनाथः, पुं, (क्षितेः पृथिव्याः नाथः सहायः भर्त्ता इत्यर्थः।) राजा। (क्षितिपतिदर्शनात्॥)

क्षितिपः, पुं, (क्षितिं पातीति। पा+डः।) राजा। यथा,—"अहंयुनाथ क्षितिपः शुभंयु-
रूचे वचस्तापसकुञ्जरेण"॥
इति भट्टौ। १।२०॥ (यथा च पञ्चतन्त्रे। २।२४।
"यः सम्मानं सदा धत्ते भृत्यानां क्षितिपोऽधिकम्।
विज्ञातावेऽपि तं दृष्ट्वा ते त्यजन्ति न कर्हिचित्"॥)

क्षितिपतिः, पुं,(क्षितेः पतिः पालकः।) राजा। यथा,—
"मूर्खोऽशान्तस्तपस्वी क्षितिपतिरलसो मत्सरी धर्म्मशीलो दुःस्थो मानी गृहस्थः प्रभुरतिकृपणः शास्त्रविद्धर्म्महीनः"। इति नवरत्ने। ६। (तथा च रघुः। ६। ८६।
"प्रमुदितवरपक्षमेकतस्तत्
क्षितिपतिमण्डलमन्यतोवितानम्"॥)

क्षितिपालः, पुं, (क्षितिं पालयतीति। पालि+"कर्म्मण्यण्"। ३।२।१। इत्यण्।) राजा। यथा, प्रबोधचन्द्रोदयनाटके १ अङ्के।
"नीताः क्षयं क्षितिभुजो नृपतेर्विपक्षा
रक्षावती क्षितिरभूत् प्रथितैरमात्यैः।
साम्राज्यमस्य विहितं क्षितिपालमौलि-
मालार्च्चितं भुवि पयोनिधिमेखलायाम्"॥
(तथा, रघुश्च। २। ५१।
"इतावदुक्ता विरते मृगेन्द्रे
प्रतिस्वनेनास्यगुहागतेन।
श्लिष्टोच्चयोऽपि क्षितिपालमुच्चैः
प्रीत्या तमेवार्थमभाषतेव"॥)

क्षितिपालभाक्, [ज्] पुं, (क्षितिपालं भजते इति। भज्+क्विप्।) राजा। यथा, भट्टौ ३।२१।
"आसिञ्च नैकत्र शुचा यरंसीत्
क्षतात्क्षतेभ्यः क्षितिपालभाग्भ्यः।
स चन्दनोशीरमृणालदिग्धः
श्लोकाग्निनागादुनिवासभूयम्"॥

क्षितिपुत्रः,पुं, (क्षितेः पृथिव्याः पुत्रः।) नरकराजः। (पुरा किल सिद्धेश्वरकपिलदेवकोपेन रसातलगतां भगवतीं क्षितिमुद्धर्त्तुं भगवान् विष्णुर्वराहरूपेणावतीर्णः सन् तत्र दुर्द्धान्तं दितिनन्दनं हिरण्याक्षं निपात्य रसातलात्तामुद्धृत्य तस्यामेव धरायां नरकनामानं पुत्रमुत्पादयामास। यथा,—
"स तीरे नदराजस्य लौहित्यस्य महात्मनः।
ब्रह्मार्च्चनं समारभ्य तपस्तप्तुमुपस्थितः॥
स मानुषेण मानेन क्षितिपुत्रः शतं सभाः।
जलाहारव्रतेनैव समानर्च पितामहम्॥
स तुष्टः शतवर्षान्ते ब्रह्मा लोकपितामहः।
प्रत्यक्षीभूय नरकस्याग्रतः समुपस्थितः"॥
इति कालिकापुराणे ३८ अध्यायः॥ अन्यत् नरकशब्दे द्रष्टव्यम्॥ (मङ्गलग्रहः। इति ज्योतिस्तत्त्वम्॥)

क्षितिबदरी, स्त्री, (क्षितौ स्थिता सत्ता वा बदरी।) भूबदरी। इति राजनिर्घण्टः॥

क्षितिरुहः, पुं, (क्षितौ रोहतीति। रुह+कः। वृक्षः। इति हेमचन्द्रः॥ (यथा, विष्णुपुराणे १।१५।६।
"सन्धानं वः करिष्यामि सह क्षितिरुहैरहम्"॥)

क्षितिवर्द्धनः, पुं, (क्षितिं वर्द्धयति। वृध्+णिच् ल्युः।) शूकः। इति त्रिकाण्डशेषः॥ भूमिवर्द्धके त्रि॥

क्षितिव्युदासः, पुं, (क्षितिं व्युदस्यति। वि+उत्+अस्+अण्।) गर्त्तः। भाँड़सी इति तद्देशभाषा। इति केचित्॥

क्षित्यदितिः, स्त्री, (क्षितौ अदितिः। देवमातुरदित्याः पृथिव्यां देवकीरूपेणाविर्भावात्तथात्वम्।) देवकी। इति त्रिकाण्डशेषः॥ (एतद्विवरणं यथा,—हरिवंशे ५५ अध्याये।
वैशम्पायन उवाच।
"नारदस्य वचः श्रुत्वा सस्मितं मधुसूदनः।
प्रत्युवाच शुभं वाक्यं देवानां प्रभुरीश्वरः॥
त्रैलोक्यस्य हितार्थाय यन्मां वदसि नारद!।
तस्य सम्यक् प्रवृत्तस्य श्रूयतामुत्तरं वचः॥
विदिता देहिनो जाता मयैते भुवि दानवाः।
याश्च यस्तनुमास्थाय दैत्यः पुष्यति विग्रहम्॥
जानामि कंसं सम्भूतमुग्रसेनसुतं भुवि।
केशिनञ्चैव जानामि दैत्यं तुरगरूपिणम्॥
नागं कुवलयापीड़ं मल्लौ चानूरमुष्टिकौ।
अरिष्टञ्चैव जानामि दैत्यं वृषभरूपिणम्॥
विदितो मे खरश्चैव प्रलम्बश्च महासुरः।
सा च मे विदिता विप्र! पूतना दुहिता बलेः॥
कालियञ्चैव जानामि यमुनाह्रदगोचरम्।
वैनतेयभयाद् यस्तु यमुनाह्रदमाविशत्॥
विदितो मे जरासन्धः स्थितो मूर्ध्नि महीक्षिताम्।
प्राग्ज्योतिषपुरे चापि नरकं साधु तर्कये॥
मानुषे पार्थिवे लोके मानुषत्वमुपागतम्।
बाणञ्च शोणितपुरे गुहप्रतिमतेजसम्॥
दृढं बाऽसहस्रेण देवैरपि सुदुर्ज्जयम्।
मय्यासक्तञ्च जानामि भारतीं महतीं धुरम्॥
तच्च सर्व्वं विजानामि यथा यास्यन्ति ते नृपाः।
क्षयो भुवि मया दृष्टः शक्रलोके च सत्क्रिया॥
तेषां पुरुषदेहानामपरावृत्तिवर्त्तिनाम्।
सम्यवेक्ष्याम्यहं योगमात्मनश्च परस्य च॥
सम्प्राप्य मानुषं लोकं मानुषत्वमुपागतः।
कंसादींस्तांस्च सर्व्वांश्च वधिष्यामि महासुरान्॥
तेन तेन विधानेन येन यः शान्तिमेष्यति।
अनुप्रविश्य योगेन तांस्तां हि गतयो मया॥
अमीषां हि सुरेन्द्राणां हन्तवा रिपवो युधि।
जगत्यर्थे कृतो योऽयमंशोत्सर्गो महात्मभिः॥
सुरदेवर्षिगन्धर्व्वैरितश्चानुमते मम।
विनिश्चयो हि प्रागेव नारदाय कृतो मया॥
निवासं तत्र मे ब्रह्मा विदधातु पितामहः॥
यत्र देशे यथा जातो येन वेषेण वा वसन्॥
तानहं समरे हन्यां तन्मे ब्रूहि पितामह!॥
ब्रह्मोवाच।
नारायणेमं सिद्धार्थमुपायं शृणु मे विभो!।
भुवि यस्ते जनयिता जननी च भविष्यति॥

क्षिप

यच्च त्वं च महाबाहो जातः कुलकरो भुवि।
यादवानां महद्वंशमखिलं धारयिष्यसि॥
तांश्चासुरान् समुत्पाट्य वंशं ह्यात्मनो महत्।
स्थापयिष्यसि मर्य्यादां नृणां तन्मे निशामय॥
पुरा हि कश्यपो विप्रो! वरुणस्य महात्मनः।
जहार यज्ञिया गा वै पयोदाश्च महामखे॥
अदितिः सुरभिश्चैव द्वे भार्य्ये कश्यपस्य तु।
प्रदीयमाना गास्तासु नेच्छेतां वरुणस्य च॥
ततो मां वरुणोऽभ्येत्य प्रणम्य शिरसा नतः॥
उवाच भगवन्! गावो गुरुणा मे हृता इति॥
ह्यतकार्य्यो हि गास्तात! नानुजानाति मे गुरुः।
अन्ववर्त्तत भार्य्ये द्वे अदितिं सुरभिस्तथा॥
मम ता ह्यक्षया गावो दिव्याः कामदुघाः प्रभो!।
चरन्ति सागरान् सर्व्वान् रक्षिताः स्वेन तेजसा॥
कस्ता धर्षयितुं शक्तो मम गाः कश्यपादृते।
अक्षयं याः क्षरन्त्यग्र्यं पयो देवामृतोपमम्॥
प्रभुर्व्वा द्युतिमतो ब्रह्मन् गुरुर्व्वा यदि वेतरः।
त्वया नियम्याः सर्व्वे वै त्वं हि नः परमा गतिः॥
यदि प्रभवतां दण्डो लोके कार्य्यमजानताम्।
न विद्यते लोकगुरो! नासते लोकसेतवः॥
यथा वास्तु तथा वास्तु कर्त्तव्यो भगवान् प्रभुः।
मम गावः प्रदीयन्तां ततो गन्तासि सागरम्॥
आत्मा मम हि ता गावो या गावः सत्त्वमव्ययम्।
लोकानां त्वत्प्रसूतानामेकं गोब्राह्मणं स्मृतम्॥
त्रातव्याः प्रथमं गावस्त्रातास्त्रायन्ति या द्विजान्।
गोब्राह्मणपरित्राणात् परित्रातं जगत् भवेत्॥
इत्यभ्युपतिना प्रोक्तो वरुणेनाहमच्युत!।
गवां कारणतत्त्वज्ञः कश्यपे शापमुत्सृजम्॥
येनांशेन हृता गावः कश्यपेन महात्मना।
स तेनांशेन तु महीं गत्वा गोपत्वमेष्यति॥
या च सा सुरभिर्नाम अदितिश्च सुरारणी।
ते पुत्रे तस्य भार्य्ये वै तेनैव सह यास्यतः।
स ताभ्यां सह गोपत्वे कश्यपो भुवि रंस्यते॥
तदस्य कश्यपस्यांशस्तेजसा कश्यपोपमः।
वसुदेव इति ख्यातो गोषु तिष्ठति भूतले॥
गिरिर्गोवर्द्धनो नाम मथुरायास्त्वदूरतः।
तत्रासौ गोष्वभिरतः कंसस्य करदायकः॥
तस्य भार्य्याद्वयञ्चैव अदितिः सुरभिस्तथा।
देवकी रोहिणी चैव वसुदेवस्य धीमतः॥
तत्रावतर लोकानां भवाय मधुसूदन!।
जयाशीर्व्वचनैस्त्वेते वर्द्धयन्ति दिवौकसः॥
आत्मानमात्मना हि त्वमवतार्य्य महीतले।
देवकीं रोहिणीञ्चैव गर्भाभ्यां परितोषय॥")

क्षित्वा, [न्] पुं, (क्षि निवासगत्योः + "शीङ् क्रुशि-रुहिजिक्षिरुधभ्यः क्वनिप्"। उणां ४। ११३। इति क्वनिप् तुक् च।) वायुः। इति सिद्धान्त-कौमुद्यामुणादिवृत्तिः॥

क्षिदः, पुं, (क्षिद् + रक्।) रोगः। सूर्य्यः। विषाणम्। इति संक्षिप्तसारोणादिवृत्तिः॥

क्षिप, य औ नुदि। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-अनिट्।) य, क्षिप्यति। औ, क्षेप्ता। इति दुर्गादासः॥

क्षिप, ग्र ञ औ नुदि। इति कविकल्पद्रुमः॥ (तुदां-उभं-सकं-अनिट्।) नुदि प्रेरणे। ग्र ञ, क्षिपति क्षिपते शरं योधः। औ, क्षेप्ता। इति दुर्गादासः॥

क्षिपः, पुं, (क्षिप् + "इगुपधज्ञाप्रीकिरः कः"। ३। १। १३५। इति कः।) क्षेप्ता। क्षेपणम्। इति व्याकरणम्॥

क्षिपकः, पुं, (क्षिप् + कः ततः संज्ञायां कन्।) योद्धा। इत्युणादिकोषः॥

क्षिपका, स्त्री, (क्षिप् + कन् + टाप् यतो नेत्वम्। "न यासयोः"। ७। ३। ४५। इत्यस्य वार्त्तिके "क्षिपकादीनाञ्च न"। इति कथनात्।) क्षेपणम्। इति व्याकरणम्॥

क्षिपणं, क्ली, (क्षिप् + ल्युट् भावे किच्च।) क्षेपणम्। तत्पर्य्यायः। क्षिपा २। इति जटाधरः॥

क्षिपणिः, पुं, (क्षिप्यते इति। क्षिप् + कर्म्मणि अनिः।) अस्त्रम्। इत्युणादिकोषः॥

क्षिपणिः, स्त्री, (क्षिप्यते असौ अनया वा। क्षिप् + कर्म्मणि करणे वा अनिः।) क्षेपणी। नौकादण्डः। इत्यमरटीकायां भरतः॥ जालविशेषः। मन्तः। अध्वर्य्युः। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, ऋग्वेदे। ४। ४१। ४।
"उतस्य वाजी क्षिपणिं तुरण्यति
ग्रीवायां बद्धो अपिकक्ष आसनि"॥)

क्षिपणी, स्त्री, (क्षिप् + अनिः ङीष्।) क्षिपणिः। इत्यमरटीकायां भरतः॥

क्षिपयुः, पुं, (क्षिप्यति इति। क्षिप् + "अनुङ् नदेश्च"। उणां ३। ५२। इति अनुङ्।) वायुः। इति त्रिकाण्डशेषः॥ (यथा, ऋग्वेदे। ४। ५८। ६।
"सम्यक् स्रवन्ति सरितो न धेना
अन्तर्हृदा मनसा पूयमानाः।
एते अर्षन्त्यूर्म्मयो घृतस्य
मृगा इव क्षिपणोरीषमाणाः"॥)

क्षिपयुः, पुं, (क्षिप् + "कन्युच् क्षिपेश्च"। उणां ३। ५१। इति कन्युच् प्रत्ययः।) वसन्तकालः। इत्युणादिकोषः॥ देहः। सुरभौ त्रि। इति मेदिनी॥

क्षिपा, स्त्री, (क्षिप् + "घिद्विदादिभ्योऽङ्"। ३। ३। १०४। इत्यङ्। ततष्टाप्।) क्षेपणम्। इत्यमरः। ३। २। ११॥ रात्रिः। इति तट्टीकायां भरतः॥

क्षिप्तः, त्रि, (क्षिप् + कर्म्मणि क्तः।) निक्षेपकृतवान्। त्यक्तः। तत्पर्य्यायः। मुक्तः २ नुन्नः ३ अस्तः ४ निर्धुतः ५ विद्धः ६ ईरितः ७। इत्यमरः। ३। १। ८७॥
(उद्धीर्णः। यथा, माघे। ३। ७१।
"क्षिप्ता इवेन्दोः स रुचोधिवेलं
मुक्तावलीराकलयाञ्चकार"॥
कर्त्तरि क्तः। पतितः। यथा, माघे १०। ७७।
"क्षिप्तमायतमदर्शयदुर्व्वीं
काश्चिदामजघनस्य महत्वम्"॥
"रतेषु उर्व्यां क्षिप्तं पतितम्"। इति मल्लिनाथः॥
हतः। यथा, माघे २। ५३।

क्षिप्तः

"केशरी निहतस्तेन क्षिप्तमृगयूथो मृगाधिपः"॥
अवज्ञातः। यथा, भागवते। २। १८। ४८।
"तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि"॥
विक्षिप्तः। यथा, मार्कण्डेये। ८८। १९।
"नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः।
प्रान्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः"॥)
वायुग्रस्तः। क्षेपा इति भाषा। इति लोक-प्रसिद्धः॥

क्षिप्रा, स्त्री, (क्षिप्र + टाप्।) रात्रिः। इति हेमायुधः॥

क्षिप्रुः, त्रि, (क्षिप् + "वसगटिदटिक्षिपेः क्रुः"। ३। २। १४०। इति क्रुप्रत्ययः।) निराकरिष्णुः। निराकरणशीलः। इत्यमरः। ३। १। ३०॥

क्षिप्रं, क्ली, (क्षिप् + "क्षायितञ्चिवच्चीति"। उणां २। १३। इति रक्।) शीघ्रम्। तद्युक्ते त्रि। इत्यमरः। १। २। ६८॥ (यथा, मनुः। ३। १७६। "विनाग्निं व्रजति क्षिप्रमामपात्रमिवाम्भसि"॥ मर्म्मविशेषः। यथा,—"तत्र पादाङ्गुष्ठाङ्गुल्योर्मध्ये क्षिप्रं नाम मर्म्म तत्र विद्धस्याक्षेप-केण मरणम्"॥ इति सुश्रुते शारीरस्थाने षष्ठे-ऽध्याये॥)

क्षिप्रपाकी, [न्] पुं, (क्षिप्रं पच्यतेऽनेन। क्षिप्रं पचति पाचयति वा। पच् + वाऽलकात् घिनुण्।) गर्हभाण्डवृक्षः। इति रत्नमाला॥ (ज्ञातव्या गर्ह-भाण्डशब्दे ऽस्य गुणपर्य्यायाः॥) शीघ्रपाकविशिष्टे त्रि॥

क्षिया, स्त्री, (क्षि क्षये + "घिद्विदादिभ्यो ऽङ्"। ३। ३। १०४। इत्यङ्। टाप् च।) अपचयः। इत्यमरः। ३। २। ७॥

क्षिव, उ निरासे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट् उदित्वात् क्त्वावेट्।) क्ष्वेडी। निरास इह फुत्कारः इति भट्टमल्लः। मुखेन क्ष्वेडादेर्वमन-मिति केचित्। एषक् पाठात् पूर्व्वौ भ्वादिः। क्ष्वेवति। उ, क्ष्वेवित्वा क्ष्वेत्वा। इति दुर्गादासः॥

क्षिव, य उ निरासे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्। उदित्वात् क्त्वावेट्) क्ष्वेडी। य, क्ष्वेव्यति। उ, क्ष्वेवित्वा क्ष्वेत्वा। इति दुर्गादासः॥

क्षी, ञ हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-अनिट्।) ञ, क्षयति क्षयते। इति दुर्गा-दासः॥

क्षीज, ह्रिक्काने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) दीर्घौ। ह्रिक्कानमव्यक्तशब्दः। सखेद-स्वेवाव्यक्तशब्दे क्षीजेः प्रयोगः। इति रक्षितः। क्षीजति सखेदो जनः। इति दुर्गादासः॥

क्षीजनं, क्ली, (क्षीज् + भावे ल्युट्।) कीचकानां नादः। इति हेमचन्द्रः॥

क्षीणः, त्रि, (क्षि + क्तः। "निष्ठायामण्यदर्थे"। ६। ४। ६०। इति दीर्घः। "क्षियोदीर्घात्"। ८। २। ४६। इति निष्ठातस्य नः।) क्षयः। अबलः। तत्पर्य्यायः। दुर्ब्बलः २ क्षुग्नः ३ क्षामः ४ तनुः ५ क्षातः ६ तलिनः ७ अमांसः ८ पेलवः ९। इति हेमचन्द्रः॥ (यथा, गीतायाम् ९। २१।

"ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति" ॥
राजयक्ष्मान्तर्गतरोगविशेषे, पुं ।
"क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटीग्रहः" ॥
अस्य चिकित्सा यथा,—
"क्षामः क्षीणः क्षतोरस्कस्त्वनिद्रः सबलेऽनले ।
घृतक्षीररसेनाद्यात् सक्षौद्रघृतशर्करम् ॥
शर्कराद्य यवक्षौद्रजीवकर्षभकौ मधु ।
घृतक्षीरानुपानं वा लिह्यात् क्षीणः क्षतः क्षयः ॥
क्रव्यादमांसनिर्यूहं घृतभृष्टं पिबेच्च सः" ॥
"क्षामक्षीणक्षयाक्षाणां एतान्येव घृतानि च ।
त्वक्क्षीरीशर्करालाजचूर्णैः पानानि योजयेत् ।
सर्पिर्गुड़ान् समध्वंशान् जग्ध्वा दद्यात्पयोऽनु च ॥
रेतो वीर्यं बलं पुष्टिं तैरानुतरमाप्नुयात्" ॥
"पलाशं सर्पिषा भृष्टं विदारीक्षुरसे घृतम् ।
स्त्रीषु क्षीणः पिबेद्यूषं जीवनं बृंहणं परम् ॥
जीवनीयोपसिद्धं वा घृतभृष्टन्तु जाङ्गलम् ।
रसं प्रयोजयेत् क्षीणो व्यञ्जनार्थे सशर्करम्" ॥
"यद्यत् सन्तर्पणं प्रोक्तमविदाहि हितं लघु ।
अन्नपानं निषेव्यन्तत् क्षतक्षीणैः सुखार्थिभिः" ॥
इति चिकित्साख्याने षोड़शेऽध्याये चरकेणोक्तम्॥)
क्षीणवान्, [त्] त्रि, (क्षि + क्तवतु "क्षियोदीर्घात् । ८ । २ । ४६ । इति निष्ठातस्य नः ।) क्षयविशिष्टः । इति व्याकरणम् ॥
क्षीणाष्टकर्म्मा, [न्] पुं, (क्षीणानि अष्टकर्म्माणि अस्य ।) जिनः । इति हेमचन्द्रः ॥
क्षीब, (व) ऋ ड मदे । इति कविकल्पद्रुमः । (भ्वां-आत्मं-अकं-सेट् ।) मदे मत्तीभावे । ऋ, अचिक्षीबत् । ड, क्षीबते मद्यपः ! इति दुर्गादासः ॥
क्षीबः, त्रि, (क्षिब + "अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः" । ८ । २ । ५५ । इति तलोपे साधुः ।) मत्तः । इत्यमरः ॥ (यथा, रामायणे । ५ । १० । १३ ।
"अथारोहणमासाद्य वेदिकान्तरमाश्रितः ।
क्षीवं राक्षसशार्दूलं प्रेक्षते स महाकपिः" ॥)
क्षीरं, क्ली, (क्षरते अद्यते इति । "क्षरे किच्च" । उणां ४ । ३४ । इति ईरन् उपधालोपे कत्वं धत्वञ्च ।) जलम् । यथा, ऋग्वेदे । १ । १०४ । ३ ।
"अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन् । क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे गिरीणाः" । दुग्धम् । इत्यमरः । २ । ९ । ५१ ॥ (यथा, मनुः । ५ । ९ ।
"क्षीक्षीरञ्चैव वर्ज्यानि सर्व्वमुक्तानि चैव हि" ।)
"आसन्नप्रसवात् क्षीरं पेयूषमुच्यते ।
परतो मोरटं विद्यादप्रसन्नं कषात्मकम्" ॥
इति रत्नमाला ॥
(क्षीरस्य लक्षणं गुणाश्च यथा,—
"अथातः संप्रवक्ष्यामि क्षीरवर्गन्तु वत्सक ! ।
दधिसर्पिर्वसातक्रं तेषां सर्व्वगुणागुणम् ॥
यद्यदाहारजातन्तु रसं क्षीरग्निरानुगम् ।
सरं जलञ्च भुक्तञ्च तथा पित्तेन संयुतम् ॥
पाचितं जाठरे वह्नौ पित्तेन सह मूर्च्छितम् ।
पच्यमानं शिरापाप्तं क्षीरं तद्विद्धि पुत्रक ! ॥
तेन क्षीरमिति ख्यातमग्निसोमात्मकं पयः ।
अमृतं सर्व्वभूतानां जीवनं बलमुत्तमम् ॥
हारीतः संशयापन्नः पप्रच्छ पितरं पुनः ।
कथं रसस्य सम्पत्तिः कथं सञ्जीयते विभो ! ॥
कथं रक्तस्य संस्थाने क्षीरं पाण्डुत्वमीयते ।
कथं तच्च कुमारीणां बन्ध्यानां न कथं भवेत् ॥
एवं पृष्टो महाचार्य्यः प्रोवाच मुनिपुङ्गवः ।
अतिहर्षप्रदं पुत्र ! परिपृष्टं भिषग्वर ! ॥
सिताखिग्धं तथारक्तं पित्तेन पाकतां गतम् ।
रक्तं श्वेतत्वमायाति तथा क्षीरं सितं भवेत् ॥
अपधातुबलं यस्मात् तस्मात् क्षीरं न जायते ।
बन्ध्यानां क्षीरनाशस्तु वातेन परिपूरिताः ॥
क्षीरञ्च न भवेत्तस्माच्चार्त्तवं चाधिकं यतः ।
प्रसूतासु च नारीषु बलेन सह सूयते ॥
तेन स्रोतोविशुद्धिः स्यात् क्षीरमाशु प्रवर्त्तते ।
तस्मात् सद्यः प्रसूतायां जायते श्लैष्मिकं पयः ॥
तेन काठिन्यमायाति तस्मात्तत् परिवर्जयेत् ।
श्रेयस्कामिततं नार्य्या बलक्षोभनाशनम् ॥
पयस्विदोषशमनं दृष्यञ्चाग्निप्रवर्द्धनम्" ॥
अथ प्राभातिकक्षीरगुणाः ।
"निशा शीतांशुसंशीतं निद्रालस्याश्रमावहम् ।
कफलत्सघनं शीतं क्षीरं प्राभातिकं भवेत्" ॥
अथ दिनक्षीरगुणाः ।
"वासरे सूर्य्यसन्तापात् सदोष्णं कफवातजित् ।
हितं तत्पित्तशमनं सुशीतं भोजने निशि" ॥
अथ क्षीरपानविधिः ।
"क्षीणानां दुर्ब्बलानाञ्च तथाजीर्णज्वरार्दिते ।
दीप्ताग्नीनामतन्द्राणां श्रमशोषविकारिणाम् ॥
राजयक्ष्मयुतानाञ्च क्षीरपानं विधीयते ॥
न शुष्कं लवणैर्युक्तं क्षीरञ्चाक्षेन वा पुनः ।
करोति कुष्ठं त्वग्दोषं तस्मान्नैव हितं मतम्" ॥
इति प्रथमे स्थाने ऽष्टमे ऽध्याये हारीतेनोक्तम् ॥
"अथ क्षीराणि वक्ष्यन्ते कर्म्म चैषां गुणाश्च ये ॥
अविक्षीरमजाक्षीरं गोक्षीरं माहिषञ्च यत् ।
उष्ट्रीणामथ नागीनां वड़वायाः स्त्रियास्तथा ॥
प्रायशो मधुरं स्निग्धं शीतं स्तन्यं पयो मतम् ।
प्रीणनं बृंहणं हृद्यं मेध्यं बल्यं मनस्करम् ॥
जीवनीयं श्रमहरं श्वासकासनिबर्हणम् ।
हन्ति शोणितपित्तञ्च सन्धानं विहतस्य च ॥
सर्व्वप्राणभृतां सात्म्यं श्रमनं शोधनन्तथा ।
हृद्यान्नं दीपनीयञ्च श्रेष्ठं क्षीणक्षतेषु च ॥
पाण्डुरोगेऽक्षपित्ते च शोथे गुल्मे तथोदरे ।
अतीसारे ज्वरे दाहे क्षयथौ च विधीयते ॥
योनिशुक्रप्रदोषे च मूत्रेषु प्रदरेषु च ।
पुरीषे ग्रथिते पथ्यं वातपित्तविकारिणाम् ॥
नस्याक्तेपावगाहेषु वमनास्थापनेषु च ।
विरेचने स्नेहने च पयः सर्व्वत्र युज्यते" ॥
इति चरके सूत्रस्थाने प्रथमेऽध्याये ॥
प्राणिभेदेनास्य गुणविशेषा यथा,—
"स्वादु शीतं मृदु स्निग्धं बहलं श्लक्ष्णपिच्छिलम् ।
गुरु मन्दं प्रसन्नञ्च गव्यं दशगुणं पयः ॥
तदेव गुणमेवौजः सामान्यादभिवर्द्धयेत् ।
प्रवरं जीवनीयानां क्षीरमुक्तं रसायनम् ॥
महिषीणां गुरुतरं गव्याच्छीततरं पयः ।
स्नेहानूनमनिद्राय हितमत्यग्नये च तत् ॥
रूक्षोष्णं क्षीरमुष्ट्रीणामीषत्सलवणं लघु ।
श्रेष्ठं वातकफानाह क्रिमिशोफोदरार्शसाम् ॥
बल्यं स्थैर्य्यकरं सर्व्वमुष्णक्षैकशफं पयः ।
साम्लं सलवणं रूक्षं श्लाखावातहरं लघु ॥
छागं कषायमधुरं शीतं ग्राहि पयो लघु ।
रक्तपित्तातिसारघ्नं क्षयकाश्वज्वरापहम् ॥
हिक्काश्वासकरन्तूष्णं पित्तश्लेष्मलमाविकम् ।
हस्तिनीनां पयो बल्यं गुरु स्थैर्य्यकरं परम् ॥
जीवनं बृंहणं साम्लं स्नेहनं मानुषं पयः ।
लवणं रक्तपित्ते च तर्पणत्वाच्छिशूलिनाम्" ॥
इति च तत्र सूत्रस्थाने २७ अध्याये ॥
"सर्व्वप्राणभृतां तस्मात् सात्म्यं क्षीरमिहोच्यते" ॥
तच्च सर्व्वमेव क्षीरं प्राणिनामप्रतिषिद्धं जातिसात्म्यात् । वातपित्तश्लेष्मशोणितमानसविकारेष्वविरुद्धम् । जीर्णज्वर-कास-श्वास-श्लेष्म-क्षय-गुल्मोन्मादोदर-मूर्च्छा-भ्रम-मद-दाह-पिपासा-हृद्रोग-पाण्डुरोग-ग्रहणीदोषार्शःशूलोदावर्त्तातिसारप्रवाहिकायोनिरोग-गर्भस्राव-रक्तपित्तश्रमक्लमहरं पाप्मापहम् बल्यं हृद्यं वाजीकरणं रसायनं मेध्यं सन्धानं स्थापनं वयःस्थापनमायुष्यं जीवनं बृंहणं वमनं विरेचनञ्च तुल्यगुणत्वाच्चौजसो वर्द्धनमिति बालवृद्धक्षतक्षीणानां क्षुधावयोव्यायामकर्शितानाञ्च पथ्यतमम् ।
"गोक्षीरमभिष्यन्दि स्निग्धं गुरु रसायनम् ।
रक्तपित्तहरं शीतं मधुरं रसपाकयोः ॥
जीवनीयं यथावातपित्तघ्नं परमं स्मृतम् ।
गव्यतुल्यगुणत्वाच्च विशेषाच्छोषिणां हितम् ॥
दीपनं लघु संग्राहि श्वासकासास्रपित्तनुत् ।
अजानामल्पकायत्वात् कटुतिक्तनिषेवणात् ॥
नात्यम्बुपानाद्व्यायामात् सर्व्वव्याधिहरं पयः ।
रूक्षोष्णं लवणं किञ्चिदौष्ट्रं स्वादुरसं लघु ॥
शोषगुल्मोदरार्शोघ्नं क्रिमिकुष्ठविषापहम् ।
आविकं मधुरं स्निग्धं गुरु पित्तकफावहम् ॥
पथ्यं केवलवातेषु कासे चानिलसम्भवे ।
महाभिष्यन्दि मधुरं माहिषं वह्निनाशनम् ॥
निद्राकरं शीतकरं गव्यात्स्निग्धतरं गुरु ।
उष्णाक्षैकशफं बल्यं श्लाखावातहरं पयः ॥
मधुराम्लरसं रूक्षं लवणानुरसं लघु ।
नार्य्यास्तु मधुरं स्तन्यं कषायानुरसं हिमम् ॥
नस्याश्चोतनयोः पथ्यं जीवनं लघु दीपनम् ।
हस्तिन्या मधुरं हृद्यं कषायानुरसं गुरु ॥
स्निग्धं स्थैर्य्यकरं शीतं चक्षुष्यं बलवर्द्धनम् ।
प्रायः प्राभातिकं क्षीरं गुरु विद्यात् शीतलम् ॥
रात्रौ सोमगुणत्वाच्च व्यायामाभावतस्तथा ।
दिवाकराभितप्तानां व्यायामानिलसेवनात् ॥
वातानुलोमिश्लाघ्यत्वात् चक्षुष्यत्वाच्च शार्ङ्गिकम् ।
पयोऽभिष्यन्दिगुर्व्वाम प्रायशः परिकीर्त्तितम् ॥
तदेवोक्तं लघुतरमभिष्यन्दि वैद्यसम् ।

वर्ज्जयित्वा स्त्रियः स्तन्यमामभेव हि तद्धितम् ॥
धारोष्णं गुणवत् क्षीरं विपरीतमतोऽन्यथा ।
तदवातिगृहीतं सर्व्वं गुरु दृंहणमुच्यते ॥
अनिष्टगन्धमस्वच्छं विवर्णं विरसञ्च यत् ।
वर्ज्यं सलवणं क्षीरं यच्च विग्रथितं भवेत् ॥
इति क्षीरवर्गः ॥
इति सूत्रस्थाने पञ्चचत्वारिंशत्तमे ऽध्याये सुश्रुतेनोक्तम् ॥ * ॥)

दुग्धधारास्नानफलम् । यथा, वराहपुराणे ।
"धेनुस्तनादिनिष्क्रान्तां धारां क्षीरस्य यो नरः ।
शिरसा प्रतिगृह्णाति स पापेभ्यः प्रमुच्यते" ॥
क्षीरेण विष्णोः स्नाने फलम् । यथा,—
"येषु क्षीरवहा नद्यो ह्रदाः पायसकर्दमाः ।
तान् लोकान् पुरुषा यान्ति क्षीरस्नापनका हरेः ॥
आह्लादं निर्वृतिं स्वास्थ्यं आरोग्यं चानुरूपताम् ।
सप्तजन्मसवाप्नोति क्षीरस्नानपरो हरेः ॥
दध्यादीनां विकाराणां क्षीरतः सम्भवो यथा ।
तथैवाग्नेयकामानां क्षीरस्नपनमुत्तमम् ॥
यथा च विमलं क्षीरं यथा निर्वृतिकारकम् ।
तथास्य विमलं ज्ञानं भविष्यति फलप्रदम् ॥
ग्रहानुकूलतां पुष्टिं प्रियत्वञ्चाखिले जने ।
करोति भगवान् विष्णुः क्षीरस्नपनतोषितः ॥
सर्व्वोऽस्य खिन्नतामेति दृष्टमात्रे प्रसीदति ।
गृहीतक्षीरेण देवेशे स्नापिते मधुसूदने" ॥
इत्याद्ये वह्निपुराणे क्रियायोगनामाध्यायः ॥ * ॥

क्षीरपाकविधिर्यथा,—
"क्षीरमष्टगुणं दद्यात् क्षीराक्षीरं चतुर्गुणम् ।
क्षीरावशेषं तत्पीतं सूक्ष्ममामोद्भवं जयेत्" ॥
इति भावप्रकाशः ॥ सरलद्रवः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ५२ । ६६ ।
"जटाः कृत्वा गमिष्यामि न्यग्रोधक्षीरमानय ।
तत्क्षीरं राजपुत्राय गुहः क्षिप्रमुपाहरत्" ॥)

क्षीरकः, पुं, (क्षीरमिव कायति प्रकाशते । कै + कः ।) क्षीरमोरटलता । इति रत्नमाला ॥

क्षीरकचुकी, स्त्री, (क्षीरं क्षीरप्रधानं कञ्चुकं आवरणं तदिव त्वगस्याः ।) क्षीरीवृक्षः । इति रत्नमाला ॥

क्षीरकण्ठः, पुं, (क्षीरं कण्ठेऽस्य ।) बालकः । यथा,—
"बालः पाकः शिशुर्डिम्भः पोतः शावः स्तनन्धयः ।
पृथुकोऽर्भोत्तानशयः क्षीरकण्ठः कुमारकः" ॥
इति हेमचन्द्रः ॥

क्षीरकण्टकः, पुं, (क्षीरकण्ट + स्वार्थे कन् ।) शिग्रुः । इति चिकित्साशब्देषः ॥

क्षीरकन्दः, पुं, (क्षीरं कन्दे यस्य । क्षीरः क्षीरप्रधानः कन्दोऽस्य वा ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

क्षीरकन्दा, स्त्री, (क्षीरकन्द + टाप् ।) क्षीरवल्ली । काल भूमि कुष्माण्ड इति ख्यातः । यथा,—
"क्षीरवल्ली क्षीरकन्दा महाश्वेतर्क्षगन्धिका" ॥
इति जटाधरः ॥

क्षीरकाकोलिका, स्त्री, (क्षीरवत् शुभ्रा काकोली । ततः स्वार्थे संज्ञायां स्वल्पार्थे वा कन् टाप् पूर्व्वह्रस्वश्च ।) क्षीरकाकोली । इति शब्दचन्द्रिका ॥

क्षीरकाकोली, स्त्री, (क्षीरमिव शुभ्रा काकोली ।) अष्टवर्गे प्रसिद्धौषधिविशेषः । तत्पर्य्यायः । महावीरा २ सुकोली ३ पयस्विनी ४ । इति रत्नमाला ॥ क्षीरशुक्ला ५ पयस्या ६ क्षीरविषाणिका ७ जीववल्ली ८ जीवशुक्ला ९ । यथा, राजनिर्घण्टे ।
"रसवीर्य्यविपाकेषु काकोल्याः सदृशी च सा" ॥
अथ काकोल्योरुत्पत्तिलक्षणनामगुणाः ।
"जायते क्षीरकाकोली महामेदोद्भवस्थले ।
यत्र स्यात् क्षीरकाकोली काकोली तत्र जायते ॥
पीवरी सदृशः कन्दः सक्षीरः प्रियगन्धवान् ।
सा प्रोक्ता क्षीरकाकोली काकोली लिङ्गमुच्यते ॥
यथा स्यात्क्षीरकाकोली काकोल्यपि तथा भवेत् ।
एषा किञ्चित् भवेत् कृष्णा भेदोऽयमुभयोरपि ।
काकोली वायसोली च वीरा कायस्थिका तथा ।
सा शुक्ला क्षीरकाकोली वयस्था क्षीरवल्लिका ॥
कथिता क्षीरिणी धीरा शुक्लक्षीरा पयस्विनी ।
काकोलीयुगलं शीतं शुक्लं मधुरं गुरु ।
दृंहणं वातदाहास्रपित्तश्लेष्मज्वरापहम्" ॥
काकोली क्षीरकाकोलीस्थाने अश्वगन्धामूलम् । इति भावप्रकाशः ॥ (शुक्रजननान्तर्गतौषधविशेषः । यथा । "जीवकर्षभककाकोली क्षीरकाकोली मुद्गपर्णी माषपर्णी मेदा वृद्धदारुहा जटिला कुलिङ्गा इति दशेमानि शुक्रजननानि भवन्ति ॥ इति चरके सूत्रस्थाने ४ अध्याये ॥)

क्षीरकाण्डकः, पुं, (क्षीरयुक्तं काण्डं यस्य । ततः कप् ।) खड्गी । अर्कवृक्षः । इति राजनिर्घण्टः ॥

क्षीरकाष्ठा, स्त्री, (क्षीरमयं क्षीरप्रधानं वा काष्ठं यस्याः ।) वटीवृक्षः । इति राजनिर्घण्टः ॥

क्षीरकीटः, पुं, (क्षीरजातः कीटः क्षीरस्य कीटो वा ।) दुग्धजातकीटः । तत्पर्य्यायः । कालिका २ । इति हारावली ॥

क्षीरज, क्ली, (क्षीराज्जायते । जन् + डः ।) दधि । इति राजनिर्घण्टो हेमचन्द्रश्च ॥ क्षीरजातद्रव्ये त्रि ॥ (दधिशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

क्षीरदलः, पुं, (क्षीरयुक्तं दलं यस्य क्षीरं दले यस्य वा ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥

क्षीरद्रुमः, पुं, (क्षीरप्रधानो द्रुमः ।) अश्वत्थः । इति राजनिर्घण्टः ॥

क्षीरधेनुः, स्त्री, (क्षीरेण निर्म्मिता धेनुः ।) दानार्थक्षीरनिर्म्मितधेनुः । यथा,—
होतोवाच ।
"क्षीरधेनुं प्रवक्ष्यामि तां निबोध नराधिप ! ।
अनुलिप्ते महीपृष्ठे गोमयेन नृपोत्तम ! ॥
गोचर्म्ममात्रमानेन कुशानास्तीर्य्य सर्व्वतः ।
तत्रोपरि महाराज ! न्यसेत् कृष्णाजिनं बुधः ॥
तत्रोपरि कुण्डलिकां गोमयेन कृतामपि ।
क्षीरकुम्भं ततः स्थाप्य चतुर्थांशेन वत्सकम् ॥
सुवर्णमुखपृष्ठाङ्घ्रि चन्दनागुरुकाणि च ।
प्रक्षालपत्रश्रवणं तिलपात्रोपरि न्यसेत् ॥
मुखं गुडमयं तस्या जिह्वा शर्करया तथा ।
फलप्रक्षालदशनां मुक्ताफलमयेक्षणाम् ॥
इक्षुपादां दर्भरोमां सितकम्बलकम्बलाम् ।
ताम्रदृष्टीं कांस्यदोहां पट्टसूत्रमयीं तथा ॥
पुच्छञ्च नृपशार्दूल ! नवनीतमयस्तनीम् ।
स्वर्णशृङ्गां रौप्यखुरां पद्मरत्नसमन्विताम् ॥
चत्वारि तिलपात्राणि चतुर्दिक्ष्वपि स्थापयेत् ।
आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैः समर्चयेत् ॥
धूपदीपादिकं कृत्वा ब्राह्मणाय निवेदयेत् ।
आच्छाद्यालङ्कृतां कृत्वा मुद्रिकाकर्णकुण्डलैः ।
पट्टकोपानहौ छत्रं दत्त्वा दानं समर्पयेत् ॥
अनेनैव तु मन्त्रेण क्षीरधेनुं प्रसादयेत् ॥
या धेनुः सर्व्वभूतानामित्यादि नरपुङ्गव ! ।
आप्यायस्वेति मन्त्रेण क्षीरधेनुं प्रसादयेत् ॥
यो गृह्णाति पठेन्मन्त्रं ग्राहको राजसत्तम ! ।
दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ॥
एतां हेमसहस्रेण शतेनाथ सपक्षितः ।
घृताढ्यमधवाप्यङ्ग तथाढ्यञ्च यथेच्छया ॥
दत्त्वा धेनुं महाराज ! गृहणु तस्यापि यत् फलम् ।
षष्टिवर्षसहस्रन्तु रुद्रलोके महीयते ॥
पितृपितामहैः सार्द्धं ब्रह्मणो भवनं व्रजेत् ।
दिव्यं विमानमारूढो दिव्यस्रगनुलेपनः ॥
क्रीड़ित्वा सुचिरं कालं विष्णुलोकं स गच्छति ।
द्वादशादित्यसङ्काशे विमाने वरमण्डिते ॥
गीतवादित्रनिर्घोषैरप्सरोगणसेविते ।
तत्रोष्य विष्णोः सौराज्यं विष्णासायुज्यतां व्रजेत् ॥
य इदं श्रावयेद्राजन् पठेद्वा भक्तिभावितः ।
सर्व्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति" ॥
इति वाराहे श्वेतोपाख्याने क्षीरधेनुमाहात्म्यनामाध्यायः ॥

क्षीरनाशः, पुं, (क्षीरं नाशयतीति । नश् + णिच् "कर्म्मण्यण्" । ३ । २ । १ । इत्यण् ।) शाखोटवृक्षः । इति राजनिर्घण्टः ॥ (क्षीरस्य नाशः इति दुग्धत्वयञ्च ॥)

क्षीरनीर, क्ली, (क्षीरमिश्रं नीरमिव एकीभूतप्रायत्वात् तथात्वम् ।) आलिङ्गनम् । इति शब्दमाला ॥ (क्षीरञ्च नीरञ्च द्वयोः समाहारः ।) दुग्धजलञ्च ॥
(यथा, वेतालपञ्चविंशतौ । १२ । १८ ।
"क्षीरनीरसमं मित्रं प्रशंसन्ति विचक्षणाः ।
नीरं क्षीरायते तत्र वह्नौ तप्यति तत्पयः" ॥)

क्षीरपर्णी, [न्] पुं, (क्षीरयुक्तं पर्णं अस्यास्तीति । इनिः ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥
(विवृतिरस्यार्कशब्दे बोद्धव्या ॥)

क्षीरपाणं,) क्ली, (पीयते इति । पा + भावे ल्युट
क्षीरपानं,) क्षीरस्य पानम् । "वा भावकरणयोः" । ८ । ४ । १० । पाक्षिको णत्वम् ।) दुग्धपानम् । दुग्धपानयुक्तदेशे तत्कर्त्तरि च त्रि । यथा । देशे पानस्य । पूर्व्वपदस्थितषकारेफऋवर्णेभ्यः परस्य पानस्य नस्य णः स्यात् देशे वाच्ये । पीयते यत्तत् पानं कर्म्मण्यनट् । क्षीरं पानं येषां ते क्षीरपाणा उशीनराः । सौवीरपाणा वाह्लीकाः । कषायपाणा गान्धाराः । उशीनरादि-

शब्दानां देशवादित्वेऽपि तन्निवाससम्बन्धेन मनुष्येषु प्रवृत्तिः। अथवा क्षीरं पानं यत्र इति व्युत्पत्त्या देशो वाच्यः। भावकरणयोरनटौ वा। क्षीरपाणं क्षीरपानम्। क्षीरं पीयतेऽनयेति क्षीरपात्री क्षीरपानी पात्री। इति मुग्धबोधटीकायां दुर्गादासः॥

क्षीरपायी, [न्] त्रि, (क्षीरं पिबति इति। "बऊलमाभीक्ष्ण्ये"। ३।२।८१। सुप्युपदे णिनिः।) दुग्धपानकर्त्ता। यथा। "क्षीरपायीत्यादिकस्तु प्रकृत्यर्थावच्छिन्नकृदन्तार्थस्यान्वयबोधे समर्थोऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य ततः पानशीलसामान्यस्याप्रत्ययात्"। इति शब्दशक्तिप्रकाशिका॥

क्षीरमोरटः, पुं, (क्षीरवत् स्वाद्यः स्वादुर्वा मोरटः।) लताभेदः। तत्पर्य्यायः। सितद्रुः २ सुदलः ३ क्षीरकः ४। इति रत्नमाला। अन्यत् मोरटशब्दे द्रष्टव्यम्॥

क्षीरवल्ली, स्त्री, (क्षीरयुक्ता क्षीरप्रधाना वा वल्ली।) क्षीरविदारी। इति राजनिर्घण्टः॥
(यथास्याः पर्य्यायाः।
"विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता स्मृता॥
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वाराहवदना यष्टिर्वदरेत्यपि कथ्यते"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

क्षीरविक्रतिः, स्त्री, (क्षीरं विक्रतिर्विकारोऽस्याः क्षीरवत् विक्रतिर्निर्य्यासोऽस्याः वा।) कूर्चिका। इत्यमरः। २।९।४४॥ क्षीरसा इति भाषा॥

क्षीरविदारिका, स्त्री, (क्षीरयुक्ता क्षीरवत् शुभ्रा वा विदारिका।) क्षीरविदारी। इति शब्दरत्नावली॥

क्षीरावदारी, स्त्री, (क्षीरवत् शुभ्रा क्षीरप्रचुरा वा विदारी।) कृष्णभूमिकुष्माण्डः। तत्पर्य्यायः। महाश्वेता २ ऋक्षगन्धिका ३। इत्यमरः। इक्षुवल्लरी ५ इक्षुवल्ली ६ क्षीरकन्दः ७ क्षीरवल्ली ८ पयस्विनी ९ क्षीरशुक्ला १० क्षीरलता ११ पयःकन्दा १२ पयोलता १३ पयोविदारिका १४। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। कषायत्वम्। तिक्तत्वम्। पित्तशूल मूत्रमेहाभयनाशित्वञ्च। (विदारीशब्देऽस्या अपर गुणा ज्ञेयाः॥)
"क्षीरकन्दो द्विधा प्रोक्तो विनालस्तु सनालकः।
विनालो रोगहर्त्ता स्यादयःस्तम्भी सनालकः"॥
इति राजनिर्घण्टः॥

क्षीरविषाणिका, स्त्री, (क्षीरमिव शुभ्रं क्षीरयुक्तं वा विषाणं अग्रभागो यस्याः ततः कन् टाप् च।) अस्थिकाली। क्षीरकाकोली। इति राजनिर्घण्टः॥

क्षीरवृक्षः, पुं, (क्षीरमयः क्षीरप्रधानो वा वृक्षः।) उडुम्बरवृक्षः। इति जटाधरः॥ क्षीरिका। इति भरतः॥ राजादनी। इति राजनिर्घण्टः॥ (यथा, सुश्रुते २७ अध्याये चिकित्सास्थाने।
"क्षीरवृक्षकषायैर्वा क्षीरेण च विमिश्रितैः"॥
राजादन्यर्थे पर्य्याया यथा,—
"राजादनः क्षीरवृक्षः पालाशी वानरप्रियः"॥
इति वैद्यकरत्नमालायाम्॥)

क्षीरशरः, पुं, (क्षीरं दुग्धं शीर्य्यतेऽस्मात् अत्र वा। शॄ + अपादानेऽधिकरणे वा अप्। क्षीरं शृणाति विकृतीकरोतीति। शॄ + कर्त्तरि अच्।) दधियोगात् प्रक्षोभ्यदुग्धजातः। छाना इति भाषा। तत्पर्य्यायः। आमिक्षा २ पयस्या ३। इति हेमचन्द्रः॥

क्षीरशीर्षः, पुं, (क्षीरं शीर्षेऽस्य।) श्रीवासः। इति राजनिर्घण्टः॥

क्षीरशुक्ला, स्त्री, (क्षीरवत् शुभ्रा शुक्ला।) क्षीरविदारी। क्षीरकाकोली। इति राजनिर्घण्टः॥ (क्षीरविदारीशब्दे विवरणमस्या ज्ञेयम्॥)

क्षीरशुक्लः, पुं, (क्षीरवत् शुक्लः।) जलकुष्माण्डः। पानिफल इति भाषा। इति शब्दचन्द्रिका॥ राजादनी। क्षीरशी इति भाषा। इति राजनिर्घण्टः॥

क्षीरशुक्ला, स्त्री, (क्षीरमिव शुक्ला।) शुक्लभूमिकुष्माण्डः। इत्यमरः। २। ४। ११०॥
(यथास्याः पर्य्यायाः।
"क्षीरशुक्ला विदारीक्षुविदारी च पलाशिका।
प्रसिद्धो भूमिकुष्माण्डो विदारीकन्द इत्यपि"॥
इति वैद्यकरत्नमालायाम्॥
"विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता स्मृता।
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वाराहवदना यष्टिर्वदरेत्यपि कथ्यते"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"जीवकर्षभकौ मेदां आवणी कर्कटाङ्गयम्।
मुद्गमाषाख्यपर्णौ च महतौ आवणीन्तथा"॥
काकोलीं क्षीरकाकोलीं द्वयं क्षिप्तरुहान्तथा।
क्षीरशुक्लांपयस्याञ्च यष्ट्याह्वं विधिना पिबेत्।
वातपित्तहितान्येतान्यादौनि तु कफापहे"॥
इति चरके कल्पस्थाने ७ अध्यायः॥)

क्षीरसः, पुं, (क्षीरं स्यतीति। सो + कः।) क्षीरसारः। इति राजनिर्घण्टः॥

क्षीरसन्तानिका, स्त्री, (क्षीरस्य दुग्धस्य सन्तानिका इव।) दुग्धविकारविशेषः। छाना इति नट्क्षीर इति च भाषा। अस्या गुणाः। "क्षीरसन्तानिका कृष्णा स्निग्धा पित्तानिलापहा"। इति राजवल्लभः॥

क्षीरसमुद्रः, पुं, (क्षीरतुल्यः स्वादुरसः क्षीरमयो वा समुद्रः।) दुग्धसागरः। स तु श्वेतद्वीपे वर्त्तते। यथा। क्षीरसमुद्राय नमः श्वेतद्वीपाय नमः इत्यादि पीठन्यासप्रकरणे तन्त्रसारः॥

क्षीरसागरसुता, स्त्री, (क्षीरसागरस्य क्षीरोदसमुद्रस्य सुता।) लक्ष्मीः। इति कविकल्पलता॥

क्षीरसारः, पुं, (क्षीरस्य दुग्धस्य सारः। यद्वा क्षीरं सरति प्राप्नोति कारणत्वेन इति। क्षीर + सृ + "कर्म्मण्यण्"। ३। २। १। इति अण्।) क्षीरविशेषः। पालजिनु इति हिन्दी भाषा। तत्पर्य्यायः। क्षीरसः २। यथा,—
"ईषच्छ्लेष्मकरं गौल्यं पित्तघ्नं तर्पणं गुरु।
पुष्टि चैवाभिधा तस्य क्षीरसारस्य क्षीरसः"।
इति राजनिर्घण्टः॥

क्षीरस्फटिकः, पुं, (क्षीरवत् शुभ्रः स्फटिकः।) क्षीरवर्णस्फटिकविशेषः। यथा,—
"सूर्य्यकान्तः सूर्य्यमणिः सूर्य्याश्मा दहनोपलः।
चन्द्रकान्तश्चन्द्रमणिश्चान्द्रश्चन्द्रोपलश्च सः॥
क्षीरतैलस्फटिकाभ्यामन्यौ स्वस्फटिकाविमौ"॥
इति हेमचन्द्रः॥

क्षीरस्रवः पुं, (क्षीरस्य स्रवः कासोत्थश्लेष्मा इव। घनीभूतत्वात्तथात्वम्।) दुग्धपाषाणः। इति राजनिर्घण्टः॥

क्षीरा, स्त्री, (क्षीरवर्णोऽस्त्यस्याः इति "अर्शआदिभ्योऽच्"। ५। २। १२७। इत्यच्। ततष्टाप्।) काकोली। इति राजनिर्घण्टः॥ (काकोलीशब्देऽस्या गुणादयो ज्ञातव्याः॥)

क्षीराब्धिः, पुं, (क्षीरमयोऽब्धिः क्षीरस्याब्धिर्वा।) क्षीरसमुद्रः। इति शब्दरत्नावली॥

क्षीराब्धिज, क्ली, (क्षीराब्धेः क्षीरोदसागरात् जायते इति। जन् + डः।) सामुद्रलवणम्। मौक्तिकम्। इति मेदिनी॥

क्षीराब्धिजः, पुं, (क्षीराब्धेर्जायते इति। जन् + डः।) चन्द्रः। इति मेदिनी॥

क्षीराब्धिजा, स्त्री, (क्षीराब्धिज + टाप्।) लक्ष्मीः। इति मेदिनी॥ (यथा, भागवते ८। ८। ८।
"ततश्चाविरभूत्साक्षात् श्रीरमा भगवत्परा।
रञ्जयन्ती दिशः कान्त्या विद्युत्सौदामनी यथा"॥)

क्षीराब्धितनया, स्त्री, (क्षीराब्धेः तनया कन्या।) लक्ष्मीः। इत्यमरः। १। १। २९॥

क्षीराविका, स्त्री, (क्षीरं अवतीति। "कर्म्मण्यण्"। ततो ङीप् ततः स्वार्थे कन् टापि पूर्ब्बह्रस्वः।) क्षीराबी। इति शब्दरत्नावली॥

क्षीरावी, स्त्री, (क्षीरं अवतीति "कर्म्मण्यण्"। ३। २। १। इत्यण् ङीप् च।) दुग्धिका। इत्यमरः। २।४।१००॥ तत्पर्य्यायः। ग्राहिणी २ कच्छुरा ३ तामूला ४ मरुद्भवा ५। इति रत्नमाला॥ हे क्षीराग्नि इति ख्यातायाम्। इयञ्च वकुलपत्रतुल्यपत्रा लताछेदे क्षीरं स्रवतीति सुभूतिः। तन्मते दुद्दिया क्षीरा इति ख्यातायामित्यनुमीयते। हे क्षीरकाकोल्यामिति स्वामी। क्षीरमवति रक्षति क्षीरावी अव रक्षे भण् ईप्। दुग्धमस्त्यस्याः दुग्धिका विकारसंज्ञेति णिजन्तः। इति भरतः॥ अन्यद्दुग्धिकाशब्दे द्रष्टव्यम्॥

क्षीराङ्कः, पुं, (क्षीरं आङ्क्यते स्पर्द्धते इति। कृ + कः।) सरलवृक्षः। इति चिकित्साङ्कशेषः॥

क्षीरिका, स्त्री, (क्षीरवत् स्वादोऽस्त्यस्य इति ठन्।) क्षीरीवृक्षः। क्षीरखर्জ্জूर इति पिण্ডखर্জ্জूर इति च केचित्। तत्पर्य्यायः। राजादनः २ फलाध्यक्षः ३। इत्यमरः। २।४।४५॥ राजातनः ४ राजादनफलम् ५ अध्यक्षम् ६ मधुका ७ क्षीरवृक्षः ८ पलाशी ९ मर्कटप्रियः १० गुरुस्कन्धः ११ श्लेष्मला १२ व्रातपत्री १३ लघा १४ मौलिकाजाती १५। इति भरतधृतवाचस्पतिः॥ क्षीरिवृक्षः १६ वानरप्रियः १७। इति रत्नमाला॥ राजन्यः १८ प्रियदर्शनः १९ दृढ़स्कन्धः २० कपीठः २१। इति जटा-

धरः ॥ वरादनम् २२ क्षीरी २३ क्षीरी [न्] २४ ।
इति शब्दरत्नावली ॥ अस्याः फलगुणाः ।
"क्षीरिकायाः फलं पक्वं गुरु विष्टम्भि शीतलम् ।
कषायं मधुरं साम्लं नातिवातप्रकोपणम्" ॥
इति राजवल्लभः ॥ अपि च ।
"क्षीरिकायाः फलं दृष्यं बल्यं स्निग्धं हिमं गुरु ।
दृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयापहम्" ॥
इति भावप्रकाशः ॥ अन्यत् राजादनीशब्दे द्रष्टव्यम् ॥ * ॥ परमान्नम् । इति राजनिर्घण्टः ॥
("क्षीरिका मधुरा चैते फलवर्गे प्रकीर्त्तिताः" ॥
इति हारीते प्रथमस्थाने १० अध्याये ॥
परमान्नार्थे पर्य्यायाः पाकप्रकारस्यास्या यथा,—
"पायसं परमान्नं स्यात् क्षीरिकापि तदुच्यते ।
गुडेऽर्द्धपक्वे दुग्धे तु घृतात्तांस्तण्डुलान् पचेत् ॥
ते सिद्धाः क्षीरिका ख्याता सशिताज्ययुतोत्तमा" ॥
गुणाश्च यथा,—
"क्षीरिका दुर्ज्जरा प्रोक्ता वृंहणी बलवर्द्धिनी" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)

क्षीरिणी, स्त्री, (क्षीरं क्षीरसदृशो निर्य्यासोऽस्यस्य इति इनिः । ततः ङीप् ।) वृक्षविशेषः । तत्पर्य्यायः । काञ्चनक्षीरी २ कर्षणी ३ षट्कर्णिका ४ विल्वदुग्धा ५ हैमवती ६ हिमदुग्धा ७ हिमावती ८ हिमाद्रिजा ९ पीतदुग्धा १० यवचिक्षी ११ हिमोद्भवा १२ हैमी १३ हिमजा । १४ । अस्या गुणाः ।
"क्षीरिणी तिक्तशीता च रेचनी श्लेष्मतापनुत् ।
कृमिदोषकफघ्नी च पित्तज्वरहरा परा" ॥
इति राजनिर्घण्टः ॥ * ॥ वराहक्रान्ता । इति शब्दचन्द्रिका ॥ कुटुम्बिनी । काश्मरी । दुग्धिका । इति च राजनिर्घण्टः ॥
(व्यवहारोऽस्या यत्र तत्र यथा ।
"तथादन्तीद्रवन्त्योः स्यादत्यन्तं जगन्ययोः ।
क्षीरिण्या नीलिकायाश्च तथैव च करञ्जयोः ॥
मसूरविदलायाश्च प्रत्यक् श्रेष्ठास्तथैव च ।
विड्वराहार्द्रा शुष्कस्तेन तद्वत् साध्यं घृतं पुनः ।
शुष्किणी सप्तलाधात्री कषाये साधयेद्घृतम्" ॥
इति कल्पस्थाने ११ अध्याये चरकेणोक्तम् ॥)

क्षीरिवृक्षः, पुं, (क्षीरी क्षीरयुक्तः वृक्षः ।) क्षीरयुक्तपञ्चप्रकारवृक्षः । यथा,—
"न्यग्रोधोदुम्बराश्वत्थपारिभद्रप्लक्षपादपाः ।
पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक्पल्लवफलम्" ॥
केचित्तु पारिभद्रस्थाने "शिरीषं वेतसं परे" ।
वदन्तीति श्लेषः । अस्य गुणाः ।
"क्षीरिवृक्षा हिमा वर्ण्या योनिरोगव्रणापहाः ।
रूक्षाः कषाया मेदोघ्ना विसर्पामयनाशनाः ।
श्लेष्मपित्तकफास्रघ्नाः स्तन्या मन्दाग्नियोजकाः" ॥
एषां त्वग्गुणाः ।
"त्वक्पक्वं हिमं याहि व्रणश्लेष्मविसर्पजित्" ॥
तेषां पत्रगुणाः ।
"तेषां पत्रं हिमं याहि कफवातास्रनुच्छ्वयः ।
विस्फोटाध्मानजित्तिक्तं कषायं मधु लेखनम्" ॥
इति राजनिर्घण्टः ॥

क्षीरी, [न्] पुं, (क्षीरं क्षीरवन्निर्य्यासोऽस्यस्य, इनिः ।) क्षीरिकावृक्षः । इति शब्दरत्नावली ॥
(अस्य व्यवहारो यथा, कनकतैले ।
"कनकक्षीरी शैला भार्गी दन्तीफलानि मूलञ्च ।
जातिफलानि प्रवालसर्षपलशुनविड्वङ्गकरञ्जत्वक् ॥
सप्तच्छदार्कपल्लवमूलत्वङ्निम्बचित्रकास्फोताः ।
गुञ्जैरण्डहतीमूलकसुरसार्ज्जकफलानि ॥
कुष्ठं पाठामुस्तं तुम्बुरुमूर्व्वा वचा सषड्ग्रन्थाः ।
खड्गजकुटजशिग्रुव्यूषभल्लातकत्रायकाः ॥
हरितालमवाकपुष्पी तुत्थं कम्पिल्लकोऽमृतासङ्गः ।
सौराष्ट्रिकाससीस दार्व्वीत्वक्सर्ज्जिकालवणम् ॥
कल्कैरेतैस्तैलं करवीरकमूलकल्पवकषाये ।
सार्धपमथवा तैलं गोमूत्रचतुर्गुणं साध्यम् ॥
स्याद्यं कटुकालाबूनि तत्सिद्धं तेनास्य मण्डलान्यास्त ।
भिन्द्याद्विद्रधिगण्डात् क्रिमींश्च कण्डूं विनिहन्यात्" ॥
इति कनकतैलम् ॥ इति चरके चिकित्सास्थाने सप्तमेऽध्याये ॥
यथा, मनुः । ८ । २४६ ।
"सीमासन्धिञ्च कुर्व्वीत न्यग्रोधाश्वत्थकिंशुकान् ।
शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पादपान्" ॥)
दुग्धिका । इति शब्दचन्द्रिका ॥ खुही । अर्कवृक्षः । राजादनी । दुग्धपाषाणः । वटः । शुक्लः ।
(अस्य पर्य्याया यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
सोमलता । स्थालीवृक्षः । इति राजनिर्घण्टः ॥

क्षीरी, स्त्री, (क्षीर + अस्त्यर्थे अच् गौरादित्वात् ङीष् ।) क्षीरीवृक्षः । इति शब्दरत्नावली ॥
(पक्वान्नविशेषः । तस्य पाकप्रणाली यथा,—
"नारिकेलन्तनूकृत्य च्छिन्नं पयसि गोः क्षिपेत् ।
सिता गव्याज्यसंयुक्ते तत्पचेन्मृदुनाग्निना" ॥
अस्या गुणाश्च ।
"नारीकेलोद्भवा क्षीरी स्निग्धाग्नीतातिपुष्टिदा ।
गुर्व्वी सुमधुरा दृष्या रक्तपित्तानिलापहा" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)

क्षीरीशः, पुं, (क्षीरिणां क्षीरप्रधानानां वृक्षाणां ईशः श्रेष्ठः ।) क्षीरकाकोली । तत्पर्य्यायः । वरपर्णः २ खुक्कुटः ३ कुष्ठनाशनः ४ बल्यः ५ मूलकमूला ६ खसकन्धः ७ कक्कुटी ८ । इति रत्नमाला ॥

क्षीरेयी, स्त्री, (क्षीर + बाह्वलकात् ढक् ततो ङीप् । यद्वा, क्षीरेण इं शोभां यातीति । या + कः गौरादित्वात् ङीष् ।) पायसम् । यथा,—
"क्षीरेयी पायसं प्रोक्तं परमान्नञ्च सूरिभिः" ॥
इति हलायुधः ॥

क्षीरोदः, पुं, (क्षीर + "उदकस्योदः संज्ञायाम्" । ६ । ३ । ५७ । "उत्तरपदस्य चेति वक्तव्यम्" । इति वार्त्तिकम् ।) दुग्धसमुद्रः । इत्यमरः । १ । १० । २ ॥
(यथा, महाभारते । १३ । १४ । २५३ ।
"अक्षयं यौवनं तेऽस्तु तेजश्चैवानलोपमम् ।
क्षीरोदसागरश्चैव यत्र यच्छसि प्रियम्" ॥)
तस्य मन्थनं यथा,—

"मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ।
दानवैः सहिता भूत्वा मथ्यं क्षीरसागरम् ॥
अहञ्च तत्र साहाय्यं करिष्यामि दिवौकसः ।
भविष्यत्यमृतं तत्र तत्पानाद्बलवत्तराः ॥
भविष्यन्ति च्यवादेव अमृतस्य प्रभावतः ।
यूयं सर्व्वे महावीर्य्या भुञ्जिष्ठा दृढविक्रमाः ॥
इन्द्राद्यास्तु महोत्साहाः स्थानलब्धा महानरीन् ।
ततो हि दानवान् जेतुं समर्था नात्र संशयः ॥
इत्युक्ता देवदेवेन देवाः सर्व्वे जगत्पतिम् ।
प्रणम्यागत्य निलयं सन्धिं कृत्वाथ दानवैः ॥
क्षीराब्धिमथने सर्व्वे चक्रुर्यत्नमुत्तमम् ।
बलिना चोद्धतो राजन् मन्दराख्यो महागिरिः ॥
क्षीराब्धौ क्षिप्तश्चैव तेनैकेन नृपोत्तम ! ।
सर्व्वौषधिश्च प्रक्षिप्ता देवैर्दैत्यैः पयोदधौ ॥
वासुकिश्च ततस्तत्र राजन् ! नारायणाज्ञया ।
सर्व्वदेवहितार्थाय विष्णुश्च स्वयमागतः ॥
ततो विष्णुसमादेशात्तत्र सर्व्वे सुरासुराः ।
समेत्य मित्रभावेन क्षीराब्धेस्तटमाश्रिताः ॥
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वाथ वासुकिम् ।
ततो मथितुमारब्धा नृपते ! तरसाऽमृतम् ॥
विष्णुना मुखभागे तु वासुकेर्दानवाः कृताः ।
देवास्तु पुच्छभागे तु मन्थनार्थं नियोजिताः ॥
एवन्तु मन्थनात्तत्र मन्दरोऽथ प्रविश्य वै ।
आधारेण विना राजंस्तं दृष्ट्वा सहसा हरिः ॥
सर्व्वलोकहितार्थाय कूर्म्मरूपमधारयत् ।
आत्मानं संप्रवेश्याथ मन्दरस्य गिरेरधः ॥
प्रविश्य कृतवान् शैलं पृथगरूपेण केशवः ।
उपर्य्याक्रान्तवान् शैलं पृथगरूपेण केशवः ॥
चकर्ष नागराजानं देवैः साद्ध जनार्द्दनः ।
असुरैरदृश्यरूपेण दैत्यमध्ये च केशवः ॥
ततस्ते तु त्वरायुक्ता ममुः क्षीरसागरम् ॥
यावच्छक्त्या नृपश्रेष्ठ ! बलवन्तः सुरासुराः ॥
मथ्यमानात् ततस्तस्मात् क्षीराब्धेरभवन्नृप ।
कालकूटमिति ख्यातं विषमत्यन्तदुःसहम् ॥
तन्नागा जगृहुः सर्व्वे तच्छेषं शङ्करोऽग्रहीत् ।
नारायणाज्ञया तेन नीलकण्ठत्वमाप्नुयात् ॥
ऐरावतश्च नागेन्द्रो हयश्चोच्चैःश्रवाः पुनः ।
द्वितीयावर्त्तनाद्राजन्नुत्पन्नाविति नः श्रुतम् ॥
तृतीयावर्त्तनादग्र्यरोगणो जातः सुशोभनः ।
चतुर्थात् पारिजातश्च उत्पन्नः स महातरुः ॥
पञ्चमात् हिमगुस्तस्मात् उत्थितः क्षीरसागरात् ।
तं भवः शिरसा धत्ते नारी च स्वस्तिको नृप ! ॥
नानाविधानि रत्नानि दिव्यान्याभरणानि च ।
क्षीरोदश्चैवमुत्थितानि गन्धर्व्वाश्च सहस्रशः ॥
एतान् दृष्ट्वा तदोत्पन्नान् नित्यार्च्चर्य्यसमन्विताः ।
अभवन् जातहर्षास्ते तत्र सर्व्वे सुरासुराः ।
दैवपक्षे ततो मेघाः सत्यं वर्षन्ति संस्थिताः ।
कृष्णाज्ञया तु वायुस्तु सुखं वाति सुरान् प्रति ॥
विषनिश्वासवातेन वासुकेश्चार्कतापनात् ।
निस्तेजसोऽभवन् दैत्या निर्व्वीर्य्याश्च महामते ॥
ततः श्रीरुत्थिता तस्मात् क्षीरोदोद्भवपङ्कजा ।
विभ्राजमाना राजेन्द्र ! दिशः सर्व्वाः स्वतेजसा ॥

ततस्तीर्थोदकैः स्नाता दिव्यवस्त्रैरलङ्कृता ।
दिव्यगन्धानुलेपैस्तु सुमनोभिः सुपूजिता ॥
देवपक्षं समासाद्य स्थिता क्षणमरिन्दम ! ।
हरिवक्षःस्थलं प्राप्ता ततः सा कमलालया ॥
ततोऽमृतघटं पूर्णं गृहीत्वा पयसोनिधेः ।
धन्वन्तरिः समुत्तस्थौ ततः प्रीताः सुरा नृप ॥
दैत्याः श्रिया परित्यक्ता दुःखितास्तत्र ते पुनः ।
आदायामृतघटं शीघ्रं ते च जग्मुर्यथेच्छया ॥
ततः स्त्रीरूपमकरोद्विष्णुदेवहिताय वै ।
आत्मानं नृपशार्दूल ! नार्या लक्षणसंयुतम् ॥
ततो जगाम भगवान् स्त्रीरूपेण सुरान् प्रति ।
दिव्यरूपान्तु तां दृष्ट्वा मोहितास्ते सुरद्विषः ॥
अमृतपूर्णं घटं भूमौ हैमं संस्थाप्य सत्तम ।
कामेन पीड़िता क्षणसन्नसुरास्तत्र तत्क्षणात् ॥
मोहयित्वा तु तानेवमसुरानवनीपते ! ।
अमृतभाजनमादाय देवेभ्यः प्रददौ हरिः ॥
तत् पीत्वा तु ततो देवा देवदेवप्रसादतः ।
बलवन्तो महावीर्या रणे जग्मुर्महासुरान्" ॥
इति नृसिंहपुराणे ३६ अध्यायः ॥

क्षीरोदतनया, स्त्री, (क्षीरोदस्य क्षीरसमुद्रस्य तनया ।) लक्ष्मीः । इति हेमचन्द्रः ॥ (अस्या उत्पत्तिकथा क्षीरोदशब्दे द्रष्टव्या ॥)

क्षीरोदतनयापतिः, पुं, (क्षीरोदतनयायाः लक्ष्म्याः पतिः ।) विष्णुः । इति कविकल्पलता ॥

क्षीरोदनन्दनः, पुं, (क्षीरोदस्य दुग्धसमुद्रस्य नन्दनः ।) चन्द्रः । इति शब्दरत्नावली ॥

क्षीव, क्ष्वै ङ दर्षे ॥ इति कविकल्पद्रुमः । (भ्वां-आत्मं-अकं-सेट् ।) क्ष्वै, अचिक्षीवत् । ङ, क्षीवते । इति दुर्गादासः ॥

क्षीव, निरासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) निरास इह फुत्कारः । इति भट्टमल्लः ॥ सुखेन श्लेष्मादेर्वमनमिति केचित् । क्षीवत्यन्नं लोकः । इति दुर्गादासः ॥

क्षीवः, त्रि, (क्षीव ङ मदे + क्तः । "अनुपसर्गात् फुल्लक्षीवेति" । ८ । २ । ५५ । तलोपो निपातनात् ।) सुरामत्तः । यथा । "मत्ते शौण्डोत्कटक्षीवाः" । इत्यमरः । २ । २ । २३ ॥ दन्त्योष्ठवकारान्तोऽयम् ॥
(यथा, रामायणे । ५ । ६० । १२ ।
"उन्मत्तभूताः प्लवगा मधुपानप्रहर्षिताः ।
क्षीवाः कुर्व्वन्ति हास्यं च कलहांश्च तथाऽपरे" ॥)

क्षु, टु ञ क्षुते । इति कविकल्पद्रुमः ॥ (अदां-परं-अकं-सेट् ।) क्षुतं छाँची इति ख्यातम् । टु, क्षवथुः । ञ, क्षौति कपी । क्षुतकं कामिनि पुक्षुवे मृगाख्या । इति माधवे । इति दुर्गादासः ॥

क्षुः, पुं, (क्षणोति हिनस्ति जीवान् इति । क्षण हिंसायां + डुः ।) सिंहः । इत्येकाक्षरकोषः ॥

क्षुणः, पुं, (क्षु + नक् ।) अरिष्टवृक्षः । यथा,—
"अरिष्टो वल्लिकर्म्माख्यो वेल्लीवः फेनिलः क्षुणः" ।
इति शब्दचन्द्रिका ॥ (अरिष्टशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

क्षुसं, त्रि, (क्षुद संपेषणे + कर्म्मणि क्तः ।) ग्रहतम् । (अभ्यक्तम् । यथा, रघौ । १ । १७ ।
"रेखामात्रमपि क्षुण्णादामनोर्व्वर्त्मनः परम्" ॥
माघे च । १ । ३२ ।
"उदीर्णरागप्रतिरोधकं जनै-
रभीक्ष्णमक्षुण्णतयातिदुर्गमम् ।
उपेयुषो मोक्षपथं मनस्विन-
स्वमग्नभूमिर्निरपायसंश्रया" ॥)
चूर्णीकृतम् । इति जटाधरः ॥
(यथा, मार्कण्डेयपुराणे । ८३ । २४-२५ ।
"सोऽपि कोपान्महावीर्य्यः क्षुरक्षुण्णमहीतलः ।
प्रस्फुराभ्यां पर्व्वतानुच्चांश्चिक्षेप च ननाद च ॥
वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्य्यत" ॥)

क्षुत्, स्त्री, (क्षु शब्दे क्षुते च + सम्पदादित्वात् भावे क्विप् तुगागमश्च ।) क्षुतम् । इत्यमरः । २ । ६ । ५२ ॥ (धान्यविशेषः । देधान इति लोके । अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ।
"क्षुत्क्षुल्लको गोजिह्वा च गुन्द्राकुल्मा गवेधुका" ॥)

क्षुत्, [ध्] स्त्री, (क्षुध् + सम्पदादित्वात् भावे क्विप् ।) क्षुधा । इत्यमरः । २ । ६ । ५४ ॥ (यथा, मार्कण्डेयपुराणे । ८ । ३५ ।
"तात ! तात ! ददस्वान्नमम्बाम्ब ! भोजनं दद ।
क्षुन्मे बलवती जाता जिह्वाग्रं शुष्यते तथा" ॥)

क्षुतं, क्ली, (क्षु शब्दे क्षुते च + भावे क्तः ।) नासिकाभिघातजन्यसशब्दवायुनिःसरणम् । हाँची इति भाषा । तत्पर्य्यायः । क्षुत् २ क्षवः ३ । इत्यमरः । २ । ६ । ५२ ॥ क्षुता ४ क्षिक्का ५ क्षवथुः ६ क्षुतः ७ । इति शब्दरत्नावली ॥ हिक्किः ८ । इति जटाधरः ॥* ॥ तस्य शकुनानि यथा,—
"अथ क्षुताख्यं शकुनं क्रमेण
महाप्रभावं प्रतिभावयामः ।
नश्यन्ति यस्माच्छकुनाः समस्ता
मृगाधिनाथादिव वन्यसत्त्वाः ॥
सर्व्वस्य सर्व्वत्र च सर्व्वकालं
क्षुतं न कार्य्यं क्वचिदेव शस्तम् ।
यातुः क्षुते तेन न किञ्चिदेव
कुर्य्यात् क्षुतं प्रायहरञ्च गन्तुः ॥
निषेधमग्रेऽप्यधिगे दक्षिणे च
धनक्षयं दक्षिणकर्णदेशे ।
तत् पृष्ठभागे कुरुतेऽर्थवृद्धिं
क्षुतं कदाचित् शुभमादधाति ॥
भोगाय वामश्रवणस्य पृष्ठे
कर्णे च वामे कथितं जयाय ।
सर्व्वार्थलाभाय च वामनेत्रे
जातं क्षुतं स्यात् क्रमशोऽप्यधैव ॥
क्रमान्निषेधं गमनस्य विघ्नं
कलिं समृद्धिं क्षुतमुग्ररोगम् ।
करोति रोगक्षयमर्थलाभं
दीप्तादिगश्च क्षुतं करोति ॥
प्रागास्य पुंसः परतोऽपरा स्यात्
पुनः पुनर्व्वा तत एव जातः ।
वृद्धाक्षिशोर्व्वा कफतो हठाद्वा
जातं क्षुतं केऽपि वदन्ति सत्यम् ॥
आद्यन्तयोर्न खलु शस्तं
क्षुतं प्रशंसन्ति न भोजनादौ
भवेत् कथञ्चिद्यदि भोजनान्ते
भवेत्तदाग्रे न हि भोज्यलाभः ॥
आदौ क्षुतञ्चेत् शकुनैस्ततः किं
जातानजातान् शकुनान्निहन्ति ।
क्षुतं क्षणेनाच न संशयोऽस्मिन्
प्रयोजने यत्नकृतेऽपि जातम् ॥
क्षुतं क्षणात्तद्विनिहन्त्यवश्यं
कार्य्यात्मकेनापि मनागपीदम् ॥
तस्मादुपेक्ष्यं न विचक्षणेन
क्षुतं यतस्त्वन्तु फलं विधत्ते" ॥
इति वसन्तराजशाकुने क्षुत्प्रकरणं तृतीयम् ॥

अपि च ।
"क्षिक्काया लक्षणं वक्ष्ये लभेत् पूर्व्वे महाफलम् ।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात् ॥
नैर्ऋत्ये शोकसन्तापौ मिष्टान्नञ्चैव पश्चिमे ।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत् ।
ईशाने मरणं प्रोक्तं प्रोक्तं क्षिक्काफलाफलम्" ॥
इति गारुड़े ज्योतिश्चक्रे ६० अध्यायः ॥ * ॥
अन्यच्च । वर्षकृत्ये ।
"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे ऽतताशे भयं
याम्यामग्निभयं सुरद्विषि कलिर्लाभः समुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने ॥
ज्येष्ठीरते क्षुतेऽप्येवमूचुः केचिच्च कोविदाः" ॥
इति ॥* ॥ क्षुते जीवेति प्रयोगः कर्त्तव्यः । यथा, मदनपारिजातधृतम् ।
"जीवेति क्षुवतो ब्रूयात् जीवेत्युक्त्वस्वया सह" ॥
इति ॥ * ॥
"क्षुतोत्पतनजृम्भास्वाजीवोत्तिष्ठाङ्गभिध्वनिः ।
शकोरपि च कर्त्तव्यमन्यथा ब्रह्महा भवेत्" ॥
इति च तिथ्यादितत्त्वम् ॥ * ॥ तस्य शुभजनकत्वम् । यथा, दाक्षिणात्यास्तु ।
"आसने शयने दाने भोजने वस्त्रसंग्रहे ।
विवादे च विवाहे च क्षुतं सप्तसु शोभनम्" ॥
अन्यच्च विष्णोरित्यधिकृत्य विष्णुधर्म्मोत्तरम् ।
"नामसंकीर्त्तनं नित्यं क्षुतप्रस्खलितादिषु ।
वियोगं शीघ्रमाप्नोति सर्व्वानर्थो न संशयः" ॥
इति ॥ * ॥ असंस्कृतमुखस्य क्षुन्निषेधो यथा,—
विष्णुधर्म्मोत्तरे ।
"नासंस्कृतमुखः कुर्य्याज्जृम्भां तथा क्षुतम्" ॥
इति ॥ * ॥ क्षुते आचमनं कर्त्तव्यं यथा । याज्ञवल्क्यः ।
"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा स्त्र्योपसर्पणे ।
आचान्तः पुनराचामेत् वासोविपरिधाय च" ॥
इति ॥ * ॥ अशुद्धौ स्मृतिः ।
"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने ।
कर्म्मस्थ एषु नाचामेदन्यत्र स्पृशेत्" ॥
इति च उदाहृतत्त्वम् ॥ * ॥ बलिनां सकृत् क्षुतं भवति यथा,—
"क्रूरे वक्त्रिणवक्रा स्याद्बलिनाञ्च क्षुतं सकृत्" ।

दन्तिभवक्रेति नासाविशेषणम्। इति च गारुडे ६६ अध्यायः॥

क्षुतः, पुं, (क्षु+क्तः। आभिधानात् पुंस्त्वम्।) क्षुतम्। इति शब्दरत्नावली॥

क्षुतकः, पुं, (क्षुताय साधुरिति कन् स्वार्थे वा।) राजिका। इति राजनिर्घण्टः॥

क्षुता, स्त्री, (क्षुत+टाप्।) क्षुतम्। इति शब्दरत्नावली॥

क्षुताभिजननः, पुं, (क्षुतं अभिजनयति। अभि+जन्+णिच्+ल्युः।) क्षुत्सर्षपः। इत्यमरटीकायां स्वामी॥

क्षुत्करी, स्त्री, (क्षुतं करोतीति। कृ+टः+ङीष् च।) कङ्गालिका। यथा, शब्दचन्द्रिकायाम्।

"भुजङ्गघातिनी सूचिः सर्पाच्ची क्षुत्करी स्मृता"॥

क्षुद्, अ ध औ इर् क्षुदि। इति कविकल्पद्रुमः॥ (स्वधां-उर्म-सर्कं-अनिट्।) अ ध, क्षुणत्ति क्षुन्ते। औ, क्षोत्ता। इर्, अक्षुदत् अक्षौत्सीत्। क्षुदि चूर्णीकरणे। इति दुर्गादासः॥ (यथा, भट्टिः। १४। ३३।

"मित्रघ्नस्य प्रभुक्षोद गदयाङ्गं विभोषणः।
सुग्रीवः प्रघसं नेभे वह्निज्वालस्तडं च"॥)

क्षुद्, [ध्] स्त्री, (क्षुध्+सम्पदादित्वात् भावे क्विप्।) क्षुधा। इत्यमरः।२।९।५४॥(विष्णुपुराणे १।५।३९।

"रजोमात्रात्मिकामेव ततोऽन्यां जग्रहे तनुम्।
ततः क्षुद् ब्रह्मणो जाता यस्यां कोपस्तया ततः"॥)

क्षुदः, पुं, (क्षुद्+-'क्षुधपधशाप्रीकिरः कः"। ३। १।१३५। इति कः।) तण्डुलादिचूर्णम्। क्षुद इति भाषा॥

क्षुद्रः, पुं, (क्षुदि+"क्षायितञ्चिवञ्चिप्रकिञ्चिपिक्षुदीति"। उणां।२।१३। इति रक्।) तण्डुलावयवः। इति संक्षिप्तसारोणादिवृत्तिः॥ डऊः। इति शब्दरत्नावली॥ (मक्षिकाविशेषः। यदुक्तम्।

"मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत्"॥)

क्षुद्रः, त्रि, (क्षुद्+"क्षायितञ्चीति"। उणां। २। १३। इति रक्।) क्षपणः। अधमः। (यथा, कुमारे। १। १२।

"क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैः शिरसां सतीव"॥

तुच्छः। यथा, गीतायाम्। २। ३।

"क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप!"॥)

क्रूरः। अल्पः। इत्यमरभेदिनीकरौ॥(यथा, महाभारते। ३। आरण्यकयात्रापर्व्वणि। १०। २४।

"तं भीमः समरश्लाघी बलेन बलिनाम्बरः।
जघान पशुमारेण व्याघ्रः क्षुद्रमृगं यथा"॥)

दरिद्रः। इति हेमचन्द्रः॥

क्षुद्रकण्टकारी, स्त्री, (क्षुद्रः कण्टकारी।) अग्निदमनी। इति राजनिर्घण्टः॥

क्षुद्रकण्टकी, स्त्री, (क्षुद्रं कण्टकं यस्याः। गौरादित्वात् ङीष्।) दृष्टती। इति भावप्रकाशः। क्षुद्रभण्टाकीति च पाठः॥

क्षुद्रकम्बुः, पुं, (क्षुद्रश्चासौ कम्बुश्चेति।) क्षुद्रशङ्खः। तत्पर्य्यायः। शङ्खनखः २ क्षुल्लकः ३। इति हेमचन्द्रः॥

क्षुद्रकारवेल्ली, स्त्री, (क्षुद्रा कारवेल्ली।) कारवेल्लविशेषः। छोट करला इति भाषा। तत्पर्य्यायः। कुड़ऊची २ श्रीफलिका ३ प्रतिपत्रफला ४ सुषवी ५ कारवी ६ वज्रफला ७ क्षुद्रकारलिका ८ कन्दफला ९। कन्दफलाख्याने कन्दलता इति च पाठः। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। तिक्तत्वम्। रुचिकारित्वम्। दीपनदत्वम्। रक्तानिलदोषकारित्वम्। पथ्यत्वञ्च। तत्फलस्याप्येते गुणाः॥ तत्कन्दगुणाः। अर्शोनाशित्वम्। मलरोधविरोधनत्वम्। योनिनिर्गतदोषगर्भस्रावविषापहत्वञ्च। इति राजनिर्घण्टः॥

क्षुद्रकारलिका, स्त्री, (क्षुद्रा कारलिका।) क्षुद्रकारवेल्ली। इति राजनिर्घण्टः॥

क्षुद्रकुलिशः, पुं, (क्षुद्रः कुलिशः वज्रमणिविशेषः। नित्यकर्म्मधारयः।) वैक्रान्तमणिः। इति राजनिर्घण्टः॥

क्षुद्रकुष्ठं, क्ली, (क्षुद्रं अल्पं कुष्ठम्।) स्वल्पकुष्ठरोगः। तत्तु एकादशविधम्। यथा। क्षुद्रकुष्ठान्याह।

"एककुष्ठं १ स्फुटं पूर्व्वं गजचर्म्म २ ततः परम्।
ततश्चर्म्मदलं ३ प्रोक्तं ततश्चापि विचर्च्चिका ४॥
विपादिकाभिधा ५ स्त्रैव पामाकच्छू–६ स्ततः परा।
ततो दद्रुश्च७ विस्फोटः८ किटिभञ्च ९ ततः परम्॥
ततश्चालसकं १० प्रोक्तं शतारुश्च ११ ततः परम्।
क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः"॥

ननु दद्रोः कथं क्षुद्रकुष्ठेषु गणना सुश्रुतेन महाकुष्ठेषूक्तत्वात्। उच्यते। असिता च गाढ़मूला दद्रुः सुश्रुते महाकुष्ठेषूक्ता असितेतरा नवगाढ़मूला दद्रुः क्षुद्रकुष्ठमेव। एवं विधाया दद्रोश्चरकेण क्षुद्रकुष्ठेषु दर्शितत्वात्॥ *॥

कुष्ठानां त्रिदोषजत्वेनैकत्वे त्रिदोषस्योल्बणतया सप्तधात्वमाह।

"सर्व्वेष्वपि त्रिदोषेषु व्यपदेशाधिकत्वतः।
कुष्ठानि सप्तधा दोषैः पृथग्द्वन्द्वं समागतैः"॥

सर्व्वेष्वपि कुष्ठेषु त्रिदोषजेषु सत्सु व्यपदेशाधिकत्वतः व्यपदेशः कापालादिसंज्ञास्तेषामष्टादशत्वरूपं यदधिकत्वं ततः कुष्ठानि सप्तधा। कैर्दोषैः कथम्भूतैः पृथग्द्वन्द्वं समागतैः। समागतैः सङ्गतैर्मिलितैरिति यावत्। अस्यायमर्थः।

किमपि कुष्ठं वातोल्बणं किमपि पित्तोल्बणं किमपि कफोल्बणं किमपि वातपित्तोल्बणं किमपि वातश्लेष्मोल्बणं किमपि पित्तश्लेष्मोल्बणं किमपि त्रिदोषोल्बणमिति॥ *॥ पूर्व्वरूपमाह।

"अतिसूक्ष्मः खरस्पर्शः खेदाखेदौ विवर्जता।
दाहःकण्डूस्त्वचि स्रावस्तोदः कोठोन्नतिः क्रमः॥
त्रयाणामधिकं स्फूलं ग्रीष्मोत्पत्तिश्चिरस्थितिः।
रूढ़ानामपि रूढ़त्वं निमित्तेऽल्पेऽपि केवलम्।
रोमहर्षोऽङ्गसः कार्ष्ण्यं कुष्ठलक्षणमग्रजम्"॥

अतिसूक्ष्मः अतिसूक्ष्मः। अथवा खरः रूक्षः कर्कशो वा स्पर्शः। खेदाखेदौ धर्म्मादि सप्तसङ्काभावेऽपि खेदः। अथवा धर्म्मादिप्रसङ्गेऽपि खेदाभावः। त्वचि स्रावः स्पर्शज्ञता। ग्रीष्मोत्पत्तिः ग्रीष्मा उत्पत्तिर्व्रणानामित्यन्वयः॥ *॥ सम्प्राप्तिपूर्व्वकं सामान्यं लक्षणमाह।

"शिराः प्रपद्य तिर्य्यक् च त्वग्लसीकास्रगामिषम्।
दूषयन्ति श्लथीकृत्य निश्चरन्तो वहिस्ततः॥
त्वचः कुर्व्वन्ति वैवर्ण्यं दोषाः कुष्ठमुषन्ति तत्"॥

तिर्य्यक् तिर्य्यगताः शिराः प्रपद्येत्यन्वयः॥*॥ येनोल्बणेन दोषेण यत् कुष्ठं समुत्पद्यते तदाह।

"वातेन कुष्ठं कापालं पित्तेनौडुम्बरं कफात्।
मण्डलाख्यं विचर्च्ची च ऋष्यजिह्वं वातपित्ततः॥
चर्म्मैककुष्ठकिटिभसिध्मासविपादिकाः॥
वातश्लेष्मोद्भवाः पित्तकफात् दद्रुशतारुषी॥
पुण्डरीकं सविस्फोटं पामा चर्म्मदलन्तथा।
सर्व्वैरेवोल्बणैर्दोषैराढ्यः काकणकं बुधाः"॥

विचर्च्ची च कफादित्यन्वयः॥

"पुण्डरीकं सविस्फोटं पामा चर्म्मदलन्तथा"॥

पित्तकफादित्यन्वयः॥ * ॥ अथ क्षुद्रकुष्ठानां मध्ये एककुष्ठस्य लक्षणमाह।

"अखेदनं महावास्तु यन्मत्स्यशकलोपमम्।
तदेव कुष्ठं चर्म्माख्यं बज्रलं हस्तिचर्म्मवत्"॥

महावास्तु महास्थानम्। मत्स्यशकलोपमं अत्र शकलशब्देन लक्षणया त्वगुच्यते। तेन चक्राकारमत्स्यकपत्रसदृशं भवति। एककुष्ठमितिक्षुद्रकुष्ठेषु मुख्यत्वात्। * ।गजचर्म्माह।

"चर्म्माख्यं बज्रलं हस्तिचर्म्मवत् रूक्षं कृष्णं च"। गजचर्म्माख्यं बज्रलं स्थूलं हस्तिचर्म्मवत् रूक्षं कृष्णञ्च॥२॥ चर्म्मदलमाह।

"रूक्षं सस्फूलं कण्डूमत् सस्फोटं दलयत्यपि।
तच्चर्म्मदलमाख्यातं संस्पर्शासहमुच्यते"॥

दलयत्यपि विदारयत्यपि चर्म्मेति शेषः॥ * ॥

विचर्च्चिकामाह।

"सकण्डूः पिड़का श्यावा बज्रस्रावा विचर्च्चिका"

पिड़का क्षुद्रपिड़का॥ * ॥ ननु क्षुद्रकुष्ठानां कथमेकादशत्वम्। विपादिकया द्वादशत्वसम्भवात् उच्यते। विचर्च्चिकैव पादयोर्भवति विदारणयोगात् विपादिका तेन न सङ्ख्यातिरेकः। अतएव बीजः।

"दाल्यते त्वक्खरा रूक्षा पाण्योर्ज्ञेया विचर्च्चिका।
पादे विपादिका ज्ञेया स्थानभेदाद्विचर्च्चिका"॥

दाल्यते विदार्य्यते। केचिद्विचर्च्चिकातो विपादिकां भिन्नमाहुः।

"वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम्"॥

पाणिपादस्फुटनं पाण्योः पादयोश्च स्फुटनं विदारणं येन तत्॥ ४॥ पामामाह।

"क्षुद्रा बह्व्यः स्रावयुत्यः प्रदाहाः
पामेत्युक्ता पिड़काः कण्डुमत्यः"।

पिड़काः पीड़यन्ति इति पिड़का इति क्विपकादित्वान्निपात्यते॥५॥

कच्छूमाह।

"सैव स्फोटैस्तीव्रदाहैरुपेता
ज्ञेया पाण्योः कच्छ्वया स्फिचोश्च"॥

सैव पामा। स्फोटैर्भिन्नैर्द्विः। स्फिचौ प्रोथौ॥६॥ दद्रूमाह।

"सकण्डूरागपिड़कं दद्रूमण्डलमुद्गतम्"॥

दद्रूमण्डलं मण्डलरूपेणोत्पद्यते। उद्गतमुच्छ्रितम्॥७॥ विस्फोटमाह। "स्फोटाः श्यावारुणा भासा विस्फोटाः स्युस्तमुत्वचः॥८॥ किटिभमाह। "श्यावं किणाखरस्पर्शं परुषं किटिभं स्मृतम्"। किणाखरस्पर्शं किणाः शुष्कव्रणास्थानं तद्वत् कर्क्कशस्पर्शम्॥ परुषं रूक्षम्॥९॥ अलसकमाह।

"कण्डूसङ्गिः सरागैश्च गण्डैरलसकाञ्चितम्"।

गण्डैर्भिन्नैः पिड़काभिः। चितं विचेष्टितम्॥१०॥

श्वित्रमाह।

"रक्तं श्यावं सदाहार्त्तिश्वित्राः स्याद्रूक्षत्रयम्"॥११॥

अथ सप्तधातुगतानां कुष्ठानां लक्षणमाह। तत्र रसगतस्य लक्षणमाह।

"त्वक्स्थे वैवर्ण्यमक्लेदे कुष्ठे रौक्ष्यञ्च जायते। त्वक्स्रावो रोमहर्षश्च स्वेदस्रातिप्रवर्त्तनम्"॥

त्वक्शब्देनात्र रस उच्यते। धातुप्रस्रावात् त्वक्स्रावाच्च। त्वक्स्रावः स्पर्शाज्ञत्वम्। त्वक्स्राव इत्यादिकं केचिदत्र रक्तगतस्य लिङ्गं मन्यन्ते॥१॥

रुधिरगतमाह।

"कण्डूर्विपूयकस्यैव कुष्ठे शोणितसम्भवे"।

विपूयः विस्फोटेषु पूयः॥२॥ मांसगतमाह।

"बाऽल्यं रक्तशोथश्च कार्कश्यं पिड़कोद्गमः। तोदः स्फोटाः स्थिरत्वञ्च कुष्ठे मांससमाश्रिते"॥

बाऽल्यं कुष्ठस्य पुष्टिः। पिड़कोद्गमः क्षुद्रपिड़कोद्गमः। स्फोटाः दृष्टपिड़काः। स्थिरत्वं संग्रहारित्वम्॥३॥ मेदोगतमाह।

"कौण्यं गतिच्युतोऽङ्गानां सम्भेदः क्षतसंक्षयम्। मेदःस्थानगते लिङ्गं प्रागुक्तानि तथैव च"॥

कौण्यं दृष्टनाशः। अङ्गानां सम्भेदः अङ्गभङ्गः। क्षतसंक्षयं क्षतप्रसरणम्। प्रागुक्तानि रक्तमांसगतलिङ्गानि॥४॥ अस्थिमज्जगतमाह।

"नासाभङ्गोऽस्थिरोगश्च क्षतेषु क्रमिसम्भवः। स्वरोपघातः पिड़का भवेत् कुष्ठेऽस्थिमज्जगे"॥५॥६॥

शुक्रगतमाह।

"दम्पत्योः कुष्ठबाऽल्याद्दुष्टशोणितशुक्रयोः। यदपत्यं तयोर्जातं क्लेयं तदपि कुष्ठितम्"॥

दम्पत्योः स्त्रीपुरुषयोर्दुष्टशोणितशुक्रयोर्यदपत्यं तयोर्जातमिति॥८॥*॥ ननु शुद्धशोणितशुक्रयोरेव दम्पत्योर्गर्भसम्भवाद्दुष्टशोणितशुक्रयोः कथमपत्योत्पत्तिः। यत आह सुश्रुतः।

"कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः। गर्भः सञ्जायते नार्य्याः स जातो बाल उच्यते"॥

इति। अन्यच्च। वातादिदुष्टरेतसः प्रजोत्पादने न समर्थाः। इति। उच्यते। गर्भोऽत्र शुद्धो बोद्धव्यः॥ अशुद्धस्तु गर्भो दुष्टशोणितशुक्रयोरपि भवति पङ्गुखञ्जान्धबधिरादीनां सम्भवात्। शोणितमत्रार्त्तवम्। कुष्ठितं कुष्ठं संजातमस्येति तारकादित्वादितच्। शुक्रार्त्तवगतं कुष्ठमपत्येन व्यज्यते इति तात्पर्य्यम्॥*॥ कुष्ठेषूल्बणवातादि दोषविशेषमाह।

"खरं श्यावारुणं रूक्षं वातकुष्ठं सवेदनम्। पित्तात् प्रकुपितं दाहरागस्रावान्वितं मतम्॥ कफात् क्लेदि घनं स्निग्धं सकण्डू श्वैत्यगौरवम्। द्विलिङ्गं द्वन्द्वजं कुष्ठं त्रिलिङ्गं सान्निपातिकम्"॥

खरं कर्क्कशम्। श्यावारुणं श्यावं चारुणञ्च। प्रकुपितं क्लेदपूतिबाऽल्यम्। क्लेदि आर्द्रतायुक्तम्। घनं पुरुषम्॥*॥ साध्यत्वादिकमाह।

"साध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकञ्च यत्। मेदोगं द्वन्द्वजं याप्यं वर्ज्यं मज्जास्थिसंश्रितम्॥ क्रमिक्षुद्दाहमन्दाग्निसंयुक्तं यत्त्रिदोषजम्"।

वातश्लेष्माधिकञ्च यत् एतेन सिद्धैककुष्ठगजचर्म्मविपादिकाकिटिभालसकानि साध्यानि। मज्जप्रत्यासन्नं शुक्रगतमप्यसाध्यम्। क्रमिक्षुदादयोऽपि वर्ज्यलिङ्गमित्यन्वयः॥*॥ अरिष्टमाह।

"प्रभिन्नं प्रस्रुताक्ष्णञ्च रक्तनेत्रं हतस्वरम्। पञ्चकर्म्मगुणातीतं कुष्ठं हन्तीह कुष्ठिनम्"॥

प्रभिन्नं विदीर्णम्। हतस्वरं घर्घरस्वरम्। पञ्चकर्म्मगुणातीतं असंजाताचमनादिपञ्चकर्म्मगुणम्॥ अथ त्वग्दोषिसाम्यात् कुष्ठभेदत्वाच्चैव श्वित्रमाह।

"कुष्ठैकसम्भवं श्वित्रं किणासश्चारुणं भवेत्। निर्द्दिष्टमपरिस्रावि चिधातूद्भवसंश्रयम्"॥

कुष्ठैकसम्भवं कुष्ठेन सह एकस्तुल्यः सम्भवो निदानं यस्य तत्॥*॥ श्वित्रस्य भेदानाह। किणासश्चारुणं भवेत्। श्वित्रमेव रक्तमांसाश्रयात् किणासमश्चारुणञ्च भवेदित्यर्थः॥*॥ ननु कुष्ठस्य श्वित्रस्य च को भेद इत्यत आह। निर्द्दिष्टमपरिस्रावीति। श्वित्रमपरिस्रावि भवति कुष्ठन्तु स्रावि अथ च त्रिधातूद्भवसंश्रयमिति त्रयो धातवो वातपित्तकफाख्येभ्यः एषणभूतेभ्य उद्भवो यस्य तत्। अथ च त्रयो धातवो रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत्। कुष्ठं सान्निपातिकं सर्व्वधातुगतञ्च भवतीति भेदः॥*॥

दोषभेदेन लक्षणभेदाह।

"वातादूरुक्षारुणं पित्तात्ताम्रं कमलपत्रवत्। सदाहं रोमविध्वंसि कफात्क्लेदि घनं गुरु॥ सकण्डूकं क्रमाद्रक्तं मांसमेदःसु चादिशेत्। वर्णौ नैवेदृशुभयं कुष्ठं तच्चोत्तरोत्तरम्"॥

क्षारणमीषल्लोहितम्। कमलपत्रवदित्यनेन मध्ये श्वेतमन्ते लोहितं बोधयति। घनं पुरुषम्। क्रमाद्रक्तं मांसमेदःसु चादिशेत्। तथा च चरकः।

"अरुणं रक्तगे वाते ताम्रं पित्ते पयं गते। श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कुष्ठं परं परम्"॥

उभयं द्विविधमपि श्वित्रं वर्णेन दृष्टमेव अरुणं ताम्रं श्वेतञ्च। दोषभेदात् द्विविधं दोषजं व्रणजञ्च। तथा च भोजः॥ श्वित्रन्तु द्विविधं विद्याद्दोषजं व्रणजं तथा"। इति॥*॥

श्वित्रं साध्यमसाध्यञ्चाह।

"अशुक्लरोमावहुलमसंस्रष्टमथो नवम्। अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा"॥

अवहुलं तनु। अन्यच्च।

"गुह्यपायितकौलेषु जातमप्यचिरन्तनम्। वर्ज्यनीयं विशेषेण किणाख्यं सिद्धिमिच्छता"॥

गुह्यं मेहनं भगञ्च। तलमत्र पादतलम्। सुश्रुतेनान्ते जातमिति सामान्यतो निर्द्दिष्टत्वात्। अचिरन्तनं नवमपि॥*॥ कुष्ठस्य संसर्गजत्वे प्रसङ्गेनान्यानपि संसर्गजान् रोगानाह।

"प्रसङ्गात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात्। एकशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्॥ कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च। औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्"॥

प्रसङ्गात् प्रकर्षेण सङ्गः प्रसङ्गो मैथुनं तस्मात्। गात्रसंस्पर्शात् तर्हि मैथुनादिति विशेषार्थम्। वस्त्रमाल्यानुलेपनात् एकस्मादेव। शोषो यक्ष्मा। औपसर्गिकरोगाः प्रीतलादयः॥*॥ सकुष्ठस्य मृतस्य पुनर्जातस्यापि कुष्ठं भवतीत्याह।

"म्रियते यदि कुष्ठेन पुनर्जातस्य तद्भवेत्। ततो निष्ठुरतरो रोगो यथा कुष्ठं प्रकीर्त्तितम्"॥

एतावता कुष्ठिनां कुष्ठं सर्व्वथा प्रतिकरणीयं न तदुपेक्षणीयम्॥

अथ कुष्ठस्य चिकित्सा।

"वातोत्तरेषु सर्पिर्व्वमनं श्लेष्मोत्तरेषु कुष्ठेषु। पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनश्चेष्टम्"॥

"पथ्याकरञ्जसिद्धार्थनिम्बावल्गुजसैन्धवैः। विड़ङ्गसहितैः पिण्डैर्लेपो मूत्रेण कुष्ठजुत्"॥

अवल्गुजः बकुचीति लोके। पथ्यादिर्लेपः॥*॥

"सोमराजीभवं चूर्णं पिबेद्वेरसमन्वितम्। उद्वर्त्तनमिदं हन्ति कुष्ठे रागक्षतासृदम्"॥

सोमराजी बकुचीति लोके। सोमराज्युद्वर्त्तनम्॥

"रसायनं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्। मार्कण्डेयप्रभृतिभिर्यत् प्रयुक्तं महर्षिभिः॥*॥ पुष्यकाले तु पुष्याणि मूलकाले मूलानिच। संग्रह्य पिष्टमर्द्धस्थ त्वक्पत्राणि दलानिच॥ दिव्यानि समाहृत्य भागिकानि प्रकल्पयेत्। भिषजा सुधयं ब्राह्मी खदंष्ट्राबब्बरान्वयः॥ विड़ङ्गसारवाराह्यो हपूर्व्वामृताः समाः। निम्बादयावल्गुजकव्याधिघाताः क्षयक्रियाः॥ कुष्ठमिश्रयवाः पाठा चूर्णमेषान्तु संहृतम्। खदिरासननिम्बानां घनक्वाथेन भावयेत्॥ सप्तधा पक्वनिम्बन्तु मार्कवस्य रसेन च। स्निग्धः शुद्धतनुर्भोजी योजयेत्तच्छ्रुतेदिने॥ मधुना तिलतैलेन खदिरासनवारिणा। लेह्यमुष्णाम्भसा वापि कोलमात्रा यथं भवेत्॥ जीर्णे तस्मिन् समश्नीयाद् स्निग्धं लघुहितञ्च यत्॥

विचर्चिकोदुम्बरपुण्डरीक-
कपालदद्रूकिटिभालसादि,
घृतारुणस्फोटविसर्पभाजाः
सप्तप्रकोपं त्रिविधं किणाख्यम्॥
भवन्दरक्षीपदवातरक्त-
व्रणान्थगण्डीव्रजगर्द्धरोगान्।
सर्व्वान् प्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविष मूलविषं निहन्ति॥
शूनोदरः सिंहकशोदरः स्यात्
सुस्निग्धसन्धिर्मधुनोपयोगात्।
सदोषरोगादपि ये दशन्ति

सर्वादयो यान्ति विनाशमाशु ॥
जीवेच्चिरं व्याधिजराविमुक्तः
शुभे रतश्चन्द्रसमानकान्तिः" ॥

अयमर्थः। निम्बस्य फल-पुष्प-त्वक्-पत्र-मूलानि सर्व्वाणि समुदितानि द्विगुणानि चूर्णितानि भृङ्गराजस्य रसेन सप्तवारान् भावयेत्। त्रिफलादीनि पाठान्तानि समुदितान्येकभागानि चूर्णितानि खदिरासननिम्बानां निविड़क्वाथेन भावयेत्। ततः सर्व्वमेकीकृत्य मध्वादिनावलिह्यात्। षड्निम्बावलेहः ॥ * ॥

"अग्निलेखाषड्गुणं तावद्विरिञ्चस्य गुग्गुलोर्द्वयं च।
ताप्यस्य पञ्चचित्यं हे लोहश्रावद्वयीकायाः ॥
त्रिफलाकरञ्जपल्लवखदिरगुडूचीत्रिवृद्दन्त्यः।
मुक्ताविड़ङ्गरजनीकुटजत्वक्निम्बवङ्गिसम्याकाः ॥
एते रचिताः वटिकां मधुघृतमिश्रां गिलेत् प्रातः।
गोमूत्रेण च कुष्ठं नुदत्यश्वगातमचिरेण ॥
श्वित्राणि पाण्डुरोगं विषमानुदरप्रमेहगुल्मांश्च।
नाशयति वलीपलितं योगः स्वायम्भुवो नाम्ना"।

अग्निलेखा सोमराजी। गिरिजस्य शिलाजतुनः। ताप्यस्य सुवर्णमाक्षिकस्य। आवल्गिका मुण्डी इति लोके। स्वायम्भुवो गुग्गुलुः ॥ * ॥

"चित्रकं त्रिफला व्योषमजाजी कारवी वचा।
सैन्धवातिविषे कुष्ठं चव्यैलायवसूकजम् ॥
विड़ङ्गान्यजमोदा च मुस्ता चामरदारु च।
यावन्त्येतानि सर्व्वाणि तावन्मात्रान्त गुग्गुलुम् ॥
सङ्घृष्य सर्पिषा सार्द्धं गुटिकां कारयेद्भिषक्।
प्रातर्भोजनकाले च खादेदग्निबलं यथा ॥
हन्त्यष्टादश कुष्ठानि क्षमीन् दुष्टव्रणानि च।
यक्ष्मार्शोविकारांश्च मुखानयगलग्रहान्।
सप्तसोमक्षिमन्थश्च गुल्मश्चापि वियच्छति।
व्याधीन् कोष्ठगतांश्चापि जयेद्विष्णुरिवासुरान्"।

एकविंशतिको गुग्गुलुः ॥ * ॥

"वातरक्ताधिकारोक्तः पुरः कैशोरकाविधः।
कुष्ठानां वातरक्तानां नाशाय परमौषधम्"।

कैशोरको गुग्गुलुः ॥ * ॥

"भल्लातकं प्रस्थयुगं क्षित्त्वा द्रोणजले क्षिपेत्।
प्रस्थद्वयं गुड़ाच्चूर्णं तत्राम्भसि क्षिपेत्।
चतुर्थांशावशेषन्तु कषायमवतारयेत्।
वस्त्रपूते कषाये च वक्ष्यमाणानि निःक्षिपेत्।
सरावमात्रं गोसर्पिर्गोदुग्धस्याढ़कं तथा।
सितां प्रस्थमितां दद्यात् प्रस्थार्द्धं माक्षिकं क्षिपेत्॥
सर्व्वाण्येकत्र भाण्डे तु पचेदृजुदग्निना शनैः।
सर्व्वद्रव्ये घनीभूते पावकादवतारयेत् ॥
तत्र क्षेप्याणि चूर्णानि ब्रूमो विल्वमितामृता।
वाकुची चाथ दन्त्यः पिप्पुमर्द्दौ हरीतकी ॥
धात्री राज्यिश्च मञ्जिष्ठा मरिचं नागरं कणा।
यवानी सैन्धवं मुस्तं त्वगेला नागकेशरम् ॥
पर्पटः पत्रकं बालमुशीरं चन्दनं तथा।
गोक्षुरस्य च बीजानि कर्च्चूरो रक्तचन्दनम् ॥
एषां पलार्द्धमानानां चूर्णमेषामिह क्षिपेत्।
पलमात्रमिदं प्रातः समश्नीयाज्जलेन हि ॥
जयेदवलेहोऽयं कुष्ठानि निखिलान्यपि।

वातरक्तानि सर्व्वाणि सर्व्वाण्यर्शांसि मेवितः ॥
व्यायाममातपं वह्निमस्यं मांसं दधि स्त्रियम्।
तैलाभ्यङ्गं तथाध्वानं नरो भल्लातके त्यजेत्" ॥

इति अमृतभल्लातकावलेहः ॥ * ॥

"निम्बं गोपारुणा कट्वी व्याघ्री त्रिफला घनम्।
पर्पटावल्गुजानन्ता वचा खदिरचन्दनम् ॥
पाठा मुरुष्टी यष्टी मार्गी वासा भूनिम्बवत्सकम्।
श्यामेन्द्रवारुणी मूर्व्वा विड़ङ्गेन्द्रयवानलम् ॥
हस्तिकर्णोऽमृता द्रेका पटोलं रजनीद्वयम्।
कषायरञ्जवधसप्ताङ्गक्षुद्रवेल्लोचटाफलम् ॥
मञ्जिष्ठा-लाङ्गली रास्ना गक्षमालाः पुनर्नवा।
दन्ती विजयसारश्च भृङ्गराजः कुरण्टकम् ॥
अर्द्धोठकं च प्राखोटं द्विपलांशं पृथक् पृथक्।
यष्टीयासानि सर्व्वाणि जलद्रोणे पचेच्छनैः ॥
अष्टमांशावशेषन्तु कषायमवतारयेत्।
विधाय वाससा पूतं स्थापयेद्भाजने दृढ़े ॥
भल्लातकसहस्राणि क्षिप्त्वा चीर्णमर्म्मण्यभ्रसि।
पचेदष्टावशेषन्तु कषायमवतारयेत्।
तत्र वल्लेण संशोध्य दौ कषायौ विमिश्रयेत्।
गुड़स्य तु तुलां दत्त्वा लेहवत् साधु साधयेत् ॥
भल्लातकसहस्राणि तत्र बीजानि विक्षिपेत्।
त्रिकटु त्रिफला मुस्तं विड़ङ्गं चित्रकं तथा।
सैन्धवं चन्दनं कुष्ठं दीप्यकञ्च पलं पृथक्।
सौगन्ध्यर्थं क्षिपेत्तत्र चातुर्जातं पलं पलम् ॥
महाभल्लातको ह्येष महादेवेन भाषितः।
प्राणिनां हितकामाय जयेच्छीघ्रं प्रयोगतः।
श्वित्रमौड़ुम्बरं दद्रूमष्टक्षिप्रं सकाकणम्।
पुण्डरीकञ्च चर्म्माख्यं विस्फोटं रक्तमण्डलम् ॥
कण्डूं कापालकं कुष्ठं पामानञ्च विपादिकाम्।
वातरक्तं षड़र्शांसि पाण्डुरोगं व्रणं क्षमीन् ॥
रक्तपित्तमुदावर्त्तं कासं श्वासं भगन्दरम्।
सदाभ्यासेन पलितमामवातं सुदुस्तरम् ॥
नियन्त्रणन्तु कथितो विहाराहारमैथुनैः।
कुरुते परमां कान्तिं प्रदीप्तं जठरानलम् ॥
अनुपानं प्रयोक्तव्यं क्षिन्नातोयं पयोऽथवा।
भोजने तु सदा त्याज्यमुष्णमन्नं विशेषतः"।

गोपां गां पातीति गोपा गोपकन्या श्वेत साउ इति लोके। यत आह निघण्टुः "श्यारिवाश्यारदाक्षोटा गोपकन्या प्रतानिका" इति। तद्वाचको गोपीशब्दश्च। यत आह। गोपी श्यामा श्यारीवा स्यादनन्तोत्पलश्यारिवेत्यमरः ॥ गोपाङ्गना गोपवल्ली लताङ्गा काण्डश्यारिवेति मदनपालः। अमृता अतीस। अवल्गुजः सोमराजी। अनन्ता दुरालभा। चन्दनं श्वेतम्। भार्ग्या अलाभे कण्टकारीमूलं ग्राह्यात्। श्यामा क्षुद्रा साउ। हस्तिकर्णः हस्तिकञ्च। द्रेका वकाइनि। सप्ताङ्गः क्षतिवन। क्षुद्रवेल्लः जलवेतस। उच्चटाफलं श्वारक्तगुञ्जाफलम्। कुरण्टकः पीतपुष्पकटसरैया। दीप्यकः यवानी। महाभल्लातकः ॥ * ॥

"मञ्जिष्ठा निम्बा तिक्ता वचा दारु निशामृता।
निम्बत्वेषां क्षतः क्वाथः सर्व्वकुष्ठानि बाधते" ॥

इति बृहन्मञ्जिष्ठादिक्वाथः ॥ * ॥

"मञ्जिष्ठा वाकुची चक्रमर्द्दश्च पिप्पुमर्द्दकः।
हरीतकी हरिद्रा च धात्री वासा शतावरी ॥
बला नागबला यष्टीमधुकं क्षुरकोऽपि च।
पटोलस्य लतोशीरं गुड़ूची रक्तचन्दनम् ॥
मञ्जिष्ठादिरयं क्वाथः कुष्ठानां नाशनः परः।
वातरक्तस्य संहर्त्ता कण्डू मण्डलखण्डनः"।

इति मध्यममञ्जिष्ठादिक्वाथः ॥ * ॥

"मञ्जिष्ठा कुटजामृता घनवचासुरठीहरिद्राद्वयं
क्षुद्रारिष्टपटोलकुण्डकटुकामार्गीविड़ङ्गाग्निकम्।
मूर्व्वादारुकलिङ्गभृङ्गमगधाश्चायन्तिपाठावरी।
गायत्रीत्रिफलाकिरातकमहानिम्बासनारग्वधम् ॥
श्यामावल्गुजचन्दनं वरणकं दन्ती च प्राखोटकं
वासा पर्पटसारिवा प्रतिविषानन्ता विशाला जलम्॥
मञ्जिष्ठादिरयं कषायमिति यः संसेवते तस्य तु
त्वग्दोषा ह्यचिरेण यान्ति विलयं कुष्ठानि चाष्टादश।
नाशं गच्छति वातरक्तमखिलं नश्यन्ति रक्तामया
वीसर्पश्वयथि शून्यता नयनजा रोगाः प्रशाम्यन्ति च"॥

अरिष्टः निम्बः। कलिङ्गमिन्द्रयवम्। भृङ्गं भङ्गरा। वरी शतावरी। गायत्री खदिरः। असनः विजयसारः। श्यामा प्रियङ्गुः। चन्दनञ्च रक्तग्राह्यम्। सारिवा साउ। अनन्ता दुरालभा। विशाला इन्द्रवारुणी। जलं नेचवाला।

इति बृहन्मञ्जिष्ठादिक्वाथः ॥ * ॥

"मरिचं त्रिफला मुस्ता हरितालं मनःशिला।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ॥
विशालां करवीरञ्च क्षीरमर्कसमुद्भवम्।
गोमयस्य रसं कुर्य्यात् प्रत्येकं कर्षसंमितम् ॥
विषस्यार्द्धपलं देयं तैलं प्रस्थमितं कटु।
पचेच्चतुर्गुणे क्षीरे गोमूत्रे द्विगुणे तथा ॥
मरिचाद्यमिदं तैलमभ्यङ्गात् कुष्ठनाशनम्।
एतस्याभ्यङ्गतः श्वित्रं विवर्णं तत्क्षणात् भवेत् ॥
तैलमेतत् जयेत् कण्डूं श्यामां सिध्मं विचर्चिकाम्।
पुण्डरीकं तथा दद्रुं श्यूनतां नित्यमेविनाम् ॥

इति लघुमरिचाद्यं तैलम् ॥ * ॥

"मरिचं त्रिफला दन्ती क्षीरमार्कवक्षारसः।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ॥
विशाला करवीरश्च हरितालं मनःशिला।
चित्रकं वाकुची मुस्ता विड़ङ्गं चक्रमर्द्दकः ॥
क्षीरीवः कुटजो निम्बः सप्तपर्णोऽमृता क्षुद्री।
सम्याको नक्तमालश्च खदिरो वाकुची वचा ॥
ज्योतिष्मती च पलिका विषं द्विपलिकं भवेत्।
आढ़कं कटुतैलस्य गोमूत्रञ्च चतुर्गुणम् ॥
श्लक्ष्णपाचे लोहपात्रे वा शनैर्मृदुग्निना पचेत्।
मरिचाद्यमिदं तैलं महर्षिभिरुदीरितम् ॥
अभ्यङ्गेतेन तैलेन श्वित्रयेत् कोष्ठिकान् व्रणान्।
श्यामाविचर्चिकादद्रुकण्डूविस्फोटकानि च ॥
वलीं च पलितं छायां नीलं व्यङ्गं तथैव च।
अभ्यङ्गेन प्रशाम्यन्ति सौकुमार्यञ्च जायते ॥
प्रथमे वयसि स्त्रीणां यासां नस्यं प्रदीयते।
तासामपि जरां प्राप्य न स्यातां स्खलितौ स्तनौ ॥
वलीवर्द्दस्तुरङ्गो वा गजो वा वायुपीड़ितः।
भिषिरभ्यङ्गनस्यस्य भवेन्मारुतविक्रमः" ॥

क्षुद्रकु

ज्योतिष्मती मालकङ्गनी इति लोके ।

इति महामरिचादितैलम् ॥ * ॥

"तालकस्य तु पत्राणि यस्य सन्ति पृथक् पृथक् ।
अभ्रकस्यैव तद्ग्राह्यं हरितालं चिकित्सकैः ॥
पुनर्नवायाः सरसे तालकं तद्विमर्दयेत् ।
दिनमेकं ततस्तस्मिन् घनत्वं गमिते सति ॥
कुर्वीत चक्रिकां तां तु शोषयेत् सम्यगातपे ।
पुनर्नवासमस्ताङ्गक्षारे स्थाल्यां गलावधि ॥
पूरयेच्च ततः क्षारं दृढयेत् पीडनेन हि ।
क्षारस्योपरि तां दद्यात् तालकस्य तु चक्रिकाम् ॥
तत आच्छादनं दत्त्वा मुद्रां कृत्वा विशोषयेत् ।
स्थाल्यां शुल्लां निधायाग्निममन्दं ज्वालयेत् भिषक् ॥
निरन्तरमहोरात्रपञ्चकं तेन सिध्यति ।
खाङ्गशीतं समुत्तार्य्य गृह्णीयाद्रसमुत्तमम् ॥
तालकेश्वरनामायं सुक्तो गुल्मामितौ रसः ।
गुडूच्यादिकषायेण सदानेतान् विनाशयेत् ॥
अष्टादशापि कुष्ठानि वातरक्तं तथोद्धतम् ।
फिरङ्गदेशजं रोगं दुस्तरञ्च व्यपोहति ॥
एतद्भेषजसेवी तु लवणाम्लौ विवर्जयेत् ।
तथा कटुरसं वह्निमातपं दूरतस्त्यजेत् ॥
लवणं यः परित्यक्तुं न शक्नोति कथञ्चन ।
स तु सैन्धवमश्नीयात् मधुरोपरसो हि सः" ॥

इति तालकेश्वरो रसः ॥ * ॥

"तालताप्यशिलाहृतटङ्गणं सिन्धुसंयुतम् ।
गन्धार्कौ द्विगुणौ सृताज्जम्बीराद्भिः प्रमर्दयेत् ॥
बड्डं पुटितं मोढ्वा भूधरे सकलं त्रिदम् ।
षट्पलं त्रिपलं ताम्रं लोहभस्म चतुष्पलम् ।
जम्बीराद्भिर्दिनं घृष्टं त्रिगुणं विषं क्षिपेत् ।
अस्य माषद्वयं खादेन्महिषीघृतसंयुतम् ॥
मध्वाज्यैर्वाकुचीबीजैः कर्षं जिह्यात्ततः परम् ।
तालकेश्वरनामायं सर्व्वकुष्ठहरो रसः" ।
अर्कौ मारितं ताम्रम् द्वितीयतालकेश्वरो रसः ॥ * ॥

"रसो बलिस्ताम्रमयः पुरोऽग्निः
शिलाजतु स्यादिषतिन्दुकञ्च ।
वरा च तुल्यं गगनं करञ्ज-
बीजं पृथग्भागचतुष्टयञ्च ॥
संमर्द्य सर्व्वं मधुना घृतेन
घृतस्य पात्रे निहितं प्रयत्नात् ।
कर्षं भजेत् प्रत्यहमस्य पथ्यं
श्यामौदनं दुग्धमधुव्रतञ्च ॥
विशीर्णकर्णाङ्गुलिनासिकोऽपि
भवेदनेन स्मरतुल्यमूर्त्तिः ।
दारापरित्यागं इह प्रदिष्टो
जलौदनं तत्र निबद्धमूले" ॥

ताम्रमयञ्च मारितम् । पुरो गुग्गुलुः । अग्निश्चित्रकम् । विषतिन्दुकः कुचिला । वरा त्रिफला । रसादि त्रिफलान्तं सर्व्वं तुल्यम् । गगनमभ्रकम् । करञ्जबीजञ्च पृथक् चतुर्गुणं रसात् । तत्र कुष्ठे बद्धमूले सति जलौदनमेव पथ्यम् ।

इति गलत्कुष्ठारिरसः ॥ * ॥

"अथ नागवधाख्यस्य रसस्य विधिरुच्यते ॥
यः पुरा मुनिवरैरुदाहृतो
यत्किञ्चित्कजनैः समाहृतः ।
यस्तु कुष्ठपरमोषकारको
नागमारणविधिः स लिख्यते ॥
सुपक्वां स्थालिकामेकामाढ्यकाम्बुघृतेक्षुमाम् ।
गुडचूर्णकृतैः पङ्क्तिरागलं लेपयेद्बहिः ॥
गन्धकं भिषगानीय शरावमितमुत्तमम् ।
चूर्णयित्वा तदर्द्धन्तु तस्यां स्थाल्यां प्रसारयेत् ॥
शरावार्द्धस्य ताम्रस्य पत्राण्यतितनूनि च ।
स्थाल्यां यद्गन्धकं तस्मिन्नुपर्य्युपरि धारयेत् ॥
शरावार्द्धस्य सीसस्य पत्राणि च तनूनि च ।
धारयेत्ताम्रपत्राणामुपर्य्येव तथैव च ॥
गन्धकस्य शरावार्द्धं पत्राणामन्तरान्तरा ।
दत्त्वा तस्यावशेषन्तु सर्व्वेषामुपरि क्षिपेत् ॥
ततः पिधानं दत्त्वा तु विदध्यात् सन्धिमुद्रणम् ।
गुडं चूर्णञ्च खदिरं मिश्रयेत्तेन मुद्रयेत् ॥
मुद्रां संशोष्य तां स्थाल्यां शुल्लग्रामुपरि धारयेत् ।
तदधो ज्वालयेदग्निं द्वादशप्रहरावधि ॥
खाङ्गशीतं समुत्तार्य्य ततो निष्काश्य चौषधम् ।
श्लिलायां चूर्णयित्वा तु वस्त्रपूतञ्च कारयेत् ॥
त्रिद्रोणजलयोग्यन्तु विशालाख्यं महाघटम् ।
गुडचूर्णकृतैः पङ्क्तिरागलं लेपयेद्बहिः ॥
सर्पः षड्यङ्गुलायामः सार्द्धषड्यङ्गुलोऽथवा ।
स्निग्धकः कृष्णवर्णः स्यात् किं वा गोधूमवर्णवान् ॥
वधस्तस्य विधातव्यो यथा देहो न भिद्यते ।
तार्क्षकं सदलं यत्तच्चूर्णयेत् कुड़वद्वयम् ॥
विषं पलमितं क्षुण्णं दत्त्वा दत्त्वान्तरान्तरम् ।
हरितालस्य चूर्णेन पूरयेद्भृङ्गगोदरम् ॥
विषं पलमितं क्षुण्णं वाकुचीं पलसंमिताम् ।
भल्लातकं सुपक्वं यत् प्रस्थमैन्द्रयवं तथा ॥
सर्व्वाणि सम्यगास्तीर्य्य धारयेत महाघटे ।
तेषामुपरि सर्पञ्च धारयेत् कुण्डलीकृतम् ॥
सर्पस्योपरि संक्षिप्य धार्य्याण्येतानि पीड़नैः ।
सनालमर्कपत्रं तु शरावयुगलं क्षिपेत् ॥
खुरोदलं सनालञ्च क्षिपेत् प्रस्थमितं तथा ।
वटप्ररोहं प्रस्थं च कुमारीं प्रस्थसंमिताम् ॥
दत्त्वा पिधानं चूर्णेन गुड़ेन खदिरेण च ।
मुद्रयेत् सह वस्त्रेण मृदा कुटितयापि च ॥
मुद्रां संशोष्य शुल्लाग्रान्तु धारयेत्तं महाघटे ।
तदधो ज्वालयेदग्निं याममेकं यथौदने ॥
ततो हठाग्निर्दातव्यो यावत् स्युः प्रहरा दश ।
पुनः प्रहरमेकञ्च वह्निं दद्याद्यथौदने ॥
ततो लौहे कटाहे तु शरावद्वितयोन्मिते ।
गोघृतं प्रक्षिपेत् सर्व्वमौषधं यद्घटे स्थितम् ॥
दत्त्वाग्निं ज्वालयेत्तावद्यावदुत्क्लिश्यतेऽनसः ।
भेषजं च भवेच्चेतं ततस्तस्मिन् परिक्षिपेत् ॥
भल्लाया: स्फटिकाख्याया द्वे पले तत्र निःक्षिपेत् ।
भल्लस्य टङ्कणस्यापि पलयुग्मञ्च निःक्षिपेत् ॥
ततः प्रहरमेकं तज्ज्वालयेच्छिखिकोपरि ।
ततस्ताम्रञ्च सीसञ्च भिन्द्यात्तावतारयेत् ॥
रसो नागवधाख्योऽयं विधिनानेन सिध्यति ।
आदौ गुल्मामितं खादेत्तावन्मरिचसंयुतम् ॥
क्रमेण वर्द्धयेत्तावद्यावद्गुल्मा चतुष्टयम् ।
वर्द्धयेन्मरिचञ्चापि तथैव हि यथारसम् ॥
यवस्य पर्पटीं भोक्तुं दद्याद्वा यष्टिकौदनम् ।
लवणं वर्जयेत् सप्त दिनानि गुल्मलोलुपः ॥
लवणं यः परित्यक्तुं न शक्नोति कथञ्चन ।
सैन्धवं खादयेत्तेन तच्च सप्तदिनोपरि ॥
रसेनानेन नश्यन्ति कुष्ठानि सकलान्यपि ।
सन्निपाताश्च नश्यन्ति राजयक्ष्मादयस्तथा ॥
इति नागवधाख्यो रसः ॥ * ॥ अथ विशिष्टानां कुष्ठानां चिकित्सा । तत्र सिध्मस्य चिकित्सा ।
"कुष्ठं मूलकबीजं प्रियङ्गवः सर्षपा रजनी ।
एतत् कोशीरयुक्तं निहन्ति च बहुवार्षिकं सिध्मम् ॥
शिरीषरसेन पिष्टं मूलकबीजं प्रलेपतः सिध्मम् ।
क्षारेण वा कदल्या रजनीमिश्रेण नाशयति ॥
दार्वी मूलकबीजानि तालकः सुरदारु च ।
ताम्बूलपत्रं सर्व्वाणि कार्षिकाणि पृथक् पृथक् ॥
श्लक्ष्णचूर्णन्तु घ्राणाः स्यात् सर्व्वाण्येकत्र वारिणा ।
लेपयेत प्रलेपोऽयं सिध्मानां नाशनः परः" ॥ * ॥

अथ चर्म्मदलस्य चिकित्सा ।

"सलिले चाम्रपेशी तु किञ्चित्सैन्धवसंयुता ।
ताम्रपात्रे विनिर्घृष्टा लेपाच्चर्म्मदलापहा" ॥
आम्रपेशी आमचूर ।
"सलिलेन तु शुष्काणि दृष्ट्वा धात्रीफलानि च ।
कराभ्यां सुखमाप्नोति नरश्चर्म्मदलान्वितः" ॥ * ॥

अथ पामाचिकित्सा ।

"शीरकस्य पलं पिष्टं सिन्दूरार्द्धपलं तथा ।
कटुतैलं पचेदार्द्धां सद्यः पामाहरं परम्" ॥
कटुतैलं षट्पलमितम् । शीरकादितैलम् ॥ * ॥
"मञ्जिष्ठात्रिफलालाक्षाकुशीराच्चिगन्धकैः ।
चूर्णितैस्तैलमादित्यपाकं पामाहरं परम्" ॥

इति आदित्यपाकतैलम् ॥

"सैन्धवं चक्रमर्द्दश्च सर्षपाः पिप्पली तथा ।
आरनालेन संपिष्टाः पामाकच्छूहराः स्मृताः" ॥ * ॥

अथ कच्छूचिकित्सा ।

"अर्कापत्ररसे पक्वं हरिद्राकल्कसंयुतम् ।
नाशयेत् सार्षपं तैलं पामां कच्छूं विचर्चिकाम्" ॥

अर्कतैलम् ।

"मनःशिलाकं कासीसं गन्धाश्मा सिन्धुजन्म च ।
खर्जूक्षीरी शिलाभेदी सुरठी कुष्ठञ्च मागधी ॥
लाङ्गलीकरवीरञ्च द्रुमः क्षमिहानलः ।
दन्तीनिम्बदलैश्चैभिः पृथक्सर्षपमितैर्भिषक् ॥
कल्कीकृतैः पचेत्तैलं कटुप्रस्थद्वयोन्मितम् ।
अर्कसीऽखण्डदुग्धेन पृथक्पलमितेन च ॥
गोमूत्रस्याढकेनापि प्रनैर्मर्द्दनेन पचेत् ।
अभ्यङ्गेन हरेदेतत् कच्छूदुःसाध्यतामपि ॥
पामानञ्च तथा कण्डूं लग्व्याधिव्याधिशमयात् ।
कच्छूराक्षसनामेदं तैलं हारीतभाषितम् ॥

इति कच्छूराक्षसनामतैलम् ॥ * ॥

अथ दद्रुचिकित्सा ।

"कुष्ठं क्षमिघ्नो दद्रुघ्नो निम्बासैन्धवसर्षपाः ।
कल्कपिष्टाः प्रलेपोऽयं दद्रुकुष्ठनिसूदनः ॥
दूर्व्वाऽभयासैन्धवचक्रमर्द-
कुठेरकाः काञ्जिकतक्रपिष्टाः ।

क्षुद्रकुष्ठ

त्रिभिः प्रलेपैरपि बद्धमूलं
दद्रुञ्च कुष्ठञ्च विनाशयन्ति ॥
कुठेरकः ममरी इति लोके।
लोके गन्धिलकाख्या सिद्धार्थश्च सुहीच्चीरम् ।
त्रयमिति समभागं स्यादेषां द्विगुणस्तु दद्रुघ्नः ॥
अष्टगुणे गोतक्रे तानि प्रक्षतानि सन्दध्यात् ।
दिवसचितयादूर्द्धं सम्यङ्निष्पेषयेत्तानि ॥
वन्योपलेन घृष्ट्वा दद्रुमालेपयेत्तेन ॥
सप्ताहाल्लेपोऽयं दद्रुमवश्यं विनाशयति" ॥ * ॥
अथ श्वित्रस्य चिकित्सा ।
"विभीतकत्वक्फलपूजटागां
क्वाथेन क्षात्वा गुडसंयुतेन।
अवश्यगुजं बीजमपाकरोति
श्वित्राणि कृष्णान्यपि पुण्डरीकम्" ॥
मलपूः काकोदुम्बरिका । अवल्गुजः सोमराजी ।
"गुडवावल्गुजबीजं हरितालं तक्रतुर्यांशम् ।
मनःशिला तालकार्द्धं गुञ्जाफलमभिमूलञ्च ॥
मूत्रेण गवां पिष्टं सुवर्णताकारकं श्वित्रस्य ।
श्वित्रकुष्ठ व्रजत्यस्तं पक्षार्द्धेनाधिकेन वा ॥
गिरिकर्ण्या सितायाश्च मूलेन परिलेपितम्" ॥
गिरिकर्णी नीलापराजिता ॥
"क्षारः सवाकुचीचूर्णो धात्रीखदिरसारयोः ।
शुक्लेन्दुकुन्दधवलं श्वित्रं संसेवितो हन्ति ॥
मथितेन पिबेत् चूर्णं काकोदुम्बर्यवश्यजम् ।
तैलाक्तो घर्म्मसेवी स्यात्क्षारी श्वित्रहृत् भवेत्" ॥
मथितं निर्ज्जलं विलोड़ितं दधि।
तक्रं चतुर्थांशयुक्तं वस्त्रपूतं दधि।
"खदिरस्य पलान्यष्टौ सोमराज्याः पलद्वयम् ।
त्रिफला पिप्पलमर्द्धञ्च दार्व्या दार्व्याश्च पर्पटी ॥
एषाक् पलांशमुद्धृत्य सिंहिकायाः पलद्वयम् ।
जलाढ़कद्वये साध्यं यावत् पादावशेषितम् ॥
क्वाथ्यमानञ्च मद्यञ्च घृतप्रस्थं विपाचयेत् ।
चतुष्पलं सोमराज्याः खदिरस्य पलं तथा ॥
पटोलमूलं त्रिफलां त्रायमाणां दुरालभाम् ।
कर्षार्द्धं कटुकं चापि कार्षिकं सूक्ष्मपेषितम् ॥
पलद्वयं कौशिकस्य शुक्लस्यात्र प्रदापयेत् ।
सिद्धं सर्पिरिदं श्वित्रं हन्यादग्न इवानलम् ॥
अष्टादशानां कुष्ठानां परमश्चैतदौषधम् ।
सोमराजीघृतं नाम निर्म्मितं ब्रह्मणा पुरा ॥
लोकानामुपकाराय श्वित्रकुष्ठादिरोगिणाम्" ॥
इति सोमराजीघृतम् ॥
"महौषधं महामेदा निम्बपत्राणि सर्षपाः ।
मनःशिला च सिन्दूरं पद्मचारिण्यवल्गुजम् ॥
हरिद्रे हरितालञ्च त्रिफला पीतगन्धकः ।
एतानि समभागानि विषार्द्धांशानि योजयेत् ॥
सर्पिषश्च पलान्यष्टौ देवदारुरसं शुभम् ।
द्विगुणं त्रिगुणं क्षीरं गोमूत्रञ्च चतुर्गुणम् ॥
ताम्रपात्रे तु संस्थाप्य श्लक्ष्णैर्म्मर्दनिका पचेत् ।
चतुर्भागावशेषन्तु सकल्कमवतारयेत् ॥
अग्नौ क्षिप्तन्तु निःशब्दं जलमुक्तं विचक्षणः ।
अभ्यङ्गपानयोर्योगादाशु सर्व्वान् गदान् जयेत् ॥
अष्टादशानां कुष्ठानां दद्रूणां श्वित्रिणां तथा ।

क्षुद्रचि

दुष्टमाड़ीषु मर्त्यानां स्रावित्रां कीटिनां तथा ॥
अष्टकस्रावपरीता ये ये च त्वक्प्रभिषक्क्रियाः ।
सर्व्वग्रहविषुक्तानां ग्रीर्णाङ्गानां निशेषतः ॥
सर्व्वधातुगते कुष्ठे पतितं भूम्निरोरुहम् ।
घर्घराव्यक्तघोषाणां तथा सर्व्वाङ्गवातिनाम् ॥
पानेऽभ्यङ्गे तथा नस्ये वस्तिकर्म्मण्यि नित्यशः ।
सप्तरात्रप्रयोगेण सर्व्वकुष्ठानि नाशयेत् ॥
द्विसप्ताहप्रयोगेण पूर्णचन्द्रनिभाननः ।
जातकेशनखश्मश्रुर्मातं षोड़शवर्षवत् ।
अनङ्गसदृशः साक्षात् सर्व्वामयविनाशनः ।
एतत् घृतं महाश्रेष्ठं भार्गवेणावतारितम् ॥
मनुष्याणां हितार्थाय सर्व्वव्याधिहरं परम् ।
महामार्त्तण्डकमिदं घृतं सर्व्वामरार्चितम्" ॥
इति महामार्त्तण्डघृतम् ॥ * ॥ इति कुष्ठाधिकारः ॥ इति भावप्रकाशः ॥

क्षुद्रगोक्षुरकः, पुं, (क्षुद्रः गोक्षुरः । ततः स्वल्पार्थे कन् क्षुद्रगोक्षुर इव कायति इत्येके ।) गोक्षुरक्षुपभेदः । छोटा गोक्षुर इति हरचिकार इति च हिन्दी भाषा । तत्पर्य्यायः । त्रिकण्टकः २ करटी ३ षड्ङ्गः ४ बक्रकण्टकः ५ क्षुरः ६ गोकण्टकः ७ कण्टफलः ८ पलङ्कषा ९ क्षुद्रक्षुरः १० भल्लटकः ११ स्थलशृङ्गाटकः १२ वनशृङ्गाटकः १३ इक्षुगन्धः १४ स्वादुकण्टः १५। अस्य गुणाः । सुशीतलत्वम् । बलप्रदत्वम् । मधुरत्वम् । दंशघ्नत्वम् । क्षुद्राश्मरीमेहविदाहनाशित्वम् । रसायनत्वम् । तत्र दृष्टेतो गुणोत्तरत्वञ्च । इति राजनिर्घण्टः ॥

क्षुद्रघण्टिका, स्त्री, (घण्टा अल्पार्थे कन् टाप् इत्वञ्च ततः क्षुद्रा घण्टिका इति कर्म्मधारयः ।) कण्ठलङ्कारविशेषः । घाघर इति घुङ्गुर इति च भाषा ॥ तत्पर्य्यायः । किङ्किणी २। इत्यमरः । २ । ६ । ११० ॥ क्षुद्रघण्टी ३ प्रतिसरा ४ किङ्किणीका ५ कङ्किणी ६ कङ्किणिका ७ क्षुद्रिका ८ । इति शब्दरत्नावली ॥ घर्घरी ९ । इति जटाधरः ॥ [इति राजनिर्घण्टः ॥

क्षुद्रघोणी, स्त्री, (क्षुद्रा घोणी ।) चिविल्लिकाक्षुपः ।

क्षुद्रचक्षुः, स्त्री, (क्षुद्रा चक्षुः सा इवाकृतिरस्याः ।) क्षुपविशेषः । तत्पर्य्यायः । चक्षुः २ चक्षूः ३ शुनकचक्षुका ४ त्वक्सारभेदिनी ५ क्षुद्रा ६ कटुका ७ कटुपत्रिका ८। अस्या गुणाः । मधुरत्वम् । कटुत्वम् । उष्णत्वम् । कषायत्वम् । दीपनत्वम् । शूलगुल्मार्शोविबन्धनाशित्वञ्च । इति राजनिर्घण्टः ॥ स्वल्पोऽत्र ॥

क्षुद्रचन्दनं, क्ली, (क्षुद्रं चन्दनमिति नित्यकर्म्मधारयः) रक्तचन्दनम् । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायाः ।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

क्षुद्रचिर्भिटा, स्त्री, (क्षुद्रा चिर्भिटा ।) गोपालकर्कटी । इति राजनिर्घण्टः ॥ (क्षुद्रचिर्भिटीति च क्वचित् दृश्यते ॥)

क्षुद्रप

क्षुद्रचूड़ः, पुं, (क्षुद्रा चूड़ा यस्य ।) पक्षिविशेषः । गोसालिक इति भाषा । यथा,—
"ध्रुवमल्लः क्षुद्रचूड़ो गूथलक्षश्च सालिकः" ॥
इति शब्दचन्द्रिका ॥

क्षुद्रजन्तुः, पुं, (क्षुद्रः जन्तुर्जीवभेदः ।) शतपदी । इति शब्दमाला ॥ स्वल्पप्राणिमात्रञ्च ॥ (आमलकशब्दे-ऽस्य विवृतिर्ज्ञातव्या ॥)

क्षुद्रजातीफलं, क्ली, (क्षुद्रं जातीफलम् ।) आमलकम् । इति राजनिर्घण्टः ॥

क्षुद्रजीरः, पुं, (क्षुद्रः जीरः ।) स्वल्पजीरकः । इति शब्दचन्द्रिका । चुदिया जीरा इति भाषा ॥

क्षुद्रजीवा, स्त्री, (क्षुद्रा जीवा कर्म्मधारयः ।) जीवन्ती । इति राजनिर्घण्टः ॥

क्षुद्रता, स्त्री, (क्षुद्रस्य भावः । क्षुद्र + तल् टाप् च ।) क्षुद्रत्वम् । इति व्याकरणम् ॥

क्षुद्रत्वं, क्ली, (क्षुद्रस्य भावः । क्षुद्र + त्वप्रत्ययः ।) अल्पता क्रूरता । अधमत्वम् । दरिद्रत्वम् ।

क्षुद्रतुलसी, स्त्री, (क्षुद्रा तुलसीति नित्यकर्म्मधारयः ।) अर्जकः । स तु वर्व्वरीभेदः । इति राजनिर्घण्टः ॥

क्षुद्रदंशिका, स्त्री, (क्षुद्रा दंशिका ।) स्वल्पदंशकः । छोट डाँश इति भाषा । यथा,—
"पतङ्गिका पुत्तिका स्यात् दंशस्तु वनमक्षिका ।
प्राचिका चाल्पतज्जातिर्दंशी स्यात् क्षुद्रदंशिका" ॥
इति जटाधरः ॥

क्षुद्रदंशी, स्त्री, (दंश + ङीष् । क्षुद्रा दंशी ।) क्षुद्रदंशिका । इति जटाधरदर्पणतः ॥

क्षुद्रदुरालभा, स्त्री, (क्षुद्रा दुरालभा लतादिभेदः ।) स्वल्पदुरालभातुल्यः । तत्पर्य्यायः । मरुस्था २ मरुसम्भवा ३ विशारदा ४ अजभक्ष्या ५ अजादनी ६ उष्ट्रभक्षिका ७ कषाया ८ कण्टिकृत् ९ ग्राहिणी १० करभप्रिया ११ करभादनिका १२। अस्या गुणाः । गौल्यत्वम् । अम्लत्वम् । ज्वरकुष्ठश्वासकासश्रमनाशित्वम् । पारदशुद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥

क्षुद्रदुस्पर्शा, स्त्री, (दुःसहः स्पर्शो यस्याः दुस्पर्शा । क्षुद्रा दुस्पर्शा इति कर्म्मधारयः ।) अग्निदमनी । इति राजनिर्घण्टः ॥ (श्रेयास्या अग्निदमनीशब्दे विवृतिः ॥)

क्षुद्रधात्री, स्त्री, (क्षुद्रा धात्री ।) कर्कटशृङ्गी । इति राजनिर्घण्टः ॥

क्षुद्रनासिकः, त्री, (क्षुद्रा नासिका नासा यस्य ।) स्वल्पनासायुक्तः । तत्पर्य्यायः । नः क्षुद्रः २ । इति हेमचन्द्रः ॥

क्षुद्रपत्रा, स्त्री, (क्षुद्रं पत्रं पर्ण यस्याः । ततष्टाप् ।) वाड़ेरी । इति हारावली ॥

क्षुद्रपत्री, स्त्री, (क्षुद्रं पत्रं अस्याः । ततो गौरादित्वात् ङीष् ।) वचा । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्यायाः ।
"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्व्विका ।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षुद्रपनसः पुं, (क्षुद्रश्चासौ पनसश्चेति कर्म्मधारयः ।)

वकुचः । इति राजनिर्घण्टः ॥ स्वल्पकण्टाफलश्च ॥ (पर्य्यायोऽस्य यथा,—

"लकुचः क्षुद्रपनसो लकुचो डङ्ग इत्यपि" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षुद्रपर्णः पुं, (क्षुद्रं पर्णं पत्रं यस्य ।) अर्जकः । इति राजनिर्घण्टः ॥ सूक्ष्मपत्रे त्रि ॥ (विवरणमस्यार्জ্জकशब्दे ज्ञातव्यम् ॥)

क्षुद्रपाषाणभेदा, स्त्री, (क्षुद्रा पाषाणभेदा इति नित्यकर्म्मधारयः ।) क्षुपविशेषः । क्षुद्रपाषाणभेदी इति ख्याता । तत्पर्य्यायः । चतुःपत्री २ पार्व्वती ३ नगभूः ४ अग्निकेतुः ५ गिरिभूः ६ कन्दरोद्भवा ७ शैलोद्भवा ८ गिरिजा ९ नगजा १० । अस्या गुणाः । व्रणकृच्छ्राश्मरीहरत्वम् । इति राजनिर्घण्टः ॥

क्षुद्रपिप्पली, स्त्री, (क्षुद्रा पिप्पली ।) वनपिप्पली । इति राजनिर्घण्टः ॥

क्षुद्रपोतिका, स्त्री, (क्षुद्रा पोतिका । नित्यकर्म्मधारयः ।) मूलपोती । इति राजनिर्घण्टः ॥

क्षुद्रफलकः, पुं, (क्षुद्रं फलमस्य इति कप् ।) जीवनवृक्षः । इति शब्दचन्द्रिका ॥

क्षुद्रफला, स्त्री, (क्षुद्रं फलं अस्या इति टाप् ।) भूमिजम्बुः । इति शब्दमाला । इन्द्रवारुणी । गोपालकर्कटी । कण्टकारी । अग्निदमनी । इति राजनिर्घण्टः ॥

क्षुद्रबुद्धिः, त्रि, (क्षुद्रा अल्पा अधमा क्रूरा वा बुद्धिर्मतिर्यस्य ।) अल्पमतिः । क्रूरधीः । अधमचेतनः ॥

क्षुद्रमुस्ता, स्त्री, (क्षुद्रा मुस्ता इति कर्म्मधारयः ।) कसेरुः । इति राजनिर्घण्टः ॥ (कसेरुशब्दे ऽस्या गुणपर्य्याया ज्ञेयाः ॥)

क्षुद्ररोगः, पुं, (क्षुद्रः रोगः ।) स्वल्पव्याधिः । तस्य गणना यथा । पलितः १ इन्द्रलुप्तः २ दारुणकः ३ अरंषिका ४ हरिवेल्लिका ५ पनसिका ६ पाषाणगर्द्दभः ७ मुखदूषिका ८ व्यङ्गः ९ नीलिका १० वल्मीकः ११ कच्छा १२ गन्धिनाम १३ अग्निरोहिणी १४ विदारिका १५ चिप्पः १६ परिवर्त्तिका १७ अवपाटिका १८ निरुद्धप्रकाशः १९ सन्निरुद्धगुदः २० दृष्टजकच्छः २१ अङ्गिपूतनः २२ गुदभ्रंशः २३ शूकदंदृः २४ अलजी २५ अलसः २६ दारी २७ कदरः २८ तिलकालकः २९ मसकः ३० जतुमणिः ३१ न्यच्छः ३२ पद्मिनीकण्टकम् ३३ अजगल्लिका ३४ यवप्रख्या ३५ अन्त्रालजी ३६ विद्रधी ३७ इन्द्रवृद्धा ३८ गर्द्दभिका ३९ जालगर्द्दभः ४० कच्छपी ४१ शर्करार्ब्बुदः ४२। एषां मध्ये येषां लक्षणचिकित्सा पूर्व्वं न लिखिता ते चात्र लिख्यन्ते ॥ * ॥

अथ अरंषिकालक्षणमाह ।

"अरंषि बज्रवक्त्राणि बज्रशोदीनि मूर्द्धनि ।
कफासृक्कृमिकोपेन तानि विद्यादरंषिकाम्" ॥

अरंषि व्रणानि । अथारंषिकायाश्चिकित्सा ।

"नीलोत्पलस्य किञ्जल्को धात्रीफलसमन्वितः ॥
यष्टीमधुकयुक्तश्च लेपाद्धन्यादरंषिकाम् ।
त्रिफलायाः रजो यष्टी मार्क्कवोत्पलसारिवा ।
सैन्धवं पद्मकेसरं तैलं हन्यादरंषिकाम्" ॥

इति त्रिफलाद्यं तैलम् ॥ * ॥

अथाग्निरोहिणीलक्षणमाह ।

"कक्षाभागेषु ये स्फोटा जायन्ते मांसदारुणाः ।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः ॥
सप्ताहात् द्वादशाहाद्वा पक्षाद्वा घ्नन्ति मानवम् ।
तामग्निरोहिणीं विद्यादसाध्यां सान्निपातिकाम्" ॥

सप्ताहादित्यादि वातपित्तकफाधिक्यापेक्षया बोद्धव्यम् । घ्नन्तीत्यनुपक्रान्ताः । उपक्रान्तास्तु साध्या एव । चरकेणाग्निरोहिण्याश्चिकित्साया उक्तत्वात् ।

तस्याश्चिकित्सा ।

"पित्तं वीसर्पविधिना साधयेदग्निरोहिणीम् ।
रोहिण्यां लङ्घनं कुर्य्याद्रक्तमोक्षणरूपताम् ॥
शरीरस्य च संशुद्धिं तान्तु रुद्धां परित्यजेत्" ॥ * ॥

अथ विदारिकालक्षणमाह ।

"विदारिकन्दवद्वृत्तो कक्षावङ्क्षणसन्धिषु ।
रक्तो विदारिकां विद्यात् सर्व्वजां सर्व्वलक्षणाम्" ॥

अत्र पिड़कामिति विशेष्यपदमध्याहरणीयम् ॥

अथ तच्चिकित्सा ।

"विदारिकायां प्रथमं जलौकायोजनं हितम् ।
पाटनञ्च विपक्वायां ततो व्रणविधिः स्मृतः" ॥ * ॥

अथावपाटिकालक्षणमाह ।

"अल्पीयसी यदा हर्षात् बलादुच्छेत् स्त्रियं नरः ।
हस्ताभिघातादथवा चर्म्मेण्युद्वर्त्तते बलात् ॥
मर्द्दनात् पीड़नाद्वापि शुक्रवेगविघाततः ।
यत्रावपाद्यते चर्म्म तां विद्यादवपाटिकाम् ॥
वातेन कर्कशा रूक्षा सूक्ष्मा क्षाम्या रागन्विता ।
पित्तेन पीता रक्ता वा दाहक्लेदासमन्विता ॥
श्लेष्मणा कठिना स्निग्धा कण्डूमत्यल्पवेदना" ॥

अल्पीयः अल्पतरं योनिच्छिद्रं यस्यास्ताम् । अवपाद्यते विदार्य्यते ।

अथ तस्याश्चिकित्सा ।

"श्लेष्मक्षेदैरिमां वैद्यश्चिकित्सेदवपाटिकाम्" ॥

अथ सन्निरुद्धगुदस्य लक्षणमाह ।

"वेगसन्धारणाद्वायुर्विकृतो गुदसंश्रितः ।
निरुणद्धि महास्रोतः सूक्ष्मं द्वारं करोति हि ॥
मार्गस्य सौक्ष्म्यात् क्लेशेन पुरीषं तस्य गच्छति ।
सन्निरुद्धगुदं व्याधिमेतं विद्यात् सुदुस्तरम्" ॥

अथ तस्य चिकित्सा ।

"सन्निरुद्धगुदे तैलैः सेको वातहरैर्हितः ।
तथा निरुद्धप्रकाशक्रियापि कथिता हिता" ॥

अथाजगल्लिकालक्षणमाह ।

"स्निग्धा सवर्णा ग्रथिता निरुजा मृद्वसन्निभा ।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका" ॥

ग्रथिता गुम्फितेव । मृद्वसन्निभा मृद्वाकृतिः ॥

अथ तस्याश्चिकित्सा ।

"तत्राजगल्लिकामामां जलौकोभिरुपाचरेत् ।
शुक्तिशौराष्ट्रिकाक्षारकल्कैस्त्वालेपयेन्मुहुः ॥
कठिना क्षारयोगैश्च द्रावयेदजगल्लिकाम् ।
श्यामालाङ्गलिकामूर्व्याकल्कैरपि विलेपयेत् ॥
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत्" ॥

अथान्त्रालजीलक्षणमाह ।

"घनामवक्त्रां पिड़कामुन्नतां परिमण्डलाम् ।
अन्त्रालजीमल्पपूयां तां विद्यात् कफवातजाम्" ॥

घनां कठिनाम् । परिमण्डलां वर्त्तुलाम् । अल्पपूयां स्वल्पस्रावाम् ॥

अथ तस्याश्चिकित्सा ।

"अन्त्रालजीं यवप्रख्यां पूर्व्वं खेदैरुपाचरेत् ।
मनःशिलादेवदारुकुष्ठकल्कैः प्रलेपयेत् ॥
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत्" ॥

इति भावप्रकाशे क्षुद्ररोगाधिकारः ॥

(अस्य सकारणलक्षणसम्प्राप्तिचिकित्सादीनि यथा,—

"स्निग्धा सवर्णा ग्रथिता नीरुजा मृद्वसन्निभा ।
पिटिका कफवाताभ्यां बालानामजगल्लिका ॥
यवप्रख्या यवप्रख्या ताभ्यां मांसाश्रिता घना ।
अवक्त्रास्वाजगीवत्तास्तोकपूया घनोन्नता ॥
ग्रथ्यथः पक्व वा षड्वा कच्छपी कच्छपोन्नता ।
कर्णस्योर्द्धं समन्ताद्वा पिटिका कठिनोग्ररुक् ॥
श्वासूकाभा घनसिका श्वोपक्लेद्यल्परुजः स्थिरः ।
हनुसन्धिसमुद्भूतस्ताभ्यां पाषाणगर्द्दभः ॥
श्लेष्मलीकण्टकाकाराः पिटिकाः सरुजो घनाः ।
मेदोगर्भा मुखे यूनां ताभ्यश्च मुखदूषिकाः ॥
ते पद्मकण्टका ज्ञेया यैः पद्ममिव कण्टकैः ।
चीयते नीरुजैस्तैस्तैः शरीरं कफवातजैः ॥
पित्तेन पिटिकादृत्ता पक्वोदुम्बरसन्निभा ।
महादाहज्वरकरी विद्रता विद्रतानना ॥
गात्रेष्वन्तश्च वक्त्रस्य दाहज्वररुजान्विताः ।
मसूरमात्रास्तदर्द्धास्तत्संज्ञाः पिटिका घनाः ॥
ततः कष्टतराः स्फोटा विस्फोटाख्या महारुजाः ।
या पद्मकर्णिकाकारा पिटिका पिटिकान्विता ॥
सा विज्ञा वातपित्ताभ्यां ताभ्यामेव च गर्द्दभी ।
मण्डला विपुलोत्सन्ना सरागपिटिकाचिता ॥
कच्छेति कक्षासन्नेषु प्रायोदोषेषु सानिलात् ।
पित्ताद्भवन्ति पिटिकाः सूक्ष्मा लाजोपमा घनाः ;
तादृशी महती लेका गन्धनामेति कीर्त्तिता ।
घर्म्मस्वेदपरीतेऽङ्गे पिटिकाः सरुजो घनाः ॥
राजिकादर्द्धसंस्थानप्रमाणा राजिकाह्वया ।
दोषैः पित्तोल्बणैर्मन्दैर्विसर्पति विसर्पवत् ॥
श्वोष्ठोऽपाकस्तनुस्ताम्रो ज्वरक्लम्लालगर्द्दभः ।
मलैः पित्तोल्बणैः स्फोटा ज्वरिणो मांसदारुणाः ॥
कक्षाभागेषु जायन्ते येऽग्नाभाः साग्निरोहिणी ।
पक्षाद्वात्सप्तरात्राद्वा पश्चाद्वा घ्नन्ति जीवितम् ॥
चिलिङ्गा पिटिका वृत्ता जचूर्द्धमिरिवेल्लिका ।
विदारी कन्दकठिना विदारी कक्षवङ्क्षणे ॥
भेदोऽनिलकफैर्ग्रन्थिः स्नायुमांसशिराश्रयैः ।
भिन्नो वसाद्यमध्याभं स्रवेत्तोद्यरुजोऽनिलः ॥
मांसं विशोष्य ग्रथितां शर्करामुपपादयेत् ॥
दुर्गन्धं रुधिरं क्लिन्नं नानावर्णं ततो मलाः ॥
तां स्रावयन्ति निचितां विन्द्यात्तच्छर्करार्ब्बुदम् ।
पाणिपादतले सन्धौ जचूर्द्धे वोपचीयते ॥
वल्मीकवच्छनैर्ग्रन्थिस्तद्वद्वक्त्रैरुभिर्मुखैः ।
रुदाहकण्डूक्लेदाढ्यो वल्मीकोऽसौ समस्तजः ॥
शर्करोन्मथिते मांसे क्षते वा कण्टकादिभिः ।

यन्थिः कोलवदुत्सन्नो जायते कदरन्तु तत् ॥
वेगसन्धारणाद्वायुरपानोऽपानसंश्रयम्।
अणूकरोति वाह्यान्तर्मार्गमस्य ततः शनैः ॥
क्षुत्क्षान्निर्गच्छति व्याधिरयं रुद्रगुदस्ततः।
कुर्य्यात् पित्तानिलं पाकं नखमांसे सरुग्ज्वरम् ॥
विष्पमक्षतरोगञ्च विद्यादुपनखञ्च तम्।
क्षण्णोऽभिघाताद्रूक्षञ्च खरञ्च कुनखो नखः॥
दुष्टकर्दमसंस्पर्शात् कण्टकोदान्वितान्तराः।
अङ्गुल्योऽलसमित्याऽऽख्यास्तिलाभास्तिलकालकान् ॥
क्षण्णानवेदनांस्त्वक्स्थान् मांसांस्तानेव चोन्नतान्।
मांसेभ्यस्तून्नततरांस्तन्मर्म्मकीलान् सितासितान् ॥
तथाविधो जतुमणिः सहजो लोहितस्तु सः।
क्षणं सितं वा सहजं मण्डलं लाञ्छनं समम् ॥
शोकक्रोधादिकुपितादातपित्तान्मुखे तनु।
श्यामलं मण्डलं व्यङ्गं वक्त्रादन्यच्च नीलिका ॥
परुषं परुषस्पर्शं व्यङ्गं श्यानञ्च मारुतात्।
पित्तात्ताम्रान्तमानीलं श्वेतान्तं कफतस्कफात् ॥
रक्ताद्रक्तान्तमाताम्रं श्लोषं चिमचिमायते।
वायुनोदीरितः श्लेष्मा त्वचं प्राप्य विदूष्यति।
ततस्त्वग् जायते पाण्डुः क्रमेण च विचेतना।
अल्पकण्डूरविक्लेदा सा प्रसुप्तिः प्रसर्पितः ॥
असम्यग्वमनोदीर्णपित्तश्लेष्मानिग्रहैः।
मण्डलान्यतिकण्डूनि रागवन्ति बहूनि च ॥
उत्कोठः सोऽनुबन्धस्तु कोठ इत्यभिधीयते।
प्रोक्ताः षट् त्रिंशदित्येते क्षुद्ररोगा विभागशः" ॥
इति वामटे उत्तरस्थाने एकत्रिंशोऽध्यायः ॥

अतोऽस्य प्रतिषेधो यथा,—
"विधावयेज्जलौकोभिरपक्वामजगल्लिकाम्।
खेदयित्वा यवप्रख्यां विलयाय विलेपयेत्।
दार्वकुष्ठमनोह्वालैरित्यापाषाणगर्दभात्।
विधिस्तांश्चाचरेत् पक्वान् व्रणवत्साजगल्लिकान् ॥
रोध्रकुष्ठसमङ्गत्वक्प्रलेपो मुखदूषिके।
वटपल्लवयुक्ता वा नारिकेलोत्थशुक्तयः ॥
अक्षान्तौ वमनं नस्यं ललाटे च शिराव्यधः।
निम्बाम्बु वान्तौ निम्बाम्बु साधितं पद्मकादके ॥
पिबेत् क्षौद्रान्वितं सर्पिर्निम्बारग्वधलेपनम्।
विद्रधादींस्तु जानीयान्निचितेलिरिवेल्लिकान् ॥
पित्तवीसर्पवत्तद्वत् प्रत्याख्यायाग्निरोहिणीम् ॥
विलङ्गं रक्तविमोक्षञ्च
विरूक्षणं कायविशोधनञ्च।
धात्रीप्रयोगान् त्रिफलाप्रदेहान्
कुर्य्यात् सदा जालकगर्दभस्य ॥
विदारिकां हृते रक्ते श्लेष्मग्रन्थिवदाचरेत्।
मेदोऽर्बुदक्रियां कुर्य्यात् सृतरां शर्कराऽर्बुदे ॥
प्रदुष्टं सुषिरच्छिद्रं सशोफं मर्म्मणि स्थितम्।
वल्मीकं हस्तपादे च वर्ज्ययेदितरत् पुनः ॥
शुद्धस्रावे हृते लिम्पेत् सपद्मारेवताम्बुभिः ॥
श्यामाकुलत्थिकामूलदन्तीपलाशसक्तुभिः ॥
पक्वे तु दुष्टमांसानि गतीः सर्व्वाश्च शोधयेत्।
श्लेष्मणा सम्यगनु च क्षारेण क्षणेन वा ॥
श्लेष्मोत्कृत्य निःशेषं खेदेन कदरं दहेत्।
निरुद्धमविवर्त्तार्य्यं रुद्रपाथोक्तिकित्सितम् ॥

चिप्यं शुद्धा जितोग्राणां साधयेच्छस्त्रकर्म्मणा।
दुष्टं कुनखमप्येवं चरणावलम्बे पुनः ॥
धान्याम्लसिक्तौकासीसपटोलीरोचनातिलैः।
सनिम्बपत्रैरालिप्ते हृते तिलकालकान् ॥
माषांश्च सूर्य्यकान्तेन क्षारेण यदि वाग्निना।
तदुद्धृत्य शस्त्रेण चर्म्मकीलजतुमणी ॥
लाङ्गलादिव्रणे कुर्य्याद् यथासन्नं सिराव्यधम्।
लेपयेत् क्षीरपिष्टैश्च क्षीरिवृक्षत्वगङ्कुरैः ॥
व्यङ्गेषु चार्ज्जुनत्वग्वा मञ्जिष्ठा वा समाक्षिका।
लेपः सनवनीतावा श्वेताश्वखुरजामयी ॥
रक्तचन्दनमञ्जिष्ठा कुष्ठरोध्रप्रियङ्गवः।
वटाङ्कुरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदाः ॥
द्वे जीरके क्षणातिसाः सर्षपाः पयसा सह।
पिष्टाः कुर्व्वन्ति वक्त्रेन्दुमपास्तव्यङ्गलाञ्छनम् ॥
क्षीरपिष्टा घृतक्षौद्रयुक्ता वा भृष्टनिस्तुषाः।
मसूराः क्षीरपिष्टा वा तोयोष्णाः श्लाक्ष्णिकाकृताः॥
स गुडः कोलमज्जा वा प्रघृष्टक् क्षौद्रकल्कितः।
सप्ताहं मातुलुङ्गस्य कुष्ठं वा मधुनान्वितम् ॥
पिष्टा वाक्षीरयसा सक्षौद्रा मौशलीजटा।
गौरसर्षपमूलीमूल-युक्तं वा साज्यमाक्षिकम् ॥
जम्ब्वाम्रपल्लवाम्लस्तु हरिद्रे द्वे नवो गुडः।
लेपः सवर्णकृत् पिष्टं खरस्वेन च तिन्दुकम् ॥
उत्पलपत्रं तगरं प्रियङ्गुकालीयकदम्बदरमज्जा।
इदमुद्वर्त्तनमाशु करोति मृतपत्रसङ्काशम् ॥
इभरिवौषधैः पिष्टैर्मुखाभ्यङ्गाय साधयेत्।
यथादोषर्तुकान् लेहान् मधुकक्षीरसंयुतैः ॥
यवान् सर्व्वरसं रोध्रमुशीरं चन्दनं मधु।
घृतं गुडश्च गोमूत्रे पचेदादर्व्विलेपनात् ॥
तदभ्यङ्गान्निहन्त्याशु नीलिकाव्यङ्गदूषिकान्।
मुखं करोति पद्माभं पादौ पद्मदलोपमौ ॥
कुङ्कुमोशीरकालीयलाक्षायष्ट्याङ्गचन्दनम्।
न्यग्रोधपादांस्तरुणान् पद्मकं पद्मकेशरम् ॥
सनीलोत्पलमञ्जिष्ठं पालिकं सतिलाढ़के।
पक्वा पादावशेषेण तेन पिष्टैश्च कार्षिकैः ॥
लाक्षापत्तङ्गमञ्जिष्ठा यष्टीमधुककुङ्कुमैः।
अजाक्षीरदिगुणितं तैलस्य कुडवं पचेत् ॥
नीलिकापलितव्यङ्गवलीतिलकदूषिकान्।
हन्ति तन्नस्यमभ्यङ्गं मुखोपचयवर्णकृत् ॥
मञ्जिष्ठा प्रवरोद्भवस्तु वरिकालाक्षा हरिद्राद्वयं
नेपाली हरितालकुङ्कुमगदागोरोचनागैरिकम्।
पत्रं पाण्डुरटस्य चन्दनयुगं कालीयकं पारदं
पद्मं कनकत्वचं कमलजं बीजं तथा केसरम् ॥
सिक्थं तुत्थं पद्मकाद्योवसाज्यं
मज्जाक्षीरं क्षीरिवृक्षाम्बुचाम्नौ।
सिद्धं सिद्धं व्यङ्गनील्यादिनाशे
वक्त्रेच्छायामैन्दवीष्वासु धत्ते ॥
मार्कवस्वरसक्षीरतोयपिष्टानि नावने।
प्रसन्नौ वातकुष्ठोक्तं कुर्य्याद्दाहञ्च वह्निना।
उत्कोठे कफपित्तोक्तं कोठे सर्व्वञ्च कौष्ठिकम्" ॥
इति वामटे उत्तरतन्त्रे द्वात्रिंशोऽध्यायः ॥
"समासेन चतुस्त्वारिंशत् क्षुद्ररोगा भवन्ति।
तद्यथा,—अजगल्लिका यवप्रख्याऽन्यालजी विद्रधी

कच्छपिका वल्मीकमिन्द्रवृद्धा पनसिका मांसाङ्कुरगर्दभो जालगर्दभः कक्षा विस्फोटकोऽग्निरोहिणी चिप्यं कुनखोऽलजी विदारिका शर्करार्बुदं मांसा विचर्चिका एकसा पाददारिकाकदरमलसेन्द्रलुप्तौ दारुणकोऽवंधिका पलितं मसूरिका यौवनपिडका पद्मिनीकण्टको जतुमणिर्म्मशुकवर्म्मकीलस्त्रिलकालको न्यच्छं व्यङ्गः परिवर्त्तिकाऽवपाटिका निरुद्धप्रकाशः निरुद्धगुदोऽहिपूतनं दृष्टमकर्कुदभंशस्त्रेति" ॥ इति सुश्रुते निदानस्थाने त्रयोदशेऽध्याये ॥ अत्रोक्तचिकित्सादिकं यथारोगं ज्ञेयम् ॥ * ॥

अस्य पथ्यापथ्यानि यथा,—
"क्षुद्ररोगेषु सर्व्वेषु नानारोगानुकारिषु।
दोषान् दूष्यानवस्थाञ्च निरीक्ष्य मतिमान् भिषक्॥
तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्व्वशः।
यथादोषं यथादुष्टं यथावस्थञ्च कल्पयेत्" ॥
इति वैद्यकपथ्यापथ्यविधौ क्षुद्ररोगाधिकारः ॥

क्षुद्रवंशा, स्त्री, (क्षुद्रा वंशा।) वराहक्रान्ता। इति केचित्॥

क्षुद्रवर्व्वरा, स्त्री, (क्षुद्रा वर्व्वरा।) वरटा। इति राजनिर्घण्टः॥

क्षुद्रवल्ली, स्त्री, (क्षुद्रा वल्ली।) मूलपोती। इति राजनिर्घण्टः

क्षुद्रवार्त्ताकी, स्त्री, (क्षुद्रा वार्त्ताकी।) कण्टकारी। इत्यमरः॥

क्षुद्रवार्त्ताकिनी, स्त्री, (क्षुद्रा वार्त्ताकिनीति।) श्वेतकण्टकारी। इति राजनिर्घण्टः॥

क्षुद्रशङ्खः, पुं, (क्षुद्रः शङ्खः खल्वशङ्खजातिः। जोड़ा इति भाषा। तत्पर्य्यायः। शङ्खनखः २। इत्यमरः। १। १०। २३॥ शङ्खनकः ३ इति तट्टीका॥ क्षुल्लकः ४ शम्बूकः ५ भवशङ्खकः ६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। मूत्रहरत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥

क्षुद्रशर्करा, स्त्री, (क्षुद्रा शर्करा नित्यकर्म्मधारयः।) यावनालशर्करा। इति राजनिर्घण्टः॥

क्षुद्रशार्दूलः, पुं. (क्षुद्रः शार्दूलः। नित्यकर्म्मधारयः।) चित्रव्याघ्रः। इति राजनिर्घण्टः॥

क्षुद्रशीर्षः, पुं, (क्षुद्रं शीर्षं यस्य।) मयूरशिखाहस्तः। इति शब्दचन्द्रिका॥

क्षुद्रशुक्तिः, स्त्री, (क्षुद्रा शुक्तिः। नित्यकर्म्मधारयः।) जलशुक्तिः। इति राजनिर्घण्टः॥

क्षुद्रश्यामा, स्त्री, (क्षुद्रा श्यामा।) कटभी। इति राजनिर्घण्टः। (कटभीशब्देऽस्या विवृतिर्ज्ञातव्या॥)

क्षुद्रश्लेष्मान्तकः, पुं, (श्लेष्मणं अन्तकः श्लेष्मान्तकः। क्षुद्रः श्लेष्मान्तकः।) भूकर्ब्बुदारकः। इति राजनिर्घण्टः॥

क्षुद्रश्वासः, पुं, (क्षुद्रः अल्पः श्वासः।) अल्पश्वासरोगः। यथा,—
"रसनिमित्तमेव खौल्यं काश्यञ्च तत्र श्लेष्मलाहारसेविनोऽध्यशनशीलस्याव्यायामिनो दिवास्वप्नरतस्य धाम एवान्नरसो मधुरतरश्च शरीरमनुक्रामन्नतिस्नेहाभ्यङ्गो जनयति तदतिस्थौल्यमापा-

दयति तं अतिस्थूलं क्षुद्रश्वासपिपासाक्षुत्क्षयप्रसेदगात्रदौर्गन्ध्यक्षयनगात्रसादगद्गदत्वानि क्षिप्रमेवाविशन्ति"। इत्यादि सुश्रुते १६ अध्यायः॥ तस्य निदानादि यथा,—

"यैरेव कारणैर्हिक्का बहुभिः संप्रवर्त्तते।
तैरेव कारणैः श्वासो घोरो भवति देहिनाम्॥
विहाय प्रकृतिं वायुः प्राणोऽथ कफसंयुतः।
श्वासयत्यूर्द्ध्वगो भूत्वा तं श्वासं परिचक्षते॥
क्षुद्रकस्तमकश्छिन्नो महानूर्द्ध्वश्च पञ्चधा।
भिद्यते स महाव्याधिः श्वास एको विशेषतः॥
प्रायूपं तस्य क्षुत्पीड़ा भक्तद्वेषोऽरतिः परा।
आनाहः पार्श्वयोः शूलं वैरस्यं वदनस्य च॥
किञ्चिदारभमाणस्य यस्य श्वासः प्रवर्त्तते।
निश्वसन्नेति ग्लानिञ्च स क्षुद्र इति संज्ञितः"॥
इति च सुश्रुते उत्तरतन्त्रे ५१ अध्यायः॥
("रूक्षाथाः सोद्भवः कोष्ठे क्षुद्रवात उदीरयन्।
क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाक्षप्रबाधकः॥
हिनस्ति न स गात्राणि न च दुःखा यथेतरे।
न च भोजनपानानां निरन्नक्षुचितां गतिम्॥
नेन्द्रियाणां यथां नापि कांक्षिदुत्पादयेद्भुवम्।
स साध्य उक्तो बलिनः सर्व्वे चाव्यक्तलक्षणाः"॥
इति चरके चिकित्सास्थाने २१ अध्याये॥)

क्षुद्रश्वेता, स्त्री, (क्षुद्रा श्वेता।) अर्कादिगणान्तर्गतक्षुद्रविशेषः। यथा,—"अर्कालर्कवरक्षुद्रदयनागदन्तीमयूरकभार्गीराजेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेताक्षुद्रिकाल्यलवणास्लापसक्षुद्रखेति॥ अर्कादिको गणो ह्येष कफमेदोविषापहः। क्रमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः"॥ इति सुश्रुते ३६ अध्यायः॥

क्षुद्रसहा, स्त्री, (सह + अच् टाप् च। क्षुद्रा सहा कर्म्मधारयः क्षुद्रस्य सहेत्येके।) सुद्गपर्णी। (अस्याः पर्य्याया यथा,—

"मुद्गपर्णी क्षुद्रसहा कामुद्गा सिंहपर्णिका।
वन्या माष्पर्णिरन्येति रूपपर्य्यायुभे च ते"॥
इति वैद्यकरत्नमालायाम्॥ अस्या व्यवहारो यथा, वमनभेषजान्तर्गतकषायविशेषे। "सुमनाः सौमनसायिनी हरिद्रा दारुहरिद्रा क्षीरपुनर्नवा महासहा क्षुद्रसहा कषायेषु"। इति चरके विमानस्थाने ८ अध्याये॥) इन्द्रवारुणी। इति राजनिर्घण्टः॥

क्षुद्रसुवर्च्चा, स्त्री, (क्षुद्रं सुवर्च्चम्। नित्यकर्म्मधारयः।) रीतिः। इति राजनिर्घण्टः। (पित्तलम्॥)

क्षुद्रहा, [न्] पुं, (क्षुद्रान् नीचान् क्रूरस्वभावान् हन्तीति। हन् + क्विप्।) महादेवः। इति शिवसहस्रनामस्तोत्रम्। इति कश्चित्। महाभारतीयानुशासनपर्व्वणि शिवसहस्रनामसु एतन्नाम नास्ति। लिङ्गपुराणोक्तविष्णुकृतशिवसहस्रनामस्तोत्रे तत्सहा इति नाम वर्त्तते। यथा,—

"प्रशान्तबुद्धिरक्षुद्रः क्षत्रहा नित्यसुन्दरः।
धैर्य्याग्रधूर्य्यो धात्रीशः साकल्यः शर्करीपतिः"॥
इति वृहत्तन्त्रसारः॥

क्षुद्रहिङ्गुलिका, स्त्री, (क्षुद्रा हिङ्गुलिका नित्यकर्म्मधारयः।) कण्टकारी। इति शब्दचन्द्रिका॥ (गुणादयोऽस्य कण्टकारीशब्दे बोद्धव्याः॥)

क्षुद्रहिङ्गुली, स्त्री, (क्षुद्रा हिङ्गुली। नित्यकर्म्मधारयः।) कण्टकारी। इति शब्दचन्द्रिकायां क्षुद्रहिङ्गुलिकाशब्ददर्शनात्॥

क्षुद्रा, स्त्री, (क्षुद् + "क्षायितञ्चिवचिग्रकिच्छिपि क्षुदीति"। उणां। २। १३। इति रक् ततष्टाप्।) अक्षा। नटी। वेश्या। सरघा। कण्टकारिका। इत्यमरः। २। ४। ६४॥ (अस्याः पर्य्याया यथा,—

"अनाक्रान्ता स्पृही व्याघ्री भण्डाकी च निदिग्धिका।
सिंही धामनिका क्षुद्रा दहती कण्टकारिका"॥
इति वैद्यकरत्नमालायाम्॥

"कण्टकारी तु दुष्पर्शा क्षुद्रा व्याघ्री निदिग्धिका।
कण्ठालिका कण्टिकिनी धावनी दहती तथा"॥
उभे च दहत्यौ। यत आह सुश्रुतः।

"क्षुद्रा या क्षुद्रभद्राख्या दहतीति निगद्यते"।
गुणाद्याख्याः कण्टकारीशब्दे ज्ञातव्याः॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ अस्या व्यवहारो यथा, पञ्चतिक्तकषाये।

"क्षुद्रामृताभ्यां सहनागरेण
सपौष्करश्चैव किरातितिक्तम्।
पिबेत्कषायन्विह पञ्च तिक्तं
ज्वरं निहन्त्यष्टविधं समग्रम्"॥
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)
चाङ्गेरिका। हिंसा। मक्षिकामाक्षम्। इति हेमचन्द्रः॥ वादरता। इति शब्दरत्नावली॥ गवेधुका। इति रत्नमाला॥

क्षुद्राग्निमन्थः, पुं, (क्षुद्रः अग्निमन्थः।) दग्धमूले प्रसिद्धक्षुद्रविशेषः। छोटा गनियारि इति हिन्दीभाषा। तत्पर्य्यायः। तपनः २ विजया ३ गणिकारिका ४ अरणिः ५ लघुमन्थः ६ तेजोवृक्षः ७ तपुतरुः ८। अस्य गुणाः।

"अग्निमन्थद्वयस्यैव तुल्यं वीर्य्यरसादिषु।
तत्प्रयोगानुसारेण योजयेत् स्वमनीषया"॥
इति राजनिर्घण्टः॥

क्षुद्राञ्जनं, क्ली, (क्षुद्रं अञ्जनम्।) चक्षूरोगस्यौषधविशेषः। यथा,—

"गोमूत्रपित्तमदिराश्लक्ष्णक्षौद्रसैः पचेत्।
क्षुद्राञ्जनं रसे चान्यत् यत्तत्क्षैपलेऽपि वा॥
सैन्धवोपहितं युञ्जान्निहितं वेणुगह्वरे।
मेदो यत्तद्घृतक्षौद्रं पिण्यं सैन्धवं मधु।
रसमामलकक्षापि पक्वं सम्यङ्निधापयेत्॥
कोशे खदिरनिर्म्माणे तद्वत् क्षुद्राञ्जनं हितम्"॥
इति सुश्रुते १८ अध्यायः॥

क्षुद्राण्डमत्स्यसंघातः, पुं, (क्षुद्राणां अण्डमत्स्यानां अण्डात् अभिनवजातानां मत्स्यानामित्यर्थः सङ्घातः समूहः।) पोताधानम्। इत्यमरः। १। १०। १६॥ पोना इति भाषा॥

क्षुद्रादिकषायः, पुं, (क्षुद्रः आदिर्यस्य स कषायः।) कण्टकार्य्यादिकषायः। यथा,—

"क्षुद्रामृतानागरपुष्करास्थैः
कृतः कषायः कफमाशतोत्थे।

सश्वासकासारुचिपार्श्वरुग्ज्वरे
ज्वरे चिरोत्थप्रभवेऽपि शस्यते"॥
इति भैषज्यरत्नावली॥

क्षुद्रान्त्रं, क्ली, (क्षुद्रं अन्त्रं उदरस्थनाड़ीभेदः।) हृदयस्थितसूक्ष्मान्त्रम्। यथा,—समाननामः पवनस्य सकलाङ्गचारित्वेऽपि नाभ्यादिस्थानविशेषावाप्तो युक्तिप्राचुर्य्याभिप्रायेण प्राधान्यतनानि प्रपञ्चयितुमाह।

"वपा वसावहननं नाभिः क्लोम यकृत् प्लिहा।
क्षुद्रान्त्रं यक्नकौ वस्तिः पुरीषाधानमेव च।
प्राणाग्नयोऽथ हृदयं स्थूलान्त्रं गुद एव च।
उदरञ्च गुदौ कौण्यौ विस्तारोऽयमुदाहृतः"॥
वपा प्रसिद्धा। वसा मांसस्नेहः। नाभिः प्रसिद्धा। अवहननं पुष्फुसः। प्लीहा आयुर्व्वेदप्रसिद्धः। ते च मांसपिण्डाकारे सव्यकुक्षिगते। यकृत् कालिका। क्लोम मांसपिण्डः। ते च दक्षिणकुक्षिगते। क्षुद्रान्त्रं क्षुत्स्थानम्। यक्नकौ हृदयसमीपस्थौ मांसपिण्डौ। वस्तिर्मूत्राशयः। पुरीषाधानं पुरीषाशयः। आमाशयोऽपक्वान्नस्थानम्। हृदयं हृत्पुण्डरीकम्। स्थूलान्त्रगुदोदराणि प्रसिद्धानि। वाह्याङ्गदवलयादन्त्रगुदवलये दे। तौ च गुदौ कौण्यौ कोष्ठे नाभेरधः प्रदेशे भवौ। अयञ्च प्राणायतनस्य विस्तारउक्तः। पूर्व्वश्लोके तु सङ्क्षेपः। अतएव पूर्व्वश्लोकोक्तानां केषाञ्चिदिह पाठः। इति मिताक्षरायां प्रायश्चित्ताध्यायः॥("पञ्चदशकोष्ठाङ्गानि तद्यथा,—"नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधारआमाशयश्चेति पक्वाशयश्चोत्तरगुदश्चाधरगुदश्च क्षुद्रान्त्रञ्च स्थूलान्त्रञ्च वपावहनञ्चेति"। इति चरके शारीरस्थाने ७ अध्याये॥)

क्षुद्रापामार्गः, पुं, (क्षुद्रः अपामार्गः। कर्म्मधारयः।) रक्तापामार्गः। इति राजनिर्घण्टः॥ (रक्तापामार्गशब्देऽस्य विवरणं ज्ञेयम्॥)

क्षुद्रामलकं, क्ली, (क्षुद्रं आमलकम्। नित्यकर्म्मधारयः।) आमलकम्। इति राजनिर्घण्टः॥ काठ आमला इति भाषा॥

क्षुद्रामलकसंज्ञः, पुं, (क्षुद्रामलकस्य संज्ञा यस्य।) कर्कटवृक्षः। इति राजनिर्घण्टः॥

क्षुद्राम्लः, पुं, (क्षुद्रः आम्लः। नित्यकर्म्मधारयः।) कोशाम्लः। इति राजनिर्घण्टः॥ (यथास्य पर्य्यायाः।

"कोशाम्ल उक्तः क्षुद्राम्लः क्षमिरुक्तः सकोशकः"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ गुणाश्चास्य कोशाम्लशब्दे ज्ञेयाः॥)

क्षुद्रास्फनसः, पुं, (क्षुद्रः अस्फनसः।) लकुचः। इति त्रिकाण्डशेषः॥ (लकुचशब्दे विवृतिरस्य व्याख्येया॥)

क्षुद्रास्फा, स्त्री, (क्षुद्रा अस्फा।) अस्फलोणिका। यथा,—

"क्षुद्रपत्रा च चाङ्गेरी क्षुद्रास्फा चास्फलोणिका"॥
इति शब्दरत्नावली। अस्फाशब्दे। इति राजनिर्घण्टः॥

क्षुधा

क्षुद्राक्षिका, स्त्री, (क्षुद्रा अक्षिका ।) वृक्षविशेषः। आवलति इति आवला इति च हिन्दी भाषा ॥ तत्पर्य्यायः। धात्रिका २ क्षुद्राक्षा ३ क्षुद्रिका ४ लोमाक्षा ५ चतुःपत्री ६ लोमा ७ वोढ़ा ८ अक्षपत्रिका ९ अम्बष्ठा १० कक्षवती ११ अक्षा १२ दन्तशठा १३ शाखाक्षा १४ अक्षपत्री १५। अस्या गुणाः। अक्षरसत्वम्। उष्णत्वम्। वह्निवर्द्धनत्वम्। रुचिकारित्वम्। ग्राहित्वम्। दोषदुर्गन्धकफघ्नाग्नित्वञ्च। इति राजनिर्घण्टः॥

क्षुद्रिका, स्त्री, (क्षुद्र + संज्ञायां कन् ततः टाप् पूर्व्वातः इत्वञ्च ।) दंशः। इति राजनिर्घण्टः॥ (हिक्कारोगप्रकारभेदः। यथा,—

"विक्षुब्धकांक्षैर्या वेगैर्मन्दैः समभिवर्त्तते।
क्षुद्रिका नाम सा हिक्का जघनमूलात् प्रधाविता"॥

इत्युत्तरतन्त्रे पञ्चाशत्तमेऽध्याये सुश्रुतेनोक्तम्॥)

क्षुद्रेङ्गुदी, स्त्री, (क्षुद्रा इङ्गुदी कर्म्मधारयः।) यवासः इति राजनिर्घण्टः॥ (यवासशब्दे ज्ञातव्यमस्या विवरणम्॥)

क्षुद्रेर्व्वारुः, पुं, (क्षुद्रा इर्व्वारुः कर्म्मधारयः।) गोपालकर्कटी। इति राजनिर्घण्टः॥

क्षुद्रोदुम्बरिका, स्त्री, (क्षुद्रा उदुम्बरिका।) काकोदुम्बरिका। इति राजनिर्घण्टः॥

क्षुद्रोपोदकनाम्नी, स्त्री, (क्षुद्रा उपोदकनाम्नी।) मूलपोती। इति राजनिर्घण्टः॥

क्षुद्रोपोदकी, स्त्री, (क्षुद्रा उपोदकी।) खल्पपूतिकाप्राकः। तत्पर्य्यायः। क्षुद्रपत्रा २ मण्डपी ३। अस्या गुणाः। "रसवीर्य्यविपाकेषु सदृशी पूर्व्वया खयम्"। पूर्व्वया उपोदक्या। इति राजनिर्घण्टः॥

क्षुद्रोलूकः, पुं, (क्षुद्र उलूकः नित्यकर्म्मधारयः।) डुडुभः। इति राजनिर्घण्टः॥

क्षुध, क्ष्ट य चौ क्षुदि। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-अनिट्।) क्षुद्भक्षणेच्छा। क्ष, अक्षुधत्। य, क्षुध्यत्यन्नं बुभुक्षितः। चौ, क्षोधा। इति दुर्गादासः॥

क्षुधा, स्त्री, (क्षुध् बुभुक्षायां सम्यदादिलाद् क्विप् झलन्तत्वाद् वा टाप्।) भोजनेच्छा। इति दुर्गादासः॥ अथव्यवहारजिह्मीर्षा इति॥ "या देवी सर्व्वभूतेषु क्षुधारूपेण संस्थिता"। इति देवीमाहात्म्यटीकायां नागोजीभट्टः॥ तत्पर्य्यायः। अशनाया २ बुभुक्षा ३ क्षुत् ४। इत्यमरः शब्दरत्नावली च॥ जिघत्सा ५। इति जटाधरः॥१॥ तत्पर्य्यायाणि यथा,—

"व्याधयो निर्जिताः सर्व्वे क्षुधया नृपसत्तम!।
कुण्डली मुकुटी खड्गी तथैवालङ्कृतो नरः।
क्षुधार्त्तो न विराजेत प्रेतवत्तृषितो यथा॥
क्षीरलविविधान् भोगान् वस्त्राण्याभरणानि च।
न चेच्छति नरः किञ्चित् क्षुधया कलुषीकृतः॥
यथा भूमिगतं तोयं रविरश्मिभिः शुष्यति।
शरीरस्थस्तथा धातुः शुष्यते जाठराग्निना॥
न शृणोति न पश्यति न जिघ्रति चक्षुषा न च पश्यति।
दह्यते वेपते मूढः शुष्यते च क्षुधार्दितः॥
अकाल वधिरत्वञ्च जरात्वञ्च पङ्कुताम्।

क्षुधाव

रौद्रं मर्य्यादहीनत्वं क्षुधा सर्व्वं प्रवर्त्तते॥
भगिनीं जननीं पुत्रं भार्य्यां दुहितरं तथा।
भ्रातरं स्वजनं वापि क्षुधाविष्टो न विन्दति"॥

इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः॥

क्षुधाकुशूलः, पुं, (क्षुधायां क्षुधोद्रेकविधये कुशूलः निपुणः विशेषेण क्षुधोत्पादकः।) विल्वान्तरवृक्षः। इति राजनिर्घण्टः॥

क्षुधातुरः, त्रि, (क्षुधा क्षुधया आतुरः।) क्षुधापीड़ितः। यथा,—

"अर्थातुराणां न सुहृन्न बन्धुः
कामातुराणां न भयं न लज्जा।
चिन्तातुराणां न सुखं न निद्रा
क्षुधातुराणां न बलं न तेजः"।

इति गारुड़े ११६ अध्यायः॥

क्षुधार्त्तः, त्रि, (क्षुधया आर्त्तः ऋतो वा ऋतीयातत्पुरुषे ऋतस्य दृद्धिः।) क्षुत्पीड़ितः। यथा,—

"प्रीतार्त्तश्च क्षुधार्त्तश्च कस्यान्वितकलेवरः।
जजागार तदा रात्रौ शुनो नीहारवारिणा"॥

इति शिवरहस्ये शिवरात्रिव्रतकथा॥ (यथा, च मनुः। १०। १०७।

"भरद्वाजः क्षुधार्त्तस्तु सपुत्रो विजने वने।
बह्वीर्गाः प्रतिजग्राह दध्नोलक्ष्णो महातपाः"॥)

क्षुधाभिजननः, पुं, (क्षुधां अभिजनयतीति। अभि + जन् + ल्युः।) राजिका। इत्यमरः। २। ९। १९॥ क्षुधाजनकद्रव्यमात्रे त्रि॥

क्षुधावती, स्त्री, (क्षुधाऽस्यामस्तीति। मतुप् मस्य वत्वम्।) क्षुधाजनकौषधवटी। अजीर्णादिरोगनाशकगुड़िका। यथा,—

"रसायो गन्धकाभ्राणि शुण्ठ्यः चिपला वचा।
यमानी घृतपुष्पा च चविका जीरकद्वयम्॥
प्रत्येकं पलमेषान्तु घण्टकर्णपुनर्नवा।
भार्गकं यश्चिकश्चेन्द्रकेशराजसदर्शनाः॥
दण्डोत्पला चित्रहन्ती शामाहरक्तचन्दनम्।
भृङ्गापामार्गकुलका मण्डूकश्च पलार्द्धकम्॥
आर्द्रकस्वरसेनाथ गुड़िकां संप्रकल्पयेत्।
वदरास्थिसमाश्चैषां भक्षयित्वा पिबेदनु॥
वारिभक्तं जलञ्चैव प्रातरुत्थाय मानवः।
वटी क्षुधावती नाम सर्व्वाजीर्णविनाशिनी।
अग्निञ्च कुरुते दीप्तं भस्मकञ्च नियच्छति।
अम्लपित्तञ्च शूलञ्च परिणामक्लमञ्च यत्।
तत्सर्व्वं शमयत्याशु भास्करस्तिमिरं यथा।
मधुरं वर्ज्जयेदन्न विशेषात् क्षीरशर्करे"॥

इति भैषज्यरत्नावल्यामम्लपित्तचिकित्सा॥ तस्याः खल्पवृद्धेदौ तत्रैव दृश्यौ॥७॥ क्षुधायुक्ते त्रि। (क्षुधाजनकापरौषधम्। यथा,—

"सप्त पञ्चचतुर्भागाश्चूर्णकारकद्वये।
त्रयस्त्रयः षट्टूनांश्च द्वौ द्वौ मरिचचित्रयोः॥
मुण्डीलवङ्गयोर्दौ दावस्त्रयोगेन भावयेत्।
वटीङ्गोलप्रमाणेन कारयेद्भिषजां वरः॥
आमशूलमम्लपित्तं पित्तशूलं विशेषतः।
दुर्नामग्रहणीमुग्रा मजीर्णानि विनाशयेत्॥
नाम्ना क्षुधावती ह्येषा वह्निदेवेन निर्म्मिता।

क्षुपडो

अस्याः प्रसादान्मन्दाग्निर्भवेद्दावानलो नरः"॥

इति चिकित्सारत्ननिधौ मन्दाग्न्यधिकारे॥)

क्षुधासागररसः, पुं, (क्षुधायां क्षुधाया वा सागररस इव क्षुधोद्रेकात् तथात्वम्।) औषधविशेषः। यथा,—

"चिकटु चिफला चैव तथा जवणपञ्चकम्।
क्षारत्रयं रसं गन्धं भागैकं पूर्व्ववद्विधम्॥
गुञ्जामात्रां वटीं कुर्य्यात्तवक्षैः पञ्चभिः सह।
क्षुधासागरनामायं रसः सूर्य्येण निर्म्मितः"॥

पूर्व्ववद्विधमित्यस्तवक्षुक्तभागवत्। तेनाच्च विषस्य भागद्वयम्। इति भैषज्यरत्नावली॥

क्षुधितः, त्रि, (क्षुध् + कर्त्तरि क्तः। यद्वा क्षुधा जातोऽस्य इति तारकादित्वादितच् प्रत्ययः।) क्षुधान्वितः। तत्पर्य्यायः। बुभुक्षितः २ जिघत्सुः ३ अशनायितः ४। इत्यमरः। ३। १। २०॥

क्षुधुनः, पुं, (क्षुध बुभुक्षायां + "क्षुधिपिसिमिथः कित्"। उणां। ३। ४४। इति उनन् स च कित्।) म्लेच्छभेदः। इत्युणादिकोषः॥

क्षुप, सादे। इति कविकल्पद्रुमः॥ (सौं-परं-सकं-सेट्।) सौचधातुरयम्। क्षुपः। इति दुर्गादासः॥

क्षुपः, पुं, (क्षुप् + "इगुपधेति कः"। ३। १। १३५।) वृक्षशाखाग्निभेदः। क्षुद्रवृक्षः। इत्यमरः। २। ४। ८॥ (यथा, महाभारते। १। १७२। २८।

"तस्या रूपेण स गिरिर्वेषेण च विशेषतः।
स सत्त्वक्षुपलतो हिरण्मय इवाभवत्"॥)

श्रीकृष्णात् सत्यभामायां जातपुत्रविशेषः। यथा,

"जज्ञिरे सत्यभामायां भानुर्भीमरथः क्षुपः।
रोहितो दीप्तिमांश्चैव ताम्रजाक्षो जलन्धमा।
भानुर्भीमरिका चैव ताम्रपक्षा जलन्धमा।
चतस्रो जज्ञिरे तेषां स्वसारो गरुड़ध्वजात्"॥

इति महाभारते हरिवंशे १६१ अध्यायः॥ * ॥ इक्ष्वाकुराजपिता। यथा,—

"आसीत् कृतयुगे तात! मनुर्दण्डधरः प्रभुः।
तस्य पुत्रो महाबाहुः प्रसन्धिरिति विश्रुतः॥
प्रसन्धेरभवत् पुत्रः क्षुप इत्यभिसंज्ञितः।
क्षुपस्य पुत्रस्त्विक्ष्वाकुर्महीपालोऽभवत् प्रभुः"॥

इति महाभारते। १४। ४। २-४॥ द्वारकापश्चिमदिक्स्थपर्व्वतः। यथा,—

"दक्षिणस्यां लतावेष्टः पद्मवर्णो विराजते।
इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः"॥

इति महाभारते हरिवंशे द्वारवतीविशेषनिर्म्माणे १५७ अध्यायः॥

क्षुपकः, पुं, (क्षुप + स्वार्थे कन्।) क्षुपः। क्षुद्रवृक्षः। यथा,—

"अतो यो विपरीतः स्यात् सुखसाध्यः स उच्यते।
अवृक्षमूलः क्षुपको यद्वदुत्पाटने सुखः"॥

इति सुश्रुते प्रथमभागे २४ अध्यायः॥

क्षुपाक्षुः, पुं, (क्षुप + आक्षुप्रत्ययः।) पाणीयाक्षुः। इति राजनिर्घण्टः॥

क्षुण्डोड़मुष्टिः, पुं, (दुल् उत्क्षेपे + अच् ततो गुणः उकारस्य वृद्धम्। दलापि वृद्धं ह्रस्वोदरात्

साधुः । तादृक मुष्टिर्यस्य ।) विषमुष्टिक्षुपः । इति राजनिर्घण्टः ॥ (विषमुष्टिशब्देऽस्या गुणादयो ज्ञेयाः ॥)

क्षुब्धः, पुं, (क्षुभ् + "क्षुब्धस्यान्तध्वान्तलम्बेति" । ७ । २ । १९ । इति निपातनात् साधुः ।) मज्ञानदण्डः । इति हेमचन्द्रः ॥ षोड़शरतिबन्धान्तर्गतैकादशबन्धः । यथा,—

"पार्श्वोपरि पदौ क्षिप्त्वा योनौ लिङ्गेन ताड़येत् । बाह्वोर्धारणं गाढ़ं बन्धो वै क्षुब्धसंज्ञकः" ॥

इति रतिमञ्जरी ॥ क्षोभविशिष्टे त्रि ॥

क्षुभ, ल्ट ड सञ्चलने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् । ल्टदित् ।) ल्ट, अक्षुभत् । ड, क्षोभते नानुनौविधु । इति हलायुधः । इति दुर्गादासः ॥

क्षुभ, य ग सञ्चलने । इति कविकल्पद्रुमः ॥ (दिवां-क्र्यां च-परं-अकं-सेट् ।) य, क्षुभ्यति रिपुक्ष्वेवेति हलायुधः । ग, क्षुभ्नाति क्षुक्षोभ । इति दुर्गादासः ॥

क्षुभः, पुं, (क्षुभ् + "इगुपधज्ञाप्रीकिरः" । ३ । १ । १३५ । इति कः ।) प्रवर्त्तकः । यथा,—

"ये च तेऽनुचराः सर्व्वे पादोपान्तं समाश्रिताः । माठरारुणदण्डाद्यास्तांस्तान् वन्देऽग्निक्षुभान्" ॥

इति महाभारते । ३ । ३ । ६८ ॥ "अग्निक्षुभान् विद्युदग्न्यादिप्रवर्त्तकान्" । इति तट्टीकायां नीलकण्ठः ॥

क्षुभा, स्त्री, (क्षुभ + स्त्रियां टाप् ।) नियहानुग्रहकर्त्री देवता । यथा, महाभारते ३ । ३ । ६६ ।

"क्षुभया सहिता मैत्री याश्चान्या भूतमातरः । ताश्च सर्व्वा नमस्यामि पान्तु मां शरणागतम्" ॥

"क्षुभा मैत्रौ नियहानुग्रहकर्त्र्यौ देवते । भूतमातरः गौरीपद्मादयः । ब्राह्मीमाहेश्वर्य्यादयश्च" । इति तट्टीकायां नीलकण्ठः ॥

क्षुभितः, त्रि, (क्षुभ + कर्त्तरि क्तः ।) भीतः । इति हलायुधः ॥ सञ्चलितः । इति क्षुभधातवर्थदर्शनात् ॥

क्षुमा, स्त्री, (क्षु + मक टाप् ।) अतसी । इत्यमरः २ । ६ । २० ॥ शणः । इति तट्टीकासारसुन्दरी ॥ नीलिका । इति मेदिनी ॥ लताभेदः । इति शब्दरत्नावली ॥

क्षुर, भ्र विलेखने । खनने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) भ्र, क्षुरति भूमिं लोकः । क्षोरिता । क्षुरो लोमच्छेदनः । इति दुर्गादासः ॥

क्षुरः, पुं, (क्षुर + "इगुपधेति" । ३ । १ । १३५ । कः । यद्वा, "ऋच्छेन्द्रायवज्रविप्रकुब्रक्षुब्रक्षुरखुरेति" । उणां । २ । २८ । इति निपातनात् सिद्धम् ।) कोकिलाच्छः । इत्यमरः । २ । ८ । ४९ ॥ (अस्य पर्य्याया यथा,—

"कोकिलाच्छस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः । भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुबालिका" ॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) शणम् । इति तट्टीका । छेदनद्रव्यम् । तत्तु नापितस्य लोमच्छेदकास्त्रम् । (यथा, मनुः । ९ । २९२ ।

"सर्व्वकण्टकपापिष्ठं हेमकारन्तु पार्थिवः । प्रवर्त्तमानमन्याये छेदयेत्क्षुरवज्रः क्षुरैः" ॥)

गोक्षुरः । इति मेदिनी ॥ (अस्य पर्य्याया यथा,—वैद्यकरत्नमालायाम् ।

"त्रिकण्टः स्थलपट्टाटो गोकण्टोऽथ त्रिकण्टकः । त्रिपुटः कण्टकफलः स्वदंष्ट्रा गोक्षुरः क्षुरः" ॥

महापिण्डीतकः । शरः । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १ । १३४ । ६० ।

"ततस्तस्य नगस्यस्य क्षुरेण निशितेन च । शिर उत्कृत्य तरसा पातयामास पाण्डवः" ॥

खड्गादिपादुका । इति धरणिः । छुरा इति भाषा ॥

क्षुरकः, पुं, (क्षुर + स्वार्थे कन् ।) तिलकवृक्षः । इत्यमरः । २ । ४ । ४० ॥ कोकिलाच्छः । (अस्य पर्य्याया यथा,—

"कोकिलाच्छस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः । भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुबालिका" ॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ अस्य व्यवहारो यथा,—

"यवानी जीरके हे च वानरीगजपिप्पली । जातीफलं सपत्रञ्च लवङ्गागुरुचन्दनम् ॥ तालीशं तिलमात्रञ्च क्षुरकं गोक्षुरस्तथा । शुतावरी शुताङ्गा च वचा दार्व्वी पुनर्नवा ॥ निकुम्भकुम्भौ मार्ज्जारी कन्दो नागबला तथा । वासामांसी मुरामुस्तं पिप्पलीमूलमेव च ॥ मूर्व्वली वानरी ब्राह्मी शाल्मली मूलमेव च । मेधिकागजकर्णौ च शर्करा चाब्धिशोधनम् । माजुफलञ्चाश्वगन्धा द्राक्षा च चोचकं समम्" ॥

इत्यादिषु द्रष्टव्यम् । इति वैद्यकवचायणसंग्रहे वृहत्कालेश्वरमोदकान्तर्गते ॥) गोक्षुरः । इति मेदिनी ॥ भूताङ्कुशः । इति राजनिर्घण्टः ॥

क्षुरकर्म्म, [न्] क्ली, (क्षुरेणोचितं क्षुरसाध्यं वा कर्म्म ।) क्षौरम् । क्षुरद्वारा केशादिकर्त्तनम् ॥ यथा,—

"यो जन्ममासे क्षुरकर्म्म याचां कार्य्यस्य वेधं कुरुते च मोहात् । नूनं स रोगं धनपुत्रनाशं प्राप्नोति मूढ़ो वधबन्धनानि ॥ जातं दिनं दूषयते वशिष्ठ- स्त्रयोदशीं च गर्गो यवनो दशाहम् । जन्माख्यमासं किल भार्गवश्च चूड़े विवाहे क्षुरकर्म्मवेधे ॥

देवकार्य्ये पिटश्राद्धे स्ववैरंग्रपरित्यये । क्षुरिकर्म्म न कुर्व्वीत जन्ममासेऽथ जन्मभे" ॥

इति तिथ्यादितत्त्वम् ॥ क्षौरानन्तरं स्नानं कर्त्तव्यम् । यथा,—

"दुःस्वप्ने मैथुने वान्ते विरिक्ते क्षुरकर्म्मणि । चिति पूयश्मशानास्थ्नां स्पर्शने स्नानमाचरेत्" ॥

इति मिताक्षरायां प्रायश्चित्ताध्याये पराशरवचनम् ॥ अन्यत् क्षौरशब्दे द्रष्टव्यम् ॥

क्षुरधारः, पुं, (क्षुरस्य धारा इव धारा अस्य ।) अस्त्रविशेषः । यथा, महाभारते । ४ । ६ । २८ ।

"खड्गांश्च दीप्तान् दीर्घांश्च कलापांश्च महाधनान् ।

विपाठान् क्षुरधारांश्च धनुर्भिर्निदधुः सह" ॥

"विपाठान् वाणविशेषान् तादृशान् क्षुरधारांश्च" । इति तट्टीकायां नीलकण्ठः ॥ * ॥ क्षुरस्य शाणितमुखम् । तद्युक्ते त्रि । (यथा, महाभारते । ४ । ६२ । २७ ।

"अथ जिष्णुरुपादत्त क्षुरधारेण कार्मुकम् । चकर्त्त भीष्मस्य तदा जातरूपपरिष्कृतम्" ॥)

क्षुरधारा, स्त्री, (क्षुरस्य धारा ।) क्षुरधारः । यथा "अन्तकः पवनो मृत्युः पातालं वड़वामुखम् । क्षुरधारा विषं सर्पा वह्निरित्येकतः स्त्रियः" ॥ इति महाभारते । १२ । पञ्चचूड़ानारदसंवादे ३८ । २९ ॥ "अन्तकादिवत् सद्यो नाशका इत्यर्थः" । इति तट्टीकायां नीलकण्ठः ॥

क्षुरपत्रः, पुं, (क्षुरस्य पत्रमिव पत्रमस्य क्षुरवत् पत्रमस्य वा ।) शरः । इति राजनिर्घण्टः ॥ (दर्भविशेषः । यथा,—

"ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च" ॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) क्षुरतुल्यपर्य्युक्ते त्रि ॥

क्षुरपत्रिका, स्त्री, (क्षुर इव पत्रमस्या स्वार्थे कन् स्त्रियां टापि अत इत्वम् ।) पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥

क्षुरप्रः, पुं, (क्षुर इव एत्यति क्षिपति । छेदनक्रियां प्रयति वा इ + कः । किच्चास्य गणः ।) बाणविशेषः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ४ । ५३ । ४६ ।

"स तु द्रोणं त्रिसप्तत्या क्षुरप्राणां समार्पयत्" ॥)

क्षुरप्रानामकघासच्छेदनास्त्रञ्च ॥

क्षुरप्रगं, क्ली, (क्षुरप्रं क्षुरप्रतां गच्छतीति । गम + डः ।) क्षुरप्रास्त्रम् । इति केचित् ॥ (क्षुरप्र इव गच्छतीति । क्षुरप्रसदृशास्त्रविशेषः ॥)

क्षुरभाण्डं, क्ली, (क्षुरस्य भाण्डं आधारः ।) क्षुरधारः । भाँड़ि इति भाषा । यथा,—"भद्रे ! शीघ्रमानीयतां क्षुरभाण्डं येन क्षौरकर्म्मकरणाय गच्छामि । सापि छिन्ननासिका गृहमध्यस्थितैव कार्य्यकरणायेच्छया क्षुरभाण्डात् क्षुरमेकं समादाय तस्याभिमुखं प्रेषयामास" । इति विष्णुधर्म्मविरचितपञ्चतन्त्रे १ तन्त्रम् ॥

क्षुरमर्दी, [न्] पुं, (क्षुरं मर्द्नातीति । क्षुर + मर्द् + णिनिः ।) नापितः । यथा,—

"पुत्रं लेप्यादिकर्म्म स्यात् नापितश्चण्डिलः क्षुरी । क्षुरमर्दी दिवाकीर्त्तिर्मुण्डकोऽन्तावसाय्यपि" ॥

इति हेमचन्द्रः ॥

क्षुराङ्गः, पुं, (क्षुर इवाङ्गमस्य ।) गोक्षुरकः । इति राजनिर्घण्टः ॥

क्षुरिका, स्त्री, (क्षुर + ङीप् स्वार्थे कन् टाप् पूर्ब्बह्रस्वश्च ।) पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥ (पालङ्क्यशब्देऽस्या विवृतिर्ज्ञातव्या ॥)

मत्स्यान्त्रविशेषः । छुरी इति भाषा । (क्षायशुर्व्वेदान्तर्गत उपनिषद्विशेषः । यदुक्तं मुक्तिकोपनिषदि । "अमृतनादकालाग्निरुद्रक्षुरिका सर्व्वसारेत्युपक्रम्य सरस्वतीरहस्यानां क्षायशुर्व्वेद-

गतानां दाक्षिण्यात् सङ्ख्याकानां उपनिधदां सहनाव वत्विति शान्तिरिति" ॥)

क्षुरिकापत्रः, पुं, (क्षुरिका इव क्षुरवदित्यर्थः पत्रमस्य ।) शरः । इति राजनिर्घण्टः ॥

क्षुरिणी, स्त्री, (क्षुरः अस्या अस्तीति । इनिः ङीप् च ।) तरावक्रान्ता । इति शब्दचन्द्रिका । नापितभार्य्या च ॥

क्षुरी, [न्] पुं, (क्षुरोऽस्यास्तीति । क्षुर + इनिः ।) नापितः । इत्यमरः । २ । १० । १० ॥

क्षुरी, स्त्री, (क्षुद्रः क्षुरः क्षुर इव वा । क्षुर + स्वल्पार्थे ङीप् ।) कुरिका । इति हेमचन्द्रः ॥ क्षुरीति च पाठः ॥

क्षुल्लः, त्रि, (क्षुद् सम्पेषणे + सम्पदादित्वात् क्विप् । क्षुदं लाति गृह्णातीति । क्षुद् + ला + कः ।) लघुः । इति हेमचन्द्रः ॥ (यथा, भागवते । ३ । ५ । १० ।

"अष्टमूः क्षुल्लसुखावहानां
तेषामृते कृष्णकथामृतौघात्" ॥)

क्षुल्लकः, त्रि, (क्षुल्ल + स्वार्थे कन् ।) क्षुद्रः । इत्यमरः । ३ । ३ । १० ॥ खल्वः । नीचकः । कनिष्ठः । दरिद्रः । इति भरतः ॥ पामरः । दुःखितः । (यथा, भागवते । ४ । १० । २९ ।

"येनोपशान्तिर्भूतानां क्षुल्लकानामपीहताम् ।
अन्तर्हितोऽन्तर्हृदये कस्मान्नो वेद नाशिषः" ॥)

खलः । इति हेमचन्द्रः । शब्दरत्नावल्यां खुल्लक इति च पाठः ॥

क्षुल्लकः, पुं, (क्षुल्ल + संज्ञायां स्वार्थे वा कन् ।) क्षुद्रशृङ्गः । इति हेमचन्द्रः राजनिर्घण्टश्च । (औषधादिप्रकरणेऽस्य विधयो यथा,—

"कट्वङ्गं गैरिकं शृङ्गं कासीसं टङ्गणन्तथा ।
नीलाञ्जनं सुक्तिभेदाः क्षुल्लकाः सवराटकाः ॥
जम्बीरवारिणा स्निग्धाः क्षालिताः कोष्णवारिणा ।
सुद्रिमायान्यमी योज्या भिषग्भिर्योगसिद्धये" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

क्षुल्लतातः, पुं, (क्षुल्लः पितुः कनिष्ठः स चासौ तातश्चेति नित्यकर्म्मधारयः ।) पितृकनिष्ठभ्राता । इति क्षुल्लतातकशब्ददर्शनात् । शब्दरत्नावल्यां खुल्लतात इति पाठः ॥

क्षुल्लतातकः, पुं, (क्षुल्लतात + स्वार्थे कन् ।) पितृव्यः । इति जटाधरः । खुड़ा इति भाषा ॥

क्षेत्रं, क्ली, (क्षि + ष्ट्रन् ।) भूमिः । खेत इति भाषा ॥ तत्पर्य्यायः । वप्रम् । २ केदारः ३ । इत्यमरः । २ । ९ । ११ ॥ वलजम् ४ निष्कुटः ५ । राजिका ६ पाटीरः ७ । इति जटाधरः ॥ * ॥ तत्समूहवाचकानि यथा,—

"केदारकन्तु केदार्य्यं क्षेत्रं कैदारकं तथा ।
वारटक्षेति पर्य्यायः क्षेत्रस्कन्दे निगद्यते" ॥
इति शब्दरत्नावली ॥ * ॥ तद्भेदा यथा,—

"व्रीहिभवोचितं क्षेत्रं व्रैहेयं तत् समीरितम् ।
शाल्युद्भवोचितं यत्तु शालेयमभिधीयते ॥
यवं यवोचितं क्षेत्रं यवकं यवकोचितम् ।
षष्टिकोद्भवनं यत्तु षष्टिक्यं तत् प्रकीर्त्तितम् ॥
तिलोद्भवोचितं यत्तु तिल्यं तैलीनमित्यपि ।
एवं माष्यन्तु माषीणं कौद्रव्यं कौद्रवीणवत् ॥
तथा भङ्ग्यञ्च भाङ्गीनमुग्म्यमौमीनमित्यपि ।
अथ मौद्गञ्च मौद्गीनमथ माषीनवीनवत् ॥
माषकोद्रवभङ्गोमामुद्गाणुप्रभवोचितम् ।
बीजाक्षतमुमक्षतमुत नीतिसमाक्षये ॥
सीत्यं क्षतञ्च हल्यञ्च हतीयाक्षतमित्यपि ।
त्रिगुणाक्षतमित्येवं त्रिवारक्षण्णभूमिषु ॥
शम्याक्षतं द्विहल्यञ्च द्विसीत्यं द्विगुणाक्षतम् ।
द्वितीयाक्षतमप्यत्र द्विवारक्षतभूमिषु ॥
द्रोणाढकखार्य्यार्द्धपादौ द्रौणिकस्तथा ।
स्यादाढकिकखारोकौ उत्तमार्य्यादयस्त्रिषु ।
आदिभ्यां प्राप्तिकादिश्च पाकादौ द्रौणिकोऽपि च" ॥
इति च शब्दरत्नावली ।

परक्षेत्रे गोचारणकथननिषेधो यथा,—

"न कुर्य्यात् सख्यवैराणि विवादं न च पैशुनम् ।
परक्षेत्रे गां चरन्तीं न चाचक्षीत कस्यचित्" ॥
इति कूर्म्मपुराणे उपविभागे १५ अध्यायः ॥ * ॥
अपि च । मनुः ।

"आत्मनो यदि वान्येषां गृहे क्षेत्रेऽथवा खले ।
भक्षयन्तीं न कथयेत् पिबन्तञ्चैव वत्सकम्" ॥
इति प्रायश्चित्ततत्त्वम् ॥ * ॥ तत्स्नानजलगुणाः ।

"केदारं मधुरं प्रोक्तं विपाके गुरु दोषलम्" ॥
इति राजवल्लभः ॥ * ॥

अथ सिद्धक्षेत्राणि ।

तत्र वाराणसीक्षेत्रं यथा,—

"आसन्नं युवयोः क्षेत्रमिदं वाराणसी तु यत् ।
कथितं नातिदूरे च वर्त्तते नरसत्तमौ" ॥ * ॥
कामरूपक्षेत्रं यथा,—

"नाचिरात् कामदं पुण्यं क्षेत्रं पीठं निगद्यते ।
चिरात्तु कामदो देवो न चिरादुच्यते ज्ञानदः ॥
तत् क्षेत्रमिति लोके यद्गद्यते पूर्व्वसूरिभिः ।
कामरूपं महापीठं गुह्याद्गुह्यतमं परम्" ॥
इति च कालिकापुराणे ५० अध्यायः ॥*॥
गङ्गाक्षेत्रं यथा, स्कान्दे ।

"तीराद्योजनमाचन्तु परितः क्षेत्रमुच्यते" ॥
नारायणक्षेत्रं यथा,—

"प्रवाहमवधिं कृत्वा यावद्वक्रचतुष्टयम् ।
तत्र नारायणः स्वामी गङ्गागर्भान्तरे वरे ॥
तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे ।
एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥ * ॥
भास्करक्षेत्रं यथा, स्मृतिसमुच्चयलिखितवचने ।

"गङ्गायां भास्करक्षेत्रे मातापित्रोर्मृते गुरौ ।
आधाने सोमपाने च वपनं सप्तसु स्मृतम्" ॥
भास्करक्षेत्रं प्रयागः । इति प्रायश्चित्ततत्त्वम् ॥*॥
गयाक्षेत्रं यथा,—

"पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः" ॥
इति वायुपुराणम् ॥*॥ पुरुषोत्तमक्षेत्रं यथा,—

मुनय ऊचुः ।

"पुरुषोत्तमाख्यं सुमहत् क्षेत्रं परमपावनम्" ॥
इत्यादि ।

जैमिनिरुवाच ।

"एतत् क्षेत्रवरस्याम्य वपुर्भूतं महात्मनः ।
स्वयं वपुष्मान् यत्रास्ते स्वनाम्ना ख्यापितं हि तत्" ॥
इत्युत्कलखण्डम् ॥ * ॥ विष्णुक्षेत्राणि यथा,—

श्रीभगवानुवाच ।

"पूर्व्वगुण्यावहितो ब्रह्मन् ! गुह्यनामानि मेऽधुना ।
क्षेत्राणि चैव गुह्यानि तव वक्ष्यामि यत्नतः ॥
कोकामुखे वराहस्य मन्दरे मधुसूदनम् ।
अनन्तं कपिलद्वीपे प्रभासे रविनन्दनम् ॥
माल्योदये तु वैकुण्ठं मरुन्द्रे तु नृपान्तकम् ।
ऋषभे तु महाविष्णुं द्वारकायान्तु भूपतिम् ॥
पाण्डुसङ्घे तु देवेशं वसुकुण्डे जगत्पतिम् ।
वन्दीवने महायोगं चित्रकूटे नराधिपम् ॥
नैमिशे पीतवासस्य गवां निष्क्रमणे हरिम् ।
शालग्रामे तपोवासमचिन्त्यं गन्धमादने ॥
कुशाम्रके हृषीकेशं गङ्गाद्वारे गदाधरम् ।
गरुड़ध्वजं तोयके च गोविन्दं नागसाह्वये ॥
वृन्दावने तु गोपालं मथुरायां स्वयम्भुवम् ।
केदारे माधवं विद्यात् वाराहस्यान्तु केशवम् ॥
पुष्करे पुष्कराक्षन्तु दृषद्वत्यां जयध्वजम् ।
कृष्णवेण्वन्तरे वीरमशोकं सिन्धुसागरे ॥
केशे वटे महाबाहुमम्बुते तेजसो वने ।
विशाखसूर्य्ये विश्वेशं नारसिंहं वने वने ॥
लोहार्गले रिपुहरं देवपाले त्रिविक्रमम् ।
पुरुषोत्तमं दशपुरे कुब्जके वामनं विदुः ॥
विद्याधरं वितस्तायां वारणे धरणीधरम् ।
देवदारुवने गुह्यं कावेर्य्यां नागशायिनम् ॥
प्रयागे योगमूर्त्तिञ्च पयोष्ण्यां सुन्दरं विदुः ।
कुमारतीर्थे कौमारं लौहित्ये हयशीर्षकम् ॥
उज्जयन्यां त्रिविक्रमं लिङ्गकोटे चतुर्भुजम् ।
हरिहरं तुङ्गभद्रायां दृष्ट्वा पापात् प्रमुच्यते ॥
विश्वरूपं कुरुक्षेत्रे मणिकुण्डे हलायुधम् ।
लोकतीरमयोध्यायां कुण्डिने रुक्मिणीपतिम् ॥
भद्रोरे वासुदेवञ्च चक्रतीर्थे सुदर्शनम् ।
आद्यं विष्णुपदे विद्यात् शूकरे शूकरं विदुः ॥
कुशेशयं मानसे तीर्थे दण्डके श्यामलं विदुः ।
चित्रकूटे नागमोक्षञ्च मेरुपृष्ठे च भास्करम् ॥
विरजं पुण्यमत्यायां बालखामीकरे विदुः ।
यज्ञस्करं विपाशायां माहिष्मत्यां ऋताशनम् ॥
क्षीराब्धौ पद्मनाभञ्च विमले तु सनातनम् ।
शिवनद्यां शिवकरं गयायाञ्च गदाधरम् ॥
सर्व्वत्र परमात्मानं यः पश्यति स मुच्यते ॥
अष्टषष्टिस्तु नामानि कीर्त्तितानि मया तव ।
क्षेत्राणि चैव गुह्यानि कथितानि विशेषतः ॥
इदन्यानि यथाशक्त्या क्षेत्राण्येतानि मानवैः ।
वैष्णवैस्तु विशेषेण तेषां मुक्तिं ददाम्यहम्" ॥
इति नारसिंहे ६२ अध्यायः ॥ * ॥ मेषादिद्वादशराशिः । यथा,—

"राशिनामानि च क्षेत्रं भस्तत्त्वं गृहनाम च ।
मेषादीनाञ्च पर्य्यायं लोकादेव विचिन्तयेत्" ॥*॥
ग्रहाणां क्षेत्राणि यथा,—

"कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीसुवाम् ।


जीवार्किभानुजेज्यानां क्षेत्राणि स्युरजादयः" ॥
इति ज्योतिस्तत्त्वम् ॥ * ॥ अपि च,
"मेषमङ्गारकक्षेत्रं दृषं शुक्रस्य कीर्त्तितम् ।
मिथुनस्य बुधो ज्ञेयः सोमः कर्कटकस्य तु ॥
सूर्य्यक्षेत्रं भवेत् सिंहः कन्या क्षेत्रं बुधस्य च ।
धनुः सुरगुरोश्चैव झषोर्मकरकुम्भकौ ॥
मीनः सुरगुरोश्चैव ग्रहक्षेत्रं प्रकीर्त्तितम्" ॥
इति गारुडे ६० अध्यायः ॥ * ॥ शरीरम् । (यथा, भगवद्गीतायाम् । १३ । १ ।
"इदं शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते" ॥
कुतः शरीरस्य क्षेत्रत्वमित्यत्र शाङ्करभाष्यम् । यथा,—"इदमिति सर्व्वनाम्नोक्तं विशिनष्टि शरीरमिति । हे कौन्तेय ! क्षतत्राणात् क्षयात् क्षरणात् क्षेत्रवदास्मिन् कर्म्मफलनिर्हेतेः क्षेत्रमितीतिशब्दः एवं शब्दपदार्थकः क्षेत्रमित्येवमभिधीयते कथ्यते" ॥ इच्छा । द्वेषः । सुखम् । दुःखम् । चेतना । धृतिः । यथा, भगवद्गीतायाम् । १३ । ६ ।
"इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः ।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम्" ॥
इत्यत्र शाङ्करभाष्यं यथा,—"अथेदानीं आत्मगुणा इति यानाचष्टे वैशेषिकास्तेऽपि क्षेत्रधर्म्मा एव न तु क्षेत्रज्ञस्येत्याह भगवान् इच्छा द्वेष इति । इच्छा यज्जातीयं सुखहेतुमर्थमुपलब्धवान् पूर्व्वं पुनस्तज्जातीयमुपलभ्यमानस्तमादातुमिच्छति सुखहेतुरिति सेयमिच्छान्तःकरणधर्म्मो ज्ञेयत्वात् क्षेत्रं तथा द्वेषो यज्जातीयमर्थं दुःखहेतुत्वेनानुभूतवान् पूर्व्वं पुनस्तज्जातीयमुपलभ्यमानस्तं द्वेष्टि सोऽयं द्वेषो ज्ञेयत्वात् क्षेत्रमेव तथा सुखमनुकूलं प्रसन्नं सत्त्वात्मकं ज्ञेयत्वात् क्षेत्रमेव दुःखं प्रतिकूलात्मकं ज्ञेयत्वात् तदपि क्षेत्रं संघातो देहेन्द्रियाणां संहतिस्तस्यामभिव्यक्तान्तःकरणवृत्तिः तत्र इव लौहपिण्डेऽग्निरात्मचैतन्याभासरूपविद्धा चेतना सा च क्षेत्रं ज्ञेयत्वात् धृतिर्यावत्सादं प्राप्तानि देहेन्द्रियाणि धियन्ते सा च ज्ञेयत्वात् क्षेत्रं सर्व्वान्तःकरणधर्म्मोपलक्षणार्थमिच्छादिग्रहणं यत उक्तं तदुपसंहरति एतत् क्षेत्रं समासेन सविकारं सह विकारेण महदादिनोदाहृतमुक्तं यस्य क्षेत्रभेदजातस्य संहतिरिदं शरीरं क्षेत्रं इत्युक्तं तत् क्षेत्रं व्याख्यातं महाभूतादिभेदादभिन्नं धृत्यन्तम्" ॥ इत्यत्र श्रीधरस्वामिनापि यदुक्तं तदुच्यते । "एते चेच्छादयो दृश्यत्वान्नात्मधर्म्मा अपि तु मनोधर्म्मा अतः क्षेत्रान्तःपातिन एवोपलक्षणञ्चैतत् सङ्कल्पादीनाम् । तथा च श्रुतिः । कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्व्वं मन एवेति" ॥ * ॥ समुद्दीपा पृथिवी । यथा, भागवते ६ । ६ । ३७ ।
"यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति ।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते" ॥)
सिद्धस्थानम् । (यथा, कथासरित्सागरे । ३ । ७८ ।
"पाटलिपुत्रं क्षेत्रं लक्ष्मीस्वरूपौ" ।) कलत्रम् ।
इति मेदिनी ॥ (यथा मनुः । ६ । ३३ ।
"क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान् ।
क्षेत्रबीजसमायोगात् सम्भवः सर्व्वदेहिनाम्" ॥)
गृहम् । नगरम् । इति वैजयन्तीकोषः । * ॥

अथ क्षेत्रव्यवहारो लिख्यते ।

तत्र भुजकोटिकर्णानामन्यतमे ज्ञातेऽन्यतमयोर्ज्ञानाय करणसूत्रं वृत्तद्वयम् ।
इष्टाद्दोर्यः स्यात्तत्स्वर्द्धिन्यां दिशीतरो बाहुः ।
यस्मे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः ॥
तत्कृत्योर्योगपदं कर्णो दोःकर्णवर्गयोर्विवरात् ।
मूलं कोटिः कोटिश्रुतिज्ञात्योरन्तरात् पदं बाहुः ॥


उदाहरणम् ।

कोटिश्चतुरयं यत्र दोस्त्रयं तत्र का श्रुतिः ।
कोटिं दोःकर्णतः कोटिश्रुतिभ्याञ्च भुजं वद ॥




कोटिः ४ । भुजः ३ । भुजवर्गः ९ । कोटिवर्गः १६ । एतयोर्योगात् २५ । मूलं ५ कर्णो जातः ॥

अथ कर्णभुजाभ्यां कोट्यानयनम् ।



कर्णः ५ । भुजः ३ । अनयोर्वर्गान्तरम् १६ । एतन्मूलं कोटिः ४ ॥


अथ कोटिकर्णाभ्यां भुजानयनम् ।



कोटिः ४ । कर्णः ५ । अनयोर्वर्गान्तरम् ९ । एतन्मूलं भुजः ३ ॥


प्रकारान्तरेण तज्ज्ञानाय करणसूत्रं सार्द्धवृत्तम् ।

राश्योरन्तरवर्गेण हिन्ने घाते युते तयोः ।
वर्गयोगो भवेदेवं तयोर्योगान्तरादृतिः ।
वर्गान्तरं भवेदेवं ज्ञेयं सर्व्वत्र धीमता ॥
कोटिश्चतुरयमिति पूर्व्वोक्तोदाहरणे ।




कोटिः ४ । भुजः । ३ । अनयोर्घातः १२ । द्विघ्ने २४ । अन्तरवर्गेण १ । युते वर्गयोगः २५ । अस्य मूलं कर्णः ५ ॥

अथ कर्णभुजाभ्यां कोट्यानयनम् ।



कर्णः ५ । भुजः ३ । अनयोर्योगः ८ । पुनरेतयोरन्तरेण-(२) हतो वा १६ । वर्गान्तरमस्य मूलं कोटिः ४ ॥


अथ भुजज्ञानम् ।



कोटिः ४ । कर्णः ५ । एवं जातो भुजः ३ ॥

उदाहरणम् ।

साङ्कित्रयमितो बाहुर्यत्र कोटिश्च तादृशी ।
तत्र कर्णप्रमाणं किं गणक ! ब्रूहि मे, द्रुतम् ॥



भुजः १२/४ । कोटिः १/४ । अनयोर्वर्गयोर्योगः १४४/१६ । अस्य मूलाभावात् करणीगत एवायं कर्णः ॥ अस्यासन्नमूलज्ञानार्थमुपायः ।


वर्गेण महतेष्टेन हताच्छेदांशयोर्वधात् ।
पदं गुणपदक्षुण्णच्छिन्नक निकटं भवेत् ॥
इयं कर्णकरणी १४४/१६ । अस्याः छेदांशघातः १६५२ । अयुतघ्नः १३,५२०,००० । अस्यासन्नमूलं ३६७७ । इदं गुणमूलं १०० । गुणितच्छेदेन ८०० । भक्तं लब्धमासन्नपदम् ४ । भागाः ५७७/८०० । अयं कर्णः । एवं सर्व्वत्र ॥

त्र्यस्रजात्ये करणसूत्रं वृत्तद्वयम् ।

इष्टो भुजोऽस्मादिगुणेष्टनिघ्ना-
दिष्टस्य कृत्यैक्ययुतात्पदाप्तम् ।
कोटिः पृथक् सेष्टगुणा भुजोना
कर्णो भवेत्त्र्यस्रमिदन्तु ज्ञात्यम् ॥
इष्टो भुजस्तत्कृतिरिष्टभक्ता
द्विःस्थापितस्वोनयुतार्द्धिता वा ।
तौ कोटिकर्णाविति कोटितो वा
बाहुश्रुती वाकरणीगते स्तः ॥

उदाहरणम् ।

भुजे द्वादशके यौ यौ कोटिकर्णावनेकधा ।
प्रकाराभ्यां वद क्षिप्रं तौ तावकरणीगतौ ॥



इष्टो भुजः १२ । इष्टं २ । अनेन द्विगुणेन ४ । गुणितो भुजः ४८ । इष्टः २ । ज्ञात्वा ४ । इष्टो नया ३ । भक्तो जन्या कोटिः १६ । इयमेकगुणा ३२ । भुजोना १२ । जातः कर्णः २० ॥


त्रिकेणेष्टेन वा ।

क्षेत्रं



कोटिः ९ ।
कर्णः १५ ।


पञ्चकेन वा



कोटिः ५ ।
कर्णः १३ ।
इत्यादि ॥

१२


अथ द्वितीयप्रकारेण ।



इष्टो भुजः १२ । अस्य कृतिः १४४ । इष्टेन २ । भक्तालब्धं ७२ । इष्टेन २ । ऊनं ७० । युता ७४ । वर्द्धितौ जातौ कोटिकर्णौ ३५ । ३७ ।

१२


चतुष्केण वा ।



कोटिः १६ ।
कर्णः २० ।

१२

षट्केन वा ।



कोटिः ।
कर्णः १५ ।

१२


अथेष्टकर्णात् कोटिभुजानयने करणसूत्रं वृत्तम् ।

इष्टेन निघ्नात् द्विगुणाच्च कर्णा-
दिष्टस्य कृत्यैक्ययुजा यदाप्तः ।
कोटिर्भवेत् सा एषां मिथस्तिन्नौ
तत्कर्णयोरन्तरमत्र बाहुः ॥

उदाहरणम् ।

पञ्चाशीतिनिते कर्णौ यौ वावकरणीगतौ ।
स्यातां कोटिभुजौ तौ तौ वद कोविद ! सत्वरम् ॥

क्षेत्रं




कर्णः ८५ । अयं द्विगुणः १७० । द्विकेनेष्टेन हतः ३४० । इष्ट २ । क्षुण्णा ४ । सैकया ५ । भक्तौ जातौ कोटिः ४८ । इयमिष्टगुणा १३६ । कर्णौ ८५ ।

५१

नितौ जातौ भुजः ५१ ।

चतुष्कोणेष्टेन वा ।




कोटिः ४० ।
भुजः ७५ ।

७५

पुनः प्रकारान्तरेण तत्करणसूत्रं वृत्तम् ।

इष्टवर्गेण सैकेन द्विघ्नः कर्णोऽथवा हतः ।
फलोनः अवशः कोटिः फलांशयुगं भुजः ॥


पूर्वोदाहरणे ।



कर्णः ८५ । अत्र द्विकेण इष्टेन जातौ कोटिभुजौ ५१ । ४८ ।

४८

चतुष्केण वा ।




कोटिः ७५ । भुजः ४० । अत्र दोःकोट्योर्नामभेद एव केवलं न स्वरूपभेदः ॥

अथेष्टाभ्यां भुजकोटिकर्णानयने करणसूत्रं वृत्तम् ।

इष्टयोराहतिर्द्विघ्नी कोटिर्वर्गान्तरं भुजः ।
कृतियोगस्तयोरेवं कर्णश्चाकरणीगतः ॥

उदाहरणम् ।


येषां स्वाक्षं भवेत् जात्यं कोटिदोःश्रवणैः सखे ! ।
तेषां त्वविदितानेतान् क्षिप्रं ब्रूहि विचक्षण ! ॥



अत्रेष्टे २ । १ । आभ्यां कोटिभुजकर्णाः ४ । ३ । ५ ।


३

क्षेत्रं



अथवेष्टे २ । ३ । आभ्यां कोटिभुजकर्णाः १२ । ५ । १३ ।

५



अथवा २ । ४ । आभ्यां कोटिभुजकर्णाः १६ । १२ । २० । एवमन्यत्रानेकधा ।


१२

कर्णकोटियुतौ भुजे च ज्ञाते पृथक्करणसूत्रं वृत्तम् ।

वंशाग्रमूलान्तरभूमिवर्गो
वंशोर्द्धवक्त्रेण पृथक्युतोनौ ।
वंशौ तदर्द्धे भवतः क्रमेण
वंशस्य खण्डे श्रुतिकोटिरूपे ॥

उदाहरणम् ।

यदि समभुवि वेणुर्द्वित्रिपाणिप्रमाणो
गणक ! पवनवेगादेकदेशे सभग्नः ।
भुवि पतमितवृत्तस्तेष्वकृलग्नं तदग्रं
कथय कतिषु मूलादेष भग्नः क्षरेषु ॥



वंशाग्रमूलान्तरभूमिः १६ । वंशः ३२ । कोटिकर्णयुतिः ३२ । भुजः १६ । जाते ऊर्द्धाधःखण्डे २० । १२ ।

१६

बाहुकर्णयोगे दृष्टे कोट्याश्च ज्ञातायां पृथक्करणसूत्रं वृत्तम् ।


स्तम्भस्य वर्गोऽहिविलान्तरेण
भक्तः फलं व्यालविलान्तरालात् ।
प्रोह्यं तदर्द्धप्रमितैः करैः स्यात्
विलाग्रतो व्यालकलामियोगः ॥

उदाहरणम् ।

अस्ति स्तम्भतले बिलं तदुपरि क्रीड़ाग्निखण्डी स्थितः स्तम्भे हस्तनवोच्छ्रिते त्रिगुणिते स्तम्भप्रमाणान्तरे । दृष्ट्वाहिं बिलमात्रजन्तमपतत् तिर्य्यक् स तस्योपरि क्षिप्रं ब्रूहि तयोर्बिलात् कतिमितौ साम्येन गत्वोर्युतिः ॥

क्षेत्रं

न्यासः




स्तम्भः ९ अहिविलान्तरम् २७। जाता विलयुत्योर्मध्यहस्ताः १२ ॥

कोटिकर्णान्तरे भुजे च दृष्टे पृथक्करणसूत्रं वृत्तम्।

भुजाद्वर्गितात् कोटिकर्णान्तराद्यं
द्विधा कोटिकर्णान्तरेणोनयुक्तम्।
तदर्द्धे क्रमात् कोटिकर्णौ भवेता-
मिदं धीमता वेद्य सर्व्वत्र योज्यम् ॥
सखे! पद्म तन्मज्जनस्थानमध्यं
भुजः कोटिकर्णान्तरं पद्मदृश्यम्।
नलः कोटिरेतन्मितं स्याद्यदम्भो
वदैवं समानीय पानीयमानम् ॥

उदाहरणम्।

चक्राकौञ्चाकुलितसलिले ह्रापि दृष्टं तड़ागे
तोयादूर्द्धं कमलकलिकाग्रं वितस्तिप्रमाणम्।
मन्दं मन्दं चलितमनिलेनाहतं हत्तयुग्मे
तस्मिन्नाग्रं गणक! कथय क्षिप्रमम्भःप्रमाणम् ॥




कोटिकर्णान्तरं $\frac{१}{४}$। भुजः २। लब्धं जलगाम्भीर्यं $\frac{१५}{४}$। इयं कोटिः $\frac{१५}{४}$। इयमेव कोटिः कल्पिकामानयुता जातः कर्णः $\frac{१७}{४}$ ॥

कोट्येकदेशेन युते कर्णे भुजे च दृष्टे कोटिकर्णज्ञानाय करणसूत्रं वृत्तम्।

द्विनिघ्नतालोच्छ्रितिसंयुतं यत्
सरोऽन्तरं तेन विभाजितायाः।
ताखोच्छ्रितेस्तालसरोऽन्तरघ्ना
उड्डीयमानं खलु लभ्यते तत् ॥

उदाहरणम्।

वृक्षाद्वृक्षत्रयोच्छ्रयाच्छतयुगे वापीं कपिः कोऽप्यगादुत्तीर्य्याथ परो द्रुतं श्रुतिपथेनोड्डीय किञ्चिद्द्रुमात्।
जातैवं समता तयोर्यदि गतावुड्डीयमानं कियद्दिदन्! चेन्नुपरिश्रमोऽस्ति गणिते क्षिप्रं तदाचक्ष्व नः।



वृक्षव्याप्यन्तरं २००। वृक्षोच्छ्रायः १००। लब्धमुड्डीयमानं ५०। कोटिः १५०। कर्णः २५०। भुजः २०० ॥


क्षेत्रं

भुजकोट्योर्योगे कर्णे च ज्ञाते पृथक् करणसूत्रं वृत्तम्।

कर्णस्य वर्गाद्द्विगुणाद्द्विघोघो
दोःकोटियोगः स्वगुणोऽस्य मूलम्।
योगो द्विधा मूलविहीनयुक्तः
स्यातां तदर्द्धे भुजकोटिमाने ॥

उदाहरणम्।


दशसप्ताधिकः कर्णस्त्र्यधिका विंशतिः सखे!।
भुजकोटियुतिर्यत्र तत्र ते मे पृथग्वद ॥



कर्णः १७। दोःकोटियोगः २३। जाते भुजकोटी ८। १५।

उदाहरणम्।

दोःकोट्योरन्तरं त्रैराशिकः कर्णो यत्र त्रयोदश।
भुजकोटी पृथक् तत्र वदाशु गणकोत्तम! ॥




कर्णः १३। भुजकोट्यन्तरम् ७। लब्धे भुजकोटी ५। १२ ॥

लम्बावबाधाज्ञानाय करणसूत्रं वृत्तम्।

अन्योन्यमूलाग्रगसूत्रयोगात्
वेधोर्वधे योगहृते च लम्बः।
वंशौ स्वयोगेन हृतावभीष्ट-
भूघ्नौ च लम्बोभयतः कुखण्डे ॥

उदाहरणम्।

पञ्चदशदशकरोच्छ्रायवेधोरज्ञातमध्यभूमिकयोः।
इतरेतरमूलाग्रगसूत्रयुतेर्लम्बमानमाचक्ष्व ॥



वंशौ १५। १०। जातो लम्बः ६। वंशान्तरभूः ५। अत्र जाते भूखण्डे ३। २। अथवा भूः १०। खण्डे ६। ४। वा भूः १५। खण्डे ९। ६। वा भूः २०। खण्डे १२। ८। एवं सर्व्वत्र लम्बः। स एव यत्र भूमितुल्ये भुजे वंशः कोटिस्तदा मूलखण्डेन किमिति त्रैराशिकेन सर्व्वत्र प्रतीतिः

क्षेत्रं


अथ क्षेत्रलक्षणे सूत्रम्।


दृष्टोद्दिष्टभुजौ क्षेत्रं यत्रैकबाहुतः स्वल्पा।
तदितरभुजयुतिरथवा तुल्या क्षेयं तदक्षेत्रम् ॥

उदाहरणम्।

चतुरस्रे त्रिषड्बाहू भुजास्त्र्यस्रे त्रिसप्तवाः।
उद्दिष्टा यत्र दृष्टेन तदक्षेत्रं विनिर्दिशेत् ॥

ते अनुपपन्ने क्षेत्रे।






भुजप्रमाणा ऋजुशलाकाः भुजस्थानेषु विन्यस्यानुपपत्तिर्दर्शनीया ॥

आबाधादिज्ञानाय करणसूत्रमार्य्याद्वयम्।
त्रिभुजे भुजयोर्योगस्तद्दन्तरगुणो भुवा हतो लब्ध्या।
द्विःस्था भूरूनयुता दलिताबाधे तयोः स्याताम् ॥
स्वाबाधा भुजक्षत्योरन्तरमूलं प्रजायते लम्बः।
लम्बगुणं भूमर्द्धं स्पष्टं त्रिभुजे फलं भवति ॥

उदाहरणम्।


क्षेत्रे महीमनुमिता त्रिभुजे भुजौ तु यत्र
त्रयोदशप्रतिथिभ्रमितौ च यस्य।
तत्रावलम्बकमथो कथयावबाधे
क्षिप्रं तथा च रमकोष्ठमितिं फलाख्याम् ॥



भूः १४। भुजौ १३। १५। लब्धे आबाधे ५। ९। लम्बश्च १२। क्षेत्रफलञ्च ८४ ॥

ऋणाबाधोदाहरणम्।

दशसप्तदशप्रमौ भुजौ
त्रिभुजे यत्र नवप्रमा मही।
अवधे वद लम्बकं तथा
गणितं गाणितिकासु तत्र मे ॥



भुजौ १०। १७। भूमिः ९। अत्र त्रिभुजेभुजयोर्योग इत्या-

क्षेत्रं


दिना लब्धम् २१। अनेन भूरूना न स्यात्। अस्मादेव भूरपनीता। शेषार्द्धमुखगता बाधा दिग्वैपरीत्येनेत्यर्थः। तथा जाते बाधे ६। १५। अत उभयत्रापि जातो लम्बः ८। फलम् ३६॥

चतुर्भुजत्रिभुजयोरस्पष्टस्पष्टफलानयने करणसूत्रं वृत्तम्।

सर्व्वदोर्युतिदलं चतुःस्थितं
बाहुभिर्विरहितञ्च तद्धात्
मूलमस्फुटफलं चतुर्भुजे
स्पष्टमेव मुदितं त्रिबाहुके॥

उदाहरणम्।


भूमिश्चतुर्दशमिता मुखमष्टसङ्ख्यं
बाहू त्रयोदशदिवाकरसम्मितौ च।
लम्बोऽपि यत्र रविसंज्ञक एव तत्र
क्षेत्रे फलं कथय तत् कथितं यदाद्यैः॥



भूमिः १४। मुखम् ८। बाहू १३। १२। लम्बः १२। उक्तवत् करणेन जातं क्षेत्रफलं करणी २९८ ०।

अस्याः पदं किञ्चिन्नूनमेकचत्वारिंशच्छतम् १४१। इदमत्र क्षेत्रे न वास्तवं फलं किन्तु लम्बेन निघ्नं कुमुखैक्यखण्डमिति वक्ष्यमाणकरणेन वास्तवं फलं १३८।

अत्र त्रिभुजस्य पूर्व्वोदाहृतस्य।



भूमिः १४। भुजौ १३। १५। अनेनापि प्रकारेण त्रिबाहुके तदेव वास्तवं फलं ८४। अत्र चतुर्भुजस्यास्पष्टमुदितम्॥

अथ स्थूलत्वनिरूपणार्थं सूत्रं सार्द्धवृत्तम्।

चतुर्भुजस्यानियतौ हि कर्णौ
कथं ततोऽस्मिन्नियतं फलं स्यात्।
प्रसाधितौ तत्र्भवगौ यदाद्यैः
सकल्पितौ तावितरत्र न स्तः॥
तेष्वेव बाहुष्वपरौ च कर्णा-
वनेकधा क्षेत्रफलं ततश्च॥

चतुर्भुजे हि एकान्तरकोणावाक्रम्यान्तः प्रवेश्यमानौ तत्संज्ञौ स्वकर्णं सङ्कोचयतः। इतरौ तु बहिः प्रसरन्तौ स्वकर्णं वर्द्धयतः अत उक्तं तेष्वेव बाहुष्वपरौ च कर्णाविति।
लम्बयोः कर्णयोर्व्वैकमनिर्द्दिश्यापरः कथम्।
एकस्यनियतत्वेऽपि नियतत्वापि तत्फलम्॥
स एकः पिशाचो वा वक्ता वा नितरां ततः।
यो न वेत्ति चतुर्बाहुक्षेत्रस्यानियतां स्थितिम्॥

क्षेत्रं


समचतुर्भुजायतयोः फलानयने करणसूत्रं सार्द्धश्लोकद्वयम्।

इष्टा श्रुतिस्तुल्यचतुर्भुजस्य
कल्पा च तद्वर्गविवर्जिता या।
चतुर्गुणा बाहुकृतिस्तदोयं
मूलं द्वितीयश्रवणप्रमाणम्॥
अतुल्यकर्णाभिहतिर्द्विभक्ता
फलं स्फुटं तुल्यचतुर्भुजे स्यात्।
समश्रुतौ तुल्यचतुर्भुजे च
तथायते तद्भुजकोटिघातः॥
चतुर्भुजेऽन्यत्र समानलम्बे
लम्बेन निघ्नं कुमुखैक्यखण्डम्॥

अत्रोद्देशकः।


क्षेत्रस्य पञ्चकृतितुल्यचतुर्भुजस्य
कर्णौ ततश्च गणितं गणक! प्रचक्ष्व।
तुल्यश्रुतेश्च खलु तस्य तथायतस्य
यद्विस्तृतौ रसमिताष्टमितश्च दैर्घ्यम्॥

प्रथमोदाहरणे।




भुजाः २५। २५। २५। २५। अत्र त्रिंशन्मितामेकां ३० श्रुतिं प्रकल्प्य यथोक्तकरणेन जातान्या श्रुतिः ४० फलञ्च ६००॥

अथवा।



चतुर्दशमितामेकां १४। श्रुतिं प्रकल्प्योक्तवत् करणेन जाता अन्या श्रुतिः ८४। फलञ्च ३३६॥


द्वितीयोदाहरणे।



क्षेत्रं

तत्कृत्योर्योगपदं करण इति जाता करणीगता श्रुतिरुभयत्र तुल्यैव १,२५०। गणितञ्च ६२५।


अथायतस्य।



विस्तृतिः ६। दैर्घ्यम् ८। अस्य गणितम् ४८।


उदाहरणम्।

क्षेत्रस्य यस्य वदनं मदनारितुल्यं
विश्वम्भरा द्विगुणितेन मुखेन तुल्या।
बाहू त्रयोदशनखप्रमितौ च लम्बः
सूर्य्योन्मितश्च गणितं वद तत्र किं स्यात्॥



वदनम् ११। विश्वम्भरा २२। बाहू १३। २०। लम्बः १२।

अत्र सर्व्वदोर्युतिदलमित्यादिना स्थूलफलं २५०। वास्तवन्तु लम्बेन निघ्नं कुमुखैक्यखण्डमिति जातं फलम् १९८। क्षेत्रस्य खण्डत्रयं कृत्वा फलानि पृथगानीय ऐक्यं कृत्वास्य फलोपपत्तिर्दर्शनीया खण्डत्रयदर्शनम्।




प्रथमस्य भुजकोटिकर्णाः ५। १२। १३। द्वितीयस्यायतस्य विस्तृतिः ६। दैर्घ्यम् १२। तृतीयस्य भुजकोटिकर्णाः १६। १२। २०।

अत्र त्रिभुजयोः क्षेत्रयोर्भुजकोटिघातार्द्धं फलं जायते चतुरस्रे क्षेत्रे तद्भुजकोटिघातः फलं यथा। प्रथमक्षेत्रे फलम् ३०। द्वितीये ७२। तृतीये ९६। एषामैक्यं सर्व्वक्षेत्रफलम् १९८।

क्षेत्रं

अथान्यदुदाहरणम् ।

पञ्चाग्रदेकसहिता वदनं यदीयं
भूः पञ्चसप्ततिमिता प्रमितोऽष्टषष्ट्या ।
सव्यो भुजो द्विगुणविंशतिसन्मितोऽन्य-
स्तस्मिन् फलं श्रवणलम्बमिती प्रचक्ष्व ॥



वदनम् ५१ । भूमिः ७५ । भुजौ ६८ । ४० ।

७३१/५ । ७५ । १५४/५

अत्र फलावलम्बश्रुतीनां सूत्रं वृत्तार्द्धम् ।

ज्ञातेऽवलम्बे श्रवणः श्रुतौ तु
लम्बः फलं स्यान्नियतन्तु तत्र ।
कर्णस्यानियतत्वात् लम्बोऽप्यनियत इत्यर्थः ॥

लम्बज्ञानाय करणसूत्रं वृत्तार्द्धम् ।

चतुर्भुजान्तस्त्रिभुजेऽवलम्बः
प्राग्वत् भुजौ कर्णभुजौ मही भूः ॥

अत्र लम्बज्ञानार्थं सव्यभुजाग्राद्दक्षिणभुजमूलगामी इष्टः कर्णः सप्तसप्ततिमितः ७७ कल्पितस्तेन चतुर्भुजान्तस्त्रिभुजं कल्पितं तत्रासौ कर्ण एको भुजः ७७ । द्वितीयस्तु सव्यभुजः ६८ । भूः सैव ७५ । अत्र प्राग्वल्लम्बो लम्बः ३०८/५ ।


लम्बे ज्ञाते कर्णज्ञानार्थं सूत्रं वृत्तम् ।


यल्लम्बलम्बाश्रितबाऽवर्ग-
विशेषमूलं कथितावधा सा ।
तद्ऊनभूवर्गसमन्वितस्य
यल्लम्बवर्गस्य पदं स कर्णः ॥

अत्र सव्यभुजाग्रात्लम्बः किल कल्पितः ३०८/५ । अतो ज्ञातावधा १५४/५ । तद्ऊनभूवर्गसमन्वितेत्यादिना ज्ञातः कर्णः ७७ ॥

द्वितीयकरणज्ञानार्थं सूत्रं वृत्तद्वयम् ।

इष्टोऽत्र कर्णः प्रथमं प्रकल्प्य
स्वाखे तु कर्णाभयतः स्थिते ये ।
कर्णौ तयोः स्वामितगौ च बाहू
प्रकल्प्य लम्बावधे च साध्ये ॥
आबाधयोरेककुपस्थयोर्यत्
स्यादन्तरं तत् क्षतिसंयुतस्य ।
लम्बैक्यवर्गस्य पदं द्वितीयः
कर्णो भवेत् सर्व्यचतुर्भुजेषु ॥





७५

तत्र चतुर्भुजे सव्यभुजाग्रात् दक्षिणभुजमूलगामिनः कर्णस्य मानं कल्पितम् ७७ । तत्कर्णरेखावच्छिन्नस्य क्षेत्रस्य मध्ये कर्णरेखोभयतो ये त्र्यस्रे उत्पन्ने तयोः कर्णः भूमी तदितरौ च भुजौ प्रकल्प्य प्राग्वल्लम्बः आबाधा च साधिता तद्ऊनं लम्बः ६० । द्वितीयलम्बः २४ । आबाधयो ४५ । ३२ । रेककुपस्थयोरन्तरस्य १३ । क्षते १६९ लम्बैक्य ८४ । क्षतेश्च ७०५६ । योगः ७२२५ । तस्य पदं द्वितीयकर्णप्रमाणम् ८५ ।

अत्रेष्टकर्णकल्पने विशेषोक्तिसूत्रं सार्द्धवृत्तम् ।

कर्णाश्रितं स्वल्पभुजैक्यमुर्व्वी
प्रकल्प्य तच्छेषमितौ च बाहू ।
साध्योऽवलम्बोऽथ तथान्यकर्णः
सोर्व्याः कथञ्चिच्चवणो न दीर्घः ॥
तदन्यलम्बान्न लघुस्तयेदं
ज्ञात्वेष्टकर्णः सुधिया प्रकल्प्यः ॥

चतुर्भुजं हि एकान्तरकोणावाक्रम्य सङ्कोच्यमानं त्रिभुजत्वं याति तत्रैककोणे लम्बलघुभुजयोरैक्यं भूमिरितरौ भुजौ प्रकल्प्य साधितं स च लम्बादूनः सङ्कोच्यमानः कर्णः कथञ्चिदपि न स्यात् तदितरौ भुजौ भूमेरधिकौ न स्यातामेवमुभयथापि एतदनुक्तमपि बुद्धिमता ज्ञायते ॥

विषमचतुर्भुजफलानयनाय करणसूत्रं वृत्तार्द्धम् ।

त्र्यस्रे तु कर्णाभयतः स्थिते ये
तयोः फलैक्यं फलमत्र नूनम् ॥

अनन्तरोक्तक्षेत्रान्तस्त्र्यस्रयोः फले । ९२४ । २३१० । अनयोरैक्यम् ३२३४ । तस्य फलम् ॥

समानलम्बस्यावधादिज्ञानाय करणसूत्रं वृत्तद्वयम् ।


समानलम्बस्य चतुर्भुजस्य
मुखोनभूमिं परिकल्प्य भूमिम् ।
भुजौ भुजौ त्र्यस्रवदेव साध्ये
तस्यावधे लम्बमितिस्तथैव ॥
अबाधयोना चतुरस्रभूमि-
स्तल्लम्बवर्गैक्यपदं श्रुतिः स्यात् ।
समानलम्बे लघुदोःकुयोगा-
न्मुखान्यदोःसंयुतिरल्पिका स्यात् ॥

उदाहरणम् ।

द्विपञ्चाग्रन्मितयेकचत्वारिंशन्मितौ भुजौ ।
मुखन्तु पञ्चविंशत्या तुल्यं षष्ट्या मही किल ॥
अतुल्यलम्बकं क्षेत्रमिदं पूर्व्वैरुदाहृतम् ।


क्षेत्रं

षट्पञ्चाशत् त्रिषष्टिश्च नियते कर्णयोर्मिती ॥
कर्णौ तत्रापरौ ब्रूहि समलम्बश्च तत्कृती ॥




अत्र बृहत् कर्णं त्रिषष्टिमितं प्रकल्प्य च ज्ञातः प्राग्वदन्यः कर्णः ५६ ॥

अथ षट्पञ्चाशत्स्थाने द्वात्रिंशन्मितं कर्णं ३२ प्रकल्प्य प्राग्वत् साध्यमाने कर्णौ ।




ज्ञातं करणीखण्डद्वयम् ६२१ । २७०० अनयोर्मूलयोः २४ २२/३५ । ५१ २४/३५ । ऐक्यं द्वितीयः कर्णः ७६ २२/३५ ।

अथ तदेव क्षेत्रक्षेत्रं समलम्बम् ।



तदा मुखोनभूमिं परिकल्प्य भूमिमितिज्ञानार्थं त्र्यस्रकल्पितम् । अत्र क्षेत्रे लम्बांशहारयोः षट्शते पतिते ।




अत्राबाधे ज्ञाते ३/५ १७२/५ लम्बस्य करणीगतो ज्ञातः २८०१४/२५ आसन्नमूलकरणेन ज्ञातः ३८ ६२२/३५ । अयं तत्र चतुर्भुजे समलम्बः लम्बाबाधोनितभूमेः समलम्बस्य च वर्गयोगः ५०४९ । अयं कर्णवर्गः । एवं बृहदावाधातो द्वितीयकर्णवर्गः २१७६ । अनयोरासन्नमूलकरणेन ज्ञातौ कर्णौ ७१ १/३० १९ १९/३० एवं चतुरस्रे तेष्वेव बाऽवन्यौ कर्णौ बहुधा भवत एवमनियतत्वेऽपि नियतावेव कर्णावानीतौ ब्रह्मगुप्तादीस्तदानयनं यथा ।

कर्णाश्रितभुजघातैक्यमुभयथान्योन्यभाजितं गुणयेत् । योगेन भुजप्रतिभुजहत्योः कर्णौ पदे विषमे ।

क्षेत्रं

न्यासः




कर्णाश्रितभुजघातेति एकवारमनयोः २५। ३९। घातः ९७५। तथा ५२। ६०। अनयोर्घातः ३१२०। घातयोर्द्वयोरैक्यम् ४०९५। तथा द्वितीयवारम् २५। ५२। अनयोर्घाते जातम् १३००। तथा द्वितीयवारम् ३९। ६०। अनयोर्घाते २३४०। घातयोर्द्वयोरैक्यम् ३६४०। एतदैक्यं भुजप्रतिभुजयोः५२। ३९। घातः २०२८। यस्मात् २५। ६०। अनयोर्वधः १५००। तयोरैक्यम् ३५२८। अनेनैक्येन ३६४० गुणितं जातं पूर्वैक्यं १९,८४१,९२०। प्रथमकर्णाश्रितभुजघातैक्येन ४०९५। भक्तं लब्धं ४६९६। अस्य मूलं ५६। एककर्णोक्त्या द्वितीयकर्णार्थं प्रथमकर्णाश्रितभुजघातैक्यम् ४०९५। भुजप्रतिभुज-३५२८। वधयोगगुणितं जातं १४,४४७,१६०। अन्यकर्णाश्रितघातैक्येन ३६४० भक्तं लब्धं ३९६९। अस्य भूलम् ६३। द्वितीयः कर्णः। अस्मिन् विषमे क्षेत्रे कर्णौ साधनं अस्य कर्णानयनस्य प्रक्रिया गौरवम्॥

लघुप्रक्रियादर्शनद्वारेणाह।

अभीष्टजात्यद्वयबाऽकोटयः
परस्परं कर्णहता भुजा इति।
चतुर्भुजं यद्विषमं प्रकल्पितं
श्रुती तु तत्र त्रिभुजद्वयात्ततः॥
बाहोर्वधः कोटिवधेन यक् स्या-
देका श्रुतिः कोटिभुजा वधैक्यम्।
अन्या लघौ सत्यपि साधनेऽस्मिन्
पूर्वैः कृतं यद्गुरु तन्न विद्मः॥

जात्यक्षेत्रद्वयम्।


न्यासः



एतयोः इतरेतरकर्णहता भुजाः कोटय इतरेतरकर्णहताः कोटयो भुजा इति कृते जातम् २५। ६०। ५२। ३९। तेषां महती मूलघुमुखमितौ बाहू इति प्रकल्प्य क्षेत्रदर्शनं इमौ कर्णौ महतायासेनानीतौ ६३। ५६। अस्यैव जात्यद्वयस्योत्तरोत्तरभुजकोट्योर्घातौ जातौ ३६। २०। अनयोरैक्यमेकः कर्णः ५६। बाहोः ३। ५। कोट्योश्च ४। १२। घातौ १५। ४८। अनयोरैक्यमन्यः कर्णः ६३। एवं श्रुती स्यातां एवं सुखेन जाते॥

अथ यदि पार्श्वभुजयोर्व्यत्ययं कृत्वा न्यस्तं क्षेत्रम्।

न्यासः



सूच्यावाधा $\frac{१५३६}{१७}$ सूच्यावाधा $\frac{३५६४}{१७}$।

भूमानम् ३००। मुखम् १२५। बाहू २६०। १९५। कर्णौ २८०। ३१५। लम्बौ १८९। २२४॥

अथ सन्ध्याद्यानयनाय करणसूत्रं वृत्तद्वयम्।

लम्बतदाश्रितबाहोर्मध्ये सन्ध्याख्यमस्य लम्बस्य।
सन्ध्योना भूः पीठं साध्यं यस्याधरं खण्डम्॥
सन्धिर्द्विघ्नः परलम्बश्रवणाहतः परस्य पीठेन।
भक्तो लम्बश्रुत्योर्योगात् स्यात्तमधःखण्डे॥

लम्बः १८९। तदाश्रितभुजः १९५। अनयो र्मध्ये यल्लम्बलम्बाश्रितबाऽवर्गेत्यादिना गता बाधा सन्धिसंज्ञा ४८। तदूनितभूरिति द्वितीया बाधा सा पीठसंज्ञा २५२।

एवं द्वितीयलम्बः २२४। तदाश्रितभुजः २६०। पूर्ववत् सन्धिः १३२। पीठम् १६८।

अथाद्यलम्बस्याधः १८९। खण्डं साध्यम्।

अस्य सन्धिः ४८। द्विघ्नः ४८। परलम्बेन २२४। अवशेन च २८०। एषगुणितः १०७५२। १३४४०। परस्य पीठेन १६८। भक्तो लब्धं लम्बाधःखण्डम् ६४। अवशाधःखण्डश्च ८०।

एवं द्वितीयलम्बस्य २२४। सन्धिः १३२। परलम्बेन १८९। कर्णेन च ३१५। एषगुणितः


क्षेत्रं

तदा जात्यद्वयकर्णयोर्वधः ६५। द्वितीयकर्णः॥

अथ सूचीक्षेत्रोदाहरणम्।

क्षेत्रे यत्र भुजत्रयं ३००। क्षितिमितिरसत्वेन्दु १२५ तुल्यं मुखं बाहू खोल्कृतिभिः २६० प्रमाति-वृतिभिः १९५ तुल्यौ च तत्र श्रुती। एका खाष्टयमैः २८० समा तिथिगुणैः ३१५ अन्याथ तल्लम्बकौ तुल्यौ गोवृतिभिः १८९ तथा अिनयमै २२४ र्योगाक्रवेा लम्बयोः॥

तत् खण्डे कथयाधरे अवशयोर्योगाच्च लम्बावधे तत्सूची निजमार्गवृद्धभुजयोर्योगाद्यथा स्यात्ततः। सावाधं वद लम्बकञ्च भुजयोः सूच्याः प्रमाणे च के सर्वं गाणितिक। प्रवक्ष्व नितरां क्षेत्रेऽत्र दक्षोऽसि चेत्॥



परस्य पीठेन २५२। भक्तो लब्धं लम्बाधःखण्डम्। ९९। अवशाधःखण्डश्च १६५।

अथ कर्णयोर्योगादधोलम्बज्ञानार्थं सूत्रं वृत्तम्।

लम्बौ भूघ्नौ निजनिजपीठविभक्तौ च वंशौ स्तः।
ताभ्यां प्राग्वत् श्रुत्योर्योगालम्बः कुखण्डे च॥

लम्बौ १८९। २२४। भू ३००। घ्नौ जातौ ५६७००। ६७२००। स्वस्वपीठाभ्यां २५२। १६८। भक्तौ एवमत्र लब्धौ वंशौ २२५। ४००। आभ्यामन्योन्यमूलाग्रसूत्रयोगादित्यादिकरणेन लब्धः कर्णयोगादधोलम्बः। १४४। भूखण्डे च १०८। १९२॥

अथ सूच्यावाधालम्बभुजज्ञानार्थं सूत्रं वृत्तत्रयम्।

लम्बहतौ निजसन्धिःपरलम्बगुणः समाक्षयो ज्ञेयः।
समपरसन्थोरैक्यं हारस्तेनोद्धृतौ तौ च॥
समपरसन्धी भूघ्नौ सूच्यावाधे एथक् स्याताम्।
हारहृतः परलम्बः सूचीलम्बो भवेद्भूघ्नः॥
सूचीलम्बघ्नभुजौ निजनिजलम्बोद्धृतौ सूच्याः।
एवं क्षेत्रक्षोदः प्राज्ञैस्त्रैराशिकात् ज्ञेयः॥

अत्र किलार्यं लम्बः २२४। अस्य सन्धिः १३२। अयं परलम्बेन १८६। गुणितो २२४। अनेन भक्तो जातः समाक्रयः $\frac{८६१}{८}$। अस्य परसन्धिश्च ४८। योगो हारः $\frac{१२७५}{८}$। अनेन भूम्नः ३००। समः $\frac{२६७३००}{८}$। परसन्धिश्च। $\frac{१४४००}{१}$ भक्तो जाते लघ्वाबाधे $\frac{३५६४}{१७}$। $\frac{१५३६}{१७}$। एवं द्वितीयः समाक्रयः $\frac{५१२}{६}$।

द्वितीयो हारः $\frac{१७००}{६}$। अनेन भूम्नः क्षेपः समः $\frac{१५३६००}{६}$। परसन्धिश्च $\frac{३६६००}{१}$। भक्तो जाते लघ्वाबाधे $\frac{१५३६}{१७}$ $\frac{३५६४}{१७}$। परलम्बः २२४। भूमि ३००। गुणो हारेण $\frac{१७००}{६}$। भक्तो जातः सूचीलम्बः $\frac{६०४८}{१७}$। सूचीलम्बेन भुजौ १६५। २६०। गुणितौ स्वस्वलम्बाभ्याम् १८६।२२४। यथाक्रमं भक्तौ जातौ स्वमार्गवृद्धौ सूचीभुजौ $\frac{६२४०}{१७}$ $\frac{७०२०}{१७}$।


एवमत्र सर्वत्र भागहारराशिं प्रमाणं गुण्यगुणकौ तु यथायोग्यं फलेच्छे प्रकल्प्य सुधिया त्रैराशिकमत्र्यम्॥

अथ वृत्तक्षेत्रे करणसूत्रं वृत्तम्।

व्यासे भनन्दाभि ३६२७ हते विभक्ते
खवाणसूर्यैः १२५० परिधिः स सूक्ष्मः।
द्वाविंशतिघ्ने विहृते ऽथ शैलैः ७
स्थूलोऽथवा स्याद्व्यवहारयोग्यः॥

उदाहरणम्।


विष्कम्भमानं किल सप्त यत्र
तत्र प्रमाणं परिधेः प्रचक्षु।
द्वाविंशतिघ्नं परिधिप्रमाणं
तद्व्यासखंखाच्च सखे विचिन्त्य॥



व्यासमानम् ७। लब्धं परिधिमानम् २१$\frac{१२३६}{१२५०}$।

स्थूलो वा परिधिर्लब्धः २२।

अथवा परिधितो व्यासानयनाय।



गुणहारविपर्ययेण व्यासमानं सूक्ष्मम् ७$\frac{११}{३६२७}$।


स्थूलं वा ७।

वृत्तगोलयोः फलानयने करणसूत्रं वृत्तम्।
वृत्तक्षेत्रे परिधिगुणितव्यासपादः फलं यत्
चुक्षं वेदैरुपरि परितः कन्दुकस्येव जालम्।
गोलस्यैवं तदपि च फलं पृष्ठजं व्यासनिघ्नं
षड्भिर्भक्तं भवति नियतं गोलगर्भे घनाख्यम्॥

उदाहरणम्।


यद्व्यासस्तुरगैर्मितः किल फलं क्षेत्रे समे तत्र किं व्यासः सप्तमितश्च यस्य सुमते गोलस्य तस्यापि किम्।
पृष्ठे कन्दुकजालसन्निभफलं गोलस्य तस्यापि किं मध्ये ब्रूहि घनं फलञ्च विमलां क्षेत्रेतृसि लीलावतीम्॥

वृत्तक्षेत्रफलदर्शनाय।




व्यासः ७। परिधिः २१$\frac{१२३६}{१२५०}$। क्षेत्रफलम् ३८$\frac{२४२३}{५०००}$।

गोलपृष्ठफलदर्शनाय।



व्यासः ७। गोलपृष्ठफलम् १५३$\frac{११७३}{१२५०}$।

गोलान्तर्गतघनफलदर्शनाय।



व्यासः ७। गोलस्यान्तर्गतं घनफलम् १७६$\frac{२४८७}{२५००}$।

अथ प्रकारान्तरेण ततफलानयने करणसूत्रं सार्धवृत्तम्।

व्यासस्य वर्गे भनवाग्निनिघ्ने
सूक्ष्मं फलं पञ्चसहस्रभक्ते।
रूद्राहते शुक्रहृते ऽथवा स्यात्
स्थूलं फलं तद्व्यवहारयोग्यम्॥
घनीकृतव्यासदलं निजैक-
विंशांशयुग्गोलघनं फलं स्यात्॥


व्यासः ७। अस्य वर्गे ४६। भनवाग्निनिघ्ने पञ्चसहस्रभक्ते तदेव सूक्ष्मं फलम् ३८$\frac{२२६४}{५०००}$। अथवा व्यासस्य वर्गे ४६। रूद्राहते ५३६। शुक्रहृते लब्धं स्थूलं फलम् ३८$\frac{१}{२}$। घनीकृतव्यासदलम् $\frac{३४३}{२}$। निजैकविंशांशयुग्गोलस्य घनफलं स्थूलम् १७६$\frac{२}{३}$।

शरजीवानयनाय करणसूत्रं सार्धवृत्तम्।

व्यासार्धयोगान्तरघातमूलं
व्यासार्धतूनो दलितः शरः स्यात्॥
व्यासाक्षरोनाक्षरसंगुणाच्च
मूलं द्विनिघ्नं भवतीह जीवा।
जीवार्धवर्गे शरभक्तयुक्ते
व्यासप्रमाणं प्रवदन्ति वृत्ते॥

उदाहरणम्।

दृग्विस्तृतिर्वृत्तसमन्तवर्त्य ज्या यत्र मिता सखे!।
तत्रेषुं वद वाणाग्र्यां ज्यावाणाभ्याञ्च विस्तृतिम्॥



व्यासः १०। ज्या ६। योगः १६। अन्तरम् ४। घातः ६४। मूलम् ८। एतदूनो व्यासः २।

दलितः १। जातः शरः १। व्यासात् १०। शरोनात् ६। शर १। सङ्गुणात् ६। मूलम् ३। द्विनिघ्नं ज्ञाता जीवा ६। एवं ज्ञाताभ्यां व्यासाभ्यां व्यासानयनं यथा जीवा- ६। ह्रे ३। वर्गे ६। शर १। भक्ते ६। शर १। युक्ते जातो व्यासः १०।


अथ वृत्तान्तस्थव्यासादिनवव्यासान्तक्षेत्राणां भुजमानानयनाय करणसूत्रं वृत्तत्रयम्।

त्रिद्व्यङ्कवह्निभवसूक्ष्मैः १०३६२३
क्ष्मिवाणाष्टयुगाष्टभिः ८४८५३।
वेदाग्निबाणखाश्वैश्च ७०५३४
खखाभ्राभ्ररसैः ६०००० क्रमात्॥
बाणेषुनखबाणैश्च ५२०५५
द्विद्विनन्देषुसागरैः ४५६२२।
कुरामदग्नवेदैश्च ४१०३१ वृत्तव्यासे समाहते॥
खखखाम्बार्क- १२०००० संभक्ते
लभ्यन्ते क्रमशो भुजाः।
वृत्तान्तस्थव्यासपूर्वेषां
नवव्यासान्तं पृथक् पृथक्॥

उदाहरणम्।


सहस्रद्वितयव्यासं यदृत्तं तस्य मध्यतः।
समत्र्यस्रादिकानां मे भुजान् वद पृथक् पृथक्॥

अथ वृत्तान्तस्थत्रिभुजे भुजमानानयनाय।




व्यासः २०००। त्रिद्व्यङ्कवह्निभवसूक्ष्मैः १०३६२३। गुणितः २०७८४६०००। खखखाभ्रार्कैः १२०००० भक्ते लब्धं व्यासे भुजमानं १७३२ १/२०।

वृत्तान्तस्थचतुर्भुजे भुजमानानयनाय।




व्यासः २०००। त्रिबाणाष्टयुगाष्टभिः ८४८५३ गुणितः १६६७०६,००० खखखाभ्रार्कैः १२०००० भक्ते लब्धं चतुरस्रे भुजमानं १४१४ १३/६०।

वृत्तान्तःपञ्चभुजे भुजमानानयनाय।




व्यासः २०००। वेदाग्निबाणखाश्वैः ७०५३४। गुणितः १४१०६८००० खखखाभ्रार्कैः १२०००० भक्ते लब्धं पञ्चासे भुजमानं ११७५ १७/३०।

वृत्तान्तःषड्भुजे भुजमानानयनाय।




व्यासः २००० खखाभ्राभ्ररसैः ६०००० गुणितः १२०,०००,००० खखखाभ्रार्कैः १२०००० भक्ते लब्धं षड्से भुजमानं १०००।

वृत्तान्तःसप्तभुजे भुजमानानयनाय।



व्यासः २००० बाणेषुनखबाणैः ५२०५५। गुणितः १०४,११०,००० खखखाभ्रार्कैः १२०००० भक्ते लब्धं सप्तासे भुजमानं ८६७ ७/१२।

वृत्तान्तरुद्रभुजे भुजमानानयनाय।



व्यासः २०००। द्विद्विनन्देषुसागरैः ४५६२२। गुणितः ६१,८४४,००० खखखाभ्रार्कैः १२०००० भक्ते लब्धमष्टासे भुजमानं ७६५ ११/३०।

वृत्तान्तनवभुजे भुजमानानयनाय।



व्यासः २०००। कुरामदग्नवेदैः ४१०३१ गुणितः ८२,०६२,००० खखखाभ्रार्कैः १२०००० भक्ते लब्धं नवासे भुजमानं ६८३ १७/२०।

एवमिष्टव्यासादेभ्योऽन्यापि जीवाः सिध्यन्तीति तासु गोले व्योत्पत्तौ वक्ष्ये।


अथ स्थूलजीवाज्ञानार्थं लघुक्रियया करणसूत्रं वृत्तम्।

चापोननिघ्नपरिधिः प्रथमाङ्घ्रयः स्यात्
पश्चाहतः परिधिवर्गचतुर्थभागः।
आद्योनितेन खलु तेन भजेच्चतुर्घ्नैः
व्यासाहतं प्रथममाघ्नमिह व्यथा स्यात्॥

उदाहरणम्।

अष्टादशांशेन वृतेः समान-
मेकादिनिघ्नेन च यत्र चापम्।
पृथक् पृथक् तत्र वदाशु जीवां
खार्कैर्मितं व्यासदलञ्च यत्र॥

७५४



४२

व्यासः २४०। अत्र किणाङ्कलाघवाय विंशतेः सार्धार्कांशतांशमिलितः स्थूलपरिधिः ७५४। अस्याष्टादशांशः ४२। अत्रापि व्यङ्कलाघवाय द्वयोरष्टादशांशयुतो गृहीतः अनेन पृथक् पृथगेकादिगुणितेन तुल्ये धनुषि कल्पिते व्याः साध्याः।

अथवात्र सुखार्थं परिधेरष्टादशांशेन परिधिं धनूंषि चापवर्त्ता व्याः साध्यास्तथापि ता एव भवन्ति।

अपवर्त्तिते न्यासः। परिधिः १८। चापानि च १। २। ३। ४। ५। ६। ७। ८। ९। यथोक्तकरणेन लब्धा जीवाः ४१। ८२। १२०। १५४। १८४। २०८। २२६। २३६। २४०।

अथ चापानयनाय करणसूत्रं वृत्तम् ।
व्यासाब्धिघातयुतमौर्व्विकया विभक्तो
जीवाङ्घ्रिपक्षगुणितः परिधेस्तु वर्गः ।
लब्धोनितात् परिधिवर्गचतुर्थभागा-
दाप्ते पदे वृतिदलात् पतिते धनुः स्यात् ॥

उदाहरणम् ।

विहिता इह ये गुणास्ततो
वद तेषामधुना धनुर्मितिम् ।
यदि तेऽस्ति धनुर्गुणक्रिया
गणिते गाणितिकातिनैपुणम् ॥

व्यासः ४२ । ८२ । १२० । १५४ । १८४ । २०८ । २२६ । २३६ । २४० । स एवापवर्त्तित-परिधिः १८ । जीवाङ्घ्रिणा । $\frac{21}{12}$ पक्षभिश्च ५ । परिधेः १८ । वर्गो ३२४ गुणितः १७०१० । व्यासा-२४० । श्लि ४ । घात ६६० । युतमौर्व्विकयानया १००२ भक्तो लब्धः १७ । अत्राङ्कलाघवाय चतु-र्विंशतेर्द्व्यधिकसहस्रांशयुतो गृहीतोऽनेनोनितात् परिधिः १८ । वर्ग ३२४ । चतुर्थभागात् ६४ । पदे प्राप्ते ८ । इति १८ । दलात् ६ । पतिते १ । जातं धनुः एवं जातानि धनूंषि । १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । एतानि परिधिष्वष्टा-दशांशेन गुणितानि स्युः । इति श्रीभास्करा-चार्य्यविरचितायां लीलावत्यां क्षेत्रव्यवहारः समाप्तः ॥

क्षेत्रकर्कटी, स्त्री, (क्षेत्रजाता कर्कटी । मध्य-पदलोपिकर्म्मधारयः ।) वालुकी । इति राज-निर्घण्टः ॥

क्षेत्रचिर्भिटा, स्त्री, (क्षेत्रजाता चिर्भिटी । प्राक-पार्थिववत् मध्यपदलोपिसमासः ।) चिर्भिटा-कर्कटी । इति राजनिर्घण्टः ॥

क्षेत्रज, पुं, (क्षेत्रे स्त्रीरूपक्षेत्रे गुर्व्वाद्यनुज्ञात-देवरादिसुक्रात् जायते इति । क्षेत्र + जन् + ड ।) खस्त्रियामन्यद्वारा जनितः पुत्रः । द्वादशविधपुत्रान्तर्गतपुत्रविशेषः । (यथाह मनुः । ९ । १६७ ।

"यस्तल्पजः प्रमीतस्य क्लीवस्य व्याधितस्य वा ।
स्वधर्म्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः ॥"

द्वादशविधपुत्रा यथा तत्रैव । ९ । १५८—१६० ।

"पुत्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः ।
तेषां षड् बन्धुदायादाः षड् दायादबान्धवाः ॥
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
क्रीतानीतश्च सहोढ़श्च क्रीतः पौनर्भवस्तथा ।
स्वयन्दत्तश्च शौद्रश्च षड् दायादबान्धवाः ॥")

स च देवरादिना भ्रात्रादिभार्य्यायां यथोक्त-विधानोत्पन्नः । यथा,—

"अपुत्रां गुर्व्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥
आगर्भसम्भवाद्ग्रन्थेः पतितस्त्वन्यथा भवेत् ।
अनेन विधिना जातः क्षेत्रजोऽस्य भवेत् सुतः ॥"

इति मिताक्षरायामाचाराध्यायः ॥

तत्पर्य्यायः । देवरादिजः २ । इति हेमचन्द्रः ॥*॥
तस्य पित्रिरिक्थभागित्वं यथा, मनुः । ९ । १६५ ।

"औरसक्षेत्रजौ पुत्रौ पित्रिरिक्थस्य भागिनौ ।
दशापरे तु क्रमशो गोरिक्थांशभागिनः ॥"*

अनियोगोत्पन्नक्षेत्रजस्य औरसेन सह विभाग-माह मनुः । ९ । १६२ ।

"यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ ।
यद्यस्य पैत्रिकं रिक्थं स तद्गृह्णीत नेतरः ॥"

(अत्र कुल्लूकभट्टः । "यदीति । अपुत्रेण पर-क्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसौ रिक्थी पिण्डदाता च धर्म्मत इति याज्ञ-वल्क्योक्तविषये यदा क्षेत्रिकस्य पितुः क्षेत्रजा-नन्तरमौरसः पुत्रो भवति तदा तौ औरसक्षेत्रजौ एकरिक्थिनौ एकस्य पितुर्यद्यपि रिक्थार्हौ भवतस्तथापि यद्यस्य जनकसम्बन्धि धनं तदेव स गृह्णीयात् न क्षेत्रजः क्षेत्रिकपितुः । यत्तु वक्ष्यति षष्ठन्तु क्षेत्रजस्यांशं प्रदद्यात् पैतृकाद्धनात् । औरसो विभजन् दायमिति तत्पुत्रवत् बीजिविषयम् । यत्तु याज्ञवल्क्येन उभयसम्बन्धि-रिक्थहरत्वमुक्तं तत् क्षेत्रिकपितुरौरसपुत्रा-भावे बोद्धव्यम् । मेधातिथिगोविन्दराजौ तु औरसमनियुक्तापुत्रस्य विषयीकृत्य इमं श्लोकं व्याचक्षाते । तन्न । अनियुक्तापुत्रस्याक्षेत्रजत्वात् अनियुक्तासुतक्षेत्रेत्यनेन तस्य रिक्थग्रहणनिषेधात् यद्येकरिक्थिनौ इत्यनन्वयाच्च ॥") एक-रिक्थिनौ एकस्यां जातौ रिक्थिनौ यस्य बीजाद्यो जातः स तस्य रिक्थं गृह्णीयात् । इतरोऽन्यबीजजो न गृह्णीयादित्यर्थः । स्त्रीधने यत्पित्रादत्तं यद्धनं स्त्रिये तद्बीजजस्तद्धनं गृह्णीयात् नान्य इत्याह नारदः ।

"द्वौ सुतौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने ।
तयोर्यद्यस्य पित्र्यं स्यात् स तद्गृह्णीत नेतरः ॥"

इति दायतत्त्वम् ॥*॥

कलौ क्षेत्रजपुत्रकरणनिषेधो यथा, आदित्य-पुराणे ।

"दीर्घकालं ब्रह्मचर्य्यं धारणञ्च कमण्डलोः ।
देवरेण सुतोत्पत्तिर्हरिकन्या प्रदीयते ॥"

इत्यादि ।

"दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः ।"

इत्यादि ।

"एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्व्वकं बुधैः ॥"

इत्यादि च उद्वाहतत्त्वम् ॥*॥

क्षेत्रजाते त्रि ॥

क्षेत्रजा, स्त्री, (क्षेत्रज + स्त्रियां टाप् ।) श्वेतकण्ट-कारी । गृध्राण्डुली । गोलुञ्चिका । गुल्फिका । चणिका । इति राजनिर्घण्टः ॥ खस्त्रियामन्य-द्वारा जाता कन्या च ॥

क्षेत्रज्ञः, पुं, (क्षेत्रं शरीरं एतच्छरीरं ममेति ज्ञात्वा यो जानाति आपादतलमस्तकं ज्ञानेन विषयीकरोति स्वाभाविकेन औपदेशिकेन वेद-नेन विषयीकरोति वा अधीवलवत् तत्फल-भोक्तृत्वादित्यर्थः । ज्ञा + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) शरीराधिदेवतम् । तत्पर्य्यायः । आत्मा २ पुरुषः ३ । इत्यमरः । १ । ४ । २६ ॥ त्रीणि शरीराधिदेवतेऽन्तर्भोक्तरि । (क्षेत्रेषु सर्व्वदेहेषु सर्व्वान्तर्य्यामितया विराज-मानः सन् "सर्व्वज्ञः सर्व्वशक्तिमान् सर्व्वक्षेत्र-पालयिता" इत्यात्मस्वरूपं जानाति अनुभवति यः प्रज्ञानघनः परमपुरुषः स सर्व्वान्तरात्मा असंसारी परमेश्वरः ।) क्षेत्रं शरीरं जाना-तीति क्षेत्रे शरीरे जानाति ज्ञानवान् भव-तीति वा क्षेत्रज्ञः । ज्ञपजनादिति डः । इति भरतः ॥ तस्य पर्य्यायान्तरम् । सुबीजः ४ पुरुषः ५ अन्तर्य्यामी ६ ईश्वरः ७ पुद्गलः ८ परसंज्ञकः ९ । इति शब्दरत्नावली ॥ प्रधानम् १० । इति जटाधरः ॥*॥ (उभयतः प्रमाणं यथा, भगवद्गीतायाम् । १३ । १—२ ।

"इदं शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ।
क्षेत्रज्ञञ्चापि मां विद्धि सर्व्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥"

ईश्वरपक्षे भाष्यकृदर्थो यथा,—"क्षेत्रक्षेत्रज्ञ-युक्तो किमेतावन्मात्रेण ज्ञानेन ज्ञातव्यावितिनेत्युच्यते क्षेत्रज्ञमिति । क्षेत्रज्ञं यथोक्तलक्षण-मपि मां परमेश्वरमसंसारिणं विद्धि जानीहि योऽसौ सर्व्वक्षेत्रेष्वेकः क्षेत्रज्ञो ब्रह्मादिस्तम्ब-पर्य्यन्तानेकक्षेत्रोपाधिप्रविभक्तस्तं निरस्तसर्व्वो-पाधिभेदं सदसदादिशब्दप्रत्ययागोचरं विद्धी-त्यभिप्रायः । हे भारत ! यस्मात् क्षेत्रक्षेत्रज्ञे-श्वरयाथात्म्यव्यतिरेकेण न ज्ञानगोचरमन्यद-वशिष्टमस्ति तस्मात् क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोर्यज् ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते तज्ज्ञानं सम्यक्ज्ञानमिति मतं अभिप्रत-मित्यभिप्रायो मम ईश्वरस्य विष्णोः ॥" अपि च तत्रैव । १३ । २२ ।

"उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥"

विष्णुः । यथा, महाभारते । १३ । विष्णुसहस्र-नामकीर्त्तने । १४६ । १५ ।

"पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥")

वटुकभैरवः । यथा,—"क्षेत्रज्ञः क्षत्रियो विराट् ।" इति तस्य स्तोत्रम् ॥ क्षेकः । इति मेदिनी ॥ विदग्धः । क्षायकः । इति शब्दरत्ना-वली ॥ क्षेघट्टयार्थे त्रि ॥

क्षेत्रदः, पुं, (क्षेत्रं शरीरं ददाति रोगादिभ्यो मोचयति स्तुतिपाठिनो भक्तस्येति भावः । क्षेत्र + दा + कः ।) वटुकभैरवः । यथा,—

"क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट् ।
श्मशानवासी मांसाशी खर्पराशी मखान्तकृत् ॥"

इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे वटुक-भैरवस्तोत्रम् ॥*॥ (क्षेत्रं शस्याद्युत्पादनक्षमां भूमिं ददातीति ।) क्षेत्रदातरि त्रि ॥

क्षेत्रदूती, स्त्री, (क्षेत्रस्य क्षेत्रे वा दूतीव। यद्वा, क्षेत्रे शरीरे दूतीव। औषधान्तरेर्युक्तस्यास्य आरोग्यसंघटकतया तथात्वम्।) श्वेतकण्टकारी। इति राजनिर्घण्टः॥

क्षेत्रदेवता, स्त्री, (क्षेत्राधिष्ठात्री देवता।) केदाराधिष्ठात्री। सा च सर्पादिरूपा। यथा, "रक्ताक्षः कथयति। अस्ति कस्मिंश्चिदधिष्ठाने हरिदत्तो नाम ब्राह्मणः। तस्य च ऋषिं कुर्वतस्तदेव निष्फलः कालोऽतिवर्त्तते। अथैकस्मिन् दिवसे स ब्राह्मणः उष्णकालावसाने धर्म्मार्त्तः स्वक्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तः। अनतिदूरे वल्मीकोपरि प्रसारितं बृहत्फुटाटीयं भीषणं भुजङ्गमं दृष्ट्वा चिन्तयामास। नूनमेषा क्षेत्रदेवता मया कदापि न पूजिता। तेनेदं मे ऋषिकर्म्म विफलीभवति।" इति पञ्चतन्त्रे काकोलूकीयं नाम ३ तन्त्रम्॥

क्षेत्रपः, पुं, (क्षेत्रं शरीरं पाति रक्षति स्तोत्रकारिणो भक्तस्येति यावत्। क्षेत्र+पा रक्षणे "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) वटुकभैरवः। यथा,—

"अस्त्रोभूतास्त्रयं न्यस्य वदने तीक्ष्णदंष्ट्रिणम्। क्षेत्रपं कर्णयोर्न्यस्येत् क्षेत्रपालं हृदि न्यसेत्॥" इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे वटुकभैरवस्तोत्रम्॥ *॥ (क्षेत्रं शस्योत्पादनक्षमां भूमिं पातीति। क्षेत्र+पा+कः।) क्षेत्ररक्षके त्रि॥ (क्षेत्रं शरीरं विश्वं जगद् वा पाति अपरिमेयात्मैश्वर्य्यप्रभावेन चैतन्यदानेन वा इति व्युत्पत्त्या परमात्मा परमेश्वरः॥)

क्षेत्रपतिः, पुं, (क्षेत्रस्य शस्यभूमेः पतिः।) केदाराधिपः। वप्रस्वामी। यथा,—"अथ प्रभाते स क्षेत्रपतिर्गरुडध्वस्तं प्रदेशमागच्छन् काकेनावलोकितः।" इति हितोपदेशे मित्रलाभप्रकरणम्॥ (क्षेत्रस्य शरीरस्य विश्वस्य वा पतिः। जीवः। अग्निः। परमात्मा। यथा, तन्त्रसारे।

"जीवं क्षेत्रपतिं प्राहुः केचिदग्निमथापरे। स्वतन्त्र एव स कश्चित् क्षेत्रस्य पतिरिष्यते॥")

क्षेत्रपर्पटी, स्त्री, (क्षेत्रे पर्पटीव। यद्वा, क्षेत्रे जाता पर्पटी।) क्षुपविशेषः। इति वैद्यकम्॥ क्षेतपापड़ा इति भाषा॥

क्षेत्रपालः, पुं, (क्षेत्रं पालयति रक्षतीति। क्षेत्र+पाल्+णिच्+अण् अच् वा।) देवताविशेषः। तद्भेदा यथा,—

"भेदा एकोनपञ्चाशत् क्षेत्रपालस्य कीर्त्तिताः। माल्कावीजभेदेन सम्भिन्ना नामभेदतः॥ अवरश्चापकुम्भश्च इन्द्रसुतिस्ततः परः। ईड़ाचारश्चोत्तरसंज्ञ ऊर्द्धाद् ऋषिस्तदनः॥ ऋक्षसुतो रुद्रकेशश्च रुद्रकश्चैकदृक्कः। ऐरावतश्चौषवन्तुरौषधीशस्तथैव च॥ अञ्जनश्चाञ्जवारश्च कवलः खरखानलः। गासुरश्चैव घण्टादीर्घमनाश्च चक्रवारणः॥ ह्रटाटोपो जटालाक्षो भङ्गीवश्च जडेश्वरः। टङ्कपाणिस्तथा चान्यस्तानवन्तुश्च डामरः॥ ढक्कारवो ढवार्णश्च तड़ित्तेहस्थिरस्तथा। दन्तुरो धनदश्चान्यो नक्तिकान्तः प्रचण्डकः॥ फट्कारो वीरसंघस्थ भृङ्गाख्यो मेघभासुरः। युगान्तो रौद्रवक्षाथ लम्बोष्ठो वसवस्तथा॥ शूकनन्दः षड़ालाख्यः सुनामाहंबुकस्तथा। एते भेदाः समाख्याता मात्रकाक्षरयोनिकाः॥"**॥

क्षेत्रपालकथनप्रयोजनं यथा,—

"नामपद्यस्य वर्णानां यो वर्णो मात्रकान्तरे। दृश्यते प्रथमं तत्र तत्रायं क्षेत्रपालकः॥ तत्र तत्र विघ्नशान्त्या भेदैरेतैर्व्यवस्थितः। ततो विघ्नेशो यक्षश्च क्षेत्रपालस्तु सर्व्वतः॥ क्षेत्रपालमसंपूज्य यः कर्म्म कुरुते क्वचित्। तस्य कर्म्मफलं हन्ति क्षेत्रपालो न संशयः॥"

इति एकोनपञ्चाशत्क्षेत्रपालकथनम्।

इति क्षेत्रपालप्रकरणं प्रयोगसारः॥ *॥

अथ क्षेत्रपालमन्त्राः। मन्त्रदेवप्रकाशिन्याम्। क्षौमितिबीजादि क्षेत्रपालाय इति नमोऽन्तः। अयं प्रणवादिर्व्वा मन्त्रः। तथा,—

"वर्णान्त्यमौ बिन्दुयुक्तं क्षेत्रपालाय हृन्मनुः। तारादौ वसुवर्णोऽयं क्षेत्रपालस्य ईरितः॥"

प्रातःस्नात्वाह्निकान्तरं प्राणायामान्तमस्य पूजां विधाय धर्म्मादिपीठं विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। अस्य ब्रह्मा ऋषिर्गायत्री छन्दः क्षेत्रपालो देवता क्षौं बीजं आयेतिशक्तिः षड़्दीर्घभाजा बीजेनाङ्गन्यासः। ततो ध्यानम्।

"भालचन्द्रजटाधरं त्रिनयनं नीलाञ्जनाद्रिप्रभं दोर्दण्डाक्तगदाकपालमरुणसृग्गन्धलोल्लसम्। घण्टामेखलघर्घरध्वनिमिलन्भृङ्कारभीमं विभुं वन्दे संहितसर्पकुण्डलधरं श्रीक्षेत्रपालं सदा॥"

एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कृत्वा धर्म्मादिकल्पितपीठपूजां विधाय पुनर्घण्टालावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। अङ्गैः प्रथममावरणम्। अनलाशामिकेशकरालघण्टारवमहाक्रोधपिङ्गिलाचौर्द्धकेशैरष्टभिर्द्वितीयम्। इन्द्रादिभिस्तृतीयम्। वज्रादिभिश्चतुर्थम्। ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षजपः। साज्येन चरुणा दशांशहोमः। तथा च निबन्धे।

"लक्षमेकं जपेन्मन्त्रं जुहुयात्तद्दशांशतः। चरुणा घृतसिक्तेन ततः क्षेत्रेशमर्च्चयेत्॥"

मन्त्रदेवप्रकाशिकायान्तु प्रणवरहितोऽयं मन्त्रः। अस्य पुरश्चरणमयुतसंख्यजपः॥ *॥

अथास्य बलिविधानम्। रात्रौ श्मशानेऽस्थिखिलं कृत्वा तत्र देवं सपरिवारं संपूज्य देवस्य हस्ते बलिमन्त्रेण चिवारं बलिं दत्त्वा सपरिवारगणेभ्यः स्वस्वनामभिर्बलिं दद्यात्। बलिमन्त्रस्तु। एह्येहि विदुषि सुर सुर भुञ्जय भुञ्जय तर्ज्जय तर्ज्जय विघ्नपद विघ्नपद महाभैरव क्षेत्रपाल बलिं गृह्ण गृह्ण स्वाहा। तथा च निबन्धे।

"पूर्व्वमेहिद्वयं पश्चात् विदधि स्यात् सुरद्वयम्। भुञ्जयद्वितयं भूयस्तर्ज्जयद्वितयं पुनः॥ ततो विघ्नपदद्वन्द्वं महाभैरव तत्परम्। क्षेत्रपाल बलिं गृह्ण द्वयं पावकसुन्दरी॥"

यद्वा, एह्येहि तुर तुर सुर सुर जम्भ जम्भ हन हन विघ्नं विनाशय विनाशय महाबलिं क्षेत्रपाल गृह्ण गृह्ण स्वाहा। इति मन्त्रः। एष बलिविधिः सर्व्वग्रहनिवारको विजयश्रीकरश्च भवति। बलिमपि सोपदंशं गुडहृतपिण्डेन दद्यात्॥ फलम्।

"बलिदानेन सन्तुष्टः क्षेत्रपालः प्रयच्छति। कान्तिमेधाबलारोग्यतेजःपुष्टियशःश्रियः॥"

इति तन्त्रसारः॥

(द्वारपालो भैरवविशेषः। यथा, तन्त्रशास्त्रे।

"गणेशं वटुकञ्चैव क्षेत्रपालञ्च योगिनीः। पूर्व्वादिक्रमयोगेन द्वारपालान् प्रपूजयेत्॥"

क्षेत्ररक्षके त्रि। यथा,—

"स एव ग्रामपालोऽभूत् पशुपालः स एव च। क्षेत्रपालः स एवासीद् द्विजातीनाञ्च रक्षिता॥"

इति मार्कण्डेयपुराणे। १६। २४॥)

क्षेत्रपालरसः, पुं, (क्षेत्रपाल इति संज्ञा विद्यते यस्य। स एव रसः औषधविशेषः।) ग्रहणीयुक्तश्लोथस्यौषधम्। दुरधवटीति ख्यातम्। यथा,—

"हिङ्गुलञ्च विषं ताम्रं लौहं तालकटङ्गणम्। जीरमाहूरफेनञ्च समभागं विमर्द्दयेत्॥ यवार्द्रा वटिका कार्य्या पथ्यं दुग्धौदनं हितम्। अलवणं वारिहीनञ्च दातव्यं भिषजा वरैः॥ गुरुश्लोथमग्निमान्द्यं ग्रहणीमतिदुस्तराम्। ज्वरञ्च विषमं जीर्णं नाशयेन्नात्र संशयः॥"

इति भैषज्यरत्नावली॥

आहूरफेनं अहिफेनम्॥

क्षेत्रयमानिका, स्त्री, (क्षेत्रे जाता यमानिका।) क्षेत्रजातयमानी। यथा,—

"उपाधिरुग्रगन्धे तु वचाक्षेत्रयमानिके।"

इति नानार्थे त्रिकाण्डशेषः॥

क्षेत्ररुहा, स्त्री, (क्षेत्रे रोहति उत्पद्यते इति। क्षेत्र+रुह+कः।) वालुकीकर्कटी। इति राजनिर्घण्टः॥ क्षेत्रजाते त्रि॥

क्षेत्रलिप्ता, स्त्री, भूमण्डलस्य कला। यथा। अथ यदि दृग्ग्रहोदयासुभिरशादग्रहतानि क्षेत्रलिप्ता लभ्यन्ते तदा तदन्तरकलासुभिः किमिति फलं क्षेत्रलिप्ताः ता ग्रहार्कभुक्त्यन्तरेण भाज्याः। भुक्त्यन्तरं हि क्षेत्रलिप्तान्तरात्मकमतः सजातीयकरणाय क्षेत्रलिप्तीकरणं भुक्त्यन्तरेणैको दिवसो लभ्यत इति युक्तमुक्तम्। इति सिद्धान्तशिरोमणौ गणिताध्याये ग्रहोदयास्ताधिकारः॥ *॥ असुभिः दृग्विषलैः। यथा,—

"गुर्व्वक्षरैः खेन्दुमितैरसृक्लैः षड़्भिः पलं तैर्घटिका खषड़्भिः॥"

इति तत्रैव कालमानाध्यायः॥

क्षेत्रवित् [द्] पुं, (क्षेत्रं शरीरं अहमित्यात्मत्वेन वेत्ति जानाति इदं सर्व्वशरीरमेवाहमिति

आत्मनेन भजन्ते इत्यर्थः। क्षेत्र+विद्+क्विप्।) क्षेत्रज्ञः। जीवात्मा। यथा,—
"तत्त्वं नरेन्द्र! जगतामथ तस्थुषाञ्च
देहेन्द्रियासुधिषणात्मभिराततानाम्।
यः क्षेत्रवित्तपतया हृदि विश्वगावि-
प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि॥"
इति श्रीभागवते। ४। २२। ३५॥
"यस्मादनात्मरतिरन्यधियेतुः तत् तस्माज्जगतां जङ्गमानां तस्थुषां स्थावराणाञ्च देहादिभिः आत्मना अहङ्कारेण चाततानां हृदि यच्चकास्ति प्रकाशते तमवेहि। कथं सोऽस्मीति। सोऽस्मीति पाठे स एवैकोऽस्मि ततोऽन्यदसत् इत्यर्थः। ननु जीवो हृदि चकास्ति नान्यस्तत्राह। क्षेत्रविदं जीवं तपति नियमयतीति क्षेत्रवित्तपः; तस्य भावस्तत्ता तया अन्तर्यामिरूपेण। यद्वा क्षेत्रवित्ते अहं ममतास्पदे पातीति क्षेत्रवित्तपः; तेन रूपेण। जीवस्तु पारतन्त्र्यान्न याति। ननु कर्म्म जीवं नियच्छति न आविः प्रत्यक्षः। तर्हि बुद्धिर्न प्रत्यक् प्रतिलोमं चकास्ति बुद्धिस्तु पराक् विषयाकारेण। तर्ह्यहङ्कारः न विश्वक् व्यापकत्वेन स तु परिच्छिन्नः। एवम्भूतो यो भगवान् तमवेहीति।" इति तट्टीकायां श्रीधरस्वामी॥
क्षेत्रसम्भवः, पुं, (क्षेत्रे सम्भवति उत्पद्यते इति। क्षेत्र+सम्+भू+अच्।) चक्षुष्यः। भिखाशुपः। इति राजनिर्घण्टः॥ भूमिजे त्रि॥
क्षेत्रसम्भूतः, पुं, (क्षेत्रे सम्भूतः जातः।) कुन्दरः। इति राजनिर्घण्टः॥ क्षेत्रोद्भवे त्रि॥
क्षेत्रसीमा, स्त्री, (क्षेत्रस्य भूमेः सीमा मर्य्यादा।) अङ्गारतुषतृचादिद्वाराचिह्नितभूमिमर्य्यादा। यथा "सीमा क्षेत्रादिमर्य्यादा सा चतुर्व्विधा। जनपदसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति।" इति मिताक्षरायां व्यवहाराध्याये सीमाविवादशब्दे द्रष्टव्यः॥
क्षेत्रजीवः, त्रि, (क्षेत्रेण क्षेत्रोद्भवशस्यादिना आजीवतीति। आ+जीव्+कर्त्तरि अच्।) कर्षकः। इत्यमरः। २। ६। ६॥
क्षेत्राधिदेवता, स्त्री, (क्षेत्रस्य अधिदेवता अधिष्ठात्री देवता।) तीर्थाधिपदेवता। यथा,—
"देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम्।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्व्वं समुदीरयेत्॥"
इति संस्कारतत्त्वे प्रयोगसारः॥
क्षेत्राधिपः, पुं, (क्षेत्रस्य अधिपः स्वामी अधिष्ठाता वा।) मेषादिद्वादशराशीनामधिपतिग्रहगणः। यथा,—
"कुजशुक्रबुधेन्दुसौम्यशुक्रावनीसुवाम्।
जीवार्किभानुजेज्यानां क्षेत्राणि स्युरनादयः॥"
इति ज्योतिस्तत्त्वम्॥
क्षेत्राधिष्ठात्री देवता च॥
क्षेत्रामलकी, स्त्री, (क्षेत्रे भूमौ जाता आमलकी। ग्राकपार्थिववत् मध्यपदलोपी समासः।) भूम्यामलकी। इति शब्दमाला॥

क्षेत्रेक्षुः, पुं, (क्षेत्रं अस्यास्तीति। उन्।) क्षेत्रस्वामी। यथाः मनुः। ६। ५४—५५।
"ओघवातार्हृतं बीजं यस्य क्षेत्रे प्ररोहति।
क्षेत्रिकस्यैव तद्बीजं न वप्ता फलमर्हति॥
एष धर्म्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च।
विहङ्गमहिषाणाञ्च विज्ञेयः प्रसवं प्रति॥
"तत्र दासीपदं परोढ़ापरं तस्यामन्येन जातो दासीभर्त्तुर्न बीजिभर्त्तुः।" इत्युद्वाहतत्त्वम्॥
कलत्रस्वामी। यथा, मनुः। ६। १४५।
"हरेत्तत्र नियुक्तायां जातः पुत्रो यथौरसः।
क्षेत्रिकस्य तु तद्बीजं धर्म्मतः प्रसवश्च सः॥"
"हरेदिति। तत्र नियुक्तायां यो जातः क्षेत्रजः पुत्र औरस इव धनं हरेत् यस्मात् यत्तस्य कारणभूतं बीजं तत् क्षेत्रस्वामिन एव तत्कार्य्यकरणत्वात्।" इति तट्टीकायां कुल्लूकभट्टः॥
क्षेत्रियं, क्ली, क्षेत्रजलशम्। परदेहचिकित्सा। इति मेदिनी॥
क्षेत्रियः, पुं, (परक्षेत्रे चिकित्स्यः। "क्षेत्रियच् परक्षेत्रे चिकित्स्यः।" ५। २। ६२। इति परक्षेत्रस्य क्षेत्रियजादेशः।) असाध्यरोगः। परदाररतः। इति मेदिनी॥ (त्रि, परदेहचिकित्स्यो रोगादिः। यथा, भट्टिः। ४। ३२।
"अहं सूर्पणखा नाम्ना नूनं नाम्नायिधि त्वया।
दग्धोऽयं क्षेत्रियो येन मय्यपातीति सान्त्वयेत्॥")
क्षेत्री, [न्] त्रि, (क्षेत्रमस्यास्तीति इनिः।) क्षेत्रविशिष्टः। कृषीवलः। यथा, हेमचन्द्रः।
"कुटुम्बी कर्षकः क्षेत्री हली कृषिककार्षिकौ॥"
(यथा च मानवे। ६। ५१।
"तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः।
कुर्व्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम्॥")
प्ररूपवादिना ग्रस्य विनाशे तत्प्राप्तिर्यथा,—
"यावत् ग्रस्यं विनश्येत्तु क्षेत्री तावत् फलं लभेत्।
पालस्ताद्योऽथ गोस्वामी पूर्व्वोक्तं दण्डमर्हति॥
इति याज्ञवल्क्यवचने गवादिदोषेण यावत् ग्रस्यं विनश्यति तावदेव पालकात् प्राप्यं पालकाग्रस्तौ पालकस्ताद्यः गोस्वामी पूर्व्वोक्तं दण्डादिकं अर्हति।" इति प्रायश्चित्ततत्त्वम्॥
क्षेत्री, [न्] पुं, (क्षेत्रं स्त्री अस्यास्य। क्षेत्र+इनिः।) स्वामी। भर्त्ता। यथा, मनुः। ६। ३२॥
"भर्त्तुः पुत्रं विजानन्ति श्रुतिद्वैधन्तु भर्त्तरि।
आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः॥"
"भर्त्तुरिति। भर्त्तुः पुत्रो भवतीति सुनयो मन्यन्ते। भर्त्तरि द्विप्रकारा श्रुतिर्वर्त्तते। केचिदुत्पादकमवोढ़ारमपि भर्त्तारं तेन पुत्रेण पुत्रिणमाहुः। अन्ये तु वोढ़ारं भर्त्तारमनुत्पादकमपि अन्यजनितेन पुत्रेण पुत्रिणमाहुः।" इति तट्टीकायां कुल्लूकभट्टः॥ (परमात्मा। यथा, गीतायाम्। १३। ३३।
"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत!॥")
क्षेत्रेक्षुः, पुं, (क्षेत्रे इक्षुरिव।) यावनालः। इति राजनिर्घण्टः॥

क्षेपोपेक्षः, पुं स्वफल्कपुत्रः। इति केचित्॥ यथा,—
"युगत्वरोऽगमित्रस्य वृष्णिः पुत्रोऽपरस्ततः।
स्वफल्कश्चित्ररथश्चैव गान्दिन्याञ्च स्वफल्कतः॥
अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रुताः।
आसङ्गः सारमेयश्च मृदुरो मृदुरिर्गिरिः॥
धर्म्मवृद्धिः सुकर्म्मा च क्षेपोपेक्षोऽरिमर्दनः।
शत्रुघ्नो गन्धमादश्च प्रतिबाहुश्च द्वादश॥"
इति श्रीभागवते। ६। २४। १४—१६॥
क्षेपोपेक्ष इति साधुपाठः। (तत्र क्षत्रेषु क्षत्रियकुलेषु उपेक्षा यस्य॥)
क्षेपः, पुं, (क्षिप+घञ्।) निन्दा। (यथा, याज्ञवल्क्यः। २। २०७।
"क्षेपं करोति चेद्दण्ड्यः पणानर्द्धत्रयोदश॥")
विक्षेपः। (यथा, गोः रामायणे। ४। ६२। १२।
"पत्त्रक्षेपपरिक्षिप्ताः सुपार्श्वेऽभ्यपयास्यति॥")
लेपनम्। गर्व्वः। प्रेरणम्। इति मेदिनी॥ विलम्बः। हेला। लङ्घनम्। इति हेमचन्द्रः॥ गुच्छः। इति त्रिकाण्डशेषः॥ (यथा, मेघदूते। ४६।
"कुन्दक्षेपानुगमधुकरश्रीयुषामात्मबिम्बम्॥")
क्षेपकः, त्रि, (क्षिपतीति। क्षिप्+ण्वुल्।) क्षेपकर्त्ता। इति व्याकरणम्॥
क्षेपणं, क्ली, (क्षिप+भावकर्म्मादिषु ल्युट्।) प्रेरणम्। तत्पर्य्यायः। क्षिपा २। इत्यमरः। ३। २। ११॥ यापनम्। यथा,—
"विधवा यौवनस्था च नारी भवति कर्कशा।
आयुषः क्षेपणार्थन्तु दातव्यं स्त्रीधनं सदा॥"
इति विवादचिन्तामणिधृतहारीतवचनम्॥
प्रस्तरादीनां दूरप्रेरणार्थरज्जुनिर्म्मितग्रन्थिम्। फिङ्गा इति भाषा। यथा, श्रीभागवते। ३। १६।
"प्रवयुर्व्वायवश्चण्डाश्चमः पांशवमैरयन्।
दिग्भ्यो निपेतुर्व्यावाशाः क्षेपणैः प्रहिता इव॥"
"पांशुलततमश्च प्रेरितवन्तः। क्षेपणैर्यन्त्रैः।" इति तट्टीकायां श्रीधरस्वामी॥ (परित्यागः। यथाह मनुः। ४। ११६।
"उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम्॥"
"उपाकर्म्मणि उत्सर्गे त्रिरात्रमध्ययनक्षेपणम्।"
इति कुल्लूकभट्टः॥ मल्लयोर्द्वन्द्वं सहसा भूपातनरूपनिगुह्यकौशलविशेषः। यथा, महाभारते। ४। १२। २८।
"क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः।
तलैर्वज्रनिपातैश्च प्रस्फोटाभिस्तथैव च॥"
"क्षेपणं कथ्यते यत्तु स्थानात् प्रच्यवनं हटात्॥"
इति तट्टीकायां नीलकण्ठधृतमल्लशास्त्रम्॥
क्षेपणिः, स्त्री, (क्षिप+बाहुलकात् अनिः ङीप् वा।) नौकादण्डः। इत्यमरः। १। १०। १३॥ डाँड़ इति भाषा। जालभेदः। इति मेदिनी॥ (अस्त्रविशेषः। यथा, रामायणे। ६। ७। २४।
"क्षेपणीयं समरात्क्षेप्याश्च क्राणि सबलानि च॥")
क्षेपणीयं, क्ली, (क्षिप+अनीयर्।) पाषाणप्रक्षेपणास्त्रम्। यथा, रघुवंशे ४। ७७।

"तत्र घोरं रघोर्युद्धं पार्व्वतीयैर्गणैरभूत्।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम्॥"
"तत्रेति। तत्र हिमाद्रौ गणैः सह रघोर्युद्धं अभूत्। किंगणैः पर्व्वते उत्पन्नैः। किं युद्धं भयङ्करम्। पुनः किं नाराचानां बाणविशेषाणां क्षेपणीयानां पाषाणप्रक्षेपणशस्त्राणां ये अश्मानस्तेषाञ्च घर्षणेन उत्पतिता अग्नयो यस्मिन्।" इति तट्टीका॥ क्षेपणयोग्ये त्रि॥

क्षेपदिनं, क्ली, अहर्गणानयनार्थं खीयविंशांशयुतक्षयनाड़ी। यथा। "इदानीमहर्गणार्थं क्षेपदिनान्याह। खीयनखांशयुता क्षयनाड्यः क्षेपदिनानि दिवागणसिद्ध्यै। पूर्व्वमानीता ये क्षयाहास्तेषामधो यन्नाड़िकादयं तत् खीयविंशांशयुतं सद्दिनाद्यं कल्प्यम्। या घटिकास्तानि दिनानि। या विघटिकास्ता घटिकासामधो ये षष्ट्यंशास्तानि पानीयपलानि कल्प्यानीति।" इति सिद्धान्तशिरोमणौ गणिताध्याये प्रश्नाष्टकुद्धिः॥

क्षेपपातः, पुं, यहकक्षाक्रान्तिमण्डलयोर्योगः। यथा। इदानीं क्रान्तिदृक्कर्म्माह। "क्रान्तिदृक्कं विधेयं ग्रहाङ्कं भमत्यक्त्र भानुश्च भार्द्धे कुभा भानुतः। क्रान्तिपातः प्रतीपं तथा प्रस्फुटाः क्षेपपातात्र बलनबोधकृत्॥" इति सिद्धान्तशिरोमणौ गोलाध्याये॥

क्षेपिमा, [न्] पुं, (क्षिप्रस्य भावः "पृथ्वादिभ्य इमनिज् वा।" ५। १। १२२। इति इमनिच्। "स्थूलदूरयुवह्रस्वक्षिप्रक्षेत्राणां यणादिपरं पूर्व्वस्य च गुणः।" ६। ४। १५६। इति साधुः।) अतिशयक्षेपः। इति सिद्धान्तकौमुदी॥

क्षेपिष्ठः, त्रि, (अतिशयेन क्षिप्रः। क्षिप्र+इष्ठन्। "स्थूलदूरेति।" ६।४।१५६। इति साधुः।) अतिशीघ्रः। क्षिप्रतरः। इत्यमरः। ३। २। १११॥

क्षेपीयान्, [स्] त्रि, (अतिशयेन क्षिप्रः। इयसुन्। "स्थूलदूरेति।" ६।४।१५६। इति साधुः।) अतिशयक्षिप्रः। इति सिद्धान्तकौमुदी॥

क्षेप्ता, [ऋ] त्रि, (क्षिपति इति। क्षिप्+तृच्।) क्षेपणकर्त्ता। इति सिद्धान्तकौमुदी॥ (यथा, रामायणे। ४। ६। ८४।
"उपास्तृश्च ददौ शापं क्षेप्तारं वालिनं प्रति॥")

क्षेमं, क्ली, प्लक्षद्वीपस्य वर्षविशेषः। यथा। "प्लक्षो लक्षप्रमाणो द्वीपाख्यातिकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं वयसं सुभद्रं शान्तं क्षेममभयमिति वर्षाणि।" इति श्रीभागवते। ५। २०। २-३॥ * ॥ मठविशेषः। यथा,—
"मर्त्तुं ययौ च वाराहक्षेत्रं यत्राविधायकः।
श्रीकण्ठक्षेममठयोरासीद्युक्तपुरान्तिके॥"
इति राजतरङ्गिण्यां ६ तरङ्गः॥

क्षेमः, पुं, क्ली, (क्षि क्षये+"अर्त्तिसुसुहृदृधक्षीति।" उणा। १। १३६। इति मन्। (कुशलम्। (यथा, मनुः। २।१२७।
"ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च॥")
तद्वति त्रि। इत्यमरः। २।४।२६॥ (यथा, गोः रामायणे। ५। ८। १७।
"क्षताः क्षेमाश्च पन्थानः सुखं गच्छन्ति खेचराः॥")
लब्धस्य रक्षणम्। इति मेदिनी॥ मोक्षः इति हेमचन्द्रः॥

क्षेमः, पुं, (क्षेमं मङ्गलमस्त्यस्मिन्नस्तीति। अर्श आद्यच्।) चोरनामगन्धद्रव्यम्। चण्डालौषधम्। इति शब्दरत्नावली मेदिनी च॥ धर्म्मेण शान्त्यासुत्पादितः पुत्रः। यथा, विष्णुपुराणे। १।७।२८।
"व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत।
सुखन्दृष्टयशः कीर्त्तिरित्येते धर्म्मसूनवः॥"
कलिङ्गदेशस्य राजा। यथा,—
"क्षेमोऽयतीर्थः कुहरः कलिङ्गेषु नराधिपः।
मतिमांश्च मनुष्येन्द्र! ईश्वरक्षेति विश्रुतः॥"
इति महाभारते। १। ६७। ६५॥ * ॥
चन्द्रवंशीयशुचिराजपुत्रः। यथा,—
"ततः सुतञ्जयाद्विप्रः शुचिस्तस्य भविष्यति।
क्षेमोऽथ सुव्रतस्तस्माद्धर्म्मसूत्रः सुनस्ततः॥"
इति श्रीभागवते। ६। २२। ४७॥ * ॥
लब्धपरिपालनम्। यथा,—
"उपेयादीश्वरक्षेत्र योगक्षेमार्थसिद्धये।
स्नात्वा देवान् पितॄंश्चैव तर्पयेदर्चयेत्तथा॥"
इति याज्ञवल्क्यसंहितायामाचाराध्यायः॥
"तदनन्तरमीश्वरमभिषेकादिगुणयुक्तमन्यं वा श्रीमन्तमकुत्सितं योगक्षेमार्थम्। अलब्धलाभो योगः। लब्धपरिपालनं क्षेमः तदर्थमुपेयात्। उपासीत उपेयादित्यनेन सेवां प्रतिषेधति। वेतनग्रहणेन आज्ञाकरणं सेवा तस्याः स्वतन्त्रत्वेन निषेधात्।" इति तट्टीका मिताक्षरा॥ (यथाच मनुः। ८। २३०।
"योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात्॥")

क्षेमकः, पुं, (क्षेम+स्वार्थे संज्ञायां वा कन्।) चोरनामगन्धद्रव्यम्। इति शटाधरः॥ * ॥ नागविशेषः। यथा,—
"नागः शङ्खसुखश्चैव तथा कुम्भाण्डकोदरः।
क्षेमकश्च तथा नागो नागः पिण्डारकस्तथा॥"
इति महाभारते। १। ३५। ११॥
जनमेजयवंशोत्पन्नराजविशेषः। यथा,—
"पूतानीकाद्दुर्मनस्तस्मात्क्षेमको भविता यतः॥"
इति श्रीभागवते। ६। २२। ४३॥
एतत्पर्य्यन्तं अस्य वंशस्य विश्रान्तिः। परीक्षिदादयः क्षेमकान्ताः कलेः सहस्रवत्सरपर्य्यन्तं राजान आसन्। ततः सोमवंशशाखान्तरे मगधवंश्या राजानः कलौ बहुकालं स्थिताः। इति श्रीभागवतमतम्॥ राक्षसविशेषः। यथा,—
"एतस्मिन्नेव काले तु पुरीं वाराणसीं नृप!।
शून्यां निवेशयामास क्षेमको नाम राक्षसः॥"
इति हरिवंशे। २६। ७६॥

क्षेमकरः, त्रि, (करोतीति। कृ+अच्।) मङ्गलकारकः। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। १४। ३५। ३७।
"पन्थानं वः प्रवक्ष्यामि शिवं क्षेमकरं द्विजाः॥")

क्षेमकारः, त्रि, (क्षेमं करोतीति। क्षेम+कृ+"कर्म्मणि अण्।" ३। २। १। इति अण्।) शुभङ्करः। इति भूरिप्रयोगः॥ क्षेमङ्करः। मङ्गलकर्त्ता। यथा, "क्षेमप्रियमद्रात् कुर्व्वा" इति सूत्रेण क्षेमशब्दात् परस्य कृधातोः खप्रत्ययाभावपक्षे छात्रशब्दात्यिति यण्प्रत्ययेन निष्पन्नः। इति सुग्धबोधव्याकरणम्॥ (यथा, भट्टिः। ५। ७७।
"पितुः प्रियङ्करो भर्त्ता क्षेमकारस्तपस्विनाम्॥")

क्षेमकृत्, त्रि, (क्षेमं करोतीति। क्षेम+कृ+क्विप्।) मङ्गलकारकः। यथा,—
"दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः।
दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः॥"
इति चाणक्ये। ५४॥

क्षेमगुप्तः, पुं, (क्षेमेण मङ्गलमयेन परमेश्वरेण गुप्तः रक्षितः यद्वा क्षेमः लब्धस्य रक्षणं तेन गुप्तः।) काश्मीरदेशस्य राजविशेषः। यथा,—
"क्षेमगुप्ताभिधानोऽभूदथ राजा तदात्मजः।
आसवासेवनोत्सिक्तवित्तताराण्यसंज्वरः॥"
इति राजतरङ्गिण्यां ६ तरङ्गः॥
(क्षेमगुप्ते त्रि॥)

क्षेमङ्करः, त्रि, (क्षेमं करोतीति। क्षेम+कृ+"क्षेमप्रियमद्रेऽण् च।" ३।२।४४। इति अण्। चात् खच् सुम् च।) मङ्गलकारकः। तत्पर्य्यायः। अरिष्टतातिः २ शिवतातिः ३ शिवङ्करः ४। इति हेमचन्द्रः॥ क्षेमकारः ५ भद्रङ्करः ६ शुभङ्करः ७। इति भूरिप्रयोगः॥

क्षेमङ्करी, स्त्री, (क्षेमङ्कर+स्त्रियां ङीप्।) देवीविशेषः। यथा,—
"क्षेमान् देवेषु सा देवी लब्धा दैत्यपतेः क्षयम्।
क्षेमङ्करी शिवेनोक्ता पूज्या लोके भविष्यसि॥
अनेनैव तु रूपेण विदार्य्यदकसमन्विता।
एका वा नगरान्तस्था पूजिता स्थापिता शुभा॥
प्रासादे पटकुम्भे वा पुस्तके जलवह्निगा।
निश्चिन्ते पूजयेत् क्षेमां सर्व्वकामफलप्रदाम्॥
दमनी पदमाला च श्रीघोषा वचग्रासना।
अस्त्रं प्रत्यङ्गिरादेव्याः पूजयेत् ससदाकृता।
एताभिः स्थापनं कार्य्यं शिवासनसमानुगम्॥"
इति देवीपुराणे क्षेमङ्करीप्रादुर्भावः ४७ अध्यायः॥
शुद्धचित्तो। सा च भगवत्या मूर्त्तिः। तस्या नमस्कारमन्त्रः। यथा,—
"कुङ्कुमारुणसर्व्वाङ्गि! कुन्देन्दुधवलानने!।
मत्स्यमांसप्रिये देवि! क्षेमङ्करि! नमोऽस्तु ते॥"
अपि च।
"क्षीरोदतरि महाचण्डे! सुक्तकेशि! बलिप्रिये!।
कुलाचारप्रसन्नास्ये नमस्ते शुद्धरूपिणे!॥"
इति तन्त्रम्॥

क्षेमजित्, पुं, (क्षेमं मङ्गलं जयति जितवान् वा सर्व्वदा पुण्यात्मककर्म्मणा। यद्वा क्षेमं प्राप्तस्य रक्षणं जितवान् स्वायत्तीकृतवान् दैवपुरुषकारादिप्रभावेणेति यावत्।) राजविशेषः। स तु मगधदेशे षट्त्रिंशद्वर्षपर्य्यन्तं राजा भविष्यति। तस्य नामान्तरं क्षेमार्चिः। इति मत्स्यपुराणमिति केचित्॥

क्षेमदर्शी, [न्] पुं, (क्षेमं द्रष्टुं शीलमस्य यद्वा क्षेमं मङ्गलं प्राप्तस्य रक्षणं वा पश्यतीति। क्षेम+दृश्+णिनिः।) चन्द्रवंशीयराजविशेषः। यथा, महाभारते। १२।८२।६।
"कोशलानामाधिपत्यं संप्राप्तं क्षेमदर्शिनम्।
मुनिः कालकृतज्ञोऽथ आजगामेति नः श्रुतम्॥"

क्षेमधन्वा, [न्] पुं, (क्षेमं लब्धरक्षणपटु धनुर्यस्य यद्वा क्षेमं प्रजानां मङ्गलसाधनं जगद्धितकरमित्यर्थः धनुर्यस्य।) सूर्य्यवंशीयराजविशेषः। स तु पुष्करीकपुत्रः। यथा,—
"नभस्य पुष्करीकस्तु क्षेमधन्वा ततः स्मृतः।
क्षेमधन्वसुतस्त्वासीद्देवानीकः प्रतापवान्॥"
इति हरिवंशे। १५।२७॥
सावर्णनामकश्चतुर्थमनुपुत्रविशेषः। यथा,—
"सर्व्वत्रगः सुधर्म्मा च देवानीकः पुरुद्वहः।
क्षेमधन्वा दृढायुश्च आदर्शः पञ्चको मनुः।
सावर्णस्य तु पुत्रा वै चतुर्थस्य नव स्मृताः॥"
इति च तत्रैव। ७।७४॥

क्षेमधर्म्मा [न्,] पुं, (क्षेमं मङ्गलरूपं क्षेमे वा धर्म्मो यस्य। यद्वा क्षेमरक्षणे धर्म्मो यस्य।) राजविशेषः। यथा, "ततश्च शिशुनागस्तस्य पुत्रश्च काकवर्णो भविता तस्य पुत्रः क्षेमधर्म्मा तस्यापि क्षत्रौजाः।" इति विष्णुपुराणे। ४।२४।३॥

क्षेमधूर्त्तिः, पुं, (क्षेमे मङ्गले लब्धरक्षणे वा धूर्त्तिर्धारणा यस्य।) राजविशेषः। यथा,—
"बृहत्क्षत्रमथायान्तं कैकयं दृढविक्रमम्।
क्षेमधूर्त्तिर्महाराज! विद्याधीरसि मार्गणैः॥"
इति महाभारते। ७।१०६।१॥

क्षेममूर्त्तिः, पुं, (क्षेमा मङ्गलमयी प्रियदर्शना मूर्त्तिरस्य।) कारूषदेशीयराजविशेषः। इति केचित्॥ क्षेमधूर्त्तिरिति साधुपाठः। यथा,—
"कारूषकाश्च राजानः क्षेमधूर्त्तिस्तथैव च।
श्रुतायुरुद्वहश्चैव बृहत्सेनस्तथैव च॥"
इति महाभारते आदिपर्व्वणि ६७ अध्यायः॥

क्षेमवान् [त्] त्रि, (क्षेमं मङ्गलं अस्त्यस्येति। अस्त्यर्थे मतुप् मस्य वत्वम्।) मङ्गलयुक्तः। इति सिद्धान्तकौमुदी॥

क्षेमशूरः, पुं, (क्षेमे मङ्गलस्थाने निर्विघ्नस्थाने वा शूरः।) निर्भयस्थाने बलप्रकाशकः। यथा,—
"किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः।
रहोजुषा वा हरिणा शम्भुना वा वनौकसा॥"
इति श्रीभागवते। १०।४। ३६॥
"क्षेमे निर्भयदेशे शूरैः। संयुगादन्यत्र विकत्थनं प्रौढ़वादो येषां तैः। ननु हरेर्विभेमि शम्भोश्चेति चेत्तत्राह रहोजुषेति। सर्व्वस्यान्तःप्रविष्टेन न क्वचिदपि बहिर्दृष्टेन इत्यर्थः। पुरुषप्रवेशरहितमिलाततवनं ओको यस्य तेन शम्भुना।" इति तट्टीकायां श्रीधरस्वामी॥

क्षेमा, स्त्री, (क्षेम+टाप्।) कात्यायनी। इति मेदिनी॥ क्षेमङ्करी। यथा,—
"निस्त्रिंशे पूजयेत् क्षेमां सर्व्वकामफलप्रदाम्।"
इति देवीपुराणे क्षेमङ्करीप्रादुर्भावनामाध्यायः॥
(अक्षरभेदः। यथा, महाभारते। १।१२३।५६।
"अम्बिका लक्षणा क्षेमा देवीरम्भामनोरमा॥")

क्षेमाधिः, पुं, (क्षेमा मङ्गलमयी क्षेमे मङ्गलविषये धीर्यस्य पृषोदरात् हस्वः।) मिथिलादेशस्थसूर्य्यवंशीयराजविशेषः। यथा,—
"अरिष्टनेमिस्तस्यापि श्रुतायुस्तत् सुपार्श्वकः।
ततश्चित्ररथो यस्य क्षेमाधिर्म्मिथिलाधिपः॥"
इति श्रीभागवते। ६।१३। २३॥

क्षेमाफला, स्त्री, (क्षेमं मङ्गलजनकं हितकरं फलं यस्याः। पृषोदरादाकारत्वे साधुः।) क्षेमफला इति वा पाठः॥ उड़म्बरवृक्षः। इति शब्दचन्द्रिका॥

क्षेम्यं, त्रि, (क्षेमाय साधुः "प्राग्वितादयत्।" ४।४।७५। इति यत्। यद्वा, क्षेममर्हति "दण्डादिभ्यो यत्।" ५।१।६६। इति यत्।) क्षेमीयम्। कुशलयोग्यम्। इति सिद्धान्तकौमुदी॥ (यथा, मनुः। ७।२१२।
"क्षेम्यां शस्यप्रदां नित्यं पशुवृद्धिकरीमपि।
परित्यजन् नृपो भूमिमात्मार्थमविचारयन्॥")

क्षेम्यः, पुं, (क्षेममर्हत्यसौ। क्षेम+यत्।) राजविशेषः। यथा, हरिवंशे। २०।४६।
"उग्रायुधस्य दायादः क्षेम्यो नाम महायशाः॥
क्षेम्यात् सुवीरो नृपतिः सुवीरात्तु नृपञ्जयः।
नृपञ्जयाद् बहुरथ इत्येते पौरवाः स्मृताः॥"

क्षै, क्षये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) क्षादिः। क्षायति। इति दुर्गादासः॥

क्षैण्यं, क्ली, (क्षीणस्य भावः। क्षीण+ष्यञ्।) क्षीणता। यथा, "क्षैण्यज्ञाने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपादादिकम्॥" इति प्रायश्चिततत्त्वम्॥ अपि च।
"अस्मिन् धनजनक्षैण्यनिमित्तं मण्डलोत्तमे।
सर्व्वतो दिक्कसुत्तस्यावधानर्थपरम्परा॥"
इति राजतरङ्गिण्याम् ५ तरङ्गः॥

क्षैत्रं, क्ली, (क्षेत्राणां समूहः। "भिक्षादिभ्योऽण्।" ४।२।३८। इति अण्।) क्षेत्रसमूहः। तत्पर्य्यायः। कैदारिकम् २ कैदर्य्यम् ३ कैदारकम् ४। इत्यमरः। २।६।११॥ वारटम् ५। इति शब्दरत्नावली॥

क्षैत्रज्ञं, क्ली, (क्षेत्रज्ञ+"हायनान्तयुवादिभ्योऽण्।" ५।१।१३०। इति अण्।) क्षेत्रज्ञस्य भावः। इति सिद्धान्तकौमुदी॥

क्षैत्रज्ञ्यं, क्ली, (क्षेत्रज्ञ+"गुणवचनब्राह्मणादिभ्यः कर्म्मणि च।" ५।१।१२४। इति ष्यञ्।) क्षेत्रज्ञस्य भावः। इति सिद्धान्तकौमुदी॥

क्षैरेयी, स्त्री, (क्षीरे संस्कृतं यदन्नम्। ततः स्त्रियां ङीप्।) परमान्नम्। इति हेमचन्द्रः॥ क्षीरसम्बन्धिनि त्रि। क्षैरेयी इति च पाठः॥

क्षोड़ः, पुं, (क्षोड्यते बध्यते अस्मिन्। क्षोड़+अधिकरणे+अप्। घञ् इति केचित् दृढ्यर्थे वैदिकधातुस्त्वायम्।) आलानम्। गजबन्धनी। इति भूरिप्रयोगः॥

क्षोणिः, } स्त्री, (क्षै+बाहुलकात् डोनिः वा
क्षोणी, } ङीप्।) पृथिवी। इति शब्दरत्नावली॥ अमरटीका च॥ (यथा, ऋग्वेदे १।५४।२।
"अक्रन्दयो नद्योरोरुवद्वना कथा न क्षोणीभियसा समारत॥")

क्षोदः, पुं, (क्षुद्यते इति। क्षुद् पेषणे+कर्म्मणि भावे च घञ्।) चूर्णः। इत्यमरः। २।८।६६॥ (यथा, काशीखण्डे। ३३।६३।
"सापि प्राग्वासना योगाच्छिङ्काचैनरता सती।
हित्वा मलयजक्षोदं विभूतीं वक्रमंस्त वै॥")
रजः। पेषणम्। इति मेदिनी॥ (यथा, रत्नावलीनाटिकायाम् १ अङ्के।
"कीर्णैः पिष्टातकौघैः क्षतदिवसमुखैः कुङ्कुमक्षोदगौरैर्-
हैमालङ्कारभाभिर्भरनमितशिरःशेखराङ्कैः किरातैः॥")

क्षोदितं, क्ली, (क्षुद्+भावे क्तः। वाच्यलिङ्गे तु कर्म्मणि+क्तः।) चूर्णम्। इति शब्दचन्द्रिका॥ पेषिते त्रि॥

क्षोदिमा, [न्] पुं, (क्षुद्+"पृथ्वादिभ्य इमनिज् वा।" ५।१।१२२। इति इमनिच्।) अतिशयक्षुद्रता। इति व्याकरणम्॥

क्षोदिष्ठः, त्रि, (अतिशयेन क्षुद्र इति। इष्ठन् प्रत्ययः।) अतिशयक्षुद्रः। इत्यमरः। ३।२।१११॥

क्षोदीयान्, [स्] त्रि, (क्षुद्+इयसुन्।) अतिक्षुद्रः। इति सिद्धान्तकौमुदी॥ (यथा, माघे। २।१००।
"बृहत्सहायः कार्य्यान्तं क्षोदीयानपि गच्छति
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा॥")

क्षोद्यः, त्रि, (क्षोदनयोग्यः क्षोदितुमर्हति। क्षुद्+"अचो यत्।" ३।१।९७। इति यत्।) क्षोदनीयः। चूर्णीकरणीयः। यथा,—
"बबन्धुर्बन्धनीयांश्च क्षोद्यान् भक्षुत्तुदः
विभिदुर्भेदनीयांश्च तांस्तान् देशान्नरः
इति रामायणे। ज्ञातवान्
"बन्धनीयान् सेतून्। क्षोद्यान्। इति शूर्करामूयिष्ठप्रदेशान्। भक्षुत्
मासुः। भेदनीयान् जलनिर्ग) भूतलम्।
इति तट्टीका॥

क्षोभः, पुं, (क्षुभ+भावे घञ्। वा
लनम्। चित्तचाञ्चल्यम्।")
"पूरोत्पीड़े तड़ागस्य प
क्षोभस्तोभे तु हृदयं प्रवृत्तिर्धारणा पालनी-
इति यराजविशेषः। यथा,
परीवाहः सेतुभेदः।८८२।
चित्तचाञ्चल्ये। प्र

अपि च प्राक्तानन्तरङ्गिणीधृततन्त्रे ।
"भुक्त्वा पीत्वा चरेत् पूजां जपं दत्त्वा समाहितः ।
साधके चोभमापन्ने मम चोभं प्रजायते ।
तस्माद्भुक्त्वा च पीत्वा च अहर्निशं यजनं चरेत् ॥"

चोभकः, पुं, (चोभ + संज्ञायां कन् ।) कामाख्यास्थ-पर्व्वतविशेषः । यथा,—
"दुर्ज्जराख्यस्य पूर्व्वस्यां पुरं नाम वरासनम् ।
तद्दक्षिणे महाशैलः चोभको नाम नामतः ॥
तस्मिन् गिरौ शिलापृष्ठे वक्षे देवी व्यवस्थिता ।
पञ्चपुष्करिणी नाम्ना पञ्चयोनिस्वरूपिणी ॥
एकत्र पञ्चभिर्दुर्गा योनिभिः पञ्चवक्त्रकम् ।
स्थिता रमयितुं तत्र नित्यमेव हिमाद्रिजा ॥"
इति कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्यायः ॥ * ॥ (क्षुभ् + कर्त्तरि + ण्वुल् ।)

चोभजनके त्रि ॥

चोभणं, त्रि, (क्षुभ् + णिच् + ल्युः ।) चोभजनकम् । सञ्चलनकारकम् । यथा,—
"आहताङ्गैः ससस्त्रैस्तं देवप्रहरणैरुदा ।
अचोभ्यां समुद्राणां चोभणं त्रिप्रकारिणम् ॥"
इति रामायणे । ३ । ३६ । १० ॥
"चोभणं चोभकर्त्तारम् ।" इति तट्टीका ॥ (स्त्री भावे ल्युट् । चोभः ॥)

चोभणः, पुं, (क्षुभ् + णिच् + ल्युः ।) वटुकभैरवः । यथा, विश्वसारोद्धारतन्त्रे तस्य स्तोत्रम् ।
"कङ्कालधारी मुण्डी च व्यालयज्ञोपवीतवान् ।
जृम्भणो मोहनस्तम्भी मारणः चोभणस्तथा ॥"

चोभितः, त्रि, (क्षुभ् + णिच् + कर्म्मणि क्तः ।) चोभयुक्तः । सञ्चालितः । यथा,—
"पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ।
चोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥"
इति मार्कण्डेये देवीमाहात्म्ये । ८२ । ३७ ॥

चोमं, क्ली, (क्षुम + मन् । पृषोदरात् वृद्धिर्वा ।) दुकूलम् । इत्यमरः । २ । २ । १२ । चौमं इति च पाठः ॥

चोमः, पुं क्ली, (क्षुम + मन् ।) अट्टः । इत्यमर-टीकायां भरतः ॥ चौमोऽपि पाठः ॥

चोमकः, पुं, (चोम + संज्ञायां कन् ।) गण-दायकः । इति जटाधरः ॥

चौणिः, } स्त्री, (क्षुण + बाहुलकात् निः रत्वं
चौणी, } वृद्धिः वा ङीप् च ।) पृथिवी । इत्य-मरः । २ । १ । २ ॥ अस्या व्युत्पत्तिर्यथा,—
"इष्ट्वा च यागाधाराद्य चौणी चौणालये च या ।
महालये व्रजं याति चितिस्तेन प्रकीर्त्तिता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्यायः ॥
(यथा, भागवते । ३ । १ । ४ । ३ ।
"तस्य चोद्धरतः चौणीं स्वदंष्ट्राग्रेण लीलया ॥")

चौणीप्राचीरः, पुं, (चौण्याः प्राचीर इव ।) समुद्रः । इति जटाधरः ॥

चौणीभुक् [ज्] पुं, (चौणीं पृथ्वीं भुनक्तीति । भुज् + क्विप् ।) राजा । यथा,—
"कृत्वा शस्त्रविभीषिकां कतिपयग्रामेषु दीनाः प्रजा मथ्नन्तो विटजल्पितैरुपहताः चौणीभुजस्ते किल।
विद्वांसोऽपि वयं किल त्रिजगतां सर्गस्थितिव्यापदा-मीशस्तत्परिचर्य्यया न गणितो वेरेष नारायणः ॥"
इति शान्तिशतके । १ । ११ ॥

चौणीमयः, पुं, (चौणी + मयट् ।) स्वरूपः । पृथिव्याश्रयः । यथा,—
"मत्स्यो युगान्तसमये मनुनोपलब्धः
चौणीमयो निखिलजीवनिकायकेतः ।
विस्रंसितानुरुभये सलिले मुखान्म
आदाय तत्र विजहार ह वेदमार्गान् ॥"
इति श्रीभागवते । २ । ७ । १२ ॥
"मत्स्यावतारमाह । मत्स्यो भाविना वैवस्वतेन मनुना दृष्टः । चौणीमयः पृथ्वीमयः पृथिवी-प्रधानस्तदाश्रय इत्यर्थः । अत एव निखिल-जीवनिकायानामाश्रयः । मे सुखाद्विसंसितान् गलितान् वेदस्य मार्गान् वेदानादाय तत्र युगान्तसलिले विजहार । ह हर्षे ।" इति तट्टी-कायां श्रीधरस्वामी ॥ * ॥ चौणीमयोऽपि पाठः ॥

चौद्रं, क्ली, (क्षुद्राभिः पिङ्गलवर्णमक्षिकाभिः सरघाभिर्निर्म्मितम् । क्षुद्र + "क्षुद्राभ्रमरवटर-पादपादञ् ।" ४ । ३ । ११६ । इति अञ् ।) मधु । इत्यमरः । २ । ६ । १०७ ॥ जलम् । इति मेदिनी ॥ पिङ्गलवर्णक्षुद्रमक्षिकाकृततकपिलवर्ण-मधु । अस्य गुणाः । अतिशीतलत्वम् । लघुत्वम् । क्लेदनाशित्वम् । घृतयुक्तचौद्रचेद्विषतुल्यत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"माक्षिकाः कपिलाः क्षुद्राः क्षुद्राख्यास्तत्कृतं मधु ।
मुनिभिः चौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत् ॥
गुणैर्माक्षिकवत् चौद्रं विशेषान्नेहनाशनम् ॥"
इति भावप्रकाशः ॥

चौद्रः, पुं, (क्षुद्र + अण् ।) चम्पकवृक्षः । इति शब्दचन्द्रिका ॥ वर्णसङ्करविशेषः । स तु सजा-तीयात् मागध्यां जातः । यथा,—
"चतुरो मागधी सूते क्रूरान् मायोपजीविनः ।
मांसं खादुकरं चौद्रं सौगन्ध्यमिति विश्रुतम् ॥"
इति महाभारते । १३ । ४८ । २२ ॥
"एते मागध्यामार्य्यागवादिभ्यश्चतुर्भ्यः क्रमाज्जा-यन्ते । इत्युपसंहरति चतुर इति । एते चत्वारो वागुरादिना जीवन्तीति मायोपजीविनः । अम्बष्ठेऽपि चत्वारो मागध्यां विश्रुताः सजाती-यादुत्पद्यन्ते । तेषां नामानि मांसमित्यादि । मांसं मांसविक्रेतारम् । खादुकरं मांसस्यैव संस्कारकम् । चौद्रं क्षुद्रं शूद्रमिति पाठान्तरेऽपि प्राकाद्यमपाककरम् । सौगन्ध्यम् उत्कलत्वगं सैरन्ध्रम् । एकस्यैव मागधस्य एतदृत्तिचतुष्य-सूक्तमिति ज्ञेयम् ।" इति तट्टीकायां नील-कण्ठः ॥ * ॥ क्षुद्रता । इति पाणिनिव्याक-रणम् ॥

चौद्रक्यं, त्रि, (क्षुद्रकः आयुधजीविसंघः । "आयुध-जीविसंघाञ्ञाटीति ।" ५ । ३ । ११४ । इति ञाट् ।) क्षुद्रम् । इति सिद्धान्तकौमुदी ॥

चौद्रजं, क्ली, (चौद्रात् जायते इति । जन + डः ।) शिक्थकम् । इति राजनिर्घण्टः ॥ मधुजात-मात्रे त्रि ॥

चौद्रधातुः, पुं, (चौद्रजातो धातुः चौद्रं धातु-रिव वा ।) माक्षिकम् । इति राजनिर्घण्टः ॥

चौद्रप्रियः, पुं, (चौद्राणां सरघाणां प्रियः चौद्र-वत् मधुवत् प्रियो वा ।) जलमधुकवृक्षः । इति राजनिर्घण्टः ॥ मधुप्रिये त्रि ॥

चौद्रमेहः, पुं, (चौद्रसंज्ञको मेहः ।) प्रमेह-रोगविशेषः । मधुमेह इति वैद्यकम् ।) तल्लक्षणं यथा,—
"कषायं मधुरं रूक्षं चौद्रमेहं वदेद्बुधः ।
कषायं कषायवर्णम् ।" इतिभावप्रकाशः ॥ अस्य चिकित्सा प्रमेहशब्दे द्रष्टव्या ॥

चौद्रेयं, क्ली, (चौद्रे भवं इति । ढक् ।) शिक्थ-कम् । इति राजनिर्घण्टः ॥ चौद्रसम्बन्धिनि त्रि ॥

चौमं, त्रि, (क्षुम + "अर्त्तिसुसुहुदृधिक्षिति ।" उणां । १ । १३६ । इति मन् । ततः प्रज्ञा-दित्वात् अण् । वृद्धिः ।) क्षुमाया विकारः । स्त्रियां चौमी कन्येत्यादि । इत्यमरटीकायां भरतः ॥

चौमं, पुं,क्ली, (क्षुम + मन् । ततोऽण् वृद्धिश्च ।) अट्टा-लकः । तत्पर्य्यायः । अट्टः२ । इत्यमरः ।२ । २ । १२ ॥
"हे हर्म्म्यादिगृहे । प्राकारायस्थितरणगृहेइति कौटिल्यः । अट्टेति ख्याते गृहविशेषे इति कोङ्कटः । प्राकारमञ्चपस्योपरिशालायामिति केचित् । हर्म्म्यादिवातकुटिकायामिति केचित् । मञ्चोपरि हर्म्म्यादृष्टे इति केचित् । प्राकार-धारणार्थोऽभ्यन्तरे चौमाख्योऽट्टः । इति भट्टः । अट्टतेऽसौ अट्टः । अट्ट ड विक्रमे वधे अल् । क्षुवन्ति शब्दायन्तेऽत्र चौमं । टु क्षुल क्षुते नाम्नि इति मः गुणः स्वार्थे ण्णे चौमञ्च । पट्ट-दुकूलयोः चौमं गुणवत् । वस्त्रभेदे चौमं वृद्धि-मदिति बहवः । चौममट्टे दुकूले स्यादतसी-वसनेऽपि चेति विश्वप्रकाशे अतसीवनेन सह पाठादट्टेऽपि चौममन्त्यस्वरवच्च । तच्च हि परेषां वृद्धिविधानात् ।" इति पुरवर्गे भरतः ॥ * ॥ अतसीवस्त्रम् । इति हेमचन्द्रः ॥ (यथाह याज्ञवल्क्यः । १ । १८७ ।
"स गौरसर्षपैः चौमं पुनः प्राकाद्धौमयम् ।
कारुहस्तः शुचिः पण्यं भैक्षं योषिन्मुखन्तथा ॥")
"क्षुमायाः विकारः चौमं वृद्ध्यादि वाच्यलिङ्गत्वे स्त्रियां चौमी कन्येत्यादि ।" इति वृवर्गे भरतः ॥ * ॥ पट्टवस्त्रम् । तत्पर्य्यायः । दुकू-लम् २ । इत्यमरः । २ । ६ । ११३ । "हे पट्टवस्त्रे । सौवस्त्रखण्डधिक्कं चौति चौमं टु क्षु शब्दे नाम्नीति मः गुणः । यत् पुनरतसीविकारवाचि प्रक्लप्तवन्तरं तद्वृद्धिमत् दुकूलाद्यात् चौमात् स्वार्थे प्रज्ञादित्वादण् चौमञ्चेति केचित् । दुनोति उपतापयति अधिकशीतजननादिति नान्नीति कूलकि दुकूलम् ।" इति च वृवर्गे भरतः ॥ * ॥ शणजवस्त्रम् । यथा, शब्दरत्नावल्याम् ।

"चौमं दुकूले स्यादट्टे पुंनपुंसकयोरिह ।
चौमन्तु गुणजेऽपि स्यादतसीजे नपुंसकम् ॥"
(यथा, महाभारते । १।२००।३ ।
"कन्या च चौमसंवीता कृतकौतुकमङ्गला ।
कृताभिवादना श्वश्वास्तस्थौ प्रह्वा कृताञ्जली ॥")
चौमकः, पुं, (चुमा एव चौमः प्रज्ञादित्वात् अण् । ततः संज्ञायां कन् ।) चोरनामगन्धद्रव्यम् । इति केचित् ॥
चौमी, स्त्री, (चुमा एव इति स्वार्थे अणि वृद्धिः ततो गौरादित्वात् ङीष् ।) अतसी । इति रत्नमाला ॥ (विकारार्थे अणि) चुमानिर्म्मितकन्था । इति चौमशब्दटीकायां भरतः ॥
चौरं, क्ली, (चुरस्य कार्य्यं कर्म्म चुरकृतं कर्म्मेति भावः चुरस्येदं वा ।) चुरकर्म्म । कामान इति भाषा । तत्पर्य्यायः । मुण्डनम् २ भद्रकरणम् ३ वपनम् ४ परिवापनम् ५ । इति हेमचन्द्रः ॥ अस्य गुणः ।
"केशश्मश्रुनखादीनां कर्त्तनं संप्रसाधनम् ।"
संप्रसाधनं पवित्रीकरणमिति यावत् । इति राजवल्लभः ॥ * ॥ व्रतादिसंयमे चौरकर्म्माकरणे दोषो यथा,—
"व्रतानामुपवासानां श्राद्धादीनाञ्च संयमे ।
न करोति चौरकर्म्म अशुचिः सर्व्वकर्म्मसु ॥
स च तिष्ठति कुण्डेषु नखादीनाञ्च सुन्दरि ! ।
तदेव दिनमानान्दं तद्भोजी दण्डताड़ितः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥*॥
नित्यचौरविहितनिषिद्धदिनादि यथाह राजमार्त्तण्डः ।
" न स्नानमात्रगमनोत्सुकभूषितानामभ्यक्तभुक्तरणकालनिरासनानाम् ।
सन्ध्यानिशाग्निकुजार्कदिनेषु रिक्ते
चौरं हितं प्रतिपदद्वि न चापि विद्याम् ॥"*॥
"प्राचीसुखः सौम्यसुखोऽपि भूत्वा
कुर्य्यान्नरः चौरमनुत्कटस्थः ॥
उत्तराचितयथान्यरोहिणी-
रौद्रसर्पपितृभेषु चाग्निभे ।
श्मश्रुकर्म्म सकलं विवर्ज्जयेत्
प्रेतकार्य्यमपि बुद्धिमान्नरः ॥"
प्रेतकार्य्यं प्रतिप्रेतसंप्रदानकदाहौघटदानविषयकम् । अन्यथा वक्ष्यमाणवचनविरोधः स्यात् ॥
"चन्द्रशुद्धिर्यदा नास्ति तारायाश्च विशेषतः ।
अचौरिमेऽपि कर्त्तव्यं चन्द्रचन्द्रजयोर्दिने ॥
मानं हन्ति गुरुः चौरे शुक्रं शुक्रो धनं रविः ।
आयुरङ्गारको हन्ति सर्व्वं हन्ति शनैश्चरः ॥"*॥
श्रीपतिरत्नमालायाम् ।
"आज्ञया नरपतेर्द्विजन्मनां
दारकर्म्मण्डतरुतकेषु च ।
बन्धमोक्षमखदीक्षणेष्वपि
चौरमिष्टमखिलेषु चोडुषु ॥
देवकार्य्ये पितृश्राद्धे रवेरंशपरिक्षये ।
चुरिकर्म्म न कुर्व्वीत जन्ममासे च जन्मभे ॥"*॥
ब्रह्मगार्ग्यः ।
"केशश्मश्रुनखादीनां कर्त्तनं संप्रसाधनम् ।
दितिमदितिञ्च स्मरतां चौरविधौ भवति कल्याणम् ॥ * ॥"
अत्र क्रमो वराहपुराणे ।
"श्मश्रुकर्म्म कारयित्वा नखच्छेदमनन्तरम् ॥"
इति ज्योतिस्तत्त्वम् ॥
अपि च । गोभिलः । "केशश्मश्रुलोमनखानि वापयीत शिखावर्ज्जम् ।" इति शुद्धितत्त्वम् ॥*॥ अन्यच्च ।
"रोहिण्याञ्च विशाखायां मैत्रे चैवोत्तरासु च ।
मघायां हस्तिकायाञ्च द्विजैः चौरं विवर्ज्जितम् ॥
हत्वा तु मैथुनं चौरं यो देवांस्तर्पयेत् पितॄन् ।
रुधिरं तद्भवेत्तोयं दाता च नरकं व्रजेत् ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
नापितगृहे चौरनिषेधो यथा,—
"स्वयं माल्यं स्वयं पुष्पं स्वयं घृष्ट्वा चन्दनम् ।
नापितस्य गृहे चौरं गच्छन्नपि हरेत् श्रियम् ॥
रवौ दुःखं सुखं चन्द्रे कुजे मृत्युर्बुधे धनम् ।
मानं हन्ति गुरोर्व्वारे शुक्रे शुक्रक्षयो भवेत् ॥
शनौ च सर्व्वदोषाः स्युः चौरमत्र विवर्ज्जयेत् ॥"
इति कर्म्मलोचनम् ॥ * ॥ * ॥
अथ प्रथमचौरस्य चूड़ाकरणस्य विहितदिनादि । ज्योतिषे ।
"अयुग्माब्दे तथा मासि चूड़ा भौमशनीतरे ।
अर्केन्दुकालशुद्धौ च जन्ममासेन्दुभेतरे ।
रिक्तादर्य्याष्टमीषष्ठीप्रतिपद्वर्ज्जिते सिते ॥"
दर्शेऽपि सामान्यतो दोषमाह ।
"षष्ठ्यष्टमी पञ्चदशी उभे पक्षे चतुर्दशी ।
अत्र सन्निहितं पापं तैले मांसे भगे क्षुरे ॥
मेषसिंहतुलाकर्कितृश्चिकेतरलग्नके ।
श्रवणादित्रयस्वातीचित्रापुष्याश्विचन्द्रभे ॥
आदित्यरेवतीहस्ता ज्येष्ठामूले च चौड़कम् ॥
पौष्णाश्विपुष्यवसुरामकवासुदेव-
ब्रह्मार्कचन्द्रवरुणादितिचित्रभेषु ।
वारेषु सोमबुधवाक्पतिभार्गवानां
चौरं करोति कुशलं खलु मानवानाम् ॥"
इति वचनात् रोहिण्यामपि चूड़ाकरणम् । अत्रापि तिथ्यङ्गादिविहितत्वं विवर्ज्जयेत् ॥
"सूर्य्ये दक्षिणमार्गगामिनि हरौ सुप्ते निरंशे रवौ
चौर्ये शीतरुचौ महीतनयभेऽर्व्वारे निशान्तस्थयोः ।
शुक्रेऽभक्तगतौ निषिद्धसमये लङ्कारयुक्ते शिखौ
चौराद्योगभयं वदन्ति यवना म्लेच्छं तथान्ये जगुः ॥"
राजमार्त्तण्डे ।
"मानं हरेत् चौरमिहायुषोऽर्कः
शनैश्चरः पञ्च कुलस्त्रयाष्टौ ।
आचार्य्यभृग्विन्दुबुधाः क्रमेण
दद्युर्दशैकादश सप्त पञ्च ॥"
जीवादिवारे चौरं प्रशस्तम् ॥*॥ भोजराजः ।
"शिखिसन्निधाने च चूड़ाकर्म्मं जगुः शुभं यवनाः ।
चैत्रे मासि दिवाकरवारे उत्तरवर्त्मनि सवितरि ॥"
दिवाकरवारविनिर्मोके तु गर्गः ।
"जन्मर्क्षे जन्ममासे च युग्ममासे च वत्सरे ।
न कुर्य्यात् प्रथमं चौरं विशेषाच्चैत्रपौषयोः ॥"
ज्येष्ठपुत्रकन्ययोस्तु ज्येष्ठदर्शाद्यन्यत्र चूड़ानिषेधो विवाहप्रकरणे उक्तः । इति ज्योतिस्तत्त्वम् ॥ * ॥
अपि च । भोजराजः ।
"यो जन्ममासे क्षुरकर्म्म याचां
कर्णस्य वेधं कुरुते च मोहात् ।
नूनं स रोगं धनपुत्रनाशं
प्राप्नोति मूढो वधबन्धनानि ॥
जातं दिनं दूषयते वशिष्ठ-
श्चाष्टौ च गर्गो यवनो दशाहम् ।
जन्माख्यमासं किल भागुरिश्च
चूड़े विवाहे क्षुरकर्म्मवेधे ॥"
एतद्विषयभेदस्तु राजमार्त्तण्डे ।
"उक्तानि प्रतिषिद्धानि पुनः सम्भावितानि च ।
सापेक्षनिरपेक्षाणि श्रुतिवाक्यानि कोविदैः ॥
सापेक्षनिरपेक्षाणि समर्थासमर्थविषयकाणि ।
क्षुरेति क्षुरकर्म्म ।" इति तिथ्यादितत्त्वम् ॥
चौरपथं, क्ली, (क्षुरैः पवित्रिभिर्वज्रैर्निर्म्मितं निर्वृत्तमिव वा गृहम् ।) क्षुरवत्तुल्यतीक्ष्णदृढ़गृहम् । यथा, श्रीभागवते । ६ । ५ । ८ ।
"नदीसुभयतो वाहां पञ्चपञ्चाङ्गुतं गृहम् ।
क्वचिद्धंसं क्वचित्कर्कं चौरपथं स्वयं भजि ॥"
"पञ्चपञ्चाशां पञ्चविंशतेः । अङ्गुतं गृहम् । चौरपथं क्षुरैः पवित्रिभिर्वज्रैश्च निर्म्मितमिव तीक्ष्णं दृढ़चेतसैः । स्वयं स्वतन्त्रम् । अजि अमत्स्वभावम् ।" इति तट्टीकायां श्रीधरस्वामी ॥
चौरिकः, पुं, (चुरकर्म्म चुरेण वा कर्म्म करोति । यद्वा चुरिकर्म्म कार्य्यत्वेनास्यास्य । इति ठक् । चौरं शिल्पत्वेनास्यास्य इति तु ठन् ।) नापितः । इति शब्दमाला ॥
क्ष्णु, ल तेजने । इति कविकल्पद्रुमः ॥ (अर्द्धा-पर्वसर्व्वा-सेट् ।) मूर्द्धन्यणकारोपधः । चादिः । क्ष्णौति खड्गं कर्म्मकारः । इति दुर्गादासः ॥
क्ष्णुतः, त्रि, (क्ष्णु + कर्म्मणि क्तः ।) शाणितः । तीक्ष्णीकृतः । इत्यमरः । ३ । १ । ६१ ॥
क्ष्मा, स्त्री, (क्षमते सहते भारं अपराधजनितं वात्मस्थानां जीवानां चतुर्व्विधानां इति । क्षम् + अच् उपधायाः लोपश्च ।) पृथ्वी । इत्यमरः । २।६।३॥ (यथा, भागवते ।७।८।३३।
"दौस्तत् सटोत्क्षिप्तविमानसङ्कुला
प्रोत्सर्पता क्ष्मा च पदातिपीड़िता ॥")
क्ष्माजः, पुं, (क्ष्मा पृथ्वी तस्यां तस्याः वा जातवान् इति । क्ष्मा + जन् + डः ।) मङ्गलग्रहः । इति ज्योतिषम् ॥
क्ष्मातलं, क्ली, (क्ष्मायाः तलम् ।) भूतलम् । (यथा, मार्कण्डेये । २३ । ४७ ।
"यदिच्छसि क्ष्मातले खेऽम्बुतो वा
तत्सम्मतं तत्स्वरैर्यत्नतश्च ॥")
पृथिवीमध्यम् । इति केचित् ॥
क्ष्माभृतिः, पुं, (क्ष्मां पृथ्वीं धृतिर्धारणा पालनी-शक्तिर्यस्य ।) काश्मीरदेशीयराजविशेषः । यथा, राजतरङ्गिण्याम् । ५ । ४८२ ।

"अथाभ्यधिषत क्षिप्रं विप्रेरेत्य यशस्करः।
प्राधृतिः प्रौढसामर्थ्यः सासुमानिव तोयदैः॥"

ह्मायः, पुं, (ह्मां पाति रक्षतीति। ह्मा+पा+कः।) राजा। यथा,—

"ह्मामयानिरियुचासचुदादौ ह्वरवेलतान्।
लब्धोदया ह्रीभयेन ह्मापा ग्रन्थमुवाचिन॥"

इति राजतरङ्गिण्याम्। ५। ३१६॥

ह्मापालः, पुं, (ह्मां पालयतीति। ह्मा+पाल्+णिच्+अण्। ह्मायाः पालो वा।) राजा। यथा, राजतरङ्गिण्याम्। ५। ३२४।

"न के लोभं ससृत्पाद्य जिह्वया स्निग्धदीर्घया।
पिपीलिका इव यस्ता ह्मापालैः शल्यकैरिव॥"

ह्माभुक् [ज्,] पुं, (ह्मां पृथ्वीं भुनक्ति उपभुनक्ति इत्यर्थः। ह्मा+भुज्+क्विप्। कुत्वं च।) राजा। इत्यमरः। २। ८। १॥ (यथा, राजतरङ्गिण्याम्। ५। ५५।

"तत्रस्थाः ह्माभुजा दृष्टास्तन्निवेदनकारणम्।
यजिग्रपन् चिरन्यस्तजागुप्राङ्गलयस्तकः॥")

ह्माभृत्, पुं, (ह्मां पृथ्वीं बिभर्त्ति। ह्मा+भृ+क्विप् तुगागमश्च।) राजा। (यथा, मनुतन्त्रे। १। १६६।

"देशानासुपरि ह्माभृदातुरार्त्ता चिकित्सकाः।
वणिजो ग्राहकाणाञ्च मूर्खाणामपि पण्डिताः॥")

पर्व्वतः। इत्यमरः। २। ८। १॥ (यथा, राजेन्द्रकर्णपूरे। ६०।

"कान्तारेषु च काननेषु च सरित्तीरेषु च
ह्माभृतासृत्सङ्गेषु च पत्तनेषु च सरिद्दुर्गोत्कटाग्रेषु च॥")

ह्माय, ईं ङ विधूनने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) पवर्गद्वितीययुक्तः। चादिः। विधूननमिति विधून्यतेऽनेनेति कर्म्मणि घञि विधूनः सकर्म्मकः ततो विधून इवाचरतीति क्विप् कृते अनटि रूपम्। कम्पनमित्यर्थः। ईं, ह्मातः। ङ, ह्मायते दृक्षः। (तथाच, भट्टिः। १४। २१।

"उल्का दहशिरे दीप्ता रुरुवुश्चाशिवं शिवाः।
चक्म्पाये च मही राम ग्रग्रहे चानुभागमम्॥")

ह्मायते कम्पते लङ्घत्येजतीर्त्ते च वेपते इति कम्पार्थे भट्टमल्लोऽपि। रमानाथस्तु विधूननशब्दस्नेणन्तादयुत्पत्तेः सकर्म्मकोऽयं इति प्रतीमः। प्रयोगस्त्वन्यथा दृश्यते इत्याह। इति दुर्गादासः॥

ह्मायितः, त्रि, (ह्माय+क्तच्।) कम्पितः। इति व्याकरणम्॥

ह्मायिता, [ऋ] त्रि, (ह्माय+तृच्प्रत्ययः।) कम्पकः। इति व्याकरणम्॥

ह्मील, निमेषे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) निमेषः पद्माभिश्चक्षुष आवरणम्। ह्मीलति चक्षुः पद्माभिराहतं स्यादित्यर्थः। इति दुर्गादासः॥

ह्मुड्, ल आ ङ णि स्नेहे। मोचे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-मोचे सकं-सेट्।) वकारयुक्तः। ल, अह्मुडत्। आ, ह्मुडितं ह्मुडं तेन। ङ, ह्मुडते। णि, ह्मुडोऽस्ति। स्नेहः स्निग्धीभावः। मोचे ह्मुडते तिलः तैलं सञ्चतीत्यर्थः। इति दुर्गादासः॥

ह्मुक्तः, त्रि, (ह्मुद्+क्तः।) सृक्तः। स्निग्धः। इति व्याकरणम्॥

ह्मुद्, आ णि क्रूजने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) आ, ह्मुदितं ह्मुदं तेन। णि, ह्मुदोऽस्ति। मूर्द्धन्यवर्गलतीयान्तोऽयमित्येके। इति दुर्गादासः॥

ह्मुद्, इर् य आ मोचे। स्नेहे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-मोचे तु सकं-सेट्।) इर्, अह्मुदत् अह्मौदीत्। अस्मात् पुषादिलान्नित्यं ङ इत्यन्ये। य, ह्मुद्यति। आ, ह्मुदितं ह्मुदं तेन। इति दुर्गादासः॥

ह्मुड्, ल आ ङ णि मोचे। स्नेहे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-स्नेहे तु अकं-सेट्।) एतदाद्यास्त्रयो वकारयुक्ताः चाद्याः। ल, अह्मुडत्। आ, ह्मुडितं ह्मुडं तेन। ङ, ह्मुडते तिलः तैलं सञ्चतीत्यर्थः। णि, ह्मुडोऽस्ति। स्नेहः स्निग्धीभावः। इति दुर्गादासः॥

ह्मुड्, क्लीं, (ह्मुड्+घञ्।) लोहितार्कपर्णफलम्। घोषापुष्पम्। इति मेदिनी। ड्, ६॥

ह्मुड्डः, पुं, (ह्मुड्+भावादौ घञ्। ह्मुड्डते इति अच् वा।) ध्वनिः। कर्णामयः। विषम्। इति मेदिनी। ड्, १५॥ (यथा, आनन्दलहर्य्याम्। २६।

"करालं यत् ह्मुड्डं कवलितवतः कालकलना
न शम्भोस्तन्मूलं जनयि तव ताड़ाङ्कमहिमा॥")

पीतघोषावृक्षः। इति रत्नमाला॥ *॥ ह्मुड्डरोगस्य निदानादि कर्णरोगशब्दे द्रष्टव्यम्॥

ह्मुड्डः, त्रि, (ह्मुड्+कर्म्मणि घञ्।) दुरासदः। कुटिलः। इति मेदिनी। ड्, ६॥

ह्मुड्डनं, क्लीं, (ह्मुड्+भावे ल्युट्।) मोचनम्। त्यागः। यथा, महाभारते। ३। १७८। २६।

"त्रासनं सर्व्वभूतानां कालान्तकयमोपमम्।
निश्वासह्मुड्डनादेव भर्तुः सयन्तमिव स्थितम्॥"

ह्मुड्डा, स्त्री, (ह्मुड्+घञ्+टाप् च।) वंशशलाका। सिंहनादः। इति मेदिनी। ड्, १५॥ (स तु लोकस्य शब्दविशेषः। यथा, वक्रोक्तिपञ्चाशिकायाम्। ३६।

"एषा सागरसङ्गताभिमततां याता न मे कर्हिचित्
सुग्धे कण्ठरुवं ब्रवीषि मम किं सञ्चूड़तामौशुवीम्।
चूड़ारावं दृहोचितस्तव गणव्रातैः सह क्रीड़तो
युष्मान्नीलगलोऽवतादिति गिरा गौर्य्या कृतोऽनुत्तरः॥"

"सागरसङ्गतेति। सागरेण समुद्रेण सङ्गता। अर्थाद्गङ्गा। उत्तरे तु सेति सर्व्वनामपदम्। गरो विषम्। तदाह सञ्चूड़ेति। चूड़ेन विषेण चूड़या शब्दविशेषेण च सञ्चूड़म्। चूड़ं विषम्। चूड़ा जनस्य शब्दविशेषः॥" इति तट्टीका॥) कोवातकी। इति राजनिर्घण्टः॥

चूड़ितं, क्लीं, (ह्मुड़्+भावे क्तः।) सिंहनादः। इत्यमरः। ३। ५। ३४॥ (यथा, महाभारते। १। ६६। ६।

"नानायुधधरैश्चापि नानावेशधरैस्तथा।
हेषितस्वनमिश्रैश्च चूड़ितास्फोटितस्वनैः।
आसीत् किलकिलाशब्दस्तस्मिन् गच्छति पार्थिवे॥")

चूल, ऋ चालगत्योः। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-गतौ तु सकं-सेट्।) वकारयुक्तः। चादिः। ऋ, अचिचूलत्। चालः कर्म्म। चालः कैश्चिन्न मन्यते। इति दुर्गादासः॥ (क्रीड़ायामिति कैश्चित्। यथा, रामायणे। ५। १०। १३।

"आस्फोटननिनादांश्च बालानां चूलितां तथा॥")

चूलिका, स्त्री, (चूला+स्वार्थे कन् अत इत्वञ्च।) क्रीड़ा। यथा, श्रीभागवते। ५। ८। १८।

"चूलिकायां मां दृष्ट्वा समाधिना आमीलितदृग्भां प्रेमसंरम्भेण चकितचकितं आगत्य पृषदरुरुविषाणाग्रेण लुठति।" "सम्भवति चेतदित्याह। चूलिकायां क्रीड़ायां दृष्ट्वा यः समाधिस्तेनामीलिते दृग्भौ येन तं मां प्रेमसंरम्भेण प्रणयकोपेन पृषत्चलबिन्दुस्रुद्रदग्रेण विषाणाग्रेण लुठति संघट्टयति।" इति तट्टीकायां श्रीधरस्वामी॥

चूली, स्त्री, (चूल+गौरादित्वात् ङीष्।) क्रीड़ा। यथा, श्रीभागवते। १०। २६। ४६।

"बाहुप्रसारपरिरम्भकरालकोरु-
नीविस्तनालभननर्म्मनखाग्रपातैः।
चूल्यावलोकहसितैर्व्रजसुन्दरीणा-
मुत्तम्भयन् रतिपतिं रमयाञ्चकार॥"

"बाहुप्रसारश्च परिरम्भश्च करालकादीनामालभनं स्पर्शश्च नर्म्म परिहासश्च नखाग्रपातश्च तैः। चूल्या क्रीड़या च अवलोकैश्च हसितैश्च कामं तासां उद्दीपयन् ता रमयामास।" इति तट्टीकायां श्रीधरस्वामी॥ *॥ अत्र चूल्यमिति प्रमादात् केनचिल्लिखितम्॥

ख

ख, खकारः। स तु यङ्गनद्वितीयवर्णः। अस्योच्चारणस्थानं कण्ठः। (यथा, सिद्धान्तकौमुद्याम्। "अ-कु-ह-विसर्ज्जनीयानां कण्ठः।" इति। शिक्षाग्रन्थे तु अस्य जिह्वामूलीयत्वमुक्तम्। यथा,—"जिह्वामूले तु कुः प्रोक्तः।" इति। परं जिह्वामूलीयस्यापि कण्ठमूलोच्चारणपरत्वात् न दोषाय एव॥) यथा, कामधेनुतन्त्रे।
"खकारं परमाश्चर्य्यं शङ्खकुन्दसमप्रभम्।
कोणत्रययुतं शून्यं बिन्दुत्रयसमन्वितम्॥
गुणत्रययुतं देवि! पञ्चदेवमयं सदा।
शिवशक्तिसंयुतं वर्णं खकारं ब्रह्ममाश्रये॥"
तस्योत्पत्तिर्यथा, प्रपञ्चसारे।
"ध सर्गः स्थेपितः कण्ठे वायुना कादिमीरयेत्।
वर्गांशसूर्य्यमात्रेण कं खरसूर्य्यनादनु खम्॥"
(वङ्गाचरैः) तस्य लेखनप्रकारादिर्यथा,—
"शिवरूपा वामरेखा ब्रह्मरेखा प्रजापतिः।
अधोरेखा विष्णुरूपा साक्षाद्ब्रह्मस्वरूपिणी॥
वामाङ्कामगता रेखा वह्निरूपा च सा स्मृता।
मात्रा कुण्डलिनी साक्षात् खकारः पञ्चदेवतः॥
ध्यानमस्याः प्रवक्ष्यामि शृणुष्व कमलानने!।
बन्धूकपुष्पसङ्काशां रत्नालङ्कारभूषिताम्॥
वराभयकरीं नित्यामीषद्धास्यसुखीं पराम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥*॥
तस्य नामानि यथा, नानातन्त्रेषु,—
"खः प्रचण्डः कामरूपी रुद्रविष्णुः सरस्वती।
आकाशमिन्द्रियं दुर्गा चक्रीशस्त्रापिणी गुरुः॥
शिखण्डी दन्तजातीशः कपोत्थिर्गगनो यदि।
शून्यं कपाली कल्याणी सूर्य्यकर्णोऽजरामरः।
सुधार्णवेशा पञ्चलिङ्गो जना यङ्कारखड्गकौ॥"

खं, क्ली, (खर्व्वति मनोऽक्षिन् खन्यते क्षुभ्यते मनोऽनेन वा। खर्व्व गतौ, खन दारणे वा अन्येभ्योपीति डः।) इन्द्रियम्। (यथा, मनौ। २। ६०।
"चिराभ्यासेन पूर्व्वं हि प्रह्लाद्यात् ततो सुखम्।
खानि चैव सृजेद्विद्वानात्मन्येव न॥")
पुरम्। क्षेत्रम्। शून्यम्। (यथा, महाभारते। १। ८८। ७।
"पतत्सुदीर्णाम्बुधरान्धकारात्
खात् खेचराणां प्रवरो यथार्कः॥")
बिन्दुः। (यथा, लीलावत्यां क्षेत्रव्यवहारे।
"वेदाग्निबाणखाश्चेन्द्र खखाभ्रभरसैः क्रमात्॥")
आकाशम्। (यथा, मनौ। १२। १२०।
"खं सन्निवेशयेत् खेषु चेष्टनस्पर्शनेऽनिलम्॥"
"खं वाय्वाकाशं खेषु उदराद्यवच्छिन्नशरीराकाशेषु।" इति कुल्लूकभट्टः॥) संवेदनम्। देवलोकः। धर्म्मः। इति मेदिनी। खे। १॥ लयात् दशमराशिः। इति दीपिका॥ (यथा, जातकप्रकरणे। "तनुनिधनखभेषाः केन्द्रकोणे

खगपः, पुं, (खगान् पातीति। खग+पा+डः।) अर्कः। (यथा, भट्टिकाव्ये। ६। ६।
"खगपतिरिव पक्षी पक्षिराजो विनेता
सुरपतिरिव शक्रः शक्रतुल्यो बलेन॥")
खगपतिः, पुं, (खगानां पतिः।) गरुडः। (यथा, भट्टिकाव्ये। ६। ६।
"खगपतिरिव पक्षी पक्षिराजो विनेता
सुरपतिरिव शक्रः शक्रतुल्यो बलेन॥")
खगपुङ्गवः, पुं, (खगानां पुङ्गवः।) गरुडः। (यथा, भट्टिकाव्ये। ६। ६।
"खगपतिरिव पक्षी पक्षिराजो विनेता
सुरपतिरिव शक्रः शक्रतुल्यो बलेन॥")
खगप्रभुः, पुं, (खगानां प्रभुरिव।) पक्षिश्रेष्ठो चाकुलिया इति भाषा॥ इति शब्दचन्द्रिका॥
खगान्तकः, पुं, (खगानां अन्तकः यम इव। यद्वा, अन्तयति अन्तं करोति इति। अन्तर्णिच् ततो ण्वुल्।) श्येनपक्षी। इति राजनिर्घण्टः॥
खगासनः, पुं, (खगस्य सूर्य्यस्य आसनमिव उदयस्थानं यत्र। आसनत्वेन कल्पितत्वात्तथात्वम्।) उदयपर्व्वतः। इति शब्दमाला॥ (खगो गरुड आसनं यस्येति विग्रहे।) विष्णुः। (एतद्विवरणं यथा, महाभारते।१। सौपर्णे। ३३। १२—१८।
"तमुवाचाथयो देवो वरदोऽस्मीति खेचरम्।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः॥
उवाच चैनं भूयोऽपि नारायणमिदं वचः।
अजरश्चामरश्च स्यामहन्तेन विनाप्यहम्॥
एवमस्त्विति तं विष्णुरुवाच विनतासुतम्।
प्रतिगृह्य वरौ तौ च गरुडो विष्णुमब्रवीत्॥
भवतोऽपि वरं दद्यां वृणोतु भगवानपि।
तं वव्रे वाहनं विष्णुर्गरुत्मन्तं महाबलम्।
ध्वजश्च चक्रे भगवानुपरि स्यास्यतीति तम्॥
एवमस्त्विति तं देवस्तदा नारायणं खगः।
वव्राज तरसा वेगाद् वायुं सृष्ट्वा महाजवः।")
खगेन्द्रः, पुं, (खगानां पक्षिणां इन्द्रः।) गरुडः। इति राजनिर्घण्टः॥ (यथा, महाभारते। १। सौपर्णे। ३१। ३५।
"पतत्रीणाञ्च गरुड इन्द्रत्वेनाभ्यषिच्यत॥"
अस्य खगेन्द्रत्वकथा यथा तत्रैव। १६—२०।
"तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः।
बालखिल्यानुपागम्य कर्म्मसिद्धिमपृच्छत॥
एवमस्त्विति तत्रापि प्रब्रूचुः सत्यवादिनः।
तान् कश्यप उवाचेदं सान्त्वपूर्व्वं प्रजापतिः॥
अयमिन्द्रस्तपोवने नियोगाद् ब्रह्मणः कृतः।
इन्द्रार्थे च भवन्तोऽपि यत्नवन्तस्तपोधनाः॥
न मिथ्या ब्रह्मणो वाक्यं कर्त्तुमर्हथ सत्तमाः!।
भवतां हि न मिथ्यायं सङ्कल्पो वै चिकीर्षितः॥
भवत्वेष पतत्रीणामिन्द्रोऽतिबलसत्त्ववान्।
प्रसादः क्रियतामस्य देवराजस्य याचतः॥")
खगेन्द्रध्वजः, पुं, (खगेन्द्रो गरुडो ध्वजः केतुर्यस्य च यस्य।) विष्णुः। (यथा, भागवते।१।१८।१६।
"कृतेन वैयासकिशब्दितेन
भेजे खगेन्द्रध्वजपादमूलम्॥")
खगेश्वरः, पुं, (खगानां ईश्वरः।) गरुडः। इत्यमरः। १। १। ५१॥

खगोलः, पुं, आकाशमण्डलम्। तस्य विवरणं यथा। एतद्ब्रह्माण्डं सच्छिद्रं कटाहद्वयस्य गोलाकारसम्पुटतुल्यम्। यत्र भूर्भुवःस्वर्महर्जनतपःसत्य-संज्ञकानि सप्तभुवनानि सन्ति। ब्रह्माण्डमध्ये यः परिधिः स आकाशकक्ष्या। तन्मध्ये परावह-परिवह-सुवह-सम्वहोद्वहाख्यानां पञ्चानां वायूनां स्थानानि अधोऽधःक्रमेण सन्ति। तदधस्तात्त्वधोऽधःस्थितपूर्व्वाभिमुखप्रनिहतसप्तिराहुकेतुमङ्गलसूर्य्यशुक्रबुधचन्द्रयहयुक्तं दक्षिणोत्तरस्थितध्रुवाक्ष-तारादयेन वहं नक्षत्रचक्रं सदापश्चिमगतिना प्रवहवायुना भ्रमति। ततः अधोऽधःक्रमेण सिद्धविद्याधरमेघविद्युदादियुक्तः सदोत्तरगतिरावहवायुर्भ्रमति एतद्ब्रह्माण्डस्य मध्ये समन्तात् ईश्वरस्य धारणात्मिकां शक्तिं बिभ्राणो भूगोलः सूर्य्ये तिष्ठति। पृथ्व्यन्तर्गता नागासुरसमाश्रया दिव्यौषधिरलोपेता रम्याः पाताल-रसातल-महातल-तलातल-सुतल-वितलातल-संज्ञका ऊर्द्धोऽधक्रमेण सप्तपातालभूमयश्च सन्ति। सुमेरुपर्व्वतोपरि सूर्य्ये एका ध्रुवतारा भ्रमति। एवं वडवानलोपरि सूर्य्ये अन्या ध्रुवतारा भ्रमति।

	अथ कक्षायोजनानि	भासयोजनानि	पृथिव्युच्चयोजनानि
आकाशस्य ब्रह्माण्डस्य वा	१८७१२०८०८६४००००००	५६५३८१३६११२७२७२७	२६७६६२१६५५६३६३६२
नक्षत्रस्य	२५६८६००००	८२६६२२७३	४१३४५३३६
शनेः	१२७६६८२५५	४०६२०२१७	२१३१००५८
राहुकेतोः	८०५७२८६३२	२५६३६८२०१	१२८१८८३३००
गुरोः	५१३७५७६४	१६३४६८३४	८१७२६१७
चन्द्रोच्चस्य	३८३२८४८४	१२७४२८२८	६३७०६१४
मङ्गलस्य	८१४६८०६	२५६२१६८	१२६५२६६
सूर्य्यस्य	४३३१५००	१३७८२०४	६८८३०२
शुक्रशीघ्रस्य	२६६४६३७	८४७८३६	४२३११६
बुधशीघ्रस्य	१०४३२०६	३३१६३०	१६५१६५
बुधशुक्रयोः	४३६१५०	१३८७७५	६८५८८
चन्द्रस्य	३२४०००	१०३०६१	५७४५
आवहवायोः	५१०४	१६२४	१२
भूगोलस्य	४८६७	१५८१	०

अथ ग्रहाणां मध्यभुक्तयः।

	रवेः	चन्द्रस्य	मङ्गलस्य
दिने— कलाद्याः	५६।८।१०।०	७६०।३४।५२	३१।२६।२८
वर्षे— राश्याद्याः	१२।०।०।२	४।१२।३६।४०।४८	६।११।२४।६।२६
युगे— भगणाद्याः	४३२००००	५७७५३३३६	२२६५८३२
कल्पे— भगणाद्याः	४३२०००००००	५७७५३३३६०००	२२६५८३२०००

	बुधशीघ्रस्य	बृहस्पतेः	शुक्रशीघ्रस्य
दिने— कलाद्याः	२४५।१२।२१	४।५६।६	६६।७।४३
वर्षे— राश्याद्याः	१।२४।४५।२२।४८	१।०।२१।३।३६	७।५।११।४६।१२
युगे— भगणाद्याः	७१६३७०६०	३६४२२०	३०१२३७६
कल्पे— भगणाद्याः	७१६३७०६००००	३६४२२००००	३०१२३७६०००

खगोलः

अथ ग्रहाणां मध्यसूत्रम्।

	सूर्यः	राहोः	मन्दोच्चस्य
दिने—कलादाः	२।०।२३	३।१०।४४	६।४१।०
वर्षे—राश्यादाः	०।१२।१२।५४	०।१६।२१।१२।३६	१।१०।४०।५६।४२
युगे—भगणादाः	२४६५६८	२३१२३८	४८८१०३
कल्पे—भगणादाः	२४६५६८०००	२३१२३८०००	४८८१०३०००

अथ राशिषु ग्रहाणां स्थितिः।

	अश्विनी	भरणी	कृत्तिका	रोहिणी	मृगशिरा	आर्द्रा	पुनर्वसुः	पुष्या	आश्लेषा
राशिः	०	०	१	१	२	२	२	३	३
अंशः	१	२०	१	२६	३	१	२०	१६	२६
कला	०	०	३	३०	०	१०	४०	२०	२०
अपक्रम-भागाः	१० उत्तरः	१२ उत्तरः	५ उत्तरः	५ दक्षिणः	१० दक्षिणः	६ दक्षिणः	६ उत्तरः	० उत्तरः	७ दक्षिणः

	मघा	पूर्वफल्गुनी	उत्तरफल्गुनी	हस्ता	चित्रा	स्वाती	विशाखा	अनुराधा	ज्येष्ठा
राशिः	४	४	५	५	५	६	६	७	७
अंशः	२	२२	५	१०	२४	१६	२६	२४	२६
कला	२०	२०	४०	०	१०	४	४०	०	०
अपक्रम-भागाः	उ	उ	उ	द	द	उ	द	द	द

	मूला	पूर्वाषाढा	उत्तराषाढा	अभिजित्	श्रवणा	धनिष्ठा	शतभिषा	पूर्वभाद्रपद्	उत्तरभाद्रपद्	रेवती
राशिः	८	८	८	८	९	९	१०	१०	११	११
अंशः	१	१४	२०	२४	१०	२०	२०	२६	१	२६
कला	१०	०	०	४०	०	०	०	०	०	५०
अपक्रम-भागाः	९ द	५ ३० द	५ द	३० उ	३० उ	३३ उ	३० द	२४ उ	२६ उ	० उ

अथ राशिषु नक्षत्राणां स्थितिः।

	अगस्त्यः	नागवीथिः। कालपुरुषः	मृगशिरः	आर्द्रा	पुनर्वसुः
राशिः	१	२	१	१	१
भागः	०	२०	२२	२२	१
कला	०	०	०	०	१
अपक्रम-भागाः	६० ८	६४० ८	३८ ८	३३० ८	५ ७
	पुनर्वसौ	आर्द्रायाम्	रोहिण्याम्	रोहिण्याम्	कृत्तिकायाम्

अथ खगोलरचना।

खवाञ्छितं काष्ठनिर्म्मितं भूगोलं तन्मध्यगं सुमेरोरुभयत्र निर्गतं दण्डञ्च कृत्वा वटुत्तर-सूत्रत्रय-परिमितं समविभक्तं आधारकक्ष्याद्वयं विषुवत्कक्ष्यैका च कार्य्या॥

अथ मेषादिराशिस्थितिः।

खाहोरात्रार्द्धकर्णैः ततप्रमाणानुमानेन च क्रान्तिस्थानात् दक्षिणोत्तरविभक्तैर्विक्षेपभागै-र्निजनिजापक्रमेण मेषादीनां राशीनां तिस्रः कक्ष्याः कुर्य्यात्। ता एव कक्ष्याः कर्कादीनां वैपरीत्येन कुर्य्यात्। तादृश्यस्तिस्रस्तुलादीनां तथा-विपर्य्ययात् मकरादीनाञ्च कुर्य्यात्॥

अहोरात्रार्द्धकर्णज्ञानं यथा।

खक्रान्तेरुत्क्रमक्रमध्ये हे कुर्य्यात्। तत्र उत्क्रमध्यया हीना त्रिज्या दक्षिणोत्तरं दिग-व्यासदलं स्यात्॥

विक्षेपज्ञानं यथा।

चन्द्रः स्वक्रान्त्यंशात् निजपातेन राशिचक्र-कलाग्रीतिभागैः परमं दक्षिणोत्तरं विक्षिप्यते। तस्य नवभागं द्विगुणितं बृहस्पतिः मङ्गल-स्त्रिगुणितं अन्ये चतुर्गुणं विक्षिप्यन्ते। तत्र क्रमः चन्द्रस्य मध्यविक्षेपकलाः २७०मङ्गलस्य६० बुधस्य १२० बृहस्पतेः ६० शुक्रस्य १२० शनेः १२० रवेर्विक्षेपकला नास्ति॥

अथ नक्षत्रादिकक्ष्यास्थानम्।

आधारकक्ष्याद्वयोपरिस्थान्दीप्तगोलसंस्थितानां नक्षत्रादीनां कक्ष्याः कुर्य्यात्। सर्व्वासां कक्ष्याणां मध्यस्थाने विषुवत्कक्ष्या स्थिता। तदाधार-कक्ष्ययोर्युतेरूर्द्धे हे अयने विषुवद्वयञ्च कुर्य्यात्। विषुवस्थानात् भगणसञ्चारपर्य्यन्तं स्फुटभागै-र्मङ्गलादीनां क्षेत्राण्येव कुर्य्यात् अर्थात् मेषादि-राशीन् तिर्य्यक्कक्ष्याभी रचयेत्। तथा अयन-स्थानात् अन्त्ययनपर्य्यन्तं तिर्य्यक् अपरा कक्ष्या-क्रान्तिसंज्ञा कार्य्या। तया कक्ष्यया सूर्य्यः प्रकाशयन् सदा भ्रमति॥ चन्द्रादयो ग्रहाः अपमण्डलमाश्रिताः स्वस्वपातोग्रैरपक्रमात् विक्षे-पान्तेषु अपक्रमेणाक्रान्ताः सन्तो खेचरैर्दृश्यन्ते। क्षितिजे उदयन् राशिः लग्नं स्यात् तद्ग्रात् अस्तं गच्छंश्च अस्ताख्यं स्यात्। लग्नोदयेर्थेथा सिद्धं दशमचतुर्थस्थानञ्च कुर्य्यात्। मध्यक्षिति-जयोर्म्मध्ये या क्ष्या सा अन्या कथ्यते। विषु-वत्क्षितिजयोरन्तरक्ष्या चरदलक्ष्या। उपरि स्वकं स्थानं मध्ये क्षितिजमण्डलं कृत्वा वृत्त-वेष्टितं लोकालोकवेष्टितञ्च कृत्वा जलपतनयोगेन पारदस्रावयोगेन वा कालभ्रमणं साधयेत्। इति सूर्य्यसिद्धान्तसम्मतम्॥

खगड़ः, पुं, (खे आकाशे गलतीति। गल+अच् पृषोदरात् साधु।) दृग्विशेषः। खागड़ा इति भाषा॥ तत्पर्य्यायः पोटगलः २ बृहत्-काशः ३ काकेक्षुः ४। इति रत्नमाला॥

खङ्गरः, पुं, (खन्यते कङ्कतिकया इति। खन दारणे+ किप्। कीर्य्यते विकीर्य्यते इति। कृ विक्षेपे+ अप्। ततः कर्म्मधारयः।) चूर्णकुन्तलः। इति हेमचन्द्रः॥

खच, ग भूतिपूत्योरुत्पत्तौ। इति कविकल्पद्रुमः॥ (क्र्यां-परं-अकं-सेट्।) भूतिः सम्पत्तिः पूतिः पवित्रता तयोरुत्पत्तिः प्रादुर्भावः। भूत्युत्पत्तौ पूत्युत्पत्तौ चेत्यर्थः। ग, खच्यति राजा सम्पद्यः स्यादित्यर्थः। ग्रेवार्थः कातन्त्रादसम्मतः। इति दुर्गादासः॥

खच, तृ क बन्धने। इति कविकल्पद्रुमः॥ (अदन्त-चुरां-परं-सकं-सेट्।) खचयति। इति दुर्गादासः॥

खचमसः, पुं, (खे आकाशे चम्यते भक्ष्यतेऽसौ पिङ्गलोकस्थैः पुण्यात्मभिरित्यर्थः। चमु भक्षणे+ असच्। खे चमसः यज्ञीयपात्रमिव अन्तमय-त्वात्तथात्वम्।) चन्द्रः। इति त्रिकाण्डशेषः॥

खचरः, पुं, (खे आकाशे चरतीति। चर+ "चरेटः।" ३।२।१६। इति टः।) मेघः। इति शब्दचन्द्रिका॥ वायुः। राक्षसः। सूर्य्यः। एतेषां प्रमाणं यथा। महाभारते द्रोणपर्व्वणि।

"खचरस्य सुतस्य सुतः खचरः
खचरस्य पिता न पुनः खचरः।
खचरस्य सुतेन हतः खचरः
खचरी परिरोदिति हा खचर!॥"

आकाशगामिनि त्रि। यथा। स्मृतिः।
"पवनो दिक्पतिर्भूमि-राकाशं खचरामराः॥"
रूपकभेदः। यथा। सङ्गीतदामोदरः।
"खचरो रङ्गताले स्यात् गुरुरादौ लघुस्तथा।
ग्रान्तेऽथवा ह्यास्यरसे भवेदेष दशाक्षरः॥"

खचितं, त्रि, (खच्+क्तः।) संयुक्तम्। तत्पर्य्यायः करम्बितम् २ रूषितम् ३ गुरुगुम्फितम् ४। इति त्रिकाण्डशेषः॥ करम्बम् ५ कवरम् ६ मिश्रम् ७ संपृक्तम् ८। इति हेमचन्द्रः॥ व्याप्तम् ९। इति शब्दरत्नावली॥ गुम्फितम् १० छुरितम् ११। इति जटाधरः॥

खज, मन्थे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) मन्थो विलोड़नम्। खजति जलं मत्स्यः। इति दुर्गादासः॥

खज, इ पाङ्गुल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्। इदित्।) इ, खञ्जते। पङ्गुः खोड़ः भावप्रधाननिर्द्देशात् पङ्गुत्वमिति यावत्। सो-ऽस्यास्तीति चूड़ादित्वात्। पङ्गुत्वस्य भावः पाङ्गुल्यं खोटनमित्यर्थः। खञ्जति खोड़ः। भावप्रधाननिर्द्देशो यथा। वृद्धसवर्णे इति का-तन्त्रसूत्रम्। अत्र असवर्णे परे उवर्णो वकारत्वं प्राप्नोतीत्येवार्थः। इति दुर्गादासः॥

खञ्जः, पुं, (खञ्यते निर्म्मथ्यतेऽनेन। खञ्+करणे अप्। यद्वा, खञ्जति मथ्नातीति। खञ्+अच्।) दर्व्विः। इत्यमरटीकायां भरतः॥ हाता इति भाषा॥ (यथा, महाभारते। १२।२१४।२१।
"पयस्यन्तर्हितं सर्पिर्यद्वद् निर्म्मथ्यते खञ्जैः।
शुक्रं निर्म्मथ्यते तद्वद्धंसकल्पैः खजैः॥"
"खञ्जनामथ चाख्यां तन्निबोधयुपयोजिनम्॥"
इति वाभट्टे चिकित्सास्थाने तृतीयोऽध्याये॥

खञ्जकः, पुं, (खञ्जति मथ्नातीति। खञ्+ण्वुल्।) मन्थानदण्डः। इति हेमचन्द्रः॥

खञ्जर्प, क्ली, (खञ्यते मथ्यते इति। "उषिकुटि-दलिकपिखलिभ्यः कपन्।" उणां ३। १४२। इति कपन्।) घृतम्। इत्युणादिवृत्तिः॥

खजलं, क्ली, (खे आकाशे निहितं यज्जलम्।)

गौड़ारः। इति त्रिकाण्डशेषः॥ आकाशचारि, यथाह राजवल्लभः। [लुताद्य।
"वर्षासु चरन्ति घने: सहोरगा वियति कीट-तड़ित्पतङ्गशलभमशकखञ्जनमगखद्योदयात् पूर्व्वम्॥"
खञ्जा, स्त्री, (खञ्ज्+भावे अप् टाप् च।) मन्थः। मठ्ठीया इति भाषा॥ प्रहस्तः। इति मेदिनी॥ (खञ्ज्+करणे अप् स्त्रियां टाप्।) दर्व्वी। इति हेमचन्द्रः॥ (यथा, त्रिकाण्डशेषस्थाने षड्-विंशेऽध्याये सुश्रुतेनोक्तम्।
"गुन्द्राफलं गोक्षुरकाच्च बीजं
तथोच्चटां गोपयसा विपाच्य।
खञ्जाहतं शर्करया च युक्तं
पीत्वा नरो हन्यति सर्व्वरोगम्॥")
पाकसाधनद्रव्यविशेषः। यथा, महाभारते। ४। ७। १।
"खञ्जाञ्च दर्व्वीञ्च करेण धारय-न्नसिञ्च कालाङ्गमकोधमन्नयम्।")
भारत्वम्। इति शब्दरत्नावली॥
खञ्जाकः, पुं, (खञ्ज् मन्थे+"खञ्जेराकः।" उणा ४। १३। इति आकः।) पक्षी। इत्युणादिवृत्तिः॥
खञ्जाका, स्त्री, पुं, (खञ्जति मथ्नाति पाकम्। खञ्ज् मन्थे+"खञ्जेराकः।" उणा ४। १३। इति आकः ततष्टाप्।) दर्व्वी। इत्यमरः। २। ६। १४६। हाता चमस इत्यादि भाषा॥
("खञ्जाकः पक्षिणि ख्यातः खञ्जाका दर्व्विरुच्यते॥" इत्युणादिवृत्तिटीका।)
खञ्जित्, पुं, (खेन आकाशध्यानेन शून्यभावनयेति भावः जयति संसारभावं यः। जि+क्विप्। शून्य-वादिनां बौद्धानां शून्यं सर्व्वमेव इत्याकार-भावनया संसारभावजयनात् तथात्वम्।) बुद्ध-विशेषः। इति हेमचन्द्रः। २। १४६॥
खद्योतिः, [स्] पुं, (खे आकाशे द्योतियस्य।) खद्योतः। इति राजनिर्घण्टः॥
खञ्जः, त्रि, (खञ्ज गतिवैकल्ये+अच्।) विकल-गतिः। खोंड़ा इति भाषा॥ यथा, मनुः। ३। २४२।
"खञ्जो वा यदि वा काणो हीनः श्रेष्ठोऽपि वा भवेत्॥")
तत्पर्य्यायः। खोड़ः २। इत्यमरः। २। ६। ४६। खोलः ३। इति शब्दरत्नावली॥ खोरः ४ खञ्जकः ५। इति हेमचन्द्रः॥ खोटः ६। इति खोड़धात्वर्थदर्शनात्॥ तस्य लक्षणं यथाह माधवकरः।
"वायुः कफान्वितः सक्थ्नः कक्षरामाश्रितेऽतदा। खञ्जत्वदा भवेच्छ्वासः पङ्गुसक्थ्नोर्हयोर्वधात्॥"
खञ्जकः, त्रि, (खञ्जतीति। खञ्ज्+कर्त्तरि ण्वुल्। स्वार्थे कन् वा।) खञ्जः। इति हेमचन्द्रः। ३। ३११६॥
खञ्जकारिः, पुं, (खञ्जकस्य अरिः नाशकः।) सुश्रुता। इति राजनिर्घण्टः॥ खेंसारि इति भाषा॥
खञ्जखेटः, पुं, (खञ्ज इव खेटति गच्छति वृक्षान्निव भूमौ चरतीत्यर्थः। खिट्+अच्।) खञ्जन-पक्षी। इति शब्दमाला॥
खञ्जखेलः, पुं, (खञ्ज इव खेलति तद्वच्चलनादि-त्वर्थः। खेल्+अच्।) खञ्जनपक्षी। इति त्रिकाण्डशेषः॥
खञ्जनं, क्ली, (खञ्ज विकलगतौ+भावे ल्युट्।) गमनम्। इति मेदिनी। ने। ५५॥
खञ्जनः, पुं, (खञ्जि+कर्त्तरि ल्युः।) खनामख्यात-पक्षी। तत्पर्य्यायः। खञ्जरीटः २। इत्यमरः। २। ५। १५॥ कणाटीनः ३ काकच्छर्दिः ४ खञ्जखेलः ५ तातनः ६ सुनिपुत्रकः ७ भद्रनामा ८ रत्न-निधिः ९। इति त्रिकाण्डशेषः॥ खञ्जखेटः १० गूढ़नीड़ः ११ तक्कः १२ चरः १३। इति शब्दमाला॥ काकच्छदः १४ नीलकण्ठः १५ कणाटीरः १६ कणाटारकः १७। इति शब्द-रत्नावली॥ (अस्य दर्शनेन यत् शुभाशुभं फलं भवति तदुक्तं बृहत्संहितायां ४५ अध्याये। तद्यथा,—
"खञ्जनको नामायं यो विहगस्तस्य दर्शने प्रथमे।
प्रोक्तानि यानि मुनिभिः फलानि तानि प्रवक्ष्यामि॥"
तत्र चत्वारः खञ्जना भवन्ति। तेषां नामान्याह।
"खूलोऽभ्युन्नतकण्ठः क्षणगलो भद्रकारको भद्रः। खसुखात् क्षणः सम्पूर्णः पूरयत्याशाम्॥ गलेऽस्य विन्दुः सितकरटान्तः स रिक्त-स्त्रिरिक्तः।
पीतो गोपीत इति क्षीणकरः खञ्जनो दृष्टः॥"
अथ कस्मिन् काले दृष्टः कीदृक्फलं करोति इत्याह।
"अथ मधुरसुरभिफलकुसुमतरुषु सलिलाशयेषु पुण्येषु।
करितुरगक्षत्रगन्धर्द्वि प्रासादोद्यानहर्म्येषु॥
गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे।
हस्तितुरङ्गमशालाच्छत्रध्वजचामरादेषु॥
हेमसमीपसिताम्बरकमलोत्पलपूजितोपलिप्तेषु।
दधिपात्रधान्यकूटेषु च श्रियं खञ्जनः कुरुते॥
पद्मे खाण्डवाग्निगोरससम्पच्च गोमयोपगते।
शाद्वलगे वस्त्राग्निः शुक्लटस्थे देशविभ्रंशः॥
शष्पपटलेऽर्थभंशो वप्रे बन्धोऽशुचौ भवति रोगः।
दृष्टे खञ्जनविकानां प्रियसङ्गमभावहत्यासु॥
महिषोष्ट्रगर्दभास्थिभस्मानलदहनकोणशर्करा-द्रिस्थः।
प्राकारभस्मकेशेषु चाशुभो मरणरुग्भयदः॥
पक्षौ धुन्वन्नशुभः शुभः पिबन् वारि निम्बगासंस्थः।
सूर्य्योदयेऽथ शुक्लो नेत्रफलः खञ्जनोऽस्तसमये॥
नीराजने निविष्टे यथा दिशा खञ्जनं नृपो यान्तम्।
पश्येत्तया गतस्य च्छिप्रमरातिर्वशमुपैति॥
तस्मिन् निधिर्भवति मैथुनमेति यस्मिन्
यस्मिंस्तु हन्ति (तत्र तलेऽस्ति काचः।
अङ्गारमप्युपदिशन्ति पुरीषमस्य
तत्कौतुकापनयनाय खनेदुरिचीम्॥
दृष्टविकलविभिन्नरोगितः
खतनुसमानफलप्रदः खगः।
धनलवदभिनिलीयमानको
वियति च वस्त्रसमागमप्रदः॥
नृपतिरपि शुभं शुभप्रदेशे
खगमवलोक्य मही तले विदध्यात्।
सुरभिकुसुमधूपयुक्तमर्घं
शुभमभिनन्दितमेवमेति दृष्टिम्॥
अशुभमपि विलोक्य खञ्जनं
द्विजगुरुसाधुसुरार्चने रतः।
न नृपतिरशुभं समाप्नुया-
न्न यदि दिनानि च सप्त मांसभुक्॥")
ततः कालफलप्रदर्शनार्थमाह। [दिनशेषे।
"आ वर्षात् प्रथमे दर्शने फलं प्रतिदिनं तु दिक्स्थानमूर्त्तिलक्षणैर्ज्ञात्वादीप्रादिभिर्बोध्यम्॥"
प्राकृते दिग्विशेषेऽस्य शुभफलं यथा,—
"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुले अग्नौ हुताग्नेर्भयं याम्यामग्निभयं सुरद्विषि कलिर्लाभः समुद्रालये।
वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे-ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने॥")
खञ्जनरतं, क्ली, (खञ्जनस्य रतमिव गोपनीयं अयुक्तं रतं रतिः।) यतिनां गोप्यं रतम्। यतिनां गोपनीयमैथुनम्। इति हारावली॥
खञ्जना, स्त्री, (खञ्जन इवाचरति। खञ्जन+क्यच्+क्विप् टाप् च। यद्वा, खञ्जि+युच्+टाप्।) सर्षपी। क्षुद्रखञ्जनजातिः। इति मेदिनी॥
खञ्जनाकृतिः, स्त्री, (खञ्जनस्याकृतिरिवाकृतिरस्य।) खञ्जनविशेषः। इति शब्दचन्द्रिका॥ तत्-पर्य्यायः। हापुत्रिका २ खञ्जनिका ३ सर्षपी ४। इति शब्दरत्नावली॥
खञ्जनिका, स्त्री, (खञ्जनस्येदमाकारोऽस्यस्याः इति। खञ्जन+ठन् टाप् च।) खञ्जनाकारपक्षि-विशेषः। तत्पर्य्यायः। हापुत्रिका २ तुलिका ३ क्षोटिका ४ सर्षपी ५। इति त्रिकाण्डशेषः॥ खञ्जनाकृतिः ६। इति शब्दचन्द्रिका॥
खञ्जरीटः, पुं, (खञ्ज इव ऋच्छतीति। ऋ गतौ+बाहुलकात् कीटन्।) खञ्जनपक्षी। इत्यमरः। २। ५। १५॥ (यथा, अमरुशतके। ६६।
"तन्वी शरत्तुचिपथगापुलिने कपोलौ
लोले दृशौ रुचिरचञ्चलखञ्जरीटौ॥")
खट, काङ्क्षे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) खटति। काङ्क्षति आकाङ्क्षायाम्। इति दुर्गादासः॥
खटः, पुं, (खट्+अच्।) अन्धकूपः। कक्षः। प्रहारान्तरम्। टङ्कः। इति मेदिनी॥ लवणम्। इति हेमचन्द्रः॥ लाङ्गलम्। कर्त्तृकम्। इत्य-जयपालः॥
खटकः, पुं, (खट्+बाहुलकात् वुन्।) घटकः। तत्पर्य्यायः। नागवीटः २ टाङ्करः ३ व्याचरः ४। इति त्रिकाण्डशेषः॥ कुत्सितपाखिः। इति शब्द-माला॥
खटिकः, पुं, (खटः अन्धस्य इति ठन्।) कुत्सित-पाखिः। इति हेमचन्द्रः॥
खटिका स्त्री, (खट्+अच्। ततः संज्ञायां कन् टाप् अत इत्वञ्च।) लेखनद्रव्यम्। खड़ी इति भाषा। (यथा, कलाविलासे। २। २३।

"विविधनवांशुकस्रगमदचन्दनकर्पूरमरिच पूगफलैः।
खटिकाहस्तः स सदा गच्छति कोटीर्मुहूर्तेन॥")
कर्बुरत्वम्। वीरणम्। इति विश्वः॥

खटिनी, स्त्री, (खट्+बाहुलकात् इनिः। ङीप् च।) खटी। इति राजनिर्घण्टः॥ (यथा, हितोपदेशे।
"न पतति खटिनी ससम्भमा यस्य महद्गणनायाम्॥")

खटी, स्त्री, (खट्+अच्। गौरादित्वात् ङीष्।) लेखनद्रव्यम्। खड़ी इति भाषा। तत्पर्य्यायः। खटिनी२ खटिका३ धवलमृत्तिका४ सितधातुः५ पाण्डुमृत्६ पाण्डुमृत्तिका७। अस्या गुणाः। मधुरत्वम्। तिक्तत्वम्। शीतलत्वम्। पित्तदाहव्रणदोषकफासनेत्ररोगनाशित्वञ्च। इति राजनिर्घण्टः॥ अस्याः पर्य्यायान्तराणि कठिनीशब्दे द्रष्टव्यानि॥ (यथास्याः पर्य्यायो गुणाश्च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"खटिका कठिनी चापि लेखनी च निगद्यते।
खटिका दाहजिच्छीता मधुरा विषशोथजित्॥
लेपादेतद्गुणाः प्रोक्ता भक्षिता रक्तिका समा।
खटी गौरखटी द्वे च गुणैस्तुल्ये प्रकीर्त्तिते॥")

खट्ट, क वृतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) टवर्गाद्यः। क, खट्टयति। इति संवरणम्। इति दुर्गादासः॥

खट्टनः, त्रि, (खट्टयते क्रियते मूल्यादिभिः इति। खट्ट वृतौ+कर्म्मणि ल्युट्।) खर्व्वः। इति हेमचन्द्रः। छोट इति भाषा॥ खट्टत इति पाठोऽपि दृष्टः॥

खट्टा, स्त्री, (खट्ट+टाप्।) खट्वा। इति शब्दचन्द्रिका॥

खट्टाग्रः, पुं स्त्री, (खट्टः आत्मा वृतः सन् अश्नाति इति। अश्+अच्। अश्नुते व्याप्नोति गात्रगन्धेन वा। अशूङ् व्याप्तौ+अच्।) वनजन्तुविशेषः। खटाग्र इति गन्धगोकुला इति च भाषा। तत्पर्य्यायः। गन्धोतुः२ वनवासनः३। इति त्रिकाण्डशेषः॥ खट्टाशी४ वनाखुः५। इति शब्दरत्नावली॥ खट्टासः६ गन्धमार्जारः७ वनजा८ शालिः९। इति जटाधरः॥ पुण्यलकः१०। इति दुर्गादासधृतवचनम्॥

खट्टाशः, पुं, (खट्टाग्र+एषोदरादि प्रकारस्य सत्वम्। यद्वा, खट्ट वासति दीप्यते प्रकाश्यते। अस दीप्तौ+अच्।) खट्टाग्रः। इति जटाधरः॥ (लक्षणमस्य यथा भैषज्यरत्नावल्यां वातव्याध्यधिकारे।
"खट्टाशोऽनूपजः श्रेष्ठो वर्त्तुलो मांसलश्च यः।
सम्मतो मध्यदेशीयो मध्यमो मरुजोऽधमः॥")

खट्टिः, पुं, (खट्ट+इन्।) शयनम्। तत्पर्य्यायः। अञ्जसा२ दाशठः३। इति त्रिकाण्डशेषः॥

खट्टिकः, त्रि, (खट्टनं आवरणं खट्टः स श्लिष्यत्वेनास्यास्तीति। ठन्।) शाकुनिकः। इति शब्दमाला। पाखिमारा इति भाषा॥

खट्टिका, स्त्री, (खट्ट+स्वार्थे खल्पार्थे वा कन्+टाप् अत इत्वञ्च।) क्षुद्रखट्वा। तत्पर्य्यायः। निषद्वा२ सन्दी३। इति त्रिकाण्डशेषः॥ आसन्दी४। इति जटाधरः। शयनम्। इति शब्दमाला॥

खट्टेरकः, त्रि, (खट्ट+बाहुलकात् कर्म्मणि एरक्।) खर्व्वः। इति शब्दमाला॥

खट्वा, स्त्री, (खट्यते काङ्क्ष्यते शयनार्थिभिरिति। खट काङ्क्षायां+"अशूप्रुषिलटीति।" उणां १।१५१। इति क्वन्।) काष्ठादिरचितशय्याधारः। खाट् इति भाषा। तत्पर्य्यायः। शयनम्२ मञ्चः३ पर्य्यङ्कः४ पल्यङ्कः५। इत्यमरः। २।६।१३८॥ तल्पम्६ शयः७। इति शब्दरत्नावली॥*॥ तद्युक्तिर्यथा,—
"अष्टाभिः काष्ठखण्डैश्च खट्टेति प्रतिपद्यते॥"

अथैषां नामानि।
"तिष्ठेत् यदालम्ब्य खट्वा तन्नेयं चरणाह्वयम्।
शिरःस्थं शुषधानं स्यात् अधःस्थं स्यात् निरूपकम्॥
आलिङ्गने उभे पार्श्वे प्राह भोजमहीपतिः।
आलिङ्गने चतुर्हस्ते शुषधाननिरूपके॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति।
सर्व्वयोढ़ग्रिका खट्वा सर्व्वत्राभयदायि॥
आलिङ्गने सार्द्धवेदे शुषधाननिरूपके।
सार्द्धहस्ते च चरणा हस्तैकपरिसम्मिताः॥
सर्व्वादग्रिका खट्वा सर्व्वकामफलप्रदा।
आलिङ्गने पञ्चहस्ते शुषधाने निरूपके॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति।
सर्व्वविंशतिका खट्वा धनधान्यजयप्रदा॥
आलिङ्गने पञ्चहस्ते शुषधाने निरूपके।
त्रिहस्तसम्मिते पादा हस्तैकपरिसम्मिताः॥
सर्व्वविंशतिका खट्वा एवमप्युपजायते।
आलिङ्गने सार्द्धपञ्चे शुषधाने निरूपके॥
तदर्द्धेन तदर्द्धेन चत्वारश्चरणा इति।
सर्व्वद्वाविंशिका खट्वा सर्व्वसम्पत्प्रदायिनी॥
आलिङ्गने च षड्हस्ते शुषधाने निरूपके।
त्रिहस्तसम्मिते पादाश्चत्वारश्चरणा इति॥
चतुर्विंशतिका खट्वा सर्व्वरोगक्षयङ्करी।
आलिङ्गने सप्तहस्ते शुषधाने निरूपके॥
त्रिहस्ते सार्द्धहस्ताश्च चत्वारश्चरणा इति।
सर्व्वषड्विंशिका खट्वा सर्व्वसौभाग्यकारिका॥
आलिङ्गने सार्द्धसप्ते शुषधाने निरूपके।
सार्द्धत्रिहस्ते सार्द्धाश्च चत्वारश्चरणा इति॥
सर्व्वाष्टाविंशिका खट्वा सर्व्वभोगप्रदायिका।
आलिङ्गने चाष्टहस्ते शुषधाने निरूपके॥
चतुर्हस्ते सार्द्धहस्ताश्चत्वारश्चरणा इति।
सर्व्वत्रिंशतिका खट्वा सर्व्वकामार्थदायिनी॥
एवमष्टविधाः खट्वाः समासेनोपदर्शिताः।
आदित्यादिदशाजानां वृणां सम्पत्तिदायिकाः॥
कार्य्याः शिल्पिभिरेतासु विविधाकृतिकल्पनाः।
सर्व्वयोढ़ग्रिका खट्वा सर्व्वेषामेव युज्यते॥
अष्टौ खण्डानि यस्याः स्युश्चतुर्हस्तयुतानि च।
श्रीसर्व्वमङ्गला नाम खट्वेयं पृथिवीपतेः॥
इयं यदा सच्छदना तदा सर्व्वजयाभिधा।
यात्रासिद्धिः सर्व्वसिद्धिर्विजया चाष्टमङ्गला॥*॥
एकैकहस्तवृद्ध्या तु भवेन्नवमतः परम्।
जयोऽथ मङ्गलः प्रेयान् चित्रकान्तः परो महान्॥
एकैकहस्तवृद्ध्या तु मञ्चानामिति लक्षणम्।
सा तुङ्गा त्रुटितुङ्गा च शिखरी विषयेऽथवा॥
एकैकहस्तवृद्ध्या तु टङ्क इत्यभिधीयते।
यात्रासिद्धिं समारभ्य येऽमी षोड़श कीर्त्तिताः॥
आदित्यादिदशाजानामाद्यन्तैकद्वयं क्रमात्।
दूरदर्शी दीर्घदर्शी दुर्लङ्घ्योऽथ दुरासदः॥
यथोत्तरं दशगुणाः पादैकपरिणाहिनः।
प्रासादसंज्ञकाः कार्य्या राज्ञा सुखमभीप्सता॥
चत्वार एते सर्व्वेषां भूपतीनां सुखावहाः॥"*॥
भोजमते च।
"सर्व्वविंशतिकां यावत् आरभ्याभयषोड़शीम्।
खट्वानामिति नामानि अष्टौ हस्तद्वयाधिकाम्॥"
तद्यथा,—
"मङ्गला विजया पुष्टिः क्षमा तुष्टिः सुखासनम्।
प्रचण्डा सर्व्वतोभद्रा खट्वानामाष्टकं विदुः॥"
आसां विभागः पूर्व्ववत्॥*॥
पराशरसंहितायान्तु।
"अष्टाभिः काष्ठखण्डैस्तु योऽत्यन्तिको विजायते।
स चेत् समो भवेत् खट्वा प्रशस्या स्यादतोऽन्यथा॥
समे सर्व्वायसम्पत्तिर्विषमे विषमाण्यदम्।
तस्मात् खट्वाङ्गविन्यासः समः कार्य्यः सूरिभिः॥"
इदन्तु सामान्यं सर्व्वसम्मतञ्च। काष्ठनियमस्तु पूर्व्ववदेव। इत्यासनयुक्तौ खट्वोद्देशः॥*॥
तस्या दोषगुणा यथा,—
"खट्वायां यो गुणो दोषो मानञ्च परिकीर्त्तितम्।
तेनैव खट्वा काष्ठोत्था तथैव गुणमावहेत्॥
अनेनैव विधानेन कार्य्यं बहुविधासनम्।
विना नौकां समं कार्य्यं सर्व्वञ्चैवासनं गुरु॥"
इति तत्रैव युक्तिकल्पतरुः॥
अस्या गुणाः। वातलत्वम्। इति राजवल्लभः॥ प्रेङ्खा। इत्यमरटीका॥ कोलश्निका। इति राजनिर्घण्टः॥

खट्वाङ्ग, क्ली, (खट्वाया अङ्गम्। तदिवाकृतिर्यस्य इति।) शिवस्याखविशेषः। तत्पर्य्यायः। सुखंसुप्त२॥ इति हेमचन्द्रः॥ (यथा, मार्कण्डेये। ८७। ६।
"विचित्रखट्वाङ्गधरा नरमालाविभूषणा॥")

खट्वाङ्गः, पुं, (खट्वाङ्ग इत्याख्यास्य। शिवस्य खट्वाङ्गास्त्रवत् सर्व्वत्र दुर्लङ्घ्यप्रासगत्वात् अमोघवीर्य्यत्वाच्चास्य तथात्वम्।) सूर्य्यवंशीयराजविशेषः। स तु विश्वसहराजपुत्रः। यथा,—
श्रीमद्भागवते। ९।९।४१।
"ततो दशरथस्तस्मात् पुत्र ऐड़विड़स्ततः।
राजा विश्वसहो यस्य खट्वाङ्गश्चक्रवर्त्त्यभूत्॥"

खट्वाङ्गभृत्, पुं, (खट्वाङ्गं बिभर्त्ति इति। भृ+क्विप्।) शिवः। इति हेमचन्द्रः॥

खट्वाङ्गी, [न्] पुं, (खट्वाङ्गं अस्त्रविशेषः सोऽस्यास्तीति इनिः।) शिवः। इति हारावली॥ (प्रायश्चित्तार्थं धारणीयं खट्वाङ्गाकृतिकाष्ठखण्डविशेषः। यथा, मनुः। ११।१०५।

"खट्वाङ्गी चीरवासा वा जटिलो विजने वने।
प्राजापत्यं चरेत् कृच्छ्रमब्दमेकं समाहितः॥")

खट्वारूढः, त्रि, (खट्वामारूढः। "खट्वा क्षेपे।" २।१।२६। इति निन्दायां द्वितीयान्तस्य क्तान्तेन नित्यसमासः।) अविनीतः। प्रमादवान्। इति चिकाण्डशेषभूरिप्रयोगौ॥ (यथा, भट्टौ। ५।१०।
"वृतखं पात्रेसमितेः खट्वारूढः प्रमादवान्।
प्राणग्रीष्मः श्रियं नेता नात्यन्तीनत्वमुन्मनाः॥"
"खट्वारूढः उत्पथस्थितः। खट्वा क्षेपे इति द्वितीया।" इति जयमङ्गलटीकायां॥) खट्वारूढो नरो जात्यः। इति कालापव्याकरणम्॥ (वेदं व्रतानि च समाप्य समाप्तेन हि खट्वा रोढ्व्या ब्रह्मचर्य्य एव भूमिशयनार्होऽपि यः खट्वामारोहतीति स जात्यः। रूढ्व्यायं तेन खट्वामारोहतु मा वा निषिद्धानुष्ठानपरः सर्व्वोऽपि खट्वारूढ उच्यते। इति ग्रन्थार्थचिन्तामणिः॥) खट्वोपरिस्थितश्च॥

खट्विका, स्त्री, (अल्पा खट्वा। अल्पार्थे कन्। अत इत्वञ्च।) क्षुद्रखट्वा। इति जटाधरः॥ खट्वाविशेषः। तदयुक्तिर्यथा,—
"ब्रह्मक्षत्रियवैश्यानां चतुःषड्रकोणिकाः।
खट्विकाः सुखसम्भूताः शुक्लरक्तासिताम्बराः॥"
इति युक्तिकल्पतरौ खट्विकोद्देशः॥

खड, ह ड मदि। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्। इदित्।) मदि मत्थने मत्थनञ्चेह भञ्जनम्। ह, खड्यते। ड, खड्यते दक्षेण भाण्डं लोकः। इति दुर्गादासः॥

खड, क भेदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, खाड्यति। इति दुर्गादासः॥

खड़, क्ली, पुं, (खड्यते छिद्यते धान्ये पक्वे सति इति। खड+कर्म्मणि अप्।) लघुलशुनम्। इति ग्रन्थरत्नावली। खड़ इति भाषा॥

खड़ः, पुं, (खड+भावकर्म्मादौ यथायथं अप्।) पानान्तरम्। भेदः। इति मेदिनी। ड़े। ८॥
खड्यूषो यथा, चक्रदत्ते।
"तक्रं कपित्थाङ्गेरीमरिचाजाजिचित्रकैः।
सुपक्वं खड्यूषोऽयमयं काम्बलिकोऽपरः॥"

खड़क्किका, स्त्री, (खड़क् इत्ययत्तग्रन्थं करोतीति। क+बाहुलकात् ङः ततो गौरादित्वात् ङीष्। ततः स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च।) पद्मद्वारम्। इति हारावली॥ खड़क्किद्वार इति भाषा॥

खड़तूः, पुं, (खड+अतृप्रत्ययः।) बाहुजङ्घाभरणम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

खड़िका, स्त्री, (खड़+अप्+गौरादित्वात् ङीष्। ततः स्वार्थे कन् पूर्व्वह्रस्वः।) कठिनी। इति जटाधरः॥

खड़ी, स्त्री, (खड़+अप्+ततो ङीष्।) कठिनी। खनामख्यातश्वेतवर्णमृत्तिकाविशेषः। इति ग्रन्थचन्द्रिका॥ अस्या गुणपर्य्यायौ कठिनीशब्दे खटीशब्दे च द्रष्टव्यौ॥

खड़ूः, स्त्री, (खड़+"खडेर्डुडुः।" उणां।१।८४। इति ऊः।) मृतशय्या। (बाहुजङ्घाभरणम्। इत्युज्ज्वलदत्तः॥)

खड्गं, क्ली, (खड़ भेदे+"छापूखड़िभ्यः कित्।" उणां।१।१२३। इति गन् प्रत्ययः।) लोहम्। इति राजनिर्घण्टः॥

खड्गः, पुं, (खड़ति भिनत्तीति। खड़+"छापू-खड़िभ्यः कित्।" उणां।१।१२३। इति गन्।) गण्डकः। गण्डार इति भाषा॥ (यथा, मनुः। ३। २७२।
"कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्व्वशः॥"
"खड्गो गण्डकः लोहो लोहितवर्णश्छाग एव।"
इति कुल्लूकभट्टः॥) गण्डकचर्म्मजम्। खाग इति भाषा। युद्धभेदः। इति मेदिनी॥ चोरकनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ अस्त्रविशेषः। खाँड़ा तरवाल इत्यादि भाषा॥ (यथा, महाभारते। ४। ४१। २५।
"यस्यायं विपुलः खड्गो गात्रे कोषे समर्पितः।
सहदेवस्य विज्ञेयं सर्व्वभारसहं दृढम्॥")
तत्पर्य्यायः। निस्त्रिंशः २ चन्द्रहासः ३ असिः ४ ऋष्टिः ५ कौक्षेयकः ६ मण्डलाग्रः ७ करवालः८ कृपाणः९। इत्यमरः।२।८।८९॥ ऋष्टिः१० करपालः ११। इति तट्टीका॥ विघसनः १२ तीक्ष्णधारः१३ दुरासदः१४ श्रीगर्भः१५ विजयः१६ धर्म्मपालः १७ कौक्षेयः १८ तरवारिः १९ तवराजः २० कृपाणकः २१ कृपाणी २२ यष्टिः२३। इति ग्रन्थरत्नावली॥ * ॥ तस्योत्पत्तिर्ब्रह्मणो यज्ञाग्नौ यथा,—
"विकीर्य्याग्निं तथाभूतमुत्थितं प्रयते तदा।
नीलोत्पलसवर्णाभं तीक्ष्णदंष्ट्रं क्षुरोदरम्॥
प्रांशुं सुदुर्द्धर्षतरं तथैव भ्रमितौजसम्।
ततस्तद्रूपमुत्सृज्य बभौ निस्त्रिंश एव सः॥
विमलस्तीक्ष्णधारश्च कालान्तक इवोद्यतः।
ततः स ग्निकक्षाय रुद्रायर्षभकेतवे॥
ब्रह्मा ददावसिं तीक्ष्णमधर्म्मप्रतिवारणम्।
ततः स भगवान् रुद्रो दानवक्षतजोचितम्॥
असिं धर्म्मस्य गोप्तारं ददौ सत्कृत्य विष्णवे।
विष्णुर्मरीचये स महर्षिभ्यः ते इन्द्राय स लोकपालेभ्यः ते मनवे सूर्य्यपुत्राय स क्षुपाय स इक्ष्वाकवे स पुरूरवसे स आयवे स नहुषाय स ययातये स पूरवे स अमूर्त्तरयसे स भूमिशयाय स भरताय स ऐड़विड़ाय स धुन्धुमाराय स काम्बोजाय स सुचुकुन्दाय स मरुत्ताय स रैवताय स यौवनाश्वाय स रघवे स हरिताश्वाय स शुनकाय स उशीनराय स भोजाय स शिबये स प्रतर्द्दनाय स अष्टकाय स ऋतध्वजाय स भरद्वाजाय स द्रोणाय स कृपाय स पाण्डवेभ्यो दत्तवान्॥ * ॥ अथ खड्गविषयकत्रयोदशविधसञ्चरणं यथा, महाभारते।
"मण्डलाकारतः खड्गभ्रामणं भ्रान्तमुच्यते।
तदेव बाहुसदृश्य ऋतसृद्भ्रान्तमीरितम्॥
भ्रामणं खस्य परितः खड्गस्यावहमुच्यते।
परप्रयुक्तशस्त्रस्य वारणार्थमिदं त्रयम्॥
ग्रभोराक्रमणार्थाय गमनन्त्वाहुतं मतम्।
खड्गस्यायेण तद्देहस्पर्शनं प्रहृतं मतम्॥
वञ्चयित्वा रिपौ शस्त्रपातनं गदितं बुधैः।
परिवृत्यं भवेत् शत्रोर्वामदक्षिणतो गतिः॥
पश्चात् यदपसरणं निहतं संप्रचक्षते।
अन्योऽन्यताड़नं प्राहुः सम्पातमुभयोरपि॥
आधिक्यमात्मनो यत् तत् समुदीर्णमुदीरितम्।
अङ्गप्रत्यङ्गदेशेषु भ्रामणं भारतं स्मृतम्॥
विचित्रखड्गसञ्चारदर्शनं कौशिकं स्मृतम्।
निलीय चर्म्मणि क्षेपो यदसेः सात्वतं हि तत्॥"
तस्य परीक्षा तरवारिशब्दे द्रष्टव्या॥ (अस्य लक्षणादिकं यथा, वृहत्संहितायां ५०अध्याये।
"अङ्गुलप्रतार्धमुत्तमजङ्घः स्यात्षड्विंशतिं खड्गः।
अङ्गुलमानाज्ज्ञेयो व्रणोऽशुभो विषमपर्व्वस्थः॥
श्रीवृक्षवर्द्धमानातपत्रशिवलिङ्गकुण्डलाजानाम्।
सदृशा व्रणाः प्रशस्ता भवन्त्यघस्वस्तिकानाञ्च॥
शकलासकाककङ्कक्रव्यादकबन्धदृष्टिकाक्षतयः।
खड्गे व्रणा न शुभदा वंशानुगाः प्रभूताश्च॥
स्फुटिसो दृश्यः कृष्णो वंशच्छिन्नो न दृश्यनोऽनुगतः।
अखण्ड इति चानिष्टः प्रोक्तविपर्य्यस्त इष्टफलः॥
क्षतिं मरणायोक्तं पराजयाय प्रवर्त्तनं कोशात्।
क्षयसङ्गरेषु युद्धं ज्वलिते विजयो भवति खड्गे॥
नाकारणं विदार्य्यान्न विधृत्येच्च
पक्षेन्न तच्च वदनं न वदेच्च मुख्यम्।
देशं न चास्य कथयेत् प्रतिमानयेच्च
नैवं सृशेन्नृपतिरप्रयतोऽसियष्टिम्॥
गोजिह्वासंस्थानो नीलोत्पलवर्णपत्रषड्ग्रन्थः।
करवीरपत्रमूलाग्रमण्डलाग्रः प्रशस्तः स्युः॥
निष्पन्नो न क्वेद्यो निकषे: कार्य्यः प्रमाणयुक्तः सः।
मूले म्रियते स्वामी जननी तस्यायतश्चिन्ने॥
यस्मिन् त्वरुप्रदेशे व्रणो भवेत्तद्देव खड्गस्य।
वनितानामिव तिलको गुह्ये वाच्यो सुखे दृष्टः॥
अथवा स्पृशति यदङ्गं प्रहृतो निस्त्रिंशभृत्यदवधार्य्यः।
कोशस्यस्यादेशो व्रणोऽसि घ्राणं विदित्वेदम्॥
शिरसि सृष्टे प्रथमेऽङ्गुले द्वितीये ललाटसंस्पर्शे।
भ्रूमध्ये च तृतीये नेत्रे सृष्टे चतुर्थे॥
नासोष्ठकपोलहनुश्रवणग्रीवांसकेषु पञ्चाद्याः।
उरसि हृदग्रसंस्थस्त्रयोदशे कक्ष्यौ त्रयोदश्यः॥
स्तनहृदयोदरकुक्षीनाभीषु चतुर्दशादयो त्रयोः।
नाभीमूले कट्यां गुह्ये चैकोनविंशतितः॥
ऊर्व्वोर्द्वाविंशे स्याद् ऊर्व्वोर्मध्ये त्रयस्त्रयोविंशे।
जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च॥
जङ्घामध्ये गुल्फे पार्ष्ण्यां पादे तदङ्गुलीष्वपि च।
षड्विंशतिकाद्यावच्चिंशतिरिति मतेन गर्गस्य॥
पुत्रमरणं धनाग्निर्धनहानिः सम्पदश्च वक्त्रेषु।
एकाद्यङ्गुलसंस्थैर्ज्ञेयं निर्दिशेत् क्रमशः॥
सुतलाभः कलहो हस्तिलब्धयः पुत्रमरणधनलाभौ।
क्रमशो विनाशवनितान्निचितदुःखानि षट्प्रभृति॥
लक्ष्मिहानिक्लेशलब्धयो वधो वृद्धिमरणपरितोषाः।
ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात्॥

वित्ताग्निरनिर्वाणं धनागमो मृत्युसम्पदोऽखिलम्।
ऐश्वर्यमत्युराण्यानि च क्रमात्तिंशदिति यावत्॥
परतो न विशेषफलं विषमसमस्यासु पाप-
शुभफलदा:।
केचिदफला: प्रदिशन्तिंशत्परतोऽयमितियावत्॥
करवीरोत्पलराजमदघृतकुङ्कुमकुन्दचम्पकसगन्धा:।
शुभदोऽनिष्टो गोगन्धपङ्कभेद:सदृशगन्ध:॥
कूर्मवसाकृष्णारोपमश्च भयदुःखदो भवति गन्ध:।
वैदूर्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकर:॥
इदमौशनसं च शस्त्रपानं
रुधिरेण श्रियमिच्छत: प्रदीप्ताम्।
हविषा गुणवत्सुताभिलिप्सो:
सलिलेनाक्षयमिच्छतश्च वित्तम्॥
वडवोष्ट्रकरेणुदुग्धपानं
यदि पापेन समीहतेऽर्थसिद्धिम्।
भवपित्तगजाश्ववस्तदुग्धै:
करिहस्तच्छिदये सतालगर्भै:॥
आर्कं पयो हुडुविषाणमहीसमेतं
पारावताखुशकृता च युतं प्रलेप:।
शस्त्रस्य तैलमधितस्य ततोऽस्य पानं
पश्चाच्छितस्य न शिलासु भवेद्विघात:॥
क्षारे कदल्या मथितेन युक्ते
दिनोषिते पायितमायसं यत्।
सम्यक् छितं चाश्मनि नेति भङ्गं
न चान्यलोहेष्वपि तस्य कौण्ठ्यम्॥")

खड्गकोष:, पुं, खड्गलता। तत्पर्य्याय:। खड्गपत्र: २ खड्गिमार: ३ अश्वपुच्छक: ४। इति शब्दचन्द्रिका॥ (खड्गस्य कोष:।) खड्गाधार:। खाप इति भाषा। अयं युत्पत्तिलभ्योऽर्थ:॥

खड्गट:, पुं, (खड्ग इव अटतीति। अट्+अच्। शकन्ध्वादित्वात् साधु:।) वृक्षत्काग्र:। इति ली॥

खड्गधेनु:, स्त्री, खड्गपुत्रिका। छुरि इति भाषा। (खड्गस्य गण्डकस्य धेनु: प्रकृ।) गण्डकस्त्री। इति मेदिनी॥ मादी गण्डार इति भाषा॥

खड्गपत्र:, पुं, (खड्गाकारागि पत्राणि अस्य।) खड्गलता। इति शब्दचन्द्रिका॥

खड्गपिधानं, क्ली, (खड्गस्य पिधानमाच्छादनम्।) खड्गकोष:। खाप इति भाषा।
हलायुध:॥
पर्य्यायकं क्ली (खड्गस्य पिधानकम्।) खड्गापवारणम्। खाप इति भाषा। तत्पर्य्याय:। प्रत्याकार: २ परीवार: ३ कोष: ४। इति हेमचन्द्र:॥

खड्गारीट:, त्रि, (खड्गं ऋच्छतीति। ऋ+कीटन्। निपातनात् पूर्व्ववृद्धि:। यद्वा खड्गारिरिवाचरति इति। कि: तत: कीटन्।) फलक:। असिधारावतधारी। इति मेदिनी॥

खड्गिक, पुं, महिषीक्षीरकेन:। गौनिक:। इति मेदिनी॥

खड्गिमार:, पुं, (खड्गिनं गण्डकं मारयतीति। मृ+णिच् "कर्म्मण्यण्।" ३।२।१। इत्यण्। अश्वविशेष:।) खड्गकोषलता॥ इति शब्दचन्द्रिका॥

खड्गी, [न्] पुं, (खड्गस्तदाकारं शृङ्गमस्यास्तीति। इनि:।) वनजन्तुविशेष:। गण्डार इति भाषा। तत्पर्य्याय:। गण्डक: २ खड्ग: ३। इत्यमर:।२।५।४॥ खड्गशृङ्ग: ४ क्रोडीमुख: ५ तुङ्गमुख: ६ बली ७ वज्रचर्म्मा ८ वाङ्मीनस:९। इति राजनिर्घण्ट:॥ एकचर: १० गण्डोत्साह: ११। इति त्रिकाण्डशेष:॥ गण्ड: १२ खनोत्साह: १३। इति शब्दरत्नावली॥ अस्य मांसगुणा:। बलकारित्वम्। हृंहणत्वम्। गुरुत्वम्। इति राजनिर्घण्ट:॥ कफवायुनाशित्वम्। कषायत्वम्। पित्तलोकलग्निकारित्वम्। पवित्रत्वम्। आयुर्हितत्वम्। मूत्रबन्धकारित्वम्। रूक्षत्वञ्च। इति राजवल्लभ:॥
("कफघ्नं खड्गिमिश्रितं कषायमनिलापहम्। पित्तं पवित्रमायुष्यं बलमूत्रं विरूक्षणम्॥" इति सुश्रुते सूत्रस्थाने षट्चत्वारिंशत्तमेऽध्याये॥ महादेव:। यथा, महाभारते।१३।१७।४२।
"अग्नी घृतघ्नी खड्गी पट्टिशी चायुधी महान्॥"
खड्गो विद्यतेऽस्य इति युत्पत्त्या तु वाच्यलिङ्ग:। यथा, भागवते। ८।१५।८।
"सुसन्नद्धोऽथ सन्नह्य धन्वी खड्गी धृतेषुधि:॥")

खड्गीय, क्ली, (खड्गस्तत् कर्म्मणि कुशलम्। बाहुलकात् ईक:।) दात्रम्। इति शब्दरत्नावली॥

खड्ग, क्ली, (खड्+घञ्। इदित्वात् नुम्।) विड्लवणम्।। इति राजनिर्घण्ट:॥ इक्षुविकार:। अस्य गुणा:। वृष्यतमत्वम्। चक्षुष्यत्वम्॥ वातपित्तनाशित्वञ्च। इति राजवल्लभ:॥
(अस्य गुणा: यथा,—
"खण्डन्तु मधुरं वृष्यं चक्षुष्यं हृंहणं हिमम्। वातपित्तहरं स्निग्धं बल्यं वान्तिहरं परम्॥"
मधुखण्डगुणा: यथा,—
"मधुजा शर्करा रूक्षा कफपित्तहरी गुरु:। क्षुद्रतीसारलड्दाहरक्तदुष्टत्वरा हिमा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

खण्ड:, पुं,क्ली, (खड्+घञ् इदित्वात् नुम्।) एकदेश:। तत्पर्य्याय:। भित्तम्२ शकलम्३। इत्यमर:।१।३।१६॥ (यथा, मार्कण्डेये।८३।२६।
"धुतश्मश्रुविभिन्नास्य खण्डखण्डं ययुर्घना:॥"
व्रजादिसमूह:। इत्यमर:। २।१०।४२॥)

खण्ड:, पुं, (खड्+घञ्।) इक्षुविकार:। खाँड़ इति भाषा। मणिदोष:। इति मेदिनी॥ (योगिविशेष:। यथा, हठयोगदीपिकायाम्।१।८।
"भानुकीनारदेवश्च खण्ड: कापालिकस्तथा॥")

खण्डक:, पुं, (खण्डेन निर्वृत्त: इति संज्ञायां क:।) निर्नख:। इति शब्दचन्द्रिका॥ सितखण्ड:। इति राजनिर्घण्ट:॥ (खण्डयतीति। खड्+ण्वुल्। छेदकारी॥)

खण्डकथा, स्त्री, (खण्डा खण्डिता कथा।) वाङ्मयभेद:। इति त्रिकाण्डशेष:॥

खण्डकर्ण:, पुं, (खण्ड इव कर्ण: कन्दो यस्य।) आलुविशेष:। शकरकन्द आलु इति भाषा॥ तत्पर्य्याय:। वक्रकन्द: २। इति रत्नमाला॥ अस्य गुणा:। कफपित्तनाशित्वम्। कटुपाकित्वम्। इति राजवल्लभ:॥

खण्डकालु, क्ली, (खण्ड इव कायतीति। कै+क:। ततः खण्डकं आलु इति कर्म्मधाय:।) आलुविशेष:। इति शब्दचन्द्रिका॥

खण्डज:, पुं, (खण्ड इव जायते खण्डाकारेण जायते वा। जन्+ड:।) गुड:। यवासशर्करा। इति राजनिर्घण्ट:॥

खण्डजोद्भव:, पुं, (खण्डज उद्भवोऽस्य इति खण्डजोद्भव: तस्माज्जायते इति। जन्+ड:।) तवराजोद्भवखण्ड:। इति राजनिर्घण्ट:॥

खण्डताल:, पुं, (खण्डेन वाद्यांशभेदेन निर्वृत्त: ताल:।) तालविशेष:। यथा,—
"इतमेकं भवेद्यत्र खण्डताल: स उच्यते।
अपरं नियमं विना।"
इति सङ्गीतदामोदर:॥

खण्डधारा, स्त्री, (खण्डे एकदेशे धारो यस्या:।) कर्णरी। इति शब्दमाला॥ काँचि इति भाषा॥

खण्डनं, क्ली, (खड़ि भावे+ल्युट्।) भञ्जनम्। भेदनम्। निराकरणम्। छेदनम्। यथा,—
"घटय भुजबन्धनं जनय रदखण्डनं देहि पदपल्लवसुदारम्॥" इति जयदेव:॥

खण्डपरशु:, पुं, (खण्डयति शत्रून् इति खण्डस्तादृश: परशुरस्य।) शिव:। इत्यमर:।१।१।३३॥ (यथा, महाभारते ७। रुद्रमाहात्म्ये।२००।४१।
"पिनाकिनं खण्डपरशुं लोकानां पतिमीश्वरम्॥"
विष्णु:। यथा, महाभारते।१३।१४६।७४।
"सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रद:॥")

खण्डपर्शु:, पुं, (शत्रून् खण्डयति विदारयति इति खण्डस्तथाविध: पर्शुरस्य।) परशुराम:। शिव:। चूर्णलेपी। खण्डामलकभेषज्यम्। राहु:। इति मेदिनी॥ भग्नदन्तहस्ती। इति शब्दरत्नावली॥

खण्डपाल:, पुं, (खण्डं पालयतीति। पालि+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) मोदक:। मयरा इति भाषा। तत्पर्य्याय:। खाण्डिक: २। इति हारावली॥

खण्डमोदक:, पुं, (खण्डेन खण्डोत्पादितलड्डुकादिना वा मोदयतीति। खण्ड+मुद्+णिच्+ण्वुल्।) यवासशर्करा। इति राजनिर्घण्ट:॥

खण्डलवणं, क्ली, (खण्ड्यते इति खण्डम्। खड़ि+कर्म्मणि घञ्। तच्च तत् लवणञ्चेति।) विड्लवणम्। इति राजनिर्घण्ट:॥ (विड्शब्देऽस्य विवरणं ज्ञातव्यम्॥)

खण्डशाखा, स्त्री, (खण्डा खण्डिता शाखा यस्या:।) महिषवल्ली। इति राजनिर्घण्ट:॥

खण्डसर:, पुं, (खण्ड इव सरतीति। सृ+अच्।) यवासशर्करा। इति राजनिर्घण्ट:॥

खण्डाभं, क्ली, (खण्डं अभ्रं मेघः।) अभ्रलेशः। छेँड़ा मेघ इति भाषा। दन्तक्षतविशेषः। इति मेदिनी॥

खण्डिकः, पुं, (खण्डोऽस्यास्तीति। ठन्।) कलायः। कड़ाइ इति भाषा। इत्यमरः॥ (अस्य पर्य्याया यथा,— [अथ॥"

"त्रिपुटः खण्डिकोऽपि स्यात् कथ्यन्ते तद्गुणा इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ गुणाश्चास्य त्रिपुटशब्दे वक्तव्याः॥) कक्षः। इति हेमचन्द्रः॥ वगल इति भाषा॥

खण्डितं, त्रि, (खडि+क्तः।) खण्डीकृतम्। तत्पर्य्यायः। छिन्नम् २ लूनम् ३ छित्तम् ४ दितम् ५ छेदितम् ६ वृक्तम् ७ वृत्तम् ८। इति हेमचन्द्रः॥ (यथाह ग्रन्थार्थचिन्तामणिः।

"चन्द्रे कलङ्कः सुजने दरिद्रता
विकाशलक्ष्मीः कमलेषु चञ्चला।
सुखेऽप्रसादः सधनेषु सर्ब्बदा
यत्नो विधातुः कथयन्ति खण्डितम्॥"

खण्डिताङ्गः। खण्डिताङ्गत्वं दुष्टवचनकर्म्मविपाकः। यथाह ग्रातातपः। ३ अध्याये।

"दुष्टवादी खण्डितः स्यात् स वै दद्यात् द्विजातये।
रूप्यं पलद्वयं दुग्धं घटद्वयसमन्वितम्॥")

खण्डिता, स्त्री, (खण्डित+टाप्।) स्त्रीयादिनायिकायाः भेदः। अस्या लक्षणम्। अन्योपभोगचिह्नितः पतिः प्रातरागच्छति यस्याः सा। अस्याश्चेष्टा। "अस्फुटालापचिन्तासन्तापनिश्वासतूष्णीम्भावाश्रुपातादयः।" इति रसमञ्जरी॥ (साहित्यदर्पणोक्तलक्षणं यथा, तत्रैव। ३। ८३।

"पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः।
सा खण्डितेति कथिता धीरैरीर्षाकषायिता॥
उदाहरणं यथा, तत्रैव।

"तदवितथमवादीर्यन्मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद्दुकूलं दधानः।
मदधिवसतिमागाः कामिनां मण्डनश्री-
र्व्रजति हि सफलत्वं वल्लभालोकनेन॥")

खण्डिनी, स्त्री, (खण्डोऽस्यास्तीति। खण्ड+इनिः। स्त्रियां ङीप्। यद्वा, खण्डयति आत्मानं द्वीपपर्व्वतसमुद्रादिवच्छेदेनेति ग्रेषः। खडि+णिनिः।) पृथ्वी। इति ग्रब्दरत्नावली॥

खण्डी, [न्] पुं, (खण्डयति आत्मानं द्विदलरूपेण इति। खडि+णिनिः।) वनमुद्गः। इति हेमचन्द्रः॥

खण्डीरः, पुं, (खण्डी+गुणादित्वात् रः।) पीतमुद्गः। इति हेमचन्द्रः॥

खतमालः, पुं, (खे आकाशे अन्तरीक्षे तमाल इव। तत्वर्णसादृश्यात्तथात्वम्।) धूमः। मेघः। इति मेदिनी॥

खद, स्तैर्य्ये। वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-वधे तु सकं-सेट्।) खदति। इति दुर्गादासः॥

खदिका, स्त्री, (खे भर्ज्जनपात्रादूर्द्धाकाशे दीयते खण्ड्यते इति। ख+दो अवखण्डने+घञर्थे कः। ततः संज्ञायां कन् टाप् अत इत्वञ्च।) लाजाः। इति त्रिकाण्डशेषः॥ खइ इति भाषा॥

खदिरः, पुं, (खद स्थैर्य्यहिंसयोः+"अजिरशिशिरशिथिलेति।" उणां। १। ५४। इति किरच्।) वृक्षविशेषः। खयेरगाछ इति भाषा। तत्पर्य्यायः। गायत्री २ बालतनयः ३ दन्तधावनः ४। इत्यमरः। २। ४। ४६॥ तिक्तसारः ५ कण्टकीद्रुमः ६। इति रत्नमाला॥ बालपत्रः ७ खदपत्नी ८ त्रितिच्चमः ९ सुग्रुल्यः १० वक्रकण्टः ११ यज्ञाङ्गः १२ जिह्मशल्यः १३ कण्टी १४ सारद्रुमः १५ कुण्ठारिः १६ बहुसारः १७ मेध्यः १८ बालपुत्रः १९ रक्तसारः २० कर्कटी २१ जिह्मशल्यः २२। इति जटाधरः॥ कुष्ठघ्नः २३ बालपत्रकम् २४ यूपद्रुमः २५। इति ग्रब्दरत्नावली॥ अपि च भावप्रकाशे।

"खदिरो रक्तसारश्च गायत्री दन्तधावनः।
कण्टकी बालपत्रश्च बहुशल्यश्च पाण्डिकः॥
खदिरः ग्रीतलो दन्त्यः कण्डूकासारुचिप्रणुत्।
तिक्तः कषायो मेदोघ्नः क्रिमिमेहज्वरव्रणान्।
श्वित्रग्रोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत्॥"

अस्य गुणाः। तिक्तरसत्वम्। ग्रीतत्वम्। पित्तकफकुष्ठकासरक्तग्रोफकण्डूव्रणनाग्नित्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ विशेषवेदनामेहमेदोनाग्नित्वम्। इति राजवल्लभः॥*॥ (अथ श्वेतखदिरः। पपरी खयेर इति भाषा॥

"खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः।
कदरो विग्रदो वर्य्यो सुखरोगकफासजित्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे च॥ खदति हन्ति ग्रत्रून् इति। खद+किरच्।) इन्द्रः। इति त्रिकाण्डशेषः॥ (खे आकाशे दीर्य्यते यस्माच्चन्द्रलोकादिष्टापूर्त्तादिकर्म्मभिः। दृ+बाहुलकात् अपादाने किरच्च। इष्टापूर्त्तादिकर्म्मिणां हि आरब्धाम्मयदेहविदारेण चन्द्रमण्डलात् आकाशे पतनात् तथात्वम्।) चन्द्रः। इति मेदिनी॥ (तथा च साङ्ख्यदर्शनभाष्ये। "येन कर्म्मदृष्टेन चन्द्रमसमारूढाः फलोपभोगाय तस्मिन् उपभोगेन क्षयिते तेषां यदम्मयं ग्रारीरं चन्द्रमस्युपभोगायारब्धं तदुपभोगक्षयदर्शनग्रोकाग्निसम्पर्कात् प्रलीयते सविद्युत्सम्पर्कात् हिमकरका इव हुतभुगर्च्चिःसम्पर्कादिव च घृतकाठिन्यम्। ततः कृतात्यये कृतस्य इष्टादेः कर्म्मणः फलोपभोगेनोपचये सति सानुग्रया एवेममवरोहन्ति॥")

खदिरपञ्चिका, स्त्री, (खदिरस्य पञ्चमिव पत्रमस्याः। कप् कापि अत इत्वम्।) अरिखदिरः। लज्जालुलता। इति राजनिर्घण्टः॥

खदिरपत्री, स्त्री, (खदिरस्य पत्रमिव पत्रमस्याः।) लज्जालुलता। इति वैद्यकम्॥

खदिरा, स्त्री, (खदिरस्तत्पचाकारोऽस्त्यस्याः। अच् टाप् च।) लज्जालुलता। इति राजनिर्घण्टः॥

खदरिका, स्त्री, (खदिरेण खदिररसेन समो रसो-ऽस्यस्याः। अस्त्यर्थे+ठन् ततः टाप्।) लाजाः। इति राजनिर्घण्टः॥

खदिरी, स्त्री, (खद्+किरच्। गौरादित्वात् ङीष्।) खदिरीग्राकम्। लाजालु इति ख्याता। इति केचित्। किन्तु रभसेन वराहक्रान्ता लज्जालुः समङ्गा जलकारिकेति खदिरिकायां सङ्कोचपत्री लज्जालुरिति लज्जालुकायां पठितम्। इति भरतः॥ तत्पर्य्यायः। नमस्कारी २ गण्डकाली ३ समङ्गा ४। इत्यमरः। २। ४। १४१॥ (क्वचित् खदिरेति पाठो दृश्यते॥) गण्डकारी ५। इति भरतः॥ ग्रर्म्मी पत्री ६ रक्तपत्री ७ अञ्जलिकारिका ८ राखा ९। इति जटाधरः॥

("गण्डकाली नमस्कारी समङ्गा खदिरी क्वचित्।"
इति वैद्यरत्नमालायाम्॥)

खदिरोपमं, क्ली, (खदिरेण उपमीयते इति। खदिर उपमा अस्य वा।) कदरः। इति रत्नमाला। काँटा बाबला इति भाषा॥

खदूरवासिनी, स्त्री, (खे शून्ये दूरे च वसतीति। वस्+णिनिः। ततो ङीप्।) वृद्धग्रक्तिविशेषः। इति त्रिकाण्डशेषः॥

खद्योतः, पुं, (खं आकाशं द्योतयतीति। द्युत् दीप्तौ+णिच्+"कर्म्मण्यण्।" ३। २। १। इति अण्।) सूर्य्यः। इति जटाधरः॥ (यथा, भागवते। ४। २६। १०।

"खद्योताविर्म्मुखौ चाच नेत्रे एकत्र निर्म्मिते।
रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः॥"

नेत्रस्य हि सूर्य्याधिष्ठातया रूपादिदर्शनग्रक्तिरिति प्रसिद्धेस्तथात्वम्॥ खे आकाशे द्योतते इति। द्युत्+अच्।) कीटविशेषः। जोनाक पोका इति भाषा। तत्पर्य्यायः। ज्योतिरिङ्गणः २। इत्यमरः। २। ५। २८॥ खद्योतिः ३ प्रभाकीटः ४ उपसूर्य्यकः ५। इति राजनिर्घण्टः॥ ध्वान्तोन्मेषः ६ तमोमणिः ७ दृष्टिवन्धुः ८ तमोद्योतिः ९ द्योतिरिङ्गः १० निमेषकः ११। इति ग्रब्दरत्नावली॥ (यथा, श्रीमद्भागवते। ६। १६। ४६।

"विदितमनन्तसमस्तं
तव जगदात्मनो जनैरिहाचरितम्।
विज्ञाप्यं परमगुरोः
कियदिव सवितुरिव खद्योतैः॥")

खद्योतनः, पुं, (द्योतयतीति। द्युत्+णिच्+कर्त्तरि ल्युः। ततः खस्य आकाशस्य द्योतनः प्रकाशकः।) सूर्य्यः। इति जटाधरः॥

खधूपः, पुं, (खं आकाशं धूपयति। खे धूपः व्यवच्छिन्नखवद्भिरिव वा। धूप्+"कर्म्मण्यण्।" ३। २। १। इति अण्।) अग्निक्रीडाविशेषः। हाउइ इति भाषा। यथा, भट्टौ। ३। ५।

"उद्धाम्यच्चकुनगरस्य मार्गान्
ध्वजान् वनस्पुमुचुः खधूपान्॥"

खन, उ न विदारे। इति कविकल्पद्रुमः॥ (भ्वां-उभं सकं-सेट्।) उ, खनित्वा खात्वा। न

तांवतो जाह्नवीतीरे कूपं खनति दुर्म्मतिः। खनते। इति दुर्गादासः॥
खनकः, पुं, (खन्+"शिल्पिनि ष्वुन्।" ३।१।१४५। इति वुन् स च णित्।) उन्दुरुः। सन्धितस्करः। सिंदेल चोर इति भाषा। भूमिवित्तज्ञः। स्वर्णाद्युत्पत्तिस्थानज्ञः। इति हेमचन्द्रः॥ (स्वनामप्रसिद्धो विदूरस्थ बन्धुविशेषः। यथा, महाभारते अनुशासने। १। १४८। १।
"विदूरस्य सुतं कञ्चित् खनकः कुशलो नरः॥")
खनकः, त्रि, (खन्+वुन्।) अवदारकः। खननकर्त्ता। इति मेदिनी॥ (यथा, गोः रामायणे। १। १२। ६।
"स्थापत्यं चेह शास्त्रज्ञा दृष्ट्वाः परमधार्म्मिकाः। कर्म्मान्तिका लिपिकरा वर्द्धकाः खनका अपि॥")
खननं, क्ली, (खन्+भावे ल्युट्।) विदारणम्। खोঁड़न खोदन इति च भाषा। यथाह कश्चित्।
"पश्य त्वं खननं नखेन तदभूदालोक्य भूकः गुहः॥"
खनयित्नी, स्त्री, (खन्+णिच् न वृद्धिर्निपातनात्। ततस्तृच् ङीप् च।) अस्त्रभेदः। खन्ती इति भाषा। यथा, नारदपञ्चरात्रे पाद्मसंहितायां।
"खनयित्नी शुभा यात्रा जयार्थं जयकाङ्क्षिणाम्।
पञ्चवर्णोज्ज्वलयुता चालनीया पुरः सताम्॥"
खनिः, स्त्री, (खन विदारे+"खनिकष्यञ्जीति।" उणा।४।१२६। इति इन्।) रत्नाद्युत्पत्तिस्थानम्। खानि इति भाषा॥ (यथा, रघुः। १८।२२।
"उत्खातप्रत्नं वसुधोपस्थं
रत्नोपहारैरुदितैः खनिभ्यः॥")
तत्पर्य्यायः। आकरः २। इत्यमरः। २।३।७॥
खानी ३ खनी ४ खानिः ५। इति शब्दरत्नावली॥ गङ्गा ६। इति हेमचन्द्रः॥
खनित्रं, क्ली, (खन्+"अर्त्तिलूधूसूखनेति।" ।३।२।१८४। इत्र।) अस्त्रविशेषः। खन्ता इति भाषा। तत्पर्य्यायः। अवदारणम्। इत्यमरः। २।८।१२॥ ("तथाहि भागवते। ७।२।१५।
"केचित् खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान्॥")
खनी, स्त्री, (खनि+वा ङीष्।) रत्नाद्युत्पत्तिस्थानम्। इति शब्दरत्नावली॥
खपुरं, क्ली, (खं आकाशं पिपर्त्ति। पॄ+कः।) घटः। इति हेमचन्द्रः॥ (खे आकाशे चरं पुरम्।) ऊर्द्धगं पुरम्। (स तु दैत्यपुरविशेषः। तत्पतत्तिकथा यथा, महाभारते। ३। १७३। निवातकवचयुद्धे। ७-११।
"पुलोमा नाम दैतेयी कालका च महासुरी।
दिव्यवर्षसहस्रं ते चेरतुः परमं तपः॥
तपसोऽन्ते ततस्ताभ्यां स्वयम्भूरददद्वरम्॥
अयाचीतां वरं ते तु सुतानामपदुःखिताम्।
अवध्यताञ्च राजेन्द्र! सुरराक्षसपन्नगैः॥
पुरं सुरमणीयञ्च खेचरञ्च महाप्रभम्।
सर्व्वरत्नैः समुदितं दुर्द्धर्षममरैरपि॥
महर्षियक्षगन्धर्व्वपन्नगासुरराक्षसैः।
सर्व्वकामगुणोपेतं वीतशोकमनामयम्॥
ब्रह्मणा भरतश्रेष्ठ! कालकेयकृते कृतम्।
तदेतत् खपुरं दिव्यं चरत्यमरवर्जितम्॥")
खे आकाशे उत्थितं पुरम्। शुभाशुभादिसूचनार्थं प्रकाशितं गन्धर्व्वनगरम्। अस्योत्पातादिदिग्भेदेनोदये फलभेदो यथा, बृहत्संहितायाम् ३६ अध्याये।
"उदगादिपुरोहितनृपबलपतियुवराजदोषदं खपुरम्।
सितरक्तपीतकृष्णं विप्रादीनामभावाय॥
नागरनृपतिनयावहसुदगविदिक्स्थं विवर्णनाशाय।
शान्ताशायां दृष्टं सतोरणं विजयाय॥
सर्व्वदिगुत्थं सततोत्थितञ्च भयदं नरेन्द्रराष्ट्राणाम्।
चौराटविकान् हन्याद्धूमानलशुक्लचापाभम्॥
गन्धर्व्वनगरसुत्थितमापाण्डुरमशनिनिपातदातकरम्।
दीप्ते नरेन्द्रक्षुर्वामेऽरिभयं जयः सर्व्वे॥
अनेकवर्णाकृति खे प्रकाशते
पुरं पताकाध्वजतोरणान्वितम्।
यदा तदा नागमनुष्यवाजिनां
पिबत्यरङ्गभूरि रणे वसुन्धरा॥")
हरिश्चन्द्रपुरम्। इति त्रिकाण्डशेषः॥
खपुरः, पुं, (खं पिपर्त्ति उच्छ्रयत्वेन। पॄ+कः।) गुवाकः। (अस्य पर्य्यायो यथा।
"खपुरो दृढकः पूगः।" इति वैद्यकरत्नमालायाम्॥ खेन आकाशगतेन हिमकरादिना पूर्य्यते इति। पॄ+कर्म्मणि घञर्थे कः।) भद्रमुस्तकम्। (खमिन्द्रियं पिपर्त्ति। पॄ+कः।) अलसके त्रि। इति मेदिनी॥ आलनखः। इति राजनिर्घण्टः॥
खभ्रान्तिः, पुं, (खे आकाशे अन्तरिक्षे भ्रान्तिर्भ्रमणं यस्मिन्नर्थे यस्य।) चिल्लः। इति शब्दरत्नावली॥ चिल् इति भाषा॥
खमणिः, पुं, (खे आकाशे मणिरिव ज्योतिर्मयत्वात् प्रकाशकत्वाद्वा।) सूर्य्यः। इति त्रिकाण्डशेषः॥
खमीलनं, क्ली, (खानां इन्द्रियाणां मीलनम्।) तन्द्रा। इति शब्दरत्नावली॥
खमूलिः, स्त्री, (खं शून्यभूतं मूलमस्याः पृषोदरात् साधुः। मूलराहित्यादस्यास्तथात्वम्।) कुम्भिका। इति शब्दरत्नावली॥ पाना इति भाषा॥
खमूलिका, स्त्री, (खमूलि+स्वार्थे कन् ततष्टाप्।) खमूली। कुम्भिका। इति शब्दरत्नावली॥
खम्ब, गतौ, इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ओष्ठवर्णशेषोपधः। खम्बति। इति दुर्गादासः॥
खरं, क्ली, (खाय अन्तरिन्द्रियाय खस्य वा तीव्रतारूपगुणं राति ददातीति। ख+रा+कः।) तीव्रम्। तत्पर्य्यायः। तिग्मम् २ तीक्ष्णम् ३॥ इत्यमरः।१।३।३५॥ (यथा, भागवते।७।८।२८।
"हत्वाट्टहासं खरमुत्स्वनोल्बणं
निमीलिताक्षं जगृहे महाजवः॥"
तद्वति त्रि। यथा, रघुवंशे। ८। ६।
"न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव॥")
खरः, पुं, (खं सुखकरं छिद्रमतिशयेनास्यास्तीति। रः।) गर्द्दभः। इत्यमरः।२।६।९७ (यथा, मनुः। २। २०१।
"परीवादात् खरो भवति श्वा वै भवति निन्दकः॥"
अश्वतरः। यथा, तत्रैव।११। २०।
"उष्ट्रयानं समारुह्य खरयानन्तु कामतः॥")
धर्म्मः। इति मेदिनी॥ निष्ठुरः। राक्षसविशेषः। स तु रावणभ्राता। इति हेमचन्द्रः॥ (यथा, रामायणे। १। ३। २०।
"वधं खरत्रिशिरसोरुत्थानं रावणस्य च॥")
दैत्यः। इति त्रिकाण्डशेषः॥ (यथा, भागवते। २। ७। ३४।
"ये च प्रलम्बखरदर्दुरकेशरिष्टमल्लेभकंसयवना कुजपौरुकाद्याः॥")
कण्टकिवृक्षविशेषः। इत्यमरः॥ कटुः। काकः। कुररपक्षी। इति राजनिर्घण्टः॥ (वत्सरविशेषः। यथा, ज्योतिषतत्त्वे।
"उपद्रुतं जगत् सर्व्वं तस्करैर्म्लेच्छकैः खगैः।
पीड्यन्ते च प्रजाः सर्व्वाः देशभङ्गः खरे प्रिये॥")
कठिनम्। रविपार्श्वगः। पश्चिमद्वारगृहम्। इति शब्दार्थचिन्तामणिः॥)
खरकाष्ठिका, स्त्री, (खरं उग्रं काष्ठं यस्याः। ततः कप् टाप् च। कापि अत इत्वम्।) बला। इति राजनिर्घण्टः॥
खरकुटी, स्त्री, (खरा क्षुरवत्तया तीव्रा कुटी।) नापितशालिका। नापितस्य गृहम्। इति त्रिकाण्डशेषः॥
खरकोणः, पुं, (खरवत् कोणयति शब्दायते। अत्र सङ्कोचार्थकुणधातोः शब्दार्थ इति बोध्यं धातूनामनेकार्थत्वात्। यद्वा कोणयति आत्मानं सङ्कोचयति वा। कुण+अच्। "कर्म्मण्यण्।" ३। २। १। इति अण् वा।) तित्तिरिपक्षी। इति हेमचन्द्रः॥
खरगन्धनिभा, स्त्री, (खरगन्धेन तीव्रगन्धेन नितरां अतिशयेन भातीति। नि+भा+कः।) नागबला। इति जटाधरः॥
खरगन्धा, स्त्री, (खरो गन्धो यस्याः।) नागबला। इति राजनिर्घण्टः॥
खरगृहं, क्ली, (खरस्य गर्द्दभस्य गृहम्।) गर्द्दभशाला। गादार घर इति भाषा। तत्पर्य्यायः। खरगृहः २। इति त्रिकाण्डशेषः॥
खरगेहं, क्ली, (खरस्य गेहम्।) खरगृहम्। इति शब्दरत्नावली॥
खरगृहः, पुं, (खरस्य गृहः गृहम्।) खरगृहम्। इति त्रिकाण्डशेषः। (खरो गृह्यते नियोज्यते ऽनेन। ग्रह+अप्। गर्द्दभगृहभेदः॥)

खरपा

खरघातनः, पुं, (खरं उग्रं रोगविशेषं घातयतीति। हन्+स्वार्थे णिच्+कर्त्तरि ल्युः।) नागकेशरः। इति शब्दचन्द्रिका॥ (खरं एतन्नाम्ना प्रसिद्धं राक्षसं घातयतीति। श्रीरामचन्द्रः। इति व्युत्पत्तिलभ्योऽर्थः॥)

खरच्छदः, पुं, (खरस्तीव्रश्छदः पत्रमस्य।) उलूकम्। उलुखड़ इति भाषा॥ इत्कटः। ओकड़ा इति भाषा। इति रत्नमाला॥ कुन्दरलक्षणम्। इति राजनिर्घण्टः॥

खरणसः, त्रि, (खरा तीक्ष्णा नासिका अस्य। "खुरखराभ्यां वा नस्।" इति वार्त्तिं पचे "अच् नासिकायाः।" ५।४।११८। इत्यच् नसादेशश्च। ततः "पूर्ब्बपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) तीक्ष्णनासिकः। तत्पर्य्यायः। खरणाः २। इत्यमरः। २।६।४६॥

खरणाः, [स्] त्रि, (खरा तीक्ष्णा नासिका यस्य। "खुरखराभ्यां वा नस्।" वार्त्तिं इति नसादेशः। "पूर्ब्बपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) तीक्ष्णनासिकः। इत्यमरः। २।६।४६॥

खरत्वक्, स्त्री, (खरा तीक्ष्णा त्वक् यस्याः।) अलम्बुषा। लज्जालुप्रभेदः। इति भावप्रकाशः॥

खरदण्डं, क्ली, (खरः कर्कशः दण्डो दण्डाकारं यस्य कण्टकावृततयेति भावः।) पद्मम्। इति धरणी॥

खरदला, स्त्री, (खरं कर्कशं दलं पत्रमस्याः।) क्षेमाफला। इति शब्दचन्द्रिका॥ डुमुर इति भाषा॥

खरदूषणः, पुं, (खरं उग्रं दूषणं मादकतानजनकदोषो यत्र।) धुस्तूरः। इति शब्दचन्द्रिका॥ खरेण राक्षसेन सह दूषणश्च॥ (त्रि, बहुदोषः॥)

खरध्वंसी [न्], पुं, (खरं खनामविश्रुतं राक्षसं ध्वंसयतीति। ध्वनस्+णिच्+णिनिः।) श्रीरामः। इति शब्दरत्नावली॥ (खरं कंसचरं दैत्यं ध्वंसयतीति। कृष्णः। इति व्युत्पत्तिलभ्योऽर्थः॥)

खरनादिनी, स्त्री, (खरं कर्कशं नदतीति। नद्+णिनिः। ततः स्त्रियां ङीप्।) रेणुकानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

खरपत्रः, पुं, (खरं पत्रमस्य।) क्षुद्रपत्रतुलसी। शाकाख्यवृक्षः। इति रत्नमाला॥ यावनालशरः। हरिद्रभः। मरुवकः। इति राजनिर्घण्टः॥

खरपत्रकः, पुं, (खरपत्र+कप् संज्ञायां कन् वा।) तिलकवृक्षः। इति शब्दचन्द्रिका॥

खरपत्री, स्त्री, (खरपत्र+गौरादित्वात् ङीष्।) गोनिकावृक्षः। काकोदुम्बरिका। इति राजनिर्घण्टः॥

खरपात्रं, क्ली, (खरं कठोरं कठिनं वा पात्रम्।) लौहपात्रम्। इति त्रिकाण्डशेषः॥

खरपादाढ्यः, पुं, (खरैः दृढैः पादैर्मूलैराढ्यः।) कपित्थवृक्षः। इति शब्दचन्द्रिका॥

खराब्दा

खरपुष्पः, पुं, (खरं पुष्पमस्य।) मरुवकवृक्षः। इति रत्नमाला॥

खरपुष्पा, स्त्री, (खरं पुष्पं खराणि पुष्पाणि वा अस्याः।) वर्ब्बरा। इत्यमरः। २।४।१३६॥ वाबुइ तुलसी इति भाषा॥ (यथास्याः पर्य्यायाः। "वर्ब्बरी तुवरी तुङ्गी खरपुष्पाजगन्धिका॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ व्यवहारोऽस्या यथा चरके विमानस्थानेऽष्टमेऽध्याये कटुकस्कन्धे। "एला-कुष्ठ-भल्लातकास्थि-हिङ्गु-किलिम-मूलक-सर्षप-लशुन-करञ्ज-शिग्रुक-मधुरशिग्रुक-खरपुष्पा" इत्यादिषु॥)

खरप्रियः, पुं, (खलः धान्यकलायादिशस्यमर्द्दनस्थानं प्रियोऽस्य। लस्य रत्वम्।) पारावतः। इति शब्दमाला॥

खरमञ्जरी, स्त्री, (खरा मञ्जरी यस्याः।) अपामार्गः। इत्यमरः। २।४।८६॥ (खर्ब्बिकाद्यतैलेऽस्या व्यवहारो यथा,—

"खर्ब्बिकासिन्धुदन्त्यमिरूपिकानलनीलिका। खरमञ्जरीबीजेषु तैलं गोमूत्रपाचितम्। दुष्टव्रणप्रशमनं कफनाड़ीव्रणापहम्॥"

इति वैद्यकचक्रपाणिसंग्रहे नाड़ीव्रणाधिकारे॥)

खररोमा [न्], पुं, (खरं रोम अस्य।) नागभेदः। इति जटाधरः॥

खरवल्लिका, स्त्री, (खरा वल्लरी ततः स्वार्थे कन् टाप् च ईकारस्य इस्वत्वं रस्य लत्वञ्च।) नागबला। इति रत्नमाला॥ गोरचचाउलिया इति भाषा॥

खरशब्दः, पुं, (खर उग्रः शब्दोऽस्य।) कुररपक्षी। इति राजनिर्घण्टः॥

खरशाकः, पुं, (खरं शाकमस्य।) भार्गी। इति भावप्रकाशः॥ वामणहाटी इति भाषा॥

खरस्कन्धः, पुं, (खरः स्कन्धोऽस्य।) प्रियालवृक्षः। इति राजनिर्घण्टः॥

खरस्कन्धा, स्त्री, (खरः स्कन्धोऽस्याः।) खर्ज्जूरी। इति राजनिर्घण्टः॥

खरस्वरा, स्त्री, (खरं रौद्रं स्वरणाति नाशयतीति। स्वृ+अच्।) वनमल्लिका। इति रत्नमाला॥

खरा, स्त्री, (खं आकाशं राति ददातीति। रा+कः। लस्य रत्वम्।) देवताड़वृक्षः। इत्यमरः। २।४।६६॥

खरांशुः, पुं, (खरा अंशवो रश्मयो यस्य।) सूर्य्यः। इति त्रिकाण्डशेषः॥

खरागरी, स्त्री, (खरं आगिरतीति। आ+गॄ+अच्। ततो गौरादित्वात् ङीष्।) देवताड़वृक्षः। इत्यमरटीकायां रायमुकुटः॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम्।

"देवी जीमूतकक्षाखुविषाणिलोमशच्छदः। खरागरी कदम्बश्च खुड्डाको देवताड़कः॥")

खराब्दाङ्कुरकं, क्ली, (खराब्दात् तीव्रगर्ज्जनमेघात् व्यङ्कुरयतीति। अङ्कुर+खुल्। अस्य हि नूतनजलदध्वनेरङ्कुरोत्पत्तेश्चायत्वम्।) वैदूर्य्यमणिः। इति राजनिर्घण्टः॥

खर्ज्जूर

खराश्वा, स्त्री, (खरैरश्यते भुज्यतेऽसौ। अशू भोजने+"उल्लादयश्च।" उणा। ४।६५। इति वः।) मयूरशिखा। रुद्रजटा इति ख्याता। क्षेत्रयमानिका इति केचित्। इत्यमरभरतौ॥ (यथास्या गुणाः।

"खराश्वा कफवातघ्नी वस्तिरोगरुजापहा॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥)

खराङ्गा, स्त्री, (खरं तीव्रगन्धं आङ्क्यतीति। कै+कः। स्त्रियां टाप्।) अजमोदा। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—

"अजगन्धाजमोदाख्या खराङ्गा कारवी च सा॥"

इति वैद्यकरत्नमालायाम्॥)

खरिका, स्त्री, (खात् शून्यात् गन्धविशेषं रातीति। रा+कः ततः संज्ञायां कन् टाप् अत इत्वञ्च।) कस्तूरीभेदः। सा तु चूर्णाकृतिः। इति राजनिर्घण्टः॥

खरुः, पुं, (खन्+"खरुशङ्कुपीयूषनीलङ्गुलिगु।" उणा १।३७। इति कुः रश्चान्तादेशः।) शिवः। हयः। दर्पः। दम्भः। इति मेदिनी। रे। २१॥ कामदेवः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ शुक्लवर्णः। इति हेमचन्द्रः॥

खरुः, त्रि, (खन्+"खरुशङ्कुपीयूषनीलङ्गुलिगु।" उणा १।३७। इति कुः रश्चान्तादेशः।) श्वेतः। इति मेदिनी। रे।२२॥ निर्विवेकशून्यः। इति हेमचन्द्रः॥ निर्बोधः। क्रूरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ तीक्ष्णः। इति संक्षिप्तसारे उणादिवृत्तिः॥

खर्ब्ब, यथाम्नोः। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) खर्ब्बति। खट् मार्ज्जनम्। इति दुर्गादासः॥

खर्ब्बिका, स्त्री, (खर्ब्ब+खुल्+स्त्रियां टाप् अत इत्वञ्च।) अवदंशः। इति शब्दचन्द्रिका॥

खर्ज्जुः, पुं, (खर्ब्ब+उन्।) खर्ज्जूरी। कण्डुः। कीटः। इति हेमचन्द्रः॥

खर्ज्जुरं, क्ली, (खर्ज्ज+उरच्।) रौप्यम्। इत्यमरटीकायां रमानाथः॥

खर्ज्जूः, स्त्री, (खर्ब्ब वधने+"क्रुधिचमितमीति।" उणा १।८२। इति ऊः।) कण्डुः। कीटः। इत्युणादिकोषः॥

खर्ज्जूरः, पुं, (खर्ज्जूं कण्डूयनं हन्तीति। हन्+टक्।) चक्रमर्दः। धत्तूरः। अर्कवृक्षः। इति राजनिर्घण्टः॥

खर्ज्जूरं, क्ली, (खर्ज्जूरस्य फलम्। फले विहितस्याणो लुप्।) खर्ज्जूरफलम्। अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। गुरुत्वम्। वायाभिघातदाहवातपित्तरोगे हितत्वम्। इक्षुवत्त्वम्। शुक्रवृद्धिकारित्वञ्च। इति राजवल्लभः॥ ("अपक्वखर्ज्जूरफलं त्रिदोषघ्नमनं मतम्। पक्वमेव हितं श्रेष्ठं त्रिदोषघ्नमनं परम्॥" इति प्रथमे स्थाने दन्तेऽध्याये हारीतेनोक्तम्॥ यथा च चरके सूत्रस्थाने चतुर्विंशेऽध्याये।

"मधुरं इक्षुवत् वृष्यं खर्ज्जूरं गुरु शीतलम्।

चयेऽभिघाते दाहे च वातपित्ते च तद्धितम् ॥") रौप्यम्। हरितालम्। इति हेमचन्द्रः ॥ खलः। इति मेदिनी ॥

खर्जूरः, पुं स्त्री, (खर्ज्ज मार्ज्जने + "खर्ज्जिपिञ्जादिभ्य ऊरोलचौ।" उणा ४। ६०। इति ऊरः।) खर्जूरीवृक्षः। खेजुर गाछ इति भाषा ॥ अस्य मस्तिष्कगुणाः। स्वादुत्वम्। तिक्तत्वम्। कषायत्वम्। मूत्रातङ्करोगनाशित्वम्। बलप्राणशुक्रवृद्धिकारित्वञ्च। इति राजवल्लभः ॥

("खर्जूरस्य विषं हन्ति तदा वै नात्र संशयः।" इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे विषाधिकारे॥)

वृश्चिकः। इति मेदिनी ॥

खर्जूरिका, स्त्री, (खर्जूर + स्त्रियां गौरादित्वात् ङीष् ततः संज्ञायां कन् टाप् च ततो ह्रस्वः।) मिष्टान्नविशेषः। इति पाकराजेश्वरः। मिटा गजा इति भाषा ॥

खर्जूरी, स्त्री, (खर्जूर + गौरादित्वात् ङीष्।) वनखर्जूरः। इत्यमरः। २। ४। १७० ॥ खर्जूरवृक्षः। खेजरगाछ इति भाषा। तत्पर्य्यायः। खरस्कन्धा २ दुरारुहा ३ दुरारोहा ४ निःस्नेही ५ कषायी ६ यवनेष्टा ७ हरप्रिया ८। अस्या गुणाः। कषायत्वम्। पक्के गौल्यत्वम्। कषायिकत्वम्। पित्तक्लमनाशित्वम्। हृद्यत्वम्। कफशुक्रवृद्धिकारित्वञ्च। इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः।

"भूमिखर्जूरिका स्वाही दुरारोहा मृदुच्छदा। तथा स्कन्धफला काककर्कटी स्वादुमस्तका ॥ * ॥ पिण्डखर्जूरिका त्वन्या सा देशे पश्चिमे भवेत्। खर्जूरी गोस्तनाकारा पराह्वीपादिहागता ॥ जायन्ते पश्चिमे देशे सा क्षोहारेति कीर्त्यते। खर्जूरीचित्तयं प्रीतं मधुरं रसपाकयोः ॥ स्निग्धं रुचिकरं हृद्यं रक्तपित्तहरं गुरु। तर्पणं रक्तपित्तघ्नं पुष्टिविष्मशुक्रदम् ॥ कोष्ठमारुतकृद्वल्यं वात्यवातकफापहम्। ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारकम् ॥ मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत्। महतीभ्यां गुणैरुक्ता स्वल्पा खर्जूरिका स्मृता॥*॥ खर्जूरीतरुतोयन्तु मदपित्तकरं भवेत्। वातघ्नं शुक्रहरं रुच्यं दीपनं बलशुक्रकृत् ॥ * ॥ सुनेपाली तु मृदुला बलिहीनफला च सा। सुनेपाली श्रमभ्रान्तिदाहमूर्च्छासपित्तहृत्॥"

इति भावप्रकाशः ॥

खर्द्द, दशने। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्।) दशनं दन्तकरणकक्रिया। खर्द्दति मलकं लोकः। केचित्तु दन्दशूके इति पठित्वा दन्दशूकः दन्दशूककर्त्तृकक्रियेत्याहुः। इति दुर्गादासः ॥

खर्परः, पुं, (कर्परः। पृषोदरात् खत्वम्।) तस्करः। धूर्त्तः। भिक्षापात्रम्। कपालम्। इति मेदिनी ॥ क्षेत्रम्। इति त्रिकाण्डशेषः ॥

खर्परी, स्त्री क्ली, (खर्परं उपधातुभेदकारकत्वेनास्त्यस्या इति अच् ततो गौरादित्वात् ङीष्।) कर्परीतुत्थम्। इत्यमरटीका ॥

खर्परीतुत्थं, क्ली, (खर्परीव तुत्थं खर्परीरूपं तदाख्यं तुत्थं वा।) तुत्थविशेषः। तत्पर्य्यायः। खर्परीरसकम् २ चक्षुष्यम् ३ अम्लतोत्पन्नम् ४ तुत्थम् ५ खर्परिका ६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। चक्षुर्हितत्वम्। रसायनत्वम्। त्वग्दोषशमनत्वम्। दीप्तत्वम्। बलपुष्टिप्रदत्वञ्च। इति राजनिर्घण्टः ॥

खर्ब्ब, गतौ। इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट्।) खर्ब्बति। इति दुर्गादासः ॥

खर्ब्ब, क्ली, (खर्ब्ब + अच्।) संख्याविशेषः। इति मेदिनी ॥ तत्तु दशानसंख्या। इति लीलावती ॥ दशवृन्दसंख्या। १०,०००,०००,००० । इति स्मृतिः ॥ (सहस्रमहापद्मसंख्या। इति गोः रामायणम्। यथा, तत्रैव। ६। ४। ५६-५६। "शतं शतसहस्राणां कोटिमाहुर्मनीषिणः। शतं कोटिसहस्राणां शङ्क इत्यभिधीयते ॥ शतं शङ्कसहस्राणां वृन्दमाहुर्मनीषिणः। शतं वृन्दसहस्राणां महावृन्दमिति स्मृतम् ॥ महावृन्दसहस्राणां शतं पद्मं परिश्रुतम्। शतं पद्मसहस्राणां महापद्मं विभाव्यते ॥ महापद्मसहस्राणां तथा खर्ब्बमिहोच्यते ॥")

खर्ब्बः, पुं, (खर्ब्ब + अच्।) कुबेरस्य निधिविशेषः। इति शब्दरत्नावली ॥ दशवृन्दसंख्या। इति स्मृतिः ॥ कुब्जकवृक्षः। इति राजनिर्घण्टः। (वामनः। इत्यमरः। २। ६। ४६ ॥ स्त्री। गायत्रीस्वरूपा भगवती। यथा, देवीभागवते। १२। ६। ३८।

"खड्गखेटकरा खर्ब्बा खेचरी खगवाहना ॥")

ख(ब्बे)र्ब्बः, त्रि, (खर्ब्ब + अच्।) क्षुद्रः। खाटो छोट इत्यादि भाषा। तत्पर्य्यायः। न्यङ् २ नीचः ३ वामनः ४ ह्रस्वः ५। इत्यमरः। ३। १। ७० ॥ निखर्ब्बः ६ खडतः ७ खर्ब्बशाखः ८। इति हेमचन्द्रः ॥ अनुष्वः ९ अनायतः १०। इति जटाधरः ॥

खर्ब्बशाखः, त्रि, (खर्ब्बा शाखा हस्तपदाद्यवयवाः यस्य।) वामनः। खर्ब्बः। इति हेमचन्द्रः ॥

खर्ब्मः, पुं, (खुर + बाहुलकात् मक् पृषोदरात् उकारस्य लोपः।) पौरुषम्। कोषजांशुकम्। पट्टवस्त्रम्। इति मेदिनी ॥

खर्ब्ब, गर्ब्बे। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) अन्तःस्थवकारान्तोऽयम् ॥ खर्ब्बति। इति दुर्गादासः ॥

खर्ब्वः, त्रि, (खर्ब्व + अच्।) ह्रस्वः। वर्ग्यवकारान्तखर्ब्बशब्दार्थोऽप्यत्र ॥

खर्ब्वटः, पुं क्ली, (खर्ब्व + अटन्) चतुःशतग्राममध्यस्थलम्। इति भूरिप्रयोगः ॥ पर्व्वतप्रान्तग्रामः। इति श्रीभागवतटीकायां श्रीधरस्वामी ॥

खर्व्वुरा, स्त्री, (खर्ब्व + उरच् टाप् च।) तरदीवृक्षः। इति राजनिर्घण्टः ॥

खर्व्वटं, क्ली, (खर्व्वू + जन् + डः।) षड्गुणा। इति भावप्रकाशः ॥ खरवुना इति भाषा ॥ (अस्य लक्षणं गुणाश्च यथा,—

"दशाङ्गुलन्तु खर्व्वटं कथ्यते तद्गुणा अथ। खर्व्वटं मूत्रलं वल्यं कोष्ठशुद्धिकरं गुरु ॥ स्निग्धं स्वादुतरं प्रीतं दृष्यम्पित्तानिलापहम्। तेषु यच्चाम्लमधुरं सत्क्षारञ्च रसाङ्गवेत् ॥ रक्तपित्तकरन्तत्तु मूत्रक्षकृकरम्परम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

खल, चलनार्थे। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्।) चलनार्थश्चालचयौ। चालश्चेह खलनम्। खलति खलो धर्म्मात्। इति दुर्गादासः ॥

खलं, क्ली, (खल् + अच्।) भूः। स्थानम्। कल्कः। इति मेदिनी। खलाधानम्। इति हेमचन्द्रः ॥ धान्यमाड़िवार खामार इति भाषा ॥ (यथा, मनुः। ११। १७।

"खलात् क्षेत्रादगाराद्वा यतो वाऽप्युपलभ्यते॥")

खलः, पुं, (खल् + अच्) सूर्य्यः। इति भूरिप्रयोगः ॥ तमालवृक्षः। इति शब्दचन्द्रिका ॥ धत्तूरवृक्षः। इति राजनिर्घण्टः ॥ (प्रवाहिकारोगे भेषजादिविहितपथ्यविशेषः। यथा, चिकित्सास्थाने नवमेऽध्याये वाभटेनोक्तम्।

"कल्को बिल्वशलाटूनां तिलकल्कश्च तत्समः। दध्नः सरोऽम्लः सक्षौद्रः खलो हन्ति प्रवाहिकाम्॥")

खलः, त्रि, नीचः। अधमः। इति मेदिनी ॥ क्रूरः। (यथा, मृच्छकटिकायां १ मे अङ्के।

"खलस्वभावं भवितव्यतां तथा चकार सर्व्वं किल शूद्रको नृपः॥")

तत्पर्य्यायः। दुर्जनः २ पिशुनः ३। इत्यमरः। ३। १। ४७ ॥ दुर्व्विधः ४ विश्वकटुः ५ वृश्चंसः ६ घातुकः ७ क्रूरः ८ पापः ९। इति जटाधरः ॥

खलतिः, पुं, (खलन्ति केशा अस्मात्। खल सञ्चलने + "खलतिः।" उणा ३। ११२। इति निपातनात् साधुः।) इन्द्रलुप्तरोगशुक्लः। टाकपड़ा माथा इति भाषा। तत्पर्य्यायः। खल्वाटः २ ऐन्द्रलुप्तिकः ३ शिपिविष्टः ४ वभ्रुरथः ५। इति हेमचन्द्रः ॥ खल्लोटः ६। इति त्रिकाण्डशेषः। खल्लिटः ७। इति शब्दरत्नावली ॥

("रोमकूपाग्रगं पित्तं वातेन सह सूच्छितम् ॥ प्रधावयति रोमाणि ततः श्लेष्मा सशोणितः। रोमकूपान् रुणद्ध्यस्य तेनान्येषामसम्भवः ॥ तदिन्द्रलुप्तं रूढ्याञ्च प्राहुश्चाचेति चापरे। खलतेरपि जन्मैवं सदनं तत्र तु क्रमात् ॥"

इति वाभटे उत्तरस्थाने चत्वारिंशेऽध्याये ॥)

खलपूः, त्रि, (खलं भूमिं पुणाति परिष्कृतं करोतीति। खल + पू + क्विप्।) माठनकारी। झाड़ुकष फरास इत्यादि भाषा। तत्पर्य्यायः। बहुकरः २। इत्यमरः। ३। १। १७ ॥

खलमूर्च्छिः, पुं, (खल इव अनिष्टकारकत्वात् उग्रा मूर्च्छिरस्य।) पारदः। इति शब्दचन्द्रिका ॥ पारा इति भाषा ॥

खलाधारा, स्त्री, (खल आधारो यस्याः।) तैलपायिका। इति जटाधरः॥ आरसुला इति भाषा॥

खलिः, पुं, (खल+इन्।) तैलकिट्टम्। इति राजनिर्घण्टः॥ (यथा, भारतरत्नाकरे। २।६८।
"स्थाल्यां वैदूर्यमय्यां पचति तिलखलिं चन्दनेरिन्धनौघैः॥")

खलिनः, पुं क्ली, (खे अश्वसुखच्छिद्रे लीनः एषोदरादित्वात् वा हस्वः।) खलीनः। इत्यमरटीकायां रायमुकुटः॥ (यथा, कादम्बर्याम्
"उभयतः खलिनकनकटकावलम्बाभ्यां पदे पदे लताकुञ्चनप्रयत्नाभ्यां पुरुषाभ्यामवलम्ब्यमानम्।" अश्वमित्यर्थः॥)

खलिनी, स्त्री, (खलानां समूहः। "इनिठनौ।" ४।२।५१। इति इनिः। ततो ङीष्।) खलसमूहः। धानेर अनेक खामार इति भाषा॥ तत्पर्य्यायः। खला २। इत्यमरः। ३।२।४२॥ तालमूली। इति रत्नमाला॥

खलिश्रः, पुं, (खे जलादूर्द्धाकाशे लिश्रति ईषदुद्गच्छतीति। यद्वा, खे जलाभ्यन्तरे क्षिप्तादौ लिश्रति खल्वीभावेन तिष्ठतीति। लिश्र्+कः।) खनामख्यातमत्स्यः। खलिशामाछ इति भाषा॥ तत्पर्य्यायः। कङ्कचोटः २ खलेशयः ३। इति शब्दरत्नावली॥ अस्य गुणाः। याहित्वम्। कषायत्वम्। वायुकोपनत्वम्। रूक्षत्वम्। लघुत्वम्। शूलहरत्वम्। किञ्चिदामविनाशित्वञ्च। इति राजवल्लभः॥ खलिश्योऽपि पाठः॥

खलीकारः, पुं, (खल+ल+घञ्। अभूततद्भावे च्विः।) अपकारः। इति जटाधरः॥ (निर्भर्त्सनम्। इति चिन्तामणिः॥)

खलीनः, पुंक्ली, (खे अश्वसुखच्छिद्रे लीनः।) कविका। इत्यमरः। २।८।४६॥ कड़ियाल इति भाषा॥ (यथा, महाभारते। १।१६६।१५।
"घृतं रथानां वरहेममालिनां
चतुर्युजां हेमखलीनशालिनाम्॥")

खलु, व्य, (खल्+बाहुलकात् उन्।) निश्चयः। वाक्यालङ्कारः। (यथा, माघे। २।७०।
"सम्पृच्छसाम्प्रतं वक्तुमुक्तं सुचलपाणिना।
निह्नारितेऽर्थे लेखेन खलूक्ता खलु वाचिकम्॥"
"अवाद्याखलुशब्दः प्रतिषेधार्थे द्वितीयः वाक्यालङ्कारे॥" इति तट्टीकायां मल्लिनाथः॥) जिज्ञासा। (यथा, गङ्गारत्ने। "स खल्वधीते वेदम्?") अनुनयः। इत्यमरः। ३।४।१८॥ (यथा, गङ्गारत्ने।
"न खलु न खलु सुग्धे! साहसं कार्य्यमेतत्॥")
निश्चितम्। (यथा, कुमारे। ४।२८।
"दयिताखनवस्थितं वृषा
न खलु प्रेम चलं सुहृज्जने॥")
पदवाक्यादिपूरणम्। (यथा, रामायणे। ३।४१।६।
"वध्याः खलु न वध्यन्ते सचिवास्तव रावण!।
ये त्वामत्यर्थमारूढं न नियच्छन्ति सर्व्वशः॥")
वीप्सा। इति शब्दरत्नावली॥ (यथा,—

ग्राकुञ्चले १ मे अङ्गे।
"न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः॥")

खलुक्, [ञ्] पुं, (खं इन्द्रियं दर्शनेन्द्रियं लुञ्चयति हन्तीति। ख+लुञ्च+क्विप्।) अन्धकारः। इति चिकाण्डशेषः॥

खलूरेषः, पुं, (खलुरिष्यते वध्यतेऽसौ। खलु+रिष्+कर्म्मणि घञ्।) मृगभेदः। इति शब्दचन्द्रिका॥

खलूरिका, स्त्री, (खलु+रिष्+निपातनात् साधुः।) शस्त्राभ्यासभूमिः। इति हेमचन्द्रः॥

खलेधानी, स्त्री, (खले धीयन्ते वृषभा अस्मिन्। धा+अधिकरणे लुट् ततो ङीप्।) मेधिः। खलेपशुबन्धनदारु। इति जटाधरः॥

खलेवाली, स्त्री, (खले वाल्यन्ते वाल्यन्तेऽत्र वृषभा इति। वल्+अधिकरणे घञ् गौरादित्वात् ङीष्।) खले गोबन्धनदारु। इति हेमचन्द्रः॥ मेड़ काठ इति भाषा॥ (यथा, कात्यायनश्रौतसूत्रे। २२।३।४८।
"खलेवालीयूपो लाङ्गलेषा॥")

खलेशयः, पुं, (खे जलादूर्द्धाकाशे गमनकाले लिश्रति संश्रियतीति। लिश्र्+अच्।) खलिश्रमत्स्यः। इति हारावली॥

खलेशयः, पुं, (खलेशं जलादूर्द्धमाकाशसंसर्गं यातीति। या+कः।) खलिश्रमत्स्यः। इति शब्दरत्नावली॥

खल्ला, स्त्री, (खलानां समूहः। यत्।) खलिनी। इत्यमरः। ३।३।४२॥ धानमाड़ार अनेक खामार इति भाषा॥

खल्लः, पुं, (खलतीति क्विप् खल् तं लातीति। ला आदाने+कः।) वस्त्रप्रभेदः। गर्म्मः। चर्म्म। चातकपक्षी। इति मेदिनी॥ इतिः। इति हेमचन्द्रः॥ मशक इति भाषा। औषधमर्द्दनपात्रम्। खल इति भाषा। इति वैद्यकम्॥ ("अजाशृङ्गतुषाग्निश्च भूगर्भे हितयं क्षिपेत्। तस्योपरिस्थितं खल्लं तप्तखल्लमिति स्मृतम्॥" इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥)

खल्लिका, स्त्री, (खल्ल+संज्ञायां कन् तलटाप्। कापि अत इत्वम्।) ऋजीषम्। पिष्टकादिभर्জनपात्रम्। इति शब्दचन्द्रिका॥

खल्लिटः, त्रि, (खल्ल+इन्। खल्लि इव टलतीति। टल्+डः।) खलतिः। इति शब्दरत्नावली॥

खल्ली, स्त्री, (खल्ल+गौरादित्वात् ङीष्।) हस्तपादावमर्द्दनाक्षरोगः। इति मेदिनी॥ तस्य लक्षणं यथा, माधवकरः।
"खल्ली तु पादजङ्घोरुकरमूलावमोटनी॥"
तच्चिकित्सा यथा, भावप्रकाशे।
"कुष्ठसैन्धवयोः कल्कश्चुक्रतैलसमन्वितः।
सुखोष्णो मर्द्दने योज्यः खल्लीशूलनिवारणः॥"
अपि च भैषज्यरत्नावल्याम्।
"खल्लां स्निग्धान्नलवणैः स्वेदोक्तादोपनाहनम्॥"

खल्लीटः, त्रि, (खल्लीव टलतीति। टल्+बाहुलकात् कः।) खलतिः। इति चिकाण्डशेषः॥ (तच्चिकित्सा यथा, गारुड़े। १८०।१।
"सप्तरात्रात्प्रजायन्ते खल्लीटस्य कृमाः शुभाः।
दग्धहस्तिदन्तलेपात् साजाक्षीररसाञ्जनात्॥")

खव, ग भूतिपूर्व्वोरुत्पत्तौ। इति कविकल्पद्रुमः॥ (क्र्यां-परं-अकं-सेट्।) भूतिः सम्पत्तिः पूतिः पवित्रता तयोरुत्पत्तिः प्रादुर्भावः॥

खवल्ली, स्त्री, (खे आकाशे स्थिता वल्ली।) आकाशवल्ली। इति राजनिर्घण्टः॥ (यथास्याः पर्य्याया गुणाश्च। अथ आकाशवल्ली। अमरवेलि इति च भाषा।
"आकाशवल्ली तु बुधैः कथितामरवल्लरी।
खवल्ली ग्राहिणी तिक्ता पित्तश्लेष्मामयापहा।
तुवरास्निकरी हृद्या पित्तश्लेष्मामनाग्निनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

खवारि, क्ली, (खे आकाशे स्थितं वारि उदकम्। खादागतं वारि वा।) दिव्योदकम्। इति राजनिर्घण्टः॥

खवासः, पुं, (खे आकाशे शून्ये स्थितो वासः।) हिमम्। इति हारावली॥

खशः, पुं, देशविशेषः। इति चिकाण्डशेषः॥ (तद्देशवासिनि तद्देशनृपे च बहुषु अणो लुक्।) तथा हि मनुः। १०।४४।
"पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः॥")

खशा, स्त्री, सुरानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ (कखयोस्तल्यार्थत्वात् खः प्रजापतिर्दक्षः आदौ तद्गर्भे कन्यात्मकबीजभावेन शेते इति। ख+शी+डः ततष्टाप्।) दक्षकन्या। सा च कश्यपपत्नी। यथा,—
"धर्म्मपत्न्यः समाख्याताः कश्यपस्य वदाम्यहम्।
अदितिर्दितिर्दनुः काला अनायुः सिंहिका मुनिः॥
क्रुधः प्राधा धरा क्रोधा विनता सुरभिः खशा॥"
"धरा वृक्षलतावल्लीः तृणजातीश्च सर्व्वशः।
खशा च यक्षरक्षांसि मुनिरप्सरसस्तथा॥"
इति गारुड़े ६ अध्यायः॥

खश्रेटः, पुं, (खं श्रेटति इति। श्रिट् अनादरे अण्। अस्य गमनसमये खस्यानादरत्वेन गतियोग्यत्वाभावेऽपि तदज्ञानादरेण गमनाच्छघात्वम्।) खलिश्रमत्स्यः। इति चिकाण्डशेषः॥

खश्वासः, पुं, (खस्य आकाशस्य श्वास इव।) वायुः। इति चिकाण्डशेषः॥

खष, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) खषति। इति दुर्गादासः॥

खष्यं, क्ली, (खनु+"खष्यशिल्पदाधेति।" उणा। ३।२८। इति षप्रत्ययात् निपातनात् सिद्धम्।) क्रोधः। बलात्कारः। इत्युणादिकोषः॥

खसः, पुं, (खं इन्द्रियं स्यति निश्चलीकरोतीति। सो+कः।) पामा। खोस इति भाषा॥ तत्पर्य्यायः। पाम २ कच्छूः ३ विचर्च्चिका ४। इति हेमचन्द्रः॥ (पामन्शब्देऽस्य विवरणं द्रष्टव्यम्॥)

खसकन्दः, पुं, (खस इव कन्दोऽस्य।) क्षीरकचुकीवृक्षः। इति रत्नमाला॥ खसगन्धोऽपि क्वचित् पाठः॥

खसतिलः, पुं, (खसपूय इव तिलति स्निह्यतीति। तिल स्नेहे+कः। अस्य शुक्लस्नेहनिःसरणात् तथात्वम्।) खखसः। इति राजनिर्घण्टः॥ (गुणादयोऽस्य यथा,—

"तिलभेदः खसतिलः कासघ्नोऽसहरः स्मृतः।
स्याद्वा खसफलोद्भूतं वल्कलं शीतलं लघु॥
ग्राहि तिक्तं कषायञ्च वातलञ्च कफासहृत्।
धातूनां शोषणं रूक्षं मदलङ्घाग्निवर्द्धनम्॥
सुदुर्मोहिकरं रूक्षं सेवनात् पुंस्त्वनाशनम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

खसमः, पुं, (खेनाकाशेन समः।) वृक्षः। इति त्रिकाण्डशेषः॥

खसम्भवा, स्त्री, (खे सम्भवतीति। सम्+भू+अच्।) आकाशमांसी। इति राजनिर्घण्टः॥

खसर्पणः, पुं, (खे शून्ये सर्पणमस्य योगप्रभावात्।) बुद्धविशेषः। इति त्रिकाण्डशेषः॥

खसात्मजः, पुं, (खसायाः कश्यपपत्न्या आत्मजः।) राक्षसः। इति त्रिकाण्डशेषः॥

खस्रमः, पुं, विप्रचित्तिदैत्यपुत्रः। यथा,—

"सिंहिकायां समुत्पन्ना विप्रचित्तिसुतास्तथा।
व्यंशः शल्यश्च बलवान् नभश्चैव महाबलः॥
वातापिर्नमुचिश्चैव इल्वलः खस्रमस्तथा।
अन्तको नरकश्चैव कालनाभस्तथैव च॥
निवातकवचा दैत्याः प्रह्लादस्य कुलेऽभवन्॥"

इति गारुड़े ६ अध्यायः॥

खस्रमः, पुं, (खस+पृषोदरात् ह्रस्वम्।) वृक्षविशेषः। पोस्ता इति भाषा॥ तत्पर्य्यायः। खस्रबीजः २ खस्रतण्डुलः ३ सुबीजः ४। अस्य गुणः। पाके मधुरत्वम्। कान्तिवीर्य्यबलप्रदत्वञ्च। इति राजनिर्घण्टः॥ (खसतिलशब्दे-ऽस्य गुणादयो ज्ञातव्याः॥)

खस्रसरसः, पुं, (खस्रसस्य क्षुद्रबीजवृक्षविशेषस्य रसः।) अहिफेनः। इति राजनिर्घण्टः॥ आफिं इति भाषा॥

खस्रनी, स्त्री, (खं आकाशं स्रवदस्याः मेघवारिपतनेन गृह्यादुत्पत्तेः पुत्रस्थानीयानां पृथिवीस्थजीवानां जीवनधारणात् तथात्वम्।) पृथिवी। इति त्रिकाण्डशेषः॥

खस्फाटिकः, पुं, (खवत् निर्म्मलः स्फाटिकः। यद्वा खस्फाटिकः सूर्य्यः स अधिष्ठाताऽस्य।) सूर्य्यकान्तमणिः। चन्द्रकान्तमणिः। इति हेमचन्द्रः॥

खाखसः, पुं, (खस प्रकारे द्विर्भावः ततः पृषोदरात् साधुः।) बीजविशेषः। पोस्तादाना इति भाषा। तत्पर्य्यायगुणाः।

"तिलभेदः खसतिलः खाखसश्चापि स स्मृतः।
स्याद्वा खसफलोद्भूतं वल्कलं शीतलं लघु॥
ग्राहि तिक्तं कषायञ्च वातलञ्च कफासहृत्।
धातूनां शोषकं रूक्षं मदलङ्घाग्निवर्द्धनम्॥
सुदुर्मोहिकरं रूक्षं सेवनात् पुंस्त्वनाशनम्॥

अथ अफेनम्।

उक्तं खसफलक्षीरमाफुकमहिफेनकम्।
आफुकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलम्॥
तथा खसफलोद्भूतं वल्कलप्रायमित्यपि।

अथ खसबीजम्।

उच्यन्ते खसबीजानि ते खाखसतिला अपि॥
खसबीजानि बल्यानि तृष्णाघ्नि सुगुरूणि च।
जनयन्ति कफं तानि भ्रमयन्ति समीरणम्॥"

इति भावप्रकाशः॥

खाजिकः, पुं, (खे ऊर्द्ध्वदेशे आजः क्षेपः तत्र साधुः ठन्।) लाजाः। इति हारावली॥ खै इति भाषा॥

खाटः, पुं, स्त्री, (खे ऊर्द्धमार्गे अटत्यनेन। अट्+करणे घञ्।) ग्रामरथः। इति शब्दरत्नावली॥ मरार खाट् इति भाषा॥

खाटिः, स्त्री, (खट् काङ्क्षायां बाहुलकात् इन्।) असङ्गृहः। किण्वः। ग्रामरथः। इति मेदिनी॥

खाटिका, स्त्री, (खाटि+स्वार्थे संज्ञायां वा कन् ततष्टाप्।) खाटः। ग्रामरथः। इति शब्दरत्नावली॥

खाण्डवं, क्ली, (खाण्डवाख्यदाख्यया प्रसिद्धाया नगर्य्या जातम्। खाण्डवी+अण्।) यदुक्तं कालिकापुराणे ६० अध्याये।

"पुरा तु विजयो राजा खाण्डवीं नाम तां पुरीम्।
भङ्क्त्वा वनं ततश्चक्रे तेन तत् खाण्डवं वनम्॥")

वनविशेषः। तद्विवरणं यथा,—

"विरूपस्याभवद्राधिर्गार्ग्यधर्म्मित्रोऽभवत् सुतः।
तेषां कल्पोऽभवद्राजा कल्पात्तु विजयोऽभवत्।
यो विजित्य क्षितिं सर्व्वां पार्थिवान् भूरितेजसा।
शक्रस्यानुमते चक्रे खाण्डवं शतयोजनम्॥
यत् सव्यसाची स्वदहत् पाण्डुपुत्रः प्रतापवान्।
आवहन् परमां प्रीतिं ज्वलनस्य महात्मनः॥

ऋषय ऊचुः।

कथं स खाण्डवं चक्रे विजयः शतयोजनम्।
तद्वयं श्रोतुमिच्छामः कथयस्व तपोधन!॥

मार्कण्डेय उवाच।

सोमवंशेऽभवद्राजा महात्मा स महाबलः॥
धीरः सुदर्शनो नाम शास्त्ररूपः प्रतापवान्।
स वै हिमवतो नातिदूरे भङ्क्त्वा महावनम्॥
सिंहान् व्याघ्रान् समुत्सार्य्य क्वचिच्चापि तपोधनान्।
खाण्डवीं नाम नगरीमकरोत्तत्र शोभनाम्॥
त्रिंशद्योजनविस्तीर्णामायतां शतयोजनम्।
उच्चप्राकारसंयुक्तां साट्टालामुदतोरणाम्॥
निम्नाभिरतिदीर्घाभिः परिखाभिः समावृताम्।
दीर्घिकाभिश्चोपवनैर्बहुभिश्चाश्रयोगिभिः॥
आकीर्णाञ्च तथावासैरुत्तमैरपि मानवैः।
सोत्सवाः सततं यत्र जना देवान् दिवि स्थितान्॥
सङ्गच्छन्ते सदा युक्ता आढ्या भोगसमन्विताः।
स वै सुदर्शनो राजा श्रुत्वा भूमिं विदार्य्य च॥
गङ्गां कनखलां देवीं वाहयामास खाण्डवीम्।

आज्ञाय खाण्डवीमध्यं तेन खातेन वर्त्मभिः॥
वक्रासु वक्रगा भूत्वा याति सीतां नदीं प्रति।
स जित्वा सकलान् भूपान् वित्तान्याहृत्य भूरिशः॥
राशीचकार खाण्डव्या मध्ये रत्नैरनेकशः।
अन्येषां नगरेभ्यस्तु जनानानीय भूपतिः॥
खाण्डव्यां वासयामास हठादपि सुदर्शनः।
देवदानवगन्धर्व्वान् जित्वा जित्वा मृधा क्षती॥
देवदत्तं देवरत्नं देवीञ्चापि तथौषधीम्।
खाण्डव्यां रोपयामास सङ्ग्रामाद्यः सुदर्शनः॥
असहिष्णुस्ततोजिष्णुर्भूपतिन्तं सुदर्शनम्।
कृतापचारं बहुधा देवानाञ्च तथा नृणाम्॥
वाराणसीपतिं वीरं विजयं जयशालिनम्।
सन्धाय कृत्वा साचिव्यं तत्रैवासौ न्ययोजयत्॥
विजयो विवरं प्राप्य महाबलपराक्रमः।
सुदर्शनस्य नृपतेरवस्कन्दमथाकरोत्॥
नासहत् सोऽप्यवस्कन्दं विजयस्य सुदर्शनः।
चतुरङ्गबलेनाशु युद्धायाभिमुखोऽभवत्॥
विजयो रथमारुह्य नियुज्य चतुरङ्गिणीम्।
सेनां सुदर्शनं योद्धुं सम्मुखोऽभवदक्षसा॥
तदा महद्युद्धमासीद्विजयेन महात्मना।
सुदर्शनस्य नृपतेर्व्वृत्रवासवयोरिव॥
ततः सुदर्शनो राजा दारितो गदयाऽपतत्।
तस्मिन्निपतिते वीरे सेनाभिस्तस्य सैनिकाः॥
भयात् संप्राद्रवन्नस्माद्दिग्भ्यः प्रदिग्भ्य एव च।
नष्टेषु तस्य सैन्येषु विजयः खाण्डवीं पुरीम्॥
प्रविश्य ददृशे तत्र राशीभूतान् गिरीनिव।
सुवर्णानाञ्च रत्नानां सञ्चयान् बहुशः पुरः॥
दृष्ट्वा सरांसि तत्राथ प्रफुल्लकमलानि तु।
हंसकारण्डवानादनादितानि समन्ततः॥
राशीन् सुवर्णरत्नानां पर्व्वतानिव विस्तृतान्।
पुष्पितान् देवदत्तांश्च भ्रमद्भ्रमरभूषितान्॥
प्रासादान् विपुलान् शुभ्रान् कैलासशिखरान् गजान्।
विस्फुटांश्च सुगन्धाढ्यान् प्रतिगेहे व्यवस्थितान्॥
उत्फुल्लनयनो राजा विजयः परवीरहा।
मेने ऽमरावतीं तान्तु पुरीं क्षितिगतामिव॥
तं वीक्ष्यन्तं नरपतिं नगरीं तां सुरेश्वरः।
समेत्य विजयं प्राह सान्त्वयन् श्लक्ष्णया गिरा॥

इन्द्र उवाच।


राजन्महद्धनमिदमासीद्विगतशोकतम्।
नरगन्धर्व्वयक्षाणां मुनीनाञ्च मनोहरम्॥
सर्व्वानुत्सार्य्य देवादीन्मम चाप्रिये रतः।
भङ्क्त्वा वनमिदं गुह्यं समुत्साद्य तपोधनम्॥
खाण्डवीं नगरीं चक्रे हठाद्राजा सुदर्शनः।
तदिदं पुनरेव त्वं वनं कुरु नृपोत्तम!॥
तत्राहं विहरिष्यामि तवकेन समं रहः।
मुनीनाञ्च तपः स्थानं मङ्गलं ते प्रसादतः॥
भविष्यति च यक्षाणां किन्नराणाञ्च पार्थिव!॥

मार्कण्डेय उवाच।

एतत् श्रुत्वा वचस्तस्य शक्रस्य विजयस्तदा।
वनमेवाकरोत्तन्तु खाण्डवीं शक्रगौरवात्॥
गच्छन्तु भो यथास्थानं प्रजाः सर्व्वा यथेच्छया।

येषां वाञ्छास्ति लोकानां मद्राज्यगमने पुनः ॥
वाराणसीं ते गच्छन्तु मयैव प्रतिपालिताम् ।
ततस्तस्य वचः श्रुत्वा जनाः केचिन्निजं पदम् ॥
जग्मुर्वाराणसीं केचिद्विजयेनाभिपालिताम् ।
ततो धनानां तान्राशीन्नानाश्च पृथक् पृथक् ॥
अश्वानां कनकानाञ्च कूप्यानां विजयस्तदा ।
धीवरैर्व्वाहयामास पुरीं वाराणसीं प्रति ॥
गन्धर्व्वाणाञ्च देवानां यदानीतं हठात् पुरा ।
रत्नदार्व्वादिकं यत्तु विजयं तत् प्रसाद्य च ॥
तैस्तैर्नीतन्तु खाण्डव्याः स्वस्थानं प्रति हर्षितैः ।
त्रिंशद्योजनविस्तीर्णां शतयोजनमायताम् ।
तां पुरीं विजयश्चक्रे न चिरादेव वै वनम् ।
तस्मिन् शक्रस्य सम्मत्या तक्षकः सहितो गणैः ॥
उवास सुचिरं तत्र ततोऽभून्निर्ज्जनं वनम् ।
तत्र देवाः सगन्धर्व्वाः क्रीड़न्तेऽप्सरसां गणाः ॥
आर्ज्जुनेयश्च विजयं रणेषु विजयावहम् ॥"*॥
"अष्टाविंशतिमे प्राप्ते युगे द्वापरसंज्ञिते ॥
वह्निर्ब्राह्मणरूपेण भिक्षां जिष्णुमयाचत ।
दातुमङ्गीकृते भिक्षां तदा पाण्डुसुतेन वै ॥
वह्निः स्वरूपमास्थाय जिष्णुं वचनमब्रवीत् ।
अहमग्निः पाण्डुपुत्र ! यज्ञभागातिभोजनात् ॥
बाधितोऽहं ततो बाधिं मम त्वं नाशयाधुना ।
खाण्डवं नाम विपिनं सपक्षिन्मृगराक्षसम् ॥
यदि त्वं मां भोजयितुं शक्तोषि श्वेतवाहन ! ।
तदा ममाल्पसौ बाधिरपयास्यति नोचिरात् ॥
पुरा तु विजयो राजा खाण्डवीं नाम तां पुरीम् ।
भङ्क्त्वा वनं ततश्चक्रे तेन तत् खाण्डवं वनम् ॥
तदर्थं देवविहितं वनं तक्षकवाहन ! ।
विरोधात्तत् शक्रस्य न स्वयं भोक्तुमुत्सहे ॥
तस्मां चाहि महाभाग ! वने तस्मिन्नियोजय ।
यथाऽहं सकलं भोक्तुं प्राप्नोमि त्वत्प्रसादतः ॥
तस्य तद्वचनं श्रुत्वा सव्यसाची महाबलः ।
दाहयामास विपिनं तत् सर्व्वं प्राणिसंयुतम् ।
देवकीतनयेनासौ वासुदेवेन पालितः ।
खाण्डवं दाहयामास ज्वलनस्य हिते रतः ॥"
"सुप्रीतः प्रददौ तस्मादर्ज्जुनाय महात्मने ।
वह्निर्धनुश्च गाण्डीवं वारणं देवनिर्म्मितम् ॥
अक्षय्यावियुधौ द्वौ च रूप्याभांश्चतुरो हयान् ।
हनूमताधिष्ठितन्तु महान्तं वानरध्वजम् ॥
खड्गञ्च त्रिशिखं तीक्ष्णं दहनः सव्यसाचिने ।
नीरोगश्चाभवद्वह्निस्तदा जिष्णुप्रसादतः ॥
तैर्व्वाणैस्तेन धनुषा तेन खड्गेन केतुना ।
तदभ्यस्तेनापि विजिग्ये फाल्गुनो रणे ॥
एवं भैरववर्गेषु संजातो विजयो नृपः ।
खाण्डवं नाम विपिनं चकार समहाक्रतौ ॥"
इति श्रीकालिकापुराणे ८० अध्यायः ॥
(खण्डस्य इक्षुखण्डादेर्विकार इत्यण् । गुड़ादि-
विकारमिश्रान्नद्रव्यम् । यथा, महाभारते । १३।
५३ । १८ । [वान् ॥")
"रसानापूपकांश्चित्रान् मोदकानथ खाण्ड-


खाण्डवी, स्त्री, (हिमवतः सन्निहितं इक्षुक्षेत्रं
खण्डयित्वा चन्द्रवंशीयेन राज्ञा सुदर्शनेन
निर्म्मिता या पुरी सा ।) चन्द्रवंशीयसुद-
र्शनराजकृतहिमवत्पर्व्वतनिकटस्थपुरीविशेषः ।
तद्विरणं खाण्डवशब्दे द्रष्टव्यम् ॥
खाण्डिकः, पुं, (खण्डं मोदकादिकं शिल्पमस्य ।
इति ठञ् ।) खण्डपालः । मोदकः । इति
हारावली ॥ मयरा इति भाषा ॥ (क्षीरे तु
खण्डिकानां समूहः "खण्डिकादिभ्यश्च" । ४ ।
२ । ४५ । इत्यण् । खण्डिकसमूहः ॥)
खातं, क्ली, (खन्यते इति । खन् + कर्म्मणि क्तः ।)
पुष्करिणी । इत्यमरः । १ । १० । २७ ॥ तस्य
परिमाणं यथा,—शतेन धनुर्भिः पुष्करिणी
त्रिभिः शतैर्दीर्घिकाचतुर्भिर्द्रोणः पञ्चभि-
स्तड़ागः द्रोणदशगुणा वापीति ॥
"चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुरुत्तरः ।
शतधन्वन्तरञ्चैव तावत् पुष्करिणी शुभा ।
एतत्पञ्चगुणः प्रोक्तस्तड़ाग इति निर्णयः ॥"
इति नयवर्द्धमानधृतो वशिष्ठः ॥
खातकं, क्ली, (खात + संज्ञायां कन् ।) परिखा ।
इति हेमचन्द्रः ॥ खाना पगार इत्यादि भाषा ॥
खातकः, पुं, अधमर्णः । धारी । ऋणी । यथा,—
"उत्तमर्णो धनस्वामी अधमर्णस्तु खातकः ॥"
इति संक्षिप्तसारटीकायां गोयीचन्द्रः ॥
(परसैन्यविदारकः । यथा, महाभारते । १२ ।
११८ । ११ ।
"खातकं व्यूहतत्त्वज्ञं बलहर्षणकोविदम् ॥"
"खातकः परसैन्यविदारकः ।" इति तट्टीकायां नील-
कण्ठः ॥)
खातभूः, स्त्री, (खातयुक्ता भूर्भूमिः ।) प्रतिकूपः ।
परिखा । इति हारावली ॥
खातव्यवहारः, पुं, (खातस्य पुष्करिण्यादेर्व्यवहारः
परिमाणम् ।) पुष्करिण्यादिपरिमाणम् । पुकुरे
कालीति भाषा ॥
"अथ खातव्यवहारे करणसूत्रं सार्द्धार्य्या ।
गणयित्वा विस्तारं बहुषु स्थानेषु तद्युतिर्भाज्या ।
स्थानकमित्या सममितिरेवं दैर्घ्ये च वेधे च ।
क्षेत्रफलं वेधगुणं खाते घनहस्तसंख्या स्यात् ॥
उदाहरणम् ।
भुजवक्रतया दैर्घ्यं दशैकार्कैरभीप्सितम् ।
त्रिषु स्थानेषु षट्पञ्चसप्तहस्ता च विस्तृतिः ॥
यस्य खातस्य वेधोऽपि द्विचतुष्करः सखे ! ।
तत्र खाते कियन्तः सुघनहस्ताः प्रचक्ष्व मे ॥"



१२

यत्र सममितिकरणेन विस्तारे हस्ताः । ६ ।
दैर्घ्ये । ११ । वेधे । ३ । तत्क्षेत्रदर्शनं यथा,—


११



११

यथोक्तकरणेन लब्धा घनहस्तसंख्या ॥ १६८ ॥
खातान्तरे करणसूत्रं सार्द्धवृत्तम् ।
सुखजतलजतद्युतिजक्षेत्रफलैक्यं हृतं षड़्भिः ।
क्षेत्रफलं समभेतत् वेधहृतं फलं घनफलं स्यात् ।
समखातफलक्षेत्रग्रः सूचीखाते फलं भवति ॥
उदाहरणम् ।
सुखे दशद्वादशहस्ततुल्यं
विस्तारदैर्घ्यन्तु तले तदर्द्धम् ।
यस्याः सखे सप्तकरश्च वेधः
का खातसंख्या वद तत्र वाप्याम् ॥


१२



१२

सुखजं क्षेत्रफलम् । १२० । तलजम् । ३० ।
तद्युतिजम् । २७० । एषामैक्यम् । ४२० ।
षड़्भिः । ६ । हृतं जातं समफलम् । ७० । वेध-
७ हृतं जातं खातफलं घनहस्ताः । ४६० ।
द्वितीयोदाहरणम् ।
खातेऽथ तिग्मकरतुल्यचतुर्भुजे च
किं स्यात् फलं नवमितः किल यत्र वेधः ।
वृत्ते तथैव दशविस्तृतिपञ्चवेधे
सूचीफलं वद तयोश्च पृथक् पृथङ्मे ॥


१२



१२

भुजः । १२ । वेधः । ९ । जातं यथोक्तकरणेन
खातफलं घनहस्ताः । १२९९ । सूचीफलम् । ४३२ ।

वृत्तखातदर्शनाय।



व्यासः। १०। वेधः। ५। अत्र सूक्ष्मपरिधिः $\frac{३१२०}{१२५}$। सूक्ष्मक्षेत्रफलम् $\frac{३१२०}{५०}$। वेधगुणं जातं सूक्ष्मखातफलम् $\frac{३१२०}{१०}$। सूक्ष्मसूची-फलम् $\frac{१३०६}{१०}$। यद्वा स्थूलखातफलम् $\frac{२७५०}{७}$। सूचीफलं स्थूलम् $\frac{२७५०}{२१}$।

इति लीलावत्यां खातव्यवहारः समाप्तः॥

खात्रं, क्ली, (खनु विदारे+"उषिखनिभ्यां कित्।" उणा। ४। १६१। इति ष्ट्रन् कित्च।) खातम्। खनित्रम्। इत्युणादिकोषः॥ दारुणम्। वनम्। क्षत्रम्। इति संक्षिप्तसारे उणादिवृत्तिः॥ (जलाधारविशेषश्च। इति उज्ज्वलदत्तः॥)

खाद, ऋ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। ऋदित्।) ऋ, अचखादत्। इति दुर्गादासः॥

खादकः, त्रि, (खाद् भक्षणे+ण्वुल्।) ऋणग्रहीता। खातक इति ख्यातः। इति मिताक्षरा॥ भक्षकः। यथा,—

"विक्रयेणोविनिमयैर्दत्त्वा गोमांसखादके।
व्रतं चान्द्रायणं कुर्याद्वधे साक्षाद्वधो भवेत्॥"

इति प्रायश्चित्ततत्त्वे गोभिलः॥

खादनं, क्ली, (खाद्+भावे ल्युट्।) भक्षणम्। आहारः। (खादति चर्व्यतेऽनेन इति।) दन्ते पुं। इति हेमचन्द्रः॥

खादितं, त्रि, (खाद+क्तः।) भक्षितम्। इत्यमरः। ३। १। ११०॥ खाओया इति भाषा॥ ("अश्नितं खादितं पीतं लीढं कोष्ठगतं तृणाम्। तच्चीर्यति यथाकालं शोषितं पित्ततेजसा॥" इति शारीरस्थाने चतुर्थेऽध्याये सुश्रुतेनोक्तम्॥)

दिरसारः, पुं, (खदिर+स्वार्थे अण् ततः षष्ठीतत्पुरुषः।) खदिरवृक्षनिर्यासः। खएर इति भाषा॥ तत्पर्य्यायः। खादिरः २ अद्भुतसारः ३ सत्सारः ४ रङ्गदः ५ रङ्गः ६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातव्रणकण्डूमयनाशित्वम्। रुचिकारित्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ खदिरसारोऽपि पाठः॥ (यथा,—

"विना खदिरसारेण हारेण हरिणीदृशाम्।
माधुरे जायते रागो नानुरागः पयोधरे॥"

इति उद्भटः॥)

खादुकः, त्रि, (खादति हिनस्ति इति। खाद्+उन् संज्ञायां कन्।) हिंसालुकः। इति हारावली॥

खाद्यं, त्रि, (खाद्यते इति। खाद्+कर्म्मणि ण्यत्।) भक्षणीयद्रव्यम्। यथा,—

"कस्त्वं भद्रखलेश्वरोऽहमिह किं घोरे वने स्थीयते
शार्दूलादिभिरेव हिंस्रपशुभिः खाद्योऽहमित्याशया।" इत्युद्भटः॥

खानपानं, क्ली, (धातूनामनेकार्थत्वात् खे भक्षणे+भावे ल्युट् खानम्। पा पाने+भावे ल्युट् पानम्। खानेन सह पानं यद्वा खानञ्च पानञ्च तयोः समाहारः।) कठिनद्रवद्रव्ययोर्गलाधःकरणम्। खाना पिना इति हिन्दी भाषा॥ यथा, गारुड़े नीतिसारे १०६ अध्यायः।

"सद्भावेन हि तुष्यन्ति देवाः सत्पुरुषा द्विजाः।
इतरे खानपानेन वाक्प्रदानेन पण्डिताः॥"

खानिः, स्त्री, (खन+इन्। पृषोदरात् वृद्धिः।) खनिः। इति हेमचन्द्रः॥

खानिकं, क्ली, (खानेन खननेन निर्वृत्तं इति ठञ्।) कुथच्छेदम्। इति त्रिकाण्डशेषः॥ देयालेर गर्त्त इति भाषा॥

खानिलः, त्रि, (खानं खननं शिल्पत्वेनाऽस्यास्य। इति बाहुलकात् इलच्।) भित्तिचौरः। इति शब्दरत्नावली॥ सिंदेल चोर इति भाषा॥

खानी, स्त्री, (खानि+वा ङीष्।) खनिः। इति शब्दरत्नावली॥

खानोदकः, पुं, (खानाय पानार्थं उदकमत्र।) नारिकेलः। इति त्रिकाण्डशेषः॥

खापगा, स्त्री, (खे आकाशे स्थिता खात् आगता वा आपगा नदी।) गङ्गा। इति हेमचन्द्रः॥

खारः, पुं, (खं अवकाशमाधिक्येन ऋच्छतीति। ऋ+अण्।) खारीपरिमाणम्। इति हलायुधः॥

खारिः, स्त्री, (खं मध्यावकाशं आरातीति। आ+रा+इन्।) खारीपरिमाणम्। इति भरतधृतहलायुधः॥

खारिकं, क्ली, (खारि+संज्ञायां कन्।) महापारेवतम्। इति राजनिर्घण्टः॥

खारिस्थः, त्रि, (खारिं खारीपरिमितधान्यमित्यर्थः पचतीति। पच्+"परिमाणे पचः।" ३। २। ३१। इति खशू+ततो सप्।) खारिपरिमितान्नादिपाककर्त्ता। इति व्याकरणम्॥

खारी, स्त्री, (खं मध्यावकाशं आरातीति। आ+रा+इन्। "कृदिकारादक्तिनः।" ४। १। ४५। इत्यस्य वार्त्तिके इति पक्षे ङीष्।) परिमाणविशेषः। इत्यमरः। २। ६। ८८॥ यदाह तट्टीकायां भरतः।

"पलं प्रकुञ्चकं मुष्टिः कुड़वस्चतुष्टयम्।
चत्वारः कुड़वाः प्रस्थश्चतुःप्रस्थमथाढ़कम्॥
चतुराढ़को भवेद्द्रोणो द्विद्रोणः शूर्प उच्यते।
सार्द्धशूर्पो भवेत् खारी दे खार्यौ गोणयुदाहृता॥
तामेव भारं जानीयात् वाहो भारश्चतुष्टयम्॥"

"षोड़शद्रोणपरिमाणम्।" इत्यमरटीकायां स्वामी लीलावती च॥ गोणीचतुष्टयम्। तत्तु यस्मवत्यधिकचतुःसहस्रपलानि। पाँचशत बारशेर इति भाषा। इति वैद्यकपरिभाषा॥ द्रोणचतुष्टयम्। यथा,—

"चतुराढ़को भवेद्द्रोणः खारी द्रोणचतुष्टयम्॥"

इति स्मृतिः॥

खारीकं, त्रि, (खारीं खारीवापमर्हतीति। "खार्य्या ईकन्।" ५। १। ३३। "केवलायाश्चेति वक्तव्यम्।" इति वार्त्तिके इति ईकन्।) खारीक्षेत्रम्। खारीपरिमितबीजवपनोपयुक्तक्षेत्रम्। तत्पर्य्यायः। खारीवापः २। इत्यमरः। २। ६। १०॥

खारीवापः, त्रि, (खारी तत्परिमितधान्यं उप्यतेऽत्र। वप्+अधिकरणे घञ्।) खारीकः। इत्यमरः। २। ६। १०॥ (खारीं वपतीति। वप्+कर्त्तरि अण्। धान्यादिवपनकारी॥)

खिखिः, स्त्री, (खिरित्यव्यक्तशब्देन खेटति भीरूणां भयमुत्पादयतीति। खि+खिट्+डः। पृषोदरात् साधुः।) किखिः। इति क्वचित् त्रिकाण्डशेषे पाठः॥ खाँकशेयाली इति भाषा॥

खिखिरः, पुं, (खिं अव्यक्तध्वनिविशेषं किरति विक्षतिभावेन शब्दं करोतीत्यर्थः। कृ+कः। पृषोदरात् सत्वेन साधुः।) शिवाभेदः। खाँकशेयाली इति भाषा। खड्गाङ्गम्। तत्तु शिवखाख्यम्। वारिवालकम्। तत्तु गन्धद्रव्यम्। इति विश्वो हेमचन्द्रश्च॥

खिट, भयभीषयोः। इति कविकल्पद्रुमः॥ (भ्वां-परं-भये अकं-भयोत्पादने सकं-सेट्।) भीषा खतो भयोत्पादना। खेटति जनो व्याघ्राद्भितीत्यर्थः। खेटति व्याघ्रो जनं भीषयते इत्यर्थः। इति दुर्गादासः॥

खिद, ग्लै प औ परिघाते। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-अनिट्।) ग्लै प, खिन्दति दुष्टं राजा। औ, खेत्त्वा। इति दुर्गादासः॥

खिद, ङ ध य औ दैन्यके। इति कविकल्पद्रुमः॥ (दिवां-रुधां च-आत्मं-अकं-अनिट्।) दैन्यकसुपतप्तीभावः। ङ ध, खिन्ते तैर्व्वेव ये द्रव्यम् दीयमानं न गृह्णते। इति हलायुधः॥ ङ य, खसुखनिरभिलाषः खिद्यते लोकहेतोरिति ग्राकुन्तले। औ, खेत्त्वा। इति दुर्गादासः॥

खिदिरः, पुं, (खिद्यते क्षयमपक्षेण दुःखेन तपसा वा। यथायथं युत्पत्तिर्ज्ञातव्या। खिद्+"इधिमदि-सदि-खिदीति।" उणा। १। ५२। इति किरच्।) चन्द्रः। इत्युणादिकोषः॥ दीनः। तापसः। इति संक्षिप्तसारे उणादिवृत्तिः॥

खिद्यमानः, त्रि, (खिद्+ताच्छील्ये चानश्।) खेदयुक्तः। दैन्यग्रस्तः। उपतप्तः। यथा,—

"खिद्यमानन्तु तं दृष्ट्वा सूर्य्यः क्षणात्मजं तदा।"

इति शाम्बपुराणे सूर्य्यस्तवः॥

खिन्नः, पुं, (खिद् दैन्ये+"स्फायि तञ्चिवञ्चीति।" उणा। २। १३। इति रक्।) रोगः। दरिद्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

खिन्नः, त्रि, (खिद्+क्तः।) दैन्यग्रस्तः। खेदयुक्तः। यथा, श्रीभागवते।

"गौर्भूत्वासुसखी खिन्ना रुदन्ती करुणं विभोः॥"
खिरहिट्टी, स्त्री, महासमङ्गा। इति राजनिर्घण्टः॥
खिलं, त्रि, (खिल्+कः।) हलादिना कृष्टभूमिः। खिल भूँइ इति भाषा॥ तत्पर्य्यायः। अप्रहतम् २। इत्यमरः। २। १। ५॥ सारसंक्षिप्ते देवर्षिभेदे च पुं। इति मेदिनी॥
"खिलो नारायणः प्रोक्त ऋषयस्तनुजाः स्मृताः।" इति खिलेषु हरिवंशे इत्यत्र नीलकण्ठटीका॥
खु, ड ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-अनिट्।) ड, खवते। इति दुर्गादासः॥
खुङ्गाहः, पुं, (खुं इत्यव्यक्तशब्दं कुर्वन् गाहते रणस्थलं विलोड़यतीति। गाह्+अच्।) क्षत्रियवर्णघोटकः। इति हेमचन्द्रः॥
खुज, उ स्तेये। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। उदित्त्वात् क्त्वा वेट्।) उ, खोजित्वा खुक्त्वा। स्तेयं चौर्य्यम्। इति दुर्गादासः॥
खुञ्जाकः, पुं, (खुञ्+आकः निपातनात् जस्य ञ्जत्वम्।) देवताड़कवृक्षः। इति रत्नमाला॥ खुञ्जाक इति क्वचित् पाठः॥
खुड, इ ड खण्डे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्-इदित्।) पञ्चमस्वरी। खञ्जः खोटनम्। इ, कर्म्मणि खुड्यते। ड, खुड्यते खोड़ः। इति दुर्गादासः॥
खुड, क } भेदे। इति कविकल्पद्रुमः॥
खुड, इ क } (चुरां-परं-सकं-सेट्। पाक्षिक इदित्।) द्वौ पञ्चमस्वरिणौ। क, खोड़यति। द्वितीय आद्यस्वरीति कातन्त्राद्याः। खमते तु द्वितीयस्याद्यस्वरित्वे पूर्व्वोपपदानुबन्धः स्यात्। पञ्चमस्वरित्वे तु स्वजातीयस्य पुनःपाठात् पूर्व्वो नेदनुबन्धः। खुड्यति। खड्यतीति प्रयोगस्तु खडि ङ् मथोत्यस्मात् घञि खडं करोतीति णौ साध्यम्। तस्य भेदवाचित्वन्तु धातूनामनेकार्थत्वात्। इति दुर्गादासः॥
खुर, ग्र विलेखने। छेदने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं सेट्।) ग्र, खुरति भूमिं लग्नं वा लोकः। खोरिता। खुरः ग्रफम्। इति दुर्गादासः॥
खुरः, पुं, (खुर छेदने+कः। यद्वा "ऋज्रेन्द्राग्रवज्रेति।" उणां। २। २८। इति रन् गुणाभावोऽन्तलोपश्च।) ग्रफम्। गवादीनां पादाग्रम्। (यथा, मनुः। ४। ६७।
"न भिन्नशृङ्गान्विखुरैर्न वालधिविरूपितैः॥") कोलदलम्। नखीनामगन्धद्रव्यम्। इति मेदिनी॥ छेदनवस्तु। नापितस्य खुरः। इति शब्दरत्नावली॥ खड़ादीनां पादुकम्। इति धरणी॥ खुरा इति भाषा॥
खुरकः, पुं, (खुर+संज्ञायां कन्। खुरो गन्धद्रव्यविशेषः स इव कायति वा। कै+कः।) तिलवृक्षः। इति शब्दचन्द्रिका॥ (तिलशब्दे ऽस्य गुणादयो बोद्धव्याः॥)
खुरणसः, त्रि, (खुर इव नासिका अस्य "अश्वनासिकाया इति।" ५। ४। ११८। इति अच् नसादेशश्च "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्।) चिपिटनासिकः। इत्यमरः। २। ६। ४७॥ चेपटानाकयुक्त इति भाषा॥
खुरणाः, त्रि, (खुर इव नासिका अस्य "खुरखराभ्यां वा नस्।" इति नसादेशः "पूर्व्वपदादीति।" ८। ४। ३। इति णत्वं च।) खुरणसः। इत्यमरः। २। ६। ४७॥ छेपड़ानासिकायुक्त इति भाषा॥
खुरप्रः, पुं, (खुर इव प्राति खुराकारवत् कार्य्यं पूरयतीत्यर्थः। खुर+प्रा+कः।) बाणविशेषः। इत्यमरटीकायां स्वामी॥ खुरपा इति भाषा॥
खुरली, स्त्री, (खुरैः सह विविधानि अलङ्कारादीनि लाति पौनःपुन्येन ग्रिच्चार्थमत्र। ला ग्रहणे+इन्+वा ङीष्।) ग्रराभ्यासः। इति हेमचन्द्रः॥
खुराकः, पुं, (खुर+आकन्।) पशुः। इत्युणादिकोषः॥
खुरालकः, पुं, (खुर इव अलति पर्य्याप्नोतीति। अल+खुल्।) लौहमयवाणः। इत्यमरमाला॥
खुरालिकः, पुं, (खुराणां आलिभिः कायति प्रकाशते। कै+कः।) ग्रामजीभिक्षुः। नापितेर भाँड़ि इति भाषा। नाराचः। उपधानम्। इति मेदिनी॥ खरालिकोऽपि पाठः॥
खुर्द, ड क्रीड़ायाम्। इति कविकल्पद्रुमः (भ्वां-आत्मं-अकं-सेट्।) पञ्चमस्वरी। दीर्घोयं पृथक्पाठात् पूर्व्वस्य न दीर्घः। ड, खुर्दते। इति दुर्गादासः॥
खुल्लं, क्ली, (क्षुद्+सम्पदादित्वात् क्विप्। क्षुदं लातीति। ला+कः। पृषोदरात् साधुः।) नखीनामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ क्षुद्रे नीचे च त्रि॥
खुल्लकः, त्रि, (खुल्ल+स्वार्थे कन्।) क्षुद्रः। नीचः॥ कनिष्ठः। दरिद्रः। निष्ठुरः खलः। इत्यमरटीका॥
खुल्लतातः, पुं, (खुल्लः कनिष्ठः तातस्य पितुरिति पूर्व्वनिपातः।) पितृकनिष्ठभ्राता। इति शब्दरत्नावली॥ खुड़ा इति भाषा॥
खुल्लमः, पुं, (खुल्लेन मीयते इति। मा+घञर्थे कः।) पन्थाः। इति त्रिकाण्डशेषः॥
खूर्द, ड क्रीड़ायाम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) षष्ठस्वरी। ड, खूर्दते। इति दुर्गादासः॥
खेखीरकः, पुं, (खे आकाशे खीलक इव तस्य रत्वम्।) शब्दवती यष्टिः। इति हारावली॥
खेगमनः, पुं, (खे आकाशे गमनं अस्य।) कालकण्ठपक्षी। इति शब्दमाला॥
खेचरः, पुं, (खे चरतीति। चर+"चरेष्टः।" ३। २। १६। इति टः। अलुक् समासः।) शिवः। इति शब्दरत्नावली॥ विद्याधरः। इति जटाधरः॥ पारदः। इति राजनिर्घण्टः॥ आकाशचारिणि त्रि॥
("हतो हन्ति जराव्याधिं मूर्च्छितो व्याधिघातकः। बद्धः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः॥" इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारः॥
मेघादिराशिः। यथा ज्योतिषतत्त्वे—"खेचराश्च सर्व्वे॥")
खेचरान्नं, क्ली, (खेचरं द्विदलादिमिश्रितं अन्नम्।) द्विदलादिसहितपक्वतण्डुलम्। खिचड़ी इति भाषा॥ इति पाकराजेश्वरः॥
खेट, त् क भक्षणे। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) अभिखेटत्। इति दुर्गादासः॥
खेटं, क्ली, (खे+अट्+अच्।) ह्लग्नम्। इति शब्दरत्नावली॥ खेड़मपि पाठः॥
खेटः, पुं, (खे आकाशे अटति। अट्+अच्।) ग्रहः। यथा, भावविवेके।
"यस्मिन् राशौ स्थितः खेटस्तेन तं परिपूरयेत्॥"
खेटः, त्रि, (खिट्+अच्। खेट्+कः वा।) अधमः। इत्यमरः। ३। १। ५४॥ चोटकः। इति शब्दरत्नावली॥ सुनिन्दकः। इति विश्वः॥ सुनन्दक इति पाठे बलरामस्य गदा इति कश्चित्॥
खेटः, पुं, क्ली, (खिद्यते भयसुतप्यते अस्मादनेन वा। खिट्+अपादाने करणे वा घञ्।) मृगया। इत्यमरहेमचन्द्रौ॥ कफः। (खेद्यते भक्षोपयोगिग्रस्त्रादिना उपजीव्यते अस्मात्।) ग्रामभेदः। स तु कर्षकग्रामः। (तथा च भागवते। १। ६। ११।
"खेटखर्व्वटवाटीश्च वनान्युपवनानि च॥"
"खेटाः कर्षकग्रामाः।" इति श्रीधरस्वामी॥) चर्म्म। इति मेदिनीशब्दरत्नावल्यौ॥
खेटकः, पुं, (खेट+स्वार्थे कः।) ग्रामभेदः। चासार गाँ इति भाषा॥ इति जटाधरः॥ फलकम्। इति हेमचन्द्रः॥ "खेटकं वसुनन्दके।" इति हारावली॥ वसुनन्दको धनदृद्धिजीवकः। इति तत्सूची॥ बलदेवस्य गदा इति कश्चित्॥
खेटः } पुं, (खेटति भयसुतप्यतेऽनेन। खिट्
खेटकः } +करणे घञ्। खेट+स्वार्थे कः।) यष्टिः। यथा,—
"यष्टिरूपेण खेट! त्वमरिसंहारकारकः।
देवीहस्तस्थितो नित्यं मम रक्षां कुरुष्व च॥"
इति शारदीयदुर्गापूजाप्रकरणे
अस्त्रपूजाप्रकरणम्॥
"खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च॥"
इति च तत्र दशभुजाया दुर्गायाः ध्यानम्॥
खेटितालः, पुं, (खे अटतीति अट इन्। खिट्+इन् वा। खेटिः तालोऽस्य।) वैतालिकः। इति शब्दमाला॥
खेटी, [न्] पुं, (खेट्+णिनिः।) नागरः। कामी। इति शब्दमाला॥
खेड, त् क भक्षणे। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) अभिखेड़त्। इति दुर्गादासः॥

खेदः, पुं, (खिद्+भावे घञ्।) शोकः। इति हेमचन्द्रः॥ अवसन्नता। इति जटाधरः॥ (यथा, रघुः। रामायणे। ४। ४६। ७।
"अद्यापीदं वनं दुर्गं विचिन्वन्तु वनौकसः।
खेदं त्यक्त्वा पुनः सर्व्वं वनमेव विचिन्वताम्॥")

खेदिनी, स्त्री, (खिद्+णिच्+णिनिः। स्त्रियां ङीप्।) अग्निपर्णीवृक्षः। लता। इति शब्दचन्द्रिका॥ (दैन्यकारिणी। शोककारिणी॥ इति व्युत्पत्तिलभ्योऽर्थः॥)

खेयं, क्ली, (खन्यते इति। खनु विदारे+"ईद्यति च खनः।"३। १। १११ इति कर्म्मणि क्यप् ईकारान्तादेशश्च।) परिखा। गड़खाइ इति भाषा। इत्यमरः॥ खननीयम्। इति व्याकरणम्॥ (सेतुभेदः। यथा मिताक्षरायां नारदवचनम्।
"सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च।
तोयप्रवर्त्तनात् खेयः।" इति॥)

खेल, ऋ चाले। गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-चलने अकं गत्यां सकं-सेट्।) कवर्गद्वितीयादिः। अचिखेलत्। चालः कम्यः। चालः कैश्चिन्न मन्यते। इति दुर्गादासः॥

खेलनं, क्ली, (खेल्+भावे ल्युट्।) क्रीड़नम्। इति हलायुधः॥ (यथा, गीतगोविन्दे। १। ४१।
"कापि विलासविलोलविलोचन-
खेलनजनितमनोजम्॥")

खेलनी, स्त्री, (खेलति अस्मिन् इति। खेल+अधिकरणे ल्युट्+स्त्रियां ङीप्।) प्रारिफलम्। इति हेमचन्द्रः॥

खेला, स्त्री, (खेल+भावे+अप् टाप्।) खेलनम्। तत्पर्य्यायः। क्रीड़ा २ कूर्दनम् ३। इत्यमरः। १। ७०। ३३॥

खेलिः, स्त्री, (खे आकाशे अलति पर्य्याप्नोति। अल्+इन्।) गीतम्। बाणः। सूर्य्यः। पक्षी। जन्तुः। इत्यजयपालः॥

खेव, ऋ ङ सेवे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट् ऋदित्।) ऋ, अचिखेवत्। ङ, खेवते। इति दुर्गादासः॥

खेसरः, पुं, (खे आकाशे इव द्रुतगामित्वात् सरतीति। खे+टः।) जन्तुविशेषः। खचर इति भाषा। तत्पर्य्यायः। अश्वखरजः २ सङ्कटगर्भः ३ अध्वगः ४ चमी ५ सन्तुरः ६ मिश्रजः ७ मिश्रशब्दः ८ अतिभारगः ९। इति राजनिर्घण्टः॥

खै, खैर्य्ये। खनने। हिंसायाम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-खैर्य्ये अकं-खननादौ सकं-अनिट्।) खायति। इति दुर्गादासः॥

खोड्डाहः, पुं, (खे आकाशे उड् इत्यव्यक्तशब्दं कुर्व्वन् गाहते इव प्रधावतीत्यर्थः। गाह+अच्। पृषोदरात् साधुः।) श्वेतपिङ्गलाश्वः। इति हेमचन्द्रः॥ खाड्डाहोऽपि पाठः॥

खोट, ऋ गत्याघाते। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऋ, अचुखोटत्। गत्याघातः खोटनम्। खोटति खञ्जः। इति दुर्गादासः॥

खोट, तृ क क्षेपे। इति कविकल्पद्रुमः॥ (अदन्त-पुरां-परं-सकं-सेट्।) अचुखोटत्। इति दुर्गादासः॥

खोटिः, स्त्री, (खोट्+इन्।) चतुरा स्त्री। इति शब्दमाला॥ खोरिरित्यपि पाठः॥

खोटी, स्त्री, (खोटि+वा ङीष्।) पालङ्कीवृक्षः। इति शब्दचन्द्रिका॥ चतुरापि॥

खोड़, ऋ खोटने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऋ, अचुखोड़त्। खोड़ति खञ्जः। रमानाथस्तु खोड़ति बाला क्रिमिमित्युदाहृतवान्। इति दुर्गादासः॥

खोड़, तृ क क्षेपे। इति कविकल्पद्रुमः॥ (अदन्त-पुरां-परं-सकं-सेट्।) अचुखोड़त्। इति दुर्गादासः॥

खोड़ः, त्रि, (खोड़ति इति। खोड़+अच्।) खञ्जः। खोंड़ा इति भाषा॥ इत्यमरः २। ६। ४६॥

खोड़कशीर्षकं, क्ली, (खोड़ क्षेपे+ण्वुल्। खोड़कं शीर्षं अस्य इति कप्।) कपिशीर्षम्। क्रयशीर्षम्। इति त्रिकाण्डशेषः॥

खोर, ऋ खोटने। गतिवैकल्ये इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऋ, अचुखोरत्। खोरति खञ्जः। इति दुर्गादासः॥

खोरः, त्रि, (खोरति इति। खोर्+अच्।) खञ्जः। इति हेमचन्द्रः॥

खोल, ऋ खोटने। गतिवैकल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऋ, अचुखोलत्। खोलति खञ्जः। रमानाथस्तु खोलति बाला क्रिमिमित्युदाहृतवान्। इति दुर्गादासः॥

खोलः, त्रि, (खोलति इति। खोल+अच्।) खञ्जः। इति शब्दमाला॥

खोलकः, पुं, (खोल+संज्ञायां कन्।) पाकः। खोला इति भाषा॥ शिरस्कः। खोपड़ा इति भाषा॥ वल्मीकः। उयेर ढिपि इति भाषा॥ पूगकोषः। इति मेदिनी॥ गुयार छोवड़ा इति भाषा॥

खोलिः, स्त्री, (खोल+इन्।) तूणः। इति शब्दमाला॥

खोल्लूकः, पुं, (खे आकाशे उल्लूक इव लोहितवर्णतयेति बोध्यम्।) मङ्गलग्रहः। इति त्रिकाण्डशेषः॥

ख्या, ल ख्यातौ। कथने। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-कथनादौ तु सकं-अनिट्।) ख्यातिः प्रसिद्धिः। ल, ख्याति गुणौ प्रसिद्धः ख्यादित्यर्थः। ख्याति साधुः कथां हरेः। तथा च। ख्या प्रकथने। प्रकथनं प्रसिद्धिरिति गोविन्दभट्टः। ख्या प्रकथने इति चतुर्भुजजुमरौ। इति दुर्गादासः॥

ख्यातः, त्रि, (ख्या+क्तः।) ख्यातियुक्तः। तत्पर्य्यायः। प्रतीतः २ प्रथितः ३ विश्रुतः ४ विज्ञातः ५ विश्रुतः ६। इत्यमरः। ३। १। ६॥ (यथा, भट्टिः। ६। ८७।
"अमितमप्यचमीग्राणं सर्व्वभोगीणसुत्तमम्।
आवयोः पितरं विद्धि ख्यातं दशरथं भुवि॥")

ख्यातगर्हणः, त्रि, (ख्याता विश्रुता गर्हणा निन्दा अस्य।) प्रसिद्धकुत्सनः। तत्पर्य्यायः। अवगीतः २। इत्यमरः। ३। १। ६३॥

ख्यातगर्हितः, त्रि, (ख्यातं गर्हितं गर्हणमस्य।) ख्यातगर्हणः। इति जटाधरः॥

ख्यातिः, स्त्री, (ख्या+क्तिन्।) प्रसिद्धिः। तत्पर्य्यायः। प्रथा २। इत्यमरः। ३। २। ६॥ (यथा, पञ्चतन्त्रे। १। ४०२। [यतः।"
"लोके ख्यातिमुपागताश्च सकले लोकोत्तिरेषा मनुश्च। १२। ३६। [पुष्कलाम्।
"येनास्मिन् कर्म्मणा लोके ख्यातिमिच्छति न च शोचत्यसम्पत्तौ तद्विद्येयन्तु राजसम्॥"
प्रकाशः। ज्ञानम्। यथा, माघे। ४। ५५।
"मैत्र्यादिचित्तपरिकर्म्मविदो विधाय क्लेशप्रहाणमिह लब्धसबीजयोगाः।
ख्यातिं च सत्त्वपुरुषान्यतयाऽधिगम्य वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम्॥"
"मैत्रीति। इहाद्यौ समाधिभृतो योगिनः। मैत्री करुणा मुदिता उपेक्षेति चतसश्चित्तवृत्तयः। तत्र पुण्यकृत्सु मैत्री दुःखिषु करुणा सुखिषु मुदिता अनुमोदनं पापिषु उपेक्षा। मैत्री आदिर्येषां तानि चित्तस्य परिकर्म्माणि प्रसाधकानि शोधकानीत्यर्थः तानि विन्दन्ति लभन्ते इति तद्विदः तद्ग्राजस्रैः चीर्णान्तःकरणमलाः इत्यर्थः। अतएव क्लेशप्रहाणं विधाय। अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः। तत्रानित्येषु नित्यत्वाभिमानः अनात्मनि च देहेन्द्रियादौ आत्मधीरित्यादि विभ्रमोऽविद्या। अस्मिता अहङ्कारः। रागोऽभिमतविषयाभिलाषः। द्वेषोऽनभिमतविषयेषु रोषः। अभिनिवेशः। कार्य्याकार्य्येष्वाग्रहः। ते हि पुरुषं क्लिश्नन्ति इति क्लेशाः क्लेशहेतवः तेषां प्रहाणं क्षयः तद्विधाय क्लेशान् हित्वा इत्यर्थः। अतो लब्धः सबीजः सावलम्बयोगो यैस्ते लब्धसबीजयोगाः सन्तः आलम्बनमेव त्यजन्ति। सत्त्वपुरुषयोरन्यतया अन्यत्वेन मिथो भिन्नत्वेन ख्यातिं ज्ञानं अधिगम्य प्रकृतिपुरुषौ भिन्नाविति ज्ञात्वा प्रकृति पुरुषयोर्विवेकाग्रहणात् संसारः। विवेकग्रहणात् मुक्तिरिति साङ्ख्याः। अथ तां ख्यातिमपि निरोद्धुं निवर्त्तयितुं वाञ्छन्ति वृत्तिरूपां तां निवर्त्त्य स्वयम्प्रकाशतयैवावस्थातुमिच्छन्तीत्यर्थः। प्रकृतावुपरतायां पुरुषस्वरूपेणावस्थानं मुक्तिरिति सांख्यसिद्धान्तः॥" इति तट्टीकायां मल्लिनाथः॥)

ग

ग, गकारः। स तु यञ्जनवर्णतृतीयवर्णः। अस्योच्चारणस्थानं कण्ठः। (यथा, "अ-कु-ह-विसर्ज्जनीयानां कण्ठः।") इति व्याकरणम् ॥ * ॥

"गकारं परमेशानि! पञ्चदेवात्मकं सदा।
निर्गुणं त्रिगुणोपेतं निरीहं निर्म्मलं सदा॥
पञ्चप्राणमयं वर्णं सर्व्वशक्त्यात्मकं प्रिये!।
अरुणादित्यसङ्काशां कुण्डलीं प्रणमाम्यहम्॥"

इति कामधेनुतन्त्रम् ॥ * ॥

"सर्गः श्वेतः कण्ठे वायुना कादिमीरयेत्।
वर्गस्पर्शनमाचेण कं खस्पर्शनात्तु खम्।
श्लोकगम्भीरसंस्पर्शाद्गौ ङश्च वह्निर्गतम्॥"

इति प्रपञ्चसारः ॥ * ॥

(वङ्गाक्षरैस्तस्य लेखनप्रकारादिर्यथा,—
"अधः कुञ्चितरेखा या गणेशी सा प्रकीर्त्तिता।
ततो दक्षगता या तु कमला तत्र संस्थिता।
अधोगता ततो या तु तस्यामीशः सदा वसेत्॥"
अधोमुखेन गता पुनरूर्द्धमुखेनापनेत्यर्थः ॥ * ॥
तस्य ध्यानं यथा,—
"ध्यानमस्याः प्रवक्ष्यामि शृणुष्व वरवर्णिनि!।
दाड़िमीपुष्पसङ्काशां चतुर्बाहुसमन्विताम्॥
रक्ताम्बरधरां नित्यां रत्नालङ्कारभूषिताम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

इति वर्णोद्धारतन्त्रम् ॥ * ॥

तस्य नामानि यथा,—
"गोगौरी गौरवो गङ्गा गणेशो गोकुलेश्वरः।
शार्ङ्गी पञ्चात्मको गाथा गन्धर्व्वः सर्व्वगः स्मृतिः॥
सर्व्वसिद्धिः प्रभा धूम्रा द्विजाख्यः शिवदर्शनः।
विश्वात्मा गौः पृथग्रूपा वालबह्वस्त्रिलोचनः॥
गीतं सरस्वती विद्या भोगिनी नन्दनो धरा।
भोगवती च हृदयं ज्ञानं जालन्धरो लवः॥"

इति नानातन्त्राहृतनामानि ॥

गं, क्ली, (गीयते इति। गै गाने + भावे बाहुलकात् डः।) गीतम्। इत्येकाक्षरकोषः ॥

गः, पुं, (गच्छति सर्व्वं जानाति इच्छामात्रेण अभिलषितं सर्व्वं प्राप्नोति वा सर्व्वज्ञत्वात् प्राप्तसर्व्वैश्वर्य्यत्वाच्च। गम् + डः।) गणेशः। (गायति इति। गै + डः।) गन्धर्व्वः। इत्येकाक्षरकोषः ॥ (गुरुसंज्ञकवर्णः स तु छन्दसो गणविशेषः। यथा, छन्दोमञ्जर्य्यां १ मे स्तवके।
"म्यरस्तजभ्नैर्लान्तैरभिर्दशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना॥"
"गुरुरेको गकारस्तु लकारो लघुरेकक॥"
वाचलिङ्गे तु उपसर्गरहितः कर्म्मोपपदश्च स्यात्। तत्र "गापोष्टक्।" ३। २। ८। इति टक्। यथा, साम गायतीति सामगः। तथा च मनुः। २। ६२।
"ह्रस्वाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः।
वैश्योऽङ्गिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः॥")

गगनं, क्ली, (गं गानं शब्दात्मकं गुणं गच्छति यद्वा गकारं भूतेषु प्रथमभूतत्वात् प्राधान्यं गच्छति। यद्वा गच्छन्त्यस्मिन् देवादय इति। "गमेर्गश्च।" उणा। २। ७७। इति युच् गश्चान्तादेशः।) आकाशम्। इत्यमरः। १।२।१॥ (यथा मेघदूते। ४८।
"प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टीरेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्॥")
तत्पर्य्यायः। अमरोक्तपर्य्यायाः आकाशशब्दे द्रष्टव्याः॥ (तेभ्यः परम्।) वह्निः १६ धन्व २० आपः २१ पृथिवी २२ भूः २३ स्वयम्भूः २४ अध्वा २५ सगरः २६ समुद्रः २७ अम्बरः २८। इति वैद्यनिघण्टौ १ अध्यायः ॥ * ॥
"आकाशं प्रथमं भूतं श्रोत्रमथात्मसुच्यते।
अधिभूतं तथा शब्दो दिशस्तत्राधिदेवतम्॥"

इत्याश्वमेधिकपर्व्व ॥

तस्य गुणाः। शब्दः १ आवृत्त्वम् २ छिद्रता ३ अनाश्रयम् ४ अनालम्बम् ५ आश्रयान्तरशून्यम्। अयक्तम् ६ रूपस्पर्शशून्यत्वात्। अधिकारिता ७ द्रव्यान्तरानारम्भकत्वम्। अप्रतीघातिता ८ भूतत्वम् ९ श्रोत्रेन्द्रियोपादानत्वात्। विक्षतानि १० देहान्तर्गतच्छिद्राणि। तद्यथा,—
"आकाशस्य गुणः शब्दो आवृत्त्वं छिद्रमेव च।
अनाश्रयमनालम्बमयक्तमविकारिता॥
अप्रतीघातिता चैव भूतत्वं विक्षतानि च।
गुणाः पञ्चाग्नतः प्रोक्ताः पञ्चभूतात्मभूतता॥"
पञ्चानां भूतानां आत्मा प्राप्तिः स्वं स्वरूपं तत्र लक्षिता। इति मोक्षधर्म्मः॥ (गगनात् पतितास्वगुणविशेषो यथा,—
"गगनाम्बु त्रिदोषघ्नं गृहीतं यत् सुभाजने।
बल्यं रसायनं मेध्यं पाचनंपित्त ततः परम्॥
रक्तोष्णं शीतलं क्षादि ज्वरदाहविषापहम्॥"

इति सुश्रुते सूत्रस्थाने ४५ अध्यायः॥)

गगनध्वजः, पुं, (गगने गगनस्य वा ध्वज इव।) मेघः। इति हारावली ॥ सूर्य्यः। इति हेमचन्द्रः ॥

गगनाध्वगः, पुं, (गगनरूपाध्वना आकाशपथेन गच्छतीति यद्वा गगनाध्वानं याप्य गच्छति। अनन्तगगनरूपमध्वानं याप्य सर्व्वतः स्थित इत्येव प्रकृततात्पर्य्यार्थः। गम + डः।) सूर्य्यः। इति हेमचन्द्रः ॥

गगनेचरः, पुं, (गगने चरतीति। "चरेष्टः।" ३। २। १६। इति टः। अलुक् समासः।) ग्रहः। नक्षत्रम्। इति सिद्धान्तशिरोमणिः ॥ (गगनचारिणि त्रि। यथा, महाभारते। १। २७। १५।
"तस्मिंस्तु कथिते मात्रा कारणे गगनेचरः॥")

गगनोल्मुकः, पुं, (गगने गगनस्य वा उल्मुक इव। मङ्गलग्रहस्य रक्तवर्णत्वात् तथात्वम्।) मङ्गलग्रहः। इति हारावली ॥

गग्घ, हसने। इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्।) कण्ठ्यवर्गद्वितीयोपधः। गग्घति। इति दुर्गादासः ॥

गङ्गका, स्त्री, (गङ्गा + अज्ञातार्थे कः। ततो ह्रस्वः। "अभाषितपुंस्काच्च।" ७। ३। ४८। इति पक्षे ङीषभावः।) गङ्गा। इति मुग्धबोधम् ॥

गङ्गा, स्त्री, (गमयति प्रापयति ज्ञापयति वा भगवत्पदं या मुक्तिः। यद्वा गम्यते प्राप्यते ज्ञाप्यते मोक्षार्थिभिर्या। गम गतौ + "गन् गम्यद्योः।" उणा। १। १२२। इति गन् ततष्टाप्।) खनामख्यातनदी। तदधिष्ठात्री देवता च। तत्पर्य्यायः। विष्णुपदी २ जह्नुतनया ३ सुरनिम्नगा ४ भागीरथी ५ त्रिपथगा ६ त्रिस्रोताः ७ भीष्मसूः ८। इत्यमरः। १।१०।३१॥ अर्घ्यतीर्थम् ९ तीर्थराजः १०। इति पद्मपुराणम्॥ त्रिदशदीर्घिका ११ कुमारसूः १२ सरिद्वरा १३ सिद्धापगा १४ सरापगा १५ स्वर्य्यापगा १६ खापगा १७ ऋषिकुल्या १८ हैमवती १९ स्वर्वापी २० हरशेखरा २१। इति हेमचन्द्रः॥ सुरापगा २२ धर्म्मद्रवी २३ सुधा २४ जह्नुकन्या २५ गान्दिनी २६ रुद्रशेखरा २७ नन्दिनी २८ अलकनन्दा २९ सितसिन्धुः ३०। इति जटाधरः॥ अध्वगा ३१ उग्रशेखरा ३२ सिद्धसिन्धुः ३३ इति त्रिकाण्डशेषः॥ स्वर्गसरिद्वरा ३४ मन्दाकिनी ३५ जाह्नवी ३६ पुण्या ३७ समुद्रसुभगा ३८ स्वर्नदी ३९ सुरदीर्घिका ४० सुरनदी ४१ स्वर्धुनी ४२ त्र्येष्ठा ४३ जह्नुसुता ४४ भीष्मजननी ४५ सुधा ४६ शैलेन्द्रजा ४७ भवायना ४८। इति शब्दरत्नावली॥ अस्या जलस्य गुणाः। शीतत्वम्। स्वादुत्वम्। स्वच्छत्वम्। अत्यन्तरुच्यत्वम्। पथ्यत्वम्। पावनत्वम्। पापहारित्वम्। दृष्णामोहध्वंसनत्वम्। दीपनत्वम्। प्रज्ञाधारित्वञ्च। इति राजनिर्घण्टः॥ * ॥
("गङ्गा सरस्वती कोनं यमुना सरयूः सची।
वेगा इरावती नीला उत्तरात् पूर्ब्बवाहिनी॥
हिमवत्-प्रभवा श्वेता हिमसम्भवशीतला।
समाः सर्व्वगुणैर्नद्यो वातश्लेष्महरा नृणाम्॥
आसां नवशतैर्युक्ता गङ्गा पूर्ब्बसमुद्रगा॥"

इति हारीते प्रथमस्थाने सप्तमेऽध्याये॥)

अस्या उत्पत्तिस्तु हिमालयात् सुमेरुदुहितरि मनोरमायाम्। हिमालयः प्रार्थितः सन् देवेभ्य इमां दत्तवान्। तां नीत्वा देवाः स्वर्गं गतवन्तः॥ * ॥ एथिद्यामस्या अवतरणकारणम्। सगरराजस्य सुतान् कपिलशापेन भस्मीभूतानुद्धर्त्तुं भगीरथराजः पृथिव्यां गङ्गानयनाय तपस्तेपे। ततो ब्रह्मा तुष्टस्तस्मै तं वरं दत्त्वा गङ्गाधारणार्थं शिवाराधनं कर्त्तुमुक्तवान्। स शिवं पर्य्यतोषयत्। शिवोऽपि हिमालयपर्व्वतं गत्वा जटा विकीर्य्य पतेति गङ्गामब्रवीत्। सा तज्जटासु पतित्वा संवत्सरपर्य्यन्तं बभ्राम। ततः शिवो भगीरथप्रार्थनया जटामेकासुत्क्षिप्य तासुत्ससर्ज्ज। साऽतिवेगेन पृथिवीतलमागत्य भगीरथस्य पश्चात् पश्चादागच्छाम। स सगरपुत्रकृतखातेन तां रसातल-

मानीय तज्जलेन सगरसुतान् तांस्तर्पयामास। ते पूताः स्वर्गं गतवन्तः। इति वाल्मीकिरामायणमतम् ॥ * ॥ प्रकारान्तरम्। वामनदेवस्य बले: सकाशात्त्रिलोकहरणकाले ब्रह्माण्डोपरिगतवामपादाङ्गुष्ठनखजनितविवरेण ब्रह्माण्डोर्ध्वस्थिता या जलधारा तच्चरणसम्पर्केण समधिकपूता सती ध्रुवलोके पपात। ततो देवमार्गेण सुमेरुपर्वतोपरि ब्रह्मसदने पतित्वा सीतालकनन्दा वंक्षुर्भद्रेति चतुर्धा भूत्वा चतुर्दिग्मात्रिश्य लवणसमुद्रं प्रविष्टा। तत्र सीता ब्रह्मसदनात् केशराचलशृङ्गेभ्योऽधोऽधः स्रवन्ती गन्धमादनमूर्द्धसु पतित्वा भद्राश्ववर्षमध्येन प्राच्यां दिशि एवं वंक्षुर्माल्यवच्छिखरान्निपत्य केतुमालवर्षमध्येन प्रतीच्यामपरं भद्रा गिरिशृङ्गाण्यतिक्रम्य शृङ्गवतः शिखरान्निपत्य उत्तरकुरुवर्षमध्येनोदीच्यामतोऽलकनन्दा बहुपर्वतशृङ्गाण्यतिक्रम्य हिमकूटान्निपत्य भारतवर्षमध्येन दक्षिणस्यां दिशि त्रिधैवक्रमेण लवणसमुद्रं सर्व्वाः प्रविष्टाः। इति भागवतमतम् ॥ * ॥ अस्याः पृथिव्यामवतरणकालस्तु आदित्यपुराणे।

"वैशाखशुक्लपक्षे तु तृतीयायां युधिष्ठिर!। युगादिरभवत्तस्यां युगद्वारम्भवान् कृतम् ॥ ब्रह्मलोकात् त्रिपथगां पृथिव्यामवतारयत्। तस्यां कार्य्यो यवैर्होमो यवैर्विष्णुं समर्चयेत्॥"* ॥

अस्या हिमालयान्निर्गतायाः दशहरा संज्ञा। तथा च स्मृतिः।

"ज्येष्ठे मासि सितेतरदिने शुक्लपक्षे दशम्यां हस्ते शैलान्निरगमदियं जाह्नवी मर्त्यलोकम्। पापान्यस्यां हरति च तिथौ सा दशेत्याहुराद्याः पुण्यं दद्यादपि शतगुणं वाजिमेधायुतस्य॥"* ॥

अथ गङ्गाध्यानम्। भविष्ये।

"चतुर्भुजां त्रिनेत्राञ्च सर्व्वावयवभूषिताम्। रत्नकुम्भां सिताम्भोजां वरदाममयप्रदाम् ॥ श्वेतवस्त्रपरीधानां मुक्तामणिविभूषिताम्। ततो ध्यायेत् सुरूपाञ्च चन्द्रायुतसमप्रभाम् ॥ चामरैर्वीज्यमानाञ्च श्वेतच्छत्रोपशोभिताम्। सुप्रसन्नां सुवदनां करुणार्द्रनिजान्तराम् ॥ सुधाप्लावितभूपृष्ठामार्द्रगन्धानुलेपनाम्। त्रैलोक्यनमितां गङ्गां देवादिभिरभिष्टुताम् ॥ दिव्यरूपविभूषाञ्च दिव्यमाल्यानुलेपनाम्॥"

अपि च।

"सितमकरनिषण्णां शुक्लवर्णां त्रिनेत्रां करधृतकमलोद्यत्सत्पलाभीत्यभीष्टाम्। विधिहरहरिरूपां सेन्दुकोटीरचूडां कलितसितदुकूलां जाह्नवीं तां नमामि॥" * ॥

अथ गङ्गामाहात्म्यश्रवणपठनफलम्। यथा,—भविष्ये।

"माहात्म्यं ये च गङ्गायाः शृण्वन्ति च पठन्ति च। तेऽपि संक्लेशमहापापैर्मुच्यन्ते नात्र संशयः॥"

अस्याः स्मरणफलम्। [वदन्।

"गच्छंस्तिष्ठन् स्वपन् ध्यायन् जाग्रत्सुप्तन् श्वसन्नः स्मरेत् सततं गङ्गां स च सुच्येत बन्धनात्॥ भवनानि विचित्राणि विचित्राभरणाः स्त्रियः। आरोग्यं वित्तसम्पत्तिर्गङ्गास्मरणजं फलम्॥"

अस्या दर्शनादिफलम्। ब्रह्माण्डमध्ययोः।

"दृष्टा तु हरते पापं स्पृष्टा तु त्रिदिवं नयेत्। प्रसङ्गेनापि या गङ्गा मोक्षदा त्ववगाहिता॥"

तथा, भविष्ये।

"यत् फलं जायते पुंसां दर्शनात् परमात्मनः। तद्भवेदेव गङ्गाया दर्शने भक्तिभावतः॥"

अस्यां स्नानफलम्। ब्रह्माण्डपुराणे।

"यैः पुण्यवाहिनी गङ्गा सकृदभ्यवगाहिता। तेषां कुलानां लक्षन्तु भवात्तारयते शिवा॥ अनेकजन्मसम्भूतं पापं पुंसां प्रणश्यति। स्नानमात्रेण गङ्गायां सद्यः पुण्यस्य भाजनम्॥"

दानधर्म्मे। [उन्मज्जा।

"अन्धाः क्लीवा जड़ा यङ्गाः पतिता रोगिणोगङ्गां संसेव्य पुरुषा देवैर्गच्छन्ति तुल्यताम्॥ स्नानन्तु भक्त्या गङ्गायां कर्त्तुकामस्य गच्छतः। पदे पदेऽश्वमेधस्य फलं मर्त्यस्य जायते॥"

तथा, ब्रह्माण्डे।

"ये गच्छन्ति स्वतो गङ्गां परांश्च प्रेरयन्ति ये। इह ते सर्व्वभोगानामन्ते स्नानस्य भाजनम्॥"

अस्याः पूजायाः फलम्। आदित्ये।

"गङ्गायां पूजितायान्तु पूजिताः सर्व्वदेवताः। तस्मात् सर्व्वप्रयत्नेन पूजयेदमरापगाम्॥" * ॥

तस्यां यज्ञादिकरणफलम्। स्कान्दे।

"यज्ञो दानं तपो जप्यं श्राद्धञ्च सुरपूजनम्। गङ्गायां यत् कृतं सर्व्वं कोटिकोटिगुणं भवेत्॥"

तथा भविष्ये।

"सुलभं सकलं पुण्यं यज्ञदानादिजं फलम्। गङ्गातोयेश्च सतिलैर्दुर्लभं पिण्डतर्पणम्॥ गयाश्राद्धं कृतं तेन उत्तरैस्तु दृष्टस्तथा। येन तद्वीचिसंसिक्ते तीरे श्राद्धमकारि च॥"*॥

तज्जलपानफलम्। भविष्ये।

"गण्डूषमात्रपानेन अश्वमेधफलं लभेत्। स्वच्छन्दं यः पिबेदापस्तस्य मुक्तिः करे स्थिता॥ त्रिभिः सारस्वतं तोयं सप्तभिस्त्वथ यामुनम्। नामेदं दशभिर्मासैर्गाङ्गं वर्षेण जीर्य्यति॥ नाभ्यन्तर्गततोयानां मृतानां क्वापि देहिनाम्। तत्ततीर्थफलप्राप्तिर्नाच कार्य्या विचारणा॥"

यमोक्तौ।

"क्षेत्रस्थमुद्धृतं वापि प्रीतमुण्णमथापि वा। गाङ्गेयं हरते पापमाजन्ममरणान्तिकम्॥"*॥

अस्यां मरणफलम्। कूर्म्मपुराणे।

"गङ्गायां स्नानतो मृत्वा मुक्तिमाप्नोति मानवः। अश्वमेधसहस्रस्य याति नाकस्यच संश्रयः॥ गङ्गायाञ्च जले मोक्षो वाराणस्यां जले स्थले। अन्तरीक्षे च गङ्गायां गङ्गासागरसङ्गमे॥"

तथा च, स्मृतौ।

"शुक्लपक्षे दिवा भूमौ गङ्गायामुत्तरायणे। ध्यात्वा देहं विसृजन्ति हृदयस्थे जनार्द्दने॥"*॥

तत्रास्थिनिक्षेपफलम्।

"दशाहाभ्यन्तरे यस्य गङ्गातोयेऽस्थि मज्जति। गङ्गायां मरणे याद्दक् स ताद्दक् फलमाप्नुयात्॥"*

तत्र त्रयोदशक्रियावर्जनं यथा, ब्रह्माण्डे।

"गङ्गां पुण्यजलां प्राप्य त्रयोदश विवर्ज्जयेत्। शौचमाचमनं सेकं निर्माल्यं मलघर्षणम्॥ गात्रसम्वाहनं क्रीड़ां प्रतिग्रहमथो रतिम्। अन्यतीर्थरतिञ्चैव अन्यतीर्थप्रशंसनम्। वस्त्रत्यागमथाघातं सन्तारञ्च विशेषतः॥"* ॥

अथ नारायणक्षेत्रलक्षणम्। ब्रह्मपुराणे।

"प्रवाहमवधिं कृत्वा यावद्ब्रह्मसरश्चतुष्टयम्। अत्र नारायणः स्वामी नान्यः स्वामी कदाचन॥"

अथ गर्भतीरयोर्लक्षणम्।

"भाद्रकृष्णाचतुर्दश्यां यावदाक्रमते जलम्। तावद्गर्भं विजानीयात् तदूर्द्धं तीरमुच्यते। सार्द्धहस्तशतं यावद्गर्भतस्तीरमुच्यते॥" * ॥

तीरे प्रतिग्रहादिनिषेधो यथा,—

"तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्म्मस्य विक्रयः॥"

अथ गङ्गास्नानफलम्। स्कान्दे।

"तीरात्रयूतिमात्रन्तु परितः क्षेत्रमुच्यते। अत्र यद्यत् कृतं कर्म्म गङ्गायां नात्र संशयः। अत्रस्थास्त्रिदिवं यान्ति ये मृतास्तेऽपुनर्भवाः॥"

इति प्रायश्चित्ततत्त्वम् ॥ * ॥

(अस्या माहात्म्यं यथा, महाभारते।३।८५।६४।

"न गङ्गा सदृशं तीर्थं न देवः केशवात् परः। ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः॥"

अस्याश्च माहात्म्यवर्णने सहस्रनामकथनं यथा, काशीखण्डे २६ अध्याये।

अगस्त्य उवाच।

"विना स्नानेन गङ्गायां नृणां जन्म निरर्थकम्। उपायान्तरमस्त्यन्यद् येन स्नानफलं लभेत्॥ अशक्तानां च पङ्गूनामालस्योपहतात्मनाम्। दूरदेशान्तरस्थानां गङ्गास्नानं कथं भवेत्॥ दानं वाथ व्रतं वाथ मन्त्रः स्तोत्रं जपोऽथवा। तीर्थान्तराभिषेको वा देवतोपासनन्तु वा॥ यदस्ति किञ्चित् षड्वक्त्र! गङ्गास्नानफलप्रदम्। विधानान्तरमात्रेण तद्वद प्रणताय मे॥ त्वत्तो न वेद स्कन्दान्यो गङ्गागर्भसमुद्भव!। परं स्वर्गतरङ्गिण्या महिमानं महामते!॥

स्कन्द उवाच।

सन्ति पुण्यजलानीह सरांसि सरितो मुने!। स्थाने स्थाने च तीर्थानि जितात्माध्युषितानि च॥ दृष्टप्रत्ययकारीणि महामहिमभाञ्जपि। परं स्वर्गतरङ्गिण्याः कोऽप्यंशोऽपि न तत्र वै॥ अनेनैवानुमानेन बुध्यस्व कलशोद्भव!। दृष्टे गङ्गोत्तमाङ्गेन देवदेवेन शम्भुना॥ स्नानकालेऽन्यतीर्थेषु जप्यते जाह्नवी जनैः। विना विष्णुपदीं क्वान्यत् समर्थमघमोचने॥ गङ्गास्नानफलं ब्रह्मन्! गङ्गायामेव लभ्यते। यथा द्राक्षाफलस्वादो द्राक्षायामेव नान्यतः॥१०॥ अस्त्युपायः इह लोकः स्वादयेनाविकलं फलम्। स्नानस्य देवसरितो महागुह्यतमो मुने!॥ शिवभक्ताय शान्ताय विष्णुभक्तिपराय च। अद्वैतवेत्त्रे सात्त्विकाय गर्भवाससमुच्चवे॥

कथनीयं न चान्यस्य कस्यचित् केनचित् क्वचित् ।
इदं रहस्यं परमं महापातकनाशनम् ॥
महाश्रेयस्करं पुण्यं मनोरथकरं परम् ।
द्युनदीप्रीतिजननं शिवसन्तोषसन्ततिं ॥
नाम्नां सहस्रं गङ्गायाः स्तवराजेषु शोभनम् ।
जप्यानां परमं जप्यं वेदोपनिषदां समम् ॥
जपनीयं प्रयत्नेन मौनिना वाचकं विना ।
शुचिस्थानेषु शुचिना सुस्थश्चारभेव च ॥

स्कन्द उवाच । ओं नमो गङ्गादेव्यै ॥

ओंकाररूपिण्यजरा तुलानन्ता नन्दतसवा ।
अद्भुदारा भया शोकालकनन्दा नन्दता मला ॥
अनाथवत्सला मोवा पां योनिर्नन्दप्रदा ।
अयक्षलक्षणा चोभ्या नवच्छिन्ना पराजिता ॥
अनाधनाथा भीरार्थसिद्धिदानङ्गवर्द्धिनी ।
अणिमादिगुणाधारा गगणा लोकहारिणी ॥
अचिन्त्यशक्तिरनघा द्भुतरूपा घहारिणी ।
अद्विराजसुता दाङ्गयोगसिद्धिप्रदा च्युता ॥२०॥
अचुसशक्तिरसदा नन्ततीर्था नन्दतोदका ।
अनन्तमहिमा पारा नन्तसौख्यप्रदा नन्दा ॥
अग्नेयदेवतामूर्तिरघोरा नन्दतरूपिणी ।
अविद्याजालशमनी द्यप्रतर्क्यगतिप्रदा ॥
अशेषविघ्नसंहर्त्री लशेषगुणगुम्फिता ।
अज्ञानतिमिरज्योतिरनुग्रहपरायणा ॥
अभिरामानवद्याङ्गनन्तसारा कलङ्किनी ।
आरोग्यदानन्दवल्ली लापन्नार्तिविनाशिनी ॥
आश्चर्यमूर्तिरायुष्या ह्याद्याद्यार्य्यसेविता ।
आप्यायिन्याप्तविद्याख्या त्वानन्दाश्वासदायिनी ॥
आलस्यघ्नाप्तदां इन्त्री ज्ञानन्दाम्नतवर्धिणी ।
इरावतीष्टदात्रीष्टा त्विष्टापूर्त्तफलप्रदा ॥
इतिहासश्रुतीर्याथा त्विहासश्च शुभप्रदा ।
इज्या शीलसमिज्येष्टा त्विन्द्रादिपरिवन्दिता ॥
इलालङ्कारमालेड्या त्विन्दिरा रम्यमन्दिरा ।
इदिन्दिरादिसंसेव्या लीश्वरीश्वरवल्लभा ॥
ईतिभीतिहरेड्या च त्वीड्यनीयचरित्रभृत् ।
उत्कृष्टशक्तिरुत्कृष्टयोडुपमण्डलचारिणी ॥
उदितास्मरमार्गोसोरगलोकविहारिणी ।
उच्चोर्वरोत्पलोत्कुम्भा उपेन्द्रचरणद्रवा ॥३०॥
उदन्वत्पूर्त्तिहेतुस्तोदारोत्साहप्रवर्द्धिनी ।
उड्डीनशुण्डाशमनी उमारश्मिसुता प्रिया ॥
उत्पत्तिस्थितिसंहारकारिण्युपरिचारिणी ।
ऊर्ध्वं वहन्त्यूर्ज्जधरोर्ज्जावती चोर्म्मिमालिनी ॥
उर्वरेतःप्रियोर्द्धाध्वा ह्यूर्म्मिलोर्द्धगतिप्रदा ।
ऋषिवृन्दस्तुतर्द्धिश्च ऋणत्रयविनाशिनी ॥
ऋतम्भरर्द्धिदात्री च ऋक्स्वरूपा ऋजुप्रिया ।
ऋक्षमार्गवहर्क्षार्च्चिर्ऋजुमार्गप्रदर्शिनी ॥
एधिताखिलधर्म्मार्था लैकैकान्तदायिनी ।
एधनीयस्वभावेड्या लेजिताशेषपातका ॥
ऐश्वर्यदेश्वर्यरूपा ह्लैतिह्यं ह्लैन्दवद्युतिः ।
ओजस्विन्योषधीचैत्रमोजोदौदनदायिनी ॥
ओष्ठाम्नतौम्नतदात्री त्वौषधं भवरोगिणाम् ।
औदार्य्यचतुरौपेन्द्री त्वौग्री ह्यौमेयरूपिणी ॥
अमराम्बवहाम्बष्ठाम्बरमालाम्बुजेक्षणा ।

अम्बिकाम्बुमहायोनिरम्बोदाम्बुकहारिणी ॥
अंशुमाला ह्यंशुमती त्वङ्गीकृतषडानना ।
अन्धतामिस्रहन्त्र्यम्बुरङ्गना ह्यङ्गनावती ॥
कल्याणकारिणी काम्या कमलोत्पलमालिनी ।
कुमुद्वती कमलिनी कान्तिः कल्पितदायिनी ॥
काञ्चनाक्षी कामधेनुः कीर्त्तिकृत् क्लेशनाशिनी ।
क्रतुश्रेष्ठा क्रतुफला कर्म्मबन्धविभेदिनी ॥४१॥
कमलाक्षी क्षमहरा क्षुधातुतपद्युतिः ।
करुणार्द्रा च कल्याणी कलिकल्मषनाशिनी ॥
कामरूपा क्रियाशक्तिः कमलोत्पलमालिनी ।
कूटस्था करुणा कान्ता कूर्म्मयाना कलावती ॥
कमला कल्पलतिका काली कलुषवैरिणी ।
कमनीयजला कन्त्रा कपर्दिसुकपर्दगा ॥
कालकूटप्रशमनी कदम्बकुसुमप्रिया ।
कालिन्दी केलिललिता कलकल्लोलमालिका ॥
कान्तलोकत्रया कक्षूः कङ्कतनयवत्सला ।
खड्गिनी खड्गधाराभा खगा खड्गेन्दुधारिणी ॥
खे खेलगामिनी खस्था खड्गेन्दुतिलकप्रिया ।
खेचरी खेचरीवन्द्या ख्यातिः ख्यातिप्रदायिनी ॥
खण्डितप्रणताघौघा खलबुद्धिविनाशिनी ।
खातेनःकन्दसन्दोहा खड्गखट्वाङ्गखेटिनी ॥
खरसन्तापशमनी खनिः पीयूषपाथसाम् ।
गङ्गा गन्धवती गौरी गन्धर्वनगराप्रिया ॥
गम्भीराङ्गी गुणमयी गतातङ्का गतिप्रिया ।
गणनाथाम्बिका गीता गद्यपद्यपरिष्टुता ॥५०॥
गान्धारी गर्भशमनी गतिभ्रष्टगतिप्रदा ।
गोमती गुह्यविद्या गौर्गोघ्नी गगनगामिनी ॥
गोत्रप्रवर्द्धिनी गुण्या गुणातीता गुणाग्रणीः ।
गुहाम्बिका गिरिसुता गोविन्दाङ्घ्रिसमुद्भवा ॥
गुणनीयचरित्रा च गायत्री गिरिशप्रिया ।
गूढरूपा गुणवती गुर्व्वी गौरववर्द्धिनी ॥
गृहपीड़ाहरा गुह्या गरघ्नी गानवत्सला ।
घर्म्महन्त्री घृतवती घृततुष्टिप्रदायिनी ॥
घण्टारवप्रिया घोरा घौघविध्वंसकारिणी ।
घ्राणतुष्टिकरी घोषा घनानन्दा घनप्रिया ॥
घातुका घूर्णितजला घृष्टपातकसन्ततिः ।
घटकोटिप्रपौताघा घटिताशेषमङ्गला ॥
घृणावती घृणानिर्घर्घरा घूकनादिनी ।
घुरुघ्राघपिङ्गरतनुर्घर्घरा घर्घरस्वना ॥
चन्द्रिका चन्द्रकान्तास्रुच्चन्द्रापा चलद्युतिः ।
चिन्मयी चितिरूपा च चन्द्रायुतशताननां ॥
चाम्पेयलोचना चारुश्चार्वङ्गी चारुगामिनी ।
चार्य्या चारित्रनिलया चिन्तनीयचरुपिणी ॥
चम्पूश्चन्दनगुच्चस्रुक्चर्चनीया चिरस्थिरा ।
चारुचम्पकमालाढ्या चमिताशेषदुष्कृता ॥६०॥
चिदाकाशवहाचिन्त्या चञ्चच्चामरवीजिता ।
चोरिता शेषदृजिना चरिताशेषमङ्गला ॥
छेदिताखिलपापौघा छद्मघ्नी छलहारिणी ।
छन्नविविक्तपतला छोटिताशेषबन्धना ॥
छुरिताम्नतधारौघा छिन्नेनाश्छन्दगामिनी ।
छत्रीकृतमरालौघा छटीकृतनिजाम्नता ॥
जाह्नवीज्या जगन्माता जया जङ्घालवीचिका ।

जया जनार्द्दनप्रीता जुषणीया जगद्धिता ॥
जीवनं जीवप्राणा जगज्ज्येष्ठा जगन्मयी ।
जीवजीवातुलतिका जन्मिजन्मनिवर्हिणी ॥
जाड्यविध्वंसनकरी जगद्योनिर्जलाविला ।
जगदानन्दजननी जलजा जलजेक्षणा ॥
जनलोचनपीयूषा जटातटविहारिणी ।
जयन्ती जन्तुपापघ्नी जनितज्ञानविग्रहा ॥
झल्लरीवाद्यकुशला झलज्झालजलावृता ।
ञिण्टीशवन्द्या झाङ्कारकारिणी झर्झरावती ॥
टीकिताशेषपाताला टङ्किनीयोद्रिपाटने ।
टङ्कारध्वत्यत्कल्लोला टीकनीयमहातटा ॥
डमरप्रवहा डीनराजहंसकुलाकुला ।
डमरुमरुद्वहा च डामरोक्तमहाडका ॥७०॥
ढौकिताशेषनिर्व्वाणा ढक्कानादचलज्जला ।
णुक्किविघ्नेशजननी ण्वड्ढुण्ढितपातका ॥
तर्पणी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी ।
त्रिलोकगोप्त्री तोयेशी त्रैलोक्यपरिवन्दिता ॥
तापत्रितयसंहर्त्री तेजोवलविवर्द्धिनी ।
त्रिलक्षा तारणी तारा तारापतिकरार्चिता ॥
त्रैलोक्यपावनी पुण्या तुष्टिदा तुष्टिरूपिणी ।
त्वष्णाक्षेत्री तीर्थमाता त्रिविक्रमपदोद्भवा ॥
तपोमयी तपोरूपा तपस्तोमफलप्रदा ।
त्रैलोक्यव्यापिनी त्वग्निस्तुग्निक्तत्त्वरूपिणी ॥
त्रैलोक्यसुन्दरी तुर्य्या तुर्य्यातीतपदप्रदा ।
त्रैलोक्यलक्ष्मीस्त्रिपदी तथा तिमिरचन्द्रिका ॥
तेजोगर्भा तपःसारा त्रिपुरारिशिरोग्रहा ।
त्रयीस्वरूपिणी तन्वी तपनाङ्गजभीतिनुत् ॥
तरिस्तरणिजामित्रं तर्पिताशेषपूर्व्वजा ।
तुलाविरहिता तीव्रपापतूलतनूनपात् ॥
दारिद्र्यदमनी दक्षा दुःखघ्ना दिवमङ्गना ।
दीर्घावती दुरावाप्या द्राक्षामधुरवारिभृत् ॥
दर्शिताशेषकृतुका दुरुदुर्ज्जयदुःखहृत् ।
दैत्यघ्नदुरितघ्नी च दानवारिपदाब्जजा ॥८०॥
दन्दशूकविघ्नी च दारिताघौघसन्ततिः ।
हुता देवद्रुमच्छाया दुर्व्वाराघविघातिनी ॥
दमयात्मा देवमाता देवलोकप्रदर्शिनी ।
देवदेवप्रिया देवी दिक्पालपददायिनी ॥
दीर्घायुःकारिणी दीर्घा दोग्ध्री दूषणवर्ज्जिता ।
दुग्धाम्बुवाहिनी दोह्या दिव्या दिव्यगतिप्रदा ॥
द्युनदी दीनशरणं देहिदेहनिवारिणी ।
द्राघीयसी दाघहन्त्री दितिपातकसन्ततिः ॥
दूरदेशान्तरचरी दुर्गमा देववल्लभा ।
दुर्वृत्तघ्नी दुर्विगाह्या दयाधारा दयावती ॥
दुरासदा दानशीला द्राविणी द्रुहिणसुता ।
दैत्यदानवसंमुह्यत्कर्त्री दुर्वृद्धिहारिणी ॥
दानसारा दयासारा द्यावाभूमिविगाहिनी ।
दृष्टादृष्टफलप्राप्तिर्देवताद्यन्दवन्दिता ॥
दीर्घव्रता दीर्घदृष्टिर्दीप्ततोया दुरालभा ।
दक्षयित्री दक्षनुतिर्दुष्टदक्षधरार्चिता ॥
दुरोदरघ्नी दावार्चिर्द्रवद्रव्यैकशेवधिः ।
दीनसन्तापशमनी दात्री दवधुवैरिणी ॥
दरीविदारणपरा दान्ता दान्तजनप्रिया ।

दारिताद्रितटा दुर्गा दुर्गारण्यप्रचारिणी ॥९०॥
धर्म्मद्रवा धर्म्मधुरा धेनुर्धीरा धृतिर्ध्रुवा ।
धेनुदानफलस्पर्शा धर्म्मकामार्थमोक्षदा ॥
धर्म्मोर्म्मिवाहिनीधुर्य्या धात्री धात्रीविभूषणम् ।
धर्म्मिणी धर्म्मशीला च धन्विकोटिकृतावना ॥
ध्यातृपापहरा ध्येया धावनी धूतकल्मषा ।
धर्म्मधारा धर्म्मसारा धनदा धनवर्द्धिनी ॥
धर्म्माधर्म्मगुणच्छेत्री धत्तूरकुसुमप्रिया ।
धर्म्मेशी धर्म्मशास्त्रज्ञा धनधान्यसमृद्धिकृत् ॥
धर्म्मलभ्या धर्म्मजला धर्म्मप्रसवधर्म्मिणी ।
ध्यानगम्यस्वरूपा च धरणी धातृपूजिता ॥
धूर्जूर्जटिजटासंस्था धन्या धौर्धारणावती ।
नन्दा निर्व्वाणजननी नन्दिनी दुष्कृतापहा ॥
निखिलविघ्ननिचया निजानन्दप्रकाशिनी ।
नभोऽङ्गनचरी नूतिर्नन्द्या नारायणी नुता ॥
निर्म्मला निर्म्मलाख्याना नाशिनी तापसम्पदाम् ।
नियता नित्यसुखदा नानाचर्य्यमहानिधिः ॥
नदीनदसरोमाता नायिका नाकदीर्घिका ।
नष्टोद्धारधुरीरा च नन्दनानन्ददायिनी ॥
निर्णिक्तार्घभुवनानिःसङ्गा निरुपद्रवा ।
निरालम्बा निष्प्रपञ्चा निर्णाशितमहामला ॥१००॥
निर्म्मलज्ञानजननी निःश्रेयप्राप्तितापहृत् ।
निर्व्योत्सवा नित्यतृप्ता नमस्कार्य्या निरञ्जना ॥
निष्ठावती निरातङ्का निर्लेपा निश्चयात्मिका ।
निरवद्या निरीहा च नीललोहितमूर्द्धगा ॥
नन्दिभृङ्गिगणस्तुत्या नागानन्दा नगात्मजा ।
निष्प्रत्यूहा नाकनदी निरयार्णवदीर्घनौः ॥
पुण्यप्रदा पुण्यगर्भा पुण्यापुण्यतरङ्गिणी ।
पृथुः पृथुफला पूर्णा प्रणतार्त्तिप्रभञ्जिनी ॥
प्राणदा प्राणिजननी प्राणेशी प्राणरूपिणी ।
पद्मालया पराशक्तिः पुरजित्परमप्रिया ॥
परापरफलप्राप्तिः पावनी च पयस्विनी ।
परानन्दा प्रकाशार्था प्रतिष्ठा पालनी परा ॥
पुराणपठिता प्रीता प्रणवाक्षररूपिणी ।
पार्व्वती प्रेमसम्पन्ना पशुपाशविमोचनी ॥
परमात्मस्वरूपा च परब्रह्मप्रकाशिनी ।
परमानन्दनिष्यन्दा प्रायश्चित्तस्वरूपिणी ॥
पानीयरूपनिर्व्वाणा परित्राणपरायणा ।
पापेन्धनदवज्वाला पापारिः पापनाशनृत् ॥
परमैश्वर्य्यजननी प्रज्ञा प्राज्ञा परापरा ।
प्रत्यक्षलक्ष्मीः पद्माक्षी परव्योमाप्तसेवा ॥११०॥
प्रसन्नरूपा प्रणिधिः पूता प्रत्यक्षदेवता ।
पितामहपरमप्रीता परमेष्ठिकमण्डलुः ॥
पद्मनाभपदार्घेश प्रस्रुता पद्ममालिनी ।
परर्द्धिदा पुष्टिकरी पथ्या पूर्णेः प्रभावती ॥
पुनाना पीतगर्भेशी पापपर्व्वतनाशिनी ।
फलिनी फलहस्ता च फुल्लाम्बुजविलोचना ॥
फालितेनोमहाक्षेत्रा फणिलोकविभूषणम् ।
फेनच्छलप्रणुन्नेनाः फुल्लकैरवगन्धिनी ॥
फेनिलाच्छाम्बुधाराभा फुल्लचाटितपातका ।
फाणितस्वादुसलिला फाल्गुपथ्यजलाविला ॥
विश्वमाता च विश्वेशी विश्वा विश्वेश्वरप्रिया ।

ब्रह्मण्या ब्रह्मकृद् ब्राह्मी ब्रह्मिष्ठा विमलोदका ॥
विभावरी च विरजा विक्रान्तानेकविष्टपा ।
विश्वमित्रं विष्णुपदी वैष्णवी वैष्णवप्रिया ॥
विरूपाक्षप्रियकरी विभूतिर्विश्वतोमुखी ।
विपाप्मा वैबुधी वेद्या वेदाचाररसस्रवा ॥
विद्या वेगवती वन्द्या वृंहणी ब्रह्मवादिनी ।
वरदा विप्रकृष्टा च वरिष्ठा च विशोधनी ॥
विद्याधरी विशोका च वयोद्वन्द्वनिषेविता ।
बहूदका बलवती बोधस्था विबुधप्रिया ॥१२०॥
वाणी वेदवती वित्ता ब्रह्मविद्यातरङ्गिणी ।
ब्रह्माण्डकोटिव्याप्ताम्बुर्ब्रह्महत्यापहारिणी ॥
ब्रह्मेशविष्णुरूपा च बुद्धिर्विभववर्द्धिनी ।
विलासिसुखदा वैश्या व्यापिनी च वृषारणिः ॥
वृषाङ्कमौलिनिलया विपन्नार्त्तिप्रभञ्जिनी ।
विनीता विनता ब्रध्नतनया विनयान्विता ॥
विपश्चो वाद्यकुशला वेणुश्रुतिविचक्षणा ।
वर्चस्करी बलकरी बलोन्मूलितकल्मषा ॥
विपाप्मा विगतातङ्का विकल्पपरिवर्ज्जिता ।
वृष्टिकर्त्री वृष्टिजला विधिर्विच्छिन्नबन्धना ॥
व्रतरूपा वित्तरूपा बहुविघ्नविनाशृङ्गत् ।
वसुधारा वसुमती विचित्राङ्गी विभावसुः ॥
विजया विश्वबीजं च वामदेवी वरप्रदा ।
वृषाश्रिता विषघ्नी च विज्ञानोर्म्मिशुमालिनी ॥
भव्या भोगवती भद्रा भवानी भूतभाविनी ।
भूतधात्री भयहरा भक्तदारिद्र्यघातिनी ॥
भुक्तिमुक्तिप्रदा भेषी भक्तस्वर्गापवर्गदा ।
भागीरथी भानुमती भार्य्या भोगवती भृतिः ॥
भवप्रिया भवद्वेष्ट्री भूतिदा भूतिभूषणा ।
भाललोचनभावज्ञा भूतभव्यभवत्प्रभुः ॥१३०॥
भ्रान्तिज्ञानप्रशमनी भिन्नब्रह्माण्डमण्डपा ।
भूरिदा भक्तिसुलभा भाग्यवद्दृष्टिगोचरी ॥
भङ्गितोपज्ञवकुला भव्यभोव्यसुखप्रदा ।
भिक्षणीया भिक्षुमाता भावाभावस्वरूपिणी ॥
मन्दाकिनी महानन्दा माता मुक्तितरङ्गिणी ।
महोदया मधुमती महापुण्या सदाकरी ॥
सुनिस्रुता मोहहन्त्री महातीर्था मधुस्रवा ।
माधवी मानिनी मान्या मनोरथपथातिगा ॥
मोक्षदा मतिदा सुख्या महाभाग्यजनाश्रिता ।
महावेगवती मेध्या महामहिमभूषणा ॥
महाप्रभावा महती मीनचञ्चललोचना ।
महाकारुण्यसंपूर्णा महर्द्धिश्च महोत्पला ॥
मूर्त्तिमन्मुक्तिरमणी मणिमाणिक्यभूषणा ।
मुक्ताकलापनेपथ्या मनोनयननन्दिनी ॥
महापातकरात्रिघ्नी महादेवार्द्धहारिणी ।
महोर्म्मिमालिनी मुक्ता महादेवी मनोज्ञनी ॥
महापुण्योदयप्राप्या मायातिमिरचन्द्रिका ।
महाविद्या महामाया महामेधा महौषधम् ॥
मालाधरी महोपाया महोरगविभूषणा ।
महामोहप्रशमनी महामङ्गलमङ्गलम् ॥१४०॥
मार्त्तण्डमण्डलचरी महालक्ष्मीर्मदोज्झिता ।
यशस्विनी यशोदा च योग्या युक्तात्मसेविता ॥
योगसिद्धिप्रदा याम्या यज्ञेशपरिपूरिता ।

यज्ञेशी यज्ञफलदा यजनीया यशस्करी ॥
यमिसेव्या योगयोनिर्योगिनी युक्तबुद्धिदा ।
योगज्ञानप्रदा युक्ता यमाद्यष्टाङ्गयोगयुक् ॥
यन्त्रिताघौघसञ्चारा यमलोकनिवारिणी ।
यातायातप्रशमनी यातनानामकृन्तनी ॥
यामिनीशहिमाच्छोदा युगधर्म्मविवर्ज्जिता ।
रेवतीरतिकन्या रत्नगर्भा रमा रतिः ॥
रत्नाकरप्रेमपात्रं रसज्ञा रसरूपिणी ।
रत्नप्रासादगर्भा च रमणीयतरङ्गिणी ॥
रत्नार्घा रुद्ररमणी रागद्वेषविनाशिनी ।
रमा रामा रम्यरूपा रोगिजीवातुरूपिणी ॥
रुचिरद्रोचनी रम्या रुचिरा रोगहारिणी ।
राजहंसा रत्नवती राजतकक्षोलराजिका ॥
रामणीयकरेखा च रजारी रोगरोधिनी ।
राका रङ्गार्त्तिशमनी रम्या रोलम्बराविणी ॥
रागिणी रञ्जितग्रिवा रूपलावण्यगर्भधिः ।
लोकप्रस्तुलोकवन्द्या लोलतृष्णोलमालिनी ॥
लीलावती लोकभूमिर्लोकलोचनचन्द्रिका ।
लेखस्रवन्ती लघभा लघुवेगा लघुत्वकृत् ॥१५१॥
लास्यतरङ्गहस्ता च ललितालयभङ्गिगा ।
लोकबन्धुर्लोकधात्री लोकोत्तरगुणोर्ज्जिता ॥
लोकत्रयहिता लोका लक्ष्मीर्लक्षणलक्षिता ।
लीलालक्षितनिर्व्वाणा लावण्यान्ततवर्द्धिनी ॥
वैश्वानरी वासवेद्या वन्ध्यत्वपरिहारिणी ।
वासुदेवाङ्घ्रिरेणुघ्नी वज्रिवज्रनिवारिणी ॥
शुभावती शुभफला शान्तिः शान्तशुक्लभा ।
शूलिनी शैलशुवयाः शीतलाम्बुतवाहिनी ॥
शोभावती शीलवती शोधिताघौघकिल्बिषा ।
शरण्या शिवदा शिष्टा शरजन्मप्रभुः शिवा ॥
शक्तिः शशाङ्कविमला शमनस्खलसम्मता ।
शमा शमनमार्गघ्नी शितिकण्ठमहाप्रिया ॥
शुचिः शुचिकरी शेषा शैवशायिपदोद्भवा ।
श्रीनिवासस्तुतिः श्रद्धा श्रीमती श्रीः शुभव्रता ॥
शुद्धविद्या शुभावर्त्ता शुतानन्दा श्रुतिस्मृतिः ।
श्वेतेतरघ्नी श्वचरी श्वामरीरूपधारिणी ॥
श्मशानशोधनी श्रान्ता श्रुत्युक्ततृप्तितुष्टता ।
श्वालिनी श्वालिशोभाढ्या श्वित्रिवाहनगर्भभृत् ॥
श्वसनीयचरित्रा च श्वातिताशेषपातका ।
षड्गुणैश्वर्य्यसम्पन्ना षड्ङ्गश्रुतिरूपिणी ॥१६१॥
षण्णताहारिसलिला षोडशन्दनदीशृता ।
सरिद्वरा च सरसा सुप्रभा सुरदीर्घिका ॥
स्वःसिन्धुः सर्व्वदुःखघ्नी सर्व्वव्याधिमहौषधम् ॥
सेव्या सिद्धिः सती सूक्तिः स्कन्दस्तन्य सरस्वती ॥
सम्यक्तरङ्गिणी स्तुत्या स्थाणुमौलिकृतालया ।
सौख्यदा सुभगा सौम्या सौधु सौभाग्यदायिनी ॥
स्वर्गनिःश्रेणिका स्तुत्या स्वधा स्वाहा सुधाजला ।
समुद्ररूपिणी स्वर्ग्या सर्व्वपातकवैरिणी ॥
स्तुताघहारिणी सीता संसाराब्धितरङ्गिका ।
सौभाग्यसुन्दरी सन्ध्या सर्व्वसारसमन्विता ॥
हरप्रिया हृषीकेशी हंसरूपा हिरण्मयी ।
हृताघसङ्घा हितकृत् हेला हेलाघगर्व्वहृत् ॥
क्षेमदा क्षालिताघौघा क्षुद्रविद्राविणी क्षमा ।

इति नामसहस्रं हि गङ्गायाः कलशोद्भव ! ।
कीर्त्तयित्वा नरः सम्यग् गङ्गास्नानफलं लभेत् ॥
सर्व्वपापप्रशमनं सर्व्वविघ्नविनाशनम् ।
सर्व्वस्तोत्रजपाच्छ्रेष्ठं सर्व्वपावनपावनम् ॥
श्रद्धयाभीष्टफलदं चतुर्व्वर्गसमृद्धिकृत् ।
सङ्कल्पादवाप्नोति ह्येकक्रतुफलं सुने ! ॥१७०॥
सर्व्वतीर्थेषु यः स्नातः सर्व्वयज्ञेषु दीक्षितः ।
तस्य यत् फलमुद्दिष्टं त्रिकालपठनाच्च तत् ॥
सर्व्वव्रतेषु यत् पुण्यं सम्यक् तीर्थेषु वाऽथ वै ।
तत् फलं समवाप्नोति त्रिसन्ध्यं नियतः पठन् ॥
स्नानकाले पठेद्यस्तु यत्र कुत्र जलाशये ।
तत्र सन्निहिता नूनं गङ्गा त्रिपथगा सुने ! ॥
श्रेयोऽर्थी लभते श्रेयो धनार्थी लभते धनम् ।
कामी कामानवाप्नोति मोक्षार्थी मोक्षमाप्नुयात् ॥
वर्षं त्रिकालपठनात् श्रद्धया शुचिमानसः ।
ऋतुकालाभिगमनादपुत्रः पुत्रवान् भवेत् ॥
गोकालमरणं तस्य नाग्निचौराहिसाध्वसम् ।
गव्यां सहस्रं गङ्गायाः यो जपेच्छ्रद्धया सुने ! ॥
गङ्गानामसहस्रन्तु जप्त्वा ग्रामान्तरं व्रजेत् ।
कार्य्यसिद्धिमवाप्नोति निर्व्विघ्नो गेहमाविशेत् ॥
तिथिवारर्क्षयोगानां न दोषः प्रभवेत् तदा ।
यदा जप्त्वा व्रजेदेतत् स्तोत्रं ग्रामान्तरं नरः ॥
आयुरारोग्यजननं सर्व्वोपद्रवनाशनम् ।
सर्व्वसिद्धिकरं पुंसां गङ्गानामसहस्रकम् ॥१७६॥
जन्मान्तरसहस्रेषु यत् पापं सम्यगर्জ্জितम् ।
गङ्गानामसहस्रस्य जपनात् तत् क्षयं व्रजेत् ॥
ब्रह्मघ्नो मद्यपः स्वर्णस्तेयी च गुरुतल्पगः ।
तत्संयोगी भ्रूणहन्ता मातृहा पितृहा सुने ! ॥
विश्वासघाती गरदः कृतघ्नो मित्रघातकः ।
अग्निदो गोवधकरो गुरुव्यापहारकः ॥
महापातकयुक्तोऽपि संयुक्तोऽप्युपपातकैः ।
मुच्यते श्रद्धया जप्त्वा गङ्गानामसहस्रकम् ॥
आधिव्याधिपरिक्षिप्तो घोरतापपरिप्लुतः ।
मुच्यते सर्व्वदुःखेभ्यः स्तवस्यास्यानुकीर्त्तनात् ॥
संवत्सरेण युक्तात्मा पठन् भक्तिपरायणः ।
अभीप्सितां लभेत् सिद्धिं सर्व्वैः पापैः प्रमुच्यते ॥
संग्रहाविष्टचित्तस्य धर्म्मविघ्नियोऽपि च ।
दाम्भिकस्यापि हिंसस्य चैतो धर्म्मपरं भवेत् ॥
वर्णाश्रमपथीनस्तु कामक्रोधविवर्জ্জितः ।
यत् फलं लभते ज्ञानी तदाप्नोत्यस्य कीर्त्तनात् ॥
गायत्र्ययुतजप्येन यत् फलं समुपार्জ্जितम् ।
सकृत् पठनतः सम्यक् तदग्र्यमवाप्नुयात् ॥१८८॥
गां दत्त्वा वेदविदुषे यत् फलं लभते क्रतौ ।
तत् पुण्यं सम्यगाख्यातं स्तवराजसकृज्जपात् ॥
गुरुशुश्रूषणं कुर्व्वन् यावज्जीवं नरोत्तमः ।
यत् पुण्यमर्জ्जयेत् तद्वाग् वर्षं त्रिधवणं जपन् ॥
वेदपारायणात् पुण्यं यदत्र परिपठ्यते ।
तत् षण्मासेन लभते त्रिसन्ध्यं परिकीर्त्तनात् ॥
गङ्गायाः स्तवराजस्य प्रत्यहं परिशीलनात् ।
शिवभक्तिमवाप्नोति विष्णुभक्तोऽथवा भवेत् ॥
यः कीर्त्तयेदनुदिनं गङ्गानामसहस्रकम् ।
ततसमीपे सहचरी गङ्गादेवी सदा भवेत् ॥
सर्व्वत्र पूज्यो भवति सर्व्वत्र विजयी भवेत् ।
सर्व्वत्र सुखमाप्नोति जाह्नवीस्तोत्रपाठतः ॥
सदाचारी स विज्ञेयः स शुचिस्तु सदैव हि ।
श्रुतसर्व्वसुरार्चः स कीर्त्तयेद् य इमां स्तुतिम् ॥
तस्मिंस्तुष्टे भवेत् तृप्ता जाह्नवी नात्र संशयः ।
तस्मात् सर्व्वप्रयत्नेन गङ्गाभक्तं समर्चयेत् ॥
स्तवराजमिमं गाङ्गं शृणुयाद्यश्च वै पठेत् ।
आवयेद्य तङ्कृत्तान् दृष्ट्वालोभविवर्জ्जितः ॥
मुच्यते त्रिविधैः पापैर्मनोवाक्कायसम्भवैः ।
क्षणान्निष्पापतामेति पितृणाञ्च प्रियो भवेत् ॥
सर्व्वदेवप्रियश्चापि सर्व्वधैर्यगुणसम्मतः ।
अन्ते विमानमारुह्य दिव्यस्त्रीशतसंवृतः ॥
दिव्याभरणसम्पन्नो दिव्यभोगसमन्वितः ।
नन्दनादिवने खेरं देववत् स प्रमोदते ॥२००॥
भुज्यमानेषु विप्रेषु श्राद्धकाले विशेषतः ।
जपन्निदं महास्तोत्रं पितॄणां तृप्तिकारकम् ॥
यावन्ति तत्र सिक्थानि यावन्त्योऽम्बुकणाः स्थिताः ।
तावन्त्येव हि वर्षाणि मोदन्ते खः पितामहाः ॥
यथा प्रीणन्ति पितरो गङ्गायां पिण्डदानतः ।
तथैव तृप्नुयुः श्राद्धे स्तवस्यास्यानुसंश्रवात् ॥
एतत् स्तोत्रं गृहे यस्य लिखितं परिपूज्यते ।
तत्र पापभयं नास्ति शुचि तद्भवनं सदा ॥
अगस्ते ! किं बहूक्तेन शृणु मे निश्चितं वचः ।
संग्रहो नात्र कर्त्तव्यः सन्देहोऽत्र फलं न हि ॥
यावन्ति मर्त्ये स्तोत्राणि मन्त्रजालान्यनेकशः ।
तावन्ति स्तवराजस्य गाङ्गेयस्य समानि न ॥
यावज्जन्म जपेद्यस्तु नान्यामेतत् सहस्रकम् ।
स कीकटेष्वपि मृतो न पुनर्गर्भमाविशेत् ॥
नित्यं नियममानेतद्यो जपेत् स्तोत्रसत्तमम् ।
अन्यत्रापि विपन्नः स गङ्गातीरे मृतो भवेत् ॥
एतत् स्तोत्रवरं रम्यं पुरा प्रोक्तं पिनाकिना ।
विष्णवे निजभक्ताय मुक्तिबीजाक्षरात्मदम् ॥
गङ्गास्नानप्रतिनिधिः स्तोत्रमेतन्मयेरितम् ।
सिक्तासुर्जाह्नवीं तस्मादेतत् स्तोत्रं जपेत् सुधीः ॥"
इति श्रीस्कन्दपुराणे काशीखण्डे गङ्गासहस्र-नामकथनं नामैकोनत्रिंशत्तमोऽध्यायः ॥*॥*॥
इयमेव शिवस्य तोयरूपा परा मूर्त्तिः । यथा, काशीखण्डे । २७ । २—७ ।

ईश्वर उवाच ।

"निष्पापमय महाबाहो ! विष्णो ! त्रैलोक्यसुन्दर ! ॥
प्राप्तं वाराणसीक्षेत्रमविमुक्तं यथा तथा ॥
निर्दग्धान् सागरान् श्रुत्वा कपिलक्रोधवह्निना ।
अश्वमेधाश्वसंयुक्तान् पूर्व्वजान् स्वान् भगीरथः ॥
सूर्य्यवंशे महातेजा राजा परमधार्मिकः ।
आरिराधयिषुर्गङ्गां तपसे कृतनिश्चयः ॥
हिमवन्तं नगश्रेष्ठममात्यस्तराज्यधूः ।
जगाम यशसां राशिरुद्दिधीर्षुः पितामहान् ॥
ब्रह्मशापाग्निनिर्दग्धान् महादुर्गतिगानपि ।
विना त्रिमार्गगां विष्णो ! को जन्तूंस्त्रिदिवं नयेत् ॥
ममैव सा परा मूर्त्तिस्तोयरूपा शिवात्मिका ।
ब्रह्मादिनामनेकानामाधारः प्रकृतिः परा ॥
शरीरस्था इड़ा नाड़ी । यथा, हटयोगदीपिकायाम् । ३ । ११० ।
"इड़ा भगवती गङ्गा पिङ्गला यमुनानदी ।
इड़ापिङ्गलयोर्मध्ये बालरण्डा च कुण्डली ॥")
दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
"क्रियाकारगरूपत्वात् सरणाच्च सरिन्मता ।
सङ्गमान्नमनाद्गङ्गा लोके देवी विभाव्यते ॥"

गङ्गाका, स्त्री, (गङ्गा एव । स्वार्थे कन् ततः "अजाद्यतष्टाप् ।"४।१।४८ । इति पाणिनिमतेन गङ्गका गङ्गिका इत्येव पदद्वयं सिद्धं परं मुग्धबोधमतेन "वाचापोऽनुक्तपुंस्कस्य ।" इति स्त्रीत्वेन । गङ्गिका गङ्गाका गङ्गका इति पदत्रयं सिद्धम् । "वाग्रहणमकारस्यापि स्त्रित्वार्थम् । " इति मुग्धबोधटीकाकृद् दुर्गादासः ।) गङ्गा । इति मुग्धबोधम् ॥

गङ्गाचिल्ली, स्त्री, (गङ्गास्थिता चिल्ली ।) चिल्लविशेषः । गाङ्गचिल इति भाषा । तत्पर्य्यायः । देवट्टी २ विश्वका ३ जलकुक्कुटी ४ । इति हारावली ॥

गङ्गाजः, पुं, (गङ्गायाः गङ्गागर्भात् जायते इति । जन् + ड ।) भीष्मः । इति शब्दरत्नावली ॥ कार्त्तिकेयः । इति भारतम् ॥

गङ्गाटेयः, पुं, (गङ्गायां गङ्गादिनद्यामित्यर्थः अटतीति । अट् + अच् । ततो ढक् । यद्वा गङ्गातटे यातीति । या + कः । पृषोदरादित्वात् तकारलोपे साधुः ।) मत्स्यभेदः । चिङ्गिड़ि इति भाषा । तत्पर्य्यायः । गलानिलः २ । इति त्रिकाण्डशेषः ॥

गङ्गाधरः, पुं, (धरतीति धरः । धृ + अच् । गङ्गाया धरः । खण्डितोजटाभिरिति श्लेषः ।) शिवः । इत्यमरः । १ । १ । ३६ ॥ (अस्य गङ्गाधारणविवरणं यथा, रामायणे । १ । ४३ । १-११ ।
"देवदेवे गते तस्मिन् सोऽक्लिष्टायनिपीड़िताम् ।
ज्ञात्वा वसुमतीं राम ! वत्सरं समुपासत ॥
अथ संवत्सरे पूर्णे सर्व्वलोकनमस्कृतः ।
उमापतिः पशुपतौ राजानमिदमब्रवीत् ॥
प्रीतस्तेऽहं नरश्रेष्ठ ! करिष्यामि तव प्रियम् ।
शिरसा धारयिष्यामि शैलराजसुतामहम् ॥
ततो हैमवती श्लिष्टा सर्व्वलोकनमस्कृता ।
तदा सातिमहद्रूपं ज्ञात्वा वेगञ्च दुःसहम् ॥
आकाशादपतद्राम ! शिवे शिवशिरस्युत ।
अचिन्तयच्च सा देवी गङ्गा परमदुर्हरा ॥
विगाह्याहं हि पातालं स्रोतसा तस्य शङ्करम् ।
तस्यावलेपनं ज्ञात्वा क्रुद्धस्तु भगवान् हरः ॥
तिरोभावयितुं बुद्धिं चक्रे त्रिनयनस्तदा ।
सा तस्मिन् पतिता पुण्या पुण्ये रुद्रस्य मूर्द्धनि ॥
हिमवत्प्रतिमे राम ! जटामण्डलगह्वरे ।
सा कथञ्चित् महीं गन्तुं नाशक्नोत् यत्नमाश्रिता ॥
नैव सा निर्गमं लोभे जटामण्डलमन्ततः ।
तत्रैवाभ्रमद्देवी संवत्सरगणान् बहून् ॥
तामपश्यत् पुनस्तत्र तपः परममास्थितः ।
स तेन तोषितश्चासीदत्यन्तं रघुनन्दन ! ॥

पिसञ्जं ततो गङ्गां हरो विन्दुसरः प्रति ।") समुद्रः । इति त्रिकाण्डशेषः ॥ * ॥ (जीर्णातिसाररोगनाशकवर्णौषधविशेषः । यथा,— "धातक्यामलकीपयोधरटकीकट्वङ्गयष्टीमधु- श्रीजम्बाम्रफलास्थिनागरविषाक्षीवेरलोध्रेन्द्रजैः । तुल्यांशं विहितं सतण्डुलजलं गङ्गाधराख्यं महच्चूर्णं तूर्णमपाकरोति सकलं जीर्णातिसारं परम्॥" इति गन्धार्थचिन्तामणिः ॥) गङ्गापत्री, स्त्री, (गङ्गावत् पवित्रं शुभं वा पत्रमस्या इति ङीष् ।) वृक्षविशेषः । तत्पर्य्यायः । पत्री२ सुगन्धा ३ गन्धपत्रिका ४ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । वातनाशित्वम् । व्रण- रोपणत्वञ्च । इति राजनिर्घण्टः ॥ गङ्गापुत्रः, पुं, (गङ्गायाः पुत्रः ।) भीष्मः । इति पुराणम् ॥ वर्णसङ्करजातिविशेषः । सुरदा- फराश इति पारस्य भाषा । स तु वेटात् तीवर कन्यायां जातः । इति ब्रह्मवैवर्तपुराणम् ॥ (कार्त्तिकेय च ॥) गङ्गासुतः, पुं, (गङ्गायाः सुतः पुत्रः ।) कार्त्ति- केयः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । २३१ । १५ । "सहस्रशीर्षक्षमनन्तरूपः सहस्रपात्त्वं गुरुभक्तिधारी । गङ्गासुतत्वं क्षमतेव देव ! खाद्दामहोत्पत्तिकानां तथैव ॥") भीष्मश्च । इति पुराणम् ॥ गङ्गिका, स्त्री, (गङ्गा एव । स्वार्थे कन् तत: "अभाषितपुंस्काच्च ।"७।३।४८। इति पक्षे ङीष् ।) गङ्गा । इति सुग्धबोधम् ॥ गच्छः, पुं, (गम् + सम्पदादित्वात् क्विप् तुक् च गतं गमनं याति नाश्रयतीति । गत् + छो + कः ।) वृक्षः । इति हेमचन्द्रः ॥ गाछ इति भाषा ॥ निर्विसर्गे गमनक्रियानुमतिः । (तदा गमधातो- र्लोटि मध्यमपुरुषस्यैकवचनस्य रूपम् ।) इति व्याकरणम् ॥ याओ इति भाषा ॥ गज, स्वने । इति कविकल्पद्रुमः ॥ (भ्वां-परं- अकं-सेट् ।) गजति । इति दुर्गादासः ॥ गज, ह मदे स्वने । इति कविकल्पद्रुमः ॥ (भ्वां-परं- अकं-सेट् इदित् ।) ह, कर्म्मणि मज्जायते । इति दुर्गादासः ॥ गज, क स्वने । (चुरां-परं-अकं-सेट् ।) क, गाज- यति । इति दुर्गादासः ॥ गजः, पुं, (गजति मदेन मत्तो भवतीति । गज् + अच् ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (स तु त्रिविधः । यथाह गन्धार्थचिन्तामणिः । "भद्रो मन्दो मृगश्चैव विज्ञेयास्त्रिविधा गजाः॥" अस्य लक्षणादिकं यथा, बृहत्संहितायां ६७ अध्याये । "मध्याभदन्ताः सुविभक्तदेहा न चोपदिग्धाश्च शुभाः क्षमाश्च । गात्रैः समैश्चापसमानवंशा वराहतुल्यैर्जघनैश्च भद्राः ॥ वक्षोऽथ कक्षावलयः शुभाश्च लम्बोदरस्थूलगुदश्च गल्लः । स्थूला च कुक्षिः सह पेचकेन सैंही च दृग्मन्दमतङ्गजस्य ॥ मृगास्तु दृक्श्मश्रुधरावलम्बो- ष्ठत्वङ्नखक्ष्वेडिजहृल्लकर्णाः । स्थूलेक्षणाश्चेति यथोक्तचिह्नैः सङ्कीर्णनागा यतिमिश्रचिह्नाः ॥ यद्योन्नतिः सप्त मृगस्य दैर्घ्य- मष्टौ च हस्ताः परिणाहमानम् । एकद्वित्रुद्भावथ मन्दभद्रौ सङ्कीर्णनागोऽनियतप्रमाणः ॥ भद्रस्य वर्णो हरितो मदस्य मन्दस्य हारिद्रकसन्निकाशः । क्षणो मदश्चाभिहितो मृगस्य सङ्कीर्णनागस्य मदो विमिश्रः ॥ ताम्रोष्ठतालुवदनाः कलविङ्कनेत्राः स्निग्धोन्नतायदशनाः पृथुलायतास्याः । चापोन्नतायतनिगूढनिमग्नवंक्षा- स्तन्वेकरोमचितकूर्म्मसमानकुम्भाः ॥ विस्तीर्णकर्णहनुनाभिललाटगुह्याः कूर्म्मोन्नतद्विनववित्रतिभिर्नखैश्च । रेखात्रयोपचितदृक्तकराः सुवाला धन्याः सुगन्धिमदपुष्करमारुताश्च ॥ दीर्घाङ्गुलिरक्तपुष्कराः सजलाम्बोदनिनादहृद्विषः । दृढदायतदृक्तकन्धरा धन्या भूमिपतेर्मतङ्गजाः ॥ निर्मदाभ्यधिकहीननखाङ्गान् कुब्जवामनकमेषविषाणान् । दृश्यकोग्रफलपुष्करहीनान् श्यावनीलभृवलासिततालून् ॥ खल्पवक्त्रबृहमत्कुणषण्ढान् हस्तिनीं च गजलक्षणयुक्ताम् । गर्भिणीं च नृपतिः परदेयं प्रापयेदतिविरूपफलास्ते ॥ * ॥ यथा, भट्टिः । १४ । ५ । "इत्था जिहेषिरे हर्षान्नभीरं जगर्जुर्गजाः ॥") परिमाणविशेषः । स तु हस्तहयं पादोनहस्त- द्वयञ्च । (यथा, शब्दार्थचिन्तामणौ । "अरत्नीनां शतान्यष्टौ षष्ट्यधिकानि च । गजप्रमाणमाख्यातं मुनिभिर्वास्तुवादिभिः ॥") वास्तुनः स्थानभेदः । इति मेदिनी ॥ "प्रस्तारे दैर्घ्यमानन्तु खहस्तेन तथा नरैः । कृत्वा चिह्नं गजैर्दत्त्वा वास्तुस्थाननिरूपणम् ॥ ध्वजो धूमश्च सिंहश्च श्वा वृषः खर एव च । गजः काकपदश्चैव स्थानान्यष्टौ च वास्तुनः ॥ ध्वजे विभूतिर्मरणञ्च धूमे सिंहे जयः श्वा च करोत्यनर्थम् । वृषे च भोगी क्षयणं खरे च पुष्टिर्गजे काकपदे विनाशः ॥" इति ज्योतिषम् ॥ * ॥ औषधपाकार्थगर्त्तविशेषः । यथा,— "हस्तप्रमाणगर्त्तो यः पुटः स तु गजाह्वयः । इत्थं चतस्रिके कुण्डे पुटो वाराह उच्यते ॥" इति वैद्यकप्रयोगान्तम् ॥ (असुरविशेषः । स तु महिषासुरपुत्रः । यथा, काशीखण्डे । ६८ । ३ । "महिषासुरपुत्रोऽसौ समायाति गजासुरः । प्रमथन् प्रमथान् सर्व्वान् निजवीर्य्यमदोद्धतः ।") गजकन्दः, पुं, (गज इव स्थूलः गजस्य दन्त इव वा कन्दो यस्य ।) हस्तिकन्दः । इति राज- निर्घण्टः ॥ गजकूर्म्माण्डी, [न्] पुं, (गजश्च कूर्म्मश्च तौ गज- कूर्म्मौ । तौ अश्नातीति । अश्नु ग भोजने + णिनि ।) गरुड़ः । इति शब्दरत्नावली ॥ (पुरा हि कदाचित् विभावसुसुप्रतीकनामानौ द्वौ भ्रातरौ ब्राह्मणकुमारौ पित्रोधनार्थमन्योन्य- मभिभूतौ गजत्वं कूर्म्मत्वं च गतावपि पूर्ब्ववैर- मनुस्मरन्तौ सुचिरं युध्यमानौ प्रजापतिकश्यपा- दिष्टेन पतगेश्वरेण गरुड़ेन भक्षितौ । एतद्वि- वरणन्तु महाभारतीयादिपर्ब्बणि सौपर्णे २६ अध्याये सविस्तरं दर्शनीयम् ॥) गजचिर्भटा, स्त्री, (गजस्यृहणीया चिर्भटा ।) इन्द्रवारुणी । इति रत्नमाला ॥ गोरचाड़ राखालशसा इति च भाषा ॥ गजचिर्भटः, पुं, (गजप्रियश्चिर्भटः ।) गोडुम्बा । इति त्रिकाण्डशेषः ॥ गजचिर्भटा, स्त्री, (गजभक्ष्या चिर्भटा ।) महेन्द्रवारुणी । इति राजनिर्घण्टः ॥ गजच्छाया, स्त्री, (गजस्य कुञ्जरस्य छाया प्रति- बिम्बः । हस्तिच्छाया ।) योगविशेषः । यथा,— "यदेन्दुः पितृदेवत्ये हंसस्थैव करे स्थितः । यात्रा तिथिर्भवेत् सा हि गजच्छाया प्रकी- र्त्तिता ॥" इति मिताक्षरापरिभाषा ॥ अपि च । कृत्यचिन्तामणौ । "हस्तार्पचे चयोदश्यां मघासिन्दुः करे रविः । यदा तदा गजच्छाया श्राद्धे पुंसोरवाप्यते ॥" अन्यच्च । "योगो मघात्रयोदश्यां कुञ्जरच्छायसंज्ञितः । भवेन्मघायां संस्थे च शशिन्यर्के करे स्थिते ॥"* ॥ चन्द्रसूर्य्ययोर्ग्रहणकालः । यथा, वराहः । "सैंहिकेयो यदा भानुं ग्रसते पर्ब्बसन्धिषु । गजच्छाया तु सा प्रोक्ता तत्र श्राद्धं प्रकल्पयेत् ॥" अमावास्याश्राद्धकालः । यथा,— "अमावास्यां गते सोमे छाया या श्राद्धखी भवेत् । गजच्छाया तु सा प्रोक्ता तत्र श्राद्धं प्रकल्पयेत् ॥" इति च मलमासतत्त्वम् ॥ गजटङ्का, स्त्री, (गजस्य उपरिभागे स्थिता या दृढटङ्का ।) गजोपरिस्थदृढटङ्का । तत्- पर्य्यायः । मदाम्बाता २ । इति हारावली ॥ गजता, स्त्री, (गजानां समूहः । "ग्रामजनबन्धु- भ्यस्तल् ।" ४ । २ । ४२ । एतस्य सूत्रस्य

"गजसहायाभ्यामिति वक्तव्यम्।" वार्त्तिं इति तल्।) गजसमूहः। तत्पर्य्यायः। हास्तिकम् २। इत्यमरः। २। ८। ३६॥

गजदन्तः, पुं, (गजेन परिमाणमस्य इति परिमाणार्थे दन्तच्।) गजपरिमाणम्। इति मुग्धबोधम्॥

गजदन्तः, पुं, (गजस्य दन्तौ इव दन्तोऽस्य।) गणेशः। इति शब्दरत्नावली॥ (गजस्य दन्तः।) गजसम्बन्धिदन्तः। नागदन्तः। हातिर दांत इति भाषा। स तु द्रव्यस्थापनार्थं भित्तिस्थदारुद्वयम्। दाबा इति भाषा॥

गजदन्तफला, स्त्री, (गजदन्ताकृतिं गजदन्त इव शुभं वा फलमस्याः।) इङ्गरीलता। इति राजनिर्घण्टः॥

गजदानं, क्ली, (गजस्य दानं मदः गण्डकटादिभ्यः स्रवितो मद इत्यर्थः।) हस्तिमदः। इति राजनिर्घण्टः॥ (तस्य प्रसवणस्थानानि। यथा,—

"करात् कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदच्युतिः।"
इति पालकाव्यम्॥

तथा च रघुः। ४। ४५।

"स सैन्यपरिभोगेण गजदानसुगन्धिना।
कावेरीं सरितां पत्युः शुक्तनीयामिवाऽकरोत्॥"

गजस्य हस्तिनो दानं प्रदानम्। गजसम्प्रदानम्। इति व्युत्पत्तिलभ्योऽर्थः॥)

गजद्वयसः, त्रि, (गजेन परिमाणमस्य इति। गज+"द्वन्द्वमात्रद्वयसट्माने।" इति परिमाणार्थे द्वयसट्।) परिमितः। इति मुग्धबोधम्॥

गजपादपः, पुं, (गजस्य नाम्ना ख्यातः पादपः गजप्रियः पादपो वा।) स्थालीवृक्षः। इति भावप्रकाशः॥

गजपिप्पली, स्त्री, (गजोपपदेन युक्ता पिप्पली। गजनाम्ना ख्याता पिप्पली वा।) पिप्पलीभेदः। गजपिंपुल इति भाषा। तत्पर्य्यायः। करिपिप्पली २ इभकणा ३ कपिवल्ली ४ कपिल्लिका ५ श्रेयसी ६ वह्निः ७ गजाह्वा ८। इति रत्नमाला॥ कोलवल्ली ९। इत्यमरः॥ वसिरः १०। इति तट्टीका॥ गजोषणा ११ चपफलम् १२ चपला १३ छिद्रवैदेही १४ दीर्घग्रन्थिः १५ तेजसी १६ वर्षाली १७ स्थूलवैदेही १८। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। रुचामलवह्नीक्षणत्वम्। बलासवातहरत्वम्। स्मृतकर्णविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ भेदाग्निकारित्वम्। इति राजवल्लभः॥ तत्पर्य्यायगुणाः। यथा, भावप्रकाशः।

"चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली।
कपिवल्ली कोलवल्ली श्रेयसी वह्निरस्य सा॥
गजकृष्णा कटुवातश्लेष्मगुल्मक्षयार्शसी।
उष्णा निहन्त्यतीसारश्वासकण्ठामयक्रिमीन्॥"

गजपुटः, पुं, (गजाख्यः पुटः हस्तप्रमाणो गर्त्तः।) औषधपाकार्थं हस्तपरिमितगर्त्तः। इति वैद्यकम्॥ अस्य प्रमाणं गजशब्दे द्रष्टव्यम्॥ (लौहमारणादावस्य प्रयोजनं यथा,—

"दग्धादिशुद्धपर्य्यन्तो गजपुटविधिर्मतः॥"
इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे जारणविधिरधिकारे॥ क्वचित् क्लीवलिङ्गत्वमपि दृश्यते। यथा, भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।

"सपादहस्तमानेन कुण्डे निम्ने यथायते।
वनोपलसहस्रेण पूर्णो मध्ये विधारयेत्॥
पुटनद्वयसंयुक्तां कोष्ठिकां सुदृढां सुखे।
अधार्द्धानि करेन्द्राणि अर्द्धान्युपरि निःक्षिपेत्॥
एतद्गजपुटं प्रोक्तं ख्यातं सर्व्वपुटोत्तमम्॥
हस्तचतुर्विंशत्यङ्गुलप्रमाणः सपादहस्तेन त्रिंशदङ्गुलप्रमाणोनेत्यर्थः। अतएवोक्तम्।
साधारणनराङ्गुल्या त्रिंशदङ्गुलको गजः॥"
इति गजपुटम्॥)

गजप्रिया, स्त्री, (गजस्य प्रिया।) शल्लकीवृक्षः। इति हेमचन्द्रः॥

गजबन्धनी, स्त्री, (गजः हस्ती बध्यते लौहशृङ्खलादिभिः रुध्यतेऽस्याम्। बन्ध+ल्युट् ङीप् च।) गजबन्धनस्थानम्। हातिशाला इति भाषा। तत्पर्य्यायः। वारी २। इत्यमरः। २। ८। ४३॥ वारिः ३। इति भरतः॥ प्रारब्धिः ४। इति जटाधरग्रन्थरत्नावल्यौ॥

गजभक्षकः, पुं, (गजेन हस्तिना भक्ष्यते इति। भक्ष+कर्म्मणि ण्वुल् ततः कप् स्वार्थे कन् वा। यद्वा गजः हस्ती भक्ष्यकोऽस्य।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥

गजभक्षा, स्त्री, (गजेन भक्ष्यतेऽसौ। भक्ष्+अप्+टाप्।) शल्लकीवृक्षः। इति शब्दरत्नावली॥

गजभक्ष्या, स्त्री, (गजेन भक्ष्या भक्षणीया।) शल्लकीवृक्षः। इत्यमरः। २। ४। १२३॥

गजमाचलः, पुं, स्त्री, (मच्+भावे घञ् माचः। गजस्य हस्तिनः माचं दर्पं लाति आदत्ते लुनाति वा बाहुलकात् डः।) सिंहः। इति हारावली॥

गजमात्रः, त्रि, (गजेन परिमाणमस्य इति। "दन्तमात्रद्वयसट् माने।" इति परिमाणार्थे मात्र।) गजपरिमितः। इति मुग्धबोधम्॥

गजमोटनः, पुं, क्ली, (गजं हस्तिनं मोटयति मर्द्दयतीति। मुट् मर्द्दने+कर्त्तरि ल्युः।) सिंहः। इति शब्दमाला॥

गजवदनः, पुं, (गजस्य वदनमेव वदनं यस्य।) गणेशः। इति हलायुधः॥

गजवल्लभा, स्त्री, (गजस्य वल्लभा प्रिया।) गिरिकदली। शल्लकी। इति राजनिर्घण्टः॥

गजसाह्वयं, क्ली, (गजनाम्ना नरपतिना सह आह्वयो नाम यस्य।) हस्तिनापुरम्। इति शब्दरत्नावली॥ (यथा, महाभारते। ३।१।८।

"ततो द्यूतजिताः पार्थाः कोपिताश्च दुरात्मभिः।
धार्त्तराष्ट्रैः सहामात्यैर्निर्ययुर्गजसाह्वयात्॥")

गजाख्यः, पुं, (गजाख्यया आख्यातः गजेन सह आख्या यस्येति वा गजकर्णवदस्य पत्राकारत्वात्तथात्वमिति केचित्।) चक्रमर्द्दवृक्षः। इति राजनिर्घण्टः॥

गजाजयीः, पुं, (अजे जीयते इति अजयीः। गजानां अजयीः श्रेष्ठः।) ऐरावतहस्ती। इति शब्दरत्नावली॥

गजाजीवः, पुं, (आजीयतेऽस्मादनेन वा आजीवः आ+जीव्+कर्म्मणि घञ्। गजः आजीवः जीवनोपायोऽस्य। गजपरिचालनपालनादिकार्य्यमालम्ब्य आजीवतीति। जीव्+कर्त्तरि अच् वा।) हस्तिपालकः। तत्पर्य्यायः। आधोरणः २ हस्तिपकः ३ इभपालकः ४। इति हेमचन्द्रः॥

गजाह्वं, क्ली, (गजस्याह्ववत् मूलमस्य।) पिण्डमूलम्। इति राजनिर्घण्टः॥

गजाननः, पुं, (गजस्य हस्तिन आननं मुखमेव आननं यस्य।) गणेशः। इत्यमरः। १। १। ४१॥ (यथा, ब्रह्मवैवर्त्ते गणेशखण्डे ६ अध्याये।

"घृणिर्दृष्ट्वा शिरश्छेदात् गजवक्त्रेण योजितः।
गजाननः शिशुस्तेन नियतिः केन बाध्यते॥"

पुराणान्तरे मतभेदोऽपि दृश्यते यथा, स्कान्दे गणेशखण्डे ११ अध्याये।

गुरुरुवाच।

"अवतारो यदि धृतः साधुचाराय भो विभो!
प्रकाशयाशु वदनं सर्व्वेषां शोकनाशनम्॥
नयस्व सर्व्वदेवानामानन्दं हृदये प्रभो!।

शिव उवाच।

प्रत्युवाच गुरुं पुत्रः पार्व्वत्या हीनमस्तकः॥

शिशुरुवाच।

मद्देहाखेन राज्ञा ते प्रणतौ चरणौ यदा।
तदाशीर्या त्वया दत्ता तस्मै राज्ञे गुरो मुदा॥
गजयोनौ जनिर्मुक्तिः शिवहस्तादुदीरिता।
तत् सर्व्वमभवत् तस्य विद्यते चारुमस्तकः॥
पूज्यमानः शिवेनास्ते शुण्डादण्डः सुशोभनः।
अवतारकरोऽसौ मे गुरोऽस्ति भविता मुखम्॥

शिव उवाच।

आश्चर्य्यपूर्णहृदयो गुरुरूचे पुनः शिशुम्॥

गुरुरुवाच।

भगवन्! विश्वरूपोऽसि त्रिकालज्ञोऽखिलेश्वरः।
मया यदुदितं तस्मै त्वया ज्ञातं यतः प्रभो!॥
अहमीशस्वरूपं ते परिच्छेत्तुं न च क्षमः।
श्रुत्वेव ब्रह्मणः पुत्रो नारदस्त्वब्रवीत्॥

नारद उवाच।

एवमेवावतीर्णोऽसि हीनमूर्द्धा कथं प्रभो!।
अथवा बालरूपस्य छिन्नं ते केन तच्छिरः॥
एतन्मे संशयं छिन्धि कृपया परमेश्वर!।

शिव उवाच।

निपीय नारदीं वाणीमुवाच शिशुरुच्चकैः॥

शिशुरुवाच।

सिन्दूरः कोऽपि दैत्यो मे वायुरूपधरोऽच्छिनत्।
अस्मे मासि सम्पूर्णे प्रविशोमोदरं शिरः।
तमिदानीं हनिष्येऽहं गजास्यं वाप्नुतं द्विज!।

शिव उवाच।

श्रुत्वेव नारदः प्राह शिशुरूपिणमीश्वरम्॥

नारद उवाच।

अकिञ्चिज्ञा वयं देव! योजनेऽस्य मुखस्य ते
त्वमेव च स्वभावेन सर्व्वमेतन्नियोजय॥

शिव उवाच ।
वदतीत्थं मुनिर्यावत् तावत् स दृष्टोऽखिलैः ।
सर्व्वावयवसम्पूर्णो गजानन उमासुतः ॥
किरीटकुण्डलधरो युगबाहुः सुलोचनः ।
वामदक्षिणभागे च सिद्धिबुद्धिविराजितः ॥
दृष्ट्वा विनायकं स्कन्द ! तथाभूतं निजेच्छया ।
हर्षोत्फुल्लनयना देवाः सर्व्वे तदाऽनुवन् ॥
गजानन इति ख्यातो भविताऽयं जगत्त्रये ।
एवं भाद्रचतुर्थ्यां स अवतीर्णो गजाननः ॥")

गजारिः, पुं, (गजस्य अरिः शत्रुः । तत्राग्रत्वात् तथात्वम् ।) वृक्षविशेषः । सिंहः । यथा, "गजारिस्तरुसिंहयोः ।" इति हेमचन्द्रः ॥

गजाशनः, पुं, (गजेन हस्तिना अश्यते अत्यते इति । गज + अश् + कर्म्मणि ल्युट् ।) अश्वत्थवृक्षः । इति रत्नमाला ॥ गजादनोऽपि ॥

गजाशना, स्त्री, (अश्नातीति । अश् ग भोजने + कर्त्तरि ल्युः । गजः अशनो भक्ष्यो यस्याः ।) भङ्गा । इति शब्दचन्द्रिका ॥ (यस्मिन्नियं अवस्थिता तद्यथा,—

"गजाशना-कुम्भिक-दाड़िमानां
रसैः कृते तैलघृते सदधि ॥"

इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमेऽध्याये ॥) शुक्लकोरण्टः । पद्मकन्दः । इति रत्नमाला ॥

गजास्यः, पुं, (गजस्य आस्यं मुखमेव आस्यं अस्य ।) गणेशः । इति हेमचन्द्रः ॥ (गजस्य आस्यम् ।) हस्तिमुखे क्ली ॥

गजाह्वं, क्ली, (गजेन गजनाम्ना आह्वयते इति गजेन सह आह्वा संज्ञा यस्य इति वा ।) हस्तिनापुरम् । इति मेदिनी ॥

गजाह्वयं, क्ली, (गजेन गजनाम्ना आह्वयोऽस्य ।) हस्तिनापुरम् । इति शब्दरत्नावली ॥

गजाह्वा, स्त्री, (गजस्य आह्वया संज्ञया आह्वा संज्ञा यस्याः ।) गजपिप्पली । इति मेदिनी ॥ (पर्य्यायोऽस्या यथा,—

"करिपिप्पलीभकणा कपिवल्ली कपिर्वालिका ।
श्रेयसी वह्निरप्यापि गजाह्वा गजपिप्पली ॥"

इति वैद्यकरत्नमालायाम् ॥)

गजेष्टा, स्त्री, (गजस्य इष्टा प्रिया ।) विदारी । इति राजनिर्घण्टः ॥ भुँइकुमड़ा इति भाषा ॥

गजोषणा, स्त्री, (गजोषणप्रदेन युता उषणा पिप्पली ।) गजपिप्पली । इति राजनिर्घण्टः ॥

गञ्जः, पुं, (गञ्जि भावे + घञ् ।) अवज्ञा । भाण्डागारम् । खनिः । इति हेमचन्द्रः ॥ गोदामघर इति भाषा ॥

गञ्जः, पुं क्ली, (गञ्जि भावे + घञ् ।) भाण्डागारम् । इति मेदिनी ॥

गञ्जा, स्त्री, (गञ्ज + टाप् ।) मदिरायाम् । इत्यमरः । २ । १० । ८ ॥ खनिः । इति मेदिनी ॥ गामरसञ्च । मद्यभाण्डम् । इति शब्दरत्नावली ॥

गञ्जिका, स्त्री, (गञ्जा + स्वार्थे कन् अत इत्वम् ।) मदिरायाम् । इति शब्दरत्नावली ॥

गड, इ गत्यै । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्-इदित् ।) इ, कर्म्मणि गण्डते । गत्यै कपोलविषयक्रियायाम् । तथा च । यत्र द्रव्यनिर्द्देशस्तत्र तन्निष्ठक्रियाविशेषो लक्ष्यते । इति मैत्रेयरक्षितः ॥ रमानाथस्तु कडु कार्कश्य इत्यस्मात् कार्कश्य इत्यनुवृत्त्या कपोलकर्त्तृककार्कश्यमिति व्याख्याय गण्डति कपोलः पांशुना इत्युदाहृतवान् । केचित्तु गण्ड इति शब्दस्य व्युत्पत्त्यर्थमेवायं धातुर्मन्तव्यो न त्वस्यान्यत्र प्रयोगः इत्याहुः । इति दुर्गादासः ॥

गड, म सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । घटादिः ।) म, गड़यति । सेकः क्षरणम् । गड़यति घटात् पानीयम् । डलयोरेकत्वात् लस्यैव प्रायः प्रयोगः । इति रमानाथः ॥ तन्मते तु लान्तपक्षेऽपि मादुपधत्वम् । खमते तु लान्तो वक्ष्यमाणः स त्वनुबन्धशून्यः इति विरोधः । इति दुर्गादासः ॥

गड़ः, पुं, (गड़ति गलति हस्ताज्जालादिभ्यो वा क्षरतीत्यर्थः । गड़ + अच् ।) मत्स्यभेदः । गङ्गई माछ् इति भाषा ॥ अन्तरायः । इति मेदिनी ॥ परिखा । अवधानम् । इति शब्दरत्नावली ॥ देशविशेषः । राजनिर्घण्टे गड़लवणपर्य्याये गड़देशजमिति दर्शनात् ॥

गड़कः, पुं, (गड़ + स्वार्थे कन् ।) मत्स्यविशेषः । गङ्गई माछ् इति भाषा । तत्पर्य्यायः । शुक्लाभीकः २ । इत्यमरः । १ । १० । १७ ॥ गड़ः ३ गलः ४ गलकः ५ । इति शब्दरत्नावली ॥ अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कषायत्वम् । शीतलत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥

गड़यन्तः, पुं, (गड़यति जलमिति । गड़ क्षरणे + णिच् । "तभूवहिवसिभाविसाधिगड़ीति ।" उणां ।३।१२८ । इति झच् । घटादित्वात् मित्त्वे मितां ह्रस्वः अयामन्तेति णेरयादेशः ।) मेघः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गड़लवणं, क्ली, (गड़देशाज्जातं लवणम् । प्राक्पार्थिवादिवत् मध्यपदलोपिसमासः ।) संवरदेशोद्भवलवणम् । सामरलुण इति भाषा ॥ तत्पर्य्यायः । शुभ्रम् २ पृथ्वीजम् ३ गड़देशजम् ४ गड़ोत्थम् ५ महारम्भम् ६ सांवरम् ७ संवरोद्भवम् ८ । अस्य गुणाः । उष्णत्वम् । लवणत्वम् । ईषदम्लत्वम् । मलापहत्वम् । दीपनत्वम् । कफवाताग्नीनाग्नित्वम् । कोष्ठशोधनत्वञ्च । इति राजनिर्घण्टः ॥

गड़देशजं, क्ली, (गड़देशात् जायते इति । जन् + डः ।) सांवरलवणम् । इति राजनिर्घण्टः ॥

गड़ि, पुं, (गड़ + इन् ।) वत्सतरः । इति राजनिर्घण्टः ॥ अलसो गवादिः । गड़िया इति भाषा ॥ यथा, काव्यप्रकाशे ।
"गुणानामेव दौरात्म्याद्दुरि धूर्य्यो नियुज्यते ।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गड़िः ॥"

गड़ुः, पुं, (गड़ + बाहुलकात् उन् ।) गलगण्डः । पृष्ठगुड़ः । स तु घाटामस्तकयोर्मध्ये मांसवृद्धिः । इति लिङ्गादिसंग्रहे अमरभरतौ ॥ कुजः । इति मेदिनी ॥ शुल्याख्यम् । इति शब्दरत्नावली ॥ किचुलुकः । इति त्रिकाण्डशेषः ॥ विषमग्रन्थिः । यथा काव्यप्रकाशे तदेतत् काव्यान्तर्गड़ुभूतमिति नास्य भेदलक्षणं कृतमित्यत्र तट्टीकाकारः ॥ ("न च अजागलस्तनवदन्तर्गड़ुना तेन किं वेति वाच्यम् ।" इति वेदान्तभाष्यम् ॥)

गड़ुरः, त्रि, (गड़ुल + रस्य लत्वम् ।) कुजः । इति शब्दरत्नावली ॥

गड़ुलः, त्रि, (गड़ुः शूलमांसपिण्डविशेषः अस्यास्तीति । गड़ु + "सिध्मादिभ्यश्चेति ।" ५ । २ । ९७ । इति लच् ।) कुजः । इत्यमरः । २ । ६ । ४८ ॥

गड़ेरः, पुं, (गड़ + "पतिकटिकुटिगड़िगुड़िदृङ्गिभ्य एरक् ।" उणां । १ । ५६ । इति एरक् ।) मेघः । इति त्रिकाण्डशेषः ॥

गड़ोत्थं क्ली, (गड़देशात् उत्तिष्ठति संजायते इति । गड़ + उत् + स्था + कः ।) गड़लवणम् । इति राजनिर्घण्टः ॥

गड़ोलः, पुं, (गड़ + "कपिगड़िगण्डिकटिपटिभ्य ओलच् ।" उणां । १ । ६७ । इति ओलच् ।) गुड़ः । इत्युणादिकोषः ॥ व्यासः । इति हेमचन्द्रः ॥

गड़ुरिका, स्त्री, (गड़ुरः जलप्रवाहः सोऽस्यास्तीति । यद्वा गड़ुरः मेघपालः तमनुगच्छतीति । ठन् टाप् च ।) अज्ञातप्रवाहागमन्मूलो धारावाही नदीविशेषः । इति केचित् । मेघयूथेरनुगम्यमाना मेघी । इत्यन्ये । इति काव्यप्रकाशटीकायां महेश्वरः ॥

गड़ुकः, पुं, (गड़ुक इति निपातनात् ह्रित्वम् ।) जलपात्रविशेषः । इति शब्दरत्नावली ॥ गाड़ इति भाषा ॥

गड्डुकः, पुं, (गड्डुक इति पृषोदरात् उकारस्य दीर्घत्वम् ।) गड्डुकः । इति शब्दरत्नावली ॥

गण, त् क संख्याने । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) मूर्द्धन्योपधः । गणयति । इति दुर्गादासः ॥

गणः, पुं, (गण्यते गणयति वा कर्म्मण्यप् । कर्त्तरि अच् वा ।) समूहः । (यथा, हितोपदेशे १ । ६३ । [फलम् ॥")
"न गणस्याग्रतो गच्छेत् सिद्धे कार्य्ये समं प्रभुः । (यथा, मेघदूते । ३५ ।
"भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः ॥")
रुद्रानुचरः । (यथा, गोः रामायणे । ५ । ८६ । ७ ।
"धनाध्यक्षसभां देवः प्राप्तो हि वृषभध्वजः ।
उमासहायो देवेशो गणैश्च बहुभिर्वृतः ॥")
सेनासंख्याविशेषः । तदयथा । गजाः २७ रथाः २७ अश्वाः ८१ पदातिकाः १३५ समुदायेन २७० । इत्यमरः । २ । ८ । ८१ ॥ (यथा, महाभारते ।
"त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ॥")

संख्या । चोरनामगन्धद्रव्यम् । इति मेदिनी ॥*॥ गणेशः । यथा, महानिर्व्वाणतन्त्रे ।
"गाणपस्तु महेशानि ! गणदीक्षाप्रवर्त्तकः ॥"
अश्विन्यादिभरणीनक्षत्रानुसारेण देवमानुषराक्षसगण इति तु पारिभाषिकम् । यथा,—
"देमरामदेमादेदेरारामममदरादरा ॥
देरारामममदेरारामममदेति गणत्रयम् ॥"
इति ज्योतिषरत्नमाला ॥
"पूर्व्वोत्तरात्रयञ्चैव भरण्यार्द्रा च रोहिणी ।
इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः ॥
श्रविष्ठाशतभिषामूलधनिष्ठाश्लेषवह्नितिकाः ।
चित्रामघाविशाखाः स्युरुदारा राक्षसदेवताः ॥
अश्विनी रेवती पुष्यः स्वाती हस्तः पुनर्व्वसुः ।
अनुराधा मृगशिरः अवर्णं देवतारकाः ॥"
इति निबन्धः ॥
(तस्य मिलनकथनं यथा, ज्योतिषे ।
"सजातौ परमा प्रीतिर्मध्यमा देवमानुषे ।
देवासुरे कनिष्ठा च न्त्वसुर्मानुषराक्षसे ॥") धातुसमूहः । यथा, मनोरमा ।
"भ्वादयोदिवुहोत्यादिदिवादिः स्वादिरेव च ।
तुदादयोधातवुक्रयादिचुरादिश्च गणा दश ॥"
(छन्दःशास्त्रोक्तपारिभाषिकाक्षरविशेषः । स तु म-न-भ-य-ज-र-स-त-ग-लसंज्ञः । इति छन्दोमञ्जरी ॥ * ॥ महादेवः । यथा, महाभारते । १३ । १७ । ४० ।
"विश्वरूपः स्वयं श्रेष्ठो बलवीरो बली गणः ॥"
दैत्यविशेषः । स तु अभिजिदिति नामान्तरस्य दैत्यस्य गुणवतो भार्य्यायां गुणवत्यां सम्भूतः । यथा, स्कन्दपुराणे गणेशखण्डे ३ अध्याये ।
"अथ सोऽप्यभिजित् पत्न्या सस्नद्रस्नानमाययौ ।
पर्व्वणि श्रद्धया युक्तश्चक्रे स्नानं तया सह ॥
लुप्तिता सा गुणवती पपौ चाञ्जलिना जलम् ।
यद्दैर्य्यं ब्रह्मणा त्यक्तं देवास्तदुरे गतम् ॥"
"भार्य्यागुणवती तस्य नवमासादनन्तरम् ।
पुत्रं प्रसूताद्रि शुभे दिव्यरूपं गुणाद्भुतम् ॥
ज्योतिर्विद्भिरनुज्ञातो गण इत्यभिधां पिता ।
कृत्वाभ्युदयिकं चक्रे यत्नीते दशमेऽहनि ॥"
स च महादेवमाराध्य वरं लब्ध्वा त्रैलोक्यं निर्जित्य च कपिलमुनेश्चिन्तामणिमपहृतवान् । कपिलमुनिस्तु अस्मादपराधात् जातमन्युर्गणेशमाराधयामास । अथ प्रसन्नेन गणपतिना तद्गृहे अवतीर्य्य तं गणदैत्यं विनाशितवान् इत्येषा कथा तत्रैवाध्याये विस्तरशो द्रष्टव्या ॥)
गणकः, पुं, (गण्यति शुभाशुभमग्रहभोगजनितफलं निरूपयतीति । गण तु क सङ्ख्याने + कर्त्तरि ण्वुल् ।) दैवज्ञः । ज्योतिर्वित् । तत्पर्य्यायः । सांवत्सरः २ ज्योतिषिकः ३ दैवज्ञः ४ मौहूर्त्तिकः ५ मौहूर्त्तः ६ ज्ञानी ७ कार्त्तान्तिकः ८ इत्यमरः । २।८।१४ ॥ ज्योतिषिकः ९ । इति तट्टीकायां भरतः ॥ स तु वर्णसङ्करजातिविशेषः । देवलादेरश्वागर्भजातः । तस्य कर्म्म तिथिवारादिज्ञापनम् । इति पराशरपद्धतिः ॥ स तु असृग्यः । यथा,—
"कलिकाले महाघोरे ! पाषण्डा बहवो जनाः ।
सङ्गदोषान्महेशानि ! तत्त्वज्ञानहानितां व्रजेत् ॥
तस्मात् प्रयत्नतो देवि ! संसर्गं वर्ज्जयेत् सुधीः ।
वरं चाण्डालसंसर्गं कुर्य्यात्तु साधकोत्तमः ॥
तथाप्यसृग्यगणकं सर्व्वदा तं परित्यजेत् ॥"
इति श्राद्धानन्दतरङ्गिण्यां षोड़शोल्लासे महिषमर्द्दिनीतन्त्रवचनम् ॥ तस्य लक्षणं यथा,—
"ज्योतिःशास्त्रविशेषज्ञः सुन्दराङ्गः सभापटुः ।
कुलक्रमागतः शुद्धो गणकः स्यान्महीपतेः ॥"
इति युक्तिकल्पतरुः ॥
(यदि च शास्त्रविशेषे गणकस्य निन्दादिकं श्रूयते तत्तु केवलं नक्षत्रजीविन एवेति बोध्यम् । प्रकृतज्योतिःशास्त्रन्तु द्विजातिभिरेवावश्यमध्ययनीयं वेदाङ्गत्वात् । यथा,—
"संयुतोऽपीतरैः कर्णनासादिभि-
श्चक्षुषाङ्गेन हीनो न किञ्चित् करः ।
तस्माद्द्विजैरध्ययनीयमेतत्
पुण्यं रहस्यं परमञ्च तत्त्वम् ॥"
इति सिद्धान्तशिरोमणिः ॥*॥
प्रजापतिपुत्रास्तारकाविशेषकेतवः । यथा,—
"तारकः पुञ्जनिकाख्या गणका नाम प्रजापतेरपत्यानि पुत्राः ॥"
इति बृहत्संहिता । ११ । २५ ॥
संकीर्णजातिविशेषः । यथोक्तम् ।
"चर्म्मकारस्य द्वौ पुत्रौ गणको वाद्यपूरकः ॥")
गणकर्णिका, स्त्री, (गणस्य गणाधिपस्य कर्णवत् पत्रमस्याः ।) इन्द्रवारुणी । इति राजनिर्घण्टः ॥
गणकारः, पुं, (गणानां सैन्यानां कारः कर्त्ता सेनापरिचालनदक्षः ।) भीमसेनः । इति शब्दरत्नावली ॥ (गणं धात्वर्थप्रकाशकग्रन्थविशेषं करोतीति । कृ + अण् ।) धातुसंग्रहकर्त्ता । यथा, "गणकारवचनप्रमाणार्थमिदम् ।" इति कातन्त्रवृत्तिः ॥
गणकी, स्त्री, (गणकस्य पत्नी इति । तत्पत्न्यामिति ङीष् ।) गणकपत्नी । इति जटाधरः ॥
गणचक्रकं, क्ली, (गणाः धार्म्मिकगणास्तेषां चक्रं सम्भूय भोजनमत्र इति कप् ।) धार्म्मिकाणां सम्भूय भोजनम् । इति त्रिकाण्डशेषः ॥
गणता, स्त्री, (गणस्य धर्म्मः भावो वा इति तल् ।) गणस्य भावः । समूहत्वम् । पक्षपातित्वम् । इति लोकप्रसिद्धिः ॥
गणदीक्षी, [न्] पुं, (गणान् बहुशिष्यान् दीक्षयति दीक्षां कारयतीति ।) बहुशिष्यकः । इति मिताक्षरा ॥ (वाच्यलिङ्गे तु गणस्य शिवस्य गणेशस्य वा दीक्षा विद्यते अस्मिन् अस्य वा । दीक्षा + इनिः । शिवदीक्षितः ।) गणेशदीक्षिते त्रि । गणस्य गणेशस्य दीक्षा गणदीक्षा । इति महानिर्व्वाणतन्त्रम् ॥
गणदेवता, स्त्री, (गणः सङ्घः तद्रूपा देवता सम्भूय स्थिता देवता इत्यर्थः ।) संहतदेवताविशेषः । यथा,—
"आदित्या विश्ववसवस्तुषिता भास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥
आदित्या द्वादश प्रोक्ता विश्वेदेवा दश स्मृताः ।
वसवश्चाष्टसंख्याताः षट्त्रिंशत् तुषिता मताः ॥
आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः ।
महाराजिकनामानो द्वे शते चापि विंशतिः ॥
साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः ।
एते च संहता देवास्तत्तदादित्याः खनामतः ॥"
इति जटाधरः ॥
गणद्रव्यं, क्ली, (गणानां साधारणानां द्रव्यम् । यद्वा द्रव्याणां गण इति परनिपातः ।) साधारणद्रव्यम् । मिलितानेकस्वामिकासम्बन्धिद्रव्यम् । द्रव्यसमूहः । तत्र द्रव्याणां गण इति युत्पत्तिः ॥
गणनं, क्ली, (गण्यते इति । गण + भावे ल्युट् ।) संख्यानम् । गणा ठिक् देया इति च भाषा ॥ यथा, विश्वसारतन्त्रे ।
"येनैव लिखनं कुर्य्यात्तेनैव गणनं स्मृतम् ॥"
गणना, स्त्री, (गण + युच् टाप् च ।) गणनम् । संख्या । (यथा, नैषधे । ३ । ४० ।
"यदि त्रिलोकी गणनापरा स्या-
त्तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारे परार्द्धं गणितं यदि स्यात्
गणेयनिःशेषगुणोऽपि स स्यात् ॥")
गणनाथः, पुं, (गणानां विघ्नकर्त्तृदेवविशेषाणां नाथः ।) गणेशः । इति शब्दरत्नावली ॥ (गणानां प्रमथानां नाथः स्वामी इति व्युत्पत्त्या शिवः ॥)
गणनायकः, पुं, (गणानां नायकः ।) गणेशः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १ । ७७ ।
"लेखको भारतस्यास्य भव त्वं गणनायक ! ॥"
गणानां देवसङ्घानां नायकः । यथा, भागवते । ५।१७।१३ । "यत्र ह देवपतयः खेः खेर्गणनायकैर्विहितमहार्हणाः ॥" इति ॥*॥ गणानां प्रमथानां नायकः । शिवः ॥)
गणनायिका, स्त्री, (गणानां नायकः शिवः तस्य शक्तिरिति टाप् अत इत्वं च गणनेत्री इत्यर्थः ।) दुर्गा । इति त्रिकाण्डशेषः ॥
गणनीयं, त्रि, (गण + अनीयर् ।) गणनार्हम् । संख्येयम् । तत्पर्य्यायः । गण्येयम् २ । इत्यमरः । ३ । १ । ६४ ॥ गणितव्यम् ३ गण्यम् ४ । इति व्याकरणम् ॥ संख्येयम् ५ । इति जटाधरः ॥
गणपतिः, पुं, (गणानां गणसंज्ञकानां देवानां पतिः अधीश्वरः स्वामी वा ।) गणेशः । इति हलायुधः ॥ (यथा, पद्मतन्त्रे । १ । १७० ।
"अन्तुं वाञ्छति शम्भवो गणपतेराद्यं क्षुधार्त्तः फणी
तं च क्रौञ्चरिपोः शिखी गिरिसुतासिंहोऽपि नागाग्रणम् ॥"
अग्रपूजनीयप्रधानदेवताविशेषः । यथा, यजुर्व्वेदीयवाजसनेयसंहितायाम् । १६ । २५ । "नमो गणेभ्यो गणपतिभ्यश्च वो नमो नम इति ॥"

बृहस्पतिः। यथा, ऋग्वेदे। २। २३। १।
"गणानां त्वा गणपतिं हवामहे
कविं कवीनामुपमश्रवस्तमम्॥"
शिवः। यथा, महाभारते। १३। १७। ४१।
"गणकर्त्ता गणपतिर्दिग्वासाः काम एव च।
मन्त्रवित् परमो मन्त्रः सर्व्वभावकरो हरः॥"
आघर्घ्यणोपनिबद्धिशेषः। यथा, मौक्तिकोपनिषदि प्रथमाध्याये।
"त्रिपुरातपनदेवीभावनाभक्षजावालगणपतिमहावाक्यगोपालतपनब्रह्मण्यहयग्रीवेति॥")

गणपर्व्वतः, पुं, (गणानां प्रमथगणानां गणपत्यादिदेवानां वा आवासरूपः पर्व्वतः। गणभूयिष्ठः पर्व्वतो वा।) कैलासपर्व्वतः। इति त्रिकाण्डशेषः॥

गणपीठकं, क्ली, (गणस्य शिवस्य परमेश्वरस्येति यावत् पीठः, आसनमिव कायति प्रकाशते इति। कै+कः।) वृत्तः। इति शब्दचन्द्रिका॥

गणराजं, पुं, (गणानां बहूनां राजीनां समाहारः गणशब्दस्य सङ्ख्यावत्त्वात् तद्धितार्थेति द्विगुसमासः। "अहः सर्व्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः।" ५। ४। ८७। इत्यच्। सङ्ख्यापूर्व्वं रात्रं क्लीवमिति लिङ्गानुशासने क्लीवत्वविधानात् "राज्ञाहाहाः पुंसि।" २। ४। २९। इति क्लीवत्वम्।) राजिसमूहः। इत्यमरः। १। ४। ६॥

गणरूपः, पुं, (गणाः बहुप्रकाराणि रूपाणि अस्य।) अर्कवृक्षः। इत्यमरः। २। ४। ८०॥

गणरूपकः, पुं, (गणरूप+संज्ञायां कन्। गणरूप इव कायति प्रकाशते इति वा। कै+कः।) राजार्कः। इति राजनिर्घण्टः॥

गणरूपी, [न्] पुं, (गणाः बहुविधानि रूपाणि वर्त्तन्तेऽत्यादयः सन्त्यस्य इति अस्त्यर्थे इनिः।) श्वेतार्कः। इति रत्नमाला॥

गणवतीसुतः, पुं, (गणवत्याः सुतः।) दिवोदासः। यथा, त्रिकाण्डशेषे।
"धन्वन्तरिर्दिवोदासः काशिराजः सुधोद्भवः।
पालकाप्यागणवतीकरेणुरुचिरासुतः॥"

गणहासः, पुं, (गणान् गन्धद्रव्यगणान् हासयतीति। गण+हस्+णिच्+अण्।) चोरकनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

गणहासकः, पुं, (गणहास+स्वार्थे कः।) चोरकनामगन्धद्रव्यम्। इत्यमरः। २। ४। १२८॥

गणाग्रणीः, पुं, (अग्रे नीयते इति अग्रणीः। गणानां गणाख्यदेवविशेषाणां अग्रणीः।) गणेशः। इति त्रिकाण्डशेषः॥

गणाचलः, पुं, (गणानां वासाय अचलः गणभूयिष्ठोऽचलो वा।) कैलासपर्व्वतः। इति जटाधरः॥

गणाधिपः, पुं, (गणानां अधिपः अधीश्वरः।) गणेशः। इत्यमरः। १। १। ४०॥ शिवः। इति हलायुधः॥

गणिः, स्त्री, (गण+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्।) गणनम्। इति आकरग्रन्थः॥

गणिका, स्त्री, (गणः लम्पटगणः उपपतित्वेनास्त्यस्याः इति ठन्।) वेश्या। (यथा, हरिवंशे। ८५। ६।
"गणिकानां पृथङ्नाम्ना शुभैरास्तरणाम्बरैः॥")
यूथिका। इत्यमरः। २। ६। १६॥ गणिकारिकाशब्दः। इति शब्दरत्नावली॥ हस्तिनी। इति जटाधरः॥

गणिकारिका, स्त्री, (गणिः गणनं करोतीति। कृ+ण्वुल्+टाप्+अत इत्वञ्च। यद्वा गणिकेत्याख्यां ऋच्छतीति। ऋ+"कर्म्मण्यण्।" ३। २। १। इत्यण्। स्वार्थे कन् अत इत्वञ्च।) वृत्तविशेषः। बड़ गणियारी इति भाषा॥ तत्पर्य्यायः। श्रीपर्णम् २ अग्निमन्थः ३ कणिका ४ जया ५। इत्यमरः। २। ४। ६६॥ तेजोमन्थः ६ हविर्मन्थः ७ ज्योतिष्कः ८ पावकः ९ अरणिः १० वह्निमन्थः ११ मथनः १२। इति रत्नमाला॥ अग्निमथनः १३ तर्कारी १४ वैजयन्तिका १५ अरणीकेतुः १६ श्रीपर्णी १७ कर्णिका १८ गादेयी १९ विजया २० अनन्ता २१ नदीजा २२। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। तिक्तत्वम्। अनिलकफश्लेष्मामान्द्याग्निमलबन्धश्रमनाशित्वञ्च। इति राजनिर्घण्टः॥ क्षुद्रगणिकारिकागुणपर्य्यायौ क्षुद्राग्निमन्थशब्दौ द्रष्टव्यौ॥

गणिकारी, स्त्री, (गणिर्गणनं करोति पूजादिषु आत्मानं गणनं कारयतीत्यर्थः। कृ+कर्म्मण्यण् ततो ङीष्।) पुष्पवृक्षविशेषः। गणियारी इति भाषा। तत्पर्य्यायः। काञ्चनिका २ काञ्चनपुष्पी ३ वसन्तदूती ४ गन्धकुसुमा ५ अलिमोदा ६ वासन्ती ७ मदनसादिनी ८। अस्या गुणाः। सुरभितरत्वम्। त्रिदोषशमनत्वम्। दाहश्लेष्मकामक्रीड़ाडम्बरसम्बरहरत्वम्। चापलप्रसरत्वञ्च। इति राजनिर्घण्टः॥ (विशेषश्चास्या गणिकारिकाग्निमन्थशब्दयोर्बोद्धव्यः॥)

गणितं, त्रि, (गण+कर्म्मणि क्तः।) कृतगणनम्। तत्पर्य्यायः। संख्यातम् २। इत्यमरः। ३। १। ६४॥ (चिन्तितम्। यथा, शिवपुराणे ज्ञानसंहितायाम्। १२। २७।
"दुःखं च विविधं तच्च गणितं न तया तथा॥")

गणितं, क्ली, (गण्यते इति। गण+क्तः।) व्यक्ताख्यम्। तत् द्विविधं व्यक्तं पाटीगणितम्। अव्यक्तं बीजगणितम्। इति लीलावती॥ गणनम्। यथा, नैषधे। ३। ४०।
"पारे परार्द्धं गणितं यदि स्यात्॥"

गणिपिटका, स्त्री, द्वादशाङ्गी। सा तु जिनानां विद्याविभागः। इति हेमचन्द्रः। २। १५६॥

गणेयः, त्रि, (गण+एय।) संख्येयः। गणनीयः। इत्यमरः। ३। १। ६४॥ (यथा, नैषधे। ३। ४०।
"गणेयनिःशेष गुणोऽपि स स्यात्॥")

गणेरुः, पुं, (गण+बाहुलकात् एरुः।) कर्म्मकारवृक्षः। इति मेदिनी। रे। १४८॥

गणेरुः, स्त्री, (गण+बाहुलकात् एरुः।) वेश्या। हस्तिनी। इति मेदिनी। रे। १४८॥

गणेरुका, स्त्री, (गणेरूणां गणिकानां गणिकासु वा मध्ये कायति प्रकाशते इति। कै+कः।) कुट्टिनी। इति त्रिकाण्डशेषः॥

गणेशः, पुं, (गणानां प्रमथसमूहानां यद्वा गणानां जीवजातानां ईशः ईश्वरः।) शिवः। इति हारावली। ८॥ (यथा, महाभारते। ३। कैरातेः। ३६। ७८।
"प्रसादये त्वां भगवन्! सर्व्वभूतमहेश्वर!।
गणेशं जगतः शम्भुं लोककारणकारणम्॥")
गणानां गणाख्यदेवविशेषाणां विघ्नाख्यदेवानां वा ईशः नियन्ता।) शिवपुत्रः। (यथा, महाभारते। १। १। ७३।
"कार्य्यस्य लेखनार्थाय गणेशः स्मर्य्यतां सुने!॥")
तत्पर्य्यायः। विनायकः २ विघ्नराजः ३ द्वैमातुरः ४ गणाधिपः ५ एकदन्तः ६ हेरम्बः ७ लम्बोदरः ८ गजाननः ९। इत्यमरः। १। १। ४०॥ विघ्नेशः १० पर्शुपाणिः ११ गजास्यः १२ आखुगः १३। इति हेमचन्द्रः। २। १२१॥ शूर्पकर्णः १४। इति ब्रह्मवैवर्त्तपुराणम्॥ * ॥
तस्योत्पत्तिः। तत्र पार्व्वतीं प्रति बृहन्नारदीयरूपश्रीकृष्णवाक्यम्। यथा,—
"न भवेद्विघ्नभक्तिश्च विष्णुमाये! त्वया विना।
तद्व्रतं लोकशिक्षार्थं तत्तपस्तव पूजनम्॥
सर्व्वेष्टाफलदात्री त्वं नित्यरूपा सनातनी।
गणेशरूपः श्रीकृष्णः कल्पे कल्पे तवात्मजः॥
त्वत्क्रोड़मागतः शिघ्रमित्युक्त्वान्तरधीयत।
कृत्वान्तर्द्धानमीशश्च बालरूपं विधाय सः॥
जगाम पार्व्वतीतल्पं मन्दिराभ्यन्तरस्थितम्।
तत्पश्चे शिववीर्य्ये च मिश्रितः स बभूव ह॥
ददर्श गेहशिखरं प्रसृतबालको यथा।
शुद्धचम्पकवर्णाभः कोटिचन्द्रसमप्रभः॥
सुखदृश्यः सर्व्वजनैश्चतुरश्रिविवर्द्धकः।
अतीवसुन्दरतनुः कामदेवविमोहनः॥
सुखं निरुपमं बिभ्रत् शारदेन्दुविनिन्दकम्।
सुन्दरे लोचने बिभ्रत् चारुपद्मविनिन्दके॥
ओष्ठाधरपुटं बिभ्रत् पक्वबिम्बविनिन्दकम्।
कपोलञ्च कपोलन्तदतीव सुमनोहरम्॥
नासाग्रं रुचिरं बिभ्रत् खगेन्द्रचञ्चुनिन्दकम्।
त्रैलोक्येषु निरुपमं सर्व्वाङ्गं बिभ्रदुत्तमम्॥
ययाच ययने रम्ये प्रेरयन् हस्तपादकम्॥"
तस्य शनैश्चरदर्शनात् मस्तकविनाशः विष्णुकर्त्तृकगजमस्तकसंयोगश्च यथा,—
"सा च देववधूभूता शनिं प्रोवाच कौतुकात्।
पश्य मां मत्शिशुमिति नियतिः केन वार्य्यते॥
पार्व्वतीवचनं श्रुत्वा सोऽगमेन हृदा स्वयम्।
पश्यामि किं न पश्यामि पार्व्वतीसुतमित्यहो॥
बालं द्रष्टुं मनश्चक्रे न बालमातरं शनिः।
विषसमानसः पूर्व्वं शुष्ककण्ठौष्ठतालुकः॥
सचलोचनकोणेन ददर्श च शिशोर्मुखम्।
शनिश्च दृष्टिमात्रेण चिच्छेद मस्तकं सुने!॥
विस्मिताश्चेति सुराः सर्व्वे चित्रपुत्तलिका यथा।
देवाश्च शैलाः गन्धर्व्वाः शिवः कैलासवासिनः॥

तान् सर्व्वान् मूर्च्छितान् दृष्ट्वा चारुह्य गरुडं हरिः।
जगाम पुण्यभद्रां स उत्तरस्यां दिशि स्थिताम्॥
पुण्यभद्रानदीतीरे ददर्श्व काननस्थितम्।
गजेन्द्रं निद्रितं तत्र शयानं हस्तिनीयुतम्॥
शीघ्रं सुदर्शनेनैव चिच्छेद तच्छिरो मुदा।
स्थापयामास गरुडे रुधिराक्तं मनोहरम्॥
आगत्य पार्व्वतीस्थानं बालं दृष्ट्वा खवक्षसि।
रुचिरं तच्छिरः दृष्ट्वा योजयामास बालके॥
ब्रह्मस्वरूपो भगवान् ब्रह्मज्ञानेन लीलया।
जीवनं जीवयामास हूंकारोच्चारणेन च॥"

इति ब्रह्मवैवर्त्तपुराणम्॥ * ॥

अस्य ध्यानम्।

"खर्व्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं
प्रस्यन्दन्मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम्।
दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम्॥"

इति पुराणम्॥ * ॥

ध्यानान्तरं यथा,—

"सिन्दूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं
दन्तं पाशाङ्कुशेष्टान्युरुकरविलसद्बीजपूराभिरामम्।
बालेन्दुद्योतमौलिं करिपतिवदनं दानपूरार्द्रगण्डं
भोगीन्द्राबद्धभूषं भजत गणपतिं रक्तवस्त्राङ्गरागम्॥"

इति तन्त्रसारः॥

(तस्य नमस्कारमन्त्रो यथा,—

"देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः।
विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः॥"

इति पूजापद्धतिः॥)

एकपञ्चाशद्गणेशाः। यथा,—

"विघ्नेशो विघ्नराजश्च विनायकश्चिवोत्तमौ।
विघ्नकृत् विघ्नहर्त्ता च गणेशद्विसुदन्तकाः॥
गजवक्त्रनिरञ्जनौ कपर्दी दीर्घजिह्वकः।
शूङ्कर्णश्च वृषभध्वजश्च गणनायकः॥
गजेन्द्रः सूर्पकर्णश्च स्थाणुलोचनसंज्ञकः।
लम्बोदरमहानन्दौ चतुर्म्मूर्त्तिसदाशिवौ॥
आमोददुर्म्मुखौ चैव सुमुखश्च प्रमोदकः।
एकपादो द्विजिह्वश्च सुरवीरः सदामुखः॥
वरदो वामदेवश्च वक्रतुण्डो द्विरण्डकः।
सेनानीर्ग्रामणीर्म्मत्तो विमत्तो मत्तवाहनः॥
जटी मुण्डी तथा खड्गी वरेण्यो वृषकेतनः।
भक्तप्रियो गणेशश्च मेघनादकसंज्ञकः॥
आपी गणेश्वरः प्रोक्ताः पञ्चाशद्गणपा इमे।
तरुणारुणसङ्काशा गजवक्त्राखिलोचनाः॥
पाशाङ्कुशवराभीतिहस्ताः शक्तिसमन्विताः॥" * ॥

तेषामेकपञ्चाशच्छक्तयश्च यथा,—

"श्रीः श्रीश्च पुष्टिः शान्तिश्च स्वस्तिश्चैव सरस्वती।
स्वाहामेधाकान्तिकामिन्यो मोहिन्यपि वेनटी॥
पार्व्वती ज्वलिनी नन्दा सुयशाः कामरूपिणी।
उमा तेजोवती सत्या विघ्नेशानी सुरूपिणी॥
कामदा मदजिह्वा च भूतिः स्याद्भौतिका सिता।
रमा च महिषी प्रोक्ता मदङ्गिनी च विकर्णपा॥

भ्रुकुटिः स्यात्तया लक्ष्मा दीर्घघोणा धनुर्द्धरा।
यामिनी रात्रिसंज्ञा च कामान्धा च शुचिप्रभा॥
लोलाक्षी चपला दीप्तिः सुभगा दुर्भगा शिवा।
भर्गा च भगिनी चैव भोगिनी सुभगा मता॥
कालरात्रिः कालिका च पञ्चाशच्छक्तयः स्मृताः।
सर्व्वालङ्करणोद्दीप्ताः प्रियाङ्क्ष्याः सुशोभनाः॥
रक्तोत्पलकरा ध्येया रक्तमाल्याम्बरावृताः॥"

इति शारदातिलकटीकायां राघवभट्टः॥

गणेशकुसुमं, क्ली, (गणेश इव कुसुमम्। रक्तवर्णसादृश्यात्तथात्वम्।) रक्तकरवीरः। इति राजनिर्घण्टः॥

गणेशभूषणं, क्ली, (गणेशस्य भूषणमिव।) सिन्दूरम्। इति राजनिर्घण्टः॥

गणोत्साहः, पुं, (गणाय गणार्थं वा यूथीकरणायेत्यर्थः उत्साहोऽस्य। यद्वा गणान् यूथान् उत्साहयतीति। उत्+साहि+अण्।) गण्डकः। इति त्रिकाण्डशेषः॥ गण्डार इति भाषा॥

गण्डः, पुं, (गडि आस्रेकदेशे+अच्। यद्वा गम गतौ+"गमन्ताडुः।" उणा। १।११३। इति डः।) हस्तिकपोलः। (यथा, पञ्चतन्त्रे। १।३५६।

"प्रमाणाभ्यधिकस्यापि गण्डश्यामदद्युतेः।
पदं मूर्द्धि समाधत्ते केशरी मत्तदन्तिनः॥")

तत्पर्य्यायः। कटः २। इत्यमरः। २। ८। ३७॥ करटः ३। इति तट्टीका॥ कटकः ४ हस्तिगण्डकः ५। इति शब्दरत्नावली॥ कपोलः। इत्यमरः। २। ६। ८०॥ गाल इति भाषा॥ (यथा, कुमारे। ७। ८२।

"तदीयदार्द्रारुणगण्डलेखं
उच्छ्वासिकालाञ्जनरागमच्छ्वोः॥")

खड्गी। वीर्य्यङ्गम्। पिटकः। चिह्नम्। वीरः। हयभूषणम्। बुद्बुदः। इति मेदिनी॥ स्फोटकः। ग्रन्थिः। इत्यमरटीकायां रमानाथः॥ विष्कुम्भादिसप्तविंशतियोगान्तर्गतदशमयोगः। (यथा, ज्योतिषवचने।

"गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा॥")

तत्र जातफलम्।

"स्वकार्य्यकर्त्ता परकार्य्यहर्त्ता
गण्डोद्भवः स्यादतिगण्डवाक्यः।
अत्यन्तधूर्त्तः पुरुषः कुरूपः
सुहृन्नृणामतितापदाता॥"

इति कोष्ठीप्रदीपः॥ * ॥

दोषजनकोऽश्विन्यादिनक्षत्राणां भागविशेषः। यथा,—

"अश्विनीमघमूलानां तिस्रो गण्डाद्यनाडिकाः।
अन्त्याः पौष्णोरगेन्द्राणां पञ्चैव जवना जगुः॥
मूलेन्द्रयोर्दिवा गण्डो निशायां पितृसर्पयोः।
सन्ध्याद्वये तथा ज्ञेयो रेवतीतुरगर्क्षयोः॥" * ॥

तत्र जातस्य दोषो यथा,—

"सन्ध्यारात्रिदिवाभागे गण्डयोगोद्भवः शिशुः।
आत्मानं मातरं तातं विनिहन्ति यथाक्रमम्॥"

तस्य शान्तिर्यथा,—

"सर्व्वेषां गण्डजातानां परित्यागो विधीयते।

तातेनादर्शनं वापि यावत् वाग्दानिको भवेत्॥
कुङ्कुमं चन्दनं कुष्ठं गोरोचनमथापि वा।
घृतैरेवान्वितं स्नात्वा चतुर्भिः कलसैर्बुधः॥
सहस्राक्षेण मन्त्रेण बालकं स्नापयेत्ततः।
पित्तयुक्तं दिवाजातं मातृयुक्तञ्च रात्रिजम्॥
स्नापयेत् पितृमातृभ्यां सन्ध्ययोरुभयोरपि।
कांस्यपात्रं घृतैः पूर्णं गण्डदोषोपशान्तये॥
दद्याद्धेनुं हिरण्यञ्च ग्रहांश्चापि प्रपूजयेत्।
मूलायाः प्रथमे पादे पितुर्व्वै पूर्व्विनश्यति॥
द्वितीये नियतां पीड़ां मातुः कुर्य्यात् पितुस्तथा।
तृतीये धननाशाय चतुर्थे सर्व्वसम्पदः॥
यत्नेन फलं ज्ञेयमश्लेषास्वपि पूर्व्ववत्।
वल्मीकदन्तिकां नद्यास्तूभयतटभक्तिकाम्॥
गोवियाणगण्डदत्वापि दन्तिदन्तञ्च निःक्षिपेत्।
तीर्थाम्भःपञ्चगव्येन स्नानं मातुः पितुः शिशोः॥
दिवा जाता तु या कन्या निशि जातस्तु यः पुमान्।
नोभयोर्गण्डदोषः स्यात् नाचलो हन्ति पर्व्वतम्॥"

इति ज्योतिषतत्त्वम्॥

गण्डकः, पुं, (गण्ड+स्वार्थे कन्।) खड्गी। इत्यमरः। २। १०। १७॥ गण्डार इति भाषा॥ खड्गः। संख्याप्रभेदः। गण्डा इति भाषा। विघ्नविशेषः। अवच्छेदः। अन्तरायः। इति मेदिनी। के ८२॥ (देशविशेषः। यथा, महाभारते। २। २६। ४।

"ततः स गण्डकान् शूरो विदेहान् भरतर्षभः॥")

भूषणम्। यथा, कादम्बर्य्याम्। "व्याघ्रनखपङ्क्तिमण्डिता गण्डकाभरणा च॥" ग्रन्थिः। यथा, तत्रैव। "गोरोचनालिखितभूर्ज्जपत्रगर्भान् मन्त्रगण्डकान्॥" स्फोटकरोगविशेषः। यथा, तत्रैव।

"अनेकवेत्राघातनिर्म्मितबहुगात्रगण्डकम्॥")

गण्डकारी, स्त्री, (गण्डं भग्नास्थिग्रन्थिमित्यर्थं करोति संयोजयतीति।) खदिरवृक्षः। इति शब्दचन्द्रिका॥ वराहक्रान्ता। इति रत्नमाला॥

गण्डकाली, स्त्री, (गण्ड+ङ+"कर्म्मण्यण्।" ३। २। १। इत्यण् ततो ङीप्। ङस्य लत्वं यद्वा गण्डेषु ग्रन्थिषु काली यस्याः।) खदिरवृक्षः। इत्यमरः। २। ४। १४१॥

("गण्डकाली नमस्कारी समङ्गा खदिरी क्वचित्॥"

इति वैद्यकरत्नमालायाम्॥)

गण्डकी, स्त्री, (गण्डक+स्त्रियां जातौ ङीष्।) स्वनामख्याता नदी। इति मेदिनी। ८२॥ यथा, स्मृतिः।

"गण्डक्याश्चैकदेशे च शालग्रामस्थलं स्मृतम्।
पाषाणं तद्भवं यत्तत् शालग्राममिति स्मृतम्॥"

तत्र शालग्रामोत्पत्तिकारणं यथा,—

"गण्डक्यापि पुरा तप्तं वर्षाणामयुतं विधेः।
शीर्णपर्णाशनं स्नात्वा वायुभक्षाप्यनन्तरम्॥
दिव्यं वर्षशतं तेपे विष्णुं चिन्तयती तदा।
ततः साक्षाज्जगन्नाथो हरिर्भक्तजनप्रियः॥
उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः।
गण्डकि! त्वां प्रसन्नोऽस्मि तपसा विस्मितोऽनघे!॥
अनवच्छिन्नया भक्त्या वरं वरय सुव्रते!।
किं देयं तद्वदस्वाशु प्रीतोऽस्मि वरवर्णिनि!॥

गण्डश्चापि पुरो दृष्ट्वा शङ्खचक्रगदाधरम् ।
दण्डवत् प्रणता भूत्वा ततः स्तोतुं प्रचक्रमे ॥
अहो देव ! मया दृष्टो दुर्ज्ञेयो योगिनामपि ।
त्वया सर्वमिदं सृष्टं जगत् स्थावरजङ्गमम् ॥
तदनु त्वं प्रविष्टोऽसि पुरुषरूपेण चोच्यते ।
त्वल्लीलोन्मीलिते विश्वे कः खल्वोऽस्ति वै पुमान्॥
अनाद्यन्तमपर्यन्तं यद्ब्रह्म श्रुतिबोधितम् ।
तदेव त्वं महाविष्णो ! यस्त्वां वेद स वेदवित् ॥
त्वदेवाद्या जगन्माता या शक्तिः परमा स्मृता ।
तां योगमायां प्रकृतिप्रधानमिति वक्ष्यते ॥
निर्गुणः पुरुषोऽव्यक्तश्चित्स्वरूपी निरञ्जनः ।
आनन्दरूपः शुद्धात्मा त्वकर्मा निर्विकारकः ॥
त्वां योगमायामाविश्य कर्तृत्वं प्राप्नवानसि ।
प्रकृत्या दृश्यमानेऽस्मिन् ब्रह्मा साक्षी निगद्यते ॥
प्रकृतेस्त्रिगुणैरस्मिन् दृश्यमानेऽपि नान्यथा ।
सान्निध्यमात्रतो देव ! त्वयि स्फुरति कारणे ॥
स्फटिके हि यथा स्वच्छे जवाकुसुमरागतः ।
प्रकाशते त्वत्प्रकाशात् ज्योतीरूप ! नतास्मि ते॥
ब्रह्मादयोऽपि कवयो न विन्दन्ति यथार्थतः ।
तत् कथं वेद्म्यहं मूढा तव रूपं निरञ्जनम् ॥
मूढस्य जगतो मध्ये स्थिता किञ्चिदजानती ।
त्वया दृष्टा ज्ञता चास्मि योग्ययोग्यमविन्दती ॥
तेन लोके महत्त्वञ्च त्वत्प्रसादेन चेच्छती ।
यदर्थाचे तत्प्रभोदार ! तस्मै दातुं त्वमर्हसि ॥
दयालुरसि दीनेषु नेति मां न वद प्रभो ! ।
ततः प्रोवाच भगवान् देवि ! यद्यत्त्वमिच्छसि ।
तद्याचय वरारोहे ! अदेयमपि सर्वथा ।
यद्दुर्लभं मनुष्याणां शीघ्रं याचय मां प्रति ॥
मद्दर्शनमनुप्राप्य कोवाऽपूर्णमनोरथः ।
ततो हिमांशोः सा देवी गण्डकी लोकतारिणी ॥
प्राञ्जलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत् ।
यदि देव ! प्रसन्नोऽसि देयो मे वाञ्छितो वरः॥
मम गर्भगतो भूत्वा विष्णो ! मत्पुत्रतां व्रज ।
ततः प्रसन्नो भगवान् चिन्तयामास गोपते ! ॥
किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया ।
दास्यामि याचितं येन लोकानां भवमोचनम् ॥
इत्येवं तपया देवो निश्चित्य मनसा स्वयम् ।
गण्डकीमवदत् प्रीतः शृणु देवि ! वचो मम ॥
शालग्रामशिलारूपी तव गर्भगतः सदा ।
तिष्ठामि तव पुत्रत्वे भक्तानुग्रहकारणात् ॥
मत्सान्निध्यात् नदीनां त्वमतिश्रेष्ठा भविष्यसि ।
दर्शनात् स्पर्शनात् स्नानात् पानाच्चैवावगाहनात्
हरिष्यसि महापापं वाङ्मनःकायसम्भवम् ।
यः स्नास्यति विधानेन देवर्षिपितृतर्पकः ॥
तर्पयेत् स्वपितॄंस्तापि तारयित्वा दिवं नयेत् ।
स्वयं मम प्रियो भूत्वा ब्रह्मलोकं गमिष्यति ॥
यदि त्वयुत्सृजेत् प्राणान् मम कर्मपरायणः ।
सोऽपि याति परं स्थानं यत्र गत्वा न शोचति ॥
एवं दत्त्वा वरान् देवी तत्रैवान्तरधीयत ।
ततः प्रभृति तिष्ठामः क्षेत्रेऽस्मिन् शृणु लोमश ॥"
इति वराहपुराणे सोमेश्वरादिलिङ्गमहिमा-ऽभिमुक्तक्षेत्रवर्णनादिमहिमनामाध्यायः ॥

गण्डकुसुमं, क्ली, (गण्डेषु गजानां कपोलदेशेषु कुसुममिव । हस्तिनां हि कटदेशात् कपोलयोरेव मदवारि क्षरति ।) हस्तिमदः । तत्पर्य्यायः । उत्कटः २ । इति हारावली ।१६१॥

गण्डकूपः, पुं, (गण्डे गिरेरूर्द्ध्वदेशे कूप इव ।) पर्व्वतस्योच्चस्थानम् । (यथा,—
"उद्देशो गण्डकूपस्तु पर्व्वतस्याभिधीयते ॥"
इति हारावली । ५१ ॥)

गण्डगात्रं, क्ली, (गण्डः स्फोटक इव वन्धुरत्वं उच्चनीचत्वं गात्रेऽस्य ।) फलविशेषः । इति शब्दचन्द्रिका ॥ आतां इति भाषा ॥

गण्डदूर्व्वा, स्त्री, (गण्डा ग्रन्थिला दूर्व्वेति कर्म्मधारयः ।) दूर्व्वाविशेषः । गाँटिया दूर्व्वा इति भाषा ॥ तत्पर्य्यायः । गण्डाली २ अतितीव्रा ३ मत्स्याक्षी ४ वारुणी ५ मीनपर्णी ६ सूचीनेत्रा ७ श्यामग्रन्थिः ८ ग्रन्थिला ९ ग्रन्थिपर्णी १० सूचीपत्रा ११ श्यामकाण्डा १२ जलस्था १३ शुक्लाक्षी १४ कलाया १५ । अस्या गुणाः । मधुरत्वम् । वातपित्तज्वरभ्रमक्षयाश्रमहृद्दोषनाशित्वम् । शिशिरत्वञ्च । इति राजनिर्घण्टः ॥ यथा, भावप्रकाशे ।
"गण्डदूर्व्वा तु गण्डाली मत्स्याक्षी शुक्लाह्वयः ।
गण्डदूर्व्वा हिमा लोहदाहविषी ग्राहिणी लघुः ॥
तिक्ता कषाया मधुरा वातक्षत् कटुपाकिनी ।
दाहक्षयावलाश्वासकुष्ठपित्तज्वरापहा ॥"

गण्डमाला, स्त्री, (गण्डानां ग्रीवाजातस्फोटविशेषाणां माला समूहोऽस्याम् ।) गलरोगविशेषः । तत्पर्य्यायः । गलगण्डः २ । इति हेमचन्द्रः । ३ । १३१ ॥ तस्यौषधं यथा,—
"अजमोदः ससिन्दूरो हरितालनिशाद्वयम् ।
क्षारद्वयं फेनयुतमार्द्रकं शूरलोद्भवम् ॥
इन्द्रवारुण्यपामार्गकदलैः कन्दलैः समैः ।
एभिः सर्व्वसमं तैलमजामूत्रेण योजितम् ॥
मृद्वग्निना पचेदेतदर्कक्षीरेण संयुतम् ।
अजमोदादिकं तैलं गण्डमालां व्यपोहति ॥
विदग्धस्तु पचेत् पक्वं पक्वञ्चैव विशोधयेत् ।
रोपणं मृदुभावञ्च तैलेनानेन कारयेत् ॥
अजमोदादिकं तैलं महावीर्य्यञ्च रोगजुत् ॥"
इति गारुड़े १७८ अध्यायः ॥
अपि च । तत्रैव १६० अध्याये ।
"द्विजयष्ट्याह्व वै मूलं पिष्ट्वं तण्डुलवारिणा ।
गण्डमालां हरेत्क्षिप्रात् कुरण्डगलगण्डकम् ॥"
अपि च । तत्रैव १६१ अध्याये ।
"अपराजिताया मूलञ्च गोमूत्रेण समन्वितम् ।
पीतञ्चापि हरत्येव गण्डमालां न संशयः ॥"
अपि च ।
"विक्ष्यामिमन्यद्योगाकपाटलापारिभद्रकम् ।
प्रसारणग्नगन्धा च हरेत्तो कण्टकारिका ॥
बला चातिबला राजा प्रदंष्ट्रा च पुनर्नवा ।
एरण्डशारिवा पर्णी गुडूची कपिकच्छुरा ॥
एषां दशपलिकान् भागान् क्वाथयेत् सलिलेऽमले ।

तेन पादावशेषेण तैलं पात्रे विपाचयेत् ॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ।
घृतावशेषसञ्चैव तैलतुल्यं प्रदापयेत् ॥
द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि तत् शृणु ।
घृतपुष्पा देवदारु शालपर्णी वचाशुण्ठ ॥
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्नवा ।
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ॥
हृच्छूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ।
अपस्मारं वातरक्तमायुष्मांश्च पुमान् भवेत् ॥
गर्भमन्वतरी विन्द्यात् किं पुनर्मानुषी स्त्रिय ! ।
अश्वानां वातभग्नानां कुञ्जराणां वृषां तथा ।
तैलमेतत् प्रदातव्यं सर्व्ववातविकारिणाम् ॥"
इति गारुड़े १६८ अध्यायः ॥ * ॥

अन्यच्च ।
अथ गण्डमालाया लक्षणमाह ।
"कर्कन्धुकोलामलकप्रमाणैः
कक्षासमन्या गलवंक्षणेषु ।
मेदःकफाभ्यां चिरमन्दपाकैः
स्याद्गण्डमाला बहुभिस्तु गण्डैः ॥"
कर्कन्धुः क्षुद्रबदरी । कोलं दृढबदरम् । चिरमन्दपाकैः चिरेण मन्दोऽल्पः पाको येषां तैः॥*॥
अथ गण्डमालाया एवावस्थाविशेषमपचीमाह ।
"ते ग्रन्थयः केचिदवाप्तपाकाः
स्रवन्ति नश्यन्ति भवन्ति चान्ये ।
कालानुबन्धं चिरमादधाति
सैवापचीति प्रवदन्ति केचित् ॥"
ते ग्रन्थयः गण्डमालाया एवं गण्डाः केचिदवाप्तपाकाः सन्तः स्रवन्ति केचित् नश्यन्ति अन्ये भवन्ति च । कालानुबन्धाच्चिरमादधाति या गण्डमाला चिरं तिष्ठति सैवापची इति केचिद्वदन्ति ॥ * ॥
अपचीः साध्यत्वादिकमाह ।
"साध्या स्मृता पीनसपार्श्वशूल-
काशज्वरच्छर्द्दियुता त्वसाध्या ।" * ॥
अथ ग्रन्थिः । ग्रन्थेर्लक्षणमाह ।
"वातादयो मांसमसृक् च दुष्टा
संदूष्य मेदश्च तथा शिराश्च ।
वृत्तोन्नतं विग्रथितन्तु शोथं
कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥"
विग्रथितं ग्रन्थिरूपम् । अतो ग्रन्थिः ॥ * ॥
अस्या निदानादिपूर्व्वलिखितम् । अथ गण्डमालाचिकित्सा ।
"काञ्चनारत्वचः क्वाथः शुण्ठीचूर्णेन संयुतः ।
माक्षिकाढ्यः सक्षौद्रः क्वाथो वरुणमूलजः ॥
गण्डमालां हरत्याशु चिरकालानुबन्धिनीम् ।
पलमङ्कपलं वापि पिष्ट्वा तण्डुलवारिणा ॥
काञ्चनारत्वचं पीत्वा गण्डमालां व्यपोहति ।
काञ्चनारस्य शुङ्गीयात् त्वचं पञ्चपलोन्मिताम्॥
नागरस्य कषायाच्च मरीचस्य पलं पलम् ।
पथ्याविभीतधात्रीणां पलमर्द्धं पृथक् पृथक् ॥
वरुणस्याष्टमेकञ्च पत्रकैलात्वचं पुनः ।
टङ्कं टङ्कं समादाय सर्व्वाण्येकत्र चूर्णयेत् ॥

यावच्चूर्णमिदं सर्व्वं तावानेवात्र गुग्गुलुः ॥
सङ्कल्प्य सर्व्वमेकत्र पिण्डं कृत्वा विधारयेत् ।
गुटिकाः प्राणिकाः कृत्वा प्रभाते भक्षयेन्नरः ॥
गण्डमालां जयत्युग्रामपचीमर्ब्बुदानि च ।
ग्रन्थ्यर्ब्बुदानि गुल्मांश्च कुष्ठानि च भगन्दरम् ॥
प्रदेयश्चानुपानार्थं क्वाथो गुग्गुलिकाभवः ।
क्वाथः खदिरसारस्य क्वाथः कोष्णोऽभयाभवः ॥"
इति काञ्चनारगुग्गुलुः ॥ * ॥
"चक्रमर्दकमूलस्य कल्कं दत्त्वा विपाचयेत् ।
कैग्गराजरसे तैलं कटुकं त्रुटनाग्निना ॥
पादशेषे विनिःक्षिप्य सिन्दूरमवतारयेत् ।
एतत्तैलं निहन्त्याशु गण्डमालां सुदारुणाम् ॥"
इति चक्रमर्दतैलम् ॥ * ॥
"गुञ्जामूलकलैस्तैलं विपक्वं द्विगुणाम्भसा ।
हरेदभ्यङ्गनस्याभ्यां गण्डमालां सुदारुणाम् ॥"
इति गुञ्जातैलम् ॥*॥ अथापच्याश्चिकित्सा ।
"चन्दनं सारिवा लाक्षा वचा कटुकरोहिणी ।
एभिस्तैलं घृतं पीतं सप्तरात्रमपचीं हरेत् ॥"
इति चन्दनादितैलम् ॥ * ॥
"योषं विड्ङ्गं मधुकं सैन्धवं देवदारु च ।
तैलमेभिः घृतं नस्यात् सकृत्क्षामपचीं हरेत् ॥"
योषादितैलम् ॥ * ॥ अथ ग्रन्थिचिकित्सा ।
"सर्ज्जिकामूलकक्षारगृञ्जचूर्णसमन्वितम् ।
एतेन सहितो लेपो हन्ति ग्रन्थिं तथार्ब्बुदम् ॥
ग्रन्थिर्न यो नश्यति भेषजेन
निष्काश्य तं शस्त्रचिकित्सकेन ।
जात्यादिपक्वेन घृतेन वैद्यो
व्रणेन चान्येन च संचिकित्सेत् ॥
ग्रन्थिमुत्कृत्य पश्चात्तु व्रणोक्तं क्रममाचरेत् ।
शिराग्रन्थिं विहायान्ये शेषे शस्त्रं प्रयुज्यते ॥"
इति भावप्रकाशः ॥
(यथास्याः सकाशाद्व्रणचिकित्सितानि ।
"दुष्टाम्बुपानसकदन्ननिषेवणाच्च
सञ्जायते च क्रिमिसम्भवगण्डमाला ।
सा मारुतेन कफपित्तभवे विकारे
संसर्पते क्रिमिजदोषगणाच्च गण्डात् ॥
वातेन वातसदृशानि च लक्षणानि
पित्तेन दाहसरुजव्रणशोषतापाः ।
सा श्लेष्मणा च घनशीतलसम्प्रयोगात्
स्यात् सन्निपातविहिता च समस्तलिङ्गैः ॥
तस्य चेमं प्रतीकारं वक्ष्यामि शृणु पुत्रक ! ।
रोहिणी विप्रदा चैव विजया च विभेदिनी ॥
कान्तारी वज्रपुष्पा च तथा चैन्द्रायुधा परा ।
इति सप्तविधा लूताः शृणु पश्चात् पृथक् पृथक् ॥
रक्तसुखा भवेद्रक्ता रक्तस्थाने च रोहिणी ।
विप्रदा मांसलस्थाने श्वेतवर्णा च दीर्घिका ॥
विजया च शिरो मध्ये पीतवर्णा यवप्रभा ।
भेदिनी मेदसः स्थाने श्वेता च नीलरेखिका ॥
कान्तारी च वसामध्ये श्वेताङ्गा रक्तसुखिका ।
वज्रपुष्पा चास्थिमध्ये श्वेताक्षणा शिरा मता ॥
वज्रायुधा शिरास्नि च धूम्रा कृष्णा शिरा मता ।
रोहिण्यङ्गुलिमात्रेण स्नेत्रेण विप्रदा समा ॥
विजया च यवाकारा वर्त्तुला विजया तथा ।
अन्या नखाच्च विज्ञेया तण्डुली कण्टकानिभा ॥
रोहिणी विजया विप्रा मांसस्थानसमाश्रिता ।
गुल्फे वा चास्थिसन्धौ च दृश्यते भेदिनी नरे ॥
कुक्षौ कर्णान्तरेऽपाङ्गे कान्तारी विद्धि पुत्रक ! ।
वज्रपुष्पा शिरसि च शिरास्नायुप्रदा मता ॥
अतो वक्ष्यामि भैषज्यं शृणु पुत्र ! प्रयत्नतः ।
सान्द्रपूयविसावञ्च गण्डीरञ्च व्रणं विदुः ॥
अत्यञ्च सरुजञ्चैव पक्वजम्बूसमप्रभम् ।
लूताव्रणानाञ्चैतानि अपक्वं यदि दृश्यते ॥
त्यक्त्वा सन्धिस्थमर्म्मस्थां लूताञ्चैव हि तद्व्रणम् ।
तदा तप्तेन तैलेन दाहयेत्तु विधीयते ॥
अङ्कोलश्चैवमद्यानि पारिभद्रदलानि च ।
गृध्रधूमं कृष्णाजीरं गोमूत्रेण तु पेषितम् ॥
लेपनञ्च प्रशस्तञ्च लूतानां मारणे परम् ।
पिण्डीतकं विड्ङ्गानि तथा चैन्द्रिमूलकम् ॥
बीजपूरकमूलानि पेषितानि विलेपयेत् ।
गण्डमालां तथा घोरां हन्ति शीघ्रं प्रकण्टकाम् ।
स्नुहीक्षीरक्षारकीरं लूतास्थ्नि नियोजयेत् ॥
तेन कीटस्तु तन्मध्ये म्रियते नात्र संशयः ।
आस्यतो गिरिकर्णीञ्च चन्दनञ्च समांशकम् ॥
पिष्ट्वा लेपः प्रयोक्तव्यो लूतां हन्ति सुदारुणाम् ।
करवीरक्षारकटुधं तथा च कटुतुम्बिकाम् ॥
निशाद्वयं जाङ्गलिकां तिलतैले विपाचयेत् ।
लूतामभ्यङ्गने हन्ति गण्डमालाञ्च दारुणाम् ॥
घृतं जात्यादिकं नाम तथा चात्र प्रयोजयेत् ।
अन्यान्यपि व्रणे यानि प्रोक्तानि च यथाविधि ॥"
इति महर्ष्याचेयभाषिते हारीतोत्तरे तृतीयस्थाने लूतागण्डमालाचिकित्सा नाम सप्तविंशोऽध्यायः ॥
"गलस्य पार्श्वे गलगण्ड एकः
स्याद्गण्डमाला बहुभिस्तु गण्डैः ।
साध्याः स्मृताः पीनसपार्श्वशूल-
कासज्वरच्छर्द्दियुताश्चसाध्याः ॥
तेषां सिरा-काय-शिरो-विरेको
धूमः पुराणस्य घृतस्य पानम् ॥"
इति चरके चिकित्सास्थाने सप्तदशोऽध्याये ॥)
गण्डमालिका, स्त्री, (गण्डानां ग्रन्थीनां मालाऽस्या अस्यां वा इति कप् । ततष्टाप् अत इत्वञ्च ।) लक्ष्मालुवृक्षः । इति रत्नमाला ॥
गण्डशैलः, पुं, (गण्ड इव शैलः स्खलितस्थूलोपलः । शैलशब्दोऽत्र शैलावयवे वर्त्तते । "विशेषणं विशेष्येण बहुलम् ।" २ । १ । ५७ । इति समासः । यद्वा शैलस्य पर्व्वतस्य गण्ड इव । राजदन्तादित्वात् पूर्व्वनिपातः ।) गिरेश्च्युतः स्थूलोपलः । भूकम्पादिना पर्व्वतात् गलितो महान् प्रस्तरः । इत्यमरः । २ । ३ । ६ ॥ (यथा, आर्य्यासप्तशत्याम् । १९६ ।
"किं पुत्रि ! गण्डशैलभ्रमेण नवनीरदेषु निद्रासि ।
अनुभव चपलाविलसितगर्ज्जितदेष्वान्तर-
भ्रान्तीः ॥")
ललाटम् । इति हेमचन्द्रः । ४ । १०२ ॥
गण्डाङ्गः, पुं, (गण्ड इव उत्कृष्टमङ्गमस्य ।) खड्गी । इति शब्दचन्द्रिका ॥
गण्डारिः, पुं, (गण्डस्य रोगविशेषस्य अरिः । तन्नाशकत्वात्तथात्वम् ।) कोविदारवृक्षः । (यथा,—
"काञ्चनाल ! काञ्चनकी गण्डारिः शोणपुष्पकः ॥"
इति भावप्रकाशः ॥)
गण्डाली, स्त्री, (गण्डं अलतीति । अल् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । गण्डेन यन्त्रिता आत्यते भूष्यते वा । अल् + घञ् स्त्रियां ङीष् ।) श्वेतदूर्व्वा । इत्यमरः । २ । ४ । १५६ ॥ सर्पाक्षी । इति भावप्रकाशः ॥ गण्डदूर्व्वा । इति राजनिर्घण्टः ॥
गण्डिः, पुं, (गडि + इन् ।) वृक्षस्य मूलाच्छाखावधिभागः । इति हेमचन्द्रः । ४ । १८६ ॥ गुँड़ि इति भाषा ॥
गण्डीरः, पुं, (गण्ड + ईरन् ।) समङ्गिला । घन्टा इति ख्यातः । समठ इति ख्यातः । अनूपदेशजं शाकम् । इति केचित् । गुच्छिया इति ख्यातशाकम् । इति सर्व्वानन्दः । इत्यमरटीकायां भरतः ॥ ("गण्डीरः शाकविशेषो गण्डीनीति लोके गण्डारी मञ्जिष्ठा च ।" इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ अस्य गुणा यथा, चरके सूत्रस्थाने २७ अध्याये ।
"वातुं वत्सादनी हन्यात् कफङ्गण्डीरचिचकौ ॥")
वीरः । इति जटाधरः ॥
गण्डीरी, स्त्री, (गण्डीर + गौरादित्वात् ङीष् । यद्वा गण्डं रोगविशेषं ईरयति दूरीकरोति खनिर्जासादिभिरिति शेषः ।) सेहुण्डवृक्षः । इति राजनिर्घण्टः ॥ सिज इति भाषा ॥
गण्डुः, पुं स्त्री, (गण्डयते शिरोभागः स्फाय्यतेऽत्र । गडि + अधिकरणे उनु ।) उपधानम् । इति जटाधरः ॥
गण्डूपदः, पुं, (गण्डूः गण्डयः ताभिरन्वितानि पदानि यस्य । शाकपार्थिवादित्वात् समासः ।) किञ्चुलुकः । इत्यमरः । १ । १० । २२ ॥
("गण्डूपदस्य रूपाणि पिच्छिलानि त्रुटूनि च ॥" इति वैद्यकमाधवकररोगविनिश्चये अर्शोऽधिकारे ॥)
गण्डूपदभवं, क्ली, (गण्डूपद इव भवति उत्पद्यते इति । भू + अच् ।) सीसकम् । इति हेमचन्द्रः । ३ । १०७ ॥
गण्डूपदी, स्त्री, (गण्डूपद + स्त्रियां अस्यार्थे ङीप् ।) किञ्चुलुकपत्नी । तत्पर्य्यायः । शिलीं २ । इत्यमरः । १ । १० । २४ ॥ सिली ३ क्षुद्रकिञ्चुलुकजातिः । इत्यमरटीकायां भरतः ॥ छोटजाति ऊँचुया इति भाषा ॥
गण्डूषः, पुं, (गडि + "गण्डेश्च ।" उणां । ४ । ७८ । इति ऊषन् ।) मुखपूरणम् । (यथा, भागवते । ६ । १५ । ३ ।
"भीमस्तु विजयस्याथ काञ्चनो होचकस्तदः ।
तस्य जङ्घः सुतो गङ्गां गण्डूषीकृत्य योऽपिबत् ॥")
हस्तिशुण्डाग्रभागः । प्रसृतिपरिमितम् । इति मेदिनी । षे ३५ ॥ (यदाह कश्चित् ।

"अगाधजलसञ्चारी विकारी न च रोहितः।
गण्डूषजलमात्रेण झषकी फर्फरायते॥")

गण्डूषा, पुं, (गण्डूष+टाप्।) गण्डूषः। इति लिङ्गादिसंग्रहे अमरः॥ "सुखपूर्णतोयमिति भरतः॥ रायमुकुटस्तु गण्डूषशब्दो सुखपूरणे स्त्रीलिङ्गः। पुंलिङ्गस्तु गण्डूषशब्दस्तुलकपरिमाण इति। यथा,—

अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते॥"

इति तट्टीकासारसुन्दरी॥

गण्डोलः, पुं, (गडि+"कपिगडिगण्डिकटीति।" उणा १।६७। इति ओलच्।) गुडः। व्यासः। इति हेमचन्द्रः। ३। ६०॥

गण्यं, त्रि, (गणं लब्धा इति। "धनगणं लब्धा।" ४।४।८४। इति यत्। यद्वा गण्यते इति। कर्म्मणि यत्। गणे भवः। "दिगादिभ्यो यत्।" ४। इति यदित्येके।) गणनीयम्। गणितयम्। तत्पर्य्यायः। गणेयम् २ संख्येयम् ३। इति हेमचन्द्रः।३।३३६॥ (यथा, ऋग्वेदे।३।७।५। "दिवो रुचः सुरुचो रोचमाना इला येषां गण्या माहिना गीः॥")

गतं, त्रि, (गच्छति जानाति यातीति वा। "गत्यर्थाऽकर्म्मकेति।" ३। ४। ७२। इति कर्त्तरि क्तः।) विज्ञातम्। यातम्। इति मेदिनी। ते १५॥ (यथा, किरातार्জ্জুनीये। ४। ५।

"सुनोद तस्य स्खलपद्मिनीगतं
वितर्कमाविष्कृतफेनसन्ततिः॥"

गम्यते इति। भावे क्तो तु गमने क्ली॥ यथा, माघे। १। २।

"गतं तिरश्चीनमनूरुसारथेः
प्रसिद्धमूर्द्ध्वज्वलनं हविर्भुजः॥")

गतनासिकः, त्रि, (गता विरहिता नासिका अस्य।) नासिकारहितः। तत्पर्य्यायः। विग्रः २। इत्यमरः।२। ३। ४६॥ विखः ३। छिन्ननासिकः ४। इति शब्दरत्नावली॥ विनासिकः ५ विनसः ६। इति जटाधरः॥

गतसन्नकः, पुं, (गतं सन्नं सादहेतुको मदो यस्मात् यस्य वा इति कप्।) निर्म्मदहस्ती। इति शब्दचन्द्रिका॥

गतागतं, क्ली, (गतं ऊर्द्ध्वगमनं आगतं अधोगमनं यत्र।) पक्षिगतिविशेषः। इति जटाधरः॥ (गतञ्च आगतञ्च द्वयोः समाहारः।) यातायातम्। यथा, रसमञ्जर्य्याम्।

"गतागतकृतूहलं नयनयोरपाङ्गावधि॥"

(तथा च भगवद्गीतायाम्। ६। २१।

"ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्म्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते॥"

गतं विनष्टं आगतं पुनः संसारागमनं यस्मात्। यं प्राप्य जीवो न पुनर्निवर्त्तते इति वाक्यात् तथात्वम्। पुं, महादेवः। यथा, महाभारते। १३। १७। ७८।

"नीतिर्ज्ञनीतिः सुहृत्मा सुहृो मान्यो गतागतः॥")

गतार्त्तवा, स्त्री, (गतं निवृत्तं आर्त्तवं रजोऽस्याः।) वृद्धा। (गतं दुष्टं आर्त्तवमस्या इति।) वन्ध्या। इति राजनिर्घण्टः॥

गतिः, स्त्री, (गम्+भावे क्तिन्।) गमनकर्म्म। (यथा, रघुवंशे। १। ४।

"अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्ब्बसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥")

तत्पर्य्यायः। वर्त्मते १ अयते २ लोटते ३ लोठते ४ स्यन्दते ५ कसति ६ सर्पति ७ स्यमति ८ सवति ९ संसृते १० अवति ११ द्योतति १२ ध्वंसति १३ वेनति १४ मार्ष्टि १५ गुरयति १६ ग्रवति १७ कालयति १८ पेलयति १९ कण्टति २० प्रिस्यति २१ विस्यति २२ मिस्यति २३ प्रवते २४ द्रवते २५ च्यवते २६ कवते २७ गवते २८ नवते २९ द्योदति ३० नक्षति ३१ सक्षति ३२ स्यक्षति ३३ सक्षति ३४ ऋक्षति ३५ तुरीयति ३६ क्षतति ३७ अतति ३८ गाति ३९ द्रयक्षति ४० सक्षति ४१ सरति ४२ रंहति ४३ यतते ४३ धमति ४५ धजति ४६ रजति ४७ लजति ४८ क्षियति ४९ धमति ५० मिनाति ५१ ऋक्षति ५२ ऋणोति ५३ स्वरति ५४ सिसर्त्ति ५५ वेधिषि: ५६ योधिषि: ५७ ऋच्छति ५८ ऋयते ५९ तेजति ६० दधति ६१ दधोति ६२ युध्यति ६३ धन्वति ६४ अश्नुते ६५ आर्य्यन्ति ६६ डीयते ६७ तकति ६८ टीयते ६९ इरति ७० फणति ७१ हनति ७२ अर्हति ७३ मर्हति ७४ सहते ७५ नसते ७६ हर्षति ७७ इयर्त्ति ७८ ईर्त्ते ७९ ईक्षते ८० अयति ८१ खादति ८२ गन्ति ८३ आगनीगन्ति ८४ अंगन्ति ८५ जिन्वति ८६ जसति ८७ गमति ८८ प्रति ८९ भ्राति ९० ध्रयति ९१ वहते ९२ रथर्यति ९३ जेहते ९४ खःकति ९५ चुम्पति ९६ ष्माति ९७ वाति ९८ याति ९९ द्रयति १०० द्राति १०१ डूलति १०२ एजति १०३ जमति १०४ जवति १०५ वक्षति १०६ अनिति १०७ पवते १०८ हन्ति १०९ सेधति ११० अगन् १११ अजगन् ११२ जिगाति ११३ पतति ११४ इन्वति ११५ क्रमति ११६ द्रवति ११७ वेति ११८ द्रयन्तात् ११९ एति १२० जगायात् १२१ अयुयुः १२२। इति द्वाविंशं शतं गतिकर्म्म। इति वेदनिघण्टौ २ अध्यायः॥ (गम्यतेऽस्यामिति। गम्+अधिकरणे क्तिन्।) मार्गः। (यथा, भगवद्गीतायाम्। ८। २६।

"शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।
एकया यात्यनावृत्तिमन्यया वर्त्तते पुनः॥")

दशा। (यथा, तत्रैव। ६। ३७।

"अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण! गच्छति॥"

गम्यते ज्ञायतेऽनया। करणे क्तिन्।) ज्ञानम्। (यथा, श्रीमद्भागवते। ७।५।३१।

"न ते विदुः स्वार्थगतिं हि विष्णुं
दुराशया ये बहिरर्थमानिनः।

अन्धा यथान्धैरुपनीयमाना
स्तेऽपीशतन्त्र्यामुरुदाम्नि बद्धाः॥"

"स्वस्मिन्नेव आत्मन्येव अर्थः प्रयोजनं येषां ते स्वार्थास्तत्त्वविदस्तेषां गतिर्ज्ञानस्वरूपं विष्णुं दुराशया बहिरर्थमानिनो न विदुः जानन्ति।" इति तट्टीकायां स्वामी॥) याचा। (गम्यते प्राप्यतेऽनया इति। गम्+करणे क्तिन्।) अभ्युपायः। (यथा, महाभारते।१३।१४६।६१।

"यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः॥")

गाङ्गीप्रगमः। सरणी। इति मेदिनी। १४॥ (गम्+भावे क्तिन्। प्रस्थितिः। यथा, किरातार्জ্জुनीये। १०। ४०।

"मदनसुप्रदधे स एव तासां
दुरधिगमा हि गतिः प्रयोजनानाम्॥"

"गतिः प्रस्थितिः।" इति तट्टीकायां मल्लिनाथः॥ प्रमाणम्। यथा, तत्रैव। १३। १५।

"क्षपेति चेदस्तु दृगः क्षतः क्षमा-
दनेन पूर्व्वं न मयेति का गतिः॥"

"मया नेत्यत्र का गतिः किं प्रमाणम्।" इति तट्टीकायां मल्लिनाथः॥ गम्यते इति। गम्+कर्म्मणि क्तिन्। स्वरूपम्। यथा, तत्रैव। ६।३६।

"चरतस्तपस्तव वनेषु सदा
न वयं निरूपयितुमस्य गतिम्।"

"तव वनेषु तपश्चरतोऽस्य गतिं स्वरूपं निरूपयितुम्।" इति मल्लिनाथः॥ विषयः। यथा, कुमारे। ५। ६४।

"तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते।"

"मनोरथानां कामानां अगतिः अविषयः।" इति मल्लिनाथः॥ कर्म्मफलम्। यथा, भगवद्गीतायाम्।।६।१८।

"गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत्॥"

"गतिः कर्म्मफलम्।" इति श्रीधरभाष्यम्॥ ग्रहभेदेन गतिभेदो यथा,—

"अष्टग्रस्वरूपा कालस्य सूनवो भगणाश्रिताः।
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः॥"

इति सूर्य्यसिद्धान्तः॥

तच्च तु नक्षत्रभेदेन बुधग्रहस्य गतिभेदो यथा, बृहत्संहितायाम्। ७ अध्याये।

"नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम्।
जलदहनपवनभयकृत् धान्यार्घक्षयविरोधी वा॥
विचरत्क्रूरगणधनिष्ठा प्राजापत्येन्दुविश्वदैवानि।
स्पृशन् हिमकरतनयः करोत्यवृष्टिं सरोगभयाम्॥
रौद्रादीनि मघान्तान्युपाश्रिते चन्द्रजे प्रजापीड़ा।
ग्रस्तनिपातक्षुद्भयरोगानावृष्टिसन्तापैः॥
हस्तादीनि विचरन् यदृक्षाणुपपीड़यन् गवामशुभः।
क्षेमसुभिक्षार्घविवृद्धिं करोति चोर्व्वीं प्रभूतान्नाम्॥
आर्य्यमृगं हौतभुजं भद्रपदासूत्तरां यमेयुग्मं च।
चन्द्रस्य सुतो निशन प्राप्नुयात् धातुसङ्क्षयकृत्॥
आश्विनवारुणमूलान्युपस्पृशन् रेवतीश्च चन्द्रसुतः।

परव्यभिचर्यगौजीविकसलिलजतुरगोपघातकरः ॥
पूर्वाद्यृक्षचितयादेकमपीन्दोः सुतोऽभिन्दूदीयात् ॥
क्षुच्छस्त्रतस्करामयभयप्रदायी चरन् जगतः ॥
प्राक्षतविमिश्रसङ्क्षिप्तदीक्षायोगान्तघोरपापाख्याः ।
सप्तपराशरतन्त्रे गच्छैः कीर्त्तिता गतयः ॥
प्राकृतसंज्ञा वायव्यान्यपेतामहानि बहुलाश्च ।
मिश्रा गतिः प्रदिष्टा अग्निश्विवपिलभुजगदेवानि॥
सङ्क्षिप्तायां पुष्यः पुनर्वसुः फल्गुनीद्वयं चेति ।
तीक्ष्णायां भद्रपदाद्वयं सप्ताक्षाश्वयुक् पौष्णम् ॥
योगान्तिकेति मूलं हे चाषाढे गतिः सुतस्येन्दोः ।
घोराश्रवणत्वाष्ट्रं वसुदेवं वारुणं चैव ॥
पापाख्या सावित्रं मैत्रं शक्राग्निदेवतं चेति ।
उदयप्रवासदिवसैः स एव गतिलक्षणं प्राह ॥
चत्वारिंशद्भिरहोभिरेका विंशतिर्दिनवकञ्च ।
नव मासार्द्धं दश चैकसंयुताः प्राकृतादीनाम् ॥
प्राकृतगत्यामारोग्यवृद्धिसस्यप्रवृद्धयः क्षेमम् ।
सङ्क्षिप्तमिश्रयोर्मिथ्यमेतदन्यासु विपरीतम् ॥
ऋज्वतिवक्रा वक्रा विकला च मतेन देवलस्येताः ।
पञ्च चतुर्हीकाहा ऋज्वादीनां षड्भ्यस्ताः ॥
ऋज्वी हिता प्रजानामतिवक्रार्थं गतिर्विनाशयति ।
शस्त्रभयदा च वक्रा विकला भयरोगसङ्जननी ॥
पौषाषाढश्रावणवैशाखेष्विन्दजः समाधेषु ।
दृष्टो भयाय जगतः शुभफलकृत् प्रोचितस्वेषु ॥
कार्त्तिकेऽयुजि वा यदि मासे
दृश्यते तनुभवः शिखिरांशोः ।
शस्त्रचौरहुतभुग्गदतोय-
क्षुद्भयानि च तदा विदधाति ॥
रुद्राणि सौम्येऽस्तमिते पुराणि
यान्युक्षते तान्युपयान्ति मोक्षम् ।
अन्ये तु पञ्चादुदिते वदन्ति
लाभः पुराणां भवतीति तज्ज्ञाः ॥
हेमकान्तिरथवा शुकवर्णः
सस्यकेन महिना सदृशो वा ।
स्निग्धमूर्त्तिरलघुश्च हिताय
व्यत्यये न शुभकृच्छिखिपुत्रः ॥"
अन्येषामपि ग्रहाणां गतिस्तत्रैव क्रमशो विशेषतो द्रष्टव्या ॥)

गतिला, स्त्री, (गम्+"मिथिलादयश्च ।" उणां । १ । ५८ । इति इलच् मलोपे तुक् च ।) नदीविशेषः । परम्परा भेदः । इत्युणादिकोषः ॥ (वेत्रलता । इत्युज्ज्वलदत्तः ॥)

गत्वरः, त्रि, (गच्छतीति । गम्+"इत्नसिजसर्त्तिभ्यः करप् ।" ३ । २ । १६३ । इति करप् ।) गमनशीलः । इति व्याकरणम् ॥ (यथा, श्रान्तिशतके । १ । २० ।
"वीभत्सा विषया जुगुप्सिततमः कायो वयो गत्वरं
सर्व्वैर्बन्धुभिरध्वनीव पथिकैर्योगे वियोगावहः॥")

गद, ृ क अभ्यक्तौ । इति कविकल्पद्रुमः ॥ (अदन्तपुरां-परं-अकं-सेट् ।) अभ्यक्तौ मेघकर्त्तृकशब्दे । गदयति मेघः । इति दुर्गादासः ॥

गद, भाषे । इति कविकल्पद्रुमः ॥ (भां-परं-सकं-सेट् ।) गदति । सारङ्गं कतिचिच्च संजगदिरे इति गणक्लृतानित्यत्वात् । इति दुर्गादासः ॥

गदं, क्ली, (गद्यते पीड्यतेऽनेन वा । गद+अपादाने करणे वा अप् ।) विषम् । इति राजनिर्घण्टः ॥

गदः, पुं, (गद्यते रुध्यतेऽनेन गदयति वा । गद+करणे अप् । कर्त्तरि घिच् अच् वा ।) रोगः । (यथा, हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ।
"ग्रन्थुः स्थानबलं प्राप्य विक्रमं कुरुते बली ।
तथा धात्वन्तरं प्राप्य विक्रमं कुरुते गदः ॥
"यावत् स्थानं समाश्रित्य विकारं कुरुते गदः ।
तावत्तस्य प्रतीकारः स्थानत्यागाद्बलीयसः ॥")
श्रीकृष्णभ्राता । इति हेमचन्द्रः । ३ । १२७ ॥ (यथा, भागवते । १ । १४ । २८ ।
"हृदीकः सप्तसोऽक्रूरो जयन्तगदसारणाः ॥")
भाषणञ्च । (औषधम् । यथा, महाभारते । १ । ४३ । २१ ।
"अथ शुश्राव गच्छन् स तक्षको जगतीपतिम् ।
मन्त्रैर्गदैर्विषहरे रक्ष्यमाणं प्रयत्नतः ॥"
असुरविशेषः । यथा, वायुपुराणे ५ अध्याये
"गदो नामासुरो ह्यासीत् वचाद्वचतरो दृढः ॥")

गदयित्नुः, पुं, (गदयति कामयुक्तं करोतीति । "स्तनिन्धिषिपृधिगदिमदिभ्यो नेरित्नुच् ।" उणां । ३ । २६ । इति इत्नुच् नेरयादेशश्च ।) कन्दर्पः । इति मेदिनी । १८२ ॥

गदयित्नुः, त्रि, (गदयति वाधार्त्तं वावदूकं कामयुक्तं वा करोतीति । "स्तनिन्धीति ।" उणां । ३ । २६० । इति इत्नुच् नेरयादेशश्च ।) जल्पाकः । कामुकः । इति मेदिनी । १८२ ॥

गदा, स्त्री, (गदयति पीड्यतेऽनया विपक्षमिति गदः । गद्+घिच्+करणे अप्+टाप् च । गदयतीति घिच् अच् वा ।) स्वनामख्यातलौहमयास्त्रम् । इति मेदिनी । दे । ४ ॥ (यथा महाभारते । ६ । ५६ । ४५ ।
"तं महात्मा महात्मानं गदामुद्यम्य पाण्डवः ।
अभिदुद्राव वेगेन धार्त्तराष्ट्रं वृकोदरः ॥"
गदायुद्धस्य गतिप्रहारादिभेदो यथा तत्रैव । ६ । ५७ । १७—२० ।
"अचरद्भीमसेनस्तु मार्गान् बहुविधांस्तथा ।
मण्डलानि विचित्राणि गतप्रत्यागतानि च ॥
अक्षयन्तानि चित्राणि स्थानानि विविधानि च ।
परिमोक्षं प्रहाराणां वर्ज्जनं परिवारणम् ॥
अभिद्रवणमाक्षेपमवस्थानं सविग्रहम् ।
परिवर्त्तनसंवर्त्तमवप्लुतमसम्प्लुतम् ॥
उपन्यस्तमपन्यस्तं गदायुद्धविशारदौ ।
एवं तौ विचरन्तौ तु व्यक्तं वै परस्परम् ॥"
भगवतो विष्णोर्गदा तु गदसंज्ञकस्यासुरविशेषस्यास्थ्ना देवशिल्पिना विश्वकर्म्मणा निर्म्मिता ।

अतएवासौ गदेति नाम्ना प्रसिद्धा अपरा गदा तु एतद्गुणसंयोगेनैव सिद्धेति बोध्यम् । यथा, वायुपुराणे गयामाहात्म्ये ५ अध्याये ।
"गदो नामासुरो ह्यासीत् वचाद्वचतरो दृढः ।
प्रार्थितो ब्रह्मणो प्रादात् स्वशरीरास्थि दुस्त्यजम् ।
ब्रह्मोक्तो विश्वकर्म्मापि गदां चक्रेऽद्भुतां तदा ॥"
योगविशेषः । यथा, लघुजातकप्रकरणे ।१०।३।
"अनन्तरयोः क्रैव्ययोर्यदा सर्व्वे ग्रहा भवन्ति ।
तदा गदानाम योगो भवति ॥")
पाटलाद्वयः । इति शब्दचन्द्रिका ॥

गदाख्यं, क्ली, (गदलेन रोगनाशकतया व्याख्यायते विभूयते इति गद इत्याख्याख्येति वा :) कुष्ठम् । इति रत्नमाला ॥ कुड् इति भाषा ॥

गदागदौ, पुं, (गदं रोगं आगदयतः नाशयतः इति । आ+गद+णिच्+अच् । यद्वा गदं रोगं आगच्छति प्राप्नोतीति गदागं स्वं दायतः विशोधयतः इति । दैप् शोधने+कः ।) अश्विनीकुमारौ । इति त्रिकाण्डशेषः ॥ द्विवचनान्तोऽयं शब्दः ॥

गदाग्रजः, पुं, (गदस्य वसुदेवपुत्रभेदस्य अग्रजः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ४ । २३ । १२ ।
"तावन्न योगगतिभिर्यतिरप्रमत्तो
यावन्न गदाग्रजकथासु रतिं न कुर्य्यात् ॥")

गदाग्र्यः, पुं, (अग्रे नीयते । अग्र+नी+क्विप् गदानां रोगाणां गदेषु वा अग्र्यः श्रेष्ठान् । अचिरात् संहारकत्वात् तथात्वम् ।) क्षयरोगः । इति राजनिर्घण्टः ॥

गदाधरः, पुं, (गदां धरति धारयति वा । धृ+अच् । यद्वा धरति इति धरः गदायाः धरः । धृ+अन्तर्भावितण्यर्थात् अजित्येके ।) विष्णुः । इति हलायुधः ॥ (यथा, भागवते । १ । ८ । ३६ ।
"नेयं शोभिष्यते तत्र यथेदानीं गदाधर ! ।
त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः ॥"
अस्य गदाधारणकथा यथा, वायुपुराणे गयामाहात्म्ये ५ अध्याये ।
"अथ कालेन महता मनौ स्वायम्भुवेऽन्तरे ।
हेतिरुचो ब्रह्मपुत्रस्तप्तेपे सुदारुणम् ॥
दिव्यवर्षसहस्राणां शतं वायुमभक्षयत् ।
उन्मुखोर्द्धबाहुश्च पादाङ्गुष्ठभरेण हि ॥
एकेनातिष्ठदव्यग्रः ग्रीष्मपञ्चानिलाग्नयः ।
ब्रह्मादींस्तपसा तुष्टान् वरं वव्रे वरप्रदान् ॥
देवैर्दैत्यैश्च शस्त्रास्त्रैर्विविधैर्मुनिभिस्तथा ।
क्षयोऽस्माकं चक्रादेरवध्यः स्यां महाबलः ॥
तथेत्युक्तान्हितांस्तस्मै हेतिर्दैत्यानथाजयत् ।
इन्द्रत्वमकरोद्धेतिर्भीता ब्रह्मवरादयः ।
हरिन्न शरणं जग्मुरूचुर्हेतिं जहीति तान् ।
ऊचे हरिरवध्योऽयं हेतिर्दैवासुरैः सुराः ॥
महास्त्रं मे प्रयच्छध्वं हेतिं हन्मि हि येन तम् ।
इत्युक्तास्ते ततो देवा गदाख्यं हरये ददुः ॥
दधार तां गदामादौ देवैरुक्तो गदाधरः ।
गदया हेतिमाहत्य देवेभ्यश्चादिवं ददौ ॥"

बुद्धितत्त्वात्मकैव भगवतो विष्णोः कौमुदीनाम गदेति अध्यात्मशास्त्रेषु परिदृश्यते। तथाच विष्णुसहस्रनामभाष्ये।
"मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदाम्।
धारयन् लोकरक्षार्थमुक्तश्चक्रगदाधरः॥"
महादेवः। स तु गयातीर्थे वर्त्तते। यथा, महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे।
"भोजपुरे भोजनाथो गयायाञ्च गदाधरः॥"
गदाधारिणि त्रि॥)

गदाभृत्, पुं, (गदां बिभर्त्ति इति। गदा+भृ+क्विप्। तुक् च।) विष्णुः। इति हेमचन्द्रः। २। १३३॥ (यथा, भागवते। १। १३। १०।
"भवद्विधा भागवतास्तीर्थभूता स्वयं विभो!।
तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता॥")

गदाम्बरः, पुं, (गदं सगन्धं अम्बरं यस्मात्।) मेघः। इति त्रिकाण्डशेषः॥

गदारातिः, पुं, (गदस्य रोगस्य अरातिः शत्रुः तन्नाशकत्वात्।) औषधम्। इति राजनिर्घण्टः॥

गदाङ्क, क्ली, (गद एव आङ्का आख्या यस्य।) कुष्ठम्। इति शब्दरत्नावली॥ कुड़ इति भाषा॥

गदी, [न्] पुं, (गदा विद्यते अस्मिन् वास्य। गदा+इनिः।) विष्णुः। इति हारावली। ६॥ (यथा, भगवद्गीतायाम्। ११। १७।
"किरीटिनं गदिनं चक्रिणञ्च
तेजोराशिं सर्व्वतो दीप्तिमन्तम्॥")
गदाविशिष्टे रोगयुक्ते च त्रि॥

गद्गदः, पुं, (गद्गदपदशब्दनाभिधायी। अत्यक्षरवक्त्रा।
तस्य वर्ण्यानिपूर्ब्बकलक्षणं यथा,—
"आहत्य वायुः सकफो धमनीः शब्दवाहिनीः।
नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान्॥"
इति माधवकरः॥
(अस्य शोके त्रि। यथा, अमरशतके। ५३।
"खेदोऽस्मासु न मेऽपराध्यति भवान् सर्व्वेऽप-
राधा मयि।
तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो
रुद्यते॥")

गद्गदध्वनिः, पुं, (गद्गदेन वायुपरिचालितश्लेष्मादिना योऽस्पष्टीकृतो ध्वनिः। गद्गदरूपो ध्वनिः वा।) हर्षशोकादिना अस्पष्टध्वनिः। तत्पर्य्यायः। मन्मन २। इति त्रिकाण्डशेषः॥

गद्य, क्ली, (गद्यते छन्दसा विना केवलं कथाप्रबन्धेरेव विरच्यते इति। गद+"गदमदचरयमश्चानुपसर्गे।" ३। १। १००। इति यत्।) पद्यभिन्नम्। कविकृतम्। अपादः पदसन्तानः। इत्यमरः। ३। ५। ३१॥ कविकृतभिन्ने त्रि। यथा गद्यो व्यवहारः गद्या वाक् गद्यं वचः। इति तट्टीकायां भरतः॥ (यथा, महाभारते। ३। २६। ३।
"यजुषाञ्चर्च्चां साम्नाञ्च गद्यानाञ्चैव सर्व्वशः।
आसीदुच्चार्य्यमाणानां निस्वनो हृदयङ्गमः॥")
"अपादः पदसन्तानो गद्यमाख्यायिका कथा॥
इति दण्डी॥
आख्यायिका तु आचष्टे प्रतिपादयति अत्यर्थं आख्यायिका अत्र नायकेन स्वयमुपलब्धोऽर्थ आख्यायते इत्येके। ज्ञातायां सत्यार्थायां कथायामाख्यायिका। सा च माधविका-वासवदत्ता-हर्षचरितादिः। कथा तु। प्रबन्धस्य कल्पना रचना बहुकृता श्लोकसत्या कथा।
प्रबन्धकल्पनां श्लोकसत्यां प्राज्ञाः कथां विदुः।
परम्पराश्रया यस्मात् सा मताख्यायिका क्वचित्॥
इति कौलाहलाचार्य्यः॥
कथा कादम्बर्य्यादिः।" इत्यमरटीकायां भरतः॥
(गद्यन्तु त्रिधा विभक्तं यथा छन्दोमञ्जर्य्याम्।
"अपादं पदसन्तानं गद्यं तत्तु त्रिधा मतम्।
वृत्तकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः॥"
एतेषामपि लक्षणं यथा तत्रैव।
"अकठोराक्षरं स्वल्पसमासं वृत्तकं श्रुतम्।
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत्॥
भवेदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरम्।
वृत्तैकदेशसम्बन्धात् वृत्तगन्धि पुनः स्मृतम्॥"
मतभेदेनैतत् क्वचित् चतुर्द्धापि दृश्यते। यथा, साहित्यदर्पणे। ६। २६५।
"वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्व्विधम्॥
आद्यं समासरहितं वृत्तभागयुतं परम्।
अन्यदीर्घसमासाढ्यं तुर्य्यञ्चाल्पसमासकम्॥")

गद्यानकं, क्ली, (गद्येन औषधादिपरिमाणभेदेन आनीयते इति। आ+नी+डः। ततः स्वार्थे कन्।) अष्टचत्वारिंशत्रक्तिकापरिमाणम्।
("तुल्या यवाभ्यां कथिताश्च गुञ्जा
वल्लस्तिगुञ्जो धरणं गतेऽष्टौ।
गद्यानकन्तद्द्वयमिन्द्रतुल्यै-
र्वल्लैरुधैको घटकः प्रदिष्टः॥"
इति लीलावती॥)
चतुःषष्टिगुञ्जापरिमाणम्। इति वैद्यकम्॥
गद्यालकमिति कुत्रचित् पाठः॥

गन्ता, [तृ] त्रि, (गच्छतीति। गम्+कर्त्तरि तृच्।) गमनकर्त्ता। इति शाकरणम्। (यथा, नलोपाख्याने। २४। ३३।
"नक्षेकाङ्गा घृतं गन्ता त्वाहृतेऽग्नेः पुमानिह॥"
गच्छति प्राप्नोतीति शीलार्थे भाविकाले तृच्। यथा, भगवद्गीतायाम्। २। ५२।
"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च॥"
अत्र शीलार्थे तृचन्तत्वात् न कर्म्मणि षष्ठीति बोध्यम्॥)

गन्तुः, पुं, (गच्छतीति। गम्+"सितनिगमीति।" उणां १। ७०। इति तुन्।) पथिकः। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। ३। ५४। १८।
"युयोत नो अनपत्यानि गन्तोः प्रजावान्नः
पशुमाँ अस्तुगातुः॥")

गन्त्री, स्त्री, (गम्यतेऽनया इति। गम्+"सर्व्वधातुभ्यः ष्ट्रन्।" उणां ४। १५८। इति करणे ष्ट्रन्। ततो ङीष्।) शकटवहनीयगकटम्। गरुर गाड़ि इति भाषा। इत्यमरः। २। ८। ५२॥
(गच्छतीति। गम्+कर्त्तरि ल्युट्+स्त्रियां ङीप्। गमनशीला गमनकारिणी वा। यथा, याज्ञवल्क्ये। ३। १०।
"गन्त्री वसुमतीनाग्नसुदधिर्देवतानि च।
फेनप्रस्थः कथं नाम्ना मर्त्यलोको न यास्यति॥")

गन्त्रीरथः, पुं, (गन्त्रीणां गच्छन्तीनां स्त्रीणां गमनाय यो रथः।) शकटम्। तत्पर्य्यायः। मठः २। इति हारावली। १६६॥

गन्ध, क ड दृहि। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) क ड, गन्धयते। दृहि हिंसायाम्। गतिर्हिंसायाञ्चेत्यिति रमानाथः। इति दुर्गादासः॥

गन्ध, क्ली, (गन्धो विद्यतेऽस्य। अर्श आदित्वादच्। छणागुरु। इति राजनिर्घण्टः॥

गन्धः, पुं, (गन्ध+घञ्वा।) आमोदः। इति विश्वः। स तु घ्राणग्राह्यपृथिवीगुणः। यथा,—
"घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः।
सौरभश्चासौरभश्च स द्वेधा परिकीर्त्तितः॥"
इति भाषापरिच्छेदे। १०३॥
(अस्य लक्षणान्तरं यथा, घ्राणमात्रग्राह्यगुणत्वव्याप्यजातिमत्त्वं गन्धत्वं यद्वा पृथिवीवृत्तिमाद्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमिति॥) स तु दशविधः। (यथा, महाभारते। १४। ५०। ४०-४२।
"शब्दः स्पर्शस्तथारूपं रसो गन्धश्च पञ्चमः।
एते पञ्च गुणा भूमेर्विज्ञेया द्विजसत्तमाः॥
पार्थिवश्च सदागन्धो गन्धश्च बहुधा स्मृतः।
तस्य गन्धस्य वक्ष्यामि विस्तरेण बहून् गुणान्॥
इष्टश्चानिष्टगन्धश्च मधुरोऽम्लः कटुस्तथा।
निर्हारी संहतः स्निग्धो रूक्षो विशद एव च।
एवं दशविधो ज्ञेयः पार्थिवो गन्ध इत्युत॥"
एतेषामपि केषु को गन्ध इत्येतद्विवृतिमाह।) इष्टः १ कस्तूरिकादौ। अनिष्टः २ शवादौ। मधुरः ३ मधुपुष्पादौ। अम्लः ४ आम्रातकादौ। कटुः ५ मरिचादौ। निर्हारी ६ हिङ्ग्वादौ। संहतः ७ चित्रगन्धः अनेकवस्त्वगतः। स्निग्धः ८ सद्यस्कप्रहृतादौ। रूक्षः ९ सार्षपतैलादौ। विशदः १० प्राज्यघृतादौ॥*॥
सौरभम्। तत्तु पञ्चविधम्। यथा,—
"गन्धश्च सम्यक् शृणुतं पुत्र वेतालभैरव!।
चूर्णीकृतो वा पृष्टो वा दाहाकर्षित एव वा॥
रसः सम्मर्दजो वापि प्राण्यङ्गोद्भव एव वा।
गन्धः पञ्चविधः प्रोक्तो देवानां प्रीतिदायकः॥
गन्धचूर्णं गन्धपत्रं चूर्णं सुमनसां तथा।
प्रसूतगन्धयुक्तानां पञ्चचूर्णानि यानि च॥
तानि गन्धाङ्गयानि स्युः स गन्धः प्रथमः स्मृतः॥१
पृष्टो मलयजो गन्धः श्रीखण्डश्च नमेरुजः॥
अगुरुप्रभृतिर्यापि दग्ध्वा पङ्कः प्रदीयते।
दृष्ट्वा स दग्धो गन्धोऽयं द्वितीयः परिकीर्त्तितः॥२॥
देवदार्व्यगुरुत्वक्षशालसारान्तचन्दनाः।
प्रियादीनाञ्च यो दग्ध्वा गृह्यते दाहजो रसः॥
स दाहाकर्षितो गन्धस्तृतीयः परिकीर्त्तितः॥३।
सगन्धकरवीरोत्थगन्धिनीतिलकं तथा॥

प्रभृतीनां रसो योऽसौ निष्पीड्य परिगृह्यते ।
स संमर्दोद्भवो गन्धः संमर्दज इतीष्यते ॥ ४ ॥
दृगनाभिसमुद्भूतस्तत्कोषोद्भव एव वा ।
गन्धः प्राग्यङ्गजः प्रोक्तो मोददः स्वर्गवासिनाम् ॥ ५ ॥
कर्पूरगन्धसाराढ्याः क्षोदे दृष्टे च संस्थिताः ।
चन्द्रभागादयश्चापि रसे पक्वे च सङ्गताः ॥
गन्धसारस्तु सर्व्वत्र संसर्गादौ प्रयुज्यते ।
दृगनाभिर्भवेद्दृष्टश्चूर्णोऽप्यन्यस्य योगतः ॥
एवं सर्व्वेषु सर्व्वत्र गन्धो भवति पञ्चधा ।
दृष्टादिभावादन्योन्यं गन्धः प्रीतिकरः परः ॥
गन्धस्य विस्तरो भेदः प्रोक्तः कालीयकादयः ।
सर्व्वैः पञ्चविधैश्चैव प्रविष्टो भवति क्षणात् ॥"*॥
"गन्धो मलयजो यस्तु दैवे पैत्रे च सम्मतः ।
तत्पङ्को वा रसो वापि चूर्णो वा विष्णुतुष्टिदः ॥
सर्व्वेषु गन्धजातेषु प्रशस्तो मलयोद्भवः ।
तस्मात् सर्व्वप्रयत्नेन दद्यान्मलयजं सदा ॥
क्षणागुरुः सकर्पूरः सहितो मलयोद्भवैः ।
वैष्णवीप्रीतिदो गन्धः कामाख्यायाश्च भैरव ! ॥
कुङ्कमागुरुकस्तूरीचन्द्रभागैः समीकृतैः ।
त्रिपुराप्रीतिदो गन्धस्तथा चण्डाश्च गुम्भना ॥
दैवतोद्देशपूर्व्वेण गन्धान् सम्पूज्य साधकः ।
देवायेज्याय वितरेत् सर्व्वसाध्येषु पूजकः ॥
गन्धेन लभते कामं गन्धो धर्म्मप्रदः सदा ।
अर्थानां साधको गन्धो गन्धो मोक्षः प्रतिष्ठितः ॥
अयं वां कथितो गन्धः पुत्रौ वेतालभैरवौ ! ॥
इति कालिकापुराणे ६८ अध्यायः ॥

प्रतिवेशी । लेशः । सम्बन्धः । गन्धकः । इति मेदिनी ॥ (यथा, प्रयोगार्हते ।
"श्लोधितो यस्तु गन्धः स्यात् जराव्याधिरुजापहः ।
अग्निसन्दीपनः श्रेष्ठो वीर्य्यवृद्धिकरोऽसितः ॥")
गर्व्वः । इति हेमचन्द्रः ॥ श्लोभाञ्जनः । इति शब्दरत्नावली ॥ दृष्टचन्दनम् । यथा, "दृष्टो मलयजो गन्धः ।" इति शुद्धितत्त्वम् ॥

गन्धकः, पुं, (उग्रो गन्धोऽस्यास्तीति । "अर्श आदिभ्योऽच् ।" ५।२।१२७। इत्यच् ततः स्वार्थे कन् ।) श्लोभाञ्जनवृक्षः । इति शब्दरत्नावली ॥ उपधातुविशेषः । तत्पर्य्यायः । गन्धाश्मा २ सौगन्धिकः ३ । इत्यमरः । २।६।१०२ ॥ गन्धिकः ४ सुगन्धिकः ५ । इति तट्टीका ॥ गन्धपाषाणः ६ गामाद्यः ७ । इति रत्नमाला ॥ गन्धमोदनः ८ पूतिगन्धः ९ अतिगन्धः १० वरः ११ सुगन्धः १२ दिव्यगन्धः १३ गन्धः १४ रसगन्धकः १५ कुष्ठारिः १६ क्रूरगन्धः १७ कीटघ्नः १८ भूरभूमिजः १९ गन्धी २० । इति शब्दरत्नावली ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तीव्रगन्धत्वम् । अतिवह्निकारित्वम् । विषकुष्ठकण्डूतिखजुत्वगदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ क्षमिश्लीहनेत्ररोगनाशित्वम् । इति राजवल्लभः ॥ तस्य भेदाः ।
"श्वेतो रक्तश्च पीतश्च नीलश्चेति चतुर्व्विधः ।
गन्धको वर्णतो ज्ञेयो भिन्नभिन्नगुणाश्रयः ॥
श्वेतः कुष्ठापहारी स्याद्रक्तो लोहप्रयोगकृत् ।
पीतो रसे प्रयोगार्हो नीलो वर्णान्तरोचितः ॥"
इति राजनिर्घण्टः ॥ * ॥

अथ गन्धकस्योत्पत्तिनामलक्षणगुणाः ।
"श्वेतद्वीपे पुरा देव्याः क्रीड़न्त्या रजसाद्भुतम् ।
दुकूलं तेन वस्त्रेण स्नातायाः क्षीरनीरधौ ।
प्रसृतं यद्रजस्तस्माद्गन्धकः समजायत ॥
गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि ।
सौगन्धिकश्च कथितो वलिर्वैलवसापि च ॥
चतुर्द्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः ।
रक्तो हेमक्रियासक्तः पीतश्चैव रसायने ।
व्रणविलेपने श्वेतः क्षयाः श्रेष्ठः सुदुर्ल्लभः ॥"
श्रेष्ठो हेमक्रियादिषु सर्व्वत्र प्रशस्ततरः ॥ * ॥
"गन्धकः कटुकस्तिक्तो वीर्य्योष्णस्तुवरः सरः ।
पित्तलः कटुकः पाके कण्डूवीसर्पजन्तुजित् ॥
हन्ति कुष्ठत्रयश्लीहकफवातान् रसायनः ।
अशोधितो गन्धक एष कुष्ठं
करोति तापं विषमं शरीरे ।
सौख्यञ्च रूपञ्च बलं तथौजः
शुक्रं निहन्त्येव करोति चास्रम् ॥"*॥
तस्य शोधनविधिर्यथा,—
"लोहपात्रे विनिःक्षिप्य घृतमग्नौ प्रतापयेत् ।
तप्ते घृते ततः समानं क्षिपेच्चन्धकजं रजः ॥
विद्रुतं गन्धकं दृष्ट्वा तदुवस्त्रे विनिःक्षिपेत् ।
यथा वस्त्रादिनिःसृत्य दुग्धमध्येऽखिलं क्षिपेत् ॥
एवं स गन्धकः शुद्धेत् सर्व्वकर्म्मोचितो भवेत् ॥"
इति भावप्रकाशः ॥
"शोधितो यस्तु गन्धः स्यात् जराव्याधिरुजापहः ।
अग्निसन्दीपनः श्रेष्ठो वीर्य्यवृद्धिकरोऽसितः ॥"
इति प्रयोगार्हतम् ॥

गन्धकन्दकः, पुं, (गन्धमूलः गन्धप्रधानो वा कन्दोऽस्य ततः कप् स्वार्थे कन् वा ।) कशेरु । इति वैद्यकम् ॥

गन्धकारिका, स्त्री, (गन्धं सुरभिप्रधानं मद्यं करोतीति । गन्ध + कृ + ण्वुल् ततष्टाप् कापि अत इत्वञ्च ।) सैरिन्ध्री । सा तु परवेश्मस्था स्ववशा स्निग्धकारिका । इति हलायुधः ॥

गन्धकालिका, स्त्री, (गन्धं प्रशस्तगन्धं पराशरसुनेर्व्वरप्रभावेन दूरवाहिगात्रसौरभं कलयतीति धारयतीति । कल + णिच् + अच् ङीष्च । ततः स्वार्थे कन् टाप् च पूर्व्वह्रस्वः ।) व्यासमाता । इति हेमचन्द्रः ॥

गन्धकाली, स्त्री, (गन्धं प्रशस्तदूरवाहिगात्रसौरभं कलयतीति । कल + णिच् अच् ङीष्च । यद्वा, गन्धवती काली । मध्यपदलोपिसमासः ।) व्यासमाता । इति शब्दरत्नावली ॥ (इयं हि दाशराजकन्या पुरा बाल्यसमये मत्स्यगन्धा कालीत्येतन्नाम्ना ख्याताऽसीत् । ततः कदाचित् नदीपरपारं जिगमिषुणा मुनिप्रवरपराशरेण सङ्गता तस्यै ऋषेर्वरप्रभावेन निजगात्रे पद्मपुष्पवत् सौरभमवाप्य ततः प्रभृति पद्मगन्धा गन्धकालीति नाम्ना च विश्रुताऽभवत् । परं तस्यामिव कन्यायां तदा पराशरौरसात् कानीनपुत्रो महर्षिर्व्यासः सञ्जातः । ततो गच्छति काले महात्मना भीष्मेण राज्यं दारपरिग्रहञ्च न करिष्यामीति निदारुणं प्रतिश्रुत्य दाशराजसकाशात् समानीता भुवनविश्रुता सा पद्मगन्धाढ्या गन्धकाली तत्कामुकाय पित्रे शान्तवे समर्पिता । एतद्विवरणं महाभारते १। सम्भवे । ६६-१०० । अध्याययोर्विशेषतो दर्शनीयम् ॥ अस्या हेतोरेव नरपतिरुग्रायुधः समरे भीष्मेण निहतः । यथा, हरिवंशे १२०।४७-५० ।
"स चापुत्र्यायुधस्तात ! दुर्म्मुखिरभवत्तदा ।
प्रदीप्तचक्रो बलवान् नीपान्तकरणोऽभवत् ॥
स दर्पपूर्णो हत्वाजौ नीपानन्यांश्च पार्थिवान् ।
पितर्य्युपरते मह्यं आवयामास किल्बिषम् ॥
मामभाष्यैः परिवृतं ग्रयानं धरणीतले ।
उग्रायुधस्य राजेन्द्र ! दूतोऽभ्येत्य वचोऽब्रवीत् ॥
अद्यत्वं जननीं भीष्म ! गन्धकालीं यशस्विनीम् ।
स्त्रीरत्नं मम भार्य्यार्थे प्रयच्छ कुरुनन्दन ! ॥"
ईदृशं जुगुप्सितवाक्यं दूतमुखादाकर्ण्यामितप्रतापो महात्मा भीष्मः अशौचान्ते तं दुरात्मानं समराङ्गणे समाहूय निपात्य च राज्ञे काम्पिल्याय तत् पैतृकं राज्यं समर्पयत् । अस्मिन्नेवाध्याये एतत् सर्व्वं वृत्तं सविशेषं द्रष्टव्यम् ॥)

गन्धकाष्ठं, क्ली, (गन्धप्रधानं सुगन्धसमन्वितं काष्ठमस्य । कर्म्मधारयो वा ।) अगुरुकाष्ठम् । इति त्रिकाण्डशेषः ॥ शुभ्रचन्दनम् । इति राजनिर्घण्टः ॥

गन्धकुटी, स्त्री, (गन्धस्य सुगन्धस्य कुटी आलय इव गन्धबाहुल्यात् तथात्वम् ।) सुराणामगन्धद्रव्यम् । इत्यमरः । २।४।१२३ ॥

गन्धकुसुमा, स्त्री, (गन्धं सुरभियुक्तं कुसुमं यस्याः ।) गणिकारीवृक्षः । इति राजनिर्घण्टः ॥

गन्धकेलिका, स्त्री, (गन्धं केलयति गमयति प्रापयति सन्निकर्षस्थानिति । गन्ध + केल + णिच् + अच् ततः स्वार्थे कन् अत इत्वञ्च । गन्धं केलतीति खुल् वा ।) कस्तूरी । इति राजनिर्घण्टः ॥

गन्धकोकिला, स्त्री, (गन्धमूलिका गन्धप्रधाना वा कोकिला ।) गन्धद्रव्यविशेषः । अस्या गुणाः । स्निग्धत्वम् । उष्णत्वम् । कफनाशित्वम् । तिक्तत्वम् । सुगन्धित्वम् । इति भावप्रकाशः ।

गन्धखेड़ं, क्ली, (गन्धस्य खेड़ः खेलोऽत्र । डलयोरैक्यात्तथात्वम् ।) गन्धवीरणम् । गन्धवेणा इति भाषा । तत्पर्य्यायः । भूतृणम् २ रौहिषम् ३ गोमयप्रियम् ४ । इति रत्नमाला ॥

गन्धखेड़कं, क्ली, (गन्धेन खेड़ति खेलतीति । खेल् + खुल् । गन्धस्य खेड़ः खेलोऽत्र इति कप् वा ।) गन्धतृणम् । इति शब्दरत्नावली ॥

गन्धचेलिका, स्त्री, (गन्धं चेलति गच्छतीति । चेल् + खुल् + टाप् अत इत्वञ्च ।) कस्तूरी । इति त्रिकाण्डशेषः ॥ (कस्तूरीशब्देऽस्या विवृतिर्वर्णिता ॥)

गन्धजातं, क्ली, (गन्धेन सह जातं उत्पन्नम् ।) तेजपत्रम् । इति शब्दरत्नावली ॥

गन्धज्ञा, स्त्री, (गन्धः इष्टानिष्टगन्धः ज्ञायते ऽनया इति । ज्ञा + करणे कः ततष्टाप् ।) नासिका । इति हेमचन्द्रः ।३।२४४ ॥

गन्धतूर्य्यं, क्ली, (गन्धे विनष्टयोर्द्रव्ययोर्गुणं द्योतितवसादि-गन्धयुक्तहिंसाप्रधानस्थाने रक्षणेन इत्यर्थः । आहन्यमानं स्थितं वा यत् तूर्य्यम् ।) वाद्य-विशेषः । तत्पर्य्यायः । रणतूर्य्यम् २ महास्वनः ३ । इति शब्दरत्नावली ॥

गन्धलशं, क्ली, (गन्धं सुगन्धान्वितं लशम् ।) सुगन्धलशम् । तत्पर्य्यायः । सुगन्धभूलशम् २ सुरसः सुरभिः सुगन्धिः ५ सुखवासः ६ । अस्य गुणाः । सुगन्धित्वम् । ईषत्तिक्तत्वम् । रसायनत्वम् । स्निग्धत्वम् । मधुरत्वम् । शीतलत्वम् । कफपित्तश्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥

गन्धत्वक्, क्ली, (गन्धयुक्ता गन्धप्रधाना वा त्वगस्य ।) एलवालुकम् । इति राजनिर्घण्टः ॥

गन्धदला, स्त्री, (गन्धयुक्तं दलं पत्रमस्याः ।) अजमोदा । इति राजनिर्घण्टः ॥

गन्धधूमजः, पुं, (गन्धाढ्यात् धूमात् जायते उत्पद्यते इति । जन् + डः ।) खादुनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

गन्धधूलिः, स्त्री, (गन्धप्रकाशकः धूलिः अणुचूर्णं वा अस्याः ।) कस्तूरी । इति हेमचन्द्रः ।

गन्धनं, क्ली, (गन्ध गतिहिंसायाचनेषु + भावे ल्युट् ।) उत्साहः । प्रकाशनम् । सूचनम् । हिंसा । इति मेदिनी । ने । ५७ ॥

गन्धनकुलः, पुं, (गन्धः दुर्गन्धप्रधानो नकुल इव ।) छुछुन्दरी । इति हारावली ॥ ८३ ॥ छुंछा इति भाषा ॥

गन्धनाकुली, स्त्री, (गन्धयुक्ता नाकुली राजा ।) राजा । इत्यमरः ।२।४।११४॥ कन्दविशेषः । तत्पर्य्यायः । महासुगन्धा २ सुवहा ३ सर्पाक्षी ४ फणिहन्त्री ५ नकुलाढ्या ६ अहिशत्रुः ७ विषमर्दनिका ८ अहिमर्दनी ९ विषमर्दनी १० महाहिगन्धा ११ अहिलता १२ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । त्रिदोषानेकविषनाशित्वम् । नाकुल्याः किञ्चित् श्रेष्ठत्वम् । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।

"नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ।
नकुलेष्टा सुगन्धाक्षी सर्पाक्षी विषनाशिनी ॥
नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् ।
भोगिलूताहिकाखुविषज्वरक्रिमिव्रणान् ॥"

इति भावप्रकाशः ॥

("रास्ना सुरसा सुगन्धा श्रेयसी सुवहा सहा ।
सुगन्धा सर्पगन्धान्या नाकुली गन्धनाकुली ॥"

इति वैद्यकरत्नमालायाम् ॥)

गन्धनामा, [न्] पुं, (गन्धेति पदपूर्व्वं नामास्य ।) रक्ततुलसी । इति रत्नमाला ॥

गन्धनासी, स्त्री, (गन्धनासन् + संज्ञायां ङीष् जातौ नान्तत्वाट् ङीष् वा ।) क्षुद्ररोगविशेषः । तल्लक्षणम् । यथा,—

"बाहुकक्षांसपार्श्वेषु क्षणास्फोटा सवेदनाः ।
पित्तप्रकोपसम्भूता कक्षामिति विनिर्द्दिशेत् ॥
एकान्तु ताडयीं दृष्ट्वा पिड़कां स्फोटसन्निभाम् ।
त्वग्जातां पित्तकोपेन गन्धनाम्नीं प्रचक्षते ॥"
ताडयीं बाहादिषु क्षणां सवेदनाञ्च ॥ * ॥

तच्चिकित्सा यथा,—

"कक्षाञ्च गन्धनाम्नीञ्च चिकित्सति चिकित्सकः ।
पैत्तिकस्य विसर्पस्य क्रियया पूर्व्वसूक्तया ॥"

इति भावप्रकाशः ॥

गन्धनाली, स्त्री, (गन्धाय गन्धज्ञानार्थं नाली प्रणालीव । गन्धग्रहणार्थं नालीव वा ।) नासिका । इति त्रिकाण्डशेषः ॥

गन्धनिलया, स्त्री, (गन्धस्य इष्टानिष्टगन्धस्य निलया आश्रयीभूता । गन्धस्य निलयोऽत्र वा स्त्रियां टाप् ।) नवमल्लिका । इति शब्दचन्द्रिका ॥

गन्धनिष्पा, स्त्री, (गन्धात् गन्धहेतोर्गन्धेन वा निष्पा हरिद्रेव ।) गन्धपत्रा । इति राजनिर्घण्टः ॥

गन्धपत्रः, पुं, (गन्धवत् पत्रमस्य ।) श्वेततुलसी । इति रत्नमाला ॥ मरुवः । वर्व्वरः । नारङ्गः । विल्वः । इति राजनिर्घण्टः ॥

गन्धपत्रा, स्त्री, (गन्धाढ्यं पत्रमस्याः ।) ग्रन्थीभेदः । पलाण्डु इति मालवे प्रसिद्धा । तत्पर्य्यायः । स्थूला २ तिक्तकन्दिका ३ वनजा ४ ग्रन्थिका ५ वन्या ६ तवचीरी ७ एकपत्रिका ८ गन्धपीताऽपलाण्डुका १० गन्धाढ्या ११ गन्धपत्रिका १२ दीर्घपत्रा १३ गन्धनिष्पा १४ वेदमुखा १५ सुपाकिनी १६ । अस्या गुणाः । कटुत्वम् । स्वादुत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । कफवातकासच्छर्द्दिज्वरनाशित्वम् । पित्तकोपकारित्वञ्च । इति राजनिर्घण्टः ॥

गन्धपत्रिका, स्त्री, (गन्धपत्रा + संज्ञायां कन् अत इत्वञ्च ।) गन्धपत्रा । अजमोदा । इति राजनिर्घण्टः ॥ (विवरणमस्या गन्धपत्राशब्दे ज्ञातव्यम् ॥)

गन्धपत्री, स्त्री, (गन्धपत्र + गौरादित्वात् ङीष् ।) अम्बष्ठा । अम्बगन्धा । अजमोदा । इति राजनिर्घण्टः ॥

गन्धपलाशिका, स्त्री, (गन्धाढ्यं पलाशं पत्रमस्याः ङीष् । संज्ञायां कन् टाप् पूर्व्वह्रस्वश्च । कप् टाप् अत इत्वञ्च इत्येके ।) हरिद्रा । इति हारावली ॥ ६३ ॥

गन्धपलाशी, स्त्री, (गन्धाढ्यं पलाशं पत्रमस्याः । गौरादित्वात् ङीष् ।) शटी । इति भावप्रकाशः ॥ (यथाह शब्दार्थचिन्तामणिः ।

"भवेद् गन्धपलाशी तु कषाया याहिमी लघुः ।
तिक्ता तीक्ष्णा च कटुका ऽनुष्णास्य मलनाशिनी ।
दोषकासव्रणश्वासशूलहिक्काग्रहापहा ॥")

गन्धपाषाणः, पुं, (गन्धयुक्तः पाषाणः । पाषाणस्येव काठिन्यात् तथात्वम् ।) गन्धकः । इति जटाधरः ॥ (यथास्य पर्य्यायाः ।

"गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि ।
सौगन्धिकश्च कथितो बलिर्बलरसापि च ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ यत्रास्य व्यवहारस्तद्यथा,—

"गन्धपाषाणचूर्णेन यवक्षारेण लेपितम् ।
सिध्मनाशं व्रजत्याशु कटुतैलयुतेन तु ॥"

इति वैद्यकचक्रपाणिसंग्रहे कुष्ठरोगाधिकारे ॥)

गन्धपिशाचिका, स्त्री, (गन्धेन पिशाचिका इव । पिशाचिका तामसप्रकृतिरूपदेवभेदः तस्या इव गन्धत्वात् तथात्वम् । नैवास्या सर्व्वाङ्गीनत्वोपमानम् । किन्तु गन्धमाघ्रायग्रहणादेकदेशेनैव सादृश्यमिति बोध्यम् ।) धूपः । इति हेमचन्द्रः । ३ । ३१३ ॥

गन्धपीता, स्त्री, (गन्धाढ्यं पीतं पीतवर्णञ्च पत्रमस्याः ।) गन्धपत्रा । इति राजनिर्घण्टः ॥

गन्धपुष्पः, पुं, (गन्धसमन्वितं पुष्पमस्य ।) वेतसवृक्षः । इति शब्दरत्नावली ॥ अङ्कोटवृक्षः । इति जटाधरः ॥ बकुलवृक्षः । इति राजनिर्घण्टः ॥

गन्धपुष्पा, स्त्री, (गन्धाढ्यं पुष्पमस्याः ।) नीली । केतकी । गणिकारी । इति राजनिर्घण्टः ॥

गन्धफणिज्झकः, पुं, (गन्धसारः गन्धप्रधानो वा फणिज्झकः ।) रक्ततुलसी । इति रत्नमाला ॥

गन्धफलः, पुं, (गन्धाढ्यं फलमस्य ।) कपित्थः । विल्वः । तेजःफलवृक्षः । इति राजनिर्घण्टः ॥

गन्धफला, स्त्री, (गन्धेन युक्तं फलमस्याः ।) प्रियङ्गुवृक्षः । इति शब्दरत्नावली ॥ मेथिका । विदारी । शल्लकी । इति राजनिर्घण्टः ॥

गन्धफली, स्त्री, (गन्धेन फलते विदीर्य्यते आत्मनेति शेषः । गन्ध + फल विदारे + कर्म्मण्यण् ततो गौरादित्वात् ङीष् ।) चम्पककलिका । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः ।
एतस्य कलिका गन्धफलीति कथिता बुधैः ॥")

प्रियङ्गुवृक्षः । इत्यमरः । २ । ४ । ५६ ॥

गन्धबधूः, स्त्री, (गन्धेन बध्नाति सन्निहृष्टजनानाकृष्टमिति । बन्ध + उः न लोपे वा ङीप् । गन्धस्य बधूरिव वा ।) शटी । चौड़ानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

गन्धबन्धुः, पुं, (गन्धेन बध्यते इति गन्धं बध्नाति इति वा । बन्ध + उन् । यद्वा, गन्धस्य बन्धुरिव । बन्धोरिव चित्तमुद्धरत्वादस्य तथात्वम् ।) आम्रवृक्षः । इति शब्दरत्नावली ॥

गन्धबहलः, पुं (गन्धः बहलः बहुलोऽस्य ।) सितार्जकः । इति राजनिर्घण्टः ॥

गन्धबहुला, स्त्री, (गन्धबहुल + टाप् ।) गोरक्षीवृक्षः । इति राजनिर्घण्टः ॥

गन्धबीजा, स्त्री, (गन्धः बीजेऽस्याः ।) मेथिका । इति राजनिर्घण्टः ॥ (मेथिकाशब्देऽस्या गुणा ज्ञेयाः ॥)

गन्धभद्रा, स्त्री, (गन्धः भद्रोऽस्याः गन्धेन भद्रा वा । एतया युक्तस्य यज्ञनयूपस्य गन्धमाघ्रायग्रहणे-

नेव रूपस्य मङ्गलं भवतीति भावः।) लताविशेषः। गन्धभादालिया इति भाषा॥ इति शब्दचन्द्रिका॥ (गुण-पर्य्यायावस्थाः प्रसारणीशब्दे ज्ञातव्याः॥)

गन्धभाण्डः, पुं, (गन्धस्य भाण्डमिव।) गर्हभाण्डवृक्षः। इति शब्दरत्नावली॥ (पर्य्यायोऽस्य यथा, "नन्दिवृक्षस्ताम्रपाकी फलपाकी च पीतकः।
गन्धभाण्डो गन्धसुण्डो द्वितीयः शिप्रपाक्यसौ॥"
इति वैद्यकरत्नमाला॥)

गन्धमांसी, स्त्री (गन्धसारा मांसी।) जटामांसीभेदः। तत्पर्य्यायः। केशी २ भूतजटा ३ पिशाची ४ पूतना ५ भूतकेशी ६ लोमशा ७ जटाला ८ लघुमांसी ९। अस्या गुणाः। तिक्तत्वम्। शीतत्वम्। कफकण्ठामयरक्तपित्तविषभूतज्वरनाशित्वम्। वर्ण्यत्वञ्च। इति राजनिर्घण्टः॥ (जटामांसीशब्देऽस्या विवृतिर्वोद्धव्या॥)

गन्धमाता, स्त्री, (गन्धस्य मातेव। गन्धगुणप्राधान्यात् तथात्वम्। यथा, मनौ। १। ७८।
"ज्योतिषञ्च विकुर्व्वाणादापो रसगुणाः स्मृताः।
अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः॥")
पृथिवी। इति हेमचन्द्रः। ४। २॥

गन्धमादनं, क्ली पुं, (गन्धैः आत्मोपरिसञ्जातौषधीविशेषसौरभैः मादयति सन्निहितस्थानिति। मद्+णिच्+कर्म्मणि ल्युः। माद्यतेऽनेन इति णिच् ल्युट् वा।) पर्व्वतविशेषः। इत्यमरः। २। ३। ३॥ अयं इलावृतभद्राश्ववर्षयोः सीमापर्व्वतः। अस्य विस्तारः नीलनिषधपर्व्वतपर्य्यन्तः। इति श्रीभागवतम्॥ (तथा च महाभारते। २। १०। ३०।
"मलयो दर्द्दुरश्चैव महेन्द्रो गन्धमादनः।
इन्द्रकीलः सुनाभश्च तथा दिव्यौ च पर्व्वतौ॥"
अस्य गिरेरधिष्ठातृदेवोऽपि एतन्नाम्ना विश्रुतः। यथा, तत्रैवाध्याये। २८ श्लोके।
"द्रुमः किम्पुरुषश्चैव उपास्ते धनदेश्वरम्।
राक्षसाधिपतिश्चैव महेन्द्रो गन्धमादनः॥"
अयमेव पर्व्वतो भगवत्याः पीठस्थानविशेषः। यथा, देवीभागवते। ७। ३०। ५६।
"प्रयागे ललिता प्रोक्ता कामुकी गन्धमादने॥")

गन्धमादनः, पुं, (गन्धेन पुष्पसौरभेण मादयत्यात्मानमिति। गन्ध+मद्+णिच्+ल्युः। यद्वा गन्धेन माद्यति इति। मद्+स्वार्थे णिच्+ल्युः।) भ्रमरः। वानरविशेषः। (यथा, रामायणे ४। २५। ३३।
"गयो गवाक्षो गवयः शरभो गन्धमादनः।
मैन्दश्च द्विविदश्चैव हनूमान् जाम्बवांस्तथा॥")
गन्धकः। इति मेदिनी॥ ने। २३४॥

गन्धमादनी, स्त्री, (गन्धेन माद्यतेऽनया। मद्+णिच्+करणे ल्युट् ततो ङीप्।) मदिरा। इति त्रिकाण्डशेषः॥ बन्धाकः। चीड़ानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

गन्धमादनी, स्त्री, (गन्धेन मादयतीति। मद्+णिच्+णिनिः।) लाक्षा। पुरानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

गन्धमार्ज्जारः, पुं, (गन्धेन गात्रगन्धेन युक्तः गन्धप्रधानो वा मार्ज्जारः।) खट्टासः। इति जटाधरः॥

गन्धमालती, स्त्री, (गन्धेन मालती इव।) गन्धद्रव्यविशेषः। सा तु गुणैर्गन्धकोकिलातुल्या। (यथा, भावप्रकाशे।
"गन्धकोकिलया तुल्या विज्ञेया गन्धमालती॥")

गन्धमालिनी, स्त्री, (गन्धानां गन्धस्य वा माला समूहः अस्त्यस्यामस्या वा इति। अस्त्यर्थे इनिः ततो ङीप्।) सुरानामगन्धद्रव्यम्। इति जटाधरः॥

गन्धसुण्डः, पुं, (गन्धं अपरगन्धं सुण्डयति मर्द्दयति खगन्धेनेति शेषः। सुण्ड मर्द्दने+णिच्+अण्। यद्वा गन्धेन स्वगन्धेन अन्यं दूरगन्धं मार्ष्टि शोधयतीति। सुण्ड शोधने+णिच्+अच्।) लताविशेषः। गन्धभादालिया इति भाषा। तत्पर्य्यायः। नन्दीवृक्षः १ ताम्रपाकी २ फलपाकी ३ पीतकः ४ गर्हभाण्डः ५ शिप्रपाकी ६। इति वैद्यकम्॥

गन्धसूल, पुं, (गन्धसारं मूलमस्य।) कुलञ्जनवृक्षः। इति राजनिर्घण्टः॥

गन्धसूलक, पुं, (गन्धमूल+संज्ञायां कन्।) शटी। इति शब्दरत्नावली॥

गन्धसूला, स्त्री, (गन्धसारं गन्धप्रधानं वा मूलमस्याः।) शुक्लकोलः। शटी। इति राजनिर्घण्टः॥

गन्धमूलिका, स्त्री, (गन्धमूली+संज्ञायां कन्।) पूर्व्ववृक्षः। यद्वा गन्धप्रधानं मूलमस्य इति कप् ततष्टाप् कापि अत इत्वम्।) माकन्दी। शटी। इति राजनिर्घण्टः॥

गन्धमूली, स्त्री, (गन्धमूल+स्त्रियां ङीष्।) शटी। इत्यमरः। २। ४। १४५॥

गन्धमूषिकः, पुं स्त्री, (गन्धप्रधानो मूषिकः।) छुछुन्दरी। इति त्रिकाण्डशेषः॥

गन्धमूषी, स्त्री, (गन्धा दुर्गन्धप्रधाना मूषी।) छुछुन्दरी। इति हेमचन्द्रः। ४। ३६८॥

गन्धरङ्गः, पुं, (गन्धाढ्यः गन्धेन युक्तो वा रङ्गः।) खट्टासः। इति शब्दमाला॥ (खट्टाशब्देऽस्य गुणादयो व्याख्याताः॥)

गन्धमैथुनः, पुं, (गन्धेन वासितायां ऋतुमत्यां गोर्योनिघ्राणेन मैथुनोद्योगः सृष्टा वा यस्य।) वृषः। इति जटाधरः॥

गन्धमोदनः, पुं, (गन्धेन आत्मोद्भवगन्धेन मोदयतीति। मुद्+णिच्+ल्युः।) गन्धकः। इति राजनिर्घण्टः॥

गन्धमोहिनी, स्त्री, (गन्धेन स्वावयवस्थगन्धेनेत्यर्थः मोहयति सन्निकर्षस्थानिति। मुह्+णिच्+णिनिः ङीप् च।) चम्पककलिका। इति राजनिर्घण्टः॥

गन्धरसः, पुं, (गन्धाढ्यः गन्धान्वितो वा रसोऽस्य।) उपधातुविशेषः। गुलसत्व इति ख्यातः। तत्पर्य्यायः। वोलः २ प्राणः ३ पिण्डः ४ गोपः ५ रसः ६। इत्यमरः। २। ६। १०४॥ रसगन्धः ७ गोसः ८ पिण्डगोसः ९ गुग्गुः १० गोसगुग्गुः ११। इति तट्टीका॥ गान्धारम् १२ मसिवर्द्धनम् १३। इति त्रिकाण्डशेषः॥ गोपरसः १४ वोलजः १५ गोपकः १६। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। २७। ११।
"न्यायोपेतं ब्राह्मणेभ्यो यदन्नं
श्रद्धापूतं गन्धरसोपपन्नम्॥")

गन्धरसाङ्कः, पुं (गन्धरसो अङ्के यस्य इति कप्।) श्रीवेरनामसुगन्धिद्रव्यम्। इति राजनिर्घण्टः॥

गन्धराजं, क्ली, (गन्धेन राजते इति। राज्+अच्।) चन्दनम्। जवादिनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ खगामख्यातशुक्लवर्णपुष्पञ्च॥

गन्धराजः, पुं, (गन्धानां गन्धसाराणां राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) सुरहवृक्षः। कणगुग्गुलुः। इति राजनिर्घण्टः॥ खनामख्यातपुष्पवृक्षः। तस्य पत्रं पनसवृक्षस्य क्षुद्रदलवत्। पुष्पञ्च सुगन्धिश्वेतवर्णं उपर्य्यधोद्वादशदलं षट्केशरमध्यं भवति वसन्तवर्षाकाले प्रस्फुटति च। तस्य शाखारोपणे वृक्षो जायते। इति लोकप्रसिद्धम्॥ गन्धश्चेलञ्च॥

गन्धराजी, स्त्री, (गन्धराज+स्त्रियां ङीष्।) गवीनामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

गन्धर्व्वः, पुं, (गन्धं सङ्गीतवाद्यादिजनितप्रमोदं अर्व्वति प्राप्नोतीति। अर्व्व गतौ+अण्। पृषोदरादित्वात् अलोपे साधुः।) स्वर्गगायकः। स तु देवयोनिः। तत्पर्य्यायः। गातुः २ दिव्यगायनः ३। तद्भेदा यथा,—
"हाहा हूहूश्चित्ररथो हंसो विश्वावसुस्तथा।
गोमायुस्तुम्बुरुर्नन्दिरेवमाद्याश्च ते स्मृताः॥"
इति जटाधरः॥ *॥
तस्य एकादश गणा यथा,—
"अभ्राजोऽङ्गारिवभ्रारी ह्यर्यवर्च्चास्तथा क्षुधुः।
हंसः सुहंसः स्वर्चैव मूर्द्धन्वांश्च महामनाः।
विश्वावसुः क्षमाद्यश्च गन्धर्व्वैकादशा गणाः॥"
इति वह्निपुराणे गणभेदनामाध्यायः॥
(असौ देवमर्त्यभेदेन गानधर्म्मिगन्धर्व्वोऽपि द्विविधः। यथाह शब्दार्थचिन्तामणिः।
"अस्मिन् कल्पे मनुष्यः सन् पुण्यपाकविशेषतः।
गन्धर्व्वत्वं समापन्नो मर्त्यगन्धर्व्व उच्यते॥
पूर्व्वकल्पकृतात् पुण्यात् कल्पादावेव चेद् भवेत्।
गन्धर्व्वत्वं ताडृशोऽत्र देवगन्धर्व्व उच्यते॥"
तत्र दिव्यगन्धर्व्वो यथा, ऋग्वेदे। १०।१३९।५।
"विश्वावसुरभि तन्नो गृणातु
दिव्यो गन्धर्व्वो रजसो विमानः॥"
तथाच महाभारते। ३। १६१। २६।
"स तमास्थाय भगवान् राजराजो महारथम्।
प्रययौ देवगन्धर्व्वैः स्तूयमानो महाद्युतिः॥"
मर्त्यगन्धर्व्वः। यथा, रामायणे। २। ४। ११।
"भ्रातरौ स्वरसम्पन्नौ गन्धर्व्वाविव रूपिणौ॥")
शुक्लकलोकोपरि विद्याधरलोकस्याधो गन्धर्व्वलोकः। यथा,—

"ततो विलोकयामास लोकं लोचनगर्भ्मदम् ।
शिवशर्म्मा ततः प्राह तुष्टस्तौ विष्णुपार्षदौ ॥
कोऽसौ जनाक्षसौ लोकः किन्नाम वदताङ्गणौ ॥
गणावूचतुः ।
गान्धर्व्वस्त्वेष लोकोऽसौ गन्धर्व्वाश्च शुभव्रताः ।
देवानां गायना ह्येते चारणाः स्तुतिपाठकाः ॥
गीतज्ञा अतिगीतेन तोषयन्ति नराधिपान् ।
स्तुवन्ति च धनाढ्यांश्च धनलोभेन मोहिताः ॥
राज्ञां प्रसादलब्धानि सुवासांसि धनानि च ।
द्रव्याण्यपि सुगन्धीनि कर्पूरादीन्यनेकशः ॥
ब्राह्मणेभ्यः प्रयच्छन्ति गीतं गायन्त्यहर्निशम् ।
स्तुताश्चैव मनस्तेषां नाप्यघाख्यकृतश्रमाः ॥
तेन पुण्येन गान्धर्व्वो लोकस्तेषां विधीयते ।
ब्राह्मणास्तोषिता यद्वै गीतविद्यार्जितैर्धनैः ॥
गीतविद्याप्रभावेण देवर्षिर्नारदो महान् ।
मान्यो वेणावलोके वै श्रीशम्भोश्चातिवल्लभः ॥
तुम्बुरुर्नारदश्चोभौ देवानामपि दुर्ल्लभौ ।
नादरूपी शिवः साक्षात् नादतत्त्वविदौ हितौ ॥
यदि गीतं क्वचिद्गीतं श्रीमद्धरिहरात्मकम् ।
मोक्षन्तु तत्फलं प्राहुः सान्निध्यमथवा तयोः ॥
गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥
अस्मिंल्लोके सदा कालं स्तुतिरेषा प्रगीयते ।
तद्गीतमालया पूज्यौ देवौ हरिहरौ सदा ॥
इति श्रुत्वा वचात् प्राप पुनरन्धं मनोहरम् ।
शिवशर्म्माथ पप्रच्छ किंसंज्ञं नगरन्त्विदम् ॥"
इति काशीखण्डम् ॥ * ॥
घोटकः । (यथा, महाभारते । ३ । १६१ । २३ ।
"रथं संयोजयामासुर्गन्धर्व्वैर्हेममालिभिः ॥")
पशुजातिविशेषः । स तु कस्तूरीमृगः । अन्तराभवसत्त्वः । इत्यमरः । ३ । ३ । १३२ ॥ "अन्तराभवसत्त्वस्तु जन्ममरणयोर्मध्यभवः प्राणी यो मृतो नैव कायान्तरं प्राप्तः नापि जन्म स मरणजन्मनोरन्तरा भवत्वादन्तराभवसत्त्वः स च यातनाशरीरः इत्येके इति मुकुटः । गुप्तप्राणीति केचित् गन्धर्व्वाः पतयो मम इति विराटे इति रमानाथः ।" इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ४ । ८ । ३४ ।
"न चाप्यहं चालयितुं शक्या केनचिदङ्गने ! ।
दुःखशीला हि गन्धर्व्वास्ते च मे बलवत् प्रियाः ।
प्रच्छन्नाश्चापि रक्षन्ति ते मां नित्यं सुचिस्मिते ॥")
पुंस्कोकिलः । गायनमात्रम् । इति मेदिनी । वे । ११ ॥ (शिवः । यथा, महाभारते । १३ । १७ । ६७ ।
"गन्धर्व्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुशारदः ॥"
ग्रहविशेषः । यथा, सुश्रुते ।
"देवास्तथा मनुगणाश्च तेषां
गन्धर्व्वयक्षाः पितरो भुजङ्गाः ।
रक्षांसि या चापि पिशाचजाति-
रेषोऽष्टधा देवगणो ग्रहाख्यः ॥"
एतैर्ग्रहैर्ग्रस्तस्य मनुष्यस्य लक्षणं यथा तत्रैव ।
"हृष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः ।
गृह्यन् वा प्रहसति चारुचाल्पशब्दं
गन्धर्व्वग्रहपरिपीडितो मनुष्यः ॥"
अस्योदाहरणं श्रुतावपि यथा, बृहदारण्यके ७म ब्राह्मणे जनकगोदानप्रकरणे ।
"मद्रेषु चरकाः पर्य्यव्रजाम ते पतञ्जलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गन्धर्व्वगृहीता ॥"
"मद्रेषु मद्रानाम जनपदास्तेषु चरकाः अध्ययनार्थं व्रतचरणात् चरका अध्वर्य्यवो वा पर्य्यव्रजाम पर्य्यटितवन्तः । ते वयं पर्य्यटन्तः पतञ्जलस्य नामतः काप्यस्य कपिगोत्रस्य गृहानैम गतवन्तः । तस्यासीद्दुहिता गन्धर्व्वगृहीता । गन्धर्व्वेण अमानुषेण सत्त्वेन केनचिदाविष्टा ॥" * ॥
गाः रश्मीन् वृषणोपयोगीनि वारीणि वा धारयति इति । गो + धृ + वः गोर्गमादेशश्च भाष्यकृद्भिर्भगवन्नाधवाचार्य्यपादैरित्येवं व्युत्पत्तिकृते सोमः । रश्मिमात्रधारकः । उदकधारकसूर्य्यांशादित्यविशेषः सूर्य्यश्च ऋते सर्व्वे एव बोधिता इत्यर्थः । एतेषां क्रमान्वयेनोदाहरणम् । यथा, ऋग्वेदे । १ । १६३ । २ ।
"गन्धर्व्वो अस्य रशना मृजन्ति सुरादत्वं वसवो नितत्नुः ॥" "गन्धर्व्वः सोमः ।" इति भाष्यम् । तत्रैव । ६ । ५८६ । १२ । "ऊर्द्धो गन्धर्व्वो अधिनाके अस्थात् विश्वारूपा प्रतिचक्षाणो अस्य ॥" "गन्धर्व्वो रश्मीनां धारकः ।" इति भाष्यम् । तत्रैव वेदे । ६ । ८३ । ४ । "गन्धर्व्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः ।" "गन्धर्व्वः उदकानां स्तुतीनां वा धारक आदित्यः ।" इति भाष्यम् । तत्रैव । ८ । १ । ११ । "बृहत् कृतुसमार्ज्जुनेयं शृतक्रतुः तुसरद्गन्धर्व्वमस्तृतम् ।" "गन्धर्व्वः गवां रश्मीनां धर्त्तारं सूर्य्यम् । इति भाष्यम् ॥" अहः दिवससमूह इत्यर्थः । यथा, भागवते । ४ । २६ । २१ ।
"तस्माद्दानीह गन्धर्व्वा गन्धर्व्व्यो राचयः स्मृताः ।"
राज्ञां स्तुतिपाठकः । यथा, भागवते । १ । ११ । २० ।
"नटनर्त्तकगन्धर्व्वाः स्तुतमागधवन्दिनः ।
गायन्ति चोत्तमश्लोकचरितान्यद्भुतानि च ॥"
अनूढानां बालस्त्रीणां भर्त्तृभोगात् प्रागेव प्रथमयद्भद्यौवनोपभोक्तृरूपपुरीराधिष्ठातृदेवविशेषः । यथा, ऋग्वेदे । १० । ८५ । ४० ।
"सोमः प्रथमो विविदे गन्धर्व्वो विविद उत्तरः ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥"
तथाच पञ्चतन्त्रे । ३ । २१०-२१३ ।
"स्त्रियः पूर्व्वं सुरैर्भुक्ताः सोमगन्धर्व्ववह्निभिः ।
भुञ्जते मानुषाः पश्चात् तस्माद्दोषो न विद्यते ॥
सोमस्तासां ददौ शौचं गन्धर्व्वाः स्निग्धितं गिरम् ।
पावकः सर्व्वमेध्यत्वं तस्मान्निष्कल्मषाः स्त्रियः ॥
असम्स्कारजा गौरी प्राप्ते रजसि रोहिणी ।
अयज्ञना भवेत् कन्या कृष्णहीना च नग्निका ॥
यज्ञनैस्तु समुत्पन्नैः सोमो भुङ्क्ते हि कन्यकाम् ।
पयोधराभ्यां गन्धर्व्वा रजस्यग्निः प्रतिष्ठितः ॥")
गन्धर्व्वतैलं, क्ली, (गन्धर्व्वनामकं तैलम् । शाकपार्थिववत् मध्यपदलोपिकर्म्मधारयः ।) एरण्डतैलम् ।
"गन्धर्व्वतैलसिद्धां हरीतकीं गोऽम्बुना पिबेत् ।
श्लीपदविबन्धसुक्तो भवत्यसौ सप्तरात्रेण ॥
गन्धर्व्वतैलं एरण्डतैलम् । गोऽम्बुना गोमूत्रेण ॥"
इति भावप्रकाशः ॥
गन्धर्व्ववेदः, पुं, (वेत्त्यस्मादनेन वा । विद् + अपादाने करणे वा घञ् वेदः । गन्धर्व्वाणां सङ्गीतविद्योपजीविनां यो वेदः सामवेदस्योपवेदविशेषः । यद्वा गन्धर्व्वः गन्धर्व्वसम्बन्धिनी गन्धर्व्वकलेत्यर्थः सङ्गीतरूपा विद्या विद्यतेऽनेनास्माद् वा । विद् ज्ञाने + करणे अपादाने वा घञ् ।) संगीतविद्या । यथा, "ऋग्वेदस्यायुर्व्वेदोपवेदो यजुर्व्वेदस्य धनुर्व्वेदोपवेदः । सामवेदस्य गन्धर्व्ववेदोपवेदोऽथर्व्ववेदस्य शस्त्रशास्त्राणीति ।" इति शौनकोक्तचरणव्यूहः ॥
गन्धर्व्वहस्तः, पुं, (गन्धर्व्वस्य नगविशेषस्य हस्तः अग्रपाद इव शाखादलत्वात् ।) एरण्डवृक्षः । इति हारावली । १०८ ॥ एतस्य पत्त्राद्यवयवोत्पत्तिमाश्रित्य कप् प्रत्ययेन सह यथाह सुश्रुतः ।
"गन्धर्व्वहस्तकमुष्ककनक्तमालाटरूषकपूतिकारग्वधचित्रपदीनां पत्त्राण्यार्द्राणि लवणेन सहोदूखलेऽनुवप्य स्नेहघटे प्रक्षिप्यावलिप्य गोशकृद्भिर्दाहयेत् एतत् पत्त्रलवणमुपदिशन्ति वातरोगेषु ॥")
गन्धर्व्वहस्तकः, पुं, (गन्धर्व्वहस्त + स्वार्थे कन् ।) एरण्डवृक्षः । इत्यमरः । २ । ४ । ५० ॥ (यथास्य पर्य्यायाः । वैद्यकरत्नमालायाम् ।
"आमण्डो वर्द्धमानः स्यादेरण्डो रुवुको वकः ।
गन्धर्व्वहस्तकश्चित्रो वातारिस्तरुणो रुचुः ॥")
गन्धलोलुपा, स्त्री, (गन्धे गन्धात्मकद्रव्ये लोलुपा लोभनप्रकृतिः ।) मक्षिका । इति शब्दरत्नावली ॥
गन्ध(ब)वणिक्, [ज्] पुं, (गन्धस्य अगरुचन्दनादिगन्धद्रव्यजातस्य वणिक् आजीवः । यद्वा गन्धं गन्धद्रव्यजातं पणायते व्यवहरति गन्धद्रव्यस्य क्रयविक्रयादिना आजीवति इत्यर्थः । पण् + इजि कृते पस्य (ब)त्वे च पृषोदरात् साधुः ।) गान्धिकः । स च वर्णसङ्करजातिविशेषः । गन्धवेणिया इति भाषा । स तु अम्बष्ठात् राजपुत्र्यां जातः । तस्य कर्म्म लिखनं गन्धदानञ्च । इति पराशरभाष्यम् ॥
गन्धवती, स्त्री, (गन्धो विद्यतेऽस्याः । गन्ध + मतुप् । मस्य वत्वे स्त्रियां ङीप् ।) पृथिवी । ("गन्धवती पृथ्वीरूपा ।" इति काशीखण्डे । २६ । ४६ श्लोकस्य टीकायाम् ॥) वायुपुरी । (यथा, काशीखण्डे । १३ । १ ।
"इमां गन्धवतीं पुण्यां पुरीं वायोर्विलोकय ।
वारुण्या उत्तरे भागे महाभाग्यनिधे द्विज ! ॥")
व्यासमाता । (इयं हि पूर्व्वं मत्स्यगन्धा आसीत् पश्चात् प्रसन्नात् पराशरात् लब्धवरा सद्गन्धविशिष्टा गन्धवतीति प्रसिद्धा जाता । यथा, महाभारते । १ । ६३ । ७६—८० ।
"एवमुक्ता वरं वव्रे गात्रसौगन्धमुत्तमम् ।

स चास्त्रे भगवान् प्रादान्मनसः काङ्क्षितं प्रभुः।
ततो लब्धवरा प्रीता स्त्रीभावगुणभूषिता ॥
जगाम सह संसर्गं शिवाङ्गतकर्म्मणा।
तेन गन्धवतीत्येवं नामास्याः प्रथितं भुवि ॥")
सुरा। इति मेदिनी। ते। १६४ ॥ वनमल्लिका।
इति रत्नमाला ॥ सुरानामगन्धद्रव्यम्। इति
जटाधरः॥ (गङ्गा। यथा, काशीखण्डे।२६।४६।
"गङ्गा गन्धवती गौरी गन्धर्वनगरप्रिया ॥")

गन्धवल्कलं, क्ली, (गन्धाढ्यं वल्कलं अस्य।)
लवङ्गम्। इति राजनिर्घण्टः॥ दारचिनी इति
भाषा॥

गन्धवल्लरी, स्त्री, (गन्धाढ्या वल्लरी लताविशेषः।)
सहदेवी। इति राजनिर्घण्टः॥

गन्धवल्ली, स्त्री, (गन्धान्विता वल्ली लता।) पीत-
पुष्पदण्डोत्पलः। डानिमोला इति भाषा। तत्-
पर्य्यायः। गोवन्दनी २ सहदेवी ३ सृहा ४।
इति रत्नमाला॥

गन्धवहः, पुं, (गन्धं वहतीति। वह्+अच्। गन्धस्य
वहो वा।) वायुः। इत्यमरः।१।१।६५॥
(यथा, महाभारते। २।१०।७।
"मन्दाराणामुदाराणां वनानि परिलोड़यन्।
सौगन्धिकवनानाञ्च गन्धं गन्धवहो वहन्॥")
गन्धयुक्ते त्रि॥

गन्धवहा, स्त्री, (गन्धमिश्रानिश्वासं वहतीति। गन्ध
+वह+अच्+टाप्। यद्वा, गन्धस्य वहा।)
नासिका। इत्यमरः।२।६।८६॥

गन्धवाहः, पुं, (गन्धं वहतीति। वह्+"कर्म्मण्य-
ण्।" ३।२।१। इति अण्।) वायुः।
इत्यमरः।१।१।६५॥ (यथा, गीतगोविन्दे।१।३६।
"इह हि दहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद् गन्धवाहः॥")
मृगविशेषः। स तु कस्तूरीमृगः। इति हेमचन्द्रः॥

गन्धवाहा, स्त्री, (गन्ध+वह्+घञ्+टाप्।)
नासिका। इति हेमचन्द्रः॥

गन्धविडलः, पुं, (गन्धेन आत्मोत्थसुरभिणा विड-
लयतीति। वि+डल्+णिच्+अच्।) गोधूमः।
इति शब्दचन्द्रिका॥

गन्धवृक्षकः, पुं, (गन्धः खनिर्य्यासजन्यसुरभियुक्तः
गन्धप्रधानो वा वृक्षः। ततः स्वार्थे संज्ञायां वा
कन्।) सालवृक्षः। इति राजनिर्घण्टः॥

गन्धव्याकुलं, क्ली, (गन्धेन व्याकुलयतीति। वि+
आ+कुल+णिच्+अच्।) कक्कोलम्। इति
शब्दचन्द्रिका॥

गन्धशुटी, स्त्री, (गन्धान्विता शुटी।) शुटी।
इति शब्दरत्नावली॥

गन्धशाकं, क्ली, (गन्धाढ्यं शाकम्।) गौरसुवर्ण-
शाकम्। इति राजनिर्घण्टः॥

गन्धशालिः, पुं, (गन्धाढ्यः शालिः।) शालि-
धान्यविशेषः। तत्पर्य्यायः। कलमः २ गन्धालुः
३ कलमोत्तमः ४ सुगन्धिः ५ गन्धबहुलः ६
सुरभिः ७ गन्धतण्डुलः ८ सुगन्धिशालिः ९।
अस्य गुणाः। मधुरत्वम्। अतिहृद्यत्वम्। पित्त-
श्रमक्षयविदाहशान्तिकारित्वम्। स्तन्यगर्भ-
स्थिरताख्यवायुपुष्ट्याख्यकफबलप्रदत्वञ्च। इति
राजनिर्घण्टः॥

गन्धशुण्डिनी, स्त्री, (गन्धाढ्यः शुण्डः सुखमस्यस्याः।
इति इनिः।) कुच्कुन्दरी। इति राजनिर्घण्टः॥
क्वचित् पुस्तके गन्धा शुण्डिनी इति नामद्वयम्॥

गन्धशैखरः, पुं, (गन्धः शैखरे गिरौदेशेऽस्य।)
कस्तूरी। इति हारावली। १०३॥

गन्धसारः, पुं, (गन्धाढ्यः सारः स्थिरांशो यस्य।)
चन्दनवृक्षः। इत्यमरः।२।६।१३१॥
(अस्य पर्य्यायाः यथा,—
"श्रीखण्डं चन्दनं न स्त्री भद्रः श्रीस्तलपर्णिकः।
गन्धसारो मलयजस्तथा चन्द्रद्रुतिश्च सः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
सङ्गरवृक्षः। इति राजनिर्घण्टः॥

गन्धसारणः, पुं, (गन्धं सारयतीति। सृ+णिच्+
ल्युः।) वृहद्वृक्षी। इति रत्नमाला॥

गन्धसोमं, क्ली, (गन्धाय गन्धार्थं प्रमोदायेत्यर्थः
सोमश्चन्द्रो यस्य।) कुमुदम्। इति त्रिकाण्डशेषः॥

गन्धहारिका, स्त्री, (गन्धं हरतीति। हृ+ण्वुल्
ततष्टाप् कापि अत इत्वञ्च।) परगृहं गत्वा
कर्म्मकारिणी स्त्रिलिङ्गिनी। इति शब्दमाला॥
गन्धहरणकर्त्री च॥

गन्धा, स्त्री, (गन्धयति गन्धं वितरतीति। गन्ध+णिच्
+अच्+टाप् च।) चम्पककलिका। इति शब्द-
रत्नावली॥ शुटी। इति राजनिर्घण्टः॥ शाल-
पर्णी। इत्यमरटीकायां भरतः॥

गन्धाढ्यः, पुं, (गन्धप्रधानः गन्धाढ्यो वा आढ्यः।)
कुच्कुन्दरी। इति हारावली॥ ८३॥

गन्धाजीवः, पुं, (गन्धेन गन्धात्मकद्रव्येण आजी-
वतीति। गन्ध+आ+जीव्+अच्।) गन्ध-
वणिक्। इति जटाधरः॥

गन्धाढ्यं, क्ली, (गन्धेन आढ्यम्।) जवादिनाम-
गन्धद्रव्यम्। चन्दनम्। इति राजनिर्घण्टः॥ गन्ध-
युक्ते त्रि॥

गन्धाढ्यः, पुं, (गन्धेनाढ्यः।) नारङ्गवृक्षः। इति
राजनिर्घण्टः॥

गन्धाढ्या, स्त्री, (गन्धेनाढ्या।) गन्धपत्रा। स्वर्ण-
यूथी। तरुणी। आरामशीतला। इति राज-
निर्घण्टः॥ गान्धाली। इति शब्दचन्द्रिका॥
(गन्धान्वितद्रव्ये त्रि। यथा, भ्रमराष्टके।१।
"गन्धाढ्योऽसौ सुवनविदिता केतकी स्वर्णवर्णा॥")

गन्धाधिकं, क्ली, (गन्धः अधिकः अस्मिन्। गन्धस्य
अधिकोऽत्रेति वा।) लवङ्गकुङ्कुमम्। इति राज-
निर्घण्टः॥

गन्धाम्बा, स्त्री, (गन्धयुक्तो अम्बः अम्बरसोऽस्या
वा।) वनजीवपूरकः। इति राजनिर्घण्टः॥

गन्धाला, स्त्री, (गन्धेन अलति पर्य्याप्नोतीति। अल्
+अच् टाप् च।) वृक्षविशेषः। इति शब्द-
चन्द्रिका॥ त्रियतीति ख्याता॥

गन्धाली, स्त्री, (गन्धस्य आली श्रेणी अस्याम्।
यद्वा गन्धेन अलति पर्य्याप्नोतीति। अल्+अच्
टाप्।) लताविशेषः। गाँधाली गन्धभादाली
इति च भाषा। तत्पर्य्यायः। प्रसारणी २
भद्रपर्णी ३ कटम्भरा ४। इति रत्नमाला॥
गन्धाढ्या ५। इति शब्दचन्द्रिका॥ सरला ६
राजबला ७ भद्रबला ८। इत्यमरः।२।५।२७॥
गन्धोली ९ सारणी १०। इति जटाधरः॥
अपि च।
"प्रसारणी राजबला भद्रपर्णी प्रतानिनी।
सरणिः सारणी भद्रबला चापि कटम्भरा॥
प्रसारणी गुरुर्हृद्या बलसन्धानकृत्सरा।
वीर्य्योष्णा वातकृत्तिक्ता वातरक्तकफापहा॥"
इति भावप्रकाशः॥
राजनिर्घण्टोक्तगुणपर्य्यायौ प्रसारिणीशब्दे
द्रष्टव्यौ॥

गन्धालीगर्भः, पुं, (गन्धाली गन्धश्रेणी गर्भ यस्य।)
सल्लकी। इति राजनिर्घण्टः॥

गन्धाश्मा [न्] पुं, (गन्धयुक्तः अश्मा प्रस्तर इव।)
गन्धकः। इत्यमरः।२।६।१०२॥

गन्धाष्टकं, क्ली, (गन्धानां गन्धात्मकागुरुचन्दना-
दीनां अष्टकम्।) पञ्चदेवतादेयाष्टप्रकारगन्ध-
द्रव्यम्। यथा,—
"चन्दनागुरुकर्पूरचोरकुङ्कुमरोचनाः।
जटामांसी कपियुता गन्धाष्टकं विदुः॥*॥
चन्दनागुरुह्रीवेरकुष्ठकुङ्कुमसेव्यकाः।
जटामांसी सुरमिति विख्यो गन्धाष्टकं विदुः॥*॥
चन्दनागुरुकर्पूरतमालजलकुङ्कुमम्।
कुशीदं कुष्ठसंयुक्तं ह्रीवं गन्धाष्टकं शुभम्॥*॥
स्वरूपं चन्दनं चोरं रोचनागुरुमेव च।
मदं मृगमदयोर्द्भूतं कस्तूरीचन्द्रसंयुतम्।
गन्धाष्टकं विनिर्द्दिष्टं गणेशस्य मनेर्प्रियुः॥"
इति शारदातिलकम्॥*॥
अपि च।
"चन्दनागुरुकर्पूररोचनाकुङ्कुमं मदम्।
रक्तचन्दनह्रीवेरं गायत्यसुदाहृतम्॥*॥
जलकाश्मीरकुष्ठेषु रक्तचन्दनचन्दनैः।
उशीरागुरुकर्पूरैः सौरं गन्धाष्टकं विदुः॥"
इति मेरुतन्त्रम्॥

गन्धि, क्ली, (गन्ध+"सर्व्वधातुभ्य इन्।"४।११७।
इति इन्।) लवङ्गकुङ्कुमम्। इति राजनिर्घण्टः॥

गन्धिकः, पुं, (गन्धो विद्यतेऽस्मिन्। गन्ध+"अत
इनिठनौ।" ५।२।११५। इति ठन्।) गन्धकः।
इति हेमचन्द्रः।३।१२३॥

गन्धिनी, स्त्री, (गन्धोऽस्यस्या इति।"अत इनिठनौ।"
५।२।११५। इति इनिः। स्त्रियां ङीप्।) सुरा।
इत्यमरः।२।४।१२३॥

गन्धिपर्णः, पुं, (गन्धि गन्धप्रधानं पर्णं पत्रमस्य।)
सप्तच्छदवृक्षः। इति राजनिर्घण्टः॥

गन्धोतुः, पुं, (गन्धः गन्धयुक्तः ओतुः।"ओतोऽयोः
समासे वा।" इति वार्त्तिं इति अकारलोपः।)
खट्टाशः। इति त्रिकाण्डशेषः॥ गन्धौतुश्च॥

गन्धोत्कटा, स्त्री, (गन्धेन उत्कटा उद्रिक्ता
उग्रा वा।) दमनकवृक्षः। इति राजनिर्घण्टः॥

गन्धोत्तमा, स्त्री, (गन्धेन उत्तमा गन्धप्रधानेत्यर्थः ।) मदिरा । इत्यमरः । २ । १० । ४० ॥

गन्धोलिः, स्त्री, (गन्धयति गन्धयुक्तं करोति संमिलितद्रव्यान्तराणीत्यर्थः । गन्ध + ओलच् ततो जातौ ङीष् निपातनात् ह्रस्वः ।) यष्टी । इति शब्दरत्नावली ॥

गन्धोली, स्त्री, (गन्धयति अर्हयतीति । गन्ध अर्हने + बाहुलकात् ओलच् ततो जातौ संज्ञायां वा ङीष् ।) यष्टी । इत्यमरः । २ । ५ । २७ ॥ भद्रा । यष्टी । इति मेदिनी ॥ ले । ८५ ॥

गभस्तिः, पुं, (गन्यते ज्ञायते इति गः विषयः । गम् + डः । तं बभस्ति दीपयति प्रकाशयतीति । भस् + "क्तिचक्तौ चेति ।" ३ । ३ । १७४ । इति क्तिच् ।) किरणः । (यथा, भागवते । ५ । ८ । २२ ।

"मासुपश्चतत्गतनयं शिशिरशान्तानुराग-
गुञ्जितनिजवदनसलिलाप्लुतमयगभस्तिभिः स्वधयतीति च ॥" गन्यते ज्ञायते इति । गम् + डः । गं इदं सर्वं जगत् बभस्ति भासयति निजकिरणजालैरिति श्लेषः । भस् + क्तिच् ।) सूर्यः । इति मेदिनी ॥ ते । १०७ ॥ (यथा, सूर्यस्तोत्रे ।

"गभस्तिमान् गभस्तिश्च विश्वात्मा भासकस्तथा ।
त्वं योनिर्वेदविद्यानां वेदवेद्यस्तथैव च ॥"

शिवः । यथा, महाभारते । १३ । १७ । १३३ ।

"गभस्तिर्ब्रह्मकृद् ब्रह्मा ब्रह्मवित् ब्राह्मणो-
गतिः ॥")

गभस्तिः, स्त्री, (गच्छति प्राप्नोति हव्यादिकमिति गः अग्निस्तं बभस्त्यनया इति । भस् + करणे क्तिच् ।) स्वाहा । इति मेदिनी ॥ ते । १०७ ॥

गभस्तिमत्, क्ली, (गभस्तयो रश्मयः नित्यं वर्त्तन्तेऽस्मिन् लोके मर्त्यादिष्वोतिःप्रभावात् । इति नित्ययोगे मतुप् ।) सप्तपातालान्तर्गतपातालविशेषः । तत्तु तलातलम् । इति शब्दरत्नावली ॥

गभस्तिमान्, [न्] पुं, (गभस्तयः रश्मयः विद्यन्ते भूम्न्यस्मिन् । इति भूम्नार्थे मतुप् ।) सूर्यः । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । ३ । १६ ।

"ओं सूर्योऽर्यमाभगस्त्वष्टा पूषार्कः सविता रविः ।
गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः ॥")

गभस्तिहस्तः, पुं, (गभस्तयो रश्मयो हस्ता इव जलाद्याकर्षणाय यस्य ।) सूर्यः । इति चिकाण्डशेषः ॥

गभीरं, त्रि, (गच्छति जलमत्र । गम् + "गभीरगम्भीरौ" । उणा । ४ । ३५ । इति ईरन् भश्चान्तादेशः ।) नीचस्थानम् । तत्पर्य्यायः । निम्नम् २ गम्भीरम् ३ । इत्यमरः । १ । १० । १५ ॥ गभीरकम् ४ । इति शब्दरत्नावली ॥ अगाधम् । (यथा, प्रबोधचन्द्रोदये । ४ । १५ ।

"निष्कम्पविम्मलपयोधिगभीरवीरा
धीराः परस्य परिवादगिरः सहन्ते ॥")

गहनम् । इत्यमरादिकोषः ॥ (पात्रकम् । यथा, भागवते । १ । ५ । १८ ।

"कालेन सर्व्वत्र गभीररंहसा ॥")

गभीरिका, स्त्री, (गभीरो ध्वनिर्विद्यतेऽस्याः । "अत इनिठनौ ।" इति ठन् । स्त्रियां टाप् ।) इक्षुयन्त्रकः । इति शब्दरत्नावली ॥

गभोलिकः, पुं, मत्सरः । इति हारावली । १३४ ॥

गम, औ ल गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) औ, गन्ता । ल, अगमत् । गतिरुत्तरदेशसंयोगफलकव्यापारः । इति दुर्गादासः ।

गमः, पुं, (गम्यते इति यथायथं भावकर्म्मादौ अप् ।) जिगीषोर्गमनम् । इत्यमरः । २ । ८ । ६५ ॥ अक्षविवर्त्तः । स तु द्यूतप्रभेदः । अपर्य्यालोचितम् । अध्वा । इति मेदिनी । मे १० ॥ सङ्कपाठः । इति हेमचन्द्रः ॥ गमनञ्च ॥ (उपभोगः । मैथुनम् । यथा, मनौ । ११ । ५४ ।

"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ॥")

गमकः पुं, (गमयति प्रापयति बोधयति वा मूर्च्छनादिलक्षणैर्यं आत्मानमिति । गम् + णिच् + खुल् ।) स्वरविशेषः । यथा, सङ्गीतदामोदरे ।

"गमकः स्वश्रुतिस्थानच्छायां श्रुत्यन्तराश्रयाम् ।
स्वरो यो मूर्च्छनामेति गमकः स इहोच्यते ॥
कम्पितः स्फुरितो नौली भिन्नः स्खलित एव च ।
आहतान्दोलितो चेति गमकाः सप्त कीर्त्तिताः ॥
माघपौषनिशायान्तु श्लेषप्रहरमात्रके ।
साधकः सलिले स्थित्वा गमकान् सप्त साधयेत् ॥
दाक्षिण्यात्वा हरिप्रीत्यै गायन्ति गमकानिमान् ॥"

(गमयति बोधयतीति । गम् + णिच् + खुल् । बोधकमात्रे त्रि । यथा, मालतीमाधवे । ३ ।

"यत् प्रौढ़त्वमुदारता च वचसां यच्चार्थतो गौरवं
तच्चेदस्ति ततस्तदेव गमकं पाण्डित्य वैदग्ध्ययोः ॥")

गमकारित्वं, क्ली, (गम्यते इति । गम् + भावे अप् । गमं करोतीति । कृ + णिनि । तस्य भावः इति ।) रभसः । इति चिकाण्डशेषः ॥

गमथः, पुं, (गच्छत्यस्मिन् इति । गम् + "ग्रीड्-ग्रपिरुगमिवञ्चिजीविप्राणिभ्योऽथः ।" उणा । ३ । ११३ । इति अधिकरणे अथः ।) पन्थाः । (गम् + कर्त्तरि अथः ।) पथिके त्रि । इत्युज्ज्वलादिकोषः ॥

गमनं, क्ली, (गम्यते जिगीषुणा इति । गम् + भावे ल्युट् ।) जिगीषोः प्रयाणम् । कुच् इति पारस्य भाषा । तत्पर्य्यायः । यात्रा २ व्रज्या ३ अभिनिर्यायम् ४ प्रस्थानम् ५ । गमः ६ । इत्यमरः । २ । ८ । १५ ॥ प्रयाणम् ७ प्रस्थितिः ८ यानम् ९ प्रायणम् १० । इति शब्दरत्नावली ॥ पादविहरणम् । (यथा, रामायणे । ३ । १३ । ११ ।

"न च मे रोचते वीर ! गमनं दण्डकं प्रति ॥")

तत्तु पञ्चविधकर्म्मान्तर्गतकर्म्मविशेषः । (यथा, भावापरिच्छेदे । ६ ।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा ।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च ॥")

तस्य भेदाः । यथा, भ्रमणम् १ रेचनम् २ स्यन्दनम् ३ ऊर्द्ध्वज्वलनम् ४ तिर्य्यग्गमनम् ५ । इति च भावापरिच्छेदे ७ । (उपभोगः । यदुक्तं तिथितत्त्वे ।

"अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चत्वस्य धारणात् ॥")

गमी, [न्] त्रि, (गमिष्यतीति । गम् + "भविष्यति गम्यादयः ।" ३ । ३ । ३ । "गमेरिनिः ।" उणा । ४ । ६ । इति भविष्यति इनिः ।) गमनकर्त्ता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गम्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) गम्बति । इति दुर्गादासः ॥

गम्भारिका, स्त्री, (गच्छति दार्ढ्यं सौन्दर्य्यभारञ्च इति । निम्नगतिमिलके । गम् + विच् । गमं बिभर्त्ति इति । भृ + खुल् ततष्टाप् कापि अत इत्वञ्च ।) गम्भारीवृक्षः । इति राजवल्लभः ॥

गम्भारी, स्त्री, (कं जलं बिभर्त्ति इति । भृ + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ङीश्च दीर्घादुरात् कस्य गत्वे साधुः । यद्वा गच्छति प्राप्नोति सौन्दर्य्यमिति । गम् + विच् । गमं बिभर्त्तीति ।) वृक्षविशेषः । गामारी इति भाषा ॥ तत्पर्य्यायः । सर्व्वतोभद्रा २ काश्मरी ३ मधुपर्णिका ४ श्रीपर्णी ५ भद्रपर्णी ६ काश्मर्य्यः ७ । इत्यमरः । २ । ४ । ३५ ॥ काश्मरी ८ । इति तट्टीका ॥ भद्रा ९ गोपभद्रिका १० कुसुदा ११ सदाभद्रा १२ कटफला १३ क्षुद्रशल्लिका १४ । इति रत्नमाला ॥ क्षुद्रपत्रा १५ क्षीरा १६ सर्व्वतोभद्रिका १७ स्निग्धपर्णी १८ सुभद्रा १९ कम्भारी २० गोपभद्रा २१ विदारिणी २२ क्षीरिणी २३ महाभद्रा २४ मधुपर्णी २५ स्वरभद्रा २६ क्षुण्णा २७ अर्श्वता २८ रोहिणी २९ यष्टिः ३० स्थूलत्वचा ३१ मधुमती ३२ सुफला ३३ मेदिनी ३४ महाकुसुदा ३५ सुदृढ़त्वचा ३६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । श्रमश्लेष्मविषदोषविषदाहार्शोज्वरक्षयासदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ एतत्फलगुणाः । तिक्तत्वम् । गुरुत्वम् । ग्राहित्वम् । मधुरत्वम् । केश्यहितत्वम् । रसायनत्वम् । मेध्यत्वम् । शीतलत्वम् । दाहपित्तनाशित्वञ्च । एतन्मूलगुणौ । अत्युष्णत्वम् । मानसव्याधौ अहितकारित्वञ्च । इति राजवल्लभः ॥ तत्पर्य्यायगुणाः ।

"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
काश्मरी काश्मरी क्षीरा काश्मर्य्यः पीत-
रोहिणी ॥
क्षुद्रपत्रा मधुरसा महाकुसुदिकापि च ।
काश्मरी तुवरा तिक्ता वीर्य्योष्णा मधुरा गुरुः ॥
दीपनी पाचनी मेध्या भेदिनी श्रमशोषजित् ।
दोषक्षयामशूलार्शोविषदाहज्वरापहा ॥
तत्फलं दृंहणं वृष्यं गुरु केश्यं रसायनम् ।
वातपित्तक्षयारक्तक्षयमूत्रविबन्धकृत् ॥
स्वादु पाके हिमं स्निग्धं तुवरान्तं विदुह्लिकृत् ।
हन्याद्दाहक्लमान्वातरक्तपित्तक्षतक्षयान् ॥"

इति भावप्रकाशः ॥

गम्भीरं, त्रि, (गच्छति जलमत्र। "गभीरगम्भीरौ।" उणा०। ४। ३५। इति गच्छतेरीरन् भश्चान्तादेशः नुमागमश्च।) गभीरम्। इत्यमरः। १।१०।१५॥ (यथा, गोः रामायणे। ५। १। ५०।

"ततः सागरगम्भीरो वानरः पवनो जवे॥")

गम्भीरः, पुं (गम्+"गभीरगम्भीरौ" उणा०। ४।३५। इति ईरन् भश्चान्तादेशः नुमागमश्च।) जम्भीरः। पङ्कजम्। कङ्कालः। इत्यादिकोषः॥ (शिवः। यथा, महाभारते। १३। १७। ५२।

"गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः॥"

स्त्रियां, हिक्कारोगभेदः। यथा, सुश्रुते उत्तरतन्त्रे ५० अध्याये।

"नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी।
शुष्कोष्ठकण्ठजिह्वास्यश्वासपार्श्वरुजाकरी।
अनेकोपद्रवयुता गम्भीरा नाम सा स्मृता॥")

गम्भीरवेदी, [न्] पुं, (गम्भीरं मन्दं यथा स्यात् तथा चिरकालात् इत्यर्थः यङ्लुग्वेधनं निषादिदत्तग्रिच्चामादेशं वा वेत्तीति विद्+णिनि।) दुर्द्धरहस्ती। तत्पर्य्यायः। अङ्कुशदुर्द्धरः २ चालकः ३ चालकः ४। इति त्रिकाण्डशेषः॥ अवमताङ्कुशः ५। इति हेमचन्द्रः॥ (यथा, रघौ। ४। ३६।

"स प्रतापं महेन्द्रस्य मूर्द्धि तीक्ष्णं न्यवेशयत्।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः॥"

अस्य लक्षणम्।

"चिरकालेन यो वेत्ति ग्रिच्चां परिचितामपि।
गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः॥"

इति ग्रन्थार्थचिन्तामणिधृतराजपुत्रीयवचनम्॥ मतभेदेन लक्षणान्तरमपि दृश्यते।

"त्वग्भेदाच्छोणितस्रावात् मांसस्य क्वथनादपि।
आत्मानं यो न जानाति स स्यात् गम्भीरवेदितः॥"

इति रघुटीकायां मल्लिनाथः॥)

गम्यं, त्रि, (गम्यते इति। गम्+कर्म्मणि यत्।) प्राप्यम्। इत्यमरः। ३। २। ४२॥ (यथा, भगवद्गीतायाम्। १३। १७।

"ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य विष्ठितम्॥")

गमनयोग्यञ्च॥ (यथा, महाभारते। ३।८५।१०२।

"गन्तव्यापि च तीर्थानि कीर्त्तितान्यगमानि च॥"

स्त्रियां, सम्भोगार्हा स्त्री। यथा, महाभारते। १। ८३। ३५।

"अभिकामां स्त्रियं यश्च गम्यां रहसि याचितः॥")

गम्यमानः, त्रि, (गम्यते इति। गम्+कर्म्मणि शानच्।) वर्त्तमानगमनाश्रयत्वादिः॥

गयः, पुं, (गीयते वीर्य्यादिप्रभावेनासौ। गै+घञ्। एषोदरादित्वात् साधुः।) वानरभेदः। (यथा, गोः रामायणे। ४। २५। ३३।

"गयो गवाक्षो गवयः शरभो गन्धमादनः॥")

स तु वैवस्वतपुत्रः। इति रामायणम्॥ राजर्षिभेदः। स च अमूर्त्तरयपुत्रः। (यथा, श्रीभागवते। ५। १५। ७।

"गयं नृपः कः प्रति याति कर्म्मभिः॥")

असुरभेदः। इति वायुपुराणम्॥ गयाप्रदेशः। यथा, हेः रामायणे। २। १०७। ११।

"गयेन यजमानेन गयेष्वेव पितॄन् प्रति।"

"गयेषु गयाप्रदेशेषु।" इति तट्टीकायाम्॥)

गया, स्त्री, (गयेन गयनाम्ना लोकप्रिसिद्धेनासुरेण पुराणान्तरमतभेदेन तन्नाम्ना राजर्षिणा वा निर्म्मिता।) गयराजर्षिपुरी। इति हेमचन्द्रः। ४। ३६॥ सा तु तीर्थभेदः। तस्य नामकरणं यथा,—

"यज्ञं चक्रे गयो राजा बहुन्नं बहुदक्षिणम्।
यत्र द्रव्यसमूहानां संख्या कर्त्तुं न शक्यते॥
गयं विष्णुादयस्तुष्टा वरं ब्रूहीति चाब्रुवन्।
गयस्तान् प्रार्थयामास अभिग्रस्तास्तु ये पुरा॥
ब्रह्मणा ते द्विजाः पूता भवन्तु क्रतुपूजिताः।
गयापुरी तु मन्नाम्ना ख्यातु ब्रह्मपुरी तथा॥
एवमस्तु वरं दत्त्वा ततश्चान्तर्दधुः सुराः॥"*॥

तस्योत्पत्तिकारणं यथा,—

"गयासुरोऽसुराणाञ्च महाबलपराक्रमः।
योजनानां शतादञ्च शतं तस्योच्छ्रयः स्मृतः॥
स्थूलः यद्दियोजनानां श्रेष्ठोऽसौ वैष्णवः स्मृतः।
कोलाहले गिरिवरे तपस्तेपे सुदारुणम्॥
बहुवर्षसहस्राणि निरुच्छ्वासः स्थिरोऽभवत्।
तत्तपस्तापिता देवाः संक्षोभं परमं गताः॥
ब्रह्मलोकं गता देवाः प्रोचुस्तेऽथ पितामहम्।
गयासुरात्तु देव! ब्रह्मन् देवांस्तथाब्रवीत्॥
व्रजामः शङ्करं देवा ब्रह्माद्याश्च गताः शिवम्।
कैलासे चाब्रुवन्नत्वा रक्ष रक्ष महाऽसुरात्॥
ब्रह्माद्यांश्चाब्रवीच्छम्भुर्व्रजाम शरणं हरिम्।
क्षीराब्धौ देवदेवेशः स नः श्रेयो विधास्यति॥
ब्रह्मा महेश्वरो देवा विष्णुं नत्वा प्रतुष्टुवुः।
किमर्थमागता देवा विष्णुनोक्तास्तमब्रुवन्॥
गयासुरभयाद्देव! रक्षास्मानब्रवीद्धरिः।
ब्रह्माद्या यान्तु तं दैत्यञ्चागमिष्याम्यहं ततः॥"*
"तमुक्तं वासुदेवाद्याः किमर्थं तप्यते त्वया।
सन्तुष्टाश्चागताः सर्व्वे वरं ब्रूहि गयासुर!"
"यदि तुष्टाः स्थ मे देवा ब्रह्मविष्णुमहेश्वराः।
सर्व्वदेवद्विजातिभ्यो यज्ञतीर्थशिलोच्चयात्॥
मत्तेभ्यो देवदेवीभ्यो योगिभ्यश्चापि सर्व्वथाः।
ज्ञातिभ्योऽतिपवित्रोऽहं पवित्रः स्यांसदा सुराः॥
परित्रो भव तं देवा दैत्यसङ्घा ययुर्दिवम्।
दृष्ट्वा दैत्यं ततः सृष्ट्वा सर्व्वे हरिपुरं ययुः॥
शून्ये लोकत्रये जाते शून्या यमपुरी ह्यभूत्।
यम इन्द्रादिभिः सार्द्धं ब्रह्मलोकं ततोऽगमत्॥
ब्रह्मणाऽमूचिरे देवा गयासुरविलोपिताः।
त्वया दत्तो योऽधिकारस्तं गृहाण पितामह!॥
ब्रह्माब्रवीत्ततो देवा व्रजामो विष्णुमव्ययम्।
ब्रह्मादयोऽब्रुवन् विष्णुं त्वया दत्तवरोऽसुरे॥
तद्गर्जनाद्ययुः स्वर्गं शून्यं लोकत्रयं ह्यभूत्।
देवैरुक्तो वासुदेवो ब्रह्माणं स वचोऽब्रवीत्॥
गत्वासुरं प्रार्थयस्व यज्ञार्थं देहि देहकम्।
विष्णूक्तः ससुरो ब्रह्मा गत्वाऽपश्यन्महासुरम्॥

ब्रह्मोवाच।

पृथिव्यां यानि तीर्थानि दृष्टानि भ्रमता मया।
यज्ञार्थं न तु ते तानि पवित्राणि शरीरतः॥
अतः पवित्रं देहं स्वं यज्ञार्थं देहि मेऽसुर!॥

गयासुर उवाच।

धन्योऽहं देवदेवेश! यद्देहः प्रार्थ्यते त्वया।
त्वयैवोत्पादितो देहः पवित्रश्च त्वया कृतः।
सर्व्वेषामुपकाराय यागोऽवश्यं भवत्विति॥
इत्युक्त्वा सोऽपतद्भूमौ श्वेतरूपे गयासुरः।
नैर्ऋतीं दिशमाश्रित्य तदा कोलाहले गिरौ॥
शिरः कृत्वोत्तरे देयः पादौ कृत्वा तु दक्षिणे।
ब्रह्मा सम्भृतसम्भारो मानसात्तृप्तिमोऽखनत्॥
चलितश्चकितो ब्रह्मा धर्म्मराजमभाषत।
यास्ते गृहे तव शिला तामानीयाच्च धारय॥
देवस्य शीघ्रं शिरसि तां धारय समाज्ञया।
निश्चलार्थं यमः श्रुत्वा धारयन्मस्तके शिलाम्॥
शिलायां धारितायान्तु सशिलश्चासुरोऽचलत्।
देवानूचेऽथ रुद्रादीन् शिलायां निश्चलाः किल॥
तिष्ठन्तु देवाः सकलास्तथेत्युक्त्वा च ते स्थिताः।
देवाः पादैर्न्यधित्वा तथापि चलितोऽसुरः॥
ब्रह्माथ व्याकुलो विष्णुं गतः क्षीराब्धिशायिनम्।
अजमूचे हरिः कस्मादागतोऽसि वदस्व तत्॥

ब्रह्मोवाच।

देवदेव! कृते यागे प्रचचाल गयासुरः।
इदानीं निश्चलार्थं हि प्रसादं कुरु माधव॥
ब्रह्मणो वचनं श्रुत्वा ह्यालक्ष्य स्वशरीरतः।
मूर्त्तिं ददौ निश्चलार्थं ब्रह्मणे भगवान् हरिः॥
आनीय मूर्त्तिं ब्रह्मापि शिलायां समधारयत्।
तथापि चलितं वीक्ष्य पुनर्देवमिदाऽब्रवीत्॥
आगत्य विष्णुः क्षीराब्धेः शिलायां संस्थितोऽभवत्।
आद्यया गदया चासौ यस्माद्दैत्यः स्थिरीकृतः॥
स्थित इत्येव हरिणा तस्मादादिगदाधरः॥"*॥
"ऊचे गयासुरो देवान् किमर्थं वञ्चितो ह्यहम्।
यज्ञार्थं ब्रह्मणे दत्तं शरीरममलं मया।
पीडायै यद्यहं देवाः प्रसन्नाः सन्तु सर्व्वदा॥"
"वरं ब्रूहि प्रसन्नाः स्मो देवैरूचे गयासुरः॥"
"यावत् पृथ्वी पर्व्वताश्च यावच्चन्द्रार्कतारकाः।
तावच्छिलायां तिष्ठन्तु ब्रह्मविष्णुमहेश्वराः॥
गदाधरः स्वयं लोकान् पूयात् सर्व्वाधनाशनः।
आर्द्धं सपिण्डकं येषां ब्रह्मलोकं प्रयान्तु ते॥"
"किं बहूक्त्या सुरेशानां युष्माकमपि देवताः।
येन, तिष्ठाम्यहं नापि समयः प्रतिपाल्यताम्॥"
"त्वया यत् प्रार्थितं वीर! तद्भविष्यत्यसंशयम्।
असुतृपादानर्चयित्वा यास्यन्ति परमां गतिम्।
देवैर्देत्यवरो देत्यो हर्षितो निश्चलोऽभवत्॥"

अथ गयाशिरआदिपरिमाणम्।

"नागाष्टनाडीनाडूक्षयूपाद्योत्तरमानसात्।
एतन्नयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते॥
पितामहं समासाद्य यावदुत्तरमानसम्।
फल्गुतीर्थन्तु विज्ञेयं देवानामपि दुर्लभम्॥
क्रौञ्चपादात् फल्गुतीर्थं यावत् साक्षाद्गयाशिरः।

सुखं गयासुरस्येतत्तस्मात् श्राद्धमथाक्षयम् ॥
सुखपृष्ठाच्च पूर्व्वस्मिन् पश्चिमे दक्षिणोत्तरे ।
श्राद्धे क्रोशद्वयं मानं गयायां ब्रह्मणेरितम् ॥
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
तन्मध्ये सर्व्वतीर्थानि त्रैलोक्ये यानि सन्ति वै ॥"

अथ गयामाहात्म्यादि ।

"गयायां न हि तत् स्थानं यत्र तीर्थं न विद्यते ।
सान्निध्यं सर्व्वतीर्थानां गयातीर्थे ततो वरम् ॥
ब्रह्मज्ञानेन किं साध्यं गोगृहे मरणेन किम् ।
वासेन किं कुरुक्षेत्रे यदि पुत्रो गयां व्रजेत् ॥
श्राद्धकृद्यो गयाक्षेत्रे पितॄणामनृणोऽपि सः ।
शिरसि श्राद्धकृद्यस्तु कुलानां शतमुद्धरेत् ॥
गयाशिरसि यः पिण्डान् येषां नाम्ना तु निर्व्वपेत् ।
नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः ॥
गत्वा वणिग्गयाशीर्षे प्रेतराजस्य पिण्डकम् ।
प्रददौ मनुजैः सार्द्धं स्वपितृभ्यस्ततो ददौ ॥
प्रेताः प्रेतत्वनिर्म्मुक्ता वणिक् च गृहमागतः ।
प्रेतराजः सह प्रेतैर्गयाश्राद्धाद्दिवं गतः ॥"*॥
"गयायां सर्व्वकालेषु पिण्डं दद्याद्विचक्षणः ।
अधिमासे जन्मदिने चास्तेऽपि गुरुशुक्रयोः ॥
न त्यक्तव्यं गयाश्राद्धं सिंहस्थेऽपि दृहस्पतौ ।
तथा दैवप्रमादेन प्रवहत्सु व्रणेषु च ॥
पूतः कर्म्माधिकारी च श्राद्धकृद्ब्रह्मलोकभाक् ॥
मौने मेषे स्थिते सूर्य्ये कन्यायां कार्म्मुके घटे ।
नारद! चिन्तु लोकेषु गयाश्राद्धं सुदुर्लभम् ॥"*॥
"सुखनद्याश्चोपवासश्च सर्व्वतीर्थैश्चयं विधिः ।
वर्ज्जयित्वा कुरुक्षेत्रं विष्णोर्नाभिं विरजां गयाम् ॥
दत्तं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिण्डदः ।
दत्तं भवति विष्णुपदे पितृभिः सह मुच्यते ॥
गयागयो गयादित्यो गायत्री च गदाधरः ।
गया गयासुरश्चैव षड्गया मुक्तिदायिकाः ॥"

अथ पिण्डदानद्रव्याणि ।

"पायसेनाथ चरुणा सक्तुना पिष्टकेन वा ।
तण्डुलैः फलमूलाद्यैर्गयायां पिण्डपातनम् ॥
तिलकल्केन खण्डेन गुड़ेन सघृतेन वा ।
केवलेनैव दध्ना वा क्षीरेण मधुनाथवा ॥
पिण्याकं सघृतं खण्डं पिण्डेष्वेतन्नियुज्यते ॥"

अथ गयास्थब्राह्मणपूजाविधिः ।

तत्रस्था ब्राह्मणा ब्रह्मात्मजभृगुः ।
"त्वया यद्दत्तमखिलं तत् सर्व्वं ज्ञापितो गतम् ।
जीवनार्थं प्रसादं नो भगवन् ! कर्त्तुमर्हसि ॥
तत् श्रुत्वा ब्राह्मणान् ब्रह्मा प्रोवाचेदं दयान्वितः ।
तीर्थोपजीविका यूयमाचन्द्रार्कं भविष्यथ ॥
लोकाः पुण्यगयायां ये श्राद्धिनो ब्रह्मलोकगाः ।
युष्मान् ये पूजयिष्यन्ति तैरहं पूजितः सदा ॥"

अथ गयायां श्राद्धादिकरणार्थं तीर्थानि ।

प्रथमदिने गयाप्रवेशे फलश्रुतीर्थे स्नानतर्पण-श्राद्धानि १ प्रेतशिलायां ब्रह्मकुण्डे स्नानं श्राद्धं षोड़शपिण्डदानं प्रेतपर्व्वते तिलमिश्रितसक्तु-निक्षेपश्च २ पञ्चतीर्थमध्ये उत्तरमानसे स्नानं सपिण्डकं श्राद्धं सूर्य्यार्चनञ्च ३ दक्षिणमानसे उदीच्यां उदीचीतीर्थे स्नानम् ४ तस्य मध्ये कनखलतीर्थे स्नानम् ५ तस्य दक्षिणे दक्षिण-मानसे तीर्थत्रये स्नानं श्राद्धं सूर्य्यार्चनञ्च ६ फल्गुतीर्थे स्नानं तर्पणं सपिण्डकं श्राद्धं ततो गदाधरस्य दर्शनं पूजनञ्च ७ ॥ द्वितीयदिने धर्म्मारण्ये गमनं धर्म्मेश्वरनमनं बोधितरु-नमनञ्च ८ मतङ्गवाप्यां स्नानं तर्पणं श्राद्धं मत-ङ्गेशनमनं यूपकूपयोर्मध्ये श्राद्धञ्च ९ ॥ तृतीय-दिने ब्रह्मसरसि स्नानं सपिण्डकं श्राद्धं यूप-प्रदक्षिणं ब्रह्मनमनञ्च १० गोप्रचारसमीपे आम्रवृक्षसेचनम् ११ ततो यमकुक्कुरकाकबलि-दानं पुनः स्नानञ्च १२ ॥ चतुर्थदिने फल्गुतीर्थे स्नानादिकं ततो गयाशिरसि विष्णुपदस्य दर्शनं स्पर्शनं पूजनं तत्र सपिण्डकं श्राद्धञ्च १३ रुद्रः १४ ब्रह्मा १५ दक्षिणाग्निः १६ गार्हपत्यः १७ आहवनीयः १८ सत्यः १९ आवसथ्यः २० शुक्रः २१ अगस्त्यः २२ क्रौञ्चः २३ मातङ्गः २४ कार्त्तिकेयः २५ गणेशः २६ कश्यपः एषां पदेषु श्राद्धम् २७ गजकर्णिकायां तर्पणम् २८ कनकेशुकेदारनरसिंहवामनरथमार्गाणां पूज-नम् २९ ॥ पञ्चमदिने गदालोले स्नानं सपि-ण्डकं श्राद्धञ्च ३३ अक्षयवटे श्राद्धं ब्रह्मकल्पित-विप्राणां पूजनं पुरोधसे षोड़शदानञ्च ३४ गायत्र्यग्रे प्रातःसन्ध्याचरणं सपिण्डकं श्राद्धञ्च ३५ सप्तगततीर्थे स्नात्वा सावित्र्यग्रे मध्याह्नसन्ध्या-चरणं पिण्डदानञ्च ३६ प्राचीसरस्वत्यां स्नात्वा सायाह्नसन्ध्याचरणं ३७ विष्णवे ३८ वेलि-दानम् ३९ भरताश्रमनामकरामतीर्थम् ४० पदा-ङ्कितम् ४१ सुखपृष्ठस्थगदाधरसमीपम् ४२ आकाशगङ्गा ४३ गिरिकर्णसुखं एषु स्नानं पिण्डदानञ्च ४४ वैतरण्यां स्नानं पिण्डदानं श्राद्धं गोदानञ्च ४५ घृतकुल्या ४६ मधुकुल्या ४७ देविकानदी ४८ शिलासङ्गम ४९ मधुस्रवासु स्नानं सपिण्डकं श्राद्धं पिण्डदानञ्च ५० दशाश्वमेधिकम् ५१ हंसतीर्थम् ५२ अमरकण्टकम् ५३ कोटितीर्थम् ५४ रुक्मिणीकुण्डं एषु पिण्डदानम् ५५ मार्कण्डेये-श्वर- ५६ कोटीश्वरयोर्दर्शनं नमनञ्च ५७ दिवौ-कसां पुष्करिण्यां पिण्डेभ्यो दानम् ५८ पङ्कजवने पाण्डुशिलायां श्राद्धम् ५९ सुखतीर्थे स्नानं तर्पणं पिण्डदानञ्च ६० गयाकूपे पिण्डदानं ६१ भस्मकूटे भस्मना स्नानम् ६२ सङ्गमतीर्थे स्नानम् ६३ धेनुकारण्ये पिण्डदानम् ६४ काम-धेनुपदे स्नात्वा कामदुघानमनम् ६५ ॥ * ॥

"कर्हमाले गयानाभौ सुखपृष्ठसमीपतः ।
स्नात्वा श्राद्धादिकं कृत्वा पितॄणामनृणो भवेत् ॥
फल्गुचक्रीक्षयाणाचीमङ्गलाद्याः समर्चयेत् ।
गयायाश्च दृषोत्सर्गस्त्रिसप्तकुलसुद्धरेत् ॥"

इति वायुपुराणे गयामाहात्म्यम् ॥ * ॥

तत्र मरणे मुक्तिर्यथा, तत्रैव ३ अध्याये ।

"गदाधरोद्भवतीर्थे सर्व्वतीर्थोत्तमोत्तमम् ।
मुक्तिर्भवेत् पितॄणाञ्च कर्त्तॄणां आहृतः सदा ॥
जरायुजा अण्डजा वा स्वेदजा वापि चोद्भिदः ।
ब्रह्मा देहं शिलायां ते यान्ति विष्णुस्वरूपताम् ॥"

तत्रस्थजनार्द्दनहस्ते जीवितस्य पिण्डदानविधि र्यथा,—

"जनार्द्दनो भस्मकूटे तस्य हस्ते तु पिण्डदः ।
आत्मनोऽप्यधवान्येभ्यो सर्व्वानेव तिलैर्विना ॥
जीवतां दधिसंमिश्रं सर्व्वे ते विष्णुलोकगाः ।
यस्तु पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
यमुद्दिश्य त्वया देयस्तस्मिन् पिण्डो नते प्रभो ॥
एष पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
अन्तकाले गते मह्यं त्वया देयो गया शिरे ।"

इति च वायुपुराणे गयामाहात्म्ये ४ अध्यायः ॥

गरं, क्ली, (गिरति दोषबहुलं नाशयति क्षिप्तं जातस्य बालकस्येति भावः । ग + पचाद्यच् ।) ववादेराकादशकरणान्तर्गतपञ्चमकरणम् । इति मेदिनी । रे । २२ ॥ (यथा, बृहत्संहितायाम् । ६६ । ४ ।

"ववबालवकौलवतैतिलाख्य
गरवणिजविष्टिसंज्ञानाम् ।"

एतेषामधीशाः । यथा, तत्रैव । ६६ । ४-५ ।

" पतयः सुरेन्द्रकमलज-
मित्रार्य्यमभूश्रियः सयमाः ॥
क्षपाचतुर्दश्यर्धाद् ध्रुवाग्नि
शुकुनिश्चतुष्पदं नागम् ।
किन्तुघ्नमिति च तेषां
कलिशूलफणिमारुताः पतयः ॥")

तत्र जातस्य फलम् ।

"विचारदक्षो विजितारिपक्षः
शूरोऽतिधीरो दृढदेहयुक्तः ।
दाता दयालुर्गुणवान्नरः स्याद्
गरे परेषामुपकारकर्त्ता ॥"

इति कोष्ठीप्रदीपः ॥

(गरादेः फलं यथा, बृहत्संहितायाम् । ६६ । ७ ।

"क्षतिबीजगृहाश्रयजानि गरे
वणिजि ध्रुवकार्य्यवणिग्युतयः ॥"

गीर्य्यते भक्ष्यते इति । गॄ + कर्म्मण्यप् ।) विषम् । (यथा, भागवते । ८ । ७ । ३१ ।

"तस्मादिदं गरं मुञ्च प्रजानां स्वस्तिरस्तु मे ॥")

वत्सनाभाख्यविषम् । इति राजनिर्घण्टः ॥ (सम्मोहनं विषम् । इति माधवकरहतरुग्नि-श्चयटीकाधृता श्रीकण्ठदत्तनोदररोगव्याख्याने उक्तम् ॥)

गरः, पुं, (गीर्य्यते इति । गॄ + कर्म्मणि अप् ।) विषम् । (यथा, भागवते । ६ । १४ । ४३ ।

"विद्वेषनरमतयः स्त्रियो दारुणचेतसः ।
गरं ददुः कुमाराय दुर्मर्षा वृषतिं प्रति ॥")

उपविषम् । रोगः । इति हेमचन्द्रः । ४ । ३८० ॥

गरत्नः, पुं, (गरं विषं हन्तीति । हन् + टक् ।) क्षपाजीवकः । वर्व्वरः । इति राजनिर्घण्टः ॥

गरघ्नी, स्त्री, (गरघ्न + टित्वात् ङीप् ।) मतस्य-विशेषः । गरइ इति भाषा । अस्या गुणाः । मधुरत्वम् । कषायत्वम् । वातपित्तकफनाशित्वम् । रुचिबलवीर्य्यकारित्वम् । दीपनत्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥

("गरघ्नी मधुरा तिक्ता तुवरा वातपित्तहृत् । कफघ्नी रुचिलघ्वी दीपनी बलवीर्यकृत् ॥"
इति शब्दार्थचिन्तामणिधृतवचनम् ॥
गरं संसारयातनारूपं विषं हन्तीति । हन्+टक् ङीप् च । गङ्गा । यथा, काशीखण्डे । २६।५४।
"ग्रहपीड़ाहरा गुन्द्रा गरघ्नी गानवत्सला ॥")
गरणं, क्ली, (ग सेचने गृ निगरणे + भावे ल्युट् ।) सेचनम् । निगरणम् । इति व्याकरणम् ॥
गरदं, क्ली, (गृ + भावे अप् । गरो भक्षणम् । गरेण भक्षणेन दीयते खण्ड्यते म्रियतेऽस्मादनेन वा । दो + अपादाने करणे वा घञर्थे क: ।) विषम् । इति राजनिर्घण्टः ॥
गरदः, त्रि, (गरं विषं ददातीति । दा + क: ।) विषदानकर्त्ता । (अयं हि आततायिनामन्यतमः । अस्य हनने दण्डादिकं नास्ति ।) यथा, स्मृतिः । "अग्निदो गरदश्चैव ग्रस्तपाणिर्धनापहः ।" (अयं हि आढ्यभोजने परिहर्त्तव्यः । तथा च मनौ । ३ । १५८ ।
" आगारदाही गरदः कुण्डाशी सोमविक्रयी । समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥")
गरव्रतः, पुं, (गरो गरणं सर्पादिग्रसनरूपं व्रतं नैसर्गिको नियमो यस्य ।) मयूरः । इति शब्दरत्नावली ॥
गरभः, पुं, (गृ + बाहुलकात् अभच् ।) गर्भः । इति हेमचन्द्रः । ३।२०४ ॥
गरलं, क्ली, (गिरति ग्रसति नाशयतीत्यर्थः । गृ + अलच् । गरात् भक्षणात् लाति आदत्ते जीवनं वा । ला + कः ।) विषम् । इत्यमरः । १।८।६ ॥ (यथा, गीतगोविन्दे ४ । २ ।
"आखण्डलगलगर्जितमिलनेन गरलमिव कलयति मलयसमीरम् ॥")
पन्नगविषम् । परिमाणम् । लशपूलकम् । इति हेमचन्द्रः ॥ वासेर गल्ला पुला आदि इत्यादि भाषा ॥
गरलारिः, पुं, (गरलस्य विषस्य अरिः तन्नाशकत्वात्तथात्वम् ।) मरकतमणिः । इति राजनिर्घण्टः ॥
गरा, स्त्री, (गीर्य्यते भक्ष्यते औषधार्थं रोगिभिरिति शेषः । गृ + कर्म्मण्यण् । ततोऽजादित्वात् टाप् ।) देवदालीलता । इति राजनिर्घण्टः ॥ निगरणम् । इति धरणी ॥
गरागरी, स्त्री, (गरं विषं आगिरति नाशयतीति । गरं मूषिकविषमिलके । आ + गृ अच् । संज्ञायां जातौ वा ङीष् ।) देवताड़वृक्षः । इत्यमरटीकायां स्वामी ॥ (यथास्याः पर्य्यायाः ।
"गरागरी च वेणी च तथा स्याद्देवताड़कः ।" इति कल्पस्थाने द्वितीयेऽध्याये चरकेणोक्तम् ॥ गुणाश्चास्या जीमूतकशब्दे ज्ञातव्याः ॥)
गरात्मकं, क्ली, (गरः विषं आत्मा जीवभूतं यस्य इति कप् ।) श्वेताञ्जनबीजम् । इति राजवल्लभः ॥
गराधिका, स्त्री, (गरेषु गरप्रतीकारादिषु अधिका प्रधाना ।) लाक्षा । इति रत्नमाला । गरादधिका गवादिकापि पाठः ॥ (गरादधिका । विषप्रधाना ॥)
गरिमा, [न्] त्रि, ("प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धेति ।" ६ । ४ । १५७ । इति गरादेशः । पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति इमनिच् ।) गुरुता । इति व्याकरणम् ॥ (यथा, भागवते । ८ । २ । २२ ।
"गिरिं गरिम्णा परितः प्रकम्पयन् ॥
निषेव्यमाणोऽलिकुलैर्मदाशनैः ॥ ")
गरिष्ठः, त्रि, (अतिशयेन गुरुः । "प्रियस्थिरेति ।" ६।४।१५७ । इति इष्ठन् गरादेशश्च ।) अतिगुरुः । इति जटाधरः ॥ (पुं, दानवविशेषः । यथा, महाभारते । १ । ६५ । ३० ।
"गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः ॥"
नृपविशेषः । यथा, तत्रैव । २ । ७ । १२ ।
"हविर्ग्राहश्च गरिष्ठश्च हरिश्चन्द्रश्च पार्थिवः ॥")
गरी, स्त्री, (गर + जातौ संज्ञायां वा ङीष् ।) देवताड़वृक्षः । इत्यमरः । २ । ४ । ६६ ॥ खरा । इति मेदिनी । रे । २२ ॥ (देवताड़शब्देऽस्या विवरणं द्रष्टव्यम् ॥)
गरीयान्, [स्] त्रि, (अतिशयेन गुरुः । गुरु + इयसुन् गरादेशश्च ।) अतिगुरुः । इति व्याकरणम् ॥
गरुड़ः, पुं, (गरुद्भ्यां पक्षाभ्यां डयते उड्डयते । इति गरुत् + ड्डी + ड: । पृषोदरात् तलोपे साधुः । यद्वा, "गिर उड़च् ।" उणा । ४ । १५५ । इति उड़च् ।) खगामखातपक्षी । तत्पर्य्यायः । गरुत्मान् २ तार्क्ष्यः ३ वैनतेयः ४ खगेश्वरः ५ नागान्तकः ६ विष्णुरथः ७ सुपर्णः ८ पन्नगाशनः ९ । इत्यमरः । २ । २ । ३२ ॥ महावीरः १० पक्षिसिंहः ११ उरगाशनः १२ । इति जटाधरः ॥ ग्राखली १३ हरिवाहनः १४ अन्तताहरणः १५ नागाशनः १६ । इति हारावली ॥ ग्राखलिखः १७ खगेन्द्रः १८ भुजगान्तकः १९ तरक्षुः २० तार्क्ष्यनायकः २१ । इति राजनिर्घण्टः ॥* तस्योत्पत्तिकारणं यथा,—
"यजतः पुत्रकामस्य कश्यपस्य प्रजापतेः ।
साहाय्यमृषयो देवा गन्धर्व्वाश्च ददुः किल ॥
तत्रैधांसमये शुक्रो नियुक्तः कश्यपेन ह ।
मुनयो वालिखिल्याश्च ये चान्ये देवतागणाः ॥
शुक्रस्तु वीर्य्यसङ्गमिघ्मभारं गिरिप्रभम् ।
समुत्क्षिप्यानयामास नातिहृष्टादिव प्रभुः ॥
अथापश्यदथौघं वृक्षागल्गुलोदरवर्ष्मणः ।
पलाशशल्लिकामेकां सहिताग् वहतः पथि ॥
तान् सर्व्वान् विस्मयाविष्टो वीर्य्योन्नद्धः पुरन्दरः ।
अवहस्याभ्ययाच्छीघ्रं लङ्घयित्वावमन्य च ॥
तेऽथ रोषसमाविष्टाः सुभृशं जातमन्यवः ।
आरेभिरे महत् कर्म्म तदा शत्रुभयङ्करम् ॥
कामवीर्य्यः कामगमो देवराजभयप्रदः ।
इन्द्रोऽन्यो सर्व्वदेवानां भवेदिति यतव्रताः ॥
तद्बुद्ध्वा शुशुभन्नाम्नो देवराजः शुतक्रतुः ।
जगाम शरणं तत्र कश्यपं शंसितव्रतम् ॥
तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः ।
वालिखिल्यानुपागम्य कर्म्मसिद्धिमपृच्छत ॥
अथ ते तं महात्मानं प्रत्यूचुः सत्यवादिनः ।
तान् कश्यप उवाचेदं सान्त्वपूर्व्वं प्रजापतिः ॥"
तस्य पक्षीन्द्रत्वकारणं यथा,—
"अयमिन्द्रक्षिसुवने नियोगात् ब्रह्मणः कृतः ।
इन्द्रार्थञ्च भवन्तोऽपि यत्नवन्तस्तपोधनाः ॥
न मिथ्या ब्रह्मणो वाक्यं कर्त्तुमर्हथ सत्तमाः ।
भवतां हि न मिथ्यायं संकल्पो वै चिकीर्षितः ॥
भवत्वेष पतत्रीणामिन्द्रोऽतिबलसत्त्ववान् ।
प्रसादः क्रियतामस्य देवराजस्य याचतः ॥
वालिखिल्या ऊचुः ।
अपत्यार्थे समारम्भो भवतश्चायमीप्सितः ।
तथा चैवं विधत्स्वात्र यथाग्रेयोऽनुपश्यसि ॥
एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा ।
विनता नाम कल्याणी पुत्रकामा यशस्विनी ॥
तपस्विनी व्रतपरा स्नाता पुंसवने शुचिः ।
उपचक्राम भर्त्तारं तामुवाचाथ कश्यपः ॥
आरम्भः सफलो देवि ! भवितायं तवेप्सितः ।
जनयिष्यसि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ ॥
तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा ।
एतौ सर्व्वपतत्रीणामिन्द्रत्वं कारयिष्यतः ॥
विनता चापि सिद्धार्था बभूव मुदिता तथा ।
जनयामास पुत्रौ द्वावण्डं गरुड़ं तथा ॥
विकलाङ्गोऽरुणश्चाद्य भास्करस्य पुरःसरः ।
पतत्रीणान्तु गरुड़ इन्द्रत्वेनाभ्यषिच्यत ॥"*॥
तस्य जन्मकालीनरूपं यथा,—
"एतस्मिन्नन्तरे चापि गरुड़ः काल आगते ।
विना मात्रा महातेजा विदार्य्याण्डमजायत ।
महाबलबलोपेतः सर्व्वा विद्योतयन्दिशः ।
कामरूपी कामगमः कामवीर्य्यो विहङ्गमः ॥
अग्निराशिरिवोद्भासन् समिद्धोऽतिभयङ्करः ।
विद्युद्विस्फूर्जिताघ्यो युगान्तायसिसमप्रभः ॥
प्रवृद्धः सहसा पक्षी महाकायो नभो गतः ।
घोरो घोरखनो रौद्रो वह्निरौर्व इवापरः ॥"*॥
तस्य विष्णुवाहनत्वे कारणं यथा,—
"अपीता चान्दतं पक्षी परिदह्यासु निःसृतः ।
अगच्छदपरिश्रान्त आवार्य्यार्कप्रभां खगः ॥
विष्णुना तु तदाकाशे वैनतेयः समेयिवान् ।
तस्य नारायणस्तुष्टस्तेनालौल्येन कर्म्मणा ॥
तमुवाचाथयो देवो वरदोऽस्मीति खेचरम् ।
स वव्रे तव तिष्ठेयमुपरीत्यब्रवीच्चगः ॥
उवाच चैनं भूयोऽपि नारायणमिदं वचः ।
अजरश्चामरश्चास्यमन्तेन विनाप्यहम् ।
एवमस्त्विति तं विष्णुरुवाच विनतासुतम् ॥
प्रतिगृह्य वरौ तौ तु गरुड़ो विष्णुमब्रवीत् ।
भवतोऽपि वरं दद्मि ब्रूतो भगवानपि ॥
तं वव्रे वाहनं कृष्णो गरुत्मन्तं महाबलम् ।
ध्वजञ्च चक्रे भगवानुपरि स्थास्यतीति तम् ॥"
इति महाभारते । १ । २१-३१ । अथाशेष ॥

(यूहविशेषः। यथा, मनुः। ७। १८७।
"वराहमकराभ्यां वा छत्रेण वा गरुडेन वा॥"
"छत्रमसख्यपद्माङ्गः पृथुमध्यो वराहयूहः। एष एव पृथुतरमध्यो गरुडयूहः।" इति कुल्लूकभट्टः॥)
गरुड़ध्वजः, पुं, (गरुड़ः ध्वजचिह्नं यस्य। यद्वा, गरुडो ध्वजे रथध्वजे यस्य।) विष्णुः। इत्यमरः। १।१।१६॥ (यथा, विष्णुपुराणे। ५।१।३३।
"इत्युक्त्वा प्रययौ विप्र! सहदेवैः पितामहः।
समाहितमतिश्चैवं तुष्टाव गरुडध्वजम्॥"
अस्य एतन्नामकारणकथा यथा, महाभारते। १। ३३। १२-१७।
"विष्णुना तु तदाकाशे वैनतेयः समेयिवान्।
तस्य नारायणस्तुष्टस्तेनालौल्येन कर्म्मणा॥
तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम्।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः॥
उवाच चैनं भूयोऽपि नारायणमिदं वचः।
अजरश्चामरश्च स्यामस्तेन विनाप्यहम्।
एवमस्त्विति तं विष्णुरुवाच विनतासुतम्॥"
"ध्वजश्च चक्रे भगवानुपरि स्थास्यतीति तम्॥")
गरुड़ायनः, पुं, (गरुड़स्य अयनो ज्ञेयः।) अरुणः। इत्यमरः। १।३।३२॥ (अस्य गरुड़ायनत्वकथा यथा, महाभारते। १।३१।२४-३४।
"विनता नाम कल्याणी पुत्रकामा यशस्विनी।
तपस्तप्ता व्रतपरा स्नाता पुंसवने शुचिः॥
उपचक्राम भर्त्तारं तामुवाचाथ कश्यपः।
आराध्यः सफलो देवि! भवितायं तवेप्सितः॥
जनयिष्यसि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ।
तपसा बालिखिल्यानां मम सङ्कल्पजौ तथा॥
भविष्यतो महाभागौ पुत्रौ त्रैलोक्यपूजितौ।
उवाच चैनं भगवान् कश्यपः पुनरेव ह॥
धार्य्यतामप्रमादेन गर्भोऽयं सुमहोदयः।
एतौ सर्व्वपतत्रीणामिन्द्रत्वं कारयिष्यतः॥"
"विनता चापि सिद्धार्था बभूव मुदिता तथा।
जनयामास पुत्रौ द्वावरुणं गरुडं तथा॥
विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः।
पतत्रीणाञ्च गरुड इन्द्रत्वेनाभ्यषिच्यत॥")
गरुड़ाङ्कितं, क्ली, (गरुड़ इव अङ्कितम्। गरुड़सादृश्यादस्य तथात्वम्।) मरकतमणिः। इति शब्दरत्नावली॥
गरुड़ाश्मा, [न्] पुं, (गरुड़वर्णवत् अश्मा प्रस्तरः। गरुड़वर्णसादृश्यात् तथात्वम्।) मरकतमणिः। इति जटाधरः॥
गरुड़ोत्तीर्णं, क्ली, (गरुड़ादुत्तीर्णं वर्णेनेति शेषः। यद्वा, गरुड़ उत्तीर्णो वर्णेनातिक्रान्तो येन।) मरकतमणिः। इति राजनिर्घण्टः॥
गरुत्, पुं, (गृणाति शब्दायते वायुवेगवशादिति। गॄ गि शब्दे + "ह्यां क्योरुतिः।" उणा। १। ६६। इति उतिः।) पक्षः। इत्यमरः। २। ५। ३६॥ पाखा इति भाषा॥ (गिरतीति। गॄ निगरणे + उतिः। निगरणम्। भक्षणम्। यथा, यजुर्व्वेदे। १७।७२। "सुपर्णोऽसि गरुत्मान् दृष्टे।"
"अये! त्वं सुपर्णोऽसि सुपर्णपक्षाकारो गरुड़ोऽसि गरुत्मान् गरुत् गरणं गिलनं भक्ष अस्यास्तीति गरुत्मान् अग्रनायत्वान्निर्द्देशः।" इति वेददीपिकायां सायणः॥)
गरुत्मान्, [त्] पुं, (गरुत् पक्षाः सन्त्यस्य। गरुत् + मतुप्।) गरुड़ः। इत्यमरः। १।१।३१। (यथा, भागवते। ३। १६। ११।
"जग्राह लीलया प्राप्तं गरुत्मानिव पन्नगम्॥")
पक्षिमात्रम्। इति मेदिनी। ते। १६६॥
गरुद्योधी, [न्] पुं, (गरुता पक्षेण युध्यतीति। युध् + णिनिः।) भारतीपक्षी। इति चिकाण्डशेषः॥ भारइ इति भाषा॥
गर्गः, पुं, (गृणाति वेदध्वनिना शब्दायते स्तौति इत्यर्थः। गॄ गि शब्दे + "सृदिगोर्गगौ।" उणा। १।१२७। इति गः।) मुनिविशेषः। स तु गयाक्षेत्रे यज्ञार्थं स्रष्टो ब्रह्मणः पुत्रः। इति वायुपुराणे गयामाहात्म्ये २ अध्यायः॥ (हृहस्पतिवंशसम्भवोऽन्यो मुनिभेदः। स तु वितथस्य पुत्रः। यथा, हरिवंशे। ३२। १५—२०।
"हृहस्पतेरङ्गिरसः पुत्रो राजन्महामुनिः।
संक्रामितो भरद्वाजो मरुद्भिः क्रतुभिर्विभुः॥
अत्रैवोदाहरन्तीमं भरद्वाजस्य धीमतः।
धर्म्मसंक्रमणञ्चापि मरुद्भिर्भरताय वै॥
अयाजयद्भरद्वाजो मरुद्भिः क्रतुभिर्हि तम्।
पूर्व्वन्तु वितथे तस्य क्षत्रे वै पुत्रजन्मनि॥
ततोऽथ वितथो नाम भरद्वाजात् सुतोऽभवत्।
पौत्रेऽथ वितथे जाते भरतस्तु दिवं ययौ॥
वितथञ्चाभिषिच्याथ भरद्वाजो वनं ययौ।
स चापि वितथः पुत्रान् जनयामास पञ्च वै॥
सुहोत्रञ्च सुहोतारं गयं गर्गन्तथैव च॥"
अयं हि शिवमाराध्य चतुःषष्ट्यङ्गज्योतिषादिज्ञानमलभत। यथा, महाभारते। १३।१८।३८।
गर्ग उवाच।
"चतुःषष्ट्यङ्गमददत् कलाज्ञानं ममाद्भुतम्।
सरस्वत्यास्तटे तुष्टो (शिवः) मनोयज्ञेन पाण्डव॥"
तथा, बृहत्संहितायाम्। २१। ५।
"न तु तन्मतं बहूनां गर्गादीनां मतं वक्ष्ये॥"*॥)
तालविशेषः। यथा, सङ्गीतदामोदरे।
"चतुर्द्वैतं विरामान्तं तालोऽयं गर्गसंज्ञितः॥"
गर्गरः, पुं, (ग गि शब्दे + भावे गः। गर्गं शब्दं रातीति। रा + "आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) मत्स्यभेदः। इति जटाधरः॥ गागरा इति भाषा॥ अस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः॥ अस्याकारगुणौ यथा, राजनिर्घण्टे।
"यः पीतवर्णोऽपि च पिच्छिलाङ्गः
दृष्टेषु रेखा बहुलः सगुल्कः।
स गर्गरो वर्व्वरनादवश्यो
जड़श्च शीतः कफवातकारी॥"
"गर्गरः पित्तलः किञ्चित् वातजित् कफकोपनः।"
इति भावप्रकाशः॥
गर्गरी, स्त्री, (गर्गं शब्दं रातीति। रा + कः। गौरादित्वात् ङीष्।) मन्थनी। दधिमन्थनपात्रम्। इत्यमरः। २। ६। ७४॥ कलसी। गागरी इति भाषा॥ यथा, तिथ्यादितत्त्वे।
"मेघादौ सक्तवो देया वारिपूर्णा च गर्गरी॥"
गर्गाटः, पुं, (गर्गेति शब्दं कृत्वा अटतीति। गर्ग + अट् + पचाद्यच्। ग्रकन्धादिवदकारलोपः।) मत्स्यविशेषः। तत्पर्य्यायः। योगनाविकः २। इति हारावली। १८६॥
गर्ज्ज, ऊर्ज्जाशब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ऊर्ज्जा बलम्। सेमक्तात् सरोरिति यः तत्करणकशब्दः। गर्ज्जति सिंहः। इति दुर्गादासः॥
गर्ज्ज, क खने। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क, गर्ज्जयति। इति दुर्गादासः॥
गर्ज्जं, क्ली, (गर्ज्जनमिति। गर्ज्ज + भावे घञ्।) हस्तिशब्दः। इति हेमचन्द्रः। ६। ४१॥ मेघादिशब्दश्च॥
गर्ज्जकः, पुं, (गर्ज्जतीति। गर्ज्ज + ण्वुल्।) मत्स्यविशेषः। गजाड़ इति भाषा॥ तत्पर्य्यायः। ग्राल्लः। ग्रालजः ३। इति शब्दरत्नावली॥ (ग्राल्लशब्देऽस्य विवृतिर्ज्ञातव्या॥)
गर्ज्जनं, क्ली, (गर्ज्ज + भावे ल्युट्।) शब्दः। (गर्ज्जयतेरनेनेति। गर्ज्ज + करणे ल्युट्।) कोपः। इति मेदिनी। ने। ५६॥
गर्ज्जरं, क्ली, मूलविशेषः। गाजर इति भाषा॥ तत्पर्य्यायः। पिण्डमूलम् २ पीतकन्दम् ३ सुमूलकम् ४ खादुमूलम् ५ सुपीतम् ६ नारङ्गम् ७ पीतमूलकम् ८। अस्य गुणाः। मधुरत्वम्। रुचिकारित्वम्। किञ्चित् कटुत्वम्। कफाघ्नाग्निक्रिमिमूलदाहपित्तश्लेष्मनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।
"गाजरं गञ्जनं प्रोक्तं तथा नारङ्गवर्णकम्।
गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु॥
संयाहि रक्तपित्तार्शोग्रहणीकफवातजित्॥"
इति भावप्रकाशः॥
गर्ज्जाफलः, पुं, (गर्ज्जा मर्म्मरध्वनिः फले यस्य। शुष्कपक्वफले शब्दबाहुल्यादस्य तथात्वम्।) विकङ्कटकवृक्षः। इति राजनिर्घण्टः॥ (गर्ज्जा गर्ज्जनमेव फलं यस्य।) युद्धम्। इति हेमचन्द्रः॥ भर्त्सनम्। उत्तेजनम्। इति शब्दरत्नावली॥
गर्ज्जिः, पुं, (गर्ज्ज ऊर्ज्जाशब्दे + "सर्व्वधातुभ्य इन्।" उणा। ४। ११७। इति इन्।) मेघशब्दः। इति हेमचन्द्रः। ६। ४२॥
गर्ज्जितं, क्ली, (गर्ज्ज + भावे क्तः।) मेघशब्दः। इत्यमरः। १। ३। ८॥ (रणादौ आस्फालनम्। यथा, हरिवंशे। १८२। ४६।
"बाण! किं गर्ज्जसे मोहात् शूराणां नास्ति गर्ज्जितम्।
एह्येहि युध्यस्व रणे किं वृथा गर्ज्जितेन ते॥")
कृतशब्दे च॥ (यदुक्तं स्मृतौ।
"सत्यायां गर्ज्जिते मेघे ग्राह्यचिन्तां करोति यः।
पतन्ति तस्य नश्यन्ति आयुर्विद्या यशो बलम्॥")

गर्जितः, पुं, (गर्ज्जो गर्ज्जनं जातोऽस्य । जातार्थे इतच् ।) मत्तहस्ती । इत्यमरः । २ । ८ । ३६ ॥

गर्त्तः, पुं, (गिरति ग्रसति खलिन् प्रतितं जीवजातादिकमित्यर्थः । गॄ निगरणे + "हसिभ्यिग्रिवामिदमीति ।" उणा । ३ । ८६ । इति तन् ।) भुवि खभ्रम् । गाड़ा इति भाषा ॥ तत्पर्य्यायः । अवटः २ । इत्यमरः । १ । ८ । २ ॥ भूरन्ध्रम् ३ दरः ४ खभ्रम् ५ । इति जटाधरः ॥ आवटिः ६ आवटुः ७ पृथिवीरन्ध्रम् ८ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । २१ । ६ ।

"धरण्यां विद्यते गर्त्ते निपपात लघुक्रमः ॥")

त्रिगर्त्तदेशः । कुकुन्दरः । इति मेदिनी । ते । १३ ॥ रोगभेदः । इति शब्दरत्नावली ॥ (मालवगर्भरूपगङ्करम् । यथा, भागवते । ३ । ३१ । ५ ।

"घ्रेते विण्मूत्रयोर्गर्त्ते स जन्तुर्जन्तुसम्भवे ॥"

कूपः । यथा, तत्रैव । ३ । १३ । ३४ ।

"यद्रोमगर्त्तेषु निलिल्युरध्वरास्तस्मै नमः कारणशूकराय ते ॥"

नरकविशेषः । यथा, मार्कण्डेये । २१ । १० ।

"निपपात महागर्त्ते तिमिरौघसमावृते ॥"

अश्वधुःसहस्रेभ्यो न्यूनगतिदेवखातभेदः । एतल्लक्षणं यथा, छन्दोगपरिशिष्टे ।

"धनुः सहस्राण्यष्टौ च गतिर्यासां न विद्यते । न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः ॥"

अस्योदाहरणं यथा, मनौ । ४ । २०३ ।

"नदीषु देवखातेषु तडागेषु सरःसु च । स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥"

गीर्य्यते स्तूयते वेदस्तुतिं कुर्व्वता जनेनेति । ग + तन् गुणश्च । देवरथः । यथा, ऋग्वेदे । ५ । ६२ । ८ ।

"आरोहथो वरुण ! मित्र ! गर्त्तमतश्चाथो अदितिं दितिं च ॥" "गर्त्तं रथम ॥" इति भाष्यम् ॥)

गर्त्तिका, स्त्री, (गर्त्तोऽस्त्यस्याः इति ठन् ।) तन्तुशाला । इति हेमचन्द्रः । ३ । ६५ ॥ तांतघर इति भाषा ॥

गर्द्द, कि रवे । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे-भ्वां-परं-अकं-सेट् ।) कि, गर्द्दयति गर्द्दति । रवः शब्दः । इति दुर्गादासः ॥

गर्द्दभं, क्ली, (गर्द्दते शब्द्यते विश्रूयते गन्धादिभिरिति यावत् । गर्द्द रवे । "कॄगॄशॄलिकलिगर्द्दिभ्योऽभच् ।" उणा । ३ । १२२ । इति अभच् ।) श्वेतकुसुदम् । इति हेमचन्द्रः ॥ (यथा, वैद्यकरत्नमालायाम् ।

"कैरवं चन्द्रकान्तञ्च गर्द्दभं कुसुदं कुसुत् ॥")

विड्लवणम् । इति रत्नमाला ॥

गर्द्दभः, पुं, (गर्द्दते गर्द्दयति वा कर्कशशब्दं करोतीत्यर्थः । गर्द्द कि रवे + "कॄगॄशॄलिकलीति ।" उणा । ३ । १२२ । इति अभच् ।) पशुविशेषः । गाधा इति भाषा । (यथा, मनौ । ८ । २६८ ।

"गर्द्दभाजाविकानान्तु दण्डः स्यात् पञ्च माषिकः ॥")

तत्पर्य्यायः । चक्रीवान् २ वालेयः ३ रासभः ४ खरः ५ । इत्यमरः । २ । ६ । ७७ ॥ राशभः ६ । इति तट्टीका ॥ शङ्कुकर्णः ७ भारगः ८ भूरिगमः ९ धूसराक्षयः १० वेशवः ११ धूसरः १२ । इति जटाधरः ॥ खरस्वनः १३ चिरमेही १४ पशुचरिः १५ चारपुष्पः १६ चारटः १७ ग्राम्याश्वः १८ । इति शब्दरत्नावली ॥ * ॥ अस्य मांसस्य गुणाः । किञ्चित् गुरुत्वं बलप्रदत्वञ्च । मूत्रस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । क्षारत्वम् । कफमेहावातभूतकम्योन्मादहरत्वञ्च । इति राजनिर्घण्टः ॥ (तथा च ।

"गार्द्दभं वा घनं मूत्रं तैलयोग्यं क्वचिद्भवेत् । सक्षारं तिक्तकटुकमुन्मादकुष्ठरोगजित् ॥"

इति हारीते प्रथमे स्थाने नवमेऽध्याये ॥

"गरचैतोविकारघ्नं तीक्ष्णं यकृन्निरोगनुत् । दीपनं गार्द्दभं मूत्रं कृमिवातकफापहम् ॥"

इति सुश्रुते सूत्रस्थाने ५४ अध्याये ॥)

तस्मात् गुणग्रिक्षा यथा,—

"अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति । सदा तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात् ॥"

इति चाणक्यम् । ७० ॥

गर्द्दभगदः, पुं, (गद्यते पीड्यतेऽनेनागद + करणे अच् । गदो रोगः । गर्द्दभनामको गदः शाकपार्थिववत् समासः ।) ज्वालागर्द्दभकरोगः । इति राजनिर्घण्टः ॥ अस्य लक्षणं ज्वालागर्द्दभशब्देद्रष्टव्यम् ॥

गर्द्दभशाकः, पुं, (गर्द्दभाख्यः शाकः । यद्वा, गर्द्दभप्रियः शाको यस्य ।) ब्रह्मयष्टिश्च । इति जटाधरः ॥

गर्द्दभशाका, स्त्री, (गर्द्दभशाक + टाप् ।) ब्रह्मयष्टिः । वामनहाटी इति भाषा ॥ इति रत्नमाला ॥

गर्द्दभशाखी, स्त्री, (गर्द्दभाख्या शाखा यस्याः । यद्वा गर्द्दभप्रिया शाखा अस्याः जातौ संज्ञायां वा ङीष् ।) भार्गी । इति राजनिर्घण्टः ॥

गर्द्दभाण्डः, पुं, (गर्द्दभं गन्धविशेषं अमति गच्छति प्राप्नोतीत्यर्थः । अम गत्याम् + "अमन्ताड्डः ।" उणा । १ । ११३ । इति डप्रत्ययः ।) वृक्षविशेषः । गान्धिभाट इति ख्यातः । अयं पत्रकाण्डफलादिभिरश्वत्थाकारः । गन्धपिप्पलः । इति केचित् । इति भरतः ॥ गर्द्दपिप्पली । इति ख्यातः । इति सारसुन्दरी ॥ तत्पर्य्यायः । कन्दरालः २ कपीतनः ३ सुपार्श्वकः ४ ब्रह्मः ५ । इत्यमरः । २ । ४ । ४२ ॥ शुक्री ६ ध्रुवः ७ कमण्डलुः ८ । इति जटाधरः ॥ गर्द्दभाण्डः ९ ब्रह्मश्रेष्ठः १० कन्दरालकः ११ । इति शब्दरत्नावली ॥ ब्रह्मवृक्षः । इति राजनिर्घण्टः ॥ पाकुड़ इति भाषा ॥ (कपीतनाश्वत्थशब्दयोरस्य विवृतिर्द्रष्टव्या ॥)

गर्द्दभाक्षयः, पुं, (गर्द्दभेन गन्धेन आक्षयति सर्द्दते इति । आ + क्षै + अच् । यद्वा गर्द्दभः आक्षयः आख्या अस्य ।) कुसुदम् । इति हेमचन्द्रः । ४ । २३० ॥

गर्द्दभिका, स्त्री, (गर्द्दभः दुर्गन्धमयपिड़कामेदो विद्यतेऽस्यामिति ठन् टाप् च ।) क्षुद्ररोगविशेषः । तल्लक्षणं यथा,—

"मण्डलं वृत्तसुत्सन्नं सरक्तं पिड़काचितम् । रुजाकरीं गर्द्दभिकां तां विद्यात् वातपित्तजाम् ॥"

तच्चिकित्सा यथा,—

"विदग्धामिन्द्रवृद्धाच्च गर्द्दभीं जालगर्द्दभम् । भैषजिकस्य विसर्पस्य क्रियया साधयेद्भिषक् ॥ पाके तु शोधयेदाद्यैः पक्वैर्मधुरभेषजैः ॥"

इति भावप्रकाशः ॥

गर्द्दभी, स्त्री, (गर्द्दभस्य पत्नीति स्त्रियां जातौ गौरादित्वाद्वा ङीष् ।) गर्द्दभपत्नी । ("सङ्घेव दृष्टभिः पुत्रैर्भारं वहति गर्द्दभी ॥") तस्याः क्षीरस्य गुणाः । बलकारित्वम् । वातश्वासहरत्वम् । मधुराम्लरसत्वम् । रूक्षत्वम् । दीपनत्वम् । पथ्यत्वञ्च । तद्विगुणाः । रूक्षत्वम् । उष्णत्वम् । लघुत्वम् । दीपनत्वम् । पाचनत्वम् । मधुराम्लरसत्वम् । रुच्यत्वम् । वातदोषनाशित्वञ्च । तन्नवनीतगुणाः । कषायत्वम् । कफवातनाशित्वम् । बल्यत्वम् । दीपनत्वम् । पाके लघुत्वम् । उष्णत्वम् । मूत्रदोषकारित्वञ्च । इति राजनिर्घण्टः ॥ क्षुद्रजन्तुविशेषः । गर्द्दभिकारोगः । इति मेदिनी । ने । १६ ॥ (अस्य लक्षणं यथा,—

"सा विद्वा वातपित्ताभ्यां ताभ्यामेव च गर्द्दभी । मण्डला विपुलोत्सन्ना सरागपिटिकाचिता ॥"

इति वाभटे उत्तरस्थाने एकत्रिंशेऽध्याये ॥)

अपराजिता । श्वेतकण्टकारी । कटभी । इति राजनिर्घण्टः ॥ (क्षुद्रकीटभेदः । यथाह सुश्रुतः ।

"पञ्चकीटो दुन्दुभिको मकरः शतपादकः । पञ्चालकः पाकमत्स्यः क्षय्यानुण्डोऽथ गर्द्दभी ॥")

गर्द्ह, क लिप्से । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, गर्द्हयति । इति दुर्गादासः ॥

गर्द्हः, पुं, (गर्द्ह्यते इति । गर्द्ह + भावे घञ् ।) स्पृहा । इति हेमचन्द्रः । ३ । ६४ ॥ गर्द्हभाण्डश्च । इति शब्दचन्द्रिका ॥

गर्द्हनः, त्रि, (गर्ध्यति स्पृहयतीति । गर्ध् + "जुचङ्क्रम्यदन्द्रम्यकृषिभ्यो युच् ।" ३ । २ । १५० । इति युच् ।) लुब्धः । इत्यमरः । ३ । ६ । २२ ॥

गर्व्व(ब्ब)ब्बे, तृ क ङ दर्पे । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-आत्मं-अकं-सेट् ।) दर्पोऽहङ्कारः । ङ, गर्व्वयते गर्व्वायते धनैर्नीचः । इति दुर्गादासः ॥

गर्व्व(ब्ब)ब्बे, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) गर्व्वति । इति दुर्गादासः ॥

गर्व्व(ब्ब)ब्बः, पुं, (गर्व्व + भावे अप् । यद्वा, गिरति मदमिति । गॄ निगरणे + "कगगृदृभ्यो वः ।" उणा । १ । १५५ । इति वः ।) अहङ्कारः । दर्पार्थादन्तगर्व्वधातोर्भावेऽल्प्रत्ययः ॥ इति सुग्धबोधम् ॥ (यथा, रामायणे । २ । ३१ । २० ।

"यदि दुःखो न रक्षेत भरतो राज्यमुत्तमम् । प्राप्य दुर्मनसा वीर ! गर्व्वं(ब्बं)ण च विशेष्यतः ॥")

गर्भः, पुं, (गीर्यते जीवसञ्चितकर्म्मफलदात्रा ईश्वरेण प्रकृतिबलात् जठरगह्वरे स्थाप्यते पुरुषशुक्रयोगेऽवासौ । गॄ + "अर्त्तिगृभ्यां भन् ।" उणा० । ३ । १५२ । इति कर्म्मणि भन् ।) भ्रूणः । तद्विवरणं यथा,—

"स्वर्गाच्च नरकान्मुक्तः स्त्रीणां गर्भो भवत्यपि ।
नाभिभूतश्च तस्यैव याति बीजत्वयं हि तत् ॥
कलनं बुद्बुदत्वञ्च ततः पेश्यौतमेव च ।
पेश्याघनसमोऽङ्गः स्यादङ्कुरस्तत उच्यते ॥
अङ्गानामथ चोत्पत्तिः पञ्चानामनुलोमकात् ।
उपाङ्गान्यङ्गुलीनेत्रनासास्रवणानि च ॥
प्ररोहं यान्ति चाङ्गेभ्यस्तद्वत्तेभ्यो नखादिकम् ।
त्वचो रोमाणि जायन्ते केशाश्चैव ततः परम् ॥
नरत्वाधीसुखः स्थित्वा दशमे च स जायते ।
ततस्तु वैष्णवी माया समाश्रयति मोहिनी ॥
बालत्वन्तु कुमारत्वं यौवनं वृद्धतामपि ।
ततश्च मरणं तत्तद्धर्म्ममाप्नोति मानवः ॥
एवं संसारचक्रेऽस्मिन् भ्राम्यते घटियन्त्रवत् ।"
इति गारुडे २२६ अध्यायः ॥

तस्य लक्षणं यथा,—

"गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकम् ।
प्रकृतिः सविकारा च तत् सर्व्वं गर्भसंज्ञकम् ॥
कालेन वर्द्धितो गर्भो यद्यङ्गोपाङ्गसंयुतः ।
भवेत्तदा स सुनिभिः शरीरीति निगद्यते ॥"*॥

तदन्यप्रकृतिर्यथा,—

"यदा नार्य्याव्रजेतायां दृश्यन्तौ कथञ्चन ।
सुचन्त्यौ शुक्रमन्योन्यमनस्थिस्तत्र जायते ॥
ऋतुस्नाता तु या नारी स्वप्ने मैथुनमाचरेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥
मासि मासि प्रवर्द्धेत स गर्भो गर्भलक्षणः ।
कारणं जायते तस्या वर्जितं पैत्तकैर्गुणैः ॥"
इति भावप्रकाशः ॥ * ॥

अस्य द्वादशधा गतिर्यथा,—

"मृषोऽनिलेन विगुणेन ततः स गर्भः
संस्थामतीत्य बहुधा सप्तपैति योनिम् ।
द्वारं निरुध्य शिरसा जठरेण कश्चित्
कश्चिच्छरीरपरिवर्त्तितकुक्षिदेहः ॥
एकेन कश्चिदपरन्तु भुजद्वयेन
तिर्य्यग्गतो भवति कश्चिदवाङ्मुखोऽन्यः ।
"पार्श्वापवृत्तगतिरेति तथैव कश्चि-
दिच्छाधा गतिरियं त्वपरा चतुर्द्धा ॥
सक्थीलकः प्रतिसुरः परिघोऽथ बीज-
स्तेषूर्द्ध्वबाहुचरणैः शिरसा च योनौ ।
सक्थी च यो भवति कीलकवत् सकीलो
द्वाभ्यां खुरैः प्रतिसुरः स हि कायसक्थी ॥
गच्छेद्भुजद्वयशिराः स च बीजकाख्यो
योनौ स्थितः सपरिघः परिघेण तुल्यः ॥"*॥

गर्भनाशलक्षणादि ।

"अपविद्धशिरा या तु क्षीणाङ्गी निरपत्रपा ।
नीलोन्नतशिरा हन्ति सा गर्भं स च तां तथा ॥
मानसागन्तुभिर्मातुरुपतापैः प्रपीडितः ।
गर्भो व्यापद्यते कुक्षौ व्याधिभिश्च प्रपीडितः ॥"*॥

अन्तर्दृतगर्भलक्षणं यथा,—

"गर्भास्रन्दनमाधीनां प्रणाशः श्यामवर्णता ।
भवेदुच्छ्वासपूतित्वं शोथश्चान्तर्दृते शिशौ ॥"
इति माधवकरः ॥ * ॥

("कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः ।
गर्भः सञ्जायते नार्य्याः सञ्जातो बाल उच्यते ॥
आधिक्ये रजसः कन्या पुत्रः शुक्राधिके भवेत् ।
नपुंसकं समत्वेन यथेच्छा पारमेश्वरी ॥"
इति पूर्ब्बखण्डे चतुर्थेऽध्याये शार्ङ्गधरेणोक्तम् ॥
"शुद्धे शुक्रार्त्तवे सत्वः स्वकर्म्मक्लेशचोदितः ।
गर्भः सम्पद्यते युक्तिवशादग्निरिवारणौ ॥
बीजात्मकैर्महाभूतैः सूक्ष्मैः सत्त्वानुगैश्च सः ।
मातुराहाररसजैः क्रमात् कुक्षौ विवर्द्धते ॥
तेजो यथार्कैरग्नीनां स्फटिकेन तिरस्कृतम् ।
नेत्रनं दृश्यते गच्छत् सत्वो गर्भाशयं तथा ॥
कारणानुविधायित्वात् कार्य्याणां तत्स्वभावता ।
नानायोन्याकृतीः सत्वो धत्तेऽतो हतलोहवत् ॥
अतएव च शुक्रस्य बाहुल्याज्जायते पुमान् ।
रक्तस्य स्त्री तयोः साम्ये क्लीवः शुक्रार्त्तवे पुनः ॥
वायुना बहुधा भिन्ने यथास्वं वक्त्रपत्रता ।
वियोनिविकृताकारा जायन्ते विकृतैर्मलैः ॥"
"पूर्ब्बयोड्गवर्षा स्त्री पूर्ब्बविण्येन सङ्गता ।
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि ॥
वीर्य्यवन्तं सुतं क्षते ततो न्यूनाब्दयोः पुनः ।
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा ॥"
"शुद्धशुक्रार्त्तवं स्वच्छं सरक्तं मिथुनं मिथः ।
क्षेत्रैः पुंसवनैः स्निग्धं शुद्धशोणितवस्तिकम् ॥
नरं विशेषात् क्षीराद्यैर्मधुरौषधसंस्कृतः ।
नारीं तैलेन मांसेन पित्तलैः ससुपाचरेत् ॥"
"मासेनोपचितं रक्तं घमनीभ्यान्तरो पुनः ।
ईषत् क्षरणं विगन्तुश्च वायुर्योनिमुखान्नुदेत् ॥
ततः पुष्ये तथादेव कल्याणध्यायिनीग्रहम् ।
स्रजालङ्काररहिता दर्भसंस्तरशायिनी ॥
क्षीरेयथावकं स्तोकं कोष्णशोधनकर्षणम् ।
मद्यं शरावे हस्ते वा शुक्लीतब्रह्मचारिणी ।
चतुर्थेऽह्नि ततः स्नाता शुक्लमाल्याम्बरा शुचिः ॥
इच्छन्ती भर्तृसदृशं पुत्रं पश्येत् पुरः पतिम् ।
ऋतुस्तु द्वादशनिशाः पूर्ब्बास्तिस्रश्च निन्दिताः ॥
एकादशी च युग्मासु स्यात् पुत्रोऽन्यासु कन्यका ।
उपाध्यायोऽथ पुत्रीयं कुर्व्वीत विधिवद्विधिम् ॥
नमस्कारपरायासु शूद्राया मन्त्रवर्ज्जितम् ।
अवन्ध्य एवं संयोगः स्यादपत्यञ्च कामतः ॥
सन्तोऽप्यापुरपत्यार्थं दम्पत्योः सङ्गतं रहः ।
दुरपत्यं कुलाङ्गारो गोत्रे जातं महत्यपि ॥
इच्छेतां यादृशं पुत्रं तद्रूपचरितांश्च तौ ।
चिन्तयेतां जनपदांस्तदाचारपरिच्छदौ ॥
कर्म्मान्ते च पुमान् सर्पिः क्षीरशाल्योदनाशितः ।
तैलमाषोत्तराहारा तत्र मन्त्रं प्रयोजयेत् ॥
अहिरसि आयुरसि सर्व्वतः प्रतिष्ठासि धाता
त्वाम् ।
दधातु विधाता त्वां दधातु ब्रह्मवर्चसा भवेति ॥
ब्रह्मा दक्षप्रजापतिर्विष्णुः सोमः सूर्य्यस्तथाग्निरो ।
भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम् ॥
सान्त्वयित्वा ततोऽन्योन्यं संविशेतां सुदान्वितौ ।
उत्तानां तन्मना योषित् तिष्ठेदङ्गैः सुसंस्थितैः ॥
तथाहि बीजं गृह्णाति दोषैः स्वस्थानमास्थितैः ।
लिङ्गन्तु सद्यो गर्भाया योन्यां बीजस्य संग्रहः ॥
लम्बिर्गुरुत्वं स्फुरणं शुक्रास्रानुबन्धनम् ।
हृदयस्पन्दनं तन्द्रा तृड्ग्लानिर्लोमहर्षणम् ॥
अव्यक्तः प्रथमे मासि सप्ताहात् कललो भवेत् ।
गर्भः पुंसवनान्यत्र पूर्ब्बं यक्तैः प्रयोजयेत् ॥
बली पुरुषकारो हि दैवमप्यतिवर्त्तते ।
पुष्ये पुरुषकं हैमं राजतं वाथ वायसम् ॥
क्षत्रामिवर्द्धं निर्व्वाप्य क्षीरे तस्याञ्जलिं पिबेत् ।
गोरदक्षमपामार्गं जीवकर्षभसैर्यकान् ॥
पिबेत् पुष्ये जले पिष्टान् एकद्वित्रिसमस्तशः ।
क्षीरेण श्वेतदूर्व्वामूलं नासापुटे स्वयम् ॥
पुत्रार्थं दक्षिणे सिञ्चेत् वामे दुहितृवाञ्छया ।
पयसा लक्षणमूलं पुत्रोत्पादस्थितिप्रदम् ॥
नासयास्येन वा पीतं वटशृङ्गाग्रकल्कतथा ।
ओषधीर्जीवनीयाश्च वाक्यान्तरमयोजयेत् ॥
उपचारः प्रियहितैर्भर्त्तुश्चैव गर्भधृक् ।
नवनीतघृतक्षीरैः सदा चैनामुपाचरेत् ॥
अतिव्यवायमायासं भारं प्रावरणं गुरु ।
अकालजागरस्वप्नकठिनोत्कटकासनम् ॥
शोकक्रोधभयोद्वेगवेगशस्त्रक्षविधारणम् ।
उपवासाध्वतीक्ष्णोष्णगुरुविष्टम्भिभोजनम् ॥
रक्तं निरसनं स्रंसकूपेचां मद्यमामिषम् ।
उत्तानशयनं यच्च स्त्रियो नेच्छन्ति तत्त्यजेत् ॥
तथा रक्तसुतिं शुद्धिं वस्तिमामासतोऽस्मात् ।
एभिर्गर्भः स्रवेदामः कुक्षौ शुष्येत् म्रियेत वा ॥
वातलैश्च भवेद्गर्भः कुब्जान्धजड़वामनः ।
पित्तलैः स्खलतिः पिङ्गः स्निग्धो पाण्डुः कफात्मभिः ॥
व्याधींस्तस्या मृदुसुखैरतीक्ष्णैरौषधैर्जयेत् ।
द्वितीये मासि कललाहतः पेश्यथवार्ब्बुदम् ॥
पुंस्त्रीक्लीवाः क्रमात्तेभ्यस्तत्र यत्तस्य लक्षणम् ।
यक्तीभवति मासेऽस्य तृतीये गात्रपञ्चकम् ॥
मूर्द्धा द्वे सकथिनी बाहू सर्व्वसूक्ष्माङ्गजन्म च ।
सममेव हि मूर्द्धाद्यैर्ज्ञानञ्च सुखदुःखयोः ॥
गर्भस्य नाभौ मातुश्च हृदि नाड्यौ निबध्यते ।
यया स पुष्टिमाप्नोति केदार इव कुल्यया ॥
चतुर्थे यक्तताङ्गानाक्षेतनायाञ्च पञ्चमे ।
षष्ठे बायुग्निरारोम-बल-वर्ण-नख-त्वचाम् ॥
सर्व्वैः सर्व्वाङ्गसम्पूर्णो भावैः पुष्यति सप्तमे ।
गर्भेणोत्पीड़िता दोषास्तस्मिन् हृदयमाश्रिताः ॥
कुर्व्वन्ति विविधं कुर्व्वन्ति गर्भिण्याः किल्बिषाणि च ।
नवनीतं हितन्तत्र कोलाम्बुमधुरौषधैः ॥
सिद्धमल्पपटुस्नेहं लघुस्वादु च भोजनम् ।
चन्दनोशीरकल्केन लिम्पेदूरुस्तनोदरम् ।
ओजोऽष्टमे सञ्चरति माता पुत्रौ सुहृत्क्रमात् ।
तेन तौ स्वास्थसुदितौ तत्र जातो न जीवति ।
म्रियुरोजोऽनवस्थानात् नारीसंश्रयिता भवेत्

क्षीरपेया च पेयान्न बहुताम्बावनं हितम्।
मधुरैः साधितं सर्पिः पुराणशालितण्डुलैः॥
शुष्कमूलकशोणाकबालबेल्वं प्रशस्यते।
घृताक्तक्षत्रिकतो वस्तिः स तैलहतसैन्धवः॥
तस्मिंस्त्रैकाहयतेऽपि कालः क्षतेरतः परम्।
वर्षादिकारकारी स्यात् कुक्षौ वातेन धारितः॥
शूलस्य नवमे मासि स्निग्धो मांसरसौदनः।
बहुस्नेहा यवागूर्वा पूर्वोक्तश्चानुवासनम्॥
तत एव पिचुश्चास्या योनौ नित्यं निधापयेत्।
वातघ्नपत्रभङ्गाम्भः घृतं स्नानेऽन्वहं हितम्॥
निःस्नेहाङ्गी न नवमान्मासात् प्रभृति वासयेत्।
प्राग्दक्षिणस्तनस्तन्या पूर्वं तत् पार्श्वचेष्टिनी॥
पुत्रामदोहदप्रसन्नरता पुंसप्रदक्षिणी।
उन्नते दक्षिणे कुक्षौ गर्भे च परिमुह्यते॥
पुत्रं सूतेऽन्यथा कन्यां या चेच्छति दृषद्गतिम्।
वृक्षवादित्रगान्धर्व-गन्धमाल्यप्रिया च या॥
क्षीरं तत् सङ्करे तत्र मध्यं कुक्षेः वसुप्रतम्।
यमौ पार्श्वद्वयोन्नामात् कुक्षौ द्रोण्यामिव स्थिते॥
प्राक् चैव नवमान्मासात् सूतिका गर्भमाश्रयेत्।
देये प्रशस्ते सम्भारैः सम्पन्नं साधकेऽहनि॥
तत्रोदीक्षेत सा सूतिं सूतिका परिवारिता।
अद्य श्वः प्रसवे स्नानैः कुक्षिश्चिश्यताननः॥
अधो गुरुतमरुचिः प्रसेको बहुमूत्रता।
वेदनोरूदरकटीपृष्ठहृद्बस्तिपर्वसु॥
योनिभेदस्रुतोदस्फुरणसदनवाताश्च च।
आवीनामनुषङ्गात्ततो गर्भोदकस्रुतिः॥
अथोपस्थितगर्भां तां कृतकौतुकमङ्गलाम्।
हस्तस्पृष्टप्राणवतां सम्यक्तोयानुवेचिताम्॥
पाययेत् सहृतां पेयां ततो भूयश्च वेश्मताम्।
आसुप्तसकथिसुप्तानामभक्तार्द्धं पुनः पुनः॥
अधोनाभेर्विमृद्नीयात् कारयेच्चाभ्यङ्गमनम्।
गर्भः प्रयात्यधोगत्यभिमुखं वृद्धिमोक्षतः॥
व्याविश्य जठरं गर्भो वस्तेरुपरि तिष्ठति।
आयो हि स्तरयत्वेनां सङ्कामारोपयेत्ततः॥
अथ सन्नीडिते गर्भे योनिमस्रावः प्रवाययेत्।
बहुपूर्वं प्रवाहेत वाढ़माप्रसवाच्च वा॥
दर्शयेत्तां सुहृद् पुत्रजन्मशब्दजनादिभिः।
प्रजायान्ति तथाप्राप्ताः सूतिकोपद्रवादिताः॥
सूपवेशनभङ्गे तु योनिं शस्त्राहिकच्युकैः।
हिरण्यपुष्पीमूलञ्च पाणिपादेन धारयेत्॥
सुवर्चलां विशल्यां वा जरायुपतनेऽपि च।
कार्यमेतत् तथोत्क्षिप्य वाजोरेनां विकम्पयेत्॥
कटीमाकोटयेत् पार्श्वा स्त्रियौ गाढं निपीडयेत्।
ताम्रकल्कं सशैवेयो गर्भं दद्यात् कुशेशयः॥
मूर्ध्वजाङ्गलिकीतुम्बी सर्षपक्षुद्रवर्षपैः।
एवम् ह्याप्यो समस्तैर्वा योनिलेपनधूपनम्॥
कुडतात्रीशुक्लकल्कं वा सुरामण्डेन पाययेत्।
यूथिकां वा कुलत्थानां विल्वलेखाद्यवेन वा॥
घृताक्तसर्षपाजाजीशिग्रुयुतैश्चक्रिचक्रकैः।
सहिङ्गुकुडमदनैर्मूत्रे क्षीरे च सार्षपम्॥
तैलं सिद्धं हितं पायौ योन्यां वाप्यनुवासनम्।
घृतपुष्पा वचाकुष्ठबलासर्षपकल्कितः॥
निरूहः पातयत्याशु सर्वोपद्रवशोऽपराम्।
तत्सङ्गे ह्यनिलो हेतुः सा निर्व्याप्यात् तच्चयात्।
कुम्भला पाणिगाक्लेन हरेत्कृष्णखेन वा।
सुप्तगर्भा परां योनिं तैलेनाङ्क्त्य महंयेत्॥
मकलाक्षे शिरोवस्तिं कोलमूले तु पाययेत्।
सचूर्णितं यवक्षारं घृतेनोद्यालकेन वा॥
धान्याम्लं वा गुडक्षौद्रविलातकरजोऽन्वितम्॥"

इति वाभटे शारीरस्थाने प्रथमोऽध्यायः॥*॥

अथ गर्भोपचारः।

आत्रेय उवाच।

"प्रथमे मासि मधुकं मधुपुष्पाञ्जि चैवहि।
नवनीतेन पयसा मधुरं पाययेच्च सा॥
द्वितीये मासि काकोली मधुरं पाययेत्तथा।
तृतीये क्षीरं श्रेष्ठं चतुर्थे च घृतौदनम्॥
पञ्चमे पायसं दद्यात् षष्ठे च मधुरं दधि।
सप्तमे घृतखण्डेन चाष्टमे घृतपूरकम्॥
नवमे विविधान्नानि दशमे दोहदस्तथा।
मासे तृतीये सम्प्राप्ते दोहदं भवति स्त्रियाः॥
यद्यत् कामयते सा च तत्तद्दाङ्क्षिगवरः।
वर्ज्ययेद्द्विदलान्नानि विदाहीनि गुरूणि च॥
अम्लानि सोद्यचीराणि गुर्विणीनां विवर्ज्ययेत्।
सूतिका भक्षयीया न न च सूरणकन्दकाः॥
रसोनञ्च पलाण्डुञ्च सन्धक्षो गुर्विणीक्षिया।
सूरणानि प्रदेयानि गौल्यानि सरसानि च॥
पथ्ये हितानि चैतानि गुर्विणीनां सदा भिषक्।
व्यायामं मैथुनं रोषं ग्रीष्मचक्रमणन्तथा॥
वर्ज्ययेद्गुर्विणीनाञ्च जायते सुखसम्भवः॥

अथोपपन्नं विदितमपि स्त्रीणामाचारेण प्रथमाश्विकमष्टमाश्विकं वा। आञ्जनमङ्गलादिभिर्गीतमोजनमपि कर्तव्यम्। दोहदादिह परिपूर्णेन्द्रियवान् शूरः पण्डितः श्रीमान् पुत्रो जायते॥" इति माधवनिदानभाविते हारीतोत्तरे तृतीयस्थाने गर्भोपचारो नाम अष्टचत्वारिंशोऽध्यायः॥*॥

अथ चलितगर्भचिकित्सा।

आत्रेय उवाच।

"प्रथमे मासि गर्भस्य चलनं दृश्यते यदि।
तदा मधुकयष्ट्याह्वा चन्दनं रक्तचन्दनम्॥
पयसा तोयितं पीतं तेन गर्भः स्थिरो भवेत्।
द्वितीये मासि चलिते त्रयाणां गागकेशरम्॥
तृतीये मासि गर्भस्य चलनं दृश्यते यदा।
तदा मधुकयष्टीञ्च शर्करां पयसा पिबेत्॥
चतुर्थे मासि दाहश्च पिपासा मूलमेव च।
ज्वरेच्च स्त्रीणां यदि गर्भश्चलते तदोशीरचन्दन-
नागकेशरधातकीकुसुमशर्करोक्षुतमधुदधि पाय-
येत्। पञ्चमे मासे चलिते गर्भे दाडिमी-
पत्राणि चन्दनं दधि मधु च पाययेत्। षष्ठे-
मासि गैरिकं शालिपर्णिकां गोमयभस्म उदकं
परिस्रुतं घृतकं चन्दनं शर्करया सह पिबेत्।
सप्तमे मासि गोक्षुरसमङ्गापद्मकचन्दनसुशीरं मधुरं
पाययेत्। अष्टमे मासि रोधं मधुमागधिकाञ्च
सह दुग्धेन शीतवतीजाक्षलिते गर्भे स्त्रीणां
सुखं सम्पद्यते।" इति माधवनिदानभाविते
हारीतोत्तरे तृतीये स्थाने चलितगर्भचिकित्सा
नामैकोनपञ्चाशत्तमोऽध्यायः॥*॥

"नरो धातुबलेनापि जीवितञ्चाप्य दृश्यते।
तस्माच्च मैथुनात् सम्यग्जायते गर्भसम्भवः॥

हारीत उवाच।

संयोगेन विना प्राज्ञ! कथं गर्भो न जायते।
संयोगेन विना पुंसां फलं वा न कथं भवेत्॥
दृश्यवन्न कथं स्त्रीणां फलोत्पत्तिः प्रदृश्यते।
एतत् सृष्टो महाभाग! प्रोवाच ऋषिपुङ्गवः॥

आत्रेय उवाच।

विरञ्चानाञ्च वल्लीनां स्थावराणाञ्च पुत्रक!।
तत्र धातुसमं बीजं सह योगेन वर्त्तते॥
न भिन्नदृष्टिस्त्रस्येव दृश्यते हृश्य पुत्रक!।
स्थावराणाञ्च सर्वेषां शिवशक्तिमयं विदुः॥
निश्चलोऽपि शिवो ज्ञेयो वामिशक्तिर्मनोहरा!।
तत्र स्त्रीपूरुषगुणा वर्त्तन्ते समयोगतः॥
आत्मपुष्पं फलं तद्वत् बीजं शुक्रमयं विदुः।
स्त्रीणां रजोमयं रेतो बीजाद्यमिन्द्रियं नरे॥
तस्मात् संयोगतः पुत्रो जायते गर्भसम्भवः।
प्रथमेऽहनि रेतश्च संयोगात् कललञ्च यत्॥
जायते बुद्बुदाकारं शोणितञ्च दशाहनि।
घनं पञ्चदशाहे स्यात् विंशाहे मांसपिण्डकम्॥
मासेकेन च पिण्डस्य पञ्च तत्त्वं प्रजायते।
पञ्चाशद्दिवसे प्राप्ते अङ्गराणाञ्च सम्भवः॥
मासद्वये तु सम्प्राप्ते हस्तपादौ प्रवर्त्तितौ।
सार्द्धमासत्रये प्राप्ते शिरश्च सारवद्भवेत्॥
चतुर्थके च मासानां चक्षुषश्चाप्य दृश्यते।
पञ्चमे च नखौघः स्यात् षष्ठे प्रस्फुरणं भवेत्॥
अष्टमे मासि याते च व्यत्ययोगः प्रवर्त्तते।
मासे तु नवमे प्राप्ते जायते तस्य चेष्टितम्॥
जायते तस्य वैराग्यं गर्भवासस्य सारवात्।
दशमे च प्रसूयेत तथैकादशमासि वा॥
अथ दोषबलेनापि गर्भो वापि प्रसूयते।
वातसंप्रेरिते गर्भे अपूर्वे दिवसे यदि॥
प्रसूतये वाप्यथ तद्गर्भे बालः प्रदृश्यते।"

इति हारीते शारीरस्थाने प्रथमोऽध्यायः॥*॥)

शिग्रुः (शीर्य्यते निशीर्य्यते निःक्षिप्यते वीर्य्यं योनि-
रर्थ्यते वाञ्छिन्। गिरति सिञ्चति निषेकं करोति
रेतोऽत्र वा। गृ य वा+भन्।) कुक्षिः। (यथा,
महाभारते। १४। १८। ६।
"यथा जोहस्य निस्यन्दो निषिक्तो विन्दियत्तम्।
उपैति तद्विजानीहि गर्भे जीवप्रवेशनम्॥")
सन्धिः। घनसकरटकम्। इति मेदिनी॥ मे। १
मध्यम्। (यथा, आर्य्यासप्तशत्याम्। १०६।
"क्षेत्रकगर्भे गन्धादरेव दूरादमी हृतसुपेताः॥")
अपवरकः। इति हैमचन्द्रः॥ गङ्गादिसन्निहित-
देशः। यथा,—
"भाद्रशुक्लचतुर्द्दश्यां यावदाक्रमते जलम्।
तावद्गर्भे विजानीयात् तदूर्द्धं तीरमुच्यते॥"

इति द्रव्यगुणतत्त्वम्॥

(आभ्यन्तरिकवस्तुमात्रम्। यथा, गोः रामायणे। ४।२७।३।
"अष्टमासधृतं गर्भं भास्करस्य गभस्तिभिः।
रसं सर्वसमुद्राणां द्यौः प्रसूते रसायनम्॥")

गर्भकं, क्ली, (गर्भ+संज्ञायां कन्। यद्वा चन्द्रस्य गर्भइयमिव कायतीति। के+कः।) रजनीइन्दम्। इति हेमचन्द्रः।२।५८॥ दुइ रात्रि इति भाषा॥

गर्भकः, पुं, (गर्भे केशगर्भे केशमध्ये इति यावत् कायते प्रकाश्यते शोभते इत्यर्थः। यद्वा गर्भ इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्।) केशमध्यस्थितमाल्यम्। इत्यमरः। २।७।१३५। खोपार माला इति भाषा॥

गर्भकरः, पुं, (गर्भं करोति गर्भदोषं निवारयति व्यवहारयोगेन इति। कृ+टः।) पुत्रजीववृक्षः। इति भावप्रकाशः॥

गर्भघातिनी, स्त्री, (गर्भं घातयति स्रावयतीति। हन्+णिच्+णिनिः ङीप् च।) लाङ्गलिकावृक्षः। इति रत्नमाला॥

गर्भनडः, पुं, (गर्भस्य नड इव। पृषोदरादित्वात् अकारलोपे साधुः।) नाभिगुड़कः। इति त्रिकाण्डशेषः॥ नाभिर गोंड़ इति भाषा॥

गर्भदः, पुं, (गर्भं ददाति उत्पादयति व्यवहारेणेति। दा+कः।) पुत्रजीववृक्षः। इति राजनिर्घण्टः॥

गर्भदात्री, स्त्री, (गर्भं ददातीति। दा+तृच् ङीप्।) स्तुपविशेषः। गर्भदा इति ख्याता। तत्पर्य्यायः। पुत्रदा २ प्रजादा ३ अपत्यदा ४ दृष्टिप्रदा ५ प्राब्भिमाता६ तापसद्रुमसन्निभा७। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। नारीपुष्पादिदोषपित्तदाहश्रमनाशित्वम्। गर्भसम्भूतिदात्रीत्वञ्च। इति राजनिर्घण्टः॥

गर्भद्रुत्, [द्] पुं, (गर्भं द्रुदति प्रेरयति नाशयतीत्यर्थः। द्रुद्+क्विप्।) कलिकारीवृक्षः। इति भावप्रकाशः॥ विषलाङ्गलिया इति भाषा॥

गर्भपाकी, [न्] पुं, (गर्भस्य पाकः परिपाकः परिणतिरित्यर्थः साध्यतयास्त्यस्य इति इनिः।) वटिकाशोहिः। इति हेमचन्द्रः। ४।२३४॥ बेठे धान इति भाषा॥

गर्भपातः, पुं, (गर्भस्य पातः पतनं विच्युतिरित्यर्थः।) पञ्चमषष्ठमासीयस्य कठिनशरीरस्य गर्भस्य पतनम्। (यथा, माधवकरोक्तवैद्यके।
"आ चतुर्थात् ततो मासात् प्रस्रवेद्गर्भविच्युतिः।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः॥"
तथाच सुश्रुते निदानस्थाने १ अध्याये।
"गर्भपातनिमित्तञ्च शोणितातिस्रवाच्च यः।
अभिघातनिमित्तञ्च न सिध्यत्यपतानकः॥")
अस्य प्रमाणादि विशेषतो गर्भस्रावशब्दे द्रष्टव्यम्॥

गर्भपातकः, पुं, (गर्भं पातयति नाशयतीति। पत्+णिच+ण्वुल्।) रक्तशोभाञ्जनवृक्षः। इति शब्दरत्नावली॥

गर्भपातनः, पुं, (गर्भं पातयतीति। पत्+णिच+ल्युः।) रोहितकवृक्षः। इति भावप्रकाशः॥

गर्भपातनी, स्त्री, (गर्भपातन+संज्ञायां ङीप्। गौरादित्वादित्येके।) कलिकारीवृक्षः। इति राजनिर्घण्टः॥

गर्भपातिनी, स्त्री, (गर्भं पातयतीति। पत्+णिच्+णिनिः। स्त्रियां ङीप्।) विशल्यावृक्षः। इति शब्दरत्नावली॥

गर्भरूपः, त्रि, (गर्भे देहकोषे रूपं लावण्यादिकं यस्य। यद्वा गीर्य्यते निगीर्य्यते प्रकाश्यते रूपं यस्मात्। तारुण्यप्रभावादिति यावत्।) तरुणः। इति भूरिप्रयोगः॥

गर्भवती, स्त्री, (गर्भो विद्यतेऽस्याः अस्यां वा। अस्त्यर्थे मतुप्। मस्य वत्वम्।) अन्तरापत्या। (यथा, भट्टाभारते। ३।१३४।१७।
"दशैव मासान् बिभर्ति गर्भवत्यः।
दशैरका दशदाशा दशार्हाः॥")
तत्पर्य्यायः। अन्तर्वत्नी २ गुर्विणी ३ गर्भिणी४ सत्त्वा ५ आपन्नसत्त्वा ६ दोहदवती ७। इति शब्दरत्नावली॥ उदरिणी ८ गुर्वी ९। इति हेमचन्द्रः। ३।२०२॥ अथ सद्योगृहीतगर्भाया लक्षणम्। यथा,—
"शुक्रशोणितयोर्योनिरसावोऽथ अमोद्भवः॥
सावसादः पिपासा च ग्लानिः स्मृतिभंगे भवेत्॥"
तस्या उत्तरोत्तरकालीनलक्षणम्। यथा,—
"स्तनयोर्मुखकार्ष्ण्यं स्यात् रोमराज्युद्गमस्तथा।
अक्षिपक्ष्माणि चाप्यस्याः संमील्यन्ते विशेषतः॥
हृदयेत् पद्मसुत्कापि गन्धादुद्विजतेऽशुभात्।
असेकः सदनञ्चैव गर्भिण्या लिङ्गमुच्यते॥" *॥
पुत्रगर्भवत्या लक्षणम्। यथा,—
"पुत्रगर्भयुतायास्तु नार्य्या मासि द्वितीयके।
गर्भो गर्भाशये लक्ष्यः पिण्डाकारोऽपरं शृणु॥
दक्षिणाक्षिभुजस्तनं स्यात् प्राक्चीरं दक्षिणस्तने।
दक्षिणोरुः सुपुष्टः स्यात् प्रसन्नमुखवर्णता॥
पुन्नामधेयद्रव्येषु स्वप्नेष्वपि मनोरथः।
आम्रादि फलमाप्नोति स्वप्नेषु कमलादि च॥" *॥
कन्यागर्भवतीलक्षणम्। यथा,—
"कन्यागर्भवतीगर्भे षष्ठे मासि द्वितीयके।
पुत्रगर्भस्य लिङ्गानि विपरीतमवेक्षते॥" *॥
नपुंसकगर्भवतीलक्षणम्। यथा,—
"नपुंसकं यदा गर्भो भवेद्गर्भोऽव्युदाहृतिः।
उन्नते भवतः पार्श्वे पुरस्तादुदरं महत्॥"
इति भावप्रकाशः॥

गर्भश्रय्या, स्त्री, (गर्भे गर्भगता वा श्रय्येव। गर्भगतस्यापत्यस्य वासस्थानमित्यर्थः।) गर्भोत्पत्तिस्थानम्। तत्तु पित्ताशयपक्वाशययोर्मध्यवर्त्ति। तस्या रूपं यथा, भावप्रकाशे।
"शुक्रनाभ्याहृतियोनिरावर्त्ता सा च कीर्त्तिता।
तस्यास्तृतीये स्रावर्त्ते गर्भश्रय्या प्रकीर्त्तिता॥
यथा रोहितमत्स्यस्य सुखं भवति रूपतः।
तत् संश्रयाच्च तथारूपा गर्भश्रय्या विदुर्बुधाः॥"
(यथा, वेणीसंहारे। ३ अङ्के।
"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात् पाण्डवीनां चमूनां

यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा॥")

गर्भस्रावः, पुं, (गर्भस्य स्रावच्युतिः पात इत्यर्थः।) गर्भपातः। चतुर्थमासपर्य्यन्तं शोणितरूपगर्भस्य स्रवणम्। पेटखसा इति भाषा॥ तस्याशौचं यथा,—
"यदि गर्भो विपद्येत स्रवते वापि योषितः।
यावन्मासान् स्थितो गर्भस्रावहिनानि शुद्धकम्॥"
इति गारुड़े १०७ अध्यायः॥
"रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति।"
इति मनुः।५।६६॥ *॥
"अर्वाक् षण्मासतः स्त्रीणां यदि स्यात् गर्भसंस्रवः।
तदा माससमैस्तासामशौचं दिवसैः स्मृतम्॥
अत ऊर्द्ध्वन्तु पतने स्त्रीणां स्याद्दशराचकम्।
सद्यःशौचं सपिण्डानां गर्भस्रावाच्च वा ततः॥"
इति कूर्म्मपुराणम्॥ *॥
("अन्तराजन्ममरणे शेषाहोभिर्विशुध्यति।
गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम्॥"
इति याज्ञवल्क्यः। ३।२०॥)
अन्यत् अशौचशब्दे द्रष्टव्यम्॥ *॥ *॥

अथ गर्भस्रावनिदानलक्षणे।
"भयाभिघाततीक्ष्णोष्णपानाशननिषेवणात्।
गर्भे पतति रक्तस्य सञ्चूलं दर्शनं भवेत्॥
आ चतुर्थात् ततो मासात् प्रस्रवेद्गर्भविद्रवः।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः॥
गर्भोऽभिघातविषमाशनपीड़नाद्यैः
पक्वं द्रुमादिव फलं पतति स्वयेन।
म्लानः करोति पवनः खलु म्लानगर्भं
शूलञ्च योनिजठरादिषु सूत्रसङ्गम्॥"
इति माधवकरः॥

अथ गर्भस्रावपातयोर्निदानमाह।
"गान्धर्व्यधर्म्माध्वगमनयानस्खलनपीड़नैः।
ज्वरोपवासोत्पतनप्रहाराजीर्णधावनैः॥
वमनाच्च विरेकाच्च कुक्ष्यनाद्गर्भपातनात्।
तीक्ष्णधारोष्णकटुकतिक्तरूक्षनिषेवणात्॥
वेगाभिघाताद्विषमादासनाच्चयनाद्भयात्।
गर्भे पतति रक्तस्य सञ्चूलं दर्शनं भवेत्॥"
गर्भपातनात् नियमेन गर्भपातनशीलं द्रव्यं तस्मात्॥ गर्भस्य स्रावपातयोः पूर्व्वरूपमाह। गर्भेपततीत्यादि। पततीति स्रावेण पातेन वा पतिष्यति॥ *॥

स्रावपातयोरवधिमाह।
आ चतुर्थात्ततो मासात् प्रस्रवेद्गर्भविद्रवः।
ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः॥
आ चतुर्थात् मासात् चतुर्थमासपर्य्यन्तम्। गर्भस्य विद्रवः शोणितरूपः। गर्भः स्रवति शोणितमिति भोजवचनात्। स्थिरशरीरस्य कठिनशरीरस्य गर्भस्य। गर्भपातस्य दृष्टान्तं दर्शयति।
गर्भोऽभिघातविषमाशनपीड़नाद्यैः
पक्वं द्रुमादिव फलं पतति स्वयेन।

यथा वृन्तलग्नं पक्वं फलं अभिघातेनाकाल एव पतति तथा गर्भोऽप्यभिघातादिनाऽकालेऽपि पतति ॥ * ॥

अथ गर्भस्रावस्य चिकित्सा ।

गुर्विण्या गर्भतो रक्तं स्रवेद्यदि सुदुर्मुहुः । तन्निरोधाय सुस्निग्धसुत्पलादि घृतं पिबेत् ॥

उत्पलादिगणमाह ।

उत्पलं नीलमारक्तं कह्लारं कुमुदं तथा । श्वेताम्भोजञ्च मधुकसुत्पलादिरयं गणः ॥ संग्रीलितो हरत्येव दाहं तृष्णां हृदामयम् । रक्तपित्तञ्च मूर्च्छाञ्च तथा हृद्दिमरोचकम् ॥*॥

अथ गर्भपातस्योपद्रवानाह ।

प्रसंसमाने गर्भे स्याद्दाहं शूलञ्च पार्श्वयोः । पृष्ठरुक् प्रदरागौ मूत्रसङ्गश्च जायते ॥ प्रसंसमाने पतति ॥ * ॥ अथ गर्भस्य स्थानान्तरगमने चोपद्रवानाह ।

स्थानात् स्थानान्तरं तस्मिन् प्रयात्यपि च जायते । आमपक्वाशयादौ तु क्षोभः पूर्व्वेऽप्युपद्रवाः ॥ पूर्व्वेऽप्युपद्रवाः पार्श्वे शूलादयः ॥ * ॥

तच्चिकित्सामाह । [चरेत् ।

स्निग्धाः घृतादयः क्रियास्तेषु दाहादिषु समाः कुशकाशोशीरदूर्व्वाणां मूलैर्गोक्षुरकस्य च ॥ घृतं दुग्धं सितायुक्तं गर्भिण्याः शूलनुत् परम् । स्वदंष्ट्रामधुकक्षुद्राम्बानैः सिद्धं पयः पिबेत् ॥ शर्करामधुसंयुक्तं गुर्व्विणीवेदनापहम् । अम्बानः पुष्यजातिः । अयं वाणपुष्पं इति गौड़ादौ प्रसिद्धः ।" इति भावप्रकाशः ॥

गर्भस्रावी, [न्] पुं, (गर्भं उदरस्थमिषुं स्रावयति विद्योतयति सेवनेनेति । गर्भ + सु + णिच् + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति णिनिः ।) छिन्नालर्त्तुः । इति राजनिर्घण्टः ॥

गर्भागारं, क्ली, (गर्भ इव आगारं गृहम् । गृहाभ्यन्तरवर्त्तित्वात् तथात्वम् ।) गृहमध्यभागः । शयनगृहम् । गृहान्तर्यं हं इत्येके । इति भरतः ॥ तत्पर्य्यायः । वासगृहम् २ । इत्यमरः । २ । २ । २८ ॥ (यथा, कथासरित्सागरे । ७ । ७१ ।

"साप्यष्टमीं समुद्दिश्य तत्र राजसुता ययौ । एकैव देवं द्रष्टुञ्च गर्भागारादथाविशत् ।" * ॥

गर्भः कुक्षिः आगारं गृहमिव । अग्नेरागारभूमेस्तथात्वम् । यद्वा, गर्भस्य उदरस्थाग्नेरागारम् ।) गर्भाशयः । इति राजनिर्घण्टः ॥

गर्भाधानं, क्ली, (गर्भं आधीयतेऽनेनेति । आ + धा + करणे ल्युट् ।) दशसंस्कारान्तर्गतप्रथमसंस्कारः । यथा,—

"गर्भाधानञ्चतौ पुंसः सवनं स्यन्दनात् पुरा । ऋतौ ऋतुकाले । स च कालो याज्ञवल्क्येनोक्तः । षोड़शर्त्तुनिशाः स्त्रीणां तासु युग्मासु संविशेत् ।" इति मलमासतत्त्वम् ॥ तत्र क्रमः । "ऋतुस्नानादूर्द्धं निषेकदिवसे सायं सन्ध्यायामतीतायां पतिः शुचिः सुगन्धिः सुवेषः मन्त्रेण सूर्य्यार्घं दत्त्वा पूर्व्वाभिमुखोपविश्याच्च वध्वा दक्षिणहस्तेनोपस्थं स्पृशन् मन्त्रं जपेत् ततः पुनरपि उपस्थं स्पृशन् मन्त्रं जपेत् । ततो भार्य्यामुपेयात् ।" इति भवदेवभट्टः ॥ तद्विहितनिषिद्धनक्षत्रादि यथा,—

"ज्येष्ठा मूला मघाश्लेषा रेवती कृत्तिकाश्विनी । उत्तराचितयं त्यक्त्वा पर्व्ववर्ज्यं व्रजेत्तदा ॥"

पर्व्वाण्याह विष्णुपुराणम् ।

"चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा । पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥"

शौनकः ।

"पुनर्वसुश्च चैतानि तिष्यो हस्तः पुनर्वसुः । अभिजित् प्रौष्ठपदैवानुराधाषाढ़ाश्चयुक् ॥"

अन्यच्च । [पुष्यश्च ।

"हस्तो मूलं श्रवणः पुनर्व्वसुर्मृगशिरस्तथा गर्भाधानादिकार्य्येषु पुंनामायं गणः शुभदः ॥ रोहिण्यन्तकचित्राहिविशाखघृतवर्ज्जिते । मे पुंग्रहे स्त्रीशुक्रा फलवन्मनसिष्यते ॥

पुष्यार्कचन्द्राग्निवसूत्तरपुनर्व्वसुः स्वादाषाढ़्यृक्षहरिभाद्रपदद्वयञ्च ।
एतानि पुंसि कथितानि शुभानि भानि पान्येषु गर्भपतनादिभयञ्च भेत्तु ॥

नन्दा भद्रा भवेत् पुंसि स्त्रीषु पूर्णा जया स्मृता । रिक्ता नपुंसके ज्ञात्वा तिथीस्तासां परिवर्ज्जयेत् ॥

स्त्रीणामृतुर्भवति षोड़शवासराणि तत्रादितः परिहरेच्च निशाश्चतस्रः । युग्मासु रात्रिषु नरा विषमासु कार्य्याः कुर्य्यान्निषेकमथ तासपि पर्व्ववर्ज्यम् ॥

मूलर्क्षे स्मृतिदुष्टत्वान्नार्भाधानेषु नेष्यते । तस्य पुंसवनादौ तु पुंसंज्ञत्वे प्रयोजनम् ॥ (मतान्तरे तु चतुर्थेऽहनि स्नानानन्तरं नार्य्यः शुध्यन्ति । यथाह भरद्वाजः ।

"प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी । तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ॥"

एवं धर्म्मशास्त्रेऽपि । यथा,—

"भर्त्तुः स्मृत्या चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला । पञ्चमेऽहनि योग्या स्याद्देवे पित्र्ये च कर्म्मणि ॥") यथा, याज्ञवल्क्यः ।

"एवं गच्छन् स्त्रियं श्यामां मघां मूलाञ्च वर्ज्जयेत् । युग्मे युग्मान्तु पुत्रं लक्षण्यं जनयेत् पुमान् ॥"

श्यामां आहारलाघवादिना क्षीणाम् । फलञ्च । "युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु । तस्मादयुग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम् ॥ पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः । (समेऽपुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्य्ययः ॥"

इति मनुः । ३ । ४८—४९ ॥)

एवञ्च ।

"युग्मायामपि रात्रौ चेत् श्रोणितं प्रचुरं यदा । कन्या च पुंवद्भवति शुक्राधिक्ये पुमान् भवेत् ॥ कन्यैवायुग्मरात्रौ च प्राधान्यं समवायिनोः । निमित्तकारणात् कालात् शुक्रशोणितयोर्यतः ॥

पौड़ा रात्रौ भौमदृष्टे ग्रहार्के मासं मासं योषितामार्त्तवं स्यात् ।
चंद्रे शुक्रान्तं यच्च रक्तं जवाभं तद्गर्भार्थं वेदनागन्धहीनम् ॥"

गर्भयोग्यर्त्तुनिरूपणम् ॥

"पापासंयुतमध्यगेषु दिनकृत्लग्नेषु पापांशगे तद्भूनेषु शुभोज्झितेषु विकुजे छिद्रे विपापे सुखे । सद्युक्तेषु त्रिकोणकण्टकविधुष्वायत्रिषष्ठान्विते पापे युग्मनिशासनाख्यसमये पुंशुद्धितः सङ्गमः ॥ मूलमघाश्विनीनामाद्यं ज्येष्ठान्त्यसर्पांशमन्त्यम् । चतुर्थांशं गण्डपदं त्यक्त्वा षोड़शाहे ऋतौ व्रजेत् ॥"

अशुद्धौ तु भृगुबलभीमे ।

"अन्त्यं पौष्णेन्द्रसर्पांशमाद्यं पित्र्यभमूलगम् । गण्डं दग्धत्रयं ख्यातं सर्व्वकार्य्येषु कल्पितम् ॥ पुमान् विंशतिवर्षेषु पूर्णषोड़शवर्षया । स्त्रिया सङ्गच्छते गर्भाशये शुद्धे रजस्यपि ॥ अपत्यं जायते भद्रं तयोर्न्यूनेऽधमं स्मृतम् । मासैशैः सितकुजगुरुरविर्शनिसौम्यलग्नपश्यांशैः । कलुषैः पीड़ा गर्भस्य पीड़ितैः पतनमन्यथा पुष्टिः ॥ कालुष्यं मासेशेन पापग्रहयोगगुरुशुक्रस्थितिनीचग्रहयोगोपग्रहयोगादि । मासेशजन्मनक्षत्रे पापग्रहयोगः पीड़ा येषां जन्मर्क्षाद्धि । १६ । ३ । २० । २२ । ११ । ८ । २७ । २ । ६ । मासेशशान्त्यादौ ऋते न गर्भपीड़ा ॥

अथ प्रश्नात् पुत्रादिज्ञानम् ।

"विवाहलग्नं विषमर्क्षसंस्थः सौरोऽपि पुंजन्मकरो विलग्नात् । स्त्रादिग्रहाणामवलोक्य वीर्य्यं वाच्यः प्रश्नतो पुरुषोऽङ्गना वा ॥"

इति ज्योतिस्तत्त्वम् ॥ * ॥

अपि च । गोभिलः ।

"यदा ऋतुमती भवति उपस्तशोणिता तदा सम्भवकालः । ऋतुः प्रजाजननयोग्यकालः । तन्निमित्तेन नैमित्तिकं गमनं कार्य्यं अकुर्व्वतः प्रत्यवायान्नियमः । यदुक्तं स्मृतेः ॥

"ऋतुमतीन्तु यो भार्य्यां संनिधौ नोपसर्पति । अवाप्नोति स मन्दात्मा भ्रूणहत्याव्रतात्रयं ॥"

ज्योतिषे ।

"ज्येष्ठा मूला मघाश्लेषा रेवती कृत्तिकाश्विनी । उत्तराचितयं त्यक्त्वा पर्व्ववर्ज्यं व्रजेत्तदा ॥"

विष्णुपुराणम् ।

"चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा । पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥"

याज्ञवल्क्यः ।

"षोड़शर्त्तुर्निशा स्त्रीणां तासु युग्मासु संविशेत् । यत्र षोड़शाहो रात्र्यात्मकः कालस्य सावनत्वात् पुंसवननामकरणयोरपि सावनगणनाया युक्तत्वाच्च संस्कारमात्रे सावनगणनया व्यवहारः ॥ तथा च याज्ञवल्क्यः ।

"गर्भाधानञ्चतौ पुंसः सवनं स्यन्दनात् पुरा । षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च ॥ अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः । षष्ठेऽन्नप्राशनं मासि चूड़ा कार्य्या यथाकुलम् ॥ एवमेनः शमं याति बीजगर्भसमुद्भवम् ॥"

चतुर्थे स्नन्हते ततः इति वचनात् स्नन्हनात् पूर्व्वं ह्रतीयमासः पुंसवनकालः। अत्र चतुर्थमासस्य सौरत्वे चान्द्रत्वे वा निषेकमासस्यापि तथात्वे तदाद्यन्तदिननिषेके सति अधिकन्यूनकालयोर्गर्भस्नन्हनमनियतमापद्येत सावने तु नियतम्। तेनात्र सावनगणना युक्ता बोधिद्यवहारविद्वांश्च। अहन्येकादशे नाम रत्नत्रापि अशौचापगमे नामधेयमिति विष्णुस्मरणात् स्नतकोत्तरदिनपरमेकादशपदम्।

"स्नतकादिपरिच्छेदो दिनमासाब्दपात्रतः।
मध्यमग्रहसुस्पित्व सावनेन प्रकीर्त्तितः॥"

इति सूर्य्यसिद्धान्तवचनेन स्नतकस्य सावनदिनघटितत्वात् तदुत्तरदिनस्यापि तथात्वम्। अतो दिनमासवर्षगणना सावनेनेति। शुभाशुभविवेचनन्तु सौरेण ज्योतिःशास्त्रात्। अतएव पितामहः।

"विवाहादौ स्नतः सौरो यज्ञादौ सावनो मतः।"

अत्र द्वितीयादिशब्दात् संस्कारपरिग्रहः।

"गर्भाधाने सदा ग्राह्या वारा भौमरवीज्यकाः।"

गोभिलः। दक्षिणेन पाणिना उपस्थमभिस्पृशेत् विष्णुर्योनिं कल्पयत्वेतया ऋचा। गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके। गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ॥ हिरण्ययी अरणी यं निर्मन्थतो अश्विना। तं ते गर्भं हवामहे दशमे मासि सूतवे॥ यथाग्निः पृथिवी अनु यथा द्यौरनु मारुतम्। एवा त्वं दशमासो सहावेहि जीवते सुतम्॥ यथेयं पृथिवी मही भूतानां गर्भमादधे। एवा धारय मे गर्भं अनु सूतवा उ सर्व्वतः॥ यथा द्यौर्यथा पृथिवी यथा यज्ञो अजायत। एवा त्वं दशमासो सहावेहि जीवते सुतम्॥ यथा द्यौश्च पृथिवी च न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः दशमासो सहावहि॥ यथा सोमो यथा भगो यथा मित्रो बृहस्पतिः। एवा त्वं दशमासो सहावेहि जीवते सुतम्॥ यथा वातो यथा वनं यथा पर्व्वत एजति। एवा दशमासो सहावेहि जीवते सुतम्॥ यथा सूर्य्यो विपश्चितो जगत् सर्व्वं प्रसर्पति। एवा दशमासो सहावेहि जीवते सुतम्॥ यथा सप्त ऋषयो देवा अदितिर्दक्षयज्ञिया। एवा त्वं दशमासो सहावेहि जीवते सुतम्॥ यथा सरस्वती सिन्धुर्व्वितस्तिरावरीवृधे। एवा त्वं दशमासो सहावेहि जीवते सुतम्॥ यथा द्यावापृथिवी

चतुर्थे मासि स्थिरत्वमापद्यते गर्भस्तस्मात्तदा गर्भिणी गुरुगात्रत्वमधिकमापद्यते विशेषेण।

पञ्चमे मासि गर्भस्य मांसशोणितोपचयो भवत्यधिकमन्येभ्यो मासेभ्यस्तस्मात्तदा गर्भिणी कार्श्यमापद्यते विशेषेण।

षष्ठे मासि गर्भस्य बलवर्णोपचयो भवत्यधिकमन्येभ्यो मासेभ्यस्तस्मात्तदा गर्भिणी बलवर्णहानिमापद्यते विशेषेण।

सप्तमे मासि गर्भः सर्व्वभावैराप्यायते सहसा तस्मात्तदा गर्भिणी सर्व्वाकारैः क्लान्ततमा भवति।

अष्टमे मासि गर्भश्च मातृतो गर्भतश्च माता रसमुपजीवतः संवाहिनीभिर्भृङ्गुरोजः परस्परत आददाते गर्भस्य सम्पूर्णत्वात् तस्मात्तदा गर्भिणी सुदुर्मुदा युक्ता भवति सुदुर्मुदा च स्थाना तस्मात्तदा गर्भस्य जन्मयाप्यबलौजसोऽनवस्थितत्वात् तस्मैवमभिसमीक्ष्याष्टमं मासमगर्भिण्यमित्याचक्षते कुशलाः।" इति चरके शारीरस्थाने चतुर्थेऽध्याये॥

"स्तनयोः क्लोम्नश्च मुखता रोमराज्युद्गमस्तथा।
अक्षिपक्ष्माणि चाप्यस्याः संमील्यन्ते विशेषतः॥
अकामतश्छर्दयति गन्धाद्वृद्धिश्च तेऽभवत्।
प्रसेकः सदनञ्चापि गर्भिण्या लिङ्गमुच्यते॥

तदा प्रभृत्येव चायामं व्यवायमपतर्पणमतिकर्षणं दिवास्वप्नं रात्रिजागरणं शोकं यानावरोहणं भयसुत्कटकासनं चेत्यान्ततः क्षेत्रादिक्रियां शोणितमोक्षणवमनाकाङ्क्षे वेगविधारणञ्च न सेवेत।

दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते।
स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते॥"
"इन्द्रियार्थांस्य यान् यान् सा भोक्तुमिच्छति गर्भिणी।
गर्भाबाधभयात्तांस्तान् भिषगाहृत्य दापयेत्॥
सा प्राप्तदौहृदा पुत्रं जनयेत गुणान्वितम्।
अलब्धदौहृदा गर्भे लभेतात्मनि वा भयम्॥
येषु येष्विन्द्रियार्थेषु दौहृदं वै विमानना।
प्रजायेत सुतस्यापि तेष्वसंस्तेष्विन्द्रियेषु॥
राजसद्मनि यस्या दौहृदं जायते स्त्रियाः।
अर्थवन्तं महाभागं कुमारं सा प्रसूयते॥
दृक्कूलपद्मकोशेषु भृङ्गवादिषु दौहृदात्।
अलङ्कृतं वर्णवन्तं पुत्रं ललितं सा प्रसूयते॥
आश्रमे संयतात्मानं धर्म्मशीलं प्रसूयते।
देवताप्रतिमायासु प्रसूते पार्थदोपमम्॥
दुर्गमे व्यालजातीनां हिंसाशीलं प्रसूयते।
गोधामांसाशने पुत्रं सुतीक्ष्णं धारणात्मकम्॥
गवां मांसे च बलिनं सर्व्वक्लेशसहन्तथा।
माहिषे दौहृदाच्छूरं रक्ताक्षं लोमसंयुतम्।
वराहमांसात् खड्गासुं शूरं सञ्जनयेत् सुतम्॥
मार्गाद्विक्रान्तजङ्घाकं सदा वनचरं सुतम्।
क्षमाद्विजमनसं नित्यभीतञ्च तैत्तिरात्॥
अतोऽशुद्धेषु वा वारी समभिधाति दौहृदम्।
अरोगाचारशीलैः सा समानं जनयिष्यति॥

कर्म्मणा चोदितं जन्तोर्भवितव्यं पुनर्भवेत्।
यथा यथा दैवयोगादौहृदं जनयेद्धृदि॥"
इति सुश्रुते शारीरस्थाने तृतीयेऽध्याये॥)

क्षीरावीरुत्। इति शब्दचन्द्रिका॥ क्षीराइ इति भाषा॥

गर्भिण्यवेक्ष्यं, क्ली, (गर्भिण्या गर्भवत्या अवेक्ष्यं यत्नेन परिचर्य्या।) कुमारभृत्या। गर्भिणीपरिचर्य्या। इति त्रिकाण्डशेषः॥

गर्भोपघातिनी, स्त्री, (गर्भं उपहन्तीति। उप+हन्+"सुप्यजातौ णिनिस्ताच्छील्ये।" ३।२।७८। इति णिनिः। गर्भे उपघातयतीति। हन्+णिच्+णिनिः। इति केचित्।) अवृतौ वृषोपगमनादिवशात् यस्या गर्भपातो भवति सा गौः। गावड़ाफेला गाइ इति भाषा॥ तत्पर्य्यायः। वेहत २। इत्यमरः। २। ६। ६६॥

गर्म्भुत्, क्ली, (गौर्य्यते भक्ष्यते प्राणैरिति। गृ निगरणे+"ग्रो सुट् च।" उणां। १। ६७। इति उति सुड़ागमश्च।) लवणान्यविशेषः। इत्यमरो भरतश्च॥ मयना इति ख्यातः। गड़ गड़ इति केचित्॥ (गौर्य्यते भक्ष्यते यद्वा गौर्य्यते विज्ञाप्यते विख्याप्यतेऽनेनेति। गृ+उति सुट् च।) स्वर्णम्। गड़ः। इति मेदिनी। ते। १०७॥

गर्म्भूटिका, स्त्री, (गर्म्भुत इव उटं पत्रमस्याः। कप्+टाप्+अत इत्वञ्च। दृषोदरात् तकारलोपः।) व्रीहिभेदः। माड़ुया इति भाषा॥ तत्पर्य्यायः। गर्म्भूच्छदः २। इति रत्नमाला॥

गर्म्भोटिका, स्त्री, (गर्म्भूटिका+निपातनात् ऊकारस्योकारः।) जरड़ीलवणम्। इति राजनिर्घण्टः॥

गर्व्व, मदे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) मद इह अहङ्कारः। नीचो गर्व्वति सम्पदा। इति दुर्गादासः॥

गर्व्वः, पुं, (गर्व्व मदे+भावे घञ्। यद्वा, गिरति मदमत्तस्यात्मानमुद्गिरतीव इति। गृ निगरणे+"कृगृशृदृभ्यो वः।" उणां। १। १५५। इति वः।) अहङ्कारः। इत्यमरः। १।७।२२॥ (यथा, रामायणे। २। ३१। २०।

"यदि दुःखो न रचेत भरतो राज्यसुत्तमम्।
प्राप्य दुर्म्मनसा वीर! गर्व्वेण च विशेषतः॥")

अहङ्कारस्तथाध्यात्मं सर्व्वसंसारकारणम्।
अभिमानोऽधिभूतञ्च वलक्षाधिदैवतम्॥"
इति महाभारते आश्वमेधिकपर्व्व॥
(अयं हि वभिचारिभावविशेषः। तल्लक्षणं यथा, साहित्यदर्पणे। ३। १५०।

"गर्व्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः।
अवज्ञासविलासाक्षदर्शनाविनयादिकृत्॥")

गर्व्वाटः, पुं, (गर्व्वेण मदेन अटतीति। अट्+अच्। प्रकरणादित्वात् अलोपः।) द्वारपालः। इति त्रिकाण्डशेषः॥

गर्व्वितः, त्रि, (गर्व्वः सञ्जातोऽस्य। गर्व्व+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्। यद्वा, गर्व्व+कर्त्तरि क्तः।) गर्व्वयुक्तः। अहङ्कृतः। इति जटाधरः॥ (यथा, रघुः। ६। ५५।

"आविर्बभूव कुशगर्भसुखं न्यगाणां
यूथं तदम्बरगर्व्वितलक्ष्यसारम्॥")

गर्ह, ङ कुत्सने। इति कविकल्पद्रुमः। (भ्वां-आत्मं-सकं-सेट्।) रेफोपधः। ङ, गर्हते। कुत्सनं निन्दा। इति दुर्गादासः॥ (यथा, रामायणे। २। ८२। १०।

"स वाष्पकलया वाचा कलहंसस्वरो युवा।
विललाप सभामध्ये जगर्हे च पुरोहितम्॥")

गर्ह, कि कुत्सने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) कि, गर्हयति गर्हेति। इति दुर्गादासः॥ (यथा, भागवते। ६।७।१०।

"गर्हयामास सदसि स्वयमात्मानमात्मना॥"
तथा, तत्रैव। ४। ४। १०।
"जगर्ह साऽमर्षविपन्नया गिरा
ध्रुवद्विषं धूमपथश्रमस्मयम्॥")

गर्हणं, क्ली, (गर्ह कुत्सने+भावे ल्युट्।) निन्दा। इत्यमरः। १। ६। १३॥

गर्हा, स्त्री, (गर्ह्यते निन्द्यते इति। गर्ह कुत्सने+"गुरोश्च हलः।" ३। ३। १०३। इति स्त्रियां अः ततष्टाप्।) निन्दा। इति शब्दरत्नावली॥ (यथा, मनौ। १। १८७।

"कुलपतनं जनगर्हां
बन्धनमपि जीवितव्यसन्देहम्।
अङ्गीकरोति कुलटा
सततं परपुरुषसंसक्ता॥")

गर्हितं, त्रि, (गर्ह्यते स इति। गर्ह+क्त। यद्वा, गर्हा सञ्जाताऽस्य। गर्हा+इतच्।) निन्दितम्। यथा, माघे। ५०।

"अतिदर्पे हता लङ्का अतिमाने च कौरवाः।
अतिदाने बलिर्बद्धः सर्व्वमत्यन्तगर्हितम्॥"

गर्ह्यः, त्रि, (गर्ह्यते निन्द्यते इति। गर्ह ङ निन्दायाम्+"ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्।) अधमः। निन्द्यः। इत्यमरः। ३। १। ५४॥ (यथा, मनुः। ५। १४६।

"पिता भर्त्ता सुतैर्व्वापि नेच्छेद्विरहमात्मनः।
एषां हि विरहेण स्त्री गर्ह्ये कुर्य्यादुभे कुले॥")

गर्ह्यवादी, [न्] त्रि, (गर्ह्यं वदतीति। गर्ह्य+वद्+"सुप्यजातौ णिनिस्ताच्छील्ये।" ३। २। ७८। इति णिनिः।) कड़चः। इत्यमरः। ३। १। ३७॥

गल, भक्षे। स्रावे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-स्रावे अकं-सेट्।) गलति। इति दुर्गादासः॥ (स्रावार्थे यथा, कथासरित्सागरे। ११। ५७।

"इति मे तव कल्याङ्गमपश्यन्त्या गलन्त्यमी।
सन्तापक्षयिताः प्राणा इव वाष्पाम्बुबिन्दवः॥")

गल, क ङ स्रावे। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) स्रावः। क्षरणम्। क ङ, गालयते रक्तं क्षतस्य। इति दुर्गादासः॥

गलः, पुं, (गलति भक्षयत्यनेन । गल् + करणे अप् । यद्वा गीर्य्यतेऽनेन । ग + करणे अप् ।) कण्ठः । इत्यमरः । २ । ३ । ८८ ॥ गला इति भाषा ॥ (यथा, पञ्चतन्त्रे । ३ । १६४ ।
"प्रजा न रञ्जयेद्यस्तु राजा रक्षादिभिर्गुणैः । अजागलस्तनस्येव तस्य राज्यं निरर्थकम् ॥"* ॥
गलति चरति ग्रालदृष्ट्यादिरिति । गल् + पचाद्यच् ।) सर्ज्जरसः । इति मेदिनी । ले । १३ ॥ धुना इति भाषा ॥ वाद्यभेदः । (गलति निःसरति जालादिरिति ।) गड़कमत्स्यः । इति शब्दरत्नावली ॥

गलकः, पुं, (गलति निःसरति जालादिभ्य इति। गल चरणे + ण्वुल् ।) गड़कमत्स्यः ॥ इति शब्दरत्नावली ॥

गलकम्बलः, पुं, (गले कम्बल इव ।) गवां गलस्थितकम्बलाकृतिर्मांसम् । तत्पर्य्यायः । सास्ना २ । इत्यमरः । २ । ६ । ६२ ॥ ("सास्ना गोगलकम्बलः ।" इत्युज्ज्वलदत्तः ॥)

गलगण्डः, पुं, (गले गण्डः स्फोटक इव ।) गलरोगविशेषः । गरगण्ड इति भाषा ॥ अथ गलगण्डाधिकारः । तत्र गलगण्डस्य सामान्यं लिङ्गमाह ।
"निबद्धः क्वथ्युर्यस्य सुष्कवल्लभते गले ।
महान् वा यदि वा ह्रस्वो गलगण्डं तमादिशेत् ॥"
निबद्धो दृढ़ः अचलो वा । सुष्कवत् अण्डवत् । गल इति हनुमन्ययोरुपलक्षणम् । तथा च भोजः ।
"महान्तं श्लोथमल्पं वा हनुमन्या गलाश्रयम् ।
सुष्कवल्लम्बमानं तु गलगण्डं विनिर्दिशेत् ॥"* ॥

संप्राप्तिमाह ।
"वातः कफश्चापि गले प्रदुष्टौ
मध्ये तु संरुध्य तथैव मेदः ।
कुर्व्वन्ति गण्डं क्रमशः खलिङ्गैः
समन्वितं तं गलगण्डमाहुः ॥"
क्रमशः शनैः शनैः । खलिङ्गैः वातकफमेदोलक्षणैः ॥ * ॥

वातिकमाह ।
"तोदान्वितः श्यावसिरावनद्धः
श्यावारुणो वा पवनात्मकस्तु ।
पानव्यथायुक्तचिरप्रवृद्धपाकी
यदृच्छया पाकमियात् कदाचित् ॥
वैरस्यमास्यस्य च तस्य जन्तोः
भवेत्तथा तालुगलप्रशोषः ।"
चिरप्रवृद्धपाकः चिरेण दृढ़िरपाकश्च यस्य सः ॥

श्लैष्मिकमाह ।
"स्थिरः सवर्णो गुरुरल्पकण्डूः
शीतो महांश्चापि कफात्मकस्तु ।
चिराच्च वृद्धिं भजतेऽचिराद्वा
प्रपच्यते मन्दरुजः कदाचित् ॥
माधुर्य्यमास्यस्य च तस्य जन्तोः
भवेत्तथा तालुगलप्रलेपः ।"
कदाचित् प्रपच्यते वा पाकोऽपि चिराद्भवति ॥ प्रलेपः श्लेष्मणा ॥ * ॥

मेदोजमाह ।
"स्निग्धो मृदुः पाण्डुरनिष्टगन्धो
मेदोऽन्वितः कण्डुयुतो रुजश्च ।
प्रलम्बतेऽलाबुवदल्पमूलो
देहानुरूपश्चयवृद्धियुक्तः ॥
स्निग्धास्यता तस्य भवेच्च जन्तोः
गलेन शब्दं कुरुते च नित्यम् ।"
देहक्षये कार्श्ये क्षयं देहवृद्धौ वृद्धिं यातीत्यर्थः ॥ * ॥

असाध्यमाह ।
"क्षताक्षसन्नं मृदुसर्व्वगात्रं
संवत्सरातीतमरोचकार्त्तम् ।
क्षीणञ्च वेद्यो गलगण्डयुक्तं
भिन्नस्वरं नैव नरं चिकित्सेत् ॥"* ॥

अथ गलगण्डचिकित्सा ।
"सर्षपान् शिग्रुबीजानि शृङ्गबीजातसीयवान् ।
मूलकस्य च बीजानि तक्रेणाक्षेन पेषयेत् ॥
गलगण्डो गण्डमाला ग्रन्थयश्चैव दारुणाः ।
प्रलेपादस्य नश्यन्ति विलयं यान्ति सत्वरम् ॥१॥
रक्षोघ्नतैलयुक्तेन जलकुम्भीकभस्मना ।
लेपनं गलगण्डस्य चिरोत्थस्यापि नाशनम् ॥
रक्षोघ्नः सर्षपः ॥ २ ॥
श्वेतापराजितामूलं प्रातः पिष्ट्वा पिबेन्नरः ।
सर्पिषा नियताहारो गलगण्डप्रशान्तये ॥ ३ ॥
तिक्तालाबुफले पक्के सप्ताहसुषितं जलम् ।
सद्यः स्याद्गलगण्डघ्नं पानात् पथ्यानुसेविनाम् ॥४॥
तैलं पिबेच्चाण्डतवल्लिविल्वा
हिंस्राक्षयाद्रक्षकपिप्पलीभिः ।
सिद्धं बलाभ्यां सह देवदारु
कृताय नित्यं गलगण्डरोगी ॥
वृक्षकोऽत्र तुलसिः । उक्तञ्च निघण्टौ धन्वन्तरिणा।
'तुलसिस्तुलसी कपोतस्तु नन्दिवृक्षोऽथ वृक्षकः ।'
बलाभ्यां बलातिबलाभ्याम्। अण्डतादितैलम् ॥५॥
यवसूपपटोलादिकटुरूक्षान्नभोजनम् ।
वमनं रक्तमोक्षश्च गलगण्डे प्रयोजयेत् ॥ ६ ॥
दापयेद्गलगण्डे तु प्रच्छन्नानि बहूनि च ।
गण्डगोपालिकां पिष्ट्वा तत्र लेपं प्रकल्पयेत् ॥
अवश्यं नश्यति क्षिप्रं गलगण्डो गदोऽसुना।
प्रलेपस्यानुभूतोऽयं बहुधा बहुभिर्जनैः ॥
प्रच्छन्नानि पक्वना इति लोके । गण्डगोपालिका गण्डगुया इति लोके प्रसिद्ध आम्रवाटिकायां सुलभः कीटविशेषः ॥ ७ ॥
लवणं जलकुम्भ्यास्तु कणापूर्णेन संयुतम् ।
प्रभाते नित्यमश्नीयात् गलगण्डप्रशान्तये ॥" ८ ॥

इति भावप्रकाशः ॥

गलग्रहः, पुं, (गलं कण्ठं गृह्णाति मत्स्यादिति। ग्रह् + अच् । यद्वा गलः मत्स्यकण्ठो गृह्यतेऽस्मिन् । ग्रह् + अधिकरणे अप् ।) व्यञ्जनविशेषः । 'तत्पर्य्यायः । मत्स्यग्रहः २ । इति शब्दचन्द्रिका ॥ तिथिविशेषः । यथा,—
"क्षयपञ्चे चतुर्थी च सप्तम्यादिदिनत्रयम् ।
त्रयोदशीचतुष्कञ्च अष्टावेते गलग्रहाः ॥"
इति मदनरत्ने नारदः ॥

अपि च ।
"आरम्भानन्तरं यत्र प्रत्यारम्भो न विद्यते ।
गर्गादिमुनयः सर्व्वे तमेवाहुर्गलग्रहम् ॥"
इति राजमार्त्तण्डः ॥
(रोगविशेषः । यथा,सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ॥"
"यस्य श्लेष्मा प्रकुपितस्तिष्ठत्यन्तर्गले शिरः ।
आशु सञ्जनयेच्छोथं जायतेऽस्य गलग्रहः ॥"
इति चरके सूत्रस्थानेऽष्टादशोऽध्याये ॥
गलग्रहरोगवत् परित्यागाग्रह्यत्वात् पौड़ादायकत्वाच्च लक्षणाग्रह्या पोष्यात्मीयजनोऽपि बोध्यते । यथा, स एव मे गलग्रहः । इति लोकप्रसिद्धिः ॥)

गलन्तिका, स्त्री, (गलतीति । गल् + शृट । उगितत्वात् ङीप् । "ग्रभ्रस्जसृगलेर्नित्यम् ।" ७ । १ । ८१ । इति तुम् स्वार्थे कन् ह्रस्वश्च ।) कर्करी । स्वल्पवारिधानिका । इत्यमरः । २ । ६ । ३१ ॥ (यथा, काश्मीरखण्डे ।
"एषा कार्य्या च वैशाखे देवे देया गलन्तिका ॥")

गलमेखला, स्त्री, (गलस्य कण्ठस्य मेखलेव ।) गलसूत्रम् । कण्ठाभरणविशेषः । तत्पर्य्यायः । सूत्रावली २ । इति हारावली । १७४ ॥

गलव्रतः, पुं, (गलो गिलनमेव व्रतं नियमो यस्य ।) मयूरः । इति त्रिकाण्डशेषः ॥

गलशुण्डिका, स्त्री, (अल्पा शुण्डा शुण्डिका । गलस्य शुण्डिकेव ।) तालूर्द्धस्थमांसिका । आल् जिव् इति भाषा ॥ (यथा, याज्ञवल्क्यः । ३ । ६८ ।
"तालूदरं वस्ति शीर्षं चिबुके गलशुण्डिके ॥")
तत्पर्य्यायः । सुधास्रवा २ घण्टिका ३ लम्बिका ४ । इति हेमचन्द्रः । ३ । २४६ ॥ रसाङ्गा ५ प्रतिजिह्विका ६ माध्वी ७ अलिजिह्विका ८ । इति शब्दरत्नावली ॥ (तालुगतरोगविशेषः । यथा, सुश्रुते सूत्रस्थाने २५ अध्याये ।
"मांस्यं जतुमणिर्म्मांससङ्घातो गलशुण्डिका ॥"
"यस्य श्लेष्मा प्रकुपितः काकले ह्यवतिष्ठते ।
आशु सञ्जनयेच्छोथं करोति गलशुण्डिकाम् ॥"
इति चरके सूत्रस्थानेऽष्टादशोऽध्याये ॥
तच्चिकित्सादिकं यथा,—
"गले च घण्टिकामार्गे रक्तश्लेष्मविकारजा ।
लम्बिका वर्द्धते नृणां विज्ञेया गलशुण्डिका ॥
रुणद्धि चास्य मार्गञ्च नेत्रस्रावः प्रदृश्यते ।
शिरोऽग्निः श्वासकासश्च ज्वरश्चैव प्रपद्यते ॥
आशुकारी महाप्राज्ञः शीघ्रं कुर्य्यात् प्रतिक्रियाम् ।
शस्त्रेण शुण्डिकां छित्त्वा कुर्य्याद्विस्रावणं हितम् ॥
मागधी मरिचं पथ्या वचा धान्ययवानिकाः ।
क्वाथः सोष्णः स्वेदनश्च गलशुण्डीप्रशान्तये ॥
दिवारात्रौ यवान्याश्च मुखे सम्धारणं हितम् ।
मर्द्दनं कण्ठदेशे तु तेन सम्पद्यते सुखम् ॥
सिद्धार्थकं वचा कुष्ठं रजनी पारिभद्रकम् ।
गृहधूमं स लवणं कण्ठे वा लेपनं हितम् ॥

ज्वरे प्रोक्तानि पथ्यानि यानि तानि महामते!।
न गौल्यं पिच्छिलं सेव्यं तैलं नैव गलामये ॥"
इति हारीते चिकित्सितस्थाने पञ्चचत्वारिंशेऽध्याये ॥)

गलस्तनी, स्त्री, (गले स्तनाविव मांसपिण्डौ यस्याः।) छागी। इति हेमचन्द्रः। ४। ३४१ ॥

गला, स्त्री, (गलतीति। गल्+अच्। स्त्रियां टाप्।) अलम्बुषा। इति भावप्रकाशः॥

गलाङ्कुरः, पुं, (गलरोधकोऽङ्कुरो यत्र।) गलरोगविशेषः। तत्पर्य्यायः। रोहिणी २। इति हेमचन्द्रः। ३। १३१ ॥ तस्य सम्प्राप्तिपूर्ब्बकलक्षणमाह माधवकरः।

"गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम्।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निहन्त्यसून् व्याधिरयञ्च रोहिणी ॥"

गलानिलः, पुं, (गले कण्ठदेशे अनिलः प्राणवायुर्यस्य।) मत्स्यविशेषः। तत्पर्य्यायः। गङ्गाटेयः २। इति त्रिकाण्डशेषः॥ गलानिकः गलाविल इति च क्वचित् पाठः॥

गलिः, पुं, (गिरति ग्रसेत् विना केवलं भक्षयतीति। गॄ+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्। गुणः रस्य लत्वञ्च।) शुक्लोऽप्यूर्ध्ववृन्तो वृषः। गड़िया गरु इति भाषा। तत्पर्य्यायः। दुष्टवृषः २। इति हेमचन्द्रः। ४। ३२६ ॥

गलितः, त्रि, (गल्+क्तः।) पतितः। तत्पर्य्यायः। स्रस्तः २ ध्वस्तः ३ भ्रष्टः ४ स्कन्नः ५ पन्नः ६ च्युतः ७। इत्यमरः। ३। १। १०३ ॥ (यथा, भागवते। १। १। ३।

"निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम्॥")

गलुः, पुं, (गलतीति। गल्+उन्।) मत्स्यविशेषः। इति महाभारतम्॥

गलेगण्डः, पुं, (गले गण्ड इव यस्य। अलुक् समासः।) पक्षिविशेषः। तत्पर्य्यायः। मर्कटः २। इति त्रिकाण्डशेषः॥ (हाड़गिला इति भाषा॥)

गलेस्तनी, स्त्री, (गले स्तनाविव मांसपिण्डौ यस्याः। अलुक् समासः।) छागी। इति राजनिर्घण्टः॥

गल्भ, ड धृष्टत्वे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) अन्तःस्थतीयोपधः। ड, गल्भते। इति दुर्गादासः॥

गल्या, स्त्री, (गलानां कण्ठानां समूहः। "प्राग्दीव्यतोयः।" ४। २। ४६। इति यः।) गलसमूहः। कण्ठानां समूहः। इत्यमरः। ३। ३। ४३॥

गल्लः, पुं, गण्डः। इति हेमचन्द्रः॥ गाल इति भाषा॥

गल्लचातुरी, स्त्री, (गल्ले गण्डे गण्डमधिकृत्य चातुरी यस्याः यस्यां वा। संज्ञात्वान्न कप्।) उपधानविशेषः। इति जटाधरः॥ गालवालिश इति भाषा॥

गल्वर्कः, पुं, (गल्वर्कविशेषः स इव अर्को दीप्तिर्यस्य।) बकः। मद्यपानपात्रम्। इति हेमचन्द्रः। ३। ५७०॥ मसारवन्नामि। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ७। १५। ५३।

"मसारगल्वर्कसुवर्णरूप्य-
वंचप्रवालस्फटिकैश्च मुख्यैः॥")

गल्ह, ड कुत्सने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सर्कं-सेट्।) अन्तःस्थतीयोपधः। ड, गल्हते। इति दुर्गादासः॥

गवयः, पुं, (गु ड ग्रब्दे+भावे अप्। गवं ग्रब्दं याति प्रयोति गव इति ग्रब्दं यातीति वा। गव+या+कः।) गलकम्बलशून्यगोसदृशपशुः। (यथा, रामायणे। २। १०३। ४२।

"व्याघ्रगोकर्णगवया विचेरुः पृषतैः सह॥")

तत्पर्य्यायः। गवालूकः २। इति त्रिकाण्डशेषः॥ वनगौः ३ बलभद्रः ४ महागन्धः ५। तन्मांसगुणौ। परुषत्वम्। बृंहणत्वञ्च। इति राजनिर्घण्टः॥ वानरविशेषः। स तु वैवस्वतपुत्रः। यथा,—

"पुत्रा वैवस्वतस्याच्च पञ्च कालान्तकोपमाः।
गयो गवाक्षो गवयः शरभो गन्धमादनः॥"

इति रामायणम्॥

गवयी, स्त्री, (गवय+जातौ गौरादित्वात् वा ङीष्।) गवयस्त्री। तत्पर्य्यायः। वनधेनुः २ भिल्लगवी ३। इति राजनिर्घण्टः॥

गवराजः, पुं, (गवेन ग्रब्देन राजते इति। राज्+अच्।) वृषः। इति ग्रब्दचन्द्रिका॥

गवलं, क्ली, महिषशृङ्गम्। इत्यमरः। २। ६। १००॥

गवलः, पुं, (गवं ग्रब्दं लातीति। ला+कः।) वनमहिषः। इति हेमचन्द्रः। ४। ३४६॥ (यथा, बृहत्संहितायाम्। ३२। १७।

"गवलालिकुलाहिनिभा विहजन्ति पयः पयोवाहाः॥")

गवाक्षः, पुं, (गवामक्षीव। "अक्ष्णोऽदर्शनात्।" ५। ४। ७६। इत्यच्। यद्वा, गावः रश्मयः अक्ष्णुवन्ति आप्नुवन्ति अनेन इति। अक्षू व्याप्तौ+अकर्म्मण्यर्थे घञ्।) गवामक्षीव यः। जानालार जालो इति भाषा॥ (यथा, रघुः। ७। ७।

"उत्सृष्टलीलागतिरागवाक्षा-
दलक्तकाङ्कां पदवीं ततान॥")

तत्पर्य्यायः। वातायनम् २। इत्यमरः। २। २। ६॥ वधूदृग्गयनम् ३ जालम् ४ जालकम् ५। इति कोषान्तरम्। इति भरतः॥ वानरविशेषः। इति मेदिनी। क्षे। ३५॥ स तु वैवस्वतपुत्रः। यथा, रामायणे।

"पुत्रा वैवस्वतस्याच्च पञ्च कालान्तकोपमाः।
गयो गवाक्षो गवयः शरभो गन्धमादनः॥"

गवाक्षी, स्त्री, (गां भूमिमक्ष्णोति व्याप्नोतीति। अक्षू व्याप्तौ+"कर्म्मण्यण्।" ३। २। १। इत्यण्। स्त्रियां ङीप्।) गोडुम्बा। इत्यमरः। २। ४। १५६॥ गोसुक् इति भाषा॥ इन्द्रवारुणी। राखाल शशा इति भाषा॥

गवाक्षी, स्त्री, (अस्याः पर्य्याया यथा,—

"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी गजचिर्भटा।
सृगेर्व्वारुः पिटक्कोटी विशाला च शशादनी॥"

इति वैद्यकरत्नमालायाम्॥

व्यवहारोऽस्य यथा,—

"चित्रकं ग्रङ्गवेरञ्च तथादन्ती गवाक्ष्यपि॥"

इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे॥ मामालाडु इति क्वचित् भाषा॥) घोषवोटः। घेंघोड़ा इति भाषा॥ इति राजनिर्घण्टः॥ अपराजिता। (यथा, वैद्यकरत्नमालायाम्।

"गवाक्ष्यश्वखुरी श्वेता श्वेतभण्डापराजिता।
द्विविधा सा सिता नीला गिरिकर्णी गवादनी॥")

गवाची, स्त्री, (गवि भूमौ अश्नुते गच्छतीति। अश्नु+क्विप्। ङीष्। "अवड् स्फोटायनस्य।" ६। १। १२३। इत्यवड्।) मत्स्यविशेषः। पाँकाल माछ् इति भाषा॥ अस्य गुणाः। अजीर्णकारित्वम्। गुरुत्वम्। श्लेष्मप्रकोपनत्वञ्च। इति राजवल्लभः॥

गवादनं, क्ली, (अद्यते भक्ष्यते इति। अद्+कर्म्मणि ल्युट्। ततः षष्ठीतत्पुरुषः।) घासः। इति ग्रब्दचन्द्रिका॥

गवादनी, स्त्री, (गवादन+गौरादित्वात् ङीष्।) इन्द्रवारुणी। (अद्यतेऽस्यामिति। अद्+अधिकरणे ल्युट्। ततः षष्ठीतत्पुरुषस्ततः स्त्रियां ङीष्।) गवां घासभक्षणाधारः। इति मेदिनी। ने। १७६॥ गरुर घास खाइवार गड़ा इति भाषा॥ नीलापराजिता। इति राजनिर्घण्टः॥ (यथास्याः पर्य्यायाः,—

"गवाक्ष्यश्वखुरी श्वेता श्वेतभण्डापराजिता।
द्विविधा सा सिता नीला गिरिकर्णी गवादनी॥"

इति वैद्यकरत्नमालायाम्॥)

गवालूकः, पुं, (गवेन ग्रब्देन अलति पर्य्याप्नोतीति। अल्+बाहुलकात् ऊकञ्।) गवयः। इति त्रिकाण्डशेषः॥

गवाशनः, पुं, (गामश्नातीति। अश्नु ग भोजने+ल्युः।) गोभक्षकः। सुचि इति भाषा॥ यथाह कश्चित्।

"माताप्येका पिताप्येको मम तस्य च पक्षिणः।
अहं सुनिभिरानीतः स चानीतो गवाशनैः॥"

गवाधिका, स्त्री, लाक्षा। इति रत्नमाला॥ गवाधिकापि पाठः॥ (गवायिका इति क्वचित् पाठः॥)

गवीश्वरः, पुं, (गवामीश्वरः। पक्षे अलुगभावः।) गवां स्वामी। तत्पर्य्यायः। गोमान् २ गोमी ३। इत्यमरः। २। ६। ५८॥ गवेश्वरोऽपि॥

गवेडुः, स्त्री, (गवे गवार्थं दीयते इति। दा+ल्यब्लोपादित्वात् कुः। एधोदरात् दकारस्य डत्वम्। तत्पुरुषे क्षतीत्यलुक्।) धान्यविशेषः। इत्यमरः। २। ६। २५॥ गड़गड़ इति भाषा॥

गवेधुः, पुं, (गवे गवार्थं धीयते इति। धा+कुः। तत्पुरुषे क्षतीत्यलुक्। यद्वा, गवि भूमौ एधते इति। गो+एध वृद्धौ+कुः।) गवेडुः। इति भरतः॥ (क्वचित् स्त्रीलिङ्गेऽपि दृश्यते। यथा,—

"गवेधुका तु विड्वद्गिर्गवेधुः कथिता स्त्रियाम् । गवेधुः कटुका स्वादी कार्श्यकृत् कफनाशिनी ॥" इति भावप्रकाशः ॥)

गवेधुकं, क्ली, (गवेधुरिव कायतीति । कै + कः । गैरिकम् । इति राजनिर्घण्टः ॥ (ह्रस्वधान्यविशेषः । गड़्गड़ि इति भाषा ॥ यथा,—

"चिल्लीलङ्काकलोबीका कुरण्टकगवेधुकम् ।" इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥ सर्पविशेषे पुं । यथा, सुश्रुते कल्पस्थाने ४ अध्याये ।

"महासर्पः शङ्खपाली लोहिताक्षो गवेधुकः परिसर्पः" इत्यादयः ॥)

गवेधुका, स्त्री, (गवेधु + स्वार्थे संज्ञायां वा कन् ।) ह्रस्वधान्यविशेषः । गड़्गड़ देधान इति च भाषा । (यथा, विष्णुपुराणे । १ । ६ । २५ ।

"श्यामाकाक्षत यौवारा जर्तिलाः सगवेधुकाः ।") तत्पर्य्यायः । गवेदुः २ । इत्यमरः । २ । ६ । ५२ ॥ गवेधुः ३ गवेड़का ४ । इति तट्टीका ॥ क्षुद्रा ५ गोजिङ्गा ६ गुन्द्रा ७ गुल्यः ८ । इति रत्नमाला ॥ नागबला । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायाः यथा,—

"गाङ्गेरुकी नागबला भद्रा दुःखगवेधुका । खरवल्लरिका विश्वदेवा गोरक्षतण्डुली ॥" इति च वैद्यकरत्नमालायाम् ॥)

गवेधुकं, क्ली, (गां भूमिमौर्ण्वे उत्पत्तिकारत्वेन प्राप्नोतीति । गो + ईर् + बाहुलकादुक । ततोऽवडादेशः ।) गैरिकम् । इति त्रिकाण्डशेषः ॥

गवेधुका, स्त्री, (ईष्टे इति । ईश् + अच । ततो गवामीशः । स इव कायतीति । कै + कः ।) ह्रस्वविशेषः । इति शब्दचन्द्रिका ॥ गोरक्ष चाउलिया । इति भाषा ॥ (गुणादयोऽस्या गोरक्षतण्डुलाशब्दे ज्ञातव्याः ॥)

गवेष, त् क मार्गणे । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) मूर्द्धन्योपधः । अजगवेषत् गुरुं गुरौ । इति दुर्गादासः ॥

गवेषणा, स्त्री, क्ली, (गवेष + भावे युच् ।) अन्वेषणा । इत्यमरः । २ । ७ । ३२ ॥

गवेषितं, त्रि, (गवेष्यते स्म इति । गवेष + क्त ।) अन्वेषितम् । इत्यमरः । ३ । १ । १०५ ॥

गवोद्भवः, पुं, उत्तमगवः । गोवृषः प्रशस्तः । इति व्युत्पत्तिः ॥

गव्यं, त्रि, (गोरिदं गोर्विकारो वा । "गोपयसो र्यत् ।" ४ । ३ । १६० । इति यत् । "वाभ्यो यि प्रत्यये ।" ६ । १ । ७६ । इति अव् ।) गवां सर्व्वम् । गोसम्बन्धि । तत्तु दुग्धगोमयादि । इत्यमरः । २ । ६ । ५० ॥ (यथा, मनुः । ३ । ७१ ।

"संवत्सरन्तु गव्येन पयसा पायसेन च ॥") गोहितम् । इति मेदिनी । ये । १७ ॥

गव्यं, क्ली, (गवि वाचि साधु । गो + यत् । ततोऽव् ।) व्याः । (गवि नेत्रे साधु इति ।) रागद्रव्यम् । इति मेदिनी । ये । १७ ॥

गव्या, स्त्री, (गवां समूहः । "खलगोरथात् ।" ४ । २ । ४० । इति यत् । "वाभ्यो यि प्रत्यये ।" ६ । १ । ७६ । इति अव् ।) गोसमूहः । तत्पर्य्यायः । गोत्रा २ । इत्यमरः । २ । ६ । ६० ॥ गव्यूतिः । (गवि इवौ साधुः । गो + यत् । ततष्टाप् ।) व्याः । इति हेमचन्द्रः ॥ गोरोचना । इति राजनिर्घण्टः ॥

गव्यूतं, क्ली, (गोर्व्यूतिः । "गोर्व्यूतौ क्रन्द्रस्युपसंख्यानम् ।" "अध्वपरिमाणे च ।" ६ । १ । ७६ । इत्यस्य वार्त्तिं इति अव् ।) क्रोशद्वयम् । इति शब्दार्थवः ॥ क्रोशद्वयम् । (यथा, राजतरङ्गिण्याम् । ३ । ४०६ ।

"गव्यूतिमात्रमासन्ने देवीधामनि धैर्य्यवान् । धुन्वन् करौ मधुपान् धावति स्म स धीरधीः ॥") तत्पर्य्यायः । क्रोशयुगम् २ । इत्यमरः । २ । १ । १८ ॥ गव्यूतम् ३ गोरुतम् ४ गोतमम् ५ । इति भरतधृतवाचस्पतिः ॥ गव्या ६ । इति हेमचन्द्रः । ३ । ५५२ ॥

गह, त् क गहने । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) गहनं दुर्ज्ञेयः । गहयति ग्राह्यं जड़धीः । दुःखेन जानातीत्यर्थः । इति दुर्गादासः ॥

गहनं, क्ली, (गाह्यते दुर्गम्यतेऽस्मिन्निति । गाह् + बहुलमन्यत्रापि इति युच् ह्रस्वगहनयोरिति निर्द्देशात् वा ह्रस्वः । यद्वा, गह त् क गहने + युट् ।) वनम् । इत्यमरः । २ । ४ । १ ॥ (यथा, गोः रामायणे । ६ । ६ । ६ ।

"सखौ के देव तद्वीर मया चर्म्म प्रतिश्रुतम् । निर्जीव गहने भूत्वे भवसुतस्य रावणात् ॥") गह्वरम् । दुःखम् । इति मेदिनी । ने । ५७ ॥ (पुं, विष्णुः । दुर्ज्ञेयत्वादस्य तथात्वम् । यथा, महाभारते । १३ । १४६ । ५४ ।

"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः ।" "सर्व्वरूपं सामर्थ्यं चेष्टितं तस्य ज्ञातुं न शक्यते इति गहनः ।" इति भाष्यम् ॥)

गहनः, त्रि, (गाह्यते दुःखेन गम्यते इति । गाह् + युच् । ह्रस्वगहनयोरिति निर्द्देशात् वा ह्रस्वः ।) दुर्गमः । दुष्प्रवेशः । तत्पर्य्यायः । कलिलः २ । इत्यमरः । २ । ४ । १ ॥ (यथा, रामायणे । २ । १ । २३ ।

"गहनेष्वाश्रमान्तेषु जीर्णविस्तृतदर्शनाः । रमन्ते तापसांस्तत्र श्राद्धयन्तः सुतानिव ॥") गहना, स्त्री, अलङ्कारः । इति देवीपुराणम् ॥

गह्वरं, क्ली, (गाह्यते इति । गाह् + "ह्रस्वगहनयोरिति ।" उणा । ३ । १ । इति वरच्प्रत्ययेन निपातनात् साधुः ।) गुहा । (यथा, रघुः । २ । २६ ।

"गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥" * ॥ गाह्यते विलुड्यते आत्मात्मनेन इति ।) इत्यमरः । २ । ३ । ६ ॥ वनम् । इति मेदिनी । रे । १४६ ॥ रोदनम् । इति हेमचन्द्रः । ६ । ६८ ॥ (गहने त्रि । यथा, भागवते । १ । ६ । १३ ।

"नलवेणुशरस्तम्बकुशकीचकगह्वरम् । एक एवातिवातोऽहमद्राक्षं विपिनं महत् ॥")

गह्वरः, पुं, (गाह्यते विलुड्यते इति । गाह् विलोड़ने + "ह्रस्वरच्छत्वरेति ।" उणा । ३ । १ । इति वरच्प्रत्ययेन निपातनात् साधुः ।) निकुञ्जः । इति मेदिनी । रे । १४६ ॥

गह्वरी, स्त्री, (गह्वर + स्त्रियां ङीप् ।) गुहा । इति शब्दरत्नावली ॥

गा, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, गाते । इति दुर्गादासः ॥

गा, र लि स्तुतौ । अजनि । इति कविकल्पद्रुमः ॥ (ङां-परं-सकं-सेट् ।) र, वैदिकः । लि, जगाति । इति दुर्गादासः ॥

गा, स्त्री, (जगाति स्तौति अनया । गा स्तुतौ + क्विप् ।) गाथा । इति शब्दरत्नावली ॥

गाङ्गं, त्रि, (गङ्गाया इदमिति अण् ।) गङ्गासम्भूतम् । इति मेदिनी ॥ गे । ५ ॥ (यथा, कुमारे । ५ । ३७ ।

"विकीर्णसप्तर्षिबलिप्रहासिभि- स्त्वया न गाङ्गैः सलिलैर्दिवच्युतैः ॥" मेघधारारविनिःक्षिप्ते जलविशेषे, क्ली । तल्लक्षणादिकं यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।

"तत्रान्तरीक्षं चतुर्विधम् । तद्यथा, धारं कारं तौषारं हैममिति । तेषां धारं प्रधानं लघुत्वात् । तत्पुनर्द्विविधं गाङ्गं सामुद्रञ्चेति । तत्र गाङ्गमाश्वयुजे मासि प्रायशो वर्षति तयोर्द्वयोरपि परीक्षकं कुर्म्मोत ग्राह्योदनपिञ्जमकुथितमविदग्धं रजतभाजनोपहितं वर्षति देवे वर्षत्यनुर्वीतं स यदि सुकृष्णं स्थितस्तोयाशय एव भवति तदा गाङ्गं पततीत्यवगन्तव्यं वर्षाण्यत्ते सिकतासेतुं च सामुद्रमिति विद्यात्तत्रोपादेयम् । सामुद्रमप्याश्वयुजे मासि गृहीतं गाङ्गवद् भवतीति ॥"

अस्य परीक्षा यथा,—

"गाङ्गं सामुद्रविज्ञानं कथयिष्यामि साम्प्रतम् । धारितं येन पात्रेण लक्ष्यते येन तद्विधम् ॥ धौतं शुद्धं सितं वस्त्रं चतुर्हस्तप्रमाणकम् । दक्षांश्चिहस्तांश्च चतुश्चतुष्कोणेषु बन्धयेत् । तस्मात् परीक्षते तोयं शुद्धे रौप्यमयेऽथवा ॥ कांस्यपात्रे समुद्धृत्य परीक्षेत भिषग्वरः । शुक्लकृष्णौ स तस्मध्ये श्वेताग्र्योदनस्य वा ॥ पिञ्जिका तत्र संच्छिन्ना नान्यथा भाति वा पुनः । श्वेता च निर्म्मला पिञ्जी शुद्धञ्च विमलं पयः ॥ तद्गाङ्गं सर्व्वदोषघ्नं ग्रहीतव्यं हि सर्व्वदा । तद्धारयेच्च मतिमान् वर्ष्यं मेध्यं रसायनम् ॥ श्रमक्लमपिपासार्त्तं कफदोषनिवारणम् । लघु सुस्पष्टवर्णं च गाङ्गोदकस्य दृष्टिः स्वादिवसे वा प्रदेयः ।

इति हारीते प्रथमे स्थाने [illegible]

गङ्गागर्भजातत्वात् सुवर्णमपि । इति महाभारतम् ॥)

गाङ्गः, पुं, (गङ्गाया अपत्यं पुमानिति । "शिवादिभ्योऽण् ।" ४ । १ । ११२ । इत्यण् ।) भीष्मः । (यथा, हरिवंशे । ३२ । १११ ।

"गाङ्गं देवव्रतं नाम पुत्रं सोऽजनयत् प्रभुः । स तु भीष्म इति ख्यातः कौरवाणां पितामहः ॥"

अस्य जन्मवृत्तान्तादिकं भीष्मशब्दे द्रष्टव्यम् ॥) कार्त्तिकेयः । इति मेदिनी । गे । ५ ॥

गाङ्गटः, पुं. (गाङ्गे गङ्गातीरादौ अटति भ्रमतीति । अट् + अच् । णकन्धादित्वात् साधुः ।) मत्स्यभेदः । इति शब्दरत्नावली ॥ चिङ्गिड़ि माछ इति भाषा ॥ (चिङ्गिटशब्दे विवरणमस्य ज्ञेयम् ॥)

गाङ्गटकः, पुं, (गाङ्गे गङ्गातीरादौ अटतीति । अट् + ण्वुल् ।) गाङ्गटमत्स्यः । इति शब्दरत्नावली ॥

गाङ्गटेयः, पुं, (गाङ्गे अटतीति । अट गतौ + बाहुलकात् ढक् ।) गाङ्गटमत्स्यः । इति शब्दरत्नावली ॥

गाङ्गायनिः, पुं (गङ्गाया अपत्यं पुमान् । "तिकादिभ्यः फिञ् ।" ४ । १ । १५४ । इति फिञ् ।) भीष्मः । इति त्रिकाण्डशेषः ॥ कार्त्तिकेयश्च ॥

गाङ्गेयं, क्ली, (गङ्गाया अपत्यम् । "शुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् । गङ्गाजातत्वादस्य तथात्वम् ।) स्वर्णम् । (यदुक्तं महाभारते वनपर्व्वणि ।

"यं गर्भं सुषुवे गङ्गा पावकाद्दीप्ततेजसम् । तद्रूपं पर्व्वते न्यस्तं हिरण्यं समपद्यत ॥") धुस्तूरः । कपोतः । इत्यमरः । २ । ६ । ६४ ॥ सुस्तम् । इति हेमचन्द्रः ॥ (अस्य पर्य्यायाः यथा, वैद्यकरत्नमालायाम् ।

"मेघाख्यं सुस्तकं सुस्ता गाङ्गेयं भद्रसुस्तकम् ॥"

गङ्गाजातजलादौ च । यथा, महाभारते । ३ । ३ । ३४ ।

"योगमास्थाय धर्म्मात्मा वायुभक्षो जितेन्द्रियः । गाङ्गेयं वार्य्युपस्पृश्य प्राणायामेन तस्थिवान् ॥")

गाङ्गेयः, पुं, (गङ्गाया अपत्यं पुमान् । "शुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् ।) भीष्मः । (यथा, देवीभागवते । २ । ४ । ३७ ।

"वसुदेव विदित्वेवं सुखं शुङ्गु सुतोद्भवम् । गाङ्गेयोऽयं महाभाग ! भविष्यति बलाधिकः ॥"

अस्य जन्मविवरणं तत्रैव २ अध्याये तथा भीष्मशब्दे विस्तरशो द्रष्टव्यम् ॥) कार्त्तिकेयः । इति हेमचन्द्रः ॥ (यथा, महाभारते ।१।१३८।१३।

"आग्नेयः कृत्तिकापुत्रो रौद्रो गाङ्गेय इत्यपि । श्रूयते भगवान् देवः सर्व्वदेवमयो गुहः ॥") इङ्गोदमत्स्यः । इति त्रिकाण्डशेषः ॥ भद्रसुस्ता । इति राजनिर्घण्टः ॥

गाङ्गेरुकी, स्त्री, (गाङ्गं जलविशेषमीरयतीति । ईर गतौ क्षेपणे च + "सृगयादयश्च ।" उणां । १ । ३८ । इति कुः । ततः स्वार्थे कन् गौरादित्वात् ङीष् ।) गोरक्षतण्डुला । इत्यमरः । २ । ४ । ११७ ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "क्षीरदध्यफलजाम्बवराजादनतोदनतिन्दुकवकुलधन्वनाम्रमन्तकाम्बकर्कफल्गुपरूषकगाङ्गेरुकीपुष्करबिल्वविल्वीप्रभृतीनि ॥"

यथास्याः पर्य्यायाः ।

"गाङ्गेरुकी नागबला भद्रा हस्तगवेधुका । खरवल्लरिका विश्व-वेदा गोरक्षतण्डुली ॥"

इति वैद्यकरत्नमालायाम् ॥

यथास्या गुणाः ।

"गाङ्गेरुकी करीरश्च बिल्वातीदनधन्वनम् । मधुरं सकषायञ्च शीतं पित्तकफापहम् ॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥)

गाङ्गेरी, स्त्री, (गाङ्गे गङ्गादिनदीतटे तिष्ठतीति । स्था + कः; असुक् । गौरादित्वात् ङीष् ।) कठगर्करालता । इति हारावली । २१० ॥ नटा इति भाषा ॥

गाङ्गिकायः, पुं, वर्त्तिकपक्षी । इति राजनिर्घण्टः ॥

गाढ़ं, क्ली, (गाहते स्म इति । गाह विलोड़ने + क्तः ।) अतिशयः । दृढ़म् । (यथा, आर्य्यासप्तशत्याम् । ६१० ।

"आलिङ्गति सा गाढ़ं पुनः पुनर्यामिनीप्रथमे ॥")

तद्युक्ते त्रि । इत्यमरः । १ । १ । ७० ॥ (यथा, रघुः । ६ । ७२ ।

"श्रमफेनसुचा तपस्विगाढ़ां तमसां प्राप नदीं तुरङ्गमेण ॥")

गाढ़मुष्टिः, पुं. (गाढ़ा दृढ़ा मुष्टिर्यत्र । ढ़त्वसुट्या धारणादस्य तथात्वम् ।) खड्गः । रूपगो त्रि । इति मेदिनी । टे । ६१ ॥ (दाढ़त्वाभावादेवास्य तथात्वम् ॥)

गाढ़वटी, स्त्री. (गाढ़ा दृढ़ा वटी वटिका यत्र । निपातनात् पुंवद्भावाभावः ।) चतुरङ्गक्रीड़ामध्ये क्रीड़ाविशेषः । यथा, तिथ्यादितत्त्वे ।

"नौकैका वटिका यस्य विद्यते खेलने यदि । गाढ़वटीति विख्याता पदं तस्य न दुष्यति ॥"

गाणपत्यः, त्रि, (गणपतिर्गणेशः उपास्यदेवो यस्य । गणपति + ष्यञ् । केषाञ्चिन्मते अश्वपत्यादिभ्यश्चेति यञाप्रवादोऽण् । तत्र गाणपत इति साधुः ।) गणेशोपासकः । इत्यागमः ॥ (गणपतेर्भावः कर्म्म वा "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ।" ५ । १ । १२४ । इति ष्यञ् ।) गणपतिसम्बन्धी । गणपतिभावे क्ली ॥ (यथा, महाभारते । ३ । ८५ । ६७ ।

"प्रदक्षिणमुपावृत्य गाणपत्यमवाप्नुयात् ॥")

गाणिक्यं, क्ली, (गणिकानां वेश्यानां समूहः । "गणिकाया यञ्चिति वक्तव्यम् ।" ४ । २ । ४० । इत्यस्य वार्त्तिके इति यञ् ।) गणिकासमूहः । बहुवेश्याः । इत्यमरः । २ । ६ । २२ ॥

गाण्डिवः, पुं, क्ली, (गण्डिर्यन्त्रिरस्यास्तीति । गाण्डि + "गाण्डाजगात् संज्ञायाम् ।" ५ । २ । ११० । इति वः ।) अर्জ্জুनधनुः । (यथा, महाभारते । ३ । २३५ । ३० ।

"धनुर्यांहश्वार्জ্জुनः सव्यसाची धनुश्च तन्नाण्डिवं भीमवेगम् ॥")

धनुर्मात्रम् । इति मेदिनी ॥ वे । ३६ ॥

गाण्डीवः, पुं,क्ली, (गाण्डिर्यन्त्रिः । "क्षुद्रिकारान्तादिति ।" ङीषि कृते गाण्डी । सा विद्यते अस्य । "गाण्डाजगात् संज्ञायाम् ।" ५ । २ । ११० । इति वः ।) अर्জ্জुनधनुः । इत्यमरः । २ । ८ । ८४ ॥ (यथा, महाभारते । ४ । ४१ । १ ।

"यस्मां पूर्व्वमिहाष्टौच्छः शत्रुसेनानिवर्हणम् । गाण्डीवमेतत् पार्थस्य लोकेषु विदितं धनुः ॥"

एतद्वृत्तन्तु ब्रह्मादयोऽपि आदौ श्रुतवन्तः यदुक्तं तत्रैव । ४ । ४१ । ५—८ ।

"एतद्वर्षसहस्रन्तु ब्रह्मा पूर्व्वमधारयत् । ततोऽनन्तरमेवाथ प्रजापतिरधारयत् ॥ त्रीणि पञ्चशतञ्चैव शक्रोऽशीतिञ्च पञ्च वै । सोमः पञ्चशतं राजा तथैव वरुणः शतम् ॥ पार्थः पञ्च च षष्टिञ्च वर्षाणि श्वेतवाहनः । महावीर्य्यं महद्वीर्य्यमेतद्धनुरनुत्तमम् ॥ एतच्च मानुषं प्राप्तं वरुणाच्चारुदर्शनम् । पूजितं सुरमर्त्येषु बिभर्त्ति परमं वपुः ॥"

खाण्डवदाहनार्थं हि वह्निना वरुणशक्रासादानीयधनुरेतदर्জ্জुनाय प्रदत्तम् । तत्कथा यथा, महाभारते । १ । २२६ । १—६ ।

"एवमुक्तः स भगवान् धूमकेतुर्हुताशनः । चिन्तयामास वरुणं लोकपालं दिदृक्षया ॥ आदित्यसदृशे देवं निवसन्तं जलेश्वरम् । स च तच्चिन्तितं ज्ञात्वा दर्शयामास पावकम् ॥ तमब्रवीद्धूमकेतुः प्रतिगृह्य जलेश्वरम् । चतुर्थं लोकपालानां देवदेवं सनातनम् ॥ सोमेन राज्ञा यद्दत्तं धनुश्चैवेषुधी च ते । तत् प्रयच्छोभयं शीघ्रं रथञ्च कपिलक्षणम् ॥ कार्य्यञ्च सुमहत् पार्थो गाण्डीवेन करिष्यति । चक्रेण वासुदेवश्च तन्मामात्र प्रदीयताम् ॥ ददानीत्येव वरुणः पावकं प्रत्यभाषत । तदद्भुतं महावीर्य्यं यशःकीर्त्तिविवर्द्धनम् ॥ सर्व्वशस्त्रैरनाधृष्यं सर्व्वशस्त्रप्रमाथि च । सर्व्वायुधमहामात्रं परसैन्यप्रधर्षणम् ॥ एकं शतसहस्रेण सम्मितं राष्ट्रवर्द्धनम् । चित्रसुग्रावचैर्व्वर्णैः शोभितं श्रक्ष्णमव्रणम् ॥ देवदानवगन्धर्व्वैः पूजितं शाश्वतीः समाः । प्रादाच्चैव धनूरत्नमक्षय्ये च महेषुधी ॥"

"तच्च दिव्यं धनुःश्रेष्ठं ब्रह्मणा निर्म्मितं पुरा । गाण्डीवमुपसंगृह्य बभूव मुदितोऽर्জ্জुनः ॥")

कार्म्मुकम् । इति मेदिनी । वे । ३६ ॥

गाण्डीवी, [न्] पुं, (गाण्डीवोऽस्त्यस्य । गाण्डीव + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) अर्জ্জुनः । इति त्रिकाण्डशेषः ॥ अर्জ্জुनवृक्षः । इति राजनिर्घण्टः ॥

गाता, [तृ] त्रि, (गायतीति । गै गाने + तृच् ।) गायकः । इति सङ्गीतदामोदरः ॥ (यथा, हरिवंशे । ५४ । ११ ।

"गाता चतुर्णां वेदानामङ्गाता प्रथमस्त्रिणाम् ॥'

गातुः, पुं, (गायतीति। गै गाने + "कमिमनि-जनिगाभायाहिभ्यश्च।" उणा। १। ७३। इति तुः।) कोकिलः। भ्रमरः। गन्धर्वः। इति मेदिनी। ते। १५॥ (गाते गच्छतीति। गा ड गतौ + कमिमनीतिस्त्रे गानिर्देशात् तुः। पथिकः। इति उज्ज्वलदत्तः॥ गै गाने + भावे तु। गानम्। यथा, ऋग्वेदे। ४। ५१। १।
"गातुं कृणुध्वमुषसो जनाय।" "गातुं गानम्।" इति भाष्यम्॥ गाते गच्छत्यत्र इति। गा ड गतौ + अधिकरणे तु। गमनीयः पन्थाः। यथा, ऋग्वेदे। ६। ८५। ४। "उरुं नो गातुं कृणु सोममीड्यः।" "गातुं गन्तव्यमार्गम्।" इति भाष्यम्॥ पृथिवी। यथा, तत्रैव। ३। ३१। १५।
"इन्द्रो दृभिरजनद्दीद्यानः साकं सूर्यस्य सचसा गातुमग्निम्।" "गातुं पृथिवीम्।" इति भाष्यम्॥ गा र लि स्तुतौ + भावे तुः। स्तवः। यथा, तत्रैव। ४। ४। ६। "स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत्।" "गातुं स्तवम्।" इति भाष्यम्॥ उपायः। यथा, तत्रैव। ५। ६५। ४। "मित्रो अंहोश्चिदुरुचयाय गातुं वनते।" "गातुमुपायम्।" इति भाष्यम्॥)

गातुः, त्रि, (गाते कोपं गच्छतीति। गा ड गतौ + "कमिमनीति।" उणा। १। ७३। इति गानिर्देशात् तुः।) रोषणः। इति मेदिनी। ते। १५॥ (गायतीति। गै गाने + तुः।) गायनः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

गात्र, त्र क ड ग्रैथिल्ये। इति कविकल्पद्रुमः॥ (अदन्तुरां-आत्मं-अर्कं-सेट्।) दन्त्यवर्गमध्यः। ड, गात्रयते गात्रायते। इति दुर्गादासः॥

गात्रं, क्ली, (गच्छत्यनेन। गम् + "गमेरा च।" उणा। ४। १६८। इति ष्ट्रन् आकारादेश्च।) इन्द्रियपूर्णजङ्घादिदेशः। इन्द्रियग्रहणादिसम्मुखभागः। (यथा, माघे। १८। ४६।
"व्यापस्काराङ्गनगात्रस्य भूमिं
निःसाधारङ्गच्छतोऽवाङ्मुखस्य॥"
"लूनगात्रस्य छिन्नजङ्घस्य॥" इति तट्टीकायां मल्लिनाथः॥ *॥ गच्छति मरणात् परं स्वकारणभूतपञ्चत्वं प्राप्नोति यद्वा गम्यते स्थानात् स्थानान्तरं प्राप्यते सञ्चाल्यते वाऽनेन इति।) अङ्गम्। इति मेदिनी। रे। २३। हस्तपादाद्यवयवसमुदयः। गा इति भाषा॥ (यथा, महाभारते। १। १५४। ३०।
"अद्य गात्राणि ते कङ्काः श्येना गोमायवस्तथा।
कर्षन्तु भवि संक्षुण्णा विक्षतस्य मया रणे॥")
तत्पर्य्यायः। कलेवरम् २ वपुः ३ संहननम् ४ शरीरम् ५ वर्ष्म ६ विग्रहः ७ कायः ८ देहः ९ मूर्त्तिः १० तनुः ११ तनूः १२। इत्यमरः। २। ६। ७०॥ इन्द्रियायतनम् १३ अङ्गम् १४ चेत्रम् १५ भूषणः १६ मत्कुणम् १७ वैरम् १८ सचरः १९ घनः २० वन्यः २१ परम् २२ पिण्डः २३ पुद्गलम् २४। इति हेमचन्द्रः॥

भूतात्मा २५ स्वर्गलोकेशः २६ स्कन्धः २७ पञ्जरः २८ कुलम् २९ बलम् ३०। इति जटाधरः॥
(गात्रवादनादि निषेधो यथा,—
"गात्रवक्त्रनखैर्वाद्यं हस्तकेशावधूननम्।
तोयाग्निपूज्यमध्येन यानं धूर्मं श्वाश्रयम्॥
मद्यातिसक्तिं विश्रम्भस्खातन्त्र्यं स्त्रीषु च त्यजेत्॥"
इति वाभटे सूत्रस्थाने तृतीयेऽध्याये॥)

गात्रभङ्गः, स्त्री (गात्रस्य भङ्गोऽवसादो यस्याः।) भ्रूकुञ्चिभेदी। इति शब्दचन्द्रिका॥

गात्रमार्ज्जनी, स्त्री, (गात्रं मृज्यतेऽनयेति। मृज् + ल्युट् + स्त्रियां ङीप्।) शरीरमार्ज्जनार्थं वस्त्रम्। इति लोकप्रसिद्धिः॥ गामोछा इति भाषा॥

गात्रसङ्कोची, [न्] पुं, (गात्रं सङ्कोचयतीति। सम् + कुच् + णिच् + णिनिः। यद्वा, गात्रस्य सङ्कोची।) जाहकजन्तुः। इति राजनिर्घण्टः॥

गात्रसंप्लवः, पुं, (गात्रेण संप्लवते भासते सन्तरति जले इत्यर्थः। सम् + प्लु + अच्।) प्लवपक्षी। इति हेमचन्द्रः। ४। ४०६॥

गात्रसम्मितः, पुं. (गात्रं सम्मितं उत्पन्नावयवमात्रं यत्र।) गात्रावयवोत्पत्तिः। यथा,—
"पादे उत्पन्नमात्रे तु द्वौ पादौ गात्रसम्मिते।
पादोनं व्रतमाचष्टे हत्वा गर्भमचेतनम्॥
अङ्गप्रत्यङ्गसम्पन्ने गर्भे चेतःसमन्विते।
द्विगुणं गोव्रतं कुर्य्यात् प्रायश्चित्तं विशुद्धये॥
मध्यमवचनं भवदेवेन व्याख्यातम्। यदा लगुड़ाद्यभिघातेन गौर्जीवति गर्भमात्रपातो भवति तदोत्पन्नगर्भमात्रपाते यथोक्तप्रायश्चित्तपादाचरणम्। गात्रावयवोत्पत्तौ प्रायश्चित्तपादद्वयम्। सकलगात्रसम्पत्तौ प्रायश्चित्तपादत्रयम्। अर्थात्चेतन्ययुक्तगर्भपाते द्वितयमेव प्रायश्चित्तमवधेयम्।" इति प्रायश्चित्ततत्त्वम्॥

गात्रानुलेपनी, स्त्री, (गात्रमनुलिप्यतेऽनया इति। अनु + लिप् + ल्युट् + स्त्रियां ङीप्।) गात्रानुलेपनयोग्यं दृष्टं पिष्टं वा सुगन्धिद्रव्यम्। तत्पर्य्यायः। वर्णिः २ वर्णकम् ३ विलेपनम् ४। इत्यमरः। २। ७। १३३॥

गायकः, त्रि, (गायतीति। गै गाने + "गास्थकन्।" ३। १। १४६। इति थकन्।) गायकः। इति त्रिकाण्डशेषः॥

गाथा, स्त्री, (गीयते इति। गै गाने + "उषि-कुषिगार्त्तिभ्यस्थन्।" उणा। २। ४। इति थन् स्त्रियां टाप्।) श्लोकः। (यथा, महाभारते। ३। ८५। ३०।
"गाथा च गीतिका चापि तस्य सम्यद्यते तप।॥")
संस्कृतान्यभाषा। सा तु प्राकृतभाषा। गेयम्। तच्च गीतम्। (यथा, मनुः। ६। ४२।
"अत्र गाथा वायुगीताः कीर्त्तयन्ति पुराविदः।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे॥")
इत्तम्। तत्तु अक्षरसंख्यातं पद्यम्। इति मेदिनी। थे। ६॥

गाध, ऋ ड प्रतिष्ठायाम्। ग्रन्थे। लिप्सायाम् इति कविकल्पद्रुमः। (भ्वां-आत्मं-प्रतिष्ठायां सर्कं-अन्यत्र अर्कं-सेट्।) ऋ, अजगाधत्। ड, गाधितासे नभो भूय इति भट्टिः। गाधते मालिकः स्वजः। इति दुर्गादासः॥

गाधः, पुं, (गाध प्रतिष्ठायां लिप्सायाञ्च + भावे घञ्।) स्थानम्। (यथा, महाभारते। १। २१। १३।
"अनासादितमाधञ्च पातालतलमक्षयम्॥")
लिप्सा। इति हेमचन्द्रः॥ (कूलम्। परपारम्। यथा, महाभारते। ७। ११३। २।
"द्वीपो य आसीत् पाण्डूनामगाधे गाधमिच्छताम्॥")

गाधि, त्रि, (गाधे। राज्ञः कौशिकात् जायते इति। जन् + डः।) विश्वामित्रमुनिः। इति त्रिकाण्डशेषः॥ (यथा, मनुः। ७। ४२।
"एतयुक्तो विनयाद्राज्यं प्राप्तवान् ऋतुरेव च।
गाधिजः, पुं, (गाधेः राज्ञः कौशिकात् जायते इति। जन् + डः।) विश्वामित्रमुनिः। इति त्रिकाण्डशेषः॥ (यथा, मनुः। ७। ४२।
"एतयुक्तो विनयाद्राज्यं प्राप्तवान् ऋतुरेव च।

कुबेरश्च धनैश्वर्यं ब्राह्मण्यश्चैव गाधिजः ॥"
एतद्जन्मकथा विश्वामित्रशब्दे द्रष्टव्या ॥)
गाधिपुरं, क्ली, (गाधेः कौशिकस्य राज्ञः पुरम्।) कान्यकुब्जदेशः। इति हेमचन्द्रः। ३। ४०॥ (यथा राजतरङ्गिण्याम्। ४। १३४।
"कन्यानां यत्र कुब्जत्वं बधात् गाधिपुरे मरुत्।
तत्रैव ग्रसनीयः स पुमांश्चक्रे भयस्ग्रामम् ॥")
गाधिभूः, पुं, (गाधेर्भूरुत्पत्तिर्यस्य गाधिर्भूरुत्पत्तिस्थानं यस्येति वा। यद्वा गाधेर्भवति उत्पद्यते स। भू+भूतवर्त्तमानयोरिति क्विप्।) विश्वामित्रमुनिः। इति शब्दरत्नावली॥
गाधेयः, पुं, (गाधेरपत्यं पुमान्। गाधि+"इतश्चानिञः।" ४। १। १२२। इति ढक्।) विश्वामित्रमुनिः। इति हेमचन्द्रः। ३। ५१४॥ (यथा, हरिवंशे। २७। १७।
"विश्वामित्रस्तु गाधेयो राजा विश्वरथश्च ह॥")
गानं, क्ली, (गीयते इति। गै+भावे ल्युट्।) गीतम्। इत्यमरः। १। ७। २५॥ (यदुक्तम्,—
"जपकोटिगुणं ध्यानं ध्यानकोटिगुणो लयः।
लयकोटिगुणं गानं गानात् परतरं न हि॥")
तत्पर्य्यायः। गेयम् २ गीतिः ३ गान्धर्व्वम् ४। इति हेमचन्द्रः। २। १६४॥ (गानं हि वैदिकलौकिकभेदात् द्विविधम्। तत्र वैदिकगानन्तु सुक्तिप्रदं अन्यत् लोकरञ्जनकरम्। वैदिकलौकिकयोर्मार्गदेशीति नामान्तरमपि श्रूयते। गानन्तु सामवेदादेव उत्पन्नं यदुक्तं सङ्गीतदर्पणटीकायाम्।
"ऋग्भिः पाद्यमसद्गीतं सामभ्यः समपद्यत।
यजुर्भ्योऽभिनया जाता रसाश्चाथर्व्वणः स्मृताः॥"
द्विविधसङ्गीतयोर्लक्षणमाह सङ्गीतदर्पणे। २-६।
"मार्गदेशीविभागेन सङ्गीतं द्विविधं मतम्।
दुहिणेन यदन्विष्टं प्रयुक्तं भरतेन च।
महादेवस्य पुरतस्तन्मार्गाख्यं विमुक्तिदम्॥
तत्तद्देशस्थया रीत्या यत् स्याल्लोकानुरञ्जनम्।
देशे देशे तु सङ्गीतं तद्देशीत्यभिधीयते॥
गीतवादित्रनृत्यानां रक्तिः साधारणो गुणः।
अतो रक्तिविहीनं यत् न तत् सङ्गीतमुच्यते॥"
गानन्तु नादात्मकमेव नादस्तु यदा स्वयं राजते तदा स्वर इति प्रसिद्धः स्यात्। स्वरस्तु षड्जऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादभेदात् सप्तविधः। एतेषां विज्ञापनार्थं एतदाश्रयीभूतद्वाविंशतिश्रुतीनां नामानि स्वरस्थितिश्च कथ्यन्ते। यथा, सङ्गीतदर्पणे। ५३—५६।
"तीव्राकुसुद्तीमन्दाछन्दोवत्यस्तु षड्जगाः।
दयावती रञ्जनी च रतिका चर्यभे स्थिता॥
रौद्री क्रोधा च गान्धारे वज्रिकाथ प्रसारिणी।
प्रीतिश्च मार्ज्जनीत्येताः श्रुतयो मध्यमाश्रिताः॥
क्षितौ रक्ता च सन्दीपन्यालापिन्यपि पञ्चमे।
मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः॥
उग्रा च क्षोभिणीति हे निषादे वसतः श्रुती॥"
अन्यत् विशेषविवरणन्तु तत्तच्छब्दे द्रष्टव्यम्॥*॥
गाने तु रागा रागिण्यश्च प्रयोक्तव्याः अतस्तेषां नामानि कथ्यन्ते। यथा, सङ्गीतदर्पणे स्वराध्याये। १२—१६।
पार्व्वत्युवाच।
"के रागाः काश्च रागिण्यः का वेला ऋतवश्च के।
किं रूपं कथसञ्चारो वद देव! प्रसादतः॥"
ईश्वर उवाच।
"श्रीरागोऽथ वसन्तश्च भैरवः पञ्चमस्तथा।
मेघरागो हृदाख्यः षड्रागाः पुरुषाकृयाः॥"
इति षट् रागाः॥
अथ रागिण्यः।
"मालश्री त्रिवणी गौरी केदारी मधुमाधवी।
ततः पाहाड़िका ज्ञेया श्रीरागस्य वराङ्गनाः॥
देशी देवगिरी चैव वराटी तोड़िका तथा।
ललिता चाथ हिन्दोली वसन्तस्य वराङ्गनाः॥
भैरवी गुर्ज्जरी रामकिरी गुणकिरी तथा।
वाङ्गाली सैन्धवी चैव भैरवस्य वराङ्गनाः॥
विभाषा चाथ भूपाली कर्णाटी वड़हंसिका।
मालवी पटमञ्जर्य्या सहैताः पञ्चमाङ्गनाः॥
मल्लारी सौरटी चैव सावेरी कौशिकी तथा।
गान्धारी हरशृङ्गारा मेघरागस्य योषितः॥
कामोदी चैव कल्याणी आभिरी नाटिका तथा।
सारङ्गी नट्टहम्मीरा नट्टनारायणाङ्गनाः॥"
इति षट्त्रिंशत् रागिण्यः॥
रागरागिणीनां विशेषविवरणन्तु तत्तच्छब्दे गानस्य अन्यद्विवरणं गीतशब्दे च द्रष्टव्यम्॥)
ध्वनिः। इति धरणी॥
गानिनी, स्त्री, (गानं रोगादिनाशकतया प्रशस्तमौतिर्विद्यतेऽस्याः। गान+इनिः।) वचा। इति शब्दचन्द्रिका॥ (गानं सङ्गीतविद्या गतिः स्तुतिश्चास्त्यस्या इति युत्पत्त्या यथाक्रमं गानज्ञा गतिमती स्तवयुक्ता च स्त्री। इति युत्पत्तिलब्धोऽर्थः॥)
गान्तुः, त्रि. (गच्छतीति। गम गतौ+"क्रमिगमिशमीति।" उणा। ५। ४३। इति तुन् दृढिच्।) गन्ता। इत्युणादिकोषः॥ गाथकः। इति संक्षिप्तसारे उणादिवृत्तिः॥
गान्त्री, स्त्री, (गन्त्री एव। स्वार्थे अण्। ततो ङीष्।) गन्त्री। वृषवाह्यशकटः। गरुर गाड़ि इति भाषा। इत्यमरटीकायां रायमुकुटः॥ (क्वचित् क्लीवलिङ्गत्वमपि दृश्यते॥)
गान्दिनी, स्त्री, (गां पशुं जीवजातमित्यर्थः दायति प्रोथयतीति। दै पः प्रोथने+णिनिः+ङीप्। पृषोदरात् साधुः।) गङ्गा। इति त्रिकाण्डशेषः शब्दरत्नावली च॥ (गां धेनुं ददाति प्रतिदिनमित्यर्थः। दा दाने+णिनि+ङीप्। पृषोदरात् साधुः।) अक्रूरमाता। इति श्रीभागवतम्॥ (अस्या नामनिरुक्तिर्यथा, हरिवंशे। ३४। ७—११।
"स्वफल्कः काशिराजस्य सुतां भार्य्यामविन्दत।
गान्दिनीं नाम सा गास्तु ददौ विप्रेषु नित्यशः॥
सा मातुरुदरस्था वै बहून् वर्षगणान् किल।
निवसन्ती न वै जज्ञे गर्भस्था तां पिताब्रवीत्॥
जायस्व शीघ्रं भद्रन्ते किमर्थञ्चैव तिष्ठसि।
प्रोवाचैनन्तु गर्भस्था सा कन्या गान्दिने दिने॥
यदि दद्यां ततो जाये पितरं प्रत्यवाच ह।
तथेत्युक्ता च तां तस्याः पिता काममपूरयत्॥
दाता यज्वा च वीरश्च श्रुतवानतिथिप्रियः।
अक्रूरः सुषुवे तस्यां स्वफल्काद्गरिदंशिनः॥"*॥
गान्दिनीति पाठोऽपि क्वचित् दृश्यते॥)
गान्दिनीसुतः, पुं, (गान्दिन्या गङ्गायाः सुतः।) भीष्मः। इति त्रिकाण्डशेषः॥ (कार्त्तिकेयः। इति युत्पत्तिलब्धोऽर्थः॥ गान्दिन्यास्तदाख्यया प्रसिद्धायाः स्वफल्कभार्य्यायाः सुतः।) अक्रूरः। इति श्रीभागवतम्॥ (यथा, माघे। १०। १२।
"विलङ्घितस्थितिमभिवीक्ष्य रूक्षया
गिरोर्गिरा गुरुमपि गान्दिनीसुतम्॥")
गान्धर्व्वं, क्ली, (गन्धर्व्वस्य इदं गन्धर्व्वेण गीतं वा। गन्धर्व्व+अण्। यद्वा, गन्धर्व्वो अधिष्ठात्री देवता अस्येति अण्।) गानम्। इति हेमचन्द्रः॥ (यथाह दन्तिलः।
"पदस्यस्वरसङ्घातस्तालेन सङ्गतस्तथा।
प्रयुक्तश्चावधानेन गान्धर्व्वमभिधीयते॥"
यथा च महाभारते। १३। १६। ४६।
"अवादयंश्च गन्धर्व्वा वाद्यानि विधिवानि च।
अथ प्रवृत्ते गान्धर्व्वे दिव्ये ऋषिरुपाविशत्॥"
गन्धर्व्वो अधिष्ठात्री देवता अस्येति अण्। गन्धर्व्वदेवताकमन्त्रम्। यथा, रघुः। ५। ५७।
"गान्धर्व्वमादत्त यतः प्रयोक्तु-
र्न चारिहिंसा विजयश्च हस्ते॥")
गान्धर्व्वः, पुं, (गन्धर्व्व एव। "प्रज्ञादिभ्यश्च।" ५। ४। ३८। इत्यण्।) गन्धर्व्वः। इति हेमचन्द्रः। २। १६४॥ (भारतवर्षोयोपद्वीपविशेषः। यथा, विष्णुपुराणे।
"भारतस्यास्य वर्षस्य नवभेदान्निबोधत।
इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान्॥
नागद्वीपस्तथा सौम्यो गान्धर्व्वस्तथ वारुणः।
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः॥")
अष्टप्रकारविवाहान्तर्गतविवाहविशेषः। यत्र कन्यावरयोरन्योन्यानुरागात् त्वं मे भार्य्या त्वं मे पतिरिति निश्चयः सः। (तल्लक्षणं यथा, मनौ। ३। ३२।
"इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च।
गान्धर्व्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः॥"
स च क्षत्रियाणामेव धर्म्म्यः। यथा, तत्रैव। ३। २६।
"गान्धर्व्वो राक्षसश्चैव धर्म्म्यौ क्षत्रस्य तौ स्मृतौ॥")
तत्सम्बन्धिनि त्रि॥ (यथा, काशीखण्डे।
"गान्धर्व्वश्चैव लोकोऽयं गान्धर्व्वाश्च शुभव्रताः॥"
गान्धर्व्वदेशाश्रिते च। यथा, महाभारते। १२२६। १०।
"उपेतं राजतैरश्वैर्गान्धर्व्वैर्हेममालिभिः।
पारदाभ्रप्रतीकाशैर्मनोवायुसमैर्जवे॥")
गान्धारं, क्ली, (गन्ध एव गान्धं सुगन्धं ऋच्छतीति। ऋ गतौ+"कर्म्मण्यण्।" ३। २। १। इत्यण्। यद्वा, गान्धाराणामन्दहृद्यवासिनां प्रियम्। अण्।) गन्धरसः। इति त्रिकाण्डशेषः॥

गान्धारः, पुं, (गन्ध एव गान्धो गन्धकस्तं ऋच्छति उत्पत्तिकारणत्वेन गच्छतीति। ऋ गतौ+अण्।) सिन्दूरम्। जम्बुद्वीपस्योत्तरदेशः। कान्धार इति भाषा। इति मेदिनी। रे। १४६॥ (देशोऽयं बृहत्संहितायां कूर्म्मविभागे उत्तरस्यामुक्तः। यथा, तत्रैव। १४। २८।
"उत्तरतः कैलासः।" इत्युपक्रम्य,—
"गान्धारयवनोवतिहेमतालराजन्यखचरगणाश्च॥" इत्युक्तवान्। दुर्य्योधनमातुलः शकुनिस्तु एतद्देशस्य राजासीत्। यथा, महाभारते। ३। २३७। २१।
"गान्धारराजः शकुनिः प्रत्युवाच हसन्निव॥"*॥ गन्ध एव गान्धः। स्वार्थे अण्। तं ऋच्छतीति। "कर्म्मणण्।" ३। २। १। इत्यण्।) सप्तस्वरान्तर्गतद्वितीयस्वरः। स तु छागस्वरतुल्यः। (यदुक्तं सङ्गीतशास्त्रे।
"षड्जं रौति मयूरस्तु गावो नर्दन्ति चर्षभम्। गान्धारन्तु अजो रौति क्रौञ्चः क्रणति मध्यमम्॥") तस्योत्पत्त्यादिः।
"वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः। नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना॥"
इति भरतः॥
अपि च।
"नाभेः समुद्गतो वायुर्गन्धं श्रोत्रे च चालयन्। स शब्दस्तेन निर्याति गान्धारस्तेन कथ्यते॥
चतसः पञ्चमे षड्जे मध्यमे श्रुतयो मताः। ऋषभे धैवते तिस्रो हे गान्धारनिषादके॥"
(अयन्तु देवकुलसम्भूतो वैश्यजातिः, स्वर्णवदुज्ज्वलपीतवर्णः। अस्य जन्म कुशद्वीपे, ऋषिः शृङ्गाङ्कः, सरस्वती देवता, त्रिष्टुप् छन्दः। करुणरसे एतस्य उपयोगित्वम्॥ इति सङ्गीतदर्पणे। ८३—९१॥ *॥ स्वरग्रामविशेषः। तल्लक्षणम्। यथा, तत्रैव ७६—८०।
"रि-श्रुतिं धो निषादस्तु ध-श्रुतिं स-श्रुतिं श्रितः॥
गान्धारग्राममाचष्ट तदा तं नारदो मुनिः।
प्रवर्त्तते स्वर्गलोके ग्रामोऽसौ न महीतले॥"*॥)
रागविशेषः। तस्य रूपं यथा, सङ्गीतदामोदरे।
"जटां दधानः स्फुरभूतिभूषणः
कषायवासास्त्रिगुणेक्षणोद्वहिः।
सयोगपट्टः स्फुरनेत्रसुन्दरो
गान्धाररागः कथितस्तपस्वी॥"
स तु भैरवरागपुत्रः। प्रभाते तस्य गानसमयः॥
गान्धारराजः, पुं, (गान्धारस्य देशविशेषस्य राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) शकुनिः। (यथा, महाभारते। ३। २३७। २१।
"गान्धारराजः शकुनिः प्रत्युवाच हसन्निव॥" अस्य पित्रादयोपि। यथा, तत्रैव। १। ११०। १४।
"ततो गान्धारराजस्य पुत्रः शकुनिरभ्ययात्॥")
गान्धारी, स्त्री, (गान्धारस्य गान्धारराजस्य अपत्यं स्त्री। इञ् ततो ङीष्।) धृतराष्ट्रराजपत्नी। सा तु दुर्य्योधनमाता। इति महाभारतम्॥ (इयं हि हरमाराध्य शतपुत्रवरं लब्धवती। यथा, महाभारते। १। ११०। ६।
"अथ शुश्राव विप्रेभ्यः स्त्रीणां सुबलात्मजाम्।
आराध्य वरदं देवं भगनेत्रहरं हरम्॥
गान्धारी किल पुत्राणां शतं लेभे वरं शुभा॥"
पार्व्वतीसहचरीभेदः। यथा, तत्रैव। ३। २३०। ४८।
"गौरी विद्याथ गान्धारी कैशिनी मित्रसाह्वया॥"
गायत्रीस्वरूपा महादेवी। यथा, देवीभागवते। १२। ६। ४०।
"गायत्री गोमती गीता गान्धारी गानलोलुपा॥"
गङ्गा। यथा, काशीखण्डे। २६। ५१।
"गान्धारी गर्भशमनी गतिभ्रष्टगतिप्रदा॥"
"गां धारयतीति गान्धारी।" इति तट्टीका॥
नाड़ीविशेषः। यथा, सङ्गीतदर्पणे। २६।
"सुषुम्नेड़ा पिङ्गला च कुहूरथ पयस्विनी।
गान्धारी हस्तिजिह्वा च वारुणाथ यशस्विनी॥")
जिनानां शासनदेवताविशेषः। इति हेमचन्द्रः॥ यवासः। इति राजनिर्घण्टः॥ दुरालभा। इति भावप्रकाशः॥ मादकद्रव्यविशेषः। गाँजा इति भाषा॥ इति विश्वप्रकाशसारावलीवैद्यकग्रन्थः॥
गान्धारेयः, पुं, (गान्धार्य्या अपत्यं पुमान्। "स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) दुर्य्योधनराजः। इति त्रिकाण्डशेषः॥ (दुःशासनादयोऽपि॥)
गान्धिकः, पुं, (गन्धयते परप्रार्थनां गच्छतीति। गन्ध क ड गतौ+णिनिः। ततः स्वार्थे कन्। यद्वा, गन्धो गर्व्वोऽस्यास्तीति। गन्ध+"अत इनिठनौ।" ५। २। ११५। इति ठन्।) लेखकः। सुगन्धिद्रव्यव्यवहारी। गन्धवणिक् इति ख्यातः। इति मेदिनी। के। ८३॥ स तु अम्बष्ठात् राजपुत्र्यां जातः। इति पराशरपद्धतिः॥ (अयं हि नायकस्य शृङ्गारसहायेषु अन्यतमः। यथा, साहित्यदर्पणे। ३। ४६।
"शृङ्गारस्य सहाया विटवेटविदूषकाद्याः स्युः।
भक्ता नर्म्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः॥
आद्यशब्दात् मालाकाररजकताम्बूलिकगान्धिकादयः॥") कीटविशेषः। इति शब्दरत्नावली॥ गाँधिपोका इति भाषा॥ (गान्धं गन्धप्रधानं द्रव्यमस्यास्ति। ठन्। गन्धप्रधानद्रव्यविशिष्टे च। यथा, पञ्चतन्त्रे। १। १३। [दिभिः।
"पण्यानां गान्धिकं पण्यं किमन्यैः काञ्चनार्य्यचैकेन च यत् क्रीतं तच्छतेन प्रदीयते॥")
गामुकः, त्रि, (गच्छतीति। गम गतौ+"लषपतपदेति।" ३। ३। १५४। इति उकञ्।) गन्ता। इति शाकरणम्॥
गाम्भीर्य्यं, क्ली, (गम्भीरस्य भावो गम्भीरे भवं वा। "गम्भीराञ्ञ्यः।" ४। ३। ५८। इति ञ्यः।) गम्भीरता। यथा,—
"मेघनिर्घोषगाम्भीर्य्यं प्रतिनादविधायिता।"
इति जिनवाल्मीकौ हेमचन्द्रः॥
(इदं हि नायकस्य सात्त्विकगुणविशेषः। यथा, साहित्यदर्पणे। ३। ५८।
"शोभा विलासो माधुर्य्यञ्चाभीर्य्यं धैर्य्यतेजसी।
ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः॥"
तस्य लक्षणम्। यथा, तत्रैव। ३। ६२।
"भीशोकक्रोधहर्षाद्यैर्गाम्भीर्य्यं निर्व्विकारता॥"
उदाहरणम्। यथा,—
"आहूतस्याभिषेकाय विसृष्टस्य वनाय च।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः॥")
गायकः, त्रि, (गायतीति। गै गाने+ण्वुल्।) गानकर्त्ता। इति शब्दरत्नावली॥ (यथा, माघे। ११। १०।
"कलमविकलताल गायकैर्बोधहेतोः॥")
तत्पर्य्यायः। गायनः २ गाथकः ३। इति त्रिकाण्डशेषः॥ गाता ४। तस्य दोषा यथा,—
"लज्जितं भीतसुत्तेषु व्यक्तमनुनासिकम्।
काकस्वरः शिरःकम्पो लयस्थानविवर्জ্জितम्॥
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम्।
व्याकुलं तालहीनञ्च गातुर्दोषाश्चतुर्দ্দश॥"
इति सङ्गीतदामोदरः॥
गायत्री, [न्] पुं, (गायन्तं त्रायते इति। गायत्+त्रै+क्विनिः। आलोपात् साधुः।) खदिरवृक्षः। इति भरतः॥ (खदिरशब्दे गुणादिकं ज्ञेयम्॥ गायन्तं स्तोत्रमस्यास्तीति गायत्र+"अत इनिठनौ।" ५। २। ११५। इति इनिः। उद्गातरि सामगायके त्रि। यथा, ऋग्वेदे। १। १०। १।
"गायन्ति त्वा गायत्रिणोऽर्च्चन्त्यर्कमर्किणः॥")
गायत्री, स्त्री, (गायन्तं त्रायते इति। त्रै ड पालने+"आतोऽनुपसर्गे कः।" ३। २। ३ इति कः। ततो गौरादित्वात् ङीष्।) खदिरवृक्षः। इत्यमरः। २। ४। ४६॥ (यथा, वैद्यके बृहन्मञ्जिष्ठादिक्वाथे।
"मूर्व्वादारुकनिम्बभृङ्गमधुका त्रायन्ति पाठावरी
गायत्री त्रिफलाकिरातकभद्रानिम्बासनारग्वधम्॥")
बृहच्छन्दोविशेषः। तस्यास्तिस्रोविधा यथा। तनुमध्या १ अग्निवदना २ सोमराजी ३। आद्यायाः आद्यन्तयोर्गुरुद्वये मध्ये लघुद्वयम्॥ द्वितीयायाः आदिमध्ययोर्लघुद्वये अन्ते गुरुद्वयम्॥ तृतीयायाः आदिमध्ययोर्लघुगुरू गुरुलघू अन्ते गुरुद्वयम्॥ क्रमेणोदाहरणानि यथा।
आस्तां मम चित्ते नित्यं तनुमध्या॥ १॥ अग्निवदनानां व्रजतरुणीनाम्॥ २॥ हरे सोमराजी समा ते यशःश्रीः॥ ३॥ इति छन्दोमञ्जरी॥*॥
दुर्गा। यथा,—
"गायनाङ्गमनाद्यापि गायत्री चिदगार्च्चिता।
साधनात् सिद्धिरित्युक्ता साधका वाग्धरीश्वरी॥"
इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः॥
(सा च गायत्रीरूपेण ब्रह्मणैव वर्णते। यथा, देवीभागवते। ७। ३०। ८१।
"गायत्री वेदवदने सावित्री शिवसन्निधौ॥"*॥

गङ्गा। यथा, काशीखण्डे। २६। ५३।
"गुणनीयचरित्रा च गायत्री गिरिशप्रिया॥")
त्रिपदा देवी। इति मेदिनी। रे। १५०॥ सा तु त्रिपादक्षराच्छन्दोयुक्तमन्त्रात्मिका वेदमाता द्विजैरुपास्या। (यथाह मनुः। २। ७७—७८।
"त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्।
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः॥
एतदक्षरमेकाञ्च जपन् व्याहृतिपूर्ब्बिकाम्।
सन्ध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते॥"
इयमेव सव्याहृतिका ब्रह्मपदप्राप्तेर्द्वाररूपं तस्मात् प्रत्यहं ब्राह्मणैर्व्याहृतिपूर्ब्बिकेयं अध्ययनीया। यदुक्तं तत्रैव। २। ८१—८३।
"ओङ्कारपूर्ब्बिकास्तिस्रो महाव्याहृतयोऽव्ययाः।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम्॥
योऽधीतेऽहन्यहन्येतान्त्रीणि वर्षाण्यतन्द्रितः।
स ब्रह्म परमभ्येति वायुभूतः खमूर्त्तिमान्॥
एकाक्षरं परं ब्रह्म प्राणायामाः परन्तपः।
सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते॥")
तस्या नामव्युत्पत्तिर्यथा, स्कन्दे।
"गायन्तं त्रायते यस्मात् गायत्री त्वं ततः स्मृता॥"
सापि ब्रह्मणः पत्नी। यथा,—
"अध्वर्य्युणा समाहूता ह्यहि देवि! त्वरान्विता।
उद्गात्राद्यास्तथा सर्व्वे दीक्षाकालमुपागताः॥
सावित्र्युवाच।
लक्ष्मीर्नायाति चायाति सती नैवेह दृश्यते।
हृदयाद्यायतो भूता शक्राणी गच्छती त्विह।
नाहमेकाकिनी यास्ये यावन्नायान्ति ताः स्त्रियः॥
ब्रूहि गत्वा विरिञ्चिन्तं तिष्ठत्विह मुहूर्त्तकम्॥
वदमानां तथाध्वर्य्युस्त्यक्त्वा देवमुपागमत्।
सावित्री व्याकुला देवी प्रसक्ता गृहकर्म्मणि॥
सख्यो नाभ्यागता यावत् तावन्नागमनं मम।
एवमुक्तोऽस्मि वै देव! कालश्चात्यतिवर्त्तते॥
यच्च योग्यं भवेदत्र तत् कुरुष्व पितामह!।
एवमुक्ते तदा वाक्यं किञ्चित्कोपसमन्वितः॥
पत्नीशाल्यां मदर्थन्तु शीघ्रं त्वञ्च समानय।
प्रवर्त्तते यथा यज्ञः कालहीनो न जायते॥
तथा शीघ्रं विधेहि त्वं नारीं काञ्चिदुपानय।
एवमुक्तस्तथा शक्रो गत्वा सर्व्वं धरातलम्॥
स्त्रियो दृष्ट्वास्तु यास्तेन सर्व्वास्तासु परिग्रहाः।
आभीरकन्या सुरूपा सुभाषा चारुलोचना॥
ददर्श्व तां सुचार्व्वङ्गीं कमलायतलोचनाम्।
कासि कस्य कुतश्च त्वमागता शुभे! कथ्यताम्॥
एकाकिनी किमर्थञ्च वीथिमध्येऽवतिष्ठसे।
रूपान्विता च सा कन्या शक्रं प्रोवाच वेपती॥
गोपकन्याऽहं वीर! विक्रेतुमिह गोरसम्।
समागता घृतादीनां प्रयत्नेनैव यत्नेप्सितम्॥
एवमुक्तस्तदा शक्रो गृहीत्वा तां करे दृढम्।
आनीय तां विशालाक्षीं यत्र ब्रह्मा व्यवस्थितः॥
कमलाक्षीं स्फुरद्वाणीं पुष्करीकनिभेक्षणाम्।
गान्धर्व्वेण तदा तस्या ग्रहीतुं मन आदधे॥
प्रभुत्वमात्मनो दाने गोपकन्याप्यमन्यत।
यदेवं मां सुरूपत्वादिच्छत्यादातुमाग्रहात्॥
नास्ति सौमन्तिनी काचिन्मत्तो धन्यतरा यतः।
अनेनाहं समानीता यस्य दुग्धोचरं गता॥
एवं चिन्तापरा दीना यावत् सा गोपकन्यका।
भवत्येषा महाभागा गायत्री नामतः प्रभो!॥
तावदेव महाविष्णुः प्रोक्तवानिदमुत्तमम्।
अनुग्रहेण देवेश! अस्याः पाणिग्रहं कुरु॥
गान्धर्व्वेण विवाहेन उपयेमे पितामहः॥"*॥
अस्या ध्यानं यथा,—
"श्वेता त्वं श्वेतरूपासि शुक्लाङ्गेन समा मता।
बिभ्रती विपुलावूरू कदलीगर्भकोमलौ॥
एणशृङ्गं करे यस्य पङ्कजञ्च सुनिर्म्मलम्।
वसाना वसने चौमे रक्ते चाम्बुतदर्शने॥
शुक्लिरश्मिप्रकाशेन हारेणोरसि राजसे।
दिव्यकुण्डलपूर्णाभ्यां श्रवणाभ्यां विभूषिता॥
चन्द्रमोगणयुक्तेन सुकुटेन विराजसे।
सुकुटेन त्रिशस्येन केशबन्धेन शोभिना॥
भुजगाभोगसदृशौ भुजौ भ्राजयतो दिशः।
स्तनौ ते कठिनौ देवि! वर्त्तुलौ समचूचुकौ॥
जघनेनातिशुभ्रेण त्रिवलीभिश्च संयुता।
विस्तीर्णसुजघना सुश्रोणी च वरानना॥
चारुरूपोरुयुगला अम्बुजाभरणा तथा।
त्रैलोक्यचारिणी सा त्वं जगतामेव पावनी॥"
अस्या वैदिकतान्त्रिकध्यानद्वयं गुह्यत्वादत्र न लिखितम्॥*॥ तस्या जपफलं तत्र ब्राह्मणान् प्रति गायत्रीवाक्यम्।
"विशेषात् पुष्करे स्नात्वा मां जप्त्वा वेदमातरम्।
प्रतिग्रहकृतान् दोषान् प्राप्स्यथ द्विजोत्तमाः!॥
मदीयैः किलजप्यैस्तु तारणाय त्रिभिः कृतैः।
ब्रह्महत्यासमं पापं तत्क्षणादेव नश्यति॥
दशभिर्जन्मजनितं घृतेन तु पुरा कृतम्।
त्रियुगन्तु सहस्रेण नात्र कार्य्या विचारणा॥
अहञ्चरा स्थिता चाहं जगद्ग्राह्यं मया त्विदम्।
माताहं सर्व्ववेदानां पदैः सर्व्वैरलङ्कृता॥
जप्त्वा मां परमां सिद्धिं यास्यन्ति द्विजसत्तमाः!।
प्राधान्यं मम जाप्येन सर्व्वेषां वो भविष्यति॥"*॥
तस्या माहात्म्यादि यथा,—
"उपलभ्य च सावित्रीं नोपतिष्ठेत यो द्विजः।
काले चिकालं सम्प्राप्तः स पतेन्नात्र संशयः॥
गायत्रीमन्त्रतोयाद्यं दत्तं येनाञ्जलित्रयम्।
काले सावित्रिकेणैव स्नातेन दत्तं जगत्त्रयम्॥
अष्टादशसु विद्यासु मीमांसाऽतिगरीयसी।
ततोऽपि तर्कशास्त्राणि पुराणं तेभ्य एव च॥
ततोऽपि धर्म्मशास्त्राणि तेभ्यो गुर्व्वी श्रुतिर्नृप।
ततो ह्युपनिषत् श्रेष्ठा गायत्री च ततोऽधिका॥
वाच्यवाचकसम्बन्धो गायत्र्याः सवितुर्हयोः।
वाच्योऽसौ सविता साक्षात् गायत्री वाचिका परा॥
तां देवीमुपतिष्ठन्ते ब्राह्मणा ये जितेन्द्रियाः।
सूर्य्यलोकं ते प्रयान्ति क्रमान्मुक्तिञ्च पार्थिव।"
इति पद्मपुराणम्॥*॥

अथ गायत्रीकल्पः।
"जपन् हि पावनीं देवीं गायत्रीं वेदमातरम्।
तपसा भावितो देवा ब्राह्मणः पूतकिल्बिषः॥
न सीदेत् प्रतिगृह्णन् स त्वपि पृथ्वीं ससागराम्।
हे सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः॥
यस्तस्य दुष्कृतं नास्ति पूर्ब्बतः परतोऽपि वा।
यज्ञदानरतो विद्वान् साङ्गवेदस्य पाठकः॥
गायत्रीध्यानपूतस्य कलां नार्हति षोडशीम्।
एवं किल्बिषयुक्तस्तु विनिर्दहति पातकम्॥
उभे सन्ध्ये ह्युपासीत तस्मान्नित्यं द्विजोत्तमः।
छन्दस्तस्यास्तु गायत्रं गायत्र्युच्यते ततः॥
गायन्तं त्रायते यस्मात् गायत्री तु ततः स्मृता।
मरीचे! कारणात्तस्मात् गायत्री कीर्त्तिता मया॥
तव बुद्धिमतां श्रेष्ठ! नित्यं सर्व्वेषु कर्म्मसु।
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह॥
जपन्ति ये सदा तेषां न भयं विद्यते क्वचित्।
दशकृत्वः प्रजप्ता सा रात्र्याघौर्घं कृतं लघु॥
तत् पापं प्रशुदत्याशु नात्र कार्य्या विचारणा।
शतं जप्ता तु सा देवी पापौघशमनी स्मृता॥
सहस्रं जप्ता सा देवी महापातकनाशिनी।
लक्षजाप्येन साध्यैव सप्त जन्मानि पातकम्॥
कोटिजाप्येन विप्रर्षे! यदिच्छति तदाप्नुयात्।
यक्षविद्याधरत्वं वा गान्धर्व्वं देवतेऽपि वा॥
यत्र यत्र भवेद्वाञ्छा तत्तदाप्नोत्यसंशयम्।
दशसाहस्रजाप्येन निष्कामः पुरुषो यदि॥
विधिना नियतं ध्यायेत् प्राप्नोति परमं पदम्।
यथाकथञ्चिज्जपिता गायत्री पापहारिणी॥
सर्व्वकामप्रदा प्रोक्ता पृथक्कर्म्मसु निष्ठिता॥"*॥
मरीचिरुवाच।
"विधिना केन कर्त्तव्या गायत्री पापनाशिनी।
पवित्रा परमा ह्येषा सर्व्वकल्याणसाधिनी॥
वह्निरुवाच।
सव्याहृतिं सप्रणवां जप्त्वा मासांश्च षोडश।
अपि भ्रूणहनः पापात् मुच्यन्तेऽहरहःकृतात्॥
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते॥
प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः।
अहोरात्रकृतात् पापात् मुच्यते नात्र संशयः॥
अन्तर्जले चिरावर्त्ता गायत्रीं प्रयतस्त्वथा।
मुच्यते पातकैः सर्व्वैर्यदि न ब्रह्महा भवेत्॥
नास्ति सत्यात् परो धर्म्मो नास्ति क्षमात् समा गतिः।
गायत्र्याश्च समं नास्ति दिवि चेह च पावनम्॥
हुता च वरदा देवी सर्व्वकामफलप्रदा।
गायत्र्याश्च तिलैर्होमः सर्व्वपातकनाशनः॥
शान्तिकामो यवैः कुर्य्यादायुष्कामो घृतेन तु।
कर्म्मान्तसिद्धिकामस्तु कुर्य्यात् सिद्धार्थकैर्नरः॥
ब्रह्मवर्चसकामस्तु पयसा च समाचरेत्।
पुत्रकामः सदा दध्ना धान्यकामस्तु शालिभिः॥
क्षीरवृक्षसमिद्भिस्तु यक्ष्मपीड़ोपशान्तये।
धनकामस्तथा विल्वैः श्रीकामः कमलैस्तथा॥
आरोग्यकामः क्षीरान्नैः कुर्य्यात् दूर्व्वाङ्कुरैस्तथा।

देशापसर्गे संप्राप्ते तदेव च विधीयते ॥
गुग्गुलेर्गुटिकाभिस्तु कृत्वा होममतन्द्रितः ।
सौभाग्यं महदाप्नोति नात्र कार्य्या विचारणा ॥
पायसेन तथा हुत्वा विद्यां समधिगच्छति ॥"*॥
"येन येन तु कामेन लक्षहोमं समाचरेत् ॥
तं तं काममवाप्नोति नात्र कार्य्या विचारणा ।
लक्षेण शुद्धिमुत्पाद्य प्राणायामशतेन च ॥
अन्तर्जले च तां जप्त्वा स्नातो नित्यमतन्द्रितः ।
प्राणायामांस्ततः कृत्वा विधानेनैव षोडश ॥
पूर्व्याह्णे जुहुयादग्नौ सुसमिद्धे यथाविधि ।
भैक्षया च कणाग्नौ वा फलमूलाशनोऽपि वा ॥
क्षीरभक्तभुक्ताहारो भवेत्तत्र विचक्षणः ।
आहाराद्यां यथोक्तानामेकाहारं समाश्रयेत् ॥
समाप्तिर्लक्षहोमस्य यावद्भवति नित्यशः ।
लक्षहोमावसाने तु ब्राह्मणेभ्यस्तु दक्षिणा ॥
देया भवति शक्त्या तु गावो वस्त्राणि काञ्चनम् ।
सर्व्वोत्पातसमुत्पत्तौ सर्व्वं भवति शोभनम् ॥
पञ्चभिर्दशभिर्वाथ लक्षहोमं समाचरेत् ।
अयङ्गौर्ब्रह्मे तथा दोधि वृषतिस्तत्प्रशान्तये ॥
नास्ति लोके स उत्पातो यो न्यतो नोपशाम्यति ।
मङ्गल्यं परं नास्ति यदसादतिरिच्यते ॥
ग्रहशान्तिं पुरा कृत्वा मन्त्रैः खैः खैः शतं शतम् ।
इन्द्रायाग्नये सोमाय यमः प्रजापतेस्तथा ॥
व्याहृतिभ्यस्ततः पश्चात् पूर्णाहुतिमथाददेत् ।
गन्धानान्त्वेति वा कृत्वा इमं देवेति चेन्दवे ॥
अग्निर्मूर्द्धेत्युदुध्यस्व दृष्टस्यतेति प्रयोजयेत् ।
अन्नात् परिस्रुतेनैव सन्नो देवीस्ततः पुनः ॥
कया न इति राहोर्वै केतुं कृण्वंति केतवे ।
त्र्यम्बकेन तु रौद्रन्तु होमयेच्छातवेदसि ॥
सर्व्वं गायत्रीहोमन्तु लक्षहोमे प्रकल्प्यते ।
दिक्पालेभ्यश्च होतव्यं भूतेभ्यश्च ततः क्रमात् ॥
मरुत्वमिं दूतं वे यस्मिन् वृत्रे नमामि तम् ।
वरुणं वो रिशा दश वयमुत्वा पथस्य ते ॥
सोमं राजानमवसे ब्रह्मरुद्राय वै तथा ।
क्षेत्रस्य पतिना चैव भूतानां पतये तथा ॥
रक्षोघ्नैर्वै मन्त्रैश्च होतव्यं विधिपूर्व्वकम् ।
घृताक्ताभिः समिद्भिश्च तिलहोमं ततः परम् ॥
दद्यैकं प्रति वा कुर्य्यादशविंशतिमेव च ।
एकैकं प्रति पूर्णा स्यात्तदन्तं ऋषिसत्तमाः ॥
ब्रह्मवृक्षोद्भवाश्चैवास्तथा दूर्व्वाङ्कुरोद्भवाः ।
होतव्या लक्षहोमे तु गायत्र्याः कामिकं परम् ॥
श्रीसूक्तं पावमानञ्च पौरुषं ग्रामवं तथा ।
रौद्रमैन्द्रञ्च रामञ्च ज्येष्ठसाम दृढव्रथम् ॥
महाजप्तु होमान्ते कुर्य्यात् वै सर्व्वसिद्धिदम् ।
सम्यक् पूर्णा ततो दद्यात् सम्प्राप्ते अभिमन्त्रितम् ॥
नमो ब्रह्मेति चामन्त्र्य सन्निधाय नवं घटम् ।
रत्नैर्बीजैः शुभैर्मन्त्रैर्हेम्ना चैव तु संयुतम् ॥
तज्जलेनाभिषिञ्चेत देवस्य त्वेति वै तदा ।
धन्वनागादिभिर्मन्त्रैरभिषिञ्चेत्ततः क्रमात् ॥
एवं यः कुरुते राजा लक्षहोमं यतव्रतः ।
न तस्य शत्रवः सङ्ख्ये अग्रे तिष्ठन्ति कर्हिचित् ॥
न चैव मरको देशे व्याधिर्व्वा जायते तथा ।
अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः ॥
राजसाद्या विनश्यन्ति सर्व्वास्तत्र तथेतयः ।
रसवन्ति च तोयानि शस्यञ्च निरुपद्रवम् ॥
जायते यस्य या चेष्टा धर्म्मिष्ठा सा न किं भवेत्॥*॥
कोटिहोमन्तु यो राजा कारयेद्विधिपूर्व्वकम् ॥
न तस्य मानसो दाह इह लोके परत्र च ।
कोटिहोमे तु वरयेत् ब्राह्मणान् विंशतिं नृप ! ॥
घृतं वाथ सहस्रं वा य इच्छेन्नतिमात्मनः ।
कोटिहोमं स्वयं यस्तु कुरुते श्रद्धया द्विजः ॥
क्षत्रियो वाथ वैश्यो वा तस्य पुण्यफलं महत् ।
यद्यदिच्छति कामानां तत्तदाप्नोत्यसंशयम् ॥
सशरीरोऽपि चेद्गन्तुं दिवमिच्छेत्तदाप्नुयात् ।
सावित्री परमा देवी सावित्री पावनं परम् ॥
सर्व्वकामप्रदा चैव सावित्री कथिता तव ।
अभिचारेषु तां देवीं विपरीतां विचिन्तयेत् ॥
कार्य्या चाक्षतयश्चात्र विपरीताश्चरास्तथा ।
विपरीताक्षरं कार्य्यं शिरश्च ऋषिसत्तम ! ॥
आदौ शिरः प्रयोक्तव्यं प्रणवोऽन्तेन वै ऋषे ! ।
मतिस्थेनैव फट्कारं मध्ये नाम प्रकीर्त्तितम् ॥
गायत्रीं चिन्तयेत्तत्र दीप्तानलसमप्रभाम् ।
घातयन्तीं त्रिशूलेन कैशेष्वाच्छिद्य वैरिणम् ॥
निहन्तां त्रिशूलेन भ्रकुटीभूषितानना ।
उच्चाटने तु तां देवीं वायुभूतां विचिन्तयेत् ॥
धावमानं तथा साध्यं तस्माद्देशात्तु दूरतः ।
अभिचारेषु होतव्या राजिका विषमिश्रिताः ॥
खरक्तमिश्रं होतव्यं कटुतैलमथापि वा ।
तत्रापि च विषं देयं होमकाले प्रयत्नतः ॥
क्रोधेन महताविष्टः परान्नाभिचरेद्बुधः ।
न जह्यात् यदि क्रोधेन ध्रुवं नश्येत् स एव तु ॥
अनागसि न कर्त्तव्यमभिचारमतो बुधैः ।
स्वल्पागसि न कर्त्तव्यो ह्यभिचारो महामुने ! ॥
महापराधं बलिनं देवब्राह्मणकण्टकम् ।
अभिचारेण यो हन्यान्न स दोषेण लिप्यते ॥
धर्म्मप्रदाने तु तथा स्वल्पागसि तथैव च ।
अभिचारं न कुर्व्वीत बहुपापं विचक्षणः ॥
बहूनां कण्टकं यस्तु पापात्मानं सुदुर्म्मतिम् ।
हन्यात् प्राणापराधन्तु तस्य पुण्यफलं महत् ॥
ये भक्ताः पुष्करीकाक्षे वेदयज्ञे द्विजे जने ।
न स्नानमिच्छरेत् ज्ञातुं तत्र तद्विफलं भवेत् ॥
न हि केशवभक्तानामभिचरेण कर्हिचित् ।
विनाशमभिपद्येत तस्मात्तन्न समाचरेत् ॥
सेयं धात्री विधात्री च सावित्र्यघविनाशिनी ।
प्राणायामेन जप्येन तथा चान्तर्ज्जलेन च ॥
यथाक्षतीकप्रणवा जप्तव्या शिरसा सह ।
प्रणवेन तथा न्यस्ता व्याहृतयः पृथक् ॥
देवतं सवितात्यस्या गायत्रं छन्द एव च ।
विश्वामित्र ऋषिश्चैव प्रोच्यते ऋषिसत्तम ! ॥
कर्म्मेन्द्रियाणि पञ्चैव पञ्च बुद्धीन्द्रियाणि च ।
पञ्चेन्द्रियार्थाः सुमहत् भूतानां पञ्चपञ्चकम् ॥
मनो बुद्धिस्तथैवात्मा व्यक्तमष्टविधन्तम ! ।
चतुर्विंशत्यथैतानि गायत्र्याक्षराणि तु ॥
प्रागेवं पुरुषं विद्धि सप्तदं पञ्चविंशकम् ।
सप्तलोकाश्च ये चेह महाव्याहृतयस्तथा ॥
शिरश्च तत्तथा वाच्यः पुरुषः परमेश्वरः ।
एवंविधा च गायत्री जप्तव्या राजसत्तम ! ॥
होतव्या च यथाशक्त्या सर्व्वकामसमृद्धिदा ।
सावित्रीसारमाचोऽपि वरं विप्रः सुयन्त्रितः ॥
नायन्त्रितश्चतुर्व्वेदी सर्व्वाशी सर्व्वविक्रयी ।
गायत्रीं जपते यस्तु त्रिकालं ब्राह्मणः सदा ॥
अर्थी प्रतिग्रही वापि स गच्छेत् परमां गतिम् ।
गायत्रीं जपते यस्तु कल्यमुत्थाय यो द्विजः ॥
स लिप्यते न पापेन पद्मपत्रमिवाम्भसा ।
कामकामी लभेत् कामान् गतिकामश्च सद्गतिम् ॥
अकामः समवाप्नोति तद्विष्णोः परमं पदम् ॥"
इत्याद्ये वह्निपुराणे गायत्रीकल्पनामाध्यायः ॥

गायनः, त्रि, (गायति सङ्गीतविद्यया उपजीवतीति । गै + "गुरट् च ।" ३ । १ । १४७ । इति गुरट् ।) गायकः । (यथा, काव्यीखण्डे ।
"देवानां गायना ह्येते चारणाः स्तुतिपाठकाः ॥")
गानोपजीवी । इति त्रिकाण्डशेषः ॥ (एतेषामन्नं विशुद्धब्राह्मणादिभिरग्राह्यं पतितत्वात् । यथाह मनुः । ४ । २१० ।
"क्लीबगायनयोश्चान्नं तच्छीलार्द्धिकस्य च ॥")
जल्पाकः । इति धरणी ॥ (स्तुतिपाठकः । यथा, महाभारते । १ । ७८ । ३२ ।
"सत्यं किलैतत् सा प्राह देवानामसि गायनः ॥")

गारित्रं, क्ली, (गीर्य्यते भक्ष्यते इति । गॄ निगरणे + "भूवादिगॄभ्यो णित्रन् ।" उणा ४ । १७० । इति कर्म्मणि णित्रन् ।) ओदनम् । इत्युणादिकोषः ॥

गारुडं, क्ली, (गरुडस्य इदमिति । गरुड + अण् ।) वह्निश्च । यद्वा, गरुडं श्रोतारमालम्ब्य भगवता यदुपदिष्टम् । यद्वा, गरुडेन प्रोक्तमिति । तन्निरुक्तिरुक्ता शिवपुराणे यथा,—
"गरुडस्तु स्वयं वक्ता यत्तद् गारुडसंज्ञकम् ।")
गरुडपुराणम् । इति पुराणम् ॥ यथा,—
गरुड उवाच ।
"मम माता च विनता नागैर्दासीकृता हरे ! ।
यथाहं देवतान् जित्वा चाण्डतं स्नानयामि तत् ॥
दास्याद्धि मोक्षयिष्यामि यथाहं वाहनं तव ।
महाबलो महावीर्य्यः सर्व्वज्ञो नागदारणः ।
पुराणसंहिताकर्त्ता यथाहं स्यां तथा कुरु ॥
विष्णुरुवाच ।
यथा त्वयोक्तं गरुड ! तथा सर्व्वम्भविष्यति ।
देवादीन् सकलान् जित्वा चाण्डतं स्नानयिष्यसि ॥
नागदास्यान्मातरं स्वां विनतां मोक्षयिष्यसि ।
महाबलो वाहनत्वं भविष्यसि विहङ्गमः ॥
पुराणं मत्प्रसादाच्च मम माहात्म्यवाचकम् ।
यदुक्तं मत्स्वरूपञ्च तव चाविर्भविष्यति ॥
गारुडं तव नाम्ना तल्लोके ख्यातिं गमिष्यति ।
यथाहं देवदेवानां श्रीः ख्याता विनतासुत ! ॥
तथा ख्यातिं पुराणेषु गारुडं गरुडेष्यति ।
यथाहं कीर्त्तनीयोऽथ तथा त्वं गरुडात्मना ॥
मां ध्यात्वा पठिष्यन्ति पुराणं गद गारुडम् ।
इत्युक्तो गरुडो रुद्र ! कश्यपायाह पृच्छते ॥

काश्यपो गरुडं स्तुत्वा दृष्ट्वं दग्धमजीवयत् ।
स्वयञ्चाप्यमलो भूत्वा विद्ययान्यानजीवयत ॥
पक्षी ओम् तं स्वाहा जापी विद्येयं गारुडी परा ।
गरुडोऽहं गारुडं हि ग्रहण मद्र ! महात्मकम् ॥"
इत्यादौ महापुराणे गारुडे प्रथमाध्यायो नाम द्वितीयः ॥ * ॥ (अस्मिन् पुराणे एकोनविंशत्-सहस्रसंख्यकश्लोका वर्त्तन्ते । यथा, देवीभागवते । १ । ३ । ११ ।
"एकोनविंशत् साहस्रं गारुडं हरिभाषितम् ॥"
अस्य विशेषविवरणन्तु पुराणशब्दे द्रष्टव्यम् ॥*॥)
गारुडी विद्या गरुडपुराणे २०२ अध्यायादौ द्रष्टव्या ॥ स्वर्णम् । इति हेमचन्द्रः ॥ विषमन्त्रः । इति जटाधरः ॥ (गरुडः गरुडवर्णोऽस्त्यस्येदम् । गरुड + अण् । गरुडवर्ण इव वर्णोऽस्येति भावः ।) मरकतमणिः । इति राजनिर्घण्टः ॥ (यथा-रघौ । १३ । ५३ ।
"त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्भमानामिव गारुडानां
सप्तच्छदः फलितो विभाति ॥"
गरुडाकारेण सेनारचनयाधिष्ठितत्वात् महाव्यूहभेदः । यथा, महाभारते । ६ । ५३ । २ ।
"गारुडञ्च महाव्यूहं चक्रे प्राज्ञनवत्सदा ॥"
एतस्य रचनायां गरुडाकृतित्वविवृतिरर्थवा, तत्रैवाध्याये । ३—८ ।
"गरुडस्य स्थितौ तुण्डे पिता देवव्रतस्तव ।
चक्षुषी च भरद्वाजः कृतवर्म्मा च सात्वतः ॥
अश्वत्थामा कृपश्चैव शिरसि व्यासतो यथा ।
त्रिगर्त्तैर्मत्स्यकैकेयैर्वाटधानैश्च संयुतैः ॥
भूरिश्रवा शलः शल्यो भगदत्तश्च मारिष !।
मद्रकाः सिन्धुसौवीरास्तथा पञ्चनदाश्च ये ॥
जयद्रथेन सहिता ग्रीवायां सन्निवेशिताः ।
पृष्ठे दुर्य्योधनो राजा सोदर्य्यैः सानुगैर्वृतः ॥
विन्दानुविन्दावावन्त्यौ काम्बोजाश्च सुदक्षिणः सह ।
पुच्छमासन् महाराज ! शूरश्चैनाश्च मारिष !॥
दक्षिणं पक्षमाश्रित्य स्थिता व्यूहस्य दंशिताः ।
कारूषाश्च विकुञ्जाश्च सुखाः कुक्कीटवासुधा ॥
दृढरथेन सहिता वामपार्श्वे समाश्रिताः ॥"
यदा त्वस्य व्यूहस्य प्रयोजनं तदाह मनुः ।
७ । १८६—१८७ ।
"व्यूहमेवविधिं भित्त्वा च गूढे युक्ततरो भवेत् ।
गतप्रागते चैव स हि कक्षतरो रिपुः ॥
दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा ॥"
"क्षुद्रसुखपक्षाद्याः पृथुमध्यो वराहव्यूहः ।
एष एव पृथुतरमध्यो गरुडव्यूहः ॥" इति तट्टीकायां कुल्लूकभट्टः ॥)
गारुडिकः, पुं. (गरुडः अधिष्ठात्रत्वेनास्य इति गारुड: विषनिवारणमन्त्रविद्यः । तेन चिकित्सति स एव आजीवो दृष्टेति वा । इति ठक् ।) विषवैद्यः । इति शब्दरत्नावली ॥
गारुडी, स्त्री, (गरुडनाम्नाख्यायते इति । अण् ङीप् च ।) पातालगरुडीलता । इति राजनिर्घण्टः ॥ (गरुडः अधिष्ठात्री देवता अस्या इति अण् ङीप् च । गरुडविद्या । सा च गरुडपुराणे २०२ अध्यायादौ द्रष्टव्या ॥)
गारुत्मतं, क्ली, (गरुत्मान् गरुडस्तस्य वर्णोऽस्यस्य गरुत्मान् अधिष्ठातृदेवताऽस्य वा इति अण् ।) मरकतमणिः । इत्यमरः । २ । ६ । ६२ ॥ (यथा, माघे । ३ । ५ ।
"तस्योत्सङ्गसदः काञ्चनकुथोत्सङ्गाग्र-
प्रलम्बगारुत्मतरत्नभासा ।"
पुत्रा इति लोके । तस्य नामानि ।
"गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गारुत्मतपत्रिका, स्त्री, (गारुत्मतं मरकतमणि-सदृशं पत्रमस्याः इति कप् टापि अत इत्वञ्च ।) पाचीलता । इति राजनिर्घण्टः ॥
गार्गकः, पुं, (गर्गस्य अपत्यं पुमान् इति । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति गार्ग्यः ततः कन् । "आपत्यस्य च तद्धितेऽनाति ।" ६ । ४ । १५१ । इति यकारलोपः ।) गर्गस्यापत्यम् । इत्यमरटीकायां रायमुकुटः ॥
गार्गी, स्त्री, (गर्गस्यापत्यं स्त्री । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् । "यञञोश्च ।" ४ । १ । १६ । इति ङीप् "ततो हलादेर्लघोः ।" ६ । ४ । १५० । इति यलोपः ।) गर्गस्य स्त्र्यपत्यम् । इति मुग्धबोधम् ॥ (यथा, बृहदारण्यके षष्ठब्राह्मणे ६ ब्राह्मणे ।
"अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिदं सर्व्वमप्स्वोतञ्च प्रोतञ्च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति ॥" दुर्गा । यथा, हरिवंशे । १७६ । १४ ।
"ह्रीं श्रीं गार्गीञ्च गान्धारीं योगिनीं योगदां सदा ॥")
गार्गीपुत्रकायणिः, पु, (गार्ग्याः पुत्रस्तस्मादागतो वंशः इति । "पुत्रान्तादन्यतरस्याम् ।" ४ । १ । १५६ । इति वा फिञ् वा कुक् च ।) गार्गी-पुत्रवंशः । अस्य रूपान्तरम् । गार्गीपुत्रायणिः । गार्गीपुत्रिः । इति पाणिनिव्याकरणम् ॥
गार्ग्यः, पुं, (गर्गस्यापत्यं पुमान् । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) गर्गस्य पुमपत्यम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, बृहदारण्यके । ४ । १ । "इमबालाकिर्हानूचानो गार्ग्य आस सङ्गोवाचाऽऽतग्रन्थं काश्यं ब्रह्म ते ब्रुवाणीति ॥")
गार्हपत्यः, पुं, (गृहस्य गृहस्य वायमिति अण् गार्हो गार्ह्यो वा पत्यः पत्यं यत्र यस्य वा ।) गार्ह्य-पत्यवाग्निः । इति हेमचन्द्रः । ३ । ४४२ ॥ गार्ह्य-पत्योऽपि ॥
गार्ह्य, क्ली, (गर्ह एव इति । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ।) लिङ्गम् । यथा, माघे । ३ । ७३ ।
"पीत्वा जलानां विधिनातिगाढ्यांस ॥"
गार्ह्यपत्यः, पुं, (गार्ह्यं गृहसम्बन्धिनं पत्यं पत्यः यस्य यत्र वा ।) गृहपत्युक्तवाग्निः । (यथा, महाभारते । ४ । ४८ । २५ ।
"न हि गार्हपत्यनिर्मुक्ता गार्ह्यपत्याः सुतेजनाः ।
अन्तरेणैव तिष्ठन्ते गिरीणामपि दारुणाः ॥")
गार्भिणं, क्ली, (गर्भिणीनां समूहः इति । "भिक्षादिभ्योऽण् ।" ४ । २ । ३८ । इति अण् ।) गर्भिणीसमूहः । इत्यमरः । २ । ६ । २२ ॥
गार्हपत्यः, पुं, (गृहपतिर्यजमानस्तेन संयुक्तः इति । "गृहपतिना संयुक्ते ण्यः ।" ४ । ४ । ६० । इति ण्यः ।) गृहपतिर्गृहस्वामी तेन नित्यसम्बन्धः । इत्यमरभरतौ ॥ यज्ञीयाग्निविशेषः । (यथा, ऋग्वेदे । १० । ८५ । २० ।
"इहेमं प्रथिं प्रजया ते समध्यता-
मस्मिन् गृहे गार्हपत्याय जागृहि ॥"
भक्तिवर्द्धनाय पितापि गार्हपत्याग्नित्वेन पुत्रादिना वेदितव्य इत्युपदिदेश भगवान् मनुः । यथा । २ । २३१ ।
"पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः ॥")
गालनं, क्ली, (गाल्यते इति । गल् + णिच् + भावे ल्युट् ।) चारणम् । छाँकन गड़ान इत्यादि भाषा ॥ यथा । "तथा पचेत् यथा दार्ढ्यकाठिन्यातिश्लैथिल्यमखगालनरहितोऽन्तरुष्मपक्वश्च भवति ।" इति भवदेवभट्टः ॥
गालवः, पुं, (गाल्यते नाश्यतेऽज्ञानमनेन इति । गल् + णिच् + घञ् । गालः वेदान्तादिज्ञानप्रतिपादकग्रन्थं तं वाति गच्छति जानाति वा । वा + कः ।) मुनिविशेषः । (यथा, भागवते । ८ । १३ । १५ ।
"गालवो दीप्तिमान् रामो द्रोणपुत्रः कृपस्तथा ॥") लोध्रवृक्षः । इति मेदिनी । वे । ३० ॥ श्वेतलोध्रः । इत्यमरटीकायां स्वामी ॥ केन्दुकवृक्षः । इति शब्दचन्द्रिका ॥
गालिः, पुं, (गाल्यते विक्रियते अवगमात्रेण मनो यस्मात् येन वा । गल् + इच् ।) शापः । इति त्रिकाण्डशेषः ॥ (यदुक्तं चिन्तामणौ ।
"ददति ददतु गालीर्गालिमन्तो भवन्तो
वयमपि तदभावाद्गालिदानेऽसमर्थाः ॥")
गालितः, त्रि, (गल् + णिच् + कर्म्मणि क्तः ।) द्रवीकृतः । गलान इति भाषा ॥ यथा,—
"गालितस्य सुवर्णस्य षोड़शांशेन सीसकम् ॥"
इति रत्नावली ॥
कृतगालनः । यथा । "तथा पचेत् यथा अगालितमखश्चरुर्भवति ।" इति कालेञ्जिः ॥
गालिनी, स्त्री, (गालयति द्रवीकरोत्यधियामिति ।) गल + णिच् + णिनि + ङीप् ।) सुद्राविशेषः । यथा,—
"कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ।
तर्ज्जनी मध्यमानामा संहता मुखवर्त्तिता ॥
सुद्रैषा गालिनी प्रोक्ता ग्रन्थस्योपरिचालिता ॥"
इति तन्त्रसारः ॥

गालोड़नं, क्ली, (गाः इन्द्रियाणि आलोडयन्ते प्रवर्त्तयन्त्यनेन। गो+आ+लोड़ि+करणे ल्युट्। निपातनात् साधुः।) उन्मादः। रोगः। मूर्खत्वम्। इति वस्तमाणशब्ददर्पणात्॥

गालोड़ितः, त्रि, (गालोड़ः उन्मादरोगः सञ्जातोऽस्य। इतच्।) उन्मत्तः। रुग्णः। मूर्खः। यथा, "उन्मादग्रीवे रोगार्त्ते मूर्खे गालोड़ितः स्मृतः॥" इति दुर्गसिंहकृतकलापवृत्तिटीकायां चिलोचनदासः॥ गोलोड़ितोऽपि पाठः॥

गालोद्यं, क्ली, (गोभिः पशुविशेषैरालोड्यते भक्षणाय इति। गो+आ+लोड़ि+कर्म्मणि यत्। प्रत्ययेन निपातनात् साधुः।) पद्मबीजम्। इति राजनिर्घण्टः॥

गावौ, पुं, (गोशब्दस्य द्विवचनेन निष्पन्निरिति बोध्यम्।) ग्रामः। यथा,—
"एकैकेन तथा द्वाभ्यां वचनैस्त्रिभिरेव च।
साकाङ्क्षत्वप्रयुक्तन्तु नाम पञ्चविधं स्मृतम्॥
एकवचनसाकाङ्क्षत्वमुक्तं एकविंशत्यादिशब्दे। उभपदं द्विपदं पुष्पवन्तपदं सर्व्वेद्यो अश्विनादिपदं भूस्वर्गयो रोदस्यादिपदं ग्रामे गोपदस्य द्विवचनमाचेष्याकाङ्क्षम्। इति। तदा गावौ ग्राम इत्यादाविव साधुत्वार्थकमेव तत्र द्विवचनमिति वदन्ति।" इति च शब्दशक्तिप्रकाशिका॥

गाह, ऊ ड विलोड़ने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ड, गाहन्तां महिषा निपानसलिलमिति ग्राकुन्तले। ऊ, अगाहिष्ट अगाढ़। इति दुर्गादासः॥

गिरा, स्त्री, (ग+भावे क्विप् स्त्रियां टाप्।) वचनम्। इति त्रिकाण्डशेषः॥ ("तां गिरां करुणां श्रुत्वा।" इति दशरथविलापनाटकम्॥)

गिरिः, पुं (गिरति धारयति पृथ्वीं गिर्यते स्तूयते गुरुत्वाद्वा। "कॄगॄशॄपॄकटिभिदिछिदिभ्यश्च।" उणा। ४। १४२। इति इः किच्च।) पर्व्वतः। इत्यमरः। २। ३। १॥ (पर्व्वतानां अष्टावेव पूजनीयाः कुलाचलत्वात्। यदुक्तम्,—
"मेरुमन्दरकैलासमलया गन्धमादनः।
महेन्द्रः श्रीपर्व्वतश्च हेमकूटस्तथैव च।
अष्टावेते तु सम्पूज्या गिरयः पूर्व्वदिक्क्रमात्॥"
इति शब्दार्थचिन्तामणिः॥)
गेरुकः। इति हेमचन्द्रः। ३। ३५२॥ चक्षूरोगविशेषः। इति मेदिनी। रे। २३॥ पारदस्य दोषविशेषः। यथा, रत्नावल्याम्।
"नागो वङ्गो मलौ वह्निश्चाष्टौ लल्यश्च विषं गिरिः।
असंस्कारैर्मलादोषा निसर्गात् पारदे स्थिताः॥"
सह्याद्रिनां पञ्चतिविशेषश्च॥ (तत्र प्रथमतस्तान्त्रिकगिरिसह्याद्रिलक्षणं यथा,—
"सदोर्द्धबाहुर्यो वीरो सुक्तकेशो दिगम्बरः।
सर्व्वत्र समभावेन भावयेद्यो नरोत्तमः।
इष्टदेवीधिया नारीं स गिरिः परिकीर्त्तितः॥"
इति तन्त्रशास्त्रम्॥
शङ्कराचार्य्यकृतदशनामब्रह्मचारिपरिव्राजकानामन्यतमः। तेषां दशनामानि यथा,—
"तीर्थाश्रमवनारण्यगिरिपर्व्वतसागराः।
पुरिः सरस्वती चैव भारती च तथा दश॥"
तत्र गिरेर्लक्षणम्। यथा, प्राणतोषिण्यां अवधूतप्रकरणे।
"वासो गिरिवरे नित्यं गीताभ्यासे हि तत्परः।
गम्भीराचलबुद्धिश्च गिरिनामा स उच्यते॥"
यदुवंशीयश्वफल्कस्य द्वादशपुत्राणामन्यतमः। यथा, भागवते। ९। २४। १५—१६।
"अक्रूरप्रमुखा आसन् पुत्रा द्वादशविश्रुताः।
आसङ्गः सारमेयश्च मृदुरो मृदुविद्गिरिः॥")
गिरिः, स्त्री, (गॄ+भावे इः किच्च।) निगरणम्। इत्यमरः। ३। २। ११॥ गेला इति भाषा॥ बालमूषिका। इत्यमरटीकायां रमानाथः॥ पूर्त्तौ च। इति मेदिनी। रे। २४।

गिरिकण्टकः, पुं, (गिरेः पर्व्वतस्य कण्टक इव तन्नामकत्वात्तथात्वम्।) वकः। इति त्रिकाण्डशेषः॥

गिरिकदम्बः, पुं, (गिरिसम्भूतः कदम्बः।) नीपः। धाराकदम्बः। इति राजनिर्घण्टः॥

गिरिकदली, स्त्री, (गिरिसञ्जाता कदली।) पर्व्वतीयकदली। तत्पर्य्यायः। गिरिरम्भा २ पर्व्वतमोचा ३ अरण्यकदली ४ वन्यकुबीजा ५ वनरम्भा ६ गिरिजा ७ गजवल्लभा ८। अस्या गुणाः। मधुरत्वम्। हिमत्वम्। बलवीर्य्यवृद्धिकारित्वम्। लघुत्वम्। दाहपित्तदाहश्लेष्मप्रशमनत्वम्। दुर्जरत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

गिरिकर्णिका, स्त्री, (गिरौ गिरिमधिकृत्य कर्णिकेव प्रतिभातीत्यर्थः। यद्वा, गिरिः सुमेरुपर्व्वतः कर्ण इव यस्याः इति कप् टाप् च कापि अत इत्वम्।) पृथिवी। इति त्रिकाण्डशेषः॥ श्वेतकिणिहीवृक्षः। अपराजिता। इति राजनिर्घण्टः॥ (अस्या अवहारो यथा,—
"गुड़पुष्पसारशिखरितरुणगिरिकर्णिका हरिद्राभिः।
अञ्जनगुड़िका भ्रमयति विद्रुचिकां चिकटुसनाथा॥"
इति वैद्यकचक्रपाणिसंग्रहेऽग्निमान्द्याधिकारे॥)

गिरिकर्णी, स्त्री, (गिरेर्बालमधिकायाः कर्ण इव पत्रमस्याः।) अपराजिता। इत्यमरः। २। ४। १०४॥ (अस्याः पर्य्याया यथा,—
"गवाक्ष्यश्वखुरी श्वेता श्वेतभण्डापराजिता।
द्विविधा सा सिता नीला गिरिकर्णी गवादनी॥"
इति वैद्यकरत्नमालायाम्॥
पार्व्वतीयापराजितार्थे पर्य्याया यथा तत्रैव,—
'गिरिकर्णी महाश्वेता स्थलपुष्पा सिता क्वचित्॥")
यवासः। इति शब्दचन्द्रिका॥

गिरिका, स्त्री, (गिरिरेव स्वार्थे कन् टाप् च।) बालमूषिका। इत्यमरः। २। ५। १२॥ (स्वनामख्याता उपरिचरवसुराजपत्नी। सा हि गिरेः कोलाहलाख्यपर्व्वतात् शुक्तिमत्यां नद्यां जातत्वात् गिरिकेति नाम्ना विश्रुता। यथा, महाभारते। १। ६३। ३३—३६।
"राजोपरिचरश्चैवं नाम तस्याथ विश्रुतम्।
पुरोपवाहिनीं तस्य नदीं शुक्तिमतीं गिरिः॥
अरौत्सीत् चेतनायुक्तः कामात् कोलाहलः किल।
गिरिं कोलाहलं तन्तु पदा वसुरताड़यत्॥
निश्चक्राम ततस्तेन प्रहारविवरेण सा।
तस्यां नद्यामजनयन्मिथुनं पर्व्वतः स्वयम्॥
तस्माद्विमोचनात् प्रीता नदी राज्ञे न्यवेदयत्।
यः पुमानभवत्तत्र तं स राजर्षिसत्तमः॥
वसुर्वसुप्रदश्चक्रे सेनापतिमरिन्दमः।
चकार पत्नीं कन्यान्तु तथा तां गिरिकां नृपः॥
वसोः पत्नी तु गिरिका कामकालं न्यवेदयत्।
ऋतुकालमनुप्राप्ता स्नाता पुंसवने शुचिः॥")

गिरिकाक्षः, पुं, (गिरिजा अक्षिरोगविशेषेषु काक्षः एकचक्षुर्हीनः।) गिरिरोगेषेकचक्षुर्हीनः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

गिरिगुड़ः, पुं, (गिरेः गिरौ वा जातः गुड़ः गुड्डितवर्त्तुल इव।) गेरुकः। इति हेमचन्द्रः। ३। ३५३॥

गिरिजं, क्ली, (गिरौ जायते इति। जन्+डः।) अभ्रकम्। शिलाजतु। शैलजम्। लोहम्। इति मेदिनी। जे २३॥ गैरिकम्। इति राजनिर्घण्टः॥

गिरिजः, पुं, (गिरौ जायते इति। जन्+डः।) मधूकवृक्षविशेषः। तत्पर्य्यायः। गौरशाकः २ मधूलः ३ खल्पपत्रकः ४। इति रत्नमाला॥

गिरिजा, स्त्री, (गिरेर्हिमालयपर्व्वतात् हिमगिरेरधिष्ठातृदेवादिति तात्पर्य्यार्थः जायते। जन्+डः स्त्रियां टाप् च। हिमालयस्य अधिष्ठातृत्वे प्रमाणं यथा, कुमारे। १। १।
"अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।"
"देवतां आत्मा यस्य सः। एतेनास्य वस्तुमाहात्म्येनकापरिणयपार्व्वतीजननादिचेतनव्यवहारयोग्यत्वसिद्धिः।" इति टीकायां मल्लिनाथः।) पार्व्वती। (यथा अनर्घराघवे। ४ अङ्के ३३।
"स्त्रीत्व प्रवीरजननी जननी तवैव
देवी स्वयं भगवती गिरिजाऽपि यस्यै॥"
गायत्रीरूपा देवी। यथा, देवीभागवते। १२। ६। ४३।
"गिरिजा गुह्यमातङ्गी गरुड़ध्वजवल्लभा॥"
गङ्गा। इति युतपत्तिलभ्योऽर्थः॥ गिरौ पर्व्वते जायते इति। जन्+डः।) मातुलुङ्गी। इति मेदिनी। जे। २४॥ (अस्याः पर्य्याया यथा,—
"मातुलुङ्गी सुगन्धाख्या गिरिजा पूतिपुष्पिका।
अत्यम्ला देवदूती च सा क्वचिन्मधुकुक्कुटी॥"
इति वैद्यकरत्नमालायाम्॥)
श्वेतदूर्व्वा। इति रत्नमाला॥ क्षुद्रपाषाणभेदः। चायमाणा लता। कारवेल्लः। मल्लिका। गिरिकदली। इति राजनिर्घण्टः॥

गिरिजामलं, क्ली, (गिरौ पर्व्वते अभ्रे अभ्रकवादित्वार्थः जायते इति। जन्+डः। गिरिजम्। तदमति गच्छति। अम्+कलच्। यद्वा, गिरिजेषु

अमलं।)अभ्रकम्। इत्यमरटीकायां रायमुकुटः॥ (अभ्रवणातले प्रमाणं यथा, भावप्रकाशे।
"पुरा वधाय विप्रस्य वज्रिणा वज्रमुद्यतम्।
विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः॥
ते निपेतुर्घनध्वानाच्छिखरेषु महीभृताम्।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकम्॥
तद्वर्णं वज्रजातत्वादभ्रमभ्रवदीड्वात्॥"
अभ्रकशब्देऽस्य विवरणं ज्ञातव्यम्॥)

गिरिज्वरः, पुं, (गिरेः पर्व्वतस्य ज्वर इव तद्भेदकत्वात्। गिरिं ज्वरयतीति वा। ज्वर+णिच्+अच्।) वच्चः। इति शब्दरत्नावली॥

गिरितः, त्रि, (गिल्+कर्म्मणि क्तः लस्य रत्वञ्च।) गिलितः। भक्षितः। इत्यमरटीकायां रायमुकुटः॥

गिरिधातुः, पुं, (गिरौ जातः धातुः। शाकपार्थिवत्वान्मध्यपदलोपिसमासः।) गैरिकम्। इति राजनिर्घण्टः॥

गिरिनिम्बः, पुं, (गिरिसम्भूतोनिम्ब इव।) महारिष्टवृक्षः। इति राजनिर्घण्टः॥

गिरिपीलुः, पुं, (गिरिसम्भूतः पिलुर्वृक्षविशेषः।) परूषकवृक्षः। इति राजनिर्घण्टः॥

गिरिपुष्पकं, क्ली, (गिरिजातं पुष्पकम्।) शैलेयम्। इति राजनिर्घण्टः॥

गिरिप्रिया, स्त्री, (गिरिः पर्व्वतः प्रियो यस्याः अत्याहृतविचरणत्वेति भावः।) चमरीगवी। इति राजनिर्घण्टः॥

गिरिभित्, [द्] पुं, (गिरिं भिनत्ति भित्वा उत्पद्यते इति। भिद्+क्विप्।) पाषाणभेदकवृक्षः। इति भावप्रकाशः॥

गिरिभूः, स्त्री, (गिरौ भवति उत्पद्यते इति। भू+क्विप्।) क्षुद्रपाषाणभेदाः। इति राजनिर्घण्टः॥ गिरेर्भूः। पर्व्वतभूमिः। (यथा, आर्य्यासप्तशत्याम्। ६१५।
"सकलकटकैकमण्डनि!
कठिनीभूताश्रये शिखरदन्ति।
गिरिसुत इव तव मन्ये
मनः शिला समभवच्चण्डि!॥" *॥
गिरेर्हिमालयात् हिमालयाधिष्ठातृदेवादित्यर्थः भवतीति। भू+क्विप्।) पार्व्वती॥

गिरिमल्लिका, स्त्री, (गिरौ जाता मल्लिकेव मध्यपदलोपिसमासः।) कुटजवृक्षः। इत्यमरः। २। ४। ६६॥ (यथास्याः पर्य्यायाः।
"वृक्षकः शक्रपर्य्यायो वत्सको गिरिमल्लिका।
कुटजस्तत्फलेन्द्रयवश्चापि कलिङ्गकः॥"
इति वैद्यकरत्नमालायाम्॥)

गिरिमाणः, पुं, (गिरिरिव मानं परिमाणमस्य उच्छ्रयत्वेनेति शेषः।) हस्ती। इति शब्दरत्नावली॥

गिरिरुट्, [द्] स्त्री, (गिरेः पर्व्वतस्य रुट् रुत्तिका।) गैरिकम्। इति चिकाण्डशेषः। (अवहारोऽस्याः यथा,—
"गिरिरुट्चन्दननागरखटिकाप्रयोजितो वह्निर्लेपः।
कुरुते वचया मिश्रो लोचनमगदं न सन्देहः॥"
इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे॥)

गिरिरुहवं, क्ली, (गिरेर्रुहो रुत्तिकाया भवतीति। भू+अच्।) गैरिकम्। इति राजनिर्घण्टः॥

गिरिरेभः, पुं, (गिरेर्रेभ इव।) विट्खदिरः। इति रत्नमाला॥ इरिमेद इति वा पाठः॥

गिरियकः, पुं, (गिरिं पर्व्वतमाश्रित्य आत्मनिर्म्माणतां याति प्राप्नोतीति। या+कः ततः संज्ञायां कन्।) गेरुकः। इति हेमचन्द्रः। ३। ३५३॥

गिरियाकः, पुं, (गिरिं गिरिमधिकृत्यात्मसत्तां यातीति। या+क्विप्। ततः संज्ञायां कन्।) गेरुकः। इति शब्दरत्नावली॥

गिरिवासी, [न्] पुं, (गिरौ गिरिमाश्रित्य वसतीति। वस्+णिनिः। गिरिं वासयति सुरभीकरोतीत्यर्थे। वस्+करोतेरर्थे णिच् णिनिः।) हस्तिकन्दः। इति राजनिर्घण्टः॥

गिरिशः, पुं, (गिरिराश्रयत्वेन वसतित्वेनास्त्यस्य इति। "लोमादिपामादिपिच्छादिभ्यः शनेलचः।" ५। २। १००। इति शः। यद्वा, गिरौ कैलासाख्यपर्व्वते आध्यात्मिकार्थे तु नित्यशुद्धमनसीत्यर्थः शेते विराजते इति। यद्वा, गिरिं त्रिगुणवृत्तात्मकं मनः श्यति तनूकरोति विशुद्धं करोति शरणागतभक्तसाधकानाम्। शॄ डल श्यने शॄ यच्छदे वा गिरौ कृन्दसि डः। लोके तु कृन्दसानां क्वचिदभाषायामपि प्रयोग इति आशुशुक्षणिवदित्याह स्वामी।) शिवः। इत्यमरः। १। १। ३३॥ (यथा, रघुः। २। ४१।
"इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य।
प्रत्याहृताक्षो गिरिशप्रभावात्
आत्मन्यवज्ञां शिथिलीचकार॥")

गिरिशालिनी, स्त्री, (गिरिं पर्व्वतस्थसुखं शालयते शोभयते इति। शल्+णिच्+णिनिः नान्तत्वात् ङीप् च। गिरिं बालमधिकाकर्त्रं शलते श्राघते निजपत्रावयवेनेत्यर्थे। शल श्राघार्थः+णिनिः ङीप् च।) अपराजिता। यथा,—
"पारिभद्रं पाटला च वकुलं गिरिशालिनी।"
इति वामनपुराणम्॥

गिरिशृङ्गः, पुं, (गिरेः शृङ्गमिवात्युच्चत्वाच्छ्रयस्येति अच्। शुष्कादङ्कोत्तलनसमये शृङ्गसादृश्यादस्य तथात्वम्।) गजेशः। इति शब्दरत्नावली॥ (गिरेः शृङ्गमिति विग्रहे क्ली। पर्व्वतश्रेष्ठम्। यथा, महाभारते। ६। ५६। १५।
"गजैर्निपतितैर्नीलैर्गिरिशृङ्गैरिवाहतैः॥")

गिरिसारः, पुं, (गिरेः सार इव।) लौहम्। (यथा, गोः रामायणे। ६। ७८। १६।
"तत्तेलधौतं विमलं गिरिसारमयं महत्।
शूलं परमसंक्रुद्धो बालिपुत्रे न्यपातयत्॥")
वज्रम्। मलयपर्व्वतः। मेदिनी। रे। २६१॥

गिरिसुता, स्त्री, (गिरेर्हिमालयपर्व्वताधिष्ठातुः सुता पुत्री।) पार्व्वती। यथा,—
"अवतु वो गिरिसुता शशिशेखरः प्रियतमा
वसतु मे हृदि सदा भगवतः पदद्वयम्॥"
इति छन्दोमञ्जरी॥
(तथाच पद्मतन्त्रे। १। १७५।
"अस्तुं वाञ्छति शाम्भवो गणपतेराखुं क्षुधार्त्तः फणी
तच्च क्रौञ्चरिपोः शिखी गिरिसुतासिंहोऽपि नागाशनम्॥"
गङ्गा। यथा, काशीखण्डे। २६। ५२।
"गुहाम्बिका गिरिसुता गोविन्दाङ्घ्रिसमुद्भवा॥")

गिरीशः, पुं, (गिरेः कैलासस्य ईशः।) शिवः। (यथा, वक्रोक्तिपञ्चाशिकायाम्। ३३।
"चिन्तामेऽत्र न वेद्मि प्रियतमे किं चिन्तय स्यान्नव-
यावद्यौवनमद्रिसुतां जयन्नवतु वः स्कन्धा गिरीशोऽनिशम्॥")
गिरीणां पर्व्वतानामीशः श्रेष्ठः।) हिमालयपर्व्वतः। (गिरां वाचां शास्त्राणां वा ईशः।) बृहस्पतिः। इति मेदिनी। शे। १६॥

गिलः, पुं, (गिल्+"इगुपधेति।" ३। १। १३५। इति कः।) जम्बीरः। इति शब्दचन्द्रिका॥

गिलग्राहः, पुं, (गिलं ग्रहाति गिलं यथा स्यात् तथा गिलेन गिलनेन वा ग्रहाति धारयति इति तात्पर्य्यार्थः। ग्रह+अण्।) नक्रः। इति राजनिर्घण्टः॥

गिलनं, क्ली, (गिल्+भावे ल्युट्।) गिरणम्। भक्षणम्। इत्यमरटीका॥ (यथा, हारीते प्रथमे स्थाने प्रथमेऽध्याये।
"चर्व्वणं गिलनञ्चापि कासितं श्वासितन्तथा।
नीचोच्चैव गम्भीरं वर्ण्णयेत् पाठकं सुधीः॥")

गिलिः, स्त्री, (गिल्+भावे इन्।) गिलनम्। इत्यमरटीका॥

गिलितं, त्रि, (गिल्+कर्म्मणि क्तः। गिलिर्जांताऽस्येति तारकादित्वादितच्प्रत्यये के।) भक्षितम्। इत्यमरः। ३। २। ११०॥

गिरणः, पुं, (गायति सामवेदं गायतीति वा। गै गाने+"इण्शीगादाभ्यां कित्।" इति उणादिकोषटीकाधृतसूत्रेण इण्। किदभावपक्षे तु "गादाभ्यां इण्णुच्।" उणा। ३। १६। इति इण्णुच् प्रत्ययनिष्पन्नत्वात् गैणुरित्येवपदं स्यात्।) सामवेदवेत्ता। गायकः। इत्युणादिकोषः॥

गीः, [र्] स्त्री, (गृ+सम्पदादित्वात् क्विप्।) वाक्यम्। सरस्वती। इत्यमरः। १। ६। १॥

गीतं, क्ली, (गीयते इति। गै गाने+भावे क्तः।) गानम्। इत्यमरः। १। ६। २५॥ तस्य लक्षणं यथा,
"धातुमातुसमायुक्तं गीतमित्युच्यते बुधैः।
तच्च नादात्मको धातुर्मातुस्वरसचयः॥ *॥
तद्द्विविधं यथा,—
"गीतञ्च द्विविधं प्रोक्तं यन्त्रगात्रविभागतः।
यन्त्रं स्यादेणवीणादि गात्रन्तु सुखजं मतम्॥"
अपि च।
"निबद्धमनिबद्धञ्च गीतं द्विविधमुच्यते।

अनिबद्धं भवेद्गीतं वर्णादिनियमं विना ॥
यद्वा गमकधातुज्ञैरनिबद्धं विना कृतम् ।
निबद्धञ्च भवेद्गीतं तालमानरसान्वितम् ॥
छन्दो गमकधातुज्ञैर्वर्णादिनियमैः कृतम् ॥
ऋग्भिः पाद्यमभूद्गीतं सामभ्यः समपद्यत ।
यजुर्भ्योऽभिनया जाता रसाश्चार्थर्वणः स्मृताः॥"

अथ संगीतलक्षणम् ।

"तालवाद्यानुगं गीतं नटौर्भिर्यच्च गीयते ।
नृत्यस्यानुगतं रङ्गे तत् सङ्गीतकमुच्यते ॥" * ॥

अथ गीतप्रशंसा ।

"सङ्गीतकेन रम्येण सुखं यस्य न चेतसि ।
मनुष्यरूपभो लोके विधिनैव स वञ्चितः ॥
संसारदुःखदग्धानामुत्तमानामनुग्रहात् ।
प्रभुणा शङ्करेणाच्च गीतवाद्यं प्रकाशितम् ॥
गीतं वाद्यं तथा नृत्यं तौर्य्यत्रिकमिदं मतम् ।
तूर्य्यशब्दो घटङ्गे स्यात् मुरजेऽपि च दृश्यते ॥
गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥
गीतेन हरिणा रङ्गं प्राप्नुवन्त्यपि पक्षिणः ।
वनादायान्ति फणिनः शिशवो न रुदन्ति च ॥
कृतिश्चमत्कृतये किमतः परं
फणिवरोऽप्यतरो वत पश्यम ।
अपि मृतां यदवाप मदालसां
मधुरगीतवशीकृतशङ्करः ॥

परमानन्दविवर्द्धनमभिमतफलं वशीकरणम् ।
सकलजनचित्तहरणं विमुक्तिबीजं परं गीतम् ॥
गीतं पीनपयोधरा समदना नारी विचित्रा कथा
रम्यं हर्म्यतलं सुधांशुकिरणप्रोद्दीपिता यामिनी।
चित्तज्ञाः सुहृदः सुता: सुमनसो भक्ताः पुनः सेवकाः
शुद्धं गीतफलं कवित्वमतुलं संसारसारा मताः॥"
"शुद्धशालगसङ्कीर्णभेदाद्गीतं त्रिधा मतम् ॥"
शुद्धलक्षणं विंशतिर्यथा,—
"एला सोऽद्यभवा सपाढ्करणं तत्पञ्चतालेश्वरः
केरातस्मरचक्रपालविजया गद्यं त्रिभङ्गिस्तथा ।
ढेङ्कीवर्णसरः पुटौ द्विपदिका सुस्तावली माहका
अम्बो दण्डकवर्णनीति कथिताः शुद्धास्तु ते विंशतिः॥"

एलादीनामेतेषां विंशतिसंख्यकानां प्रबन्धगीता नामङ्गानि षट् भवन्ति । तथा च ।

"पदं तानो विरूदञ्च तालः पाढ्यः स्वरस्तथा ।
एलादीनां षड़ङ्गानि कथितानि विरिञ्चिना ॥
पौनरुक्त्यं न देशीये गीते दोषोऽभिजायते ।
श्रीश्रोच्चारेण वर्णानां तथा चैव प्रसारणे ॥
लिङ्गान्यत्ते विसर्गो च संयुक्ताक्षरमोक्षणे ।
परिवर्त्तेऽक्षरागाच्च दुष्टदीर्घयतिक्रमे ॥" * ॥

अथ शालगलक्षणम् ।

"ध्रुवको मण्डकश्चैव प्रतिमण्डो निसारुकः ।
वासकः प्रतिलाभश्च तथान्या चैकतालिका ॥
यतिश्च भ्रुमरश्चेति शालगं लक्षमीरितम् ॥"*॥

अथ सङ्कीर्णलक्षणम् ।

"वेत्रो मञ्जकवस्तथा न गणिका चर्च्चातिनाटोन्नवी
दोहा स्याद्दुलस्तथा गुरुवलो गीता च गोविन्दथा ।
हेम्नोकोऽथ कारिका त्रिपदिकेत्येतानि कामद्विषा
संक्षेपेण चतुर्दशः प्रकटितान्यत्राधमानि क्रमात्॥
इति सङ्गीतदामोदरः ॥
(सङ्गीतस्यान्यद्विवरणं गानशब्दे द्रष्टव्यम् ॥*॥
गीयते स्म इति । गै शब्दे + कर्म्मणि क्तः ।) शब्दिते त्रि । इति मेदिनी । ते । १६ ॥

गीतमोदी, [न्] पुं, (गीतेन सङ्गीतेन मोदते इति । मुद् + "नन्दिग्रहीति।" ३ । १ । १३४ । इति णिनिः ।) किन्नरः । इति शब्दरत्नावली ॥ (सङ्गीतानुरागिणि त्रि ॥)

गीता, स्त्री, (गीयते स्म आत्मविद्योपदेशात्मिका ब्रह्मतत्त्वोपदेशमयी कथा यत्र । गै + क्तः ।) ग्रन्थविशेषः । भगवद्गीतेति ख्याता । सा तु अर्জ্জुनस्य मोहनिवृत्त्यर्थं महाभारतीयभीष्मपर्व्वान्तर्गता कर्म्मोपासनाज्ञानकाण्डत्रयात्मिकाऽष्टादशाध्यायी श्रीकृष्णोक्ता । यथा,—
"भारतं सर्व्ववेदार्थो भारतार्थञ्च कृत्स्नशः ।
गीतायामस्ति तेनेयं सर्व्वशास्त्रमयी मता ॥
इयमष्टादशाध्यायी क्रमात् षट्कत्रयेण हि ।
कर्म्मोपासिज्ञानकाण्डचितयात्मा निगद्यते ॥"
इति नीलकण्ठः ॥
"गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः। या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृता ॥"
इति स्वामी ॥
(अस्याः प्रयोजनादिकं श्रीमद्भिर्मधुसूदनसरस्वतीपादैर्विस्तरशो गीतागूढार्थदीपिकायां दर्शितम् । तदृयथा,—
"सच्चेतनस्य संसारस्यात्यन्तोपरमात्मकम् ।
परं निःश्रेयसं गीताशास्त्रस्योक्तं प्रयोजनम् ॥
सच्चिदानन्दरूपं तत् पूर्णं विष्णोः परं पदम् ।
यत्प्राप्तये समारब्धा वेदाः काण्डत्रयात्मकाः ॥
कर्म्मोपासिस्तथाज्ञानमिति काण्डत्रयं क्रमात् ।
तदूपाष्टादशाध्यायीगीताकाण्डत्रयात्मिका ॥
एकमेकेन षट्केन काण्डमत्रोपलक्षयेत् ।
कर्म्मनिष्ठाज्ञाननिष्ठे कथिते प्रथमान्त्ययोः ॥
यतः समुच्चयो नास्ति तयोरतिविरोधतः ।
भगवद्भक्तिनिष्ठा तु मध्यमे परिकीर्त्तिता ॥
उभयानुगता सा हि सर्व्वविघ्नापनोदिनी ।
कर्म्ममिश्रा च शुद्धा च ज्ञानमिश्रा च सा त्रिधा ॥
तत्र तु प्रथमे काण्डे कर्म्म तत्त्यागवर्त्मना ।
त्वंपदार्थो विशुद्धात्मा सोपपत्तिर्निरूप्यते ॥
द्वितीये भगवद्भक्तिनिष्ठावर्णनवर्त्मना ।
भगवान् परमानन्दस्तत्पदार्थोऽवधार्य्यते ॥
तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम् ।
एवमप्यत्र काण्डानां सम्बन्धोऽस्ति परस्परम् ॥
प्रत्यध्यायं विशेषस्तु तत्र तत्रैव वक्ष्यते ।
मुक्तिसाधनपर्व्वेदं शास्त्रार्थत्वेन कथ्यते ॥
निष्कामकर्म्मनिष्ठालं त्यागात् काम्यनिषिद्धयोः ।
तत्रापि परमो धर्म्मो जपस्तुत्यादिकं हरेः ॥
क्षीणपापस्य चित्तस्य विवेके योग्यता यदा ।
नित्यानित्यविवेकस्तु जायते सुदृढ़स्तदा ॥
इहामुत्रार्थवैराग्यं वशीकाराभिधं क्रमात् ।
ततः शमादिसम्पत्त्या सन्न्यासो निश्चितो भवेत् ॥
एवं सर्व्वपरित्यागान्मुक्तिः जायते दृढ़ा ।
ततो गुरूपसदनमुपदेशग्रहस्ततः ॥
ततः सन्देहहानाय वेदान्तश्रवणादिकम् ।
सर्व्वसुत्तरमीमांसाशास्त्रमत्रोपयुज्यते ॥
ततस्तत्परिपाकेन निदिध्यासननिष्ठता ।
योगशास्त्रन्तु सम्पूर्णमुपयोगं भवेदिह ॥
क्षीणदोषे ततश्चित्ते वाक्यात्तत्त्वमतिर्भवेत् ।
साक्षात्कारो निर्व्विकल्पः शब्दादेवोपजायते ॥
अविद्याविनिवृत्तिस्तु तत्त्वमभ्यसतो भवेत् ।
तत आवरणे क्षीणे क्षीयेते भ्रमसंशयौ ॥
अनारब्धानि कर्म्माणि नश्यन्त्येव समन्ततः ।
न चागामीनि जायन्ते तत्त्वज्ञानप्रभावतः ॥
प्रारब्धकर्म्मविक्षेपाद्वासना तु न नश्यति ।
सा सर्व्वतो बलवता संयमेनोपशाम्यति ॥
संयमो धारणा ध्यानं समाधिरिति यत्क्रमम् ।
यमादिपञ्चकं पूर्व्वं तदर्थमुपयुज्यते ॥
ईश्वरप्रणिधानात्तु समाधिः सिध्यति द्रुतम् ।
ततो भवेन्मनोनाशो वासनाक्षय एव च ॥
तत्त्वज्ञानं मनोनाशो वासनाक्षय इत्यपि ।
युगपत्त्रितयाभ्यासाज्जीवन्मुक्तिर्दृढ़ा भवेत् ॥
विद्वत्सन्न्यासकथनमेतदर्थं श्रुतौ श्रुतम् ।
प्रागविद्वान् य एवाशु यतः स्यात्तस्य साधने ॥
निरुद्धे चेतसि पुरा सविकल्पसमाधिना ।
निर्व्विकल्पसमाधिस्तु भवेदत्र त्रिभूमिकः ॥
युत्थिते खतखाद्ये द्वितीये परबोधितः ।
अन्ते युत्थिते नैव सदा भवति तन्मयः ॥
एवम्भूतो ब्राह्मणः स्याद्वरिष्ठो ब्रह्मवादिनाम्
गुणातीतः स्थितप्रज्ञो विष्णुभक्तश्च कथ्यते ॥
अतिवर्णाश्रमी जीवन्मुक्त आत्मरतिस्तथा ।
एतस्य कृतकृत्यत्वात् शास्त्रमस्मान्निवर्त्तते ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
इत्यादिस्मृतिमानेन कायेन मनसा गिरा ।
सर्व्वावस्थासु भगवद्भक्तिरत्रोपयुज्यते ॥
पूर्व्वभूमौ कृता भक्तिरुत्तरां भूमिमानयेत् ।
अन्यथा विघ्नबाहुल्यात् फलसिद्धिः सुदुर्लभा ॥
पूर्व्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
अनेकजन्मसंसिद्ध इत्यादि च वचो हरेः ॥
यदि प्राग्भवसंस्कारस्यान्वित्यत्वात्तु कस्यचन ।
प्रागेव कृतकृत्यः स्यादाकाग्रफलपातवत् ॥
न तं प्रति कृतार्थत्वाच्छास्त्रमारब्धुमिष्यते ।
प्राक्सिद्धसाधनाभ्यासाद्दुर्ज्ञेया भगवत्कृपा ॥
एवं प्राग्भूमिसिद्धावप्युत्तरोत्तरभूमये ।
विधेया भगवद्भक्तिस्तां विना सा न सिध्यति ॥
जीवन्मुक्तिदशायान्तु न भक्तेः फलकल्पना ।
अदृष्टादिवत्तेषां स्वभावो भजनं हरेः ॥
आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्व्वन्त्यहैतुकीं भक्तिमित्यंभूतगुणो हरिः ॥

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
इत्यादिवचनात् प्रेमभक्तोऽयं मुख्य उच्यते ॥
एतत् सर्वं भगवता गीताशास्त्रे प्रकाशितम् ।
अतो व्याख्यातुमेतन्मे मन उत्सहते भृशम् ॥
निष्कामकर्म्मानुष्ठानं मूलं मोक्षस्य कीर्त्तितम् ।
शोकादिरासुरः पाप्मा तस्य च प्रतिबन्धकः ॥
यतः स्वधर्म्मविभ्रंशः प्रतिषिद्धस्य सेवनम् ।
फलाभिसन्धिपूर्व्वा वा साहङ्कारा क्रिया भवेत् ॥
आविष्टः पुरुषो नित्यमेवमासुरपाप्मभिः ।
पुमर्थलाभायोग्यः सन् लभते दुःखसन्ततिम् ॥
दुःखं स्वभावतो हेयं सर्व्वेषां प्राणिनामिह ।
अतस्तत्साधनं त्याज्यं शोकमोहादिकं सदा ॥
अनादिभवसन्तानजनि(गू)रूढं दुःखकारणम् ।
दुस्त्यजं शोकमोहादि केनोपायेन हीयताम् ॥
एवमाकाङ्क्षयाविष्टं पुरुषार्थोन्मुखं नरम् ।
बुबोधयिषुराहेदं भगवान् शास्त्रसुत्तमम् ॥")
एतदन्याः श्रीभागवतोक्तगोपीगीताध्यात्मरामायणोक्तरामगीताऽष्टमेधिकपर्व्वोक्ते ब्राह्मणगीतानुगीते देवीभागवतोक्तभगवतीगीता शिवगीता इत्याद्याः सन्ति ॥

गीतासारः, पुं, (गीतासु सारः गीतानां वेदान्तादिशास्त्राणां वा सारो यत्र इति वा। सुष्ठ्वर्थं संचेपेण समस्तयोगज्ञानादिप्रतिपादकशास्त्रार्थानां सारार्थो गीतो यत्र इति तात्पर्य्यार्थः।) अर्জ্জুनं प्रति श्रीकृष्णोक्तसुष्ठ्वर्थाष्टाङ्गादियोगः। यथा,—

श्रीभगवानुवाच ।
"गीतासारं प्रवक्ष्यामि अर्জ্জुनायोदितं पुरा ।
अष्टाङ्गयोगं सुष्ठ्वर्थं सर्व्ववेदान्तसारगम् ॥
आत्मलाभः परो नान्य आत्मा देहादिवर्জ্জितः ।
रूपादिमान् हि देहोऽतः करणत्वादि लोचनम् ॥
करणत्वान्मनोऽधीनो न प्राणोऽचेतनो यतः ।
विज्ञानरहितः प्राणः सुषुप्ते हि प्रतीयते ॥
नाहमात्मा च दुःखादिसंसाराभिसमन्वयात् ।
विधूम इव दीप्तार्चिरादित्य इव दीप्तिमान् ॥
वैद्युतोऽग्निरिवाकाशे हृत्स्थो ज्ञेयात्मनात्मनि ।
श्रोत्रादीनि न पश्यन्ति खं स्वमात्मानमात्मना ॥
सर्व्वज्ञः सर्व्वदर्शी च चेत्रज्ञस्तानि पश्यति ।
खानानु मनसा रश्मीन् यदा सम्यङ्नियच्छति ॥
तदा प्रकाशते ह्यात्मा घटे दीपो ज्वलन्निव ।
ज्ञानसुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः ॥
यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ।
इन्द्रियाणीन्द्रियार्थांश्च महाभूतानि पञ्च च ॥
मनो बुद्धिमहङ्कारमव्यक्तं पुरुषं तथा ।
प्रसंख्याय परावाप्तो विमुक्तो बन्धनैर्भवेत् ॥
इन्द्रियग्राममखिलं मनस्यभिनिवेश्य च ।
मनश्चैवाप्यहङ्कारे प्रतिष्ठाप्य च पाण्डव ! ॥
अहङ्कारं तथा बुद्धौ बुद्धिञ्च प्रकृतावपि ।
प्रकृतिं पुरुषे स्थाप्य पुरुषं ब्रह्मणि न्यसेत् ॥
अहं ब्रह्मपरं ज्योतिः प्रसंख्याय विमुच्यते ।
द्विजादिभ्येभ्यः ख्यातो यः पुरुषः पञ्चविंशकः ॥
विवेकात् केवलीभूतः षड्विंशमनुपश्यति ।
नवद्वारमिदं गेहं त्रिगुणं पञ्चसाक्षिकम् ॥
चेत्रज्ञाधिष्ठितं विद्वान् यो वेद स वरः कविः ॥
ज्ञानयज्ञस्य सर्व्वाणि फलं नार्हन्ति षोड़शीम् ॥"
अश्वमेधसहस्राणि वाजपेयशतानि च ।

इति गारुड़े २३३ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।
"यमाश्च नियमाः पार्थ ! आसनं प्राणसंयमः ।
प्रत्याहारस्तथा ध्यानं धारणार्জ্जुन ! सप्तमी ॥
समाधिरयमष्टाङ्गो योग उक्तो विमुक्तये ।
कर्म्मणा मनसा वाचा सर्व्वभूतेषु सर्व्वदा ॥
अक्लेशजननं प्रोक्तं भूतानां यदहिंसनम् ।
अहिंसा परमो धर्म्मो ह्यहिंसा परमं सुखम् ॥
विधिना या भवेद्धिंसा ह्यहिंसा सा प्रकीर्त्तिता ।
यथा नागपदेऽन्यानि पदानि पदगामिनाम् ॥
सर्व्वाण्येवापिधीयन्ते पदजातानि कौञ्जरे ।
एवं सर्व्वं हि हिंसायां धर्म्मार्थमपिधीयते ॥
यद्भूतहितमत्यन्तं वचः सत्यस्य लक्षणम् ।
सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ॥
प्रियञ्च नानृतं ब्रूयात् एष धर्म्मः सनातनः ।
यच्च द्रव्यापहरणं चौर्य्याद्धाथ बलेन वा ॥
स्तेयं तस्यानाचरणमस्तेयं धर्म्मसाधनम् ।
कर्म्मणा मनसा वाचा सर्व्वावस्थासु सर्व्वदा ॥
सर्व्वत्र मैथुनत्यागं ब्रह्मचर्य्यं प्रचक्षते ।
द्रव्याणामप्यनादानमापत्स्वपि यथेच्छया ॥
अपरिग्रहमित्याहुस्तं प्रयत्नेन वर्জ্জयेत् ।
द्विधा शौचं बाह्यमाभ्यां बाह्यं भावादथान्तरम् ॥
यदृच्छालाभतस्तुष्टिः सन्तोषः सुखलक्षणम् ।
मनसश्चेन्द्रियाणाञ्च ऐकाग्र्यं परमं तपः ॥
शरीरशोषणं वापि कृच्छ्रचान्द्रायणादिभिः ।
वेदान्तश्रुतरुद्रीयप्रणवादिजपं बुधाः ॥
सत्त्वशुद्धिकरं पुंसां स्वाध्यायं परिचक्षते ।
स्तुतिस्मरणपूजादिवाङ्मनःकायकर्म्मभिः ॥
सुनिश्चला हरौ भक्तिरेतदीश्वरचिन्तनम् ।
आसनं स्वस्तिकं प्रोक्तं पद्मसंज्ञमथापरम् ॥
प्राणः स्वदेहजो वायुरायामस्तन्निरोधनम् ।
प्राणापाननिरोधस्तु प्राणायाम उपस्थितः ॥
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
नियमः प्रोच्यते सद्भिः प्रत्याहारस्तु पाण्डव ! ॥
मूर्त्तामूर्त्तब्रह्मरूपचिन्तनं ध्यानमुच्यते ।
योगारम्भे मूर्त्तहरिममूर्त्तमथ चिन्तयेत् ॥
नाभिकन्दे स्थितं नालं दशाङ्गुलसमायुतम् ।
नाले चाष्टदलं पद्मं द्वादशाङ्गुलविस्तृतम् ॥
सकर्णिके केशरालं सूर्य्यसोमाग्निमण्डलम् ।
अग्निमण्डलमध्यस्थो वासुदेवश्चतुर्भुजः ॥
शङ्खचक्रगदापद्मयुक्तः कौस्तुभसंयुतः ।
वनमाली कौस्तुभेन युतोऽहं ब्रह्ममुक्त ओम् ॥
धारणेत्युच्यते चेयं धार्य्यते यन्मनोऽनया ।
प्राङ्नाभ्यां हृदये चाथ तृतीया च तथोरसि ॥
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु ।
किञ्चित्तस्मात् परस्मिंश्च धारणादेशकीर्त्तिताः ॥
अहं ब्रह्मेत्यवस्थानं समाधिरभिधीयते ।
एकाकारः समाधिः स्याद्देशलक्षणवर्জ্जितः ॥"

इति गारुड़े २३४ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।
"ब्रह्मगीतां प्रवक्ष्यामि यां ज्ञात्वा मुच्यते भवान् ।
अहं ब्रह्मेति वाक्याज्ज्ञानाम्मोचो भवेन्नृणाम् ॥
वाक्यज्ञानं भवेज्ज्ञानादहं ब्रह्मपदार्थयोः ।
पदद्वयार्थौ द्विविधौ वाच्यौ लक्ष्यौ स्मृतौ बुधैः ॥
वाच्यौ दग्धबलौ ज्ञेयौ लक्ष्यौ शुद्धौ प्रकीर्त्तितौ ।
प्राणपिण्डात्मकार्य्येण चेतनं शुद्धमुक्तं यत् ॥
तथा वै देवपर्य्यन्तमहं शब्देन नोच्यते ।
प्रत्ययूपमद्वितीयमहं शब्देन भण्यते ॥
अद्वयानन्दचैतन्यं परोक्षसहितं परम् ।
प्राणपिण्डात्मकापार्थसहितीयविभागकम् ॥
त्यागेन प्रत्यक्चैतन्यभागो लक्ष्यते चाहमा ।
तथा ब्रह्मपदेनैव प्राणपिण्डात्मकारणा ॥
विद्यापरोक्षभागे च परित्यागे च लक्ष्यते ।
अद्वयानन्दचैतन्यभाग एवं विचिन्तयेत् ॥
अहंपदेन चैतन्यप्रत्यग्ब्रह्मपदेन तु ।
अद्वयानन्दचैतन्यं लक्षयित्वा स्थितस्य च ॥
ब्रह्माहमस्म्यहं ब्रह्म अहंब्रह्मपदार्थयोः ।
अहं ब्रह्मासि वाक्यस्य आत्मभूतिफलात्मकम् ॥
एकत्वज्ञानञ्च भवेद्वेदान्ताद्युक्तो ध्रुवम् ।
ज्ञानादज्ञानताकार्य्यनिवृत्तेर्भुक्त एकतः ॥"

इति गारुड़े २३५ अध्यायः ॥ * ॥

श्रीभगवानुवाच ।
"सम्भवियब्रह्मतः खं स्यात् खाभ्रस्तस्मात्ततोऽनलः ।
अग्नेरापस्ततः पृथ्वी प्रपञ्चीकृतभूतकम् ॥
ततः सम्भवं लिङ्गं पञ्च कर्म्मेन्द्रियाणि च ।
वाक्पाणिपादं पायुश्च उपस्थमथ धीन्द्रियम् ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं स्यात् पञ्च वायवः ।
प्राणोऽपानः समानश्च व्यानश्चोदान एव च ॥
मनो धीरन्तःकरणं स्यान्मनः संशयात्मकम् ।
बुद्धिर्निश्चयरूपा तु एतत्सूक्ष्मशरीरकम् ॥
हिरण्यगर्भमाख्यातं भूततत्कार्य्यलिङ्गकम् ।
पञ्चीकृतानि भूतानि अपञ्चीकृतभूतकः ॥
पञ्चीकृतेभ्यो भूतेभ्यो ब्रह्माण्डं समजायत ।
लोकप्रसिद्धं स्थूलाख्यं शरीरचरणादिमत् ॥
पञ्चीकृतानि भूतानि तत्कार्य्यं चाहमेव च ।
सर्व्वं शरीरजातञ्च प्राणिनां स्थूलमीरितम् ॥
तीराद्युपरतात्मानः शरीरं प्रोच्यते बुधैः ।
देहदयाभिमानी च त्वमर्थो जीव एकतः ॥
सच्छब्दवाच्यं ब्रह्मैव प्रविष्टं देहयोर्द्वयोः ।
जलार्कवद्घटखवज्जीवैः प्राणादिधारणात् ॥
जाग्रत्स्वप्नसुषुप्तीनां साक्षी जीवः स च स्मृतः ।
जाग्रत्स्वप्नसुषुप्ताख्यैर्यतिरिक्तश्च निर्गुणः ॥
निर्गतावयवोत्सर्गो नित्यशुद्धस्वभावकः ।
परमात्मैव सञ्जायत्स्वप्नादौ सन्निधानतः ॥
अन्तःकरणरागेण अन्तःकरणसंस्थितः ।
जाग्रत्स्वप्नसुषुप्तीश्च पश्यतोऽचिन्तः सदा ॥
फलं क्रियाकारकयोर्व्यापारादीन् वदाम्यहम् ।
इन्द्रियैरनुविज्ञानं जाग्रत्स्थानमुदीरितम् ॥
जाग्रत्संस्कारसम्भूतः प्रत्ययो विषयान्वितः ।
स्वप्नं प्रसूतिश्चरणोपसंहारोऽधिपः स्थितः ॥

ब्रह्मकारणरूपेण वटस्य कणिकात्मना ।
क्रमते क्रमतो जीवो जाग्रदादीन् स पश्यति ॥
समाधारम्भकाले तु पूर्व्वमेवावधारयेत् ।
सुसुप्तः पश्चात् संजाते अन्तःकरणनिश्चले ॥
विलापयेत् क्षेत्रजातं क्षेत्रज्ञं परिशोषयेत् ।
पञ्चीकृतेभ्यो भूतेभ्यः अण्डादियतिरिक्तकम् ॥
यथा घटो घटो भिन्नो नास्ति तत्कार्य्यतस्तथा ।
पञ्चीकृतानि भूतानि अपञ्चीकृतभूततः ॥
समष्टियतिरेकेण शिष्टं सूक्ष्मशरीरकम् ।
अपञ्चीकृतभूतेभ्यो न लिङ्गं यतिरिक्तकम् ॥
पृथ्वी वारि विना नास्ति वारि नास्ति च तेजसा ।
तेजश्च वायुना नास्ति वायुः खेन विना न हि ॥
सदब्रह्मणा च खं नास्ति शुद्धब्रह्म विना च सत् ।
शुद्धभावात्तथा जाग्रत्स्वप्नादीनामसम्भवे ॥
जीवत्ववर्जितः प्रत्यगात्मा वै तनुरूपकः ।
नित्यशुद्धबुद्धमुक्तं सत्यं ब्रह्माद्वितीयकम् ॥
तत्त्वंपदार्थौ शिष्टौ तच्चाकारो ब्रह्मकारकः ।
उकारश्च अकारश्च मकारोऽहं द्वयक्षयः ॥
अस्माहमस्माद्ब्रह्म ज्ञानमज्ञानमर्द्दनम् ।
अयमात्मा ब्रह्मज्योतिर्विज्ञानानन्दरूपकम् ॥
सत्यज्ञानमनन्तः स तत्त्वमसि श्रुतीरितम् ।
अहं ब्रह्मास्मि ब्रह्माहं सर्व्वप्राणिषु सर्व्वगम् ॥
योऽसावादित्यपुरुषः सोऽसावहमनादिमत् ।
गीतासारोऽर्जुनायोक्तो येन ब्रह्मणि वै लयः ॥"
इत्यादिमहापुराणे गारुड़े गीतासारे २३६ अध्यायः ॥

गीतिः, स्त्री, (गै गाने + क्तिन् ।) गानम् । (यथा, कुमारे । ३ । ४० ।

"श्रुताक्षरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसंख्यानपरो बभूव ॥")

आर्य्याच्छन्दोविशेषः । इति मेदिनी । ते १६ ॥ (अस्या लक्षणं यथा छन्दोमञ्जर्य्यां मात्रावृत्ते । ७ । [गीतिः ॥")

"आर्य्याप्रथमार्द्धसमं यस्याः परार्द्धमीरितां

गीरथः, पुं, (गीर्वाणी वाङ्मयं ग्राह्यमित्यर्थः रथ इव यस्य ।) देवः । इति त्रिकाण्डशेषः ॥

गीर्णः, त्रि, (गीर्य्यते स्म इति । गॄ गि स्तुतौ + क्त ।) स्तुतः । इत्यमरटीकायां भरतः ॥

गीर्त्तिः, स्त्री, (गॄ + क्तिन् । ऋत्व्यादिभ्यः क्तिन्निष्ठावत् तेन नत्वम् ततो रेफात् णत्वञ्च ।) गिलनम् । इत्यमरः । ३ । ३११ ॥ स्तुतिश्च । गीर्णशब्ददर्शनात् ॥

गीर्देवी, स्त्री, (गीर्वाणी तस्या देवी । वागधिष्ठातृतया तस्यास्तथात्वम् ।) सरस्वती । इति शब्दरत्नावली ॥

गीर्लता, स्त्री, (गीरिव तमोनाशिनी विस्तृता च लता ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥

गीर्(र्व्वा)र्व्वाणः, पुं, (गीर्वाणेव वाणोऽस्यं यस्य । अयथर्थवाक्यतयास्य तथात्वम् । अन्तःस्थवकारमध्यपाठे तु गिरं वदते याचते काङ्क्षतीत्यर्थः स्तुतिप्रियत्वादिति । वद याच्ञायाम् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) देवता । इत्यमरः । १ । १ । ६ ॥ (यथा, भागवते । ८ । १५ । ३२ ।

"एवं सुमन्त्रितार्थास्ते गुरुणार्थानुदर्शिना ।
हित्वा त्रिविष्टपं जग्मुर्गीर्व्वाणाः कामरूपिणः ॥")

गौ(व्वा)र्व्वाणकुसुमं, क्ली,(गौ(व्वा)र्व्वाणप्रियं कुसुमं पुष्पं यस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥

गीष्पतिः, पुं, (गिरां पतिः । अक्षरादीनामिति रेफाभावपक्षे "इडुडुपधस्येति ।" ८ । ३ । ४१ । इति षः । सुग्धबोधमते "खपि वा ।" इति सूत्रस्य प्राच्यिको विधिः ।) बृहस्पतिः । इत्यमरः । १ । १ । २४ ॥ पण्डितः । इति शब्दरत्नावली ॥ अस्य रूपान्तरे गीष्पतिः गीःपतिः । इति सुग्धबोधम् ॥

गु, ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-अनिट् ।) ङ, गवते । इति दुर्गादासः ॥

गु, शि ओ विष्ठोत्सर्गे । इति कविकल्पद्रुमः ॥ (तुदां-(कुटां)-परं-अकं-अनिट् ।) शि, गुवति अगुवीत् । ओ, गुणः । इति दुर्गादासः ॥

गुग्गुलः, पुं, (गोजति शब्दायतेऽनेनेति । गुज् + क्विप् । गुक् रोगस्तस्मात् गुडति रक्षतीति । गुड + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः । डलयोरैक्यात् डस्य लत्वम् ।) गुग्गुलुः । इत्यमरटीकायां भरतः ॥

गुग्गुलुः, पुं, (गुज्यतेऽनेनेति । गुज शब्दे + क्विप् । गुक् रोगस्तस्मात् गुडतीति । गुड रक्षणे + बाहुलकात् कुः । डलयोरैक्यात् डस्य लत्वम् ।) रक्तशोभाञ्जनवृक्षः । इति शब्दचन्द्रिका ॥ स्वनामख्यातवृक्षः । स तु गोमूत्रोद्भवः । यथा,—

"गोरोचनाया मङ्गल्याः संजाताः सर्व्वकामिकाः ।
गुग्गुलुस्तु ततो जातो गोमूत्राच्छुभदर्शनः ॥"

इति वह्निपुराणे वैष्णवधर्म्मे शुद्धिव्रतनामाध्यायः ॥ अस्य निर्य्यासः सुगन्धिद्रव्यम् । तत्पर्य्यायः । कुम्भम् २ उलूखलकम् ३ कौशिकः ४ पुरः ५ ॥ इत्यमरः । २ । ४ । ३४ ॥ कुम्भोलुः ६ खलकम् ७ कुम्भोलूखलकम् ८ गुग्गुलः ९ । इति भरतः ॥ जटायुः १० कालनिर्य्यासः ११ देवधूपः १२ सर्व्वसहः १३ महिषाक्षः १४ पलङ्कषा १५ । इति रत्नमाला ॥ यवनेष्टः १६ भवाभीष्टः १७ निशाटकः १८ जटालः १९ पुटः २० भूतहरः २१ शिवः २२ शाम्भवः २३ दुर्गः २४ यातुघ्नः २५ महिषाक्षकः २६ देवेष्टः २७ मरुद्दिष्टः २८ रक्षोघ्नः २९ रूक्षगन्धकः ३० दिव्यम् ३१ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफमारुतकासक्रमिवातोदरक्लेदश्लीपाग्नीनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ दीपनत्वम् । तीक्ष्णत्वम् । कषायत्वम् । मेदःकुष्ठनाशित्वम् । पित्तदाहित्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ विशदत्वम् । सारकत्वम् । रूक्षत्वम् । पाके कटुत्वम् । भग्नसन्धानकारित्वम् । दृष्यत्वम् । सूक्ष्मत्वम् । सर्य्यत्वम् । पिच्छिलत्वम् । वलकारित्वम् । व्रणमेहाश्मवातामवातपिडकाग्रन्थिगण्डमालानाशित्वञ्च ॥ * ॥

"माधुर्य्याच्छमयेद्वातं कषायत्वाच्च पित्तहा ।
तिक्तत्वात् कफजित्तेन गुग्गुलुः सर्व्वदोषहा ॥"

स तु पञ्चधा यथा,—

"महिषाक्षो महानीलः कुसुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्चजातयः ॥"

तेषां रूपाणि यथा,—

"भृङ्गाञ्जनसवर्णस्तु महिषाक्ष इति स्मृतः ।
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ॥
कुसुदः कुसुदाभः स्यात् पद्मो माणिक्यसन्निभः ।
हिरण्याख्यस्तु हैमाभः पञ्चानां लिङ्गमीरितम् ॥"

एषां प्राणिविशेषे प्रयोगो यथा,—

"महिषाक्षमहानीलौ गजेन्द्राणां हितावुभौ ।
हयानां कुसुदः पद्मः स्वस्यारोग्यकरौ परौ ॥
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ।
कदाचिन्महिषाक्षस्तु मतः कैश्चिन्नृणामपि ॥"

नूतनगुग्गुलो रूपं यथा,—

"स्निग्धकाञ्चनसङ्काशः पक्वजम्बूफलोपमः ।
नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः ॥"

पुरातनस्य रूपं यथा ।

"शुष्को दुर्गन्धिकश्चैव त्यक्तप्रकृतवर्णकः ।
पुराणः स तु विज्ञेयो गुग्गुलुर्व्वीर्य्यवर्जितः ॥"

इति भावप्रकाशः ॥ * ॥

अस्य स्थानविशेषे जन्मादिकथनम् । यथा,—

"जायन्ते पुरपादपा मरुभुवि श्रीशोऽर्कसन्तापिताः
शीतार्त्ताः शिशिरेऽपि गुग्गुलुरसं सृष्यन्ति ते पञ्चधा ।
हैमाभं महिषाक्षतुल्यमपरं सत्पद्मरागोपमं
भृङ्गाभं कुसुदद्युतिञ्च विधिना ग्राह्या परीक्षा ततः ॥
वह्नौ ज्वलन्ति तपने विलयं प्रयान्ति
क्लिद्यन्ति कोष्णसलिले पयसः समानाः ।
ग्राह्याः शुभाः परिहरेच्चिरकालजाता-
नङ्गारवर्ण्यसमपूयविगन्धवर्ण्यान् ॥"

इति प्रयोगरत्नम् ॥

पक्वस्यास्य पूर्व्ववीर्य्यत्वं मासत्रयपर्य्यन्तं तिष्ठति । इति परिभाषा ॥

गुच्छः, पुं, (गुध्यति परिवेष्टते इति । गुध् + "गुधृस्वाद्यिभ्यश्छक्च् ।" इति छक् इति भोजराजः । यद्वा, गुछ ग्रन्थे + क्विप् । गुतं ग्रन्थं छति नाशयतीति । गुत् + छो + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) स्तवकः । पुष्पादिर्यत्नुया इति भाषा । (यथा, गीतगोविन्दे । १ । ११ । [वलीम् ॥")

"अक्षणोर्निक्षिपदञ्जनं श्रवणयोस्तापिच्छगुच्छाञ्जसा ।
इत्यादि गोछा इति भाषा ॥ (उद्भिद्विशेषः । स तु मल्लिकादिः । यथा, मनुः । १ । ४८ ।

"गुच्छगुल्मं तु विविधं तथैव तृणजातयः ।"

"मूलत एव यत्र लतासन्दोहो भवति न च प्रकाण्डानि ते गुच्छा मल्लिकादयः ।" इति तट्टीकायां कुल्लूकभट्टः ॥) हारविशेषः । यष्टिश्च-

नर हार इति भाषा ॥ कलापः । इति मेदिनी । के । ३ ॥ मयूरेर पाखा इति भाषा । मुक्ताहारः । इति रन्तिदेवः ॥

गुच्छकं, क्ली, (गुच्छ + संज्ञायां कन् ।) ग्रन्थिपर्णम् । इति भावप्रकाशः ॥

गुच्छकः, पुं, (गुच्छ + स्वार्थे कन् ।) स्तवकः । इत्यमरः । २ । ४ । ३४ ॥ तत्पर्य्यायः । गुलच्छः २ स्तम्बः ३ कुसुमोच्चयः ४ गुच्छः ५ । इति राजनिर्घण्टः ॥ गुत्सः ६ गुत्सकः ७ । इत्यमरटीकायां भरतः ॥ राठाकरञ्जः । इति राजनिर्घण्टः ॥ स्वार्थे कप्रत्ययात् गुच्छशब्दार्थोऽप्यत्र ॥

गुच्छकणिशः, पुं, (गुच्छवत् कणिशानि मञ्जर्यो यस्य ।) रागीधान्यम् । इति राजनिर्घण्टः ॥

गुच्छकरञ्जः, पुं, (गुच्छः स्तवकः करञ्जफले यस्य ।) करञ्जविशेषः । तत्पर्य्यायः । स्निग्धदलः २ गुच्छपुष्पकः ३ नन्दी ४ गुच्छी ५ सागन्दः ६ दन्तधावनः ७ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । विषवातार्शिकण्डूविचर्चिकाकुष्ठसर्पदंशव्रणदोषनाशित्वञ्च ॥" इति राजनिर्घण्टः ॥

गुच्छदन्तिका, स्त्री, (गुच्छाः स्तवकीभूता दन्ता इव फलानि यस्याः । कप् टाप् अत इत्वञ्च ।) कदली । इति राजनिर्घण्टः ॥

गुच्छपत्रः, पुं, (गुच्छीभूतानि पत्राणि यस्य ।) तालवृक्षः । इति राजनिर्घण्टः ॥

गुच्छपुष्पः, पुं, (गुच्छीभूतानि पुष्पाणि यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ (अशोकवृक्षः । अस्य पर्य्यायाः यथा,—

"हेमपुष्पस्वशोकश्च गुच्छपुष्पोऽङ्गनाप्रियः ॥"

इति वैद्यकरत्नमालायाम् ॥)

गुच्छपुष्पकः, पुं, (गुच्छपुष्प + संज्ञायां कन् ।) रीठाकरञ्जः । गुच्छकरञ्जः । इति राजनिर्घण्टः ॥

गुच्छपुष्पी, स्त्री, (गुच्छपुष्प + जातौ ङीष् ।) धातकी । ग्रिन्ढ़ीवृक्षः । इति राजनिर्घण्टः ॥

गुच्छफलः, पुं, (गुच्छीभूतानि फलानि यस्य ।) रीठाकरञ्जः । राजादनी । कतकः । इति राजनिर्घण्टः ॥ (राजादनशब्देऽस्य गुणादयो ज्ञातव्याः ॥

गुच्छफला, स्त्री, (गुच्छीभूतानि फलानि यस्याः । स्त्रियां टाप् ।) अम्बिदमनी । काकमाची । निष्पावी । द्राक्षा । कदली । इति राजनिर्घण्टः ॥

गुच्छबभ्रा, स्त्री, (गुच्छेन बध्यते इति । बन्ध + बाहुलकात् रक् । ततष्टाप् ।) गुच्छालाबुवृक्षः । इति राजनिर्घण्टः ॥

गुच्छमूलिका, स्त्री, (गुच्छाकृतिः मूलमस्याः । कप् स्त्रियां टाप् अत इत्वञ्च ।) गुच्छासिनीवृक्षम् । इति राजनिर्घण्टः ॥

गुच्छार्द्धः, पुं, (गुच्छस्य इवार्द्धं यष्टिकाहारस्य अर्द्धः । यामार्द्धवत् समासः ।) चतुर्विंशतियष्टिको हारः । इत्यमरः । २ । ६ । १०५ ॥

(पुंलिङ्गनिर्देशादेवास्य तथात्वम् । क्लीवलिङ्गे तु "पुंस्यर्द्धेऽर्द्धं समेऽग्रके ।" इत्यमरोक्तेः षोड़शयष्टिकहारो बोद्धव्य इतितु सुधीभिर्विभाव्यम् ॥)

गुच्छालः, पुं, (गुच्छेन अलति पर्य्याप्नोतीति । अल पर्य्याप्तौ + अच् ।) भूस्तृणम् । इति राजनिर्घण्टः ॥

गुच्छाङ्कन्दः, पुं, (गुच्छाङ्को गुच्छसंज्ञकः कन्दः ।) गुलच्चकन्दः । इति राजनिर्घण्टः ॥

गुच्छी, स्त्री, (गुच्छ + जातौ ङीष् ।) गुच्छकरञ्जः । इति राजनिर्घण्टः ॥

गुज, कूजने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट ।) पञ्चमस्वरी । गौजति । कूजनमव्यक्तशब्दः । इति दुर्गादासः ॥

गुज, द कूजने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) पञ्चमस्वरी । द, कर्म्मणि गुज्जते । कूजनमव्यक्तशब्दः । गुञ्जति भ्रमरः कुञ्जे । इति दुर्गादासः ॥

गुज, ग्रि ध्वनौ । इति कविकल्पद्रुमः ॥ (तुदां-(कुटां)-परं-अकं-सेट् ।) ग्रि, गुजति अगुजीत् जुगोज । इति दुर्गादासः ॥

गुज्जरी, स्त्री, (गुर्ज्जरदेशवासिनां प्रिया । गुर्ज्जर + अण् + स्त्रियां ङीप् । एषोदरादिरलोपे वृद्ध्यभावे च साधुः ।) रागिणीविशेषः । अस्य ध्यानं यथा, सङ्गीतदर्पणे ।

"श्यामा सुकेशी मलयद्रुमार्था
रुद्रूक्षसत्पल्लवतल्पयाता ।
श्रुतेः स्वरांशां दधती विभागं
तन्त्रीसुखाद्यन्निगुज्जरीयम् ॥"

अस्याः कालनियमो यथा,—

"नाटो गौड़ो वड़ारी च गुज्जरी देशिरव च ।
पूर्व्वाह्णे गानमेतेषां निशिद्धमिति तद्विदः ॥"

इति सङ्गीतदामोदरः ॥

मतभेदेन पूर्व्वाह्णेऽपि गीयते ॥ (इयंपुनर्भैरवरागस्य वराङ्गना । हनूमन्मते तु मेघरागस्य । अस्याः स्वरूपं यथा, सङ्गीतदर्पणे ।

"ग्रहांशन्यास-ऋषभा सम्पूर्णा गुर्ज्जरी मता ।
पौरवी मूर्च्छना यस्यां वङ्गाल्या सह मिश्रिता ॥"

"पौरवीमूर्च्छना यस्याम् ।" इत्यत्र "सप्तमी मूर्च्छनैतस्याम् ।" इति क्वचित् पाठः । सोमेश्वरमते इयं पञ्चमहीना षाड़वा । इयञ्च केनापि कारणेन रागविकारे जाते तत्पापप्रायश्चित्तार्थं प्रायेण गीयते तथाचोक्तम्,—

"लोभान्मोहाच्च ये केचिद् गायन्ति च विरागतः ।
सुरसा गुर्ज्जरी तस्य दोषं हन्तीति कथ्यते ॥")

गुञ्जः, पुं, गुञ्जन्ति भ्रमरादयो यत्र गुञ्ज + अधिकरणे घञ् ।) गुच्छः । पुष्पस्तवकः । इति शब्दरत्नावली ॥

गुञ्जकृत्, पुं, (गुञ्जं गुञ्जनं करोतीति । कृ + क्विप् तुक् च ।) भ्रमरः । इति शब्दचन्द्रिका ॥

गुञ्जनं, क्ली, (गुजि कूजने + भावे ल्युट् ।) गुनगुनध्वनिः । भ्रमरादिशब्दः ।

(किमिदं गुञ्जनं सख्यः षट्पदानां मनोहरम् ।)

गुञ्जा, स्त्री, (गुञ्जतीति । गुजि + अच् । अस्याः पक्वफलगुच्छे शब्दबाहुल्यात्तथात्वम् ।) लताविशेषः ॥ कुँच इति भाषा ॥ तत्पर्य्यायः । काकचिञ्ची २ कृष्णला ३ । इत्यमरः । २ । ४ । ६८ ॥ साङ्कुष्ठा ४ रक्तिका ५ काकणन्तिका ६ काकादनी ७ काकतिक्ता ८ काकजङ्घा ९ ग्रिखण्डिनी १० । इति रत्नमाला ॥ चूड़ामणिः ११ सौम्या १२ ग्रिखण्डी १३ अरुणा १४ ताम्रिका १५ ग्रीतपाकी १६ उच्चटा १७ कृष्णचूड़िका १८ रक्ता १९ कामोजी २० भिल्लभूषणा २१ वन्या २२ श्यामलचूड़ा २३ काकचिञ्चिका २४ । अस्या बीजगुणाः । तीक्ष्णत्वम् । उष्णत्वम् । इति राजनिर्घण्टः ॥ कुष्ठव्रणनाशित्वम् । इति राजवल्लभः ॥ अस्याः ग्रिफागुणः । वान्तिकारित्वम् । मूलविषनाशित्वञ्च । वश्यकर्म्मणि श्वेता प्रशस्ता । इति राजनिर्घण्टः ॥ * ॥ (इयन्तु श्वेतरक्तभेदेन द्विविधम् । यदुक्तं भावप्रकाशे ।

"श्वेतरक्तप्रभेदेन ग्रेयं गुञ्जाद्वयं बुधैः ।
गुञ्जाद्वयन्तु कैश्यं स्यात् वातपित्तज्वरापहम् ॥
मुखशोषश्रमश्वासतृष्णामदविनाशनम् ।
नेत्रामयहरं वृष्यं बल्यं कण्डूव्रणं हरेत् ॥
क्षमोन्मत्तप्रकुष्ठानि रक्ता च धवलापि च ॥"

श्वेतगुञ्जा तु अभिचारकर्म्मणि प्रशस्ता । यथा, नवदुर्गामन्त्राभिचारे ।

"जपित्वा सितगुञ्जानां कुडवं कुलिकोदये ॥"

इत्यादि ॥

गुञ्जाफलन्तु विषप्रायत्वात् कदापि स्वयंन भोक्तव्यम् । अस्या विषमयत्वसूक्तं यथा, पद्मतन्त्रे । ४ । ५८ ।

"अन्तर्विषमया श्वेता बहिश्चैव मनोरमाः ।
गुञ्जाफलसमाकाराः स्वभावादेव योषितः ॥")

चतुर्यवपरिमाणम् । रति इति भाषा । (यथा,—

"यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् ॥"

इति ग्रार्ङ्गधरेपूर्व्वखण्डे प्रथमेऽध्याये ॥)

चतुर्धान्यपरिमाणम् । इति सुभङ्करः ॥ गोधूमद्वयमाषम् । इति राजनिर्घण्टः ॥ (गुञ्जति शब्दायते इति । कर्त्तरि अच् ।) पटहः । (गुञ्जनमिति । गुजि + भावे अप् ।) कलध्वनिः । इति मेदिनी ॥ (गुञ्जते भ्रमरादिभिर्मद्यपायिभिर्वा यत्र + अधिकरणे अप् घञ् वा ।) मदिरागृहम् । इति शब्दरत्नावली ॥ चर्चा । इति त्रिकाण्डशेषः ॥

गुञ्जिका, स्त्री, (गुञ्जा एव । स्वार्थे कन् । अत इत्वम् ।) गुञ्जा । त्रियवपरिमाणम् । इति शब्दचन्द्रिका ॥ (गुञ्जाशब्देविवरणमस्या ज्ञातव्यम् ॥)

गुञ्जितं, क्ली, (गुञ्ज + भावे क्तः ।) गुञ्जनम् । यथा,

"न गुञ्जितं तन्न जहार यन्मनः ॥"

इति भट्टिः । २ । १६ ॥

गुटिका, स्त्री, (गुटिरेव । गुटि + स्वार्थे कन् ।) वटिका । गुलि इति वड़ि इति च भाषा ॥ यथा, "गुटिकापातादिना अञ्जनम् ।" इति दायभागः ॥

गुठ, इ क वेष्टे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इस्वी। इ क, गुण्ठयति अगुण्ठत्। इति दुर्गादासः॥

गुड़, इ क वेष्टे। रक्षे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) पञ्चमस्वरी। इ क, गुण्डयति। अनेकार्थत्वाच्चूर्णीकरणेऽपि। गुण्डयति छिङ्गुलं लोकः। इति दुर्गादासः॥

गुड़, गि रक्षे। आघाते। इति कविकल्पद्रुमः॥ (तुदां-(कुटां)-परं-सकं-सेट्।) गि, गुड़ति अगुड़ीत्। इति दुर्गादासः॥

गुड़ः, पुं, (गवते अव्यक्तशब्दं करोतीति। गु ड शब्दे + "कादिभ्यः कित्।" उणां। १। ११४। इति ड; स च कित्।) गोलः। हस्तिसन्नाहः। इति मेदिनी। डे। १०॥ ग्रासः। इति हेमचन्द्रः॥ कार्पासी। इति राजनिर्घण्टः॥ इक्षुपाकः। इत्यमरः। ३। ३। ४१। तस्य पर्य्यायः। इक्षुसारः २ मधुरः ३ रसपाकजः ४ खण्डजः ५ द्रवजः ६ सिद्धः ७ मोदकः ८ अग्रतसारजः ९ शिशुप्रियः १० सितादिः ११ अरुणः १२ रसजः १३। इति राजनिर्घण्टः॥ इक्षुरसकाथः १४ गण्डोलः १५ मधुवीजकः १६। इति वैद्यकम्॥ गण्डोलम् १७ गुलः १८ स्वादुखण्डः १९। इति शब्दरत्नावली॥ स्वादुः २०। इति त्रिकाण्डशेषः॥ अस्य गुणाः। हृद्यत्वम्। स्निग्धत्वम्। गुरुत्वम्। वातनाशित्वम्। मूत्रशोधनत्वम्। नातिपित्तहरत्वम्। मेदःकफकृमिबलप्रदत्वञ्च। इति राजवल्लभः॥ मधुरत्वम्। क्षारत्वम्। उष्णत्वम्। कफनाशित्वम्। पित्तरक्ते अहितत्वम्। ओर्ध्वञ्चैव रसायनः॥ पुरातनस्य तस्य गुणाः। पित्तपवनार्भिनिदोषपाण्डुप्रमेहश्रमनाशित्वम्। प्रथान्तरसंयोगेन विशेषतो ज्वरनाशित्वम्। रुचिकारित्वम्। हृद्यत्वम्। सन्तापशान्तिप्रदत्वम्। विण्मूत्रामयशोधनत्वम्। अग्निजननत्वम्। स्निग्धत्वम्। स्वादुतरत्वम्। लघुत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥ अधिकगुणत्वम्। रक्तप्रसन्नबलकारित्वम्। मधुरत्वञ्च। इति राजवल्लभः॥ यावनालरसपाकभवगुड़गुणाः। क्षारत्वम्। कटुत्वम्। मधुरत्वम्। कफवातनाशित्वम्। पित्तप्रदत्वम्। सततनिषेवणेन कण्डूतिकुष्ठजननत्वम्। जनन इत्यत्र ग्रसन इति क्वचित् पाठः। अस्रविदाहदायित्वञ्च। इति राजनिर्घण्टः॥*॥

"इक्षो रसो यः संपक्को जायते जोष्यवह्निः।
स गुड़ो गौड़देशे तु मत्स्यण्डीव गुड़ो मतः॥
श्लेष्माणमाशु विनिहन्ति सदार्द्रकेण
पित्तं निहन्ति च सदैव हरीतकीभिः।
शुण्ठ्या समं हरति वातमशेषमित्थं
दोषत्रयक्षयकराय नमो गुड़ाय॥
इति भावप्रकाशः॥

("वल्यो हृद्यो गुरुः स्निग्धो वातघ्नो मूत्रशोधनः।
नातिपित्तहरो मेध्यः कफकृन्मिकरो गुड़ः॥
पित्तघ्नो मधुरः शुक्लो वातहा मूत्रशोधनः।
स पुराणोऽधिकगुणो गुल्माग्नीरोचकापहः॥
क्षये कासे क्षतक्षीणे पाण्डुरोगेऽरुचौ क्षये।
हितो योगेन संयुक्तो गुड़ः पथ्यतमो मतः॥
गुदामये कामलशोथमेहे
गुल्मामये पाण्डुहलीमके च।
वाते सपित्तास्रजि राजरोगे
रुचिप्रदो रोगहरो गुड़ः स्यात्॥
कासे श्लीपे गुड़ो नेष्टः अन्यत्रापि हितो मतः।
योगयुक्तोऽपि सर्व्वत्र हितो गुणगणो नयः॥
श्यामक्षीणे पवनकुपिते श्वासमूर्च्छातुराणां
अध्वश्रान्तश्रमदविषि क्षतक्षीणाश्मरीणाम्।
जीर्णः श्यामज्वरविषमगे रक्तपित्तप्रकोपे
लक्षादाहक्षयरुधिरगे सर्व्वरोगान्निहन्ति॥"
इति गुड़गुणाः॥

इति हारीते प्रथमस्थानेऽष्टमोऽध्याये॥*॥

गुड़कः, पुं, (गुड़ेन पक्वः। गुड़ + बाहुलकात् कः। यद्वा, गुड़ेन कायतीति। के + कः।) गुड़द्वारा पक्वौषधविशेषः। अस्य पूर्णतेजः षण्मास पर्य्यन्तं तिष्ठति। इति परिभाषा॥ (गुड़ एव। स्वार्थे कन्। गोलाकृतिः। यथा, महाभारते। ३। १५। ८।
"सक्षुद्गुड़ाश्चगुड़का सायुधा सपरश्वधा॥"
"अश्वगुड़का वर्त्तुलीकृताः पाषाणाः।" इति तट्टीकायां नीलकण्ठः॥)

गुड़करी, स्त्री, (गुड़ं गुड़वत्सुमिष्टं श्रुतिसुखकरमित्यर्थं करोतीति। गुड़ + कृ + "कृञो हेतुताच्छील्यानुलोम्येषु।" ३। २। २०। इति टः स्त्रियां ङीप्।) रागिणीविशेषः। इति हलायुधः॥

गुड़ची, स्त्री, (चि + क्विप् निपातनाद्दीर्घत्वे साधुः। गुड़वत् ची चयनं चरितोरसो यस्या इत्यर्थः। अन्तोदात्तत्वादेवास्यास्तथात्वम्।) गुड़ूची। इत्यमरटीकायां भरतः॥ (अस्या उत्पत्तिकथा अन्यद्विवरणञ्च गुड़ूचीशब्दे द्रष्टव्यम्॥)

गुड़त्वक्, क्ली, (गुड़प्रधानं गुड़कारकं वा त्वक्।) इक्षुः। इति राजनिर्घण्टः॥

गुड़त्वचं, क्ली, (गड़प्रधानं त्वक्। निपातनात् साधु।) गुड़त्वक्। इक्षुः। इति शब्दरत्नावली॥

गुड़त्वक्, [च्] क्ली, (गुड़इव मधुरा त्वगस्य।) खनामख्यातगन्धद्रव्यम्। तत्पर्य्यायः। क्षुत्कटम् २ भृङ्गम् ३ त्वक्पत्रम् ४ वराङ्गकम् ५ त्वचम् ६ चोलम् ७ त्वक्चापत्रम् ८ कुद्दम् ९ सुरभिवल्कलम् १०। इति शब्दरत्नावली॥ उत्कटम् ११ चोचम् १२। इत्यमरः। २। ४। १३४॥ त्वक् १३ पत्रम् १४ इति तट्टीका॥ अस्य गुणाः। कफशुक्रामवातनाशित्वम्। मधुरत्वम्। कटुत्वञ्च। इति राजवल्लभः॥ लघुत्वम्। उष्णत्वम्। स्वादुत्वम्। तिक्तत्वम्। रूक्षत्वम्। पित्तदृष्टिकारित्वम्। अरुचिकण्डुकृद्वस्तिधातार्शःकृमिपीनसरोगनाशित्वञ्च। इति भावप्रकाशः॥

गुड़त्वचं, क्ली, (गुड़वत् मधुरं त्वचम्।) गुड़त्वक्। राजभोग्यम्। इति शब्दचन्द्रिका॥ जयिनी इति भाषा॥

गुड़दारु, क्ली, गुड़प्रधानं गुड़कारणं वा दारु-त्वगादिः।) इक्षुः। इति त्रिकाण्डशेषः॥

गुड़धेनुः, स्त्री, (गुड़निर्म्मिता गुड़भारादिभिः कृता धेनुः।) गुड़ादिनिर्म्मिता धेनुः। यथा,—
"गुड़धेनुविधानस्य यद्वप्रमिह यत् फलम्।
तदिदानीं प्रवक्ष्यामि सर्व्वपापविनाशनम्॥
कृष्णाजिनं चतुर्हस्तं प्रागग्रीवं विन्यसेद्भुवि।
गोमयेनानुलिप्तायां दर्भमास्तीर्य्य सर्व्वतः॥
लवणेनाजिनं तद्वत् वत्सस्य परिकल्पयेत्।
उदङ्मुखीं कल्पयेद्धेनुमुदीच्याञ्च सवत्सकाम्॥
उत्तमा गुड़धेनुः स्यात् सदा भारचतुष्टये।
वहुभारेण वा कार्य्या भाराभ्यां मध्यमा स्मृता॥
अर्द्धभारेण वत्सः स्यात् कनिष्ठा भारकेण तु।
चतुर्थांशेन वत्सः स्यात् यद्वित्तानुसारतः॥
धेनुवत्सौ तदा तौ तु सितसूक्ष्माम्बराद्यौ।
शुक्तिकर्णाविक्षुपादौ शुद्धसुक्ताफलेक्षणौ॥
सितसूत्रशिरालौ तु सितकम्बलकम्बलौ।
ताम्रगुड़कपृष्ठौ तु सितचामररोमकौ।
विद्रुमभ्रूयुगलतौ नवनीतस्तनान्वितौ॥
क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ।
इत्येवं रचयित्वा तु धूपदीपैः समर्चयेत्॥
सर्व्वासां धेनूनामेवं विधानं ज्ञेयम्। इति भाग्ने हरिवंशखण्डम्॥

गुड़पुष्पः, पुं, (गुड़ इव मधुरं पुष्पमस्य।) मधूकवृक्षः। इत्यमरः। २। ४। २७॥

गुड़फलः, पुं, (गुड़ इव मधुरं फलमस्य।) पीलुवृक्षः। इत्यमरः। २। ४। २८॥

गुड़बीजः, पुं, (गुड़वत् मधुरं यद्वा, गुड़ं वर्त्तुलाकृति बीजं यस्य।) मक्षरः। इति राजनिर्घण्टः॥

गुड़भा, स्त्री, (गुड़वत् भाति शोभते इति। भा + कः। स्त्रियां टाप्।) यावनालशर्करा। इति राजनिर्घण्टः॥

गुड़मूलः, पुं, (गुड़वत् सुमिष्टं मूलं यस्य।) अश्वमारिमशाकम्। इति शब्दचन्द्रिका॥

गुड़लं, क्ली, (गुड़ं उत्पत्तिकारणत्वेन लातीति। ला + कः।) गौड़ी मदिरा। इति शब्दचन्द्रिका॥

गुड़शर्करा, स्त्री, (गुड़जाता शर्करा।) शर्करा। तत्पर्य्यायः। पिण्टा २। इति त्रिकाण्डशेषः॥ (यथा, सुश्रुते उत्तरतन्त्रे ४२ अध्याये।
"विदारी त्रिफला भीरु शृङ्गाटी गुड़शर्करा॥")

गुड़शिग्रुः, पुं, (गुड़ इव रक्तवर्णः शिग्रुवृक्षविशेषः।) रक्तशोभाञ्जनः। इति शब्दचन्द्रिका॥

गुड़ा, स्त्री, (गुड़ + स्त्रियां टाप्।) खुड़ीवृक्षः। गुड़िका। इति मेदिनी॥ उम्बरी। इति राजनिर्घण्टः॥

गुड़ाका, स्त्री, (गुड़यति सङ्कोचयति जड़ीकरोति देहेन्द्रियादीनि योऽवस्थाविशेषः स गुड़ः तं आकायति प्रकाशयतीति। गुड़ + आ + कै + कः स्त्रियां टाप्।) निद्रा। इति गुड़ाकेशशब्दव्युत्पत्तौ श्रीधर

स्वामी ॥ (आलस्यम् । इति मधुसूदनसरस्वतिः ॥)
गुड़ाकेशः, पुं, (गुड़ाका निद्रा माया इत्यर्थस्तस्या ईशः ।) शिवः । (गुड़ा निद्रा आलस्यं इन्द्रियाणि वा तस्या ईशः शास्ता जितनिद्रो जितेन्द्रियो वा ।) अर्জ্জुनः । इति जटाधरः ॥ (यथा, गीतायाम् । १ । २४ ।
"एवमुक्तो हृषीकेशो गुड़ाकेशेन भारत ! ॥")
गुड़ाश्रयः, पुं, (आश्रयतेऽस्मिन्निति । आश्रयो वासस्थानम् । ततो गुड़स्येव मधुररसस्य आश्रयः ।) आखोटवृक्षः । इति राजनिर्घण्टः ॥
गुड़िका, स्त्री, (गुड़ा वर्त्तुलाकृतिः । स्वार्थे कन् टापि अत इत्वम् ।) गुटिका । वृहद्वटिका । यथा, वैद्यकपरिभाषा ॥
"वटिका गुटिका चेति संज्ञावान्तरभेदतः ।"
("चूर्णावलेहगुड़िका कल्कानामनुपानकम् ।
वातपित्तकफोद्रेके त्रिद्वैकफलमाहरेत् ॥
इति गार्ङ्गधरे मध्यखण्डे षष्ठेऽध्याये ॥)
गुड़ुची, स्त्री, (गुड़ची + निपातनादुत्वागमः ।) गुड़ूची । इति द्विरूपकोषः ॥
गुड़ूची, स्त्री, लताविशेषः । गुलञ्च इति भाषा ॥ तत्पर्य्यायः । वत्सादनी २ छिन्नरुहा ३ तन्त्रिका ४ अमृता ५ जीवन्तिका ६ सोमवल्ली ७ विशल्या ८ मधुपर्णी ९ । इत्यमरः ॥ गुड़ूची १० । इति भरतः ॥ कुण्डली ११ चक्रलक्षणा १२ । इति रत्नमाला ॥ अमृतवल्ली १३ ज्वरारिः १४ श्यामा १५ वरा १६ सुरलता १७ मधुपर्णिका १८ छिन्नोद्भवा १९ अमृतलता २० रसायनी २१ छिन्ना २२ सोमलतिका २३ भिषक्प्रिया २४ कुण्डलिनी २५ वयःस्था २६ नागकुमारिका २७ कुण्डिका २८ चन्द्रहासा २९ । इति राजनिर्घण्टः ॥ अमृतवल्लरी ३० सुधा ३१ जीवन्ती ३२ सोमा ३३ चक्रलक्षणिका ३४ वयस्था ३५ मण्डली ३६ देवनिर्म्मिता ३७ । अस्या गुणाः । कटुत्वम् । खादुपाकित्वम् । रसायनत्वम् । संग्राहित्वम् । कषायत्वम् । उष्णत्वम् । लघुत्वम् । वल्यत्वम् । अग्निदीपनत्वम् । दोषत्रयामलरुग्दाहमेहकासपाण्डुकामलाकुष्ठवातासृक्ज्वररक्तमिवमिनाशित्वञ्च । इति भावप्रकाशः ॥ गुरुत्वम् । वीर्य्यदार्ढ्यत्वम् । भ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ रक्तपित्तनाशित्वम् । इति राजवल्लभः ॥ अस्याः पत्रस्य गुणाः । आग्नेयत्वम् । सर्व्वज्वरहरत्वम् । लघुत्वम् । कषायत्वम् । कटुत्वम् । खादुपाकित्वम् । रसायनत्वम् । बलकारित्वम् । उष्णत्वम् । संग्राहित्वम् । त्रिदोषलक्षणादाहभ्रमेहवातासृक्कामलाकुष्ठपाण्डुतानाशित्वञ्च । इति भावप्रकाशः ॥ घृतयुक्तायाः वातनाशित्वम् । गुड़युक्तायाः पित्तनाशित्वम् । मधुयुक्तायाः कफनाशित्वम् । एरण्डतैलयुक्तायाः उग्रवातासृग्नाशित्वम् । शुण्ठीयुक्तायाः आमवातनाशित्वम् । इति राजवल्लभः ॥ * ॥

अस्या उत्पत्तिर्यथा,—
"अथ लङ्केश्वरो नाम्ना रावणो राक्षसाधिपः ।
रामपत्नीं बलात् सीतां जहार मदनातुरः ॥
ततस्तं बलवान् रामो रिपुं जायापहारिणम् ।
बलं वानरसैन्येन जघान रणमूर्द्धनि ॥
हते तस्मिन् सुरारातौ रावणे बलगर्व्विते ।
देवराजः सहस्राक्षः परितुष्टोऽपि राघवे ॥
तत्र ये वानराः केचिद्राक्षसैर्निहता रणे ।
तानिन्द्रो जीवयामास संस्मित्वाऽमृतदृष्टिभिः ॥
ततो येषु च देशेषु कपिगात्रात् परिच्युताः ।
पीयूषबिन्दवः पेतुस्तेभ्यो जाता गुड़ूचिका ॥"
इति भावप्रकाशः ॥
(गुड़ूचीघृतम् । यथा,—
"गुड़ूचीकाथकल्काभ्यां सपयस्कं घृतं शृतम् ।
हन्ति वातं तथारक्तकुष्ठं जयति दुस्तरम् ॥
इति वैद्यकचक्रपाणिसंग्रहे वातरक्ताधिकारे ॥)
गुड़ेरः, पुं, (गुड़ति रक्षतीति गुड़ रक्षायाम् + "पतिकठिकुठिगड़ि गुड़िदंशिभ्य एरक् ।" उणां । १ । ५८ । इति एरक् । रक्षकः । इति व्युत्पत्तिलभ्योऽर्थः ।) ग्रासः । इत्युणादिकोषः ॥ गुड़कः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
गुड़ेरकः, पुं, (गुड़ेर + स्वार्थे कन् ।) ग्रासः । इति हेमचन्द्रः । ३ । ८६ ॥
गुड़ोद्भवा, स्त्री, (गुड़ादुद्भवो यस्याः । यद्वा, उद्भवत्यस्मादिति उद्भवः । गुड़ उद्भवो उत्पत्तिर्यस्याः ।) शर्करा । इति राजनिर्घण्टः ॥
गुध, तृ क मन्त्रणे । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-परं-सकं-सेट् ।) दुःखी । मूर्द्धन्योपधः । गुधयति । इति दुर्गादासः ॥
गुणः, पुं, (गुण्यते मन्त्र्यते मन्त्रणादिभिर्निश्चीयते राजभिरितिशेषः । गुण मन्त्रणे + घञ् ।) षट्प्रकारराजनीतिविशेषः । तद्यथा । सन्धिः १ विग्रहः २ यानम् ३ आसनम् ४ द्वैधम् ५ आश्रयः ६ ॥ (यथा, मनुः । ७ । १६० ।
"सन्धिञ्च विग्रहञ्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा ॥"
एते षड्गुणास्तु नीतिविदा राज्ञा कदा केनोपायेन च प्रयोक्तव्यास्तद्विवरणादिकन्तत्रैव । ७ । १६१ । श्लोकमारभ्य द्रष्टव्यम् ॥) धनुराकर्षणरज्जुः । छिला इति भाषा । (यथा, रघुवंशे । ९ । ५४ ।
"अथ नभस्य इव त्रिदशायुधं
कनकपिङ्गतडिद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे
नरवरो रवरोधितकेशरी ॥")
तत्पर्य्यायः । मौर्व्वी २ ज्या ३ शिञ्जिनी ४ शिञ्जा ५ ज्यावा ६ पतञ्चिका ७ । इति शब्दरत्नावली ॥ जीवा ८ । इति जटाधरः ॥ रज्जुः । (यथाह कश्चित् ।
"गुणवन्तोऽपि सीदन्ति न गुणग्राहको यदि ।
सगुणोऽपि पूर्णकुम्भो यथा कूपे निमज्जति ॥"
सूत्रम् । यथा, आर्य्यासप्तशत्याम् । ३६६ ।
"काञ्चीगुण इव पतितः स्थितेकरत्नः फणी
स्फुरति ॥")
सत्त्वरजस्तमांसि । (यथा, भागवते । १ । २ । २३ ।
"सत्त्वं रजस्तम इति प्रकृतेर्गुणास्ते-
र्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः
श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥")
शुक्लकृष्णरक्तपीतादिः । द्रव्याश्रितः । स तु गौर्य्यादिः रसगन्धादिश्च । इत्यमरः । ३ । ३ । ४६ ॥ तस्य लक्षणं यथा,—
"सत्त्वे निविशते ऽपैति पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥"
इति सुग्धबोधम् ॥
(अस्यार्थमाह दुर्गादासः ।
"यः सत्त्वे द्रव्ये निविशते तदेवाश्रयतीत्यर्थः । अपैति तस्मात् सत्त्वादपगच्छतीत्यर्थः ॥ यथा श्यामता पूर्व्वमाम्रादिफलमुपगच्छति पश्चात् पक्वदशायां ततोऽपैति । पृथक् जातिषु दृश्यते भिन्नेषु पदार्थेषु दृश्यते । यथा आम्रादिफले या श्यामता दृष्टा सा कदलीफलादिषु च दृश्यते स गुणः स्यादित्यर्थः । ननु तर्हि उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्म्माणीति उक्तकर्म्मस्वपि गुणत्वापत्तिः यदा द्रव्यं सक्रियं भवति तदा कर्म्म सत्त्वे निविशते यदा द्रव्यं निष्क्रियं भवति तदा कर्म्म सत्त्वादपैति पृथग्जातिषु च दृश्यते यथा मनुष्येषु गमनादिक्रिया दृश्यते तथा पश्वादिषु च दृश्यते अतः कर्म्मणो गुणत्वमपाकर्त्तुमाह आधेयश्चाक्रियाजश्चेति । आधेय उत्पाद्यः यथा पक्वस्याम्रपात्रेषु रक्ततागुणः सहि वह्निसंयोगादिना निष्पाद्यते । अक्रियाज इति । क्रियाया जायते । इति क्रियाजः । न क्रियाजोऽक्रियाजः नित्य इत्यर्थः । आकाशादिषु महत्त्वादिर्गुणः । ततश्च गुणस्य उत्पाद्यत्वमनुत्पाद्यत्वञ्च इति प्रकारद्वयदर्शनतया कर्म्मणो गुणत्वं न स्यादिति शङ्कापि तं कर्म्मत्वं सर्व्वमेव उत्पाद्यमिति । एवञ्चेत्तर्हि द्रव्यमपि गुणोऽस्तु तत्रापि ह्येते धर्म्मा वर्त्तन्ते । यथा तदपि द्रव्यमारम्भके अवयवद्रव्ये निविशते ततोऽपैति च यथा शरीरमवयवि तन्हि मस्तकादिष्ववयवेषु समवेतं भवतीति तन्निनाशात् ततोऽपैति । पृथग्जातिषु पश्वादिषु च दृश्यते एवं द्रव्यस्य उत्पाद्यत्वमनुत्पाद्यत्वञ्चास्ति अवयवि द्रव्यस्य उत्पाद्यत्वात् आकाशादेस्तु अनुत्पाद्यत्वादिति । अत आह असत्त्वप्रकृतिरिति । सत्त्वं द्रव्यं प्रकृतिःस्वभावः । सत्त्वं प्रकृतिर्यस्य स सत्त्वप्रकृतिः । न सत्त्वप्रकृतिरसत्त्वप्रकृतिः ॥")
विशेषाधानहेतुः सिद्धो वस्तुधर्म्मः । शुक्लादयो हि गवादिकं स्वजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्त्तयन्तीति साहित्यदर्पणम् ॥
अपि च ।
द्रव्यत्वव्यापकतावच्छेदकसत्त्वान्यजातिमत्त्वं तदर्थः तद्यथा । रूपम् १ रसः २ गन्धः ३ स्पर्शः ४

संख्या ५ परिमाणम् ६ पृथक्त्वम् ७ संयोगः ८ विभागः ९ परत्वम् १० अपरत्वम् ११ बुद्धिः १२ सुखम् १३ दुःखम् १४ इच्छा १५ द्वेषः १६ यत्नः १७ गुरुत्वम् १८ द्रवत्वम् १९ स्नेहः २० संस्कारः २१ धर्मः २२ अधर्मः २३ शब्दः २४। इति भाषापरिच्छेदः॥ (साहित्यनायकगुणा यथा, साहित्यदर्पणे। ३। ५८।

"ओभाविलासोमाधुर्य्यश्लाभौर्य्यं धैर्य्यतेजसी। ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषागुणाः॥ एतेषां विशेषविवरणन्तु तत्तच्छब्दे द्रष्टव्यम्॥)

अप्रधानम्। खदः। इन्द्रियम्। त्यागः। वटी। इति मेदिनी॥ गौ। १०॥ भीमसेनः। तनुः। दोषान्यविशेषणम्। इति हेमचन्द्रः॥ विद्यादि। इति विश्वः॥ (अञ्जनम्। यथा, मनुः। ३।२२६।

"गुणांश्च सूपशाकाद्यान् पयोदधिघृतं मधु। विन्यसेत् प्रयतःसम्यक् भूमावेव समाहितः॥"

"गुणान् अञ्जनानि अन्नापेक्षयाऽप्राधान्यात् गुणयुक्तान् वा।" इति तट्टीकायां कुल्लूकभट्टः॥ आवृत्तिः। यथा, महाभारते।

"आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणाः। षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः॥")

व्याकरणोक्तसंज्ञाविशेषः। यथा। इडोऽरलेऽणुः। अस्यार्थः। इ उ ऋ ऌ एषां स्थाने ए ओ अर् अल् एते गुणसंज्ञा भवन्ति। इति सुग्धबोधम्। काव्यगुणस्य लक्षणं यथा,—

ये रसस्याङ्गिनो धर्माः शौर्य्यादय इवात्मनः। उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥

इति काव्यप्रकाशः॥

तस्य भेदाः।

श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः॥ इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः॥

इति दण्डी॥

माधुर्य्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश॥ तस्य दशसंख्याभावे हेतुर्यथा,—

केचिदन्तर्भवन्त्येषु दोषत्यागात् परे स्थिताः। अन्ये भजन्ति दोषत्वं कुत्रचित्स ततो दश॥

इति भरतमुनिः। स्तुत्युक्तगुणविशेषा उपवासप्रबन्धे द्रष्टव्याः॥

गुणकः, पुं, (गुणयति आवर्त्तयतीति। गुण + ण्वुल्।) पूरकाङ्गविशेषः। यथा, गुण्यान्त्यमङ्गं गुणकेन हन्यात्। इति लीलावती॥

गुणकारः, पुं, (गुणं व्यञ्जनादिकं पाकजनितगुणं वा करोतीति। कृ + अण्। विराटनगरे छद्मवेशेन सूपकारित्वग्रहणात् पाकशास्त्रकर्त्तृत्वाच्च भीमस्य तथात्वम्।) भीमसेनः। इति त्रिकाण्डशेषः॥ (विराटनगरेऽस्य सूपकारित्वस्वीकारकथा यथा, महाभारते। ४।२।१—४।

भीम उवाच।

"पौरोगवो ब्रुवाणोऽहं वल्लवो नाम नामतः। उपस्थास्यामि राजानं विराटमिति मे मतिः॥ सूपानस्य कारिष्यामि कुशलोऽस्मि महानसे। कृतपूर्व्वाणि यैरस्य व्यञ्जनानि सुचित्रिते॥ तानप्यभिभविष्यामि प्रीतिं सञ्जनयन्नृपम्। आहरिष्यामि दारूणां निचयान्महतोऽपि च॥ तत्प्रेक्ष्य विपुलं कर्म्म राजा प्रीतो भविष्यति। अमानुषाणि कुर्व्वाणं तानि कर्म्माणि भारत!॥ राज्ञस्तस्य परिप्रेष्या मंस्यन्ते मां यथा नृपम्। भक्ष्यान्नरसपानानां भविष्यामि तथेश्वरः॥")

पाचके गुणकारके च त्रि।

गुणज्ञः, त्रि, (गुणं जानातीति। गुण + ज्ञा + कः।) गुणवेत्ता। यथा,—

गुणिनि गुणज्ञो रमते नागुण-शीलस्य गुणिनि परितोषः। अलिरेति वनात् कमलं न हि मेकस्त्रैकवासोऽपि॥

इत्युद्भटः॥

गुणनिका, स्त्री, (गुणयति पुनःपुनरावर्त्तयतीति। गुण + ण्यासश्रन्थो युच्।" ३।३।१०७। इति युच्। संज्ञायां कन् कापि अत इत्वञ्च।) वृत्तम्। सूत्राङ्कम्। पाठनिचयः। इति मेदिनी॥ के १८५। (शास्त्रादीनां पुनः पुनरनुशीलनम्। यथा, माघे। २। ७५।

"हेतुःपरिचयस्तैर्य्यं वस्तुगुंजनिकैव सा॥" माला। इत्यानन्दलहरीटीका॥ (यथा, आनन्दलहर्य्यां। ३।

"दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा सुरिपुवराहस्य भवती॥")

गुणनी, स्त्री, (गण्यते पुनःपुनरनुशीलयतेऽनया। गुण + ल्युट् + ङीप्।) पाठनिचयः। तत्पर्य्यायः। भवनी २ शीलनम् ३। इति त्रिकाण्डशेषः॥

गुणनीयः, पुं. (गुण्यते पुनःपुनरनुशील्यतेऽनेन इति। गुण आवर्त्तने + करणे अनीयर्।) शास्त्राद्यभ्यासः। इति हारावली। १५०। (कर्म्मणि अनीयर्। गुणितव्ये त्रि॥)

गुणभङ्गः, पुं, (गुणस्य भङ्गोविनाशः।) गुणनाशः। तत्पर्य्यायः पर्य्यस्तिका २। इति हारावली॥ २१०॥

गुणलयनिका, स्त्री, (गुणा गुणनिर्म्मिताः पटाः लीयन्तेऽस्याम्। गुण + ली + अधिकरणे + ल्युट्। स्त्रियां ङीप् कन् टापि पूर्व्वह्रस्वश्च।) वस्त्रनिर्म्मितगृहम्। तत्पर्य्यायः कैलिका २ पटकुटी ३। इति हेमचन्द्रः। ३। ३४६॥

गुणलयनी, स्त्री, (गुणा गुणमयपटाः लीयन्ते यत्र। ली + ल्युट् + ङीप्।) गुणलयनिका। इति हलायुधः॥

गुणवान्, [त्] पुं, त्रि, (गुणोविद्यतेऽस्य। गुण + मतुप् मस्य वत्वम्।) सम्बन्धी। इति त्रिकाण्डशेषः॥ गुणविशिष्टः। यथा, "दाता दयागुणवान्नरः स्यात् गरे परेषामुपकारकर्त्ता। इति कोष्ठीप्रदीपः॥ (पुं, यदुवंशीय सुनाभस्य दौहित्रः। यथा, हरिवंशे। १५५।

"गुणवत्यपि पुत्रे च गुणवन्तमजीजनत्॥"

स्त्रियां ङीप्। तस्य सुनाभस्य दुहिता। यथा, तत्रैव। १५३।

"वज्रनाभस्य तनयः सुनाभो नाम विश्रुतः। दुहितृद्वयञ्च नृपते! तस्य रूपगुणान्वितम्। एकचन्द्रावती नाम्ना गुणवत्यथ चापरा॥"

गायत्रीरूपा महादेवी। यथा, देवीभागवते। १२। ६। १२।

"गुहावासा गुणवती गुरुपापप्रणाशिनी॥"

गङ्गा। यथा, काशीखण्डे। २६। ५३।

"गुरुरूपा गुणवती गुर्व्वी गौरववर्द्धिनी॥"

अप्सरोविशेषः। यथा, तत्रैव ६ अध्याये।

"अलम्बुषा गुणवती स्थूलकेशी कलावती॥"

गुणवृक्षकः, पुं, (गुणानां तरणीस्थरज्जूनां वृक्ष इव। ततः स्वार्थे कन्।) नौकागुणबन्धनस्तम्भः। मास्तुल इति भाषा। तत्पर्य्यायः। यूपकः २। इत्यमरः। १। १०। १२।

गुणसागरः, पुं, (गुणानां सागर इव आधारस्थानम्।) ब्रह्मा। इति शब्दरत्नावली॥ बुद्धिविशेषः। इति त्रिकाण्डशेषः॥ सकलगुणाधारश्च॥

गुणा, स्त्री, (गुणाः सूक्ष्मतन्तवः सन्त्यस्याः। "अर्श आदिभ्योऽच्।" ५। २। १२७। इत्यच्। स्त्रियां टाप्।) दूर्व्वा। मांसरोहिणी। इति राजनिर्घण्टः॥

गुणाकरः, पुं, (गुणानामाकर इव। गुणबाहुल्यात्तथात्वम्।) बुद्धः। इति शब्दरत्नावली॥ (महादेवः। यथा, महाभारते। १३। १७। ४७।

"गजहा दैत्यहा कालो लोकधाता गुणाकरः॥")

गुणयुक्ते त्रि। यथा,—

"तपस्विभिरतस्त्याज्य तस्य पुत्रो गुणाकरः। सत्यवान् नाम देवर्षे! मनसा सम्मतो मया॥"

इति वनपर्व्वणि सावित्रीव्रतकथा॥

गुणितः, त्रि, (गुण्यते स्म। गुण आवर्त्तने + क्तः।) पूरितः। तत्पर्य्यायः। आहतः २। इत्यमरः। ३। १। ८८॥ यथा। पञ्चधा गुणिता द्वादशसंख्या षष्टिर्भवतीत्यादि इति भरतः॥ (गुणोऽस्य जातः। तारकादिभ्य इतच्।) पिञ्जितः। इति शब्दरत्नावली॥

गुणी, [न्] पुं, (गुणो व्या विद्यतेऽस्य। गुण + इनिः।) धनुः। इति त्रिकाण्डशेषः॥ (गुणास्ति दाक्षिण्यादयो विद्यन्तेऽस्येति।) गुणविशिष्टे त्रि। यथा। गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद्यस्य। तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी नाम॥ इति हितोपदेशः॥

गुणीभूतः, त्रि, (अगुणो गुणोभूतः। गुण + भू + क्तः। अभूत तद्भावे च्वि।) अप्रधानीभूतः। यथा। कृतपूर्व्वीकटमित्यत्र समासनिविशत्वाद्गुणीभूतादिशेषबोधिका द्वितीया नोक्ता। इति सुसेनकविराजः॥ (तथाच महाभारते। २। १५। ११।

"सर्व्वैरपि गुणैर्युक्तो निर्व्वीर्य्यः किं करिष्यति। गुणीभूता गुणाः सर्व्वे तिष्ठन्ति हि पराक्रमे॥"

गुणीभूतव्यङ्ग्यः. पुं, (गुणीभूतमप्रधानीभूतं व्यङ्ग्यं व्यञ्जना प्रक्रियैव।) काव्यविशेषः। यथा,—
"अताऽग्रि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ॥*
तस्याष्टौ भेदाः यथा।
"अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम्।
सन्दिग्धतुल्यप्राधान्ये काङ्क्षाक्षिप्तमसुन्दरम्।
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदा मताः ॥*॥
अगूढं यथा।
स्फुटतया वाच्यायमानमिति अपराङ्गम्। यथा अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्य अङ्गं रसादि अनुरञ्जनरूपं वा ॥ * ॥
वाच्यसिद्ध्यङ्गं यथा।
आपाततः प्रतीतस्य वाच्यार्थस्य प्रतिसन्धीयमानानुपपत्तिनिरासकं व्यङ्ग्यम् ॥ * ॥
अस्फुटं यथा।
विदग्धैरपि क्षोणगम्यं सन्दिग्धप्राधान्यं यथा प्राधान्यमत्र रसादिव्यङ्गकत्वेन तथा च प्रतीतस्य रसादेर्व्यङ्गकं किं वाच्यं किंवा व्यङ्ग्यमितौत्तरकालिकसन्देहविषयत्वं तत्त्वम् ॥ * ॥
तुल्यप्राधान्यं यथा।
अत्रापि रसादिव्यङ्गकत्वेनैव प्राधान्यं व्यङ्ग्यस्य निश्चितत्वेन तेन तेन वाच्येन तुल्यार्थो बोध्यः ॥*
काङ्क्षाक्षिप्तं यथा।
आक्षिप्तमत्र प्रागेव पदार्थविधया उपस्थानम् ॥*
असुन्दरं यथा।
"रसादिव्यञ्जने वाच्यसुखनिरीक्षकं व्यङ्ग्यम्।"
इति काव्यप्रकाशः ॥
(इत्यत्र साहित्यदर्पणकारेण काव्यभेदमाश्रित्य यदुक्तं तदुयथा। ४। १।
"काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यश्चेति द्विधा मतम्।
वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम् ॥"
तत्रैव च। ४। १६।
"अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये।
"अपरं काव्यम्। अनुत्तमत्वं न्यूनतया साम्येन च सम्भवति ॥" ततस्तत्र स्वादितराङ्गं काङ्क्षाक्षिप्तत्वाद्यष्टौ भेदानुक्त्वा इतरस्य रसादेरङ्गं रसादिव्यङ्ग्यं यथेत्यभिधाय क्रमशः इतराङ्गादेरुदाहरणानि प्रदर्शितानि। यथा,—
"अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥
अत्र शृङ्गारः करुणस्याङ्गम्।
"भानोर्नतां प्रणयिनीमनुनेतुकाम-
स्वत्सैन्यसागररवोन्नतकर्णतालः।
हा! हा! कथं नु भवतो रिपुराजधानी-
प्रासादसन्ततिषु तिष्ठति कामिलोकः ॥
अत्रौत्सुक्यचाससन्धिसंकृतस्य करुणस्य राजविषयरतावङ्गभावः।
जनस्थाने भ्रान्तं कनकमृगतृष्णान्वितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम्।
लता लङ्काभर्तुर्वदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥"
अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्तेरेव रामत्वमवगम्यते। वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्वता तद्गोपनमपाकृतम्। तेन वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतयाऽङ्गतां नीतम्। काङ्क्षाक्षिप्तं यथा,—
मधूनामि कौरवप्रतं समरे न कोपात्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ॥
अत्र 'मधून्यपेक्षादि' व्यङ्ग्यं वाच्यस्य निषेधस्य सह भावेनैव स्थितम्।
दीपयन् रोदसीरन्धूमेघ ज्वलति सर्वतः।
प्रतापस्तव राजेन्द्र! वैरिवंशदवानलः ॥
अत्रान्वयस्य वैशुद्ध्यारोपणरूपो व्यङ्ग्यः। प्रतापस्य दवानलत्वारोपसिद्ध्यङ्गम्। 'हरस्तु किञ्चित् परिवृत्तैत्यादौ' विलोचनव्यापारसुखनाभिलाषयोः प्राधान्ये सन्देहः।
ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥
अत्र परशुरामो रक्तःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम्।
सन्धौ सर्वंसहरत्नं विग्रहे प्राणनिग्रहः।
अज्ञापदीनृपतौ न सन्धिर्न च विग्रहः ॥
अत्र अज्ञापदीनाख्ये नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपायः व्यङ्ग्यं श्रुत्पन्नानामपि भटित्यस्फुटम्।
अनेन लोकगुरुणा सतां धर्मोपदेशिना।
अहं व्रतवती खेरमुक्तेन किमतः परम् ॥
अत्र प्रतीयमानोऽपि प्राक्यसुनेस्सिर्यक् योधिति बलात्कारोपभोगः स्फुटतया वाच्यायमान इत्यगूढम्।
वाणीरकुड्मलमुखीयसउन्निकोलाहलं
सुगन्तीव।
घरकम्मवाव्वाडाए बहूए सीअन्ति अङ्गाइं॥"
अत्र दत्तसङ्केतः कश्चिल्लतागृहं प्रविष्टः इति व्यङ्ग्यात् 'सीदन्त्यङ्गानि' इति वाच्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुन्दरं किञ्च यो दीपकतुल्ययोगितादिषु उपमाद्यलङ्कारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव। काव्यस्य दीपकादिसुखेनैव चमत्कारविधायित्वात्। तदुक्तं ध्वनिकृता।
अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते।
तत्परत्वं न काव्यस्य नासौ मार्गो ध्वनेर्मतः ॥
यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्ययः। यथा,—
दृष्टा केशवगोपरागकृतया किञ्चिन्न दृष्टं मया
तेनाद्य स्खलितासि नाथ! पतितां किं नाम
नालम्बसे?
एकस्यं विषमेषु खिन्नमनसां सर्व्वाबलानां गतिर्गोप्यैवं गदितःसलेशमवताद्गोष्ठे हरिर्वश्चिरम्॥"
अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां 'सलेशमिति' पदेन स्फुटतयावभासः। सलेशमिति पदस्य परित्यागे ध्वनिरेव।
किञ्च यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभावः तत्र प्रधानकृत एव काव्यव्यवहारः। तदुक्तं तैरेव।
प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम्।
धत्ते रसादितात्पर्य्यालोचनया पुनरिति ॥
यत्र च।
यत्रोन्मादानां प्रमदाजनानाम्
अंलिङ्गः श्रोणमणीमयूखैः।
सन्ध्याम्रमं प्राप्नुवता मकाण्डे-
ऽप्यनङ्गनैपथ्यविधिं बधत्त ॥
इत्यादौ रसादीनां नगरीवृत्तादि वस्तुमात्रेऽङ्गत्वम्। तत्र तेषामतात्पर्य्यविषयत्वेऽपि तैरे गुणीभूतैः काव्यव्यवहारः। तदुक्तमस्मत्सगोत्रकविपण्डितसुखश्रीचण्डिदासपादैः। काव्यार्थस्यास्वण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते कालान्तरे तु प्रकरणादिपर्य्यालोचनया भवन्नप्यसौ न काव्यव्यपदेश्यं वाहन्तुमीशस्तस्यास्वादमात्रात्मत्वादिति ॥")
गुणेश्वरः, पुं (गुणैर्हेतुभिरीश्वरःश्रेष्ठः पूज्य इत्यर्थः। विविधगुणग्रालिद्रव्यजातोत्पादकतयास्य तथात्वम्।) चित्रकूटपर्व्वतः। इति शब्दरत्नावली ॥ गुणपतौ त्रि॥ (गुणानां नानाविधपुरुषोपयोगिगुणानां ईश्वरः प्रभुः स्वामी वा शान्तदान्तादि गुणग्रालो पुरुष इत्यर्थः। गुणानां सत्त्वरजस्तमसां त्रयाणां मायागुणानामिति यावत् ईश्वरः नियन्ता। परमेश्वरः ॥)
गुणोत्कर्षः, पुं, (गुणानां उत्कर्षः उत्कर्षजं प्राधान्यमित्यर्थः।) गुणप्राधान्यम्। (यथा, गोः रामायणे। १। २५। १६।
"स्वभावजैर्गुणैर्दिव्यैः कामजैर्बहुलैर्वृतः।
भूयस्त्वञ्च गुणोत्कर्षमेते विद्धि करिष्यतः ॥")
अतिशयः। तत्पर्य्यायः। परभागः २। इति हेमचन्द्रः। ६। ११॥
गुणोत्कीर्त्तनं, क्ली, (गुणानां उत्कीर्त्तनं कथनम्।) यद्वा गुणैर्गणस्तुचकवाक्यैरुत्कीर्त्तनम्। गुणकथनम्। विरहकालीनकान्ताविषयकप्रशंसाप्रतिपादनम्। इति रसमञ्जरी ॥ कान्तापदमत्रोपलक्षणम् ॥
गुण्ठितः, त्रि, (गुठि वेष्टने + कर्म्मणि क्तः।) गुण्ठितः। इत्यमरटीकायां रमानाथः ॥ आवृतः। रुद्धितः। धूल्यादिभिर्धूसरित इत्यर्थः। यथा, गोः रामायणे। ६। ८२। ८।
"तन्न युद्धेन मे कार्य्यं न प्राणैरपि सीतया।
लक्ष्मणं निहतं दृष्ट्वा भ्रातरं पांशुगुण्ठितम् ॥")
गुण्डः, पुं, (गुडि वेष्टने + अच्।) व्रणभेदः। यस्य कन्दः कण्डूरः। तत्पर्य्यायः। कारुगुण्डः २ दीर्घकाण्डः ३ त्रिकोणकः ४ क्षुद्रगुच्छः ५ असिपत्रः ६ नीलपत्रः ७ त्रिधारकः ८। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। कफपित्तातिसारदाहरक्तनाशित्वम्। अस्य मधौ स्थलतरोरधिकगुणः। इति राजनिर्घण्टः ॥

गुण्डकः, पुं, (गुण्ड + संज्ञायां कन्। गुडि + खुल् वा।) मलिनः। धूली। कलौक्तिः। स्नेहपात्रम्। इति मेदिनी। के। ८३॥

गुण्डकन्दः, पुं, (गुण्ड इत्याख्यया प्रसिद्धः कन्दः। गुण्डानां कन्द इति केचित्।) कण्डेरु। इति राजनिर्घण्टः॥

गुण्डारोचनिका, स्त्री, (गुण्डाऽपि रोचना हरिद्रा इव। तत इवार्थे कन् टाप् कापि अत इत्वञ्च।) तृणविशेषः। कमलागुँड़ि इति भाषा। तत्पर्य्यायः। काम्पिल्लकः २ रक्ताङ्गा ३। इति रत्नमाला॥

गुण्डाला, स्त्री, (गुण्डाल + टाप्। यद्वा गुण्डां चूर्णं आलाति आदत्ते इति। आ + ला + कः। स्त्रियां टाप्।) क्षुद्रक्षुपविशेषः। तत्पर्य्यायः। जलोद्भूता २ गुच्छवप्रा ३ जलाग्र्या ४। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। श्लेष्मव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

गुण्डासिनी, स्त्री, (गुण्ड इत्याख्यया आस्ते वर्त्तते इति। आस् + णिनिः। गुण्डा सती आस्ते इत्येके।) क्षुपभेदः। तत्पर्य्यायः। गुण्डाला २ गुड़ाला ३ गुच्छमूलिका ४ चिपिटा ५ क्षुद्रपत्री ६ यवासां ७ पृथुला ८ विस्तरा ९। अस्या गुणाः। कटुत्वम्। पित्तदाहश्रमक्षयक्षतव्रणदोषनाशित्वम्। तिक्तत्वम्। उष्णत्वञ्च। इति राजनिर्घण्टः॥

गुण्डिकः, पुं, स्त्री, (गुण्डोऽस्यास्तेति। "अत इनिठनौ।" ५।२।११५। इति ठन्।) गुण्डकः। तण्डुलादिचूर्णम्। गुँड़ा इति भाषा। यदुक्तं अनन्तव्रतकथायाम्।

"गुण्डिकैः सितपीतैश्च मक्षयन्ती यहाङ्गनम्॥"

गुण्डिचा, स्त्री, (गुण्डिभिर्गुण्डिकैः सितपीतादिरङ्गैः प्रस्तरेष्टकादिचूर्णैर्वा चीयते उपचीयते इति। चि + घञर्थे कः ततष्टाप्। गुण्डिचा इत्याख्यया प्रसिद्धा वा। यद्वा गुण्ड्यते अवगुण्ड्यते ब्रह्मतेजोभिरस्या दर्शक इति ग्रेषः। गुडि वेष्टने इति धातोर्निपातनात् चकारागमे साधुः। इयं युत्पत्तिस्तु गुण्डिचाविवरणदर्शनेरेवबोध्या।) श्रीपुरुषोत्तमदेवस्य रथारोहणानन्तरवासार्थमण्डपविशेषः। यथा,—

"मण्डपे वासयेद्देवान् गुण्डिचाख्ये मनोहरे।
चारुचन्द्रातपे चारुमाल्यचामरभूषिते॥
रत्नस्तम्भमये स्वर्णवेदिकोपस्तृतान्तरे।
क्षीरवलयावीते सुधालेपससुज्ज्वले॥
माधुसोपानघटिते चतुर्द्वारोपशोभिते।
त्रैलोक्याडम्बरयुते महावेद्यां महाक्रतोः॥
प्रादुर्भावो मदेशस्य याचाभूद्दारुवर्ष्मणः॥"*॥

तस्यां श्रीजगन्नाथदेवस्य दर्शनफलं यथा,—

"विन्दुतीर्थतटे तस्मिन् सप्ताहानि जनार्दनः।
तिष्ठेत् पुरा स्वयं राज्ञे वरमेतत् समादिशत्॥
तत्तीर्थतीरे राजेन्द्र! स्थास्यामि प्रतिवासरम्।
सर्व्वतीर्थानि तस्मिंश्च स्थास्यन्ति मयि तिष्ठति॥
तत्र स्नात्वा विधानेन तीर्थे तीर्थोपपावने।
सप्ताहं ये प्रपश्यन्ति गुण्डिचामण्डपे स्थितम्॥
माञ्च रामं सुभद्राञ्च मम सायुज्यमाप्नुयुः॥"*॥

तस्या नामकरणं यथा, उत्कलखण्डम्।

"अत ऊर्द्धं प्रवक्ष्यामि महावेदीमहोत्सवम्।
अज्ञानतिमिरान्धोऽपि येन भास्वत्पदं भजेत्॥
सर्व्वपापहरःस्नात्वा पूज्यत्वात् सर्व्वदेवतैः।
गुण्डिचाख्यापि सा यात्रा ब्रह्मतेजोऽवगुण्ठनात्॥"

गुण्डितः, त्रि, (गुडि वेष्टने + कर्म्मणि क्तः।) धूलिगुण्डकेनेव खचितः। तत्पर्य्यायः। रूषितः २। इत्यमरः। ३। १। ८६॥ चूर्णीकृतञ्च॥

गुत्यः, पुं, (गुत्स + पृषोदरादित्वात् साधुः।) गवेधुका। इति रत्नमाला॥

गुत्यकं, क्ली, (गुत्य + संज्ञायां कन्। यद्वा गुच्छ इव गुच्छेन वा कायतीति। कै + कः। पृषोदरात् साधुः।) ग्रन्थिपर्णम्। इति रत्नमाला॥

गुत्सः, पुं, (गुध्यते क्षणपचपुष्पादिभिः परिवेष्यतेऽसौ इति। गुध् परिवेष्टने + "उन्दिगुधिकुषिभ्यश्च।" उणां। ३। ६८। इति कर्म्मणि सः किच्च।) स्तवकः। स्तम्बः। (हारादौ तु गुध्यते परिवेष्यते कण्ठवक्षःस्थलादिकमनेन।) हारिंग्रथ्यष्टिकाहारः। ग्रन्थिपर्णवृक्षः। इति मेदिनी। से। २॥

गुत्सकः, पुं, (गुत्स + स्वार्थे कन्।) स्तवकः। इति ग्रन्दरत्नावली॥ ग्रन्थपरिच्छेदः। इति चिकाकण्ठेषः॥

गुत्सकपुष्पः, पुं, (गुत्सकानि स्तवकीभूतानि पुष्पाणि यस्य यत्र वा।) सप्तच्छदवृक्षः। इति जटाधरः॥

गुत्सार्द्धः, पुं, (गुत्सं गुच्छं प्राप्य आश्रित्य वा ऋध्नोतीति। ऋध् + अच्। गुत्सं आर्द्धयति वर्द्धयति इति। ऋध् + णिच् अच् वा। यद्वा गुत्सस्य अर्द्धः असमांशकः।) गुच्छार्द्धः। चतुर्विंग्रतियष्टिकहारः। इत्यमरटीकायां भरतः॥

गुद, ड खेलने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ड, गोदते। इति दुर्गादासः॥

गुदं, क्ली, (गोदते खेलति चलतीत्यर्थः अपानसंज्ञकवायुः अनेन। गुद् + "इगुपधेति।" ३।१। १३५। इति कः।) मलत्यागद्वारम्। तत्पर्य्यायः। अपानम् २ पायुः ३। इत्यमरः। २। ६। ७३॥ गुह्यम् ४ गुदवर्त्म ५। इति जटाधरः॥ (यथा, मनौ। ८। २८२।

"अवनिष्ठीवतो दर्पाद्दावोष्ठौ क्षेदयेन्नृपः।
अवमूत्रयतो मेढ्रमवग्रन्थयतो गुदम्॥")

गुदकीलः, पुं, (गुदस्य अपानस्य मलद्वारस्येत्यर्थः यद्वा गुदे कील इव।) अर्शोरोगः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।

"व्यानाहमेदो गुदकीलदृक्का-
श्वासापहः श्लेष्मितपित्तकृच्च॥")

गुदकीलकः, पुं, (गुदकील + स्वार्थे कन्।) गुदकीलः। इति हलायुधः॥

गुदग्रहः, पुं, (गुदस्य ग्रह इव गुदमाश्रित्य ग्रहवत् प्रवर्त्तते इत्यर्थः। यद्वा गुदं मलद्वारमधिकृत्य आभ्यन्तरिकस्थानं गृह्णाति धारयतीति ग्रह + अच्।) उदावर्त्तरोगः। इति हेमचन्द्रः। ३। १३३॥

गुदभ्रंशः, पुं, (गुदस्य भ्रंशोऽस्मात्। गुदं भगं भ्रश्यतेऽस्मादिति वा।) मलद्वारनिर्गमरोगः। तस्य लक्षणम्।

"प्रवाहनातिसाराभ्यां निर्गच्छति गुदं बहिः।
रूक्षदुर्ब्बलदेहस्य गुदभ्रंशं तमादिशेत्॥"

इति माधवकरः॥

तच्चिकित्सा यथा,—

"गुदभ्रंशे गुदं स्विन्नं स्नेहेनाक्तं प्रवेशयेत्।
प्रविष्टं रोधयेदृजुतादृगथसच्छिद्रचर्म्मणा॥
पक्षिण्याः कोमलं पत्रं यः खादेच्छर्करान्वितम्।
एतन्निश्चित्य निर्द्दिष्टं न तस्य गुदनिर्गमः॥
मूषकाणां वसाभिर्वा गुदभ्रंशे प्रलेपनम्।
सुस्निग्धमूषिकामांसैर्नाथवा खेदयेद्गुदम्॥
वृक्षाम्लानलचाङ्गेरीविल्वपाठायवाग्रजम्।
तक्रेण श्लीलयेत् पायुं भ्रंशार्त्तोऽनलदीपनम्॥
मूषकान् दग्धमूलानि गृह्णीयादुभयं समम्।
तयोः क्वाथेन कल्केन पचेत्तैलं यथोदितम्॥
अभ्यङ्गात्तस्य तैलस्य गुदभ्रंशो विनश्यति।
विनश्यति तथा तेन गुदमूलं भगन्दरः॥"

इति मूषकतैलम्। इति भावप्रकाशः॥

(यदा गुह्यं निरस्येत तदा कुर्य्यात् क्रियामिमाम्।
सहचर्य्याबलाभाच्च रसो ग्राह्यो घृतं पयः॥
पक्वा घृतेन लेपः स्यात् तस्य चैवं प्रशस्यते।
अरणीपल्लवक्वाथो वार्य्यं लोष्टं सचन्दनम्॥
प्रोत्तप्य वह्निसदृशं सहसा नरस्य
निर्व्वाप्य काञ्जिकमथो विदधीत तद्वत्।
सौख्यञ्च साध्यगुदसेचनकं प्रशस्तं
संवेशमध्यगुदतो दृढबन्धनं स्यात्॥"

इति गुदभ्रंशः॥

इति हारीते चिकित्सितस्थाने त्रयोदशोऽध्याये॥*॥

अथास्य चिकित्सा।

"गुदनिःसरणे शूले पानमस्य सर्पिषः।
प्रशस्यते निरामाणां मधुवाप्यनुवासनम्॥
चाङ्गेरी कोलदध्यम्लनागरक्षारसंयुतम्।
घृतसुत्क्वथितं पेयं गुदभ्रंशरुजापहम्॥"

इति चाङ्गेरीघृतम्॥*॥

"सक्षयपिप्पलीमूलं सयोषविड्दाडिमम्।
पेयमस्मै घृतं युक्त्या सधान्याजाजिचित्रकम्॥
दग्धमूलोपसिद्धं वा सविस्वमनुवासनम्।
घृताक्ता गुटी विस्वैर्व्वा वचया चित्रकेण वा॥
सर्व्वभ्रंशगुदे पूर्व्वं स्नेहस्वेदौ प्रयोजयेत्॥"

इति चरके चिकित्सितस्थाने दशमेऽध्याये॥)

गुदाङ्कुरः, पुं, (गुदे अङ्कुरः प्ररोह इव गुदमधिकृत्य प्ररोहवदुत्पद्यते वलिरित्यर्थः।) अर्शोरोगः। इति हेमचन्द्रः॥ ३। १३२।

("गुदाङ्कुरा वङ्गनिलाः।" इति वाभटे निदानस्थाने सप्तमेऽध्याये॥)

गुद, इ क क्रीडे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट्-इदित् ।) पञ्चमस्वरी । दन्त्यवर्गं ऌतीयोपधः । कुन्दो मिथ्योक्तिः । इ क, गुन्द्रयति नीचः मिथ्या वदतीत्यर्थः । गुन्द्र इत्यनेनैवेऽसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थः । इति दुर्गादासः ॥

गुध, ग रुषि । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-अकं-सेट् ।) ग, गुध्नाति । जुगोध । इति दुर्गादासः ॥

गुध, ड क्रीड़े । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ड, गोधते । इति दुर्गादासः ॥

गुध, य वेष्टे । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् ।) य, गुध्यति । जुगोध । इति दुर्गादासः ॥

गुधेरः, त्रि, (गुध्यति सर्व्वतो वेष्टयति वेष्टनेन रक्षतीत्यर्थः इति । गुधय वेष्टने "सृजेरादयः ।" उणा । १ । ६१ । इति एरक् ।) रक्षकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

गुन्दलः, पुं, (गुन्दिति मधुरमस्फुटशब्दं कारयन् दल्यते मर्द्यतेऽसौ । दल् + णिच् + कर्म्मणि अच् ।) मर्द्दलशब्दः । इति हेमचन्द्रः । ६ । ४४ ॥

गुन्द्रः, पुं, (गुन्द्रि + अच् ।) शरटलक्षम् । इत्यमरः । २ । ४ । १६२ ॥ वृक्षविशेषः । गोदपठेर इति देशान्तरीयभाषा । तत्पर्य्यायः । पटरकः २ अच्छः ३ शङ्खवेराङ्कमूलकः ४ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । हिमत्वम् । पित्तरक्तमूत्रकृच्छ्रनाशित्वम् । स्तन्यशुक्रकरजोमूत्रशोधनत्वञ्च । इति भावप्रकाशः ॥

("गुन्द्रान् दग्ध्वा क्षतं भस्म हरितालं मनःशिला । उपदंशविसर्पाणामेतच्छान्तिकरं परम् ॥"

इति सुश्रुते चिकित्सितस्थाने १६ अध्याये ॥)

गुन्द्रमूला, स्त्री, (गुन्द्रस्य मूलमिव मूलमस्य ।) शरकालक्षम् । इति भावप्रकाशः ॥

गुन्द्रा, स्त्री, (गुन्द्र + टाप् ।) भद्रमुस्तकः । प्रियङ्गुवृक्षः । इत्यमरः । २ । ४ । १६० ॥ गवेधुका । इति रत्नमाला ॥ शरटा । इति भावप्रकाशः ॥

("वेल्लन्तरारणिकबूकवृषाश्मभेद-
गोकण्ठकेतुकटसहाचरवाणकाद्याः ।
वृक्षादनीनलकुशद्वयगुच्छगुन्द्रा
भल्लूकमोरटकुररुष्टकरम्भपार्थाः ॥"

इति वाभटे सूत्रस्थाने १५ अध्याये ॥

पित्तसंशमनीयवर्गान्तर्गतौषधिविशेषः । यथा । "चन्दनकुचन्दनह्रीवेरोशीरमञ्जिष्ठा पयस्याविदारीशृतावरीगुन्द्राशैवालकट्टारकुसदोत्पलकदलीकन्दलीदूर्व्वाम्बष्ठाप्रभृतीनि काकोल्यादिर्न्यग्रोधादिस्तृणपञ्चमूलमिति समासेन पित्तसंशमनो वर्गः ॥" इति सुश्रुते सूत्रस्थाने ३६ अध्याये ॥)

(गङ्गा । यथा काशीखण्डे । २६ । ५४ ।

"यत्पीड़ाहरा गुन्द्रा गरघ्नी मानवत्सला ॥")

गुन्द्रालः, पुं, (गुन्द्रं नीड़निर्म्माणार्थं लगादिकं आलाति आदत्ते इति । आ + ला + कः ।) जीवञ्जीवपक्षी । इति हेमचन्द्रः । ४ । ४०६ ॥ गुन्द्रालोऽपि पाठः ॥

गुनृफ, शृ अर्त्ते । इति कविकल्पद्रुमः ॥ (तुदां परं-सकं-सेट् ।) पञ्चमस्वरी । शृ, गुम्फति मालां मालिकः । जुगुम्फ । इति दुर्गादासः ॥

गुम, ऊ रुजे । इति कविकल्पद्रुमः । (भ्वां-परं-सकं-वेट् ।) आयन्तत्वादुभयपदमिति बोपदेवः । गोपायति गोपायते । अरे तु आयस्याप्राप्तिपक्षे परस्मैपदमेव । अगोपीत् । जुगोप गोरूपधरामिलोर्व्वीमिति रघुः ॥ ऊ, गोपिष्यति गोष्यति । इति दुर्गादासः ॥

गुप, क भासि । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, गोपयति । भासि दीप्तौ । इति दुर्गादासः ॥

गुप, ड गोपनकुत्सयोः । इति कविकल्पद्रुमः ॥ (भ्वां आत्मं-सकं-सेट् ।) गोपनमपह्नवः । ड, कङ्कणभ्रमनृत्कारश्च किं गोपसे । अत्र त्वादयो न स्युरिति रमानाथः । कुत्सा निन्दा । सा जुगुप्सा प्रचक्रेऽस्रुक् । इति भट्टिः । इति दुर्गादासः ॥

गुप, य इर् व्याकुलत्वे । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं सकच्च-सेट् ।) व्याकुलत्वं व्याकुलीभावस्तत्करणञ्च । य, धीरो न गुप्यति महत्यपि कार्य्यजाते । इति हलायुधः । गुप्यति गा दृष्टिः । आकुलीकरोतीत्यर्थः । इति चतुर्भुजः । इर्, अगुपत् अगोपीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

गुपिलः, पुं, (गोपायति प्रजाजनानिति । गुप् रक्षणे + "गुपादिभ्यः कित् ।" उणा । १ । ५६ । इति इलच् कित्च ।) राजा । इत्युणादिकोषः ॥

गुप्तं, त्रि, (गुप्यते स्म । गुप् + कर्म्मणि क्तः ।) क्षतरक्षणम् । तत्पर्य्यायः । त्रातम् २ त्राणम् ३ रक्षितम् ४ अवितम् ५ गोपायितम् ६ । (यथा, महाभारते । १ । १ । १८८ ।

"यदाश्रौषं बृहन्मेद्यमन्यै-
र्भारद्वाजेनात्तशस्त्रेण गुप्तम् ॥")

क्षतगोपनम् । तत्पर्य्यायः । गूढम् २ । इत्यमरः । ३ । १ । १०६ । (यथाह वह्निष्टः ।

"आहारनिर्हारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः ।
वाग्गुप्तिकार्य्याणि तपस्तथैव
धनायुषी गुप्ततमे तु कार्य्ये ॥"

"हेम्नो भस्मकमभ्रकं द्विगुणितं लौहास्त्रयः पारदाश्चत्वारो नियतन्तु वङ्गयुगलञ्चैकीकृतं मर्द्दयेत् । सूक्ता विद्रुमयो रसेन समता गोचुरवासेक्षुणा सर्व्वं वन्यकरीषकेण सुदृढं गुप्तं पचेत् सम्पुटे ॥" इति वैद्यकरसेन्द्रसारसंग्रहे रसायनाधिकारे ॥) सङ्गतम् । इति शब्दरत्नावली ॥ वैश्यशूद्रयोर्नाम्नां प्रकृतिविशेषे पुं । यथा, इत्युद्वाहतत्त्वम् ॥

"गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ।"

गुप्तगतिः, पुं, (गुप्ता संवृता अन्यैरलक्षिता गतिर्गमनं चेष्टादिर्वा यस्य ।) चरः । इति शब्दरत्नावली ॥

गुप्तचरः, पुं, (गुप्तः योगेनात्मसंवृतः सन् स्वयं विष्णुरपि सर्व्वैश्वर्य्यमाच्छाद्य नररूपेण चरतीत्यर्थः ।) बलदेवः । इति त्रिकाण्डशेषः ॥ (कर्म्मधारयसमासे तु राज्ञां गूढचरः । गुप्तश्चरो यस्य इति विग्रहे राजानमेव बोधयति ॥)

गुप्तस्नेहः, पुं, (गुप्तः गूढभावेन स्थितः स्नेहः तैलादिरसो यत्र ।) अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥

गुप्ता, स्त्री, (गुप्त + टाप् ।) कपिकच्छुः । इति राजनिर्घण्टः ॥ परकीयान्तर्गतनायिकाभेदः । तस्या लक्षणम् । मैथुनगोपनम् । सा च त्रिधा । वृत्तसुरतगोपना १ वर्त्तिष्यमाणसुरतगोपना २ वृत्तवर्त्तिष्यमाणसुरतगोपना ३ । इति रसमञ्जरी ॥

गुप्तिः, स्त्री, (गुप् + अधिकरणभावकरणादिषु यथायथं क्तिन् ।) अवकरस्थानम् । कारागारम् । (यथा, माघे । ११ । ६० ।

"चिरमतिरसलौल्यादुद्बन्धनं लम्बितानां
पुनरयसुदयाय प्राप्य धाम स्वमेव ।
दलितदलकपाटः षट्पदानां सरोजे
सरभस इव गुप्तिस्फोटमर्कः करोति ॥")

रक्षणम् । इति मेदिनी । ते । १६ ॥ (यथा, मनुः । १ । ६४ ।

"तं हि स्वयम्भूः स्वादास्यात्तपसस्यादितोऽसृजत् ।
हव्यकव्यवाहाय सर्व्वस्यास्य च गुप्तये ॥")

भूगर्भः । यमः । इति हेमचन्द्रः ॥ गर्त्तार्थं क्षितेरुत्खननम् । नौकाच्छिद्रम् । इत्यमरटीकायां भरतः । गोपनम् । इति तट्टीकासारसुन्दरी ॥ (यथा, साहित्यदर्पणे । ३ । १५५ ।

"भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ॥"

संवरणम् । यथा, कुमारे । ६ । ३८ ।

"दृषन्मणिशिलासालं गुप्तावपि मनोहरम् ॥"

यज्ञीयमन्त्रसंस्कारविशेषः । यथा, तन्त्रसारधृतगौतमीये ।

"यजनं जीवनं पश्चात् ताड़नं बोधनं तथा ।
तथाभिषेको विमलीकरणाप्यायने पुनः ।
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ॥")

गुफ, प शृ अर्त्ते । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) पञ्चमस्वरी । प शृ, गुम्फति मालां मालिकः । जुगोफ । इति दुर्गादासः ॥

गुफितः, त्रि, (गुफ् + कर्म्मणि क्तः ।) गुम्फितः । ग्रथितः । इत्यमरटीका ॥

गुम्फः, पुं, (गुम्फ + घञ् ।) ग्रन्थनम् । (यथा, रावणकृतशिवतांडवे । १३ ।

"निगुम्फनिर्भरक्षरन्मधूष्णिकामनोहरम् ॥"

तथाच आर्य्यासप्तशत्याम् । ६०६ ।

"सततमरुणितमुखे सखि ! निगिरन्ती गिरां
गुम्फम् ॥")

बाहोरलङ्कारः । इति मेदिनी । फे । २ । श्मश्रु । इति शब्दरत्नावली ॥ गोँप इति भाषा ॥

गुम्फितः, त्रि, (गुम्फ + कर्म्मणि क्तः ।) ग्रथितः । इत्यमरटीकायां रायमुकुटः ॥ (यदुक्तम् ।

"प्रयत्नगुम्फितामाला यतस्तेन निराकृता ॥")

गुर, ईं य ड वधे । गत्याम् । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-सेट् ॥)
गुर, ड ईं अि उद्यमे । इति कविकल्पद्रुमः ॥ (तुदां-आत्मं-अकं-सेट् ।) इत्वी । ड अि, गुरते अगुरिष्ट । ईं, गूर्णः । इति दुर्गादासः ॥
गुरणं, क्ली, (गुर्+भावे ल्युट् ।) उद्यमः । इत्यमरः । ३ । २ । ११ ॥ अस्य रूपान्तरे गूरणं गोरणं इति भरतः ॥
गुरुः, पुं. (गृणाति उपदिशति वेदादिशास्त्राणि इन्द्रादिदेवेभ्य इति । यद्वा गीर्यते स्तूयते देवगन्धर्वमनुष्यादिभिः । गॄ+"क्रुग्रोरुच ।" उणां । १ । २४ । इति उत् ।) बृहस्पतिः । (यथा, देवीभागवते । १ । ११ । ४४ ।
"इत्याश्वास्य गुरुं शक्रो दूतं वक्तुं विचक्रमे ॥")
निषेकादिकृत् । इत्यमरः । ३ । ३ । १६१ ॥ (यथा, मनुः । २ । १४२ ।
"निषेकादीनि कर्म्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते ॥")
निषेको गर्भाधानं आदिना सीमन्तोन्नयनादेर्मन्त्रविद्यादानादेश्च ग्रहणम् । तत्कर्त्ता पित्रादिर्गुरुः स्यात् । इति भरतः ॥ मन्त्रदाता । तस्य वर्ज्जनीयत्वं यथा, कालिकापुराणे ५४ अध्याये ।
"अभिशप्तमपुत्रञ्च सन्नद्धं कितवन्तथा ।
क्रियाहीनमकल्पाङ्गं वामनं गुरुनिन्दकम् ॥
सदा मत्सरसंयुक्तं गुरुं मन्त्रेषु वर्ज्जयेत् ।
गुरुर्म्मन्त्रस्य मूलं स्याम्मूलशुद्धौ सदा शुभम् ॥"
अपि च । क्रियासारसमुच्चये ।
"श्वित्री चैव गलत्कुष्ठी नेत्ररोगी च वामनः ।
कुनखी श्यावदन्तश्च स्त्रीजितश्चाधिकाङ्गकः ॥
हीनाङ्गः कपटी रोगी वह्वाशी बहुजल्पकः ।
एतैर्दोषैर्विहीनो यः स गुरुः शिष्यसम्मतः ॥"
इति तन्त्रसारः ॥ * ॥

गुरुवर्गो यथा,—
"उपाध्यायः पिता ज्येष्ठभ्राता चैव महीपतिः ।
मातुलः श्वशुरश्चाता मातामहपितामहौ ॥
बन्धुर्ज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ।
मातामही मातुलानी तथा मातुश्च सोदराः ॥
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु ।
इत्युक्तो गुरुवर्गोऽयं मान्यतः पितृतो द्विजाः ॥
अनुवर्त्तनमेतेषां मनोवाक्कायकर्म्मभिः ।
गुरुं दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः ॥
नैतैरुपविशेत् सार्द्धं विवदेन्नात्मकारणात् ।
जीविताद्यै पि हेयादृगुरुभिन्नञ्च भाषणम् ॥
उदितोऽपि गुणैरन्यैर्गुरुर्हेयो पतत्यधः ।
गुरुणाञ्चैव सर्व्वेषां पूज्याः पञ्च विशेषतः ॥
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ।
यो भावयति या स्तौति येन विद्योपदिश्यते ॥
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ।
आत्मनः सर्व्वयत्नेन प्राणत्यागेन वा पुनः ॥
पूजनीया विशेषेण पञ्चैते भूतिमिच्छता ।
यावत् पिता च माता च द्वावेतौ निर्व्विकारिणौ ॥
तावत् सर्व्वं परित्यज्य पुत्रः स्यात्तत्परायणः ।
पिता माता च संप्रीतौ स्यातां पुत्रगुणैर्यदि ॥
स पुत्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ।
नास्ति पित्रसमो देवो नास्ति मात्रसमो गुरुः ॥
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ।
तयोर्न्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा ॥
न ताभ्यामनुज्ञातो धर्म्ममन्यं समाश्रयेत् ।
वर्ज्जयित्वा सुकृतफलं नित्यं नैमित्तिकं तथा ॥
धर्म्मसारः समुद्दिष्टः प्रेत्यानन्दफलप्रदः ।
सम्यगाराध्य वक्तारं विद्वद्भस्तदनुज्ञया ।
शिष्यो विद्याफलं भुङ्क्ते प्रेत्य चाप्याप्नुते दिवि ॥
यो भ्रातरं पितृसमं ज्येष्ठं रुष्टोऽवमन्यते ।
तेन दोषेण स प्रेत्य निरयं घोरमृच्छति ॥
पुंसा वर्त्मनिविष्टेन पूज्यो भर्त्ता तु सर्व्वदा ।
अपि मातरि लोकेऽस्मिन्नुपकाराद्धि गौरवम् ॥
ये नरा भर्त्तृपिण्डार्थं स्वान् प्राणान् संत्यजन्ति हि ।
तेषामाचार्य्यांल्लोकान् प्रोवाच भगवान् मनुः ॥
मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् ।
असावहमिति ब्रूयुः प्रत्युत्थाय यवीयसः ॥"
इति कूर्म्मपुराणे उपविभागे ११ अध्यायः ॥*॥

तस्य परीक्षा यथा ।
"सदाचारः कुशलधीः सर्व्वशास्त्रार्थपारगः ।
नित्यनैमित्तिकानाञ्च कार्य्याणां कारकः शुचिः ॥
अपव्यमैथुनपरः पितृदेवार्च्चने रतः ।
गुरुभक्तो जितक्रोधो विप्राणां हितकृत् सदा ॥
दयावान् शीलसम्पन्नः सत्कुलीनो महामतिः ।
परदारेषु विमुखो दृढसङ्कल्पको द्विजः ॥
अन्यैश्च वैदिकगुणैर्युक्तः कार्य्यो गुरुर्नृपैः ।
एतैरेव गुणैर्युक्तः पुरोधाः स्याम्महीभुजाम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥

शिष्यकृतपापं गुरुं स्पृशति यथा ।
"मन्त्रिपापञ्च राजानं पतिं जायाकृतं तथा ।
तथा शिष्यकृतं पापं प्रायो गुरुमपि स्पृशेत् ॥
प्राय इति गुरुणा शिष्यः सम्यग्बोधितोऽपि तदाचरणमनादृत्य पापच्छेदाचरति तदा तत् पापं गुरौ न आप्नोतीत्यर्थः ॥
वर्णाश्रमाणां सर्व्वेषामाचारः सद्गतिप्रदः ।
गुरुस्त्रिवारमाचारं बोधयेत् कुलनायिके ! ॥
न गृह्णाति हि शिष्यश्चेत्तदा पापं गुरोर्न हि ।
इति कुलार्णववचनात् । इति शिवार्च्चनचन्द्रिका ॥

मन्त्रदगुरोर्लक्षणं यथा ।
"गकारः सिद्धिदः प्रोक्तो रेफः पापस्य हारकः ।
उकारो विष्णुरव्यक्तस्त्रितयात्मा गुरुः परः ॥
शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् ।
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ॥
आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः ।
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥
उद्धर्त्तुं चैव संहर्त्तुं समर्थो ब्राह्मणोत्तमः ।
तपस्वी सत्यवादी च गृहस्थो गुरुरुच्यते ॥" * ॥

देशभेदेन तस्य विशेषो यथा ।
"मध्यदेशकुरुक्षेत्रनाटकोङ्कणसम्भवाः ।
अन्तर्व्वेदिप्रतिष्ठाना आवन्त्याश्च गुरूत्तमाः ॥
गौड़ाः प्राग्जोङ्गवाः सौरा मगधाः केरलास्तथा ।
कोशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः ॥
कर्णाटनर्म्मदारेवाकच्छातीरोद्भवास्तथा ।
कालिङ्गाश्च कलम्बाश्च काम्बोजाश्चाधमा मताः ॥
वैष्णवे वैष्णवो ग्राह्यः शैवे शैवश्च शाक्तिके ।
शैवः शाक्तोऽपि सर्व्वत्र दीक्षाखामी न संशयः ॥"
इति तन्त्रसारः ॥ * ॥

"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्व्वत्राभ्यागतो गुरुः ॥"
इति चाणक्यम् ॥

कपिकच्छुः । इति राजनिर्घण्टः ॥ द्विमाचः । दीर्घः । इति शब्दरत्नावली ॥ (गृणाति उपदिशति वेदान् । गॄ+"क्रुग्रोरुच ।" उणां । १ । २४ । इति उत् ।) वेदाध्यापयिताचार्य्यः । यथा, मनुः । ३ । १ ।
"षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम् ।
तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥"
गृणाति उपदिशति किञ्चिदपि यः । उपाध्यायइत्यर्थः । यथा, मनुः । २ । १४६ ।
"अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।
तमप्योह गुरुं विद्याच्छ्रुतोपक्रियया तया ॥"
गीर्य्यते स्तूयतेऽसौ ज्ञानतपोवृद्धत्वात् । ज्ञानप्रभावान्वितत्वात् तपोबलप्राधान्याद्वा पूज्यतमोमहात्मा । यथा, मनुः । २ । १३० ।
"मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् ।"
"भूयिष्ठाः खलु गुरव इत्युपक्रम्य ज्ञानवृद्धतपोवृद्धयोरपि हारीतेन गुरुत्वकीर्त्तनात् तयोश्च कनिष्ठयोरपि सम्भवात् तद्विषयोऽयं गुरुशब्दः ।"
इति टीकाकृत् कुल्लूकभट्टः । गृणाति उपनीयसन्ध्योपासनाचारादीनि कर्म्माणि उपदिशति । उपनेता सन्ध्योपासनादुपदेष्टा च । यथा, मनुः । २ । ६६ ।
"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्य्यञ्च सन्ध्योपासनमेव च ॥"
पिता । यथा, रामायणे । २ । ७६ । २ ।
"गतो दशरथः स्वर्गं यो नो गुरुतरोगुरुः ।"
राजचक्रवर्त्ती सम्राट् । यथा, रघुः २ । ६८ ।
"गुरुर्नृपाणां गुरवे निवेद्य ।"
गिरति अज्ञानमन्तर्यामिरूपेणाविद्यां नाशयतीत्यर्थः । गीर्य्यते स्तूयते जीवनिकरैरिति वा । गॄ वा उत् । विष्णुः । यथा, महाभारते । १३ । १४६ । ६५ ।
"आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥"
शिवः । तत्रैव । १७ । १३० ।
"सहस्रमूर्द्धा देवेन्द्रः सर्व्वदेवमयो गुरुः ।"
ब्रह्मा । माननीयः । एकेनैव श्लोकेनैतयोरुदाहरणं यथा, काशीखण्डे । ६६ । ७१ ।
"विभ्रत् सहजकाठिन्यं जातो गौरीगुरुर्गुरुः ।
शम्भुं प्रपूज्य सुतया सजा विश्वगुरोरपि ॥"
विश्वगुरोर्ब्रह्मणोऽपिगुरुर्मान्यनीयः पूज्यो वा इति तट्टीका ।
उपदेष्टृ अर्थे यथा सुश्रुतसूत्रस्थाने तृतीयाध्याये
"अथ वत्स ! तदेतदध्येयं यथा तथोपधारय

मया प्रोच्यमानम्। अथ शुचये ऋतोत्तरासङ्गाया-
व्याकुलायोपस्थितायाध्ययनकाले शिष्याय यथा-
शक्ति गुरुरुपदिशेत् पदं पादं श्लोकं वा ते च
पद-पाद-श्लोका भूयः क्रमेणाशुसंख्या एव-
मेकैकशो घटयेदात्मनाचानुपठेत्।" तत्रैव चतुर्थे
"शास्त्रं गुरुमुखोद्गीर्णमादायोपास्य चासकृत्।
यः कर्म्म कुरुते वैद्यः स वैद्योऽन्ये तु तस्कराः॥")

गुरुः, त्रि, (गीर्य्यते स्तूयते महत्त्वात्। गॄ+क्रुग्रो-
रुच" उणां।१।२४। इति उत्) महान्। (यथा,
ऋग्वेदे।४।५।६। "इदं मे अग्ने! कियते पावका-
मिनते गुरुं भारं न मन्म।") दुर्जरः। अलघुः।
इति मेदिनी॥ रे।२५॥ (यथा, पञ्चतन्त्रे।२।१६६
"प्राप्तो बन्धनमप्यहं गुरुत्वगस्तावत् त्वया मे
हृतः।" पराक्रान्तः। यथा, पञ्चतन्त्रे।३।२८।
"सोत्साहशक्तिसम्पन्नो हन्याच्छत्रुं लघुर्गुरुम्।"
भारायमाणः। यथा, रघुः।१२।१०२।
"अथ मदगुरुपक्षैर्लोकपालद्विपानाम्।"
अथ मदेन गजगण्डसञ्चारसंक्रान्तेन गुरुपक्षैः
भारायमाणपक्षैः अलिबृन्दैः।" इति टीका-
कृन्मल्लिनाथः। अतिशयः। यथा, मेघदूते।१।१।
"कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तं गमितमहिमा वर्षभोग्येण भर्तुः॥")

गुरुक्रमः, पुं, (गुरोरेव क्रमः पारम्पर्य्यं यत्र।)
इतिहः। पारम्पर्य्योपदेशः। इति हलायुधः॥

गुरुघ्नः, पुं, (गुरून् पराक्रान्तानपि यज्ञदान-
राज्यसादीन् हन्ति निराकरोतीत्यर्थः। हन्+
टक्।) गौरसर्षपः। इति राजनिर्घण्टः।
गुरुहन्तरि त्रि॥

गुरुण्टकः, पुं, (गुरुं दुर्जरत्वस्वादिकं रुण्टति
चोरयति हरतीति यावत्। गुरुं गुरुतां दुर्ज्जरतां
रुण्टतीत्येके रुटहस्तेये+खुल् ततः पृषोदरात्
रुलोपे साधुः।) तिलमयूरः। इति त्रिकाण्ड-
शेषः॥

गुरुतल्पगः, पुं, (गुरोः पितुराचार्य्योपाध्याया-
देर्वा तल्पं शय्यां पत्नीमितियावत्; गच्छति इति
गम्+डः।) विमातृगन्ता। यथा,—
"गुरुतल्पगः सुरापश्च स्तेयी च गुरुतल्पगः।
एते सर्व्वे पृथग्ज्ञेया महापातकिनो नराः॥"
एतस्य नरकभोगावसाने पुनर्गृहीतमनुष्यदेहस्य
फलं यथा, तत्रैव।११।४६।
"ब्रह्महा क्षयरोगित्वं सौरभेयं गुरुतल्पगः।")

गुरुतालः, पुं, (गुरुः अपेक्षाकृतदीर्घकालव्यापी-
तालः।) तालविशेषः। यथा,—
"एक एव गुरुर्यत्र गुरुतालः स कथ्यते।
अपरं नियमं विना॥" इति सङ्गीतदामोदरः

गुरुत्वं, क्ली, (गुरोर्भावः। "त्वतलौ" इति
त्वप्रत्ययसिद्धः त्वान्तं क्लीवमिति क्लीवत्वम्।।
महत्त्वम्। गुरुता। (यथा, भाषापरिच्छेदे।३१)
"स्पर्शादयोऽष्टौ वेगश्च गुरुत्वञ्च द्रवत्वकम्।")
अलघुता। यथा,—
"अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादित्रये तु तत्।
अनित्ये तदनित्यं स्यात् नित्ये नित्यमुदाहृतम्॥
तदेवासमवायि स्यात् पतनाख्यं तु कर्म्मणि।"
इति भाषापरिच्छेदः॥
(आधिक्यम्। यथा, रघुः।२।१८।
"गरिष्ठगुरुत्वाद्वपुषो नरेन्द्रः।" वपुषो गुरु-
त्वात् आधिक्यात् इति मल्लिनाथस्तट्टीकायाम्।
पूज्यत्वम्। यथा, तत्रैव।१०।६४।
"मेने परार्द्धमात्मानं गुरुत्वेन जगद्गुरोः।")

गुरुदेवतः, पुं, (गुरुर्हस्पतिर्देवतमस्येति।) पुष्य-
नक्षत्रम्। इति हेमचन्द्रः।२।२५॥

गुरुपत्रं, क्ली, (गुरुपाके दुर्ज्जरं पत्रं पत्राकार-
फलकमस्य।) वङ्गम्। इति हेमचन्द्रः॥
४।१०८॥

गुरुपत्नी, स्त्री, (गुरु सेवने दुर्ज्जरं पत्नं पर्ण-
मस्याः।) तिन्तिड़ीवृक्षः। इति शब्दरत्ना-
वली॥

गुरुमर्द्दलः, पुं, (गुरुः मर्द्दल इति नित्यकर्म्म-
धारयः।) डिण्डिमवाद्यम्। इति शब्दरत्ना-
वली॥

गुररत्नं, क्ली, (गुरु गौरवान्वितं मूल्यवदित्यर्थः;
गुरुत्वाद् गुरु वा रत्नम् गुरोः प्रियं रत्नमित्येके।)
पुष्परागमणिः। इति राजनिर्घण्टः॥ (पर-
मित्यत्र नवग्रहदोषशान्त्यै गुरौ सुवर्णेवेत्युक्ता)
यथा, अस्मिन्नेव शब्दकल्पद्रुमे नवरत्नशब्दे।
"नवग्रहदोषशान्त्यै धार्य्याणि नवरत्नानि।
वदूर्य्यं धारयेत् सूर्य्ये नीलञ्च शनलाञ्छने॥
आवनेयेऽपि माणिक्यं पद्मरागं शशाङ्कजे।
गुरौ मुक्ता भृगौ वज्रं शनौ नीलं विदुर्बुधाः॥"
इति॥
मणेरुत्पत्तिप्रभृतयोऽपि रत्नशब्दे द्रष्टव्या यथा,—
"वज्रमुक्ताश्मसमयः सपद्मरागाः समरकताः
प्रोक्ताः।
अपिचेन्द्रनीलवरवैदूर्य्याश्च पुष्यरागाश्च॥")

गुरुवर्चोघ्नः, पुं, (गुरुवर्चः वातपित्तादिप्रकोप-
जनिताग्निमान्द्यकोष्ठरोधनादिदोषसं हन्ति इति
हन्+टक्।) लिम्बाकः। इति शब्दचन्द्रिका॥
पातितेबु। इति भाषा॥

गुरुहा, [न्] पुं, (गुरुं हन्ति इति। हन्+क्विप्।)
गुरुघ्नः। तत्पर्य्यायः। नरकौलकः२। इति
हेमचन्द्रः।३।५२२॥ गुरुहन्तरि त्रि।

गुर्ज्जरः, पुं, (गुर् शब्दकृततताड़नं बधोद्यमादिकं
वा उज्जरयति यो देशः। कलिङ्गाः साह-
सिका इतिवद्देशशब्देन लक्षणेति ज्ञेयम्।)
गुज्जराटदेशः। इति शब्दरत्नावली॥

गुर्ज्जरी, स्त्री, (गॄ+क्विच्+अच। गुरिति शब्द-
कृततताड़नादिकं तर्ज्जयतीत्यच इति अधिकरणे
अप्। गुर्ज्जरः देशः तस्य प्रियेति ङीष्। यद्वा
गुर्ज्जरदेशः प्रियोऽस्या इति अण ङीप् च।
गुर्ज्जरदेशवासिनी अतो गुर्ज्जरीति केचित्।)
रागिणीविशेषः। इति हलायुधः॥ इयन्तु भैरव-
रागस्य रागिणीति बोध्यम्। यथा, सङ्गीतदर्पणे
रागविवेकाध्याये।१६।
"भैरवी गुर्ज्जरी रामकिरी गुणकिरी तथा।
वाङ्गाली सैन्धवी चैव भैरवस्य वराङ्गनाः॥"
अस्या गानवेलानिर्णयो यथा, तत्रैव।२०।
"वेलावली च मल्लारी वल्लारी सोमगुर्ज्जरी।"
इयं हि ग्रीष्मऋतौ स्वस्वामिना भैरवरागेण सह
गीयते। यथा, तत्रैव।२७।
"भैरवः ससहायस्तु ऋतौ ग्रीष्मे प्रगीयते।"
इति सोमेश्वरमतम्। हनूमन्मते तु। इयमेव
मेघरागस्य स्त्री। यथा, तत्रैव।३०।
"मल्लारी देशकारी च भूपाली गुर्ज्जरी तथा।
टङ्का च पञ्चमी भार्य्या मेघरागस्य योषितः॥"
इयं पुना रागार्णवमते पञ्चमरागाश्रया रागिणी-
त्वावधेयम्। यथा, तत्रैव।४०।
"ललिता गुर्ज्जरी देशी वराड़ी रामकृत्तथा।
मता रागार्णवे रागाः पञ्चैते पञ्चमाश्रयाः॥")

गुर्द्द क निकेतने। कूर्द्दे। इति कविकल्पद्रुमः॥
(चुरां-परं-अकं-सेट्।) दीर्घिणो वक्ष्यमाणत्वा-
दस्य न दीर्घः। क गुर्दयति। निकेतनं निवासः।
इति दुर्गादासः॥

गुर्द्द ड कूर्द्दे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-
अकं-सेट्।) दीर्घिणो वक्ष्यमाणत्वादस्यापि न
दीर्घः। ड गुर्दते। कूर्द्दः क्रीड़ा। इति दुर्गादासः॥

गुर्व्व ई उद्यमे। इति कविकल्पद्रुमः॥ (भ्वां-परं-
सकं-सेट् ईरित्।) अकर्म्मकेऽपि। खड्गादेरुत्तो-
लनार्थकस्य गुर्व्वधातोः सकर्म्मकत्वमकर्म्मकत्वम्
चैतत् प्रज्ञावद्भिरेव चिन्तनीयम्।) द्रव्यं। गूः
गुरौ गुरः। ईं गूर्णः। गुर्व्वति पक्षिः खड्गम्।
इति दुर्गादासः॥

गुर्व्विणी, स्त्री, (गर्व्वति कुक्षौ सन्तानमपत्यमित्यर्थः
प्राप्नोति धारयतीति यावत्। गर्व्व गतौ "गर्व्वे-
रत उच्च।" उणां।२।५४। इति उत् इनन्
च गौरादित्वात् ङीष्। गर्व्वयति सुचयतीत्येके।
यद्वा गुरुर्गुरुभारयुक्तो गर्भोऽस्यस्याः अपत्य-
धारणात्तथात्वम्। गुरु+"ब्रीह्यादिभ्यश्च।" ५।
२।११६। इति इनिः।) गर्भिणी। इत्यमरः।
२।६।२२॥ (यथा, मार्कण्डेये।२७।२०।
"बन्धकीपद्मशरभशूलिकागुर्व्विणीरुतनात्।
प्रज्ञा नृपेण चादेया तथा गोपालयोषितः॥"
यथास्याः पथ्यापथ्यनियमः।
यदृयत् कामयते सा च तत्तद्दद्याद्विशेषतः।
वर्ज्जयेद्विदलान्नानि विदाहीनि गुरूणि च॥
अम्लानि सोष्णशीतानि गुर्व्विणीनां विवर्ज्जयेत्।
मृत्तिका भक्षणीया न न च शूरणकन्दकाः॥
रसोनश्च पलाण्डुश्च सन्त्याज्यो गुर्व्विणीस्त्रिया।
शूरणानि प्रदेयानि शौल्कानि सरसानि च॥
पथ्ये हितानि चैतानि गुर्व्विणीनां सदा भिषक्।
यायामं मैथुनं रोगं शौर्य्यशक्रमशस्त्रथा॥
वर्ज्जयेद्गुर्व्विणीनाञ्च जायन्ते सुखसम्पदः॥"
इति हारीते ततीयस्थानेऽष्टचत्वारिंशेऽध्याये॥)

गुर्व्वी, स्त्री, (गुरुभारयुक्तो गर्भोऽस्याः । गुरु + ङीष् ।) गर्भवती । इति हेमचन्द्रः । ३ । २०३ ॥ ("नहि वन्ध्या विजानाति गुर्व्वीप्रसववेदनाम् ॥" इति हितोपदेशः ॥)

गुरुपत्नी । (गुरोः पत्नीति गुरु + ङीष् ।) गौरवयुक्ता । (गुरु + वोतोगुणवचनात् ।" ४ । १ । ४४ । इति विभाषायां ङीष् ।) यथा । अनन्यगुर्व्वाश्रयकेन केवलः पुराणमूर्त्तेर्महिमावगम्यते । इति माघः ॥ (गुरुभारविशिष्टा । यथा, महाभारते । ३ । २२ । ३७ ।

"ततः शूलं गदां गुर्व्वीमाविध्यन्तं महाहवे ।
द्विधाचकार सहसा प्रजज्वाल च तेजसा ॥"

गायत्री । यथा,—

देवीभागवते । १२ । ६ । ४२ ।

"गुह्यवासा गुणवती गुरुपापप्रणाशिनी ।
गुर्व्वी गुणवती गुह्या गोप्रदा गुणरूपिणी ॥")

गुलः, पुं, (गुड़ + डलयोरैक्याडुकारस्य लत्वम् ।) ऐक्षवः । गुड़ः । इति मेदिनी । वे । १३ ॥

गुलञ्चकन्दः, पुं, (गुलञ्चस्य लताविशेषस्य कन्द इव कन्दोऽस्य गुलं गुड़वद्रसं अञ्चति अञ्च + अण् । ततः शाकपार्थिवादित्वादलोपे गुलञ्चः ताडशः कन्दः । इति केचित् ।) कन्दविशेषः । कुली इति भाषा । तत्पर्य्यायः । गुच्छाङ्गकन्दः २ बलाङ्गकन्दः ३ निषण्टिका ४ । अस्य गुणाः । मधुरत्वम् । सुशीतलत्वम् । वृष्यप्रदत्वम् । तर्पणत्वम् । दाहनाशित्वञ्च । इति राजनिर्घण्टः ॥

गुला, स्त्री, (गुलं गुड़इव रसोऽस्यस्या इति अर्शआदिभ्योऽच् ततष्टाप् ।) क्षुद्रौषधिः । इति मेदिनी । ले । १३ ॥

गुली, स्त्री, (गुड़ः क्षुद्रवर्त्तुलाकृतिर्विषमयस्फोटाकृतिरित्यर्थः विद्यतेऽस्याः इति अर्शआदिभ्योऽच् ततो ङीष् ।) गुटिका । रोगभेदः । वसन्त इति ख्यातः । इति मेदिनी । ले । १४ ॥

गुलुञ्छः, पुं, (गुञ्छ + एषोदरात् साधुः ।) गुच्छः । स्तवकः । इति त्रिकाण्डशेषः ॥

गुलुञ्छः, पुं, (गुञ्छति गोलाकारेण वेष्टयतीति गुछ + क्विप् गुट् तं तदाकारं उञ्छति आदत्ते उपार्ज्जयति वा । उञ्छि "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । ततो डस्यलत्वे साधुः ।) गुच्छः । इति हेमचन्द्रः । ४ । १६२ ॥

गुलुञ्छकः, पुं, (गुलुञ्छ + स्वार्थे कन् ।) गुच्छः । इति शब्दरत्नावली ॥

गुल्फः, पुं, (गल + "कल्यगलिभ्यां फगस्योच ।" उणा । ५ । २६ । इति फक् अकारस्योत्वं च ।) पादग्रन्थिः । तत्पर्य्यायः । घुटिका २ । इत्यमरः । २ । ६ । ७२ ॥ चरणग्रन्थिः ३ घुटिकः ४ घुण्टकः ५ घुण्टः ६ । इति हेमचन्द्रः । ३ । २७६ ॥ (यथा, गीः रामायणे । ६ । २१ । १२ ।

"समावेतौ करौ पादौ गुल्फौ चावनतौ मम ॥")

गुल्मः, पुं, (गुड़ति वेष्टयति गुण्यते वेष्टते वा, गुड़ + करणे बाहुलकात् मक् डलयोरैक्यात् डस्यलत्वे साधुः ।) उदरनरोगविशेषः । तस्य निदानादि।

"दुष्टा वातादयोऽत्यर्थं मिथ्याहारविहारतः ।
कुर्व्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ॥*
तस्य पञ्चविधं स्थानं पार्श्वे हृन्नाभिवस्तयः ।
हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदि वाचलः ॥
वृत्तत्वयापचयवान् स गुल्म इति कीर्त्तितः ।
स सर्व्वैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः ॥
पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः ॥*
तस्य पूर्व्वरूपं यथा,—

"उद्गारबाहुल्यपुरीषबन्ध-
लघ्वन्नमलान्नविकूजनानि ।
आटोपआध्मानमपक्तिशक्ति-
रासन्नगुल्मस्य वदन्ति लिङ्गम् ॥" * ॥

तस्य सामान्यरूपम् ।

"अरुचिः क्षुत्क्षयोऽपवाततान्त्रविकूजनम् ।
आनाहश्चोर्द्ध्ववातश्च सर्व्वगुल्मेषु लक्षयेत् ॥*॥

वातिकस्य निदानं यथा,—

"रूक्षान्नपानं विषमातिमात्रं
विचेष्टनं वेगविनिग्रहश्च ।
ग्लौकोऽभिघातोऽतिमलक्षयश्च
निरन्नता चानिलगुल्महेतुः ॥" * ॥

वातिकस्य रूपम् । यथा,—

"यः स्थानसंस्थानरुजा विकल्पं
विड्वातसङ्गं गलवक्त्रशोषम् ।
श्यावारुणत्वं शिशिरज्वरञ्च
हृत्कुक्षिपार्श्वां सशिरोरुजञ्च ॥
करोति जीर्णेऽभ्यधिकं प्रकोपं
सुप्ते स्तब्धं समुपैति यञ्च ।
वातात् स गुल्मो न च तत्र रूपं
कषायतिक्तं कटु चोपशेते ॥" * ॥

पैत्तिकस्य निदानं यथा,—

"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्रोधातिमद्यार्कहुताग्निसेवा ।
आमाभिघातो रुधिरञ्च दुष्टं
पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥" * ॥

पैत्तिकस्य रूपं यथा,—

"ज्वरः पिपासा वदनाङ्गरागः
शूलं महच्जीर्य्यति भोजने च ।
स्वेदो विदाहो ग्रथनञ्च गुल्मः
सप्राग्लहः पैत्तिकगुल्मरूपम् ॥" * ॥

श्लैष्मिकस्य निदानम् ।

"प्रीतं गुरु स्निग्धमचेष्टनञ्च
संपूरणं प्रस्वपनं दिवा च ।
गुल्मस्य हेतुः कफसम्भवस्य
सर्व्वस्तु दुष्टो निचयात्मकस्य ॥" * ॥

श्लैष्मिकस्य रूपम् ।

"श्लेष्मित्यशीतज्वरगात्रसाद-
हृल्लासकासारुचिगौरवाणि ।
श्लैष्मं रुगल्पा कठिनोन्नतत्वं
गुल्मस्य रूपाणि कफात्मकस्य ॥" * ॥

द्वन्द्वजस्य रूपं यथा,—

"निमित्तलिङ्गान्युपलभ्य गुल्मे
द्विदोषजे दोषबलाबलज्ञः ।
यामिश्रलिङ्गानपरांश्च गुल्मां-
स्त्रीणादिशेद्दीर्घकरूपनार्थम् ॥" * ॥

त्रिदोषजस्य रूपं यथा,—

"महारुजं दाहपरीतमग्नवद्
घनोन्नतं शीघ्रविदाहिदारुणम् ।
मनःशरीराग्निबलापहारिणं
त्रिदोषजं गुल्ममसाध्यमादिशेत् ॥" * ॥

अथ स्त्रीणां रक्तजगुल्मनिदानं यथा,—

"नवप्रसूताहितभोजना या
या चामगर्भं विसृजेद्वृतौ वा ।
वायुर्हि तस्याः परिगृह्य रक्तं
करोति गुल्मं सरुजं सदाहम् ॥" * ॥

स्त्रीणां रक्तजगुल्मलक्षणं यथा,—

"पैत्तस्य लिङ्गेन समानलिङ्गं
विशेषणञ्चाप्यपरं निबोध ।
यः स्रन्दते पिच्छित एव नाड्ये-
श्चिरात् सशूलः समगर्भलिङ्गः ॥
सरौधिरः स्त्रीभव एव गुल्मो
मासे व्यतीते दशमे चिकित्स्यः ।

स्त्रीणामार्त्तवजो गुल्मो न पुंसासुपजायते ।
अन्यस्त्रक्स्रग्भवो गुल्मः स्त्रीणां पुंसाञ्च जायते ॥
अथासाध्यलक्षणं यथा,—

सञ्चितः क्रमशो गुल्मो महावास्तुपरिग्रहः ।
छिन्नमूलः शिरारन्ध्रो यदा कूर्म्म इवोन्नतः ॥
दौर्ब्बल्यारुचिहृल्लासकासच्छर्दरतिज्वरैः ।
क्षयातन्द्राप्रतिश्यायैर्युज्यते न स सिध्यति ॥
गृहीत्वा सज्वरं श्वासच्छर्दतीसारपीड़ितम् ।
हृन्नाभिहस्तपादेषु शोथः कर्षति गुल्मिनम् ॥
श्वासः शूलं पिपासान्नविद्वेषो ग्रन्थिसम्भवः ।
जायते दुर्ब्बलत्वञ्च गुल्मिनो मरणाय वै ॥"

इति माधवकरः ॥ * ॥

तच्चिकित्सा यथा,—

"वातारितैलेन प्रयोजयेत्तं
पथ्यासमेतेन विरेचनं हि ।
संस्वेदनं स्निग्धमतिप्रशस्तं
प्रभञ्जनक्रोधकृते तु गुल्मे ॥
स्वर्ज्जिकाकुष्ठसहितः क्षारः केतकसम्भवः ।
पीतस्तैलेन शमयेद्गुल्मं पवनसम्भवम् ॥
तित्तिरांश्च मयूरांश्च कुक्कुटान् क्रौञ्चबर्हकान् ।
सर्पिः प्राशि प्रसन्नाश्च वातगुल्मे प्रयोजयेत् ॥*॥
पित्तगुल्मे त्रिवृच्चूर्णं पातव्यं त्रिफलाम्बुना ।
विरेकाय सितायुक्तं कम्पिल्लं वा समाक्षिकम् ॥"

त्रिफलाम्बुना त्रिफलाक्वाथेन । कम्पिल्लं कम्पिला इति लोके ।

"अभयां द्राक्षया खादेत् पित्तगुल्मी गुड़ेन वा ॥*
योगैश्च वातगुल्मोक्तैः श्लेष्मगुल्ममुपाचरेत् ॥
अपरैश्च बलासघ्नैर्युक्तियुक्तैः शमं नयेत् ॥"* ॥

हिङ्गुग्रन्थिकधान्यजीरकवचाचव्यामिपाठाग्नटी-
वृक्षाम्लं लवणत्रयं त्रिकटुकं क्षारद्वयं दाड़िमम् ।
पथ्यापौष्करवेतसाम्लहवुषाजाज्यस्तदेभिः कृतं
चूर्णं भावितमेतदार्द्रकरसैः स्याद्बीजपूरद्रवैः ॥
गुल्माध्मानगुदाङ्कुरान् ग्रहणिकोदावर्त्तसंज्ञौ गद

प्रत्याभानगरोदराक्षरियुतांस्तूनीद्वयारोच-
कान् ।
ऊरुस्तम्भमतिभ्रमञ्च मनसो बाधिर्य्यमष्ठीलिकां
प्रत्यष्ठीलिकया सहापहरते प्राक्पीतसुरया-
स्रुना ॥

हृत्कुक्षिवंक्षणकटीजठरान्तरेषु
वस्तिस्तनांशफलकेषु च पार्श्वयोश्च ।
शूलानि नाशयति वातबलासजानि
हिङ्ग्वाद्यमाद्यमिदमाश्विनसंहितोक्तम् ॥"

हिङ्ग्वादिचूर्णम् ॥ * ॥

"धीमानुपचरेद्गुल्मं प्रत्येकञ्च त्रिदोषजम् ।
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः ॥
शूरपुङ्खस्य लवणं पथ्याचूर्णं समं द्वयम् ।
घ्राणप्रमाणमग्नीयाच्चूर्णं गुल्मगदापहम् ॥
खर्ज्जिका घ्राणमाना स्यात्तावदेव गुडं भवेत् ।
उभयोर्वटिकां खादेद्गुल्मामयविनाशिनीम् ॥*
पलाशयवचीशिखरिचित्रकैतिलनालजाः ।
यवजः खर्ज्जिका चेति चारा अष्टौ प्रकीर्त्तिताः ॥
गुल्मशूलहराः चारा अजीर्णस्य च पाचनाः ।"

चाराष्टकम् ॥ * ॥

"सासुद्रं सैन्धवं काचं यवक्षारः सुवर्चलम् ।
टङ्कणं खर्ज्जिकाक्षारं तुल्यं चूर्णं प्रकल्पयेत् ॥
वचीक्षीरेरविक्षीरैरातपे भावयेत् त्र्यहम् ।
वेष्टयेदर्कपत्रेण रुद्ध्वा भाण्डपुटे पचेत् ॥
ततश्चारं चूर्णयेत् पश्चात् त्र्यूषणं त्रिफलां
तथा ।
यवानी जीरको वह्निचूर्णमेषाञ्च कारयेत् ॥
सर्व्वचूर्णसमं क्षारं सर्व्वमेकत्र कारयेत् ।
तच्चूर्णं टङ्कयुगलं सलिलेन प्रयोजयेत् ॥
गुल्मे शूले तथाजीर्णे प्लीहे सर्व्वोदरेषु च ।
मन्दे वह्नावुदावर्त्ते प्लीहि चापि परं हितम् ॥
वातेऽधिके जलैः कोष्णैर्हितं पित्तेऽधिके घृतैः ।
गोमूत्रेण कफाधिक्ये काञ्जिकेन त्रिदोषजे ॥
वचक्षार इति ख्यातः प्रोक्तः पूर्व्वं स्वयम्भुवा ।
सेवितो हरतेऽजीर्णं तथाजीर्णभवान् गदान् ॥"

वचक्षारः ॥ * ॥

"सुवर्चिका टङ्कमिता घ्राणमानार्द्रिकापि च ।
उभे भक्षीत युगपद्गुल्मामयनिवृत्तये ॥"

सुवर्चिका सोरा इति लोके ।

"शुक्तिकाचूर्णगुटिकां टङ्कमात्रां सुवेष्टयेत् ।
गुड़ेन घ्राणमानेन ताड़्गेत् गुल्मरोगवान् ॥
गुल्मी कुमारिकामांसं कर्षार्द्धं गोघृतान्वितम् ।
गिलेत् घोषाभयासिन्धुसूक्ष्मचूर्णावधूलितम् ॥
कुमारिका घिउकुँयारी इति लोके ॥ * ॥

"वल्लूरं मूलकं मत्स्यं शुष्कशाकानि वेदलम् ।
न खादेदानुकं गुल्मी मधुराणि फलानि च ॥
वेदलानां निषेधेऽपि माषकुलत्थयोर्न्नानिषेधः ।
इति सुश्रुतटीका । इति गुल्माधिकारः ॥ इति
भावप्रकाशः ॥

अथ गुल्मचिकित्सा ।

आत्रेय उवाच ।

"भयधूपोपचारैश्च दोषैः संकुप्यतेऽनिलः ।
मन्दाग्निना हि जठरे जायते गुल्मरुङ् नृणाम् ॥
उदरं गर्জ্জते यस्य विषमाग्निश्च दृश्यते ।
तोदो वपुषि शूलञ्च वातगुल्मं विनिर्द्दिशेत् ॥
शोषोऽरतिः सपीतत्वं मन्दज्वरनिपीड़ितम् ।
तमोभ्रमपिपासार्त्तं गुल्मं तत् पित्तसम्भवम् ॥
शोफो जाड्यञ्च श्लक्ष्णासं तन्द्रालस्यं सशीतकम् ।
मन्दाग्निर्विड्विबन्धश्च गुल्मं तत् श्लेष्मसम्भवम् ॥
मोहो विभ्रमता जाड्यमरतिश्छर्दितृषापिपासकम् ।
आलस्यं निद्रया चैवं गुल्मं तत् कफपैत्तिकम् ॥
निद्रालस्यञ्च दाहश्च शोथात् शूलञ्च सञ्चरम् ।
वैवश्यमरतिर्जाड्यं विड्बन्धो विकलाङ्गता ॥
तथातीसारमूर्च्छा च क्षयाच्छ्वासवेपथु ।
श्वासोऽरुचिरजीर्णत्वं गुल्मं तत्सान्निपातिकम् ॥
साध्यं केवलदोषोत्थं द्वन्द्वं कष्टेन सिध्यति ।
असाध्यं सन्निपातोत्थं वक्ष्यामस्तत्प्रतिक्रियाम् ॥
यच्चतुश्चिकित्सितञ्चैव कथितञ्चोपचारजम् ।
तच्चतुःशीघ्रा समाख्यातो न चात्र कथितं पुनः ॥
चिकित्सोदरगुल्मस्य वक्ष्यते शृणु साम्प्रतम् ।
स्नेहनं रूक्षणञ्चैव पाचनं स्रोधनानि च ॥
संशमनं विरेकश्च वस्ति-स्नेह-निरूहणम् ।
चये पानञ्च चूर्णानि गुल्मोपचरणक्रिया ॥
शुण्ठीमूर्व्वा पञ्चमूलं लघुराम्ना च दारु च ।
क्वाथोऽस्य चावशेषः स्यात् तत्समं क्षीरमेव च ॥
दधितत्समभेवन्तु पाचयेत्तत्समाग्निना ।
घृतं यावत् प्रपक्षेच्च सिद्धमुत्तार्य्यते ततः ॥
ततः कृतं पानकेऽभ्यङ्गे भोजने च प्रदापयेत् ।
स्नेहं सप्तदिनं यावत् तस्माच्च रूक्षयं हितम् ॥
दिनत्रयञ्च कर्त्तव्यं कथयाम्यत्र कोविद ! ।
शुण्ठी सौवर्चलं जीरे द्वे वा हिङ्गुसमन्वितम् ॥
काञ्जिकं पानमेतेषां रूक्षणं गुल्मशान्तये ।
गुल्मचिकित्सिते क्षारपाकोऽत्र प्रतियुज्यते ॥

क्षारं पलाशाङ्गुनशूरणस्य
क्षारं तथा वै सहयावशूकम् ।
सौवर्चलं सिन्धुभवोद्भिदञ्च
सासुद्रजं वापि विमिश्रयेच्च ॥
तोयं परिस्राव्य विधानतोऽपि
युक्तं तथैतानि सदौषधानि ।
पथ्यामिशुण्ठी रजनीसुराह्वं
कुष्ठं विशाला च यवानिका च ॥
तथाजमोदा सहजीरके द्वे
षड्ग्रन्थिका हिङ्गुयुतञ्च चूर्णम् ।
क्षारोदकौ पानविमिश्रपानं
निहन्ति सर्व्वाण्यपि कोष्ठजानि ॥
गुल्मानि सर्व्वाणि विसूचिकानां
मन्दाग्निशूलानि भगन्दराणाम् ।
प्लीहोदरानाहमथो विबन्धं
विनाशनो रोगचयं नराणाम् ॥"

इति विरुच्यम् ॥ * ॥

अथ विरेचनानि वक्ष्यामः ॥ * ॥

"नागरं क्रिमिजित् पथ्या त्रिवृता त्रिगुणायुतम् ।
चूर्णं गुड़ान्वितं देयं वातगुल्मविरेचनम् ॥
दन्ती च भागमेकञ्च द्वौ भागौ च हरीतकी ।
त्रिवृतायास्त्रिभागः स्यात् शुण्ठ्याश्चत्वार एव च ॥
प्रक्षिप्य सर्व्वमेकत्र सर्व्वतुल्यगुड़ेन तु ।
वटकं भक्षयेत् प्रातस्तस्योपरिजलं पिबेत् ॥
कथितञ्च विरेकञ्च वातगुल्मोपशान्तये ।"

इति वातगुल्मविरेचनम् ॥ * ॥

"पिबेदेरण्डतैलञ्च सर्करां क्षीरसंयुतम् ।
पित्तगुल्मविरेकाय श्रेष्ठमेतत् सुखावहम् ॥
क्षारगर्भं प्रवालानि तथैवारग्वधानि च ।
विभीतैरण्डतैलेन तत्पचेच्चैव वेष्टयेत् ॥
कदलेन प्रलिप्याथ अङ्गारेषु निधापयेत् ।
सुस्विन्नमर्द्दितां ताञ्च भक्षयेत् शर्करान्विताम् ॥
विरेकं पैत्तिके गुल्मे हितं शुद्धविरेचनम् ।"

इति पित्तगुल्मविरेचनम् ॥ * ॥

"त्रिफला सुरसा शुण्ठी चूर्णं क्षौद्रेण भावयेत् ।
स्नुहीक्षीरेण वारेकं गुड़ेन सह मिश्रितम् ॥
विरेकः श्लेष्मगुल्मे च सर्व्वोदरविनाशनम् ।
शुण्ठी सौवर्चलं पथ्या विड़ङ्गञ्च पुनर्नवा ॥
चूर्णोऽपामार्गबीजानां स्नुहीक्षीरेण भावितः ।
गुड़ेन संयुतं खादेत् पश्चात् सोष्णं जलं पिबेत् ॥
विरेकः सर्व्वगुल्मेषु प्रशस्तो हितकारकः ॥

इति विरेचनम् । [कोकिला

शुक्तिक्षारनिशाविशालकदली स्यात् शूरणं
पालाशं दहनार्ज्जुनं ग्रथितयाऽपामार्गकुशा-
ङ्कम् ।
दग्ध्वाक्षारविपाचितं परिहृतं हिङ्गुत्रिकट्वन्वितं
गुल्मानाहविबन्धशूलहरणं सर्व्वोदराणां हितम् ॥

इति क्षारपानम् ॥ * ॥

"अजमोदा ग्रन्थी दन्ती विड़ङ्गं शुण्ठितुम्बुरु ।
त्रिफला चित्रकश्चैव शुण्ठी कर्कटशृङ्गिका ॥
त्रिवृता च सुराङ्का च पुष्करं वृहदारकम् ।
तथाश्वेतसहचैव तिन्तिड़ीकश्च त्रिंशिलिः ॥
समन्तु मातुलुङ्गेन विभाव्यमेकतः कृतम् ।
त्रिभागहिङ्गुसंयुक्तं घृतेन चूर्णितं हितम् ॥
निहन्ति वातगुल्मञ्च सशूलमुदरन्तथा ।"

इत्यजमोदादि ॥ * ॥

हिङ्गुपलत्रिकक्षीरकयुग्मं
चित्रकभागिककुष्ठविड़ङ्गम् ।
तुम्बुरुपुष्कर-विश्वसुराह्वं
क्षारयुतं लवणानि च पञ्च ॥
वातिकगुल्मविनाशनहेतुः
शूलरुजञ्च नरस्य निहन्ति ॥"

इति वातगुल्मचिकित्सा ॥ * ॥

"विदारी क्षीरशुक्ला च पथ्या विश्वौषधं मधु ।
लेहः पित्तात्मके गुल्मे हितः श्लोफनिवारणः ॥
यष्टिकं निम्बपत्राणि तथा धात्रीफलं सिता ।
चूर्णं मध्वावलीढञ्च पित्तगुल्मनिवारणम् ॥"

इति पित्तगुल्मचिकित्सा ॥ * ॥

"त्रिकटुत्रिफलाचित्रवटकट्फलसंयुतम् ।
चूर्णं मद्येन वा पीतं फलकाथेन वा पीतम् ॥
श्लेष्मगुल्मविनाशाय हितश्चैतत् सुखावहम् ।
लोध्रञ्च कट्फलं विश्वा कुष्ठं चित्रकमेव च ॥
नागरं हिङ्गुसंयुक्तं चूर्णं मूत्रेण संयुतम् ।

श्लेष्मगुल्मविनाशाय शूलोदरविनाशनम् ॥
उद्धृत्य च मरिचं चारचूर्णसमन्वितम् ।
पिबेन्मद्येन संयुक्तं श्लेष्मगुल्मविनाशनम् ॥"
इति श्लेष्मगुल्मचिकित्सा ॥ * ॥
"मुष्टी सौवर्चलं भार्गी वत्सकं यावशूकजम् ।
जीरे द्वे चाटरूषश्च यवानी हिङ्गुसैन्धवम् ॥
आरग्वधेन संयुक्तं चूर्णं सघृतमेव च ।
वातश्लेष्मोद्भवे गुल्मे सुखमाशुप्रपद्यते ।
उद्धृत्य फलत्रिकं देवदारुपुनर्नवा ॥
चित्रकसौवर्चलोपेतं चारोदकसमन्वितम् ।
पीतं वातकफे गुल्मे शुभकारि परं मतम् ॥"
इति वातश्लेष्मगुल्मचिकित्सा ॥ * ॥
इति हारीते चिकित्सितस्थाने चतुर्थोऽध्याये ॥
"रूक्षकषायारुणशिरा तनुजालगवाक्षितः ।
गुल्मोऽधा पृथक् दोषैः संसृष्टैर्निश्चयं गतः ॥
आर्तवस्य च दोषेण नारीणां जायतेऽथवा ।
ज्वरच्छर्दातिसाराद्यैर्वमनाद्यैश्च कर्मभिः ॥
कर्शितो वातलान्यत्ति शीतं वाम्बुसुचिरतः ।
यः पिबत्यनुचान्नानि लङ्घनं प्लवनादिकम् ॥
सेवते देहसंशोभिच्छर्दिं वा समुदीरयेत् ।
अनुदीर्णानुदीर्णान् वा वातादीन्न विमुञ्चति ॥
स्नेहस्वेदावनभ्यस्य शोधनं वा निषेवते ।
शुष्को वापि विदाहीनि भजते स्यन्दनानि वा ॥
वातोल्बणास्त्रयमलाः पृथक् कुद्वाद्विशोऽथवा ।
सर्वे वा रक्तयुक्ता वा महास्रोतोऽनुधाविनः ॥
ऊर्ध्वाधोमार्गमाश्रित्य कुर्वते शूलपूर्वकम् ।
स्पर्शोपलभ्यं गुल्माख्यमुत्पन्नं ग्रन्थिरूपिणम् ॥
कर्शनात् कफविट्पित्तैर्मार्गस्यावरणेन वा ।
वायुः कृताश्रयः कोष्ठे रौक्ष्यात् काठिन्यमागतः ।
स्वतन्त्रः स्वाश्रये दुष्टः परतन्त्रः पराश्रये ॥
पिच्छितत्वाददृष्टोऽपि मूर्तत्वमिवसंश्रितः ।
गुल्म इत्युच्यते वस्तिनाभिहृत्पार्श्व-संश्रयः ॥
वाताच्छ्यावारुणः शूलं ज्वरश्छर्दिरलजृम्भणम् ।
यथा स्वयेव विट्सङ्गः कृच्छ्रादुच्छ्वसनं सुहुः ॥
स्तम्भो गात्रे मुखे शोषः कार्श्यं विषमवह्निता ।
रूक्षकृष्णत्वगादित्यं चलत्वादनिलस्य च ॥
अनिरूपित-संस्थान-स्थानवृद्धिक्षयव्ययः ।
पिपीलिकाभिरव गुल्मः स्फुरति तुद्यते ॥
पित्ताद्दाहोऽम्लको मूर्छा विड्भेदस्वेदलड्-
ज्वराः ।
हारिद्रत्वं त्वगादीनां गुल्मश्च स्पर्शनासहः ॥
दूयते दीप्यते सोष्मा स्वस्थानं दहतीव च ।
कफात् स्तैमित्यमरुचिः सदनं शिश्चिरज्वरः ॥
पीनसालस्य-कृच्छ्रास-कासशुक्लत्वगादिताः ।
गुल्मोऽवगाढः कठिनो गुरुः सुप्तः स्थिरोऽल्प-
रुक् ॥
स्वदोषस्थानधामानः स्वे स्वे काले च रूक्षराः ।
प्रायस्त्रयस्तु हृन्नाभ्या गुल्माः संसृष्टलक्षणाः ॥
सर्वजस्तीव्ररुग्दाहः शीघ्रपाकी घनोन्नतः ।
सोऽसाध्यो रक्तगुल्मस्तु स्त्रिया एव प्रजायते ॥
ऋतौ वा नवसूता वा यदि वा योनिरोगिणी ।
सेवते वातलानि स्त्री कुद्वस्तस्याः समीरणः ॥
निरुणद्धार्तवं योन्यां प्रतिमासमवस्थितम् ।
कुक्षिं करोति तद्गर्भ-लिङ्गमाविष्करोति च ॥
कृच्छ्रास-दौर्हृदस्तन्य-दर्शनं श्यामतादिकम् ।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत् ॥
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान् ।
रक्तस्तम्भादहातिसारदृड्ज्वरादीनुपद्रवान् ॥
गर्भाशये च सुतरां शूलंदुष्टासृगाश्रये ।
जन्याच्च सावदौर्गन्ध्यतोदस्यन्दनवेदनाः ॥
न चाङ्गैर्गर्भवद् गुल्मः स्फुरत्यपि तु शूलवान् ।
पिण्डीभूतः स एवास्याः कदाचित् स्यन्दते चिरात् ॥
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते ।
स दोषसंश्रयो गुल्मः सर्व्वो भवति तेन सः ॥"
इति वाभटे निदानस्थाने पञ्चमेऽध्याये ॥
"रूक्षान्नपानैरतिसेवनैर्वा
शोकेन मिथ्या प्रतिकर्मणा वा ।
विचेष्टितैर्वा विषमात्मिताभैः
कोष्ठे प्रकोपं समुपैति वायुः ॥
कफञ्च पित्तञ्च स दूषयित्वा
प्रोह्य मार्गान् विनिबध्य ताभ्याम् ।
कृत्क्षीहपार्श्वोदरवस्तिशूलं
करोत्यधो याति न बद्धमार्गः ॥
पक्वाशये पित्तकफाशये वा
स्थितः स्वतन्त्रः परसंश्रयो वा ।
स्पर्शोपलभ्यः परिपिच्छितत्वात्
गुल्मो यथा दोषमुपैति नाम ॥
वस्तौ हि नाभ्यां हृदिपार्श्वयोर्वा
स्थानानि गुल्मस्य भवन्ति पञ्च ।
पञ्चात्मकस्य प्रभवन्तु तस्य
वक्ष्यामि लिङ्गानि चिकित्सितञ्च ॥
क्रियाक्रममतः सिद्धं गुल्मिनां गुल्मनाशनम् ।
प्रवक्ष्याम्यत ऊर्द्धञ्च योगान् गुल्मनिबर्हणान् ॥
रूक्षच्छायामजं गुल्मं वातिकं तीव्रवेदनम् ।
बद्धविट्-मारुतं स्नेहैरादितः समुपाचरेत् ॥
भोजनाभ्यञ्जनैः पानैर्निरूहैः सानुवासनैः ।
स्निग्धस्य भिषजा स्वेदः कर्त्तव्यो गुल्मशान्तये ॥
स्रोतसां मार्दवं कृत्वा जित्वा मारुतमुल्बणम् ।
भित्त्वा विबन्धं स्निग्धस्य स्वेदो गुल्ममपोहति ॥
स्नेहपानं मतं गुल्मे विशेषेणोर्द्धनाभिजे ॥
हबुषाद्यं घृतम् ।
हबुषा योष पृथ्वीका चव्यचित्रकसैन्धवः ।
साजाजीपिप्पलीमूलैर्दीप्यकैर्विपचेद्घृतम् ॥
मातुलुङ्गदधिक्षीर-कोलमूलकदाडिमैः ।
रसेस्वद्यातगुल्मघ्नं शूलानाहविमोचनम् ॥
योन्यर्शोग्रहणीदोषश्वासकासारुचिज्वरान् ।
वस्तिहृत्पार्श्वशूलञ्च घृतमेतदपोहति ॥"
इति हबुषाद्यं घृतम् ॥ * ॥
"तैलं प्रसन्ना गोमूत्रमारनालं यवाग्रजः ।
गुल्मजठरमानाहं पीतमेकत्र साधयेत् ॥"
इति तैलपञ्चकम् ॥ * ॥
"यथोक्तैः कोपनैर्दोषाः कुपिताः कोष्ठमागताः ।
जनयन्ति नृणां गुल्मं स पञ्चविध उच्यते ॥
पञ्च गुल्माश्रया नृणां पार्श्वहृन्नाभिवस्तयः ।
कुपितानिलमूलत्वाद्गूढमूलोदयादपि ॥
गुल्मवद्वा विशालत्वाद् गुल्म इत्यभिधीयते ।
स यस्मादात्मनिचयं गच्छत्यप्सिव बुद्बुदः ॥
अन्तः सरति यस्माच्च न पाकमुपयात्यतः ।
सदनं मन्दता वह्नेराटोपोऽन्त्रविकूजनम् ॥
विण्मूत्रानिलसङ्गश्च सौहित्यासहता तथा ।
दोषोऽन्ने वायुरूर्द्धञ्च पूर्वरूपेषु गुल्मिनाम् ॥
हृत्कुक्षिशूलं सुखवक्त्रशोषो
वायोर्निरोधो विषमाग्नितां च ।
ते ते विकाराः पवनात्मकाश्च
भवन्ति गुल्मेऽनिलसम्भवे तु ॥
खेदज्वराहारविदाहदाहा-
स्तृष्णाङ्गरागः कटुवक्त्रता च ।
पित्तस्य लिङ्गान्यखिलानि यानि
पित्तात्मके तानि भवन्ति गुल्मे ॥
स्तैमित्यमन्नेरुचिरङ्गसाद
श्छर्दिः प्रसेको मधुरास्यता च ।
कफस्य लिङ्गानि च यानि तानि
भवन्ति गुल्मे कफसम्भवे तु ॥
सर्व्वात्मकः सर्व्वविकारयुक्तः
सोऽसाध्य उक्तः क्षतजश्च वर्ज्ये ।
"न स्यन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम् ॥
तं गर्भकालातिगमे चिकित्स्य
मङ्गभवं गुल्ममुशन्ति तज्ज्ञाः ॥"
चिकित्सा यथा ॥
"वातगुल्मार्दितं स्निग्धं युक्तं स्नेहविरेचनैः ।
उपाचरेत् यथाकालं निरूहैः सानुवासनैः ॥
पित्तगुल्मार्दितं स्निग्धं काकोल्यादिघृतेन तु ।
विरिक्तं मधुरैर्योगैर्निरूहैः समुपाचरेत् ॥
श्लेष्मगुल्मार्दितं स्निग्धं पिप्पल्यादिघृतेन तु ।
तीक्ष्णैर्विरिक्तं तद्वच्चैर्निरूहैः समुपाचरेत् ॥
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः ।
पित्तवद्रक्तगुल्मिन्या नार्याः कार्यः क्रियाविधिः ॥
विशेषमपरञ्चास्याः शृणु रक्तविमोक्षणम् ।
पलाश-भस्मतोयेन सिद्धं सर्पिः प्रयोजयेत् ॥
दद्यादुत्तरवस्तिञ्च पिप्पल्यादिघृतेन तु ।
उल्लेखेद्वा भेदयेद्वा न विधिरासृग्दरोदितः ॥
आनूपौदकमज्जानो वसातैलं घृतं दधि ।
विपक्वमेकतः शूलं वातगुल्मेऽनुवासनम् ॥
जाङ्गलैकशफानान्तु वसा सर्पिश्च पैत्तिके ।
तैलं जाङ्गलमज्ञान एव गुल्मे कफोत्थिते ॥
धात्रीफलानां स्वरसे षड्ङ्गं विपचेद्घृतम् ।
शर्करा सैन्धवोपेतं तद्धितं वातगुल्मिने ॥
चित्रकव्योषसिन्मूत्थ यवाक्षारदाडिमैः ।
दीप्यकग्रन्थिकाजाजी हबुषा धान्यकैः समैः ॥
दध्नारनालवदर-मूलकक्षारसैर्घृतम् ।
तत् पिबेद्वातगुल्माग्निदौर्बल्यार्शोपशूलनुत् ॥
विड्दाडिमसिन्मूत्थ-हुतभुग्योषजीरकैः ।
हिङ्गुसौवर्चलक्षार-रुग्घृत्साम्लवेतसैः ॥
बीजपूररसोपेतं सर्पिर्दधिचतुर्गुणम् ।
साधितं दाधिकं नाम गुल्महृत् प्लीहशूलजित् ॥

रसोनखरसे सर्पिः पक्वमूलरसान्वितम् ।
सुरारनालदध्यम्ल-मूलकखरसैः सह ॥
योष-दाडिमवृक्षाम्लयवानीचयसैन्धवैः ।
हिङ्गुम्लवेतसाजाजीदीप्यकैश्च समाग्निकैः ॥
सिद्धं गुल्मग्रहण्यर्श:श्वासोन्मादक्षयज्वरान् ।
कासापस्मारमन्दाग्नि-प्लीहशूलानिलान् जयेत् ॥
व्रणमूलकपाये तु जीवनीये: पचेद्घृतम् ।
न्यग्रोधादिगणे वापि.गणे वाप्युत्पलादिके ॥
रक्तपित्तोत्थितं ब्रन्ति घृतान्येतान्यसंशयम् ।
आरग्वधादौ विपचेद्दीपनीययुतं घृतम् ॥
क्षारवर्गे पचेच्चान्यत् पचेन्मूत्रगणेऽपरम् ।
ब्रन्ति गुल्मं कफोद्भूतं घृतान्येतान्यसंशयम् ॥
यथा दोषोच्छ्रयश्चापि चिकित्सेत् सान्निपातिकम् ।
चूर्णं क्षिप्तादिकं वापि घृतं वा क्षीरभोजनम् ॥
पिबेद्गुल्मापहं काले सर्पिस्तैलकमेव वा ।
तिलेक्षुरकपालाग्न्यसार्जक्षार-यवनालजम् ॥
भस्म मूलकजक्षारमपि गोजाविखरहस्तिनाम् ।
मूत्रेण महिषीणाञ्च पालिकेनावचूर्णितैः ॥
कुष्ठ-सैन्धवयष्ट्याह्व-नागरक्रिमिघातिभिः ।
साजमोदैश्च दग्धैश्च सासुद्राब्ध पलैर्युतम् ॥
अयःपात्रेऽग्निनाक्लेन पक्वा क्षेम्यमथोद्धरेत् ।
तस्य मात्रां पिबेद्भक्त्या सुरया सर्पिषापि वा ॥
धान्याम्लेनोष्णतोयेन कौलत्थेन रसेन वा ।
गुल्मं वातविकारांश्च चारोऽयं हन्त्यसंशयम् ॥"
"पीतं सुखाम्बुना वापि खर्जिका कुष्ठसैन्धवम् ।
वृक्षाम्लसुरभूकच्च वर्षाभूष्टहृतौद्वयम् ।
चित्रकच्च जलद्रोणे पक्वा मादावशेषितम् ॥
मागधी चित्रकक्षौद्रसर्पिर्युक्तं निषापयेत् ।
मधुनः प्रस्थमावाप्य पथ्याचूर्णार्द्धसंयुतम् ॥
तुषोदकं दशाहन्तु जीर्णभक्तः पिबन्नरः ।
अरिष्टोऽयं जयेद्गुल्ममविपाकमरोचकम् ॥
सप्तरात्रे सोन्नतस्यन्दे दाहपाकरुगन्विते ।
गुल्मे रक्तं जलौकोभिः शिरामोक्षेण वा हरेत् ॥
सुस्नेह्या जाङ्गलरसाः सुस्निग्धा यक्तसैन्धवाः ।
कटुत्रिकसमायुक्ता हिताः पाने च गुल्मिनाम् ॥
पेया वातहरैः सिद्धाः कौलत्थाः संस्कृता रसाः ।
खलाः सपञ्चमूलाश्च गुल्मिनां भोजने हिताः ॥
बहुवर्चोऽनिलानान्तु सार्द्रकं क्षीरमिष्यते ।
कुम्भीपिण्डेस्वकाखेदान् कारयेत् कुशलो भिषक् ॥
गुल्मिनः सर्पिषोक्ता दुर्विरेचयतमा भृशम् ।
अतस्तेषांस्तु सुस्निग्धान् स्वेदनेनोपपादयेत् ॥
विरेचनाभ्यञ्जनानि तथा सन्दहनानि च ।
उपनाहाश्च कर्तव्याः सुखोष्णाः वातलादयः ।
उदरोक्तानि सर्पींषि चूर्णवर्त्तिक्रियास्तथा ॥
लवणानि च योज्यानि यान्युक्तान्युदरामये ।
वातवर्चोनिरोधे तु सासुद्रार्द्रकसर्षपैः ॥
ज्ञात्वा पायौ विधातव्या वर्तयो मरिचोत्तराः ।
दग्धी चित्रकमूलेषु तथा वातहरेषु च ॥
कुर्यादरिष्टान् सर्वांश्च स्वस्थाने यथेरितान् ।
खादेद्वाप्युषणान् भक्षान् पूतिकदृषदश्चजान् ॥
जङ्गलैर्वातमृगैश्च गुल्मिनं न विरूक्षयेत् ।

पिबेच्चित्रकमागरं वा सगुडां वा हरीतकीम् ॥
गुग्गुलुं चित्रतां दन्तीं द्रवन्तीं सैन्धवं वचाम् ।
मूत्रमद्य-पयोद्राक्षा-रसैर्वीक्ष्य बलाबलम् ॥
एवं पीलूनि पिण्डानि पिबेत् सलवणानि तु ।
पिप्पलीपिप्पलीमूलचव्यचित्रकसैन्धवैः ॥
युक्ता हन्ति सुरागुल्मं प्लीहं काले प्रयोजिता ।
बहुविण्मारुतो गुल्मी सक्षीत पयसा यवान् ॥
कुल्माषान् वा बहुक्षीरान् भक्षयेत्तत्त्वयोत्तरान् ॥"
इत्युत्तरतन्त्रे द्वाचत्वारिंशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥) सेनासंख्याविशेषः । (यथा, महाभारते । १।२।१६-२० ।
"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिन्तु त्रिगुणामेनामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥")
अस्यार्थविवृतिर्यथा,—
अत्र गजा नव, रथा नव, अश्वाः सप्तविंशतिः, पदातयः पञ्चचत्वारिंशत्, समुदायेन नवतिः ॥
क्षीरा । अप्रकाशश्चः । तत्पर्य्यायः । क्षत्रः२। इत्यमरः । २ । ४ । ६ ॥ "अविद्यमानप्रकाशस्तृप्रकाशो वा बहुपत्रवान् मञ्जरीभिरुटीनलः कमलवंशवीरणादिः मूलादारभ्य पूर्व्वभागः प्रकाशः।" इति भरतः ॥ (यथा, मनुः । १।४८।
"गुच्छगुल्मञ्च विविधं तथैव तृणजातयः ।"
"यत्र लतासमूहा भवन्ति न च प्रकाशानि ते गुच्छा मल्लिकादयः, गुल्मा एकमूलाः सङ्घातजाताः ।" इति टीकायान्तु कुल्लूकभट्टः ॥) वृक्षभेदः । सैन्यरचनम् । इति मेदिनी । मे । ११ ॥ (रचितपुरुषसमूहः । यथा, मनुः । ७ । ११४ ।
"द्वयोस्त्रयाणां पक्षाणां मध्ये गुल्ममधिष्ठितम् ।"
गुल्मं रचितपुरुषसमूहमित्यत्र टीकायां कुल्लूकभट्टः ॥ सैन्यैकदेशः । यथा, तत्रैव । ७ । १९० ।
"गुल्मांश्च स्थापयेदन्यान् कृतसंज्ञान् समन्ततः ।"
गुल्मान् सैन्यैकदेशानिति टीकायान्तु कुल्लूकभट्टः ॥)

गुल्मकेतुः, पुं, (गुल्मानां केतुर्ध्वज इव । गुल्मः केतुर्यस्येति वा । अत्र तु केतुर्लिङ्गं ज्ञापनमित्यर्थः ।) अम्बष्ठवैद्यः । इति राजनिर्घण्टः ॥

गुल्ममूलं, क्ली, (गुल्मवन्मूलमस्य ।) आर्द्रकम् । इति राजनिर्घण्टः ॥

गुल्मवल्ली, स्त्री, (गुल्माढ्या वल्ली यस्याः ।) सोमलता । इति राजनिर्घण्टः ॥ (सोमलताशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

गुल्मशूलः, पुं, (गुल्माख्यं गुल्ममूलकं वा शूलमत्र ।) रोगविशेषः । तच्चौषधं यथा,—
"नारी पुष्पदिने पीत्वा गोक्षीरेणोपवासतः ।
श्वेतार्कस्य तु वै मूलं तस्यास्तद्गुल्मशूलनुत् ॥"
इति गारुडे १६३ अध्यायः ॥

गुल्मिनी, स्त्री, (गुल्मोऽस्यस्या इति । "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः । ततः ङीप् ।) विस्तृता लता । तत्पर्य्यायः । वीरुत् २ उलुपः ३ । इत्यमरः । २ । ४ । ६ ॥ वीरुधा ४ अवरुत् ५ । इति शब्दरत्नावली ॥

गुल्मी, स्त्री, (गुल्माकारो विद्यतेऽस्या इति । "अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ततो ङीप् ।) आमलकी । एला । वनी । वल्लरेयम् । इति मेदिनीशब्दरत्नावल्यौ हेमचन्द्रश्च ॥ शब्दनखीवृक्षः । इति शब्दचन्द्रिका ॥ गुड़काँओली इति भाषा ॥ (गुल्माः गुल्मनामको रोगोऽस्यस्य इति । गुल्म + इनिः ।) गुल्मरोगयुक्ते त्रि ॥ (यथा, अत्रैव घृतपनसशब्दगुणव्याख्याने भावप्रकाशः ।
"विशेषात् पनसं वर्च्चो गुल्मिभिर्मन्दवह्निभिः ॥")

गुल्यः, पुं, (गुड़मिव माधुर्य्यमर्हतीति । गुड़ + यत् । ततो ङस्य लत्वम् ।) मधुरः । खाड़ः । इति हेमचन्द्रः । ६ । २४ ॥

गुवाकः, पुं, (गुवति मलवत् क्वाथसुतृड्जनतीति । गु + "पिणाकादयश्च ।" उणा । ४ । १५ । इति आकः । तुदादित्वाद्गुणाभावः । निपातनात् दीर्घोऽपि दृश्यते ।) वृक्षविशेषः । गुवा सुपारि इति च भाषा ॥ तत्पर्य्यायः । घोण्टा २ पूगः ३ क्रमुकः ४ खपुरः ५ । इत्यमरः । २।४।१३६ ॥ गूवाकः ६ । इति तट्टीका ॥ पूगवृक्षः ७ दीर्घपादपः ८ वल्कतरुः ९ दृढ़वल्कः १० चिक्कणः ११ । इति राजनिर्घण्टः ॥ पूगी १२ । इति भावप्रकाशः ॥ सुरञ्जनः १३ गोपदलः १४ राजतालः १५ छटाफलः १६ । इति चिकाख्यौषधेः ॥* अस्य फलस्य पर्य्यायः । क्रमुकफलम् १ पूगम् २ चिक्कयी ३ चिक्का ४ चिक्कणम् ५ द्रव्यकम् ६ उद्देगम् ७ पूगफलम् ८ । इति राजनिर्घण्टः ॥ पूगीफलम् ९ । इति भावप्रकाशः ॥* अस्य मस्तिष्कस्य गुणाः । स्वादुत्वम् । तिक्तत्वम् । कषायत्वम् । बलप्रदत्वमुष्णवीर्य्यत्वम् । मूत्ररोगनाशित्वञ्च । इति राजवल्लभः ॥ * ॥ अस्य निर्य्यासस्य गुणाः । हिमत्वम् । मोहनत्वम् । गुरुत्वम् । विपाके रूक्षत्वम् । चारत्वम् । बाल्यत्वम् । वातघ्नत्वम् । पित्तलत्वञ्च ॥* अस्य फलगुणाः सम्मोहकारित्वम् । कषायत्वम् । स्वादुत्वम् । रेचनत्वम् । त्रिदोषघ्नमग्नित्वम् । रूक्षत्वम् । वल्लदोषमलापहत्वञ्च । इति राजनिघण्टः ॥ गुरुत्वम् । रूक्षत्वम् । कफपित्तकारित्वम् । दीपनत्वञ्च ॥ * । आर्द्रस्य तस्य गुणाः । गुरुत्वम् । अभिष्यन्दित्वम् । अग्निदीप्तिरत्वञ्च ॥ * ॥ स्निग्धस्य तस्य गुणः । दोषत्रयश्लेष्मित्वम् । दृढ़मध्यं तदुत्तमम् । इति भावप्रकाशः ॥* आमपूगस्य गुणाः । कषायत्वम् । सुखमलरक्तामश्लेष्मपित्तोदराध्मानजनाग्नित्वम् । कण्ठशुद्धिकारित्वम् । वारकत्वञ्च ॥ * ॥ शुष्कस्य तस्य गुणाः । कण्ठामयघ्नत्वम् । रुचिकरत्वम् । पाचनत्वम् । रेचनत्वञ्च ॥* । तत् ताम्बूलेनोनमयुतञ्च चेत् झटिति पाण्डुवातशोथकारित्वञ्च । इति राजनिर्घण्टः ॥* ॥ तत्पीलुगुणाः । तस्यादिपीलुं विषतुल्यम् । द्वितीयपीलुं भेदकं दुर्जरञ्च । तृतीयपीलुं पानोपयुक्तं सुधातुल्यं रसायनञ्च । इति राजवल्लभः ॥ (ताम्बूलेन विना केवलं गुवाकभक्षणाधाऽऽ-

लत्वावाप्तिस्तन्मोचनार्थं गङ्गादर्शनरूपप्रायश्चित्तमप्युक्तम्। यथा,—
"ताम्बूलं न मुखे दत्त्वा गुवाकं भक्षयेद् यदि।
तावच्चाण्डालतां याति यावद् गङ्गानदर्शनम्॥")

गुह, ऊ च संवृतौ। इति कविकल्पद्रुमः॥ (भ्वां-उभ-सक-वेट्।) इस्वी। ऊ, अगूहीत् अघुक्षत्। ञ, गूहति गूहते। गुहो गोरूरिति दीर्घः। इति दुर्गादासः॥

गुहः, पुं, (गूहति रक्षति पालयतीत्यर्थः देवसेनाम्। गुह+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः। नामनिरुक्तौ तु गुहा आवासत्वेनास्त्यस्येति अच्। एतयोर्युत्पत्तिद्वययोरेव क्रमान्वयेनोदाहरणे द्रष्टव्ये। यथा, महाभारते। ३। २२८ अध्याये।
"स्कन्दस्तु ततः प्रादुर्गुहं गुरुवतामरम्।"
इत्युपक्रम्य।
"अथैनमभ्ययुः सर्वा देवसेनासहस्रशः।
अस्माकं त्वं पतिरिति ब्रुवाणाः सर्वतो दिशः॥"
इत्यन्तेन महात्मा कार्त्तिकेयः सेनापत्यार्थं देवैः प्रार्थितः। ततो नामनिरुक्तिः। यथा, महाभारते। १३। ८५। ८०—८३।
"दिव्यं शरवणं प्राप्य वर्द्धितोऽद्भुतदर्शनः।
दृष्ट्वा कृत्तिकास्तन्तु बालार्कसदृशद्युतिम्॥
स्कन्नत्वात् स्कन्दनाच्चापि गुहावासाद्गुहोऽभवत्॥")
कार्त्तिकेयः। इत्यमरः। १। १। ४२॥ घोटकः। इति शब्दरत्नावली॥ श्रीरामसखः। स तु शृङ्गवेरपुरवासी निषादाधिपतिः। (यथा, रामायणे। २। ५०। ३३।
"तत्र राजा गुहो नाम रामस्यात्मसमः सखा।
निषादजात्यो बलवान् स्थपतिश्चेति विश्रुतः॥"
गूहते संवृणोति स्वरूपादीनि मायया इति। गुह+कः।) विष्णुः। (यथा, महाभारते। १३। १४६। ५४।
"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः॥"
महादेवः। यथा, महाभारते। १३।१७।६०।
"बालरूपो गुहावासी गुहो माली तरङ्गवित्॥")
कायस्थानां पङ्क्तिविशेषः॥ (यथा, कायस्थकुलदीपिकायाम्।
"अथ गुहकुलोद्भवो दशरथाभिधानो महान् कुलाम्बुजमधुव्रतो विविधपुण्यपुञ्जान्वितः॥")

गुहषष्ठी, स्त्री, (गुहस्य कार्त्तिकेयस्य प्रिया या षष्ठी तस्य जन्मतिथित्वात्तथात्वम्।) मार्गशीर्षमासीयशुक्लषष्ठी। यथा, भविष्ये।
"येयं मार्गशिरे मासि षष्ठी भरतसत्तम!।
पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया॥"
शुक्लेयं गुहषष्ठी। इति तिथ्यादितत्त्वम्॥

गुहा, स्त्री (गुह्+कः टाप् च।) सिंहपुच्छीलता। गर्त्तः। पर्व्वतादेर्गह्वरम्। इति मेदिनी। हे। ४। (यथा, रामायणे। १। १। ७०।
"किष्किन्धां रामसुग्रीवौ जग्मतुस्तौ गुहां तदा॥")
शैवस्य पर्य्यायः। विलम् २ शिलासन्धिः ३ देवखातम् ४ गह्वरम् ५। शालपर्णीवृक्षः ६। इति राजनिर्घण्टः॥ (हृदयम्। यथा, शतपथब्राह्मणे। ११। २। ६। ५।
"तस्मादिदं गुहाहृदयम्॥" गूढ़ा ज्ञाटज्ञानज्ञेयपदार्थाः अस्यां गूहतेऽस्यामात्मा इति वा। गुह+भिदादित्वादधिकरणे अङ् टाप् च। बुद्धिः। यथा, श्वेताश्वतरोपनिषदि।
"अणोरणीयान् महतो महीयान्
आत्मा गुहायां निहितोऽस्य जन्तोः॥")

गुहाशयः, पुं, (गुहासु गिरिगह्वरादिषु शेते अवतिष्ठते इति। शीङ् ल शयने+"अधिकरणे शेतेः।" ३। २। १५। इति अच्।) व्याघ्रः। इति राजनिर्घण्टः॥ (गुहाशायित्वादेवास्य तथात्वम्। यथा, भावप्रकाशे।
"सिंहव्याघ्रर्क्षका ऋक्षतरक्षुद्विपिनस्तथा।
बभ्रुजम्बुकमार्ज्जारा इत्याद्याः स्युर्गुहाशयाः॥"
गुहायां हृदये बुद्धौ वा शेते विराजते इत्यर्थः।) विष्णुः। (यथा, श्वेताश्वतरोपनिषदि। "सर्व्वभूतगुहाशयः।" यथा च। [शयः।
"तावत् स भगवान् साक्षात् योगाधीशो गुहाऽन्तर्दधे ऋषेः सद्यो यथेहानीशनिर्म्मिता॥"
इति श्रीभागवतम्॥
(प्राणाः। यथा, सुश्रुतोपनिषदि। २। १। ८।
"सप्त इमे लोका येषु चरन्ति प्राणा
गुहाशया निहिताः सप्त सप्त।"
गुहाशायिनि त्रि॥)

गुहिनं, क्ली, (गूहते इत्यादिभिराच्छन्नं भवतीति। गूहतेऽस्मिन्निति वा। गुह+बाहुलकात् इनन्।) वनम्। इति शब्दरत्नावली॥

गुहिलं, क्ली, (गूहते पादपादिभिराच्छन्नं भवतीति। गुह+"गुहादिभ्यः कित्।" उणा। १। ५६। इति इलच्। गुणनिषेधार्थं किच्च।) वनम्। इत्युणादिकोषः॥

गुहेरः, पुं, (गूहते लौहादेर्मलादिकं विलोपयन् खड्गाद्यस्त्रेणापादयतीति। धातूनामनेकार्थत्वात्तथात्वमित्यवधेयम्। गुह+"मूलेरादयः।" उणा। १। ६१। इति निपातनादेरक्प्रत्ययः।) लौहकारः। इत्युणादिकोषः॥ (गूहते रक्षतीति।) गोप्ता। इति संक्षिप्तसारे उणादिवृत्तिः॥

गुह्यं, क्ली, (गुहां गोपनं अर्हति वस्त्राद्यभ्यन्तरस्थानं लब्धुमर्हतीति यावत्। गुहा+"तदर्हति।" ५। १। ६३। इति यत्। गुह+कर्म्मणि व्यधिकरणे।) उपस्थः। स तु भगं लिङ्गञ्च। (भगार्थे यदुक्तम्।
"कामार्त्तः पुरुषो स्त्रञ्च पुंश्चयेद् गुह्यमादृतः॥")
रहस्ये त्रि। इत्यमरः। ३। ३। १५३॥ गोप्यम्। तत्पर्य्यायः। विविक्तः २ विजनः ३ छन्नः ४ निःशलाकः ५ रहः ६ उपांशु ७ गूढ़म् ८ उपकरम् ९। इति जटाधरः॥ (यथा, भगवद्गीतायाम्। ९। २।
"राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्॥"
तथा च, देवीभागवते। १। ३। ३७।
"पुराणगुह्यं सकलं समेतं
गुरोः प्रसादात् करुणानिधेश्च॥")

गुह्यः, पुं, (गुहां सरस्यादेर्गर्त्तमर्हतीति। गुहा+"दन्तादिभ्यो यत्।" ५। १। ६६। इति यत्।) कमठः। दम्भः। इति मेदिनी॥ ये। १६॥ (गूहितुमर्हति योग्यो भवति उपनिषद् वेदत्वात् यद्वा गुहायां बुद्धौ हृदयाकाशे वस्तुमर्हति ध्यानायार्हतीति यावत्।) विष्णुः। इति तस्य सहस्रनाममध्ये पठितः॥ (यथा, महाभारते। १३। १४६। ७१।
"गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः॥"
महादेवः। यथा, महाभारते। १३। १७। ६१।
"यजुः पादभुजो गुह्यः प्रकाशो जङ्घमस्तथा॥"
गुह्यानि गूहति गुणान् प्रकटीकरोतीति। गुणशालिप्रभावान्वितजीवविशेषः। यथा, ऋग्वेदे। ७। १०३। ८।
"अध्वर्यवो घर्म्मिणः सिष्विदाना
आविर्भवन्ति गुह्या न केचित्॥"
उपदेवताविशेषः। यथा, महाभारते। ६। ३। ४३।
"गुह्याः पिशाचगणाः सप्त ये दिवा ये च मानुषाः॥"
स्त्रियां टाप्। गायत्रीस्वरूपा देवी। यथा, देवीभागवते। १२। ६। ४२।
"गुर्व्वी गुरुवती गुह्या गोप्त्री गुरुदायिनी॥"
गोपनीये त्रि। यथा, मनुः। ११। २६५।
"सगुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित्॥"
"प्रणवाख्यो गुह्यो गोपनीयः।" इति कुल्लूकभट्टः॥)

गुह्यकः, पुं, (गूहति निधिं धनविशेषं रक्षतीति। गुह्+ण्वुल्। एषोदरादित्वादृगागमे साधुः।) देवयोनिविशेषः। स तु कुबेरानुचरः निधिरक्षको माणिभद्रादियक्षभेदः। इत्यमरभरतौ॥ (कार्य्योत्पत्त्यादिभिर्देवैर्न तु बहुधोदाहियते तथाच याज्ञिनोक्तम्।
"निधिं रक्षन्ति ये यक्षास्ते स्युर्गुह्यकसंज्ञकाः॥"
गुह्यं कुत्सितं कायति शब्दायते प्रकाशयति वा। कै+कः। यद्वा गुह्यं गोप्यं कं सुखं यस्य। "शंसिदुहिगुहिभ्योवेति" काप्रिकोक्तेः अप् वा। यद्वा गुह्यात् रहिं चिकीर्षोः परब्रह्मणः सकाशात् गुह्यदेशात् कायति आविर्भवतीति। यदुक्तं ब्रह्मवैवर्त्ते ब्रह्मखण्डे। ५। ६०।
"आविर्बभूव तस्यास्य गुह्यदेशात्ततः परम्।
पिङ्गलश्च पुमानेकः पिङ्गलैश्च गणैः सह।
आविर्भूता यतो गुह्यात् तेन ते गुह्यकाः स्मृताः॥"
यथा, महाभारते। ३।३।१०।
"तत्र दिव्यं रथं यान्तमद्भुतान्ति वरार्थिनः।
सिद्धचारणगन्धर्व्वा यक्षगुह्यकपन्नगाः॥")
तस्य लोकः पिशाचलोकादूर्द्धं गन्धर्व्वलोकादधः। येन येन कर्म्मणा एतल्लोकप्राप्तिरुच्यते।
"ततो गन्धर्व्वदर्शार्थं हृष्टपुष्टजनैर्वृतम्।
पिण्डिकिलैः खूलवर्क्कैर्मेघगम्भीरनिस्वनैः॥

लोकैरध्युषितं लोकं श्यामलाङ्गैश्च लोमशैः ।
गणौ कथयतं कैऽमी को लोकः पुण्यतः क्षतः ॥
गणावूचतुः ।
गुह्यकानामयं लोकस्तत्रैते वै गुह्यकाः स्मृताः ।
न्यायेनोपार्ज्य वित्तानि गूहयन्ति च ये सुधि ॥
स्वमार्गगा धनाढ्याश्च शूद्रप्राया: कुटुम्बिनः ।
संविभज्य च भोक्तारः क्रोधास्यावर्ज्जिताः ॥
न तिथिं नैव वारञ्च संक्रान्त्यादि न पर्व्व च ।
नाधर्म्मञ्च न धर्म्मञ्च विदन्त्येते सदासुखाः ॥
एकमेव हि जानन्ति कुलपूज्यो हि यो द्विजः ।
तस्मै गाः संप्रयच्छन्ति मन्यन्ते तद्वचः स्फुटम् ॥
सप्तद्विभागो ह्यत्रापि तेन पुण्येन गुह्यकाः ।
भुञ्जते स्वर्गसौख्यानि देवत्वमकुतोभयाः ॥"
इति काशीखण्डे शिवशर्म्मणो वैकुण्ठलोकगमने विष्णुगणसंवादः ॥ (पक्वान्नविशेषः । तस्य पाकप्रकारो यथा, शब्दार्थचिन्तामणिधृतपाकशास्त्रे ।
"समितां सर्पिषा भृष्टां सितादाड्यादिसम्भृताम् ।
एलां लवङ्गकर्पूरमरीचपरिवासिताम् ॥
त्रिभागान्वसमितालम्बपुटे वेष्टां हृते पचेत् ।
ततः खण्डे न्यसेत् पक्वे गुह्यकोऽवसदाहृतः ॥"
अस्य गुणास्तत्रैव । यथा,—
"गुह्यको दृंहणो हृद्यो वृष्यः पित्तानिलापहः ।
मधुरोऽतिगुरुः पाके किञ्चित् सन्धानकृत् सरः ॥")

गुह्यकेश्वरः, पुं. (गुह्यकानामीश्वरः प्रभुरधिपतिरित्यर्थः ।) कुबेरः । इत्यमरः । १ । १ । ७१ ॥ (यथा, ब्रह्मवैवर्ते ब्रह्मखण्डे । ५ । ६१ ।
"यः पुमान् स कुबेरश्च धनेशो गुह्यकेश्वरः ॥")

गुह्यगुरुः, पुं. (गुह्यः गोप्यः हृदयाभ्यन्तर्वर्त्ती अन्तर्यामिस्वरूपो गुरुः ।) शिवः । इति त्रिकाण्डशेषः ॥

गुह्यदीपकः, पुं, (गुह्येन गुह्यस्थज्योतिषा दीपयति प्रकाशयतीति । स्वयं गुह्यः सन् दीपयतीत्वेके । दीप् + ण्वुल् ।) खद्योतः । इति शब्दचन्द्रिका ॥

गुह्यनिष्यन्दः, पुं, (गुह्यात् गुह्यदेशात् उपस्थछिद्रादित्यर्थः निष्यन्दते निर्गच्छति इति ।) सूत्रम् । इति राजनिर्घण्टः ॥

गुह्यपुष्पः, पुं, (गुह्यानि अदृश्यानि पुष्पाणि अस्य इति ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥

गुह्यबीजः, पुं, (गुह्यमदृश्यं बीजमस्य ।) भूतलम् । इति राजनिर्घण्टः ॥

गुह्यभाषितं, क्ली. (गुह्यं रहस्यं भाषितम् ।) मन्त्रः । इति जटाधरः ॥ गुप्तभाषणञ्च ॥

गू, ओ शि विट्त्यजौ । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-अनिट् ।) ओ, गूनः । शि, गुवति अगुवीत् । विट्त्यजनिर्देशनम् । इति दुर्गादासः ॥

गूः, पुं, गुः । विष्ठा । गूधातोः कर्म्मणि क्विप्प्रत्ययेन निष्पन्नः ॥ (गच्छत्यपानेन देहात् । गम् + कूः । मलोप इत्येके ॥)

गूढं, क्ली, (गुह + भावे क्तः ।) रहः । गुह्यम् । इति मेदिनी । ढे । १ ॥

गूढः, त्रि, (गुह + कर्म्मणि क्तः ।) संवृतः । गुप्तः । इत्यमरमेदिनीकरौ ॥ (यथा, पञ्चदश्याम् । १ । ३८ ।
"शक्तिरस्येश्वरी काचित् सर्व्ववस्तुनियामिका ।
आनन्दमयमारभ्य गूढा सर्व्वेषु वस्तुषु ॥")

गूढजः, पुं, (गूढात् गुप्तभावादिहेतोः गूढे गुप्तस्थाने वा जायते इति । गूढः सन् जायते इत्येके । गूढ + जन् + डः ।) गूढोत्पन्नपुत्रः । इति मिताक्षरा ॥ (यथा, याज्ञवल्क्यः । २ । १३२ ।
"गूढे प्रच्छन्न उत्पन्नो गूढजस्तु सुतो मतः ।
कानीनः कन्यकाजातो मातामहसुतो मतः ॥")

गूढनीड़ः, पुं, (गूढः गोपनस्थलस्थः गूढे गुप्तस्थाने वा नीड़ः कुलायोऽस्य ।) खञ्जनपक्षी । इति शब्दमाला ॥

गूढपत्रः, पुं, (गूढः समाच्छन्नः पत्त्रेण योऽसौ । गूढं पत्त्रमस्येति केचित् ।) करीरवृक्षः । अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥

गूढपथः, पुं, (गूढः पन्था गतिर्यस्य समासनिष्पन्नत्वाच्च ।) अन्तःकरणम् । इति हेमचन्द्रः । ६ । ५ ॥ गुप्तपथश्च ॥

गूढपात्, [द्] पुं, (गूढं पादयति । पद गतौ + णिजन्तात् क्विप् । यद्वा गूढाः पादा अस्य पृषोदरादित्वादलोपे साधुः ।) सर्पः । इत्यमरः । १ । ८ । ७ ॥

गूढपादः, पुं, (गूढाः संवृताः पादा अस्य ।) सर्पः । इति शब्दरत्नावली ॥
("पादानामपि विज्ञेये दे घृते द्वे च विंशती ।"
इत्यागमः ।
आच्छादितपादे त्रि । यथा, महाभारते ।
"सन्तोषाच्चतलभस्य विश्वैश्वर्य्यं करस्थितम् ।
उपानद्गूढपादस्य सर्व्वा चर्म्मावृतेव भूः ॥")

गूढपुरुषः, पुं (गूढः गुप्तः पुरुषः कृत्यवेष्टी राजप्रेरितो जनः इत्यर्थः ।) चरः । इत्यमरः । २ । ८ । १३ ॥

गूढपुष्पकः, पुं, (गूढः समावृत इव पुष्पैर्योऽसौ इवार्थे कन् । गूढानि संवृतानि पुष्पाण्यस्य इत्येके ।) वञ्जुलवृक्षः । इति राजनिर्घण्टः ॥

गूढफलः, पुं, (गूढः संवृतप्रायः फलेनासौ । गूढं यथा स्यात् तथा फलतीत्वेके ।) वदरः । इति राजनिर्घण्टः ॥

गूढमार्गः, पुं, (गूढः प्रच्छन्नः मार्गः ।) सुवोऽन्तरमार्गः । सुड़ङ्ग इति भाषा ॥ तत्पर्य्यायः । सुरङ्गा २ सन्धिला ३ । इति हेमचन्द्रः । ४ । ५१ ॥

गूढमैथुनः, पुं, (गूढं अन्यैरदृश्यं मैथुनं यस्य ।) काकः । इति त्रिकाण्डशेषः ॥

गूढवर्च्चाः, [स्] पुं, (गूढं वर्च्चोऽस्य ।) भेकः । इति त्रिकाण्डशेषः ॥

गूढवल्लिका, स्त्री, (गूढा वल्लिका वल्ली यस्य ।) अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥

गूढसाक्षी, [न्] त्रि, (गूढः प्रच्छन्नः सन् यः अर्थिना प्रत्यर्थिवाक्यं श्रावितः ताद्दृशः साक्षी ।) योऽर्थिना गूढतया प्रत्यर्थिवचनं श्रावितः सः । फरियादी गोपने राखिया आसामीर कथा याहार्के शुनाइयाछे सेइ साक्षी इति भाषा ॥

तथा च नारदः ।
"अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् ।
यः श्रावयते तदा गूढो गूढसाक्षी स उच्यते ॥"
इति व्यवहारतत्त्वम् ॥

गूढाङ्गः, पुं, (गूढानि अङ्गानि यस्य इच्छामात्रेणैवाङ्गानि अन्तःप्रवेशयति इति तात्पर्य्यार्थः ।) कच्छपः । इति राजनिर्घण्टः ॥

गूढाङ्घ्रिः, पुं, (गूढः संवृतः गुल्फेनाहृतोऽङ्घ्रिश्चरणोऽस्य ।) सर्पः । इति राजनिर्घण्टः ॥

गूढोत्पन्नः, पुं, (गूढं अन्येरविज्ञातं यथा स्यात् तथा उत्पन्नो जातः ।) द्वादशविधपुत्रमध्ये पुत्रविशेषः । यथा, मनुः । ६ । १७० ।
"उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥"
अस्यार्थः । "यस्य गृहेऽवस्थितायां भार्य्यायां पुत्र उत्पद्यते सजातीयोऽयं भवतीति ज्ञानेऽपि कस्मात् पुरुषविशेषाज्जातोऽसाविति न ज्ञायते स गृहे अप्रकाशसुतोत्पन्नस्तस्य पुत्रः स्यात् यदीयायां भार्य्यायां जातः ।" इति कुल्लूकभट्टः ॥ (अयं हि वस्तुदायहारी । यथाह मनुः । ६ । १५६ ।
"औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥")

गूथं, क्ली पुं, (गवते शब्दायते गुवति पुरीषमुत्सृजतीति वा । गुङ शब्दे गुधि विष्ठोत्सर्गे वा + "तिथपृष्ठ गूथ यूथ प्रोथाः ।" उणां । २ । १२ । इति थक् दीर्घश्च ।) विष्ठा । इत्यमरः । २ । ६ । ६८ ॥ गु इति भाषा । (शूरीरादिमलेऽपि कर्णगूथादिशब्ददर्शनात् ॥)

गूथलक्तः, पुं, (गूथे विष्ठायां रक्तः अनुरक्त आसक्त इत्यर्थः । ततो रस्य लत्वम् ।) पक्षिविशेषः । गुये शालिक इति भाषा । तत्पर्य्यायः । शूरसक्तः २ क्षुद्रचूडः ३ शालिकः ४ । इति शब्दचन्द्रिका ॥

गूनः, त्रि, (गूयते पुरीषमुत्सृज्यते स्म इति । गु शि विष्ठोत्सर्गे + क्तः । "दृग्वोदीर्घश्चेति ।" नत्वं दीर्घश्च ।) कृतपुरीषोत्सर्गः । तत्पर्य्यायः । हृनः २ । इत्यमरः । ३ । १ । ६६ ॥

गूर, ड क उद्यमे । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं सेट् ।) दीर्घौ । ड कौ, भस्मेषु नौ गूरयते महोरगः । इति दुर्गादासः ॥ (तथा च कविरहस्ये । ५१ ।
"भस्मेषु नोद्गूरयतेऽक्षमोहवे-
ऽयुक्तोऽपि यो नोद्गुरते स्वधर्म्मवित् ॥")

गूर, ई य ड वधे । गल्याम् । इति कविकल्पद्रुमः । (दिवां-आत्मं-सकं-सेट् ।) दीर्घौ । तथा च ।
"दीपिपूरिजनिगरिधूरयः
काशिवाशिपदिशूरितूरयः ।
घूरिजूरिखिदिविद्यतिः क्षिशि-
खूरिरुध्यतिमनो दिवादिषु ॥
इति रथोद्धतायां चक्रेश्वरः ।" इति दुर्गादासः ॥

गूरणं, क्ली, (गूर क ड उद्यमे + भावे ल्युट् ।) उद्यमः । इत्यमरटीकायां रायमुकुटः । ३ । ८ । १११ ॥

गर्ह्, क निकेतने। कूर्हे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क, गर्हयति। इति दुर्गादासः॥

गर्ह्, ड कूर्हे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ड, गर्हते। इति दुर्गादासः॥

गूवाकः, पुं, (गुवति पुरीषसृत्सृजत्यनेन यद्वा गुवति बहुलभक्षणेन सुखविवरात् पुरीषवदुत्सृजतीति। गुप्रि. विलोत्सर्गे+"पिनाकादयश्च।" उणां। ४। १५। इति आकः। कुटादित्वाद्गुणाभावः। निपातनात् दीर्घत्वम्।) गुवाकः। इति शब्दरत्नावली॥

गूषया, स्त्री, (भूषयतीति। निपातनात् भकारस्य गत्वम्।) मयूरचन्द्रकः। मयूरपिच्छचक्रम्। इति शब्दचन्द्रिका॥

गृ, सेके। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) गरति तरं मेघः। इति दुर्गादासः॥

गृज, ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) सप्तमस्वरी गर्जति। इति दुर्गादासः॥ (यथा, पूर्ब्बचातकाष्टके। ४।

"गर्ज्जसि मेघ! न यच्छसि तोयं
चातकपक्षी याकुलितोऽहम्।
दैवादिह यदि दत्तिश्चातः
क्वं काहं क्व च जलपातः॥")

गृज, इ ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) सप्तमस्वरी। इ, गृज्जते। इति दुर्गादासः॥ (ध्वनिरिह कथनमिति मत्वा केचित् सकर्मकमपि वदन्ति॥)

गृज्जनं, क्ली, (गृज्जते अभक्ष्यत्वेन कथ्यते प्राणनाशकत्वादिति। गृजि ध्वनौ+कर्म्मणि ल्युट्।) विषदिग्धपशोर्म्मांसम्। इति मेदिनी। ने। ५८॥ (गृज्जते रोगनाशकतया भक्ष्यत्वेन कथ्यते इति।) मूलविशेषः। सलगम इति ख्यातः। तत्पर्य्यायः। शिखिमूलम् २ यवनेष्टम् ३ वर्त्तुलम् ४ ग्रन्थिमूलम् ५ शिखाकन्दम् ६ कन्दम् ७ डिम्भीरमोदकम् ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातरोगगुल्मनाशित्वम्। रुच्यत्वम्। दीपनत्वम्। हृद्यत्वम्। दुर्गन्धत्वञ्च। इति राजनिर्घण्टः॥

गृज्जनः, पुं, (गृज्जते अभक्ष्यत्वेन कथ्यते इति। गृजि+ल्युट्।) रसोनकः। रसुन इति भाषा। इति मेदिनी। ने। ५८॥ रक्तलशुनः। इति राजनिर्घण्टः॥ (अस्य अभक्ष्यीयत्वमुक्तं यथा, मनौ। ५। १९—२०।

"छत्राकं विड्वराहञ्च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृज्जनञ्चैव मत्वा जग्ध्वा पतेद्द्विजः॥
अमत्यैतानि षड्जग्ध्वा कृच्छ्रं सान्तपनञ्चरेत्।
यतिचान्द्रायणं वापि पोषेवूपवसेद्दहः॥")

गृध्नीवः, पुं, एषुशृगालः। बड़ शेयाल इति भाषा। तत्पर्य्यायः। लोपाकः २। इति हेमचन्द्रः। ४। ३५७॥ (गृध्निवोऽपि पाठः॥)

गृत्सः, पुं, (गृध्यति लिप्सत्यनेनेति। गृध् अभिकाङ्क्षायाम्+"गृधिवृधिभ्यां कित्।" उणां। ३। ६६। इति सः स च कित् इकारान्तादेशश्च।) कन्दर्पः। इत्युणादिकोषः॥ (चि, स्तुत्यः। यथा, ऋग्वेदे। ७। ८७। ५।

"गृत्सो राजा वरुणश्चक्र एतं दिविश्रेष्ठम्।"

"गृत्सः स्तुत्यः।" इति भाष्यम्॥)

गृध, इर् य उ लिप्सौ। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट् क्रावेट्।) इर्, अगृधत् अगर्धीत्। असात् पुषादित्वात् नित्यं ङ इत्यन्ये। य, गृध्यति धनं लुब्धः। उ, गर्द्धित्वा गृद्धा। इति दुर्गादासः॥

गृधुः, पुं, (गृध्यत्यनेनासादयति वा इति। गृधृ इर लिप्सायाम्+"पृभिदिव्यधिगृधिधृषिक्षिपिभ्यः।" उणां। १। २३। इति कुः।) कामदेवः। इत्युणादिकोषः॥ (गृध्यति अभिलषतीति विग्रहे वाच्यलिङ्गत्वात्।) अभिलाषुकः। इति संक्षिप्तसारे उणादिवृत्तिः॥

गृधूः, पुं, (गृध्+बाहुलकात् कूः।) वृद्धिः। अपानम्। कृत्सितम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

गृधुः, त्रि, (गृध्यति कामयते लिप्सति वा धनमिति गृधः। गृध्+असिगृधिधृषिक्षिपेः कुः।) ३। २। १४०॥ इति कुः।) लुब्धः। इत्यमरः। ३। १। २१॥ (यथा, भागवते। ३। १४। २०।

"न वयं प्रभवस्त्वामनुकर्त्तुं जगदीश्वरि!
अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृधवः॥"

क्वचित् गृध्नोऽपि पाठः॥)

गृधुता, स्त्री, (गृध्नोर्भावः इति तल्।) लुब्धता। तत्पर्य्यायः। रागः २ सङ्गः ३। इति त्रिकाण्डशेषः॥

गृध्रः, पुं, (गृध्यति अभिकाङ्क्षति मांसानीति। "सृगृधाज्यधिभ्यः क्रन्।" उणां। २। २४। इति क्रन्।) पक्षिविशेषः। गृधिनी गृध्रुनी इति च भाषा। तत्पर्य्यायः। दाक्षायः २ वज्रतुण्डः ३ दूरदर्शनः ४। इति राजनिर्घण्टः॥ (यथा, महाभारते। ६। ३। ३१।

"गृध्रः संपतते क्षीर्यं जनयन् भयमुत्तमम्॥"

इह लोके लोभवशात् यस्तु देवब्राह्मणस्वं हरति स पापात्मा परत्र गृध्रोच्छिष्टेनोपजीवति। यथाह मनुः। ११। २६।

"देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति॥")

गृध्रनखी, स्त्री, (गृध्रस्य नख इवाकारोऽस्यस्याः इति। "अर्श आदिभ्योऽच्।" ५। २। १२७। इत्यच्। ततो ङीष्।) कुलिकवृक्षः। इति रत्नमाला॥ कालियाकड़ा इति भाषा। (यथा, सुश्रुते। सूत्रस्थाने। ३८ अध्याये।

"करमर्दैचिकण्टकसैरीयकशृतावरीगृध्रनख इति कण्टकसंज्ञः॥") कोलिवृक्षः। इति त्रिकाण्डशेषः॥

गृध्रपत्रा, स्त्री, (गृध्रस्य पत्रमिव पत्रवदित्यर्थः। पत्रमस्याः। गृध्र इव धूम्रवर्णं पत्रमस्या इत्येके।) धूम्रपत्रावृक्षः। इति राजनिर्घण्टः॥

गृध्रराजः, पुं, (गृध्रः राजा इवेत्युपमितसमासः। गृध्राणां राजेति वा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) जटायुपक्षी। यथा,—

"भूयः कनकपुङ्खाग्रै रचो वाणैरजिह्मगैः।
निर्बिभेद सुतीक्ष्णाग्रैर्गृध्रराजं शिलाशितैः॥"

इति रामायणम्॥

गृध्रसी, स्त्री, (गृध्यति मांसमभिकाङ्क्षति सततं इति गृध्+क्रन्। गृध्रो मांसलोलुपो मनुष्यः तं स्यति पीडयति। नाशयति वा। सो+कः ङीष्।) वातरोगविशेषः। तल्लक्षणं यथा,—

"स्फिक्पूर्व्वोरुकटीपृष्ठजानुजङ्घापदं क्रमात्।
गृध्रसी स्तम्भरुक् तोदैर्गृह्णाति स्यन्दते मुहुः॥
वाताद्भातकफाभ्यां सा विज्ञेया द्विविधा पुनः।
वातजायां भवेत्तोदो देहस्यातीववक्रता॥
जानुजङ्घोरुसन्धीनां स्फुरणं स्तम्भता भृशम्।
वातशैत्योद्भवायान्तु गौरवं वह्निमार्द्दवम्॥
तन्द्रा सुखप्रसेकश्च भक्तद्वेषस्तथैव च॥"

गृध्रसीवातात् केवलात् स्फिगादिपर्य्यन्तं स्तम्भरुक् तोदैर्गृह्णाति। क्रमात् वृद्धिक्रमात्। तेन यथा यथा वर्द्धते तथा तथा स्फिगादीन्याक्रामति नात्र गृध्रसी निर्द्देशक्रमनियमः। तथा मुहुः स्यन्दते स्फिगादिषु शिराकर्म्म करोतीत्यर्थः॥*॥

अथ तस्याश्चिकित्सा।

"गृध्रस्यान्तु नरं सम्यक् रेकेण वमनेन वा।
ज्ञात्वा निरामं दीप्ताग्निं वस्तिभिः समुपाचरेत्॥
नादौ वस्तिविधिं कुर्य्यादायवद्धं न शुध्यति।
स्नेहो निरर्थकः स स्याद्वह्निमान्द्यं च हुतो यथा॥*॥
तैलमेरण्डजं प्रातर्गोमूत्रेण पिबेन्नरः।
मासमेकं प्रयोगोऽयं गृध्रस्यान्तु गदापहः॥ १॥

तैलं घृतं सार्द्रकमातुलुङ्ग-
रसं सचुक्रं सगुडं पिबेद्वा।
कट्वारुगृष्ठचिकमूलगुल्म-
गृध्रस्युदावर्त्तहरः प्रयोगः॥ २॥

निष्कुथैरण्डबीजानि पिष्ट्वा क्षीरे विपाचयेत्।
ततुपायसं कटीशूले गृध्रस्यां परमौषधम्॥ ३॥
एरण्डमूलं विल्वञ्च दहती कण्टकारिका।
कषायो रुचकोपेतः पीतो गृध्रवस्तिजम्॥
गृध्रसीञ्च हरेच्छूलं चिरकालानुबन्धि च॥"

रुचकं सौवर्चलम्॥ ४॥

"गोमूत्रेरण्डतैलाभ्यां क्षाराचूर्णं पिबेन्नरः।
दीर्घकालोत्थितां हन्ति गृध्रसीं कफवातजाम्॥५॥

सिंहास्यदन्तीकृतमालकानां
पिबेत् कषायं रवु-तैलमिश्रम्।
यो गृध्रसीनष्टगतिः प्रसुप्तः
स शीघ्रगः स्याद्धि किमत्र चित्रम्॥ ६॥

दृढन्निम्बतरोः सारो वारिणा परिपेषितः।
स पीतो नाशयेत् क्षिप्रमसाध्यामपि गृध्रसीम्॥७॥
शेफालिकादलैः क्वाथो गुडेनापरिपाचितः।
दुर्वारं गृध्रसीरोगं पीतमात्रः प्रणाशयेत्॥"

शेफालिकानिर्गुण्डौ॥ ८॥

"राज्ञायास्तु पलञ्चैकं पञ्च कर्षाणि गुग्गुलोः।
सर्पिषा वटिकां कृत्वा भक्षयेद् गृध्रसीहरीम्॥"

इति राक्षागुग्गुलुः ॥ ६ ॥
"राक्षाम्बुतारगवधदेवदारु-
चिकणटकैरखपुनर्नवानाम् ।
क्वाथं पिबेन्नागरचूर्णमिश्रं
जङ्घोरुपृष्ठचिकपार्श्वशूली ॥"
इति राक्षासप्तकक्वाथः ॥ १० ॥
"पथ्याविभीतामलकीफलानां
घृतं क्रमेण द्विगुणाभिवृद्धम् ।
प्रस्थेन युक्तच्च पलद्वयानां
द्रोणे जले संस्थितमेकराचम् ॥
अर्द्धावशेषं कथितं कषायं
भाण्डे पचेच्च पुनरेव लौहे ।
अस्मिन् वहेरवतार्य्य दद्यात्
द्रव्याणि संचूर्ण्य पलार्द्धकानि ॥
विड्ङ्गदन्तीचिफलागुडूची-
कृष्णात्रिवृन्नागरकोषणानि ।
यथेच्छचेष्टस्य वरस्य शीघ्रं
हिमाम्बुपानानि च भोजनानि ॥
निषेव्यमाणो विनिहन्ति रोगान्
स गृध्रसीं नूतनखञ्जताच्च ।
प्लीहानमुग्रं जठराणि गुल्मं
पाण्डुत्वकण्डूवमिवातरक्तम् ॥
पथ्यादिको गुग्गुलुरेष नाम्ना
ख्यातः क्षितावप्रमितप्रभावः ।
बलेन नागेन समं मनुष्यं
जवेन कुर्य्यात्तुरगेण तुल्यम् ॥
आयुःप्रकर्षं विदधाति चक्षु-
र्बलं तथा पुष्टिकरो विषघ्नः ।
क्षतस्य सन्धानकरो विशेषा-
द्रोगेषु ग्रस्तः सकलेषु तज्ज्ञैः ॥"
इति पथ्यादिगुग्गुलुः ॥ ११ ॥
इति भावप्रकाशः ॥

(तथा च ।
"रक्तवातसमुद्भूतान् दोषान् ग्रसति महामते ! ।
कव्यूरुजानुमध्ये तु जायते बहुवेदना ।
गृध्रसीति विजानीयात् तेन नोक्तच्च लक्षणम् ॥"
"घृतावरी बले द्वे च पिप्पली पुष्करास्थयम् ।
चूर्णमेरण्डतैलेन गृध्रसीमपकर्षति ॥
अजमोदादिकं चूर्णमाम्बाते प्रकीर्त्तितम् ।
तदत्र योजनीयच्च गृध्रसीनां निवारणम् ॥"
इति हारीते चिकित्सितस्थाने त्रयोविंशोऽध्याये ॥
"पार्ष्णिं प्रत्यङ्गुलीनां या कण्डरा मारुतार्दिता ।
सक्थ्युत्क्षेपं निगृह्णाति गृध्रसीं तां प्रचक्षते ॥"
इति वाभटे निदानस्थाने पञ्चदशोऽध्याये ॥
"पार्ष्णिं प्रत्यङ्गुलीनान्तु कण्डरा यानिलार्दिता ।
सक्थ्नोः क्षेपं निगृह्णीयाद् गृध्रसीति हि सा स्मृता ॥"
इति सुश्रुते निदानस्थाने प्रथमेऽध्याये ॥
चिकित्सास्था यथा,—
"गृध्रसीविश्वाचीकोष्टुकशिरःखञ्जपङ्गुलवातकण्टक
पाददाहपादहर्षावबाहुकवाद्रिर्य्यधमनीगतवात-
रोगेषु यथोक्तं यथोद्दिष्टच्च शिरावधं कुर्य्या-
II.

दग्रजावबाहुकाङ्गातथाधिचिकित्सितस्थाने ॥" इति च सुश्रुते चिकित्सितस्थाने ५मे अध्याये ॥)

गृध्राणी, स्त्री, (गृध्र इव धूम्रवर्णेन अनति प्राणितीति । अन् + पचाद्यच् । गौरादित्वात् ङीष् । संज्ञायां गलम् ।) धूम्रपत्राढ्यः । इति राजनिर्घण्टः ॥

गृष्टिः, स्त्री, (गृह्णाति सद्यःप्रसवमिति । ग्रह + उपादाने + कर्त्तरि क्तिच् पृषोदरादित्वात् साधुः ।) एकवारप्रसूता गौः । तत्पर्य्यायः । सद्यःप्रसूतिका २ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १३ । ६३ । ३३ ।
"प्रष्ठौहीनां गवां राजन् तावदग्र्या गृष्टयो धेनवः सुव्रताश्च ॥"
यथा च ।
"एभ्य एव स्थिरादीनि जले पक्वेकविंशतिम् ।
रसे तस्मिन् पचेत् सर्पिर्गृष्टिक्षीरं चतुर्गुणम् ॥
वीराद्विमाषकाकोली स्वयं गुप्तर्षभर्द्धिभिः ॥
मेदया च समैः कल्कैस्तत् स्यात् कल्याणकं महत् ।
दृष्टनीयं विशेषेण सन्निपातहरं परम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे उन्मादाधिकारे ॥
सद्यःप्रसूतस्त्रीमात्रम् । इति शब्दार्थचिन्तामणिः ॥) वराहकान्ता । इत्यमरः । २ । ४ । १३५ ॥ वदरश्चः । इति मेदिनी । टे । १२ ॥ काश्मरी । इति राजनिर्घण्टः ॥

गृह, तृ क ङ गृहे । इति कविकल्पद्रुमः ॥ (अदन्तपुरां-आत्मं-सर्कं-सेट् ।) सप्तमस्वरी । क ङ, गृहयते । अगृहो गृहयम् । इति दुर्गादासः ॥

गृहं, क्ली, (गृह्णाति धान्यादिकं जीवनार्थं यस्मिन्निति । ग्रह + "गेहे कः ।" ३ । १ । १४४ । इति कः ।) इष्टकादिरचितवासस्थानम् । घर इति भाषा ॥ (यथा, मनुः । २ । ३४ ।
"चतुर्थे मासि कर्त्तव्यं शिवोर्निष्क्रमणं गृहात् ॥"
अर्द्धर्चादिगणादयं शब्दो विभाषया पुंसि च वर्त्तते । तत्र बहुवचनान्त एव । यथा,—
"गृहाः पुंसि च भूम्नेव ।" इत्यमरः ॥ अतएव मनौ । ४ । २५० ।
"गृह्यान् गृहान् कृशान् गत्वानयः पुण्यं मणीन् दधि ॥")
तत्पर्य्यायः । गेहम् २ उदवसितम् ३ वेश्म ४ सद्म ५ निकेतनम् ६ निशान्तम् ७ वस्त्यम् ८ सदनम् ९ भवनम् १० अगारम् ११ मन्दिरम् १२ गृहा: १३ निकाय्यः १४ निलयः १५ आलयः १६ वासः १७ कुटः १८ शाला १९ सभा २० । इत्यमरः । २ । २ । ४-५ ॥ पस्त्यम् २१ सादनम् २२ आगारम् २३ कुटिः २४ कुटी २५ गेहः २६ निकेतः २७ साला २८ मन्दिरा २९ ओकः ३० । इति भरतः ॥ निवासः ३१ संवासः ३२ आवासः ३३ अधिवासः ३४ निवसतिः ३५ वसतिः ३६ केतनम् ३७ । इति शब्दरत्नावली ॥ गयः ३८ छदिः ३९ गर्त्तः ४० हर्म्यम् ४१ अस्तम् ४२ दुरोणे ४३ नीलम् ४४ दुर्या: ४५ सवराणि ४६ अमा ४७ दमे ४८ क्षत्तिः ४९ योनिः ५० शरणम् ५१ वरूथम् ५२ छर्दिः ५३ छदिः ५४ छाया ५५ शर्म्म ५६ व्रजम् ५७ ।
इति वैद्यनिघण्टौ ३ अध्यायः ॥ * ॥

अथ गृहारम्भकालः ।
"वैशाखश्रावणाषाढ़मार्गकालगुनकार्त्तिकाः ।
शुभप्रश्ना गृहारम्भे पत्नीपुत्रसम्वर्द्धिदाः ॥
शुक्लपक्षे भवेत् सौख्यं कृष्णपक्षे भवेद्भयम् ।
आदित्यभौमवर्जन्तु सर्व्वे वाराः शुभावहाः ॥
पूर्णिमान्तदर्शौ यावत् पूर्व्वास्यं वर्जयेद् गृहम् ।
उत्तरास्यं न कुर्व्वीत नवम्यादिचतुर्दशीम् ॥
अमावस्यादर्शौ यावत् पश्चिमास्यं विवर्जयेत् ।
नवम्यादि तथा याम्यां यावच्छुक्लचतुर्दशीम् ॥
वज्रव्याघातशूले च शतीपातातिगण्डयोः ।
विष्कुम्भगण्डयोश्चैव गृहारम्भं न कारयेत् ॥
आदित्यहरयोर्हिबुध्न्याग्निरोज्येष्ठा धनिष्ठोत्तरा
रेवत्याश्च मघाशुराधहरिभिः शुद्धैः स्वभावादिभिः ।
सौम्यानां दिवसेऽथ गण्डरहिते योगे विरिक्ते तिथौ
विद्वत्यक्षदिने वदन्ति मुनयो वेश्मादिकार्य्यं शुभम् ॥
त्रिभिस्त्रिभिर्वेश्मनि कृत्तिकाद्यै-
रुक्षेषपुत्राग्निधनानि शोकाः ।
शत्रोर्भयं राजभयच्च मृत्युः
सुखं प्रवासच्च नव प्रभेदाः ॥
नाशं दिशन्ति मकरालिकुलीरलग्ने
मेषे घटे धनुषि कार्म्मसुदीर्घरुग्मम् ।
कन्याभसे मिथुनके ध्रुवमर्थलाभो
ज्योतिर्विदः कलसिंहवृषेषु वृद्धिम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥

तत्र प्रवेशकालः ।
"ज्येष्ठापुनर्व्वसुवर्जे गृहारम्भोदितच्च यत् ।
तत् सर्व्वं चिन्तयेद्वेश्मप्रवेशे दैवचिन्तकः ॥
हस्तापुष्यपुनर्व्वसुश्रुतिभाज्येष्ठाश्वयो रोहिणीरेवत्युत्तरविष्णुवातशुभभूलाधनिष्ठासु च ।
कन्याकुम्भवृषालिसिंहमिथुनस्वर्क्षोदयेऽर्के शुभे
शुक्रेज्येन्दुजशीतरश्मिदिवसे वेश्मप्रवेशः शुभः ॥
स्नात्वायतो द्विजवरानथ पूर्णकुम्भं
दध्यक्षताम्रदलपुष्पफलोपशोभम् ।
दत्त्वा हिरण्यवसनञ्च तथा द्विजेभ्यो
माङ्गल्यशान्तिनिलयं निलयं विशेत्तु ॥"
इति समयप्रदीपः ॥ * ॥

(गृहकरणे समयशुद्धिरुक्ता विश्वकर्म्मप्रकाशे द्वितीयाध्याये यथा,—
"चैत्रे व्याधिमवाप्नोति यो नवं कारयेद्गृहम् ।
वैशाखे धनरत्नानि ज्येष्ठे मृत्युं तथैव च ॥
आषाढ़े भृत्यरत्नानि पशुवर्द्धनमवाप्नुयात् ।
श्रावणे मिश्रलाभन्तु हानिं भाद्रपदे तथा ॥
युद्धञ्चैवाश्विने मासि कार्त्तिके धनधान्यकम् ।
धनवृद्धिं मार्गशीर्षे पौषे तस्करतो भयम् ॥

माघे चाग्निभयं विद्यात्लक्ष्मीवृद्धिश्च फाल्गुने ॥"
गृहसंस्थापने मेषादिराशिगतशुभाशुभं यथा तत्रैव, द्वितीयाध्याये।
"गृहसंस्थापनं सूर्ये मेषस्थे शुभदं भवेत्।
वृषस्थे धनवृद्धिः स्यान्मिथुने मरणं भवेत् ॥
कर्कटे शुभदं प्रोक्तं सिंहे शत्रुविवर्द्धनम्।
कन्या रोगं तुला सौख्यं वृश्चिके धनधान्यकम् ॥
कार्म्मुके च महाहानिर्मकरे स्याद्धनागमः।
कुम्भे तु रत्नलाभः स्यात् मीने स्वप्नभयावहम् ॥
चाण्डालनृपयुक्कन्यामासा दोषवहाः स्मृताः।
ज्येष्ठोर्ज्जमाघसिंहास्थाः सौरमाने तु शोभनाः ॥
मासे तपस्ये तपसि माधवे नभसि त्विषे।
ऊर्ज्जे च गृहनिर्म्माणं पुत्रपौत्रधनप्रदम् ॥
निषिद्धेष्वपि कालेषु स्वानुकूले शुभे दिने।
लग्नदारुगृहारम्भे मासदोषो न विद्यते ॥
पाषाणेष्टादिगेहानि निन्द्यमासे न कारयेत्।
निन्द्यमासेऽपि चन्द्रस्य मासेन शुभदं गृहम् ॥
गोचराष्टकवर्गाभ्यां वास्तवेधं विचिन्तयेत्।
दशा चान्तर्दशादीनां विचारश्चात्र कर्म्मणि ॥
गुरुशुक्रबले विप्रान् सूर्य्यभूमिजयोस्तथा।
राशिसौम्यबले सौर-वर्षानुक्रमपूर्व्वशः ॥
गृहारम्भं प्रकुर्व्वीत वर्षनाथबले सति।
सर्व्वेषामपि वर्षाणां सूर्य्यचन्द्रबलं स्मृतम् ॥"
गृहयोग्यभूमिपरीक्षा यथा तत्रैव, १मे अध्याये।
"अथातः संप्रवक्ष्यामि लोकानां हितकाम्यया।
श्वेता रक्ता तथा पीता कृष्णा वर्णानुपूर्व्वशः ॥
सुगन्धा ब्राह्मणी भूमी रक्तगन्धा तु क्षत्रियी।
मधुगन्धा भवेद्वैश्या मद्यगन्धा च शूद्रिणी ॥
मधुरा ब्राह्मणी भूमिः कषाया क्षत्रिया मता।
अम्ला वैश्या भवेद्भूमिस्तिक्ता शूद्रा प्रकीर्त्तिता॥"
अथ भूमिभेदे फलानि यथा तत्रैव।
"सुवर्णगन्धा सुरसा धनधान्यसुखावहा।
जयाये जयफला स्मृतः कार्य्या परीक्षणम् ॥
चतुरस्रा महाधन्या द्विपाभा धनदायिनी।
सिंहाभा सद्गुणान् पुत्रान् वृषाभा पशुवृद्धिदा॥
वृत्ता सद्वृत्तदा भूमिर्भद्रपीठनिभा तथा।
त्रिशूलरूपा वीराख्यासुतपत्तिधनसौख्यदा ॥
लिङ्गाभा लिङ्गिनां श्रेष्ठा प्रासादध्वजसन्निभा।
पदोन्नतिं प्रकुरुते कुम्भाभा धनवर्द्धिनी ॥
त्रिकोणशकटाकारा खर्परवनसन्निभा।
क्रमेण सुखसौख्यार्थधर्म्महानिकरी स्मृता ॥
सुरसा वंशहा सर्पमण्डूकाभा भयावहा।
नेःस्वा खरानुकारा च शत्रुदाऽनगरान्विता ॥
चिपिटा पौरुषहीना सुरक्षाभा तथैव च।
काकोलूकनिभास्तद्वत् दुःखशोकभयप्रदा ॥
सर्पाभा पुत्रपौत्रघ्नी वंशाभा वंशहानिदा।
शूकरोष्ट्राश्वसदृशी धनुःपरशुरूपिणी।
कृच्छ्रिणान् मलिनान् रुक्षान् वक्रान् जनयेत् सुतान् ॥
लक्षलाक्षगवाकारा स्रुतपुत्रधनार्थिनाम्।
दुर्गन्धा माधिनी दुष्टस्त्रां भूमिं परिवर्जयेत्।
मनोरमा सुतप्रदा दृढा धनप्रदा मता।
सुतार्थदा तथाप्युदक् सुरेशदिक्प्लवा मही ॥"
अन्यद्विवरणन्तु तत्रैव विस्तरशो द्रष्टव्यम् ॥*॥
गृहकर्म्मणि वर्ज्यकालान्याह यथा, ज्योतिषतत्त्वे।
"क्षीरिवृक्षोद्भवं दारु गृहेषु न निवेशयेत्।
कृताधिवासं विहगैरनिलानलपीड़ितम् ॥
गजैर्विभग्नञ्च तथा विद्युन्निर्घातपीड़ितम्।
चैत्यदेवालयोत्पन्नं वल्मीकभयं श्मशानजम् ॥
देवाद्यधिष्ठितं दारुनीपनिम्बविभीतकान्।
कण्टकिनोऽसारतरून् वर्ज्जयेद् गृहकर्म्मणि ॥
वटाश्वत्थौ च निर्गुण्डी कोविदारास्तथैव च।
भल्लातकं भ्राल्मलीञ्च पलाशञ्च विवर्जयेत् ॥"*॥
गृह्यते निर्दिश्यतेऽनेन इति।) नाम। (गृह्यते स्वीक्रियते धर्म्माचरणायासौ इति।) कलत्रम्।
इति शब्दरत्नावली ॥ तथा च स्मृतिः।
"न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
तया हि सहितः सर्व्वान् पुरुषार्थान् समश्नुते ॥"
गृहकच्छपः, पुं, (गृहस्थितः कच्छप इव। हस्तपादादिरहितत्वादेवान्तर्निहितकरचरणकच्छपवत् प्रतीयमानत्वादस्य तथात्वम्।) पेषणशिला।
तत्पर्य्यायः। पेषणिः२ पेषणीपट्टः३ गृहाश्मा४।
इति शब्दरत्नावली ॥
गृहकन्या, स्त्री, (गृहस्थिता कन्येव। गृहपालिततया कन्याया इव रोगादिषु हितकारितया चास्यास्तथात्वम्।) घृतकुमारी। इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
"कुमारी गृहकन्या च ज्ञेया घृतकुमारिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गृहकपोतकः, पुं, (गृहस्थितः गृहपालितो वा कपोतः। ततः स्वार्थे संज्ञायां वा कन्।) पक्षिविशेषः। पायरा इति भाषा ॥ तत्पर्य्यायः।
प्रासादकुक्कुटः २ भिल्लीकण्ठः ३ पारावतः ४।
इति त्रिकाण्डशेषः ॥ (पारावतशब्दे विवृतिरस्य ज्ञातव्या ॥)
गृहकर्त्ता, पुं, (गृहं वासार्थं दृढादिरचितवेश्म करोतीति। गृह+कृ+तृच्।) धूसरोऽतिरुक्षश्चटकः। तत्पर्य्यायः। धान्यभक्षः २ क्षमः ३ भीरुः ४ कृषिप्रियः ५ कणप्रियः ६।
इति राजनिर्घण्टः ॥ (गृहकारके, त्रि ॥)
गृहकारकः, पुं, (गृहं करोतीति। गृह+कृ+ण्वुल्।) वर्णसङ्करजातिविशेषः। घरामी इति भाषा ॥ यथा, पराशरपद्धतौ।
"प्रतिमाघटकादेव कन्यायां नापितस्य च।
सूत्रकारस्य सम्भूतिः सोपानगृहकारकः ॥"
गृहकारी, [न्] (गृहं करोतीति। गृह+कृ+णिनिः।) कीटविशेषः। कुमिरपोका इति भाषा ॥ इति केचित् ॥ (यथा, मनुः।१२।६६।
"वको भवति चाण्डालो गृहकारी तथोपस्करः ॥")
गृहगोधा, स्त्री, (गृहे गृहस्थिता गोधेव।) व्येष्ठी। चेठी टिकटिकी इति च भाषा॥ तत्पर्य्यायः।
पल्ली२ सुवली३ विश्वम्भरा४ व्येष्ठा५ कुचमत्स्यः६ पल्लिका७ गृहगोधिका८। इति राजनिर्घण्टः ॥ गृहगोलिका९ माक्षिका१० भित्तिका११ गृहालिका१२। इति हेमचन्द्रः। ४। ३६३ ॥
गृहगोधिका, स्त्री, (क्षुद्रा गोधा अस्यार्थे कः। कापि अत इत्त्वं टाप् च। गृहस्य गोधिका गोधिरेव।) व्येष्ठी। इत्यमरः। २। ५। १२ ॥ (यथा, वृहत्संहितायाम्। ८६। ३०।
"ग्रिवा श्यामा रला क्षुद्रः पिङ्गला गृहगोधिका।
शूकरी परपुष्टा च पुन्नामानश्च वामतः ॥"
यथा च सुश्रुते कल्पस्थाने तृतीयेऽध्याये।
"मार्ज्जारश्ववानरमकरमण्डूकपाकमत्स्यगोधाशम्बूकप्रचलाकगृहगोधिकाचतुष्पादकीटास्तथान्ये दंष्ट्रा नखविषाः ॥")
गृहगोलिका, स्त्री, (गृहे गृहस्था वा गोधिकेव। निपातनात् साधुः।) व्येष्ठी। इति हेमचन्द्रः। ४। ३५३ ॥
गृहगौ, स्त्री, (गृहे नीयते क्रियते इति। नी+क्विप्, संज्ञायां गलम्।) काङ्किकम्। इति त्रिकाण्डशेषः ॥ (विवरणमस्याः काङ्किकशब्दे ज्ञेयम् ॥)
गृहतटी, स्त्री, (गृहस्य गृहे वा गृहमाश्रित्येत्यर्थः तटीव।) वीथी। इति हारावली। १५२ ॥ पिंड़ा दाओया इति च भाषा ॥
गृहद्रुमः, पुं, (गृहमिव द्रुमः।) मेढ़शृङ्गीवृक्षः। इति रत्नमाला ॥
गृहनाशनः, पुं, (गृहं नाशयति प्रवेशेन इति। नश्+णिच्+ल्यु।) कपोतः। इति राजनिर्घण्टः ॥ (कपोतोऽत्र वनकपोतः वनकपोतस्य प्रवेशेनैव गृहनाशित्वात्। घुघु इति यस्य भाषा ॥)
गृहनीड़ः, पुं, (गृहे नीड़ं कुलायोऽस्य।) चटकः। इति हारावली। ८६ ॥
गृहपतिः, पुं, (गृहस्य पतिः।) गृहस्थः। (यथा, ऋग्वेदे। १४। १। ५१।
"भर्गस्त्वा हस्तमग्रहीत् सविता हस्तमग्रहीत्।
पत्नीत्वमसि धर्म्मणाहं गृहपतिस्तव ॥")
सत्री। इति मेदिनी। ते। १६५ ॥ धर्म्मः। इति शब्दरत्नावली ॥ (अग्निः। यथा, ऋग्वेदे। १। १२। ६।
"अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ॥")
स्त्री, गृहस्य पतिः "विभाषा सपूर्व्वस्य।" ४।१ ३४। इति वा नान्तादेशे गृहपत्नी गृहपतिरिति रूपद्वयम्। गृहस्वामिनी ॥)
गृहपोतकः, पुं, (गृहं पोतः शिशुरिव यस्य इति कप्।) वास्तुः। वाटी। इति शब्दरत्नावली ॥
गृहबलिप्रियः, पुं, (गृहबलिः प्रियोऽस्य। गृहबलीनां प्रिय इत्येके।) वकपक्षी। इति शब्दरत्नावली ॥ (काकादयोऽपि ॥)
गृहबलिभुक्, [ज्] पुं, (गृहे दत्तं बलिं अन्नादिभक्षद्रव्यं भुङ्क्ते इति। भुज्+क्विप्।) चटकः। इति हेमचन्द्रः। ४। ३६३ ॥ वकः। काकः। इति केचित् ॥
गृहभूमिः, स्त्री, (गृहयोग्या भूमिः।) वास्तुः। वेश्मभूः। इति हलायुधः ॥ (अस्याः लक्षणादिकं गृहशब्दे द्रष्टव्यम् ॥)

गृहमणिः, पुं, (गृहे मणिरिव ।) प्रदीपः । इति हेमचन्द्रः । ३ । ३५१ ॥

गृहमाक्षिका, स्त्री, (गृहे मक्षति गृह्णति गुप्तभावेन तिष्ठतीति । मक्ष् + "खुल् लचौ" ।३।१।१३३ । इति खुल् । ततष्टाप् । कापि अत इत्वञ्च ।) चर्म्मचटी । इति त्रिकाण्डशेषः ॥ चामचिका इति भाषा ॥

गृहस्थगः, पुं, (गृहे स्थग इव । यद्वा, गृहस्थितो स्थगः पशुः ।) कुक्कुरः । इति हेमचन्द्रः ।४।३४५॥

गृहमेधी, [न्] पुं, (गृहैर्दारैर्मेधते सङ्गच्छते इति । गृह + मेध सङ्गमे + "सुप्यजातौ णिनिः ।" ३ । २ । ७८ । इति णिनिः ।) गृहस्थः । इति हेमचन्द्रः । ३ । ४७२ ॥ (यथा, मनुः । ४ । ३१ ।

"वेदविद्याव्रतस्नातान् श्रोत्रियान् गृहमेधिनः । पूजयेद्धव्यकव्येन विपरीतांश्च वर्ज्जयेत् ॥")

गृहमेधिनी, स्त्री (गृहं मेधते पुनाति ग्राह्योक्तदानदयादाक्षिण्यादिना सङ्गच्छते इत्यर्थः। गृह + मेध + णिनिः । ततो ङीप् ।) सात्विकी बुद्धिः । इति महाभारतम् ॥ (गृहमेधिन् + स्त्रियां ङीप् ।) गृहस्थपत्नीच ॥

गृह्यः, पुं, (गृह्य ग्रहणे । गृह्यते इति। गृह + "मृदृत्तिसृहिगृहिभ्य आयः ।" उणा । ३ । ६६ । इति आयः । ततः "अयामन्तेति ।" ६।४। ५५ । इति णेरयादेशः ।) गृहस्थः । इत्युणादिकोषः ॥

गृह्यालुः, पुं, (गृह्यते गृह्णातीति। गृह + "सृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ।" ३ । २ । १५८ । इति आलुच् । "अयामन्तेति ।" ६ । ४ । ५५ । इति णेरयादेशः ।) गृहीता । गृहणशीलः । इत्यमरः । ३ । १ । २७ ॥

गृहवाटिका, स्त्री, (गृहसमीपस्था वाटिका आरामः ।) गृहसमीपवनम् । इति हारावली । १६८ ॥

गृहस्थः, पुं, ("न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।" अतएव गृहेषु दारेषु तिष्ठति अभिरमते इति । गृह + स्था + "सुपि स्थः ।"३।२।४। इति कः ।) गृही । द्वितीयाश्रमी । तत्पर्य्यायः । ब्रह्मचर्य्याश्रमी २ गृहमेधी ३ स्नातकः ४ गृही ५ । इति हेमचन्द्रः । ३ । ४७१ ॥ गृहपतिः ६ सत्री ७ । इत्यमरः । २ । ८ । १५ ॥ गृह्याग्यः ८। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ गृहाधिपः ९ । इति हलायुधः ॥ कुटुम्बी १० । इति जटाधरः ॥ गृहायनिकः ११ । इति शब्दरत्नावली ॥ * ॥ तस्य धर्म्मो यथा,—

"गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः । चत्वार आश्रमाः प्रोक्ताः सर्व्वे गार्हस्थ्यमूलकाः॥ यः कश्चिदिह लोकेऽस्मिन्नागमः संप्रकीर्त्तितः । तस्याच्च गमनं श्रेयः कीर्त्तिरेषा सनातनी ॥ संस्कारैः संस्कृतः पूर्व्वं यथावच्चरितव्रतः । स्नातो गुरुविशिष्टायां समावर्त्तेत वेदवित् ॥ स्वदारनिरतो नित्यं गृह्याचारो जितेन्द्रियः । पञ्चभिश्च महायज्ञैः श्रद्दधानो यजेद्गृहे ॥ देवतातिथिभृत्याग्नौ निरतो वेदकर्म्मसु । इज्याप्रदानयुक्तश्च यथाशक्ति यथाविधि ॥ न पाणिपादचपलो न नेत्रचपलो मुनिः । न च वाग्भ्रूचपल इति शिष्टस्य गोचरः ॥ नित्यं यज्ञोपवीती स्यात् शुक्लवासाः शुचिव्रतः । नियतो दमदानाभ्यां सदा शिष्टैश्च संविशेत् ॥ मितशिश्नोदरो मैत्रः शिष्टाचारसमन्वितः । वेणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम् ॥ अधीत्याध्यापनं कुर्य्यात् तथा यजनयाजने । दानं प्रतिग्रहञ्चापि षड्गुणां वृत्तिमाचरेत् ॥ त्रीणि कर्म्माणि यानीह ब्राह्मणानान्तु जीविका । याजनाध्यापने चोभे शुद्धाच्चापि प्रतिग्रहः ॥ अथ शेषाणि चान्यानि त्रीणि कर्म्माणि यानि तु । दानमध्ययनं यज्ञो धर्म्मयुक्तानि तानि तु ॥ तेष्वप्रमादं कुर्व्वीत त्रिषु कर्म्मसु धर्म्मवित् । दान्तो मैत्रः क्षमायुक्तः सर्व्वभूतसमो मुनिः ॥ सर्व्वमेतद् यथाशक्ति विप्रो निर्व्वर्त्तयन् शुचिः । एवं युक्तो जयेत् स्वर्गं गृहस्थः संशितव्रतः ॥"

इत्याश्वमेधिकपर्व्व ॥

"सर्व्वेषामाश्रमाणान्तु देविध्यन्तु चतुर्व्विधम् । ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः ॥ योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् । उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥ अग्नयोऽतिथिश्चभृत्या यज्ञो दानं सुरार्च्चनम् । गृहस्थस्य समासेन धर्म्मोऽयं द्विजसत्तमाः ॥ उदासीनः साधकश्च गृहस्थो द्विविधो भवेत् । कुटुम्बभरणे युक्तः साधकोऽसौ गृही भवेत् ॥ अग्न्यादि त्रीण्युपादाय त्यक्त्वा भार्य्याधनादिकम् । एकाकी विचरेद् यस्तु उदासीनः स मौक्षिकः ॥"

इति गारुडे ४६ अध्यायः ॥

बाहुल्यन्तु तत्रैव ।५०।५१। अध्याययोर्द्रष्टव्यम् ॥*॥

गृहस्थब्राह्मणधर्म्मो यथा,—

"चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः । द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥ अग्नीदेवे भूतानामृषीदैवञ्च पुत्रः । वा वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥ याचामात्रप्रसिद्ध्यर्थं खेः कर्म्मभिरगर्हितैः । अक्लेशेन शरीरस्य कुर्व्वीत धनसञ्चयम् ॥ ऋताभ्यामप्यृताभ्यां वा जीवेत्तु न्यतेन प्रमृतेन वा । सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥ ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् । मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥ सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते । सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेत् ॥"

इत्यादि मानवे ४ अध्यायः ॥

गृहस्तूणं, क्ली, (गृहस्य गृहावलम्बनार्था स्तूणा । अभिधानात् क्लीबत्वम् ।) गृहस्तम्भः । इत्यमरः । ३ । ५ । ३० ॥

गृह्यः, पुं, (गृह्णन्ति ध्यानादिकं इति । गृह् + "गेहे कः ।" ३।१।१४४। इति कः ।) गृहम् । (यथा, मनुः । ४ । २५० ।

"गृह्यां गृहान् कृशान् गत्वागपः पुण्यं मुनीन् हधि । धानामत्स्यान् पयो मांसं शाकञ्चैव न निर्णुदेत्॥"

गृह्यन्ते धर्म्माचरणाय इति । ग्रह + कः ।) दाराः । इत्यमरः । २ । २ । ५ ॥ नित्यबहुवचनान्तोऽयं शब्दः ॥

गृहागतः, पुं, (गृहमागतः । आ + गम् + कर्त्तरि क्तः ।) अतिथिः । इत्यमरः । २ । ७ । ३४ ॥ (गृहमागते, त्रि । यथा, हितोपदेशे ।

"नाहं गृहागतं हन्मि ॥")

गृहाधिपः, पुं, (गृहस्य अधिपः ।) गृहस्थः । इति हलायुधः ॥

गृहाङ्गं, क्ली, (गृहे पर्य्युषितान्नादिना प्रस्तुतौषधमस्तम् ।) काञ्जिकम् । इति त्रिकाण्डशेषः ॥

गृहायनिकः, पुं, (गृहरूपमयनं विद्यतेऽस्य इति ठन् ।) गृहस्थः । इति शब्दरत्नावली ॥

गृहारामः, पुं, (गृहस्य गृहे गृहसमीपस्थो वा आरामः ।) गृहसमीपे क्षुद्रमवनम् । तत्पर्य्यायः । निष्कुटः २ । इत्यमरः । २ । ४ । १ ॥

गृहालिका, स्त्री, (गृहे आलिरिव कायते प्रकाशते इति । गृहालि + के + कः । ततष्टाप् ।) व्येष्ठी । इति हारावली । १८४ ॥

गृहावग्रहणी, स्त्री, (गृहमवगृह्यतेऽनया इति । अव + ग्रह् + करणे ल्युट् । ततो ङीप् ।) देहली । इत्यमरः । २ । २ । १३ । द्वातिना दाब्योया इति च भाषा ॥

गृहाश्रया, स्त्री, (गृहे इव छायायुक्तस्थाने आश्रयति इति । आ + श्रि + अच् । ततः स्त्रियां टाप् ।) ताम्बूली । इति शब्दचन्द्रिका ॥ पानेर गाछ इति भाषा ॥

गृहाश्मा, [न्] पुं, (गृहरचितोऽश्मा अश्मनिर्म्मितपेषणशिलाविशेषः ।) पेषणशिला । इति शब्दरत्नावली । शिल इति भाषा ॥

गृहिणी, स्त्री, (गृहस्वामित्वमस्त्यस्याः । इति इनिः ङीप् च ।) भार्य्या । इति हेमचन्द्रः । ३ । १७६ । (यथा, रघौ । ८ । ६७ ।

"गृहिणी सचिवः सखी मिथः
प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना-
हरता त्वां वद किं न मे हृतम् ॥"

गृहं गृहकार्य्यं साधुतयास्त्यस्या इति इनिः ङीप् च । गृहकर्म्मैकशीला स्त्री । यथा, शकुन्तलायां चतुर्थाङ्के ।

"सुमुखञ्च गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥)

गृही, [न्] पुं, (गृहा दारा विद्यन्तेऽस्य इति इनिः।) गृहस्थः । इत्यमरः । २ । ७ । ३ ॥ भर्त्ता । इति राजनिर्घण्टः ॥ (यथा भागवते । ३ । ३० । ६ ।

"गृहेषु कूटधर्म्मेषु दुःखतन्त्रेष्वतन्द्रितः ।
कुर्व्वन् दुःखप्रतीकारं सुखवन्मन्यते गृही ॥")

गृहीतं, त्रि, (ग्रह + कर्म्मणि क्तः ।) स्वीकृतम् । प्राप्तम् । ज्ञातम् । धृतम् । यथा, हितोपदेशे । १ । ३ ।
"अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्म्ममाचरेत् ॥"

गृहीतृदिक्, [ग्रृ] त्रि, (गृहीता आश्रिता दिक् हन्तुः पलायनं वा भयादृयेन ।) पलायितः । तिरोहितः । इति हेमचन्द्रः । ३ । ४६६ ॥

गृहोलिका, स्त्री, (गृहे वलते चलतीति । गृह + वल + कुन् । वाहुलकात् सम्प्रसारणम् । तेन वस्य उत्वम् ।) ध्येष्ठी । इति हेमचन्द्रः । ४ । ६८ ॥

गृह्यं, क्ली, (गृह्यते आक्रम्यते अर्थ्य-आदिभी रोगैरिति । ग्रह + "पदास्खेरिवाह्यापश्येषु च ।" ३ । १ । ११६ । इति क्यप् ।) गुदम् । (गृह्यन्ते संगृह्यन्ते सामवेदाद्युक्तानि कर्म्मविधानान्यत्र इति । ग्रह + क्यप् ।) कात्यायनगृह्यभिन्नादिकृत-सूत्रग्रन्थभेदः । इति मेदिनी । रे । १६ ॥ तत्र तु गोभिलादिकृतसामवेदाद्युक्तकर्म्मकाण्डनिर्णयः ॥

गृह्यः, पुं, (गृह्यते मानवेनेति । ग्रह + "पदास्खेरिवाह्यापश्येषु च" । ३ । १ । ११६ । इति क्यप् । पञ्चरादित्वनेन परस्त्रीलिङ्गत्वादस्य तथात्वम् ।) गृहासक्तच्छगादिः । इति मेदिनी । ये । १८ ॥ (ऋषिः । यथा, मनौ । ३ । ८४ ।
"वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्व्वकम् ।
आभ्यः कुर्य्याद्देवताभ्यो ब्राह्मणो होममन्वहम् ॥")

गृह्यः, त्रि, (गृह्यते स्वाम्यादिभिरिति । ग्रह + क्यप् ।) अस्वैरी । अस्वतन्त्रः । पत्यः । इति विश्वमेदिन्यौ ॥ (यथा, भारविः । २ । ५ ।
"नन्वक्तविशेषनिस्पृहा
गुणगृह्या वचने विपश्चितः ॥"
गृहे भव इति यत् । गृहोत्पन्नवस्तु ॥)

गृह्यकः, त्रि, (गृह्य + स्वार्थे अनुकम्पायां वा कन् ।) अस्वतन्त्रः । पराधीनः । इत्यमरः । ३ । १ । १६ ॥

गृह्यकः, पुं, (गृह्य + स्वार्थे अनुकम्पायां वा कन् ।) गृहासक्तपक्षिच्छगादिः । तत्पर्य्यायः । छेकः २ । इत्यमरः । २ । ६ । ४३ ॥

गृह्या, स्त्री, (गृह्यते नृपैरिति । ग्रह + क्यप् + टाप् ।) ग्राम्यापुरम् । नगरनिकटग्रामः । इत्यमरः ॥

गृ, क उ विज्ञापे । विज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) विज्ञापो विज्ञापनम् । क उ, गारयते ज्ञापयति सुधीः । इति दुर्गादासः ॥

गृ, गि ग्रन्थे । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-सकं-सेट् ।) ग्रन्थः ग्रथ वस्तुवाचकम् । गि, गृणाति वाचं लोकः । गीर्णः गीर्त्तः । इति दुर्गादासः ॥

गृ, ग्र निगरणे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) निगरणं भक्षणम् । ग्र, गिरत्यन्नं लोकः । देवात्ततो विगलितो निखितो यकेन इति तु अशुद्धात् ह्रीः कभावे इति भावे कप्रत्यये ऋदिरञ्चादिति इरि वस्तुवादुरेषञ्च लकारे गिल इति स्थिते वेः क्ष्वाक्ष्ये इति ल्यो कर्म्मणि क्ते सिद्धम् । इति दुर्गादासः ॥

गेङ्कुः, पुं, (गच्छतीति । गम् + ङः । गो गन्ता । ग इन्दुरिवेति गेन्दुः पृषोदरादित्वात् दस्य डत्वे साधुः ।) गेङ्कुकः । इति भरतो द्विरूपकोषश्च ॥ (गेन्दुरपि च दृश्यते ॥)

गेङ्कुकः, पुं, (ग इन्दुरिवेत्यतः इवे प्रतिकृताविति कन् । अत्र गेन्दुकोऽपि पाठः ।) कन्दुकः । इत्यमरः । २ । ७ । १३८ ॥ गेंडु इति गेंद । इति च भाषा ॥

गेङ्कुकः, पुं, (गेङ्कुक; ततः पृषोदरादित्वात् दीर्घः । अत्र गेन्दूकोऽपि पाठः ।) गेङ्कुकः । इति जटाधरः ॥

गेद, ऋ ङ उ गतौ । चाले । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट ॥)

गेप, ङ ऋ गतिचालयोः । (भ्वां-आत्मं-सकं-सेट् ।) ङ, गेपते । ऋ, अजिगेपत् । इति दुर्गादासः ॥

गेयं, क्ली, (गै + "अचो यत् ।" ३ । १ । ६७ । इति यत् । "ईदूयति ।" ६ । ४ । ६५ । इति आत ईत्वम् । ततो गुणश्च । गीतम् । इति मेदिनी । गे । २० ॥ (यथा, माघे । २ । ७२ ।
"वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव ।
अनन्ता वाङ्मयाद्धो गेयस्येव विचित्रता ॥")

गेयः, त्रि, (गै + यत् । तत आत ईत्वम् ।) गातव्यः । गायनः । इति मेदिनी । गे । २० ॥ (यथा हरिवंशे हरिवंशपर्व्वणि । ५० । ४१ ।
"इमे त्वां सुनयः सप्त सहिता सुनिमङ्गलैः ।
स्तुवन्ति देवविद्याभिर्गेयाभिर्गीर्भिरञ्जसा ॥")

गेव, ऋ ङ सेवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अजिगेवत् । ङ, गेवते । इति दुर्गादासः ॥

गेष, ऋ ङ अन्वेषे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अजिगेषत् । ङ, गेषते । जिगेषे । अन्वेषोऽनुसन्धानम् । इति दुर्गादासः ॥

गेष्णः, पुं, (गायतीति । गै + "इष्णो गादाभ्यां किच्च ।" इत्युणादिकोषटीकाकारस्वात् इष्णः ।) रङ्गोपजीवी । सामगानकर्त्ता । इत्युणादिकोषः ॥

गेष्णुः, पुं, (गायतीति । गै गाने + "गादाभ्यामिष्णुच् ।" उणा । ३ । १६ । इति इष्णुच् ।) गायनः । नटः । इति मेदिनी । गे । ११ ॥ सामगानकर्त्ता च ॥

गेहं, क्ली, (गो गन्धर्व्वो गणेशश्च । गेन गन्धर्व्वेण गणेशेन वा ईह्यते काम्यते इति । ग + ईह + कर्म्मणि घञ् । यद्वा, गो गन्धर्व्वो गणेशो वा ईहः ईप्सितो यस्मिन् ।) गृहम् । इत्यमरः । २ । २ । ४ ॥ (यथा, हितोपदेशे ।
"छत्रवानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥")

गेहकृत्, [त्] त्रि, (गेहमात्मस्थमेति । गेह + इनिः ।) गृही ॥ (स्त्रियां ङीप् । गृहिण्यौ । यथा, आर्य्यासप्तशती । १६६ । [मानम् ॥")
"गेहिन्यया; प्रवसन्ती गोत्रस्खलितापराधतो

गेहेनर्दी, [न्] पुं, (गेहे नर्दति गर्ज्जतीति । गेह + नर्द + णिनिः; अलुक् समासः । अस्य गृह एव गर्ज्जनं नान्यत्र अतस्तथात्वम् ।) कापुरुषः । तत्पर्य्यायः । गेहेशूरः २ भिक्षीशूरः ३ । इति हेमचन्द्रः । ३ । १४१ ॥

गेहेशूरः, पुं, (गेहे एव शूरः । अलुक् समासः । अन्यत्र शूरत्वाभावादस्य तथात्वम् ।) गृहेनर्दी । इति हेमचन्द्रः । ३ । १४१ ॥

गै, गाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) गीतं गायति गायनः । इति दुर्गादासः ॥

गैरिकं, क्ली, (गिरौ भवमिति अध्यात्मादित्वात् ठञ् ।) स्वर्णम् । रक्तवर्णधातुविशेषः । गिरिमाटी इति भाषा ॥ तत्पर्य्यायः । रक्तधातुः २ गिरिधातुः ३ गवेधुकम् ४ धातुः ५ सुरङ्गधातुः ६ गिरिसम्भवम् ७ । इति राजनिर्घण्टः ॥ वर्णकम् ८ गवेरुकम् ९ प्रत्यक्षम् १० गिरिजम् ११ । इति त्रिकाण्डशेषः ॥ लोहितमृत्तिका १२ गिरिजम् १३ ॥ पीतगैरिकस्य पर्य्यायः । सुवर्णगैरिकम् १ सुवर्णम् २ स्वर्णगैरिकम् ३ । इति रत्नमाला ॥ स्वर्णधातुः ४ सुरङ्गकः ५ सन्ध्याभ्रम् ६ वभ्रुधातुः ७ शिलाधातुः ८ । अनयोर्गुणाः । मधुरत्वम् । शीतत्वम् । कषायत्वम् । व्रणरोपणत्वम् । विस्फोटाग्नीषदाहनाशित्वम् । स्वर्णवर्णादिकं शुभम् । इति राजनिर्घण्टः ॥ निर्म्मलत्वम् । स्निग्धत्वम् । सुवर्णगैरिकं तद्वत् विशेषतश्चक्षुष्यत्वकारित्वम् । इति राजवल्लभः ॥
"गैरिकं रक्तधातुश्च गैरेयं गिरिजन्यथा ।
सुवर्णगैरिकस्त्वन्यत्ततो रक्ततरं हि तत् ॥
गैरिकाद्वितयं स्निग्धं मधुरत्वुवरं हिमम् ।
चक्षुष्यं दाहमित्तासक्रकफहिक्काविषापहम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

गैरिकाक्षः, पुं, (गैरिकमिव रक्तवर्णमक्षि पुष्परूपनयनं यस्य ।) जलमधूकवृक्षः । इति राजनिर्घण्टः ॥

गैरी, स्त्री, (गिरौ भवः । गिरि + अण् । गौरादित्वात् ङीष् ।) लाङ्गलिकीवृक्षः । इति रत्नमाला ॥ (लाङ्गलिकीशब्देऽस्या गुणादयो ज्ञातव्याः ।) विषलाङ्गला इति भाषा ॥

गैरेयं, क्ली, (गिरौ भवमिति । गिरि + ढक् ।) शिलाजतु । इत्यमरः । २ । ६ । १०४ ॥ (यथास्य पर्य्यायाः ।
"शिलाजत्वद्रिजतु च शैलनिर्य्यास इत्यपि ।
गैरेयमश्मजञ्चापि गिरिजं शैलधातुजम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
गुणास्तु शिलाजतुशब्दे ज्ञेयाः ॥) गिरिजाते त्रि ॥

गोकण्टकः, पुं, (गोः पृथिव्याः कण्टक इव ।) गोक्षुरकवृक्षः । (अस्य पर्य्यायाः यथा,—
"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनश्रृङ्गाट इत्यपि ॥
पलङ्कषा चदंष्ट्रा च तथा स्यादिक्षुगन्धिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

स्पुटः। गवां खुरम्। इति विश्वमेदिन्यौ॥ गोखुरैः स्पुटीकृतः। इति हेमचन्द्रः॥ विकटकण्टकवृक्षः। इति राजनिर्घण्टः॥

गोकर्णः, पुं. (गोः कर्ण इव। तत्तुल्यपरिमाणत्वादस्य तथात्वम्।) परिमाणविशेषः। स तु अनामिकायुक्तविस्तृताङ्गुष्ठम्। (गोः कर्णाविव कर्णौ यस्य।) रुद्रभेदः। इत्यमरः। २।५।१०॥ (यथा च अनर्घराघवे। २। २३।

"मुनिविनियोगविलूनप्ररूढदुग्धाङ्गलानि बर्हीणि।
गोकर्णतर्णकोऽयं तर्णोत्युपकण्टकच्छेदु॥"

अस्य मांसगुणा यथा,—

"गोकर्णमांसं मधुरं स्निग्धं लघु कफापहम्।
विपाके मधुरत्वापि रक्तपित्तविनाशनम्॥"

इति सुश्रुते सूत्रस्थाने ६४ अध्यायः॥) अश्वतरः। (गौरश्वतुरेव कर्णौ यस्य।) सर्पभेदः। (गोरिव कर्णौ यस्य।) गणदेवताविशेषः। इति मेदिनी। णे। ४६॥ तीर्थविशेषः। यथा, भागवते।

"ततोऽभिव्रज्य भगवान् केरलांस्तु त्रिगर्तकान्। गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः॥" (पीठस्थानम्। यथा, देवीभागवते।७।३०।६०।

"केदारपीठे सम्प्रोक्ता देवीसन्मार्गदायिनी। मन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका॥")

गोकर्णी, स्त्री, (गोः कर्ण इव पत्रमस्याः। "पाकर्कर्कपर्णपुष्पफलमूलवालोत्तरपदाच्च।" ४।१। ६४। इति ङीष्।) मूर्वालता। इत्यमरः। २।४।८४॥ (विष्टतिरस्या मूर्वाशब्दे ज्ञातव्या॥)

गोकिराटिका, स्त्री, (गां वाचं किरति रटतीत्यर्थः। कॄ+"इगुपधज्ञाप्रीकिरः कः।" ३।१। १३५। इति कः। ततस्टाप् गोकिरा। तथा सती अटतीति। अट्+ण्वुल्। ततस्टाप् अत इत्वच।) सारिकापक्षी। इति हेमचन्द्रः॥

गोकिराटी, स्त्री, (गोकिरा वाचं रटन्ती सती अटतीति। अट गतौ+"कर्म्मण्यण्।" ३।२।१। इत्यण्। गौरादित्वात् ङीष्।) सारिकापक्षी। इति राजनिर्घण्टः॥

गोकिलः, पुं. (गोः पृथिव्याः कील इव। निपातनात् ह्रस्वः।) सुवर्णम्। हलम्। इति हेमचन्द्रः॥

गोकीलः, पुं, (गोः पृथिव्याः कील इव।) सुवर्णम्। हलम्। इति शब्दरत्नावली॥ २५५॥

गोकुलं, क्ली, (गोः कुलम्।) गोसमूहः। तत्पर्य्यायः। गोधनम् २ गवांव्रजः ३। इत्यमरः। २। ९। ५८॥ (यथा, रामायणे। २।६।१७।

"गोकुलाकुलतीरायाः तमसायाः विदूरतः।
अवसत् तत्र तां रात्रिं रामः प्रकृतिभिः सह॥")

गोस्थानम्। यथा, तिथ्यादितत्त्वे।

"भोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः।
अमीमांसानि शौचानि स्त्रीषु बालातुरेषु च॥"

मथुरैकदेशे श्रीनन्दस्य वासस्थानम्। यथा,—

"कालेन व्रजता तात! गोकुले रामकेशवौ।
जानुभ्यां सह पाणिभ्यां रिङ्गमाणौ विजह्रतुः॥"

इति श्रीभागवतम्॥

(अत्र प्रदेशे महादेवो गोपीश्वर इत्याख्यया प्रसिद्धो विराजते। यदुक्तं महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे,—

"गोकुले गोपिनीपूज्यो गोपीश्वर इतीरितः॥"

पुं, स्वनामख्यातः पण्डितविशेषः। अयन्तु सप्तदशशतपरिमितशकाब्दसमत्सरप्रारम्भे एव मिथिलादेशान्तर्वर्त्तिनि 'मगरौणी' संज्ञकग्रामे विद्यानिधिपौताम्बरपण्डितात् जातः इति मैथिलाः। अद्यावधि ज्ञाता अनेन विरचिता ग्रन्थास्सन्ति। १ दीधितिविद्योतः (शिरोमणिटीका।) २ न्यायसिद्धान्ततत्त्वम्। ३ पदवाक्यरत्नाकरः। ४ मासमीमांसा। ५ मिथ्यात्वनिरुक्तिः। ६ रश्मिचक्रम् (चिन्तामणिटीका। ७ रसमञ्जर्यर्थः। ८ लाघवगौरवरहस्यम्। ९ शिवशतकम्॥)

गोकुलिकः, त्रि, (गोर्नेत्रस्य कुलं चञ्चलभावः प्रखरदृष्टिपातुर्य्यमित्यर्थः। तदस्यास्तीति। "अत इनिठनौ।" ५। २। ११५। इति ठन्।) कैकरः। (पङ्क्तिपतिते गवि कुलिकः उपेक्षकत्वात् जड़ इव।) पङ्क्त्यगत्युपेक्षकः। इति मेदिनी। के। १८६॥

गोक्षतं, क्ली, (गोभिः क्षतम् उच्चरितम्। क्ष+भावे क्तः। क्षद्विहितो भावो द्रव्यवत् प्रकाशते इति न्यायात् गोपुरोधमित्यर्थः।) गोमयम्। इति शब्दचन्द्रिका॥

गोक्षुरः, पुं, (क्षुरति विलिखतीति। क्षुर विलेखने+"इगुपधज्ञेति।" ३। १। १३५। इति कः। ततो गोः पृथिव्याः क्षुरः अस्त्रविशेष इव। बहुकण्टकाकीर्णत्वात् तथात्वम्।) क्षुद्रक्षुपविशेषः। स तु क्षुद्रदृढ़त्वेन द्विविधः। गोखुरि इति गोखुद इति च भाषा॥ तत्पर्य्यायः। त्रिकण्टः २ स्थलशृङ्गाटः ३ गोकण्टः ४ त्रिकण्टकः ५ त्रिपुटः ६ कण्टकफलः ७ क्षुरः ८। इति रत्नमाला॥ गोक्षुरकः ९ पलङ्कषा १० इक्षुगन्धा ११ शृङ्गी १२ खादुकण्टकः १३ गोकण्टकः १४ वनशृङ्गाटः १५। इत्यमरः। २।४।८—९९॥ क्षुरकः १६ भक्ष्यकण्टः १७ इक्षुगन्धिका १८। इति भावप्रकाशः॥ क्षुरकः १९ शृङ्गिकः २० कण्टकी २१ भद्रकण्टः २२ बालदंष्ट्रः २३ षट्कण्टः २४ गोखुरः २५ त्रिकटः २६ त्रिकः २७ इक्षुरः २८। इति शब्दरत्नावली॥ अस्य गुणाः सुश्रुतोक्ताः। बलप्रदत्वम्। मधुरत्वम्। दृंहणत्वम्। तच्छ्राक्षरीभेदविदाहनाशित्वम्। रसायनत्वम्। तत्र दृढ़तो गुणोत्तरत्वच्च। इति राजनिर्घण्टः॥ खादुत्वम्। वस्तिशोधनत्वम्। दीपनत्वम्। पुष्टिदत्वम्। श्वासकासाशर्श्रोव्रणनाशित्वच्च। इति भावप्रकाशः॥ वायुनाशित्वम्। दृष्यत्वच्च॥ तच्छाकगुणाः। तिक्तत्वम्। दृष्यत्वम्। स्रोतोविशोधनत्वच्च। इति राजवल्लभः॥

गोक्षुरकः, पुं, (गोक्षुर+स्वार्थे कन्।) गोक्षुरः। इत्यमरः। २।४।८८॥ (अस्य पर्य्यायाः यथा,—

"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः खादुकण्टकः।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि।
पलङ्कषा शृङ्गिका च तथा स्यादिक्षुगन्धिका॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ यथा, च सुश्रुते चिकित्सितस्थाने षड्विंशेऽध्याये॥

"गुल्माफलं गोक्षुरकाच्च बीजं
तथोच्चटां गोपयसा विपाच्य।
खजाहतं शर्करया च युक्तं
पीत्वा नरो न क्षुयति सर्व्वरात्रम्॥")

गोखुरः, पुं, (खुरति विलिखतीति। खुरः अस्त्रविशेषः। गोः पृथिव्याः खुर इव।) गोक्षुरवृक्षः। इति शब्दरत्नावली॥ (गवां खुरम्।) गवां शब्दे क्ली॥

गोखुरिः, पुं, (गवां खुरिरिव।) गोक्षुरः। इति शब्दचन्द्रिका॥

गोगृष्टिः, स्त्री, (गौर्गृष्टिः गौरेव गृष्टिरित्यर्थः। जाता समासे परनिपातः।) सद्यःप्रसूता गौः। इति केचित्॥

गोगोयुगं, क्ली, (गोर्द्वित्वम्। गो+द्विगौ गोयुगच्।) गोद्वयम्। ("पशुभ्यः स्थानद्विघट्के गोद्वगोयुगषड्गवम्।" इति सुग्धबोधव्याकरणम्॥)

गोगोष्ठं, क्ली, (गोः स्थानम्। गो+स्थाने गोष्ठच्।) गोस्थानम्। इति सुग्धबोधव्याकरणम्॥

गोग्रन्थिः, पुं, (गोभिः ग्रथितो ग्रन्थिरिव।) करीषः। (गोर्ग्रन्थिर्वा हुल्यात् एकत्र ग्रन्थनं यत्र।) गोष्ठम्। (गोर्ग्रन्थिरिव।) गोजिङ्गिकौषधिः। इति मेदिनी। थे। १६॥

गोघ्नः, पुं, (गौर्हन्यतेऽस्मै। गो+हन्+सम्प्रदाने सूत्रविभूजादित्वात् कः।) अतिथिः। इति याज्ञिकाः॥ (गां हन्ति। हन्+कः।) गोघातके त्रि। यथा, प्रायश्चित्ततत्त्वे।

"गोघ्नवद्विहितः कल्पश्चान्द्रायणमथापि वा॥"

गोघृतं, क्ली, (गोः पृथिव्या घृतमिव ग्रस्यादिपोषकत्वात्।) दृष्टिः। इति त्रिकाण्डशेषः॥ (गोर्जातं घृतम्।) गव्यघृतञ्च॥

गोचरः, पुं, (गावः इन्द्रियाणि चरन्त्यस्मिन्। गो+चर+"गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च।" ३। ३। ११९। इति निपातनात् साधुः।) इन्द्रियार्थः। स तु रूपशब्दगन्धरसस्पर्शस्वरूपः। इत्यमरः। १। ५। ८॥ (यथा भाषापरिच्छेदे "ग्राह्यस्य गोचरो गन्धः॥"* गावश्चरन्त्यस्मिन्निति। गोचरस्थानम्। इति सिद्धान्तकौमुदी। यथा च भारविः। ४। १०।

"उपारताः पश्चिमरात्रिगोचरा-
दपारयन्तः पतितुञ्जवेन गाम्॥"

गोशब्द इन्द्रियेषु चरतीति। गो+चर्+पचाद्यच्। इन्द्रियप्रत्यक्षीभूतविषयः। यथा, वेदान्तसारे।

"अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्॥"

देशः। यथा, हेः रामायणे। २। ८५। ५।
"अब्रवीत् प्राञ्जलिर्भूत्वा गुहो गहनगोचरः॥"
"गहनं वनं गोचरो देशो यस्य सः।" इति तत्कौलाद्रामायणः॥) ऋक्षराक्षसाधिष्ठिताक्रान्तराशीनां संज्ञा। यथा,—
"गोचरे वा विलग्ने वा ये ग्रहारिरिःस्थिताः।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः॥"
अपि च।
"अष्टवर्गशुभैः श्रीमान् कर्म्म कुर्य्यान्नभश्चरैः।
गोचरस्थैस्तदाप्तौ तदाप्तौ तु वेधगैः॥"
गोचरशुद्धिर्यथा,—
"केतूपग्रवभौमसन्द्गताः षष्ठत्रिसंस्थाः शुभाः
चन्द्रार्कावपि ते च तौ च दशमौ चन्द्रः पुनः सप्तमः।
जीवः सप्तनवद्विपञ्चमगतो युग्मेषु सोमात्मजः
शुक्रः षड्दशसप्तवर्जमितरे सर्व्वेऽप्युपान्ते शुभाः॥"
इति दीपिका॥
(अथ ग्रहाणां गोचरगतफलम्। यथा,—
सुधस्य गोचरफलम्।
"स्थानं जन्मनि नाशयेद्दिनकरः कुर्य्याद्द्वितीये भयम्।
दुश्चिक्ये श्रियमातनोति हिबुके मानक्षयं यच्छति॥
दैन्यं पञ्चमगः करोति रिपुहा षष्ठेऽर्थदः सप्तमे।
पीड़ामष्टमगः करोति नितरां कान्तिक्षयं धर्म्मगः॥
कर्म्मस्थद्विजनकस्तु कर्म्मगो
वित्तस्थद्विजदयायसंस्थितः।
व्रजनाशजनितां महापदं
यच्छति व्ययगतो दिवाकरः॥"
चन्द्रस्य गोचरफलम्।
"जन्मन्यर्थं दिशति हिमगुर्व्वित्तनाशं द्वितीये
दद्याद्दुःखं सहजभवने नेत्ररोगं चतुर्थे।
कार्य्यभंशं तनयसहगो वित्तलाभञ्च षष्ठे
द्यूने द्रव्यं युवतिसहितं रत्नसंस्थोऽथ रत्नम्॥
नृपभयं कुरुते नवमः सुधी
दशमधामगतस्तु महत् सुखम्।
विविधमायगतः कुरुते धनं
व्ययगतस्तु रुजं सधनक्षयम्॥"
मङ्गलस्य गोचरफलम्।
"प्रथमसहगः क्षौणीसूनुः करोत्यरिनं भयं
क्षपयति धनं वित्तस्थाने द्वितीयगतोऽर्थदः।
अरिभयकरः पातालेऽस्तु स्त्रियोगति च पञ्चमः
रिपुसहगतो धत्ते वित्तं सुखं मदनस्थितः॥
जनयति मरणस्थः सूनुवार्धां धराजो
दिशति च नवमस्थो कार्य्यपीड़ामतीव।
शुभमपि दशमस्थो लाभगो भूरिलाभं
व्ययभवनगतोऽसौ बाधनर्थार्थनाशान्॥"
बुधस्य गोचरफलम्।
"बुधः प्रथमधामगो दिशति वन्धमर्थे धनं
वधं रिपुभवान्वितं सहजगश्चतुर्थोऽर्थदः।
अनिष्टतिकरो भवेत्तनयगोऽरिगः स्यात्सदः
करोति मदनस्थितो बहुविधां शरीरापदम्॥
अरमे शुभ्रिसुते धनलब्धि-
र्धर्म्मगोऽतिमहतीं तनुपीड़ाम्।
कर्म्मगः शुभमथायगतोऽर्थे
द्वादशे भवति वित्तविनाशः॥"
गुरोर्गोचरफलम्।
"भयं जन्मन्यार्य्यो जनयति धनस्थोऽर्थमतुलं
तृतीयेऽङ्गक्लेशं दिशति च चतुर्थेऽर्थविलयम्।
सुखं पुत्रस्थानेऽशुभमपि च कुर्य्यादरिगृहे
गुरुर्द्यूने पूजां धननिचयनाशञ्च निधने॥
धर्म्मगतो धनवृद्धिकरः स्यात्
प्रीतिहरो दशमेऽमरपूज्यः।
स्थानधनानि ददाति स चाये
द्वादशगस्तनुमानसपीड़ाम्॥"
शुक्रस्य गोचरफलम्।
"जन्मन्यतिभयकरो भृगुजोऽर्थदोऽर्थे
दुश्चिक्यगः शुभकरो धनदश्चतुर्थे।
स्यात् पुत्रदस्तनयगोऽरिगतोऽरिवृद्धिं
शोकप्रदो मदनगो निधनेऽर्थदाता॥
जनयति विविधाम्बराणि धर्म्मे
न शुभकरो दशमस्थितस्तु शुक्रः।
धननिचयकरस्तु लाभसंस्थो
व्ययभवनेऽपि धनागमं करोति॥"
शनेर्गोचरफलम्।
"वित्तभंशं सदार्हं दिनकरतनयो जन्मराशिं प्रपन्न-
श्चित्तक्लेशं द्वितीये रिपुहननकृतं वित्तलाभं तृतीये।
पाताले शत्रुवृद्धिं सुतभवनगतः पुत्रभद्यादिनाशं
षष्ठस्थानेऽर्थलाभं जनयति मदने देहसङ्गात्तमार्त्तिः॥
शरीरपीड़ां निधनेऽथ धर्म्मे
धनक्षयं कर्म्मणि दौर्म्मनस्यम्।
उपान्त्यगो वित्तमनर्थमन्ते
शनिर्ददातीत्यवदत् सुतत्तः॥"
राहोर्गोचरफलम्।
"जन्मान्त्यपञ्चवसुरन्ध्रनवद्विसप्त-
राशौ स्थिते यदि भवेदसुरः कदापि।
अर्थक्षयं रिपुभयं बहुकार्य्यहानिं
रोगप्रवासमरणाधिभयं करोति॥"
केतोर्गोचरफलम्।
"एकादशत्रिदशषड्गते नराणां
सम्मानभोगनृपमानसुखार्थदाता।
आज्ञाकराश्च पुरुषाः प्रमदाश्च नित्यं
सौख्योदयं दिशति पुण्यचयश्च केतुः॥"
अन्यत्सर्व्वं ग्रहशब्दे द्रष्टव्यम्॥)

गोचर्म्म, [न्] क्ली, (गोश्चर्म्म।) गवां त्वक्। कर्म्मविशेषे तदासनविधिर्यथा,—
"मेषासनन्तु वज्राय मार्जारौ व्याघ्रचर्म्म च।
व्याघ्रौ रुरुजिनं भद्रं मोक्षार्थं व्याघ्रचर्म्म च॥
गोचर्म्मसम्भवे देवि! सम्भवे वाजिचर्म्म च॥"
इति समयाचारतन्त्रे २ पटलः॥ * ॥
परिमाणविशेषः। यथा,—
"यत् किञ्चित् कुरुते पापं ज्ञानतोऽज्ञानतोऽपि वा।
अपि गोचर्म्ममात्रेण भूमिदानेन शुध्यति॥"
गोचर्म्मलक्षणञ्च हरिव्रतिना दर्शितम्। यथा,—
"सप्तहस्तेन दण्डेन त्रिंशद्दण्डैर्निवर्त्तनम्।
दश तान्येव गोचर्म्म दत्त्वा स्वर्गे महीयते॥"
इति मिताचरायां आचाराध्यायः॥

गोच्छालः, पुं, (गां भूमिं छादयतीति। छद + णिच् + अण्। पृषोदरादित्वात् साधुः।) कुलाहलवृक्षः। इति रत्नमाला॥ कोकणिमा इति भाषा॥

गोजलं, क्ली, (गवि जातं जलम्।) गोमूत्रम्। इति राजनिर्घण्टः॥ (यथा, गारुड़े १८० अध्याये।
"गोजलेनैव पूरेण कर्णस्रावो विनश्यति॥")

गोजा, स्त्री, (गवि पृथिव्यां जायते इति। गो + जन् + "जनसनखनक्रमगमो विट्।" ३। २। ६७। इति विट्। "विड्नोरिति।" ६। ४। ४१। इति आत्वञ्च।) गोलोमिकावृक्षः। इति राजनिर्घण्टः॥

गोजागरिकं, क्ली, (गोषु इन्द्रियेषु जागरः अप्रमादोऽस्यस्य ठन्।) मङ्गलम्। इति मेदिनी। के। २२७॥

गोजागरिकः, पुं, (गवि पृथिव्यां जागरिकः प्रहरीव। अस्त्रवत्कण्टकान्वितत्वादस्य तथात्वम्।) कण्टकारिका। इति मेदिनी। के। २२७॥

गोजापर्णी, स्त्री, (गोजं दुग्धं तद्वत् आपर्णयति सुखवर्णी भवतीति। आ + पर्ण + अच्।) गौरादित्वात् ङीष्।) दुग्धफेनीवृक्षः। इति राजनिर्घण्टः॥

गोजिह्वा, स्त्री, (गोर्जिह्वेव।) क्षुपविशेषः। गोजियाशता इति दारियाग्राक इति च भाषा। तत्पर्य्यायः। दार्व्विका २। इत्यमरः। २। ४। ११६॥ दर्व्विका ३। इति भरतः॥ दार्व्विपत्रिका ४। इति रत्नमाला॥ खरपत्री ५ वातोगा ६ अधोमुखा ७ अनड्वाहिका ८ अधःपुष्पी ९ दर्व्वी १० गोजिह्विका ११। इति शब्दरत्नावली॥ अपि च भावप्रकाशे।
"गोजिह्वा गोजिका गोभी दार्व्विका खरपर्णिनी।
गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत्॥
हृद्या प्रमेहकासास्रव्रणव्रणहरी लघुः।
कोमला तुवरी तिक्ता स्वादुपाकरसा स्मृता॥"
अस्या गुणाः। कटुत्वम्। तीक्ष्णत्वम्। शीतलत्वम्। पित्तसर्व्वदन्तिविषाग्निनाशित्वम्। व्रणसंरोपणत्वञ्च। इति राजनिर्घण्टः॥ (अस्या अवहारो यत्र तद्यथा,—
"सोमवल्लीऽम्बकर्णश्च गोजिह्वा हंसपद्यपि।
रजन्यौ गैरिकं क्षीरो नखदन्तविषापहः॥"
इति वैद्यकचक्रपाणिसंग्रहे विषाधिकारे॥)
गवेधुका। इति रत्नमाला॥ गड़गड़ इति भाषा॥

गोजिह्विका, स्त्री, (गोजिह्वेव गोजिह्वा स्वार्थे कन्। अत इत्वञ्च।) गोजिह्वा लता। इति शब्दरत्नावली॥

गोड़ः, पुं, (गोरङ्ग इव। पृषोदरादित्वात् साधुः।) गोरङ्गः। स तु नाभौ प्रवृद्धमांसगुड़कः। इति लिङ्गादिसंग्रहटीकायां भरतः॥

गोड़ुम्बः, पुं, (गां भुवं तुम्बति व्यर्थतीति। गो+तुम्ब+कः। पृषोदरादित्वात् साधुः।) भूमिर्भृङ्गः। इति मेदिनी। बे। १२॥ तरमुज इति ख्यातः॥

गोड़ुम्बा, स्त्री, (गोड़ुम्ब+स्त्रियां टाप्।) गवादनी। इति मेदिनी। बे। १२॥ गोसुक इति ख्याता गोमा इति राजगोसुक् इति च ख्याता इत्यैके। इति भरतः॥ तत्पर्य्यायः। चित्रा २ गवाक्षी ३। इत्यमरः। २। ४। १५६॥ गोड़ुम्बिका ४। इति रत्नमाला॥

गोड़ुम्बिका, स्त्री, (गोड़ुम्ब+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च।) गोड़ुम्बा। इति रत्नमाला॥

गोणी, स्त्री, (गवादिगुणाद् जातः गोणः। निपातनादुकारस्य गुणः। गोणगुणात् आवपनेऽर्थे "जानपदकुण्डगोणीति।" ४। १। ४२। इति ङीष्।) धान्यादिवहनार्थाधारविशेषः। इति शब्दबोधम्। गुण इति भाषा॥ द्रोणीपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, सुश्रुते चिकित्सितस्थाने चतुर्थाध्याये।

"विड्वालनकुलोष्ट्राणां चर्म्मगोण्यां न रङ्गयेत्।
प्रवेण्यवेष्ट्रा खण्डं वाक्षवेणोपनाहितम्॥"

"शूर्पाभ्याञ्च भवेद्द्रोणी वाहो गोणी च वा स्मृता।
मागधञ्चाढकञ्चैव कुड़वः प्रस्थमाढकम्।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणाः॥"

इति श्रीधरेण पूर्व्वखण्डे प्रथमेऽध्याय उक्तम्॥

"गोणी शूर्पद्वयं विद्यात् खारी भारीत्यथैव च।
द्वात्रिंशतं विजानीयात् वाहं शूर्पाणि बुद्धिमान्॥"

इति कल्पस्थाने द्वादशेऽध्याये चरकेणोक्तम्॥) छिद्रवस्त्रम्। तत्पर्य्यायः। ग्रन्थी २। इति हेमचन्द्रः। ३। ३४३॥

गोण्डः, पुं, (गोः अण्ड इव।) नाभौ वृद्धमांसगुड़कः। इति लिङ्गादिसंग्रहे अमरः। ३। ५। १८॥ गेंड़ इति भाषा। पामरजातिः। वृद्धनाभियुक्ते त्रि। इति मेदिनी। डे। ११॥ अस्य रूपान्तरं गोड़ः, गौड़ः। इत्यमरटीका॥

गोतमः, पुं, (गोभिर्धर्म्मं तमो यस्य। पृषोदरादित्वात् साधुः। एतन्निरुक्तिर्यथा, महाभारते। १३। ६३। ६५।

"गोदमोऽहमतोऽधूमोऽदमस्ते समदर्शनात्।
गोभिस्तमो मम ध्वस्तं जातमात्रस्य देहतः।
विद्धि मां गोतमं तस्मे यातुधानि! निबोध माम्॥")

गौतमसुनिः। स तु ब्रह्मपुत्रः। इति गयामाहात्म्ये वायुपुराणम्॥

गोतमान्वयः, पुं, (गोतमोऽन्वयो वंशप्रवर्त्तको यस्य।) शाक्यमुनिः। इति हेमचन्द्रः॥

गोतल्लजः, पुं, (प्रशस्तो गौः "प्रशंसावचनैश्च।" २। १। ६६। इति कर्म्मधारयः।) उत्तमगौः। गोषु मध्ये तल्लजः प्रशस्तः इति वा व्युत्पत्तिः॥

गोत्रं, क्ली, गवते शब्दयति पूर्व्वपुरुषान् यत्। इति भरतः॥ (गु+"गुधृवीपचीति।" उणां। ४। १६६। इति त्रः।) तत्पर्य्यायः। सन्ततिः २ जननम् ३ कुलम् ४ अभिजनः ५ अन्वयः ६ वंशः ७ अन्ववायः ८ सन्तानः ९। इत्यमरः। २। ७। १॥ आख्या। (यथा, कुमारे। ४। ८।

"सरसि सारमेखलागुणे-
धृत गोत्रस्खलितेषु बन्धनम्॥")

सम्भावनीयबोधः। कानगनम्। चेचम्। वर्त्म। इति मेदिनी। रे। २६॥ क्षेत्रम्। इति हेमचन्द्रः॥ संघः। दृष्टिः। इति शब्दचन्द्रिका॥ वित्तम्। इति विश्वः॥ *॥ "वंशपरम्पराप्रसिद्धं आदिपुरुषं ब्राह्मणरूपम्। क्षत्रियवैश्यशूद्राणामतिदिष्टातिदिष्टगोत्रं शूद्रस्यातिदिष्टातिदिष्टगोत्रम्।" इत्युद्वाहतत्त्वम्॥ क्षत्रियवैश्यशूद्राणामतिदिष्टातिदिष्टगोत्रप्रवरमतएवैतेषां पुरोहितगोत्रप्रवरमित्यर्थः। तथा चाग्निपुराणे वर्णसङ्करोपाख्याने।

"क्षत्रियवैश्यशूद्राणां गोत्रञ्च प्रवरादिकम्।
तथान्यवर्णसङ्कराणां येषां विप्राश्च याजकाः॥"

गोत्राणि तु चतुर्व्विंशतिः तथा च मनुः।

"भृगवङ्गिरसोऽत्रिश्च पुलस्त्यः पुलहः क्रतुः।
वसिष्ठः काश्यपो गर्ग्यो मरीचिश्च्यवनोऽभिजित्॥
विश्वामित्रः कृशिकश्च कौशिकश्च तथापरः।
धृतकौशिकमौद्गल्यौ आलम्बायनपराशरौ।
सौपायनश्चयास्कश्च वासुकी रोहितस्तथा।
वैयाघ्रपद्यकश्चैव नामदेयास्तथापरः।
चतुर्व्विंशतिर्वै गोत्रा कथिताः पूर्व्वपण्डितैः॥"

तथा च मनुः।

"जमदग्निर्भरद्वाजो विश्वामित्रोऽथ गौतमः।
वशिष्ठकाश्यपावत्रेः सप्तैते गोत्रकारिणः॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते॥"

एतदुपलक्षणमन्येषामपि दर्शनात्। तथा च।

"सौकालीनकमौद्गल्यौ पराशरदृढस्मृती।
काश्यपो विष्णुकौशिक्यौ कात्यायनाचैय-
काश्यकाः॥
लक्षायनेयः साङ्कृतिश्च कौण्डिल्यो गर्गसंज्ञकः।
आङ्गिरस इति ख्यातः अनावृकाश्यसङ्गतः॥
अथर्वणैमिनिवृद्धाख्याः शाण्डिल्यो वात्स्य
एव च।
सावर्ण्यालम्बायनवैयाघ्रपद्यश्च धृतकौशिकः॥
शक्तिः काक्षायणश्चैव वासुकी गौतमस्तथा।
शुनकः सौपायनश्चैव शुनयो गोत्रकारिणः॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते॥"

सर्व्वे चत्वारिंशद्गोत्राः। इति कुलदीपिकाधृतधनञ्जयशतधर्म्मप्रदीपः॥ (मेघः। इति निघण्टुः। १। १०। यथा, ऋग्वेदे। १। ५१। ३।

"त्वं गोत्रमङ्गिरोभ्योऽवृणोरपोतात्रये धृत-
दुरेषु गातुवित्॥")

गोत्रः, पुं, (गां पृथिवीं त्रायते रक्षतीति। गो+त्रै+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) पर्व्वतः। इत्यमरः। २। ३। १३॥ (यथा, भागवते। २। ६। ६।

"गात्रो नदनदीनान्तु गोत्राणामस्थिसंहतिः॥")

गोत्रजः, त्रि, (गोत्रे जायते इति। गोत्र+जन्+डः।) गोत्रोत्पन्नः। स तु जन्मनामस्तुतिपर्य्यन्तसमानोदकभावात् पञ्चाब्दवति। इति शुद्धितत्त्वम्॥ (यथा, याज्ञवल्क्ये। २। १३८।

"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः॥")

गोत्रभित्, [द्] पुं, (गोत्रं पर्व्वतं भिनत्तीति। "सत्सूद्विषेत्यादि।" ३। २। ६१। इति क्विप्। ततस्तुगागमः।) इन्द्रः। इत्यमरः। १। १। ४५॥ (यथा, ऋग्वेदे। ६। १७। २।

"यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः
स इन्द्र चित्रो अभिष्टिधि वाजान्॥"

यथा च भट्टौ। १। ३।

"सहासनं गोत्रभिदाध्यवात्सीत्॥")

गोत्रदृष्टः, पुं, (गोत्रजातः पर्व्वतजातो दृष्टः।) धन्वनदृष्टः। इति भावप्रकाशः॥

"धन्वजस्तु धनुर्वृक्षो गोत्रदृष्टः सुतेजनः।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

गोत्रा, स्त्री, (गाः पशून् सर्व्वान् जीवागित्यर्थः त्रायते इति। त्रै+कः। स्त्रियां टाप् च।) पृथिवी। (गवां समूहः। "इनित्रकट्यचच्।" ४। २। ५१। इति त्रः। टाप् च।) गोसमूहः। इति मेदिनी। रे। २६॥ (गायत्रीस्वरूपा महादेवी। यथा, देवीभागवते। १२। ६। ४१।

"गन्धर्व्वी गह्वरी गोत्रा गिरिज्ञा गहना गमी॥")

गोदः, पुं, (गा इन्द्रियाणि दायति शोधयतीति। गो+दै+कः।) मस्तकस्नेहः। मस्तिष्कम्। इति हेमचन्द्रः॥ (गाः ददातीति। +दा+कः।) गोदातरि त्रि। इति शब्दबोधम्॥ (यथा, मनुः। ४। २३१।

"वासोदध्नश्चसालोक्यमश्विसालोक्यमश्वदः।
अनड्वाहः श्रियं पुष्टां गोदो ब्रह्मस्य पिप्पलम्॥")

गोदन्तं, क्ली, (गोदन्त इव अवयवो विद्यते यस्य।) हरितालम्। इति राजनिर्घण्टः॥ (हरितालशब्दोऽस्य गुणादयो बोधव्याः॥)

गोदा, स्त्री, (गां जलं स्वर्गं वा ददाति ज्ञानेनेति। गो+दा+कः। स्त्रियां टाप्।) गोदावरी नदी। इति हेमचन्द्रः। ४। १५०॥ (गायत्रीस्वरूपा महादेवी। यथा, देवीभागवते। १२। ६। ४३।

"गन्धर्व्वप्रहारिणी गोदा गोकुलस्था गदाधरा॥"

गाः ददातीति। दा+क्विप्। गोदातरि त्रि। यथा, ऋग्वेदे। १। ४। २।

"गोदा इद्रेवतो मदः।"

"गोदावस्तुरिन्द्रियव्यवहारप्रदः।" इति दयानन्दभाष्यम्॥)

गोदारणं, क्ली, (गौर्भूमिर्दार्य्यतेऽनेनेति। गो+दॄ+णिच्+करणे ल्युट्।) लाङ्गलम्। इत्यमरः। २। ८। १४॥ कुदालः। इति हेमचन्द्रः। ८। ५५६॥

गोदावरी, स्त्री, (गां जलं स्वर्गं वा ददातीति गोदा। तासु वरी श्रेष्ठा। वर+ङीष् संज्ञायाम्। यद्वा गां स्वर्गं ददाति। गो+दा+बिच्+ङीप् रान्तादेशश्च।) नदीविशेषः। (अस्या उत्पत्तिकथा यथा, ब्रह्मवैवर्त्ते। १०। १२६—१३०।

"गच्छन्तीं तीर्थयात्रायां ब्राह्मणीं रविनन्दनः। ददर्श कामुकः श्रान्तः पुष्पोद्याने च निर्जने॥ तया निवारितो यत्नात् कालेन बलवान् सुरः। अतीवसुन्दरीं दृष्ट्वा वीर्य्याधानं चकार सः॥ हृतं तत्याज गर्भं सा पुष्पोद्याने मनोहरे। सद्यो बभूव पुत्रश्च तप्तकाञ्चनसन्निभः॥ सपुत्रा स्वामिनो गेहं जगाम क्रीड़िता तदा। स्वामिनं कथयामास यन्मार्गे देवसङ्कटम्॥ विप्रो रोषेण तत्याज तच्च पुत्रं स्वकामिनीम्। सरिद् बभूव योगेन सा च गोदावरी स्मृता॥") तत्पर्य्यायः। गोदा २। इति हेमचन्द्रः॥ गौतमसम्भवा ३ ब्राह्मण्यादिजाता ४ गौतमी ५। (यथा, हितोपदेशे।

"अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः॥") इयमेव पीठस्थानविशेषः। अत्र देवी त्रिसन्ध्यासूर्य्याविराजते। यथा, देवीभागवते। ७।३०।६८।

"गोदावर्य्यां त्रिसन्ध्यं तु गङ्गाद्वारे रतिप्रिया॥") अस्या जलस्य गुणाः। पित्तार्शिरक्तार्शिवायुपापकुष्ठादिदुष्टामयदोषत्रयाणाग्नित्वम्। परमपथ्यत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥

गोदुग्धदा, स्त्री, (गवां दुग्धं ददाति आधिक्येन सम्पादयतीति। गो+दा+कः। तद्गुणेन गवां दुग्धवर्द्धनादस्यास्तथात्वम्।) चण्डिकाकल्पम्। इति राजनिर्घण्टः॥

गोदोहनी, स्त्री, (गावो दुह्यन्तेऽस्यामिति। गो+दुह्+अधिकरणे ल्युट्।) गोदोहनपात्रम्। तत्पर्य्यायः। पारी २। इति जटाधरः॥

गोद्रवः, पुं, (द्रवति स्रवतीति। द्रु+अच् द्रवः। गवां द्रवः।) गोमूत्रम्। इति राजनिर्घण्टः॥

गोधनं, क्ली, (गवां धनं समूहः।) गोसमूहः। इत्यमरः। २।९।५८॥ (यथा, रामायणे। २। ३२। ४२।

"स आत्मनो दृढां कर्त्तां बद्धा सम्भ्रान्तमानसः। दण्डमुद्यम्य सहसा प्रतस्थे गोधनं प्रति॥")

गोधनः, पुं, (धन ग्रन्थे भावे ल्युट् धनं ग्रन्थः। गोर्वै तस्यैव धनं ग्रन्थो यस्य।) स्थूलग्रन्थवान्। इति हरिवंशः॥ तुक्ता इति भाषा॥

गोधा, स्त्री, (गुध्यते परिवेष्ट्यते बाहुर्यया। गुध्+"हलश्चेति।" करणे घञ्।) धनुर्गुणाघातवारणाय प्रकोष्ठबद्धा चर्म्मकृतपट्टिका। तत्पर्य्यायः। तला २ व्याघातवारणा ३। इत्यमरः। २। ८। ८४॥ तलम् ४। इति तट्टीका॥ (यथा, महाभारते। ३। १७। ३।

"विचित्रपत्रादर्यश्चापि धनुः श्रेष्ठं महाबलेः। तूणश्चबड्गधरः शूरो बद्धगोधाङ्गुलित्रवान्॥") जन्तुविशेषः। गोसाप् इति भाषा॥ सा तु स्थलजलजभेदात् द्विविधा। तत्पर्य्यायः। निहाका २ गोधिका ३। इत्यमरः। १।१०।२२॥ दारुसख्याङ्का ४। (यथा, दृहत्संहितायाम्। ५४। १३।

"श्वेता गोधार्द्धनरे पुरुषे स्पृहूसरा ततः कृष्णा। पीता सिता ससिकता ततो जलं विनिर्दिशेदमितम्॥"

पक्वनखतया गोधाया मांसं भक्ष्यत्वेन ग्राह्यमित्यभिहितं मन्वादिभिर्धर्म्मशास्त्रप्रयोक्तृभिः। यथा, मनुः। ५। १८।

"श्वाविधं शल्यकं गोधां खड्गकूर्म्मशशांस्तथा। भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्राश्चैकतोदतः॥") अस्या मांसगुणाः। वातश्वासकासनाशित्वम्। इति राजनिर्घण्टः॥ पाके मधुरत्वम्। कषायत्वम्। कटुरसत्वम्। पित्तनाशित्वम्। रक्तशुक्रबलकारित्वम्। इति राजवल्लभः॥

("गोधा विपाके मधुरा कषायकटुका रसे। वातपित्तप्रशमनी हृंहण्यी बलवर्द्धनी॥"

इति चरके सूत्रस्थाने २७ अध्याये॥)

गोधापदिका, स्त्री, (गोधाया इव पादो मूलमस्याः। स्वाङ्गत्वात् ङीष्। ततः "कुम्भपदीषु च।" ५। ४। १३६। इति पद्भावः। गोधापदी। ततः स्वार्थे कन् टाप् पूर्ब्बह्रस्वश्च।) गोधापदीलता। इति शब्दरत्नावली॥

गोधापदी, स्त्री, (गोधाया इव पादो मूलं यस्याः। स्वाङ्गत्वात् ङीष्। "कुम्भपदीषु च" ५। ४। १३६। इति पद्भावः।) लताविशेषः। गोयालिया इति भाषा॥ तत्पर्य्यायः। सुवहा २। इत्यमरः। २। ४। ११६॥ हंसपदी ३ गोधाङ्घ्री ४ त्रिफला ५। इति भरतः॥ त्रिपदी ६ मधुस्रवा ७ हंसपादी ८। इति रत्नमाला॥ हंसपादिका ९ हंसाङ्घ्रिः १० रक्तपादी ११ त्रिपदा १२ घृतमण्डलिका १३ विश्वग्रन्थिः १४ त्रिपादिका १५ त्रिपादी १६ कीटमारी १७ कर्णाटी १८ ताम्रपादी १९ विक्रान्ता २० ब्रह्मदण्डी २१ पदाङ्गी २२ घृतात्रा २३ सुतपादिका २४ सञ्चारिणी २५ पदिका २६ प्रक्रान्ती २७ कीटपादिका २८ धार्त्तराष्ट्रपदी २९ गोधापदिका ३०। इति शब्दरत्नावली॥ द्विदला ३१ हंसवती ३२। इति जटाधरः॥ अस्या गुणाः। कटुत्वम्। उष्णत्वम्। विषभूतभ्रान्त्यपस्मारदोषनाशित्वम्। रसायनत्वञ्च। सुबली। तालमूली इति ख्याता। इति राजनिर्घण्टः॥

गोधास्कन्धः, पुं, (गोधेव स्कन्धोऽस्य।) विट्खदिरः। इति राजनिर्घण्टः॥

गोधिः, पुं, (गावौ नेत्रे धीयेते अस्मिन्। "कर्म्मण्यधिकरणे च।" ३। ३। ९३। इति किः।) ललाटम्। इत्यमरः। २। ६। ९२॥ (गुध्नाति कृष्णतीति। गुध्+"सर्व्वधातुभ्य इन्।" उणां। ४। ११८। इति इन्।) गोधिका। इति शब्दरत्नावली॥

गोधिका, स्त्री, (गुध्नातीति। गुध्+ण्वुल्। टाप् च्यत इत्वञ्च।) गोधा। इत्यमरः। १।१०।२२॥ गोसाप इति भाषा॥

गोधिकात्मजः, पुं, (गोधिकाया आत्मजः।) स्थूलगोधिका। गोधाग्निश्रुतुल्याकारकोटरस्थजन्तुविशेषः, तोके इति ख्यात इति भाषा। इति सारसुन्दरी॥ तत्पर्य्यायः। गौधेरः २। गौधारः ३ गौधेयः ४। इत्यमरः। २। ५। ६॥ (सर्पाद्गोधायासुतपन्ने जन्तुविशेषे इति गोधिकापुत्रशब्दार्थे शब्दार्थचिन्तामणिः॥)

गोधिनी, स्त्री, (गोधः क्रीड़ाभेदः सोऽस्त्यस्याः इति इनिः ङीप् च।) चण्डिका। सा तु दृहतीभेदः। इति राजनिर्घण्टः॥

गोधुक्, [ह्] त्रि, (गां दोग्धीति। गो+दुह्+"सत्सु द्विषद्रुहदुहयुजविदादि।" ३। २। ६१। इति क्विप्।) गोदोग्धा। इति व्याकरणम्॥ (यथा, ऋग्वेदे। १। १६४। २६।

"उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम्॥")

गोधूमः, पुं, (गुध+"गुधेरूमः।" उणां। ५। २। इति ऊमः। निपातनात् ह्रस्वः।) गोधूमः। इति शब्दचन्द्रिका॥

गोधूमः, पुं, (गुध्यते वेष्टते त्वगादिभिः। गुध+"गुधेरूमः।" उणां। ५। २। इति ऊमः।) नागरङ्गः। ओषधीविशेषः। गोहिभेदः। इति मेदिनी॥ मे। ४३। गम गोम् इति च भाषा॥ अस्य पर्य्यायः। बहुदुग्धः २ अपूपः ३ स्वेच्छभोजनः ४ यवनः ५ निस्तुषवीरः ६ रसालः ७ सुमनाः ८। (यथा, मनुः। ५। २५।

"यवगोधूमजं सर्व्वं पयसश्चैव विक्रियाः॥") अस्य गुणाः। स्निग्धत्वम्। मधुरत्वम्। वातपित्तदाहनाशित्वम्। गुरुत्वम्। श्लेष्मबलरुचिवीर्य्यकारित्वञ्च। इति राजनिर्घण्टः॥ हृंहण्यत्वम्। जीवनहितत्वम्। शीतत्वम्। भग्नसन्धानस्थैर्य्यकारित्वम्। सारकत्वञ्च। इति राजवल्लभः॥ (अथ गोधूमस्य नामानि लक्षणं गुणाश्च।

"गोधूमः सुमनोऽपि स्यात् त्रिविधः स च कीर्त्तितः। महागोधूम इत्याख्यः पञ्चाङ्गुल्यात् समागतः॥ महागोधूमः बड़ गोधूमा इति लोके। मधुली तु ततः किञ्चिदल्पा सा मध्यदेशजा। निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः॥ गोधूमो मधुरः शीतो वातपित्तहरो गुरुः। कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत् सरः॥ जीवनो हृंहणो वर्ण्यो व्रण्यो रुच्यः स्थिरत्वकृत्। कफप्रदो नवीनो न तु पुराणः। पुराण्यवगोधूमः चौद्रजाङ्गलशूलभागिति। वाग्भटेन वसन्ते ग्रहीतत्वात्। मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः। शुक्रला हृंहणी पथ्या तद्वन्नन्दीमुखः स्मृतः॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

गोधूमचूर्णं, क्ली, (गोधूमस्य चूर्णम् ।) चूर्णीकृत-गोधूमः । मयदा इति भाषा ॥ यथा,—
"शुष्कगोधूमचूर्णेन किञ्चित्पुष्टाञ्च रोटिकाम् ॥"
इति भावप्रकाशः ॥

गोधूमसम्भवं, क्ली, (सम्भवत्यस्मादिति सम्भव उत्पत्तिस्थानम् । गोधूमः सम्भवोऽस्य ।) सौवीरम् । काञ्जिकभेदः । इति राजनिर्घण्टः ॥

गोधूमसारः, पुं, गोधूमस्य सारभागः । पालो इति भाषा ॥ तत्करणविधिर्यथा । "निस्तुष-गोधूमं उदूखले कण्डयित्वा सन्ध्याकाले स्फटिकादिपात्रे जले मग्नं कारयित्वा परदिने प्रभाते उपरिस्थजलं क्रमेण दूरीकृत्य नीचस्थसारं रौद्रे शुष्कं कृत्वा पात्रान्तरे स्थापयेत् ।" इति पाकराजेश्वरः ॥

गोधूमी, स्त्री, (गां धूमयतीति । धूमि+अण् । गौरादित्वाद् ङीष् ।) गोलोमिका । इति राजनिर्घण्टः ॥ (गोलोमिकाशब्देऽस्या विवरणं ज्ञेयम् ॥)

गोधूलिः, स्त्री, (गवां खुरोत्थिता धूलिर्यत्र-काले ।) कालविशेषः । गोधूलिकालस्तु त्रिविधः । यथा, "ग्रीष्मे ग्रहास्तमिते वसन्तसमये भानौ गतेऽस्तं हेमन्ते शिशिरे प्रयाति मृदुतां पिच्छीकृते भास्करे ।
ग्रीष्मेऽर्द्धास्तमिते वसन्तसमये भानौ गतेऽस्तं सूर्ये चास्तमुपागते च नियतं वर्षाशरत्-कालयोः ॥"
इति दीपिका ॥

गोधेनुः, स्त्री, (गौरेव धेनुः ।) दुग्धवती गवी । इति संक्षिप्तसारव्याकरणम् ॥

गोधेरः, पुं. (गोधति धातूनामनेकार्थत्वात् रक्षतीति । गुध्+बाहुलकादेरक् ।) गोघ्ना । इति संक्षिप्तसारे उणादिवृत्तिः ॥

गोनन्दी, स्त्री, (गवि जले नन्दतीति । नन्द+अच् । गौरादित्वात् ङीष् ।) सारसपक्षिणी । इति हारावली ॥

गोनर्द्द, क्ली, (गवि पृथिव्यां नर्द्दते स्वनान्वा आख्यायते इत्यर्थः । नर्द्द+अप् ।) सुस्तकम् । इति मेदिनी । दे । २८ ॥

गोनर्दः, पुं. (गवि जले नर्द्दति कूजतीति । गो+नर्द्द+"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।" ३ । १ । १३४ । इति पचादित्वादच् ।) सारसपक्षी । इति मेदिनी । दे । २८ ॥ (गोभिर्वाग्भिर्नर्द्दतीति । अच् ।) देशविशेषः । यथा, हरिवंशे । १४ । १२ ।
"कङ्कटटङ्कणवनवासि-
शिविकपक्षिकारकोङ्कणाभीराः ।
आकरवैद्यावन्तक-
दशपुरगोनर्द्दकेरलकाः ॥"

गोनर्द्दस्य देशस्य राजा । "तदाजेऽपि ।" २ । ४ । ६२ । इत्यण् । गोनर्द्दराजः । यथा, राजतरङ्गिण्याम् । १ । ५७ ।
"काश्मीरेन्द्रः स गोनर्द्दो वेल्लद्भङ्गादकूलया ।
दिशा कैलासहासिन्या प्रतापी पर्य्युपास्यत ॥")

गोनर्द्दीयः, पुं, (गोनर्द्दे देशे भवः । गोनर्द्द+"दृङ् प्राच्यां देशे ।" १ । १ । ७५ । इति वृद्धसंज्ञत्वात् छः ।) पतञ्जलिमुनिः । इति हेमचन्द्रः । ३ । ५१५ ॥ (अस्य गोनर्द्ददेशोद्भूतत्वात् तथात्वम् । तद्देशभवे, त्रि ॥)

गोनसः, पुं, (गोरिव नासिका यस्य । "अन् नासिकायाः संज्ञायां नसं चास्थूलात् ।" ५ । ४ । ११८ । इति अच् नसादेशश्च ।) सर्पविशेषः । वोड़ा इति ख्यात इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । तिलित्सः २ । इत्यमरः । १ । ८ । ४ ॥ गोनासः३ घोनसः४ । इति हेमचन्द्रः ॥ मण्डली-वोड्रः ५ । इति विक्रमादित्यः ॥ वोड्रः ६ । इति शब्दरत्नावली ॥ (यथा, सुश्रुते कल्पस्थाने चतुर्थाध्याये ।
"सिलिन्दको गोनसो वृद्धगोनसः पनसी ॥")
वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

गोनाथः, पुं, (गवां नाथः ।) अनड्वान् । इति राजनिर्घण्टः ॥

गोनासं, क्ली, (गोर्नासा इव आकृतिर्यस्य । गोनसाकारत्वादस्य तथात्वम् ।) वैक्रान्तमणिः । इति राजनिर्घण्टः ॥

गोनासः, पुं, (गोर्नासा इव नासा यस्य ।) गोनस-सर्पः । इति हेमचन्द्रः । ४ । ३७२ ॥

गोनिष्यन्दः, पुं, (गोर्निष्यन्दते चरतीति । नि+स्यन्द+पचाद्यच् । यद्वा गवां निष्यन्दः । "क्षद्-विहितो भावो द्रव्यवत् प्रकाशते ।" इति न्यायात् ।) गोमूत्रम् । इति राजनिर्घण्टः ॥

गोपः, पुं, (गोर्जलात् कफपित्तादिदूषितरसात् पाति रक्षतीति । गो+पा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) वोल । (गां गोजातिं पाति रक्षतीति । गो+पा+कः ।) जातिविशेषः । गोयाला इति भाषा ॥ तत्पर्य्यायः । गोसंख्यः २ गोधुक् ३ आभीरः ४ वल्लवः ५ गोपालः ६ । इत्यमरः । २ । ९ । ५७ ॥ तस्योत्पत्तिर्यथा,—
"मणिबन्धात् तन्तुवायात् गोपजातेश्च सम्भवः ।"
इति पराशरपद्धतिः ॥
(यथा, मनुः । ८ । २६० ।
"व्याधाञ्छाकुनिकान् गोपान् कैवर्त्तान् मूलखानकान् ।
व्यालग्राहानुञ्छवृत्तीनन्त्यांश्च वनचारिणः ॥")
गोष्ठाध्यक्षः । (गां पृथिवीं पाति रक्षतीति । पा+कः ।) पृथ्वीपतिः । बहुग्रामस्याधिकृतः । इति मेदिनी । पे । ५ ॥ (गाः पाति रक्षतीति । पा+कः । गोरक्षकः । यथा, मनुः । ८ । २३१ ।
"गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम् ।
गोखाम्यनुमते भृत्यः सा स्यात् पाले भृते भृतिः ॥"

गन्धर्वविशेषः । यथा, रामायणे । ६ । ६१ । ४६ ।
"नारदस्तुम्बुरुर्गोपः प्रभया सूर्य्यवर्चसः ।
एते गन्धर्वराजानो भरतस्यानुगा जगुः ॥")

गोपः, त्रि, (गोपायति रक्षतीति । गुपू क् रक्षणे गुप+घञ्+"आयादय आर्द्धधातुके वा ।" ३ । १ । ३१ । इति अच् ।) रक्षकः । उपकारकः । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । १० । ६१ । १० । "द्विबर्हसो य उप गोपमागुरदब्धासो अप्रयुता दुदुक्षन् ॥")

गोपकः, पुं, (गोप+स्वार्थे कन् ।) वोल । बहुग्रामाधिपतिः । इति शब्दरत्नावली ॥

गोपकन्या, स्त्री, (इन्द्रियाद्युपलक्षितशरीररक्षकस्य गोपस्य वैद्यस्य कन्येव हितकारित्वात् ।) शारिवौषधिः । इति राजनिर्घण्टः ॥ (गोपस्य कन्या ।) आभीरसुता ॥ (यथा,—
"युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित् ।
कैशोरकं मानयन् वै सह ताभिर्मुमोद ह ॥"
इति हरिवंशे । ७६ । १८ ॥)

गोपघोषटा, स्त्री, (गोपप्रिया घोषटा बदरीविशेषः ।) हस्तिकोलिः । इति रत्नमाला ॥ बदरीसदृशस्वल्पफलवृक्षः । गेयाकुल इति भाषा ॥ यथा, शब्दरत्नावल्याम् ।
("बदरीसदृशाकारो वृक्षः स्वल्पफलो भवेत् ।
अटयामेव सा घोषटा गोपघोषटेति घोष्यते ॥")
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

गोपतिः, पुं (गोर्वृषभस्य पतिः । यद्वा गवां पशूनां जीवानां पतिः ।) शिवः । (यथा, महाभारते । १३ । १७ । १३ ।
"गोपालिर्गोपतिर्गोभो गोचर्म्मवसनो हरिः ॥"
गां पृथ्वीं जगदित्यर्थः पाति पालयतीति । गो+पा+डतिः । विष्णुः । यथा, महाभारते । १३ । १४६ । ६६ ।
"उत्तरो गोपतिर्गोष्ठो गोधनोऽथ पुरातनः ॥"
गोपेन्द्रनन्दनकृष्णः । यथा, हरिवंशे । ७६ । ४ ।
"अमानुषाणि कर्म्माणि पश्यामस्तव गोपते ! ॥"
असुरभेदः । यथा, महाभारते । ३ । १२ । ३५ ।
"गोपतिस्तालकेतुश्च त्वया विनिहतावुभौ ॥"
गवां रश्मीनां पतिः ।) सूर्य्यः । (यथा, भागवते । १ । १२ । १० ।
"परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ।
अक्षतेजः स्वदृशा नीहारमिव गोपतिः ॥"
गोः पृथिव्याः पतिः ।) राजा । (गवां सौरभेयाणां पतिः ।) वृषः । इति मेदिनी ॥ ते । १०७ ॥ (यथा, वृहत्संहितायाम् । ६८ । ११५ ।
"ग्राहर्क्षहंससमदद्विपगोपतीनां
तुल्या भवन्ति गतिभिः शिखिनां च भूपाः ।
येषाञ्च शब्दरहितं स्खलितं च यातं
तेऽपीश्वरा हतपरिश्रुतगा दरिद्राः ॥")
ऋषभनामौषधिः । इति राजनिर्घण्टः ॥

गोपदलः, पुं, (गोपदं गोचरगन्धासयोग्यं स्थानं लाति गृह्णातीति । गोपद+ला+कः ।) गुवाकः । इति त्रिकाण्डशेषः ॥

गोपनं, क्ली, (गुप्+भावे ल्युट्।) अपह्नवः। (यथा, महानिर्व्वाणतन्त्रे। ४। ७६।
"गोपनाद्गोपयेत् सत्यं न गुप्तिरनृतं विना।
तस्मात् प्रकाशतः कुर्य्यात् कौलिकः कुलसाधनम्॥")
कृत्सनम्। रक्षा। (यथा, राजेन्द्रकर्णपूरे।३४।
"अधिकं समाप्तसमरः प्रथितो भुवनेषु गोपनरसोत्कः॥")
आकुलत्वम्। दीप्तिः। इति कविकल्पद्रुमे गुपधात्वर्थदर्शनात्॥ तमालपत्रम्। इति राजनिर्घण्टः॥ तेजपात इति भाषा॥

गोपनीयं, क्ली, (गुप्+अनीयर्।) गोप्यम्। गोपितव्यम्। यथा,—
"स्वर्गेऽपि दुर्लभा विद्या गोपनीया प्रयत्नतः।"
इति नाड़ीप्रकाशः॥

गोपवधूः, स्त्री, (गोपस्य वधूरिव प्रियत्वात्। गोपान् बध्नाति स्वगुणेन इति वा। बन्ध+बाहुलकात् ऊन्।) शारिवा। इति भावप्रकाशः॥ गोपस्य पत्नी च॥ (यथा, गीतगोविन्दे। १। ४१।
"पीनपयोधरभारभरेण हरिं परिरभ्य सरागम्।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम्॥")

गोपभद्रं, क्ली, (गोपे भद्रमिव।) शालूकम्। इति शब्दचन्द्रिका॥

गोपभद्रा, स्त्री, (गोपानां भद्रं मङ्गलं यस्याः यस्यां वा गोपाद्यारण्यकजातिभिः पूज्यत्वादस्यास्तथात्वम्।) काश्मरीवृक्षः। इति राजनिर्घण्टः॥

गोपभद्रिका, स्त्री, (गोपभद्रा संज्ञायां कन्। टापि अत इत्वञ्च।) गम्भारीवृक्षः। इति रत्नमाला॥

गोपरसः, पुं, (गोपः गन्धद्रव्यविशेषः। गोपः रसोऽस्य। गोपः अभ्यन्तरगुग्गो रसो यस्मिन् वा।) बोलः। इति शब्दरत्नावली॥

गोपवल्ली, स्त्री, (गां पाति रक्षतीति। पा+कः। टाप्। गोपा चासौ वल्ली चेति कर्म्मधारयः।) मूर्व्वा। शारिवा। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायाः यथा,—
"गोपवल्ली करालाच सुगन्धा भद्रवल्लिका।
गोपीभद्रा तथागन्धा नागजिह्वातिशारिवा॥"
इति वैद्यकरत्नमालायाम्॥
यथा च सुश्रुत उत्तरतन्त्रे ५१ अध्याये।
"गोपवल्ल्युदके सिद्धं स्यादन्यद्दधिगुणे हृतम्॥")
शुक्लालता। इति शब्दरत्नावली॥

गोपा, स्त्री, (गां पाति रक्षतीति। पा+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः। स्त्रियां टाप्।) शुक्लालता। इत्यमरटीका शब्दरत्नावली च॥ (गाः पाति रक्षतीति। पा रक्षणे+कप्रापिविषये वासरूपन्यायेन "आतो मनिन्क्वनिप्वनिपश्च।" ३। २। ७४। इति वेन विचि अदन्तत्वाभावादाप् विधेरभावे गोपा गोरक्षाकर्त्री। गोपा विश्वपावदिति सुग्धबोधव्याकरणम्॥)

गोपानसी, स्त्री, (गोपायति रक्षति गृहमिति। गुपू रक्षणे+बाहुलकात् असट् यलोपश्चतो ङीप् च।) वड़भी। गृहाणामग्रभागे दत्तवक्रकाष्ठम्। सुदनी इति भाषा॥ इत्यमरटीकासारसुन्दरी॥ गृहचूड़ा वड़भी तच्छादनार्थं वक्रीकृत्य यत् काष्ठं दीयते सा वड़भी चतुष्किकादिचूड़ा तच्छादनाय वक्रीकृत्य यत् काष्ठं दीयते सा। इति मधुः॥ पटलाधोवंशपञ्जरम्। इति भरतः॥ कर्णिकाविष्कम्भिदारु इत्यन्ये। वक्रीभूतं धरणकाष्ठम्। इत्येके। इत्यमरटीकायां भरतः॥ (यथा, माघे। ३। ४६।
"गोपानसीषु चणमाश्रितानामालम्बिभिश्चन्द्रकिणां कलापैः।
हरिन्मणिश्यामलणालिकाभिरामैर्गृहाणि नीलैरिव यत्र रेजुः॥")

गोपायितं, त्रि, (गुपू रक्षणे। गोपाय्यते स्म इति। गोपाय+कर्म्मणि क्तः।"आयादय आर्द्धधातुके वा।" ३। १। ३१। इति आयागमश्च।) रक्षितम्। इत्यमरः। ३। १। १०६॥ (भावे क्तः रक्षणम्॥)

गोपालः, पुं, (गाः पालयतीति। गो+पाल+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) गवां पालकः। वृन्दावनस्थगोपालानां स्वरूपं यथा,
"गोपाला सुनयः सर्व्वे वैकुण्ठानन्दमूर्त्तयः॥"
इति पद्मपुराणे पातालखण्डे व्यासं प्रति श्रीकृष्णवाक्यम्॥ * ॥ (गां पृथिवीं पालयतीति। गो+पाल+अण्।) राजा। (गां पृथिवीं वेदं वा पालयतीति।) नन्दनन्दनः कृष्णः। इति मेदिनी। ले। ८६॥ * ॥ श्रीगोपालस्य ध्यानं यथा,
"अथादृश्याकोमनीलाम्बुजरुचिरवपाम्भोज-
नेत्रोऽम्बुजस्थो
बालो जङ्घाकटीरस्थलकलितरणत्किङ्किणीको
सकुन्दः।
दोर्भ्यां हैयङ्गवीनं दधदतिविमलं पायसं विम्ब-
वन्धो
गोगोपीगोपवीतो रुरुनखविलसत्कण्ठभूष-
श्चिरं वः॥"
इति तन्त्रसारः॥ * ॥
तस्य स्वरूपं यथा,—
श्रीव्यास उवाच।
"ततोऽहमब्रुवं हृष्टः पुलकोत्पुल्लविग्रहः।
त्वामहं द्रष्टुमिच्छामि चक्षुर्भ्यां मधुसूदन!॥
यत्तत् सत्यं परं ब्रह्म जगद्योनिर्जगत्पतिः।
वसन्तं वेद शिरसि चाक्षुषं नाथ! मेऽस्तु तत्॥
श्रीभगवानुवाच।
ब्रह्मणैवं पुरा दृष्टः प्रार्थितश्च यथा पुरा।
यदवोचमहं तस्मै तत्तुभ्यमपि कथ्यते॥
मामेके प्रकृतिं प्राहुः पुरुषञ्च तथेश्वरम्।
धर्म्ममेके धनञ्चैके मोक्षमेकेऽकुतोभयम्॥
शून्यमेके भावमेके परमार्थमथापरे।
दैवमेके दैवमेके ग्रहमेके मनः परे॥
बुद्धिमेके कालमेके शिवमेके सदाशिवम्।
अपरे वेदशिरसि स्थितमेकं सनातनम्॥
सच्चावं विक्रियाहीनं सच्चिदानन्दविग्रहम्।
मन्मायामोहितधियः सर्व्वकालेषु वञ्चिताः॥
कोऽपि वेद पुमान् लोके मदनुग्रहभाजनः।
पश्चाद्य दर्शयिष्यामि स्वं रूपं वेदगोपितम्॥
ततोऽपश्यमहं भूप! बालं बालार्कसुप्रभम्।
गोपकन्यावृतं गोपं हसन्तं गोपबालकैः॥
कदम्बमूलमासीनं पीतवाससमच्युतम्।
वनं वृन्दावनं नाम नवपल्लवमण्डितम्॥
कोकिलभ्रमरारावमनोभवमनोहरम्।
नदीमपश्यं कालिन्दीमिन्दीवरदलप्रभाम्॥
गोवर्द्धनं तथापश्यं कृत्वावामकरोद्धृतम्।
महेन्द्रदर्पनाशाय गोगोपालसुखावहम्॥
दृष्ट्वा विहस्य ह्यभवं सर्व्वभूतवशङ्गमः।
गोपालबालासङ्गसुदितं वेणुनादितम्॥
ततो मामाह भगवान् वृन्दावनवनः स्वयम्।
यदिदं मे त्वया दृष्टं रूपं दिव्यं सनातनम्॥
निष्कलं निष्क्रियं शान्तं सच्चिदानन्दविग्रहम्।
पूर्णं पद्मपलाशाक्षं नातः परतरं मम॥
इदमेव वदन्त्येते वेदाः कारणकारणम्।
सत्यं व्यापि परानन्दचिद्घनं शाश्वतं शिवम्॥
नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा।
यमुनां गोपकन्याश्च तथा गोपालबालकान्॥
ममावतारो नित्योऽयमत्र मा संशयं कृथाः।
ममेष्टा हि सदा राधा सर्व्वशोऽहं परात्परः॥
मयि सर्व्वमिदं विश्वं भाति मायाविजृम्भितम्॥"
इति पद्मपुराणे पातालखण्डम्॥ * ॥
द्वादशगोपालाश्चैतन्यग्रन्थे द्रष्टव्याः॥

गोपालकः, पुं, (गां पशुं जीवजातमित्यर्थः पालयति रक्षतीति। गो+पालि+ण्वुल्।) शिवः। इति त्रिकाण्डशेषः॥ श्रीकृष्णः। यथा,—
"दाता फलानामभिवाञ्छितानां
प्रागेव गोपालकमन्त्र एषः।
क्रमदीपिका॥
गोपालशब्दात् स्वार्थे कन् गोरक्षकश्च॥ (यद्वा, गवां पालकः रक्षकः। पालि+ण्वुल्। यथा, महाभारते। ३। २३६। ६।
"अथ संसारणं कृत्वा लक्षयित्वा चिरायवान्।
वृतो गोपालकैः प्रीतो बहरत् कुरुनन्दनः॥"
चक्रमहासेननृपतेः पुत्रयोरन्यतरः। यथा, कथासरित्सागरे। ११। ७४।
"जातौ द्वौ तनयौ चक्रमहासेनस्य भूपतेः।
एको गोपालको नाम द्वितीयः पालकस्तथा॥")

गोपालकर्कटी, स्त्री, (गोपालप्रिया कर्कटी फलविशेषः।) कर्कटीभेदः। गोयालकाँकरी गुरुभा इति च हिन्दी भाषा॥ तत्पर्य्यायः। वन्या २ गोपकर्कटिका ३ क्षुद्रेर्व्वारुः ४ क्षुद्रफला ५ गोपाली ६ क्षुद्रचिर्भिटा ७। अस्या गुणाः। शीतत्वम्। मधुरत्वम्। पित्तरक्तश्लेष्मश्वासमेहदाहशोषनाशित्वञ्च। इति राजनिर्घण्टः॥

गोपालिका, स्त्री, (गोपालकस्य गोरक्षकस्य पत्नी। "पालकान्तात् वा।" ४। १। ४८। इत्यस्य

वार्त्तिं इति न ङीष् अतश्चापि अत इत्वम् ।) गोपालपत्नी । इति मुग्धबोधम् ॥ कीटविशेषः । तत्पर्य्यायः । महाभीरुः २ । इति हेमचन्द्रः । ४ । २७४ ॥

गोपाली, स्त्री, (गोपालानां प्रिया । गोपाल + जातौ ङीष् ।) गोपालकर्कटी । गोरक्षी । इति राजनिर्घण्टः ॥ (गोपालस्य पत्नी । गोपाल + स्त्रियां ङीष् । गोपपत्नी ॥ स्कन्दानुचरमातृविशेषः । यथा, महाभारते । ९ । ४६ । ४ ।

"अधुना चाता च गोपाली वृद्धदम्बालिका तथा॥")

गोपाष्टमी, स्त्री, (गोपप्रिया अष्टमी । प्राक्पार्थिवादिवत् समासः ।) कार्त्तिकशुक्लाष्टमी । यथा,—

"शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी बुधैः । तद्दिने वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः ॥ तत्र कुर्य्यात् गवां पूजां गोग्रासं गोप्रदक्षिणम् । गवानुगमनं कार्य्यं सर्व्वान् कामानभीप्सता ॥"

इति कूर्म्मपुराणम् ॥

गोपिका, स्त्री, (गोप्येव स्वार्थे कन् इत्वञ्च ।) गोपी । यथा,—

"न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।"

इति श्रीभागवते । १० । ३१ । ४ ॥

(गोपायति रक्षति या । गुपू + रक्षणे + ण्वुल् । स्त्रियां टापि अत इत्वम् ।) रज्जुः ॥

गोपिनी, स्त्री, (गोपायति रक्षतीति । गुप् + णिनिः ङीप् च ।) श्यामालता । इति शब्दचन्द्रिका ॥ (वीराचारि-पञ्चाचारिणां पूजनीयनायिकाविशेषः । यदुक्तं गुप्तसाधनतन्त्रे १ म पटले ।

"नटी कापालिकी देश्या रजकी नापिताङ्गना । ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ॥"

अस्याः निरुक्तिर्यथा, कुलार्णवतन्त्रे ।

"आत्मानं गोपयेत् या च सर्व्वदा पशुसङ्कटे । सर्व्ववर्णोद्भवा रम्या गोपिनी सा प्रकीर्त्तिता ॥")

गोपिलः, त्रि, (गोपायति रक्षतीति । गुपू रक्षणे + "मिथिलादयश्च ।" उणां । १ । ५८ । इति इलच् निपातनात् किदभावः ।) गोप्ता । इति संक्षिप्तसारे उणादिवृत्तिः ॥

गोपी, स्त्री, (गोपस्य स्त्री । "पुंयोगादाख्यायाम् ।" ४ । १ । ४८ । इति ङीष्) गोपपत्नी । वृन्दावनस्थगोपीनां स्वरूपं यथा,—

"गोप्यस्तु श्रुतयो ज्ञेयाः खाधिना गोपकन्यकाः । देवकन्याश्च राजेन्द्र ! न मानुष्यः कथञ्चन ॥"

तत्र व्रजबाला यथा,—

पूर्णरसा रसमन्थरा रसालया रससुन्दरी रसपीयूषधामा रसतरङ्गिणी रसकल्लोलिनी रसवापिका अनङ्गमञ्जरी अनङ्गमानिनी मदयन्ती रङ्गविह्वला ललिता ललितयौवना अनङ्गकुसुमा मदनमञ्जरी कलावती रतिकला कलकण्ठी अलाक्षा रतोत्सुका रतिसर्व्वस्वा रतिचिन्तामणिः इत्यादयः ॥ * ॥

श्रुतिगणा यथा,—

उद्गीता रसगीता कलगीता कलस्वरा कलकण्ठिता विपञ्ची कलपदा बहुमता बहुकर्म्मसुनिष्ठा बहुहरिः बहुशाखा विशाखा सुप्रयोगतमा विप्रयोगा बहुप्रयोगा बहुकला कलावती क्रियावती इत्यादयः ॥ * ॥

मुनिगणा यथा,—

उग्रतपाः सुतपाः प्रियव्रता सुरता सुरेखा सुपर्व्वा बहुप्रदा रत्नरेखा मणिग्रीवा अपर्णा सुपर्णा मत्ता सुलक्षणा सुदती गुणवती सौकालिनी सुलोचना सुमनाः सुभद्रा सुशीला सुरभिः सुखदायिका इत्यादयः ॥ * ॥

गोपबाला यथा —

चन्द्रावली चन्द्रिका काञ्चनमाला रुक्ममालावती चन्द्रानना चन्द्ररेखा चान्द्रवापी चन्द्रमालाचन्द्रप्रभा चन्द्रकला सौवर्णमाला मल्लिमालिका वर्णप्रभा शुद्धकाञ्चनसन्निभा मालती यूथी वासन्ती नवमल्लिका मल्ली नवमल्ली शेफालिका सौगन्धिका कस्तूरी पद्मिनी कुसुद्वती रसाला सुरसा मधुमञ्जरी रम्भा उर्व्वशी सुरेखा स्वर्णरेखिका वसन्ततिलका इत्यादयः । इति पाद्मे पातालखण्डम् ॥ अस्या विवरणं लक्षाशब्दे द्रष्टव्यम् ॥ * ॥ (गोपायति रक्षतीति । गुप् + अच् + गौरादित्वात् ङीष् ।) शारिवा । रज्जिका । इति विश्वः ॥ (रज्जिनी यथा, रघुः । ४ । २० ।

"रज्जुच्छाया निषादिभ्यस्तस्य गोप्तुर्गुणोदयम् । आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥")

प्रकृतिः । यथा, गोपायति सकलमिदं गोपायति परं पुमांसं गोपीप्रकृतिरिति क्रमदीपिका ॥

गोपीथं, क्ली, (गोपायति रक्षति भवबन्धनादिति । यद्वा गाः प्रभून् पाति रक्षतीति । गुप् अथवा गो + पा + "निष्पीथगोपीथावगाथाः ।" उणां । २ । ६ । इति भावे थक्प्रत्ययेन निपातनात् साधुः ।) तीर्थस्नानम् । इति सिद्धान्तकौमुद्यामरटीकायां भरतः ॥ (गावः पिबन्त्यस्यामिति व्युत्पत्त्या जलाशयादि । इति चिन्तामणिः ॥)

गोपीथः, पुं, (गुप्यते रक्षते इति । गुप् + "निष्पीथगोपीथावगाथाः ।" उणां । २ । ६ । इति भावे थक्प्रत्ययेन निपातनात् साधुः ।) रक्षणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (यथा, ऋग्वेदे । १ । १६ । १ ।

"प्रति त्यं चारुमध्वरं गोपीथाय प्रहूयसे । मरुद्भिरग्न आ गहि ॥"

"गोपीथाय पृथिवीन्द्रियादीनां रक्षणाय ॥" इति दयानन्दभाष्यम् ॥ गां वाणीं पृथिवीं वा पातीति व्युत्पत्त्या । गो + पा + थक् । निपातनात् ईत्वम् । पक्षितः । राजा । इति कश्चित् ॥)

गोपुच्छः, पुं, (गोः पुच्छ इव आकृतिर्यस्य गोपुच्छाकारत्वादस्य तथात्वम् ।) हारभेदः । इति हेमचन्द्रः । ३ । ३२५ ॥ (वाद्यविशेषः । इति तट्टीका ॥) गोलाङ्गूलवानरः । यथा,—

"गार्दूलऋक्षगवयसंघुष्टं सिंहैर्भीमबलैर्वृतम् । ऋक्षवानरगोपुच्छैर्मार्ज्जारैश्च निषेवितम् ॥"

इति रामायणे किष्किन्धाकाण्डम् ॥

गवां लाङ्गूलच्च ॥ (यथा, बृहत्संहितायाम् । ६५ । ३५ ।

"गोपुच्छस्थे वल्मीकगेऽथवा दर्शनं भुजङ्गस्य ॥")

गोपुटा, स्त्री, (गौर्वच्चं तद्वदतिकठिनमिति भावः पुटं आच्छादनं यस्याः ।) स्थूलैला । इति राजनिर्घण्टः ॥

गोपुटिकं, क्ली, (गोः शिववृषभस्य पुटिकं आच्छादनयुक्तं गृहम् ।) शिववृषस्य मन्दिरम् । इति त्रिकाण्डशेषः ॥

गोपुरं, क्ली, (गोपायति नगरं रक्षतीति । गुप् + बाहुलकात् उरच् । यद्वा गाः पिपर्त्तीति । पॄ पालनपूरणयोः + "मूलविभुजादिभ्य उपसंख्यानम् ।" इति कः ।) नगरद्वारम् । सहरेर फटक् इति भाषा ॥ तत्पर्य्यायः । पुरद्वारम् २ । इत्यमरः । २ । ३ । १६ ॥ दुर्गपुरद्वारम् । इत्यजयः ॥ द्वारमात्रम् । इति भरतः ॥ (यथा, महाभारते । १ । २०८ । ३१ ।

"द्विपत्तगरुड़प्रख्यैर्द्वारैः सौधैश्च शोभितम् । गुप्तमभ्रचयप्रख्यैर्गोपुरैश्चन्द्ररोपमैः ॥" * ॥

गौर्वलं पुरमस्य यद्वा गवा जलेन पिपर्त्ति पूरयति आत्मानमिति । पॄ + कः ।) कैवर्त्तीसुस्तकम् । इति मेदिनी । रे । १५० ॥ (वैद्यकग्राम्रग्रणीत ऋषिभेदः । यथा, सुश्रुते सूत्रस्थाने १ अध्याये । "अथ खलु भगवन्तममरवरन्यधिगणपरिवृतं आश्रमस्थं काशिराजं दिवोदासं धन्वन्तरिमौपधेनवगौतमरक्षौरभ्रपौष्कलावतं करवीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः ॥")

गोपुरकः, पुं, (गां भूमिं पिपर्त्तीति । पॄ पूर्त्तौ + "मूलविभुजादिभ्य उपसंख्यानम् ।" इति कः ॥ ततः संज्ञायां कन् ।) कुन्दुरुकः । इति राजनिर्घण्टः ॥

गोपुरीषं, क्ली, (गोः पुरीषम् विष्ठा ।) गोमयम् । इति राजनिर्घण्टः ॥

गोपेन्द्रः, पुं, (गोपेषु गोकुलस्थगोपालेषु मध्ये इन्द्रः श्रेष्ठः । गोप इन्द्र इव वा । यद्वा गां वाचं याति रक्षतीति गोपो वेदस्तत्र इन्द्रति सर्व्वैश्वर्य्यवत्तया विराजते । इदि परमैश्वर्ये + "ऋजेन्द्रेति ।" उणां । २ । २८ । इति रनुप्रत्ययेन निपातनात् साधुः ।) विष्णुः । इति हेमचन्द्रः । २ । १३२ ॥ (श्रीकृष्णः । इति भागवतम् । गोपानामिन्द्र ईश्वरः । गोपपतिः । स तु नन्दः । यथा, महाभारते । ६ । २२ । २३ ।

"गोपेन्द्रस्यात्मजे ज्येष्ठे नन्दगोपकुलोद्भवे ॥")

गोपेशः, पुं, (गां पृथिवीं पान्ति रक्षन्तीति गोपा राजानस्तेषामीशः सर्व्वहिंसानिवारणादिति भावः । प्राप्तराज्योऽपि यं विषयभोगं तुच्छीकृत्य सन्न्यासेन निर्व्वाणमलभतातोऽस्य राजसु श्रेष्ठत्वमायातमिति तात्पर्य्यार्थः ।) बुद्धमुनिः । इति त्रिकाण्डशेषः ॥ (गोपानां गोकुलस्थ-

गोपालानामीशः।) नन्दघोषः। यथा,—
"रामकृष्णाद्भयतो गोपेशं परितः परे॥"
इति मुग्धबोधम्॥
श्रीकृष्णश्च॥

गोप्ता, [तृ] त्रि, (गोपायति रक्षतीति। गुपू+रक्षणे+"ग्वुल्तृचौ।" ३।१। १३३। इति तृच्।) रक्षकः। यथा,
"विप्राणामभयार्थमध्वरविधेर्गोप्ता गुरो-
राज्ञया।"
इति राघवपाण्डवीये कविराजः॥
(तथा च मनुः। ११। ७६।
"ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान् परित्यजन्।
मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च॥")

गोप्यः, पुं, (गोप्यते रक्ष्यतेऽसौ इति। गुपू रक्षणे+"ऋहलोर्ण्यत्।" ३।१। १२४। इति ण्यत्।) दासः। इत्यमरटीकायां भरतः॥ दासीपुत्रः। रक्षणीये त्रि। इति मेदिनी। ये। २०॥ (यथा, महाभारते। १२। ४१। १५।
"सहदेवं समीपस्थं नित्यमेव समादिशत्।
तेन गोप्यो हि नृपतिः सर्व्वावस्थो विशाम्पते!॥"
गोप्यतेऽसाविति। गुपू च गोपने+कर्म्मणि ण्यत्।) गोपनीयः। यथा,—
"आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम्।
अपमानमपो दानं नव गोप्यानि यत्नतः॥"
इति पुराणम्॥
गोपीसम्बन्धे॥ (तत्र गोपीशब्दात् प्रथमाविभक्तेर्वैदुवचनप्रयोगः॥)

गोप्यकः, पुं, (गोप्य एव। स्वार्थे कन्।) दासः। इत्यमरः। २।१०।१७॥

गोप्याधिः, पुं, (गोप्यो रक्षणीय आधिर्बन्धकः।) बन्धकविशेषः। (यथा, याज्ञवल्क्ये। २। ६०।
"गोप्याधिभोगे नौ वृद्धिः सोपकारेऽथ तापिते॥")
"तथा च नारदः।
अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः।
कृतकालोपनेयश्च यावद्देयोद्यतस्तथा॥
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च।
गोप्यो रक्षणीयः।" इति मिताक्षरा॥

गोप्रकाण्डं, क्ली, (प्रशस्ता गौर्गोजातिः। "प्रशंसावचनैश्च।" २।१।६६। इति परनिपातः। प्रकाण्डशब्दस्य नियतलिङ्गतया क्लीवत्वम्।) श्रेष्ठगौः॥ इति सिद्धान्तकौमुदी॥

गोभण्डीरः, पुं, (गवि जले भण्डीरः अतिवाचालः।) जलकुक्कुभपक्षी। इति त्रिकाण्डशेषः॥

गोभ, तृ क लेपने। इति कविकल्पद्रुमः॥ (अदन्त-परां-परं-सर्क-सेट्।) अनुगोभ्नोमयेन स्थानं चेष्टा। इति दुर्गादासः॥

गोमक्षिका, स्त्री, (गोसन्निकटस्था गोप्रिया वा मक्षिका।) दंशः। इति शब्दरत्नावली॥ डांश इति भाषा॥

गोमत्प्रिका, स्त्री, (प्रशस्ता गौर्गोजातिः। "प्रशंसावचनैश्च।" २।१।६६। इति नित्यसमासेन परनिपातः।) सुशीला गौः। इति हलायुधः॥

गोमती, स्त्री, (बहवो गावो जलानि सन्त्यस्यामिति। भूम्नि "तदस्यास्तीति।" ५।२।९४। मतुप्। "उगितश्च।" ४।१।६। इति ङीप्।) स्वनामख्याता नदी। तत्पर्य्यायः। वाशिष्ठी २। इति हेमचन्द्रः॥ (यथा, महाभारते। ६।९।१७।
"गोमतीं धूतपापाञ्च चन्दनाञ्च महानदीम्॥"
अस्यास्तीरे महादेवस्याश्रमकमुत्तमं विराजते। यदुक्तं महालिङ्गेश्वरतन्त्रे शिवरहस्यनामस्तोत्रे।
"चाश्रमको गोमतीतीरे गोकर्णे च त्रिलोचनः॥"
गङ्गा। यथा, काशीखण्डे। २९। ५१।
"गोमती गुह्यविद्या गौर्गौम्री गगनगामिनी॥")

गोम्यः, पुं, (गोप्यते रक्ष्यतेऽसौ इति। गुपू रक्षणे+"ऋहलोर्ण्यत्।" ३।१। १२४। इति ण्यत्।) दासः। इत्यमरटीकायां भरतः॥ दासीपुत्रः। रक्षणीये त्रि। इति मेदिनी। ये। २०॥ (यथा, महाभारते। १२। ४१। १५।
"सहदेवं समीपस्थं नित्यमेव समादिशत्।
तेन गोप्यो हि नृपतिः सर्व्वावस्थो विशाम्पते!॥"
गोप्यतेऽसाविति। गुपू च गोपने+कर्म्मणि ण्यत्।) गोपनीयः। यथा,—
"आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम्।
अपमानमपो दानं नव गोप्यानि यत्नतः॥"
इति पुराणम्॥
गोपीसम्बन्धे॥ (तत्र गोपीशब्दात् प्रथमाविभक्तेर्वैदुवचनप्रयोगः॥)

गोम्यकः, पुं, (गोप्य एव। स्वार्थे कन्।) दासः। इत्यमरः। २।१०।१७॥

गोम्याधिः, पुं, (गोप्यो रक्षणीय आधिर्बन्धकः।) बन्धकविशेषः। (यथा, याज्ञवल्क्ये। २। ६०।
"गोप्याधिभोगे नौ वृद्धिः सोपकारेऽथ तापिते॥")
"तथा च नारदः।
अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः।
कृतकालोपनेयश्च यावद्देयोद्यतस्तथा॥
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च।
गोप्यो रक्षणीयः।" इति मिताक्षरा॥

गोप्रकाण्डं, क्ली, (प्रशस्ता गौर्गोजातिः। "प्रशंसावचनैश्च।" २।१।६६। इति परनिपातः। प्रकाण्डशब्दस्य नियतलिङ्गतया क्लीवत्वम्।) श्रेष्ठगौः॥ इति सिद्धान्तकौमुदी॥

गोभण्डीरः, पुं, (गवि जले भण्डीरः अतिवाचालः।) जलकुक्कुभपक्षी। इति त्रिकाण्डशेषः॥

गोभ, तृ क लेपने। इति कविकल्पद्रुमः॥ (अदन्त-परां-परं-सर्क-सेट्।) अनुगोभ्नोमयेन स्थानं चेष्टा। इति दुर्गादासः॥

तमालैलावनयुतं मरिचच्छदसङ्कुलम्।
प्रियालीवल्लिकलिलं चित्रमिङ्गुदपादपैः॥
द्रुमैः सर्व्वरसानाञ्च सर्व्वतः प्रतिशोभितम्।
प्रांशुशालवनैर्गुप्तं बहुचित्रवनैर्युतम्॥
सर्ज्जनिम्बार्জ্জुनवनं पाटलीकुलसङ्कुलम्।
हिन्तालेश्च तमालेश्च पुन्नागैश्चोपशोभितम्॥
जलेषु जलजैश्छन्नं स्थलेषु स्थलजैरपि।
पङ्कजैर्द्रुमषण्डैश्च सर्व्वतः प्रतिभूषितम्॥
चम्पकाशोकबकुलं विल्वतिन्दुकशोभितम्॥
कुटजैर्नागपुष्पैश्च समन्तादुपशोभितम्।
नागयूथसमाकीर्णं न्यग्रोधातिशोभितम्॥
सिद्धचारणरक्षोभिः सेवितप्रस्तरान्तरम्।
विद्याधरगणैर्नित्यमनुकीर्णशिलातलम्।
सिंहशार्দ্দূलसन्नादैः सततं प्रतिनादितम्।
सेवितं वारिधाराभिश्चन्द्रपादैश्च शोभितम्॥
स्रुतं चित्रशिलाबद्धैरम्बरीभिरलङ्कृतम्।
वनस्पतीनां दिव्यानां पुष्पैरुच्चावचैश्चितम्॥
शुक्लवज्रप्रहाराणामनभिघ्नं कदाचन।
दावाग्निभयनिर्मुक्तं महावातभयोज्झितम्॥
प्रपातप्रभवाभिश्च सरिद्भिरुपशोभितम्।
जलशीकरशुक्लाग्रैरुन्निषन्तमिव श्रिया॥
स्थलीभिर्दन्तशुभाभिः कान्ताभिरुपशोभितम्।
पार्श्वैरुपलकल्माषैर्मेघैरिव विभूषितम्॥
पादपोच्छ्रितसौम्याभिः सपुष्पाभिः समन्ततः।
मण्डितं वनराजीभिः प्रमदाभिः पतिं यथा॥
सुन्दरीभिर्दरीभिश्च कन्दरीभिस्तथैव च।
तेषु तेष्ववकाशेषु सदारमिव शोभितम्॥
ओषधीदीप्तशिखरं वानप्रस्थनिषेवितम्।
जातरूपैर्वनोद्देशैः शुचिभिरिव भूषितम्॥
मूलेन सुविशालेन शिरसात्युच्छ्रितेन च।
पृथिवीमन्तरीक्षञ्च गाहयन्तमिव स्थितम्॥"
श्रीकृष्णो बलरामेण सह जरासन्धभयात् अत्र पर्व्वते पलायमानः स्थितः। ततो मदमत्तैर्बहुसंख्यकराजभिरतिगर्व्वितो जरासन्धः कृष्णेन सार्द्धं युयुत्सुरत्रागत्यैमं गोमन्तपर्व्वतं दग्धुं प्रवृत्तः, एतत्कथा हरिवंशे ८८ अध्याये विस्तरशो द्रष्टव्या॥*॥) गवां स्वामिसम्बन्धे॥ (तत्र गोमच्छब्दे प्रथमाविभक्तेर्वैदुवचनप्रयोगः॥)

गोमयं, क्ली पुं, (गोः पुरीषम्। "गोश्च पुरीषे।" ४।३।१३५। इति मयट्।) गवां गूथम्। गोवर इति भाषा॥ तत्पर्य्यायः। गोविट् २ इत्यमरः। २।९।५०॥ जगलम् ३ गोशकृत् ४ गोशकृत् ५। इति रत्नमाला॥ गोपुरीषम् ६ गोविष्ठा ७ गोमलम् ८। इति राजनिर्घण्टः॥
तस्य माहात्म्यं यथा,—
"शतं वर्षसहस्राणां तपस्तप्तं सुदुष्करम्।
गोभिः पूर्व्वविसृष्टाभिर्गव्यैस्तुल्यं श्रेष्ठतामिति॥
असत्पुरीषस्नानेन जनः पूयेत सर्व्वदा।
शुद्धता च पवित्रार्थे कुर्व्वीरन् देवमानुषाः॥
ताभ्यो वरं ददौ ब्रह्मा तपसोऽन्ते स्वयं प्रभुः।
एवं भवतिति विसृजोंकांस्तारयतेति च॥"*॥

तत्र लक्ष्म्या वासो यथा, लक्ष्मीं प्रति गवां वाक्यम्।
"अवश्यं मानना कार्य्या तवास्माभिर्यशस्विनि!।
शृङ्गमूले निवस त्वं पुण्यमेतद्धि नः शुभे!॥"
श्रीरुवाच।
"दिष्ट्या प्रसादो युष्माभिः कृतो मेऽनुग्रहात्मकः।
एवं भवतु भद्रं वः पूजिताऽस्मि सुखप्रदाः॥"
इति महाभारते दानधर्म्मः॥
(कृच्छ्रसान्तपने अस्य भक्षणविधिर्यथा, मनुः। ११। २१२।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्॥"
"अत्यन्तजीर्णदेहाया वन्ध्यायाश्च विशेषतः।
रोगार्त्तायाः प्रसूतायाः न गोर्गोमयमाहरेत्॥"
इति चिन्तामणिधृतस्मृतिवचनम्॥
गां सर्व्वतीर्थमयीं परिकल्प्य एतस्या गोमयं यमुनानदीतयां परिकल्पयन्ति वृद्धाः। यदुक्तम्,—
"गोमयं यमुना साक्षात् गोमूत्रं नर्म्मदा शुभा।
गङ्गा क्षीरन्तु वासां वै किं पवित्रमतःपरम्॥"*॥)
गवात्मके क्ली॥

गोमयकृच्छ्रं, क्ली, (गोमयात् जातं कृच्छ्रं कृच्छ्राकारं श्लिलीन्ध्रमित्यर्थः।) करकम्। इति चिकाण्डशेषः॥ कोँड़कछाता इति भाषा॥

गोमयकृच्छ्रिका, स्त्री, (गोमये गोमयप्रचुरे स्थाने जाता कृच्छ्रिका श्लिलीन्ध्रमित्यर्थः।) गोमयकृच्छ्रम्। तत्पर्य्यायः। दिलीरम् २ श्लिलीन्ध्रकम् ३। इति हारावली॥ उच्छिलीन्ध्रम् ४। यथा, "उच्छिलीन्ध्रमिवार्भकाः॥" इति श्रीभागवतम्॥

गोमयप्रियं, क्ली, (गोमयं प्रियं उत्पत्तिकारणत्वेन यस्य।) भूतृणम्। इति रत्नमाला॥ गन्धखड़ इति भाषा॥

गोमयोत्था, स्त्री, (गोमयादुत्तिष्ठतीति। उत्+स्था+"आतोऽनुपसर्गे कः।" ३। १। ३। इति कः। ततः स्त्रियां टाप्।) गोमयजातकीटविशेषः। तत्पर्य्यायः। गर्दभी २। इति हेमचन्द्रः। ४। २७४॥

गोमयोद्भवः, पुं, (उद्भवत्यस्मादिति उद्भवः गोमय उद्भवः कारणं यस्य। यद्वा गोमयादुद्भव उत्पत्तिर्यस्य।) व्रीहिगुवकः। इति शब्दचन्द्रिका॥ धोनालु इति भाषा॥

गोमांसं, क्ली, (गवां मांसम्।) गवां पिशितम्। तद्भक्षणप्रायश्चित्तं यथा। "सुमन्तुः। गोमांसभक्षणे प्राजापत्यचरेत्। इदमज्ञानतः सकृद्भक्षणविषयम्। यथाह पराशरः।
अगम्यागमने चैव मद्यगोमांसभक्षणे।
शुद्धौ चान्द्रायणं कुर्य्यात्तप्तौ गत्वा यमुनागाम्॥
चान्द्रायणे ततश्चार्द्धं कुर्य्यादब्राह्मणभोजनम्।
अनड्वुत्सहितां गाञ्च दद्यादविभवे दरिद्रायाम्॥
इदं ज्ञानतोऽभ्यासे। शुद्धः।
ग्रामश्वं कुक्कुरोष्ट्रौ च सर्व्वं पञ्चनखं तथा।
क्रव्यादं कुक्कुटं ग्राम्यं कुर्य्यात् संवत्सरं व्रतम्॥
एतच्चिरकालाभ्यासे। संवत्सरसहस्रव्रते पञ्चदशधेनवः। पुनरुपनयनञ्च। यथा, विष्णुः। विड्वराहग्रामकुक्कुटनरगोमांसभक्षणे सर्व्वेष्वेव द्विजातीनां प्रायश्चित्तान्ते भूयः संस्कारं कुर्य्यात्।" इति प्रायश्चित्तविवेकः॥ (अस्य गुणा यथा,—
"गवां केवलवातेषु पीनसे विषमज्वरे।
शुष्ककासश्रमात्मस्मिंसचयश्चितच्च यत्॥"
इति चरके सूत्रस्थाने २७ अध्याये॥
"श्वासकासप्रतिश्यायविषमज्वरनाशनम्।
श्रमात्मस्मिंहितं गव्यं पवित्रमनिलापहम्॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥
अन्यत् गोशब्दे (गौः इत्यत्र द्रष्टव्यम्॥*॥
हठयोगमतेनास्य पारिभाषिकोऽर्थो यथा, हठयोगप्रदीपिकायाम्। १। ४७—४८।
"गोमांसं भक्षयेन्नित्यं पिबेदमरवारुणीम्।
कुलीनं तमहं मन्ये इतरे कुलघातकाः॥
गोशब्देनोच्यते जिह्वा तत्प्रवेशो हि तालुनि।
गोमांसभक्षणं तत्तु महापातकनाशनम्॥")

गोमान्, [न्] त्रि, (बहवो गावोऽस्यास्मिन् वा सन्तीति। "तदस्यास्तीति।" ५। २। ९४। मतुप्।) बहूनां गवां स्वामी। तत्पर्य्यायः। गवीश्वरः २ गोमी ३। इत्यमरः। २। ९। ५८॥ (यथा, अथर्ववेदे। ६। ६८। ३।
"येनावपत् सविता क्षुरेण
सोमस्य राज्ञो वरुणस्य विद्वान्।
तेन ब्रह्मणो वपते एनस्य
गोमानश्ववानयमस्तु प्रजावान्॥")

गोमायुः, पुं, (गां विक्षतां वाचं मिनोतीति। कुमि च+शवापेक्षुच्।) शृगालः। इत्यमरः। २। ५। ५॥ (यथा, महाभारते। २। ६७। २३।
"ततो राज्ञो धृतराष्ट्रस्य गेहे
गोमायुरुच्चैर्व्याहरद्विप्रोच्चैः॥"
अस्य ध्वनौ शुभाशुभत्वं शृगालशब्दे द्रष्टव्यम्॥) गन्धर्व्वविशेषः। इति जटाधरः॥ गोपिते सान्तक्षीणोऽयम्॥

गोमी, [न्] त्रि, (गौरस्यास्य। "ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विनि।" ५। २। ११४। इति मिनिः।) गोमान्+इत्यमरः। २। ९। ५८॥ (यथा, मनुः। ९। ५०।
"यद्यप्यर्थाद्धु एषभो वत्सानां जनयेच्छतम्।
गोमिनामेव ते वत्सा नोक्षं स्कन्दितमार्षभम्॥"
गौर्वीजमस्त्रवार्थं अस्यास्तीति।) उपासकः। इति मेदिनी। ने। ६०॥

गोमी, [न्] पुं, (गौः कठोरध्वनिरस्यास्तीति। "ज्योत्स्नातमिस्रेति।" ५। २। ११४। इति मिनिः।) शृगालः। इति मेदिनी। ने। ६०॥ बुद्धभिक्षुशिष्यः। इति चिकाण्डशेषः॥

गोमीनः, पुं, (गौरिव स्थूलो मीनः।) मत्स्यविशेषः। यथा, मत्स्यसूक्ते।
"शृणु देवि! प्रवक्ष्यामि मांसभेदान् निबोध मे।
न दद्यात् तिलकमठं पशुश्वङ्गिमेव च॥
गोमीनं चक्रशृकुलं वड़ालं राघवन्नथा॥"

गोसुखं, क्ली, (गोर्मुखमिव सुखं प्रवेशद्वारमस्य।) कुटिलागारम्। (गोर्मुखमिव आकृतिरस्य।) वाद्यभाण्डम्। (एतदर्थे पुंलिङ्गोऽपि दृश्यते। यथा, गीतायाम्। १। १३।
"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥"
तथा च महाभारते। ६। ४६। ५७।
"आडम्बरान् गोमुखांश्च डिण्डिमांश्च महास्वनान्॥")
लेपनम्। इति मेदिनी। खे। ८॥ (यथा, माघे। ३। ४८।
"सुकाञ्चनीजोपलनिर्म्मितानां
लिप्तेषु भासा यहदेहलीनाम्।
यस्यामलिन्देषु न चक्रुरेव
सुग्धाङ्गना गोमयगोसुखानि॥")
चौरक्रियमाणसुरङ्गाभेदः। सिंधविशेष इति भाषा। इति चिकाण्डशेषः॥ (आसनविशेषः। तल्लक्षणं यथा, हठयोगप्रदीपिकायाम्। १। २०।
"सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत्।
दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखाकृति॥")
जपमालागोपनार्थं वस्त्रनिर्म्मितथलं यथा,—
"चतुर्व्विंशाङ्गुलमितं षड्वस्त्रादिसम्भवम्।
निर्म्मायाष्टाङ्गुलिमुखं ग्रीवां तत् षड्दशाङ्गुलम्॥
क्षेयं गोमुखमस्यन्च सर्व्वतन्त्रेषु गोपितम्।
तन्मुखे स्थापयेन्मालां यावामध्यगतः करः॥
प्रजपेद्विधिना गुह्यं वर्णमालाधिकं प्रिये॥"
इति सुन्दरीतन्त्रम्॥
अपि च मायातन्त्रे।
"गोमुखादौ ततो मालां गोपयेन्माहचारवत्॥"

गोमुखः, पुं, (गोर्मुखमिव मुखं यस्य।) नक्रः। यत्तविशेषः। इति हेमचन्द्रः। ४। ४१५॥ (मातलिपुत्रः। यथा, महाभारते। ५। १००। ८।
"बहुशो मातले! त्वच्च तव पुत्रच्च गोमुखः॥"
वसुराजमन्त्रिपुत्रविशेषः। स पुनः वसुराजसुतस्य मन्त्रिणामन्यतमः। यथा, कथासरित्सागरे। २३। ५७।
"ततो निर्गोदिताख्यस्य प्रतीहाराधिकारिणः।
इत्यपरवक्त्रस्य पुत्रोऽजायत गोमुखः॥")

गोमुखी, स्त्री, (गोर्मुखमिव आकृतिरस्याः। स्त्रियां ङीष्।) हिमालयाद्रिप्रपतने गोमुखाकारगुहा। इति लोकप्रसिद्धिः॥ राढ़देशस्थनदीविशेषः। गोमुड़ इति ख्याता॥

गोमूत्रं, क्ली, (गोर्मूत्रम्।) गोप्रस्रावः। गोमा इति भाषा॥ तत्पर्य्यायः। गोजलम् २ गोऽम्भः ३ गोनिष्यन्दः ४ गोद्रवः ५। (कृच्छ्रसान्तपने गोमूत्रभक्षणविधिर्यथा, मनुः। ११। २१२।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्॥")
अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्।

लघुत्वम्। कफवातत्वग्दोषनाशित्वम्। पित्तकारित्वम्। दीपनत्वम्। मेध्यत्वम्। मतिप्रदत्वञ्च। इति राजनिर्घण्टः॥ तीक्ष्णत्वम्। क्षारत्वम्। कषायत्वम्। शूलगुल्मोदरानाहकण्डूविसुखरोगकिलासवातामवस्तिरुक्कुष्ठकासश्वासशोथकामलापाण्डुतिसारमूत्ररोधव्रणमिश्रीतश्रीहवर्च्चोग्रहनाशित्वम्। पूरणात् कर्म्मशूलनाशित्वम्। सर्व्वमन्त्रेषु गुणाधिकत्वञ्च। इति भावप्रकाशः॥

("तीक्ष्णक्षोणं क्षारमेवं कषायं)
मेध्यं छर्य्यारुक्षनाश्यस्थिरञ्च।
तस्माच्छूलं रक्तपित्तप्रभेदि
भूयुग्मकण्डूकाहदुरोगगुल्मम्।
कण्डूकिलासगदशूलसुखाक्षिरोगान्
गुल्मातिसार-मरुदामय-मूत्ररोधान्।
काश्यं सकुष्ठजठरक्रिमिरोगवातं
गोमूत्रमेकमपि पीतमहो निहन्ति॥")

इति प्रथमस्थाने नवमेऽध्याये धन्वन्तरीयेणोक्तम्॥
"गोमूत्रं कटुतीक्ष्णोष्णं सक्षारत्वान्नवातलम्।
लघुर्विदीपनं मेध्यं पित्तलं कफवातजित्॥
शूलगुल्मोदरानाह विरेकास्यापनादिषु।
मूत्रप्रयोगसाध्येषु गव्यं मूत्रं प्रयोजयेत्॥"

इति सुश्रुते सूत्रस्थाने पञ्चचत्वारिंशत्तमेऽध्याये॥ गां वर्णतोवर्णवीं कपिलां सवत्सां दुग्धवतीं नर्म्मदादक्षिणतीरेण परिक्रामयन्ति ब्रह्मणः। यदुक्तम्। "गोमयं यत्नतो ग्राह्यं गोमूत्रं नर्म्मदा शुभा। गङ्गा क्षीरेषु यागेषु हविष्यमतः परम्॥")

गोमूत्रिका, स्त्री, (गोमूत्रवत् वक्रसरलाकृतिरस्या अस्तीति। गोमूत्र+"अत इनिठनौ।" ५।२।११५। इति ठन् टाप् च।) लतविशेषः। तामड़ु इति भाषा॥ तत्पर्य्यायः। रक्तदुग्धा २ क्षीरवल्ली ३ लताभूमिका ४। अस्या गुणाः। मधुरत्वम्। दुग्धत्वम्। गोदुग्धं दाधित्वञ्च। इति राजनिर्घण्टः॥ (गोमूत्रस्येव उद्धावना गतिरस्या अस्तीति ठन्।) पिचकाविशेषः। यथा,—
"गतिर्वक्राक्षरा यत्र मार्गे मूत्रस्य गौरिव।
गोमूत्रिकेति तत् प्राहुर्दुष्करक्रियावेदिनः॥"

तस्या भेदाः। पादगोमूत्रिका। अर्द्धगोमूत्रिका। शीर्षगोमूत्रिका। विपरीतगोमूत्रिका। इति सरस्वतीरत्नाभरणम्॥ (उदाहरणं यथा, किरातार्জ্জुनीये। १५। १२।

"नाहरोयं नवाभोगो धरसंस्थो हि राजसः।
नागलीयं नवाभोगो धरसंस्थो हि राजसः॥"
"वर्णानामेकरूपत्वं यद्येकाक्षरमर्द्धयोः
गोमूत्रिकेति तत् प्राहुर्दुष्करं तद्विदो विदुः॥

इति वृत्तरत्नात्।

शोकश्लोकादौ अर्द्धयोः क्रमेण विलिखेत्काव्यविनियोगेन वाचने शोकापव्यक्तिरित्युद्धारः॥"

इति तट्टीकायां मल्लिनाथः॥)

गोमेदः, पुं, (गौरौजसमिव मेदयति क्षेदयतीति। मिद्+घञ्वाद्यच्।) गोमेदकमणिः। इति राजनिर्घण्टः॥ (यथ तु नवरत्नान्तर्गतरत्न-विशेषः। यथा,—

"रत्नं गारुत्मतं पुष्यं रागो माणिक्यमेव च।
इन्द्रनीलश्च गोमेदस्तथा वैदूर्य्यमित्यपि॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ अस्य परीक्षागुणादिकञ्च गोमेदकशब्दे द्रष्टव्यम्॥ कक्षोलः। इति हारावली। २६१॥ द्वीपविशेषः। तन्नामनिरुक्तिर्यथा,—
"गोमेदे गोपतिर्नाम राजाभूद्गोसवोद्यतः।
याज्ञोऽभूद्ब्रह्मिकक्षाणामौतथ्यानां मनोः सुवे॥
स तेषु हरियज्ञाय प्रवृत्तेषु भृगून् गुरून्।
वव्रे तं गौतमः कोपादशपत् सोऽगमत् क्षयम्॥
यज्ञवाटेऽस्य ता गावो दग्धाः कोपाग्निना मुनेः।
तन्मेदसा मही छन्ना गोमेदः स ततोऽभवत्॥"

इति चित्रामश्विस्तवचरितानि॥

प्रचण्डौषधवर्षाचलभेदः। यथा, विष्णुपुराणे। २। ४। ६—७।
"मर्य्यादाकारकास्तेषां तथान्ये वर्षपर्व्वताः।
सप्तैव तेषां नामानि द्वीपेषु सुनिबोधत॥
गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा।
सोमकः सुमनाश्चैव वैभ्राजश्चैव सप्तमः॥")

गोमेदकं, क्ली, (गोमेद+स्वार्थे कन्।) पीतमणिः। काकोलम्। पद्मकम् इति मेदिनी। के। १८६॥

गोमेदकः, पुं, (गोमेद+स्वार्थे कन्।) खनामख्यातमणिः। तत्पर्य्यायः। गोमेदः २ राहुरत्नम् ३ तमोमणिः ४ खर्भानवः ५ पिङ्गस्फटिकः ६। अस्य गुणाः। अम्लत्वम्। उष्णत्वम्। वातकोपविकारनाशित्वम्। दीपनत्वम्। पाचनत्वम्। धारके पाचनाग्नित्वञ्च। इति राजनिर्घण्टः॥ तस्य परीक्षा यथा,—
"हिमालये वा सिन्धौ वा गोमेदमणिसम्भवः।
स्वच्छकान्तिर्गुरुः स्निग्धो वर्त्माष्टौ दीप्तिमानपि॥
बलवान् पिङ्गरो धन्यो गोमेद इति कीर्त्तितः।
चतुर्द्धा जातिभेदेषु गोमेदोऽपि प्रकाशते॥
ब्राह्मणः शुक्लवर्णः स्यात् क्षत्रियो रक्त उच्यते।
आघातो वैश्यजातिस्तु शूद्रास्तु नील उच्यते॥
छाया चतुर्विधा श्वेता रक्ता पीतासिता तथा॥
गुरुप्रभाढ्यः सितवर्णरूपः
स्निग्धो बृहद्वर्त्मतिमहापुराज्यः
स्वच्छस्तु गोमेदमणिर्धृतोऽयं
करोति लक्ष्मीं धनधान्यवह्निम्॥
लघुर्विरूपोऽतिखरोऽल्पमानः
क्षेदोपसिक्तो मलिनः खरोऽपि।
न रीति गोमेदमणिर्विनाशं
धत्ते तभोगावलयौघराशेः॥
ये दोषा दौरके प्रोक्तास्ते गोमेदमणावपि।
परीक्ष्य वर्जितः कार्य्यो धार्य्ये वा रत्नकोविदैः॥
स्फटिकेनैव कुर्व्वन्ति गोमेदप्रतिरूपिकम्॥
गुरुत्वं गोमेदमणेस्तु मूल्यं
हृणत्यतो दैगुण्यमाहुरेके।
अन्ये तथा विद्रुमतुल्यमूल्यं
तथापरे चामरतुल्यमाहुः॥
चतुर्विधानामेषान्तु धारणं परिसम्मतम्॥"

इति भोजराजकृतयुक्तिकल्पतरुः॥ (कतक-गोमेदक-विषपन्थि-श्वेतबालमूल-वल्कानि सुक्तामणिश्चेति।" इति सुश्रुते सूत्रस्थाने ४५ अध्याये॥)

गोमेदसन्निभः, पुं, (गोमेदस्य सन्निभस्तुल्यः।) दुग्धपाषाणः। इति राजनिर्घण्टः॥

गोमेधः, पुं, (मेधहिंसायम्+भावे घञ्। गवां मेधो हिंसा यत्र।) यज्ञविशेषः। तत्र स्त्रीगोपशुः मन्त्रेषु स्त्रीलिङ्गपाठात्। तस्य लक्षणं यज्ञशब्दे द्रष्टव्यम्। तस्य प्रयोगः सर्व्वोऽपि छागपशुवत्। यजमानस्य स्वर्गः फलं गोश्च गोलोकप्राप्तिः। तस्य च कलौ निषेधो यथा,—
"अश्वालम्भो गवालम्भः सन्न्यासः पलपैतृकम्।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्ज्जयेत्॥"

इत्यादितत्त्वादिकल्पसूत्रपुराणम्॥

गोरक्षः, पुं, (गां रक्षतीति। रक्ष+"कर्म्मण्यण्।" ३। २। १।) ऋषभनामौषधम्। इति हेमचन्द्रः॥ नागरङ्गः। गोरक्षके त्रि। इति मेदिनी। के। ३६॥ (यथा, मनुः। ८। १०२। (गोरक्षकान् वाणिजिकांस्तथा कारुकुशीलवान्॥" खनामख्यातो योगिविशेषः। अयं हठविद्यया प्राप्तैश्वर्य्यः सिद्धपुरुषः। यथा हठयोगप्रदीपिकायाम्। १। ५।
"श्री-आदिनाथमत्स्येन्द्रशाबरानन्दभैरवाः।
चौरङ्गीमीनगोरक्षविरूपाक्षबिलेशयाः॥"

एतद्ग्रन्थोक्तयोगप्रकरणानि गोरक्षसंहितायां वर्णनीयानि। तच्च आसनप्राणसंरोधप्रत्याहारधारणाध्यानसमाधयः षट् योगाङ्गानि उक्तान्येवेति॥ शिवोपासकानां 'कच्च षट्' इत्याख्ययोगिनां गुरुर्गोरक्षनाथ एव धर्म्मप्रयोजकः। अमी शैवयोगिनः एनं शिवावतारं गुरुं मन्यमानास्तत्प्रवर्त्तितहठयोगमभ्यस्यन्ति। गोरक्षनाथो आदिनाथस्य शैवस्य मच्छेन्द्रनाथस्य पुत्र आसीदिति तच्छिष्यैर्नाथाख्यां भण्यते॥)

गोरक्षकर्कटी, स्त्री, (गोरक्षा गोरक्षाकर्त्री कर्कटी।) चिर्भिटा। इति भावप्रकाशः॥

गोरक्षजम्बूः, स्त्री, (गोरक्षा जम्बूः।) गोधूमः। गोरक्षतण्डुला। इति विश्वः॥ घोण्टाफलः। इति शब्दरत्नावली॥

गोरक्षतण्डुला, स्त्री, (गोरक्षा तण्डुला।) क्षुद्रलताविशेषः। गोरक्षचाउलिया इति भाषा। तत्पर्य्यायः। गाङ्गेरुकी २ नागबला ३ ऋषभा४ ऽक्षगवेधुका ५ खरवल्लरिका ६ विश्वदेवा ७। इति रत्नमाला॥

गोरक्षतुण्डी, स्त्री, (गां जलं रक्षतीति अम्। गोरक्षः कुम्भः। तद्वत् कुम्भाकारा तुण्डी। गोरक्षेति नाम्निका तुण्डी वा।) कुम्भतुण्डी। इति राजनिर्घण्टः॥

गोरक्षदुग्धा, स्त्री, (गोरक्षं गोपालकं दुग्धं रक्षी यस्याः।) क्षुद्रक्षुपविशेषः। तत्पर्य्यायः।

गोरक्षी २ ताम्रदुग्धा ३ रसायनी ४ बहुपत्रीपू अम्लता ६ जीवा ७ अम्लवल्लीवनी ८। अस्या गुणाः। मधुरत्वम्। दृष्यत्वम्। संग्राहित्वम्। हिमत्वम्। सर्व्ववश्यकारित्वम्। रसस्निग्धगुणप्रदत्वञ्च। इति राजनिर्घण्टः॥

गोरक्षी, स्त्री, (गां रक्षति पालयति इति। "कर्म्मण्यण्।" ३। २। १। इति अण्। ततो ङीप्।) क्षुद्रक्षुपविशेषः। सा तु मालवे प्रसिद्धा। तत्पर्य्यायः। सर्पदष्टी २ दीर्घदष्टी ३ सुदंष्ट्रिका४ चित्रला ५ गन्धदुग्धा ६ गोपाली ७ पक्षपर्णिका ८। अस्या गुणाः। मधुरत्वम्। तिक्तत्वम्। शिशिरत्वम्। दाहपित्तविस्फोटवान्तितीसारज्वरदोषनाशित्वञ्च। गोरक्षदुग्धा। कुम्भतुल्सी। इति राजनिर्घण्टः॥

गोरङ्गुः, पुं, (गच्छा वाचा इक्षुमृगविशेष इव।) पक्षिभेदः। लमकः। वन्दी। इति मेदिनी। के। ८५॥ क्वचित् पुस्तके लमकस्थाने नमकोऽपि पाठः॥

गोरटः, पुं, (गवि इन्द्रिये रटतीति। रट्+अच्।) दुरालभदिरः। इति राजनिर्घण्टः॥

गोरवं, क्ली, (गुरु+भावे ष्यञ्।) गुरुत्वम्। (गुर्य्यते गण्यते बलमनेनेति। गुरु+करणे घञ्।) उद्यमः। इत्यमरटीका॥

गोरसः, पुं, (गवां रसः।) दुग्धम्। दधि। तक्रम्। इति हेमचन्द्रः। ३। ७२॥ (यथा, गोः रामायणे। ३। २२। ७।

"ग्रामक्षेमा जनपदाः सस्यवत्यश्च गोरसाः।
विचरन्ति महीपाला यात्रार्थं विजिगीषवः॥"
"विवदा गुरवो रूक्षा याहिशस्तक्रपिच्छकाः।
गोरसानामयं वर्गो नवमः परिकीर्त्तितः॥"

इति चरके सूत्रस्थाने २७ अध्याये॥)

गोरसजं, क्ली,(गोरसात् जायते इति। गोरस+जन्+"अन्येष्वपि दृश्यते।" ३। २। १०१। इति डः।) तक्रम्। इति राजनिर्घण्टः॥

गोराटी, स्त्री, (गां मनुष्यवद्वाचं रटतीति। रट्+"कर्म्मण्यण्।" ३। २। १। इत्यण्। ततो ङीप्।) प्रारिकापर्णी। इति हेमचन्द्रः। ४। ४०२॥

गोराटिका, स्त्री, (गोराटी+स्वार्थे कन्। टाप् पूर्व्वह्रस्वश्च। ततो निपातनात् साधुः। गोराटिका इत्यपि दृश्यते।) प्रारिकापर्णी। इति राजनिर्घण्टः॥

गोरिका, स्त्री, (गोराटिका+पृषोदरात् साधुः।) प्रारिकापर्णी। इति राजनिर्घण्टः॥

गोरुतं, क्ली, (गो रुतं रवः श्रूयते यावता पथेति शेषः। गोशब्दः श्रुतिगोचरत्वेन अस्यस्य इत्यच् इत्येके वस्तुतस्तु पारिभाषिकोऽयं शब्दः।) क्रोशद्वयम्। इति हेमचन्द्रः। ३। ५५१॥

(गवां रुतं रवः इति ततपुरुषसमासे तु गवां शब्दमात्रे। तच्च कालादिभेदेन स्वामिनरपतिप्रभृतीनां शुभाशुभकरं स्यात्। यथा, डंडुतसंहितायाम्। ६२। १—३।

"गावो दीप्ताः प्राथिवस्याग्नियाय
प्रादैर्भूमिं कुट्टयन्त्यश्च रोगान्।
म्लेच्छं कुर्व्वन्त्यम्बुपूर्णायताश्च:
पत्युर्भीताश्चस्करानायवन्त्यः॥
अकारण्ये क्रोशति चैदनर्थो
भयाय राज्ञो दृषभः शिवाय।
भक्षं निरुद्धा यदि मक्षिकाभिः
क्षुदाम् दृष्टिं सरमाल्जवेर्वा॥
आगच्छन्त्यो वेश्म वस्त्रारवेश
संसेवन्त्यो गोष्टमुद्दे गवां गाः।
आर्द्राङ्गो वा दुष्टरोमण्यः प्रदुष्टा
धन्या गावः स्युर्महिष्योऽपि चैवम्॥")

गोरोचं, क्ली, (गोभिः तेजोभिरुच्यते दीप्यते इति। रुच्+अप्। गा इन्द्रियाणि इन्द्रियोपलक्षितानि शरीरादीनि रोचयति दीपयति औषधादियोगेनेत्यर्थः रुच्+णिच्+अच्।) हरितालम्। इति राजनिर्घण्टः॥

गोरोचना, स्त्री, (गौर्जाता रोचना हरिद्रा इव।) स्वनामख्यातपीतवर्णद्रव्यम्। तत्तु गोमस्तकस्थशुष्कपित्तम्। यथा, माधवकरे।

"विद्योषयेद्वस्तिगतं सशुक्रं
मूत्रं सपित्तं पवनः कफं वा।
यदा तदाश्मर्य्युपजायते च
क्रमेण पित्तेष्विव रोचना गोः॥"

तत्पर्य्यायः। रुचिः २ शोभा ३ रुचिरा ४ शोभना ५ शुभा ६ गौरी ७ रोचनी ८ पिङ्गा९ मङ्गल्या १० मङ्गला ११ शिवा १२ पीता १३ गौतमी १४ गया १५ चन्दनीया१६ काञ्चनी१७ मेध्या १८ मनोरमा १९ श्यामा २० रामा २१। इति राजनिर्घण्टः॥ वन्द्या २२ रोचना २३। अस्या गुणाः। हिमत्वम्। तिक्तत्वम्। वश्यमङ्गलकान्तिकारित्वम्। विषालक्ष्मीग्रहोन्मादगर्भस्रावक्षतास्रनाशित्वञ्च। इति भावप्रकाशः॥ रूक्षत्वम्। पवित्रताश्रृङ्गारहितकारित्वम्। कृमिकुष्ठनाशित्वम्। भूतोपशमनत्वम्। जनमोहनत्वञ्च। इति राजनिर्घण्टः॥ (यथा, कुमारे। ७। १५।

"विल्वस्तनोन्नागुरुचक्रुरङ्गं
गोरोचनापत्रविभक्तमस्याः।"
"क्रमेण पित्तेष्विव रोचना गोः।"

इति माधवनलतरङ्गिणिधृतस्याप्यर्थेधिकारे॥)

गोर्द्दं, क्ली, (गुर्+"अन्दादयश्च।" उणां। ४।६८। इति दन्प्रत्ययेन निपातनात् साधुः।) मस्तिष्कम्। मस्तकस्थघृतम्। इत्यमरः। २।६।६५॥ (मस्तिष्कशब्दोऽस्य विवरणं ज्ञातव्यम्॥)

गोलं, क्ली, (गुड्+भावे घञ् डस्य लत्वं च।) मण्डलम्। इति मेदिनी। ले। २५॥ (यथा, भागवते। २। २३। ४३। [स्वया॥")

"प्रेक्षयित्वा सुवो गोलं पद्मेन यावान् स्वर्ग-

गोलः, पुं, (गुड्+भावे घञ् अजित्वेके। डस्य लत्वम्।) सर्व्ववर्त्तुलः। इति हेमचन्द्रः॥ मदनवृक्षः। इति रत्नमाला॥ जारात् विधवायाः सुतः। इति धरणी॥ (यथा, याज्ञवल्क्यः। १। २२२।

"अवकीर्णी कुण्डगोली कुनखी श्यावदन्तकः॥")

गोलः। इति जटाधरः॥ भूगोलः खगोलश्च। (यथा, भागवते। ५। २०। ४३।

"सूर्य्यास्तगोलयोर्मध्ये कोष्ठः स्यु पञ्च विंशतिः॥")

यथा, शिद्धान्तशिरोमणौ। [त्वम्॥"

"गोलं श्रोतुं यदि तव मतिर्भास्करीयं ग्रन्थं एकराशौ बहुग्रहयोगः। यथा. प्रश्नकौतुकाम्।
"यद्राशावेकस्मिन् यदि भवति यस्मिं निवसतिस्तदा गोलो योगः प्रलयपदमिन्दोऽपि लभते।
भवेल्लोको रक्षः परिहरति पुत्रञ्च जननी कृपार्द्रा नाग्नः स्यात् ज्वलति वसुधा शुष्यति नदी॥"

एकराशौ सप्तग्रहयोगश्च। यथा, मयूरचित्रके।

"सप्तग्रहा यदैकस्यां गोलयोगस्तदा भवेत्।
दुर्भिक्षं राष्ट्रपीड़ा च तस्मिन् काले नृपक्षयः॥"

अपि च। [संख्याख्या,।

"एकादिग्रहयोगैस्तैरुक्तान् योगान् विहाय गोलयुक्सूलकेदारपाशुद्दामाख्यकीनाः स्युः॥
दुःखितदरिद्रघातुकक्षधिकरदुःशीलपशुपतिपुत्रागाम्॥
जन्मक्रमेण दुःखिनः परमाग्नेः सर्व्व एवैते॥"

इति दैवज्ञिका॥

गोलकं, क्ली, (गुड्+घञ्। स्वार्थे कन् च। ह्रस्वत्वं च। खुल् इत्येके।) गोलोकम्। यथा, तन्त्रे।

"यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके॥"

गोलकः, पुं, (गुड्+घञ्। ततः स्वार्थे कन्। ह्रस्वत्वं च। खुल् इत्येके।) जते भर्त्तरि जारजः। इत्यमरः॥ राँड़ेर छेले इति भाषा॥ (यथा, मनुः। ३। १५६।

"भ्रूणघ्न्यो गुरुतल्पश्च वार्षुषः कुण्डगोलकौ॥")

अलिङ्गरः। गुडः। पिण्डः। इति हेमचन्द्रः॥ गन्धरसः। इति रत्नमाला॥ कषायः। इति शब्दचन्द्रिका॥ मटर इति ख्यातः॥

गोला, स्त्री, (गां पृथ्वीं सर्व्वं जगदित्यर्थः खञ्जतिव्याप्नोतीति खञ्जति प्रलयकाले खञ्जिन् खाति यच्छति इति वा।) दुर्गा। (गां पृथ्वीं लातीत्यर्थं जलरूपशरीरव्यापकतया लाति।) गोदावरी। (गां वाचं लाति। ला+किप्।) सखी। कुनटी। पत्राञ्जनम्। मण्डलम्। अलिङ्गरः। बालक्रीड़नकाष्ठम्। इति मेदिनी। ले। २५॥

गोलाङ्गूलः, पुं, (गोर्लाङ्गूलवल्लाङ्गूलमस्य।) वानरः। (यथा, रामायणे। ६। १०५। ८।

"निरुजो निर्व्रणश्चैव सम्पन्नबलपौरुषान्।
गोलाङ्गूलां स्तथैवर्क्षान् द्रष्टुमिच्छामि मारुत!॥"

तत्पर्य्यायः। कपिलाक्षः २ दधिग्रीवः ३ नगाटनः ४। इति त्रिकाण्डशेषः॥ लाङ्गलवानरः। इति राजनिर्घण्टः॥

गोलासः, पुं, (गां पृथ्वीं भूमिमित्यर्थः लासयति उल्लासयति विभूषयति इति यावत्।) गोमयच्छत्रिका। शिलीन्ध्रम्। इति शब्दरत्नावली।२५॥

गोलिहः, पुं, (गाः लेढीव इति। लिह + कः। गोभिर्लिह्यते इति वनर्थे क इति केचित्।) वराटा पाटलिः। इति जटाधरः॥

गोलीढः, पुं, (गोभिर्लिह्यते स इति क्तः।) वराटापाटलिः। इत्यमरः। २। ४। ३६॥

गोलोकं, क्ली, (गौर्ज्योतीरूपं ज्योतिर्मयः पुरुष इत्यर्थस्तस्य लोकः स्थानम्। अभिधानात् क्लीवत्वम्। यद्वा गोभिः किरणैः ब्रह्मज्ञानतेजोभिरित्यर्थः लोक्यते इति। लुक् + घञ्।) श्रीकृष्णस्य स्थानम्। यथा, तत्रैव।

"वैकुण्ठस्य दक्षभागे गोलोकं सर्व्वमोहनम्।
तत्रैव राधिका देवी द्विभुजो मुरलीधरः॥
यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके।
ज्ञाने वा चक्षुषोः किंवा ध्यानयोगे न विद्यते॥
शुद्धतत्त्वमयं देवि! नानादेवेन शोभितम्।
मध्यदेशे गोलोकाख्यं श्रीविष्णोर्लोभमन्दिरम्॥
श्रीविष्णोः सत्त्वरूपस्य यत् स्थानं चित्तमोहनम्।
तस्य स्थानस्य माहात्म्यं किं मया कथ्यतेऽधुना॥
तत्रैव सततं भाति द्विभुजो मुरलीधरः।
तदा सत्त्वमयो विष्णुर्भुवनं पाति निश्चितम्॥
वैष्णवस्य महामोक्षो यत्रैव परमेश्वरि!।
इति स्थानस्य माहात्म्यं संक्षेपेण मयोदितम्॥
विस्तारेण न शक्नोमि जन्मान्तरशतेन च।
बीजकोषस्य वाह्ये तु वेष्टितं तोयमण्डलम्॥
प्रमाणं सुन्दरं तोयं यथा क्षीरोदसागरम्।
घनस्य ज्योतिषाकारं कोटिचन्द्रसमप्रभम्॥
जलाकाररूपेण सुशुभं तोयमण्डलम्।
गङ्गादिसरितः सर्व्वास्तथैव भान्ति सुन्दरि!॥
इन्द्रादिदेवताः सर्व्वा स्तूयमाना निरन्तरम्।
गन्धर्व्वयक्षनागादिकुष्माण्डा भैरवास्तथा॥
नानासुखविलासेन सदा चैकाग्रचेतसः।
विष्णुगानं प्रकुर्व्वन्ति स्तुतिभक्तिपरायणाः॥
देवा गानं प्रकुर्व्वन्ति चतुर्व्वक्त्रेण वेधसा।
मालवाद्याश्च षड्रागा षट्त्रिंशद्रागिणी तथा॥
वेदगानेन भासन्तो मूर्त्तिमन्तः सदैव हि।
मालवेनैव रागेण सामगानं सदा प्रिये॥
मल्लारेण सदाथर्व्वं वसन्तेन तथा पुनः॥
छिन्दोगेन यजुःपाठं सदा कुर्व्वन्ति चेतसा॥
कर्णाटेनैव ऋग्वेदं श्रीरागेण तथा ग्रिवे।
निर्दिष्टपाठभेतत्तु ह्यनिर्दिष्टमतः परम्॥
तत्रैव सन्ति ते रागाः सहस्राणि च षोड़श।
मुरारेर्मुररीगानात् सर्व्वस्तालः प्रजायते॥
तेन तालेन रागेण सदा गायन्ति वेधसः।
तदागस्य विभागं हि कुर्व्वन्ति मुनयो जनाः॥
वसन्ताद्याश्च ऋतवस्तिष्ठन्ति तत्र सन्ततम्।
नानाऋतुप्रसूनेन भूषितं मुररीधरम्॥
तत्रैव राधिका देवी नानासुखविलासिनी।
वदन्ती मुररीगानं कुरु कान्त! प्रमोहनम्॥
येन शब्देन कामस्य उत्पत्तिर्जायते सदा।
तदागञ्चैव तत्तालं कुरु गानं प्रयत्नतः॥
एवमानन्दसंयुक्ता महावेश्यविलासिनी।
वामभागे सदा भाति राधिका भक्तवत्सला॥"

(एतस्य धाम्नो नित्यादिकमाहात्म्यं लक्षणादिकञ्च ब्रह्मवैवर्त्तपुराणे ब्रह्मखण्डे २८ अध्याये विस्तरशो विवृतं यथा,—

"नित्यं स्थूलञ्च प्रच्छन्नं गोलोकाभिधमेव च।
लक्षकोटियोजनञ्च चतुरस्रं मनोहरम्॥
रत्नेन्द्रसारनिर्म्माणैर्गोपीनामावृतं सदा।
सुदृश्यं वर्त्तुलाकारं यथैव चन्द्रमण्डलम्॥
रत्नेन्द्रसारनिर्म्माणं निराधारञ्च स्वेच्छया।
ऊर्द्धञ्च नित्यं वैकुण्ठात् पञ्चाशत्कोटियोजनम्॥
गोगोपगोपीसंयुक्तं कल्पवृक्षसमन्वितम्।
कामधेनुभिराकीर्णं रासमण्डलमण्डितम्॥
वृन्दावनवनाच्छन्नं विरजावेष्टितं मुने!।
शतशृङ्गं शतशृङ्गैः सुदीप्तं दीप्तमौषधैः॥
लक्षकोटिपरिमितै राश्रमैः सुमनोहरैः।
शतमन्दिरसंयुक्तमाश्रमं सुमनोहरम्॥
प्राकारपरिखायुक्तं पारिजातवनान्वितम्।
कौस्तुभेन्द्रेण मणिना निर्म्माणकलसोज्ज्वलैः॥
हीरासारविनिर्म्माणसोपानसंघसुन्दरैः।
मणीन्द्रसारनिर्म्माणैः कपाटदर्पणान्वितैः॥
नानाचित्रविचित्राढ्यैराश्रमञ्च सुसंस्कृतम्।
षोड़शद्वारसंयुक्तं सुदीप्तं रत्नदीपकैः॥
रत्नसिंहासने रम्ये चामूल्यरत्ननिर्म्मिते।
नानाचित्रविचित्राढ्ये वसन्तमीश्वरं वरम्॥")

गोलोकः, पुं, (लोक्यतेऽसौ इति लोकः गोभिस्तेजोभिरुपलक्षितो लोकः। ब्रह्मस्वरूपज्योतिर्म्मयलोक इत्यर्थः।) श्रीकृष्णस्य नित्यधाम। यथा, ब्रह्मवैवर्त्तपुराणे॥

"निराधारञ्च वैकुण्ठो ब्रह्माण्डानां परो वरः।
तत्परञ्चापि गोलोकः पञ्चाशत्कोटियोजनात्॥
ऊर्द्धं निराश्रयञ्चापि रत्नसारविनिर्म्मितः।
सप्तद्वारः सप्तसारः परिखासप्तसंयुतः॥
लक्षप्राकारयुक्तश्च नद्या विरजया युतः।
वेष्टितो रत्नशैलेन शतशृङ्गेण चारुणा॥
योजनायुतमानञ्च यस्यैकं शृङ्गमुज्ज्वलम्।
शतकोटीयोजनञ्च शैल उच्छ्रित एव च॥
दैर्घ्ये तस्य शतगुणं प्रस्थे च लक्षयोजनम्।
योजनायुतविस्तीर्णस्तत्रैव रासमण्डलः॥
अमूल्यरत्ननिर्म्माणो वर्त्तुलश्चन्द्रविम्बवत्।
पारिजातवनेनैव पुष्पितेन च वेष्टितः॥
कल्पवृक्षसहस्रेण पुष्पोद्यानशतेन च।
नानाविधैः पुष्पवृक्षैः पुष्पितेन च चारुणा॥
त्रिकोटिरत्नभारेण गोपीलक्षेण रचितः।
रत्नप्रदीपयुक्तश्च रत्नतल्पसमन्वितः॥
नानाभोगसमायुक्तो मधुवापीशतैर्वृतः।
पीयूषवापीयुक्तश्च कामभोगसमन्वितः॥
गोलोकस्यसंख्यानं वर्णनं वा विशारदः।
न कोऽपि वेद विद्वान् वा वेद विद्वान् ब्रह्मेश्वरः॥"

गोलोमिका, स्त्री, (गवां लोमेव लोमानि सन्त्यस्याः इति ठन् टाप् च। यद्वा गोलोमी स्वार्थे कः पूर्व्वह्रस्वः। इत्येके।) क्षुद्रक्षुपविशेषः। गोधूमा इति पाषरी इति च भाषा। तत्पर्य्यायः। मोधमीरः गोजाः क्रोष्टुकपुच्छिका४ गोसम्भवा५ प्रस्तरिणी६। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। चिरदोषशमनत्वम्। हिमत्वम्। शूलरोगास्रदोषनाशित्वम्। ग्राहित्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥

गोलोमी, स्त्री, (गोर्लोमवत् लोमाकारं पत्रमस्याः।) श्वेतदूर्व्वा। (व्यवहारो यथा,—

"पुराणसर्पिर्लवणं हिङ्गु-सिद्धार्थकं वचा।
गोलोमी चाजलोमी च भूतकेशी जटा तथा॥"

इत्यादिषु इति सुश्रुते उत्तरतन्त्रे षष्टितमेऽध्याये॥) वचा। भूतकेशः। इति मेदिनी॥ (व्यवहारोऽस्य यथा, संज्ञास्थापनगणे।

"छिन्नरुहाटरूषकारिमेदा-वचा-चोरक-वयःस्था गोलोमी-जटिला-पलङ्कषाशोकरोहिण्य इति दशेमानि संज्ञास्थापनानि भवन्ति॥" इति चरके सूत्रस्थाने चतुर्थेऽध्याये॥) वेश्या। इति हेमचन्द्रः॥ गोलोमिका। इति राजनिर्घण्टः॥

गोवत्सादी, [न्] पुं, (गोवत्सं अत्ति भक्षयति। अद् + णिनिः।) वृकः। इति राजनिर्घण्टः॥

गोवधः, पुं, (गोर्वधो हननम्।) गोहत्या। सा च उपपातकविशेषः। यथा, मनुः ११ अः।

"गोवधोऽयाज्यसंयाज्ययाररार्थात्मविक्रयाः॥"

तत्प्रायश्चित्तं प्रायश्चित्तशब्दे द्रष्टव्यम्॥

गोवन्दनी, स्त्री, (गवि पृथिव्यां वन्द्यते प्रशस्यते इति कर्म्मणि ल्युट् ततो ङीप्।) प्रियङ्गुवृक्षः। इत्यमरः॥ पीतदण्डोत्पलः। इति रत्नमाला॥ (प्रियङ्गु पीतदण्डोत्पलयोरस्या विशेषो ज्ञातव्यः॥)

गोवरं, क्ली, (गोभ्यो निःसृतत्वाद् वरं श्रेष्ठं माननीयमित्यर्थः। गोषु ब्रियते। वृ + बाहुलकात् अः इत्येके।) गोखरचूर्णसगोष्ठस्थशुष्कगोमयचूर्णम्। यथा,—

"गोष्ठान्तर्गोखरचूर्णं शुष्कं गोमयचूर्णितम्।
गोवरं तत् समाख्यातं वरिष्ठं रससाधने॥"

इति भावप्रकाशः॥

गोवर्द्धनः, पुं, (गाः वर्द्धयन्ति कोमलतृणपत्रादिदानेन इति। वृध् + णिच् + ल्युः। यद्वा गावो वर्द्धन्तेऽत्र इति। णिच् + ल्युट् अधिकरणे। पर्व्वतबोधकत्वात् पुंस्त्वम्। यद्वा गां पृथ्वीं भूमिं वा वर्द्धयति। वृध् + णिच् कर्त्तरि ल्युः। स्वनामख्यातश्रीवृन्दावनस्थपर्व्वतः। इति जटाधरः॥ तस्य स्वरूपं यथा,—

"अनादिर्हरिदासोऽयं भूधरो नात्र संशयः।"

इति पाद्मे पातालखण्डे व्यासं प्रति श्रीकृष्णवाक्यम्॥ तस्य पूजाकालादिर्यथा,—

"प्रातर्गोवर्द्धनं पूज्य द्यूतञ्चैव समाचरेत्।
भूषणीयास्तथा गावः पूज्याश्च दोहवाहनाः॥
श्रीकृष्णदासवर्य्योऽयं श्रीगोवर्द्धनभूधरः।
शुक्लप्रतिपदि प्रातः कार्त्तिके चार्य्यतेऽच वैष्णवैः॥"

"प्रातर्गोवर्द्धनं पूज्य रात्रौ जागरणं चरेत्।"

इति क्वचित् पाठः।

तस्मात्तदिदं कर्म्म गोवर्द्धनप्राधान्येन गोप्राधान्येन च ख्यातमप्येकमेव श्रेयम्। तत्र दिन निर्णयः। तदाह देवलः।

"प्रतिपद्दर्शसंयोगे क्रीडनन्तु गवां सतम्।
परविद्धान्तु यः कुर्य्यात् पुत्रदारधनक्षयः॥"
निर्णयान्तदधृतं पुराणान्तरवचनम्।
"या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप!।
पूजामात्रेण वर्द्धन्ते प्रजा गावो महीपतेः॥"
ततः प्रातर्गोवर्द्धनं पूर्व्वेति पूर्व्वाङ्गतातृपर्य्यकम्। द्वितीयासमये तु सर्व्वथा निषिद्धम्। तद्यथा,—
"नन्दायां दर्शने रक्षा बलिदानदृशासु च।
भद्रायां गोकुलक्रीड़ा देशनाशाय जायते॥"
पुराणसमुच्चये तु सम्भावितचन्द्रोदयद्वितीयासंयोग एव निषिध्यते।
"गवां क्रीड़ादिने यत्र रात्रौ दृश्यते चन्द्रमाः।
सोमो राजा पशून् हन्ति सुरभी पूजकांस्तथा॥"
तदुदयसम्भावनया निर्णयान्ते निर्णीतम्। प्रतिपदापराह्णिकत्रिमुहूर्त्तव्याप्तिन्यां द्वितीयायां चन्द्रदर्शनं सम्भाव्यते। तदुक्तसम्बाधानविषये वृद्धशातातपेन।
"द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपदापराह्णिकी।
अस्यामाधानचतुर्दश्यां परतः सोमदर्शनादिति॥"
अपराह्णश्च पञ्चधा विभक्तस्याह्नश्चतुर्थोभागः। ततश्च यत्र प्रतिपदि यन्मुहूर्त्तव्याप्तिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति। अन्यदा तूत्तरैव प्रतिपत्तत्र ग्रहीता। तदेव पुराणसमुच्चये।
"वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका।
द्वितीयावृद्धिगामित्वादुत्तरा तत्र घोष्यते॥"
किञ्च। यदा पूर्व्वप्रतिपत् परञ्च निष्क्रामति तदाप्युत्तरैव कार्य्या। यथोक्तं भविष्योत्तरे।
"यथा द्वादशभिर्मासैर्मासो वृद्धो मलिम्लुचः।
तथैवाहोरात्रिवृद्ध्या तिथिः प्रोक्तो मलिम्लुचः॥
यथा मलिम्लुचः पूर्व्वो मासो देवस्तथा परः।
आह्नया तिथिस्तथा पूर्व्वा आह्ना चैव तथोत्तरेति निर्णयान्ततमतम्॥ किन्तु। अङ्गलीन्यायेन पूर्व्वैव ग्राह्यं ग्रन्थते। तद्दत्रापि देवलादिवचनप्रामाण्यमस्तीति॥ *॥
अथ गोवर्द्धनपूजाविधिः। पाद्मे तत्रैव।
"मथुरायाञ्चयाग्यत्र दृष्ट्वा गोवर्द्धनं गिरिम्।
गोमयेन महास्थूलं तत्र पूज्यो गिरिर्यथा॥
मथुरायां तथा दृष्ट्वा तं दृष्ट्वा चैव प्रदक्षिणम्।
वैष्णवं धाम सम्प्राप्य मोदते हरिसन्निधौ॥"
पूजामन्त्रः।
"गोवर्द्धन! धराधार! गोकुलत्राणकारक!।
विष्णुबाहुकृतोच्छ्रायो गवां कोटिप्रदो भव॥"
गोपूजामन्त्रः। स्कान्दे तत्रैव।
"लक्ष्म्यौर्या लोकपालानां धेनुरूपेण संस्थिता।
घृतं वहति यज्ञार्थे यमपाप्रं यमोहतु॥
अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः।
गावो मे पार्श्वतः सन्तु गवां मध्ये वसाम्यहम्॥"
अथ गोक्रीड़ा। तत्रैव।
"क्रीडापयेद्धावयेच्च गोमहिष्यादिकं ततः।
इदान् वर्षापयेन्नोपेक्षेत्प्रत्युक्तिवादतः॥"
पाद्मे च तत्रैव।
"महिष्यादेस्तथा भूषा क्रीड़नं वारणन्तथा॥"
तन्माहात्म्यञ्च तत्रैव।
"एवं गोवर्द्धनं गाञ्च पूजनीया विधानतः।
गोवर्द्धनमखो रम्यः सर्व्वसन्तोषकारकः॥"
इति श्रीहरिभक्तिविलासे कार्त्तिककृत्ये १६ विलासः॥ (पुरुषोत्तमक्षेत्रे भगवता शङ्कराचार्य्येण प्रतिष्ठापितो मठविशेषः। इति शङ्करविजयः॥ आर्य्यासप्तशतीप्रभृतिग्रन्थकारः आचार्य्यविशेषः। अयमेव कविवरः वङ्गाधिपस्य लक्ष्मणसेनस्य सभापण्डित आसीत्। एतन्मतसमर्थनोदाहरणानि क्रमान्वयेन वेदितव्यानि यथा, आर्य्यासप्तशतीम्। ७०२।
"हरिचरणाञ्जलिमसृणं कविवरहर्षाय बुद्धिमान् सततम्।
अकृतार्य्यासप्तशतीमेतां गोवर्द्धनाचार्य्यः॥"
तत्रैव टीकासुखबन्धान्तरे। यथा,—
"गोवर्द्धनोत्तिसुखदानदिनमेतद्-
यच्चार्यदीपनमनल्पचमत्कृतीनाम्।"
"गोवर्द्धनाचार्य्यसमयस्तावद्यापि सम्यङ् न ज्ञायते परन्त्वयं गीतगोविन्दकर्त्तुर्जयदेवात् प्राचीनस्ततसमकालीनो वेति वक्तुं शक्यते। यतो जयदेवेन गीतगोविन्दप्रारम्भे 'श्रङ्गारोत्तरसत्प्रमेयरचनैराचार्य्यगोवर्द्धनस्पर्द्धी कोऽपि न विश्रुतः' इत्युक्तमस्ति। जयदेवकविश्च वङ्गदेशाधिपस्य वल्लालसेनस्य लक्ष्मणसेनस्य सभायामासीदिति श्रीसनातनगोस्वामिनां मतम्। 'गोवर्द्धनश्च शरणो जयदेव उमापतिः।
कविराजश्च रत्नानि समितौ लक्ष्मणस्य च॥'
इत्ययं श्लोको लक्ष्मणसेनसभायश्चङ्कारोपरि श्लिलायासुत्कीर्ण आसीत्। तस्माद् गोवर्द्धनजयदेवादयः सर्व्वेऽपि लक्ष्मणसेनसभायामासन्निति केचित्॥")
गोवर्द्धनधरः, पुं, (धरति धारयति वा। धृ+अच्। गोवर्द्धनस्य धरः।) श्रीकृष्णः। इति शब्दचन्द्रिका॥ (यथा, हरिवंशे। ७६। १।
"गते शक्रे ततः कृष्णः पूज्यभागो व्रजालये।
गोवर्द्धनधरः श्रीमान् विवेश व्रजमेव ह॥")
गोवन्ध्या, स्त्री (वन्ध्या गौरिति प्रत्ययोत्पातनात् तथात्वम्।) वन्ध्या गौः। इति कलापव्याकरणम्॥
गोविट्, [ष्ठ्] पुं, (गवां विट् विष्ठा।) गोमयम्। इत्यमरः। २। ६। ५०॥
गोविन्दः, पुं, (गां पृथ्वीं धेनुं वा विन्दतीति। विन्द+"अनुपसर्गाल्लिम्पेति।" ३। १। १३८। इत्यस्य "गवादिषु विन्देः संज्ञायाम्।" इति वार्त्तिकोक्त्या घञ्।) श्रीकृष्णः। (यथा, भगवद्गीतायाम्। १। ३२।
"किं नो राज्येन गोविन्द! किं भोगैर्जीवितेन वा॥")
एतस्य शब्दान्तरीयव्युत्पत्तिर्यथा, हरिवंशे—विष्णुपर्व्वणि। ७५। ४३—४५।
"अद्य प्रभृति नो राजा त्वमिन्द्रो वै भव प्रभो!।
तस्मात्तं काञ्चने पूर्व्वैर्दिग्यस्य पयसो घटैः॥
एभिरद्याभिषिञ्चस्व मया शक्रावमानितैः।
अहं किलेन्द्रो देवानां त्वं गवामिन्द्रतां गतः॥
गोविन्द इति लोकास्त्वां स्तोष्यन्ति भुवि शाश्वतम्॥"
गोभिर्वागीभिर्वेदान्तवाक्यैर्विन्दते योऽसौ पुरुषः विदन्ति यं पुरुषं तत्त्वज्ञा इति वा। यथा, विष्णुतिलके।
"गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः॥"
गां वेदलक्षणां वाचीं गोभूम्यादिकं वा वेत्तीति। यथा, गोपालतापन्यां पूर्व्वविभागे ध्यानप्रकरणे। ७—८।
"तद्वै होचुः कः स्विद्यो गोविन्दश्च कोऽसाविति गोपीजनवल्लभः कः का स्वाहेति॥ तासुवाच ब्राह्मणः पापकर्षणो गोभूमिवेदविदितो विदिता गोपीजनाविद्याकलाप्रेरकस्तन्माया चेति।"
एतन्मान्यो भारतादिमतेन व्युत्पत्तिर्यथा, महाभारते। १। २१। १२।
"गां विन्दता भगवता गोविन्देनामितौजसा।
वराहरूपिणा शान्तविक्षोभितजलावलम्॥"
तत्रैव। ५। ७०। १३।
"विष्णुर्विक्रमणाद्देवो जयनाज्जिष्णुरुच्यते।
शाश्वतत्वादनन्तत्व गोविन्दो वेदनाद्गवाम्॥"
यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्याये।
"युगेयुगे प्रवरां गां विष्णो! विन्दसि तत्त्वतः।
गोविन्देति ततो नाम्ना प्रोच्यसे ऋषिभिस्तथा॥"
विन्दतीति विन्दः पालकः स्वामी वा। विन्द+घञ्। गवां गोसम्बन्धिनां विन्दः।) गवाध्यक्षः। (गवां ज्ञानमयीनां वाचीनां विन्दः पतिः।) वेदवेत्तेति मेदिनी॥ (गौड़पादाचार्य्यशिष्यः योगिविशेषः। अयं हि परमहंसपरिव्राजकाचार्य्यस्य भगवतः शङ्करस्य गुरुः। यथा, माधवीये शङ्करजये। ५। १०१।
"तस्योपदर्शितवतश्चरणौ गुहायां
द्वारे न्यपूजयदुपेत्य स शङ्कराख्यः।
आचार इत्युपदिदेश स तत्र तस्मै
गोविन्दपादगुरवे स गुरुर्यतीनाम्॥"
अनेन च योगिप्रवरेण गोविन्देन बौधायनधर्म्मविवरणं बौधायनधर्म्मसूत्रभाष्यञ्च प्रणीतमिति श्रूयते ततो बौद्धमतमालोच्य रससाराख्यग्रन्थोऽपि विरचित इति श्रूयते। यथा, रससारे ५म पटले।
"बौद्धानाञ्च मतं ज्ञात्वा रससारः कृतो मया॥"
पञ्चावस्थाग्निसञ्ज्ञातीनां गुरुभेदः। योऽसौ गुरुगोविन्द इति नाम्नोदाहृतः॥ गाः मनःप्रधानानीन्द्रियाणि तेषां विन्दः प्रवर्त्तयिता चेतयिता वा। अन्तर्यामी आत्मेश्वरः।) परमब्रह्म। यथा,—
"तत्र यद्यसमर्थस्त्वं ज्ञानयोगे महामते!।
क्रियायोगे दिवा रात्रौ तत्परः सततं भव॥
करोषि यानि कर्म्माणि तानि देवे जगत्पतौ।

समर्पयस्व भद्रं ते ततः कर्म्म प्रहास्यसि ॥
शुभाशुभपरित्यागी चौवै निःवैषकर्म्मणि ।
लयमाप्स्यसि गोविन्दं पदमक्षं परमं महत् ॥"
तन्नाममाहात्म्यं यथा,—
"ये तिष्ठन्तः स्वपन्तश्च गच्छन्तश्चलिते सुते ।
संकीर्त्तयन्ति गोविन्दं ते वस्त्याश्याः सुदूरतः ॥"
इति च वह्निपुराणे यमानुशासननामाध्यायः ॥
(अस्य ध्यानं यथा,—
"फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कसुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥")
गोविन्दद्वादशी, स्त्री, (गोविन्दप्रीतये या द्वादशी गोविन्दाख्या द्वादशी वा । गोविन्दप्रिया द्वादशीत्यैके ।) फाल्गुनशुक्लद्वादशी । यथा,—
"फाल्गुने द्वादशी शुक्ला या पुण्यैरेव संयुता ।
गोविन्दद्वादशी नाम सा स्याद् गोविन्दभक्तिदा ॥
तस्यामुपोष्य विधिना भगवन्तं प्रपूजयेत् ।
लिखितः पापनाशिन्यां विधिर्योऽत्रापि स स्मृतः ॥"
तस्माहात्म्यञ्च ब्रह्मपुराणे श्रीवशिष्ठमान्धातृसंवादे ।
"फाल्गुनाऽमलपक्षे तु पुण्यैर्द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥
तस्यामुपोष्य विधिवन्नरः संयोजकत्रतः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति ॥
आमर्दकी द्वादशीति लोके ख्यातेयमेव हि ।
यत्र आमर्दकीपूजा व्रतमस्यां विशेषतः ॥"
तदुक्तं ब्राह्मे तत्रैव पापनाशिनीमाहात्म्यप्रसङ्गे ।
"फाल्गुने तु विशेषेण विष्णोः कथितो नृप ! ।
आमर्दकस्य व्रतं पुण्यं विष्णुलोकप्रदं नृणाम् ॥"
प्रभासखण्डे च । श्रीदेवीमहेशसंवादे ।
"फाल्गुनस्य सिते पक्षे एकादश्यामुपोषितः ।
स्नात्वा नद्यां तडागे वा वाप्यां कूपे ह्रदेऽपि वा ॥
गत्वा गिरौ वने वापि यत्र सा प्राप्यते शिवा ।
चीरोदे मथ्यमाने तु यदा दृष्टः वसुस्थितः ॥
आमर्दाद्देवदेवानां तेन सामर्दकी स्मृता ।
शिवा लक्ष्मीः स्मृतो दृष्टः सेव्यते सुरसत्तमैः ॥
देवैर्ब्रह्मादिभिः सर्व्वैर्वृतोऽसौ वैष्णवः स्मृतः ।
तत्र गत्वा हरिः पूज्यो दृष्टस्तेऽथवा शिवा ॥
पूज्या पूज्यैः शुभे रात्रौ कार्य्यं जागरणं हरेः ।
कैरवं जलपूर्णेषु कर्णेषं प्राज्यसंयुतम् ॥
हविष्यान्नञ्च कर्त्तव्यं दीपः कार्य्यो विधानतः ।
एवं जागरणं कार्य्यं कथाश्रवणतत्परैः ॥
सुप्यन्ते देहिनः पापैः कलिजैः कायसम्भवैः ।
देहानां च वराः सर्व्वे पूज्यन्ते हरिमन्दिरे ॥"
इति श्रीहरिभक्तिविलासे १४ विलासः ॥
गोविष्ठा, स्त्री, (गवां विष्ठा शकृत् ।) गोमयम् । इति राजनिर्घण्टः ॥
गोवृन्दं, क्ली, (गवां वृन्दं यूथः ।) गोसमूहः । इति हेमचन्द्रः ॥
गोवृन्दारकः, पुं, (गौर्वृन्दारक इव पूज्य इति श्रीधरः । "वृन्दारकनागकुञ्जरैः पूज्यमानम् ।" २।१।६२ । इत्यनेन सूत्रेणोपमितसमासे आद्यादेराकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनमिति वार्त्तिकम् ।) श्रेष्ठगौः । इति कलापव्याकरणम् ।
गोवृषः, पुं, (गोषु स्त्रीगोव्यिर्थः वर्षति सिञ्चति रेतः । वृष् + "इगुपधेति ।" ३ । १ । १३५ । इति कः ।) वृषः । इति शब्दरत्नावली ॥ (यथा, मनुः । ६ । १५० ।
"कीनाशो गोवृषो यानमलङ्कारश्च वेश्म च ।"
"कीनाशः कर्षकः गवां सेक्ता वृषो यानमश्वादि ।"
इति कुल्लूकभट्टः ॥)
गोशकृत्, क्ली, (गवां शकृत् विष्ठा ।) गोमयम् । इति जटाधरः ॥ (यथा, मनुः । २ । १८२ ।
"उदक्कुम्भं सुमनसो गोशकृत् स्थण्डिलं कुशान् ॥"
पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"गोमयं जगलं गोविट् गोषद्यं तच्च गोशकृत् ॥")
गोशालं, क्ली स्त्री, (गवां शाला "विभाषा सेनेति ।" २ । ४ । २५ । इति विभाषया क्लीवत्वम् ।) गोगृहम् । इति लिङ्गादिसंग्रहे अमरः ॥ गोयालि इति भाषा ॥ (गोशालायां जातः । "स्थानान्तगोशालखरशालाच्च ।" ४ । ३ । ३५ । जातार्थप्रत्ययस्य लुक् । ततो विभाषासेनेति नपुंसकत्वे ह्रस्वत्वम् । गोशब्दजाते त्रि ॥)
गोशीर्षं, क्ली, (गोः शीर्षं शीर्षदेशाकारो विद्यतेऽस्य ऋषभपर्व्वतेकदेशजातानां चन्दनभेदानां शीर्षभागस्य तद्वत्तया तथात्वम् ।) चन्दनम् । इति राजनिर्घण्टः ॥ हरिचन्दनम् । इत्यमरः ॥
"गोः शीर्षं गोशीर्षं तदाकारे मलयैकदेशे जातं कालतास्यामिश्रवर्णसुतप्रलम्बि अतिसुरभि शीतलतया सदैव सर्पैर्वेष्टितम् ।" इति भरतः ॥
(यथा, गोः रामायणे । ४ । ४१ । ५६ ।
"गोशीर्षचन्दनं यत्र पद्मकञ्जासमिन्नभम् ॥"
अवह्रियते यस्मिंस्तदृथा,—
"सोत्सर्गे वदनादृश्ये खेदः प्रथयते भृशम् ।
लेपव्यरोपतप्तस्य दुर्लभं तस्य जीवितम् ॥"
इति चरके इन्द्रियस्थानेऽष्टमेऽध्याये ।)
गवां मस्तकञ्च ॥
गोशीर्षकः, पुं. (गोशीर्षमिव कायति प्रकाशते इति । कै + कः ।) द्रोणपुष्पीवृक्षः । इति रत्नमाला ॥ (स्वार्थे कन् । चन्दनविशेषः ।)
गोशृङ्गः, पुं, (गोः शृङ्गमिव शृङ्गं शीर्षभागोऽस्य । खनामप्रसिद्धः पर्व्वतविशेषः । यथा, महाभारते । २ । ३१ । ५ ।
"निषादभूमिं गोशृङ्गं पर्व्वतप्रवरन्तथा ।"
अत्रैव पर्व्वते अरत्निमात्रा मन्देहा नाम राक्षसा निवसन्ति । ते हि देवराजमहेन्द्रेणाभिप्रभाः सन्तः सूर्य्योदये जले पतन्ति रजन्यां पुनरुत्पतन्ति । एतद्विवरणं यथा, रामायणे । ४ । ४० । ४२—४४ ।
"दक्षधामोत्तरं दिग्यं गोशृङ्गं नाम पर्व्वतम् ।
तस्य शृङ्गसहस्रेषु मन्देहा नाम राक्षसाः ॥
अरत्निमात्रा लक्ष्यन्ते नानारूपा भयावहाः ।
ते पतन्ति जले घोराः सूर्य्यस्योदयनं प्रति ॥
अभिप्रभा महेन्द्रेण निशायासुत्पतन्ति च ॥")
वर्ब्बरश्चः । इति राजनिर्घण्टः ॥ गोविषाणे क्ली ॥
गोशतुर्गवं, क्ली, (गवां शतुर्गवम् । "प्रमुखः स्यात्प्रधिष्टके गोशतुर्गोशतुर्गवम् ।" इति सुग्धबोधसूत्रात् ।) गोशतुर्गवम् । इति सुग्धबोधव्याकरणम् ॥
गोष्ट, ङ संघाते । इति कविकल्पद्रुमः (भ्वां-आत्मं- सर्क-सेट् ।) सङ्घातो राघौकरणम् ।
ङ, गोष्टते धान्यं लोकः । इति दुर्गादासः ॥
गोष्ठं, क्ली, (गावस्तिष्ठन्त्यत्र इति । स्था + "सुपि स्थः ।" ३ । २ । ४ । इति कः । घञर्थे कः । इत्येके ।) गोस्थानम् । गोठ । इति भाषा ॥ इत्यमरः ॥ (यथा, रामायणे । ४ । २२ । ३१ ।
"सिंहेन निहतं गोष्ठे गौः सवत्सेव गोपतिम् ।
दृष्ट्वा संग्रामयज्ञेन रामवाक्यमहाम्यसा ॥")
प्रत्ययविशेषः । स तु स्थानार्थे पशुवाचकशब्देभ्यो भवति । यथा, गोगोष्ठं महिषगोष्ठं इत्यादि । इति भरतः ॥ (गोष्ठीश्राद्धे । यथा, मनुः । ३ । २५४ ।
"पित्र्ये खदितमित्येव वाच्यं गोष्ठे तु सुस्वतम् ।
सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि ॥"
"गोष्ठे गोष्ठीश्राद्धे ।" इति कुल्लूकभट्टः ॥)
गोष्ठजः, त्रि, (गोष्ठे जा । "अचतुरविचतुरेति ।" ५ । ४ । ७० । समासे अच् । षष्ठीतत्पुरुषसमासे तु गोष्ठजा इत्येव स्यात् ।) खरशृङ्गेत्यितो यः परान् दहति सः । इति जटाधरः ॥
गोष्ठाष्टमी, स्त्री, (गोष्ठोपपदान्विता अष्टमी । गोष्ठे विहिता अष्टमी वा । एतस्यां तिथौ भगवतो बालरूपिणो नन्दनन्दनस्य गोष्ठगमनपुरःसरं वत्सपत्वं विधाय गोपत्वस्वीकरणात् तथात्वम् ।) गोपाष्टमी । सा च कार्त्तिकशुक्लाष्टमी । यथा, पाद्मे कूर्म्मपुराणे च ।
"शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी बुधैः ।
तद्दिने वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः ॥
तत्र कुर्य्याद्गवां पूजां गोप्यासं गोः प्रदक्षिणम् ।
गवानुगमनं कुर्य्यात् सर्व्वान् कामानभीप्सता ॥",
इति श्रीहरिभक्तिविलासे १६ विलासः ॥
"भौमपराक्रमे कार्त्तिकशुक्लपक्षमधिकृत्य ।
गोष्ठाष्टम्यां गवां पूजां गोप्यासं गोः प्रदक्षिणम् ।
गवानुगमनं कुर्य्यात् सर्व्वपापविमुक्तये ॥"
इति तिथ्यादितत्त्वम् ॥
गोष्ठी, स्त्री (गावः बहुविधा वाचस्तिष्ठन्त्यत्र । गो + स्था + कः । स्त्रियां ङीष् ।) सभा । तस्या लक्षणविशेषः ।
"एकाङ्का कथिता गोष्ठी कैशिकीवृत्तिसंयुता ।
सम्भोगरसघट् पञ्च सप्त वा योषिदन्विता ॥
प्राकृतैर्नवभिः पुंभिर्नृभिर्वाप्यजनैः कृता ।
गर्व्वावमर्षसन्धिभ्यां हीना प्राकृतसम्मता ॥

वाद्याद्यैरन्विता नैव कर्त्तव्येयं विचक्षणैः ॥"
इति सङ्गीतदामोदरः ॥
(गावोऽनेका वाचस्तिष्ठन्ति यत्र । गो + स्था + चर्य्ये कः । ततः "अस्मात्सगोभूमीति ।" ८ । ३ । ६७ । इति यलम् ।) संसायः । इति मेदिनी । ठे । ४ ॥ (यथा, पञ्चतन्त्रे । १ । ४०० ।
"एवमुक्तिते चत्वारोऽपि ते एकस्थाने विहारिणः परस्परमनेकप्रकारगोष्ठीसुखमनुभवन्तस्तिष्ठन्ति ॥") गोष्यवर्गः । यथा, चाणक्ये ।
"विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम् ॥"
(यथा च राजेन्द्रकर्णपूरे । ४० ।
"त्यक्त्वा वेलापुलिनजवलीपल्लवव्यासगोष्ठीं
दिङ्मातङ्गाः समममथ सरिन्नाथपाथः पिबन्ति ॥")
गोष्ठीपतिः, पुं, (पातीति पतिः । गोष्ठाः गोष्यवर्गस्य सभाया वा पतिः ।) गोष्यवर्गपालकः । सभापतिः ।
अथ ब्राह्मणगोष्ठीपतिलक्षणं यथा — [दिता
"नानाशास्त्रविचारदे रसिकता सत्काव्यसम्मोदितैः कुलभूषणैः परिमिता पूर्वा कुलज्ञैरपि ।
श्रीमद्भागवतादिकारणकथास्वभ्यासयान्विता
गत्वाभीरसुपैति यद्गुणिजनो गोष्ठी हि सा गोच्यते ॥"
एवम्भूता गोष्ठी तस्याः पतिः । अपि च ।
"कुलीनाः श्रोत्रियाः सर्व्वे यस्यान्नं सुभुजते सुखम् ।
कुलीनाय सुतां दत्त्वा स गोष्ठीपतिरुच्यते ॥"
तद्यथा । गाङ्गवंशे लक्ष्मीकान्तमज्जुमदारः १ सुखवंशे मदनभट्टाचार्य्यः २ तर्कवंशे गन्धर्व्वराय: ३ वन्द्यवंशे शुभराजखानवंश्यः ४ भट्टवंशे अनन्तभट्टाचार्य्यः ५ एते प्राचीनाः आधुनिका बहवः सन्ति ॥ ॥
कायस्थगोष्ठीपतिलक्षणं यथा,—
"नीतिज्ञः कुलकर्म्मठः स्मृतिमतां मान्योऽपि धर्म्मान्वितः
कार्य्याकार्य्यविलोकनैः कुलभृतां सम्मानदानोद्यतः ।
गोष्ठ्याः यः कुलसंविदां कुलसुधीः सम्मौलिकानां तथा
सदंशप्रभवः क्षितौ सुविदितो दाता स गोष्ठीपतिः ॥"
अथ कायस्थगोष्ठीपतिगणना ।
"आदौ द्वादशपर्य्याये समभवद्दामेन गोष्ठीपतिः
सतकीर्त्तिश्च सुबुद्धिखानतनयः श्रीमन्तराव; स्मृतौ । १ ।
संजातस्तदनन्तरं गुणधरो गण्ये च पर्य्यायके
खेचाती हि पुरन्दरः कुलभवः खानः सदा दानतः ॥ २ ॥
पर्य्याये च चतुर्दशे समभवत् पौरन्दरः केशवः
खानः सन्ततदानतो हि विलसत्कीर्त्तिर्धरामण्डले ॥ ३ ॥
नानावित्तविसर्जनेन जनितप्रोत्पुल्लकीर्त्तिः क्षिता-
वासीत् पञ्चदशे तदात्मजभवो श्रीलक्ष्मविश्वासखान् ॥ ४ ॥
ततः षोड़शे पर्य्याये दानखानः
कुलीनालिभाजो दयारामपालः ॥ ५ ॥
ततस्तत्सुतः पर्य्याये सूर्य्यवाजि-
चपानाथगण्येऽभवत् पुण्यराजिः ॥ ६ ॥
ततः पर्य्यायेऽष्टादशे तत्तनूजः
समाहूय भूयोऽक्षितार्थव्रजो यः ।
सदा सत्कथानापसंजातोषः
कुलीनौघपूजापरोऽयं सुभाषः ॥ ७ ॥
आसीत् किङ्करसेननामसुकृती यो मौलिकैकाग्रणीः
पर्य्याये परिपूजितार्थनिचये पैकोनविंशे हि सः ।
सद्गोष्ठीपतिपालवंशतनयापाणिग्रहैश्चालनो
दानेनापि च मेलिकाटिरपरो गोष्ठीपतिः प्राथमः ॥ ८ ॥
दानेनातिवदान्यतादिगुणतो निःसीमपुण्येश्च यो
गोपीसिंहचतुर्धुरीणसुकृती विंशे हि पर्य्यायके ।
यज्ञात् किङ्करसेनवंशतनयापाणिग्रहाद्गतः
सोऽभ्यासीद् भुवि मेलिकाटिरपरो गोष्ठीपतिः सत्कृतिः ॥ ९ ॥
पर्य्याये पुनरेकविंशक इह ख्यातः क्षमामण्डले
गोपीसिंहचतुर्धुरीणसुकृतजो यो रामकान्तः कृती ।
धन्यो गण्यसुपुण्यजन्यनयसा गोष्ठीपतेरग्रणीः
दानैः कर्णं इवातिधैर्य्यपयसा रत्नाकरश्चापरः ॥ १० ॥
द्वाविंशे किल पर्य्यायेऽतिविधतेरुत्खातजात्यंशजात्
खस्येवाखसुपुण्यदत्तकतनूभूतस्य च श्रीमतः ।
गोपीमोहनसंज्ञकस्य तनयद्वारा च गोष्ठीपतिः
सम्भूतो नवलक्षभूपतिवरः सर्व्वेलिकाटिः क्षितौ ॥ ११ ॥
तावच्चुक्लकनिष्ठमध्यमकुलोद्भूतां स्मृतीयोद्भवान्
बहूंश्चातुनपि तावतोऽत्र भजना बहुक्रमागादरात् ।
सद्गोष्ठीपतिकारणागतिनताधीनान् कुलीनान् समा-
हूयात्र प्रणतांश्चयात्र सहजान् पूर्व्यांश्चया कोमलान् ॥
विंशेर्वागतेर्भुतिप्रवतिभिश्चार्य्येऽब्धयोविंशके
पर्य्याये तितरां प्रपूज्य परमाद्दादान्वितः श्रीयुतः ।
गोपीमोहनदेववंशतिलको गोष्ठीपतिः क्ष्मापति-
र्जातः संप्रति भूमिदेवघटकानाश्चाश्वगान्दृच्युतिः ॥" १२ ॥
इति दक्षिणराढ़ीयकायस्थकुलाचार्य्यकारिका ॥
अथ वैद्यानां गोष्ठीपतिर्यथा,—
"विप्रेभ्यः प्रियभोज्यवस्तुवसनं छत्राचनं भूषणं
यानं भूमितुरङ्गमा गजगवां खर्व्वाणि रत्नानि च ।
गावो ग्राव उदारमन्दिरवरो वाद्यञ्च दत्ता: सदा
बाधुग्रातिकुटुम्बसङ्गवगणाः संप्रीणिता येन च ॥
गौड़क्ष्मापतिना य एव भिषजां श्रेष्ठोऽभिधिक्तः कृती
नानाशास्त्रविचारदः सुभमतिर्वाग्मी चिकित्सासुधीः ।
तस्मात् प्राप गजं तुरङ्गकनकच्छत्रञ्च रत्नं धनं
सोऽभूत् सेनविनायको बहुगुणैरम्बष्ठगोष्ठीपतिः ॥
वैनायकेषु सर्व्वेषु भास्करः श्रेष्ठ ईरितः ।
गोष्ठीपतितया ख्यातः स वैद्यैः पूजितोऽमतः ॥"
इति भरतमल्लिककृतकुलपञ्जिका ॥
गोष्यदं, क्ली, (गोः पदम् । यद्वा, गावः यत्रस्थे गच्छन्ति यस्मिन् देशे । "गोष्यदं खेचितालेचित-प्रमाणेषु ।" ६ । १ । १४५ । इति षुट् तस्य षत्वञ्च ।) गोखेचितस्थानम् । गोखुरप्रमाणम् । इत्यमरः । २ । ४ । ८१ ॥ (यथा, महाभारते । ६ । ८ । ३० ।
"भौमेनोत्पातजं वेगं तीर्त्वा कर्षेपातालसम्भवम् ।
मा निमज्जत्त सगणः शून्यमासाद्य गोष्यदम् ॥")
तथा विष्णौ मेदिनौ च ।
"गोष्यदं गोपदञ्चैव गवाक्ष गोतगोचरे ॥"
(गवाखेचितारण्यादि । इति सिद्धान्तकौमुदी ॥)
गोसः, पुं, (गां चर्म्म स्यति नाशयतीति । सो + नाशने + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) गोसः । उशः काशः । इति मेदिनी । से । ३ ॥
गोसङ्ख्यः, पुं, (गाः सङ्ख्ये इति । सङ्ख्ये डच उत्तौ + "सङ्ख्याः खाम् ।" २ । ४ । ५४ । इति खाम् ततः "समिख्यः ।" ३ । २ । ७ । इति कः । यद्वा, गवां संख्या बहवो गाव एवार्थः विद्यते यस्य । समासे पुंवद्भावः ।) गोषः । इत्यमरः । २ । ६ । ५० ॥
गोसङ्घः, पुं, (गोभिः सङ्घो मिलनं यस्मिन् काले । प्रत्यूषकाले हि गावो गोष्ठगमनाय निर्गच्छन्तीति प्रसिद्धिः । यद्वा गौः सूर्य्यकिरणं तेन सङ्घो यस्मिन् ।) प्रत्यूषः । इति भूरिप्रयोगः ॥
गोसङ्घः, पुं, (गोः सङ्घवत्तुल्यः । गोसङ्घाकारत्वादस्य तथात्वम् ।) गवयः । इति हेमचन्द्रः ॥
गोसन्दायः पुं, (गां सम्प्रदातीति । सम् + दा + घञ् ।) गोदानकर्त्ता । इति व्याकरणम् ॥
गोसम्भवा, स्त्री, (गोरिव सम्भवो गोमादिरूपा कृतिर्यस्याः ।) श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥ (सम्भवत्यस्याः इति सम्भवा उत्पत्तिकारणम् । गौः सम्भवा यस्याः ।) गोजाते त्रि ॥
गोसर्गः, पुं, (गवां सर्गो वनगमनाय मोचनं यद्वा गवां सूर्य्यकिरणानां सर्गो विसर्गः यस्मिन् ।) प्रभातम् । इति हारावली । १६१ ॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये ।
"गोसर्गे चाहनि राज्यां च तथा मध्यन्दिनेषु च ।")
गोसव:, पुं, (गौः सूयते पीयते हिंस्यते यत्र । सू भू पीड़ायाम् + "ऋदोरप् ।" ३ । ३ । ५७ ।) इति अप् ।) गोमेधयज्ञः । इति जटाधरः ॥ (यथा, मनुः । ११ । ७४ ।

"यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा।
अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा॥")

गोसहस्रः, पुं, (गोस एव ग्रहः ग्रहतुल्यः इति गोवलीवर्द्दन्यायेन सिद्धः।) बोलः। इत्यमरटीकायां रायमुकुटः॥

गोसहस्री, स्त्री, (गवां सहस्रं तद्दानफलं विद्यते यत्र। अर्श आदित्वादच् गौरादित्वात् ङीष्।) मङ्गलवारयुक्तामावास्या। तत्र गङ्गास्नाने सहस्रगोदानफलम्। यथा, व्यासः।

"अमावास्यां भवेद्वारो यदि भूमिसुतस्य च।
गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी॥"

इति तिथ्यादितत्त्वम्॥ *॥

सोमवारयुक्तामावास्या। तत्र अरुणोदयकालमारभ्य स्नानकालपर्य्यन्तं मौनीभूत्वा स्नानात् गोसहस्रदानफलम्। यथा व्यासः।

"सिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत्।
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम्॥"

इति च तिथ्यादितत्त्वम्॥

गोस्तनः, पुं, (गोः स्तन इव गुच्छो यस्य।) हारभेदः। इत्यमरः। २। ६। १०५॥ स तु चतुर्यष्टिकः। चतुस्त्रिंशद्यष्टिक इति केचित्। इति भरतः॥ (गवां स्तनः।) गवां कुचश्च॥ (यथा, सुश्रुते उत्तरतन्त्रे १ मे अध्याये।

"सुवृत्तं गोस्तनाकारं सर्व्वभूतगुणोद्भवम्॥")

गोस्तना, स्त्री, (गोः स्तन इव फलमस्याः। ङीषभावपक्षे टाप्।) गोस्तनी। इत्यमरटीका॥

गोस्तनी, स्त्री, (गोः स्तन इव फलमस्याः।

"स्वाङ्गाज्जोपसर्ज्जनादसंयोगोपधात्।" ४। १। ५४। इति ङीष्।) द्राक्षा। इत्यमरः। २। ४। १०७॥ कपिलद्राक्षा। इति राजनिर्घण्टः॥ (यथास्याः पर्य्यायाः।

"द्राक्षा खाडूफला प्रोक्ता तथा मधुरसापि च।
वृद्धीका हारहूरा च गोस्तनी चापि कीर्त्तिता॥"

वृथा स्याद् गोस्तनी द्राक्षा गुर्व्वी च कफपित्तनुत्॥

गोस्तनी सुवृत्ता इति।" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ गोः स्तना इव स्तना यस्याः। कुमारानुचारिण्यो मातृगणानामन्यतमा। यथा, महाभारते। ६। ४६। ३।

"प्रभावती विशालाक्षी ललिता गोस्तनी तथा॥"

गोनसीति पाठोऽपि दृश्यते॥)

गोस्थानं, क्ली, (गवां स्थानम्।) गोष्ठम्। इति शब्दरत्नावली॥ (यथा, हरिवंशे। ६०। २७।

"शार्ङ्गलहारगोवाटं मथ्ये गोस्थानमङ्गलम्॥")

गोस्थानकं, क्ली, (गोस्थान+स्वार्थे कन्।) गोष्ठम्। इत्यमरः। २। १। १३॥

गोस्वामी, [न्] त्रि, (गवां स्वामी।) गोपतिः। इति हलायुधः॥ (यथा, मनुः। ८। २३१।

"गोपः क्षीरभृतो यस्तु स दुग्धाद्यग्रतो वराम्।
गोस्वाम्यनुमते भृत्यः सा स्यात् भागेऽभृते भृतिः॥")

स्वामस्य भुवो वा प्रभुः। (यद्वा, गवां इन्द्रियाणां स्वामी। जितेन्द्रियतया एव तथात्वम्।) यथा। "श्रीसनातनगोस्वामी प्रिया श्रीरतिमञ्जरी।" इत्यनन्तसंहिता॥

गोहत्या, स्त्री, (गवां हत्या हननम्।) गोवधः। तत्प्रायश्चित्तादि प्रायश्चित्तग्रन्थे द्रष्टव्यम्॥ *॥

पारिभाषिकगोहत्या यथा,—

सावित्र्युवाच।

"विप्रहत्याच गोहत्या किंविधामातिदेशिकीम्।
का वा कृशामगम्या वा को वा सन्ध्याविहीनकः॥
एतेषां लक्षणं सर्व्वं वद वेदविदां वर!॥

यम उवाच।

गामाहारं प्रकुर्व्वन्तं पिबन्तं यो निवारयेत्।
याति गोविप्रयोर्मध्ये गोहत्याच लभेत्तु सः॥
दक्षैर्गान्ताड़यन् मूढ़ो यो विप्रो वृषवाहकः।
दिने दिने गवां हत्यां लभते नात्र संशयः॥
ददाति गोभ्य उच्छिष्टं भोजयेद्वृषवाहकम्।
भोजयेद्वृषवाहान्नं स गोहत्यां लभेद् ध्रुवम्॥
वृषलीपतिं याजयेद् यो भुङ्क्तेऽन्नं तस्य यो नरः।
गोहत्याशतकं सोऽपि लभते नात्र संशयः॥
पादं ददाति वह्नौ यो गाञ्च पादेन ताड़येत्।
यदि विप्रोदधौताङ्घ्रिः स्नात्वा गोवधमालभेत्॥
यो भुङ्क्तेऽस्निग्धपादेन शेते स्निग्धाङ्घ्रिरेव च।
सूर्य्योदये च द्विर्भोजी स गोहत्यां लभेद् ध्रुवम्॥
अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः।
यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेद् ध्रुवम्॥
पितुञ्च पर्व्वकाले च तिथिकाले च देवताः।
न सेवतेऽतिथिं यो हि स गोहत्यां लभेद् ध्रुवम्॥
स्वभर्त्तरि च शक्ते वा भेदबुद्धिं करोति या।
कटाक्षा ताड़येत् कान्तं सा गोहत्यां लभेद् ध्रुवम्॥
गोमार्गं खननं कृत्वा ददाति शस्यमेव च।
तड़ागे च तनूद्भे वा स गोहत्यां लभेद् ध्रुवम्॥
प्रायश्चित्तं गोवधस्य यः करोति अतिक्रमम्।
अर्थलोभादज्ञानात् स गोहत्यां लभेद् ध्रुवम्॥
राजके दैवके यत्नात् गोस्वामी गां न पालयेत्।
दुःखं ददाति यो मूढ़ो गोहत्यां लभते ध्रुवम्॥
प्राणिनं लङ्घयेद्यो हि देवार्थेभ्यमनलं जलम्।
नैवेद्यं पुण्यमन्नञ्च स गोहत्यां लभेद् ध्रुवम्॥
शास्त्रमाक्षीति वादी यो मिथ्यावादी प्रतारकः।
देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद् ध्रुवम्॥
देवतामतिमां दृष्ट्वा गुरुं वा ब्राह्मणं प्रति।
न सम्भ्रमान्नमेत् यो हि स गोहत्यां लभेद् ध्रुवम्॥
न ददात्याशिषं कोपात् प्रणताय च यो द्विजः।
विद्यार्थिने च विद्यान्च स गोहत्यां लभेद् ध्रुवम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

गोहरं, क्ली, (हृद विष्ठात्यागे+क्तः। हृतम्। गोर्हृतं विष्ठा।) गोमयम्। इति रत्नमाला॥

गोहरीतकी, स्त्री, (गवां हरीतकीव हितकारित्वात्।) विख्यातः। इति शब्दरत्नावली॥

गोहालिया, स्त्री, लताविशेषः। गोयालिया इति भाषा॥ यथा, गारुड़े १६० अध्याये।

"पोतं गोहालियामूलं तिलदध्यन्नसंयुतम्।
निवहन्मूत्रं कथितं प्रवर्त्तयति शूकर!॥"

गोहितः, पुं, (गोषु हितः।) वीधलता। विख्यः। इति शब्दचन्द्रिका॥ गवां हितकारके त्रि॥ (गोर्भूमेर्भारावतरणे स्वेच्छया शरीरग्रहणं कुर्व्वन् गोहितः, यद्वा गवां रक्षार्थं गोवर्द्धनं धृतवानिति गोहितः। विष्णुः। यथा, महाभारते। १३। १४६। ७६।

"गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः॥")

गोहिरं, क्ली, (गुहू+बाहुलकादिरच्।) पादमूलम्। इति हेमचन्द्रः। ३। २८०॥

गोह्यं, त्रि, (गुहू+"ग्रंसिदुहिगुहिभ्यो वा।" इति काप्रिकोक्तेः, व्यवभावपक्षे ण्यत्।) गुह्यम्। गोपनीयम्। इति पाणिनिशब्दरत्नम्॥

गौः, [गो] पुं स्त्री, (गच्छतीति। गम्+"गमेर्डोः।" उणा। २। ६७। इति डोः। यद्वा, गच्छत्यनेनेति करणे डोः। वृषस्य यानसाधनत्वात् स्त्रीगवा दानेन स्वर्गगमनसाधनत्वाच्च उभयोरपि दानेन स्वर्गगमनत्वाद्वा तथात्वम्। वस्तुतस्त्वयं रूढ एव शब्दः। यदुक्तम्।

"रूढ़ा गवादयः प्रोक्ता यौगिकाः पाचकादयः।
योगरूढ़ाश्च विज्ञेयाः पङ्कजाद्या मनीषिभिः॥")

खनामख्यातपशुः। गरु इति भाषा॥ पुंगोः पर्य्यायः अनड्वान् इति पदे द्रष्टव्यः॥ स्त्रीगोः पर्य्यायः। माहेयी २ सौरभेयी ३ उक्षा ४ माता ५ इड्विजी ६ अर्च्चनी ७ अघ्न्या ८ रोहिणी ९। इत्यमरः॥ माहेन्द्री १० दित्या ११ धेनुः १२ अघ्ना १३ दोग्ध्री १४ भद्रा १५ भूरिमही १६ अनड्वाही १७ कल्याणी १८ पावनी १९ गौरी २० सुरभिः २१ महा २२ जिलनाचिः २३ सुरभी २४ अनड्वाही २५ हिड़ा २६ अधसा २७। इति शब्दरत्नावली॥ बहुला २८ मही २९ सरस्वती ३०। इति जटाधरः॥ उक्षिया ३१ अही ३२ अदितिः ३३ इला ३४ जगती ३५ शर्करी ३६। इति वैद्यनिघण्टौ २ अध्यायः॥ *॥ (गवां लक्षणादिकं यथा, बृहत्संहितायां ६१ अध्याये।

"पराशरः प्राह बृहद्रथाय
गोलक्षणं यत् क्रियते ततोऽयम्।
मया समासः शुभलक्षणाढ्याः
सर्व्वास्तथाप्यागमतोऽभिधास्ये॥
सास्राविलरूक्षाक्षो ह्रस्वकनयनाश्च न शुभदा गावः।
प्रचलच्चिपिटविषाणाः करटाः खरसदृशवर्णाः॥
दृश्यप्रचुरदन्ताः प्रलम्बसङ्कानना विगतरोमाः।
दृश्यस्थूलग्रीवा यवभध्या दारितखुराश्च॥
ध्यावातिदीर्घजिह्मागुल्फैरतितनुभिरतिबहुरिर्वा।
अतिककुदाः कृशदेहा नेष्टा हीनाधिकाङ्गाश्च॥
दृश्यभोऽर्थं स्थूलातिलम्बदृषणः शिरातताक्रोड़ः।
स्थूलशिराचितगण्डश्चिस्थानं मेहते यच्च॥
मार्জ্জाराक्षः कपिलः करटो वा न शुभदो द्विजस्येष्टः।

कृष्णोष्ठतालुजिह्वः श्वसनो यूथस्य घातकरः ॥
स्थूलशृङ्गखुरशिरोङ्गः सितोदरः कृष्णसारवर्णश्च ।
गृहजातोऽपि त्याज्यो यूथविनाशावहो वृषभः ॥
श्यामकपृथ्वचिताङ्गो भस्मारुणसन्निभो विड्रालाक्षः ।
विप्राणामपि न शुभ करोति वृषभः परिग्रहीतः ।
ये चोद्धरन्ति पादान् पङ्क्तादिव योजिताः कृष्णग्रीवाः ।
कातरनयना हीनाः पृथुतरुण ते न भारसहाः ॥
मृदुसंहतताम्रोष्ठास्तनुस्निग्धस्ताम्रताल्वजिह्वाश्च ।
तनुदृक्षोचश्रवणाः सुकुचयः सघनकुक्षयश्च ॥
आताम्रसंहतखुरा थूणेरस्का दृढतृककुदयुक्ताः ।
स्निग्धश्मश्रुस्थूलतनुलरोमाग्रलाम्ततनुपुच्छाः ॥
तप्तभृशृङ्गबालधयो रक्तान्तविलोचना महोच्छ्वासाः ।
सिंहस्कन्धास्तान्वल्यकम्बलाः पूजिताः सुगताः ॥
वामावर्त्तैर्वामे दक्षिणपार्श्वे च दक्षिणावर्त्तैः ।
शुभदा भवन्त्यनङ्वाहो लक्षणाभिश्चैवमनिभिः ॥
वैदूर्य्यमक्षिका वृद्धवृद्धेक्षणाः स्थूलनेत्रचर्म्माणः ।
पार्श्वैरिस्फुटिताभिः ग्रस्ताः सर्व्वेऽपि भारवहाः ॥
प्रायोदैर्घ्ये सवलिमार्ज्जारमुखः सितश्च दक्षिणतः ।
कमलोत्पललाक्षाभः सुबालधिर्वाजितुल्यजवः ॥
लम्बैर्वृषणैर्मेधोदरश्च सङ्क्षिप्तवङ्क्षणाक्रोडः ।
श्रेयो भाराध्वसहो जवेऽश्वतुल्यश्च गृहफलः ॥
सितवर्णः पिङ्गाक्षस्ताम्रविषाणेक्षणो महावक्त्रः ।
वृषो नाम शुभफलो यूथस्य विवर्द्धनः प्रोक्तः ॥
भूयस्त्रवालधिरातास्रवङ्क्षणो रक्तदृक्ककुद्मी च ।
कल्माषश्च स्वामिनमचिरात्कुरुते पतिं लक्ष्म्याः ॥
यो वासितेक्षणरसो यथेष्टवर्णश्च सोऽपि ग्रस्तफलः ।
मिश्रफलोऽपि त्याज्यो यदि नैकान्तप्रशस्तोऽस्ति ॥" * ॥

गोरीङ्गितभेदेन शुभाशुभसूक्तं यथा, तत्रैव ८२ अध्याये,—

"गावो दीनाः पार्थिवस्याग्रियाय
पादैर्भूमिं कुट्टयन्त्यश्च रोगान् ।
कर्त्तुं कुर्व्वन्त्यश्रुपूर्णायताक्ष्यः
पत्युर्भीतास्तस्करान्नारवन्त्यः ॥
अकारणे क्रोशति वेदनार्त्तो
भयाय रात्रौ वृषभः शिवाय ।
वृद्धं निरुद्धा यदि मक्षिकाभिः
सदासु दृष्टिं सरमालनैर्वा ॥
आगच्छन्त्यो वेश्म वत्सारवेण
संसेवन्त्यो गोष्टदृष्ट्या गवां गाः ।
आर्द्राङ्ग्यो वा दृष्टरोमण्यः प्रहृष्टा
धन्या गावः स्युर्महिष्योऽपि चैवम् ॥"* ॥)

गोमङ्गलत्वादि यथा, दैवले ।

"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥
एतानि सततं पश्येन्नमस्येदर्चयेच्च यः ।
प्रदक्षिणञ्च कुर्व्वीत तथा चायुर्न हीयते ॥"
अभिप्रेतार्थसिद्ध्यर्थमङ्गलं तद्धेतुतया ब्राह्मणादपि ॥ * ॥ गोग्रहणे ब्रह्मपुराणम् ।
"सदा गावः प्रयच्छासु मल्लेखानेन पार्थिव ! ।
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।
मन्त्रस्य स्मरणादेव गोदानफलमाप्नुयात् ॥"
भविष्ये ।
"गामालभ्य नमस्कृत्य कृत्वा चैव प्रदक्षिणम् ।
प्रदक्षिणीकृतां तेन सप्तद्वीपा वसुन्धरा ॥
गवामग्रे न लङ्घेत लङ्घने गन्धेन वर्ज्जयेत् ।
यावद्दाम्नाति तद्गात्रं तावद्गन्धेन युज्यते ॥"
विष्णुः ।
"गोमूत्रं गोमयं क्षीरं सर्पिर्दधि च रोचना ।
षड्ङ्गमेतन्मङ्गल्यं पवित्रं सर्व्वदा गवाम् ॥"
षड्ङ्गं षट्प्रकारम् । इति शुद्धितत्त्वम् ॥ * ॥
तस्यांसगुणाः । स्निग्धत्वम् । पित्तश्लेष्मविवर्द्धनत्वम् । इंद्रियत्वम् । बलकारित्वम् । पौनसपदरनाशित्वञ्च । इति भावप्रकाशः ॥ अम्लत्वम् । गुरुत्वम् । वातकफापहत्वञ्च ॥* ॥ तद्गन्धगुणाः । पथ्यत्वम् । अत्यन्तरुच्यत्वम् । स्वादुत्वम् । स्निग्धत्वम् । पित्तवातामयनाशित्वम् । मेध्यत्वम् । कान्तिप्रज्ञाङ्गपुष्टिवीर्य्यवृद्धिकारित्वञ्च ॥ (यथा च हारीते प्रथमस्थाने २ मेध्याये ।

"गव्यं पवित्रञ्च रसायनञ्च
पथ्यञ्च हृद्यं बलपुष्टिदं स्यात् ।
आयुःप्रदं रक्तविकारपित्त-
त्रिदोषकुष्ठोगविषापहं स्यात् ॥" * ॥)

तद्दधिगुणाः । अतिपवित्रत्वम् । शीतत्वम् । स्निग्धत्वम् । दीपनत्वम् । बलकारित्वम् । मधुरत्वम् । अरोचकवातामयनाशित्वम् । ग्राहित्वञ्च ॥ (यथा च हारीते प्रथमस्थाने २ मेध्याये ।

"अम्लखादुरसं ग्राहि गुरूष्णं वातरोगजित् ।
मेदः-शुक्र-बल-श्लेष्म-रक्तपित्तास्रि-शोफजित् ॥
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम् ।
वातापहं पवित्रञ्च दधि गव्यं गुणप्रदम् ॥"* ॥

तद्घृतफेनगुणाः ।

"गवाञ्च क्षीरफेनं वा तक्रेण संहितन्तथा ।
पक्वान्नं भक्षयेद्यापि ग्रहणी तस्य नश्यति ॥")

तन्नवनीतगुणाः । शीतत्वम् । वर्णबलशुक्रकफरुचिसुखकान्तिपुष्टिकारित्वम् । सुमधुरत्वम् । संग्राहकत्वम् । चक्षुर्हितत्वम् । वातसर्व्वाङ्गशूलकासश्रमसर्व्वदोषनाशित्वञ्च ॥ * ॥

तद्घृतगुणाः । वृष्यत्वम् । धीकान्तिस्मृतिबलमेधापुष्ट्यग्निदृङ्मुक्रवपुःस्त्रौल्यकारित्वम् । वातश्लेष्मश्रमपित्तनाशित्वम् । विपाके मधुरत्वम् । हृद्यतमत्वम् । बहुगुणत्वञ्च ॥ (तथा च ।

"विपाके मधुरं हृद्यं वातपित्तकफापहम् ।
चक्षुष्यं बलमेध्यं गव्यं सर्पिर्गुणोत्तमम् ॥"
इति हारीते प्रथमस्थाने अष्टमेऽध्याये ॥* ॥)

"गवां प्रसूषु क्षीरं गुरु विद्यात् दुर्ज्जरम् ।
तस्मादभ्युदिते सूर्य्ये यामं यामार्द्धमेव वा ॥
सुस्नातार्य्य पयो ग्राह्यं तत् पथ्यं दीपनं लघु ।
विवत्सावालवत्सानां पयो दोषसमीरितम् ॥
ग्रस्तं वत्सैकवर्णाया धवलीकृष्णयोरपि ।
दशाहा मासपर्य्यन्ता कर्द्धभङ्गी च या भवेत् ॥
तासां गवां हितं क्षीरं घृतं वाप्यतसेव वा ।
गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम् ।
श्वेतानां रक्तवर्णानां श्लेष्मघ्नं रक्तदोषनुत् ॥"
इति राजनिर्घण्टः ॥

गौः, [गो] पुं, (गम्यते कर्म्मभिः यज्ञदानपरोपकारादिधर्म्ममूलककर्म्मफलैर्यस्मिन् । गम् + "गमेर्डोः ।" उणा० । २ । ६३ । इति अधिकरणे डोः ।) स्वर्गः । (गच्छन्ति गायन्ति विषया येन यद्वा गच्छति शीघ्रमिति करणे कर्त्तरि वा डोः । किरणसम्पर्केण विना चाक्षुषज्ञानाभावात् किरणस्य ज्ञानप्रकाशधर्म्मवत्त्वात् शीघ्रगामित्वाच्च तथात्वम् ।) रश्मिः । (यथा, महाभारते । ३ । ३ । ५२ ।

"चयोदशद्वीपवतीं गोभिर्भासयसे महीम् ।
चयाणामपि लोकानां हिताय त्वं प्रवर्त्तसे ॥"* ॥)

वज्रः । इति मेदिनी । गे । १ ॥ (गम्यते पुण्यवद्भिर्यस्मिन् । अधिकरणे डोः ।) इष्टापूर्त्तादिकाम्यकर्म्मभिः पुण्यवतां चन्द्रलोकगमनात् तथात्वम् ।) चन्द्रः । इति विश्वः ॥ (गच्छति प्राप्नोति विश्वं प्रकाशकालकेन खतेजसेति जानाति सर्व्वमिति वा । कर्त्तरि डोः ।) सूर्य्यः । गौरेययज्ञः । इत्यमरटीकायां भानुदीक्षितः ॥ अश्वनामौषधम् । इति राजनिर्घण्टः ॥

गौः, [गो] स्त्री, (गम्यते विषयज्ञानं यया । गम् + "गमेर्डोः ।" उणा० । २ + ६३ । इति करणे डोः ।) चक्षुः । (गच्छति शीघ्रमिति कर्त्तरि डोः ।) वाक् । दिक् । (गम्यते ज्ञायते चित्ताभिप्रायो यया । करणे डोः ।) वाक् । (यथा, रघुः । ५ । १२ ।

"इत्यध्यवात्सीदुमितवयस्य
रघोरुदारामपि गां निशम्य ॥" * ॥

गम्यते प्राप्यतेऽस्मादिति । अधिकरणे डोः ।) भूः । (यथा, रघुः । १ । २६ ।

"इदोहं गां च यज्ञाय ग्रहाय मघवा दिवम् ।
सम्यग्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥" * ॥

अत्र बहुवचनान्तोऽयम् । इति मेदिनी । गे । १ ॥ अत्र एकवचनान्तोऽपि इति केचित् । इति भरतः ॥ (यथा, वृन्दावनयमके । २ ।

"खमिव सुखं गवि शैवं
युवधाय खपिति यो सुजङ्गविशेषम् ।
नव पुष्करसमकरया
शीर्षोन्मिषंपद्मा च सेवितः समकरया ॥")

माता । इत्येकाक्षरकोषः ॥ (खनामख्याता शुकदौहित्रस्य ब्रह्मदत्तस्य भार्य्या । यथा, भागवते । ६ । २१ । २५ ।

"स कीर्त्त्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ।

स योगो गवि भार्य्यायां विष्वक्सेनमधात् सुतम्॥"
"गवि सरस्वत्यां भार्य्यायाम्॥" इति कश्चित् व्याचष्टे॥)

गौः, [गो] पुं, स्त्री, (गम्यते ज्ञायते सार्थसुखमनेन। गम्+"गमेर्डोः।" उणा०। २। ६३। इति करणे डोः। स्वपि जातत्वादेवास्य तथात्वम्।) लोम। (गच्छति निम्नदेशमिति। कर्त्तरि डोः। निम्नप्रवणादेवास्य तथात्वम्।) जलम्। इत्यमरटीकायां भानुदीक्षितः॥

गौड्डिकः, पुं, (गुड्डा परिमाणविशेषस्तद्ग्रहीतुं शीलमस्य। यद्वा, गुड्डा गुड्डाफलं तस्य परिमाणार्थं ग्रहणं विद्यते अस्य। गुड्डा+ठक्।) स्वर्णकारः। इति त्रिकाण्डशेषः॥

गौड़ः, पुं, (खनामख्यातदेशः। (यथा, प्रबोधचन्द्रोदये। २। ७।
"गौड़ं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी।
भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमो नः पिता॥")
तद्देशस्थे पुं भूम्नि। इति जटाधरः॥ तद्देशसीमा यथा, भक्तिरत्नाकरे सप्तमपटले।
"वङ्गदेशं समारभ्य सुवर्णग्रामगं शिवे!।
गौड़देशः समाख्यातः सर्व्वविद्याविशारदः॥"
(देशोऽयं हृहत्संहितायां कूर्म्मविभागे पूर्व्वखण्डस्थः। यथा, तत्रैव। १४। ५, ७।
"अथ पूर्व्वस्याम्।" इत्युक्त्वा
"उदयगिरि भद्रगौड़क-
पौण्ड्रोत्कलकाग्निमेकलाम्बष्ठाः॥"
इत्युक्तवान्॥)
पक्व गौड़ा यथा, स्कन्दपुराणे।
"सारस्वताः कान्यकुब्जा गौड़मैथिलिकौत्कलाः।
पञ्च गौड़ा इति ख्याता विन्ध्यस्योत्तरवासिनः॥"
(गुड़स्य विकारः। गुड़+अण्। गुड़जाते आसवे क्लीबे च। अस्य गुणा यथा,—
"हृद्यत्वग्ग्रहदृग्वातौ गौड़स्तर्पण-दीपनः॥"
इति भावप्रकाशस्य पञ्चमेऽध्याये वामटेनोक्तम्॥
"श्यामादन्तीरसे गौड़ः पिप्पलीफलचित्रके।
लिप्तेऽविशोऽनिल-कफ-प्लीहपाण्डूदरापहः॥"
इति च चरके कल्पस्थाने द्वादशेऽध्याये॥)

गौड़वासूकः, पुं, (गौड़े गौड़देशे जातः गौड़देशवासिप्रियो वा वासूकः शाकविशेषः।) चिल्लीशाकम्। इति राजनिर्घण्टः॥ (चिल्लीशब्दे ऽस्य विवरणं द्रष्टव्यम्॥)

गौड़िकं, क्ली, (गौड़ं गुड़विकारस्तत् कारणत्वेनास्त्यस्य। "अत इनिठनौ।" ५। २। ११५। इति ठन्।) मद्यविशेषः। यथा,"पैष्टिकगौड़िकमाध्वीकानां पानं सुरापाने कल्पितम्॥" इति प्रायश्चित्तविवेके देवलः॥ गुड़निष्पन्नद्रव्ये च॥ (पुं, गुड़े साधुः। "गुड़ादिभ्यष्ठञ्।" ४। ४। १०२। इति ठञ्। इक्षुः। इति सिद्धान्तकौमुदी॥)

गौड़ी, स्त्री, (गुड़स्य विकारः गुड़विकारेण सम्पादिता इत्यर्थः। गुड़+अण्। स्त्रियां ङीप्।) गुड़ादिकृता सुरा। गुड़ेर मद इति भाषा॥ (यथा, मनुः। ११। ९४।
"गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा॥")
तत्पर्य्यायः। वाल्कली २। इति त्रिकाण्डशेषः॥ अम्लत्वम्। गुरुत्वम्। उष्णत्वम्। मधुरत्वम्। वातनाशित्वम्। पित्तबलकाम्लिक्लेदिकारित्वम्। दीपनत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥ (यथा च हारीते प्रथमे स्थाने ११ अध्याये।
"गौड़ी कषाया मधुराम्लशीता
सन्दीपनी मूलरुजापहन्त्री।
हृद्या त्रिदोषं श्रमयत्यजीर्णं
पाण्डामयार्शःश्वसनं निहन्ति॥")
रागिणीविशेषः। सा तु मेघरागस्य पत्नी। इति सङ्गीतदामोदरः॥ (गौड़ानां गौड़देशवासिनां प्रिया।) काव्यरीतिविशेषः। यथा,—
"ओजःप्रसादमाधुर्य्यं गुणत्रितयभेदतः।
गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः॥"
इति काव्यचन्द्रिका॥
(यथा च साहित्यदर्पणे। ९। ४।
"ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः।
समासबहुला गौड़ी————————॥"
उदाहरणं यथा, तत्रैव धृतो वेणीसंहारश्लोकः।
"चण्डद्गजभ्रमितचक्रगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
पुरुषोत्तमस्याह।
बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौड़ीया।
रीतिरनुप्रासमहिमपरतन्त्रास्तोभवाक्या च॥")

गौणः, पुं, (गुणादागता गौणी। तस्या आगतः प्रतिबोधितः। गौणी+अण्।) गौणीवृत्तिबोधितः। यथा,"शब्दस्य साङ्केतात्मकः सम्बन्धो गुणः तदधीना या लक्षणा सा गौणी तद्योगात् गौणः।" इति दायभागटीकायां श्रीजगन्नाथतर्कालङ्कारः॥ (असुखे त्रि। यथा, महाभारते। १२। ६४१। ६।
"बहूनि सम नामानि कीर्त्तितानि महर्षिभिः।
गौणानि तत्र नामानि कर्म्मजानि च कानिचित्॥")

गौणकालः, पुं, (गौणोऽसत्यः कालः।) सत्यकालकर्त्तव्यकर्म्मकरणयोग्यकालान्तरः। यथा,—
"यद्वागामिक्रियासुख्यकालस्याप्यन्तरालवत्।
गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्म्मणि॥
यद्वेति पक्षान्तरं प्राक्तनकर्म्मणि मध्यकालवत् आगामिक्रियाया सुख्यकालस्यापि गौणकालत्वम्। तेन सायं सन्ध्याया रात्रेः प्रातः सन्ध्याकालश्च गौणकाल इत्यर्थः।" इति मलमासतत्त्वम्॥

गौणचान्द्रः, पुं, (गौणोऽप्रधानश्चान्द्रश्चन्द्रसम्बन्धिमासः।) लक्षणप्रतिपदादिपौर्णमास्यन्तमासः। यथा चन्द्रार्कसौप्रकरणे तिथ्यादितत्त्वे।
"गौणचान्द्रेण भाद्रस्य सुखचान्द्रेण श्रावणस्य॥"
अपि च शब्दरत्नावल्याम्।
"चान्द्रोऽपि द्विविधः प्रोक्तो सुख्यगौणविभेदतः।
गौणः लक्षणप्रतिपदादिपौर्णमास्यन्त ईरितः॥"

गौणी, स्त्री, (गुणं साहश्यमधिकृत्य प्रवृत्ता। गुण+अण्+स्त्रियां ङीप्।) अप्रीतिप्रकारलक्षणान्तर्गतलक्षणाविशेषः। यथा,—
"साहश्येतरसम्बन्धाः गुड़ाद्याः सकला अपि।
साहश्यात्तु मता गौण्यस्तेन गोड़ाश्च भेदिताः॥"
("ताः पूर्व्वोक्ता अष्टादशभेदा लक्षणाः। साहश्येतरसम्बन्धाः कार्य्यकारणभावादयः। अत्र गुड़ानां 'श्वेतो धावति' इत्यादीन्युदाहरणानि ज्ञेयानि। रूढ़्यनुपादानलक्षणा सारोपा गौणी यथा. 'एतानि तैलानि हेमन्ते सुखानि' अत्र तैलशब्दस्तिलभवत्वेनरूपं सुखार्थमुपादायैव सार्थपादिस्नेहेषु वर्त्तते। प्रयोजने यथा, राजकुमारेषु तत्सदृशेषु गच्छत्सु 'एते राजकुमारा गच्छन्ति।' रूढ़्यनुपादानलक्षणा साध्यवसाना गौणी यथा, 'तैलानि हेमन्ते सुखानि।' प्रयोजने यथा, 'राजकुमारा गच्छन्ति।' रूढ़ौ लक्षणलक्षणा सारोपा गौणी यथा, 'राजा गौड़ेन्द्रः कण्टकं शोधयति।' प्रयोजने यथा, 'गौर्वाहीकः।' रूढ़ौ लक्षणा साध्यवसाना गौणी यथा, 'राजा कण्टकं शोधयति।' प्रयोजने यथा, 'गौर्जल्पति।'

अत्र केचिदाहुः गोसदृशत्वादयो गुणा आद्यमान्द्यादयो लक्ष्यन्ते। ते च गोशब्दस्य वाह्लीकार्थाभिधाने निमित्तीभवन्ति। यदुक्तं, गोशब्दस्यागृहीतसङ्केतः वाह्लीकार्थमभिधातुमसामर्थ्यात् गोशब्दार्थमात्रबोधनाच्च। अभिधाया विरतत्वात् विरतायाश्च पुनरुत्थानाभावात्। अन्ये पुनर्गोशब्देन वाह्लीकार्थो नाभिधीयते किन्तु स्वार्थसहचारिगुणसाजात्येन वाह्लीकार्थगता गुणा एव लक्ष्यन्ते। तदप्यनेन मन्यन्ते। तथाच्च गोशब्दाद्वाह्लीकार्थः प्रतीयते न वा। आद्येऽपि गोशब्दादेव वा लक्षितात्तद्गुणात्। अविनाभावद्वारा तत्र न प्रथमः। वाह्लीकार्थेऽस्यासङ्केतितत्वात्। न द्वितीयः। अविनाभावलभ्यस्यार्थस्य शाब्दे ऽन्वये प्रवेशासम्भवात्। शाब्दी हाकाङ्क्षा शब्देनैव प्रपूर्य्यते। न तृतीयः। यदि हि गोशब्दाद्वाह्लीकार्थो न प्रतीयते तदास्य वाह्लीकस्य सामानाधिकरण्यमसमञ्जसं स्यात्। तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाह्लीकशब्देन सहान्वयमलभमानोऽजत्वादिसाधर्म्म्यसम्बन्धाद्वाह्लीकार्थं लक्षयति। वाह्लीकस्याजत्वाद्यतिशयबोधनं प्रयोजनम्। इयञ्च गुणयोगात् गौणी इत्युच्यते। पूर्व्वा तु उपचारामिश्रत्वात् शुद्धा। उपचारो हि नामात्यन्तं विसदृशयोः साहश्यातिशयमहिम्ना भेदप्रतीतिस्थगणमात्रम्। यथा व्यधिमानवकयोः शुक्लपटयोस्तु नात्यन्तं भेदप्रतीतिः। तस्मादेवमादिषु शुद्धैव लक्षणा॥"

इति साहित्यदर्पणे । २ । १३ ॥) अन्यत् सर्व्वं लक्षणाशब्दे द्रष्टव्यम् ॥

गौतमः, पुं, (गोतमस्य ऋषेर्गोत्रापत्यमिति । "ऋष्यन्धकेति ।" ४ । १ । ११४ । इत्यण् ।) मुनिविशेषः । स तु प्रतानन्दः । इति हेमचन्द्रः ॥ शाक्यवंशावतीर्णबुद्धमुनिविशेषः । तत्पर्य्यायः । शाक्यमुनिः २ शाक्यसिंहः ३ सर्व्वार्थसिद्धः ४ शौद्धोदनिः ५ अर्कबन्धुः ६ मायादेवीसुतः ७ । इत्यमरः । १ । १ । १५ ॥ खजितृ ८ श्वेतकेतुः ९ धर्म्मकेतुः १० महामुनिः ११ पद्मज्ञानः १२ सर्व्वदर्शी १३ महाबोधिः १४ महाबलः १५ बहुज्ञः १६ चित्रभानुः १७ सिद्धार्थः १८ शुक्लः १९ । इति शब्दरत्नावली ॥ (अस्य हि गौतमीपुत्रत्वे प्रमाणं यथा, ललितविस्तरे १५ अध्याये । "ते सान्त्वयिष्यिमृगयन्ते । सान्त्वयिष्यिमृगयमाणा न पश्यन्ति स्म । महाप्रजावत्यपि गौतमी परिदेवमाना महौतले परिवर्त्तते स्म राजानं शुद्धोदनमेवाह । क्षिप्रं मां महाराज ! पुत्रेण सङ्गिनीं कुरुष्वेति ।" वैवस्वतमन्वन्तरे सप्तर्षीणामन्यतमः । यदुक्तं हरिवंशे ७ । ३३—३५ । "अत्रिर्वशिष्ठो भगवान् कश्यश्च महातपाः । गौतमश्च भरद्वाजो विश्वामित्रस्तथैव च ॥ तथैव पुत्रो भगवान् ऋचीकस्य महात्मनः । सप्तमो जमदग्निश्च ऋषयः साम्प्रतं दिवि ॥" अयमेव तु विंशतिमे द्वापरयुगे वेदव्यासोऽभूत् । यथा, देवीभागवते । १ । ३ । ३१ "अत्रिरेकोनविंशेऽथ गौतमस्तु ततः परम् ॥" कुरुकुलवर्द्धनराट्पाण्डुसुतानामाचार्य्यः क्षयः । गोतमवंशोत्पन्नत्वादेवास्य तथात्वम् । यथा, हरिवंशे ३२ । ७५—७६ ।

"अवस्कन्द्य शरस्तम्बे मिथुनं समपद्यत ।
कृपया तत्र जग्राह शान्तनुर्मृगयाङ्गतः ॥
कृपः स्मृतः स वै तस्मात् गौतमी च कृपी तथा ।
एते शारद्वताः प्रोक्ता एते ते गौतमाः स्मृताः ॥"

मुनिभेदः । स तु एकतद्विलादिमुनीनां पिता । यथा, महाभारते । ६ । ३६ । ७—६ ।

"आसन् पूर्व्वयुगे राजन् । मुनयो भ्रातरस्त्रयः ।
एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः ।
सर्व्वे प्रजापतिसमाः प्रजावन्तस्तथैव च ॥
ब्रह्मलोकजितः सर्व्वे तपसा ब्रह्मवादिनः ।
तेषान्तु तपसा प्रीतो नियमेन दमेन च ॥
अभवद्गौतमो नित्यं पिता धर्म्मरतः सदा ॥"
स्थावरविषभेदः । इति हेमचन्द्रः । ३ । २६५ ॥)

गौतमसम्भवा, स्त्री, (गौतमः सम्भवो यस्याः । यद्वा, गौतमात् सम्भवतीति । ष्टुम् + भू + अच् ।) गोदावरी नदी । इति राजनिर्घण्टः ॥

गौतमी, स्त्री, (गोतमस्य इयम् । तस्येदमित्यण् ततः स्त्रियां ङीप् ।) दुर्गा । इति मेदिनी ॥ मे । ४३ ॥ (यथा, हरिवंशे । १०६ । ७ । "गौतमीं कंसघातार्थं यशोदानन्दवर्द्धिनीम् ॥") राक्षसीविशेषः । इति शब्दरत्नावली ॥ गोदावरी नदी । (यथा, गोः रामायणे । ४ । २ । २७ । "यो नदीं गौतमीं रम्यां गिरिं पर्य्येति चार्च्चिमान् ॥" तथा च हारीतो प्रथमस्थाने सप्तमेऽध्याये । "पश्चिमाद्रिसमुद्भूता गौतमी पुण्यभावना । अस्याः प्रीतं जलं वापि कफवातविकारहृत् ॥ पित्तप्रशमनं बल्यं व्रणदोषविकारहृत् । पुण्या पयस्विनी वेया प्रणीता च वरानना ॥ दोषा गोवर्द्धनी चान्या गौतम्यानुगता इमाः । आसां जलं घनं नातिवातश्लेष्मविकारहृत् ॥") गोरोचना । इति राजनिर्घण्टः ॥ (गोतमस्यापत्यं स्त्री । गोतमवंश्यीयशरद्वतः कन्यात्वादस्यास्तथात्वम् । कृपी । सा तु द्रोणस्य भार्य्या अश्वत्थाम्नो माता च । यथा, महाभारते । १ । १३१ । २३ ।

"जज्ञे च गौतमी पुत्रमश्वत्थामानमेव च ॥"

गायत्रीरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ४० ।

"गौतमी गामिनी गाधा गन्धर्व्याधर सेविता ॥")

गौधारः, पुं, (गोधाया अपत्यम् । "शारद्वतीचाम् ।" ४ । १ । १३० । इति अण् ।) गोधिकात्मजः । इत्यमरः । २ । ५ । ६ ॥ गोधा इति ख्यातः ॥

गौधेयः, पुं, (गोधाया अपत्यम् । "शुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् ।) गोधिकात्मजः । इत्यमरः । २ । ५ । ६ ॥

गौधेरः, पुं, (गोधाया अपत्यम् । "गोधाया ढ्रक् ।" ४ । १ । १२६ । इति ढ्रक् ।) गोधिकात्मजः । इत्यमरः । २ । ५ । ६ ॥

गौरं, क्ली, (गुरते चित्तं यत्र । गुर ग्रै ड उद्यमने + इलच्चेति घञ् । ततः स्वार्थे अण् । यद्वा, गवते इति । गुड शब्दे + "ऋज्वेन्द्रेति ।" उणां । २ । २८ । इति रन्प्रत्ययेन निपातनात् साधुः ।) पद्मकेशरः । इति मेदिनी । रे २८ ॥ (पद्मकेशरशब्देऽस्य विवृतिर्द्रष्टव्या ॥) कुङ्कुमम् । स्वर्णम् । इति राजनिर्घण्टः ॥

गौरः, पुं, (गवते व्यक्तं शब्दयतीति । गुड शब्दे + "ऋज्वेन्द्रेति ।" उणां । २ । २८ । रन्प्रत्ययेन निपातनात् सिद्धम् ।) श्वेतसर्षपः । ("गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते । सर्षपस्तु रसे पाके कटुस्निग्धः सतिक्तकः ॥ तीक्ष्णोष्णः कफवातघ्नो रक्तपित्तामिवर्द्धनः । रक्षोहरो जयेत् कण्डूं कुष्ठ-कोठकृमिग्रहान् ॥ यथा रक्तसखा गौरः किन्तु गौरो वरो मतः ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) चन्द्रः । इति मेदिनी । रे २८ ॥ धवश्च । इति राजनिर्घण्टः ॥ पीतवर्णः । गोरो इति भाषा । तद्वर्णकरगौषधं यथा,—

"कुष्माण्डनालचारस्तु सगोमूत्रश्च तत्त्वतः ।
जलपिष्टा हरिद्रा च सिद्धा मन्दानलेन हि ॥
माहिषेण पुरीषेण लेपिता दृषभध्वज ! ।
अस्या उद्वर्त्तनं कुर्य्यादङ्गगौरत्वमीश्वर ! ॥"

इति गारुडे १६४ अध्यायः ॥

श्वेतवर्णः । अरुणवर्णः । तद्वति त्रि । इत्यमरः । (यथा, रामायणे । ४ । ३६ । १४ ।

"तरुणादित्यगौरेण शरगौरेण वानरैः ॥"

यथा च रघुः । २ । ३५ ।

"कैलासगौरं वृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम् ॥")

श्रीचैतन्यदेवः । इत्यनन्तसंहिता ॥ (यज्ञविशेषः । यथा, भागवते । ३ । १० । २२ ।

"खरोष्ट्रोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः ! शृणु पञ्चनखान् पशून् ॥")

गौरः, त्रि, विशुद्धः । इति मेदिनी । रे । २७ ॥

गौरचन्द्रः, पुं, (गौरेण सप्रकाशवर्णेन चन्द्रयति आह्लादयतीति । चदि आह्लादे + णिच् + रन् ।) श्रीचैतन्यदेवः । यथा,—

"कलौ चैतन्यगौराङ्गो गौरचन्द्रः प्रभुर्हरिः ।
प्रभुर्गौरो गौरहरिर्नामानि भक्तिदानि मे ॥"

इत्यनन्तसंहिता ॥

गौरजीरकः, पुं, (गौरः शुक्लवर्णो जीरकः ।) शुक्लजीरकः । भाषा जीरा इति भाषा ॥ तत्पर्य्यायः । अजाजी २ श्वेतजीरकः ३ कणाढ्या ४ कणजीरः ५ कणा ६ सितदीप्यः ७ दीर्घकणा ८ सिताजाजी ९ गौराजाजी १० । अस्य गुणाः । हिमत्वम् । रुचिकारित्वम् । कटुत्वम् । मधुरत्वम् । दीपनत्वम् । क्षमिविषाध्माननाशित्वम् । चक्षुर्हितत्वञ्च । इति राजनिर्घण्टः ॥

गौरत्वक्, पुं (गौरी शुक्लवर्णा त्वग् यस्य ।) इक्षुदीक्षः । इति राजनिर्घण्टः ॥

गौरवं, क्ली, (गौरवं साधनत्वेनास्त्यस्य । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ।) अभ्युत्थानम् । इति हेमचन्द्रः । ३ । १६४ ॥ (गुरोर्भावः । गुरु + "इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इत्यण् ।) गुरुत्वम् । इति सुग्धबोधम् ॥ (यथा, महाभारते । १ । १६३ । १८ ।

"शरीरगौरवादस्य शिला गात्रैर्विचूर्णिता ॥"

उत्कर्षः । यथा, रघुः । १४ । १८ ।

"शुश्राव तेभ्यः प्रभवादिहेतुं
खद्विक्रमे गौरवमाश्रितानाम् ॥"

आदरः । यथा, कुमारे । ३ । १ ।

"प्रयोजनापेक्षितया प्रभूणां
प्रायश्चलं गौरवमाश्रितेषु ॥")

गौरवितः, त्रि, (गौरवं सञ्जातमस्येति तारकादित्वादितच् ।) आर्य्यः । तत्पर्य्यायः । आर्य्यमिश्रः २ । इति त्रिकाण्डशेषः ॥

गौरशाकः, पुं, (गौरः गौरवर्णः शाकोऽस्येति ।) मधुकवृक्षविशेषः । इति जटाधरः ॥

गौरसर्षपः पुं, (गौरश्चासौ सर्षपश्चेति कर्म्मधारयः ।) श्वेतसर्षपः । (यथा

"रक्षोघ्नः सर्षपः श्वेतः सिद्धार्थो गौरसर्षपः ।"

इति वैद्यकरत्नमालायाम् ॥)

तत्पर्य्यायः । अनन्यः २ सिद्धार्थः ३ भूतनाशनः ४

कटुखेट: ५ यक्षघ्न: ६ कफघ्न: ७ राजिकाफल: ८ तीक्ष्णक: ९ दुराधर्ष: १० रक्तोद्भव: ११ कुष्ठनाशन: १२ सिद्धप्रयोजन: १३ सिद्धसाधन: १४ सितसर्षप: १५। अस्य गुणा:। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातरक्तयकृत्प्लीहगुल्मदोषविषभूतव्रणनाशित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥ कृमित्वम्। तीक्ष्णत्वम्। कफरक्तःकण्डूकुष्ठकोठक्षमिनाशित्वम्। रक्तपित्तास्रिवर्द्धनत्वञ्च। इति भावप्रकाशः॥ (परिमाणविशेषः। यथा, मनुः। ८।१३६।

त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपाः॥")

गौरसुवर्ण, क्ली, (गौरः शुभ्रः अतएव सु शोभनो वर्णो यस्य।) पत्रशाकविशेषः। तत्तु चित्रकूटदेशे प्रसिद्धम्। तत्पर्य्यायः। स्वर्णम् २ सुगन्धिकम् ३ भूमिजम् ४ वारिजम् ५ हृद्यम् ६ गन्धशाकम् ७ कटुद्रङ्गालम् ८ चूर्णशाकाङ्कुरः ९। अस्य गुणाः। शिशिरत्वम्। कफपित्तज्वरदाहरुचिभ्रान्तिरक्तश्रमनाशित्वम्। पथ्यत्वञ्च। इति राजनिघण्टः॥

गौरा, स्त्री, (गौरादिगणे वर्णवाचिन एव गौरशब्दस्य ग्रहणात् अत्र विशुद्धार्थपरत्वे टाप्।) गौरी। इति त्रिरूपकोषः॥

गौराङ्गः, पुं, (गौरं तप्तकाञ्चनवर्णं अङ्गं कलेवरं यस्य।) श्रीचैतन्यदेवः। यथा,—

"गौराङ्गं गौरदीप्राङ्गं पठेत् स्तोत्रं कृताञ्जलिः।
नन्दगोपसुतत्वेव नमस्यामि गदाग्रजम्॥"

इति ब्रह्मयामले चैतन्यकल्पे चैतन्यस्तवः॥
अपि च ब्रह्मयामले।

"गौराङ्गो नादगम्भीरः खगमाण्डतलालयः॥"

गौरार्द्रकः, पुं, (गौरवर्णं आर्द्रकं इव।) खादरविषभेदः। इति हेमचन्द्रः। ४। २४४॥

गौरास्यः, पुं, (गौरं शुक्लवर्णं आस्यं मुखं यस्य।) कृष्णवानरः। इति राजनिर्घण्टः॥

गौरिका, स्त्री, (गौर्य्येव। गौरी+स्वार्थे कन्। ह्रस्वश्च।) अष्टवर्षीया कन्या। इति शब्दरत्नावली॥

गौरिलः, पुं, (गौरवर्णोऽस्यास्तीति। गौर+बाहुलकादिलच्।) श्वेतसर्षपः। लोहचूर्णम्। इति मेदिनी। ८७॥

गौरी, स्त्री, (गौर+"षिद्गौरादिभ्यश्च।" ४। १। ४१। इति ङीष्।) पार्व्वती। (यथा, रघुः। २। २६।

"गौरीगुरोर्गह्वरमाविवेश॥"

पार्व्वती किल गौरीशृङ्गात् पीठस्थाने कान्यकुब्जे विराजते। यथा, देवीभागवते। ७।३०।५८।

"गौरी प्रोक्ता कान्यकुब्जे रम्या तु मलयाचले॥")

अष्टवर्षवयस्का कन्या। (सा तु अष्टवर्षवयस्ककन्यका। यदुक्तं स्मृतौ।

"अष्टवर्षा भवेद् गौरी नववर्षा तु रोहिणी॥"

तथा च महाभारते। १। २२२। ४०।

"स्त्रीणां यशस्तं गौरीणां सर्वेषामनां सर्वदेवानाम्॥")

हरिद्रा। दारुहरिद्रा। गोरोचना। प्रियङ्गुवृक्षः। वसुधा। नदीविशेषः। (यथा, महाभारते। ६। ६। २५।

"वस्तुं सुवर्णां गौरीञ्च किम्पुरुषां सहिरण्यतीम्॥"

गङ्गा। यथा, काशीखण्डे। २६। ४६।

"गङ्गा गन्धवती गौरी गन्धर्व्वनगरप्रिया॥")

वरुणभार्य्या। इति मेदिनी। रे। २८—२६॥
सूर्य्यवंशीयप्रसेनजिद्राजभार्य्या। यथा,—

"जेमे प्रसेनजिद्भार्य्यां गौरीं नाम पतिव्रताम्।
अभिग्रक्षा तु सा भर्त्रा नदी वै बाहुदाऽभवत्॥"

इति हरिवंशः॥
वृद्धशृङ्गिविशेषः। इति हेमचन्द्रः॥ मञ्जिष्ठा। श्वेतदूर्व्वा। मल्लिका। तुलसी। सुवर्णकदली। व्याघ्रनखी। इति राजनिर्घण्टः॥ रागिणीविशेषः। सा तु मालवरागपत्नी। तस्या रूपं यथा, सङ्गीतदामोदरे।

"आरामध्यगता कुमारिका शारदेन्दुसुखलक्ष्मीः।
राढ़ी दाड़िमबीजं दधती कीरानने गौरी॥"

(केषाञ्चित् मते तु इयं कौशिकरागस्य पत्नी। यदुक्तं सङ्गीतदर्पणे रागाध्याये। ३३।

"लोढ़ी खाम्बावती गौरी गुणकी ककुभा तथा।
रागिण्यो रागराजस्य कौशिकस्य वराङ्गनाः॥"

केषाञ्चित् मते इयं श्रीरागस्य पत्नी। यदुक्तं तत्रैव रागाध्याये। १४।

"मालश्री त्रिवणी गौरी केदारी मधुमाधवी।
सतः प्राहाड़िका ज्ञेया श्रीरागस्य वराङ्गनाः॥"

अस्या रागवेला तृतीयप्रहरात् परं अर्द्धरात्रावधिः॥)

गौरीजं, क्ली, (गौर्य्या जायते इति। जन्+डः।) अभ्रकम्। इति राजनिर्घण्टः॥

गौरीपुत्रः, पुं, (गौर्य्याः पुत्रः।) कार्त्तिकेयः। इति हलायुधः॥

गौरीपुष्पः, पुं, (गौरीप्रियं पुष्पमस्य।) प्रियङ्गुवृक्षः। इति राजनिर्घण्टः॥

गौरीललितं, क्ली, (गौरीव हरिद्रेव ललितम्। पीतवर्णत्वादस्य तथात्वम्।) हरितालम्। इति राजनिर्घण्टः॥

गौरुतल्पिकः, पुं, (गुरुतल्पं गुरुपत्न्यां गुरुपत्नी मित्यर्थः गच्छतीति। "गच्छतौ परदारादिभ्यः।" ४। ४। १। इत्यस्य वार्त्तिं इति ठक्।) गुरुपत्नीगामी। इति प्रायश्चित्तप्रकरणे धर्म्मशास्त्रम॥

गौलिकः, पुं, (गुड़ं साधुः। गुड़+ठक्। डस्य लत्वम्।) शुष्ककटुवृक्षः। इति राजनिर्घण्टः॥

गौल्यं, क्ली, (गुड़स्य भावः। गुड़+ष्यञ्। डस्य लत्वम्।) मधुरम्। इति राजनिर्घण्टः॥

गौश्रुतिकः, त्रि, (गोश्रुतमस्यास्तीति। गोश्रुत+"एकगोपूर्व्वाट्ठञ् नित्यम्।" ५। २। ११८। इति ठञ्।) गोश्रुतस्वामी। इति व्याकरणम्॥ याहार एक श्रुतगरु आहे इति भाषा॥

गौष्ठीनं, क्ली, (पूर्व्वं भूतं गोष्ठम्। गोष्ठ+"गोष्ठात् खञ् भूतपूर्व्वे।" ५। २। १८। इति खञ्।) भूतपूर्व्वकगोस्थानम्। इत्यमरः। ३। १। १३॥ पूर्व्वैर गोठ इति भाषा॥ (यथा, भट्टिः। ४। २१।

"तासुवाच स गोष्ठीने वने स्त्रीपुंसभीषणे॥")

ग्रथ, इ ङ क्षेपे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सकं च-सेट्।) रेफयुक्तः। क्षेपाभिन्न कुटिलीभावः कुटिलीकरणञ्च। इ, कर्म्मणि ग्रन्थ्यते। ङ, ग्रन्थते काष्ठं कुटिलं स्यादित्यर्थः। ग्रन्थते लतां वायुः कुटिलां करोतीत्यर्थः। इति दुर्गादासः॥

ग्रथितं, त्रि, (ग्रथ्यते स्म इति। ग्रन्थ+क्तः। ततो न लोपः।) कृतग्रन्थनम्। गाँथा इति भाषा। तत्पर्य्यायः। ग्रन्थितम् २ हृद्यम् ३। इत्यमरः। ३। १। ८६॥ गुम्फितम् ४। (यथा, रघुः। ८। ३४।

"कुसुमैर्ग्रथितामपार्थिवैः
सजमासोद्य शिरोनिवेशिताम्॥")

आक्रान्तम्। छिंशितम्। इति मेदिनी। ते। १०६॥

ग्रन्थ, कि ग दर्भे। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-क्रां च-परं-सकं-सेट्।) रेफयुक्तः। दर्भो ग्रन्थनम्। कि, ग्रन्थयति ग्रन्थति। ग, ग्रथ्नाति मालां मालिकः। ग्रन्थिसङ्ग्रथियुं हृदयेशः। इति माघे चिन्त्यम्। इति दुर्गादासः॥

ग्रन्थः, पुं, (ग्रन्थ ग दर्भे+भावे घञ्।) गुम्फः। ग्रन्थना। धनम्। (ग्रथ्यते विरच्यते इति। ग्रन्थ+कर्म्मणि घञ्।) शास्त्रम्। (यथा, महाभारते। १। १। ८०।

"ग्रन्थग्रन्थिं तदा चक्रे सुनिर्गूढं कृतूहलात्॥")

द्वाचिंशद्वर्णनिर्म्मितिः। अनुष्टुप्छन्दःश्लोकः। इति हेमचन्द्रः॥

ग्रन्थकर्त्तृ, [ऋ] त्रि, ग्रन्थं करोतीति। ग्रन्थ+ह्वच्प्रत्ययः। ग्रन्थकारः। पुस्तककारकः। शास्त्रकृत्॥

ग्रन्थकुटी, स्त्री, (ग्रन्थस्य कुटी गृहादिस्थानम्।) लेखस्थानम्। इति त्रिकाण्डशेषः॥

ग्रन्थनं, क्ली, (ग्रन्थ+भावे ल्युट्।) गुम्फनम्। ग्रन्थना। तत्पर्य्यायः। सन्दर्भः २ रचना ३ गुम्फः ४ ग्रन्थनम् ५। इति हेमचन्द्रः। ३। ३१७॥

ग्रन्थना, स्त्री, (ग्रन्थ+भावे युच्। स्त्रियां टाप्।) ग्रन्थनम्। इति सुग्धबोधम्॥

ग्रन्थिः, पुं, (ग्रन्थ ग सन्दर्भे+"सनिकथ्यञ्जास्यसिवसिवनिसनिध्वनिग्रन्थिचरिभ्यश्च।" उणां। ४। १३६। इति भावकरणादौ यथायथं इः।) वंशादिसन्धिः। गाँठि इति भाषा। तत्पर्य्यायः। पर्व्व २ परु ३। इत्यमरः। २। ४। १६२॥ काण्डसन्धिः ४। (यथा, आर्य्यासप्तशत्याम्। १६८।

"इक्षोरिव सुन्दरि! मानस ग्रन्थिरपि काव्यः॥")

भद्रमुस्ता। हितावली। पिण्डालुः। इति राजनिर्घण्टः॥ (अन्योन्याध्यासः। मायापाशः। यथा, भागवते। १। ६। २१।

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ॥")
कौटिल्यम्। ग्रन्थिप्रभेदश्च:। (यथा, चरके
सूत्रस्थाने त्रितीयेऽध्याये।
"मनःशिला त्वक्कुटजात् सकुष्ठः
सलोमशः सैड्गजः करञ्जः।
ग्रन्थिश्च भौर्ज्जः करवीरमूलं
चूर्णानि साध्यानि तुषोदकेन ॥")
बन्धनम्। रुग्भेदः। इति मेदिनी। धे। ६ ॥
तस्य निदानसंप्राप्ती यथाह माधवकरः।
"वातादयो मांसमसृक्प्रदुष्टाः
सन्दूष्य मेदाश्च तथा शिराश्च।
वृत्तोन्नतं विग्रथितन्तु शोथं
कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥"
तस्य वातिकरूपं यथा,—
"आयम्यते वृद्धति तुद्यते च
प्रभज्यते मथ्यति भिद्यते च।
क्षामो रुदुर्व्वस्तिरिवातताश्च
भिन्नः स्रवेच्चानिलजेऽसमक्षम् ॥"
पैत्तिकरूपं यथा,—
"दंदह्यते धूप्यति चुप्यते च
पाप्यते प्रज्वलतीव चापि।
रक्तः सपीतोऽथवापि पित्तात्
भिन्नः स्रवेदुष्णमतीव चासम् ॥"
श्लैष्मिकरूपं यथा,—
"श्वेतो विवर्णोऽल्परुजोऽतिकण्डूः
पाषाणवत्संहननोपपन्नः।
चिराभिवृद्धश्च कफप्रकोपा-
च्छिन्नः स्रवेच्छुक्लघनञ्च पूयम् ॥"
(अथास्य ससम्प्राप्तिकलक्षणं यथा,—
"कफप्रधानाः कुर्व्वन्ति मेदोमांसासृगामलाः।
वृत्तोन्नतं यं श्वयथुं सग्रन्थिर्ग्रथनात् स्मृतः ॥
दोषासृमांसमेदोऽस्थि शिराव्रणभवा नव।
ते तत्र वातादायामतोदभेदान्वितोऽसितः ॥
स्थानात् स्थानान्तरगतिरकस्माद्वानिवृद्धिमान्।
रुदुर्व्वस्तिरिवानद्धो विभिन्नोऽच्छस्रवत्यरुक् ॥
पित्तात् सदाहः पीताभो रक्तो वा पच्यते द्रुतम्।
भिन्नोऽसृग्यं स्रवति श्लेष्मणा नीरुजो घनः ॥
प्रीतः सवर्णः कण्डूमान् पक्वः पूयं स्रवेद्घनम्।
दोषैर्दुष्टेऽस्थि ग्रन्थिर्भवेच्मूर्च्छतुसु जन्तुषु ॥
शिरामांसञ्च संश्रित्य सस्रावः पित्तलक्षणः।
मांसलैर्दूषितं मांसाहारैश्च ग्रन्थिमावहेत् ॥
स्निग्धं महान्तं कठिनं शिरानद्धं कफाकृतिम्।
प्रवृद्धं मेदुरैर्मेदोनीतं मांसेऽथवा त्वचि ॥
वायुना कुरुते ग्रन्थिं भृशं स्निग्धं रुदुं चलम्।
श्लेष्मतुल्याकृतिं देहच्यवृद्धिश्चयोदयम् ॥
स विभिन्नो घनं मेदस्तान्त्रासितसितं स्रवेत्।
अस्थिभङ्गाभिघाताभ्यासुप्तावनतन्तु यत् ॥
सोऽस्थिग्रन्थिः पदान्ते च सहसाभोऽवगाहनात्।
यायामाङ्गा प्रतान्तस्य शिराजालं सशोणितम् ॥
वायुः सम्शोष्य सङ्कोच्य वक्रीकृत्य विशोष्य च।
निष्कुरं नीरुजं ग्रन्थिं कुरुते स शिराह्वयः ॥
अरूढे रूढमात्रे वा व्रणे सर्व्वरसाग्निः।

सार्द्रे वा वत्सरहिते गात्रेऽस्राभिहतेऽथवा ॥
वातासमसुतं दुष्टं संशोष्य ग्रथितं व्रणम्।
कुर्य्यात् सदाहः कण्डूमान् व्रणग्रन्थिरयं स्मृतः ॥
साध्या दोषासमेदोजा न तु स्नायुसराश्रयाः।
मर्म्मकण्ठोदरस्थाश्च ————————॥"
इति वाभटेनोत्तरस्थाने २६ अध्याये उक्तम् ॥)
तस्य चिकित्सा यथा,—
"स्वर्ज्जिकामूलकक्षारः गृञ्जचूर्णसमन्वितः।
एतेन विहितो लेपो हन्ति ग्रन्थिं तथार्ब्बुदम् ॥
ग्रन्थिर्न यो नश्यति भेषजेन
निष्कास्य तं शस्त्रविचिकित्सकेन।
ज्ञात्वादिपक्वं घृतेन वैद्यो
व्रणेन चान्येन च सन्चिकित्सेत् ॥
ग्रन्थीनुद्धृत्य पश्चात्तु व्रणोक्तं क्रममाचरेत्।
शिराग्रन्थिं विहायाग्ने लेपे शस्त्रं प्रयुञ्जते ॥
अन्ये आचार्य्याः।" इति भावप्रकाशः ॥
("ग्रन्थिष्वामेषु कर्त्तव्या यथास्वं श्लीपदवत् क्रिया।
दहतीत्यत्र कथ्यन्ते क्रियासिद्धेन सर्पिषा ॥
स्नेहयेच्छुद्धिकामश्च तीक्ष्णैः शुद्धस्य लेपनम्।
संस्वेद्य बहुशो ग्रन्थिं विस्रंसीयात् पुनः पुनः ॥
एष वाते विशेषेण क्रमः पित्तासृजे पुनः।
जलौकसो हिमं सर्व्वं कफजे वातिको विधिः ॥
तथाप्यपक्वं क्षित्त्वैनं स्थितं रक्तेऽग्निना दहेत्।
साध्यश्लेष्मं सश्लेषो हि पुनराप्यायते ध्रुवम् ॥
मांसव्रणोक्तवौ ग्रन्थौ पाटयेदेवमेव च।
कार्य्यं मेदोभवेऽप्येतत्तैः क्षारादिभिश्च तम् ॥
प्रस्त्यान्तिलदिग्धेन क्षुण्णं द्विगुणवाससा।
शस्त्रेण पाटयित्वा वा दहेन्मेदसि दहृते ॥
शिराग्रन्थौ नवे पेयं तैलं साहचरन्तथा।
उपनाहोऽनिलहरैर्वस्तिकर्म्मशिरावधः ॥
अङ्गैकदेशेष्वनिलादिभिः स्यात्
स्वरूपधारी स्फुरणः शिराभिः।
ग्रन्थिर्महान्मांसभवस्त्वनर्त्ति-
र्मेदोभवः स्निग्धतमश्चलश्च ॥
तं शोधितं स्वेदितमश्मकाष्ठैः
साङ्गुष्ठदर्व्वीनयेदपक्वम्।
विपाच्य चोद्धृत्य भिषक् सकोषं
शस्त्रेण दग्ध्वा व्रणवच्चिकित्सेत् ॥
अदग्ध ईषत् परिशोधितश्च
प्रयाति भूयोऽपि घनैर्विवृद्धिम्।
तस्मादृषेः कुशलैः समन्ता-
च्छेदो भवेद्दोष शरीरदेशान् ॥
शोषे क्षते पाकवशेन शीर्य्येत्
ततः क्षतोत्थः प्रसरेद्विसर्पः।
उपद्रवं तं प्रतिवारयेज्ज्ञः
स्वेदैर्भेषजैः पूर्व्वतरैर्यथोक्तैः ॥
ततः क्रमेणाशु यथाविधानं
व्रणं व्रणज्ञस्त्वरया चिकित्सेत् ॥"
इति चरके चिकित्सास्थाने १७ अध्यायः ॥
अपरा चिकित्सा च यथा,—
"ग्रन्थिष्वथामेषु भिषग्विदध्या-
च्छोफक्रियायाः विहितं विधिज्ञः।

रक्तेऽलक्तापि वरस्य गिल्यं
तद्रक्षितं व्याधिबलं निहन्ति ॥
तैलं पिबेत् सर्पिरथो घृतं वा
दत्त्वा वसां वा क्षितं विदध्यात्।
अपेहि वातादग्रमूलसिद्धं
वैद्यश्चतुःस्नेहमथो घृतं वा ॥
हिंसाश्च रोहिण्यन्तसाश्च भार्गी
श्योनाकविल्वागुरुबल्वजाग्न्याः।
गोजी च पिष्टा सह तालपत्र्या
ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥
स्वेदोपनाहान् विविधांश्च कुर्य्या-
त्तथा प्रसिद्धागदपरांश्च लेपान्।
विदार्य्य वा पक्वमपोह्य पूयं
प्रक्षाल्य विस्रार्कनरेन्द्रतोयैः ॥
तिलैः सपद्माङ्कुरपञ्चमिश्रैः
संशोधयेत् सैन्धवसंप्रयुक्तैः।
सुखं व्रणं वाप्युपरोपयेयु-
स्तैलेन राज्ञा सवलान्वितेन ॥
विड्ङ्गयष्टीमधुकाञ्जनाभिः
सिद्धेन वा क्षीरसमन्वितेन।
जलौकसः पित्तकृते हितासु
क्षीरोदकाद्यां परिवेचनञ्च ॥
काकोलिवर्गस्य च घृतानि
पिबेत् कषायाणि सशर्करादि।
दार्व्वारसेनेक्षुरसेन वापि
चूर्णं पिबेच्चापि हरीतकीनाम् ॥
मधूकजम्बूर्ज्जुनवेतसानां
त्वग्भिःप्रदाहानवचारयेत।
सशर्करैर्वा त्वगमूत्यकन्दै-
र्दिग्धादभीक्ष्णं मुचुकुन्दजैर्वा ॥
विदार्य्य वा पक्वमपोह्य पूयं
धावेत् कषायेण वनस्पतीनाम्।
तिलैः सयष्टीमधुकैर्विशोध्य
सर्पिः प्रयोज्यं मधुरैर्विपक्वम् ॥
कृतेषु दोषेषु यथानुपूर्व्वया
ग्रन्थौ भिषक् श्लेष्मसमुत्थिते तु।
स्निग्धस्य विस्रापनमेव कुर्या-
दकुण्ठलोहोपलवेणुदण्डैः ॥
विकङ्कतारग्वधकाकजङ्घा
काकादनी तापसवृक्षमूलैः।
आलेपयेत् पिण्डफलार्कभार्गी
करञ्जकाजामदनैश्च विद्वान् ॥
अमर्म्मजातं व्रणमप्रयात-
मपक्वमेवापहरेद्विदार्य्य।
दहेत् स्थिते वातजे सिद्धकर्म्मा
सद्यः क्षतोक्तञ्च दिधिं विदध्यात् ॥
या मांसकन्दः कठिना दहत्य-
स्राव्येव योऽन्यञ्च विधिर्विधिज्ञैः।
शस्त्रेण चापाद्य सुपक्वमाशु
प्रक्षालयेत् पथ्यतमैः कषायैः ॥
संशोधनैस्तञ्च विशोधयेयुः
क्षारोत्तरैः क्षौद्रघृतप्रगाढैः।

सुद्धे च तैलं त्वचारजीयं
विड़ङ्गपाठारजनीविपक्वम् ॥
मेदः ससुत्थे तिलकल्कदिग्धं
दत्त्वोपरिष्टाद्दृढिगुग्गुलं पटान्तम्।
हुताशतप्तेन सुहृत् प्रयत्ना-
लोहेन धीमान् दहनं हिताय ॥
प्रलिप्य दार्व्वीमथ लाक्षया वा
प्रतप्तया खेदनमस्य कार्य्यम्।
निपात्य वा श्लक्ष्णमपोह्य मेदो-
दहेत् सुपक्वत्वथवा विदार्य्यम् ॥
प्रक्षाल्य सूत्रेण तिलैः सुपिष्टैः
सुवर्षिकाद्यैर्हरितालमिश्रैः।
ससैन्धवैः क्षौद्रघृतप्रगाढ़ैः
क्षारोत्तरैरेनमभिप्रशोध्य ॥"

इति सुश्रुते चिकित्सितस्थानेऽष्टादशेऽध्याये ॥)

ग्रन्थिकं, क्ली, (ग्रन्थिभिः कायति प्रकाशते इति। कै+कः।) पिप्पलीमूलम्। (अस्य पर्य्यायो यथा, "ग्रन्थिकं पिप्पलीमूलसुषवं चटकाग्निरः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

ग्रन्थिपर्णम्। गुग्गुलुः। इति मेदिनी। रे। ६॥

ग्रन्थिकः, पुं, (ग्रन्थिभिः पर्व्वभिः कायतीति। ग्रन्थि+कै+कः।) करीरः। (ग्रन्थिना कौटिल्येन कायतीति। कै+कः। यद्वा ग्रन्थः पक्षिकाख्यासक्तोति ठन्।) दैवज्ञः। (यथा, महाभारते। १४। ७०। ७।

"तत्र मङ्गलनटाश्चैव ग्रन्थिकाः सौख्यदायिकाः।
स्तुतमागधसङ्घाश्चाप्यस्तुवंस्तं जनार्द्दनम् ॥")

सङ्कटदेवाख्यपाखण्डः। इति मेदिनी। के। ८१॥

(नकुलश्च। इयमाख्या तु यदानेन छद्मरूपिणा विराटगृहे वासः कृतस्तदैव जाता। यथा, महाभारते। ४। १। २।

नकुल उवाच।

"अश्वबन्धो भविष्यामि विराटनृपतेरहम्।
सर्व्वथा ज्ञास्यसे नृप्त कुशलः परिरक्षणे।
ग्रन्थिको नाम नाम्नाहं कर्म्मैतत् सुप्रियं मम॥")

ग्रन्थितं, त्रि, (ग्रन्थ्यते स्म इति। ग्रन्थि+क्तः।) ग्रथितम्। इत्यमरः। ३। १। ८६॥

ग्रन्थिदला, स्त्री, (ग्रन्थिर्दलेषु पर्व्वसु यस्याः।) मालादूर्व्वा। इति राजनिर्घण्टः॥

ग्रन्थिदूर्व्वा, स्त्री, (ग्रन्थिबहुला दूर्व्वा। शाकपार्थिवादित्वात् समासः।) मालादूर्व्वा। इति राजनिर्घण्टः॥

ग्रन्थिपर्ण, क्ली, (ग्रन्थिषु पर्णानि यस्य। ग्रन्थि प्रचुराणि पर्णानि यस्येति वा।) वृक्षविशेषः। गाँदियाला इति भाषा॥ तत्पर्य्यायः। शुकम् २ दर्भपुष्पम् ३ खौशेयम् ४ कुक्कुरम् ५। इत्यमरः। २। ४। १३२॥ बर्हिःपुष्पम् ६ बर्हिः ७ पुष्पम् ८ बर्हम् ९ शुकबर्हम् १०। इति तट्टीका॥ खौशेयकम् ११ कुशपुष्पम् १२ गुत्यकम् १३। इति रत्नमाला॥ विशीर्षाख्यम् १४ खारामगुल्फकम् १५ बर्हिः १६ शुकपुच्छम् १७ शुकच्छदम् १८। इति शब्दार्णवः॥ शाल्यकम् १९ काकपुष्पम् २० नीलपुष्पम् २१ सुगन्धम् २२ तैलपर्णकम् २३। अस्य गुणाः। तिक्तत्वम्। तीक्ष्णत्वम्। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। लघुत्वम्। कफवातविषश्वासकण्डूदौर्गन्ध्यनाशित्वञ्च। इति भावप्रकाशः॥ अस्य शेषनगुणः। रूक्षतालक्ष्मीराक्षसज्वरनाशित्वम्। इति राजवल्लभः॥

ग्रन्थिपर्णः, पुं, (ग्रन्थिः पर्व्व तत्प्रचुराणि पर्णान्यस्य।) चोरकनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ (चोरकशब्दस्यास्य गुणादयो ज्ञेयाः॥)

ग्रन्थिपर्णी, स्त्री, (ग्रन्थिपर्ण+टाप्।) जतुकालता। इति राजनिर्घण्टः॥

ग्रन्थिपर्णी, स्त्री, (ग्रन्थिपर्ण+गौरादित्वात् ङीष्।) गण्डदूर्व्वा। इति राजनिर्घण्टः॥

ग्रन्थिफलः, पुं, (ग्रन्थियुक्तं फलमस्य।) शाकरुक्षवृक्षः। कपित्थवृक्षः। मदनवृक्षः। इति राजनिर्घण्टः॥

ग्रन्थिमत्फलः, पुं, (ग्रन्थिरस्यास्तीति मतुप्। ग्रन्थिमत् पर्व्वविशिष्टं फलं यस्य।) लकुचः। इति राजनिर्घण्टः॥

ग्रन्थिमान्, [त्] पुं, (ग्रन्थिरस्यस्यास्मिन् वा। ग्रन्थि+मतुप्।) अस्थिसंहारकवृक्षः। हाड़भाङ्गा इति हाड़जोड़ा इति च भाषा। तत्पर्य्यायः। अस्थिसंहारी २ वज्रवल्ली ३ अस्थिशृङ्खला ४। अस्य गुणाः। वातश्लेष्मरक्तमिदुर्नामनाशित्वम्। अस्थियोकृत्वम्। उष्णत्वम्। सारकत्वम्। अन्तरोगपित्तकारित्वम्। रूक्षत्वम्। स्वादुत्वम्। लघुत्वम्। दृष्यत्वम्। प्राचनत्वञ्च। इति भावप्रकाशः॥ रत्नमालोक्तपर्य्यायो राजवल्लभोक्तगुणाश्चास्थिसंहारशब्दे द्रष्टव्याः॥ (ग्रन्थियुक्ते, त्रि। यथा, कुमारे। ३। ४६।

"कण्डप्रभासङ्गविशेषनीलां
क्षणात्वचं ग्रन्थिमतीं दधानम्॥")

ग्रन्थिमूलं, क्ली, (ग्रन्थिर्मूले यस्य।) शृङ्गवेरम्। इति राजनिर्घण्टः॥

ग्रन्थिमूला, स्त्री, (ग्रन्थिबहुलं मूलं यस्याः। शाकपार्थिवादित्वात् समासः।) मालादूर्व्वा। इति राजनिर्घण्टः॥

ग्रन्थिलं, क्ली, (ग्रन्थिर्विद्यतेऽस्य। ग्रन्थि+"सिध्मादिभ्यश्च।" ५। २। ९७। इति लच्।) पिप्पलीमूलम्। इति राजनिर्घण्टः॥ आर्द्रकम्। इति शब्दचन्द्रिका॥

ग्रन्थिलः, पुं, (ग्रन्थिरस्यास्तीति। "सिध्मादिभ्यश्च।" ५। २। ९७। इति लच्।) विकङ्कतवृक्षः। वँइचि इति भाषा॥ (पर्य्यायोऽस्य यथा,—

"विकङ्कतः सुवाहुश्चो ग्रन्थिलः खादुकण्टकः।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) करीरवृक्षः। इत्यमरः। २। ४। ३०, ७७॥ तण्डुलीयशाकम्। हितावली। पिण्डालुः। चोरकनामगन्धद्रव्यम्। विकङ्कटवृक्षः। इति राजनिर्घण्टः॥ ग्रन्थियुक्ते त्रि। इति मेदिनी। थे। ८५॥

(यथा, आर्य्यासप्तशत्याम्। ५००।

"रोषेणैव मया सखि! वक्रोऽपि ग्रन्थिलोऽपि कठिनोऽपि।
ऋजुतामनीयतायं सदः खेदेन वंशः इव॥")

ग्रन्थिला, स्त्री, (ग्रन्थिल+टाप्।) भद्रमुस्ता। (भद्रमुस्तशब्देऽस्या गुणादिकं ज्ञातव्यम्॥) मालादूर्व्वा। गण्डदूर्व्वा। इति राजनिर्घण्टः॥

ग्रन्थिवर्द्धी, [न्] पुं, (ग्रन्थिभिर्वर्द्धते इति। वृह वृद्धौ+णिनिः।) ग्रन्थिपर्णवृक्षः। इति शब्दचन्द्रिका॥

ग्रन्थिहरः, पुं, (ग्रन्थिं कौटिल्यं हरति परस्तकुटिलतां कार्य्यजटिलतां वा विभेदयतीत्यर्थः। ग्रन्थि+हृ+अच्।) अमात्यः। मन्त्री। इति त्रिकाण्डशेषः॥

ग्रन्थीकं, क्ली, (ग्रन्थिभिः कायतीति। ग्रन्थि+कै+कः। निपातनात् दीर्घत्वम्।) ग्रन्थिकम्। पिप्पलीमूलम्। इति द्विरूपकोषः॥

ग्रस, उ ङ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) रेफयुक्तः। उ, ग्रसित्वा ग्रस्त्वा। ङ, ग्रसते। हिमांशुमाशु ग्रसते। इति माघः। इति दुर्गादासः॥

ग्रस, कि ग्रासे। इति कविकल्पद्रुमः॥ (चुरां—पक्षे भ्वां-परं सकं सेट्।) रेफयुक्तः। कि, ग्रासयति फलं लोकः। ग्रसति तव सुखेन्दुं पूर्णचन्द्रं विहाय। इमं ग्रहणे पठन्ति केचित्। इति दुर्गादासः॥

ग्रस्तं, त्रि, (ग्रस्यते स्म इति। ग्रस+क्तः। "ग्रस्य विभाषा।" ७। २। १५। इति इड्भावः।) सुप्तवर्णपदम्। असम्पूर्णवाक्यम्। सुप्तम्। (यथा, रामायणे। २। ४२। १२।

"राज्ञो नातिबभौ रूपं ग्रस्तस्यांशुमतो यथा॥")

खादितम्। इत्यमरः। १। ६। २०॥ (आक्रान्तम्। यथा, याज्ञवल्क्ये। ३। २४४।

"दीर्घतीव्रामयग्रस्तं ग्राम्यधर्म्मैरपीडितम्॥")

ग्रह, ग ञ ग्रहणे। इति कविकल्पद्रुमः॥ (क्र्यां-उभं-सकं-सेट्।) ग ञ, गृह्णाति गृह्णीते। इति दुर्गादासः॥

ग्रह, ऊ कि आदाने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) ऊ, अग्रहीत् अग्राहीत्। कि, ग्राहयति ग्रहति। एव कादिरेव मन्यते तन्नाप्यात्मनेपदी एव। इति दुर्गादासः॥

ग्रहः, पुं, (गृह्णाति गतिविशेषानिति। यद्वा, गृह्णाति फलदानत्वेन जीवानिति। ग्रह+"विभाषा गृहः।" ३। १। १४३। इति पचे अच्।) सूर्य्यादिनव। यथा। रविसोममङ्गलबुधबृहस्पतिशुक्रशनिराहुकेतवः। (उक्तञ्च,—

"सूर्य्यचन्द्रौ मङ्गलश्च बुधश्चापि बृहस्पतिः।
शुक्रः शनैश्चरौ राहुः केतुश्चेति नव ग्रहाः॥"

"लोकानग्नीन् स्वरान् धातून् सुरान् द्वीपान् ग्रहानपि।
समिधः सप्त सङ्ख्याताः सप्तजिह्वा हविर्भुजः॥"

इत्यनेन ग्रहाणां यत् सप्तत्वमुक्तं तत् वराहमतानुसारेणोक्तत्वाद्ध्येयम्। एतेन राहुकेत्वोर्ग्रहत्वं सर्व्वे नाद्रियन्ते इति सूचितम्॥) तेषामूर्द्धा गतिर्यथा। वक्रा १ अतिवक्रा २ कुटिला ३ मन्दा ४ मन्दतरा ५ समा ६ शीघ्रा ७ शीघ्रतरा ८। इति ज्योतिषम्॥ तेषां ध्यानानि यथा। तत्र सूर्य्यस्य ध्यानम्।

"क्षत्रियं काश्यपं रक्तं कालिङ्गं द्वादशाङ्गुलम्। पद्महस्तद्वयं पूर्व्वाननं सप्ताश्ववाहनम्॥ शिवाधिदेवतं सूर्य्यं वह्निप्रत्यधिदेवतम्॥" *॥

सोमस्य ध्यानम्।

"सासृजं वैश्यमात्रेयं हस्तमात्रं सिताम्बरम्। श्वेतं द्विबाहुं वरदं दक्षिणं सगदेतरम्॥ दशाश्वं श्वेतपद्मस्थं विचिन्त्योमाधिदेवतम्। जलप्रत्यधिदेवञ्च सूर्य्यास्यमाकृयेत्तथा॥" *॥

मङ्गलस्य ध्यानम्।

"आवन्त्यं क्षत्रियं रक्तं मेषस्थं चतुरङ्गुलम्। आरक्तमाल्यवसनं भारद्वाजं चतुर्भुजम्॥ दक्षिणोर्द्धक्रमाच्छक्तिवराभयगदाकरम्। आदित्याभिमुखं देवं तद्वदेव समाकृयेत्॥ स्कन्दाधिदेवतं भौमं क्षितिप्रत्यधिदेवतम्॥"*॥

बुधस्य ध्यानम्।

"मागधं द्व्यङ्गुलाच्चेयं वैश्यं पीतं चतुर्भुजम्। वामोर्द्धक्रमतश्चर्म्मगदावरदखड्गिनम्॥ सूर्य्यास्यं सिंहगं सौम्यं पीतवस्त्रं तथाकृयेत्। नारायणाधिदेवञ्च विष्णुप्रत्यधिदेवतम्॥" *॥

बृहस्पतेः ध्यानम्।

"द्विजमाङ्गिरसं पीतं सैन्धवञ्च षडङ्गुलम्। ध्यात्वा पीताम्बरं जीवं सरोजस्थं चतुर्भुजम्॥ दक्षोर्द्धदक्षवरदकरकादक्षमाकृयेत्। ब्रह्माधिदेवं सूर्य्यास्यमिन्द्रप्रत्यधिदेवतम्॥" *॥

शुक्रस्य ध्यानम्।

"शुक्रं भोजकटं विप्रं भार्गवञ्च नवाङ्गुलम्। पद्मस्थमाकृयेत् सूर्य्यसुखं श्वेतं चतुर्भुजम्॥ सदाक्षवरकरकादक्षहस्तं सिताम्बरम्। शक्राधिदेवतं ध्यायेत् शचीप्रत्यधिदेवतम्॥"*॥

शनेर्ध्यानम्।

"सौराष्ट्रं काश्यपं शूद्रं सूर्य्यास्यं चतुरङ्गुलम्। कृष्णं कृष्णाम्बरं शूलमृगस्थं सौरिं चतुर्भुजम्॥ तदद्वामवरं शूलंधनुर्हस्तं समाकृयेत्। यमाधिदेवतं प्राजापतिप्रत्यधिदेवतम्॥" *॥

राहोर्ध्यानम्।

"राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम्। कृष्णं कृष्णाम्बरं सिंहासनं ध्यात्वा तथाकृयेत्॥ चतुर्भाहुं खड्गवरशूलचर्म्मकरन्तथा। कालाधिदेवं सूर्य्यास्यं सर्पप्रत्यधिदेवतम्॥" *॥

केतूनां ध्यानम्।

"कौशद्वीपं केतुगणं जैमिनीयं षडङ्गुलम्। धूम्रं ध्वजगतं शूद्रमाकृयेद्विकृताननम्॥ सूर्य्यास्यं ध्वजवसनं वरदं गदिनं तथा। चित्रगुप्ताधिदेवञ्च ब्रह्मप्रत्यधिदेवतम्॥"

इति यज्ञयागतत्त्वम्।

तेषां कामरूपे स्थानानि ध्यानमन्त्रादिञ्च यथा,

"पूर्व्वं सुमदनायास्तु ब्रह्मक्षेत्रस्य पश्चिमे। महापीठं यत्र देव आदित्यः सततं स्थितः॥ भैरवस्य हिताथाय यदा सर्व्वे सुराः स्थिताः। कामरूपे महापीठे ब्रह्मेन्द्रवरुणादयः॥ तदा तत्त्वाकृये शैले श्रीसूर्य्योऽपि व्यवस्थितः। चित्रोता नाम तस्यास्ति नदी पूर्व्वदिग्नि स्थिता॥ कापोतं करणं पश्चादृश्यं कुक्कुटद्वयं स्थितम्। कापोतकुक्कुटे विधिवत् स्नात्वा करणकुक्कुटके॥ तत्त्वाचलं समारुह्य संपूज्य च दिवाकरम्। सकृदेव नरो याति भास्करस्य गृहं प्रति॥ सूर्य्यरश्मिसमुद्भूत! कापोत! करणाग्नत!। पुण्यतोय! महाघोरं पापं कापोत! मे हर!॥ इत्यनेन तु मन्त्रेण स्नात्वा कापोतपुष्करे। करणं समुपस्पृश्य तत्त्वशैले रविं यजेत्॥ विविधं ब्रह्मबीजन्तु सहस्रपदमन्ततः। रश्मयेति चतुर्थ्यन्तं देवतायाः शुचेस्ततः॥ अङ्गबीजमिदं प्रोक्तमादित्यस्यातिकामदम्॥" ध्यानं यथा,—

"पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः। सप्ताश्वः सप्तरज्जुश्च द्विभुजो भास्करः सदा॥ वर्त्तुलं मण्डलं चास्य अष्टपत्रसमन्वितम्। अङ्गष्ठाद्यङ्गुलीनान्तु हृदादीनां तथा च षट्॥ अङ्गमन्त्रेण संयुक्त उपान्तो वह्निसंयुतः। सर्व्वाशासे समुद्दिष्टो मन्त्रः सर्व्वफलप्रदः॥ कृष्णिरस्तु शिखावर्म्मनेत्रास्त्रोदरपृष्ठतः। वाक्षोः पार्श्वयोर्ज्जङ्घयोस्तु पादयोर्व्यापि विन्यसेत्॥ जघने तु समस्तानि क्रमान्मन्त्राक्षराणि तु। क्रमश्चोत्तरतन्त्रोक्तः पूजनेऽस्य प्रकीर्त्तितः॥ विसर्ज्जनं तथैषाञ्च विद्याद्या दलगक्तयः। निर्म्माल्यधृग्युगच्छो माठरादास्तु पार्श्वयः॥ बीजमुत्तरतन्त्रस्य पूर्व्वतः प्रतिपादितम्। अनेन विधिना तत्र पूजयित्वा सुरोत्तमम्॥ स कामानखिलान् प्राप्य इह लोके स उत्तमः। सुखी शैवे ततो गच्छेद्रुद्राक्षरस्थालयं प्रति॥१॥"

इति कालिकापुराणे ८० अध्यायः॥

"पूर्व्वं वायुगिरेः शैलश्चन्द्रकूट इति स्मृतः। त्रिकोणस्ताम्रसंकाशस्तदूर्द्ध्वं चन्द्रमण्डलम्॥ द्वितीयवर्णस्याद्यन्तु विन्दिन्दुभ्यामलङ्कृतम्। चन्द्रबीजमिति प्रोक्तं तेन चन्द्रं प्रपूजयेत्॥ अद्यापि प्रतिदर्शे तु पर्व्वतं तं निशापतिः। प्रदक्षिणीकरोत्येव दशभिश्चाश्वभिर्युतः॥ तस्यैव पूर्व्वभागे तु सोमकुण्डाक्ष्यं सरः। तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते॥ स्वर्गादवश्च्युतश्चन्द्रः कामाख्यासेवने यदा। तदा तद्रश्मिसङ्घातनिःसृतास्तोयराशयः॥ तैस्तोयैर्व्वार्त्तवः कुण्डमकरोद्दिव्यचन्द्रयोः। मध्ये पुण्यतमस्थाने स्वयं ब्रह्मशिलोपरि॥ चन्द्ररश्मिससङ्घातचन्द्रकुण्ड महोदधे। सुधास्रवश्च साक्षाद त्वं चन्द्र कलुषं हर॥ इत्यनेन तु मन्त्रेण यः स्नात्वा चन्द्रभाग्यसि। चन्द्रकूटं समारुह्य पूजयेद्यस्तु तं नरः॥

अविच्छिन्ना सन्ततिस्तु सुकान्ता तस्य जायते। परञ्च चन्द्रभवनं भित्त्वा याति परं पदम्॥"

ध्यानं यथा,—

"श्वेतः श्वेताम्बरधरो दण्डाब्जौ हेमभूषितः। गदापाणिर्द्विबाहुश्च स्वर्णाभो वरदः शुभ्रौ॥२॥ पूर्व्वस्यां कर्पटाख्यातु शैलाच्चित्र इति स्मृतः। यः पूर्व्वभागयान्तोऽभूद्विख्यातैर्व्यां व्यवस्थितः॥ पीठस्य ब्राह्मणावस्तु अर्व्वाक् पर्व्वत उच्यते। तस्मिन् वसन्ति सततं ग्रहा राजन्! यथेच्छया॥ तत्र तान् पूजयेद्यस्तु स नाप्नोत्यापदं क्वचित्। रूपं मन्त्रश्च सूर्य्यस्य चन्द्रस्य प्रतिपादितम्। सप्तानामितरेषान्तु मन्त्रं रूपं शृणुष्व मे॥ रक्ताम्बरधरः शूली शक्तिमांश्च गदाधरः। चतुर्भुजो मेषरथो वरदो मङ्गलो मतः॥३॥ पीताम्बरधरः शूली पीतमाल्यानुलेपनः। खड्गचर्म्मगदापाणिः सिंहस्थो वरदो बुधः॥४॥ स्वर्णगौरः पीतवासाः स्वर्णपङ्कजसंस्थितः। मालां कमण्डलुं दण्डं वामेन वरदायकम्॥ चतुर्भुजं सुसम्पन्नं चिन्तयेद्देवतीर्थकम्। सर्व्वैर्देवगणैर्नित्यं नम्यमानं मनोहरम्॥५॥ शुक्लवस्त्रं शुक्लवर्णं शुक्लनागोपरिस्थितम्। चतुर्भुजं पाद्ममालां पुस्तकञ्च वराभये॥ क्रमाद्दक्षिणवामाभ्यां धत्ते दैत्यगुरुः सदा॥६॥ इन्द्रनीलनिभः शूली वरदो गृध्रवाहनः। पाशवाद्यासनधरो ध्यातव्योऽर्कसुतः सदा॥७॥ कामदेवस्य बीजन्तु मन्त्रं भौमस्य कीर्त्तितम्। मं। दुर्गाया नेत्रबीजस्य यत्तु मध्याक्षरं शुभम्। तन्मन्त्रं शृणिपुत्रस्य सर्व्वकामफलप्रदम्॥ नु॥ भकारपञ्चमो यस्तु चतुर्थस्वरसंयुतः। गणेशबीजं तदिदं गुरोर्म्मन्त्रं प्रकीर्त्तितम्॥ ह॥ बिन्दिन्दुसंयुतश्चापि पूर्व्ववर्णद्वयं पुनः। सप्तमस्वरसंयुक्तो भकारस्त्वादिरन्तरम्॥ प्राग्वर्गाद्यक्षरन्तु बिन्दिन्दुभ्यां समन्वितम्। भवेच्छुक्रस्य बीजन्तु सर्व्वकामसमृद्धिदम्॥ शु॥ प्राग्वर्गाद्यक्षरन्तु चन्द्रबिन्दुसमन्वितम्। आद्यमन्त्यस्वरोपेतं तदेवेन्द्रादिसंयुतम्। शनैश्चरस्य मन्त्रोऽयं सर्व्वदोषविनाशनः॥ शं॥ बिन्दुचन्द्रसमायुक्तं नामाद्यक्षर एव वा। तेषां सर्व्वग्रहाणां वै मन्त्रसङ्घः प्रकीर्त्तितः॥ शान्तिके पौष्टिके क्षेत्रे एभिर्मन्त्रैर्ग्रहानिमान्। पूजयेत् सर्व्वदा धीरो भूतिकामो महामतिः॥ वरदाभयहस्तश्च खड्गचर्म्मधरस्तथा। सिंहासनगतः क्षीणो राहुर्धीरैः प्रपूज्यते॥८॥ धूम्रवर्णो विशालाक्षः पुच्छरूपी चतुर्भुजः। खड्गचर्म्मगदाबाणपाणिः केतुः शुभासनः॥९॥ उपान्तादिद्वादशेन स्वरेण सहितः पुनः। उपान्तपञ्चमेनेन्दुबिन्दुभ्यां सहितावुभौ॥ मन्त्रोऽयमनुलोमेन राहोः केतोर्विलोमतः। आद्याक्षरं बिन्दुभद्वा मन्त्रमुक्तं तयोस्तयोः॥१०॥ के

एवं चित्रे शैलवरे पूजयित्वा नवग्रहान्। अभीष्टान् लभते कामान्नरः शान्तिं तथोत्तमाम्॥"

इति कालिकापुराणे ८१ अध्यायः॥ *॥

(अथ ग्रहयुत्यधिकारो यथा,—
"तारायग्रहाश्चामन्योन्यं स्यातां युद्धसमागमौ ।
समागमः शशाङ्केन सूर्य्येणास्तमनं सह ॥
शीघ्रे मन्दाधिकेऽतीतः संयोगो भवितान्यथा ।
द्वयोः प्राग्यायिनोरेवं वक्रिणोस्तु विपर्य्ययात् ॥
प्राग्यायिन्यधिकेऽतीतो वक्रिण्येष्यः समागमः ॥
ग्रहान्तरकलाः स्वस्वशुक्तिलिप्तासमाहताः ।
भुक्त्यन्तरेण विभजेद्गुलोमविलोमयोः ॥
द्वयोर्वैक्रिययोरेकस्मिन् भुक्तियोगेन भाजयेत् ॥
लब्धं लिप्तादिकं शोध्यं गते देयं भविष्यति ।
विपर्य्ययाद्वक्रगत्योरेकस्मिंस्तु धनत्ययौ ॥
समलिप्तौ भवेतां तौ ग्रहौ भगणसंस्थितौ ।
विवरं तद्वदुद्धृत्य दिनादि फलमिष्यते ॥
कृत्वा दिनक्षपामानं तथा विक्षेपलिप्तिकाः ।
ततोऽन्तरं साधयित्वा स्वकाक्षयवशात्तयोः ॥
विषुवच्छाययाभ्यस्ताद्विक्षेपाद् द्वादशोद्धृतात् ।
फलं खनतगाङ्गेयं खदिगार्द्धविभाजितम् ॥
लब्धं प्राच्यास्तगं सौम्याद्विक्षेपात् पश्चिमे धनम् ।
दक्षिणे पाक्कपाले खं पश्चिमे तु तथा क्षयः ॥
सक्षिभग्रहजक्रान्तिभागघ्नाः क्षेपलिप्तिकाः ।
विकलाः खन्दशं क्रान्तिक्षेपयोर्भिन्नतुल्ययोः ॥
नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने ।
द्वङ्नोन्नतौ तु चन्द्रस्य दृक्कर्मादाविदं स्मृतम् ॥
तात्कालिकौ पुनः कार्य्यौ विक्षेपौ च तयोस्ततः ।
दिक् तुल्ये ऽन्तरं भेदे योगः शिष्टं ग्रहान्तरम् ॥
कुजार्किज्ञामरेज्यानां त्रिंशद्दर्शार्द्धवर्द्धिताः ।
विष्कम्भाच्चन्द्रकक्षायां भृगोः षष्टिरुदाहृता ॥
त्रिचतुःकर्णयुक्त्याप्ताः क्रमाच्छिन्नाखिव्यया हताः ।
स्फुटाः स्वकर्णाखिव्याप्ता भवेयुर्मानलिप्तिकाः ॥
छायाभूमौ विपर्य्यस्ते स्वच्छायायेतु दर्शयेत् ।
ग्रहः स्वदर्शनान्तस्थः शृङ्गयं सम्प्रदृश्यते ।
पक्ष हस्तोच्छ्रितौ शृङ्गे यथादिग्भ्रमसंस्थितौ ।
ग्रहान्तरेण विच्छिन्नावधो हस्तनिपातगौ ॥
छायाकर्णौ ततो दद्याच्छायाग्राच्छृङ्गसंगौ ।
छायाकर्णाग्रसंयोगे संस्थितस्य प्रदर्शयेत् ॥
स्वशृङ्गसंगौ योज्यि ग्रहौ दृक्तुल्यतामितौ ।
उल्लेखं तारकाग्रार्द्धदेवं भेदः प्रकीर्त्यते ॥
युद्धग्रंसुविमर्द्दाख्यसंयोगे परस्परम् ।
अंशादूनेऽपसव्याख्यं युद्धमेकोऽत्र चेदृशः ॥
समागमोऽंशादधिके भवतश्चेद्बलान्वितौ ।
अपसव्ये जितो युद्धे पिहितोऽरुणदीप्तिमान् ॥
रूक्षो विवर्णो विध्वस्तो विजितो दक्षिणाश्रितः ।
उदक्स्थो दीप्तिमान् स्थूलो जयी याम्यपि यो
बली ॥
आसन्नावप्युभौ दीप्तौ भवतश्चेत् समागमः ।
स्वल्पौ द्वावपि विध्वस्तौ भवेतां कूटविग्रहौ ॥
उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी ।
शशाङ्केनैवमेतेषां कुर्य्यात् संयोगसाधनम् ॥
भावाभावायलोकानां कल्पनेयं प्रदर्शिता ।
समागंगाः प्रयान्त्येते दूरमन्योन्यमाश्रिताः ॥"
इति सूर्य्यसिद्धान्ते ग्रहयुत्यधिकारः ॥
अथ ग्रहाणां राशिविपत्त्यकथनं ग्रहभावप्रकाशे
यथा,—
"मेषवृश्चिकयोर्भौमः शुक्रो वृषतुलाश्रितः ।
बुधः कन्यामिथुनयोः प्रोक्तः कर्कस्य चन्द्रमाः ॥
स्वाम्नीनधन्विनोर्जीवः शनिर्मकरकुम्भयोः ।
सिंहस्याधिपतिः सूर्य्यः कथितो गणकोत्तमैः ॥"
अथ ग्रहाणामुच्चनीचत्वकथनं तत्रैव यथा,—
"रवेर्मेषतुले प्रोक्ते चन्द्रस्य वृषवृश्चिकौ ।
भौमस्य मृगकर्की च कन्यामीनौ बुधस्य तु ॥
जीवस्य कर्कमकरौ मीनकन्ये सितस्य च ।
तुलामेषौ च मन्दस्य उच्चनीचावुदाहृतौ ॥"
अथ ग्रहाणामन्योन्यं मित्रशत्रुत्वमाह तत्रैव ।
"रवीन्दुभौमगुरवो मित्रशुक्रशनिराहवः ।
स्वस्मिन् मित्राणि चत्वारि परस्मिन् शत्रवः
स्मृताः ॥
राहुरयोः परं वैरं गुरुभार्गवयोरपि ।
हिमांशुबुधयोर्वैरं विवस्वन्मन्दयोरपि ॥"
अथ ग्रहाणां प्रभातादिकालज्ञानमाह तत्रैव,
"प्रभातमिन्दुजगुरू मध्याह्नं रविभूमिजौ ।
अपराह्णं भार्गवेन्दू सन्ध्या मन्दशनैश्चरौ ॥"
अथ ग्रहाणां दृष्टिकथनं तत्रैव यथा,—
"तिर्य्यग्दृष्टी बुधसितौ भौमार्कौ योमदर्शिनौ ।
जीवेन्दू समदृष्टी च शनिराहू अधोदृशौ ॥"
अथ ग्रहाणां विचरत्स्थानानि तत्रैव यथा,—
"भार्गवेन्दू जलचरौ शनीवौ ग्रामचारिणौ ।
राहुचित्रिजमन्दार्कान् शृणुतेऽरण्यचारिणः ॥"
अथ ग्रहाणां प्रित्तादिधातुज्ञानमाह तत्रैव,
"प्रित्तं प्रभाकरश्चन्द्रौ श्लेष्मा भार्गवगीतगू ।
शनिगुरू समधातू च पवनौ राहुमन्दगौ ॥"
अथ ग्रहाणां रसज्ञानमाह तत्रैव ।
"कुजार्की कटुकौ जीवो मधुरस्तुवरो बुधः ।
शशाङ्कौ चन्द्रशुक्रौ तीक्ष्णौ सर्पार्कनन्दनौ ॥"
अथ ग्रहाणां धातुमूलादिचिन्ताज्ञानमाह ।
"मन्देन्दूरगभौमाः क्षुधर्तुः सवित्रभार्गवौ ।
मूलं जीवश्च सौम्यश्च जीवं प्राहुर्महाधियः ॥"
अथ ग्रहाणां पदज्ञानमाह तत्रैव ।
"त्रिपदौ भार्गवगुरू भूपुत्रार्कौ चतुष्पदौ ।
पक्षिणौ बुधशौरी च चन्द्रराहू सरीसृपौ ॥"
अथ ग्रहाणां जातिविशेषमाह ।
"विप्रौ शुक्रगुरू क्षत्रौ कुजार्कौ शूद्र इन्दुजः ।
इन्दुर्वैश्यः स्मृतौ म्लेच्छौ सैंहिकेयशनैश्चरौ ॥"
अथ ग्रहाणां देहादीनां स्वरूपमाह ।
"स्थूल इन्दुः सितः पद्मः चतुरस्रौ कुजो भृगुः ।
वर्त्तुलौ सोमधिषणौ दीर्घौ शनिसुजङ्गमौ ॥"
अथ ग्रहाणां वर्णस्वरूपमाह तत्रैव ।
"रक्तवर्णः कुजः प्रोक्तो धिषणः कनकद्युतिः ।
शुक्लपिङ्गसमः सौम्यो गौरकान्तिरथोऽगुरुः ॥
मन्दारस्यार्कपुष्पस्य समद्युतिरुशनगुः ।
कविरत्यन्तधवलः फणी कृष्णः शनिस्तथा ॥"
ग्रहाणां धातुचिन्तामाह तत्रैव ।
"शुक्रे चन्द्रे भवद्रौप्यं बुधे स्वर्णमुदाहृतम् ।
गुरौ रत्नयुतं हेम सूर्य्ये मौक्तिकमुच्यते ॥
भौमे ताम्रः शनौ लौहं राहावभ्राणि कीर्त्तयेत् ।
धातोर्विनिश्चये ज्ञाते विशेषः स्यादुदाहृतः ॥
शुक्रे चन्द्रे जलाधारो देवतावसतिर्गुरौ ।
रवौ चतुष्पदाश्चानमिष्टकानिचयो बुधे ॥
भृगौ स्थानं कुजे प्रोक्तं शनिराहू च वाह्यभूः ।
अमीभिर्हि वुकस्थाने नरभूमिं विलोकयेत् ॥"
अथ ग्रहाणां लिङ्गज्ञानमाह तत्रैव ।
"जीवमङ्गलमार्त्तण्डाशुशुक्रा पुरुषान् बुधाः ।
सोमसोमजमन्दा हि शुक्रपुत्रास्तु योषितः ॥"
अथ ग्रहाणां वयोज्ञानमाह तत्रैव ।
"युवा कुजः शिशुः सौम्यः शशिशुक्रौ च मध्यमौ ।
मन्दमार्त्तण्डदेवेज्यफणिनः स्थविरा ग्रहाः ॥"
अथ ग्रहाणां प्रकृतिस्वरूपमाह तत्रैव ।
"भौमभास्कराहिभोगीन्द्राः प्रकृत्या दुःखदायकाः ।
शशिगुरुश्वेतकिरणशुक्राः सुखकराः सदा ॥"
अथ ग्रहाणां राशिभोगकालनिरूपणं यदुक्तं ज्योतिषे ।
"रविर्मासं निशानाथः सपादद्विसङ्गयम् ।
पञ्चत्रयं भूमिपुत्रो बुधोऽष्टादशवासरान् ॥
वर्षमेकं सुराचार्य्यश्चत्वारिंशद्दिनं भृगुः ।
शनिः सार्द्धत्रयं वर्षं सभानुः सार्द्धवत्सरम् ॥"
ग्रहाणां स्तुत्यादिकन्तु नवग्रहशब्दे द्रष्टव्यम् ॥)
सेषां दशा तत्फलादि च दशाशब्दे गरुड़-
पुराणे ६० अध्याये च द्रष्टव्यम् ॥ *॥
अथ नवग्रहयागविधानादि यथा,—
याज्ञवल्क्य उवाच ।
"श्रीकामः शान्तिकामो वा ग्रहयागमुरभिचार-
वान् ।
ग्रहयज्ञं समं कुर्य्यात् ग्रहाश्चैते बुधैः स्मृताः ॥
सूर्य्यः सोमो मङ्गलश्च बुधश्चैव बृहस्पतिः ।
शुक्रः शनैश्चरो राहुः केतुः कुर्य्यात् ग्रहांस्तथा ॥
ताम्रकात् स्फटिकाद्रक्तचन्दनात् खर्जकादुभौ ।
रजतादयसः सीसात् कांस्यात् वर्णान् निबोधत ॥
रक्तः शुक्लस्तथा रक्तः पीतः पीतः सितोऽसितः ।
कृष्णः कृष्णः क्रमाद्वर्णा द्रव्याणि सुनयेत्ततः ॥
स्थापयेद्ग्रहवर्णानि होमार्थं प्रलिखेत् पटे ।
सवर्णानि प्रदेयानि वासांसि कुसुमानि च ॥
गन्धाश्च वलयश्चैव धूपो देयश्च गुग्गुलुः ।
कर्त्तव्यास्तत्र मन्त्रेण चरवः प्रतिदेवतम् ॥
आज्यभागेन हुत्वा अभिर्ग्रहा दिवः ककुत् ।
उदुत्तमेति जुहुयाद्गुभिरेव यथाक्रमम् ॥
दृंहस्तेऽतियदर्य्येति सर्व्वेऽन्नात् परिस्रुतः ।
शन्नो देवीस्ततः काण्डात् केतुं कृन्वन्निति क्रमात् ॥
अर्कः पलाशः खदिरश्चापामार्गोऽथ पिप्पलः ।
औडुम्बरः शमी दूर्वा कुशश्च समिधः क्रमात् ॥
होतव्या मधुसर्पिर्भ्यां दध्ना चैव समन्विताः ।
गुडौदनं पायसञ्च हविष्यं क्षीरयष्टिकम् ॥
दध्योदनं हविः पूपाश्चांसं चित्रान्नमेव च ।
दद्याद्ग्रहक्रमादेतान् ग्रहेभ्यो भोजनं ततः ॥
धेनुः शृङ्गसुवर्णाढ्या हेम वासो हयस्तथा ।
छत्रं गौरायसञ्चाज्यं एता वै दक्षिणाः क्रमात् ॥
ग्रहाः पूज्याः सदा यस्माद्राज्यादि प्राप्यतेफलम् ॥"
इति गारुड़े १०१ अध्यायः ॥

अथ वेदभेदे ग्रहादीनां मन्त्रभेदाः क्रमशः प्रदर्श्यन्ते ।

	ऋग्वेदिनाम्	यजुर्वेदिनाम्	सामवेदिनाम्	अथर्ववेदिनाम्
सूर्यस्य	आ कृष्णेन रजसा ।१।३५।२	आ कृष्णेन रजसा। वा: ३३।४३	उदु त्यं जातवेदसम् १।१।१।३।११*	विषासहिं सहमानम् १७।१।१
सोमस्य	आ प्यायस्व समेतु ते १।९१।१६	इमं देवा असपत्नम्। वा: ९।४०	सन्ते पयांसि । वा: १२।११३†	ग्रक्रधूमं नक्षत्राणि ६।१२८।१
मङ्गलस्य	अग्निर्मूर्द्धा दिव: ८।४४।१६	अग्निर्मूर्द्धा दिव: । वा: १५।२०	अग्निर्मूर्द्धा दिव: १।१।१।३।७	त्वया मन्यो सरथम् ४।३१।१
बुधस्य	अग्ने विवस्वत् १।४४।१	उद्बुध्यस्वाग्ने। वा: १५।५४	अग्ने विवस्वत् १।१।१।४।६	यद्राजानो विभजन्त: ३।२९।१
बृहस्पतेः	बृहस्पते परि दीया १०।१०३।४	बृहस्पते अतियदर्य्य:। वा: २९।३	बृहस्पते परि दीया २।९।३।२।१‡	बृहस्पतिर्न: परियातु ७।५२।१
शुक्रस्य	शुक्रं ते अन्यत् ९।५८।१	अन्नात् परिस्रुत:। वा: १९।७५	शुक्रं ते अन्यत् १।१।२।३।३	हिरण्यवर्णा: शुचय: १।३३।१
शनैश्चरस्य	शन्नोदेवीरभीष्टये १०।९।४	शन्नो देवीरभीष्टये । वा: ३६।१२	शन्नो देवीरभीष्टये १।१।१।३।१३	सहस्रबाहु: पुरुष: १९।६।१
राहोः	कया नश्चित्र: ४।३१।१	काण्डात् काण्डात्। वा: १३।२०	कया नश्चित्र: १।२।२।३।५	दिवं चित्रन्तुषा:
केतोः	केतुं कृण्वन्नकेतवे १।६।३	केतुं कृण्वन्नकेतवे । वा: २९।३७	केतुं कृण्वन्नकेतवे २।६।३।१२।३	यक्षे पृथु: स्तनयिनु: ७।११।१
सूर्यादिदेवेश्वरस्य	आ वो राजानम् ४।३।१	त्र्यम्बकं यजामहे। वा: ३।६०	आ वो राजानम् १।१।२।२।७	मानो विदन् विधाधिन:।।१९।१
सोमाधिदेवोमायाः	गौरीर्मिमाय १।१६४।४१	श्रीश्चते लक्ष्मीश्च । वा: ३१।२२	आपो हि ष्ठा २।९।२।१०।१	आपो हि ष्ठा १।५।१
कुजाधिदेवस्कन्दस्य	कुमारं माता ५।२।१	यदक्रन्द: प्रथमम् । वा: २९।२२	स्योना पृथिवि । वा: ३५।२१	अग्निरिव मन्यो त्विषित:।३।३१।२
बुधाधिदेवहरेः	इदं विष्णुर्विचक्रमे १।२२।१७	विष्णोरराटमसि। वा: ५।२१	इदं विष्णुर्विचक्रमे १।३।१।३।९	प्र तद्विष्णु: स्तवते ७।२९।२
जीवाधिदेवब्रह्मणः	त्वमित् सप्रथा: ८।९०।५	आ ब्रह्मन् ब्राह्मण:। वा: २२।२२	त्वमित् सप्रथा: १।१।१।४।८	ब्रह्म जज्ञानम् ४।१।१
शुक्राधिदेवेन्द्रस्य	इन्द्रं वो विश्वत: १।७।१०	सजोषा इन्द्र: । वा: ७।३७	इन्द्रमित् देवतातये १।३।२।१।७	इन्द्रेमं प्रतरम् ६।५।२
शन्यधिदेवयमस्य	यमाय सोमं सुनुत १०।१४।१३	यमाय त्वाङ्गिरस्वते। वा: ९८।९	आयं गौ: पृश्नि: २।९।१।१।१	य: प्रथमं व्यवसाद९।२८।३
राह्वधिदेवकालस्य	ब्रह्म जज्ञानम् । वा: ।१३।३	कार्षिरसि समुद्रस्य। वा: ९।२८	ब्रह्म जज्ञानम्। १।३।१।३।९	रोहित: काल: १३।२।३९
केत्वधिदेवचित्रगुप्तस्य	उषो वाजं हि १।४८।११	चित्रावसो स्वस्ति । वा: ३।१८	चित्र इच्छिशो: १।१।२।२।२।	आज्ञातं यदनाज्ञातम्
सूर्यप्रत्यधिदेवाग्नेः	अग्निं दूतं वृणीमहे १।१२।१	अग्निं दूतं पुरोदधे । वा: २२।१७	अग्निं दूतं वृणीमहे १।१।१।१।३	समाव्याम ऋतव: २।६।१
सोमप्रत्यधिदेवजलस्य	अप्सु मे सोम: १।२३।२०	आपो हि ष्ठा। वा: १२।५०	उदुत्तमं वरुण पाशम्। वा:१२।१२	शन्नो देवीरभीष्टये । वा: ३६।१२
कुजप्रत्यधिदेवक्षितेः	स्योना पृथिवि १।२२।१५	स्योना पृथिवि । वा: ३५।२१	पृथिव्यन्तरीक्षम्। तै: आ:७।७।३	भूमे मातर्निधेहि १२।१।६३
बुधप्रत्यधिदेवविष्णोः	सहस्रशृङ्गो वृषभ: १०।९०।१	इदं विष्णुर्विचक्रमे । वा: ५।१५	सहस्रशृङ्गो वृषभ:। वा: ३१।१	इदं विष्णुर्विचक्रमे ७।२९।४
जीवप्रत्यधिदेवेन्द्रस्य	इन्द्रायेन्दो मरुत्वते ९।६४।२२	इन्द्र आशां नेता । वा: १७।४०	इन्द्रायेन्दो १।५।२।३।६	इन्द्र क्रतुम न आ भर २।५।१
शुक्रप्रत्यधिदेवशच्याः	उत्तापर्ये सुभगे १०।१४५।२	अदितेऽनुमन्यासि। वा: १।३०	एकाष्टका तपसो। ऋ: ३।१०।१२	प्रेतं पादौ १।३७।४
शनिप्रत्यधिदेवप्रजापतेः	प्रजापते न त्वदृ १०।१२१।१०	प्रजापते न त्वदृ। वा: १०।२०	प्रजापते न त्वदृ। वा: १०।२०	नक्तं जातास्योषधे १।२३।१
राहुप्रत्यधिदेवसर्पाणाम्	आयं गौ: पृश्नि: १०।१८९।१	नमोऽस्तु सर्पेभ्य: । वा: १३।६	तवेन्द्रियावमम् १।३।२।३।८	शेरभक शेरभ २।२४।१
केतुप्रत्यधिदेवब्रह्मणः	ब्रह्म जज्ञानम् । वा: १३।३	ब्रह्म जज्ञानम् । वा: १३।३	एष ब्रह्मा य ऋत्विज: १।५।२।१।२	ये दिशामन्तर्देशेभ्य: ४।४०।८

पाठान्तराणि प्रदर्श्यन्ते.—

* वसूर्हासि १ । ३ । २ । ४ । ४ † सोमं राजानम १ । १ । २ । ५ । १ ‡ बृहद्वयो हि । १ । १ । २ । ३ । ८

(गृह्यते अनुगृह्यते अभ्युपपद्यते इति। ग्रह + "ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) अनुग्रहः। निर्बन्धः। (यथा, आर्य्यासप्तशत्याम्। ४४५।

"महति स्नेहे निहितः कुसुमं बहु दत्तमर्चितो बहुशः।
वक्रस्तदपि शनैश्चर रव सखि! दुर्ग्रहो दयितः॥"

"दुष्टो ग्रह आग्रही यस्य पत्ये दुश्चासौ ग्रहश्चेति विग्रहः।" इति तट्टीका॥) ग्रहणम्। (यथा, भागवते। ३। १५। ३५।

"सद्योहरेरनुचरावुरु विभ्यतुस्तत्-
पादग्रहावपतितामतिकातरेण॥")

रक्षोग्रहः। पूतनादयः। ते तु बालग्रहाः। (एतेषां नामानि विवरणञ्च बालग्रहशब्दे द्रष्टव्यानि॥*॥) सैंहिकेयः। (यथा, रघुः।१२।२८।

"सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः॥")

उपरागः। स तु चन्द्रसूर्य्ययोर्ग्रहणम्। इति मेदिनी। हे। ३॥ (यदुक्तं तिथितत्त्वे।

"भक्तिपादान्तरे राहोः केतोर्वा संस्थितो रविः।
चतुर्थ्यादान्तरे चन्द्रस्तदा सम्भवते ग्रहः॥"

ग्रहाणां नवसंख्यात्वेन ग्रहशब्देनापि नवमसंख्या उच्यते। यथा, देवीभागवते। १। ३। ३।

"चतुर्दशसहस्राच्च मातस्तमाद्यं प्रकीर्त्तितम्।
तथा ग्रहसहस्रन्तु मार्कण्डेयं महाद्भुतम्॥"

महादेवः। यथा, महाभारते। १३। १७। ३७।

"चन्द्रः सूर्य्यः शनिः केतुर्बुधो ग्रहपतिर्ग्गुरः॥")

ग्रहकल्लोलः, पुं, (ग्रहस्य चन्द्रसूर्य्यादेः कल्लोलः विमर्दैक इव।) राहुः। इति त्रिकाण्डशेषः॥

ग्रहणं, क्ली, (गृह्यते इति। ग्रह + भावे ल्युट्।) स्वीकारः। (यथा, हे रामायणे।१।६६।१६।

"नगेन्द्रकुम्भैर्हरिणे तस्य धनुर्ग्रहोलनेऽपि वा॥"

आदरः। करः। उपलब्धिः। (यथा, रघुः। ३। २८।

"स वृत्तचूलस्य कलाकपक्षकैः
अमात्यपुत्रैः सवयोभिरन्वितः।
लिपेर्यथावद्ग्रहणेन वाङ्मयं
नदीमुखेनेव समुद्रमाविशत्॥")

बन्दी। उपरागः। इति मेदिनी। णे ४५॥ (गृह्यन्ते विषया अनेन। ग्रह + करणे ल्युट्।) इन्द्रियम्। इति राजनिर्घण्टः॥ शब्दः। इति जटाधरः॥ अथ सूर्य्यचन्द्रग्रहणकारणं यथा,—

"भक्तिपादान्तरे राहोः केतोर्वा संस्थितो रविः।
चतुर्थ्यादान्तरे चन्द्रस्तदा सम्भवते ग्रहः॥
यस्मिन्नृक्षे रविस्तस्माच्चतुर्दशगतः शशी।
पूर्णिमाप्रतिपत्सन्धौ राहुणा ग्रस्यते शशी॥
कृष्णपक्षे तृतीयायां मासार्द्धं यदि जायते।
तदन्त्ययोदशे सूर्य्यो राहुणा ग्रस्यते रविः॥"*॥

ग्रहणकालीनरविचन्द्रयोर्मेघेनाच्छादनाच्छादनकारणं यथा,—

"रविभौमनवांशे तु निरभ्रं ग्रासमादिशेत्।
बुधसौरिनवांशे तु मलिनं क्षुद्रवर्षणम्॥
गुरोरंशकमासाद्य ह्रस्यते सबलाहकः।
शशिशुक्रनवांशे तु प्रावृट्काले महज्जलम्।
अन्यच्चायत्तभूतौ तौ ह्रस्येते ह्रादितामरौ॥"*॥

राहोर्वर्णविशेषे शुभाशुभं यथा, (हृहत् संहितायाम्। ५। ५३-५८।)

"श्वेते क्षेमसुभिक्षं ब्राह्मणपीड़ाच्च निर्द्दिशेद्राहौ।
अग्निभयमनलवर्णे पीड़ा च हुताशवृत्तीनाम्॥
हरिते रोगोत्पत्तिर्गगनाभासीतितच्च विध्वंसः।
कपिले ग्रीष्मगसत्त्वक्षयविध्वंसोऽथ दुर्भिक्षम्॥
अरुणकिरणानुरूपे दुर्भिक्षं दृश्यते विहगपीड़ा।
धूम्राभे क्षेमसुभिक्षमादिशेन्मन्दवृष्टिञ्च॥
कापोतारुणकपिले श्यामाभे क्षुद्भयं विनिर्द्दिशेत्।
कापोतः शूद्राणां याधिकरः क्षत्रवर्णश्च॥
विमलकमलपीताभो वैश्यध्वंसी भवेत् सुभिक्षाय।
सार्च्चिश्चित्रमभयं गैरिकरूपे च युद्धानि॥
दूर्व्वाकाण्डश्यामे हारिद्रे वापि निर्द्दिशेन्मरकम्।
अग्निभयसम्प्रदायी पाटलकुसुमोपमो राहुः॥"

तद्ग्रहणनिषेधो यथा,—

"सप्तार्णजन्मशेषेषु चतुर्थे दशमे तथा।
नवमे च तथा चन्द्रे न कुर्य्याद्राहुदर्शनम्॥
जन्मभे जन्मराशौ च षष्ठाष्टमगते तयोः।
चतुर्थे द्वादशे चन्द्रे न कुर्य्याद्राहुदर्शनम्॥
ग्रासदर्शनमात्रेण चार्थहानिर्भवेद्ध्रुवम्।
जायते नात्र सन्देहस्तस्मात्तत्परिवर्जयेत्॥
विपत्करप्रत्यरिसंज्ञितेषु
वैनाशिकर्क्षेषु कृतं हि कर्म्म।
सर्व्वं नृणां निष्फलमेव यस्मात्
कृतेऽपि तत्रास्ति शुभं न किञ्चित्॥"

तत्र कर्त्तव्यं कर्म्म यथा,—

"एकरात्रमुपोष्यैव राहुं दृष्ट्वा त्यजेन्नरः।
पुण्यमाप्नोति कृत्वा च स्नानं श्राद्धं विधानतः॥
आदित्यकिरणैः पूतं पुनः पूतञ्च वह्निना।
जलं याध्यातरः स्नायात् ग्रहणेऽप्युष्णवारिणा॥
सर्व्वं भूमिसमं दानं सर्व्वे व्यासमा द्विजाः।
सर्व्वं गङ्गासमं तोयं ग्रहणे नात्र संशयः॥
सर्व्वेणापि कर्त्तव्यं श्राद्धं वै राहुदर्शने।
अकुर्व्वाणस्तु तत् श्राद्धं पङ्के गौरिव सीदति॥
आपद्यनशौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा।
आमश्राद्धं द्विजैः कार्य्यं शूद्रेण तु सदैव हि॥
चन्द्रसूर्य्यग्रहे स्नानं श्राद्धदानजपादिकम्।
कार्य्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा॥
सप्तीर्थेष्वेकविधुरासे तन्नदामनपर्व्वणोः।
मन्वादीनां प्रकुर्व्वाणो मासर्त्वादीन् न शोधयेत्॥
चन्द्रग्रहश्चन्द्रवारे सूर्य्ये सूर्य्यग्रहस्तथा।
रूढ़ामणिरयं योगस्तत्रानन्तफलं स्मृतम्॥
अन्यस्माद्ग्रहणात् कोटिगुणमत्र फलं लभेत्।
अथवान्यप्रकारेण पुरश्चरणमिष्यते॥
ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्व्वमुपोषितः॥
नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः।
यद्वा पुण्योदके स्नात्वा शुचिः पूर्व्वमुपोषितः॥
ग्रहणादिविशोधान्तं जपेन्मन्त्रं समाहितः।
अनन्तरं दशांशेन क्रमाद्धोमादिकं चरेत्॥
तदन्ते महतीं पूजां कुर्य्याद्ब्राह्मणतर्पणम्।
ततो मन्त्रप्रसिद्ध्यर्थं गुरुं संपूज्य तोषयेत्॥
एवञ्च मन्त्रसिद्धिः स्याद्देवता च प्रसीदति।
सूतके मृतके चैव न दोषो राहुदर्शने।
स्नानमात्रन्तु कर्त्तव्यं दानश्राद्धविवर्जितम्॥"*॥

नक्षत्रविशेषे ग्रहणे नराणां दोषस्तत्शान्तिश्च यथा,—

"यस्मिंस्त्रिजन्मनक्षत्रे ग्रस्येते शशिभास्करौ।
तज्जातानां भवेत् पीड़ा ये नराः शान्तिवर्ज्जिताः॥
ग्रहयज्ञग्रहपरिपीड़ितनाड़ीनक्षत्रदोषशमनाय।
सह शतपुष्पैः स्नायात् फलिनीपलचन्दनोशीरैः॥"

नाड़ीनक्षत्राणि च। आद्यदशघोड़शाद्यदशत्रयोविंशपञ्चविंशतयः॥

"ताम्रपात्रं तिलैः पूर्णं पूर्णं वा गव्यसर्पिषा।
भास्करग्रहणे दद्यान्नाड़ीदोषोपपीड़ितः॥
घृतकुम्भोपरि निहितं शुद्धं नवनीतपूरितं दद्यात्।
नाड्यादिदोषशान्त्यै द्विजाय दोषाकरग्रहणे॥"

तत्र भोजनादिनिषेधो यथा,—

"चन्द्रस्य यदि वा भानोर्यस्मिन्नहनि भार्गव!।
ग्रहणन्तु भवेत्तत्र तत्पूर्व्वां भोजनक्रियाम्॥
नाचरेत् सग्रहे चैव तथैवास्तमुपागते।
यावत् स्यान्नोदयस्तस्य नाग्नीयात्तावदेव तु॥
मुक्तिं दृष्ट्वा तु भुञ्जीत स्नानं कृत्वा परेऽहनि॥
सूर्य्यग्रहे तु नाग्नीयात् पूर्व्वं यामचतुष्टयम्।
चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना॥
व्याहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके॥"

तत्राशौचं यथा,—

"सर्व्वेषामेव वर्णानां सूतकं राहुदर्शने।
स्नात्वा कर्म्माणि कुर्व्वीत सूतमन्नं विवर्ज्जयेत्॥
ग्रहणे ग्रामयात्रायां विवाहे सौतिकं सूतकम्।
तयोः सम्पत्तिमात्रेण उपस्पृश्य क्रियाक्रमः॥"

इति तिथ्यादितत्त्वम्॥*॥

अथ ज्योतिर्म्मते ग्रहणस्वरूपं यथा। राहुः पृथिवीच्छायां समाश्रित्य चन्द्रं चन्द्रमाश्रित्य रविं यदाच्छादयति तत् ग्रासाख्यम्। किन्तु रविचन्द्रयोर्न गतिरोधकस्वरूपो ग्रासः॥*॥

अथ ग्रहणसम्भवना। अमावस्यावसानसमये यदि रविस्फुटराश्यादिः राहुकेत्वोः स्फुटराश्यादिभिस्तुल्यः किंवा द्वादशभागान्तरितो भवति तदा सूर्य्यग्रहणम्। पूर्णिमावसानकाले यदि चन्द्रस्फुटराश्यादिः राहुकेत्वोः स्फुटराश्यादिभिस्तुल्यः किंवा त्रयोदशभागान्तरितो भवति तदा चन्द्रग्रहणं स्यात्॥*॥ तस्य गणनाप्रकारो यथा। अमान्ता शेषचक्रे पूर्णिमावसाने च सूर्य्यसिद्धान्तोक्तगतिागतौ यथा-

सम्भवराश्यादिस्थौ रविचन्द्रौ कर्त्तव्यौ। मध्यराहुराश्यादिभिर्युक्तः स्फुटराश्यादिस्थो रविश्च कार्यः। अस्मिन् राहुयुक्तरवौ षड्राश्यधिके सति षड्राशीन् त्यक्त्वा त्रिंशता पूरितः सन् यदि नवतिभागाधिको भवति तदाशीत्युत्तरशतांशेभ्यो हीनः कार्यः। अवशिष्टाङ्को द्विःस्थाप्य एकस्मात् द्वाभ्यां हृताङ्केनापरो युक्तः सन् ग्रहो भवति। राहुरर्कयोर्योगे कृते मेषादिराशिषट्के सति स ग्रहः सौम्यसंज्ञकः तुलादिषट्के सति याम्यसंज्ञकः स्यात्॥*॥ चन्द्रराहुमानज्ञानम्। पञ्चत्रिंशद्विकलाधिकनवत्युत्तरसप्तशतकलामितमध्यचन्द्रभुक्तिः ७९०।३५। सा च स्फुटकर्म्मणा किञ्चित् कलादिभिर्न्यूनाधिका वा भवति। तस्याः स्फुटेन्दुभुक्त्याः सकाशात् द्वाचत्वारिंशद्दधिकशतेन १४२ हरणालब्धं चन्द्रस्य मानं स्यात्। पञ्चगुणितचन्द्रमानात् द्वाभ्यां हरणालब्धं राहुमानं भवति॥*॥

अथ चन्द्रग्रहणम्।

राहुचन्द्रयोर्म्मानं मिलितं ग्रहेण हीनकरणात् यदवशिष्टं तत् ग्रासो भवेत् ग्रहे ऊने सति राहुचन्द्रयोर्म्मिलितं मानद्वयं ग्रासो भवेत्। ग्रहेऽधिके ग्रासो न स्यात्॥*॥

चन्द्रग्रहणारम्भादिकालज्ञानं यथा। षड्गुणितग्रासाङ्कात् चतुर्म्मिश्रितग्रासाङ्केन लब्धं दण्डादिकं स्थितिरर्द्धदण्डादेरर्द्धं भवति। तत् पौर्णमासीयदण्डादिषु हीनं सत् स्पर्शकालः। युक्तं सत् मुक्तिकालः द्विगुणितं तत् स्थितिदण्डादिकालः स्यात्॥*॥

चन्द्रमण्डलस्य स्पर्शादिदिग्ज्ञानम्।

पूर्व्वोक्तग्रहे याम्ये सति आकाशे चन्द्रमण्डलस्य अग्निकोणे स्पर्शो नैर्ऋतकोणे मुक्तिश्च स्यात्। ग्रहे सौम्ये सति ईशानकोणे स्पर्शः वायुकोणे मोक्षः। इति चन्द्रग्रहणम्॥*॥

सूर्य्यग्रहणे अक्षो यथा। स्वदेशविषुवच्छाया द्विः स्थाप्या। एकस्याः षड्भूतैनान्या युक्ता सती भागादिर्याम्याच्चः स्यात्॥*॥ सूर्य्यग्रहणोपयोगिनतमाह। दिनार्द्धभावस्वयोर्दण्डादीनां यदन्तरं तत् अंशादिकं नतनामकं स्यात्॥*॥ सूर्य्यग्रहणोपयोगि लम्बनं यथा। द्विगुणनतसमसङ्ख्यकखण्डो ग्राह्यः खण्डान्तरगुणितशेषात् षष्टिलब्धयुक्तः सन् स्फुटलम्बनं अंशादिकं भवति॥*॥ सूर्य्यग्रहणे फलं यथा। दिनपूर्व्वपरार्द्धक्रमेण षड्गुणितनतयुक्तलम्बनसहितस्फुटरवौ षड्राश्यधिके षड्राशीन् त्यक्त्वा त्रिंशता गुणितो यदि नवत्या अधिको भवति तदा अशीत्युत्तरशतात् हीनः कार्यः। त्रिगुणितदृग्लब्धेः खण्डो ग्राह्यः खण्डान्तरगुणितशेषात् दृग्लब्धयुक्तः सन् फलं भवति॥*॥

सूर्य्यग्रहणे नतिर्यथा। अक्षफलयोर्योगो नतिः स्यात् षड्राशिन्यूने अक्षफलान्तरनतिः सा फले अधिके सति सौम्या अक्षे अधिके सति याम्या भवति॥*॥ सूर्य्यग्रहणे ग्रहो यथा। मध्यराहुसहितः स्फुटरविर्द्विगुणितलम्बनखण्डात् नवत्यंशादिभिर्दिनपूर्व्वार्द्धे रहितः दिनपरार्द्धे सहितः कार्यः एतादृग्संस्कृतरवौ षड्राश्यधिके षड्राशीन् त्यक्त्वा इत्यादि चन्द्रग्रहणोक्तवत् ग्रहः कार्यः। एव स्फुटग्रहः उभयोः ग्रहनतोर्दिक्तुल्यतायां नत्या सह युक्तो दिग्विभेदे रहितः कार्यः अन्तरे कार्ये सति यदधिकं तस्य दिशा ग्रहस्य दिक् वक्तव्या॥*॥ सूर्य्यमानं यथा। दृग्भानुपलाहतविपलाधिकोनषष्टिकलामितरविमध्यभुक्तिः। ५६। ८। १० सा च स्फुटकर्म्मणि किञ्चित् कलादिभिर्न्यूनाधिका वा भवति। तस्माल्लिप्तागुणितस्फुटरविभुक्तेर्द्वाभ्यां हृता लब्धं रविमानं स्यात्॥*॥

अथ सूर्य्यग्रहणम्।

पूर्व्वोक्तचन्द्रमानं रविमानं मिलितं ग्रहेण हीनं सत् ग्रासो भवेत्॥*॥ सूर्य्यग्रहणस्यारम्भादिकालज्ञानम्। चतुर्गुणितग्रासाङ्कात् द्वियुतग्रासाङ्केन लब्धं दण्डादिकं स्थितिनाड्यर्द्धं भवति। तदमावस्याया दण्डादिषु हीनं स्पर्शकालः युक्तं मुक्तिकालः स्यात्॥*॥ स्पर्शादिदिग्ज्ञानम्। ग्रहे याम्ये सति अर्कमण्डलस्य नैर्ऋतकोणे स्पर्शोऽग्निकोणे मोक्षः स्यात्। सौम्ये ग्रहे सति वायुकोणे स्पर्शः ईशानकोणे मुक्तिर्भवेत् द्विगुणितं तत् स्थितिदण्डादि स्यात्॥*॥ दिवारात्रौ परार्द्धे यदि ग्रहणं भवति तदा अमावस्यापौर्णमास्योर्दण्डादिः स्फुटलम्बनयुक्तः कार्य्यः॥ गणिताग्रकालात् हीनातिरिक्ते काले यदि ग्रहणं स्यात् तत् औत्पातिकं भवेत्॥*॥ ग्रहणे मण्डलस्य सामान्यवर्णो यथा। बिम्बस्य वैवर्ण्यं अंशुहानिस्तमोवृत्तिः खण्डनमल्पता वा शुक्लारुणश्यामलपीतचित्रैः पटाद्यैः रोध इव वेष्टनं वा भवति॥*॥ अपर्व्वणं ग्रहणं ईतिभयसनार्त्तिकारि स्यात् तदा दिग्भ्यश्च विरूपाः स्युः॥*॥ ग्रासाङ्गुलिमानज्ञानम्। दृग्गुणितग्रासाङ्कात् मानद्वयार्द्धेन लब्धं चन्द्रसूर्य्ययोर्ग्रासस्य गम्याङ्गुलाद्यं भवति। सूर्य्यस्य त्र्याङ्गुलमपि ग्रासोऽक्षयो भवति। चन्द्रस्य सार्द्धाङ्गुलः सुदर्शः यदि षोडशाङ्गुलाधिको भवति तदा सर्व्वग्रासः॥*॥ ग्रहणे मण्डलवर्णो यथा। अर्के ग्रहणे धूम्राभं समग्रे कपिलं अर्द्धे कृष्णाभम्। इति सूर्य्यग्रहणम्॥ इति सिद्धान्तमञ्जरीसम्मतम्॥

(अधुना सूर्य्यसिद्धान्तमतमुच्यते तत्र चन्द्रग्रहणाधिकारो यथा,—

"सार्द्धानि दृट्सहस्राणि योजनानि विवस्वतः। विष्कम्भो मण्डलस्यैन्दोः सहस्राण्येव तानि तु॥ स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटौ। रवेः स्वभगणाभ्यस्ताः ग्रस्ताङ्गभगणोद्धृताः॥ ग्रस्ताङ्कघ्नागुणितो भाजितो वार्कघ्नया। विष्कम्भचन्द्रकघ्नायां तिथ्याप्ता मानुलिप्तिका॥ स्फुटेन्दुभुक्तिभुक्त्यासगुणिता मध्ययोद्धृता। लब्धं क्षयौ महीव्यासस्फुटार्कश्रवणान्तरम्॥

मध्येन्द्व्यासगुणितं मध्यार्कव्यासभाजितम्। विशोध्य लब्धं क्षय्या तु तमो लिप्तास्तु पूर्ब्ववत्॥ भानोर्भार्द्धे महीच्छाया तत्तुल्यार्कसमेऽपि वा। ग्रस्ताङ्गपाते ग्रहणं कियङ्गागाधिकोनके॥ तुल्यौ राश्यादिभिः स्यातामभावास्यान्तकालिकौ। सूर्य्येन्दुपौर्णमास्यन्ते भार्द्धे भागादिकौ समौ॥ गतस्य पर्वनाड्यादीनां खफलेनोनसंयुतौ। समलिप्तौ भवेतां तौ पातस्तात्कालिकोऽन्यथा॥ छादको भास्करस्येन्दुरधःस्थो घनवद्भवेत्। भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ॥ तात्कालिकेन्दुविक्षेपं छाद्यच्छादकमानयोः। योगार्द्धात् प्रोज्झ्य यच्छेषं तावच्छन्नं तदुच्यते॥ यदृग्ग्राह्यमधिके तस्मिन् सकलं न्यूनमन्यथा। योगार्द्धादधिके न स्याद्विक्षेपे ग्राससम्भवः॥ ग्राह्यग्राहकसंयोगवियोगौ दलितौ पृथक्। विक्षेपवर्गहीनाभ्यां तद्वर्गाभ्यासुभे पदे॥ षष्ट्या संगुण्य सूर्य्येन्दोर्भुक्त्यन्तरविभाजिते। स्यातां स्थितिविमर्दार्द्धे नाड्यादिफलके तयोः॥ स्थित्यर्द्धनाडिकाभ्यस्ता गतयः षष्टि भाजिताः। लिप्तादि प्रग्रहे शोध्यं मोक्षे देयं पुनः पुनः॥ तद्विक्षेपैः स्थितिदलं विमर्दार्द्धं तथासकृत्। संसाध्यमन्यथा याते तस्मिन्नादिफलं स्वकम्॥ स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत्। स्थित्यर्द्धनाड्यूनाहीने ग्रासो मोक्षस्तु संयुते॥ तद्वदेव विमर्दार्द्धनाड्याहीनसंयुते। निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे॥ इष्टनाडीविहीनेन स्थित्यर्द्धेनार्कचन्द्रयोः। भुक्त्यन्तरं समाहन्यात् षष्ट्याप्ताः कोटिलिप्तिकाः॥ भानोर्यद्धे कोटिलिप्ता मध्यस्थित्यर्द्धषड्गुणाः। स्फुटस्थित्यर्द्धसम्भक्ताः स्फुटाः कोटिकलाः स्मृताः॥ क्षेपो भुजस्तयोर्वर्गयुतेर्मूलं श्रवस्तु तत्। मानयोगार्द्धतः प्रोज्झ्य ग्रासस्तात्कालिको भवेत्॥ मध्यग्रहणतश्चोर्द्धमिष्टनाड्यैवं विशोधयेत्। स्थित्यर्द्धान्मौलिकार्द्धेयं प्राग्वच्छेषं तु मौलिके॥ ग्राह्यग्राहकयोगार्द्धाच्छोध्याः खच्छन्नलिप्तिकाः। तद्वर्गात् प्रोज्झ्य तत्कालविक्षेपस्य कृतिम्यदम्॥ कोटिलिप्ता रवेः षष्टिस्थित्यर्द्धेनाहता हृताः। मध्येन लिप्तास्ताभ्यः स्थितिवद् ग्रासनाड्यिकाः॥ नतन्यूनोच्यताभ्यस्ता विद्याप्ता तस्य कार्मुकम्। बलनांशाः सौम्ययाम्याः पूर्व्वापरकपालयोः॥ राशित्रययुतादृग्ग्राह्यात् क्रान्त्यक्षैर्दिक्समैर्युताः। भेदेऽन्तराभ्यां बलना सप्तत्यङ्गुलभाजिता॥ सोन्नतं दिनमर्धार्द्धं दिनार्द्धाप्तं फलेन तु। छिन्याद्विक्षेपमानानि तान्येषामङ्गुलानि तु॥

इति सूर्य्यसिद्धान्ते चन्द्रग्रहणाधिकारः॥

अथ सूर्य्यग्रहणाधिकारः।

"मध्यलम्बसमे भानौ हरिजस्य न सम्भवः। अक्षोद्भवाधभक्रान्तिसाम्ये नावनतेरपि॥ देशकालविशेषेण यथावनतिसम्भवः। लम्बनस्यापि पूर्व्वान्यदिग्ग्राह्ये तथोच्यते॥ लम्बं पर्व्वान्तनाड्यादीनां कुर्य्यात् खेरुदयासुभिः। तज्ज्ञानार्थापक्रमज्यात्रौ लम्बज्याप्तोदयाभिधा॥

तदा लङ्घोदयैर्लग्नं मध्यसंज्ञं यथोदितम् ।
तत्क्रान्त्यन्त्यांशसंयोगो दिक्साम्येऽन्तरमन्यथा ॥
येषं नतांशास्तन्मौर्व्वी मध्यच्या साभिधीयते ।
मध्योदयज्यया भक्ता चिज्यापा वर्गितं फलम् ॥
मध्यच्यावर्गविश्लिष्टं दृक्क्षेपः शेषतः पदम् ।
तच्चिज्यावर्गविश्लेषान्मूलं शङ्कुः स दृग्गतिः ॥
नतांशबाहुकोटिघ्ने स्फुटे दृक्क्षेपहृद्गती ।
एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया ॥
मध्यलग्नार्कविश्लेषज्या छेदेन विभाजिता ।
रवीन्दोर्लम्बनं ज्ञेयं प्राक्पश्चाद्घटिकादिकम् ॥
मध्यलग्नाधिके भानौ तिथ्यन्तात् प्रविशोधयेत् ।
धनस्त्रेऽसकृत् कर्म यावत् सर्व्वं स्थिरीभवेत् ॥
दृक्क्षेपः शीतदीधितिमांशोर्मध्यसूत्रान्तराहतः ।
तिथिघ्नचिज्यया भक्तो लब्धं सावनदिनभवेत् ॥
दृक्क्षेपात् सप्तदिहृताद्भवेद्वावनतिः फलम् ।
अथवा चिज्यया भक्तात् सप्तसप्तकसङ्गुणात् ॥
मध्यच्या दिग्विशात् सा च विज्ञेया दक्षिणोत्तरा ।
सैन्दुविक्षेपदिक्साम्ये युक्ता विश्लेषितान्यथा ॥
तथा स्थितिविमर्दार्द्धन्यासाद्यं तु यथोदितम् ।
प्रमाणं बलनाभीष्यासादि हिमरश्मिवत् ॥
स्थित्यर्द्धोनाधिकात् प्राग्वत् तिथ्यन्तालम्बनं पुनः ।
ग्रासमोक्षोद्भवं साध्यं तत्कार्य्यहरिजान्तरम् ॥
प्राक्कपालेऽधिकत्वाद्भवेत् प्राग् ग्रहणं यदि ।
मौर्व्विकं लम्बनं हीनं पश्चार्द्धे तु विपर्य्ययः ॥
तदा मोक्षस्थि...दले देयं प्रग्रहणे तथा ।
हरिवान्तरकं शोध्यं यत्रैतत् स्याद्विपर्य्ययः ॥
एतदुक्तं कपालैक्ये तद्भेदे लम्बनैक्यता ।
स्वे स्वे स्थितिदले योज्या विमर्दार्द्धेऽपि चोक्तवत्॥"

इति सूर्य्यसिद्धान्ते सूर्य्यग्रहणाधिकारः ॥)

ग्रहणिः, स्त्री, (ग्रह्णाति आक्रमते उदरमङ्गादिरूपेण नाड़ीविशेषावच्छिन्नं शरीरमिति। ग्रह ञ उपादाने + "ग्रहेरनिः।" उणा०। ५। ६०। इति अनिः णत्वं च।) ग्रहणीरोगः। इत्यमरटीकायां रायमुकुटः ॥

ग्रहणी, स्त्री, (ग्रहणि + "ऋदिकारान्तादक्तिनः।" इति ङीष्।) अग्न्यधिष्ठाननाड़ी। स्वनामख्यातरोगः। तस्य निदानसम्प्राप्ती यथा,—

"अतीसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः।
भूयः सन्दूषितो वह्निर्ग्रहणीमपि दूषयेत् ॥
एकैकशः सर्व्वशश्च दोषैरत्यर्थमूर्च्छितैः।
सा दुष्टा बहुशो सुक्तमाममेव विमुञ्चति ॥
पक्वं वा सरुजं पूति सुहुर्ब्बद्धं सुहुर्द्रवम्।
ग्रहणीरोगमाहुस्तमायुर्व्वेदविदो जनाः ॥"*॥

तस्य पूर्व्वरूपं यथा,—

"पूर्व्वरूपन्तु तस्येदं लवणास्यं बलक्षयः।
विदाहोऽन्नस्य पाकस्य चिरात् कायस्य गौरवम् ॥"

तस्य वातिकस्य निदानरूपे।

"कटुतिक्तकषायातिरूक्षसन्दुष्टभोजनैः।
प्रमिताग्न्यशनात्यध्ववेगनिग्रहमैथुनैः ॥
मारुतः कुपितो वह्निं संछाद्य कुरुते गदान्।
तस्मादन्नं पचते दुःखं शुक्तपाकं खराङ्गता ॥
कण्ठास्यशोषः क्षुत् तृष्णा तिमिरं कर्णयोः स्वनः।
पार्श्वोरुवङ्क्षणयोवारुगभीक्ष्णं विसूचिका ॥
हृत्पीड़ाकार्श्यदौर्ब्बल्यं वैरस्यं परिकर्त्तिका।
मुष्टिः सर्व्वरसानाञ्च मनसः सदनं तथा ॥
जीर्णे जीर्य्यति चाध्मानं भुक्ते स्वास्थ्यमुपैति च।
स वातगुल्महृद्रोगप्लीहाश्मरीकी च मानवः ॥
चिरादुदुःखं द्रवं शुष्कं तन्वामं शूलफेनवत्।
पुनः पुनः क्षणेऽर्चः श्वासकासार्दितोऽनिलात् ॥"

पैत्तिकस्य तस्य निदानरूपे।

"कट्वम्लोर्गविदाह्याहारादेः पित्तसुल्बणम्।
आप्लावयद्धन्यनलं जलं तप्तमिवानलम् ॥
सोऽजीर्णं नीलपीताभं पीताभः सार्य्यते द्रवम्।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचिलङ्घितः ॥"

श्लैष्मिकस्य तस्य निदानरूपे।

"गुर्व्वतिस्निग्धशीतादिभोजनादतिभोजनात्।
भुक्तमात्रस्य च स्वप्नाद्दन्यग्निं कुपितः कफः ॥
तस्मादन्नं पचते दुःखं क्षुत्तृष्णाच्छर्द्यरोचकाः।
श्वासोपदेहमाधुर्य्यकासष्ठीवनपीनसाः ॥
हृदयं मन्यते स्थानमुदरं स्तिमितं गुरु।
दुष्टो मधुर उद्गारः सदनं स्रोतसां हर्षणम् ॥
भिन्नामश्लेष्मसंसृष्टगुरुवर्च्चःप्रवर्त्तनम्।
अल्पस्यापि हि दौर्ब्बल्यमालस्यञ्च कफात्मके ॥
पृथग्वातादिनिर्दिष्टं हेतुलिङ्गसमागमे।
त्रिदोषं निर्दिशेद्देवं तेषां वक्ष्यामि भेषजम् ॥"

तस्यासाध्यस्य लक्षणं यथा,—

"लिङ्गैरसाध्यग्रहणीविकारो
यैस्तैरतीसारगदो न सिध्येत्।
दृष्टस्य नूनं ग्रहणीविकारो
हत्वा तनुं नो विनिवर्त्तते च ॥

इति माधवकरः ॥

तस्य चिकित्सा यथा, गारुड़े १७४ अध्याये।

"चिकित्साथ ग्रहण्यास्तु ग्रहणी चाग्निनाग्निनी।
चित्रकक्काथकल्काभ्यां ग्रहणीघ्नं घृतं हविः॥"*॥

हरिरुवाच।

"मरीचं शृङ्गवेरञ्च कुटजत्वचमेव च।
पानाच्च ग्रहणी नश्येत् शृणाङ्कशतशेखर!॥"

इति तत्रैव १८७ अध्यायः ॥

"अङ्कोटमूलकर्षार्द्धं पिष्टं तण्डुलवारिणा।
सर्व्वातीसारग्रहणीं पीतं हरति भूतप!॥
मरीचशुण्ठीकुटजत्वक्चूर्णन्तु गुड़ान्वितम्।
क्रमात्तत् द्विगुणं पीतं ग्रहणीशाधिनाशनम्॥"

इति तत्रैव १८६ अध्यायः ॥*॥

अथ सामान्यग्रहणीरोगस्य चिकित्सा।

"ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत्।
लङ्घनैर्दीपनीयैश्च सदातीसारभेषजैः॥
दोषं सामं निरामञ्च विद्यादतीसारवत्।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत्॥
पेयादिपटुलघून्नं पञ्चकोलादिभिर्युतम्।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक्॥
कपित्थबिल्वधात्रीरौतक्रदाड़िमसाधितः।
यवागूः पाचयत्यामं घृतन्तं संवर्त्तयत्यपि॥"

संवर्त्तयति घनीकरोति॥*॥

अथ तक्रम्। तत्र गोदधिगुणाः।

"गव्यं दध्युत्तमं बल्यं पाके स्वादु रुचिप्रदम्।
पवित्रं दीपनं स्निग्धं पुष्टिकृत् पवनापहम्॥
उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम्॥"

अथ महिषीदधिगुणाः।

"माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तजुत्।
स्वादुपाकमभिष्यन्दि वृष्यं गुर्व्वमदूषणम्॥"

अथ छागीदधिगुणाः।

"आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम्।
श्वासकासार्शः-क्षयकार्श्येषु दीपनम्॥"

उत्तमं ग्राहिणां मध्ये श्रेष्ठं इत्यर्थः॥

अथ तक्रस्य भेदाः।

"तक्रन्तु घोलमथितोदश्वित्तक्रप्रभेदतः।
सुश्रुतादौर्मुनिश्रेष्ठैश्चतुर्द्धा परिकीर्त्तितम्॥
ससरं निर्ज्जलं घोलं मथितन्त्वसरोदकम्।
तक्रं पादजलं प्रोक्तमुदश्चिच्चार्द्धवारिकम्॥
वातपित्तहरं घोलं मथितं कफपित्तजुत्।
उदश्वित् कफदं बल्यं श्रमघ्नं परमं मतम्॥"

अथ तक्रस्य गुणाः।

"तक्रं ग्राहि कषायाम्लं मधुरं दीपनं लघु।
वीर्य्योष्णं बलदं वृष्यं प्रीणनं वातनाशनम्॥
यान्युक्तानि दधीन्यद्यौ तद्गुणं तक्रमादिशेत्।
ग्रहण्यादिमतां तक्रं पथ्यं संग्राहि लाघवात्॥
वातघ्नमम्लसान्द्रत्वात् सद्यस्कं त्वविदाहि च।
किञ्च स्वादु विपाकित्वान्न च पित्तप्रकोपणम्॥
कषायोष्णविकारित्वाद्दीप्ताग्नेश्चैव कफे हितम्॥"

अथोद्धृतस्योद्धृतानुद्धृतस्य तक्रस्य गुणाः।

"समुद्धृतघृतं तक्रं पथ्यं लघु विशेषतः।
स्तोकोद्धृतघृतं तस्मादुरु वृष्यं कफापहम्॥
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम्॥"

अथ दोषविशेषे तक्रविशेषाः।

"वातेऽम्लसैन्धवोपेतं पित्ते स्वादु सशर्करम्।
पिबेत्तक्रं कफे चापि शारत्रिकटुसंयुतम्॥
हिङ्गुजीरयुतं घोलं सैन्धवेनावधूलितम्।
ग्रहण्यर्शोऽतिसारघ्नं भवेद्वातहरं परम्॥
रोचनं पुष्टिदं बल्यं वस्तिशूलविनाशनम्॥"

अथामपक्वतक्रगुणाः।

"तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च।
पीनसश्वासकासादौ पक्वमेव विशिष्यते॥"*॥

अथ तक्रस्य निषेधः।

"नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्ब्बले।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके॥"*॥

अथ तक्रस्य गुणोत्कर्षः।

"न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः॥"*॥

"सुद्रव्यं रसं तक्रं धान्यजीरकसंयुतम्।
सैन्धवेनान्वितं दद्यात् वह्न्यूषमिति कीर्त्तितम्॥"

रसं लघु ग्राहि मांसभवरसम्। इति वह्न्यूषम्॥

"कर्षं गन्धमर्द्धपारदमुभे कुर्य्याच्छुभां कञ्चुलीं
त्रार्द्धं चूषणतश्च पञ्चलवणं सार्द्धेच कर्षं पृथक्।
श्रेष्ठं हिङ्गु च जीरकद्वययुतं वल्वार्द्धमङ्गान्वितं

खादेद्दृङ्मितं प्रवृत्तिगदवांस्तक्रस्य विख्येन च ॥"
इति लघुलाईचूर्णम् ॥ * ॥
"त्रिकटु त्रिफला चैव विड्ङ्गं जीरकद्वयम् ।
भल्लातकं यमानी च हिङ्गु लवणपञ्चकम् ॥
गृहधूमवचाकुष्ठं रसगन्धकमभ्रकम् ।
क्षारत्रयाजमोदा च चित्रकं गजपिप्पली ॥
मुस्ता मोचरसं पाठा लवङ्गं जातिपत्रकम् ।
समभागकृतश्चैषां चूर्णं श्लक्ष्णं विनिर्मितम् ॥
भ्रक्षाग्नस्य चूर्णस्तु चूर्णतुल्यं प्रदापयेत् ।
मन्दाग्निकासदुर्नामशीहपाण्डरुक्षिज्वरान् ।
विरुग्मं संग्रहं शूलं हन्यान्नानातिसारजित् ॥
आमवातापहं बल्यं स्रुतिकादोषनाशनम् ।
वर्ज्यनीयं माषमद्यं स्नानं पिष्टितभोजनम् ॥
पथ्यं काञ्जिकमत्रापि दधि तक्रमथापि वा ।
दहलाईचूर्णमिदं लाईभाषितमुत्तमम् ॥"
इति दहलाईचूर्णम् ॥ * ॥
"जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः ।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः ॥
तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः ।
शुण्ठीविड्ङ्गमरिचैः समभागविचूर्णितैः ॥
यावन्त्येतानि सर्व्वाणि दद्याच्छर्करां च तावतीम् ।
सर्व्वचूर्णसमानांशा प्रदेया शुभशर्करा ॥
कर्षमात्रमिदं खादेन्मधुनाप्लावितं जनः ।
नाशयेत् ग्रहणीं कासं क्षयं श्वासमरोचकम् ॥"
इति जातीफलादिचूर्णम् ॥ * ॥
"चित्रकं पिप्पलीमूलं क्षारौ लवणपञ्चकम् ।
योषं हिङ्ग्वजमोदाच क्षयं चैकत्र चूर्णयेत् ॥
वटिका मातुलुङ्गस्य रसैर्वा दाडिमस्य वा ।
कृता विपाचयत्यामं प्रदीपयति चानलम् ॥"
क्षारौ खर्ज्जिका यवक्षारश्च । लवणपञ्चकमिति सैन्धवं रुचकं चैव विड्ं सासुद्रिकं गड्मिति । योषं शुण्ठीपिप्पलीमरिचानि । अजमोदात्र यवानिका । मातुलुङ्गं बीजपूरकम् । इति चित्रकादिवटिका ॥ * ॥ [सगुड़ः ।
"श्रीफलश्लाटुः कल्को नागरचूर्णेन मिश्रितः
ग्रहणीगदमल्पुयं तक्रभुजा श्लीलितो जयति ॥"
श्रीफलश्लाटुः विल्वस्यामं फलम् । गुड़स्याच भागद्वयम् । इति विल्वकल्कः ॥ * ॥
"चतुष्पलं सुधाकाक्षं त्रिपलं लवणत्रयम् ।
वार्त्ताकोः कुड़वक्षार्कमूलाद्विल्वे तथानलात् ॥
दग्धा द्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम् ।
भुक्ता भुक्तं पचत्याशु गाढ़येद्ग्रहणीगदम् ॥
कास श्वासं तथार्शांसि विसूचीञ्च हृदामयम् ॥"
इति वार्त्ताकगुटिका ॥ * ॥
"मुस्तकातिविषाविल्वकौटजं त्वक्चूर्णितम् ।
मधुना च समालोढ़ं ग्रहणीं सर्व्वजां जयेत् ॥"
कौटजं इन्द्रयवः । इति मुस्तकादिचूर्णम् ॥ * ॥
"श्वेतो वा यदि वा रक्तः सुपक्को ग्रहणीगदः ।
गुड़ेनाधिकसर्ज्जेन भक्षितेनाशु नश्यति ॥"
सर्ज्जः राल इति लोके । इति सर्ज्जरसचूर्णम् ॥*॥
"विल्वाब्दग्रक्रयवजाजकमोचसिंह-
मांसं पयः पिबति यो दिवसत्रयेण ।
सोऽतिप्रवृद्धचिरजग्रहणीविकारं
सामं सशोणितमसाध्यमपि क्षिणोति ॥"
मोचो मोचरसः । क्षिणोति हन्ति ।
"प्रस्थत्रये त्वामलकीरसस्य
गुड़स्य दत्त्वार्द्धतुलां गुड़स्य ।
चूर्णीकृतैर्यत्निककोरचव-
योषिभल्लाह्वयवाजमोदैः ॥
विड्ङ्गसिन्धूत्रिफलायवानी-
पाटामिधान्यैश्च पलप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि षाष्टा-
वथौ च तैलस्य पचेद्यथावत् ॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम् ।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः ॥
ग्राम्यन्ति चायं चिरमन्तरग्नि-
र्दृप्तस्य पुंस्त्वस्य च वृद्धिहेतुः ।
स्त्रीणान्तु वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रसिद्धः ॥
तैले मनाक् त्रिवृद्भृष्टा त्रिसुगन्धि पलं पलम् ।
सिद्धे निधेयमत्रैव गुड़े कल्याणपूर्व्वके ॥"
इति कल्याणगुड़ः ॥ * ॥
"पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
त्रिफला चाजमोदा च नलिनी जीरकद्वया ।
सैन्धवं रौमकञ्चापि सासुद्रं रुचकं विड्म् ॥
धारगन्धश्च त्वक्पत्रं क्षुद्रैला चोपकुञ्चिका ।
शुण्ठीशुक्रयवाश्चैव प्रत्येकं कर्षसम्मिताः ॥
गुड़ीकायाः पलान्यत्र चत्वारि कथितानि हि ।
त्रिवृतायाः पलान्यष्टौ गुड़स्यार्द्धतुला तथा ॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु ।
प्रस्थत्रयमिदं सर्व्वं शनैर्मृदग्निना पचेत् ॥
औड़म्बरं त्वामलकं बादरं वा यथाफलम् ।
तावन्मात्रमिदं खादेद्दृक्षयेद् वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम् ।
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंक्षयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं स्मरम् ।
पित्तपाठान्वयाह्वन्ति रक्तपित्तञ्च विंशतिम् ॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः ।
तेभ्यो हितश्च वन्ध्याये महाकल्याणको गुड़ः ॥"
इति महाकल्याणगुड़ः ॥ * ॥
"कुष्माण्डानां सुपक्वानां खिन्नानां निष्कुल-
त्वचाम् ।
सर्पिः प्रस्थे पलशतं ताम्रपात्रे शनैः पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली ।
धान्यकानि विड्ङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम् ।
एकैकस्य पलं चैकं त्रिवृतोऽष्टौ पलानि च ॥
तैलस्य च पलान्यष्टौ गुड़ात् पञ्चाशदेव तु ।
आमलक्याः रसस्यात्र प्रस्थत्रयमुदीरितम् ॥
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक् ।
यावत् दर्व्वीप्रलेपः स्यात्तदैनमवतारयेत् ॥
औड़म्बरं चामलकं बादरं वा यथाफलम् ।
तावन्मात्रमिदं खादेद्दृक्षयेद्वा यथानलम् ॥
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ।
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान् ॥
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः ।
कामलां पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम् ॥
वातश्लेष्मितपैत्तर्पदद्रुरश्मशीलीमकान् ।
वातपित्तकफान् सर्व्वान् दुष्टान् शुद्धान् समा-
चरेत् ॥
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये
नराः ।
तेभ्यो हितो गुड़ोऽयं स्यात् वन्ध्यानामपि पुत्रदः ॥
दृष्टो बलो दृढ़ष्टश्च वयसः स्थापनः परः ॥"
इति कुष्माण्डकल्याणकगुड़ः ॥ * ॥
अतीसाराधिकारलिखितं विल्वतैलं चात्र हितम् । इति ग्रहणीरोगाधिकारः । इति भावप्रकाशः ॥ (सनिदानलक्षणादिकं चिकित्सितञ्चास्य यथा,—
"सामं सान्नमजीर्णेऽग्नौ जीर्णे पक्वन्तु नैव वा ।
अकस्माद्वा सुदुर्बद्धमकस्माच्छिथिलं सुहुः ॥
चिरवृद्ग्रहणीदोषः सञ्चयाच्चोपवेशयेत् ।
स चतुर्धा पृथग् दोषैः सन्निपातात्च जायते ॥
प्रागूपं तस्य सदनं चिरात् पचनमन्वकः ।
प्रसेको वक्त्रवैरस्य मरुचिस्तृट्क्लमो भ्रमः ॥
आनद्धोदरता च्छर्द्दिः कर्णक्ष्वेड़ोल्लूलनम् ।
सामान्यं लक्षणं कार्श्यं धूमकस्तमको ज्वरः ॥
मूर्च्छा शिरोरुग्विस्रम्भः श्वयथुः करपादयोः ।
तत्रानिलात्तालुशोषस्तिमिरं कर्णयोः स्वनः ॥
पार्श्वोरुवङ्क्षणग्रीवारुजाभीष्णं विसूचिका ।
रसेषु रुद्धिः सर्व्वेषु क्षुत्तृष्णा परिकर्त्तिका ॥
जीर्यत जीर्य्यति चाध्मानं शुक्ले स्वास्थ्यं समश्नुते ।
वातरुद्रोगगुल्मार्शःश्लीहपाण्डुत्वशङ्किनः ॥
चिरादृङ्नखं श्रवं शुष्कं तन्वामं शूल्यफेनवत् ।
पुनः पुनः क्षुजेद्वर्चः पायुरुक् श्वासकासवान् ॥
पित्तेन नीलं पीताभं पीताभः क्षुजति द्रवम् ।
पूयश्लेष्मोद्गारहृत्कण्ठदाहारुचिल्लर्हितः ॥
श्लेष्मणा पच्यते दुःखमन्नं छर्द्दिररोचकः ।
आस्योपदेहनिष्ठीवकासच्छ्वासपीनसाः ॥
हृदयं मन्यते स्थानसदनं स्तिमितं गुरु ।
उद्गारो दुरभुरः सदनं स्त्रीष्वहर्षणम् ॥
भिन्नामश्लथसंहतगुरुवर्च्चःप्रवर्त्तनम् ।
अल्पस्यापि दौर्ब्बल्यं सर्व्वजे सर्व्वसङ्करः ॥
विभागेऽस्य ये चोक्ता विषमाद्याश्चयोऽपयः ।
तेऽपि स्युर्ग्रहणीदोषाः समस्तु खास्थ्यकारणम् ॥
वातव्याधश्मरीकुष्ठमेहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः सुदुस्तराः ॥"
इति वाभटे निदानस्थानेऽष्टमेऽध्याये ॥
चिकित्सास्था यथा,—
"ग्रहणीमाश्रितं दोषमजीर्णेवदुपाचरेत् ।
अतीसारोक्तविधिना तस्यामश्च विपाचयेत् ॥
अम्लकाले यवागवादिपक्वकोलादिभिर्युतम् ।
बितरेत् षट्कघन्नं पुनर्योगांश्च दीपनान् ॥

दद्यात् सातिविषां पेयामामे साम्लां सनागराम्।
पानेऽतिसारविहितं वारितक्रं सुरादि च॥
ग्रहणीदोषिणां तक्रं दीपनग्राहि लाघवात्।
पथ्यं मधुरपाकित्वान्न च पित्तप्रदूषणम्॥
कषायोष्णविकाशित्वाद्रूक्षत्वाच्च कफे हितम्।
वातेस्वाद्वम्लसान्द्रत्वात् सद्यस्कमविदाहि तत्॥"
"क्षीणक्षामशरीरस्य दीपनं स्नेहसंयुतम्।
दीपनं बहुपित्तस्य तिक्तैर्मधुरकैर्युतम्॥
स्नेहोऽम्लवर्गैर्युक्तो बहुवातस्य शस्यते।
स्नेहमेव परं विद्याद्दुर्बलानलदीपनम्॥
नालं स्नेहसमिद्धस्य ग्रमायान्नं सुगुर्वपि।
योऽस्याग्निवात् कफे क्षीणे वर्चः पक्वमपि श्लथम्॥
सुस्नेदृग्दोषधयुतं स पिबेदल्पशो घृतम्।
तेन स्वमार्गमानीतः स्वकर्मणि नियोजितः॥
समानो दीपयत्यग्निमग्नेः सन्तुष्टको हि सः।
पुरीषं यच्च रूक्षेण कठिनत्वाद्विसुष्यति॥
स घृतं लवणैर्युक्तं नरोऽन्नावग्रहं पिबेत्।
रौक्ष्यान्मन्देऽनले सर्पिस्तैलं वा दीपनैः पिबेत्॥
क्षारचूर्णासवारिष्टान् मन्दे स्नेहातिपानतः।
उदावर्त्तात् प्रयोक्तव्या निरूहस्नेहवस्तयः॥
दोषातिवृद्ध्या मन्देऽग्नौ संशुद्धोऽन्नविधिक्षरेत्।
व्याधिसात्म्यस्य मन्देऽग्नौ सर्पिरेव तु दीपनम्॥
अध्वोपवासक्षामत्वे यवाग्वा पाययेद्घृतम्।
अन्नावपीडितं बल्यं दीपनं हृद्यमेव तत्॥
दीर्घकालप्रसङ्गात्तु क्षामक्षीणक्षतान्नरान्।
प्रसहानां रसैः साम्लैर्भोजयेत् पिशितान्वितैः॥
लघूष्णकटुशोधित्वाद्दीपयत्याशु तेजनलम्।
मांसोपचितमांसत्वात् परञ्च बलवर्द्धनम्॥
स्नेहासवसुरारिष्टचूर्णक्वाथहिताशनैः।
सम्यक्प्रयुक्तैर्देहस्य बलमग्नेश्च वर्द्धते॥
दीप्तो यथैव स्वाग्नेयैर्वाय्वोऽग्निः सारदारुभिः।
सस्नेहैर्नीयते तद्वदाहारैः कोष्ठकोऽनलः॥
न भोजनेन कायाग्निर्दीप्यते नातिभोजनात्।
यथा निरिन्धनो वह्निरल्पो वातेन्धनान्वितः॥
यदा क्षीणे कफे पित्तं स्वस्थाने पवनानुगम्।
प्रवृद्धं वर्द्धयत्यग्निं तदासौ सानिलोऽनलः॥"

इति वाभटे चिकित्सास्थाने दशमेऽध्याये॥

अपरं सकारणलक्षणचिकित्सितं यथा,—
"दुष्यति ग्रहणी जन्तोरग्निसादनहेतुभिः।
अतिसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः॥
भूयः सन्दूषितो वह्निर्ग्रहणीमभिदूषयेत्।
तस्मात् कार्य्यः परीहारस्त्वतीसारे विरक्तिवत्॥
यावन्न प्रकृतिस्थः स्याद्दोषतः प्राग्यतस्तथा।
मध्ये पित्तधरा नाम या कला परिकीर्त्तिता॥
पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्त्तिता।
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः॥
तस्मात् सन्दूषिते वह्नौ ग्रहणी सम्प्रदुष्यति।
तस्योत्पत्तौ विदाहान्न सदनालस्यतट्टकाः॥
बलक्षयोऽरुचिः कासः कर्णक्ष्वेड्गात्रकूजनम्।
अथ जातं भवेज्जन्तुः शूलपादकरः क्षयः॥
पर्व्वरुग्गौरवाष्ठीवदृद्धिज्वरारोचकदाहवान्।
उद्गारैरुद्धतिक्तास्यलोहधूमसमगन्धिकम्॥
प्रसेकसुखवैरस्य तमकारुचिपीडितः।
वाताच्छूलाधिकैः पायुहृत्पार्श्वोदरमस्तकैः॥
पित्तात् सदाहैर्गुरुभिः कफात्तिमिस्निग्धकैः।
दोषवर्णनखेस्वङ्नेत्रविण्मूत्रनयननैः॥
हृत्पाण्डूदररुग्गुल्मार्शःप्लीहाग्निसादी च मानवः।
यथा दोषोच्छ्रयन्तस्य विशुद्धस्य यथाक्रमम्॥
पेयादिं वितरेत् सम्यग् दीपनीयोपसंभृतम्।
ततः पाचनसंग्राहि दीपनीयगणद्वयम्॥
पिबेत् प्रातः सुरारिष्टस्नेहमद्यसुखाम्बुभिः।
तक्रेण वाथ तक्रं वा केवलं हितमुच्यते॥
क्षमिगुल्मोदरार्शोघ्नीः क्रियाश्चाचारवत्यरेत्।
चूर्णं हिङ्ग्वादिकञ्चात्र घृतं वा क्षीद्रनागरम्॥
कल्कीन मगधादेश चाङ्गेरीस्वरसेन वा।
चतुर्गुणेन दध्ना च घृतं सिद्धं हितं भवेत्॥
सर्व्वथा दीपनं सर्व्वं ग्रहणीरोगिणां हितम्।
ज्वरादीनविरोधाच्च साधयेत्स्वेचिकित्सितैः॥"

इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमेऽध्याये॥)

ग्रहणीरुक्, [क्] स्त्री, (ग्रहण्येव रुक्।) ग्रहणीरोगः। तत्पर्य्यायः। प्रवाहिका २। इत्यमरः। २।६।१५५॥ ग्रहिणी ३। इति तट्टीका॥

ग्रहणीहरं, क्ली, (ग्रहणीं हरतीति। हृ+अच्।) लवङ्गम्। इति शब्दचन्द्रिका॥ (ग्रहणीहारके च॥)

ग्रहद्रुमः, पुं, (ग्रहाख्यो द्रुमः वृक्षविशेषः।) शाकवृक्षः। इति राजनिर्घण्टः॥

ग्रहनायकः, पुं, (नयतीति। नी+ण्वुल्। ततो ग्रहाणां नायकः।) सूर्य्यः। इति शब्दरत्नावली॥ सूर्य्यश्च॥

ग्रहनाशः, पुं, (ग्रहान्ति रुणद्धि मलमिति ग्रहः। कोष्ठरोधकवायुविशेषः रोगविशेषो वा तं नाशयति। नश्+णिच्+अण्।) वृक्षविशेषः। इति शब्दरत्नावली॥ छातियान इति भाषा॥

ग्रहनाशनः, पुं, (ग्रहं रोगविशेषं नाशयतीति। नश्+णिच्+ल्युः।) ग्रहनाशवृक्षः। इति शब्दरत्नावली रत्नमाला च॥

ग्रहनेमिः, पुं, (ग्रहाणां ग्रहकक्षाणां ग्रहेषु वा नेमिरिव। ग्रहकक्षाधःस्थितत्वात्तस्य नेमिसादृश्यमिति बोध्यम।) चन्द्रः। इति शब्दरत्नावली॥

ग्रहपतिः, पु, (ग्रहाणां पतिः।) सूर्य्यः। (यथा, महाभारते। १२।१६८।२५। [रिव॥")
"तस्य विस्तीर्य्यते राज्यं ज्योत्स्ना ग्रहपतेरिव॥"
इत्यमरः। १। ३। ३०॥ (शिवः। यथा, महाभारते। १३। १७। ३७।
"चन्द्रः सूर्य्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः॥"
इत्यनुशासनम्॥ यथा, महाभारते।१३।८५।११७।
"मम सद्मनि दिवं यद्यं ग्रहपतिस्त्विह।
चौणि पूर्व्वाण्ययत्यानि मम तानि न संशयः॥")

ग्रहपुषः, पुं, (ग्रहान् अन्यान् सर्व्वान् पुष्णाति स्वतेजसेत्यर्थः।) सूर्य्यः। इति हेमचन्द्रः॥

ग्रहभीतिजित्, [द्] पुं, (ग्रहभीतिं जयतीति। जि+क्विप्।) चौड़ानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

ग्रहयागः, पुं, (ग्रहाणां ग्रहानुद्दिश्य वा यो यागः।) ग्रहाणां यज्ञः। तस्य शान्तिकत्वे मलमासादावपि कर्त्तव्यत्वं पौष्टिकत्वे तु शुक्लकाले। तस्य प्रयोगो यथा। यजमानः स्नातस्नानादिः गोमयोपलिप्ते देशे कुशासने उपविश्य उदङ्मुखो ब्राह्मणान् स्वस्तिवाच्य संकल्प्य मन्त्रमुच्चार्य्य श्वेतसर्षपेण विघ्नकरानुत्सार्य्य सगणाधिपषोड़शमातृकापूजावसोर्द्धारादृद्धिश्राद्धानि कृत्वा स्वयं करणासमर्थे ब्राह्मणान् वृणुयात्। ततो मण्डपोत्तरपूर्ब्वभागे वितस्तिद्वयविस्तृतायां वितस्त्युच्छ्रितायां उदक्प्लवायां वेद्यां रक्तचन्दनादिना मध्ये वर्त्तुलं सूर्य्यं आग्नेय्यां श्वेतमर्द्धचन्द्राकारं सोमं दक्षिणस्यां त्रिकोणं रक्तं मङ्गलं ऐशान्यां पीतं धनुराकारं बुधं उत्तरस्यां पीतं पद्माकारं गुरुं प्राच्यां श्वेतं चतुष्कोणं शुक्रं प्रतीच्यां श्यामं सर्पाकारं शनिं नैर्ऋत्यां श्यामं मकराकारं राहुं वायव्यां धूम्रवर्णान् खड्गाकारान् केतून् विलिख्य स्वगृह्योक्तविधिनाऽग्निस्थापनादिब्रह्मस्थापनपर्य्यन्तं कर्म्म कृत्वा ग्रहशब्दे लिखिततत्तद्ग्रहेण मण्डले ग्रहानावाह्य तेषां स्वस्ववर्णवस्त्रगन्धपुष्पादिना पूजयेत्। गन्धे विशेषः। सूर्य्याय रक्तचन्दनं सोमाय श्वेतचन्दनं मङ्गलाय कुङ्कुमं बुधाय सरलं गुरवे समभागेन मिश्रितानि रक्तचन्दनश्वेतचन्दनकुङ्कुमसरलानि शुक्राय श्वेतचन्दनं शनैश्चराय कस्तूरीं राहवे पद्मकाष्ठं केतुभ्यश्च पद्मकाष्ठं दद्यात्। धूपे विशेषः। रवये गुग्गुलुं सोमाय सरलं मङ्गलाय देवदारु बुधाय घृतमिश्रितदेवदारु बृहस्पतये दशाङ्गं शुक्रायागुरुं शनैश्चराय कालागुरुं राहवे गुड़त्वचं केतुभ्यो मधुमिश्रितगुड़त्वचं दद्यात्। ततोऽधिदेवताप्रत्यधिदेवताः पूजयेत्। ततो बलिं दद्यात्। सूर्य्याय गुड़ौदनं सोमाय घृतपायसं मङ्गलाय पक्वयवचूर्णात्मकं यावकं बुधाय क्षीरान्नं गुरवे दध्योदनं शुक्राय घृतौदनं शनैश्चराय यवतिलतण्डुलात्मकं क्षसरं राहवे छागमांसं केतुभ्यः अजाक्षीरसाधितान्नकर्षैरक्तमिश्रितयवतिलतण्डुलरूपं चित्रौदनम्। ततश्चरुं अपयेत्। ततः कुशण्डिकां समाप्य स्वादीनां चरुहोमं कुर्य्यात्। ततो यथाशक्ति एकैकस्याष्टाविंशतिमष्टोत्तरशतमष्टोत्तरसहस्रं वा मधुसर्पिर्म्मिश्रिताभिः सूर्य्यादीनां तत्तत्समिद्भिर्होमं कुर्य्यात्। समिधस्तु।
"अर्कः पलाशः खदिरश्चापामार्गोऽथ पिप्पलः।
उड़ुम्बरः शमी दूर्व्वा कुशाश्च समिधः क्रमात्॥"
तत उदीच्यं कर्म्म समाप्य दक्षिणां दद्यात्। दक्षिणास्तु।
"धेनुः शय्यासनद्वान् हेम वासो हयस्तथा।
कृष्णागौरायसश्चाग एता वै दक्षिणाः स्मृताः॥"
(अस्य यागस्य प्रयोजनं यथा, महानिर्व्वाणतन्त्रे।
"शान्तौ पुष्टौ महेशानि! तथा क्रूरेऽपि कर्म्मणि।
ग्रहयागं प्रकुर्व्वाणो वाञ्छितार्थमवाप्नुयात्॥"

दीपिकायाच्च । यथा,—
"शुभग्रहार्कवारेषु नक्षत्रेषु च ।
शुभराशिविलग्नेषु शुभं शान्तिकपौष्टिकम् ॥
नक्षत्रगणः चित्रानुराधाश्वगिशिरोरेवत्यः । चिप्रगणो लघुगणः पुष्याश्विहस्ताः । ध्रुवगणः रोहिण्युत्तरात्रयम् ॥)
"गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः ।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥"
इति ग्रहयागतत्त्वम् ॥

(मात्स्योक्तम् । यथा,—
"श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
दृढायुः पुष्टिकामो वा तथैवाभिचरन् पुनः ॥
येन ब्रह्मन् ! विधानेन तन्मे निगदतः शृणु ।
सर्व्वशास्त्रागमानुक्त्वा सङ्क्षिप्य ग्रन्थविस्तरम् ॥
ग्रहशान्तिं प्रवक्ष्यामि पुराणश्रुतिनोदिताम् ।
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥
ग्रहान् ग्रहादिदेवांश्च स्थाप्य होमं समारभेत् ।
ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः ।
प्रथमोऽयुतहोमः स्यात्तच्चहोमस्ततः परम् ।
तृतीयः कोटिहोमस्तु सर्व्वकामफलप्रदः ॥
अयुतेनाहुतीनाञ्च नवग्रहमखः स्मृतः ।
तस्य तावद्विधिं वक्ष्ये पुराणश्रुतिभाषितम् ॥"
ग्रहवेदिनियमः । यथा,—
"गर्त्तस्योत्तरपूर्ब्बेण वितस्तिद्वयविस्तृताम् ।
चतुरश्रां वेदिं वितस्तुच्छ्रयसंस्थिताम् ॥
संस्थापनाय देवानां चतुरस्रासदङ्मुखाम् ।
अभिप्रणयनं कृत्वा तस्यामावाहयेत् सुरान् ॥
देवतानां ततः स्थाप्या विप्रतिदादग्राधिका ।
सूर्य्यः सोमस्तथा भौमो बुधजीवसितार्कजाः ॥
राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः ॥"
मण्डले स्थानम् । यथा,—
"मध्ये तु भास्करं विद्यात् सोमं दक्षिणतो न्यसेत् ।
उत्तरेण गुरुं विद्याद् बुधं पूर्ब्बोत्तरेण तु ॥
पूर्ब्बेण भार्गवं विद्यात् सोमं दक्षिणपूर्ब्बके ।
पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ॥
पश्चिमोत्तरतः केतुं स्थापयेच्चक्रतण्डुलैः ॥"
अधिदेवताः । यथा,—
"भास्करस्येश्वरं विद्यात् उमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्य च तथा हरिम् ।
ब्रह्माणञ्च गुरोर्विद्याच्छक्रस्यापि शचीपतिम् ।
शनेश्चरस्य तु यमं राहोः कालन्तथैव च ।
केतोर्वै चित्रगुप्तञ्च सर्व्वेषामधिदेवताः ॥"
प्रत्यधिदेवताः । यथा,—
"अग्निरापः क्षितिर्विष्णुरिन्द्र ऐन्द्री च देवताः ।
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः ॥"
पञ्च लोकपालाः । यथा,—
"विनायकं तथा दुर्गां वायुमाकाशमेव च ।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥"
ग्रहवर्णः । यथा,—
"संस्मरेद्रक्तमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ ।
मन्दराहू तथा कृष्णौ धूम्रं केतुगणं विदुः ॥"
"ग्रहवर्णानि देयानि वासांसि कुसुमानि च ।
धूपामोदोऽत्र सुरभिरुपरिष्टादविनाशकम् ॥
शोभनं स्थापयेत् प्राज्ञः फलपुष्पसमन्वितम् ॥"
अन्यद्विवरणन्तु ग्रहयागतत्त्वे द्रष्टव्यम् ॥)

ग्रहराजः, पुं, (ग्रहाणां राजा इति । "राजाहः-सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) सूर्य्यः । चन्द्रः । इति मेदिनी । जे । ३२ ॥ बृहस्पतिः । इति शब्दरत्नावली ॥

ग्रहाधारः, पुं, (ग्रहाणां आधारः आश्रयः । मेधीवदेतन्नक्षत्रमाश्रित्य स्वस्वगत्यनुसारेण ग्रहाणां परिभ्रमणात्तथात्वम् ।) ध्रुवनक्षत्रम् । इति शब्दरत्नावली ॥

ग्रहामयः, पुं, (ग्रहः उपदेवविशेषस्तज्जन्य आमयः रोगभेदः ।) आवेशः । स तु भूतादिना जातरोगः । इति राजनिर्घण्टः ॥

ग्रहाग्नी, [न्] पुं, (ग्रहं ग्रहजन्यदोषं अश्नाति दूरीकरोतीति । अश् + णिनिः । स्कन्दग्रहदोषभञ्जातीत्येके ।) अग्निनाशुष्टचः । इति शब्दरत्नावली ॥

ग्रहाह्वयः, पुं, (ग्रहाणामुपदेवानामाह्वयः आह्वा संज्ञा यस्य । ग्रहान् आह्वयति आकारयति तज्जनितदोषनाशायेति भावः । आ + ह्वे + अः । इत्येके ।) भूताङ्कुशवृक्षः । इति राजनिर्घण्टः ॥

ग्रहीता, [तृ] त्रि, (गृह्णातीति । ग्रह + तृच् ।) ग्रहणकर्त्ता । तत्पर्य्यायः । गृहयालुः २ । इत्यमरः । ३ । १ । २७ ॥ (यथा, श्वेताश्वतरोपनिषदि ।
"अपाणिपादो यवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः ।"
तथा च मनुः । ८ । १६६ ।
"ग्रहीता यदि नष्टः स्यात् कुटुम्बार्थे कृतो व्ययः ॥")

ग्रामः, पुं, (ग्रस् + "ग्रसेरात् ।" उणां । १ । १४२ । इति मन् धातोराकारान्तादेशश्च ।) विप्रादिवर्णप्राया प्राकारपरिखादिरहिता बहुजनवसतिः । इति भरतः ॥ तत्पर्य्यायः । संवसथः २ । इत्यमरः । २ । ३ । १६ ॥ वृक्षादिशून्यवसतिः । इति श्रीधरस्वामी ॥ यथा, मार्कण्डेयपुराणे ।
"तथा शूद्रजनप्राया सुसम्वृद्धकुटीवला ।
क्षेत्रोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका ॥"
(तथा च मनुः । १० । ५४ ।
"अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥")
ग्रहादिपूर्ब्बकश्चेत् समूहार्थः । इति विश्वः ॥ यथा ग्रहग्रामः भूतग्रामः गुणग्रामः । इत्यादि ॥ (यथा, मनुः । २ । २१५ ।
"बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥"
शिवः । यथा, महाभारते । १३ । १७ । ११३ ।
"गोपालिर्गोपतिर्ग्रामो गोचर्म्मवसनो हरिः ॥")
स्वरभेदः । यथा,—
"षड्जमध्यमगान्धारास्त्रयो ग्रामा मता इह ।
षड्जग्रामो भवेदत्र मध्यमग्राम एव च ।
मर्त्यलोके च गान्धारो ग्रामः प्रचरति स्वयम् ॥"

इदानीं षड्जग्रामस्य मूर्च्छनाः [illegible] ।
मूर्च्छना प्रस्तार इत्यर्थः । ष ऋ ग म प ध नि स । इति षड्जस्य । म-पौ ध-नी ष ऋ स ग । इति मध्यमस्य । ऋ गौ म-पौ ध नी षोऽन्ते । इति गान्धारस्य मूर्च्छनाः । ष ऋ ग म प ध नि स । नि-पौ ऋ-ग-म-पाच्च धः । ध नि ष ऋ ग म पोऽन्ते । प-धौ नि-पौ ऋ-गौ च सः । म-पौ ध-नी च ष ऋ ग । ग म प ध नि ष ऋ । ऋ-गौ म-पौ ध-नी गोऽन्ते । मूर्च्छनाः सप्त षड्जाः ॥
"आदि द्वित्रिचतुःपञ्चषट्सप्तस्वपि समे मता ।
मध्यमो मौ यदा तेषु मध्यमग्राममूर्च्छना ॥
आदौ गकारो यत्रास्ति गान्धारग्राममूर्च्छना ॥"
तच्च षड्जग्रामप्रस्तारस्यायं क्रमः ।
"षड्जान्नियधान्तं नेर्धान्तं धात् पान्तमिष्यते ।
पान्तान्तं मध्यमान्तान्तं गादृषभान्तमिष्यते ॥
ऋषभात् धान्तमित्याहुः षड्जग्रामस्य मूर्च्छनाः ।
मध्यमग्रामजास्त्वेवं मूर्च्छनाः परिकीर्त्तिताः ॥
मकारादिक्रमेणैव गकारान्तास्तु ता मताः ।
तारो मन्द्रश्च आवश्च इति ग्रामनिरूपणाः ॥
षड्जग्राममूर्च्छनायाः सप्त कोष्ठानि ।
ब्रह्मविष्णुशिवैरुक्तास्त्रयो ग्रामा मनोहराः ॥"
इति सङ्गीतदामोदरः ॥

ग्रामकूटः, पुं, (ग्रामे ग्रामस्यो ग्रामस्य वा कूट इव तमःप्राधान्यात्तथात्वम् ।) शूद्रः । इति त्रिकाण्डशेषः ॥

ग्रामजनिन्यायः, स्त्री, (ग्रामे ग्रामसन्निकर्षे वा जायते इति । जन + डः । ग्रामजा निन्यावीति कर्म्मधारयः ।) नखनिन्यायी । इति राजनिर्घण्टः ॥

ग्रामणीः, पुं, (ग्रामाः जीवसमूहाः नीयते चैतन्यदानेन परिचाल्यतेऽनेन । यद्वा ग्रामान् जीवसमूहान् नयति प्रापयति चेतयतीत्यर्थः । नी + क्विप् ततो णत्वम् ।) विष्णुः । यथा, महाभारते । १३ । १४६ । ३७ ।
"अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ॥"
यज्ञः । यथा, विष्णुपुराणे २ । १० । २ ।
"स यथाधिष्ठितो देवैरादित्यैर्ऋभिरिज्यया ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥"
"देवैरादित्यैः आदित्या एव देवास्तैः । ग्रामणीर्यज्ञः ।" इति तट्टीका ॥ नापितः । इत्यमरः । ३ । ३ । ४६ ॥

ग्रामणीः, त्रि, (ग्रामं संवसथं तत्रत्यान् जनान् नयति दोषगुणविचारादिभिः परिचालयति प्रेरयति वा क्विप् ।) प्रधानः । अधिपतिः । इति मेदिनी । नी । ४५ ॥ (यथा, ऋग्वेदे । १० । १०७ । ५ ।
"दक्षिणावान् प्रथमो हूत एति
दक्षिणावान् ग्रामणीरग्रमेति ॥"
तथा च महाभारते ८ ।
"दानामोदविनोदलज्जमधुपप्रोत्तमारणाविभवना
कर्णादोलनखेलनां विजयते देवोगणग्रामणीः ॥

ग्रामेण ग्राम्येण भोग्यद्रव्येण आयुर्नयति क्षपयतीति। ग्रामान् भोग्यवस्तूनि नयति आत्मानं प्रापयतीति वा।) भोगिकः। इति हेमचन्द्रः॥

ग्रामणीः, स्त्री, (ग्रामेण जनसमूहेनेत्यर्थः नीयते गम्यते यद्वा ग्रामेण ग्राम्यधर्म्मेण केवलं मैथुनादिना नयति कालं यापयतीति। नी+क्विप्।) वेश्या। ग्रामेया। नीलिका। इति हेमचन्द्रः॥

ग्रामतक्षः, पुं, (ग्रामस्य ग्रामपरतन्त्रो वा तक्षा। "ग्रामकौटाभ्यां च तक्षः।" ५।४।९५। इति टच्।) ग्रामाधीनः काष्ठतट्। ग्रामायत्तस्तक्षा। इत्यमरः। २।१०।९॥ गाँये कुतार इति भाषा॥

ग्रामता, स्त्री, (ग्रामाणां समूहः। "ग्रामजनबन्धुभ्यस्तल्।" ४।२।४२। इति तल्।) ग्रामसमूहः। इत्यमरः। ३।२।४३॥ (ग्रामस्य भावः। "तस्य भावस्त्वतलौ।" ५।१।११९। इति तल्।) ग्रामत्वञ्च॥

ग्रामभृतः, पुं, (ग्रामे ग्रामस्य वा भृतः भरणीयः ग्रामावस्थितजनैरिति शेषः।) ग्रामप्रेष्यः। स तु ब्राह्मणश्चेत् पञ्चमोऽब्राह्मणः। इत्याह्निकतत्त्वम्॥ (यथाह शातातपः।

"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनादिष्टानु यः पूर्व्वां सादित्वाश्चैव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥")

ग्राममक्षिका, स्त्री, (ग्रामस्य मत्स्यस्य मेषु वा मक्षिकेव। क्षुद्रमक्षिर इवेत्यर्थः।) क्षुद्रझीमत्स्यः। ग्रामयुद्धम्। इति मेदिनी। के।२३४॥

ग्रामसुखः, पुं, (ग्रामस्य सुखमिव यो स्थितः। यद्वा, ग्रामो ग्रामवासिजनो सुखत्वेन प्रधानकारणत्वेन यस्य। ग्रामस्थजनसाध्यत्वादेवास्य तथात्वम्।) कृषः। इति शब्दरत्नावली॥

ग्रामशूगः, पुं, (ग्रामस्य शूग इव। यद्वा, ग्रामेस्थितो शूगः पशुः।) कुक्कुरः। इति शब्दरत्नावली॥

ग्रामयाजकः, पुं, (ग्रामस्य याजको यागकर्त्ता।) ग्रामश्चनानावर्णानां पुरोहितः। स तु चतुर्थोऽब्राह्मणः। यथाह, शातातपः।

"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनादिष्टानु यः पूर्व्वां सादित्वाश्चैव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥"
(शूतस्ते प्रदत्तं दानादिकं निष्फलं भवति। यथोक्तं महाभारते। ३।१९९।७।

"यत्किञ्चित् पतिते दानं ब्राह्मणे तस्करे तथा।
गुर्वी चावृत्तिके पापे शूतप्रे ग्रामयाजके॥")

ग्रामस्थः, त्रि, ग्रामवासी। ग्रामे तिष्ठति य इत्यर्थे ष्ठन्प्रत्ययः॥

ग्रामहासकः, पुं, (ग्रामान् ग्रामवासिनः श्वशुरालयसमुद्धान् वा हासयतीति। हस्+णिच्+ण्वुल्।) भगिनीपतिः। इति शब्दरत्नावली॥

ग्रामाधानं, क्ली, (आधीयते उपजीविका यत्र तत्। आ+धा+ल्युट्। ततो ग्रामस्य शूगयुसमूहस्याधानं पोषणकम्।) शूगया। इति हलायुधः॥

ग्रामान्तं, क्ली, (ग्रामस्य अन्तं समीपम्।) ग्रामसमीपम्। तत्पर्य्यायः। उपग्रन्थम् २। इत्यमरः। २।३।२०॥ ग्रामान्तिकम् ३। इति शब्दरत्नावली॥

ग्रामिणी, स्त्री, (ग्राम उत्पत्तिस्थानत्वेन अस्ति अस्याः। अत इनिः स्त्रियां ङीप्।) नीलीवृक्षः। इति शब्दरत्नावली॥

ग्रामी, [न्] त्रि, (ग्रामः अधिकारित्वेनास्त्यस्य। अत इनिः।) ग्रामविशिष्टः। गाँइ इति भाषा॥ यथा, ब्राह्मणकुलाचार्य्यकारिकायाम्।

"रामो गड्गड्यामी निपः केशूरकोलितः।
केशूरकोलीति ख्यातो ग्रामी ग्रामवतामरः॥"
(ग्रामो ग्राम्यधर्म्मो मैथुनं अस्त्यस्येति। ग्राम्यधर्म्मविशिष्टः। यथा, भागवते। ४।२६।१४।

"आसुरी मेढ्रमर्वाग्दार्थवायो ग्रामिणां रतिः।
उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुदं उच्यते॥")

ग्रामीणः, पुं, (ग्रामे भवः। ग्राम+"ग्रामाद्यखञौ।" ४।२।९४। इति खञ्।) ग्राम्यशूकरः। इति राजनिर्घण्टः॥ कुक्कुरः। काकः। ग्रामोत्पन्ने त्रि। इति मेदिनी। णे। ४६॥ (यथा, भाषापरिच्छेदे। ७६।

"ग्रामीणस्य प्रचरतः पश्यतो गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम्॥")

ग्रामीणा, स्त्री, (ग्रामीण+स्त्रियां टाप्।) नीलीवृक्षः। इति मेदिनी॥ (अस्याः पर्य्यायो यथा,

"नीली तु नीलिनी तूली कालदोला च नीलिका।
रञ्जनी श्रीफली तुङ्गा ग्रामीणा मधुपर्णिका॥
क्षीतका कालकेशी च नीलपुष्पा च सा स्मृता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ गुणास्त्वस्या नीलिनीशब्दे ज्ञातव्याः॥) पालङ्कशाकम्। इति राजनिर्घण्टः॥

ग्रामेयकः, त्रि, (ग्रामे भवः। ग्राम+"कन्ग्रामादिभ्यो ठक्।" ४।२।९५। इति ठक्।) ग्राम्यः। इति हेमचन्द्रः। ३।१६५॥

ग्रामेया, स्त्री, (ग्रामे भवा। ग्राम+ठक्।) ग्राम्यनारी। इति ग्रामणीशब्दार्थे हेमचन्द्रः॥

ग्रामेशः, त्रि (ग्रामस्य ईशः।) ग्रामेश्वरः। ग्रामाधिपतिः। यथा, ज्ञानसङ्कलने। ११।

"यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं।
सेवायै मृगयामहे नरमहो मूढा वराका वयम्॥"

ग्राम्यः, त्रि, (ग्रामे भवः। ग्राम+"ग्रामात् यखञौ।" ४।२।९४। इति यः।) ग्रामोत्पन्नः। तत्पर्य्यायः। ग्रामेयकः २ ग्रामीणः ३। इति हेमचन्द्रः। ३।१६५॥ (यथा, मनुः। ११।१९९।

"अश्वगोखरैर्दैष्टो ग्राम्यैः क्रव्याद्भिरेव च॥"

तथा, माघे। १२।३८।

"ग्राम्यानपश्यत् कपिशं पिपासतः॥"
रूढः। प्राकृतः। यथा, तत्रैव। १४।६४।

"ग्राम्यभावमपहातुमिच्छवो
योगमार्गपतितेन चेतसा॥")

भक्ष्यादिवचनम्। "हालिकशाकटिकप्रधानत्वात् ग्रामे भवं ग्राम्यम्।" इति भरतः॥ तत्पर्य्यायः। अश्लीलम् २। इत्यमरः। १।६।१६॥ (काव्यस्य दोषविशेषः। स च शब्दगतः अर्थगतश्च। तत्र शब्दगतो यथा, साहित्यदर्पणे। ७।३।

"दुःश्रवत्विविधाश्लीलानुचितार्थाप्रयुक्तताः।
ग्राम्याश्चप्रतीतसन्दिग्धनेयार्थनिहतार्थताः॥"
अस्य उदाहरणं यथा तत्रैव। "कटिस्ते हरते मनः। अत्र कटिशब्दो ग्राम्यः॥" अर्थगतो यथा, तत्रैव। ७।५।

"अपुष्टदुष्क्रमग्राम्यव्याहताश्लीलकष्टताः॥"
उदाहरणं यथा तत्रैव। "स्वपिहि त्वं समीपे मे स्वपित्र्येवाधुना प्रिय!॥ अत्रार्थो ग्राम्यः॥")

ग्राम्यकन्दः, पुं, (ग्राम्यो ग्रामभवः कन्दः।) ग्राम्यौलः। वनओल इति भाषा। तत्पर्य्यायः। स्थलकन्दः २। इति रत्नमाला॥ स तु दोषलः। इति राजवल्लभः॥

ग्राम्यकर्कटी, स्त्री, (ग्राम्या ग्रामजाता कर्कटी।) कृष्माण्डः। इति चिकाण्डशेषः॥

ग्राम्यकुङ्कुमं, क्ली, (ग्राम्यं ग्रामसम्भूतं कुङ्कुमम्।) कुसुम्भम्। इति चिकाण्डशेषः॥

ग्राम्यधर्म्मः, पुं, (ग्राम्यस्य इतरादेर्धर्म्मः।) मैथुनम्। इत्यमरः। २।७।५७॥ (यथा, महाभारते। ३।४८।४।

"प्रमत्तो ग्राम्यधर्म्मेषु मन्दात्मा पापनिश्चयः।
मम पुत्रः सुदुर्बुद्धिः पृथिवीं घातयिष्यति॥")

ग्राम्यपशुः, पुं, (ग्राम्यो ग्रामजातः पशुः।) ग्रामजातजन्तुः। (यथा, भागवते। ६।१५।१६।

"तस्माद् युवां ग्राम्यपशोर्मम सृष्टयिः प्रभू।
अन्यं तमसि मत्सङ्गात् क्षानदीप उदीर्य्यताम्॥")
स तु सप्तावधो यथा। गौः १ अजः २ मेषः ३ मनुष्यः ४ अश्वः ५ अश्वतरः ६ गर्द्दभः ७। इति तिथ्यादितत्त्वम्॥ (यथाह प्रेठीनसिः।

"ग्राम्यारण्याश्चतुर्दश। गौरविरजोऽश्वोऽश्वतरो गर्द्दभो मनुष्यश्चेति ग्राम्याः पशवः। महिषवाराहक्षसरीसृपपक्षिपुरुषहस्तिनश्चेति यान्यारण्याः॥" सुश्रुतमते उष्ट्रादयोऽपिग्राम्याः। यदुक्तं तत्रैव सूत्रस्थाने ४६ अध्याये।

"अश्वाश्वतरगोखरीष्ववसोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः॥")

ग्राम्यमक्षिका, स्त्री, (ग्राम्या ग्रामोद्भवा मक्षिका) क्षुद्रझीमत्स्यः। इति हारावली॥

ग्राम्यशूगः, पुं, (ग्राम्यो ग्रामभवो शूगो हरिणइव। शूगःपशुर्वा इत्येके।) कुक्कुरः। इति शब्दरत्नावली॥

ग्राम्यराशिः, पुं, (ग्राम्यो राशिः।) मिथुनम्। कन्या। तुला। वृश्चिकः। धनुः। कुम्भः। राशी मेषः वृषश्च। इति ज्योतिषम्॥

ग्राम्यवल्लभा, स्त्री, (ग्राम्याणां ग्रामस्थजनानां वल्लभा प्रिया। पल्लोग्रामस्थजनप्रियत्वादेवास्यास्तथात्वम्।) पालङ्क्यशाकम्। इति राजनिर्घण्टः॥ (ग्राम्यं अश्लीलं वल्लभं प्रियं यस्याः इति विग्रहे वेश्या। इति युत्पत्तिलब्धोऽर्थः॥)

ग्राम्यसूकरः, पुं, स्त्री, (ग्राम्यः सूकरः।) ग्रामोत्पन्नवराहः। तत्पर्य्यायः। विड्वराहः २ ग्रामीणः ३ ग्रामक्रोड़ः ४ ग्रामकोलः ५ विष्कलः ६ दारकः ७। तस्य मांसस्य गुणाः। वनवराहमांसाद्गुरुत्वम्। मेदोबलवीर्य्यवृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥

ग्राम्या, स्त्री, (ग्रामे भवा। ग्राम+"ग्रामात् यखौ।" ४। २। ६४। इति यः। स्त्रियां टाप्।) नीली। निष्पावी। इति राजनिर्घण्टः॥ (तुलसी। इति चिन्तामणिः॥)

ग्राम्याश्वः, पुं, (ग्राम्यः ग्रामजातोऽश्वः।) गर्द्दभः। इति त्रिकाण्डशेषः॥

ग्रावा, [न्] पुं, (ग्रसते इति ग्रः। ग्रस्+अन्येभ्योऽपीति डः। आवनति शब्दायते इति। आ+वन शब्दे+विच्। ततो ग्रश्चासौ आवा चेति।) प्रस्तरः। (यथा, भागवते। ४। ५। १८।

"सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः।
तैरर्द्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन्॥")

पर्व्वतः। इत्यमरः। २। ३। १॥ (यथा,—

"पृथ्वी तावत् त्रिकोणा विपिनतरुतरुदीग्रावखण्डं तदङ्गम्॥"

इत्युद्भटः॥)

मेघः। इति विश्वः॥ दृढ़े त्रि। इति शब्दरत्नावली॥

ग्रासः, पुं, (ग्रस्यते अद्यते इति। ग्रस्+कर्म्मणि घञ्।) सुखपूरणाद्यादि। यथा,—

"कुक्कुटाण्डप्रमाणन्तु यावद्वा प्रविशेन्मुखम्।
एतं ग्रासं विजानीयात् शुद्ध्यर्थं कायशोधनम्॥"

इति प्रायश्चित्तप्रकरणे पराशरः॥

(तथा च मनुः। ११। २१३।

"एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत्॥")

तत्पर्य्यायः। कवलः २। इत्यमरः। २।६।५४॥ गुड़ेरकः ३ पिण्डः ४ गण्डोलः ५ कवकः ६ गुरुः ७। इति हेमचन्द्रः। ३। ८॥ (दग्धौषधकालान्तर्गतकालविशेषः। "तत्र निर्भक्तं प्राग्भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं सभक्तं सासुकं सुदुर्मुहुः ग्रासं ग्रासान्तरचेति दग्धौषधकालाः॥" इत्युत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

ग्राहः, पुं, (गृह्यते इति। ग्रह+भावे घञ्।) ग्रहणम्। (गृह्णातीति। ग्रह+"विभाषा ग्रहः।" ३। १। १४३। इति व्यवस्थापितविभाषया घञ्।) जलजन्तुविशेषः। हाङ्गर इति भाषा॥ जलहस्ती इति कोचित्॥ तत्पर्य्यायः। अवहारः २। इत्यमरभरतौ॥ (यथा, महाभारते। १। २१। ५।

"भीमश्चैर्विविधैस्तैरन्यैर्घोरैश्चलचरैस्तथा।
उग्रैर्नित्यमनाधृष्यं कूर्म्मग्राहसमाकुलम्॥")

ग्रिवुकः। इति राजनिर्घण्टः॥ (ग्राग्रहः। यथा, गीतायाम्। १७। १९।

"मूढ़ग्राहेणात्मनो यत् पीड़या क्रियते तपः॥"

"मूढ़ग्राहेणाविवेककृतेन दुराग्रहेण।" इति श्रीधरस्वामी॥)

ग्राहकः, पुं, (गृह्णातीति। ग्रह+ण्वुल्।) सितावरशाकम्। इति राजनिर्घण्टः॥ हिंसपक्षी। बालग्राही। ग्रहीतरि त्रि। इति शब्दरत्नावली॥ (ग्रह+णिच्+ण्वुल्। ग्रापकः। यथा, महाभारते। ३। २१०। १३।

"यथासं ग्राहकाण्येषां शब्दादीनामिमानि तु॥")

ग्राहिणी, स्त्री, (गृह्णाति अशेषगुणानिति। ग्रह उपादाने+"नन्दिग्रहीति।" ३। १। १३४। इति णिनिः ङीप्।) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥ ताम्रमूलालताच्च। इति रत्नमाला॥ चिरट इति भाषा॥

ग्राहिफलः, पुं, (ग्राहि धारकं मलबन्धकमित्यर्थः फलं यस्य।) कपित्थवृक्षः। इति राजनिर्घण्टः॥

ग्राही, [न्] पुं, (गृह्णातीति। ग्रह+णिनिः।) कपित्थः। इति शब्दचन्द्रिका॥

ग्राही, [न्] त्रि, (गृह्णातीति। ग्रह+णिनिः।) मलबन्धकः। धारकः। इति वैद्यकम्॥ (यथा, भावप्रकाशे।

"काथनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत्॥")

ग्रहणकर्म्मा। इति व्याकरणम्॥ (यथा, कथासरित्सागरे। २५। ४६।

"तत्र तस्यैव कैवर्त्तपतेः सत्यव्रतस्य सः।
ग्रफरग्राहिभिर्भृत्यैः प्राप्य दैवादयज्यत॥"

प्रतिकूलः। यथा, भट्टिः। ५। ६३।

"मास भूर्य्याहिणी भीरु! गन्तुसुत्साहिनी भव॥"

"हे भीरु! मास भूर्य्याहिणी प्रतिकूला मा भूः।"

इति जयमङ्गलः॥)

ग्रीवा, स्त्री, (ग्रीर्य्यतेऽनया। गॄ विज्ञाने+"ग्रीवायक्ष्णिक्ष्णाग्रीवापार्श्वाग्रीवाः।" उणा। १। १५४। इति वनृप्रत्ययेन निपातनात् साधुः।) गलघाटादिसमुदिता। इति भरतः॥ (यथा, शकुन्तलायां १ अङ्के। [दृष्टिः॥")

"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्।
दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥")

सा तु ज्येष्ठाषाढ़ौ। तत्पर्य्यायः। उष्णकः २ निदाघः ३ उष्णोपगमः ४ उष्णः ५ उष्णागमः ६ तपः ७। इत्यमरः। १। ४। १६॥ घर्म्मः ८ तापनः ९ उष्णागमः १० उष्णकालः ११।

"ग्रैष्मिकस्यवनभिस्यन्दि जलमिवैष निश्चयः॥"

इति राजनिर्घण्टः॥

("दीर्घवासरकं तीक्ष्णं ज्वालामालाकुलं जगत्।
दिग्धि ग्रीष्मे न्यगद्यन्त खिन्नाः खुर्द्दमवाजिनः॥
नैर्ऋतो मारुतो रूक्षः ग्रीष्मपर्णा महीरुहाः।
दग्धं लक्षाकुलारण्यं दावाग्निभ दिशो दश॥
एवं लक्षणके ग्रीष्मे पित्तरक्तमुदीर्य्यते।
तस्मात् क्रिया प्रतीकारं कुर्य्यात् संशमनं भिषक्॥
जलक्रीड़ा दिवानिद्रा सेवनं सुखसाधनम्।
श्यामारामारतं ग्रस्तं कुङ्कुमाक्तश्च शीतलम्॥
शीतलानलदीपेतः श्रमघ्नो व्यजनानिलः।
कैतक्या मोदकुसुमचन्दनोशीरशीतलैः॥
लेपनं शीतलं सम्यक् धारागारात्रयः पुनः।
एवं क्रिया समापन्ने ग्रीष्मे च सुखसङ्गमः॥"

इति ग्रीष्मोपचारः॥

इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये॥

"तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपतीव यत्।
प्रत्यहं क्षीयते श्लेष्मा तेन वायुश्च वर्द्धते॥
अतोऽस्मिन् पटुकट्वम्लव्यायामार्कांस्त्यजेत्।
भजेन्मधुरमेवान्नं लघुस्निग्धं हिमं द्रवम्॥
सुशीततोयसिक्ताङ्गो लिह्यात् शक्तून् सशर्करान्॥
मद्यं न पेयं पेयं वा स्वल्पं सुबहु वारि वा॥
अन्यथा श्लोपशैथिल्यदाहमोहान् करोति तत्।
कुन्देन्दुधवलं शालिमश्नीयाच्छालिभिः फलैः॥
पिबेद्रसं नातिघनं रसालां रागखाण्डवौ।
पानकं पञ्चसारं वा नवमृद्भाजनस्थितम्॥
मोचचोचदलैर्युक्तं साम्लं मृद्वम्लयुक्तिभिः।
पटलावासितच्छायः सकर्पूरं सुशीतलम्॥
शशाङ्कशिखरान् भक्ष्यान् रजन्यां भक्षयन् पिबेत्।
ससितं माहिषं क्षीरं चन्द्रनक्षत्रशीतलम्॥
अवश्यमहाशालतालखर्ज्जूरशिग्रुषु।
वनेषु माधवीश्चिद्राश्चास्तवकशालिषु॥
सुगन्धिहिमपानीयसिच्यमानपटालिके।
कायमाने चिते चूतप्रवालफललम्बिभिः॥
कदलीदलकक्षार-मृणालकमलोत्पलैः।
कल्पिते कोमलैस्तल्पे हसत्कुसुमपल्लवे॥
मध्यदिनेऽर्कतापार्त्तः सर्व्याहारायहेऽथवा।
पुंस्त्रीसरूपहस्तास्यप्रवृत्तोशीरवारिणि॥
निशाकरकराकीर्णे सौधपृष्ठे निशासु च।
आसनाक्षस्थचित्तस्य चन्दनार्द्रस्य मालिनः॥
निवृत्तकामतन्त्रस्य सुसूक्ष्मतनुवाससः।
जलार्द्रशालवृन्तानि विस्तृताः पद्मिनीपुटाः॥
उत्क्षेपाश्च मृदूत्क्षेपा जलवर्षिहिमानिलाः।
कर्पूरमल्लिकामाला हाराः सहरिचन्दनाः॥
मनोहरकलालापाः स्निग्धवः शारिकाः शुकाः।
मृणालवलयाः कान्ताः प्रोतपुङ्कजकमलोत्पलाः॥
अङ्गना इव पद्मिन्यो हरन्ति हृदयं क्षमम्॥"

इति वाभटे उत्तरस्थाने तृतीयेऽध्याये।

"ग्रीष्मे पुनर्भृशौष्ण्योपहतत्वात् शरीरमसुखोपपन्नं भवति। उष्णवातावभ्रातमतिशिथिलमल्पप्रविलीनदोषं भेषजं पुनः संशोधनार्थसुखसुखभावसुखानुगमनायाच्छतरत्वमापद्यते। तस्मात्तयोः संयोगे संशोधनमतियोगायोपपद्यते शरीरं पिपासोपद्रवाय।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥

"मयूखैर्जगतः सारं ग्रीष्मे पेपीयते रविः।
स्वादुशीतं द्रवं स्निग्धमन्नपानं तदा हितम्॥
शीतं सशर्करं मद्यं जाङ्गलामृगपक्षिणः।
घृतं पयः स शाल्यन्नं भजन् ग्रीष्मे न सीदति॥
मद्यमल्पं न वा पेयमथवा सुबहूदकम्।
लवणाम्लकटूष्णानि व्यायामञ्चात्र वर्जयेत्॥
दिवा शीतगृहे निद्रां निशि चन्द्रांशुशीतलम्।
भजेच्चन्दनदिग्धाङ्गः प्रवाते हर्म्यमस्तके॥
व्यजनैः पाणिसंस्पर्शैश्चन्दनोदकशीतलैः।
सेव्यमानो भजेदास्यां सुक्तामणिविभूषितः॥
कानानि च शीतानि जलानि कुसुमानि च।
ग्रीष्मकाले निषेवेत मैथुनाद्विरतो नरः॥"
इति च सूत्रस्थाने षष्ठेऽध्याये चरकेणोक्तम्॥)

तत्र जातफलं यथा, कोष्ठीप्रदीपे।

"ग्रीष्मोद्भवो भोगभवापुरस्तो
वक्ता सुशीलो जलकेलिशीलः।
विद्याधनैश्वर्ययशोमनोज्ञो
धन्वी सुवेशः परदारचित्तः॥"

उक्तः। इति मेदिनी। मे। १०॥ गर्म्मि इति तात् इति च भाषा॥ तद्वति त्रि॥

ग्रैष्मजा, स्त्री, (ग्रैष्मात् ग्रीष्मप्रभावात् ग्रीष्मे ग्रीष्मकाले वा जायते या इति। जन्+डः। ततष्टाप् च।) लवली। इति शब्दचन्द्रिका॥ लोवा इति भाषा॥ (ग्रीष्मजातमात्रे, त्रि॥)

ग्रैष्मपुष्पी, स्त्री, (ग्रीष्मे ग्रीष्मकाले पुष्पं यस्याः। जातौ संज्ञायां वा ङीप्।) करञ्जीपुष्पवृक्षः। इति राजनिर्घण्टः॥

ग्रैष्मभवा, स्त्री, (ग्रीष्मे ग्रीष्मसमये ग्रीष्मागमे इत्वकं भवति उत्पद्यते या। भू+अच्। टाप्।) नवमल्लिका। इति रत्नमाला॥

("कुमारिका ग्रीष्मभवा सुगन्धा।"
इति वैद्यकरत्नमालायाम्)

ग्रैष्मसुन्दरकः, पुं, (ग्रीष्मे सुन्दर इव कायते शोभते इति। कै+कः। ग्रीष्मसुन्दर+स्वार्थे कन् वा।) वृक्षविशेषः। गिमा इति भाषा॥ तस्य गुणाः। तिक्तत्वम्। लघुत्वम्। कफपित्तदोषनाशित्वम्। रुचिकारित्वञ्च। इति राजवल्लभः॥

ग्रैष्महासं, क्ली, (ग्रीष्मे ग्रीष्मसमये हासः प्रकाशः उत्पत्तिर्जन्यं शोभित्वं यस्य।) इक्षुतृणकम्। इति त्रिकाण्डशेषः॥ कुड़ीर खड़ा। इति भाषा॥

ग्रैष्मी, स्त्री, (ग्रैष्मः ग्रीष्मसमयः उत्पत्तिकारणत्वेनाऽस्त्यस्याः।"अर्श आदिभ्योऽच्।"५।२।१२७। इत्यच् ततो ङीप्।) नवमल्लिका। इति राजनिर्घण्टः॥

ग्रैष्मोद्भवा, स्त्री, (उद्भवतीति। उद्+भू+अच्। ग्रैष्मे उद्भवो यस्याः ग्रैष्मे उद्भवतीति वा।) नवमल्लिका। इति राजनिर्घण्टः॥

ग्लुच, इर् उ चौर्य्ये। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-उदित्वात् क्त्वा वेट्।) रेफयुक्तः। पञ्चमस्वरी। इर्, अग्लुचत् अग्लोचीत्। उ, ग्लोचित्वा ग्लुक्त्वा। इति दुर्गादासः॥

ग्लैव्य, न, (ग्लैव+"वर्णदृढादिभ्यः ष्यञ्च।" ५।१।१२३। इति ष्यञ्।) क्लीवता। इति हेमचन्द्रः॥ (यथा, गीतायाम्। २। ३। "क्लैब्यं मास्म गमः पार्थ नैतत्त्वय्युपपद्यते।")

ग्लौ, स्त्री, (ग्लायति म्लानियुक्तो भवतीति। ग्लै+कः।) चन्द्रः। इति शब्दरत्नावली॥ (यथा, भागवते। ५। २४। १३। "ग्लौरपरपक्षवत्।")

ग्लौः, पुं, (ग्लायति म्लानियुक्तो भवतीति। ग्लै+कः।) म्लानियुक्तः। इति व्याकरणम्।

ग्लानः, त्रि, (ग्लै+कर्त्तरि क्तः।) रोगात् क्षीणदेहः। तत्पर्य्यायः। म्लानुः २। इत्यमरः। २। ६। ५८॥ रोगी। इति राजनिर्घण्टः॥

ग्लानिः, स्त्री, (ग्लायति अनेनासिन् वा। ग्लै+"वहिश्रिस्रुयुद्रुस्त्राह्लास्त्रारिभ्यो नित्।" उणा। ४। ५१। निः।) बलदीनता। इति हेमचन्द्रः। २। २३३॥ (यथा, गीतायाम्। ४। ७। "यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत!॥") रोगः। इति राजनिर्घण्टः॥ (यथा, भागवते। ५। २४। १३। "देहेवैवर्ण्यदौर्गन्ध्यस्वेदक्लममग्लानिरिति वयोऽवस्थाश्च भवन्ति॥")

ग्लानुः, त्रि, (ग्लायतीति। ग्लै+"ग्लाजिस्थश्च गस्नुः।" ३। २। १३६। इति स्नुः।) ग्लानः॥ इत्यमरः। २। ६। ५८॥ (यथा, भट्टिः। ७। ४। "वसन् माल्यवति ग्लास्नू रामो जिष्णुरधृष्णुवत्॥")

ग्लुच, इर् उ चौर्य्ये गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं सेट्। उदित्वात् क्त्वावेट्।) अन्तःस्थलतीययुक्तः। पञ्चमस्वरी। इर्, अग्लुचत् अग्लोचीत्। उ, ग्लोचित्वा ग्लुक्त्वा। इति दुर्गादासः॥

ग्लुच, उ इर् गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) उदित्वात् क्त्वावेट्। अन्तःस्थलतीययुक्तादिः। पञ्चमस्वरी। उ, ग्लुचित्वा ग्लुक्त्वा। इर्, अग्लुचत् अग्लोचीत्। इति दुर्गादासः॥

ग्लेप, ऋ ड दैन्ये। गतौ। घात्वे। इति कविकल्पद्रुमः। (भ्वां-आत्मं-अकं-सकं-च-सेट्।) अन्तःस्थलतीययुक्तः। ड, ग्लेपते निर्धनः सदा। ऋ, अजिग्लेपत्। इति दुर्गादासः॥

ग्लेयः, त्रि, (ग्लानिमर्हतीति। ग्लै+यः।) ग्लानियोग्यः। इति व्याकरणम्॥

ग्लेव, ऋ ड सेवे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) अन्तःस्थलतीययुक्तः। ऋ, अजिग्लेवत्। ड, ग्लेवते। इति दुर्गादासः॥

ग्लेष, ऋ ड अन्वेषे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) अन्तःस्थलतीययुक्तः। ऋ, अजिग्लेषत्। ड, ग्लेषते जिग्लेषे। अन्वेषोऽनुसन्धानम्। ग्लेषते यः सतां मार्गमिति हलायुधः। इति दुर्गादासः॥

ग्लै, क्लमे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) अन्तःस्थलतीययुक्तः। क्लमो हर्षक्षयः। ग्लायति लोकः शोकात्। अनुपसर्गस्य तौ त्वल फल हल इत्यादिना वा ह्रस्वः। ग्लपयति ग्लापयति। सोपसर्गस्य तु प्रग्लापयति। इति दुर्गादासः॥ (यथा, मनुः। २। ८०। "श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः॥")

२ । ६४ । इति डौः ।) चन्द्रः । (यथा, अथर्ववेदसंहितायाम् । ६ । ८३ । ३ ।
"ग्लौरितः प्रपतिष्यति स गलुन्तो नशिष्यति ॥") कर्परः । इत्यमरः । १ । ३ । १४ ॥

घ

घ, घकारः । स तु यञ्जनचतुर्थवर्णः । अस्योच्चारणस्थानं कण्ठः । इति व्याकरणम् ॥ (एतत्तु मुग्धबोधमतम् । यथा, "अ आ ह क ख ग घ ङाः कण्ठ्याः ।" पाणिनीये तु एष कण्ठ्यो जिह्वामूलीयश्च । यथा, "अकुहविसर्ज्जनीयानां कण्ठः ॥" इत्युक्ता पुनः शिक्षायाम् ।
"जिह्वामूले तु कुः प्रोक्तो दन्तोष्ठौ वः स्मृतो बुधैः ॥") अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"घकारं चञ्चलापाङ्गि ! चतुष्कोणात्मकं सदा ।
पञ्चदेवमयं वर्णमरुणादित्यसन्निभम् ॥
निर्गुणं त्रिगुणोपेतं सदा त्रिगुणसंयुतम् ।
सर्व्वगं सर्व्वदं शान्तं घकारं प्रणमाम्यहम् ॥" अस्योत्पत्तिर्गवर्णे द्रष्टव्या ॥ वङ्गाक्षरैरस्य लेखनप्रकारादिर्यथा,—
"दक्षिरूपा वामरेखा किञ्चिदाकुञ्चिता ततः ।
कुण्डलीरूपमास्थाय ततोऽधोगत्य दक्षतः ॥
अत ऊर्द्धं गता रेखा ब्रह्मविष्णुनारायणस्तयोः ।
ब्रह्मस्वरूपिणी देवि ! मात्राशक्तिः प्रकीर्त्तिता ॥" अस्य ध्यानं यथा,—
"मालतीपुष्पवर्णाभां षड्भुजां रक्तलोचनाम् ।
शुक्लाम्बरपरीधानां शुक्लमाल्यविभूषिताम् ॥
सदा क्षीरसुखीं रम्यां लोचनत्रयराजिताम् ।
एवं ध्यात्वा घकारन्तु तन्मन्त्रं दशधा जपेत् ॥" तत्प्रयोगमन्त्रो यथा, वर्णोद्धारतन्त्रे ।
"निर्गुणं त्रिगुणोपेतं सदा त्रिगोलसंयुतम् ।
सर्व्वगं सर्व्वदा शान्तं घकारं प्रणमाम्यहम् ॥" तस्य नामानि यथा, नानातन्त्रेषु ।
"घः खड्गी घुर्घुरो घण्टी घण्टीशस्त्रिपुरान्तकः ।
वायुः शिवोत्तमः सत्या किङ्किणी घोरनायकः ॥
मरीचिर्ब्रह्मणो मेधा कालरूपी च दाम्भिकः ।
लम्बोदरा ज्वालमूलं नन्देशो हननं ध्वनिः ॥
त्रैलोक्यविद्या संहर्त्ता कामाख्यमनघामयः ॥"

घः, पुं, (घण्टयति शब्देन क्षोभते घटयति घर्घरादिशब्दं वा । घटि द्युतौ घट चेष्टायां च + बाहुलकात् डः ।) घण्टा । घर्घरशब्दः । इति मेदिनी । घे । १ ॥

घगघ, हसने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कण्ठ्यवर्गद्वितीयोपधः । घगघति । इति दुर्गादासः ॥

घट, क चिंसे । संघाते । द्युतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-अकंच-सेट् ।) क, घाटयति कवाटं द्वारि जनः संयोजयतीत्यर्थः । इति दुर्गादासः ॥

घट, इ कि द्युतौ । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-अकं-सेट् ।) इ, भावे घण्टते । कि, घण्टयति घण्टति । द्युतिर्दीप्तिः । द्युत्यर्थत्वेन प्राप्तिकपुरादित्वे सिद्धे कि करणमर्थान्तरेऽपि प्राप्तिकपुरादित्वार्थम् । तथाच,—
"क्रियावाचित्वमाख्यातुं प्रसिद्धोऽर्थः प्रदर्शितः ।
प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः ॥"
इति बोपदेवः ॥
प्रसिद्धार्थं कथयितुं धातूनां प्रसिद्धोऽर्थः प्रदर्शितः । किन्तु महाकविप्रयोगं दृष्ट्वान्येऽप्यर्था मन्तव्याः हि यस्मात् धातवोऽनेकार्था भवन्तीत्यर्थः । तेन हिंसास्तुत्योः पठितस्यापि शंसते: कथनार्थत्वे न मे क्रिया शंसति किञ्चिदीप्सितमिति रघौ कथयतीत्यर्थः । एवं दीप्तिपठितस्यापि तर्कधातोर्वितर्कणार्थत्वे तर्कयत्यन्यगुणं सुधीरित्यादिः । इति दुर्गादासः ॥

घट, ष ड म चेष्टे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ष, घटा । ड, घटते पठितुं शिष्यः । म, घटयति । घटतीति घटो क्वेयो नाघटन् घटतामियादिति तु धटते घटः पचाद्यच् । ततो घट इवाचरतीति क्यौ साधयम् । इति दुर्गादासः ॥ (यथा, भट्टिः । १२ । २६ ।
"घटेत सन्ध्यादिषु यो गुणेषु
लक्ष्मीर्न तं सृजति चञ्चलापि ॥")

घटः, पुं, (घटते ग्रहादिसङ्घातैः जलादिग्रहणाय इत्यर्थः । घट् + पचाद्यच् ।) कलसः । इत्यमरः । २ । ६ । ३२ ॥ (यथा, मनुः । ८ । ३१६ ।
"यस्तु रज्जुं घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपाम् ।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत् ॥") तस्य परिमाणं कलशशब्दे द्रष्टव्यम् ॥ समाधिभेदः । (घटस्थवारिवत् निश्चलत्वात्तथात्वम् ।) स तु कुम्भकम् । इभशिरः । (आकृतिसादृश्यात्तथात्वम् ।) कूटकुटः । इति मेदिनी । टे । ७ ॥ कुम्भराशिः । यथा,— [लभेत् ।"
"सिंहे वा यदि गोघटे गतनरः सर्व्वार्थसिद्धिं
इति समयप्रदीपः ॥ द्रोणपरिमाणम् । इति वैद्यकपरिभाषा ॥ (अस्य पर्य्याया यथा,—
"चतुर्भिराढकैर्द्रोणः कलशोनल्वणोम्मलः ।
उन्मानञ्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः ॥"
इति श्राद्धधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥
"कंसचतुर्गुणो द्रोणः कर्म्मणोनल्वणश्च तत् ।
स एव कलशः ख्यातो घट उन्मान मेवच ॥"
इति परके कल्पस्थाने द्वादशेऽध्याये ॥) कुम्भपरिमाणम् । यथा,—
"दशद्रोणो भवेत् खारी कुम्भस्तु द्रोणविंशतिः ।"
इति प्रायश्चित्ततत्त्वे कात्यायनः ॥ (योगावस्थाभेदः । यथा, हठयोगप्रदीपिकायाम् । ४ । ६६ ।
"आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्याश्चतुष्टयम् ॥"
एतदवस्थायां किं स्यात्तदाह तत्रैव । ४ । ७२ । ७३ ।
"द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ।
दृढासनो भवेद्योगी ज्ञानी देवसमस्तदा ॥
विष्णुग्रन्थेस्ततो भेदात् परमानन्दसूचकः ।
अतिशून्ये विमर्द्दश्च भेरीशब्दस्तथा भवेत् ॥")

घटकः, पुं, (घटयति परस्परसम्बन्धादिकमिति । घट + णिच् + ण्वुल् ।) कुलाचार्य्यः । तस्यासृश्यत्वम् । यथा,—
"वरं चाण्डालसंसर्गं कुर्य्यात्तु साधकोत्तमः ।
तथाप्यसृश्यगणकं सर्व्वदा तं परित्यजेत् ॥
दूषिताः कलिकालेषु भारते विविधाः प्रजाः ।
अतएव महेशानि ! सर्व्वे संसर्गदूषिताः ॥
घटकं ब्राह्मणं देवि ! संसर्गे यत्नतस्त्यजेत् ॥"
इति श्राद्धानन्दतरङ्गिण्यां वोढ्यौद्वाहे महिषमर्द्दिनीतन्त्रवचनम् ॥* ॥ योजकः । तत्पर्य्यायः । चाटरः २ । इति त्रिकाण्डशेषः ॥ तस्य रूपञ्च यथा, कुलदीपिकायाम् ।
"धावको भावकश्चैव योजकश्चाटकस्तथा ।
दूषकस्तावकश्चैव षड्ते घटकाः स्मृताः ॥"
अन्यच्च ।
"के नो विदन्ति पुरुषा पुरुषानुपूर्व्वीं-
सुर्व्वीतले कुलभृतां परिवर्त्तनं वा ।
अत्यन्तसूक्ष्ममपि ये कुलतारतम्यं
जानन्ति ते हि घटका न तु योजकाद्याः ॥"
वनस्पतिः । पुष्पेण विना यः फलति सः । इति भूरिप्रयोगः ॥ (घटयति योजयति परार्थांहितादिकं साधयतीत्यर्थः । योजके, त्रि । यथाह भर्त्तृहरिः । २ । ६६ ।
"ते ने सत्पुरुषाः परार्थघटकाः स्वार्थस्य बाधेन ये
मध्यस्थाः परकीयकार्य्यकुशलाः स्वार्थाविरोधेन ये ।
ते वै मानुषराक्षसाः परहितं ये: स्वार्थतो घ्नन्ति ये
ये घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥")

घटदासी, स्त्री, (घटार्थं घटनार्थं नियोजिता दासीव या । घटयति योजयति नायकनायिकौ इति घटा योजिका सा दासीव इति वा ।) कुट्टनी । तत्पर्य्यायः । कुट्टिनी २ दूत्या ३ दूतताली ४ गणेश्वरा ५ । इति त्रिकाण्डशेषः ॥

घटना, स्त्री, (घट + णिच् + युच् टाप् च ।) संघातीकरणम् । सम्पादीकरणम् । यथा, "करिणां घटना घटा ।" इत्यमरः । २ । ८ । १०७ ॥ योजना । मेलनम् । यथा, "अघटनघटनापटीयसी माया ।" इति मायाशब्दव्याख्यायाम् ॥ (यथा, राघवपाण्डवीये । ४ । ३६५ ।
"शक्तिः काप्यपरीक्षितार्त्ति महतां स्वैरं
विधत्ते न्यथा
यस्याहत्यभावयोगेन यान्ति घटनां कार्य्याणि
निर्यन्त्रणम् ॥")

घटयोनिः, पुं, (घटः कुम्भः योनिः कारणं उत्पत्तिस्थानम् यस्य ।) अगस्त्यमुनिः । इति हलायुधः ॥

घटराजः, पुं, (घटेषु राजते इति। यद्वा घटेन मृदादिसङ्घटनेन राजते शोभते इत्यर्थः।) कुम्भः। इति हारावली॥

घटा, स्त्री, (घट+भावे विवादङ् ततष्टाप् च।) करिणां घटना। हस्तिनां युद्धादावेकत्र संघातीकरणम्। इत्यमरः। २। ८। १०७॥ (यथा, कथासरित्सागरे। १६। १०६।

"तुरङ्गतुरगव्राता: सुभटास्तैरिवोन्मथ्यः।
तद्गजेन्द्रघटा वेगावनेषु दलशो ययुः॥")

घटनम्। गोष्ठी। सभा। इति मेदिनी। टे। १३॥ समूहः। यथाह श्रीहर्षः।

"यद्गारघटाङ्कुशिमसवदिन्दूपलतुन्दिलापया॥"

घटालाबुः, स्त्री, (घटाकारा अलाबुः।) कुम्भतुम्बी। इति राजनिर्घण्टः॥

घटिकं, क्ली, (घटेन सादृश्यं विद्यतेऽस्य इति ठन्।) नितम्बः। इति शब्दचन्द्रिका॥ (घटेन तरतीति। "नौद्व्यचष्ठन्।" ४। ४। ७। इति ठन्। घटेन तरत्यब्धौ चि। पुंसि तु। घटिं वादयति घटीवादकेन समयं ज्ञापयतीति। के+कः पूर्वहस्वश्च। घटीवादकः॥)

घटिका, स्त्री, (पादस्थास्थि यन्थिघटः घटना विद्यतेऽत्र इति। घट+ठन्।) पादग्रन्थिः। इति शब्दरत्नावली॥ (घटयति निर्दिशति निरूपयति वा कालांशविशेषं लोकयात्रासम्पादनाय। घट+णिच्+ण्वुल्+टापि अत इत्वञ्च।) मुहूर्तः। इति जटाधरः॥ यथा, ज्योतिर्विदाभरणे।

"गुर्वक्षराणामुदितं च यस्या
मलं पलानां घटिका सैलेका॥"

यथा, तिथितत्त्वे रघुनन्दनः। "अत्र घटिका मुहूर्त्तः ग्राह्ययोग्यकालातुरोधात्॥") दण्डः। घड़ी इति भाषा। यथा,—

"चतस्रो घटिकाः प्रातरुदयोदय उच्यते॥"

इति तिथ्यादितत्त्वम्॥

(घट+स्वल्पार्थे कन् टापि अत इत्वञ्च। क्षुद्रघटः। यथा, पञ्चतन्त्रे। १। २०३।

"एता हसन्ति च रुदन्ति च कार्य्यहेतो-
र्विश्वासयन्ति च परं न च विश्वसन्ति।
तस्मान्नरेण कुलशीलवता सदैव
नार्य्याः प्रमाणघटिका इव वर्जनीयाः॥")

घटी, स्त्री, (घटते इति घटः। घट+अच्। ततः संज्ञायां जातौ वा ङीष्। यद्वा, घटः कालमानज्ञापकः सच्छिद्रः कुम्भः ज्ञापकतयाऽस्त्यस्या मत्वर्थीयच् ततो गौरादित्वात् ङीष्।) दण्डः। इति भूरिप्रयोगः। घड़ी इति भाषा॥ (यथा, सिद्धान्तशिरोमणौ।

"गुर्वक्षरैः खेन्दुमितैरसृक्षैः
षड्भिः पलं तैर्घटिका खषड्भिः
स्याद् वा घटी षष्टिरहः सरामैः॥"

स्वल्पार्थे ङीष्।) क्षुद्रघटः। इति मुग्धबोधम्॥ (यथा, मार्कण्डेये। १२। २२।

"घटीयन्त्रेषु चैवान्यो बहुस्रोतो यथा घटी॥")

घटीकारः, पुं, (घटीं करोतीति। क+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) यद्वा, अघटं घटं करोति यः। कुलालः। इति मुग्धबोधम्॥

घटीयन्त्रं, क्ली, (घट्याः यन्त्रम्।) कूपाज्जलोत्तोलनार्थैरज्जुसहितघटः। जलतोला कल इति भाषा। तत्पर्य्यायः। उद्घाटनम् २। इत्यमरः। २। १०। २७॥ (यथा, मार्कण्डेयपुराणे। १२। २०।

"तान्येव तत्र चक्राणि घटीयन्त्राणि चाप्यतः॥"

घटी क्षुद्रघटस्तदधस्तनार्द्धाकारं यन्त्रम्। यद्वा घट्याः दण्डरूपकालस्य ज्ञापकं यन्त्रम्। कालपरिमाणज्ञापको यन्त्रविशेषः। घड़ी इति ख्यातः॥ सूर्य्यसिद्धान्ते कालमानज्ञापकयन्त्राणि बहुविधान्युक्तानि। तत्र शङ्कुयष्ट्यादिकं दिवाकालमानज्ञापकमुक्तवान्। घटीयन्त्रादिकन्तु अहर्निशं कालज्ञानसाधनमिति घटीयन्त्रादिकं सूर्य्यसिद्धान्ते रङ्गनाथेन विस्तीर्य्य प्रदर्शितम्। यथा,—

"अथ घटीयन्त्रादिभिश्चमत्कारियन्त्रैर्वा सर्व्वोपजीव्यं कालं सूक्ष्मं साधयेदिति कालसाधनमुपसंहरति॥"

"तोययन्त्रकपालाद्यैर्मयूरनरवानरैः।
सशुक्लरेणुगर्भैश्च सम्यक् कालं प्रसाधयेत्॥"

इति सूर्य्यसिद्धान्तः॥

अत्र रङ्गनाथकृतटीका यथा,—

"जलयन्त्रञ्च तत् कपालञ्च कपालाख्यं जलयन्त्रं वक्ष्यमाणं तदाद्यं प्रथमं तेषां तैर्यन्त्रैर्वालुकायन्त्रप्रभृतिभिः सापेक्षघटीयन्त्रैर्मयूरनरवानरैः। मयूराख्यं स्वयंवहयन्त्रं निरपेक्षं नरयन्त्रं शङ्कुनाम्नं छायायन्त्रं पूर्व्वोद्दिष्टं वानरयन्त्रं स्वयंवहं निरपेक्षमेतैः सशुक्लरेणुगर्भैः शुक्लसहिता रेणवो धूलयो गर्भे मध्ये येषां तैः शुक्लप्रोताः षष्टिसंख्यका यष्टिका मयूरोदरस्था सुखात् घटिकान्तरेण खत एव निःसरन्तीति लोकप्रसिद्धा तादृग्यैर्यन्त्रैरित्यर्थः। यद्वा शुक्लाकारेण रेणवः सिकतांशा गर्भे उदरे यस्येतादृशं यन्त्रं वालुकायन्त्रं प्रसिद्धम्। तेन सहितैर्मयूरादियन्त्रैर्मयूरादयुक्तयन्त्रैर्वालुकायन्त्रेण चेति सिद्धोऽर्थः। चकारस्तोययन्त्रकपालाद्यैरित्यनेन समुच्चयार्थकः। कालं दिनगतादिरूपं सम्यक् सूक्ष्मं प्रसाधयेत्। प्रकर्षेण सूक्ष्मत्वेनातिरूक्ष्मत्वेनेत्यर्थः। जानीयादित्यर्थः॥ * ॥ ननु मयूरादिस्वयंवहयन्त्राणि कथं साध्यानीत्यतस्तत्साधनप्रकारा बहवो दुर्गमाश्च उक्तीत्याह॥"

"पारदाराम्बुसूत्राणि शुक्लतैलजलानि च।
बीजानि पांशवस्तेषु प्रयोगास्तेऽपि दुर्लभाः॥"

अत्र रङ्गनाथकृतटीका यथा,—

"तेषु मयूरादियन्त्रेषु स्वयंवहार्थमेते प्रयोगाः प्रकर्षेण योग्याः। प्रकर्षस्तु यावदभिमतसिद्धेः। एते के इत्यत आह। पारदाराम्बुसूत्राणीति पारदयुक्ता आराः। यथा सिद्धान्तशिरोमणौ। लघु काष्ठजसमचक्रे समसुषिरारा: समान्तरा नेम्याम्।
किञ्चिदवक्रा योग्याः सुषिरस्यार्द्धे पृथक् तासाम्॥
रसपूर्णे तच्चक्रं द्वाधाराच्छस्थितं स्वयं भ्रमति।
अम्बु जलस्य प्रयोगः। सूत्राणि सूत्रसाधनप्रयोगः। शुक्लं शिल्पनैपुण्यम्। तैलजलानि तैलयुक्तजलस्य प्रयोगः। चकारात् तयोः पृथक् प्रयोगोऽपि। यथा च सिद्धान्तशिरोमणौ।
उत्कीर्य्यनेमिमथवा परितो मदनेन संलग्नम्।
तदुपरि तालदलादं छत्वा सुषिरे रसं क्षिपेत्
तावत्॥
यावद्सैकपार्श्वे क्षिप्तजलं नान्यतो याति।
पिहितच्छिद्रं तदतश्चक्रं भ्रमतिस्वयं जलाक्षिप्तम्॥
ताम्रादिमयस्याङ्गुष्ठपरुषनलस्याम्बुपूर्णस्य।
एकं कुम्भजलान्तर्द्वितीयमग्नं लघोस्तुलं च बहिः॥
युगपन्मुक्तं चेत् कं नलेन कुम्भाद्बहिः पतति।
नेम्यां बद्धा घटिकाचक्रं जलयन्त्रवत् तथा
धार्य्यम्॥
नलकप्रच्युतसलिलं पतति यथा तद्घटीमध्ये।
भ्रमति ततस्तत् सततं पूर्णघटीभिः समाक्षिप्तम्॥
चक्रच्युतं तदुदकं कुम्भे याति प्रणालिकया॥
बीजानि केवलं तुङ्गबीजप्रभोगः। पांसवो धूलिप्रयोगास्तैर्युक्ताः प्रयोगाः। अपिशब्दात् प्रयोगेषु सुगमतरा इत्यर्थः। दुर्लभा असाधारणत्वेन मनुष्यैः कर्त्तुमशक्या इत्यर्थः। अन्यथा प्रतिगृहं स्वयंवहानां प्राचुर्य्यापत्तेः। इयं स्वयंवहविद्या समुद्रान्तर्निवासिजनैः फिरङ्गाख्यैः सम्यगभ्यस्तेति। कुहकविद्यात्वादत्र विस्तारानुद्योग इति संक्षेपः॥*॥ अथ कपालाख्यजलयन्त्रमाह।
"ताम्रपात्रमधश्छिद्रं न्यस्तं कुम्भेऽमलाम्भसि।
षष्टिर्मज्जत्यहोरात्रे स्फुटं यन्त्रं कपालकम्॥"

अत्र रङ्गनाथकृतटीका यथा,—

"यत् ताम्रघटितं पात्रमधश्छिद्रं अधोभागे छिद्रं यस्य तत्। अमलाम्भसि निर्म्मलं जलं विद्यते यस्मिन् तादृशे कुम्भे दृढ़भाण्डे न्यस्तं धारितं सत् अहोरात्रे नाहोरात्रे बहिः षष्टिवारमेव न न्यूनाधिकं मज्जति। अधश्छिद्रमार्गेण जलागमनेन जलपूर्णतया निमग्नं भवति तत्कपालकं कपालमेव कपालकं घटखण्डानां कपालपदवाच्यत्वात् घटार्द्धसमार्द्धाकारं यन्त्रं घटीयन्त्रं स्फुटं सूक्ष्मम्। तद्घटनन्तु।

गुलवस्य द्विगभिर्विहितं पलैर्यत्
षड्भिर्गुलोत्थं द्विगुणार्थतास्यम्।
तदम्भसा षष्टिपलैः प्रपूर्य्यं
प्राच्यं घंटार्द्धप्रातमं घटी स्यात्॥
सत्तंग्रमाषचयनिर्म्मिता या
हेम्नः शलाका चतुरङ्गुला स्यात्।
विद्धं तया प्राक्तनमत्रपात्रं
प्रपूर्य्यते नाड़िकयाम्बुभिस्तत्॥

तथाच सिद्धान्तशिरोमणौ,—

"घटदलरूपा घटिता घटिका ताम्री तले
पृथुच्छिद्रा।
द्युनिशं निमज्जनमित्या भक्तं द्युनिशं घटीमानम्॥"

"अत्र दशभिः गुलवस्य पलैरित्यादि यद्घटी-

लक्षणं केचित् कृतं तदयुक्तिमूलं दुर्घटं नेत्यतदुपेक्षितम्। इष्टप्रमाणाकारसुषिरं पात्रं घटीसंज्ञमङ्गीकृतम्। द्युनिशूनिमज्जनसङ्ख्या यदि घटचिह्नशङ्कितानि पानीयपलानि लभ्यन्ते तदैकेन निमज्जनेन किमिति चैराधिक्यम्।" इति घटीयन्त्रम् ॥ अन्यानि कालमानयन्त्राणि तु यन्त्रशब्दे द्रष्टव्यानि ॥)

घटोत्कचः, पुं. (घट इव उन्नतःकचोऽस्य।) राक्षसविशेषः। स तु हिडिम्याराक्षसीगर्भे भीमसेनाज्जातः ॥ इति महाभारतम् ॥ (अस्य नामनिरुक्त्या सह जन्मादिविवरणं यथा, महाभारते। १। १५६। २१—६३।

"तथेति तत् प्रतिश्रुत्य हिडिम्बा राक्षसी तदा।
भीमसेनमुपादाय सोऽर्द्धमाचक्रमे ततः ॥
शैलशृङ्गेषु रम्येषु देवतायतनेषु च।
मृगपक्षिविघुष्टेषु रमणीयेषु सर्व्वदा ॥
कृत्वा च रूपं परमं सर्व्वाभरणभूषिता।
सङ्गच्छन्ती सुमधुरं रमयामास पाण्डवम् ॥
तथैव नदुर्गेषु पुष्पितद्रुमसानुषु।
सरःसु रमणीयेषु पद्मोत्पलयुतेषु च ॥
नदीद्वीपप्रदेशेषु वैदूर्य्यसिकतासु च।
सुतीर्थवनतोयासु तथा गिरिनदीषु च ॥
काननेषु विचित्रेषु पुष्पितद्रुमवल्लिषु।
हिमवद्गिरिकुञ्जेषु गुहासु विविधासु च ॥
प्रफुल्लशतपत्रेषु सरःस्वमलवारिषु।
सागरस्य प्रदेशेषु मणिहेमचितेषु च ॥
मत्तनेषु च रम्येषु तथैवोपवनेषु च।
देवारण्येषु पुण्येषु तथा पर्व्वतसानुषु ॥
गुह्यकानां निवासेषु तापसायतनेषु च।
सर्व्वर्त्तुफलपुष्पेषु मानसेषु सरःसु च ॥
बिभ्रतो परमं रूपं रमयामास पाण्डवम्।
रमयन्ती तथा भीमं तत्र तत्र मनोजवा ॥
प्रजज्ञे राक्षसीपुत्रं भीमसेनात् महाबलम्।
विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम् ॥
भीमनादं सुताम्रौष्ठं तीक्ष्णदंष्ट्रं महारवम्।
महेष्वासं महावीर्य्यं महासत्त्वं महाभुजम् ॥
महाजवं महाकायं महामायमरिन्दमम्।
दीर्घघोणं महोरस्कं विकटोद्वद्धपिण्डिकम् ॥
अमानुषं मानुषजं भीमवेगं महाबलम्।
यः पिशाचानतीवान्यान् बभूवाबीव राक्षसान् ॥
बालोऽपि यौवनं प्राप्तो मानुषेषु विशाम्पते!।
सर्व्वास्त्रेषु परं वीरः प्रकर्षमगमद् बली ॥
सद्यो हि गर्भान् राक्षस्यो लभन्ते प्रसवन्ति च।
कामरूपधराश्चैव भवन्ति बहुरूपिकाः ॥
प्रणम्य विकचः पादावगृह्णात् स पितुस्तदा।
मातुश्च परमेष्वासौ च नामास्य चक्रतुः ॥
घटो ह्यासोत्कचश्चेति माता तं प्रत्यभाषत।
अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह ॥"

असौ हि कुरुक्षेत्रयुद्धे कर्णनिक्षिप्तैकपुरुषघातिन्या वासवदत्तया शक्त्या आहतो मृतश्च। यथा, महाभारते। ७। १७७। ४८—६३।

"ततोऽब्रुवन् कुरवः सर्व्व एव
कर्णं दृष्ट्वा घोररूपाञ्च मायाम्।
शक्त्या रक्षो जहि कर्णाद्य तूर्णं
नश्यन्त्येते कुरवो धार्त्तराष्ट्राः ॥
करिष्यतः किञ्च नो भीमपार्थौ
तपन्तमेनं जहि पापं निशीथे।
यो नः संग्रामाद्घोररूपाद्विमुच्येत्
स नः पार्थान् सबलान् योधयेत ॥
तस्मादेनं राक्षसं घोररूपं
जहि शक्त्या वै दत्तया वासवेन।
मा कौरवाः सर्व्व एवेन्द्रकल्पा
राधेयाद्य कर्ण! नेशुः सयोधाः ॥
स वध्यमानो रक्षसा वै निशीथे
दृष्ट्वा राजंस्वास्यमानं बलञ्च।
महच्च श्रुत्वा निनदं कौरवाणां
मतिं दधे शक्तिमोक्षाय कर्णः ॥
स वै क्रुद्धः सिंह इवात्यमर्षी
नामर्षयत् प्रतिघातं रणे तम्।
शक्तिं श्रेष्ठां वैजयन्तीमसह्यां
समाददे तस्य वधं चिकीर्षन् ॥
याऽसौ राजन्! निहिता वर्षपूगान्
वधायाजौ सत्कृता फाल्गुनस्य।
यां वै प्रादात् सूतपुत्राय शक्रः
शक्तिं श्रेष्ठां कुरुसभाभ्यां निनाय ॥
तां वै शक्तिं लेलिहानां प्रदीप्तां
पाशैर्युक्तामन्तकस्येव रात्रिम्।
रक्षो रक्षसारं ज्वलिताभिवीक्ष्य
वैकर्त्तनः प्राहिणोद्राक्षसाय ॥
तामुक्तमां परकायावहन्तीं
दृष्ट्वा सौतेर्बाहुसंस्थां ज्वलन्तीम्।
भीतं रक्षो विप्रदुद्राव राजन्!
कृत्वात्मानं विस्थतुल्यप्रमाणम् ॥
दृष्ट्वा शक्तिं कर्णबाहूत्तरस्थां
नेदुर्भूतान्यन्तरीक्षे नरेन्द्र!।
ववुर्वाताश्चुक्षुभाचापि राजन्!
सनिर्घाता चाग्निगर्भा जगाम ॥
सा तां मायां भस्म कृत्वा ज्वलन्ती
भित्त्वा गाढं हृदयं राक्षसस्य।
ऊर्द्धं ययौ दीप्यमाना निशायां
नक्षत्राणामन्तराण्याविशन्ती ॥
युद्धा चित्रैर्विविधैः शस्त्रपूगैः
दिव्यैर्वीरो मानुषे राक्षसेच्च।
नदन्नादान् विविधान् भैरवांश्च
प्राणानिष्ट्वाजितः शक्रशक्त्या ॥
इदञ्चान्यच्चित्रमाश्चर्य्यरूपं
चकारासौ कर्म्म शत्रुक्षयाय।
तस्मिन् काले शक्तिनिर्भिन्नमर्म्मा
बभौ राजन्! शैलमेघप्रकाशः ॥
ततोऽन्तरीक्षादपतन्नदीप्ताः
स राक्षसेन्द्रो भुवि भिन्नदेहः।
अवाक् शिरास्तब्धगात्रो विनिष्क्रो
घटोत्कचो महदास्याय रूपम् ॥
स तद्रूपं भैरवं भीमकर्म्मा
भीमं कृत्वा भैमसेनिः पपात।
हतोऽप्येवं तव सैन्येकदेशमपोथयत् स्वेन देहेन राजन्! ॥
ततो मिश्राः प्राणदन् सिंहनादैर्भेर्य्यश्च शङ्खा सुरजाश्चानकाश्च।
दग्धां मायां निहतं राक्षसञ्च
दृष्ट्वा हृष्टाः प्राणदन् कौरवेयाः ॥
ततः कर्णः कुरुभिः पूज्यमानो
यथा शक्रो वृत्रवधे मरुद्भिः।
अन्वारूढस्तव पुत्रं रथस्थं
हृष्टश्चापि प्राविशत् स्वं स्वसैन्यम् ॥")

घटोत्कचान्तकः, पुं. (घटोत्कचस्य अन्तकः संहारकः।) कर्णराजः। इति त्रिकाण्डशेषः॥

घटोद्भवः, पुं. (उद्भवतीति उद्भवः घटः कलसः उद्भवः उत्पत्तिस्थानं यस्य। यद्वा घटात् उद्भवतीति। उत्+भू+अच्।) अगस्त्यमुनिः। इति हेमचन्द्रः। २। ३६ ॥

घट्ट, क चाले। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं क्वचित् सकञ्च-सेट्।) टवर्त्तयान्तः। चालश्चलनम्। क, घट्टयति मेघो वायुना। इति दुर्गादासः॥

घट्ट, ङ चाले। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं क्वचित् सकञ्च-सेट्।) टवर्त्तयान्तः। ङ, घट्टते। इति दुर्गादासः॥

घट्टः, पुं, (घट्टतेऽस्मिन् इति। घट्ट+"हलश्च।" ३। ३। १२१। इति घञ्।) नद्यादौ स्नानाद्यर्थं प्रवेशस्थानम्। इति लिङ्गादिसंग्रहे अमरभरतौ॥ घाट् इति यस्य प्रसिद्धिः। जगत इति ख्यातो वा। तत्पर्य्यायः। तीर्थं २। अवतारः ३। इति हेमचन्द्रः। ४। १५३॥

घट्टगा, स्त्री, (घट्टेति नाम्ना गीयते उदाहियते इति। घट्टा+गै+कः टाप् च।) नदीभेदः। यथा,—

"मलापहा भीमरथी च घट्टगा
यथा च कृष्णा जलसान्द्रतागुणैः।
मलापहा घट्टपयस्तथापि
पथ्यं लघु स्वादुतरं सुकान्तिदम्॥"

इति राजनिर्घण्टः॥

घट्टजीवी, [न्] पुं, (घट्टेन घट्टे देयतरपण्येन शुल्कादिनेत्यर्थः। जीवतीति। जीव+णिनिः।) वर्णसङ्करजातिविशेषः। पाटनि इति भाषा। स तु वैश्यायां शूद्रकाज्जातः। इति विवादार्णवसेतुः॥

घट्टना, स्त्री, (घट्ट+"न्यासश्रन्थोयुच्।" ३। ३। १०७। इत्यस्य सूत्रस्य "घट्टिवन्दिविदिभ्यश्चेति वाच्यम्।" इति वार्त्तिकोक्त्या युच् टाप् च।) चलना। (आङ् पूर्व्वकघट्टनाशब्दस्य प्रयोगो यथा, माघे। १। १०।

"रणद्भिराघट्टनया नभस्वतः
पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः॥")

वृत्तिः। इति हेमचन्द्रः॥

घण, ट ञ उ दीप्तौ । इति कविकल्पद्रुमः ॥ (तनां-उभं-अकं-सेट् । उदितात् क्त्वेट् ।) ट ञ, घण्टोति घण्टते । उ, घण्टित्वा घण्टा । इति दुर्गादासः ॥

घण्टः, पुं, (घण+क्तः ।) स्वनामख्यातवाद्यभेदविशेषः । मत्स्यघण्टगुणः । बलरुचिकारित्वम् । वातनाशित्वञ्च । इति राजवल्लभः ॥

घण्टकः, पुं, (घण्ट+संज्ञायां कन् ।) क्षुपविशेषः । घेंटकोल इति भाषा । अस्य गुणगुणाः । कफनाशित्वम् । कटुपाकित्वम् । पित्तकारित्वञ्च । इति राजवल्लभः ॥ घण्टकर्णोऽपि पाठः ॥

घण्टा, स्त्री, (घण्टयति दीप्यते पूजादिकाले वाद्येन श्रोभते, घण्टयति शब्दायते वा । घटि दीप्तौ + अच् ततष्टाप् ।) कांस्यनिर्म्मितवाद्यविशेषः । यथा, स्मृतिः ।

"सर्व्ववाद्यमयी घण्टा वाद्याभावे नियोजयेत् ॥"
"शब्दो यस्य गृहे नास्ति घण्टा वा गरुडान्विता ।
पूरतो वासुदेवस्य न स भागवतः कलौ ॥"

इति पद्मपुराणे पातालखण्डम् ॥

अथ घण्टामाहात्म्यसूक्तञ्च स्कान्दे श्रीब्रह्मनारदसंवादे यथा,—

"स्नानार्चनक्रियाकाले घण्टानादं करोति यः ।
पूरतो वासुदेवस्य तस्य पुण्यफलं शृणु ॥
वर्षकोटिसहस्राणि वर्षकोटिशतानि च ।
वसते देवलोके तु अप्सरोगणसेवितः ॥
सर्व्ववाद्यमयी घण्टा केशवस्य सदा प्रिया ।
वादनाच्छ्रुते पुण्यं यज्ञकोटिसमुद्भवम् ॥
वादित्रनिनदे सूर्य्यगीतमङ्गलनिःस्वने ।
यः स्नापयति गोविन्दं जीवन्मुक्तो भवेद्धि सः ॥
वादित्राणामभावे तु पूजाकाले हि सर्व्वदा ।
घण्टाशब्दो नरैः कार्य्यः सर्व्ववाद्यमयी यतः ॥
सर्व्ववाद्यमयी घण्टा देवदेवस्य वल्लभा ।
तस्मात् सर्व्वप्रयत्नेन घण्टानादन्तु कारयेत् ॥
मन्वन्तरसहस्राणि मन्वन्तरशतानि च ।
घण्टानादेन देवेशः प्रीतो भवति केशवः ॥"*॥

तथा, विष्णुधर्म्मोत्तरे श्रीभगवत्प्रह्लादसंवादे ।

"शृणु दैत्येन्द्र ! वक्ष्यामि घण्टामाहात्म्यमुत्तमम् ।
प्रह्लाद ! त्वत्समो नास्ति मद्भक्तो भुवनत्रये ॥
मम नामाङ्किता घण्टा पूरतो मम तिष्ठति ।
अर्चिता वैष्णवगृहे तत्र मां विद्धि दैत्यप ! ॥
वैनतेयाङ्किता घण्टां सदर्शनयुतां यदि ।
ममाग्रे स्थापयेद्दृश्यस्तु देहे तस्य वसाम्यहम् ॥
यस्तु वादयते घण्टां वैनतेयेन चिह्नितां ।
धूपे दीपे च नैवेद्ये स्नाने पूजाकाले विशेषतः ॥
मामाग्रे प्रत्यहं वत्स ! प्रत्येकं लभते फलम् ।
सहस्रायुतं गोयुतञ्च वाजपेयशतोद्भवम् ॥
विघ्नविनाशनता पूजा सफला जायते नृणाम् ।
घण्टानादेन तुष्टोऽहं प्रयच्छामि स्वकं पदम् ॥
नागारिचिह्निता घण्टा रथाङ्गेन समन्विता ।
वादनात् कुरुते नाशं जन्मन्तुभयस्य च ॥
गरुडेनाङ्किता घण्टां दृष्ट्वाहं प्रत्यहं सदा ।
प्रीतिं करोमि दैत्येन्द्र ! लक्ष्मीं प्राप्य यथाधनः ॥

दृष्ट्वान्तं यथा देवाः प्रीतिं कुर्व्वन्त्यहर्निशम् ।
सुपर्णे च तथा प्रीतिं घण्टाशिखरमास्थिते ॥
स्वकरेण प्रकुर्व्वन्ति घण्टानादं सुभक्तितः ।
मदीयार्चनकाले तु फलं कोट्येन्दवं कलौ ॥"

अन्यच्च ।

"घण्टादण्डस्य शिखरे सचक्रं स्थापयेत्तु यः ।
गरुडं वै प्रियं विष्णोः स्थापितं भुवनत्रयम् ॥
सचक्रघण्टानादन्तु श्रुत्वाकाले शृणोति यः ।
पापकोटियुतस्यापि नश्यन्ति यमकिङ्कराः ॥
सर्व्वे दोषाः प्रलीयन्ते घण्टानादे कृते हरौ ।
देवतानां मुनीन्द्राणां पितॄणामुत्सवो भवेत् ॥
अभावे वैनतेयस्य चक्रस्यापि न संशयः ।
घण्टानादेन भक्तानां प्रसादं कुरुते हरिः ॥
गृहे यस्य भवेन्नित्यं घण्टा नागारिसंयुता ।
न सर्पाणां तत्र भयं नाग्निविद्युत्समुद्भवम् ॥
यस्य घण्टा गृहे नास्ति शब्दश्च पुरतो हरेः ।
कथं भागवतं नाम गीयते तस्य देहिनः ॥"
"अतो भगवतः प्रीत्यै घण्टा श्रीगरुडान्विता ।
संग्राह्या वैष्णवैर्यत्नाच्चक्रेणोपरि मण्डिता ॥
गीतं वृत्तं पुराणादिपठनञ्च प्रशस्यते ॥"

इति श्रीहरिभक्तिविलासे ६ विलासः ॥

(घण्टयति दीप्यते कुसुमादिभिरिति । घटि + अच् । स्त्रियां टाप् ।) घण्टापाटलिवृक्षः । इति शब्दरत्नावली ॥ अतिबला । नागबला । इति राजनिर्घण्टः ॥(अतिबलानागबलाघण्टापाटलिशब्देष्वासां विवृतिः यथास्थानं ज्ञातव्या ॥)

घण्टाकः, पुं, (घण्टयति दीप्यते स्वकुसुमैरिति । घटि + अच् टाप् । घण्टा तया घण्टेति आख्यायेत्यर्थः कायतीति । घण्टा + के + कः ।) घण्टापाटलिवृक्षः । इति शब्दरत्नावली ॥

घण्टाकर्णः, पुं, (घण्टावत् कर्णौ यस्य ।) शिवगणविशेषः । घेंटु इति ख्यातः । यथा,—

"घण्टाकर्णो गणः श्रीमान् शिवस्यातीववल्लभः ॥"

इति शिवपुराणम् ॥

तस्य पूजाविधिर्यथा,—

"चैत्रे मासि च संपूज्यो घण्टाकर्णो घटात्मकः ।
आरोग्यार्थं क्षुद्दोषमूलं संक्रान्त्यां तत्र कारयेत्॥"

पूजामन्त्रो यथा,—

"घण्टाकर्ण ! महावीर ! सर्व्वव्याधिविनाशन !!
विस्फोटकभये प्राप्ते रक्ष रक्ष महाबल ! ॥"

इति तिथ्यादितत्त्वे रविसंक्रान्तिप्रकरणम् ॥
(वा.श्रीस्यन्दविशेषः । यथा, काशीखण्डे । ३३ । १०५ ।

"इयं हि चित्रघण्टेशी घण्टाकर्णस्वयं ह्रदः ॥")

घण्टापथः, पुं, (घण्टानां उपलक्षणात् घण्टादिवादित्राणां पन्थाः । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अः ।) घण्टोपलक्षितानां हस्त्यादीनां पन्थाः । इति भरतः ॥ ग्रामादौ प्रधानमार्गः । यथा,—

"दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः ॥"

इति चामरव्यम् ।

तत्पर्य्यायः । संसरणम् २ । तत् संसरणं

यदि पुरसम्बन्धि स्यात्तदा उपनिष्करमिति स्यातम् । इत्यमरः । २ । १ । १८ ॥

घण्टापाटलिः, पुं, (घण्टा चासौ पाटलिश्चेति कर्म्मधारयः ।) वृक्षविशेषः । घण्टापारुल इति भाषा ॥ तत्पर्य्यायः । गोलीढः २ भाटलः ३ मोचः ४ सुष्कः ५ । इत्यमरः । २ । ४ । ३६ ॥ गोलिहः ६ घण्टा ७ पाटलिः ८ । इति तट्टीका ॥ चारटः ९ कालसुष्कः १० । इति रत्नमाला ॥ पाटली ११ घण्टाकः १२ भाटः १३ । इति शब्दरत्नावली ॥ तीक्ष्णः १४ घण्टकः १५ । इति रत्नकोषः ॥ मोचकः १६ काष्ठपाटली १७ कालाश्यामली १८ काष्ठस्थली १९ । इति भावप्रकाशः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ मुष्ककशब्दे द्रष्टव्यौ ॥

घण्टाबीजं, क्ली, (घण्टेव बीजमस्य ।) जयपालः । इति राजनिर्घण्टः ॥

घण्टारवा, स्त्री, (घण्टारववत् रवः शब्दोऽस्त्यस्याः । यद्वा, शब्देषु फलेषु घण्टेव रौतीति । रु शब्दे + अच् ।) वृक्षविशेषः । भुनभुनिया इति बनशब्द इति च भाषा ॥ तत्पर्य्यायः । शूकशिम्बिका २ । इत्यमरः । २ । ४ । १०७ ॥ शूकशिम्बी ३ । इति भरतः ॥

घण्टाली, स्त्री, (घण्टां अलति पर्य्याप्नोति शब्देनेत्यर्थः । अल पर्य्याप्तौ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् स्त्रियां ङीप् च । यद्वा घण्टा आली सदृशरी यस्याः शब्दसाद्दश्यात् तथात्वम् ।) कोशातकी । इति राजनिर्घण्टः ॥ झिङा इति भाषा ॥ (घण्टानां आली श्रेणी ।) घण्टाश्रेणी च ॥

घण्टाशब्दं, क्ली, (घण्टायाः शब्द इव शब्दो यस्य ।) कांस्यम् । इति हेमचन्द्रः । ४ । ११५ ॥

घण्टिका, स्त्री, (घण्टा + अल्पार्थे कन् ततष्टाप् अत इत्त्वञ्च । घण्टिका क्षुद्रघण्टा तद्वत् आकृतिरस्त्यस्याः । अर्श आदित्वादच् ।) लम्बिका । तालूद्देशलम्बजिह्वा । इति राजनिर्घण्टो हेमचन्द्रश्च ॥ (गलरोगविशेषः । अस्य स लक्षणचिकित्सितं यथा,—

"तिलपिच्छिलगौल्यादिसेवनात्तद्वदपि ।
नवोद्भेदेन कफजो जायते घण्टिकागदः ॥
जिह्वामूले कण्ठसन्धौ श्वेतरक्तसमुद्भवः ।
तेनास्यस्रोषो जड़ता ज्वरो मन्दश्च जायते ॥
शिरोव्यथा रुचिस्तृष्णा तथास्यजड़ता भवेत् ।
तज्ज्ञेया कण्ठमध्ये तु संपीड्य रक्तग्रन्थिका ॥
परिस्रुतं तथा रक्तं तदा विस्रापणं हितम् ।
वचाच्च मरिचं क्षाराधूमं तत्र निधापयेत् ॥
मर्द्दनं स्यात् कण्ठदेशे तेन ग्रन्थिर्विलीयते ।
धान्यनागरजीरूतवचाव्योषसुक्काः ॥
क्वाथः खेदो घण्टिकाया सुखे गण्डूषधारणम् ।
गले च घण्टिकामार्गे रक्तश्लेष्मविकारजा ॥"

इति घण्टिकारोगः ॥

इति हारीते चिकित्सितस्थाने पञ्चचत्वारिंशत्तमेऽध्याये ॥)

घण्टिनीबीजं, क्ली, (घण्टिनीव बीजं यस्य।) जयपालः। इति राजनिर्घण्टः॥

घण्टः, पुं, (घण्टयति दीप्यते इति। घटि दीप्तौ + "तन्वादेरः।" इति उणादिकोषटीकाधृतसूत्रेण डः।) गजघण्टा। प्रतापः। इत्युणादिकोषः॥

घण्टेश्वरः, पुं, (घण्टानां घण्टाकर्णादिगणविघ्नेषाणां ईश्वरः प्रभुः।) देवताविघ्नेषः। स तु मङ्गलपुत्रः। व्रणदाता च। घेंटु इति भाषा॥ यथा,

"मङ्गलस्य प्रिया मेधा तस्यां घण्टेश्वरो महान्।
व्रणदाता च तेजस्वी विष्णुतुल्यो बभूव ह॥"

इति ब्रह्मवैवर्त्तपुराणम्॥

घण्डः, पुं, (घण्डिति शब्दं कुर्व्वन् इयते उड्डीयते इति। डी नभोगतौ + बाहुलकात् डः।) भ्रमरः। इति संक्षिप्तसारे उणादिवृत्तिः॥

घनं, क्ली, (हन्यते ताड्यते यत् इति। हन् + "मूर्त्तौ घनः।" ३। ३। ७७। इति अप् घनादेशश्च।) कांस्यतालादिकं वाद्यम्। इत्यमरः। २। ७। ४॥ कांस्यतालः करताल इति ख्यातः आदिना काहलादयः। इति सारसुन्दरी॥ मधुमधृतम्। इति मेदिनी। ने। ३॥ लौहः। इति हेमचन्द्रः॥ त्वचम्। इति राजनिर्घण्टः॥

घनः, पुं, (घनति दीप्यते इति। घन दीप्तौ + अच्।) मेघः। (यथा, महाभारते। १। १३७। २४।

"ततः खेऽहार्द्दरिहयं दृष्ट्वा रङ्गावलोकिनम्।
भास्करोऽप्यनयन्नाशं समीपोपगतान् घनान्॥")

मुस्ता। ओषः। दार्ढ्यं। विस्तारः। (हन्यते वध्यतेऽनेन। हन् + "मूर्त्तौ घनः।" ३। ३। ७७। इति अप् घनादेशश्च।) लौहमुद्गरः। इति मेदिनी। ने। ३॥ (यथा, भारविः। १८।१।

"धनुरास्य सकाणधिज्यकरः
प्रतिजघान घनैरिव सृष्टिभिः॥")

शरीरम्। कफः। अभ्रकम्। इति राजनिर्घण्टः॥ सजातीयाङ्कचयस्य पूरणम्। यथा,

"समस्त्रिघातश्च घनः प्रदिष्टः
स्याद्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः।
आदिर्विनिघ्नस्तत आदिवर्ग-
स्त्यान्त्यात्ततोऽर्थादिघनश्च सर्व्वे॥"

इति लीलावती॥

(वेदपाठविशेषः। यथा,—

"जटासुस्ता विपर्य्यस्य घनमाहुर्मनीषिणः॥")

घनः, त्रि, (हन्यते इति। हन् + अप् घनादेशश्च।) निविड़ः। तत्पर्य्यायः। निरन्तरः २ सान्द्रः ३। इत्यमरः। ३। १। ६६॥ (यथा, रघुः। ८। ६१।

"स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज्ज मुनिम्।
तदलङ्घ्यपदं हृदि श्रीकरणं
प्रतियातमिवान्तिकमस्य गुरोः॥")

ह्रस्वः। इति मेदिनी। ने। ४॥ (यथा, रघुः। ११। ११८।

"यच्चकार विवरं शिलाघने
ताड़कोरसि स रामसायकः॥")

पूर्णः। (यथा, महाभारते। १। १३६। २८।

"किंखिदापूर्य्यते व्योम जलधारावनैर्घनैः॥")

सम्पुटः। इति शब्दरत्नावली॥ (निरवकाशः। यथा, पञ्चतन्त्रे। ३। २३६।

"किं गाण्डीवस्फुरगुरुघनास्फालनक्रूरपाणिर्नासील्लीलानटनविलसन् मेखली सव्यसाची॥")

घनकफः, पुं, (घनस्य मेघस्य कफ इव।) करका। इति त्रिकाण्डशेषः॥

घनकालः, पुं, (घनस्य मेघस्य घनप्रधानो वा कालः।) वर्षा ऋतुः। इति शब्दरत्नावली॥

घनगोलकः, पुं, (घनस्य नानावर्णमेघस्य गोलः। स इव कायति प्रकाशते इति। घन + कै + "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः। शुक्लरक्तमेघसादृश्यादस्य तथात्वम्।) संश्लिष्टरजतसुवर्णम्। इति हेमचन्द्रः। ४। ११३॥ मिश्रान सोआ रूपा इति भाषा॥

घनजम्बालः, पुं, (घनः सान्द्रो जम्बालः इति कर्म्मधारयः।) चुलुकः। इति त्रिकाण्डशेषः॥

घनज्वाला, स्त्री, (घनस्य मेघस्य ज्वाला दीप्तिः प्रस्फुरणमित्यर्थः।) मेघदीप्तिः। वज्राग्निः। इति शब्दरत्नावली॥

घनतालः, पुं, (घनतायां निविड़तायां अलति पर्य्याप्नोतीति। अल पर्य्याप्तौ + अच्।) सारङ्गपक्षी। इति जटाधरः॥

घनतोलः, पुं, (घनं मेघं अभिलक्षीकृत्य खसुखं तोलयति ऊर्द्धसुखीभवतीत्यर्थः। तुल उन्माने + अच्।) चातकपक्षी। इति त्रिकाण्डशेषः॥

घनद्रुमः, पुं, (घनः कण्टकाकीर्णत्वान्निविड़ो द्रुमो वृक्षः।) विकङ्कटवृक्षः। इति राजनिर्घण्टः॥

घननाभिः, पुं, (घनस्य मेघस्य नाभिरिर्भाश्रयस्थानमिव। मेघस्य धूमयोनित्वादेव तथात्वम्।) धूमः। इति शब्दरत्नावली॥

घनपत्रः, पुं, (घनानि निविड़ानि पत्राणि यस्य।) पुनर्नवा। इति राजनिर्घण्टः॥

घनपावकः, पुं, (घनेन मेघेन मेघध्वनिनेत्यर्थः। पावक इव। मेघध्वनिश्रवणेन उन्मत्ततयास्य तथात्वम्।) मयूरः। इति शब्दमाला॥

घनफलः, पुं, (घनानि बहूत्पन्नत्वात् निविड़ानि फलानि यस्य।) विकङ्कटवृक्षः। इति राजनिर्घण्टः॥

घनमूलं, क्ली, (घनस्य सजातीयाङ्कचयपूरणस्य मूलम् आद्यम्।) पूरितसजातीयाङ्कचयस्याद्याङ्कः। यथा। नवघनस्य मूलं चयं इत्यादि॥ करणसूत्रं यथा,—

"आद्यं घनस्थानमथाघने द्वे
पुनस्तथान्त्यात् घनतो विशोध्य।
घनं पृथक्स्थं पदमस्य कृत्वा
त्रिघ्ना तदाद्यं विभजेत् फलन्तु॥
प्रन्यस्य शेषत्तृकृतिमन्त्यनिघ्नीं
त्रिघ्नीं त्यजेत्तत्प्रथमात् फलस्य।
घनं तदाद्यात् घनमूलमेवं
पंक्त्या भवेदेवमतः पुनश्च॥"

इति लीलावती॥

घनमूलः, पुं, (घनं दृढं मूलमस्य।) मोरटः। इति राजनिर्घण्टः॥

घनरसः, पुं, (घनः सान्द्रो रसः।) सान्द्रनिर्यासः। (घनो रसो यस्य।) मोरटः। (घनस्य मेघस्य रसः।) जलम्। कर्पूरम्। पीलुपर्णी। सम्यक्सिद्धरसः। इति मेदिनी। से। ५१॥ अजे क्लीवलिङ्गोऽपि। यथा, रत्नकोषे।

"घनरसमन्नं क्षीरं घृतमम्बुतं जीवनं भुवनम्॥"

घनवल्लिका, स्त्री, (घनस्य मेघस्य वल्लिका लता इव।) विद्युत्। इति हारावली। ५८॥

घनवल्ली, स्त्री, (घना घनरसा वल्ली लता।) अम्लतसवा लता। इति राजनिर्घण्टः॥ (घनस्य मेघस्य वल्लीव इति विग्रहे विद्युत्॥)

घनवातः, पुं, (घनो निविड़ो वातो वायुर्यत्र।) नरकभेदः। इति हेमचन्द्रः। ५। २॥

घनवासः, पुं, (घनस्त्वक्क्षीरः वासो गन्धो यस्य।) कुशाग्रः। इति हारावली। ६७॥

घनवाहनः, पुं, (घन इव शुभ्रं वाहनं यस्य। शुभ्रत्वेन वाहनत्वादेवास्य तथात्वम्।) शिवः। इति हेमचन्द्रः। २। १११॥ (घनो मेघः वाहनं यस्य।) इन्द्रः। मेघवाहन इत्यमरदर्शनात्॥

घनश्यामः, त्रि, (घनो मेघस्तद्वत् श्यामः श्यामवर्णः।) निविड़कृष्णवर्णः। मेघतुल्यश्यामवर्णः। योगरूढ़िरयं शब्दः श्रीरामकृष्णयोर्बोधकः। इति कैश्चित् तत्र पुं। यथा, महानाटके।

"अये राम! घनश्याम! तुभ्यामि सुखपङ्कजम्।
यदि जीवामि शोकेन पुनर्द्रक्ष्यामि ते मुखम्॥"

"समानकर्णविन्यस्तस्फुरन्मकरकुण्डलम्।
हेमाम्बरं घनश्यामं श्रीवत्सश्रीनिकेतनम्॥"

इति श्रीभागवतम्॥

घनसारः, पुं, (घनः शुक्लमेघस्तद्वत् शुभ्रः सारो यस्य।) कर्पूरम्। (यथा, सुश्रुते उत्तरतन्त्रे ४७ अध्याये।

"पीनस्तनोरुजघना घनसारदिग्धा-
स्ता एवमार्द्रवसनाः सह संविशेयुः॥"

यथाच महाभागवतपुराणे। ६।

"दिक्कान्ताघनसारचन्दनरसासाराः श्रयन्तां मनः॥")

घनो निविड़ः सारो यस्य।) दक्षिणावर्त्तपारदः। इति मेदिनी रे। २६०॥ वृक्षभेदः। (घनस्य मेघस्य सारः।) जलम्। इति धरणी॥

घनस्कन्धः, पुं, (घनो दृढ़ः स्कन्धो यस्य।) कोशाम्रवृक्षः। इति राजनिर्घण्टः॥

घनस्वनः, पुं, (घनो सुस्ता तद्वत् सुष्ठु अनिति प्राणितीति। अन घञु प्राणने + अच्।) तरुलीयशाकः। इति राजनिर्घण्टः॥ (घनस्य मेघस्य स्वनः।) मेघशब्दश्च॥

घना, स्त्री, (घन + टाप्।) मांसपर्णी। रुद्रजटा। इति राजनिर्घण्टः॥

नाकरः, पुं, (घनानां मेघानामाकरः।) वर्षाकालः। इति शब्दरत्नावली॥

घनाघन:, पुं, (हन्तीति। हन वधे+पचाद्यच्। ततः "हन्तेर्घत्वञ्च।" ३। १। १३४। इत्यस्य वार्त्तिके इति हित्वं आक चाभ्यासस्य।) इन्द्रः। धातुकमरुद्धस्ती। वर्षुकमेघः। इत्यमरः। ३।३। १०६॥ (यथा, राजतरङ्गिण्याम्। ४। ३६५।

"अभीज्ञानि घनाघनव्यवहितोऽप्युल्लाघयत्यंशुमान्
दूरस्थोऽपि पयोधरोऽतिशिशिरस्पर्शं करोत्यातपम्॥")

अन्योन्यघट्टनं इति धरणी॥

घनाघन:, त्रि, निरन्तरः। (हन्तीति। हन्+अच्। "हन्तेर्घत्वञ्च।" इति हित्वं आक् चाभ्यासस्य।) घातुकः। इति हेमचन्द्रः॥ (यथा, ऋग्वेदे। १०। १०३। १।

"आशुः शिशानो वृषभो न भीमो
घनाघनः क्षोभणश्चर्षणीनाम्॥")

घनाघना, स्त्री, (घनाघन+टाप्।) काकमाची। इति शब्दचन्द्रिका॥

घनात्ययः, पुं, (घनानां मेघानामत्ययो नाशो यस्मिन्।) ग्रीष्मकालः। इति हेमचन्द्रः। २। ७२॥ (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये।

"पैत्तिकानां शरीराणामुपशमो हेमन्ते श्लैष्मिकाणां निदाघे वातिकानां घनात्यये स्वभावत एव॥"

"हैमन्तिकं दोषचयं वसन्ते
प्रवाहयन् श्लैष्मिकमभ्रकाले।
घनात्यये वार्षिकमाशु सम्यक्
प्राप्नोति रोगानृतुजान्न जातु॥"

इति चरके शरीरस्थाने द्वितीयेऽध्याये॥)

घनामयः, पुं, (घनो दृढ़ः आमयो यस्मात्।) खर्জ্জুরवृक्षः। इति त्रिकाण्डशेषः॥

घनामलः, पुं, (घनो निविड़ः अमलश्च।) वास्तूकशाकः। इति त्रिकाण्डशेषः॥

घनाश्रयः, पुं, (घनानां मेघानामाश्रयः।) आकाशम्। इति हेमचन्द्रः। २। ७७॥

घनोदधिः, पुं, (घनानां लौहसुद्गराघातसदृशः समुद्र इव। लौहसुद्गरप्रचुरतया एवास्य तथात्वम्।) नरकभेदः। इति हेमचन्द्रः। ५। २॥

नीपलः, पुं, (घनस्य मेघस्य उपलः।) करकः॥ इति हेमचन्द्रः। २। ८०॥ (करकाशब्दे अस्य विवरणं ज्ञातव्यम्॥)

घम्, गतौ। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्।) ओष्ठ्यवर्णयोपधः। घम्बति। इति दुर्गादासः॥

घरट्टः, पुं, (घर घर इति शब्देन अटति भ्राम्यतीति। अट+निपातनात् ह्रस्वे साधुः) पेषणी। इति पुराणम्॥ जाता इति भाषा॥ (यथा, श्रीकण्डचरिते। ६। ४२।

"अरुक्षमतसजघटपलङ्काचङ्कं
बतप्रोक्षस्तृड्डुममाधवभूक्षतानाम्।
मानस्य पद्मलहया सहसैव पेटुं
तत् अटमाजघरट्टविलासलासोत्॥")

घर्घटः, पुं, (घर्घ इत्यस्फुटशब्दं अटति गच्छतीति। अट+अच्। ग्रकन्धादित्वात् साधुः।) मत्स्यविशेषः। इति शब्दरत्नावली॥ टाङ्गरा इति भाषा॥

घर्घरः, पुं, (घर्घरोति अव्यक्तं ध्वनिविशेषं रातीति। रा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) पर्व्वतद्वारम्। द्वारम्। उलूकः। नदविशेषः। स्वरभेदे त्रि। इति मेदिनी। रे। १५१॥ ध्वनिः। (यथा, राजतरङ्गिण्याम्। २। १०३।

"चण्डैर्डमरुनिर्घोषैर्घर्घरं श्रुतवान् ध्वनिम्॥")

हास्यम्। इति हेमचन्द्रः। २। २१०॥ तुषानलः। इति भूरिप्रयोगः॥

घर्घरकः, पुं, (घर्घर एव। स्वार्थे कन्।) घर्घरनदः। यथा, राजनिर्घण्टे।

"ग्रीष्मे घर्घरके जलन्तु रुचिदं सन्तापशोषापहं
पथ्यं वह्निकरं तथाच बलदं चीणाङ्गदृद्धिप्रदं॥"

घर्घरा, स्त्री, (घर्घ इत्यव्यक्तशब्दं रातीति। रा+कः स्त्रियां टाप्।) क्षुद्रघण्टिका। वीणाभेदः। इति मेदिनी। रे। १५१॥ (गङ्गा। यथा, काशीखण्डे। २६। ५७।

"घुरघुरा पिङ्गरतनुर्घर्घरा घर्घरस्वना॥")

घर्घरिका, स्त्री, (घर्घरेव। स्वार्थे कन्। अत इत्वञ्च।) क्षुद्रघण्टिका। भृष्टधान्यम्। नदीविशेषः। वादित्रदण्डः। इति हेमचन्द्रः॥ वाद्यप्रभेदः। इति विश्वः॥

घर्घुर्घा, स्त्री, (घुर ध्वनौ+क्विप्। घुर्घुरा ध्वनिविशेषेण गायतीति। गै+डः। निपातनात् गस्य घत्वम्।) यमकीटः। इति रत्नमाला॥ घुरघुरिया इति भाषा॥

घर्ब्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) रेफोपधः। घर्ब्बति। इति दुर्गादासः॥

घर्म्मः, पुं, (घरति क्षरति अङ्गादिति। घृ क्षरणे+"घर्म्मः।" उणां। १। १४८। इति मनप्रत्ययेन निपातनात् साधुः।) अम्बारि। अङ्गजलम्। घाम इति भाषा॥ (यथा, आर्य्यासप्तशत्याम्। २१२।

"दयितस्यांशोन्मीलित-
घर्म्मजलस्खलितचरणनखलाक्षे॥")

तत्पर्य्यायः। निदाघः २ स्वेदः ३। इत्यमरः। १। ७। ३३॥ सिग्रः ४। इति जटाधरः॥ सवणम् ५। इति शब्दरत्नावली॥ अस्य निदानं स्वेदशब्दे द्रष्टव्यम्॥ (घरति क्षरति स्वेदः शरीरादनेन इति। घृ+करणे मन्।) आतपः। ग्रीष्मः। ऊष्मा। इति हेमचन्द्रः॥ (यथा, सुश्रुते उत्तरतन्त्रे ६४ अध्याये।

"सरांसि सरितो वापि वनानि रुचिराणि च।
चन्दनानि परार्घ्याणि स्रजः सकमलोत्पलाः॥
तालवृन्तानिलाहारांस्तथाशीतगृहाणि च।
घर्म्मकाले निषेवेत वासांसि सुलघूनि च॥")

घर्म्मदोषः, पुं, (घर्म्मस्य स्वेदस्य दोषः विकृतिः।) स्वेदस्य विकारः। तस्यौषधं यथा,—

"मन्दोष्णकोष्णनीवारचर्म्मसु कनकस्य च।
तैनोदकैस्तदेहस्य हरेदूष्मप्रसादिकाम्॥
त्वग्दोषश्चैव देवेन्द्र! घर्म्मदोषश्च नश्यति॥"

इति गारुड़े १६४ अध्यायः॥

घर्म्मविचर्चिका, स्त्री. (घर्म्मजनिता स्वेदोत्पन्ना विचर्चिका। घर्म्मो ग्रीष्मकालस्तज्जनिता विचर्चिका वा।) घर्म्मविचर्चा। घर्म्मचर्चिका। घामाचि इति भाषा॥ यथा, प्रयोगरत्ने।

"स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा।
ततः स्वेदः प्रवर्त्तेत दौर्गन्ध्यं घर्म्मचर्चिका॥
राजिकाकृतिरुण्णोत्था यतो घर्म्मविचर्चिका॥"

अस्याश्चिकित्सा स्वेदशब्दे द्रष्टव्या॥

घर्म्मान्तः, पुं, (घर्म्मस्य निदाघकालस्य अन्तोऽत्र।) वर्षाकालः। इति राजनिर्घण्टः॥ (यथा, मेघदूते। १०६।

"घर्म्मान्ते मे विगणय कथं वासराणि व्रजेयुः॥")

वर्षाकालविवरणेऽस्य विशेषो बोध्यः॥)

घर्म्मान्तकासुकी, स्त्री, (घर्म्मान्ते वर्षासु कासुकी कामार्त्ता। वर्षाकाले हि अस्याः मैथुनस्पृहा भवतीति प्रसिद्धिः। यद्वा, घर्म्मान्तं वर्षाकालं कामयते इति। कम्+उकञ् स्त्रियां ङीप्।) बलाका। इति राजनिर्घण्टः॥

घर्षणं, क्ली, (घृष्+भावे ल्युट्।) घर्षः। घषा इति भाषा॥ यथाह, माधवकरः।

"घर्षणादभिघाताद्वा यदङ्गं विगतत्वचम्।
उपासावान्वितं तद्धि घृष्टमित्यभिधीयते॥"

घर्षणालः, पुं, (घर्षणे घर्षणाय वा अलति पर्य्याप्नोति। अल्+अच्।) श्लीपदरोगः। इति त्रिकाण्डशेषः॥ लोड़ा इति भाषा॥

घर्षणी, स्त्री, (घृष्यते इति। घृष+कर्म्मणि ल्युट्। टित्त्वात् ङीप् च।) हरिद्रा। इति त्रिकाण्डशेषः॥ (विवृतिरस्या हरिद्राशब्दे ज्ञातव्या॥)

घष, इ ङ चरे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) आद्यस्वरी। इ, घंषते। ङ, घंषते। अयं कैश्चिन्न मन्यते। इति दुर्गादासः॥

घस, इ ङ चरणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) इ, घंस्यते। ङ, घंसते। अयं कैश्चिन्न मन्यते। इति दुर्गादासः॥

घस, ल औ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वां-परं सकं-अनिट्।) ल, अघसत्। औ, घस्ता। इति दुर्गादासः॥

घसिः, पुं. (घस् भक्षणे+भावे इन्।) आहारः। इति हेमचन्द्रः॥ (तथाच, वैदिके।

"घसिना मे मासं एकया ऊर्ह्या मे नाभिः सीद॥")

घस्मरः, त्रि, (घस+"हृघस्यदः क्मरच्।" ३। २। १६०। इति क्मरच्।) अग्रगः। भक्षकः। इत्यमरः। ३। १। २०॥ (यथा, महाभारते। ८। ४०। ३६।

"गौर्य्यो हृष्टा निर्हीकाः मद्रिकाः कम्बलावृताः।
घस्मरा नष्टशौचाश्च प्राय इत्यनुशुश्रुम॥")

घस्रं, क्ली, (घस्+रक्।) कुङ्कुमम्। इति त्रिकाण्डशेषः॥

घसः, पुं, (घसति भक्षयति अन्धकारम्। घस्+रक्।) दिनम्। हिंसे त्रि। इति मेदिनी। रे। ३०॥ (यथा, पञ्चदश्याम्। ६। १८५।
"रात्रिघसौ सुप्तिबोधायुन्मीलननिमीलने।
तूष्णीम्भावमनोराज्ये इव स्थिलयाविमौ॥")

घा, स्त्री (हन्+डः। हस्य घत्वम्। टाप् च।) काञ्ची। घातः। इति मेदिनी। घे। १॥

घाटः, पुं (घटते सङ्कुचते शिरोऽनेन देहे इत्यर्थः। घट्+करणे घञ्।) घाटा। इति शब्दरत्नावली॥ (घाटा अस्यास्तीति। "अर्श आदिभ्योऽच्।" ५। २। २७। इत्यच्। घाटाविशिष्टे, त्रि। इति व्युत्पत्तिलब्धोऽर्थः॥)

घाटा, स्त्री. (घाटा विद्यतेऽस्मिन् इति घाटः ततः टाप्।) ग्रीवापश्चाद्भागः। घाड़ इति भाषा॥ तत्पर्य्यायः। अवटुः २ ककाटिका ३। इत्यमरः॥ शिरःपश्चात्सन्धिः। इति राजनिर्घण्टः॥ घाटः ५ ककाटी ६। इति शब्दरत्नावली॥ घाटिका ७। इति शब्दचन्द्रिका॥

("दोषास्तु दुष्टास्त्रय एवमन्यां
संपीड्य घाटां सुरुजां सुतीव्राम्॥"
इत्युत्तरतन्त्रे पञ्चविंशेऽध्याये सुश्रुतेनोक्तम्॥)

घाटिका, स्त्री, (घाटा+स्वार्थे कन्। टापि अत इत्वञ्च।) घाटा। इति शब्दचन्द्रिका॥ (यथा, पञ्चतन्त्रे गद्यदत्तप्रकरणे। ४। २५। "अथ कूपमासाद्यारघट्टघाटिकामार्गेण सर्पस्तेनात्मना स्वालयं नीतः॥")

घाण्टिकः, पुं, (घण्टया चरतीति। चरतीति ठक्।) यो बहुभिर्मिलित्वा स्तुतिं पठति सः। यो देवताद्यर्थे घण्टाघातेन शंसति स आवणाख्यः। इति स्वामी। इति सारसुन्दरी॥ (यदुक्तम्। "राज्ञः प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः।") तत्पर्य्यायः। घाटिकः २। इति भरतः॥ चाक्रिकः ३। इत्यमरः। २। ८। ६७॥ अन्यच्च। "मिलिता बहवो ये तु भवेयुः स्तुतिकारकाः। चाक्रिकास्ते निगदिताश्चक्रिका अपि कुत्रचित्॥ घण्टावादस्तावका ये घाण्टिका घण्टिकाश्च ते।"
इति शब्दरत्नावली॥
धुस्तूरटङ्कः। इति हारावली। १०७॥

घातः, पुं, (हन्+करणभावादौ घञ्। "हनस्तोऽचिण्णलोः।" ७। ३। ३२। इति हन्तेस्तकारोऽन्तादेशः। "हो हन्तेर्ञ्णिन्नेषु।" ७। ३। ५४। इति कुत्वञ्च।) काष्ठः। प्रहारः। इति मेदिनी। ते। १७॥ (यथा, गोः रामायणे। ६। ८८। २४।
"सुहृद्भिः पार्ष्णिघातेश्च बाहुघातेश्च गोभने।
घोरैर्जानुप्रहारैश्च नयनाञ्चनपीड़नैः॥")
अङ्गपूरणम्। यथा। "समत्रिघातश्च घनः प्रदिष्टः।" इति लीलावती॥ (वधः। यथा-पञ्चतन्त्रे। १। ३१२।
"यदि शत्रुमपि प्राप्तं विश्वस्तमकृतोभयम्।
यो हन्यात् तस्य पापं स्याच्छरणागतघातजम्॥"

लुण्ठनम्। यथा, मनुः। ६। २७४।
"ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने॥"
"ग्रामघाते ग्रामलुण्ठने तस्करादिभिः।" इति कुल्लूकभट्टः॥ द्रव्याद्युत्खातः हानिर्वा। यथा, याज्ञवल्क्यः। २। १६२।
"माषानष्टौ तु महिषी शूरघातस्य कारिणी॥"
भङ्गः। उच्छेदादिर्वा। यथा, पञ्चतन्त्रे। १। सञ्जीवककथायाम्। "प्रोवाच भो शृणु भागे अयुक्तं मया पापेन कृतं सञ्जीवकं आपादयता यस्माद् विश्वासघातादन्यन्नास्ति पापतरम्॥")

घातकः, त्रि, (हन्तीति। हन्+ण्वुल्। णितितान्तादेशे कृत्वम्।) हननकर्त्ता। यथा,—
"गौरीमाधवयोर्भक्ता राधिका शिवसन्निधौ।
इन्दुः कुमुदहन्ता च सूर्य्यः कमलघातकः॥"
इति विदग्धमुखमण्डनम्॥
(तथा च मनुः। ५। ५१।
"संस्कर्त्ता चोपहर्त्ता च खादकश्चेतिघातकाः॥")

घातनं, क्ली, (हन्+णिच्+भावे ल्युट्।) हननम्। वधः। यज्ञार्थपशुवधः। इति शब्दरत्नावली॥ (यथा, महाभारते। २। ४४। ४०।
"पशुवद्घातनं वा मे दहनं वा कटाग्निना॥")

घातनः, त्रि, (हन्ति मारयतीति। हन्+कर्त्तरि ल्युः। स्वार्थे णिच्।) वधकर्त्ता। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (कैश्चित्तु एतस्य प्रामादिकत्वमुक्तम्। "हन्तेर्युन्नाद्यन्तयोर्धत्वतत्वे।" ५। ४२। इत्युणादिसूत्रेण हन्तेर्युनिक्ते आद्यन्तयोर्धत्वतत्वे घतनः। इत्युक्तत्वात्। अतः सुधीभिश्चिन्त्यम्।)

घातिः, पुं, (हन्+इण्।) पक्षिबन्धनम्। इत्युणादिकोषः॥ प्रहरणम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

घातिपक्षी, [न्] पुं, (घातिः घातकः पक्षीति कर्म्मधारयः।) श्येनपक्षी। इति हारावली। ८६॥

घातुकः, त्रि, (हन्तीति। हन्+"लषपतपदस्थाभूवृषहनकमगमशभ्य उकञ्।" ३। २। १५४। इति उकञ्।) हिंसः। क्रूरः। इत्यमरः। ३। १। ४७॥ (यथा, अथर्ब्ववेदे। १२। ४। ७।
"ततः किशोरा म्रियन्ते वत्सांश्च घातुको वृकः॥")

घात्यं, त्रि, (हन्यतेऽसौ हन्तुमर्हो य इत्यर्थः। हन्+ण्यत्।) हननयोग्यम्। इति व्याकरणम्॥ (यथा, पञ्चतन्त्रे। ३। २२८। "ततो मम सुखघात्या सञ्जाता॥") [हेमचन्द्रः॥

घारः, पुं, (घृ सेचने+घञ्।) सेचनम्। इति

घार्त्तिकः, पुं, (घृतेन निर्वृत्तः। इति ठञ्।) घृतपूरः। इति हेमचन्द्रः॥ (घृतसंयुक्ते त्रि। यथा, पञ्चतन्त्रे। ५। ३५॥ "अन्यस्य घार्त्तिकभोजनं दत्तम्॥")

घासः, पुं, (घस्यतेऽसौ पशुभिरित्यर्थः। घस्+कर्म्मणि घञ्।) गवाद्यदनीयतृणविशेषः। तत्पर्य्यायः। यवसम् २। इत्यमरः। २। ५। १६७॥ यवसः ३ जवसः ४। इति भरतः॥ यवासम् ५। इति शब्दरत्नावली॥ (यथा, पञ्चतन्त्रे। ४। ५३।

घासिः, पुं, (घसति भक्षयति इयमिति। घस+"जनिघसिभ्यामिण्।" उणां ४। १३० इति इण्।) अग्निः। इति त्रिकाण्डशेषः॥ (यथा, ऋग्वेदे। १। १६२। १४। [देवेष्वस्तु॥")
"यच्च पपौ यच्च घासिं जघास सर्व्वा ताते अपि घिण, इ ङ ग्रहणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) इ, घिस्रते। ङ, घिस्रते। जेघिस्रते। इति दुर्गादासः॥

घु, ङ ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-अनिट्।) ङ, घवते। इति दुर्गादासः॥

घुः, पुं, (घुङ् ध्वनौ+भावे बाहुलकात् डुः।) ध्वनिः। इति जटाधरः॥

घुट, ङ ल्ल परिवर्त्ते। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) परिवर्त्तो गतवतः प्रत्यागमनं विनिमयो वा। ङ, घोटते नदी। ल्ल, अघुटत्। इति दुर्गादासः॥ (यथा, कविरहस्ये १४६।
"यस्य आघोटते दक्षो गाढतार्थः कृतक्षण॥")

घुट, ग्रि प्रतिहतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्रि, घुटति अघुटीत् शत्रुं शूरः। जुघोट। इति दुर्गादासः॥

घुटः, पुं, (घुट् प्रतिहतौ+संज्ञायां अच्।) चरणग्रन्थिः। इति हेमचन्द्रः॥ [कोषः॥

घुटिः, स्त्री, (घुट+इन्।) गुल्फः। इति द्विरूपघुटिकः, पुं, (घुट्+ठन्।) गुल्फः। इति हेमचन्द्रः॥ [मरः। २। ६। ७२॥

घुटिका, स्त्री, (घुटिक+टाप्।) गुल्फः। इत्यघुटी, स्त्री, (घुट्+इन्। "ऋदिकारान्तादक्तिनः।" इति ङीष्।) गुल्फः। इति द्विरूपकोषः॥

घुड, ग्रि आघाते। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्रि, घुड़ति अघुड़ीत्। इति दुर्गादासः॥

घुण, ङ भ्रमणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, घोणते। इति दुर्गादासः॥

घुण, इ ङ ग्रहणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) इ, घुण्यते। ङ, घुणते जोघुण्यते। इति दुर्गादासः॥

घूण, ग्र भ्रमणे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) ग्र, घुणति घोणिता। इति दुर्गादासः॥

घुणः, पुं, (घुणति काष्ठं भक्षयन् काष्ठाभ्यन्तरेऽभ्यतीति। घुण भ्रमणे+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) काष्ठकृमिः। (यथा, सुश्रुते सूत्रस्थाने। ६ अध्याये। "घुणोपहतकाष्ठवेणुनलनालीशुष्कालाबुमृखेल्वेष्यस्य॥") तत्पर्य्यायः। काष्ठवेधकः २। इति लिङ्गादिसंग्रहटीकायां भरतः॥ काष्ठलेखकः ३। इति भूरिप्रयोगः॥

घुणवल्लभा, स्त्री, (घुणः वल्लभो यस्याः। घुणस्य वल्लभा वा।) अतिविषा। इति भावप्रकाशः॥ (व्यवहारोऽस्या यत्र तद्यथा,—
"कुटजत्वक्फलं तार्क्ष्यं माक्षिकं घुणवल्लभाम्।
पिबेत्तण्डुलतोयेन————————"
इति वाभटे चिकित्सास्थानेऽष्टमेऽध्याये॥)

घुष्टः, पुं, (घुष्यते परिहृत्यतेऽनेन। घुट+ बाहुलकात् कः निपातनात् मुम् च।) गुल्फः। इति शब्दमाला॥ [हेमचन्द्रः॥

घुष्टकः, पुं, (घुष्ट+स्वार्थे कन्।) गुल्फः। इति

घुष्टिकं, क्ली, (घुष्ट इव कायतीति। के+ कः।) वनस्थकरीषम्। इति शब्दचन्द्रिका॥ विलघुंटे इति भाषा॥ [शब्दरत्नावली॥

घुस्कः, पुं, (घोषते भाष्यतीति।) भ्रमरः। इत्यु-

घुर, भ्र भीमार्थौ। भीमार्थे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) भीमो भयानकरस-स्तस्य अर्थो निमित्तं हेतुरिति यावत् भीमार्थः। भ्र, घुरति आप्तो मनुष्यान्यां भयहेतुर्भवतीत्यर्थः। घुर भीमार्थोऽयमन्द्योरिति प्राचः। आर्षं इति शब्दविशेषवमिति रमानाथः। घुरत्यर्त्ते च कुरते इति। शब्दार्णवतन्त्रौ भट्टमल्लः। घोरिता। इति दुर्गादासः॥

घुर्घुरः, पुं, (घुरति मनुष्यान्यां भयहेतुर्भवतीति। घुर्+किप्। ततः घुरो भयानकात् अन्योरपि घुरः भयानकः। एतद्ग्रन्थेन प्रायशो ध्वनु-सम्भवादेव तथात्वम्।) कीटविशेषः। घुर-घुरिया इति भाषा॥ तत्पर्य्यायः। यमकीटः२। इति त्रिकाण्डशेषः॥ घर्घुर्घा ३। इति रत्न-माला॥ (शूकरशब्दः। इति चिन्तामणिः॥)

घुर्घुरी, स्त्री, (घुर्घुरः शूकरशब्दतद्यक्तशब्दः सोऽस्या अस्तीति। घुर्घुर+"अर्शं आदिभ्यो ऽच्।" ५। २। १२७। इत्यच्। ततो गौरा-दित्वात् ङीष्।) जलजन्तुविशेषः। तत्पर्य्यायः। शुत्किरा २। इति त्रिकाण्डशेषः॥

घुलघुः, पुं, गवेधुका। इति रत्नमाला॥ गड़-गड़ इति भाषा॥

घुलघुलारवः, पुं, (घुल् घुल् इत्यव्यक्तमारौतीति। आ+रु+अच्।) पारावतभेदः। इति राज-निर्घण्टः॥

घुष, इ ङ घूषे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) घूषः कान्तिश्चेति। इ, घुष्यते। ङ, घुषते चन्दनं गात्रम्। इति दुर्गा-दासः॥

घुष, इर् वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इर्, अघुषत् अघोषीत्। इति दुर्गादासः॥

घुष, कि इर् शब्दे। शब्दे इति यावत्। विशब्दे। इति कविकल्पद्रुमः॥ (तुदां पक्षे भ्वां-परं-सकं-सेट्।) विशब्दः इह कथनं आविष्करणं नाना-शब्दकरणं वा आद्यपूर्व्वकः सततशब्दने। इति तट्टीका॥ कि, घोषयति घोषति गूढमर्थमभि-व्यक्तः। नानाशब्दे वाद्यं घोषयति द्वारि यस्य कश्चिदुपद्रुतः। इति हलायुधः। इर्, अघुषत् अघोषीत्। घुष किरत्युवर्णते। कि, आघोषयति आघोषति शोकार्त्तः सततं क्रन्दतीत्यर्थः। इति दुर्गादासः॥

घुषितं, त्रि, (घुष्यते स्म इति। घुष विशब्दे+ क्तः। "घुषिरविशब्दने।" ७। २। २३। इति कथनात् अच इट्।) ग्रन्थितम्। इति सुपद्म व्याकरणम्॥

घुसृं, त्रि, (घुष्यते स्म इति। घुष+"सुघ्वार-स्वान्तंध्वान्तेति" सुग्धबोधसूत्रात् निपातनात् साधुः।) ग्रन्थितम्। इति सुग्धबोधम्॥ (यथा, हरिवंशे। २०। ८६।

"हंससारसघुसृेषु कारण्डवरतेषु च॥"

ग्रन्थितान्यर्थे तु "घुषिरविशब्दने।" ७। २। २३। इति नेट्। "घुसृा रज्जुः।" इति सिद्धान्त-कौमुदी॥)

घुस्रणं, क्ली, (घुष्यते स्रूयते इति भावः। घुष+ बाहुलकात् ऋणक्। पृषोदरादित्वात् साधुः। यद्वा घुंष्यते कान्तिविशिष्टं क्रियते शरीर-मनेन। घुषि धूषि+ऋणक्।) कुङ्कुमम्। इति त्रिकाण्डशेषः॥ (यथा, काशीखण्डे। २६। ५७।

"घुस्रणापिञ्जरतनुर्घर्घरा घर्घरस्वना॥"

यथा च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"चन्दनं घुस्रणोपेतं रुगनाभिसमायुतम्।
न शीतं न च वा शीतं वर्षाकाले तदिष्यते॥"

इति घुस्रणकुङ्कुमम्॥)

घूकः, पुं, (घू इत्यव्यक्तशब्देन कायति शब्दायते इति। घू+कै+कः।) उलूकः। इति हेम-चन्द्रः। ४। ३६॥

घूकारिः, पुं, (घूकस्य पेचकस्य अरिः शत्रुः।) काकः। इति हेमचन्द्रः। ४। ३८८॥

घूकावासः, पुं, (घूकानां पेचकानां आवासो वास-स्थानम्।) प्राखोटवृक्षः। इति राजनिर्घण्टः॥

घूर, य ङ ईं हिंसाग्लान्योः। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-अकं च-सेट्।) दीर्घो। य ङ, घूर्य्यते। ईं, घूर्णः। ग्लानिर्मरणवद्वयो-भावः। इति दुर्गादासः॥

घूर्ण, भ्रू भ्रमणे। इति कविकल्पद्रुमः॥ (तुदां-उभं-अकं-सेट्।) भ्रू, घूर्णति घूर्णते। भ्रू, घूर्णती घूर्णन्ती। इति दुर्गादासः॥ (यथा, गोः रामायणे। ४। १५। २५।

"स तु वाली रणगतः सालताड़नविह्वलः।
गुरुभारसमाक्रान्तश्चचाल च घुघूर्ण च॥")

घूर्णः, पुं, (घूर्णति स्रोतःपत्तिभूमौ घूर्ण्यकारेण सम्भवतीति। घूर्ण+अच्। घूर्ण्यकारेण जाय-मानत्वात् तथात्वम्।) शैलसुन्दरकः। इति शब्दचन्द्रिका॥ गीमा इति भाषा॥ (घूर्ण+ भावे अच्।) भ्रमणञ्च॥ (विघूर्णते, त्रि। यथा, भागवते। ७। २। २।

"आह चेदं रुषा घूर्णः संदष्टश्छदपुटः॥")

घूर्णनं, क्ली, (घूर्ण+भावे ल्युट्।) भ्रमणम्। तत्-पर्य्यायः। चक्रावर्त्तः २ भ्रमः ३ भ्रान्तिः ४ भ्रमिः ५ घूर्णिः ६। इति हेमचन्द्रः। ६।१५५॥ (यथा, गीतगोविन्दे। ६। ११।

"अनमीलनमौलिघूर्णनचलन्मन्दारविसंसन-स्रस्ताकर्षणदृष्टिहर्षवलमद्दामन्नः कुरङ्गी-दृशाम्॥")

घूर्णायमानः, त्रि, (घूर्ण इवाचरतीति। घूर्ण+ क्यङ्। ततो घूर्णायते इति। घूर्णाय+शानच्।) भ्राम्यमाणः। यथा, कलापधातुव्याख्यासारे।

"इन्द्रादेरखिलार्थसाधनपरैः संस्तूयमानं मुहुः
पीतोन्मत्तफलातुलालसतया घूर्णायमानेक्षणम्॥"

घूर्णिः, स्त्री, (घूर्ण+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति भावे इन्।) घूर्णनम्। इति हेमचन्द्रः। ६। १५५॥

घूर्णितः, त्रि, (घूर्णते स्म इति। घूर्ण+क्तः।) भ्रमितः। तत्पर्य्यायः। प्रचलायितः २। इत्य-मरः। ३। १। ३२॥ (यथा, कथासरित्-सागरे। २४। १।

"मद्घूर्णितवक्त्रोत्थैः सिन्दूरैरुद्धरयन् महीम्।
हेरम्बः पातु वो विघ्नान् स्वतेजोभिर्दहन्निव॥")

घूर्ण्यमानः, त्रि, (घूर्ण्यते इति। घूर्ण+णिच्+कर्म्मणि शानच्।) भ्राम्यमाणः। यथा, महानाटके।

"भो दृष्टाः पर्व्वतस्था बहुकुसुमयुता वायुना घूर्ण्यमानाः॥"

अग्निजन्ते तु घूर्णमाण इत्येव स्यात्। यथा, हरिवंशे ४८। ३६।

"भ्रमन्तं घूर्णमानञ्च स्तुतिं देवाः प्रचक्रिरे॥")

घृ, सेके। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) घरति तरुं मेघः। इति दुर्गादासः॥

घृ, क सेके। क्षरणे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-अनिट्।) क, घारयति। इति दुर्गा-दासः॥

घृ, र लि भासि। सेके। इति कविकल्पद्रुमः॥ (क्रयां-परं-अकं-अनिट्।) र वैदिकः। लि, जघर्त्ति घृतं दीप्यते चरति वेत्यर्थः। इति दुर्गा-दासः॥

घृण, इ ङ गर्हणे। कविकल्पद्रुमः॥ (भ्वां आत्मं-सकं-सेट्।) इ, घृणते। ङ, घृणते जरी-घृण्यते। इति दुर्गादासः॥

घृण, इ ण उ दीप्तौ। इति कविकल्पद्रुमः॥ (तनां-उभं अकं-सेट्। उदित्वात् क्त्वावेट्।) इ ण, घृणोति घर्णति। घृणुते घर्णते। उ, घर्णित्वा घृत्वा। इति दुर्गादासः॥

घृणा, स्त्री, (घ्रियते सिच्यते हृदयमनया।। घृ सेके+बाहुलकात् नक् स्त्रियां टाप्। दयारसेन हि हृदयं सिक्तमिवार्द्रं भवतीति तथात्वम्।) करुणा। (यथा, किरातार्জ্জुनीये। १५। १३।

"मन्दमस्खलितुलतां घृणया सुनिरेष वः।
प्रणुदत्यागतावज्ञं जघनेषु पपूनिव॥" *॥

घ्रियते आच्छाद्यते गुणादिकमनयेति।) जुगुप्सा। तत्पर्य्यायः। अर्त्तनम् २ ऋतीया ३ घृणीया ४ इत्यमरः। ३। २। ३२॥ रौच्यां५ घृणिया ६ घ्रिणीया ७ घृणीया ८। इति तट्टीका॥ (यथा, रघुः। ११। १७।

"तां विलोक्य वनितावधे घृणां
पत्रिणा सह समोच राघवः॥")

घृणावासः, पुं, (घृणाया आवासः।) कुष्माण्डः। इति त्रिकाण्डशेषः॥ घृणायुक्ते त्रि॥

घृणिः, पुं, (जघर्त्ति दीप्यते इति। घृ+"घृणि-पृश्निपार्ष्णिचूर्णिभूर्णि।" उणा०। ४। ५२। इति निप्रत्ययेन निपातनात् साधुः।) किरणः। इत्यमरः। १। ३। ३३॥ सूर्य्यः। (घरति सिञ्चतीति। घृ सेके+निः गुणाभावश्च।) जलम्। इति मेदिनी॥ (जघर्त्ति दीप्यते इति व्युत्पत्त्या दीप्तिशालिनि, त्रि। यथा, भागवते। ७। २। ७। "तस्य त्वत्तस्वभावस्य कृष्णेमायावनौकसः॥")

घृतः, पुं क्ली, (जघर्त्ति चरतीति। घृ+"अञ्जि-घृभ्यः क्तः।" उणा०। ३। ८६। इति क्तः।) पञ्चनवनीतम्। घि इति भाषा॥ तत्पर्य्यायः। आज्यम् २ हविः ३ सर्पिः ४। इत्यमरः। २। ९। ५२॥ पवित्रम् ५ नवनीतकम् ६ अन्टतम् ७ अभिधारः ८ होम्यम् ९ आयुः १० तैजसम् ११। इति राजनिर्घण्टः॥ आज्यम् १२। यथा,—

"घृतोऽग्नौ चाज्यमाज्यञ्च सर्पिः स्यादन्टतं हविः।"

इति जटाधरः॥

तस्य गुणाः। वृद्ध्यग्निशुक्रौजोमेदःस्मृतिकफ-कारित्वम्। वातपित्तविषोन्मादरोगग्रोथालक्ष्मी-ज्वरनाशित्वम्। मांसादष्टगुणगुरुत्वञ्च। इति राजवल्लभः॥ रसायनत्वम्। स्वादुत्वम्। चक्षु-र्हितत्वम्। ग्रीतवीर्य्यत्वम्। पापनाशित्वम्। अल्पाभिस्यन्दित्वम्। कान्तितेजोलावण्यस्वरायु-र्हितबलकारित्वम्। पवित्रत्वम्। गुरुत्वम्। उदा-वर्त्तशूलनाहव्रणक्षयवीसर्परक्तनाशित्वम्। स्निग्ध-त्वम्। रूक्षत्वञ्च। इति भावप्रकाशः॥ * ॥ अथ गव्यघृतस्य गुणाः। विशेषेण चक्षुर्हितत्वम्। ग्रीतत्वम्। वातपित्तकफालक्ष्मीपापरक्तोनाशि-त्वम्। शुक्राग्निस्वादुपाकमेधालावण्यकान्त्योज-स्तेजोदृष्टिवयःस्थितिबलायुर्हितकारित्वम्। गुरु-त्वम्। पवित्रत्वम्। सुमङ्गल्यत्वम्। रसायनत्वम्। सुगन्धित्वम्। रोचनत्वम्। चारुत्वम्। सर्व्वा-ज्येषु गुणाधिकत्वञ्च। इति भावप्रकाशः॥ वृद्धिस्मृतिपुष्टिवपुःस्थैर्य्यकारित्वम्। श्रमोपशमन-त्वम्। हृद्यतमत्वम्। बहुगुणत्वञ्च॥*॥ माहिष-घृतगुणाः। उत्तमत्वम्। धृतिसौख्यकान्तिबलवर्द्ध-चक्षुर्हितकारित्वम्। वातश्लेष्मदुर्नामव्रहणी-विकारनाशित्वम्। मन्दानलोद्दीपनत्वम्। नव-गव्यतः परमहृद्यत्वम्। मनोहारित्वञ्च। इति राजनिर्घण्टः॥ स्वादुत्वम्। पित्तरक्तनाशित्वम्। ग्रीतत्वम्। श्लेष्मशुक्रवह्निकारित्वम्। गुरुत्वम्। स्वादुपाकित्वञ्च॥*॥ छागीघृतगुणाः। अग्निचक्षुर्हितबलकारित्वम्। कासश्वासक्षयेषु हितत्वम्। कटुपाकित्वञ्च। इति भाव-प्रकाशः॥ कफनाशित्वम्। इति राज-निर्घण्टः॥*॥ मेषीघृतगुणाः। पित्तमेदस्कारि-त्वम। योनिदोषे ग्रोषे कफे अनिले च ग्रस्त-त्वम्। रूक्षत्वम्। दुर्नामोन्मादनाशित्वञ्च। इति राजवल्लभः॥ पाके लघुत्वम्। पित्तकोपकारि-त्वम्। ग्रोषे कम्पे च हितत्वञ्च॥*॥ मेढ़क-घृतगुणाः। अतिगौरवात् सुकुमारदेहिवर्ण्य-

त्वम्। वृद्धिपाटवहरत्वम्। बलकारित्वम्। कृमि वधूको विसगन्धकारित्वञ्च॥*॥ हस्तिनीघृत-गुणाः। कफपित्तविषक्रमिनाशित्वम्। कषाय-त्वम्। लघुत्वम्। विदम्भित्वम्। तिक्तत्वम्। वह्निकरत्वञ्च॥*॥ अश्वाघृतगुणाः। कटु-त्वम्। मधुरत्वम्। कषायत्वम्। ग्रथदग्निदीप-नत्वम्। बाल्यप्रदत्वम्। मूर्च्छाहारित्वम्। गुरु-त्वञ्च॥*॥ गर्दभीघृतगुणाः। अग्निबलकारि-त्वम्। मूत्रदोषकफनाशित्वम्। पाके लघुत्वम्। कषायत्वम्। उष्णवीर्य्यत्वञ्च॥*॥ उष्ट्री-घृतगुणाः। मधुरत्वम्। विपाके कटुत्वम्। ग्रीतलत्वम्। कुष्ठकृमिविषवातकफगुल्मोदर-नाशित्वञ्च। इति राजनिर्घण्टः॥ ग्रोधनाशि-त्वम्। इति राजवल्लभः॥*॥ नारीघृतगुणाः। चक्षुर्हितरुचिकारित्वम्। पथ्यत्वम्। मन्दाग्नि-दीपनत्वम्। पाके लघुत्वम्। सर्व्वामयविष-नाशित्वञ्च। इति राजनिर्घण्टः॥ प्रमेहनाशि-त्वम्। इति राजवल्लभः॥*॥ दुग्धभवघृत-गुणाः। ग्राहित्वम्। ग्रीतलत्वम्। नेत्र-रोगकारित्वम्। पित्तदाहास्रमदमूर्च्छाभ्रमा-निलनाशित्वञ्च॥*॥ क्षीरनवदधिजघृतं तदेव हैयङ्गवीनम्। तस्य गुणाः। चक्षुर्हितत्वम्। दीपनत्वम्। रुचिबलकारित्वम्। हृद्यत्वम्। हृद्यत्वम्। विशेषान्ज्वरनाशित्वञ्च॥*॥ वर्षा-दूर्द्धं पुराणस्य तस्य गुणाः। त्रिदोषमूर्च्छाकुष्ठ-विषोन्मादापस्मारतिमिरनाशित्वम्। इति भाव-प्रकाशः॥ मदग्निरःकर्णादिरोगग्रान्तिनाशि-त्वम्। व्रणस्य ग्रोधनत्वम्। रोपणत्वञ्च। आयु-र्वृद्धिग्ररीरदृढ़तासौकुमार्य्यकान्तिस्मृतिबलकारि-त्वम्। बाल्ये तरुणे वार्द्धके चातिबल्यत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥ प्रतिश्यायाम-कासजीर्णज्वरसर्व्वरोगनाशित्वम्। श्रेष्ठत्वम्। धातुसाम्यकारित्वञ्च॥*॥ तस्य लक्षणम्। "उग्यगन्धं पुराणं स्याद्व्यवर्षस्थितम् घृतम्। लाक्षारसनिभं ग्रीतं प्रपुराणमतः परम्। यथा यथा भवेज्जीर्णं गुणवत् स्यात्तथा तथा॥" कांस्यपात्रे दग्धदिनस्थितं घृतं त्याज्यम्। इति राजवल्लभः॥ औषधघटितघृतस्य पूर्व्ववीर्य्यं यन्मासपर्य्यन्तं तिष्ठति। इति वैद्यकपरिभाषा॥ ("ग्रस्तं धीस्मृतिमेधाग्नि-बलायुःशुक्रचक्षुषाम्। बालवृद्धप्रजाकान्ति-सौकुमार्य्यस्वरार्थिनाम्॥ घातक्षीणपरीसर्पग्रस्तानिग्लपितात्मनाम्। वातपित्तविषोन्मादग्रोषालक्ष्मीज्वरापहम्॥ स्नेहनानुत्तमं ग्रीतं वयसः स्थापनं परम्। सहस्रवीर्य्यं विधिभिर्घृतं कर्म्मसहस्रकृत्॥" इति पूर्व्वखण्डे पञ्चमेऽध्याये ग्रार्ङ्गधरेणोक्तम्॥ "विपाके मधुरं हृद्यं वातपित्तकफापहम्। चक्षुष्यं बलकृन्मेध्यं गव्यं सर्पिर्गुणोत्तरम्॥" इति गव्यघृतम्॥ "आजं सन्दीपनीयञ्च चक्षुष्यं बलवर्द्धनम्। कासे श्वासे क्षये ग्रूलैः सु लघुपाके कफापहम्॥" इत्याजघृतम्॥

"वातपित्तसमं सर्व्वं सुग्रीतं माहिषं घृतम्। मधुरं गुरु विदम्भि भवत्यल्पगुणात्मकम्॥" इति माहिषघृतम्॥ "औष्ट्रं कटु घृतं पाके ग्रोषक्रिमिविषापहम्। दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम्॥" इत्यौष्ट्रघृतम्॥ "पाके लघ्वाविकं सर्पिः सर्व्वरोगविषापहम्। वृद्धिं करोति चास्याश्च वाजीकरीशर्करापहम्॥" इत्याविकं घृतम्॥ "वृद्धिं करोति देहाग्नेर्लघु पाके विषापहम्। चक्षुष्यं दीपनञ्चाग्नेर्वातदोषनिवारणम्। वृद्धिं करोति चास्त्रीणां तत्प्रोक्तञ्च विषापहम्॥" इत्यश्वीघृतम्॥ "कफेऽनिले योनिदोषे ग्रोषे पित्तेषु तद्धितम्। सात्म्यं स्त्रीणाञ्च चक्षुष्यं सर्पिः स्यादन्टतोपमम्॥" इति नारीघृतगुणाः॥ "तर्पणं नेत्ररोगघ्नं दाहहृत् पयसो घृतम्॥" इति क्षीरोद्भवघृतम्॥

"दोषापहं वह्निसन्दीपनञ्च
मूर्च्छादिकोन्मादकर्णाक्षिशूले।
ग्रोफार्शसोर्योनिदोषे व्रणेषु
ग्रस्तं सर्पिर्जीर्णमेव गृह्णीत स्यात्॥
उग्यगन्धं पुराणं स्याद्व्यवर्षोषितं घृतम्।
यथा यथा जरां याति गुणवत् स्यात्तु तत्तथा॥"

इति जीर्णघृतगुणाः॥

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये॥

"स्मृतिबुद्ध्यग्निशुक्रौजःकफमेदोविवर्द्धनम्। वातपित्तविषोन्मादग्रोषालक्ष्मीज्वरापहम्॥ सर्व्वस्नेहोत्तमं ग्रीतं मधुरं रसपाकयोः। सहस्रवीर्य्यं विधिभिर्घृतं कर्म्मसहस्रकृत्॥ मदापस्मारमूर्च्छायग्रोफोन्मादज्वरान्। योनिकर्णग्निरःग्रूलं घृतं जीर्णमपोहति॥"

इति चरके सूत्रस्थाने सप्तविंग्रेऽध्याये॥

"विशेषतः पुराणञ्च घृतं तत् प्राययेद्भिषक्। त्रिदोषघ्नं पवित्रत्वात् विशेषाद्ग्रहमोचनम्॥ गुणकर्म्माधिकं स्नानादास्वादात् कटुतिक्तकम्। उग्यगन्धं पुराणं स्याद्व्यवर्षस्थितं घृतम्॥ लाक्षारसनिभं ग्रीतं तद्धि सर्व्वत्रहापहम्। मेधां विरेचनेष्वग्र्यं प्रपुराणमतः परम्॥ नासाध्यं नाम तस्यास्ति यत् स्याद्वर्षग्रतस्थितम्। दृष्टं सूक्ष्मघ्राणात तद्धि सर्व्वत्रहापहम्। अपस्मारग्रहोन्मादवतां ग्रस्तं विशेषतः॥"

इति चरके चिकित्सास्थाने चतुर्थेऽध्याये॥

"घृतन्तु सौम्यं ग्रीतवीर्य्यं मृदुमधुरमल्पाभिष्यन्दि स्नेहनमुदावर्त्तोन्मादापस्मारग्रूलज्वरानाहवात-पित्तप्रग्रमनमग्निदीपनं स्मृतिमतिमेधाकान्ति-स्वरलावण्यसौकुमार्य्यौजस्तेजोबलकरं आयुष्यं हृद्यं मेध्यं वयःस्थापनं गुरु चक्षुष्यं श्लेष्माभि-वर्द्धनं पापालक्ष्मीप्रग्रमनं विषहरं रक्षोघ्नञ्च॥ विपाके मधुरं ग्रीतं वातपित्तविषापहम्। चक्षुष्यमग्र्यं बल्यञ्च गव्यं सर्पिर्गुणोत्तरम्॥ आजं घृतं दीपनीयं चक्षुष्यं बलवर्द्धनम्।

कासे श्वासे क्षये चापि पथ्यं पाके च तल्लघु ॥
मधुरं रक्तपित्तघ्नं गुरुपाके कषायहृत् ।
वातपित्तप्रशमनं सुशीतं माहिषं घृतम् ॥
औष्ट्रं कटुरसं पाके श्लीपकृमिविषापहम् ।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ॥
पाके लघ्वाविकं सर्पिर्नं च पित्तप्रकोपणम् ।
कफेऽनिले योनिदोषे श्लीपे कम्पे च तद्धितम् ॥
पाके लघ्वजावीर्य्यञ्च कषायं कफनाशनम् ।
दीपनं बह्वमूत्रञ्च विद्यादैकशफं घृतम् ॥
चक्षुष्यमग्र्यं स्त्रीवान्तु सर्पिः स्यादन्ततोपमम् ।
दृष्टिं करोति देहाग्र्योर्लघुपाकं विषापहम् ॥
कषायं बहुविष्मूत्रं तिक्तमग्निकरं लघु ।
हन्ति कारेवकं सर्पिः कफकुष्ठविषक्रमीन् ॥".

चीरघृतं पुनः संग्राहि रक्तपित्तश्रमसूर्च्छा-प्रशमनं नेत्ररोगहितञ्च। सर्पिर्मण्डस्तु मधुरः सरो योनिश्रोत्राक्षिशिरसां शूलघ्नो बस्तिनस्याक्षि-प्रपूरणेषूपदिश्यते। सर्पिः पुराणं सरं कटु-विपाकं त्रिदोषापह मूर्च्छामेदोन्माद उदर-ज्वरगरश्लीपापस्मारयोनिश्रोत्राक्षिशिरःशूलघ्नं दीपनं बस्तिनस्याक्षिपूरणेषूपदिश्यते। भवन्ति चात्र।

"पुराणं तिमिरश्वासपीनसज्वरकासजुत्।
मूर्च्छाक्लमविषोन्मादग्रहापस्मारनाशनम् ॥
एकाहजातदोषेव वत्सरातुषितं घृतम्।
रक्षोघ्नं कुम्भसर्पिः स्यात् परतस्तु महाघृतम् ॥
पेयं महाघृतं भूतैः कर्षणं पवनाधिकैः।
बल्यं पवित्रं मेध्यञ्च विषोन्मत्तिमिरापहम् ॥
सर्व्वभूतहरञ्चैव घृतमेतत् प्रशस्यते ॥"

इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥ * ॥

क्ली, सलिलम्। इति मेदिनी। ते। १७॥)

घृतः, त्रि, (जवर्णि दीप्यते क्षरति सिञ्चतीति वा। घृ+"अञ्जिघृसिभ्यः क्तः।" उणा। ३। ८६। क्तः।) दीप्तः। सेचकः। इति शब्दरत्नावली॥

घृतकरञ्जः, पुं, (घृतमिव करञ्जः। घृतवद्रस-वाढुल्यादस्य तथात्वम्।) करञ्जभेदः। चिया-करमूचा इति भाषा॥ तत्पर्य्यायः। प्रकीर्य्यः २ घृतपर्णकः ३ स्निग्धपत्रः ४ तपस्वी५ विषारिः६ विरोचनः ७। अस्य गुणाः। कटुत्वम्। उष्ण-त्वम्। वातव्रणकर्म्मत्वग्दोषविषक्षयार्शोनाशित्वञ्च। इति राजनिर्घण्टः॥

घृतकुमारिका, स्त्री, (घृतेन घृतसदृशरसेन कुमारिका सुन्दरी बालिकेव वा। यद्वा कुमारी कन्येव। यद्वे पालित-त्वात् तथात्वम्।) घृतकुमारी। इति भाव-प्रकाशः॥ (यथास्याः पर्य्यायाः।

"कुमारी ग्रहकन्या च कन्या घृतकुमारिका॥"

गुणाश्च यथा,—

"कुमारी भेदिनी शीता तिक्ता नेत्र्या रसायनी।
मधुरा दीपनी बल्या दृष्या वातविषप्रणुत्॥
गुल्मप्लीहयकृद्वृद्धिकफज्वरहरी हरेत्।
यन्मायिदग्धविस्फोटपित्तरक्तव्रणामयान्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

घृतकुमारी, स्त्री, (घृतेन घृतवद्रसेन कुमारी सुन्दरी। यद्वा कुमारी कन्येव। यद्वे पालित-तया तथात्वम्।) स्वनामख्यातगुल्मः। घिकु-मारी इति भाषा। तत्पर्य्यायः। कुमारी २ तरणिः ३ सहा ४। इति शब्दरत्नावली॥ कन्यका ५ दीर्घपत्रिका ६ स्थलेरुहा ७ स्नुक् ८ कन्या ९ बहुपत्रा १० अमरा ११ अजरा १२ कण्टकप्राहृता १३ वीरा १४ भद्रेष्टा १५ विपु-लासवा १६ ब्रह्मणी १७ तरुणी १८ रामा १९ कपिला २० अम्बुधिस्रवा २१ सुकण्टका २२ स्थूलदला २३ गृहकन्या २४। अस्या गुणाः। हिमत्वम्। तिक्तत्वम्। मदगन्धित्वम्। कफपित्त-कासविषश्वासकुष्ठनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ भेदकत्वम्। नेत्रहित-त्वम्। मधुरत्वम्। दृंहणत्वम्। शुक्रबलकारि-त्वम्। वातगुल्मप्लीहयकृत्स्नुग्वरयन्याग्निदग्ध-विस्फोटपित्तरक्तव्रणरोगनाशित्वञ्च। इति भाव-प्रकाशः॥ (कुमारीशब्दे विवरणमस्या ज्ञेयम्॥)

घृततैलादिकल्पः, पुं, (घृततैलादीनां रोगविना-शकपक्वघृततैलादीनां कल्पो विधिः।) रोग-नाशकनानौषधिपक्वघृततैलादिवर्गः। यथा।

धन्वन्तरिरुवाच।

"घृततैलादि वक्ष्यामि शृणु सुश्रुत! रोगजुत्।
शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला॥
अभया गुडुची चैव वटरूपकवाकुची।
एतैरर्द्धसमैर्भागैर्घृतप्रस्थं विपाचयेत्॥
कल्कार्य्या रसप्रस्थचीरप्रस्थसमन्वितम्।
एतद्ब्राह्मीघृतं नाम श्रुतिमेधाकरं परम्॥१॥
त्रिफलात्रिकटुकबलानिर्गुण्डीनिम्बवासकाः।
पुनर्नवा गुडूची च वृहती च घृतावरी॥
एतैर्घृतं यथालाभं सर्व्वरोगविमर्द्दनम्॥२॥
बलाघृतकषाये तु तैलस्यार्द्धाढकं पचेत्।
कल्कैर्मधुकमञ्जिष्ठाचन्दनोत्पलपद्मकैः।
स्थौलेयापिप्पलीकुष्ठत्वगेलागुरुकेशरैः॥
गन्धाश्मजीवनीयैश्च क्षीराढकसमाश्रितम्।
एतन्मृदुग्निना पक्वं स्थापयेद्रजते शुभे॥
सर्व्ववातविकारांस्तु सर्व्वधात्वन्तराश्रयान्।
तैलमेतत् प्रशमयेद्बलाख्यं राजवल्लभम्॥३॥
घृतावरीरसप्रस्थं क्षीरप्रस्थं तथैव च।
घृतपुष्पा देवदारु मांसी श्लेष्मकं बला॥
चन्दनं तगरं कुष्ठं माला चांशुमती तथा।
एतैः कर्षसमैः कल्कैस्तैलप्रस्थं विपाचयेत्॥
कुब्जवामनपङ्गूनां वधिरत्वञ्चकुब्जिनाम्।
वायुना भग्नगात्राणां ये च सीदन्ति मैथुने॥
जराजर्जरगात्राणामाभाग्यसुखप्रोषिताम्।
त्वगतावापि ये वाताः शिरास्नायुगताश्च ये॥
सर्व्वान् नाशयत्याशु तैरेव स्याद्ध्वजक्षम।
नारायणमिदं तैलं विष्णुनोक्तं रणर्द्दनम्॥४॥
पृथक् तैलं घृतं कुर्य्यात् समस्तैरौषधैः पृथक्।
घृतावर्य्या गुडूच्या वा क्षिरके रोचनायुतः॥
निर्गुण्ड्या वा प्रसारण्याः कण्टकार्य्या रसा-दिभिः॥

वर्य्या वानलया वापि वासकेन फलत्रिकैः।
ब्राह्म्या चैरण्डकेनापि भृङ्गराजेन सुक्षिना॥
मूलत्वक्पत्रमूलेन खदिरेण वटादिभिः।
वटिका मोदको वापि चूर्णं स्यात् सर्व्वरोगजुत्॥
घृतेन मधुना वापि युक्तं खण्डगुडादिभिः।
लवणैः कटुकैर्युक्तं यथालाभञ्च रोगजुत्॥५॥
चित्रककार्षिकत्रिघृतामलप्लक्षयमारकम्।
सुधाञ्च बालागणिकासप्तपर्णसुवर्चिकाम्॥
ज्योतिष्मतीञ्च संभृज्य तैलं धीरो विपाचयेत्।
एतन्निस्यन्दनं तैलं भग्नं दद्याद्गरन्दरे॥
श्लीपनं रोचनञ्चैव सर्व्ववर्णकरं परम्।
चित्रकाद्यं महातैलं सर्व्वरोगप्रभञ्जनम्॥६॥
अजमोदां ससिन्दूरां हरितालं निशाद्वयम्।
क्षारद्वयं फेनयुतमार्द्रकं सरलोद्भवम्।
इन्द्रवारुण्यपामार्गकदलैः कन्दलैः समैः॥
एभिः सर्षपजं तैलमजमूत्रेण योजितम्।
स्नुहिक्षिना पचेदेतदर्कक्षीरेण संयुतम्॥
अजमोदादिकं तैलं गण्डमालां व्यपोहति।
विदग्धस्तु पचेत् पक्वं पक्वञ्चैव विशोधयेत्॥
रोपणं स्नुहभावञ्च तैलेनानेन कारयेत्।
अजमोदादिकं तैलं महावीर्य्यञ्च रोगजुत्॥"७॥

इत्यादिमहापुराणे गारुडे १७८ अध्याये॥

घृतदीधितिः, पुं, (घृतेन प्रदीप्ता दीधितिः किरणं यस्य। घृताहुत्या अग्निवर्द्धनादेव तथात्वम्।) अग्निः। इति त्रिकाण्डशेषः॥

घृतपर्णकः, पुं, (घृतयुक्तमिव पर्णं पत्रं यस्य। कप्।) घृतकरञ्जः। इति राजनिर्घण्टः॥

घृतपूरः, पुं, (घृतेन पूर्य्यते इति। पूरी ङ य पूर्त्तौ+कर्म्मणि अप्। प्रचुरघृतपाच्यत्वादेवास्य तथात्वम्।) पिष्टकविशेषः। यथाह राजवल्लभः।

"महितां समितां चीरनारिकेलघृतादिभिः।
अवगाह्य घृते पक्वा घृतपूरोऽयमुच्यते॥
घृतपूरो गुरुर्वृष्यः कफरक्तकृन्मांसदः।
रक्तपित्तहरो हृद्यः स्वादुः पित्तहरोऽपरः॥"

तत्पर्य्यायः। पिष्टपूरः२ घृतवरः ३ धार्मिकः४। इति हेमचन्द्रः। ३। ६४॥ (अस्य पाक-प्रकारादि यदुक्तं चिन्तामणौ।

"चीरेण महितं चूर्णं गोधूमानां सुगालितम्।
विस्नाय्य सर्पिषा पाच्यं कटाहेऽथ सितान्वितम्।
घृतपूरोऽयमुद्दिष्टः कर्पूरमरिचान्वितः॥"

नारिकेलजो यथा,—

"समिता महिता चीरे नारिकेलघृतार्द्रकैः।
अवगाह्य घृते पाच्या घृतपूरोऽपरः स्मृतः॥"

दुग्धजो यथा,—

"पाकपिण्डीकृतं चीरं शर्कराचूर्णमिश्रितम्।
घृतपूरविनिर्म्माणं कारयेत् खण्डसंयुतम्॥"

घृतालिभवो यथा,—

"सुघृतालिपिष्टं दुग्धन्तु कथितं वस्त्रगालितम्।
खण्डयुक्तं घृते पक्वं घृतपूरो भवेदयम्॥"

कपूरभवो यथा,—

"कर्पूरचूर्णं निःक्षिप्य पाकपिण्डीकृतं पयः।
निर्म्माणं घृतपूराणां शर्करासहितं भवेत्॥"

आम्रजो यथा,—
"पक्वाम्रस्य घृते तप्ते रसखण्डलपिण्डितः।
शुद्धशर्करया योज्यो घृतपूरो यदृच्छया॥
क्षीरमाद्यं स्वरूपं हि खण्डं चूर्णं ततः स्मृतम्।
योजिते यो विशेषोऽत्र तदाख्याखण्डसंज्ञितः॥
घृतपूरो गुरुर्ह्यो हृद्यः पित्तानिलापहः।
सद्यः प्राणप्रदो बल्यः सुरुच्योऽग्निप्रदीपनः॥
षड्रागटकसुखानामप्येवं स्यात् घृतपूरकः।
विचार्य्य वस्तुसंयोग तद्गुणानपि चाहरेत्॥")

घृतपूर्णकः, पुं, (घृतेन पूर्णं इव कायतीति। कै+कः।) करञ्जवृक्षः। इति त्रिकाण्डशेषः॥

घृतमण्डलिका, स्त्री, (घृतस्य मण्डलं समूहः। तदिव निर्य्यासः अस्या अस्यां वा अस्तीति। घृतमण्डल+"अत इनिठनौ।" ५।२।११५। इति ठन्।) हंसपदीवृक्षः। इति राजनिर्घण्टः॥

घृतमण्डा, स्त्री, (घृतमण्डवत् निर्य्यासोऽस्यास्याः। "अर्शं आदिभ्योऽच्।" ५।२।१२७। इत्यच्।) वायसोलीवृक्षः। इति शब्दचन्द्रिका॥ माकड़-हाता इति भाषा॥

घृतवरः, पुं, (घृतमेव वरं बाहुल्यात् प्रधानं यत्र।) घृतपूरः। इति हेमचन्द्रः। ३। ६४॥

घृता, स्त्री, (घृतवत् निर्य्यासोऽस्यास्याः। "अर्शं आदिभ्योऽच्।" ५।२।१२७। इत्यच्।) घृतमण्डा। इति शब्दचन्द्रिका॥

घृताची, स्त्री, (घृतेन अक्तेन अञ्चति क्षिप्रं गच्छतीति। अनुच+क्विप्। नलोपे स्त्रियां ङीप्। सर्व्वथा मनुष्याहारवर्ज्जितानां देवजातीनां स्वभक्षणमयघृतभोजनं महाभारतपुराणादिप्रसिद्धम्।) अप्सरोविशेषः। इति हलायुधः॥ (यथा, विष्णुपुराणे। १।६।१०१।
"घृताचीप्रमुखा ब्रह्मन् नृतुर्ज्जाप्सरोगणाः॥"
गायत्रीस्वरूपा महादेवी। यथा, देवीभागवते। १२।६।४६।
"घनारिमण्डला चूर्णा घृताची घनवेगिनी॥")

घृताचीगर्भसम्भवा, स्त्री, स्थूलेला। इति राज-निर्घण्टः॥

घृताञ्चः, पुं, (घृतस्य आक्ता आक्ता यस्य। यद्वा, घृतेन आञ्चयते सङ्गते स्वगन्धेन इति। आ+अञ्चे+कः।) सरलद्रवः। इति त्रिकाण्डशेषः॥

घृतेली, स्त्री, (घृतेन इलति तद्भक्षणाय तत्र स्थिति-रीति। इल स्थैर्य्ये+अच्। गौरादित्वात् ङीष्।) कीटविशेषः। तैलपायिका इति केचित्॥ तत्-पर्य्यायः। पिङ्गकपिङ्गा २। इति हेमचन्द्रः। ४।२०३॥

घृतोदः, पुं, (घृतमिव स्वादु आक्लत्या शुभ्रं वा उदकं यस्य। उदकस्योदादेशः।) घृतसमुद्रः। यथा, "एवं सुरोदाद्दधिसंज्ञितद्विगुणः समानेन घृतोदेन यथा पूर्व्वः कुशद्वीपः।" इति श्रीभागवते।५।१३॥

घृष, उ संघर्षे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। उदित्वात् क्त्वेट्।) उ, घर्षित्वा घृष्ट्वा। घर्षति चन्दनं लोकः। इति दुर्गादासः॥

घृष्टः, त्रि, (घृष्+कर्म्मणि क्तः।) घर्षितः। घसा इति भाषा॥ यथा। घृष्टो मलयजो गन्धः। इति शुद्धितत्त्वम्॥ (यथाच काशीखण्डे।१६।५६।
"धातुका चूर्णितजला घृष्टपातकसन्ततिः॥")

घृष्टिः, स्त्री, (घृष्यतेऽसौ। घृष्+कर्म्मणि क्तिच्।) वाराही। चामर आलु इति भाषा॥ इत्य-मरः। २।४।१५१॥ (घृष्+भावे क्तिन्।) घर्षणम्। सङ्गः। अपराजिता। (घर्षतीति। घृष्+कर्त्तरि क्तिच्।) शूकरे पुं,। इति मेदिनी। टे। १३॥

घृष्टिला, स्त्री, (घृष्टिं घर्षणं लातीति। ला+कः।) चित्रपर्णिका। पृश्निपर्णी। इति रत्नमाला॥

घृष्विः, पुं स्त्री, (घर्षतीति। घृष संघर्षे+"क्रविघृष्विङ्भ्यः क्वीति।" उणा। ४।५६। इति क्विन्प्रत्ययेन निपातनात् सिद्धः।) शूकरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (भावे+क्विन्। घर्षणम्। यथा, ऋग्वेदे। १।३७।४।
"प्रवः शुक्राय घृष्वये।" "घृष्वये शुक्लघर्षणा-युक्ताय।" इति भाष्यम्॥)

घेचुलिका, स्त्री, क्रौञ्चादनम्। इति रत्नमाला॥ घेँचु इति भाषा॥ (यथा, वैद्यकरत्नमालायाम्। "क्रौञ्चादनं घेचुलिका॥")

घोटः, पुं स्त्री, (घोटते परिवर्त्तते इति। घुट परि-वर्त्तने+पचाद्यच्।) घोटकः। इति राज-निर्घण्टः॥

घोटकः, पुं स्त्री, (घोटते गत्वा प्रत्यागच्छतीति। घुट परिवर्त्तने+ण्वुल्।) पशुविशेषः। घोड़ा इति भाषा॥ तत्पर्य्यायः। पौतिः २ तुरगः ३ तुरङ्गः ४ अश्वः ५ तुरङ्गमः ६ वाजी ७ वाहः८ अर्व्वा ९ गन्धर्व्वः १० हयः ११ सैन्धवः १२ सप्तिः १३। इत्यमरः। २।८।४४॥ घोटः १४ पौती १५ पौथिः १६। इति भरतः॥ तार्क्ष्यः १७ हरिः १८ वीती १९। इति हेमचन्द्रः॥ सुन्नभोजी २० धाराटः २१ जवनः २२ जितवः २३ जवी २४ वाहनश्रेष्ठः २५ श्रीभाता २६ अश्ततसोदरः २७। सुन्नमुक् २८ ग्रालिहोत्रः २९ लक्ष्मीपुत्रः ३० प्रकीर्णकः ३१। इति जटाधरः॥ वातायनः ३२ श्रीपुत्रः ३३ चामरी ३४ हेयी ३५ ग्रालिहोत्री ३६ मरु-द्वयः ३७ वाजस्कन्धः ३८ हरिदाक्तः ३९ एक-ग्रकः ४० किन्नी ४१ ललाममम् ४२ विमानकः ४३॥ इति शब्दरत्नावली॥ अत्यः ४४ वह्निः ४५ दधिक्रा ४६ दधिक्रावा ४७ एतवः ४८ एतग्रः ४९ पेडः ५० दीर्घेडः ५१ उच्चैःश्रवसः ५२ आशुः ५३ ब्रध्नः ५४ अरुषः ५५ मांसलः ५६ अश्वयः ५७ ग्रैनासः ५८ सुपर्णः ५९ पतङ्गः ६० नरः ६१ आर्य्याणाम् ६२ हंसासः ६३। इति वैद्य-निघण्टौ १ अध्यायः॥ हरी इन्द्रस्य १ रोहितः अग्नेः २ हरितः आदित्यस्य ३ रासभौ अश्विनोः ४ अजाः पूष्णः ५ एषत्वो मरुताम् ६ अरुण्यो गावः उषसाम् ७ श्यावाः सवितुः ८ विश्वरूपा हरयस्ते: ९ नियुतो वायोः १०। इति दश-दिशोपयोजनानि। इति च वैद्यनिघण्टौ १ अध्यायः॥ अस्य मांसगुणाः। उष्णत्वम्। वात-नाशित्वम्। लघुगुरुत्वम्। अतिसेवनात् पित्त-दाहप्रदत्वञ्च। इति राजनिर्घण्टः॥ अग्निकफ-बलकारित्वम्। दृंहणत्वम्। चक्षुर्हितत्वम्। मधुरत्वञ्च। इति भावप्रकाशः॥ * ॥

अथाश्वपरीक्षा।

"सप्तधा वाजिनः पूर्व्वं संजाता धीमचारिणः।
गन्धर्व्वेभ्यो यथाकामं गच्छन्ति च समन्विताः॥
इन्द्रादेशात्कालिहोत्रस्वेषां पञ्चमथाच्छिनत्।
ततः प्रभृति विख्याश्चतुरङ्गा धरणीं गताः॥
उत्तमा मध्यमा नीचाः कनीयांसस्तथापरे।
चतुर्द्धा वाजिनो भूमौ जायन्ते देशसंश्रयात्॥
ताजिताः खुरशालाच्च तुषाराच्चोत्तमा हयाः।
गोजिकाणाच्च कैकाणाः प्रौढ़ाहाराच्च मध्यमाः।
ताड़जा उत्तमाश्चाच्च वात्रशूलाच्च मध्यमाः।
गत्वराः साध्यवासाच्च सिन्धुदाराः कनीयसः॥
अन्यदेशोद्भवा ये च ते वै नीचाः प्रकीर्त्तिताः।
वाजिनो जलजाः केचिद्वह्निजातास्तथापरे॥
समीरप्रभवाश्चान्ये तुरगा ग्लमजाः परे।
जलोद्भवा द्विजा ज्ञेयाः क्षत्रिया वह्निसम्भवाः॥
प्रभञ्जनभवा वैश्या ग्लजाः शूद्रजातयः।
पुण्यगन्धिर्भवेद्विप्रः क्षत्रियोऽगुरुगन्धिकः॥
घृतगन्धो भवेद्वैश्यो मीनामोदी च शूद्रकः।
विवेकी सद्गुणो विप्रस्तेजस्वी क्षत्रियो बली॥
कोष्ठभावो भवेद्वैश्यः शूद्रो निःसत्त्वको भवेत्।
विप्राद्या वाहनाः सर्व्वे त्रयो भूमिपतेः सदा॥
शूद्रजातिं तुरङ्गन्तु न सृजन्ति परेश्वराः॥"

इत्युत्पत्तिः॥ * ॥

अथाङ्गाङ्गविभागः।

"सप्तविंशत्यङ्गुलिभिर्मुखमानं विधीयते।
कर्णौ षड़ङ्गुलौ प्रोक्तौ भालकं चतुरङ्गुलम्॥
चत्वारिंशच्च सम्प्राप्ता स्कन्धः संपरिकीर्त्तितः।
पृष्ठवंशश्चतुर्विंशः सप्तविंशा तथा कटी॥
इति लक्ष्यं तथा निम्नं प्रतिपुच्छं द्व्यधिकम्।
लिङ्गं हस्तप्रमाणन्तु तथाण्डौ चतुरङ्गुलौ॥
मध्यस्थानं चतुर्व्विंशं हृदयं षोड़शात्मकम्।
कटिकुक्ष्यन्तरं प्रोक्तं चत्वारिंशत् प्रमाणतः॥
मणिबन्धद्वयञ्चैव खुराश्च चतुरङ्गुलाः।
अष्टौत्यङ्गुलिकाः पादा दीर्घा विंशाधिका मताः॥"

इत्यङ्गुलिविभागः॥ * ॥

अथ वयोविभागः।

"दन्तेषु यत्नं यत्नेन ज्ञेयो वयःक्रमः॥"
तद्यथा,—
"कालिका हरिणी शुक्ला काम्या मध्यिकया सह॥
शुक्लो मुषलकश्चैव दन्तानां चलता तथा।
इत्यष्टौ अङ्गनाम्नाहुरश्वेषां लक्षणं शुभम्॥
चतुर्भिर्वत्सरैर्दन्ताश्चत्वारः परिकीर्त्तिताः।
पञ्चभिश्च षड़ित्येव जायन्ते अथ कालिकाः॥
षष्ठे संवत्सरे प्राप्ते कालिकाख्या भवेत्तु हि।
तथान्या सप्तमे वर्षे चतुर्थी कालिका भवेत्॥
अष्टमे वत्सरे प्राप्ते जायन्ते सर्व्वकालिकाः।

घोटकः

नवमे त्वथ ताः सर्वा आपीताः सम्भवन्ति च॥
केचिदेकादशे वर्षे तावत् पीतत्वमागताः।
ततः श्वेताः प्रजायन्ते चतुर्दशसमावधि॥
ततः काचप्रभाः सम्यक् यावत् संवत्सराक्षयः।
ततः खप्रदशादूर्द्धं यावद्वर्षाणि विंशतिः॥
मक्षिकाभां वदन्त्येषां यावद्वर्षत्रयं पुनः।
शुद्धाभासाः सर्वदन्ता भवन्ति वाजिनां ततः॥
त्रयोविंशात् परे वर्षे दशना सुबला मताः।
षड्विंशात् परतो दन्ताः स्थानाच्चलनमाप्नुयुः॥
यावद्वर्षत्रयं पञ्चान्निपतन्ति समात्रये।
द्वात्रिंशद्वत्सरे वाजी नूनं निर्नाशमाप्नुयात्॥"

अथ शुभलक्षणानि।

"दीर्घाः शुष्का विशालास्या ये भवन्ति तुरङ्गमाः।
ते ग्रस्ताः पार्थिवेन्द्रस्य यानवाहनकर्मणि॥
आस्यं भुजौ चापि हृत्काटिका च
दीर्घं चतुष्कं तुरगस्य शस्तम्।
तथोन्नते भालपुटे ललाटे
कपश्च वाजिप्रवरस्य बोध्यः॥
ओष्ठे च मक्षिवन्नश्च पुच्छं कोष्ठं लघूत्तमम्।
पीताङ्गः श्वेतपादो यो यश्च स्यात् सितलोचनः॥
चक्रवाकः स विज्ञेयो राजार्हः शिवसत्तमः।
मुखे चन्द्रकसंभीतः पङ्कजभूफलाकृतिः॥
श्वेतपादः स विज्ञेयो मक्षिकाख्यः सुपूजितः।
सर्वश्वेतो हयो यस्तु श्यामैकश्रवणो भवेत्।
स वाजी वाजिमेधार्हः श्यामकर्णः सुदुर्लभः॥
यस्य पादाः सिताः सर्वे पुच्छौ सुक्खो सुखं तथा।
महिषास्तु सिता यस्य तन्निद्यादशमङ्गलम्॥
यस्य पादाः सिताः सर्वे चन्द्रकश्च ललाटके।
कल्याणपञ्चकः प्रक्तो भर्तुः कल्याणकारकः॥
विमिश्रवर्णकाः सर्वे प्रशस्ता वाजिनो मताः।
यस्योत्तरोत्तरा वर्णा वृद्धिं यान्ति शनैः शनैः॥
नाशयन्ति तथा नीचान् करोति स बहून् हयान्।"

अथावर्तगुणाः।

"रोमणां भ्रमिरावर्त इति गद्यते।
बहुविधो दक्षिणो वामो दक्षिणस्तु शुभावहः॥
नासिकाग्रे ललाटाग्रे ग्रीवे कण्ठे च मस्तके।
आवर्तो यावते येषां ते धन्यास्तु तुरङ्गमाः॥
ललाटे यस्य चावर्तो द्वितीयस्तु कुकुन्दरे।
मस्तके च तृतीयस्तु स विज्ञेयो हयोत्तमः॥
गलावर्तो भवेद् यस्य वाजिनो दक्षिणाश्रयः॥
न करोति महासौख्यं स्वामिनः शिवसंज्ञितः।
कर्णमूले यदावर्तः स्तनमध्ये तथापरः।
विजयाख्यौ भवौ तौ तु युद्धकाले जयप्रदौ॥
स्कन्धपार्श्वे यदावर्तः स भवेत् सुखकारकः।
नाभामध्ये यदावर्तो दक्षो वा यदि वा जयः॥
चक्रवर्ती स विज्ञेयो वाजी भूपालभूषितः।
कण्ठे यस्य महावर्तः प्रोक्तश्चिन्तामणिः शुभः॥
रोमणां दक्षिणवत् स्यात् मुक्तिरित्यभिधीयते।
वामावर्ते शुभस्तत्र मुक्तिस्तत्र शुभावहा॥"

अथ दोषाः।

"चत्वारोऽप्यसिताः पादाः सर्वश्वेतस्य वाजिनः।
भवन्ति यस्य च ह्यन्ये यमदूताः सुदूरतः॥

घोटकः

चत्वारो यस्य वै पादाः परस्परविवर्णकाः।
स ह्याज्यो सुबलो नाम्ना मुनिभिः कुलनाशनः॥
दुर्लक्ष्मवाजिनं जह्याद्यदीच्छेत् श्रियमात्मनः।
यस्तु वर्णविभेदेन ह्यायते रोमसम्भवात्॥
पुच्छाख्यः स परित्याज्यः सर्ववाजिभयावहः।
यस्यावयेषवर्णेन छाद्यते च प्रधानतः॥
विद्यद्विं गच्छतः सोऽपि कुरुते हयसंक्षयम्।
इति स्कन्धे गले चैव कटिदेशे तथैव च॥
नाभौ कुक्षौ च पार्श्वांशे मध्यमः स प्रकीर्त्तितः।
एको वामकपोलस्थो यस्यावर्तः प्रदृश्यते॥
चर्वणी स हयस्याज्यः कुरुते स्वामिनाशनम्।
वामगण्डाश्रयावर्तः प्रकरोति धनक्षयम्॥
कण्ठान्ते यस्य चावर्तः स नृत्युं कुरुते विभोः।
क्रोडं जानुगतावर्तः प्रवासं कुरुतेऽथवा॥
वाजी मेढ्रगतावर्तो वर्ज्जनीयो महीभुजा।
त्रिवलिप्रभवावर्तस्त्रिवर्गस्य प्रणाशकः॥
पृष्ठवंशे यदावर्तः एकः संपरिलक्ष्यते।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः॥
गुह्ये पुच्छे बलौ यस्य भवन्त्यावर्तकाक्षयः।
न छतान्तस्तु रूपेण वर्ज्जनीयस्तुरङ्गमः॥
अधोदृष्टिं यदा वाजी सम्पुटं न सृणेत् क्वचित्।
यमदूतः स विज्ञेयो वर्ज्जनीयस्तुरङ्गमः।
हीनदन्तोऽधिकश्चैव करालो ह्यग्रतालुकः।
सुबलो च तथा ह्यङ्गी षड्हते घातकाः स्मृताः॥
तत्राद्यौ विदितार्थौ तु शेषार्थां लक्षणं ह्यहम्।
त्रयः पादाः सिता यस्य ह्यग्रश्चैकोऽभिजायते॥
त्रयो वाप्यसिता यस्य एकः शुक्लोऽभिजायते।
सुबली नाम पापोऽयं दूरे त्याज्यो हयाधमः॥
विकटो विषमो यस्य दशनः स करालकः।
करालो कुरुते नाशं भर्तुरत्र न संशयः॥
ह्यग्रतालुर्हयो नाशं कुरुते नात्र संशयः।
विषदन्तो भवेद्यस्तु ह्यग्रतालुर्न दुष्यते॥
कर्णान्ते चूलिकान्ते च ह्यङ्गवल्लक्ष्यते यदि।
स ह्यङ्गी कुरुते नाशं राज्ञश्च कुलस्य च॥
एकाक्षोऽजातकाक्षश्च हीनाक्षोऽभ्यधिकाक्षकः।
काणो च कम्बली चैव षड्हते पापलक्षणाः।"

अथारिष्टम्।

"सुस्यस्यापि च नेत्रान्ते स्यातां नीले च वाजिनः।
तथैव तस्य जानीयाद्वैवस्वतदृष्टिवार्धिकौ॥
नीलपीते च नेत्रान्ते त्रिभिर्मासैर्वपुःक्षयः।
यस्य नेत्रान्तरे रेखा बहुवर्णा प्रजायते॥
विंशेषाद्वाजिनो ज्ञेयं तस्यायुः पञ्चमासिकम्।
जिह्वायां जायते बिन्दुरकस्माद्यदि वाजिनः॥
मासैकं जीवितं तत्र पीते मासद्वयं तथा।
रक्ते त्रिभिर्मासैश्चतुर्भिश्च विचित्रके॥
पञ्चभिर्नीलवर्णे च षड्भिर्वभ्रुसमाकृतौ।
सप्तभिः पाटलाकारे चणकाभे तथाष्टभिः॥
नवभिश्च हरिद्राभे दशभिर्नृतुकोपमे।
एकादशे सुवर्णाभे वत्सरेण हिमद्युतौ॥
यस्य श्वासो भवेदुष्णः शरीरं पुलकाङ्कितम्।
जिह्वा हि मलिनाकारा मासषट्कं स जीवति॥
जिह्वायां पिडका यस्य पादान्ते च तथोदरे।

घोटकः

मूत्रं करोति रक्तमा मासषट्कं स जीवति॥
कर्णयोः क्षतजं यस्य नेत्राभ्यां वा प्रवर्त्तते।
वाजिनः पित्तग्रस्तस्य दशमासान् स जीवति।
यस्य नेत्रे हरिद्राभे यस्य वातार्दितस्य च।
तस्यायुः सप्तमासीयं बहुवर्णे तथा दिनैः॥
यस्यैकं लोचनं हीनं द्वितीयं रक्तसन्निभम्।
पुटान्ते च स विज्ञेयः पीताभे मासजीवकः॥"
एतानि अरिष्टानि रक्तदोषजानि।
"स्फुलिङ्गा यस्य दह्यन्ते पुच्छतोऽस्य वह्निजाः।
निर्गच्छन्तः प्रभोर्नाशं ते वदन्ति निशागमे॥
अश्वशालां समासाद्य यदा च मधुमक्षिकाः।
मधुशालं प्रवध्नन्ति तदाश्वान् घ्नन्ति ह्यतृक्षजः॥"

अथ हयक्रियाकालः।

"स्वरुणगुरुपार्श्वांशेषु भौमार्कवारे
स्वतिथिकरणतारा चन्द्रयोगोदयेषु।
शुभमिह हयकार्यं कार्यमार्येण बुद्धा
न शनिरविकुजानां वासरे नोग्रतारे॥"

इति कालः॥ * ॥

अथ हयारोहणज्ञानम्।

"चलकिशूलयपादः कर्णमध्यैकदृष्टि-
र्नचलति कटिदेशः स्वासने संस्थितो यः।
हयहृदयगतिज्ञः स्थानदण्डावपातः
स खलु तुरगयाता पूज्यते पार्थिवेन्द्रैः॥
मेरुः स्थिरौ यस्य चलौ च पादौ
त्रिकोन्नतं संहतमासनञ्च।
स वाजिवाहः प्रथितः पृथिव्यां
शेषा नरा भारकरा हयानाम्॥ * ॥

तत्र ताडनविधिः।

"रक्तकोष्ठे सुखे चौष्ठे गले पुच्छे च ताडयेत्।
भीते वक्षःस्थले हन्याद्दृक्कं चोच्चागतागामिनः॥
कुपिते पुच्छसंस्थानं भ्रान्ते जानुहृयं तथा।
सर्वस्याप्राप्तदण्डस्य दण्डमेकं निपातयेत्॥
अस्थानदण्डपातात्च बहुदोषः प्रजायते।
तस्मान्निरीक्ष्य कर्त्तव्यं हये दण्डनिपातनम्॥"*॥

अथ धावनविधिः।

"हस्तैश्चतुर्भिर्गतिभिर्हयैस्तु उदाहृतः।
अक्ष्णोर्निमेषगण्यश्च मात्रा प्रोक्ता विचक्षणैः॥
मात्राघोड्शकैर्नाश्वो यो धावति धनुःशतम्।
तमुत्तमोत्तमं विद्यादायुर्वेगं महाजवम्॥
विंशत्या मध्यमो ज्ञेयो ह्युत्तमन्ये चाधमा मताः।
नभस्याश्वयुजे मासि नैवाश्वान् वाहयेन्नृपः॥
वक्ष्यामिसद्यं पित्तं श्रमात् कुप्यति वाजिनाम्।
कार्येण महता वापि योज्यो मासि तु कार्त्तिके॥
हेमन्ते शिशिरे योगो वसन्ते च यदृच्छया।
बालं वृद्धं क्षयं रुग्णं दत्तखेदं वृहद्बलिम्॥
पूर्णातिरिक्तकोष्ठञ्च गुर्व्विणीञ्च न वाहयेत्॥*॥

अथ रक्तमोक्षणविधिः।

"द्वासप्ततिसहस्राणि नाड़ीनां सम्भवन्ति हि।
वाजिनामिह सर्वेषामासु रक्तं व्यवस्थितम्॥
तासां निर्मोक्षणार्थाय द्वारास्यद्वौ वदाम्यहम्।
येर्याति कुत्सितं रक्तं सर्वदेहसमुद्भवम्॥
कण्ठे कर्णे लोचनोरंसयोश्च सुखे तथा।

अक्ष्योरथ पादेषु पार्श्वयोरुभयोरपि ॥
एतद्धर्म्मं सुविज्ञेयं वाजिनां भिषगुत्तमैः ।
अन्ये समुदयान्याहुः सिराद्वाराणि वाजिनः ॥
येषु रक्तं हृतं सद्यः प्रकरोति ततः सुखम् ।
गुल्फे गले तथा मेढ्रे कक्षान्ते चैव पत्रके ।
गुदे पुच्छेऽथ वस्तौ च जङ्घयोः सर्व्वसन्धिषु ।
जिह्वायां चाधरे चौष्ठे नेत्रयोरुभयोरपि ॥
कर्णमूले मणौ गण्डे रुधिरं स्रावयेद्भिषक् ।
सौश्रुतमानपत्रेण त्याज्यं रक्तं तुरङ्गप्रमाणम् ॥"
तद्यथा,—
"घृतं सुखे त्याज्यं कक्षयोश्चैकमेव च ।
घृताक्तं नेत्रदेशाच्च मेढ्रदेशात्तथैव च ॥
गण्डयोरक्ष्योश्चैव स्रावयेत् पञ्चविंशतिम् ।
द्वादशैव गुदे प्राहुरश्वशास्त्रविचक्षणाः ॥
पैत्तिकं कालिकं विद्याद्वाते विद्यात् सशोणितम् ।
पिच्छिलं श्लेष्मलं पाण्डु कषायोदकवच्च यत् ॥"*

अथ ऋतुचर्य्या ।

"न प्राज्ञो वाहयेदश्वान् प्रावृट्काले कथञ्चन ।
यदीच्छेदुद्धतन्तस्य वाहनं दशमासिकम् ॥
कूपोदकं कटुकतैलनिवातगेहं
ग्रस्तं पलार्द्धलवणं दिवसान्तरेण ।
तत्रान्यथा सति सुखामयवीर्य्यहानि-
र्मुखेबलैर्विरहितस्तु वयो विनश्येत् ॥
शरदि गुडहृतं पयः प्रशस्तं
शरदि सिताहपलप्रमाणमच्छम् ।
मधुरमथ जलं सरोवरोत्थं
हृतयुतनीलसुकुष्ठकाश्च भेद्याः ॥
हेमन्तकाले हृततैलमाषा
निर्व्वातसंस्था च पयो यथेच्छम् ।
शूनेः शूनेर्वाहनकर्म्म कुर्य्याद्-
यवांश्च पक्वा वितरेद् विधिज्ञः ॥
शिशिरे तैलपलाष्टकं कटिस्थं
दिनसप्तावधि पाययेत्तुरङ्गान् ।
तदनु प्रातर्भोजयेद्यवांश्च
यवयवमाश्च तथाष्टतखरूपाः ॥
यस्य हृता यवा भोज्ये शिशिरे समुपस्थिते ।
अकृत्वापि क्रियाः सर्व्वाः स हयः सुखमश्नुते ॥
वसन्ते संप्राप्ते निजसुखवशाद्धाहय हयान्
घृतं तैलं ग्रस्तं सकलविधिरुक्तोऽपि च मतः ।
पयो दद्यादस्मै सलवणमधो वाहनविधि-
र्भृशं योज्यस्तेनाब्दमपि सुखमिच्छेद्धयवरः ॥
वसन्तसमये योऽश्वः स्थाने तिष्ठति बन्धने ।
तस्योत्साहः प्रणश्येत सालस्यं जायते वपुः ॥
ग्रीष्मे घृतं घृतजमोक्षणघर्म्मशान्ति-
सुच्छायबन्धनविमर्द्दनग्रीततोयम् ।
दूर्व्वा हृतं लघु च कोमलमन्यदेव
यत्किञ्चिदेवसुपयुक्तमिदं वदन्ति ॥"* ॥
भोजे तु हयलक्षणमन्यथा,—
स्निग्धाङ्गो लघुतरलोमकस्तु पुच्छो
दीर्घास्थिनयनकेशपृष्ठवंशः ।
रक्तोष्ठः पृथुजनितम्भभारवक्षा
राजार्हो भवति तुरङ्गमः प्रशस्तः ॥
नाभेरारभ्य देहस्तु द्विधा पूर्व्वापरक्रमात् ।
पूर्व्वकायस्थिता रक्ताः शुभाय हयसंस्थिताः ॥
अधःकाये स्थिता रक्ता अधमत्वप्रकाशकाः ।
शुक्लीनां विपरीत्येन प्रशस्तफलमादिशेत् ॥"*॥
वातस्यस्तु ।
"ब्रह्मादिजातिभेदेन हयजातिश्चतुर्व्विधा ।"
तद्यथा,—
"ये शुक्लाः सुविमलपुण्यगन्धा ये वा
शुद्धाङ्गाः सदृशसदृश्यभोजिनो वा ।
अक्रुद्धाः समरगता भृशञ्च पुष्टा-
स्ते विप्राः क्षितिपतिवाहनेऽतियोग्याः ॥
ये रक्ताः सदगुरुगन्धयोऽहता वा
संरुद्धाः बहुतरभोजिनो बलाढ्याः ।
अश्रान्ताः सकलगुणग्रहाः प्रवीणा
विज्ञेया विधिकरजातजातयस्ते ॥
ये पीताः खलु घृतगन्धयोऽपि ये वा
येऽक्रुद्धाः कथमपि रोषशालिनो ये ।
बद्धा वा बहुतरनादघोषणा वा
विज्ञेया नृपवर ! वैश्यजातयस्ते ॥
ये कृष्णाः सरुधिरगन्धयोऽपि ये वा
अन्यथा बहुतरताडनैरपीमे ।
क्षीणाङ्गा लघुतनवोऽपि वेगहीना-
स्ते शूद्राः क्षितिपतिना भृशं विहेयाः ॥"
एतत्तु एकैकमेव लक्षणं न सासुदायिकम् ॥
"लक्षणद्वयसम्बन्धात् द्विजातिः स्यात्तुरङ्गमः ।
चतुर्लक्षणयुक्तस्तु दूरे त्याज्यो हयाधमः ॥"*॥
अन्यच्च तु ।
"सात्त्विका राजसाश्चेति तामसाश्चेति ते हयाः ॥
ये शुद्धवर्णा भृशवेगयुक्ता
अश्रान्तिभाजो बहुभोगिनश्च ।
अक्रोधशीलाः समरेऽतिरूढा-
स्ते सात्त्विका भूप ! तुरङ्गमाः स्युः ॥
ये रक्तवर्णा गुरुवेगरोषाः
कषाभिघातं न हि ये सहन्ते ।
येऽमी बलाढ्याः खलु दीर्घदेहा-
स्ते राजसा भूप ! तुरङ्गमाः स्युः ॥
ये कृष्णवर्णास्तनुरोषवेगा
अल्पाग्निनो लक्षणलक्षिताश्च ।
ये दुर्बलाः सर्व्वगुणैर्विहीना-
स्ते तामसा भूप ! तुरङ्गमाधमाः ॥
द्वयोर्लक्षणसम्बन्धात् द्विगुणो वाजिनमध्यमः ।
त्रयाणां गुणसम्बन्धात् त्रिगुणो वाजिनिन्दितः ॥"
पराशरसंहितायान्तु ।
"पृथिव्यब्वायुतेजःखैः पञ्चभिस्तुरगाश्रितैः ।
उक्तवैः पञ्चधा भेदाः परमरमता यथा ॥
ये स्थूला श्रमसहदेहरूपभाज-
श्चाक्रान्ता बहुतरभोजनाच्च दीर्घाः ।
अक्रुद्धाः समरगतास्तु रोषभाजो
भौमास्ते घनगुरुघर्घरस्वरास्तु ॥
ये कृशाङ्गास्तनुबलाः श्रमासहकलेवराः ।
अक्रोधवेगाः सखरा आप्यास्ते तुरगाधमाः ॥
ये वातवेगप्रतिमोग्रवेगाः
शुष्का भृशं दीर्घकलेवराश्च ।
अश्रान्तिभाजो बहुदूरगाश्च
ते वायवा वाजिवराः प्रदिष्टाः ॥
ये क्रोधशीला भृशवेगयुक्ता
सुस्ता दिनात् क्रोशशतं व्रजन्ति ।
ते तेजसाः पुण्यवतां प्रदेशे
भवन्ति पुण्यैरपि ते मिलन्ति ॥
एको यदा तैजससंज्ञकोऽश्वः
किं कार्य्यमन्यैस्तुरगाधमेषु ।
शुद्धं यदा क्षीरकलङ्कमेकं
किं कार्य्यमन्यैर्मणिभिर्विचित्रैः ॥
उत्प्लुत्य ये वाजिवरा व्रजन्ति
क्रुधा शशं वेगसमन्विताश्च ।
ये लङ्घयन्तः परिखामपारां
ते गागना पुण्यतमाः प्रदिष्टाः ॥
द्वयोर्लक्षणसम्बन्धात्तुरगः स्यात् द्विभौतिकः ।
स्वजातिगुणभूतानां हयानां वाहनं शुभम् ॥
शालिहोत्रादिविज्ञानात्तद्विज्ञेयं यथोत्तरम् ।
असम्भवे हि दुष्टाश्वं वाहयेदिति चेत्तदा ॥
तिलं सकाञ्चनं दद्याल्लवणं वा गुडान्वितम् ।
रेवन्तं पूजयेद्वापि निजं निर्म्मत्सर्य्यचेत्तदा ॥
दद्यात्ताम्रपलं वापि अभावे सर्व्वकर्म्मसु ॥"
एवमन्यत्रापि ।
"काञ्चनं रजतं ताम्रं लौहमेतद्यथाक्रमम् ।
ब्रह्मादिजातिदोषाणां देयमेतत् प्रशान्तये ॥
अभावेऽपि च सर्व्वेषां ताम्रेण स्यात् प्रति-
क्रिया ।"
इति हयपरीक्षा ॥ * ॥
इति भोजराजकृतयुक्तिकल्पतरुः ॥
("येन ज्ञानवता हिमालयतरुच्छायासु विक्रीड़ितम्
यः स्नातो हिमपुण्यवातशिशिरे गङ्गाजले पावने ।
रेमे यस्तु तुरङ्गयूथजनितैर्नानाविधैर्हेषितैः
पायाद्वः स तुरङ्गघोषतनयः श्रीशालिहोत्रो मुनिः ॥
जयति च पाण्डवनाथो धर्म्मसनाथो युधिष्ठिरो नृपतिः ।
भीमार्জ্জুनसहदेवास्तदनु च ये वाजिशास्त्रज्ञाः ॥
दृष्ट्वा सम्यङ्नकुलः शास्त्रं कृत्स्नं च शालिहोत्रीयम् ।
ब्रूते शास्त्रार्थमन्यच्छास्त्रं कृत्वा समासेन ॥
प्रश्नो जातिवर्णमावर्णदन्ता
लक्षं वेगा वाहनं धातुरत्नम् ।
कालो नस्यं पिच्छमाच्यं कषायं
शालां चेष्टां वाजिनामत्र वक्ष्ये ॥
सपक्षा वाजिनः सर्व्वे सज्ञाता योगचारिणः ।
गन्धर्व्वेभ्यो यथाकामं गच्छन्ति च समन्ततः ॥
तान् दृष्ट्वा जवसम्भ्रमानसञ्जान्वाहनोचितान् ।
शक्रः प्रोवाच पार्श्वस्थं शालिहोत्रं मुनीश्वरम् ॥
नास्त्यसाध्यं मुने ! किञ्चिद्भवतो भुवनत्रये ।
तस्मादाशु कुरुष्व त्वं वाहनार्हान् हयोत्तमान् ॥

घटोकः

ये च मे युद्धकालेषु प्रवहन्ति रथं सदा ।
अग्र्यं वारणेन्द्रेण दानवैर्बलवत्तरैः ॥
ईषिकाख्यं समुत्सृज्य पक्षच्छेदं यथात्तदा ।
वाजिनां शुक्रवाक्येन ग्रालिहोत्रो महामुनिः ॥
छिन्नपक्षास्तु ते सर्वे गत्वा तत्पर्षिमब्रुवन् ।
दीनाः सुदुःखसम्पन्ना रुधिरेण परिप्लुताः ॥
भगवन् ! किं निमित्तं नः पक्षच्छेदः कृतस्त्वया ।
अपराधविहीनानां नेदृगिच्छन्ति पण्डिताः ॥
तस्मादृतिर्भवेत् प्राज्ञ ! सर्वेषामिह वाजिनाम् ।
यथा स्यात् सर्वदा सौख्यं पुष्टिश्च मुनिपुङ्गव ! ॥
अथासौ कृपयाविष्टस्तानुवाच सुदुःखितान् ।
इन्द्रादेग्रात् क्षतं सर्वं भवतां पक्षपातनम् ॥
तस्माद्वः प्रकरिष्यामि भविष्यति यथासुखम् ।
पुष्टीरन्या यथा देहे गौरवं च जगत्त्रये ॥
यूयं शुक्रादिदेवानां वाहनत्वं करिष्यथ ।
तथा भूमिपोतनाच्च गौरवेण समन्विताः ॥
यो राजा भवतां पुष्टिं खन्नपानादिभिः सदा ।
करिष्यति न सन्देहो भविष्यति स दुर्जयः ॥
न च त्यक्ष्यति तं लक्ष्मीः कदाचिच्चपलत्वया ।
अपि सर्वैर्गुणैर्हीनं बहुशुभैरावृतम् ॥
तथा चैव विधास्यामि परमञ्च चिकित्सितम् ।
पुष्टौ च रोगनाशार्थं नराणां विहितं यथा ॥
तस्माद्गच्छत भूलोकं पातालञ्च तथापरे ।
स्वर्गे चान्ये मदादेशादृषेण ग्रालिभवेद् ध्रुवम् ॥
एवं विसृज्य तान् सर्वान् ग्रालिहोत्रस्तु रङ्गमान् ।
चक्रे ह्यादग्रसाहस्रीं तदर्थे संहितां सुधीः ॥
ततःप्रभृति लोकेऽस्मिन् वाह्या जातास्तुरङ्गमाः ।
तच्चिकित्सितं तेषां ग्रालिहोत्रप्रभाषितम् ॥"

इति श्रीनकुलक्षतेश्चचिकित्सिते प्रश्नो नाम
प्रथमोऽध्यायः ॥

अथ जातिः ।

"उत्तमा मध्यमा नीचाः कनीयांसस्तथापरे ।
चतुर्धा वाजिनो भूमौ जायन्ते देग्रसंश्रयात् ॥
ताजिकाः खुरग्राणाच्च उत्तराश्चोत्तमा हयाः ।
गोचिकाख्याच्च कैकाणाः पौढ़ाहाराच्च मध्यमाः ॥
भाल्लजाश्चोत्तमाग्राच्च राजमूलाच्च मध्यमाः ।
गोडराः ग्रावराश्चैव सिन्धुपाराः कनीयसः ॥
अन्यदेग्रोद्भवा ये च नीचनीचाश्च ते स्मृताः ।
वाजिनो जलजाः केचिद्वृद्धिजातास्तथापरे ॥
समीरप्रभवाश्चान्ये उलूकन्दगजास्तथा ।
जलोद्भवा द्विजातीयाः क्षत्रिया वृद्धिसम्भवाः ॥
समीरप्रभवा वैश्या एणोलूकाश्च शूद्रजाः ।
विवेकी सदृशो विप्रस्तेजस्वी क्षत्रियो बली ॥
दुरभावस्तथा वैश्यः शूद्रो निःसत्वकातरः ।
ब्राह्मणाः सामवाही च भेदवाही च क्षत्रियः ॥
उपादानेन वैश्यः स्याच्छूद्रो दण्डेन ताडितः ।
पुष्पगन्धः सदा विप्रः क्षत्रियोऽगुरुगन्धकः ॥
घृतगन्धः सदा वैश्यो मीनामोदी च शूद्रकः ।
विप्रार्हा वाजिनः सर्वे क्षत्रियो भूपतेः सदा ॥
द्वौ वैश्यस्याथ शूद्रस्य शूद्र एव सुखावहः ।
केचिदिच्छन्ति भूपानां सर्वेषां वाहनोचिताः ॥
तदर्थं भूतले यस्माच्छालिहोत्रेण निर्मिताः ।

ब्राह्मणाः क्षेमकृत्येषु सिद्धिं मच्छन्ति वाजिनः ॥
क्षत्रिया युद्धकार्येषु वैश्या वित्तार्जने सदा ।
शूद्राश्चान्येषु कृत्येषु ज्ञात्वैवं वाजिनः सदा ॥
आरोहेत् सर्वकार्येषु यदीच्छेच्छाश्वतीं श्रियम् ।
सदा शुभा भवन्त्येते वाजिनो यस्य भूतले ॥
सदैव निद्रावशगा निद्राच्छेदस्य सम्भवः ।
जायते सङ्करे प्राप्ते कर्करस्य च भक्षणे ॥
प्रबुद्धाः कथयन्त्यश्वाः शुभं वा यदि वाशुभम् ।
स्वस्वामिनो निजैश्चिह्नैस्तद्विज्ञेयं विचक्षणैः ॥
यः सन्नद्धो हयो रावमूर्ध्वमूर्ध्वं करोति च ।
खुराग्रेण लिखन् भूमिं स ग्रंसति रणे जयम् ॥
यः करोत्यवलग्नमूत्रं पुरीषञ्चाश्रुमोचयम् ।
स ग्रंसति पराभूतिं यश्चैवं वर्तते हयः ॥
निरामिषं निग्रीवे यो जागर्त्ति नृपतेर्हयः ।
स ग्रंसति हतन्तस्य स्थिरस्यापि प्रयाणकम् ॥
यदा खादिं विना वाजी ग्रासन्त्यजति दुर्मनाः ।
अश्रुपातञ्च कुरुते तदा भर्तुरशोभनम् ॥
पुलकाङ्कितपुच्छा ये जायन्ते भूपतेर्हयाः ।
निरीक्षन्तः प्रभोर्नाग्रं ते वदन्ति निग्रागमे ॥
घरटं रचयेद्यत्नात् प्रविग्रन्तं हयालये ।
यदीच्छेच्छाश्वतीं वृद्धिं तेषाञ्चैव तथात्मनः ॥
स्फुलिङ्गा यस्य दृग्यन्ते पुच्छदेग्रे च वह्नयः ।
प्ररचक्रागमाग्रंसी विज्ञेयो हयपण्डितैः ॥
अश्वग्रालां समासाद्य यदान्तर्मधुमक्षिकाः ।
मधुजालं प्रकुर्वन्ति तदाश्वान् घ्नन्ति क्षत्रजग्रः ॥
तस्मात् सर्वप्रयत्नेन वाजिग्रालां प्ररचयेत् ।
उपायैरथ सर्वेभ्यो य इच्छेद्भूतिमात्मनः ॥
ब्राह्मणान्वाचयेत् स्वस्ति नित्यं वेदविचक्षणान् ।
तिलहोमस्तथा कार्य्यो जपश्च घृतरुद्रियः ॥
मन्दुरान्ते सदा धार्य्यो रक्तवक्त्रो महाकपिः ।
सर्वपापविनाग्राय वाजिनाञ्च विवृद्धये ॥
सरघां रचयेद् यत्नात् प्रविग्रन्तीं हयालये ।
यदीच्छेच्छाश्वतीमृद्धिं तेषाञ्चैव तथात्मनः ॥

इति श्रीनकुलक्षतेश्चचिकित्सिते जात्यधिकारे
द्वितीयोऽध्यायः ॥

अथ वर्णवर्णनम् ।

"वर्णाः सप्त भवन्तीह सर्वेषां वाजिनां ध्रुवम् ।
तानहं कीर्तयिष्यामि भेदैर्जातानने कधा ॥
सितो रक्तस्तथा पीतः सारङ्गः पिङ्ग एव च ।
नीलः कृष्णोऽथ सर्वेषां श्वेतः श्रेष्ठतमः स्मृतः ॥
पट्टार्हो भूपतेर्वाजी सर्वश्वेतः प्रग्रस्यते ।
तदभावे यथा प्रोक्तास्तथा श्रेष्ठाः क्रमेण च ॥
श्वेतः प्रालेयसङ्काग्रो रक्तः कुङ्कुमसन्निभः ।
हरिद्रासदृग्रः पीतः सारङ्गः कर्बुरः स्मृतः ॥
पिङ्गः कपिलकाकारो नीलो दूर्वाग्रसन्निभः ।
कृष्णो जम्बूफलाकारः ग्रास्त्रज्ञैः समुदाहृतः ॥
पीताभः श्वेतपादो यस्तथा स्यात् सितलोचनः ।
चक्रवाकः स विज्ञेयो राजार्हो वाजिसत्तमः ॥
सर्वश्वेतो हयो यस्तु भवेन्नेचककर्णकः ।
स वाजी वाजिमेधार्हः श्यामकर्णः प्रकीर्तितः ॥
सुखे चक्रकसंवीतो धूपलसमाकृतिः ।
श्वेतपादः स विज्ञेयो मल्लिकाख्यः स पूजितः ॥

चत्वारोऽप्यसिताः पादाः सर्वश्वेतस्य वाजिनः ।
भवन्ति यस्य स त्याज्यो यमदूतः सुदूरतः ॥
यस्य पादाः सिताः सर्वे पुच्छं वक्त्रं सुखं तथा ।
सार्धजाश्च सिता यस्य तं विद्यादृग्रमङ्गलम् ॥
भस्माभं वाजिनं ज्ञात्वा सुदूरेण नराधिपः ।
यदि वाञ्छति कल्याणं वाञ्छेच्च ग्रीससुखम् ॥
यस्य रोमविभेदेन जायन्ते रोमविन्दवः ।
पुण्याख्यः स परित्याज्यः सर्ववाजिभयावहः ॥
यस्य पादाः सिताः सर्वे तथा वक्त्रञ्च मध्यतः ।
कल्याणपक्षकः प्रोक्तः सर्वकल्याणदश्च सः ॥
विमिश्रवर्णकाः सर्वे प्रग्रस्ता वाजिनः स्मृताः ।
कृष्णनीलस्य मिश्रत्वमेकं मुक्त्वा सुदूरतः ॥
यस्योत्कृष्टतरो वर्णो दृष्टिं याति घ्नैः घ्नैः ।
नाग्रयति तथा नीचान् स करोति बहून् हयान् ॥
यस्याग्रमेन वर्णेन क्रान्तो च प्रधानजः ।
विवृद्धिं गच्छता सोऽथ करोति हयसंचयम् ॥

इति श्रीनकुलक्षतेश्चचिकित्सिते वर्णो नाम
तृतीयोऽध्यायः ॥

अथ आवर्त्ताः ।

"आवर्त्ता विंग्रतिः प्रोक्ता ग्रालिहोत्रमहात्मना ।
गात्रस्थानविभागेन तेषां लक्षणमुच्यते ॥
ललाटे मस्तके चैव ग्रीवायां हृदये तथा ।
पादे पृष्ठे मणीबन्धे नाभिदेग्रे विग्रेषतः ॥
स्कन्धे पार्श्वे गले वक्त्रे कुक्षौ रन्ध्रे चिके तथा ।
आद्यास्त्रयोदग्रावर्त्ता विज्ञेया वाजिपण्डितैः ॥
नासिकाग्रे ललाटाग्रे ग्रृङ्गे कण्ठे च मस्तके ।
आवर्त्तो जायते येषां ते धन्यास्तुरगोत्तमाः ॥
हृदि स्कन्धे गले चैव कटिदेग्रे तथैव च ।
नाभौ कुक्षौ च पार्श्वाङ्गे मध्यमास्ते प्रकीर्तिताः ॥
ललाटे यस्य चावर्त्तो द्वितीयस्य स लिङ्गकः ।
मस्तके च तृतीयश्च पूर्णकुक्षिः स उत्तमः ॥
पृष्ठवंग्रे तथावर्त्तो यस्यैकः संप्रजायते ।
स करोत्यश्वसंघातान् स्वामिनः सूर्यसंज्ञकः ॥
कक्षायां जानुमेढ्रे च चिबुके पुच्छसन्धिषु ।
पुच्छे गुह्ये बलावस्थावर्त्ता अधमा हये ॥
त्रयो यस्य ललाटस्था आवर्त्ता अधरोत्तराः ।
त्रिकूटः स परिज्ञेयो वाजिवृद्धिकरः परः ॥
एवमेव प्रकारेण त्रयो ग्रीवां समाग्रिताः ।
त्रयावर्त्तः स वाजीग्रो जायते भूपमन्दिरे ॥
ललाटे युगलावर्त्तौ चन्द्रार्कौ संप्रकीर्तितौ ।
वाजिनो यदि तौ स्यातां राष्ट्रवृद्धिकरौ परौ ॥
उपर्युपरि यस्य स्युरावर्त्ता अलिके त्रयः ।
निःग्रेषि सतु विज्ञेयो राष्ट्रवृद्धिकरः परः ॥
एकोऽथवा कपोलस्थो यस्यावर्त्तः प्रदृग्यते ।
वर्त्तमानः स विज्ञेयः स इच्छेत् स्वामिनाग्रनम् ॥
कपोलाभ्यन्तरावर्त्तो विद्यते वाजिनो यदि ।
तावच्चिनाविति प्रोक्तौ युद्धकाले जयप्रदौ ॥
गण्डावर्त्तौ भवेद्यस्य वाजिनो दक्षिणाग्रयः ।
स करोति महासौख्यं स्वामिनः ग्रिवसंज्ञकः ॥
तद्वद्वामाग्रयः क्रूरः प्रकरोति धनक्षयम् ।
इन्द्रकाख्यावुभौ ग्रस्तौ नृपराज्यविवृद्धिदौ ॥
कर्णमूले यदावर्त्तस्तन्मध्ये च तथापरः ।

विजयाख्यावुभौ ज्ञेयौ युद्धकाले जयप्रदौ ॥
नासामध्ये यदावर्त्तौ एको वा यदि वा त्रयः
चक्रवर्त्ती स विज्ञेयो वाजी भूपालपूजितः ॥
कण्ठे यस्य महावर्त्तः एकोऽश्वस्य प्रजायते ।
चिन्तामणिः स विज्ञेयश्चिन्तितार्थविवर्द्धितः ॥
स्कन्धे पार्श्वे यदावर्त्तः स भवेत् पद्मलक्षणः ।
करोति विधिवत् पट्टी स्वामिनः सततं सुखम् ॥
शुक्लाख्यौ तालुकान्तस्थावावर्त्तौ कीर्त्तितद्विदौ ।
हयस्य स्वामियुक्तस्य सदैव सुसुखावहौ ॥
एकावर्त्तो भवेद्यस्य कण्ठान्ते वाजिनो यदा ।
स रणे दृढमाप्नोति द्वौ च स्वामिविनाशनौ ॥
जानुदेशे यदावर्त्तो वाजिनः संप्रदृश्यते ।
प्रवासं सततं ब्रूते स्वभर्त्तुः क्लेशसंयुतम् ॥
वाजी मेढ्रतलावर्त्तो वर्जनीयो महीभुजाम् ।
स करोति हरेर्नाशं परचारसमुद्भवम् ॥
त्रिवलिस्थो यदावर्त्तस्त्रिवर्गस्य प्रणाशकः ।
वाजिनस्ते परिज्ञेयाः स्त्रीपार्श्वस्था भयप्रदाः ॥
पुच्छदेशे यदावर्त्तो वाजिनः संप्रदृश्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः ॥
गुह्ये पुच्छे बलौ यस्य भवन्त्यावर्त्तकाश्चयः ।
स कृतान्तस्वरूपेण वर्जनीयस्तुरङ्गमः ॥
अध ऊर्द्धं यदा वाजी सम्पुटं न सृणेत् क्वचित् ।
यमदूतः स विज्ञेयो वर्जनीयः प्रयत्नतः ॥
हीनदन्तोऽधिदन्तश्च करालो क्ष्यातालुकः ।
सृग्वली च तथा ग्रङ्गी वर्द्धते स्वामिघातकाः ॥
एकाक्षजातश्चैकाक्षो हीनाङ्गोऽप्यधिकाङ्गकः ।
परित्याज्यः स वाञ्छद्भिरन्विष्य परमं यशः ॥
घण्टी वदनको वाली ग्रङ्गी चैव चतुर्थकः ।
वर्जनीयः प्रयत्नेन सर्व्वे ते पापकृत्तमाः ॥
घण्टी च स्वामिनं हन्ति वदनी धनसंक्षयम् ।
अन्तःपुरं तथा वाली ग्रङ्गी राष्ट्रविनाशनः ॥
षट्पदाभो भवेद्यश्च क्ष्यातालुर्न दुष्यति ।
गृध्रपादसुखो यस्तु आवर्त्तैः कुतुसितैरपि ।
न दुष्यति सदावर्त्तैः ज्वालिहोत्रमतं यथा ॥

इति श्रीनकुलविरचिते ऽश्वचिकित्सिते आवर्त्ताध्यायश्चतुर्थः ॥

अथ दन्ताः ।

दन्तोद्भेदं प्रवक्ष्यामि वाजिनामायुलक्षणम् ।
येन विज्ञातमात्रेण आयुर्ज्ञानं प्रजायते ॥
अश्वस्तु तनुभिर्दन्तैः क्षीरदन्त इति स्मृतः ।
तथा द्वाविंशभिः कोणो प्राज्ञैर्दंशमासिकः ॥
त्रिंशन्मासोद्भवाः सर्व्वे अखण्डाः परिकीर्त्तिताः ।
द्वौ स्यातां द्वौ च न स्यातां मध्ये परियथाक्रमम् ॥
चतुर्भिर्वत्सरैर्दन्ताः कालिकान्ये भवन्ति च ।
तथाग्रः सप्तमे वर्षे चतुर्थः कालिको भवेत् ॥
अष्टमे वत्सरे प्राप्ते प्राप्ताः स्युः सार्व्वकालिकाः ।
नवमे त्वथवा रेखा पीतत्वं ध्वंसयन्ति च ॥
तथाप्येकादशे वर्षे तावत् पीतत्वमागताः ।
तिष्ठन्ति दशनास्तेषां वाजिनामत्यसंशयम् ॥
ततः श्वेताः प्रदृश्यन्ते यावद्वर्षत्रयं पुनः ।
ततः कालप्रभाः सम्यक् यावत् संवत्सरात्त्रयः ॥
ततः कालदशाद्यूर्द्धं यावद्वर्षाणि विंशतिः ।
मध्यिकाभारदाक्षेषां यावद्वर्षत्रयं पुनः ॥
तस्माद्दूखलं प्राप्नोत्यावद्वर्षत्रयं पुनः ।
प्रकम्पश्च समागच्छ पश्चात् पातः समात्रयम् ॥
द्वात्रिंशद्वत्सरैरेव वाजी निर्व्वाणमाप्नुयात् ।
दंष्ट्राश्चतुरश्चं श्वेतं वक्त्रेण परमायुषि ॥
अश्वानामेव सर्व्वेषां दन्ता द्वादश कीर्त्तिताः ।
कालिका हारिणी शुक्ला काचा वाप्यथ मध्यिका ॥
शूलोदूखलकश्चैव दन्तानाञ्चलनं तथा ।
ततस्तु पतनं विद्यादेव व्यञ्जनसंग्रहः ॥
चतुर्विंशतयो दंष्ट्राः शालिहोत्रमतं तथा ।
एवं दन्तविशेषेण सर्व्वेषामिह वाजिनाम् ।
विज्ञेया चायुषःसंख्या वाजिपोषणतत्परैः ॥

इति श्रीनकुलसूते ऽश्वचिकित्सिते दन्तोद्भेदो नाम पञ्चमोऽध्यायः ॥

अथ अवयवप्रमाणम् ।

दीर्घसूक्ष्मविमांसास्था ये भवन्ति तुरङ्गमाः ।
ते शस्ताः पार्थिवेन्द्रस्य यानवाहनकर्म्मसु ॥
स्कन्धमभ्युन्नतं दीर्घं वक्त्रग्रीवं विशेषतः ।
चमरालङ्कृतं सम्यक् स्त्रोकवालसमन्वितम् ॥
येषां पृष्ठं सुवृत्तं स्याद्विपुलं व्रणवर्जितम् ।
किञ्चिन्मध्ये भवेन्निम्नं राजार्हास्ते तुरङ्गमाः ॥
स्निग्धरोमा सुदृश्या च सुश्लक्ष्णा विपुला कटी ।
ग्रथिताः सुदृढा रम्या सुजा मांसप्रपूरिताः ॥
पादा निर्मांसला वक्राश्चक्राकारखुरान्विताः ।
अप्रमाणं तथा वक्त्रः कर्णौ लघुतरौ स्मृतौ ॥
पार्श्वौ तनुतरौ ग्रस्तौ सुरसस्निग्धतालुकम् ।
दन्ताश्च स्निग्धराकारा विपुला चन्द्रवर्चसः ॥
सप्तविंशप्रमाणेन सुखमश्वस्य ग्रस्यते ।
कर्णौ षड्ङ्गुलौ प्रोक्तौ तालुकं चतुरङ्गुलम् ॥
चत्वारिंशच्च सम्पाद्याः स्कन्धाः सम्यक् प्रकीर्त्तिताः ।
एकविंशप्रमाणेन कटी सप्तविंशा तथा ॥
अतिरूक्ष्मा तथा निम्ना पुच्छं हस्तद्वयायतम् ।
लिङ्गं हस्तप्रमाणञ्च तथाण्डौ चतुरङ्गुलौ ॥
मार्गस्थानं चतुर्व्विंशं हृदयं षोड्शाङ्गुलम् ।
कटिकाण्डान्तरश्रोणिं चत्वारिंशत् प्रमाणतः ॥
मणिबन्धद्वयं चैव खुराश्च चतुरङ्गुलाः ।
अशीत्यङ्गुल उत्सेधो देघ्येण द्व्यधिकं शतम् ।
एवं क्रमेण गात्रस्य प्रमाणं वाजिनां मतम् ॥

दीर्घाणि चत्वारि तथोन्नतानि
चत्वारि रक्तानि च सूक्ष्मकाणि ।
ह्रस्वानि चत्वार्यथ चायतानि
भूयश्च चत्वार्यथ गम्भकानि ॥

द्वात्रिंशत् क्रमशोऽप्याहुर्ज्ञेयानि मुनीश्वराः ।
तान्यहं कीर्त्तयिष्यामि वाजिनाञ्च पृथक् पृथक् ॥

आस्यं भुजौ केशलकाटिकाश्च
दीर्घं चतुष्कं तुरगस्य ग्रस्तम् ।
तथोन्नते ग्राक्षपुटे ललाटे
मुखाश्च तज्ज्ञाखरकर्णौ वदन्ति ॥
ओष्ठौ च जिह्वाश्चय तालुकश्च
मेढ्रं तुरङ्गं शुभदं हयस्य ।
लघूनि वक्त्राक्षरगेषु कोष्ठं
श्रोत्राणि सर्व्वाणि तथैव पुच्छम् ॥
कर्णान्तरं कर्णसमन्वितञ्च
वंशं तथा ह्रस्वतरं प्रशस्तम् ।
वक्त्रं सुखं कन्धराजानुनी च
पार्श्वञ्च सप्तेः शुभदं प्रदिष्टम् ॥
कक्षान्तरं चोदरमध्यमञ्च
निम्ना कटी तानि समानुकानि ।
वक्षःग्रफोरूजघनस्थलञ्च
चतुष्कमेतत् पृथुलं प्रदिष्टम् ॥

इति श्रीनकुलसूते ऽश्वचिकित्सिते सर्व्वावयव-प्रमाणो नाम षष्ठोऽध्यायः ॥

अथ वेगः ।

गुणानामिह सर्व्वेषां गुणो वेगमयोऽधिकः ।
अश्वानां ग्रस्यते तज्ज्ञैरश्वज्ञानविचक्षणैः ॥
संवाहनविधानेन प्रकाशं यान्त्यसंशयम् ।
तस्मात् सर्व्वप्रयत्नेन वेगो ज्ञेयश्च वाजिनाम् ॥
अवाहिता विनश्यन्ति विनश्यन्त्यतिवाहिताः ।
अश्वानां वाहनं पथ्यं सातुरागश्च मोचयम् ॥
अधमा मध्यमास्ते स्युर्मध्यमाश्च तथोत्तमाः ।
उत्तमाश्चोत्तमा भूयो वाह्यमानास्तुरङ्गमाः ॥
रूपमश्वविदां श्रेष्ठं रूपे सर्व्वं प्रतिष्ठितम् ।
रूपेण तु विहीनस्य लक्षणं चाप्यलक्षणम् ॥
रूपावर्त्तगतिच्छायासत्ववर्णवयोबलम् ।
जवहीनस्य वाहस्य सर्व्वमेव निरर्थकम् ॥
गतेर्धैर्य्यतरो वर्णो वर्णाद्धैर्य्यतरः स्वरः ।
स्वराद्धैर्य्यतरं सत्वं सर्व्वं सत्वे प्रतिष्ठितम् ॥
लङ्घनं माल्लदोषेण पिल्लदोषेण जायता ।
दौर्ब्बल्यं स्वामिदोषेण खदोषो नास्ति वाजिनाम् ॥

जवो हि सप्तेः प्रथमं विभूषणं
जपाङ्गनायाः क्षमता तपस्विनः ।
द्विजस्य वेदोऽथ सुनेरपि क्षमा
पराक्रमः ग्रस्यबलोपजीविनः ॥

आकर्षन्निव गां खमन्निव खुरौ पर्य्याप्तसद्मन्निव
क्रीकुर्व्वन्निव खं पिबन्निव दिशो वायुं समन्वन्निव ।
साङ्गारप्रकरान् सृजन्निव महीं क्षायाममर्षन्निव
चञ्चच्चामरवीज्यमानवदनः श्रीमान् हयो धावति ॥
अलक्षितगलागतैर्न्नगड्ग्रां कटाक्षैरिव
क्षणानुनयशीतलैः प्रलयकेलिकोपैरिव ।
सुवृत्तमसृणोत्तरैर्न्नगड्ग्रासुरोजैरिव
त्वदीयतुरगैरलं धरणिचक्रमाक्रम्यते ॥
येषां दीपशिखोपमानि नयनान्युद्भावितः सन्निव
ग्रीवा क्षणभिवा विभाति च समा पादाश्च सुश्लोपमाः ॥
वेगो वायुरिवाथ वातरयसः स्वाङ्गारवप्रेङ्खितं
गृह्णन्नौचलगेन्द्रदुन्दुभिघनध्वानेभतुल्यस्वनः ॥
वक्त्रे यो हरिवाधिपप्रतिनिभो ग्रीवोपमो बाहुभिः
आवर्त्तैश्चशुभैः प्रधानकुलजाः सुस्निग्धवर्ण-प्रभाः ।
उद्ग्राहाः प्रियदर्शनाश्च सुभगाः ग्रासैः सुगन्धैश्च ये

धन्यास्ते जयराज्यवित्तसुखदाः संवाहका भूपतेः ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वेगवर्णनो-नाम सप्तमोऽध्यायः ॥

अथ आरोहणम् ।

अथातः संप्रवक्ष्यामि हयारोहणमुत्तमम् ।
येन विज्ञानमात्रेण रेवन्तेनोपमीयते ॥
चलकिसलयपादः कर्णमध्येकदृष्टेः
न चलति कटिदेशे आसने संस्थितश्च ।
हयहृदयगतिज्ञः स्थानदक्षोऽवधानी
स खलु तुरगयोक्ता मान्यते पार्थिवेन्द्रैः ॥
यो नित्यं दृढसुश्लिष्टललघुकः क्रोधानलैर्वर्जितः
सत्त्वैकस्थिरबुद्धिमध्यमतनुः प्राज्ञस्यतत्त्वज्ञकः ।
काले दक्षनिपातविश्रमयुतः ताम्बूलवक्त्रान्वितः
त्वेवं लक्षणसंयुतो हयरहो राज्याधिपैः पूज्यते ॥
ऊरू स्थिरौ यस्य चलौ च पादौ
त्रिकोन्नतं संहतमासनञ्च ।
स वाजिवाहः कथितः पृथिव्यां
श्रेष्ठा नरा भारवहा हयानाम् ॥
प्राज्ञः सत्त्वबलोत्साही दृढः सर्व्वाङ्गसौष्ठवः ।
जितशीतातपक्लेशो जितायासो जितासनः ॥
हयकालबलप्राज्ञजवकाम्याध्वयोगवित् ।
श्रान्तोपचारसारज्ञो रणक्रीडासु दीक्षितः ॥
वाजिनां हृदयज्ञश्च स्थाने दक्षनिपातवित् ।
दुष्टाश्वदमने दक्षः सर्व्वक्लेशसहः शुचिः ॥
यासौषधान्नपानीये परभृद्दावलोकने ।
त्रिषु श्रेष्ठः प्रवेशे च निर्गमे कुशलोऽश्ववित् ॥
रोगं विकुरुते यश्च दृष्ट्वा बाधाविचारवित् ।
धनुःकुन्तासिशक्तिज्ञः सोऽश्ववाहः प्रकीर्त्तितः ॥
वक्त्रे स्कन्धे सुखे कोष्ठे गात्रे सक्थौ च ताडयेत् ।
उन्मार्गो यदि भ्रष्टोऽश्वो मूढः स्खलति दृश्यते ॥
कुपिते पुच्छसंस्थाने भ्रान्ते जानुहये तथा ।
सर्व्वथा प्राप्तदक्षस्य दक्षमेकं निपातयेत् ॥
दृश्यते स्कन्धमुद्दिष्टं स्खलिते जघनान्तरम् ।
भीते वक्त्रःस्थलं हन्याद्वक्रोन्मार्गगामिनम् ॥
अस्थाने ताडितो वाजी बहून् दोषान् प्रदर्शयेत् ।
तावद्भवन्ति ते दोषा यावज्जीवत्यसौ हयः ॥
दक्षेनाभिभवेद्वाहारोहेद्दक्षवर्ज्जितान् ।
दक्षो हि साधनं तीव्रं पदं दक्षात् प्रजायते ॥
तुलावद्धृता वल्गा नात्युच्चा नातिलम्बिता ।
दोषं दृष्ट्वा तु कर्त्तव्या तिर्य्यगाकुंचिता शनैः ॥
कटिं सन्धिं च शैथिल्याद्वहमानस्य ताडयेत् ।
सद्यः प्रस्खलिते गात्रं तत्र दक्षं प्रदापयेत् ॥
अकालदक्षपाताच्च अकालश्रमसम्भवात् ।
अकालहिंसावाताच्च तेन वाजी न धावति ॥
त्रासनं शिथिलं यस्य स्वरो यस्य न भीषणः ।
लघुप्रहारदाता च वाजी तस्य न धावति ॥
सर्व्वलक्षणसम्पन्नः सर्व्वदोषविवर्जितः ।
कुलशीलबलोपेतः कथमश्वो न धावति ॥
गतिरेका प्लुता चान्या चतुराख्या तृतीयका ।
वेगसन्धिश्चतुर्थी च धारावेगगतिस्तथा ॥
हयरागार्थवेषस्य चञ्चलस्य त्रिकोणतः ।
नित्यमुद्यतदक्षस्य तस्य वाजी न धावति ॥
धारा तु पञ्चमी प्रोक्ता न शृणोति न पश्यति ।
सर्व्वकर्म्माक्षमो वाजी तस्मात्तां परिवर्जयेत् ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते आरोहणं नाम अष्टमोऽध्यायः ॥

अथ ऋतुचर्य्या ।

कर्म्मचर्य्यासु नित्यानां शुद्धानां सुनिवर्हितम् ।
धनुरष्टादशे योज्यं वाजिनां मण्डलं क्रमात् ॥
सङ्कोचयेच्च्यं तावद् यावत् कार्म्मुकपञ्चकम् ।
तदूर्द्धं मण्डलैर्योज्यो गोमूत्रात्तदनन्तरम् ॥
ऋतुवृत्तानुवृत्ता च गोमत्रा सर्व्वकर्म्मसु ।
युज्यमानानि दृश्यन्ते प्रायशो हि विचक्षणैः ॥
शालिहोत्रसुनिप्रोक्ता चर्य्या षोड़श वाजिनाम् ।
तासामनुपयोगित्वान्न कृतः संग्रहो मया ॥
तीक्ष्णस्खेकेन सुदितो द्वाभ्यां भद्रस्तु धावति ।
त्रिभिर्दक्षैस्तदा मन्दः क्रमात् षड्भिताड़नैः ॥
तीक्ष्णाश्वभद्रमन्दानां प्रधानो जव उच्यते ।
सोऽप्यनेनैव मार्गेण संविभज्यो विजानता ॥
अवाहिता विनश्यन्ति सर्व्वकर्म्माक्षमा हयाः ।
क्षुधा व्याधिपरीताङ्गा जायन्तेऽत्यन्तवाहनात् ॥
बलं कालो वयो भूमिः कालः सत्त्वमतः क्रमात् ।
कुर्य्यादेकान्तरे योगञ्चातियोगो हि दोषवान् ॥
तच्च लोकप्रसिद्धं हि बोद्धव्यं यत्नतो बुधैः ।
हयवाहनवेज्ञानी नरेन्द्रैः पूज्यते सदा ॥
धावितं ये गुणाः सप्तैर्वल्गमाणान्निबोध तान् ।
शालिहोत्रादिशास्त्राणां यायामफलसम्भवान् ॥
स्थिरमांसो भारसहो लघुगात्रः पराक्रमी ।
दीप्राग्निश्च सुशीलश्च यायामेनोपजायते ॥
सत्यार्थो विनयी प्रीतो निर्द्वेषस्तापवर्जितः ।
वेदवित्सादिचित्तज्ञ उक्तो धावति तिष्ठति ॥
सुभावर्त्तगतिच्छायाबलशीलसमन्वितम् ।
गन्धर्वस्वरोत्कण्ठसारपुङ्खविभूषितम् ॥
एवं विधं समारुह्य देवतांशं हयं नृपः ।
जित्वा रिपुकुलं भुंक्ते निःशङ्कोऽथ वसुन्धराम् ॥
जवः श्रेष्ठसुरङ्गानामुत्तमाधममध्यमः ।
त्रिविधोऽपि तथा भिन्नो जवभेदः स उच्यते ॥
यवोदरैरष्टसङ्ख्यैरङ्गुलं परिकीर्त्तितम् ।
हस्तश्च तैश्चतुर्विंशैः कार्म्मुकं तैश्चतुर्गुणैः ॥
अक्षौहिणीमेधवतः काष्ठा अश्वलघ्वक्षरं तथा ।
मात्रा ज्ञेया प्रमाणेन पूर्व्वप्रोक्ता तपोधनैः ॥
मात्राधोड़शकेनाश्वो यो धावति धनुःशतम् ।
तमश्वसत्तमं विद्याद्वायुवेगं महाजवम् ॥
यथोत्तमजवा वाहास्तथाश्वा मध्यमाधमाः ।
चतुरब्दाधिकां दृष्टिं मात्राणां लक्षणं बुधाः ॥
नभस्यश्वयुजे मासि भाराध्वानं जवं त्यजेत् ।
वह्न्यग्निसदृशं पित्तं श्रमात् कुप्यति वाजिनाम् ।
कार्य्यैरेव महान् किञ्चिद् युज्यो नभसि कार्त्तिके ॥
हेमन्ते शिशिरे योगं वसन्ते च यथेच्छया ॥
शैत्यक्षयात् शनैर्गात्रं न ग्रीष्मे वाहयेद्धयम् ।
बालो वृद्धः क्षुधो रोगी दुर्बलस्नेही महाबली ॥
पूर्णातिरिक्तकोष्ठश्च गुर्व्विणीं न च वाहयेत् ।
समां च विपुलाश्चैव किञ्चित्-पांशुसमन्विताम् ॥
एकान्ते विजने चैव रङ्गभूमिं हयं नयेत् ।
सान्द्रश्चैव सुकठिनां पाषाणोदकवर्ज्जिताम् ॥
तृणकाष्ठसमायुक्तां रङ्गभूमिं विवर्ज्जयेत् ।
विगूढं कारयेदश्वं क्रोशक्रोशद्वयान्तरे ॥
वारि दद्याद् यथाकामं घासं सुस्थिश्च कारयेत् ।
अन्यथा दोषजातानि वक्ष्याम्येतानि तावतः ॥
गुरुविसब्यगात्रश्च क्षिप्रश्वासी च कम्पते ।
दुर्मनाः रुद्धविण्मूत्रः सर्व्वकर्म्माक्षमो हयः ॥
गूढमेढ्रोन्नतग्रीवो रक्तमेही गुरुक्लमः ।
क्षुत्तृष्णार्तश्शुष्कास्यश्छायां प्राप्य वितिष्ठति ॥
तर्जनैर्हन्यमानोऽपि विधुनोति शिरः परम् ।
सुदुर्विनमते दृष्टं पदमेकं न गच्छति ॥
भाराध्वानपरिश्रान्तं श्रमैः संक्रामयेत् पथि ।
नावतारितपर्य्याणं मार्गेऽध्वानसमागतम् ॥
सुकृपुच्छाग्रवन्यस्त खलीनं नावतारयेत् ।
मर्द्दयित्वास्य गात्राणि पांशुमध्ये विवर्त्तयेत् ॥
स्नानपानावगाहश्च प्रतिपानं सभोजनम् ।
सर्व्वं क्रमेण कर्त्तव्यमन्यथा दोषसम्भवः ॥
रक्तपित्तसमीरोत्थमन्यास्त्वोदरादयः ।
कृद्रोगा वातशूलानि शीतोष्णोदकपानतः ॥
रक्तपित्तहरं देयं प्रतिपानं गुड़ौदनम् ।
रक्तपित्तसमीरोत्थं दातव्यं शर्करोदकम् ॥
जीवनं वातपित्तघ्नं हृद्यं बल्यतमं ततः ।
सर्व्वरोगहरोऽश्वानां मधु जाङ्गलको रसः ॥
स्वच्छात्तच्च घृतं क्षीरं वारियुक्तं तुरङ्गमः ।
पीत्वा हि निर्हरेद्दोषान् श्रमभाराध्वसंश्रवान् ॥
धर्म्मार्थकामा विजयो यशःश्री-
प्रीतिसुखं ज्ञातिजनेश्च पूज्या ।
रणे निमित्तानि शुभावहानि
नृपस्य चैवं विनिवेदयन्ति ॥
प्रत्यूषकाले च दिनं निरीक्ष्य
वह्निं द्विजं पूर्णघटं कुमारीम् ।
छत्रं ध्वजं चामरदर्पणञ्च
रूपञ्च दृष्ट्वा तुरगं जयाय ॥
श्रुत्वा तु शब्दाम्युदवेदवाक्यं
पुण्याहमाङ्गल्यशिवस्य गीतम् ।
हृद्यं निमित्तं भवति स्वनेन
ध्रुवं जयं तत्र रणे नराणाम् ॥
सन्त्याड्घ्रिघातेन महीं निहन्ति
हृष्यन्ति ये स्वामिसुखं निरीक्ष्य ।
प्रदक्षिणावर्त्तविकीर्णपुच्छा
जयावहास्ते समरे नृपाणाम् ॥
विच्छन्नदीनस्वरगद्गदा ये
अश्रुस्रुता भिन्नपुरीषमूत्राः ।
अनल्पमाना दिनकृन्निरीक्ष्याः
पराजयं ते कथयन्ति युद्धे ॥
अन्यापदं याश्च वदन्ति दीना
सवेतरं चक्रविकीर्णपुच्छाः ।
युग्यासनादीन् परिवर्जयन्ते
पराजयं ते कथयन्ति भर्त्तुः ॥
विना निमित्तं रसयन्त्यभीक्ष्णं
आकुञ्चिता व्यापितमक्षिकाक्षाः ।

ध्यायन्ति घातेच्छ न चोद्विजन्ते
भयावहास्ते समरे नृपाणाम् ॥
श्लोकं श्लीलं भयं लज्जामालस्यं चैवमादिषु ।
सुकुलं तं विजानीयादलं पर्य्याणवारणे ॥
स्थाणुकण्टकवृक्षेच्छ सुधाखदिरकण्टकैः ।
स्वामिघाताय चादत्ते तेषां रूपमिदं शृणु ॥
वानरोलूकमार्जारतरक्षुगर्दभलोचनाः ।
गतिर्वा ऋसुरेसुल्या स्थूलमेढ्रशिरान्विताः ॥
लम्बौष्ठकर्णनासाच्च क्रुतक्षुद्दीनाधिकङ्घिकाः ।
विच्छिन्नप्रोथगर्ब्बा ये भ्रुकुटीचित्रमेहनाः ॥
एते दोषास्तथान्येऽपि सुकुलाश्वसमुद्भवाः ।
खलानामिह राजेन्द्र! वक्तुं शक्या न माद्दशैः ॥
लक्ष्यं प्रधानमित्येके चान्ये लक्षणमाश्रिताः ।
लक्ष्यलक्षणमेतेषां तेनेदं दुष्करं विदुः ॥
अश्वाग्निरतिसंक्षेपादतिव्याप्तिच्च विस्तरात् ।
मुनीनामेकवाक्यत्वाद् ब्रूयामः स्थितिदुष्करान् ॥
सत्ववर्णगतिछायास्वरस्थानगतिः कृशम् ।
पुच्छं पुष्टकनामानि दोषं वा जवलक्षणम् ॥
एवं लक्षणसंयुक्तं दृश्यते शूररक्षणे ।
लक्षणेन विहीना ये निर्दोषाःस्युः प्रधाविताः ॥
हयरोहस्य का चिन्ता लक्षणैः शुभनिन्दितैः ।
तेनात्र न कृतोऽस्माभिर्हयलक्षणविस्तरः ॥
हयवाहनविज्ञानं कौतुकाहितबुद्धयः ।
अनायासेन गच्छन्ति परं क्षुद्रा इमे जनाः ॥
चलासनं कषा रागाः प्राणिघातप्रतोदनम् ।
पदप्रघातसंज्ञानि दोषो यैरुपजायते ॥
कामात् कोपाद्भयान्मोहाद्दर्पाच्चैव मदाश्रयात् ।
पर्य्याणारोहदोषाच्च दुष्यन्तेऽश्वा निसर्गतः ॥

श्रीयुक्तसामन्तनरेन्द्रवन्दितं
रणे हयारोहवराभिनन्दितम् ।
धर्म्मार्थकामादियशःप्रधान-
मित्थं कृतं वाहनशास्त्रविस्तरम् ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वाहनाध्यायो नवमः ॥

अथ धातुपरीक्षा ।

अथातः संप्रवक्ष्यामि धातूनां लक्षणं परम् ।
येन विज्ञानमात्रेण ज्ञायन्ते रोगसम्भवाः ॥
ततः शुद्धशरीरोत्थरक्तदोषानवाप्नुयात् ।
रक्तदोषात्तदा वाजी प्राप्नोत्येव महाभयान् ।
तस्मात् सर्व्वप्रयत्नेन रक्तं ज्ञेयं विचक्षणैः ।
आषाढ़समये प्राप्ते शिरामोक्षेण कृतक्षणः ॥
तेन संशोधितं रक्तं वाजिनां दोषसम्भवम् ।
ततः शुद्धशरीरोऽथ पिण्डाद्यैश्च बलीकृतः ॥
लावणे भक्ष्यमासाद्य वर्च्चवत् शुद्धो भवेत् ।
यदि रक्ताधिको वाजी श्लेष्मलमश्नाति कर्हिचित् ॥
रक्तात् सञ्जायते पित्तं ततो नाशमवाप्नुयात् ।
रक्ताधिकश्वासपुटः क्षेदाद्यैः श्लेष्मलश्चेत् ॥
संप्राप्य श्लेष्मरिचाद्वयो नाशमवाप्नुयात् ।
हीनरक्तो यदा श्लेष्मं रूक्षोऽश्नाति तुरङ्गमः ॥
तदा वायुं परं प्राप्य सद्यो नाशमवाप्नुयात् ।
तस्मेदं लक्षणं प्रोक्तं रक्तकोपसमुद्भवम् ॥
धातूनामपि सर्व्वेषां ज्ञेयचिह्नं विचक्षणैः ।

पित्तरक्तप्रकोपेण यदा संमीयते हयः ॥
तदा कण्डूतिमासाद्य कषते सततं वपुः ।
छायां वाञ्छति यत्नेन विशेषेण जलाश्रयम् ॥
सुदुर्वाञ्छति पानीयमाहारञ्च विशेषतः ।
एवं वातोत्थरक्तेन ज्ञात्वाश्वमीड़ितं ततः ॥
शिरामोक्षं विधायैव दद्यात् सकटुकं गुड़म् ।
ततः शुद्धिमवाप्नोति नीरोगः संप्रपद्यते ॥
पित्ताक्तगूदूषितो वाजी यदि चाश्रूणि सुञ्चति ।
नेत्रान्ते पाण्डुरत्वञ्च सद्यो मृत्युमवाप्नुयात् ॥
नेत्रयोर्लक्षणं प्रोक्तं पित्तरक्तसमुद्भवम् ।
श्लेष्मरक्तप्रकोपेण यदा सम्मीयते हयः ॥
अधोवक्त्रो भवेन्नित्यं कासते च मुहुर्मुहुः ।
आहारं न च गृह्णाति नोत्साहं कुरुते क्वचित् ॥
न विन्दति कण्डूघातं न च पार्ष्णिं न चासनम् ।
नासाग्रेण चिपेत्तोयं वह्निर्घर्म्मेच्च वाञ्छति ॥
तस्यापि प्रोथयित्वाशृङ्गं दद्याच्छुण्ठ्या युतं गुड़म् ।
सर्व्वं रक्तं ततः शुद्धा निःश्लेष्मं समवाप्नुयात् ॥
वाजिनः श्लेष्मरक्ताभ्यां दूषितस्य सदा भवेत् ।
नेत्रान्ते बिन्दुकाकारकण्डूस्तस्य तथोदरे ॥
तदा मृत्युमवाप्नोति षण्मासाभ्यन्तरे ध्रुवम् ॥

शुण्ठ्याढ्यता गोक्षुरक घनञ्च
श्यामावचाहिङ्गुयुता च यष्टिः ।
कफप्रणाशाय विनिर्मितोऽयं
पिण्डः प्रसिद्धश्च कफापहश्च ॥

नोचेदश्नाति शुण्ठ्याढ्यं सैन्धवं नस्यमार्गतः ।
वायुरक्तप्रकोपेण पीड़ितस्तु तुरङ्गमः ॥
कुक्षिह्रदये हयस्तीव्रं मुहुः श्वासं प्रमुञ्चति ।
नैकत्र मन्यते स्थातुं क्षिपते च निरर्गलम् ।
एवं वातोद्भवं ज्ञात्वा रक्तन्दद्यै हयस्य च ॥
प्रोथयित्वाथ सन्दद्यान्महाशृतमनल्पकम् ।
ततः शुद्धिमवाप्नोति परां पुष्टिञ्च गच्छति ॥
उत्साहं कुरुते मार्गे सर्व्वदोषविवर्ज्जितः ।
वातरक्तप्रकोपेण लोचनान्ते हयस्य च ॥
यदा स्यातां सिते रक्ते काश्यः कण्डूस्तथानने ।
तदा तस्य भवेन्मृत्युर्यदि नाश्नाति चामिषम् ॥
अश्मकञ्च युतन्दद्या माहिषेण निशागमे ।
सन्निपातेऽथ रक्तेन यदा सम्मीयते हयः ॥
यदा वेपथुमाप्नोति काशते च निरर्गलम् ।
निद्रालस्याग्निमन्दत्वं वस्तौ मलनिबन्धनम् ॥
कर्णयोः पातनञ्चैव वक्त्राल्लालाविमोक्षणम् ।
तत्रापि प्रोथयेद्रक्तं ततो लङ्घनमर्हति ॥
यावद्दोषस्य निर्णाशं स्तोकोदकक्रियाशनः ।
क्वचिद्दुग्धं क्वचिच्छीतं क्वचिद्भेषजसंयुतम् ॥
प्रदेयं युक्तितत्त्वज्ञैर्वारि वार्य्यं न कुत्रचित् ।
सपथ्या चान्दता चैव कटुका च वचा तथा ॥
शमयेत्तत्क्षणादेव त्रिधातुकुपितं ज्वरम् ।
शिरीषं श्रीफलञ्चैव वेतसञ्चैव वृद्धिभाक् ॥
मन्दाग्नित्वं सदोषाणां करुते भस्मसादृढतम् ।
मधुकं मधुजालञ्च माधुर्य्यं कुलिकान्वितम् ॥
शिरीषं क्षुद्रकं लाक्षां क्वाथयित्वा त्रिभागतः ।
यस्यैतत् सन्निपाताय वाजिनः संप्रदीयते ॥
तस्य तन्नाशमायाति तमः सूर्य्योदये यथा ।

स्वस्थस्यापि हि नेत्रान्ते स्यातां नीले च वाजिनः ॥
गन्धञ्च सदृशः क्षीणा तदा मृत्युर्द्विमासिकः ।
नीले पीतेऽथ नेत्रान्ते स्यातां चेद्वाजिनः क्वचित् ।
स निर्व्वाणमवाप्नोति त्रिभिर्मासैरसंशयम् ॥
यस्य नेत्रान्तरे रेखा बहुवर्णा प्रजायते ।
विशेषात् स्वरभेदः स्यात्तस्यायुः पाञ्चमासिकम् ॥
जिह्वायां जायते बिन्दुरकस्माद् यस्य वाजिनः ।
क्रुच्छ्रेच्छ जीवते मासं स वाजी नाच संशयः ॥
पीतो मासद्वयेनैव सन्निर्द्दग्धं प्रयच्छति ।
त्रिभिर्मासैस्थथारक्तश्चतुर्भिश्च विचित्रितः ॥
पञ्चभिर्नीलवर्णश्च षड्भिर्भिन्नश्चसमाकृतिः ।
सप्तभिः पाटलाकारश्चन्यकाभस्तथाष्टभिः ॥
नवभिश्च हरिद्राभो दशभिर्जन्तुकोपमः ।
एकादशभिर्धूम्राभो वत्सरेण हिमद्युतिः ॥
यस्य श्वासो भवेदुग्रः शरीरं पुलकाङ्कितम् ।
जिह्वा हिमकराकारा मासषट्कं स जीवति ॥
ग्रीवाग्रे पिड़िका यस्य जायते च तथाधरे ।
स्रुवं करोति रक्ताढ्यं मासषट्कं स जीवति ॥
वर्णैः श्वेतो यदा यस्य नेत्रयोश्च प्रजायते ॥
दशमासान् समासाद्य पित्तार्त्तो न स जीवति ।
यस्य नीलप्रभे स्यातां नेत्रे वातार्दितस्य तु ।
मासत्रयञ्च क्रुच्छ्रेण यः सप्तिः स न जीवति ॥
श्लेष्मयुक्तस्य वा रक्ते यदि स्यातां विलोचने ।
वक्त्रगन्धः सुरातुल्यो दश मासान् स जीवति ॥
यस्य नेत्रे हरिद्राभे स्यातां पित्तार्दितस्य च ।
तस्यायुः सप्तमासाख्यं मुनिभिः परिकीर्त्तितम् ॥
बहुवर्णे घने नेत्रे स्यातां धातुसमागमे ।
तस्य सन्निर्भवेन्मृत्युः सप्तरात्रादसंशयम् ॥
यस्यैकं लोचनं नीलं द्वितीयं रक्तसन्निभम् ।
दृश्यते स च विज्ञेयः पित्ताढ्यो मासजीवकः ॥
यस्य पित्तप्रसक्तस्य काले नीरदवर्जिते ।
हयस्य जीवितं तावद्दिनानि दश पञ्च च ॥
एवं रक्तविकाराणां ज्ञात्वा धातुं तुरङ्गमे ।
ततः प्रतिक्रिया कार्य्या उक्ता या कीर्त्तिता परा ॥
भयादपीतपानीयग्रहीतविश्रीयुतस्य च ।
आर्त्तोऽपि ताड़ितोऽत्यर्थं तिर्य्यग्विद्धो यदापि वा ॥
श्रमाद्धराच्च बन्धाद्वा गात्रे वा विषमस्थिते ।
क्षीणशोणितमांसस्य शिरावेधः प्रशस्यते ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते धातुपरीक्षाध्यायो दशमः ॥

अथ ऋतुचर्य्या ।

द्वासप्ततिसहस्राणि नाड़ीनां हि भवन्ति च ।
वाजिनामिह सर्व्वेषां वायुरक्तं व्यवस्थितम् ॥
तासां निर्मोचनार्थाय द्वाराण्यष्टौ वदाम्यहम् ।
यैर्याति कुत्सितं रक्तं सर्व्वदेहसमुद्भवम् ॥
कण्ठे वक्षसि तालौ च नाभयोश्च मुखे तथा ।
अण्डयोरथ पादेषु पादयोरुभयोरपि ॥
कालं बलञ्च विज्ञाय वाजिनां भिषगुत्तमः ।
शिरामोक्षं प्रकुर्वीत स्थानेष्वेतेषु पण्डितः ॥
अन्ये सप्तदश प्राहुः शिराद्वाराणि वाजिनः ।
विकारयुक्तं यत्रक्तं सुस्थस्यापि वर्जयेत् ॥
एवं शरदि यः सम्यक् पुष्टिं नयति वाजिनाम् ।

तस्य यद्वाञ्छितं किञ्चिद्दयानार्थं तच्च सिध्यति ॥
ततो हेमन्तमासाद्य निवातं निवधेद्धयम् ।
मासोत्थं यवसन्दद्यात् पानीयञ्च यथेच्छया ॥
घृतं वा यदि वा तैलं पाने दद्याद्विचक्षणः ।
वाहयेच्च शनैर्नित्यं सर्व्वदोषप्रशान्तये ॥
ततः शिशिरमासाद्य दद्यात्तैलं हि वाजिनाम् ।
पलार्द्धप्रमाणेन यावद्दिनत्रिसप्तकम् ॥
यवोत्थं यवसन्दद्यादेकविंशत्यहानि च ।
यवाभावेऽथ चणकान् दद्यादार्द्रतरान् सदा ॥
तदभावे मसूरांश्च शुष्कार्द्रांस्तैलसंयुतान् ।
यवसं चापि तद्देयं नीरोगो जायते हयः ॥
औषधानाञ्च सर्व्वेषां क्वाथानां नस्यकर्म्मणाम् ।
तैलानाञ्च घृतानाञ्च यवसं यवसं परम् ॥
पर्व्वतानां यथा मेरुरायुधानाञ्च वज्रकम् ।
तथा सर्व्वोपचाराणां संप्रोक्तमाश्वयुजं यवाः ॥
देवतानां यथा विष्णुर्ब्रह्मा वेदविदां वरः ।
नदीनाञ्च यथा गङ्गा तथा श्रेष्ठा यवा हये ॥
यथोदितः सहस्रांशुर्निःशेषं तिमिरं जयेत् ।
तथा शरीरजान् दोषान् यवाः सम्यैर्हरन्ति च ॥
उपचारक्रियाः सर्व्वाः पञ्चर्त्तुजनिता हये ।
कृताः स्युर्यवभोज्येन सम्यक्तस्य कृता नरैः ॥
यस्य दत्ता यवा भोज्ये शिशिरे वसुपस्थिते ।
अकृतापि कृता सर्व्वा पञ्चर्त्तुजनिता हये ॥
कृताः स्युर्यवभोज्येन सम्यक्तस्य कृता नरैः ।
नीरोगास्तुरगाः सर्व्वे शालिहोत्रमतं यथा ॥
पञ्चर्त्तुजनिता वाथ क्रिया न्यस्ता तुरङ्गमे ।
अतीतास्ते विज्ञानीयाद्यवभोज्यविवर्जिताः ॥
एवं रक्तविशुद्धानां ज्ञात्वा यत्नेन वाजिनाम् ।
दद्याद्गोभूवसंयुक्तां सतैलां च हरीतकीम् ॥
दिनं त्रिसप्तकं यावत् पलपञ्चप्रमाणतः ।
ततः शुद्धिमवाप्नोति निःशेषादधिरोहणात् ॥
ततो नवतृणाहारं संप्राप्य मृगनोहरम् ।
परां पुष्टिमवाप्नोति नीरोगश्च प्रजायते ॥
न प्रायो वाहयेद्दृश्यं प्रावृट्काले कथञ्चन ।
य इच्छेद्वाजिनस्तस्य वाहनं दशमासिकम् ॥
कूपोदकं सदा ग्रस्तं पानाय जलदागमे ।
अभ्यङ्गः कटुतैलेन निर्वातस्थानबन्धनम् ॥
एकाहान्तरितं दद्याल्लवणञ्च विचक्षणः ।
पलद्वयप्रमाणेन सुखजाग्रपरिग्रहे ॥
सुखरोगमवाप्नोति चारस्वादविवर्जितः ।
दृष्ट्वाभीप्सितं सिक्ताङ्गस्तेजसा त्यज्यते हयः ॥
अशुद्धोदकजान् प्राप्तान् प्राप्नोति ग्रसतः परान् ।
नवोदकप्रधानेन बलहीनश्च जायते ।
तस्मात् सर्व्वप्रयत्नेन प्रावृट्काल उपस्थिते ।
अनेन विधिना प्राज्ञो वाजिनः परिपोषयेत् ॥
ततः शरदमासाद्य बहुखड्गसमन्वितम् ।
ग्रस्तं क्षारोदनं सम्यक्पलाद्यपरिसंख्यया ॥
दुग्धं वा केवलं रात्रौ क्वथितं संप्रग्रस्यते ।
तथान्यदपि यत्किञ्चिन्मधुरं संप्रजायते ॥
पानाय क्षारसं तोयं यवसं सुमनोहरम् ।
नीलवर्षमुकुष्टाश्च घृतं प्राशेन संयुतम् ॥
वाहनं च प्रयत्नेन सुखस्थमपि वर्जयेत् ॥

परीक्षायौ यथा देव्याः स्नेहस्य च प्रतिक्रिया ।
हयकौवस्य तद्वच्च परीक्षा यवभक्षणे ॥
यथा सांयात्रिकः पारं गत्वोत्तैः खस्थतां व्रजेत् ।
तद्वत् यवाशनोत्तीर्णाः शुद्धदेहा हयोत्तमाः ॥
अल्पेनापि हि छिद्रेण यथा नश्यति नौर्जले ।
स्वल्पेनापि हि दोषेण यवदोषास्तथैव च ॥
एवं ज्ञात्वा विदग्धेन यवा देयाः प्रयत्नतः ।
प्राप्तचीरा विशेषेण शिशिरे समुपस्थिते ॥
शुष्का वापि यवा देयाः सर्व्वकालं च वाजिनाम् ।
प्राग्दत्तास्ते ततो ज्ञेयाः सर्व्वव्याधिविनाशनाः ॥
यश्चाश्नाति यवानाशु शुष्कांश्च स्वेच्छया सदा ।
न तस्य जायते रोगः कदाचिच्च यवाशभाक् ॥
न च शूलं न च श्वासो न च क्षीहा न च क्रमः ।
न च रक्तप्रकोपश्च न च वातादिधातवः ॥
योगोऽश्वनार्थं वाहानां प्रधानो यव इष्यते ।
यवाभावेऽथ चणका धान्यमन्यतमं परम् ॥
यवाभावेऽथवा दद्यान्मुकुष्टांस्तैलसंयुतान् ।
भोजने तुरगेन्द्राणां परां पुष्टिमवाप्नुताम् ॥
सुकृष्टभोजनाद्वाजी पुष्टिं गच्छत्यलौकिकीम् ।
उत्साहं परमं धत्ते स च रोगैर्विमुच्यते ॥
अप्राप्तौ च सुकृष्टानां मुद्गा देया मनीषिभिः ।
सतैलास्तेऽपि कुर्व्वन्ति पुष्टिं सत्त्वविवर्द्धिनीम् ॥
एते पुष्टिगुणाः प्रोक्ताश्चणकाहारजा हये ।
नान्यस्तत्सादृशभावेन सर्व्वेषां तान् विनिर्द्दिशेत् ॥
नान्यद्धितं प्रशंसन्ति पञ्चमं वाजिनां बुधाः ।
भक्षणार्थं यतस्तस्य दानोल्लङ्घनमुत्तमम् ॥
अन्नाभावे प्रदातव्यं घृतं वा यदि वा पयः ।
ग्रस्यं वा मांसमेवाथ पुष्ट्यर्थं वाजिनां सदा ॥
यस्याश्वः ग्रस्यमश्नाति सदा लवणमिश्रितम् ।
किं तस्य ग्रस्यदानेन यथाभूतेन भूपतेः ॥
ग्रस्याभावेऽथ यवसं शुष्कं वा यस्य वाजिनः ।
दिवानिशमरण्ये च स्वेच्छया संविमुञ्चिकाः ॥
ते चापि वाजिनो ज्ञेया यथा ग्रस्यचरास्तथा ।
तथा सर्व्वप्रयत्नेन मुक्तान् सञ्चारयेद् वने ॥
आरोग्यार्थं सुपुष्ट्यर्थं सुतृप्त्यार्थं विशेषतः ।
वित्तव्ययस्य रक्षार्थं हरेद्रोगं प्रयत्नतः ॥
वसन्तसमये प्राप्ते वाहयेत् सततं हयम् ।
सनिम्बं लवणं दद्यात्ताभ्यां तैलं विशेषतः ॥
सर्व्वत्र सम्भवे भोज्यं तैलं वा यदि वा घृतम् ।
न दोषकारणं प्रोक्तं सञ्चारं लवणान्नतः ॥
वसन्तसमये योज्याः स्थाने तिष्ठति बन्धने ।
तस्योत्साहः प्रणश्येत बालस्यं जायते वपुः ॥
ततो मन्दाग्निनाविष्टो रोगाभावे प्रजायते ।
तस्मात् सर्व्वप्रयत्नेन वसन्ते वाहयेद्धयम् ॥
ग्रीष्मकाले च संप्राप्ते दूर्व्वाभोज्यं प्रशस्यते ।
वाजिनामिह सर्व्वेषां घर्म्मतापोपशान्तये ॥
घृतपानं विशेषेण सुच्छायासु निबन्धनम् ।
रक्तस्रावे च गात्रेषु यवसं वा घृतसंयुतम् ॥
दूर्व्वाभावे प्रदातव्यं तुरगाय घृतान्वितम् ।
क्षुत्काग्रस्यमध्यांश्च सर्व्वदोषोपशान्तये ॥
एवं खस्थमयं सम्यगुपचारं करोति यः ।
हयस्य तु गृहे नित्यं तस्य वर्द्धन्ति वाजिनः ॥

नीरोगाः पुष्टिसंयुक्ताः प्रकृत्योत्साहसंयुताः ।
तर्पिता भूमिपैरश्वा भूमिमार्गक्रियाक्षमाः ॥

इति श्रीनकुलदेवज्ञविरचितेऽश्वचिकित्सिते ऋतुपर्य्यायाध्याय एकादशः ॥

अथ नस्यः ।

कासश्वाससमो नस्यो वातपित्तकफोद्भवः ।
नस्यः संज्ञाग्र्येत्तस्मात्तं नस्यं योजयेद्धये ॥
पिप्पली सैन्धवं सारं नागरञ्च गुडान्वितम् ।
क्षत्तिकासारमध्याग्र्यं वाजिनां श्लेष्मनाशनम् ॥
चूलिकालवणं नस्ये सदा रोगविनाशनम् ।
सिता चन्दनतोयानि सात्तुकाख्यानि वाजिनाम् ।
नस्यकर्म्माणि युक्तानि नाड़ीवातप्रशान्तये ।
रुद्रुकैरार्द्रकं सान्द्रं वचाचारविमिश्रितम् ॥
नस्ये दत्तं वातशान्त्यै हयरोगविनाशनम् ।
शर्करां माक्षिकं सैरं पटोलं पलसंयुतम् ॥
नस्ये शरदि सम्प्रोक्तं जायते रोगशान्तये ।
वचा चोशाम्बुकं कुष्ठं सुखी च कासमर्द्दिका ॥
युक्तं घृतोदके स्तोके तैर्यां नस्येऽपसर्पयेत् ।
गुडूची कौसुदी ताली मिश्रिता कूपवारिणा ॥
नस्ये दत्ता वराश्वानां शिशिरे सुखदा स्मृता ।
व्यायामार्गे महानस्यं सर्व्वरोगविनाशनम् ॥
केवलं कटुतैलं वा गोमूत्रे पाचितञ्च यत् ।
मैथुनादिक्लमघ्नीनां स्रोतोबलकरं विदुः ॥
कण्ठरोगे तथा नस्यं गोमूत्रलवणान्वितम् ।
महद्गुणकरं प्रोक्तं सर्व्वदोषनिवारणम् ॥
व्यायामार्गस्य मूलेन नस्ये मूत्रञ्च छागलम् ।
सुखरोगविनाशाय नस्यं मत्स्यवसोद्भवम् ॥
लशुनं पिप्पलीमूलं गण्डकी नागकेशरम् ।
दत्तं नस्येन रोगघ्नं कटुतैलेन वाजिनाम् ॥
नस्यं पर्य्युषितस्तोयैः प्रातर्दत्तं तु केवलैः ।
अश्वानाञ्च नराणाञ्च चाक्षुष्यं बलवर्द्धनम् ॥
पिप्पलीमिश्रतोयेन सशितासलिलेन च ।
नस्यं यच्छति सम्प्रोक्तं सर्पिषा यच्छते बलम् ॥
नस्यं स्निग्धं तथा रूक्षं तिक्तञ्च मधुरं तथा ।
चतुर्द्धा वाजिशास्त्रज्ञैर्यथावत्परिकीर्त्तितम् ॥
देयं वाताधिके स्निग्धं रूक्षं तिक्तं कफाधिके ।
मधुरं चैव पित्ताढ्ये तुरङ्गे समयोचितम् ॥
द्विपञ्चाशत्पलमाणं वा श्रेष्ठं तन्नस्यसुच्यते ।
पादोनं मध्यमं तच्च षड्विंशत्या तथाधमम् ॥
नस्यान्ते वाजिनो रक्तं सदा पुष्टं प्रजायते ।
नस्यदानात् हृतं तस्य विनाशमुपगच्छति ॥
दाड़िमं पुष्करं श्रीकं श्वेतदूर्व्वाङ्कुरास्तथा ।
घृतोदकेन संयुक्तं रक्तं दुष्टं न जायते ॥
धातकी गोशुरं रोध्रं कुसुम्भं सिन्धुवारकम् ।
घृतोदकेन संयुक्तं नस्यं रक्तविनाशनम् ॥
धातकी गण्डकी चैव गोमूत्रं लवणं तथा ।
नस्ये दत्तं कफं हन्ति तमः सूर्य्योदये यथा ॥
सुखी घृतञ्च दुग्धञ्च रससारं तथैव च ।
वातदोषविनाशाय नस्यमेतत्प्रयोजयेत् ॥
माक्षिकं शर्करायुक्तं चन्दनं केशराणि च ।
नस्योऽयं वारिणा सद्यः पित्तनाशकरः परः ॥
गुडूची सुखी मुस्ता च तगरं सितसर्षपाः ।

सन्निपाते सपित्तेऽयं नस्यः स्याच्छीतरक्तके ॥
अभया पुत्रिणी धात्री एला लाक्षा घृतावरी ।
सन्निपातेऽनिलाधिक्ये नस्योऽयं क्षेमकारकः ॥
मरिचं पिप्पलीमूलं वचा भारङ्गिकाभया ।
सन्निपाते कफाधिक्ये नस्यं सर्षे: सुखप्रदम् ॥"

इति श्रीनकुलकृतेऽश्वचिकित्सिते नस्याधिकाराध्यायो द्वादशः ॥

अथ पिण्डः ।

"कटुका च जयन्ती च भामरी सुरसा घना: ।
पञ्चाम्लतमयः पिण्डो वाजिनामयमिष्यते ॥
एला घृतघ्नी सुरसा काकजङ्घा घृतावरी ।
माक्षिकं सक्षितं पिण्डः पित्तयुक्ते हि वाजिनि ॥
माक्षिकं सैन्धवं मुस्ता गोमूत्रञ्च हरीतकी ।
समभागेन पिण्डोऽयमुक्तो वह्निप्रदीपकः ॥
कंकोलं केतकी द्राक्षा शर्करा मधुयष्टिका ।
दत्तो घृतयुतः पिण्डः पुष्टिं नयति वाजिनः ॥
मत्स्यमांसेन संयुक्तं श्यावचूर्णं घृतप्लुतम् ।
बलहीनस्य वाहस्य पिण्डोऽयं बलवर्द्धनः ॥
बला मद्यं दधि क्षौद्रं भक्ष्यंस्तुरगो भवेत् ।
अतिवृद्धोऽपि कृष्णोऽपि यथा षट्सप्तवार्षिकः ॥
मेथिका धातकी काली सारवी बीजपूरकः ।
पिण्डो दत्तो वराश्वानां तेजोवृद्धिकरः स्मृतः ॥
कटुका मद्यसंमिश्रा धात्री लोध्रगुडान्विता ।
दत्ता पिण्डविधानेन वाजिनां सुखवृद्धिदा ॥
त्रिफला कटुका मुस्ता विड्लानि च चित्रकम् ।
सदालस्यसमेतानां वाजिनां पिण्ड आर्त्तिजित् ॥
वचा विदलिताः स्निग्धाः सघृताः क्षारभाविताः ।
पिण्डैर्दत्ताः प्रकुर्वन्ति वाजिनां व्याधिनाशनम् ॥
सैन्धवं नागरं श्यामा गुडूची सितसर्षपाः ।
अश्ववेतसमश्वानां पिण्डोऽयं मूलनाशनः ॥
पिप्पली पिप्पलीमूलं कटुका सहदेविका ।
दूर्व्वापञ्चवसंमिश्रः पिण्डोऽयं व्रीहनाशकः ॥
केशरं श्रीफलं तालं माक्षिकं गिरिकर्णिका ।
पिण्डोऽयं व्रणने शस्तो वाजिनां सुगतिप्रदः ॥
वचा लोध्रं सकर्पूरं गुहा श्यामा गुडं मधु ।
समांशकेन पिण्डोऽयं करोति लघुतां हये ॥
मद्यं मरिचसंयुक्तं लशुनं नागकेशरम् ।
द्विगुणं मेषमांसञ्च पिण्डो दत्तो जयेत्क्रमम् ॥
जम्बीरं बलिनीपत्रं वचा किञ्जल्कमेव च ।
जातशोणितवाहानां पिण्डोऽयं रक्तनाशनः ॥
तमालं पुष्करं लोध्रमपामार्गं सतिन्दुकम् ।
पयसा पिण्डमेतद्धि वातकोपप्रशान्तनम् ॥
आरनालं प्रविश्य च पथ्या नेपालिकाफलम् ।
पिण्डे दत्ते हये दद्या निहन्यात्तु विजृम्भितम् ॥
मुद्गपूगं वचाभिश्रं तथा सर्ज्जरसान्वितम् ।
पिण्डे दत्ते निहन्यात्तु क्षमिसंघं त्रयोदशम् ॥
खुरीचीरं सकर्पूरं कूपोदकविभावितम् ।
पिण्डोऽयं हन्ति मध्यस्थान् रोगान् सर्व्वान् क्षमिव्रणान् ॥
सिता दुग्धं सकर्पूरमेलया पञ्चसंयुतम् ।
अश्विदाहार्त्तियुक्तानां पिण्डोऽयं वाजिनां स्मृतः ॥
ग्रीष्मासक्तप्रतप्तानामारनालं परिप्लुतम् ।
सक्तदिच्छन्ति पिण्डेन वाजिनां सुखकारकम् ॥
दृष्टिवातार्दितानाञ्च वाजिनां पुष्टिवर्द्धनः ।
पिण्डः कृतः सतैलेन लशुनेन पलेन च ॥
महाघृतं सकर्पूरं शर्करा दुग्धमेव च ।
कफनाशकरः प्रोक्तः पिण्डोऽयं सुखदः स्मृतः ॥
रोचना च वरी धात्री तथा स्याद्वीजपूरकः ।
गुल्मं प्रशमयत्याशु वाजिनां हृदयोद्भवम् ॥
सहदेवी वचा कुष्ठं वरुणा चेन्द्रवारुणी ।
अतिश्वासं हरत्येते वाजिनां मधुना सह ॥
उदुम्बरफलं मांसं शूकरं माहिषं दधि ।
हयस्य चातिवृद्धस्य करोति परमं सुखम् ॥
विभीतकं प्रियङ्गुश्च सर्ज्जिका लवणं तथा ।
कासदोषोपशमनः पिण्डः सप्तैः सुखप्रदः ॥
तक्रं कर्पूरचूर्णञ्च शिवं सौवर्चलान्वितम् ।
पिण्डोऽयं वस्तिसंरोधे वाजिनः संप्रकीर्त्तितः ॥
सौवर्चलं हरिद्रा च पिप्पली चेन्द्रवारुणी ।
मूत्रकृच्छ्रे परीक्षन्ति पिण्डोऽयं तुरगस्य हि ॥
पिण्डीरसत्तवः क्षौद्रं भल्लातकफलं वृषम् ।
रक्तमूत्रे तु पिण्डोऽयं वाजिनां रक्तनाशनः ॥
अभया यष्टिका श्यामा देवदारु सगन्धकम् ।
पुरीषे रक्तसंमिश्रे सदा शंसति वाजिनः ॥
पटोलं धातकी मुस्ता यष्टिका गिरिकर्णिका ।
रक्ताधिके हृतः पिण्डः करोति रुधिरक्षयम् ॥
हरिद्राद्वयसंयुक्तं गन्धकं कटुतैलकम् ।
पिण्डकं श्वित्रयुक्तानां सदाश्वानां प्रशस्यते ॥
अतसीपत्रकं निम्बं न्यग्रोधकलिकान्वितम् ।
अतीसारे सृजंशन्ति पिण्डोऽयं वाजिनः शुभः ॥
व्रणैः कृमिभिरत्यर्थं सदा वाजी प्रपीड्यते ।
सदा पिण्डः प्रदातव्यः स्थूलैरङ्गुलैरलम् ॥
कर्पूरशर्करालोध्रं माक्षिकं त्रिफलान्वितम् ।
तुरङ्गिण्याः प्रशंसन्ति पिण्डोऽयं वाजिनः शुभः ॥
पचकं सिन्धुवारश्च भामरं चक्रकिंशुकम् ।
मांसघृद्धौ प्रशंसन्ति पिण्डोऽयं वाजिनः शुभः ॥
सैन्धवं चूलिकाक्षारं विड्लानि मधूनि च ।
शूलपीड़ाभिभूतस्य पिण्डोऽश्वस्य प्रशस्यते ॥"

इति श्रीनकुलकृतेऽश्वचिकित्सिते पिण्डाध्यायश्चतुर्दशः ॥

अथ घृतविधानम् ।

"शिलाजतु विशाला च पद्मकं नागकेशरम् ।
लाक्षा पद्मकमूलञ्च निम्बद्वयसमन्वितम् ॥
घृतं माक्षिकसंयुक्तं सप्तविंशतिकं विदुः ।
अश्वांशं तु समादाय सुरामांसघृतस्य च ।
पलमाचार्य्य सर्व्वाणि पूर्व्ववद्यानि निःक्षिपेत् ।
तेषां दानेन ततृप्तिर्जायते सर्व्ववाजिनाम ॥
बलपुष्टिकरं नित्यं सर्व्ववातविनाशनम् ।
सर्व्वरोगप्रशमनं कायाग्नेश्च प्रदीपनम् ॥
ओजस्करं वयस्थानां श्रीहग्रोगप्रणाशनम् ।
धातकी केशरं कुष्ठं कुसुम्भं कुङ्कुमं नलम् ॥
दाड़िमं सितलोध्रञ्च पलमाचार्य्य निःक्षिपेत् ।
घृतञ्च पाचयेत् प्राज्ञादभिघातान्वितो हयः ॥
जायते सर्व्वसुह्राद्यो महाप्राणेन संयुतः ।
आरनालं वचा कुष्ठं पिङ्गला सिक्थकं घृतम् ॥
एते: पर्व्वा घृतं सम्यक् पित्तव्याधिविनाशनम् ।
हरिद्राद्वयसंयुक्तं गन्धकं तु मनःशिला ॥
क्वाथयेन्नवनीतेन त्रिगुणेन घृतेन च ।
अभ्यङ्गेनाथ पानेन सप्तरात्रेण वाजिनः ॥
कण्डूतिर्निःशयं याति तथोदरभवा रुजः ।
माक्षिकं निम्बपत्राणि नखं गुग्गुल एव च ॥
भृङ्गराजो विशाखा च पाठा चैव पुनर्नवा ।
विल्वमारुष्कके लोध्रं सैन्धवं तगरं तथा ॥"
एते: पक्वं घृतं वाजी संप्राप्यार्त्तैर्विमुच्यते ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते घृताध्यायश्चतुर्दशः ॥

अथ क्वाथः ।

"पूर्व्वाणि समभागानि क्वाथयेत् कूपवारिणा ।
ततोऽर्द्धांशं समादाय तोयस्य क्वथितस्य च ॥
एतत् सिद्धार्थकं नाम क्षुत्कृच्छ्रं सर्व्ववाजिनाम् ।
कायाग्निं वर्द्धयत्याशु नीरोगत्वं प्रयच्छति ॥
मुस्ता मधुकपत्राणि केशरं लवणं वृहा ।
घृताक्षा श्लाक्ष्णली धात्री चपुषं फलिनी तथा ॥
क्वाथयित्वा जलं कौपं दत्तेस्तुल्यं विचक्षणः ।
त्रिभागमेवमादाय ततो द्व्याढ्यस्य च ॥
प्रकरोति सदा नाशं पित्तस्यागन्तुकस्य च ।
एकविंशदिनं यावच्छालिहोत्रमतं यथा ॥
शुण्ठी हरीतकी पाठा ब्राह्मी मुस्ता शिखालिका ।
हरिद्राद्वयसंयुक्ता हरितालं मनःशिला ॥
सिद्धस्त्रिभागशेषोऽयं क्वाथो हन्यात्तिराचिकम् ।
सन्निपातमशेषेण पलिकः पलमात्रकः ॥
मधुकं केशरं पत्रं भल्लातकविभीतकम् ।
शृङ्गपुष्पं वृहा सारं समभागेन मिश्रितम् ॥
कायाग्नेस्य समुद्दिष्टः क्वाथोऽयं त्रिफलात्मकः ।
उत्साहवर्द्धकः सद्यस्तथा कायाग्निदीपकः ॥
कुमारी श्लाक्ष्णली पाठा मञ्जिष्ठा चेन्द्रवारुणी ।
काकोली समभागेन क्वाथयेत् समभागतः ॥
पलद्वयप्रमाणेन ततः पीतेन वाजिना ।
मोहयेच्छूलनं दोषं मूत्रदोषं च तत्क्षणात् ॥
यवानी माक्षिकं क्षारं सौवर्चलयुताभया ।
क्वाथयेदष्टमांशेन तत्पानाच्छाम्यते हयः ॥
प्रदीप्ताग्निस्तु वेजस्वी सर्व्वरोगाद्विमुच्यते ।
स शीघ्रमार्गगामी च स्निग्धो रोगविवर्जितः ॥
वेणालिका वृहानीले वेल्लुका सिन्धुवारिका ।
एते: क्वाथः कृतः सम्यक् क्रिमिनाशकरः परः ॥
मातुलुङ्गस्य बीजानि चन्दनं सितसर्षपाः ।
उशीरं पुष्करं ब्राह्मी लक्ष्मणा च पुनर्नवा ॥
क्वाथोऽयं मुखिचूर्णेन धावितक्षोमनाशनः ।
प्रकरोति तुरङ्गाणां सर्व्वदेव सुखं तथा ॥"

इति श्रीनकुलकृतेऽश्वचिकित्सिते क्वाथाध्यायः पञ्चदशः ॥

अथ विषम् ।

"वारुणी माक्षिकी गौरी श्रीतालीबीजपूरकम् ।
क्षमिक्लेदविनाशाय क्वाथो नित्यं रजाहरः ॥
अश्वगन्धा घृतं क्षौद्रं विषदग्धस्य वाजिनः ।
विषनाशं करोत्येव सर्व्वगात्रेषु तत्क्षणात् ॥
सामान्येन प्रदिष्टोऽयमगदो विषनाशनः ।

एथक् एथग्विभागेन कर्त्तव्यं साम्यतः परम् ॥
त्रिविधं कीर्त्तितं चैव कृत्रिमञ्च ततःपरम् ।
त्रिविधं कीर्त्तितं प्राज्ञैर्विषज्ञानविचक्षणैः ॥
स्थावरं कन्दजं प्रोक्तं जङ्गमं सत्त्वसंस्थितम् ।
कृत्रिमं योगजं प्रोक्तं त्रिविधं विषमुच्यते ॥
यदा शिरं समश्नन्ति कदाचित्तुरगोत्तमाः ।
तदा कार्य्यं विधानञ्च रेगदस्य प्रयोजनम् ॥
केशरं पद्मनालञ्च सौपर्णी वदरीफलम् ॥
तक्रमिश्रं हये दत्तं सर्व्वथा विषनाशनम् ॥
सौपर्णी सिन्धुवारञ्च नागबला जटा तथा ।
विषार्त्ते प्राप्य संमिश्रं दुग्धे खादायुधी हयः ॥
अश्वगन्धा रुहा एला घृतमिश्रा प्रयोजिता ।
विषनाशं नयत्याशु जङ्गमं हयगात्रजः ॥
मूलं चन्दनवृक्षस्य माषचूर्णपरिप्लुतम् ।
जङ्गमस्य विषस्याशु प्रकरोति च संक्षयम् ॥
तक्रं केशरसंयुक्तं विषं सद्यो नवाभ्रकम् ।
हयस्य जङ्गमं नाशं विषन्नयति तत्क्षणात् ॥
सौपर्णी विषकट्फोली पिष्ट्वा मद्येन भावितां ।
जङ्गमं गात्रतः क्षत्तं विषं नयति तत्क्षणात् ॥
एला कट्फोलिकामूलं सौपर्णीघृतमिश्रितम् ।
विषनाशं करोत्याशु नस्यदानेन वाजिनाम् ॥
कौसुम्भं केशरं लाक्षा माक्षिका नाकुली तथा ।
कृत्रिमस्य विषस्याशु प्रकरोति च संक्षयम् ॥
चम्पकं मालतीमूलमुन्मत्तकरसं तथा ।
अश्वानां नाशयत्याशु विषं जङ्गममाश्रितम् ॥"

इति श्रीनकुलकृतेऽश्वचिकित्सिते विषयोगाध्यायः षोड़शः ॥

अथ अश्वशालाविधिः ।

"पृथवेशमवामभागे शुभदिने तु कारयेद्वयागारम् ।
पूर्व्वश्रियं प्रयत्नाद्वैः अवसं प्रतिष्ठाप्य ॥
सुशुभे भूमिविभागे पूर्व्वोत्तरजलप्रवविधानात् ।
तस्मिन् शालां चिरां दशहस्तसमुच्छ्रितां दृढां कुर्य्यात् ॥
खादनकोष्ठकमस्मिन् हस्तद्वितयं समुच्छ्रितं कुर्य्यात् ।
संस्थाप्य वृषभगवौ सप्ताहं वाजिशालायाम् ॥
अत ऊर्द्धन्तु हुताग्निः प्रवेशयेद्वाजिनो यथायोग्यम् ।
कुशलैस्तरुणैर्दक्षैरनुकूलैः स्नानपालैश्च ॥
कृतमङ्गलसंस्कारा वन्यवास्तोश्च चोत्तराभिमुखाः ।
नात्यायता न शिथिलाः स्थाने वा दक्षिणाभिमुखम् ॥
वैद्यानां तुरगाय समीपं गृहं कारयेत् पूर्व्वम् ।
कार्य्यासिकेन सत्त्वेन मालिकानां निवारणम् ॥
गन्धैर्माल्यैर्धूपैः स्थानानि विभूषयेदलङ्कारैः ।
सर्विग्रेवं लवणीतौ हुत्वाग्निं पूरयेद्विद्वान् ॥
स्वच्छिद्रं नातियवसं यथा पश्यन्ति वाजिनः ।
स्थानं चैव पृथक् प्राज्ञं प्रयत्नं रोगिणां न वै ॥
कोडी कुष्ठी ज्वरी यक्ष्मी परस्परं दूषयति चारैः ।
तिथिवारे केशांश्च खुरांश्च प्रच्छन्ति दीर्घान् ॥
अश्वस्याङ्गे प्रलिपेद्धरिद्रया वरिष्ठया मङ्गल्याच ।
सुपवित्रान् दोषघ्नैर्विभूषयेदलङ्कारैः ॥"

इति श्रीनकुलकृतेऽश्वचिकित्सिते अश्वशालाविधिरष्टादशोऽध्यायः ॥ सप्तदशाध्यायस्तु नाधिगम्यते ॥

अथ ग्रहनामलक्षणानि ।

"दृश्यन्ते यानि लिङ्गानि ग्रहदोषेण वाजिनाम् ।
तानि सम्यक् प्रवक्ष्यामि ग्रहनामानि यानि तु ॥
लोहिताक्षो विरूपाक्षो हरिर्वल्लिस्तथैव च ।
सकाशी चैव विख्यातः सङ्काशी च परः स्मृतः ॥
सुसंस्थितश्च कौदेरो वैशाखश्च स्टदुग्रहः ।
ऊर्द्धश्च दारुणश्चैव षड्विधो वरुणग्रहः ॥
वृहस्पतिश्च सोमश्च तथा सूर्य्यग्रहोऽपरः ।
एते प्रोक्ता ग्रहाः सर्व्वे दारुणा मुनिसत्तमैः ॥
एतैर्दृष्टाः स्फुटं वाहा नैव जीवन्ति सर्व्वदा ।
चिह्नं सर्व्वं प्रवक्ष्यामि यथा शास्त्रे व्यवस्थितम् ॥
कम्पते पूर्व्वकायस्तु निश्चलो यस्य पश्चिमः ।
पश्चाच्छङ्की सकम्पश्च खिद्यते हरिपीड़ितः ॥
भवन्ति बिन्दवो रक्ता अकस्माद् यस्य चक्षुषः ।
हरिताक्षग्रहीतोऽश्वो ग्रासद्वेषी च जायते ॥
प्रस्विन्नगुरुगात्रश्च लुब्धचङ्क्रमणक्रियः ।
मीलतोन्मीलतां चाक्ष्णा स्वभावान्निश्चलैव च ॥
विरूपाक्षग्रहीते तु कम्पः खेदश्च जायते ।
उत्थितः सहसा यस्तु मूर्द्धा पतति भूतले ॥
स्रस्ताङ्गो मुच्यते केशैस्तथा बालैः खुरैरपि ।
बलिग्रहगृहीतोऽसौ स्रस्तकर्णशिरोधरः ॥
अकस्माद् यस्य लोमानि ग्रीष्यन्ते यच्च लङ्घति ।
सूनपक्ष्मपादस्य तस्य काण्ड्यं वदेत् ॥
सहसा कुपितो वाजी स्वानि गात्राणि खादति ।
प्रीयत सततञ्चैव सङ्काग्रिग्रहपीड़ितः ॥
खिन्नाङ्गो वेपमानश्च जानुभ्यां यश्च तिष्ठति ।
कौवेरग्रहसन्दृष्टं तं विद्यात् कृच्छ्रजीवितम् ॥
क्ष्वेडते सततं यस्तु पश्चादात्मानमीक्षते ।
सुसंस्थितग्रहाविष्टः स विज्ञेयो मनीषिभिः ॥
स्रस्तेन गुरुणा चैव वेपमानेन पक्षिणा ।
गात्रेण विद्याद् वाहं तु वैशाखग्रहसेवितम् ॥
ग्रीवां चैव तथा जिह्वां परिवर्त्त्य मुहुर्मुहुः ।
जृम्भते पूर्व्वकायेन प्रीतोच्छ्वासी विलोचनः ॥
नोद्विजेच्चाहतः पृष्ठे कश्या प्राणिनापि वा ।
तं वै दीर्घस्वरग्रस्तं दृष्ट्वैव परिवर्जयेत् ॥
श्यामं जिह्वासुखं यस्य नष्टदृष्टिस्तिर्भवेत् ।
ऊर्द्धग्रहगतं दोषं तस्य दीनस्य निर्दिशेत् ॥
तालुजिह्वे च नेत्रे च वृषणौ मेढ्रमेव च ।
श्यावं रूपञ्च यस्य स्याद् गात्रगौरवमेव च ॥
तस्य खेदपरीतस्य बुद्धिमान् वरुणग्रहैः ।
क्षतं दोषं महाघोरं स्रस्ताङ्गस्य विनिर्दिशेत् ॥
क्ष्वेडते सततं यस्तु कृष्टरोमा तुरङ्गमः ।
स्रस्ताङ्गो जृम्भतेऽत्यर्थं तस्यापि सलिलग्रहः ॥
सुविस्फुरितसर्व्वाङ्गः सलिले निश्चलस्थितः ।
क्ष्वेडते विस्तरं वाजी वरुणग्रहपीड़ितः ॥
सुदूर्नावस्थितस्तोये जानुभ्यां योऽवसीदति ।
मुखपाकश्च यस्याग्ने तं विद्याद्दकग्रहम् ॥
उद्वर्त्तिताक्षः खिन्नश्च संग्रहीतश्च यः ।

कम्पमानश्च यो वाजी स रविग्रहपीड़ितः ॥
स्तब्धग्रीवो न जानाति कशाघातं सुदुर्म्मनाः ।
जलग्रहगृहीतोऽश्वो वामपार्श्वेन निश्चलः ॥
सूनाक्षिकूटो रक्ताक्षः क्षुधः स्खलति यो मुहुः ।
वृहस्पतिग्रहीतोऽसौ नैव जीवति तादृशः ॥
कम्पते पूर्व्वकायेन स्वल्पपानाशनश्च यः ।
ग्रीवे प्रसार्य्य गात्राणि ग्रीताङ्गः सोमपीड़ितः ॥
रक्ताक्षः सूनकण्ठश्च कम्पमानश्च श्वासयुक् ।
फेनतीव्राङ्गखेदश्च ग्रस्तः सूर्य्यग्रहेण सः ॥
उदके तत्समीपे वा प्रायो गच्छति दारुणः ।
तुरङ्गं सत्त्वहीनन्तु षड्विधो वारुणग्रहः ॥
यज्ञभूमिचितावैत्यशून्यवेश्मसुरालये ।
लोहिताक्षादयो रोषाद् ग्रहा यच्छन्ति वाजिनः ॥
एवंविधैर्निदानैस्तु ग्रहदोषं विनिर्दिशेत् ।
वातपित्तकफानान्तु निदानैर्व्याधिमादिशेत् ॥
एकाकारेण रोगेण म्रियते वा हयो यदा ।
तुरङ्गाणां तदा ज्ञेया उपसर्गाः सुदारुणाः ॥
ग्रहदोषेषु सर्व्वेषु उपसर्गाःस्वथैव च ।
अथोक्ताश्च महाशान्तिं गान्धर्व्वीञ्च प्रयोजयेत् ॥
अश्वरक्षाविधानाय ऋक्षं सम्मान्य पावकम् ।
जुहुयादृक्षसंयुक्तं शुचिः स्नात्वा सुपूजितः ॥
शान्तिकं कारयेत् कर्म्म बलिञ्चापि प्रयोजयेत् ।
ग्रहदोषेषु सर्व्वेषु शान्तिकर्म्माणि कारयेत् ॥
देवद्विजप्रव्रजितगुरुवृद्धान् यतीनपि ।
तोषयेद्भोजनैर्दानैर्वस्त्रगोकाञ्चनादिभिः ॥
रात्रौ शालासमीपे तु बलिं दद्यात् चतुर्दिशम् ।
मत्स्यमांसैश्च पक्वान्नैः क्षुरैः पायसादिभिः ॥
चिरार्चं पञ्चरार्चं वा सप्तरात्रमथापि वा ।
नीराजनविधिं कृत्वा नयेदश्वान् पृथक् पृथक् ॥"

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे ग्रहग्रहशान्तिचिकित्सिते सप्तपञ्चाशत्तमोऽध्यायः ॥)

घोटिका, स्त्री, (घोटते परिवर्त्तते क्वथादिकुथैरिति । घुट् + ण्वुल् । ततष्टाप् अत इत्वम् ।) वृक्षभेदः । तत्पर्य्यायः । कर्कटी २ तुरङ्गी ३ चतुरङ्गा ४ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । मधुरत्वम् । वातव्रणकण्डुकुष्ठासश्वयथुनाशित्वञ्च । इति राजनिर्घण्टः ॥

घोणा, स्त्री, (घोणते शब्दायते वस्तुगन्धम् । घुण् + अच् टाप् च । घोणतेऽनया इति करणे घञ् वा ।) नासा । (यथा, महाभारते । १ । १५६ । ३३ ।
"दीर्घघोणं महोरस्कं विकटोद्वहपिङ्गिकम् ॥"
"घोणायां हे ॥" इति सुश्रुते शारीरस्थाने पञ्चमाध्याये ॥) अश्वनासिका । तत्पर्य्यायः । घ्राणः २ । इत्यमरः । २ । ८ । ४६ ॥ (यथा, अश्ववैद्यके । २ । ७ ।
"नासाच्छिद्रान्तिमध्ये तु घोणाख्यः ससुदाहृतः ।
घोणापार्श्वगतौ गण्डौ क्षौरिके च ततः परम् ॥")

घोणी, [न्] पुं, (प्रशस्ता घोणा अस्त्यस्य इति । "अतोऽनेकस्वरात् ।" ५ । २ । ११७ । इति इनिः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

घोण्टा, स्त्री, (घुण्यते शब्द्यते भक्षणायेति । घुण् + बाहुलकात् टः ।) वृक्षविशेषः । श्रेयाकुल

इति भाषा ॥ तत्पर्य्यायः । वदरः २ गोपघोण्टा ३ शृगालकोलिः ४ कपिकोलिः ५ । इति कात्रित् रत्नमाला ॥ हस्तिकोलिः ६ वदरीच्छदा ७ कर्कन्धुः । इति रत्नकोषः ॥ पूगवृक्षः । इति मेदिनी । टे । १४ ॥ (यथा, उत्तरस्थाने त्रिंशेऽध्याये वाभटेनोक्तम् ।

"घोण्टाफलत्वग्वदरं सलाजं
बूकस्य पत्रं वनितापयश्च ।
स्रुग्गर्दभघ्नान्वित एष कल्को
वर्त्तीकृतो हन्त्यचिरेण नाड़ीम् ॥")

घोनसः, पुं, (गोनसः + पृषोदरादित्वात् साधुः ।) गोनसः । तिलितसर्पः । इति हैमचन्द्रः । ४ । ३६२ ॥ (क्वचित् मूर्द्धन्यमध्योऽपि दृश्यते ॥)

घोरं, क्ली, (हन्यते वध्यतेऽनेनेति । हन् + "हन्तेरच् घुर् च ।" उणां । ५ । ६४ । इति अच् धातोर्घुरादेशश्च ।) विषम् । इति राजनिर्घण्टः ॥

घोरः, पुं, (घोरयति भयानकरसनिमित्तीभवतीति । घुर + अच् । यद्वा, हन्ति विनाशयति रुद्ररूपेण इति । हन वधे + "हन्तेरच् घुर् च ।" उणां । ५ । ६४ । इति अच् धातोर्घुरादेशश्च ।) शिवः । भयानके त्रि । इति हैमचन्द्रः ॥ (यथा, मनुः । १२ । ५४ । [चयात्।

"बहून् वर्षगणान् घोरान्नरकान् प्राप्य तत्संसारान् प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥")

घोरदर्शनः, पुं स्त्री, (घोरं भयानकं दर्शनं यस्य ।) उलूकः । इति राजनिर्घण्टः ॥ भयानकरूपे त्रि ॥ (यथा, रामायणे । १ । १ । ५५ ।

"मार्गमाणो वने सीतां राक्षसं सन्ददर्श ह ।
कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥")

घोरपुष्पं, क्ली, कांस्यम् । इति राजनिर्घण्टः ॥ घोरघुष्यमपि पाठः ॥

घोररासनः, पुं, (घोरं भयानकं रासनं शब्दो यस्य ।) शृगालः । इति शब्दरत्नावली ॥

घोररासी, [न्] पुं, (घोरं यथा तथा रसति शब्दं करोतीति । रस शब्दे + णिनिः ।) शृगालः । इति हैमचन्द्रः । ४ । ३५६ ॥

घोरा, स्त्री, (घोरति भयानकरसनिमित्तीभवतीति । घुर + अच् + टाप् च ।) रात्रिः । इति त्रिकाण्डशेषः ॥ देवदाली लता । इति राजनिर्घण्टः ॥ (गङ्गा । यथा, काशीखण्डे । २६ । ५५ ।

"घण्टारवप्रिया घोरा घौघविध्वंसकारिणी ॥"

रविसंक्रान्तिविशेषः । इति ज्योतिषम् ॥ यथा, तिथितत्त्वे रविसंक्रान्तिप्रकरणे ।

"मन्दा मन्दाकिनी ध्वांक्षी घोरा चैव महोदरी ।
राक्षसीमिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप ! ॥
मन्दा ध्रुवेषु विज्ञेया रुद्रौ मन्दाकिनी तथा ।
त्रिप्रे ध्वांक्षी विजानीयाद्रुद्रे घोरा प्रकीर्त्तिता ॥")

भयानका । (यथा, कालीध्याने ।

"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ॥")

घोलं, क्ली, (घुलते आलोड्यते यत् । घुट + अच् । पृषोदरादित्वात् साधुः ।) ससरं निर्जलं मथितं दधि । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।

"यत्तु सस्नेहमजलं मथितं घोलमुच्यते ॥")

तत्पर्य्यायः । दध्नाहृतम् २ कालसेयम् ३ अरिष्टम् ४ गोरसः ५ घलम् ६ मलिनम् ७ केवलम् ८ भग्नसन्धिकम् ९ । तस्य भेदाः ।

"तक्रं ह्युदश्विन्मथितं पादाम्बुर्द्वांसुनिर्जलम् ।
ससारं यद्भवेत्तक्रं कट्टरं तत् प्रकीर्त्तितम् ॥"

इति शब्दचन्द्रिका ॥

अस्य विशेषाः तक्रशब्दे द्रष्टव्याः ॥

घोली, स्त्री, पत्रशाकविशेषः । तत्पर्य्यायः । घोलिका २ घोलिः ३ कलम्बुः ४ कुवकाम्लुका ५ । चैत्रजातायाः अस्याः गुणाः । लवणत्वम् । रुचिकारित्वम् । अम्लत्वम् । वातकफनाशित्वञ्च ॥ आरामघोलिकागुणाः । अम्लत्वम् । रूक्षत्वम् । रुच्यत्वम् । वायुनाशित्वम् । पित्तश्लेष्मकारित्वञ्च । सूक्ष्मायाः जीर्णज्वरनाशित्वम् । इति राजनिर्घण्टः ॥

घोषं, क्ली, (घोषति शब्दायते इति । घुष विशब्दने + अच् ।) कांस्यम् । इति राजनिर्घण्टः ॥

घोषः, पुं, (घोषन्ति शब्दायन्ते गावो यस्मिन् । घुषिर् विशब्दने + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) आभीरपल्ली । (यथा, रघुः । १ । ४५ ।

"हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥"

घोषति शब्दायते इति । घुष + कर्त्तरि अच् ।) गोपालः । (घुष + भावे घञ् ।) ध्वनिः । (यथा, मनुः । ७ । २२५ ।

"तत्र भुक्त्वा पुनः किञ्चित् तूर्य्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥")

घोषकलता । कांस्यम् । मेघशब्दः । इति मेदिनी । षे । ११ ॥ मशकः । इति त्रिकाण्डशेषः ॥ (वर्णोच्चारणवाद्यप्रयत्नविशेषः । यदुक्तं शिक्षायाम् । २० ।

"संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् ।
घोषा वा संवृताः सर्व्वे अघोषा विवृताः स्मृताः ॥")

कायस्थादीनां पङ्क्तिविशेषः । (यथा, कुलदीपिकायाम् ।

"वसुवंशे च सख्यौ द्वौ नाम्ना लक्ष्मणपूषणौ ।
घोषेषु च समाख्यातश्चतुर्भुजमहाक्रतौ ॥")

घोषकः, पुं, (घोष एव । घोष + संज्ञायां कन् ।) घोषालता । तत्पर्य्यायः । धामार्गवः २ । इत्यमरः । २ । ४ । ११७ ॥ घोषकाकृतिः ३ आदानी ४ देवदानी ५ तुरङ्गकः ६ घोषः ७ घोषालता ८ । इति शब्दरत्नावली ॥ कोषकालः ९ । इति जटाधरः ॥ महांश्चेत् हस्तिघोषातकी ॥ * ॥ पीतघोषायाः पर्य्यायः । धामार्गवः १ पीतघोषा २ राजघोषातकी ३ कर्कोटकी ४ महाजाली ५ चुड़ः ६ कोषफला ७ कोषातकी ८ । इति च जटाधरः ॥ * ॥ श्वेतघोषायाः पर्य्यायः । घोषातकी १ स्तब्धङ्गी २ जालिनी ३ क्षतवेधकः ४ श्वेतपुष्पा ५ आकृतिच्छदा ६ ज्योत्स्ना ७ इति रत्नमाला ॥

घोषकाकृतिः, पुं, (घोषकस्य घोषलतायाः आकृतिरिवाकृतिर्यस्य ।) घोषकः । इति रत्नमाला ॥

घोषणा, स्त्री, (घुषिर् विशब्दने + "ग्लाजिस्थश्रुवो युच् ।" ३ । ३ । १०७ । इति युच् ।) उच्चैःशब्दः । लोकविज्ञापनायोच्चैःशब्दितम् । (यथा, कथासरित्सागरे । २४ । ५० ।

"गच्छ भ्रमय क्षतक्ष्वेडं पुरे पटहघोषणाम् ॥")

तत्पर्य्यायः । उच्चैर्घुष्टम् २ । इत्यमरः । १ । ६ । १२ ॥ निघुष्टम् ३ घुष्टघोषणम् ४ । इति शब्दरत्नावली ॥

घोषयित्नुः, पुं, (घोषयतीति । घुष् + णिच् + बाहुलकात् इत्नुच् ।) ब्राह्मणः । कोकिलः । वन्दी । इति शब्दरत्नावली ॥

घोषवती, स्त्री, (घोषो विद्यतेऽस्याः । घोष + मतुप् मस्य वः । स्त्रियां ङीप् ।) वीणा । इति हैमचन्द्रः ॥ (यथा, कथासरित्सागरे । ११ । ३ ।

"स बभूव शृणे राजा सुखेष्वेकान्ततत्परः ।
सदा सिषेवे मृगयां वीणां घोषवतीञ्च ताम् ।
दत्तां वासुकिना पूर्व्वं नक्तं दिनमवादयत् ॥"

तथाच तत्रैव । १२ । ३२ ।

"अङ्के घोषवती तस्य कण्ठे गीतश्रुतिस्फुटा ॥")

शब्दविशिष्टे त्रि ॥ (यथा, महाभारते । १ । २५ । ११ ।

"त्वं वज्रमतुलं घोरं घोषवांस्त्वं बलाहकः ॥")

घोषा, स्त्री, (घोष्यन्ते मधुकरी यया । घुष + णिच् + घञ् ।) मधुरिकौषधिः । मौरी इति भाषा । इति मेदिनी ॥ (यथा, गारुड़े १६ अध्याये ।

"घोषाफलं सैन्धवञ्च तल्लिमार्गः पतेत्तथा ॥")

कर्कटशृङ्गी । इति राजनिर्घण्टः ॥ (गङ्गा । यथा, काशीखण्डे । २६ । ५५ ।

"घ्राणतुष्टिकरी घोषा घनानन्दा घनप्रिया ॥"

गायत्रीरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ४४ ।

"ऋग्मिन्त्रमयी घोषा घनसम्पातदायिनी ॥")

घोषातकी, स्त्री, श्वेतघोषा । इति रत्नमाला ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।

"घोषातकी स्तब्धङ्गी स्याज्जालिनी क्षतवेधनः ।
श्वेतपुष्पा क्षतिच्छत्रा ज्योत्स्नाकोषातकी
क्वचित् ॥")

घ्रा, गन्धोपादाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) जिघ्रति पुष्पं लोकः । इति दुर्गादासः ॥

घ्राणं, क्ली, (जिघ्रत्यनेनेति । घ्रा + करणे ल्युट् । यद्वा, घ्रा + क्तः "तुदविदोस्त्राघ्रेति ।" ८ । २ । ५६ । इति निष्ठातस्य नो वा ।) नासिका । इत्यमरः । २ । ६ । ८६ ॥ (यथा रघुः । १६ । ११ ।

"घ्राणकान्तमधुगन्धकर्षिणीः
पानभूमिरचनाः प्रियासखः ॥")

न्यायमते घ्राणेन्द्रियग्राह्यगन्धत्वादि । (घ्रा + भावे ल्युट् । आघ्राणम् । यथा, देवीभागवते । १ । १४ । २४ ।

"आलिलिङ्ग सुदुर्घ्राणं मूर्द्धि तस्य चकार ह ॥")

घ्राते त्रि । इति मेदिनी । णे । ११ ॥

घ्राणतर्पण:, पुं, (घ्राणमिन्द्रियविशेषं तर्पयतीति। तृप+ल्युट्।) सुगन्धि:। इत्यमर:। २।५।११॥ (यथा, रामायणे। २। ८४। १४।
"घ्राणतर्पणमश्नेत्र कं नरं न प्रहर्षयेत्॥")

घ्राणदु:खदा, स्त्री, (घ्राणस्य दु:खं ददातीति। दा+क:। स्त्रियां टाप्।) छिक्कनी। इति भावप्रकाश:॥

घ्रात:, त्रि, (घ्रा+क्त:। "गुदविदेति।" ८। २। ५६। इति प्राचिको नत्वाभाव:।) गृहीतगन्धपुष्पादि:। घ्राण लक्ष्मोया इति खोंका इति च भाषा। तत्पर्य्याय:। घ्राण:२। इत्यमर:। ३। १। ८०॥ घ्रिक्षित:३। इति जटाधरशब्दरत्नावल्यौ॥ (यथा, मनु:। ५। १२५।
"पक्षिगन्धं गवाघ्रातमवधूतमवप्लुतम्।
दूषितं केशकीटैश्च स्तन्यप्रदेषेण शुध्यति॥")

घ्राति:, स्त्री, (जिघ्रत्यनया। घ्रा+करणे क्तिन्।) नासिका। इति शब्दचन्द्रिका॥ (भावे क्तिन्। आघ्राणम्। यथा, मनु:। ११। ६७।
"घ्राणस्य रस: घ्राता घ्रातिर्घ्रेयमद्ययो:॥")

ङ

ङ, ङकार:। स तु यञ्जनपञ्चमवर्ण:। अस्योच्चारणस्थानं नासिकाकण्ठ:। इति वाकरणम्॥ ("जिह्वामूले तु कु: प्रोक्त:।" इति। "अनुस्वारयमानाश्च नासिकास्थानमुच्यते॥" इति च शिक्षोक्तेस्तथात्वम्॥) अस्य स्वरूपं यथा, कामधेनुतन्त्रे।
"ङकारं परमेशानि! स्वयं परमकुण्डली।
सर्व्वदेवमयं वर्ण्णं त्रिगुणं लोललोचने!॥
पञ्चप्राणमयं वर्ण्णं ङकारं प्रणमाम्यहम्॥"
अपि च।
"ऊर्द्धाध:क्रमतो रेखा किञ्चिदाकुञ्चिता तत:।
अधोगता कुण्डली तु मात्रा शक्तिस्वरूपिणी॥
रेखात्रयेषु ब्रह्मेशविष्णव: सन्ति देवता:॥
ध्यानं यथा, तत्रैवोद्धारतन्त्रे।
"धूम्रवर्णां महाघोरां ललज्जिह्वां चतुर्भुजाम्।
पीताम्बरपरीधानां साधकाभीष्टसिद्धिदाम्॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

ङु

तस्य नामानि यथा,—
"ङ: शूली भैरवश्चण्डो विष्वक्सेन: शिवप्रिय:।
एकरुद्रो दक्षनख: खर्परो विषयस्पृहा॥
कान्ति: श्वेताक्ष्यो धीरो द्विजात्मा ज्वालिनी वियत्।
मन्त्रशक्तिश्च मदनो विघ्नेशो चात्मनायक:॥
एकनेत्रो महानन्दो दुर्द्धरश्चन्द्रमा यति:।
शिवयोषा नीलकण्ठ: कामेशी च मयांशुकौ॥"
इति नागातन्त्रादि॥
(माल्यकान्यासे अस्य दक्षिणकराङ्गुल्यासु न्यस्यता॥)

ङ:, पुं, (ङयते अस्य इन्द्रियैरिति। ङु+बाहुलकात् ड:।) विषय:। विषयस्पृहा। इति मेदिनी। ङे। १॥ भैरव:। इत्येकाक्षरकोष:॥ (यथा, स्तुतिपञ्चाशति।
"ङवन्हिते! ङलिखिते! ङकारवर्णरूपिणि!॥")

ङु, ङ ध्वनौ। इति कविकल्पद्रुम:॥ (भ्वां-आत्मं-अकं-अनिट्।) ङ, ङवते। इति दुर्गादास:॥

च

च, चकारः। व तु चञ्चनमहवर्णः। (द्वितीयवर्ण-स्याद्यवर्णश्च।) असोचारणस्थानं तालु। इति आकरग्रन्थः॥ (यदुक्तं सिद्धान्तकौमुद्याम्। "इचु-यशानां तालु।" इति। तथा च शिक्षायाम्। "कण्ठ्याव्हाविचुयशास्तालव्या ओष्ठजावुपू॥") वर्णाक्षरैरस्य स्वरूपं यथा, कामधेनुतन्त्रे। "चवर्णं शृणु सुश्रोणि! चतुर्वर्गप्रदायकम्। कुण्डलीसहितं देवि! स्वयं परमकुण्डली॥ सततं कुण्डलीयुक्तं पञ्चदेवमयं सदा। पञ्चप्राणमयं वर्णं पञ्चप्राणात्मकं सदा॥ शिवशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये!॥" अपि च।

"वार्त्ताकुवर्त्तुलाकार ऊर्द्धाधः क्रमतो गतः। रेखात्रयेषु चन्द्राग्निसूर्यास्तिष्ठन्ति नित्यशः। शक्तिर्मात्रा तु विज्ञेया ध्यानमस्य प्रचक्षते॥" तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे "तुषारकुन्दपुष्पाभां नानालङ्कारभूषिताम्। सदा षोडशवर्षीयां वराभयकरां पराम्॥ शुक्लवस्त्रावृतकटिं शुक्लवस्त्रोत्तरीयिणीम्। वरदां शोभनां रम्यामष्टबाहुसमन्विताम्॥ एवं ध्यात्वा चकारन्तु तन्मन्त्रं दशधा जपेत्॥" तस्य नामानि यथा, नागतन्त्रे। "चः पुष्करो हली वाणी चात्मशक्तिः सुदर्शनः। चर्म्मखड्गधरो भूत्वा महिषाचारसन्निभो॥ एकरूपो दधिः कूर्म्मश्चामुण्डा दीर्घबाहुकः। वामबाहुर्मूलमाया चतुर्मूर्त्तिस्वरूपिणी॥ दयितश्च दिनेशश्च लक्ष्मीक्षितयलोचनः। चन्दनं चन्द्रमा देवश्चेतनो दधिको बुधः॥ देवो केटसुखेशात्मा कौमारी पूर्णकालगुणौ। अनङ्गमेखला वायुर्मेदिनी च शनावती॥" (मालतीमाधवे वामबाहुमूले एवास्य न्यासश्च।)

च, य (चयति चिनोतीति वा। चय ह्रस्वे चिञ् चित्वं वा+"अन्येभ्यपि दृश्यते।" ३। २। १०१। इति ड।) अन्वाचयः। यत्र एकस्य प्राधान्येनापरस्य गौणत्वेनान्वयः। यथा। भो वटो! भिक्षामट गां चानय। भिक्षा-मटनमत्र प्रधानं तत् कुर्य्याद्यदि गां पश्यसि तदा तामप्यानयेति गौ चेत् भिक्षामेवाटेति। समाहारश्चेतरेतरश्च समाहारेतरेतरौ तयोरवयवभेदः। अतएव चार्थे द्वन्द्व इति सूत्रं विधाय चार्थोऽत्र समाहार इतरेतरश्चेति व्याख्याय समाहारे जनपदस्यावयवत्वात् एकवचनम्। इतरेतरयोगे संदह्यमानप्रधानत्वात् द्विवचनम्। यथा। "ब्राह्मणाद्यं अन्यतरोवर्हे ब्रह्म-क्षत्रियविट्शूद्राः। ब्रह्मन्यश्चोधाविति परेरुक्तम्। समुच्चयः समुच्चय; प्राधान्येन क्वचित् क्रिया-विषयेऽनेकस्य चीयमानता। यथा। धर्मश्च स्त्रियश्च हिन्धि। इति भरतः॥ समाहारः। अन्यार्थे। समुच्चयः। (यथा, मनुः।१२।८८। "इह चानुत्र वा कान्यं प्रहृतं कर्म्म कीर्त्यते॥")

पदार्थान्तरम्। (यथा, हितोपदेशे। "मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः। तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते॥" तथा च शकुन्तलायां १ मे अङ्के। "ग्राम्यमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य। अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र॥") पादपूरणम्। (यथा, रामायणे। १।२०।१६। "तेन सत्योदितौ तौ तु रात्रौ सन्ध्यासु च प्रभावन्तौ। मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः॥") अवधारणम्। इति मेदिनी। चे। १२॥ हेतुः। इति त्रिकाण्डशेषः॥

चः, पुं. (चयति शब्दायते इति। चय शब्दे+ "अन्येभ्यपि दृश्यते।" ३। २। १०१। इति डः।) चक्रवाकः। (चिनोति खाद्यानि सङ्कोचय-तीति। चि+डः।) कच्छपः। (चीयते उप-चीयते क्रमशः कलाभिः प्रतिपदादिभारभ्य-त्यर्थः।) चन्द्रः। (चिनोति सञ्चिनोति पर-धनानि इति।) चौरः। इति मेदिनी॥ चे। १॥ निर्भोजे दुर्जने च त्रि। इति शब्दरत्ना-वली॥

चक, ट भ्रान्तौ। सौत्रो धातुरयम्। इति कवि-कल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ट, चक्रुरः रथे। इति दुर्गादासः॥

चक, भ ड म प्रतिघाते। ट्वौ। इति कविकल्प-द्रुमः॥) भ्वां-उभं-आत्मं-सकं-अकच-सेट्।) भ, चकति चकते खलः साधुम्। ड, चकते जनस्तृप्यतीत्यर्थः। म, चकयति। इति दुर्गा-दासः॥

चकाच, ट च वृ दीप्तौ। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-सेट्।) ट, अचीचकाचत् अच-चकासत्। अनेकाच्त्वात् सन्नद्भावविकल्पः। च, चकासति। वृ, चकास्ति। इति दुर्गादासः॥

चकितं, त्रि. (चक भ्रान्तौ+क्तः।) भीतम्। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। २। ८। "दत्ता दिग्धि दिग्धि इति याचकचकितोऽव-गुण्ठनं लत्ता। चौर इव कुटिलचारी पलायते विकटरथ्याभिः॥ क्ली, भावे क्तः। भयम्। नायिकालङ्कारविशेषः। तल्लक्षणं यदुक्तं साहित्यदर्पणे। ३। १२१। "कृतोऽपि दयितस्याग्रे चकितं भयसम्भ्रमः॥") "प्रियाग्रे चकितं भीतेरस्थानेऽपि भयं महत्।" इत्युज्ज्वलनीलमणिः॥ (क्ली, छन्दोविशेषः। यथा, छन्दोमञ्जर्याम्। "भात् नसतगैरटछैदे खादिह चकिता॥")

चकोरः, पुं क्ली, (चकते चन्द्रकिरणेन दृश्यतीति। चक दृशौ+"कटिचकिभ्यामोरन्।" उणा। १। ६४। इति ओरन्।) पक्षिविशेषः। (यथा, भागवते। ३। २१। ३३। "सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितम्॥") तत्पर्य्यायः। चन्द्रिकापायी २ कौमुदीजीवनः३ अस्य मांसगुणाः। यथा, राजनिर्घण्टे।

"चटकं शीतलं रूक्षं दृष्यं कापित्तलाभिषम्। तद्वच्चकोरजं मांसं दृष्यञ्च बलपुष्टिदम्॥" ("वातश्लेष्माधिको ज्ञेयः शीतलः शुक्रवर्द्धनः। अक्षरीं हन्ति विशदो बलकृन्मांसलश्च सः॥ चकोरः शुक्रकारी च समदोषा गुणागुणैः॥" इति हारीते प्रथमस्थाने एकादशेऽध्याये॥ अस्य डिम्बगुणा यथा, चरके सूत्रस्थाने २७अः। "धार्म्मराजचकोराणां दक्षाणां शिखिनामपि। चटकानाञ्च यानि स्युरण्डानि च हितानि च॥ रेतःशीतेषु कासेषु क्षतक्षीणेषु चेषु च। मधुराग्र्यविपाकीनि सद्यो बलकराणि च॥").

चकोरकः, पुं क्ली, (चकोर एव। चकोर+ स्वार्थे कन्।) चकोरपक्षी। इत्यमरः। २। ५। ३५॥

चक्क, क अर्त्तौ। इति कविकल्पद्रुमः॥ (पुरां-परं-सकं-सेट्।) कोपधः। आशुसरमध्यः। अर्त्तिः पीड़नम्। क, चक्कयति शत्रुं शूरः। इति दुर्गा-दासः॥

चक्रं, क्ली, (क्रियतेऽनेनेति। कृ+वर्णे कः। कृवादीनामिति ह्रस्वश्च।) व्रजः। सङ्घः। सैन्यम्। रथाङ्गम्। चाका इति भाषा॥ (यथा, याज्ञवल्क्ये। १। ३५१। "यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्। तथा पुरुषकार्य्येण विना दैवं न सिध्यति॥") राष्ट्रम्। दम्भविशेषः। कुम्भकारोपकरणम्। कुमारेर चाक इति भाषा॥ (यथा, याज्ञ-वल्क्ये। ३। २४६। "सूत्रचक्रसंयोगात् कुम्भकारो यथा घटम्। करोति क्षयमन्तकाले गृहं वा गृहकारकः॥") अस्त्रविशेषः। (यथा, रघुः। ७। ४६। "आधोरणानां गजसन्निपाते शिरांसि चक्रैर्निशितैः क्षुराग्रैः॥") जलावर्त्तः। इति मेदिनी॥ भगवतः सुदर्शन चक्रम्। (यथा, महाभारते। १। १६। ६। "ततो भगवता तस्य शिरश्छिन्नमलङ्कृतम्। चक्रायुधेन चक्रेण पिबतोऽन्तमोजसा॥") तस्य भगवन्मन्दिरे स्थापनविधिर्यथा, श्रीभाग-वते। ३। १। २३। "अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः। प्रत्यङ्गमुख्याङ्कितमन्दिराणि यद्दर्शनात् कृत्स्नमनुस्मरन्ति॥" "द्विजदेवैः ऋषिभिर्देवैश्च कृतानि अङ्गमङ्गं प्रति वर्णन्ते इति प्रत्यङ्गान्यायुधानि तैर्यं मुख्यं चक्रं तेनाङ्कितानि मूर्द्धन्यादेषु चिह्नितानि मन्दिराणि येषु तानि नानाविधानि विष्णो-रायतनानि क्षेत्राणि तीर्थानि च आसिषेवे। येषां चक्राङ्कितमन्दिरवर्त्मा दर्शनात् श्रीलक्ष्म्या-स्मरणं भवति।" इति तट्टीकायां श्रीधरस्वामी॥* अथ चक्रलक्षणम्।

"द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम्। चक्रं स्याद्दक्षिणावर्त्तः शुद्धश्च श्रीहरेः क्षुतः॥"

इति श्रीहरिभक्तिविलासे ४ विलासः॥

ग्रामजालम्। इति त्रिकाण्डशेषः॥ नगरपुष्पम्। इति राजनिर्घण्टः॥ यूहविशेषः। (एतस्य लक्षणं यथा,—

"अष्टारं वर्त्तुलाकारं यूहचक्रं त्रिनाड़िकम्। दक्षचतुष्टयं वाह्ये कर्णैश्च चतुर्दिशम्॥ पूर्व्वदक्षायतो ऽन्यस्य दिनभाद्यं भमण्डलम्। प्रवेशे निर्गमे चैव त्रीणि त्रीणि प्रदक्षिणे॥ ग्रंग्निसंज्ञारकं मध्ये तद्वाह्ये भानुसंज्ञकम्। तृतीयं राहुसंज्ञञ्च केतुर्दक्षचतुष्टये॥ चन्द्रर्क्षे विजयो लाभः सूर्य्यर्क्षे मध्यमं फलम्। राहुधिष्ण्यारके विन्नं मृत्युः केतुचतुष्टये॥ एवमुक्तं चतुःस्थाने यद्दिने यस्य नामभम्। तद्दिने तत् फलं तस्य सर्व्वकार्य्येषु सर्व्वदा॥" एतच्चक्रन्तु भगवता द्रोणाचार्य्येण अभिमन्युवधार्थेवाभिकल्पितम्। तत्र यूहमध्ये निर्म्माणप्रकारः कः कुत्र आसीदिति प्रदर्शयितुमाह।

"चक्रयूहो महाराज! आचार्य्येणाभिकल्पितः। तत्र शक्रोपमाः सर्व्वे राजानो विनिवर्त्तिताः॥ अवस्थानेषु विन्यस्ताः कुमाराः सर्व्ववर्म्मसु। संघातो राजपुत्राणां सर्व्वेषामभवत्तदा॥ लताभिसमयाः सर्व्वे सुवर्णविकृतध्वजाः। रक्ताम्बरधराः सर्व्वे सर्व्वे रक्तविभूषणाः॥ सर्व्वे रक्तपताकाश्च सर्व्वे वै हेममालिनः। चन्दनागुरुदिग्धाङ्गाः सर्व्वे रक्षोघ्नवाससः॥ सहिताः पर्य्यधावन्त कार्त्तिं प्रति युयुत्सवः। तेषां दशसहस्राणि वभूवुर्द्दुन्दिनामपि॥ पौत्रं तव पुरस्कृत्य लक्ष्यं प्रियदर्शनम्। अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः॥ अन्योन्यं रक्षमाणाश्चाप्यन्योन्यस्य हिते रताः॥ दुर्य्योधनस्तु राजेन्द्र! सैन्यमध्ये व्यवस्थितः। कर्णदुःशासनप्रेष्टैतो राजा महारथैः॥ देवराजोपमः श्रीमान् श्वेतच्छत्राभिसंवृतः। चामरव्यजनाग्रेषैरुद्यन्निव भास्करः॥ प्रमुखे तस्य सैन्यस्य द्रोणोऽवस्थितनायकः। विभुराजस्यथाश्लिष्टः श्रीमान् मेरुरिवाचलः॥ विभुराजस्य पार्श्वस्था अश्वत्थामपुरोगमाः। सुताश्च महाराज! गिरिशृङ्गसन्निभाः॥ गान्धारराजः कितवः शकुनो भूरिश्रवास्तथा। पार्श्वतः विभुराजस्य वराजन्त महारथाः॥ ततः प्रवर्त्तते युद्धं तुमुलं लोमहर्षणम्। तावकानां परेषाञ्च दृष्ट्वा निवर्त्तनम्॥" इति महाभारते। ७। ३३। १३—२४॥)

तैलयन्त्रम्। इत्यमरटीकायां स्वामी॥ (यथा, आर्य्यासप्तशत्याम्। ५६२। [कारस्य॥"

"कैश्चमयान् पीड़यतः किं चक्रेणापि तैलकालज्ञापकयन्त्रविशेषः। यथा, गोलाध्याये।

"चक्रं चक्राग्राङ्कं परिधौ त्रयभ्रमण्डलादिकाधारम्। धात्रौ त्रिभ आधारात् कल्प्या भार्द्धेऽन्त्र खार्द्धम्॥ तन्मध्ये छिद्रार्द्धं त्रिभार्कांभिसुखनेमिकं कार्य्यम्। भूमेरन्नतभागाश्चक्राग्रच्छाया भुक्तः। [लम्। तत्खार्द्धाग्रच्छाया गता उन्नतनवर्क्षभुक्तौ क्षुद्दद्कोन्नतांशभक्तं नाड्यः स्युलाः परैः प्रोक्ताः।"

धातुमयं दारुमयं वा समं चक्रं कृत्वा तन्नेम्यां ग्रहकक्षादिराधारः ग्रन्थिलः कार्य्यः। चक्रमध्ये छिद्रं सुविरमाधारात् सुविरोपगामिनी लम्बवदूर्द्धरेखा कार्य्या। तन्मध्यतोऽन्या तिर्य्यक्रेखा चात्र कार्य्या। तच्चक्रं परिधौ भगणांशैरङ्कयित्वाधारात् त्रिभ इति नवतिभागान्तरे तिर्य्यगेखा तत्परिधिसम्पाते धात्री क्षितिः कल्प्या। भार्द्धेऽन्तर लम्बरेखानेमिसम्पाते खार्द्धं कल्प्यम्। सुविरे छिद्रा शलाका प्रदातव्या। सा चाग्रसंज्ञा। तच्चक्रमर्काभिसुखनेमिकञ्च यथा भवति तथाधारे धार्य्यम्। तथा धृतेऽग्रस्य छाया परिधौ यत्र लगति तत्तुल्यचिह्नयोरन्तरे ये अंशास्ते रवेरन्नतांशाः। ये छायाखार्द्धयोरन्तरे ते नतांशा ज्ञेयाः। एवमत्र नतोन्नतांशज्ञानमेव भवति। अतोऽन्येर्घटिका अप्यागताः। तद्यथा, तस्मिन् दिने गणितेन मध्यन्दिनोन्नतांशान् दिनार्द्धमानञ्च ज्ञात्वानुपातः कृतः। यदि मध्यन्दिनोन्नतांशैर्दिनार्द्धनाड्यो लभ्यन्ते तदैभिः किमित्येवं स्फुटा घटिकाः स्युः॥ अथ वेधेन यद्ज्ञानमाह।

"पैत्र्यपुष्यान्तिमवारुणानां-
ऋक्षद्वयं नेमिगतं यथा स्यात्।
दूरेऽन्तरेऽल्पेषु भखेचरौ वा
तथात्र यत्नं सुधिया प्रधार्य्यम्॥
नेमिस्थदृष्ट्याचगतं प्रपश्येत्
खेटञ्च धिष्ण्यस्य च योगतारान्।
नेम्यक्षयोरन्तरयुग्जोस्तु मध्ये
ये ऽग्राः स्थिता भध्रुवको युतस्तैः॥
प्रत्यक्स्थिते भेऽथ पुरःस्थिते तै
र्हीनो ध्रुवः स्यात् खचरस्य भुक्तम्॥"

तत्र यत्नस्त्वाधो नेम्यां दृष्टिं कृत्वोर्द्धनेम्यासक्तचार्य्या मध्ये भद्वितयं युगपन्नेमिगतं यथा स्यात् तथा यत्नं स्थिरं कृत्वा नेम्यां धिष्ण्ययोरेकतरं स्थानमङ्कयेत्। ततोऽग्रे पृष्ठतो वा दृष्टिं चालयित्वा यद्वं विध्येत्। यद्वः प्रायोऽचगतो दृश्यते। अचमण्डलस्य यद्वस्य चान्तरं ध्रुवो यद्वावधिः अचमण्डलं नेम्यां यत्र लग्नं दृश्यते तत् स्थानमग्रङ्कम्। अथ भग्रहाङ्कयोर्मध्ये ये ऽग्रास्तैर्भध्रुवो युतः स्फुटग्रहो भवति यदा यद्वात् पश्चिमस्थं नक्षत्रम्। यदा पूर्व्वस्थं नक्षत्रं तदा भध्रुवो हीनः स्फुटग्रहो भवति। अथवाल्पग्रहं नक्षत्रं रोहिण्याद्यं ततो दूरेऽन्तरे यदा यद्वस्तदा तावेव विद्ध्वा प्रोक्तवद्यद्वज्ञानम्। इति चक्रयन्त्रम्॥ शरीरस्थषट्चक्राणि यथा। मूलाधारः १ स्वाधिष्ठानम् २ मणिपूरम् ३ अनाहतम् ४ विशुद्धम् ५ आज्ञाख्यम् ६। तद्यथा,—

"मूलाधारे त्रिकोणाख्ये रक्तज्ञानक्रियात्मके। मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम्॥ तदूर्द्धे कामबीजन्तु मूलग्रन्थीन्दुनादकम्। तदूर्द्धे तु शिखाकारा कुण्डली ब्रह्मविग्रहा॥ तद्वह्नौ हेमवर्णाभं वसवर्णं चतुर्दलम्।

हृतहेमसमप्रख्यं पद्मं तत्र विभावयेत्॥ तदूर्द्धेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम्। वादिलान्तषड्वर्णैश्च युक्ताधिष्ठानसंज्ञकम्॥ मूलमाधारषट्कानां मूलाधारं ततो विदुः। स्वयम्भूस्थं परं लिङ्गं स्वाधिष्ठानं ततो विदुः॥ तदूर्द्धे नाभिदेशे तु मणिपूरं महाप्रभम्। मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः॥ मणिवद्भिन्नतत्पद्मं मणिपूरं तथोच्यते। दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्॥ शिवेनाधिष्ठितं पद्मं विश्वालोकैककारणम्। तदूर्द्धेऽनाहतं पद्मसुद्यदादित्यसन्निभम्॥ कादिठान्ताक्षरैरंकपत्रैश्च समधिष्ठितम्। तन्मध्ये वायुलिङ्गन्तु सूर्य्ययुतसमप्रभम्॥ शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते। तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्तितम्॥ आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम्। तदूर्द्धन्तु विशुद्धाख्यं कुलषोड़शपङ्कजम्॥ स्वरैः षोड़शभिर्युक्तं धूम्रवर्णैर्महाप्रभम्। विशुद्धिं तनुते यस्मात् जीवस्य हंसलोकगात्॥ विशुद्धं पद्ममाख्यातमाकाशाख्यं महाद्भुतम्। आज्ञाचक्रं तदूर्द्धे तु आत्मनाधिष्ठितं परम्॥ आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम्। कैलासाख्यं तदूर्द्धे तु बोधनीन्तु तदूर्द्धतः॥ एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत!॥"॥ मन्त्रोद्धारार्थषट्चक्राणि यथा। कुलाकुलचक्रम् १ राशिचक्रम् २ नक्षत्रचक्रम् ३ अकथहचक्रम् ४ अकडमचक्रम् ५ ऋधिधनिचक्रम् ६। तद्यथा,—

"कुलाकुलस्य भेदं हि वक्ष्यामि मन्त्रिणामिह। वायुग्निभूजलाकाशाः पञ्चाग्न्यक्षिपयः क्रमात्॥ पञ्चह्रस्वाः पञ्चदीर्घा विन्दवः सन्धिसम्भवाः। कादयः पञ्चधा वर्णा लसहक्षाः प्रकीर्त्तिताः॥ तथा च।

अ आ ए क च ट त प य वाः मारुताः।
इ ई ऐ ख छ ठ थ फ र शाः आग्नेयाः।
उ ऊ ओ ग ज ड द ब ल साः पार्थिवाः।
ऋ ॠ औ घ झ ढ ध भ व सा वारुणाः।
ऌ ॡ अं ङ ञ ण न म ष्ण हाः नाभसाः॥

साधकस्याचरं पूर्व्वं मन्त्रस्यापि तदचरम्। यद्येकंभूतदैवत्यं जानीयात् सकुलं हि तत्॥ भौमस्य वारुणं मित्रमाग्नेयस्यापि मारुतम्। मारुतं पार्थिवानाञ्च शत्रुराग्नेयमम्भसाम्॥ नाभसं सर्व्वमित्रं स्यादिदन्तु नैव शोधयेत्॥"

अथ राशिचक्रम्।

"रेखाद्वयं पूर्व्वगतं स्यात् तन्मध्यतो याम्यकुवेरभेदात्। एकैकमीशानिशाचरे तु हुताशवाय्वोर्विलिखेत्ततोऽर्कान्॥ वेदाग्निवह्नियुगलभवर्णाचिसंख्यान् पञ्चेषुवाणशरपञ्चचतुष्कसंख्यान्। मेषादितः प्रविलिखेत् सकलांस्तु वर्णान् कक्षागतांस्तु प्रविलिखेदथ ग्रादिवर्णान्॥

तग ज आ द ई मेषः। उ ऊ ऋ वृषः। ऋ ल ल मिथुनम्। ए ऐ कर्कटः। ओ औ सिंहः। अं अः शू ष स ह ल क्षाः कन्या। कवर्गस्थला। चवर्गो वृश्चिकः। टवर्गो धनुः। तवर्गो मकरः। पवर्गः कुम्भः। यवर्गो मीनः। खराशीनामनुकूलं मन्त्रं भजेत्।

राशीनां शुद्धता ग्रेया त्यजेत् शुद्धं न्दतिं चयम्।
खराशेर्मेलराशस्थं गणनीयं विचक्षणैः॥
यदा तु खराशेरज्ञानं तदा साधकानामाद्याक्षर-
सम्बन्धिनं राशिं ग्रहीत्वा गणयेत्॥ * ॥

अथ नक्षत्रचक्रम्।

"अ आ अश्विनौ देवगणः। इ भरणी मानुषः। ई उ ऊ कृत्तिका राक्षसः। ऋ ऋ ॡ ॡ रोहिणी मानुषः। ए ओगशिरो देवः। ऐ आर्द्रा मानुषः। ओ औ पुनर्वसुर्देवः। क पुष्यो देवः। ख ग अश्लेषा राक्षसः। घ ङ मघा राक्षसः। च पूर्वफल्गुनी मानुषः। छ ज उत्तरफल्गुनी मानुषः। झ ञ हस्ता देवः। ट ठ चित्रा राक्षसः। ड स्वाती देवः। ढ ण विशाखा राक्षसः। त थ द. अनुराधा देवः। ध न ज्येष्ठा राक्षसः। प फ ब मूला-राक्षसः। भ पूर्वाषाढ़ा मानुषः। म उत्तरा-षाढ़ा मानुषः। य र श्रवणा देवः। ल व धनिष्ठा राक्षसः। श ष स शतभिषा राक्षसः। ह ळ क्ष पूर्व-भाद्रपदा मानुषः। अ आ इ उत्तरभाद्रपदा मानुषः। अं अः ज्ञ रेवती देवः॥ तथा च।

"अश्विन्यादिक्रमेणैव विलिखेत्तारकाः पुनः।
वक्ष्यमाणविधानेन तन्मध्ये वर्णकान् लिखेत्॥
उत्तराद्विचतुष्कायान्तु रेखां कुर्यात्चतुर्थीम्।
दश रेखाः पश्चिमायाः कर्तव्या वीरवन्दिते!॥
अकारादिहकारान्तान् द्विचन्द्रवह्निवेदकान्।
भूमीन्द्रनेत्रचन्द्रांश्च अश्वेषान्तं खगौ प्रिये!॥
द्विभूनेत्रनेत्रयुग्मांश्चेन्द्रनेत्राग्निचन्द्रकान्।
मघादिश्लेषपर्यन्तं द्वितीयं नवतारकम्॥
वह्निभूमीन्दुचन्द्रांश्च युग्मेन्दुनेत्रवह्निकान्।
वेदेन भेदिता वर्णा रेवत्यंशगताः क्रमात्॥
पूर्वोत्तराश्चयश्चैव भरण्यार्द्रा च रोहिणी।
इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः॥
श्वेताशतभिषाम्लाधनिष्ठाश्चैवक्षत्रिकाः।
चित्रामघाविशाखाः स्युस्तारा राक्षसदेवताः॥
अश्विनी रेवती पुष्यः स्वाती हस्तः पुनर्वसुः।
अनुराधाश्चगणिरःश्रवणा देवतारकाः॥
स्वातौ परमा प्रीतिर्मध्यमा भिन्नजातिषु।
रक्षोमानुषयोर्नाशो वैरं दानवदेवयोः॥
अन्त्य सम्पद्विपत् क्षेमः प्रत्यरिः साधको वधः।
मित्रं परममित्रश्च जन्मादीनि पुनः पुनः॥"
जन्मत्रिपञ्चसप्तानि वर्ज्यनीयानि नक्षत्राणि।
खनक्षत्रादेव नक्षत्रं गणनीयम्। खनक्षत्राज्ञाने खनमाद्याक्षरसम्बन्धिनक्षत्राद्गणनीयम्॥ * ॥

अथाकथहचक्रम्।

"चतुरस्रं लिखेत् कोष्ठं चतुष्कोष्ठसमन्वितम्।
पुनश्चतुष्कं तत्रापि लिखेद्वीमान् क्रमेण तु।
इन्दग्निरुद्रनवनेत्रयुगार्कदिक्षु
ऋत्वष्टयोऽग्र्यचतुर्दृग्भौतिकेषु।
पातालपञ्चदशवह्निहिमांशुकोष्ठे
वर्णान् लिखेत् लिपिभवान् क्रमशस्तु धीमान्॥
नामाद्याक्षरमारभ्य यावन्नक्षत्रमादिमाक्षरम्।
चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्टयम्॥
पुनः कोष्ठकोष्ठेषु सप्ततो नाम आदितः।
सिद्धः साध्यः सुसिद्धोऽरिः क्रमात्तेषां मनीषिभिः॥
सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः।
सुसिद्धो ग्रहमात्रेण रिपुर्मूलं निहन्यति॥"*॥

अथाकडमचक्रम्।

"रेखाद्वयं पूर्वपरेण कुर्यात्
तन्मध्यतो यान्यकुवेरभेदात्।
महेश्वरर्क्षाधिपतिक्रमेण
तिर्यक् तथा त्रायुहुताशनेन॥
आकारादिहकारान्तान् क्षीवहीनान् लिखेत्ततः।
तथा ऋ ॠ वर्जयेत्तयं ल ळ तद्वि क्लीवं प्रचक्षते॥
एकैकक्रमतो लेखान् मेषादिषु दृष्टान्तकान्।
गणयेत् क्रमशो भद्रे नामादिवर्णकादिमान्॥
मेषादितश्च मीनान्तं गणयेत् क्रमशः सुधीः।
अनुस्वारसहितं मन्त्रो यावन्नक्षत्रमादिमाक्षरम्॥
सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादयः पुनः।
नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके॥
सुसिद्धस्त्रिसप्तके रुद्रे वेदाष्टद्वादशे रिपुः।
एतत्ते कथितं देवि! अकडमादिकमुत्तमम्॥
तारासुद्धिर्वैद्यवानां कोष्ठसुद्धिः शिवस्य च।
राशिसुद्धिस्तथैवोक्ता गोपालेऽकडमः स्मृतः॥"

अथ ऋणिधनिचक्रम्।

"कोष्ठान्येकादशान्येव वेदैश्च पूरितानि च।
अकारादिहकारान्तं लिखेत् कोष्ठेषु तत्त्ववित्॥
प्रथमं प्रथमकोष्ठेषु ह्रस्वदीर्घक्रमेण तु।
द्वयं द्वयं लिखेत्तत्र विचारे खलु साधकः॥
शेषेष्वेकैकशो वर्णान् क्रमशस्तु लिखेत् सुधीः॥

दौ दौ स्वरौ पञ्चसु कोष्ठकेषु
शेषान् स्वरान् षट्सु षड्रेकमेकम्।
कादीन् हशेषान् विलिखेत्ततोऽर्णा-
वेकैकमेकादशसु त्रिकेषु॥
षट्कालकालवियदग्निसमुद्रवेद-
खाकाग्निशून्यदहनाः खलु साध्यवर्णाः॥
युग्मद्विपञ्चवियदम्बरयुक्प्रभाङ्क-
व्योमाग्निवेदशशिनः खलु साधकार्णाः॥
नामाद्यभात्कादकठवादृगणसङ्कशेषं
ज्ञात्वोभयोरधिकशेषवर्णं धर्णं स्यात्॥
मन्त्रो यदधिकाङ्कः स्यात् तदा मन्त्रं जपेत् सुधीः।
समेऽपि च जपेन्मन्त्रं न जपेत्तु ऋणाधिके॥
शून्ये ज्ञातुं विजानीयात्तस्मात्तं शून्य विवर्जयेत्॥"

इति तन्त्रसारः॥ * ॥

अथोत्तरायणचक्रं यथा,—

"चक्रं सारं विलिख्याथ पतिरयने संक्रमं यत्र करोति
यस्मिन्मृत्वे तदहं मरणभयकरं शूलमूलेऽपि दद्यात्।
तस्मात् पञ्चादारभ्य विविधभयकरं शूलपार्श्वेऽति-लाभः
सख्य स्यात् शूलमध्ये भवति च नियतं वित्त-वामक्रमेण॥"

केतुचक्रं यथा,—

"कण्ठे हृदि विभयुगे क्रतुमागलाभौ
षट्पृष्ठभं चयकरं धनदं करे चिः।
वामे चतुर्षु च रुजं पदयोस्तथाष्टौ
क्षोभो भयञ्च नितरामिह केतुचक्रम्॥"*॥

अहिचक्रं यथा,—

"अथाहिचक्रं वक्ष्यामि विभान्तद्वयशल्ययोः।
ऊर्द्धं रेखाष्टकं लेख्यं तिर्यक् च पञ्चरेखिकाः॥
स्यानदारसुखं चक्रमष्टाविंशतिकोष्ठकम्।
तत्र पौष्णाश्वियान्त्यर्क्षत्रिकामघभाग्यभम्॥
उत्तराफल्गुनी लेख्या पूर्वषड्भां भसप्तकम्।
अहिभ्नोऽजपादर्क्षं शतभं त्राक्षसर्पभम्॥
पुष्यं हस्तं समालेख्यं द्वितीयां पङ्क्तिमाश्रितम्।
अभिजिद्विश्वसृक्षत्रं सौम्यं रौद्रं पुनर्वसुम्॥
चित्रभच्च तृतीयायां षड्क्षौ धिष्ण्यस्य सप्तकम्।
विश्वर्क्षं तोयभं मूलं ज्येष्ठमैत्रविशाखभम्॥
स्वातीं षड्क्षौ चतुर्थ्यान्तु कर्तव्यं पन्नगाक्षतः।
द्वारभाखे मघा याम्ये द्वारस्था क्षत्रिका ततः॥
अश्वीशपूर्वाषाढ़ादित्रिकपञ्चचतुष्टयम्।
रेवती पूर्वभाद्रेन्दोर्भानि शेषाणि भाखतः॥
उदयादिगता नाड्यो भन्नाः षष्ट्याप्तशेषके।
दिनेन्दुसुक्तयुक्तोऽसौ भवेत्तत्कालचक्रमाः॥
चक्रवत्साधयेत् सूर्यन्दत्तस्थेष्टकालिकम्।
चन्द्र ऋक्षे यदार्केन्दू तदास्ति निखिलं निधिः॥
भानु ऋक्षे स्थितौ तौ चेत्तदा शून्यं न संशयः।
स्वस्मै हितं शेषं नास्ति किञ्चिद्विपर्यये॥
स्थितं न लभ्यते द्रव्य चन्द्रे क्रूरग्रहान्विते।
पुष्टे चन्द्रे भवेन्मुद्रा चीजे चन्द्रेऽपकोनिधिः।
हेमतारच्च ताम्रारं रत्नं कांस्यं तथा अपु।
नागं चन्द्रे विजानीयाद्भास्करादिग्रहे स्थिते॥
मिश्रैर्मिश्रं भवेत्तद्वय शून्यं दृष्टिविवर्जिते॥
हेमतारच्च ताम्रारं पाषाणं क्रयणायसम्।
सूर्यादिग्रहगे चन्द्रे द्रव्यभाङ्कं प्रजायते॥
शुक्लराशंशमानेन भूमानं परिकल्पयेत्।
नीचे छिद्रं परे नीचे जलसंस्थो भवेन्निधिः॥
खोचस्थे तूर्द्धगं द्रव्य नवांशक्रमेण च।
परमोचे भवेत्तद्वि भित्तिसन्धिसंक्रमे।
अधिष्ठितं भवेद्द्रव्यं यत्र चन्द्रो यदान्वितः॥"*॥

कुलाकुलचक्रं यथा,—

"द्वितीया दशमी षष्ठी कुलाकुलसुदाहृतम्।
विषमाश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः॥
रविचन्द्रो गुरुः सौरिश्चारोऽप्याकुला मताः।
भौमशुक्रौ कुलाख्यौ च बुधवारः कुलाकुलः॥
वरुणार्द्राभिजिन्मूलं कुलाकुलसुदाहृतम्।
कुलानि समधिष्ण्यानि शेषभान्यकुलानि च।
तिथौ वारे च नक्षत्रे अकुले यायिनो जयः।

कुलाख्ये स्थायिनो नूनं सन्धिश्चैव कुलाकुले ॥"

अथ कुम्भचक्रम् ।

"कुम्भाकारं लिखेच्चक्रं तिर्यग्रेखाप्रभेदितम् ।
क्रमादूर्ध्वमधो लेख्यमेकैकान्तरभं क्रमात् ॥
भानुभानि लिखेत्तत्र रिक्तः पूर्णं इति क्रमात् ।
एवं राशिक्रमो लेख्यो रिक्तः पूर्णं इति द्विधा ॥
रिक्ते रिक्ता भवेद्यात्रा पूर्णे पूर्णा शुभावहा ॥"

अथ कोटचक्रम् ।

"अथातः सम्प्रवक्ष्यामि कोटचक्रमिहारघा ।
लोकोऽरिः कुरुते यत्र भूरिसैन्यपराजयम् ॥
प्रथमो रत्नगयः कोटो द्वितीयो जलकोटकः ।
तृतीयो ग्रामकोटश्च चतुर्थस्तत्र गह्वरः ॥
पञ्चमो गिरिकोटश्च षष्ठः कोटश्च डामरः ।
सप्तमो वक्रभूमिष्ठो विषमाख्यस्तथाष्टमः ॥
ग्रामे साधयेत् खड्गिं जलस्थे वन्यमोचयम् ॥
ग्रामदुर्गेऽग्निदाहश्च प्रवेशं गह्वरे तथा ।
पर्वते स्थानभेदश्च भूतलं डामरे रणे ॥
वक्रस्थे कवियोगश्च विषमे स्थायियायिनौ ।
अतिदुर्गे कालकर्षं चक्रावर्तश्च टिङ्गनम् ॥
तुलावर्तश्च पद्माख्यो यत्नभेदश्च शार्ङ्गरम् ।
एतन्नामाष्टकं ज्ञेयं वर्गाष्टकक्रमेण च ॥
यस्य वर्गस्य ये भक्षा वर्ज्यास्तन्नामनागराः ।
योजयेत् तेन वर्गेण तद्वर्गास्तस्य भङ्गदाः ॥
अ गरुडः क मार्जारश्च सिंहश्च मुनीसुतः ।
त सर्पश्च प आखुश्च य गजः श अजासुतः ॥
दुर्गवर्गस्य ये भक्षा वर्गनामस्थिता नराः ।
तद्वर्गे ते रणे त्याज्या न कर्त्तव्या गड़ाधिपाः ॥
अवर्गात् पञ्चमे स्थाने खड्गिभङ्गश्च जायते ।
अवर्गाद्यष्टकं ज्ञेयं पूर्व्वाद्यदिशां क्रमात् ॥
कोटचक्रं लिखेदादौ चतुरस्रं त्रिनाड़िकम् ।
कृत्तिकादीनि धिष्ण्यानि साभिजित्नि न्यसेद्बुधः ॥
बहिःकोटे तथा मध्ये कोटे मध्ये बहिर्बहिः ।
प्रवेशो निर्गमस्तत्र ज्ञातव्यः खरवेदिभिः ॥
बहिर्दादशभान्यत्र प्राकारे तारकाष्टकम् ।
दुर्गमध्ये तथा चाष्टौ मध्ये स्तम्भचतुष्टयम् ॥
कृत्तिकापुष्यसर्पेन्द्र मघास्वातिविशाखभे ।
अनुराधाभिजिद्विष्णुधनिष्ठात्रियमा बहिः ॥
ब्रह्मा पुनर्वसुभाग्यं चित्रा ज्येष्ठा तथोत्तराः ।
शतभं रेवती चैव प्राकारे तारकाष्टकम् ॥
नगरौद्रोत्तरा हस्तं मूलमाषाढपूर्व्वकम् ।
पूर्व्वोत्तरा तथा भद्रा मध्ये ऋक्षाष्टकं विदुः ॥
पूर्व्वे रौद्रं यमे हस्त पूर्व्वाषाढा च वारुणे ।
उत्तरे चोत्तरं भाद्रमेतत् स्तम्भचतुष्टयम् ॥
कृत्तिकाद्यं मघाद्यञ्च मैत्राद्यं वासवादिकम् ।
त्रीणि त्रीणि प्रवेशे च भानि द्वादश निर्गमे ॥
कृत्तिकादिरयं न्यासः सुबोधोऽयं प्रदर्शितः ।
दुर्गभादृगणनाच्च ग्रहैर्व्वाच्यं ततः फलम् ॥
चतुरस्रं तथावृत्तं त्रिकोणं वृत्तदीर्घकम् ।
अर्द्धचन्द्रं वर्त्तुलञ्च गोसनं धनुराकृति ॥
चतुरस्रे यथा न्यासो भूमिभागक्रमेण च ।
प्रवेशे निर्गमे कार्म्मे तथा वृत्तादिसप्तके ॥
दुर्गे भित्तिविभागेन ज्ञातव्यं धिष्ण्यमण्डलम् ।
बाह्यमे मध्यमे चैव यत्रस्थाः क्रूरखेचराः ॥
तत्र स्थाने कृते यत्ने हस्तिदुर्गं ससैनिकम् ।
ऊर्द्धदृष्टौ च भौमार्कौ केकरौ बुधभार्गवौ ॥
समदृष्टौ च जीवेन्दू शनिराहू ह्यधोदृशौ ।
गाड़ीचये वह्निमध्ये गर्भे नामादि लिख्यते ॥
कालपद्मौद्रयुग्मेभ्यः शराक्रमविवर्जया ।
वातुर्भे कालनाड़ीस्थे ऋक्षमध्यपदे स्थिते ॥
चौर्य्यभयोपतापाच्च रौद्रनार्या पुरग्रहः ।
क्रूरा गर्भे पुरं हन्ति प्राकारे खड्गिकारकाः ॥
बहिःस्था वेरके सैन्ये भङ्गदा नात्र संशयः ।
क्रूरा गर्भे शुभा बाह्ये ग्रस्यते निश्चितं पुरम् ॥
सौम्या मध्ये बहिः क्रूरा असाध्यं दुर्गमुच्यते ।
क्रूरचतुष्टयं मध्ये प्राकारे सौम्यखेचराः ॥
भेदाङ्गको भवेद्दुर्गे विना युद्धेन गृह्यते ।
प्राकारे संस्थिताः क्रूरा मध्ये सौम्यग्रहा यदि ॥
दुर्गभङ्गे समुत्पन्ने भङ्गमायान्ति वेरकाः ।
मध्यनाड़ीस्थिताः सौम्याः क्रूरा बहिरवस्थिताः ॥
सैन्यावर्त्तो बहिः शत्रोर्विना युद्धेन जायते ।
प्राकारे पुरमध्ये च यदा क्रूरा अवस्थिताः ॥
सौम्या बाह्ये तदा दुर्गमयत्नेनापि सिध्यति ।
सौम्या मध्ये च कोटे च बाह्ये पापग्रहा यदि ॥
देवैरप्यादिभिः कोटो गृह्यते न कदाचन ।
प्राकारबाह्यगाः क्रूराः सौम्या मध्यगता यदि ॥
युद्धं प्राकारखड्गिभ्यं पुरभेदो न जायते ।
स्तम्भान्तरगता यस्य ग्रहाः सौम्याः शुभान्विताः ॥
भवेद्वृक्षस्य कोटस्य न नाशो विद्यते क्वचित् ।
स्तम्भान्तरगता यस्य रविराहुशनैश्चराः ॥
भूमिपुत्रश्च तस्यापि नाशः कोटस्य निश्चितम् ।
सौम्या बाह्ये तथा कोटे मध्ये क्रूरग्रहाः स्थिताः ॥
स्वयं दुर्गं प्रयच्छन्ति वेरकाय गड़ाधिपाः ।
बाह्याभ्यन्तरगाः क्रूराः प्राकारे शोभनग्रहाः ॥
रिपुर्हयं क्षयं याति विना युद्धेन निश्चितम् ।
प्राकारस्था ग्रहाः क्रूरा बहिर्मध्ये शुभाः स्थिताः ॥
समयुद्धं भवेत्तत्र खड्गिपातो दिने दिने ।
सौम्याः क्रूरास्तथा चाष्टौ प्राकारमध्यबाह्यगाः ॥
एकस्या यत्र कुर्व्वन्ति संग्रामस्तत्र दारुणम् ।
गजाश्वरथभूपालाः सामन्ता मण्डलेश्वराः ॥
कुर्व्वन्ति च भटा युद्धमुभयोरपि सैन्ययोः ।
विचार्य्य कुरुते युद्धं कोटचक्रं खरोदयौ ॥
प्रवेशनिर्गमाङ्गे चन्द्रे जीवपद्मर्क्षसंस्थिते ।
निर्गीर्णे कविरत्नं दुर्गे कर्त्तव्यं वेरकैर्नृपैः ॥
कर्त्तव्यं कवियुद्धञ्च रात्रौ सुप्ते बहिर्जने ।
प्रवेशनिर्गमावुक्तौ सैनयोरुभयोरपि ॥
कवौ कोटे जयो युद्धे विपरीते पराजयः ।
विहाय प्रहृतं चारं वक्रं गच्छति चेद्गुरुः ॥
तदा प्राग्दिशि भङ्गः स्यात् रुद्धयोः पूर्व्वसैन्ययोः ।
भौमे च वक्रिते भङ्गो भवेत् दक्षिणतोऽपि च ॥
भवेत् पश्चिमतो भङ्गो भार्गवे वक्रगामिनि ।
युधे वक्रगतौ चैव भङ्गश्चोत्तरतो भवेत् ॥
यदि तत्र स्थितौ स्यातां न जातकर्क्षनैश्चरौ ॥
क्रूरो वक्री प्रवेशर्क्षे पुरमध्ये स्थितो यदा ।
तदा कोटविनाशाय कोटस्थो बाह्यभूपतेः ॥

प्रवेशबाह्यगे क्रूरे वक्रे खसैन्यविग्रहः ।
दुर्भिक्षं क्षत्नुभङ्गौ च वहिः सैन्यस्य जायते ॥
निर्गमर्क्षे बहिःस्थे च क्रूरो वक्रं करोति चेत् ।
प्राकारस्य भवेद्भङ्गः प्राकारस्थे पुरस्य च ॥
पुरभे निर्गमे वक्राः कथञ्चित् क्रूरखेचराः ।
दुर्गं त्यक्त्वा तदा काले दुर्गस्थः प्रपलायते ॥
यथा क्रूरैस्तथा सौम्यैः फलं ग्राह्यं विपर्य्ययात् ।
मिश्रैर्मिश्रं विजानीयात् कोटचक्रं न संशयः ॥
दुर्गसैन्यं तथैवोक्तं प्राकारे मध्यभागगम् ।
नीचस्थं वेरकं सैन्यं ज्ञातव्यं खरवेदिभिः ॥
कोटे कोटाधिपे नीचौ विन्नदौ भौमभास्करौ ।
समस्थौ च पुरे सर्व्वे उच्चस्थौ निष्फलौ च तौ ॥
प्राकारं वेरकं हन्ति उच्चस्थौ राहुसूर्य्यजौ ।
प्राकारस्थौ बहिःसैन्यं नीचस्थौ तौ च निष्फलौ ॥
सितेऽर्कपुत्रे तु रवौ गुरावन्यसितेऽपि च ।
वक्रिता नैव शस्ताः स्युर्विधातुं कोटभेदनम् ॥
समदृष्ट्या गुरुचन्द्रः पश्यतः सर्व्वतः सदा ।
तिर्य्यक्स्थितौ बुधशुक्रौ फलदौ नात्र संशयः ॥
ऊर्द्धदृष्टिगते कुर्य्यात् टिङ्गनीयन्त्रवाहनम् ।
समे च साधयेत् खड्गिं रन्ध्रपातमधोमुखे ॥
कोटभं सुखपृच्छस्थं राहोर्यदि गलादिके ।
कोटश्च भज्यते क्षिप्रं पूर्व्वोक्तविधिना चिरात् ॥
दुर्गमध्यगते सूर्य्ये जलग्रोषः प्रजायते ।
चक्रे भङ्गः कुजे दाहो बुधे बुद्धिबला नराः ॥
वाक्पतौ दुर्गमध्यस्थे सुभिक्षं प्रपुरं जलम् ।
चलचित्ता नराः शुक्रे क्षत्नुरोगौ शनैश्चरे ॥
राहौ मध्यगते दुर्गे भङ्गो भेदो महद्भयम् ।
केतौ मध्यगते तत्र विषादः स्याद्गड़ाधिपे ॥
सौरिश्च वाक्पतिश्चैव भवेतां दिशि संस्थितौ ।
यस्यां तया स कोटस्तु भज्यते नात्र संशयः ॥
इत्येवोक्तं फलं मध्ये एवं बाह्यगते ग्रहे ।
उपग्रहसमायोगादनन्तं प्राणसंशयः ॥
अकारादिस्वराः पञ्च पूर्व्वाशादिचतुष्टये ।
मध्यान्ताः सप्तमावेखा अन्तस्थाः खड्गिकारकाः ॥
दुर्गनाम्नः स्वरो यस्य बालो वालमितोऽपि वा ।
तद्दिने प्रारभेत् युद्धं दुर्गं सिध्यति नान्यथा ॥"

इति कोटचक्रम् ॥

इति समयाण्डतम् ॥* चक्रान्तराणि तत्तच्छब्दे द्रष्टव्यानि ॥ (चित्रकाव्यविशेषः । ग्रन्थालङ्कार-भेदः । अस्य च तथाविधलिपिसन्निवेशवशेन चमत्कारिविधायिनामपि वर्णानां तथाविध-श्रोत्राकाशसमवायविशेषवशेन चमत्कारि-विधायिभिर्वर्णैरभेदेन उपचारत्वात् ग्रन्थालङ्कारत्वम् । उदाहरणं यथा, काव्यालङ्कारे । ५ । ६—१३ ।

"माराशिशुक्ररामेभसुखेशसारंहसा ।
सारारम्भसखा नित्यं तदर्तिहरणक्षमा ॥
माता नतानां संघट्टः श्रियां बाधितसम्भ्रमा ।
मान्याथ सीमारामाणां ग्रामे दिग्धाद्यमादिमा ॥
मायाविनं महाभावा रसाधातं ससद्गुणा ।
जातलीला यथा सारवाचं महिषमावधीः ॥

मामभीदा शरण्यासुतसदेवारुक्प्रदा च धीः।
धीरा पवित्रा सन्नासात्त्वासीष्टा मातरारम ॥
मानसापरुषं लोकदेवां सदस सन्नम।
मनसा सादरं गत्वा सर्वदा दास्यमङ्ग ताम् ॥
मा सुधो राजस स्वासूंल्लोककूटेग्रदेवताम्।
तां ग्रिवावाग्रितां सिद्धाग्र्याग्रितां हि स्तुतां
स्तुहि ॥
माङ्रिधाखे रयोऽन्या तु सों डु नानेवमत्र हि।
हिमातङ्कादिवासुं च कं कम्पिनमुग्रुतम् ॥
मातङ्गानङ्गविधिनासुगा पादं तसुद्यतम्।
तङ्गयित्वा ग्रिरस्यस्य निपात्याहन्ति रंहसा ॥”

अथ चक्रे वर्णविन्यासक्रमः।



चक्रः, पुं, (करोति अस्फुटशब्दम्। कृ + बाहुलकात् कः ततो निपातनात् द्वित्वे साधुः।) चक्रवाकपक्षी। इत्यमरः। २। ५। २२ ॥

चक्रकः, त्रि, (चक्र इव कायति प्रकाशते इति। कै + कः।) तर्कविशेषः। तस्य लक्षणं यथा। स्वापेक्षज्ञीयापेक्षितसापेक्षितत्वनिबन्धनप्रसङ्गत्वम्। अपेक्षा च ज्ञप्तौ उत्पत्तौ स्थितौ च ज्ञेया। तत्राद्या यथा। एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यज्ञानजन्यं स्यात् तदा एतद्घटज्ञानजन्यज्ञानभिन्नं स्यात्। द्वितीया यथा। घटोऽयं यद्येतद्घटजन्यजन्यजन्यः स्यात् तदा एतद्घटजन्यजन्यभिन्नः स्यात्। तृतीया यथा। घटोऽयं यद्येतद्घटवृत्तिवृत्तिः स्यात् तथात्वेनोपलभ्येत इति। इति तर्कग्रन्थम् ॥ (वेदान्तदर्शनमते तु “स्वग्रहसापेक्षग्रहकर्त्वं आत्माश्रयः। स्वग्रहसापेक्षग्रहसापेक्षग्रहकर्त्वं अन्योन्याश्रयः। स्वग्रहसापेक्षग्रहसापेक्षग्रहसापेक्षग्रहकर्त्वम् चक्रकम् ॥”)

चक्रकारकं, क्ली, (चक्रं चक्रवदाकारं करोत्यात्मनः वक्रनखाकृत्या इति शेषः। यद्वा चक्रं चक्राकृतिरेखादिकं करोतीति। कृ + खुल्।) व्याघ्रनखनामगन्धद्रव्यम्। इत्यमरः। २। ४। १२६ ॥

चक्रकुल्या, स्त्री, (चक्रस्य चक्राख्यौषधीलतादृश्यभेदस्य कुल्या इव।) चित्रपर्णी। इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ॥ (चित्रपर्णिकाशब्दे ग्रेयमस्या विवरणम् ॥)

चक्रगजः, पुं, (चक्रेण चक्राख्यया गम्यते शब्द्यते। यद्वा चक्रे चक्राकृतिदद्रुव्याधौ गज इव। गज इव दद्रुरोगमर्दक इत्यर्थः।) चक्रमर्दवृक्षः। इति राजनिर्घण्टः ॥

चक्रगण्डुः, पुं, (चक्रमिव वर्त्तुलाकारो गण्डुः।) वर्त्तुलाकारोपाधानम्। इति चतुरग्रब्दार्थे हेमचन्द्रः ॥ गोलबालिग्र इति गालबालिग्र इति च भाषा ॥

चक्रगुच्छः, पुं, (चक्रवद्गुच्छः पुष्पगुच्छोऽस्मिन् अस्य वा।) अग्रोकवृक्षः। इति शब्दचन्द्रिका ॥

चक्रजीवकः, पुं, (चक्रेण कुम्भाद्युत्पादनयन्त्रविग्रेषेण जीवतीति। जीव + ण्वुल्।) कुम्भकारः। इति हेमचन्द्रः ॥

चक्रदंष्ट्रः, पुं, (चक्रं चक्राकृतिर्दंष्ट्रायां यस्य चक्रमिव दंष्ट्रा यस्येति वा।) शूकरः। इति राजनिर्घण्टः ॥

चक्रदन्ती, स्त्री, (चक्रमिव दन्तरूपमिव च इत्येके।) दन्तीवृक्षः। इति राजनिर्घण्टः ॥

चक्रदन्तीबीजं, क्ली, (चक्रदन्त्या बीजम्।) जयपालः। इति राजनिर्घण्टः ॥

चक्रधरः, पुं, (धरतीति। धृ + अच्। चक्रं सुदर्शनाख्यं द्वादग्रारादिलक्षणलक्षितमस्त्रम्। तस्य धरः। चक्रं धरति धारयतीति वा।) विष्णुः। (यथा, रघुः। १६। ५५।

“विगाहितुं ग्रीमदिमानुरूपं
प्रचक्रमे चक्रधरप्रभावः ॥”

चक्रं यथा तस्य धरः।) सर्पः। (यथा, महाभारते। ३। ८५। ७०।

“अङ्गिरःप्रमुखाश्चैव तथा ब्रह्मर्षयोऽपरे।
तथा नागाः सुपर्णाश्च सिद्धाश्चक्रधरास्तथा ॥”)

श्यामलालिनि त्रि। इति मेदिनी ॥ (यथा, महाभारते। ३। ८५। ७६।

“यजन्ते क्रतुभिर्देवास्तथा चक्रधरा नृपाः ॥”)

चक्रनखः, पुं, (चक्रमिव नखः नखाकृत्यग्रविग्रेषोऽस्यस्य इति। “अर्ग्र आदिभ्योच्” इत्यच्।) व्याघ्रनखनामगन्धद्रव्यम्। इति राजनिर्घण्टः ॥

चक्रनामा, [न्] पुं, (चक्रं सरघानिर्म्मितमधुचक्रं तन्नामेव नामास्य।) माक्षिकधातुः। इति हेमचन्द्रः ॥

चक्रनायकः, पुं, (चक्रं कर्षणजन्यचक्राकाररेखादिकं नयतीति। नी + ण्वुल्।) व्याघ्रनखः। इति राजनिर्घण्टः ॥ (चक्रस्य नायके त्रि ॥)

चक्रपद्माटः, पुं, (चक्रं चक्रवत् यत् पद्मं दद्रुरोगः तत्र अटति तं शब्दातीत्यर्थः।) चक्रमर्दकवृक्षः। इति शब्दरत्नावली ॥

चक्रपरिव्याधः, पुं, (चक्रं दद्रुरोगं परिविध्यतीति। परि + व्यध + अण्।) आरग्वधवृक्षः। इति वैद्यकम् ॥

चक्रपर्णी, स्त्री, (चक्राकारं पर्णमस्या इति। जातौ संज्ञायां वा ङीष्।) चक्रकुल्यालता। इति शब्दचन्द्रिका ॥

चक्रपाणिः, पुं, (चक्रं सुदर्शनाख्यं पाणौ यस्य। अधिकरणबहुव्रीहिसमासः।) विष्णुः। इत्यमरः। १। १। २० ॥ (यथा, विष्णोरष्टोत्तरशतनामकीर्त्तने।

“वैकुण्ठश्चाच्युतो रामश्चक्रपाणिरधोक्षजः ॥”)

चक्रपादः, पुं, (चक्रं पाद इवास्य।) रथः। (चक्रवत् पादा यस्य।) हस्ती। इत्यजयपालः ॥

चक्रपुष्करिणी, स्त्री, (चक्रेण विष्णुचक्रेण खनिता पुष्करिणी।) मणिकर्णिका। इति काग्रीखण्डम् ॥

चक्रफलं, क्ली, (चक्राकारं फलं फलकमस्य।) अस्त्रविग्रेषः। तत्पर्य्यायः। अङ्कनम् २। इति त्रिकाण्डग्रेषः ॥

चक्रबान्धवः, पुं, (चक्रस्य पद्मस्य बान्धवः बन्धुः।) सूर्य्यः। इति हेमचन्द्रः ॥

चक्रभृत्, [द्] पुं, (चक्रं बिभर्त्तीति। भृ + क्विप्।) विष्णुः। इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम्। १। ३८।

“चक्रभृद्विजयेग्रादिकैग्रवे गानभूषिते ॥”)

चक्रभेदिनी, स्त्री, (चक्रं चक्रवाकमिथुनं भिनत्ति पृथक् करोतीति। भिद् + णिनिः। ततो ङीप्। निग्रायां हि चक्रवाकयोर्विग्रेषेण भवतीति लोकप्रसिद्धम्।) रात्रिः। इति त्रिकाण्डग्रेषः ॥

चक्रमण्डली, [न्] पुं, (चक्राकारेण यन्मण्डलं तदस्यास्य इति इनिः।) अजगरसर्पः। इति हेमचन्द्रः ॥

चक्रमर्दः, पुं, (चक्रं चक्राकारदद्रुरोगं मृद्नातीति। मृद् + “कर्म्मण्यण्।” ३। २। १। इत्यण्।) क्षुपविग्रेषः। चाकुन्दिया इति भाषा ॥ तत्पर्य्यायः। एडगजः २ अडगजः ३ गजाख्यः ४ मेघाख्यः ५ एडहस्ती ६ व्यावर्त्तकः ७ चक्रगजः ८ चक्री ९ पुन्नाटः १० पुन्नाडः ११ विमर्दकः १२ दद्रुघ्नः १३ तर्व्वटः १४ चक्राह्वः १५ शुकनाग्रनः १६ दृढ़बीजः १७ प्रपुन्नाड़ः १८ खर्ज्जुघ्नः १९। इति राजनिर्घण्टः ॥ चक्रमर्दकः २० पद्माटः २१ उरुग्राख्यः २२। इत्यमरः। २। ४। १४७ ॥ प्रपुन्नड़ः २३ प्रपुनाड़ः २४ उरुग्राचः २५। इति तट्टीका ॥ अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। मेदोवातकफकण्डूकुष्ठदद्रुपामादिदोषनाग्रित्वञ्च। इति राजनिर्घण्टः ॥ लघुत्वम्। स्वादुत्वम्। रूक्षत्वम्। पित्तश्वासक्रमिनाग्रित्वम्। हृद्यत्वम्। हिमत्वञ्च। तत्फलगुणाः। उपदंशकुष्ठकण्डूदद्रुविषानिलगुल्मकासक्रमिश्वासनाग्रित्वम्। कटुत्वञ्च। इति भावप्रकाग्रः ॥ (अस्य गुणाः पर्य्यायाश्च यथा, भावप्रकाग्रस्य पूर्व्वखण्डे प्रथमे भागे।

“चक्रमर्दः प्रपुन्नाटो दद्रुघ्नो मेघलोचनः।
पद्माटः स्वादेडगजचक्री पुन्नाट इत्यपि ॥
चक्रमर्दो लघुः स्वादु रूक्षः पित्तानिलापहः।
हृद्यो हिमः कफश्वासकुष्ठदद्रुक्रिमीन् हरेत् ॥
हन्त्युपदंशतत्फलं कुष्ठकण्डूदद्रुविषानिलान्।
गुल्मकासक्रिमिश्वासनाग्रनं कटुकं स्मृतम् ॥”)

चक्रमर्दकः, पुं, (चक्रं दद्रुरोगविग्रेषं मृद्नातीति। मृद् + ण्वुल्।) चक्रमर्दः। इत्यमरः। २। ४। १४७ ॥ (स्त्रियान्तु काम्नि अत इत्वञ्च।

राजमालविशेषः। यथा, राजतरङ्गिण्यां। ४।२१३।
"ललितादित्यभूभर्तुर्वल्लभा चक्रमर्दिका॥")

चक्रयानं, क्ली, (चक्रेण अन्वितं यानम्।) रथादि। चक्रयुक्तवाहनम्। इत्यमरटीकायां रायमुकुटादयः॥

चक्ररदः, पुं, (चक्रवद्दृत्तो रदः दन्तोऽस्येति।) शूकरः। इति त्रिकाण्डशेषः॥

चक्रलक्षा, स्त्री, (चक्रे चक्राकारे दर्व्यां मण्डलाकारे कुठादौ वा लक्षयं आरोग्याय चिह्नं आरोग्यसूचनमित्यर्थः यस्याः।) गुडूची। इति रत्नमाला॥ (चक्रं लक्षयं यस्य इति व्युत्पत्त्या। रथे विष्णौ च पुं॥)

चक्रलताम्रः, पुं, (चक्र+रक्। चक्रः ढक्किजनकः लताम्रः यत्र यस्य वा।) वह्वरसालवृक्षः। इति राजनिर्घण्टः॥

चक्रला, स्त्री, (चक्रं चक्राकारं लाति आदत्ते चक्राकारेण वर्त्तत इति यावत्। ला+कः ततष्टाप्।) उचटा। इत्यमरः। २। ४। १६०॥

चक्रवर्त्तिनी, स्त्री, (चक्राकारेण वर्त्तते इति। वृत्+णिनिः।) जनीनामग्न्यन्वयम्। इत्यमरः। २। ४। १५३॥ अलक्तकः। जटामांसी। इति राजनिर्घण्टः॥ (चक्रं पृथ्वीचक्रं वर्त्तते अस्यां यद्वा चक्रं सेनाचक्रं अग्रेसरयूहरचनयाधिष्ठितं सेनाबृन्दं वर्त्तयितुं शीलमस्या इति। सर्व्वभूमेरीश्वरी॥ चक्रेण समूहेषु वर्त्तते या। यूथेश्वरी। यथा, कथासरित्सागरे। २०। ११४।
"एवं बाल्येऽपि जाताहं डाकिनीचक्रवर्त्तिनी॥")

चक्रवर्त्ती, [न्] पुं, (चक्रं पद्माकारमुभयचिह्नं करे वर्त्तते यस्य। वृत्+णिनिः। यद्वा चक्रं पृथ्वीचक्रं तेन वर्त्तते इति। वृत+णिनिः।) समुद्रपरिवृतायाः सर्व्वभूमेरीश्वरः। तत्पर्य्यायः। सार्व्वभौमः २। इत्यमरः। २। ८। २॥ (यथा, शुक्लजायां १ म अङ्के।
"जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुत्रमेवं गुणोपेतं चक्रवर्त्तिनमाप्नुहि॥")
वास्तुकम्। इति राजनिर्घण्टः॥ (श्रेष्ठः। यथा, गीतगोविन्दे। १। २।
"वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्त्ती॥"
"पारश्चचक्रवर्त्ती नर्त्तकश्रेष्ठः।" इति तट्टीकायां चेतनदासः। यद्वा पद्मावती महालक्ष्मीः राधा तस्याश्चरणचारणे परिचर्य्यायां यच्चक्रं मण्डलं तत्र वर्त्तते इति व्युत्पत्त्या वैष्णवसम्प्रदायविशेषः॥)

चक्रवाकः, पुं क्ली, (चक्र इत्याख्यया उच्यतेऽसौ। वच+कर्म्मणि घञ्। ततो "व्यञ्जादीनाञ्च।" ७। ३। ५३। इति कुत्वम्।) पक्षिविशेषः। चकाचकि इति भाषा॥ (यथा, महाभारते। १। ६६। ५६।
"धृतराष्ट्रौ तु हंसांश्च जनहंसांश्च सर्व्वशः।
चक्रवाकांश्च भद्रं ते जनयामास वै तु॥")

तत्पर्य्यायः। कोकः २ चक्रः ३ रथाङ्गाह्वयनामकः ४। इत्यमरः। ३। ५। २२॥ भूरिप्रेमा ५ इष्टचारी ६ सहायः ७ कान्तः ८ कामी ९ रात्रिविश्लेषगामी १० रामावक्षोजोपमः ११ कासुकः १२। अस्य मांसगुणाः। लघुत्वम्। स्निग्धत्वम्। बलप्रदत्वञ्च। इति राजनिर्घण्टः॥ (यथा, चरके सूत्रस्थाने २७ अ।
"चक्रवाकास्थान्ये च खगाः सन्त्वम्बुचारिणः।")

चक्रवाटः, पुं, (चक्रेण चक्राकारेण वाटः वेष्टनं यस्य।) क्रियारोधः। पर्य्यन्तः। ग्रिखातरः। इति मेदिनी। टे। ६२॥

चक्रवाड़, क्ली, (चक्रवद् वाड़ते वेष्टयतीति। वाड़+अच्।) चक्रवालम्। इत्यमरटीकायां भरतः॥ पर्व्वतविशेषे पुं। इति मेदिनी। डे। ३८॥

चक्रवात, पुं, (चक्रवद्वातः। ह्रस्वपार्श्वादीत्वादाय चक्राकारेण भ्राम्यति यो वायुरिति यावत्।) भ्रमिवातः। घूर्ण्णवातास इति भाषा॥ तत्पर्य्यायः। वात्या २। यथा, भागवते। १०। ७। २०।
"दैत्यो नाम्ना तृणावर्त्तः कंसभृत्यः प्रचोदितः।
चक्रवातस्वरूपेण जहारासीनमर्भकम्॥"

चक्रवालं, क्ली, (चक्रमिव वाड़ते वेष्टयतीति। वाड़+अच्। ह्रस्य लत्वम्।) मण्डलाकारेण परिवर्त्तः समूहमात्रम्। मण्डलाकारो दिक्समूहः इति माधवी। इति भरतः॥ तत्पर्य्यायः। मण्डलम् २। इत्यमरः। १। ३। ६॥ (यथा, भागवते। ५। १८। १४।
"हित्वा यदं संसृतिचक्रवालं
नृसिंहपादं भजतानुकालोऽभयम्॥")

चक्रवालः, पुं, (चक्रेण चक्राकारेण वलते लोकालोको परिवेष्ट्य विराजते इत्यर्थः। वल+बाहुलकात् घञ्।) अस्य पर्व्वतस्य लोकालोकपरिवेष्टनकारितया विराजमानत्वात्तथात्वम्।) लोकालोकपर्व्वतः। इत्यमरः। २। ३। २॥ (मनुष्यादीनां मण्डलाकारेण स्थितिः। यथा, हरिवंशे। ७६। ३५।
"एवं स लक्ष्यो गोपीनां चक्रवालेरलङ्कृतः।
शारदीषु सचन्द्रासु निशासु सुसुदे सुखी॥")

चक्रवृद्धिः, स्त्री, (चक्रमिव चक्रभ्रमणमिव वृद्धिः उत्तरोत्तरं वृद्धेरपि वृद्धिरित्यर्थः।) यत्र वृद्धिरूपं धनं दातुमग्नोऽधमर्णः सवृद्धिकमिदं दास्यामीतिस्वीकरोति तत्र या वृद्धिः सा। सुदेर सुद इति भाषा। यथाह नारदः।
"वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता॥"
(तथाच मनुः। ८। १५३।
"चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या।"
"कायिका कायसंयुक्ता मासव्याह्या च कालिका।
वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना सता॥"
इति तट्टीकायां कुल्लूकभट्टधृतबृहस्पतिवचनम्।)

चक्रव्यूहः, पुं, (चक्रवत् मण्डलाकारेण रचितो व्यूहः रचनयाधिष्ठापितः सेनासमूह इति यावत्।) युद्धार्थमण्डलाकारेण सैन्यरचना। (एतस्य रचनालक्षणादिचक्रशब्दे द्रष्टव्यः॥

व्यूहोऽयमभिमन्युवधेषुणा भगवता द्रोणाचार्य्येणाभिकल्पितः। यथा, महाभारते। ७। ३३। १२—२३।
"चक्रव्यूहो महाराज! आचार्य्येणाभिकल्पितः।
तत्र शक्रोपमाः सर्व्वे राजानो विनिवेशिताः॥
अवस्थानेषु विन्यस्ताः कुमाराः सूर्य्यवर्चसः।
सङ्गतौ राजपुत्राणां सर्व्वेषामभवत्तदा॥
लताभिसमयाः सर्व्वे सुवर्णविकृतध्वजाः।
रक्तास्त्रधराः सर्व्वे सर्व्वे रक्तविभूषणाः॥
सर्व्वे रक्तपताकाश्च सर्व्वे वै हेममालिनः।
चन्दनागुरुदिग्धाङ्गाः सगन्धिनः सुवाससः॥
सहिताः पर्य्यधावन्त काङ्क्षिणं प्रति युयुत्सवः।
तेषां दशसहस्राणि बभूवुर्द्दुर्निवारणम्॥
पौत्रं तव पुरस्कृत्य लक्षयं प्रियदर्शनम्।
अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः॥
अन्योन्यं सङ्गमाद्यान्यन्योन्यस्य हिते रताः।
दुर्य्योधनस्तु राजेन्द्र! सैन्यमध्ये व्यवस्थितः॥
कर्म्मदुःशासनप्रभृतिपेर्वृतो राजा महारथैः।
देवराजोपमः श्रीमान् श्वेतच्छत्राभिसंवृतः॥
चामरव्यजनाद्यैश्च रविरश्मिव भास्करः।
प्रमुखे तस्य सैन्यस्य द्रोणोऽवस्थितनायकः॥
सिन्धुराजस्तथाऽतिष्ठत् श्रीमान् मेरुरिवाचलः।
सिन्धुराजस्य पार्श्वस्था अन्वयामपुरोगमाः॥
सताश्चैव महाराज! त्रिंशन्नित्यदशसन्निभाः।
गान्धारराजः कितवः शकुनो भूरिश्रवास्तथा।
पार्श्वतः सिन्धुराजस्य वराजन्त महारथाः॥")

चक्रशल्या, स्त्री, (चक्रवत् चक्राकारेण वा शल्या अत्र।) काकतुण्डी। श्वेतशुङ्गा। इति राजनिर्घण्टः॥

चक्रश्रेणी, स्त्री, (चक्रमिव चक्राणां वा श्रेणी यत्र।) अजशृङ्गीवृक्षः। इति रत्नमाला॥

चक्रसंज्ञं, क्ली, (चक्रेण वैद्यकयोगचक्रेण संज्ञायते इति। सं+ज्ञा+कः। चक्रस्य संज्ञा संज्ञा यस्य इति वा।) वङ्गम्। इति हेमचन्द्रः॥

चक्रसंवरः, पुं, (चक्रं अविद्याकामकर्म्मादिजन्यविषयवासनासमूहं इन्द्रियाणां समूहं वा संवृणोति संगमयतीति। सं+वृ+अच्।) बुद्धभेदः। तत्पर्य्यायः। हेरुकः २ हेवकः ३ देवः ४ वज्रकपाली ५ निशुम्भी ६ अग्निग्रेश्वरः ७ वज्रटीकः ८। इति त्रिकाण्डशेषः॥

चक्रा, स्त्री, (चक्र+स्वार्थे+रक्। ततष्टाप्।) नागरमुस्ता। कर्कटशृङ्गी। इति राजनिर्घण्टः॥

चक्राङ्की, स्त्री, (चक्रेण चक्राकारेण अङ्कते गच्छतीत्यर्थः। अकि गतौ+अच् ततो ङीष्।) हंसी। इति शब्दरत्नावली॥ चक्राकी च पाठः॥

चक्राङ्गः, पुं, स्त्री, (चक्रेण चक्राकारेण अङ्गति गच्छतीति। अङ्ग+अच्) हंसः। इत्यमरः। २। ५। २३॥ (यथा, महाभारते। ८। ४१। २१।
"इदमूचुः स चक्राङ्गा वचः कार्कं विहङ्गमाः॥"
चक्रमङ्गमस्येति व्युत्पत्त्या रथोऽपि॥ (चक्र) वाकः। यथा, मनुः। ५। १२।
"कलविङ्कं शुकं हंसं चक्राङ्गं ग्राम्यकुक्कुटम्॥")

चक्राङ्गा, स्त्री, (चक्रमिवाङ्गमस्यस्याः इति। "अर्शआदिभ्योऽच्।" ५।२।१२७। इत्यच् ततष्टाप्।) सुदर्शना लता। इति रत्नमाला॥

चक्राङ्गी, स्त्री, (चक्राङ्ग+जातौ ङीष्।) कटुरोहिणी। इति मेदिनी। गे। ३५॥ (अस्याः पर्य्यायाः यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"कट्वी तु कटुका तिक्ता शल्यभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी॥")
हंसी। इति शब्दरत्नावली॥ छिल्लमोचिका। इति चिकित्साशास्त्रे॥ मञ्जिष्ठा। इति शब्दचन्द्रिका॥ कर्कटशृङ्गी। इति रत्नमाला॥

चक्राटः, पुं, (चक्रं धूर्त्ततालं शाल्मलिसम्बन्धं आलम्ब्य अटतीति। अट्+अच्।) विष्वक्सेनः। धूर्त्तः। दीनारः। इति मेदिनी। टे। ४२॥

चक्राणः, त्रि, (चक्रे कर्म्मादिकं इति। कृ+कानच् प्रत्ययः। ततो धातौ अभ्यस्त संज्ञम्।) कृतवान्। कर्म्मवाच्ये कृतः। भाववाच्ये स्त्री कृतम्। इति मुग्धबोधव्याकरणं तट्टीका च॥

चक्राधिवासी, [न्] पुं, (चक्र इत्याख्या संज्ञा यस्य।) चक्रमर्दः। इति राजनिर्घण्टः॥ (चक्रवाकपक्षिविशेषः। यथा, भागवते। ३।१०।२४।
"हंससारसचक्राङ्गकाकोलूकादयः खगाः॥"
यथाच, हारीते प्रथमस्थाने ११ अध्याये।
"चक्राङ्गोऽतिकषायशुक्रजननो दृष्योऽतिरुच्योरुदुः॥")

चक्रिः, पुं, (करोतीति। कृ+"आदृगमहनजनः किकिनौ लिट् च।" ३।२।१७१। इति किन्। स च लिड्वत्।) कर्म्मा। इति मुग्धबोधम्॥ (यथा, ऋग्वेदे। १।६।२।
"चक्रिं विश्वानि चक्रये।"
"चक्रये पुरुषार्थकरणशीलाय॥" इति दयानन्दभाष्यम्॥)

चक्रिका, स्त्री, (चक्रं चक्रवद्गोलाकारो विद्यते अस्याः वा। चक्र+ठन् टाप् च।) जातुः। इति राजनिर्घण्टः॥ (यथा, राजतरङ्गिण्याम्। ४।३०६।
"अथोभयधनादानि भल्लचक्रिकया समम्॥")

चक्री, [न्] पुं, (चक्रं सुदर्शनाख्यं भगवत्प्रहरणालङ्कारमिति यावत् अस्त्यस्येति। चक्र+इनिः।) विष्णुः। (यथा, महाभारते। १३।१४६।११०।
"अरौद्रः कुण्डली चक्री विक्रम्यूर्ज्जितशासनः॥")
चक्रं ग्रामचक्रं ग्रामसमूह इत्यर्थः अधिकारितयास्त्यस्य इति इनिः।) ग्रामणीलिकः। (चक्रं चक्राकारचिह्नविशेषोऽस्यास्य।) चक्रवाकः। (चक्रं षट्पदिनिर्म्माणकरणव्यञ्जनविशेषः। सोऽस्यास्य इति।) कुलालः। (चक्रं प्रभा अस्यास्य इति।) सर्पः। कृष्णकः। इति विश्वमेदिन्यौ॥ अजः। तैलिकभेदः। इति शब्दरत्नावली॥ चक्रवर्त्ती। इति हेमचन्द्रः॥ चक्रमर्दः। तित्तिरिः। बालसखः। काकः। खरः। इति राजनिर्घण्टः॥ (कुलालतैलिकराजचक्रवर्त्त्यर्थे प्रमाणं यथा आर्य्यासप्तशत्याम्। ५६२।
"खेदमयान् पीड़यतः किं चक्रेणापि तैलकारस्य।
चालयति पार्थिवानपि यः स कुलालः परं चक्री॥")
चक्रविशिष्टे त्रि॥ (चक्रयुक्तरथादियानारूढः। यथाह मनुः। २।१३८। [स्त्रियाः॥"
"चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः।
"चक्रिणः चक्रयुक्तरथादियानारूढस्य॥"
इति तट्टीकायां कुल्लूकभट्टः॥")

चक्रीवान्, [त्] पुं, स्त्री, ("आवन्नीवद्दशोश्चक्रीवदिति।" ८।२।१२। चक्रशब्दस्य चक्रीभावः ततो निपातनात् साधुरिति।) गर्हभः। इत्यमरः॥ रावणविशेषः। इति सिद्धान्तकौमुदी॥

चक्रुः, पुं, (करोतीति। कृ+"कृञश्च।" उणा। १।२२। इति कुः।) कर्म्मा। इति सिद्धान्तकौमुदीसुबादिवृत्तिः॥

चक्रेश्वरी, स्त्री, (चक्राणां जिनविशेषाणां ईश्वरी अधिष्ठात्री।) जिनानां विद्यादेवीविशेषः। इति हेमचन्द्रः॥

चक्ष, ञ ङ वदे। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं-सेट्।) वदः कथनम्। (दर्शने च इति केचित्।) ञ ङ, आचष्टे धर्म्मं धीरः। तृतीयस्वरादुत्तस्य इति प्राचः। इकार उच्चारणार्थ इति केचित्। छन्दसि गुणागमार्थ इति केचित्। वेदेषूच्चारणार्थ इति केचित्। अत्र वहश्वसु तृतीयस्वरो भमकारितः किन्तु चतुर्थस्वरादुत्तरोऽयं निष्ठाया इत्यनिषेधार्थः तेन वर्ज्जनार्थे खाणकसाणादेश्चयोरप्राप्तौ आचष्टं वर्ज्जनमित्याहुः। इति दुर्गादासः॥

चक्ष्यं, क्ली, (चक्ष्यते कथ्यते मद्यपानाय मद्यपानेन सह वा। चक्ष+क्युट्। यद्वा, चक्ष्यते भक्ष्यते मद्यमनेनेति। चक्ष+क्युट् निपातनात् कुत्वागमश्च।) मद्यपानरोचकभक्ष्यद्रव्यम्। इति हेमचन्द्रः। ३।५।७१॥ (चक्ष+भावे क्युट्।) कथनम्। (दर्शनम्। यथा, ऋग्वेदे। १।१३।५।
"स्तृणीत बर्हिरासदे वृतदृष्टं मनीषिणः।
यत्रान्धतस्य चक्ष्यम्॥")

चक्षाः, [स्] पुं, (चष्टे भक्षयत्यनेनेति। चक्ष+"चक्षेः शिच्च।" उणा। २।१२०। इति उसिः स च शित्। शित्त्वात् खाणादेराभावः।) दर्शनेन्द्रियम्। तस्य धात्वं उद्भूतरूपम् १ तद्द्रव्यम् २ पृथक्त्वम् ३ संख्या ४ विभागः ५ संयोगः ६ परत्वम् ७ अपरत्वम् ८ स्नेहः ९ द्रवत्वम् १० संस्कारपरिमाणम् ११ योग्यवृत्तिक्रिया १२ योग्यवृत्तिजातिः १३ योग्यवृत्तिसमवायः १४। अस्येन्द्रियसहकारिणः आलोकः उद्भूतरूपं महत्त्वम्। इति भाषापरिच्छेदः॥ अस्याधिष्ठात्री देवता सूर्य्यः। इति श्रीभागवतम्। तत्पर्य्यायः। लोचनम् २ नयनम् ३ नेत्रम् ४ ईक्षणम् ५ अक्षि ६ दृक ७ दृष्टिः ८। इत्यमरः। २।६।८३॥ अम्बकम् ९ दर्शनम् १०। इति हेमचन्द्रः॥ तपनम् ११। इति राजनिर्घण्टः॥ विलोचनम् १२ दृग्गा १३ वीक्षणम् १४ प्रेक्षणम् १५ देवदीपः १६ देवदीपः १७ दृक्षिः १८ दृशी १९। इति शब्दरत्नावली॥ *॥ यथा, कर्म्मलोचने।
"मालिन्यां न सृणेश्चक्षुश्चक्षुषी नैकपाणिना।
चक्षुः परहिताकाङ्क्षी न सृणेर्दैकपाणिना॥"
मेघश्यङ्गीटीकायाः। इति रत्नमाला॥

चक्षुर्व्रतं, क्ली, (चक्षुर्ज्योतिर्व्रतमित्यनेनेति। व्रत+स्वार्थे। चक्षुर्ज्योतिरुद्भिकारित्वादेव तथात्वम्।) मेघश्यङ्गीटीकायाः। इति रत्नमाला॥

चक्षुःश्रवाः, [स्] पुं, (चक्षुर्नयनमेव श्रवः श्रवणं यस्य।) सर्पः। इत्यमरः। १।८।७॥ (यथा, नैषधे। १।२८।
"इति स्म चक्षुःश्रवसां प्रिया नले
स्तुवन्ति निन्दन्ति हृदा तदालयम्॥"
अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"आहुश्चाशीविषः सर्पो द्विजिह्वोऽहिः सरीसृपः।
चक्षुःश्रवा दन्दशूको गूढ़पात् पन्नगोरगाः॥")

चक्षुष्यं, क्ली, (चक्षुषे लोचनाय हितम्। चक्षुस्+"शरीरावयवात् यत्।" ५।१।६। इति यत्।) प्रपौण्डरीकम्। अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"प्रपौण्डरीकं चक्षुष्यं श्वेतं श्वेतपुष्पकम्॥"
सौवीराञ्जनम्। खर्परीतुत्थम्। इति राजनिर्घण्टः॥

चक्षुष्यः, पुं, (चक्षुषे हितः। "शरीरावयवात् यत्।" ५।१।६। इति यत्।) केतकवृक्षः। पुण्डरीकवृक्षः। इति मेदिनी। ये। ८२॥ श्वेताञ्जनवृक्षः। इति राजनिर्घण्टः॥ रसाञ्जनम्। इति हेमचन्द्रः॥

चक्षुष्यः, त्रि, (चक्षुषे हितः। चक्षुस्+यत्।) प्रियदर्शनः। इति जटाधरः॥ (यथा, राजतरङ्गिण्याम्। ३। ४६५।
"धिया भाग्यानुगामिन्या चेष्टमानो न याचितम्।
अभूत् सर्व्वस्य चक्षुष्यः स तु दुर्ल्लभवर्द्धनः॥"
चक्षुषः। इति विश्वः। यथा, माघे। ८।५७।
"चक्षुष्यः खलु महतामभ्रेरलङ्घ्यः॥"
"चक्षुषि भवश्चक्षुष्यः प्रियोऽञ्जिश्च।" इति तट्टीकायां मल्लिनाथः॥) चक्षुर्हितः इति मेदिनी। ये। ८२॥ (यथा, सुश्रुते सूत्रस्थाने २० अध्याये।

"दक्षिणो मारुतः श्रेष्ठचक्षुष्यो बलवर्द्धनः॥")

चक्षुष्या, स्त्री, (चक्षुष्य + टाप्।) कुलत्थिका। सुभगा। इति मेदिनी। ये। ८२॥ अजशृङ्गी। अरण्यकुलत्थिका। इति राजनिर्घण्टः॥

चघ, न घातने। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) न, चघ्नोति। इति दुर्गादासः॥

चक्कुरं, क्ली, (चकति लक्ष्यतेऽनेन। चक + उरच्। इदित्वान्नुम्।) यानमात्रम्। तत्पर्य्यायः। घोरणम् २। इति त्रिकाण्डशेषः॥

चक्कुरः, पुं, (चक्यते लक्ष्यतेऽनेन। चकि + उरच्।) इदित्वान्नुम्।) रथः। इक्षः। इति मेदिनी। रे। १५३॥

चङ्क्रमणं, क्ली, (पुनःपुनरतिशयेन वा क्राम्यतीति। चङ्क्रम + भावे ल्युट्।) पुनःपुनर्भ्रमणम्। (यथा, भागवते। ३। २१। ५०।

"नूनं चङ्क्रमणं देव! सतां संरक्षणाय ते।
वधाय चासतां यत्तं हरेः शक्तिर्हि पालिनी॥")

अतिशयभ्रमणम्। इति शाकरणम्॥ (यथा, सुश्रुते सूत्रस्थाने १६ अध्याये।

"स्थानासनं चङ्क्रमणं यानयानातिभाषणम्॥")

अनतिदेहपीड़ाकारकचङ्क्रमणस्य गुणाः। आयुर्बलमेधाग्नीन्द्रियशुद्धिकारित्वम्। सदोषानद्रहितपादचङ्क्रमणदोषाः। अनारोग्यत्वम्। अनायुष्यत्वम्। इन्द्रियदृष्टिनाशित्वञ्च। इति राजवल्लभः॥

चङ्गः, त्रि, शोभनः। दक्षः। इति मेदिनी। गे। ७॥ (पुं, राजमन्त्रिविशेषः। यथा, राजतरङ्गिण्याम्।

"अन्तरङ्गाश्च चङ्गाद्या येऽभूवंस्तत्र मन्त्रिणः।
ते स्त्रीवदासितन्तूर्णौ चक्रेः शक्त्यान्वितैरपि॥")

चचेड्डा, स्त्री, (चि + बाहुलकात् ड्डः। चं उपचीयमानं अड्डवत् फलं अस्याः ततो निपातनात् साधुः।) फललतताविशेषः। चिचिड़ा इति भाषा। तत्पर्य्यायः। वेणुफलः २ श्वेतराजी ३ दृढफलः। अस्या गुणः। पटोलगुणात् किञ्चिन्यूनत्वम्। विशेषात् श्लेष्मिणो हितत्वञ्च। इति मदनविनोदः॥

चञ्चत्पुटः, पुं, (चञ्चत् गुरुलघूनां लयविशेषाणां पुटं इन्द्वं यत्र।) तालप्रभेदः। यथा,—

"ताले चञ्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघु द्वयम्॥"

इति सङ्गीतदामोदरः॥

चञ्चत्पुटोऽपि कुत्रचित् पाठः॥

चञ्चरी, स्त्री, पुं, (चञ्चूर्य्यते पुनः पुनरतिशयेन वा चरति भ्राम्यतीति। चर + यङ् लुक् ततो टक् टिलात् ङीप् च।) भ्रमरी। यथा,—

"करी वरी भरीति चेद्दिशं सरी सरीति कम्।
स्थिरी चरी करीति चेन्न चञ्चुरीति चञ्चरी॥"

इत्यद्भटः॥

चञ्चरीकः, पुं, (चरति पुनःपुनरिति "चर्करीकादयश्च।" उणा। ४। २०। इति बहुलगुणेन साधुः।) भ्रमरः। इति त्रिकाण्डशेषः॥

चञ्चलं त्रि, (चञ्चं गतिं लातीति। ला + कः।) अस्थिरम्। (यथा, हरिवंशे। ६४। ७।

"एव वत्सान् पालयन्ती शोभमाना महावनम्।
चञ्चूर्य्यन्ती रमन्ती सा किशोरावित्र चञ्चलौ॥")

तत्पर्य्यायः। चलनम् २ कम्पनम् ३ कम्पम् ४ चलम् ५ लोलम् ६ चलाचलम् ७ तरलम् ८ पारिप्लवम् ९ परिप्लवम् १०। इत्यमरः। ३। १।७५॥ चपलम् ११ चटुलम् १२। इति तट्टीका॥ वायौ पुं। इति मेदिनी। ले। ६०॥

चञ्चला, स्त्री, (चञ्चं लाति। ला + कः टाप् च। यद्वा चञ्चलं चाञ्चल्यं अस्त्यस्याः इति अच्।) लक्ष्मीः। विद्युत्। इति मेदिनी। ले। ६०॥ पिप्पली। इति शब्दचन्द्रिका॥ (वर्णवृत्तविशेषः। यथा, शब्दार्थचिन्तामणौ।

"तूर्य्यतालपणिराजमेखलाहारनायकेन।
चामरध्वजेन चापि मण्डिता सुवर्णकेन॥
वर्णितातिसुन्दरेण पन्नगेन्द्रपिङ्गलेन।
चञ्चला चकोरचारुलोचने शुभङ्गलेन॥")

चञ्चा, स्त्री, (चञ्च + अच् + टाप्।) नलनिर्म्मिता। चाँच इति भाषा। (चञ्चेव मनुष्यः। इति इवार्थे कन् ततः "सुप्सनुष्ये।" ५। ३। ६८। इति कनो लुप्।) लवणनिर्म्मितपूरुषः। इति मेदिनी। त्रे। ५॥

चञ्चुः, पुं, (चनुच + बाहुलकात् उः।) गोनाड़ीभेदः। स तु नाड़ीचक्षाकः। एरण्डदण्डः। इति मेदिनी। चं। ५॥ त्यगः। इति शब्दरत्नावली॥ रक्तैरण्डः। क्षुद्रचञ्चुदण्डः। इति राजनिर्घण्टः॥

चञ्चुः, स्त्री, (चञ्चति प्राप्नोति गृह्णाति भक्ष्यमनया।) प्रक्षिणामोष्ठः। पाखिर ठोँट् इति भाषा। (यथा, पातकाष्टके। ६।

"भ्रातश्चातक! पातकं किमपि ते सम्यङ् न
वक्त्रेऽस्मिन्न पतन्ति चञ्चुपुटके द्विन्नाः पयो-
बिन्दवः॥")

तत्पर्य्यायः। चोटिः २। इत्यमरः। २।५।३६॥ चञ्चूः ३ चोटी ४ चञ्चुका ५। इति शब्दरत्नावली॥ खपाटिका ६। इति हेमचन्द्रः॥ पक्षिग्राकविशेषः। तत्पर्य्यायः। विजला २ चञ्चूः ३ कलभी ४ चीरपत्रिका ५ चञ्चुरः ६ चञ्चुपत्रः ७ सुग्राकः ८ क्षेत्रसम्भवः ९। अस्या गुणाः। मधुरत्वम्। तीक्ष्णत्वम्। कषायत्वम्। मलशोधनत्वम्। गुल्मोदरविबन्धार्शोग्रहणीनाशित्वञ्च॥

"चिक्कचक्षुश्चिक्षुकी च दीर्घपत्रा सतिक्तिका।
चञ्चुः शीता सरा रुक्षा स्वादौ दोषत्रयापहा।
धातुपुष्टकरी बल्या मेधा पिच्छिलिका स्मृता॥"

इति भावप्रकाशः॥

तस्या बीजस्य गुणाः। कटुत्वम्। उष्णत्वम्। गुल्मश्लीपदरोगविषत्वग्दोषकण्डूखर्जूकुष्ठनाशित्वञ्च। इति राजनिर्घण्टः॥ (यवहारोऽस्य यथा,

"आमे परिणते यस्तु विबन्धमतिसार्य्यते।
सशूलपिच्छमल्पाल्पं बहुशः संप्रवाहिकम्॥
तं मूलकानां यूषेण वदराम्लमथापि वा।
उपोदकायाः चौरिण्या यवान्या वासुकस्य वा॥
सुवर्चलायाश्चञ्चोर्वा शाकेनावल्गुजस्य वा॥"

इति चरके चिकित्सास्थाने दशमेऽध्याये॥)

चञ्चुका, स्त्री, (चञ्चु + स्वार्थे कन् टाप् च।) चञ्चुः। प्रक्षिणामोष्ठः। इति शब्दरत्नावली॥

चञ्चुपत्रः, पुं, (चञ्चाकारं पत्रमस्य) चञ्चुशाकः। इति राजनिर्घण्टः॥

चञ्चुभृत्, पुं, स्त्री, (चञ्चुं बिभर्त्तीति। भृ + क्विप्।) पक्षी। इति त्रिकाण्डशेषः॥

चञ्चुमान्, [त्] पुं, स्त्री, (चञ्चुरस्यास्तीति। नित्ययोगे मतुप्।) पक्षी। इति हारावली॥

चञ्चुरः, पुं, (चञ्चति चञ्चुवदाकृतिं गच्छतीति। चञ्च गतौ + बाहुलकात् उरच्।) चञ्चुशाकः। इति राजनिर्घण्टः॥ (दक्षः। यथा, काशीखण्डे। १०। ४६।

"विज्ञाताखिलशास्त्रार्थो लौकिकाचारचञ्चुरः।
कदाचिच्चिन्तयामास बुद्धिधाता महेश्वरम्॥")

चञ्चुरुचिः, पुं, (चञ्चुः रुचिरिव यस्य।) कारण्डवपक्षी। तत्पर्य्यायः। सुमुखः २ पीततुण्डः ३। इति त्रिकाण्डशेषः। मरलः ४ चञ्चुरुचिकः ५। इति हेमचन्द्रः। ४। ४०७॥

चञ्चुरुचिकः, पुं स्त्री, (चञ्चुरुचि + स्वार्थे कन् यद्वा चञ्चुः रुचिरिव यस्य इति कप्।) चञ्चुरुचिपक्षी। इति हेमचन्द्रः। ४। ४०७॥

चञ्चूः, स्त्री, (चञ्चु + "ऊडुतः।" ४। १। ६६। इत्यस्य "अप्राणिजातेश्चारज्ञ्वादीनामुपसंख्यानम्।" इति वार्त्तिकोक्त्या ऊङ्।) चञ्चुः। इति हेमचन्द्रः॥

चट, भेदे। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्।) चटेति। इति दुर्गादासः॥

चट, क वधे। भेदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, चाटयति। इति दुर्गादासः॥

चटकः, पुं, (चटति भिनत्ति धान्यादिकं चञ्चुपुटेनेति। चट भेदे + "नन्दिग्रहीति।" ३। १। १३४। इति पचाद्यच् ततः स्वार्थे कन्।) पक्षिविशेषः। चटा इति भाषा॥ (यथा, देवीभागवते। १। ४। ८।

"वीक्ष्य प्रेमाङ्कुरं तत्र बाबे चटकयोस्तदा।
बासचिन्तातुरः कामं मनसा समचिन्तयत्॥")

तत्पर्य्यायः। कलविङ्कः २। इत्यमरः। २।५।१८॥ चित्रदृक् ३ गृहनीड़ः ४ इत्यायवः ५। इति हारावली॥ कासुकः ६ नीलकण्ठकः ७ कालकण्ठकः ८ कामचारी ९। इति जटाधरः॥ कलाविकलः १०। इति शब्दरत्नावली॥ तन्मांसगुणाः। शीतत्वम्। लघुत्वम्। शुक्रबलप्रदत्वञ्च। तद्वातरक्तयचटकं तत् क्वथ्यं लघु पञ्चदम्॥

इति राजनिर्घण्टः॥

("चटकाः शैम्बलाः स्निग्धा वातघ्नाः शुक्रलाः परम्।
गुरुत्वस्निग्धमधुरा वर्गाद्यातो यथोत्तरम्॥"

इति वाग्भटे सूत्रस्थाने षष्ठेऽध्याये॥

"चटका मधुराः स्निग्धा बलशुक्रविवर्द्धनाः।
सन्निपातप्रशमनाः श्रमना मारुतस्य च॥"

इति चरके सूत्रस्थाने २७ अध्याये॥)

चटकका, स्त्री, (चटका + स्वार्थे कन् । "उदीचामातः स्थाने यकपूर्व्वायाः ।" ७ । ३ । ४६ । इति प्रत्ये इदादेशाभावः ।) चटका । इति मुग्धबोधव्याकरणम् ॥

चटका, स्त्री, (चटक + टाप् ।) चटकपत्नी । (चटकस्य चटकाया वा स्त्रीपत्यम् । चटका + ऐरक् । स्त्रियामपत्ये लुक् वक्तव्यः । तत्र टाबन्तात् तद्धिते लुप्ते "लुक् तद्धितलुकि ।" १ । २ । ४६ । इति टापो लुकि पुनः अजाद्यतष्टाप् । स च जातिलक्षणङीषो बाधकः ।) चटकस्त्रीपत्यम् । चटी इति भाषा ॥ इत्यमरः । २ । ५ । १८ ॥ पिप्पलीमूलम् । इत्यमरटीकायां नारायणचक्रवर्त्ती ॥ श्यामापक्षी । इति राजनिर्घण्टः ॥

चटकाशिरः [स्] क्ली, (चटकायाः शिर इव ।) पिप्पलीमूलम् । इति हेमचन्द्रः ॥

चटकिका, स्त्री, (चटका + स्वार्थे कन् । "उदीचामातः स्थाने यकपूर्व्वायाः ।" ७ । ३ । ४६ । इति इदादेशः ।) चटका । इति मुग्धबोधव्याकरणम् ।

चटिका, स्त्री, (चटति भिनत्ति रोगादिकं नाशयतीत्यर्थः । चट् + बाहुलकात् इकन् ।) पिप्पलीमूलम् । (चटति भिनत्ति ध्यान्यादिकं खचक्षुपुटेनेति ।) चटका । इति हलायुधः ॥

चटिकाशिरः, [स्] क्ली, (चटिकायाः चटकपक्षायाः मस्तकमिव आकृतिरस्य ।) पिप्पलीमूलम् । इत्यमरः । २ । ६ । ११० ॥

चटिकाशिरः, पुं, ("सर्व्वे सान्ता अदन्ताः स्युः ।" इत्युक्तेः एषोदरादित्वात् सलोपः ।) पिप्पलीमूलम् । इत्यमरटीकायां भरतः ॥ (अस्य पर्य्यायाः यथा, वैद्यकरत्नमालायाम् ।

"ग्रन्थिकं पिप्पलीमूलं षडग्न्यश्चिटिकाशिरः ॥")

चटुः, पुं, (चटति शोकसन्तापादिकं भिनत्तीति । चट भेदे + "ग्रन्थयादयश्च ।" उणां । १ । ३७ । इति कुः ।) प्रियवाक्यम् । (यथा, माघे । ४ । ६ ।

"छायां निजस्त्रीचटुलालसानां
मदेन किञ्चित् चटुलालसानाम् ॥")

उदरम् । प्रतिनामासनभेदः । इति मेदिनी । टे । १४ ॥ प्रियभाषणे क्लीवलिङ्गोऽपि । इति संक्षिप्तसारे उणादिवृत्तिः ॥

चटुलः, त्रि, (चटतीति । चट् + बाहुलकादुलच् । यद्वा, चटु + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति मत्वर्थे लच् ।) चञ्चलः । इति हेमचन्द्रः । ६ । ९१ ॥ (यथा, रघुः । ९ । ५८ ।

"त्रासातिमात्रचटुलैः सरतः सुनेत्रैः
प्रौढ़प्रियानयनविभ्रमचेष्टितानि ॥")

सुन्दरः । इत्युणादिकोषः ॥

चटुला, स्त्री, (चटुल + "अजाद्यतष्टाप् ।" ४ । १ । ४ । इति टाप् ।) विद्युत् । इति जटाधरः ॥ (गायत्रीरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ४७ ।

"चटुला चण्डिकाचित्रा चित्रमाल्यविभूषिता ॥")

चटुलोलः, त्रि, (चटुलश्चञ्चलः लोलश्च । अतिचञ्चलत्वात्तथात्वम् । निपातनादलोपे साधुः ।) चाटुलोलः । सुचञ्चलः । इति हारावली ॥ २१६ ॥

चड, इ क रोधे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) इ क, चण्डयति । इति दुर्गादासः ॥

चड, इ ड रोधे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) इ, कर्म्मणि चण्ड्यते । ड, चण्डते । इति दुर्गादासः ॥

चण, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) चणति । इति दुर्गादासः ॥

चण, म दाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) म, चणयति । इति दुर्गादासः ॥

चण, मि गतौ । हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) मि, चणयति चाणयति । इति दुर्गादासः ॥

चणकः, पुं, (चणति वेदीचारणादिध्वनिना शब्दायते इति । चण शब्दे + कुन् ।) मुनिविशेषः । इति शब्दरत्नावली ॥ (चण्यते दीयते इति । चण दाने + कुन् ।) शस्यविशेषः । चणा बुट छोला इति च भाषा ॥ तत्पर्य्यायः । हरिमन्थकः २ । इत्यमरः । २ । ९ । १८ ॥ हरिमन्थजः ३ । इति तट्टीका ॥ चणः ४ हरिमन्थः ५ सुगन्धः ६ कृष्णाचक्षुकः ७ बालभोज्यः ८ वाजिभक्ष्यः ९ कक्षुकी १० । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । मेहवान्त्यसपित्तनाशित्वम् । दीपनत्वम् । वर्णबलरुच्याध्मानकारित्वञ्च ॥ * ॥ आमस्य तस्य गुणाः । शीतलत्वम् । रुक्षत्वम् । सन्तर्पणत्वम् । दाहश्लेष्मासृग्दोषनाशित्वम् । गौल्यत्वम् । कषायत्वम् । ईषत्कफवीर्य्यकारित्वञ्च ॥ * ॥ भृष्टस्य तस्य गुणाः । रुक्षत्वम् । वातनाशित्वम् । रक्तदोषकारित्वम् । उष्णवीर्य्यत्वम् । लघुत्वम् । खेदग्लेत्यहरत्वञ्च ॥ * ॥ तस्य यूषस्य गुणाः । मधुरत्वम् । कषायत्वम् । कफवातविकारश्वासोर्द्धकासक्लमपीनसनाशित्वम् । बलदीपनत्वञ्च ॥ * ॥ प्रातस्तच्चलपानगुणाः । चन्द्रमरीचिवत् शीतलत्वम् । पित्तरोगनाशित्वम् । पुष्टिप्रदत्वम् । पाके नैजगुणत्वम् । सन्तर्पणत्वम् । मङ्गुलत्वम् । मधुरत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ तस्य आर्द्रभृष्टस्य गुणः । बलकारित्वम् । रोचनत्वञ्च ॥ * ॥ स्विन्नस्य तस्य गुणः । पित्तकफनाशित्वम् ॥ * ॥ तत्सूपः शोभकरः ॥ * ॥ तस्य शाकस्य गुणाः । रुक्षत्वम् । दुर्ज्जरत्वम् । कफवातकारित्वम् । अग्नित्वम् । विष्टम्भजनकत्वम् । पित्तदग्धशोथनाशित्वञ्च । इति भावप्रकाशः ॥

चणकात्मजः, पुं, (चणकस्य मुनिविशेषस्य आत्मजः ।) वात्स्यायनमुनिः । इति हेमचन्द्रः । ३ । ५१७ ॥

चणकाम्लकं, क्ली, (चणकजातमम्लम् । ततः स्वार्थे कन् ।) चणकलवणम् । तस्य गुणाः । अत्यम्लत्वम् । दीपनत्वम् । दन्तहर्षणत्वम् । लवणानुरसत्वम् । रुक्षत्वम् । शूलाजीर्णविबन्धनाशित्वञ्च । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

चणकाम्लवाः, [र्] क्ली, (चणकाम्लस्य चणकलवणस्य वार् जलम् ।) क्षेत्रस्थफलवच्चणकपत्रशिशिरवारि । इति रत्नावली ॥

चणद्रुमः, पुं, (चणश्चणक इव द्रुमो वृक्षः ।) क्षुद्रगोक्षुर इति राजनिर्घण्टः ॥ चणोद्रुमोऽपि पाठः ॥

चणपत्री, स्त्री, (चणश्चणकस्तस्य पत्रमिव पत्रं यस्याः । स्त्रियां ङीप् ।) रुदन्तीवृक्षः । इति राजनिर्घण्टः ॥

चणिका, स्त्री, (चणति दुग्धवद्रसं ददातीति । चण दाने + कुण् । टाप् अत इत्वञ्च ।) क्षुद्रविशेषः । तत्पर्य्यायः । गोदुग्धा २ सुनीला ३ क्षेत्रजा ४ हिमा ५ । अस्या गुणाः । बीजैर्वृष्यत्वम् । बल्यत्वम् । अतिमधुरत्वञ्च । क्षुद्रोः पशुहितत्वम् । इति राजनिर्घण्टः ॥

चण्डं, क्ली, (चण्डते इति । चडि + पचाद्यच् ।) तीक्ष्णम् । इति शब्दरत्नावली ॥

चण्डः, पुं, (चण्डति चण्डयति वा अन्धरसं ददातीत्यर्थः । चड + "अमन्तात् डः ।" उणां । १ । ११४ । इति डः ।) तिन्तिड़ीवृक्षः । चण्डते कुप्यतीति । चडि + अच् ।) यमकिङ्करः । दैत्यविशेषः । इति मेदिनी । डे । ११ ॥ (अयं हि शुम्भासुरसेनानीः । कदाचिदयं हिमाचलस्थां भगवतीं दृष्ट्वा शुम्भाय कथितवान् । ततः शुम्भार्थं भगवत्यानयनाय गतोऽसौ तल्ललाटफलकनिर्गतया चामुण्डया निहतः । एतद्विवरणं मार्कण्डेयपुराणे द्रष्टव्यम् । कार्त्तिकेयः यथा, महाभारते । ३ । २३१ । ४ ।

"शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः ॥")

चण्डः, त्रि, (चण्डते रुष्टो भवतीति । चडि + पचाद्यच् ।) अत्यन्तकोपनः । इत्यमरः । ३ । १ । ३२ ॥ (यथा, महाभारते । ३ । २३३ । ११ ।

"चण्डाश्च शौण्डाश्च महाशनाश्च
चौराश्च दुष्टाश्चपलाश्च वध्याः ॥")

तीक्ष्णताविशिष्टः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ३२ । २३ ।

"दहन्तमिव तीक्ष्णांशुं चण्डवायुसमीरितम् ॥")

चण्डता, स्त्री, (चण्डस्य भावः । चण्ड + तल् ।) उग्रता । इति हेमचन्द्रः । २ । २३२ ॥

चण्डनायिका, स्त्री, (चण्डी कोपना नायिका ।) दुर्गा । इति शब्दरत्नावली ॥ अष्टनायिकान्तर्गतनायिकाविशेषः । (यथा, दुर्गाध्याने ।

"उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चामुण्डा चण्डिका तथा ॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम् ।
चिन्तयेत् सततं दुर्गां धर्म्मकामार्थमोक्षदाम् ॥")

तस्या ध्यानं यथा, देवीपुराणोक्तदुर्गोत्सवपद्धतौ ।

"चण्डनायिकां नीलवर्णां षोड़शभुजाम् ।
कपालं खेटकं घण्टां दर्पणञ्च धनुर्ध्वजम् ।
पाशञ्च शोभनां शक्तिं वामहस्तेन बिभ्रतीम् ॥
सृग्गरं शूलवज्रञ्च खड्गञ्चैव तथाङ्कुशम् ।
शरं चक्रं शलाकाञ्च दक्षिणेन च बिभ्रतीम् ॥"

चण्डरुद्रिका, स्त्री, (चण्डः प्रचण्डः रुद्रः अधिष्ठातृतयास्त्यस्याः । चण्डरुद्र + "अत इनिठनौ ।"

५।२।११५। इति ठन्। स्त्रियां टाप्। यद्वा प्रचण्डरुद्रौ रुद्रशक्तिविशेषौ। ततः स्वार्थे कन्। टापि पूर्ब्बह्रस्वः।) विद्याविशेषः। इति रत्नावली॥

चण्डवती, स्त्री, (चण्ड+"अमन्ताड्डुः।" उणां। १।११४। इति डुः। चण्ड्+अच् वा। चण्डश्चण्डता विद्यतेऽस्याम्। यद्वा, चण्डः रुद्रांशो भैरवविशेषो रुचकतया विद्यतेऽस्याः। मतुप् ततो भस्य वत्वम्।) दुर्गा। इति शब्दरत्नावली॥ अष्टनायिकान्तर्गतनायिकाविशेषः। अस्या ध्यानं यथा। चण्डवर्णां घोड़शभुजामित्यादि शेषं चण्डनायिकाध्यानवत्। इति देवीपुराणोक्तदुर्गोत्सवपद्धतिः॥

चण्डा, स्त्री, (चम् चण् वा+डः। चण्ड्+अच् वा। ततष्टाप्।) अष्टनायिकान्तर्गतनायिकाविशेषः। (यथा, देवीपुराणे।

"चण्डा चण्डवती चण्डनायिकाख्यतिचण्डिका॥") अस्या ध्यानं यथा। चण्डां शुक्लवर्णां षोड़शभुजामित्यादि शेषं चण्डनायिकाध्यानवत्। इति देवीपुराणोक्तदुर्गोत्सवपद्धतिः॥ जिनानां शासनदेवताविशेषः। इति हेमचन्द्रः॥ चोरनामगन्धद्रव्यम्। इत्यमरः। २।४।१२८॥ (यथा, चरके सूत्रस्थाने त्रयस्त्रिंशेऽध्याये।

"कुष्ठं हरिद्रे सुरसं पटोलं
निम्बाश्वगन्धे सुरदारुशिग्रु।
ससर्षपं तुम्बुरुधान्यवन्यम्
चण्डाश्च चूर्णानि समानि कुर्य्यात्॥")

शुक्लपुष्पी। इति मेदिनी। डे। १२॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये॥ "श्लातगरकुष्ठमांसीध्यामकत्वक्पत्रनागपुष्प प्रियङ्गुहरेणुकाद्याग्रनखशुक्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकशालकगुग्गुलुसर्ज्जरसतुरुष्ककुन्दुरुकागुरुसृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरश्चेति॥" लिङ्गिनीलता। कपिकच्छुः। आखुकर्णी। श्वेतदूर्ब्बा। इति राजनिर्घण्टः॥ नदीविशेषः। इति शब्दरत्नावली॥

चण्डांशुः, पुं, (चण्डाः प्रखरास्तीव्रा वा अंशवो रश्मयोऽस्य।) सूर्य्यः। यथा, महानाटके।

"चण्डांशोर्निशि का कथा रघुपते चन्द्रोऽयमुज्जृम्भते।"

(तथाच राजतरङ्गिण्याम्। ४।४०१।

"भ्रातरौ तौ समासाद्य राज्यं नैव बराजत।
हेमन्तशिशिरौ प्राप्य चण्डांशोरिव मण्डलम्॥")

चण्डातः, पुं, (चण्डं चण्डतां तीव्रत्वं अतति निरन्तरं प्राप्नोतीति। अत+अच्।) करवीरः। इत्यमरः। २।४।७६॥ (पर्य्यायोऽस्य यथा,—

"द्वितीयो रक्तपुष्पश्च चण्डातो लगुड़स्तथा॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ गुणाश्चास्य करवीरशब्दे ज्ञातव्याः॥)

चण्डातकं, क्ली, (चण्डां स्त्रियं अतति सततं गच्छति प्राप्नोतीत्यर्थः। अत+ण्वुल्।) अर्द्धोरुकम्। वरस्त्रीणामर्द्धोरुपर्य्यन्तं वासः। इत्यमरः। २।६।११६॥ पुंस्काण्डे वोपालितधृतात् पुंलिङ्गोऽपि॥

चण्डालः, पुं, (चण्डते कुप्यतीति। चड़ि कोपे+"पतिचण्डिभ्यामालच्।" उणां।१।११६। इत्यालच्। यद्वा, चण्डं विकटं अलं अलङ्कारो यस्य इत्युज्ज्वलदत्तः।) वर्णसङ्करजातिविशेषः। चाँड़ाल इति भाषा। स तु ब्राह्मणीगर्भे शूद्रौरसाज्जातः। इति पराशरपद्धतिः॥ तत्पर्य्यायः। श्वपचः २ मातङ्गः ३ दिवाकीर्त्तिः ४ जनङ्गमः ५ निषादः६ श्वपचः ७ अन्तेवासी ८ चाण्डालः ९ पुक्कसः१०। इत्यमरः। २। १०। १९॥ जलङ्गमः ११ निषादः १२ श्वपक् १३ पुक्कशः १४ पुक्कषः१५। इति तट्टीका॥ निष्कः १६। इति चिकाण्डशेषः॥ तस्योत्पत्तिर्यथा, रामायणे।

"अथ रात्र्यां यतीतायां तस्यां राजा बभूव ह।
चण्डालदर्शनो राम! सद्य एव दुराकृतिः॥
नीलपीताम्बरधरो रक्ताम्बरकृतोत्तरः।
संरब्धताम्रघोराक्षः करालो हरिपिङ्गलः॥
ऋक्षचर्म्मनिवासी च लौहाभरणभूषितः॥"

श्मशानचण्डालस्य निवासकर्म्मादि यथा,—

"चण्डालश्वपचानान्तु वह्निर्य्यान्मात् प्रतिश्रयः।
अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्दभम्॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन्।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह॥
अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च॥
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः।
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया।
वध्यवासांसि गृह्णीयुः भृत्याश्चाभरणानि च॥"

(एतैर्हेतस्य पशोर्मांसशुद्धिमाह मनुः।५।१३१। "अभिहृतस्य यन्मांसं शुचि तन्मुनिरब्रवीत्।
क्रयाद्विक्रयतो वापि चण्डालादाहृतञ्च यत्॥")

क्रूरकर्म्मा। इति संक्षिप्तसारे उणादिवृत्तिः॥ (स्त्रियां ङीष्। तल्लक्षणशक्तिविशेषः॥)

चण्डालकन्दः, पुं, (चण्डालप्रियः कन्दः।) कन्दविशेषः। तस्य गुणाः। मधुरत्वम्। कफपित्तासदोषविषभूतादिदोषनाशित्वम्। रसायनत्वञ्च। तस्य भेदाः। एकपत्रः द्विपत्रः त्रिपत्रः चतुष्पत्रः पञ्चपत्रः। इति राजनिर्घण्टः॥

चण्डालवल्लकी, स्त्री, (चण्डालवादनीया वल्लकी वीणा।) चण्डालवीणा। इत्यमरः।२।१०।३२॥ अस्याः पर्य्यायः। कण्डोलवीणाशब्दे द्रष्टव्यः॥

चण्डालिका, स्त्री, (चण्डालः वादकत्वेनास्त्यस्याः। चण्डाल+ठन् टाप् च।) चण्डालवल्लकी। उमा। (चण्डं प्रचण्डभावं अलतीति। अल+ण्वुल् कापि अत इत्वञ्च।) औषधीभेदः। इति मेदिनीकरहेमचन्द्रौ॥

चण्डिः, स्त्री, (चड़ि कोपे+इन्।) चण्डी। इत्यमरटीकायां भरतः॥

चण्डिका, स्त्री, (चण्डी+स्वार्थे कन् टापि पूर्ब्बह्रस्वः। चण्ड्+कन् वा।) दुर्गा। इत्यमरः। १।१।३६॥ (यथा, मार्कण्डेये। ८२। २६।

"इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा॥"

इयमेव अमरकण्टके पीठशक्तिरूपेण विराजते। यथा, देवीभागवते। ७।३०।७३।

"छगलण्डे प्रचण्डा तु चण्डिकाऽमरकण्टके॥"

गायत्रीरूपा देवी। यथा, देवीभागते। १२। ६। ४७। [स्थिता॥")

"चटुला चण्डिका चित्रा चित्रमाल्यविभू-

चण्डिलः, पुं, (चण्डते कोपयुक्तो भवतीति। चड़ि कोपे+इलच्। चण्ड+अस्यर्थे इलच् वा।) रुद्रः। नापितः॥ वास्तूकम्। इति हेमचन्द्रः॥

चण्डिला, स्त्री, (चण्डिल+स्त्रियां टाप्।) नदीभेदः। इत्युणादिकोषः॥

चण्डी, स्त्री, (चण्ड्+"वर्द्धादिभ्यश्च।" ४।१।४५। इति वा ङीष्।) दुर्गा। (यथा, तिथितत्त्वे दुर्गोत्सवबोधनप्रकरणे। [स्थिया॥")

"चण्डीमामन्त्रयेद् विद्वान् नाच षष्ठी पुरहिंसा। कोपना। इति मेदिनी। ते।१२॥ (यथा, रघुवंशे। १२।५। [वरौ॥")

"सा किलाश्वासिता चण्डी भर्त्रा तत् संश्रुतौ अस्या रूपान्तराणि। चण्डिः चण्डा चण्डिका। इत्यमरटीकायां भरतः॥ *॥ मार्कण्डेयपुराणोक्तदेवीमाहात्म्यम्। तस्य पाठक्रमो यथा,—

"अर्गलं कीलकञ्चादौ पठित्वा कवचं पठेत्।
जपेत् सप्तशतीं पश्चात् क्रम एष त्रिधोदितः॥
अर्गलं दुरितं हन्ति कीलकं फलदं तथा।
कवचं रक्षयेन्नित्यं चण्डिका चितयं तथा॥"

इति तत्त्वम्॥

अपि च।

"नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥
आदौ च प्रणवं दद्या दित्युवाचादिपूरुषः॥
सर्व्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत्।
शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः॥
न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य वाचनम्।
आधारे स्थापयित्वा तु पुस्तकं वाचयेत् सुधीः॥
हस्तसंस्थापनादेव यस्मादल्पफलं लभेत्।
स्वयञ्च लिखितं यत्तु कृतिना लिखितं न यत्॥
अब्राह्मणेन लिखितं तच्चापि विफलं भवेत्।
ऋषिच्छन्दादिकं न्यस्य पठेत् स्तोत्रं विचक्षणः॥
स्तोत्रे न दृश्यते यत्र प्रणवन्यासमाचरेत्।
सङ्कल्पिते स्तोत्रपाठे संख्यां कृत्वा पठेत् सुधीः॥
अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन।
कृते विरामे मध्ये तु अध्यायादिं पठन्नरः॥
ब्राह्मणं वाचकं विद्यान्नान्यवर्णोभमादरात्।
श्रुत्वान्यवर्णजाद्राजन्! वाचकान्नरकं व्रजेत्॥
देवार्चामग्नयः कृत्वा ब्राह्मणानां विशेषतः।
ग्रन्थिञ्च ग्रथितं कुर्य्याद्वाचकः कुरुनन्दन!॥
पुनर्ग्रन्थीत तत् स्तोत्रं न सुकृत् धारयेत् क्वचित्।

विसृष्टमदृतं ग्राह्यं सदाचरपदन्तथा ॥
कलस्वरसमायुक्तं रसभावसमन्वितम् ।
बुध्यमानः सदर्थं वै यत्नार्थं कृतलक्षणो नृप ! ॥
ब्राह्मणादिषु सर्व्वेषु यत्नार्थंचार्पयेन्नृप ! ।
य एवं वाचयेद्ब्रह्मन् ! स विप्रो वास उच्यते ॥
सप्तस्वरसमायुक्तं काले काले विराजते ।
प्रदर्शयन् रसान् सर्व्वान् वाचयेद्वाचको नृप ! ॥"
तस्य फलं यथा,—
"चण्डीपाठफलं देवि ! शृणुष्व गदतो मम ।
एकादृत्त्यादिपाठानां यथावत् कथयामि ते ॥
सङ्कल्प्य पूर्व्वं सम्पूज्य न्यस्याङ्गेषु मनून् सदृत् ।
पाठादृबलिप्रदानाद्धि सिद्धिमाप्नोति मानवः ॥
उपसर्गस्य शान्त्यर्थं त्रिरादृत्तं पठेन्नरः ।
यज्ञोपशान्त्ये कर्त्तव्यं पञ्चादृत्तं वरानने ! ॥
महाभये समुत्पन्ने सप्तादृत्तं समुच्चरेत् ।
नवादृत्त्या भवेच्छान्तिर्वाजपेयफलं लभेत् ॥
राजवश्याय भूत्यै च रुद्रादृत्तसुदीरयेत् ।
अर्कादृत्त्या कार्य्यसिद्धिर्वैरहानिश्च जायते ॥
मन्वादृत्त्या रिपुर्व्वश्यस्तथा स्त्रीवश्यतामियात् ।
सौख्यं पञ्चदशादृत्त्या श्रियमाप्नोति मानवः ॥
कलादृत्त्या पुत्रपौत्रधनधान्यागमं विदुः ।
राज्ञां भीतिविमोक्षाय वैरस्फोटनाय च ॥
कुर्य्यात् सप्तदशादृत्तं तथाष्टादशकं प्रिये ! ।
महाव्रणविमोक्षाय विंशादृत्तिं पठेत् सुधीः ॥
पञ्चविंशादृत्तिपाठात् भवेद्वन्ध्याविमोक्षणम् ।
सङ्कटे समनुप्राप्ते दुश्चिकित्सामये तथा ॥
जातिध्वंसे कुलोच्छेदे व्याधयो नाश्च आगते ।
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ।
तथैव त्रिविधोत्पाते तथा चैवातिपातके ।
कुर्य्यात्त्रयात्र्त्तं घृतादृत्तिं ततः सम्पद्यते शुभम् ॥
श्रियोवृद्धिः घृतादृत्ताद्राज्यवृद्धिस्तथापरे ।
मनसा चिन्तितं देवि ! सिद्धेदष्टोत्तराच्छतात् ॥
घृताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ! ।
सहस्रावर्त्तनाल्लक्ष्मीरादृणोति स्वयं स्थिरा ॥
भुक्त्वा मनोरथान् कामान् नरो मोक्षमवाप्नुयात् ।
यथाश्वमेधः क्रतुराट् देवानाञ्च यथा हरिः ॥
स्तवानामपि सर्व्वेषां तथा सप्तशतीस्तवः ।
अथवा बहुनोक्तेन किमेतेन वरानने ! ।
चण्ड्याः घृतादृतपाठात् सर्व्वाः सिध्यन्ति
सिद्धयः ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥

अथ प्रथमचरितस्य ब्रह्मर्षिर्मधुकैटभहाकाली देवता गायत्री छन्दो नन्दा शक्तिः रक्तदन्तिका बीजमग्निस्तत्त्वम् । तत्र महाकाल्या ध्यानं यथा,—
"दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशालया राजमाना त्रिंशल्लोचनमालया ॥
स्फुरद्दशनदंष्ट्राभा भीमरूपा भयङ्करी ।
खड्गशूलगदाबाणतोमरञ्च भुशुण्डिभृत् ॥
परिघं काम्मुकं शीर्षं निश्चोतद्रुधिरं दधौ ।
मधुकैटभयोर्युद्धे ध्येया सा तामसी शिवा ॥"

मध्यमचरितस्य विष्णुर्ऋषिर्महालक्ष्मीर्देवता अनुष्टुप् छन्दः शाकम्भरी शक्तिर्दुर्गा बीजं सूर्य्यस्तत्त्वम् । तत्र महालक्ष्म्या ध्यानं यथा,—
"श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ।
रक्तमध्या रक्तदेहा स्फुलजङ्घोरुतालुका ॥
चित्रानुलेपना कान्ता सर्व्वसौभाग्यशालिनी ।
अष्टादशभुजा पूज्या सा सहस्रभुजा रणे ॥
आयुधान्यत्र रक्ष्यन्ति दक्षिणाधःकरक्रमात् ।
अक्षमालाञ्च सुवर्णं बाणासिकुलिशं गदाम् ॥
चक्रं त्रिशूलं परशुं शङ्खघण्टे च पाशकम् ।
शक्तिदण्डं चर्म्म चापं पानपात्रं कमण्डलुम् ॥
अलङ्कृतभुजा एतैरायुधैः परमेश्वरी ।
सर्त्तव्या स्तुतिकालादौ महिषासुरमर्द्दिनी ॥
इत्येषा राजसी मूर्त्तिः सर्व्वदेवमयी मता ।
यां ध्यात्वा मानवो नित्यं लभतेप्सितमात्मनः ॥"

उत्तरचरितस्य रुद्र ऋषिः सरस्वती देवता उष्णिक् छन्दो भीमा शक्तिर्भ्रामरी बीजं वायुस्तत्त्वम् । तत्र सरस्वत्या ध्यानं यथा,—
"गौरीदेहसमुत्पन्ना या सत्त्वैकगुणाश्रया ।
साक्षात् सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी ॥
दधौ चाष्टभुजा बाणं मुसलं शूलचक्रकम् ।
शङ्खघण्टाहलञ्चैव कार्म्मुकञ्च तथा परम् ॥
ध्येया सा स्तुतिकालादौ वधे शुम्भनिशुम्भयोः ॥"
इति कात्यायनीतन्त्रम् ॥
(छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
"नयुगलसयुगलगैरिति चण्डी ॥")

चण्डीकुसुमः, पुं, (चण्डीप्रीतिजनकं कुसुमं यस्य ।) रक्तकरवीरवृक्षः । इति राजनिर्घण्टः ॥ (विवृतिरस्य करवीरशब्दे बोद्धव्या ॥)

चण्डुः, पुं, (चण्ड्+बाहुलकात् उः ।) उन्दुरः । इति शब्दचन्द्रिका ॥

चत, ए अ याचे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-सेट् ।) ए, अचतीत् । अ, चतति चतते । इति दुर्गादासः ॥

चतुः, [र्] अ, चतुर्व्वारम् । इति व्याकरणम् ॥

चतुःपत्री, स्त्री, (चत्वारि चत्वारि पत्राण्यस्याः ।) क्षुद्रपाषाणभेदी । इति राजनिर्घण्टः ॥

चतुःपर्णी, स्त्री, (चत्वारि चत्वारि पर्णानि यस्याः ।) क्षुद्रान्विका । इति राजनिर्घण्टः ॥

चतुःपला, स्त्री, (चत्वारि पलानि यस्यां यस्या वा ।) नागबला । इति राजनिर्घण्टः ॥

चतुःपुष्पः, पुं, (चत्वारि पुष्पाणीव यत्र ।) भिण्डावृक्षः । इति राजनिर्घण्टः ॥

चतुःशालं, क्ली स्त्री, (चतसृणां शालानां समाहारः ।) परस्पराभिमुखगृहचतुष्टयम् । चकमिलनवाड़ी इति भाषा ॥ इत्यमरः । २ । २ । ६ ॥ (यथा, महाभारते । १ । १४५ । ८ ।
"तत्र गत्वा चतुःशालं गृहं परमसंवृतम् ॥")

चतुःशालकं, क्ली, (चतुःशाल+स्वार्थे कन् ।) चतुःशालम् । इति शब्दरत्नावली ॥

चतुःषष्टिः, स्त्री, (चतुरधिका षष्टिः ।) चतुरधिकषष्टिसंख्या । चौषट्टि इति भाषा ॥ कलानाम्नी उपविद्या । (यदुक्तं रूपगोस्वामिकृतभगवन्माहात्म्ये ।
"चतुःषष्टिकलानान्तु विद्यानां पारदृश्वनः ।
ऋते कृष्णाद्भगवतः कः क्षमो देहधारकः ॥")
ऋग्वेदः । इति मेदिनी । टे । ६३ ॥

चतुरः, त्रि, (चत्यते याच्यते इति । चत+"मन्त्रिवाग्मिभिषिचतिचक्षिभ्य उरच् ।" उणां । १ । ३८ । इत्युरच् ।) कार्य्यक्षमः । निरालस्यः । तत्पर्य्यायः । दक्षः २ पेशलः ३ पटुः ४ कृत्यानम् ५ उक्षः ६ । इत्यमरः । २ । १० । १६ । पेशलः ७ पेषलः ८ इति तट्टीकायां भरतः ॥ निपुणः । इति राजनिर्घण्टः ॥ (यथा, देवीभागवते । १ । १७ । ३३ ।
"चतुरो नैव सुस्थेतं मूर्खः सर्व्वत्र सुस्थति ॥")
तस्य लक्षणं यथा । वाक्चेष्टायज्ञसमागमः । तत्र वचनयज्ञसमागमो यथा, रसमञ्जर्य्याम् ।
"तमोजटाले हरिदन्तराले
काले निशायास्तव निर्गतायाः ।
तटे नदीनां निकटे वनानां
घटेत प्रातोदरिकः सहायः ॥"
चेष्टायज्ञसमागमो यथा,—
"कान्ते कनकलम्बीरं करे कमपि कुर्व्वति ।
अगारलिखिते भानौ विन्दुभिन्दुसुखी ददौ ॥"
(उपभोगक्षमः । यथा, रघुः । ६ । ४७ ।
"त्यजत मानमलं वत विग्रहैः
न पुनरेति गतं चतुरं वयः ॥"
"चतुरं उपभोगक्षमम् ।" इति तट्टीकायां मल्लिनाथः ॥) नेत्रगोचरः । इति हेमचन्द्रः ॥

चतुरः, पुं, (चत+उरच् ।) चक्रवाकः । हस्तिशाला । इति हेमचन्द्रः ॥

चतुरङ्गमः, पुं, (चतुरः चातुर्य्यान्वितः क्रमः प्रणाली यत्र ।) सप्तधारूपकान्तर्गतरूपकभेदः । यथा—
"हृतहृन्दं श्रुतहृन्दं तथा प्रान्ते गुरुर्भवेत् ।
द्वाविंशत्यक्षरैर्युक्तः सङ्गारे चतुरङ्गमः ॥"
इति सङ्गीतदामोदरः ॥

चतुरङ्गं, क्ली, (चत्वारि अङ्गानि यस्य ।) हस्त्यश्वरथपदातिरूपं सैन्यम् । यथा, रामायणे ।
"चतुरङ्गं क्षयं बलं सुमहत् प्रसहेमहि ।"
अश्वक्रीड़ाविशेषः । चौरंखेला इति भाषा ॥ यथा,—
युधिष्ठिर उवाच ।
"अश्वकोट्याञ्च या क्रीड़ा तां मे ब्रूहि तपोधन ! ।
प्रकर्षेणैव मे नाथ चतुराजी यतो भवेत् ॥
व्यास उवाच ।
अष्टौ कोष्ठान् समालिख्य प्रदक्षिणकमेण तु ।
अरुणं पूर्व्वतः कृत्वा दक्षिणे हरितं बलम् ॥
पार्थ ! पश्चिमतः पीतसुत्तरे श्यामलं बलम् ।
राज्ञो वामे गजं कुर्य्यात् तस्मादश्वं ततस्तस्मिन् ॥
कुर्य्यात् कौन्तेय ! पुरतो युद्धे पत्तिचतुष्टयम् ।
कोणे नौका द्वितीयेऽश्वस्तृतीये तु गजो वसेत् ॥
तुरीये च वसेद्राजा वटिकाः पुरतः स्थिताः ॥
पञ्चकेन वटी राजा चतुष्कोणेव कुञ्जरः ॥
त्रिकेण तु चलत्यश्वः पार्थ ! नौकाद्वयेन तु ॥
कोष्ठमेकं विलङ्घ्याथ सर्व्वतो याति भूपतिः ॥

अग्र एव वटी याति बलं हन्त्यग्रकोणगम् ।
यथेष्टं कुञ्जरो याति चतुर्हिक्षु महीपते ! ॥
तिर्यक् तुरङ्गमो याति लङ्घयित्वा त्रिकोष्ठकम् ।
कोणकोष्ठद्वयं लङ्घ्य व्रजेन्नौका युधिष्ठिर ! ॥
सिंहासनं चतूराजी कृपाक्षस्तु षट्पदम् ।
काककाष्ठं दृढा नौका नौकाक्षस्तूभयप्रकारकम् ॥
घाताघाते वटी नौका बलं हन्ति युधिष्ठिर ! ।
राजा गजो हयश्चापि त्यक्त्वा घातं निहन्ति च ॥
अत्यन्तं खबलं रक्षेत् खराजा बलसत्तमम् ।
अल्पस्यारक्षया पार्थ ! हन्तव्यं बलसत्तमम् ॥
नौकायाश्चत्वारि पदानि अश्वस्याष्टौ पदानि इत्याधिक्यमस्य ॥
मतङ्गजस्य गर्व्वेण राजा क्रीड़ति निर्भरम् ।
तस्मात् सर्व्वबलं दत्त्वा रक्ष कौन्तेय ! कुञ्जरम् ॥
सिंहासनं चतूराजी यदवस्थानतो भवेत् ।
सर्व्वसैन्यैर्गजैर्वापि रक्षितव्यो महीपतिः ॥
अन्यद्राजपदं राजा यदाक्रान्तो युधिष्ठिर ! ।
तदा सिंहासनं तस्य भक्ष्यते नृपसत्तम ! ॥
राजा च नृपतिं हत्वा कुर्य्यात् सिंहासनं यदा ।
द्विगुणं वाहयेत् पक्षमन्यदैकगुणं भवेत् ॥
द्विगुणं पक्षं दातव्यतेन प्रापयेत् ॥
मित्रसिंहासनं पार्थ यदारोहति भूपतिः ।
तदा सिंहासनं नाम सर्व्वं नयति तद्बलम् ॥
यदा सिंहासनं कर्त्तुं राजा बलपदाश्रितः ।
तदा घातेऽपि हन्तव्यो बलेनापि सुरक्षितः ॥
विद्यमाने नृपे यत्र स्वकीये च नृपत्रयम् ।
प्राप्नोति च तदा तस्य चतूराजी यदा भवेत् ॥
नृपेणैव नृपं हत्वा चतूराजी यदा भवेत् ।
द्विगुणं वाहयेत् पक्षमन्यदैकगुणं भवेत् ॥
स्वपदस्थं यदा राजा राजानं हन्ति पार्थिव ।
चतुरङ्गे तदा भूप ! वाहयेच्च चतुर्गुणम् ॥
यदा सिंहासने काले चतूराजी समुत्थिता ।
चतूराजी भवत्येव न तु सिंहासनं नृप ! ॥
अत्रेदं बीजं उभयथा जयेऽपि परसिंहासनाधिकारात् परराजवधे ग्रौर्य्याधिक्यनिष्कृष्टत्वदर्शनात् । क्रीड़ायामपि तथा कल्प्यते ॥ * ॥
राजद्वयं यदा हस्ते आत्मनो राज्ञि संस्थिते ।
परेण संहृतत्वेको बलेनाप्यपहार्य्यते ॥
राजद्वयं यदा हस्ते न स्यादन्यकरे परः ।
तदा राजा हि राजानं घातेऽपि तं हनिष्यति ॥
नृपाक्षस्थे यदा राज्ञा गमिष्यति युधिष्ठिर ! ।
घाताघातेऽपि हन्तव्यो राजा तत्र न रक्षकः ॥
कोणं राजपदं त्यक्त्वा वटिकान्तं यदा व्रजेत् ।
वटी नयेत् पदं नाम तदा कोष्ठबलं च वट् ॥
यद्वि तस्य भवेत् पार्थ ! चतूराजी च षट्पदम् ।
तदापि च चतूराजी भवत्येव न संशयः ॥
पदातेः षट्पदे विद्धे राज्ञा वा हस्तिना तथा ।
षटपदं न भवेत्तस्य अवश्यं ग्रस्य पार्थिव ॥
भ्रमणे कोष्ठके या स्याद्वटिका दृग्बलेन वै ।
तदान्योन्यस्य हन्तव्यं सुखाय दुर्ब्बलं बलम् ॥
त्रिवटीकस्य कौन्तेय ! पुरुषस्य कदाचन ।
षट्पदं न भवत्येव इति गोतमभाषितम् ॥
नौकैका वटिका यस्य विद्यते खेलने यदि ।
गाढ़ावटीति विख्याता पदं तस्य न दुष्यति ॥
गाढ़ावाच्यापदं राजपदं कोणपदञ्च तत् ।
हस्ते रङ्गे बलं नास्ति काककाष्ठं तदा भवेत् ॥
वदन्ति राक्षसाः सर्व्वे तस्य न स्तो जयाजयौ ।
प्रार्थिते पक्षमे रात्रि स्तवञ्चाश्च षट्पदे ॥
अशौचं स्यात्तदा राजन् ! चलित्वा चालितं पदम् ।
द्विराहृत्या गतौ तस्माद्धन्यात् परबलं जयी ॥
सिंहासनं भवत्येव काककाष्ठं न भक्ष्यते ॥
उपविश्च यत् स्थानं तस्योपरिचतुष्टये ।
नौकाचतुष्टयं यत्र क्रियते यस्य नौकया ॥
नौकाचतुष्टयं तत्र दृढनौकेति भक्ष्यते ।
न कुर्य्यादेकदा राजन् ! गजस्याभिमुखं गजम् ॥
यदि कुर्व्वीत धर्म्मज्ञ ! पापभ्यस्तो भविष्यति ।
स्थानाभावे यदा पार्थ ! हस्तिनं हस्तिसम्मुखम् ॥
करिष्यति तदा राजन्निति गोतमभाषितम् ।
प्राप्ते गजद्वये राजन् ! हन्तव्यो वामतो गजः ॥"
इति तिथ्यादितत्त्वे चतुरङ्गक्रीड़नम् ॥

चतुरङ्गा, स्त्री, (चत्वारि अङ्गानि यस्याः ।) घोटिकाहृद्यः । इति राजनिर्घण्टः ॥

चतुरङ्गिणी, स्त्री, (चत्वारि अङ्गानि हस्त्यश्वरथपदातयः सन्त्यस्यामिति । चतुरङ्ग + इनिः ।) चतुरङ्गसेना । इति रामायणम् ॥ (यथा, महाभारते । १ । ७३ । २० ।
"प्रेषयिष्ये तवार्थाय वाहिनीं चतुरङ्गिणीम् ॥")

चतुरङ्गुलः, पुं, (चतसः अङ्गुलयः परिमाणमस्य । समासे अच् ।) आरग्वधवृक्षः । इत्यमरः । २ । ४ । २३ ॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"विरेचनानि सर्व्वाणि विशेषाच्चतुरङ्गुलात् ॥")

चतुरङ्गुलिपरिमिते त्रि॥ (यथा, शतपथब्राह्मणे । १० । २ । २ । १ ।
"स चतुरङ्गुलमेवोभयतोऽन्तत उपगूहति ॥")

चतुरङ्गं, क्ली, (चतुर्णां अङ्गानां समाहारः ।) चतुर्विधाङ्गद्वयम् । यथा, भावप्रकाशे ।
"अङ्गवेतसवृक्षाम्लवृक्षाम्लीरनिम्बुकैः ।
चतुरङ्गं हि पञ्चाङ्गं बीजपूरयुतैर्भवेत् ॥"

चतुरश्रः, त्रि, (चतसोऽश्रयोऽस्य । "सुप्रातसुश्वसुदिवेति ।" ५ । ४ । १२० । इति अच्प्रत्ययेन निपातितः ।) चतुष्कोणः । यथा,—
"चतुरश्रं त्रिकोणं वा वर्त्तुलं चार्द्धचन्द्रकम् ।
कर्त्तव्यमानुपूर्व्वेण ब्राह्मणादिषु मण्डलम् ॥"
इत्याह्निकतत्त्वे बौधायनः ॥
लक्षाच्चतुर्थाष्टमलक्ष्यम् । इति दीपिका ॥

चतुराननः, पुं, (चत्वारि आननानि मुखानि यस्य ।) ब्रह्मा । इत्यमरः । १ । १ । १६ ॥ तस्य चतुराननत्वे कारणं यथा,—
"तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः ।
परिक्रमन् खानि निवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि ॥"
इति श्रीभागवते । ३ । ८ । १६ ॥ (यथा,—
"इतरतापशतानि यथेच्छया
वितर तानि सहे चतुरानन ! ।
अरसिके तु रहस्यनिवेदनं
शिरसि मा लिख मा लिख मा लिख ॥"
इत्युद्भटः ॥)

चतुरूषणं, क्ली, (चतुर्णां ऊषणानां समाहारः ।) पिप्पलीमूलसहितं त्रिकटु । यथा, भावप्रकाशे ।
"त्रूषणं सकणामूलं कथितं चतुरूषणम् ।
ओषस्येव गुणाः प्रोक्ता अधिकाश्चतुरूषणे ॥"

चतुर्गतिः, पुं, (चतुर्भिर्गतिरस्य ।) कच्छपः । इति हेमचन्द्रः । ४ । ४१६ ॥ (चतुर्णां आश्रमाणां वर्णानां ब्राह्मणादीनां यथोक्तकारिणां गतिराश्रयः । विष्णुः । यथा, महाभारते । १३ । १४६ । ६५ ।
"चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्वूहश्चतुर्गतिः ॥")

चतुर्थः, त्रि, चतुर्णां पूरणः । ("तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् । ततः "षट्कतिपयचतुरां थुक् ।" ५ । २ । ५१ । इति थुक् ।) चतुर्थसंख्यापूरणः । इति सुग्धबोधम् ॥ चौथा इत्यादि भाषा ॥

चतुर्थांशः, पुं, (चतुर्थः अंशः ।) चतुर्भागैकभागः । तत्पर्य्यायः । तुरीयः २ पादः ३ । इति राजनिर्घण्टः ॥ (चतुर्थः अंशो यस्य । चतुर्थांशस्वामिनि त्रि । यथा, मनुः । ८ । २१० ।
"तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः ॥")

चतुर्थिका, स्त्री, पलपरिमाणम् । इति वैद्यकपरिभाषा ॥

चतुर्थी, स्त्री, (चतुर्णां पूरणी । "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् । ततः "षट्कतिपयचतुरां थुक् ।" ५ । २ । ४१ । इति थुक् । ततस्त्रियां ङीप् ।) तिथिविशेषः । सा तु चन्द्रस्य चतुर्थकलाक्रियारूपा । इति स्मृतिः ॥ (चतुर्थी तु पञ्चमीयुता ग्राह्या । "युग्मानिक्षतभूतानि ।" इति युग्मवचनात् तथा,—
"एकादश्यष्टमी षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्व्वेण संयुताः ॥"
इत्यग्निपुराणवचनाच्च ॥

भविष्ये,—
"अमा वै सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया ॥'
यत्तु,—
'चतुर्थीसंयुता कार्य्या तृतीया च चतुर्थिका ।
तृतीयया युता नैव पञ्चम्या कारयेत् क्वचित् ॥'
इति ब्रह्मवैवर्त्तवचनं पञ्चमीयुतानिषेधकं तद्विनायकव्रतपरमिति गुरुचरणाः तृतीयायुता निषेधकत्वे क्वचिदित्यनुपपत्तेः सर्व्वत्रैव पञ्चमीयुताया ग्रहणात् । सारस्वतादिप्रदीपमाह ।
'त्रयोदश्याश्चतुर्थ्याश्च सप्तम्या द्वादशीतिथेः ।
प्रदोषेऽध्ययनं धीमान् न कुर्व्वीत यथाक्रमम् ।
सारस्वतो गणपतः सौरश्च वैष्णवस्तथा ॥'
प्रदोषशब्दोऽत्र प्रथमप्रहर इति हेमाद्रिः ।

रात्रिपर इति निर्णयाम्बतकृद् भोजदेवः ॥
'शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशापं कुरुते न पश्येत्तच्च तं ततः ॥'
चतुर्थ्यां दर्शननिषेधात् तच्चोदितस्य चन्द्रस्य पञ्चम्यां दर्शने तु न दोषः । अतः,—
'पञ्चाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥'
दैवात् प्रमादाद्वा दर्शने तु ।
"सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक ! मा रोदीस्तव ह्येष स्यमन्तकः ॥"
अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम् । माघमासस्य शुक्लचतुर्थ्यां गौरी पूजनीया । यथा, भविष्योत्तरे माघशुक्लपक्षमधिकृत्य,—
"चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥"
इति तिथ्यादितत्त्वम् ॥)
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"स्वपुत्रमित्रप्रमदाप्रमोदी
घृताभिलाषी कृपया समेतः ।
विवादशीलो विजयी विवादे
भवेच्चतुर्थीप्रभवः कठोरः ॥"

चतुर्दन्तः, पुं, (चत्वारो दन्ता यस्य ।) ऐरावतहस्ती । इति हेमचन्द्रः । २ । ६१ ॥ (खनामख्यातः पञ्चतन्त्रोक्तगजविशेषः । यथा, पञ्चतन्त्रे । ३ । ८० । "कस्मिंश्चिद्वनोद्देशे चतुर्दन्तो नाम महागजो यूथाधिपः प्रतिवसति स्म ॥")

चतुर्दश, [न्] त्रि, चतुरधिका दश । चौद इति भाषा । इति ज्योतिषम् ॥ (यथा, नैषधे । १ । ४ ।
"अधीतिबोधाचरणप्रचारणै-
र्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
चतुर्दशत्वं कृतवान् कृतः स्वयं
न वेद्मि विद्मासु चतुर्दशस्वयम् ॥"
चतुर्दशानां पूरणः । "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् ।) पूरणार्थे अकारान्तोऽयं शब्दः ॥ (यथा, रामायणे । २ । ११२ । २५ ।
"चतुर्दशे हि सम्पूर्णे वर्षेऽहनि रघूत्तम ! ।
न द्रक्ष्यामि यदि त्वान्तु प्रवेक्ष्यामि हुताशनम् ॥")
तद्वाचकानि । विद्या १ यमः २ मनुः ३ इन्द्रः ४ भुवनम् ५ ध्रुवतारकम् ६ । इति कविकल्पलता ॥

चतुर्दशी, स्त्री, (चतुर्दश + टित्वात् ङीप् ।) तिथिविशेषः । सा तु चन्द्रस्य चतुर्दशकलाक्रियारूपा । तत्पर्य्यायः । भूता २ । इति तिथ्यादितत्त्वम् ॥ ("सा च शुक्ला पूर्णिमायुता ग्राह्या युग्मात् कृष्णा पूर्व्वयुता ।
"कृष्णपक्षेऽमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्व्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ।
उपवासादिकार्य्येषु एष धर्म्मः सनातनः ॥'
इति निगमवचनात् अपराह्णव्यापित्वे तु शुक्लचतुर्दश्यपि पूर्व्वविद्धा ग्राह्या
'चतुर्दशी तु कर्त्तव्या त्रयोदश्या युता विभो ! ।
मम भक्तैर्महावाहो ! भवेद्या चापरुद्धिकी ।
दर्शविद्धा न कर्त्तव्या राकाविद्धा तथा सुने ॥'
इति स्कन्दपुराणात् मम भक्तैरिति ईश्वरोक्तेः शिवव्रतविषयम् । त्रयोदश्यां दिवातनमुहूर्त्तचतुर्दशलाभे तु पद्मपुराणम् ।
'एकादशस्यमी षष्ठी उभे पक्षे चतुर्दशी ।
अमावास्या तृतीया च उपोष्याः स्युः परान्विताः ॥
एतद्विषय एव ।
'शिवा घोरा तथा प्रेतासावित्री च चतुर्दशी ।
कृष्णयुक्तैव कर्त्तव्या कृष्णामेव हि पारणम् ॥'
इति वचनम् ।" इति च तिथ्यादितत्त्वम् ॥)
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"विरुद्धशीलः पुरुषः सरोष-
श्चौरः कठोरः परवञ्चकश्च ।
परान्नभोक्ता परदारचित्त-
श्चतुर्दशी चेत् जननस्य काले ॥"
मासविशेषे तत्र कर्म्माणि यथा । ज्येष्ठकृष्णाचतुर्दश्यां स्त्रीकर्त्तृकसावित्र्यादिदेवतापूजा स्वामिपूजा च ॥ भाद्रशुक्लचतुर्दश्यां अनन्तपूजा चतुर्दशपिष्टकभक्षणं डोरकबन्धनञ्च ॥ कार्त्तिकशुक्लचतुर्दश्यां चतुर्दशप्रदीपदानं यमतर्पणञ्च ॥ अग्रहायणशुक्लचतुर्दश्यां गौरीपूजा पाषाणाकारपिष्टकभक्षणञ्च ॥ माघकृष्णपक्षे रटन्त्याख्यचतुर्दश्यां कालीपूजारुणोदये स्नानञ्च ॥ फाल्गुनकृष्णपक्षे शिवरात्र्याख्यचतुर्दश्यामुपवासः शिवपूजा च ॥ चैत्रशुक्लपक्षे मदनचतुर्दश्यां मदनदत्तपल्लवेन कामदेवपूजा । इति स्मृतिः ॥

चतुर्दोलं, क्ली, पुं, (चतुर्भिर्वाहकैर्दोल्यते उत्क्षिप्य नीयते उह्यते इति यावत् । दोलि + कर्म्मणि घञ् । यद्वा, चतुर्भिर्दण्डैरुपलक्षितं दोलं दोलायमानयानविशेषः ।) खनामख्यातयानविशेषः । यथा,—
"राज्ञो यद्दिपदं यानं विशेषाख्यमलं विदुः ।
चतुर्भिरुह्यते यत्तु चतुर्दोलं तदुच्यते ॥
भोजस्तु ।
चतुर्भिर्वाहकैर्दण्डैः षड्भिः कुम्भैः सुसंस्थितैः ।
स्तम्भैरष्टाभिरुदितं चतुर्दोलमनुत्तमम् ॥
तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम् ।
चतुर्व्विधानां भूपानां चतुर्दोलाः प्रकाशिताः ॥
त्रिहस्तसम्मितायामो द्विहस्तपरिणाहवान् ।
हस्तद्वयोन्नतः प्रोक्तश्चतुर्दोलो जयाख्यया ॥
चतुर्हस्तायतो यस्तु सार्द्धेन्दुहस्तदन्यथा ।
चतुर्दोलः समाख्यातः कल्याणस्तावदुन्नतः ॥
पञ्चहस्तायतो यस्तु त्रिहस्तपरिणाहवान् ।
तावदेवोन्नतो वीरश्चतुर्दोल उदाहृतः ॥
आयामपरिणाहाभ्यां चतुर्हस्तमितो हि यः ।
चतुर्दोलो ह्ययं सिंहस्तदर्द्धोन्नत शुभः ॥
सर्व्वोऽथ द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदिः ।
आद्यः समरवर्षासु परः केलिधनात्यये ॥
सर्व्वेषामेव काष्ठानां रङ्गः स्यादुचितवारणः ।
चन्दनेनेव घटना सर्व्वेषामुपयुज्यते ॥
लोलजं सर्व्ववस्त्रेषु कनकं सर्व्वधातुषु ।
कुम्भश्च पद्मकोषश्च गिरिश्चेति यथाक्रमम् ॥
चैदेशानां महीन्द्राणां चतुर्दोलेषु विन्यसेत् ॥
दर्पणश्चार्द्धचन्द्रश्च हंसः केकी शुको गजः ।
अश्वः सिंहश्च तस्याग्रे आदित्यादिदशोत्तरान् ॥
मणिनियमस्तु दण्डवत् ॥
रक्तः शुक्लश्च पीतश्च कृष्णश्चित्रस्तथारुणः ।
नीलः कपिल इत्युक्तः पताकानान्तु संग्रहः ॥
चतुर्दोलः सपताकः शुभयानमिति स्मृतम् ॥
सुवर्णरत्नखचितैर्दण्डैर्युक्तः स्याद्राजकेशिनाम् ।
चामरदण्डैर्दण्डैर्भिर्दिग्जयिनां चतुर्दोलः ॥
चासपक्षस्य पुच्छेन सर्व्वोपरि परिन्यसेत् ।
यात्रासिद्धिरयं नाम्ना चतुर्दोलो महीभुजाम्
स्तम्भच्छादरहितो निश्छदिरुक्तश्चतुर्दोलः मानं पूर्व्ववत् ॥
स पुनर्द्विविधः प्रोक्तः सध्वजश्चाथनिर्ध्वजः ।
ध्वजान् षड्वच्च न्यस्यन्ति षड्वर्गविजयेषिणः ॥
तेषां मानन्तु चत्वारः स्वामिहस्तैकसम्मिताः ।
कोणेषु पश्चादग्रे च हस्तद्वयमितौ ध्वजौ ॥
सुवर्णं रजतं युग्मं त्रिविधानां महीभुजाम् ।
मणिचामरकुम्भानां खड्गादीनां विनिश्चयः ॥
चतुर्दोलध्वजे राज्ञां त्रिज्ञेयो नवदण्डवत् ।
निर्ध्वजे च चतुर्दोले मानमन्यतमं ग्रहेत् ॥
आयामपरिणाहाभ्यां चतुर्हस्तमितो हि यः ।
विजयो नाम विज्ञातश्चतुर्दोलो महीभुजाम् ॥
विजयो मङ्गलो भद्रो वितस्त्येकैकवर्द्धितः ।
त्रिविधानां महीन्द्राणां यानत्रयमुदाहृतम् ॥
अष्टाभिरुह्यते यस्तु अष्टदोलमुशन्ति च ।
सोपानद्वितयञ्चात्र विज्ञेयं शिल्पिनिर्म्मितम् ॥
भोजस्तु ।
अष्टाभिर्वाहकैर्दण्डैः षड्भिस्तु दशभिर्घटैः ।
स्तम्भैस्तु दशभिर्ज्ञेयमष्टदोलं महीभुजाम् ॥
तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम् ।
चतुर्व्विधानां भूपानामष्टदोलाः प्रकाशिताः ॥
षड्भिर्हस्तैर्मितायामः परिणाहश्चतुर्भुजः ।
चतुर्हस्तोन्नतो राज्ञामष्टदोलं जयं विदुः ॥
आयामपरिणाहाभ्यां पञ्चहस्तमितो हि यः ।
कल्याणाख्योऽष्टदोलोऽयं चतुर्हस्तमितोन्नतिः ॥
सप्तहस्तायतः कार्य्यो प्रवरे पञ्चहस्तकः ।
पञ्चहस्तोन्नतो वीरश्चाष्टदोलो महीभुजाम् ॥
आयामपरिणाहाभ्यामष्टहस्तमितो हि यः ।
सिंहनामाष्टदोलोऽयं विज्ञेयः षड्भुजोन्नतः ॥
सर्व्वोऽथ द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदिः ।
काष्ठवस्त्रघटादीनां मणीनां चामरस्य च ॥
चतुर्दोलवदुक्तेयो नियमोऽन्योऽपि सूरिभिः ।
पूर्व्ववन्निश्छदेमानं ध्वजमानमिहोच्यते ॥
दशध्वजास्तेषु चाष्टौ स्वामिहस्तद्वयोन्नताः ।
पश्चादग्रे ध्वजौ राज्ञश्चतुर्हस्तमितौ मतौ ॥
मणिचामरपद्मानां निर्णयो निध्यताकवत् ।
निर्ध्वजश्चाष्टदोलो यः शिविकेति स गद्यते ॥
मणिकुम्भसुखादीनां नियमो नवदण्डवत् ।
इत्यष्टदोलकथनम् ॥ * ॥

एवं द्वादशघोड़शविंशतिदोलादिका: कार्य्या: ।
मानं सार्द्धद्विगुणं सार्द्धत्रिगुणितं युक्तमेतेषाम् ॥
विंशतिदोलात् परतो भोजमते सम्भवेदयानम् ।
यानं बहुनुयोज्यं बहुगुणमेतच्च गाद वै व्यास: ॥
भविष्योत्तरेऽपि ।
यदुक्तं देवदं यानं तेन मानेन यो नृप: ।
स्वयानं कुरुते दिव्यं स चिरं सुखमश्नुते ॥
स्वयोगयुक्तयानस्थो भोगमाप्नोति मानव: ।
परयौगिकयानस्थ: क्षेत्रमाप्नोति पुष्कलम् ॥
यो दम्भाद्यथवाज्ञानादयानं प्रकुरुतेऽन्यथा ।
तस्येतानि विनश्यन्ति आयुर्विद्या यशो धनम् ॥
प्रधानं यानमाश्रित्य नियमोऽयं समाश्रित: ।
नाप्रधाने निर्णयोऽस्ति तस्मिंस्तु मनोज्ञता ॥"
इति युक्तिकल्पतरु: ॥

चतुर्धा, व, (चतु:प्रकारमिति । "धाच् प्रकारे ।" इति मुग्धबोधव्याकरणेन धाच् ।) चतु:प्रकारम् । चारिप्रकार इति भाषा ॥ इति व्याकरणम् ॥ (यथा, भागवते । ३ । २६ । १४ ।
"मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम् ।
चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥")

चतुर्भोजं, क्ली, (चतुर्णां भोजानां समाहार: ।) मेथिका चन्द्रसूरं कालाजाजी यवानिका एतच्चतुष्टयं मिलितम् । तच्चूर्णं नित्यभक्षणगुण: । पवनामयाजीर्णशूलाध्मानपार्श्वशूलकटिव्यथानाशित्वम् । इति भावप्रकाश: ॥

चतुर्भद्रं, क्ली, (चत्वारि भद्राणि यत्र वृन्दे । यद्वा, चतुर्णां धर्म्मार्थकाममोक्षसंज्ञकानां भद्राणां श्रेयसां समाहार: ।) सकलधर्म्मार्थकाममोक्षम् । इत्यमर: । २ । ७ । ५८ ॥ अन्यूनाधिकशक्ति-धर्म्मार्थकाममोक्षम् । इति तट्टीकासारसुन्दरी ॥ (तत्तन्मङ्गलमयगुणयुक्ते त्रि । यथा, महाभारते । ७ । ६२ । १७ ।
"स चेन्मार क्षत्रिय ! चतुर्भद्रतरक्षया ।
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथा: ॥")

चतुर्भुज:, पुं, (चत्वारो भुजा यस्य ।) विष्णु: । इत्यमर: । १ । १ । २० ॥ (यथा, देवीभागवते । १ । ७ । ५ ।
"विष्णुं प्रबोधयाम्यद्य घोरैर्वै सूक्तं वनाह्वैनम् ।
चतुर्भुजं महावीर्यं दु:खहा स भविष्यति ॥"
वटिकौषधविशेष: । यथा,—
"क्षतक्षतस्य भागौ द्वौ भागैकं हेमभस्मकम् ।
त्वगकस्तूरिका चैव हरितालश्च तत्समम् ॥
सर्वं खल्वतले पिष्ट्वा कन्याखरसमर्दितम् ।
एरण्डपत्रैरावेष्ट्य धान्यगर्भे दिनत्रयम् ॥
संशोष्य तत उद्धृत्य सर्वरोगेषु योजयेत् ।
एतद्रसायनवरं त्रिफलामधुसंयुतम् ।
तदृग्यथाग्निबलं खादेद्बलीपलितनाशनम् ।
अपस्मारे ज्वरे कासे प्लीहे मन्दानले क्षये ॥
हृत्कर्म्मे शिर:कर्म्मे गात्रकर्म्मे विशेषत: ।
वातपित्तसमुत्थांश्च कफजं नाशयेद्ध्रुवम् ॥
सर्व्वौषधिप्रयोगैर्यै व्याधयो न निवर्त्तिता: ।
कर्म्मभि: पञ्चभिश्चैव योजयेद्वरराजत: ॥
चतुर्भोजो रसो नाम महेशेन प्रकाशित: ।
क्रमेण प्लीहलितं हन्ति वृद्धमिन्द्राग्निर्यथा ॥"
इति चतुर्भुजो रस: ॥
इति वैद्यकरसेन्द्रसारसंग्रहे उन्मादाधिकारे ॥
स्त्रियां गायत्रीरूपा महाशक्ति: । यथा, देवीभागवते । १२ । ६ । ४७ ।
"चतुर्भुजा चारुदन्ता चातुरी चरितप्रदा ॥"
चतुर्भुजविशिष्टे, त्रि । यथा, देवीभागवते । १ । १५ । ५६ ।
"तदा प्रान्ता भगवती प्रादुरास चतुर्भुजा ।
शङ्खचक्रगदापद्मवरायुधधरा शिवा ॥")

चतुर्मुख:, पुं, (चत्वारि मुखानि अस्य । यद्वा चत्वारो वेदाश्चत्वारि मुखानीवास्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ (यथा, रघु: । १० । २२ ।
"चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगा: ।
चतुर्वर्णमयो लोकस्तत: सर्व्वं चतुर्मुखात् ॥"
"सर्व्वं चतुर्मुखात् चतुर्मुखरूपिणस्तत: जातमिति श्लेष: ।" इति तट्टीकायां मल्लिनाथ: ॥
शिव: । यथा, महाभारते । १३ । १७ । ७६ ।
"चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ॥")
औषधविशेष: । यथा,—
"रसगन्धकलौहाभ्रं समं क्षतात्रि हेम च ।
सर्व्वं खल्वतले क्षिप्त्वा कन्यारसविमर्द्दितम् ॥
एरण्डपत्रैरावेष्ट्य धान्यराशौ दिनत्रयम् ।
संशोष्य तत उद्धृत्य सर्व्वरोगेषु योजयेत् ॥
एतद्रसायनवरं त्रिफलामधुसंयुतम् ।
तदृग्यथाग्निबलं खादेत् बलीपलितनाशनम् ॥
व्यपस्मारमहोन्मादान् सर्व्वार्शांसि त्वगामयान् ।
क्रमेण सेवितं हन्ति वृद्धमिन्द्राग्निर्यथा ॥
पौष्टिकं बल्यमायुष्यं पुत्रप्रसवकारणम् ।
चतुर्मुखेन देवेन ब्रह्मणात्रेयेण सूचितम् ॥"
इति प्रयोगान्ते चतुर्मुखरस: ॥
(औषधान्तरं यथा,—
"स्तं क्षतं स्तं स्वर्णं ह्याभ्यां तुल्या मन: शिला ।
विमर्द्दितञ्च तैलेन चातसीसम्भवेन च ॥
तन्नोलं वस्त्रतो बद्ध्वा न्यसेत्तैलेषयेत्तत: ।
व्यतसीफलकल्केन दोलायन्त्रे चाहं पचेत् ॥
उद्धृत्य धारयेद्वक्त्रे जिह्वास्यदन्तरोगनुत् ॥"
इति चतुर्मुखो रस: ॥
इति वैद्यकरसेन्द्रसारसंग्रहे सुखरोगाधिकारे ॥)

चतुर्युगं, क्ली, चतुर्णां युगानां समाहार: । इति व्याकरणममरटीका च ॥ (चत्वारि युगानि यत्र इति विग्रहे चतुर्युगविशिष्टे, त्रि । यथा, रघौ । १० । २२ ।
"चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगा: ॥"
"चत्वारि युगानि कृतत्रेतादीनि यासु ताश्चतुर्युगा: कालावस्था: कालपरिमाणम् ॥" इति तट्टीकायां मल्लिनाथ: ॥)

चतुर्व्यक्त्र:, पुं, (चत्वारि वक्त्राणि अस्य वस्तुतस्तु चत्वारो वेदा एव वक्त्राणि सुखानीवास्य ।) ब्रह्मा । इति हलायुध: ॥

चतुर्व्वर्ग:, पुं, (चतुर्णां धर्म्मार्थकाममोक्षाणां वर्ग: समूह: ।) धर्म्मार्थकाममोक्षम् । इत्यमर: । २ । ७ । ५८ ॥ (यथा, रघौ । १० । २२ ।
"चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगा: ॥")

चतुर्व्विद्य:, पुं, (चतसो विद्या अस्मिन्निति । यद्वा । ७ । ३ । ३१ । इत्यस्य सूत्रस्य वार्त्तिकोक्तं यथा, "चतुर्वेदस्योभयपदवृद्धिश्च । चतुरो वेदानधीते चतुर्वेद: स एव चातुर्वेद्य: । चतुर्विद्यस्येति पाठान्तरम् । चतुर्विद्य एव चातुर्व्वैद्य: ।") चतुर्व्वेदवेत्ता । अस्य रूपान्तराणि । चतुर्व्वेद: । चातुर्व्वैद्य: । चातुर्व्वेद: । इति व्याकरणम् ॥

चतुल:, त्रि, (चत + उलच् ।) स्थापयिता । इति संक्षिप्तसारे उणादिवृत्ति: ॥

चतुष्कं, क्ली, (चत्वारोऽवयवा यस्य वा कन् । चतुष्कं चतुरवयवम् । यथा, मनु: । ७ । ५० ।
"प्रानमन्त्रा: स्त्रियश्चैव रत्नानि च यथाक्रमम् ।
एतत् कृतमं विद्याचतुष्कं कामजे गणे ॥"
गृहविशेष: । यथा, कुमारे । ५ । ६८ ।
"चतुष्कपुष्पप्रकरावकीर्णयो:
परोऽपि को नाम तवानुमन्यते ॥")
यष्टिभेद: । इति शब्दरत्नावली ॥
(पुंसि तु राजविशेष: । यथा, राजतरङ्गिण्याम् । ८ । २८४ ।
"अथ पांक्तीहरिर्योऽभूच्चतुष्क: कोष्टकानुज:॥")

चतुष्की, स्त्री, (चतुष्क + स्त्रियां ङीप् ।) मशूरी । मशारि इति भाषा ॥ पुष्करिणीभेद: । इति मेदिनी । के । ८७ ॥

चतुष्टयं, क्ली, केन्द्रम् । इति नीलकण्ठीयजातकम् ॥ (चत:संख्या । यथा, कुमारे । ७ । १३ ।
"तस्मात् प्रदेशाच्च वितानवन्तं
युक्तं मणिस्तम्भचतुष्टयेन ॥"
चत्वारोऽवयवा यस्य । "संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् । ततो रेफस्य विसर्गे सत्वे च कृते "ङ्यादौ तद्धिते ।" ८ । ३ । १०१ । इति षत्वम् ।) चतुरवयवे त्रि । इति मुग्धबोधम् ॥ (यथा, मनु: । ८ । १३० ।
"वधेनापि यदा त्वेतान्नियह्णीतुं न शक्नुयात् ।
तदेषु सर्व्वमप्येतत् प्रयुञ्जीत चतुष्टयम् ॥"
यथाच, कुमारे । २ । १७ ।
"प्रवृत्तिरासीच्छन्दानां चरितार्था चतुष्टयी ॥")

चतुष्पथं, क्ली, (चतुर्णां पथां समाहार: । "तद्धितार्थेति ।" २ । १ । ५१ । इति समास: । "ऋक्पूरब्धू:पथामानक्षे ।" ५ । ४ । ७४ । इति अ: । "इदुदुपधस्येति ।" ८ । ३ । ४१ । इति षत्वम् । यद्वा, चत्वार: पन्थानो यत्र इति ।) एकत्र मिलितपथचतुष्टयम् । चौमाता पथ इति भाषा ॥ तत्पर्य्यायम् । शृङ्गाटकम् २ । इत्य-

मरः। २। १। १७॥ (यथा, मनुः। ४। ३६।
"गुरुदङ्गान् देवतं विप्रं धृतं मधु चतुष्पथम्।
प्रदक्षिणानि कुर्व्वीत प्रज्ञानांश्च वनस्पतीन्॥")
चतुष्पथः, पुं, (चत्वारः पन्थानो ब्रह्मचर्य्यादय आश्रमा यस्य। "ऋक्पूरिति।" ५। ४।७४। इति अः।) ब्राह्मणः। इति मेदिनी। थे २७॥
चतुष्पदः, पुं, (चत्वारि पदानि यस्य।) पशुः। (यथा, हरिवंशे। २१। १७।
"तरवश्च निरूपस्थाङ्कुरा नरचतुष्पदा द्रुहाः॥")
करणविशेषः। इति मेदिनी। दे। ४८॥ तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे।
"चतुष्पदभवो मर्त्यः सदाचारविवर्जितः।
स्वल्पवित्तः क्षीणदेहश्चतुष्पादधनान्वितः॥"
"मेषवृषसिंहराशयः मकरपूर्व्वार्द्धं धनुःपरार्द्धञ्च।"
इति दीपिका॥
(चतुष्पदविशिष्टे। त्रि। यथा, महाभारते। १। ६०। ११।
"चतुष्पदं द्विपदश्चापि सर्व्वमेवं भूता गर्भभूता भवन्ति॥"
व्याधिनिवारणोपायः। यथा,—
"वैद्यो व्याधुपसृष्टस्तु भेषजं परिचारकः।
एते पादाश्चिकित्सायाः कर्म्मसाधनहेतवः॥
गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक्।
व्याधिमल्पेन कालेन महान्तमपि साधयेत्॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः।
उदग्राहरहोऽब्रह्माणो यथाध्वर्य्युं विनाध्वरे॥
वैद्यस्तु गुणवानेकस्त्रायेदातुरान् सदा।
ध्रुवं प्रतितरेद्दीनं कर्णधार इवाम्भसि॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः।
सत्त्वधर्म्मपरो यश्च स भिषक् पाद उच्यते॥
आयुष्मान् सत्त्ववान् साध्यो ह्यथवानात्मवानपि।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम्।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम्॥
दोषघ्नमग्न्यनिकरमविकारि विपर्य्यये।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते॥
स्निग्धोऽनुगुप्तुर्बलवान् युक्तो व्याधितरक्षणे।
वैद्यवाक्यक्रदश्रान्तः पादः परिचरः स्मृतः॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्याये॥)
चतुष्पदी, स्त्री, (चत्वारः पादा यस्याः। "संख्यासुपूर्व्वस्य।" ५। ४। १४०। इति अन्तलोपे। "पादोऽन्यतरस्याम्।" ४। १। ८। इति ङीपि। "पादः पत्।" ६। ४। १३०। इति पदादेशः।) पद्यम्। इति मेदिनी। दे। ४८॥ चौपदी इति भाषा॥ (यथा, छन्दोमञ्जर्य्याम्। १ स्तवके।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा॥")
चतुष्पाटी, स्त्री, (चतस्रः दिशः पाटयति भिनत्तीति। पाटि+अण+स्त्रियां ङीप्।) नदी। इति शब्दमाला॥
चतुष्पाठी, स्त्री, चतुर्णां वेदानां पाठो यस्यां सा। छात्राध्ययनस्थानम्। चौपाठी इति भाषा॥ इति लोके प्रसिद्धिः॥
चतुष्पाणिः, पुं, (चत्वारः पाणयो हस्ता यस्य।) विष्णुः। इति हारावली। ६॥ (चतुर्हस्तविशिष्टे, त्रि॥)
चतुःसमं, क्ली, (चतुर्णां चन्दनागुरुकस्तूरीकुङ्कुमानां समः समभागो यत्र। यद्वा, चतुर्भिश्चन्दनादिभिः समं एकत्र सहावस्थानं यत्र।) मिलितचन्दनागुरुकस्तूरीकुङ्कुमरूपम्। इति हेमचन्द्रः। ३। ३०३॥ औषधविशेषः। यथा, सुखबोधे।
"लवङ्गं सैन्धवं पथ्या यमानी च चतुःसमम्।
आममूलविबन्धघ्नं पाचनं भेदि श्लोषणुत्॥"
अन्यच्च।
"जातीफलं त्रिदशपुष्पसमन्वितञ्च
जीरञ्च टङ्कणयुतं चरकेण चोक्तम्।
चूर्णानि माक्षिकसितासहितानि लीढ्वा
आमातिसारमखिलं गुरु हन्ति शूलम्॥"
चतुस्त्रिंशत्, स्त्री, चतुरधिका त्रिंशत्। चौंतिस् इति भाषा॥ इति ज्योतिषम्॥ (यथा, ऋग्वेदे। १। १६२। १८।
"चतुस्त्रिंशद्वाजिनो देवबन्धो
र्वङ्क्रीरश्वस्य स्वधितिः समेति॥")
चतुस्त्रिंशद्ज्ञातज्ञः, पुं, (चतुस्त्रिंशद्ज्ञातं जानातीति। ज्ञा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) बुद्धभेदः। इति हेमचन्द्रः। २। १४७॥
चतूराजी, स्त्री, (चतुर्भिरङ्गैः राजते दीप्यते इति। राज्+"कर्म्मण्यण्।" ३। २। १। इति अण्। स्त्रियां ङीप्।) चतुरङ्गक्रीड़ाविशेषः। इति तिथ्यादितत्त्वम्॥
चत्वरं, क्ली, (चत्यते स्वीक्रियते इति। चत+"कृगृशृदृचतिभ्यः क्वरच्।" उणां। २। १२१। इति क्वरच्।) स्वण्डिलम्। होमार्थपरिष्कृता भूमिः। अङ्गनम्। इत्यमरः। २। ७। ८॥ उठान चाताल इति च भाषा॥ (चतस्रणां रथ्यानां सङ्गमः। इति शब्दार्थचिन्तामणिः॥ यथा, महाभारते। ३। १५। २०।
"अतुरथ्यासु सर्व्वासु चत्वरेषु च कौरव!।
बलं बभूव राजेन्द्र! प्रभूतगजवाजिमत्॥"
नानाजनपदेभ्यः समागतानां वासस्थानम्। मठ इति भाषा॥ यथा, कथासरित्सागरे। ६।४१।
"कृत्वा तांश्चणकान् पिष्टान् गृहीत्वा जलकुम्भिकाम्।
अतिष्ठं चत्वरे गत्वा क्वायायां नगराद्बहिः॥")
चत्वारः, त्रि, (चतुरशब्दस्य प्रथमाविभक्तेर्बहुवचनेन सिद्धेस्यात्वम्।) चतुःसंख्या। चारि इति भाषा॥ इति व्याकरणम्॥ तद्वाचकानि। वेदः १ ब्रह्मास्यम् २ वर्णः ३ समुद्रः ४ हरिवाहः ५ खर्दन्तिदन्तः ६ सेनाङ्गम् ७ उपायः ८ यामः ९ युगम् १० आश्रमम् ११ वृत्तपादः १२। इति कविकल्पलता॥ चतुःसंख्याविशिष्टे त्रि। इत्यमरः॥
चत्वारिंशत्, स्त्री, (चत्वारो दशतः परिमाणमस्याः। "षड्त्रिंशत्त्रिंशतोरिति।" ५। १। ५९। इति निपातनात् साधुः।) संख्याविशेषः। इति ज्योतिषम्॥ चल्लिश इति भाषा॥ (यथा, भागवते। ४। १। ६०।
"तेभ्योऽमयः समभवन् चत्वारिंशच्च पञ्च च॥")
चत्वालः, पुं, (चत्यते प्रार्थ्यते स्वीक्रियते होमार्थेति। चत+"स्थाचतिमदेरिति।" वालच् नकृद्विः।) होमकुण्डम्। दर्भः। इति मेदिनी। ले। ८६॥ गर्भः। इति विश्वहेमचन्द्रौ॥
चद, ए च याचे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-द्विकं-सेट्।) ए, अचदीत्। च, चदति चदते। इति दुर्गादासः॥
चद, इ क्रादे। दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) इ, कर्म्मणि चन्द्यते। क्रादौ हर्षः। इति दुर्गादासः॥
चदिरः, पुं, (चन्दति दीप्यते स्वप्नरीरादिना इति। चदि+बाहुलकात् किरच् निपातनात् नस्य लोपः।) हस्ती। चन्द्रः। कर्पूरम्। सुभगः। इति संक्षिप्तसारे उणादिवृत्तिः॥
चन, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) चनति। इति दुर्गादासः॥
चन, म हिंसे। इति कविकल्पद्रुमः॥ (भ्वां परं-सकं-सेट्।) म, चनयति। इति दुर्गादासः॥
चन, थ असाकल्यम्। अकार्त्स्न्यम्। यथा। किञ्चन। इत्यमरभरतौ॥ ("किमः क्वन्नात् चित्चनौ।" इति सूत्रेण।) प्रत्ययोऽयं विभक्त्यन्तकिमुशब्दादुत्तरे भवति। इति सुग्धबोधम्॥
चनूच, उ इतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। उदित्त्वात् क्त्वेट्।) उ, चञ्चित्वा चञ्चा। इतिगतिः। इति दुर्गादासः॥
चन्दः, पुं, (चन्दयति आह्लादयति यद्वा चन्दति दीप्यते इति। चन्दि वा चन्द+घञादयश्च।) चन्द्रः। इति भरतधृतशब्दार्णवः॥
चन्दकः, पुं, (चन्दयति आह्लादयति लोकानिति। चदि आह्लादे+णिच्+"खुलञौ।" ३। १।१४३। इति खुल्।) मत्स्यविशेषः। चाँदा इति भाषा॥ तस्य गुणः। रुचिबलकारित्वम्। अनभिष्यन्दित्वञ्च। इति राजवल्लभः॥ चन्द्रकोऽपि पाठः॥ (चन्द्रकशब्देऽस्य विवृतिर्द्रष्टव्या।)
चन्दनः, पुं, क्ली, (चन्दयति आह्लादयतीति। चदि आह्लादे+णिच्+ल्युः।) स्वनामख्यातवृक्षः। (यथा, गोः रामायणे। ५। ७४। ३।
"चन्दनांस्तिलकांश्चूतानशोकान् सिन्धुवारकान्॥"
तथा च पञ्चतन्त्रे। १। ४२।
"विना मलयमन्यत्र चन्दनं न प्ररोहति॥")
तत्पर्य्यायः। गन्धसारः २ मलयजः ३ भद्रश्रीः ४। इत्यमरः। २। ६। १३१॥ श्रीखण्डम् ५ महार्हम् ६ श्वेतचन्दनम् ७ गोशीर्षम् ८ तिलपर्णम् ९ भद्रशीलम् १० मलयोद्भवम् ११ गन्धराजम् १२ सुगन्धम् १३ सर्व्वासम् १४ शीतलम् १५ गन्धाढ्यम् १६ भोगिवल्लभम् १७ माव-

नम् १८ शीतगन्धः १९ । इति राजनिर्घण्टः ॥ तैलपर्णिकः २० चन्द्रद्युतिः २१ । इति भावप्रकाशः ॥ भद्रश्रियम् २२ हितम् २३ हिमम् २४ । इति रत्नमाला ॥ पटीरः २५ वर्णकः २६ भद्राश्रयः २७ सेव्यः २८ रौहिणः २९ । इति शब्दरत्नावली ॥ याम्यः ३० पीतसारः ३१ । इति जटाधरः ॥ अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतलत्वम् । स्वादे कियत्कषायत्वम् । पित्तभ्रान्तिवमिज्वरक्रिमिदृष्टासन्तापग्लानिकारित्वम् । दृश्यत्वम् । वक्रदोषनाशित्वम् । शरीरकान्तिवृद्धिकारित्वम् । लेपने कामवृद्धिकारित्वम् । अतिसौरभ्यदत्वञ्च । इति राजनिर्घण्टः ॥ रूक्षत्वम् । तिक्तत्वम् । आह्लादनत्वम् । लघुत्वम् । श्रमशीतज्वरोगविषश्लेष्मामदाहनाशित्वञ्च ॥ * ॥ श्रेष्ठचन्दनलक्षणं यथा,—

"स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम् ।
यन्मिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते ॥"

इति भावप्रकाशः ॥

वानरविशेषः । इति हेमचन्द्रः । ३ । ३०५ ॥

चन्दनं, क्ली, (चन्द्यते आह्लाद्यते अस्मादनेन वा इति । चदि आह्लादे + ल्युच् + ल्युट् ।) भद्रकाली । इति मेदिनी । ने । ६१ ॥

चन्दनगोपी, स्त्री, (चन्दनमपि गोपायति स्वगन्धादिना रक्षतीति । गुप + अच् । ततो ङीप् । यद्वा, चन्दनवद् गुप्यति दीप्यते इति । अच् ।) शारिवाविशेषः । इति राजनिर्घण्टः ॥

चन्दनधेनुः, स्त्री, (चन्दनेन अङ्किता धेनुः । मध्यपदलोपिकर्म्मधारयः ।) पतिपुत्रवत्कृतनार्य्युद्देश्यकोत्सृष्टचन्दनाङ्कितसवत्सगौः । तत्प्रमाणप्रयोगो लिख्यते ।

"नत्वा शिवं चन्दनचर्चितायाः
धेनोः प्रदाने सविधिप्रयोगम् ।
रत्नाकरादेर्लिखितं विलोक्य
तनोति वाचस्पतिरग्यबुद्धिः ॥

अथ चन्दनधेनुदानविधिः । तत्र रत्नाकरे देवलः ।

जीवद्भर्त्री तु या नारी पुत्रिणी म्रियते यदि ।
सवत्सामङ्कितां धेनुमाचार्य्याय प्रदापयेत् ॥
पतिपुत्रवती नारी म्रियते यावतस्तयोः ।
दृश्यं न चोत्सृजेत् पुत्रः पिता यावच्च जीवति ॥

तथा कर्म्मादेशिन्या ब्राह्मणसर्व्वस्वे च हलायुधधृतानि वचनानि । यथा स्मृतिः ।

पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः ।
चन्दनेनाङ्कितां धेनुं तस्याः स्वर्गाय कल्पयेत् ॥

तथा जातूकर्णः ।

धेनुं चन्दनमालिप्य यो दद्याच्चाह्लहेतवे ।
यदि पापग्रहैर्युक्ता तथापि स्वर्गमाप्नुयात् ॥

तथा वशिष्ठः ।

न युक्तञ्च वृषोत्सर्गो यावत् पितरि जीवति ।
चन्दनेनाङ्कितां धेनुमाचार्य्याय प्रदापयेत् ॥ *॥

चतुर्हस्तो भवेद्यूपो यज्ञवृक्षसमुद्भवः ।
वर्त्तुलः शोभनः स्थूलः कर्णस्थो धेनुमौलिकः ॥
बिल्वस्य बकुलस्यैव कलौ यूपः प्रशस्यते ।
अभावे वारुणेनापि यूपं कुर्य्याद्विधानतः ॥

वृषोत्सर्गे तु वृषमौलिकः ।

तरुणी रूपसम्पन्ना सुशीला च पयस्विनी ।
न्यायार्জ্জिता गृहे जाता देया सा श्रोत्रियाय गौः ॥

नदीतीरे वने गोष्ठे देवतायतनेषु च ।
शैवहिङ्गेत्रे कुशचैत्रे राजद्वारे चतुष्पथे ॥

एषु वचनेषु वृषोत्सर्गनिषेधचन्दनधेनूत्सर्गविधीर्युगपदुपसंहारदर्शनात् वृषोत्सर्गस्थाने प्रधानतया चन्दनधेनूत्सर्गः प्रतीयते । अतोऽस्य वृषोत्सर्गकार्य्यकारित्वात् तत्फलहेतुत्वं लभ्यते । एकोद्दिष्टं न कुर्व्वीत न्यासिनाञ्चैव सर्व्वदा । अहन्येकादशे प्राप्ते पार्व्वणन्तु विधीयते ॥ इति श्राद्धविवेकधृतोशनोवचने त्रिदण्डसन्यासिनां एकोद्दिष्टनिषेधपार्व्वणविधीर्युगपदुपसंहारात् एकोद्दिष्टस्थाने पार्व्वणमिव । यद्वा पतिपुत्रवतीरूपप्रेतविशेषाधिकृतत्वं न चोत्सृजेदिति निषेधचन्दनधेनूत्सर्गविधिभ्यां प्रेतमात्राधिकृतसामान्यवृषोत्सर्गविध्यवगतफलभावनाकरणीभूतवृषकर्म्मैकत्वागमनुद्य तत्कर्म्मीभूतवृषमपहाय तत्स्थाने धेनुमात्रगुणविधिलांघवादवगम्यते । पशुयागे सामान्यविध्यवगताः प्रणयनीयाधिकरणीभूतचमसस्थाने गोदोहेनाः प्रणयेदिति विशेषविधिना गोदोहगुणविधिवत् । नालाभेऽपि प्रवेक्ष्यिनीम् । उपोद्घातदर्शी तत्र त्रयोदश्यान्तु पारणमित्यत्र एकादशीरूपनिमित्तस्थाने द्वादशीमात्रगुणविधिवच्च । अन्यथा धेनूत्सर्गस्य पृथक्कर्म्मत्वे फलभावना तत्करणनियोज्यानां पृथक्कल्पने गौरवं स्यात् । उक्तविधिनिषेधयोरुपसंहारवैयर्थ्यञ्च स्यात् । ततश्च करणैक्यात् फलैक्यमिति । चन्दनधेनूत्सर्गेऽपि प्रेतत्वविमुक्तिपूर्व्वकस्वर्गप्राप्तिः फलम् । एवं कपिलमन्त्रस्यापाप्यपगमस्वर्गप्रार्थनाया अपि तथैव तात्पर्य्यम् । तथा जातूकर्णवचनस्यापापस्वर्गपदयोरपि तथैव तात्पर्य्यं बोध्यम् । भूतार्थानां विधिशेषिणामेव जैमिन्युक्तप्रामाण्येन प्रकृते सिद्धे विधिशेषित्वे लाघवात् । पापिष्ठमपि शुद्धेन शुद्धं पापहृतापि वेति कात्यायनवचनस्यापापपदस्य प्रेतत्वे एव तात्पर्य्यदर्शनाच्च । अत्र यद्यपि पतिपुत्रवतीत्यत्र पतिपुत्रवत्त्वस्य विशेष्यीभूतकर्त्तृनियमरणान्वयित्वेन न विशेषणत्वं किन्तूपलक्षणत्वमेव ततश्च काकवन्तो देवदत्तस्य गृहा इतिवत् कादाचित्कतद्वत्तामादायापि पतिपुत्रवतीतिप्रयोग उपपद्यते । तथापि अयतस्तयोर्भर्त्तुरग्रत इत्याभ्यां मरणकालिकी पतिपुत्रसत्तावगम्यते । गवां गोष्ठं इतिवत् । अथवा पराह्णान्वयेन धेनूत्सर्गकालिकीति । नचापुत्रिता मृता काचित् तस्या धेनुर्विगर्हिता । इति कपिलवचने अपुत्रितायाः पुत्रकर्त्तृकधेनूत्सर्गनिषेधस्याप्रसक्ततया सपत्नीपुत्रकर्त्तृकधेनूत्सर्गनिषेधप्राप्तौ तद्दृष्ट्या पतिपुत्रवतीत्यस्य सपत्नीपुत्रवतीपरत्वं अवश्यं वाच्यम् । तदेकवाक्यतया पुत्रिणीत्यादावपि तथात्वमिति वाच्यम् । अपुत्रितेति कपिलार्द्धस्य प्रसक्तिपूर्व्वकतार्थं पतिपुत्रवत् निवृत्तरजस्काया धेनूत्सर्गनिषेधार्थत्वात् गत्यां सत्यां लक्षणाया बीजाभावात् । प्रतियोगिवत्ध्वंसप्रागभावयोरपि अत्यन्ताभावविरोधित्वमस्तु तु अजातपुत्रस्त्रीपरत्वं वा भवतु तथात्वेऽपि तस्या धेनुर्विगर्हितेति अप्रसक्तार्थापि अपुत्रिताधेनुदाननिन्दा पतिपुत्रवत्याश्चन्दनधेनुदानस्तुतिपरा । यथा हरेरुत्थाने प्रौष्ठपद्यैवेश किन्तेन प्रतिपदाद्य यो निराहारः प्रसक्तापि निन्दा एकादश्यादिपौर्णमास्यन्तपक्षके रेवत्यन्तपाठयोगविधिस्तुतिपरा । यथा वा वेदगाने यो गिरा गिरेति ब्रूयात् स आत्मानमपि गिरेत् इत्यप्रसक्तनिन्दा ऐरं क्षत्रा अवगिरेदिति विधेः स्तुतिपरा । अतएव उक्तं शाबरभाष्ये । न हि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते अपि तर्हीतरत् स्तोतुमिति । स्तुतौ हि अप्रसिद्धगुणदोषारोपणदोषाय । न चात्र काम्यस्यैव कार्त्तिक्यादिवृषोत्सर्गस्य स्थाने धेनुदानं विधीयते इति वाच्यम् । तन्नित्यत्वे मानाभावात् । प्रत्युत म्रियत इति वर्त्तमानार्थकविभक्त्या वर्त्तमानसामीप्येनाचिरप्रसूतोपस्थितेश्च । ये तु वक्ष्यमाणमेकपत्नीनामेका चेत् पुत्रिणी भवेत् । सर्व्वास्तासेन पुत्रेण प्राह पुत्रवतीर्मनुरिति मनुना पुत्रवतीत्वाभिधानादेव पतिपुत्रवतीत्वञ्च सपत्नीपुत्रवती प्रतीयते इति ब्रुवते तेऽतीवभ्रान्ताः । पुत्रवतीति पदस्याखण्डतया मतुपा पतिपदस्यान्वये तदसम्भवापत्तेः ॥*॥

ननु वृषतुल्यवयो वर्णो वृषः स्याद्दक्षिणा द्विजाः ।
वृषोत्सर्गे तथा पुंसां स्त्रीणां स्त्रीगौर्विधिष्यते ॥

इति भविष्यसंवादाद्धेनुदानमिदं पतिपुत्रवत्या वृषोत्सर्गे दक्षिणादानस्य विशेषरूपम् । न तु प्रधानकर्म्मान्तरं गौरवात् । न च दक्षिणाया अङ्गत्वेन फलासङ्गतिः । यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोतीतिवत्तदुपपत्तेरिति चेत् न । वृषोत्सर्गदक्षिणातश्चन्दनाङ्कितधेनुदानस्य प्रकरणान्तराम्नायेन प्रकरणान्तरन्यायतः प्रधानत्वसिद्धेः । वृषोत्सर्गस्थानीयत्वेनानुवर्त्तमानग्रहणाचारात् । धेनुदानमुपगच्छद्वृषोत्सर्गनिवेधानामसङ्गतेः । कपिलपञ्चरात्रे चन्दनधेनुदानस्यापीति कर्त्तव्यतायां वृषरूपदक्षिणादानविधानाच्च ॥ * ॥

यथा कपिल उवाच ।

अतः परं प्रवक्ष्यामि धेनुदानमनुत्तमम् ।
पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः ॥
चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत् ॥

तथा ।

जीवद्भर्त्री तु या नारी पुत्रिणी म्रियते यदि ।
सवत्सामङ्कितां धेनुमाचार्य्याय निवेदयेत् ॥
साध्वी पतिव्रता नारी म्रियते यावतस्तयोः ।
दृश्यं नैवोत्सृजेत् पुत्री यावत् पितरि जीवति ॥

मृतपुत्रा च या नारी संगृहीता तु या भवेत्।
तस्या धेनुर्न दातव्या वृषोत्सर्गो विधीयते॥
अपुत्रिता मृता काचित्तस्या धेनुर्विगर्हिता।
दद्याद्धेनुं सुतो ज्येष्ठः कनिष्ठो वृषमुत्सृजेत्॥
द्वयोः सोदरयोरेको भवेत् ज्येष्ठः प्रधानतः।
त्रयाणां द्वौ सुतौ ज्येष्ठौ चतुर्णाञ्च त्रयः स्मृताः॥
पञ्चानां सोदराणाञ्च त्रयो ज्येष्ठाः प्रकीर्त्तिताः।
ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानतः॥
हेमशृङ्गीं खुरै रूप्यैः सुशीलां वस्त्रसंयुताम्।
कांस्योदरीं ताम्रदृष्टां घण्टाचामरभूषिताम्॥
प्रवालमालिकां दद्यात् कर्णयोरुभयोरपि।
चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत्॥
गवां लोकमवाप्नोति दिवि देवैश्च मोदते।
चन्दनेनाङ्कितां धेनुं दत्त्वा गच्छेत् सुरालयम्॥
तावत्तिष्ठति खर्लोके यावदाहूतसंप्लवम्।
न चोत्सर्गो वृषस्याच्च व्रतमेतत्समन्वितस्य च॥
वृषोत्सर्गविधानेन कर्त्तव्यं सर्व्वकर्म्म च।
मा नस्तोकेति मन्त्रेण दत्ते वृषाण्यसीति च॥
धेनोश्च सक्थिदेशे तु त्रिशूलाङ्कं समालिखेत्।
वामभागे विशेषोऽयं दत्ते चक्रं समालिखेत्॥
तच्चान्यद्वर्ण्यदृविद्वानाचार्य्यस्तु विधानवित्।
ततो वै संलिखेच्चक्रं पञ्चाङ्गुलप्रमाणकम्॥
शूलं षड़ङ्गुलं कार्य्यं दत्ते वामे यथाविधि।
पूर्व्वाह्णाभिमुखीं धेनुं यजमानोत्तराननः॥
मस्तकादिक्रमेणैव प्रतिमन्त्रैः प्रपूजयेत्॥" *॥

शिरसि ओं ब्रह्मणे नमः। ललाटे ओं वृषभध्वजाय नमः। कर्णयोः ओम् अश्विनीकुमाराभ्यां नमः। चक्षुषोः ओं अग्निभास्कराभ्यां नमः। जिह्वायां ओं सरस्वत्यै नमः। दन्तेषु ओं वसुभ्यो नमः। ओष्ठयोः ओं सन्ध्यायै नमः। ग्रीवायां ओं नीलकण्ठाय नमः। हृदि ओं स्कन्दाय नमः। रोमकूपेषु ओम् ऋषिभ्यो नमः। दक्षिणपार्श्वे ओं कुबेराय नमः। वामपार्श्वे ओं वरुणाय नमः। रोमाग्रेषु ओं रश्मिभ्यो नमः। ऊरुषु ओं धर्म्माय नमः। जङ्घासु ओम् अधर्म्माय नमः। श्रोणितटे ओं पितृभ्यो नमः। खुरमध्ये ओं गन्धर्व्वेभ्यो नमः। खुराग्रे ओम् अप्सरोभ्यो नमः। लाङ्गूले ओं द्वादशादित्येभ्यो नमः। गोमये ओं महालक्ष्म्यै नमः। गोमूत्रे ओं गङ्गायै नमः। पयोधरेषु ओं चतुःसागराय नमः।

एवमङ्गानि संपूज्य पठेन्मन्त्रं समाहितः।
ओम् इन्द्रस्य च त्वमिन्द्राणी विष्णोर्वक्षश्च या स्मृता।
रुद्रस्य गौरी या देवी सा देवी वरदास्तु मे॥
ओं या लक्ष्मीर्लोकपालानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी तस्याः पापं व्यपोहतु॥
ओं देहस्था या च ब्रह्माणी गुह्यरूपा सदा प्रिया।
धेनुरूपेण सा देवी तस्याः शान्तिं प्रयच्छतु॥
ओं सर्व्वदेवमयी दोग्ध्री सर्व्वलोकमयी तथा।
धेनुरूपेण सा देवी तस्याः स्वर्गं प्रयच्छतु॥

गृहीत्वार्घ्यञ्च पाद्यञ्च उत्सृजेत्तामलङ्कृताम्।
दीयते ब्राह्मणायैषा आचार्य्याय महात्मने॥
एवंविधिस्थां तां धेनुं दत्त्वा तर्पणमारभेत्।
पुच्छं गृहीत्वा पित्रादीन् वृषोत्सर्गविधानतः॥
ऐशान्याञ्चालयेत् किञ्चिदाचार्य्याय च दक्षिणाम्।
वृषभञ्च ततो दद्यादाचार्य्याय गुणान्वितम्॥
पूजयेद्ब्राह्मणांश्चैव वस्त्रमाल्यादिभिस्ततः।
कांस्यपात्रं वस्त्रयुग्मं सुवर्णञ्च विशेषतः॥
आचार्य्याय प्रदातव्यं ब्रह्मणे कनकं तथा।
आगतान् पूजयेद्भक्त्या यथाशक्ति विधानतः॥
दीनानाथकृपणादींश्च अन्नाद्यैः परितोषयेत्॥"

इति कापिले धेनुदानप्रमाणम्॥ * ॥

पुस्तकान्तरे पाठाधिक्यं यथा,—

"एकादशाहे प्रेतायाः षण्मासे चाब्दिके तथा।
त्रिपक्षे मासिके वापि दद्याद्धेनुं सुपूजिताम्॥

तथा वराहपुराणम्।

अयने विषुवेऽभ्यां युगाद्यापूर्णिमासु च।
दर्शे मन्वन्तरे चैव धेनुं दद्यात् सुपूजिताम्॥

ननु आद्यश्राद्धे त्रिपक्षे वेत्यादिना आद्यश्राद्धकर्त्तव्यनित्यवृषोत्सर्गकालस्य परपरकालो गौणः। न वा सर्व्वे कालाः स्युः। तत्र नाद्यः त्रिपक्षादौ श्रिष्टाचारविरोधात्। नापि द्वितीयः त्रिपक्षादौ नित्यत्वबोधकाभावात्। वस्तुतः आद्यश्राद्धे वृषोत्सर्गस्य नित्यत्वं त्रिपक्षादौ काम्यत्वम्। आद्यश्राद्धपदं अशौचान्तद्वितीयदिनपरम्। अशौचान्तादृद्वितीयेऽह्नीत्यादेकवाक्यत्वात्। अत्र च आद्यश्राद्धस्य विघ्नपतिततत्त्वन एकादशाहादौ क्रियमाणत्वे वृषोत्सर्गमपि न कुर्य्यात्। आद्यश्राद्धदिने वृषोत्सर्गाकरणे त्रिपक्षाद्यन्यतमकालेऽपि वृषोत्सर्गस्यावश्यप्रेतत्वपरीहारकत्वेन तस्य पुनः संवत्सरसाध्यसङ्कल्पस्य नित्यत्वं कल्प्यम्। एवं धेनुदानस्यापि। अतएव पूर्व्वसंवत्सरे मलमासपातेऽपि प्रागङ्गीकृतत्वेन कार्य्य एव इति नवीना जगुः। एककर्तृकानेकवृषोत्सर्गोऽपि श्रिष्टाचार एकदिनेऽपि। तथा हि स्वर्गलोकगमनफलश्रुतेः काम्यत्वेन यो भूय आरभते तस्मिन् फले विशेष इति न्यायादविरोधः॥ ननु नैमित्तिकत्वात् कथमाद्यत्तिः सङ्कल्पतस्ते ततः श्राद्धार्थ इति न्यायात्। न चैकत्र क्रियाद्वयमिति वचनाच्च। अत्रायं विशेषः। काम्यनैमित्तिकं फलविशेषार्थं भूयः कार्य्यं नैमित्तिकमात्रं सङ्कल्पदेव। किञ्च। संक्रान्त्यादिनिमित्तकश्राद्धमपि पुनः पुनः स्यात्। मैवं तत्र पिण्डप्रक्रियोपप्रधानफलस्य वस्त्वेन चरितार्थ इति॥ * ॥ अत्रोक्तानि सर्व्वाण्येतानि वचनानि तिर्य्यग्धिकरणन्यायमूलानि। तथा हि तिर्य्यग्धिकरणे तिर्य्यक्पङ्क्त्यार्षेयदेवतागामनधिकार इति यागमात्रे उक्तम्। तत्र हेतवः तिरश्चां विशिष्टान्तःकरणविरहात् पङ्क्तेः प्रचरणविरहात् आर्षेयाणां अन्यवधिर्मूकानामवैदग्ध्यश्रवणोच्चारणविरहात् साङ्गयागासामर्थ्ये तेषां यथा यागानधिकारस्तद्वदत्र

स्वपितुः पिण्डदत्वेषु अधिकारो न विद्यते। इति छन्दोगपरिशिष्टे अग्निष्वात्ताद्यन्तर्गणसङ्गा जीवत्पितृकश्चेतानन्यांश्चेतर इति कात्यायनसूत्रे च जीवत्पितृकस्य पितृतर्पणनिषेधात् वृषोत्सर्गे तदङ्गभूततत्पुच्छगलितोदकतर्पणविरहात् साङ्गकरणासामर्थ्ये वृषोत्सर्गानधिकारः। अतएव हेतुनिर्णयेऽपि। अनूचितस्त्रियां करणीभूतगर्भाधेन यागवद्वृषोत्सर्गस्य बाध उक्तो वाचस्पतिमिश्रेण। धेनुदानाङ्गतर्पणे तु प्रधानाधिकारश्रुतेः जीवत्पितृकाधिकृतविशेषविधानाच्चाधिकार एवाभ्युदयिकश्राद्धवत् जन्मास्युपनयनाङ्गसग्रिखवपनवच्च। अयन्तु सामान्यशास्त्रोपजीवित्वेन निषेधः पर्य्युदास एव। स तु यदि पतिपुत्रवद्भिन्नाया वृषोत्सर्गं कुर्य्यादित्येव मात्रस्तदा पुत्र इत्यादिवचनभागवैयर्थ्यं स्यात्। यदि च जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्य्यात् इत्येव मात्रस्तदा पूर्व्वभागवैयर्थ्यं स्यात्। यदि वा पतिपुत्रवत्या जीवत्पितृकपुत्रभिन्नो वृषोत्सर्गं कुर्य्यादित विशिष्टरूपस्यापि पतिपुत्रवत्यास्तदुभयरहितायाश्च जीवत्पितृकपौत्रादिना वृषोत्सर्गः स्यात्। स चायुक्त एव प्रागुक्तवचनन्यायविरोधात्। तस्मात् समुदायवचनसार्थक्याय पतिपुत्रवद्भिन्नाया वृषोत्सर्गं कुर्य्यात्। तथा जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्य्यात् इति वचनन्यायसंवादाद्वाक्यद्वयमेव सिध्यति। प्रमाणवह्नौरवस्य सर्व्वाङ्गीकृतत्वात्। दर्शपौर्णमासयोः षट्प्राधानापूर्व्ववत्। अथवोक्तदेवलादिवचने ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानत इत्यन्तकापिलसकलवचनपर्य्यालोचनया कनिष्ठपुत्रवतीभिन्नपतिपुत्रवतीतरजनस्यकापिलप्रतिप्रसूतकनिष्ठपुत्रभिन्नजीवत्पितृकात् अन्यो जनो वृषोत्सर्गं कुर्य्यात्। इति सामान्यत एव वृषोत्सर्गविधिः। तथा पतिपुत्रवत्या ज्येष्ठपुत्र एव चन्दनाङ्कितधेनुसूत्सृजेदिति विधिश्च सिध्यति। ततश्च पतिपुत्रवत्याः कनिष्ठपुत्रसत्त्व एव तेन तदन्यस्तपितृकेण वा वृषोत्सर्गः कार्य्यः। कनिष्ठपुत्राभावे तु न केनापि। एवं पत्न्यादिना चन्दनधेनुदानमिति। प्रतिप्रसूतकनिष्ठान्यजीवत्पितृकेण न कस्यापि वृषोत्सर्गः कार्य्य इत्यपि च पर्य्यवसितम्॥ वस्तुतस्तु पतिपुत्रवत्या वृषोत्सर्गनिषेधे तत्पुत्रस्य जीवत्पितृकत्वेनानधिकार एव हेतुः न तु स्त्रियाः पतिसत्त्वं पुत्रसत्त्वं वा। मृतपुत्रेत्यादिप्रागुक्तकापिलवचने पतिसत्त्वे कनिष्ठपुत्रसत्त्वे च वृषोत्सर्गावगतेः। तत्पुत्रस्य पितुः सत्त्व एवानधिकारोक्त्या तत्स्मरणे वृषोत्सर्गावगमाच्च। न वा तदुभयसत्त्वं मिलितं उक्तन्यायावगततत्पुत्रस्य जीवत्पितृकत्वहेतोरेव ताद्दृग्निषेधप्राप्तेः पतिपुत्रसत्त्वयोर्निर्बीजहेतुत्वकल्पनानौचित्यात् तयोर्व्यावर्त्तकहेतुत्वे तु अदृष्टकल्पनाया अन्याय्यत्वात् सिद्धजीवत्पितृकनिषेधप्रयुक्तया पतिपुत्रवत्या निषेधोपपत्तौ अधिकानिषेधकल्पने

गौरवाच्च। यस्तु जीवत्पितृकस्य वृषोत्सर्गनिषेधे पतिपुत्रवत्या: एकपुत्रसंहार: सोऽपि तस्या: पुत्रानधिकारमात्रप्रयुक्तविहितवृषोत्सर्गाभावभागित्वानुवाद:। पूर्ववाक्यावगतधेनुदानस्य वृषोत्सर्गस्थानीयत्वज्ञापनार्थ एवेति प्रागपि निरूपितम्। ततश्चोक्तवचने तिर्यग्गधिकरणन्यायप्राप्तं जीवत्पितृकस्य वृषोत्सर्गकर्मत्वाभावमनूद्य सपतिकाया वृषोत्सर्गस्थाने चन्दनाङ्कितधेनूत्सर्ग एव विधीयते। एतेन वृषोत्सर्गकर्मणि कपिलप्रतिप्रसूतसपतिकावृषोत्सर्गश्रुतिमत्कनिष्ठपुत्राद्यजीवत्पितृकेतरत्वविशेषवंशं सपतिकाया वृषोत्सर्गस्थाने ज्येष्ठपुत्रस्येव चन्दनाङ्कितधेनूत्सर्गमात्रञ्च लभ्यते। अतो जीवत्पितृकेण काम्यवृषोत्सर्ग: पतिते प्रव्रजिते वा पितरि जीवति पितामहादिवृषोत्सर्गश्च न कार्य्य:। एवं सपतिकाया अपि पुत्रस्य कर्मयोग्यत्वे असत्त्वे वा पत्या कन्यादिना वा वृषोत्सर्ग: कार्य्य एवेति स्थितम्। इदन्तु रत्नाकरहलायुधाचार्य्यचूड़ामणिविद्याभूषणशुभङ्करमहादेवभट्टाचार्य्यप्रभृतीनामपि सम्मतं तेषां पृथक् पृथक् पद्धतिरपि प्रचरति। क्वचिद्देशे स्मार्त्तभट्टाचार्य्यस्यापि सम्मूलपद्धतिर्दृश्यते। अतएवात्र विशेषादग्निनामनाचारोऽनाचारएव। अत्र भविष्योक्तप्रकारस्तु वैकल्पिक एव। स्मृतिग्रन्थे विकल्पो हि आकाङ्क्षापूरके सतीति जैमिन्युक्ते:। तत्र त्रयपूजाहोमाद्यङ्गेषु विशेषमन्त्रतन्त्रोक्ते:। कापिलकल्पेन वृषोत्सर्गधर्म्मातिदेशेन विशेषोक्तनिरासाच्च॥३॥ सम्प्रति विचारितकापिलकल्पप्रयोगोऽभिधीयते यथा। गोग्रासादौ वितानयुक्ते प्राग्उदक्प्रवणं देशं गोमयेनोपलिप्य कृतनित्यक्रिय आचान्त: कुशहस्तो द्विराचम्य प्राङ्मुख: ओं तद्विष्णो: परमं पदं इति विष्णुं स्मृत्वा नत्वा च उदङ्मुख: ओं तत् सदद्यामुकार्य्य कृप्तिलजलपूर्णताम्रपात्रमादाय विशेषानुपदेशात् सुस्थचान्द्रमासोल्लेखेन अद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्राया: प्रेताया: अमुकाया: अग्नौचान्ताद्वितीयेऽह्नि अमुकगोत्राया: प्रेताया: अमुकाया: प्रेतलोकविमुक्तत्वस्वर्गलोकगमनकाम: चन्दनाङ्कितसवत्सधेनुदानकर्म्माहं करिष्यामीति संकल्पयेत्। ततश्चन्दनमेधाभ्यां लिखेत्। तत: स्वस्तीत्वा सङ्कल्पसूक्तं पठेत्। तत: प्रथमं ब्रह्मवरणम्। तत्र उत्तरामुखं ब्रह्माणमुपवेश्य तत्समीपे आसनमानीय प्राङ्मुखो यजमान: प्राञ्जलि: ओं साध्वभवानास्तां इति वदेत्। ओं साध्वहमासे इति प्रतिवचनं दत्त्वा ब्रह्मा तदासनं उपविशति। तत: कर्त्ता ओम् अर्चयिष्यामो भवन्तं इति वदेत्। ओम् अर्चेति प्रतिवचनम्। ततो गन्धपुष्पताम्बूलवस्त्राभरणैस्तं संपूज्य तद्दक्षिणं जानु स्पृष्ट्वा ओम् अद्यामुकेमासि अमुकेपक्षेऽमुकतिथौ अमुकगोत्राया: प्रेताया: अमुकाया अग्नौचान्ताद्वितीयेऽह्नि अमुकगोत्रममुकप्रवरं श्रीअमुकदेवशर्म्माणं त्वामस्मिन् चन्दनाङ्कितधेनुदानाङ्गहोमकर्म्मणि ब्रह्मकर्म्मकरणाय गन्धादिभिरभ्यर्च्याहं वृणे इति ब्रह्माणं वृणुयात्। ओं वृतोऽस्मीति प्रतिवचनम्। ओं यथाविहितं ब्रह्म कर्म्म कुरु। ओं यथाज्ञानं करवाणीति प्रतिवचनम्। स्वयं गानाशक्तौ ब्रह्मकर्म्म करणायेत्यत्र ब्रह्मादिकर्म्मकरणायेति वदेत्। स्वयं होमासामर्थ्ये होतारं वृणुयात्। तत्र होत्रकर्म्मकरणायेति विशेष:। एवं तन्त्रधारकाचार्य्यमपि। आचार्य्यान्तराभावे ब्रह्मैवाचार्य्यत्वेनापि वरणीय:। तत्र ब्रह्माचार्य्यकर्म्मकरणायेति विशेष:। एवं प्रागुक्तवत् सदस्यवरणमपि। हस्ताङ्कुशादिमानन्तु यानमानिकमेव सर्व्वत्र ग्राह्यम्। तत: पुण्याहस्वस्त्यृद्धिवाचनं कृत्वा चन्दनाङ्कितधेनुदाननिमित्तकहोमीयहविरुचयलकामो भारतनामोच्चारणं कुर्य्यात्। ततो यजमानो होता वा गायत्र्या गोमन्त्रं ओं गन्धद्वारेत्यादिना गोमयं ओम् आप्यायस्वेत्यादिना दुग्धं ओं दधिक्राव्ण इत्यादिना दधि ओं तेजोऽसीत्यादिना घृतं ओं देवस्य त्वा सवितु: प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इति कुशोदकञ्च प्रोक्षयित्वा गायत्र्या सर्व्वमेकीकृत्य तेन वेदीमभ्युक्ष्य तत्र घटान् संस्थाप्य गन्धैर्गुरून् विष्णुञ्च संपूजयेत्। ततो हस्तप्रमाणं स्रुक्खिलं शुक्लैराङ्गारास्निकेशतुषादिरहितं पूर्व्वोत्तरप्रवणं समं वा गोमयेनोपलिप्य तत्र स्वस्त्युक्तविधिनाग्निं संस्थाप्य स्वस्त्युक्तवृषोत्सर्गपद्धतिक्रमेण कर्म्म कृत्वा प्राङ्मुखो धेनुमग्निसमीपं नीत्वा ओं मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नोऽश्वेषु रीरिष:। वीराम्मा नो रुद्रभामितोऽवधीर्हविष्मन्त: सदमित्त्वा हवामहे। इति मन्त्रेण धेनोर्वामसक्थिनि षड्डुलं चिह्नमूलं चन्दनेन कुशेन लिखेत्। वीराम्मा न इति सामगानाम्। यजुषान्तु मा नो वीरानिति मन्त्रभागे पाठ:। तत: ओं वृषोऽसि भानुना द्युमन्तं त्वा हवामहे पवमान: स्वर्द्दृशम्। इति मन्त्रेण दक्षसक्थिनि पश्चाद्भुलं आरद्वीप चक्रञ्च तथैवाचार्य्यो लिखेत्। अस्मिन्नवसरे अग्नेरुत्तरे सवत्सधेनुमौलिकं यूपमारोपयेत्। तत: स्वस्त्युक्तविधिना वृषवह्निं आपयेत्। तत: सितवाससा जलमपनीय गन्धचन्दनपुष्पाञ्जनसिन्दूरगोरोचनाद्यै: स्वर्णरूप्याभ्यां रूप्यखुरैश्च वस्त्रेण कांस्यदोहेन ताम्रशृङ्गेण वराटाचामराभ्याञ्च यथायोग्यं तथा कुर्य्यो: प्रवालमालिकाभ्याञ्च धेनुं भूषयित्वा पाद्यादिभिरभ्यर्च्य स्वस्त्युक्तमन्त्रान् आवर्त्य च प्राङ्मुखीं धेनुं शुक्लवाससा यूपे बध्नीयात्। ततो यजमान उत्तरामुख: धेनोर्मस्तकादिक्रमेण तत्तन्मन्त्रै: पूजयेदृथा। शिरसि ओं ब्रह्मणे नम:। एवं ललाटे वृषभध्वजाय नम:। कर्णयो: अश्विनीकुमाराभ्याम्। चक्षुषो: सूर्य्यभास्कराभ्याम्। जिह्वायां सरस्वत्यै। दन्तेषु वसुभ्य:। ओष्ठयो: सन्ध्यायै। ग्रीवायां नीलकण्ठाय। हृदि स्कन्दाय। रोमकूपेषु ऋषिभ्य:। दक्षपार्श्वे कुबेराय। वामपार्श्वे वरुणाय। रोमाग्रे रश्मिभ्य:। ऊरुषु धर्म्माय। जङ्घासु अधर्म्माय। श्रोणीतटे पितृभ्य:। खुरमध्ये गन्धर्व्वेभ्य:। खुराग्रेषु अप्सरोभ्य:। लाङ्गूले हृदयादिभ्य:। गोमये महालक्ष्म्यै। गोमूत्रे गङ्गायै। पयोधरेषु चतुःसागराय। एवं संपूज्य पठेत्।

ओम् इन्द्रस्य च त्वमिन्द्राणी विष्णोर्लक्ष्मीश्च या स्मृता।
रुद्रस्य देवी या गौरी सा देवी वरदास्तु मे॥
ओं या लक्ष्मीर्लोकपालानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी मम पापं व्यपोहतु॥
ओं देवस्या या च रुद्राणी शङ्करस्य सदा प्रिया।
धेनुरूपेण सा देवी तस्या: शान्तिं प्रयच्छतु॥
ओं सर्व्वदेवमयी दोग्ध्री सर्व्वलोकमयी तथा।
धेनुरूपेण सा देवी तस्या: स्वर्गं प्रयच्छतु॥

तत: ओम् आचार्य्याय नम: इत्यनेनोदङ्मुखं सम्प्रदानब्राह्मणं पाद्यादिभि: संपूज्य एवं ओं रुद्राय नम: इति तद्देवतां संपूज्य ओं चन्दनाङ्कितसवत्सधेनवे नम: इत्यनेन पाद्यार्घ्याचमनीयगन्धपुष्पैर्धेनुं संपूज्य संप्रोक्ष्य च ब्राह्मणहस्ते जलं दत्त्वा कृप्ततिलजलान्यादाय ओं तत् सदद्यामुकेमासि अमुके पक्षे अमुकतिथावमुकगोत्राया: प्रेताया अमुकाया अग्नौचान्ताद्वितीयेऽह्नि अमुकगोत्राया: प्रेताया अमुकाया: प्रेतलोकविमुक्तत्वस्वर्गलोकगमनकामोऽहं एतां सालङ्कारां चन्दनाङ्कितसवत्सधेनुं रुद्रदेवताकां अमुकगोत्राय श्रीअमुकदेवशर्म्मणे आचार्य्यब्राह्मणाय तुभ्यं ददानीति ब्राह्मणहस्ते जलं दद्यात्। तत: सम्प्रदानब्राह्मण: पुच्छं धृत्वा ओमित्युक्त्वा प्रतिगृह्य स्वस्तीत्युक्त्वा च सावित्रीं पठेत्। ततो धेनुरियं रुद्रदेवताकेति वदेत्। यथाशाखं कामस्तुतिञ्च पठेत्। यथा सामवेदे। ओं कस्तं कस्मा अदात् काम: कामायादात् कामो दाता काम: प्रतिग्रहीता काम: समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते॥ यजुर्व्वेदे तु। ओं द्यौस्त्वा परिददातु पृथिवी त्वा प्रतिगृह्णातु कोऽदात् कस्मा अदात् काम: कामायादात् कामो दाता काम: प्रतिग्रहीता कामैतत्ते तव कामदुघात् भुनजामहै॥ ऋग्वेदे तु। सामगमन्त्रान्ते। ओं हरिरसि द्यौस्त्वा परिददातु पृथिवी त्वा प्रतिगृह्णातु। इदमधिकम्। ततो यजमान: ओं अद्येत्यादि कृतैतत्सालङ्कारचन्दनाङ्कितसवत्सधेनुदानकर्म्मण: साङ्गतार्थं दक्षिणामिमां हिरण्यं तन्मूल्यं वा विष्णुदैवतं अमुकगोत्राय श्रीअमुकदेवशर्म्मणे आचार्य्याय ब्राह्मणाय तुभ्यमहं ददानीत्याचार्य्याय दद्यात्। आचार्य्यस्तु ओमिति गृहीत्वा

स्वस्तीति वदेत्। ततो वृषोत्सर्गवन्मन्त्रोहेन स्वस्वगृह्योक्तआद्यादिशेषं कर्म्म समापयेत्। ततः सदस्यदक्षिणां दत्त्वा आहूतान् वक्ष्यमाल्यादिभिः पूजयेत्। सामगचेदिदानीं ब्रह्मा होताचार्य्यसदस्येभ्यो ब्राह्मणेभ्यो दक्षिणां वृषोत्सर्गवद्दद्यात्। अन्यवेदी तु स्वस्वगृह्योक्तरीत्या यथास्थानं दक्षिणां वृषोत्सर्गवद्दद्यात्। शूद्रस्तु यजुर्वेदिवत् सर्व्वं कुर्य्यात्। किन्तु मन्त्रपाठं ब्राह्मणेन कारयेत्। दीनानाथादींश्च वस्त्रान्नादैस्तोषयेदिति॥"*॥ इति श्रीचन्द्रशेखरवाचस्पतिभट्टाचार्य्यविरचितः चन्द्रनाङ्कितधेनुदानसविधिप्रयोगः समाप्तः॥

चन्दनपुष्पं, क्ली, (चन्दनमिव सुगन्धि पुष्पं यस्य।) लवङ्गम्। इति राजनिर्घण्टः॥

चन्दनप्यारिवा, स्त्री, (चन्दनगोपी प्यारिवा। प्याकपार्थिवादिवत् समासः।) प्यारिवाविशेषः। इति राजनिर्घण्टः॥

चन्दनसारः, पुं, (चन्दनस्येव सारो यस्य।) वज्रसारम्। इति राजनिर्घण्टः॥

चन्दना, स्त्री, (चन्दयति आह्लादयति स्वगन्धादिनेति। चदि आह्लादे+णिच्+युच्। स्त्रियां टाप्।) प्यारिवाविशेषः। इति राजनिर्घण्टः॥ नदीविशेषः। सा तु मधुखाख्यनगरसमीपे प्रसिद्धा॥

चन्दनाचलः, पुं, (चन्दनस्य चन्दनोत्पादको वा अचलः। चन्दनाकरः पर्व्वत इत्यर्थः।) मलयपर्व्वतः। इति जटाधरः॥

चन्दनाद्रिः, पुं, (चन्दनस्य चन्दनोत्पादको वा अद्रिः पर्व्वतः।) मलयपर्व्वतः। इति त्रिकाण्डशेषः॥

चन्दनी, स्त्री, (चन्दयति आह्लादयति जलादिदानेनेत्यर्थः। चन्दन+ङीष्) नदीविशेषः। इति मेदिनी। ने। ६०॥ (यथा, गोः रामायणे। ४। ४०। २०।
"रुचिरां कुटिलाञ्चैव चन्दनीं चापगां तथा॥")

चन्दनीया, स्त्री, (चन्द्यते दीप्यतेऽनया। चदि+करणे अनीयर्।) गोरोचना। इति राजनिर्घण्टः॥

चन्द्रिः, पुं, (चन्दन्ति हृष्यन्ति लोका येन। चदि आह्लादे+"इषिमदीति।" उणां। १।५१। इति किरच्।) चन्द्रः। हस्ती। इति मेदिनी। रे। १५२॥

चन्द्रं, क्ली, (चन्दति दीप्यते इति। चदि+"स्फायितञीति।"उणां। २।१३। इति रक्।) स्वर्णम्। पुष्करम्। इति राजनिर्घण्टः॥ (वृत्तविशेषः। यथा, वृत्तरत्ने।
"द्विजवरगणयुगसुपधाय परिकलय करमथनगणयुगलमिह गन्धयुगमपि वितर। पदिदृपतिभणितमिति चन्द्रमिदमिति ब्रुवत सकलकविकुलहृदयमोदकरमवतुत॥")

चन्द्रः, पुं, (चन्दयति आह्लादयति चन्द्यते दीप्यते इति वा। चन्द+"स्फायितञीति।" उणां। २। १३। इति रक्।) देवताविशेषः। चाँद इति भाषा। तत्पर्य्यायः। हिमांशुः २ चन्द्रमाः ३ इन्दुः ४ कुमुदबान्धवः ५ विधुः ६ सुधांशुः ७ शुभांशुः ८ ओषधीशः ९ निशापतिः १० अब्जः ११ जैवातृकः १२ सोमः १३ क्षपाः १४ मृगाङ्कः १५ कलानिधिः १६ द्विजराजः १७ ग्रहगणेशः १८ नक्षत्रेशः १९ क्षपाकरः २०। इत्यमरः। १। ३। १३—१४॥ दोषाकरः २१ निशीथिनीनाथः २२ शुभ्ररोचिः २३ एणाङ्कः २४ शीतरश्मिः २५। इति शब्दान्तरम्॥ मथितनवनीतः २६ सारसः २७ श्वेतवाहनः २८ नक्षत्रनेमिः २९ उडुपः ३० सुधासूतिः ३१ तिथिग्रन्थीः ३२ अमतिः ३३ चन्दिरः ३४ चित्राटीरः ३५ पक्षधरः ३६ अजः ३७ नभश्चमसः ३८ राजा ३९ रोहिणीशः ४० अत्रिनेत्रजः ४१ पक्षजः ४२ सिन्धुजन्मा ४३ दक्षशापः ४४ हरचूड़ामणिः ४५ माः ४६ तारापीड़ः ४७ निशामणिः ४८। इति जटाधरः॥ मृगलाञ्छनः ४९ दर्शविपत्तिः ५० छायाभृद्गदरः ५१ गदनेमिः ५२ दाक्षायणीपतिः ५३ जयौषधिजः ५४ सुधाकरः ५५ सुधाधारः ५६ शीतभानुः ५७ तमोहरः ५८ तुषारकिरणः ५९ हरिः ६० हिमद्युतिः ६१ द्विजपतिः ६२ विश्वधा ६३ अष्टतदीधितिः ६४ हरिताङ्गः ६५ रोहिणीपतिः ६६ सिन्धुनन्दनः ६७ तमोनुत् ६८ रजतिलकः ६९ कुमुदेशः ७० क्षीरोदनन्दनः ७१ कान्तः ७२ कलावान् ७३ यामिनीपतिः ७४ सिप्रः ७५ मृगपिप्पुः ७६ सुधानिधिः ७७ तुङ्गी ७८ पद्मजन्मा ७९ चन्दः ८० अत्रिनयनसमुद्भवः ८१ पीयूषमहाः ८२ शीतमरीचिः ८३ शीतलः ८४। इति शब्दरत्नावली॥ त्रिनेत्रचूड़ामणिः ८५ अत्रिनेत्रभूः ८६ सुधाङ्गः ८७ परिशाः ८८ वलक्षगुः ८९ तुङ्गीपतिः ९० यज्ञनाम्यतिः ९१ पर्व्वधिः ९२ क्षेदुः ९३ जयन्तः ९४ तपसः ९५ खचमसः ९६ विकसः ९७। इति त्रिकाण्डशेषः॥ दक्षवाजी ९८ श्वेतवाजी ९९ अष्टतनुः १०० कौमुदीपतिः १०१ कुमुदिनीपतिः १०२ भपतिः १०३ दक्षजापतिः १०४ ओषधीपतिः १०५ कलाभृत् १०६ ग्रहभृत् १०७ एणभृत् १०८ छायाभृत् १०९ अत्रिदृग्जः ११० निशाकरम् १११ निशाकरः ११२ अष्टतः ११३ श्वेतद्युतिः ११४। इति हेमचन्द्रः। २। १६॥ *॥ तस्योत्पत्तिर्यथा,—
"ब्रह्मणो मानसः पुत्रस्त्रिनेत्रसम महातपाः।
सृष्टिकामः प्रजा वत्स! तपस्तेपे सुदुश्चरम्॥
त्रीणि वर्षसहस्राणि दिव्यानीतीह नः श्रुतम्।
ऊर्द्धबाहुरभूत् तस्य रेतः सोमत्वमीयिवत्॥
नेत्राभ्यां तस्य सुस्राव दशधा द्योतयद्दिशः।
तं गर्भं ब्रह्मणादिष्टा दश देवी दधुर्दिशः॥
संगत्यैव महाराज! नैव ताः समशक्नुवन्।
यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः॥
ततस्ताभिः सहैवासौ निपपात वसुन्धराम्।
पतितं सोममालोक्य ब्रह्मा लोकपितामहः॥
रथमारोपयामास लोकानां हितकाम्यया।
स तेन रथमुख्येन सागरान्तां वसुन्धराम्॥
त्रिःसप्तकृत्वो दुहितुर्योऽकार्षीत्तं प्रदक्षिणम्।
तस्य तत्प्लावितं तेजः पृथिवीमन्वपद्यत॥
तेनौषधयः समुद्भूता याभिः सन्धार्य्यते जगत्।
स लब्धतेजा भगवान् ब्रह्मणा वर्द्धितः स्वयम्॥"
तस्य चौरत्वपूर्व्वतयोः कालो यथा,—
"कृष्णाष्टमीदिनादूर्द्धं यावच्छुक्लाष्टमीदिनम्।
तावत् कालं ग्रहो चौरः पूर्व्वस्तोपरि स्मृतः॥"
इत्यग्निपुराणे ज्योतिःशास्त्रम्॥
तस्य क्षयवृद्धिकारणं यथा, पाद्मे स्वर्गखण्डे।
"अश्विन्यादास्तु दक्षस्य उपयेमे सुता विधुः।
रोहिण्यामेव सततं बह्वप्रेमा ररास ह॥
दृष्ट्वा तदितरास्तास्च तप्ताः पितरमब्रुवन्।
असाकं कामदस्तात! जामाता तव रोहिणीम्।
रमयत्येव सततं तेन तप्ता वयं पितः!॥
तत् श्रुत्वा चाप्रियं दक्षः सोममाह भजस्व भोः।
प्रेम्णा समेन सर्व्वासु दुहितृष्मम मानद!॥
अयुक्तं तद्वचो नैव सोमः सप्रेम रोहिणीम्।
तथैव रमयामास श्रुत्वा दक्षश्चुकोप ह॥
शशाप ते न भविता क्षयत्वं मद्वचोऽतिगः।
यस्माच्च परिग्लानो भव त्वं चौररेतकः॥
अथ क्षयमिते तस्मिन् सर्व्वास्ताः सहिताः क्षियः।
पितरं शरणं प्राप्ताः क्षीयते नः पतिः पितः!॥
न वयं तेन वर्त्स्यामो विना सुखनिराकृताः॥
उवाच दक्षस्ताः सर्व्वाः शापो मे नान्यथा भवेत्।
मासमध्ये पक्षमेकं वर्द्धतां स क्रमेण वै॥
क्षयं क्रमेण प्राप्नोतु पक्षमेकं क्षयस्थया।
एवं शापं ददत्येव दक्षो देवो क्षयस्थया॥
तथैव राजते योनि क्षयवृद्धी दधद्विधुः॥"
स च गौरवर्णः वायुकोणस्थोवैश्यजातिसत्त्वगुणकर्कटराशिरुग्रगणिरोगचरौषधवरसमुत्पत्तिगैरिकादिधातुसर्पाणामधिपतिः। आर्द्रभूमिचारी तपस्वी अपराह्णकाले प्रबलः श्लेष्मप्रकृतिः स्थूलो युवा शुभग्रहः शुभाभश्च। इति ताजकज्ञातकादयः॥ अर्द्धोनः शुक्लो यामः। इति समयाप्रदीपः॥ *॥ कर्पूरम्। स्वर्णम्। (यथा, ऋग्वेदे। १। १४१। १२। [चक्रधरः॥")
"उतनः सुदोत्मा जीरात्रो होता मन्द्रः शृणुजलम्। काम्बिलः। इति मेदिनी। रे। ३१॥ हीमविशेषः। इति शब्दमाला॥ विसर्गः। इति तन्त्रम्॥ कमनीयः। मेचकः। स तु वर्हिचन्द्रकः। इति हेमचन्द्रः॥ रक्तरजतम्। तस्य शोभासुक्ताफलम्। (योगोक्तक्रीड़ाकृती। यथा, हठयोगप्रदीपिकायाम्। २। ७।
"वह्निपद्मासनो योगी प्राणं चन्द्रेण पूरयेत्॥"
"चन्द्रेण चन्द्रनाथेऽयात्।" इति तट्टीका॥ भ्रूमध्यभागस्थसोममण्डलम्। यथा, तत्रैव। ३। ४६।
"चन्द्रात् स्रवति यः सारः स स्यादमरवारुणी॥"
"चन्द्रात्भ्रुवोरन्तर्वामभागस्थात् सोमात्।"
तट्टीका॥)
आह्लादजनकद्रव्ये त्रि। इति भरतधृतवाक्यात्॥

चन्द्रकं, क्ली, (चन्द्र इव चन्द्रप्रभा इव कायतीति। कै+कः। वर्णसाहश्यात्तथात्वम्।) सितमरिचम्। इति राजनिर्घण्टः॥

चन्द्रकः, पुं, (चन्द्र इव कायति प्रकाशते इति। कै+कः।) बर्हनेत्रम्। मयूरपुच्छेर चाँद इति भाषा। तत्पर्य्यायः। मेचकः २। इत्यमरः। २।५।३१॥ (यथा, गीतगोविन्दे। २। ३।

"चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम्॥")

नखः। इति शब्दचन्द्रिका॥ मत्स्यविशेषः। चाँदा माछ इति भाषा। अस्य गुणाः। अनभिष्यन्दित्वम्। मधुरत्वम्। बलवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायः। चलत्पूर्णिमा २ चन्द्रचञ्चला ३ चन्द्रिका ४। इति शब्दरत्नावली॥ (मण्डलम्। यथा, माघे। ५। ४०।

"यां चन्द्रकैर्मदजलस्य महानदीनां
नेत्रश्रियं विकसतो विदधुर्गजेन्द्राः॥"

"चन्द्रकैश्चन्द्राकारैर्मण्डलैर्मदानदीनाम्।" इति मल्लिनाथः।) चन्द्रशब्दात् स्वार्थे कः चन्द्रश्च॥

चन्द्रकला, स्त्री, (चन्द्रं चन्द्राकारं सुखभागं कलयतीति। कलि+अच् टाप् च।) द्रगड़वाद्यम्। वाचामत्स्यः। इति शब्दरत्नावली॥ (चन्द्रस्य कला।) चन्द्रस्य षोड़शभागेषु भागः। तद्यथा,—

"पूषा यशा सुमनसा रतिः प्राप्तिस्तथा धृतिः।
शुद्धिः सौम्या मरीचिश्च तथा चैवांशुमालिनी॥
अङ्गिरा शूलिनी चेति छाया सम्पूर्णमण्डला।
तद्विद्येवाऽमृता चेति कलाः सोमस्य षोड़श॥"

आसां प्रयोजनं तिथिभेदे स्त्रीणामङ्गविशेषे स्थितस्य कामस्य प्रणवादिसविन्दुप्रत्येकस्वरयुक्तनमोऽन्ततत्तत्प्रत्येककलानामरूपैर्मन्त्रैश्चालनम्। इति कामशास्त्रम्॥ * ॥ तन्त्रोक्ता कला यथा,

"अमृता मानदा पूषा पुष्टिस्तुष्टी रतिर्धृतिः।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा॥
पूर्णापूर्णामृताकामदायिन्यः शशिनः कलाः।
आसां प्रयोजनं कलावतीदीक्षादौ पूजनम्॥"

इति रुद्रयामलम्॥

(चन्द्रः। यथा, कथासरित्सागरे। १। ३६।

"स च दत्तमखस्तेन नाग्निहोत्री मन्युना मया।
ततो जातो हिमाद्रेरुमध्ये चन्द्रकला यथा॥")

चन्द्रकान्तं, क्ली, (चन्द्रवत् कान्तं कान्तिः कमनीयता अस्य।) श्वेतचन्दनम्। कैरवम्। इति रत्नमाला॥

चन्द्रकान्तः, पुं, (चन्द्रः कान्तः प्रियो यस्य।) कैरवम्। (चन्द्र इव कान्तः कान्तियुक्तः। चन्द्रः कान्तः अभीष्टो अधिष्ठातृदेवोऽस्येति वा।) मणिभेदः। इति मेदिनी। ते। १६५॥ अस्य पर्य्यायाः। चन्द्रमणिः २ चान्द्रः ३ चन्द्रोपलः ४। इति हेमचन्द्रः। ४। १६२॥ इन्दुकान्तः ५ चन्द्राश्मा ६ संश्रवोपलः ७ शीताश्मा ८ चन्द्रिकाश्मकः ९ अग्निकान्तः १०। (यथा, पञ्चतन्त्रे। १। ८८।

"परीक्षका यत्र न सन्ति देशे
नार्घन्ति रत्नानि समुद्रजानि।
आभीरदेशे किल चन्द्रकान्तं
चिभिर्वराटैर्विपणन्ति गोपाः॥")

अस्य गुणाः। स्निग्धत्वम्। स्निग्धत्वम्। असदाहग्रहालक्ष्मीनाशित्वम्। शिवप्रीतिकरत्वम्। स्वच्छत्वञ्च॥* तदुद्भववारिगुणाः। विमलत्वम्। लघुत्वम्। पित्तमूर्च्छापिपासादाहकासमदात्ययरोगनाशित्वञ्च। इति राजनिर्घण्टः॥

चन्द्रकान्ता, स्त्री, (चन्द्रः कान्तः प्रियो यस्याः।) रात्रिः। इति शब्दचन्द्रिका॥ (चन्द्रस्य कान्ता।) चन्द्रपत्नी च॥

चन्द्रकालानलं, क्ली, चक्रविशेषः। यथा,—

"चन्द्रकालानलं चक्रं व्योमाकारं लिखेद्बुधः।
चतुर्दिक्षु त्रिशूलानि मध्यभिन्नानि कारयेत्॥
पूर्ब्बत्रिशूलमध्यस्थं दिग्नं ऋक्षादि लिख्यते।
त्रिशूले च बहिर्मध्ये मध्ये बहिस्त्रिशूलके॥
स्तम्भस्त्रिशूले नामर्क्षे मध्यमं बहिरष्टके।
क्षेमलाभभयप्राप्ताः नामर्क्षे चन्द्रगर्भगे॥
वर्जनीयं प्रयत्नेन प्रथमाष्टत्रिपञ्चकम्॥"

इति समयाष्टतम्॥

चन्द्रकी, पुं, स्त्री, (चन्द्रको विद्यतेऽस्येति अच्। चन्द्रक+ङीष्।) मयूरः। इति त्रिकाण्डशेषः॥

चन्द्रकुण्डः, पुं, (चन्द्रस्य कुण्डः चन्द्ररश्मिनिर्म्मितः कुण्डो वा। चन्द्राधिष्ठातृकः कुण्ड इत्यर्थः।) कामरूपस्थसरोवरविशेषः। (यथा, कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्याये।

"चन्द्ररश्मिसमुद्भूत! चन्द्रकुण्ड! महोदधे!॥")

चन्द्रकूटः, पुं, (चन्द्राख्यः कूटः पर्व्वतः। यद्वा, चन्द्रः कूटे शृङ्गे यस्य। प्रतिदने चन्द्रप्रदक्षिणकरणादेवास्य तथात्वम्।) कामरूपस्थपर्व्वतभेदः। यथा,—

"पूर्ब्बं वायुगिरेः शैलश्चन्द्रकूट इति स्मृतः।
त्रिकोणस्ताम्रसङ्काशस्तदूर्द्धे चन्द्रमण्डलम्॥
द्वितीयवर्णसाद्यन्तु विन्दिन्दुभ्यामलङ्कृतम्।
चन्द्रबीजमिति प्रोक्तं तेन चन्द्रं प्रपूजयेत्॥
अद्यापि प्रतिदर्शे तु पर्व्वतं तं निशापतिः।
प्रदक्षिणीकरोत्येव दशभी रश्मिभिर्युतः॥
तस्यैव पूर्ब्वभागे तु सोमकुण्डाख्यं सरः।
तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते॥
स्वर्गादवश्यतश्चन्द्रः कामाख्यासेवने यदा।
तदा तद्रश्मिसंघातनिःसृतास्तोयराशयः॥
तैस्तोयैर्व्वासवः कुण्डमकरोदिन्द्रचन्द्रयोः।
मध्ये पुण्यतमस्थाने स्वयं ब्रह्मशिलोपरि॥
चन्द्ररश्मिसमुद्भूत! चन्द्रकुण्ड! महोदधे!।
सुधासदृश! साह्लाद! त्वं चन्द्र! कलुषं हर॥
इत्यनेन तु मन्त्रेण स्नानाय चन्द्रपायसि।
चन्द्रकूटं समारुह्य पूजयेद्यस्तु तं नरः॥
अविच्छिन्ना सन्ततिस्तु सुकान्ता तस्य जायते।
परत्र चन्द्रभवनं भित्त्वा याति परं पदम्॥
तीरे तु चन्द्रकूटस्य नन्दनो नाम वै गिरिः।
तस्मिन् वसति शुक्रस्तु कामाख्यासेवने रतः॥
न्यग्भावं समासाद्य सर्व्वदेवेश्वरो हरिः।
सेवितुं चिदग्नेयानीं सततं वर्त्तते नरः॥
चन्द्रकूटस्य तु गिरेर्नन्दनस्य तथा गिरेः॥
प्रतिदर्शं तथा चन्द्रः प्रदक्षिणयति त्रिधा॥
चन्द्रकुण्डजले स्नात्वा समारुह्याथ नन्दनम्।
आराध्य शुक्रं लोकेशं महाफलमवाप्नुयात्॥"

इति कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्यायः॥

चन्द्रगुप्तः, पुं, (चन्द्रेण गुप्तः रक्षितः। चन्द्रवदाह्लादजनकरूपगुणवत्त्वात्तथात्वं वा।) राजविशेषः। (यथा, भागवते। १२। १।११—१२।

"नवनन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति।
तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ।
स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति॥")

चित्रगुप्तः। इति केचित्॥

चन्द्रगोलस्थाः, पुं, (चन्द्र एव गोलः चन्द्रगोलकस्थानं चन्द्रलोक इत्यर्थः। तत्र तिष्ठन्ति ये।) दिव्यपितरः। इति त्रिकाण्डशेषः॥ बहुवचनान्तोऽयं शब्दः॥

चन्द्रगोलिका, स्त्री, (चन्द्रगोलः साधनत्वेनास्त्यस्याः। इति ठन् टाप् च।) ज्योत्स्ना। इति हेमचन्द्रः। २। २०॥

चन्द्रचञ्चला, स्त्री, (चन्द्र इव चलच्चलस्यचन्द्रवत् चञ्चला।) चन्द्रकमत्स्यः। इति शब्दरत्नावली जटाधरश्च॥

चन्द्रदाराः, पुं. (चन्द्रस्य दाराः पत्न्यः।) अश्विन्यादिनक्षत्राणि। इति हलायुधः॥ बहुवचनान्तोऽयम्॥

चन्द्रपुष्पा, स्त्री, (चन्द्र इव पुष्पमस्याः।) श्वेतकण्टकारी। इति राजनिर्घण्टः॥

चन्द्रप्रभः, पुं, (चन्द्र इव प्रभा यस्य।) तृतीयार्हद्विशेषः। इति हेमचन्द्रः। १। २७॥ (चन्द्रप्रभाविशिष्टे, त्रि। यथा, महाभारते। ६। २०। ८।

"चन्द्रप्रभं श्वेतमथातपत्रं
सौवर्णदण्डं च तथोत्तमाङ्गे॥")

चन्द्रप्रभा, स्त्री, (चन्द्रवत् प्रभा स्निग्धादिगुणवत्त्वास्याः।) वाकुची। इति राजनिर्घण्टः॥ औषधविशेषः यथा, सुश्रुते।

"कृमिरिपुदहनयोधत्रिफलामरदारुचव्यभूनिम्बम्।
मागधिमूलं सुरसं सप्तदशैवचामाधिकत्वेन॥
लवणत्रयनिशाद्वयगजकुसुमरुगजकणातिविषाः।
कर्षांशकान्येव समानि कुर्य्यात्
पलाष्टकं चाम्लजलोर्विदध्यात्।
निष्पञ्चमुष्टस्य पुरस्य धीमान्
पलद्वयं लौहरजस्तथैव॥
सिताचतुष्कं पलमत्र वंशा
निकुम्भकुम्भत्रिसुगन्धियुक्तम्।
चन्द्रप्रभेयं गुटिका प्रयोज्या
चार्शांसि निर्गाशयते बलेव॥
भगन्दरं पाण्डुरकामलाञ्च
निर्नष्टवह्नेः कुरुते च दीप्तिम्।

हन्त्यामयान् पित्तकफानिलोत्था-
न्नाड़ीगते मर्म्मगते व्रणे च ॥
यस्यार्ब्बुदे विद्रधिराजयक्ष्मणो-
र्मेहे भगार्शे प्रबले च योज्या।
शुक्रक्षये चाश्मरिमत्रकृच्छ्रे
शुक्रप्रवाहेऽप्युदरामये च ॥
भक्तस्य पूर्व्वं सततं प्रयोज्या
तक्रानुपानं खल्व मस्तुपानम्।
व्याघो रसो जाङ्गलजो रसो वा
पयोऽथवा घृतजलानुपानम् ॥
बलेन नागस्तुरगो जवेन
दृष्ट्या सुपर्णः श्रवसे वराहः ॥
वलीपलितनिर्मुक्तो दृढोऽपि तरुणायते ॥
न पानभोज्ये परिहार्य्यमस्ति
न शीतवातातपमैथुनेषु।
शक्तुं समर्थश्च कृतप्रसादे-
नाम्ना गुडी चन्द्रमसः प्रसादात् ॥"

("हतस्ततान्धकं लौहं नागं वङ्गं समं समम्।
एलाबीजं लवङ्गञ्च जातीकोषफलन्तथा ॥
मधूकं मधुयष्टी च धात्री च समशर्करा।
कर्पूरं खादिरं सारं घृताक्ता कण्टकारिका।
अन्वेतसतुल्यांग्रमन्वलोणीद्रवैर्दिनम्।
भावयेन्मेषशृङ्गी च नागवल्ली दिनं दिनम् ॥
वटिकां वदराख्याभां नात्वा चन्द्रप्रभां पराम्।
भक्षयेत्तीव्रमेहार्त्तः सर्व्वमेहकुलान्तकम् ॥
धात्री पटोलपत्रं वा कषायं वाऽथतायुतम्।
सक्षौद्रं पाययेच्चापि सर्व्वमेहप्रशान्तये ॥"

इति चन्द्रप्रभावटी।

इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे ॥)

चन्द्रभागः, पुं, (भज्+भावे घञ्। चन्द्रस्य भागो-विभागो यत्र इति।) पर्व्वतविशेषः। यथा,—

ऋषय ऊचुः।

"चन्द्रभागा कथं सिन्धुसङ्गोत्पन्ना महागिरौ।
कौदृक् सरस्तद्गिरेन्द्र! दृषद्लोहितसंज्ञकम् ॥
कथं स पर्व्वतश्रेष्ठश्चन्द्रभागाह्वयोऽभवत्।
चन्द्रभागाह्वया कस्मान्नदी जाता वृषोदका ॥
एतन्नः श्रोतुमाख्यानं जायते कौतुकं महत्।
माहात्म्यं चन्द्रभागायाः कासारस्य गिरेस्तथा ॥

मार्कण्डेय उवाच।

श्रूयतां चन्द्रभागाया उत्पत्तिर्द्विजसत्तमाः।
युष्माभिश्चन्द्रभागस्य माहात्म्यं नामकारणम् ॥
हिमवत्गिरिसंसक्तघृतयोजनविस्तृतः।
योजनत्रय उच्छ्रायः कुन्देन्दुधवलो गिरिः ॥
तस्मिन् गिरौ पुरा वेधाश्चन्द्रं शुद्धं सुधानिधिम्।
विभज्य कल्पयामास देवार्थं स पितामहः ॥
पित्र्यर्थञ्च तथा तस्य तिथिवृद्धिक्षयात्मकम्।
कल्पयामास जगतां हिताय कमलासनः ॥
विभक्तचन्द्रमा यस्मात् तस्मिन् पर्व्वतसत्तमे।
अतो देवाश्चन्द्रभागं ज्ञात्वा चक्रुः पुरा गिरिम् ॥"

इत्यादि कालिकापुराणे २० अध्यायः ॥

चन्द्रभागा, स्त्री, (चन्द्रभागः पर्व्वतविशेषः स उत्पत्तिस्थानत्वेनास्त्यस्याः। "अर्शआदिभ्योऽच्।" ५।२।१२७। इत्यच् ततष्टाप्। चन्द्रभागात् पर्व्वतविशेषात् जाता इति वा।) नदीविशेषः। इत्यमरः। १।१०।३४ ॥ तत्पर्य्यायः। चन्द्रभागी २ चन्द्रिका ३। इति शब्दरत्नावली ॥ सा तु काश्मीरदेशे प्रसिद्धा। तस्या उत्पत्तिर्यथा,—

मार्कण्डेय उवाच।

"यत्र देवसभा भूता सानौ तस्य महागिरेः।
तत्र जाता देवनदी शीतास्वा वचनाद्विधेः ॥
स्नापयित्वा यथा चन्द्रं शीतालोयैर्मनोहरैः।
चन्द्रं पपुर्ब्रह्मवाक्यात् सर्व्वे ते त्रिदिवौकसः ॥
तदा शीतजलं चन्द्रस्नानयोगाच्च साम्प्रतम्।
भूत्वा निपतितं तस्मिन् दृषल्लोहितसंज्ञके ॥
तद्विवृद्धं तदा तोयं तस्मिन् सरसि निर्म्मलम्।
तद्दर्शं स्वयं ब्रह्मा विवृद्धं साधु तज्जलम् ॥
तद्दर्शनाज्जलात्तस्मादुत्थिता कन्यकोत्तमा।
चन्द्रभागेति तन्नाम विधिश्चक्रे स्वयं ततः ॥
भार्य्यार्थे सञ्चारस्तान्तु जग्राह ब्रह्मसम्मते।
तत्रैवाधिष्ठितं तोयं गदाग्रेण निशापतिः ॥
निर्भिद्य पश्चिमे पार्श्वे गिरिं तत्तु प्रवाहयत्।
तत् साम्प्रतजलं भित्त्वा दृषल्लोहितसंज्ञकम् ॥
कासारं सागरं जातं चन्द्रभागा नदी तु सा।
सागरोऽपि तदा भार्य्यां चन्द्रभागां महानदीम् ॥
तेन तोयप्रवाहेण निनाय भवनं स्वकम्।
एवं तस्मिन् समुत्पन्ना चन्द्रभागाह्वया नदी ॥
चन्द्रभागे महाशैले गुणैर्गङ्गासमा सदा।"

इति कालिकापुराणे २२ अध्यायः ॥

अस्या जलस्य गुणः। सुशीतलत्वम्। दाहपित्तवातनाशित्वञ्च। इति राजनिर्घण्टः ॥

चन्द्रभागी, स्त्री,(चन्द्रभागस्य तदाख्यया प्रसिद्धस्य पर्व्वतस्य इयम्। चन्द्रभागपर्व्वतसङ्गातत्वात्तथात्वम्। चन्द्रभाग+"तस्येदम्।" ४।३।१२०॥ इत्यण्। अत्र न वृद्धिः। ततः "वङ्गादिभ्यश्च।" ४।१।४५। इति ङीष्।) चन्द्रभागानदी। इति शब्दरत्नावली।

चन्द्रभूति, स्त्री, (चन्द्रस्येव शुक्ला भूतिः सम्पत् कान्तिरिति यावत् यस्य। चन्द्रवत् शुभ्रदीप्तितयास्य तथात्वम्।) रूप्यम्। इति राजनिर्घण्टः ॥

चन्द्रमणिः, पुं, (चन्द्रप्रियश्चन्द्रकान्त इत्यर्थः मणिः। शाकपार्थिववत् समासः।) चन्द्रकान्तमणिः। इति हेमचन्द्रः। ४।१३३ ॥

चन्द्रमण्डलं, क्ली, (चन्द्रस्य मण्डलम्।) चन्द्रबिम्बम्। चन्द्रपरिवेषः॥ (यथा, गोः रामायणे १५।३२।४८।
"तस्याश्च विमलं वक्त्रं सुदन्तं सुगुणैर्युतम्।
यथा राहुविनिर्म्मुक्तमभवच्चन्द्रमण्डलम् ॥")

चन्द्रमाः, [स] पुं, (चन्द्रमानन्दं मिमीते यद्वा चन्द्रं कर्पूरं साद्रयेण माति परिमातीति। मा+"चन्द्रे मो डित्।" उणा। ४।२२८। इति असिः स च डित्। चन्द्रं रजतं अद्भतत्व तद्वत् मीयते चन्द्र इति वा मीयते इति दासीभारादिषुत्पादने हरदत्तः।) चन्द्रः। इत्यमरः। १।३।१३ ॥ (यथा, पञ्चतन्त्रे। ३।६८।
"एकोपि कोपि सेव्यो यः चीर्णं क्षीरं पुनर्नवम्।
अनुदियः करोत्येव सूर्य्यश्चन्द्रमसं यथा ॥")

चन्द्रमौलिः, पुं, (चन्द्रः मौलौ शेखरे यस्य।) शिवः। इति हारावली। ८॥ (यथा, कुमारे। ५।८६।
"अद्य प्रभृत्यवनताङ्गि! तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ॥")

चन्द्ररेखा, स्त्री, (चन्द्रस्य रेखा इव आकृतिर्यस्याः।) वाकुची। इति भैषज्यरत्नावली ॥ हाकुच इति भाषा ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठाधिकारे।
"गुडुची चन्द्ररेखा च सोमराट् चक्रमर्द्दकम्॥"
वाकुचीशब्दे विवरणमस्या ज्ञातव्यम्॥)

चन्द्ररेणुः, पुं, (चन्द्र आह्लादको रेणुर्यत्र।) कांस्यपीरः। इति त्रिकाण्डशेषः ॥

चन्द्रलेखा, स्त्री, (चन्द्रस्य लेखा इव आकृतिर्यस्याः।) वाकुची। इति राजनिर्घण्टः ॥ (अप्सरोविशेषः। यथा, काशीखण्डे। ६।७।
"उर्व्वशी मेनका रम्भा चन्द्रलेखा तिलोत्तमा॥"
छन्दोविशेषः। यथा, छन्दोमञ्जर्य्याम्।
"नौ मो यौ चेद्वदेतां सप्ताष्टकैश्चन्द्रलेखा॥")

चन्द्रलोहकं, क्ली, (चन्द्र इव शुभ्रं लोहकं धातुत्रयम्।) रूप्यम्। इति राजनिर्घण्टः ॥

चन्द्रवंशः, पुं, (चन्द्रस्य वंशः अन्ववायः।) चन्द्रसन्तानः। यथा। ब्रह्मणः पुत्रः अत्रिः तस्य पुत्रश्चन्द्रः तस्य बुधः तस्य वैवस्वतमनुकन्यायां इलायां भार्य्यायां पुरूरवाः स प्रतिष्ठाननगरे इदानीं विठोरसंज्ञे राजचक्रवर्त्ती आसीत्। तस्योर्व्वश्यां षट् पुत्रा आसन् तेषां आयुर्ज्येष्ठः। तस्य पुत्रो नहुषस्तस्य ययातिश्चक्रवर्त्ती। तस्य द्वे भार्य्ये वृषपर्व्वणो दानवराजस्य सुता शर्म्मिष्ठा शुक्रस्य कन्या देवयानी च। देवयान्यां ययातेर्द्वौ पुत्रौ यदुस्तुर्व्वसुश्च। शर्म्मिष्ठायां त्रयः पुत्राः द्रुह्युः अनुः पूरुश्च। तत्र यदुप्रभृतयश्चत्वारः पितुराज्ञाशैलजं कृतवन्तः पित्रा शप्ताः। ज्येष्ठपुत्रं यदुं शुक्रशाप तव वंशे राजचक्रवर्त्ती माभूत्। तुर्व्वसुद्रुह्यूनून् शुक्रशाप युष्माकं वंशजा वेदबाह्या म्लेच्छा भविष्यन्ति। पूरुस्तु पितुराज्ञया दुष्करं कर्म्म कृत्वा पितुरतिप्रिय आसीत्। ययातिः स्वमरणसमये कनिष्ठपुत्रं पूरुं राजचक्रवर्त्तिनं कृतवान्। यदवे दक्षिणस्यां दिशि किञ्चिद्राज्यखण्डं दत्तवान्। तथा द्रुह्यवे पूर्व्वस्यां दिशि, पश्चिमायां तुर्व्वसवे, उत्तरस्यां अनवे, सर्व्वान् पूरोरधीनांश्चक्रे। यदुरतीवधर्म्मशीलस्तद्वंशे द्वापरयुगस्यान्ते श्रीकृष्णोऽवतीर्णः। तच्चरितं सर्व्वशास्त्रप्रसिद्धम्॥ (अधुना यदोर्वंश उच्यते। यदोः पुत्रः क्रोष्टा (क्रोष्टु) तस्य वृजिनिवान् तस्य आहिः तस्य उशङ्गुः तस्य चित्ररथः तस्य शशबिन्दुः तस्य पृथुकीर्त्तिः पृथुजयः पृथुदानः पृथुश्रवा इति चत्वारः पुत्राः। पृथु-

श्रवस: तम: तस्य उशना: तस्य शितायु: तस्य रुक्मकवच: तस्य व्यामघ: तस्य विदर्भ: तस्य क्रथ: तस्य कुन्ति: तस्य धृष्टि: तस्य निवृत्ति: तस्य दशार्ह: तस्य व्योम: तस्य जिमूत: तस्य विकृति: तस्य भीमरथ: तस्य मधुरथ: तस्य शकुनि: तस्य करम्भि: तस्य देवमत: तस्य देवक्षत्र: तस्य मधु: तस्य कुरुवश: तस्य अनुरथ: तस्य पुरुहोत्र: तस्य अंशु: तस्य सत्वश्रुत: तस्य वृष्णि: दैवावृध: अन्धक: महाभोज: इति चत्वार: पुत्रा:। तेषु वृष्णिन्यङ: तस्य सुमित्र: तस्य अनमित्र: तस्य वृषि: तस्य चित्रक: तस्य विदूरथ: तस्य शूर: तस्य भजमान: तस्य शिनि: तस्य भोज: तस्य राधिक: तस्य देवमीढ़: तस्य शूरसेन: तस्य वसुदेव: तस्य पुत्रो भगवान् श्रीकृष्ण: ॥*॥) ययातिपुत्रस्य पूरोरतिविस्तीर्णो वंश उच्यते। पूरो: पुत्रो जनमेजय: तस्य प्रचिन्वान् तस्य प्रवीर: तस्य मनस्यु: तस्य चारुपद: तस्य सुद्यु: तस्य बहुगव: तस्य संयाति: तस्य अहंयाति: तस्य रौद्राश्व: तस्य ऋचेयु: तस्य रन्तिनार: तस्य सुमति: (तंसु:) तस्य रैभ्य: (सुरोध:) तस्य दुष्मन्तचक्रवर्त्ती। तस्य शकुन्तलायां भार्य्यायां भरतचक्रवर्त्ती आसीत्। यस्तय-ज्ञिंशच्छतमश्वमेधान् कृतवान् पञ्चाशद्ब्राह्मणान् एवमन्यान् नानाविधान् यज्ञान् अकरोत् बहूनि धनरत्नादीनि दत्तवान् सप्तविंशतिसहस्रवत्सरान् एकच्छत्रं राज्यं शतवान्। तस्य पुत्रो वितथ: तस्य मन्यु: तस्य बृहत्क्षेत्र: तस्य हस्ती येन हस्तिनापुरं निर्म्मितम्। तस्य अजमीढ़: तस्य ऋक्ष: तस्य संवरण: तस्य सूर्य्यकन्यायां तपत्यां कुरु: तस्य जह्नु: तस्य सुरथ: तस्य विदूरथ: तस्य सार्व्वभौम: तस्य जयत्सेन: तस्य राधिक: तस्य अयुतायु: तस्य ऋक्ष: तस्य दिलीप: तस्य प्रतीप: तस्य देवापि: शान्तनु: बाह्लीक इति त्रय: पुत्रा:। तत्र देवापि: कलापग्रामे योगी भूत्वा वर्त्तते। स कलौ चन्द्रवंशे क्षुप्ते कलेरन्ते पुन: सत्ययुगे चन्द्रवंशं भावयिष्यति ॥*॥ तत्र शान्तनू राजा अभवत् स चक्रवर्त्ती तस्य गङ्गायां भीष्म: पुत्रो जात: स परमधर्म्मात्मा महावीर: येन पितुर्दाशकन्याविवाहार्थं पितृराज्यं त्यक्तम् य: स्वस्य विवाहं त्यक्त्वा ऊर्द्धरेता जात:। शान्तनोर्दाशकन्यायां द्वौ पुत्रौ जातौ चित्राङ्गदो विचित्रवीर्य्यश्च। सत्यवत्यां कन्याकाले पराशरात् व्यासो जात:। पुनर्भुनेर्वरात् व्यासजन्मानन्तरं सा कन्यारूपाभवत्। चित्राङ्गदो युद्धे गन्धर्व्वेण हत:। विचित्रवीर्य्यस्य क्षेत्रे सत्यवत्याज्ञया व्यास: धृतराष्ट्रं पाण्डुञ्च जनयामास। धृतराष्ट्रस्यात्मज गान्धार्य्यां भार्य्यायां दुर्य्योधनप्रभृतं पुत्रशतं बभूव। पाण्डोर्द्वे भार्य्ये कुन्ती माद्री च। ऋषीभूतस्य मुने: शापाज्जैषुनरहितस्य पाण्डोराज्ञया कुन्ती धर्म्माद्युधिष्ठिरं पवनाद्भीमं इन्द्रादर्জ্জুनं जनयामास। माद्री अश्विनीकुमाराभ्यां नकुलसहदेवौ जनयामास। युधिष्ठिरस्तु राजसूययाजी। अर्জ্জुनस्य सुभद्रायां भार्य्यायां अभिमन्युक्षस्य उत्तरायां भार्य्यायां परिक्षित्। युधिष्ठिरादनन्तरं कलियुगस्यारम्भे स राजासीत् चक्रवर्त्ती। तस्य जनमेजय: तस्य श्रुतानीक: तस्य सहस्रानीक: तस्य अश्वमेधज: तस्य असीमकृष्ण: तस्य नेमिचक्र: स हस्तिनागरे गङ्गाक्षते कौशाम्ब्यां पुर्य्यां राजासीत्। तस्य उष्ण: तस्य चित्ररथ: तस्य शुचिरथ: तस्य वृष्टिमान् तस्य सुषेण: तस्य सुनीथ: तस्य नृचक्ष: तस्य सुखीनल: तस्य परिप्लव: तस्य सुनय: तस्य मेधावी तस्य नृपञ्जय: तस्य दूर्व्व: तस्य तिमि: तस्य बृहद्रथ: तस्य सुदास: तस्य शतानीक: तस्य दुर्दमन: तस्य महीनर: तस्य दण्डपाणि: तस्य निमि: तस्य क्षेमक:। एतत्पर्य्यन्तमस्य वंशस्य शान्ति: एते कलौ; सहस्रवर्षपर्य्यन्तं स्थिता: ॥*॥ सोमवंशशाखान्तरे मगधवंशा राजान: कलौ बहुकालं स्थिता:। अतस्ते वर्ण्यन्ते। तत्र युधिष्ठिरसमकालीनो जरासन्धसुत: सहदेवो मगधेषु राजासीत्। तस्य मार्जारि: तस्य श्रुतश्रवा: तस्य अयुतायु: तस्य निरमित्र: तस्य सुनक्षत्र: तस्य बृहत्सेन: तस्य कर्म्मजित् तस्य श्रुतञ्जय: तस्य विप्र: तस्य शुचि: तस्य क्षेम: तस्य सुव्रत: तस्य धर्म्मसूत्र: तस्य शम: तस्य द्रढ़सेन: तस्य सुमति: तस्य सुबल: तस्य सुनीथ: तस्य सत्यजित् तस्य विश्वजित् तस्य पुरञ्जय: एते राजान: कलौ: सहस्रवत्सरपर्य्यन्तं राज्यं शतवन्त: ॥*॥ तत: पुरञ्जयस्य मन्त्री शुनक: पुरञ्जयं हत्वा तस्य पुत्रं प्रद्योतं राजानं शतवान्। तदारभ्य राजानो वर्णसङ्करदोषदुष्टा जाता:। प्रद्योतपुत्र: पालक: तस्य विशाखयूप: तस्य राजक: तस्य नन्दिवर्द्धन:। एते पञ्च अष्टत्रिंशोत्तरशतवर्षं भूमिपा आसन् ॥*॥ नन्दिवर्द्धनस्य पुत्र: शिशुनाग: तस्य काकवर्ण: तस्य क्षेमधर्म्मा तस्य क्षेत्रज्ञ: तस्य विधिसार: तस्य अजातशत्रु: तस्य दर्भक: तस्य अजय: तस्य नन्दिवर्द्धन: तस्य महानन्दि: एते दश नृपा: षडुत्तरशतत्रयं वत्सरान् भूमिपाला आसन् ॥*॥ महानन्दिसुतो नन्द: शूद्रायां सम्भूतपन्न: राजासीत् तस्य सुमाल्याद्या अष्टौ पुत्रा आसन्। ते शतवत्सरान् राज्यं शतवन्त:। चाणक्यनामा कश्चिद्ब्राह्मण: नन्दं तत्पुत्रांश्च हत्वा मौर्य्यं चन्द्रगुप्तं राजानं शतवान्। कलौ नन्दान्त: क्षत्रियवंश:। इति श्रीभागवतं महाभारतञ्च॥

चन्द्रवल्लरी, स्त्री, (चदि आह्लादे + रक्। चन्द्रा आनन्ददायिका वल्लरी। सुधातुल्यमधुस्रावित्वात्तथात्वम्। चन्द्रस्य वल्लरी लता इति केचित्।) सोमवल्लरी। सोमलता इति ख्याता। ब्रह्मी ग्राकमिति केचित्। इत्यमरटीकायां भरत:॥

चन्द्रवल्ली, स्त्री, (चन्द्र इव आनन्ददायिका वल्ली।) प्रसारणी। माधवीलता। इति राजनिर्घण्ट:॥

सोमलता च॥ (सोमलताशब्दे गुणादयोऽस्या ज्ञेया:॥)

चन्द्रवाला, स्त्री, (चन्द्रं कर्पूरमपि वलते संवृणोति स्वगन्धेन इति। वल संवरणे + अण्। ततष्टाप्।) स्थूलैला। इत्यमर:। २। ४। १२५॥ (पर्य्यायोऽस्या यथा,—

"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रैला हृद्देला च चन्द्रबाला च निष्कुटि:॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

चन्द्रविहङ्गम:, पुं, (चन्द्र इव शुभ्रो विहङ्गम:।) बकपक्षी। इति त्रिकाण्डशेष:॥

चन्द्रव्रतं, क्ली, (चन्द्राय चन्द्रलोकप्राप्तये यत् व्रतम्। यद्वा, चन्द्रस्य ह्रासवृद्धिभ्यां कृतं यद्व्रतं तत्।) चान्द्रायणम्। इति स्मृति:॥ (एतद्विवरणं चान्द्रायणशब्दे द्रष्टव्यम्॥)

चन्द्रशाला, स्त्री, (चन्द्रेण शालते शोभते इति। शाल + अच्। ततष्टाप्।) ज्योत्स्ना। इति त्रिकाण्डशेष:॥ (चन्द्र इव शालते भ्राजते इति। उपस्थानस्थितत्वादेव तथात्वम्।) प्रासादोपरिगृहम्। तत्पर्य्याय:। शिरोगृहम् २। इति हेमचन्द्र:। ४। ६१॥ चन्द्रशालिका ३ वड़भी ४ कूटागारम् ५। इति त्रिकाण्डशेष:॥ (यथा, रघु:। १३। ४०।

"तस्यायमन्तर्हितसौधभाज:
प्रसक्तसङ्गीतगदङ्गघोष:।
वियद्गत: पुष्पकचन्द्रशाला:
सद्यं प्रतिश्रुन्मुखरा: करोति॥")

चन्द्रशालिका, स्त्री, (चन्द्र इव शालते इति। शाल + ण्वुल्। टापि अत इत्वम्। यद्वा, चन्द्रशाला + स्वार्थे कन्।) वड़भी। इति त्रिकाण्डशेष:॥

चन्द्रशूरं, क्ली, (फलविशेष:। हालिम इति भाषा। तत्पर्य्याय:। चन्द्रिका २ चन्द्रहन्त्री ३ पशुमेहनकारिका ४ नन्दनी ५ कारवी ६ भद्रा ७। अस्य गुणा:। शिरोवातश्लेष्मातिसारिणां हितत्वम्। अश्मवातरोगहितत्वम्। बलपुष्टिविवर्द्धनत्वञ्च। इति भावप्रकाश:॥

चन्द्रशेखर:, पुं, (चन्द्र: शेखरे मौलौ यस्य। यद्वा, चदि आह्लादे + रक्। चन्द्र: आह्लाद: स्वानन्दानुभवरूपपरमात्मज्योति: शेखरे ललाटोर्द्ध्वभागे यस्य। स्वप्रकाशात्मनां शरीरत्रयोपाधिवर्জ্জितानां योगीन्द्रपुरुषाणामपि ललाटदेशे सत्यज्ञानानन्दाद्वैतसंवेद:; परब्रह्मण: स्वाभासङ्गज्योतिर्मण्डलस्य प्रकाशमानत्वात् अन्येष्वपि चन्द्रशेखरत्वमिति चेन्न। विश्वगुरोर्महादेवादन्यत्र पूर्णतमयोगसिद्धेरप्रसिद्धे:। किञ्च महेश्वरादिशब्दवत् रूढ़िप्रवृत्तितोऽपि सर्व्वयोगीन्द्रगुरौ भगवति महेश्वरे एव चन्द्रशेखरपदस्य समन्वर्थतेति पूर्व्वाचार्य्यपादा:॥) शिव:। इत्यमर:। १।१।१३२॥ (यथा, कुमारे। ५। ५८।

"यदा युधे: सर्व्वगतस्त्वमुच्यसे
न वेत्सि भावस्यमिमं कथं जनम्।

इति स्वहस्तोल्लिखितञ्च सुग्धया
रहस्युपालभ्यत चन्द्रशेखरः ॥"

चन्द्रयुक्तः शेखरः शङ्कः यस्य ।) पर्व्वतविशेषः । यथा, आगमे शिववाक्यम् ।

"विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥"

(तथा, महाकालेश्वरतन्त्रे ।

"गुप्तनाथचन्द्रनाथचन्द्रशेखर पर्व्वते ॥")

चट्टलदेशे महापीठे भैरवविशेषः । यथा,—

"चट्टले देववाहुर्म्मे भैरवचन्द्रशेखरः ।
भक्तरूपा भगवती भवानी तत्र देवता ॥
विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥"

इति तन्त्रचूड़ामणौ ५१ पीठनिर्णयः ॥

करवीरपुरराजा । स च पौष्यराजपुत्रः । यथा,-

"अथ काले व्यतीते तु सर्व्वज्ञो वृषभध्वजः ।
तद्भाविकर्म्म ज्ञात्वैव मानुषो ह्यभवत् स्वयम् ॥
ब्रह्मणो दक्षिणाङ्गुष्ठाच्चो ब्रह्मसुतोऽभवत् ।
अदितिस्तत्सुता जाता ततः पूषाऽभवत् ॥
पूषः पुत्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः ।
यस्य तुल्यो नृपो भूमौ न भूतो न भविष्यति ॥
स पुत्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः ।
शैवे वयसि सम्प्राप्ते भार्य्याभिस्तिसृभिः सह ॥
पौष्यः परमया भक्त्या ब्रह्माणं पर्य्यतोषयत् ।
तस्य प्रसन्नो भगवान् ब्रह्मा लोकपितामहः ॥
तमुवाच स राजानं किमिच्छसि वदस्व मे ।
प्रसन्नोऽस्मि नृपश्रेष्ठ ! प्रदास्यामि यथेप्सितम् ॥
यदिदं तव जायानां तत्तद्दास्यामि साम्प्रतम् ॥

पौष्य उवाच ।

हिरण्यगर्भापुत्रोऽहं पुत्रार्थी त्वामुपाश्रये ।
त्वयि प्रसन्ने पुत्रो मे भवेच्छतयसंयुतः ॥
एतदर्थं सभार्य्योऽहं भक्त्या त्वां समुपस्थितः ।
यथा मे जायते पुत्रस्तथा कुरु जगत्पते ! ॥
पुन्नाम्नो नरकात् पुत्रस्त्रायते पितरं प्रभुम् ।
अतस्त्वमाशयं ब्रह्मन् ! त्वं नाशयितुमर्हसि ॥

ब्रह्मोवाच ।

शृणु पौष्य ! यथा भावी पुत्रस्तव कुलोद्वहः ।
तदहं ते वदाम्यद्य भार्य्याभिस्तत् समाचर ॥
इदं फलं गृहाण त्वं मया दत्तं नृपोत्तम ! ।
अनेन वहवे काले प्राप्तेऽपि सुरतं सदा ॥
फलमेतत् समादाय यावत् संवत्सरत्रयम् ।
आराधय महादेवं सुप्रसन्नो भविष्यति ॥
यथा संभावते भगः फलमेतत्तथा भवान् ।
करिष्यति फलं राजन्! भार्य्याभिस्तिसृभिः सह ॥
ततस्ते जनयोपेतस्तनयः कुलवर्द्धनः ।
भविष्यति च यः शास्ता चक्रवर्त्ती भविष्यति ॥
इत्युक्त्वा प्रययौ ब्रह्मा राजापि सह भीरुभिः ।
हरं यष्टुं समारेभे भक्त्या परमया युतः ॥
निराशी संयताहारः कदाचित् फलभोजनः ।
शङ्खतीनदीतीरे फलं संस्थाप्य चात्मतः ॥
पुष्पार्घ्यधूपदीपाद्यैर्वृषध्वजमतर्पयत् ।
स तु वर्षत्रयेऽतीते महादेवो जगत्पतिः ॥
पौष्यस्य नृपतेः सम्यक् प्रसन्नोदार्थसिद्धये ।
प्रसन्नः प्राह नृपतिं महादेवो हसन्निव ॥

उपास्से किमर्थं मां तन्मे वद ददामि ते ॥

पौष्य उवाच ।

अपुत्रोऽहं पुत्रकामः पूजयामि वृषध्वज ! ।
यथाहं पुत्रवान् वै स्यां वृषध्वज ! तथा कुरु ॥
इति संस्तवदाजा भार्य्याभिः सह हर्षितः ।
प्रणम्य स्तुतिपूर्व्वेण भक्तिनम्रात्ममानसः ॥
ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः ।
ब्रह्मदत्तफलं हस्ते ददौ दं तमुवाच ह ॥

ईश्वर उवाच ।

इदं फलं ब्रह्मदत्तं विभज्य नृपते त्रिधा ।
भोजयैता: स्वभार्य्याश्च प्रहृष्टः सुसमाहितः ॥
ततः प्रवृत्ते भवत एतासु ऋतुसङ्गमे ।
आधास्यन्ति च गर्भांस्तु भार्य्यास्ते युगपन्नृप ! ॥
काले प्राप्ते च युगपत् प्रसवो योषितां तव ।
भविष्यति नृपश्रेष्ठ ! ता एवं त्वं करिष्यसि ॥
एकस्या जठरे ग्रीवे भार्य्यायास्ते भविष्यति ।
अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति ॥
अधो नाभ्यास्तु यो भागः सोऽपरस्यां भविष्यति ।
ततः खण्डत्रयं भूप ! यथास्थानं पृथक् पृथक् ॥
योजयिष्यसि पश्चात्ते पुत्र एको भविष्यति ।
तस्य ग्रीवे चन्द्ररेखा सहजा संभविष्यति ॥
तेनैव नाम्ना स ख्यातिं गमिष्यति च भूपते ! ।
इत्युक्त्वा स महादेवस्तासां गर्भान् स्वयं तदा ॥
संस्कर्त्तुं जातवीतोयमात्मनः शिरसो न्यधात् ।
ततः फले स्वयं देवः प्रविवेश वृषध्वजः ॥
ततश्चखात् ततः फलं भूतं त्रिभागं स्वयमेव हि ।
पौष्यस्तत् फलमादाय हृदितः सह भार्य्यया ॥
प्रययौ मन्दिरं हृष्टो अनुज्ञाप्य वृषध्वजम् ।
ततः समुचिते काले प्राप्ते ताभिस्तु भक्तितम् ॥
तत् फलं नृपशार्दूल! गर्भाधाय्याहिताः शुभाः ।
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत ॥
खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम् ।
तच्च खण्डत्रयं पौष्यो यथास्थानं नियोज्य च ।
एकं पिण्डं चकारासु तत्र पुत्रो व्यजायत ।
तस्य ग्रीवे तदा राजन सहजेन्दुकला शुभा ॥
विरराज यथा स्वच्छा शरत्काले कला विधोः ।
तं सर्व्वलक्षणोपेतं पीनोरस्कं सुनासिकम् ॥
सिंहग्रीवं विशालाक्षं दीर्घायतभुजं तदा ।
दृष्ट्वा पौष्योऽथ भार्य्याभिस्तिसृभिः सह संमुदम् ।
लेभे दरिद्रः सत्कोषं प्राप्येव विपुलं ततः ।
तस्य नामाकरोद्राजा ब्राह्मणैः खैः पुरोहितैः ॥
चन्द्रशेखर इत्येवं कान्त्या चन्द्रमसः समः ।
ववृधे स महाभागः प्रवृद्धं चाब्दवद्गतः ॥
कलाभिरिव तेजस्वी शरदीव निशाकरः ।
एवं तिसृणामम्बानां गर्भे जातो यतो हरः ॥
अतस्त्र्यम्बकनामाभूत् प्रथितो लोकदेवयोः ।
स राजपुत्रः कौमारावस्थां प्राप यदा तदा ॥
सर्व्वशास्त्रार्थतत्त्वज्ञो जिष्णोस्तुल्यो बभूव ह ।
बले वीर्य्ये प्रहरणे शास्त्रे ग्रीवे च ततसमः ॥
नान्योऽभून्नृपशार्दूल! नो वा भूमौ भविष्यति ।
अभिषिच्याथ तं बालं कुमारं बलवत्तरम् ॥
दशपञ्चैकवर्षीयं सर्व्वराजगुणैर्युतम् ।

तिसृभिः सह भार्य्याभिर्ब्रह्मणं पौष्यो विवेश ह ॥
गृहोचितक्रियां कर्त्तुं राजा परमधार्म्मिकः ।
गते पितरि राजा स वनवासं महाबलः ॥
सर्व्वां क्षितिं वशे चक्रेऽमात्यैः स चन्द्रशेखरः ।
सार्व्वभौमो नृपो भूत्वा राजभिः परिवेष्टितः ॥
अमरैरिव देवेन्द्रो विजहार श्रिया युतः ।
एवं पौष्यसुतो भूत्वा चाम्बकः प्राप्य निर्वृतिम् ॥
ब्रह्मावर्त्ताख्ये रम्ये करवीराख्ये पुरे ।
शङ्खतीनदीतीरे राजा भूत्वा समोद ह ॥"

इति कालिकापुराणे ४६ अध्यायः ॥ * ॥

(खनामख्यातः पण्डितविशेषः । असौ हि सिद्धपुरुषः त्रिवेणीसन्निकर्षस्थवन्द्यपाड़ाख्यग्रामे १६०० शकस्य प्रारम्भ एव वर्त्तमान आसीत् । अद्यापि तस्य सिद्धिस्थानं तत्रैव वर्त्तते । अयं नानाशास्त्रवेत्ता विशेषतो ज्योतिश्शास्त्रेषु लब्धप्रतिष्ठो बभूव । एतत्संकलिता बहवो ग्रन्था अस्मद्देशेऽद्यापि प्रचरन्ति ॥ * ॥)

षोड़शभ्रुवकान्तर्गतनवमभ्रुवकः । तद्विवरणं भ्रुवकशब्दे द्रष्टव्यम् ॥ अपि च ।

"जनविश्रुतिवर्णाढ्यः सिद्धिदश्चन्द्रशेखरः ।
कथितः कैङ्कटे ताले भवेत् शङ्कारवीरयोः ॥"

इति सङ्गीतदामोदरः ॥

(वटिकौषधविशेषः ।

"क्षतो गन्धरङ्गः सोमः स्या-
देतैस्तुल्या शर्करा मत्स्यपित्तैः ।
भूयो भूयो भावयेत्तु त्रिवारं
वल्लो देयः शङ्खवेरस्य वारा ॥
सम्यक् तापे वारिभक्तं सतक्रं
दृग्नाकाढ्यं पथ्यमेव प्रदिष्टम् ।
अङ्गे रोगं हन्ति सामं प्रभावात्
पित्ताधिक्ये ह्यर्द्धं वारिप्रयोगः ॥"

इति उदकमञ्जरीरसः ॥

"अत्रैव शर्करा ब्राह्मी शिला च यदि दीयते ।
गुणैः समो भवेदस्य नाम्ना च चन्द्रशेखरः ॥"

इति चन्द्रशेखरो रसः ४)

चन्द्रसंज्ञः, पुं, (चन्द्रस्य संज्ञा संज्ञा यस्य ।) कर्पूरम् । इत्यमरः । २ । ६ । १३० ॥

चन्द्रसम्भवा, स्त्री, (चन्द्रः सम्भवो यस्याः ।) क्षुद्रैला । इति शब्दचन्द्रिका ॥ (बुधे, पुं ॥)

चन्द्रहासं, क्ली, (चन्द्रस्येव शुक्लो हासः प्रभा यस्य ।) रौप्यम् । इति राजनिर्घण्टः ॥

चन्द्रहासः, पुं, (चन्द्रस्येव शुक्लो हासो दीप्तिर्यस्य ।) खड्गः । रावणखड्गः । इति मेदिनी । गे, ५२ ॥

चन्द्रहासा, स्त्री, (चन्द्रहास + टाप् ।) गुडूची । इति राजनिर्घण्टः ॥ (चन्द्रवदाह्लादकरो हासो यस्याः इति । गायत्रीरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ४८ ।

"चन्द्रहासा चारुदासी चकोरी चन्द्रहासिनी ॥"

दूतली । तस्याः पर्य्यायो यथा,—

"क्षुद्राख्या क्षुद्रभण्टाख्या दूतलीति निगद्यते ।
श्वेता क्षुद्रा चन्द्रहासा शङ्खपुष्पी शिवदूतिका ॥

गर्भदा चन्द्रभा चन्द्री चन्द्रपुष्पा प्रियङ्करी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

चन्द्रा, स्त्री, (चन्दयति आह्लादयतीति। चदि+क्विप्+रक्। स्त्रियां टाप्।) एला। वितानम्। इति शब्दरत्नावली ॥ गुडूची। इति केचित् ॥

चन्द्रातपः, पुं, (चन्द्र इव आतपति प्रीतिं करोति छायादानेन। आ+तप्+अच्।) आच्छादनविशेषः। चाँदोया इति भाषा ॥ तत्पर्य्यायः। उल्लोचः २ वितानम् ३ चन्द्रा ४। इति शब्दरत्नावली ॥ (चन्द्रस्य आतपः रश्मिः।) ज्योत्स्ना। इति हेमचन्द्रः। २। २१ ॥ (यथा, कादम्बर्य्याम्। "चन्द्रातपमिव रसतासुपेतम् ॥")

चन्द्रापीड़ः, पुं, (चन्द्रः आपीड़े शेखरे यद्वा आपीड़ः शिरोभूषणं यस्य।) शिवः। इति त्रिकाण्डशेषः ॥ (काश्मीरस्य राजविशेषः। यथा, राजतरङ्गिण्याम्। ४। ४५।

"राजचूड़ामणिः श्रीमांश्चन्द्रापीड़स्ततोऽभवत्।
पीड़ितेन्दुतिथा कीर्त्या कले: पीड़ाश्चकार यः॥"

कादम्बरीवर्णितनायकविशेषः। स तु राज्ञस्तारापीड़स्य पुत्रः। यथा, कादम्बर्य्याम्। १३७।

"अतिक्रान्ते च षष्ठीजागरे प्राप्ते दशमेऽहनि पुण्ये सुकूर्त्ते गाः सुवर्णञ्च कोटिशो ब्राह्मणेभ्यो दत्वा 'मातुरस्य मया परिपूर्णमण्डलश्चन्द्रः स्वप्ने मुखकमलमाविशन् दृष्टः' इति स्वप्नानुरूपमेव राजा सुनोश्चन्द्रापीड़ इति नाम चकार।"

अयं हि एकदा मृगयां गच्छन् किन्नरमिथुनमनुधावन् हिमालयशिखरमधिरुह्य अच्छोदसरोवरसमीपं गतवान्। तत्रस्थञ्च महाश्वेतां गन्धर्व्वकुमारीमवलोक्य तन्मुखात् तस्याः सर्व्ववृत्तान्तमाकर्ण्य च तया सह गन्धर्व्वलोकं गतवान्। तत्र गत एव गन्धर्व्वराजस्य चित्ररथस्य कादम्बरीं नाम कन्यां ददर्श्य। दृष्ट्वा च तां कन्दर्पबाणपीड़ितोऽभवत्। ततोऽतिकष्टेन तस्मात् स्थानात् प्रत्यागत्य स्वसहचरं वैशम्पायनं स्कन्धावाररक्षकत्वेन परिकल्प्य पित्राकृतः स्वभवनमाजगाम। अथ गच्छति काले वैशम्पायनानयनाय गतोऽसौ चिरबन्धोर्वैशम्पायनस्य कमलवार्त्तामाकलय्य छिन्नतरुरिव भूतले पतित्वा महाश्वेताचन्द्रिकार्य्य एव विदीर्णहृदयो गतासुरासीत्। ततो दैवादैशेन रचितशरीरोऽसौ पुनर्जीवितश्च कादम्बरीं परिणीतवान्। इत्येषातीवाश्चर्य्यजनिका कथा कादम्बरीग्रन्थत एव विशेषतो विज्ञेया ॥)

चन्द्रावली, स्त्री, गोपीविशेषः। सा तु चन्द्रभानुकन्या व्रजे श्रीकृष्णस्य नित्यप्रिया राधातुल्या। यथा, उज्ज्वलनीलमणौ।

"राधाचन्द्रावलीमुख्याः प्रोक्ता नित्यप्रिया व्रजे।
लक्ष्मवित्यसौन्दर्य्यवैदग्ध्यादिगुणाश्रयाः॥"

चन्द्रिका, स्त्री, (चन्द्र आश्रयत्वेनास्त्यस्याः।) "अत इनिठनौ।" ५। २। ११५। इति ठन्।) ज्योत्स्ना। इत्यमरः। १। ३। १६ ॥ (यथा, रघुः। १६। ३६।

"अन्वसुङ्क्त सुरतश्रमापहां
मेघमुक्तविशदां स चन्द्रिकाम् ॥")

खूलेला। चन्द्रक्रमतुल्यः। चन्द्रभागानदी। इति शब्दरत्नावली ॥ कर्णस्फोटा। मल्लिका। श्वेतकण्टकारी। मेधिका। स्फुल्लेला। इति राजनिर्घण्टः ॥ चन्द्रसूरम्। इति भावप्रकाशः ॥ (पीठस्य देवीविशेषः। सा तु हरिश्चन्द्रे विराजते। यथा, देवीभागवते। ७। ३०। ६७।

"सन्ध्याद्यावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका ॥"

छन्दोविशेषः। तल्लक्षणं यथा, छन्दोमञ्जर्य्याम्।

"ननततगुरुभिश्चन्द्रिकाश्चर्त्तुभिः ॥"

वासपुष्पा। अस्याः पर्य्याया यथा,—

"चन्द्रिका चर्म्महन्त्री च पशुमेहनकारिका।
नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

चन्द्रिकाद्रावः, पुं, (चन्द्रिकया द्रावो द्रवणं यस्य।) चन्द्रकान्तमणिः। इति राजनिर्घण्टः ॥

चन्द्रिकापायी, [न्] पुं स्त्री, (चन्द्रिकां ज्योत्स्नां पिबतीति। पा+णिनिः।) चकोरपक्षी। इति राजनिर्घण्टः ॥

चन्द्रिकाम्बुजं, क्ली, (चन्द्रिका इव शुभ्रं अम्बुजम्।) सितोत्पलम्। इति राजनिर्घण्टः ॥

चन्द्रिलः, पुं, (चन्द्रो विद्यतेऽस्य। चन्द्र+वाहुलकात् अस्त्यर्थे इलच्।) शिवः। नापितः। वास्तूकम्। इति मेदिनी। ले, ८६ ॥

चन्द्री, स्त्री, (चन्दयति आह्लादयतीति। चदि+क्विप्+रक्। गौरादित्वात् ङीष्।) वाकुची। इति राजनिर्घण्टः ॥

चन्द्रेष्टा, स्त्री, (चन्द्रः इष्टः प्रियो यस्याः। निष्ठायाः परनिपातः।) उत्पलिनी। इति राजनिर्घण्टः ॥

चन्द्रोदयः, पुं, (चन्द्रस्य उदयः।) आकाशे चन्द्रस्य प्रकाशः। स च यद्दिने सार्द्धप्रहरद्वयव्यापिनी या तिथिस्तत्तिथ्यनुसारेण भवति। तस्य प्रमाणं यथा, पुराणसमुच्चये।

"गर्भा क्रीड़ादिने यत्र रात्रौ दृश्यते चन्द्रमाः।
सोमो राजा पशून् हन्ति सुरभीपूजकांस्तथा ॥
तदुदयसम्भावनच्च निर्णयाऽस्ते निर्णीतम्।
प्रतिपद्यापराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां चन्द्रदर्शनं सम्भाव्यते। तदुक्तसम्भाधानविषये दृढप्रातास्तेन।
द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी।
अम्भाधानं चतुर्दश्यां परतः सीमदर्शनादिति॥
अपराह्णश्च पञ्चधाविभक्तस्याङ्गचतुर्थो भागः।
ततश्च यत्र प्रतिपदि षण्मुहूर्त्तव्यापिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति।" इति श्रीहरिभक्तिविलासे १६ विलासः ॥ (चन्द्रस्य वल्कखण्डादिरचितचन्द्राकृतिरातपो यत्र।) चन्द्रातपः। औषधविशेषः। इति हेमचन्द्रः। ३। ४५॥ स तु मकरध्वजाक्षरसविन्दूरम्। यथा,—

"पत्रं चतु खर्जदलं रसेन्द्रं
प्रकारकं गोड़ग्र गन्धकस्य।

ग्रोक्षैः सुकार्पासभवैः प्रसूनैः
सर्व्वं विमर्द्यार्थ कुमारिकाङ्गैः ॥
तत्काचकुम्भे निहितं सुगाढ़े
ग्रतुकर्पटैस्तद्दिवसत्रयञ्च।
पचेत् क्रमात्तौ सितकास्यथन्ते
ततो रजः पल्लवरागरम्यम् ॥
निगृह्य चैतस्य पलं पलानि
चत्वारि कर्पूररजस्तथैव।
जातीफलं सोषणमिन्द्रपुष्पं
कस्तूरिकाया इह भाग एकः ॥ * ॥
चन्द्रोदयोऽयं कथितस्तु मासो
भुक्तोऽहिवल्लीदलमध्यवर्त्ती।
मदोन्मदानां प्रमदाजनानां
गर्व्वाधिकत्वं ग्रथयत्यकाण्डे ॥
घृतं घनीभूतमतीव दुग्धं
ग्रदूनि मांसानि समस्तकानि।
मायान्नपिष्टानि भवन्ति पथ्या-
न्यानन्ददायीन्यपराणि चात्र ॥ * ॥
वलीपलितनाशनस्तनुभृतां वयःस्तम्भनः
समस्तगदखण्डनः प्रचुररोगपाषाणनः।
ग्रहेषु रसराड़यं भवति यस्य चन्द्रोदयः
स पञ्चशरदर्पितो ग्रगदशां भवेदुर्ल्लभः ॥"

इति सारकौमुदी सुखबोधञ्च ॥

चन्द्रोदया, स्त्री, (चदि आह्लादे+भावे रक्। चन्द्रस्य दर्शनादिजन्यानन्दस्य उदयो यस्याः।) नेत्ररोगस्यौषधविशेषः। यथाह चक्रपाणिदत्तः।

"हरीतकी वचा कुष्ठं पिप्पली मरिचानि च।
विभीतकस्य मज्जा च श्लक्ष्णाभिर्भेषजैः श्लिक्षा ॥
सर्व्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत्।
नाशयेत्तिमिरं कृच्छ्रं पटलान्यर्ब्बुदानि च ॥
अधिकानि च मांसानि यच्च रात्रौ न पश्यति।
अपि द्विवार्षिकं पुंसां मासेनैकेन साधयेत्।
वर्त्तिश्चन्द्रोदया नाम्ना तथा दृष्टिप्रसादनी ॥")

चन्द्रोपलः, पुं, (चन्द्रप्रभोद्भासित उपलः प्रस्तरः।) चन्द्रकान्तमणिः। इति हेमचन्द्रः। ४। १३३ ॥

चप, सान्त्वे। इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट्।) सान्त्वः प्रियवचनं उपग्रमो वा। चपति पुत्रं माता। इति दुर्गादासः ॥

चप, क म कल्के। इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट्।) कल्कचूर्णीकरणम्। क म, चपयति तण्डुलं गिलां। इति दुर्गादासः ॥

चपटः, पुं, (चप+घञर्थे कः। चपः सान्त्वना चूर्णीकरणं वा तत्रे अटति गच्छतीति। अट+पचाद्यच्। ततः प्रकन्दादिवत् साधुः।) चपेटः। इत्यमरटीका ॥ चड़ इति भाषा ॥

चपलं, क्ली, (चपं सान्त्वनां लाति प्राप्नोतीति। ला+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) घृतम्। इति मेदिनी। ले, ८८ ॥ चञ्चिकम्। इति हेमचन्द्रः ॥

चपलः, पुं, (चोपति मन्दं मन्दं गच्छतीति। चुप मन्दायां गतौ+"चुपेरोपधायाः।" उणां। १। १११। इति कलच् धातोरुकारस्य अकारा-

देशश्च ।) पारदः । (अस्य पर्य्याया यथा,—
"पारदो रसधातुश्च रसेन्द्रश्च महारसः ।
चपलः शिववीर्य्यश्च रसः शूतः शिवाक्षयः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
मीनः । चोरकः । प्रस्तरविशेषः । इति मेदिनी ।
ले, ८७ ॥ शवः । इति राजनिर्घण्टः ॥ (मूषिक-
विशेषः । यथा, सुश्रुते कल्पस्थाने ६ अध्याये ।
"पूर्ब्बसूक्ताः शुक्लविषा मूषिका ये समासतः ।
नामलक्षणभैषज्यैरष्टादश निबोध तान् ॥"
"कुलिङ्गखाजितश्चैव चपलः कपिलस्तथा ॥"
एतस्य दंशनेन यल्लक्षणं भवति तदुपशमनाय
च यदौषधं तदृयथा तत्रैव,—
"चपलेन भवेच्छर्द्दिर्मूर्च्छा च सह लक्षया ।
सभद्रकाष्ठां सजटां चौद्रेण त्रिफलां लिहेत् ॥")
चपलः, त्रि, (चोपति मन्दं मन्दं गच्छतीति । चुप
+कलः । धातोरुकारस्याकारादेशश्च ।) तरलः ।
चञ्चलः । इति मेदिनी । ले, ८८ ॥ (यथा,
आर्य्यासप्तशत्याम् । ५३० ।
"विचरति परितः क्षणे राधायां रागचपल-
नयनायाम् ।
दग्धविधिविशुद्धं विधिरवं विदधाति विषमेषुः ॥")
दोषमणिचित्य वधबन्धनादेः कर्त्ता । तत्पर्य्यायः ।
चिकुरः २ । इत्यमरः । ३ । १ । ४६ ॥ विकलः ।
इति शब्दरत्नावली ॥
चपला, स्त्री, (चपल+टाप् ।) लक्ष्मीः । (यथा,
माघे । ६ । १६ ।
"निलयः श्रियः सततमेतदिति
प्रथितं यदेव जलजञ्च तया ।
दिवसात्ययात्तदपि सुक्तमहो
चपलाजनं प्रति न चोदमदः ॥"
"चपला चापलवती स्त्री कमला च ॥" इति
तट्टीकायां मल्लिनाथः ॥) विद्युत् । (यथा,
आर्य्यासप्तशत्याम् । १७६ ।
"किंपुच्चि! गरुडग्रैलभमेघ नवनीरदेषु निद्रासि ।
अनुभव चपलाविलासितगर्ज्जितदेष्णान्तर-
भ्रान्तीः ॥")
पुंश्चली । पिप्पली । इति मेदिनी । ले, ८८ ॥
(अस्याः पर्य्याया यथा,—
"पिप्पली मागधी क्षुद्रा वैदेही चपला कणा ।
उपकुल्योषणा ग्रौढी कोला स्यात्तीक्ष्णतण्डुला ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
जिह्वा । इति शब्दचन्द्रिका ॥ विजया । मदिरा ।
इति राजनिर्घण्टः ॥ (आर्य्याछन्दोविशेषः ।
तल्लक्षणं यथा, वृत्तरत्नाकरे २ अध्याये ।
"उभयार्द्धयोर्नकारौ द्वितीयतुर्य्यौ गमध्यगौ
यस्याः ।
चपलेति नाम तस्याः प्रकीर्त्तितं नागराजेन ॥")
चपेटः, पुं, (चप+घञर्थे कः । चपः सान्त्वना
चूर्णीकरणं वा तत्रे टटति गच्छतीति । टट
गतौ+अच् ।) विस्तृताङ्गुलिपाणिः । चड इति
चापड इति च भाषा । तत्पर्य्यायः । प्रतलः २
प्रहस्तः ३ । इत्यमरः । २ । ६ । ८४ ॥

चपेटी, स्त्री, भाद्रशुक्लषष्ठी । यथा, भाद्रशुक्लषष्ठ्यां
अक्षयफलप्राप्तिकामः स्नानादिकं कुर्य्यात् ।
सन्तानकामो जलसमीपे षष्ठीं पूजयेत् । षष्ठ्यै
नमः इति आरण्यषष्ठीपूजावत् । चापड़ाषष्ठी-
यम् । इति कृत्यचन्द्रिकाव्याख्या ॥ * ॥ अन्यच्च ।
"प्रस्तुत्या द्वादशे मासि सम्यग्व्यापत्यदुःखिते ।
सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्येष्ठे चारण्यसंज्ञिता ।
आषाढ़े कार्ह्मसी श्रेया श्रावणे सुखदा मता ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा ।
नाथाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी ॥
पौषे माख्यस्वरूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता ॥"
इति स्कन्दपुराणम् ॥
मन्यानषष्ठी इति केचित् ॥
चम, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-
सकं-सेट् । उदित्वात् क्त्वावेट् ।) चमति । उ,
चमित्वा चान्त्वा । इति दुर्गादासः ॥
चम, न र उ भक्षे । इति कविकल्पद्रुमः ॥ (स्वां-
परं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) न, चन्मोति ।
र वैदिकः । उ, चमित्वा चान्त्वा । इति दुर्गा-
दासः ॥
चमत्कारः, पुं, (चमत्करोतीति । कृ+अण् ।)
अपामार्गः । इति शब्दरत्नावली ॥ (चमत्+
कृ+भावे घञ् ।) चित्तविस्तारहेतुः । तत्-
पर्य्यायः । विस्मयः २ । इति साहित्यदर्पणम् ॥
डमरः ३ । इति त्रिकाण्डशेषः ॥ लोकातीतार्था-
कलनेन किमेतदिति ज्ञानधाराजनने चित्तस्य
दीर्घप्रायत्वं चित्तविस्तारः । इष्टहेतुभ्योऽसम-
वित्यज्ञानेन हेत्वन्तरानुसन्धाने मनोव्यापार एव
चित्तविस्तार इत्यपरे । इति साहित्यदर्पणटीका ॥
(यथा, कथासरित्सागरे । २२ । २५७ ।
"एवं सकलजगच्चयहृदयचमत्कारकारि-
चरिताम् ।
स्वयमनुधावन्ति सदा कल्याणपरम्पराः पदवीम् ॥")
चमरं, क्ली, (चमरस्येदम् । चमर+अण् । अत्र
. न वृद्धिः ।) चामरम् । इति मेदिनी । रे, १५२ ॥
चमरः, पुं, (चमति भक्षयतीति । चम+"अर्ति-
कमिभ्रमिचमीति ।" उणां । ३ । १३२ । इति
अरच् ।) चमरगौः । तत्पर्य्यायः । अजनी २
वन्यः ३ धेनुगः ४ वालधिप्रियः ५ । इति राज-
निर्घण्टः ॥ (यथा, वैद्यरामायणे । २६ । ३ ।
"चमराः शमराश्चैव ये चान्ये वनचारिणः ॥")
चमरपुच्छः, पुं, (चमरस्य पुच्छ इव पुच्छो यस्य ।)
कोकड़ः । स तु विशेषग्रन्थभेदः । इति राज-
निर्घण्टः ॥ चामरे क्ली च ॥
चमरिकः, पुं, (चमरमिव केशरोऽस्यास्य । "अत
इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) कोविदार-
वृक्षः । इत्यमरः । २ । ४ । २२ । (पर्य्यायोऽस्य
यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ।
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुक्षीतान्नप्रभेदश्च स्मृतः स्वल्पकेशरी ॥")

चमरी, स्त्री, (चमरस्य स्त्रीजातिः । चमर+
स्त्रियां ङीष् ।) चमरगवी । तत्पर्य्यायः । दीर्घ-
वाला २ गिरिप्रिया ३ । इति राजनिर्घण्टः ॥
(यथा, कुमारे । १ । १३ ।
"यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति बालव्यजनैश्चमर्यः ॥")
मञ्जरी । इति मेदिनी । रे, १५२ ॥
चमसः, पुं, क्लो, (चम्यते भक्ष्यते पीयते इति यावत्
सोमोऽस्मिन्निति । चस भक्षणे+"अत्यवि-
चमीति ।" उणां । ३ । ११७ । इति असच् ।)
यज्ञपात्रभेदः । इति मेदिनी । से, २१ ॥ चमच्
इति भाषा ॥ (एतल्लक्षणादिकमुक्तं यथा,—
"चमसानां तु वक्ष्यामि दारुजाः सुचतुरङ्गुलाः ।
बाहुलस्तु भवेत् स्कन्धो विस्तारश्चतुरङ्गुलः ॥
विकङ्कतमयाः श्लक्ष्णावार्ग्विलाश्चमसाः स्मृताः ।
अन्येभ्यो वापि वा कार्य्यास्तेषां दर्व्वेश्च लक्षणम् ॥
होतुर्मध्यम एव स्यात् ब्रह्मणश्चतुरस्रकः ।
उद्गातृणाञ्च त्रयः स्याद् याजमानः पृथुः स्मृतः ॥
प्रशास्तुरवतः स्याद्दक्षोत्थो ब्रह्मणंसिनः ।
पोतुरग्रे विशाखौ स्याच्छेषाद्विग्रहीतकः ॥
अच्छावाकस्य राज्ञाव आग्नीध्रस्य मयूखकः ।
इत्येते चमसाः प्रोक्ता ऋत्विजां यज्ञकर्म्मणि ।
पलाशाश्वत्थ वटाद्यार्द्रदृषद्वा चमसाः स्मृताः ॥")
चमसः, पुं, (चम्यते भक्ष्यते इति । चम+असच् ।)
पर्पटः । पिण्डभेदः । लड्डुकः । इत्यजयपालः ॥
(ऋषभदेवस्य पुत्राणामन्यतमः । यथा, भाग-
वते । ५ । ४ । ११ ।
"कविर्हविरन्तरिक्षः प्रबुद्धः पिप्पलायनः ।
आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥
एते भागवतधर्म्मदर्शनो नव महाभागवताः ॥")
चमसी, स्त्री, (चमस+गौरादित्वात् ङीष् ।)
सुद्रमस्करादिपिण्डम् । काष्ठरचितं यज्ञपात्र-
मित्यन्ये । इति लिङ्गादिसंग्रहटीकायां भरतः ॥
"चूर्णं यज्ञक्ष्मभाणां चमसी सा विधीयते ।"
इति भावप्रकाशः ॥
चम्पः, क्ली, (चमति भक्षयति ग्रहून् नाशयतीत्यर्थः ।
चम+"क्रविचमितनीति ।" उणां । १ । ८० । इति
पः ।) सेनामात्रम् । (यथा, गीतायाम् । १ । ३ ।
"पश्यैतां पाण्डुपुत्राणामाचार्य्य महतीं चम्पम् ।"
सेनाविशेषः । तत्र ७२६ हस्तिनः ७२६ रथाः
२१८७ अश्वाः ३६४५ पदातयः । समुदायेन
७२६० द्विगुणनवत्यधिकसप्तसहस्रम् । इत्यमर-
मेदिनीकरौ ॥
चम्पः, पुं, क्लो, (चमतीति । चम+"खर्जिपिञ्जा-
दिभ्य ऊरोलचौ ।" उणां । ४ । ६० । इति ऊरः ।
पृषोदरादित्वात् अत उलच् ।) हरिद्राविशेषः ।
इत्यमरः । २ । ५ । ६ ॥ (यथा, माघे । १ । ८ ।
"चकासतं चारुचमूरुचर्म्मणा
कृत्तेन नागेन्द्रमिवेन्द्रवाहनम् ॥")
चम्पः, पुं, (चम्यतीति । चम्प+अच् ।) कोवि-
दारवृक्षः । इति शब्दमाला ॥

चम्पकं, क्ली, (चम्पति सदृगन्धं गच्छतीति। चम्प + खुल्।) कदलीफलविशेषः। चाँपा कला इति भाषा। अस्य गुणाः। वातपित्तनाशित्वम्। गुरुत्वम्। वीर्य्यकारित्वम्। अतिशीतत्वम्। रसे पाके मधुरत्वञ्च। इति राजवल्लभः॥ (चम्पकस्य इदम्। चम्पक + अण्। ततोऽणो लुक्।) चम्पकपुष्पम्॥ (सांख्यशास्त्रोक्तसिद्धभेदः। यथा,—
"न्यायेन स्वयं परीक्षितमप्यर्थं तावन्न श्रद्दधते यावद्गुरुशिष्यसब्रह्मचारिभिः सह न संवादयते। अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सुहृत्प्राप्तिः सा सिद्धिश्चतुर्थी चम्पकमुच्यते॥")

चम्पकः, पुं, (चम्पयति सदृगन्धादिकं गच्छतीति। चम्प + खुल्।) वृक्षविशेषः। चाँपा इति भाषा। तत्पर्य्यायः। चाम्पेयः २ हेमपुष्पकः ३। इत्यमरः। २। ४। ६३॥ स्वर्णपुष्पः ४ शीतलच्छदः ५ सुभगः ६ भृङ्गमोही ७ शीतलः ८ भ्रमरातिधिः ९ सुरभिः १० दीपपुष्पः ११ स्थिरगन्धः १२ अतिगन्धकः १३ स्थिरपुष्पः १४ हेमपुष्पः १५ पीतपुष्पः १६ हेमाङ्गः १७ सुकुमारः १८ वनदीपः १९। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। शिशिरत्वम्। दाहकुष्ठकण्डूव्रणनाशित्वम्। गुणाढ्यो राजचम्पकः। इति राजनिर्घण्टः॥ कषायत्वम्। मधुरत्वम्। विषश्लेष्मकृच्छ्रकफवातास्रपित्तनाशित्वञ्च। इति भावप्रकाशः॥ फलस्यैकदेशावयवश्च॥

चम्पककलिका, स्त्री, (चम्पकस्य कलिका कोरकः।) चम्पककोरकः। तत्पर्य्यायः। गन्धफली २ वङ्कुगन्धा ३ गन्धमोदिनी ४। इति राजनिर्घण्टः॥

चम्पकचतुर्दशी, स्त्री, (चम्पकसाध्या चतुर्दशी। अस्यां चम्पकैः शिवपूजनात् शिवलोकप्राप्तेस्तथात्वम्।) ज्येष्ठशुक्लचतुर्दशी। यथा, ज्येष्ठमासपटलस्य मत्स्यसूक्ते ४५ पटले।
"चतुर्दश्याञ्च शुक्लायां चम्पकैः पूजयेत् शिवम्। अयुतेनैव सहस्रैर्वा शतैर्वा परमेश्वरि!॥ पायसञ्च बलिं दद्यात् ततो नक्तं चरेद्व्रती। वत्सरेण विशेषेण न भूयो जायते भुवि॥ त्रिमध्वक्तैश्चम्पकैश्च सहस्रं जुहुयान्निशि। त्र्यम्बकेश्वरान् हत्या हत्वा ब्रह्महणि यानि च॥ तत्सर्वं चतुर्दशी ख्याता पूजयेद्वा सदाशिवम्। दग्ध्वा जन्मकृतं पापमर्चनादेव नश्यति॥"
अन्यच्च।
"चतुर्दश्याञ्च शुक्लायां ज्येष्ठे मासि महेश्वरम्। चम्पकैः पूजयेत् भक्त्या शिवलोकमवाप्नुयात्॥"
इत्युत्तरकामाख्यातन्त्रे ११ पटलः॥
अपि च।
"ज्येष्ठराशौ चतुर्दश्यां पुष्पैश्चम्पकसम्भवैः। अर्चयित्वा महादेवं रुद्रलोके महीयते॥"
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम्॥

चम्पकरम्भा, स्त्री, (चम्पक इति नाम्ना प्रसिद्धा रम्भा। यद्वा, चम्पकपुराणतद्वृत्तग्रन्थविशिष्टा रम्भा।) सुवर्णकदली। इति राजनिर्घण्टः॥

(चाँपा कला। इति भाषा॥ गुणादिकं चम्पकशब्दे द्रष्टव्यम्॥)

चम्पकालुः, पुं, (चम्पकवत् चम्पकपुष्पवर्णवत् आशु रथन्तरदीवकोषो यस्य। यद्वा, चम्पकं चम्पकवर्णं आलाति प्रतियह्णातीति। आ + ला + मितद्वादित्वात् डुः।) पनसः। इति भूरिप्रयोगः॥

चम्पकुन्दः, पुं, (चम्पकवर्णः सन् उनत्तीति। उन्दी क्लेदने + अच्। पृषोदरादित्वात् अकारलोपः।) मत्स्यभेदः। चाँदकुड़ा। इति भाषा। अस्य गुणाः। गुरुत्वम्। शुक्रकारित्वम्। मधुरत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः॥

चम्पकोषः, पुं, (चम्पश्चम्पक इव कोषो यस्य।) पनसः। इति त्रिकाण्डशेषः॥

चम्पा, स्त्री, (चम्पा नदी विद्यतेऽस्यामिति। "अर्श आदिभ्योऽच्।"५। २। १२७। इत्यच्। यद्वा, चम्पेन राज्ञो हरिश्चन्द्रस्य प्रपौत्रेण निर्म्मिता या पुरी। यदुक्तं भागवते।९।८।१।
"हरितो रोहितसुतश्चम्पस्तस्मादिनिर्म्मिता। चम्पा पुरी.....॥")
कर्णपुरी। अधुना भागलपुर इति ख्याता। तत्पर्य्यायः। मालिनी २ लोमपादपूः ३ कर्णपूः ४। इति हेमचन्द्रः। ४। ४२॥ चम्पावती ५ चम्पापुरी ६। इति शब्दरत्नावली॥ (इयन्तु अङ्गदेशान्तर्गता। यदुक्तं हेमचन्द्रेण। ४। २३।
"वङ्गास्तु हरिकेलीया अङ्गाश्चम्पोपलक्षिताः॥"
तथा च महाभारते। १२। ५। ६—७।
"प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ। अङ्गेषु नरशार्दूल! स राजानमसीत् सपत्नजित्॥ पालयामास चम्पाञ्च कर्णः परबलार्दनः। दुर्य्योधनस्यानुमते तवापि विदितं तथा॥"
इयमेव पुरा राज्ञो लोमपादस्य राजधानी आसीत्। इति रामायणम्॥ अङ्गदेशस्यनदीविशेषः॥)

चम्पाधिपः, पुं, (चम्पाया अधिप ईश्वरः।) कर्णराजः। इति हेमचन्द्रः॥

चम्पापुरी, स्त्री, (चम्पा एव पुरी।) चम्पानगरी। इति शब्दरत्नावली॥

चम्पालुः, पुं, (चम्पकस्यैव कोशवर्णं आलाति आ + ला + डुः।) पनसः। इति शब्दरत्नावली॥

चम्पावती, स्त्री, (चम्पा तदाख्यया प्रसिद्धा नदी विद्यतेऽस्यामिति। चम्पा + मतुप्। मस्य वत्वम्।) चम्पापुरी। इति शब्दरत्नावली॥

चम्पूः, स्त्री, काव्यविशेषः। इति जटाधरः॥ तल्लक्षणं यथा,—
"गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते॥"
इति साहित्यदर्पणे। ६। २६८॥

चम्पेशः, पुं, (चम्पाया ईशः।) कर्णराजः। इति त्रिकाण्डशेषः॥

चम्पोपलक्षितः, पुं, (चम्पया नगर्य्या नद्या वा उपलक्षितः।) अङ्गदेशः। इति हेमचन्द्रः। ४। २३॥ तद्देशस्थे पुं भूम्नि॥

चम, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) चमति। इति दुर्गादासः॥

चय, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, चयते। इति दुर्गादासः॥

चयः, पुं, (चीयते इति। चि + "एरच्।" ३। ३। ५६। इति कर्म्मणि अच्।) वप्रम्। इत्यमरः। २। २। ३॥ तत्तु प्राकारादिमूलबद्धम्। यदुपरि प्राकारो निरूप्यते सः। पगार इति ख्यात इति केचित्। इति तट्टीकासारसुन्दरी॥ दुर्गनगरे उद्धृतमृत्तिकास्तूपबद्धं यदुपरि प्राकारो निवेश्यते। तथाचार्थशास्त्रम्। खातसुद्धृतमृत्तदा वप्रं कारयेत् तस्योपरि प्राकारमिति। इति भरतः॥ समूहः। (यथा मनौ। १। ३।
"चयश्चेषामित्यवधारितं पुरा॥")
समाकृतिः। इति मेदिनी। ये, २१॥ प्राकारः। (यथा, महाभारते। ३। १६०। ३७।
"शैलादभ्युच्छ्रयवता चयेनाट्टालकशोभिना॥")
पीठम्। इति हेमचन्द्रः॥ (दोषार्त्ता सञ्चयप्रकोपप्रशमादिषु प्रकारविशेषः। तद्यथा,—
"ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति। वर्षार्त्ता चीयते पित्तं शरत्काले प्रकुप्यति॥ हेमन्ते चीयते श्लेष्मा वसन्ते च प्रकुप्यति। प्रायेण प्रशमं याति स्वयमेव समीरणः॥ शरत्काले वसन्ते च पित्तं प्रावृड्भवौ कफः।"
"चयकोपशमान् दोषा विहाराहारसेवने। समानैर्व्यत्ययात्काले ऽपि विपरीतैर्विपर्य्ययम्॥"
इति पूर्व्वखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम्॥ प्रोथः। यथा,—
"कटुतैलान्वितैर्लेपात् सर्षपैर्निर्म्लोकभस्मभिः। चयः शाम्यति गण्डस्य प्रकोपः स्फुटति द्रुतम्॥"
इति वैद्यकचक्रपाणिसंग्रहे व्रणशोथाधिकारे॥)

चर, गमने। अदने। आचारे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) चरति। इति दुर्गादासः॥

चर, क संशीलसंशीत्योः। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) संशीतिः संशयः। असंशीतिरसंशयः। क, विचारयति यो धर्म्ममिति हलायुधः। चर असंशये। इति प्राचः। केचित्तु संशये इति पठित्वा संशये हि विचारणा स्यादित्याहुः। इति दुर्गादासः॥

चरः, पुं, (चरति स्वपरराष्ट्रस्य शुभाशुभज्ञानाय भ्राम्यतीति। चर + अच्।) राष्ट्रादेः शुभाशुभादिज्ञानार्थं राज्ञा सगोपनं नियुक्तः पुरुषः। परतत्त्वज्ञानार्थभ्रमणकर्त्ता। तत्पर्य्यायः। यथार्हवर्णः २ प्रणिधिः ३ अपसर्पः ४ चारः ५ स्पशः ६ गूढपुरुषः ७। इत्यमरः। २। ८। १३॥ अपसर्पकः ८ प्रतिष्कः ९ प्रतिष्कसः १० ऊष्मगतिः ११ मलगूढः १२ हितप्रणीः १३। इति शब्दरत्नावली॥ उदासितः १४। इति जटाधरः॥ तत्कार्य्यौ भिक्षुबलिगादिवेशेन नित्यस्थायिनि चरे। पक्षे स्वदेशपरदेशभ्रमणग्राह्ये इत्यर्थे। इति भरतः॥ तस्य लक्षणं यथा,—

"विवस्वानिव तेजोभिर्नभस्वानिव वेगतः ।
राजा चरैर्जगत् सर्व्वं प्राप्नुयाल्लोकसम्मतैः ॥
तर्कैङ्गितज्ञः स्मृतिमान् स्वीयभावाप्रकाशकः ।
क्लेशायाससहो दक्षः सर्व्वत्र भयवर्जितः ॥
सुभक्तो राजसु तथा कार्य्याणां प्रतिपत्तिमान् ।
दृपो निहन्याच्चारेण परराष्ट्रं विचक्षणः ॥
कालज्ञो मन्त्रकुशलान् संवत्सरचिकित्सकान् ।
तथान्यानपि युञ्जीत समर्थान् शुद्धचेतसः ॥
अक्रुद्धांश्च तथाशुभ्रान् दक्षार्थान् तत्त्वभाषिणः ।
पाषण्डिनस्तापसादीन् परराष्ट्रे नियोजयेत् ॥
स्वदेशपरदेशज्ञान् सुशीलान् सुविचक्षणान् ।
वर्षाद्यर्थान् बहूंश्चैव चराञ्जां विनियोजयेत् ॥
नैकस्य वचने राजा चारस्य प्रत्ययं वहेत् ।
द्वयोः समन्वमाज्ञाय तदुक्तं कार्य्यमारभेत् ॥
तस्माद्राजा प्रयुञ्जीत चरान् बहुसखान् बहून् ।
नीरोतोवामनाः कुब्जास्त्रिधा ये च कारवः ॥
भिक्षुकश्चारणा दास्यो मालाकार्य्यः कलाविदः ।
अन्तःपुरगतां वार्त्तां निर्हरेयुरलक्षिताम् ॥
प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधो मतः ।
अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूतसंज्ञकः ॥"

इति भोजराजकृतयुक्तिकल्पतरौ ॥ * ॥

अचद्यूतभेदः । भौमः । चलः । इति मेदिनी । रे, ३० ॥ खञ्जनपक्षी । इति शब्दमाला ॥ कपर्दकः । इति राजनिर्घण्टः ॥ मेषकर्कटतुलामकरलग्नानि । इति ज्योतिषम् ॥ अस्थिरविभूतिमिदं चलमटनं खलितनियममपि चरमे । इति दीपिका ॥ (यथा, तिथितत्त्वे ।
"चरलग्ने चरांशे वा स्थापनञ्च विसर्জ্জनम् ॥"
जङ्गमे, त्रि । यथा मनुः । ७ । १५ ।
"तस्य सर्व्वाणि भूतानि स्थावराणि चराणि च ॥"
तथाच चरके सूत्रस्थाने २७ अध्याये ।
"नरः शरीरावयवः स्वभावो धातवः क्रिया ।
लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्ष्यते॥
चरोरगूपजलाकाशधन्वाद्यो भक्षसंविधिः ।
जलजानूपनाश्चैव जलानूपचराश्च ये ॥
गुरुभक्त्याश्च ये सक्ता सर्व्वे ते गुरवः स्मृताः॥")

चरकः, पुं, (चर एव । स्वार्थे कन् ।) चारः । इत्युणादिकोषः ॥ पर्पटः । इति राजनिर्घण्टः ॥ (चरति गच्छति वेत्ति वेदवेद्यकादीनि सर्व्वशास्त्राणीति । चर + अच् ततः कन् च । यद्वा चर इव महोक्षं द्रष्टुमागतः । चर + इवार्थे कन् ।) मुनिविशेषः । तत्कृततत्तन्नामकग्रन्थः । तयोरुत्पत्तिर्यथा,—
"यदा मत्स्यावतारेण हरिणा वेद उद्धृतः ।
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान् ॥
अथर्व्वान्तर्गतं सम्यगायुर्व्वेदञ्च लब्धवान् ।
एकदा स महीद्वृत्तं द्रष्टुं चर इवागतः ॥
तत्र लोकान् गदैर्यस्तान् व्यथया परिपीड़ितान् ।
स्थलेषु बहुषु व्याधान् म्रियमाणांश्च दृष्टवान् ॥
तान् दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः ।
अनन्तश्चिन्तयामास रोगोपशमकारणम् ॥
संचिन्त्य स स्वयं तत्र मुनेः पुत्रो बभूव ह ।
यतश्चर इवायातो न ज्ञातः केनचिद्यतः ॥
तस्माच्चरकनामासौ विख्यातः क्षितिमण्डले ।
स भाति चरकाचार्य्यो देवाचार्य्यो यथा दिवि ॥
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ।
आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन् ॥
मुनयो बहवस्तेषु कृतं तन्त्रं स्वकं स्वकम् ।
तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता ॥
चरकेणात्मनो नाम्ना यत्नोऽयं चरकः कृतः ॥"

इति भावप्रकाशः ॥

चरटः, पुं, (चरति वृथतीव विचरतीर्थः । चर + बाहुलकात् अटच् ।) खञ्जनपक्षी । इति शब्दमाला ॥

चरणं, क्ली, (चर + भावे ल्युट् ।) गमनम् । (यथा, ऋग्वेदे । ६ । ११४ । ६ ।
"यत्राकामं चरणं त्रिनाके त्रिदिवे दिवः ॥")
भक्षणम् । (यथा, मनुः । २ । १८६ ।
अक्षता भैक्षचरणमसमिश्र च पावकम् ।
अगारुरः सप्तरात्रमवकीर्णिव्रतञ्चरेत् ॥")
आचारः । इति हेमचन्द्रः । ३ । ५०७ ॥ (यथा, ऋग्वेदे । १० । १३६ । ६ ।
"अप्सरसां गन्धर्व्वाणां मृगाणां चरणे चरन् ॥")

चरणः, पुं क्ली, बहुचादिः । (यथा, प्रपञ्चतन्त्रे । ४ । ३ ।
"न पृच्छेच्चरणं गोत्रं न च विद्यां कुलं न च ।
अतिथिं वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत् ॥"
अपि च महाभाष्यवचनम् । यथा,—
"सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥"
"चरणशब्दो वेदैकदेशवाची कठादिरूपः ।" इति सुबोधटीकायां दुर्गादासः ॥) मूलम् । गोत्रम् । इति मेदिनी । णे, १७ ॥ (चरतीति । चर + ल्युः । चरत्यनेनेति करणे ल्युट् वा । अधमाङ्गम् । तत्पर्य्यायः । पादः २ पतु ३ अङ्घ्रिः ४ । इत्यमरः । २ । ६ । ७१ ॥ विक्रमः ५ पदः ६ आक्रमः ७ । इति राजनिर्घण्टः ॥ क्रमणः ८ चलनः ९ क्रमः १० । इति हेमचन्द्रः । ३ । २८० ॥ पदम् ११ पात् १२ । इति जटाधरः ॥ (यथा, मनुः । ६ । २७७ ।
"अङ्गुलीग्रन्थिभेदस्य क्षेदयेत् प्रथमे ग्रहे ।
द्वितीये दण्डचरणौ तृतीये वधमर्हति ॥"
श्लोकचतुर्थभागः । यथा, उत्तररामचरिते १ अध्याये ।
"श्लेषं गाथाभिः षड्भिश्चरणैश्चोपलक्षितः ॥")

चरणग्रन्थिः, पुं, (चरणस्य ग्रन्थिः ।) गुल्फः । इति हेमचन्द्रः । ३ । ६१५ ॥

चरणव्यूहं, क्ली, (चरणानां वेदशाखानां व्यूहोऽत्र ।) वेदव्यासविरचितचतुर्व्वेदविवरणग्रन्थभेदम् । तच्च वेदशब्दे द्रष्टव्यम् ॥

चरणायुधः, पुं, (चरण एवायुधं अस्त्रविशेषो यस्य ।) कुक्कुटः । इत्यमरः । २ । ५ । १७ ॥ (पर्य्यायोऽस्य यथा,—
"कुक्कुटः कुक्कवाकुः स्यात् कलयञ्चरणायुधः ।
ताम्रचूडस्तथा दक्षो यामनादी शिखण्डिकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
अस्य मांसगुणादिकं कुक्कुटशब्दे द्रष्टव्यम् ॥

चरणाढ्ये, त्रि । यथा, रामायणे । ३ । ५६ । ३५ ।
"तुरङ्गपदसंहारैश्च जटायुश्चरणायुधः ॥")

चरमः, त्रि, (चरतीति । "चरेश्च ।" उणां ५ । ६८ । इति अमच् ।) अन्तः । पश्चिमः । इत्युणादिकोषः ॥ (यथा, मनुः । २ । १६४ ।
"उत्तिष्ठेत् प्रथमं चास्य चरमं चैव संविशेत् ॥")

चरमभाभृत्, पुं, (भां बिभर्त्तीति । भृ + क्विप् । ततः चरमश्चासौ भाभृच्चेति कर्म्मधारयः ।) अस्ताचलः । इत्यमरः । २ । ३ । २ ॥

चरमाचलः, पुं, (न चलतीति पचाद्यच् अचलः पर्व्वतः । ततः चरमश्चासौ अचलश्चेति कर्म्मधारयः ।) अस्तपर्व्वतः । इति त्रिकाण्डशेषः ॥

चरमाद्रिः, पुं, (चरमश्चासावद्रिश्चेति ।) अस्ताचलः । इति हेमचन्द्रः ॥

चराचरं, क्ली, (चराचरयोः समाहारः ।) जगत् । इति मेदिनी । रे, २६० ॥ (तथा च मनुः । १ । ५७ ।
"एवं स जागयत्सुप्तमेतदं सर्व्वं चराचरम् ।
सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः ॥")
आकाशः । इति धरणी ॥ जङ्गमाजङ्गमम् । यथा, देवीभागवते ।
"तया विरच्यते विश्वं जगदेतच्चराचरम् ॥"

चराचरः, त्रि, (चरश्चलं आचरो व्यवहारचेष्टादिकं तौ विद्यतेऽस्मिन् ।) जङ्गमः । इत्यमरः । ३ । १ । ७४ ॥ शूद्रः । इति विश्वः ॥ इडः । इति हेमचन्द्रः ॥ कपर्दके पुं । इति राजनिर्घण्टः ॥ (चरतीति चरो जङ्गमः अचरः स्थावरः । चरेण सह अचरः । स्थावरजङ्गमः । यथा, भागवते । ३ । ६ । ६ ।
"युक्तोभान्योन्यमासाद्य यस्मिंल्लोकाश्चराचराः ॥")

चरिः, पुं, (चर + "सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।) पशुः । इत्युणादिकोषः ॥

चरितं, क्ली, (चर + भावे क्तः ।) चरित्रम् । इति शब्दरत्नावली ॥ (यथा, भागवते । १० । १ । १ ।
"कथितो वंशविस्तारो भवता सोमसूर्य्ययोः ।
राज्ञाञ्चोभयवंश्यानां चरितं परमाद्भुतम् ॥")
तद्द्विविधं यथा, उज्ज्वलनीलमणौ ।
"अनुभावाश्च लीला चेत्युक्तं चरितं द्विधा ।
अनुभावा अलङ्काराख्याः उद्भास्वराख्याः वाचिकाख्याश्च । लीला स्यादतविक्रीड़ा राजकन्यकखेलाद्या चारुक्रीड़ा प्रकीर्त्तिता । ताण्डवं वेणुवादनं गोदोहः पर्व्वतोद्धारो गोभूतिर्गमनादिका ॥" (यथा, गीतगोविन्दे । १ । २ ।
"वाग्देवताचरितचित्रितचित्तसद्मा ॥"
वाच्यलिङ्गे तु । चर + कर्म्मणि क्तः । ततम् । आचरितम् । यथा, रामायणे । १ । ३ । १ ।
"श्रुत्वा पूर्व्वं कायवीजं देवर्षेर्नारदादृषिः ।
लोकादन्विच्य भूयश्च चरितं चरितव्रतः ॥")

चरितार्थः, त्रि, (चरितः कृतः अर्थः प्रयोजनं येन सः ।) प्राप्तप्रयोजनः । यथा, कुमारसम्भवे । २ । ७ ।
"पुराणस्य कवेस्तस्य चतुर्म्मुखसमोदिता ।
प्रवृत्तिरासीच्छन्दांसि चरितार्थां चतुष्टयी ॥"

चरित्रं, क्ली, (चर+"अर्म्मिलधूसृखनसहचर इत्रः।"उ। २। १८४। इति इत्रः।) स्वभावः। तत्पर्य्यायः। चरितम् २ चारित्रम् ३ चरीत्रम् ४। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ४। ८३।

"अचिन्त्यं स्त्रीगुणानां चरित्रं कुलयोषिताम्॥")

चरित्रा, स्त्री, (चरित्र+टाप्।) तिन्तिड़ीवृक्षः। इति शब्दरत्नावली॥

चरिष्णुः, त्रि, (चरतीति। चर+"अलङ्कृञ्निति।" २। २। १३६। इति इष्णुच्।) जङ्गमः। इत्यमरः।३।१।७४॥ (यथा, भागवते। २।६।४०।

"द्रव्यं विकारो गुण इन्द्रियाणि
विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः॥")

चरीत्रं, क्ली, (चरित्र+पृषोदरादित्वाद्दीर्घत्वम्।) चरित्रम्। इति शब्दरत्नावली॥

चरुः, पुं, (चरन्ति भक्षयन्ति देवा इमं चर्य्यते भक्ष्यते अध्वर्य्वादिभिर्देवैरिति वा चरति होमादिकमनेनादिलोके। चर+"भृञ्जीति।" उणा १। ७। इति उः।) हविरन्नम्। तत्पाकभाजनम्। इति मेदिनी। रे, ३२॥

"ततश्च संस्कृते वह्नौ गोचीरेण चरुं पचेत्॥"

इति शारदातिलकम्॥

तस्यानुष्ठानं यथा। अग्नेः प्रक्रियायान्दिशि प्रागग्यान् कुशानास्तीर्य्य तदुपरि प्रक्षालितं वारुणसुदूखलं सुमलं वैष्णवेन सर्पिषा वारुणचमसस्थजलप्रोक्षितं संस्थाप्य व्रीहीन् यवान् वा सर्पिषि निधाय चमसस्थजलेन ओं वास्तोष्पतये त्वा जुष्टं प्रोक्षामि ओम् इन्द्राय त्वा जुष्टं प्रोक्षामि ओं भूस्वाहा जुष्टं प्रोक्षामि ओं भुवस्वाहा जुष्टं प्रोक्षामि ओं स्वस्वाहा जुष्टं प्रोक्षामि ओं प्रजापतये त्वा जुष्टं प्रोक्षामि ओं प्रजापतये त्वा जुष्टं निर्व्वपामि ओं भूस्वाहा जुष्टं निर्व्वपामि ओं भुवस्वाहा जुष्टं निर्व्वपामि ओं स्वस्वाहा जुष्टं निर्व्वपामि ओं प्रजापतये त्वा जुष्टं निर्व्वपामि इति प्रत्येकं गृहीत्वा उदूखले क्षापयेत् द्विरूखीम्। ततो दक्षिणहस्तोपरि कृत्वा सुवेणावहत्य सर्पिषा प्रस्फोटयेत्। इत्थमेव वारत्रयं कृत्वा त्रिः प्रक्षालयेत्। ततश्चरुस्थालाममन्त्रकं कृतोत्तराग्रं पवित्रं निधिय प्रक्षालिततण्डुलं निधाय दुग्धं निधिय स्तोकं स्तोकमुदकं दत्त्वा तन्मध्ये खदिरपलाशोडुम्बराणामन्यतमस्य प्रादेशप्रमाणं अग्रे उभयतोऽङ्गुष्ठपर्व्वप्रमाणं चतुष्कोणपुष्पलं मेक्षणं दक्षिणावर्त्तेन भ्रामयित्वा तथा पचेत् यथाऽतण्डुलो सम्यक् पाको भवति गालनं न भवति दाहश्च न भवति ततः सम्यक्पाके भूते मध्ये घृतप्लुतं कृत्वा प्रागादिदिक्स्थितं चरुमवतार्य्य अग्नेरुत्तरतः कुशोपरि स्थापयित्वा पुनर्मध्ये घृतप्लुतं दद्यात्। इति भवदेवभट्टः॥

चरुत्रयः, पुं, (चरोस्त्रय इव।) चित्राभूपः। इति त्रिकाण्डशेषः॥ चितार इति भाषा॥

चर्च, क इड्सने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इड्सनम्; अध्ययनम्। क, चर्च्चयति वेदं विप्रः। इति दुर्गादासः॥

चर्च, ग उल्लो। भर्त्सने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) रेफोपधः। ग्र, चर्च्चतीति चर्च्चन्ती। गुणस्थानरहितानां तुदादिपाठफलन्तु ग्रन्थानामादौपोरिति गुणो विभाषा वेदेषूच्चारणभेदश्च। इति दुर्गादासः॥

चर्च्चरी, स्त्री, (चर्च+वाहुलकात् अरन् ततो गौरादित्वात् ङीष्।) गीतभेदः। चर्च्चरी गीतभेदे च कैशिकीकरग्रन्थ्योरिति रुद्रः॥ हर्षक्रीड़ेति भूमिः। कापटिकानां सादरवचनं तौर्य्यत्रिकचेत्यन्ये। वसन्तसमयक्रीड़ेत्येके। इत्यमरटीकायां भरतः॥ हर्षक्रीड़ावाक्। तत्पर्य्यायः। चर्भटी २। इति हेमचन्द्रः॥ (यथा, रत्नावल्याम्। १ अङ्के। "अये! मधुरमभिहत्यमागन्दुन्दुभध्वानुगतसङ्गीतमधुरः पुरः पौराणासुच्चरति चर्च्चरीध्वनिः॥" एतदुदाहरणं यथा, विक्रमोर्व्वश्याम्। ४ अङ्के। अनन्तरे चर्च्चरीमुक्ता,—

"गन्धोन्मादितमधुकरगीते-
र्वाद्यमाने: परभृततूर्य्यैः।
प्रसरितपवनोद्वेल्लितपल्लवनिकरः
सुललितविविधप्रकारैर्नृत्यति कल्पतरुः॥"

चर्च्चत्तविशेषः। यथा, शब्दार्थचिन्तामणौ।

"हारयुक्तसुवर्णकङ्कणपाणिशुक्लविराजिता
पादनूपुरसङ्गता सुपयोधरद्वयभूषिता।
शोभिता वलयेन पिङ्गलपन्नगाधिपवर्णिता
चर्च्चरी तरुणीव चेतसि चारुसौति सुसङ्गता॥")

चर्च्चरीकः, पुं, (चर्च्च+"फर्फरीकादयश्च।" उणा ४। २०। इति ईकन्प्रत्ययान्तेन निपातनात् साधुः।) महाकालः। कैशिकविन्यासः। शाकः। इति मेदिनी। के, १८७॥

चर्च्चा, स्त्री, (चर्च्चते विचार्य्यते वेदवेदान्तादितत्त्वशास्त्रैरसौ इति। चर्च+णिच्+अङ्।) दुर्गा। चिन्ता। चार्च्चित्यम्। इति मेदिनी। चे, ४॥ विचारणा। इत्यमरः। १।५।२॥ (चर्च+भावे अङ्। लेपनम्। यथा, छन्दोमञ्जर्य्याम्। १५। ४।

"रुगमदक्षतचर्च्चा पीतकौशेयवासाः॥"

गायत्रीरूपा महाशक्तिः। यथा, देवीभागवते। १२। ६। ४६।

"ज्ञानधातुमयी चर्च्चा चर्च्चिता चारुहासिनी॥")

चर्च्चिका, स्त्री, (चर्च्चा+स्वार्थे कन्। कापि अत इत्वम्।) दुर्गा। इति त्रिकाण्डशेषः॥ चर्च्चा। इति हेमरूपकोषः॥ (रोगविशेषः। तदपनोदनं तुषारपानीयं यथा,—

"तौषारं लघुशीतलं श्रमहरं पित्तार्त्तिशूलान्तकं
दोषाणां शमनं ज्वलार्त्तिहननं सर्व्वामयघ्नं परम्।
कुष्ठक्षीपदचर्च्चिका-विषहरं पामाविसर्पापहं
पीणानां क्षतशोषिणां हितकरं संसेव्यते
मानवैः॥"

इति हारीते प्रथमे स्थाने सप्तमेऽध्याये॥ (चर्च्चां वेदादिविचारणां वेत्ति इति। ठन्। वेदाद्यध्येतरि, त्रि॥)

चर्च्चितं, त्रि, (चर्च्च+कर्म्मणि क्तः। चर्च्चा लेपनं सञ्जातास्य इति इतच् वा।) चन्दनादिना क्षतलेपनम्। तत्पर्य्यायः। दिग्धम् २ लिप्तम् ३। इति जटाधरः॥ (यथा, गीतगोविन्दे। १।४०।

"चन्दनचर्च्चितनीलकलेवरपीतवसनवनमाली॥")

चर्त्तृः, त्रि, (चर्त्तते इति। चृत हिंसायाम्+"ऋदुपधाच्चाकृपिचृतेः। ३। १। ११०। इति ण्वुल्।) हननीयः। इति याज्ञिनिकाकरत्नम्॥

चर्पटः, पुं, (चृप्+अटन्।) स्फारः। विपुलः। चपेटः। पर्पटः। इति मेदिनी। टे, ३१॥

चर्पटा, स्त्री, (चर्पट+टाप्।) भाद्रशुक्लषष्ठी। चापड़ाषष्ठी इति भाषा॥ अस्या विवरणं चपेटीशब्दे द्रष्टव्यम्॥

चर्पटी, स्त्री, (चर्पट+ङीष्।) पोली। इति त्रिकाण्डशेषः॥

चर्म्म, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) चर्म्मति। इति दुर्गादासः॥

चर्भटः, पुं, (चर+क्विप्। भटति भरति स्वशरीरदानेनेति। भट्+अच्। ततः कर्म्मधारयः।) इन्द्रवारुः। इति हलायुधः॥

चर्भटी, स्त्री, (चर्भट+ङीष्।) चर्च्चरी। हर्षक्रीड़ावाक्। इति हेमचन्द्रः॥

चर्म्म, क्ली, (चर्म्मे साधनतयास्त्यस्य अच्।) फलकः। इत्यमरटीकायां भरतः॥ (यथा, मनुः। ७। १६२।

"स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः खले॥")

चर्म्म, [न्] क्ली, (चर+"सर्व्वधातुभ्यो मनिन्।" उणा। ४।१४५। इति मनिन्।) इन्द्रियविशेषः। चाम इति भाषा॥ तत्पर्य्यायः। त्वक् २ अस्रग्धरा ३ क्षत्तिः ४ अजिनम् ५ देहचर्म्म ६ रक्ताधारः ७ रोमभूमिः ८ शरीरावरणम् ९। इति राजनिर्घण्टः॥ अस्रग्धरा १०। इति भरतधृतसर्व्वधरः॥ (यथा, भागवते।३।६।२६।

"निर्भिन्नान्यस्य चर्म्माणि लोकपालोऽनिलोऽविशत्॥")

शरीरावरकं शुष्कम्। छाल इति भाषा॥ तत्पर्य्यायः। फलकः २ फलम् ३। इत्यमरः। २। ८। ८०॥ फरम् ४ चर्म्मम् ५। इति भरतः॥*॥

तस्य लक्षणं यथा, युक्तिकल्पतरौ।

"शरीरावरकं शुष्कं चर्म्म इत्यभिधीयते।
तत् पुनर्द्विविधं कार्य्यचर्म्मैसम्भवभेदतः॥
शरीरावरकत्वञ्च लघुता दृढ़ता तथा।
दुर्भेद्यतेति कथिता चर्म्मणां गुणसंग्रहः॥
खरत्वता गुरुत्वा च स्पृष्टता सुखभेदता।
विरूक्षत्वर्यता चेति चर्म्मणां दोषसंग्रहः॥

सितो रक्तस्तथा पीतः कृष्ण इत्यभिशब्दितः।
ब्रह्मादिजातिभेदेन चर्म्मणां वर्णनिर्णयः॥
चित्रवर्णस्तु सर्व्वेषां सर्व्वदेवोपयुज्यते॥"*॥
ब्रह्मचारिधार्य्यकृष्णसारचर्म्म। इत्यमरः। २।७।४७॥ (यथा, मनुः। २। ४१।
"काषायरौरववास्तानि चर्म्माणि ब्रह्मचारिणः॥")

चर्म्मकषा, स्त्री, (चर्म्मणः कषा। चर्म्म कषतीति। कष+अच् टाप् वा।) पश्चिमदेशजातं गन्धद्रव्यम्। केचित्तु चामारकषा इति ख्याता इत्याहुः। इति भरतः॥ तत्पर्य्यायः। सप्तला २ विमला ३ सातला ४ भूरिफेना ५। इत्यमरः। २। ४। १४३॥ शातला ६ चर्म्मकसा ७। इति भरतः॥ मांसरोहिणी। इति राजनिर्घण्टः॥
("चर्म्मकषायाः कल्कं विल्वसमं गृह्णीयात्। काकपदमस्य।
क्षत्वा कृष्णात् कटभीं कटुकोटफलाप्रधमनञ्च॥"
इति चरके चिकित्सास्थाने प्रथमेऽध्याये॥)

चर्म्मकसा, स्त्री, (चर्म्मणः कसा।) चर्म्मकषा। इत्यमरटीकायां भरतः॥

चर्म्मकारः, पुं, (चर्म्म चर्म्मनिर्म्मितद्रव्यादिकं करोतीति। कृ+"कर्म्मण्यण्"। ३।२।१। इति अण्।) वर्णसङ्करजातिविशेषः। चामार इति मुचि इति च भाषा॥ स तु चण्डाल्यां तीवराज्जातः। इति पराशरपद्धतिः॥ तत्पर्य्यायः। पादुकृत् २। इत्यमरः। २।१०॥ पादुकृत् ३ चर्म्मारः ४। इति तट्टीका॥ चर्म्मकृत् ५ पादुकाकारः ६। इति हलायुधः॥ चर्म्मरुः ७ कुरटः ८। इति त्रिकाण्डशेषः॥ (यथा, मनुः। १०। ३६।
"कारावरो निषादात्तु चर्म्मकारः प्रसूयते॥")

चर्म्मकारी, स्त्री, (चर्म्म करोति वर्द्धयति उत्कर्षं करोतीति यावत्। कृ+अण्। चर्म्म किरतीति चर्म्म+कॄ+अण्। ङीषि ह्रस्वे। ततो ङीष्।) चर्म्मकषौषधिः। इति मेदिनी। रे, २६१॥

चर्म्मकीलः, पुं, (चर्म्मे कीलतीति। कील+अच्। चर्म्मणि गुह्यस्थचर्म्मणि कील इवेति वा।) गुह्यरोगविशेषः। हालीश इति हारिस् इति च भाषा॥ तस्य निदानं यथा,—
"आमो गृहीत्वा श्लेष्माणं करोत्यङ्गेषु वह्निः।
कीलोपमं स्थिरखरं चर्म्मकीलन्तु तद्विदुः॥
वातेन तोदप्राग्रूपं पित्तादसितरक्तता।
श्लेष्मणा रूक्षता तस्य ग्रथितत्वं सवर्णता॥"
इति माधवकरेण रोगविनिश्चयग्रन्थे अर्शोरोगाधिकारे धृतम्। अतोऽस्य चिकित्सा अर्शोरोगचिकित्सावत्। अपि च।
"चर्म्मकीलं जतुप्रख्यं मसकान् तिलकालकान्।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामथेषतः॥"
इति भावप्रकाशः॥

चर्म्मकृत्, पुं, (चर्म्म करोति चर्म्मघटितपादुकादिकम् उत्पादयतीत्यर्थः। चर्म्म+कृ+क्विप्।) चर्म्मकारः इति हलायुधः॥ (यथा, राजतरङ्गिण्याम्। ४। ५५। [योगिनीम्॥")
"चर्म्मकृत् कोऽपि न ग्रासात् कुटीं चेत्रोप-

चर्म्मचटका, स्त्री, (चर्म्मणा चटकेव।) निशाचरपक्षिविशेषः। चामचिका इति भाषा॥ तत्पर्य्यायः। जतुका २ अजिनपत्रिका ३। इति हेमचन्द्रः॥ जतूका ४ गृहमाचिका ५ जतुनीड् ६ अजिनपत्रा ७ चार्म्मिः ८ चर्म्मचटी ९। इति शब्दरत्नावली॥ चर्म्मपत्रा १०। इति जटाधरः॥ चर्म्मचटिका ११। इति केचित्॥

चर्म्मचटी, स्त्री, (चर्म्मणा चटीव। यद्वा, चर्म्म चटति भिनत्तीति। चट+अच् ङीष्।) चर्म्मचटका। इति शब्दरत्नावली॥

चर्म्मचित्रकं, क्ली, (चर्म्मणि चित्रकं चित्रितमिवेत्यर्थः। चर्म्मे चित्रयतीति वा। चित्र+ण्वुल्।) श्वेतकुष्ठम्। इति राजनिर्घण्टः॥

चर्म्मजं, क्ली, (चर्म्मणो चर्म्मणि वा जायते। जन+डः।) रोम। रुधिरम्। इति राजनिर्घण्टः॥

चर्म्मखती, स्त्री, (चर्म्मैव उत्पत्तिहेतुत्वेनास्त्यस्याः इति मतुप् मस्य वत्वम्।) नदीविशेषः। सा तु बुन्देलखण्डाख्यदेशे चम्बल इति ख्याता॥ कदली। इति मेदिनी। ते, १६६॥ (आसीत् किल पुरा रन्तिदेवनामा (ग्रन्थविन्दुनामा वा) कश्चित् राजचक्रवर्त्ती। तस्य यज्ञे मारिता ये गावस्तेषां चर्म्मगलितरक्तौघादिभ्यो जातेयं नदीति पौराणिकी गाथा। यथा, देवीभागवते। १। १८। ५४।
"चर्म्मणां पर्व्वतो जातो विन्ध्याचलसमः पुरः।
मेघानुभावनाज्जाता नदी चर्म्मखती शुभा॥")

चर्म्मदण्डः, पुं, (चर्म्मभिश्चर्म्मणा वा निर्म्मितो दण्डः।) कशा। इति हेमचन्द्रः॥ चाबुक् इति भाषा॥
("चर्म्मदण्डाहतो विप्रः ग्रन्थापातिरुषा च तम्॥"
इति महाभारतशान्तिपर्व्वणि॥)

चर्म्मदूषिका, स्त्री, (चर्म्म दूषयति दोषयति वा। दुष्+णिच्+ण्वुल्। ततष्टाप् अत इत्वम्।) कोठरोगः। इति राजनिर्घण्टः॥

चर्म्मतरङ्गः, पुं, (चर्म्मणां चर्म्मभिर्वा तरङ्ग इव।) वलिः। त्वक्सङ्कोचः। इति राजनिर्घण्टः॥

चर्म्मद्रुमः, पुं, (चर्म्मवत्कठिनत्वक्त्वङ्मधो द्रुमः।) भूर्जवृक्षः। इति राजनिर्घण्टः॥

चर्म्मपत्रा, स्त्री, (चर्म्ममयं पत्रं पक्षवदयं यस्याः।) चर्म्मचटी। इति जटाधरः॥

चर्म्मपादुका, स्त्री, (चर्म्मनिर्म्मिता चर्म्ममयी वा पादुका।) उपानत्। चामड़ार जुता इति भाषा॥ यथा। "ततो ब्रह्मचारी अनेन मन्त्रेण चर्म्मपादुकायुगलं पादौ निदध्यात्।" इति भवदेवभट्टः॥ अस्या गुणाः पादुकाशब्दे द्रष्टव्याः॥

चर्म्मपुटः, पुं, (चर्म्मनिर्म्मितः पुटः पात्रम्।) चर्म्मपुटकः, पक्षे स्वार्थे कन्। चर्म्ममयं पुटमत्र इति कप् इत्येके।) चर्म्मनिर्म्मितपात्रविशेषः। छापा इति भाषा॥ यथा। इतिचर्म्मे पुटकः। इतिचर्म्मपुटे मतुस्त्वे चेति मेदिनी॥ इति पुंलिङ्गसंग्रहटीकायां भरतः॥ तत्पर्य्यायः। डतिः खलचर्म्ममयीति हेमचन्द्रः॥

चर्म्मप्रभेदिका, स्त्री, (चर्म्म प्रभिनत्तीति। प्र+भिद्+ण्वुल्। टापि अत इत्वञ्च।) चर्म्मप्रभेदनास्त्रम्। इत्यमरः। २। १०। ३५॥ पोड़ इति भाषा॥

चर्म्मप्रसेवकः, पुं, (चर्म्मणा प्रसीव्यते इति। ष्णिञ् तन्तुसन्ताने+"संज्ञायाम्।" ३। ३। १०६। इति कर्म्मणि ण्वुल् बाहुलकात् वुन् वा।) चर्म्मप्रसेविका। इत्यमरटीकायां भरतः॥

चर्म्मप्रसेविका, स्त्री, (चर्म्मप्रसेवक+टाप् अत इत्वञ्च।) अग्निसन्दीपनार्थं चर्म्म निर्म्मितयन्त्रम्। भराती इति जाँता इति च भाषा॥ तत्पर्य्यायः। भस्त्रा २। इत्यमरः। २।१०।३३॥

चर्म्मसुखा, स्त्री, (चर्म्मणः जीवरहितदेहस्येत्यर्थः सुखमस्त्यिहस्येत्या इति। छिन्नशिरोधारणादेव तथात्वम्।) दुर्गा। इति हेमचन्द्रः। २। १२०॥ (चर्म्मसुखा। इत्यपि क्वचित् पाठः॥)

चर्म्मरङ्गा, स्त्री, (चर्म्मणे रङ्गो यस्याः।) आवर्त्तकीलता। इति राजनिर्घण्टः॥ (देशविशेषे, पुं। स च देशः कूर्म्मविभागे पश्चिमोत्तरस्यां दिशि उक्तः। यथा, बृहत्संहितायाम्। १४। २३।
"दिशि पश्चिमोत्तरस्याम्।" इत्युपक्रम्य,—
"वेणुमती फल्गुयुका
गुरुहा मरुकुचचर्म्मरङ्गाख्याः॥"
इत्युक्तवान्॥)

चर्म्मरुः, पुं, (चर्म्म रचयतीति। रच+बाहुलकात् डुः।) चर्म्मकारः। इति त्रिकाण्डशेषः॥

चर्म्मजम्बवा, स्त्री, (चर्म्मणि सम्भव उत्पत्तिर्यस्याः।) शला। इति हारावली। ६७॥

चर्म्मसारः, पुं, (चर्म्मणः सारः। शुक्लद्रव्येभ्यो रसस्य लड्मध्ये जायमानत्वात् तथात्वम्।) रसः। इति राजनिर्घण्टः॥

चर्म्मस्नाः, पुं, (चर्म्मणोऽम्भः जलम्। सर्व्वे स्नाता अदन्ताश्च।" इति न्यायादत्र अकारान्तः। क्वचित् स्त्रीत्वे स्नान्तोऽपि दृश्यते।) रसः। इति राजनिर्घण्टः॥

चर्म्मारः, पुं, (चर्म्म चर्म्मक्रियां ऋच्छतीति। ऋ गतौ+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) चर्म्मकारः। इति जटाधरः॥

चर्म्मी, [न्] पुं, (चर्म्म शरीरावरकं शुक्लविशेषोऽस्यास्य। चर्म्म+इनिः।) चर्म्मधारियोद्धा। ढाली इति भाषा॥ तत्पर्य्यायः। फलकपाणिः २। (यथा, महाभारते। ३।२७।३१।
"श्यामं दृष्ट्वा तरुणं चर्म्मिणामुत्तमं रथे।
नशलं ते वने दृष्ट्वा केशान्तं मन्युर्न वर्द्धते॥"
चर्म्मेव त्वक् अस्त्यस्येति।) भूर्जवृक्षः। इत्यमरः। २। ६। ४६॥ (यथा, सुश्रुते चिकित्सितस्थाने ११ अः। "चर्म्मिटङ्गगिरिकर्णिकाग्रीवानीलिवनिचुलदाड़िमाजकर्णहरिद्दचराजादनगोपनरुटाविकवृक्षेषु वा यवान्नविकारांश्च सेवेत॥") भृङ्गरीटः। योगा। इति शब्दरत्नावली।

चर्य्या, स्त्री, (चर+"गदमदचरयमश्चानुपसर्गे।" ३।१।१००। इति यत्। स्त्रियां टाप्।) ईर्य्यापथस्थितिः। इत्यमरः। २।७।३६॥ नियमापरित्यागः। ईर्य्यते गुरोः शास्त्रोपासनया ज्ञायते ईर्य्या सा च ध्यानधारणादिः तस्याः पन्था उपायः तत्र व्रतिनां या स्थितिरवस्थानमपरित्यागः सा। इति भरतः॥ (यथा, महाभारते। १।२।३२६।

"चर्य्यायां हयसुतृष्टं प्राह्लवस्यानुगच्छतः॥") गमनम्। अदनम्। आचरणम्। इति मुग्धबोधटीकायां दुर्गादासः॥ (यथा, मनुः। ६।३२।

"व्यासां महर्षिचर्य्यायां व्याख्यातमतया तनुम्॥" सेवा। यथा, हेः रामायणे। २।२६।१५।

"वनवासस्य शूरस्य मम चर्य्या हि रोचते॥" त्रि, अनुष्ठेयः। आचरणीयः। यथा, मनुः।३।१।

"षट्त्रिंशद्दाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम्॥")

चर्व्व, किं भक्षे। इति कविकल्पद्रुमः॥ (चुरां-यद्धे भ्वां-परं-सकं-सेट्।) किं, चर्व्वयति चर्व्वति तद्भुक्तं बालकः। इति दुर्गादासः॥

चर्व्वणं, क्लीं, (चर्व्व+भावे ल्युट्।) दन्तैश्चूर्णनम्। इति हेमचन्द्रः। ३।८८॥ चिबान इति भाषा॥ (यथा, हारिते प्रथमे स्थाने प्रथमेऽध्याये।

"चर्व्वणं गिरिनद्यापि कासितं श्वासितं तथा॥")

चर्व्वा, [न्] पुं, तलप्रहारः। इति हारावली। १६७॥

चर्व्वितं, त्रि, (चर्व्यते स्म इति। चर्व्व+कर्म्मणि क्तः।) कृतचर्व्वणम्। भक्षितम्। इत्यमरः। ३।२।११०॥ (यथा, भागवते। ७।५।३०।

"अदान्तगोभिर्विधृतां तमिस्रं
पुनःपुनश्चर्व्वितचर्व्वणानाम्॥")

चर्व्वितपात्रकं, क्लीं, (चर्व्वितानां ताम्बूलादीनां त्यागपात्रम्। ततः स्वार्थे कन्।) चर्व्वितताम्बूलादित्यागपात्रम्। पीकदान इति भाषा॥ यथा, रासलीलायां पातालखण्डे।

"ताम्बूलं दर्पणं पानपात्रं चर्व्वितपात्रकम्॥"

चर्व्व्य, त्रि, (चर्व्यते दन्तैश्चूर्ण्यते इति। चर्व्व+कर्म्मणि ण्यत्।) चर्व्वणीयम्। यथा,—

"षट्कोटिं ब्राह्मणाश्चाभोजयामास नित्यशः।
चूष्यपेयलेह्यचर्व्व्यैरतिलक्ष्मिं दिने दिने॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

चर्षणिः, पुं, (कर्षतीति। कृष+"कृषेरादेश्च चः।" पां-उणां। २।१०३। इति अनिः आदेश्च चः।) जनः। यथा, श्रीभागवते।

"स चर्षणीनामुदगाच्छुचो मृजन्
प्रियः प्रियाया इव दीर्घदर्शनः॥"

मनुष्यजातिः। यथा,—

"अर्थज्ञो मात्रका पत्नी तयोश्चैवंमयः सुतः।
यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता।"

इति श्रीभागवते। ६।६।३१॥ "चर्षणयः ज्ञताज्ञतज्ञानवन्तः। पश्यन्तिकर्म्मलेन निघण्टावुक्तेः। यत्र येषु आत्मानुसन्धानविशेषेण मानुषी जातिश्चोपकल्पिता। तथा च श्रुतिः। पुरुषत्वे चाविस्तरामात्मेति।" इति तट्टीकायां श्रीधरस्वामी॥ (अत्र उणादिवृत्तिकृतोज्ज्वलदत्तेन तु "कृषेरादेश्च धः।" इति पठित्वा धर्षणिर्बन्धकीति व्याख्यातम्॥)

चल, क भृतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, चालयति। दन्त्यवकारादिरयमिति दुर्गासिंहानुमरनन्दी। भृतिरिह पोषणम्। इति दुर्गादासः॥

चल, ञ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ञ, चालः चलः। मिश्रणे इति वक्ष्यमाणं न पठित्वा इममेव मानुबन्धं आन्ताः पठन्ति तन्नेयम्। तेनास्य चालयति हस्तिनं यन्ता। चलमानोऽनिल इत्यत्र ताच्छील्ये शतुः शानः। मिश्रणे। पूर्व्वेणान्वयः। चलधातुः कम्पने मानुबन्धः स्वादित्यर्थः। म, चलयति लतां वायुः। चलयन् भङ्गरुचस्तवालकानिति रघुः। चालयन् सकलां पृथ्वीमिति घञन्तात् चालं करोतीति णौ शतृन्तम्। इति दुर्गादासः॥

चल, भ्र विलासे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) भ्र, चलती चलन्ती। विलासः क्रीड़नम्। इति दुर्गादासः॥

चलं, त्रि, (चलति गच्छतीति। चल+पचाद्यच्।) चञ्चलम्। इत्यमरः। ३।१।७४॥ (यथा, रघुः। ११।१५।

"ताड़का चलकपालकुण्डला
कालिकेव निविड़ा बलाकिनी॥"

पारदः। इति हेमचन्द्रः। ४।११६॥ अष्टादशाक्षरवृत्तभेदः। यथा, वृत्तरत्नाकरे।

"भौ नृजौ भौ चेच्चलमिदमुदितं युगैर्मुनिभिः
स्वरैः॥")

चलः, पुं, (चल+पचाद्यच्।) कम्पः। तद्युक्तं त्रि। इति मेदिनी। ले, १५॥ (शिवः। यथा, महाभारते। १३।१७।११६।

"महाकेतुर्महाधातुर्नैकसानुचरश्चलः॥"

विष्णुः। यथा, तत्रैव। १३।१४६।६२।

"वीरहा विषमः शून्यो घृताशीरचलश्चलः॥"

"वायुरूपेण चलः।" इति भाष्यम्॥)

चलचक्षुः, पुं, (चला चञ्चला चक्षुरस्य।) चकोरपक्षी। इति हेमचन्द्रः। ४।४०५॥

चलत्पूर्णिमा, स्त्री, (चलन्ती पूर्णिमा तदाश्रयीभूतचन्द्र इवेति तात्पर्य्यार्थः।) चन्द्रकमतृस्नः। इति त्रिकाण्डशेषः॥

चलदङ्गः, पुं, (चलत् चञ्चलं अङ्गं यस्य।) मत्स्यविशेषः। चेङ्गा इति भाषा॥ अस्य गुणाः। अनभिष्यन्दित्वम्। वाते हितत्वम्। रोचनत्वञ्च। इति राजवल्लभः॥

चलदङ्गकः, पुं, (चलदङ्गं यस्य इति कप्।) चलदङ्गमत्स्यः। इति जटाधरः॥

चलदलः, पुं, (चलानि दलानि पत्राणि यस्य।) अश्वत्थवृक्षः। इत्यमरः। २।४।२०॥ (अस्य वृक्षस्य गुणादयो ज्ञातव्याः॥)

चलनं, क्लीं, (चल+भावे ल्युट्।) भ्रमणम्। (यथा, देवीभागवते १।१७।१६।

"चलनञ्च विना कार्य्यं न भवेदिति मे मतिः॥") कम्पनम्। (यथा, पञ्चतन्त्रे। २।१७३।

"द्वादुपायाविह प्रोक्तौ विमुक्तौ शत्रुदर्शने।
हस्तयोश्चलनादेको द्वितीयः पादवेगजः॥") कर्म्म, त्रि। इति मेदिनी। ने, ६१॥

चलनः, पुं, (चलत्यनेन इति। चल+करणे ल्युट्।) पादः। इति हेमचन्द्रः॥ हरिणः। इति जटाधरः॥

चलनकः, पुं, (चलन+संज्ञायां कन्।) चञ्चातकम्। इति हेमचन्द्रः। ३।३३८॥

चलनी, स्त्री, (चलन+ङीप्।) वारीभेदः। जगदम्बनी। वल्लघर्घरी। इति हेमचन्द्रः॥ चाघरा इति भाषा॥

चलपत्रः, पुं, (चलानि पत्राणि यस्य।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥ (यथा, नैषधे।

"अङ्गेन केनापि विजेतुमस्या
गवेष्यते किं चलपत्रपत्रम्।
नचेद्विधेयादितरच्छदेभ्य-
स्तस्यास्तु कस्मिन् कृतो भयेन॥")

चला, स्त्री, (चलतीति चल+पचाद्यच् टाप् च। नैकत्रावस्थितत्वात् तथात्वम्।) लक्ष्मीः। इति मेदिनी। ले, १५॥ सिध्मकः। इति रत्नमाला॥

चलाचलः, त्रि, (चलतीति चल+अच्। चरिचलिपतिवदीनां वा द्वित्वमितिद्वित्वे अभ्यासस्य आगमश्च इति वार्त्तिकसूत्रेणास्य सिद्धिः।) चञ्चलः। इत्यमरः। ३।१।७४॥ (यथा, किरातार्জ্জুनीये।११।३०। [चलाम्॥")

"जलिनोऽस्य स्थितिं विद्वान् लक्ष्मीमिव चलाचलाम्॥") पुं, । इति राजनिर्घण्टः॥

चलातङ्कः, पुं, (चले चलने आतङ्को भयं यस्मात्।) वातरोगः। इति राजनिर्घण्टः॥

चलितं, त्रि, (चल+कर्म्मणि क्तः।) कम्पितम्। इत्यमरः। ३।१।८७॥ (यथा, राजतरङ्गिण्याम्। ५।३६५।

"तयोर्विलासवलितैश्चलिताग्रविभ्रमैः॥") गतम्। चल ञ गताविति दर्शनात्॥ (यथा, गीः रामायणे। ३।५७।२३।

"अधिरूढे गवाक्षोदे यथास्याश्चलितो गजः॥")

चलुः, पुं, (चल+उप्।) गण्डूषः। इति हेमचन्द्रः। ३।२६२॥

चलुकः, पुं, (चलुना कायतीति। कै+कः।) प्रस्थतिः। भाण्डभेदः। इति मेदिनी। के, ८६॥

चविः, स्त्री, (चर्व्यते इति। चर्व्व+इन्। इषीदरादिभ्यात् रजोपे साधुः।) चविका। इति शब्दरत्नावली॥

चविकं, क्लीं, (चवि+संज्ञायां कन्।) चविका। इति भरतधृतरुद्रः॥

चविका, स्त्री, (चवि+स्वार्थे कन्।) वृक्षविशेषः। चव इति भाषा॥ तत्पर्य्यायः। चव्यम् २। इत्यमरः। २।४।६४॥ तथा च चविकम् ४

चवी ५ । इति भरतः ॥ चविः ६ । इति शब्दरत्नावली ॥ तेजोवती ७ कोला ८ नाकुली ९ उषणा १० चषकम् ११ वह्निः १२ गन्धनाकुली १३ वल्ली १४ कोलवल्ली १५ कोलम् १६ कुटिलसप्तकम् १७ तीक्ष्णम् १८ करिकरणावल्ली १९ कुकरः २० । (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।

"सारिवाद्वयपथ्याङ्गचविकारुक्तचन्दनैः ॥")

अस्या गुणाः । कटुत्वम् । उष्णत्वम् । लघुत्वम् । रोचनत्वम् । दीपनत्वम् । जन्तूद्रेककासश्वासशूलनाशित्वञ्च । इति राजनिर्घण्टः ॥ भेदकत्वम् । कफनाशित्वञ्च । इति राजवल्लभः ॥

चवी, स्त्री, (चवि + "वह्वादिभ्यश्च ।" ४ । १ । ४५ । इति ङीष् ।) चविका । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । ६ । १५१ ।

"सर्व्ववर्म्मा चवीहस्तः प्रतिज्ञां तां सुदुष्कराम् । पश्यन् सानुशयः सर्व्वं स्वभार्य्यार्थे शशंस तत् ॥")

चष्यं, क्ली. (चर्व्यते इति । चर्व्व + ण्यत् । पृषोदरादित्वात् रलोपे साधुः ।) चविका । इत्यमरः । २ । ४ । ९८ ॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।

"चष्येन्द्रयवजं त्रिफला सर्पिर्म्मांसरसान्वितैः ॥")

चषकं, क्ली, (चषमेव । स्वार्थे कन् ।) चविका । इति राजनिर्घण्टः ॥

चषजा, स्त्री, (चषमिव जायते इति । जन + डः ।) गजपिप्पली । इति राजनिर्घण्टः ॥ (विवृतिरस्या गजपिप्पलीशब्दे ज्ञेया ॥)

चषफलं, क्ली, (चषमिव फलं यस्य ।) गजपिप्पली । इति राजनिर्घण्टः ॥

चषा, स्त्री, (चष + टाप् ।) चविका । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये ।

"सर्पिर्म्मधुभ्यां चिकटु प्रलिह्या-
चषाविडङ्गोपहितं दयार्द्रः ॥")

वदा । इति मेदिनी ॥ कार्पासी । इति राजनिर्घण्टः ॥

चष, वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चषति । इति दुर्गादासः ॥

चष, ण भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ण, चषति चषते । इति दुर्गादासः ॥

चषकः, पुं, क्ली, (चषति भक्षयति पिबत्यनेनेत्यर्थः । चष + "कुन् शिल्पिसंज्ञयोरपूर्ब्बस्यापि ।" उणां । २ । ३२ । इति कुन् ।) मद्यपानपात्रम् । तत्पर्य्यायः । गल्वर्कः २ सरकः ३ अनुतर्षणम् ४ । इति हेमचन्द्रः । ४ । १०२४ ॥ * ॥

अथ चषकोद्देशः ।

"यत् पानपात्रं भूपानां तच्छ्रेयं चषकं बुधैः ।
काचकं राजतञ्चैव स्फाटिकं काचमेव च ॥
दृतं खरादिकोणं चतुर्थो पृथिवीभुजाम् ।
इत्यन्यसम्मतं तेषां निर्णयः प्राड्सम्मतः ॥
खसुधिसम्मितं रत्नैश्चतुर्व्वर्णैः समन्वितम् ।
प्रान्तिकं वाथ फालं वा सर्व्वेषामुपदृश्यते ॥
काष्ठजं धातुजं शैलं जाङ्गलादि महीभुजाम् ।
यदन्यत्तोयपानादि पात्रं पृथ्वीभुजां भवेत् ॥"

एवं तत्रापि नियम इति भोजस्य निश्चयः । इति युक्तिकल्पतरुः ॥ * ॥ सुरापात्रम् । मधु । मद्यभेदः । इति मेदिनी । के, ८६ ॥

चषतिः, पुं, (चष भक्षे वधे वा + भावे अतिः ।) भक्षणम् । वधः । इति सिद्धान्तकौमुदीसुबादिवृत्तिः ॥

चषालः, पुं, (चष्यते वध्यते ऽस्मिन् । चष + "सानसिवर्ण्णसीति ।" उणां । ४ । २०७ । इति आल प्रत्ययेन निपातनात् साधुः ।) यूपकटकः । इत्यमरः । २ । ७ । १८ ॥ यज्ञसमाप्तिसूचकं पशुबन्धनार्थं यज्ञभूमौ यत् काष्ठमारोप्यते स यूपः तस्य शिरसि वलयाकृतिर्दर्भरूपकाष्ठविशेषो यः काष्ठविकारः सः । यूपमूले विहितलोहवलयश्च । इति केचित् । इति भरतः ॥ मधुस्थानम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

चह, ग्राव्णे । प्रतारण इति यावत् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चहति । इति दुर्गादासः ॥

चह, तृ क ग्राव्णे । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) चहयति खलः । इति दुर्गादासः ॥

चह, क म ग्राव्णे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क म, चहयति खलः साधुं प्रतारयतीत्यर्थः । इति दुर्गादासः ॥

चाकचक्यं, क्ली, उज्ज्वलता । चक्चक् इति भाषा । यथा, न हि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव तथा हि । कामादिदोषदूषितलोचनस्य पुरोवर्त्तिन्यसंयोगादिदमाकारा चाकचक्याकारा च काचिदन्तःकरणवृत्तिरुदेति । इति वेदान्तपरिभाषा ॥

चाकचिक्या, स्त्री, श्वेतदूर्व्वा । इति रत्नमाला ॥

चाक्रिकः, पुं, (चक्रेण चक्रेण यन्त्रविशेषेण वा चरतीति । चक्र + "चरति ।" ४ । ४ । ८ । इति ठक् ।) बहुभिर्मिलित्वा यः स्तौति सः । तत्पर्य्यायः । वाग्दिकार्थकः २ । इत्यमरः । २ । ८ । १७ ॥ (यथा, याज्ञवल्क्ये । १ । १६५ ।

"पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम् ।
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ॥")

तैलकारः । इति हेमचन्द्रः ॥ ग्राकटिकः । इति महाभारते राजधर्म्मः ॥ गाड़ोयान् इति भाषा ॥

चाक्षुषं, क्ली, (चक्षुषा निर्व्वृत्तम् । चक्षुष् + "तेन निर्व्वृत्तम् ।" ५ । १ । ७६ । इत्यण् ।) प्रत्यक्षविशेषः । तत्तु चक्षुरिन्द्रियजन्यज्ञानम् । द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम् । द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः । द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः । इति सिद्धान्तमुक्तावली ॥ तथा च ।

"द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ।
द्रव्येषु समवेतानां तथा तत्समवायतः ॥
तत्रापि समवेतानां शब्दस्य समवायतः ।
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ॥"

इति भाषापरिच्छेदे ॥ ५६—६० ॥ (चक्षुषा गृह्यते इति । चक्षुष + अण् । चक्षुर्ग्राह्यरूपादि । चक्षुर्ग्राह्ये, त्रि ॥)

चाक्षुषः, पुं, (चक्षुषः ब्रह्मणो लोचनात् जातः । चक्षुष् + अण् । एतन्निरुक्तिर्यथा, मार्कण्डेये । ७६ । २ ।

"अन्यजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः ।
चाक्षुषत्वमतस्तस्य जन्मन्यस्मिन्नपि द्विज ! ॥")

षष्ठमनुः । अस्मिन्वन्तरे अजितनामको विष्णोरवतारः । मन्त्रद्रुम इन्द्रः । आप्यादयो देवाः । हर्य्यश्वशरीरकादयः सप्तर्षयः । पुरुषसम्भवादयो मनुपुत्राः । इति श्रीभागवतम् ॥ (अस्य अन्यद्विवरणं मन्वन्तरशब्दे द्रष्टव्यम् ॥)

चाङ्गः, पुं, (चीयते इति । चि + डः । चमङ्गं यस्य ।) चाङ्गेरी । इत्यमरटीकायां रायमुकुटः ॥

चाङ्गेरी, स्त्री, (चाङ्गं ईरयतीति । ईर + अण् । ततो ङीष् ।) अम्लशोणिका । इत्यमरः । २ । ४ । १४० ॥ ("ग्रहण्यर्शोविकारघ्नी साम्ला वातकफे हिता ।
उष्णा कषायमधुरा चाङ्गेरी चाग्निदीपनी ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

चाचपुटः, पुं, तालभेदः । यथा,—

"गुरुर्लघुः प्लुतश्चैव भवेच्चाचपुटाभिधे ॥"

इति सङ्गीतदामोदरः ॥

चाञ्चल्यं, क्ली, चञ्चलस्य भावः । चञ्चल + ष्यञ् ।) चञ्चलता । चापल्यम् । यथा —

"चाञ्चल्यरहिता लक्ष्मीः पुत्रपौत्रावधिस्थिरा ॥"

इति जगन्मङ्गलाख्यकवचम् ॥

चाटः, पुं, (चट्यते भिद्यते यस्मात् । चट + घञ् । यद्वा चटति भिनत्ति भित्त्यादिकम् । चट + णः ।) चौरः । इति मिताक्षरा ॥ प्रतारकः । यथा,—

"चाटतस्करदुर्व्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः ॥"

चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति । प्रच्छन्नापहारिणस्तस्कराः । दुर्व्वृत्ता इन्द्रजालिकक्षितवादयः । सहो बलं सहसा बलेन कृतं साहसं महच्च तत् साहसञ्च महासाहसं तेन वर्त्तन्त इति महासाहसिकाः प्रसह्यापहारिणः । आदिशब्दान्मौलिककुहकवृत्तयः । एतैः पीड्यमाना बाध्यमानाः प्रजा रक्षेत् । कायस्था गणका लेखकाश्च तैः पीड्यमाना विशेषतो रक्षेत् । तेषां राजवल्लभतया अतिमायावितया च दुर्निवारत्वात् ।" इति मिताक्षरायां आचाराध्यायः ॥

चाटकैरः, पुं, (चटकस्य चटकाया वा पुमपत्यमिति । "चटकाया ऐरक् ।" ४ । १ । १२८ । इत्यैरक्प्रत्ययः । "चटकस्येति वाच्यम् । लिङ्गविशिष्टपरिभाषया स्त्रियाऽपि" इति वार्त्तिकम् ।) चटकस्य अपत्यम् । इत्यमरः ॥ चटार छा इति भाषा ॥

चाटुः, पुं, क्ली, (चटतिं भिनत्ति मनस्तोषामोदवाक्येनेति। चट+"इसनीति।" उणां १।३। इति णुच्।) प्रियवाक्यम्। तत्पर्य्यायः। चटुः २ प्रियप्रायम् ३। इति हेमचन्द्रः॥ स्फुटवादी। इति संक्षिप्तसारे उणादिवृत्तिः॥ मिथ्याप्रियवाक्यम्। इति महाभारतम्॥ खोग्रामदिया कथा इति भाषा॥ (यथा, गीतगोविन्दे। २।१२।

"प्रथमसमागमलज्जितया
पटुचाटुशतैरनुकूलम्॥"

चाटूक्त्यादौ त्रि। यथा, राजतरङ्गिण्याम्। १।२१३।

"उपनिन्ये च संयत्ता पुटकैश्चाटुसीतृतैः॥")

चाटुपटुः, पुं, (चाटुषु पटुः निपुणः।) भण्डः। इति हारावली॥ भाँड़ इति भाषा॥

("प्राक्ष्वणां पण्डितोऽसौ यासश्चाटुपटुः कविः॥ इति नैषधम्॥")

चाटुलोलः, त्रि, (चाटुरेव लोल इति कर्म्मधारयः। चाटुषु लोल इत्येके।) चटुलोलः। इति हारावली॥

चाटुवटुः, पुं, (चाटुपटु+पृषोदरात् साधुः।) चाटुपटुः। इति भूरिप्रयोगः॥

चाटूक्तिः, स्त्री, (चाटुरूपा उक्तिः। चाटूनामुक्तिर्वा।) सेवा। इति हारावली॥ प्रियकथा च॥

चाण्डकीनं, त्रि (चण्डकानां भवनं क्षेत्रंवा। "धान्यानां भवने क्षेत्रे खञ्।" ५।२।१। इति खञ्।) चण्डकीतृप्तियोग्यक्षेत्रम्। इत्यमरटीकायां रायमुकुटः॥

चाणक्यः, पुं, (चणकस्य गोत्रापत्यम्। "गर्गादिभ्यो यञ्।" ४।१।१०५। इति यञ्।) मुनिविशेषः। तत्पर्य्यायः। द्रौमिणः २ कुण्डलः ३। इति त्रिकाण्डशेषः॥ (अयमेव द्विजस्त्रीभिचारक्रियायोगेन योगनन्दराजं मारयित्वा नन्दौरसात् मौरकारपत्नीगर्भे जातं स्वशिष्यं चन्द्रगुप्तं राज्येऽभिषेचयंश्च तस्यामात्यपदवीमप्यङ्गीचकार। एतद्विवरणं मुद्राराक्षसविष्णुपुराणभागवतादिषु विशेषतो दर्शनीयम्। इत्रत्र क्वचिन्मतभेदोऽपि दृश्यते यथाच, कथासरित्सागरे। ५।१२१—२३।

"स चाणक्यो द्विजः क्वापि गत्वा कृत्यामसाधयत्।
तदवग्राह्ययोगेन नन्दोऽथ दाहज्वरमवाप्य सः॥
सप्तमे दिवसे प्राप्ते पञ्चत्वं समुपागमत्।
हत्वा हिरण्यगुप्तञ्च मौकटालेन तत्सुतम्।
पूर्व्वनन्दसुते लक्ष्मीश्चन्द्रगुप्ते निवेशिता॥"

चाणक्येन प्रोक्तमित्यण्।) ग्रन्थविशेषे, क्ली। यथा, तत्रैव।

"नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम्।
मन्त्रबीजमिदं ग्राह्यं चाणक्यं सारसंग्रहम्॥"

चाणक्यमूलकं, क्ली, (चणकमेव चाणक्यं तद्वन्मूलमस्य। इति कप् स्वार्थे कन् वा।) मूलकप्रभेदः। चणकमूलीति ख्यातम्। तत्पर्य्यायः। वालेयम् २ विष्णुगुप्तकम् ३ स्थूलमूलम् ४ महाकन्दम् ५ कौटिल्यम् ६ मरुसम्भवम् ७ शालाकटुकम् ८ मिश्रम् ९। अस्य गुणाः। उष्णत्वम्। कटुत्वम्। रुचिकारित्वम्। दीपनत्वम्। कफवातक्रिमिगुल्मनाशकत्वम्। ग्राहकत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

चाणूरः, पुं, (कंसराजस्य मल्लविशेषः। यथा,—

"ततः क्रोधातिताम्राक्षः कंसः परमकोपनः।
चाणूरमादिशद्युद्धे कृष्णस्य सुमहाबलम्॥"

इति महाभारते हरिवंशम्॥

(तथाच, भागवते। १०।४४।

"भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः।
चाणूरो भज्यमानाङ्गो मुहुर्ग्लानिमवाप ह॥")

चाणूरसूदनः, पुं, (चाणूरं सूदयतीति। सूदिँ क्षरणे। ल्युः।) श्रीकृष्णः। इति त्रिकाण्डशेषः॥ (एतत्सम्बन्धस्य नाग्नजित्यां हरिवंशे ८६ अध्याये द्रष्टव्यम्॥)

चाण्डालः, पुं, (चण्डति कुप्यति सततमिति। "प्रतिचण्डिभ्यामालच्।" उणां १।११७। इति आलच्। यद्वा, चण्डाल+"कुलादिभ्योऽण्" यद्वा चण्डाल एवेति प्रज्ञादिभ्योऽण्।) चण्डालः। इत्यमरः। २।१०।१६॥ (यथा, मनुः। ४।७६।

"न संवसेच्च पतितैर्न चाण्डालैर्न पुक्कसैः॥"

कर्म्मदोषतो ब्राह्मणानामपि पारिभाषिकचाण्डालत्वम्। यथा, महाभारते। १२।७५।

"आङ्घायका देवलका नक्षत्रग्रामयाजकाः।
एते ब्राह्मणचाण्डाला महापथिकपक्षमाः॥")

चाण्डालिका, स्त्री, (चाण्डाली वादकत्वेनास्त्यस्याः। इति ठन्। चण्डालेन निर्वृत्ता इति ठक् वा।) चण्डालवीणा। इत्यमरः। २।१०।३२। चण्डालिकाग्न्यर्थोऽप्यत्र॥ (चण्डालेन कृतेति कुलालादिभ्योऽण्। चण्डालाकृतवस्तुमात्रे, त्रि॥)

चाण्डाली, स्त्री, (चाण्डाल+जातित्वात् ङीष्।) लिङ्गिनी। इति राजनिर्घण्टः॥ चाण्डालपत्नी च॥

चातकः, पुं, (चतते याचते जलमम्बुदमिति। चत याचने+ण्वुल्।) खनामख्यातपक्षी। तत्पर्य्यायः। स्तोककः २ सारङ्गः ३ मेघजीवनः ४। इति राजनिर्घण्टः॥ तोककः ५। इत्यमरः। २।५।१७॥ शारङ्गः ६। इति भरतः॥ (यथा, मेघदूते। ६।

"वामश्चायं नदति मधुरं चातकस्ते सगर्व्वः॥")

तन्मांसगुणाः। लघुत्वम्। शीतत्वम्। कफरक्तपित्तनाशित्वम्। अग्निकारित्वञ्च। इति राजवल्लभः॥

चातकानन्दनः, पुं, (चातकं आनन्दयतीति। आ+नन्द+णिच्+ल्युः।) वर्षाकालः। इति राजनिर्घण्टः॥

चातुरः, पुं, (चतुर्भिरङ्गैः हस्तपदद्दष्टिशिरोभिरित्यर्थैः गृह्यते इति। चतुर+अण्। यद्वा चतुर एव। स्वार्थे अण्।) चक्रगडुः। इति मेदिनी॥ गोलवालिश इति भाषा॥

चातुरः, त्रि, (चतुर+स्वार्थे अण्।) नेत्रगोचरः। चाटुकारः। नियन्ता। इति मेदिनी। रे, १५३॥

चातुरकः, त्रि, (चातुर+स्वार्थे कन्।) चातुरः। इति हेमचन्द्रः॥

चातुराश्रम्यं, क्ली, (चतुर्णां आश्रमाणां कर्म्म इति। "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च।" ५।१।१२४। इति ष्यञ्।) ब्रह्मचर्य्यगार्हस्थ्यवानप्रस्थभिक्षुरूपाश्रमचतुष्टयानां धर्म्मः। इति पुराणम्॥ (यथा, महाभारते। १२।४६।२२।

"चातुर्विद्यं चातुर्होत्रं चातुराश्रम्यमेव च।
राजधर्म्माश्च निखिलान् पृच्छेनं पृथिवीपते॥"

चत्वार आश्रमा एवेति स्वार्थे ष्यञ्। चतुराश्रममात्रम्॥)

चातुरिकः, पुं, (चातुरीं रथपरिचालनकौशलं वेत्तीति ठक्।) सारथिः। इति जटाधरः॥

चातुरी, स्त्री, (चतुरस्येयं "तस्येदम्।"४।३।१२०। इत्यण्। ततो ङीप्। यद्वा चतुरस्य भावः इति ष्यञ् ञित्वात् ङीष् ततो यलोपः।) दाक्ष्यम्। चतुरता। इति मेदिनी॥ [चातुरी॥"

"या लोकद्वयसाधनी तनुभृतां सा चातुरी
दुष्कृटः॥)

(गायत्रीरूपा महाशक्तिः। यथा, देवीभागवते। १२।६।४७।

"चतुर्भुजा चारुदन्ता चातुरी च ऋतप्रदा॥")

चातुर्जातकं, क्ली, (चतुर्जातक एव इति स्वार्थे अण्।) गुडत्वगेलापत्रनागकेशररूपचतुष्टयम्। इति राजनिर्घण्टः॥ (अस्य लक्षणं गुणाश्च।

"त्वगेलापत्रकेसुल्लेखिसुगन्धि त्रिजातकम्।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते॥
तद्वयं रेचनं रूक्षं तीक्ष्णोष्णसुखगन्धकृत्।
लघुपित्तास्रिदृद्वर्ण्यं कफवातविषापहम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

चातुर्थकः, पुं, (चतुर्थे चतुर्थेऽह्नि भव इति। चतुर्थ+वुञ्।) प्रतिचतुर्थदिनभवज्वरः। तस्य मन्त्रौषधं यथा, ओं जम्भनि स्तम्भनि विमोहय सर्व्वव्याधीन्मे वर्व्वेय फट्। इति। पुष्यमृक्षगतं जप्त्वा हस्ते दत्त्वाथ न स्पृशेत्। चातुर्थको ज्वरो रुद्र! अन्ये चैव ज्वरास्तथा॥ जम्बुफलं हरिद्रा च सर्षपस्यैव च कणकम्। सर्व्वज्वराणां धूपोऽयं हर! चातुर्थकस्य च॥"

इति गारुडे १८७ अध्यायः॥

(अस्य लक्षणचिकित्सादीनि यथा,—

"चातुर्थो द्विविधो ज्ञेयो वातश्लेष्मात्मको ज्वरः।
चातुर्थको नाम गदो दारुणो विषमज्वरः॥
प्रोक्तश्च सर्व्वधातूनां बलवर्णाग्निनाशनः।
त्रिदोषजो विकारः स्यादस्थिमज्जगतोऽनिलः॥
कुपितं पित्तमेवन्तु कफञ्चैवं स्वकालतः।
प्रीतदाहकरस्तीव्रस्त्रिकालञ्चानुवर्त्तते॥
स सन्निपातसम्भूतो विषमो विषमज्वरः।
ऊर्द्धं कायस्य यश्चाति यः पूर्व्वं सोऽनिलात्मकः।
पूर्व्वं श्लेष्मात्ययः कार्यं श्लेष्मपूर्व्वज्वरश्च सः।
जङ्घाभ्यां श्लेष्मिको ज्ञेयः शिरसोऽनिलसम्भवः
एवं विज्ञाय भद्वैद्यः कुर्य्यात्तत्र प्रतिक्रियाम्।
वेलाज्वरो रसगतो रक्तञ्चैकाह्निकस्तथा॥

मांसगोऽपि तृतीयः स्याच्चतुर्थोऽस्थिसमाश्रितः ।
सर्व्वधातुगतो ज्ञेयो जीर्णो धातुक्षयङ्करः ॥
भूतजे भूतविद्या स्याद्धाति समताड़नम् ।
वासाधात्रीदारुपथ्या नागरत्रिफला भवः ॥
मधुना संयुतः कार्य्यश्चातुर्थकनिवारणः ॥
अगस्तिपत्रस्वरसो निहन्ति
नस्ये च चातुर्थकरोगसङ्घम् ।
कासं भ्रमञ्चापि शिरोरुजाञ्च
विनाशयत्याशु हि तन्नराणाम् ॥"
इति हारीते चिकित्सास्थाने द्वितीयेऽध्याये ॥)

चातुर्भद्रं, क्ली, (चतुर्भद्रमेवेति अण् ।) नागरातिविषामुस्ता गुडूचीति चतुष्टयम् । इति राजनिर्घण्टः ॥

चातुर्मास्यं, क्ली, (चतुर्षु मासेषु क्रियते इति । "चतुर्म्मासाङ्ख्यो यज्ञे ।" ५ । १ । ६४ । इत्यस्य सूत्रस्य वार्त्तिकोक्तेः ख्यः । यागविशेषः । चातुर्म्मास्यवागस्य चत्वारि पर्व्वाणि । वैश्वदेवो वरुणप्रघासः शाकमेधः शुनासीरीयश्चेति शब्दार्थचिन्तामणिः ॥) आषाढ़शुक्लद्वादश्यादिचतुर्म्मासकर्त्तव्यनियमविशेषः । "अत्रं वाराहे ।
'आषाढ़शुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्म्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्कोऽपि मन्त्रेण नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्धापि हि तत्कीर्य्यं चातुर्म्मास्यं व्रतं नरः ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत् समापयेत् ॥'
मात्स्ये ।
'चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
मधुस्वरो भवेन्नित्यं नरो गुड़वितर्ज्जनात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्गः प्रजायते ।
कटुतैलपरित्यागात् घ्राणनाशः प्रजायते ॥
लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन् ।
सदा सुखी सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निरधिर्णीरुगोजस्वी विष्णुभक्तश्च जायते ।
एकान्तरोपवासेन विष्णुलोकमवाप्नुयात् ॥
धारणान्नखलोमानां गङ्गास्नानं दिने दिने ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ।
घृतत्यागात् सुलावण्यं सर्व्वं स्निग्धं वपुर्भवेत् ॥
फलत्यागात्तु मतिमान् बहुपुत्रश्च जायते ।
नमो नारायणायेति जप्त्वानन्तफलं जपेत् ॥
पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलम् ।
एवमादिव्रतैः पार्थ ! तुष्टिमायाति केशवः ॥'
सनत्कुमारः ।
'इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! यदपूर्णं त्वहं स्थिये ।
तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥'
समाप्तौ च ।
'इदं व्रतं मया देव ! कृतं प्रीत्यै तव प्रभो ! ।
न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ! ॥'
अत्रैव प्रतिमधिकृत्य काठकगृह्यम् ।
'एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥'
एतद्ग्रन्थविषयम् । 'ऊर्द्धं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी' इति ग्रन्थोक्तेः ।"इति तिथ्यादितत्त्वम् ॥ * ॥ अन्यच्च । तत्रोपक्रमकालः सनत्कुमारेणोक्तः ।
"एकादश्यान्तु गृह्णीयात् संक्रान्तौ कर्कटस्य तु ।
आषाढ्यां वा नरो भक्त्या चातुर्म्मास्योदितं व्रतम् ॥"
तत्र मन्त्रः ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
इमं करिष्ये नियमं निर्व्विघ्नं कुरु मेऽच्युत ! ॥"
अथ चातुर्म्मास्यनियमावश्यकता भविष्ये ।
"यो विना नियमं मर्त्यो व्रतं वा जप्यमेव वा ।
चातुर्म्मास्यं नयेन्मूर्खो जीवन्नपि मृतो हि सः ॥"
अथ चातुर्म्मास्यनियमाः । स्कान्दे नागरखण्डे ।
"श्रावणे वर्ज्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि कार्त्तिके चामिषं त्यजेत् ॥"
तत्रैव श्रीब्रह्मनारदसंवादे ।
"निष्पावान् राजमाषांश्च सुप्ते देवे जनार्द्दने ।
यो भक्षयति विप्रेन्द्र ! श्वपचादधिको हि सः ॥
कार्त्तिके तु विशेषेण राजमाषांश्च भक्षयन् ।
निष्पावान् मुनिश्रेष्ठ ! यावदाभूतसंप्लवं ॥
कलिङ्गानि पटोलानि वृन्ताकसहितानि च ।
एतानि भक्षयेद्यस्तु सुप्ते देवे जनार्द्दने ॥
सप्तजन्मार्ज्जितं पुण्यं हरते नात्र संशयः ॥"
किञ्च ।
"रूक्षं तत्तत्काललभ्यं फलमूलादि वर्ज्जयेत् ।
जपहोमादयुक्तानं नामसङ्कीर्त्तनन्तथा ।
स्त्रीत्यक्त्वा प्रार्थयेद्देवं गृहीतनियमो बुधः ॥
इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! पञ्चत्वं यदि मे भवेत् ।
तदा भवतु सम्पूर्णं प्रसादात्ते जनार्द्दन ! ॥"*॥
अथ चातुर्म्मास्यव्रतनियममाहात्म्यम् । विष्णुरहस्ये ब्रह्मनारदसंवादे ।
"शृणु नारद ! कार्त्स्न्येन चातुर्म्मास्यव्रतक्रियाः ।
या निर्व्वर्त्त्य नरो भक्त्या प्रयाति परमां गतिम् ॥
व्रतानि वैष्णवानीह मनस्यपि चिकीर्षतः ।
नरस्य क्षयमाप्नोति पापं जन्मशतोद्भवम् ॥
एकभक्तो नरः शान्तो नित्यस्नायी दृढ़व्रतः ।
योऽर्च्चयेच्चतुरो मासान् हरिं स्यात्तस्य लोकभाक् ॥
यस्तु सुप्ते हृषीकेशे क्षितिशायी भवेन्नरः ।
वार्षिकान् चतुरो मासान् लभते वैष्णवीं गतिम् ॥
यस्तु केशवसुद्दिश्य चान्द्रायणपरायणः ।
चातुर्म्मास्यं नयेद्भक्त्या स विष्णुतनुमाविशेत् ॥"
भविष्योत्तरे भगवद्युधिष्ठिरसंवादे ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
स्त्री वा नरो वा मद्भक्तो धर्म्मार्थं सुदृढ़व्रतः ॥
गृह्णीयान्नियमानेतान् दन्तधावनपूर्ब्बकम् ।
तेषां फलानि वक्ष्यामि तत्कर्त्तॄणां पृथक् पृथक् ॥
मधुरस्वरसम्पन्नो भवेल्लवणवर्ज्जनात् ।
लभते सन्ततिं दीर्घां तैलस्य परिवर्ज्जनात् ॥
अभ्यङ्गवर्ज्जनात् पार्थ ! सुन्दराङ्गः प्रजायते ।
पक्वतैलपरित्यागाच्चक्षुर्नाशमवाप्नुयात् ॥
मधूकतैलत्यागेन सौभाग्यमतुलं भवेत् ।
पुष्पोपभोगत्यागेन स्वर्गे विद्याधरो भवेत् ॥
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ।
कटून्तिक्तमधूष्णारकाषायलवणान् रसान् ॥
यो वर्ज्जयेत् स वैरूप्यं वैगन्ध्यं नाप्नुयात् क्वचित् ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठो भवेत् ॥
पादाभ्यङ्गशिरोऽभ्यङ्गपरित्यागाच्च पार्थिव ! ।
दीप्तिमान् दीप्तचरणो यक्षो द्रव्यपतिर्भवेत् ॥
दधिदुग्धघृतक्षीरनियमात् गोलोकं लभते नरः ।
इन्द्रातिथित्वमायाति स्थालीपाकविवर्ज्जनात् ॥
लभेच्च सन्ततिं दीर्घां तापपक्वस्य वर्ज्जनात् ।
भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत् ॥
सदा सुखी सदा योगी मधुमांसस्य वर्ज्जनात् ।
निर्व्याधिर्नीरुगोजस्वी सुरामद्यविवर्ज्जनात् ॥
एकान्तरोपवासेन ब्रह्मलोके महीयते ।
धारणान्नखलोमानां गङ्गास्नानं दिने दिने ॥
मौनव्रती भवेद्यस्तु तस्याज्ञा स्खलिता भवेत् ।
भूमौ शुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ॥
नमो नारायणायेति जप्त्वा दानशतं फलम् ।
पादाभिवन्दनाद्विष्णोर्भवेद्गोदानजं फलम् ॥
विष्णुपादाम्बुजस्पर्शात् कृतकृत्यो भवेन्नरः ।
विष्णोर्दैवकुले कुर्य्यादुपलेपनमार्ज्जने ॥
कल्पस्थायी भवेद्राजा स नरो नात्र संशयः ।
प्रदक्षिणत्रयं यस्तु करोति स्तुतिपाठकः ॥
हंसयुक्तविमानेन स च विष्णुपदं व्रजेत् ।
गीतवाद्यकरो विष्णोर्गान्धर्व्वं लोकमाप्नुयात् ॥
नित्यं शास्त्रविनोदेन लोकान् यस्तु प्रबोधयेत् ।
स व्यासरूपी भगवान्नन्ते विष्णुपुरं व्रजेत् ॥
पुष्पमालाकुलां पूजां कृत्वा विष्णोः पुरं व्रजेत् ।
कृत्वा प्रेक्षणिकं दिव्यं स्थानमप्सरसां लभेत् ॥
तीर्थाम्भसि कृतस्नानो निर्म्मलं देहमाप्नुयात् ।
पक्षगत्याश्नतः पार्थ ! चान्द्रायणफलं लभेत् ॥
एकभक्ताश्ननान्नित्यमग्निहोत्रफलं लभेत् ।
नक्तभोजी समग्रन्तु तीर्थयात्राफलं लभेत् ॥
अयाचितेन चाप्नोति वापीकूपप्रपाफलम् ।
षष्ठकालेऽन्नभोजी यः स्यायी स्वर्गे नरो भवेत् ॥
नित्यस्नायी नरो यस्तु नरकं स न पश्यति ।
भाजनं वर्ज्जयेद्यस्तु स स्थानं पौष्करं लभेत् ॥
पत्रेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ।
शिलायां भोजनं नित्यं भवेत् स्नानं प्रयागजम् ॥
यामद्वयजलत्यागान्न रोगैः परिभूयते ।
एवमादिव्रतैः पार्थ ! तुष्टिमायाति तोषितः ॥"
किञ्च ।
"योगनिद्रां समालम्ब्य शेषाहिशयने स्थितम् ।
क्षीरोदतोयवीच्यर्द्धीतपादः समाहितः ॥
लक्ष्मीकरासुजैः शश्वन्मृज्यमानपदद्वयः ।
तस्मिन् काले च मद्भक्तो यो मासांश्चतुरः क्षिपेत् ॥
व्रतैरनेकैर्नियमैः पाण्डवश्रेष्ठ ! मानवः ।
कल्पस्थायी विष्णुलोके भवेन्नास्त्यत्र संशयः ॥

सत्यां व्रतसमाप्तौ च श्रीकृष्णस्य प्रसादतः ।
यदृच्छालाभादिकृत्यञ्च लेख्यं तत्तच्च कार्त्तिके ॥
स्तुत्वाथ कृष्णमभ्यर्च्च्य प्रसाद्य च पुनः पुनः ।
प्रेषं गृह्णीतदीर्थे च स्वीकुर्य्याद्देष्णवैः सह ॥
गीतनृत्यादिना देवं परितोष्याथ वैष्णवान् ।
संपूज्य नरयानेन देवं स्वालयमानयेत् ॥
प्रभोर्नीराजनं कृत्वा विसर्ज्जं वत वैष्णवान् ।
निवेश्य स्वासने देवं गृह्णीत भुवि तं स्मरन् ॥
एवञ्च कुर्व्वतो मासाश्चत्वारो यान्ति ते सुखम् ।
अन्यथा प्रभवेद्दःखमनादृष्टिश्च जायते ॥
तथा च भविष्ये ।
मिथुनस्थे सहस्रांशौ न स्नापयति यो हरिम् ।
वैष्णवैः सह सम्भूय स्नानादृष्टिस्तदा भवेत् ॥
किञ्च । भविष्योत्तरे ।
यो देवस्नपनं पार्थ ! अनुमोद्य समाचरेत् ।
उत्थानं वापि कृष्णस्य स हरेर्लोकमाप्नुयात् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

चातुर्व्वर्ण्यं, क्ली, (चत्वारो वर्णाः । "चतुर्वर्णादीनां स्वार्थे उपसंख्यानम् ।" इति ष्यञ् ।) ब्राह्मण-क्षत्रियवैश्यशूद्राः । इति हेमचन्द्रः । ३।४७२॥ (यथा, मनुः । १२ । १ ।
"चातुर्व्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्म्मस्वयानघ ! ॥")
चतुर्वर्णधर्म्मश्च ॥

चातुर्व्वैद्यः, पुं, (चतुरो वेदानधीते इति चतुर्व्वेदः । स एव । "चतुर्वेदस्योभयपदवृद्धिश्च ।" इति ष्यञ् ।) चातुर्विद्यः । चतुर्व्वेदवेत्ता । इति व्याकरणम् ॥

चात्वाल, क्ली पुं, (चतते याचते इति । चत+ "स्थाचतिन्दनेरालच्वालनालीयचः ।" उणा १ । ११५ । इति वालच् ।) गर्त्तः । अग्निहोत्रोपकरणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (यथा, तैत्तिरीयसंहितायाम् । ६ । १ । ३ । ८ ।
"योनिर्वै यज्ञस्य चात्वालम् ॥")

चान्द्रं, क्ली, (चन्द्रस्य इदम् । चन्द्र+अण् । यद्वा, चन्द्राय चन्द्रलोकप्राप्तये इदम् ।) चान्द्रायणम् । इति प्रायश्चित्ततत्त्वम् ॥

चान्द्रः, पुं, (चन्द्रस्यायम् । "तस्येदम् ।" ४।३।१२०। इत्यण् ।) चन्द्रकान्तमणिः । इति हेमचन्द्रः । ४।१३३ ॥ चान्द्रमासः । इति शब्दरत्नावली ॥

चान्द्रकं, क्ली, (चान्द्रं आर्द्रकमिव कायतीति । कै+कः ।) शुण्ठी । इति राजनिर्घण्टः ॥

चान्द्राख्यं, क्ली, (चान्द्रमित्याख्या संज्ञा यस्य ।) आर्द्रकम् । इति राजनिर्घण्टः ॥

चान्द्रभागा, स्त्री, (चान्द्रश्चन्द्रसम्बन्धी भागो यस्याम्) चन्द्रभागानदी । इति द्विरूपकोषः ॥

चान्द्रमसं, क्ली, (चन्द्रमाश्चन्द्रोऽधिष्ठाटदेवता यस्य । चन्द्रमस्+अण् ।) स्फटिकशिरोनक्षत्रम् । इति हेमचन्द्रः । २ । २३ ॥ (चन्द्रमसश्चन्द्रस्य इदम् । चन्द्रमस्+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) चन्द्रमस्सम्बन्धिनि त्रि ॥ (यथा, महाभारते । १२ । २५० । २० ।
"सर्व्वतः सुखमन्वेति वपुश्चान्द्रमसं यथा ॥")

चान्द्रमसायनः, पुं, (चन्द्रमसोऽपत्यं पुमान् । चन्द्रमस्+फक् ।) बुधग्रहः । इति हलायुधः ॥ ("तिकादिभ्यः फिञ् ।" ४ । १ । १५५ । इति फिञ् ।) चान्द्रमसायनिश्च ॥

चान्द्रमासः, पुं, (चान्द्रश्चन्द्रसम्बन्धी मासः ।) चन्द्रसम्बन्धिमासः । स तु गौणमुख्यभेदेन द्विविधः । तत्राद्यः कृष्णप्रतिपदादिपौर्णमास्यन्तः । द्वितीयः शुक्लप्रतिपदादिदर्शान्तः । सामान्यचिंग्नक्तिथ्यात्मकमासश्च ॥ तत्र मुख्यचान्द्रे कर्म्माणि । आब्दिकश्राद्धाद्यश्राद्धादिसपिण्डीकरणान्तश्राद्धानि चान्द्रायणप्राजापत्यादिव्रतानि दानकर्म्मनित्यस्नानं गृहपुष्करिण्यादिप्रतिष्ठा साधारणतिथिविहितकर्म्म । गौणचान्द्रे अष्टकादिपार्व्वणश्राद्धं वारुणीस्नानं जन्मतिथिकृत्यं जन्माख्यादुपवासः दुर्गोत्सवादितिथिनियतपूजा । सामान्यचिंग्नक्तिथ्यात्मकमासेन मासिकादिमासगणना । इति स्मृतिः ॥

चान्द्रायणं, क्ली, (चान्द्रस्य चन्द्रलोकस्य अयनं प्राप्तिर्यस्मात् । "धर्म्मार्थं यश्चरेद्देहश्चन्द्रस्येति सलोकताम् ।" इति याज्ञवल्क्यवचनादेव तथात्वम् । यद्वा चन्द्रः अमृतानन्दमयपुरुषः अयनं आश्रयोऽधिष्ठाटदेवो यस्य व्रतस्य यत्र व्रते वा ।) व्रतविशेषः । तत्पर्य्यायः । इन्दुव्रतम् २ । इति त्रिकाण्डशेषः ॥ तत्तु चतुर्व्विधं पिपीलिकामध्याख्यम् १ यवमध्याख्यम् २ यतिचान्द्रायणम् ३ शिशुचान्द्रायणम् ४ । यथा,—
"एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ।
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥"
"एतदेव पिपीलिकामध्याख्यम् ।" इति कुल्लूकभट्टः ॥
"एवमेव विधिं कृत्स्नमाचरेद्यवमध्यमे ।
शुक्लपक्षादिनियतश्चरंश्चान्द्रायणं व्रतम् ॥
अष्टावष्टौ समश्नीयात् पिण्डान् मध्यन्दिने स्थिते ।
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥
चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः ।
चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम् ॥"
इति मनुः ॥
तद्विधानं यथा, गारुड़े १०५ अध्याये ।
"तिथिपिण्डांश्चरेद्भुक्त्वा शुक्ले शिखण्डसंमितान् ।
एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरेत् ॥
यथाकथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयम् ।
मासेनैवोपयुञ्जीत चान्द्रायणमथापरम् ॥
कुर्य्यात्त्रिषवणं स्नानं पिण्डं चान्द्रायणं चरेत् ।
पवित्राणि जपेत् पिण्डान् गायत्र्या चाभिमन्त्रयेत् ॥
अनादिष्टेषु सर्व्वेषु शुद्धिश्चान्द्रायणेन च ।
धर्म्मार्थी यश्चरेद्देवं चन्द्रस्येति सलोकताम् ॥
कृच्छ्रकृद्धर्म्मकामस्तु महतीं श्रियमश्नुते ॥"
अपि च ।
"एकैकं वर्द्धयेत् पिण्डं शुक्ले कृष्णे च ह्रासयेत् ।
उपस्पृशंस्त्रिषवणं विपरीताधमर्द्दनम् ॥"
इति तत्रैव २२६ अध्यायः ॥

चान्द्री, स्त्री, श्वेतकण्टकारी । (चन्द्रस्य इयम् । चन्द्र+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् स्त्रियां ङीप् ।) ज्योत्स्ना । इति राजनिर्घण्टः ॥ (चन्द्रसम्बन्धिनि त्रि । यथा, माघे । २ । २ ।
"गुरुकाव्यागुणां विभ्रच्चान्द्रीमभिनभः श्रियम् ॥")

चापं, क्ली पुं, (चपस्य वंशविशेषस्य विकारः । "अवयवे च प्राण्योषधिवृक्षेभ्यः ।" ४।३।१३५। इत्यण् ।) धनुः । इत्यमरः । २ । ८ । ८३ ॥ (यथा, रघुः । १२ । ४७ ।
"क्रमशस्ते पुनस्तस्य चापात् समभिवोट्टयुः ॥"
वृत्तश्चेदार्द्धः । यथा, सिद्धान्तशिरोमणौ ।
"दलीकृतं चक्रमुशन्ति चापं
कोदण्डखण्डं खलु तूर्य्यगोलम् ॥"
नवमराशिः । यथा, बृहत्संहितायाम् । ४२ । १० ।
"चापगते गृह्णीयात् कुङ्कुमशङ्खप्रवालकाचानि ॥")

चापपटः, पुं, (चापो धनुस्तद्वत् वक्रीभूताकृतिः पटः पत्रं यस्य ।) पियालवृक्षः । इति जटाधरः ॥

चापलं, क्ली, (चपलस्य भावः कर्म्म वा युवादित्वादण् ।) अनवस्थितिः । इति हेमचन्द्रः । २ । २२६ ॥ तस्य लक्षणं यथा, साहित्यदर्पणे ।
"मातृसंदर्शनरागादेश्चापलन्त्वनवस्थितिः ॥"
(यथा, रघुः । १ । ६ ।
"तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥")

चापल्यं, क्ली, (चपलस्य भावः कर्म्म वा । ब्राह्मणादित्वात् ष्यञ् ।) चपलता । चाञ्चल्यम् । यथा,
"परदारं परद्रव्यं परीवादं परस्य च ।
परीहासं गुरोः स्थाने चापल्यञ्च विवर्ज्जयेत् ॥"
इति चाणक्ये । ३० ॥

चामरं, क्ली पुं, (चमरी मृगविशेषस्तस्या इदम् । चमरी+अण् ।) चमरीपुच्छलोमनिर्म्मितव्यजनम् । चौरी । इति भाषा ॥ तत्पर्य्यायः । प्रकीर्णकम् २ । इत्यमरः । २ । ८ । ३१ ॥ चमरम् ३ चामरा ४ चामरी ५ । इति भरतः ॥ वालव्यजनम् ६ रोमगुच्छकम् ७ । इति रभसः ॥ (यथा, पञ्चतन्त्रे । ३ । २६६ ।
"गुणेषु रागो व्यसनेष्वनादरो
रतिः सुभृत्येषु च यस्य भूपतेः ।
चिरं स भुङ्क्ते चलचामरांशुकां
सितातपत्राभरणां नृपश्रियम् ॥")
अस्य वायुगुणः । ओजःकारित्वम् । मक्षिकादिशमोपद्रवत्वञ्च । इति राजवल्लभः ॥ * ॥
अथ चामरोद्देशः ।
"हस्तद्वयोन्नतः शुक्लः सुवर्णबलिभूषितः ।
हरेर्बालकृतो राज्ञां भयमानसुखप्रदः ॥
बलेश्चामरदैर्घाद्वा आयामत्वं प्रकाशितम् ।
भयो भद्रो जयः शीलः सुखः सिद्धिबलः स्थिरः ॥
वितस्त्येकैकसंवृद्ध्या दिनेशादिदिशां सदाम् ।
सौवर्णं राजतं युग्मं चैदेशानां महीभुजाम् ॥
योजयेदिति निश्चित्य बलिकल्पनकर्म्मणि ।
स्खलजं जाङ्गलो राजा अनूपो जलजं वहेत् ॥
हीरञ्च पद्मरागञ्च वैदूर्य्यं नील एव च ।
मणिर्बलिषु योक्तव्यो ब्रह्मादीनां यथाक्रमम् ॥*॥

शुक्लो रक्तोऽथ पीतश्च नानावर्णो यथाक्रमम् ।
चामरो राजकैश्वर्य्य न सामान्यस्य भूपतेः ॥
न भवमानतो नूनं चामरं गुणमावहेत् ॥"

अथ चामरपरीक्षा ।

स्थलजं जलजञ्चेति चामरं द्विविधं विदुः ।
मेरौ हिमालये विन्ध्ये कैलासे मलये तथा ॥
उदये ऽस्तगिरौ चैव गन्धमादनपर्व्वते ।
एवमेतेषु शैलेषु याच्यमर्य्यो भवन्ति हि ॥
तासां वालस्य जायेत चामरेत्यभिधा भुवि ॥
आपीताः कनकाद्रिजा हिमगिरेः शुभ्रायता विन्ध्यजाः;
कैलासादसिताः सिता मलयजाः शुक्लाक्षया पिङ्गलाः ।
आरक्ता उदयोद्भवाश्चमरजा आनीलशुक्लत्विषः;
क्षुद्राः केचन गन्धमादनभवाः पाण्डुत्विष-चामराः ॥
अन्येषु प्रायशः क्षुद्राश्चामराः सम्भवन्ति हि ।
ब्रह्मक्षत्रियविट्शूद्रजातयस्ताश्चतुर्व्विधाः ॥
चमर्य्यः पर्व्वतोद्भूता यथापूर्व्वं गुणावहाः ।
दीर्घवालाः सुलघवः स्निग्धाङ्गाश्चापि कोमलाः ।
विरलास्तनुपर्व्वाणश्चमर्य्यो ब्रह्मजातयः ।
विना संस्कारमप्यासां चामरं विमलं भवेत् ॥
दीर्घवालाः सुगुरवः कर्करांशा भृशं घनाः ।
विज्ञेयाः शूलपर्व्वाणश्चमर्य्यो वैश्यजातयः ॥
संस्कारे चाप्यसंस्कारे न स्वभावं त्यजेदिदम् ।
खर्व्ववालाः सुलघवः कोमलाङ्गा भृशं घनाः ॥
चमर्य्यस्तनुपर्व्वाणो विज्ञेयाः शूद्रजातयः ।
संस्कारेणापि मलिनमासां चामरमिष्यते ॥*॥
दीर्घता लघुता चैव स्वच्छता घनता तथा ।
गुणाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः ॥
खर्व्वता गुरुता चैव वैवर्ण्यं मलिनाङ्गता ।
दोषाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः ॥
दीर्घे दीर्घायुराप्नोति लघौ भीतिविनाशनम् ।
स्वच्छे स्याद्वर्णकीर्त्तिश्च घने स्युः स्थिरसम्पदः ॥
खर्व्वे खर्व्वायुरुद्दिष्टं गुरुर्गुरुभयप्रदः ।
वैवर्ण्ये रोगशोकौ च मलिनं दूषयुमादिशेत् ॥"

इति स्थलजम् ॥ * ॥

अथ जलजम् ।

"लवणेक्षुसुरासर्पिर्दधितोयपयोऽब्धिषु ।
यथोत्तरं गुणवद्भाश्चमर्य्यः सप्त सप्तसु ॥
पुच्छानि तासां क्षुत्तानि जन्तुभिर्म्मकरादिभिः ।
कदाचिदुपलभ्येत तत्तीरे पुण्यशालिभिः ॥
लवणाब्धिसमुद्भूतं पीतं गुरु तथा लघु ।
वह्नौ स्निग्धञ्च वालञ्चेत् किञ्चिच्चटचटायते ॥
इक्षुसिन्धूद्भवं ताम्रं चामरं विमलं लघु ।
मक्षिका मशकाश्चैव तस्मिन् व्यजति चामरे ॥
सुराब्धिजातं कलुषं कर्व्वरं गुरुकर्कशम् ।
तन्नम्नेनैव माद्यन्ति अपि क्षुद्रा मतङ्गजाः ॥
सर्पिःसिन्धुभवं स्निग्धं श्वेतापीतं घन लघु ।
वायुरोगाः प्रशाम्यन्ति तस्य वीजनवायुना ॥
जलसिन्धूद्भवं पाण्डु दीर्घं लघु घनं महत् ।
अस्य वातेन नश्येत्तु क्षुधा मूर्च्छा मदो भ्रमः ॥
नारिष्टं नेतयस्तस्य यस्येदं चामरं गृहे ।
क्षीरोदसम्भवं श्वेतं दीर्घं लघु घनं महत् ॥
अस्य चामरराजस्य विज्ञेयो गुणविस्तरः ।
नाल्पेन तपसा लभ्यो देवानामपि जायते ॥
द्वियतेऽभ्यन्तरे सिन्धोर्नागैः सम्पत्तिलोलुपैः ।
एषां पूर्व्ववदुन्नेयं जातिदोषगुणादिकम् ॥ * ॥
स्थलजे जलजे चैव भाष्यमेतदविशेषणम् ।
स्थलजं सुखदृश्यं हि दाहे मिषमिषायते ॥
जलजं वह्निदुर्दृश्यं महान्तं धूमसुद्गिरेत् ।
चामराणां समुद्दिष्टमित्येवं लक्षणद्वयम् ॥
एवं विज्ञाय यो धत्ते स राजा सुखमश्नुते ॥*॥
जलजं चामरं राजा यो धत्ते जाङ्गलेश्वरः ।
तस्याचिरात् कुलं वीर्य्यं लक्ष्मीरायुश्च नश्यति ॥
अनूपाधीश्वरो राजा यो वहेत् स्थलजं तथा ।
तस्यैतानि विनश्यन्ति लक्ष्मीरायुर्यशो बलम् ॥
नालं वर्णयितुं तेषां विधेयं ग्लिष्मिना क्रमात् ।
संस्कारो वालुकायन्त्रे मरुरसलिलादिभिः ।
तदुष्णसलिलक्वाथात् क्षत्रिमत्वं विपद्यते ॥"

इत्युपकरणयुक्तौ चामरोद्देशः । इति भोजराजकृतयुक्तिकल्पतरुः ॥

चामरपुष्पः, पुं, (चामरवत् पुष्पमस्य ।) शुवाकः । काशः । आम्रः । केतकः । इति मेदिनी । पे ३१ ॥

चामरपुष्पकः, पुं, (चामरपुष्प + स्वार्थे कन् । चामरमिव पुष्पमस्य इति कप् वा ।) काशः । इति जटाधरः ॥ चामरपुष्पार्थोऽप्यत्र ॥

चामरा, स्त्री, (चामर + अजादित्वात् टाप् ।) चामरम् । इत्यमरटीकायां भरतः ॥

चामरी, स्त्री, (चामर + संज्ञायां ङीष् ।) चामरम् । इत्यमरटीकायां भरतः ॥

चामरी, [न्] पुं स्त्री, (चामर इव केशरोऽस्यस्य । इति इनिः ।) घोटकः । इति त्रिकाण्डशेषः ॥

चामीकरं, क्ली, (चमीकरः रत्नाकरविशेषः तत्र भवमित्यण् ।) स्वर्णम् । (यथा, शिवपुराणे वायुसंहितायाम् । २ । १३ ।
"दृष्ट्वा मुनयो देवा देवर्षिगणसेवितम् ।
मुहुश्चामीकरप्रख्यं सर्व्वाभरणभूषितम् ॥")
धुस्तूरः । इत्यमरः । २ । ६ । ६५ ॥

चामुण्डा, स्त्री, (महासंग्रामे चण्डमुण्डाख्यौ द्वौ शुम्भनिशुम्भसेनाध्यक्षौ अनया हत्वा निहतौ अतः परितुष्टया भगवत्या कौशिक्या अस्याश्चामुण्डेति संज्ञा रचिता । एतत् सर्व्वन्तु वक्ष्यमाणासु प्रवृत्तिषु दर्शनीयम् ।) दुर्गा । इति जटाधरः ॥ मातृकाभेदः । इति शब्दरत्नावली ॥ तत्पर्य्यायः । चर्च्चिका २ चर्म्ममुण्डा ३ मार्ज्जारकर्णिका ४ कर्णमोटी ५ महागन्धा ६ भैरवी ७ कापालिनी ८ । इति हेमचन्द्रः ॥
अस्या ध्यानं यथा,—
"काली करालवदना विनिष्क्रान्तासिपाशिनी ।
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥
द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा ।
अतिविस्तारवदना जिह्वाललनभीषणा ॥
निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥"

अस्याश्चामुण्डेति नामकारणं यथा,—
"यस्माच्चण्डञ्च मुण्डञ्च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि ! भविष्यसि ॥"

इति चण्डी ॥

अस्यास्तन्त्रादिकं यथा,—
"देव्या ललाटनिष्क्रान्ता या कालीति च विश्रुता ।
तस्यास्तन्त्रं प्रवक्ष्यामि कामदं शृणु भैरव ! ॥
समाग्निसहितो दन्त्यः प्रान्तस्तस्मात् पुरःसरः ।
षष्ठस्वराग्निविन्दुसहितो मादिरेव च ॥
कालीतन्त्रमिति प्रोक्तं धर्म्मकामार्थदायकम् ।
एतन्मूर्त्तिं प्रवक्ष्यामि वत्सकाग्रमनाः शृणु ॥
नीलोत्पलदलश्यामा चतुर्बाहुसमन्विता ।
खड्गाङ्कं चन्द्रहासञ्च बिभ्रती दक्षिणे करे ॥
वामे चर्म्म कपालञ्च ऊर्द्धाधोभावतः पुनः ।
दधती मुण्डमालाञ्च व्याघ्रचर्म्मधराम्बरा ॥
क्षुत्क्षामा दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा ।
लोलजिह्वा निम्नरक्तनयना नादभैरवा ॥
कबन्धवाहना पीनविस्तारश्रवणाननः ।
एषा ताराख्या देवी चामुण्डेति च कथ्यते ॥
एतस्या योगिनी चाष्टौ पूजयेच्चिन्तयेदपि ।
त्रिपुरा भीषणा चण्डी कर्त्री हन्त्री विघाटका ॥
करालाऽमूलिनी चेति अष्टौ ताः परिकीर्त्तिताः ।
एषातिकामदा देवी जाप्यहानिकरी सदा ॥
एतस्याः सदृशी काचित् कामदा न हि विद्यते ॥"

इति कालिकापुराणे ६० अध्यायः ॥

चाम्पिला, स्त्री, (चपि + भावे घञ् । ततष्टाप् । चम्पेवेति चाम्पा । ततोऽस्यार्थे इलच् टाप् च ।) नदी । इति त्रिकाण्डशेषः ॥

चाम्पेयः, पुं, (चम्पायां नद्यां भव इति ढक् ।) चम्पकः । इत्यमरः । २ । ४ । ६३ ॥ (यथास्य पर्य्यायाः ।
"चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
नागकेशरः । (यथा,—
"नागपुष्पः स्मृतो नागः केशरो नागकेशरः ।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
राजविशेषः । यथा, राजतरङ्गिण्याम् । ८ । ५४० ।
"चाम्पेयो नासटोवञ्चधरो वल्लापुराधिपः ॥"
विश्वामित्रपुत्राणामन्यतमः । यथा, महाभारते । १३ । ४ । ५७ ।
"आरण्यिनाचिकश्चैव चाम्पेयोज्जयनौ तथा ॥"
क्ली, सुवर्णं । यथा काशीखण्डे । २४ । ३६ ।
"मणिमाणिक्य-चाम्पेयदुकूलेभाश्वगोधनम् ॥")

चाम्पेयकं, क्ली, (चाम्पेय इव कायतीति । कै + कः । स्वार्थे कन् वा ।) किञ्जल्कः । इति राजनिर्घण्टः ॥

चाय्यं, क्ली, (चय्यते भक्ष्यते इति । चम + कर्म्मणि ण्यत् ।) भक्ष्यम् । इति व्याकरणम् ॥

चाय, ऋ ञ निश्चामे । अर्च्चे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ऋ, अचचायत् । ञ, चायति चायते । निश्चाम इति चात्तुषज्ञानम् ।
तं पर्व्वतीयाः प्रमदाश्चचायिरे । इति माघः ।
इति दुर्गादासः ॥

चारं, क्ली, (चर्यते भक्ष्यते कोपदेशादिवशादिति। चर+कर्म्मणि घञ्।) क्षत्रिमविषम्। इति हेमचन्द्रः। ३। ३६८॥

चारः, पुं, (प्रियालवृक्षः। गतिः। बन्धः। अपसर्पः। इति मेदिनी। रे, ३३॥ कारागारम्। इति हेमचन्द्रः। ३। ३६८॥ (चर एव इति स्वार्थे अण्।) गूढपुरुषः। चरः। तद्विवरणम्। यदुक्तं कालिकापुराणे ८५ अध्याये।

"क्षयिदुर्गञ्च वाणिज्यं खन्यानां करसाधनम्।
आदानं स्नेन्यकरयोर्बन्धनं गजवाजिनोः॥
शून्यवप्रमुखानाञ्च योजनं सततं जनैः।
प्रजानां सारसेतूनां बन्धनं चेति चाष्टमम्॥
एतदोषासु वर्गेषु चारान् सम्यक् प्रयोजयेत्।
कार्य्याकार्य्यविभागाय चाष्टवर्गाधिकारिणाम्॥
अष्टौ चारान् नियुञ्जीयादष्टवर्गेषु पार्थिवः।
दशसन्धेषु युञ्जीत क्रमतः शृणु तानि मे॥
स्वामी सचिवराष्ट्राणि मित्रं कोषो बलं तथा।
दुर्गन्तु सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितम्॥
दुर्गयुक्तं चाष्टवर्गे चारं नात्मनि योजयेत्।
तस्मादिमानि शेषाणि पञ्च चारपदानि तु॥
शुद्धान्तेष्वेव पुत्रेषु सकूपूपादौ महानसे।
शून्यदासीनयोश्चैव बलाबलविनिश्चये॥
आदौ दशसु चैतेषु चारान् राजा प्रयोजयेत्।
नयात् प्रकाशं जानीयात् तत्तु चारैर्निरूपयेत्॥
निरूप्य तत्प्रतीकारमवश्यं हिततश्चरेत्।
यथानियोगमेतेषां यो यो यत्रान्यथा चरेत्॥
ज्ञात्वा तत्र नृपश्चारैर्दण्डयेद्वा नियोजयेत्।
चारांस्तु मन्त्रिणा सार्द्धं रहस्ये संस्थितो नृपः॥
प्रदोषसमये पृच्छेत्तदानीमेव साधयेत्।
स्वपुत्रे चाथ शुद्धान्ते ये तु चारा महानसे॥
नियुक्तांस्तान् मध्यरात्रौ पृच्छेत् यद्यपि मन्त्रिणि।
एतान् चारान् स्वयं पश्येत् नृपतिर्मन्त्रिणा विना॥
अन्यांश्च मन्त्रिणा सार्द्धं निरूप्य प्रदिशेत् फलम्।
नैकेनैश्वर्य्यधरश्चारो नैको नोत्साहवर्द्धितः॥
संस्तुतो न हि सर्व्वत्र नातिदीर्घो न वामनः।
सततं न दिवाचारी न रोगी नाप्यबुद्धिमान्॥
न वितर्विभवैर्हीनो न भार्य्यापुत्रवर्जितः।
कार्य्यचारो नृपतिना गुह्यतत्त्वविनिर्णये॥
अनेकवेषग्रहणक्षमं भार्य्यासुतैर्युतम्।
बहुदेशवचोऽभिज्ञं पराभिप्रायवेदकम्॥
दृढभक्तं प्रकुर्व्वीत चारं शस्त्रमसाध्वसम्।
अधितिष्ठेत् स्वयं राजा क्षयिमात्मसमैस्तथा॥
बणिक्पथे च दुर्गादौ तेषु शस्त्राग्नियोजयेत्।
अन्तःपुरे पितुस्तुल्यान् धीरान् वृद्धान् नियोजयेत्॥
षण्डान् पङ्गून् तथा वृद्धान् स्त्रियो या बुद्धितत्पराः।
शुद्धान्तदारि भुञ्जीयात् स्त्रियो वृद्धा मनीषिणीः॥"

यथा च युक्तिकल्पतरौ।

"नृपो निहन्याच्चारेण परराष्ट्रं विचक्षणः।"

(कापटिकपुरुषादयः। यथा, मनुः। ७।१८४।

"उपगृह्यासदश्चैव चारान् सम्यग्विधाय च॥"

"चारांश्च कापटिकादीन्।" इति कुल्लूकभट्टः॥

प्रचारः। यथा, रामायणे। २। ६६। २६।

"निवृत्तचारः सहसा गतो रविः
प्रवृत्तचारा रजनी ह्युपस्थिता।"

"निवृत्तचारः निवृत्तकिरणप्रचारः प्रवृत्तचारा प्रवृत्ततमःप्रचारा।" इति तट्टीकायां रामानुजः॥ वाणिज्यादिव्यवहारः। यथा, महाभारते। ५। ३८। १२।

"भृतैर्वाणिज्यचारञ्च पुत्रैः सेवेत च द्विजान्॥"

सञ्चारः। प्रवृत्तिः। यथा, देवीभागवते। १। ११। ९२।

"न स्त्री दुष्यति चारेण न विप्रो वेदकर्म्मणा।"

"चारेण रजःसञ्चारेण।" इति टीकायां नीलकण्ठः॥)

चारकः, पुं, (चारयति इति। चर+णिच्+ण्वुल्।) अश्वादेः पालकः। सञ्चारकः। (यथा, रामायणे। ३। ६६। १८।

"इयं ऋते भ्रातरि मे मयि वत्स्यति मैथिली।
न चाहमार्य्यां कुर्य्यां ते पाप! प्रच्छन्नचारक!॥")

बन्धः। इति मेदिनी॥ के, ८७। प्रियालवृक्षः। इति राजनिर्घण्टः॥ (चर एव स्वार्थे अण् चारः। ततः स्वार्थे कन्। गुप्तचरः। यथा महाभारते। २।५।३८। [चारकैः॥"

"त्रिभिस्त्रिभिरविज्ञातैर्वेतृसि तीर्थानि चरणग्रीवे,त्रि। यथा,कथासरित्सागरे।१४।६५।

"गुप्तं विरचितां नाम भेजेऽन्तःपुरचारिकाम्॥")

चारटिका, स्त्री, (चर+णिच्+"ण्वुलादिभ्योऽटन्।" ४। ८१। उणा। इति अटन् ततः संज्ञायां कन् कापि अत इत्वञ्च।) नलीनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

चारटी, स्त्री, (चर+णिच्+"ण्वुलादिभ्योऽटन्।" इति अटन् ततो गौरादित्वात् ङीष्।) पद्मचारिणीवृक्षः। इत्यमरः। २। ४। १४६॥ भूम्यामलकी। इति राजनिर्घण्टः॥

चारणः, पुं, (चारयति प्रचारयति वृत्यगीतादिविद्यां तज्ज्ञत्वकीर्त्तिं वा। चर+णिच्+ल्युः।) नटविशेषः। तत्पर्य्यायः। कुशीलवः। इत्यमरः। २। १०। १२॥ (यथा, मनुः। १२। ४४।

"चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः।
रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः॥"

"चारणाः नटादयः।" इति कुल्लूकभट्टः॥")

गन्धर्व्वविशेषः। यथा,—

"गन्धर्व्वाणां ततो लोकः परतः शुतयोजनात्।
देवानां गायनास्ते च चारणाः स्तुतिपाठकाः॥"

इति पाद्मे पातालखण्डम्॥

(देवयोनिविशेषः। यथा, भागवते। २।१।३६।

"गन्धर्व्वविद्याधरचारणाप्सरः
स्वरःखतीरसुरानीकवीर्य्यम्॥"

चारपुरुषः। यथा, भागवते। ४। १६। १२।

"अन्तर्वहिश्च भूतानां पश्यन् कर्म्माणि चारदैः।
उदासीन इवाधत्ते वायुरात्मेव देहिनाम्॥")

चारभटः, पुं, (चारेषु चरेषु भटः। यद्वा, चारे बुद्धिकौशलादिप्रचारे भटः।) वीरः। इति हेमचन्द्रः। ३।२८॥ (यथाह भर्त्तृहरिः। १।६१।

"कक्षुभ्यति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि।
चारभटचौरचेटकनटविटनिष्ठीवनप्ररावम्॥"

चारवायुः, पुं, (चारेण सूर्य्यस्योदग्गतिभेदेन प्रेरितो यो वायुः।) निदाघजवायुः। इति चिकाण्डशेषः॥

चारिणी, स्त्री, (चारयति स्वगुणमिति। चर+णिच्+णिनिः ङीप् च।) करञ्जवृक्षः। इति राजनिर्घण्टः॥

चारित्रं, क्ली, (चरित्रमेव इति। स्वार्थे अण्।) चरित्रम्। इति हेमचन्द्रः। ३। ५००॥ (यथा, रामायणे। ३। ५६। ६।

"कुलाक्रोशकरं लोके धिक् ! ते चारित्रमीदृशम्॥"

मरुद्गणानामन्यतमः। यथा, हरिवंशे। १६६।५४।

"जयोनक्षाद्भुतविधे चारित्रं बहुपन्नगम्॥"

चरतीति। "चरेर्वृत्ते।" ४। १७२। उणा। इति ञित्रम्। वृत्तान्तम्॥)

चारित्रा, स्त्री, (चारित्रं अन्नस्वभावो विद्यतेऽस्या इति। अच् टाप्।) तिन्तिड़ीवृक्षः। इति शब्दरत्नावली॥

चारी, स्त्री, (चारः पदनिक्षेपभेदः गतिभेदो वा अस्त्यस्यामिति। "अर्शआदिभ्योऽच्।" ५।२।१२७। इत्यच्। ततो ङीष्।) वृत्याङ्गविशेषः। यथा,—

"न हि चारीं विना वृत्ते वृत्तस्याङ्गं प्रवर्त्तते।
प्रङ्गाहारादिसानान्तु भावोद्दीपनकारिका॥
माधुर्य्योद्वर्त्तनेनैव नित्यं चारी चारुगतिर्मता॥"

अन्ये तु।

"एकपादप्रचारो यः सा चारी तु निगद्यते।
पादयोश्चारणं यच्च सा चारीति निगद्यते॥
करणानां समायोगः खण्डकः परिकीर्त्तितः।
त्रिभिः खण्डैश्चतुर्भिर्वा मण्डलं समुदाहृतम्॥
समनखा नूपुरविद्धा तिर्य्यङ्मुखी सबला च।
कातरा च कुवीरा च विश्लिष्टा रथचक्रिका॥
पार्ष्णिरेचितका तलदर्शिनी गजहस्तिका।
परावृत्ततला चोरुताड़िताऽर्द्धमण्डला॥
स्तम्भक्रीड़निका हरिणत्रासिका चोररेचिका।
तलोद्वृत्ता सञ्चरिता स्फुरिकापि तथैव च॥
लङ्घितजङ्घा सङ्कुटिता स्यादथ मदालसा।
उत्कुञ्चितातिर्य्यक्कुञ्चिता चापकुञ्चिता॥
षड्विंशतिर्भौमचार्य्य इत्याख्याता मनीषिभिः॥"

अन्ये तु।

"समपादस्थिता वर्णा शकटास्याधहिंकापि च।
विद्याधा ताड़िता बद्धा एड़का क्रीड़िता तथा॥
ऊरुवृत्ता क्रन्दिता जनितापस्पन्दिता तथा।
स्पन्दितावत्समतन्वी समोत्सारितमञ्जिता॥
उच्छन्दिता च विज्ञेयाश्चार्य्यः षोड़श भूमिगाः।"

इति भूमिचारी॥ * ॥

आकाशचारी यथा,—

"चारीचाकाशगा वक्षे विद्धेपा लघरी तथा।
अङ्कितोड़िता भ्रमरी पुरःक्षेपा च रुचिका॥

अपक्षेपा जङ्घावर्त्ता विद्धा च हरिणप्लुता।
ऊरुजङ्घान्दोलिता च जङ्घा जङ्घनिका तथा॥
विद्युत्क्रान्ता भ्रमरिका दण्डपार्श्वेति षोड़श॥"
अन्ये तु।
"विभ्रान्तातिक्रान्तापक्रान्ता पार्श्वक्रान्तिका।
ऊर्द्धजानुर्दोलपादादृत्ता नूपुरपादिका॥
भुजङ्गभासिका चित्राविद्धा ताला च स्रूचिका।
विद्युत्क्रान्ता भ्रमरिका दण्डपादा तथैव च॥
आकाशचारिका एताः षोड़शैव निरूपिताः॥"
एताश्चैव भूमिचारीष्वप्यन्तरभेदोऽस्ति तिर्य्यक्-चारी ऊर्द्धचारी अधश्चारीति ता ऊहनीयाः॥
"तैलाभ्यक्तेन गात्रेण लब्धाहारो जितश्रमः।
स्तम्भे वा भित्तिदेशे वा प्रथमं तां प्रयोजयेत्॥
रूक्षाहारं तथान्नञ्च भुक्त्वा तां न समाचरेत्।
वृत्यपादस्य विन्यासचारी सैवाभिधीयते॥
झङ्कारादिरसानान्तु भवेद्दीपनकारणम्।
माधुर्य्यो भूमसा नित्यं हृद्यतालत्रयान्विता॥
नियतोऽङ्गविशेषाणां चारी सञ्चारतो भवेत्॥"
इति सङ्गीतदामोदरोक्तचारीलक्षणम्॥

चारः, पुं, (चरति देवेषु गुरुत्वेन। चर+"दृ-सनिजनिचरीति।"उणा १।३। इति असुन्।) बृहस्पतिः। (चरति चित्ते इति।) मनोज्ञे त्रि। इति मेदिनी। रे, ३३॥ (यथा, गीतगोविन्दे। १०।६। [मधिवचनजातम्॥"
"इति चटुलचाटुपटुचारुसुरवैरिणो राधिका-श्रीकृष्णस्य रुक्मिणीगर्भसम्भूतपुत्राणामन्यतमः। यथा, हरिवंशे। ११७। ३६।
"चारुश्च बलिनां श्रेष्ठं सुताचारुमतीं तथा॥")

चारुकः, पुं, (चारु+संज्ञायां कन्।) शरबीजम्। अस्य गुणाः। मधुरत्वम्। रूक्षत्वम्। रक्त-पित्तकफापहत्वम्। शीतत्वम्। लघुत्वम्। अदृष्यत्वम्। कषायत्वम्। वातकोपनत्वञ्च। इति भावप्रकाशः॥

चारुकेशरा, स्त्री, (चारूणि केशराणि अस्याः।) नागरमुस्ता। तरुणीपुष्पम्। इति राजनिर्घण्टः॥

चारुगर्भः, पुं, (चारुः मनोज्ञः गर्भः अभ्यन्तरवर्त्ती करणमिति यावत् यस्य। यद्वा चारुर्गर्भे उत्पत्तिस्थानं यस्य।) श्रीकृष्णपुत्रः। यथा, हरिवंशे। १६०। ६।
"चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च॥"

चारुगुप्तः, पुं, (चारु यथा स्यात् तथा गुप्तः। यद्वा चारुणा ईश्वरेण कृष्णेन गुप्तः पालितः।) श्रीकृष्णपुत्रः। यथा, हरिवंशे। १६०। ६।
"सुवेशश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान्॥"

चारुदेष्णः, पुं, रुक्मिणयां श्रीकृष्णपुत्रः। यथा, हरिवंशे। १६०। ५।
"द्वितीयश्चारुदेष्णश्च वृष्णिसिंहो महारथः॥"

चारुधारा, स्त्री, (चारूणां मनोहरपदार्थानां धारा इव, तैलोक्यसुन्दरत्वेनाख्यातत्वात्। चार्व्वी धारा नीतिर्यत्रवहारो यस्याः वा।) ग्रन्थी। इति त्रिकाण्डशेषः॥ (चारु धाम यस्याः।) चारुधामा इत्यपि पाठः॥

चारुनालकं, क्ली, (चारु नालं यस्य कप्।) रक्तपद्मम्। इति पुरुषोत्तमः॥

चारुपर्णी, स्त्री, (चारु मनोज्ञं पर्णं पत्रं अस्याः।) प्रसारणी। इति राजनिर्घण्टः॥ गन्धभादालिया इति भाषा॥ (प्रसारणीशब्देऽस्या गुणादिकं ज्ञेयम्॥)

चारुफला, स्त्री, (चारु मनोहरं फलं अस्याः।) द्राक्षा। इति राजनिर्घण्टः॥

चारुबाहुः, पुं, (चारू बाहू यस्य।) श्रीकृष्ण-पुत्रः। यथा, हरिवंशे। १६०। ६।
"चारुबाहुः कनीयांश्च कन्या चारुमती तथा॥"

चारुबिन्दः, पुं, (चारुं चारुतां बिन्दतीति। विदि+अण्।) श्रीकृष्णपुत्रः। यथा, हरिवंशे। १६०। ६।
"सुवेशश्चारुगुप्तश्च चारुबिन्दश्च वीर्य्यवान्॥"

चारुमती, स्त्री, (चारु चारुता सौन्दर्य्यं अस्या अस्तीति। मतुप् ततो ङीप्।) रुक्मिण्यां श्रीकृष्णस्य कन्या। यथा, हरिवंशे। १६०। ६।
"चारुबाहुः कनीयांश्च कन्या चारुमती तथा॥"

चारुलोचनः, पुं,(चारवौ लोचनेऽस्य।) हरिणः। इति त्रिकाण्डशेषः॥(चारुलोचनविशिष्टे त्रि॥)

चारुवर्द्धना, स्त्री, (चारु चारुत्वं श्रियमित्यर्थः वर्द्धयति स्वगुणैरिति यावत्। वृध+णिच्+युच्। कर्त्तरि ल्युर्वा ततष्टाप्।) नारी। इति राजनिर्घण्टः॥

चारुव्रता, स्त्री, (चारु व्रतमस्याः।) मासोप-वासिनी। इति त्रिकाण्डशेषः॥

चारुश्रिला, स्त्री, (चारुश्चार्व्वी श्रिला इति नित्य-कर्म्मधारयः।) मणिः। इति त्रिकाण्डशेषः॥

चार्चिक्यं, क्ली, (चर्चिकैव। स्वार्थे ष्यञ्।) चन्दनादिना देहविलेपनविशेषः। इत्यमरः॥ तत्पर्य्यायः। चर्च्चा २ स्यासकः ३। इत्यमरः॥ चर्चिक्यम् ४। इति भरतः॥ अपि च।
"स्यासकः स्यायकश्चर्च्चा चर्चिक्यञ्च चतुष्टयम्।
वस्त्रादौ कुङ्कुमादीनां छटादिषु निगद्यते॥"
इति शब्दरत्नावली॥

चार्म्मः, पुं, (चर्म्मणा परिवेष्टितः इति। चर्म्म+अण्।) चर्म्माच्छादितरथः। इति भरतः॥ चर्म्माच्छन्नदण्डे त्रि॥

चार्म्मिकं, क्ली, (चर्म्मणां समूहः इति। भिक्षा-दिभ्योऽण्।" ४।२।३८। इत्यण्।) चर्म्म-समूहः। इत्यमरटीकायां भरतः॥

चार्म्मिकं, क्ली, (चर्म्मिणां चर्म्मधारिणां समूहः। इति अण्।) चर्म्मिसमूहः। इत्यमरटीकायां स्वामी॥

चार्व्वाकः, पुं, (चारुः आपातमनोरमः लोक-चित्ताकर्षकः इति यावत् वाकः वाक्यमस्य। ततः पृषोदरादित्वात् साधुः।) तार्किकविशेषः। तत्पर्य्यायः। बार्हस्पत्यः २ नास्तिकः ३ लौकायतिकः ४। इति हेमचन्द्रः॥ स च आकाशा-दिभूतचतुष्टयवादी। प्रत्यक्षमेकं प्रमाणमिति चार्व्वाकाः। इति न्यायसंग्रहः॥ (यथा च सर्व्वदर्शनसंग्रहे।"अथ कथं परमेश्वरस्य निःश्रेय-सपदत्वमभिधीयते बृहस्पतिमतानुसारिणा नास्तिकशिरोमणिना चार्व्वाकेण दूरोत्सारित-त्वात् दुरुच्छेदं हि चार्व्वाकस्य चेष्टितम्॥") दुर्य्योधनसखाराक्षसविशेषः। (यथा, महा-भारते। १२। ३८। २२—२३।
"निःशब्दे च स्थिते तत्र ततो विप्रजने पुनः।
राजानं ब्राह्मणच्छद्मा चार्व्वाको राक्षसोऽब्रवीत्॥
तत्र दुर्य्योधनसखा भिक्षुरूपेण संवृतः।
साक्षः शिखी त्रिदण्डी च दृष्टो विगतसाध्वसः॥")

चार्व्वी, स्त्री, (चारु+गुणवचनत्वात् ङीष्।) कुबेरपत्नी। ज्योत्स्ना। बुद्धिः। शोभना। इति मेदिनी। वे, ६॥ दीप्तिः। इति शब्दरत्ना-वली॥

चालः, पुं, (चालयति छादयतीति। चल+णिच्+अच् णो वा। यद्वा चालयति आच्छादयत्यनेने-ति। चल+णिच्+करणे घञ्।) स्वनाम-ख्यातयष्ट्याच्छादनम्। तत्पर्य्यायः। पिटम् २। इति त्रिकाण्डशेषः॥ पटलम् ३ छदिः ४। इत्य-मरः। २। २। १४॥ कटलम् ५। इति शब्द-रत्नावली॥ छादम् ६। इति जटाधरः॥ स्वर्ण-चूड़पक्षी। इति भूरिप्रयोगः॥

चालकः, पुं, (चलति स्वेच्छयैव। चल+ण्वुल्।) अङ्गुष्ठदुर्द्दुरयन्त्री। इति त्रिकाण्डशेषः॥

चालनं, क्ली, (चालयत्यनेनेति। चल+णिच्+करणे ल्युट्।) चालनी। इत्यमरटीकायां भरतः॥ (यथा, कर्म्मप्रदीपे।
"क्षुद्रच्छिद्रसमोपेतं चालनं तितउः स्मृतः॥"
भावे ल्युट्। प्रेरणम्। यथा, भागवते। ३। २६। ३७।
"चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः॥")

चालनी, स्त्री, (चालयत्यनेनेति। चल+णिच्+करणे ल्युट् ङीप् च।) स्वनामख्यातशूर्पादि-चालनपात्रम्। तत्पर्य्यायः। तितउः २। इत्य-मरः।२।६।२६॥ चालनम् ३ क्षुद्रच्छिद्रा ४। इति भरतः॥ पाचीरः ५। इति जटाधरः॥

चाषः,पुं,(चाषयति भक्षयति कथादिकमिति। चष+स्वार्थे णिच्+अच्। यद्वा चष्यते भक्ष्यते-ऽसौ मांसाग्निभिरिति। चष्+कर्म्मणि घञ्।) खञ्जनपक्षी। सोनाचड़া इति ख्यातः। नील-कण्ठ इति क्वचित् ख्यातः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। किकीदिविः २ नीलाङ्गः ३ पुण्यदर्शनः ४। इति राजनिर्घण्टः॥

चासः, पुं, (चाष+पृषोदरात् सलम्।) चाष-पक्षी। इक्षुः। इति मेदिनी। से, ६॥

चि, अ चित्याम्। चयने। इति कविकल्पद्रुमः॥ (भ्वां-उभं-द्विकं-अनिट्।) अ, चयति चयते धनं लोकः। इति दुर्गादासः॥

चि, अ न चित्याम्। इति कविकल्पद्रुमः॥ (स्वां-उभं-द्विकं-अनिट्।) चितिश्चयनं राशीकरण-मिति यावत्। न अ, चिनोति चिनुते। इति दुर्गादासः॥

चि, क मि चित्याम्। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क मि, चययति चाय-यति। स्वमते तु चपयति चापयतीत्यपि। इति दुर्गादासः॥

चिकित्सकः, पुं, (चिकित्सति रोगमपनयतीति। कित्+"गुप्तिज्किद्भ्यः सन्।"३।१।५। इति स्वार्थे सन्+ण्वुल्।) चिकित्साकर्त्ता। (यथा, मनुः। ६। २८४।

"चिकित्सकानां सर्व्वेषां मिथ्या प्रचरतां दमः॥") तत्पर्य्यायः। रोगहारी २ अगदङ्कारः ३ भिषक् ४ वैद्यः ५। इत्यमरः। २। ६। ५७॥ तस्य लक्षणं यथा, चरके।

"आयुर्व्वेदकृताभ्यासः सर्व्वेषां प्रियदर्शनः। आर्य्यशीलगुणोपेत एष वैद्यो विधीयते॥"

चिकित्सा, स्त्री, (चिकित्सनमिति। कित्+आधि-प्रतीकारे+"गुप्तिज्किद्भ्यः सन्।"३। १। ५। इति स्वार्थे सन् ततः अप्रत्ययः।) रोगप्रतीकारः। तत्पर्य्यायः। रुक्प्रतिक्रिया २। इत्यमरः। २। ६। ५०॥ उपचारः ३ उपचर्य्या ४ निग्रहः ५ वेदनानिष्टा ६ क्रिया ७ उपक्रमः ८ ग्रमः ९। इति राजनिर्घण्टः॥ चिकित्सितम्१० प्रतीकारः ११ भिषग्जितम् १२। इति रत्न-माला॥ रोगप्रतिकारः १३। इति शब्दरत्ना-वली॥ सा त्रिधा यथा, वैद्यके।

"आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता। कृतप्रधाना दैवी स्यात् छेदभेदात्मिकासुरी॥ मानुषी षड्विधा ज्ञेया जपहोमादिसंस्कृता। कलौ बाह्यबले लोके मानुषी तत्र पूजिता॥" तस्या लक्षणं यथा,—

"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः। सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम्॥ या क्षुदीर्णं श्रमयति नान्यं व्याधिं करोति च। सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्॥" चिकित्साविधुपदेशो यथा,— [गदः।

"जातमात्रचिकित्स्यः स्यान्नोपेक्ष्योऽल्पतया बुद्धिशत्रुर्विषेस्तुल्यः स्वल्पोऽपि विकरोत्यसौ॥ रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्। ततः कर्म भिषक् पश्चाज्ज्ञानपूर्व्वं समाचरेत्॥ औषधं कवलं कर्त्तुं यो जानाति न चौषधम्। वैद्यकर्म्म स चेत् कुर्य्याद्वधमर्हति राजतः॥ आदावन्ते तथा ज्ञाने प्रयतेत चिकित्सकः। भेषजानां विधानेऽथ ततः कुर्य्यात् चिकित्सितम्॥ प्रीते प्रीतप्रतीकारसुखे चोद्वानिवारणम्। कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत्॥ अप्राप्ते वा क्रियाकाले प्राप्ते वा न क्रिया कृता। क्रियाहीनातिरिक्ता च साध्येष्वपि न सिध्यति॥ क्रिया यासु गुणालाभे क्रियामन्यां प्रयोजयेत्। पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो मतः॥" चिकित्सासाफल्यं यथा,—

"क्वचिदर्थः क्वचिच्चेष्टा क्वचिद्धर्म्मः क्वचिद्यशः। कर्म्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला॥"*॥

चिकित्साङ्गानि यथा, भावप्रकाशे।

"रोगी दूतो भिषग्दीर्घमायुर्व्रत्यञ्च सेवकः। सदौषधं चिकित्सायामित्यङ्गानि बुधा जगुः॥"

चिकित्सितं, क्ली, (कित्+स्वार्थे सन् ततो भावे क्तः।) चिकित्सा। इति रत्नमाला॥ (यथा, सुश्रुते सूत्रस्थाने २ अः। [तम्॥"

"बीजं चिकित्सितस्येतत् समासेन प्रकीर्त्ति-पर्य्याया अस्य यथा, वैद्यकरत्नमालायाम्।

"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्-जितम्॥"

चिकित्स्यतेऽनेनेति। करणे क्तः। भेषजम्। अस्य पर्य्याया यथा, चरके चिकित्सास्थाने १ अः।

"चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम्। प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम्॥ विद्याङ्गेषजनामानि भेषजं द्विविधञ्च तत्। यदूर्द्ध्वाधिनिर्घातकरं वक्ष्यते तच्चिकित्सितम्॥ चिकित्सितार्थं एतावान् विकाराणां यदौ-षधम्।"

यथा, भागवते। १। ५। ३२।

"एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम्। यदीश्वरे भगवति कर्म्म ब्रह्मणि भावितम्॥") क्षतप्रतीकारे च॥

चिकिनः, त्रि, (नि नता नासिकास्यस्य। "इनच्-पिटच्-चिकचि च।" ५। २। ३३। इति इनच् प्रकृतेश्चिकादेशश्च।) चिपिटनासिकः। इति केचित्॥

चिकिलः, पुं, (चि+बाहुलकात् इलच् कुक् च।) पङ्कः। इति हेमचन्द्रः। ४। १५६॥

चिकीर्षा, स्त्री, (कर्त्तुमिच्छा इति। "धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा।" ३। १। ७। इति सधातोः इच्छार्थकसन्प्रत्ययेन चिकीर्ष्। ततः "अप्रत्ययात्।" ३। ३। १०२। इत्यः।) कर्त्तुमिच्छा। इति सुग्धबोधम्॥ करिवार वाञ्छा इति भाषा। (यथा, भागवते।२।१०।२४।

"हस्तौ रुरुहतुस्तस्य नाशुकर्म्मचिकीर्षया॥")

चिकीर्षुः, त्रि, (चिकीर्षतीति। कृ+सन्+"सनाशंसभिक्ष उः।" ३। २। १६८। इति उः।) कर्त्तुमिच्छुः। करणेच्छाविशिष्टः। इति व्याकरणम्॥

चिकुरः, पुं, (चि इत्ययुक्तशब्दं कुरतीति। कुर-शब्दे+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) केशः। (यथा, राजतरङ्गिण्याम्। ८।३६७।

"चिकुरनिचये यत् कौटिल्यं विलोचनयोश्च या॥") सर्पः। (अयं हि ऐरावतकुलजातस्य सुमुखस्य पिता। यथा, महाभारते। ५। १०३। २४।

"एतस्य हि पिता नागश्चिकुरो नाम मातले!। न चिरात् वैनतेयेन पञ्चत्वमुपपादितः॥") पर्व्वतः। पक्षिभेदः। वृक्षविशेषः। गृहबभुः। तरलः। इति मेदिनी। रे, १५५॥

चिकुरः, त्रि, (चि+कुर+कः।) चपलः। स तु दोषमनिश्चित्य वधबन्धनादेः कर्त्ता। इत्यमरः। ३। १। ४६॥

चिकुरपक्षः, पुं, (चिकुराणां केशानां पक्षः समूहः।) कचसमूहः। केशसमुदयः। इत्यमरः। २। ६। ८८॥

चिकुरपाशः, पुं, (चिकुराणां केशानां पाशः समूहः।) केशसमूहः। इत्यमरः। २। ६। ८८॥

चिकुरहस्तः, पुं, (चिकुराणां हस्तः समूहः।) केशसमूहः। इत्यमरः। २। ६। ८८॥

चिकूरः, पुं, (चिकुर+निपातनात् दीर्घः।) केशः। इति शब्दभेदप्रकाशः॥

चिक्क, क अर्त्तौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) कोपधः। तृतीयस्वरभध्यः। अर्त्तिः पीड़नम्। क, चिक्कयति शत्रुं शूरः। इति दुर्गादासः॥

चिक्कः, पुं, (चिक् इत्ययुक्तशब्देन कायति शब्दा-यते इति। चिक्+कै+कः।) कुच्छुन्दरिः। इति चिकाख्यशेषः॥ (नि नता नासिकास्यस्येति। "इनच्पिटचिति।" ५। २। ३३। इत्यस्य वार्त्तिं "कप्रत्ययचिकादेशौ च वक्तव्यौ।" इति कप्रत्ययो नेश्चिकादेशश्च। नतनासिके, चि। इति सिद्धान्तकौमुदी॥)

चिक्कणं, त्रि, (चिक्यते ज्ञायते इति। चित्+"चितेः कनः कश्च।" उणां। ४। १७६। इति कर्म्मणि कनः ककारान्तादेशः। बाहुलकाद-गुणः।) स्निग्धयञ्जनादि (स्निग्धत्वमस्टणत्वादि-गुणवद्वस्तु।) इत्यमरः। २। ६। ४६॥ चिक्कण इति भाषा॥ (यथा, महाभारते। १२। १८४। ३४।

"कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो मृदु-दारुणः॥")

चिक्कणः, पुं, (चिक्कणं स्निग्धगुणं विद्यतेऽस्य। अर्श-आदित्वात् अच्।) पूगवृक्षः। तत्फले क्लीं। इति राज-निर्घण्टः॥ (औषधपाकस्यावस्थाविशेषो यथा,

"पाकस्तु त्रिविधो मन्दश्चिक्कणः खरचिक्कणः॥" इति वाभटे कल्पस्थाने षष्ठेऽध्याये॥)

चिक्कणा, स्त्री, (चिक्कणं मसृणता विद्यतेऽस्याः। अर्श-आदित्वात् अच्। ततष्टाप्।) उत्तमा गौः। तत्पर्य्यायः। नेचिकी २। इति शब्दचन्द्रिका॥ पूगफलम्। इति राजनिर्घण्टः॥

चिक्कणी, स्त्री, (चिक्कण+गौरादित्वात् ङीष्।) पूगफलम्। इति राजनिर्घण्टः॥

चिक्कसः, पुं, (चिक्कयति पीड़यति चूर्णकारण-मिति। चिक्क+असच्।) यवचूर्णम्। इति हेमचन्द्रः। ३। ६६॥

चिक्का, स्त्री, (चिक्कयति पीड़यति भोक्तारमिति। चिक्क+अच्।) पूगफलम्। इति राजनिर्घण्टः॥

चिङ्गटः, पुं, (चिङ्ग इत्ययुक्तशब्देन अटतीति। अट गतौ+अच्। प्रकन्यादिवत् अलोपः।) मत्स्य-विशेषः। गलाचिङ्गड़ी इति मोचाचिङ्गड़ी इति च भाषा॥ तत्पर्य्यायः। महाशल्कः २।

इति हारावली । १८७ ॥ अस्य गुणाः । गुरुत्वम् । ग्राहित्वम् । मधुरत्वम् । बलवर्द्धनत्वम् । मेदःपित्तास्रनाशित्वम् । वृष्यत्वम् । रोचनत्वम् । कफवातकारित्वञ्च । इति राजवल्लभः ॥ (ऊषापानविधौ भक्षणनिषेधोऽस्य यथा,—

"प्रातः पानीययाने महऋषिगणितं द्रव्यमेतच्च नाद्यात् ।
मांसं क्षीरञ्च शाकं सकलविदलकं पिष्टकं चिङ्गटञ्च ॥"

इति वैद्यक-ऋतुचर्य्यायाम् ॥)

चिङ्गटी, स्त्री, (चिङ्गट + जातौ ङीष् ।) मत्स्यविशेषः । घुषाचिङ्गड़ी इति भाषा ॥ अस्या गुणाः । मधुरत्वम् । हृद्यत्वम् । वातनाशित्वम् । श्लेष्मकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

चिङ्गड़ः, पुं, (चिङ्गट + एषोदरादित्वात् टस्य डत्वे साधुः ।) चिङ्गटमत्स्यः । इति शब्दमाला ॥ (विवरणमस्य चिङ्गटशब्दे आख्यातम् ॥)

चिचिण्डः, पुं, फलविशेषः । चिचिण्डा इति चिचिङ्गा इति च भाषा ॥ तत्पर्य्यायः । श्वेतराजिः २ सुदीर्घः ३ गृहकूलकः ४ । अस्य गुणाः । वातपित्तनाशित्वम् । पथ्यत्वम् । बलरुचिकारित्वम् । ग्रीष्मिणोऽतिहितत्वम् । पटोलतः किञ्चिद्गुणहीनत्वञ्च । इति भावप्रकाशः ॥ (यथा च हारीते प्रथमे स्थाने दशमेऽध्याये ।

"चिचिण्डो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ।
ग्रीष्मिणोऽतिहितः किञ्चिद्गुणैर्न्यूनः पटोलतः ॥")

चिच्चा, स्त्री, (चिं चयनं चिनोतीति । चि + अन्येभ्योऽपीति ङः ।) तिन्तिड़ीवृक्षः । इत्यमरः । २ । ४ । ४३ ॥ (यथा,—

"चिच्चादलरसक्षारैः पथ्यं दध्योदनं हितम् ॥"

इति वैद्यकभैषज्यव्यवहारिग्रन्थे गुल्माधिकारे ॥)

चिच्ची, स्त्री, (चिच्च + गौरादित्वात् ङीष् ।) गुञ्जा । इति केचित् ॥

चिच्चाम्लं, क्ली, (चिच्चा तिन्तिड़ी तद्वत् अम्लं यत्र ।) अम्लशाकः । इति राजनिर्घण्टः ॥

चिच्चासारः, पुं, (चिच्चायास्तिन्तिड्याः सार इव सारोऽस्य यत्र ।) अम्लशाकः । इति राजनिर्घण्टः ॥

चिच्चोटकः, पुं, (चिच्चेव अटतीति । अट + ण्वुल् । एषोदरात् साधुः ।) लूतविशेषः । चैँचको इति चैँचड़ा इति च भाषा ॥ तत्पर्य्यायः । अक्कोलः २ । इति रत्नमाला ॥ चिच्चाटकोऽपि पाठः ॥

चिट, प्रेषे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) चेटति भृत्यं स्वामी । इति दुर्गादासः ॥

चिट, क प्रेषे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ॥)

चित, ई ज्ञाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ईं, चित्तः । ज्ञानमिह जागरणम् । ज्ञानञ्च अविद्यानिद्रयाक्रान्ते जगत्येकः स चेततीति हलायुधः । चिचेत रामस्तत् छद्मम् । इति दुर्गादासः ॥

चित, इ क स्मृतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इ क, चिन्तयति विद्यां सुधीः । इति दुर्गादासः ॥

चित, क ड ज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) क ड, चेतयते । राक्षसस्य चेतयन्ति न । इति भट्टौ गणकृतानित्यत्वमिति रमानाथः । वस्तुतस्तु चेतयते ततश्चेतं करोतीति णौ साध्यम् । इति दुर्गादासः ॥

चित्, स्त्री. (चित संज्ञाने + सम्पदादित्वात् भावे क्विप् ।) ज्ञानम् । इत्यमरः । १ । ५ । १ ॥ (यथा, भागवते । ३ । ७ । २ ।

"ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः ।
लीलया चापि युज्येरन् निर्गुणस्य गुणाः क्रियाः ॥")

चित्, य, असाकल्यम् । इत्यमरः ॥ यथा । किञ्चित् कञ्चित् इत्यादि ॥ (तत्तु प्रत्ययविशेषः । कालाद्यनिर्णये चित्प्रत्ययस्य प्रयोगो दृश्यते । "किमः क्वन्नाश्चिच्चनौ ।" इति सुग्धबोधव्याकरणप्रणेता पूज्यपादोपदेवाचार्यः ॥)

चित्, त्रि, (चि + कर्म्मणि क्तः ।) छन्नः । इति मेदिनी । ते, १८ ॥ (क्रतचयनः । सञ्चितः । "इह वै कर्म्मचितो लोकः क्षीयते एवममुत्र पुण्यचितः क्षीयते ।" इति श्रुतेः ॥)

चिता, स्त्री, (चीयते ऽस्यामग्निरस्यां यद्वा चीयते उद्दीयतेऽसौ प्रेतस्य परलोकगमनेऽग्नि इति। चि + अधिकरणे वा कर्म्मणि क्तस्तताप् ।) ध्रुवदाहाधारकाष्ठौघः । तत्पर्य्यायः । चित्या २ । इत्यमरः । २ । ६ । ११७ ॥ काष्ठमठी ३ चैत्यम् ४ चिताचूड़कम् ५ चित्यम् ६ । इति त्रिकाण्डशेषः ॥ चितिः ७ । (यथा, महाभारते । ३ । २१६ । १७ ।

"चितायेरुद्वहन्नाथं पत्नीभ्यां तत् प्रवर्त्तते ॥")

संहतिः । इति मेदिनी । ते, १८ ॥

चिताचूड़कं, क्ली, (चितेव चूड़कम् ।) चिता । इति त्रिकाण्डशेषः ॥

चितिः, स्त्री, (चीयतेऽस्यामग्निरिति । चि + अधिकरणे क्तिः ।) चिता । (यथा, भागवते । ४ । २८ । ५० ।

"चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ॥")

समूहः । इति मेदिनी । ते, १८ ॥ दुर्गा । यथा,

"चितिश्चैतन्यभावाद्वा चेतना वा चितिः स्मृता ।
महान् यस्यां स्थिता सर्व्वं महा वा प्रकृतिर्मता ॥"

इति देवीपुराणे ४५ अध्यायः ॥ * ॥


भित्तिस्थेष्टिकादिसङ्ख्याज्ञानार्थाङ्कविशेषः । यथा,

चितौ करणसूत्रं सार्द्धवृत्तम् ।

"उच्छ्रयेण गुणितं चितेः किल
क्षेत्रयुग्मभवफलं घनं भवेत् ।
इष्टिकाघनहृते घने चिते-
रिष्टिकापरिमितिश्च लभ्यते ॥
इष्टकोच्छ्रयहृदुच्छ्रितिचितेः
स्युः स्तराश्च दृषदां चितेरपि ॥

उदाहरणम् ।

अष्टादशाङ्गुलं दैर्घ्यं विस्तारो द्वादशाङ्गुलः ।
उच्छ्रितिश्चाङ्गुला यस्यामिष्टिकास्तास्त्रयो किल ॥
यद्विस्तृतिः पञ्चकराष्टहस्तं
दैर्घ्यञ्च यस्यां त्रिकरोच्छ्रितिश्च ।
तस्यां चितौ किं फलमिष्टिकानां
सङ्ख्या च का ब्रूहि कतिस्तराश्च ॥



इष्टिकायाः घनहस्तमानम् $\frac{३}{६४}$ चितेः क्षेत्र-फलम् ४० । उच्छ्रयेण गुणितं चितेर्घनफलम् १२० । लब्धा इष्टिकासङ्ख्या २५६० । स्तरसङ्ख्या २४ । एवं पाषाणचयेऽपि । इति चितिव्यवहारः ॥" इति लीलावती ॥ (इष्टाङ्कविशेषः । यथा, मार्कण्डेये । २२ । ६ ।

"चितयस्तत्र कर्त्तव्या नान्तरिक्षगता यतः ॥")

चितिका, स्त्री, (चितिः काष्ठीभेदः सा इव कायतीति । कै + कः ।) कटिग्रहला । इति हारावली । २२४ ॥

चित्तं, क्ली, (चेतत्यनेनेति । चित् + करणे क्तः ।) अनुसन्धानात्मिकान्तःकरणवृत्तिः । इति वेदान्तः ॥

"यत्तत् सत्त्वगुणं स्वच्छं स्वान्तं भगवतः पदम् ।
यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥
स्वच्छत्वमविकारित्वं प्रशान्तत्वमिति चेतसः ।
प्रवृत्तिलक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥"

इति श्रीभागवतम् ॥

अस्यार्थः । "अधिभूतस्वरूपेण तस्यैव महानितिसंज्ञा अध्यात्मरूपेण चित्तं उपास्यरूपेण वासुदेवः अधिष्ठाता तु तस्य चैत्यज्ञः ।" इति श्रीधरस्वामी ॥ (अनेनैव चित्तवृत्तेः प्रथमसम्बन्धः । अतएव भगवत्पतञ्जलिपादैरुपदिष्टं प्रथमसूत्रे "योगश्चित्तवृत्तिनिरोधः ।" तथा च मुक्तकोपनिषदि । ३ । १ । ६ ।

"एषोऽणुरात्मा चेतसा वेदितव्यो
यस्मिन् प्राणः पञ्चधा संविवेश ।
प्राणैश्चित्तं सर्व्वमोतं प्रजानां
यस्मिन् विशुद्धे विभवत्येष आत्मा ॥")

मनः । इत्यमरः । १ । ४ । ३१ ॥

चित्तप्रसन्नता, स्त्री, (चित्तस्य प्रसन्नता प्रसादः ।) हर्षः । इति हेमचन्द्रः । २ । २२६ ॥

चित्तविप्लवः, पुं, (चित्तस्य विप्लवो विपर्य्ययः ।) उन्मादः । इति हेमचन्द्रः । २ । २३४ ॥

चित्तविभ्रमः, पुं, (चित्तस्य विभ्रमः भ्रान्तिः ।) उन्मादः । इत्यमरः । १ । ७ । २६ ॥ (उन्मादशब्दे विवृतिरस्य ज्ञेया ॥)

चित्तसमुन्नतिः, स्त्री, (चित्तस्य समुन्नतिः समुन्नयनं उत्तेजनमिति यावत् ।) मानः । इत्यमरः । १ । ७ । २२ ॥

चित्ताभोगः, पुं. (चित्तस्य आभोगः परिपूर्णता इत्यर्थः ।) एकस्मिन् विषये मनसः पुनः पुनः प्रवृत्तिः । तत्पर्य्यायः । मनस्कारः २ । इत्यमरः । १ । ५ । २ ॥

चित्तोन्नतिः, स्त्री. (चित्तस्य उन्नतिः उन्नयनम् ।) गर्व्वः । इति हेमचन्द्रः । २ । २३१ ॥

चित्यं, क्ली, (चीयते इति । चि + "चित्याग्नि-चित्ये च ।" ३ । १ । १३२ । इति कर्म्मणि यः । निपातनात्तुगागमे साधुः । यद्वा, ष्यप्प्रत्ययेन पितौ तुगागमः ।) चितिः । इति चिकाण्डशेषः ॥ (तज्जाते त्रि । यथा, रामायणे । १ । ५८ । ११ ।

"चित्यमाल्याङ्गरागश्च आयसाभरणोऽभवत् ॥")

चित्यः, पुं, (चीयतेऽसौ इति । चि + "चित्याग्नि-चित्ये च ।" ३ । १ । १३२ । इति कर्म्मणि यः ।) अग्निः । इति सुग्धबोधम् ॥

चित्या, स्त्री. (चीयतेऽग्निरस्यां प्रेतस्य । चि + यः निपातनात् साधुः । ष्यप् वा ।) चिता । इत्यमरः । २ । ६ । ११७ ॥

चित्र, त् क चलिकेचने । लेखेऽद्भुते । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।)चलिकेचनं कदाचिद्दर्शनम् । चित्रयति चित्रापयति राजा लोकः कदाचित् पश्यतीत्यर्थः । चित्रयति प्रतिमां लोकः । इति दुर्गादासः ॥

चित्रं, क्ली, (चित्रयतीति । चित्र + कर्म्मणि ष्यप् । यद्वा, चीयते इति ।"अमिचिमिश्मिभ्यः क्रः ।" उणां ४ । १६४ । इति क्रः ।) तिलकम् । आलेख्यम् । (यथा, पद्मदश्याम् । ६ । ५ ।

"उत्तमाधमभावेन वर्त्तन्ते पटचित्रवत् ॥") अद्भुतम् । (यथा, रामायणे । १ । १० ।

"चित्रं संक्रीड़मानास्ताः क्रीड़नैर्विविधैस्तथा ॥") कर्ब्बुरवर्णः । (यथा, माघे । १ । ८

"निसर्गचित्रोज्ज्वलरूपमप्यभूषा ॥")

तद्युक्ते त्रि । इति मेदिनी । रे, २५ ॥ (अलङ्कारविशेषः । यथा,—

"तच्चित्रं यत्र वर्णानां खड्गगात्राकृतिहेतुता ।" सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खड्गसुरजपद्माकारमुखास्यन्ति तच्चित्रं काव्यम् ॥ * ॥ अस्मिन्नक्षरयोर्ज्ञात्वा राट्टिच्छन्दोभेदः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।

"चित्रसंज्ञमीरितं समानिकापदद्वयन्तु ।" उदाहरणं यथा,—

"विद्मारुणाधरोऽयोभि वेणुवाद्यकृष्ट-वल्लवीजनाङ्गसङ्गजातसुग्धकण्टकाङ्ग ! ।
त्वां सदैव वासुदेव ! पुण्यलभ्यपाद ! देव ! वन्यपुष्पचित्रकेश ! त्वां स्मरामि गोपवेश ! ॥")

आकाशः । कुलविशेषः । इति हेमचन्द्रः । ६ । ३४ ॥ (आश्चर्य्यान्विते, त्रि । यथा, महाभारते । १ । १ । ३ ।

"चित्राः श्रोतुं कथाश्चैव परिवव्रुस्तपस्विनः ॥")

चित्रः, पुं. (चित्रयति पापपुण्ये विचार्य्य चित्रं करोति लिखतीत्यर्थः । चित्र + णिच् + अच् । यद्वा चीयन्ते उपचीयन्ते प्रेतलोका येन । चि + "अमिचिमिश्मिभ्यः क्रः ।" उणां । ४ । १६४ । इति क्रः ।) यमविशेषः । यथा, तिथ्यादितत्त्वे ।

"एकोदराय चित्राय चित्रगुप्ताय वै नमः ॥"

कर्ब्बुरवर्णः । इत्यमरटीकायां भरतः ॥ (सर्पविशेषः । यथा, महाभारते । २ । ६ । ८ ।

"ह्लादश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान् ॥" धृतराष्ट्र-पुत्रभेदः । यथा, तत्रैव । १ । ११७ । ४ ।

"चित्रोपचित्रौ चित्राङ्गश्चारुचित्रः शरासनः ॥") एरण्डवृक्षः । अशोकवृक्षः । चित्रकवृक्षः । इति राजनिघण्टः ॥

चित्रकं, क्ली, (चित्र + स्वार्थे कन् । यद्वा चित्रमिव कायति । कै + कः ।) तिलकम् । इति मेदिनी । के, ८८ ॥ (वृक्षविशेषः । यथा, गारुड़े १८७ अध्याये ।

"चिफला चित्रकं चित्रं तथा कटुकरोहिणी ॥")

चित्रकः, पुं, (चित्रेण चित्र इव वा कायति । कै + कः ।) व्याघ्रः । इति हेमचन्द्रः । ४ । ३५१ ॥ व्याघ्रभेदः । चितावाघ् इति भाषा । तत्पर्य्यायः । चित्रकायः २ उपव्याघ्रः ३ नखगान्तकः ४ शूरः ५ क्षुद्रशार्दूलः ६ चित्रव्याघ्रः ७ ॥ वृक्षविशेषः । चिता इति भाषा ॥ तत्पर्य्यायः । अग्निः २ शार्दूलः ३ चित्रः ४ पाचीकटुः ५ शिखी ६ क्षपाघातुः ७ दहनः ८ बालः ९ ज्योतिष्कः १० पालकः ११ अनलः १२ दारुणः १३ वह्निः १४ पावकः १५ शुक्रधरः १६ पाचौ १७ हुतभुक् १८ चित्राङ्गः १९ शूरः २० । अस्य गुणाः । अग्निसमत्वम् । पाके कटुत्वम् । श्लेष्मकफार्शिवातोदराग्निग्रहणीकृमिकासनुत्त्वञ्च । इति राजनिर्घण्टः ॥ पाके ऽग्निसमत्वम् । कुष्ठनाशित्वम् । इति राजवल्लभः ॥ (यथा, श्राद्धचिन्तामणिधृतवचनम् ।

"चित्रकः कटुकः पाके वह्निकृत् पाचनो लघुः ।
रूक्षोष्णो ग्रहणीकुष्ठश्लोथार्शःकृमिकासनुत् ॥
वातश्लेष्महरो ग्राही वातार्शःश्लेष्मपित्तकृत् ।
विचित्रं चैत्रकं शाकं कायमर्द्दविमर्द्दितम् ॥
तप्ततैले सवाक्षीके पाचितं तक्रसम्भृतम् ॥")

ओषधिविशेषः । यथा, सुश्रुते सूत्रस्थाने ३६ अध्याये ।

"पूतिकश्चित्रकः पाठा विड़ङ्गैलाहरेणवः ॥") एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ ॥ (चित्र + कृञ् ।) चित्रकारः । इति हेमचन्द्रः ॥ (सुपुकुन्दः । यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

सुपुकुन्दः स्मृतश्चित्रकः प्रतिविषुकः ॥"

अस्य गुणः । शिरःपीड़ापित्तास्रविषनाशित्वञ्च ॥)

चित्रकण्ठः, पुं, (चित्रः चित्रितः कण्ठोऽस्य ।) कपोतः । इति जटाधरः ॥ (कपोतशब्देऽस्य विवृतिर्व्याख्याता ॥)

चित्रकमलः, पुं, (चित्रश्चासौ कमलश्चेति ।) कमलविशेषः । दुलिचा गालिचा इत्यादि भाषा ॥ यथा, उणादिकोषे ।

"कुथः स्त्रीपुंसयोश्चित्रकमले पुंसि वर्हिषि ॥"

चित्रकरः, पुं, (चित्रं करोतीति । क्र + टः ।) वर्णसङ्करजातिविशेषः । पटुया इति भाषा ॥ स तु शूद्रागर्भे विश्वकर्म्मौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । रङ्गाजीवः २ । इत्यमरः । २ । १० । ७ ॥ रङ्गजीवकः ३ । इति शब्दरत्नावली ॥ वर्णौ ४ वर्णाटः ५ चित्रकारः ६ । इति जटाधरः ॥ (यथा, आर्य्यासप्तशत्याम् । ३४५ ।

"चित्रकरतूलिकेव त्वां सा प्रतिभित्ति भावयति ॥")

चित्रकर्म्मा, [न्] पुं, (चित्रं कर्म्मास्य ।) तिनिशवृक्षः । इति शब्दचन्द्रिका ॥ बहुव्रीहौ आश्चर्य्यकर्म्मा चित्रकारश्च ॥

चित्रकायः, पुं. (चित्रो नानावर्णयुक्तः कायो देहो यस्य ।) व्याघ्रः । इति हेमचन्द्रः । ४ । ३५१ ॥ चित्रव्याघ्रः । इति राजनिर्घण्टः ॥

चित्रकारः, पुं, (चित्रं करोतीति । क्र + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चित्रकरः । (यथा, महाभारते । १ । १२८ । ४० ।

"संमार्ज्जितं सौधकारैश्चित्रकारैश्च चित्रितम् ॥") अस्य उत्पत्तिविवृतिर्यथा, पराशरपद्धतौ ।

"स्वपतेरपि गान्धिक्यां चित्रकारो व्यजायत ॥"

चित्रकूटः, पुं, (चित्राणि कूटानि शृङ्गाणि यस्य ।) पर्व्वतविशेषः । इति शब्दरत्नावली ॥ पुरा रामो वनं गत्वा प्रथमे यत्र वासमकरोत् । (पर्व्वतोऽयं प्रयागश्चैत्रस्थभरद्वाजाश्रमात् सार्द्धयोजनद्वयेऽतीते पार्श्वगताया मन्दाकिन्याख्याया सरितो दक्षिणतो राजते । यदुक्तं रामायणे । २ । ६२ । १० —१२ ।

"भरतार्द्धगतीवेषु योजनेष्वजने वने ।
चित्रकूटगिरिस्तत्र रम्यनिर्द्दरकाननः ॥
उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी ।
पुष्पितद्रुमसंच्छन्ना रम्यपुष्पितकानना ॥
अनन्तरं ततस्तस्माच्चित्रकूटश्च पर्व्वतम् ।
तयोः पर्णकुटीं तात ! तत्र तौ वसतो ध्रुवम् ॥")

अधुना बुन्देलखण्डाख्यदेशे कामृता इति ख्यातः ॥ (अयं हि पीठस्थानेषु अन्यतमः । अत्र च भगवती सीतारूपेण महादेवश्चन्द्रचूड़रूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ७० ।

"चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी ॥"

तथा, महालिङ्गेश्वरतन्त्रे ।

"चित्रकूटे चन्द्रचूड़ो योगेन्द्रो विन्ध्यपर्व्वते ॥")

चित्रकृत्, पुं, (चित्रं नानावर्णं करोतीति । क्र + क्विप् ।) तिनिशवृक्षः । इत्यमरः । २ । ४ । २७ ॥ (चित्रमालेखं करोतीति ।) चित्रकरः । इति हलायुधः ॥

चित्रकोलः, पुं, (चित्रो विचित्रः कोल क्रोड़देशो यस्य ।) अञ्जनिका । इति चिकाण्डशेषः ॥

चित्रगन्धं, क्ली, (चित्रो विचित्रो गन्धो यस्य ।) हरितालम् । इति राजनिर्घण्टः ॥

चित्रगुप्तः, पुं, (गुप रक्षणे + भावे क्तः । चित्राणां नीवक्तपापपुण्यादिविचित्राणां गुप्तं गोपनं

रत्नं यस्मात्। यद्वा, चित्रं विचित्रं गुप्तं धर्म्मस्य रत्नं यस्य।) चतुर्दशयमान्तर्गतयमः। तस्य लेखकः। इति मेदिनी। ते, १६८॥ तस्योत्पत्तिर्यथा,-

"ब्रह्मपादांशतः शूद्रमसीग्रौ द्वौ बभूवतुः।
एको मसीग्रः सर्व्वाख्यः सर्व्वांगीहृदयद्विजात्॥
कुलप्रदीपः खीयानां ज्ञातीनां पूततासृहः।
वगलेति महाविद्यां गृहीत्वा साधयन् सुदा॥
सर्व्वांगीहृदयाख्यस्य पण्डितस्य प्रसादतः।
वरं याचितवान् भक्त्या त्रिलोकाधिपतिं, गुरो॥
कृपया कुरु मां नाथ। त्वमेव वगला मम।
गुरुणापि वरो दत्तो राज्यं भुक्त्वा पुनर्भवान्॥
त्रिलोकाधिपतिर्भूत्वा सुदा तत्र सुखिष्यति।
गुर्व्वाज्ञया मसीग्रः स राज्यभोगी द्विजार्च्चनात्॥
विहाय देहं भूयश्च त्रिधारूपो बभूव ह।
चित्रगुप्तश्चित्रसेनश्चित्राक्षद इति त्रयः॥
स्वर्गे मर्त्ये च पाताले राजते चिरमुत्तमः।
चित्रगुप्तो महाविद्यां प्राप्य कृष्णाख्यविग्रतः॥
पुत्रान् याचितवान्नैव गुरोर्दैवलमावहन्।
यमान्तिस्थो बभूवापि स्वमर्त्याधोविवेचकः॥
चिरं शुभाशुभं कर्म्म विविध्य ग्रमनान्तिके।
यद्वदेत् सकलानान्तु तदेवाभोजयेदयमः॥"

इत्याचारनिर्णयतन्त्रम्॥

अस्योत्पत्त्यन्तरं कायस्थशब्दे द्रष्टव्यम्॥

चित्रजल्पः, पुं, (चित्रो मनोहरो जल्पः।) वाक्यविशेषः। तल्लक्षणादिर्यथा,—

"श्रेष्ठस्य सुहृदा लोके गूढरोषाभिसूचितः।
भूरिभावमयो जल्पो यस्तीव्रोत्कण्ठितान्तिमः॥
चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितम्।
विजल्पो जल्पसंजल्पावजल्पोऽभिजल्पितम्॥
आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तितः।
एष भ्रमरगीताख्यो दशमे प्रकटीकृतः॥
असङ्गभावबैचित्री चमत्कृतिसुदुस्करः।
अपि चेच्चित्रजल्पोऽयं मनाक् तदपि कथ्यते॥
तत्र प्रजल्पः।
अक्षयेर्ष्यामदद्युता योऽवधीरणसूचया।
प्रेयस्याकौशलोद्गारः प्रजल्पः स तु कीर्त्यते॥
यथा,—
मधुप! कितवबन्धो! मा घ्राङ्क्षीः सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्बं यस्य दूतस्त्वमीदृक्॥ १॥

अथ परिजल्पितम्।

प्रभोर्निर्दयतायाश्चापलाद्युपपादनात्।
खविच्चतुरतायुक्तिर्भङ्ग्या स्यात् परिजल्पितम्॥
यथा,—
सकृदधरसुधां स्वां मोहिनीं पाययित्वा
सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक्।
परिचरति कथं तत्पादपद्मं नु पद्मा
अपि बत हृततेता ह्युत्तमश्लोकजल्पैः॥ २॥

अथ विजल्पः।

व्यक्तयाऽक्षयया गूढमानसुप्तान्तरालया।
अर्थद्वयपि कटाक्षोक्तिर्विजल्पो विदुषां मतः॥
यथा,—
किमिह बहु षडङ्घ्रे! गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणम्।
विजयसखसखीनां गीयतां तत्प्रसङ्गः
क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः॥ ३॥

अथोल्लजल्पः।

हरेः कुहकताख्यानं गर्व्वगर्भितयेर्ष्यया।
साक्षेपस्य तदाक्षेपो धीरैरुल्लजल्प ईर्य्यते॥
यथा,—
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः
कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः।
चरणरज उपासते यस्य भूतिर्व्वयं का
अपि च कृपयपुष्टे ह्युत्तमश्लोकशब्दः॥ ४॥

अथ संजल्पः।

सोल्लुण्ठया गर्हणया कथाय्याक्षेपसूचया।
तस्याक्षतस्यतायुक्तिः संजल्पः कथितो बुधैः॥
यथा,—
विस्रब्धं शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात्।
स्वकृत इह विसृष्टापत्यपत्यन्यलोका
व्यधुरदधृतचेताः किन्नु सन्धेयमस्मिन्॥ ५॥

अथ अवजल्पः।

हरौ काठिन्यकामित्वधौर्त्त्यादिसाक्ष्ययोग्यता।
यत्र सेर्ष्यं भियेवोक्ता सोऽवजल्पः सतां मतः॥
यथा,—
स्वगायुरिव कपीन्द्रं विजधे लुब्धधर्म्मा
स्त्रियमकृतविरूपां स्त्रीजितः कामयानाम्।
बलिमपि बलिमत्त्वाऽवेष्टयद्बद्धवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थैः॥ ६॥

अथाभिजल्पितम्।

भङ्ग्या त्यागौचितं तस्य खगानामपि खेदनात्।
यत्र सानुशयं प्रोक्तं तद्भवेदभिजल्पितम्॥
यथा,—
यदनुचरितलीलाकर्णपीयूषविप्रुट्-
सकृददनविधूतद्वन्द्वधर्म्मा विनष्टाः।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इव विहङ्गा भिक्षुचर्य्यां चरन्ति॥ ७॥

अथ आजल्पः।

त्यक्तेर्ष्यं तस्यार्त्तिदत्वञ्च निर्व्वेदादुद्यत्र कीर्त्तितम्।
भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरितः॥
यथा,—
वयमृतमिव जिह्मवाङ्मतं श्रद्दधानाः
कुलिकरुतमिवाज्ञाः कालबध्वो हरिण्यः।
दहसुरसकृदेतत्तन्नखस्पर्शतीव्र-
स्मररुजसुपमन्त्रिन्! भण्यतामन्यवार्त्ता॥ ८॥

अथ प्रतिजल्पः।

दुस्त्यजद्वन्द्वभावेऽस्मिन् प्राप्तिर्गार्हेत्यनुद्धतम्।
दूतसंमाननेनोक्तं यत्र स प्रतिजल्पकः॥
यथा,—
"प्रियसख! पुनरागाः प्रेयसा प्रेषितः किं
वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग!।
नयसि कथमिहारात्रं दुस्त्यजद्वन्द्वपार्श्वं
सततसुरसि सौम्य! श्रीवधूः साकमास्ते॥ ९॥

अथ सुजल्पः।

यत्रार्जवात् सगाम्भीर्य्यं सदैन्यं सहचापलम्।
सोत्कण्ठञ्च हरिः प्रष्टः स सुजल्पो निगद्यते॥
यथा,—
अपि बत! मधुपुर्य्यामार्य्यपुत्रोऽधुनास्ते
स्मरति स पितृगेहान्! सौम्यबन्धूंश्च गोपान्।
क्वचिदपि स कथां नः किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्द्ध्न्यधास्यत् कदा नु॥"१०॥

इत्युज्ज्वलनीलमणौ स्थायिभावः॥

चित्रतण्डुलं, क्ली, (चित्रो विचित्रस्तण्डुलो यस्य।) विड्लवणम्। इति रत्नमाला॥

चित्रतण्डुला, स्त्री, (चित्रो नानावर्णस्तण्डुलो यस्याः।) विड्लवणम्। इत्यमरः। २। ४। १०६॥ (यथास्याः पर्य्यायः।

"पुंसि क्लीवे विड्लवणः स्यात् क्षमिश्रो लवणाग्रजः।
तण्डुलश्च तथा वेल्लसमोद्भा चित्रतण्डुला॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

चित्रत्वक्, [च्] पुं, (चित्रा विचित्रा त्वक् यस्य।) भूर्जवृक्षः। इति राजनिर्घण्टः॥

चित्रदण्डकः, पुं, (चित्रो विचित्रो दण्डो यस्य। इति कप्।) ओलटवृक्षः। इति रत्नमाला॥

चित्रदेवी, स्त्री, (चित्रं दीव्यतीति। दिव्+अच्। गौरादित्वात् ङीष्।) महेन्द्रवारुणी। इति राजनिर्घण्टः॥

चित्रनेत्रा, स्त्री, (चित्रे मनोज्ञे नेत्रे यस्याः।) सारिकापक्षी। इति हारावली। ८६॥

चित्रपक्षः, पुं, (चित्रौ विचित्रौ पक्षौ यस्य।) तित्तिरिपक्षी। इति जटाधरः॥

चित्रपक्षिका, स्त्री, (चित्राणि विचित्राणि पक्षाणि पर्णानि यस्याः। कापि अत इत्वम्।) कपित्थपर्णीवृक्षः। इति रत्नमाला॥ द्रोणपुष्पी। इति राजनिर्घण्टः॥

चित्रपत्री, स्त्री, (चित्राणि पक्षाणि यस्याः। गौरादित्वात् ङीष्।) जलपिप्पली। इति राजनिर्घण्टः॥

चित्रपदा, स्त्री, (चित्रं पदं यस्याः।) गोधापदीलता। इति शब्दमाला॥ छन्दोभेदः। इति छन्दोमञ्जरी॥ अस्य लक्षणादि छन्दःशब्दे द्रष्टव्यम्॥ (चित्रं पदं वस्तुविन्यासो यस्य यत्र वा इति विग्रहे विचित्रपदयुक्ते त्रि। यथा, महाभारते। ३। ३१। १।

"वल्गु चित्रपदं श्लक्ष्णं याज्ञसेनि! मया वचः।
उक्तं तत् श्रुतमस्माभिर्नास्तिक्यन्तु प्रभाषसे॥")

चित्रपर्णिका, स्त्री, (चित्राणि पर्णानि पत्राणि यस्याः। कापि अत इत्वम्।) चित्रपर्णीभेदः। तत्पर्य्यायः। दीर्घा २ शृगालविल्वा ३ त्रिपर्णी ४ सिंहपुच्छिका ५ दीर्घपत्रा ६ अतिगुहा ७ गुण्ठिला ८। इति रत्नमाला॥

चित्रपर्णी, स्त्री, (चित्राणि पर्णानि यस्याः। गौरादित्वात् ङीष्।) वृश्चिपर्णी। इत्यमरः।

२।४।६२॥ कर्कशस्फोटालता। चलपिप्पली। द्रोणपुष्पी। इति राजनिर्घण्टः॥ मञ्जिष्ठा। इति रत्नमाला॥ (यथास्याः पर्य्यायाः।
"मञ्जिष्ठा विकसा जिङ्गी काला योजनपर्ण्यपि।
ताम्रवल्ली चित्रपर्णी काकोरी रक्तयष्टिका॥"
इति वैद्यकरत्नमालायाम्॥)

चित्रपादा, स्त्री, (चित्रौ पादौ यस्याः।) सारिकापक्षी। इति हारावली। ८६॥

चित्रपिच्छकः, पुं, (चित्राणि पिच्छानि पुच्छकानि यस्य। ततः कप्।) मयूरः। इति राजनिर्घण्टः॥

चित्रपृष्ठः, पुं, (चित्रः पृष्ठो यस्य।) शरः। इति त्रिकाण्डशेषः॥

चित्रपुष्पी, स्त्री, (चित्राणि पुष्पाणि यस्याः। स्त्रियां ङीप्।) अम्लष्ठा। इति राजनिर्घण्टः॥ (विवरणमम्लष्ठाशब्देऽस्या ज्ञेयम्॥)

चित्रपृष्ठः, पुं, (चित्रं नानावर्णं पृष्ठं यस्य।) कलविङ्कपक्षी। इति हारावली। ८६॥

चित्रफलः, पुं, (चित्रं फलं फलकं तद्वदाकृतिर्विद्यतेऽस्य। अच्।) मत्स्यविशेषः। चितल इति भाषा॥ अस्य गुणाः। गुरुत्वम्। स्वादुत्वम्। स्निग्धत्वम्। दृष्यत्वम्। बलप्रदत्वञ्च। इति राजवल्लभः॥

चित्रफलकः, पुं, (चित्रफल+स्वार्थे कन्।) चित्रफलमत्स्यः। इति भूरिप्रयोगः॥

चित्रफला, स्त्री, (चित्राणि फलानि यस्याः।) चिर्भिटा। ऋगेर्व्वारुः। लिङ्गिनी। महेन्द्रवारुणी। वार्त्ताकी। कण्टकारी। इति राजनिर्घण्टः॥ मत्स्यविशेषः। फलइ इति भाषा॥ तत्पर्य्यायः। राजगीवः २ फलकी ३ मद्गोन्मदः ४। इति शब्दरत्नावली॥

चित्रभानुः, पुं, (चित्रा नानावर्णा भानवो रश्मयो यस्य।) अग्निः। (यथा, महाभारते।२।३१।४२।
"चित्रभानुः सुरेशश्च अनलश्चं विभावसो!॥")
सूर्य्यः। इति मेदिनी। ने, १८३॥ चित्रकटुश्चः। अर्कटृक्षः। वह्निसंज्ञक इति अर्काश्च इति चामरदर्शनात्॥ भैरवः। इति शब्दरत्नावली॥ (वर्षविशेषः। यथा, बृहत्संहितायाम्। ८।३५।
"श्रेष्ठं चतुर्थस्य युगस्य पूर्व्वं
यच्चित्रभानुं कथयन्ति वर्षम्॥")

चित्रमेखला, स्त्री, (चित्रं मेखलं यस्याः।) काकोदुम्बरिका। इति राजनिर्घण्टः॥

चित्रमेखलः, पुं, (चित्रा विचित्रा मेखला यस्य।) मयूरः। इति त्रिकाण्डशेषः॥

चित्रयोधी, [न्] पुं, अर्জ্জुनश्चः। इति राजनिर्घण्टः॥ (चित्रं यथा स्यात् तथा युध्यतीति। युध+णिनिः।) पार्थः॥ (चित्रयुद्धयोधे, त्रि। यथा, महाभारते। १।१।१८६।
"यदा द्रोणो विविधानस्त्रमार्गा-
न्निदर्शयन् समरे चित्रयोधी॥")

चित्ररथः, पुं, (चित्रो रथो यस्य।) सूर्य्यः। गन्धर्व्वविशेषः। इति मेदिनी। थे, २८। (अस्य पर्य्यायः। गन्धर्व्वराजः २ अङ्गारपर्णः ३ कुबेरसखः ४ दग्धरथः ५। (यथा, महाभारते। १। १७१। ३७—३६।
गन्धर्व्व उवाच।
"जितोऽहं पूर्व्वकं नाम सुधान्यङ्गारपर्वतात्।
न च श्लाघे बलेनाद्य! न गात्रा जनसंसदि॥
साध्विमं लब्धवाँल्लाभं योऽहं दिव्यास्त्रधारिणम्।
गान्धर्व्वया मायया योत्स्यामि संयोजयितुमर्জ্জुनम्॥
अस्त्रामिना विचित्रोऽयं दग्धो मे रथ उत्तमः।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम्॥")
स तु मुनिनाम्न्यां दक्षकन्यायां कश्यपौरसाञ्जातः। इति महाभारते। १। ६५। ४३॥

चित्रलः, पुं, (चित्रमाश्चर्य्यं लातीति। ला+कः।) कर्ब्बुरवर्णः। तड़इति चि। इति शब्दरत्नावली॥

चित्रलता, स्त्री, (चित्रा नानावर्णा लता।) मञ्जिष्ठा। इति राजनिर्घण्टः॥

चित्रला, स्त्री (चित्रल+"अजाद्यतष्टाप्।" ४। १।४। इति टाप्।) गोरक्षीवृक्षः। इति राजनिर्घण्टः॥

चित्रलेखा, स्त्री, (चित्रो लेखो लेखनशक्तिर्यस्याः। चित्रं लेखयतीति वा। लिख+"कर्म्मण्यण्।" ३।२।१। इत्यण्। चित्रलेखनदक्षतयास्यास्तथात्वम्।) अप्सरोविशेषः। सा ऊषायाः सखी कुम्भाण्डस्य कन्या। यथा, हरिवंशे। १७४। ७४—७५।
"उवाच रुदतीमेव कुम्भाण्डतनया सखीम्।
कुशला ते विशालाक्षि! सर्व्वथा सन्निविश्यताम्॥
अप्सराश्चित्रलेखा वै क्षिप्रं विज्ञाप्यतां सखि!॥"
यथा, श्रीभागवते। १०। ६२। १४।
"बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता।
सखायुक्तु सखीमूषां कौतूहलसमन्विता॥"
(अस्याश्चित्रलेखनपटुत्वकथा यथा हरिवंशे। १७४। ८०—८८।
"चित्रलेखाऽब्रवीद्बाणमूषां हर्षयती मुने:॥"
"देवदानवयक्षाणां गन्धर्व्वोरगरक्षसाम्।
ये विशिष्टाः प्रभावेण रूपेणाभिजनेन च॥
यथा प्रधानतः सर्व्वानालिखिष्याम्यहं सखि!।
मनुष्यलोके ये चापि प्रवरा लोकविश्रुताः॥
सप्तरात्रेण ते भीरु! दर्शयिष्याम्यहं प्रियम्।
ततो विज्ञाय पट्टस्थं भर्त्तारं प्रतिलप्स्यसे॥
सा चित्रलेखया प्रोक्ता ऊषा हितचिकीर्षया।
क्रियतामेवमित्याह चित्रलेखां सखीं प्रति॥
ततः कुशलहस्तत्वात् यथा लेख्यं समन्ततः।
दृष्ट्वा सप्तरात्रेण लेखगतांस्तु तान्॥
चित्रपट्टगतान् सुखानानयामास शोभना॥")
छन्दोविशेषः। इति छन्दोमञ्जरी॥ अस्य विवरणं छन्दःशब्दे द्रष्टव्यम्॥

चित्रलोचना, स्त्री, (चित्रे लोचने यस्याः।) सारिकापक्षी। इति जटाधरः भूरिप्रयोगश्च॥

चित्रवदानः, पुं, (चित्रवत् आ समन्तादनति पर्य्याप्नोतीति। आ+अन+अच्।) पाठीनमत्स्यः। इति जटाधरः॥

चित्रवल्लिकः, पुं, (चित्रा विचित्रा वल्लिर्लता। सा इव कायतीति। के+कः।) वदालमत्स्यः। इति हेमचन्द्रः। ४। ३११॥

चित्रवल्ली, स्त्री, (चित्रा विचित्रा वल्ली लता यस्याः।) ऋगेर्व्वारुः। महेन्द्रवारुणी। इति राजनिर्घण्टः॥

चित्रवीर्य्यः, पुं, (चित्रमाश्चर्य्यजनकं वीर्य्यमस्य।) रक्तैरण्डः। इति राजनिर्घण्टः॥

चित्रशिखण्डिजः, पुं, (चित्रशिखण्डिनोऽङ्गिरसो सुनेर्ज्जायते इति। जन+डः।) दृढ़च्युतिः। इत्यमरः। १। ३। २४॥

चित्रशिखण्डिप्रसूतः, पुं, (चित्रशिखण्डिनोऽङ्गिरसः प्रसूतः सन्ततिः।) दृढ़च्युतिः। इति हलायुधः॥

चित्रशिखण्डी, [न्] पुं, (चित्रः शिखण्डः शिखा अस्यास्य। "अत इनिठनौ।" ५।२।११५। इति इनिः।) सप्तर्षयः। इत्यमरः। १।३।२०॥ यथाह भरतः।
"मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः।
वशिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः॥"
(यथाच, महाभारते। १२।३३५।२६—२८।
"ये हि ते ऋषयः ख्याताः सप्त चित्रशिखण्डिनः।
तैरेकमतिभिर्भूत्वा यत् प्रोक्तं शास्त्रमुत्तमम्॥
वेदैश्चतुर्भिः समितं कृतं मेरौ महागिरौ।
आस्थेः सप्तभिरव्यग्रैर्लोकधर्म्ममनुत्तमम्॥
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः।
वशिष्ठश्च महातेजास्ते हि चित्रशिखण्डिनः॥")

चित्रसर्पः, पुं, (चित्रः नानावर्णरञ्जितः सर्पः।) मायुधानसर्पः। इति शब्दरत्नावली॥

चित्रसेनः, पुं, ब्रह्मपादजमसीग्राह्यकायस्थस्य चित्रगुप्तादित्रितयान्तर्गतमूर्त्तविशेषः। स तु मर्त्यलोकविवेचकः। यथा,—
"चित्रसेने महाविद्यां वगलेति गुरोर्नयन्।
अम्बा सन्तोष्य पुत्रादीन् याचित्वा प्राप्य मर्त्यतः॥
राज्यं चकार स्वदृयुक्तचित्राङ्गद अधो गतः॥"
इत्याचारनिर्णयतन्त्रम्॥
(चित्रा सेना यस्य। गन्धर्व्वविशेषः। यथा, महाभारते। २। १०। २५।
"चित्रसेनश्च गीतज्ञस्तथा चित्ररथोऽपि च।
एते चान्ये च गन्धर्व्वा धनेश्वरमुपासते॥"
धृतराष्ट्रपुत्रविशेषः। यथा, महाभारते। १। ६५। ५७। "तेषां धृतराष्ट्रस्य पुत्राणां चत्वारः प्रधाना बभूवुः। दुर्य्योधनो दुःशासनो विकर्णश्चित्रसेनश्चेति॥" पूरुवंशीयस्य परिक्षितः पुत्राणामन्यतमः। यथा, महाभारते। १।६४।५२।
"परिक्षितोऽभवन् पुत्राः सर्व्वे धर्म्मार्थकोविदाः।
कक्षसेनोग्रसेनौ च चित्रसेनश्च वीर्य्यवान्॥"
शम्बरासुरस्य पुत्रविशेषः। यथा, हरिवंशे। १६१। ४३।
"चित्रसेनोऽतिसेनश्च विश्वक्सेनजितस्तथा॥"
नरिष्यन्तपुत्रः। यथा, भागवते। ६। २। १६।
"चित्रसेनो नरिष्यन्तात् दक्षस्तस्य सुतोऽभवत्॥")

चित्रा, स्त्री, (चित्रयति चित्रकर्म्म करोति सर्व्वगुणैः शोभते इति वा। चित्र + अच् + टाप्।) श्रीव्यासस्त्रीविशेषः। यथा, उज्ज्वलनीलमणौ।
"परमप्रेष्ठसख्यस्तु ललिता सविशाखिका।
सचित्रा चम्पकलता तुङ्गविद्येन्दुलेखिका।
रङ्गदेवी सुदेवी चेत्यष्टौ सर्व्वगुणाग्रिमाः॥"
अस्याः कृष्णः श्रीकृष्णस्य पूर्व्वस्यां व्यानन्दसुखदो नाम। वयः अष्टमासाधिकत्रयोदशवत्सरम्। वर्णो गौरः। अस्या वस्त्रं जातीपुष्पतुल्यम्। कर्म्म चित्रम्। इति गोस्वामिग्रन्थः॥ ✻॥ स्त्रियिकपर्णी। गोदुग्धा। सुभद्रा। इन्द्रिका। (पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"चित्रा दन्ती निकुम्भः स्याद्गुप्तचित्रा सकुलकः।
दारुणद्वी विशल्या च तथोदुम्बरपर्ण्यपि॥")
माया। सर्पभेदः। नदीविशेषः। इति मेदिनी॥ अप्सरोविशेषः। इति हेमचन्द्रः॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतचतुर्दशनक्षत्रम्। तत्तु सुक्लावदुज्ज्वलं एकतारकामयम्। अस्य अधिष्ठात्री देवता विश्वकर्म्मा। यथा,—
"एकमौक्तिकसमुज्ज्वलप्रभे
त्वष्टरीन्दुवदने स्वमध्यगे।"
इति कालिदासः॥
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे।
"प्रतापसन्तापितशत्रुपक्षो
दक्षो नये चापि विचित्रवासाः।
प्रसूतिकाले यदि यस्य चित्रा
दुष्टिर्विचित्रा खलु तस्य भाग्ये॥"
ऋक्षेश्वरः। (यथा, चरके कल्पस्थाने। १२ अः।
"तिलः प्रियालाभियुक्तो विभीतकाचित्राभयेङ्गदमधूकसर्षपाः।
कुसुम्भविस्वार्कबलातकासो
निकोटकाघोड़करञ्जशिग्रुयुक्ताः॥
छेदाग्र्याः स्यावरसंज्ञितास्तथा
खुर्ज्जूमा मत्स्यसंज्ञाः सपत्तिकाः॥")
गजदूर्व्वा। सुतश्रेष्ठी। मञ्जिष्ठा। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सितस्थाने २ अध्याये।
"चित्राबलमभित्यक्त्वैव रथादाहविनाशनम्॥")
छन्दोविशेषः। इति छन्दोमञ्जरी॥ अस्य विवरणं छन्दःशब्दे द्रष्टव्यम्। (गायत्रीस्वरूपा महाशक्तिः। यथा, देवीभागवते। १२। ६। ५२।
"चक्रवाकस्तनी चेष्टा चित्रा चारुविलासिनी॥")
चित्राक्षी, स्त्री, (चित्रे अक्षिणी नेत्रे यस्याः। समासे वच् स्त्रियां ङीष्।) सारिकापक्षी। इति त्रिकाण्डशेषः॥
चित्राक्षुपः, पुं, (चित्रा स्त्रियिकपर्णीव क्षुपः इक्षुर्व्व शाखत्वः।) द्रोणपुष्पी। इति राजनिर्घण्टः॥
चित्राङ्गं, क्ली, (चित्रं अङ्गं यस्मात्।) हिङ्गुलम्। हरितालम्। इति राजनिर्घण्टः॥
चित्राङ्गः, पुं, (चित्रमङ्गं यस्य।) चित्रकः। रक्तचित्रकः। सर्पः। इति राजनिर्घण्टः॥ (यथास्य गुणाः।
"चित्राङ्गो वातशमनो दीपनो बलकृन्मतः।
श्वेतस्तु कथितो वापि दुर्ज्जरो मेदवर्द्धकः॥"
इति हारीते प्रथमे स्थाने एकादशेऽध्याये॥
धृतराष्ट्रपुत्राणामन्यतमः। यथा, महाभारते। १। ११७। ६।
"अयोबाहुर्महाबाहुश्चित्राङ्गश्चित्रकुण्डलः॥")
चित्राङ्गदः, पुं, चन्द्रवंशीयराजविशेषः। स तु शान्तनुराजपुत्रः। विचित्रवीर्य्यभ्राता। (अयन्तु शान्तनुराजस्य स्वर्गगमनानन्तरं राज्यं लब्ध्वा ऐश्वर्य्यवीर्य्यमदेन शूरान् सर्व्वान् तृणवदमन्यत। अथ कदाचित् गन्धर्व्वराजचित्ररथः युद्धार्थमेनमभ्ययात्। ततः कुरुक्षेत्रमध्ये महति युद्धे समधिकमायाबलेनायं गन्धर्व्वराजेन निहतोऽयं कौरवप्रवीरः। इत्येषा कथा महाभारते। १। १०१। अध्याये द्रष्टव्या॥) गन्धर्व्वविशेषः। इति महाभारतम्॥ (यथा, देवीभागवते। १। २०। २२।
"चित्राङ्गदस्तु गन्धर्व्वो दृष्ट्वा तं मार्गगं नृपम्।
उत्तस्थारान्तिकं भूमेर्विमानवरमास्थितः॥")
ब्रह्मपादजमसीग्राख्यकायस्थस्य चित्रगुप्तादिचित्रबान्तर्गतमूर्त्तिविशेषः। स अधोलोकविवेचकः। तस्याधोगमनकारणं यथा,—
"अधोगतस्य हेतुत्वं वगवे! ब्रूहि कालिके!।
वगवेति मृगं प्राह्य विप्रः स्यामिति वाञ्छया॥
तपश्चकार पञ्चाब्दं नान्यत् किञ्चिदुपेक्षितवान्।
फलमूलादिकं किञ्चित् सायमात्तं यथा मिलेत्॥
विहाय विप्रस्य गुरोरपि पूजाच भार्व्वति!।
जपेन्नित्यं हि वगलामन्यविप्रच नेक्षयन्॥
म्लेच्छेति ब्राह्मणाः सर्व्वे ऊचुश्चित्राङ्गदं क्रुधा।
वचो हि मधुरं किञ्चित् प्रियाङ्गस्थाच सुन्दरि!।
रे चित्राङ्गद! अम्बष्ठं वत्स! विप्रत्वमिच्छसि।
कदाप्युपानत् मस्तस्थो नेवेति न हि बुध्यसे॥
वत्स! शीघ्रमधो गच्छ चिरं कुरु तपो मुदा॥"
चित्राङ्गदः श्रुत्वा तं शापं ब्राह्मणान् तुष्टाव ततो ब्राह्मणा लज्जिताः सन्तस्तमब्रुवः।
"हे चित्राङ्गद! हे तात वत्स! त्वं गोत्सवः किल।
दुःखन्तां कुरु मा तात भद्रं ते कथयाम भोः॥
जलस्थोवलेनैव सर्व्वं प्राप्नोत्यवश्यमेव।
नाहैतोश विना तात! ब्राह्मणो भवितुं किल॥
इतीश्वराज्ञा वेदेऽस्ति प्रतिज्ञागीहि तत्त्वतः।
वरं प्राप्नोति देवत्वं ब्राह्मणत्वं कदापि न॥
यथामरत्वमोघेन विना क्वापि न शाम्यति।
नोतृसवस्त्रमधो गच्छ सुखेन वगलां जप॥
कलेर्द्वादशसहस्राब्दि नागलोकेश्वरो भव।
ततस्त्रिलोकनाथस्त्वमिन्द्रतुल्यो भविष्यसि॥
राज्यं शुक्रान्ततो नैव पुनरावर्त्तनं तव।
सदा वयं तव शिवं चिन्तयामो न भीं कुरु॥
तात गच्छ सुखं सद्यः नागलोकेऽपि विस्तरात्।
तत आनन्दमनसा गतश्चित्राङ्गदस्तथा॥
इत्याचारनिर्णयतन्त्रम्॥
(स्त्रियां टाप्। मणिपुरेश्वरस्य चित्रवाहनस्य कन्या यथा महाभारते। १। २१६। १५।
"तस्य चित्राङ्गदा नाम दुहिता चारुदर्शना॥")
चित्राङ्गदसूः, स्त्री, (चित्राङ्गदं सूते प्रसूते इति। षू ङ प्रसवे + क्विप्।) सत्यवती। सा व्यासमाता। इति त्रिकाण्डशेषः॥
चित्राङ्गी, स्त्री, (चित्रमङ्गं यस्याः। स्त्रियां ङीप्।) मञ्जिष्ठा। कर्णजलौका। इति राजनिर्घण्टः॥
चित्राटीरः, पुं, (चित्रां नक्षत्रावलीं अटतीति। अट गतौ + बाहुलकात् ईरच्।) चन्द्रः। (चित्रं तिलकं अटति गच्छति प्राप्नोति वलिच्छागास्रबिन्दुभिरित्यर्थः। अट + ईरच्।) घण्टाकर्णवलिच्छागासबिन्दुभिरङ्कितभालः। इति मेदिनी। रे, २६३॥
चित्रापूपः, पुं, (चित्रो विचित्र आपूपः पिष्टकः।) पिष्टकभेदः। चिताइ पिटा इति भाषा॥ तत्पर्य्यायः। पञ्चवाणः २। इति त्रिकाण्डशेषः॥
चित्रायसं, क्ली, (चित्रमायसं लोहम्।) तीक्ष्णलोहम्। इति राजनिर्घण्टः॥
चित्रिकः, पुं, (चित्रा नक्षत्रविशेषः सा पौर्ब्बमासामस्यस्य। चित्रा + ठन्।) चैत्रमासः। इति शब्दरत्नावली॥
चित्रिणी, स्त्री, (चित्रं विचित्रताऽस्त्यस्याः। चित्र + इनिः + ङीप्।) पद्मिन्यादिचतुर्व्विधस्त्रीमध्ये स्त्रीविशेषः। सा मीनगन्धा। तस्या लक्षणं यथा। रतिमञ्जर्य्याम्। ४।
"भवति रतिरसज्ञा नातिदीर्घा न खर्व्वा
तिलकुसुमसुनासा स्निग्धोदेहोत्पलाक्षी।
कठिनघनकुचाढ्या सुन्दरी सा सुशीला
सकलगुणविचित्रा चित्रिणी चित्रवक्त्रा॥"
(इयं हि श्यामजातीयपुत्रं लब्ध्वा सम्भूता भवति। यदुक्तं तत्रैव। ८।
"शूद्रके पद्मिनी तुष्टा चित्रिणी रमते नगम्।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम्॥"
अस्या रतिकरणप्रकारमाह तत्रैव। २६।
"शीत्कारं चुम्बनं पीड़ा गले हस्ते च चुम्बनम्।
चक्रे चक्रे स्तने हस्तं चित्रिणीरतिमादिशेत्॥")
चित्रेशः, पुं, (चित्रा नक्षत्रविशेषस्तस्या ईशः पतिः,) चन्द्रः। इति शब्दचन्द्रिका।
चित्रोक्तिः, स्त्री (चित्रा आश्चर्य्यकरी उक्तिर्व्वाणी।) आकाशवाणी। इति त्रिकाण्डशेषः॥ आश्चर्य्यकथनञ्च॥
चित्रौदनं, क्ली, (चित्रमोदनम्।) विचित्रान्नम्। इति भरतधृतवचनम्॥
चिद्रूपः, त्रि, ज्ञानवान्। इति भूरिप्रयोगः। (चित् ज्ञानमेव रूपं यस्य।) ज्ञानमयः। यथा। चिद्रूपे परमात्मनीति योगशास्त्रम्॥
चिन्ता, स्त्री (चिन्तनमिति। चिन्ति + "चिन्तिपूजिकथिकुम्बिचर्च्चश्च।" ३। ३। १०५। इति अङ्।) चिन्तना। चिन्तनम्। तत्पर्य्यायः। स्मृतिः २ आध्यानम् ३। इत्यमरः। १। ७। २६॥ आधा ४ ध्यानम् ५ चिन्तिः ६। इति शब्दरत्नावली॥ चिन्तिया ७। इति हेमः॥ (यथाह कश्चित्।

"चिता चिन्ता द्वयोर्मध्ये चिन्ता नाम गरीयसी। चिता दहति निर्जीवं चिन्ता हि जीवितमथा॥") दर्शनसम्मोगयोः प्रकारभावना। इति रसमञ्जरी॥ (सा च व्यभिचारिभावविशेषः। यथा. साहित्यदर्पणे। ३। १७०। [कृत्॥")

"ध्यानं चिन्ता हितानाम्नेः शून्यताश्वासतापः

चिन्तामणिः, पुं, (चिन्तायां सर्व्वकामप्रदो मणिरिव। शाकपार्थिवादित्वात् समासः। यद्वा, चिन्तया ध्यानधारणादिना मण्यते आह्वयते इति। मण+इण्।) ब्रह्मा। इति शब्दरत्नावली॥ (चिन्ता एव मणिरिव यस्य। चिन्तामणीलत्वादेवास्य तथात्वम्।) बुद्धविशेषः। इति त्रिकाण्डशेषः॥ मणिविशेषः। यथा, भट्टिः।

"सामर्थ्यसम्पादितवाञ्छितार्थ-
चिन्तामणिः स्यान्न कथं हनूमान्॥"

सार्थमणिः। तथा च।

"यथा चिन्तामणिं कृत्वा लोष्टं काञ्चनतां भजेत्।"

इति पाद्मोत्तरखण्डम्॥

(अश्वविशेषः। यथा, नकुलकृताश्वचिकित्सिते। ४। १६।

"कण्ठे यस्य महावर्त्म एकोऽश्वस्य प्रजायते। चिन्तामणिः स विज्ञेयश्चिनातार्थविदुद्विदः॥")

चिन्तावेश्म, [न्] क्ली, (चिन्तायाः मन्त्रणार्थं वेश्म गृहम्।) मन्त्रणागृहम्। तत्पर्य्यायः। दार्व्वटम् २। इति हारावली। १६॥

चिन्तिड़ी, स्त्री, (तिन्तिड़ी। पृषोदरादित्वात् तस्य चत्वम्।) तिन्तिड़ी। इति हिरूपकोषः॥ इति क्वचित्॥

चिन्तितं, त्रि, (चिति+कर्म्मणि क्तः।) ज्ञातचिन्तनम्। यथा,—

"यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसा न गणितं तदिहाभ्युपैति।"

रत्नकूटः॥

कर्त्तरि क्ते चिन्तायुक्तः। भावे क्ते चिन्ता॥

चिन्तितिः, स्त्री, (चिन्त+भावे क्तिच् रट् च।) चिन्ता। इति शब्दरत्नावली॥

चिन्तिया, स्त्री, चिन्ता। इति त्रिकाण्डशेषः॥

चिप्रः, पुं, शस्त्रविशेषः। इति शब्दचन्द्रिका॥ चिना इति भाषा॥ (चीनशब्दे विशेषोऽस्य ज्ञातव्यः॥)

चिपिटः, पुं, (चयतीति। चि+बाहुलकात् पिटच् स च कित्।) भक्ष्यद्रव्यविशेषः। चिड़ा। इति भाषा॥ तत्पर्य्यायः। पृथुकः २। इति हेमचन्द्रः। २। ६५॥ चिपिटकः ३। इत्यमरः॥ चिपुटः ४। इति भरतः॥ धान्यचमसः ५। इति त्रिकाण्डशेषः॥ चिपोटकः ६। इति शब्दरत्नावली॥ अस्य गुणाः। गुरुत्वम्। स्निग्धत्वम्। हृंहणत्वम्। कफपित्तकत्वञ्च। शीरयुक्तस्य तस्य गुणाः। बलकारित्वम्। वायुनाशित्वम्। मलभेदकत्वञ्च। इति राजवल्लभः॥ बृंहणत्वम्। गुरुत्वञ्च। तस्य लक्षणं यथा, भावप्रकाशे पूर्व्वखण्डे द्वितीये भागे।

"धानाः सशुष्का आर्द्रा भृष्टा अस्फुटितास्ततः। कुट्टितास्चिपिटाः प्रोक्ताः क्वचित् स्फुटिताः पृथुकाः स्मृताः।"
"धानेया यावनालाद्याश्चिपिटाः पृथिवर्द्धनाः॥"

इति राजनिर्घण्टः॥

तस्य भक्षणविधिनिषेधौ यथा,—

"द्विःखिन्नमन्नं पृथुकं शुष्कं देशविशेषके। नात्यन्तशुष्कं विप्राणां भक्षणे च निवेदने॥ अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम्॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥

(नि नता नासिका विद्यतेऽस्य। "इनच्पिटच्चिकचि च।" ५। २। ३३। इति पिटच् प्रत्ययेश्चिरादेशश्च। नतनासिके चि। यथा, विश्वकर्म्मप्रकाशे। १३। २।

"दिग्वक्त्रं चिपिटञ्चैव चक्षुर्नं सुरचन्नथा।"

इत्यस्य फलमाह तत्रैव। ५म श्लोके।

"तुङ्गहीनञ्च चिपिटं चक्षुश्चानर्घदर्शनम्।"

चिपिटाकारसुखादौ च। यथा, काशीखण्डे। ३७। १४।

"वक्त्रो हस्तश्च चिपिटः सुखसौभाग्यभङ्गकः॥"

"चिपिटः चिप्टिकाकारः" इति तट्टीका॥)

चिपिटकः, पुं, (चिपिट+स्वार्थे कन्।) चिपिटः। इत्यमरः। २। ६। ४७॥ (स्त्रियां टाप्। नतनासिका॥)

चिपिटा, स्त्री, गुरुत्वाधिनीद्रव्यम्। इति राजनिर्घण्टः॥ (चिपिटा चिपिटाकारा इति। चिपिट+टाप्। चिपिटमस्ति। यथा, काशीखण्डे। ३७। १६। "चिपिटाभिर्भवेद्दासी॥")

चिपुटः, पुं, (चिपिट+पृषोदरादित्वात् साधुः।) चिपिटकः। इति भरतधृतरुद्रकोषः॥

चिप्पः, पुं, (चिक्कति पीड़यति अङ्गुलिमिति। चिक्क+अच्। निपातनात् ककारस्थाने पकारागमे साधुः।) नखरोगविशेषः। आङ्गुलछाड़ा इति भाषा॥ तल्लक्षणं यथा,—

"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम्। करोति दाहपाकौ च सं व्याधिं चिप्पमादिशेत्॥"

अथ कुनखस्य लक्षणमाह।

"अभिघातात् प्रदुष्टो यो नखो रूक्षोऽसितः खरः। भवेत्तं कुनखं विद्यात् कुग्रीवं वा विधानतः॥"

अथ तयोश्चिकित्सा।

"चिप्पं रुधिरमोक्षेण प्रोषणेनाप्युपाचरेत्। गतोष्माणमथैनन्तु सेचयेदुष्णवारिणा। शुष्कञ्चाप्नि यथायोग्यमुपक्रम्य सावचेत्ततः॥ व्रणोक्तेन विधानेन रोपयेत्तं विचक्षणः। खरेण दृढ़िमायाः पात्रे क्षत्वायसेऽभयाम्॥ दग्ध्वा तल्लेन कल्केन लिम्पेच्चिप्पं पुनः पुनः। काक्षण्याः सप्तभिः पत्रैः कोमलैः परिवेष्टितः॥ अङ्गुलीवेष्टकः पुंसां ध्रुवमाशु प्रशाम्यति। श्लेष्मविद्रधिकल्पेन कुनखं समुपाचरेत्॥ नखकोटिप्रविष्टेन टङ्कणेन प्रशाम्यति। कुनखश्चेत्तदा शीघ्रं सलिले ह्रवतेऽपि च॥"

इति भावप्रकाशे मध्यखण्डे ४र्थे भागः॥ (लक्षणान्तरमस्य यथा,—

"कुर्य्यात् पित्तानिलं पाकं नखमांसे सरुग्ज्वरम्। चिप्पमत्यन्तरोगञ्च विद्यादुपनखञ्च तम्॥"

इति वाभटेनोत्तरस्थाने ३१ अध्याये उक्तम्॥ चिकित्सास्त्र यथा,—

"चिप्पं शुद्ध्या जितोग्राग्नं साधयेच्छस्त्रकर्म्मणा॥"

इत्युत्तरस्थाने द्वात्रिंशेऽध्याये वाभटेन चोक्तम्॥)

चिमिः, पुं, (चिनोति सञ्चिनोतीति मनुष्यजातिवद्वाक्यानीति। चि+बाहुलकात् मिक्।) शुकपक्षी। इति शब्दमाला॥

चिमिकः, पुं, (चिमि+स्वार्थे कन्।) शुकपक्षी। इति शब्दरत्नावली॥

चिरं, अ, (चि+बाहुलकात् रक्।) दीर्घकालः। तत्पर्य्यायः। चिराय२ चिरायाय ३ चिरस्य ४। इत्यमरः॥ चिरेण ५ चिरात् ६ चिरे ७। इति भरतः॥ चिरतः८। इति शब्दरत्नावली॥ (यथा, मनुः। ४। ६०।

"नैकः प्रपद्येताध्वानं न चिरं पर्व्वते वसेत्॥")

चिरकारी, [न्] त्रि, (चिरं व्याप्य करोतीति। कृ+णिनिः।) चिरक्रियः। (यथा, महाभारते। १२। २६६। १।

"चिरकारी हि मेधावी नापराध्यति कर्म्मसु॥")

गौतमस्य पुत्रभेदः। अस्य निरुक्त्यादिकं यदुक्तं महाभारते। १२। २६५। ४-५।

"चिरकारी महाप्राज्ञो गौतमस्याभवत् सुतः। चिरेण सर्व्वकार्य्याणि विन्दत्यर्थान् प्रपद्यते। चिरं सञ्चिन्तयत्यर्थांश्चिरं जागर्त्ति चिरं स्वपन्। चिरं कार्य्याभिपत्तिञ्च चिरकारी तथोच्यते॥")

चिरकालः, पुं, (चिरः काल इति कर्म्मधारयः।) दीर्घकालः। तत्पर्य्यायः। दीर्घराजम् २। इति त्रिकाण्डशेषः॥

चिरक्रियः, त्रि, (चिरं व्याप्य क्रिया यस्य।) चिरकालेन क्रियाकारकः। तत्पर्य्यायः। दीर्घसूत्रः। इत्यमरः। २। १। १७॥

चिरजीवकः, पुं, (चिरं जीवतीति। जीव+ण्वुल्।) जीवकद्रुमः। इति जटाधरः॥

चिरजीवी, [न्] पुं, (चिरं जीवतीति। जीव+णिनिः।) विष्णुः। काकः। इति मेदिनी॥ जीवकद्रुमः। शालमलिद्रुमः। इति राजनिर्घण्टः॥ मार्कण्डेयः। अश्वत्थामा। बलिः। व्यासः। हनूमान्। विभीषणः। कृपः। परशुरामः। इति तिथ्यादितत्त्वम्॥ बहुकालजीविनि त्रि। इति जटाधरः॥ (यथा, रामायणे। २। १। ३६।

"अथ राज्ञो बभूवैव वृद्धस्य चिरजीविनः॥")

चिरञ्जीवी, [न्] पुं, (चिरं जीवतीति। जीव+णिनिः।) विष्णुः। काकः। इति हेमचन्द्रः। ४। ३८८॥ जीवकद्रुमः। शालमलिद्रुमः। इति राजनिर्घण्टः॥ चिरजीविनि त्रि॥

चिरण्टी, स्त्री, (चिरात् चिरेण वा अटति पिङ्गयतीति। अट+अच्। "यसि प्रथमे।" ४। १। २०। इति ङीप्। सत्, पृषोदरादित्वात् साधुः।) खण्डाशिनी। जड़ा अनूढ़ा वा पिङ्ग-

गेहस्थिता कन्या। द्वितीयवयाः स्त्री। सा च युवती। इति भरतधृतरुद्रः हैमचन्द्रश्च॥

चिरतिक्तः, पुं, (चिरं चिरात् वा चिरावधीत्यर्थः तिक्तः।) वृक्षविशेषः। चिरता इति भाषा॥ तत्पर्य्यायः। चिरातिक्तः २ तिक्तकः ३ अनार्य्यतिक्तकः ४ किराततिक्तः ५ भूनिम्बः ६ किरातकः ७ सुतिक्तकः ८। इति शब्दरत्नावली॥ (भूनिम्बशब्दे विवरणमस्य ज्ञातव्यम्॥)

चिरत्नः, त्रि, (चिर+"चिरपरुत्परारिभ्यस्नो वक्तव्यः।" ४।३।२३। स्नुचस्य वार्त्तिकोक्त्या त्नप्रत्ययः।) पुरातनः। चिरकालोत्पन्नः। इति जटाधरः॥

चिरन्तनः, त्रि, (चिरं भवं इति। "सायंचिरमिति।" ४।३।२३। इति ट्युल् तुट् च। निपातनात् साधुः।) पुरातनः। इत्यमरः।३।१।७७॥ (यथा, पद्मतन्त्रे। १। ८०। "अयमसाकं चिरन्तनो मन्त्रिपुत्रो दमनको ऽभ्याहतप्रवेशः॥" पुं, मुनिविशेषः। यथा, सिद्धान्तकौमुद्याम्। ४। ३। १०५। इत्यस्य वार्त्तिके। "ब्राह्मणेषु पुराणेन चिरन्तनेन मुनिना॥")

चिरपाकी, [न्] पुं, (चिरेण पाको ऽस्यास्य। पच+घञ्+इनिः।) कपित्थः। इति राजनिर्घण्टः॥

चिरपुष्पः, पुं, (चिराणि पुष्पाणि यस्य।) वकुलवृक्षः। इति राजनिर्घण्टः॥

चिरम्, व्य, (चि+रसुक्।) चिरार्थम्। दीर्घकालार्थम्। तत्पर्य्यायः। चिराय २ चिरराचाय ३ चिरस्य ४ चिरात् ५ चिरेण ६। इति हैमचन्द्रः।३।१६८॥ (यथा, रघौ।३।६२।

"तथापि शुश्रूषयवहारनिष्ठुरे
विपक्षभावे चिरमस्य तस्थुषः॥")

चिरमेही, [न्] पुं, स्त्री, (चिरेण मेहतीति। मिह+णिनिः।) गर्द्दभः। इति हैमचन्द्रः।४।३२२॥

चिरभवः, पुं, (चिरं भवति क्लीयतीति। चिरं+भव+अच्।) चिञ्चः। इति चिकाण्डशेषः॥

चिररात्रं, क्ली, (चिरा रात्रिरिति योगविभागात् अच् समासे।) दीर्घकालः। इति हलायुधः॥ (यथा, महाभारते। १। १६८। ३।

"चिररात्रोषिताः स्नेह ब्राह्मणस्य निवेशने॥")

चिरराचाय, व्य, (चिररात्रं अयते इति। अय+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) दीर्घकालः। इत्यमरः।३।४।१४॥ (यथा, मनुः। ३। २६६।

"हविर्यैश्चिरराचाय यज्ञानन्त्याय कल्पते।
पितृभ्यो विधिवद्दत्तं तत् प्रवक्ष्याम्यशेषतः॥")

चिरविल्वः, पुं, (चिरं विलति आच्छादयति पत्रकण्टकादिभिरिति। विल आच्छादने+वः।) करञ्जवृक्षः। इत्यमरः। २।४।४७॥ (यथा,—

"चिरविल्वोऽथिको दन्ती चिरको हयमारकः।
कपोतपक्वकफ्रान्तो पुरीषाणि च दारुणम्॥"

इति सुश्रुते सूत्रस्थाने षट्त्रिंशेऽध्याये॥)

चिरस्नता, स्त्री, (चिरं स्नता या सा।) चिरप्रस्नता गवी। केने गाइ इति भाषा। तत्पर्य्यायः। त्रस्नायनी २। इत्यमरः। २।९।७१॥

चिरस्थायी, [न्] त्रि, (चिरं तिष्ठतीति। स्था+णिनिः।) बहुकालस्थाता॥

चिरस्य, व्य, (चिरमस्यते इति। अस्+यत्। प्रकन्यादित्वात् साधुः।) दीर्घकालः। इत्यमरः।३।३।११॥ (यथा, हरिवंशे।१२६।२३।

"चिरस्य खलु कृष्णेन संस्तुतो ऽस्मि महात्मना॥")

चिराटिका, स्त्री, (चिरं अटतीति। अट+ण्वुल् कापि अत इत्वञ्च।) श्वेतपुनर्नवा। इति रत्नमाला॥ पाताड़ी इति भाषा॥ यथा, वैद्यके।

"गोमूत्रयुक्तस्य पुरातनस्य
यद्वायसस्तानि चिराटिकायाः॥"

चिरात्, व्य, (चिरं अततीति। अत्+क्विप्) दीर्घकालः। इति हैमचन्द्रः। ६। १६८॥ (यथा, पञ्चतन्त्रे। ४। ७८। "भो भगिनीसुत! किमतिचिराद्दृश्योऽसि॥")

चिरात्, पुं, (चिरं चिरेण वा अत्ति। अद्+क्विप्।) गरुड़ः। इति त्रिकाण्डशेषः॥

चिरातिक्तः, पुं, (चिरं चातिक्तः।) चिरतिक्तः। इति शब्दरत्नावली॥

चिराय, व्य, (चिरं अयते। अय+अच्।) दीर्घकालः। इति हैमचन्द्रः। ६। १६८॥ (यथा, महाभारते। १३। ८४। १०।

"पुरा धर्म्मो वर्त्तते नेह यावत्
तावद्गच्छामः सुरलोकं चिराय॥")

चिरायुः, [स्] पुं, (चिरमायुर्यस्य।) देवता। इति त्रिकाण्डशेषः॥ चिरजीविनि त्रि। यथा, "भवति यदि मनुष्यो गुर्व्वधीनश्चिरायुः॥" इत्यागमः॥ (यथा च पद्मतन्त्रे। ५। ३४।

"यदि विस्तारविस्तीर्णं तद्भवेन्न चिरायुषम्॥")

चिरि, र ण हिंसे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) रेफोपधः। र वैदिकः। ण, चिरिण्वोति। इति दुर्गादासः॥

चिरिः, पुं, (चिनोति मनुष्यवद्वाक्यादिकम्। चि+किरच्।) शुकपक्षी। इति त्रिकाण्डशेषः॥

चिरिण्टी, स्त्री, (चिरण्टी+पृषोदरात् साधुः।) छड़ा अनूढ़ा वा पितृगृहस्थिता कन्या। तत्पर्य्यायः। स्वयंसिनी। इत्यमरः। २। ६। ८॥ चिरण्टी २ सुवासिनी ३। इति भरतः॥ द्वितीयवयाः स्त्री। युवतौ। इति मेदिनी॥

चिरिबिल्वः, पुं, (चिरबिल्वः। पृषोदरादित्वात् साधुः।) चिरबिल्वः। करञ्जवृक्षः। इत्यमरटीकायां भरतः॥

चिरु, स्त्री, (चिरु चयने+क्विप्। चि चयनं यद्वयमित्यर्थः रातीति। रा+ङगयादयश्चेति कुः। बाहुलन्यबलमाश्रित्यैव यङ्लुगभावात् तथात्वम्।) बाहुलन्यिः। इति शब्दचन्द्रिका॥

चिरे, व्य, चिरम्। इत्यमरटीकायां रायमुकुटः॥

चिरेण, व्य, चिरम्। इति हैमचन्द्रः॥ (यथा, रघुः। ५। ६४।

"भावावबोधकलुषा दयितेव रात्री
निद्रा चिरेण नयनाभिमुखी बभूव॥")

चिर्भटी, स्त्री, (चिरेण भटतीति। भट+अच्। गौरादित्वात् ङीष्। पृषोदरादित्वात् साधुः।) कर्कटी। इति हैमचन्द्रः। ४। २५५॥ (यथा, पञ्चतन्त्रे।१।१६७।"अहो अविवेको ऽस्मदूपतेयैः पुरीषोत्सर्गमाचरद्भिर्चिर्भटीभक्षं करोति॥")

चिर्भिटा, स्त्री, कर्कटीभेदः। चिभिड़ा इति बेलसेद इति च देशान्तरीयभाषा॥ तत्पर्य्यायः। सुचिक्रा २ चिक्रफला ३ क्षेत्र चिर्भिटा ४ पाण्डुफला ५ पक्वा ६ रोचनफला ७ चिर्भिटिका ८ कर्कचिर्भिटा ९। इति राजनिर्घण्टः॥ चिर्भिटम् १० वैशदुग्धम् ११ गोरक्षकर्कटी १२। अस्या गुणाः। मधुरत्वम्। रूक्षत्वम्। गुरुत्वम्। पित्तकफापहत्वम्। अशुक्लत्वम्। वाहित्वम्। विष्टम्भित्वञ्च॥ यक्षायाः अस्या गुणाः। उष्णत्वम्। पित्तलत्वञ्च। इति भावप्रकाशः॥ गौल्यत्वम्। दीपनत्वञ्च॥ वाजायाः अस्या गुणाः। तिक्तत्वम्। किञ्चिदम्लत्वञ्च। शुष्कायाश्चास्या गुणाः। श्लेष्मवातास्रपित्तार्शोनाशित्वम्। रोचनत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ (क्वचित् पुंलिङ्गेऽपि दृश्यते॥)

चिल, ग्र वासे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) वासः परिधानम्। ग्र, चिलति वस्त्रं लोकः परिदधातीत्यर्थः। चेलिता। इति दुर्गादासः॥

चिलमीलिका, स्त्री, (चिरं मीलतीति। मील मीलने+ण्वुल्। ततष्टाप् अत इत्वम्। रस्य लत्वे साधुः।) कक्कीभेदः। खद्योतः। विद्युत्। इति मेदिनी। के, २२८॥

चिलिचिमः, पुं, (चिरं हिंसां चिनोतीति। चिरि+चि+मक्। रस्य लत्वम्।) मत्स्यविशेषः। वालियागड़क इति ख्यातः। इचाक इत्यके। इति भरतः॥ तत्पर्य्यायः। तलमीनः २। इत्यमरः। १। १०। १८॥ तलमीनः ३ चिलीचिमिः ४ चिलीचिमः ५ चिलिचीमः ६ चेलिचीमः ७ चिलीमः ८ चिलिमीनकः ९ चिलिचीमिः ११ कवलः ११ विलोटकः १२। इति भरतधृतकोषान्तरम्॥ चेङ्गो इति ख्यातो मत्स्यः। तस्य गुणाः। लघुत्वम्। रूक्षत्वम्। अनभिष्यन्दित्वम्। वायुकारित्वम्। कफनाशित्वञ्च। इति राजवल्लभः॥

चिल्ल, शैथिल्ये। ह्रावभावे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ह्रस्वी लङ्यात्मनेः। चिल्लति चेचिल्लते। इति दुर्गादासः॥

चिल्लः, पुं, (चिल्लति ह्रावभावेन उड्डीयते इति। चिल्ल+अच्।) पक्षिविशेषः। चिल् इति भाषा॥ तत्पर्य्यायः। आतायी २। इत्यमरः। २। ५। २३॥ शकुनिः ३ आतापी ४। इति हैमचन्द्रः॥ खञ्जरीटः ५ कञ्जनीडकः ६ चिरञ्जः ७। इति त्रिकाण्डशेषः॥ (यथा, विष्णुधर्म्मोत्तरे।

"गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च। चिल्लश्च चर्म्मचिल्लश्च भासः पाङ्कर एव च॥" स्निग्धे चक्षुषी अस्य। "स्निग्धस्य चित्पिल् लक्षास्य चक्षुषी।" ५। २। ३३। इत्यस्य वार्त्तिके इति चिलादेशो लप्रत्ययश्च।) स्निग्धचक्षुः। स्निग्धनेत्रयुक्ते त्रि। इति मेदिनी। ले, १६॥

चिल्लका, स्त्री, (चिल्ल इव कायतीति। के+कः।) भिल्लिका। इति शब्दरत्नावली॥

चिल्लभक्षा, स्त्री, (चिल्लस्य भक्षा भक्षणीया।) कङ्कविलासिनी। इति शब्दचन्द्रिका॥

चिल्लाभः, पुं, (प्रसक्तं हारकत्वात् चिल्ल इव आभातीति। आ+भा+कः।) प्रसक्तचोरः। इति चिकाकश्लेषः॥ हातहैं चढ़ इति गाँटिकाटा इति च भाषा॥

चिल्ली, स्त्री, (चिल्लति हार्दं करोति चिल्लतेऽनेन वा। चिल्ल+इन्। ततो वा ङीष्।) लोहः। यन्त्रशाकभेदः। तत्पर्य्यायः। चिल्लिका २ कुली ३ अग्रलोहिता ४ लट्वपत्री ५ चारदला ६ चारपत्रा ७ वास्तुकी ८ मण्डूका ९ गौड़वास्तुकः १०। (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये। "सतीनो वास्तुकक्षुद्र चिल्ली मूलकपोतिकाः। मण्डूकपर्णी जीवन्ती शाकवर्गे प्रशस्यते॥") अस्य गुणाः। वास्तुकतुल्यत्वम्। चारत्वम्। श्लेष्मपित्तप्रमेहमूत्रशुक्रनाशित्वम्। पथ्यत्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥ ("तद्वच्चिल्ली तु विज्ञेया वातपित्तविकारिणाम्॥" इति हारीते प्रथमे स्थाने दशमेऽध्याये॥) भिल्लिका। इति शब्दरत्नावली॥

चिवि:, पुं, (चीयते आदराय यत्नते इति। चीव यत्नने+"सर्व्वधातुभ्य इन्।" उणा ४। ११७। इति इन्। इषोदरादित्वात् ह्रस्वः।) चिबुकम्। इति जटाधरः॥

चिविटः, पुं, (चिपिटः निपातनात् पस्य वः।) चिपिटः। इत्यमरटीका॥

चिविल्लिका, स्त्री, क्षुद्रक्षुपविशेषः। तत्पर्य्यायः। रक्तदला २ क्षुद्रघोण्टी ३ मधुमालपत्रिका ४। अस्या गुणाः। कटुत्वम्। कषायत्वम्। जीर्ण्णज्वरे अतिहितत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

चिबुकः, पुं, (चीयते आदराद्यर्थं गृह्यतेऽसौ। चीव +"कृगयादयश्च।" उणा। १। ३८। इति कुप्रत्ययेन साधुः।) चिबुकम्। इति भरतः॥

चिबुकं, क्लो, (चिबु+स्वार्थे कन्। अभिधानात् क्लीवत्वम्।) अधराधोभागः। रत्नमरः। २। ६। ६०॥ थुँति इति दाढ़ि इति च भाषा॥ (यथा, हठयोगप्रदीपिकायाम्। १। ४६। "उत्तम्भ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः॥")

चिबुकः, पुं, (चिबुरिव कायतीति। के+कः।) शुषुक्कृक्षः। इति राजनिर्घण्टः॥

चिह्न, लक्षणे। (अदन्तचुरां-परं-सकं-सेट्।) सौत्रधातुरयमिति दुर्गादासः। इत्यमरटीकायां भरतः॥

चिह्नं, क्लो, (चिह्नयतेऽनेनेति। चिह्न लक्षणे+करणे घञ्।) चिह्नयते येन तत्। चिना इति दाग् इति च भाषा॥ तत्पर्य्यायः। कलङ्कः २ अङ्कः ३ लाञ्छनम् ४ लक्ष्म ५ लक्षणम् ६ लिङ्गम् ७। इत्यमरः। १। ३। १७॥ लक्ष्मणः ८। इति भरतः॥ अभिज्ञानम् ९। इति जटाधरः॥ (यथा, भागवते। ४। १५। ९। "वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः। पादयोररविन्दञ्च तं वै मेने हरेः कलाम्॥") पताका। इति मेदिनी। ने, ४॥

चिह्नकारी, [न्] त्रि, (चिह्नं करोतीति। चिह्न+णिनिः।) चोरदर्शनः। विघाती। इति विश्वः॥

चिह्नधारिणी, स्त्री, (चिह्नं धरति धारयतीति वा। चिह्न+णिनिः स्त्रियां ङीप्।) श्यामालता। इति शब्दचन्द्रिका॥

चिह्नित:, त्रि, (चिह्न+कर्म्मणि क्तः। चिह्नयुक्तः। अङ्कितः। लक्षितः। (यथा, मनुः। १०। ५५।) "दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः॥")

चीक, क्लि मर्शने। इति कविकल्पद्रुमः॥ (चुरां-उभे भां-परं-सकं-सेट्।) क्लि, चीकयति चीकति। मर्शनं स्पर्शः। तथा च। चन्द्रावतीतरङ्गार्द्रांचीकयन्ति च यदूवपुरिति हलायुधः। वायवः सृप्तगतीत्यर्थः। भट्टमल्लस्तु मर्षेऽयं इति मर्द्दनेऽयमर्थं पठित्वा क्षमार्थमाह। इति दुर्गादासः॥

चीड़ा, स्त्री, गन्धद्रव्यविशेषः। चीड़ागन्ध इति ख्याता। तत्पर्य्यायः। दारुगन्धा २ गन्धबधूः ३ गन्धमादनी ४ तरुजा ५ तारा ६ भूतमारी ७ मङ्गल्या ८ कपटिनी ९ यक्षभीतिर्जित् १०। अस्या गुणाः। कटुत्वम्। कासकफनाशित्वम्। दीपनत्वम्। अत्यन्तसेवनात् पित्तदोषप्रशमापहत्वञ्च। इति राजनिर्घण्टः॥

चीनं, क्लो, (चिनोति कीर्त्त्यादिकमिति। चि+बाहुलकात् नक् दीर्घश्च।) पताका। इति चिकाकश्लेषः॥ सीसकम्। इति रत्नमाला॥

चीनः, पुं, (चीयते सञ्चीयते दृषलत्वादिदोषो यत्र। चि+बाहुलकात् नक् दीर्घश्च।) देशविशेषः। चीना इति भाषा॥ यथा,—
"काश्मीरन्तु समारभ्य कामरूपान्तु पश्चिमे। भोटान्तदेशो देवेशि! मानसेशाच्च दक्षिणे। मानसेशाद्दक्षपूर्व्वे चीनदेशः प्रकीर्त्तितः॥"
इति शक्तिसङ्गमतन्त्रम्॥
(तद्देशवासिषु तन्त्रेषु च बहुवचनान्तः। यथा, महाभारते। २। २८। ६। [२भवत॥"])
"स किरातैश्च चीनैश्च वृतः प्राग्ज्योतिषोऽभवत्॥" (यथा, रघुवंशे ४ सर्गे।
"चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥")
शीघ्रभेदः। तन्तुः। नगविशेषः। इति मेदिनी। ने, ४॥

चीनकः, पुं, (चीन एव। चीन+स्वार्थे कन्।) धान्यविशेषः। चीना इति भाषा॥ तत्पर्य्यायः। काककङ्गुः २। इति हेमचन्द्रः॥ (यथा, विष्णुपुराणे। १। ६। २१।
"प्रियङ्गवो नदारालाश्च कोरदूषाः सचीनकाः॥") अस्य गुणाः। ग्राहित्वम्। वायुवर्द्धकत्वम्। पित्तश्लेष्मनाशित्वम्। रूक्षत्वञ्च। इति राजवल्लभः॥ कङ्गुनी। चीनकर्पूरः। इति राजनिर्घण्टः॥ (चीनदेशवासिषु बहुवचनान्तः। यथा, महाभारते। ८। ८। १६।
"सुह्मागङ्गांश्च वादांश्च निषधान् पुलिन्दचीनकान्॥")

चीनकर्पूरः, पुं, (चीनजातिः कर्पूरः।) कर्पूरविशेषः। चीनकर्पूर इति देशान्तरीयभाषा॥ तत्पर्य्यायः। चीनकः २ क्षत्रिमः ३ धवलः ४ पटुः ५ मेघसारः ६ तुषारः ७ द्वीपकर्पूरजः ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। ईषच्छीतत्वम्। कफकण्डूदोषक्रिमिनाशित्वम्। मेध्यत्वम्। पावनत्वञ्च। इति राजनिर्घण्टः॥

चीनजं, क्लो, (चीने चीनदेशे जायते इति। जन +डः।) लोहम्। तच्च तीक्ष्णलौहम्। इति राजनिर्घण्टः॥

चीनपिष्टं, क्लो, (चीनस्य सीसकस्य पिष्टं क्षतपेषणं वस्तु चूर्णमित्यर्थः।) सिन्दूरम्। इति हेमचन्द्रः॥ सीसकम्। इति राजनिर्घण्टः॥ (यथा, कथासरित्सागरे। २३। ८५।
"चीनपिष्टमयो लोकचारश्चैकमयी च भूः॥")

चीनवङ्गं, क्लो, (चीनभवं वङ्गम्।) सीसकम्। इति राजनिर्घण्टः॥

चीनाकः, पुं, (चीनं चीनाकारमकतीति। अक +अच्।) कर्पूरविशेषः। तद्गुणाः। यथा, भावप्रकाशे।
"चीनाकसंज्ञः कर्पूरः कफघ्नयकरः स्मृतः। कुष्ठकण्डूविषहरस्तथा तिक्तरसश्च सः॥"

चीनाककर्कटी, स्त्री, (चीनमिव स्वादुः कर्कटी। ततः, इषोदरादि, साधुः।) कर्कटीभेदः। सा तु चित्रकूटदेशे प्रसिद्धा। तत्पर्य्यायः। राजकर्कटी २ सुदीर्घा ३ राजफला ४ बाला ५ कुलककर्कटी ६। अस्या गुणाः। रूक्षत्वम्। शिशिरत्वम्। पित्तदाहश्लेष्मनाशित्वम्। मधुरत्वम्। लघुत्वम्। वृद्धत्वञ्च। इति राजनिर्घण्टः॥

चीभ, ऋ ङ कत्थे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) कत्थः प्रशंसा। ऋ, अचिचीभत्। ङ, चीभते गुणिनं गुणी ओष्ठ्यकारादिरयमित्येके। इति दुर्गादासः॥

चीय, ऋ च संहृत्यादानयोः। (भ्वां-उभं-सकं-सेट्।) चतुर्थस्वरौ। ऋ, अचिचीयत्। च, चीयति चीयते। इति दुर्गादासः॥

चीरं, क्लो, (चिनोति आवृणोति वृक्षं कटिदेशादिकं वा। चि+"शुचिचिमीनां दीर्घश्च।" उणा। २। २५। इति क्रन् दीर्घश्च।) वृक्षत्वक्। (यथा, रामायणे। ५। ३१। २२।
"प्रागेव तु महाबुद्धिः सौमित्रिर्भ्रातृवत्सलः। पूर्व्वजस्यानुयात्रार्थं हंसचीरैरलङ्कृतः॥") जीर्णवस्त्रखण्डम्। इति शुभूतिः। इति लिङ्गादिसंग्रहटीकायां भरतः॥ (यथा, भागवते। २। २। ५।

"चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ॥")
गोस्तनः । वस्त्रभेदः । (यथा, मनुः ।११।१०१।
"चीरवासा द्विजोऽरण्ये चरेद्ब्रह्मह्यो व्रतम्॥")
रेखाभेदः । लेखनभेदः । इति मेदिनी ॥ चूड़ा ।
(यथा, महाभारते । ३ । ११ । ४६ ।
"सुस्रवन्त्यश्चरीभूता बहुवस्त्रा नदापगाः ।
चीराजीव युदस्तानि रेजुस्तत्र महाबने ॥")
सीसकम् । इति हेमचन्द्रः ॥
चीरकः, पुं, (चीर+संज्ञायां कन् ।) विक्रिया-
लेखः । विकारलेखनम् । इति विश्वः ॥ (स्वार्थे-
कनि चीरशब्दार्थोऽप्यत्र ॥)
चीरपत्रिका, स्त्री, (चीरमिव पत्रमस्य । ततः
कन् टापि अत इत्वञ्च ।) चक्षुष्याकः । इति
राजनिर्घण्टः ॥
चीरपर्णः, पुं, (चीरमिव पर्णमस्य ।) शालतृणः ।
इति राजनिर्घण्टः ॥ (विदतिरस्य शालशब्दे
विज्ञेया ॥)
चीरिः, स्त्री, (चि+बाहुलकात् क्रिः दीर्घश्च ।)
नेत्राञ्जनम् । इति शब्दरत्नावली ॥
चीरिका, स्त्री, (चीरीति शब्दं कायति शब्दायते
इति । के+कः ।) झिल्ली । इति हेमचन्द्रः ॥
चीरितच्छदा, स्त्री, (चीरित: चीरमिव जात-
च्छदः पत्रं यस्याः ।) पालङ्क्यशाकम् । इति
भावप्रकाशः ॥
चीरी, स्त्री, (चीरि+"ऋदिकारादिति ।"
वा ङीष् ।) कक्षाटिका । झिल्ली । इति हेम-
चन्द्रः ॥
चीरुकं, क्ली, (चीं इति शब्दं करोति । रु+क्विप् ।
चीरुभिर्झिल्लीपतङ्गः स इव इति इवार्थे कन् ।)
फलविशेषः । चेँचर इतिभाषा ॥ अस्य गुणाः ।
रुचिदाहकफपित्तकारित्वम् । अम्लत्वञ्च । इति
राजवल्लभः ॥
चीर्ण, त्रि, (चर+क्तः । पृषोदरात् साधुः ।) भक्षि-
तम् । इति त्रिकाण्डशेषः ॥
चीर्णपर्णः, पुं, (चीर्णं विदीर्णं पर्णमस्य ।) निम्ब-
वृक्षः । खर्जूरवृक्षः । इति मेदिनी ॥
चीलिका, स्त्री, (चीरिका+रस्य लत्वे साधुः ।)
चीरिका । झिल्ली । इति शब्दरत्नावली ॥
चील्लका, स्त्री, (चीलिका+पृषोदरात् साधुः ।
चीलिति शब्देन लक्ष्यते इति । लक्ष+घञ् । ततः
पृषोदरादित्वात् साधुः इति वा ।) झिल्ली ।
इति शब्दरत्नावली ॥
चीव, ऋ न गतौ । संवृतौ । इति कविकल्प-
द्रुमः ॥ (भ्वां उभं-सकं-सेट् ।) ऋ, अचिचीवत् ।
न, चीवति चीवते वस्त्रकं भिक्षुः । यज्ञाति
परिदधाति वेत्यर्थः । इति दुर्गादासः ॥
चीव, क्र दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-
परं-अकं-सेट् ।) क, चीवयति । इति दुर्गा-
दासः ॥
चीवरं, क्ली, (चीयते तन्तुसन्तानैरिति । चि+
"चिवरच्छावरधीवरेति ।" उणां । ३ । १ ।
इति वरच् । निपातनात् धातोर्दीर्घत्वे साधुः ।)
भिक्षुवस्त्रम् । इत्यादिकोषः ॥ (यथा, महा-
भारते । १ । ६१ । १२ ।
"अनग्निरनिकेतश्चाप्यगोचरगतो मुनिः ।
कौपीनाच्छादनं यावत्तावदिच्छेच्च चीवरम् ॥")
चीवरी, [न्] पुं, (चीवरं अस्त्यस्येति । इनिः ।)
बुद्धभिक्षुकः । इति त्रिकाण्डशेषः ॥
चुक्क, क अर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरां-
परं-सकं-सेट् ।) कोपधः पञ्चमस्वरमध्यः ।
अग्निः पौड़नम् । क, चुक्कयति शूलं शूरः ।
इति दुर्गादासः ॥
चुक्कारः, पुं, (चुक्क+भावे अप् । चुक्कं पौड़नं
आराति सम्यक् ददातीति । सिंहनादश्रवणेन
भीरूणां भयजनकत्वात्तथात्वम् । आ+रा+
कः ।) सिंहनादः । इति त्रिकाण्डशेषः ॥
चुक्रं, क्ली, (चक्यते क्षय्यतेऽनेन इति । चक+"चकि-
रम्योरुचोपधायाः ।" उणां । २ । १४ । इति
रक् उपधाया उच्च ।) अम्लद्रव्यविशेषः । महादा
इति ख्यातम् । तत्पर्य्यायः । तिन्तिड़ीकम् २
वृक्षाम्लम् ३ । इत्यमरः । २ । ६ । ३५ ॥ चुक्र-
कम् ४ । इति शब्दरत्नावली ॥ महाम्लम् ५ ।
इति जटाधरः ॥ (अम्लवृक्षकम् ६ । इति भाव-
प्रकाशः । १ । १ ॥) मत्स्यशाकविशेषः । चुक इति
भाषा ॥ तत्पर्य्यायः । चुक्रवास्तूकम् २ तिक्त-
पत्रम् ३ अम्लवास्तुकम् ४ दशाम्लम् ५ अम्ल-
शाकाख्यम् ६ अम्लादि ७ हिलमोचिका ८ ।
अस्य गुणाः । अम्लपत्रत्वम् । लघुत्वम् । उष्ण-
त्वम् । वातश्लेष्मनाशित्वम् । रुच्यत्वं वातपित्त-
कारित्वम् । पथ्यत्वम् । तत्पर्य्यायगुणाः ।
"चुक्रिया स्यात्तु पत्राम्ला रोचनी श्रुतवेधिनी ।
चुक्रा लम्बतरा स्वादी वातघ्नी कफपित्तकृत् ॥
रुच्या लघुतरा पाके तृष्णाके नातिरोचनी ॥"
इति भावप्रकाशः ॥ * ॥
("चुक्रमत्यम्लसुरुच्यं दीपनं पाचनं परम् ।
शूलगुल्मविबन्धामवातश्लेष्महरं परम् ॥
वमिष्ठ्यास्यवैरस्यकृत्तृपीड़ाबह्निमान्द्यकृत् ॥"
इति शब्दार्थचिन्तामणिधृतवैद्यकम् ॥)
काञ्जिकप्रभेदः । तत्पर्य्यायः । सहस्रवेधम् २
रसाम्लम् ३ चुक्रवेधकम् ४ शाकाम्लभेदनम् ५
चन्द्रम् ६ अम्लसारम् ७ चुक्रिका ८ । अस्य
गुणाः । तिक्तत्वम् । अम्लत्वम् । स्वादुत्वम् ।
कफपित्तनाशिकारोगदुर्गन्धग्निरोरोगनाशित्वञ्च ।
इति राजनिर्घण्टः ॥*॥ सन्धानवर्गविशेषः । यथा,
"यव्यक्षादिघृतौ भार्ङ्गे सगुड़ञ्चौद्रकाञ्जिकम् ।
धान्यराशौ चिरात्तप्तं युक्तं चुक्रं तदुच्यते ॥
द्विगुणं गुड़मध्वारवालमस्तु क्रमादिह ॥"
इति परिभाषा ॥
(अस्य लक्षणं यथा,—
"विनष्टे संहितो यस्तु तच्चुक्रमभिधीयते ॥"
इति शार्ङ्गधरे मध्यखण्डे दशमेऽध्याये ॥)
चुक्रः, पुं, (चक्यते क्षय्यतेऽनेनेति । चक+रक् उप-
धाया उच्च ।) अम्लः । अम्लवेतसः । इति विश्वः ॥
चुक्रकं, क्ली, (चुक्र+संज्ञायां कन् ।) शाक-
विशेषः । चुकापालङ्ग इति भाषा ॥ अस्य
गुणाः । दुर्जरत्वम् । भेदकत्वम् । वायुनाशि-
त्वम् । पित्तकारित्वम् । गुरुत्वञ्च । इति राज-
वल्लभः ॥ (चुक्रार्थे स्वार्थे कन् ॥)
चुक्रफलं, क्ली, (चुक्रमेव फलं यस्य । चुक्रं फलति
वा । फल+अच् ।) वृक्षाम्लम् । इति राज-
निघण्टः ॥ (वृक्षाम्लशब्देऽस्य विशेषो ज्ञातव्यः ॥)
चुक्रा, स्त्री, (चुक्रः अम्लत्वं विद्यतेऽस्या इत्यच्
टाप् च ।) चाङ्गेरी । इति मेदिनी । रे, ३५ ॥
आमरुल इति भाषा ॥ (अस्या गुणा यथा,—
"चुक्रा लम्बतरा स्वादी वातघ्नी कफपित्तकृत् ।
रुच्या लघुतरा पाके तृष्णाके नातिरोचनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तिन्तिड़ी । इति शब्दरत्नावली ॥ (यथास्याः
पर्य्यायाः भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"अम्लिका चुक्रिकाम्लौ च चुक्रा दन्तशठापि च ।
अम्ला च विम्बिका चिञ्चा तिन्तिड़ीका च
तिन्तिड़ी ॥")
चुक्राम्लं, क्ली, (चुक्रमिव अम्लम् । चुक्रवदम्लोऽत्र
इति वा ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥
(वृक्षाम्लशब्दे विदतिरस्य ज्ञेया ॥)
चुक्राम्ला, स्त्री, (चुक्रमिव अम्लः अम्लं विद्यते-
ऽस्याः । अच् टाप् च ।) अम्लवेतसिका ।
चिञ्चा । काञ्जिकभेदः । इति राजनिर्घण्टः ॥
चुक्रिका, स्त्री, (चुक्रो विद्यतेऽस्मिन् इति । ठन्
टाप् च ।) अम्लवेतसिका । इत्यमरः । २ । ४ ।
१४० ॥ (अस्याः पर्य्याया यथा, भावप्रकाशे ।
"चाङ्गेरी चुक्रिका दन्तशठाम्लवेतसिका ।
अम्लकन्तु शफरी कुशली चाम्लपत्रकः ॥")
कुचाङ्गेरी । इति रत्नमाला ॥ चुकापालङ्ग
इति भाषा ॥ (यथास्याः पर्य्यायाः ।
"चुक्रिका स्यात्तु पत्राम्ला रोचनी श्रुतवेधिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
तिन्तिड़ी । तत्पर्य्याया यथा, तत्रैव ।
"अम्लिका चुक्रिकाम्लौ च चुक्रा दन्तशठापि च ॥
अम्ला च विम्बिका चिञ्चा तिन्तिड़ीका च
तिन्तिड़ी ॥")
चुचुकं, क्ली, (चुचु इत्यव्यक्तशब्देन कायति पान-
काले इति । के+कः ।) कुचाग्रम् । तत्-
पर्य्यायः । चूचुकम् २ चुचूकम् ३ । इति शब्द-
रत्नावली ॥ कुचाननम् ४ । पुंलिङ्गोऽपि । इति
रत्नकोषः ॥ स्तनवृन्तम् ५ । इत्यमरटीकायां
भरतः ॥ (देशविशेषे तद्देशवासिषु च पुं । यथा,
महाभारते । १२ । २०७ । ४२ ।
"दक्षिणापथजञ्चान: सर्व्वे नरवरान्वयाः ।
गुहाः पुलिन्दाः शबराश्चुचुका मद्रकैः सह ॥")
चुच्चुः, पुं, सुनिरुद्धशाकम् । इति त्रिकाण्डशेषः ॥
चुचूकं, क्ली, (चुचुक+पृषोदरादित्वात् दीर्घः ।)
चुचुकम् । इति शब्दरत्नावली ॥
चुच्छ, ई अभिषवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
अकं-सकच्छ-सेट् ।) तालव्यवर्गादिरुपधः । पच्छ-

मखरी। ङ्, चुक्तः। यङ्यान्तोऽयमित्येके। अभिषवः, आसवं मद्यमं पीड़नं सन्धानञ्च। इति दुर्गादासः॥

चुचुः, पुं, छुछुन्दरिः। इति शब्दरत्नावली। ८३॥ (सङ्करजातिविशेषः। यथा, मनुः। १०। ४८।
"मेदान्ध्रचुचुमद्गूगामारग्यपशुहिंसनम्॥"
"चुचुर्मद्गुश्च वैदेहकवन्दिक्षियोर्व्रात्यक्षत्रियात् जातौ बौधायनेनोक्तौ बोडचौ।" इति तट्टीकायां कुल्लूकभट्टः॥ आकारश्चोक्तप्रत्ययविशेषः। स तु प्रसिद्धार्थे भवति। यथा, विद्यया वित्तो विद्याचुचुः। इति सिद्धान्तकौमुदी॥ स्त्री, उड्डिञ्चविशेषः। चेचुरा इति लोके। गाड़ीचवत्। अस्या पर्य्यायो गुणाश्च यथा,—
"चिञ्चा चञ्चुश्चुकी च दीर्घपत्रा सतिक्तका।
चुचुः शीता सरा बल्या स्वादुः दोषत्रयापहा।
धातुपुष्टिकरी बल्या मेध्यपिच्छिलका स्मृता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"शुक्लवर्णाया चुचोर्वा लोहिकाया रसैरपि॥"
इति वाभटे चिकित्सास्थाने नवमेऽध्याये॥)

चुचुरी, स्त्री, (चुचुरिव रातीति। रा+कः। स्त्रियां ङीप्।) तिन्तिड़ीवृक्षः। काँरवीचिर खेजा इति भाषा॥

चुचुली, स्त्री, (चुचुरी। स्वार्थे लत्वम्।) तिन्तिड़ीकास्थिभिर्द्भूतक्रीड़ा। इति शब्दरत्नावली। ६२॥

चुट, तुच्छने। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-सेट्।) पञ्चमस्वरी। तुच्छनमल्पीभावः। चोटति नदी ग्रीष्मे। इति दुर्गादासः॥

चुट, ट तुच्छने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) पञ्चमस्वरी। तुच्छनमल्पीभावः। ट, चुण्टते नद्या ग्रीष्मे। इति दुर्गादासः॥

चुट, ट क छेदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) पञ्चमस्वरी। ट क, चुण्टयति धान्यं लोकः। इति दुर्गादासः॥

चुट, क श्नि छेदे। इति कविकल्पद्रुमः। (चुरां-तुदां-पर-सकं-सेट्।) क, चोटयति। श्नि, चुटति अचुटीत्। इति दुर्गादासः॥

चुड्, क तुच्छने। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) ङिदयान्तः। पञ्चमस्वरी। एकटकार इति रामः। तुच्छनमल्पीभावः। क, चुड्डयति नदी ग्रीष्मे। इति दुर्गादासः॥

चुड, ट तौच्छ्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ट, चुण्डते। तौच्छ्यमल्पीभावः। इति दुर्गादासः॥

चुड, ट क छिदि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) ट क, चुण्डयति। इति दुर्गादासः॥

चुड, ट क रोषे। (चुरां-परं-अकं-सेट्।) ट क, चुण्डयति। इति दुर्गादासः॥

चुड, ट ड रोषे। (भ्वां-आत्मं-अकं-सेट्।) ट, चुण्डते। ड, चुडते। इति दुर्गादासः॥

चुड्, क्षतौ। हावे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकं च-सेट्।) टवर्गलतीयोपधः। क्विपि संयोगान्तलोपे चुड्। कातन्त्रादौ हावकरण इत्येकोऽर्थो दृश्यते। अमी हावाः क्रियाः शृङ्गारभावजाः। इत्यमरः। भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते। इति साहित्यदर्पणम्। चुडति कान्ताधवा कान्तः। इति दुर्गादासः॥

चुण, शि छिदि। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) शि, चुणति अचुणीत् चुचोण। इति दुर्गादासः॥

चुण्टा, स्त्री, (चुण्टतेऽसाविति। चुण्ट छेदे+घञ्। यन्त्रिकाखननेन जायमानत्वात्तथात्वम्।) कूपः। इति त्रिकाण्डशेषः॥

चुण्टी, स्त्री, कूपः। इति त्रिकाण्डशेषः॥ उपकूपम्। कूप समीपे खल्पजलाधारः। इति हेमचन्द्रः॥

चुत, ऐर् क्षरे। इति कविकल्पद्रुमः॥ (भ्वां-परं सकं सेट्। अकं-इति केचित्।) ऐर्, अचुतत् अचोतीत्। क्षर ऐह आसेचनम्। चोतति क्षतं वह्नौ यज्वा आसिञ्चतीत्यर्थः। इति दुर्गादासः॥

चुतः, पुं, (चोतति क्षरति मलश्लेष्मशोणितादिर्यस्मात्। चुत+घञर्थे कः।) गुदद्वारम्। इति शब्दरत्नावली॥

चुतिः, स्त्री, (चोतति क्षरति मलश्लेष्मशोणितादिर्यस्मात्। चुत+"सर्व्वधातुभ्य इन्।" उणां ४।११७। इति इन्।) गुदद्वारम्। इति शब्दरत्नावली॥

चुद्, क तुदि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) तुदि प्रेरणे। क, चोदयति वाणं चापः। इति दुर्गादासः॥

चुद्ड, क्षतौ। हावे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकं च-सेट्।) तवर्गलतीयोपधः। क्विपि संयोगान्तलोपे चुद्। कातन्त्रादौ हावकरण इत्येकोऽर्थो दृश्यते। अमी हावाः क्रियाः शृङ्गारभावजाः। इत्यमरः। भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते। इति साहित्यदर्पणम्। चुडति कान्ताधवा कान्तः। इति दुर्गादासः॥

चुन्दी, स्त्री, (चोदयति प्रेरयति घटयतीत्यर्थः। गायकादीनिति। चुद+कः। निपातनात् नुमागमः। ततः स्त्रियां ङीप्।) छुछुन्दरी। इति हेमचन्द्रः। ३। १६०॥

चुप, ऐर् शौटौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) चोपति खड्गः। चोपति दुष्टं राजा। इति रमानाथः। इति दुर्गादासः॥

चुब, ऐ कि चुम्बने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) चुम्बनं सुखसंयोगः। ऐ, चुम्बयते। कि, चुम्बयति चुम्बति कान्ताधरं कामी। प्रियासुखं किम्पुरुषश्चुम्बे॥ इति यतीहारे आत्मनेपदम्। इति दुर्गादासः॥

चुम्बं, क्ली, (चुम्बतेऽनेनाच वा। भावे चुम्बने +"अन्येभ्योऽपीति।" उणां। २। २८। इति रप्रत्ययो नकारलोपश्च।) वदनम्। इत्युणादिकोषः॥

चुम्बकः, पुं, (चुम्बति आकर्षति लौहमिति। चुम्ब+ण्वुल्।) कान्तलोहभेदः। तत्पर्य्यायः। कान्तपाषाणः २ अयस्कान्तः ३ लोहकर्षकः ४। अस्य गुणाः। लेखनत्वम्। शीतत्वम्। मेदोविषगरापहत्वञ्च। इति भावप्रकाशः॥ (विशेषोऽस्य कान्तलोहशब्दे ज्ञेयः॥) घटस्योर्द्धावलम्बनम्। इति मेदिनी। के, ८६॥

चुम्बकः, त्रि, (चुम्बतीति। चुम्ब+ण्वुल्। चुम्बनपरः। धूर्त्तः। बहुग्रन्थेकदेशज्ञः। इति मेदिनी। के, ८६।

चुम्बनं, क्ली, (चुम्ब+कि ल्युट्।) सुखसंयोगः। चुमा इति भाषा॥ तस्य स्थानानि यथा, कामशास्त्रे।
"सुखे स्तने ललाटे च कण्ठे च नेत्रयोरपि।
गण्डे च कर्णयोश्चैव कपोलभगमर्द्दने।
चुम्बनस्थानमित्युक्तं विज्ञेयं कामुकैरिह॥"

चुर, कि क्षेपे। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) कि, चोरयति चोरति धनं चौरः। इति दुर्गादासः॥

चुरा, स्त्री, (चुर+बाहुलकात् कः। स्त्रियां टाप्।) चौर्य्यम्। इति शब्दरत्नावली॥

चुरी, स्त्री, (चुर+कः। स्त्रियां ङीप्।) उपकूपम्। कूपसमीपस्थाल्पजलाधारः। इति हेमचन्द्रः। ४। १५६॥

चुलुकं, क्ली, (चोलयतीति। चुल+बाहुलकात् उकञ्।) मांसमज्जनजलम्। यथा। मांसमज्जनजलमात्रामं तच्चुलुकमिति मद्दोपनिषत्॥

चुलुकः, पुं, (चोलयति उन्नतो भवतीति। चुल उन्नतौ+बाहुलकात् उकञ्।) घनपङ्कः। इति त्रिकाण्डशेषः॥ प्रस्रुतिः। भाण्डप्रभेदः। इति हेमचन्द्रः॥

चुलुकी, [न्] पुं, (चुलुक ऊर्द्धोन्नतिर्विद्यतेऽस्य। चुलुक+इनिः।) शिशुमाराकृतिमत्स्यः। इति शब्दरत्नावली॥ (यथा, वाभटे सूत्रस्थाने।६।५८।
"चुलुकी नक्रमकरशिशुमारतिमिङ्गिलाः।
राजीपिलिचिमाद्याश्च मांसमित्याकुरुद्धरा॥")

चुलुम्प, लोपे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) अन्तःस्थलतीयमध्यः। पञ्चमस्वरद्वयी। ओष्ठवर्गशेषोपधः। चुलुम्पति। यगादौ चुलुम्प्यते इत्यादि। न तु नकारजावनुस्वारपञ्चमाविति स्वरसाम्प्रकृतित्वे यगादौ तल्लोप इति वाच्यम्। तर्हि नोपधस्थैव पठितुमुचितत्वात्। एवं सति अङ्कादीनां न प्रकृतित्वेऽपि ङमध्यपाठः कथमिति चेन्न। ते तु कस्यचिन्मते ङमध्या एवेति ज्ञापनाय ङमध्याः पठिताः। न च तर्हि इदित् पाठोऽपौरुषेयत्वादिति वाच्यम्। क्विपि संयोगान्तलोपे इदितपाठे चुलुम् चुलुम्प लोपे चुलुम् इति भेदात्। एवं सर्व्वत्र। इति दुर्गादासः॥

चुलुम्पः, पुं, (चुलुम्प्यते इति चुलुम्पनमिति वा। चुलुम्प+भावे घञ्।) वाजलालनम्। इति जटाधरः॥

चुलुम्पा, स्त्री, (चुलुम्पति चञ्चला भवतीति। चुलुम्प+अच्। स्त्रियां टाप्।) छागी। इति चिकाण्डशेषः॥

चुलुम्पी, [न्] पुं, (चुलुम्पो लौल्यं चञ्चलता इत्यर्थः। सोऽस्यास्तीति। इनिः।) शिशुमाराकृतिमत्स्यः। उत्पलमत्स्यः। इति कश्चित्। इति शब्दरत्नावली॥

चुल्ल, हावक्रतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) पञ्चमस्वरी लङ्यान्तः। एकोऽर्थः। चुल्लन्ति चारुनयनाश्च सह प्रियेणेति हलायुधः। इति दुर्गादासः॥

चुल्लः, पुं, क्लिन्नचक्षुः। (क्लिन्ने चक्षुषी अस्य। "चुल् च।" ५।२।३३। इत्यस्य वार्त्तिकोक्त्या क्लिन्नस्य चुलादेशो लप्रत्ययश्च।) तदयुक्तेत्रि। इति हेमचन्द्रः। ३। १२५॥

चुल्लकी, स्त्री, (चुल्लति हावभावेन क्रीड़तीति। चुल्ल+ण्वुल्। गौरादित्वात् ङीष्।) शिशुमारः। कुक्षीभेदः। कुलविशेषः। इति मेदिनी शब्दरत्नावली च॥

चुल्लिः, स्त्री, (चुल्लते प्रज्वाल्यते अग्निरत्र। चुल्ल+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्। यद्वा, चुल्यते प्रेर्य्यते अग्नियत्र। चुद्+बाहुलकात् लिक्।) पाकार्थमग्निस्थानम्। चुल्ला इति आखा इति च भाषा॥ तत्पर्य्यायः। अङ्गन्तम् २ उद्धानम् ३ अधिश्रयणी ४ अन्तिका ५। इत्यमरः। २। ६।२६॥ अङ्गन्तम् ६ उधानम् ७ उद्धारम् ८ चुल्ली ९ आन्दिका १०। इति तट्टीका॥ उद्धानिः ११। इति शब्दरत्नावली॥

चुल्लो, स्त्री, (चुल्लि+"कृदिकारादक्तिनः।" ४। १। ४५। इत्यस्य वार्त्तिकोक्त्या वा ङीष्।) चिता। उद्धानम्। इति मेदिनी। ले, १७॥ (यथा, मनुः। ३। ६८।

"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्॥")

चुल्लं, क्ली पुं, वृक्षम्। तत्तु मांसपिण्डकविशेषः॥ स्थालीभृष्टमांसम्। पनसादिफलस्यासारभागः। इति लिङ्गादिसंग्रहटीकायां भरतः॥ भोता इति ख्यातः॥

चूचुकं, क्ली पुं, (चूष्यते पीयते इति। चूष पाने+बाहुलकात् उकः। यस्य चत्वच।) चुचुकम्। इत्यमरटीकायां भरतः॥ (यथा, रामायणे। ६। २३। १३।

"स्तनौ च विरलौ पीनौ समौ मे मग्नचूचुकौ॥")

चूड़कः, पुं, (चुडति अल्पीभवतीति। चुड़+ण्वुल् ततो निपातनात् दीर्घत्वे साधुः।) कूपः। इति चिकाण्डशेषः॥

चूड़ा, स्त्री, (चोलयति मस्तकादुपरि उन्नता भवतीति। चुल क् उन्नतौ+भिदादित्वाड्ड ततो दीर्घस्तोलस्य ड़त्वे साधुः।) मयूरशिखा। शिरोमध्यशिखामात्रम्। तत्पर्य्यायः। शिखा २। इत्यमरः। २। ५। ३२॥ केशपाशौ ३। जूटिका ४ जुटिका ५। यथा, शब्दरत्नावल्याम्।

"शिखा चूड़ा केशपाशौ जूटिका जुटिकेत्यपि।
शिरोमध्यवर्त्तिचूड़े भवेदेतत्तु पञ्चकम्॥"

वड़भी। वाहुभूषणम्। इति मेदिनी। ड़े, १३॥ अग्रम्। इति हेमचन्द्रः॥ (यथा, हितोपदेशे।

"अस्त्राघलचूड़ालम्बिनि भगवति चन्द्रमसि॥")

कूपः। इति चिकाण्डशेषः॥ दशसंस्कारान्तर्गतसंस्कारविशेषः। यथा। चूड़ा कार्य्या यथाकुलमिति मलमासतत्त्वम्॥ (यथाच,—

"अयुग्माब्दे तथा मासि चूड़ा भौमशनीतरे।
अर्केन्दुकालशुद्धौ च जन्ममासेऽष्टभाद्यते॥
रिक्तादर्शाष्टमीषष्ठीप्रतिपद्वर्ज्यिते सिते॥"

इति संस्कारतत्त्वधृतज्योतिषवचनम्॥

अस्य विशेषविवरणं चूड़ाकरणशब्दे द्रष्टव्यम्॥)

चूड़ाकरणं, क्ली, (चूड़ायाः करणं कर्म्म।) दशसंस्कारान्तर्गतसंस्कारविशेषः। तस्य क्रमो यथा। कुलाचारवशात् प्रथमे तृतीये वा वर्षे चूड़ाकरणं कर्त्तव्यम्। तत्र प्रथमं प्रातःस्नातस्नातः स्नातदृद्धिश्राद्धः पिता सत्यनामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कृत्वाग्निकां समाप्याग्नेर्दक्षिणत एकविंशतिदर्भपिञ्जलीः सप्तसप्तभिरेकीकृत्य कुशान्तरेण वेष्टयित्वा उष्णोदकसहितं कांस्यपात्रं ताम्रनिर्म्मितक्षुरं तदभावे दर्पणं वा लौहक्षुरपात्रञ्च नापितं स्थापयेत् अग्नेरुत्तरतो वृषगोमयं तिलतण्डुलमाषसिद्धञ्च शरावं अग्नेः पूर्ब्बतो मिश्रितव्रीहियवतिलमाषपूरितपात्रत्रयं स्थापयेत्। माता शुचिना वस्त्रेण कुमारमाच्छाद्य क्रोड़े निधाय अग्नेः पश्चिमतो भर्त्तुर्व्वामपार्श्वे उत्तराग्रेषु कुशेषु प्राङ्मुखी उपविशति। ततः पिता प्रकृतकर्म्मारम्भे प्रादेशप्रमाणौ घृताक्तौ समिधं तूष्णीमग्नौ हुत्वा यत्तसमस्तमहाव्याहृतिहोमं कुर्य्यात्। प्रजापतिर्ऋषिर्गायत्री छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः। ओँ भूः स्वाहा। प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः। ओँ भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप् छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः। ओँ स्वः स्वाहा। प्रजापतिर्ऋषिर्बृहती छन्दः प्रजापतिर्देवता यत्तसमस्तमहाव्याहृतिहोमे विनियोगः। ओँ भूर्भुवः स्वः स्वाहा। ततः पिता उत्थाय प्राङ्मुखः कुमारस्य मातुः पश्चादवस्थितः क्षुरपात्रं नापितं पश्यन् तमेव सवितृरूपं ध्यायन् जपति। प्रजापतिर्ऋषिः सविता देवता चूड़ाकरणे विनियोगः। ओम् आयमगात् सविता क्षुरेण। तत उष्णोदकसहितं कांस्यपात्रं पश्यन् वायुं मनसा ध्यायन् जपति। प्रजापतिर्ऋषिर्वायुर्देवता चूड़ाकरणे विनियोगः। ओँ उष्णेन वाय उदकेनैधि। ततः कांस्यपात्रस्थितोष्णोदकेन दक्षिणहस्तगृहीतेन दक्षिणकपुञ्जिकामन्त्रेण मन्त्रेण क्लेदयति। कपुञ्जिकाशब्देन दक्षिणोत्तरतः शिखास्थानादधः शिरसः कर्णाभिसुखोच्चदेशः उच्यते। ततः प्रजापतिर्ऋषिरापो देवता चूड़ाकरणे विनियोगः। ओम् आप उदन्तु जीवसे। ततस्ताम्रक्षुरं तदभावे दर्पणं वा पश्यन् जपति। प्रजापतिर्ऋषिर्विष्णुर्देवता चूड़ाकरणे विनियोगः। ओँ विष्णोर्दंष्ट्रोऽसि। ततः कुशत्रयसमदर्भपिञ्जलीर्गृहीत्वा क्षिप्तदक्षिणकपुञ्जिकादेशे अनेन मन्त्रेण ऊर्द्धमूला निदध्यात्। प्रजापतिर्ऋषिरोषधिर्देवता चूड़ाकरणे विनियोगः। ओम् ओषधे त्रायस्वैनम्। ततो वामहस्तगृहीतकुशपिञ्जलीसहितकपुञ्जिकादेशे स्वदक्षिणहस्तगृहीतताम्रक्षुरं दर्पणं वा अनेन मन्त्रेण निदध्यात्। प्रजापतिर्ऋषिः खधितिर्देवता चूड़ाकरणे विनियोगः। ओँ खधिते मैनं हिंसीः। ततः केशच्छेदो यथा न भवति तथा ताम्रक्षुरं दर्पणं वा तत्रैव कपुञ्जिकादेशे अनेन मन्त्रेण प्रेरयेत्। प्रजापतिर्ऋषिः पूषा देवता चूड़ाकरणे विनियोगः। ओँ येन पूषा बृहस्पतेर्वायोरिन्द्रस्य बाहवपत्तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय बलाय वर्च्चसे। तूष्णीं वारत्रयम्। ततो लौहक्षुरेण दक्षिणकपुञ्जिकादेशस्य केशं क्षित्वा दर्भपिञ्जलीसहितकेशस्य बालमिश्रविधृतपात्रस्थदृषगोमयोपरि निधानं कुर्य्यात्। ततः कपुच्छलदेशस्य कांस्यपात्रस्थितोष्णोदकेन दक्षिणहस्तगृहीतेन पूर्ब्ववदेव आप उन्दन्तु जीवसे इत्यनेन मन्त्रेण क्लेदनं ओँ विष्णोर्दंष्ट्रोऽसि इत्यनेन ताम्रक्षुरस्य दर्पणस्य वा प्रेरणं ओम् ओषधे त्रायस्वैनं इत्यनेन कपुच्छलदेशे ऊर्द्धमूलदर्भपिञ्जलीनिधानं ओँ खधिते मैनं हिंसीरित्यनेन ताम्रक्षुरस्य दर्पणस्य वा कपुच्छलदेशे निधानं ओँ येन पूषा बृहस्पतेरित्यनेन पूर्ब्वाभिमुखं ताम्रक्षुरप्रेरणं लौहक्षुरेण कपुच्छलदेशस्य केशं क्षित्वा दर्भपिञ्जलीसहितकेशस्य बालमिश्रविधृतपात्रस्थदृषगोमयोपरि निधानं कुर्य्यात्। कपुच्छलशब्देन पश्चिमतः शिखास्थानादधःशिरसो नापितक्रोड़ाभिमुखोच्चदेशोऽभिधीयते। तथैव वामकपुञ्जिकाभावनादिच्छेदनपूर्ब्वकं दृषगोमयोपरिदेशे निधानान्तं पूर्ब्ववत् सर्व्वं कुर्य्यात्। ततः कुमारस्य शिरः पार्श्वियास्पृशन् जपति। प्रजापतिर्ऋषिर्विष्णुश्चिक् छन्दो जमदग्निकश्यपागस्त्यादयो देवताश्चूड़ाकरणे विनियोगः। ओँ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं अगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्नोऽस्तु त्र्यायुषम्। ततोऽग्नेरुत्तरदेशं नीत्वा पुण्याद्बलद्भृतो नापितः कुमारं सुखयति। सर्व्वमेव केशं दृषगोमयोपरि निधायारण्ये वंशविटपे स्थापयेत् ततः पूर्ब्ववत् यत्तसमस्तमहाव्याहृतिहोमं हुत्वा तूष्णीं प्रादेशप्रमाणघृताक्तसमित्प्रक्षेपान्तप्रकृतं कर्म्म समाप्य उदीच्यं प्राचार्य्यानहोमादिवामदेवगानान्तं कर्म्म निर्व्वर्त्य कर्म्मकारयितृब्राह्म-

लाय दक्षिणां दद्यात्। क्षुरघान्ययवतिलमाषशूरावान् नापिताय दद्यात्। इति चूड़ाकरणं समाप्तम्॥" इति भवदेवभट्ट:॥

चूड़ामणि:, पुं, (चूड़ा शिरोभूषणं मुकुटकिरीटादिकम्। तत्र स्थितो मणि:। शाकपार्थिवादित्वात् समास:।) शिरोरत्नम्। (यथा, महाभारते। १। ११६। ३८।

"ततश्चूड़ामणिं निष्कमङ्गदे कुण्डलानि च॥"

चूड़ायामयभागे मणिरिव यस्य।) काकचिञ्चाफलम्। इति मेदिनी। णे, ६४॥ योगविशेष:। (स तु ग्रहणकाले एव भवति।) यथा गारुड़े।

"सूर्य्यग्रह: सूर्य्यवारे सोमे सोमग्रहस्तथा।
चूड़ामणिरयं योगस्तत्रानन्तं फलं स्मृतम्।
अन्यस्मादृग्रहणात् कोटिगुणमत्र फलं लभेत्॥"

इति तिथ्यादितत्त्वम्॥

शुभाशुभगणनाविशेष:। तस्य विवरणं गरुड़पुराणे २०५ अध्याये द्रष्टव्यम्॥ * ॥ वङ्गदेशीयपण्डितोनासुपाधिश्च॥

चूड़ाम्बं, क्ली, (चूड़ायां अग्रभागे अम्बो यस्य।) इक्षुदण्डम्। इति राजनिर्घण्ट:॥

चूड़ालं, क्ली, (चूड़ा अस्त्यस्य। "प्राणिस्थादातो लजन्यतरस्याम्।" ५। २। ६६। इति लच्।) मस्तकम्। इति शब्दरत्नावली॥ चूड़ायुक्ते च। इति हेमचन्द्र:॥ (यथा, महाभारते। १०। ७। ३७।

"चूड़ाला: कर्त्तिकाराश्च प्रवृद्धा: पिठरोदरा:॥")

चूड़ाला, स्त्री, (चूड़ा शिखा अस्त्यस्या:। "प्राणिस्थादातो लजन्यतरस्याम्।" ५। २। ६६। इति लच्। ततोऽजादित्वात् टाप्।) उच्चटाख्यम्। इत्यमर:। २। ४। १६०॥ श्वेतगुञ्जा। नागरमुस्ता। इति राजनिर्घण्ट:॥

चूड़ावान्, [त्] (चूड़ा अस्त्यस्य। चूड़ा+मतुप्। मस्य वत्वम्।) चूड़ाविशिष्ट:। इति चूड़ालाशब्दार्थे मेदिनी। ले, ६०॥

चूण, क सङ्कोचे। इति कविकल्पद्रुम:॥ (चुरां-परं-अकं-सेट्।) तालव्यवर्गादि:। षष्ठस्वरी। क, चूणयति चक्षु: सङ्कुचितं स्यादित्यर्थ:। इति दुर्गादास:॥

चूत:, पुं, (चूष्यते पीयते इति। चूष+कर्म्मणि क्त:। पृषोदरादित्वात् धलोप:। रसालत्वादेवास्य तथात्वम्।) आम्रवृक्ष:। इत्यमर:। २। ४। ३३॥ (यथा, रामायणे। ३। ७६। १७।

"परिपुष्पति संविश्य भ्रमरश्चूतमञ्जरीम्।
नवसङ्गमसंहृष्ट: कामी प्रणयिनीमिव॥"

चोतति चरति श्लोणितादिकमस्मादिति। चुत+चरणे+बाहुलकात् घञर्थे क:। दीर्घश्च।) गुदद्वारम्। इति शब्दरत्नावली॥ च्यूत इत्यपि पाठ:॥

चूतक:, पुं, (चूत एव। चूत+स्वार्थे कन्।) आम्र:। कूपक:। इति मेदिनी। के, ६०॥

चूर, इं ङ य दाहे। इति कविकल्पद्रुम:॥ (दिवां-आत्मं-सकं-सेट्। (दीर्घी। ङ य, चूर्य्यते वह्निरित्यनम्। इं, चूर्ण:। इति दुर्गादास:॥

चूर्ण, क पेषे। इति कविकल्पद्रुम:॥ (चुरां-परं-सकं-सेट्।) षष्ठस्वरी। पेषञ्चूर्णीकरणम्। क, चूर्णयति शिला। इति दुर्गादास:॥

चूर्ण, क्ली, (चूर्ण्यते पिष्यते यत्। चूर्ण+कर्म्मणि घञ्।) सम्पेषणेन जातरज:। तस्य लक्षणं यथा,—

"अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम्।
तत् स्याच्चूर्णं रज: क्षोदस्तन्मात्रा कर्षसम्मिता॥
चूर्णे गुड़: समो देय: शर्करा द्विगुणा मता।
चूर्णेषु भर्ज्जितं हिङ्गु देयं नोत्क्लेदलक्षवेत्॥
लिहेच्चूर्णं द्रवै: सर्व्वैर्घृताद्यैर्द्विगुणोल्बणै:।
पिबेच्चतुर्गुणैरेव चूर्णमालोड़ितं द्रवै:॥
चूर्णावलेहगुटिका कल्कानामनुपानकम्।
पित्तवातकफघ्नेन विल्वैकपलमाहरेत्॥"

इति भावप्रकाश:॥ * ॥

चूर्णौषधस्य पूर्ववीर्य्यं पक्षत्रयपर्य्यन्तं तिष्ठति। इति वैद्यकपरिभाषा॥

("कर्षचूर्णस्य कल्कस्य गुड़िकानाञ्च सर्व्वश:। द्रवशुक्ला स लेढव्य: पातव्यश्च चतुर्द्रव:॥" इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)

आवीर इति ख्यातम्। (यथा, मेघदूते। ७०।

"अर्चिस्तुङ्गानभिमुखगतान् प्राप्य रत्नप्रदीपान्
ह्रीमूढ़ानां भवति विफला प्रेरणा चूर्णमुष्टि:॥")

पटरसाच्चोद इत्यन्ये। इति भरत:॥ गन्धगुँड़ा इति ख्यातम्। इति सारसुन्दरी॥ तत्पर्य्याय:। वासयोग:। २। इत्यमर:। २।६।१३४॥ वासयुक्ति:। ३। इति मेदिनी। ने, १२॥ गन्धयुक्ति:। ४। इति भूरिप्रयोग:॥ पटयुक्ति:। ५। इति शब्दरत्नावली॥ (कुङ्कुमादिरज:। यथा, रघु:। ४। ५४।

"अलकेषु चमरीरुचूर्णप्रतिनिधीकृत:॥")

चूर्ण:, पुं, (चूर्ण्यते सम्पिष्यते इति। चूर्ण+कर्म्मणि घञ्।) सम्पेषणेन जातरज:। चूर इति गुँड़ा इति फाकि इति च भाषा॥ तत्पर्य्याय:। क्षोद:। २। इत्यमर:। २। ८। ६६॥ चूर्णम् ३ रज:। ४। इति भावप्रकाश:॥ (यथा, महाभारते। ६। ११८। ३।

"कन्याश्चन्दनचूर्णैश्च लाजैर्माल्यैश्च सर्व्वश:।
अवाकिरञ्छान्तनवं तत्र गत्वा सहस्रश:॥")

धूलि:। चारविशेष:। इति मेदिनी। ने, १२॥ चुण इति भाषा॥ (यथा,—

"पर्णानि शीर्णवर्णानि सीदन्त्यार्कर्णलोचने!।
चूर्णमानीयतां तूर्णं पूर्णचन्द्रनिभानने!॥")

श्लेष्मस्य गुण:। वातश्लेष्मभेदोनाग्निबल्यम्॥ शुद्धचूर्णस्य गुणा:। कटुत्वम्। चारत्वम्। उष्णत्वम्। क्रिमिनाशित्वञ्च। इति राजवल्लभ:॥

चूर्णकं, क्ली, (चूर्ण इव कायतीति। चूर्ण+के+क:।) गद्यविशेष:। यथा,—

"अपाद: पदसन्तानो गद्यं तत्तु त्रिधा मतम्।
चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदत:॥
अकठोराक्षरं स्वल्पसमासं चूर्णकं विदु:।
तत्तु वैदर्भरीतिस्थं गद्यं क्षुद्रसरं भवेत्॥

भवत्युत्कलिकाप्रायं समासाढ्यं दृढ़ाक्षरम्। वृत्तैकदेशसम्बन्धाद्वृत्तगन्धि पुन: स्मृतम्॥

चूर्णकं यथा। स हि त्रयाणामेव जगतां गति: परमपुरुष: पुरुषोत्तमो दमदानवभरेण भङ्गुराङ्गीमवनिमवलोक्य करुणार्द्रहृदयस्तस्या भारमवतारयितुं रामकृष्णस्वरूपेणांशतो यदुवंशे अवततार।" इति छन्दोमञ्जरी॥ (क्वचित् वृत्तकं इत्यपि दृश्यते॥)

चूर्णक:, पुं, (चूर्णै: कायते प्रकाश्यते इति। के+क:।) सक्तु:। इति त्रिकाण्डशेष:॥ (वष्टिक:। यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये। "वष्टिकाकुक्कुसकुन्दकपीतकप्रभेदककाकलकासनपुष्पकमहावष्टिकचूर्णककुरवककेदारकप्रभृतय: वष्टिका:॥") स्वार्थे कन्। चूर्णशब्दार्थेऽप्यत्र॥

चूर्णकार:, पुं, (चूर्णं चारविशेषं करोतीति। चूर्ण+कृ+"कर्म्मण्यण्।" ३। २। १ इत्यण्।) वर्णसङ्करजातिविशेष:। चूनरी इति भाषा॥ स नटकन्यायां पुक्कसकन्यातः। इति पराशरपद्धति:॥

चूर्णकुन्तल:, पुं, (चूर्णं वासयोगसदृशयुक्त: कुन्तल:। शाकपार्थिवादित्वात् समास:।) अलक:। इत्यमर:। २। ६। ६६॥

चूर्णखण्ड, क्ली, (चूर्णाय यत् खण्डम्।) कर्करम्। इति हारावली। २०८॥ काँकर इति घुटिं इति च भाषा॥

चूर्णपारद:, पुं, (चूर्ण: पारदस्य। एकदेशिसमास:। पारदजन्यतया एवास्य तथात्वम्।) हिङ्गुलम्। इति राजनिर्घण्ट:॥

चूर्णशाकाङ्ग:, पुं, (चूर्ण इव शुभ्र: शाकस्तमङ्गते सादृश्येन गच्छतीति। अङ्ग गतौ+अच्।) गौरसुवर्च्चशाकम्। इति राजनिर्घण्ट:॥

चूर्णि:, स्त्री, (चूर्णयति खण्डयति अशेषपण्डितानां तर्कमिति। चूर्ण+"सर्व्वधातुभ्य इन्।" उणा०। ४। ११७। इति इन्। यद्वा, "वृणिवृञ्भ्यामीदिति।" उणा०। ४। ५२। इति इ:।) सक्तु:। इति भूरिप्रयोग:॥

चूर्णिकृत्, पुं, (चूर्णिं महाभाष्यं करोतीति। कृ+क्विप्।) भाष्यकार:। इति त्रिकाण्डशेष:॥

चूर्णी, स्त्री, (चूर्णि:+"छन्दोनामादिकारादक्तिन:।" ४। १। ४५। इत्यस्य वार्त्तिकोक्त्या वा ङीष्।) कपर्दक:। इति मेदिनी। णे, १२। नदीविशेष:। सा राजाघाट्टाख्यग्रामसमीपे तिष्ठति॥

चूल:, पुं, (चोलयति पुन: पुन: छिद्येऽपि उत्तिष्ठतीति। चुल उन्नतौ+"इगुपधज्ञेति।" ३। १। १३५। इति क:। निपातनात् दीर्घ:। यद्वा, चूर्य्यते इति। चूर्+क:। रस्य लत्वम्।)

केशः। यथा। "सुक्तकेशाश्च चूलिनः।" इति लिङ्गपुराणम्॥

चूलकः, पुं, (चूल एव। चूल+स्वार्थे कन्।) केशः। यथा, मत्स्यसूक्ते ३८ पटले।
"गृहीतचूलको विप्रो म्लेच्छेन रजकादिना। प्राजापत्यद्वयं कुर्य्यात् शूद्रः कुर्य्यात्तु भागतः॥ सशिखं निर्व्वपेत् केशं घृते चान्त्यावसायिना। अन्त्यजेषु शिखावर्ज्जं शूद्रेरप्याङ्गुलित्रयम्॥"

चूला, स्त्री, (चूड़ा+इस्य लत्वम्।) चन्द्रशाला। गृहोपरिगृहम्। इति शब्दरत्नावली॥ चूड़ा च॥

चूलिकं, क्ली, (चोलयति गोधूमचूर्णं पिष्टकाकारेण उन्नयति उत्पादयतीत्यर्थः। चुल+णिच्+खुल्। पृषोदरात् दीर्घत्वे अत इत्वे च साधुः।) घृतभृष्टगोधूमचूर्णम्। इति शब्दचन्द्रिका॥ लूची इति भाषा॥

चूलिका, स्त्री, (चोलयति सन्निहितचर्म्ममांसराशिं उन्नयतीति। चुल+खुल्+कापि अत इत्वच। पृषोदरात् दीर्घत्वे साधुः।) हस्तिकर्णमूलम्। इत्यमरः।२।८।३८॥ नाटकाङ्गविशेषः। इति मेदिनी। के, ६०॥

चूष, पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) दीर्घौ चूषत्यास्यं लोकः। इति दुर्गादासः॥

चूषा, स्त्री, (चूष्यते यीयते पृष्ठमांसेनाऽश्रयतां नीयते इति। चूष+घञर्थे कः।) कक्षा। इत्यमरः। २। ८। ४२॥ काछदड़ी इति भाषा॥

चृत्, कि सन्दीपने। इति कविकल्पद्रुमः॥ (चुरां-परे भ्वां-परं-सकं-सेट्।) कि, चर्त्तयति। इति दुर्गादासः॥

चृत्, ग्र हिंसे। ग्रन्थे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, चृतति चर्त्तिता। ग्रन्थो ग्रन्थनम्। इति दुर्गादासः॥

चेटः, पुं, (चेटतीति। चिट् परप्रेषे+अच्।) दासः। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। ६। १२७।
"एतत्तस्य सुखाच्छ्रुत्वा राजचेटस्य दुर्म्मनाः॥" सतु भृङ्गारसहायः। यथा, साहित्यदर्पणे।३।४६।
"भृङ्गारस्य सहाया विटचेटविदूषकाद्याः स्युः॥")

चेटकः, पुं, (चेटति दासत्वं करोतीति। चिट+खुल्।) दासः। इत्यमरः। २। १०। १७॥ (यथा, कथासरित्सागरे। ६। १२४।
"आवाभ्यां राजहंसाख्य आहूतो राजचेटकः॥") उपपतिनायकभेदः। तस्य लक्षणं सन्धानचतुरः। इति रसमञ्जरी॥

चेटिका, स्त्री, (चेटी+स्वार्थे कन् टापि अत इत्वं पूर्व्वह्रस्वः। यद्वा चिट् खुल् टापि अत इत्वम्।) दासी। इति द्विरूपकोषः॥ (यथा, कथासरित्सागरे। ४। ५१।
"अङ्गीकुर्व्वन् स तन्मूढश्चेटिकाभिः प्रवेशितः॥")

चेटी, स्त्री, (चेट+ङीप्।) दासी। इति हेमचन्द्रः॥ (यथा, रामायणे। २। ६१। ६४।
"प्रेष्याश्चेट्यश्च वध्यश्च बलस्थाश्चापि सर्व्वशः॥")

चेड़ः, पुं, (चेटति परप्रेष्यत्वं करोतीति। चिट+अच्। टस्य ड़त्वञ्च।) दासः। इत्यमरटीकायां रमानाथः॥

चेड़कः, पुं, (चेटति इति। चिट+खुल्। टस्य ड़त्वम्।) दासः। इत्यमरटीका॥

चेड़िका, स्त्री, (चेड़क+टाप्। कापि अत इत्वम्।) दासी। इति द्विरूपकोषः॥

चेड़ी, स्त्री, (चेड़+ङीप्।) दासी। इत्यमरटीका॥

चेत्, व, (चित्+विच्।) याद। इत्यमरः। ३। ४। १२॥ (यथा, पद्मदशम्। ६। ४२।
"अन्यत्वकारकं सत्वमिति चेदन्यवारणम्। कूटस्थस्यात्मतां वक्तुरिष्टमेव हि तद्भवेत्॥"
पद्मान्तरम्। असन्देहेऽपि सन्देहवचनम्। यथा,
"सत्यचेदृगुरुवाक्यमेव पितरो देवाश्च चेद्-योगिनी
प्रीता चेत् परदेवता च यदि चेद्वेदाः प्रमाणं हि चेत्।
शास्त्रीयं यदि दर्शनं भवति चेदाम्नाय मोघास्मि चेत्
स्वातन्त्र्या अपि कौलिकाश्च यदि चेत् स्याम्मे जयः सर्व्वदा॥"
इति शब्दार्थचिन्तामणिधृतश्लोकः॥)

चेतः, [स्] क्ली, (चेतत्यनेन इति। चित्+करणेऽसुन्।) चित्तम्। इत्यमरः। १। ४। ३१॥ (यथा, पद्मदशम्। १। ५४। [यत्।
"ताभ्यां निर्व्विचिकित्सेऽर्थे चेतसः स्थापितस्य एकतानत्वमेतद्धि निदिध्यासनमुच्यते॥")

चेतकी, स्त्री, (चेतयते उन्मीलयति ज्ञानेन्द्रियबलादीनि। चित+खुल्। गौरादित्वात् ङीष्।) हरीतकी। इत्यमरः।२।४।५६॥ हिमाचलभवा त्रिशिरा हरीतकी। सा च सर्व्वरोगनाशिनी गन्धयुक्तत्रयकरणे प्रशस्ता। इति वैद्यकम्॥
("चेतकी द्विविधा प्रोक्ता आकाराङ्गर्णतस्तथा। षड़ङ्गुला हिता प्रोक्ता शुक्ला चैकाङ्गुला स्मृता॥ श्रेष्ठा कृष्णा समाख्याता रेचनार्थे जिगीषुणा। चेतकी वृक्षशाखायां यावत्तिष्ठति तां पुनः॥ भिन्दन्ति पशुपक्षाद्या नराणां कोऽत्र विस्मयः। चेतकीं यावद्धृत्य हस्ते तिष्ठति मानवः॥ तावद्विनश्यन्ति रोगांस्तु प्रभावान्नात्र संशयः॥" इति कल्पस्थाने प्रथमेऽध्याये हारीतेनोक्तम्॥ एतस्या उत्पत्तिगुणजात्यादिकं यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"पपात बिन्दुर्मेदिन्यां शक्रस्य पिबतोऽन्तकम्। ततो दिव्या समुत्पन्ना सप्तजातिर्हरीतकी॥ हरीतक्यभया पथ्या कायस्था पूतनाऽमृता। हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा॥ वयस्था विजया चापि जीवन्ती रोहिणीति च। विजया रोहिणी चैव पूतना चामृताऽभया॥ जीवन्ती चेतकी चेति पथ्यायाः सप्तजातयः। श्यामायुक्ता विजया वृत्ता सा रोहिणी स्मृता॥ पूतनास्थिमती रूक्षा कथिता मांसलाऽमृता। पञ्चरेखाऽभया प्रोक्ता जीवन्ती सर्व्ववर्णिनी॥ त्रिरेखा चेतकी ज्ञेया सप्तानामियमाकृतिः। विजया सर्व्वरोगेषु रोहिणी व्रणरोहिणी॥ प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता। अस्थिरोगेऽभया ग्रस्ता जीवन्ती सर्व्वरोगहृत्॥ चूर्णार्थे चेतकी ग्रस्ता यथायोगं प्रयोजयेत्। चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णतः॥ षड़ङ्गुलायता शुक्ला कृष्णात्वेकाङ्गुला स्मृता। काचिदास्याद्भाचिच्च काचिद्गन्धेन भेदयेत्॥ काचित् स्पर्शेन दृष्ट्वान्या चतुर्द्धा भेदयेच्छिवा। चेतकी पादपच्छायासुपसर्पन्ति ये नराः॥ भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादयः। चेतकी तु धृता हस्ते यावत्तिष्ठति देहिनः॥ तावद्व्रजेत् रोगेषु प्रभावान्नात्र संशयः। न धार्य्यं सुकुमाराणां कृशानां भेषजद्विषाम्॥ चेतकी परमा ग्रस्ता हिता सुखविरेचनी॥")
जातीपुष्पम्। इति राजनिर्घण्टः॥

चेतनः, पुं, (चेतति जानाति सर्व्वं इति। चित्+कर्त्तरि ल्युः।) आत्मा। इति हेमचन्द्रः॥ (यथा, पद्मदशम्। ६। ४५।
"चेतना चेतनभिदा कूटस्थात्मक्षता न हि। किन्तु बुद्धिकृताभासक्षतैवेत्यवगम्यताम्॥") मनुष्यः। इति राजनिर्घण्टः॥ प्राणी। इत्यमरः। १। ४। ३०॥
("रथादौ नियता चेष्टा चेतनेनाधितिष्ठिते। न दृष्टा चेतनस्तेन प्रणादीनां प्रवर्त्तकः॥"
इति शब्दार्थचिन्तामणिधृतवचनम्॥)
चेतनं चैतन्यं विद्यतेऽस्य इति। "अर्शआदिभ्योऽच्।"५।२।१२७। इत्यच्।) प्राणयुक्ते त्रि। इति मेदिनी। ने, ६४॥ (यथा, मेघदूते। ५।
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥")

चेतनकी, स्त्री, (चेतनं करोति बुद्धीन्द्रियादिस्फुरणं वर्द्धयतीत्यर्थः। कृ+ड। ततो ङीष्।) हरीतकी। इति राजनिर्घण्टः॥

चेतना, स्त्री, (चेतयतेऽनया इति। चित् संज्ञाने "ग्रासश्रन्थेति।" युच् टाप् च।) बुद्धिः। इत्यमरः।१।५।१॥ (यथा, भागवते। ४।२१। ३४।
"प्रधानकालाशयधर्म्मसंग्रहे शरीर एष प्रतिपद्य चेतनाम्॥"
"एष विभुः परमान्दोऽपि शरीरे विषयकारां बुद्धिं प्राप्य क्रियाफलत्वेन प्रतीयते।" इति टीकाकृच्चूर्णिः॥) सा गर्भस्थबालकस्य सप्तभिर्मासैर्भवति। इति सुश्रुतः॥ (ज्ञानात्मिका मनोवृत्तिः। यथा, भगवद्गीतायाम्। १३। ६।
"इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः॥"
तस्यामभिव्यक्तेन्द्रियवृत्तिः तप्त इव लौहपिण्डेऽग्निरात्मचैतन्याभासरसविद्वा चेतना इति शाङ्करभाष्यम्। ज्ञानात्मिका मनोवृत्तिरिति श्रीधरस्वामी॥ स्वरूपज्ञानयष्टिकायां प्रमाणासाधारणकारणिकायां चित्तवृत्तौ ज्ञानाख्यायां भगवतो विभूताविति शब्दार्थचिन्तामणिः॥)

चेतनीया, स्त्री, (चित्+णिच्+अनीयर् टाप् च। यद्वा चेतनायै हिता इति च्छः।) ऋद्धिनामौषधिः। इति राजनिर्घण्टः॥

चेदिः, पुं, देशभेदः। तत्पर्य्यायः। चेपुरः २ डाहलः ३ चैद्यः ४। (अयं देशस्तु आर्य्यायां दिशि शुक्तिमतीनदीतीरे स्थितः। यथा, हरिवंशे। १४। ८।
"शौलिकविदर्भवत्सान्धचेदिकाशोर्द्धकच्छाश्च।")
तद्देशस्थे पुं भूम्नि। इति हेमचन्द्रः॥

चेदिपतिः, पुं, (चेदिदेशस्य पतिः पालकः राजा।) उपरिचरवसुः। यथा,—
"इन्द्रप्रीत्यै चेदिपतिश्चकारेन्द्रमहञ्च सः।
पुत्राश्चास्य महावीर्य्याः पञ्चासन्नमितौजसः॥"
इति महाभारतम्॥
(शिशुपालः। यथा, महाभारते। २। ४०।१५।
"इति तस्य वचः श्रुत्वा ततश्चेदिपतिर्नृपः।
भीष्मं रूक्षाक्षरा वाचः श्रावयामास भारत॥")

चेदिराजः, पुं, (चेदीनां राजा इति। "राजाहःसखिभ्यष्टच्।" इति टच्।) शिशुपालः। इति पुराणम्॥ (यथा, महाभारते। २। ४०। १२।
"विश्रुता चास्य दुर्बुद्धेर्बुद्धिर्बुद्धिमतांवर!।
चेदिराजस्य कौन्तेय! सर्व्वेषाञ्च महीक्षिताम्॥")
उपरिचरवसुः। स तु चन्द्रवंशीयक्षत्रियराजपुत्रो विष्णुभक्त इन्द्रसखा इन्द्रादेशाच्चेदिराज्यं गृहीतवान् इन्द्रदत्ताकाशगविमानेनोपरिचरो बभूव। एकदा ऋषयो देवाश्च विवदमानास्तमपृच्छन् किमोषधा पशुना वा यज्ञाः कल्प्यास्तेनोक्तं पशुना तत ऋषयस्तं गोपुर्भवता यथाशास्त्रमनुक्ता देवानां पक्षपातः कृतस्तस्मादधो गच्छ इत्यभिशप्तः स ततश्चरात् भूविवरे गतः। श्रीविष्णुना तस्य भक्षणार्थं नान्दीश्राद्धादौ गृहभित्तौ घृतधारादानं विहितम्। इति महाभारतम्॥

चेदिराट्, [ज्] पुं, (चेदिषु राजते इति। राज+क्विप्। यद्वा चेदिषु राट्।) शिशुपालः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। २। ३८। ३१।
"स वै पश्येदयथा धर्म्मं न तथा चेदिराड्यमम्॥"
उपरिचरवसुः। दमघोषश्च। इति पुराणम्॥)

चेदी, स्त्री, रागिणीविशेषः। इति हलायुधः॥

चेल, कृ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकंच-सेट्-ऋदित्।) कृ, अचिचेलत्। इति दुर्गादासः॥

चेलं, क्ली, (चेल्यते विस्तार्य्यते तन्तुभिरिति। चेल चाले+कर्म्मणि घञ्। यद्वा चिल्यते परिधीयते यत् इति। चिल+कर्म्मणि घञ्।) वस्त्रम्। (यथा, मनुः। ११। १६६।
"चेलचर्म्माभिधाणाञ्च चिरात्तं स्वादभोजनम्॥")
अधमे त्रि। इत्यमरः। ३। ३। २०१॥

चेलानः, पुं, (चेल+आनच्।) फललताविशेषः। चेलना इति भाषा॥ तत्पर्य्यायः। अल्पप्रमाणकः २। इति रत्नमाला॥ अस्य फलस्य गुणाः। गुरुत्वम्। विष्टम्भित्वम्। मधुरत्वम्। कफवायुकारित्वञ्च। इति राजवल्लभः॥

चेलालः, पुं, (चेलमिव त्वचं आलाति। आ+ला+"कर्म्मण्यण्।" ३।२। १। इत्यण्।) फललताविशेषः। तत्पर्य्यायः। चित्रफलः २ सुखाशः ३ राजतेमिषः ४ लतापनसः ५ नाटाम्रः ६ सेदुः ७। इति त्रिकाण्डशेषः॥

चेलिका, स्त्री, (चिल्यते परिधीयतेऽसौ इति। चिल+इन्। स्वार्थे कन् ततष्टाप्।) पट्टवस्त्रविशेषः। चेलिरकापड़ इति भाषा॥ यथा,—
"सेयं कृष्णस्य वनिता पीतशाटीपरिच्छदा।
रक्तचेलिकया च्छन्ना शातकुम्भघनस्तनी॥"
इति पाद्मे पातालखण्डम्॥

चेलुकः, पुं, (चेलति बुद्धितत्त्वं गच्छति इति। चेल+उकः।) बुद्धभिक्षुशिष्यः। तत्पर्य्यायः। श्रामणेरः २ प्रव्रजितः ३ महोपासकः ४ गोमी ५। इति त्रिकाण्डशेषः॥

चेल्ल, कृ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) लङयान्तः। कृ, अचिचेल्लत्। अस्य ऋदशुबन्धः कुटतेः कुटादिपाठवन्निष्फलः वेदेषूच्चारणभेदार्थो वा। अयं केचिन्न मन्यते। इति दुर्गादासः॥

चेष्ट, ङ ईहे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ईहो व्यापारः। ङ, चेष्टते पठितुं शिष्यः। इति दुर्गादासः॥

चेष्टकः, पुं, (चेष्टते इति। चेष्ट+ण्वुल्।) रतिबन्धविशेषः। यथा, स्मरदीपिकायाम्।
"पादमेकं हृदि न्यस्य इतरेणैव चेष्टयेत्।
कान्तः क्रोड़े स्थितां नारीं बन्धोऽयं चेष्टको मतः॥"
चेष्टाकर्त्तरि त्रि॥

चेष्टा, स्त्री, (चेष्ट+भावे अङ् टाप् च।) कायिकव्यापारः। इति सुग्धबोधटीकायां दुर्गादासः॥ (यथा, मनुः। ७। ६७।
"आकारमिङ्गितं चेष्टां भक्ष्येषु च चिकीर्षितम्।"
"प्रवृत्तिरत्र चेष्टा ज्ञानेच्छा प्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वात् चेष्टायाञ्च यत्नवानात्मा प्युपयुज्यते॥" इति सिद्धान्तसुक्तावली। ५५॥)

चेष्टानाशः, पुं, (चेष्टायाः स्वस्वादेर्व्यापारस्य नाशो निवृत्तिरत्र।) प्रलयः। इति राजनिर्घण्टः॥

चेष्टितं, क्ली, (चेष्ट+भावे क्तः।) गतिः। चेष्टा। इति मेदिनी॥ (यथा, देवीभागवते। १। १५। १८।
"जलकेव सदा नारी रुधिरं पिबतीति च।
सर्व्वस्तु न विजानाति मोहितो भावचेष्टितैः॥")

चैतन्यं, क्ली, (चेतन एवेति। स्वार्थे भावे वा ष्यञ्।) प्रकृतिः। इति राजनिर्घण्टः॥ चेतना॥ (यथा, "चैतन्यं परमाणूनां प्रधानस्यापि नेष्यते।
ज्ञानक्रिये जगत्कर्त्तर्य्यीश्वरेते चेतनाश्रये॥
नेष्यते वैशेषिकैः साङ्ख्यैश्चेति शेषः।"इति ग्रन्थारम्भे चिन्तामणिः॥ तथाच, याज्ञवल्क्यः। ३। ८१।
"मनश्चैतन्ययुक्तोऽसौ नाड़ीस्थायुशिरायुतः।
सप्तमे चाष्टमे चैव लड्घ्मांसस्तुतिमानपि॥")

चैतन्यः, पुं, (चेतन एव। स्वार्थे ष्यञ्।) भगवदवतारविशेषः। तस्य प्रमाणं यथा,—
"श्रुत्वा तु कलिधर्म्मांस्तान् ब्रह्मा लोकपितामहः।
सर्व्वलोकहितार्थाय प्रोवाच मधुसूदनम्॥
भविष्यति कलौ केनोपायेन धर्म्मपालनम्।
भक्तिमार्गस्थितिः कस्मात्तद्दस्य जगद्गुरो!॥
श्रीभगवानुवाच।
अवतीर्णो भविष्यामि कलौ निजगणैः सह।
शचीगर्भे नवद्वीपे स्वर्धुनीपरिवारिते॥
अप्रकाश्यमिदं गुह्यं न प्रकाश्यं बहिर्मुखे।
भक्तावतारं भक्ताख्यं भक्तं भक्तिप्रदं स्वयम्॥
मन्मायामोहिताः केचिन्न ज्ञास्यन्ति बहिर्मुखाः।
ज्ञास्यन्ति मद्भक्तियुताः साधवो न्यासिनोऽमलाः॥
कृष्णावतारकाले या स्त्रियो ये पुरुषाः प्रियाः।
कलौ तेऽवतरिष्यन्ति श्रीदामसुबलादयः॥
चतुःषष्टिर्महान्तस्ते गोपा द्वादश बालकाः।
धर्म्मसंस्थापनार्थाय विहरिष्यामि तैरहम्॥
काले नष्टं भक्तिपथं स्थापयिष्याम्यहं पुनः।
कृष्णचैतन्यगौराङ्गो गौरचन्द्रो गौरहरिः॥
शचीसुतः प्रभुर्गौरो नामानि भक्तिदानि मे।
गच्छन्तु भुवि ते पुत्रा जायन्तां भक्तरूपिणः॥
धर्म्मसंस्थापनं काले कुर्व्वन्तु ते ममाज्ञया।
कृष्णावतारकाले ये मद्भक्तास्तान् ग्रहणक्रमात्॥
श्रीदामनामगोपालो मम रामस्य च प्रियः।
अभिराम इति ख्यातः पृथिव्यां स भविष्यति॥
सुदामनामगोपालः श्रीमान् सुन्दरठक्कुरः।
वसुदामप्रियसखः श्रीधनञ्जयपण्डितः॥
सुबलो मे प्रियसखो गौरीदासाख्यपण्डितः।
कमलाकरपिप्पलाइः पूर्व्वख्यातो महाबलः॥
महाबाहुर्गोपबालः श्रीमान् साहसपण्डितः॥
पुरुषोत्तमो वैश्यकुले स्तोककृष्णाः प्रियो मम।
अर्জ্জुनः पूर्व्वदेहे यः कलौ श्रीपरमेश्वरः॥
पूर्व्वप्रियो लवङ्गो मे कृष्णाख्यः स कलौ युगे।
श्रीधरः श्रीधरसमः पूर्व्वे श्रीमधुमङ्गलः॥
सुबलो बलरामसखः कलौ श्रीहलायुधः।
द्वादशैते भविष्यन्ति कलौ महर्म्मरचणे॥
चतुःषष्टिर्महान्तो ये स्त्रियः केचिच्च पूरुषाः।
पुरा गोपाङ्गनाः ख्याताः कलौ ता पुरुषा भुवि॥
यतिर्यस्मात् कलौ चाहं तदर्थे पुरुषाः स्त्रियः।
नीलाम्बरश्चक्रवर्त्ती गर्गः ख्यातो मुनिः पुरा॥
अतिप्रिया राधिका मे श्रीगदाधरपण्डितः।
राधिकायाः प्रियांशः स श्रीगदाधरठक्कुरः॥
मधुमती प्रियसखी श्रीनरहरिसंज्ञकः।
वृन्दा देवी प्राणसखी श्रीमुकुन्दः कलौ युगे॥
चन्द्रावली प्राणतुल्या कविराजः सदाशिवः।
ललिता या सखी मुख्या जगदानन्दपण्डितः॥
विशाखा या प्रियसखी श्रीदामोदरनामकः।
वनमाली कविराजः श्रीविशाखा सखी मम॥
श्रीरघुनाथभट्टश्च रङ्गदेवी मम प्रिया।
श्रीगदाधरभट्टस्तु सुदेवी सा मम प्रिया॥
प्रबोधानन्दविख्यातस्तुङ्गविद्या तथा प्रिया।
श्रीलराघवगोस्वामी चम्पकाख्या लता प्रिया॥

गोस्वामी श्रीलभूगर्भ इन्द्रलेखा तथा प्रिया।
काश्मिश्रः अग्निरेखा रूपः श्रीरूपमञ्जरी॥
श्रीसनातनगोस्वामी प्रिया श्रीरतिमञ्जरी।
श्रीरघुनाथदासः श्रीस्वरूपमञ्जरी मम॥
द्वितीयो रघुनाथश्च श्रीरागमञ्जरी प्रिया।
श्रीलगोपालभट्टः श्री-अनङ्गमञ्जरी सखी॥
लोकनाथः प्रेमभक्तो लवङ्गमञ्जरी सखी।
श्रीगदाधरभट्टस्तु प्रिया श्रीगुणमञ्जरी॥
भट्टः श्रीजीवगोस्वामी योगमाया सहायिनी।
दूती कलावती प्रेष्या श्रीगोविन्दः प्रियो मम॥
दूती लीलावती श्रीमान् माधवः प्रीतिवर्द्धनः।
वासुघोषाभिधो दूती ममानन्दप्रदायिनी॥
श्रीश्रिवानन्दभार्य्या सा मतप्रियेन्दुमती सखी।
श्रीपरमानन्दपुरि प्रियो मे उद्धवः सखा॥
श्रीलराघवदासस्तु धनिष्ठा मे प्रिया सखी।
शुक्लाम्बरो ब्रह्मचारी याज्ञिको ब्राह्मणः स्मृतः॥
पण्डितो जगदीशश्च यज्ञपत्नी मम प्रिया।
आचार्य्यः श्रीलभगवान् श्रीचैतन्यप्रियांशभाक्॥
पण्डितो गरुडः श्रीमान् गरुडो मम वाहनः।
श्रीलगोपीनाथसिंहोऽक्रूरो भक्तो मम प्रियः॥
घोषः प्रङ्कर आख्यातो गुणसागरनायकः।
माधवः प्राग्जनुर्निर्विघ्नकर्म्मा तु भास्करः॥
वनमाली सुदामा च सार्व्वभौमो हरिष्यति।
प्रिया इन्द्रसखी या मे मकरध्वजविश्रुतः॥
सिंहानन्दो लोकनाथः कविचन्द्रस्ततः परम्।
श्रीनाथो रामनाथश्च चत्वारः सनकादयः॥
काश्मिश्रस्तु कुलात्स्याद्रामानन्दोऽर्जुनः सखा।
प्रतापरुद्रः ख्यातोऽसाविन्द्रद्युम्नो महीपतिः॥
टङ्कुरश्च कालिदासः पुलिन्दीवनचारिणी।
शिखी च राधिका दासी मा इति ख्यातिसंयुता॥
आचार्य्यगोपीनाथश्च रत्नावती मम प्रिया।
शार्ङ्गदासः पद्मिनी स्यात् सूर्य्यो विश्वेश्वरः स्मृतः॥
भानुमती सत्यराजो रामानन्दः कलावती।
जयश्च विजयश्चैव गोविन्दो गरुडस्तथा॥
आचार्य्यरत्नचन्द्रः स्याद्व्यासो वृन्दावनः स्मृतः।
शुकदेवी व्यासपुत्रो भट्टो वल्लभ ईरितः॥
श्रिवानन्दोऽञ्जन इव देवानन्दश्च भार्गवः।
पण्डितः श्रीजगन्नाथो दुर्व्वासा मुनिरुच्यते॥
आचार्य्यः श्री-अनन्तश्च हरिदासस्तथैव च।
एता गोप्यो व्रजे ख्याता हृदयानन्द एव च॥
प्रियाश्चतुःषष्टिरेते धर्म्मसंस्थापने कलौ।
एतेषां पुण्यनामानि ये स्मरन्ति दिने दिने॥
ते प्राप्नुवन्ति मद्भक्तिं पुनन्ति भुवनत्रयम्।
मद्भक्तदासा ये मर्त्या नास्ति तेषां समः क्वचित्॥
श्रुत्वा भगवतो वाक्यं ब्रह्मा हर्षमवाप्तवान्।
स्तौति तं देवदेवेशं नेदुर्दुन्दुभयस्तदा॥
जगुर्गन्धर्व्वप्रवरास्तुमुरुप्रमुखास्तदा॥"

इत्यनन्तसंहितायां श्रीचैतन्यजन्मखण्डे सप्तपञ्चाशत्तमोऽध्यायः॥ * ॥ अपि च।

"यः सत्ये सितवर्णमादधदसौ श्रीशुक्लनामाभवत्
त्रेतायां मखसृक् मखाख्य उचितोऽभूद्रक्तवर्णं दधत्।
यः श्यामं दधदास्तु वर्णकममुं श्यामो युगे द्वापरे
सोऽयं गौरविधुर्विभाति कलयन्नावतारं कलौ॥
नित्यानन्दो भक्तरूपो व्रजे यः श्रीहलायुधः।
भक्तावतार आचार्य्योऽद्वैतो यः श्रीसदाशिवः॥"

इति गौरगणोद्देशः॥

(अयमेव भगवांश्चैतन्यदेवो नवीनवैष्णवसम्प्रदायविशेषस्य प्रवर्त्तकस्तत्सम्प्रदायेष्वोपास्येष्टदेवत्वेनासौ परिगृहीतश्च। असौ एव वृन्दावनरमण-श्रीकृष्णस्य पूर्णावतार इति केचित्, परन्तु प्रामाणिकग्रन्थवचनादर्शनात् तन्न मन्यते अतएवास्मिन् विषये पण्डितानां प्रायशो मतभेदो दृश्यते।

स तु प्रभुः (१४०७) सप्ताधिकचतुर्दशशतशके कुम्भस्थे सवितरि पौर्णमास्यां तिथौ शुक्रवारे प्रदोषसमये नवद्वीपाख्यनगर्य्यां प्रादुर्बभूव। तस्मिन्नेव महामहिम्नस्तस्य भगवतो जन्मसमये चन्द्रदेवं प्रति सैंहिकेयोपरागो जातः। एतदुपलक्षीकृत्य गङ्गास्नानार्थं बहवो लोका नानादिग्देशादागत्य तत्र मिलिताः। तदा ग्रस्तेऽपि राहुणा चन्द्रमसि भक्तजनकुमुदबान्धवो गौरचन्द्रः समवेतलोकानां हरिसंकीर्त्तनप्रभृतिभिर्मङ्गलाचरणैः सह शचीपूर्व्वपर्व्वताद्युदियाय। भवन्ति हि शुभसूचकानि महतामाविर्भूतानि। अतस्तदापि प्रसन्ना दिक् प्रेयसौगन्ध्यमान्द्यादिगुणगणाढ्यो मलयसमीरणः प्रसन्नानि च साधु जनमनांसि समभवन्। अस्य पिता जगन्नाथमिश्रस्तु पुरा श्रीहट्टनिवासी आसीत्। कदाचित् गङ्गास्नानार्थमेव नवद्वीपमागत्य विप्रचक्रवर्त्तिकुलतिलकस्य नीलाम्बरचक्रवर्त्तिनः शचीनाम्नीं कन्यां परिणीतवान्। ततो गच्छति काले अयं चैतन्यदेवः शचीगर्भे त्रयोदशमासं यावदुषित्वा जगन्नाथमिश्रस्य दशमपुत्रत्वेन समभवत्। अस्य पूर्व्वजो विश्वरूपो नाम जगन्नाथमिश्रस्यापरः पुत्र आसीत्। स तु यौवन एव ज्ञानवैराग्यविशारदो दारपरिग्रहमनङ्गीकुर्व्वन् पारिव्राज्यधर्म्मं समाश्रयत्।

अथ चैतन्यदेवस्य जातकर्म्मादिसंस्कारे यथाकालं क्रमशो निवृत्ते अस्य मातामहो नीलाम्बरचक्रवर्त्ती सुलक्षणादिकमवलोक्य विश्वम्भर इति नाम्नैनमाजुहाव। शचीदेवी तु पुनः पुनः पुत्रधनेन वञ्चिता प्रियतममेनं कनीयांसं संसारस्थितिदीर्घजीवनकामनया निमाइ इत्याख्यया गौरवासिनस्तु असामान्यरूपलावण्यतया परमसमादरेण गौर इत्याख्यया च आजुहुवन्तः। परं धर्म्मरसिकानां भक्तानां समाजे, शाक्यसिंहस्य बुद्धदेव इव अस्य महाप्रभुरिति चैतन्यदेव इति च आख्या प्रसिद्धा।

अथ प्राप्ते काले चैतन्यदेवोऽयं शास्त्रसागरपारगमप्रेयवुधवर्गवन्दितचरणारविन्दं महामहोपाध्यायं गङ्गादासशर्म्माणमुपाध्यायत्वेनाङ्गीकृत्य स्वल्पेनैव कालेन सर्व्वशास्त्रार्थतत्त्वज्ञः समभवत्। अस्य बुद्धिप्राखर्य्यमवगम्य तदा सर्व्व एवैनं देवांशसम्भूतममन्यन्त। अथ कदाचिदयं गङ्गास्नानार्थं गत्वा तत्र वल्लभाचार्य्यस्य लोकातीतरूपलावण्यां लक्ष्मीं नाम कन्यामवलोक्य मोहित आसीत्। वल्लभाचार्य्यस्तु एतदवगम्य स्वयमेव तां कन्यामस्मै सम्प्रददे। विवाहानन्तरमेवासौ छात्रानध्यापयितुं प्रवृत्तः। एतस्मिन्नेव समये बहवो दिग्विजयिनः पण्डिता नवद्वीपमागत्य अस्य तर्कजालैः समाच्छन्ना भग्नदर्पाश्च सन्तः प्रतिनिवृत्ताः। असावपि दिग्विजिगीषया पूर्व्वादिस्थलीं गत्वा तत्रस्थान् पण्डितान् विमोहयन् सुविमलं यशः प्राप्तवान्। एतस्मिन्नेव काले अस्य पूर्व्वपत्नी कालधर्म्मं प्राप्ता। चैतन्यदेवस्तु तस्या विरहेऽप्याकुलितोऽपि मातुरनुरोधेनैव पुनः सनातनपण्डितस्य विष्णुप्रियानाम्नीं कन्यां द्वितीयपत्नीत्वेन स्वीचकार। परं सर्व्वगुणविभूषितायाः साक्षात् लक्ष्म्या इव लक्ष्म्या मरणादेवासौ संसारविरक्तः श्रीवासादिभिर्भक्तवर्गैर्मिलितो हरिभक्तिरसनिमग्न एव कालं यापयामास। अथ कदाचित् पिण्डलीकोद्धारवासनया गयातीर्थं गत्वा भक्तचूडामणेः श्रीमदीश्वरपुरिनाम्नो गोस्वामिनः सकाशात् हरिनामाद्यन्तदीक्षां लब्ध्वात्मानं कृतकृतार्थं मत्वा च स्वदेशं प्रत्यावृत्तवान्। एतस्मिन्नवसरे पाषण्डदुराचारौ दस्युप्रवरौ जगाइ माधाइ चेति प्रसिद्धौ ब्रह्मबन्धू अन्यांश्च कुष्ठादिव्याधिपीड़ितान् महापातकिनः करुणया हरिनामदीक्षादानेन संसारसागरात् समुद्धृत्य यवनजातीयकाजिप्रभृतीन् वैष्णवद्वेषिणः स्वमहिम्ना दमयामास। ततः प्रभृत्येवासौ भक्तिरसप्रधानं वैष्णवधर्म्मं प्रचारयितुमिच्छन् नित्यानन्दाद्वैताचार्य्यादिभिर्भक्तवर्गैः सह नानाजनपदं परिभ्रमन् बहूनेव जनान् प्रेमोन्मत्तानकरोत्। अथ(१४३१) एकत्रिंशदधिकचतुर्दशशतशके उत्तरायणसंक्रान्त्यां संसारमायां परित्यज्य काटोयाख्यग्रामे केशवभारतिसकाशात् सन्यासधर्म्मं समाश्रयत्। अथ नीलाचलमागत्य श्रीजगन्नाथदेवं दृष्ट्वा राज्ञः प्रतापादित्यस्य सभापण्डितं वेदान्तशास्त्रपारदर्शिनं सार्व्वभौमं विचारेण पराजित्य वैष्णवदीक्षां प्रदत्तवान्। अथ कदाचित् गोदावरीतीरे भक्तवरं रामानन्दमवलोक्य सेव्यनिर्णयेधर्म्मालापैरात्मानं कृतकृत्यवदमन्यत। ततोऽसौ त्रिपदी-शिवकाञ्ची-विष्णुकाञ्ची-त्रिमल्लप्रभृतीन् बहून् दाक्षिणात्यजनपदान् हरिप्रेमरसेन प्लावयित्वा द्वारकातीर्थदर्शनार्थं प्रस्थितः। तत्रैवासौ 'कृष्णकर्णामृतं' नाम सुप्रसिद्धवैष्णवग्रन्थं लब्धवान्। अतः परं पुनरेव नीलाचलमागत्य काशीश्वरनाम्नः कस्यचिद्भक्तप्रधानस्य भवने अवस्थितवान्। अत्रैवासौ श्रीश्रीजगन्नाथदेवस्य रथयात्रामहोत्सवे हरिसंकीर्त्तनादिकं विधाय प्रेमोन्मादप्रलापादिभिर्भक्तिलक्षणं दर्शयामास। अथ गच्छति काले वृन्दावनं

जिगमिषुर्वन्येनैव पथा व्रजन् स्वभावसारल्येन व्याघ्रादीनपि हिंसजन्तून् भक्तिप्रेमणा मादयित्वा वृन्दावनमुपतस्थे। तत्र स्वभक्तवृन्दावृत एवासौ गोपीवल्लभश्रीकृष्णस्य विहारस्थानादिकमवलोक्य मथुरासुद्दिश्य प्रस्थितः। ततोऽस्मात् स्थानात् प्रयागागमनकाले बहून् पाषण्डानपि यवनान् हरिभक्तान् विधाय वाराणसीमुपस्थितः। तत्र कियत्कालमुषित्वा स्वधर्म्मं प्रचार्य्य च पुनर्नीलाचलमाजगाम। अत्रस्थ एवासौ स्वप्रचारितवैष्णवधर्म्मस्य माहात्म्यं विज्ञापयितुं भक्तवृन्दाग्रगण्यान् रूपसनातनादीन् नानातीर्थस्थानेषु प्रेषयामास। अथ स्वभक्तैर्मिलितो नानाविधमहोत्सवेन हरिसंकीर्त्तनादिकं विधाय भक्तिरसस्य उत्कटकोटिमभिगम्य विरहोन्मादादिप्रगाढभक्तिलक्षणैरन्वित आसीत्। तत एवासौ स्वभक्तगणान् कलियुगे हरिसंकीर्त्तनस्य माहात्म्यादिकं श्रावयित्वा अष्टचत्वारिंशद्वर्षवयसि कालस्य दुरतिक्रमणीयत्वात् (१४५५) पञ्चपञ्चाशदधिकचतुर्दशशतशकके मानवकायं परित्यज्य अन्तर्हितवान्॥)

चैत्यं, क्ली पुं, (चित्यस्य इदम्। "तस्येदम्।" ४। ३। १२०। इत्यण्।) आयतनम्। इत्यमरः। २। २। ७॥ यज्ञस्थानं केचित्तु सुखरहितं देवकुलसदृग्यज्ञायतनं सचित्यमचित्यमपीत्याहुः। देवायतनमात्रम्। इदं देवकुलम्। इति भरतः॥ (यथा, महाभारते। २। ३। १२।
"यत्र यूपा मणिमयाश्चैत्याश्चापि हिरण्मयाः॥")
चिता। इति त्रिकाण्डशेषः॥

चैत्यः, पुं, (चैत्ये देवायतनादिस्थाने तिष्ठतीति। चैत्य+अण्।) बुद्धः। विष्णुः। उद्देशवृक्षः। इति मेदिनी भरतश्च॥ शेषस्य पर्य्यायः। देवतरुः २ देवावासः ३ करिभः ४ कुञ्जरः ५। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ६। ३। ४०।
"वृक्षाः पतन्ति चैत्याश्च ग्रामेषु नगरेषु च॥"
चैत्रः पुरुषः। यथा, भागवते। ३। २६। ६०।
"अहङ्कारस्तयोरुद्रश्चित्तं चैत्यस्ततोऽभवत्॥")

चैत्यद्रुः, पुं, (चैत्य एव द्रुर्वृक्षः।) अश्वत्थवृक्षः। इति त्रिकाण्डशेषः॥ (अश्वत्थशब्दस्य गुणादयो ज्ञातव्याः॥)

चैत्यसुखः, पुं, (चैत्यं चितिसम्यग्रं विस्तृतमित्यर्थः सुखं यस्य।) कमण्डलुः। इति त्रिकाण्डशेषः॥

चैत्यवृक्षः, पुं, (चैत्यस्तदाख्यया प्रसिद्धो वृक्षः।) अश्वत्थवृक्षः। इति रत्नमाला॥ (यथा, मनुः। ९। २६४।
"चतुष्पथाश्चैत्यवृक्षाः समाजाः प्रेक्षणानि च॥")

चैत्रं, क्ली, (चीयन्ते जीवाः स्थानात् स्थानान्तरमनेनेति। चि+बाहुलकात् करणे ष्ट्रन्। ततः स्वार्थे अण्।) गृहम्। देवकुलम्। इति मेदिनी। रे, ३०॥ देउल इति भाषा॥ (यज्ञस्थानम्। यथा, महाभारते। १। १०९। १३।
"भीष्मेण धर्म्मतो राजन्! सर्व्वतः परिरक्षिते।
बभूव रम्यश्चैत्रयूपशतावृतः॥")

चैत्रः, पुं, (चित्रे विचित्रे कार्य्यादौ साधुः। चित्र+अण्।) बुद्धभिक्षुकः। इति त्रिकाण्डशेषः॥ वर्षपर्व्वतविशेषः। इति मेदिनी। रे, ३७॥ (यथा, हरिवंशे।
"हिमवान् हेमकूटश्च निषधो मेरुरेव च।
चैत्रः कर्णी च रुक्मी च सप्तैते वर्षपर्व्वताः॥"
चित्रायां भवः। चित्रा+अण्।) चित्रागर्भजो बुधपुत्रः। स सप्तद्वीपाधिपतिः सुरथराजपितामहः। इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ (चित्रानक्षत्रयुक्ता पौर्णमासी यत्रसः। चित्रा+"विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः।" ४। २। २३। इति पक्षे अण्।) मासभेदः। स तु सौरचान्द्रभेदेन द्विविधः। तत्र मीनराशिस्थरविकः सौरः मीनस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तश्चान्द्रः। इति मलमासतत्त्वम्॥ तत्पर्य्यायः। चैत्रिकः २ मधुः ३। इत्यमरः। १। ४। १५॥ चैत्री ४ कालादिकः ५। इति राजनिर्घण्टः॥ चैत्रकः ६ चित्रिकः ७। इति शब्दरत्नावली॥ * ॥ तत्र जातफलम्।
"सत्कर्म्मशाली विनयी सुवेषो
भोगी सुखी स्वाम्बुराशभोजी।
सत्सङ्गयुक्तो द्विजदेवभक्तो
भवेन्नरो मधुमासजश्च॥"
इति कोष्ठीप्रदीपः॥ * ॥
(चैत्रजन्मानि तु वारुण्यग्नीकाश्मी-श्रीरामनवमी-मदनत्रयोदशी-मदनचतुर्दशीप्रभृतीनि। एतेषां प्रकरणादिकं तत्तच्छब्दे द्रष्टव्यम्।) तत्र शिवव्रतं कर्त्तव्यम्। यथा,—
"चैत्रे मास्यथ माघे वा योऽर्चयेत् शङ्करं व्रती।
करोति नर्त्तनं भक्त्या वेत्रपाणिर्दिवानिशम्॥
मासं वाप्यर्द्धमासं वा दश सप्त दिनानि वा।
दिनमानं युगं सोऽपि शिवलोके महीयते॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥
अधुनास्य सन्न्यास इति गाजन् इति च भाषा॥

चैत्रकः, पुं, (चैत्र+एव। स्वार्थे कन्।) चैत्रमासः। इति शब्दरत्नावली॥

चैत्ररथं, क्ली, (चित्ररथेन गन्धर्व्वेण निर्वृत्तम्। "तेन निर्वृत्तम्।" ४। २। ६८। इत्यण्।) कुबेरस्योपवनम्। तत्तु चित्ररथगन्धर्व्वनिर्म्मितम्। इत्यमरः। १। २। ७३॥ (यथा, रघुः। ५। ६०।
"एको ययौ चैत्ररथप्रदेशान्
सौराज्यरम्यानपरो विदर्भान्॥"
इदन्तु पीठस्थानानामन्यतमं। यथा, देवीभागवते। ७। ३०। ५८।
"मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे॥")
पुं, कुरुपुत्रविशेषः। यथा, महाभारते। १। ९४। ४६।
"अविचित्तमभिष्वन्तं तथा चैत्ररथं सुनिम्।
जनमेजयञ्च विख्यातं पुत्रांश्चास्यानुशुश्रुम॥")

चैत्रावली, स्त्री, (चैत्रं चैत्रमासं वा सम्यक्रूपेण वरयत्यभिलषतीति। वा+वर+णिच्+अच्। स्त्रियां ङीप्। रस्य लत्वम्।) चैत्री पूर्णिमा।

चोदना

तत्पर्य्यायः। मधूत्सवः २ सुवसन्तः ३ काममहः ४ वासन्ती ५ कर्द्दनी ६। इति त्रिकाण्डशेषः॥

चैत्रिकः, पुं, (चित्रानक्षत्रयुक्ता पौर्णमासी विद्यतेऽस्मिन्। "विभाषा फल्गुनीति।" ४। २। २३। इति पक्षे ठक्।) चैत्रमासः। इत्यमरः। १। ४। १५॥

चैत्री, [न्] पुं, (चैत्री चित्रायुक्ता पौर्णमासी विद्यतेऽस्मिन्। ज्योत्स्नादित्वादिनिः।) चैत्रमासः। इति राजनिर्घण्टः॥ (चित्रा+इञ्।) चैत्रिरिति च पाठः॥

चैद्यः, पुं, (चेदीनां जनपदानां राजा। चेदि+ष्यञ्।) शिशुपालः। स तु दमघोषसुतः। इति जटाधरः॥ (यथा, माघे। २। ३८।
"त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे॥"
चेदिराजवसुः। इति पुराणम्॥) तद्देशीये पुं भूम्नि। इति त्रिकाण्डशेषः॥

चोच्यः, त्रि, (खायते उच्यते गीयते इत्यर्थः। चर्च+कर्म्मणि घञ्। ततः पृषोदरात् साधुः।) गीतः। शुचिः। (यथा, मनुः। ३। २०७।
"अवकाशेषु चोच्येषु नदीतीरेषु चैव हि।
विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा॥")
दक्षः। (यथा, महाभारते। १२। ७०। ८।
"अनीर्षुर्गुणदारः स्याच्चोचः स्यादक्षवी नृपः॥")
तीक्ष्णः। मनोज्ञः। इति मेदिनी। घे, १२॥

चोचं, क्ली, (प्रशस्तं चोचं त्वक् विद्यतेऽस्य। "अर्शआदिभ्योऽच्।" ५। २। १२७। इत्यच्।) गुडत्वक्। इत्यमरः। २। ४। १३४॥ (यथा, सुश्रुते चिकित्सास्थाने। २५। ४५।
"त्वक्पत्रचोचमूलानि स्वादूनि मधुराणि च॥")
तेजपात इति ख्यातम्। इति केचित्॥ (अस्य पर्य्यायाः यथा,—
"त्वक्पत्रञ्च वराङ्गं स्याद्भङ्गं चोचन्तथोत्कटम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
उपसुस्तफलावग्निम्। चोँचा इति ख्यातम्॥ तालफलम्। इति भरतः। कदलीफलम्॥ इति सारसुन्दरी॥ नारिकेलम्। इति स्वामी॥ वल्कलम्। चर्म्म। इति धरणी॥

चोचकं, क्ली, (चोच+स्वार्थे कन्। यद्वा, चोचेन त्वचा कायतीति। कै+कः।) वल्कलम्। इति शब्दरत्नावली॥

चोटी, स्त्री, झाटी। इति हेमचन्द्रः। ३। ३३६॥

चोड़ः, पुं, (चुड़ति संवृणोति शरीरमिति। चुड़ संवरणे+अच्।) प्रावरणम्॥ देशविशेषः। इति मेदिनी। ड़े, १३॥

चोदना, स्त्री, (चोद्यते प्रवर्त्यतेऽनयेति। चुद क् तुदि+युच् टाप् च।) विधिः। (यथा, गीतायाम्। १८। १८।
"ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्म्मचोदना॥")
प्रेरणा। यथा। चोदना लक्षणोऽर्थो धर्म्म इति जैमिनिसूत्रम्॥ एकोद्दिष्टादिश्राद्धादौ ब्राह्मणादि चोदना। इति स्मृतिः॥

चोदनागुड़ः, पुं, (चोदनया प्रेरणया गुह्यते उत्क्षिप्यते इति। गुड़+"इगुपधज्ञेति।" ३। १

१३५। इति कः। क्रीड़नकाले कन्दुकानां ऊर्द्ध-क्षेपणप्रसिद्धतयास्य तथात्वम्।) कन्दुकः। इति त्रिकाण्डशेषः॥

चोद्य, क्ली, (चोदयति प्रेरयति चित्तं रसविशेषे अनेनेति। चुद्+णिच्+ण्यत्।) अद्भुतम्। प्रश्नः। इति मेदिनी। ये, २३॥ (यथा, महाभारते। ५। ४३। ३४।

"सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च। अस्तेयं ब्रह्मचर्य्यञ्च तथासंग्रहमेव च॥")

चोद्यः, त्रि, (चोदयितुं प्रेरयितुं योग्यः। "अर्हे कृत्यतृचश्च।" ३। ३। १६८। इति यत्।) चोदनार्हः। प्रेरणयोग्यः। इति मेदिनी। ये, २३॥ (यथा, महाभारते। ५। ३८। ७।

"नीवारस्तेजकुद्प्राकृत्तिः सुसंयता चाग्निकार्य्येषु चोद्यः। वने वसन्नतिथिष्वप्रमत्तो धुरन्धरः पुण्यकृदेष तापसः॥")

चोपनं, क्ली, (चुप मन्दगमने+भावे ल्युट्।) मन्दगमनम्॥

चोरः, पुंस्त्री, (चोरयतीति। चुर+णिच्+पचाद्यच्।) स्तेयकर्त्ता। तत्पर्य्यायः। चौरः२ दस्युः३ तस्करः४ प्रतिरोधी५ मलिम्लुचः६ स्तेनः७ ऐकागारिकः८ स्तेन्यः९ प्रच्छन्नजनः१० मोषकः११ पाटचरः१२ पराक्रन्दी१३ कुम्पिलः१४ खनकः१५ ग्रन्थिभेदकः१६ खानिकः१७। इति शब्दरत्नावली॥ प्रचुरपुरुषः१८। इति त्रिकाण्डशेषः॥ लुप्तः१९ तक्का२० रिभ्वा२१ रिपुः२२ रिक्का२३ विहायाः२४ तायुः२५ वनर्गुः२६ हुरश्चित्२७ सूचीवान्२८ मलिम्लुचः२९ अदाशंगुः३० टृक्कः३१। इति वैद्यनिघण्टौ ३ अध्यायः॥ (यथा, देवीभागवते १। १९। ६।

"चोरेषु चौरबुद्धिस्तु साधुबुद्धिस्तु तापसे। स्वपरत्वं तवाप्यस्ति विदेहस्त्वं कथं नृप!॥")

क्षणघटी। इति क्रमचन्द्रिकाधृतहड्डचन्द्रः॥ गन्धद्रव्यविशेषः। यथा। चोरकुङ्कुमरोचनाः। इत्यष्टगन्धकथने आगमः॥

चोरकः, पुं, (चोरो गन्धद्रव्यविशेषस्तद्वत् कायतीति। कै+कः।) टृक्का। इति रत्नमाला॥ पिड़िङ्ग इति भाषा। (चोर+स्वार्थे कन्।) सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। ग्रन्थिकः२ खड्गः३ दुष्यत्रः४ चेमकः५ रिपुः६ चपलः७ कितवः८ धूर्त्तः९ पटुः१० नीचः११ निशाचरः१२ गण्डहासः१३ कोपनकः१४ चोरः१५ पलचोरकः१६ दुष्कुलः१७ ग्रन्थिलः१८ सुग्रन्थिः१९ पर्णचोरकः२० ग्रन्थिपर्णः२१ ग्रन्थिदलः२२ ग्रन्थिपत्रः२३। (यथा, सुश्रुते कल्पस्थाने ६ अध्याये।

"चोरको वरुणः कुष्ठं सर्व्वगन्धा ससप्तला॥")

अस्य गुणाः। तीव्रगन्धत्वम्। उष्णत्वम्। तिक्तत्वम्। वातकफनाशासुखरुजाजीर्णकृमिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

चोरपुष्पिका, स्त्री, (चोरपुष्पी+स्वार्थे संज्ञायां वा कन् टाप् पूर्व्वह्रस्वश्च।) चोरपुष्पी। इति शब्दरत्नावली॥ ("ग्रन्थिनी चोरपुष्पिका।" इति वैद्यकम्॥)

चोरपुष्पी, स्त्री, (चोरो गन्धद्रव्यविशेषस्तद्वत् सुगन्धि पुष्पमस्याः। "पाककर्णपर्णेति।" ४। १। ६४। इति ङीष्।) वृक्षविशेषः। चोरा इति चोरहुली इति च ख्याता इति भरतः॥ तत्पर्य्यायः। ग्रन्थिनी २ कैग्निनी ३। इत्यमरः। २। ४। १२६॥ चोरपुष्पिका ४। इति शब्दरत्नावली॥ (चोरा ५। इति शब्दचन्द्रिका॥)

चोरस्नायुः, स्त्री, (चोरस्य स्नायुरिव।) काकनासालता। तस्करस्नायुरिति राजनिर्घण्टदर्शनात्॥

चोरा, स्त्री, (चोरो गन्धद्रव्यविशेषः तस्येव गन्धोऽस्त्यस्य। अच् ततष्टाप्।) चोरपुष्पी। इति शब्दचन्द्रिका॥

चोरिका, स्त्री, (चोरस्य भावः। मनोज्ञादित्वात् ठन्।) चौरिका। चौर्य्यम्। इत्यमरटीकायां रायमुकुटः॥

चोलः, पुं, (चोलयति वसुङ्कयति स्त्रीणां वक्षःप्रदेशे इति। चुल उन्नतौ+अच्।) कञ्चुलिका। काँचुलि इति भाषा॥ (यथा, आनन्दलहर्य्याम्। ६६। तम्॥")

"निजां वीणां वाणी निचुलयति चोलेन निभृतं तत्पर्य्यायः। कूर्पासकः२। इत्यमरः। २। ६। ११८॥ कञ्चुकः३। इति जटाधरः॥ कुञ्चुली ४ कुञ्चुलिका५। इति शब्दरत्नावली॥ स्त्रीणां निचोल इति रमानाथः॥ पुंसोऽप्येतौ चोला इति ख्यातौ इति सुभूतिः॥ नदादित्वात् चोली च। कूर्पर-कफोणिर्णासु च तद्द्वयमस्यते क्षिप्यते अत्र कूर्पासः घञमनीषादित्वाद्रलोपः ततः स्वार्थे कः। इति भरतः॥ * ॥ देशविशेषः। इति शब्दरत्नावली। अधुना ताञ्जोर इति ख्यातः॥ क्षत्रधारिवैदेयागानधिकारिक्षत्रविशेषः। स तु पूर्व्वं क्षत्रिय आसीत् सगरराजेनास्य धर्म्मनाशं वेश्यान्यत्वञ्च चकार। इति हरिवंशः॥

चोलकं, क्ली, (चोलयति आच्छादयतीति। चुल+णिच्+अच्+स्वार्थे कन्। यद्वा चोल इव कायति इति। कै+कः।) वल्कलम्। इति शब्दरत्नावली॥

चोलकः, पुं, (चोल इव कायति इति। कै+कः।) वाणवारः। कवचम्। इति हारावली। १६०॥ (देशभेदः। यथा कथासरित्सागरे। १६। ६५।

"उल्लङ्घमाना कावेरी तेन संमर्द्दकारिणा। चोलकेश्वरकीर्त्तिश्च कालुष्यं ययतुः समम्॥")

चोलकी, [न्] पुं, (चोलकमिवास्थास्य इति इनिः।) करीरः। नारङ्गः। किष्कुपर्व्व। इति मेदिनी। ने, १८४॥

चोलखुडकः, पुं, (चोलस्य अखुडक इव शुष्कत्वादित्वात् साधुः।) शिरोवेष्टः। इति त्रिकाण्डशेषः॥

चोलः, पुं, (चीयते इति। चि+डः। ततः उपदाहे+अप्। चश्चासौ उपश्चेति।) पार्श्वज्वाला॥ यथा.—

"हृच्छूलपीड़नयुतं पवनेन पित्ता-च्छृड्दाहचोषबहुलं सकफप्रसेकम्। श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्यात् वैगुण्यमोहजड़ताभिरथापरञ्च॥

चोषः पार्श्वस्थितायिनेव सन्तापः।" इति भावप्रकाशः॥ (यथाच, सुश्रुते। १। ४२।

"यो गले चोषमुत्पादयति सुखवेग्रहं जनयति भक्तरुचिं चापादयति हर्षञ्च स तिक्तः॥")

चोरुकः, पुं, (चन्द्यति आह्लादयति। चदि+डः। ततः स्कन्दति आक्रमते शत्रून् स्कुगति आश्रयते वा। स्कन्दि स्कु वा+डः। ततः पृषोदरादित्वे साधुः।) सिन्धुवारदेशीयाश्वः। इति त्रिकाण्डशेषः॥

चौर्य्यं, त्रि, (चोर एव इति। स्वार्थे ष्यञ्।) मनोज्ञम्। इति महाभारतम्॥

चौरः, पुं क्ली, (चोर एव प्रज्ञादिभ्योऽण्। यद्वा चुरा शीलमस्य। "इतिकुलादिभ्यो ढञ्।" ४। ४। ६२। इति ढञ्।) चोरः। इत्यमरः। २। १०। २४॥ (यथा, देवीभागवते। १। १६। ५६।

"चौरं वा तापसं वापि समानं मन्यते कथम्॥")

असुरविशेषः। यथा, हरिवंशे। १७६। १६।

"किरातौ चौरवसगां चौरसेनानमस्कृताम्॥"

कविभेदः।

"कविरमरः कविरमरुः कविश्चौरो मयूरकः॥" इत्युज्जटः॥)

चोरपुष्पी। इति मेदिनी। रे, ३७॥ (चोरपुष्पीशब्दे विवरणमस्य ज्ञेयम्॥) सुगन्धिद्रव्यविशेषः। इति हेमचन्द्रः॥

चौरिका, स्त्री, (चोरस्य कार्य्यं भावो वा। "दुष्टमनोज्ञादिभ्यश्च।" ५। १। १३३। इति युञ्। टापि अत इत्वम्।) चौर्य्यम्। इत्यमरः। २। १०। २५॥ (यथा, मनुः। १। ८२।

"चौरिकाकृतमायाभिर्धर्म्मज्ञापेति पादयः॥")

चौरी, स्त्री, (चौर+ङीष्।) चौर्य्यम्। इति शब्दरत्नावली॥ (गायत्रीरूपा महाशक्तिः। यथा, देवीभागवते। १२। ६। ४६।

"चन्द्रिका चन्द्रधात्री च चौरी चौरा च चण्डिका॥")

चौर्य्यं, क्ली, (चोरस्य कर्म्म भावो वा। "गुणवचनाद्ब्राह्मणादिभ्यः कर्म्मणि च।" ५। १। १२४। इति ष्यञ्।) चौरधर्म्मः। चोरी इति चुरी इति च भाषा॥ तत्पर्य्यायः। स्तेन्यम्२ स्तेयम्३ चौरिका४। इत्यमरः। २। १०। २५॥ चौरी५। इति शब्दरत्नावली॥ चोरिका६। इत्यमरटीका॥ (यथा, मनुः। ९। २७६।

"सन्धिं छित्त्वा तु ये चौर्य्यं रात्रौ कुर्व्वन्ति तस्कराः। तेषां छित्त्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत्॥")

चौलकर्म्म, [न्] क्ली, (चूड़ाया इदम्। "तस्येदम्।" ४। ३। १२०। इत्यण् डस्य लत्वञ्च।

ततश्चौलमेव कर्म्म इति कर्म्मधारयः ।) चूड़ाकर्म्म । इति स्मृतिः ॥

चौलुक्यः, पुं. (चुलकस्य गोत्रापत्यमिति । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) राजर्षिभेदः । इति हेमचन्द्रः । ३ । ७१२ ॥

च्यु, क हासे । सहने । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सकच-सेट् ।) अन्तःस्याद्योपधः । क, च्यावयति । इति दुर्गादासः ॥

च्यु, ड गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ।) अन्तःस्याद्योपधः । ड, च्यवते । इति दुर्गादासः ॥

च्युत्, इर् क्षरणे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । क्वचित् अकच ।) अन्तःस्यादियुक्तः । इर्, अच्युतत् अच्योतीत् । क्षर इह आसेचनम् । द्योतति घृतं वह्नौ यज्वा । आसिच्य तीत्यर्थः । इति दुर्गादासः ॥ (यथाच, भट्टिः । ६ । २८ ।

"सीतां जिघांसुः सौमित्रे ! राक्षसावारतां ध्रुवम् ।
इदं श्रोत्रियमभ्यर्च्य सम्पृक्षारेऽच्युतत्त्वयोः ॥"

"अच्युतत् गलितमकर्म्मकोऽत्र।" इति तट्टीकायां जयमङ्गलभरतौ ॥")

च्युतं, त्रि, (च्यूयते स्म इति । च्यु + कर्म्मणि क्तः । यद्वा च्युत् + घञर्थे कः ।) क्षरितम् । यथा,—

"पिबन्तं लक्ष्मणाभोजच्युतं हरिकथामृतम् ॥"
इति श्रीभागवतम् ॥

(स्खलितम् । यथा, रघुः । ११ । २५ ।

"सम्भ्रमोऽभवदपोढकर्म्मणां
कृत्विजां च्युतविकर्षतस्रुचाम् ॥")

च्युतिः, स्त्री, (अवते प्रीणितादिकमस्मा इति । च्यु + अपादाने क्तिन् ।) भगम् । इति हेमचन्द्रः । ३ । ६०६ ॥ गुदद्वारम् । इति शब्दरत्नावली ॥ (च्यु + भावे क्तिन् ।) क्षरणम् । यथा,—

"कुर्य्यां हरस्यापि पिनाकपाणे-
र्धैर्य्यच्युतिं के मम धन्विनोऽन्ये ॥"
इति कुमारसम्भवे । ३ । १० ॥

च्युप्, पुं, (अवन्ति भाषन्तेऽनेन इति । च्यु + "च्युवः किच्च ।" उणां । ३ । २४ । इति पः स च कित् च्युधातुरत्र भाषणार्थे वर्त्तते इत्युज्ज्वलदत्तः ।) सुखम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

च्युस, क हासौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क्वचित् पुस्तके हासे । अन्तःस्यादियुक्तः । क, च्योसयति । इति दुर्गादासः ॥

च्योतं, क्ली, (च्युत + एषोदरादित्वादोत्वे साधुः ।) घृतादिक्षरणम् । इत्यमरटीका ॥

च्यौत्नः, त्रि, (अवते इति । "जनिदाच्युसिति ।" उणां । ४ । १०४ । इति त्नच् ।) गमनकर्त्ता । अश्वजः । द्यौप्रुषयः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ बलम् । इत्युज्ज्वलदत्तः ॥)

छ

छ, छकारः । स तु यज्ञनसप्तमवर्णः । चवर्गद्वितीयवर्णश्च । (वङ्गाक्षरैः) तस्य लेखनप्रकारो यथा,

"ऊर्द्ध्वादधोगता रेखा कुचिता कुण्डली ततः ।
पुनश्चाधोगता तासु सन्ति ब्रह्मग्रविष्णवः ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥ ("इचुयशानां तालु ।" इति सूत्रकारेणोक्तम् । "कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ।"
इति शिक्षाग्रन्थः ॥)

अस्योत्पत्तिर्यथा । प्रपञ्चसारे ।

"विसर्गस्तालुगः सोष्मा शं चवर्गश्च यन्तथा ।"

अन्योन्यत्रापि वर्गस्य द्वितीयादिवर्णोच्चारणे खरसप्तमादिति श्लोकगम्भीरसंस्पर्शादिति च यथास्थानमन्वेतीति तट्टीकाकारो विश्वरूपः ॥

अस्या ध्यानं यथा, वर्णोद्धारतन्त्रे ।

"ध्यानमस्याः प्रवक्ष्यामि द्विभुजान्तु त्रिलोचनाम् ।
पीताम्बरधरां नित्यां वरदां भक्तवत्सलाम् ।
एवं ध्यात्वा छकारन्तु तन्मन्त्रं दशधा जपेत् ॥"

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।

"छकारं परमाक्षर्यं स्वयं परमकुण्डली ।
सततं कुण्डलीयुक्तं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं वर्णं पञ्चप्राणात्मकं सदा ।
त्रिबिन्दुसहितं वर्णं सदा ईश्वरसंयुतम् ॥
पीतविद्युल्लताकारं छकारं प्रणमाम्यहम् ॥"

तस्य नामानि यथा, तन्त्रशास्त्रे ।

"छच्छन्दं सुभगा च पशुः पशुपतिर्मृतिः ।
निर्म्मलं तरलं वह्निर्भूतमात्रा विलासिनी ॥
एकनेत्रश्च वृषली द्विशिरा वामकूर्परः ।
गोकर्णा लाङ्गली वामकाममत्ता सदाशिवः ॥
माता निशाचरः पादुर्विश्वतः स्थितिग्रन्थकः ॥"

छं, त्रि, (छायते परिक्षिप्यते यत् इति । छो + कर्म्मणि घञर्थे कः ।) निर्म्मलम् । इति मेदिनी । छे, १ ॥ तरलम् । इत्येकाक्षरकोषः ॥

छः, पुं, (छो + भावे डः घञर्थे को वा ।) छेदनम् । इत्येकाक्षरकोषः ॥

छगः, पुं क्ली, (छं यज्ञादौ छेदनं गच्छति प्राप्नोतीति । गम + डः ।) छागः । इति हेमचन्द्रः । ४ । १२७५ ॥

छगणं, क्ली पुं, (छद + ल्युः । छः तस्मै अन्नेस्थादनायेत्यर्थः गण्यते इति । गण + कर्म्मणि अप् ।) करीषः । इति हेमचन्द्रः ।४।१२।७३ ॥

छगलं, क्ली, (छ्यति छिनत्ति छाद्यते वा । छो + छेदने + "छो गुग् डश्च ।" उणां । १ । ११६ । इति कलच् प्रत्ययः धातोर्गुगागमो डश्च ।) नीलवस्त्रम् । इति मेदिनी । ले, १ ॥

छगलः, पुं स्त्री, (छाद्यते छिद्यते देवोपहाराय इति । छो + कलच् गुगागमो डश्च ।) छागः । इति मेदिनी । ले, ६१ ॥ (यथा, सुश्रुते । १ । ४६ ।

"नाति स्थौल्यो गुरुः स्निग्धो मन्दपित्तकफः स्मृतः ।
छगलस्यभिष्यन्दी तैर्यां पौरुषनाशनः ॥")

छगलकः, पुं स्त्री, (छगल + स्वार्थे कन् ।) छागः । इत्यमरः । २ । ६ । ७६ ॥

छगला, स्त्री, (छगलस्तदाकारोऽस्यास्य छगलवत् त्वक् विद्यतेऽस्येति वा । "अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् टाप् च ।) वृहद्दारकवृक्षः । इति शब्दरत्नावली मेदिनी च ॥ (व्यवहारोऽस्या यथा, "सुचूपूथिकातरणीजीवन्तीविभीतिकानन्दीभल्लातकच्छगलान्त्रीवृक्षादनीफल्गुशाल्मलीग्रेसुवनस्पतिप्रसवश्रृगाकर्ब्बुदारकोविदारप्रभृतीनि ।" इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

छगलाङ्घ्री, स्त्री, (छगलवदङ्घ्रिर्मूलमस्याः । ततो ङीष् ।) छगलान्त्री । इत्यमरटीकायां रमानाथः ॥

छगलाक्षी, स्त्री, (छगलवदक्षं अन्नं यस्याः ।) छगलान्त्री । इत्यमरटीकायां रायमुकुटः ॥ (पुंसि तु पीठस्थानभेदे । यथा, देवीभागवते । ७ । ३० । ७३ ।

"छगलण्डे प्रचण्डा तु चण्डिकाऽमरकण्टके ॥")

छगलान्त्रिका, स्त्री, (छगलान्त्री + स्वार्थे कन् । टापि पूर्वह्रस्वः ।) छगलान्त्री । इति शब्दरत्नावली ॥

छगलान्त्री, स्त्री, (छगलवदन्त्रं यस्याः ।) वृहद्दारकवृक्षः । इत्यमरः । २ । ४ । १३० । वृक्षः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने । ३८ अध्याये । "श्यामासहाश्यामात्रिवृद्दन्तीग्रन्थिनीतिल्वककम्पिल्लकरञ्चकक्रमुकपुन्नागश्रेणीगवाक्षीराजवृक्षकरञ्जदयगुडूचीसप्तलाच्छगलान्त्रीसुधाः सुवर्णक्षीरी चेति ॥")

छगली, स्त्री, (छगल + जातित्वात् ङीष् ।) छागमाता । वृहद्दारकवृक्षः । इति विश्वः ॥

छटा, स्त्री, (छो + अटन् किच्च ।) दीप्तिः । (यथा, राजतरङ्गिण्याम् । ४ । १२८ ।

"प्रतापांशुच्छटाकूटैः पटवासमधर्म्मभिः ।
जम्बुद्वीपद्विजेन्द्रस्य येनातन्यत मण्डनम् ॥")

समूहः । यथा, माघे । १ । ४७ ॥

"सटाच्छटाभिन्नघनेन बिभ्रता
तृसिंहसैंहीमतनुं तनुत्वया ।"

(सटाच्छटाभिः केशरसमूहैः ।" इति मल्लिनाथः ॥)

छटाफलः, पुं, (छटा इव परस्परसंश्लष्टानि फलानि यस्य ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः ॥ (पूगशब्दे विवृतिरस्य ज्ञेया ॥)

छटाभा, स्त्री, (छटाभिर्दीप्तिभिर्भाति इति । भा + क्विप् । यद्वा । भा + कः । टाप् च ।) विद्युत् । इति हारावली । ५८ ॥

छद(च)त्रं, क्ली, (छादयत्यनेनातपादिकमिति । छद + णिच् + "सर्व्वधातुभ्यः ष्ट्रन् ।" उणां । ४ । १५८ । इति ष्ट्रन् णिलोपः ह्रस्वश्च ।) रौद्रदृष्टिनिवारणार्थावरणविशेषः । छाति इति भाषा ॥ तत्पर्य्यायः । आतपत्रम् २ । इत्यमरः । २ । ८ । ३२ ॥ छायामित्रम् ३ पटोटजम् ४ । इति शब्दरत्नावली ॥ आतपवारणम् ५ । राजच्छत्रं यथा,—

"आतपत्रञ्च राज्ञस्तु शुक्लवर्णं सितन्तु तत् ।

पुष्करीकमधो भद्रासनं राजासनं तु यत् ॥"
इति जटाधरः ॥

अपि च शब्दरत्नावल्याम् ।
"छत्रे कनकदण्डे तु रागश्छत्रमुदाहृतम् ।
नृपलक्ष्म भवेत्तत्तु यच्छत्रं पृथिवीभुजाम् ॥"
तस्य गुणाः । दृष्टातपधूलिवायुहिमनाशित्वम् । वर्णदृष्टिकारित्वम् । गुप्तावरणमङ्गलकारित्वञ्च । इति राजवल्लभः ॥ * ॥ तस्योत्पत्तिर्यथा । एकदा व्येऽमासे जमदग्निमुनिर्धनुषि बाणान् सन्धाय सन्धाय प्रचिक्षेप ततः पत्नी रेणुका तान् बाणानानीयानीय तस्मै प्रादात् । सा मध्याह्नकाले रौद्रेण पीड़िता वृक्षच्छायामवलम्ब्य किञ्चित् कालं स्थित्वा तानानिनाय । ऋषिस्तदा क्रुद्धस्तामाह किं चिरेणागता । सा आह सूर्य्यतेजसा मे शिरः पादौ च सन्तप्तौ तेन वृक्षच्छायामाश्रित्य स्थिता तस्मात् चिरायेतत् कृतम् । तच्छ्रुत्वा मुनिराह अद्य सूर्य्यमस्त्राग्नितेजसा निपातयिष्यामीत्युक्त्वा धनुषि बाणान् सन्धाय सूर्य्याभिमुखोऽतिष्ठत् । सूर्य्यस्तं दृष्ट्वा भीतो द्विजरूपेण आगत्य आह सूर्य्यादनादि भवति तेनान्नेन भवद्भिः कर्म्माणि क्रियन्ते कथमेनं हनिष्यसि एवं माकार्षीस्तथापि मुनिः शमं न जगाम । अथ सूर्य्यः शिरस्त्राणं छत्रं निर्म्माय तस्मै दत्त्वा अद्यप्रभृति एतत् लोके प्रचरिष्यति व्रतादिषु च अस्य दानं महाफलं स्यादित्युक्त्वा गतः ॥ * ॥ तस्य दानफलं यथा,—
"छत्रं हि भरतश्रेष्ठ ! यः प्रदद्यात् द्विजातये ।
शुभं शतशलाकं वै स प्रेत्य सुखमेधते ॥
स शक्रलोके वसति पूज्यमानो द्विजातिभिः ।
अप्सरोभिश्च सततं देवैश्च भरतर्षभ ! ॥"
इति महाभारते दानधर्म्मः ॥

अथ छत्रयुक्तिः ।
"विशेषस्याथ सामान्यं छत्रस्य द्विविधा भिदा ।
राज्ञश्छत्रं विशेषाख्यं सामान्यस्यान्यदुच्यते ॥
तत्र विशेषच्छत्रोद्देशः ।
सदण्डस्याथ निर्दण्डं तज्ज्ञेयं द्विविधं पुनः ।
सदण्डं तत्र विज्ञेयं सारणाकुञ्चनात्मकम् ॥
दण्डः कन्दः शलाकाश्च रज्जुर्वस्त्रञ्च कीलकः ।
षड्भिरेतैः सुसन्दिष्टैश्छत्रमित्यभिधीयते ॥
दिगष्टषट्चतुर्हस्तदीर्घो दण्डो युगक्रमात् ।
षड्बाणवेदनयनवितस्त्या कन्द उच्यते ॥
शतान्यष्टौ शलाकाः षष्टिश्च चत्वारिंशदृयुगक्रमात् ।
शलाकाः षट्पञ्चवेदत्रिहस्तैः सम्मिताः क्रमात् ॥
कवभिस्तन्तुभिः सूत्रं सूत्रैस्तु नवभिर्गुणः ।
गुणैस्तु नवभिः पाशो रश्मिस्तैर्नवभिर्भवेत् ॥
नवाष्टसप्तषट्संख्यैरश्मिभी रज्जवः क्रमात् ।
वस्त्रं शलाकाद्विगुणमायामेन प्रतिष्ठितम् ॥
भानुदिग्ग्रहवसुभिरङ्गुलीभिस्तु कीलकः ।
वस्त्रां षष्ठ्यानसदितं तदाज्ञामेव भूतये ॥
पादोनं युवराजस्य अन्येषान्तु तदर्द्धतः ॥
एतेन राज्ञो दण्डो दशहस्तः युवराजस्य ततः अन्येषामपि तदेव ।
विशुद्धकाष्ठस्य तु दण्डकन्दौ
तथा शलाका अपि शुद्धवंशजाः ।
रज्जुश्च रक्ता वसनञ्च रक्तं
छत्रप्रसादं नृपतेर्वदन्ति ॥
प्रसादमिति प्रसादार्हम् ।
नीलो दण्डश्च वस्त्रञ्च शिरःकुम्भस्तु कानकः ।
सौवर्णं युवराजस्य प्रतापं नाम विश्रुतम् ॥
चान्दनौ दण्डकन्दौ चेत् सुशुक्ले रज्जुवाससी ।
छत्रं मनोहरं राज्ञां स्वर्णकुम्भोपशोभितम् ॥
शुक्लानि रज्जुवासांसि स्वर्णकुम्भस्तथोपरि ।
इदं कनकदण्डाख्यं छत्रं सर्व्वार्थसाधकम् ॥
दण्डकन्दशलाकाश्च शुद्धस्वर्णेन निर्म्मिताः ।
कीलकं स्वर्णघटितमशुक्ले रज्जुवाससी ॥
कुम्भादिरथ हंसादिश्चामरादिर्यथाक्रमम् ।
कुम्भादावथ हंसादौ नवरत्नानि रचयेत् ॥
द्वात्रिंशन्मौक्तिकी माला द्वात्रिंशद्वस्त्र दापयेत् ।
सर्व्वोपरि ब्रह्मजातिं विशुद्धं हीरकं न्यसेत् ॥
दण्डान्ते कुरुविन्दांश्च पद्मरागांश्च विन्यसेत् ।
खामिहस्तैकमानेन चामरः सित इष्यते ॥
इत्ययं नवदण्डाख्यश्छत्रराजो महीभुजाम् ।
अभिषेके विवाहे च ग्रहाणां प्रीतिवर्द्धनः ॥
पताका नवदण्डाये राज्ञोऽष्टाङ्गुलिसंमिताः ।
अयं दिग्विजयी नाम छत्रराजो महीभुजाम् ॥"
इति भोजराजकृतयुक्तिकल्पतरुः ॥

छत्रः, पुं, (छद + णिच् + ष्ट्रन् ह्रस्वश्च ।) म्लेच्छ पक्षेन च वचाकारवृक्षः । छातारियाविष । छातनाविष । खरविष इति च भाषा । तत्पर्य्यायः । अतिच्छत्रः २ कटुः ३ । इति रत्नमाला ॥ भूतलक्षम् । इति राजनिर्घण्टः ॥

छत्रकः, पुं, (छत्रमिव कायति इति । कै + कः ।) मत्स्यरङ्गपक्षी । इति शब्दचन्द्रिका ॥ अतिच्छत्रः । राङ्गा कुलेखाड़ा इति भाषा ॥ इति रत्नमाला ॥ ईश्वरगृहविशेषः । इति शब्दरत्नावली ॥

छत्रगुच्छः, पुं, (छत्रमिव गुच्छो यस्य ।) गुच्छलक्षम् । इति राजनिर्घण्टः ॥

छत्रचक्रं, क्ली, (छत्राकृति चक्रम् ।) चक्रविशेषः । यथा, समयान्ते छत्रचक्रम् ।
"अश्विनीमघमूलाद्यं चक्रं छत्रचयात्मकम् ।
प्रतीचीमधरेखाया ईशानान्तं हयाधिपः ॥
आग्नेयान्तं नराधीशो नैर्ऋतान्तं गजाधिपः ।
एषा छत्रविभागेन ज्ञातव्या शुभाशुभम् ॥
अन्यस्य राज्ञो नामर्क्षं यत्र छत्रे ततः फलम् ।
चामरं कलसं वीणा छत्रं दण्डः पतद्ग्रहः ॥
आसनं कीलकं रज्जुर्नव भेदाः प्रकीर्त्तिताः ।
यत्र छत्रे स्थितः सौरिर्भङ्गं तस्य विनिर्द्दिशेत् ॥
चामरे चञ्चता वायोरनावृष्टिः प्रजायते ।
दुर्भिक्षञ्च भवेत् घोरं प्रजापीड़ा न संशयः ॥
कलसस्थे भवेद्युद्धं भङ्गो घातादिकं ध्रुवम् ।
वीणास्थेनार्कपुत्रेण षड्राज्ञो विनश्यति ॥
चलचित्तो भवेद्राजा भयभीता च मेदिनी ।
यदा ऋक्षत्रये सौरिश्छत्रे दण्डे पतद्ग्रहे ॥
तदा तस्य भवेद्भङ्गश्छत्रस्यास्य न संशयः ।
आसनस्थे भवेन्नाश आसनस्थे ग्रनैश्चरे ॥
युवराजत्रयः कीले बन्धनं रज्जुसंस्थिते ।
सौम्ययुक्तोऽतिचारस्थः शनिरुक्तफलो न हि ॥
वक्रगः क्रूरयुक्तश्च सर्व्वं क्रूरं करोति सः ।
शनिराहुकुजादित्या यदा जीवेन्दुसंयुताः ॥
उत्तराधीशराज्ञो वै निश्चितं छत्रभङ्गदाः ।
क्रूरं चतुष्टयञ्चैव बुधचन्द्रेण संयुतम् ॥
पूर्व्वच्छत्रविनाशाय तथा पापचतुष्टयम् ।
शुक्रेन्दुसंयुतं छत्रे दक्षिणे ग्रस्तभङ्गदम् ॥
एवमन्येषु राज्येषु नामर्क्षात् फलमादिशेत् ।
यथा दुष्टफलः सौरिस्तथा सौम्यफलो गुरुः ॥
भौमज्ञौ गुरुराहू च रविचन्द्रौ बले समौ ।
यथा हानिकराः क्रूरास्तथा सौम्याः शुभङ्कराः ॥
एतेऽष्टौ ग्रहाश्छत्रे परचक्रेण भङ्गदाः ।
नृपनामर्क्षगो राहुः केतुर्वा यत्र संस्थितः ॥
छत्रभङ्गो भवेत्तस्य विषदानेन भूपतेः ।
मृगयासाहसं यात्रां दुष्टहस्त्यश्वबाहनम् ॥
विग्रहञ्च त्यजेद्राजा छत्रस्थे क्रूरखेचरे ।
शास्त्रैवं शान्तिकं कुर्य्यात् ग्रहाणां जायते शुभम् ॥"

छत्रधारः, पुं, (छत्रं धरतीति । धृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) छत्रधरः । छातिधरा इति भाषा ॥ तत्पर्य्यायः । छायाकरः २ । इति हेमचन्द्रः । ३ । ४२८ ॥ (यथा, पद्मतन्त्रे । ३ । ६७ । "खपचे च यथा, जननी देवी कञ्चुकी मालिकः शय्यापालकः खशाध्यक्षः सांवत्सरिकः भिषक् जलवाहकः ताम्बूलवाहकः आचार्य्यः अङ्गरक्षकः स्थानचिन्तकः छत्रधारः विलासिनी च ॥")

छत्रपत्रं, क्ली, (छत्रमिव पत्रमस्य ।) स्थलपद्मम् । इति त्रिकाण्डशेषः ॥

छत्रपत्रः, पुं, (छत्रमिव विस्तृतं पत्रमस्य ।) भूर्जवृक्षः । इति रत्नमाला ॥ (भूर्जशब्दे विवृतिरस्य ज्ञातव्या ॥) मानकचुः । इति केचित् ॥ सप्तपर्णवृक्षः । इति च केचित् ॥

छत्रभङ्गः, पुं, (छत्रस्येव रचितुः स्वामिन इत्यर्थः भङ्गो यत्र ।) वैधव्यम् । खातन्त्र्यम् । नृपनाशः । इति मेदिनी । गे, ५६ ॥

छत्रा, स्त्री, (छत्रमिव आकृतिर्विद्यतेऽस्याः । अर्शआदित्वादच् ततष्टाप् । यद्वा, छदति आच्छादयति स्रोतःपत्तिस्थानमिति । छद् + "सर्व्वधातुभ्यः ष्ट्रन् ।" उणा० । ४ । १५८ । इति ष्ट्रन् । ततः छित्रत्वस्य ङीषोऽनित्यत्वात् टाप् ।) मिधिः । मौरी इति भाषा ॥ कुसुम्भुरु । धन्या इति भाषा ॥ (यथा,—
"सुस्नपर्पटकोदीच्यछत्राख्योशीरचन्दनैः ।
शृतं शीतं जलं दद्यात् लड्डाहज्वरशान्तये ॥
छत्रा धान्याकम् ॥" इति भावप्रकाशः ॥)
शिलीन्ध्रम् । इति मेदिनी । रे, ३८ ॥ कोँड़कछाता इति भाषा ॥ मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (निवृत्तसन्तापान्तर्गतरसायनौषधिविशेषः । तस्य

लक्षणं यथा, सुश्रुते चिकित्सितस्थाने ३० अः।
"कृष्णसर्पस्वरूपेण वाराहीकन्दसम्भवा।
एकपत्रा महावीर्या भिन्नाञ्जनसमप्रभा॥
छत्रातिच्छत्रके विद्याद्रक्षोघ्ने कन्दसम्भवे॥")

छत्राकं, क्ली, (छत्रा इव कायतीति। कै+कः।) किम्याकुः। छत्रिका। इति प्रायश्चित्तविवेकः॥ (यथा, मनुः। ५। १६।
"छत्राकं विड्वराहञ्च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनञ्चैव मत्वा जग्ध्वा पतेद्द्विजः॥")

छत्राकः, पुं, (छत्रमिव अकति आच्छादकत्वं गच्छतीति। छत्र+अक्+अच्।) जालवर्ब्बूरकवृक्षः। इति राजनिर्घण्टः॥

छत्राकी, स्त्री, (छत्राक+गौरादित्वात् ङीष्।) रास्ना। इत्यमरः। २। ४। ११५॥

छत्रातिच्छत्रः, पुं, (छत्रमतिक्रम्य छदति आच्छादयतीति। अति+छद्+ण्।) छत्राकारजलोद्भवसुगन्धास्यलतृणविशेषः। तत्पर्य्यायः। छत्रातिच्छत्रा २ पालघ्नः ३ अतिच्छत्रा ४ सुगन्धा ५ छत्रकः ६ कटुकः ७ कटुः ८। इति शब्दरत्नावली॥

छत्राधान्यं, क्ली, (छत्रा धान्यमिव।) धान्याकम्। इति राजनिर्घण्टः॥

छत्रिका, स्त्री, (छत्रा एव। छत्रा+स्वार्थे कन्। अत इत्वञ्च।) ग्लिलीन्ध्रम्। कौँड़कछाता इति भाषा॥ तत्पर्य्यायः। गोमयच्छत्रिका २ दिलीरम् ३ ग्लिलीन्ध्रकम् ४ उर्व्वङ्गम् ५ वसारोहम् ६ गोलासम् ७। इति हारावली॥ छत्राकम् ८। इति स्मृतिः॥ उच्छिलीन्ध्रम् ९। इति श्रीभागवतम्॥ करीषेचुपलालपृथ्वीवेणुजच्छत्रिकायाः सामान्यगुणाः। शीतत्वम्। कषायत्वम्। स्वादुत्वम्। पिच्छिलत्वम्। गुरुत्वम्। कृद्दोषातीसारज्वरश्लेष्मरोगकारित्वञ्च॥ पलालजच्छत्रिकागुणाः। पाके स्वादुरसत्वम्। रूक्षत्वम्। दोषकारित्वञ्च॥ शुचिस्थानकालवंशगोहजश्वेतच्छत्रिकाया गुणाः। अतिदोषकारित्वम्। अन्यच्छत्रिकास्तेभ्यो विगर्हिताः। इति राजवल्लभः॥

छत्री, [न्] पुं, (छत्रं कौशलादिभिराच्छादकत्वं विद्यतेऽस्य। छत्र+इनिः।) नापितः। इति शब्दरत्नावली॥ छत्रविशिष्टे, त्रि। यथा,—
"गच्छेद्वर्षातपे छत्री दण्डी रात्र्यटवीषु च।"
इति स्मृतिः॥
(यथा च हरिवंशे। २५३। ५।
"मौञ्जी यज्ञोपवीती च छत्री दण्डाजिनी तथा।
वामनो धूमरक्ताक्षो भगवान् बालरूपधृक्॥")

छत्वरः, पुं, (छदते अपवारयति वर्षोष्णादिकमिति। छद अपवारणे+"छित्वरच्छत्वरेति।" उणां। ३। १। इति ध्वरच् प्रत्ययेन साधुः।) गृहम्। कुञ्जः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

छद, तृ क संवृतौ। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं सकं सेट्।) छदयति। इति दुर्गादासः॥ (यथा, कविरहस्ये। १६।
"छदयति सुरलोकं यो गुणैर्यश्च युद्धे
सुरयुवतिविसृत्राश्छादयन्ति स्म यञ्च॥")

छद, कि ञ संवृतौ। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-उभं-सकं-सेट्।) कि ञ, छादयति छादयते छदति छदते दिशं मेघः। आच्छादयति इत्यर्थः। इति दुर्गादासः॥

छद, म कि ञ ऊर्ज्जने। ऊर्ज्जनं बलं जीवनञ्च। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-उभं-सकं-सेट्।) छदयति पुत्रं पिता। जीवयति बलवन्तं करोति वा इत्यर्थः। इति दुर्गादासः॥

छदः, पुं, (छदति आच्छादयतीति। छद+अच्।) पत्रम्। (यथा, रामायणे। २।५५।६।
"ततो न्यग्रोधमासाद्य महान्तं हरितच्छदम्॥")
पत्रः। ग्रन्थिपर्णवृक्षः। तमालवृक्षः। इति मेदिनी। दे, ५॥

छदनं, क्ली, (छदति आच्छादयतीति। छद+ल्युः।) पत्रम्। पत्रः। (यथा, महाभारते। ३। १५८। ६६।
"विमलस्फाटिकाभानि पाण्डरच्छदनैर्द्विजैः।
कलहंसैरुपेतानि सारसाभिरुतानि च॥"
छद+भावे ल्युट्।) पिधानम्। इति मेदिनी। ने, ६५॥ तमालपत्रम्। इति राजनिर्घण्टः॥ तेजपात इति भाषा॥

छदपत्रः, पुं, (छदानि आच्छादकानि पत्राणि यस्य।) भूर्जपत्रवृक्षः। इति कात्यायनी रत्नमाला॥

छदिः, [स्] क्ली, (छादयतीति छाद्यतेऽनेन वा। छद्+णिच्+"अर्त्तिसुचिहुसृपिछादिछर्दिभ्य इसिः।" उणां। २। १०६। इति इसिः। "इसन्नन्नृक्षिषु च।" ६। ४। ६७। इति ह्रस्वः।) पटलम्। इत्यमरः। २। २। १४॥ (यथा, भागवते। ७। १४। १३।
"कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम्।
क्व तदीयरतिर्भार्य्या क्वायमात्मा नभश्छदिः॥")

छद्म, [न्] क्ली, (छद्यते आव्रियते स्वरूपमनेनेति। छद+"सर्व्वधातुभ्यो मनिन्।" उणां। ४। १४४। इति मनिन्।) व्याजः। (यथा, रघुः। १२। २
"तं कर्णमूलमागत्य रामे श्रीर्न्यस्तामिति।
कैकेयीग्रहणेवाह पलितच्छद्मना जरा॥")
कपटः। प्राग्भम्। व्यपदेशः। स्वरूपाच्छादनम्। इति मेदिनी। ने, ६४॥

छद्मतापसः, पुं, (छद्मना कपटेन तापसः। अप्रकृततपस्वितया एवास्य तथात्वम्।) कृतपस्वी। तत्पर्य्यायः। सर्व्वाभिसन्धी २ वैडालव्रतिकः ३ वैशधारी ४। इति शब्दरत्नावली॥

छद्मिका, स्त्री, (छद्म अस्त्यस्याः। व्रीह्यादित्वादिनिः संज्ञायां कन् टाप् च।) गुडूची। इति राजनिर्घण्टः॥

छन्दः, पुं, (छन्द्यते इति। छन्द+भावे घञ्।) अभिप्रायः। (यथा, रामायणे। २। ६। ७।
"मयोच्यमानं यदि ते श्रोतुं छन्दो विलासिनि!।
श्रूयतामभिधास्यामि श्रुत्वा चैतद्विधीयताम्॥")

वग्गः। इत्यमरः। ३। ३। ८८॥ अभिलाषः। इति भरतः॥ विषम्। इति शब्दचन्द्रिका॥ रहसि त्रि। इत्यमरटीकासारसुन्दरी॥

छन्दः, [स्] क्ली, (चन्द्यते आह्लाद्यते चन्द्यतेऽनेन वा। चदि आह्लादे+"चन्देरादेश्च छः।" उणां। ४। २१८। इति असुन् चस्य छश्च।) वेदः। (यथा, रघुः। १। ११।
"आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव॥")
स्वेराचारः। अभिलाषः। (यथा, महाभारते। १२। २०१। १२।
"कामात्मकाश्छन्दसि कर्म्मयोगा
एभिर्विमुक्तः परमभ्युपैति॥")
पद्यम्। इति मेदिनी। से, २२॥ अस्य लक्षणं यथाह गङ्गादासः।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्॥
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः॥
आदिस्तृतीयवद्यस्य पादस्तुर्य्यो द्वितीयवत्।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम्॥"
एषामर्थः। अक्षरसंख्यातं अक्षरगणनया परिप्राप्तं वृत्तमुच्यते। मात्राकृता मात्रागणनया निर्णीता जातिर्जातिसंज्ञिका भवति। समं समचतुष्पादम्। अर्द्धसमं यस्य प्रथमः पादः तृतीयेन पादेन तुल्यः चतुर्थः पादो द्वितीयेन पादेन तुल्यः। विषमं पृथक्लक्षणचतुष्पादम्॥ (तच्च समवृत्तन्तु उक्थादिसंज्ञाभेदेन षड्विंशतिप्रकारकम्। यदुक्तं छन्दोमञ्जर्य्याम्।
"आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्द्धितैः।
पादैरुक्थादिसंज्ञं स्याच्छन्दः षड्विंशतिं गतम्॥
उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुपूर्ब्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च॥
त्रिष्टुप् च जगती चैव तथातिजगती मता।
शक्करी सातिपूर्ब्बा स्यादष्ट्यत्यष्टी तथा स्मृते॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः।
विकृतिः संकृतिश्चैव तथातिकृतिरुत्कृतिः॥"
छन्दोलक्षणोपयोगिगणास्तु दश्र। यदुक्तं तत्रैव,
"स्मरस्तजैर्भुगैर्लान्तैरेभिदशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना॥
मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥
गुरुरेको गकारस्तु लकारो लघुरेककः।
क्रमेण चैषां रेखाभिः संस्थानं दर्शयते यथा॥"
म ऽऽऽ, न ।।।, भ ऽ।, य ।ऽऽ, ज ।ऽ।,
र ऽ।ऽ, स ।।ऽ, त ऽऽ।, ग ऽ, ल।)
छन्दस्तु नानाविधम्। तस्य संज्ञाः छन्दोविचितिपिङ्गलछन्दोमञ्जरीवृत्तरत्नाकरश्रुतबोधाद्यैः सन्ति तेषु छन्दोमञ्जर्य्यादुक्तलक्षणोदाहरणादीनि लिख्यन्ते॥

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणाः।	छन्दसामुदाहरणानि।
एकाक्षरा वृत्तिः। उक्था।		
श्रीः	गश्री २	श्रीस्ते। सास्ताम्॥
द्व्याक्षरा वृत्तिः। अत्युक्था।		
स्त्री	गौ स्त्री २,२	गोपस्त्रीभिः। कृष्णो रेमे॥
त्र्याक्षरा वृत्तिः। मध्या।		
नारी	मो नारी २२२	गोपानां नारीभिः। श्लिष्टोऽवात् कृष्णो वः॥
मृगी	रो मृगी २।२	सा मृगीलोचना। राधिका श्रीपतेः॥
चतुरक्षरा वृत्तिः। प्रतिष्ठा।		
कन्या	म्यौ चेत् कन्या २,२२२	भास्वत्कन्या सैका धन्या। यस्याः कूले कृष्णोऽखेलत्॥
सती	नगि सती ।।।,२	सुररिपो! तव पदम्। नमति सा ननु सती॥
पञ्चाक्षरा वृत्तिः। सुप्रतिष्ठा।		
पङ्क्तिः	भ्गौ गिति पङ्क्तिः २।।,२,२	कृष्णसनाथा तर्णकपङ्क्तिः। यासुनकच्छे चारु चचार॥
प्रिया	सलगैः प्रिया ।।२,।,२	व्रजसुभ्रुवो विलसत्कलाः। अभवन् प्रिया सुरवैरिणः॥
षडक्षरा वृत्तिः। गायत्री।		
तनुमध्या	त्यौ चेत् तनुमध्या २२।,।२२	मूर्त्तिर्मुरघ्नोरद्भुतरूपा। आस्तां मम चित्ते नित्यं तनुमध्या॥
अग्निवदना	अग्निवदना न्यौ ।।।,।२२	अग्निवदनानां व्रजतरुणीनाम्। अधरसुधोर्म्मिं मधुरिपुरैच्छत्॥
सोमराजी	द्विया सोमराजी ।२२,।२२	हरे! सोमराजीसमा ते यशः श्रीः। जगन्मण्डलस्य च्छिनत्त्यन्धकारम्॥
विद्युल्लेखा	विद्युल्लेखा मो मः २२२, २२२	
वसुमती	तृतौ चेद् वसुमती २२।,।२	
सप्ताक्षरा वृत्तिः। उष्णिक्।		
मधुमती	ननगि मधुमती ।।।,।।।,२	रविदुहितटे नवकुसुमततिः। वधित मधुमती मधुमथनमुदम्॥
कुमारललिता	कुमारललिता जसगाः ।२।,।।२,२	सुरारितनुवल्ली कुमारललिता सा। व्रजैजनयमानां तताद मुदमुच्चैः॥
मदलेखा	मसगौ स्यात् मदलेखा २२२,।।२,२	रङ्गे बाहुविलमाद्दन्तीन्द्राम्मदलेखा। लभाभून्मुरघ्नौ कस्तूरीरसचर्चा॥
हंसमाला	सरगैर्हंसमाला ।।२,२।२,२	
अष्टाक्षरा वृत्तिः। अनुष्टुप्।		
चित्रपदा	चित्रपदा यदि भौ गौ २।।,२।।,२,२	यासुनसैकतदेशे गोपवधूजलकेलौ। कंसरिपोर्गतिलीला चित्रपदा जगदद्यात्॥
माणवकम् माणवकक्रीड़मिति केचित्।	भात्तलगा माणवकम् २।।,२२।,।,२	चञ्चलचूड़चपलैर्वेतसकूले: केलिपरम्। ध्याय सखे स्मेरमुखं नन्दसुतं माणवकम्॥
विद्युन्माला	मो मो गो गो विद्युन्माला २२२,२२२,२,२	वासो वल्लीविद्युन्माला वर्हश्रेणी शाक्रच्चापः। यस्मिन्नास्तां तापोच्छित्त्यै गोमध्यस्थः कृष्णाभोदः॥
समानिका	म्यौ रजौ समानिका तु २,।,२।२,।२।	यस्य कृष्णपादपद्ममस्ति हृत्तड़ागसद्म। धीः समानिका परेण नोचिताच्च मत्सरेण॥
प्रमाणिका नगस्वरूपिणी इति कुत्रापि।	प्रमाणिका जरौ लगौ ।२।,२।२,।,२	पुनातु भक्तिरच्युता सदाच्युताङ्घ्रिपद्मयोः। श्रुतिस्मृतिप्रमाणिका भवाम्बुराशितारिका॥
गजगतिः	नभलगा गजगतिः ।।।,२।।,।,२	रविसुतापरिसरे विहरतो हरिं हरेः। व्रजवधूगजगतिसुदमलं व्यतनुत॥
हंसरुतम्	म्यौ गौ हंसरुतमेतत् २२२,।।।,२,२	
नाराचिका	नाराचिका तरौ लगौ २२।,२।२,।,२	
नवाक्षरा वृत्तिः। बृहती।		
भुजगशिशुभृता भृतेत्यत्र हृतेति युतेति च केचित्।	भुजगशिशुभृता नौ मः ।।।,।।।,२२२	वृन्दातटनिकटचौञ्चौ भुजगशिशुभृता यासीत्। सुररिपुदलिते नागे व्रजजनसुखदा साभूत्॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
मणिमध्यम्	स्याच्चेन्मणिमध्यं भमसाः ऽ।।,ऽऽऽ,।।ऽ	कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा ।
भुजङ्गसङ्गता	सजरैर्भुजङ्गसङ्गता ।।ऽ,।ऽ।,ऽ।ऽ	चित्रपदाभो नन्दसुतश्चारु ननर्त्त स्वैरसुखः ॥
		तरला तरङ्गरिङ्गितैर्यमुना भुजङ्गसङ्गता ।
		कथमेतु वत्सचारकश्चपलः सदैव तां हरिः ॥
हलमुखी	राज्ञसाविह हलमुखी ऽ।ऽ,।।।,।।ऽ	
भद्रिका	भद्रिका भवति रो नरौ ऽ।ऽ,।।।,ऽ।ऽ	
दशाक्षरा वृत्तिः । षड्वृत्तिः ।		
रुक्मवती	रुक्मवती सा यत्र भमस्गाः ऽ।।,ऽऽऽ,।।ऽ,ऽ	कायमनोवाक्यैः परिशुद्धैर्यस्य सदा कंशद्विषि भक्तिः ।
रूपवती क्वचित् । चम्पकमाला इति क्वापि ।		राज्यपदे हन्मिथ्यालिरुदारा रुक्मवती विघ्नः खलु तस्य ॥
मत्ता	ज्ञेया मत्ता मभसगसहिता ऽऽऽ,ऽ।।,।।ऽ,ऽ	पीत्वा मत्ता मधु मधुपाली कालिन्दीये तटवनकुञ्जे ।
		उद्दीयन्तीव्रजजनरामाः कामासक्ता मधुजिति चक्रे ॥
त्वरितगतिः	त्वरितमतिश्च नजनगैः ।।।,।ऽ।,।।।,ऽ	त्वरितगतिर्व्रजयुवतिस्तरणिसुताविपिनगता ।
		सुररिपुणा रतिगुरुणा परिरमिता श्रमदमिता ॥
मनोरमा	नरजगैर्भवेन्मनोरमा ।।।,ऽ।ऽ,।ऽ।,ऽ	तरणिजातटे विहारिणी व्रजविलासिनी विलासतः ।
		सुररिपोस्तनुः पुनातु वः सुकृतशालिनां मनोरमा ॥
शुद्धविराट्	भ्सौ ज्गौ शुद्धविराड्दं मतम् ऽऽऽ,।ऽ,।ऽ।,ऽ	
पणवम्	न्यौ य्गौ चेति पणवनामेदम् ऽऽऽ,।।।,।ऽऽ,ऽ	
मयूरसारिणी	र्न्यौ र्गौ मयूरसारिणी स्यात् ऽ।ऽ,।ऽ।,ऽ।ऽ,ऽ	
उपस्थिता	तो न्यौ गुरुश्चेयमुपस्थिता ऽऽ।,।ऽ।,।ऽ।,ऽ	
दीपकमाला	दीपकमाला भ्मौ मता ज्गौ ऽ।।,ऽऽऽ,।ऽ।,ऽ	
हंसी	ज्ञेया हंसी मभनगयुता ऽऽऽ,ऽ।।,।।।,ऽ	
एकादशाक्षरा वृत्तिः । त्रिष्टुप् ।		
इन्द्रवज्रा	स्यादिन्द्रवज्रा यदि तौ जगौ गः ऽऽ।,ऽऽ।,।ऽ।,ऽ,ऽ	गोष्ठे गिरिं सव्यकरेण धृत्वा रुष्टेन्द्रवज्राहतियुक्तदृष्टौ ।
		यो गोकुलं गोपकुलञ्च सुप्तं चक्रे स नो रक्षतु चक्रपाणिः ॥
उपेन्द्रवज्रा	उपेन्द्रवज्रा जतजास्ततो गौ ।ऽ।,ऽऽ।,।ऽ।,ऽ,ऽ	उपेन्द्रवज्रादिमणिच्छटाभिर्विभूषणानां छुरितं वपुस्ते ।
उपेन्द्रवज्रायाः इन्द्रवज्रायाश्च चरणघटिता उपजातयः । ताश्च चतुर्वर्णप्रस्तारभेदादादन्यौ त्यक्त्वा चतुर्दशप्रकारा भवन्ति ।	अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः । इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥	स्मरामि गोपीभिरुपास्यमानं सुरद्रुमूले मणिमण्डपस्थम् ॥
सुमुखी	नजजलगैर्गदिता सुमुखी ।।।,।ऽ।,।ऽ।,ऽ,ऽ	तरणिसुतातटकुञ्जगृहे वदनविधुस्मितदीधितिभिः ।
		तिमिरमुदस्य सुखं सुमुखी हरिमवलोक्य चुचुम्ब चिरम् ॥
ग्लानिनी	मात्तौ गौ चेत् ग्लानिनी वेदलोकैः ऽऽऽ,ऽऽ। ऽऽ।,ऽ,ऽ	अंहो हन्ति ज्ञानवृद्धिं विधत्ते धर्म्मं धत्ते काममर्थञ्च सूते।
अस्याश्चतुर्थे ततः सप्तमे च यतिः ।		सूक्तिं दत्ते सर्व्वदोपास्यमाना पुंसां श्रद्धाग्लानिनी विष्णुभक्तिः॥
वातोर्म्मी	वातोर्म्मीयं गदिता म्नौ तगौ गः ऽऽऽ,ऽ।।,ऽऽ।,ऽ,ऽ	ध्याता मूर्त्तिः चरमपुरुषस्य श्रेणी नाम्नां गदिता हेलयापि । संसारेऽस्मिन् दुरितं हन्ति पुंसां वातोर्म्मीपोतमिवाम्भोधिमध्ये ॥
भ्रमरविलसिता भ्रमरविलसितमिति केचित् ।	मो गो नौ गो भ्रमरविलसिता ऽऽऽ,ऽ,।।।,।।।,ऽ	सुग्धे ! मानं परिहर न चिरात्तारुण्यन्ते सफलयतु हरिः ।
		फुल्लावल्ली भ्रमरविलसिताभावे शोभां कलयति किमु ताम् ॥
अनुकूला	स्यादनुकूला भतनगगाश्चेत् ऽ।।,ऽऽ।,।।।,ऽ,ऽ	वल्लववेश्या सुररिपुमूर्त्तिर्गोपन्यासोद्दीप्ततरतिपूर्त्तिः ।
		वाञ्छितसिद्ध्यै प्रयतिपरस्य स्यादनुकूला जगति न कस्य ॥
रथोद्धता	रात् परैर्नरलगै रथोद्धता ऽ।ऽ,।।।,ऽ।ऽ,।,ऽ	राधिका दधिविलोड़नस्थिता तार्ण्यवेणुनिनदैरथोद्धता ।
		यासुनं तटनिकुञ्जमञ्जसा सा जगाम सलिलाहृतिच्छलात्॥
स्वागता	स्वागता रनभगैर्गुरुश्च ऽ।ऽ,।।।,ऽ।।,ऽ,ऽ	यस्य चेतसि सदा सुरवैरी वल्लवीजनविलासविलोलः ।
		तस्य नूनममरालयभाजः स्वागतादरकरः सुरराजः ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
दोधकम्	दोधकमिच्छति भत्रितयाद्गौ ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ	देव ! सदोधकदम्बतलस्थ ! श्रीधर ! तारकनामपदं मे । कण्ठतलेऽसुविनिर्गमकाले स्वल्पमपि त्वयमेष्यति योगम् ॥
मोटनकम्	स्यान्मोटनकं तजजाश्च लगौ ऽऽ।,।ऽ।,।ऽ।,।,ऽ	रङ्गे खलु मल्लकलाकुशलश्चाणूरमहाभटमोटनकम् । यः केलिलवेन चकार स मे संसाररिपुं प्रतिमोटयतु ॥
श्येनी श्येनिका इति क्वचित् ।	श्येन्युदीरिता रजौ रलौ गुरुः ऽ।ऽ,।ऽ।,ऽ।ऽ,।,ऽ	यस्य कीर्तिरिन्दुकुन्दचन्दनश्येन्यश्लोकपावनी सदा । जाह्नवीव विश्ववन्द्यविभ्रमा तं भजामि भावगम्यमच्युतम् ॥
श्रीः	वाणरसैः स्यात् भतनगगैः श्रीः ऽ।।,ऽऽ।,।।।,ऽ,ऽ	
वृत्ता	ननसगगुरुरचिता वृत्ता ।।।,।।।,।।ऽ,ऽ,ऽ	
भद्रिका	ननरलगुरुभिश्च भद्रिका ।।।,।।।,ऽ।ऽ,।,ऽ	
मौक्तिकमाला	मौक्तिकमाला यदि भतनात् गौ ऽ।।,ऽऽ।,।।।,ऽ,ऽ	
उपस्थितम्	उपस्थितमिदं जसौ तादृगकारौ।ऽ।,।।ऽ,ऽऽ।,ऽ,ऽ	
उपचित्रम्	उपचित्रमिदं ससमाक्षगौ ।।ऽ,।।ऽ,।।ऽ,।,ऽ	
कुपुरुषजनिता	कुपुरुषजनिता ननौ रगौ गः ।।।,।।।,ऽ।ऽ,ऽ,ऽ	
अनवसिता	अनवसिता न्यौ भगौ गुरुरन्ते ।।।,।ऽऽ,ऽ।।,ऽ,ऽ	
विध्वङ्कमाला	विध्वङ्कमाला भवेत्तौ तगौ गः ऽऽ।,ऽऽ।,ऽऽ।,ऽ,ऽ	
सान्द्रपदम्	सान्द्रपदं स्याद्भतनगलैश्च ऽ।।,ऽऽ।,।।।,ऽ,।	
शिखण्डितम्	शिखण्डितमिदं जसौ तृगौ गुरुश्चेत् ।ऽ।,।।ऽ,ऽऽ।,ऽ,ऽ	
द्वादशाक्षरा वृत्तिः । जगती ।		
चन्द्रवर्त्म	चन्द्रवर्त्म निगदन्ति रनभसैः ऽ।ऽ,।।।,ऽ।।,।।ऽ	चन्द्रवर्त्म पिहितं घनतिमिरे राजवर्त्म रहितं जनगमने: । इदवर्त्म तदलङ्कुरु सरसे ! कुञ्जवर्त्मनि हरिस्तव कुतुकी ॥
वंशस्थविलम् वंशस्थनितमिति क्वापि ।	वदन्ति वंशस्थविलं जतौ जरौ ।ऽ।,ऽऽ।,।ऽ।,ऽ।ऽ	विलासवंशस्थविलं सुखानिलैः प्रपूर्य यः पञ्चमरागसुन्दिरम् । व्रजाङ्गनानामपि गानशालिनां जहार मानं स हरिः पुनातु नः ॥
इन्द्रवंशा वंशस्थविलेन्द्रवंशचरणोभयघटिता- श्चतुर्वर्णप्रस्तारीयाद्यन्तव्यतिरिक्त- चतुर्दशप्रकारा उपजातयो भवन्ति।	स्यादिन्द्रवंशा ततजैरसंयुता ऽऽ।,ऽऽ।,।ऽ।,ऽ।ऽ	दैत्येन्द्रवंशाभिरुदीर्णदीप्तिः पीताम्बरोऽसौ जगतीतमोहरः । । यस्मिन् ममज्जुः शुभा इव स्वयं ते कंसचाणूरमुखा मखद्विषः ॥
जलोद्धतगतिः	जसौ जसयुतौ जलोद्धतगतिः ।ऽ।,।।ऽ,।ऽ।,।।ऽ	यदीयहस्तौ विलोक्य विपदं कलिन्दतनया जलोद्धतगतिः ।
भुजङ्गप्रयातम्	भुजङ्गप्रयातं चतुर्भिर्यकारैः ।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ	विलासविपिनं विवेश सहसा करोतु कुशलं हरौ स जगताम् ॥ सदारात्मजज्ञातिभृत्यो विहाय स्वमेतं हृदं जीवनं लिप्समानः । मया क्लेशितः कालियेत्थं कुरु त्वं भुजङ्ग ! प्रयातं द्रुतं सागराय ॥
तोटकम्	वद तोटकमब्धिसकारयुतम् ।।ऽ,।।ऽ,।।ऽ,।।ऽ	यमुनातटमच्युतकेलिकला- लसदङ्घ्रिसरोरुहसङ्गरुचिम् । मुदितोऽट कलेरपनेतुमघं यदि चेच्छसि जन्म निजं सफलम् ॥
सखिणी	कीर्तितेयं चतुरेफिका सखिणी ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	इन्द्रनीलोपलेनेव या निर्मिता शातकुम्भद्रवालङ्कृता शोभते ! नवमेघच्छविः पीतवासा हरे- र्मूर्तिराक्षां ममेवोरसि सखिणी ॥
वैश्वदेवी	वाणाब्धिश्चिन्ना वैश्वदेवी ममौ यौ ऽऽऽ,ऽऽऽ,।ऽऽ,।ऽऽ	अथोमध्येमां त्वं विहायामराणा- मद्रेतनैकं ह्यणमभ्यर्च भक्त्या । तवाप्येषाभ्यर्चिते भाविनी ते श्रीतः ! सम्यगाराधना वैश्वदेवी ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
प्रमिताक्षरा	प्रमिताक्षरा सजसैः कथिता ।।२,।२।,।।२,।।२	अस्तस्य श्रीकरमिवोद्गिरतो रदमौक्तिकांशुलहरीच्छुरिता । प्रमिताक्षरा सुररिपोर्भणिति- र्व्रजसुभ्रुवामभिजहार मनः ॥
द्रुतविलम्बितम्	द्रुतविलम्बितमाह नभौ भरौ ।।।,२।।,२।।,२।२	तरणिजापुलिने नवकाम्यवी- परिषदा सह केलिकुतूहलात् । द्रुतविलम्बितचारुविहारिणं हरिमहं हृदयेन सदा वहे ॥
मन्दाकिनी	ननररघटिता तु मन्दाकिनी ।।।,।।।,२।२,२।२	बलिदमनविधौ बभौ सङ्गता पदजलरुहि यस्य मन्दाकिनी । सुरनिहितसिताम्बुजस्रङ्निभा हरतु जगदघं स पीताम्बरः ॥
कुसुमविचित्रा	नयसहितौ न्यौ कुसुमविचित्रा ।।।,।२२,।।।,।२२	विपिनविहारे कुसुमविचित्रा कृतुकितगोपीमहितचरित्रा । सुररिपुभङ्गिर्मुखरितवंशा चिरमवताद्वस्तरलवतंसा ॥
तामरसम्	इह वद तामरसं नजजा यः ।।।,।२।,।२।,।२२	स्फुटसुषमामकरन्दमनोज्ञं व्रजललनानयनालिनिपीतम् । तव सुखतामरसं सुरभ्रुवो ! हृदयतडागविकाशि ममास्तु ॥
मालती यमुनेति क्वापि ।	भवति नजावथ मालती जरौ ।।।,।२।,।।।,२।२	इह कलयाद्भुतकेलिकानने मधुरससौरभसारलोलुपः । कुसुमसङ्गतस्मितचारुविभ्रमा मलिरपि चुम्बति मालतीं मुहुः ॥
मणिमाला अस्याः षड्वर्णैर्यतिः ।	न्यौ न्यौ मणिमाला छिन्ना गुरुवक्त्रैः २२।,।२२,२२।,।२२	प्रङ्कामरमौलौ रत्नोपलकल्पे जातप्रतिबिम्बा श्रोणा मणिमाला । गोविन्दपदाब्जे राजी नखराणा- मास्तां मम चित्ते ध्वान्तं भ्रमयन्ती ॥
जलधरमाला अस्याश्चतुर्भिरष्टाभिश्च यतिः ।	मो भः स्त्रौ चेज्जलधरमालाभ्यन्तैः २२२,२।।,।।२,२२२	या भक्तानां कलिदुरितोत्पन्नानां तापोच्छेदे जलधरमाला नव्या । भव्याकारा दिनकरपुत्रीकूले केलीलोला हरितनुरयात् सा वः ॥
पुटः	वसुयुगविरतिर्नौ न्यौ पुटोऽयम् ।।।,।।।,२२२,।२२	
प्रमुदितवदना प्रभेति मल्लिनाथः । गौरीति कौमुदीकारः ।	प्रमुदितवदना भवेन्नौ च रौ ।।।,।।।,२।२,२।२	
प्रियंवदा	भुवि भवेन्नभजरैः प्रियंवदा ।।।,२।।,।२।,२।२	
ललिता	धीरैरभाणि ललिता तभौ जरौ २२।,२।।,।२।,२।२	
उज्ज्वला	ननभरसहिता गदितोज्ज्वला ।।।,।।।,२।।,२।२	
नवमालिका	इह नवमालिका नजभयैः स्यात् ।।।,।२।,२।।,।२२	
ललना	पञ्चमुनि भ्मौ सात् सयुता ललना २।।,२२२,।।२,।।२	
ललितम्	ललितमभिहितं नौ स्त्रौ नामतः ।।।,।।।,२२२,२।२	
द्रुतपदम्	द्रुतपदं भवति नभनयास्थेत् ।।।,२।।,।।।,।२२	
विद्याधारः	सर्वे मा यस्मिन् सोऽयं विद्याधारः स्यात् २२२,२२२,२२२,२२२	
पञ्चचामरम्	लघुर्गुरुर्वदन्ति पञ्चचामरम् ।२।२।२।२।२	
सारङ्गम्	सारङ्गसंज्ञं समस्तैस्सकारैस्तु २२।,२२।,२२।,२२।	
मौक्तिकदाम	समस्तनमीरय मौक्तिकदाम ।२।,।२।,।२।,।२।,	

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणाः।	छन्दसामुदाहरणानि।
मोटकम् तरलनयनम् त्रयोदशाक्षरा वृत्तिः। अतिजगती।	मोटकनाम समस्तभमीरय ऽ।।,ऽ।।,ऽ।।,ऽ।। वरिलघु तरलनयनमिह ।।।।।।।।।।।।	
प्रहर्षिणी त्रिभिर्दशभिश्च यतिः।	त्रयाणाभिर्मनजरगाः प्रहर्षिणीयम् ऽऽऽ,।।।,।ऽ।,ऽ।ऽ,ऽ	गोपीनामधरसुधारसस्य पानै- रुत्तुङ्गस्तनकलसोपगूहनैश्च। आचार्यैरपि रतिविभ्रमैर्मुरारेः संसारे मतिरभवत् प्रहर्षिणीह॥
रुचिरा चतुर्भिर्नवभिश्च यतिः।	जभौ सजौ गिति रुचिरा चतुर्थ्यहैः ।ऽ।,ऽ।।,।।ऽ,।ऽ।,ऽ	पुनातु वो हरिरतिरासविभ्रमी परिभ्रमन् व्रजरुचिराङ्गनान्तरे। समीरणोल्लसितलतान्तरालगो यथा मरुत्तरलतमालभूरुहः॥
मत्तमयूरः चतुर्भिर्नवभिश्च यतिः।	वेदरन्ध्रैर्मौ तौ यसगा मत्तमयूरः ऽऽऽ,ऽऽ।,।ऽऽ,।।ऽ,ऽ	लीलानृत्यन्मत्तमयूरध्वनिकान्तं नृत्यद्गोपामोदिपयोदानिलरम्यम्। कामक्रीडाकृष्टमना गोपवधूभिः कंसध्वंसी निर्ज्जनवृन्दावनमाप॥
चण्डी	नयुगलसयुगलगैरिति चण्डी ।।।,।।।,।।ऽ,।।ऽ,ऽ	जयति दितिजरिपुताण्डवलीला- कुपितकवलकरकालियमौलौ। चरणकमलयुगचपलचण्डी पदनखरुचिजितभोगमणिश्रीः॥
मञ्जुभाषिणी सुनन्दिनीति प्रभौ	सजसा जगौ च यदि मञ्जुभाषिणी ।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	अम्बतोर्मिप्रीतलकरेण लालयं- स्तनुकान्तिचोरितविलोचनो हरे!। नियतं कलानिधिरसीति वल्लवी सुदमच्युते यधित मञ्जुभाषिणी॥
चन्द्रिका उतुपलिनीति क्वापि। विद्युदिति चमेति च क्वापि। सप्तभिः षड्- भिश्च यतिः।	ननततगुरुभिश्चन्द्रिकाश्वर्तुभिः ।।।,।।।,ऽऽ।,ऽऽ।,ऽ	प्रसरदमृतरुचिचन्द्रिकाचालिते दिनकरतनयातीरदेशे हरिः। विहरति रभसाद्गोपीभिः समं त्रिदिवयुवतिभिः कोऽपि देवो यथा॥
कलहंसः सिंहनादः क्वापि।	सजसाः सगौ च कथितः कलहंसः ।।ऽ,।ऽ।,।।ऽ,।।ऽ,ऽ	यमुनाविहारकुतुके कलहंसो व्रजकामिनीकमलिनीकृतकेलिः। जनचित्तहारिकलकण्ठनिनादः प्रमदं तनोतु तव नन्दतनूजः॥
प्रबोधिता	सजसा जगौ च भवति प्रबोधिता ।।ऽ,।ऽ।,।।ऽ,।ऽ।,ऽ	प्रणयिता त्वया चटुलमानिनीद्रया रतिकेलिकुञ्जनिलये विलासिनी। सुरवैरिणा वदनचुम्बनादिना क्षितमाततान सपदि प्रबोधिता॥
नगेन्द्रसुखम्	भवति नगेन्द्रसुखं नजौ जरौ गः ।।।,।ऽ।,।ऽ।,ऽ।ऽ,ऽ	गुरुभुजवीर्य्यभरं हरिं मदान्धा युधि समुपेत्य न दानवा जिजीवुः। क्षुधितनगेन्द्रसुखं नगा उपेत्य क्व नु खलु बिभ्रति जीवनस्य योगम्॥
चञ्चरीकावली	यमौ रौ विख्याता चञ्चरीकावली गः ।ऽऽ,ऽऽऽ,ऽ।ऽ,ऽ।ऽ,ऽ	
चन्द्ररेखा	नसरयुगलैश्चन्द्ररेखत्रिलोकैः ।।।,।।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ	
कन्दुकम्	इदं कन्दुकं यत्र येभ्यश्चतुर्भ्यो गः।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,ऽ	
नगेन्द्रसुखम्	भवति नगेन्द्रसुखं नजौ जरौ गः।।।,।ऽ।,।ऽ।,ऽ।ऽ,ऽ	
उपस्थितम्	उपस्थितमिदं जसौ तसौ यदि गुरुः स्यात् ।ऽ।,।।ऽ,ऽऽ।,।।ऽ,ऽ	
मञ्जुहासिनी	जतौ सजौ गो भवति मञ्जुहासिनी ।ऽ।,ऽऽ।,।।ऽ,।ऽ।,ऽ	
नन्दिनी	इह नन्दिनी सजससैर्गरयुक्तैः।।ऽ,।ऽ।,।।ऽ,।।ऽ,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
कुटजगतिः	कुटजगतिर्नजौ सप्तर्तुं मृतौ गुरुः ।।।,।ऽ।,ऽऽऽ,ऽऽ।,ऽ	
प्रभावती ।	यस्यां प्रिये ! प्रथमकमक्षरद्वयं तुर्यं तथा गुरु नवमं दशान्तिमम् । सान्ध्यं भवेद्यतिरपि चेद्युगग्रहैः सा लक्ष्यतामष्टतरते ! प्रभावती ॥	
चतुर्दशाक्षरा वृत्तिः । शर्करी ।		
असम्बाधा षड्भिर्नवभिश्च यतिः ।	मो गो गो नौ मः शरनवभिरसम्बाधा ऽऽऽ,ऽ,ऽ,।।।,।।।,ऽऽऽ	वीर्य्याग्नौ येन ज्वलति रणरसात् चित्ते दैत्येन्द्रे जाता धरणिरियमसम्बाधा । धर्म्मस्थित्यर्थं प्रकटिततनुसम्बन्धः साधूनां बाधां प्रशमयतु स कंसारिः ॥
वसन्ततिलकम् अष्टाभिः षड्भिश्च यतिः । सिंहोन्नता क्वापि । सिंहोन्नता इति सुनिकाश्यपः । उद्धर्षिणी इति सुनिसेतवः ॥	ज्ञेयं वसन्ततिलकं तभजा जगौ गः ऽऽ।,ऽ।।,।ऽ।,।ऽ।,ऽ,ऽ	पुष्पं वसन्ततिलकं तिलकं वनाल्या लीलापरं पिककुलं कलमत्र रौति । वात्येष पुष्पसुरभिर्मलयाद्रिवातो यातो हरिः स मथुरां विधिना हताः स्मः ॥
अपराजिता सप्तभिर्यतिः ।	ननरसलघुगैः खरैरपराजिता ।।।,।।।,ऽ।ऽ,।।ऽ,।,ऽ	यदनवधिभुजप्रतापदग्धाखदा यदुनिचयचमूः परैरपराजिता । व्यजयत समरे समस्तरिपुव्रजं स जयति जगतां गतिर्गरुड़ध्वजः ॥
प्रहरणकलिका सप्तभिर्वर्णैर्यतिः ।	ननभनलगिति प्रहरणकलिका ।।।,।।।,ऽ।।,।।।,।,ऽ	व्यथयति कुसुमप्रहरण ! कलिका प्रमदवनभवा तव धनुषि तता । विरहविपदि मे शरणमिह ततो मधुमथनगुणस्मरणमविरतम् ॥
वासन्ती	मात्तो नो मो गौ यदि गदिता वासन्तीयम् ऽऽऽ,ऽऽ।,।।।,ऽऽऽ,ऽ,ऽ	भाम्यद्भृङ्गीनिर्भरमधुरालापोद्गीतैः श्रीखण्डाद्रेरुद्धतपवनैर्मन्दान्दोला । लीलालोला पल्लवविलसद्वल्लीहस्तैः कंसारातौ वृत्यति सहसा वासन्तीयम् ॥
लोला व्यस्राः सप्तभिर्यतिः ।	द्विःसप्तच्छिदि लोला मृसौ भौ गौ चरणौ चेत् ऽऽऽ,।।ऽ,ऽऽऽ,ऽ।।,ऽ,ऽ	सुग्धे यौवनलक्ष्मीर्विद्युद्विभ्रमलोला त्रैलोक्याद्भुतरूपो गोविन्दोऽतिदुरापः । तद्वृन्दावनकुञ्जे गुञ्जद्भृङ्गसनाथे श्रीनाथेन समेता खच्छन्दं कुरु केलिम् ॥
नान्दीसुखी व्यस्राः सप्तभिर्यतिः ।	खरभिदि यदि नौ तौ च नान्दीसुखी गौ ।।।,।।।,ऽ।।,ऽ।।,ऽ,ऽ,	सरसखगकुलालापनान्दीसुखीयं लहरिभुजलता चारुफेनस्मितश्रीः । सुरहरकलयासक्तिमासाद्य किन्ते प्रमुदितहृदया भानुजा नृत्यतीह ॥
इन्द्रवदना नदी सप्तभिर्यतिः ।	इन्द्रवदना भजसने: सगुरुयुग्मैः ।।।,।ऽ।,।।ऽ,।।।,ऽ,ऽ ननतजगुरुगैः सप्तयतिर्नदी स्यात् ।।।,।।।,ऽऽ।,।ऽ।,ऽ,ऽ	
लक्ष्मीः	लक्ष्मीरन्तविरामा मृसौ तभौ गुरुयुग्मम् ऽऽऽ,।।ऽ,ऽऽ।,ऽ।।,ऽ,ऽ	
सुपवित्रम्	त्रिननगगिति वसुयति सुपवित्रम् ।।।,।।।,।।।,।।।,ऽ,ऽ	
मध्यश्यामा	मध्यश्यामा युगदशविरमा भौ न्यौ गौ ऽऽऽ,ऽ।।,।।।,।ऽऽ,ऽ,ऽ	
कुटिलम्	युगदिग्भिः कुटिलमिति सभौ न्यौ गौ चेत् ।।ऽ,ऽ।।,।।।,।ऽऽ,ऽ,ऽ	
प्रमदा	नजभजला गुरुश्च भवति प्रमदा ।।।,।ऽ।,ऽ।।,।ऽ।,।,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणानि ।	छन्दसामुदाहरणानि ।
मञ्जरी पञ्चमे नवमे च यतिः ।	सजसा यलौ गिति शरयदैर्मञ्जरी ।।२,।२।,।।२,।२२,।,२	
कुमारी अष्टमे नवमे च यतिः ।	नजभजगैर्गुरुश्च वसुषट् कुमारी ।।।,।२।,२।।,।२।,२,२	
सुकेसरम्	नरनरलैर्लगौ च रचितं सुकेसरम् ।।।,२।२,।।।,२।२,।,२	
चन्द्रोरसः	भौ भौ लगौ चेदिह भवति च चन्द्रोरसः २२२,२।।,।।।,।२२,।,२	
चक्रपदम्	चक्रपदमिह भननगलगुरुभिः २।।,।।।,।।।,।।।,।,२	
वासन्ती	वासन्तीयं स्यादिह खलु मतौ भौ गौ चेत् २२२,२२।,।।।,।२२,२,२	
पञ्चदशाक्षरा वृत्तिः । अतिशर्करी ।		
शृङ्खलिका	गुरुनिधनमनुलघुरिह शृङ्खलिका ।।।।।।।।।।।।,२	मलयजतिलकससुदितशृङ्खलिका व्रजयुवतिलसदलिकगगनगता । सरसिजनयनहृदयसलिलनिधिं यतसुत वितरभसपरितरलम् ॥
शक्वरी सप्ता: षड्भिर्नवभिश्च यतिः ।	सगियमपि च रसनव-रचितयतिः ।।।।।,।।।,।।।।।,२	अयि सहचरि! रुचिरतरगुणमणौ स्वदिमवसतिरनपगतपरिमला । मगिव निवस विलसदनुपमरसा सुसखि ! सुदितदनुजदलनहृदये ॥
मञ्जिष्ठनिकरः अष्टभिः सप्तभिश्च यतिः ।	वसुमुनियतिरिति मञ्जिष्ठनिकरः ।।।।।।,।,।।।।।,२	नरकरिपुरवतु निखिलसुरगति- रमितमहिमभरसङ्गनिवसतिः । अनवधिमञ्जिष्ठनिकरपरिचितः सरिदधिपतिरिव हृततनुविभवः ॥
मालिनी अष्टभिः सप्तभिश्च यतिः ।	नगमथवयुतेयं मालिनी भोगिलोकैः ।।।,।।।,२२२,।२२,।२२	नगमदमतचर्चा पीतकौषेयवासा रुचिरशिखिशिखण्डावद्धधम्मिल्लपाशा । अशिथुनिहितमंशे वंशमुत्तालयन्ती हृतमधुरिपुलीला मालिनी पातु राधा ॥
लीलाखेलः	एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः २२२,२२२,२,२,२२२,२२२,२	पायादो गोविन्दः कालिन्दीकूलचौचौचक्रे रासोल्लासक्रीड़ालोपीभिः सार्द्धं लीलाखेलः । मन्दाकिन्यास्तीरोपान्ते खेरक्रीड़ाभिर्लोलो यद्वद्वेवानामीशः सर्व्वेस्त्राभिः खेलन्तीभिः ॥
विपिनतिलकम्	विपिनतिलकं नसनरेषयुग्मैर्भवेत् ।।।,।।२,।।।,२।२,२।२	विपिनतिलकं विकसितं वसन्तागमे मधुलतमदैर्मधुकरै रञ्जितं वृतम् । मलयमरुता रचितलास्यमालोकयन् व्रजयुवतिभिर्विहरति स सुखी हरिः ॥
तूणकम्	तूणकं समानिकापदद्वयं विभान्तिमम् २,।,२।२,।२।,२,।,२।२,।२	सा सुवर्णकेतकं विकाशि भृङ्गपूरितं पश्चबाणबाणजालपूर्णदेहतूणकम् । राधिका वितर्ष्य माधवाद्य मासि माधवे मोहमेति निर्भरं त्वया विना कलानिधे ! ॥
चन्द्रवेत्रा सप्तमे अष्टमे च यतिः ।	भौ मो यौ चेद्भवेतां सप्ताष्टकैश्चन्द्रवेत्रा २२२,२।२,२२२,।२२,।२२,	विच्छेदे ते मुरारे! पाण्डुप्रकाशा लक्ष्मीर्भाले ज्ञानच्छायं दुकूलं न भ्राजते विभ्रती सा । राधाम्भोदस्य गर्भे लीना यथा चन्द्रवेत्रा किंवार्त्ता त्वां स्मरन्ती धत्ते ध्रुवं जीवयोगम् ॥
चित्रा	चित्रा नामच्छन्दश्चित्रचेत् नयौ मा यकारौ २२२,२२२,२२२,।२२,।२२	गोपाली लीलालोला यदतु कलिन्दात्मजान्ते खेलन्मुक्ताहारा वन्यसुमसज्जाऽतिचित्रा । कंसारातेर्मूर्त्तिरच्छन्ने हरि [illegible] कोऽन्यः स्वर्गो मोक्षो वाञ्छाद्विद्यते तत्र जाने ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
प्रभद्रकम्	भवति नजौ भजौ रसहितौ प्रभद्रकम् ।।।,।।।.ऽ।।,।ऽ।,ऽ।ऽ	
एला पञ्चभिर्दशभिश्च यतिः ।	सजना नयौ शरदृश्ययतिरियमेला ।।ऽ,।ऽ।,।।।,।।।,।ऽऽ	
कामक्रीड़ा	मा: पञ्च स्युर्यस्यां सा कामक्रीड़ासंज्ञा ज्ञेया ऽऽऽ,ऽऽऽ,ऽऽऽ,ऽऽऽ,ऽऽऽ	
सुखेलकम्	नजभजरैर्विराजितमिदं सुखेलकम् ।।।, ।ऽ।,ऽ।।,।ऽ।,ऽ।ऽ	
चन्द्रकान्ता सप्तभिरष्टाभिश्च यतिः ।	चन्द्रकान्ताभिधा रौ मृसौ यो विरमः खराष्टौ ऽ।ऽ,ऽ।ऽ,ऽऽऽ,।।ऽ,।ऽऽ	
उपमालिनी अष्टाभिः सप्तभिश्च यतिः ।	ननतभरक्षतारुखरैरुपमालिनी ।।।,।।।,ऽऽ।,ऽ।।,ऽ।ऽ	
ऋषभः	ऋषभाख्यमेतदुदितं सजसा सयौ चेत् ।।ऽ,।ऽ। ।।ऽ,।।ऽ,।ऽऽ	
मानसहंसः	कथयन्ति मानसहंसनाम सजौ जभराः ।।ऽ,।ऽ।,।ऽ। ऽ।।,ऽ।ऽ	
नलिनी	सगणैः शिववक्त्रमितैर्गदिता नलिनी ।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,	
निश्चिपालकम्	भ्रंस निश्चिपालकमिदं भजसगाश्च रः ऽ।,।ऽ।,।।ऽ,।।।,ऽ।ऽ	
षोड़शाक्षरा वृत्तिः । अष्टिः ।		
चित्रम्	चित्रसंज्ञमीरितं समानिका पदद्वयम् ऽ,।,ऽ।ऽ,।ऽ।,ऽ,।,ऽ।ऽ,।ऽ।	विद्रुमारुणाधरोष्ठशोभिवेणुवाद्यदक्ष- वल्लवीजनाङ्गसङ्गजातसुग्धकण्टकाङ्ग ! । त्वां सदैव वासुदेव ! पुण्यलभ्यपादसेव ! वन्द्यपुण्यचित्रकेश्य ! संसरामि गोववेश्य ! ॥
ऋषभगजविलसितम् गजतुरगविलसितमिति भ्रमौ । सप्तभिर्नवभिश्च यतिः ।	भवितगैः खराङ्कैर्ऋषभगजविलसितम् ऽ।।,ऽ।ऽ,।।।,।।।,।।।,ऽ	यो हरिश्चखान खरतरनखरशरै- र्दुर्ज्जयदैत्यसिंहसुविकटहृदयतटम् । किञ्चिदह चित्रमेव यदखिलमपहृतवान् कंसनिदेशदृष्यऋषभगजविलसितम् ॥
चकिता अश्वा अष्टमे यतिः ।	भातु समतनगैरुरुच्छेदे स्यादिह चकिता ऽ।।,।।ऽ,ऽऽऽ,ऽऽ।,।।।,ऽ	दुर्ज्जयदनुजश्रेणीदुःखेदाद्भुतचकिता यदुभुजपरिघत्राता याता साध्वसविगमम् । दीव्यति दिवि यन्माला खेच्छं नन्दनविपिने गच्छत शरणं तस्यां तं भीता भवरिपुतः ॥
पञ्चचामरम्	प्रमाणिका पदद्वयं वदन्ति पञ्चचामरम् ।ऽ।,ऽ।ऽ,।,ऽ,।ऽ।,ऽ।ऽ,।,ऽ	सुरद्रुमूलमण्डपे विचित्ररत्ननिर्म्मिते लसद्वितानभूषिते सलीलविभ्रमालसम् । सुराङ्गनाभवल्लवीकरप्रपञ्चचामर- स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥
मदनललिता चतुर्थे षष्ठे च यतिः ।	भौ नौ भौ गो मदनललिता वेदैः षड्भुतुभिः ऽऽऽ,ऽ।।,।।।,ऽऽऽ,।।।,ऽ	विभ्रदसमलितचिकुरा धौताधरपुटा स्खायतृपत्रावलिकुचतटोच्छ्वासोर्म्मितरला । राधार्थं मदनललितान्दोलालसवपुः कंसारातेरतिरसमहो चक्रेऽतिचटुलम् ॥
वाणिनी	नजभजरैर्वेदा भवति वाणिनी गयुक्तैः ।।।,ऽ।,ऽ।।,ऽ।,ऽ।ऽ,ऽ	स्फुरतु ममाननेऽद्य नतु वाणि ! नीतिरम्यं तव चरणप्रसादपरिपाकतः कवित्वम् । भवजलराशिपारकरणक्षमं सुकृच्छं सततमहं स्तवैः खरचितैः स्तवानि नित्यम् ॥
प्रवरललितम्	यमौ नः स्रौ गश्च प्रवरललितं नाम वृत्तम् ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽ।ऽ,ऽ	सुजोत्तेपः सूत्रे चलवलयझङ्कारयुक्तो सुधा पादन्यासः प्रकटिततुलाकोटिनादः । स्फुरत् वक्षेऽकस्मादृढमि पटुकटाक्षोर्म्मिलीला हरौ जीयादीदृक् प्रवरललितं वल्लवीनाम् ॥

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगाथाः।	छन्दसामुदाहरणानि।
अचलधृतिः	द्विगुणितवसुलघुभिरचलधृतिरिह ।।।।।।।।,।।।।।।।	तरणिदुहितृतटरुचिरतरवसति- रमरसुनिसुखजनविहितधृतिरिह। मधुरिपुरभिनवजलधररुचितनु- रचलधृतिरुदयति सुकृतिहृदि खलु॥
गरुडरुतम्	गरुडरुतं नजौ भजतगा यदा स्फुरदा ।।।,।ऽ।,ऽ।।,।ऽ।,ऽऽ।,ऽ	अमरमयूरमानसमुदे पयोदध्वनि- र्गरुडरुतं मुरारिसुजगेन्द्रसन्नासने। धरणिभरावतारविधिडिण्डिमाडम्बरः स जयति कंसरङ्गभुवि सिंहनादो हरेः॥
धीरललिता	संकथिता भरौ नरनगाश्च धीरललिता ऽ।।,ऽ।ऽ,।।।,ऽ।ऽ,।।।,ऽ	
अश्वगतिः	पञ्चभकारयुताऽश्वगतिर्यदि चान्त्यगुरुः ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ	
मञ्जिकाकुसुमलता	नजरभेन गेन च स्याद्मञ्जिकाकुसुमलता ।।।,।ऽ।,ऽ।ऽ,ऽ।।,ऽ।।,ऽ	
रूपम्	यस्मिन् सर्वे गा राजन्ते ब्रह्माद्यं तद्रूपं नाम ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ,ऽ	
वरयुवतिः	भो रयणा नगौ च यस्यां वरयुवतिरियम् ऽ।।,ऽ।ऽ,।ऽऽ,।।।,।।।,ऽ	
सप्तदशाक्षरा वृत्तिः। अक्षरैः।		
शिखरिणी षष्ठे एकादशे च यतिः।	रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽ।।,।,ऽ	करादस्य भ्रष्टे नखु शिखरिणी दृश्यति शिरो- र्विलीनाः स्रः सत्यं नियतमवधेयं तदखिलैः। इति त्रस्यन्नोपानुचितनिभृतालापजनितं स्मितं बिभ्रद्देवो जगदवतु गोवर्द्धनधरः॥
पृथ्वी अष्टमे नवमे च यतिः।	जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।ऽ।,।।ऽ,।ऽ।,।।ऽ,।ऽऽ,।,ऽ	दुरन्तदनुजेश्वरप्रकरदुःस्थपृथ्वीभरं जहार निजलीलया यदुकुलेऽवतीर्य्यासु यः। स एष जगतीगतिर्दुरितभारभङ्गादृशां हरिष्यति हरिः स्तुतिस्मरणचाटुभिस्तोषितः॥
वंशपत्रपतितम् वंशदलमिति ग्रन्थौ वंशपत्रपतिता इति केचित्। अस्य दशमे सप्तमे च यतिः।	दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ऽ।।,ऽ।ऽ,।।।,ऽ।।,।।।,।,ऽ	नूतनवंशपत्रपतितं रजनिजलवं पश्य सुकुन्द! मौक्तिकमिवोत्तमरकतगम्। एष च तं चकोरनिकरः प्रपिबति मुदितो वान्तमवेत्य चन्द्रकिरणैरन्तकवपुमिव॥
मन्दाक्रान्ता अस्याश्चतुर्थे षष्ठे सप्तमे च यतिः। इयं दौत्यवर्णनोपयोगिनी श्रुता।	मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ऽऽऽ,ऽ।।,।।।,ऽऽ।,ऽऽ।,ऽ,ऽ	प्रेमालापैः प्रियविरचयैः प्रीणितालिङ्गनाद्यै- र्मन्दाक्रान्ता तदनु नियतं वश्यतामेति बाला। एवं श्रुत्वा वचनसुधया राधिकायाः सखीनां प्रीतः प्रायात् स्मितसुवदनो देवकीनन्दनो नः॥
हरिणी षष्ठे चतुर्थे सप्तमे च यतिः।	नसमरसला गः षड्वेदैर्दयैर्हरिणी मता ।।।,।।ऽ,ऽऽऽ,ऽ।ऽ,।।ऽ,।,ऽ	अथित स विधिर्नेत्रं नीत्वा ध्रुवं हरिणीगणाद्- व्रजनन्दगृहां सन्दोहस्रोतःसन्नयनश्रियम्। यदयमनिशं दूर्व्वाश्यामे मुरारिकलेवरे व्यकिरदधिकं वक्त्राकार्क्षं विलोलविलोचनम्॥
नर्दटकम्	यदि भवतो नजौ भजजला गुरु नर्दटकम् ।।।,।ऽ।,ऽ।।,।ऽ।,।ऽ।,।,ऽ	व्रजवनिता वसन्तलतिका विलसन्मधुपं मधुमथनं प्रयान्तमनवाञ्छितकल्पतरुम्। विभुमभिनौति कोऽपि सुकृती मुदितेन हृदा रुचिरपदावलीघटितनर्दटकेन कविः॥
कोकिलकम् अस्य सप्तमे षष्ठे चतुर्थे च यतिः।	हयनृतुसागरैर्यतियुतं यदि कोकिलकम् ।।।,।ऽ।,ऽ।।,।ऽ।,।ऽ।,।,ऽ	लसदरविन्दचारु मधुरभाषणमोदकरं मधुसमयागमे सरसकेलिभिरुल्लसितम्। अलिललितद्युतिं रविसुतावनकोकिलकं नखु कलयामि तं सखि! सदा हृदि नन्दसुतम्॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
हारिणी अस्याश्चतुर्थे षष्ठे सप्तमे च यतिः ।	वेदर्तुश्वेर्मभनमयला गश्चेत्तदा हारिणी ऽऽऽ,ऽ।।,।।।,ऽऽऽ,।ऽऽ,।,ऽ	यस्या नित्ये श्रुतिकुवलये श्रीश्चालिनी लोचने रागः स्त्रीयोऽधरकिसलये लाक्षारसारञ्जनम् । गौरी कान्तिः प्रकृतिरुचिरा रम्याङ्गरागच्छटा सा कंसारेरजनि न कथं राधा मनोहारिणी ॥
भाराक्रान्ता चतुर्थे षष्ठे सप्तमे च यतिः ।	भाराक्रान्ता मभनरसला गुरुः श्रुतिषड्हयैः ऽऽऽ,ऽ।।,।।।,ऽ।ऽ,।।ऽ,।,ऽ	भाराक्रान्ता मम तनुरियं गिरीन्द्रविधारणात् कम्पं धत्ते श्रमजलकणं तथा परिसुष्यति । इत्याकूतज्ञ जयति जलदस्वनाकुलवल्लवी- संश्लेषोत्थं सारविलसितं विलोक्य गुरुं हरिः ॥
हरिः	रसयुगहययुङ् नौ म्नौ सो लगौ हि यदा हरिः ।।।,।।।,ऽऽऽ,ऽ।ऽ,।।ऽ,।,ऽ	
कान्ता	भवेत् कान्ता युगरसहयैर्यभौ नरसा लगौ ।ऽऽ,ऽ।।.।।।,ऽ।ऽ,।।ऽ,।,ऽ	
चित्रलेखा दशमे सप्तमे च यतिः ।	ससजा भजगा ग दिक्खरैर्भवति चित्रलेखाः ।।ऽ,।।ऽ,।ऽ।,ऽ।।,।ऽ।,ऽ,ऽ	
अतिग्राथिनी	ससजैरतिग्राथिनी मता भजपरैर्गुरुभ्याम् ।।ऽ,।।ऽ,।ऽ।,ऽ।।,।ऽ।,ऽ,ऽ	
पञ्चचामरम्	अवेहि पञ्चचामरं जरौ जरौ जगौ लघुश्च ।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ,।	
अष्टादशाक्षरा वृत्तिः । धृतिः ।		
कुसुमितलतावेल्लिता पञ्चमे षष्ठे सप्तमे च यतिः ।	स्याद्भूतर्तुभ्यैः कुसुमितलतावेल्लिता मृतौ नयौ यौ ऽऽऽ,ऽऽ।,।।।,।ऽऽ,।ऽऽ,।ऽऽ	क्रीडत्कालिन्दीललितलहरीवारिभिर्दाक्षिणात्यै- र्वातैः खेलद्भिः कुसुमितलता वेल्लिता मन्दमन्दम् । भृङ्गालीगीतैः किसलयकरोल्लासितोल्लास्यलक्ष्मीं तन्वाना चेतो रभसतरलं चक्रपाणेश्चकार ॥
नन्दनम् एकादशे सप्तमे च यतिः । इदमेव वेदरेफैश्छिन्ना महामालिका त्रयोदशभिस्तारका दशवसुभिर्लसा इति कुत्रापि ।	नजभजरैस्तु रेफसहितैः शिवेर्हयैर्नन्दनम् ।।।,ऽ।ऽ,ऽ।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	तरणिसुतातरङ्गपवनैः सलीलमान्दोलितं मधुरिपुपादपङ्कजरजःसुपूतदृष्ट्योतलम् । सुरहरचित्रचेष्टितकलाकलापसंसारकं क्षितितलनन्दनं व्रज सखे ! सुखाय वृन्दावनम् ॥
नाराचम्	इह नगरचतुष्कस्थैस्तु नाराचमाचक्ष्यते ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	दिनकरतनयातटीकानने चारुसञ्चारिणी श्रवणनिकटलम्भमेत्योक्षणा क्षणा ! राधा त्वयि । ननु विकिरति नेत्रनाराचमेषातिहृच्छेदनं तदिह मदनविभ्रमोद्भ्रान्तचित्तावधत्स्व हृतम् ॥
चित्रलेखा चन्द्रलेखा इति क्वचित् ।	मन्दाक्रान्ता नगरलघुयुता कौर्तिता चित्रलेखा ऽऽऽ,ऽ।।,।।।,।,ऽऽ।,ऽऽ।,ऽ,ऽ	भङ्क्ते ऽसौ न जगति नृगद्दृशां सारूपं यदासी- दाक्ष्यं देवं व्रजयुवतिसभा वेधसा सा व्यधायि । नैतादृक् चेत् कथमुदधिसुतामन्तरेणाच्युतस्य प्रीतं तस्यां नयनयुगमभूच्चित्रलेखाद्भुतायाम् ॥
शार्दूलललितम् द्वादशे चरमान्ते च यतिः ।	मः सो जः सतसा दिनेशऋतुभिः शार्दूललालितम् ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽऽ।,।।ऽ	ज्ञात्वा कंसस्तगे पराक्रमविधिं शार्दूललालितं यच्चक्रे क्षितिभारकारिषु सुरारातिष्वतिदरम् । सन्तोषं परमन्तु देवनिवहे त्रैलोक्यशरण्यं श्रेयो वः स तनोत्पारमहिमा लक्ष्मीप्रियतमः ॥
हरिणप्लुतम् हरिप्लुतेति क्वचापि ।	मात् सौ जौ भरसंयुतौ करिवाणखेर्हरिणप्लुतम् ऽऽऽ,।।ऽ,ऽ।,ऽ।,ऽ।।,ऽ।ऽ	
अश्वगतिः	पञ्चभकारयुताश्वगतिर्यदि चान्त्यसरचिता ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,।।ऽ	
सुधा	सुधा तर्कैर्ऋक्षैर्भवति ऋतुभिर्यौ मौ नयसयाः ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽऽ।,।।ऽ	
चित्रलेखा	वर्णाश्चेर्मनगततमकैः कौर्तिता चित्रलेखेयम् ऽऽऽ,।।।,।।।,ऽऽ।,ऽऽ।,ऽऽऽ,	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
भ्रमरपदकम्	भाद्रनगा नसौ भ्रमरपदकमिदमभिहितम् ऽ।।,ऽ।ऽ,।।।,।।।,।।।,।।ऽ	
शार्दूलम्	शार्दूलं वद मासषट्कयति मः सो जसौ रौ मश्चेत् ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽ।ऽ,ऽऽऽ	
केसरम्	अर्थाश्वैर्मभनयरयुगैर्वृत्तं मतं केसरम् ऽऽऽ,ऽ।।,।।।,।ऽऽ,ऽ।ऽ,ऽ।ऽ	
चलम्	स्यौ नृजौ स्यौ चेच्चलमिदमुदितं युगैर्मुनिभिः खरैः ऽऽऽ,ऽ।।,।।।,।ऽ।,ऽ।।,ऽ।ऽ	
लालसा	सेका वसुविरतिस्तनौ रेचतुर्भिर्युता लालसा ऽऽ।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
लता	भवति नयुगलं रभौ रौ दशभिर्गजेन्द्रैर्लता ।।।,।।।,ऽ।ऽ,ऽ।।,ऽ।ऽ,ऽ।ऽ	
सिंहविस्फूर्जितम्	तद्भूतर्तवश्चैर्मौ भ्मौ विरतिश्चेत् सिंहविस्फूर्जितं यौ ऽऽऽ,ऽऽऽ,ऽ।।,ऽऽऽ,।ऽऽ,।ऽऽ	
हरणप्लुतम् विबुधप्रिया इति च कुत्रापि ।	रसौ नजौ भरसंयुतौ करिवाजखैर्हरणप्लुतम् ऽ।ऽ,।।ऽ,।ऽ।,।ऽ।,ऽ।।,ऽ।ऽ	
क्रीडचक्रम्	इदं क्रीडचक्रं सदीर्घं समस्तैर्यकारैः समेतम् ।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,	
हीरकम्	हीरकमुदितं भसनजनैरिह रगयोऽन्तगः ऽ।।,।।ऽ,।।।,।ऽ।,।।।,ऽ।ऽ	
जनविभ्रमश्चरा इति: । अतिधृतिः । मेघविस्फूर्जिता षष्ठे षष्ठे सप्तमे च यतिः ।	रसर्तवश्चैर्यौ नृसौ ररगुरुयुतौ मेघविस्फूर्जिता स्यात् । ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ	कदम्बामोदाढ्या विपिनपवनाः केकिनः कान्तकेका विनिद्राः कन्दल्यो दिशि दिशि सुदा दर्दुरा ह्रादनादाः । निशा वृत्यद्विद्युल्लसितलसन्मेघविस्फूर्जिता चेत् प्रियः स्वाधीनोऽसौ दनुजदलनो राज्यमस्मात् किमन्यत् ॥
छाया षष्ठे द्वादशे अन्ते च यतिः ।	भवेत् सैवच्छाया तयुगगयुता स्याद् द्वादशान्ते यदा ।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽऽ।,ऽऽ।,ऽ	अभीष्टं कुष्टो यो वितरति लसद्दोश्चारुग्रास्योज्ज्वलः स्फुरन्नानारत्नस्तवकिततनुश्चित्रांशुकालम्बितः । न यस्याङ्घ्र्यायासप्रगतवतां संसारतीव्रातप- क्लान्तिं प्रोक्तां स जगदवतात् कंसारिकल्पद्रुमः ॥
शार्दूलविक्रीडितम् द्वादशे जनविभ्रमौ च यतिः ।	सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽऽ।,ऽऽ।,ऽ	गोविन्दं प्रणमोत्तमाङ्ग ! रसने ! त्वं घोषयाद्रिं प्रियं पाणी ! पूजयतं मनः ! स्मर पदे ! तस्यालयं गच्छतम् । श्रवश्चेत् कुरुताखिलं मम हितं श्रीर्वादयस्वद् भुवं न प्रेक्षे भवतां ऋते भवमहाशार्दूलविक्रीडितम् ॥
सुरसा सप्तमे चतुर्दशे अन्ते च यतिः ।	स्त्रौ भ्रौ यो नो गुरुश्चेत् स्वरमुनिकरगैराह सुरसाम् ऽऽऽ,ऽ।ऽ,ऽ।।,।।।,।ऽऽ,।।।,ऽ	कामक्रीडासदग्णो मधुसमयसमारम्भरभसात् कालिन्दीकूलकुञ्जे विहरणकुतुकाक्रान्तहृदयः । गोविन्दो वल्लवीनामधररससुधां प्राप्य सुरसां श्रङ्के पीयूषपानप्रभवबलसुखं यस्मरदसौ ॥
पुष्पदाम प्रथमे द्वादशे अन्ते च यतिः । पुष्पदाम इति केचित् ।	मो गौ नौ तौ गौ स्वरहयतुरगैः पुष्पदाम प्रसिद्धम् ऽऽऽ,ऽ,ऽ,।।।,।।।,ऽऽ।,ऽऽ।,ऽ,ऽ	ग्रथ्नन्लोकानां प्रकटितकदनं ध्वस्तमालोक्य कंसं हृष्यन्तेतोभिखिदिववसतिभिर्योमसंस्थैर्विसृष्टम् । सुधामोदेन स्वागतदग्रदिगाभोगमापूतभृङ्गं मौलौ दैत्यारेर्न्यपतदनुपमं स्वस्तरोः पुष्पदाम ॥
पद्मचामरः	नयुगलगलघू रजौरलगा यदा स पद्मचामरः ।।।,।।।,ऽ,।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।,ऽ	
विभ्रमम्	वृत्तं विभ्रमाख्यं भरसनितुरगैर्मौ तौ नृसौ ततौ चेद्गुरुः ऽऽऽ,ऽऽ।,।।।,।।ऽ,ऽऽ।,ऽऽ।,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
मकरन्दिका	रसैः षड्भिर्लोकैर्यमनसजगा गुरुमकरन्दिका ।२२,२२२,।।।,।।२,।२।,।२।,२	
मणिमञ्जरी	इगाद्यैः स्यात् यभनयजगाः कीर्तिता मणि-मञ्जरी ।२२,२।।,।।।.।२२,।२।,।२।.२	
वसुव्रतता	मजाश्चितुरगैर्जसौ जसतभा गश्चेत् वसुव्रतता ।२।,।।२,।२।,।।२,२२।,२।।,२	
विंशत्यक्षरा वृत्तिः । कृतिः ।		
सुवदना सप्तमे चतुर्दशे विंशतौ च यतिः ।	ज्ञेया सप्ताश्वषड्भिर्मरभगयुता भौ गः सुवदना २२२,२।२,२।।,।।।,।२२, २।।,।,२	प्रत्यादृत्येन्द्रियाणि त्वदितरविषयान्नासाग्रनयना त्वां ध्यायन्ती निकुञ्जे परमतरसयं हर्षोत्पुलका । आनन्दाश्रुप्लुताक्षी वसति सुवदना योगैकरसिका कामार्त्तिं त्वत्कुकामा वद नरकरिपो! राधा मम सखी ॥
गीतिका	सजजा भरौ सलगा यदा कथिता तदा खलु गीतिका ।।२,।२।,।२।,२।।,२।२,।।२,।,२	करतालचञ्चलकङ्कणस्वनमिश्रणेन मनोरमा रमणीयवेणुनिनादरङ्गिमसङ्गमेन सुखावहा । बहुलानुरागनिवासरासरसोत्सवा भवरागिणं विदधौ हरिं खलु वल्लवीजनचारु चामरगीतिका ॥
वृत्तम्	वृत्तमीदृग्वद नामतो रजौ रजौ रजौ गुरुर्लघुश्च २।२,।२।,२।२,।२।,२।२,।२।,२,।	चित्तवृत्तलीलया निसर्गरम्यदेहरूपविभ्रमेण राजमानसद्वयोविलाससम्यदा कलाकुतूहलेन । यः समं व्रजाङ्गनाजनैः सुराङ्गनाभिः सुखं समेत्य विष्णुरुल्लास चित्तपद्मकोषषट्पदः स मे सदास्तु ॥
भ्रोभा षष्ठे त्रयोदशे अष्टमे च यतिः ।	रसाश्वार्कैः भ्रोभा नयुगगजठरा मेघविस्फू-र्जिता चेत् ।२२,२२२,।।।,।।।,२,२।२,२।२,२	सपीयूषोन्मीलत्सरसिजयुगला मध्यनम्रा फलाढ्या तयोरूर्द्ध्वं राजत्तरलकिशलयाश्लिष्टसुस्निग्धशाखा । लसन्मुक्तारक्तोत्पलकुवलयैश्चन्द्रविभ्राजितायां महाभ्रोभा मौलौ मिलदलिपटलैः लक्ष्य ! सा कापि वल्ली ॥
सुवंशा	ख्याता पूर्वैः सुवंशा यदि मरभना तद्वयं गो गुरुश्च २२२,२।२,२।।,।।।,२२।,२२।,२,२	
मत्तेभविक्रीडितम् त्रयोदशे यतिः ।	सभरा नृगौ यलगाश्चयोदशयतिर्मत्तेभविक्रीड़ितम् ।।२,२।।,२।२,।।।,२२२,।२२,।,२	
एकविंशत्यक्षरा वृत्तिः। प्रकृतिः ।		
सग्धरा सप्तमे चतुर्दशे एकविंशतौ च यतिः।	म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता सग्धरा कीर्तितेयम् २२२,२।२,२।।,।।।,।२२,।२२,।२२	श्यामोद्यन्नीलराभा कनककलसतत्पीतवासाः सुहासा बर्हैरुच्चन्द्रकाणां ललितचिकुरा चारुकर्णावतंसा । अंसन्यासक्तवंशध्वनिसुखितजगद्वल्लवीभिर्लसन्ती सृष्टिर्गोपस्य विष्णोरवतु जगति वः सग्धरा हारिहारा ॥
सरसी सिंहकमिति सलिलनिधिरिति च कापि।	नजभजजा जरौ यदि तदा गदिता सरसी कवीश्वरैः ।।।,।२।,२।।,।२।,।२।,।२।,२।२	चिकुरकलापशैवलकृतप्रमदासु लसद्रसोर्म्मिषु स्फुटवदनाम्बुजासु विलसद्भुजवालदलावलिषु । कुचयुगचक्रवाकमिथुनायुगता सुकलाकुतूहली चरचयदद्भुतो व्रजदृगीनयनासरसीषु विश्वमम् ॥
द्वाविंशत्यक्षरा वृत्तिः । आकृतिः ।		
हंसी अष्टमे द्वाविंशतौ च यतिः ।	मौ गौ नाश्चत्वारो गो गो वसुभुवनयतिरिति भवति हंसी २२२,२२२,२,२,।।।,।।।,।।।,।।।,२,२	सार्द्धं कान्तेनैकान्तेऽसौ विकचकमलमधुसुरभि पिबन्ती कामक्रीड़ाकूतस्फीतप्रमदरसरभसमलघु रसन्ती । कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे कंसारातेः पश्य खेच्छं सरभसगतिरिह विलसति हंसी ॥
मदिरा	सप्तभकारयुतैकगुरुर्गदितेयमुदारतरा मदिरा २।।,२।।,२।।,२।।,२।।,२।।,२।।,२	माधवमासि विकस्वरकेसरपुञ्जलसन्मदिरामुदितै- र्भृङ्गकुलैरुपगीतवने वनमालिनमालि! कलानिलयम् । कुञ्जगृहोदरपल्लवकल्पिततल्पमनल्पमनोजरसं त्वं भज माधविका मृदुनर्मकथासुनवातलतोपगमा ॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
भद्रकम्	भौ नरगा रनावथगुरुर्दिगर्कविरमं हि भद्रकमिदम् ऽ।।,ऽ।ऽ,।।।,ऽ।ऽ,।।।,ऽ।ऽ,।।।,ऽ	
लालित्यम्	लालित्यं भुजगेन्द्रेण भाषितमेतच्चेन् मसरस्त- जगुभिः ऽऽऽ,।।ऽ,ऽ।ऽ,।।ऽ,ऽऽ।,।ऽ।,।।।,ऽ	
महासग्धरा	सजता नसौ ररौ गः फणितुरगहये: स्यान्महा सग्धराख्या ।।ऽ,।ऽ।,ऽऽ।,।।।,।।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ	
त्रयोविंशत्यक्षरा वृत्तिः। विकृतिः।		
अद्रितनया अश्वललितमित्यन्यच्च ।	नजभजभा जभौ लघुगुरू वुधेस्तु गदितेय- मद्रितनया ।।।,।ऽ।,ऽ।।,ऽ।।,।ऽ।,ऽ।।,।,ऽ	खरतरशौर्यपावकशिखापतङ्गनिभमग्रदनुजो जलधिसुताविलासवसतिः सतां गतिरशेषमान्यमहिमा । भुवनहितावतारचतुरचराचरधरोऽवतीर्ण इह हि क्षितिवलयेऽस्ति कंसशमनस्तवेति तमवोचदद्रितनया ॥
मत्ताक्रीड़म् अष्टमे त्रयोदशे त्रयोविंशतौ च यतिः। मत्ताक्रीड़ा इति क्वचित् ॥	मत्ताक्रीड़ं वखिष्वाग्न्यायति मधुगमयुगमनुलघु- गुरुभिः ऽऽऽ,ऽऽऽ,ऽ,ऽ,।।।।।।।।।।।।,ऽ	सुरभीन्मीलन्मत्ताक्रीड़ं मधुसमयसुलभमधुरमधुरसातु गाने याने किञ्चित्स्यन्दत्पदमरुणनयनयुगलसरसिजम् । रासोल्लासक्रीड़त्कन्यव्रजयुवतिवलयरचितसुनरसं सान्द्रानन्दं वृन्दारण्ये स्मरत हरिमनघचरणपरिचयम् ॥
सुन्दरिका	इह सुन्दरिका पिङ्गलमुनिनोक्ता सदयतो भसता जलभगाः ।।ऽ,।।ऽ,ऽ।।,।।ऽ,ऽऽ।,।ऽ।,।,ऽ।।,ऽ	
चतुर्विंशत्यक्षरा वृत्तिः। संस्कृतिः।		
तन्वी पञ्चमे द्वादशे चतुर्विंशतौ च यतिः।	भूतमुनीनैर्यतिरिह भतगाः सुभौ भगवाच्च यदि भवति तन्वी ऽ।।,ऽऽ।,।।।,।।ऽ,ऽ।।,ऽ।।,।।।,।ऽऽ	माधव मुग्धेर्मधुकरविरुतैः कोकिलकूजितमलयसमीरैः कम्यमुपेता मलयजसलिलैः श्रावनतोऽप्यधिगततनुदाहा । पद्मपलाशैर्विरचितशयना देहजसंज्वरभरपरिदूने निःश्वसती सा सुदुरतिपरमं ध्यानलये तव निवसति तन्वी ॥
किरीटम्	नाम किरीटमिदं भगवा यदि पिङ्गलनाग- मुनीन्द्रमतं किल ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।	
दुर्मिलम्	सगणैरिह वृत्तवरं वसुभिः किल दुर्मिलमुक्तमिदं कविभिः ।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ	
पञ्चविंशत्यक्षरा वृत्तिः। अतिकृतिः।		
क्रौञ्चपदा पञ्चमे दशमे अष्टादशे पञ्च- विंशतौ च यतिः ।	क्रौञ्चपदा स्यात् भो मसभाद्यैर्दिङ्मुनिरवसुमुनि- यति मधुलघुगैः ऽ।।,ऽऽऽ,।।ऽ,ऽ।।,।।।।।।।।।।।,ऽ	क्रौञ्चपदालीचित्रिततीरा मदकलखगकुलकलकलरुचिरा फुल्लसरोजश्रेणिविलासा मधुसुदितमधुपरवरभसकरी । फेनविलासप्रोज्ज्वलहासा ललितलहरिभरपुलकितसुतनुः पद्म हरेऽसौ कस्य न चेतो हरति तरलगतिरहिम- किरणजा ॥
षड्विंशत्यक्षरा वृत्तिः। उत्कृतिः।		
भुजङ्गविजृम्भितम् अष्टमे जनविंशतौ षड्विंशतौ च यतिः ।	वसीग्न्याश्चैश्छेदोपेतं ममतनयुग रसलगै- र्भुजङ्गविजृम्भितम् ऽऽऽ,ऽऽऽ,ऽऽ।,।।।,।।।,।।।,ऽ।ऽ,।।ऽ,।,ऽ	शैलोदञ्चन्नाचत्पादप्रकटविकटगटगभ रयतूत्करतालक- झारप्रेङ्खद्धूढावर्हः स्तुतितरलनवकिसलयस्तरङ्गित- हारधृत् । चक्यन्नागस्त्रीभिर्भक्त्या सकुलितकरकमलयुगं स्तुतस्तुति- रघुतः पायाद्वश्चिन्दन् कालिन्दीह्रदशतनिजवसतिदृढजङ्घ- विजृम्भितम् ॥
अपवाहम्	भो नाः षट् सगाविति यदि नवरसरसशर- यतियुतमपवाहाख्यम् ऽऽऽ,।।।,।।।,।।।,।।।,।।।,।।।,।।ऽ,ऽ,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
अथ दण्डकाः । सप्तविंशत्यक्षरा वृत्तिः । जलधरपटलप्रपातः	यदिह नयुगलं ततः सप्तरेफास्तदा चण्ड- वृष्टिप्रपातो भवेद्दण्डकः ।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,	प्रलयघनघटाभयारम्भमेघावलीचण्डवृष्टिप्रपाताकुलं गोकुलं सपदि समवलोक्य सर्वेण हस्तेन गोवर्द्धनं नाम शैलं दधतीलया । कमलनयन ! रक्ष रक्षेति गर्ज्जन्नसम्भ्रमगोपाङ्गनालिङ्ग- नानन्दितो गलदभिनवधातुधारार्द्रविचित्राङ्गरागो सुरारातिरस्तु प्रमोदाय वः ॥
प्रचितकः	प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्यादुत्तरैः सप्तभिर्यैः ।।।,।।।,ऽऽ।,ऽऽ।,ऽऽ।,ऽऽ।,ऽऽ।,ऽऽ।	सुरवर ! यदुकुलाम्भोधिचन्द्र ! प्रभो ! देवकीगर्भरत्न ! त्रिलोकैकनाथ ! प्रचितकपटसुरारिव्रजोद्दामदन्तावलस्तोमविद्रावदक्ष केसरीन्द्र ! । चरणनखरसुधांशुच्छटोज्जेवलिःश्रेचितध्वायिचेतो निविडान्धकार ! प्रणतजनपरितापोग्रदावानलोच्छेदमेघ ! प्रसीद प्रसीद प्रसीद ॥
कुसुमस्तवकम्	सगणः सकलः खलु यत्र भवेत्तमिह प्रवदन्ति बुधाः कुसुमस्तवकम् ।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ,।।ऽ	विरराज यदीयकरः कनकद्युतिवन्दुरवामदृशः कुचकुड्मलगो भ्रमरप्रकरेण यथाहृतमूर्छिरशोकलतावलिसत्कुसुमस्तवकः॥ स नवीनतमालदलप्रतिमच्छविबिम्बदतीवविलोचनहारिवपु- रपलारुचिरांशुकवल्लिधरो हरिरस्तु मदीयहृदम्बुज- मध्यगतः ॥
मत्तमातङ्गलीलाकरः	यत्र रेफः परं श्रेष्ठया गुम्फितः स स्मृतो दण्डको मत्तमातङ्गलीलाकरः ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	हेमगौरं वसानोऽंशुकं शुक्लनीलासिते वर्त्मनि सन्दिशा- वुद्वेपार्श्वितो हारतारांशुवच्चोनभश्चित्रमालाञ्चितो भक्तभूगोप्तृलाङ्गः समं वीरिका । अञ्जनाभाखरेन्द्वब्जकुन्दाभ दैत्येन लीलापरिहास- हासोल्लिकौतूहलैः कंसरङ्गाङ्गिणः पातु वश्चक्रपाणिर्गतिक्रीड़या मत्तमातङ्ग- लीलाकरः ॥
अशोकपुष्पमञ्जरी	यत्र दृश्यते गुरोः परो लघुः क्रमात् स उच्यते बुधैरशोकपुष्पमञ्जरीति ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।	मूर्द्धि चारुचम्पकस्रजा सलीलवेष्टनं लसल्लवङ्गचारु- चन्द्रिका कचेषु कर्णयोरशोकपुष्पमञ्जरीवतंसको गलेच कान्तकेसरो- यकल्पदाम । फुल्लनागकेसरादिपुष्परेणुरूषितं तनौ विचित्रमित्युपात्त- वेष एष वः केशवः पुनातु वः सुपुष्पभूषितः स मूर्त्तिमानिवागतो मधुविद्रुतुंमत्र ॥
अनङ्गशेखरः	लघुर्गुरुर्निवेच्छया यदा निवेश्यते तदेव दण्डको भवेदनङ्गशेखरः ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ।	उदेत्यसौ सुधाकरः पुरो विलोकयाद्य राधिके ! विजृम्भ- माणगौरदीधितौ रतिरहस्यनिर्म्मितः कलाकुतूहलेन चारुचम्पकैरनङ्ग- शेखरः किमु । इति प्रमोदकारिणीं प्रियाप्रमोदलब्धये गिरं ससुस्मिर- मुरारिरद्भुतां प्रदोषकालसङ्गमोल्लसन्मना मनोज्ञकेलिकौतुकी करोतु वः कृतार्थतां ॥

छन्दसां दत्तिनामानि ।	छन्दसां लक्षणानि ।	छन्दसामुदाहरणानि ।
त्रिंशदक्षरा दत्तिः ।	प्रतिचरणविहङ्गरेफाः सुरवोर्ध्ववक्त्रजीमूत-	जय जय जगदीश विष्णो हरे राम दामोदर श्रीनिवासा-
अर्थः	लीलाकरोद्दामशब्दादयः	च्युतानन्त नारायण
	प्रतिचरणं चक्रदृष्टिप्रपातस्य दत्तार्थः ।	त्रिदशगणगुरो सुरारे मुकुन्दासुरारे हृषीकेश पीताम्बर
	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	श्रीपते माधव ।
		गरुडगमन शङ्ख वैकुण्ठ गोविन्द विश्वम्भरोपेन्द्र चक्रायुधा-
		धोक्षज श्रीनिधे
		वलिदमन वृषिंह शौरे । भवाम्भोधिघोरार्णसि त्वं निमज्जन्त-
		मभ्युद्धरोपेत्य मामु ॥
सिंहविक्रीड:	यकारैः कवीन्द्रासुरोधान्निवद्धैः प्रथिष्ठो विशुद्धो	
	ऽपरो दण्डकः सिंहविक्रीड़नामा	
	।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ	
नवत्रिंशदक्षरा दत्तिः ।		
अर्णवः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	अर्णोवदर्णवादीनामुदाहरणानि षोडशापि ॥
अशोकमञ्जरी	खेच्छया रजौ क्रमेण संनिवेशयत्युदारधीः कविः	
	स दण्डकः स्मृतो जयत्यशोकमञ्जरी	
	ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ	
षट्त्रिंशदक्षरा दत्तिः ।		
व्याल:	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
ऊनचत्वारिंशदक्षरा दत्तिः ।		
जीमूत:	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,	
	ऽ।ऽ	
चत्वारिंशदक्षरा दत्तिः ।		
जीमूतः	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,	
	ऽ।ऽ,ऽ।ऽ	
एकचत्वारिंशदक्षरा दत्तिः ।		
उद्दाम:	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,	
	ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
सिंहविक्रान्त:	नयुगलगुरुयुगेवं यकारा: कवीन्द्रासुरोधा-	
	त्तदा यत्र वस्यन्त एवोऽपरो दण्डकः प्रख्यितै-	
	रीरितः सिंहविक्रान्तनामा	
	।।।,।।।,।,ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ,	
	।ऽऽ,।ऽऽ,।ऽऽ,।ऽऽ	
अष्टचत्वारिंशदक्षरा दत्तिः ।		
शङ्ख:	।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,	
इत्यादय: ।	ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ	
इति समवृत्तानि समाप्तानि ॥*॥		
अथार्धसमवृत्तानि ।		
उपचित्रम् ११ । ११ दत्तिः ।	विषमे यदि नौ जगणा दले भौ गुरु भाद्-	
	गुरुकावुपचित्रम् ।	
	द्विरावृत्त्या श्लोकः पूरयितव्यः	
प्रथमपादे तृतीयपादे च	।।ऽ,।।ऽ,।।ऽ,।,ऽ	सुरवैरिवपुस्रुतां सुरं हेमनिभांशुकचन्दनलिप्तम् ।
द्वितीयपादे चतुर्थपादे च	ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ	गगनचपलामिलितं यथा शारदनीरधरेऽपचित्रम् ॥
वेगवती १० । ११ दत्तिः ।	विषमे प्रथमाक्षरहीनं दोधकमेव हि वेगवती	
	स्यात्	
प्रथमपादे तृतीयपादे च	।।ऽ,।।ऽ,।।ऽ,ऽ	स्मर वेगवती भ्रजर. [illegible]
द्वितीयपादे चतुर्थपादे च	ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ	रभसान्न गुरून् गणयन्ती कैमिनिभुक्तयथाश क्रमात् ।

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
भद्रविराड् १०।११ वृत्तिः ।	ओजे तपरौ जरौ गुरुश्चेत् मृसौ ज्गौ ग भद्रविराड् भवेदनोजे	
प्रथमपादे द्वतीयपादे च द्वितीयपादे चतुर्थपादे च केतुमती १०।११ वृत्तिः ।	ऽऽ।,।ऽ।,ऽ।ऽ,ऽ ऽऽऽ,।।ऽ,।ऽ।,ऽ,ऽ असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद्गः	
प्रथमपादे द्वतीयपादे च द्वितीयपादे चतुर्थपादे च विपरीतपूर्व्वा ११।११ वृत्तिः ।	।।ऽ,।ऽ।,।।ऽ,ऽ ऽ।।,ऽ।ऽ,।।।,ऽ.ऽ जतौ जगौ गो विषमे समे चेत् तौ ज्गौ ग एषा विपरीतपूर्व्वा	
प्रथमपादे द्वतीयपादे च द्वितीयपादे चतुर्थपादे च आख्यानकी ११।१२ वृत्तिः ।	।ऽ।,ऽऽ।,।ऽ।,ऽ,ऽ ऽऽ।,ऽऽ।,।ऽ।,ऽ,ऽ आख्यानकी तौ जगुरू ग ओजे जतावनोजे जगुरू गुरुश्चेत्	
प्रथमपादे द्वतीयपादे च द्वितीयपादे चतुर्थपादे च हरिद्भुता ११।१२ वृत्तिः ।	ऽऽ।,ऽऽ।,।ऽ।,ऽ,ऽ ।ऽ।,ऽऽ।,।ऽ।,ऽ,ऽ अयुजि प्रथमेन विवर्णितं द्रुतविलम्बितकं हरिद्भुता	
प्रथमपादे द्वतीयपादे च द्वितीयपादे चतुर्थपादे च	।।,ऽ।।,ऽ।।,ऽ।ऽ ।।।,ऽ।।,ऽ।।,ऽ।ऽ	स्फुटफेनचया हरिद्भुता वलिमनोज्ञतटा तरङ्गैः सुता । कलहंसकुलारवव्याकुलिनी विहरतो हरति स्म हरेर्मनः ॥
अपरवक्त्रम् ११।१२ वृत्तिः ।	अयुजि नयरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ	
प्रथमे द्वतीये च पादे द्वितीये चतुर्थे च पादे द्रुतमध्या ११।१२ वृत्तिः ।	।।।,।।।,ऽ।ऽ,।,ऽ ।।।,।ऽ।,।ऽ।,ऽ।ऽ भवयमोजगतं गुरुणौ चेद् युजि च नजौ व्ययुतौ द्रुतमध्या	स्फुटसुमधुरवेणुगीतिभिस्तमपरवक्त्रमवेत्य माधवम् । नगयुवतिमनोः समं स्थिता व्रजवनिता धृतचित्तविभ्रमाः ॥
प्रथमपादे द्वतीयपादे च द्वितीयपादे चतुर्थपादे च मालभारिणी ११।१२ वृत्तिः ।	।ऽ। ऽ।।,ऽ।।,ऽ,ऽ ।।।,।ऽ।,।ऽ।,।ऽऽ विषमे ससजा यदा गुरू चेत् सभरा येन तु मालभारिणीयम्	
प्रथमपादे द्वतीयपादे च द्वितीयपादे चतुर्थपादे च कौमुदी १२।१२ वृत्तिः ।	।।ऽ,।।ऽ,।ऽ।,ऽ,ऽ ।।ऽ,ऽ।।,ऽ।ऽ,।ऽऽ अयुजि ननभभा समकेऽपि तु नयुगरयुगलं तदा कौमुदी	
प्रथमपादे द्वतीयपादे च द्वितीयपादे चतुर्थपादे च पुष्पिताग्रा १२।१३ वृत्तिः ।	।।।,।।।,ऽ।।,ऽ।। ।।।,।।।,ऽ।ऽ,ऽ।ऽ अयुजि नयुगरेफतो यकारो युजि च भजौ जरगाश्च पुष्पिताग्रा	
प्रथमपादे द्वतीयपादे च द्वितीयपादे चतुर्थपादे च जवमती १२।१३ वृत्तिः ।	।।।,।।।,ऽ।ऽ,।ऽऽ ।।।,।ऽ।,।ऽ।,ऽ।ऽ,ऽ स्यादयुग्मके रजौ रयौ समे चेत् जरौ जरौ गुरुर्ज्जवात् परा मतीयम्	करकिसलयशोभया विभान्ती कुचफलभारविनम्रदेहयष्टिः । स्खलतरुचिरविलासपुष्पिताग्रा व्रजयुवतिव्रततौ हरेर्मुदेऽभूत् ॥
प्रथमपादे द्वतीयपादे च द्वितीयपादे चतुर्थपादे च मञ्जुसौरभम् १२।१३ वृत्तिः ।	ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽऽ ।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,ऽ यदि विषमे भवतो नजौ जरौ सजया: समे तु जगौ मञ्जुसौरभम्	
प्रथमपादे द्वतीयपादे च द्वितीयपादे चतुर्थपादे च	।।।,।ऽ।,।ऽ।,ऽ।ऽ ।।ऽ,।ऽ।,।ऽऽ,।ऽ।,ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
सुन्दरी १०।११ वृत्तिः ।	अयुजोर्यदि सौ जगौ युजोः सभराः लगौ यदि सुन्दरी तदा	
प्रथमे तृतीये पादे च	।।२,।।२,।२।,२	यदवोचदवेक्ष्य सुन्दरी परितः स्नेहमयेन चक्षुषा ।
द्वितीये चतुर्थे पादे च	।।२,२।।,२।२,।,२	अपि कंसहरस्य दुर्वचं वचनन्तद्धिदधीत विस्मयम् ॥
इत्यर्द्धसमवृत्तानि समाप्तानि ॥* ॥		
अथ विषमवृत्तानि ।		
उद्गता	प्रथमे सजौ यदि सलौ च नसजगुरुकाण्य-नन्तरम् । यदथ भनभगाः स्फुरधो सजसा जगौ च भवतीयमुद्गता ॥	
प्रथमे पादे १०	।।२,।२।,।।२,।	विललास गोपरमणीषु तरङ्गितनयाप्रभोद्गता ।
द्वितीये १०	।।।,।।२,।२।,२	लक्ष्मणयनचकोरयुगे दधती सुधांशुकिरणोर्मिविभ्रमम् ॥
तृतीये १०	२।।,।।।,२।।,२	
चतुर्थे १३	।।२,।२।,।।२,।२।,२	
अन्यविधोद्गता	प्रथमे सजौ यदि सलौ च नसजगुरुकाण्य-नन्तरम् । यदथ भनजलगाः स्फुरधो सजसा जगौ च भवतीयमुद्गता ॥	
प्रथमे पादे १०	।।२,।२।,।।२,।	अथ वासवस्य वचनेन रुचिरवदनश्चिलोचनम् ।
द्वितीये १०	।।।,।।२,।२।,२	क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनञ्जयः ॥
तृतीये ११	२।।,।।।,।२।,।,२	इति भारवाद्गतामेदः । १२ । १ ॥
चतुर्थे १३	।।२,।२।,।।२,।२।.२	
सौरभम्	त्रयसङ्गता सङ्गमेव पदमिह तृतीयमन्यथा । जायते रनभगैर्ग्रथितं कथयन्ति सौरभक-मेतदीदृग्गम् ॥	
प्रथमे पादे १०	।।२,।२।,।।२,।	परिभूतपुष्पगुतपवनविद्धतगन्धविभ्रमा ।
द्वितीये १०	।।।,।।२,।२।,२	कस्य चित्त हरतीह हरे सुखपद्मसौरभकला त्वाङ्गुता ॥
तृतीये १०	२।२,।।।,२।।,२	
चतुर्थे १३	।।२,।२।,।।२,।२।,२	
ललितम्	नयुगं सकारयुगलञ्च भवति चरणे तृतीयके । तदुदितसुरमतिभिर्ललितं यदि श्रेयसस्य सकलं यशोद्गता ।	
प्रथमे पादे १०	।।२,।२।,।।२,।	व्रजसुन्दरी सदुदयेन मुदितमनसा स्म पीयते ।
द्वितीये १०	।।।,।।२,।२।,२	हिमकरगलितमिवाम्रतकं ललितं मुरारिमुखचन्द्र-विच्युतम् ॥
तृतीये १२	।।।,।।।,।।२,।।२	
चतुर्थे १३	।।२.।२।,।।२,।२।,२	
वक्त्रम्	वक्त्रं युगभ्यां मगौ स्यातामब्धेर्यौ।गुरुभिः ख्यातम् ।	
प्रथमे पादे ८	ऽऽऽऽ।ऽऽऽ	वक्त्राम्भोजं सदा स्नेरं चक्षुर्नीलोत्पलं फुल्लम् ।
द्वितीये ८	ऽऽऽऽ।ऽऽऽ	वल्लवीनां मुरारातेश्चेतोभृङ्गं जहारोच्चैः ॥
तृतीये ८	।ऽऽऽ।ऽऽऽ	
चतुर्थे ८	ऽऽऽऽ।ऽऽऽ	
पथ्यावक्त्रम्	युजोश्चतुर्थतो जेन पथ्यावक्त्रं प्रकीर्त्तितम् ।	
प्रथमे पादे ८	।ऽ।।ऽऽ।	रासकेलिसदृश्यस्य कृष्णस्य मधुवासरे ।
द्वितीये ८	ऽऽ।।।ऽ।ऽ	आसीद्गोपन्यगाङ्गीणां पथ्या वक्त्रमधुस्तुतिः ॥
तृतीये ८	ऽऽऽ।ऽऽऽ	
चतुर्थे ८	ऽऽऽ।ऽ।ऽ	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणगणाः ।	छन्दसामुदाहरणानि ।
अनुष्टुप्	पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।	
	गुरु षष्ठञ्च पादानां प्रेषेष्वनियमो मतः ॥	
	प्रयोगे प्रायिकं प्राहुः केऽप्येतल्लक्षणक्षमम् ।	
	लोकेऽनुष्टुबिति ख्यातं तस्माद्वाचरता मता ॥	
प्रथमे चरणे ८	।।।।।।।	पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
द्वितीये ८	।।।।।।।	गुरु षष्ठञ्च पादानां प्रेषेष्वनियमो मतः ॥
तृतीये ८	।।।।।।।	
चतुर्थे ८	।।।।।।।	
इति वृत्तमनुष्टुप्तानि समाप्तानि ॥*॥		
अथ मात्रावृत्तानि ।		
आर्या अपरनाम गाथा	लक्ष्मैतत् सप्तगणा गोपेता भवति नेह विषमे जः ।	
	षष्ठो जश्च नलघु वा प्रथमार्द्धे नियतमार्यायाः ॥	
	षष्ठे द्वितीयलात् परके नृणे सुखलाच्च सयतिपद-	
	नियमः ।	
	चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥	
प्रथमे पादे १२	।।।।।।।	लक्ष्मीः श्रिमुः सुतो मे वल्लवकुलटाभिराकृतो न रहे ।
द्वितीये १८	।।।।।।।।।।।।	चरणमपि वत्सलसाविति जगाद गोष्ठां यशोदार्या ॥
तृतीये १२	।।।।।।।।	
चतुर्थे १५	।।।।।।।।।	
प्रकारान्तरो यथा		
प्रथमे पादे १२	।।।।।।।	वृन्दावने सलीलं वल्गुद्रुमकाञ्चनिहिततनुयष्टिः ।
द्वितीये १८	।।।।।।।।।।।।	क्षीरसुखार्पितवेणुः लक्ष्मो यदि मनसि कः स्वर्गः ॥
तृतीये १२	।।।।।।।	
चतुर्थे १५	।।।।।।।।।	
नवधा आर्या क्रमेण यथा ।		[पथ्या ।
पथ्या	प्रथमगणत्रयविरतिर्दलयोरुभयोः प्रकीर्त्तिता	
प्रथमे पादे १२	।।।।।।।	जय जय नाथ! सुरारे! केशव! कंसान्तकाच्युतानन्त ।।
द्वितीये १८	।।।।।।।।।।।।	कुरु करुणामिति विगतिः पथ्या भवरोगदुःस्थानाम् ॥
तृतीये १२	।।।।।।।	अत्र द्वितीयपादान्तलघोर्गुरुत्वम् ।
चतुर्थे १५	।।।।।।।।।	पूर्वापरार्द्धयोर्द्वादशमात्रायां यतिः ॥
विपुला	संलक्ष्य गणत्रयमादिमं शुकलयोर्द्वयोर्भवति पादः ।	
	यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ॥	
प्रथमे पादे १८	।।।।।।।।।।।।	पुंसां कलिकालबालहतानां माधुर्यप्रहतिरस्यापि ।
द्वितीये १२	।।।।।।।।	वीर्य्यविपुला सुखे चेत् स्याद्गोविन्दाख्यमन्त्रकला ॥
तृतीये १८	।।।।।।।।।।।।	अत्र द्वितीयचरणान्तलघोर्गुरुत्वम् ।
चतुर्थे १३	।।।।।।।।।।।	पूर्वापरार्द्धयोर्द्वादशमात्रां संलक्ष्य यतिः ॥
चपला	दलयोर्द्वितीयतुर्य्यौ गयौ जकारौ तु यत्र	
	चपला सा ।	
प्रथमे पादे १२	।।।।।।।	चपला न चेत् कदाचिन्मयां भवेद्भक्तिभावना लक्ष्मीः ।
द्वितीये १८	।।।।।।।।।।।।	धर्म्मार्थकाममोक्षास्तदा करस्था न सन्देहः ॥
तृतीये १२	।।।।।।।	
चतुर्थे १५	।।।।।।।।।	
सुखचपला	आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ।	
	प्रेम्णः पूर्णजलक्ष्मा सुखचपला सोदिता मुनिना ॥	
प्रथमे पादे १२	।।।।।।।	नन्दसुत! वचनक्रमं दृढं न ते प्रेम गच्छ तत्रैव ।
द्वितीये १८	।।।।।।।।।।।।	यत्र भवति ते रागः कापि जगादेति सुखचपला ॥
तृतीये १२	।।।।।।।	अत्र द्वितीयपदान्तलघोर्गुरुत्वम् ॥
चतुर्थे १५	।।।।।।।।।	

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणगणाः।	छन्दसामुदाहरणानि।
जघनचपला	प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे च चपलायाः।	
	लक्ष्माश्रयेत योक्ता विशुद्धधीभिर्जघनचपला॥	
प्रथमे चरणे १२	ऽऽऽ।ऽ२	लक्ष्मा: प्रहारपटुर्यौवनमदचञ्चल: सुललिताङ्ग:।
द्वितीये १८	ऽ।।।ऽ।ऽ।।ऽऽ	आसीद्व्रजाङ्गनानां मनोहरो जघनचपलानाम्॥
तृतीये १२	ऽऽऽ।ऽऽ	
चतुर्थे १५	।ऽ।ऽ।।।।ऽऽ	
गीति:	आर्याप्रथमार्द्धसमं यस्या अपरार्द्धमाह तां गीतिम्।	
प्रथमे चरणे १२	ऽ।।ऽऽऽ	केशवबंशीगीतिर्लोकमनोहरिबहारिणी जाति।
द्वितीये १८	ऽ।।ऽ।।।ऽ।।ऽ	गोपीमानग्रन्थेर्विमोचनी दिव्यगायनाचार्या॥
तृतीये १२	ऽऽऽऽऽ	अत्र द्वितीयचरणान्तलघोर्गुरुत्वम्॥
चतुर्थे १८	।ऽ।ऽऽ।ऽ।ऽऽ	
उपगीति:	आर्यापरार्द्धतुल्ये दलद्वये प्राहुरुपगीतिम्।	
प्रथमे चरणे १२	।।ऽ।ऽऽ	नवगोपसुन्दरीणां राजोल्लासे मुरारातिम्।
द्वितीये १५	ऽऽऽ।ऽऽऽ	अक्षारयदुपगीति: स्वर्गसुरङ्गीढयां गीतिम्॥
तृतीये १२	ऽऽ।।।ऽऽऽ	
चतुर्थे १५	।।ऽ।ऽ।ऽऽऽ	
उद्गीति:	आर्याद्वयकलद्वितये विपरीते पुनरिहोद्गीति:।	
प्रथमे चरणे १२	ऽऽ।ऽ।ऽ।।	नारायणस्य सन्ततमुद्गीति: संस्तुतिर्भक्त्या।
द्वितीये १५	ऽऽऽ।ऽऽऽ	अनायासमाविशेदुत्तरसंसारसागरे तरणि:॥
तृतीये १२	ऽऽऽऽऽ	
चतुर्थे १८	।।ऽ।ऽ।ऽ।ऽ	
आर्यागीति:	आर्याप्राग्दलमन्तेऽधिकगुरु तादृगपरार्द्धमार्यागीति:।	
प्रथमे चरणे १२	ऽऽऽ।।।ऽ	हर्षान्वक्षिमितदृग्भ्र: प्रमोदरोमाञ्चकञ्चुकाञ्चितदेहा:।
द्वितीये २०	।ऽ।ऽऽ।ऽ।।ऽऽ	आर्यागीतिं भक्त्या गायन्ति श्रीपतेश्चरितसङ्घाम्॥
तृतीये १२	ऽऽऽऽऽ	लघुगुरुविपर्ययरूपप्रस्तारभेदेन बहुविधा आर्या भवन्ति॥
चतुर्थे २०	ऽऽऽ।ऽ।।।ऽऽ	
पूर्वार्द्धे विंशत्या चतुर्विंशत्या वा मात्राणां परार्द्धे षोडशमात्राणां परे लघुवर्णचतुष्टये सति प्रथमं द्वितीयं वा लघ्वक्षरं प्राप्य आर्याया: सामान्येन यतिनियम:॥		
वैतालीयम्। अपरवक्त्रमित्येके।	षड्विषमेऽष्टौ समे कलास्ताश्च समेष्वर्णो निरन्तरा। न समाश्च पराश्रिता कला वैतालीयेऽन्ते रलौ गुरु:॥	
प्रथमे चरणे १४	।।ऽ।ऽ।ऽ।ऽ	बुध्नेन मदेन चर्चितं तव यन्निन्दति राधिके कुचम्।
द्वितीये १६	।।ऽऽ।ऽ।ऽ।ऽ	मुदमातनुतेऽत्र पक्तिमं तद्वैतालीयं फलं हरे:॥
तृतीये १४	।।ऽ।ऽ।ऽ।ऽ	लघुगुरुवत्त्वयेनापि बहुधा भवति॥
चतुर्थे १६	ऽऽऽऽ।ऽ।ऽ	
औपच्छन्दसकम्	तत्रैवान्तेऽधिके गुरौ स्यादौपच्छन्दसकं कवीन्द्रछन्दम्।	
प्रथमे चरणे १६	ऽऽऽ।ऽ।ऽऽ	आतन्वानं मुरारिकान्तासौपच्छन्दसकं हृदा विनोदम्।
द्वितीये १८	ऽऽऽ।ऽ।ऽ।ऽऽ	कंसं यो निर्जघान देवो वन्दे तं जगतां स्थितिं दधानम्॥
तृतीये १६	ऽऽऽ।ऽ।ऽऽ	
चतुर्थे १८	ऽऽऽ।।ऽ।ऽ।ऽऽ	
एतदैतालीयमेव:॥		

छन्दसां वृत्तिगामानि ।	छन्दसां लक्षणगाथाः ।	छन्दसामुदाहरणानि ।
पञ्झटिका	प्रतिपदयमकितषोड़शमात्रा नवमगुरुत्वविभूषितगात्रा ।	
	पञ्झटिकापुनरत्र विवेकः क्वापि च मध्यगुरुर्गण एकः ॥	
प्रथमे चरणे १६	।।।।ऽऽऽऽऽ	तरलवतंसाश्लिष्टस्कन्धचलत्तरपञ्झटिकाकटिबन्धः ।
द्वितीये १६	।।।।ऽ।ऽ।ऽऽ	मौलिचपलशिखिचन्द्रकछन्दः कालियशिरसि ननर्त्त मुकुन्दः॥
तृतीये १६	ऽ।।।।ऽ।ऽऽ	इयं प्रतिपदयमकितषोड़शमात्रा लघुगुरुत्वत्वयेनापि बहुधा।
चतुर्थे १६	ऽ।।।।ऽ।ऽऽ	अस्या नवमी मात्रा च कदाचित् लघ्वी भवति ॥
दोहड़िका	मात्रा चयोदशकं यदि पूर्व्वं लघुकविरामि । पश्चादेकादशकन्तु दोहड़िका द्विगुणेन ॥	
प्रथमे चरणे १३	ऽऽऽ।।।।।।	माई दोहड़िपठय सुणि हासिओ काणु गोआल।
द्वितीये १३	ऽ।ऽ।ऽऽ।	वृन्दावणघणकुञ्ज चलिओ कमलरसाल ॥
तृतीये ११	ऽऽ।।।।ऽ।	अस्यार्थः । हे मातः ! दोहड़िकापाठं श्रुत्वा हस्यो गोपालो हसित्वा कमपि रसालं चलितः कुत्र वृन्दावनघनकुञ्जे वृन्दावनस्य निविड़निकुञ्जे । राई इति क्वचित् पाठः तत्तेन राधिकाया दोहड़िकापाठं श्रुत्वा ॥
चतुर्थे ११	।।ऽ।।।।ऽ।	गुरुलघुत्वत्वयेन बहुधा भवति ॥
अस्या अन्या मात्रा लघ्वी अपभ्रंशभाषया प्रचारः ॥		
इति मात्रावृत्तानि समाप्तानि ॥*॥		

अत्र समवृत्तानि (२४७) सप्तचत्वारिंशदधिकं द्विशतं, अर्द्धसमवृत्तानि (१५) पञ्चदश, विषमवृत्तानि (७) सप्त, मात्रावृत्तानि च (१५) पञ्चदश, समुदायेन (२८४) चतुरशीत्यधिकद्विशतसंख्यकानि छन्दांसि लिखितानीति ॥ * ॥

छन्दकंपातनः, पुं, (छन्दकेन छद्मना पातयति लोकानिति । पत+णिच्+ल्युः ।) छद्मतापसः । इति जटाधरः ॥

छन्दोगः, पुं, (छन्दो वेदविशेषं सामेत्यर्थः गायतीति । गै+"गोपोष्टक् ।" ३।२।८। इति टक् ।) सामगः । सामवेदी । इति जटाधरः ॥ (यथा, मनुः । ३ । १४५ ।

"यत्नेन भोजयेच्छ्राद्धे वह्वृचं वेदपारगम् ।
शाखान्तगमथाध्वर्युं छन्दोगन्तु समाप्निकम् ॥")

छन्दोगपरिशिष्टं, क्ली, (छन्दोगेन सामगेन कात्यायनेन मुनिनेत्यर्थः । प्रणीतं यत् परिशिष्टम् । यद्वा, छन्दोगेभ्यः हितं परिशिष्टम् ।) कात्यायनमुनिप्रणीतं सामवेदिकर्म्मबोधकगोभिलसूत्रस्यार्थं परिशेषशास्त्रम् । इति स्मृतिः ॥

छन्दोविचितिः, स्त्री, (छन्दसां विचितिर्यत्र ।) स्मृतिच्छन्दसां प्रत्यायकं शास्त्रम् । इत्यमरटीकायां भरतः ॥ (यथा, वृहत्संहितायाम् । १०४ । ६४ ।

"विपुलामपि मुद्गां छन्दोविचितिं भवति कार्य्यमेतावत् ।
श्रुतिसुखदृत्तसंग्रहमिममाह वराहमिहिरोऽतः ॥")

छद्म, क्ली, (छद्+क्तः ।) रङ्गः । निर्जनस्थानम् । इति मेदिनी । ने, ५ ॥

छद्मः, त्रि, (छद्+क्तः ।) छादितः । इति मेदिनी । ने, ५ ॥ (प्राप्तः । यथा, महाभारते । ३ । २० । २४ ।

"न हया न रथो वीर ! न यन्ता मम दारुकः ।
अदृश्यन्त शरैश्छन्नास्तेनाहं सैनिकाश्च मे ॥")

छद्मः, क्ली, (छद्+क्तः ।) रङ्गः । इत्यमरः । २ । ८ । २२ ॥

छप, ट्र क सर्पे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) ट्र क, छम्पयति । सर्पो गतिः । इति दुर्गादासः ॥

छम, उ भक्षे । इति कविकल्पद्रुमः । (भ्वां-परं सकं-सेट् । उदित्वात् क्त्वेट् ।) छमति । उ, छमित्वा छान्त्वा । इति दुर्गादासः ॥

छमष्कः, पुं, (छमति भक्षयति जन्मग्रहणान्तरं पितरं नाशयतीत्यर्थः । छम+बाहुलकादष्कन् ।) ऋतपिटकः । इत्युणादिकोषः ॥ छैमड़ा इति भाषा ॥ वन्युद्दीनः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

छर्द्द, क वमने । इति कविकल्पद्रुमः । (चुरां-परं-सकं-सेट् ।) वमनं वान्तिः । क, छर्दयति अन्नं लोकः । इति दुर्गादासः ॥ (तथाच, महाभारते । ५ । ६६ । ४२ ।

"खपन्ति च भवन्ति च छर्दयन्ति च मानवाः ॥")

छर्द्दि, क्ली, (छर्द+भावे घञ् ।) वमनम् । इति हेमचन्द्रः । ३ । १३३ ॥

छर्द्दनं, क्ली, (छर्द+भावे ल्युट् ।) वमनम् । इति हेमचन्द्रः ॥ (यथा, सुश्रुते । ४ । १० ।

"तत्रास्य मदनालाबुविम्बीकोशातकीफलैः ।
छर्द्दनं दधुदन्त्याम्बमधवा तक्तलाम्बुना ॥")

छर्द्दनः, पुं, (छर्द्दयति नरपश्वादिकं यस्मिन् पुनरुद्गिरतीति । छर्द्द+ल्युः ।) अलम्बुषराक्षसः । (छर्द्दयति कटुगन्धेन उद्गिरत्यनेनेति । छर्द्द+ल्युट् ।) निम्बवृक्षः । इति हेमचन्द्रः ॥ मदनवृक्षः । इति भावप्रकाशः ॥

छर्द्दापनिका, स्त्री, (छर्द्दं वमनं आपयति प्रापयतीत्यर्थः । आप्+णिच्+ल्युः । ततः स्वार्थे कः । टापि अत इत्वच ।) कण्टकी । इति राजनिर्घण्टः ॥

छर्द्दिः, स्त्री, (छर्द्दयत्यनेनेति । छर्द्द वमने+इन् ।) वमिरोगः । वाँति इति भाषा ॥ तत्पर्य्यायः । प्रच्छर्द्दिका २ छर्द्दम् ३ वमथुः ४ वमनम् ५ वमिः ६ । इति हेमचन्द्रः । ३ । ३३ ॥ छर्द्दिका ७ छर्द्दीका ८ वान्तिः ९ उद्गारः १० । इति राजनिर्घण्टः ॥ उत्कासिका ११ छर्द्दनम् १२ । इति शब्दरत्नावली ॥ तस्या निदानादि यथा,—

"दुष्टैर्दोषैः पृथक्सर्व्वैर्वीभत्सालोकनादिभिः ।
छर्द्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते ॥
अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरति ।
अकाले चातिमात्रेण तथा सात्म्येन भोजनैः ॥
अमाङ्गल्यात्तथोद्वेगादजीर्णात् क्रिमिदोषतः ।
नार्य्याश्चापन्नसत्त्वायास्तथातिद्रुतमश्नतः ॥
वीभत्सैर्हेतुभिश्चान्यैर्द्दं तमुत्क्लेशितो बलात् ।
छादयन्ननलं वेगैरर्द्दयन्नङ्गभञ्जनैः ॥
निरुच्यते छर्द्दिरिति दोषो वक्त्रं प्रधावितः ॥"

तस्याः पूर्व्वरूपं यथा,—

"क्लमोद्गारारोचौ च प्रसेको लवणास्यता ।
भक्ष्ये द्वेषोऽन्नपाने च वमीनां पूर्व्वलक्षणम् ॥"

वातजायास्तस्या रूपं यथा,—

"हृत्पार्श्वपीड़ासुखशोषशीर्षे-
नाभ्यर्त्तिकासस्वरभेदतोदैः ।
उद्गारशब्दप्रबलं सफेनं
विच्छिन्नलक्ष्यं तनुकं कषायम् ॥
हृल्लास चाल्पं महता च वेगेनार्त्तोऽनिलाच्छर्द्दयतीह दुःखम् ॥"

तस्याः पित्तजाया रूपं यथा,—

"मूर्च्छा पिपासा सुखशोषमर्द्द-
तालुक्विसन्तापतमोभमार्त्तः ।

पीतं भृङ्गोणं हरितं सतिक्तं
धूम्रञ्च पित्तेन वमेत् सदाहम् ॥"

तस्याः श्लेष्मजाया रूपं यथा,—

"तन्द्रास्यमाधुर्यकफप्रसेक-
सन्मोहनिद्रारुचिगौरवार्त्तः ।
स्निग्धं घनं स्वादु कफाद्विशुद्धं
सलोमहर्षोऽल्परुजं वमेच्च ॥"

तस्यासाध्यदोषजाया रूपं यथा,—

"शूलाविपाकारुचिदाहतृष्णा-
श्वासप्रमोहप्रबलाप्रसक्तम् ।
छर्दिस्त्रिदोषाह्वयमाञ्जनील-
सान्द्रोष्णरक्तं वमतां नृणां स्यात् ॥"

असाध्याया लक्षणं यथा,—

"विट्स्वेदमूत्रास्रवहानि वायुः
स्रोतांसि संरुध्य यदोर्द्ध्वमेति ।
उत्पन्नदोषस्य समाचितं तं
दोषं समूह्य नरस्य कोष्ठात् ॥
विण्मूत्रयोस्तत्समगन्धवर्णं
लट्श्वासकासार्त्तियुतं प्रसक्तम् ॥
प्रच्छर्द्ययेद्दुष्टमिहातिवेग-
स्तयार्द्दितश्चाशु विनाशमेति ॥"

आगन्तुजाया लक्षणं यथा,—

"वीभत्सजा दौर्हृदजामजा तु
असात्म्यजा या क्रिमिजा च या हि ।
सा पञ्चमी ताश्च विभावयेच्च
दोषोच्छ्रयेणैव यथोक्तमादौ ॥"

क्रिमिजाया लक्षणं यथा,—

"शूलच्छलासबहुला क्रिमिजा च विशेषतः ।
क्रिमिच्छर्द्योगतुल्येन लक्षणेन च लक्षिता ॥
चीनस्य या च्छर्द्दिरतिप्रसक्ता
सोपद्रवा श्लेष्मितपूययुक्ता ।
सचन्द्रिकां तां प्रवदेदसाध्यां
साध्याधिकित्सेन्निरुपद्रवाच्च ॥"

तस्या उपद्रवा यथा,—

"कासः श्वासो ज्वरो हिक्का तृष्णा वैचित्त्य
मेव च ।
छर्द्योगसमकश्चैव क्रियाच्छर्द्दैरुपद्रवाः ॥"
इति माधवकरः ॥

तस्यौषधं यथा, गारुड़े १८७ अध्याये ।

"अश्वगन्धाभया चैव उदकेन समं पिबेत् ।
हरीतकीकुडचूर्णं लीढ्वा आस्यञ्च पूरयेत् ॥
शीतं पीत्वाथ पानीयं सर्व्वच्छर्द्दिनिवारणम् ।
गुडूचीपद्मकारिष्टधन्वार्क रक्तचन्दनम् ॥
पित्तश्लेष्मज्वरच्छर्द्दिदाहतृष्णाश्रमापहम् ॥"

अपिच ।

"बिल्वमूलञ्च समधु गुडूचीकथितं जलम् ।
पीतं हरेच्च त्रिविधां छर्द्दिं वै नात्र संशयः ॥
पीता दूर्व्वा च्छर्द्दिं नश्येत् पिष्टा तण्डुलधारिया ॥"
इति च गारुड़े १६४ अध्यायः ॥*॥

अथ छर्द्दिचिकित्सा ।

"आमाशयोत्क्लेशभवा हि सर्व्वा-
च्छर्द्दीर्मता लङ्घनमेव तस्मात् ।
विधीयते मारुतजां विना तु
संशोधनं वा कफपित्तहारि ॥"

अत्र च्छर्द्दीशब्दः ।

"हन्यात् क्षीरोदकं पीतं छर्द्दिं पवनसम्भवाम् ।
सुश्लक्ष्णमलकयूषो वा ससर्पिष्कः ससैन्धवः ॥
क्षीरोदकं नाग्नितप्तं क्षीरस्योदकम् ।
गुडूचीत्रिफलानिम्बपटोलैः क्वथितं जलम् ।
पिबेत् मधुयुतं तेन छर्द्दिर्नश्यति पित्तजा ॥
हरीतकीनां चूर्णन्तु लिह्यान्माक्षिकसंयुतम् ।
अधोमार्गौन्मुखे दोषे छर्द्दिः शीघ्रं निवर्त्तते ॥
विड्ङ्गत्रिफलाविश्वाचूर्णं मधुयुतं पिबेत् ।
विड्ङ्गन्नवशुण्ठीनां चूर्णं वा कफजां वमिम् ॥
श्लवं केवर्त्तीमुस्तं गुडूचीति श्लोके ।
पिष्ट्वा धात्रीफलं लाजान् शर्करांश्च पलोन्मितान् ।
दत्त्वा मधुपलञ्चापि कुड़वं सलिलस्य च ॥
वाससा गालितं पीतं हन्ति छर्द्दिं त्रिदोषजाम् ।
गुडूच्या रचितं हन्ति हिमं मधुसमन्वितम् ॥
दुर्निवारामपि छर्द्दिं त्रिदोषजनितां बलात् ॥
एलालवङ्गजकेशरकोलमज्जा-
लाजाप्रियङ्गुघनचन्दनपिप्पलीनाम् ।
चूर्णानि माक्षिकसितासहितानि लीढ्वा
छर्द्दिं निहन्ति कफमारुतपित्तजाताम् ॥
इति एलादिचूर्णम् ॥

अश्वत्थवल्कलं शुष्कं दग्धं निर्व्वापितं जले ।
तल्लं पानमात्रेण छर्द्दिं जयति दुर्জ্জयाम् ॥
यवा त्रिकटुधान्याकजीरकाणां रजो लिहन् ।
मधुना नाग्नियेच्छर्द्दिमरुचिञ्च त्रिदोषजाम् ॥
बिल्वत्वचो गुड़ूच्या वा क्वाथः क्षौद्रेण संयुतः ।
छर्द्दिं त्रिदोषजां हन्ति पर्पटः पित्तजां तथा ॥
आम्राक्षिबिल्वनिर्यूहः पीतः समधुशर्करः ।
निहन्याच्छर्द्दितीसारं वैश्वानर इवाहुतिम् ॥
निर्यूहः क्वाथः ।

जम्ब्वाम्रपल्लवश्रेष्ठं लाजरजःसंयुतं शीतम् ।
शमयति मधुना युक्तं वमिमतिसारं दवाग्निमिव
सस्याम् ॥

वीभत्सजां हृद्यतमैरिष्टैर्हृद्यां फलैः ।
लङ्घनैरामजां छर्द्दिं जयेत् सात्म्यैश्च रसात्मजाम् ॥
क्रिमिच्छर्द्योगवद्वक्ष्याद्विधिं क्रिमिसमुद्भवाम् ।
तत्र तत्र यथा दोषं क्रियां कुर्य्याच्चिकित्सकः ॥
इति छर्द्दयधिकारः ।" इति भावप्रकाशः ॥

छर्द्दिः, [स्] स्त्री, (छर्द्दयति छर्द्यते इति वा । छर्द्द वमने + "अर्च्चिशुचिहुसृपिच्छादिछर्द्दिभ्य इसिः ।" उणा० । २ । १०८ । इति इसिः ।) वमिः । इत्युणादिकोषः ॥ (यथा, चरके चिकित्सास्थाने २३ अध्याये ।

"तदभिवेद्यस्य वचो निशम्य
प्रीतो भिषक्श्रेष्ठ इदं जगाद ।
छर्द्दौ पि यानीह पुरोदितानि
विस्तारतस्तानि निबोध सम्यक् ॥")

छर्द्दिका, स्त्री, (छर्द्दि + स्वार्थे कन् । स्त्रियां टाप् । यद्वा, छर्द्दयतीति । छर्द्दि + ण्वुल् । टापि अत इत्वञ्च ।) छर्द्दिः । विष्णुक्रान्ता । इति राजनिर्घण्टः ॥

छर्द्दिकारिपुः, पुं, (छर्द्दिकायाः रिपुः नाशक इत्यर्थः ।) क्षुद्रेला । इति शब्दचन्द्रिका ॥

छर्द्दिघ्नः, पुं, (छर्द्दिं हन्तीति । हन् + टक् ।) निम्बवृक्षः । इति रत्नमाला ॥ (निम्बशब्देऽस्य विवरणं ज्ञेयम् ॥)

छलं, क्ली, (छो + दृषादित्वात् कलच् । यद्वा, छल + अच् ।) स्खलितम् । द्राव्यम् । इति मेदिनी । ले, १७ ॥ (यथा, मनुः । ८ । ४६ ।

"धर्म्मेण व्यवहारेण च्छेनाचरितेन च ।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च ॥"

व्याजः । यथा, मार्कण्डेये । २५ । १० ।

"सा वै मदालसा पुत्रं बालसुत्तानशायिनम् ।
उल्लापनच्छलेनाह रुदमानमविस्वरम् ॥"

तात्पर्य्यान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरेण कथनम् । यथा, अश्वमेधपर्व्वणि । ५० ।

"वचनविघातोऽर्थविकल्पोपपत्त्या च्छलम् ॥"

"अर्थस्य वाद्यभिमतस्य यो विकल्पो विरुद्धः कल्पः अर्थान्तरकल्पनेति यावत् तदुपपत्त्या युक्तिविशेषेण यो वचनस्य वादुक्तस्य विघातो दूषणं तच्छलमित्यर्थः । वक्तृतात्पर्य्याविषयार्थकल्पनेन दूषणाभिधानमिति फलितम् । तात्पर्य्याविषयत्वं विशेष्ये विशेषणे संसर्गे वा । यथा, नेपालादागतोऽयं नवकम्बलत्वादित्यत्र नवसंख्यापरत्वकल्पनयाऽसिद्धत्वाभिधानम् । प्रमेयं धर्म्मित्वादित्यत्र पुण्यत्वार्थकल्पनया भागासिद्धत्वाभिधानम् । वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम् । तत्त्रिविधम् । वाक्छलं सामान्यच्छलमुपचारच्छलञ्च ॥" "छलं नाम परिशुद्धमर्थाभासमपार्थकं वाग्वस्तुमात्रमेव । तद्विविधं वाक्छलं सामान्यच्छलञ्च । तत्र वाक्छलं नाम यथा कश्चिद्ब्रूयात् नवतन्त्रोऽयं भिषगिति भिषग् ब्रूयात् नाहं नवतन्त्र एकतन्त्रोऽहमिति । परो ब्रूयात् नाहं ब्रवीमि नव तन्त्राणि तवेति अथतु नवाभ्यस्तं ते तन्त्रमिति भिषग् ब्रूयात् न मया नवाभ्यस्तं तन्त्रं अनेकशताभ्यस्तं मया तन्त्रमिति । एतद्वाक्छलम् । सामान्यच्छलं नाम यथा, व्याधिप्रशमनायौषधमित्युक्ते परो ब्रूयात् सतु सत्प्रशमनायेति भवानाह सतृरोगः सदौषधं यदिच सत्प्रशमनाय भवति सतृकासः सतृक्षयः सतृसामान्यात् कासस्तेक्षयप्रशमनाय भविष्यतीति एतत्सामान्यच्छलम् ॥" इति चरके विमानस्थाने अष्टमे अध्याये ॥)

छल्लिः, स्त्री, (छदं छाद्यतां लातीति । ला + बाहुलकात् किः ।) त्वक् । इति शब्दरत्नावली ॥ छाल इति भाषा ॥

छल्ली, स्त्री, (छदं छाद्यतां लातीति । ला + किः । ततः छदिकारादिति वा ङीष् ।) वीरुत् । सन्तानः । वल्कलम् । कुसुमविशेषः । इति मेदिनी । ले, १८ ॥

छविः, स्त्री, (छदि ऊर्द्धं करोति यद्वा छदि छिनत्ति दूरीकरोति मालिन्यादिकमेषेति । छो + "छदष्टुञ्छिच्छिवस्विकिकीदिवि ।"

उणा० । ४ । १५६ । इति किन् प्रत्ययेन निपातनात् साधुः ।) शोभा । दीप्तिः । इत्यमरः । १ । ३ । १७ ॥ (यथा, मेघदूते । ३५ ।

"भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः ॥")

छद, ण वधे । इति कविकल्पद्रुमः । (भ्वा-उभ-सकं-सेट् ।) ण, छदयति छदते । अयं केचिन्न मन्यते । इति दुर्गादासः ।

छदा, स्त्री, (छद्+ङः टाप् च ।) आच्छादनम् । इति मेदिनी । दे, १ ॥

छदः, पुं, (छाद्यते माल्यपत्राभ्यामसौ । छद्+"सर्व्वधातुभ्योऽसुन् ।" उणा० । ४ । १८८ । इति असुन् ततः पृषोदरात् साधुः ।) शावकः । इत्येकाक्षरकोषः ॥

छागः, पुं, स्त्री, (छाद्यते छिद्यते देवबलये इति । छो+"छापूखड़िभ्यः कित् ।" उणा० । १ । १२४ । इति गन् ।) पशुविशेषः । तत्पर्य्यायः । वस्तः २ छगलकः ३ अजः ४ शुभः ५ । इत्यमरः । २ । ६ । ७६ ॥ छगः ६ छगलः ७ छागलः ८ तभः ९ क्षभः १० शुभः ११ । इति तट्टीका ॥ लघुकामः १२ क्षयसदः १३ वर्करः १४ पर्व्वभोजनः १५ सत्यकर्व्वः १६ मेगादः १७ वृकः १८ अश्वपायुः १९ शिवाप्रियः २० । इति शब्दरत्नावली ॥ अवृकः २१ मेध्यः २२ पशुः २३ पयस्वलः २४ । तस्यांसगुणाः । लघुत्वम् । स्निग्धत्वम् । नातिशीतत्वम् । रुचिबलपुष्टिदात्वम् । निर्द्दोषत्वम् । वातपित्तनाशित्वम् । मधुरत्वञ्च । इति राजनिर्घण्टः ॥ शुक्रधातुसाम्यकारित्वम् । दृंहणत्वम् । स्निग्धत्वम् । स्नेहुत्वम् । अनभिष्यन्दित्वम् । नातिप्रशस्तत्वञ्च । इति राजवल्लभः ॥* ॥ छागपोतमांसगुणाः । लघुत्वम् । शीतत्वम् । प्रमेहनाशित्वञ्च ॥ हव्यचारिछागस्य मांसगुणः । दृंहणत्वम् । बलदात्वञ्च ॥ तन्मूत्रगुणाः । कटुत्वम् । उष्णत्वम् । रूक्षत्वम् । नाड़ीविशोषिज्ञीहोदरकफप्रश्वास-गुल्मशोफनाशित्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥

"छागलो वर्करश्छागो वस्तोऽजश्छगलः शुभः ।
छागमांसं लघु स्निग्धं स्वादुपाकं त्रिदोषजुत् ॥
नातिशीतमदाहि स्यात् स्वादु पीनसनाशनम् ।
परं बलकरं रुच्यं दृंहणं बलवर्द्धनम् ॥
अजाया अप्रसूतायाः मांसं पीनसनाशनम् ।
शुष्ककासेऽरुचौ शोषे हितमग्नेश्च दीपनम् ॥
अजासुतस्य बालस्य मांसं लघुतरं स्मृतम् ।
हृद्यं ज्वरहरं श्रेष्ठं सुखादु बलदं भृशम् ॥
मांसं निष्कासिताक्षस्य छागस्य कषजस्य च ।
स्रोतःशुद्धिकरं बल्यं मांसदं वातपित्तजुत् ॥
वृद्धस्य वातलं रूक्षं तथा व्याधिन्वितस्य च ।
ऊर्द्धजत्रुविकारघ्नं छागमुक्तं रुचिप्रदम् ॥"

इति भावप्रकाशः ॥

(एतन्मांसं पितॄणां तृप्तिकरत्वात् श्राद्धे देयम् । यथाह याज्ञवल्क्यः । १ । २५८ ।

"मातृस्वसारिवकौरभ्राकुनच्छागमार्षते ः ॥"

छागमांसेन पितॄणां यच्छाद्धे वार्षतूप्तिः । यथाह मनुः । ३ । २६९ ।

"यच्छ्राद्धे छागमांसेन पार्षतेन च सप्त वै ॥"

भोजराजेन युक्तिकल्पतरौ इतत्पदरीत्योक्ता । यथा,—

"नक्षत्राणां विभेदेन नराणान्तु गजत्रयम् ।
तेषां शुभाय निर्द्दिष्टं पशुवस्त्रत्रयं बलौ ।
ये छाग्याः शुचयश्छागाः पशवोऽन्ये तथैव च ।
देवजातिभिरुत्पन्नाश्चे सर्व्वार्थोपसिद्धये ॥
ये पीता हरिता वापि नरजातेरदीरिताः ।
ये शुक्लाश्च महान्तो वा रक्ताश्चाः शुभप्रदाः ॥
यो मोहादथवाज्ञानादबलिमन्यं प्रयच्छति ।
वध एव फलं तस्य नान्यत् किञ्चित् फलं भवेत् ॥"

इतस्य पशोर्लक्षणादिकं विशेषतो दक्षसंहितायाम् ६५ अध्याये उक्तम् । यथा,—

"छागशुभाशुभलक्षण-
मभिधास्ये नवदशारदन्ताक्षं ।
धन्याः स्याप्या वेक्षन्ति
वन्द्याश्चाः सप्तदन्ता ये ॥
दक्षिणपार्श्वे मण्डल-
मसितं शुक्लस्य शुभफलं भवति ।
अथ निभक्ष्याश्चलोहित-
वर्णानां श्वेतमपि शुभदम् ॥
स्तनवदवलम्बते यः
कण्ठेऽजानां मणिः स विज्ञेयः ।
एकमणिः शुभफलद-
श्चत्वारो द्विमणयो ये ॥
शुक्लाः सर्व्वे शुभदाः
सर्व्वसिताः सर्व्वलक्षणोद्देशाच्च ।
अर्द्धासिताः सितार्द्धा
धन्याः कपिलार्द्धलक्ष्याश्च ॥
विचरति यूथाख्याये
प्रथमं चाम्भोऽवगाहते योऽजः ।
स शुभः सितमूर्द्धा वा
मूर्द्धनि वा टिप्पिका यस्य ॥
वृषभतकक्षशिरा वा
तिलपिष्टनिभश्च ताम्रदृक् शुक्लः ।
लक्ष्मचरश्चः सितो वा
लक्ष्मो वा श्वेतचरणो यः ॥
यः लक्ष्माक्षः श्वेतो
मध्ये लक्ष्मणेन भवति पद्मेन ।
यो वा चरति सशब्दं
मन्दञ्च स शोभनश्छागः ॥
अथ शिरोरुहपादो
यो वा प्राक् पाण्डुरो ऽपरे नीलः ।
स भवति शुभलक्षणः
शोकघ्नश्चैव गर्गोक्तः ॥
कुहकः कुटिलश्चैव जटिलो वामनस्तथा ।
ते चत्वारः श्रियः पुत्रा नालक्ष्मीके वसन्ति ते ॥
अथाप्रशस्ताः खरतुल्यनादाः
प्रदीप्तपुच्छाः कुनखा विवर्णाः ।
निश्चित्तकर्णा द्विप्रमुखाश्च
भवन्ति ये चाचिततामुजिह्वाः ॥
वर्णैः प्रशस्तैर्मिलिताश्च युक्ता
सुकाश्च ये ताम्रविलोचनाश्च ।
ते पूजिता वेश्मसु मानवानां
सौख्यानि कुर्व्वन्ति यशः श्रियश्च ॥")

छागलः, पुं, (छाग एव । स्वार्थे अण् ।) करीषाग्निः । इति त्रिकाण्डशेषः ॥ घुँटेर आगुन इति भाषा ॥

छागभोजी, [न्] पुं, स्त्री, (छागं भुङ्क्ते भक्षयतीति । भुज्+णिनिः ।) वृकः । इति राजनिर्घण्टः ॥ छागभक्षके, त्रि ॥

छागरथः, पुं, (छागः रथो वाहनमस्य ।) अग्निः । इति हेमचन्द्रः । ३ । १६३ ॥

छागलः, पुं, स्त्री, (छागल एव इति प्रज्ञाद्यण् ।) छागः । इति राजनिर्घण्टः ॥ (यथा, पञ्चतन्त्रे । ३ । ११७ ।

"बहुदुग्धसमायुक्ताः सुविज्ञाना बलोत्कटाः ।
मुक्ता वधयितुं धूर्त्ता ब्राह्मणं छागलादिव ॥"

छगलस्य गोत्रापत्यं पुमान् इति । छगल+"विकर्णशुङ्गच्छगलाद्वृतसभरद्वाजाजिन्नि ।" ४ । २ । १११ । इति अण् । आत्रेय ऋषिभेदः । इति सिद्धान्तकौमुदी ॥)

छागलकः, पुं, (छागल इव कायतीति । कै+कः ।) मत्स्यविशेषः । यथा,—

"श्वेतं सुपाकं समदीर्घवृत्तं
निःशल्कलं छागलकं वदन्ति ।
गवे द्विकण्टः किल तस्य दृष्टे
कण्टः सुपथ्यो रुचिरो बलप्रदः ॥"

इति राजनिर्घण्टः ॥

(स्वार्थे कन् ।) छागलच्च ॥

छागलाद्यं, क्ली, (छागल आद्यः प्रधानो यत्र ।) छागलादिघृतम् । तच्च वातरोगस्यौषधम् । यथा,

"आजं चर्म्मविनिर्मुक्तं लक्ष्मशृङ्गखादिकम् ।
पञ्चमूलीद्वयचैव जलद्रोणे विपाचयेत् ॥
तेन पादावशेषेण घृतप्रस्थं विपाचयेत् ।
जीवनीयैः सयष्ट्याह्वैः क्षीरेणैव घृतावरी ॥
छागलाद्यमिदं नाम्ना सर्व्ववातविकारजित् ।
अर्दिते कर्ण्यशूले च वाधिर्य्ये मुखमिञ्चिने ॥
जङ्घागृध्रसपङ्गूनां खञ्जे शस्यसिकुजयोः ।
अपतानेऽपतन्त्रे च सर्पिरेतत् प्रशस्यते ॥
पृथगर्द्धतुलां पञ्चमूलद्वन्द्वाजमांसयोः ।
निःक्वाथ्य सलिलद्रोणे क्वाथे पादावशेषिते ॥"

इति खण्डघृतागलाद्यं घृतम् ॥ * ॥

घृतारम्भे मन्त्रः ।

"ओँ कालि वर्च्चेश्वरि अमुकस्य बलसिद्धं देहि वज्रवचनेन स्वाहा ।

क्वाथयित्वा छागमादौ मधु दत्त्वा ललाटके ।
उदङ्मुखः प्राङ्मुखो वा भिषगेतमुपालभेत् ॥

छागमारम्भमन्त्रः ।

ओँ हाँ ओँ गाँ गणपतये स्वाहा ।

छागमांसतुलां गृह्य दग्धमूल्याः पलं पलम् ।
अश्वगन्धापलशतं वाराहीकन्दमेव तथा ।
घृताढ्यं पचेत्तोयेनैतुर्भागावशेषितैः ।

क्षीरं क्षेत्रसमं दद्यात् घृतावर्य्यं रसं तथा ॥
ताम्रपात्रे दृढे चैव घृतेनैर्द्वङ्गिना पचेत् ।
अस्यौषधस्य कल्कस्य प्रत्येकं युक्तिसम्मितम् ॥
जीवन्ती मधुकं द्राक्षाकाकोल्यौ नीलमुत्पलम् ।
मुस्तं सचन्दनं राला पर्णिनीद्वयशारिवे ॥
मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ घृटी ।
दार्व्यौ प्रियङ्गु त्रिफला नतं तालीशपद्मकौ ॥
एलापत्रं वरीनागजातीकुसुमधान्यकम् ।
मञ्जिष्ठा दाड़िमं दारु रेणुकं शैलवालुकम् ॥
विड़ङ्गं जीरकञ्चैव पेषयित्वा विनिक्षिपेत् ।
वस्त्रपूते च घृते च शर्करापस्थसंयुतम् ॥
निधापयेत् स्निग्धभाण्डे आर्द्रे वा भाजने शुभे ।
अस्यौषधस्य सिद्धस्य प्रस्थं वीर्य्यमतःपरम् ॥
देवदेवं नमस्कृत्य संपूज्य गणनायकम् ।
पिबेत् पाचितमं तस्य व्याधिं वीक्ष्यानुपानतः ॥
सर्व्ववातविकारेषु अपस्मारे विशेषतः ।
उन्मादे पक्षघाते च आध्माने कोष्ठनिग्रहे ॥
कर्णरोगे शिरोरोगे बाधिर्य्ये चापतन्त्रके ।
भूतोन्मादे च गृध्रस्यां सोन्मादे वातपित्तजे ॥
पार्श्वशूले च कृच्छ्रे च बाह्यायामार्दिते तथा ।
वातकण्टकजङ्घोरुगृध्रसीसक्थिशूले ॥
क्रोष्टुशीर्षे तथा खञ्जे कुब्जे वामनि मिञ्जिने ।
अपतानेऽन्तरायामे रक्तपित्ते तथोर्द्ध्वगे ॥
आनाहेऽर्शोविकारेषु चातुर्थकज्वरेऽपि च ।
हनुग्रहे तथा ग्रीवे शीते चैवाववाहुके ॥
दण्डापतानके भग्ने दाहे चाक्षेपके तथा ।
जीर्णज्वरे विषे कुष्ठे शोफःस्तम्भे मदात्यये ॥
आढ्यवातेऽभिमान्थे च वातरक्तगदेषु च ।
एकाङ्गरोगिणे चैव तथा सर्व्वाङ्गरोगिणे ॥
हृत्कर्म्मे शिरःकर्म्मे जिह्वाकर्म्मे जड़े भ्रमे ।
चीर्णेन्द्रिये नष्टशुक्रे शुक्रनिःसरणे तथा ॥
स्त्रीणां वातासृपाते च पटले चाक्षिसन्दने ।
एकाङ्गस्यन्दने चैव सर्व्वाङ्गस्यन्दने तथा ॥
नगादिपतिते वाते स्त्रीणामप्राप्तिहेतुके ।
आभिचारिकदोषे च धनसन्तापसम्भवे ॥
ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः ।
शिरोमध्यगता ये च जङ्घापार्श्वादिसंस्थिताः ॥
माठ्यग्रहाभिभूतञ्च शिशुर्यैश्च विमुच्यते ।
प्रष्ठीवबलमांसञ्च न वर्त्मगमनक्षमः ॥
एतेनानेन सिध्यन्ति वज्रसुक्तिरिवासुरान् ।
निहन्ति सकलान् रोगान् घृतं परमदुर्लभम् ॥
रसायनं वह्निबलप्रदञ्च
वपुःप्रकर्षं विदधाति रूपम् ।
इन्द्रावलेन्द्रेण समन्ततेजा
दीर्घायुषं पुत्रशतं करोति ॥
स्त्रीणां घृतं गच्छति वातिरेकं
न याति क्षिप्रं वरसः समाङ्गः ।
अपुत्रिणीपुत्रशतं करोति
घृतायुषं कामसमं बलिष्ठम् ॥
महद्घृतं नाम तु छागलाद्यं
विनिर्म्मितं वातनिसूदनञ्च ।
स्निग्धं सुधं रोगभयापहञ्च
चकार हारीतमुनिर्विशिष्टः ॥
मृगालवर्हिणः पाके पुमांसं तत्र दापयेत् ।
मयूरी नकुली छागी वीर्य्यहीनाः स्वभावतः ॥
भाषितं काशिराजेन छागमेव नपुंसकम् ॥"
घृतम् १६ शेर । क्वाथार्थं छागमांसपलम् १००।
पाकार्थं जलं प्रं ६४ । शेषः प्रं १६ । विल्वादि-
दशमूलं प्रपलम् १० । जलं प्रं ६४ । शेषः
प्रं १६ । अश्वगन्धा १०० पलम् । जलं प्रं ६४ ।
शेषः प्रं १६ । वाट्यालकं १०० पलम् ।
जलं प्रं ६४ । शेषः प्रं १६ । दुग्धं प्रं १६ ।
शतमूलीरसः प्रं १६ । कल्कार्थं जीवन्त्या-
दीनां जीरकपर्य्यन्तानां कल्कद्रव्याणां प्रं तो ४ ।
वस्त्रपूते घृते शर्करा प्रं २ । इति बृहच्छागलाद्यं
घृतम् । इति भैषज्यरत्नावली ॥
("छागमांसं तुलार्द्धं स्यात् दशमूलं तथापरम् ।
तोयद्रोणे पचेद्धीमान् यावत् स्यादंघ्रयेषितम् ॥
तैलप्रस्थद्वयञ्चैव क्षीरञ्चैव घृतावरी ।
जीवनीयं समधुकं बला राला च शैलजम् ॥
मांसीस्याद्धेमतालीशनागपुष्पकाधनवालुकम् ।
पृथक् पृथक् समादाय सर्व्वमेकत्र साधयेत् ॥
मञ्जिष्ठालोध्रलाक्षा च प्रत्येकं कुड़वान्वितम् ।
आढ़कञ्च जलञ्चैव विधिना च विपाचयेत् ॥
छागलाद्यमिदं तैलं हारीतेन महात्मना ।
पाने वस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते ।
सर्व्वज्वरगदं हन्ति सन्निपाञ्चास्थिजन्तथा ॥"
इति छागलाद्यं तैलम् ॥
इति वैद्यकक्षेमशालीकायां वातरोगाधिकारे ॥)

छागलाङ्घिका, स्त्री, (छागलाङ्घी + संज्ञायां कन् । टापि पूर्व्वह्रस्वः ।) वृक्षदारकवृक्षः । इति राज-निर्घण्टः ॥

छागलाङ्घी, स्त्री, (छागलं अन्तयतीति वाहु-लकात् रक् ततो ङीष् ।) वृकः । इति राज-निर्घण्टः ॥

छागवाहनः, पुं, (छागेन आत्मानं वाहयतीति । वह + णिच् + ल्युः । यद्वा, छागो वाहनमस्य ।) अग्निः । इति त्रिकाण्डशेषः ॥

छागिका, स्त्री, (छागी + स्वार्थे कन् । ततः टापि पूर्व्वह्रस्वः ।) छागी । इति हेमचन्द्रः ।४।३४१ ॥

छागी, स्त्री, (छायते छिद्यते देवोपहारायेति । छो + "छापूखड़िभ्यः कित् ।" उणां ।१।१२४। इति गन् कागः ततः स्त्रियां जातौ ङीष् ।) छागमाता । वकरी इति पाँटी इति च भाषा । तत्पर्य्यायः । अजा २ पयस्विनी ३ भीरुः ४ मेध्या ५ गलेस्तनी ६ । इति राजनिर्घण्टः ॥ छागिका ७ मङ्गा ८ सर्व्वभक्ष्या ९ गलस्तनी १० । इति हेमचन्द्रः ॥ घुसृण्या ११ । इति त्रिकाण्ड-शेषः ॥ सङ्गा १२ सुखविसुण्ठिका १३ । इति ग्रन्थरत्नावली ॥ तद्दुग्धगुणाः । मधुरत्वम् । शीतलत्वम् । ग्राहित्वम् । दीपनत्वम् । रक्त-पित्तविकारक्षयकासनाशित्वञ्च । यथा, राज-निर्घण्टे ।

"अजानां लघुकायत्वान्नानाद्रव्यनिषेवणात् ।
नात्यम्बुपानात् व्यायामात् सर्व्वव्याधिहरं पयः ॥"
कषायत्वम् । लघुत्वम् । अतीसारज्वरजाग्नि-त्वञ्च । यथा, भावप्रकाशे ।
"छागं कषायं मधुरं शीतं ग्राहि पयो लघु ।
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् ॥
अजानामल्पकायत्वात् कटुतिक्तादिभक्षणात् ।
स्तोकाम्बुपानाद्व्यायामात् सर्व्वरोगापहं पयः ॥"
तद्दधिगुणाः । उत्तमत्वम् । ग्राहित्वम् । लघु-त्वम् । दोषत्रयापहत्वम् । श्वासकासार्शः-क्षय-कार्श्येषु शस्तत्वम् । दीपनत्वञ्च । इति भाव-प्रकाशः ॥ कफवातनेत्रदोषदुर्नाम्नश्वासकास-नाशित्वम् । उष्णत्वम् । रूक्षत्वम् । पाचनत्वञ्च ॥ तन्नवनीतगुणाः । लघुत्वम् । मधुरत्वम् । कषा-यत्वम् । त्रिदोषनाशित्वम् । चक्षुष्यत्वम् । दीप-नत्वम् । बल्यत्वम् । सदा हितत्वञ्च ॥ तन्नवोत्थ-नवनीतगुणाः । क्षयकासनेत्रामयकफनाशित्वम् । बल्यत्वम् । परमदीपनत्वञ्च ॥ तद्घृतगुणाः । चक्षुष्यत्वम् । दीपनत्वम् । बलवर्द्धनत्वम् । कास-श्वासकफनाशित्वम् । राजयक्ष्मणि शस्तत्वञ्च । इति राजनिर्घण्टः ॥

छातः, त्रि, (छो + क्तः । "शाच्छोरन्यतरस्याम् ।" ७ । ४ । ४१ । इति विभाषायामित्वाभावः ।) छिन्नः । दुर्ब्बलः । इत्यमरः । ३ । १ । १०३ ॥

छात्रं, क्ली, वरटीच्छत्रसम्भवं मधु । तस्य गुणाः । श्वित्रक्रिमिरोगरक्तपित्तनाशित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥
("वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥"
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्वित्ररक्तपित्तप्रमेहजित् ।
भ्रमलड्मोहविषघ्नत् तर्पणञ्च गुणाधिकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

छात्र(त्त्र)वः, पुं, (छत्रं गुरोर्दोषाभावरक्षं तच्छील-मस्येति । "छत्रादिभ्यो णः ।" ४ । ४ । ६२ । इति णः ।) शिष्यः । इत्यमरः । २ । ७ । ११ ॥ (यथा, राजतरङ्गिण्याम् । ६ । ८७ ।
"भूभुजा दानशौण्डेन पैत्रिके स्वस्थिते सति ।
छात्राणामार्य्यदेशानां तेन विद्यार्थिनां मठः ॥")

छात्रकं, क्ली, (छात्र + स्वार्थे कन् ।) छात्रं मधु । यथा, राजनिर्घण्टे ।
"छत्राकारन्तु पटलं सरघाः पीतपिञ्जलाः ।
ये कुर्व्वन्ति तदुत्पन्नं मधु छात्रकमीरितम् ।
श्वित्रमेहक्रिमिघ्नञ्च विद्याच्छात्रं गुणोत्तरम् ॥"
अपिच भावप्रकाशे ।
"वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्वित्ररक्तपित्तप्रमेहजित् ॥
भ्रमलड्मोहविषघ्नत्तर्पणञ्च गुणाधिकम् ॥"

छात्रगडः, पुं, (छात्रो गड इव ।) पदाद्यवित् । विभक्तान्तस्य श्लोकचरणस्य वा आदिमात्रवेत्ता ।

(अल्पश्मश्रुकः।) इति हारावली। २१६॥

छात्रदर्शनं, क्ली, (छात्रं वरटीक्षत्रसम्भूतं मधु तद्दिव दृश्यते इति। दृश+कर्म्मणि ल्युट्।) हैयङ्गवीनम्। इति शब्दचन्द्रिका॥ (छात्राणां दर्शनम्।) शिष्यावलोकनञ्च॥

छादं क्ली, (छाद्यते गृहमनेनेति। छद+णिच्+करणे घञ्। छादयतीति। छद+णिच्+अच् वा।) पटलम्। इति जटाधरः॥ छात इति चाल इति च भाषा॥

छादनं, क्ली, (छद कि संवृतौ+णिच्+करणे ल्युट्।) छदनम्। अन्तर्द्धानम्। (कर्म्मणि ल्युः।) पत्रम्। इत्यमरटीकायां भरतः॥ (भावे ल्युट्।) आच्छादनम्। (यथा, हरिवंशे। ६५। २५।

"नियोगपाशैरासक्तैर्गरीरैस्तस्मिन्महीतले।
छादनाय प्रकीर्णैश्च कण्टकैस्तृणसङ्कटैः॥")

छादनः, पुं, (छादयति आवृणोति पत्रादिभिरिति। छादि+ल्युः।) नीलाम्बानटवृक्षः। इति राजनिर्घण्टः॥

छादितः, त्रि, (छाद्यते स्मेति। छद+"वा दान्तशान्तेति।" ७।२।२७। इड़ागमात् साधुः।) छन्नः। इति जटाधरः॥ आच्छादितः। यथा,

"घनतरघनदृष्टेश्छादितौ पुण्यवन्तौ॥"

इत्युद्भटः॥

छान्दसः, पुं, (छन्दो वेदं अधीते वेत्ति वा। छन्दस्+"तदधीते तद्वेद।" ४।२।५९। इत्यण्।) वेदाध्येता। इत्यमरः। २।७।६॥ (छन्द एवेति। स्वार्थे अण्। वेदः।

"मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात्॥"

इति भागवते। १। ४। १३॥

त्रि, छन्दसो वाक्यावयवस्तत्र भवः। "छन्दसो यदणौ।" ४। ३। ७१। इत्यण्। वेदभवः॥ छन्दसोऽयम्। "तस्येदम्।" इत्यण्। वेदसम्बन्धी। स्त्रियान्तु ङीप्। यथा, हरिवंशे। २१५। ७।

"छान्दसीभिरुदाराभिः श्रुतिभिः समलङ्कृतः॥")

छान्दोग्यं, क्ली, (छन्दोगानां धर्म्मः आम्नायो वा। छन्दोग+"छन्दोगौक्थिकयाज्ञिकबह्वृचनटाण्ण्याः।" ४। ३। १२९। इति ण्याः।) सामवेदोपनिषत्। इति वैदिकसम्प्रदायः॥ (यथा, मौक्तिकोपनिषदि १ अध्याये।

"ऐतरेयञ्च छान्दोग्यं बृहदारण्यकन्तथा॥")

छाया, स्त्री, (अति छिनत्ति सूर्य्यादेः प्रकाशं नाशयतीत्यर्थः। छो+"माच्छासिसिभ्यो यः।" उणा। ४। १०६। इति यस्तस्टाप् च।) रौद्रशून्यम्। अतपस्थानम्। भावानुगा २ श्यामा ३ अतेजः ४ भीतः ५ अनातपः ६ आभीतिः ७ अतापाभावः ८ भावालीना ९। अस्या गुणाः। मधुरत्वम्। स्निग्धत्वम्। दाहश्रमहरत्वञ्च। इति राजनिर्घण्टः॥ धर्म्मनाशित्वम्। मेघच्छायागुणः। श्रमभ्रममूर्च्छातृष्णातापनाशित्वम्। इति राधवल्लभः॥ *॥ छायाविशेषे दोषो यथा,—

"दीपस्वङ्गातनुच्छाया छिन्नकेशनखादिकम्।
अजमार्ज्जारखरेषु हन्ति पुण्यं पुराकृतम्॥"

इति कर्म्मलोचनम्॥ *॥

(लक्षणभेदेनास्या अरिष्टकारित्वं यथा,—

"व्योत्स्नायामातपे दीपे सलिलादर्शयोरपि।
अन्येषु विद्यता यस्य छायाप्रेतस्तथैव सः॥
छिन्ना भिन्नाकुला च्छाया हीना वाप्यधिकापि वा।
नष्टा तन्वी द्विधा च्छाया विशिरा विकृता च या॥
एताश्चान्याश्च याः काश्चित् प्रतिच्छाया विगर्हिताः।
सर्व्वा मुमूर्षतां ज्ञेया नचेक्षस्वनिमित्तजाः॥
संस्थानेन प्रमाणेन वर्णेन प्रभया तथा।
छाया विवर्त्तते यस्य स्वप्नेऽपि प्रेत एव सः॥"

"स्वादीनां पञ्चपञ्चानां छाया विविधलक्षणाः।
नाभसी निर्म्मला नीला सर्व्वेच्छा सप्रभेव च॥
रूक्षा श्यावारुणा या तु वायवी सा हतप्रभा।
विशुद्धरक्तालायेयी दीप्ताभा दर्शनप्रिया॥
शुद्धवैदूर्य्यविमला सुस्निग्धा चाभसी मता।
स्थिरा स्निग्धा घना श्वेता श्यामा स्नेता च पार्थिवी॥
वायवी गर्हिता त्वासां चतस्रः सुखोदयाः।
वायवी तु विनाशाय क्लेशाय महतेऽपि वा॥
स्यात्तेजसी प्रभा सर्व्वा सा तु सप्तविधा स्मृता।
रक्ता पीता सिता श्यावा हरिता पाण्डुरा सिता॥
तासां याः स्फुर्विकासिन्यः स्निग्धाश्च विपुलाश्च याः।
ताः शुभा रूक्षमलिनाः संक्षिप्ताश्चाशुभोदयाः॥
वर्णमाक्रामति च्छाया भासु वर्णप्रकाशिनी।
आसन्ना लक्ष्यते च्छाया भाः प्रकृष्टा प्रकाशते॥
नाच्छायो नाप्रभः कश्चिद्विशेषाच्चिह्नयन्ति तु।
वृथा शुभाशुभोत्पत्तिं काले च्छायाः प्रभाश्रिताः॥"

इतीन्द्रियस्थाने सप्तमेऽध्याये चरकेणोक्तम्॥)

प्रतिबिम्बम्। (यथा, याज्ञवल्क्ये। १। २०६।

"मयि तेज इति च्छायां स्वां दृष्ट्वाम्बुगतां जपेत्॥")

सूर्य्यपत्नी। सा संज्ञाप्रतिकृतिः। (यथा मत्स्यपुराणे। ११। ५।

"नारीमुत्पादयामास स्वशरीरादनिन्दिताम्।
त्वाष्ट्रीस्वरूपेण नाम्ना छायेति भामिनी तदा॥")

पालनम्। उत्कोचः। कान्तिः। (यथा, मेघदूते। ३१।

"वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः
पाण्डुच्छायातटरुहतरुभ्रंशिभिः शीर्णपर्णैः॥")

सच्छोभा। षड्लिङ्गः। इति मेदिनी। ये, २३॥ काश्यायनी। इति शब्दरत्नावली॥ तमः। इति हेमचन्द्रः॥ साहश्यम्। यथा,—

"अङ्गादङ्गेभृशं जन्मा आत्मायं शिशुमूर्द्धनि।
वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम्॥
पुत्रच्छाया पुत्रसादृश्यम्।" इति दत्तकचन्द्रिका॥
(ऋविंशत्यक्षरवृत्तविशेषः। इति छन्दोमञ्जरी॥
अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥)

छायाकरः, त्रि, (करोतीति। कृ+अच्। छायायाः करः। छायां करोतीति वा।) छत्रधारः। इति हेमचन्द्रः॥ छातावरदार इति भाषा॥

छायातनयः, पुं, (छायायाः सूर्य्यपत्न्यास्तनयः पुत्रः।) शनिः। इति त्रिकाण्डशेषः॥

छायातरुः, पुं, (छायाप्रदः छायाप्रधानो वा तरुः। प्राकपार्थिववत् मध्यपदलोपिसमासः।) स्थिरच्छायवृक्षः। इति त्रिकाण्डशेषः॥ (अस्य लक्षणं यदाह कश्चित्।

"पूर्व्वाह्णे च पराह्णे च तलं यस्य न सुच्यति।
अत्यन्तशीतलच्छाया स च्छायातरुरुच्यते॥"

यथा, मेघदूते। १।

"कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु॥")

छायात्मजः, पुं, (छायायाः सूर्य्यपत्न्या आत्मजस्तनयः।) शनिग्रहः। इति त्रिकाण्डशेषः॥

छायापथः, पुं, (छाया मेघच्छाया तद्भस्मरः पन्थाः। छायायुक्तः पन्था इत्येके।) देवपथः। आकाशः। इति त्रिकाण्डशेषः॥

छायापुरुषः, पुं, (छायायां दृष्टः पुरुषः पुरुषाकृतिविशेषः।) आकाशे दृष्टः स्वीयच्छायारूपपुरुषः। यथा,—

श्रीदेव्युवाच।

"भगवन्! देवदेवेश! सर्व्वागमविशारद!।
नराणां पापिनां लोके पापनिर्म्मोचनं कथम्॥
कालज्ञानं कथं वा स्यात् सूक्ष्मोपायेन तद्वद।
श्रुतानि साधनानीश! मयानेकानि भूरिशः॥
तथापि तानि मनुजैरशक्यान्यल्पबुद्धिभिः।
प्रायेण मनुजा लोके कलौ स्वल्पायुषो ध्रुवम्॥
अनेकवर्षसाध्येऽस्मिन् योगाभ्यासे श्रमक्षयः॥

शिव उवाच।

साधु देवि! त्वया दृष्टं लोकानां हितकाम्यया।
तादृशं साधनं वक्ष्ये सर्व्वसाधारणं शुभम्॥
गोपनीयं प्रयत्नेन न वाच्यं वै कथञ्चन।
सिद्धाय भक्तियुक्ताय सेवकाय सुचेतसे॥
पापिने क्रूरचेष्टाय भक्तिहीनाय भामिनि!।
न वदेदयदि वा मोहात् वदेत् सिद्धिं न विन्दति॥
तस्मात् परीक्ष्य वक्तव्यं शिष्याय ज्ञानिने शिवे!।
स्वच्छायापुरुषं पश्येन्नग्ने शुद्धमानसः॥
तस्यावलोकनात् सद्यः पापराशिर्विनश्यति।
महापातकसङ्घैश्च तत्समैरुपपातकैः॥
विमुच्यते नरार्द्धेन तूलराशिर्यथानलात्।
कालज्ञानञ्च वक्ष्यामि तस्मिन् दृष्टे भवेद्ध्रुवम्॥

देव्युवाच।

अतश्छायां कथं पश्येन्नग्ने भूतलसंस्थिताम्।
यस्मात्कालज्ञानञ्च तस्मिन् दृष्टे कथं भवेत्॥

शिव उवाच।

निरभ्रे गगनं देवि! यदा भवति निर्म्मलम्।
तदा छायासुखो भूत्वा निजदेहं प्रयत्नतो धिया॥

स्वच्छायाकण्ठमालोक्य स्वगुरूक्तक्रमेण वै।
सम्मुखं गगनं पश्येन्निर्निमेयस्तथैकधीः॥
शुद्धस्फटिकसङ्काशः पुरुषस्तत्र दृश्यते।
न दृश्यते यदा तत्र पुनस्तद्वत् परीक्षयेत्॥
बहुधा दर्शनेनैव साक्षात्कारो भवेद् ध्रुवम्।
कस्यचिद् भाग्यतः पश्येद् यदि विघ्नोऽचिगोचरः॥
भवत्येव न सन्देहो गुरुविश्वासतः शिवे!।
गुरुं सम्यक् पूजयित्वा पश्येच्छायां समाहितः॥
तथा षण्मासपर्यन्तं मृत्युस्तस्य न विद्यते।
शिरोहीनं यदा पश्येत् षण्मासाभ्यन्तरे मृतिः॥
यदा पादौ न दृश्येते भार्याहानिर्न संशयः।
न दृश्येते यदा पाणी भ्रातुर्हानिर्न संशयः॥
एतज्ज्ञात्वा सुधीः सम्यक् गङ्गातीरं समाश्रयेत्।
योगाभ्यासेन सततं प्राणायामेन संस्मृतिः॥
यथा वा सत्समीपस्थो लभेत् मृत्युञ्जयं जपेत्।
यो न भुक्तो हविष्याशी यतवाग्यतमानसः॥
मृत्युञ्जयेन सन्देहो ह्यन्यथा मृत्युरिच्छति।
यदा तु मलिनं पश्येत् ज्वरपीडा भवेत्तदा॥
तस्य शान्तिं प्रकुर्वीत शिवसेवां समाहितः।
रक्तवर्णं यदा पश्येद्दैन्यं भवति ध्रुवम्॥
मध्यच्छिद्रं यदा पश्येत् शत्रुघातो भवेत्तदा।
एवं सन्दर्शनाद् देवि! ज्ञानवान् भवति ध्रुवम्॥
नारदाय पुरा प्रोक्तं मया पुरुषदर्शनम्।
तत्प्रसादान्महायोगी भूत्वा लोकांश्चरत्यसौ॥
स्वच्छायादर्शनं देवि! कलौ पुरुषलक्षणम्।
दीर्घायुः समवाप्नोति ज्ञानवापि सुनिर्मलम्॥"

इति योगप्रदीपिकायां उमामाहेश्वरसंवादे छायापुरुषलक्षणं नाम पञ्चमः पटलः॥ *॥

"ओमृगस्य श्रीछायापुरुषग्रहणमन्त्रस्य ब्रह्मर्षिर्बृहद्गायत्री छन्दः छायादेवी देवता: ह्रां बीजं स्वाहा शक्तिः पुरुष इति कीलकं सर्वसिद्धिसन्दर्शनसिद्ध्यर्थे जपे विनियोगः। ह्रामित्यादि षडङ्गन्यासः॥ मायया मायया लौं लौं ह्रीँ माया शिवविद्यार्या ऋषयः ओँ ह्रीँ अं गां सरस्वति ओँ नमो भगवते भूतशरीरमात्मानमाकाशे दर्शय दर्शय चाँ चाँ चाँ ह्रीँ भैरवाय नमः स्वाहा। इति मन्त्रः॥

पादाभावे च पुत्रं वा बाहुभावे च बान्धवम्।
आत्मानं शिरसोऽभावे सर्वाभावे कुलक्षयम्॥
विप्रोर्णे विष्टते धूते कुम्भे धूमे च विल्वरम्।
दुर्भिक्षं जायते घोरं कज्जले च पराङ्मुखे॥
संपूर्णे च सुखे स्निग्धे क्षेमलाभं सुसिद्धये।
हीने रक्ते जये भीते उष्णे मृत्युर्न संशयः॥
प्रतिभीतिं शुक्लघातमिति वेदविदो विदुः।
मृत्युञ्जयं जपन्नेव शान्तिस्तस्य विधीयते॥
षण्मासे मरणं तस्य ग्रीर्षाद्यपचये विदुः॥

अथ मृत्युञ्जययन्त्रम्।

"प्रथमं प्रणवमालिख्य तन्मध्ये साध्यनामकम्।
बहिरष्टदलं पद्मं यान्तान्तं वसुपत्रके॥
विलेखेत् अहंकारञ्च केसरेषु सुशोभितम्।
तद्बहिश्चन्द्रवृत्तं स्यात् षोडशस्वरकं लिखेत्॥
द्वारं भूपुरमालिख्य चतुर्द्वारञ्च वारुणम्।
पार्श्वयश्च चतुष्कोणं चक्रं मृत्युञ्जयं भवेत्॥
ज्वरादिसर्वरोगादिदाहशान्तिकरं परम्।
मृत्युञ्जयं महाचक्रं सर्वरक्षाकरं नृणाम्॥"

अथ ध्यानम्।

"चन्द्रार्काग्निविलोचनं स्मितसुखं पद्मद्वयान्तःस्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम्।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत्॥ *॥
नत्वा तातगुरुं शिवं गणपतिं मन्त्रं जपेत् सर्वदा।
खे लक्षेत् सततं विलोकनपरं शुक्ले रवौ प्रत्यहम्॥

खे विलोकनमन्त्रस्तु।

ओँ ह्रीँ भूचरी खेचरी आत्मानमाकाशे दर्शय सर्ववृत्तान्तं कथय कथय हुं फट् स्वाहा।
यः पश्येत् सर्वगं शान्तमात्मानं सत्यमद्वयम्।
न तेन किञ्चिद्ज्ञातव्यं ज्ञातव्यं वावशिष्यते॥"

इति योगप्रदीपिकायां छायापुरुषोपदेशो नाम षष्ठः पटलः॥

छायाव्यवहारः, पुं, ज्योतिःशास्त्रोक्ताङ्कविशेषः।


अथ छायाव्यवहारे करणसूत्रं वृत्तम्।

"छाययोः कर्णयोरन्तरे ये तयोर्वर्गवर्गैक्यभक्ता रसाद्रीषवः।
सैकलब्धैः पदघ्नन्तु कर्णान्तरं
भान्तरैक्योनयुक्तं दले स्तः प्रभे॥

उदाहरणम्।

नन्दचन्द्रैर्मितं छाययोरन्तरं
कर्णयोरन्तरं विश्वतुल्यं ययोः।
ते प्रभे वक्ति यो युक्तिमान् वेत्त्यसौ
यत्तमश्चक्तयुक्तं हि मन्येऽखिलज्ञ॥

न्यासः



कं $\frac{७}{२}$ छाया $\frac{४५}{२}$

छायान्तरम्। १६। कर्णान्तरम्। १३। अनयोर्वर्गान्तरेण। १६२। भक्ता रसाद्रीषवः। ५७६। लब्धम्। ३। सैकस्यास्य। ४। मूलम्। २। अनेन कर्णान्तरम्। १३। गुणितम्। २६। द्विशम्। २६। भान्तरैक्य। १६। ऊनयुते।

७। ४५। तदर्धे लब्धे छाये $\frac{७}{२}$ $\frac{४५}{२}$ तत्क्षत्रो-

योगपदमित्यादिना जातौ कर्णौ $\frac{२५}{२}$ $\frac{५१}{२}$


छायान्तरे करणसूत्रं वृत्तार्धम्।

भुजः प्रदीपतलभुक्तलान्तरघ्न-
च्छाया भवेद्विनरदीपशिखौच्यभक्तः।

उदाहरणम्।

भुजप्रदीपान्तरभूक्षिहस्ता
दीपोच्छ्रितिः सार्धकरत्रया चेत्।
भुजोत्सदार्काङ्गुलसम्मितस्य
तस्य प्रभा स्यात् कियती वदाशु॥

न्यासः



भूः ३ छाया $\frac{१}{२}$ भुजः $\frac{१}{२}$ प्रदीपभुजतलान्तरम् ३

अनयोर्घातः $\frac{३}{२}$ विनरदीपशिखौच्यन।३। भक्तो

लब्धानि छायाङ्गुलानि। १२।


अथ दीपोच्छ्रित्यानयनाय करणसूत्रं वृत्तार्धम्।

छायाहते तु नरदीपतलान्तरघ्ने
भुजौ भवेन्नरयुते खलु दीपकौच्यम्।

उदाहरणम्।

प्रदीपभुजान्तरभूक्षिहस्ता
छायाङ्गुलैः षोड़शभिः समा चेत्।
दीपोच्छ्रितिः स्यात् कियती वदाशु
प्रदीपभुजान्तरसुश्रुतां मे॥

न्यासः



भूः ३ छाया $\frac{२}{३}$

भुजः। १२। छायाङ्गुलानि। १६। भुजप्रदीपान्तरहस्ताः। ३। लब्धं दीपकौच्यं

हस्ताः $\frac{११}{४}$

प्रदीपभुजान्तरभूमानानयनाय करणसूत्रं वृत्तार्धम्।

विभुजदीपोच्छ्रयसंगुणा भा
भुजाहृता दीपनरान्तरं स्यात्॥

उदाहरणम्। पूर्वोक्त एव दीपोच्छ्रायः $\frac{११}{४}$

भुजाङ्गुलानि। १२। छाया। १६। लब्धाः भुजप्रदीपान्तरहस्ताः। ३।

छायाप्रदीपान्तरदीपौच्यानयनाय करणसूत्रं सार्धवृत्तम्।


छायाग्रयोरन्तरसंगुणा भा
छायाप्रमाणान्तरभाजिता सा॥

भूशङ्कुघातः प्रभया विभक्तः
प्रजायते दीपशिखौचमेवम् ॥
त्रैराशिकेनैव यदेतदुक्तं
छायाग्रं खभेदैरिदमेव विश्वम् ॥

उदाहरणम् ।

शङ्कोर्भार्कमिताङ्गुलस्य सुमते! द्दष्टा किलाष्टाङ्गुला
छायाग्राभिमुखे करद्वयमिते व्यस्तस्य देशे पुनः।
तस्मेवार्कमिताङ्गुला यदि तदा छायाप्रदीपान्तरं
दीपौचाग्रं च कियद्भवत्यवहृतिं छायाभिधां वेत्सि चेत् ॥

ग्रासः



भूः $\frac{१३}{२}$ छा $\frac{१}{२}$ भूः २ छा $\frac{१}{२}$

अत्र छायाग्रयोरन्तरमङ्गुलात्मकम् । ५२ । छाये च । ८ । १२ । अनयोराद्या । ८ । इयमनेन । ५२ । गुणिता । ४१७ । छायाप्रमाणान्तरेण । ४ । भक्ता लब्धं भूमानम् । १०४ । इदं प्रथमछायाग्रदीपतलयोरन्तरमित्यर्थः । एवं द्वितीयच्छायाग्रमानम् ।१५६। भूशङ्कुघातः प्रभया विभक्त इति जातसुभयतोऽपि दीपौचं सममेव द्दश्याः $६\frac{१}{२}$ ।

एवमित्यत्र छायाव्यवहारे त्रैराशिककल्पनयानयनं वर्णते तद्यथा । प्रथमच्छायातो द्वितीयच्छाया । १२ । यावताधिका तावता छायावयवेन यदि छायाग्रान्तरतुल्याभूर्लभ्यते तदा छायया किमिति एवं लब्धक पृथक् छायाप्रदीपतलान्तरप्रमाणं लभ्यते । ततो द्वितीयं त्रैराशिकं यदि छायातुल्ये भुजे शङ्कुः कोटिस्तदा भूतुल्ये भुजे किमिति लब्धं दीपकौचाग्रमुभयतोऽपि तुल्यमेव । एवं पञ्चराशिकादिकमखिलं त्रैराशिककल्पनयैव सिद्धं यथा भगवता श्रीनारायणेन जननमरणक्लेशापहारिणा निखिलजगज्जननैकबीजेन सकलभुवनभावनेन गिरिसरितसुरनरासुरादिभिः खभेदैरिदं जगद्ग्राह्यं तथेदमखिलं गणितजातं त्रैराशिकेन व्याप्तं यदेवं तदबहुभिः किमित्याशङ्क्याह । यत्किञ्चिदूनाधिकभागहारविधिना बीजेऽत्र वा गण्यते
तत् त्रैराशिकमेव निर्मलधियामेवावगम्यं विदाम् ।
एतद्यद्बहुधाखदादिजडधीधीदृङ्मितुद्ध्या बुधैः
लब्धेदान् सुगमान् विधाय रचितं प्राज्ञैः प्रकीर्णादिकम् ॥"

इति श्रीभास्कराचार्यविरचितायां लीलावत्यां छायाधिकारः समाप्तसामगात् ॥

छायाभृत्, पुं, (छायां छायारूपमङ्गलाङ्गं बिभर्त्ति छायां श्रीतलकान्तिं बिभर्त्तीति । भृ+क्विप् ।) चन्द्रः । इति हेमचन्द्रः । २ । १६ ॥

छायामित्रं, क्ली, (छायया छायाकरणेन मित्रमिव छायाया मित्रमिति वा ।) छत्रम् । इति शब्दरत्नावली ॥

छायाङ्गधरः, पुं, (छाया छायारूप एव अङ्गरागं धरतीति । धृ+अच् । छायाङ्गस्य धरो वा ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

छायासुतः, पुं, (छायायाः सूर्य्यपत्न्याः सुतः पुत्रः ।) शनिः । इति हेमचन्द्रः । २ । ३४ ॥

छिः, पुं, (छिनत्ति छिनत्ति कीर्त्त्यादिकं नाशयतीत्यर्थः । छो+बाहुलकात् किः ।) गर्हा । इत्येकाक्षरकोषः ॥

छिक्कनी, स्त्री, (छिक् इत्यव्यक्तशब्दं कनत्यनया । कन्+करणे अप् ततो ङीष् ।) वृक्षविशेषः । छिक्कनी इति गाकछिक्कनी इति हाँचोटी इति च भाषा ॥ तत्पर्य्यायः । क्षवत्रं २ तिक्ता ३ छिक्किका ४ व्राणदुःखदा ५ । अस्या गुणाः । कटुत्वम् । रुच्यत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । वह्निपित्तकारित्वम् । वातरक्तकुष्ठकृमिवातकफनाशित्वञ्च । इति भावप्रकाशः ॥

छिक्का, स्त्री, (छिगित्यव्यक्तशब्देन कायतीति । कै+कः । ततष्टाप् ।) क्षुतम् । इति शब्दरत्नावली ॥ छिँक् इति हिन्दी भाषा ॥ (यथा, गारुड़े ज्योतिश्चक्रे ६० अध्याये ।
"छिक्काया लक्षणं वक्ष्ये लभेत् पूर्व्वे महाफलम् ।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात् ॥
नैर्ऋते शोकसन्तापौ मिश्रान्नञ्चैव पश्चिमे ।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत् ।
ईशाने मरणं प्रोक्तं प्रोक्तं छिक्काफलाफलम् ॥")

छिक्किका, स्त्री, (छिक्का क्षुतं साधुत्वेनास्त्यस्याः । बाहुलकात् ठन् ।) छिक्कनी । इति भावप्रकाशः ॥ [छेदनकर्त्ता ॥

छित्, [द्] त्रि, (छिनत्तीति । छिद्+क्विप् ।)

छित्तं, त्रि, (छायते स्मेति । छो+क्तः । "श्राच्छीरन्यतरस्याम् ।" ७।४।४१ । इति ईत्वम् ।) छिन्नम् । इत्यमरः । ३ । १ । १०६ ॥

छित्तिः, पुं, (छिद्+क्तिन् ।) करजक्षतः । इति शब्दचन्द्रिका ॥ छेदश्च ॥

छित्वरः, त्रि, (छिनत्तीति । छिद्+"छित्वरच्छत्वरेति ।" उणा० । ३ । १ । इति क्वरच् प्रत्ययेन निपातनात् साधुः ।) छेदनशस्त्रम् । धूर्त्तः । वैरी । इत्युणादिकोषः ॥

छिद, द्वर ध न औ छेदे । इति कविकल्पद्रुमः ॥ (रुधां-उभं-सकं-अनिट् ।) छेदो द्विधाकरणम् । द्वर्, अच्छिदत् अच्छेत्सीत् । ध न, छिनत्ति छिन्ते दात्रेण लवं लोकः । औ, छेत्ता । इति दुर्गादासः ।

छिदकं, क्ली, (छिनत्तीति । छिद्+कुन् ।) वज्रम् । इत्युणादिकोषः ॥

छिदा, स्त्री, (छिद्+"गिदृभिदादाङ् ।" ३ । ४ । १०४ । इत्यङ् ततष्टाप् ।) छेदनम् । इति मुग्धबोधम् ॥

छिदिः, स्त्री, (छिद्यतेऽनया इति । छिद्+"कृगृप्कुटिभिदिछिदिभ्यश्च ।" उणा० । ४ । १४२ । इति इः सच्च कित् ।) कुठारः । इत्युणादिवृत्तिः ॥

छिदिरः, पुं, (छिनत्त्यनेनेति । छिद्+"इषिमदिमुदिखिदिच्छिदीति ।" उणा० । १ । ५१ । इति किरच् ।) करवालः । परश्वधः । पावकः । रज्जुः । इति मेदिनी । रे, १५५ ॥

छिदुरः, पुं, (छिनत्तीति । छिद्+"विदिभिदिच्छिदेः कुरच् ।" ३।२।१६२ । इति कुरच् ।) छेदनद्रव्यम् । धूर्त्तः । वैरी । इति मेदिनी । रे, १५६ ॥ (स्वयं छिन्ने, त्रि । यथा, रघुः । १६।६२।
"संलक्ष्यते न छिदुरोऽपि हारः ॥")

छिद्र, तृ क भेदे । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) भेद इह रन्ध्रकरणम् । छिद्रयति छिद्रापयति बालकः । इति दुर्गादासः ॥

छिद्रं, क्ली, (छिद्यते भिद्यते यत् । छिदिरौ छेदने+"स्फायितञ्चिवञ्चीति ।" उणा० । २।१३। इति रक् ।) भेदः । छेँदा इति भाषा । तत्पर्य्यायः । कुहरम् २ शुषिरम् ३ विवरम् ४ विलम् ५ निर्व्यथनम् ६ रोकम् ७ रन्ध्रम् ८ स्वभ्रम् ९ वपा १० शुषिः ११ । इत्यमरः । १ । ८ । २ । खभ्रम् १२ शुषी १३ । इति तट्टीका ॥ (यथा, महाभारते । ३।८२।५३ ।
"ततो गच्छेत धर्म्मज्ञ! हिमवत्सुतमर्ब्बुदम् ।
पृथिव्यां यत्र वै छिद्रं पूर्व्वमासीत् युधिष्ठिर!॥")
दूषणम् । इति मेदिनी । रे, ३८ ॥ (यथा, महाभारते । २ । १२ । २६ ।
"बहुविघ्नश्च नृपते! क्रतुरेष स्मृतो महान् ।
छिद्राण्यस्य तु वाञ्छन्ति यज्ञघ्ना ब्रह्मराक्षसाः॥"
अवकाशः । नवमसंख्या । इति ज्योतिषम् ॥ लग्नादष्टमस्थानम् । "छिद्राख्यमष्टमं स्थानमिति ।" इति ज्योतिस्तत्त्वम् ॥)

छिद्रवेदेही, स्त्री, (छिद्रप्रधाना वेदेही पिप्पली ।) गजपिप्पली । इति राजनिर्घण्टः ॥

छिद्रात्मा, [त्मन्], पुं, (छिद्रमन्तर्मध्ये यस्य ।) नलः । इति राजनिर्घण्टः ॥

छिद्राफलं, क्ली, (छिद्रं दूषणमाप्नोतीति । आप्+फल+अच् ।) मायाफलम् । इति राजनिर्घण्टः ॥

छिद्रितः, त्रि, (छिद्र+क्तः ।) कृतच्छिद्रः । तत्पर्य्यायः । वेधितः २ विद्धः ३ । इत्यमरः । ३ । १ । ६६ ॥

छिन्नं, त्रि, (छिद्यते स्म इति । छिद्+क्तः ।) कृतच्छेदनम् । छेँड़ा इति काटा इति च भाषा । तत्पर्य्यायः । क्षतम् २ लूनम् ३ कृत्तम् ४ दातम् ५ दितम् ६ छित्तम् ७ वृक्णम् ८ । इत्यमरः । ३।१।१०३॥ क्षतभृद् क्षादितम् १० । इति जटाधरः ॥ छेदितम् ११ खण्डितम् १२ । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ६० । ११ ।

"छिन्ने धनुषि देवेन्द्रस्तथा शक्तिमयाददे ॥"*॥
मन्त्रविशेषे, पुं। तल्लक्षणादिकं यथा, विश्वसारे।
"मनोर्वेस्वादिमध्यान्तेष्वानिलं बीजमुच्यते।
संयुक्तं वा वियुक्तं वा पराक्रान्तस्त्रिधा पुनः॥
चतुर्धा पञ्चधा वापि स मन्त्रश्छिन्नसंज्ञकः॥")

छिन्नग्रन्थिनिका, स्त्री, (छिन्ना ग्रन्थिर्यस्याः। संज्ञायां कन् ततष्टाप् पूर्वह्रस्वश्च।) त्रिपर्णिका। इति राजनिर्घण्टः॥

छिन्नपत्री, स्त्री, (छिन्नं पत्रं यस्याः। स्त्रियां ङीष्।) अम्बष्ठा। इति राजनिर्घण्टः॥ (विवरणमस्या अम्बष्ठाशब्दे ज्ञेयम्॥)

छिन्नमस्ता, स्त्री, (छिन्नं मस्तं शिरो यस्याः।) दशमहाविद्यान्तर्गतषष्ठमहाविद्या। सा च प्रचण्डचण्डिका। यथा,—
"प्रचण्डचण्डिकां वक्ष्ये सर्व्वकामफलप्रदाम्।
यस्याः प्रसादमात्रेण सदाशिवो भवेन्नरः॥
अपुत्रो लभते पुत्रं अधनो धनवान् भवेत्।
कवित्वञ्च सुपाण्डित्यं लभते नात्र संशयः॥"
अथ प्रचण्डचण्डिकामन्त्राः। विश्वसारे तन्त्रे च।
"लक्ष्मीं लज्जां ततो मायां मात्रां द्वादशिकामपि।
वज्रवैरोचनीये द्वे माये फट्स्वाहया युतः॥
लक्ष्मीबीजं यदाद्यं स्यात् तदा श्रीः सर्व्वतोसुखी।
लज्जाबीजेन चाद्येन वश्यतां यान्ति योषितः॥
मायाबीजेन चाद्येन महापातकनाशनम्।
मात्रां द्वादशिकां बीजमाद्यं स्यान्मुक्तिदायकम्॥
भैरवोऽस्य ऋषिर्देवि! सम्राट् छन्द उदीरितम्।
छिन्नमस्ता स्मृता देवी बीजं कूर्चद्वयं पुनः॥
स्वाहा शक्तिरभीष्टार्थे विनियोग उदाहृतः॥"
"अत्र लज्जापदं कामबीजपरम्। तथा च।
अत्र लज्जापदे देवि! कामबीजं वितन्यते।
महाकालमतं ज्ञेयं मन्त्रोद्धारं शुभावहम्॥"
पूर्व्वमायापदे इति पाठे मायायाः पूर्व्वं लज्जाबीजं तस्मिन्नित्यर्थः। तथा च। पूर्व्वमायापदेन लज्जाबीजमुच्यते। अन्यथा तापिन्यादिविरोधः। तथा च।
"कामाद्यां वाग्भवाद्यां वा मायाद्यां वा जपेत् सुधीः।
लज्जाद्यां वा जपेद्विद्यां चतुर्व्वर्गफलप्रदाम्॥
अन्येषाञ्च मुनीनां मते सर्व्वत्र मायापदं कूर्चपरम्। तत्रैव।
वाग्भवं वह्निसमायुक्तं रतिबिन्दुसमन्वितम्।
लक्ष्मीबीजमिदं प्रोक्तं सर्व्वकामार्थसिद्धये॥
वामाक्षिवह्निसंयुक्तं बिन्दुनादविभूषितम्।
शिववीजं महेशानि! लज्जाबीजमुदाहृतम्॥
ईशानमुद्धृत्य पुरारिबीजं
सबिन्दुकं नादविभूषितञ्च।
सवामकर्णं परितः प्रकल्प्य
मायां वदन्तीह मनीषिणस्ताम्॥
द्वादशस्वरवर्णं स्यात् नादबिन्दुविभूषितम्।
वाग्भवं बीजमित्युक्तं सर्व्ववाक्यविशुद्धये॥
इति मन्त्रे चतुर्व्वीरव्याख्यानात् व्यक्तम्

समीचीनः। भैरवमते तु माया भुवनेश्वर्य्येव॥
लक्ष्मीः प्रथमबीजेऽस्ति लज्जाबीजे मनोभवः।
तृतीयेऽस्मिन् सदा देवी महापातकनाशिनी॥
चतुर्थे तु गुणातीता मुक्तिविद्याप्रदायिका।
वकारे वरुणः साक्षात् जकारे तु सुराधिपः॥
रेफे हुताशनो देवो वकारे वसुधाधिपः।
ऐकारे त्रिपुरा देवी रेफे त्रिपुरसुन्दरी॥
त्रैलोक्यविजया देवी सदैवौकारसंस्थिता।
चकारे चन्द्रमा देवो नकारे हि विनायकः॥
ईकारे कमला साक्षात् यकारे च सरस्वती।
मायायुग्मे सदा देवी प्रकृत्या सह सङ्गता॥
वैखरी चैव फट्कारे स्वाकारे कुसुमायुधः।
हाकारे च रतिस्तिष्ठेदेवं मन्त्रसमुच्चयः॥"
इति व्याख्यानाच्च॥*॥

अस्याः पूजाप्रयोगः।
प्रातःकृत्यादिकं कृत्वा मन्त्राचमनं कुर्य्यात्। यथा,—
"लक्ष्मीमायाकूर्चबीजैस्त्रिभिः पीत्वाम्बु साधकः।
वाग्भवेनौष्ठौ संदश्य मायाभ्यान्तु द्विरुन्मृजेत्॥
कूर्चेन चालयेत् पाणी एभिर्मन्त्रैश्च विन्यसेत्।
श्रीमायाकूर्चवाक्कामत्रिपुटाभगवर्त्मकैः॥
कामकलाङ्कुशाभ्याञ्च वक्त्रनासाक्षिकर्णकान्।
नाभिहृन्मस्तकं चांसौ सृष्ट्वा ग्रस्तुर्भवेत् क्रमात्॥
आद्यन्यैवं छिन्नमस्तां वज्रवैरोचनीं प्रपश्यति।
ततः प्राणायामान्तं विधाय षोढान्यासं कुर्य्यात्।
मन्त्रषोढां ततः कुर्य्यात् त्रैलोक्यवशकारिणीम्।
श्रीबालात्रिपुटायोनिप्रासादप्रणवैस्तथा॥
कालीवध्वङ्कुशैः कामकलाकूर्चाख्यकैः क्रमात्।
षोढ़शीमनुवर्णैश्च पृथगष्टादशाक्षरी॥
एभिर्बीजैर्मालकार्णान् खेषु स्थानेषु विन्यसेत्।
एषा ब्रह्मस्वरूपा हि बीजषोढ़ा प्रकीर्त्तिता॥
अस्याः संन्यसनात् सर्व्वे वज्रदेहा भवन्ति हि।
सर्व्वैश्वर्य्ययुतास्ते हि जीवन्मुक्ता दृढ़ाव्रताः॥"*॥
तत ऋष्यादिन्यासः।

अस्य मन्त्रस्य भैरव ऋषिः सम्राट् छन्दः छिन्नमस्ता देवता हुंकारद्वयं बीजं स्वाहा शक्तिरभीष्टार्थसिद्धये विनियोगः। यथा, शिरसि भैरवऋषये नमः। मुखे सम्राट्छन्दसे नमः। हृदि छिन्नमस्तायै देवतायै नमः। गुह्ये हूँ हूँ बीजाय नमः। पादयोः स्वाहाशक्तये नमः॥ ततः कराङ्गन्यासौ। ओम् ऐं सुखड्गाय हृदयाय स्वाहा। इति कनीयसि। ओम् ईं सुखड्गाय शिरसे स्वाहा। इति पवित्राङ्गुलयोः। ओम् ऊं सुवज्राय शिखायै स्वाहा। इति मध्यमयोः। ओम् ऐं पाशाय कवचाय स्वाहा। इति तर्ज्जन्योः। ओम् ौं अङ्कुशाय नेत्रत्रयाय स्वाहा। इत्यङ्गुष्ठयोः। ओम् अः सुरक्षारक्षासुरक्षायास्त्राय फट्। इति करतलपृष्ठयोः। एवं हृदयादिषु। तदुक्तं भैरवतन्त्रे।
"उच्चरेत् प्रणवं पूर्व्वमाकारं बिन्दुसंयुतम्।
खड्गाय हृदयायेति स्वाहायुक्तं कनीयसि॥

ईंकारञ्च ततो देवि! चन्द्रकोटिसमप्रभम्।
सुखड्गाय ततो वाच्यं शिरसे तदनन्तरम्॥
स्वाहायुक्तं ततो वाच्यं पवित्राङ्गुलिसंयुतम्।
ऊकारञ्च ततो वाच्यं बिन्दुलाञ्छितमस्तकम्॥
सुवज्राय ततो वाच्यं शिखायै तदनन्तरम्।
स्वाहान्तं मध्यमायाञ्च विन्यसेत्तदनन्तरम्॥
मात्रां द्वादशिकां देवीं विन्यसेच्च ततः परम्।
पाशायेति समुच्चार्य्य प्रवदेत् कवचाय च॥
स्वाहान्तं विन्यसेन्मन्त्रं तर्ज्जन्यां तदनन्तरम्।
औकारञ्च ततो देवि! चाङ्कुशं तदनन्तरम्॥
नेत्रत्रयाय स्वाहान्तमङ्गुष्ठे करयोर्द्वयोः।
अकारञ्च विसर्गान्तं सुरक्षारक्षसंयुतम्॥
असुरक्षायसंयुक्तं अस्त्रायेति ततः परम्।
फड्वह्निरसमायुक्तं विन्यसेत् करयोर्द्वयोः॥
हृदि मूर्द्धि शिखायाञ्च कवचे नेत्रमण्डले।
यावदस्त्रं चतुर्दिक्षु विदिक्षु च यथाक्रमम्॥"
त्रिशक्तितन्त्रे भैरववाक्यम्।
"उच्चरेत् प्रणवं पूर्व्वमाकारं बिन्दुसंयुतम्।"
इत्यादिवाक्यात् कराङ्गेषु प्रणवसम्बलितो न्यासः। ततो मूलेन मस्तकादिपादपर्य्यन्तं पादादिमस्तकपर्य्यन्तं वारत्रयं न्यसेत्॥*॥
ततो ध्यानम्।
"स्मराभौ नीरजं ध्यायेद्रक्तं विकसितं सितम्।
तत्पद्मकोषमध्ये तु मण्डलं चक्ररोचिषः॥
नवाकुसुमसङ्काशं रक्तबन्धूकसन्निभम्।
रजःसत्त्वतमोरेखायोनिमण्डलमण्डितम्॥
मध्ये तु तां महादेवीं सूर्य्यकोटिसमप्रभाम्।
छिन्नमस्तां करे वामे धारयन्तीं स्वमस्तकम्॥
प्रसारितसृजां देवीं लेलिहानाग्रजिह्विकाम्।
पिबन्तीं रौधिरीं धारां निजकण्ठविनिर्गताम्॥
विकीर्णकेशपाशाञ्च नानापुष्पसमन्विताम्।
दक्षिणे च करे कर्त्रीं सुखड्गमालाविभूषिताम्॥
दिगम्बरीं महाघोरां प्रत्यालीढ़पदे स्थिताम्।
अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम्॥
रतिकामोपरिष्टाच्च सदा ध्यायन्ति मन्त्रिणः।
सदा षोड़शवर्षीयां पीनोन्नतपयोधराम्॥
विपरीतरतासक्तौ ध्यायेद्रतिमनोभवौ।
डाकिनीवर्णिनीयुक्तां वामदक्षिणयोगतः॥
देवीगलोच्छलद्रक्तधारापानं प्रकुर्व्वतीम्।
वर्णिनीं लोहितां सौम्यां शुक्लकेशीं दिगम्बरीम्।
कपालकर्त्तृकाहस्तां वामदक्षिणयोगतः।
वामयज्ञोपवीताढ्यां ज्वलत्तेजोमयीमिव॥
प्रत्यालीढ़पदां दिव्यां नागालङ्कारभूषिताम्।
सदा द्वादशवर्षीयामस्थिमालाविभूषिताम्॥
डाकिनीं वामपार्श्वे तु कल्पसूर्य्यानलोपमाम्।
विद्युज्जटां त्रिनयनां दत्त्वा श्वखाकिनीम्॥
दंष्ट्राकरालवदनां पीनोन्नतपयोधराम्।
महादेवीं महाघोरां शुक्लकेशीं दिगम्बरीम्॥
लेलिहानमहाजिह्वां शुक्लमालाविभूषिताम्।
कपालकर्त्तृकाहस्तां वामदक्षिणयोगतः॥
देवीगलोच्छलद्रक्तधारापानं प्रकुर्व्वतीम्।
करस्थितकपालेन भीषयन्तीमतिभीषणाम्॥

आभ्यां निवेद्यमानां तां ध्यायेद्वीं विचक्षणः ॥"
ध्यानस्यावश्यकत्वमाह । तन्त्रे ।
"प्रचण्डचण्डिकामेवमर्थलाभा यस्तु पूजयेत् ।
स्वदस्तस्य शिरश्छित्वा देवी पिबति शोणितम् ॥"
पिबन्तीमिति तेन सुखेनेति शेषः ।
तथा च ।
"खमस्तकं सखर्परं रक्तधाराभिपूरितम् ।
ललज्जिह्वं महाभीमं धृतं वामभुजे तथा ॥"
इति भैरवतन्त्रे ।
तत्रैव ।
"सितं कुर्याद्दलं पूर्वमाद्येयं रक्तवर्णकम् ।
याम्यं कृष्णमतः पीतं शुक्लं रक्तं सितासितम् ॥
ततः पीतां प्रकुर्वीत कर्णिकां तस्य मध्यगाम् ।
तन्मध्ये तु प्रकुर्वीत मण्डलं चक्ररोचिषः ॥
रजःसत्त्वतमोरेखा रक्ता शुक्लासिता क्रमात् ।
मायायुग्मं ततो न्यस्य षड्वक्त्रसमन्वितम् ॥
वाह्यं तस्य च चक्रस्य कुर्यात् प्राकारवेष्टितम् ।
पूर्वं रक्तं ततः कृष्णं सितं पीतं यथाक्रमम् ॥
चतुर्द्वारसमायुक्तं क्षेत्रपालैरधिष्ठितम् ॥"
इत्यस्याः पूजायन्त्रम् ॥ * ॥
यथा वा ।
"त्रिकोणं विन्यसेदादौ तन्मध्ये मण्डलत्रयम् ।
तन्मध्ये विन्यसेद्योनिं द्वारत्रयसमन्विताम् ॥
बहिरष्टदलं पद्मं भूबिम्बत्रितयं पुनः ।
कूर्चबीजं लिखेन्मध्ये त्रिकोणे फट् समन्वितम् ॥"
यद्वा एतद्ध्यानोक्तं यन्त्रम् ।
तथाच ।
"अपरञ्च प्रवक्ष्यामि शृणु देवि ! यथाक्रमम् ।
स्वनाभौ नीरजं ध्यायेद्भानुमण्डलसन्निभम् ॥
षोडशच्छदसमायुक्तं गुणत्रितयसंयुतम् ।
तत्र मध्ये महादेवीं छिन्नमस्तां स्मरेद्यतिः ॥
प्रदीपकलिकाकारामद्वितीयवस्थिताम् ।
योनिमुद्रासमायुक्तां हृदयस्थितलोचनाम् ॥
ध्येयमेतद्यतीनाञ्च सर्वस्वानां निगद्यते ॥"
यथा,—
"अन्तरे स्वगुरोरस्य नाभिनीरजसङ्गताम् ।
निर्लेपां निर्गुणां सूक्ष्मां बालचन्द्रसमप्रभाम् ॥
समाधिमात्रगम्यान्तु गुणत्रितयवेष्टिताम् ।
कलातीतां गुणातीतां मुक्तिमात्रप्रदायिनीम् ॥"
एवं ध्यात्वा मानसैः संपूज्य तारिणीवच्छक्तस्यापनं कुर्यात् । ततः पीठपूजा । आधारशक्तये । प्रकृतये । कूर्माय । अनन्ताय । पृथिव्यै । क्षीरसमुद्राय । रत्नद्वीपाय । कल्पवृक्षाय । तदधः स्वर्णसिंहासनाय । आनन्दकन्दाय । सम्बिन्नालाय । सर्वतत्त्वात्मकपद्माय । सं सत्त्वाय । रं रजसे । तं तमसे । आं आत्मने । अं अन्तरात्मने । पं परमात्मने । ह्रीं ज्ञानात्मने नमः । पद्ममध्ये रतिकामाभ्याम् ॥ भैरवभते तु ।
"आधारशक्तिं कूर्मञ्च नागराजमतःपरम् ।
पद्मनालञ्च पद्मञ्च पूजयेन्मन्त्रविग्रहः ॥
मण्डलं चतुरस्रञ्च रजः सत्त्वं तमस्तथा ।
रतिकामौ च संपूज्य शक्तिपूजां समाचरेदिति ॥
रतिकामोपरि वज्रवैरोचनीये देहि देहि एहि एहि गृह्ण गृह्ण मम सिद्धिं देहि देहि मम शत्रून् मारय मारय करालिके हूं फट् स्वाहेति पीठमन्त्रः ॥ सर्वत्र प्रणवादिनमोऽन्तेन पूजयेत् । पुनर्ध्यात्वावाहयेत् । सर्वसिद्धिवर्द्धनीये सर्वसिद्धिडाकिनीये वज्रवैरोचनीये इहावह इहावह पुनस्तन्मन्त्रमुच्चार्य्य इह तिष्ठ इह तिष्ठ इह सन्निधेहि इह सन्निरुध्यस्व इत्यनेनावाह्य आं ह्रीं क्रों हंसः इत्यनेन प्राणप्रतिष्ठां कृत्वा । ओम् आं खड्गाय हृदयाय स्वाहा इत्यादिना षडङ्गं विन्यस्य यथाशक्ति पूजां कृत्वा बलिं दद्यात् । यथा । वज्रवैरोचनीये देहि देहि एहि एहि गृह्ण गृह्ण इमं बलिं मम सिद्धिं देहि देहि मम शत्रून् मारय मारय करालिके हूं फट् स्वाहा इति मन्त्रेण । ततो देव्या दक्षिणे ओं वर्णिन्यै नमः । वामे ओं डाकिन्यै नमः । ततो देव्यङ्गे षडङ्गं संपूज्य दक्षिणे ओं गुह्यनिधये नमः । वामे ओं पद्मनिधये नमः । पूर्वादिदिक्षु लक्ष्मीं लज्जां मायां वाणीञ्च पूजयेत् । विदिक्षु ब्रह्मविष्णुरुद्रेश्वरान् मध्ये सदाशिवं सर्वत्र प्रणवादि नमोऽन्तेन पूजयेत् । ततः पञ्च पुष्पाञ्जलिं दत्त्वा आवरणान् पूजयेत् । अग्नीशासुरवायुषु मध्ये दिक्षु च ओम् आं खड्गाय हृदयाय स्वाहा इत्यादिना षडङ्गानि संपूज्य अष्टपत्रेषु पूर्वादिक्रमेण ओम् ह्रीं काल्यै नमः एवं वर्णिन्यै डाकिन्यै भैरव्यै महाभैरव्यै इन्द्राण्यै पिङ्गाक्ष्यै संहारिण्यै सर्वत्र प्रणवादिनमोऽन्तेन पूजयेत् । यथा,—
"एकां नामाभिधां कालीं वर्णिनीं डाकिनीं तथा ।
भैरवीञ्च महापूर्वां भैरवीं तदनन्तरम् ॥
इन्द्राणीञ्च सपिङ्गाक्षीं ततः संहारकारिणीम् ।
पूर्वादिके दले पूज्याः शक्तयश्च यथाक्रमम् ॥
प्रणवादिनमोऽन्तेन लज्जाबीजं समुच्चरन् ।"
पद्ममध्ये हूं हूं फट् नमः स्वाहा नमः । देव्या दक्षिणे सम्राट्कुन्दसे नमः । देव्या उत्तरे सर्ववर्णेभ्यो नमः । पुनर्दक्षिणे ओं बीजशक्तिभ्यां नमः । पत्रायेषु पूर्वादिक्रमेण ब्राह्म्यै माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै इन्द्राण्यै चामुण्डायै महालक्ष्म्यै सर्वत्र प्रणवादिनमोऽन्तेन पूजयेत् । ततश्चतुर्दिक्षु द्वारेषु ओम् करालाय नमः । विकरालाय नमः । एवं अतिकरालाय महाकरालाय । यथा, भैरवीये ।
"पूर्वद्वारे करालञ्च विकरालञ्च दक्षिणे ।
पश्चिमेऽतिकरालञ्च महाकरालमुत्तरे ॥"
ततो धूपादिविसर्जनान्तं कर्म समापयेत् ।
विसर्जने त्वयं विशेषः । संहारमुद्रां प्रदर्श्य अञ्जलावारोप्य वामनासापुटेन ।
योनिमुद्रासमारूढां प्रदीपकलिकोज्ज्वलाम् ।
क्षणपक्षे विधुमिव क्रमेण चोर्ध्वगां गताम् ॥
इमं मन्त्रं समुच्चार्य्य चक्षूरन्ध्रौ निवेशयेत् ।
उत्तरे शिखरे इत्यादि । अस्य पुरश्चरणं सक्षजप्तः । सिद्धविद्यात्वात् ॥ * ॥ बलिदाने तु भैरवीये ।
"रात्रौ बलिः प्रदातव्यो मत्स्यमांससुरादिभिः ।
अथवा मधुपानाद्यैर्मधुरैर्विभवक्रमैः ॥
मन्त्रस्तु ।
उच्चरेत् प्रणवं पूर्वं सर्वसिद्धिप्रदेऽन्वितम् ।
वर्णिनीये ततो वाच्यं सर्वसिद्धिप्रदे ततः ॥
डाकिनीये ततो वाच्यं देवीनाम ततः परम् ।
एह्येहीति ततो वाच्यं इमं बलिमनन्तरम् ॥
गृह्ण गृह्ण ततः प्रोक्ता मम सिद्धिमनन्तरम् ।
देहि देहीति मायां च ततः फट्स्वाहया युतः ॥
बलिमन्त्रः समाख्यातः पूजितोऽयं सुरेश्वरीति ॥
मन्त्रान्तरम् ।
भुवनेशी कामबीजं कूर्चबीजञ्च वाग्भवम् ।
भुवनेशी कूर्चबीजं वाग्भवं तदनन्तरम् ॥
वज्रवैरोचनीये च हूं फट् स्वाहा ततः परम् ॥
अस्य पूजाप्रयोगन्यासपूजादिकं षोढ़शीवत् कार्य्यम् ॥ * ॥
कृष्णरेखा मादनं लक्ष्मीर्बीजभवं कूर्चमेव च ।
अक्षान्ता छिन्नमस्ताया महाविद्या प्रकीर्तिता ॥
अस्यापि सदृशी विद्या जगत्स्वपि न विद्यते ।
षड्वर्णोऽयं मनुः साक्षान्मोक्षदो नात्र संशयः ॥
अस्या ध्यानमहं वक्ष्ये शृणुष्व कमलानने ! ।
प्रत्यालीढ़पदां सदैव दधतीं छिन्नं शिरः
कर्त्रृकां
दिग्वस्त्रां स्वकबन्धशोणितसुधाधारां पिबन्तीं
मुदा ।
नागावद्धशिरोमणिं त्रिनयनां हृद्युत्पलालङ्कृतां
रत्यासक्तमनोभवोपरिदृढ़ां ध्यायेज्जवासन्नि-
भाम् ॥
दक्षे चातिसिता विमुक्तचिकुरा कर्त्रीं तथा
खर्परं
हस्ताभ्यां दधती रजोगुणभवा नाम्नापि सा
वर्णिनी ।
देयाच्छिन्नकबन्धतः पतदसृग्धारां पिबन्ती मुदा
नागावद्धशिरोमणिर्मम मुदा ध्येया सदा
सासुरैः ॥
वामे कृत्तातसृक्खर्परधरा खड्गं तथा खर्परं
प्रत्यालीढ़पदा कबन्धविगलद्रक्तं पिबन्ती मुदा ।
सैषा या प्रलये समस्तभुवनं भोक्तुं क्षमा तामसी
शक्तिः सापि परात्परा भगवती नाम्ना परा
डाकिनी ॥
इति ध्यानम् ।
अस्याः पूजादिकं सर्वं षोढ़शीवत् कार्य्यम् ॥ * ॥
मन्त्रान्तरम् ।
तारं लज्जाद्वयं वज्रवैरोचनीये हूं फट् स्वाहा ।
अस्यापि ध्यानपूजादिकं सर्वं षोढ़शीवत् ॥ * ॥
वियत्सूक्ष्मयुतं बिन्वादियुक्तं ततः प्रिये ! ।
एकाक्षरी महाविद्या त्रैलोक्यवशकारिणी ॥
सूक्ष्मं दीर्घ ऊकारः ॥
ठठान्तेयं महाविद्या त्रैलोक्यमोहकारिणी ।
तारादिन्ता भवेदेषा चतुर्वर्गफलप्रदा ॥ * ॥

मन्त्रान्तरं यथा,—
वधूवैरोचनीये च कूर्चयुग्मं सफट्ठटः।
तारादेवी महाविद्या सर्व्वतेजोऽपहारिणी॥
त्रैलोक्याकर्षिणी विद्या चतुर्व्वर्गफलप्रदा।
ध्यानपूजादिकं सर्व्वं षोड़शीवत् समाचरेत्॥*॥
इदानीं षोड़शीविद्याप्रशंसामाह।
तथा सर्व्वप्रयत्नेन सर्व्वाराध्या च षोड़शी।
लक्ष्मीबीजादिका सैव सर्व्वैश्वर्य्यप्रदायिनी॥
लक्ष्म्या स्वर्गभूनागयोषिदाकर्षिणी परा।
कूर्चाद्या सर्व्वजन्तूनां महापातकनाशिनी॥
वाग्भवाद्या यदा देवी वागीशत्वप्रदायिनी।
एषा तु षोड़शीविद्या वेदा सप्तदशाक्षरी॥
श्रीबीजपुटिता सा तु लक्ष्मीवृद्धिकरी सदा।
लक्ष्म्या पुटिता विद्या त्रैलोक्याकर्षिणी परा॥
कूर्चेन पुटिता सर्व्वपापिनां पापहारिणी।
वाग्बीजपुटिता चैषा वागीशत्वप्रदायिनी॥
चतुर्व्विधेति विद्येषा प्रिये! सप्तदशाक्षरी।
ताराद्या षोड़शी चान्या भवेत् सप्तदशाक्षरी।
एषा विद्या महाविद्या मुक्तिमुक्तिकरी सदा।
कमला भुवनेशानी कूर्चबीजं सरस्वती॥
वधूवैरोचनीये च पूर्व्वबीजानि योजयेत्।
फट् स्वाहा च महाविद्या वसुचन्द्राक्षरी परा।
तारादेकोनविंशार्णा ब्रह्मविद्यास्वरूपिणी।
एते विद्योत्तमे देवि! मुक्तिमुक्तिप्रदे शुभे॥*॥
लक्ष्म्यादिपुटिता पूर्व्वा रन्ध्रचन्द्राक्षरी भवेत्।
चतुर्द्धा च महाविद्या चतुर्व्वर्गफलप्रदा॥
प्रणवाद्या यदा चैषा भोगमोक्षकरी सदा।*।
विद्यान्तरं प्रवक्ष्यामि सावधानावधारय।
कूर्चलोकूर्चवाग्बीजवधूवैरोचनीये ङूं॥
अस्त्रं स्वाहा महाविद्या चतुर्दशाक्षरी मता।
सर्व्वैश्वर्य्यप्रदा चैषा सर्व्वसंमोहकारिणी॥*॥
भुवनेशी चितत्त्वञ्च वाग्बीजं प्रणवं ततः।
वधूवैरोचनीये च फट् स्वाहा च तथापरा॥
चतुर्दशाक्षरी चैषा चतुर्व्वर्गफलप्रदा।
एषा विद्या महाविद्या जन्ममृत्युविनाशिनी॥*॥
तन्त्रान्तरे।
रमा कामसखा लक्ष्मी वाग्भवं वधू वै पदम्।
रौद्रवनीये लक्ष्म्यन्तमन्त्रं स्वाहासमन्वितम्॥
इयं सा षोड़शी प्रोक्ता सर्व्वकामफलप्रदा।
कथिताः सकला विद्याः सारात्सारतराः शुभाः॥
आसां ऋषिर्भैरवोऽहं नाम्ना तु क्रोधभूपतिः।
सम्राट् छन्दो देवता च छिन्नमस्ता प्रकीर्त्तिता।
षड्दीर्घभाक्षरैरेव प्रणवाद्येन सुन्दरि!।
षड़ङ्गादेन षडङ्गानि षड़ङ्गानि प्रकल्पयेत्॥
नारिदोषादिकञ्चासां सा सुसिद्धाः सुरासुरैः।
सकलेषु च वर्गेषु सकलेष्वाश्रमेषु च॥
शान्तिमेषु च वर्गेषु मुक्तिमुक्तिप्रदायिका।
प्रणवाद्याश्च या विद्या शूद्रादौ न प्रकीर्त्तिताः॥
अस्यास्त्वेव विशेषोऽयं योजितेत् समुपासयेत्।
डाकिनी सा भवत्येव डाकिनीभिः प्रजायते॥
पतिहीना पुत्रहीना यथा स्यात् सिद्धयोगिनी।
इति ते कथितं सत्यं रहस्यमखिलं प्रिये!॥
अतिस्नेहतरङ्गेन भक्त्या दासोऽस्मि ते प्रिये!।
एतासां ध्यानपूजादिकं षोड़शीवत् कार्य्यम्॥*॥
नाभौ शुद्धारविन्दं तदुपरि कमलं मण्डलं चण्ड-
रश्मेः
संसारस्यैकसारां त्रिभुवनजननीं धर्म्म-
कामोदयाढ्याम्।
तस्मिन् मध्ये त्रिकोणे त्रितयतनुधरां छिन्नमस्तां
प्रशस्तां
तां वन्दे ज्ञानरूपां निखिलभयहरां योगिनीं
योगसुप्ताम्॥"
इति छिन्नमस्ताप्रकरणम्। इति तन्त्रसारः॥

छिन्नरुहः, पुं, (छिन्नोऽपि रोहतीति। रुह+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) तिलकवृक्षः। इति राजनिर्घण्टः॥

छिन्नरुहा, स्त्री, (छिन्ने सत्यपि रोहतीति। रुह+कः। अजादित्वात् टाप्।) गुडूची। इत्यमरः। २।४।८२॥ (यथास्याः पर्य्यायाः।
"वत्सादनी छिन्नरुहा मधुपर्ण्यन्तामरा।
कुण्डल्यन्तवल्ली च गुडूची चक्रलक्षणा॥"
इति वैद्यकरत्नमालायाम्॥)
स्वर्णकेतकी। शुक्लकी। इति राजनिर्घण्टः॥

छिन्नवेणिका, स्त्री, (छिन्नो विच्छिन्नो वेणो यस्याः। संज्ञायां कन्। ततोऽपि अत इत्वम्।) पाठा। इति शब्दचन्द्रिका। आकनादी इति भाषा॥

छिन्ना, स्त्री, (छिद्यतेऽसौ। छिद+क्तः। "अजाद्यतष्टाप्।"४।१।४। इति टाप्।) गुडूची। (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"गुडूची मधुपर्णी स्यादमृतास्तवल्लरी।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च॥"
छिद्यते कुलात् वह्निश्चिक्रियते इति।) पुंश्चली। इति विश्वः॥

छिन्नोद्भवा, स्त्री, (छिन्ना विभिन्ना सत्यपि उद्भवति पुनर्जायते इति। उत्+भू+अच्। यद्वा, छिन्ने छेदनेऽपि उद्भव उत्पत्तिर्यस्याः।) गुडूची। इति राजनिर्घण्टः॥ (गुडूचीशब्देऽस्या विवृतिर्ज्ञेया॥)

छिलिण्डिकः, पुं, (चिलिना वसनखण्डरूपतया हिलते अनादियते इति। हिल अनादरे+अच्। पृषोदरादित्वात् चस्य छः।) पातालगरुड़वृक्षः। इति भावप्रकाशः॥

छुकुन्दरी, स्त्री, (कुकुमित्यव्यक्तशब्दो दीर्य्यते निर्गच्छत्यस्याः। दृ+"सर्व्वधातुभ्य इन्।" उणा॰ ४।११७। इति इन्। ततः ह्रस्वादिकारादिति ङीष्।) जम्बुविशेषः। छुँचा इति भाषा। तत्पर्य्यायः। गन्धमूषा २। इति हेमचन्द्रः। ४।३६७॥ चिक्कः ३ वेश्मनकुलः ४ पुंछुचुः ५ गन्धमूषिकः ६। इति चिकाण्डशेषः॥ गन्धमूषिका ७। इति हलायुधः। राजपुत्री ८ प्रतिमूषिका ९ सुगन्धिमूषिका १० गन्धमुखिनी ११ सुखिमूषिका १२। इति राजनिर्घण्टः॥ गन्धाखुः १३ गन्धनकुलः १४ छुचुः १५। इति हारावली। (छुकुन्दरिः १६। इति भाकाशेषपुराणम्॥१५।३१॥

"अभ्यङ्गान्नाशुयेत् क्षिप्रं गण्डमालां सुदारुणाम्।
कुकुन्दर्य्या विपक्वन्तु घृतात्तैलवरं ध्रुवम्॥"
इति वैद्यकचक्रपाणिसंग्रहे गण्डमालाधिकारे॥)

कुट, कौटिल्ये। इति कविकल्पद्रुमः॥ (चुरां-तुदां च-सकं-सेट्।) कः, कोटयति। शिः, कुटति। अचुकुटीत्। इति दुर्गादासः॥

कुड्मं, क्लीं, (कुद+रक्। पृषोदरादित्वात् उत्वम्।) प्रतीकरणम्। रश्मिः। इति संक्षिप्तसार उणादिवृत्तिः॥

कुप, शब्दे औ स्पर्द्धे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-अनिट्।) शः, कुपति। औ, कोपा। इति दुर्गादासः॥

कुपः, पुं, (कुप+चन्प्रत्ययेन कः।) क्षुपः। स्पर्द्धनम्। इति मेदिनी। पे, ६॥ चपलः। युद्धम्। इति विश्वः॥

कुर, छेदे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। छोरति। अचुक्षोरीत्॥)

कुर, शब्दे लोपे। इति कविकल्पद्रुमः। (तुदां-परं-सकं सेट्।) शः, कुरति, अचुक्षुरीत् चुक्षोर। लोपश्छेदः। इति दुर्गादासः॥

कुरा, स्त्री, (कुरति रञ्जयति नाशयति दुर्गन्धादिकमिति वा। कुर+कः टाप् च।) सुधा। चूर्णम्। इति हारावली। १३५॥

कुरिका, स्त्री, (कुरति छिनत्तीति। कुर+कुन्। यद्वा, कुरी+स्वार्थे कन्। पृषोदरादित्वञ्च।) अस्त्रविशेषः। कुरी इति ख्याता। तत्पर्य्यायः। शल्की २ असिपुत्री ३ असिधेनुका ४। इत्यमरः। २।८।९२॥ कुरी ५। इति भरतः॥ खुरी ६ छूरी ७ क्षुपाधिका ८ धेनुपुत्री ९। इति हेमचन्द्रः॥ कूरिका १०। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे।२५।१४६।
"तावत् स्त्रियमपश्यन्तौ क्षित्वा क्षुरिकया सुहृत्।
खादन्तौ तस्य मांसानि पुंसः शूलाग्यवर्त्तिनः॥")

कुरितं, त्रि, (कुर+क्तः।) खचितम्। इति जटाधरः॥ (रञ्जितम्। यथा, माघे।१।२२।
"परस्परेण क्षुरितामलच्छवी
तदेकवर्णाविव तौ बभूवतुः॥")
छिन्नच॥

कुरी, स्त्री, (कुरति छिनत्तीति। कुर छेदे+"इगुपधज्ञेति।" ३।१।१३५। इति कः। ततो ङीष्।) कुरिका। इति भरतः॥

कुरिकापत्री, स्त्री, (कुरिका इव पत्राणि यस्याः। स्त्रियां ङीष्।) चेता। इति राजनिर्घण्टः॥

कूरी, स्त्री, (कुरी+पृषोदरादित्वात् दीर्घः।) कुरिका। इति हेमचन्द्रः। ३।४४८॥

कृद, कि सन्दीपे। इति कविकल्पद्रुमः। १ (चुरादौ भ्वां-परं-सकं-सेट्।) सन्दीपनकरणम्। कि, कर्दयति कर्दति दीपं लोकः। इति दुर्गादासः॥

कृद, उ ण घ इर् देवने। स्विधि। वमने। इति कविकल्पद्रुमः॥ (रुधां-उभं-सकं-सेट्। उदित्वात् स्रावेट्।) उ, कर्दित्वा कृत्वा। ण घ, कृत्वा

कृन्ते। इर्, अच्छृदत् अच्छर्दीत्। देवनं जिगीषेच्छाव्यवहारस्तुतिद्युतिक्रीड़ागतयः। इति केचित्। क्षमते तु क्रीड़नमेव अन्यथा त्रिषो ग्रहणमनर्थकं स्यात्। त्रिषि दीप्तौ। इति दुर्गादासः॥

छेकः, त्रि, (अति वनवासादिसुखं छिनत्ति नाशयतीति। छो य लूनौ + बाहुलकात् केकन्।) गृहासक्तपक्षिच्छगौ। तत्पर्य्यायः। शल्यकः २। इत्यमरः। २।५।४३॥ नागरः। इति मेदिनी। के, २४॥ (ग्रन्थालङ्कारविशेषे, पुं। स तु अनुप्रासभेदः। तल्लक्षणं यथा, साहित्यदर्पणे।१०।४।
"छेको वक्रजनसङ्घस्य सकृत्साम्यमनेकधा॥"
तदुदाहरणं यथा, तत्रैव,— [भ्रमरान्।
"आदाय वकुलगन्धानन्धीकुर्वन् पदे पदे
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः॥"
अत्र गन्धानन्धीति संयुक्तयोः कावेरीवारीत्यसंयुक्तयोः पावनः पवन इति बहूनां वक्रजनानां सकृदावृत्तिः। छेको विदग्धस्तत्प्रयोज्यत्वादेष छेकानुप्रासः॥")

छेकोक्तिः, स्त्री, (छेकानां विदग्धानां उक्तिः।) वक्रोक्तिः। इति जटाधरः॥ (विशेषस्तु वक्रोक्तिशब्दे ज्ञेयः॥)

छेद, तृ क छेदे। इति कविकल्पद्रुमः॥ (अदन्त पुरां-परं-सकं-सेट्।) अच्छिच्छेदत्। इति दुर्गादासः॥

छेदः, पुं, (छिद + भावे घञ्।) छेदनम्। इति हेमचन्द्रः। ३। ३६॥ (यथा, कुमारे।२।४१।
"तेनामरवधूहस्तैः सदयालूनपक्षवाः।
अभिन्नाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः॥"
नाशः। अपगतिः। यथा, शाकुन्तले २य अङ्के।
"भेदच्छेदलघोरदं लघु भवत्युत्थानयोग्यं वपुः
वस्त्वागामपि लक्ष्यते विक्षतिमच्चित्तं
भयक्रोधयोः॥" *॥
छिद्यते इति। छिद् + कर्म्मणि घञ्।) खण्डम्। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। १। ४।
"बलाहकच्छेदविभक्तरागा-
मकालसन्ध्यामिव धातुमत्ताम्॥")

छेदनं, क्ली, (छिद् + भावे ल्युट्।) अङ्गेन द्विधा करणम्। तत्पर्य्यायः। वर्हणम् २। इत्यमरः। ३। २। ७॥ कर्त्तनम् ३ कल्पनम् ४ छेदः ५। इति हेमचन्द्रः॥ (यथा, मनुः। ११। १४२।
"फलदानानु वृक्षाणां छेदने जप्यमृक्शतम्॥"
नाशः। अपभोदनम्। यथा, महाभारते। ३। १८५। २४।
"मृत्युरेव तु महात्मानो सुतयोऽभ्यद्रवन् द्रुतम्।
सनत्कुमारं धर्म्मज्ञं संप्रयच्छेदनाय वै॥"३॥)
भेदः। इति मेदिनी। ने, ६५।
(छिनत्तीति। छिद् + ल्युः। छेदके, त्रि। यथा, महाभारते। २। ५४। ६।
"प्रच्छन्नो वा प्रकाशो वा योगो योऽरिं प्रबाधते।
छेदने शस्त्रं शस्त्रविदां न शस्त्रं छेदनं स्मृतम्॥"
उषाच तत्रैव। १। ३३। ३।
"ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम्।
घोररूपं तदत्यर्थं यन्त्रं देवैः सुनिर्म्मितम्॥")

छेदनीयः, पुं, (छेत्तुं योग्यः। छेद + "अर्हे कृत्यतृचश्च।" ३।३।१६९। इति अनीयर्।) कतकवृक्षः। इति राजनिर्घण्टः॥ (कतकवृक्षे गुणादयोऽस्य आख्याताः॥) छेद्ये, त्रि॥ (यथा, सुश्रुते। १। २७।
"अनुत्सृष्टानि शल्यानि छेदनीयमृजूनि च॥")

छेदिः, त्रि, (छिनत्तीति। छिद् + "कृपिचिरुहीति।" उणां ४। ११८। इति इन्।) छेदनकर्त्ता। इत्युणादिकोषः॥

छेदितं, त्रि, (छेद तृ क छेदे + क्त।) छिन्नम्। इति हेमचन्द्रः॥ (यथा, काशीखण्डे।२६।६२।
"छेदिताखिलपापौघा छन्नाशी छलहारिणी॥")

छेमड़ः, पुं, (छम् अदने + बाहुलकात् अड़न् अत इत्वञ्च।) पिङ्गहीनः। इत्युणादिवृत्तिः। १। १२८। छेमड़ा इति भाषा॥

छेलुः, पुं, सोमराजी। इति शब्दचन्द्रिका॥

छो, य लूनौ। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-अनिट्।) लूनिश्छेदः। य, अति धान्यं लोकः। इति दुर्गादासः॥

छोटिका, स्त्री, (छुटति यज्ञविघ्नकारिणां माथां छिनत्तीति। छुट + ण्वुल्। टापि अत इत्वञ्च।) तर्ज्जनशङ्खाङ्गुलिध्वनिः। यथा, "छोटिकाभिर्दशदिग्बन्धनं कृत्वा भूतशुद्धिं कुर्य्यात्।" इति तन्त्रसारः॥

छोटी [नृ] पुं, (छुटति नीचजातितया खल्पीभवतीति। छुट + इनिः।) कैवर्त्तः। इति त्रिकाण्डशेषः॥

छोरकं, क्ली, (छुर + भावे ण्वुल्।) परित्यागः। इति त्रिकाण्डशेषः॥ छोड़न इति हिन्दी भाषा॥

छोलङ्गः, पुं, (छुरतीति। छुर + बाहुलकात् अङ्गच्। ततो रस्य लत्वम्।) मातुलुङ्गः। इति शब्दरत्नावली॥ टाबालेबु इति भाषा॥

ज्यु, ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, ज्यवते। इति दुर्गादासः॥

ज

ज, जकारः। स यज्ञनासमन्त्रार्थः। चवर्गद्वितीयवर्णश्च। अस्योच्चारणस्थानं तालु। इति वाक्यरत्नम्॥ (यदुक्तं सिद्धान्तकौमुद्याम्। "इचुयशानां तालु।" तथाच शिक्षायाम्।
"कण्ठ्याववर्णविषुयशास्तालव्या ओऽजाडपूः॥")
अस्योत्पत्तिर्यथा, प्रपञ्चसारे।
"विसर्गस्तालुगः सोष्मा शं चवर्गश्च यस्तथा॥"
(वक्त्राकारेऽ) अस्य वैखनप्रकारो यथा, वर्णोद्धारतन्त्रे।
"ऊर्द्धाधःकुञ्चिता रेखा तासु ब्रह्मेशसंविदः।
वाग्देवी कमला नित्या द्विधा मात्रा प्रकीर्त्तिता॥"

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।
"जकारं परमेशानि! या स्वयं मध्यकुण्डली।
शरच्चन्द्रप्रतीकाशं सदा त्रिगुणसंयुतम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये!॥"
तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे।
"ध्यानमस्याः प्रवक्ष्यामि शृणुष्व कमलानने!।
नानालङ्कारसंयुक्तैर्भुजैर्द्वादशभिर्युताम्॥
रक्तचन्दनदिग्धाङ्गीं विचित्राम्बरधारिणीम्।
त्रिलोचनां जगद्धात्रीं वरदां भक्तवत्सलाम्॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"
तस्य पर्य्याया यथा,—
"जः शृङ्गी वानरः शूली भोगदा विजया स्थिरा।
ललदेवो जयो जेता धातकी सुसुखी विभुः॥
लम्बोदरी स्मृतिः शाखा सुप्रभा कर्त्तृकाधरा।
दीर्घबाहू रुचिर्हंसो नन्दी तेजाः सुराधिपः॥
जवनो वेगितो वामो मानवाद्यः सदात्मकः।
ब्रह्मारुद्रेश्वरो वेगी वामोदो मदविह्वलः॥"
इति नागतन्त्रम्॥
(धातुपाठेऽनुदात्तविशेषः। यथा, कविकल्पद्रुमे।
"जो ज्वलादौ शिरश्चक्षुः साधुर्दुःखिमकर्त्तृयुतः॥"
छन्दःशास्त्रोक्तमध्यगुरुवर्णविशेषः। (।२।)
यदुक्तं छन्दोमञ्जर्य्याम्।
"जो गुरुर्मध्यगतो रलमध्यः॥" इति॥)

जः, पुं, (जयति जायते वा। जि जन् वा + "अर्त्तेरपि ड्रश्च ते।" ३। २। १०१। इति डः।) स्त्र्यङ्गम्। जनिः। तातमाचम्। जनार्द्दनः। इति मेदिनी। जे, १॥ विष्णुः। शुक्तिः। तेजः। पिशाचः। इति शब्दरत्नावली॥ वेगः। इत्येकाक्षरकोषः॥

जः, त्रि, (जयति विपक्षमिति। जि + डः।) जेता। वेगितः। इति शब्दरत्नावली॥

जकुटं, क्ली, (जं जातं सत् कुटति वक्रीभवतीति। कुट् कौटिल्ये + "इगुपधज्ञेति।" ३।१।१३५। इति कः।) वार्त्ताकुपुष्पम्। इति मेदिनी॥ जे, ४३॥

जकुटः, पुं, (जो जातः सन् कुटतीति। कुट् + कः।) मलयपर्व्वतः। कुकुरः। इति मेदिनी॥ जे, ४३॥

जक्ष, इ म ङ दाने। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) इ, जक्षते। न मध्यपाठे नैवेश्सिद्धे इदुपधत्वो वेदेषूच्चारणभेदार्थः। न, अजक्षि अजाक्षि जक्षुं जक्षुं जाक्षुं जाक्षुं अनुबन्धबलादनुपधाया अपि दीर्घः। क्षमते तु अत्र दीर्घविधिरुपधां नापेक्षते। ङ, जक्षते। इति दुर्गादासः॥

जक्ष, क्ष क्षु घ भक्षे। हासे। इति कविकल्पद्रुमः॥ (अदां-परं-भक्षे सकं-हासे-अकर्ष-सेट्।) केचित्तु विष्णुपुराणे यक्षराक्षसोत्पत्तिप्रसङ्गे यक्ष्यतामिति यैरुक्तं वै वै यक्षास्तु यक्षणादिति भक्षणार्थस्यैव यक्षशब्दव्युत्पादनादेतन्मन्त्रादिं मन्यन्ते॥ तच्च अमरटीकायां वर्म्म-

अकारस्यान्तःस्थयकारस्यान्दसो दस्य दस्रुक्षा वर्ग्यादिरयं निर्णीतः। च, जक्षति। क्षु च, अक्षिति। इति दुर्गादासः॥

जक्षणं, क्ली, (जक्ष+भावे ल्युट्।) भक्षणम्। इति हेमचन्द्रः। ३। ८७॥

जक्षः, पुं, (जक्षिति भक्षयति शरीरं नाशयतीत्यर्थः। जक्ष+बाहुलकात् मन्।) जक्षा। इत्यमरटीका॥ (कैश्चित् तु "अर्शिसुसुक्षिति।" १।१३६। उणादिसूत्रेण यत्र पूजायामिति धातोर्मनुप्रत्ययनिर्देशात् अन्तःस्थयकारादिरिति मन्यन्ते॥)

जक्ष्मा, [न्] पुं, (जक्षिति भक्षयति शरीरं नाशयतीत्यर्थः। जक्ष+"सर्व्वधातुभ्यो मनिन्।" उणा। ४।१४४। इति मनिन्।) यक्ष्मरोगः। इत्यमरटीकायां भरतः॥

जगच्चक्षुः, [स्] पुं, (जगतां भुवनानां चक्षुरिव प्रकाशकत्वात्।) सूर्य्यः। इति हेमचन्द्रः। २।१२॥ (यथा, काशीखण्डे। ४६।४४।

"इति काशीप्रभावज्ञो जगच्चक्षुस्समोदतः।
ज्ञात्वा द्वादशधात्मानं काशीपुर्य्यां व्यवस्थितः॥")

जगत्, क्ली, (गच्छतीति। गम+"द्युतिगमिभ्रुहोतीनां ङे च।" उणा। २।१३८। इत्यस्य वार्त्तिके इति क्विपि ङित्त्वे च "गमः क्वौ।" ६।४।४०। इति मलोपे तुक्।) विश्वम्। तत्पर्य्यायः। जगती२ लोकः३ पिष्टपम्४ भुवनम्५। इत्यमरः। २।१।६॥ विष्टपम्६। इति तट्टीका॥ (यथा, मनुः। १।५२।

"यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्व्वं निमीलति॥"

गच्छति इतस्ततो यातीति।) वायौ, पुं। (गच्छन्त्यस्मिन् जीवा इति। महादेवः। यथा, महाभारते। १३।१७।१५१।

"विहस्तो हस्ततेजाश्च श्रीमान् श्रीवर्द्धनो जगत्॥")

जङ्गमे त्रि। इति मेदिनी। ते, १०८॥

जगत्कर्त्ता, [र्त्तृ] पुं, (करोतीति। कृ+तृच्। ततो जगतः कर्त्ता कारकः।) ब्रह्मा। इति हेमचन्द्रः। २।१२६॥

जगत्प्राणः, पुं, (जगतां विश्वस्थजीवानां प्राणो जीवनम्।) वायुः। इत्यमरः। १।१।६५॥

जगत्साक्षी, [न्] पुं, (जगतां भुवनानां साक्षी कर्म्मदृष्टा।) सूर्य्यः। इति हेमचन्द्रः। २।१२॥

जगती, स्त्री, (गच्छति कार्य्यत्वात् नश्वरा भवतीति। गम+"वर्त्तमाने पृषद्बृहन्महज्जगच्छतवच।" उणा। २।८४। इति अतिप्रत्ययेन निपातनात् साधुः। ततः ङीप्रत्ययात्। "उगितश्च।" ४।१।६। इति ङीप्।) भुवनम्। (यथा, रामायणे। २।६८।११।

"स्वप्नेऽपि सागरं शुष्कं चन्द्रञ्च पतितं भुवि।
उपदद्राव जगतीं तमसेव समावृताम्॥")

पृथ्वी। (यथा, मार्कण्डेये। ६।२५।

"तमायान्तं ततो देवी सर्व्वदैत्यजनेश्वरम्।
जगत्यां पातयामास भित्त्वा भूमिं गदया॥")

जगः। छन्दोविशेषः। इति मेदिनी। ते, १०६॥ (सा च द्वादशाक्षरा इष्टिः। यथा, छन्दोमञ्जर्य्यां १ स्तवके।

"त्रिष्टुप् च जगती चैव तथातिजगती मता॥"

अस्या उदाहरणादीनि छन्दःशब्दे द्रष्टव्यानि॥) जन्यवप्रम्। इति हेमचन्द्रः॥

जगदम्बा, स्त्री, (जगतामम्बा माता।) दुर्गा। यथाह कश्चित्।

"अदूरे जगदम्बाया श्वारदीयो महोत्सवः॥"

"जगदम्बापदद्वन्द्वभक्तिर्दद्यात् क्षयाधनम्॥"

इति शूलपाणिः॥

अपि च ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३१ अध्याये।

"विष्णुमायां भगवतीं दुर्गां दुर्गतिनाशिनीम्।
प्रकृतिं जगदम्बाञ्च पतिपुत्रवतीञ्च॥"

जगदम्बिका, स्त्री, (जगतां अम्बा जननी। ततः स्वार्थे कन्। टापि अत इत्वम्।) दुर्गा। यथा,

"सृष्टिस्थितिविनाशानां विधात्री जगदम्बिका।
अहं सर्व्वान्तरस्था च संसारार्णवतारिणी॥"

इति भगवतीगीतायां ५ अध्यायः॥

(यथा च देवीभागवते। १।७।४६।

"कामं कुरुष्व वधमद्य ममैव मातर्दुःखं न मे मरणजं जगदम्बिकेऽत्र॥")

जगदाधारः, पुं, (जगतामाधारः आश्रयः।) वायुः। इति शब्दचन्द्रिका॥ जगदाश्रयः। यथा,

"कालो हि जगदाधारः।" इति स्मृतिः।

जगदीशः, पुं, (जगतामीशो नियन्ता।) विष्णुः। इति शब्दरत्नावली॥ (यथा, पाद्मे उत्तरखण्डे। १११ अध्याये।

"सर्व्वान्तर्यामी जगदीशश्चाजरमक्षयः प्रभुः॥"

विधाता। यथा, कुमारे। २।६।

"जगद्योनिरयोनिश्च जगदन्तो निरन्तकः।
जगदादिरनादिश्च जगदीशो निरीश्वरः॥"

सनामख्यातपण्डितविशेषः। स च न्यायशास्त्रटीकाद्यास्यार्थवादिग्रन्थप्रणेता अस्य जन्मस्थानं नवद्वीपः॥)

जगद्गौरी, स्त्री, (जगत्सु मध्ये गौरी।) मनसादेवी। इति शब्दरत्नावली॥

जगद्धात्री, स्त्री, (जगतां धात्री विधात्री।) दुर्गाविशेषः। अस्याः पूजायाः कालो विधिश्च यथा, निगमकल्पसारज्ञानसारखते ग्रन्थे दुर्गाकल्पे।

श्रीशिव उवाच।

"प्रसीद जगतां मातर्जगन्निस्तारकारिणि!।
अतएव महेशानि! तवाहं शरणागतः॥
त्वया यत् कथितं पूर्व्वं तत् सर्व्वञ्च श्रुतं मया।
जगद्धात्री महादुर्गा चतुर्व्वर्गफलप्रदा॥
तस्याः पूजाविधिर्दिव्यं कालं तत्र प्रकाशितम्।
तदेव कथयेशानि! श्रोतुमिच्छामि साम्प्रतम्॥

श्रीदेव्युवाच।

कथयामि महेशान! सावधानोऽवधारय।
तस्याः पूजाविधिर्दिव्यं समयं भावभेदतः॥
कार्त्तिके शुक्लपक्षे च या दुर्गानवमी तिथिः।
सा प्रशस्ता महादेव! महादुर्गाप्रपूजने॥
प्रातश्च सात्त्विकी पूजा मध्याह्ने राजसी मता।
सायाह्ने तामसी पूजा त्रिविधा परिकीर्त्तिता॥
जयद्यादिभिर्देव! इति चैकालिकी मता।
अथान्यत् संप्रवक्ष्यामि शृणुष्व परमेश्वर!॥
सप्तम्यादिनवम्यान्तं पूजाकालमितीरितम्।
त्रिदिने त्रिविधा पूजा दशम्यान्च विसर्জ্জयेत्॥
पूजापरेऽह्नि देवेश! तत्रापि विसर्জ্জनम्।
बोधितायाः प्रकारेण तत्र पूजा प्रकीर्त्तिता॥

श्रीशिव उवाच।

त्रिसन्ध्याव्यापिनी सा तु यदि स्यान्नवमी तिथिः।
त्रिकाले त्रिविधा पूजा कथं देया जगन्मयि!॥
कथयस्व महेशानि! इति मे संशयो हृदि॥

श्रीदेव्युवाच।

सा प्रातर्व्यापिनी यत्र वासरे नवमी तिथिः।
त्रिसन्ध्यं पूजयेत्तत्र वासरे जगदम्बिकाम्॥
सूर्य्योदयव्यापिनी चापि तत्र ग्राह्या महेश्वर!।
एककाले त्रिधा पूजा साधको नैव कारयेत्॥
इति ते कथितं वत्स! किमन्यत् श्रोतुमिच्छसि।
कथयिष्यामि तद्ब्रह्मन् तव प्रीत्या त्रिलोचन!॥"

श्रीपार्व्वत्युवाच।

"दशम्यां बलिदानन्तु निषिद्धं जगदीश्वर!।
कथं त्रिकालं पूजा सा लभ्येत परमेश्वर!॥

श्रीशिव उवाच।

नवमीतिथिमाश्रित्य यत्र पूजाविधिर्भवेत्।
निषिद्धं बलिदानन्तु दशम्यां तत्र सुन्दरि!॥
नवमीदिनमाश्रित्य पूजाविधिरुदीरितः।
दशम्यां बलिदानन्तु निषिद्धं नात्र पार्व्वति!॥
ज्ञानार्णवतन्त्रसारे पूर्व्वं पूजाप्रकारं उक्तवान्।
"सुकूरसैव्यापिनी चापि प्रातश्चैव नवमी तिथिः।
तद्दिने पूजनं कार्य्यं त्रिसन्ध्यं वरवर्णिनि!॥
त्रिकालं पूजयेत्तत्र नैककाले कदाचन॥"
अथ कात्यायनीतन्त्रे अरुणप्रतिपदे।
"कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च।
उपस्थाप्योदितो भानुर्दुर्गामाराध्य यत्नवान्॥
पुत्रारोग्यबलं वेश्मे लोकसाक्षित्वमेव च।
तां तिथिं प्राप्य मनुजः श्रवणिभौमदिने यदि॥
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम्॥"
शक्तिसङ्गमतन्त्रे।
"कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम्।
त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत्॥
निर्म्माय प्रतिमां शक्त्या जगद्धात्र्या विधानतः।
पूजयित्वा परदिने प्रतिमां तां विसर्জ্জयेत्॥
एवं कृत्वा चक्रवर्त्ती भवेत् साधकसत्तमः।
पुत्रपौत्रधनैश्वर्य्यसंयुतास्य भवेत् पुरी॥"
तन्त्रान्तरे।
"शुक्लवारे युगाद्यायां नवम्यान्तु जगत्प्रसूः।
प्रादुर्भूता महेशानी तत्र तां परिपूजयेत्॥"
तन्त्रान्तरे।
"त्रिकालं पूजयेद्दुर्गां सूक्ष्मनैकाचरेऽपि च।
नानारत्नविधानेन गीतवाद्यपुरःसरम्॥
कार्त्तिकस्य सिते पक्षे नवम्याञ्च विशेषतः।
कृत्वैवं साधकश्रेष्ठो लभेद्राज्यमकण्टकम्॥"

योगिनीतन्त्रे ।
"कार्त्तिकेऽमलपक्षे तु नवम्याञ्च विशेषतः ।
प्रगल्भान्तु जगद्धात्रीं पूजयेद्दीपमालया ॥"
आगमतत्त्वसारे ।
"कार्त्तिकेऽमलपक्षे तु नवम्यां भौमवासरे ।
आविर्भूता जगद्धात्री युगादौ दैत्यनाशिनी ॥"
उत्तरकामाख्यातन्त्रे ।
"कार्त्तिके शुक्लपक्षे तु त्रेतायां प्रथमेऽहनि ।
त्रिसन्ध्यं पूजयेद्देवीं दुर्गां सम्यत्प्रहृष्टये ॥"*॥
कुलिकातन्त्रे ।
"कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम् ।
दुर्गां प्रपूजयेद्भक्त्या धर्म्मकामार्थसिद्धये ॥"*॥
दुर्गाकल्पे विद्योत्पत्तिः ।
"कार्त्तिके शुक्लपक्षेऽह्नि भौमवारे जगत्प्रसूः ।
सर्व्वदेवहितार्थाय दुर्व्वृत्तघ्नमनाय च ॥
आविरासीज्जगच्छान्त्यै युगादौ परमेश्वरी ॥"
व्रतकालविवेकधृतवचनम् ।
"कार्त्तिकेऽमलपक्षस्य त्रेतायां नवमेऽहनि ।
पूजयेत्तां जगद्धात्रीं सिंहस्थे निवेदुषीम् ॥"*॥
स्मृतिः ।
"युगाद्या वर्षहृच्छुक्ला नवमी पार्व्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥"*॥
कृत्यतत्त्वार्णवे ।
"कार्त्तिकेऽमलपक्षे तु युगाद्या नवमी स्मृता ।
पूर्व्वाह्णसमये तत्र पूजाविधिरिहोदितः ॥"*॥
भविष्यपुराणकृत्यतत्त्वार्णवयोः ।
"कार्त्तिके शुक्लपक्षे तु युगाद्या नवमी स्मृता ।
पूर्व्वाह्णसमये कार्य्यात्मिका परदिने यदि ॥
तत्र पूजादिकं कुर्य्यात् पित्र्यनिर्व्वपणादृते ॥"
स्मृतिसागरे ।
"कार्त्तिकस्य युगाद्यायामृद्धिकामोऽर्च्चयेदुमाम् ॥"
इति जगद्धात्रीपूजाकालव्यवस्था ॥ * ॥ * ॥

अथ जगद्धात्रीविद्योत्पत्तिः ।

श्रीपार्व्वत्युवाच ।
"भगवन् ! प्राणनाथेश ! सर्व्वतन्त्रविशारद ! ।
श्रुता कात्यायनीविद्यासम्भूत्पत्तिस्त्रिलोचन ! ॥
महादुर्गाजगद्धात्रीविद्योत्पत्तिर्भवेदुतः ।
तत् सर्व्वं ब्रूहि भगवन् ! कृपया परमेश्वर ! ॥
यदि न कथ्यते देव ! विसृजामि तदा तनुम् ॥

श्रीशिव उवाच ।
शृणु पार्व्वति ! वक्ष्यामि रहस्यं परमाद्भुतम् ।
यत् श्रुत्वा लभते देवि ! सौभाग्यं सुखमुत्तमम् ॥
पुरा पुरन्दरसखाः स्वेश्वरत्वाभिमानिनः ।
प्राहुः किमीश्वरोऽस्माभ्यादतिरिक्तः सुरानिति ॥
अथ दुर्गा जगन्माता नित्या चैतन्यरूपिणी ।
एतेषां धर्म्ममेतूनामिन्द्रादीनां नियन्त्रणम् ॥
करिष्यामीति निश्चित्य ज्योतीरूपं दधात्यलम् ।
तेषामाविरभूद्दुर्गा जगद्धात्री जगन्मयी ॥
कोटिसूर्य्यप्रतीकाशा चन्द्रकोटिसमप्रभा ।
ज्वलन्तं पर्व्वतमिव सर्व्वलोकभयङ्करी ॥
तद्दृष्टवः सुराः सर्व्वे भयमापुर्म्महौजसः ।
किमेतन्न विनिश्चेतुं शक्तास्ते ह्यभवन् सुराः ॥

वायुमाहूय समादृश्य किमेतत् परमाद्भुतम् ॥
विजानीहि मरुद्वीर ! मातरिश्वा दिशःपते ! ॥
ततो वायुर्द्रुतं तत्र गतस्तेजोऽन्तिकं ततः ।
तमन्तिकमुपायातं प्राह तेजोमयी ततः ॥
बलवान् कस्त्वमायातो वीर्य्यं किञ्चास्ति वा त्वयि ।
आदातुं शक्यते सर्व्वं पृथिवीतलसम्भवम् ॥
इति प्रत्युक्तवान् वायुः त्वयं तत्रैव तिष्ठति ।
आदत्स्वैतत् तृणमिति निदधौ वायवे तृणम् ॥
वायुः सर्व्वप्रयत्नेन नादातुं तत् क्षमोऽभवत् ।
ततो देवाः प्राहुरग्निं भीता उद्विग्नमानसाः ॥
अग्ने ! एतद्विजानीहि किमेतत् कर्म्म चाद्भुतम् ।
इत्युक्तो देवतादृन्दैरग्निस्तेजोऽन्तिकं गतः ॥
अमरा जातवेदा वा तेजो वागित्युवाच तम् ।
स प्रोक्तवानग्निरस्मि सर्व्वदाहकशक्तिकः ॥
दहेतत्तृणमत्यल्पमिति तस्मै तृणं ददौ ।
अग्निः सर्व्वप्रयत्नेन दग्धुं नैतत् क्षमोऽभवत् ॥
ततो निवृत्ते वह्निर्भूत्वा सोऽपत्रपान्वितः ।
एकत्रस्थाः सुराः सर्व्वे मन्त्रयामासुरुत्तमम् ॥
इथमेवेश्वरी नूनं स्त्रीख्यामो नेश्वरा वयम् ।
इति निश्चित्य सुधियस्तुष्टुवुः परमेश्वरीम् ॥
प्राहुर्देवगणाः सर्व्वे त्वमीशा नेश्वरा वयम् ।
ईश्वरत्वाभिमानेन यदस्माकं सुदुष्कृतम् ॥
क्षन्तुमर्हसि तत् सर्व्वं कृपया जगदम्बिके ! ।
तव रूपं सुगोप्यं यच्चङ्गलं सर्व्वमङ्गलम् ॥
तद्द्रष्टुं वयमिच्छामो देहि दर्शनमुत्तमम् ।
इत्युक्तानां सुबहूनामाविरासीच्छिवाम्बरे ॥
तेजस्यन्तर्हिते तस्मिन् चमत्कारकलेवरे ।
सृगेन्द्रोपरि सुस्थिरा सर्व्वालङ्कारभूषिता ॥
चतुर्भुजा महादेवी रक्ताम्बरधरा शुभा ।
बालार्कसदृशीदेहा नागयज्ञोपवीतिनी ॥
त्रिनेत्रा कोटिचन्द्राभा देवर्षिसुनिसेविता ।
दर्शयामास देवानामेवं रूपं जगन्मयी ॥
ततस्तां तुष्टुवुर्देवा जगद्धात्रीं महेश्वरीम् ।
वरं प्रापुः सुरगणा यथेष्टं त्रिदशालये ॥
तत्रैवान्तर्हिता देवी महादुर्गा जगन्मयी ।
इति ते कथितं भद्रे ! विद्योत्पत्तिं सुदुर्ल्लभाम् ॥"

इति कात्यायनीतन्त्रे ७६ पटलः ॥ * ॥

श्रीशिव उवाच ।
"अथ दुर्गामनुं वक्ष्ये शृणुष्व हरवल्लभे ! ।
यस्य प्रसादमात्रेण सुखते भवबन्धनात् ॥
यान्तवर्णं ससृत्य वामकर्णं विभूषितम् ।
इन्दुबिन्दुसमायुक्तं बीजं परमदुर्ल्लभम् ॥
चतुर्व्वर्गप्रदं साक्षान्महापातकनाशनम् ।
एकाक्षरीसमा नास्ति विद्या त्रिभुवने प्रिये ! ॥
कूर्चाद्यां वा जपेद्विद्यां तदन्ते वह्निसुन्दरी ।
लज्जाद्यां वा जपेद्विद्यां षड्वर्णां वा जपेत् सुधीः ॥
वधूबीजयुतां वापि खाद्यान्तां वा जपेत् पुनः ।
लज्जाद्यां वा जपेद्विद्यां चतुर्व्वर्गफलाप्तये ॥
वाग्भवाद्यां जपेद्वापि प्रणवाद्यां जपेत् पुनः ।
कामबीजादिकां वापि षड्वर्णां वा जपेत् पुनः ॥
चाक्षरी विविधा विद्या कथिता ब्रह्मणा पुरा ।
विना गन्धैर्विना पुष्पैर्विना होमपुरःसरैः ॥

प्राणायामं विना देवि ! जपमात्रेण सिद्धिदा ।
मन्त्रस्यास्य ऋषिर्देवि ! नारदः परिकीर्त्तितः ॥
गायत्री छन्द आख्यातं जगद्धात्री च देवता ।
चतुर्व्वर्गप्रदा दुर्गा सर्व्वसत्त्वेषु संस्थिता ॥
दीर्घस्वरसमायुक्तनिजबीजानि पार्व्वति ! ।
विन्यसेदात्मनो देहे हृदयादिषु षट्करि ! ॥
पूर्व्ववन्न्यासवर्णेषु पूर्व्ववत् कर्म्म चाचरेत् ।
कालीवदाचरेद्विद्यां जपेद्विद्यामहर्निशम् ॥
लक्षाद्वादशकैर्देवि ! पुरश्चरणमीरितम् ।
यथास्थाने यथाकाले यथाचारविधानतः ॥
प्रजपेत् परया भक्त्या दुर्गां दुर्गतिनाशिनीम् ॥*॥
ध्यानमस्याः प्रवक्ष्यामि शृणुष्व नगनन्दिनि ! ॥
सिंहस्कन्धाधिसंरूढां नानालङ्कारभूषिताम् ।
चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम् ॥
शङ्खचक्रधनुर्व्वाणलोचनत्रितयान्विताम् ।
रक्तवस्त्रपरीधानां बालार्कसदृशीतनुम् ॥
नारदाद्यैर्मुनिगणैः सेवितां भवसुन्दरीम् ।
त्रिवलीवलयोपेतनाभिनालसदृशालिनीम् ॥
रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते ॥
प्रफुल्लकमलारूढां ध्यायेत्तां भवगेहिनीम् ।
एवं ध्यात्वा जगद्धात्रीं पूर्व्वोक्तपूजनं चरेत् ॥
यन्त्रमस्याः प्रवक्ष्यामि शृणुष्व हरवल्लभे ! ।
त्रिकोणत्रितयद्वारां त्रैविम्बसहितन्ततः ॥
अष्टपत्रं ततो लिख्य त्रिरेखासहितं ततः ।
वज्रभूपुरसंयुक्तं विलिखेद्विधिनासुना ॥
तत्र तां पूजयेद्देवीं मूलप्रकृतिरूपिणीम् ।
प्रभाद्याः शक्तयः पूज्या गन्धाद्यैर्नवकोणके ॥
प्रभा माया जया सूक्ष्मा विशुद्धा नन्दिनी पुनः ।
सुप्रभा विजया सर्व्वसिद्धिदा नव शक्तयः ॥
ह्रीमाद्याः पूजयेत्तासु रक्तचन्दनदूर्व्वकैः ।
शङ्खपद्मनिधी देवौ वामदक्षिणयोगतः ॥
पूजयेत् परया भक्त्या रक्तचन्दनदूर्व्वकैः ।
अर्घ्यदानं ततः कुर्य्यात् पूजान्ते नगनन्दिनि ! ॥
अङ्गावृतिः पुनः पूज्या पत्रकोणेषु मातरः ।
वज्राद्यायुधसंयुक्ता भूपुरे लोकनायकाः ॥"

इति कात्यायनीतन्त्रे ७७ पटलः ॥ * ॥

श्रीशिव उवाच ।
"पूजा तिथिविशेषेण चतुर्व्वर्गफलाप्तये ।
कर्त्तव्या या तु दुर्गायास्तां शृणुष्व शुभानने ! ॥
अष्टम्याञ्च चतुर्दश्यां नवम्यां वापि यत्नतः ।
यः पूजयेन्महादुर्गां सोऽभीष्टफलमाप्नुयात् ॥
पौर्णमास्याममायां वा रविसंक्रमणे तथा ।
अग्निभौमदिने चैव पूजयेत् परमेश्वरीम् ॥
सुखं सौभाग्यमारोग्यमैश्वर्य्यं लभते ध्रुवम् ।
अग्निभौमदिने चैव यदि स्यादष्टमी तिथिः ॥
तत्र पूज्या जगद्धात्री पुत्रपौत्रधनप्रदा ।
सोमवारेऽप्यमावास्या मघानक्षत्रसंयुता ॥
उत्तरा सप्तमीयुक्ता आदित्यार्हे च पार्व्वति ! ।
चतुर्थ्यङ्गारवारे च रोहिणीसंयुता यदि ॥
गुर्व्वङ्ग्यां तथा ख्यातौ यदि स्यात् परमेश्वरि ।
एषु पूजा महादेव्याः कर्त्तव्या सर्व्वसिद्धये ॥
मधुमासे सिताष्टम्यां वैशाखत्रितयेऽहनि ।

पौर्णमास्यां तथा ज्येष्ठे अमायाञ्च महेश्वरि ! ॥
मिथुनेऽर्के द्वितीयायां श्रावणे द्वादशीदिने ।
भाद्रे मास्यसिताष्टम्यां आश्विने शुक्लपक्षके ॥
सप्तम्यामेव चाष्टम्यां नवम्याञ्च विशेषतः ।
अमायां कार्त्तिके चैव नवम्यां शुक्लपक्षके ॥
नक्तं मार्गशिरे भूते पौषेऽष्टम्यां सितेतरे ।
माघे च सितपञ्चम्यां फाल्गुन्यां च सुरेश्वरि ! ॥
एषु द्वादशमासेषु तिथिष्वेतासु पार्वतीम् ।
पूजयेत् परया भक्त्या यथाविभवविस्तरैः ॥
राजराजेश्वरो भूत्वा वसेत् कल्पायुतं दिवि ।
पुत्रपौत्रधनर्द्धीनामधिपो जायते ऽचिरात् ॥
अन्ते देवीपुरं याति सर्व्वान् भोगान् यथेप्सितान् ॥

श्रीपार्व्वत्युवाच ।

देवदेव ! महादेव ! विश्वनाथ ! महेश्वर ! ।
श्रुता तव मुखाम्भोजाद्दुर्गापूजा महाफला ॥
केन वा पूजिता देवी कस्य वा किञ्च सिध्यति ।
केन प्रकाशिता मर्त्यैस्तत् सर्व्वं कथय प्रभो ! ॥

श्रीशिव उवाच ।

रामरावणयोर्युद्धे दुर्गा रामेण पूजिता ।
अवधीद्रावणं राम इषे मासि प्रपूजनात् ॥
तेन लोकाश्चरिष्यन्ति दुर्गायाः शारदोत्सवम् ।
एवमाराध्य देवेशीमिन्द्रजिद्रावणात्मजः ॥
अभवत् कार्त्तिके यो वै दुर्गामेवं समर्चयन् ।
अमायां कार्त्तिके मासि तारकासुरनाशकः ॥
कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च ।
उषस्यर्द्धोदितो भानुर्दुर्गामाराध यद्बलवान् ॥
पुत्रारोग्यवरं लेभे लोकसाचित्वमेव च ।
तां तिथिं प्राप्य मनुजः शनिभौमदिने यदि ॥
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम् ।
एवं मार्गशिरे मासि दशराशिगते विधौ ॥
चतुर्दश्यां निशायान्तु चन्द्रः संपूज्य पार्व्वतीम् ।
महापापाद्विमुक्तोऽसौ रात्रौशत्वमवाप च ॥
तेन मार्गशिरे मासि चतुर्दश्यां प्रपूजयेत् ।
इन्द्रत्वमेवमिन्द्रोऽसौ लेभे दुर्गां समर्चयन् ॥
ब्रह्मत्वमपि विष्णुत्वं रुद्रत्वञ्च महेश्वरि ! ।
देवत्वं सर्व्वदेवानामभवच्चण्डिकार्चनात् ॥
भूतं भव्यं भविष्यं यत् स्थावराणि चराणि च ।
सर्व्वं दुर्गाप्रभावेण सुखभोगमवाप्नुयुः ॥
विना दुर्गां महेशानि ! न किञ्चिदपि वर्त्तते ।
इति ते कथितं देवि ! संक्षेपेण तवाग्रतः ॥
महादुर्गाजगद्धात्रीविद्योत्पत्तिं सुदुर्लभाम् ॥"

इति कात्यायनीतन्त्रे ७८ पटलः ॥

(सरस्वती । यथा, मार्कण्डेये । २३ । ३० ।
"जगद्धात्रीमहं देवीमारिराधयिषुः शुभाम् ।
स्तोत्रं प्रारभ्य शिरसा ब्रह्मयोनिं सरस्वतीम् ॥")

जगद्वलः, पुं, (जगतां बलं यस्मात् ।) वायुः । इति चिकाण्डशेषः ॥

जगद्योनिः, पुं, (जगतां योनिरुत्पत्तिस्थानम् ।) शिवः । इति चिकाण्डशेषः ॥ (यथा, महाभारते । ७ । २०० । १३ ।
"जगद्योनिं जगद्बीजं जविनं जगतो गतिम् ॥")

विष्णुः । इति तस्य सहस्रनाम ॥ (यथा, विष्णुपुराणे । १ । १२ । ३२ ।
"ते समेत्य जगद्योनिमनादिनिधनं हरिम् ॥"
केचित्तु हरिविशेषं कल्पयन्ति ॥)
ब्रह्मा । (यथा, कुमारे । २ । ६ ।
"जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ॥")
पृथिवी । इति शब्दचन्द्रिका ॥

जगद्वहा, स्त्री, (जगन्ति वहति धारयतीति । वह + अच् । अजादित्वात् टाप् ।) पृथिवी । इति चिकाण्डशेषः ॥

जगद्विनाशः, पुं, (जगतां विनाशो ध्वंसः अखिलकार्य्यनाश इत्यर्थः यस्मिन् ।) युगान्तः । इति हलायुधः ॥ (प्रलयकाले च अखिलकार्य्यशून्यत्वं यथाह मनुः । १ । ५२—५४ ।
"यदा स्वपिति शान्तात्मा तदा सर्व्वं निमीलति ॥
तस्मिन् स्वपिति तु स्वस्थे कर्म्मात्मानः शरीरिणः ।
स्वकर्म्मभ्यो निवर्त्तन्ते मनश्च ग्लानिमृच्छति ॥
युगपच्च प्रलीयन्ते तदा तस्मिन् महात्मनि ।
तदायं सर्व्वभूतात्मा सुखं स्वपिति निर्वृतः ॥")

जगन्नाथः, पुं, (जगतां नाथ ईश्वरः ।) विष्णुः । इति हेमचन्द्रः ॥ (यथा, देवीभागवते ।१।४।३६।
"देवदेव ! जगन्नाथ ! भूतभव्यभवत्प्रभो ! ।
तपश्चरसि कस्यार्थं किं ध्यायसि जनार्द्दन ! ॥")
पुरुषोत्तमक्षेत्रम् । यथा,

सूत उवाच ।

"पुरुषोत्तमाख्यं सुमहत् क्षेत्रं परमपावनम् ।
यत्रास्ते दारुवपुः श्रीशो मातृबलीयया ॥
दर्शनान्मुक्तिदः साक्षात् सर्व्वतीर्थफलप्रदः ।
तन्नो विस्तरतो ब्रूहि तत् क्षेत्रं केन निर्म्मितम् ॥
ज्योतिःप्रकाशो भगवान् साक्षान्नारायणः प्रभुः ।
कथं दारुमयस्तस्मिन्नास्ते परमपूरुषः ॥

जैमिनिरुवाच ।

एतत् क्षेत्रवरस्यास्य वपुर्भूतं महात्मनः ।
स्वयं वपुष्मान् यत्रास्ते स्वनाम्नाख्यापितं हि तत् ॥
यथा चातुदिनं देवाः सिद्धाः ब्रह्मर्षयस्तथा ।
समर्चितुमिहायान्ति देवीं न तथान्यतः ॥
अहो ! तत् परमं क्षेत्रं विस्तृतं दशयोजनैः ।
तीर्थराजस्य सलिलाद्दक्षिणं वालुकाचितम् ॥
नीलाचलेन महता मध्यस्थेन विराजितम् ।
एकं स्तनमिवावन्याः सुदूरात् परिभावितम् ॥"
ब्रह्माणं प्रति विष्णुवाक्यम् ।
"सागरस्योत्तरे तीरे महानद्यास्तु दक्षिणे ।
स प्रदेशः पृथिव्यां हि सर्व्वतीर्थफलप्रदः ॥
एकाम्रकाननादूर्ध्वावह्निकोणदधितीरभूः ।
पदात् पदात् श्रेष्ठतमः क्रमेण परिकीर्त्तितः ॥
सिन्धुतीरे च यो ब्रह्मन् ! राजते नीलपर्व्वतः ।
पृथिव्यां गोपितं स्थानं तव चापि सुदुर्लभम् ॥
सुरासुराणां दुर्ज्ञेयं मायया च्छादितं मम ।
सर्व्वसङ्गपरित्यक्तश्च तिष्ठामि देहभृत् ॥
दृष्ट्वालयेन नाक्रान्तं क्षेत्रं मे पुरुषोत्तमम् ।
नीलाद्रेरन्तरभुवि कल्पन्त्यर्योधनव्रजतः ॥
वारुण्यां दिशि यत् कुण्डं रोहिणं नाम विश्रुतम् ।
तत्तीरे निवसन्तो मां यजन्तश्चक्रमेचक्षुषा ॥
तदम्भसा क्षीणपापा मम सायुज्यमाप्नुयुः ॥
व्रतेषु तीर्थेषु च यद्दानयोः
पुण्यं यदुक्तं विमलात्मनां हि ।
अहर्निवासाल्लभते च सर्व्वं
निमेषवासात् खलु चाश्वमेधिकम् ॥

जैमिनिरुवाच ।

उदकार्णः समागत्य कृतक्षिह्नायसोत्तमः ।
कारणोदकसम्पूर्णे तस्मिन् कुण्डे निमज्जितः ॥
विलोक्य माधवं नीलरत्नकान्तिं कृपानिधिम् ।
काकदेहं समुत्सृज्य सुठमानं सुदुः क्षितौ ॥
शङ्खचक्रगदापाणिस्तस्य पार्श्वे व्यवस्थितः ॥"
यमं प्रति लक्ष्मीवाक्यम् ।
"पक्षक्रोशमिदं क्षेत्रं समुद्रान्तर्व्यवस्थितम् ।
चक्रोशं तीर्थराजस्य तटभूमौ सुनिर्म्मलम् ॥
सुवर्णवालुकाकीर्णं नीलपर्व्वतशोभितम् ।
योऽसौ विश्वेश्वरो देवः साक्षान्नारायणात्मकः ॥
संयम्य विषयग्रामं समुद्रतटमाश्रितः ।
उपासितुं जगन्नाथं चतुःषष्ट्युत्तमः प्रभुः ॥
यमेश्वर इति ख्यातो यमसंयमनाश्रमः ।
यं दृष्ट्वा पूजयित्वा तु कोटिसिद्धफलं लभेत् ॥
सीमा प्रतीची क्षेत्रस्य शङ्खाकारस्य शङ्खिनि ।
शङ्खाग्रे नीलकण्ठः स्यादेतत् क्रोशं सुदुर्लभम् ॥
परमं पावनं क्षेत्रं साक्षान्नारायणस्य वै ।
शङ्खोत्तरभागस्तु समुद्रोदकसंवृतः ॥
यत्सम्पर्कात् समुद्रोऽत्र तीर्थराजत्वमागतः ।
यथायं भगवान्मुक्तिप्रदो दृष्टिपथं गतः ॥
तथेदं मरणात् क्षेत्रं सिन्धुस्नानाद्विमुक्तिदम् ।
चिच्छेद ब्रह्मणः पूर्व्वं रुद्रः क्रोधात्तु पञ्चमम् ॥
तच्छिरो दुस्त्यजं रुद्रं ब्रह्महत्यं परिभ्रमत् ।
तत्रागतो यदा ब्रह्मकपालं परिसुस्रुवान् ॥
कपालमोचनं तीर्थं द्वितीयावर्त्तसंस्थितम् ।
तस्य दक्षिणपार्श्वे तु मरणं भवमोचनम् ॥
तृतीयावर्त्तसीमायां मुक्तिं मे विमलाङ्गयाम् ।
जानीहि धर्म्मराज ! त्वं मुक्तिमुक्तिफलप्रदाम् ॥
नाभिदेशे स्थितं श्वेतं चक्रं कुण्डं वटो विभुः ।
कपालमोचनं यावद्ब्रह्माग्नेयी प्रतिष्ठिता ॥
मध्यं शङ्खस्य जानीयात् सुगुप्तं चक्रपाणिना ।
तां दृष्ट्वा प्रणमेद्यस्तु भोगान् सोऽश्नाति यथेप्सितान् ॥
सिन्धुराजस्य सलिलात् यावन्मूलं वटस्य वै ।
कोटपश्चिमभुव्यावां मरणान्मुक्तिदो मतः ॥
अन्तर्व्वेदी स्थितं पुण्या वाञ्छन्ति त्रिदशैरपि ।
अत्र स्थितान् हि पश्यन्ति सर्व्वांश्चक्रायुधारिणः ॥
कामाख्या क्षेत्रपालश्च विमला चान्तरा स्थिता ।
साक्षाद्ब्रह्मस्वरूपोऽसौ वृक्षिंहो दक्षिणे विभोः ॥
अन्तर्व्वेदी रथस्यार्थे शङ्खयोऽष्टौ प्रकल्पिताः ।
उग्रेण तपसा पूर्व्वमहं सर्व्वैश्च भाविता ॥
पत्न्यर्थं सा मया दृष्टा गौरी तस्याथ भाविनी ।
सर्व्वसौन्दर्य्यवसतिर्वपुषो मे विनिर्गता ॥
तदा दृष्ट्वा मया भद्रे ! वचनं मे प्रियं कुरु ।
अन्तर्व्वेदीं रथं मम परितस्तं स्वमूर्त्तिभिः ॥

सात्र तिष्ठति मत्प्रीत्या अष्टधा दिक्षु संस्थिता।
मङ्गला वटमूले तु पश्चिमे विमला तथा।
शङ्खस्य पूर्वभागे तु संस्थिता सर्वमङ्गला॥
अर्द्धाग्नौ तथा लक्ष्मा कुबेरदिशि संस्थिता।
कालरात्रिर्दक्षिणस्यां पूर्वस्यान्तु मरीचिका।
कालरात्र्यास्तथा पश्चात् पद्मरूपावस्थिता।
रुद्रागयाश्चाष्टधा भेदं दृष्ट्वा रुद्रोऽपि शङ्करः।
आत्मानमष्टधा भित्त्वा उपास्ते परमेश्वरम्॥
कपालमोचनं नाम क्षेत्रपालं यमेश्वरम्।
मार्कण्डेयं तथेशानं विघ्नेशं नीलकण्ठकम्॥
वटमूले वटेशञ्च लिङ्गान्यष्टौ महेशितुः।
यानि दृष्ट्वा तथा स्पृष्ट्वा पूजयित्वा विमुच्यते॥"
तत्र जगन्नाथस्याविर्भावकारणम्।

जैमिनिरुवाच।

"इन्द्रद्युम्नस्य नृपतेः क्षेत्रे श्रीपुरुषोत्तमे।
जगदीशप्रसादाय पितामहनिदेशतः॥
एकोनं क्रमशः संख्यामवाप पृथिवीपतेः॥
सहस्रं हयमेधस्य यथावद्विधिचोदितम्।
कृत्वा सम्प्रदिशात् पूर्वं या रात्रिरभवद्द्विजाः॥
तस्यास्तुरीयप्रहरे ध्यायतो विष्णुमव्ययम्।
ध्याने तस्मिन् ददर्शासौ महाभाग्यवशान्नृपः।
प्रलयोर्मिव च क्षेतद्वीपं स्फाटिकनिर्मितम्।
तन्मध्ये ददृशे देवं शङ्खचक्रगदाधरम्॥
नीलजीमूतसङ्काशं वनमालाविभूषितम्।
दक्षपार्श्वे स्थितं तस्य अनन्तं धरणीधरम्॥
हलाङ्गलशङ्खाब्जस्फुरद्बाहुचतुष्टयम्।
दक्षपार्श्वे स्थितां विष्णोर्लक्ष्मीं तां शुभलक्षणाम्॥
वराभयाब्जहस्तां वै कुङ्कुमाभां सुलोचनाम्।
ददर्श पद्मासनगां लावण्याम्बुधिपुत्रिकाम्॥
पितामहञ्च ददृशे पुरतोऽस्य कृताञ्जलिम्।
वामपार्श्वस्थितं चक्रं सर्वज्ञानमयं विभोः॥
ततः प्रवृत्ते स्तुत्या नृपतेर्वाग्मिमेधिका।
शृण्वतोः श्लोकैर्दिव्यङ्गिर्वर्णक्रमसमुज्ज्वलैः॥
दक्षिणे तटभूदेशे विश्वेश्वरसमीपतः।
नियुक्ताः सेवका राज्ञा ससम्भ्रमसुपस्थिताः॥
न्यवेदयन्तो नृपतिं कृताञ्जलिपुटा द्विजाः।
देव! दृष्टो महाश्चर्यस्तटभूमौ महोदधेः॥
प्रविष्टायस्समुद्रान्तर्कल्लोलप्रबलक्लमः।
माङ्गल्यवर्णैः सर्वत्र शङ्खचक्रादिकैः शुभैः॥
न दृष्टपूर्वो दृश्योऽयमुद्यत्सूर्यनिभोऽनघः।
नियुक्तानां वचः श्रुत्वा राजा नारदमब्रवीत्॥
तत् किं निमित्तं यद्दृष्टं तत्रश्रेष्ठं वदन्ति ते।
नारदः प्रहसन् वाक्यमुवाच नृपसत्तमम्॥
उपस्थितस्तु ते भाग्यं स्वप्ने यद्दृष्टवान् पुरा।
श्वेतद्वीपे विश्वमूर्तिर्दृष्टो यो विष्णुरव्ययः।
तदङ्गस्खलितं लोम तरुत्वमुपपद्यते।
तद्भाग्यवशगः सर्वलोकानां नयनातिथिः॥
भविष्यति महाराज! सर्वकल्मषनाशनः।
समाप्यावभृथस्नानं तटान्ते सरितां पतेः॥
उत्सवं सुमहत् कृत्वा कृतकौतुकमङ्गलम्।
महावेद्यां स्थापयाद्य यज्ञेशं तरुरूपिणम्॥
विचार्यैत्यं सुरा मुक्तौ तौ च नारदभूभुजौ।

ससन्दृष्टौ ततो यातौ यत्रासौ भगवान् हरिः॥
पुनः पुनः प्रणम्येनं हर्षाश्रुनयनो नृपः।
द्विजैराहारयामास तरुं कल्लोललोहितम्॥
सगन्धाक्षतपुष्पाद्यैर्दिव्यं महावेदीं विनिन्यतुः।
वचसा नारदस्येनं पूजयामास पार्थिवः॥
पूजावसाने पप्रच्छ नारदं मुनिसत्तमम्।
कीदृशीं प्रतिमां विष्णोर्घटयिष्यति कः पुनः॥
विचारयन्तौ तावित्थं यावन्नारदपार्थिवौ।
अशरीरा ततो वाणी शुश्राव चान्तरीक्षतः॥
अपौरुषेयो भगवान् सद्विचारपथे स्थितः।
सुगुह्यायां महावेद्यां स्वयं सोऽवतरिष्यति॥
प्रच्छाद्यतां दिनान्येव यावत् पञ्चदशानि वै।
उपस्थितोऽयं यो वृक्षः शुक्लपार्श्वस्तु वह्निकौ॥
एनमन्तः प्रवेश्यैव द्वारं बध्नन्तु यत्नतः।
बहिर्वाद्यानि कुर्वन्तु यावत्तु घटना भवेत्॥
श्रुतस्तद्घटनाशब्दो बाधिर्यान्धत्वदायकः।
नरके वसतिश्चैव कुर्यात् सन्ताननाशनम्॥
नान्तः प्रवेशनं कुर्यान्न पश्येच्च कदाचन।
नियुक्तान्यः प्रपश्येच्चेद्राज्ञो राज्यस्य चैव हि॥
दृष्ट्वापि महाभीतिरन्यता च युगे युगे।
तच्छ्रुत्वा नारदाद्यास्ते यथोक्तं विष्णुना स्वयम्॥
चिकीर्षन्ति तथा कर्तुं तत्रायातस्तु वह्निकौ।
प्रोवाच नृपतिं सोऽथ स्वप्ने दृष्टस्तु याज्ञया॥
ता एवाहं घटिष्यामि दारुणा दिव्यरूपिणा।
इत्युक्त्वान्तर्दधे वेदां दृढवर्हिरूपधृक्॥
वचनार्थं मनुष्याणां साक्षान्नारायणो विभुः।
ततः स पृथिवीपालस्तथा कृत्वान्तरीक्षगा॥
यदुवाच गिरां देवी तत्तत् परिचचार च।
निर्ववाह स्वयं देवः क्रमात् पञ्चदशे दिने॥
चतुर्मूर्तिः स भगवान् यथा पूर्वं मयोदितः।
दिव्यसिंहासनगतो बलभद्रसुदर्शनैः॥
शङ्खचक्रगदापद्मलक्ष्मीदुर्जनार्दनैः।
हलं मूषलचक्राब्जं धारयन् पन्नगाकृतिः॥
क्षत्रौक्षतपलाशप्रसुकुटोज्ज्वलकुण्डलः।
सुभद्रा चारुवदना वराभयधारिणी॥
लक्ष्मीः प्रादुर्भवेयं सर्वचैतन्यरूपिणी।
सुदर्शनन्तु यच्चक्रं सदा विष्णोः करे स्थितम्॥
शस्त्राग्रशस्त्रमध्यस्थं तद्रूपन्तु तुरीयकम्॥ *॥
निर्वृत्ते भगवद्रूप चतुर्द्धा दिव्यरूपिणी॥
लोकानामुपकाराय पुनराहान्तरीक्षगा।
पटैराच्छाद्य सुदृढं नृपते! प्रतिमास्विमाः॥
स्वं स्वं वर्णं प्रापयाशु वर्णकैश्चित्रकर्मणा।
अस्थ्नां रसरूपेण हरेः पापाय हेतवः॥
गोपनीयाः प्रयत्नेन पट्टनिर्वासवस्त्रकैः।
शिल्पिभिः कर्मकुशलैर्दृढमाच्छादयाशुतः॥
वर्षे वर्षे च संस्कार्या पूर्वसंस्कारमोचनात्।
ऋते वस्त्रजलेपन्तु न तु दिव्यशरीरतः॥
प्रमादाद्यदि तं लेपमपनीयेत कश्चन।
दुर्भिक्षं मरणं राज्ये सन्ततिश्चास्य क्षीयते॥
नेक्षितव्यास्त्वया राजन्! कदाचिदपवारणाः।
मनुष्येण च राजेन्द्र! हरेः सुमहतेजसः॥
तस्मात् सुचिरा दृष्ट्वा मद्दुःखमिव निर्वृताः।

नीलाद्रौ कल्पवृक्षस्य वायव्यां शुभलक्षतः॥
प्रदेशे सुमहत्स्थाने प्रासादं सुदृढायतम्।
उत्तरे नरसिंहस्य सहस्रकरसङ्कुलम्॥
कारयित्वा प्रतिष्ठाप्य तत्रेनं विनिवेशय।
पुरा स्थितः पर्वतेऽस्मिन् योऽभ्यर्चयति माधवम्॥
नाम्ना विश्वावसुर्नाम शबरो वेद्यवोत्तमः।
तस्य सन्ततिरेवास्य सेवनस्यागकर्मणि॥
नियुज्यतां महाराज! भविष्यत्कुशलप्रदः।
ततः स नृपतिः श्रीमान् शिल्पशास्त्रविशारदान्॥
सत्कारैर्दानमानैश्च योजयामास सारदम्।
दिने दिने सुघटितः प्रासादो वत्सरे द्विजाः॥
परितः पूर्यमाणस्तु शुक्लपक्षे यथा शशी॥

नारद उवाच।

प्रवर्षं बहु राजेन्द्र! स्थित्वा चास्मिन् चिरं भुवि।
आराधय जगन्नाथमुपचारैर्महोत्सवैः।
पितामहं द्रष्टुकामो गत्वा वेदन्तिकं विभोः॥
उपदेक्ष्यति सोऽप्यस्य यात्राक्षात्रा महोत्सवाः।
उभौ तौ दिव्ययानेन जग्मतुर्मुनिभूसुरौ॥
प्रदक्षिणीकृत्य हरिं व्योममण्डलमध्यगम्।
दृष्ट्वा पितामहं दूरात् सहारं जगतां नृपः॥
अमन्यत द्विजश्रेष्ठाः साक्षाद्धारमयं हरिम्।
प्रणैः प्रणैर्ययौ भूपः प्रणनाम कृताञ्जलिः॥
स्तवन् प्रणिपतन् भूमौ साश्रुसङ्कलितं व्रजन्।
जानन्नपि हि तत् कार्यं मानवनृपसत्तमम्॥
उवाच परमप्रीत इन्द्रद्युम्नं पितामहः।
किमर्थमागतोऽत्यन्त तद् ब्रूहि हृदयस्थितम्॥

इन्द्रद्युम्न उवाच।

आविर्बभूव भगवान् भूतभव्यभवत्प्रभुः।
गत्वा देवं जगन्नाथं स्थापयिष्यसि च प्रभो!॥

ब्रह्मोवाच।

क्षमयतोऽधरां गत्वा यावत् सम्भारसद्विधम्।
करिष्यसि महाभाग! तावदेव व्रजाम्यहम्॥
इन्द्रद्युम्नोऽपि तच्छ्रुत्वा दृष्ट्वा ब्राह्मीं श्रियं द्विजाः।
आजगाम सुखं विप्रा विधिना चानुमोदितः॥
आगत्य च जगन्नाथं चिरादुत्कण्ठमानसः।
दण्डवत् प्रणनामासौ घनरोमाञ्चकञ्चुकः॥
ततः क्रमात् सन्ददृशे विमानाग्यं प्रजापतेः।
सर्वहंसयुते; स्वर्णैरुह्यमानं समन्ततः॥
प्रणिपत्य जगन्नाथं त्रिः परीत्य पितामहः।
आनन्दसिन्धुसंमग्नः सरोमाञ्चवपुः स्वयम्॥
ससृजे तौ ततो ब्रह्मा कृतस्वस्त्ययनः स्वयम्।
ऋषिभिर्नारदाद्यैश्च विद्वद्भिर्ब्राह्मणैस्तथा॥
प्रासादद्वारि रचिते रत्नस्तम्भोपशोभिते।
वासयित्वाभिषेकाय सम्मुखादग्रमण्डपे॥
सुवासिते रत्नकुम्भैस्तीर्थवार्ध्युपबृंहिते।
युक्त्याभ्यां स्त्रीपुरुषयोरभिषेकं पितामहः॥
चकार भगवान् लोकसंग्रहार्थं द्विजोत्तमाः!
ततोऽभ्यक्षतान् देवान् गन्धमाल्योपशोभितान्॥
नीराजयित्वा विधिवत् स्वयं लोकभावनः।
रत्नसिंहासने रम्ये स्थापयामास मन्त्रतः॥
स्थापयित्वा जगन्नाथं दृष्ट्वा तस्य मुखाम्बुजम्।

आयुष्यं मन्त्रराजं सहस्रं प्रजजाप ह ॥
वेदाक्षरसमाने पद्ये अरण्यां प्रत्ययोगतः ।
हता प्रतिष्ठा भो विप्राः शोभने गुरुवासरे ॥"
तन्महाप्रसादमाहात्म्यं यथा,—
"बहून् नियोजयेत्तत्र लोकान् त्रैवर्गिकाद्भुत ।
लौकिकव्यवहारोऽयं प्रयति श्रीः स्वयं ध्रुवम् ।
भुङ्क्ते नारायणो नित्यं तथा पद्मं शरीरवान् ॥
अन्नदं तद्धि नैवेद्यं पापघ्नं ब्रह्महे धारणात् ।
भक्षणाच्चान्नपानादिमहादुरितनाशनम् ॥
आत्मात्मजगतं पापं दर्शनादृष्टिजं तथा ।
आस्वादादूवाकृतं पापं श्रवणाच्च व्यपोहति ॥
स्पर्शनात् त्वक्कृतं पापं मिथालापं तथा द्विजाः ॥
गात्रे वेषाद्देहे पापं शारीरं वै न संशयः ॥
महापवित्रं हि हरेर्निवेदितं
नियोजयेद्यः पितृदेवकर्मसु ।
तृप्यन्ति तस्मै पितरः सुराश्च
प्रयान्ति लोकं मधुसूदनस्य ॥
अतः परं हि वक्ष्यामि हयकर्णेषु भो द्विजाः ॥
नराणां रूपमास्थाय तदश्नन्ति दिवौकसः ॥
विष्ण्वालयगतं तद्धि निर्माल्यं पतितादयः ।
भुञ्जन्ति चेन्न दुष्टं हि यथा विष्णुस्तथैव तत् ॥
निन्दन्ति ये तदज्ञाता ज्ञाताः पण्डितमानिनः ।
स्वयं दग्धरसेह सहते नापराधिनः ॥
येषामत्र न दृक्कर्णेदृष्टवा तेषां हि दुर्गतिः ।
कुम्भीपाके महाघोरे पच्यन्ते तेऽतिदारुणे ॥
चिरस्थमपि संभुक्तं गीतं वा दूरदेशतः ।
यथा तथोपभुक्तं तत् सर्वपापापनोदनम् ॥
नैवेद्यान्नं जगद्भर्तुर्गात्रं वारि समं द्वयम् ।
दृष्टिस्पर्शनचिन्ताभिर्भक्षणादघनाशनम् ॥"
इत्युत्कलखण्डम् ॥ * ॥

स च कलेर्द्वात्रिंशत्सहस्रवर्षपर्य्यन्तं पृथिव्यां स्थास्यति। यथा,—
"प्रयास्यामो हरेर्मूर्त्तिं जगन्नाथस्य भारतम् ।
कलेर्द्वात्रिंशसहस्राब्दे ययौ ब्रह्मा हरेः पदम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

(स्वनामख्यातो बहुग्रन्थकर्त्ता पण्डितविशेषः। अयं हि तैलङ्गवंशोद्भवः। अस्य पिता पेरमभट्ट इति ख्यातः। असौ पण्डितराजजगन्नाथो दिल्लीप्रभोः शाहजहान्-श्वेडखगोर्यवनस्य दाराशाहस्य सभायामासीत्। यतोऽनेन जगदाभरणकाव्ये दाराशाहस्यैव यशोवर्णनं कृतम्। अपिच भामिनीविलासस्थमाद्यो "दिल्लीश्वरजगदीश्वरसाहे गीतं नवीनं वयः" इत्युक्तम्। दाराशाहस्तु १५८१ एकाशीत्यधिकपञ्चदशशतकाब्दपर्य्यन्तं जीवित आसीत्। अतः पण्डितराजजगन्नाथोऽयं तात्कालिक इत्येवावातम्। अनेन पण्डितराजपदवी शाहजहानगुणज्ञाजो दिल्लीप्रभोः प्राप्तेति ततुल्यतादात्म्यविलासनामकग्रन्थादेवागम्यते यथा,—
"अथ सकलजोकविस्तारविस्तारितमहोपकारपरम्पराधीनमानसेन प्रतिदिनमुदयदनवद्यगद्यपद्यानेकविद्याविद्योतितान्तःकरणैः कविभिरुपास्यमानेन कृतयुगोद्भूतकलिकालेन कुमतिदुरभिनिवेशसमाच्छादितवेदवनमार्गविलोकनाय सपदीपितसुतर्कदहनज्वालाजालेन मूर्त्तिमतेव नव्यावासप्रकाशमयःप्रसादेन माथुरकुलसमुद्रेन्दुना रायमुकुन्देनादिष्टेन सार्व्वभौमश्रीशाहजानुप्रसादाधिगतपण्डितराजपदवीविराजितेन तैलङ्गकुलावतंसेन पण्डितजगन्नाथेनाक्षविलासाख्येयमाख्यायिका निरमीयत। सेयमनुग्रहेण बहुदयानामनुदिनसुज्ञाविता भवतात् ॥"

एतत्पण्डितविरचिता बहवो ग्रन्थाः सन्ति। तेषु अद्यावधि ज्ञाताश्चैते, रसगङ्गाधरः १, यमुनावर्णनचम्पूः २, रतिमन्मथनाटकम् ३, वसुमतीपरिणयनाटकम् ४, जगदाभरणकाव्यम् ५, प्राणाभरणकाव्यम् (कामरूपदेशाधिपस्य प्राणनारायणभूपस्य स्तुतिरूपोऽयं ग्रन्थः) ६, पीयूषलहरी ७, अमृतलहरी (यमुनास्तुतिरूपोऽयं ग्रन्थः) ८, सुधालहरी (सूर्य्यस्तवरूपोऽयं ग्रन्थः) ९, करुणालहरी (विष्णुलहरी वा) १०, लक्ष्मीलहरी ११, भामिनीविलासः १२, मनोरमाकुचमर्द्दिनी १३, अक्षघाटीकाव्यम् १४, आसफविलासः १५ ॥ * ॥

तर्कपञ्चाननोपाधिकोऽपरपण्डितविशेषः। अयं हि विवादभङ्गार्णवसेतु-रामचरितादिग्रन्थानां प्रणेता। पितास्य रुद्रदेवः माता च अम्बिका। रुद्रदेवस्तु चतुःषष्टितमवयसि पूर्व्वसदृधर्म्मिण्यां सप्ततायां सुतायां संसारविरक्तः काश्मीरावासुखमभिलषन् चिरसुहृदं निशानन्दपुरनिवासिनं ज्योतिर्विद्याविशारदं सुप्रसिद्धं चन्द्रशेखरवाचस्पतिमभिगम्य स्वीयान्तिमदशाफलानि पृष्टवान्। चन्द्रशेखरस्तु रुद्रदेवस्य जन्मलग्नमासुसारतश्चरमे वयसि सुप्रसिद्धपुत्रलाभरूपं शुभफलमवगम्य वासुदेवनाम्नः कस्यचिद् विप्रवरस्यास्विकानाम्नीं कन्यामुदवाहयामास। रुद्रदेवस्तु ज्योतिर्विद्यापारदर्शिनं चन्द्रशेखरस्य शास्त्रादिकां परिक्षीय सत्पुत्रप्राप्तिकामो काश्मीरमभिगम्य विश्वेश्वरसुहृदियैकविंशतिपुरश्चरणं कृतवान्। चरमपुरश्चरणदिवसीयरात्रिमां शिवधामे प्राप्तसत्पुत्रलाभरूपः प्रहृष्टमनाः पुनः स्वस्यां चिरेवीप्रदेशं प्रत्यागत्य गार्हस्थ्यधर्म्मानुरक्तो बभूव। अथ गच्छति काले पतिपरायणास्विका गर्भमुपलभ्य १६१६ शाके (११०१ परिमितवङ्गाब्दे) सौराब्दिनस्य दैवीपद्यीयपञ्चम्यां पुत्ररत्नं जगन्नाथं प्रसूतवती। रुद्रदेवस्तु नवजातपुत्रस्य जातसंस्कारादिकं विधाय राजशुसारतो रामराम इति नाम चक्रे परं कुमारस्य मातामहो वासुदेवः अस्मिन्नेव समये श्रीजगन्नाथक्षेत्रात् तीर्थस्नानात् प्रत्यागत्य दौहित्रसुखं दृष्ट्वा जगन्नाथ इत्याख्येयमयोजयत्। ततः प्रभृत्येवायं जगन्नाथ इति नाम्ना प्रसिद्धोऽभूत्।

अयन्तु बाल्यावस्थायामतीवचञ्चलप्रकृतिर्दुर्दान्तोऽपि स्मृतिशक्तिसत्यवादितादिगुणनिकरैश्च बहूनां पितरौ प्रियपात्रमासीत्। अथ प्रथमतः पितृसन्निधाने व्याकरणमधीत्य ततो श्वेतातनस्य न्यायसङ्गतीपनामकस्य भवदेवस्य समीपे साहित्यादिकमधीतवान्। ततो भवदेवस्य परलोकगमनानन्तरं कामाणपुरनिवासिनं रघुदेवविद्यावाचस्पतिं अध्यापकत्वेन वीक्ष्य दर्शनशास्त्रादिचिन्तया कालं यापयामास। अस्य एतादृशी प्रखरा स्मृतिशक्तिरासीत् यदनधीतस्यापि भिन्नदेशीयभाषायां निबद्धस्य ग्रन्थस्य द्वित्रिपत्राणि एकवारमात्रमाकर्ण्यैवायं अनर्गलं अश्रान्त इव आवर्त्तयितु समर्थः। एतादृशीमेधाशक्तिरेवैनं अल्पसमयेन बहुशास्त्रपारदर्शिनमकरोत्।

पञ्चदशवर्षवयस्क एवासौ द्रौपदीनाम्नीं सुलक्षणां कन्यामुपयेतवान्। विवाहात् परमेवास्य श्वेतातो भवदेवः परलोकं गतः। माता तु पूर्व्वमेव कालवर्म्मसुपगता पिता च चतुर्व्विंशतिवयस्कमेनमवलोक्यैव इह लोकं तत्याज। पितृवियोगानन्तरमेवायं छात्रानध्यापयितुं प्रवृत्त आसीत्।

अथ कदाचित् वर्द्धमानाधिपतिमहाराजखिलोकचन्द्रबाहादुरोऽस्य पाण्डित्यप्रभावमवगम्य राजसभामधिरोहयितुं निमन्त्रयामास। जगन्नाथस्तु राजप्रसादसुपलब्धुं राजसभां प्रविश्य तर्कजालेन तत्रस्थान् पण्डितान् जितवान्। महीपतिस्तु जगन्नाथस्य तादृशीं बुद्धिशक्तिं मेधाशक्तिञ्चावलोक्य विशेषेण परीक्षितुं पथि दरस्य समयवसुनो वार्त्तां विज्ञापयितुमादिदेश। जगन्नाथस्तु नृपतेर्मनोऽभिप्रायमवगम्य त्रिवेणीप्रदेशात् वर्द्धमानपर्य्यन्तं यावत् पथि स्थितानां प्रत्येकपादपमन्दिरावासमपि वृत्तान्तं कथयामास। राजा तु स्वकर्म्मचारिभिरेतद्वृत्तान्तस्य याथार्थ्यमुपगम्य सातिशयेनानन्दितो बभूव।

एकदा सुधींद्रावादाख्यप्रदेशनृपतेर्यवनस्य मन्त्री गन्दकुमारोऽस्य पाण्डित्यमवगम्य (नवाब) महीपतिसभीपमेनमानयामास। नृपतिस्तु बहुविधैर्दुरूहप्रश्नैरेनं वञ्चयितुमभिलषन् परं जगन्नाथः सौवबुद्धिप्राखर्य्येण नृपतिप्रेषितप्रश्नानां सदुत्तरं दत्वा तं सन्तोष्य च तस्माद् बहुशार्थप्रदां भूम्यादिसम्पत्तिं लब्धवान्।

अथ कालचक्रगत्यनुसारतो यवनराजानां वैभवविरहं गतः इंराजराजानां सौभाग्यसमयः वसुपागतश्च। तदा इंराजनृपतयस्तदानीन्तनप्रजारञ्जनार्थं विचारकार्य्यस्य सौकर्य्याय जगन्नाथतर्कपञ्चाननं समाहूय व्यवहारोपयोगिनं ग्रन्थमेकं प्रणेतुमादिदेशुः। जगन्नाथस्तु नवीननृपतिभिस्तथादिष्टः "विवादभङ्गार्णवसेतु" नामकं ग्रन्थं प्रणीतवान्।

अस्य द्वितीयवयसि सहधर्म्मिणी द्रौपदी बहुपुत्रपौत्रादिकं संरक्ष्य परलोकं गता। अस्य द्वौ पुत्रौ तिस्रः कन्याश्चाभवन्। पुत्रयोर्यवनजामातार्न्नभौम एव ज्येष्ठः प्रतिभाशाली बहुशास्त्र-

पारदर्शी च। जगन्नाथोऽयमन्तिमावस्थायां दृष्ट्वा प्रपौत्रादिसुखमवलोक्य अतिदुर्लभमेतादृशं संसारसुखमनुभूय शकनरपतेः १७२६ वत्सरे (१२१४वङ्गाब्दे) आश्विनशुक्लपञ्चदशतीयायां गङ्गातीरे प्राणान् तत्याज। ह्यतोः प्राक्कालपर्य्यन्तमेवास्येन्द्रियशक्तिर्न जातम्। गङ्गातीरं गतेन सुस्थुंशासुना ह्यतप्राक्काले हतः श्लोको यथा,—

"केचिद् ब्रह्म निराकारं साकारञ्च केचन।
वयन्तु दीर्घयोगेन नीराकारमुपास्महे॥"इति॥)

जगद्गुः, पुं, (जगता विश्वस्थजीवजातेन गम्यते इति। जगत्+गम्+बाहुलकात् डुः। यद्वा, गु+क्विप् एषो। गु नैवनं स्तुतिरित्यर्थः जगति विश्वसंसारे गुः स्तुतिर्यस्य। सर्व्वजीवस्तुतत्वाद्वेधास्यतथात्वम्।) अग्निः। जन्तुः। इति विश्वः शब्दरत्नावली च॥ जगद्गुरपि पाठः॥

जगरः, पुं, (जागर्त्ति संग्रामेऽनेनेति। जागृ+अप्। एषोदरादित्वात् साधुः।) कवचः। इति हेमचन्द्रः। ३। ४३०॥

जगलः, पुं, (पुनःपुनरतिशयेन वा गलतीति। गल क्षरणे+यङ्लुगन्तात् अच्। संज्ञापूर्व्वकत्वात् "दीर्घोऽकितः।"७।४।८३। इति न दीर्घः। यद्वा, जन्+डः। जः जातः सन् गलति निर्गच्छतीति। गल+अच्।) सुराकरम्। मेया इति भाषा॥ तत्पर्य्यायः। मेदकः २। इत्यमरः। २। १०। ४२॥ (यथा, भावप्रकाशे मध्यखण्डे दशमेऽध्याये।

"तद्धो जगलो ज्ञेयो मेदको जगलाह्वः॥")

मदनवृक्षः पिण्डमद्यम्। (तद्गुणा यथा,—

"मूलप्रवाहिकाटोपकफवातार्शसां हितः।
जगलो गाहिरूक्षोष्णः ग्रोफघ्नो मुक्तपाचनः॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥

"ग्राम्यो जगलः पक्वो रूक्षस्तृट्कफशोफहृत्।
हृद्यः प्रवाहिकाटोपदुर्नामानिलशोफहृत्॥"

इति सुश्रुते सूत्रस्थाने ४५ अध्याये॥)

धूर्त्ते त्रि। इति मेदिनी। धे, ६१॥ कवचः। रलयोरैक्यात्॥ गोमये, क्ली। इति रत्नमाला॥ (यथा, वैद्यकरत्नमालायाम्।

"गोमयं जगलं गोविट् गोदग्धं तच्च गोग्रहत्॥")

जग्धं, त्रि, (अद्यते स्म इति। अद् भक्षणे+क्तः। "अदो जग्धिर्लयुति किति।" २। ४। ३६। इति जग्धादेशः। इकार उच्चारणार्थः।) भुक्तम्। इत्यमरः। ३। २। १११॥

("स्विन्नं घर्मं कुटजवल्कमजग्धं जग्धम्॥"

इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे॥)

जग्धिः, स्त्री, (अद भक्षणे+क्तिन्। "अदो जग्धिर्लयुति किति।" २। ४। ३६। इति जग्धादेशः।) सकृद्भोजनम्। इत्यमरः। २।६।५५॥ भक्षणम्। इति हेमचन्द्रः॥ (यथा, मनौ। ३। ११५।

"अदत्त्वा तु य एतेभ्यः पूर्व्वं भुङ्क्तेऽविचक्षणः।
स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः॥")

जग्मिः, पुं, (गच्छति इतस्ततो वातीति। गम+"आदृगमहनजनः किकिनौ लिट् च।" ३।२। १७१। इत्यस्य "भाषायां धात्वन्तरगमिजनिनमिभ्यः।" इति वार्त्तिकोक्त्या किन्नित्वच।) वायुः। इति केचित्॥

जघनं, क्ली, (हन्यते इति। हन्+"हन्तेः शरीरावयवे डे च।" उणा। ५। ३२। इति अच् द्वित्वञ्च। "अभ्यासाच्च।" ७। ३। ५५। इति कुत्वम्।) स्त्रीकट्याः पुरोभागः। (यथा, माघे। ५। २६।

"नाभिह्रदेः परियहीतरयाद्यि यत्र
स्त्रीणां दृषज्जघनसेतुनिवारितानि॥")

कटिः। इति मेदिनी। ने, ६७॥ (यथा, देवीभागवते। १। ६। ८१।

"भगवान् द्विगुणं चक्रे जघनं विस्तितौ तदा।
श्रोणिं सन्दधतां तत्र जघने परमाद्भुते॥")

जघनकूपकौ, पुं, (जघनकूपे इव कायतः इति। कै+कः।) कुकुन्दरौ। इति हलायुधः॥ द्विवचनान्तोऽयं शब्दः॥

जघनेपत्ता, स्त्री, (जघने इव मध्यभागे पत्तमस्याः।) काकोदुम्बरिका। इत्यमरः। २। ४। ६१॥

जघन्यः, त्रि, (कुटिलं हन्यते निन्द्यते इति। हन+यङन्तात् अचो यत्। अनित्यमागमशास्त्रमिति नुगतोऽनुनासिकान्तस्येति न नुक्। यद्वा, जघनमिव। "शरीरावयवाद्यत्।" ५। ३। १०३। इति यत्।) चरमः। (यथा, वैद्यकचक्रपाणिसंग्रहे क्षेत्राधिकारे।

"उत्तमस्य पलं मात्रा त्रिभिरत्रैव मध्यमे।
जघन्यस्य पलार्द्धेन क्षेत्रकाण्यौषधेषु च॥")

गर्हितः। (यथा, महाभारते। ३। ३५। १३।

"तत्र द्यूतमभवन्नो जघन्यं
तस्मिन् जिताः प्रव्रजिताश्च सर्व्वे॥"*॥

जघने कटिदेशे भवम्। दिगादित्वात् यत्।) मेहने, क्ली। इति मेदिनी। ये, ८३॥ पुं, शूद्रः। इति शब्दरत्नावली। (हीनजातिमात्रम्। यथा, मनौ। ८। ३६६।

"उत्तमां सेवमानस्तु जघन्यो वधमर्हति॥"

"हीनजातिस्त्रियं मोहादुद्वहन्तौ व्रजत्यधः।
क्षत्रियाम्बष्ठकन्यासु जात्यपेक्षयाऽनुक्रमेण मारवात्मकं वधमर्हति॥" इति तट्टीकायां कुल्लूकभट्टः॥*॥ पृष्ठभागः। यथा, रामायणे। २। १०४। २६।

"ततो जघन्यं सहितैः सचिवैः
पुरप्रधानैश्च तथैव सैनिकैः।
जनेन धर्म्मज्ञतमेन धर्म्मवा-
नुपोपविष्टो भरतस्तदाग्रजम्॥"

"जघन्यं जघनभागं पृष्ठभागमाश्रितः सन्।" इति तट्टीकायां रामानुजः॥*॥ राजानुचरविशेषः। यथा, हर्षचरितायाम्। ६८। ३१, ३२—३४।

"पश्चात्परे वामनको जघन्यः
कुब्जोऽपरो मङ्कणकोऽथ सामी।
पूर्व्वोक्तभूपानुचरा भवन्ति
सङ्कीर्णसंज्ञाः ग्रथु लक्षणेस्तान्॥"
"मालव्यसेवी तु जघन्यनामा
खड्गेक्षुतुल्यश्रवणः सुगन्धिः।
सुक्लेश सारः पिशुनः कविश्च
रूक्षच्छविः स्थूलकराङ्गुलीकः॥
क्रूरो धनी स्थूलमतिः प्रतीत-
स्ताम्रच्छविः स्यात् परिहासशीलः।
उरोऽङ्घ्रिहस्तेष्वसिशक्तिपाश-
परश्वधाङ्कश्च जघन्यनामा॥")

जघन्यजः, पुं स्त्री, (जघन्ये चरमे जायते इति। जन्+"सप्तम्यां जनेर्डः।" ३। २। ६७। इति डः।) शूद्रः। कनिष्ठे, त्रि॥ इति मेदिनी॥ जे, ३२॥ (यथा, महाभारते। १। ६५। १६।

"एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः॥")

जङ्घिः, पुं, (हन्यते इति। हन+"आदृगमहनेति।" ३। २। १७१। इति किन् द्वित्वञ्च।) हननयोग्यास्त्रम्। इति संक्षिप्तसारः॥ (यथा, ऋग्वेदे। ६। ६१। २०।

"जङ्घिर्भिरभिमिन्वियं सखिर्न्नाजं दिवे दिवे॥")

जङ्घुः, त्रि, (हन्तीति। हन वधे+"जङ्घन्यञ्च।" उणा। १।२३। चकारात् हन्तेरपि कुर्द्वित्वञ्च।) हन्ता। हननकर्त्ता। इत्युणादिकोषः॥

जङ्गमः, त्रि, (पुनः पुनर्गच्छतीति। गम्+यङ्+अच्।) अस्थावरः। गतिशक्तिविशिष्टः। तत्पर्य्यायः। परिष्णु २ चरः ३ चलः ४ इङ्गः ५ चराचरः ६। इत्यमरः। ३। १। ७४॥ (यथा, रघौ। २। ४४।

"मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रलयहेतुरन्तः॥"

"ओषधयस्तावद्द्विविधाः स्थावरा जङ्गमाश्च।"

"जङ्गमाश्चापि चतुर्व्विधा जरायुजाण्डजस्वेदजोद्भिज्जाः। तत्र पशु-मनुष्य-वाजादयो जरायुजाः। खग-सर्प-सरीसृप-प्रभृतयोऽण्डजाः। कृमिकीटपिपीलिकाप्रभृतयः स्वेदजाः। इन्द्रगोपमक्कूकप्रभृतय उद्भिज्जाः॥" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये॥)

जङ्गमकुटी, स्त्री, (जङ्गमा गतिशक्तिविशिष्टा कुटी गृहमिव।) छत्रम्। इति त्रिकाण्डशेषः॥

जङ्गलं, त्रि, (पुनः पुनरतिशयेन वा गलतीति। गल+यङ्+अच्। एषोदरादित्वात् साधुः।) निर्व्वारिदेशः। इति शब्दरत्नावली॥ निर्ज्जनस्थानम्। पिच्छिले, क्ली। इति मेदिनी। ले, ६३॥

जङ्गालः, पुं, (जङ्घां कुटिलगतिं जलति प्राप्नोतीति। जल+"कर्म्मण्यण्।" ३।२।१ इत्यण्।) रोधविशेषः। जाङ्गाल इति भाषा॥ तत्पर्य्यायः। आलिः २ पङ्क्तारः ३ सेतुः ४ सचरः ५। इति जटाधरः॥

जङ्गुल, क्ली, विषम्। इति त्रिकाण्डशेषः॥

जङ्घा, स्त्री, (जङ्घन्यते कुटिलं गच्छतीति। हन वधे गतौ च यङ्लुगन्तात्+"अन्येभ्योऽपीति।"

ङ:।) गुल्फोर्द्धजान्वधोभाग:। जाङ् इति भाषा॥ तत्पर्य्यायः। प्रहस्ता २। इत्यमरः॥ टङ्का ३ टङ्कम् ४ टङ्किका ५। इति शब्दरत्नावली॥ (यथा, महाभारते। ५।१३३।१६।
"शुचुर्निमज्जता यान्ती जङ्घायां प्रपतिष्यता॥")

जङ्घाकरिक:, पुं, (जङ्घा तत्साध्यगतिरेव आकरो निधि: जीविकानिर्व्वाहधनस्येत्यर्थः। सोऽस्यस्येति। जङ्घाकर+"अत इनिठनौ।" ५।२।११५। इति ठन्।) धावक:। तत्पर्य्यायः। आङ्गिक:२। इत्यमरः।२।८।७१॥ डाकचक्री३। इति शब्दरत्नावली॥

जङ्घात्राणं, क्ली, (जायतेऽनेनेति। त्रै+करणे ल्युट्। त्राणं वर्म्म। ततो जङ्घायास्त्राणमिति।) जङ्घासन्नाह:। तत्पर्य्यायः। मङ्क्षुणम् २। इति त्रिकाण्डशेष:॥

जङ्घाल:, त्रि, (प्रशस्ता वेगवतीत्यर्थः जङ्घास्त्यस्येति। जङ्घा+"सिध्मादिभ्यश्च।"५।२।९७। इति लच्। जङ्घावत्त्वेनैव वेगस्य जननात्तथात्वम्।) अतिवेगवान्। तत्पर्य्यायः। अविष्व:२। इत्यमरः। २।८।७३॥ (यथा, काशीखण्डे गङ्गामाहात्म्ये। २६।६४।
"जाह्नवीत्था जगन्माता जया जङ्घाल-
वीचिका॥")

हरिण:। एण:। कुरङ्ग:। ऋष्य:। एषत:। न्यङ्कु:। शृङ्गर:। राजीव:। सृङ्की। (यथा,—
"एणहरिणश्यैकुरङ्गकराजतृतमालशृरभ-
श्यैरुष्ट्रघृतचारुष्करुष्टगमाल्काप्रभृतयो
जङ्घाला मृगा: कषाया मधुरा लघवो वातपित्त-
हरास्तीक्ष्णा हृद्या वस्तिशोधनाश्च॥" इति सुश्रुते सूत्रस्थाने ४६ अध्याय:॥)
एषां मांसगुणा:।
"जङ्घाला: प्रायशः सर्व्वे पित्तश्लेष्महरा: स्मृता:।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धना:॥"
इति भावप्रकाश:॥

जङ्घाशूलं, क्ली, (जङ्घाया: शूलं रोगविशेष:।) जङ्घावेदना। तस्यौषधं यथा,—
"हरीतकी शृङ्गवेरं देवदारु च चन्दनम्।
क्वाथयेच्छागदुग्धेन अपामार्गस्य मूलकम्॥
जङ्घाशूलमरुत्सक्तं सप्तरात्रे तु नाशयेत्॥"
इति गारुड़े १८७ अध्याय:॥

जञ, युधि। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट्।) जञति। युधि योधने। इति दुर्गादास:॥

जञ, इ युधि। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट्।) इ, जञ्जते। युधि योधने। इति दुर्गादास:।

जञ्जपूक:, त्रि, (पुन:पुनरतिशयेन वा जपतीति। जप+यङ्+"यजजपदशां यङ:।"३।२।१६६। इति ऊक:।) पुन:पुनर्जपकर्त्ता। इति मुग्धबोधम्॥

जट, संहतौ। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट्।) जटति केशा: परस्परं सम: स्यादित्यर्थः। इति दुर्गादास:॥

जटा, स्त्री, (जटति परस्परं संलग्ना भवतीति। जट्+अच्। यद्वा, जायते प्रादुर्भवतीति। जन्+"जनेष्टन् लोपश्च।" उणां। ५।३०। इति टन् अन्यलोपश्च।) व्रतिनां शिखा। जयकच:। तत्पर्य्यायः। शृटा २। इत्यमरः॥ अटि:३ जटी४ जूट:५ लुटकम्६ शृटम्७ कौटीरम् ८ जूटकम् ९ हस्तम् १०। इति शब्दरत्नावली॥ (यथा, महाभारते।३।११२।२।
"नीला: प्रसन्नाश्च जटा: सुगन्धा
हिरण्यरज्जुग्रथिता: सुदीर्घा:॥")
मूलम्। यथा,—
"यदि न समुहरन्ति यतयो हृदि कामजटा
दुरधिगमोऽसतां हृदि गतोऽस्मृतकण्ठमणि:॥"
इति श्रीभागवते श्रुतिस्तवे ८७ अध्याय:॥
मांसी। इति मेदिनी। टे, १५॥ रुद्रजटा। (यथा, सुश्रुते कल्पस्थाने ७ अध्याये।
"कालेयकं पद्मकञ्च मधुकं नागरं जटाम्॥")
शृतावरी। इति राजनिर्घण्ट:॥ कपिकच्छु:। इति रत्नमाला॥ (वेदपाठविशेष:। यथा,—
"जटा माला शिखा रेखा ध्वजो दण्डो रथो घन:।
अष्टौ विकृतय: प्रोक्ता: क्रमपूर्व्वं महर्षिभि:॥")

जटाजूट:, पुं, (जटानां जूट: समूह:।) जटासमूह:। यथा, महानाटके।
"जटाजूटग्रन्थिं दृढ़यति रघूणां परिवृढ़:॥"
शिवजटा च॥

जटाज्वाल:, पुं, (जटेव ज्वाला यस्य।) प्रदीप:। इति हारावली। २४॥

जटाटङ्क:, पुं, (जटा टङ्क इवास्य।) शिव:। इति त्रिकाण्डशेष:॥

जटाटीर:, पुं, (जटामटतीति। अट्+बाहुलकादीरन्।) शिव:। इति त्रिकाण्डशेष:॥

जटाधर:, पुं, (धरतीति। धृ+अच्। जटाया धर:।) शिव:। इति शब्दरत्नावली॥ (यथा, महाभारते। १३। १७। १२६।
"त्रिनेत्रश्च विषग्रीवो मणिविद्धो जटाधर:॥")
वृक्षभेद:। इति त्रिकाण्डशेष:॥ पर्य्यायनामार्थकोषाख्याभिधानतन्त्रकारश्च॥ (स्कन्दस्यानुचरविशेष:। यथा, महाभारते। ६। ४५। ५६।
"परिश्रुत: कोकनद: लम्बकेशो जटाधर:॥"
देशविशेष:। स तु दाक्षिणात्यप्रदेश:। यथा, बृहत्संहितायाम्। १४। १३।
"अथ दक्षिणेन।" इत्युक्त्वा,—
"कौशद्वीपजटाधरकावेर्यो रिष्यमलकञ्च॥"
इत्युक्तवान्॥

जटाधारिन्, त्रि। यथा, रामायणे।२।८६।२५।
"जटाधरौ तौ हमचीरवाससौ
महाबलौ कुञ्जरयूथपोपमौ॥")

जटामांसी, स्त्री, (जटां जटाकृतिं मन्यते इति। मन+"मनेर्दीर्घश्च।" उणां।३।६४। इति सौ दीर्घश्च।) सुगन्धिद्रव्यविशेष:। तत्पर्य्यायः। नलदम् २ बह्निनी ३ पेषी ४ मांसी ५ कचजटा ६ जटी ७ किरातिनी ८ जटिला ९ लोमशा १० तपस्विनी ११। इति रत्नमाला॥ भूतजटा १२। इति भावप्रकाश:॥ पेशी १३ क्रव्यादि १४ पिशिता १५ पिशी १६ पेशिनी १७ जटा १८ हिंस्रा १९ मांसिनी २० जटाला २१ नलदा २२ मेषी २३ तामसी २४ चक्रवर्त्तिनी २५ माता २६ अग्नतजटा २७ जननी २८ जटावती २९ रुद्रगर्भा ३० जटामांसी ३१ मिंसी ३२ मिसि: ३३ मिसी ३४ लोमिका ३५ मिसि: ३६। इति शब्दरत्नावली॥ अस्या गुणा:। सुरभित्वम्। कषायत्वम्। कटुत्वम्। शीतलत्वम्। कफभूतदाहपित्तनाशित्वम्। कान्तिमोदकारित्वञ्च। इति राजनिर्घण्ट:॥ तिक्तत्वम्। मेध्यत्वम्। बलप्रदत्वम्। स्वादुत्वम्। त्रिदोषास्रवीसर्पकुष्ठनाशित्वञ्च। इति भावप्रकाश:॥ अनुलेपनेन ज्वररुग्नतानाशित्वम्। इति राजवल्लभ:॥

जटायु:, पुं, (जटां याति प्राप्नोतीति। या+रुगयादित्वात् कु:। सान्तपक्षे जटं संहतमायुर्यस्य।) खगामखावपक्षी। स तु अरुणपुत्र: सम्पातेर्भ्रातु: दशरथराजसख: सीताहरणसमये रावणेन हत:। इति रामायणम्॥ (यथा, च महाभारते। ३।२७८। १—७।
"सखा दशरथस्यासीत् जटायुरुरुविक्रम:।
अरुणानो महावीर: सम्पातिर्यस्य सोदर:॥
स ददर्श्व तदा सीतां रावणाङ्कगतां क्षुधाम्।
सक्रोधोऽभ्रवत् पक्षी रावणं राक्षसेश्वरम्॥
अथैनमब्रवीद्गृध्रो मुञ्च मुञ्चस्व मैथिलीम्।
श्रियमाजे मयि कथं हरिष्यसि निशाचर!॥
नहि मे मोक्ष्यसे जीवन् यदि नोत्सृजसे वधूम्।
उत्क्षेप्स्ये राक्षसेन्द्रं तं चक्रुत्तं नखरैर्भुजम्॥"
"स वध्यमानो गृध्रेण रामप्रियहितैषिणा।
खड्गमादाय चिच्छेद भुजौ तस्य पतत्रिण:॥
निहत्य गृध्रराजं स भिन्नाभ्रशिखरोपमम्।
ऊर्द्धबाहुरुदक्रामे सीतां गृहीत्वाक्षिणे राक्षस:॥")
गुग्गुलु। इति मेदिनी। ये, ८४॥
("गुग्गुलुर्दैवधूपश्च जटायु: कौशिक: गुरु:।
कुम्भीलूखलकं क्लीवे महिषाक्ष: पलङ्कष:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"जटायु: कालनिर्य्यास: कौशिको गुग्गुलु: गुरु:॥"
इति वैद्यकरत्नमालायाम्॥)
सान्तोऽव्ययम्। इति द्विरूपकोष:॥ (यथा, महाभारते। १। ६६। ७०।
"अरुणस्य भार्य्या श्येनी तु वीर्य्यवन्तौ महाबलौ।
सम्पातिं जनयामास वीर्य्यवन्तं जटायुषम्॥")

जटाल:, पुं, (जटाख्यस्येति। जटा+"सिध्मादिभ्यश्च।" ५।२।९७। इति लच्।) कर्ज्जूर:। वट:। शुष्ककः। गुग्गुलुः। इति राजनिर्घण्ट:। जटायुक्ते, त्रि। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १८०। २२।
"चीरिणं शिखिनञ्चान्ये जटालोर्द्धशिरोरुहा:॥")

जटाला, स्त्री, (जटाऽस्त्यस्या इति। जटा+"विभाषा-दिभ्यश्च। ५।२।९७। इति अच्। ततो ऽजादित्वात् टाप्।) जटामांसी। इति राज-निर्घण्टः॥ (विवरणमस्या जटामांसीशब्दे ज्ञातव्यम्॥)

जटावती, स्त्री, (जटा विद्यतेऽस्याः। जटा+मतुप्। मस्य वः स्त्रियां ङीप् च।) जटामांसी। इति राजनिर्घण्टः॥

जटावल्ली, स्त्री, (जटेव वल्ली।) वटजटा। जटा-मांसी। इति राजनिर्घण्टः॥

जटिः, स्त्री, (जटति परस्परं संलग्ना भवतीति। जट+"सर्वधातुभ्य इन्।" उणां। ४।११७। इति इन्।) जटाहस्तः। इति शब्दरत्नावली॥ जटा। सन्न्यासः। इत्युणादिकोषः॥

जटिल, पुं, (जटा अस्त्यस्येति। जटा+"तोन्दादि-भ्यामादिपिच्छादिभ्यः शनेलचः।" ५।२।१००। इति इलच्।) शिवः। इति शब्दचन्द्रिका॥ (ब्रह्मचारी। यथा, मनुः। ३।१५१।

"जटिलं चानधीयानं दुर्बलं कितवन्तथा॥"

"जटिलो ब्रह्मचारी।" इति तट्टीकायां कुल्लूक-भट्टः॥) जटायुक्ते, त्रि। इति मेदिनी। ले, ६२। (यथा, कुमारे। ५। ३०।

"विवेश कश्चिज्जटिलस्तपोधनं
शरीरबद्धः प्रथमाश्रमो यथा॥")

जटिला, स्त्री, (जटिल+अजादित्वात् टाप्।) जटामांसी। इत्यमरः। २। ४। १३३॥ ("जटामांसी भूतजटा जटिला च तपस्विनी॥" इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥) पिण्डखजूरी। इति मेदिनी॥ वचा। उशवटा। इति रत्नमाला। दमनवृक्षः। इति राजनिर्घण्टः॥ राक्षिकाचम्पूः। यथा, गौरीशतोद्देशे।

"जटिला राक्षिकाचम्पूः कार्यतोऽविग्रदेव तम्॥"

(ऋषिपत्नीविशेषः। यथा, महाभारते। १।१६७।१३।

"श्रूयते हि पुराऽपि जटिला नाम गौतमी।
अरुन्धत्यासितपती सप्त धर्मभृतामरा॥")

जटी, स्त्री, (जटि+"ऋदिकारादिति।" ४।१।४५। ङीष्यस्य वार्त्तिकोक्त्या वा ङीष्।) प्रकटीवृक्षः। इति शब्दरत्नावली॥ जटामांसी। इति रत्नमाला॥

जटी [न्], पुं, (जटा अस्त्यस्येति। जटा+इनिः।) शिवः। इत्यमरः। २। ४। ३२॥ (यथा,—

"शिवो जटी पर्कटी च पर्कटी च स्त्रियामपि॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥ खाण्डवखाण्डवविशेषः। यथा, महाभारते। ६। ४५। ५८।

"ज्वालाजिह्वः करालश्च घृतकेशो जटी हरिः॥")

जटाविशिष्टे, त्रि। (यथा, महाभारते। ७।५०।३२

"ततो हरो जटी स्थाणुर्निग्राचरपतिः शिवः॥")

जटुलः, पुं, (जटति देहे संहतो भवतीति। जट संहतौ+बाहुलकादुलच्।) जतुकम्। जटुल इति भाषा॥ तत्पर्य्यायः। काचलः २ पिण्डुः ३। इत्यमरः। २। ६। ४८॥

जठरं, त्रि, (जटति एकत्रीभवतीति। जट+ बाहुलकादरः ठान्तादेशश्च। यद्वा, जनयते इति। जन+"जनेरठ च।" उणां ५। ३८। इति अरः ठश्चान्तादेशः।) बहुम्। कठिनम्। इति शब्दरत्नावली॥ (यथा, ज्ञानसङ्कलिनीतन्त्रे। ४। १३।

"इदानीमस्माकं जठरकमठपृष्ठकठिना
मनोवृत्तिस्तत् किं वसनिविसुखेव त्वयसि॥")

जठरः, पुं क्ली, (जायते गर्भो मलं वा अस्मिन्निति। जन+"जनेरठ च।" उणां। ५। ३८। इति अरः ठश्चान्तादेशः।) उदरम्। इति मेदिनी॥ (यथा, हितोपदेशे। २। ४४।

"पृष्ठतः सेवयेद्वर्कं जठरेण हुताशनम्।
स्वामिनं सर्वभावेन परलोकमभायया॥")

देशविशेषे, पुं। स तु कूर्मविभागे आग्नेय्यां दिशि वर्त्तते। यथा, वृहत्संहितायाम्। १४। ८।

"आग्नेय्यां दिशि कोशलकलिङ्गवङ्गो
प्रवङ्गजठराङ्गाः॥"

तथाच महाभारते। ६। ८। ४२।

"अत ऊर्द्धं जनपदान् निबोध गदतो मम।"
इत्युपक्रम्य,—
"जठराः कुकुराश्चैव सदशार्णाश्च भारत!॥"
इत्युक्तवान्॥

पर्व्वतविशेषः। यथा, भागवते। ५। १६। २७।

"जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्र-सुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः॥"

उदररोगविशेषः।

"राजौ जन्म बलीमाग्नो जठरे जठरेषु तु।"

इति निदानस्थाने द्वादशेऽध्याये वाभटेनोक्तम्। एतत्सम्प्राप्तिर्यथा, सुश्रुते निदानस्थाने ● अध्याये।

"कोष्ठाङ्गवैगुण्यदशारो
निःसृत्य दुष्टोऽनिलवेगशुद्धः।
स्वयं समुन्नम्य गुदैः समन्ता-
दिवर्द्धमानो जठरं करोति॥")

जठरवृत्, पुं, (वृणोतीति। वृङ्+क्विप्। ततः षष्ठीतत्पुरुषः। एतत्सेवनेनोदरभङ्गादेवास्य तथात्वम्।) आरग्वधवृक्षः। इति शब्द-चन्द्रिका॥

जठरामयः, पुं, (जठरस्य आमयो रोगः।) जलोदररोगः। इति राजनिर्घण्टः॥ (अतीसाररोगश्च। तस्य चिकित्सा यथा,—

"कपित्थमर्धं जीर्णा तु सक्षौद्रश्चौद्रशर्करम्।
वट्पलं मधुयुक्तं वा सुखते जठरामयात्॥"

इति चरके चिकित्सास्थाने दशमेऽध्याये॥)

जड़, क्ली, (जलति लोकान् जीवयतीति। जल+ अच्। उकयोरैक्यात् लक्ष उत्वम्।) जलम्। इत्यमरटीकायां रायमुकुटः॥ (जलति घनी-भवतीति।) सीसकम्। इति राजनिर्घण्टः॥ (अचेतनपदार्थानां सरूपम्। यदुक्तं पञ्च-दश्याम्। ६। १२७।

"अचिदाकाशघटादीनां यत् सरूपं जड़ं हि तत्॥")

जड़ः, त्रि, (जलति वुद्धिशक्तिमाच्छादयतीति। जल आच्छादने+अच्।) हिमयुक्तः। (शीतलः। यथा, रघौ। ३। ६८।

"परान्भृशं हर्षजडेन मानिना
तदीयमङ्गं कुलिशव्रणाङ्कितम्॥"

"हर्षजडेन हर्षशिथिरेण।" इति तट्टीकायां मल्लिनाथः॥) मूकः। (यथा, मनौ। २।११०।

"नाप्टः कस्यचिदाचरेत् न चाप्यायेन पृच्छतः।
जानन्नपि हि मेधावी जड़वल्लोक आचरेत्॥"

बधिरः। यथा, तत्रैव। ६। २०१।

"उन्मत्तजड़मूकाश्च ये च केचिन्निरिन्द्रियाः॥"

तथा तत्रैव। ८। ३६३।

"अन्धो जड़ः पीठसर्पी वामना खल्वितरे च ये॥"

"अन्धो बधिरः पङ्गुः सम्पूर्णसप्तधातवः।" इति तट्टीकायां कुल्लूकभट्टः॥) अप्रज्ञः। इति मेदिनी। डे, १४॥ (यथा, विक्रमोर्व्वश्याम् १ अङ्के।

"अस्राः सर्गविधौ प्रजापतिरभूच्छन्नो तु कान्तिप्रदः
शङ्गारैकरसः स्वयं तु मदनो मासो तु पुष्पाकरः।
वेदाभ्यासजड़ः कथं तु विषयव्यावृत्तकौतूहलो
निर्म्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥"

निष्पन्नः। यथा, रघौ। २। ४२।

"जड़ीकृतज्यामकठोरपाणेः
वर्षं तुलयन्निव वज्रपाणिः॥"

मोहितः। यथा, तत्रैव। ८।७५। [अमन्त्रितः अथ तं वचनाय दीक्षितः प्रतिपेदाते सुदरा-मभिवज्रभृदं विजृम्भितम् इति श्लिष्येव विभाव्यभेदवत्॥")

जड़क्रियः, त्रि, (जड़स्य मोहितस्येव क्रिया कार्य्यं यस्य।) दीर्घसूत्री॥ चिरक्रियः। इति हला-युधः॥

जड़ता, स्त्री, (जड़स्य भावः। जड़+भावे तल्।) आधानम्। तत्पर्य्यायः। स्तैमित्यम्२ शीतलत्वम्३ अपाटवम्४। इति राजनिर्घण्टः॥ (यथा, रघुः। ९। ४६।

"अनयदासनरज्जुपरिग्रहे
सुजनतां जड़तामवलाजनः॥"

इयं हि व्यभिचारिभावविशेषः। अस्या लक्षणं यथा, साहित्यदर्पणे। ३। १४४।

"अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः।
अनिमिषनयननिरीक्षणतूष्णीम्भावादयस्तस्य॥")

विरहदुःखेन जीवनमात्रस्थितिः। इति रस-मञ्जरी॥

जड़ा, स्त्री, (जड़यति तत्करोतीति णिजन्तात् अच् ततष्टाप्।) भूम्यामलकी। इत्यमरः॥ भूम्यामलकी। इति रत्नमाला॥

जड़िमा, [न्] पुं, (जड़स्य भावः। "वर्णदृढादिभ्यः ष्यञ् च।" ५। १। १२३। इति इमनिच्।) जड़ता। तस्य लक्षणं यथा,—

"इष्टानिष्टागमज्ञानं यत्र प्रत्येकमक्षरम्।

दर्शनश्रवणाभावो जड़िमा सोऽभिधीयते ॥"
इत्याश्वलनीलमणिः ॥

जड़ुलः, पुं, (जटुलः पृषोदरादिलात् टस्य डत्वम् ।) देहस्थितिलकः । इति हेमचन्द्रः ॥

जतु, क्ली, (जायते वृक्षादिभ्य इति । जन + "पलि-पाटिनमिमनिजनामिति ।" उणां १ । १६ । इति उः तोऽन्तादेशश्च ।) वृक्षनिर्य्यासविशेषः । लौ इति ला इति च भाषा ॥ तत्पर्य्यायः । राचा २ लाचा ३ यावः ४ अलक्तः ५ द्रुमामयः ६ । इत्यमरः ।६।२।१२५॥ रचा ७ । इति रभसः ॥ कीटजा ८ क्रिमिजा ९ जतुका १० जन्तुका ११ गवाधिका १२ । इति रत्नमाला ॥ जतुकम्१३ यावकः१४ अलक्तकः१५ रक्तः १६ । इति शब्दरत्नावली ॥ यलक्षया १७ क्षमिः १८ वरवर्णिनी १९ । इति जटाधरः ॥ (यथा, महाभारते । १ । १४७ । १३ ।

"जिघ्रन् सोऽस्य वसागन्धं सर्पिर्जतुविमिश्रितम्॥")

जतुकं, क्ली, (जतु इव कायतीति । कै + कः ।) हिङ्गु । (जतु एव । स्वार्थे कन् ।) लाचा । इति मेदिनी । के, ६१ ॥

जतुका, स्त्री, (जतु इव आकृत्या कायतीति । कै + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) जनीनामगन्धद्रव्यम् । इत्यमरटीकायां भरतः ॥ चर्म्मचटिका । इति शब्दरत्नावली ॥ (यथा, वैद्यकचक्रपाणिसंग्रहेऽपस्काराधिकारे ।

"जतुकाग्रलता तद्वद्गन्धैर्वा वस्त्ररोमभिः ।
अपस्कारहरो लेपो व्रणविड्वार्थशिग्रुभिः ॥")

पर्णटी । इति भावप्रकाशः ॥ लताविशेषः । सा तु मालवे प्रसिद्धा । तस्याः पर्य्यायाः । जतुकारी २ जननी ३ चक्रवर्त्तिनी ४ तिर्य्यक्फला ५ निग्रान्धा ६ बहुपुत्री ७ सुपुत्रिका ८ राजवृक्षा ९ जनेष्टा १० कपिकच्छुफलोपमा ११ रङ्गनी १२ क्षुद्रवल्ली १३ भ्रमरी १४ क्षुद्रवल्लिका १५ विज्जुलिका १६ क्षुद्रवृक्षा १७ ग्रन्थिपर्णा १८ सुवर्चिका १९ तरुवल्ली २० दीर्घफला २१ । अस्या गुणाः । स्निग्धिरत्वम् । तिक्तत्वम् । रक्तपित्तकफदाहक्षयाविषनाशित्वम् । रुचिकारित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ जन्तुकापि पाठः निग्रान्धाक्षुद्रवृक्षयोरित्यत्र क्रमेण निग्रान्धा वृक्षवृक्षा च पाठः ॥ (लाचा । तत्पर्य्याया यथा,—

"कीटजा क्रिमिजा लाचा जतुका च गवाधिका॥"
इति वैद्यकरत्नमालायाम् ॥)

जतुकारी, स्त्री, (जतु करोतीति । जतु + क + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ततः स्त्रियां ङीष् ।) जतुकाख्यता । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या जतुकाशब्दे व्याख्याताः ॥)

जतुकृत्, स्त्री, (जतु करोति उत्पादयतीति । क + क्विप् । जतोः क इति वा ।) जनीनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १५३ ॥ (अस्याः पर्य्याया यथा,—

"पर्णटी रङ्गना लाचा जतुका जननी जनी ।
जतुकृच्चाग्निसंज्ञार्या जतुकचक्रवर्त्तिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जतुक्षया, स्त्री, (जतु इव क्षया ।) पर्पटी । इति भावप्रकाशः ॥

जतुनी, स्त्री, (जतु इव नयति जलाकारेण प्रापयति संश्लिष्टद्रव्यमिति । नी + क्विप् । अस्याः संश्लेषात् द्रव्यस्य जतुवदूपलाक्षात्वम् ।) चर्म्मचटिका । इति त्रिकाण्डशेषः ॥

जतुपुत्रकः, पुं, (जतुनिर्म्मितः पुत्र इव । इवार्थे कन् ।) प्राग्भवगुटिका । नयः । इति त्रिकाण्डशेषः ॥

जतुमणिः, पुं, क्षुद्ररोगविशेषः । (जड़ुल इति भाषा ॥) तस्य निदानं यथा,—

"समस्तसन्निपातजं मस्तकं कपालजम् ।
सहजं लक्ष्म चैकेषां लक्ष्मो जतुमणिश्च सः ॥"
इति माधवकरः ॥

तच्चिकित्सा यथा—

"चर्म्मकीलं जतुमणिं मशकान् तिलकालकान् ।
उत्पलस्य पत्रेण दहेत् क्षारामिभ्यामशेषतः ॥"
इति भावप्रकाशः ॥

जतुरसः, पुं, (जतुनो रसः ।) अलक्तकः । इति राजनिर्घण्टः ॥ (विवृतिरस्यालक्तकशब्दे ज्ञातव्या ॥)

जतूका, स्त्री, (जतुका निपातनात् दीर्घः ।) जनीनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १५३ ॥ चर्म्मचटी । इति शब्दरत्नावली ॥

जत्रु, क्ली, (जायते बाहुरस्मात् । जन् + "जन्यातिभ्यश्च ।" उणां ४ । १०२ । इति रुन्नकारस्य तकारश्च ।) स्कन्धसन्धिः । इत्यमरः । २ । ६ । ७८ ॥ प्राखरा इति भाषा ॥ (यथा, महाभारते । ३ । १७ । २२ ।

"तैः स विद्धो महाबाहुः प्रद्युम्नः समरे स्थितः ।
जत्रुदेशे भृशं वीरो चचालोद्वमते तदा ॥")

जत्रुकं, क्ली, (जत्रु एव । स्वार्थे कन् ।) जत्रु । इति शब्दरत्नावली ॥

जत्वभ्रकं, क्ली, (जतुरूपमभ्रकम् ।) शिलाजतु । इति राजनिर्घण्टः ॥

जन, ईं म य ड जनौ । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सेट् ।) ईं, जातः । म, जनयति । य ड, जायते जन्यते । जनिर्ज्ञेम । प्रादुर्भावे इति प्राचः । प्रादुर्भावः स्फुटीभावः । प्राकाश्ये प्रादुरविः स्यादित्यमरः । बीजादङ्कुरो जायते पत्रकाण्डादिभेदेन प्रकाश्यते इत्यर्थः । प्रादुर्भावोऽसदुत्पत्तिरिति केचित् । घटो जायते । इति दुर्गादासः ॥

जन, म जि र जनौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) म, जनयति । जि, जज्ञिः । रवैदिकः । इति दुर्गादासः ॥

जनः, पुं, (जायते इति । जन + अच् ।) लोकः । (यथा, महाभारते । १ । १४६ । ६ ।

"अथ प्रवाते तुमुले निम्नि सुप्ते जने तथा ।
तदुपादीपयत् भीमः शेते यत्र पुरोचनः ॥")

महलोकादूर्द्ध्वलोकः । मामरः । इति मेदिनी । ने, ६ ॥ (असुरविशेषः । जगार्हेण इति शब्ददर्शनात् ॥)

जनकः, पुं, (जनयतीति । जन + ण्वि + ण्वुल् ।) पिता । राजभेदः । स तु मिथिलाधिपतिः । इति मेदिनी । के, ६० ॥ इक्ष्वाकुराजपुत्रो निमिर्वसिष्ठं त्यक्त्वा यज्ञं ऋतवान् वसिष्ठस्तदयज्ञस्थानमागत्य राजानं आक्रयामास राजा तदा निद्रित आसीत् । मुनिस्तु क्रोधात् त्वं विदेहो भव इत्युक्त्वा तमभिशशाप । ततः,—

"दृष्ट्वा विदेहं राजानस्तदयः सर्व्व एव ते ।
तच्च ते याजयामासुर्यावद्दीर्घां मनोधिकः ॥
नरेन्द्रस्यापि तं देहमरण्यमृषिपुङ्गवाः ।
वसिष्ठोर्व्वेच गन्धेच पूज्यमानं सुदुर्मुखुः ॥
ऋषयोऽपि महात्मानो निमिर्देहं ममन्थिरे ।
अरण्यन्तस्य देहात्तु मन्थावच्चापि चक्रिरे ॥
मन्त्रहोमैर्महात्मानः पुत्रहेतोर्निमेस्तदा ।
अरण्यां मथ्यमानायां प्रादुर्भूतो यतश्च सः ॥
अतो मिथिरिति ख्यातो जनात्जनकोऽभवत् ।
विदेहत्वाभवद्यस्मान्महात्मा स महानृपः ॥
तस्माद्विदेहाः प्रोच्यन्ते सर्व्वे तद्वंशजा नृपाः ।
एवं विदेहराजस्तु पूर्व्वको जनकोऽभवत् ॥
मिथिर्नाम महावीर्य्यो येन सा मिथिलाभवत्॥"
इति रामायणम् ॥

(ऋषिविशेषः । स तु वैद्यसन्देहभञ्जनग्रन्थस्य प्रणेता । यथा, ब्रह्मवैवर्त्ते । १ । १६ । १९ ।

"चकार जनको योगी वैद्यसन्देहभञ्जनम् ॥"

शम्बरासुरस्य पुत्रविशेषः । यथा, हरिवंशे । १६१ । ४४ ।

"श्रुत्वा तु शम्बराङ्गारं सुतास्ते शम्बरस्य ह ।
सन्नद्धा निर्य्ययुर्हृष्टाः प्रद्युम्नवधकाम्यया ॥"
इत्युपक्रम्याह ।

"सेनस्कन्धोऽतिसेनश्च सेनको जनकस्तथा ॥")

उत्पादके, त्रि ॥ (यथा, ब्रह्मवैवर्त्ते ।१।१६।२०।

"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः॥")

जनकतनया, स्त्री, (जनकस्य विदेहनृपतेस्तनया ।) सीता । इति रामायणम् ॥ (यथा, मेघदूते ।१ ।

"यच्चन्द्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु ॥")

जनकनन्दिनी, स्त्री, (जनकस्य नन्दिनी ।) सीता । इति रामायणम् ॥

जनकसुता, स्त्री, (जनकस्य सुता ।) सीता । इति रामायणम् ॥

जनकात्मजा, स्त्री, (जनकस्य आत्मजा ।) सीता । इति शब्दरत्नावली ॥ (यथाह कश्चित् ।

"युध्यतृप्तते खञ्जनगञ्जनाक्षि !
शिरो मदीयं यदि यातु यातु ।
जूनानि नूनं जनकात्मजार्थे
दशाननेनापि दशाननानि ॥")

जनकारी, [नृ], पुं, (जनान् किरति आच्छादयति स्वयमेनेति । कृ आच्छादने + क्विप् ।) अलक्तकः । इति राजनिर्घण्टः ॥

जनङ्गमः, पुं, (जनेभ्यो गच्छतीति। "गमश्च।" ३। २। ४३। खच् सुमागमश्च।) चाण्डालः। इत्यमरः। २।१०।१६॥ (यथा, माघे।१५।३५।
"अवधीज्जनङ्गम इवैष
यदि हतदृषो दृषं नयु।
स्वर्गमशुचिवपुरर्हति न
प्रातमानन्तु नितरां वृषोचिताम्॥")

जनता, स्त्री, (जनानां समूहः। जन+"ग्राम-जनबन्धुसहायतल्।" ४। २। ४२। इति तल्।) जनसमूहः। इत्यमरः। २। २। ४२॥ (यथा, रघौ। ११। ८२।
"तावुभावपि परस्परस्थितौ
वर्द्धमानपरिहीनतेजसौ।
पश्यति स्म जनता दिनात्यये
पार्वणौ शशिदिवाकराविव॥"*॥
जनस्य भावः।) जनत्वञ्च॥

जननं, क्ली, (जन्यतेऽस्मिन्निति। जन+अधिकरणे ल्युट्।) वंशः। (जन+भावे ल्युट्।) जन्म। इति मेदिनी। ने, ६६॥ (यथा, महानिर्व्वाण-तन्त्रे। ३। ५०।
"जननमरणभीतिभंग्नि सच्चित्सुखरूपं
सकलसुखनबीजं ब्रह्मचैतन्यमीड़े॥"
उत्पत्तिः। यथा, कुमारे। १। ४२।
"अन्योन्यशोभाजननाद् बभूव
साधारणो भूषणभूष्यभावः॥"
पुं, जनयति उत्पादयति जीवानिति। जन+णिच्+कर्त्तरि ल्युः। विष्णुः। यथा, महाभारते। १३। १४६। ११८।
"जननो जनजन्मादिर्भीमो भीमपराक्रमः॥"
"जन्मनः जनयतः जननः।" इति तट्टीकायाम्॥
जनयतीति। जनि+ल्युः। उत्पादके, त्रि। यथा, महाभारते। ३। ३६। ३५।
"एकत्र चिरवासो हि न प्रीतिजननो भवेत्॥")

जननिः, स्त्री, (जनयति ब्रह्मसुखमिति। जन+णिच्+बाहुलकात् अनिः।) जनीनामगन्धद्रव्यम्। इति शब्दरत्नावली।

जननी, स्त्री, (जनयतीति। जनि+बाहुलकादनिः। ङीदिकारादिति वा ङीष्। यद्वा, जन्यल्युटो बहुलमिति ल्युट् टित्वात् ङीप्।) माता। (यथा, पञ्चतन्त्रे। १। ३६।
"निरतिशयं गरिमाणं
तेन जनन्याः स्मरन्ति विद्वांसः।
यत् कमपि वहति गर्भं
महतामपि यो गुरुर्भवति॥")
दया। इति मेदिनी। ने, ६६॥ जनीनामगन्धद्रव्यम्। (प्रयोगा यथा,—
"पलंटी रञ्जना कृष्णा जतुका जननी जनी।
जतुकृष्णासंज्ञा जतुकृष्णवर्त्तिनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
चर्म्मचटी। इति शब्दरत्नावली। यूथिका। इति शब्दचन्द्रिका। कटुका। मञ्जिष्ठा। अलक्तकः। जटामांसी। इति राजनिर्घण्टः॥

जनपदः, पुं, (जनस्य लोकस्य पदं आश्रयस्थानं यत्र। जनः पदं वस्तु यस्येति वा।) देशः। (यथा, चाणक्यशतके। ३१।
"त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥"
जनपदनामानि महाभारते भीष्मपर्व्वणि द्वितीयाध्याये कथितानि अतस्तत्रैव विशेषतो द्रष्टव्यानि॥)
जनः। इति मेदिनी। दे, ४८॥

जनप्रवादः, पुं, (जनेषु लोकेषु प्रवादोऽपवादः।) लोकापवादः। तत्पर्य्यायः। कौलीनम् २ विगानम् ३ वचनीयता ४। इति हेमचन्द्रः। ।२।१८४॥ (यथा, महाभारते। २।७२।१६।
"जनप्रवादान् सुबहून् शृण्वन्नपि नराधिपः।
ह्रिया च धर्म्मसंयोगात् पार्थो द्यूतमियात् पुनः॥")

जनप्रियः, पुं, (जनानां प्रियः।) धान्यकम्। शोभाञ्जनवृक्षः। इति राजनिर्घण्टः॥ (लोक-प्रिये, त्रि॥)

जनमेजयः, पुं, (जनान् शत्रुजनान् एजयति प्रतापैः कम्पयतीति। एजृङ् कम्पने+णिच्+"एजेः खश्।"३।२।२८। इति खश् ततो सुमागमः।) परीक्षितराजपुत्रः। तत्पर्य्यायः। राजर्षिः २ पारीक्षितः ३। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। २। ११। ६।
"पौरजानपदा लोकाश्चक्रुस्तं नृपतिं शिशुम्।
जनमेजयनामानं राजलक्षणसंयुतम्॥"
जन्मेजय इति पाठोऽपि क्वचित् दृश्यते। तन्नि-रुक्तिस्तच्छब्दे द्रष्टव्या॥

अयं हि चतुरशीतिवर्षाणि राज्यं कृतवान्। तत्र अश्वमेधादिकं बहुयज्ञं कृत्वा पितृवधा-मर्षात् सर्पसत्रं चकार। यत्रैवासौ जरत्-कारुपुत्रेण आस्तीकेन प्रार्थितः सर्पसत्रात् विरराम ततश्चित्तप्रशमनार्थं भारतादिकं श्रुत-वान्। इत्तान्तस्त्वेवः क्रमशः प्रदर्श्यते। यथा, राजावल्यां १ परिच्छेदे।
"पारीक्षितस्तदा राजा नीतिमानीतिभीतितः।
पृथिवीं पालयामास निवसन् गजसाह्वये।
कृत्वा पितृवधामर्षी सर्पेष्टिं मुनिभिः समम्।
नाशयामास सर्पाणां कुलानि कुलनायकः॥
हयमेधशतञ्चक्रे सम्भारैर्बहुविस्तरैः।
ब्रह्महत्याभवत्तत्र यागेऽकालकृते तदा॥
तत् पापमभवत् तस्य दारुणं पृथिवीपतेः।
वैशम्पायनतो वेदव्यासशिष्यात्तपोनिधेः।
श्रुत्वा भारतमाख्यानं ततःपापात् सुक्तिमाप सः।
चतुरशीतिवर्षाणि कृत्वा राज्यं सुनिर्म्मलम्।
प्रपौत्रीकं सुतं राज्ये संस्थाप्यैव दिवं गतः॥"
सोमश्रवसन्धिमसौ पौरहित्याय वृतवान्।
तत्कथा यथा, महाभारते। १।३१—२०।
"जनमेजयः पारिक्षितः सह भ्रातृभिः कुरु-क्षेत्रे दीर्घसत्रमुपास्ते। तस्य भ्रातरश्चयः श्रुत-सेन उग्रसेनो भीमसेन इति। तेषु तत्सत्र-मुपासीनेष्वागच्छत् सारमेयः। स जनमेजयस्य

भ्रातृभिरभिहतो रोरूयमाणो मातुः समीप-मुपागच्छत्। तं माता रोरूयमाणमुवाच किं रोदिषि केनास्यभिहत इति। स एवमुक्तो मातरं प्रत्युवाच जनमेजयस्य भ्रातृभिरभिहतोऽस्मीति। तं माता प्रत्युवाच यत्तं त्वया तत्रा-पराद्धं येनास्यभिहत इति। स तां पुनरुवाच नापराध्यामि किञ्चिन्नावेक्षे हवींषि नावलिह इति। तच्छ्रुत्वा तस्य माता सरमा पुत्रदुःखार्त्ता ततः सत्रमुपागच्छदुवाच स जनमेजयः सह भ्रातृभिर्दीर्घं सत्रमुपास्ते। स तया क्रुद्धया तत्रोक्तोऽयं मे पुत्रो न किञ्चिदपराध्यति नावे-क्षते हवींषि नावलेढि किमर्थमभिहत इति। न किञ्चिदुक्तवन्तस्ते सा तानुवाच यस्मादय-मभिहतोऽनपकारी तस्मादद्यप्रभृत्यां भयमाग-मीष्यतीति। जनमेजय एवमुक्तो देवशुन्या सरमया भृशं संभ्रान्तो विषसादासीत्। स तस्मिन् सत्रे समाप्ते हास्तिनपुरं प्रत्येत्य पुरो-हितमृत्विजमन्विच्छमानः परं यत्नमकरोत् यो मे पापकृत्यां प्रशमेदिति। स कदाचि-न्मृगयां गतः पारीक्षितो जनमेजयः कस्मिंश्चित् स्वविषये आश्रममपश्यत्। तत्र कञ्चिदधि-रासाञ्चक्रे श्रुतश्रवा नाम तस्य तपस्यभिरतः पुत्र आस्ते सोमश्रवा नाम। तस्य तं पुत्र-मभिगम्य जनमेजयः पारीक्षितः पौरहित्याय वव्रे। स नमस्कृत्य तन्मुनिसुवाच भगवन्नयं तव पुत्रो मम पुरोहितोऽस्तिति। स एवमुक्तः प्रत्युवाच जनमेजयं भो जनमेजय! पुत्रोऽयं मम सर्य्याङ्गातो महातपस्वी स्वाध्यायसम्पन्नो मत्तपो-वीर्य्यसम्भृतो मच्छुक्रपोतवत्यास्तस्याः कुक्षौ जातः। समर्थोऽयं भवतः सर्व्वाः पापकृत्याः प्रशमयितुमन्तरेण महादेवकृत्याम्। अस्य त्वेक सुपार्श्वव्रतं यदेनं कश्चिद्ब्राह्मणः कश्चिदर्थ-मभियाचेत्तं तस्मै यदादेयं यदेतदुत्सहसे ततो नयस्वैनमिति। तेनैवमुक्तो जनमेजयस्तं प्रत्यु-वाच भगवंस्तत्तथा भविष्यतीति॥*॥
अस्य सर्पसत्रविवरणकथा यथा देवीभागवते। २। ११। ४६—६०।
"इति तस्य वचः श्रुत्वा राजा जन्मेजयस्तदा।
नेत्राभ्यामश्रुपातञ्च चकारातीवदुःखितः॥
धिङ्मामस्तु सुदुर्बुद्धेर्वृथामानकरस्य वै।
पिता यस्य गतिं घोरां प्राप्तः पन्नगपीड़ितः॥
यद्यहं मखमारभ्य करोम्यद्यैव पितुः।
हत्वा सर्पानसन्दिग्धो दीप्यमाने विभावसौ॥
आहूय मन्त्रिणः सर्व्वान् राजा वचनमब्रवीत्।
कुर्व्वन्तु यज्ञसम्भारं यथार्हं मन्त्रिसत्तमाः!॥
गङ्गातीरे शुभां भूमिं मापयित्वा द्विजोत्तमैः।
कुर्व्वन्तु मण्डपं रम्यं शतस्तम्भं मनोहरम्॥
वेदी यज्ञस्य कर्त्तव्या ममाद्य सचिवाः खलु।
तदङ्गत्वे विधेयो वै सर्पसत्रः सुविस्तरः॥
तच्चकर्त्तु प्रमुखत्व होतोत्तो महामुनिः।
शीघ्रमाहूयतां विप्राः सर्व्वज्ञा वेदपारगाः॥
मन्त्रिणस्तु तदा चक्रुर्भूपवाक्येऽतिचञ्चलाः।

यज्ञस्य सर्व्वसम्भारं वेदीं यज्ञस्य विस्तृताम् ॥
हवने वर्त्तमाने तु सर्पाणां तक्षको गतः ।
इन्द्रं प्रति भयार्त्तोऽहं त्राहि मामिति चाब्रवीत् ॥
भयभीतं समाश्वास्य स्वासने सन्निवेश्य च ।
ददावभयमत्यर्थं निर्भयो भव पन्नग ! ॥
तमिन्द्रशरणं ज्ञात्वा सुनिर्द्दग्धाभयं तथा ।
उत्तङ्कोऽयदुद्विग्नः सेन्द्रं ज्ञात्वा निमन्त्रयम् ॥
स्तुतस्तदा तक्षकेण यायावरकुलोद्भवः ।
आस्तीको नाम धर्म्मात्मा जरत्कारुसुतो मुनिः ॥
तत्रागत्य मुनेर्बालस्तुष्टाव जनमेजयम् ।
राजा तमर्घयामास दृष्ट्वा बालं सुपण्डितम् ॥")

जनयित्री, स्त्री, (जनयिट + ङीप् ।) माता । इत्यमरः । २ । ६ । २६ ॥ (यथा, रघुः । १०।७०।
"कैकेय्यास्तनयो ऽन्ये भरतो नाम शीलवान् ।
जनयित्रीमलञ्चक्रे यः प्रश्रय इव श्रियम् ॥")

जनरवः, पुं, (जनेषु लोकेषु रवः प्रवादः ।) लोकवादः । यथाह लक्ष्मणसेनः ।
"परीवादस्तथ्यो भवति वितथो वापि महतां
तथाप्यग्रेधार्य्यान् हरति महिमानं जनरवः ॥"

जनलोकः, पुं, (जन एव लोकः ।) महर्लोकोपरिभुवनम् । यथा,—
"अयं स हि महर्लोकः स्वर्लोकात् परमाद्भुतः ।
कल्पायुषो वसन्त्यत्र तपसा धुतकल्मषाः ॥
इत्थं कथां कथयतोर्भगवद्गणयोः प्रिये ! ।
तत्रार्द्धेन विमानस्तञ्जनलोकं निनाय तान् ॥
निवसन्त्यमला यत्र मानसा ब्रह्मणः सुताः ।
सनन्दनाद्या योगीन्द्राः सर्व्वे ते ऊर्द्धरेतसः ॥
अन्ये तु योगिनो ये वै ह्यखण्डब्रह्मचारिणः ।
सर्व्वद्वन्द्वविनिर्मुक्तास्ते वसन्त्यत्र निर्म्मलाः ॥
महर्लोकः स्थितेरूर्द्धमेककोटिप्रमाणतः ।
कोटिद्वयेतिसंख्यातो जनो भूर्लोकतो जनैः ॥"
इति स्कान्दे काशीखण्डम् ॥

जनवल्लभः, पुं. (जनानां लोकानां वल्लभः प्रियः ।) श्वेतरोहितवृक्षः । इति राजनिर्घण्टः ॥ लोकप्रिये, त्रि ॥

जनवादः, पुं, (जनेषु लोकेषु वादोऽपवादः ।) जनप्रवादः । इति हलायुधः ॥ (यथा, आर्य्यासप्तशत्याम् । ४१६ ।
"भक्तपरवशोऽपि गिरिशे स्नेहमयी त्वमुचितेन
सुभगासि ।
मोघस्खयि जनवादो यदौषधिप्रस्थदुहितेति ॥")

जनश्रुतिः, स्त्री, (जनेभ्यः श्रुतिः श्रवणम् ।) सत्यमसत्यं वा लोकप्रवादः । तत्पर्य्यायः । किंवदन्ती २ । इत्यमरः । १ । ६ । ७ ॥ (यथा, आर्य्यासप्तशत्याम् । ३६५ ।
"पुंसां दर्शय सुन्दरि ! सुखेन्द्रमीषत्प्रणामपात्रत्व ।
जायाजित इति रूढा जनश्रुतिर्मे यशो भवतु ॥")

जनस्थानं, क्ली, (जनस्य स्थानं भूभागः ।) दण्डकारण्यम् । इति जटाधरः ॥ दण्डकारण्यसमीपस्थानविशेषः । यथा । इक्ष्वाकुराजपुत्रो दण्डः शुक्राचार्य्यकन्यामरजां बलाद्गृहीत्वा मैथुनं कृतवान् स मुनिस्तं श्रुत्वा राजानं शशाप । यथा,—
"सप्तरात्रेण राजासौ सभृत्यबलवाहनः ।
पापकर्म्मसमाचारो वधं प्राप्नोति दुर्म्मतिः ॥
सर्व्वसस्यानि यानीह जङ्गमानि स्थिराणि च ।
सर्व्वेषां पांशुवर्षेण क्षयः क्षिप्रं भविष्यति ॥
दण्डस्य विषयो यावत् तावत् सवनमाश्रमम् ।
पांशुभूतमिवाकस्मात् सप्तरात्राद्भविष्यति ॥
इत्युक्त्वा क्रोधसन्तप्तस्तदाश्रमनिवासिनम् ।
जनं जनपदस्थान्ते स्थीयतामित्यवोचत ॥
सप्ताहाद्भस्मसाद्भूतः स चापि ब्रह्मतेजसा ।
तस्य दण्डस्य विषयो विन्ध्यशैलस्य सानुषु ॥
तदाप्रभृति काकुत्स्थ ! दण्डकारण्यमुच्यते ।
तपस्विनः स्थिता यत्र तज्जनस्थानमुच्यते ॥"
इति रामायणम् ॥
(अत्र रावणस्य खरदूषणप्रभृतीनि सैन्यान्यासन् । यथा, रामायणे । १ । १ । ४६ ।
"तेन तत्रैव वसता जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥"
"जनस्थानं नाम दण्डकारण्ये रावणबलनिवेशस्थानम् ।" इति तट्टीकायां रामानुजः ॥)

जना, स्त्री, (जननमिति । जन + बाहुलकात् डः ।) उत्पत्तिः । इति सुग्धबोधम् ॥

जनान्तः, पुं, (जनस्य प्रदेशस्य अन्तः ।) देशः । इति धनञ्जयः । जेला इति पारस्यभाषा ॥

जनान्तिकम्, क्ली, अप्रकाशः । इति त्रिकाण्डशेषः ॥ (एतल्लक्षणं यथा, साहित्यदर्पणे ।
"त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम् ॥"
एतल्लक्षणोक्तमप्रकाशकथनम् । नाटके एव अस्य भूरिप्रयोगो दृश्यते ॥ जनस्य अन्तिकम् । जनसमीपञ्च ॥)

जनार्द्दनः, पुं, विष्णुः । इत्यमरः । १ । १ । १६ ॥ तन्नामव्युत्पत्तिर्यथा । "ससुद्रान्तवासिनो जनान्लोकासुरान् अर्द्दितवान् जनार्द्दनः । अर्द्द वधे अर्द्दकृच नन्दादित्वादनः । किंवा जनैर्लोकैरर्द्दते याच्यते पुरुषार्थानसौ जनार्द्दनः । अर्द्द यातनागतियाचने कर्म्मणि अनट् । किंवा जनं जनः भावे घञ् । जनं जन्म अर्द्दयति हन्ति भक्तस्य मुक्तिदत्वादिति जनार्द्दनः । किंवा जनान् लोकान् अर्द्दति हररूपेण संहारकत्वादिति जनार्द्दनः । किंवा जनयति उत्पादयति लोकान् ब्रह्मरूपेण सृष्टिकर्त्तृत्वादिति जनः जनेर्णान्तात् पचाद्यच् । अर्द्दति हन्ति लोकान् हररूपेण संहारकारित्वादिति अर्द्दनः जनश्चासौ अर्द्दनश्चेति जनार्द्दनः । किंवा जनान् लोकान् अर्द्दति गच्छति प्राप्नोति रक्षणार्थं पालकत्वादिति जनार्द्दनः ।" इत्यमरटीकायां भरतः ॥ * ॥ गयायां तस्य हस्ते जीवितस्य पिण्डदानविधिर्यथा,—
"जनार्द्दनो भस्मकूटे तस्य हस्ते तु पिण्डदः ।
आत्मनोऽप्यधवान्धेषां सर्व्वेभ्य तिलैर्विना ॥
जीवता दधिसंमिश्रं सर्व्वं ते विष्णुलोकगाः ।
यस्तु पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
यमुद्दिश्य त्वया देयस्तस्मिन् पिण्डो ऋते प्रभो ! ।
एष पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
अन्तकाले गते मह्यं त्वया देयो गयाशिरे ।
जनार्द्दन ! नमस्तुभ्यं नमस्ते पिण्डमोक्षद ! ॥
पिण्डपात्र नमस्तुभ्यं नमस्ते पिण्डरूपिणे ।
गयायां पिण्डरूपेण स्वयमेव जनार्द्दनः ॥
तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ।
नमस्ते पुण्डरीकाक्ष ! ऋणत्रयविमोचन ! ॥
लक्ष्मीकान्त ! नमस्तेऽस्तु पिण्डमोक्षप्रदो भव ।
वामजानु च सव्यात्य नत्वा भीमो जनार्द्दनम् ॥
आर्द्रं सपिण्डकं कृत्वा भ्रातृभिर्न्नकुलोकभाक् ।
पितृभिः सह धर्म्मात्मा कुलानाञ्च शतेन च ॥
शिलायां वक्षरूपेण यक्षायक्षात्मना स्थितः ।
लक्ष्मीशो विबुधैः सार्द्धं तस्माद्देवमयी शिला ॥"
इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये ४ अध्यायः ॥ * ॥ ग्रामस्यामशिलाविशेषः । तल्लक्षणं यथा,—
"वज्रचक्राङ्कितं जनार्द्दनमिहो नमः ।
उपेन्द्रं गदिनं सार्विपद्मगर्भ ! नमोऽस्तु ते ॥"
इति पाद्मे पातालखण्डे १० अध्यायः ॥
"आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ।
ज्ञानञ्च शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्द्दनात् ॥"
इति कर्म्मलोचनम् ॥

जनाग्रणीः, पुं (जनानग्रणाति भक्षयतीति । अग्र + ल्युः ।) दक्षः । इति राजनिर्घण्टः ॥

जनाश्रयः, पुं, (जनानां लोकानामाश्रयः ।) मरुत्वः । इत्यमरः । २ । २ । ६ ॥

जनिः, स्त्री, (जननमिति । जन + "जनिघसिभ्यामिञ् ।" उणा ४ । १२६ । इति इञ् । जनिवध्योश्चेति वृद्धिनिषेधः ।) उत्पत्तिः । इत्यमरः । २ । ४ । ३० ॥ (यथा, हरिवंशे । २०८ । ४० ।
"वनस्पत्योषधीश्चैव युगपत् प्रतिपद्यसे ।
बालभावाय वसुधा पत्ते पत्ते जनिस्तव ॥"
जायते यस्याम् । जन + आधारे इण् ।) नारी । माता । इति शब्दरत्नावली ॥ (जायते सुखमनयेति । करणे इण् ।) जलीनामगन्धद्रव्यम् । इत्यमरटीकायां रायमुकुटः ॥

जनिका, स्त्री, (जायते वंशो यस्यामिति जनिः । ततः स्वार्थे कन् टाप् च ।) कुषा । इति शब्दरत्नावली ॥ (जनिशब्दार्थः ॥) जननकर्त्री च ॥

जनितं, त्रि, (जन्यते स्मेति । जन + णिच् + क्तः ।) उत्पादितम् । यथा,—
"सेनाचरी भवदिभाननदानवारि-
वासेन यस्य जनिता सुरभौ रजश्रीः ॥"
इति नैषधम् ॥
(यथा च हरिवंशे । १६१ । ३१ ।
"अन्योऽहं कामयामि त्वां नहि त्वं जनितो मया ।
रूपन्तु सौम्य ! पश्यन्ती सीदामि हृदि दुर्म्मना ॥")

जनुः

जनिता [तृ] पुं, (जनयतीति। जन+णिच्+तृच्। "जनिता मन्त्रे।" ६। ४। ५३। इति निपातनात् णिलोपः।) पिता। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १। १२६। ११।

"अधा हि त्वा जनिता जीजनद्वसो
रक्षोहणं त्वा जीजनद्वसो॥"

क्वचित् लौकिकेऽपि दृश्यते। यथा, पञ्चतन्त्रे। १।६।

"अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते।
जनितारमपि त्यक्त्वा निःस्वं गच्छति दूरतः॥")

जनित्री. स्त्री, (जनिष्ट+स्त्रियां ङीप्।) माता। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ३।४८।२।

"तं ते माता परि योषा जनित्री
महः पितुर्दम आसिञ्चदग्रे॥"

यथाच शब्दरत्नतविष्णुस्तोत्रे ६।

"या सृष्टे सृष्टजातं सकलमपि सदा सन्निधानेन पुंसो
धत्ते या सत्त्वयोगाच्चरमचरमिदं भूतये भूतजातम्।
धात्रीं स्थात्रीं जनित्रीं प्रकृतिमविकृतिं विश्वशक्तिं विधात्रीं
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि॥")

जनित्रः, पुं, (जायतेऽस्मादिति। जन+"जनिदाप्यसीति।" उणां ४। १०४। इति इत्रन्।) पिता। इत्युणादिकोषः॥

जनित्रा, स्त्री, (जायतेऽस्याः। जन+इत्रन्। अजादित्वात् टाप्।) माता। इत्युणादिकोषः॥

जनिनीलिका, स्त्री, (जन्या उत्पत्त्या नीलिका।) महानीली। इति राजनिर्घण्टः॥ (महानीलीशब्देऽस्या विवरणं ज्ञातव्यम्॥)

जनिमा, [न्] पुं, (जन्यते इति। जन+"जनिष्टृभ्यामिमनिन्।" उणां ४। १४८। इति इमनिन्।) जन्म। इत्युणादिकोषः॥

जनी, स्त्री (जायते सन्ततिर्यस्यामिति। जन+"जनिवध्योश्चेति वृद्धिनिषेधः। ततः क्तादिकारादिति ङीष्।) सीमन्तिनी। वधूः (जन+भावे इण्।) उत्पत्तिः। (जायते आरोग्यमनया। करणे इण्।) आधिधौषितः। इति मेदिनी। ने, ६॥ ग्रैवस्य पर्य्यायः। जतूका २ रजनी ३ जतुजात ४ चक्रवर्त्तिनी ५ संसर्ग्गा ६। इत्यमरः। २। ४। १५३॥ जतूका ७ जनिः ८ जननी ९। इति भरतः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ जतूकाशब्दे द्रष्टव्यौ॥

जतुः [स्] क्ली, (जन्यते इति। जन+"जनेरसिः।" उणां। २। ११६। इति उसिः।) जन्म। इत्यमरः। १। ४। ३०॥ (यथा, ऋग्वेदे। ४। १७। २०।

"त्वं राजा जनुषां धेह्यस्मे अधिश्रवो
माहिनं यज्ञियेभ्यः॥")

जनुः, स्त्री, (जन्यते इति। जनोऽच् जनी+बाहुलकात् उः।) जन्म। इत्युणादिकोषः॥

जन्तुः

जनूः, स्त्री, (जनु+स्त्रियां ऊङ्।) जन्म। इति शब्दरत्नावली॥

जनेष्टः, पुं, (जनानामिष्टः प्रियः।) सुन्नरटक्षः। इति राजनिर्घण्टः॥

जनेष्टा, स्त्री, (जनानामिष्टा प्रिया।) जतुका। वृद्धिनामौषधिः। जातीपुष्पम्। हरिद्रा। इति राजनिर्घण्टः॥

जनोदाहरणं, क्ली, (जनैरुदाह्रियते कथ्यते इति। उत्+आ+हृ+कर्म्मणि ल्युट्।) यशः। इति धनञ्जयः॥

जनौः, पुं, (जनावति रक्षतीति। अव+।क्विप्।) "क्ष्णोः शूद्रगुनासिके च।" ६। ४। १६। इति ऊट् ततो वृद्धिः।) जगरक्षकः। इति सुधाबोधम्॥

जन्तुः, पुं, (जायते उद्भवतीति। जन+"कमिमनिजनीति।" उणां। १। ७२। इति तुः।) प्राणी। इत्यमरः। १। ४। ३०॥ (यथा, मनौ। ४। २४०।

"एकः प्रजायते जन्तुरेक एव प्रलीयते।
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम्॥"

मनुष्ये बहुवचनान्तः। इति निघण्टुः॥ यथा, ऋग्वेदे। १। ६४। ५।

"विश्वा गोपा अस्य चरन्ति जन्तवो
द्विपच्च यदुत चतुष्पदक्तुभिः॥"

सोमकस्य राज्ञः पुत्रविशेषः। अस्य विवरणसूत्रं यथा, महाभारते। ३। १२७—१२८ अध्याययोः।

"युधिष्ठिरासीन्नृपतिः सोमको नाम धार्म्मिकः।
तस्य भार्य्याशतं राजन्! सदृशीनामभूत्तदा॥
स वै यज्ञेन महता तासु पुत्रं महीपतिः।
कञ्चिन्नासादयामास काले महता क्वापि॥
कदाचित्तस्य वृद्धस्य घटमानस्य यत्नतः।
जन्तुर्नाम सुतस्तस्मिन् क्षीयते समजायत॥
तं जातं मातरः सर्व्वाः परिवार्य्य समासते।
सततं पृच्छतः श्रुत्वा कामभोगान् विशाम्पते!॥
ततः पिप्पीलिका जन्तुं कदाचिददशत् स्थिते।
स दष्टो वेदनार्त्तं तेन दुःखेन बालकः॥
ततस्ता मातरः सर्व्वाः प्राक्रोशन् भृशदुःखिताः।
प्रावार्य्य जन्तुं सहिताः स शब्दस्तुमुलोऽभवत्॥
तमार्त्तनादं सहसा शुश्राव स महीपतिः।
अमात्यपर्षदो मध्ये उपविष्टः सहर्त्विजा॥
ततः प्रस्थापयामास किमेतदिति पार्थिवः।
तस्मै चाख्यातं यथावृत्तमाचचक्षे सुतं प्रति॥
त्वरमाणः स चोत्थाय सोमकः सह मन्त्रिभिः।
प्रविवेशान्तःपुरं पुत्रमाश्वासयदरिन्दमः॥
सान्त्वयित्वा तु तं पुत्रं निष्क्रान्त्वान्तःपुराद्गृपः।
ऋत्विजा सहितो राजन्! सहामात्य उपाविशत्॥

सोमक उवाच।

धिगस्त्विहैकपुत्रत्वमपुत्रत्वं वरं भवेत्।
नित्यातङ्कान्वितानां शोक एवैकपुत्रता॥
इदं भार्य्याशतं ब्रह्मन्! परीक्ष्य सदृशं प्रभो!।
पुत्रार्थिना मया चोढ़ं न तासां विद्यते प्रजा।
एकः कथञ्चिदुत्पन्नः पुत्रो जन्तुरयं मम।
यतमानासु सर्व्वासु किन्नु दुःखमतः परम्॥
वयञ्च समतीतं मे सभार्य्यस्य द्विजोत्तम!।
आसां प्राणाः समायत्ता मम चात्रैकपुत्रके॥
स्यात्तु कर्म्म तथा युक्तं येन पुत्रशतं भवेत्।
महता लघुना वापि कर्म्मणा दुष्करेण वा॥

ऋत्विगुवाच।

अस्ति चेदृङ्मं कर्म्म येन पुत्रशतं भवेत्।
यदि ग्रहोऽपि तत् कर्त्तुमथ वक्ष्यामि सोमक!॥

सोमक उवाच।

कार्य्यं वा यदि वाकार्य्यं येन पुत्रशतं भवेत्।
ज्ञातमेवेति तद्ब्रूहि भगवन्! प्रब्रवीतु मे॥

ऋत्विगुवाच।

यजस्व जन्तुना राजंस्त्वं मया वितते क्रतौ।
ततः पुत्रशतं श्रीमद्भविष्यत्यचिरेण ते॥
वपायां हूयमानायां धूममाघ्राय मातरः।
ततस्ताः सुमहावीर्य्यान् जनयिष्यन्ति ते सुतान्।
तस्यामेव तु ते जन्तुर्भविता पुनरात्मजः।
उत्तरे चास्य सौवर्णे लक्ष्म पार्श्वे भविष्यति॥
ततः स याजयामास सोमकं तेन जन्तुना।
मातरस्तु बलात् पुत्रमपाकार्षुः क्षुपान्विताः॥
हा हताः स्मेति वाश्रुन्यस्तोव्रशोकसमाहताः।
रुदत्यः करुणञ्चापि गृहीत्वा दक्षिणे करे॥
सद्यं प्राणी गृहीत्वा तु याजकोऽपि स्म कर्षति।
क्रुररीत्यामिवार्त्तानां समाहत्य तु तं सुतम्॥
विग्रस्य चैनं विधिना वपामस्य जुहाव सः।
वपायां हूयमानायां गन्धमाघ्राय मातरः॥
आर्त्ता निपेतुः सहसा पृथिव्यां कुरुनन्दन!॥
सर्व्वाश्च गर्भानलभंस्ततस्ताः परमाङ्गनाः॥
ततो दशसु मासेषु सोमकस्य विशाम्पतेः।
जज्ञे पुत्रशतं पूर्णं तासु सर्व्वासु भारत!॥
जन्तुर्ज्येष्ठः समभवत् जनित्रामेव पार्थिव।
स तासामिष्ट एवासीत् न तथा ते निजाः सुताः॥
तस्य लक्षणमस्यासीत् सौवर्णे पार्श्व उत्तरे।
तस्मिंस्तु पुत्रशते चाग्र्यः स बभूव गुणैरपि॥")

जन्तुकम्बुः, पुं, (जन्तुश्चेतनाविशिष्टः कम्बुरिव।) शङ्खमिश्रः। इति राजनिर्घण्टः॥

जन्तुका, स्त्री, (जन्तुभिः कायति प्रकाशते इति। के+कः। अजादित्वात् टाप्।) लाक्षीहिङ्गु। लाक्षा। इति राजनिर्घण्टः॥ (यथा,—

"जन्तुका जलजन्मा च तथा शावरकश्चकम्।"

इत्युत्तरस्थाने ३दादशेऽध्याये वाभटेनोक्तम्॥)

जन्तुघ्नं, क्ली, (जन्तून् हन्तीति। हन्+"आसन्युपकर्षके च।" ३। २। ५३। इति टक्।) विड्लवणम्। इति शब्दरत्नावली॥ (यथा, भावप्रकाशस्य मध्यखण्डे चतुर्थभागे योगिकव्यक्तिविवेचनम्।

"पौरिकाख्यास्तु चक्षुष्यं रक्तघ्नं कफदोषजाः।")

विडूद्भवं। इति रत्नमाला॥

जन्तुघ्नः, पुं, (जन्तून् क्रिमीन् हन्तीति। हन्+टक्।) नीलपूरः। इति राजनिर्घण्टः॥

जन्तुघ्नी, स्त्री, (जन्तुघ्न+टित्त्वात् ङीप् ।) विड्-लवणम् । इति राजनिर्घण्टः ॥

जन्तुनाशनं, क्ली, (जन्तून् क्रिमीन् नाशयतीति । नश+णिच्+ल्युः । यद्वा, जन्तूनां नाशनं विनाशो यस्मादिति ।) हिङ्गु । इति राजनिर्घण्टः ॥

जन्तुपादपः, पुं, (जन्तवः कीटाः फले यस्य ।) उडुम्बरः । इत्यमरः । २ । ४ । २२ ॥ (पर्य्यायोऽस्य यथा,—

"उडुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

जन्तुमारी, स्त्री, (जन्तून् क्रिमीन् मारयतीति । जन्तु+मृ+णिच्+"कर्म्मण्यण्" ३।२।१। इत्यण् । ततो ङीप् ।) निम्बः । इति राजनिर्घण्टः ॥

जन्तुला, स्त्री, (जन्तून् कीटान् लाति आददातीति । ला+कः ।) काश्मलत्वम् । इति त्रिकाण्ड-शेषः ॥

जन्तुहन्त्री, स्त्री, (हन्तीति । हन्+ट्रच् स्त्रियां ङीप् । ततो जन्तूनां हन्त्री गात्रिका ।) विड्-लवणम् । इति राजनिर्घण्टः ॥

जन्म, [न्] क्ली, (जायते इति । जन+"सर्व्वधातुभ्यो मनिन् ।" उणा० । ४ । १४४ । इति मनिन् ।) उत्पत्तिः । आद्यत्वयसमन्वः । इति तिथि-तत्त्वेऽवस्थाप्रकरणे व्याख्यातम् ॥ तथा च ।

"अध्वस्तत्वयोगस्य त्वयोगो जनिर्मता ।"

इति सामान्यलक्षणाग्रन्थे श्रीरोमणिधृतोदय-नाचार्य्यकारिका ॥ तत्पर्य्यायः । जनुः २ जन-नम् ३ जनिः ४ उद्भवः ५ । इत्यमरः ।१।४।३० ॥ जन्मन् ६ जनी ७ । इति भरतः ॥ प्रभवः ८ भावः ९ भवः १० सम्भवः ११ जनूः १२ प्रज-ननम् १३ । इति शब्दरत्नावली ॥ जातिः १४ । इति जटाधरः ॥ तच्च शुभाशुभकर्म्मणा भवति । यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।

"शुभानामशुभानाञ्च कर्म्मणां जन्म जायते ।
पुण्यक्षेत्रे च सर्व्वत्र नान्यत्र मुक्तये जनाः ॥"*॥

तस्य क्रमो यथा,—

"ऋतौ विकाले भवति योनिः कमलवत् सदा ।
गर्भाशयस्थतः शुक्रं धत्ते रक्तसमन्वितः ॥
अन्यत्र काले सुकृता योनिर्भवति योषिताम् ।
सृष्टं शुक्रमतो योनौ नैति गर्भाशयं शुभैः ॥
ऋतावपि च योनिश्चेद्वातपित्तकफाहता ।
भवेत्तदा विशेषेण नैव तस्यां प्रजायते ॥
ऋतुकाले यदा शुक्रं निर्दोषं योनिसंस्थितम् ।
तदा सङ्गायुना सृष्टं क्षीरक्षौद्रैकतां व्रजेत् ॥
विशेषं मानवं स्त्रीणां वीज प्राप्य रजस्वय ।
सुक्तमात्रोऽपि नरकात् स्वर्गाद्वापि प्रपद्यते ॥
विसर्गकाले शुक्रस्य जीवः कर्म्मसंवृतः ।
धृत्वा प्रविशते योनिं कर्म्मभिः स्वैर्नियोजितः ॥
तच्छुक्रशोणितैक्यस्यैकाहात् कलनं भवेत् ।
पञ्चरात्रेण कलनं बुद्बुदाकारतां व्रजेत् ॥
बुद्बुदः सप्तरात्रेण मांसपेशी भवेत्ततः ।
द्विसप्ताहाद्भवेत् पेशी रक्तमांसाचिता दृढा ॥
वीजस्थैवाङ्कुराः पेश्याः पञ्चविंशतिरात्रतः ।
भवन्ति मासमात्रेण पञ्चधा जायते पुनः ॥
ग्रीवा शिरश्च कण्ठश्च पृष्ठवंशस्तथोदरम् ।
पाणिपादं तथा पार्श्वं कटिमात्रं तथैव च ॥
मासद्वयेन सर्व्वाणि क्रमशः सम्भवन्ति हि ।
त्रिभिर्मासैः प्रजायन्ते सर्व्वाङ्गाङ्कुरसञ्चयः ॥
मासैश्चतुर्भिरङ्गुल्यः प्रजायन्ते यथाक्रमम् ।
स्रोत्यं चतुर्थे चाङ्गानां पञ्चमे शोणितोद्भवः ॥
सुखं नासा च कर्णौ च जायन्ते मासि पञ्चमे ।
षष्ठे बलस्य वर्णस्य नखलोम्नाञ्च सम्भवः ॥
दन्तपंक्तिक्षुधा शुक्लं जायन्ते च नखाः पुनः ।
कर्णयोश्च भवेच्छिद्रं षण्मासाभ्यन्तरेण च ॥
पायुर्मेढ्रसुपस्थञ्च नाभिश्चैवोपजायते ।
सप्तमे चाष्टमे चैव सर्व्वावयवसंस्थितिमानपि ॥
अङ्गप्रत्यङ्गसम्पूर्णः शिरःकेशसमन्वितः ।
विभक्तावयवः स्पष्टः पुनर्म्मासाष्टमेन च ॥
नवमे दशमे मासि प्रबलैः सूतिमारुतैः ।
निःसार्य्यते बाल इव जन्तुश्छिद्रेण सत्वरः ॥
मनसश्चञ्चलत्वेन यदा गर्भस्थितिर्भवेत् ।
तदा विकृतिरूपेण पापात्मा हि प्रजायते ॥
पुटद्वयं समासाद्य यदा वहति मारुतः ।
तदा प्रसूते पापिष्ठान् बधान् कर्म्मबहिष्कृतान् ॥
मातृरक्तोत्तरा नारी पितुः शुक्रोत्तरो नरः ।
उभयोर्बीजसामान्ये जायते वै नपुंसकम् ॥"

अन्यच्च ।

"विषमायां तिथौ स्त्रिं कुर्य्याद्वीजन्तु कन्यकाम् ।
समायां पुरुषं नूनं केचिदाहुर्मनीषिणः ॥
वामाङ्गेन भवेन्नारी दक्षिणेन पुमान् भवेत् ।
रक्ताधिक्ये मातृरूपं रेतोऽधिक्ये तु पैतृकम् ॥
शुक्रशोणितसङ्घाते वायुना च द्विधा कृते ।
यमौ स्यातां त्रिधा चेति चतुर्द्धा बहुधापि वा ॥
ततो हीनाधिकत्वङ्गकुब्जवामनकादयः ।
जायन्ते सर्पकुब्जाद्या विकृतास्याश्च योनयः ॥"

तथा च सारकलिकायाम् ।

"गर्भात् कोटिगुणं दुःखं योनियन्त्रनिपीडने ।
संमूर्च्छा तस्य जठराज्जायमानस्य देहिनः ॥
जायमानः पुरीषाद्यैर्मूत्रशुक्राविलाननः ।
प्राजापत्येन वातेन पौरुषमानास्यबन्धनः ॥
अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः ।
क्लेशाग्निश्चालितमायाति जठराज्जातुरातुरः ॥
ततस्तं वैष्णवी माया समाक्रन्दति मोहिनी ।
तया विमोहितात्मासौ ज्ञानभंशमवाप्नुयात् ॥
दृष्टमात्रस्य घोरश्च ज्वरः समुपजायते ।
तेन ज्वरेण महता महामोहः प्रजायते ॥
कण्टकैरिव हिंस्राभः क्रव्यादैरिव दारितः ।
पूतिवज्राग्निपतितो धरण्यां कृमिको यथा ॥
दह्यमानश्चापरीतात्मा क्वचित्तिष्ठति वा रटन् ।
विण्मूत्रभक्षणाद्यञ्च मृतप्रायः समाचरेत् ॥
कल्पयनेऽपि चाग्रक्तः परिवर्त्तेऽप्यनीश्वरः ।
स्नानपानादिकाहारमप्याप्नोति परेच्छया ॥
अशुचिः संसरे क्षुद्रकीटदंशादिभिस्तथा ।
भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे ॥
केन बन्धनबद्धोऽहं कारणं किमकारणम् ।
किं कार्य्यं किमकार्य्यं वा किं वाच्यं किञ्च नोच्यते ॥
कोऽधर्म्मः कश्च वै धर्म्मः कस्मिन् वा वर्त्तते कथम् ।
किं कर्त्तव्यमकर्त्तव्यं किं वा किं गुणदोषवत् ॥
संमूढस्य स्मृतिभ्रंशः शीघ्रं संजायते पुनः ।
रतिः संजायते तूर्णं जन्तोस्तत्रैव जन्मनि ॥
रक्तो मूढश्च लोकोऽयमकार्य्ये सम्प्रवर्त्तते ।
देही देहं परित्यज्य नेन्द्रस्थानमपीच्छति ॥
तस्मात् कीटोऽपि जन्तूनां सुमूढो जायते भृशम् ।
न चात्मानं विजानाति न परं न च दैवतम् ॥
न ब्रह्मेति परं श्रेयः सति चक्षुषि नेक्षते ।
मुह्यन्तं सर्व्वा न जानाति मुह्यमानो मुहैरपि ॥
संसारे क्लिश्यते तेन रागलोभवशानुगः ॥"

इति सुखबोधः ॥

जन्म, क्ली, (जायते इति । जन+बाहुलकात् मन् ।) उत्पत्तिः । "अनन्तरं जात्विति मप्रत्यये जन्म मद्जन्तच्च । जन्ममद्जन्तमपीत्युणादावितिं सुकुटः । जन्मे पञ्चनवस्थिते कलहरिप्रभयमिति ज्योतिषे ।" इत्यमरटीकायां भरतः ॥

जन्मकीलः, पुं, (जन्मनः कील इव । विष्णुसेव-नेन हि जन्माभावात् तथात्वम् ।) विष्णुः । इति त्रिकाण्डशेषः ॥

जन्मदः, पुं, (जन्म ददातीति । जन्म+दा+"आतो ऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) पिता । इति शब्दरत्नावली ॥

जन्मवर्त्म, [न्] क्ली, (जन्मन उत्पत्तेर्वर्त्म पन्थाः ।) योनिः । इति त्रिकाण्डशेषः ॥

जन्मान्तरं, क्ली, (जन्मनः अन्तरम् ।) परलोकः । इति भरतः ॥ तत्पर्य्यायः । भावान्तरम् २ प्रेत्य ३ असुच ४ । इत्यमरः ॥ (यथा, महा-भारते । ३ पर्व्वणि ।

"नूनं जन्मान्तरकृतं पापमाचरितं महत् ॥"

अन्यत् जन्म । मयूरव्यंसकादित्वात् समासः । पुनर्जन्म । यथा, पद्मतन्त्रे । २ । १८५ ।

"वरं प्राणपरित्यागो न वियोगो भवाद्धेः ।
प्राणा जन्मान्तरे भूयो न भवन्ति भवद्विधाः ॥")

जन्माष्टमी, स्त्री, (जन्मनः श्रीकृष्णोत्पत्तेरष्टमी तिथिः ।) भाद्रकृष्णाष्टमी । सा च श्रीकृष्णस्य जन्मतिथिः । सा तु सूर्य्यचान्द्रेण श्रावणस्य कृष्णाष्टमी गौणचान्द्रेण भाद्रस्य । तत्र श्रीकृष्णस्य जन्मकालो यथा, ब्रह्मपुराणे ।

"अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे ।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः ॥"

विष्णुपुराणे महामायां प्रति भगवद्वाक्यम् ।

"प्रावृट्काले च नभसि कृष्णाष्टम्यां महानिशि ।
उत्पत्स्यामि नवम्यान्तु प्रसूतिं त्वमवाप्स्यसि ॥
श्रावणे वा नभस्ये वा रोहिणीसंहिताष्टमी ।
यदा कृष्णे नरैर्जेया सा जयन्ती प्रकीर्त्तिता ॥"

अग्निपुराणे ।
"रोहिणीसहिता कृष्णा भाद्रपदेऽष्टमी ।
सप्तम्यामर्द्धरात्राधःकलयापि यदा भवेत् ॥
तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः ।
तमेवोपवसेत् कालं तत्र कुर्य्याच्च जागरम् ॥
अविद्धायाच्च सप्तम्यां जातो देवकीनन्दनः ॥"
इति सप्तम्यवेधे जन्माश्रवणकल्पभेदादविरुद्धम् ॥
नवम्यादियोगस्य प्रशंसा यथा । ब्रह्मवैवर्त्ते ।
"उदये चाष्टमी किञ्चिन्नवमी सकला यदि ।
भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ।
अपि वर्षशतैरेतैरपि लभ्यते वा न वा विभो ! ॥"
पद्मपुराणे ।
"प्रेतयोनिगतानान्तु प्रेतत्वं नाशितन्तु तैः ।
यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता ॥
किं पुनर्बुधवारेण सोमेनापि विशेषतः ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥"
उपवासादिफलं यथा, भविष्यपुराणे ।
"एकेनैवोपवासेन कृतेन कुरुनन्दन ! ।
सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः ॥"
ब्रह्मवैवर्त्ते ।
"मन्वादिदिवसे प्राप्ते यत् फलं स्नानपूजनैः ।
फलं भाद्रपदेऽष्टम्यां भवेत् कोटिगुणं द्विज ! ॥
तस्मान्निधौ वारिमात्रं पितृभ्यो यः प्रयच्छति ।
गयाश्राद्धं कृतं तेन सुताद्यं नात्र संशयः ॥"
उपवासाकरणे दोषो यथा, भविष्योत्तरे ।
"श्रावणेऽबहुले पक्षे कृष्णजन्माष्टमीव्रतम् ।
न करोति नरो यस्तु स भवेत् क्रूरराक्षसः ॥
वर्षे वर्षे च या नारी कृष्णजन्माष्टमीव्रतम् ।
न करोति महाक्रूरा घाली भवति कानने ॥"
स्कान्दे ।
"न करोति यदा विष्णोर्जयन्तीसंज्ञकं व्रतम् ।
यमस्य वशमापन्नः कहते नारकीं यथाम् ॥"
भविष्ये ।
"तुष्ट्यर्थं देवकीसूनोर्जयन्तीसंज्ञकं व्रतम् ।
कर्त्तव्यं चिन्त्यमानेन भक्त्या भक्तजनैः सह ॥
अकुर्व्वन् नरकं याति यावदिन्द्राश्चतुर्दश ॥"
तत्रोपवासक्रमः, भविष्यपुराणे ।
"पार्थ ! तद्दिवसे प्राप्ते दन्तधावनपूर्व्वकम् ।
उपवासस्य नियमं शक्तीयाद्भक्तिभावतः ॥
वासुदेवं समुद्दिश्य सर्व्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यज्ञेविन्द ! त्रियोनिजम् ।
तस्मे सुप्तस्तु मां चाहि पतितं शोकसागरे ॥
आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत् प्रणाशय गोविन्द ! प्रसीद पुरुषोत्तम ! ॥"
एतदुपक्रम्य ।
"तन्मध्ये प्रतिमा स्थाप्या काञ्चनादिविनिर्म्मिता ।
प्रतप्तकाञ्चनाभा सा देवकी सुतसंयुता ॥
मातापि बालकं सद्यः प्रसूता नीरदच्छविम् ।
वसुदेवोऽपि तत्रैव रथमारुह्य सत्वरः ।स्थितः ॥
यशोदा चापि तत्रैव प्रसूतवरकन्यका ।
बलभद्रस्तथा नन्दो दध्नो गर्गसुतुर्मुखः ॥
एवं संपूजयेद्भक्त्या गन्धपुष्पाक्षतैः फलैः ।
स्थण्डिले स्थापयेद्देवीं सचन्द्रां रोहिणीस्तथा ॥
देवकीं वसुदेवञ्च यशोदां नन्दमेव च ।
चण्डिकां बलदेवञ्च पूज्य पापैः प्रमुच्यते ॥
अर्द्धरात्रे वसोर्धारां पातयेद्गुडसर्पिषा ।
ततो वर्द्धापनं षष्ठीं नामादेः करणं मम ॥
कर्त्तव्यं तत्तच्चाद्यान्तौ प्रभाते नवमीदिने ।
यथा मम तथा कार्य्यो भगवत्या महोत्सवः ॥
ब्राह्मणान् भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ।
सुवर्णं काञ्चनं गाञ्च वासांसि कुसुमानि च ॥
यदृयदिष्टतमं लोके तत्तो मे प्रीयतामिति ।
यं देवं देवकी देवी वसुदेवादजीजनत् ॥
भौमस्य ब्रह्मणो गुप्त्रे तस्मै ब्रह्मात्मने नमः ।
सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च ॥
शान्तिरस्तु शिवञ्चास्तु इत्युक्त्वा तान् विसर्ज्जयेत् ॥
एवं यः कुरुते देवा देवक्या सुमहोत्सवम् ।
वर्षे वर्षे भगवतो मद्भक्त्या धर्म्मनन्दन ! ।
नरो वा यदि वा नारी यथोक्तफलमाप्नुयात् ॥
पुत्रसन्तानमारोग्यधनधान्यर्द्धिमद्यहम् ।
सम्यर्केणापि यः कुर्य्यात् कस्मिंश्चन्माष्टमीव्रतम् ॥
विष्णुलोकमवाप्नोति नरो नास्त्यत्र संशयः ॥"
पूजा च मध्यरात्रे गारुडे ।
"कृष्णाष्टम्यान्तु रोहिण्यामर्द्धरात्रेऽर्चनं हरेः ॥"
व्रतपारणयोः कालनियमः । एकदिने जयन्तीलाभे तत्रैवोपवासः । उभयदिने चेत्तदा परदिने । जयन्त्यलाभे तु रोहिणीयुक्ताष्टम्याम् । उभयत्रैरे रोहिणीयुताष्टमीलाभे परदिने तदलाभे तु निशीथसम्बन्धिन्याम्यष्टम्यां उभयदिने निशीथसम्बन्धे तदसम्बन्धे वा परदिने इति । उपवासपरदिने तिथिनक्षत्रयोरवसाने पारणम् । यदा महानिशायाः पूर्व्वमेकतरस्यावसानमन्यतरस्य महानिशायां तदनन्तरं वा तदेकतरावसाने पारणं 'यदा महानिशायासुभयस्थितिस्तदा उत्तरान्ते पारणम् ।" इति तिथ्यादितत्त्वम् ॥ * ॥
हरिभक्तिविलासमते तूपवासकालो यथा,—
"जन्माष्टमी पूर्व्वविद्धा न कर्त्तव्या कदाचन ।
पलवेधे तु विप्रेन्द्र ! सप्तम्यां चाष्टमीं त्यजेत् ॥
सुरायां बिन्दुना सृष्टं गङ्गाम्भःकलसं यथा ।
विना ऋक्षेण कर्त्तव्या नवमीसंयुताष्टमी ॥
सप्तम्यापि न कर्त्तव्या सप्तमीसंयुताष्टमी ।
तस्मात् सर्व्वप्रयत्नेन त्याज्यमेवासुभं बुधैः ॥
वेधे पुण्यक्षयं याति तमः सूर्य्योदये यथा ।
यच्च वह्निपुराणादौ प्रोक्तं विद्धाष्टमीव्रतम् ।
अवैष्णवपरं तच्च कृतं वा देवमायया ॥"
पारणकालो यथा,—
"यद्वा तिथ्यर्क्षयोरेव द्वयोरन्ते तु पारणम् ।
समर्थानामशक्तानां द्वयोरेकवियोगतः ॥
केचिच्च भगवज्जन्ममहोत्सवदिने शुभे ।
भक्तोत्सवान्ते कुर्व्वन्ति वैष्णवा व्रतपारणम् ॥"
तद्भुतकथा यथा,—
"एकदा श्रीकुलाचार्य्यं वशिष्ठन्दधिसत्तमम् ।
राजा दिलीपः पप्रच्छ विनयावनतः सुधीः ॥
दिलीप उवाच ।
भाद्रे मासि सिते पक्षे यस्यां जातो जनार्द्दनः ।
तत्कथां श्रोतुमिच्छामि कथयस्व महामुने ! ॥
कथं वा भगवान् जातः शङ्खचक्रगदाधरः ।
देवकीजठरे विष्णुः किं कर्त्तुं केन हेतुना ॥
वशिष्ठ उवाच ।
शृणु राजन् ! प्रवक्ष्यामि यस्माज्जातो जनार्द्दनः ।
पृथिव्यां त्रिदिवं दृष्ट्वा भवते कथयाम्यहम् ॥
पुरा वसुन्धरा ह्यासीत् कंसाराधनतत्परा ।
खाधिकारप्रमत्तेन कंसदूतेन ताड़िता ॥
क्रन्दन्ती लज्जिता सापि ययौ धूर्जटिलोचना ।
यत्र तिष्ठति देवेशः उमाकान्तो वृषध्वजः ॥
कंसेन ताड़िता नाथ ! इति तस्मै निवेदितम् ।
वाष्पधारां प्रवर्षन्तीं विवर्णामपमानिताम् ॥
क्रन्दन्तीं तां समालोक्य कोपेन स्फुरिताधरः ।
उमया सहितः सर्व्वैर्द्देवगन्धैरनुद्रुतः ॥
आजगाम महादेवो विधातुर्भवनं रुषा ।
गत्वा चोवाच ब्रह्माणं कंसध्वंसनिमित्तकम् ॥
उपायः क्रियतां ब्रह्मन् ! भवता विष्णुना सह ।
ऐश्वरं तद्वचः श्रुत्वा गन्तुं प्र ामदात्मभूः ॥
क्षीरोदे यत्र वैकुण्ठः सुप्तः स शुभगोपरि ।
हंसयुक्ते समारुह्य हरेरन्तिकमाययौ ॥
तत्र गत्वा हरिं ध्यात्वा देवगन्धैर्हरादिभिः ।
तुष्टाव भगवान् वाग्भिरर्थाभिर्ब्बाग्विदाम्वरः ॥
नमः कमलनेत्राय हरये परमात्मने ।
जगतः पालयित्रे च लक्ष्मीकान्त ! नमोऽस्तु ते ॥
नमः कमलकिञ्जल्कपीतनिर्म्मलवाससे ।
नमः समस्तदेवानामधिपाय महात्मने ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
इति तैस्तैः स्तुतैः श्रुत्वा प्रत्युवाच जनार्द्दनः ।
देवा नन्नसुखाः सर्व्वे भवतामागमः कथम् ॥
ब्रह्मोवाच ।
शृणु देव ! जगन्नाथ ! यस्मादस्माकमागमः ।
कथयामि सुरश्रेष्ठ ! तदहं लोकतारक ! ॥
भूमिदत्तवरोन्मत्तः कंसराजो दुरासदः ।
वसुधा ताड़िता तेन पदाघातेन मुष्टिना ॥
वरं दत्त्वा पुरापुत्रो मायया स प्रवञ्चितः ।
भागिनेयं विना राजन् ! घ्राता न भविता तव ॥
तस्माद्गच्छ स्वयं देव ! हन्तुं कंसं दुरासदम् ।
देवकीजठरे जन्म लभ गत्वा च गोकुलम् ॥
ब्रह्मणा प्रेषितो विष्णुः प्रत्युवाच पशोः पतिम् ।
पार्व्वतीं देहि देवेश ! चण्डं स्खिलागमिष्यति ॥
उमया रमया सार्द्धं शङ्खचक्रगदाधरः ।
उद्दिश्य मथुरां चक्रे प्रयाणं कंसनाशनम् ॥
देवकीजठरे जन्म लेभे विष्णुर्गदाधरः ।
यशोदाकुक्षिमध्ये तु सर्व्वाणी नगलोचना ॥
नव मासांश्च विश्राम्य कुक्षौ नवदिनाधिकान् ।
भाद्रे मासि सिते पक्षे अष्टमीसंज्ञया तिथौ ॥

रोहिणीतारकायुक्ता रजनी घनघोरिता ।
घूमयोनौ तड़िद्युक्ते वारि वर्षति सर्व्वदा ॥
तस्यां जातो जगन्नाथः कंसारिर्व्वसुदेवजः ।
वैराटे नन्दपत्नी च यशोदाजीवनन्तु सुताम् ॥
पुत्रं पद्मकरं पद्मनाभं पद्मदलेक्षणम् ।
रमंश्चतुर्भुजं श्यामं शङ्खचक्रगदाधरम् ॥
तदा क्रन्दितुमारेभे दृष्ट्वा चानकदुन्दुभिः ।
तत्रैव वाग्यभूद्देवी देवकीमात्रगोचरा ॥
पुत्रं दत्त्वा यशोदायै कन्यां तस्याः समानय ।
कंसासुरभयात्तं हि उवाच देवकी तदा ॥
वैराटं गच्छ विप्रेन्द्र ! सुतं प्रत्यर्पितुं प्रभो ! ।
पुत्रं दत्त्वा यशोदायै सुतां तस्याः समानय ॥
तां दृष्ट्वा कंसराजोऽपि सभायां न हनिष्यति ।
तस्या वचः समाकर्ण्य वसुदेवोऽतिदुःखितः ॥
अङ्के कुमारमादाय वैराटाभिमुखं ययौ ।
यमुना जलसंपूर्णा ततपथे मध्यवर्त्तिनी ॥
अतिश्रोता महावीर्य्या सुतीक्ष्णोर्म्मिभयाकुला ।
तां दृष्ट्वा तत्तटे स्थित्वा यमुनामवलोकयत् ॥
वसुदेवोऽतिदुःखार्त्तो विलोलचेतनोऽभवत् ।
किं करोमि क्व गच्छामि विधिनात्रापि वञ्चितः ॥
कथमद्य गमिष्यामि वैराटे नन्दमन्दिरम् ।
हरिणा तत्र सानन्दं मायया वञ्चितः पिता ॥
क्षणमात्रं तटे स्थित्वा यमुनामप्यलोकयत् ।
तेन दृष्टा पुनः सापि क्षीणा जानुवहाभवत् ॥
ततः सोऽपि पुरो दृष्ट्वा धावन्तं खलु जम्बुकम् ।
क्रोड़े कृत्वा सुतं खेरं गन्तुं पारं प्रचक्रमे ॥
तं दृष्ट्वा हृष्टचित्तन्तु भगवान् यमुनाजले ।
मायां कृत्वा जगन्नाथो ह्यङ्कात् स पतितः पितुः ॥
तं सुतं पतितं दृष्ट्वा सूर्य्यजाजीवने द्विजः ।
तदा क्रन्दितुमारेभे भाले घात्वा करं दृढ़म् ॥
विधिना वैरिणा ह्यत्र दुःखितोऽहं प्रवञ्चितः ।
त्राहि मां जगतां नाथ ! पुत्रं देहि सुरोत्तम ! ॥
जनकं क्रन्दितं दृष्ट्वा कंसारिः कृपया विभुः ।
जलक्रीड़ां समाधाय पितुरङ्केऽवसत् पुनः ॥
यथा तेन द्विजश्रेष्ठो गतवान्नन्दमन्दिरम् ।
सुतं दत्त्वा यशोदायै सुतां तस्याः समानयत् ॥
सुतामङ्के तथा सोऽपि गृहीत्वानकदुन्दुभिः ।
निजागारं पुनः प्राप्य प्रत्यर्प्य तादृशीं सुताम् ॥
प्रतियुध्य पदे लोहमासीत् पूर्ब्ववदाहृतः ।
देवकी च प्रसूतेति वार्त्ता प्राप्ता सुरारिणा ॥
आनेतुं प्रहितो दूतः सुतं दुहितरञ्च वा ।
आगत्य कंसदूतोऽसौ सुतां नेतुं प्रचक्रमे ॥
बलादङ्कात् समाकृष्य देवकीवसुदेवयोः ।
कंसदूतो गृहीत्वा तां कंसायादर्शयत् पुनः ॥
दृष्ट्वा तां कंसराजोऽपि सभयोऽभूद्दुरासदः ।
सुवर्णकाञ्चनवर्णाभां पूर्णेन्दुसदृशाननाम् ॥
दृष्ट्वा कंसो विहस्यैनां विद्युत्स्फुरितलोचनाम् ।
आदिदेशासुरश्रेष्ठो वध कृत्वा शिलोपरि ॥
आज्ञां जग्मुरसुरास्ते तु निष्टेतुं तां प्रवर्त्तिताः ।
विद्युद्रूपधरा गौरी जगाम शङ्करान्तिकम् ॥
अन्तरीक्षे स्थितं स्थित्वा कंसं प्रोवाच शङ्करी ।
त्वां हन्तुं गोकुले जातः पूर्ब्वशत्रुर्न संशयः ॥
तत्रातिष्ठज्जगन्नाथः कंसारिः सुरवल्लभः ।
क्रीड़ित्वा बालभावेन कंसध्वंसे मनो दधौ ॥
प्राप्तिमात्रेण तं कंसं जघान जगदीश्वरः ।
एतत्ते कथितं राजन् ! कृष्णजन्माष्टमीव्रतम् ॥
य इदं कुरुते राजन् ! या च नारी हरेर्व्रतम् ।
प्राप्नोत्यैश्वर्य्यमतुलमिह लोके यथेप्सितम् ॥
अन्तकाले हरेः स्थानं दुर्ल्लभञ्च गमिष्यति ।
एकेनैवोपवासेन कृतेन कुरुनन्दन ! ॥
सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः ।
वत्सरद्वादशे चैव यत् पुण्यं समुपार्ज्जितम् ॥
विफलं तद्भवेत् सर्व्वं पुरा व्यासेन भाषितम् ।
न दृष्टं सुखं तेषां नराणां न च योषिताम् ॥
जयन्ती न कृता यैस्तु जागरादिसमन्विता ।
श्यानश्चैते तु विज्ञेया जयन्तीविमुखा नराः ॥
योषितश्च न सन्देहः सत्योक्तं तव सुव्रते ! ॥"

इति भविष्यपुराणे वह्निरुद्रदिलीपसंवादे श्रीकृष्णजन्माष्टमीव्रतकथा समाप्ता ॥

जन्नी [न्] पुं, (जन्म अस्त्यस्येति । जन्मन् + "व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति इनिः ।) प्राणी । इत्यमरः । १ । ४ । ३० ॥ (यथा, भारविः । ११ । ३० ।

" जन्मिनोऽस्य स्थितिं विद्वान् लक्ष्मीमिव चलाचलाम् ।
भवान्मास्म वधीत् न्याय्यं न्यायाधारा हि साधवः ॥")

जन्मेजयः, पुं, (जनान् भृत्यान् एजयति कम्पयतीति । एज + णिच् + "एजेः खश् ।" ३ । २ । २८ । इति खश् ततो सुमागमात् जनमेजय इति सिद्धं शकन्ध्वादित्वादलोपे साधुः ।) जनमेजयराजः । इति श्रीभागवतम् ॥ (एतन्निरुक्तिर्यथा देवीभागवतस्य । २ । ११ । ४६ श्लोकटीकायाम् । "जन्मनैवातिसुक्षेन भृत्यानेजितवान् यतः ।
एतद् कम्पने धातोर्हि जन्मेजय इतिश्रुतः ॥")

जन्य, क्ली, (जन्यते इति । जनि + "तकिशसिचतियतिजनिभ्यो यङ्लुग्यः ।" इति वार्त्तिकोक्त्या यत् ।) वृद्धः । परीवादः । संग्रामः । इति मेदिनी । ये, २५ ॥ (यथा, रघौ । ४ । ७७ । "तत्र जन्यं रघोर्घोरं पार्व्वतीयैर्गजैरभूत् ॥")

जन्यः, पुं, (जायते जनयति वा । जन + "भव्यगेयेति ।" ३ । ४ । ६८ । इति कर्म्मरि यत् ।) जनकः । इति मेदिनी । ये, २६ ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ५६ । "उग्रतेजा महातेजा जन्यो विजयकालवित् ॥" देहः । यथा, भागवते । १ । ६ । ३१ ।

"निवृत्तसर्व्वेन्द्रियवृत्तिविभ्रम-
स्तुष्टाव जन्यं विरुजन् जनार्द्दनम् ॥"

जनस्य जन्यः । जन + "मतजनहलादिति ।" ४ । ४ । ६७ । इति यत् । जनजन्यः । इति सिद्धान्तकौमुदी ॥)

जन्यः, त्रि, (जन्यते इति । जन् + णिच् + कर्म्मणि यत् ।) उत्पाद्यः । यथा,—

"जनकस्य स्वभावो हि जन्ये तिष्ठति निश्चितम् ।
यथा श्रीकृष्णपादाब्जं कालीयवंशमस्तके ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
("जन्यानां जनकः कालो जगतामाश्रयो मतः ॥"
इति च भाषापरिच्छेदे ५५ ॥)

जनयिता । (जनीं वधूं वहति प्रापयति वा । संज्ञायामिति साधुः ।) नवोढ़ाज्ञातिः । नवोढ़ाभर्त्ता । वरस्य स्निग्धः । स तु जामाद्यवत्सलः । इति मेदिनी । ये, २६ ॥ (जनाय हितः । यत् ।) जनहितः । इति व्याकरणम् ॥

जन्या, स्त्री, (जायतेऽस्याम् । जन् + ण्यत् यत् वा । मातृतुल्यत्वादेवास्यास्तथात्वम् ।) मातृष्वस्रा । इति मेदिनी । ये, २६ ॥ (यथा, रघौ । ६ । ३० ।

"अथाङ्गराजादवतार्य्य चक्षु-
र्यामेति जन्यामवदत् कुमारी ॥")

प्रीतिः । इति हेमचन्द्रः ॥

जन्युः, पुं, (जायते इति । जन + "यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणा० १ । २ । इति युच् ।) प्राणी । अग्निः । धाता । इति मेदिनी । ये, २६ ॥ (उत्पत्तिः । जन्म । यथा, हरिवंशे । १२३ । ४६ ।

"अन्यतापा हितीयोऽयं जन्युर्हि मम सर्व्वथा ॥")

जप, व्यक्तायां वाचि । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) जिह्वोष्ठादिव्यापाररहितं शब्दार्थयोश्चिन्तनं व्यक्तवाचः । जपति मन्त्रं साधकः । इति दुर्गादासः ॥

जपः, पुं, (जप्यते इति । जप + "यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३ । ३ । ९० । इति भावे अप् ।) विधानेन मन्त्रोच्चारणम् । तद्विधिर्यथा,—

"जीवैर्व्वर्ज्जयेच्च संकुर्य्यात् रहः कुर्य्यादतन्द्रितः ।
समाहितमनाश्चार्य्यो मनसा वापि चिन्तयेत् ॥
विधियज्ञात् जपयज्ञो विशिष्टो दशभिर्गुणैः ।
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ॥
विना दर्भैस्तु यत् स्नानं यच्च दानं विनोदकम् ।
असंख्येयन्तु यद्जप्यं सर्व्वं तदफलं स्मृतम् ॥
मुक्ताफलैर्विद्रुमेण रुद्राक्षैः स्फटिकेन वा ।
गणना सर्व्वथा कार्य्या सम्यगङ्गुलिपर्व्वभिः ॥
हिरण्यरत्नमणिभिर्जप्यं धृतगुणं भवेत् ।
सहस्रगुणमिन्द्राक्षैः पद्माक्षैरयुतं भवेत् ॥
नियुतं वापि रुद्राक्षैर्भद्राक्षैस्तु न संशयः ।
पुत्रजीवकजप्यस्य परिसंख्या न विद्यते ॥
दशभिर्जन्मजनितं धृतेन च पुरा कृतम् ।
त्रियुगं तु सहस्रेण गायत्र्या हन्ति दुष्कृतम् ॥
दर्भैश्चस्रुस्तथासीनो दर्भैर्व्वृदकपाणिगा ।
प्राङ्मुखो वर्त्तयेत् मालां सहस्रं धृतमेव वा ॥"

इत्याद्ये वह्निपुराणे नित्याह्निकस्नानविधिनामाध्यायः ॥ तस्यानुष्ठानं यथा,—

"मनः संहृत्य विषयान्नान्यार्थगतमानसः ।
न हसं न विलम्बञ्च जपेन्मौक्तिकपङ्क्तिवत् ॥
जपः स्याद्यद्यदुक्तिर्मानसोपांशुवाचिकैः ।
धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम् ॥
उच्चरेदर्थसहितं मानसः स जपः स्मृतः ।
जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतमानसः ॥

किञ्चिन्न्यूनवर्णयोगः स्यादुपांशुः स जपः स्मृतः ।
मन्त्रस्योच्चारयेद्वाचा वाचिकः स जपः स्मृतः ॥
उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः ।
जिह्वाजपः शतगुणः साहस्रो मानसः स्मृतः ।
जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैः ॥"
तत्र वर्ज्यं यथा,—
"विस्मृतोत्सर्गशङ्कादियुक्तः कर्म्म करोति च ।
अपार्थकादिकं सर्व्वमपवित्रं भवेत् प्रिये ! ॥
मलिनाम्बरकेशादिसुखदौर्गन्ध्यसंयुतः ।
यो जपेत्तं दहत्याशु देवता गुप्तसंस्थिता ॥
आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम् ।
नीचाङ्गस्पर्शनं कोपं जपकाले विवर्ज्जयेत् ॥"
अथ करमालाजपनियमो यथा,—
"तर्ज्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात् ।
तिस्रोऽङ्गुल्यस्त्रिपर्व्वाद्यो मध्यमा चैकपर्व्विका ॥
पर्व्वत्रयं मध्यमाया मेरुत्वेनोपकल्पयेत् ।
अनामामध्यमारभ्य कनिष्ठादित एव च ॥
तर्ज्जनीमूलपर्य्यन्तं दशपर्व्वसु संजपेत् ।
अनामामूलमारभ्य कनिष्ठादित एव च ।
तर्ज्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥"
एतद्वचनन्तु अशौचरक्षतादिविषयम् ।
मुक्तिविषये पुनः ।
"अनामिकाद्यं पञ्च कनिष्ठादित्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्व्वणि ॥
तर्ज्जन्यग्रे तथा मध्ये यो जपेत् स तु पापहृत् ।
अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च ॥
मध्यादिमूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥"
श्रीविद्याविषये पुनः ।
"अनामामध्यमायाश्च मूलाग्रयोश्च द्वयं द्वयम् ।
कनिष्ठायाश्च तर्ज्जन्याश्चाग्रं पर्व्व सुरेश्वरि ! ॥
अनामामध्यमायाश्च मेरुः स्यात् त्रितयं शुभम् ।
प्रदक्षिणक्रमाद्देवि ! जपेन्मेरुपुरन्दरीम् ॥
कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
तर्ज्जनीमूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥"
इदमपि अशौचरक्षतादिविषयम् ॥ * ॥
"अङ्गुलीर्न वियुञ्जीत किञ्चिदाकुञ्चिते सति ।
अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः ॥
अङ्गुल्यग्रे च यज्जप्तं यज्जप्तं मेरुलङ्घने ।
पर्व्वसन्धिषु यज्जप्तं तत् सर्व्वं निष्फलं भवेत् ॥
गणनाविधिसंलक्ष्य यो जपेत्तच्च पर्य्यतः ।
यद्वन्ति राक्षसास्तेन गच्छेत् सर्व्वथा बुधः ॥
हृदये हस्तमारोप्य तिर्य्यक् ज्ञात्वा कराङ्गुलीः ।
आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥"
जपसंख्यायां निषिद्धदर्भं यथा,—
"नाग्रतेऽस्तपर्व्वभ्यां न धान्येन च पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसंख्यां कारयेत् ॥" *॥
क्वचिद्विहितदर्भं यथा,—
"नागाकृतीदसिन्दूरं गोमयञ्च करीषकम् ।
एभिर्निर्म्माय वटिकां जपसंख्यान्तु कारयेत् ॥"
अथ वर्णमालाजपनियमो यथा,—
"सबिन्दुं वर्णसङ्घाय पञ्चाशन्नं जपेद्बुधः ।
अकारादिक्षकारान्तं बिन्दुयुक्तं विभाव्य च ॥
वर्णमाला समाख्याता अनुलोमविलोमतः ।
पञ्चाशल्लिपिभिर्भिन्ना विहिता सर्व्वकर्म्मसु ॥
अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता ।
चार्द्धं मेरुसुखं तत्र कल्पयेन्मुनिसत्तम ! ।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः ॥"*॥
तस्य फलं यथा,—
"जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् ।
सर्व्वेषामेव यज्ञानां आयतेऽसौ महाफलः ॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
प्रसन्ना विपुलान् कामान् दद्यान्मुक्तिञ्च शाश्वतीम् ॥
यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः ।
नाग्निं नोपसर्पन्ति भयभीताः समन्ततः ॥
यावन्तः कर्म्मयज्ञाः स्युः प्रदिष्टानि तपांसि च ।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम् ॥
माहात्म्यं वाचिकस्येतत् जपयज्ञस्य कीर्त्तितम् ।
तस्माच्छतगुणोपांशुः साहस्रो मानसः स्मृतः ॥"
इति तन्त्रसारः ॥

जपनं, क्ली, (जप क्षुद्वचारे + भावे ल्युट् ।) जपः । इत्यमरटीका ॥ (यथा, महाभारते । १२ । १६६ । ७ ।
"संन्यास एव वेदान्ते वर्णितो जपनं प्रति ॥")

जपपरायणः, त्रि, (जप एव परमयनं आश्रयो यस्य ।) जपासक्तः । जपनशीलः । यथा,—
"शिवरात्रिव्रतं देव ! पूजाजपपरायणः ।
करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर ! ॥"
इति तिथ्यादितत्त्वम् ॥

जपा, स्त्री, (जपन्ति तान्त्रिका अनयेति । जप + अप् ततष्टाप् ।) जवापुष्पवृक्षः । इति हेमचन्द्रः । ४ । २१३ ॥ तस्य पर्य्यायगुणाः ।
"ओड्रपुष्पं जपा याग त्रिसन्ध्या साधवा स्मिता ।
जपा संध्याह्वयी कोशा त्रिसन्ध्या कपवातजित् ॥"
इति भावप्रकाशः ॥
(विशेषवार्त्ता जवाशब्दे ज्ञातव्या ॥)

जभ, जभने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) जभनं मैथुनम् । जभति युवा । इति दुर्गादासः ॥

जभ, इ जभने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) जभनं मैथुनम् । इ, जभ्यते । इति दुर्गादासः ॥

जभ, इ क नशि । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) नशीति अन्तर्भूतण्यर्थत्वान्नष्टीकरणे । इ क, जम्भयति पापं गङ्गा । इति दुर्गादासः ॥

जभ, इ ड जृम्भे । गात्रग्रैथिल्य इति यावत् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) इ, जम्भते । ड जम्भते । प्रत्यूषकाले भुजङ्गाङ्गनानां सुखेषु कामः प्रतिजृम्भतीव । इति गणरत्नतानित्यत्वात् । इति दुर्गादासः ॥

जभ, ड जृम्भे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) जृम्भो गात्रग्रैथिल्यमिति गोविन्दभट्टः । ड, जम्भते लोकः । शुक् जभो-ऽचीत्यत्रेव शुक् आत्मनेपदप्रकरणे स्वरविधान-सामर्थ्यात् । इति दुर्गादासः ॥

जभ, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्वात् क्त्वेट् ।) उ, जभित्वा जाग्ध्वा । इति दुर्गादासः ॥

जभ्, य, पत्नी । इति जभ्यतीशब्दटीकायां भरत-धृतनामप्रपञ्चः ॥

जमजौ, त्रि, (यमौ एकत्र सहचरौ सन्तौ जायेते इति । जन + ड । पृषोदरादित्वात् यस्य जः ।) यमजौ । इति द्विरूपकोषः ॥

जमदग्निः, पुं, (जमनं हुतभक्षणशीलः प्रज्वलित इत्यर्थः । तथाविधोऽग्निरिव । यद्वा, यमदग्निः । पृषोदरादित्वात् यस्य जः ।) यमदग्निसुनिः । इति द्विरूपकोषः ॥ स तु भृगुवंशोद्भव ऋचीकसुनिपुत्रः परशुरामपिता च । इति श्रीभागवतम् ॥ (अस्य जन्मविवरणादिकं महाभारते वनपर्व्वणि । ११५-११६ अध्याययोर्द्रष्टव्यम् ॥ असौ च सावर्णिके मन्वन्तरे ऋषिविशेषः । यथा, मार्कण्डेये । ७६।६-१० ।
"अत्रिश्चैव वशिष्ठश्च काश्यपश्च महामुनिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ॥
तथैव पुत्रो भगवान्ऋचीकस्य महात्मनः ।
जमदग्निस्तु सप्तैते सप्तयोऽत्र तथाऽन्तरे ॥")

जमनं, क्ली, (जम भक्षे + भावे ल्युट् ।) भोजनम् । इत्यमरटीकायां भरतः ॥

जम्यती, पुं, (जाया च पतिश्च । राजदन्तादि-गणे पाठात् जायाशब्दस्य जम्भावो निपात्यते ।) जायापती । इत्यमरः । २ । ६ । ३८ ॥ द्विवच-नान्तोऽयं शब्दः ॥

जम्बालः, पुं, (जसु अदने + बाहुलकादुवालच् । यद्वा, जम्ब + भावे घञ् । जम्बं आलातीति । ला + कः ।) पङ्कः । इत्यमरः । १ । १० । ६ ॥ (यथा, श्रीकवङ्कणचरिते । २ । १० ।
"अवद्यजम्बालजवेषजाय
क्षतोद्यमानां खलसेरिभाणाम् ।
कवीन्द्रवाङ्निर्झरनिर्झरिण्यां
संजायते वर्थमनोरथत्वम् ॥")
ग्रैवालः । इति मेदिनी । ले, ६१ ॥ केतक-वृक्षः । इति शब्दरत्नावली ॥

जम्बालिनी, स्त्री, (जम्बालः ग्रैवालोऽस्यस्या इति । जम्बाल + इनिः ।) नदी । इति हेमचन्द्रः । ४ । १४६ ॥

जम्बिरः, पुं, (जम्बीर + निपातनात् ह्रस्वः ।) जम्बीरः । इति शब्दरत्नावली ॥

जम्बीरः, पुं, (जम्बते भक्षयते इति । जसु भक्षे + "गम्भीरादयश्च ।" इति निपातनात् ईरन् प्रत्ययेन साधुः ।) फलवृक्षविशेषः । जाम्बीर इति लोके इति च भाषा । तत्पर्य्यायः । दन्त-शठः २ जम्भः ३ जम्भीरः ४ जम्भलः ५ । इत्यमरः । २ । ४ । २४ ॥ जम्भी ६ रोच-नकः ७ ग्रोधी ८ जाम्बारिः ९ दन्तहर्षणः १० गम्भीरः ११ जम्बिरः १२ दन्तकर्षणः १३ । इति शब्दरत्नावली ॥ रेवतः १४ वज्रशोधी १५ दन्तहर्षकः १६ । इति जटाधरः ॥ तस्य गुणाः ।

"जम्बीरसुरां गुर्वन्नं वातश्लेष्मविबन्धनुत् ।
शूलं कासकफक्लेशच्छर्दिहृल्लासदोषजित् ॥
आस्यवैरस्यहृत्पीड़ावह्निमान्द्यक्रमीन् हरेत् ।
स्वल्पजम्बीरिका तद्वत् तृष्णाच्छर्दिनिवारिणी ॥"

इति भावप्रकाशः ॥

तस्य फलस्य गुणाः । अम्लमधुररसत्वम् । वातनाशित्वम् । पथ्यत्वम् । पाचनत्वम् । रोचनत्वम् । पित्तबलाग्निदृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ अत्यन्तत्वम् । गुरुत्वम् । सुगन्धित्वम् । दुर्जरत्वम् । वह्निकफवातविबन्धनाशित्वञ्च । इति राजवल्लभः ॥ पक्वस्य तस्य गुणाः । मधुरत्वम् । कषार्त्तिपित्तासदोषनाशित्वम् । वर्णवीर्यरुचिपुष्टिबलकारित्वञ्च । मल्लकः । अर्जकः । सितार्जकः । इति राजनिर्घण्टः ॥ (क्षुद्रपत्रतुलसी । यथा, वैद्यकरत्नमालायाम् ।
"खरपर्णस्तु जम्बीरः प्रस्थपुष्पः फणिज्झकः ॥")

जम्बुः, स्त्री, (जम्बते इति । जसु भक्षणे + "अन्दू-इनफूजम्बिति ।" उणा १ । ६५ । इति कू प्रत्ययेन निपातनात् साधुः । बाहुलकात् ह्रस्वः ।) जम्बूः । इत्यमरटीकायां भरतः ॥ (यथा,—
"जम्बुर्ग्राही मधुरकफहा रोचनो वातहारी ।"
इति हारीते प्रथमस्थाने दशमेऽध्याये ॥)

जम्बु, क्ली, स्त्री, जम्बूफलम् । तत्पर्य्यायः । जम्बूः २ जाम्बवम् ३ । इत्यमरः । २ । ४ । १६ ॥

जम्बुकः, पुं, (जमतीति । जसु भक्षणे + "ऋगयुषि दयच्च ।" उणा १ । ३८ । इति कुप्रत्ययेन निपातनात् साधुः । ततः स्वार्थे कन् ।) शृगालः । (यथा, महाभारते । १ । १४१ । ४६ ।
"एवं तेषु प्रयातेषु जम्बुके दुरमानसः ।
खादति स्म तदा मांसमेकः सन्नलनिश्चयात् ॥")
वराहः । (जम्बु इव कायतीति । के + कः ।) वृक्षविशेषः । गोलापचाम इति भाषा ॥ नीचे त्रि । इति शब्दरत्नावली ॥ म्लेच्छाकप्रभेदः । इति राजनिर्घण्टः ॥ (सुवर्णकेतकी । यथा,—
"केतकः स्फिटिकापुष्पो जम्बुकः क्रकचच्छदः ।
सुवर्णकेतकी तस्या लघुपुष्पा सुगन्धिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जम्बुद्वीपः, पुं, (जम्बुवृक्षयुक्तो द्वीपः ।) पृथिव्याः सप्तद्वीपान्तर्गतद्वीपविशेषः । अयं द्वीपः पद्मकोषमध्यवर्त्तिकोष इव लक्षयोजनविस्तीर्णः पद्मपत्र इव समवर्त्तुलः लक्षयोजनविस्तृतलवणसमुद्रेण वेष्टितः । यस्मिन् प्रत्येकनवसहस्रयोजनायामानि नव वर्षाणि तेषां वर्षाणामष्टौ सीमपर्व्वताः सन्ति । ॥ एषां वर्षाणां मध्ये इलावृतवर्षे मध्यवर्त्ति यस्य मध्यदेशे सुमेरुपर्व्वतः लक्षयोजनोत्सेधः । इलावृतवर्षस्योत्तरे नीलपर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः पूर्व्वपश्चिमयोः पारससमुद्रावधि दीर्घः । ॥ । तदुत्तरे रम्यकवर्षं तदुत्तरे श्वेतपर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः पूर्व्वपश्चिमयोः पारससमुद्रावधि दीर्घः । ॥ । तदुत्तरे हिरण्मयवर्षं तदुत्तरे शृङ्गवान् पर्व्वतः तस्य विस्तारादयः श्वेतपर्व्वतवत् दैर्घ्येण श्वेतपर्व्वतात् किञ्चिदधिकदशांशेन न्यूनः । ॥ । तदुत्तरे कुरुवर्षं तदुत्तरे लवणसमुद्रः । इलावृतवर्षस्य दक्षिणे निषधपर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः पूर्व्वपश्चिमयोः पारससमुद्रावधि दीर्घः । ॥ । तद्दक्षिणे हरिवर्षं तद्दक्षिणे हेमकूटपर्व्वतः अस्य विस्तारादयो निषधवत् दैर्घ्येण निषधात् किञ्चिदधिकदशांशेन न्यूनः । तद्दक्षिणे हिमालयपर्व्वतः अस्य विस्तारादयः पूर्व्ववत् दैर्घ्येण हेमकूटपर्व्वतात् किञ्चिदधिकदशांशेन न्यूनः । ॥ । तद्दक्षिणे भारतवर्षं तद्दक्षिणे पारससमुद्रः । इलावृतस्य पश्चिमे माल्यवान् पर्व्वतः द्विसहस्रयोजनविस्तीर्णः अयुतयोजनोत्सेधः उत्तरदक्षिणयोर्नीलनिषधपर्व्वतावधि दीर्घः । ॥ । ततपश्चिमे केतुमालवर्षं ततपश्चिमे लवणसमुद्रः । इलावृतस्य पूर्व्वे गन्धमादनपर्व्वतः अस्य विस्तारादयो माल्यवद्वत् । ततपूर्व्वे भद्राश्ववर्षं ततपूर्व्वे लवणसमुद्रः । ॥ । मेरोः पूर्व्वादिचतुर्दिक्षु मन्दरमेरुमन्दरसुपार्श्वकुमुदनामानः पर्व्वतास्तिष्ठन्ति । तेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारो वृक्षाः सन्ति । ते सर्व्वे दैर्घ्येण एकादशशतयोजनपरिमिताः विस्तारे शतयोजनपरिमिताः । तेषां शाखाविस्तारः एकादशशतयोजनपर्य्यन्तम् । तेषु पर्व्वतेषु ह्रदाश्चत्वारः पयोमधिक्षुरसमदृशजलाः । एवं नन्दनचैत्ररथवैभ्राजकसर्व्वतोभद्रसंज्ञकानि चत्वारि देवोद्यानानि च सन्ति । ॥ । मन्दरोपरिस्थितैकादशशतयोजनोच्चचूतमस्तकात् पर्व्वतशृङ्गवत् स्थूलानि फलान्यरुणवर्णानि पतन्ति । तेषां विशीर्य्यमाणानामतिमधुरसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणेलावृतमुपप्लावयति । ॥ । एवं जम्बूफलानामरुचिनिपातविशीर्णानामनस्थिप्रायाणामभिकायनिभानां रसेन जम्बूर्गाम नदी मेरुमन्दरशिखरादवनितले निपतन्ती दक्षिणेनेलावृतं वहति । तस्या उभयोस्तीरयोर्मृत्तिका जम्बूरसेनाशुविध्यमाना वायुर्कसंयोगविपाकेन सदासरलोकाभरणं जाम्बूनदं नाम स्वर्णं भवति । ॥ । सुपार्श्वपर्व्वतस्थो यो कदम्बवृक्षस्तस्य पञ्चकोटरेभ्यो विनिःसृताः पञ्चयामसन्मूलाः पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्यः पश्चिमेनेलावृतमनुमोदयन्ति । ॥ । कुमुदपर्व्वतोपरिस्थितो यो वटवृक्षस्तस्य स्कन्धेभ्यो निर्गताः पयोदधिघृतमधुगुडान्नाद्यम्बरगव्यशय्याभद्रादियुक्ताः कामदुघा नदाः कुमुदाग्राद् प्रपतन्त उत्तरेणेलावृतमुपभोजयन्ति । ॥ । तान् नदान् सेवमानानां प्रजानां वलीपलितजन्मदौर्गन्ध्यजरामयक्लमग्लानीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा न कदाचित् भवन्ति यावज्जीवं निरतिशयसुखमेव । कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिखरशिशिरपतङ्गरुचकनिषधशितिवासकपिलशङ्खवैदूर्य्यजारुधिहंसऋषभनागकालञ्जरनीरदादयः पर्व्वता मेरोर्मूलदेशे परित उपकुल्याः । मेरोः पूर्व्वदिशि उत्तरस्यामष्टादशयोजनदीर्घौ जठरदेवकूटपर्व्वतौ तिष्ठतः । तौ द्विसहस्रयोजनविस्तारौ एवं द्विसहस्रयोजनोच्चौ । मेरोः पश्चिमायान्दिशि पवनपारियात्रौ पर्व्वतौ उत्तरस्यां अष्टादशयोजनदीर्घौ द्विसहस्रयोजनविस्तारौ द्विसहस्रयोजनोच्चौ । एवं दक्षिणस्यान्दिशि कैलासकरवीरपर्व्वतौ पूर्व्वस्यामष्टादशयोजनदीर्घौ द्विसहस्रयोजनविस्तारौ द्विसहस्रयोजनोच्चौ । एवमुत्तरस्यां त्रिशृङ्गमकरपर्व्वतौ पूर्व्वस्यामष्टादशयोजनदीर्घौ द्विसहस्रयोजनविस्तारौ द्विसहस्रयोजनोच्चौ । एवं वर्षे वर्षे नदाः नद्यश्च बहवः सन्ति ॥ ॥ तत्रापि भारतमेव वर्षं कर्म्मक्षेत्रं अन्यान्यानि वर्षाणि सर्गिणां पुण्यशेषोपभोगस्थानानि भूस्वर्गनामाख्यातानि । एषु वर्षेषु पुरुषाणां आयुरयुतवर्षाणि ते देवकल्पा अयुतहस्तिबलविशिष्टाः वज्रवद्दृढशरीराः सर्व्वदा मोदयुक्ताः सन्ति । येषु देवपतयः सगणाः सलोकाः नानास्थानेषु स्वैरं विहरन्ति । नवसु वर्षेषु भगवान् नारायणस्तत्तत्पुरुषाणामभ्युदयाय स्वमूर्त्तिभेदेनाद्यापि सन्निहितो भवति । ॥ । इलावृते तु वर्षे भगवान् शिव एक एव पुरुषः भवानी प्रधानार्द्धसहस्रैः स्त्रीभावैः परिवृतः नारायणस्य सङ्कर्षणसंज्ञां मूर्त्तिं ध्यानेन सन्निधाप्य स्तुवन्नास्ते । ॥ । भद्राश्वे वर्षे तद्वर्षपतिभद्रश्रवा नाम धर्म्मसुतः ततकुलपतयः पुरुषा भगवतो हयशीर्षाभिधानां मूर्त्तिं परमसमाधिना सन्निधाप्य स्तुवन्ति । ॥ । हरिवर्षे भगवान्नरहरिरूपेणास्ते तत्र प्रह्लादो दैत्यदानवकुलतीर्थस्वरूपः तदर्षभपुरुषैः सहानन्यभक्तियोगेनोपास्ते । ॥ । केतुमाले भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया आस्ते तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेता अहःसु तद्भर्तृभिरुपेता उपास्ते । ॥ । हिरण्मये वर्षे भगवान् कूर्म्मतनुं बिभ्राणो निवसति तद्भगवन्मूर्त्तिं पितृगणाधिपतिरर्यमा तद्वर्षपुरुषैः सह उपास्ते । ॥ । उत्तरकुरुवर्षे भगवान् वराहरूपी आस्ते तं भूमिसंज्ञं पुरुषैः सहाखलितभक्तियोगेनोपास्ते । ॥ । किम्पुरुषे वर्षे भगवान् दाशरथी रामरूपेणास्ते तं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनुमान् अविरतभक्तिरद्वर्षपुरुषैरुपास्ते । ॥ । भारते वर्षे भगवान्नरनारायणाख्य आत्मज्ञानिनामनुग्रहायानुकम्पया अवर्त्तगतिरद्यापि चरति । तन्मूर्त्तिं नारदः वर्षाभिमुखाभिर्भारतवर्षीयप्रजाभिः सह भगवदनुभावोपबर्हणं पञ्चरात्रं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेन सेवते । ॥ । भारतेऽप्यस्मिन् वर्षे सरिच्छैला बहवः सन्ति । यथा, मलयः मङ्गलप्रस्थः मैनाकः त्रिकूटः

ऋषभः कूटकः कोलः सह्यः देवगिरिः ऋष्यमूकः श्रीशैलः महेन्द्रः वारिधारः विन्ध्यः शुक्तिमान् ऋक्षगिरिः पारियात्रः द्रोणः चित्रकूटः गोवर्द्धनः रैवतकः ककुभः नीलः कोकः गोमुखः इन्द्रकीलः कामगिरिरिति चाग्नेये च प्रतसहस्रशः शैलाः। *। तेषां नितम्बप्रभवा नद्यो ह्यसंख्याताः। यथा, चन्द्रवंश्या साम्बपर्णी अवटोदा क्षतमाला वैहायसी कावेरी वेत्रा पयस्विनी घृतकुल्या त्रिसामा गण्डकी वाग्मती कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूः ओघवती सुषोमा सुप्रयोगः चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वा इति महानद्यः। अन्याः शोणश्च नदौ। *। अस्मिन् वर्षे लब्धजन्मभिः पुरुषैः शुक्लाहितलक्षणवर्णेन खरश्मेन कर्म्मणा दिव्यमानुषनारकगतयो भवन्ति॥ *॥ जम्बुद्वीपस्य अष्टौ उपद्वीपाः सन्ति सगरात्मजैरन्वेष्टुमेषु इमां महीं परितो निखनद्भिरुपकल्पिताः। तद्यथा, स्वर्णप्रस्थः चन्द्रशुक्लः आवर्त्तनः रमणकः मन्दहरिणः पाञ्चजन्यः सिंहलः लङ्का इति। इति श्रीभागवते। ५। १६ अध्याये। तथा च मार्कण्डेये ५४ अध्याये मातृके ११२ अध्याये च द्रष्टव्यम्॥ *॥ ज्योतिःशास्त्रमते लवणसमुद्रस्योत्तरे जम्बुद्वीपः। स तु भूम्यर्द्धभागः। तस्य दक्षिणे द्वितीयार्द्धभागे द्वीपषट्कस्य सप्तसमुद्रस्य च निवेशः। इति सिद्धान्तशिरोमणिः॥

जम्बुलः, पुं, (जम्बुं जम्बुफलं लातीति। ला+कः।) जम्बूवृक्षः। केतकवृक्षः। इति विश्वः॥ (यथा, सुश्रुते। १। १६।
"अवमन्थः सकङ्कोलो ग्रन्थिको जम्बुलक्षया॥")

जम्बुवनजं, क्ली, (जम्बुवनमिव जायते इति। जन्+डः।) श्वेतजवापुष्पम्। यथा,—
"पारिभद्रं पाटला च वकुलं गिरिशालिनी।
तिलकं जम्बुवनजं पीतकं तगरन्त्वपि॥
एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने॥"
इति वामनपुराणम्॥

जम्बूः, स्त्री, (जम्यते भक्ष्यते इति। जसु अदने+"अन्दूजनूफूजम्बिति।" उणा १। ६५। इति कूः।) नागदमनी। इति राजनिर्घण्टः॥ वृक्षविशेषः। जाम इति भाषा। तत्पर्य्यायः। सुरभिपत्रा २ नीलफला ३ श्यामला ४ महास्कन्धा ५ राजार्हा ६ राजफला ७ शुकप्रियाः ८ मोदमोदिनी ९। तत्फलगुणाः। कषायत्वम्। मधुरत्वम्। श्रमपित्तदाहकण्ठार्त्तिशोषक्लमिदोषश्वासातिसारकफकासविनाशित्वम्। विष्टम्भित्वम्। रोचनत्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ गुरुत्वम्। स्वादुत्वम्। शीतलत्वम्। अभिसंदूषणत्वम्। रूक्षत्वम्। वातकारित्वम्। इति राजवल्लभः॥ सा वृक्षस्तु द्विविधा। तत्र वृक्षस्य पर्य्यायः। महाजम्बूः १ महापत्रा २ राजजम्बूः ३ वृक्षतृफला ४। इति रत्नमाला॥ फलेन्द्रः ५ गन्दः ६ महाफला ७ सुरभिपत्रा ८। एतत्फलगुणाः। विष्टम्भित्वम्। गुरुत्वम्। रोचनत्वम्। इति भावप्रकाशः॥ क्षुद्रायाः पर्य्यायः। क्षुद्रजम्बूफला १ दीर्घपत्रा २ मध्यमा ३। वनजम्बूपर्य्यायः। भूमिजम्बूः १ काकजम्बूः २ नादेयी ३ श्वेतपत्रिका ४। इति रत्नमाला॥ क्षुद्रपत्रा ५ जलजम्बुका ६। तत्फलगुणाः। ग्राहित्वम्। रूक्षत्वम्। कफपित्तासदाहनाशित्वञ्च। इति भावप्रकाशः॥ तत्फलस्य पर्य्यायः। जम्बु २ जाम्बवम् ३। इत्यमरः। २। ४। १६॥ (स्वनामख्याता नदी। यथा, मात्स्ये। १२०। ६७।
"मेरोः पार्श्वात् प्रभवति हृदश्चन्द्रप्रभो महान्। जम्बूश्चैव नदी पुण्या यस्यां जाम्बूनदं स्रुतम्॥")

जम्बुकः, पुं, स्त्री, (जम्बुकः पृषोदरादित्वात् दीर्घः।) शृगालः। इति शब्दरत्नावली॥ जम्बुकशब्दार्थोऽप्यत्र॥

जम्बूका, स्त्री, (जम्बूरिव कायतीति। कै+कः। अजादित्वात् टाप्।) काकलीद्राक्षा। इति राजनिर्घण्टः॥

जम्बूलः, पुं, (जम्बूं जम्बूफलं लातीति। ला+कः।) जम्बूवृक्षः। केतकवृक्षः। इति मेदिनी। ले, ६४॥ (यथा, हरिवंशे। ६६। १६।
"जम्बूजम्बूलवृक्षाढ्यं कन्दकन्दलभूषितम्॥")
वरपक्षीयस्त्रीणां परिहासवचनम्। इति नीलकण्ठः॥)

जम्बूलमालिका, स्त्री, (जम्बूलस्य वरपक्षीयरमण्याः परिहासवचनस्य मालिका परम्परा।) कन्यावरयोर्मुखचन्द्रिका। इत्युद्वाहतत्त्वम्॥ (यथा, हरिवंशे। १८३। २२।
"आग्नेयीभिर्व्वर्द्धयित्वा च देवर्षिः श्लक्ष्णमब्रवीत्। अनिरुद्धस्य वीर्य्याख्यो विवाहः क्रियतां विभोः। जम्बूलमालिकां द्रष्टुं अहो हि मम जायते॥")
"जम्बूलं वरपक्षीयस्त्रीणां परिहासवचनं तेषां मालिका श्रेणी।" इति तट्टीकायां नीलकण्ठः॥

जम्भः, पुं, (जम्भते भृम्भते इति। जभि गात्रविनामे+घञ्। यद्वा जभ्यते भक्ष्यते इति। जभ भक्षणे+घञ्। "रधिजभोरचि।" ७। १। ६१। इति नुम्।) दैत्यभेदः। (इन्द्र एनं निहतवान्॥ अपरो दैत्यविशेषः। विष्णुरेनं जघान। यथा, महाभारते। ३। १०२। २४—२५।
"असुरश्च महेष्वासो जम्भ इत्यभिविश्रुतः। यज्ञघोभकरः क्रूरस्त्वयैव विनिपातितः॥
एवमादीनि कर्म्माणि येषां संख्या न विद्यते। अस्माकं भयभीतानां त्वं गतिर्मधुसूदन!॥"
प्रह्लादपुत्राणामेकतमः। यथा, हरिवंशे। २१८। ३५।
"प्रह्लादस्य त्रयः पुत्रा विक्रान्ताश्च महाबलाः। विरोचनश्च जम्भश्च कुजम्भश्चेति विश्रुताः॥"
राक्षसविशेषः। स तु रावणस्यानुचरः। यथा, महाभारते। ३। २८४। रामरावणयुद्धे। २।
"पर्व्वतः पूतनो जम्भः खरः क्रोधवशो हरिः।"
जम्भ्यते भक्ष्यतेऽनेनेति। जम्भ+करणे घञ्।) दन्तः। यथा, ऋग्वेदे। ८। ६१। २।
"इमं जम्भसुतं पिब।" "जम्भसुतं दन्तैरभिषुतम्।" इति तद्भाष्यम्॥ *॥ जम्भ्यते भक्ष्यतेऽसौ इति कर्म्मणि घञ्।) जम्बीरः। (यथा,—
"खाज्जम्बीरो दन्तशठो जम्भजम्भीरजम्भलाः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ *॥
जभ+भावे घञ्।) भक्षणम्। इति मेदिनी। मे, ४॥ (यथा, महाभारते। ५। ६४। २०।
"इति ते कथयन्ति स्म ब्राह्मणा जम्भसाधकाः॥")
अंशुः। हनुः। तूणः। इति हेमचन्द्रः॥

जम्भकः, पुं, (जम्भ एव। स्वार्थे कन्।) जम्बीरः। इति शब्दचन्द्रिका॥ (स्वनामख्यातो नृपविशेषः। यथा, महाभारते। २। ३१। ७।
"ततश्चर्म्मण्वतीकूले जम्भकस्यात्मजं नृपम्। ददर्श वासुदेवेन शोषितं पूर्व्ववैरिणा॥"*॥)
जभ्नातीति जभ्+जभने+ण्वुल्। कासुके, त्रि॥)

जम्भका, स्त्री, (जम्भा एव। स्वार्थे कन्।) तृम्भा। इति राजनिर्घण्टः॥

जम्भगः, पुं, (जम्भाय भक्षणाय गच्छति जभतीति। गम+डः। अतिशयेन भक्षणशीलत्वात् तथात्वम्।) राक्षसविशेषः। यथा,—
"देवा यक्षास्तथा नागा गन्धर्व्वाप्सरसोऽसुराः।
क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भगाः खगाः॥
विद्याधरा जलाधारास्तथैवाकाशगामिनः।
निराहाराश्च ये जीवाः पापेऽधर्म्मे रताश्च ये॥
तेषामाप्यायनायैतद्दीयते सलिलं मया॥"
इत्याह्निकाचारतत्त्वधृतपद्मपुराणवचनम्॥

जम्भद्विट्, [द्] पुं, (जम्भं तदाख्यया प्रसिद्धमसुरं द्वेष्टीति। द्विष्+क्विप्। जम्भस्य द्विट् इति वा।) इन्द्रः। इति हेमचन्द्रः॥ (विष्णुः। इति महाभारतम्॥)

जम्भभेदी, [न्] पुं, (जम्भं भेत्तुं शीलमस्य। भिद्+"सुप्यजातौ णिनिस्ताच्छील्ये।" ३। २। ७८। इति णिनिः।) इन्द्रः। इत्यमरः। १। १। ४६॥

जम्भरः, पुं, (जम्भं भक्षणरुचिं राति ददातीति। जम्भ+रा+कः।) जम्बीरः। इति शब्दचन्द्रिका॥

जम्भलः, पुं, (जम्भर। रस्य लत्वम्।) जम्बीरः। (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"खाज्जम्बीरो दन्तशठो जम्भजम्भीरजम्भलाः॥")
वृद्धदेवविशेषः। इति मेदिनी। ले, ६३॥

जम्भला, स्त्री, (जम्भं भक्षणं लाति आददातीति। ला+कः।) राक्षसीविशेषः। यथा,—
"समुद्रस्योत्तरे तीरे जम्भला नाम राक्षसी।
तस्याः स्मरणमात्रेण विघ्नस्तस्या गर्भिणी भवेत्॥"
इति ज्योतिषतत्त्वे राजमार्त्तण्डः॥

जम्भा, स्त्री, (जम्भ्यते इति। जभि तृम्भायाम्+भावे घञ्। ततः स्त्रियां टाप्।) तृम्भा। इति राजनिर्घण्टः॥

जम्भारिः, पुं, (जम्भस्यासुरस्य वरिः शत्रुः।) इन्द्रः। यथा, "जम्भारिदम्भोलयः।" इत्युत्तरनेषधम्॥ वह्निः। वज्रम्। इति विश्वः॥ (विष्णुः। इति महाभारतम्॥)

जम्भी, [न्] पुं, (जम्भयति क्षुधामान्द्यादिकं नाशयतीति। जभि क नाशे+इनिः।) जम्भीरः। इति शब्दचन्द्रिका॥

जम्भीरः, पुं, (जम्भाते अभिदृद्धार्थं भक्ष्यते इति। जभ+"गम्भीरादयश्च।" इति ईरन्। ततो "रधिजभोरचि।" ७।१।६१। इति नुम्।) जम्बीरः। इत्यमरः। २।४।७६॥ मरुवकः। इति तट्टीकायां भरतः॥

जयः, पुं, (जि जये+"एरच्।" ३।३।५६। इत्यच्।) शत्रुपराङ्मुखीकरणम्। जित् इति भाषा। तत्पर्य्यायः। विजयः २ जयनम् ३। इत्यमरः। २।८।१०॥ (यथा, मनुः।७।४४। "इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्। जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः॥") अभिमन्युः। (जयतीति। जि+पचाद्यच्।) जयन्तः। युधिष्ठिरः। इति मेदिनी। ये, २५॥ (एतन्नाम तु विराटगृहे कृष्णप्रवाससमये जातम्। यथा, महाभारते। ४।५।२४।

"जयो जयन्तो विजयो जयत्सेनो जयद्बलः।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः॥")

विजयनन्दनराजः। स तु इक्ष्वाकुवंशोद्भवः। इति हेमचन्द्रः। ३।३५८॥ श्रीनारायणपार्षदः। यथा,—

"एतौ द्वौ पार्षदौ मह्यं जयो विजय एव च।
कदर्थीकृत्य मां यन्तौ बलात्तामतिक्रमम्॥"
इति श्रीभागवते। ३।१६।२॥

(सर्व्वाणि भूतानि जयतीति। जीयते संसारमनेन वा। विष्णुः। यथा, महाभारते। १३। १४६। ६७।

"जयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः॥"

नागविशेषः। यथा, महाभारते।५।१०३।१६।

"विरजा धारणश्चैव सुबाहुर्मुखरो जयः॥"

दानवविशेषः। यथा, हरिवंशे। २३४। ८३।

"जयो निकुम्भः कुपथश्च दानवो
रराजुरेते दश दानवाधिपम्॥"

दशमसन्वन्तरीय-ऋषिविशेषः। यथा, भागवते। ८। १३। २१—२२।

"दशमो ब्रह्मसावर्णिरुपश्लोकसुतो मनुः॥"

"हविष्मान् सुकृतः सत्यो जयो मूर्त्तिरतद्वित्रियाः॥"

ध्रुववंशीयस्य वत्सरस्य पुत्रविशेषः। यथा, तत्रैव। ४। १३। १९।

"सुरुचीर्वत्सरस्येष्टा भार्य्याऽसूत षडात्मजान्।
पुष्पार्णं तिग्मकेतुञ्च इषमूर्ज्जं वसुं जयम्॥"

विश्वामित्रपुत्रविशेषः। (यथा, तत्रैव। ६। १६। ३६।

"एष वः कुशिकाः वीरो दैवरातस्तमन्वित।
अग्रे वाजकहारीतजयक्रतुमुदादयः॥"

ऊर्ब्बग्रीवगर्भजातः पुरुरवसः पुत्रविशेषः। यथा, तत्रैव। ६। १५। १।

"ऐलस्य चोर्ब्बशीगर्भात् षड़ासन्नात्मजा नृप!।
आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः॥"

राजर्षिविशेषः। यथा, महाभारते। २।८।१४।

"तस्यां राजर्षयः पुण्यास्तथा ब्रह्मर्षयोऽमलाः।
यमं वैश्रवणं तात! प्रहृष्टाः पर्य्युपासते॥"

इत्युपक्रम्याह।

"अङ्गो विजश्च वेणश्च दृढ़च्युतः सुव्रतो जयः॥"

धृतराष्ट्रपुत्राणामन्यतमः। यथा, तत्रैव। १। ६३। ११७।

"जयः सत्यव्रतश्चैव पुरमित्रश्च भारत!॥"

सृञ्जयस्य राज्ञः पुत्रः। यथा, हरिवंशे। २६। २।

"सृञ्जयस्य जयः पुत्रो विजयस्तस्य चात्मजः॥"

सृञ्जयस्य राज्ञः पुत्रः। यथा, भागवते। ६। १७। १६। [जयः॥"

"कृशात् प्रतिः क्षात्रवृद्धात् सृञ्जयस्तत सुतो दौष्मन्तेर्भन्यो पुत्रविशेषः। यथा, तत्रैव। ६। २१। १।

"वितथस्य सुतात् मन्योर्हृतद्रव्यो जयस्ततः॥"

युयुधानपुत्रः। यथा, तत्रैव। ६। २४। १४।

"युयुधानः सात्यकिर्वै जयस्तस्य कुलिस्तः॥"

भारतादिशास्त्रविशेषः। यथा, भविष्यपुराणे।

"अष्टादशपुराणानि रामस्य चरितं तथा।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत!॥
काव्यान्यत्र पञ्चमो वेदो यन्महाभारतं स्मृतम्।
सौराश्च धर्म्मा राजेन्द्र! मागधोक्ता महीपते!॥
जयेति नाम यतैषां प्रवदन्ति मनीषिणः॥"

दक्षिणद्वारयज्ञम्। इति शब्दार्थचिन्तामणिः॥ वत्सरविशेषः। ततफलं यथा,—

"क्षत्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः।
पौड़िताश्चे वरारोहे! जये सर्व्वे न संशयः॥")

जयकोलाहलः, पुं, (जयस्य कोलाहलो यत्र।) पाशुपतभेदः। इति शब्दरत्नावली॥ (जयस्य कोलाहलः।) जयध्वनिश्च॥

जयघण्टा, स्त्री, (जयघोषिका घण्टा। विजयकाले एव वादनादस्य तथात्वम्।) वाद्यविशेषः। इति लोकप्रसिद्धा। जयढाक इति भाषा॥

जयदत्तः, पुं, (जयेन विजयेन दत्त इव। जयप्रीतत्वादेवास्य तथात्वम्।) इन्द्रपुत्रः। इति हेमचन्द्रः। २। ८६॥

जयनं, क्ली, (जीयतेऽनेनेति। जि+करणे ल्युट्।) तुरङ्गादिसमाहः। (यथा, माघे।१७।२३।

"सकवचनं शिरदगजं वरूथिन-
स्तुरङ्गिणो जयनयुजश्च वाहिनः।
त्वरायुजः खयमपि कुर्व्वतो नृपाः
पुनः पुनस्तदधिसतानतत्वरम्॥"* ॥

भावे ल्युट्।) जयः। इति मेदिनी। ने, ६७॥

जयनी, स्त्री, (जयन+स्त्रियां ङीप्।) इन्द्रकन्या। इति शब्दरत्नावली॥

जयन्तः, पुं, (जयतीति। जि+"तृभूवहिवसीति।" उणां ३।१२८। इति झच्।) इन्द्रपुत्रः। तत्पर्य्यायः। पाकशासनिः २। इत्यमरः। १।१।४६॥ ऐन्द्रिः ३। इति मेदिनी। ते, ११०। (यथा, रघौ। ३।२३।

"उमाद्वितीयौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ॥"

विष्णुः। यथा, महाभारते। १३। १४६। ६८।

"अर्को वाजसनः शृङ्गी जयन्तः सर्व्वविज्जयी॥"

"अतिशयेनारिन् जयते जयहेतुरिति वा जयन्तः।" इति तट्टीकायाम्॥) शिवः। (यथा, मातृकायाम्। ५। ६०।

"सावित्रश्च जयन्तश्च पिनाकी चापराजितः।
एते रुद्राः समाख्याता एकादशगणेश्वराः॥")

चन्द्रः। इति त्रिकाण्डशेषः॥ भौमः। इति मेदिनी। ते, ११०॥ (एतन्नाम तु कृष्णना विराटगृहवासकाले जातम्। यथा, महाभारते। ४।५।२४।

"जयो जयन्तो विजयो जयत्सेनो जयद्बलः।
इति गुह्यानि नामानि चक्रे तेषां युधिष्ठिरः॥")

मरुत्वतीगर्भजातो धर्म्मपुत्रविशेषः। अयं हि उपेन्द्र इत्याख्यया प्रसिद्धः। यथा, भागवते। ६।६।८।

"मरुत्वांश्च जयन्तश्च मरुत्वान् बभूवतुः।
जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः॥"

राज्ञो दशरथस्य मन्त्रिविशेषः। यथा, रामायणे। १।७।२—३।

"अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः।
शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः॥
दृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्द्धनः।
अकोपो धर्म्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित्॥"

पर्व्वतविशेषः। यथा, हरिवंशे।१७०।१४।

"ततश्च पर्व्वताः सप्त केशवं समुपस्थिताः।
जयन्तो वैजयन्तश्च नीलो रजतपर्व्वतः।
महामेरुः सकैलाशः शृङ्गकूटश्च गामतः॥"

ज्योतिषोक्तयात्रिकयोगविशेषः। यथा,—

"यत्र स्थोदयगतचन्द्रो जन्मादेकादशे स्थितः।
जयन्तो नाम योगोऽयं शत्रुपक्षविनाशकृत्॥")

षोड़शध्रुवकान्तर्गतध्रुवविशेषः। तस्य लक्षणं यथा,—

"आदितोऽयं जयन्तः स्यात् शृङ्गाररससंयुतः।
रुद्रसंख्याक्षरपदः आयुर्वृद्धिकरः परः॥"
इति सङ्गीतदामोदरः॥

जयन्तिका, स्त्री, (जयन्तीव कायतीति। के+कः। ततो ह्रस्वो निपातनात्।) हरिद्रा। इति राजनिर्घण्टः॥ (दुर्गायाः सखीविशेषः। यथा, कालीखण्डे। ४०। ४६।

"यथा जया च विजया यथा चैव जयन्तिका।")

जयन्ती, स्त्री, (जयतीति। जि+"तृभूवहीति।" उणां ३। १२८। इति झच्। ततो गौरा-

दित्वात् ङीष् ।) गौरी । (यथा, कलिकापुराणे ।
"जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमो-
ऽस्तु ते ।")
इन्द्रपुत्री । पताका । इति मेदिनी । ते, १०६ ॥
वृक्षविशेषः । तत्पर्य्यायः । जया २ तर्कारी ३ नादेयी ४ वैजयन्तिका ५ । इत्यमरः ।२।४।६५॥
बला ६ मोटा ७ हरिता ८ विजया ९ सूक्ष्म-
मूला १० विक्रान्ता ११ अपराजिता १२ ।
(यथा, तिथितत्त्वे ।
"कदली दाड़िमो धान्यं हरिद्रा मानकं कचु ।
विल्वोऽग्नीको जयन्ती च विज्ञेया नवपत्रिकाः॥")
अस्याः गुणाः । मदगन्धयुक्तत्वम् । तिक्तत्वम् ।
कटुत्वम् । उष्णत्वम् । कृमिभूतनाशित्वम् ।
कण्ठविशोधनत्वञ्च । तत्र क्षुद्रा रसायनी ।
इति राजनिर्घण्टः ॥ एतच्छाकस्य गुणाः ।
गरदोषनाशित्वम् । पक्षहितत्वम् । मधुरत्वम् ।
हिमत्वञ्च । इति राजवल्लभः ॥
("श्वेतजयन्ती मूलं पिष्टं पीतञ्च गव्यपयसैव ।
श्वित्रं निहन्ति नियतं रविवारे वैद्यनाथाज्ञा ॥"
इति वैद्यकचक्रपाणिसंग्रहे कुष्ठाधिकारे ॥)
योगविशेषः । यथा, तिथ्यादितत्त्वे स्कान्दम् ।
"जयं पुण्यञ्च कुरुते जयन्तीमिति तां विदुः ।
रोहिणीसहिता कृष्णा माघे च श्रावणेऽष्टमी ॥
अर्द्धरात्रादधश्चोर्द्धं कलयापि यदा भवेत् ।
जयन्ती नाम सा प्रोक्ता सर्व्वपापप्रणाशिनी ॥"
(द्वादशीविशेषः । यथा, ब्रह्मवैवर्त्ते ।
"उन्मिलनी वञ्जुली च त्रिस्पृशा पक्षवर्द्धिनी ।
जया च विजया चैव जयन्ती पापनाशिनी ।
द्वादश्यश्चैता महापुण्याः सर्व्वपापहरा द्विज ! ॥"
वटिकौषधविशेषः । तद्यथा,—
"विषं पाठाश्वगन्धा च वचातालीशपञ्चकम् ।
मरिचं पिप्पलीनिम्बमजामूत्रेण तुल्यकम् ।
वटिका पूर्ब्ववत्कार्य्या जयन्तीयोगवाहिका ॥"
इति जयन्ती वटी ।
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)
जयपत्रं, क्ली, (जयस्यकं पत्रम् ।) अश्वमेधीय-
यज्ञघोटकफाले बद्धा लिपिः । तद्यथा,—
"त्रैलोक्यविजयी रामो रावणान्तकरः प्रभुः ।
स दीक्षितो वाजिमेधे तस्यायं प्रोक्षितः पशुः ॥
पालितो लक्ष्मणेनैव सुलक्षणविलक्षितः ।
संपूज्य च परित्याज्यः सर्व्वैरिति च संस्कृताम् ॥"
इति वाग्भिरायणम् ॥*॥
विवादविषयकजयबोधकलिपिः । डिक्करि इति
इङ्गराजी भाषा । यथा, व्यवहारतत्त्वे ।
"यदृष्टं व्यवहारात्तु पूर्ब्वपक्षोत्तरादिकम् ।
क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत् ॥
पूर्ब्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः ।
प्रदद्याज्जयिने लेखं जयपत्रं तदुच्यते ॥"
जयपालः, पुं, (जयं पालयतीति । पालि+
"कर्म्मण्यण् ।" ३।२।१ । इत्यण् ।) विधिः ।
विष्णुः । भूपालः । इति शब्दरत्नावली ॥ वृक्ष-
विशेषः । जमालगोटा इति भाषा । तत्-
पर्य्यायः । सारकः २ रेचकः ३ तिन्तिड़ीफलम् ४
दन्तीबीजम् ५ मलद्रावि ६ बीजरेचनम् ७ कुम्भी-
बीजम् ८ कुम्भिनीबीजम् ९ घण्टाबीजम् १०
घण्टिनीबीजम् ११ निकुम्भाख्यबीजम् १२
ग्रोधनीबीजम् १३ चक्रदन्तीबीजम् १४ । अस्य
गुणाः । कटुत्वम् । उष्णत्वम् । विरेचनत्वम् ।
दीपनत्वम् । कृमिकफामजउदरामयनाशित्वञ्च ।
इति राजनिर्घण्टः ॥
जयपुत्रकः, पुं, (जयेन विजयेन पुत्र इव कायति
तीति । कै+कः । पुत्रतुल्यप्रीतिप्रदत्वात् तथात्वम् ।) पाशुकभेदः । इति शब्दरत्नावली ॥
जयमङ्गलः, पुं, (जय एव मङ्गलं यस्य । जयेन
मङ्गलं यस्मादिति वा ।) राजवाजिहस्ती ।
इति शब्दरत्नावली ॥ ध्रुवकविशेषः । यथा,—
"चतुर्व्विंशतिवर्णाङ्घ्रिः कथितो जयमङ्गलः ।
शृङ्गारवीरयोरेव ताले चाचपुटे च सः ॥"
इति सङ्गीतदामोदरः ॥ *
ज्वरघ्न औषधविशेषः । यथा,—
"हिङ्गूलसम्भवं सूतं गन्धकं टङ्कणं तथा ।
ताम्रं वङ्गं माक्षिकञ्च सैन्धवं मरिचं तथा ॥
समं सर्व्वं समाहृत्य द्विगुणं स्वर्णभस्मकम् ।
तदर्द्धं कान्तलौहञ्च रूप्यभस्मापि तत् समम् ॥
तत्समं पारदसमम् ।
एतत् सर्व्वं विचूर्ण्याथ भावयेत् कनकद्रवैः ।
श्लेष्मातीदलजैश्चापि दशमूलरसेन च ॥
किराततिक्तकक्वाथैस्त्रिवारं भावयेत् सुधीः ।
भावयित्वा तु तत् कार्य्यं गुञ्जाद्वयमिता वटी ॥
अनुपानं प्रयोक्तव्यं जीरकं मधुसंयुतम् ।
जीर्णज्वरं महाघोरं चिरकालसमुद्भवम् ॥
ज्वरमष्टविधं हन्ति साध्यासाध्यमथापि वा ।
पृथग्दोषांश्च विविधान् समस्तान् विषमज्वरान् ॥
मेदोगतं मांसगतमस्थिमज्जगतं तथा ।
अन्तर्गतं महाघोरं व्रह्मिस्थञ्च विशेषतः ॥
नानादेशोद्भवञ्चैव ज्वरं शुक्रगतं तथा ।
निखिलं ज्वरनामानं हन्ति श्रीशिवशासनात् ॥
जयमङ्गलनामायं रसः श्रीशिवनिर्म्मितः ।
बलपुष्टिकरश्चैव सर्व्वरोगनिवर्हणः ॥"
इति श्रीजयमङ्गलो रसः ।
इति भैषज्यरत्नावली ॥
जयवाहिनी, स्त्री, (जयस्य जयन्तस्य वाहिनी
यद्वा स्वयंवरसभायां संग्रामे वा जयं वहतीति । वह+णिनिः । ततो ङीप् ।)
पूचौ । इन्द्राणी । इति हेमचन्द्रः । २।८६ ॥
जया, स्त्री, (जीयतेऽनया । जि+"इरच् ।"
इति करणे अच् ततष्टाप् ।) दुर्गा । (यथा,
महाभारते । ६ । २२ । २२ ।
"कात्यायनि महाभागे करालि विजये जये ! ॥")
अस्या युत्पत्तिर्यथा,—
"जयः कल्याणवचनो याकारो दात्ववाचकः ।
जयं ददाति सा नित्यं वा जया परिकीर्त्तिता ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
जयन्तीवृक्षः । यथा, वैद्यवररत्नमालायाम् ।
"वैजयन्ती च तर्कारी जयन्ती विजया जया ॥"
तिथिविशेषः । सा तु तृतीयाष्टमीचयोदश्यः ।
(यथा, ज्योतिषे ।
"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात् ॥"
द्वादशीविशेषः । यथा, ब्रह्मवैवर्त्ते ।
"जया च विजया चैव जयन्ती पापनाशिनी ।
द्वादश्योऽश्वौ महापुण्याः सर्व्वपापहरा द्विज ॥")
हरीतकी । दुर्गासखी । इति मेदिनी । ये, २४॥
(यथा, काशीखण्डे । ४७ । ४६ ।
"यथा जया च विजया यथा चैव जयन्तिका ॥"
देवी भगवती तु वराहशैले पीठस्थाने जया-संज्ञा
विराजते । यथा, देवीभागवते ।७।३०।५२ ।
"वराहशैले तु जया कमला कमलालये ॥")
विजया । (यथा, रसप्रदीपे अजीर्णचिकित्-
सायाम् ।
"क्षारत्रयं क्षुतगन्धौ पञ्चकोलमिदं शुभम् ।
सर्व्वैस्तुल्या जया भृष्टा तदर्द्धा शिग्रुजा वटा ॥")
शान्ताहृक्षः । नीलदूर्व्वा । अग्निमन्थवृक्षः ।
इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशस्य
पूर्ब्वखण्डे प्रथमे भागे ।
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी पृश्निकारिका ।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥")
पक्षाकाविशेषः । इति युक्तिकल्पतरुः ॥
(ज्वरघ्नौषधविशेषः । यथा,—
"विषं त्रिकटुकं मुस्तं हरिद्रा निम्बपञ्चकम् ।
विड्भ्रमश्चमं चूर्णं छागमूत्रैः समं समम् ।
चणकाभा वटी कार्य्या स्याज्जया योगवाहिका ॥
जयन्ती वा जया वाथ क्षौरैः पित्तज्वरापहा ।
सुक्षामलकयूषेण पथ्यं देयं घृतं विना ॥
जयन्ती वा जया वाथ विषमज्वरनुद्धृतैः ।
सर्व्वज्वरं मधुयोगैर्गवां मूत्रेण पीतकम् ॥
चन्दनस्य कषायेण रक्तपित्तज्वरापहा ।
जयन्ती वा जया वाथ माक्षिकेण च कासजित् ॥
जयन्ती वा जया वाथ गोमूत्रेण युतां पिबेत् ।
हन्त्याशु काकजं कुष्ठं सुलेपेन च तद्धृतम् ॥
द्विनिष्कं केतकीमूलं पिष्ट्वा तोयेन पाचयेत् ।
जयन्ती वा जया वाथ मेहं हन्ति सुराक्षयम् ॥
जयन्ती वा जया वाथ मधुना सर्व्वमेहजुत् ।
जयन्ती वा जया वाथ गुड़ैः कोष्णजलैः पिबेत् ॥
त्रिदोषोत्थं हरेद्गुल्मं रसो वा नन्दभैरवः ।
जयन्ती वा जया वाथ शुण्ठ्या सर्व्वभगन्दरम् ।
जयन्ती वा जया वाथ तक्रेण ग्रहणीप्रजुत् ।
जयन्ती वा जया वाथ भृङ्गीद्रावैर्निशान्वितम् ॥
जयन्ती वा जया वाथ पृष्ट्वा स्वल्पेन चाक्षमम् ।
आवर्त्तं सर्व्वदोषोत्थं मांसहृद्धि नाशयेत् ॥"
इति जयाजयन्ती वटी ॥
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥*॥)
जयावहा, स्त्री, (जयमावहतीति । आ+वह+
अच् ।) भद्रदन्तीवृक्षः । इति राजनिर्घण्टः ॥
जयाश्रया, स्त्री, (जयमाश्रयतीति । आ+श्रि+
अच् ।) जरड़ीवृक्षम् । इति राजनिर्घण्टः ॥

जयाङ्का, स्त्री, (जयस्य आङ्का आख्या आङ्का यस्या:।) भद्रदन्तीवृक्ष:। इति राजनिर्घण्ट:॥

जयी, [न्] त्रि, (जेतुं शीलमस्य। जि+"जिदृक्षिविश्रीति।" ३।२।१५७। इति इनि:।) जययुक्त:। विजयी। यथा,—

"जगति जयिनो यस्य विशिखा:।"

इति महिम्न: स्तोत्रम्॥

(यथा, च रघौ। ४। ३४।

"पौरस्त्यानेवमाक्रामंस्तांस्तान् जनपदान् जयी।
प्राप तालीवनश्यामसुपकण्ठं महोदधे:॥")

जय्य:, त्रि, जेतुं शक्य:। ("शकि लिङ् च।" ३।३।१७२। इति शक्तौ यत्। गुण:। "ऋय्यजय्यौ शक्यार्थे।" ६।१।८१। इति। यान्तादेश:।) जयकरत्वयोग्य:। इत्यमर:। २।८।७४॥ (यथा, शतपथब्राह्मणे। १४। ४।३।२४।

"सोऽयं मनुष्यलोक: पुत्रेणैव जय्यो नान्येन कर्म्मणा॥")

जरठ:, त्रि, (जीर्य्यत्यनेनेति। जॄ वयोहानौ+उणां १।१०२। सूत्रे बाहुलकात् जॄधृमोरथट: इत्युज्ज्वलदत्तोक्तेरठ:।) कर्कश:। पाण्डु:। कठिन:। इति मेदिनी। ठे, १३॥ (यथा, माघे। ४। २६।

"अयमतिजरठा: प्रकामगुर्वी-
रलघुविलम्बिपयोधरोपरुद्धा:॥")

जीर्ण:। इति हेमचन्द्र:॥ (वृद्ध:। यथा, भागवते। ६।१।२५।

"स बहुहृदयस्तस्मिन्नर्भके कलभाषिणि।
निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशम्॥"

परिणत:। यथा, माघे। ११। १४।

"हिमरुचिरुचिश्चा राजते रम्यमाणै-
र्जरठकमलकन्दच्छेदगौरैर्मयूखै:॥")

जरायां पुं। इति विश्व:॥

जरड़ी, स्त्री, (जॄ+बाहुलकात् अड़। ततो गौरादित्वात् ङीष्।) लताविशेष:। तत्पर्य्याय:। गन्धोटिका २ सुगन्धा ३ जयाश्रया ४। अस्या गुणा:। मधुरत्वम्। शीतत्वम्। सारकत्वम्। दाहरक्तदोषनाशित्वम्। रुच्यत्वम्। पथ्यत्वम् दुग्धदात्रत्वञ्च। इति राजनिर्घण्ट:॥

जरणं, क्ली, (जरयतीति। जॄ+णिच्+ल्यु:।) हिङ्गु। कुड़ौषधी। जीर्णे, त्रि। इति शब्दरत्नावली॥ (श्वेतजीरक:। पर्य्याया यथा,—

"अजाजी जरणं दीप्यं मागधी जीरकं सितम्॥"

इति वैद्यकरत्नमालायाम्॥)

जरण:, पुं, (जरयतीति। जॄ+णिच्+ल्यु:।) जीरक:। (यथा,—

"जीरको जरणो जाजी कणा स्याद्दीर्घजीरक:॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लघुजीरक:। सौवर्चललवणम्। इति शब्दरत्नावली॥ कासमर्द:। इति राजनिर्घण्ट:॥

जरणा, स्त्री, (जरण+टाप्।) लघुजीरक:। इति राजनिर्घण्ट:॥ (यथा, ऋग्वेदे। १०।३७।६।

"भद्रं जीवन्तो जरणामशीमहि॥")

जरणद्रुम:, पुं, (जरणो जीर्ण: द्रुम:।) अश्वकर्णवृक्ष:। इति राजनिर्घण्ट:॥

जरण्ड:, त्रि, (जीर्य्यतीति। जॄ+अण्डच्।) जीर्ण:। इति संक्षिप्तसारे उणादिवृत्ति:॥

जरत्, त्रि, (जॄ+अतृन्।) वृद्ध:। इत्यमर:। २।६।४२॥ पुरातनम्। इति हेमचन्द्र:॥

जरत्कारु:, पुं, मुनिविशेष:। तत्पर्य्याय:। यायावर: २। इति त्रिकाण्डशेष:॥ (एतन्निरुक्तिर्यथा, महाभारते। १। ४०। ३—४।

"जरेति क्षयमाहुर्वै दारुणं कारुसंज्ञितम्।
शरीरं कारु तस्यासीत्तत् स धीमाञ्छनै: शनै:॥
क्षपयामास तीव्रेण तपसेत्यत उच्यते।
जरत्कारुरिति ब्रह्मन्! वासुकेर्भगिनी तथा॥"

एतद्विवरणं यथा, देवी भागवते। २।१२।९-६।

"जरत्कारुर्मुनि: श्रान्तो न चकार गृहाश्रमम्।
तेन दृष्ट्वा वने गर्त्ते लम्बमाना: खपूर्व्वजा:॥
ततस्तमाहु: कुरु पुत्रदारान्
यथा च न: स्यात् परमा हि तृप्ति:।
स्वर्गे व्रजाम: खलु दु:खमुक्ता
वयं सदाचारयुते सुते वै॥
स तानुवाचाथ लभे सनामा-
मयाचितां चातिवशानुगाञ्च।
तदा गृहारम्भमहं करोमि
ब्रवीमि तथ्यं मम पूर्व्वजा वै॥

इत्युक्ता तान् जरत्कारुर्गतस्तीर्थान् प्रति द्विज:॥"

अथ मात्राभिभ्रष्टो वासुकि: ब्रह्मोपदेशात् स्वभगिनीं जरत्कारुमेनमर्पयामास। तदुयथा, तत्रैव। २। १२। ३५—४५।

"वासुकिस्तु तदाकर्ण्य वचनं ब्रह्मण: शिवम्।
वनं गत्वा सुतां तस्मै ददौ विनयपूर्व्वकम्॥
सनामां तां समिच्छन्तो जरत्कारुरवाच तम्।
अप्रियं मे यदा कुर्य्यात्तदा तां सन्त्यजाम्यहम्॥
वाग्बन्धं तादृशं श्रुत्वा मुनिर्जग्राह तां स्वयम्।
दत्त्वा च वासुकि: कामं भवनं स्वं जगाम ह॥
श्रुत्वा पर्णकुटीं शुभ्रां जरत्कारुर्मनोहराम्।
तया सह सुखं प्राप रममाण: परन्तप!॥
एकदा भोजनं श्रुत्वा सुप्तोऽसौ मुनिसत्तम:।
भगिनी वासुकेस्तत्र संस्थिता वरवर्णिनी॥
न सम्बोधयितुश्चेष्टं त्वया कान्ते! कथञ्चन।
श्रुत्वा तु गतो निद्रां मुनिस्तां सुदतीं तदा॥
रविरस्तगिरिं प्राप्त: सन्ध्याकाल उपस्थिते।
किं करोमि न मे शान्तिरद्येत्यां बोधित: पुन:॥
धर्म्मलोपभयाद्भीता जरत्कारुरचिन्तयत्।
नोचेत् प्रबोधयाम्येनं सन्ध्याकालो वृथा व्रजेत्॥
धर्म्मनाशाद्धरं त्यागस्तथापि मरणं ध्रुवम्।
धर्म्महानिर्नराणां हि नरकाय भवेत् पुन:॥
इति सञ्चिन्त्य सा बाला तं मुनिं प्रत्यबोधयत्।
सन्ध्याकालोऽपि सञ्जात उत्तिष्ठोत्तिष्ठ सुव्रत!॥
उत्थितोऽसौ मुनि: कोपात्तामुवाच व्रजाम्यहम्।
त्यक्तु भ्रातृगृहं याहि निद्राविच्छेदकारिणी॥
वेपमानाब्रवीद्वाक्यमित्युक्ता मुनिना तदा।
भ्रात्रा दत्ता यदर्थं तत् कथं स्यादमितप्रभ!॥
मुनि: प्राह जरत्कारुं तदस्तीति निराकुल:॥"

अस्य पुत्र: आस्तीकनामा मुनिप्रवर:। योऽसौ जनमेजयं गत्वा सर्पसत्रात् निवारयामास। जरत्कारुमुनेर्विशेषविवरणन्तु महाभारते आदिपर्व्वणि ४४—४८ अध्यायेषु द्रष्टव्यम्॥)

जरत्कारु:, स्त्री, मनसादेवी। इति त्रिकाण्डशेष:॥ (यथा, देवीभागवते। २। १२। ४७।

"मुनि: प्राह जरत्कारुं तदस्तीति निराकुल:॥")

जरत्कारुप्रिया, स्त्री, (जरत्कारो: खगाम ख्यातस्य मुने: प्रिया।) मनसादेवी। इति शब्दरत्नावली॥

जरती, स्त्री, (जरत्+"उगितश्च।" ४।१।६। इति ङीप्।) वृद्धा। इति राजनिर्घण्ट:॥

जरद्गव:, पुं, (जरं प्राप्तो गौरिति। "गोरतद्धितलुकि।" ५।४।९२। इति टच्।) जीर्णवृष:। तत्पर्य्याय:। वृद्धोक्ष: २। इत्यमर:। २।९।६१॥ (यथा, पञ्चतन्त्रे। ४। ८४।

"अकृत्य पौरुषं या श्री: किं तयापि सुभोग्यया।
जरद्गव: समश्नाति देवादुपगतं तृणम्॥"

जरन् क्षीयमाणो गौर्वृषरूपो धर्म्म:। धर्म्मरूपजीर्णवृष:। यथा, महाभारते। १३।६३।६८।

"नैतस्येह यथाप्राकं शृङ्गच्छास्त्रं जरद्गव:।
अलस: क्षुत्परो मन्थं क्लेन ग्रीवाच्छुगा सह॥")

शृङ्गपक्षिविशेष:। यथा,—

"अज्ञातकुलशीलस्य वासो देयो न कस्यचित्।
मार्ज्जारस्य हि दोषेण हतो गृध्रो जरद्गव:॥"

इति हितोपदेशे मित्रलाभपरिच्छेद:॥

जरन्, पुं, (जरतीति। जॄ+शतृ।) वृद्ध:। इति राजनिर्घण्ट:॥

("वान्तमात्रे जरत् पित्तं शूलमाशु व्यपोहति॥"

इति माधवकृतरुग्विनिश्चये शूलाधिकारे॥)

जरन्त:, पुं, (जीर्य्यतीति। जॄ+"जॄविशिभ्यां झच्।" उणां ३।१२६। इति झच्।) मन्थिग्रह:। वृद्ध:। इति त्रिकाण्डशेष:॥

जरसान:, पुं, (जीर्य्यति जरायुरो भवतीति। जॄ वयोहानौ+"कृन्दृस्यसानच् सुजभ्यां।" उणां। २। ८६। इति असानच्।) मनुष्य:। इति सिद्धान्तकौमुद्यामुणादिवृत्ति:॥

जरा, स्त्री, (जीर्य्यत्यनया। जॄ+"सृदृभिदादिभ्योऽङ्।" ३।३।१०४। इत्यङ्। "ऋदृशोऽङि गुण:।" ७।४।१६। इति गुण:।) वय:कृतशथमांसादावस्थाभेद:। वार्द्धक्यम्। "जीर्य्यत्यनया जरा जॄ व वयोहानौ विच्चात् ड: दृश्रोर्गुरिति गुण:।" इत्यमरटीकायां भरत:॥ तत्पर्य्याय:। विस्रसा २। इत्यमर:। २।६।४१॥ सा तु कालकन्या। यथा,—

"कालकन्या जरा साक्षात् लोकस्तां नाभिनन्दति।
खसारं जगृहे क्रतु: क्षयाय यवनेश्वर:॥"

इति श्रीभागवतम्।

रुधां भेदप्रभेदेन चतुःषष्टिरुजः स्मृताः ।
मृत्युकन्यासुतश्चैव जरा तस्याश्च कन्यका ।
जरा च भ्रातृभिः सार्द्धं भ्रमन्ती भूतलम् ॥
एते चोपायवेत्तारं न गच्छन्ति च संयतम् ।
पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः ॥
चक्षुर्जलञ्च व्यायामः पादाधस्तैलसेवनम् ।
कर्णयोर्मूर्द्ध्नि तैलञ्च जराव्याधिविनाशकम् ॥
वसन्ते भ्रमणं वह्निसेवां ग्रीष्मे करोति यः ।
वर्षाश्च सेवते काले जरा तं नोपगच्छति ॥
शरत्शीतोदकस्नायी सेवते चन्दनद्रवम् ।
नोपयाति जरा तस्य निदाघेऽनिलसेविनम् ॥
प्रावृष्युष्णोदकस्नायी घनतोयं न सेवते ।
समये च समाहारी जरा तं नोपगच्छति ॥
शरदौदनं न गृह्णाति भ्रमणञ्च वर्ज्जयेत् ।
स्नातस्नायी समाहारी जरा तं नोपतिष्ठते ॥
स्नातस्नायी च हेमन्ते काले वह्निं निषेवते ।
शुद्धे नवान्नभुग्यश्च जरा तं नोपगच्छति ॥
घृतघिरेऽशुक्लवह्निञ्च नवोष्णान्नञ्च सेवते ।
य एवोष्णोदकस्नायी जरा तं नोपगच्छति ॥
सन्नोमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतञ्च सेवते यो हि जरा तं नोपगच्छति ॥
शुद्धे सदन्नं ऋतुकाले त्रयाणां पीयते जलम् ।
नित्यं शुद्धे च ताम्बूलं जरा तं नोपगच्छति ॥
दधि हैयङ्गवीनञ्च नवनीतं तथा गुडम् ।
नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति ॥
शुष्कमांसं स्त्रियं दृष्ट्वा बालार्कन्तरुणं दधि ।
संसेवन्तं जरा याति प्रहृष्टा भ्रातृभिः सह ॥
रात्रौ ये दधि सेवन्ते युंश्चलीञ्च रजस्वलाम् ।
तानुपेति जरा क्षुब्धा भ्रातृभिः सह सुन्दरि ! ॥
रजस्वला च कुलटा चाषीरा जारदूतिका ।
शूद्रयाजकपत्नी या ऋतुहीना च या सति ! ॥
यो हि तासामन्नभोजी ब्रह्महत्यां लभेत्तु सः ।
तेन पापेन सार्द्धं सा जरा तमुपगच्छति ॥
पापानां व्याधिभिः सार्द्धं मित्रता सन्ततं ध्रुवम् ।
पापं व्याधितरोर्बीजं विघ्नबीजञ्च निश्चितम् ॥
पापेन जायते व्याधिः पापेन जायते जरा ।
पापेन जायते दैन्यं दुःखं शोको भयङ्करः ॥
तस्मात् पापं महावैरं दोषबीजममङ्गलम् ।
भारते सन्ततं सन्तो नाचरन्ति भयातुराः ॥
स्वधर्म्माचारयुक्तञ्च दीक्षितं हरिसेवकम् ।
गुरुदेवातिथीनाञ्च भक्तं सक्तं तपःसु च ॥
व्रतोपवासयुक्तञ्च सदा तीर्थनिसेवकम् ।
रोगा द्रवन्ति तं दृष्ट्वा वैनतेयमिवोरगाः ॥
एतान् जरा न सेवेत व्याधिसंघश्च दुर्ज्जयः ।
सर्व्वं बोध्यमसमये काले सर्व्वं प्रसिध्यति ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे । १ । १६ । ३३—५५ ॥
जराया औषधं यथा, गारुडे १६६ अध्याये ।
"पलाग्रचूर्णं समधु गव्याज्यामलकान्वितम् ।
सविड्ङ्गं पीतमात्रं नरं कुर्य्यान्महामतिम् ॥
मासेकेन महादेव ! जरामरणवर्ज्जितः ।
पलाग्रचूर्णं सघृतं तिलमध्वन्वितं समम् ।
सप्ताहं भक्षितं रुद्र ! जरां नयति संक्षयम् ॥"

अपिच ।
"ब्रह्मीकृतं भृङ्गराजस्य चूर्णं
तिलार्द्धकं चामलकार्द्धकञ्च ।
सप्तर्करं भक्षयते गुडेर्व्वा
न तस्य रोगो न जरा न मृत्युः ॥
अन्धः पश्येदमनरहितो मत्तमातङ्गगामी
मूको वाग्मी श्रवणरहितो दूरशब्दानुसारी ।
नीरङ्गात्मा भवति पलितो नीलजीमूतकेशो
जीर्णा दन्ताः पुनरपि नवाः क्षीरगौरा भवन्ति ॥"
इति भैषज्यरत्नावल्यां भृङ्गराजादिचूर्णम् ॥
("क्लैब्यं जरासम्भवं हि प्रवक्ष्याम्यथ ततः शृणु ॥
जघन्यमध्यप्रवरं वयस्त्रिविधमुच्यते ।
अत्र प्रवयसां शुक्रं प्रायशः क्षीयते नृणाम् ॥
रसादीनां संक्षयाच्च तथैवाऽत्यसेवनात् ।
बलवीर्य्येन्द्रियाणाञ्च क्रमेणैव परिक्षयात् ॥
परिक्षयादायुषश्चाप्यनाहारात् श्रमात् क्षमात् ।
जरासम्भवं क्लैब्यं इत्येतैर्हेतुभिर्नृणाम् ॥
जायते तेन सोऽत्यर्थं क्षीणधातुः सुदुर्ब्बलः ।
विवर्णो विफलो दीनः क्षिप्रं व्याधिमवाप्नुते ।
एतज्जरा सम्भवं हि ।"
"जरासम्भवणे क्लैब्ये सर्व्वत्रैव प्रकारयेत् ।
क्लेदस्वेदोपपन्नस्य सक्तेदं शोधनं हितम् ।
क्षीरसर्पिर्द्वयोगा वस्तयश्चैव यापनाः ।
रसायनप्रयोगाश्च तयोर्भैषजमुच्यते ॥"
इति चरके चिकित्सास्थाने त्रिंशेऽध्याये ॥*॥
"या च भार्य्या विरूपाक्षी कक्षला कलहप्रिया ।
वचनोत्तरवक्त्री च सा जरा न जरा जरा ॥"
इति चाणक्यम् ॥*॥)
चौरिकादृष्टः । इति शब्दचन्द्रिका ॥ राजयक्ष्मविशेषः । यथा, श्रीभागवते ।
"अन्यस्यामपि भार्य्यायां शुक्रबीजे दृढद्रथात् ।
ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ॥"
जरातुरः, त्रि, (जरया आतुरः ।) जीर्णः । जरारोगग्रस्तः । इति शब्दमाला ॥ (यथा, मनौ । १ । १३५ ।
"मद्येकपुत्रा जननी जरातुरा
नवप्रसूतिर्व्वरटा तपस्विनी ।
अतिक्षयोरेव वनस्तमर्हथ-
स्त्रयो विधे ! वां करवा कदर्हि मे ॥")
जरापुरः, पुं. (जरया राक्षस्या पुरः ।) जरासन्धः । इति शब्दरत्नावली ॥
जराभीरुः, पुं. (जरातो भीरुः ।) कामदेवः । इति हेमचन्द्रः । २ । ३१ ॥ जरामरणभीरौ, त्रि ॥
जराभृतिः, पुं. (जराया राक्षस्या अपत्यम् । जरा + बाहुलकात् इञ् । तत्प्राप्तजीवत्वात् तथात्वम् ।) जरासन्धः । इति शब्दरत्नावली ॥
जरायुः, पुं, (जरामेतीति । जरा + इण् + "क्विब्रयोः श्रिणः ।" उणा १ । ४ । इति युच् ।) येन वेष्टितो गर्भः कुक्षौ तिष्ठति सः । 'गर्भवेष्टनचर्म्म । ओंबोल इति भाषा । तत्पर्य्यायः । गर्भाशयः २ उल्बम् ३ कलः ४ । इत्यमरः । २ । ६ । ३८ ॥
"या तु चर्म्मावृतिः सूक्ष्मा जरायुः सा निगद्यते ॥"
इति महाभागवते भगवतीगीता ॥
अग्निजारदृष्टः । इति राजनिर्घण्टः ॥
जरायुजः, त्रि, (जरायौ जायते इति । जन + डः ।) गर्भाशयजातः । स तु मृगवादिः । इत्यमरः । ३ । १ । ५० ॥
"या तु चर्म्मावृतिः सूक्ष्मा जरायुः सा निगद्यते ।
शुक्रशोणितयोर्योगस्तस्मिन् संजायते यतः ।
तत्र गर्भो भवेद्यस्मात्तेन प्रोक्तो जरायुजः ॥"
इति महाभागवते भगवतीगीता ॥
जरासन्धः, पुं, (जरया तदाख्यया प्रसिद्धया राक्षस्या हतो सन्धो देहसंयोजनमस्य ।) चन्द्रवंशीयराजविशेषः । स तु बृहद्रथराजपुत्रः । कंसश्वशुरः; वृष्णियुद्धे भीमसेनं हतवान् । अस्य नामकरणं यथा,—
"अन्यस्यामपि भार्य्यायां शुक्रबीजे द्वे बृहद्रथात् ।
ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ॥
जीव जीवेति क्रीडन्त्या जरासन्धोऽभवत् सुतः ॥"
इति श्रीभागवतम् ॥
तत्पर्य्यायः । वार्हद्रथिः २ । इति त्रिकाण्डशेषः ॥ (अस्य जन्मविवरणं महाभारते सभापर्व्वणि १७ अध्याये तथा मृत्युविवरणं तत्रैव २४ अध्याये द्रष्टव्यम् । अयं हि विप्रचित्तिनामकस्यासुरस्यावतारः । यथा, महाभारते । १ । ६७ । ४ ।
"विप्रचित्तिरिति ख्यातो य आसीद्दानवर्षभः ।
जरासन्ध इति ख्यातः स आसीत् मनुजर्षभः ॥"
बृहद्रथपुत्राणामन्यतमः । यथा, महाभारते । १ । ११७ । ८ ।
"बृहन्तो जरासन्धः सत्यसन्धः सदःसुवाक् ॥")
जरासन्धजित्, पुं, (जयतीति । जि + क्विप् । ततो जरासन्धस्य जित् जेता ।) भीमः । इति त्रिकाण्डशेषः ॥
जरी, [न्] त्रि, (जरास्त्यस्येति । जरा + इनिः ।) वृद्धः । इति हेमचन्द्रः । ३ । ४ ॥
जरूथं, क्ली, (जीर्य्यतीति । जॄ + "जॄवृञ्भ्यामथन् ।" उणा । २ । ६ । इति कथन् ।) मांसम् । इति त्रिकाण्डशेषः ॥
जर्ब, भ्व उक्तौ । भर्त्सने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) भ्व, जर्बति जर्बन्ती । गुरुस्थानरहितानां तुदादिपाठफलस्तु भ्वन्तानां आदीपोरिति गुणो विभाषा वेदेषूच्चारणभेदश्च । भर्त्सनञ्च भर्त्सनम् । इति दुर्गादासः ॥
जर्भ, भ्व उक्तौ । भर्त्सने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) भ्व, जर्भति जर्भन्ती । भर्त्सनञ्च भर्त्सनम् । इति दुर्गादासः ॥
जर्ब्ब, भ्व वाचि । भर्त्सने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) भ्व, जर्ब्बति जर्ब्बन्ती । भर्त्सनञ्च भर्त्सनम् । इति दुर्गादासः ॥
जर्ब्बरः, पुं, (जर्ब्बति स्वगुणेनापरान् निन्दतीति । जर्ब्ब + बाहुलकात् अरः ।) श्लेष्मलः । (जर्ब्बति भक्षयन् तर्ज्जयतीति ।) भक्षकश्च । (जर्ब्बते निन्द्यते इति । कर्म्मणि बहुलवचनादरः ।)

जरातुरे, त्रि। इति मेदिनी। रे, १५७॥ (जीर्णे। यथा, महाभारते। ३। ११। ६५।
"अथ जर्जरसर्व्वाङ्गं व्याविद्धनयनाम्बरम्।
भूतले भ्रामयामास वाक्यचेदमुवाच ह॥"
विदीर्णे। यथा, माघे। ४। २३।
"कृत्वा पुंवत्प्रातसुचेर्भृगुभ्यो
ह्यर्हिं यावद्यां जर्जरा निर्झरौघाः॥")

जर्जरीकः, त्रि, (जर्जति जीर्णो भवतीति। जर्ज+"फर्फरीकादयश्च।" उणा ४। २०। इति ईकन्प्रत्ययेन साधुः।) बहुच्छिद्रद्रव्यम्। जरातुरः। इति मेदिनी। के, १८६॥

जर्भ, भ्व भर्त्सने। उक्तौ। इति कविकल्पद्रुमः। (तुदां-परं-सकं-सेट्।) भ्व, जर्भीति जर्भ्भी। भर्त्सनम्। इति दुर्गादासः॥

जर्भः, पुं, (जीर्यति क्षीणो भवतीति। जॄ+"कृवृजिद्रुपनीति।" उणा ३।१०। इति भन्।) चन्द्रः। इति मेदिनी। भे, १२॥ जीर्णे, त्रि। इति हेमचन्द्रः॥

जर्भः, पुं, (जायतेऽस्मादिति। जन+बाहुलकात् तप्रत्ययेन साधुः।) योनिः। हस्ती। इति संक्षिप्तसारे उणादिवृत्तिः॥ (अत्र जर्तुरित्येव पाठो भवितुं युक्तः॥)

जर्मिलः, पुं, वनोद्भवतिलः। इति राजनिर्घण्टः। हेमचन्द्रश्च॥ (यथा, विष्णुपुराणे। १।६।२५।
"श्यामाकाश्चैव नीवारा जर्मिलाः सगवेधुकाः।
तथा वेणुयवाः प्रोक्तास्तद्वन् मर्कटकास्तथा॥")

जर्तुः, पुं, (जायते यस्मादिति। जन+"जनेस्तुरः।" उणा ५। ४६। इति तुः रेफश्चान्तादेशः।) योनिः। हस्ती। इत्युणादिकोषः॥

जर्त्स, भर्त्सने। रुषे। इति कविकल्पद्रुमः॥ (भ्वां परं-सकं-सेट्।) रेफयुक्तः दन्त्यवर्गाद्योपधः। जर्त्सति। भर्त्सा भर्त्सनमुक्तिश्च। इति दुर्गादासः॥

जर्हिलः, पुं, अरण्यतिलः। इति राजनिर्घण्टः॥

जल, क धिधाने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) पिधानमाच्छादनम्। क, जालयति चन्द्रं मेघः। इति दुर्गादासः॥

जल, ज धान्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। अकं इति केचित्।) ज, जालः। जलः। धीयते अनेनेति धानं तस्य भावः धान्यं जीवनोपयोगिक्रिया। जलति लोकान् जलम्। जीवयतीत्यर्थः। धीयते आच्छाद्यते अनेनेति धानं तस्य भावः धान्यं आच्छादनक्रिया। जलति जालेन मत्स्यान् जालिक इति वा। गोविन्दभट्टस्तु धनस्य भावः धान्यं सन्दोहः। जलति धनी सन्दोहः स्यादित्यर्थं इत्याह। इति दुर्गादासः॥

जलं, क्ली, गोकलनम्। क्षीवेरम्। इति मेदिनी। ले, १८॥ (यथा, भावप्रकाशे अरोचकाधिकारे।
"जलं सकृष्णागुरुभृङ्गकेसरम्।" इति॥ *॥
जलति जीवयति लोकान् जलति आच्छादयति भूम्यादीनिति वा। जल+घञ्वा क। पानीयम्। पञ्चभूतान्तर्गतभूतविशेषः। अस्य धर्म्माः। रूपं द्रवत्वं प्रत्यक्षयोग्यत्वञ्च। इदं गुरुरसविशिष्टञ्च। अस्य गुणाश्चतुर्दश। यथा,—
स्पर्शः १ संख्या २ परिमितिः ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ वेगः ९ द्रवत्वम् १० गुरुत्वम् ११ रूपम् १२ रसः १३ स्नेहः १४। अस्य वर्णः शुक्लः रसो मधुरः स्पर्शः शीतलः। स्नेहः द्रवत्वं स्वाभाविकगुणः। परमाणुजलं नित्यम्। सावयवजलं अनित्यम्। अनित्यजलं त्रिविधं यथा।
देहं अयोनिजम् १ इन्द्रियं रसनम् २ विषयः सिन्धुहिमादिः ३। इति भाषापरिच्छेदः॥ *॥
तस्योत्पत्तिर्यथा.—
"रूपमात्राद्विकुर्व्वाणात्तेजसो देव चोदितात्।
रसमात्रमभूत्तस्मादप्सो विष्कारसंग्रहः॥"*॥
तस्य लक्षणं यथा,—
"क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायवोदनम्।
तापापनोदो भूयस्त्वमप्सो दृष्टयक्षिमाः॥"
इति श्रीभागवतम्॥ *॥
"अपां स्नेहं तथा क्लेदो द्रवत्वं स्नेहसौम्यता।
जिह्वाविस्पन्दनञ्चापि भौमानां अपसं तथा॥
चतुर्थमापो विज्ञेयं जिह्वाधातुं प्रचक्षते।
अधिभूतं रसस्तत्र सोमस्तत्राधिदैवतम्॥"
इत्यात्मभेदिकपर्व्व॥ *॥
तत्पर्य्यायः। आपः २ क्षीरादिकबहुवचनान्तोऽयम्। वाः ३ वारि ४ सलिलम् ५ कमलम् ६ पयः ७ कीलालम् ८ अन्नतम् ९ जीवनम् १० भुवनम् ११ वनम् १२ कबन्धम् १३ उदकम् १४ पाथः १५ पुष्करम् १६ सर्व्वतोमुखम् १७ अम्भः १८ अर्णः १९ तोयम् २० पानीयम् २१ नीरम् २२ क्षीरम् २३ अम्बु २४ सम्बरम् २५ मेघपुष्पम् २६ घनरसः २७। इत्यमरः।१।१०।३॥ आपः २८ सान्तस्त्रीवोऽयम्। सरिलम् २९ सलम् ३० जड़म् ३१ कम् ३२ अम्बम् ३३ कपन्धम् ३४ उदम् ३५ दकम् ३६ नारम् ३७ शुम्बरम् ३८ अवभ्रपुष्पम् ३९ घनरसम् ४० घृतम् ४१। इति भरतः॥ पीप्पलम् ४२ कुशम् ४३ विषम् ४४ काण्डम् ४५ सवरम् ४६ वरम् ४७ क्षपीटम् ४८ चन्द्रोरसम् ४९ सदनम् ५० कर्न्नुरम् ५१ व्योम ५२ सम्बः ५३ सरः ५४ इरा ५५ वाजम् ५६ तामरम् ५७। इति जटाधरः॥ कमलम् ५८ स्यन्दनम् ५९ सम्बलम् ६० जलपीथम् ६१ चरम् ६२ ऋतम् ६३ ऊर्ज्जम् ६४ कोमलम् ६५ सोमम् ६६। इति शब्दरत्नावली॥*॥ तस्य गुणाः। ईषत् कषायत्वम्। मधुरत्वम्। स्नेहित्वम्। शीतलत्वम्। क्षुधानाशित्वम्। अबलरसत्वम्। शरीरेन्द्रियतर्पणत्वञ्च॥*॥ सुगन्धस्य तस्य गुणाः। अस्पृष्टरसत्वम्। सुशीतलत्वम्। तर्षनाशित्वञ्च॥ *॥ स्वच्छस्य तस्य गुणाः। लघुत्वम्। हृद्यत्वम्। गुणवत्त्वञ्च॥ *॥ पर्य्युषितबालकर्दमयुक्तजलगुणाः। पिच्छिलत्वम्। कृमिलत्वम्। क्लिन्नत्वम्। विवर्णत्वम्। विरसत्वम्। सान्द्रत्वम्। दुर्गन्धित्वम्। अहितकारित्वञ्च॥ *॥ दिवासूर्य्यकिरणराशिचन्द्ररश्मिसृष्टजलगुणाः। अरुचित्वम्। अनभिष्यन्दित्वम्। गगनाम्बुतुल्यत्वञ्च॥ *॥ साधारणजलगुणाः। हृद्यत्वम्। दीपनत्वम्। मधुरत्वम्। लघुत्वञ्च॥ *॥ वर्षाकालीनजलगुणाः। गुरुत्वम्। अभिष्यन्दित्वम्। मधुरत्वम्। सारकत्वञ्च॥ *॥ शरत्कालीनजलगुणाः। अनभिष्यन्दित्वम्। लघुत्वञ्च॥*॥ हैमन्तिकजलगुणाः। स्निग्धत्वम्। बल्यत्वम्। हृद्यत्वम्। हितकारित्वम्। गुरुत्वञ्च॥ *॥ शैशिरजलगुणः। कफवातनाशित्वम्। हैमन्तिकात् किञ्चिल्लघुत्वञ्च॥ *॥ वासन्तिकजलगुणाः। कषायत्वम्। मधुरत्वम्। बल्यत्वम्। रूक्षत्वञ्च॥ *॥ ग्रैष्मिकजलगुणः। अनभिष्यन्दित्वम्॥ *॥ शीतलजलगुणाः। मदमूर्च्छाच्छर्द्दिपित्तज्वरश्रमक्लमभ्रमादाहमदात्ययविषनाशित्वम्॥ *॥ पवनाहतधारापातजलगुणाः। विदम्भित्वम्। दुर्जरत्वञ्च॥ *॥ यत् अन्तर्व्याप्यशीतलं तत् हृतशीतं तस्य गुणः। चिरदोषनाशित्वम्॥ *॥ जलस्य सिद्धकरणप्रकारः। हेमन्ते शिशिरे पादहीनं वसन्ते पादस्थितं ग्रीष्मशरत्कालयोरर्द्धावशेषितं वर्षाखण्डावशेषितम्। दिवासिद्धं जलं रात्रौ गुरु रात्रिसिद्धं दिवागुरु॥ *॥ पुष्पसुवासितशुक्लवस्त्रपूतनूतनन्तप्तप्राच्यजलगुणः। मङ्गलरुचिकारित्वम्॥ *॥ अजीर्णे जलमौषधं जीर्णे बलप्रदं आहारकाले आयुर्वर्द्धनकं भुक्तान्नोपरि रात्रौ न पेयम्॥ *॥ रात्रिशेषे जलपानगुणाः। कासश्वासातीसारज्वरवमथुकटीकोठकुष्ठमूत्राघात-उदरार्शः-श्वयथुगलशिरःकर्णनासाचक्षुरोगवातपित्तकफक्षयजरोगनाशित्वम्॥ * ॥ मेघशून्यरात्रिशेषे नाशिकारन्ध्रेण जलपानगुणाः। बुद्धिकारित्वम्। चक्षुर्हितत्वम्। वलीपलितसर्व्वरोगनाशित्वञ्च॥ *॥
"जलञ्च तुर्व्विधं प्राहुरन्तरीक्षोद्भवं बुधाः।
धारञ्च कारकञ्चैव तौषारं हैममित्यपि॥"
इति राजनिर्घण्टः॥ *॥
क्षुधिताय रोगिणेऽपि जलं देयं यथा,—
"पानीयं प्राणिनां प्राणास्तदायत्तं हि जीवनम्।
तस्मात् सर्व्वास्ववस्थासु न क्वचिद्वारि वार्य्यते॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम्।
तोयाभावे पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते॥
क्षुधितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
तस्माज्जलमवश्यं हि दातव्यं भेषजैः समम्॥"
इति राजवल्लभः॥ * ॥
"पादेन घटमुत्थाप्य भाजने पूरयेज्जलम्।
तज्जलं मदिरातुल्यं भाजनस्थं सुरया समम्॥"
इति कर्म्मलोचनम्॥ * ॥
तस्य दानमाहात्म्यं यथा,—
"अन्ने दत्ते नरैरेह प्राणा दत्ता भवन्त्युत।
प्राणदानाद्धि परमं न दानमिह विद्यते॥

अन्नं नापि प्रभवति पानीयात् कुरुसत्तम ! ।
नीरजातेन हि विना न किंचित् संप्रवर्त्तते ॥
अन्नौषधी महाराज ! वीरुधश्च जलोद्भवाः ।
यतः प्राणभृतां प्राणाः सम्भवन्ति विशाम्पते ! ॥
तस्मात् पानीयदानाद्धि न परं विद्यते क्वचित् ।
तच्च दत्तानरो नित्यं यदीच्छेद्गतिमात्मनः ॥
धन्यं यशस्यमायुष्यं जलदानमिहोच्यते ।
शृणुष्वाप्यधि कौन्तेय ! यदा तिष्ठति तोयदः ॥
सर्व्वकामानवाप्नोति कीर्त्तिंचैवेह शाश्वतीम् ।
प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते ॥
तोयदो मनुजव्याघ्र ! स्वर्गं गत्वा महाद्युते ! ।
अक्षयान् समवाप्नोति लोकानित्यब्रवीन्मनुः ॥"
इति महाभारते दानधर्म्मः ॥ * ॥
"एकहस्ते धृतं तोयमभक्ष्यं सर्व्वयज्ञतम् ॥"
इति ब्रह्मवैवर्त्ते जन्मखण्डम् ॥ * ॥
"उद्धृतं वामहस्तेन यत्तोयं पिबति द्विजः ।
सुरापानेन तुल्यं स्यान्मनुराह प्रजापतिः ॥"
इति मनुः ॥

तस्य वेदोक्तपर्य्यायाः । अर्कः १ क्षोदः २ सद्मः ३ नभः ४ अम्भः ५ कवन्धम् ६ सलिलम् ७ वा ८ वनम् ९ घृतम् १० मधु ११ पुरीषम् १२ पिप्पलम् १३ क्षीरम् १४ विषम् १५ रेतः १६ कग्रः १७ अम्भ १८ वृवूकम् १९ वसम् २० तुग्र्या २१ वर्ष्मरम् २२ सुखेमम् २३ धरुणम् २४ सुरा २५ अरविन्दानि २६ धन्वन्तु २७ जामि २८ आयुधानि २९ क्षपः ३० अद्भिः ३१ अक्षरम् ३२ सोतः ३३ क्षत्रिः ३४ रहसः ३५ उदकम् ३६ पयः ३७ रसः ३८ भेषजम् ३९ सदः ४० ध्रुवः ४१ यहः ४२ ओजः ४३ सुखम् ४४ क्षत्तम् ४५ आवयाः ४६ शुभम् ४७ यादुः ४८ भूतम् ४९ सुवनम् ५० भविष्यत् ५१ आपः ५२ महत् ५३ व्योमः ५४ यज्ञः ५५ मदः ५६ सर्व्वौकम् ५७ स्तोकम् ५८ सतीनम् ५९ गहनम् ६० गभीरम् ६१ गम्भनम् ६२ ईम् ६३ अम्मम् ६४ हविः ६५ सद्म ६६ सदनम् ६७ ऋतम् ६८ योनिः ६९ ऋतस्ययोनिः ७० सत्यम् ७१ नीरम् ७२ रयिः ७३ सत् ७४ पूर्व्यम् ७५ सर्व्वम् ७६ अचितम् ७७ वर्हिः ७८ नाम ७९ सर्पिः ८० अपः ८१ पवित्रम् ८२ अन्तम् ८३ इन्दुः ८४ हेम ८५ स्वः ८६ स्वर्गः ८७ गम्भरम् ८८ अम्मम् ८९ वपुः ९० अम्बु ९१ तोयम् ९२ तूयम् ९३ कपीटम् ९४ शुक्रम् ९५ तेजः ९६ स्वधा ९७ वारि ९८ जलम् ९९ जलाषम् १०० । इदमम्बुकशुतसुदकनामानि । इति वेदनिघण्टौ १ अध्यायः ॥ * ॥

अस्य गुणाः ।
पानीयं भ्रमनाशनं श्रमहरं मूर्च्छापिपासापहं तन्द्राच्छर्द्दिविनाशनं बलकरं निद्राहरं तर्पणम् । हृद्यं गुरुरसं ह्यजीर्णशमकं नित्यं हितं शीतलं लघुच्छं रसकारणं निगदितं पीयूषवज्जीवनम् ॥"
अथ तस्य भेदाः ।
"पानीयं मुनिभिः प्रोक्तं दिव्यं भौममिति द्विधा ।
दिव्यं चतुर्विधं प्रोक्तं धाराजं करकाभवम् ॥
तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम् ॥"
तत्र धारस्य लक्षणं गुणाश्च ।
"धाराभिः पतितं तोयं गृहीतं स्फीतवाससा ।
ग्लिलायां वा सुधायां वा धौतायां पतितञ्च यत् ॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्म्मिते ।
भाजने न्यस्तये चापि स्थापितं धारमुच्यते ॥
धारनीरं त्रिदोषघ्नमनिर्देश्यरसं लघु ।
सौम्यं रसायनं बल्यं तर्पणं ह्रादिजीवनम् ॥
पाचनं मतिकृन्मूर्च्छातन्द्रादाहश्रमक्लमान् ।
छर्द्यां हरति तत्पथ्यं विशेषात् प्राट्शरि स्मृतम् ॥"
अथ धाराजलस्य भेदौ ।
"धाराजलञ्च द्विविधं गाङ्गसासुद्रभेदतः ॥"
तत्रगाङ्गसासुद्रयोर्लक्षणं गुणाश्च ।
"आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः ।
मेघैरन्तरिता दृष्टीः कुर्व्वन्तीति वचः सताम् ॥
गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः ।
सर्व्वथा तज्जलं देयं तथैव चरके वचः ॥
स्थापितं हैमजे पात्रे राजते न्यस्तयेऽपि वा ।
ग्राह्यन्नं येन संसिक्तं भवेदक्लेदिवर्णवत् ॥
तद्गाङ्गं सर्व्वदोषघ्नं ग्रेयं सासुद्रमन्यथा ।
तत्तु सक्षारलवणं शुक्रदृष्टिविलापहम् ।
विस्रञ्च दोषलं तीक्ष्णं सल्ककर्म्मसु गर्हितम् ।
सासुद्रं त्वाश्विने मासि गुणैर्गाङ्गवदादिशेत् ॥
यतोऽगस्त्यस्य दिशर्षेरुदयात् सकलं जलम् ।
निर्म्मलं निर्व्विषं स्वादु शुक्लं स्याददोषलम् ॥"
अतएवाह ।
"फूत्कारविषवातेन नागानां श्वासचारिणाम् ।
वर्षासु सविषं तोयं दिव्यमप्याश्विनं विना ॥"
अथागस्त्यजलगुणाः ।
"अगस्त्यं प्रसुवन्ति वारि वारिधरास्तु यत् ।
तत्त्रिदोषाय सर्व्वेषां देहिनां परिकीर्त्तितम् ॥
अगस्त्यं पौषादिमासचतुष्टयविषयम् ॥
अथ करकजलस्य लक्षणं गुणाश्च ।
"दिव्यवायुसिसंयोगात् संहताः खात् पतन्ति याः ।
पाषाणखण्डवच्चापस्ताः कारकोऽभ्रतोपमाः ॥
करकाजं जलं रूक्षं विशदं गुरु च स्थिरम् ।
दारुणं शीतलं सान्द्रं पित्तक्षतकफवातहृत् ॥"
अथ तौषारजललक्षणं गुणाश्च ।
"अपि नद्याः समुद्रान्ते वह्निरापश्च तद्भवाः ।
धूमावयवनिर्म्मुक्तास्तुषाराख्यास्तु ताः स्मृताः ॥"
अपि नद्याः समुद्रान्ते वह्निः । नदीमारभ्य समुद्रपर्य्यन्तं वह्निरास्ते । तद्भवाः वह्निभवाः । धूमावयवनिर्म्मुक्ताः धूमांशरहिताः आपस्तुषाराख्याः । तुष इति लोके तुस इति च ।
"अपथ्याः प्राणिनां प्रायो भूरुहाणान्तु ताहिताः ।
तुषाराम्बु हिमं रूक्षं स्वाद्वातलमपित्तलम् ॥
कफोरुस्तम्भकण्ठाग्निमेदोगण्डादिरोगनुत् ॥"
अथ हैमजलस्य लक्षणं गुणाश्च ।
"हिमवच्छिखरादिभ्यो द्रवीभूयाभिवर्षति ।
यत्तदेव हिमं हैमं जलमाहुर्म्मनीषिणः ॥
हिमाम्बु शीतं पित्तघ्नं गुरु वातविवर्द्धनम् ॥"
हैमं जलं कुहंसजलम् । अन्ये तु ।
"और्व्वानलधूमेरित-
मम्बु समुद्रस्य यद्घनीभूतम् ।
पवनानीतमुदीच्यां
तद्धिममिति कथ्यते मुनिभिः ॥
हिमं कुहंस इति लोके ।
हिमन्तु शीतलं रूक्षं दारुणं श्लेष्मलमपि ।
न तद्भवते वातं नच पित्तं न वा कफम् ॥"*॥
अथ भौमं जलं तद्भेदाश्च ।
"भौममम्भो निगदितं प्रथमं त्रिविधं बुधैः ।
जाङ्गलं परमानूपं ततः साधारणं क्रमात् ॥"
तेषां लक्षणानि गुणाश्च ।
"अल्पोदकोऽल्पवृक्षश्च पित्तरक्तामयान्वितः ।
ग्रीष्मो जाङ्गलो देशस्तज्जं जाङ्गलं जलम् ॥
बहुवार्म्बहुवृक्षश्च वातश्लेष्मामयान्वितः ।
देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ॥
मिश्रचिह्नस्तु यो देशः स हि साधारणः स्मृतः ।
तस्मिन् देशे यदुदकं तत्तु साधारणं स्मृतम् ॥
जाङ्गलं सलिलं रूक्षं लवणं लघु तत्तनु ।
वह्निकृत् कफहृत् पथ्यं विकारान् कुरुते बहून् ॥
आनूपं वार्य्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु ।
साधारणन्तु मधुरं दीपनं शीतलं लघु ॥
तर्पणं रोचनं हृद्यादाहदोषत्रयप्रणुत् ॥"
अथ भौमानामेव नादेयादीनां लक्षणानि गुणाश्च । तत्र नादेयस्य लक्षणं गुणाश्च ।
"नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ।
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ॥
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ।
नद्यः शैवलसंछन्ना मन्दगाः कलुषाश्च याः ।
नदीसरस्तडागस्थे कूपप्रस्रवणादिजे ॥
उदके देशभेदेन गुणान् दोषांश्च लक्षयेत् ॥"
अथौद्भिदस्य लक्षणं गुणाश्च ।
"विदार्य्य भूमिं निर्य्यत्या यन्नद्या धारया स्रवेत् ।
तत्तोयमौद्भिदं नाम वदन्तीति महर्षयः ॥
औद्भिदं वारि पित्तघ्नमविदाह्यतिशीतलम् ।
ग्रैष्मिकं मधुरं बल्यमीषद्वातकरं लघु ॥"
अथ नैर्झरस्य लक्षणं गुणाश्च ।
"शैलसानुसवद्वारिप्रवाहो निर्झरो झरः ।
स तु प्रस्रवणश्चापि तज्जं नैर्झरं जलम् ॥
नैर्झरं रुचिकृन्नीरं कफघ्नं दीपनं लघु ।
मधुरं कटुकं पाके वातलं स्यादपित्तलम् ॥"
अथ सारसस्य लक्षणं गुणाश्च ।
"नद्याः शैलादिरुद्धाया यत्र संशुष्यतिष्ठति ।
तत् सरो जलजच्छन्नं तदम्भः सारसं स्मृतम् ॥
सारसं सलिलं बल्यं हृद्यान्नं मधुरं लघु ।
रोचनं तुवरं रूक्षं बह्वम्लमलं सितम् ॥"
अथ तड़ागस्य लक्षणं गुणाश्च ।
"प्रशस्तभूमिभागस्थो बहुसंवत्सरोषितः ।
जलाशयस्तड़ागः स्यात्तड़ागं तज्जलं स्मृतम् ॥
तड़ागसदकं स्वादु कषायं कटुपाकि च ।
वातलं बह्वविश्लेष्मकफपित्तकफापहम् ॥"
अथ वाप्यस्य लक्षणं गुणाश्च ।

"पाषाणैरिष्टकाभिर्वा बद्धकूपा दृढस्तरा।
ससोपाना भवेद्वापी तज्जलं वाप्यमुच्यते॥
वाप्यं वारि यदि चारं पित्तकृत् कफवातहृत्।
तदेव मिष्टं कफकृत् वातपित्तहरं भवेत्॥"
अथ कौपस्य लक्षणं गुणाश्च।
"भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः।
बद्धोऽबद्धः स कूपः स्यात्तदम्भः कौपमुच्यते॥
कौपं पयो यदि स्वादु त्रिदोषघ्नं हिमं लघु।
तत् चारं कफवातघ्नं दीपनं कफकृत् परम्॥"
अथ चौद्यस्य लक्षणं गुणाश्च।
"शिलाकीर्णं स्वयं स्वभ्रं नीलाञ्जनसमोदकम्।
लतावितानसंछन्नं चौद्यमित्यभिधीयते॥
अश्मादिभिरबद्धं यत्तत् चौद्यमिति चापरे।
तज्जन्यसुदकं चौडं मुनिभिः समुदाहृतम्॥
चौडं वह्निकरं नीरं रूक्षं कफहरं लघु।
मधुरं पित्तनुद्दृद्यं पाचनं विशदं स्मृतम्॥"
अथ पाक्वलस्य लक्षणं गुणाश्च।
"अल्पं सरः पक्वलं स्यात् यत्र चन्द्रर्क्षगे रवौ।
न तिष्ठति जलं किञ्चित् तज्जलं वारि पाक्वलम्॥
पाक्वलं वार्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत्॥"
अथ विकिरस्य जलस्य लक्षणं गुणाश्च।
"नद्यादिनिकटे भूमिर्यत्र भवेद्वालुकामयी।
उद्गायते ततो यत्तु तज्जलं विकिरं विदुः॥
विकिरं शीतलं स्वच्छं निर्दोषं लघु तत् स्मृतम्।
तुवरं स्वादु पित्तघ्नं चारं तत् पित्तलं मनाक्॥"
अथ कैदारस्य लक्षणं गुणाश्च।
"कैदारं क्षेत्रसुद्दिष्टं कैदारं तज्जलं स्मृतम्।
कैदारं वार्यभिष्यन्दि मधुरं गुरु दोषकृत्॥"
अथ दृष्टिजलस्य लक्षणं गुणाश्च।
"वार्षिकं तदहर्दृष्टं भूमिरुक्षहितं जलम्।
चिराच्चसुषितं तत्तु प्रसन्नमग्नितोपमम्॥"
अथ हेमन्तादिकालविशेषे विहितो जलविशेषः।
"हेमन्ते सारसं तोयं ताडागं वा हितं स्मृतम्।
हेमन्ते विहितं तोयं शिशिरेऽपि प्रशस्यते॥
वसन्तग्रीष्मयोः कौपं वाप्यं वा नैर्झरं जलम्।
न देयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः॥
विषवह्निनदृच्चाणां पत्राद्यैर्दूषितं यतः।
औद्भिदं वान्तरीक्षं वा कौपं वा प्रावृषि स्मृतम्॥
ग्रस्तं ग्रहदि नादेयं नीरमंशूदकं परम्।
दिवा रविकरैर्दुष्टं निशि शीतकरांशुभिः॥
ज्ञेयमंशूदकं नाम स्निग्धं दोषचयापहम्।
अनभिष्यन्दि निर्दोषमान्तरीक्षजलोपमम्॥
वल्यं रसायनं मेध्यं शीतं लघु सुधासमम्॥"
रविकरैर्दुष्टमित्युक्ते दिवापदं समस्तदिवसप्राप्त्यर्थं शीतकरांशुभिर्दुष्टमित्युक्ते निशीतिपदं समस्तरात्रिप्राप्त्यर्थम्। अन्यच्च।
"ग्रहदि स्वच्छसदयादगस्त्यस्याखिलं हितम्॥"
इन्द्रसुश्रुतस्तु।
"पौषे वारि सरोजातं माघे तत्तु तडागजम्।
फाल्गुने कूपसम्भूतं चैत्रे चौद्यं हितं मतम्॥
वैशाखे नैर्झरं नीरं ज्येष्ठे ग्रस्तं तथौद्भिदम्।
आषाढे ग्रस्यते कौपं श्रावणे दिव्यमेव च॥
भाद्रे कौपं पयः ग्रस्तमाश्विने चौद्यमेव च।
कार्त्तिके मार्गशीर्षे च जलमात्रं प्रशस्यते॥"
अथ जलस्य ग्रहणकालः।
"भौमानामम्भसां प्रायो ग्रहणं प्रातरिष्यते।
ग्रीतलं निर्मलत्वञ्च यतस्तेषां महान् गुणः॥"
अथ जलस्य पाने विधिः।
"अत्यम्बुपानान्न विपच्यतेऽन्न-
मनम्बुपानाच्च स एव दोषः।
तस्मान्नरो वह्निविवर्द्धनाय
मुहुर्मुहुर्वारि पिबेदभूरि॥"
अथ ग्रीतलजलपानस्य विषयाः।
"मूर्च्छापित्तोल्लासदाहेषु विषे रक्ते मदात्यये।
भ्रमे श्रमे विदग्धेऽन्ने तमके वमथौ तथा।
ऊर्द्ध्वगे रक्तपित्ते च ग्रीतमम्भः प्रशस्यते॥"
अथ तन्निषेधः।
"पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे।
आध्माने स्तिमिते कोष्ठे सद्यः शुद्धौ नवज्वरे॥
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ।
हिक्कायां स्नेहपाने च ग्रीताम्बु परिवर्जयेत्॥"
अथाल्पजलपानस्य विषयाः।
"अरोचके प्रतिश्याये मन्देऽग्नौ श्वयथौ क्षये।
सुखप्रसेके जठरे कुष्ठे नेत्रामये ज्वरे।
ग्रन्थौ च मधुमेहे च पिबेत् पानीयमल्पकम्॥"
अथ जलपानस्यावश्यकता।
"जीवानां जीवनं जीवो जगत् सर्वन्तु तन्मयम्।
अतोऽत्यन्ततया सुज्ञो न क्वचित् वारि वार्यते॥"
हारीतश्च।
"क्षुधा गरीयसी घोरा सद्यःप्राणविनाशिनी।
तस्मादेयं क्षुधार्त्ताय पानीयं प्राणधारणम्॥
क्षुधितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
अतः सर्वास्ववस्थासु न क्वचित् वारि वारयेत्॥"
अथ प्रशस्तं जलम्।
"अगस्त्यमयत्नरसं सुग्रीतं तर्षनाशनम्।
अच्छं लघु च स्वादुच्च तोयं गुणवदुच्यते॥"
अथ निन्दितं जलम्।
"पिच्छिलं क्रमिलं क्लिन्नं पर्णशैवालकर्दमैः।
विवर्णं विरसं सान्द्रं दुर्गन्धं न हितं जलम्॥
कलुषं क्षुद्रमत्स्योपसर्पणीलशैवलादिभिः।
दुर्दैग्रजलमसंसृष्टं सौरचान्द्रमसांशुभिः॥
अनार्त्तवं वार्षिकमपि प्रथमं तच्च भूमिगम्।
आपन्नं परिहर्त्तव्यं सर्वदोषप्रकोपणम्॥
तत् कुर्य्यात् स्नानपानाभ्यां क्षुधाध्मानोदर-
ज्वरान्।
कासाग्निमान्द्याभिष्यन्दिकण्डूगण्डादिकांस्तथा॥"
अथ दुष्टजलस्य निर्दोषीकरणोपायः।
"निन्दितं चापि पानीयं कथितं सूर्यतापितम्।
सुवर्णं रजतं लोहं पाषाणं सिकतां स्पृशेत्॥
भृशं संताप्य निर्व्वाप्य सप्तधा साधितं तथा।
कर्पूरजातिपुन्नागपाटलादिसुवासितम्॥
सुचिसान्द्रपटस्रावैः क्षुद्रजन्तुविवर्जितम्।
स्वच्छं कनकसुक्तादैः शुद्धं स्याद्दोषवर्जितम्॥
पर्णमूलविसग्रन्थिसुक्ताकनकशैवलैः।
गोमेदेन च वस्त्रेण कुर्य्यादम्बुप्रसादनम्॥"
अथ पीतस्य जलस्य पाकावधिः।
"आमं जलं जीर्य्यति यामभाजं
तदर्द्धभाजं ग्रृतग्रीतलञ्च।
तदर्द्धभाजं तु ग्रृतं कटुष्णं
पयःप्रपाकेऽधिरेष उक्तः॥"
इति भावप्रकाशे वारिवर्गः॥
अथ जले भगवत्पूजाविधिः।
"उत्तापेऽर्कांशुतो जाते ग्रीतलेन सुगन्धिना।
जलेन पूरिते पात्रे शीक्षणमुपवेशयेत्॥
नित्यार्चाविधिनाभ्यर्च्च सायं सन्ध्यासपास्य च।
देवं सिंहासने नीत्वा गन्धादिभिरथार्चयेत्॥
नीराज्य देवं सर्व्वेभ्यो दत्त्वा तीर्थं भजेत् स्वयम्।
द्वादश्यान्तु विशेषेण रात्रौ तोयस्थमर्चयेत्॥"
तन्माहात्म्यं यथा, गारुडे।
"स्वर्णपात्रेऽथवा रौप्यैस्ताम्रे वा स्फाटिकेऽपि वा।
तोयस्थं योऽर्चयेद्भक्त्या ग्रालग्रामसमुद्भवम्॥
चक्राङ्कितं वा भूपाल! निवृत्ते मधुमाधवे।
प्रतिमां स महाभागस्तस्य पुण्यमनन्तकम्॥
यावद्धराधरो लोके यावच्चन्द्रदिवाकरौ।
तावत्तस्य कुले कश्चिन्न भवेद्भूप! नारकी॥
तस्माच्छ्रेष्ठे सदा भूप! तोयस्थं पूजयेद्धरिम्।
वीततापो नरस्त्विष्टैर्दयावदाहूतसंप्लवम्॥
क्षतैः सुग्रीतलैस्तोयैस्तुलसीदलवासितैः।
शुचिशुक्लगते काले योऽर्चयिष्यति केशवम्॥
जलस्थं विविधैः पुण्यैर्मुच्यते यमयातनात्॥
जलस्था यतो विष्णुर्जलशायी जलप्रियः।
तस्मादग्नौ विशेषेण जलस्थं पूजयेद्धरिम्॥
नीरमध्यस्थितं कृत्वा ग्रालग्रामसमुद्भवम्।
योऽभ्यर्चयेन्महाभक्त्या स भवेत् कुलपावनः॥
कर्किराशिगते सूर्य्ये मिथुनस्थे विशेषतः।
येनार्चितो हरिर्भक्त्या जलमध्ये महीपते!॥
द्वादश्यान्तु विशेषेण जलस्थं जलशायिनम्।
योऽभ्यर्चयेत् कृतं तेन यज्ञकोटिशतं भुवि॥
पात्रे गन्धादिकं कृत्वा यः क्षिपेन्नरुड़ध्वजम्।
द्वादश्यां पूजयेद्यश्चो सुक्तिभागी भवेन्नरः॥"
किञ्च।
"घनागमे प्रकुर्व्वन्ति जलस्थं वै जनार्द्दनम्।
ये नरा नृपतिश्रेष्ठ! तेषां वै नरकं ध्रुवम्॥"
"तथैवाश्वयुजस्यैव कालिन्द्यादौ विशेषतः।
सम्पादयेद्भगवतो जलक्रीड़ामहोत्सवम्॥"
इति श्रीहरिभक्तिविलासे १५ विलासः॥

जलः, त्रि, (जलति आच्छादयति विनाशयति वा ज्ञानं बुद्धिप्रतिभां वेति। जल+अच्।) जड़ः। इति मेदिनी। ले, १८॥ (यथा, काशीखण्डे। २८।६६।
"जाड्यविध्वंसनकरी जगदुद्योतिर्ज्वलाविलां॥"
"जलानां जड़नामज्ञानानामित्यर्थः। आविलेव कलुषितेव आहतेवेति वा।" इति तट्टीका॥)

जलकण्टकः, पुं, (जले जातः कण्टकः। कण्टकान्वितत्वादेवास्य तथात्वम्।) मत्स्याटः। मानो-

फल इति भाषा ॥ (जले कण्टकः प्रचुरिव ।) कुम्भीरः । इति हारावली । ७६ ॥

जलकपिः, पुं, (जले कपिरिव ।) शिशुमारः । इति हारावली । ७७ ॥

जलकरङ्कः, पुं, (जलपूर्णः करङ्कः । मध्यपदलोपिसमासः ।) नारिकेलफलम् । (जले करङ्कः अशस्यनारिकेलफलास्थि इव ।) पद्मम् । शृङ्गः । जललता । मेघः । इति मेदिनी । के, २२८ ॥

जलकल्कः, पुं, (जलस्य कल्क इव ।) जम्बालः । इति हारावली । २०५ ॥

जलकाकः, पुं, (जले जलस्य वा काक इव ।) पक्षिविशेषः । पानीकौड़ि इति भाषा ॥ तत्पर्य्यायः । दात्यूहः २ कालकण्टकः ३ । अस्य मांसगुणाः । स्निग्धं गुरु हिमं दृष्यं मांसं जलपक्षिणामन्यु वातहरम् । इति राजनिर्घण्टः ॥

जलकाङ्क्षः, पुं, स्त्री, (जलं काङ्क्षति अभिलषतीति । जल + काङ्क्ष + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) हस्ती । इति चिकाण्डशेषः ॥

जलकाङ्क्षी, [न्] पुं स्त्री, (जलं काङ्क्षति अभिलषतीति । काङ्क्ष + णिनिः ।) हस्ती । इति हारावली । १४ ॥ जलाभिलाषिणि, त्रि ॥

जलकान्तारः, पुं, (जलमेव कान्तारं दुर्गमपथो यस्य यस्मे इति वा । जलाधिष्ठातृत्वादेवास्य तथात्वम् ।) वरुणः । इति हेमचन्द्रः । २ । १०२ ॥

जलकामुकः, पुं, (जलस्य कामुकः अभिलाषुकः ।) कुटुम्बिनीवृक्षः । इति राजनिर्घण्टः ॥ (स्त्री, अर्कपुष्पी । यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका ॥")

जलकिराटः, पुं, (जले किरः शूकर इव अटति गच्छतीति । अट + अच् ।) ग्राहः । इति हारावली । ७७ ॥

जलकुक्कुटी, स्त्री, (जले कुक्कुट इव । ततः स्त्रियां जातित्वात् ङीष् ।) गङ्गाचिल्ली । इति हारावली । ८६ ॥

जलकुक्कुभः, पुं, (जले कुक्कुभः पक्षिविशेष इव ।) जलचरपक्षिविशेषः । कोड़ापाखी इति भाषा ॥ तत्पर्य्यायः । कोयष्टिः २ शिखरी ३ । इति हेमचन्द्रः ॥

जलकुन्तलः, पुं, (जलस्य कुन्तलः केशः इव ।) शैवालम् । इति भूरिप्रयोगः ॥ (शैवालशब्देऽस्य विवृतिर्विधेया ॥)

जलकूपी, स्त्री, (जलस्य कूपीव ।) कूपगर्भः । पुष्करिणी । इति मेदिनी । पे, २४ ॥

जलकूर्म्मः, पुं, (जले कूर्म्म इव । प्रलयसमये कूर्म्मस्येव दृश्यत्वादस्य तथात्वम् ।) शिशुमारः । इति चिकाण्डशेषः ॥

जलकेशः, पुं, (जलस्य केश इव ।) शैवालम् । इति हारावली । १०६ ॥

जलक्रीड़ा, स्त्री, (जलेन जले वा क्रीड़ा ।) नद्यादौ वयस्यादिभिः सह जलनिःक्षेपादिरूपक्रीड़ा । तत्पर्य्यायः । करपाचम् २ व्यालुची ३ करपचिका ४ । इति हारावली । ११६ ॥ (यथा, महाभारते । १ । १२८ । ३६ ।

"सहिता भ्रातरः सर्व्वे जलक्रीड़ामवाप्नुयः ॥")

जलगुल्मः, पुं, (जलस्य गुल्म इव ।) जलावर्त्तः । कच्छपः । जलचत्वरम् । इति मेदिनी । मे, ६० ॥

जलङ्गमः, पुं, (जलं गच्छतीति । जल + गम् + डः । तत्तो सुम् ।) महाकालः । लताविशेषः । इति राजनिर्घण्टः ॥

जलङ्गमः, पुं, (जलं ग्रामान्तजलभूमिं गच्छतीति । जल + गम + "गमश्च ।" ३ । २ । ४७ । इति खच् सुम् च । ग्रामान्तवासित्वादेवास्य तथात्वम् ।) जनङ्गमः । चाण्डालः । इत्यमरटीकायां भरतः ॥

जलचारी, [न्] पुं, (जले चरतीति । चर + णिनिः ।) मत्स्यः । इति शब्दचन्द्रिका ॥ जलचरे, त्रि ॥ (यथा, रामायणे । ३ । १५ । ६ ।

"ददृशुः सहिता रम्यं तड़ागं योजनायतम् ।
शरारिहंसकुररैराकीर्णं जलचारिभिः ॥")

जलज, क्लो, (जले जायते इति । जन + डः ।) पद्मम् । (यथा, कुमारे । २ । ३० ।

"वाचस्पतिरुवाचेदं प्राञ्जलिर्व्वलजासनम् ॥")

शृङ्गः । इति मेदिनी । जे, २४ ॥ (यथा, रघुः । ७ । ६३ ।

"ततः प्रियोपात्तरसेऽधरौष्ठे
निवेश्य दध्मौ जलजं कुमारः ॥")

लोणारम् । इति राजनिर्घण्टः ॥

जलज, पुं, (जले जायते इति । जल + जन् + डः ।) मत्स्यः । इति शब्दचन्द्रिका । (यथा, रामायणे । २ । ६१ । २२ ।

"स ताडग्रः सिंहबलो वृषभाक्षो नरर्षभः ।
स्वयमेव हतः पित्रा जलजेनात्मजो यथा ॥")

जले निवासात् कुम्भीरशिशुमारादयः । एषां मांसगुणाः । गुरुत्वम् । उष्णत्वम् । मधुरत्वम् । स्निग्धत्वम् । वातनाशित्वम् । शुक्रवर्द्धनत्वञ्च । इति राजवल्लभः ॥ हिज्जलवृक्षः । शैवलः । वानीरवृक्षः । शृङ्गः । इति राजनिर्घण्टः ॥ कुमीलुः । इति भावप्रकाशः ॥ कर्कटमीनकुम्भराशयः मकरशैघार्द्धञ्च । इति दीपिका ॥ जलजाते, त्रि ॥ (यथा, हरिवंशे । ६७ । ३२ ।

"जलजैः प्राणिभिः कीर्णां जलजैर्भूषितां गुणैः ।
जलजैः कुसुमैश्चित्रां जलजैरतोदकाम् ॥")

जलजन्तुः, पुं, (जलजातो जन्तुः ।) जलजप्राणी । तत्पर्य्यायः । यादः २ । इत्यमरः । १ । १० । २० ॥

जलजन्तुका, स्त्री, (जलजो जन्तुः । ततः संज्ञायां कन् । स्त्रियां टाप् ।) जलौका । इति भरतः ॥

जलजन्म, [न्] क्लो, (जले जन्म यस्य ।) पद्मम् । इति हेमचन्द्रः । ४ । २२८ ॥ (स्थावरकन्दके, पुं । तद्यथा,—

"जन्तूका जलजन्मा च तथा स्थावरकन्दकम् ॥"

इत्युत्तरस्थाने २ अध्याये वाभटेनोक्तम् ॥)

जलजम्बूका, स्त्री, (जलप्रधाना जम्बूका क्षुद्रजम्बूः ।) क्षुद्रजम्बूः । इति भावप्रकाशः ॥ भूँइजाम इति वनजाम इति च भाषा ॥

जलजिह्वः, पुं, (जड़ा स्वादग्रहणासमर्था जिह्वा यस्य । ङस्य लः ।) नक्रः । इति हारावली । ७६ ॥

जलडिम्भः, पुं, (जले डिम्ब इव ।) शम्बूकः । इति हारावली । ११२ ॥ (शम्बूकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

जलतापिकः, पुं, (जलतापिन् + संज्ञायां कन् ।) दक्षीशमत्स्यः । काकचीमत्स्यः । इति शब्दरत्नावली ॥

जलतापी, [न्] पुं, (जलेऽपि तपति प्रकाशयतीयेति । तप + णिनिः ।) दक्षीशमत्स्यः । इति शब्दरत्नावली ॥

जलताल, पुं, (जलं अगाधसलिलं तलति आश्रयत्वेन गच्छतीति । तल + अण् ।) दक्षीशमत्स्यः । इति चिकाण्डशेषः ॥

जलतिक्तिका, स्त्री, (स्वल्पा तिक्ता तिक्तिका । स्वल्पार्थे कन् । जलप्रधाना तिक्तिका ।) शुल्लकीवृक्षः । इति राजनिर्घण्टः ॥

जलत्रा, स्त्री, (जलात् त्रायते इति । त्रै + कः ।) छत्त्रम् । इति हारावली । ४० ॥

जलद, पुं, (जलं ददातीति । दा + कः ।) मेघः । (यथा, मेघदूते । १३ ।

"मार्गं तावत् शृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद ! श्रोष्यसि श्रोत्रपेयम् ॥")

सस्यकम् । इति मेदिनी । दे, २६ ॥ (यथा,—

"अष्टता-नागर-सहचर-भद्रोत्कट-पद्ममूल-
जलदजलम् ।
घृतपीतं मधुयुक्तं निवारयति सृतिकातङ्कम् ॥"

इति वैद्यकचक्रपाणिसंग्रहे सृतिकाधिकारे ॥

प्राकाङ्क्षीपार्श्वगतवर्षविशेषः । यथा, महाभारते । ६ । ११ । २२—२३ ।

"वर्षाणि तेषु कौरव्य ! सप्तोक्तानि मनीषिभिः ।
महामेरुमहाकाया जलदः कुसुदोत्तरः ।
जलधारो महारूप ! सुकुमार इति स्मृतः ॥")

जलदागम, पुं, (जलदानां मेघानां आगम आगमनं यत्र ।) वर्षाकालः । इति राजनिर्घण्टः ॥ (यथाह वररुचिः ।

"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे ।
दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥")

जलदाग्रजः, पुं, (अग्रते भक्षते इति । अद् + कर्म्मणि क्विप् । जलदानां मेघानामग्रजः । मेघाः ग्राह्यपत्रं भक्षयन्तीति प्रसिद्धेः ।) ग्राहवृक्षः । इति शब्दचन्द्रिका ॥

जलधर, पुं, (धरतीति धरः । धृ + अच् । जलस्य धरः ।) मेघः । (यथा, महाभारते । १ । १३५ । १८ ।

"नभो जलधरैर्हीनं साङ्गारक इवांशुमान् ॥")

सस्यकम् । इत्यमरः । १ । ३ । ७, २ । ४ । १५६ ॥ समुद्रः । इति हेमचन्द्रः ॥ तिनिशवृक्षः । इति राजनिर्घण्टः ॥ जलधारिणि, त्रि ॥

जलधिः, पुं, (जलानि धीयन्तेऽस्मिन्निति। जल+धा+"कर्म्मण्यधिकरणे च।" ३।३। ९३। इति किः।) समुद्रः। (यथा, आर्य्यासप्तशत्याम्। ४८०।

"या दक्षिणा त्वमस्यामदक्षिणो दक्षिणस्त्व-
मितरस्याम्।
जलधिरिव मध्यसंस्थो न वेलयोः सदृशमाचरसि॥")

दशगुणकुसङ्ख्या। सा तु शतलक्षकोटयः। इति लीलावती॥

जलधिगा, स्त्री, (जलधिं समुद्रं गच्छतीति। गम+डः। स्त्रियां टाप्।) नदी। इति हेमचन्द्रः। ३। १४६॥

जलधिजा, स्त्री, (जलधौ जायते इति। जन्+"सप्तम्यां जनेर्डः।" इति डः।) लक्ष्मीः। इति त्रिकाण्डशेषः॥

जलधेनुः, स्त्री, (जलकल्पिता धेनुः।) दानार्थकल्पितधेनुः। यथा,—

होतोवाच।

"जलधेनुं प्रवक्ष्यामि पुण्येऽह्नि विधिपूर्ब्बकम्।
गोचर्म्ममात्रं भूभागं गोमयेनोपलेपयेत्॥
तत्र मध्ये च राजेन्द्र! पूर्णकुम्भन्तु विन्यसेत्।
जलपूर्णसुगन्धाढ्यं कर्पूरागुरुचन्दनैः॥
वासितां गन्धतोयेन तां धेनुं परिकल्पयेत्।
वत्सं तथापरं कल्प्य घृतेन परिपूरितम्॥
वर्द्धनीकं महाराज! पत्रपुष्पैः समन्वितम्।
दूर्व्वाङ्कुरैरुपस्तीर्य्य स्रग्दामैश्च विभूषितम्॥
पञ्चरत्नानि निःक्षिप्य तस्मिन् कुम्भे नराधिप!।
मांसीसुगन्धीरं कुङ्कुमं तथा श्वेतयवाक्षतम्॥
आमलासर्षपाश्चेता सर्व्वधान्यानि पार्थिव!।
चतुर्दिक्षूपि पत्राणि चत्वार्य्येव प्रकल्पयेत्॥
एवं घृतमयं पात्रं द्वितीयं दधिपूरितम्।
तृतीयं मधुनश्चैव चतुर्थे शर्करायुतम्॥
सुवर्णं सुखचन्द्रञ्च शङ्खं क्षौमगुरूणि च।
प्रशस्तपत्रश्रवणां सुक्ताफलमयेक्षणाम्॥
ताम्रशृङ्गां कांस्यदोहां दर्भरोमसमन्विताम्।
पुच्छं सूत्रमयं कृत्वा क्षौमाभरणभूषिताम्॥
कम्बले पुष्पमालाञ्च गुड़ाख्यां मुक्तिदन्तिकाम्।
जिह्वां शर्करया कृत्वा नवनीतेन च स्तनम्॥
इक्षुपादान्तु राजेन्द्र! गन्धपुष्पोपशोभिताम्।
क्षौमाजिनोपरि स्थाप्य वस्त्रैराच्छादितान्तु ताम्॥
गन्धपुष्पैः समभ्यर्च्च विप्राय विनिवेदयेत्।
एवं धेनुं तदा दत्त्वा ब्राह्मणे वेदपारगे॥
साधुविप्राय राजेन्द्र! श्रोत्रियायाहिताग्नये।
तपोऽहे वयोऽहे दातव्या च कुटुम्बिने॥
यो ददाति नरो राजन्! यः पश्यति शृणोति च।
प्रतिगृह्णाति यो विप्रः सर्व्वे सुध्यन्ति पातकात्॥
ब्रह्महा पितृहा गोघ्नः सुरापो गुरुतल्पगः।
विसृष्टः सर्व्वपापेभ्यो विष्णुलोकं स गच्छति॥
योऽश्वमेधेन यजते समाप्तवरदक्षिणः।
जलधेनुञ्च यो दद्यात् समेतत्तमराधिप॥
जलाहारस्त्वेकदिनं तिष्ठेच्च जलधेनुदः।
अथवा हविष्येकदिने यः पयोव्रतमास्थितः॥
ग्राहकोऽपि चिरार्त्तं वै तिष्ठेद्देवं न संशयः।
यत्र क्षीरवहा नद्यो मधुपायसकर्द्दमाः॥
यत्र चाक्षरसां गीतं तत्र यान्ति जलप्रदाः।
दाता च दापकश्चैव प्रतिग्राही च यो द्विजः॥
ते सर्व्वे पापनिर्म्मुक्ता विष्णुलोकञ्च प्राप्नुयुः॥"

इति वाराहे जलधेनुमाहात्म्यनामाध्यायः॥

जलनकुलः, पुं, (जले नकुल इव।) जलजन्तुविशेषः। धाड़िया इति उड़िड़ाल इति च भाषा। तत्पर्य्यायः। उद्रः २ जलमार्জ্জारः ३ जलाखुः ४ जलश्वः ५। इति त्रिकाण्डशेषः। जलविड़ालः ६ नीराखुः ७। इति हारावली। ।७६॥ पानीयनकुलः ८ वसी ९। इति हेमचन्द्रः॥

जलनिधिः, पुं, (जलानि निधीयन्तेऽस्मिन्निति। धा+"कर्म्मण्यधिकरणे च।" ३।३।९३। इति किः। जलानां निधिरिति वा।) समुद्रः। इत्यमरः। १।१०।२०॥ (यथा, आर्य्यासप्तशत्याम्। ६१४।

"सरित इव यस्य गेहे शुष्यन्ति
विशालगोत्रजा नार्थाः।
धारास्वेव स दृश्यति जलनिधिलहरीषु
जलद इव॥"

चतुःसंख्या समुद्रवाचित्वात्। यथा, सप्तशत्यामुक्तावल्याम्।

"वारे प्रीतकरं तिथौ जलनिधिं
भेऽस्मिंश्च योगे द्वयम्॥" इति॥)

जलनिर्गमः, पुं, (गम+"अकर्त्तरि च कारके संज्ञायाम्।" ३।३।१९। इति भावे घञ्। जलानां निर्गमो बहिर्गमनं यस्मात्।) प्राकारगृहभित्त्यादिषु जलनिःसरणमार्गः। इति भरतः॥ देवकुलप्राकारादिषु जलनिःसरणद्वारम्। इति सर्व्वानन्दः॥ तत्पर्य्यायः। भमः २। इत्यमरः। १।१०।७॥ वक्त्रम् ३ पुटभेदः ४। इति स्वामी॥

जलनीली, स्त्री, (जलं नीलयतीति। नील+तत्करोतीति णिच्+ततः "कर्म्मण्यण्।" ३।२।१। इत्यण्। ततो ङीप्।) श्वेवालम्। इत्यमरः। १।१०।३८॥ (श्वेवालशब्देऽस्या विवृतिर्द्दृश्या॥)

जलन्धरः, पुं, (जलं ब्रह्मनेत्रच्युताश्रुजलं धरतीति। जल+धृ+बाहुलकात् खच् सम् च।) असुरविशेषः। तस्योत्पत्तिकारणं यथा,—

इन्द्रः शिवं द्रष्टुं शिवलोकं गत्वा एकं भयानकं पुरुषं दृष्ट्वा तं पुनःपुनः पप्रच्छ ईश्वरः कुतः। स उत्तरं न ददौ इन्द्रः क्रुद्धस्तं वज्रेण जघान। ततो रुद्रस्तेजसा प्रजज्वाल। तत इन्द्रो भीतस्तं प्रणम्य तुष्टाव रुद्रस्तुष्ट इन्द्रदाहार्थोत्पन्नं भालनेत्रस्थवह्निं गृहीत्वा गङ्गासागरसङ्गमे प्राक्षिपत् ततः स बालरूपोभूत्वा रुरोद तस्य रोदनशब्देन सप्तलोका बधिरीकृतास्तच्छ्रुत्वा ब्रह्मा विस्मितस्तत्रागत्य तं बालं समुद्रक्रोड़े दृष्ट्वा तं पप्रच्छ कस्यार्थं पुत्र! समुद्रस्तं प्रणम्योवाच मम पुत्रः अस्य जातकर्म्मादि कुरु इत्युक्त्वा ब्रह्मा क्रोड़े ददौ स बालस्तस्य श्मश्रु दधार श्मश्रु धुन्वतो ब्रह्मणो नेत्राभ्यां जलमगमत् ब्रह्मा समुद्रमुवाच यस्मादनेन मम नेत्राभ्यां निर्गतं जलं धृतं तस्मादयं जलन्धरनामा अधुनैव सर्व्वशास्त्रवेत्ता रुद्रं विना सर्व्वभूतावध्यश्च भविष्यति इत्युक्त्वा शुक्रमाकृष्य तमासुरराज्ये न्यवेशयत् स कालनेमिसुतां वृन्दामुपयेमे। इति पाद्मोत्तरखण्डम्॥

जलपतिः, पुं, (जलस्य पतिः।) वरुणः। इति हेमचन्द्रः। २।१०२॥ (अस्य जलपतित्वकथा यथा, काशीखण्डे। १२।८६—९५।

"ततस्तं तनयः दृष्ट्वा पितरं प्रणिपत्य च।
जगाम तूर्णं तपसे श्रीमद्वाराणसीं पुरीम्॥
तत्र तप्त्वा तपो घोरं लिङ्गं संस्थाप्य शाम्भवम्।
पञ्चवर्षसहस्राणि स्थितः पाषाणनिश्चलः॥
आविरासीन्महादेवस्तुष्टस्तत्तपसा ततः।
उवाच कार्द्दमे! ब्रूहि कं ददामि वरोत्तमम्॥

कार्द्दमिरुवाच।

यदि नाथ! प्रसन्नोऽसि भक्तानामनुकम्पक!।
सर्व्वेषामाधिपत्यं मे देह्यपां यादसामपि॥
इति श्रुत्वा महेशानः सर्व्वचिन्तितदः प्रभुः।
अभ्यषिञ्चत्तं तत्र वारुणे परमे पदे॥
रत्नानामब्धिजातानामब्धीनां सरितामपि।
सरसां पल्वलानाञ्च वाप्यम्बुस्रोतसां पुनः॥
जलाशयानां सर्व्वेषां प्रतीच्यामपि वै दिशः।
अधीश्वरः पाशपाणिर्भव सर्व्वामरप्रियः॥")

समुद्रः। अप्यतिरित्यमरदर्शनात्॥

जलपारावतः, पुं, (जले पारावत इव।) पक्षिविशेषः। तत्पर्य्यायः। कोपी २ जलकपोतः ३। इति राजनिर्घण्टः॥

जलपित्तं, क्ली, (जलानां पित्तमिव।) अग्निः। इति शब्दरत्नावली॥

जलपिप्पली, स्त्री, (जलजाता पिप्पली।) पिप्पलीविशेषः। पनिसगा इति लोके। जलपिपरी इति हिन्दी भाषा। तत्पर्य्यायः। महाराष्ट्री २ शारदी ३ तोयवल्लरी ४ मत्स्याक्षी ५ मत्स्यगन्धा ६ लाङ्गली ७ शकुलादनी ८ अग्निज्वाला ९ चित्रपत्री १० शाल्वदा ११ लघुशृङ्गी १२ बहुशिखा १३। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। कषायत्वम्। मलशोधनत्वम्। व्रणकीटादिदोषरक्तदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"जलपिप्पल्यभिहिता शारदी शकुलादनी।
मत्स्याक्षी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता॥
जलपिप्पलिका कृष्णा चक्षुष्या शुक्रला लघुः।
संग्राहिणी हिमा रूक्षा रक्तदोषव्रणापहा॥
कटुपाका रसे रूक्षा कषाया वह्निवर्द्धिनी॥"

इति भावप्रकाशः॥

("गम्भीरो जलपिप्पल्यास्तुम्बुरुः शृङ्गवेरिका।
तीक्ष्णोष्णकटुरूक्षाणि कफवातहराणि च॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥)

जलपृष्ठजा, स्त्री, (जलस्य पृष्ठे उपरि प्रदेशे जायते इति। जन+डः।) शैवालम्। इति शब्दचन्द्रिका॥

जलप्रायं, क्ली, (जलस्य प्रायो बाहुल्यं यत्र।) जलबहुलस्थानम्। अनूपदेशः। इत्यमरः। २।१।१०॥

जलप्रियः, पुं, (जलं प्रियं यस्य।) चातकपक्षी। इति शब्दरत्नावली॥ मत्स्यः। इति शब्दचन्द्रिका॥

जलप्लवः, पुं, (जले प्लवते इति। प्लु+अच्।) जलनकुलः। इति हारावली। ७६॥

जलफलं, क्ली, (जलजातं फलम्।) शृङ्गाटकम्। इति भावप्रकाशः॥

जलबन्धः, पुं, (जलं बध्नाति जीवनहेतौ निर्व्यत्नेन परिकल्पयतीति। बन्ध+अच्।) मत्स्यः। इति शब्दचन्द्रिका॥

जलबन्धकः, पुं, (जलं बध्नातीति। बन्ध+ण्वुल्।) जलमध्यगं स्रोतोभेदकरं दारुशिलादि। तत्पर्य्यायः। विदारकः २ कूपकः ३। इति शब्दरत्नावली॥

जलधालकः, पुं, (जलेन वलयति जीवयति स्वाश्रितवृक्षादीनिति। वल जीवने+णिच्+ण्वुल्।) विन्ध्यपर्व्वतः। इति हेमचन्द्रः। ४।६५॥

जलबालिका, स्त्री, (जलस्य बालिकेव।) विद्युत्। इति हेमचन्द्रः। ४।१७१॥

जलबुद्बुदं, क्ली, (जलस्य बुद्बुदम।) जलविम्बम्। यथा, सुश्रुतसंहितायां शारीरस्थाने ४ अध्याये।
"मानुष्यं कदलीस्तम्भनिःसारे सारमार्गणम्।
यः करोति स वै मूढो जलबुद्बुदसन्निभे॥"

जलब्रह्मी, स्त्री, (जले ब्रह्मीव।) झिलमोची। इति हारावली। १८०॥

जलभूः, पुं, (भवत्यसादिति। भू+अपादाने क्विप्। ततो जलस्य भूः।) मेघः। (जलं भूरुत्पत्तिस्थानमस्य।) कच्छपः। इति शब्दचन्द्रिका॥

जलमक्षिका, स्त्री, (जलजाता मक्षिका।) वारिक्रमिः। इति त्रिकाण्डशेषः॥

जलमद्गुः, पुं, (जले मद्गुरिव।) मत्स्यरङ्गपक्षी। इति हारावली। ८८॥

जलमधुकः, पुं, (जलजातो मधुकः।) मधुकवृक्षप्रभेदः। जलमहुया इति भाषा। तत्पर्य्यायः। मङ्गल्यः २ दीर्घपत्रकः ३ मधुपुष्पः ४ क्षौद्रप्रियः ५ पतङ्गः ६ कीरेष्टः ७ गैरिकाक्षः ८। अस्य गुणाः। मधुरत्वम्। व्रणवान्तिनाशित्वम्। शुक्रवलकारित्वम्। शीतत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः। अथ महुया वनमहुया।
"मधुको गुडपुष्पः स्यात् मधुष्ठीलो मधुस्रवः।
वानप्रस्थो मधुष्ठीलो जलजोऽथ मधूलकः॥
मधूकपुष्पं मधुरं शीतलं गुरु दृंहणम्।
दाहपित्तकरं प्रोक्तं वातपित्तविनाशनम्॥*॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत्।
अक्षुद्यं हन्ति तृष्णासदाहश्वासक्षतक्षयान्॥"
इति भावप्रकाशः॥

जलमसिः, पुं, (जलेन जलाकारेण मस्यति परिणमतीति। मस परिणामे+इन्। घनीभूतमेघस्य जलाकारेण परिणमनात् तथात्वम्।) मेघः। इति हारावली। १८॥

जलमार्गः, पुं, (जलस्य मार्गः निर्गमपथः।) प्रणाली। इति हेमचन्द्रः। ४।५५॥ नर्दमा इति भाषा॥

जलमार्जारः, पुं, (जलस्य मार्जार: जले मार्जार इव इति वा।) जलनकुलः। इति त्रिकाण्डशेषः॥

जलमुक्, [च्] पुं, (जलं मुञ्चतीति। मुच्+क्विप्।) मेघः। इत्यमरः। १।३।७॥ (यथा, मेघदूते। ७१।
"शृङ्गाण्युद्धा इव जलमुचस्तुङ्गमा यत्र जालैर्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति॥"
जलमोचके, त्रि। यथा, बृहत्संहितायाम्। १६।२।
"तीक्ष्णं तपत्यदितिजः शिशिरेऽपि काले
नात्यम्बुदा जलमुचोऽचलसन्निकाशाः॥")

जलमूर्त्तिः, पुं, (जलं मूर्त्तिर्यस्य।) शिवः। इति तस्याष्टमूर्त्तिपूजायां तिथ्यादितत्त्वम्॥

जलमूर्त्तिका, स्त्री, (जलस्य मूर्त्तिः घनीभूताकृतिः। ततः स्वार्थे संज्ञायां वा कन् टाप् च।) करका। इति शब्दचन्द्रिका॥

जलमोदं, क्ली, (जलेन जलसंयोगेन मोदयति आनन्दयति सद्गन्धप्रदानेनेत्यर्थः। मुद्+णिच्+अण्।) उशीरम्। इति राजनिर्घण्टः॥

जलयन्त्रगृहम्, क्ली, (जलयन्त्रमिव छत्रं गृहम्।) जलमध्यछत्रगृहम्। जलटुङ्गि इति फोयारार घर इति च भाषा। तत्पर्य्यायः। समुद्रगृहम् २। इति त्रिकाण्डशेषः॥ जलयन्त्रनिकेतनम् ३। इति हारावली॥ जलयन्त्रमन्दिरम् ४। यथा.—
"क्वचिद्विचित्रं जलयन्त्रमन्दिरम्।"
इति कालिदासः॥

जलरङ्कः, पुं, (जले सरसि रङ्कु इव।) वकपक्षी। इति हारावली। १८३॥

जलरङ्कुः, पुं, (जले रङ्कुरिव।) दात्यूहपक्षी। इति हलायुधः॥

जलरङ्गः, पुं, (जले रजति अनुरक्तो भवतीति। रञ्ज अनुरागे+अच्।) वकपक्षी। इति हेमचन्द्रः। ४।३।८॥ (वकशब्देऽस्य विवरणं ज्ञातव्यम्॥)

जलरज्जुः, पुं, (जलस्य रज्जु इव भयजनकत्वात्।) जलावर्त्तः। पयोरेणुः। भुजङ्गमः। इति हेमचन्द्रः शब्दरत्नावली च॥

जलरसः, पुं, (जलजातो रसः। जलप्रधानो रसो वा।) लवणम्। इति हारावली। ७५॥

जलरुट्, [ड्] पुं, (जले रोहतीति। रुह+क्विप्।) पद्मम्। इति हेमचन्द्रः। ४।२२८॥

जलरुहं, क्ली, (जले रोहतीति। रुह+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) पद्मम्। इति हेमचन्द्रः। ४।२२८॥ (यथा, महाभारते। १।१२८।४१।
"जलञ्च शुशुभे छन्नं पुष्पैर्जलरुहैस्तथा॥")

जलरूपः, पुं, (जलस्य रूपमिव रूपं यस्य। शुभ्रवर्णत्वादस्य तथात्वम्।) मकरः। इति त्रिकाण्डशेषः॥

जललता, स्त्री, (जले लतेव तदाकारत्वात्।) तरङ्गः। इति हारावली। २०५॥

जलवरणः, पुं, (जलं रसस्तत्प्रधानो वरणो वसन्तः।) जलवसन्ताख्यवृक्षः। पानीवसन्त इति भाषा। तत्पर्य्यायः। मोघः २। इति हारावली। १४२॥

जलवल्कलः, पुं, (जलस्य वल्कल इव।) कुम्भिका। इति हारावली॥ ११२। पाना इति भाषा॥)

जलवल्ली, स्त्री, (जलजाता जलप्रधाना वा वल्ली।) शृङ्गाटकः। इति राजनिर्घण्टः॥

जलवायसः, पुं, (जले वायसः काक इव कृष्णवर्णत्वात्।) मद्गुपक्षी। इति हेमचन्द्रः। ४।३८॥ पानीकौड़ि इति भाषा॥

जलवासं, क्ली, (जलेन वासो गन्धो यस्य।) उशीरम्। इति राजनिर्घण्टः॥

जलवासः, पुं, (जलं वासयतीति। वस+णिच्+अण्।) विष्णुकन्दः। इति राजनिर्घण्टः॥ (जले वासः निवासः। सलिलनिवासः। यथा, महाभारते। १२। २६०। ५।
"स चिन्तायामास मुनिर्जलवासे कदाचन॥"
जले वासो यस्य इति विग्रहे जलवासिनि, त्रि। यथा तत्रैव। १२। २६०। ४।
"स कदाचित् महातेजा जलवासो महीपते!।
चचार लोकान् त्रिपथैः प्रेक्षमाणो
मनोजवः॥")

जलवाहः, पुं, (जलं वहतीति। वह+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) मेघः। इति हेमचन्द्रः। २। ७८॥ (यथा, भारविः। १२।२१
"सान्द्रजलधिजलवाहपं
सद्गिरयुवानिव विश्वमोजसा॥"
जलवाहके, त्रि। यथा, महाभारते। २।७।२०।
"जलवाहास्तथा मेघा वायवस्तनयित्नवः॥")

जलविड़ालः, पुं, (जले विड़ाल इव।) जलनकुलः। इति हारावली। ७६॥

जलविन्दुजा, स्त्री, (जलविन्दुभ्यो जायते इति। जन+डः।) यावनालीशर्करा। इति राजनिर्घण्टः॥

जलविश्वः, पुं, (जलप्रधानो विश्व इव।) कर्कटः। पर्य्याङ्गः। जलचत्वरम्। इति मेदिनी। वे, ५८॥ चातरजल इति भाषा॥

जलविषुवं, क्ली, (जलप्रधानं विषुवम्।) तुलासंक्रान्तिः। तत्पर्य्यायः। आश्विनविद्धिदम् २। इति शब्दरत्नावली॥ चक्रविशेषः। यथा,—
"मार्गं शिरे षण्मुखपञ्चवेदं
वसुचतुर्भे बहुवित्तलाभः।

भोग: करे षट्पदयोस्तु षट्के
भीतिर्नृणां स्याद्विभुवस्य चक्रे ॥
यस्मिन्रुचे वसेद्भानुस्तस्मात् संगच्छतेऽद्भुत: ॥"
इति समयान्ततम् ॥

जलवृश्चिक:, पुं, (जले वृश्चिक इव।) चिङ्गट-मत्स्य:। इति त्रिकाण्डशेष: ॥

जलवेतस:, पुं, (जलजातो वेतस:।) वानीर-वृक्ष:। इति राजनिर्घण्ट: ॥ (यथास्य पर्य्याया गुणाश्च।
"निकुञ्जक: परिव्याधी नादेयो जलवेतस:।
जलजो वेतस: प्रीत: कुब्जकुब्जातकोपन: ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जलशय:, पुं, (जलं विश्वतीति। शव+अच्।) कङ्कचोटमत्स्य:। इति त्रिकाण्डशेष: ॥

जलशाल:, पुं, (जलस्थितो व्यालो हिंसजन्तु:।) अजगरसर्प:। इत्यमर:। १। ८। ५ ॥ क्रूर-कर्म्मा जलजन्तु:। इति राजनिर्घण्ट: ॥

जलशय:, पुं, (जले शेते। शी+अच्। पुंसीति घो वा।) विष्णु:। इति हेमचन्द्र:। २।१२८ ॥

जलशयन:, पुं, (जले क्षीरोदसलिले शेते इति। शी+ल्यु:।) विष्णु:। इति हलायुध: ॥

जलशायी, [न्] पुं, (जले शेते इति। शी+णिनि:।) विष्णु:। यथा, पुराणम्।
"जलमध्ये वराहश्च पावके जलशायिनम् ॥"

जलशुक्ति:, स्त्री, (जलचरी शुक्ति:।) शम्बूक:। इत्यमर:। १। १०। २३ ॥ ग्रामूक इति जल-सीपी इति च भाषा ॥ तत्पर्य्याय:। वारि-शुक्ति: २ कृमिशुक्ति:३ क्षुद्रशुक्तिका४ शम्बूका५ नरशुक्ति: ६ पुटिका ७ तोयशुक्तिका ८। तस्या गुणा:। कटुत्वम्। स्निग्धत्वम्। दीपन-त्वम्। गुल्मशूलविषदोषनाशित्वम्। रुच्यत्वम्। पाचनत्वम्। बलदाढ्यत्वञ्च। इति राजनिर्घण्ट:॥

जलशूर्क, क्ली, (जले शूर्कं शूर्प्पमिव।) शैवालम्। इति हेमचन्द्र:। ४।२३१ ॥ (पुंलिङ्गेऽपि दृश्यते। यथा,—
"जलशूर्क: स्वयं शुष्का रजन्यौ दहतीदृशम् ॥"
इत्युत्तरस्थाने २दादशोऽध्याये वाभटेनोक्तम्।)

जलशूकर:, पुं, (जले जलस्य वा शूकर इव।) कुम्भीर:। इति हेमचन्द्र:। ४। ४१५ ॥

जलसर्पिणी, स्त्री, (जले सर्पति गच्छतीति। सृप+णिनि+ङीप्।) जलौका। इति हेमचन्द्र:। ४। २७० ॥

जलसूचि:, पुं, (जले सूचिरिव। अभिधानात् पुंस्त्वम्।) कङ्कचोटमत्स्य:। झङ्झाट:। शिशु-मार:। जलौकायां स्त्री। इति मेदिनी। चे, २० ॥ काक:। इति हेमचन्द्र: ॥

जलस्तम्भनं, क्ली, (जलस्य स्तम्भनम्।) मन्त्रादि-द्वारा जलगतिनिवारणम्। तन्मन्त्रो यथा,—
"ओम् नमो भगवते जलं स्तम्भय स्तम्भय संस-मंसके कके कचर।
जलस्तम्भनमन्त्रोऽयं जलं स्तम्भयते ध्रुवं ॥"
इति गारुडे १७६ अध्याय: ॥

पुस्तकान्तरे १८६ अध्याय: ॥ (जलस्तम्भनविद्या दुर्य्योधनेन विदितासीत्। अतएवायं द्वैपायन-ह्रदजलं संस्तभ्य तत्र सुष्वाप। एतत्कथा महाभारते शल्यपर्व्वणि २६ अध्याये द्रष्टव्या ॥)

जलस्था, स्त्री, (जले जलबहुलप्रदेशे तिष्ठतीति। स्था+क:। स्त्रियां टाप्।) गण्डदूर्व्वा। इति राजनिर्घण्ट: ॥ (जलावस्थिते, त्रि। यथा, भाग-वते। ३। २७।१२।
"यथा जलस्थ आभासो जलस्थेनावदृश्यते।
स्वाभासेन तथा सूर्य्यो जलस्थेन दिवि स्थित: ॥")

जलहं, क्ली, (जलेन हन्यते इति। हन+बाहु-लकात् ड:।) स्वल्पजलयन्त्रगृहम्। इति त्रिकाण्डशेष: ॥

जलहास:, पुं, (जलानां हास इव शुक्लत्वात्।) समुद्रफेन:। इति त्रिकाण्डशेष: ॥

जलाका, स्त्री, (जले आकायति प्रकाशते इति। आ+कै+क:।) जलौकस:। इति शब्द-रत्नावली ॥

जलाक्षी, स्त्री, (जलमश्नोति व्याप्नोति करण-तयेति। अक्ष+अण्।) जलपिप्पली। इति शब्दरत्नावली ॥

जलाखु:, पुं, (जले आखुरिव।) जलनकुल:। इति त्रिकाण्डशेष: ॥

जलाक्षलं, क्ली, (जलमक्षति व्याप्नोतीति। अक्ष+बाहुलकात् अलच्। यद्वा, जले अक्षल: वल्कप्रान्त इव। अभिधानात् क्लीवत्वम्।) शैवालम्। खलो वारिनिर्गम:। इति मेदिनी। ले, १५४ ॥

जलाटन:, पुं, (जले अटति भ्रमतीति। अट+ल्यु:।) कङ्कपक्षी। इति मेदिनी। ने, १८४ ॥ (विशेषोऽस्य कङ्कशब्दे ज्ञातव्य: ॥)

जलाटनी, स्त्री, (जले अटति भ्रमतीति। अट+ल्यु:। स्त्रियां ङीष्।) जलौका। इति मेदिनी। ने, १८४ ॥

जलाण्डक:, पुं, (जले अण्डते इतस्ततो भ्रम-तीति। अण्ड गतौ+खुल्। पृषोदरादित्वात् ठस्य ट:।) नक्रराज:। इति हारावली ।७७॥

जलाण्डकं, क्ली, (जले अण्डमिव कायतीति। कै+क:।) पोताधानम्। इति शब्दरत्ना-वली ॥

जलात्मिका, स्त्री, (जलमेव आत्मा यस्या:। कप् ततः टापि अत इत्वम्।) जलौका। इति शब्दरत्नावली ॥

जलाधार:, पुं, (जलस्य आधार:।) जलाशय:। इत्यमर:। १। १०। २५ ॥ (यथा, याज्ञ-वल्क्ये। ३। १४४।
"आकाशमेकं हि यथा घटादिषु पृथग् भवेत्।
तथात्मैकोऽप्यनेकस्तु जलाधारेष्विवांशुमान् ॥")

जलाधिदैवत:, पुं, (जलस्याधिदैवतं अधिष्ठात्री देवता।) वरुण:। इति हलायुध: ॥ (जलं अधिदैवतं यस्य।) पूर्व्वाषाढ़ानक्षत्रे, क्ली। इति ज्योतिषम् ॥

जलाम्बिका, स्त्री, (जलस्य अम्बिका माता इव। क्रोड़देशे जलधारणादस्यास्तथात्वम्।) कूप:। इति हारावली। ४१ ॥ जलाम्लिका इति क्वचित् पाठ: ॥

जलायुका, स्त्री, (जलमायुरस्या:। कप्। पृषो-दरादित्वात् सलोप:।) जलौका। इति शब्द-रत्नावली ॥ (यथा, सुश्रुते। १। १३।
"अथ जलायुका: वक्ष्यन्ते। जलमांसामायु-रिति जलायुका:।" अस्या अन्यद्विवरणं जलौका:शब्दे द्रष्टव्यम्। यस्मिन्नियं अवहृता तद्यथा,—
"नस्याञ्जनाभ्यञ्जनपानधूमं
तथावपीड़ं कवलग्रहञ्च।
संशोधनञ्चोभयत: प्रयुञ्जा-
द्रक्तं हरेच्चापि जलायुकाभि: ॥"
इति सुश्रुते कल्पस्थानेऽष्टमेऽध्याये ॥)

जलार्द्र:, पुं, (जलेन आर्द्र: सिक्त:।) आर्द्र-वस्त्रम्। इति हारावली। १६६ ॥ (जलसिक्ते, त्रि। यथा, मेघदूते। ४५।
"तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारै: स्नपयतु भवान् व्योमगङ्गाजलार्द्रै:॥")

जलार्द्रा, स्त्री, (जलेन आर्द्रा सिक्ता।) क्लिन्न-वस्त्रम्। इति हेमचन्द्र:। ३। ३४३ ॥ (आर्द्र-तालवृन्तम्। यथा, वैद्यजीवने।
"ध्रुवित्वं तालवृन्तं स्याद्वृन्तेपत्रजनञ्च तत्।
जलेनार्द्रं जलार्द्रा स्यात्———— ॥")

जलार्णव:, पुं, (जलप्रचुरोऽर्णव: समुद्रो यत्र काले।) वर्षाकाल:। इति त्रिकाण्डशेष: ॥ (जलप्रचुरोऽर्णव:।) जलसमुद्रश्च ॥

जलालु:, पुं, (जलजात आलु:। शाकपार्थिववत् समास:।) पानीयालु:। इति राजनिर्घण्ट: ॥

जलालुकं, क्ली, (जलालुरिव कायति प्रकाशते इति। कै+क:।) पद्मकन्द:। इति राज-निर्घण्ट: ॥

जलालुका, स्त्री, (जले अलति गच्छतीति। अल गतौ+बाहुलकात् उक:।) जलौका। इति शब्दरत्नावली ॥

जलालोका, स्त्री, (जले आलोक्यते दृश्यते इति। आ+लोक दर्शने+कर्म्मणि घञ्।) जलौका। इत्यमरटीकायां भरत: ॥

जलावर्त्त:, पुं, (जलस्य आवर्त्त: सम्भ्रम:।) जल-गुल्म:। अम्भसां भ्रम:। इति जटाधर: ॥

जलाशयं, क्ली, (जले जलबहुलप्रदेशे आशेते इति। आ+शी+अच्।) उशीरम्। इत्य-मर:। २। ४। १६४ ॥ लामज्जकम्। इति राजनिर्घण्ट: ॥ (जलशायिनि, त्रि। यथा, महाभारते। ३। १४३। ५४।
"तत: सत्त्वान्युपाक्रामन् सुबहूनि महान्ति च।
रुरवानरसिंहांश्च महिषांश्च जलाशयान् ॥")

जलाशय:, पुं, (जलस्य आशय आधार:।) जलाधार:। स तु पुष्करिण्यादि:। इत्यमर:। १। १०। २६ ॥ (यथा, मनु:। ४। १२६।

"न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि।
न वासोभिः सहाजस्रं नाविज्ञाते जलाग्नये॥"
जलं आग्नेते तिष्ठत्यत्र। आ+ग्नी+"पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। इति घः।) समुद्रः। इति हेमचन्द्रः॥ अङ्गाटकः। इति राजनिर्घण्टः॥

जलाग्न्या, स्त्री, (जले जलसमीपे आग्नेते उद्भवतीति। आ+ग्नी+अच्। स्त्रियां टाप्।) गुञ्जालताभेदः। इति राजनिर्घण्टः॥

जलाश्रयः, पुं, (जले जलप्रचुरप्रदेशे आश्रय उत्पत्तिस्थानं यस्य।) वृत्तगुञ्जाभेदम्। इति राजनिर्घण्टः॥

जलाश्रया, स्त्री, (जले जलबहुलप्रदेशे आश्रयो यस्याः।) मूलीलताभेदम्। बलाका। इति राजनिर्घण्टः॥

जलाष्ठीला, स्त्री, (जलेनाष्ठीला संहता।) पुष्करिणी। इति हारावली। ४२॥

जलाश्रयं, क्ली, (जले आश्रयः सङ्घो यस्य।) उत्पलम्। इति राजनिर्घण्टः॥

जलिका, स्त्री, (जलं उत्पत्तिस्थानत्वेनाश्रयोऽस्याः। जल+"अत इनिठनौ।" ५।२।११५। इति ठन् स्त्रियां टाप्।) जलौका। इत्यमरटीकायां भरतः॥

जलुका, स्त्री, (जले तिष्ठतीति। जल+बाहुलकात् उकः।) जलौका। इति शब्दरत्नावली॥

जलूका, स्त्री, (जलुका। पृषोदरादित्वात् दीर्घः।) जलौका। इति हेमचन्द्रः। ४। २७०॥ (यथा, देवीभागवते। १।१५। १८।
"जलकेव सदा नारी रुधिरं पिबतीति वै।
मूर्खस्तु न विजानाति मोहितो भाववेदितैः॥")

जलेचरः, पुं, (जले चरतीति। चर+"चरेष्टः।" ३।२।१६। इति टः। "ततपुरुषे कृति बहुलम्।" ६।३।१४। इत्यलुक्।) जलचरपक्षी। स तु हंसमद्गुवकादिः। तस्य मांसगुणाः। गुरुत्वम्। उष्णत्वम्। स्निग्धत्वम्। मधुरत्वम्। वातघ्नत्वम्। शुक्रकारित्वञ्च। इति राजवल्लभः॥ (जलचारिणि, त्रि। यथा, महाभारते। १।२१७। ११।
"स तमादाय कौन्तेयो विस्फुरन्तं जलेचरम्।
उदतिष्ठन्महाबाहुर्बलेन बलिनां वरः॥")

जलेच्छया, स्त्री, (जलमेतीति जलेतृ जलप्रचुरस्थानम्। इ+क्विप्। तत्र श्येते उद्भवतीति। श्यै+अच्। स्त्रियां टाप्।) हस्तिशुण्डावृक्षः। इति शब्दरत्नावली॥

जलेजातं, क्ली, (जले जातमुत्पन्नम्।) पद्मम्। इति शब्दरत्नावली॥

जलेन्द्रः, पुं, (जलस्य इन्द्रः अधिपतिः।) वरुणः। महोदधिः। जम्बालः। इति मेदिनी। रे, १५८॥

जलेशनः, पुं, (जलान्येव इन्धनानि यस्य।) वाडवाग्निः। इति भूरिप्रयोगः॥

जलेरुहा, स्त्री, (जले रोहति उद्भवतीति। रुह+कः। "ततपुरुषे कृतीति।" अलुक्।) कुटुम्बिनीवृक्षः। इति राजनिर्घण्टः॥

जलेवाहः, पुं, (जले जलमध्ये वाहते जलमभ्रस्य लाभार्थं प्रयतते इति। वाह प्रयत्ने+अच्।) जातिविशेषः। डुबर इति भाषा॥ यथा, पाद्मे पातालखण्डे।
"जलेवाहानधाक्षीच्च बहूंस्तत्र व्ययोजयत्।
तत् श्रुत्वा परमं यत्नमापुराभरणं न ततः॥"

जलेशयः, पुं, (जले शेते इति। शी+अच्।
"ततपुरुषे कृतीति।" अलुक्।) मत्स्यः। इति त्रिकाण्डशेषः॥ (कारणतोयशायित्वात् विष्णुः। यथा, हरिवंशे। २२। ६८।
"नमोऽस्त्वनन्तपतये अच्युताय महात्मने।
जलेशयाय देवाय पद्मनाभाय विष्णवे॥"
महादेवः। यथा, महाभारते। १३। १७।६८।
"तुम्बवीणो महाक्रोध ऊर्ध्वरेता जलेशयः॥"
जलाशयिनि, त्रि॥)

जलेश्वरः, पुं, (जलस्य ईश्वरः।) वरुणः। इति शब्दरत्नावली॥ (यथा, महाभारते।१।२२६।३।
"तमब्रवीत् धूमकेतुः प्रतिगृह्य जलेश्वरम्।
चतुर्थं लोकपालानां देवदेवं सनातनम्॥"
जलानामाश्रयत्वात्) समुद्रश्च॥

जलोका, स्त्री, (जलमोकं आश्रयो यस्याः। पृषोदरादित्वात् साधुः।) जलौका। इत्यमरटीकायां भरतः॥

जलोच्छ्वासः, पुं, (जलानां उच्छ्वासः।) जलाग्न्यं परिपूर्य समधिकजलस्य सर्वतो वहनम्। इति कैयटः॥ समधिकजलस्योपायेनैष्कासनम्। इति स्वामी॥ जलाप्लुपचये पुष्करिण्यादावुपायेन-जलनिष्कासनम्। इति सर्वस्वम्॥ सेतुभङ्गादिभयेन जलाग्न्यादुपायेर्जलविहिष्करणम्। इत्यन्ये॥ पुष्करिण्यादौ जलप्रवेशार्थंसुपायः सुयान् इति खात इत्येके। इति भरतः॥ तत्पर्य्यायः। परीवाहः२। इत्यमरः।१।१०।१०॥

जलोदरं, क्ली, (जलप्रधानं उदरं यस्मात्।) जठरामयः। तस्य निदानादि यथा,—
"यः स्नेहपीतोऽप्यनुवासितो वा
वान्तो विरिक्तोऽप्यथवा निरूढः।
पिबेज्जलं शीतलमाशु तस्य
स्रोतांसि दुष्यन्ति हि तद्वहानि॥
स्नेहोपलिप्तेष्वथवापि तेषु
एकोदरं पूर्ववदभ्युपैति।
स्निग्धं महत्तत् परिवृत्तनाभि-
समाततं पूर्णमिवाम्बुना च॥
यथा द्रुतिः क्षुभ्यति कम्पते च
शब्दायते चापि एकोदरन्तत्॥
जन्मनैवोदरं सर्वं प्रायः क्षुद्रकृतमं मतम्।
बलिनस्तदजातानां यत्नसाध्यं नवोत्थितम्॥"
इति माधवकरः॥
(अस्य संस्कारजलक्षयचिकित्सितं यथा, हारीते चिकित्सितस्थाने २७ अध्याये।
आत्रेय उवाच।
"वियमाग्नेयोपवेशात् पीतस्नेहादथापि वा।
अमाध्यश्वासनिष्क्रान्तादतिव्यायामतोऽपि वा॥
पीतन्तूदरमेवच्च तस्माज्जातं जलोदरम्।
उदरं सजलं यस्य सघोषमतिवर्द्धितम्॥
श्वयथुः पादयोः श्रोथो जलोदरस्य लक्षणम्।
विरेकं वमनं कुर्य्यात् पाचनानि च कारयेत्॥
क्षारयोगश्च वटकस्तेन तदुपशाम्यति।
तस्मान्नाभेर्वलीभागे वध्वयित्वाङ्गुलद्वयम्॥
जलनाड़ीञ्चानुमन्य कुशपत्रेण वेधयेत्।
एरण्डजलनालञ्च तत्र सञ्चारयेद्बुधः॥
अन्तर्गतं जलं स्रावं ततः सञ्चारयेद्द्रुतम्।
यदा न धरते तच्च तदा दाहः प्रशस्यते॥
कणा कल्कं परिस्राव्य घृतं देयं चतुर्गुणम्।
शुण्ठी विषा समं पाठ्यं पानमालेपनं हितम्॥
शस्त्रकर्म भिषक् श्रेष्ठो विज्ञातेनैव कारयेत्।
दुष्करं शस्त्रकर्मैव न कुर्य्यात् यत्र तत्र तु॥
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत्।
तस्मादवश्यकर्त्तव्यमीश्वरं साधिकारिणा॥"॥)

जलोद्भवा, स्त्री, (जले उद्भवो यस्याः।) लघुद्राक्षी। इति राजनिर्घण्टः॥ (कालानुसारिवा। श्रिउली छोपर इति च यस्य ख्यातिः। यथास्याः पर्य्यायाः।
"शीतली शीतकुम्भी च शुक्लपुष्पा जलोद्भवा।
कालानुसारिवा तस्याः प्रवाहो नतवद्गुणैः॥"
इति वैद्यकरत्नमालायाम्॥)

जलोद्भूता, स्त्री, (जले उद्भूता।) गुञ्जालाचुपः। इति राजनिर्घण्टः॥

जलोरगी, स्त्री, (जले उरगी सर्पिणीव।) जलौका। इत्यमरटीकासारसुन्दरी॥

जलौकसः, स्त्री, (जले ओको वासस्थानं यासाम्।) जलौका। सान्तबहुवचनान्तोऽयं शब्दः। इत्यमरः। १। १०। २२॥

जलौकसः, पुं, स्त्री, (जलमेव ओको वासस्थानं तदस्यस्येति। अर्शआदित्वादच्।) जलौका। इत्यमरटीकायां रायमुकुटः॥ अकारान्तोऽयम्॥

जलौकाः, [स्] स्त्री, (जलमेव ओको वसतिस्थानं यस्याः।) जलौका। इति भरतः॥ (यदुक्तम्।
"यश्चाति साधुरपरस्य गुणं न दोषं
दोषान्वितो गुणिगुणं परिहाय दोषम्।
बालस्तनात् पिबति दुग्धमसृग्विहाय
त्यक्त्वा पयो रुधिरमेव न किं जलौकाः॥"
जलवासिनि, त्रि। यथा, महाभारते। १३। ५८। १०।
"जलौकसां स सत्त्वानां बभूव प्रियदर्शनः॥"
विवरणमस्या यथा,—
"पृषाद्य-बाल-स्थविर-भीरु-दुर्बल-नारीसुकुमाराणामनुग्रहार्थं परमसुकुमारोऽयं श्रोणितावसेचनोपायोऽभिहितो जलौकसः। तत्र वातपित्तकफ-दुष्ट-श्रोणितं यथासङ्ख्यं शृङ्ग-जलौकालाबुभिरवसेचयेत् स्निग्धशीतरूक्षत्वात् सर्व्वाणि सर्व्वत्र॥"
"उष्णं समधुरं स्निग्धं गवां शृङ्गं प्रकीर्त्तितम्।
तस्माद्दोषोपदृष्टे तु हिते तदवसेचने॥
शीताधिवासा मधुरा जलौका वारिसम्भवा।

तस्मात् पित्तोपसृष्टे तु हिता सा त्वरसेचने ॥
अलाबुकटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितम्।
तस्मात् श्लेष्मोपसृष्टे तु हितं तद्वरसेचने ॥"

"अथ जलायुका वक्ष्यन्ते। जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः। ता द्वादश, तासां सविषाः षट् तावत्य एव निर्व्विषाः। तत्र सविषाः कृष्णा कर्ब्बुरा अलगर्द्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति। तासञ्जनचूर्णवर्णा पृथुशिराः कृष्णा। वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्ब्बुरा। रोमशा महापार्श्वा कृष्णमुखलगर्द्दा। इन्द्रायुधवद्दूर्द्दराजिभिश्चित्रा इन्द्रायुधा। ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका। गोवृषणवदधोभागे द्विधाभूताकृतिरक्तसुखी गोचन्देति। ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूर्मूर्च्छा ज्वरोदाहश्छर्द्दिर्मदः सदनमिति लिङ्गानि भवन्ति। तत्र महागदः प्राणाबाधनस्यकर्म्मादिषूपयोज्याः। इन्द्रायुधादृश्यसाधर्म्मिलेताः सविषाः सचिकित्सिता व्याख्याताः।

अथ निर्व्विषाः। कपिला पिङ्गला शुक्लमुखी मूषिका पुष्करीकमुखी सावरिका चेति। तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां दृष्टे स्निग्धसृष्टवर्णा कपिला। किञ्चिद्रक्ता वृत्तकाया पिङ्गासुगा च पिङ्गला। यत्कृष्णा श्लीपदिनी दीर्घतीक्ष्णमुखी शुक्लमुखी मूषिकाकृतिवर्णाऽनिष्टगन्धा च मूषिका। सृष्टवर्णा पुष्करीकतुल्यवक्त्रा पुष्करीकमुखी। स्निग्धा पद्मपत्रवर्णाद्यङ्गाङ्गुलप्रमाणा सावरिका सा च पर्य्यर्थे। इत्येता अविषा व्याख्याताः। तासां यवनपाण्डुसच्छवीतनादीनि चेत्राणि। तेषु महाशरीरा बलवत्यः श्लीपदिन्यो महाशना निर्व्विषाश्च विशेषेण भवन्ति। तत्र सविषमत्स्यकीटदर्दुरसत्रपुरीषकोथजाताः कलुषेष्वम्भःसु च सविषाः। पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुष्करीकशैवालकोथजाता विमलेषु अम्भःसु च निर्व्विषाः॥"

"क्षेत्रेषु विचरन्त्येताः सलिलेषु सुगन्धिषु।
न च सङ्कीर्णचारिण्यो न च पङ्कशयाः सुखाः॥"

"अथैनां नवे महति घटे सरक्षुद्रागोदकपद्मभावाद्य निदध्यात्। भक्षार्थे चास्यासुपहरेच्छैवलं वल्लूरमौदकांश्च कन्दांश्चूर्णीकृत्य शृतार्थं लवणमौदकानि च पत्राणि। द्वाहात्त्राहाद्यान्यच्छलं भक्ष्यं च दद्यात् सप्तरात्रात् सप्तरात्राच्च घटमन्यं संक्रामयेत्॥"

"स्थूलमध्याः परिक्लिष्टाः पृथ्व्यो मन्दविचेष्टिताः। अग्राह्यिण्योऽल्पपायिन्यः सविषाश्च न पूजिताः॥ अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरुक्ष्य चास्य तमवकाशं स्निग्धमयचूर्णैर्यथोरुजः स्यात्। गृहीताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः श्लिलसरकमध्ये सुकृतस्थिता विगतक्षमा ज्ञात्वा तासां रोगं ग्राहयेत्। स्थूलमुक्तार्द्रपिचुस्रोतावच्छन्नां कृत्वा मुखमपावृणुयादग्रहन्त्ये क्षीरबिन्दुं घृतबिन्दुं वा दद्याच्छस्त्रपदानि वा कुर्व्वीत यद्येवमपि न गृह्णीयात्तदन्यां ग्राहयेत्। यदा च निविशतेऽश्वखुरवदाननं क्लोम्न्य च स्कन्धं तदा जानीयाद् गृह्णातीति गृह्णन्तीञ्चार्द्रवस्त्रावच्छन्नां धारयेत् सेचयेच्च। दंशे तोदकण्डूप्रादुर्भावैर्ज्ञानीयाच्छुद्धमियमादत्त इति शुद्धमाददानामपनयेत्। अथ स्रोतितगन्धेन न सुधेस्मुखमस्याः सैन्धवचूर्णेनावकिरेत्। अथ पतितां तण्डुलकण्डनप्रदिग्धगात्रीं तैल-लवणाभ्यक्तमुखीं वामहस्ताङ्गुष्ठाङ्गुलीभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलीभ्यां शनैः शनैरनुलोमानुमार्ज्जयेदासुखाद्गमयेत्तावद् यावत् सम्यग्वान्तलिङ्गानीति। सम्यग्वान्ता सलिलसरकन्यस्ता भोक्तुकामा सती चरेत्। या सीदति न चेष्टते सा दुर्व्वान्ता तां पुनः सम्यग्वामयेत्। दुर्व्वान्तायां व्याधिरसाध्य इन्द्रमदो नाम भवति। अथ सुवान्तां पूर्ब्ववत् सन्निदध्यात् स्रोतितस्य च योगायोगानवेक्ष्य जलौको व्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेद्गृहीत वा व्रणं कषायमधुर-स्निग्धशीतैश्च प्रदेहैः प्रदिह्यादिति।"

"चेत्राणि ग्रहणं जातीः पोषणं सावचारणम्।
जलौकसाञ्च यो वेत्ति तत् साध्यान् स जयेद्गदान्॥"

इति सूत्रस्थाने त्रयोदशाध्याये सुश्रुतेनोक्तम्॥)

जलौका, स्त्री, (जलमेव ओकं वसतिस्थानं यस्याः।) जलजन्तुविशेषः। जोंक इति भाषा। तत्पर्य्यायः। रक्तपा २ जलौकसः ३ इत्यमरः। १। १०। २२॥ जलूका ४ जलाका ५ जलौकाः ६ जलोरगी ७ जलायुका ८ जलिका ९ जलासुका १० जलजन्तुका ११ वेणी १२ जलालोका १३ जलौकसः १४ जलौकसी १५। इति भरतः॥ जलौकसम् १६ जलौकसा १७। इति रायमुकुटः॥ रक्तपायिनी १८ रक्तसन्दृब्धिका १९ तीक्ष्णा २० वमनी २१ जलजीवनी २२। इति राजनिर्घण्टः॥ रक्तपाता २३ वेधिनी २४ जलसर्पिणी २५ जलसूचिः २६ जलाटनी २७ जलाका २८ जलपटालिका २९ जलिका ३० जलालुका ३१। इति शब्दरत्नावली॥ (यथा सुश्रुते शारीरस्थानेऽष्टमेऽध्याये।
"सिरा-विधानतुल्येषु जलौकाभिः प्रदेशयेत्।
अवगाढं यथापूर्व्वं निर्हरेद्दुष्टशोणितम्॥"
अस्या विवरणमन्यत् सविस्तरं जलौकःशब्दे व्याख्यातम्॥)

जल्प, वाचि। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) अन्तःस्थलतीयोपधः। जल्पति। इति दुर्गादासः॥ (यथा, महाभारते। ७। १४६। १२।
"नारिं जित्वा विकत्थन्ते नच जल्पन्ति दुर्व्वचः॥")

जल्पः, पुं, (जल्प वाचि+घञ्।) विजिगीषोः कथा। परमतखण्डनपूर्ब्बकं स्वमतव्यवस्थापनम्। इति जटाधरो गौतमश्च॥ ("यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः॥" इति न्यायसूत्रम्। १। ४२॥
"स वादो द्विविधः संग्रहेण जल्पो वितण्डा च। तत्र पक्षाश्रितयोर्व्वचनं जल्पः।"
"यथैकस्य पक्षः पुनर्भवोऽस्तीति नास्तीत्यपरस्य तौ च स्वपक्षं स्वहेतुभिः स्थापयतस्तत्परपक्षसूद्भावयतः एषः जल्पः।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥) कथा। (यथा, भागवते। १। ७। १७।
"इति प्रियां वल्गुविचित्रजल्पैः
स सान्त्वयित्वाच्युतमित्रसूतः॥")

जल्पनं, क्ली, (जल्प+भावे ल्युट्।) कथनम्। यथा,—
"किं मिथ्या शृतजल्पनेन सततं रे वक्त रामं वद॥"
इत्युद्भटः। (जल्पतीति। जल्प+नन्द्यादित्वाद् ल्युः। कथके, त्रि॥)

जल्पाकः, त्रि, (जल्पतीति। जल्प+"जल्पभिक्षकुट्टलुण्टवृङः षाकन्।" ३। २। १५५। इति षाकन्।) बहुकुत्सितभाषी। तत्पर्य्यायः। वाचालः २ वाचाटः ३ बहुगर्ह्यवाक् ४। इत्यमरः। ३। १। ३६॥ (स्त्रियां विशेषात् ङीप्। यथा, भट्टिः। ७। १६।
"जल्पाकीभिः सहासीनः स्त्रीभिः प्रजविना त्वया॥")

जल्पितं, त्रि, (जल्पते स्म इति। जल्प+क्तः। उक्तम्। इत्यमरः। ३। १। १०७॥ (यथा, पद्मतन्त्रे। १। १४६। "भो भो गोरम्भ! सत्यमेतत् यत् त्वया जल्पितम्। किं देवी दन्तिलेन समालिङ्गिता॥") कथने, क्ली। (यथा, पद्मतन्त्रे। २। १३२।
"सा प्राह भो प्रियतम! मिथ्याजल्पितमेतत्॥")

जवः, पुं, (जवनमिति। जु वेगगतौ+"ऋदोरप्।" ३। ३। ५७। इति अप्।) वेगः। (यथा, महाभारते। ३। १४१। २१।
"यस्य बाहुबले तुल्यः प्रभावे च पुरन्दरः।
जवे वायुर्मुखे सोमः क्रोधे मृत्युः सनातनः॥")
वेगवति, त्रि। इति मेदिनी। वे, ७॥

जवनं, क्ली, (जु वेगगतौ+भावे ल्युट्।) वेगः। इत्यमरः। ३। २। ३६॥

जवनः, पुं, (जु+"जुचङ्क्रम्येति।" ३। २। १५०। इति युच्।) वेगः। वेगयुक्ताश्वः। देशविशेषः। इउनान इति पारस्यभाषा। इति हेमचन्द्रः॥ श्रीकारी रुगः। घोटकः। इति राजनिर्घण्टः॥ म्लेच्छजातिविशेषः। एष पूर्ब्वं जवनदेशोद्भवः क्षत्रिय आसीत् सगरराजेनास्य सर्ब्वशिरोमुण्डनं सर्ब्वधर्म्मबहिष्कृतत्वञ्च चकार। इति हरिवंशः॥ (स्कन्दस्य सैनिकविशेषः यथा, महाभारते। ९। ४५। ७२।
"शृणु नामानि चाप्येषां येऽन्ये स्कन्दस्य सैनिकाः॥"

इत्युपक्रम्याह।
"लोहाजवक्षो जवनः कुम्भवक्त्रश्च कुम्भकः॥")
वेगयुक्ते त्रि। इति मेदिनी। ने, ६६॥ (यथा, महाभारते। ३। १६। १६।
"अपायाज्जवनैरश्वैः शास्त्रवाणप्रपीडितः॥")
जवनालं, क्ली, (जवनाय अलति पर्य्याप्नोतीति। अल + अच्।) फलविशेषः। जनार इति भाषा॥ अस्य गुणाः। स्वादुत्वम्। ग्रीतत्वम्। वायुकारित्वम्। कफपित्तनाशित्वञ्च। इति राजवल्लभः॥
जवनिका, स्त्री, (जवनं वेगेन प्रतिरोधनमस्त्यस्याः। जवन + ठन्। टाप् च।) अवधायकवस्त्रम्। कानात् इति भाषा॥ तत्पर्य्यायः। प्रतिसीरा२ तिरस्करिणी ३। इत्यमरः। २।६।१२०॥ यवनिका ४ यमनिका ५ तिरस्कारिणी ६। इति तट्टीका॥ अन्तस्पटः७ पटी ८ चित्रा ९ काण्डपटः १०। इति शब्दरत्नावली॥ (यथा, माघे। ४। ५४।
"समीरश्चिश्चिरः शिरःसु वसतां
सतां जवनिका निकामसुखिनाम्॥")
जवनी, स्त्री, (जूयते आच्छाद्यतेऽनया। जु + करणे ल्युट्। स्त्रियां ङीप्।) अपटी। कानात् इति भाषा॥ (यथा, आर्य्यासप्तशत्याम्। ५३८।
"व्रीड़ाप्रसरः प्रथमं तदनु च रसभावपुष्टवेष्टेयम्।
जवनीविनिर्मादनु नटीव दयिता मनो हरति॥")
ओषधीभेदः। इति हेमचन्द्रः॥ (जवनजातिस्त्री। यथाह।
"जवनी नवनीतकोमलाङ्गी
ग्रयनीये यदि नीयते कथञ्चित्॥"
वेगशीला। यथा, ऋग्वेदे। १। ५१। २।
"इन्द्रं दानमरुद्भवो मदच्युतं
शतक्रतुं जवनी सूनृतारुहत्॥")
जवसं, क्ली, (जूयते भक्षार्थं प्राप्यते गवादिभिरिति। जु + बाहुलकात् कर्म्मणि असच्।) घासः। इति शब्दरत्नावली॥
जवा, स्त्री, (जवते रक्तवर्णत्वं गच्छतीति। जु गतौ + अच्। ततष्टाप्।) स्वनामख्यातपुष्पवृक्षः। तत्पर्य्यायः। ओड्रपुष्पम् २। इत्यमरः। २। ४। ७६॥ जपा ३ ओड्राख्या ४ रक्तपुष्पी ५ अर्कप्रिया ६ रागपुष्पी ७ प्रतिकाम ८ हरिवल्लभा ९। (यथा, माघे। ६। ४६।
"अनुवनं वनराजिवधूमुखे
बहलरागजवाधरचारुणि॥")
अस्या गुणाः। कटुत्वम्। उष्णत्वम्। दृष्ट सुप्तविनाशकारित्वम्। विरूक्षदृष्टजनजनकत्वम्। सूर्य्याराधनसाधनत्वञ्च। इति राजनिर्घण्टः॥ मलमूत्रस्खलनरक्षनकारित्वम्। इति राजवल्लभः॥
(यस्त्रिस्त्रियं जवत्रियते तदृयथा,—
"सकाङ्क्षिकं जवापुष्पं भटं ज्योतिश्चतीदलम्।
दूर्व्वापिष्टञ्च संप्राश्य वनिता स्वर्गमेव लभेत्॥"
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे॥)

जवादि, क्ली, सुगन्धिद्रव्यभेदः। तत्पर्य्यायः। गन्धराजम् २ कृत्रिमम् ३ मृगघर्म्मजम् ४ समूहगन्धम् ५ गन्धाढ्यम् ६ स्निग्धम् ७ सान्द्राग्निकर्दमम्८ सुगन्धतैलनिर्य्यासम्९ कटुमोदम्१०। अस्य लक्षणम्। नीरसत्वम्। स्निग्धत्वम्। ईषत्पिङ्गत्वम्। सुगन्धत्वम्। आतपे वहलामोदत्वम्। राज्ञां योग्यत्वञ्च। अस्य गुणाः। सौगन्धिकत्वम्। स्निग्धत्वम्। उष्णत्वम्। सुखावहत्वम्। वाते हितत्वम्। राज्ञां मोहनाङ्गादकारकत्वञ्च। इति राजनिर्घण्टः॥
जवाधिकः, पुं, (जवेन वेगेन अधिकः।) वेगाधिकघोटकः। इत्यमरः। २। ८। ४५॥ अतिशयवेगयुक्ते त्रि॥
जवापुष्पं, क्ली, (जवायाः स्वनामख्यातवृक्षस्य पुष्पम्। यद्वा, जवेव पुष्पम्।) ओड्रपुष्पम्। इति शब्दरत्नावली॥
जवी, [न्] त्रि, (जवो वेगः सोऽस्यास्तीति। जव + इनिः।) वेगयुक्तः। इति हेमचन्द्रः। ३। १५८॥ (यथा, याज्ञवल्क्ये। २। १११।
"समकालमिषुं क्षिप्तमानीयाग्रो जवी नरः।
गते तस्मिन् निमग्नाङ्गं पश्येद्वेत् सुष्ठिमाप्नुयात्॥"
पुं, उष्ट्रः। घोटकः। इति राजनिर्घण्टः॥
जष, ञ वधे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) ञ, जषति जषते। परस्मैपदीत्यन्ये। इति दुर्गादासः॥
जस, इ क रचये। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इ क, जंसयति। इति दुर्गादासः॥
जस, उ इर् य मोक्षे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्। उदित्त्वात् क्त्वावेट्।) उ, जसित्वा जस्त्वा। इर्, अजसत् अजासीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। य, जस्यति वत्सं गोपः। इति दुर्गादासः॥
जस, क वधे। अनादरे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, जासयति। इति दुर्गादासः॥
जसुरिः, पुं, (जस्यते सुप्यते हन्यते वाऽनेनेति। जस + "जसिसहीरुरिन्।" उणां। २। ७३। इति उरिन्।) वज्रम्। इत्युणादिकोषः॥
जहकः, पुं, (जहाति परित्यजतीति। ओ हाक त्यागे + "जहातेर्डे च।" उणां। २। ३४। इति कुन् डित्वञ्च।) कालः। इति त्रिकाण्डशेषः॥ त्यागकर्त्तरि, त्रि। इत्युणादिकोषः॥ बालः। निर्म्मोहः। निर्म्मोकः। इति संक्षिप्तसारे उणादिवृत्तिः॥
जहा, स्त्री, (जहातीति। हा + बाहुलकात् घः।) सुखितिका। इति शब्दचन्द्रिका॥ सुखिरी इति भाषा॥
जहानकः, पुं, प्रलयः। इति हेमचन्द्रः। २। ७५॥
जह्नुः, पुं, (जहातीति। हा + बाहुलकात् उन् डित्वञ्च।) अपत्यम्। यथा। "इति श्रुतानुभङ्ग आप्लवनप्रयनाटनस्नानादिषु सह मृगजह्नुना स्नेहानुबद्धहृदयः आसीत्।" इति श्रीभागवते पञ्चमस्कन्धे आदिभरतचरिते। ८। ११॥ "इत्येवं श्रुतोऽनुषङ्गो आसक्तिर्य्येन। मृगजह्नुना मृगापत्येन सह। स्नेहानुबद्धं हृदयं येन।" इति तट्टीकायां श्रीधरस्वामी॥
जह्नुः, पुं, (जहातीति। हा + "जहातेर्डे अन्तलोपश्च।" उणां। ३। ३६। इति नुः डित्वमन्तलोपश्च।) विष्णुः। राजर्षिभेदः। स चन्द्रवंशोद्भवकुरुराजपुत्रः। गङ्गागमनकाले येन गङ्गा पीता पुनर्भगीरथप्रार्थनेन ऊरुं भित्त्वा बहिर्निर्गमिता तेन सा जाह्नवीति ख्याता। इति रामायणम्॥
जह्नुतनया, स्त्री, (जह्नोस्तनया।) गङ्गा। इत्यमरः। १। १०। ३१॥
जह्नुसप्तमी, स्त्री, (जह्नोः सप्तमी। अस्यां तिथौ जह्नुसुनिना हि गङ्गा पीता पुनस्यक्ता अतोऽस्यास्तथात्वम्।) वैशाखशुक्लसप्तमी। तन्नामकारणं यथा वाराहे नारदाम्बरीषसंवादे।
"वैशाखशुक्लसप्तम्यां जाह्नवी जह्नुना पुरा।
क्रोधात् पीता पुनस्यक्ता कर्णरन्ध्रात्तु दक्षिणात्॥
तस्यां समर्चयेद्देवीं गङ्गां भुवनमेखलाम्।
स्नात्वा सम्यग्विधानेन स धन्यः सुकृती नरः॥
तस्यां सन्तर्पयेद्देवान् पितॄन् मर्त्यान् यथाविधि।
साक्षात् पश्यन्ति ते गङ्गास्नातकं गतपातकम्॥"
इति श्रीहरिभक्तिविलासे १४ विलासः॥
अपि च उत्तरकामाख्यातन्त्रे ११ पटले।
"शुक्लपक्षस्य सप्तम्यां वैशाखे जह्नुपुत्रिकाम्।
प्रपूजयेत् सुखार्थाय स्वर्गमोक्षफलाप्तये॥"
जह्नुसुता, स्त्री, (जह्नोः सुता।) गङ्गा। इति राजनिर्घण्टः॥ (यथा, महाभारते। १।६८।१८।
"अहं गङ्गा जह्नुसुता महर्षिगणसेविता॥")
जा, स्त्री, (जायते सम्बन्धिनी या। जन + बाहुलकात् डः।) याता। भर्त्तुर्भ्रातृपत्नी। इत्येकाक्षरकोषः॥
जागरः, पुं क्ली, (जाग्र जागरणे + भावे घञ्। "जाग्रोऽविचीति।" ७। ३। ८५। इति गुणः।) जागरणम्। इत्यमरः। २। ८। ६४॥ (यथा, आर्य्यासप्तशत्याम्। ३६०।
"प्रोञ्छति तवापराधं मानं मर्दयति निद्रतिं हरति।
खलतामिहन्ति मृगयान् जागरदीर्घा निशा सुभग!॥"
जागर्त्ति जीवति संग्रामस्यलेऽनेनेति। जाग्र + करणे घञ्।) कवचे, पुं। इति तट्टीका॥
जागरर्य्यं, क्ली, (जाग्र + भावे ष्यञ्।) निद्राभावः। जागरा इति भाषा॥ तत्पर्य्यायः। जागर्य्या २ जागरा ३ जागरः ४। इति हेमचन्द्रः॥ जाग्रिया ५ जागर्त्तिः ६। इत्यमरटीका॥ (यथा, महाभारते। २। १२६।१२।
"रात्रिजागरणात् श्रान्ताः सौप्तिकैः समतीयतान्॥")

जागरिता, [ऋ] त्रि, (जागर्त्तीति। जाग्र+तृच्।) जागरणशीलः। इत्यमरः। ३।१।३२॥
जागरी, [न्] त्रि, (जागरो जागरणमस्त्यस्येति। जागर+"अत इनिठनौ।" ५।२।११५। इति इनिः।) जागरूकः। इति हेमचन्द्रः। ३।१०७॥
जागरूकः, त्रि, (जागर्त्तीति। जाग्र+"जागरूकः।" ३।२।१६५। इति ऊकः।) जागरणशीलः। जागरणकर्त्ता। तत्पर्य्यायः। जागरिता २। इत्यमरः। ३।१।३२॥ जागरी ३। इति हेमचन्द्रः। ३।१०७॥ (यथा, रघुः। १०।२४।
"अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः।
स्वपतो जागरूकस्य यायार्थे वेद कस्तव॥"
कर्त्तव्यपालनादर्थे अप्रमत्तः। यथा, रघुः। १४। ८५।
"निशम्य श्लोकं स्वयमेव धीमान्
वर्णाश्रमावेक्षणजागरूकः॥")
जागर्त्तिः, स्त्री, (जाग्र+भावे क्तिन्।) जागरणम्। इत्यमरटीकायां रायमुकुटः॥
जागर्य्या, स्त्री, (जाग्र+"जागर्त्तेरकारो वा।" ३।३।१०१। इत्यस्य वार्त्तिकोक्त्या यक्।
"जाग्रोऽविचौति।" ७।३।८५। इति गुणः।) जागरणम्। इत्यमरः। ३।१।१६॥
जागुड़, क्ली, (जागुड़े तदाख्यया प्रसिद्धे देशे भवमित्यण्।) कुङ्कुमम्। इति त्रिकाण्डशेषः॥ (देशविशेषः। यथा, माघे। २०।३।
"अभिचेदमगाद्रथोऽपि शौरे-
रवनिं जागुड़कुङ्कुमाभितान्वैः॥"
जागुड़ोऽभिजनोऽस्येत्यण्। तद्देशवासिनि, त्रि,। यथा, महाभारते। ३।५१।२४।
"जागुड़ान् रामठान् सुक्षान् क्षीराभ्यानथ-
तङ्गनान्॥")
जाग्र, च सु जागरे। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-सेट्।) च, जाग्रति। सु, जागर्त्ति। दिग्रो निरीक्षमाणस्य नास्ति जाग्रतो भयमिति पचाद्यजादौ जागर इत्याचरतीति क्वौ ग्रचन्तम्। इति दुर्गादासः॥
जाग्रविः, पुं, (जागर्त्ति साक्षिस्वरूपतयेति। जाग्र+"जृषिमन्दिजाग्रिभ्यः क्विन्।" उणा०। ४।५४। इति क्विन्।) अग्निः। इति हेमचन्द्रः। ४।१६५॥ (यथा, ऋग्वेदे। ५।११।१।
"जनस्य गोपा अजनिष्ट जाग्रविरग्निः॥"
जागर्त्ति प्रजानां शुभाशुभकार्य्यदर्शनार्थमिति। वृत्तिः। इत्युणादवृत्तः॥)
जाग्रत्, त्रि, (जागर्त्तीति। जाग्र+शतृ।) जागरणविशिष्टः। यथा,—
"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्तृषा-
स्फुर्ज्जत्तृष्णतृणत्रुटीतिसम्भृतचमत्कारस्फुरत्-
सम्भ्रमा॥"
इति काव्यचन्द्रिका॥
(जागरणम्। यथा, मनौ। १।५७।
"एवं स जाग्रत्स्वप्नाभ्यामिदं सर्व्वं चराचरम्।
सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः॥")

जाग्रिया, स्त्री, (जाग्र+"जागर्त्तेरकारो वा।" इति पक्षे ग्रस्तातो रिडादेशः।) जागरणम्। इत्यमरटीकायां रायमुकुटः॥
जाघनी, स्त्री, (जघनस्य समीपम्। जघन+ग्रैषिकोऽण्। ततः स्त्रियां ङीप्।) ऊरुः। इति त्रिकाण्डशेषः॥ (यथा, मनुः। १०।१०८।
"क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम्।
चण्डालहस्तादाददे धर्म्माधर्म्मविचक्षणः॥"
विश्वामित्रस्य जाघनीहरणकथा महाभारते आपद्धर्म्मपर्व्वणि १४१ अध्याये द्रष्टव्या॥)
जाङ्गलं, क्ली, (जाङ्गलेषु स्थलजपशुविशेषेषु भवम्। जाङ्गल+अण्।) मांसम्। इति हेमचन्द्रः॥
जाङ्गलः, पुं, (जङ्गले भवः। जङ्गल+अण्।) कपिञ्जलपक्षी। इति मेदिनी। ले, ६५॥ निर्व्वारिदेशः। इति ग्रब्दरत्नावली॥ (अस्य लक्षणं यथा,—
"स्वल्पोदकफलो यस्तु प्रवातः प्रचुरातपः।
स ज्ञेयो जाङ्गलो देशः बहुधान्यादिसंयुतः॥")
भावप्रकाशग्रन्थेऽस्य लक्षणं यथा,—
"आकाशग्रुभ्र उच्चश्च स्वल्पपानीयपादपः।
ग्रमीकरीरविल्वार्कपीलुकर्कन्धुसङ्कुलः॥
हरिणैर्ऋक्षपृषतगोकर्णखरसङ्कुलः।
सुखादुफलवान् देशो वातलो जाङ्गलः स्मृतः॥"
("खरपरुषविशालाः पर्व्वताः कण्टकीर्णाः
दिशि दिशि ग्रटगह्वा भूरुहाः ग्रीर्णपर्णाः।
अतिखररविरिक्षाः पांशुभृत् शुष्कभूमिः
सरसरसविहीनः कूपकाम्भःप्रकर्षः॥
तदनुविरसग्रस्याहारगो गोमनुष्यः
प्रभवति रसमांसं रूक्षभावश्च सम्यक्।
पुनरपि हिमवाहं ग्रालिग्रस्यं न चेच्छु-
र्भवति रुधिरपित्तं कोपमाशु ह्युपैति॥"
इति च हारीते प्रथमस्थाने चतुर्थेऽध्याये॥)
तस्य गुणाः। वातपित्तकारित्वम्। उष्णत्वम्। रूक्षत्वञ्च। तद्देशीयजलगुणाः। अनूपदेशात् विपरीतत्वम्। इति राजवल्लभः॥ रूक्षत्वम्। लघुत्वम्। लघुत्वम्। तनुत्वम्। पथ्यत्वम्। वह्निकफबहुविकारकारित्वञ्च। इति भावप्रकाशः॥ जङ्गलदेशोद्भवञ्च॥
जाङ्गलः, त्रि, स्थलजपशुविशेषः। यथा,—
"हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुशम्बराः।
राजीवोऽपि च सृक्वी चैत्यादा जाङ्गलसंज्ञकाः॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान्॥
ऋष्यो नीलाङ्कको लोके स रोरु इति कीर्त्यते।
पृषतश्चन्द्रबिन्दुः स्याद्धरिणात्किञ्चिदल्पकः॥
न्यङ्कुर्बहुविषाणोऽथ ग्रम्बरो गवयो महान्।
राजीवस्तु मृगो ज्ञेयो राजीभिः परितो वृतः॥
यो मृगः ग्रृङ्गहीनः स्यात् स सृक्वीति निगद्यते॥"
तस्य मांसस्य गुणाः। मधुरत्वम्। रूक्षत्वम्। कषायत्वम्। लघुत्वम्। वल्यत्वम्। दृंहणत्वम्। दृष्यत्वम्। दीपनत्वम्। दोषहरत्वम्। मृकल्मिन्नलगण्डदलार्हितवाधिर्य्यारुचिकृद्दृष्टिप्रमेह

सुखजरोगग्लीपदगलगण्डवायुनाशित्वञ्च। इति भावप्रकाशः॥ ग्रीतत्वम्। मनुष्यहितत्वम्। इति राजवल्लभः॥ *॥
जाङ्गलिः, पुं, (जाङ्गलो जङ्गलभवः सर्पादिर्य्यास्यतयास्त्यस्येति। जाङ्गल+बहुलवचनात् इञ्।) आलग्राही। इति ग्रब्दरत्नावली॥
जाङ्गली, स्त्री, (जङ्गले भवा। जङ्गल+अण्। ततो ङीप्।) ग्रूकग्रिम्बी। इति। मेदिनी। ले, ६५॥ (यथास्याः पर्य्यायाः।
"कपिकच्छुरात्मगुप्ता दृष्या प्रोक्ता च मर्कटी।
अजरा कण्डुरा यज्ञा दृष्यर्ग्गा प्रावृषायणी॥
जाङ्गली ग्रूकग्रिम्बी च सैव प्रोक्ता महर्षिभिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
जाङ्गुलं, क्ली, (जङ्गुलमेव। स्वार्थे अण्।) विषम्। जानिलीफलम्। इति ग्रब्दरत्नावली॥
जाङ्गुलिः, पुं, (जङ्गुलं विषं व्यवहार्य्यतया विद्यतेऽस्येति। जङ्गुल+बाहुलकात् इञ्।) विषवैद्यः। इति ग्रब्दरत्नावली॥ सापुड़े इति भाषा॥
जाङ्गुलिकः, पुं, (जाङ्गुलो विषप्रधानः सर्पादिर्य्यास्यतयास्त्यस्येति। जाङ्गुल+ठन्।) आलग्राही। इत्यमरः। १।८।११॥
जाङ्गुली, स्त्री, (जङ्गुलस्य इयम्। "तस्येदम्।" ४।३।१२०। इत्यण्। ततो ङीष्।) विषविद्या। इति हेमचन्द्रः॥
जाङ्गिकः, पुं, (जङ्गामभिचरतीति। जङ्गा+"पर्णादिभ्यष्ठन्।" ४।४।१०। इति ठन्। यद्वा, जङ्गामभिर्जीवतीति। "वेतनादिभ्यो जीवति।" ४।४।१२। इति ठन्।) उष्ट्रः। श्रीकारीवृक्षः। इति राजनिर्घण्टः॥ जङ्गाजीवी। धावकादिः। तत्पर्य्यायः। जङ्गाकरिकः २। इत्यमरः। २।८।७३॥ (प्रग्रस्तजङ्गाविशिष्टे, त्रि। यथा, भोजराजप्रबन्धयुक्तिकल्पतरौ।
"जाङ्गलस्या जाङ्गिकाश्च श्वानस्ते राजसा
मताः॥")
जाज्वल्यमानः, त्रि, (भृशं ज्वलतीति। ज्वल+यङ्+शानच्।) देदीप्यमानः। यथा, चण्डी।
"जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात्॥"
जाटलिः, पुं स्त्री, (जाटं सञ्जातं जातीति। जटा+बाहुलकात् किः।) वृक्षविशेषः। इति त्रिकाण्डशेषः॥
जाड्यं, क्ली, (जड़स्य भावः। जड़+अण्।) जड़ता। तत्पर्य्यायः। स्तम्भः २। (यथा, पद्मपुराणे। ६।६६।
"विना जाड्यानुभूतिं न कथञ्चिदुपपद्यते॥")
मौर्ख्यम्। इति हेमचन्द्रः॥
जाड्यारिः, पुं, (जाड्यस्य अरिः शत्रुः। अग्निना जाड्यदोषनिराकरणात् तथात्वम्।) जम्बीरः। इति राजनिर्घण्टः॥
जातं, क्ली, (जन+कर्म्मणि क्तः।) यज्ञम्। सम्पदः। (यथा, भट्टिः। ३।३३।
"अन्याकृतिं द्रावयितुं सविप्रा-
श्चिषीषवस्तोऽरपाचजातम्॥"

भावे क्तः ।) जन्म । (पारिभाषिकपुत्रविशेषे, पुं । यथा, पद्मतन्त्रे । १ । ४३१—४३२ ।
"जातः पुत्रोऽनुजातश्च अतिजातस्तथैव च ।
अपजातश्च लोकेऽस्मिन् मनवः ग्राह्यवेदिभिः ॥
मातृतुल्यगुणो जातस्त्वनुजातः पितुः समः ।
अतिजातोऽधिकस्तस्मादपजातोऽधमाधमः ॥")
उत्पन्ने त्रि । इति मेदिनी । ते, १६ ॥ (यथा, हितोपदेशे । १ । १४ ।
"कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्म्मिकः ।
काणेन चक्षुषा किं वा चक्षुःपीडैव केवलम् ॥")

जातकं, क्ली. (जातं जन्म तदधिकृत्य कृतो ग्रन्थः इत्यण् ततः स्वार्थे कन् । यद्वा, जातेन शिशोर्जन्मना कार्यतीति । कै + कः ।) जातबालकस्य शुभाशुभनिर्णायकग्रन्थः । तस्य भेदाः । जातकदीपिका १ जातकाभरणम् २ जातकतरङ्गिणी ३ जातककौमुदी ४ जातकरत्नाकरः ५ जातकसारः ६ जातकार्णवः ७ जातकचन्द्रिका ८ लघुजातकम् ९ बृहज्जातकम् १० इत्यादि । इति ज्योतिषम् ॥

जातकः, पुं, कारस्करः । भिक्षुः । (जात + स्वार्थे कन् ।) जाते, त्रि । इति धरणिः ॥

जातकर्म्म, क्ली, (जातस्य जाते सति वा यत् कर्म्म ।) दशसंस्कारान्तर्गतसंस्कारविशेषः । तस्य क्रमो यथा । पुत्रे जाते पिता नाभिं मा छिन्त छिन्द्धि मा दत्त इत्यभिधाय कृतजातः कृतद्विराशौचः प्रक्षालितशिलायां ब्रह्मचारिणा कुमार्य्या गर्भवत्या वा श्रुतस्वाध्यायशीलब्राह्मणेन वा अनाहृतलोहपिष्टौ व्रीहियवौ दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा मन्त्रेण कुमारस्य जिह्वां मार्ष्टि । ततस्तयैव सुवर्णेन घृतं गृहीत्वा मन्त्रेण तयैव कुमारस्य जिह्वां मार्ष्टि । ततः पुनरपि सुवर्णेन घृतं गृहीत्वा मन्त्रेण तयैव कुमारस्य जिह्वां मार्ष्टि । ततो नाभिं छिन्त छिन्द्धि दत्तेति पिता ब्रूयात् । छिन्नं पुनः पिता न कुर्य्यात् । इति भवदेवभट्टः ॥

जातवेदाः, [स्] पुं, (विद्यते लभ्यते इति । विद् लाभे + असुन् । जातं वेदो धनं यस्मात् ।) अग्निः । (अस्य निरुक्तिरुक्ता यथा, महाभारते २ । ३१ । ४१ ।
"पावनात् पावकत्वासि वह्नेराहुतयवाहनः ।
वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि ॥")
चित्रकवृक्षः । इत्यमरः । १ । १ । ५६ ॥ (जाते जाते सर्व्वप्रपञ्चस्य स्वस्मिन् अध्यस्ततया विद्यते यो जीवः । यद्वा, जातानि सर्व्वाणि कारणत्वेन विदन्ति यमिति । विद् ज्ञाने + असुन् । अन्तर्य्यामी परमेश्वरः । यथा, भागवते । ५ । ७ । १४ । "ओं परो रजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान ॥" "जातं वेदो धनं कर्म्मफलं यस्मात् कर्म्मफलदमित्यर्थः ॥" इति श्रीभागवतटीकायां श्रीधरस्वामी ॥)

जातरूपं, क्ली, (जातं प्रशस्तं रूपं यस्य ।) स्वर्णम् । (यथा, भागवते । १ । १७ । ३८ ।
"पुनश्च याचमानाय जातरूपमदात् प्रभुः ॥")
धुस्तूरः । इत्यमरः । २ । ६ । ६५ । उत्पन्नरूपे, त्रि । यथा, नैषधे । १ । १२६ ।
"न जातरूपच्छदजातरूपता
द्विजस्य दृष्टेयमिति स्तुवन् मुहुः ॥"

जातापत्या, स्त्री, (जातमपत्यमस्याः ।) प्रसूता । इत्यमरः । २ । ६ । १६ ।

जातिः, स्त्री, (जायतेऽस्यामिति । जन् + अधिकरणे क्तिन् ।) गोत्रम् । (जन + भावे क्तिन् ।) जन्म ॥ अम्लवेतसः । आमलकी । सामान्यम् । तत्तु ब्राह्मणक्षत्रियवैश्यशूद्रात्मकम् । छन्दः । जातीफलम् । मालती । इति मेदिनी । ते, १६ ॥ (अस्याः पर्य्यायाः यथा,—
"जातिर्ज्याती च सुमना मालती राजपुत्रिका ।
चेतिका छत्रगन्धा च सा पीता स्वर्णजातिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कामिल्लः । इति विश्वः ॥ गोत्रादिः । तस्य लक्षणं यथा, मुग्धबोधे ।
"आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्व्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह ॥"
अस्यार्थः । "आक्रियते अभ्यतेऽनयेति आकृतिः संस्थानं आकृत्या ग्रहणं ज्ञानं यस्याः सा आकृतिग्रहणा जातिराकृतिग्रहणा भवति संस्थानग्राह्या इत्यर्थः । तेन मनुष्यगोत्वगहंसादीनां पृथक् पृथक् संस्थानैर्व्यज्यमाना मनुष्यत्वगोत्वहत्वहंसत्वादिर्जातिः । एवं ब्राह्मणक्षत्रियवैश्यशूद्राणां पृथक् संस्थानाभावाद्ब्राह्मणत्वादेर्जातित्वं नायातमिति लक्षणान्तरमाह लिङ्गानाञ्च न सर्व्वभागिति या सर्व्वाणि लिङ्गानि न भजते सा च जातिरित्यर्थः । स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः । जातिभेदाः पुमाख्याश्च इत्यमरसिंहे जातिभेदानां स्त्रीपुंस्योरेवेति नियमे ब्राह्मणादीनां सर्व्वलिङ्गभाजित्वाभावाज्जातित्वम् । किन्तु अज्ञातहंसस्य जनैर्हंसं दृष्ट्वतोऽपि तस्य संस्थानेन हंसत्वं वा ज्ञातुं न शक्यते इति हंसस्यापि जातित्वं प्राप्तमिति पूर्व्वलक्षणस्य दोषः । एवं देवदत्तादिसंज्ञाग्रन्थस्यापि सर्व्वलिङ्गभाजित्वाभावाज्जातित्वापत्तिरिति द्वितीयलक्षणस्य दोषः इति दोषद्वयमपाकर्त्तुं द्वयोर्लक्षणयोर्विशेषणमाह सकृदाख्यातनिर्ग्राह्येति सकृदेकवारमाख्यातेन उपदेशेन निर्निश्चयेन ग्राह्या गृहीतुं शक्या इत्यर्थः । तेन ईदृशो हंस इत्युपदेशे हंसं दृष्ट्वतस्तस्य संस्थानेन हंसत्वं बुद्धितुं शक्यत एवेति पूर्व्वलक्षणस्य न दोषः । एवं देवदत्तादिसंज्ञाग्रन्थस्य एकस्मिन्नुपदेशेऽपि अन्यस्मिन् ज्ञानाभावात् जातित्वं न स्यादिति परलक्षणस्यापि न दोषः । गार्ग्यपुरुषः गार्गी स्त्री गार्ग्यं कुलमिति सर्व्वलिङ्गभाजित्वात् संस्थानग्राह्यत्वाभावाच्च गार्ग्यादीनां जातित्वानुपपत्तौ तृतीयलक्षणमाह गोत्रञ्चेति । पुत्रपौत्रप्रभृतिकमपत्यं गोत्रमिति पूर्व्वाचार्य्यपरिभाषितं गोत्रमिह गृह्यते गार्ग्यौवात्सीत्यादि । चतुर्थलक्षणमाह चरणैः सहेति चरणश्च जातिरित्यर्थः । चरणशब्दो वेदैकदेशवाची कठादिरूपः स च अध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात् क्रियावाचक एव न तु जातिवाचकः तेनास्य जातिसंज्ञार्थं चरणैः सहेत्युक्तं गार्ग्यादिनां क्षत्रियादीपि सिद्धेऽपि जातिसंज्ञा फलन्तु गार्गी भार्य्या यस्यासौ गार्गीभार्य्य इत्यादौ गोत्राककोडित्यादिना पुंवद्भावनिषेधः । गार्गी चासौ भार्य्या चेति गार्ग्यभार्य्या इत्यादौ गोडादिः पुंवदित्यादिना पुनः पुंवद्भावः ।" इति दुर्गादासः ॥
"सामान्यं द्विविधं प्रोक्तं परचापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥
परभिन्ना तु या जातिः सैवापरतयोच्यते ।
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च ॥
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥"
इति भाषापरिच्छेदे । ८-९ ॥
तल्लक्षणन्तु "नित्यत्वे सत्यनेकसमवेतत्वम् ।" इति सिद्धान्तमुक्तावली ॥

जातिकोशं, क्ली, (जातेः कोशमिवेति ।) जातीफलम् । इति भावप्रकाशः ॥

जातिकोषं, क्ली, (जातेः कोषमिव ।) जातीफलम् । इति हेमचन्द्रः । ३ । ३०७ ॥ (जयित्री इति लोके प्रसिद्धम् । तदेव जातीफलानामावरणदलं यवक्षतम् । तदृयथा वैद्यकरसेन्द्रसारसंग्रहे कषायाधिकारे ब्रह्मशाखरसे ।
"कर्पूरं जातिकोषं सजलमभकणाजातिपत्रं लवङ्गं
मांसी तालीशचोचे गजकुसुमगदं धातकी
चेति तुल्यम् ।
पथ्या धात्री विभीतं त्रिकटुरपि पृथक्त्वर्द्ध-
भागं द्विभागा-
मेलाजातीफलाख्यं त्रितितलविधिनाशुद्धगन्धस्य
कोलम् ॥"
जातिकोषजातीफलयोरेकस्मिन्नौषधे सम्मेलनादेव जयित्रीति लोकप्रसिद्धम् । औषधन्तु सर्व्वत्रैव प्रयुज्यते ॥)

जातिकोषी, स्त्री, (जातिकोषमस्या अस्तीति । "अर्श-आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् ततो ङीप् ।) जातीपत्री । इति राजनिर्घण्टः ॥

जातिफलं, क्ली, (जात्याख्यं फलमिति ।) जातीफलम् । इति हेमचन्द्रः । ३ । ३०७ ॥

जातिभ्रंशकरं, क्ली, (जातेर्भ्रंशं करोतीति । भ्रंश + टः ।) नवविधपापान्तर्गतपापविशेषः । यथा, मनुः । ११ । ६७ ।
"ब्राह्मणस्य रुजः कृत्वा घातिरन्यैयमत्ययोः ।
जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम् ॥"
"ब्राह्मणस्य दण्डहस्तादिना पीड़ाक्रिया अन्यैर्यं लशुनपरीषादि जैह्म्यं कुटिलत्वं वक्रता । इति कुल्लूकभट्टः ॥

जातिवैरं, क्ली, (जात्या स्वभावतो वैरं शत्रुत्वम् ।) स्वाभाविकशत्रुत्वम् । तत्पञ्चविधम् । स्त्रीकृतम्१

यथा श्रीकृष्णाग्निपुराणयोः ॥ वास्तुजम् २ यथा कौरवपाण्डवानाम् ॥ वाग्जम् ३ यथा द्रोण-द्रुपदयोः ॥ सापत्नम् ४ मूषिकनकुलयोः ॥ अपराधजम् ५ यथा पूजनीयब्रह्मदत्तयोः ॥ इति महाभारतम् ॥

जातिसारं, क्ली, (जात्या स्वभावतः सारोऽत्र।) जातीफलम्। इति राजनिर्घण्टः॥ (जातीफलग्रन्थेऽस्य विवृतिर्ज्ञेया॥)

जाती, स्त्री, (जन+क्तिच्। ततो वा ङीप्।) जातीपुष्पम्। चमेली इति हिन्दी भाषा॥ तत्पर्य्यायः सुरभिगन्धा २ सुमनाः ३ सुरप्रिया ४ श्वेतकी ५ सुकुमारा ६ सन्ध्यापुष्पी ७ मनोहरा ८ राजपुत्री ९ मनोज्ञा १० मालती ११ तैलधाविनी १२ जनेष्टा १३ हृद्यगन्धा १४। (एतस्या हि सर्व्वपुष्पेषु श्रेष्ठत्वमुक्तम्। यथा, "पुष्पेषु जाती नगरेषु काञ्ची।" इति उद्भटः॥) अस्या गुणाः। तिक्तत्वम्। शीतत्वम्। कफसुखप्राकनाग्नित्वम्। इति राजनिर्घण्टः॥ उष्णत्वम्। तुवरत्वम्। लघुदोषाग्निरोऽहिदन्तरोगविषकुष्ठव्रणरक्तदोषनाशित्वञ्च। इति भावप्रकाशः॥ तत्कुटमलस्य गुणाः। नेत्ररोगव्रणविस्फोटकुष्ठनाशित्वम्। इति राजनिर्घण्टः॥

जातीकोशः, क्ली, (जातीत्याख्यया कोशमिव फलमिति यावत्।) जातीफलम्। इति हेमचन्द्रः। ३। ३०७॥ (क्वचित् पुंलिङ्गेऽपि दृश्यते। यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।

"जातीकोशोऽथ कर्पूरं जातीकटुकयोः फलम्। कक्कोलकं लवङ्गञ्च तिक्तं कटुकषायकम्॥")

जातीकोषं, क्ली, (जातीत्याख्यया कोषमिव फलम्।) जातीफलम्। इति हेमचन्द्रः॥

जातीपत्री, स्त्री, (जातीपत्रमिवास्त्यस्यामिति। "अर्शआदिभ्योऽच्।" ५। २। १२७। इत्यच्। ततो ङीप्।) जातीफलत्वक्। जैत्री इति भाषा। तत्पर्य्यायः। जातिकोषी २ सुमनःपत्रिका ३ मालतीपत्रिका ४ सौमनसायनी ५ जातिपत्री ६। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। सुरभित्वम्। कफजाध्मानाग्नित्वम्। वक्त्रवैशद्यजननत्वञ्च। इति राजनिर्घण्टः॥ लघुत्वम्। स्वादुत्वम्। उष्णत्वम्। रुचिवर्णकारित्वम्। कफकासवमिश्वासव्रणाविषनाशित्वञ्च। इति भावप्रकाशः॥ दुर्गन्धनाशित्वम्। इति राजवल्लभः॥

जातीफलं, क्ली, (जातीत्याख्यं फलम्।) सुगन्धफलविशेषः। जायफल इति भाषा॥ तत्पर्य्यायः। जातीकोषम् २। इत्यमरः। २। ६। १३२॥ जातीकोशम् ३ जातिफलम् ४। इति तट्टीका॥ जातिग्रन्थम् ५ ग्रालूकम् ६ मालतीफलम् ७ मज्जसारम् ८ जातिसारम् ९ पर्पटम् १० सुमनःफलम् ११ फलजातिः १२ फलजाती १३ कोशम् १४ कोषम् १५ जातिकोषम् १६ कोषकम् १७। इति ५ शब्दरत्नावली॥ (यथा, वृहत्संहितायाम्। १६। ३०।

"जातीफलागुरुवचापिप्पल्यश्चन्दनं च भृगोः॥")

अस्य गुणाः। कषायत्वम्। उष्णत्वम्। कटुत्वम्। कण्ठामयार्शिवातातीसारमेहनाशित्वम्। तृष्यत्वम्। दीपनत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ रसे तिक्तत्वम्। तीक्ष्णत्वम्। रोचनत्वम्। ग्राहित्वम्। खरहितत्वम्। श्लेष्मानिलसुखवैरस्यमलदौर्गन्ध्यक्षयाताक्षिकासवमिश्वासशोषपीनसकृच्छ्रनाशित्वञ्च। इति भावप्रकाशः॥ लघ्वाश्मूलनाशित्वम्। इति राजवल्लभः॥

जातीयः, त्रि, (जातौ भवः। "दृङ्कादक्षः।" ४। २। ११४। इति छः। जातिभवः। यथा, कथासरित्सागरे। २३। ४८।

"प्राग्जन्मभिन्नजातीयाः परिरूढ्यैव कन्यकाः॥")

तद्धितप्रत्ययविशेषः। स तु प्रकारार्थे भवति। यथा। तार्किकजातीया। इति सुग्धबोधमतम्। (प्राणिभिन्नेते तु जातीयर्॥)

जातीरसं, क्ली, (जात्या रसः इव रसो यस्य।) बोलः। इति राजनिर्घण्टः॥

जातु, य, (जन+क्तुन्। पृषोदरात् साधुः।) कदाचित्। इत्यमरः। ३। ४। ४॥ (यथा, मनुः। २। ६४।

"न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते॥")

सम्भावितार्थः। (यथा, महाभारते। ५। १७६। १२।

"का जातु परभावं हि नारीं बालामिव स्थिताम्। वासयेत गृहे जानन् स्त्रीणां दोषो महात्ययः॥")

गर्हार्थः। इति शब्दरत्नावली॥ [रम्॥"

("जातु निन्दसि गोविन्दं जातु निन्दसि शङ्करम्। इति सुग्धबोधव्याकरणम्॥)

जातुकं, क्ली, (जातु गर्हितं निन्दितं दूषितमित्यर्थः कं जलं यस्मादिति।) हिङ्गु। इति शब्दचन्द्रिका॥

जातुधानः, पुं, (धीयते सन्निधीयते इति धानं सन्निधानमस्य जातु गर्हितं। धानमभिधानमस्येत्येके।) यातुधानः। राक्षसः। इत्यमरटीकायां रमानाथः॥ (यथा, कालिकापुराणे।

"जातुधानाः पिशाचाश्च कुष्माण्डा भैरवादयः॥")

जातुषं, त्रि, (जतुनो विकारः। "चर्पूजतुनोर्युक्।" ४। ३। १३८। इति अण् युक् च।) जतुविकारः। जतुनिर्म्मितम्। इति जटाधरः॥ (यथा, पञ्चतन्त्रे। १। १२०।

"अत्यप्रतापमासाद्य यो दण्डं न प्रयच्छति। जातुषाभरणस्येव रूपेणापि हि तस्य किम्॥")

जातोच्चः, पुं, (जातश्चासौ उच्चा चेति। जातः प्राप्तदशावस्थः उच्चा इत्यर्थः। "अचतुरेति।" ५। ४। ७७। इति निपातनात् साधुः।) उत्पन्न उच्चा। इत्यमरः। २। ६। ६१॥ उत्पन्नो दृढ्दशभावः। प्राप्तबलीवर्दभाव उच्चा। इति भरतः॥

जात्यः, त्रि, (जातौ भवः इति यत्।) कुलीनः। श्रेष्ठः। इति हेमचन्द्रः॥ (यथा, महाभारते। १३। १६। ६।

"खजात्यानधितिष्ठामि नक्षत्राणीव चन्द्रमाः॥")

काम्यः। इति जटाधरः॥ (यथा, महाभारते। ५। ३३। १२२।

"अतीव स जायते ज्ञातिमध्ये महामणिर्जात्य इव प्रसन्नः॥")

जात्यन्धः, त्रि, (जात्या जन्मनैव अन्धः।) जन्मान्धः। यथा, मनुः। ६। २०१।

"अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥"

जादौ, त्रि, (जात इत्यस्य जादौ इतीत्वत्प्रयोगस्तु प्राकृतलक्षणेश्वरसम्मत इति बोध्यम्।) जातः। इति प्राकृतलक्षणेश्वरः॥

जानकी, स्त्री, (जनकस्य मिथिलाधिपस्यापत्यं स्त्रीत्यण् ङीप् च।) सीता। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। २७३। १।

"प्राप्तमप्रतिमं दुःखं रामेण भरतर्षभ!। रक्षसा जानकी तस्य हृता भार्य्या बलीयसः॥")

जानपदः, पुं, (जानेन जन्मना पदयते इति अण्।) जनः। (यथा, याज्ञवल्क्ये। २। ३७।

"देयं चौराहृतं द्रव्यं राज्ञा जानपदाय तु। अदद्धि समवाप्नोति किल्बिषं यस्य तस्य तत्॥")

जनपद एव। स्वार्थे अण्।) देशः। इति मेदिनी। दे, ४। ४८॥ जनपदे भवः। इति "उत्सादिभ्योऽञ्। ४। १। ८६ इत्यञ्। देशभवे, त्रि॥ यथा, मनुः। ८। ४१।

"जातिजानपदान् धर्म्मान् श्रेणीधर्म्मांश्च धर्म्मवित्॥")

जानु, क्ली, (जायते इति। जन "दृसनिजनिचरिचटिभ्यो नुक्।" उणा १। ३। इति नुक्।) ऊरुजङ्घयोर्म्मध्यभागः। हाँटु इति भाषा॥ (यथा, महाभारते। ४। ३२। ३६।

"तस्य जानु ददौ भीमो जघ्ने चैनमरिन्दमः॥")

तत्पर्य्यायः। ऊरुपर्व्व २ अष्ठीवत् ३ अष्ठीवान् ४। इत्यमरः। २। ६। ७२॥ चक्रिका ५। इति राजनिर्घण्टः॥

जापः, पुं, (जप+भावे घञ्।) जपः। इति जटाधरः॥

जापकः, त्रि, (जपतीति। जप्+ण्वुल्।) जपकर्त्ता। (यथा, महाभारते। १२। १६६। ३।

"जापकानां फलावाप्तिं श्रोतुमिच्छामि भारत!। किं फलं जपतामुक्तं क्व वा तिष्ठन्ति जापकाः॥"

जपेन कृतं जपजन्यमित्यर्थः। जप्+अण्+स्वार्थे कन्। जपजन्ये, त्रि। यथा, महाभारते। १२। १६६। ४६।

"अथवा सर्व्वमेवेह मामकं जापकं फलम्॥")

जापनं, क्ली, (जप्+स्वार्थे णिच्+भावे ल्युट्।) निरसनम्। निर्व्वसनम्। इति धरणिः॥ (अपा। यथा, संवर्त्तकसंहितायाम्। २०६।

"मुच्यते सर्व्वपापेभ्यो गायत्र्याश्चैव जापतः॥")

जाबालः, पुं, (जबालाया अपत्यं पुमानिति। अण्।) अजाजीवः। इत्यमरः। २। १०।११॥ मुनिविशेषः। (यथा, ब्रह्मवैवर्त्ते। १। १६।१४॥ "जाबालो याज्ञलिः पैलः करथोऽगस्त्य एव च। एते वेदाङ्गवेदज्ञाः षोड़शाधिनायकाः॥" उपनिषद्विशेषः। यथा, मौक्तिकोपनिषदि। "ब्रह्मकैवल्यजाबालश्वेताश्वो हंस आरुणिः। दर्शनग्राह्यविशेषः। यथा, रामचन्द्रदत्तशाप प्रकरणे। [यात्॥") "अधोत्य कूटजाबालं ग्रार्गालिं योनिमाप्नु-

जाबालिः, पुं, (जबालाया अपत्यं पुमान् इति। इञ्।) मुनिविशेषः। यथा, रामायणम्॥ "सुयज्ञं वामदेवञ्च जाबालिमथ काश्यपम्।" (तथाच ब्रह्मवैवर्त्ते। २। ४। ७०। "कण्वगर्ग्गो भरद्वाजश्चास्तीको देवलस्तथा। जैगीषव्योऽथ जाबालिर्यङ्कृत्वा सर्व्वपूजितः॥")

जामदग्न्यः, पुं, (जमदग्नेरपत्यं पुमान् इति। "गर्गादिभ्यो यञ्।" ४। १। १०५। इति यञ्।) जमदग्निपुत्रः। परशुरामः। इति हेमचन्द्रः॥ (यथा, देवीभागवते। २५। ४१। "पित्राज्ञया जामदग्न्येन पूर्व्वं छिन्नं शिरो मातुरिति प्रसिद्धम्।")

जामाता, [तृ] पुं, (जायां माति मिमीतेमिनोति वा। "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातरिति।" उणा। २। ९९। इति निपातनात् साधुः।) दुहितृपतिः। इत्यमरः। २। ६। ३२। जामाइ इति भाषा॥ (यथा, हरिवंशे। ११६। २५। "जामाता त्वभवत्तस्य कंसस्तस्मिन् हते युधि॥") सूर्य्यावर्त्तः। धवः। इति मेदिनी। ते, ११०॥

जामिः, स्त्री, (जम्+इञ्। इत्वं निपातनात् साधुरित्येके।) स्वसा। कुलस्त्री। इत्यमरः। ३। ३। १४२॥ (यथा, मनुः। ३। ५७। "शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्॥")

जामी, स्त्री, (जामि+वा ङीष्।) जामिः। इति शब्दरत्नावली॥ (यथा, महाभारते। १३। ४६। ७। "यामीमुग्राणि गेहानि निक्तानीव क्षत्रया॥")

जामेयः, पुं, (जाम्या अपत्यमिति। "स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) भागिनेयः। इति हेमचन्द्रः॥

जाम्बवं, क्ली, (जम्बूः फं मूं। "जम्बा वा।" ४। ३। १६४। इत्वेऽण् तस्य विधानात् न लुक्।) जम्बूफलम्। इत्यमरः। २। ४। १६॥ (यथा, सुश्रुते। १। ४६। "अत्यर्थं वातलं ग्राहि जाम्बवं कफपित्तजित्॥") सुवर्णम्। इति राजनिर्घण्टः॥ जाम्बवति, पुं। इति शब्दभेदः॥

जाम्बवती, स्त्री, (जाम्बवतो अपत्यं स्त्री। अण् वतो ङीप्।) श्रीकृष्णपत्नी। जाम्बवत्कन्या। इति श्रीभागवतम्॥ (यथा, हरिवंशे। ३८। ४०। "लेभे जाम्बवतीं कन्यान्द्यराजस्य सम्मताम्॥") नागदमनी। इति राजनिर्घण्टः॥

जाम्बवान्, [त्] पुं, (जम्बोर्वर्णं जाम्बवं तदस्यास्तीति मतुप् मस्य वः। पृषोदरादित्वात् साधुः। जम्बुतुल्यकृष्णत्वादस्य तथात्वम्।) ऋक्षराजः। स ब्रह्मपुत्रः। यथा, रामायणे। "ऋक्षराजस्य पुत्रोऽत्र महाप्राज्ञः सुदुर्ज्जयः। पितामहसुतश्चात्र जाम्बवानिति विश्रुतः॥") (यथाच, हरिवंशे। ३८। ३५। "धात्र्या कुमारमादाय सुतं जाम्बवतो नृप!॥")

जाम्बवी, स्त्री. (जाम्बवस्याकारोऽस्यास्याः इति।) नागदमनी। इति राजनिर्घण्टः॥

जाम्बुवान्, [तृ] पुं, (जाम्बवान् पृषोदरात् साधुः।) जाम्बवान्। इति भरतो द्विरूपकोषश्च॥

जाम्बूनदं, क्ली, (जम्बूनद्यां भवमिति। अण्।) स्वर्णम्। धुस्तूरः। इति राजनिर्घण्टः॥ स्वर्णविशेषः। यथा। "मेरुमन्दरपर्व्वतस्थजम्बूफलानामत्युच्चनिपातनविशीर्णानां अनस्थिप्रायाणां इभकायनिभानां रसेन जम्बूनामनदी इलाहृतं वहति तस्या उभयोस्तीरयोर्मृत्तिका जम्बूरसेनानुविध्यमाना वायुर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति।" इति श्रीभागवतम्॥

जायकं, क्ली, (जयति अपरं गन्धमिति। जि+ण्वुल्।) कालीयकम्। कालिया इति ख्यातं पीतवर्णसुगन्धिकाष्ठम्। इत्यमरः। २। ६। १२५॥

जाया, स्त्री, (जायते पुत्ररूपेणात्मास्यामिति। जन्+यक् आत्वञ्च।) भार्य्या। इत्यमरः। २। ६। ६॥ (यथा, मनुः। ९। ८। "पतिर्भार्य्यां संप्रविश्य गर्भो भूत्वेह जायते। जायायास्तद्धि जायात्वं यदस्यां जायते पुनः॥")

जायाजीवः, पुं, (जाया आजीवः जीवनोपायो यस्य इति। जायया जीवतीति वा। जीव+अच्। जायायाः सङ्गीतनर्त्तनादिना जीवनादस्य तथात्वम्।) नटः। इत्यमरः। २। १०। १२॥

जायानुजीवी, [न्] पुं, (जायया अनुजीवतीति। अनु+जीव+णिनिः।) नटः। वकपक्षी। इति मेदिनी। नि, १५५॥ वेश्यापतिः। इति शब्दरत्नावली॥ दुश्चरः। इति हेमचन्द्रः॥

जायापती, पुं, (जाया च पतिश्चेति तौ।) भार्य्यापती। मातृभातार इति भाषा॥ नित्यद्विवचनान्तोऽयं शब्दः। इत्यमरः। २। ६। ३८॥

जायी, [न्] पुं, (जै+णिनिः। यद्वा, जि+णिनिः।) ध्रुवकभेदः। यथा,— "जायीति नाम्ना ध्रुवको द्वाविंशत्यक्षरान्वितः। सन्निपातेन तालेन शृङ्गारेऽभीष्टदो रसे॥" इति सङ्गीतदामोदरः॥ (यथा, महाभारते। ३। ३५। ८। "अफलं जन्म तस्याहं मन्ये दुर्ज्जातजायिनः॥")

जायुः, पुं, (जयति रोगान् इति। जि+उण्।) औषधम्। इत्यमरः। २। ६। ५०॥ (जयतीति। जयशीले, त्रि॥)

जारः, पुं, (जीर्य्यति स्त्रियाः सतीत्वमनेन। जॄ+करणे घञ्।) उपपतिः। इत्यमरः। २। ६। ३५॥ (यथा, याज्ञवल्क्ये। २। ३०। "जारं चौरैत्यभिवदन् दाप्यः पञ्चशतं दमम्॥" जारयति नाशयति इति। जॄ+णिच्+अच्। हन्ता। यथा, ऋग्वेदे। १। ६६। ४। "यमोऽह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम्॥")

जारजः, त्रि, (जारात् उपपतेर्ज्जायते इति। जन्+डः।) उपपतिजातसन्तानः। इत्यमरः। २। ६। ३६॥ (यथा, मनुः। ३। १५८। स्त्रीके कुल्लूकभट्टधृतटीकायाम्। "अस्तेते जारजः कुण्डो मृते भर्त्तरि गोलकः॥")

जारणी, स्त्री, (जारयति परिपाकं कारयतीति। जॄ+णिच्+ल्युः। ततो ङीप्।) शूलजीरकः। इति राजनिर्घण्टः॥

जारी, स्त्री, (जारयति जीर्णं कारयतीति। जॄ+णिच्+अच्+गौरादित्वात् ङीष्।) ओषधीविशेषः। इति मेदिनी। रे, ३६। जाड़ी इति भाषा॥

जारूथ्यः, पुं, (जरूथं मांसं तदर्हतीति। जरूथ+ण्यः।) त्रिगुणदक्षिणाकाययज्ञः। (यथा, महाभारते। ३। २६०। ७०। "ततो देवर्षिसहितः सरितं गोमतीमनु। दशाश्वमेधानाजह्रे जारूथ्यान् स निरर्गलान्॥")

जालं, क्ली, (जलते आच्छाद्यतेऽनेनेति। जल-संवरणे+करणे घञ्। यद्वा, व्रज्ये क्षिप्यते इति। जल+"ग्रहे।" ३। २। ६२। इत्यण्।) खनामख्यातसूत्रादिनिर्म्मितमत्स्यादिधारणोपायः। तत्पर्य्यायः। आनायः २। इत्यमरः। ३। ३। १६६॥ जालकम् ३। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ५५८। "वंशावलम्बनं यद् यो विस्तारो गुणस्य यावन्तः। तज्जालस्य खलस्य च निजाङ्गसुप्रणाशाय॥") गवाक्षः। (यथा, रघुः। ६। ४३। "प्रासादवातायनवेशिरन्ध्रां रेवां यदि प्रेक्षितुमस्ति कामः॥")

जारकः। स तु अस्फुटकलिकाकुड्मलाकृतिक्षुद्रफलश्च। दम्भः। समूहः। इति मेदिनी। ले, १६॥ (यथा, रघुः। ७। ६२। "ततो धनुष्कर्षणमूढहस्तं एकांशपर्य्यस्तशिरस्त्रजालम्॥" वंशलोहादिनिर्म्मितजालवद्द्रव्यविशेषः। यथा, भट्टिः। १। ८। "अन्तर्निविष्टोज्ज्वलरत्नभासो वातायनालेरभिनिष्पतन्त्यः॥") इन्द्रजालम्। इति हेमचन्द्रः। ३। ५६०॥

जालः, पुं, (जालयति शाखाप्रशाखादिभिः संवृणोतीति। जल संवरणे+णिच्+"नन्दिग्रहीति।" ३। १। १३४। इत्यच्।) कदम्बवृक्षः। इति मेदिनी। ले, १६॥

जालकं, क्ली, (जल संवरणे + भावे घञ्। जालेन ईषदावरणेन कायति प्रकाशते इति। कै + कः। जाल + स्वार्थे कन् वा।) अस्फुटकलिका। इति भरतः॥ (यथा, मेघदूते। ६६।
"तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्॥")
कुष्माण्डादिच्छद्रफलम्। इति भारसुन्दरी॥ तत्पर्य्यायः। चारकः २। इत्यमरः। २। ४। १६॥ कोरकः। दम्भः। कुलायः। आनायः। इति मेदिनी। के, ६२॥ (यथा, सुश्रुते। उत्तरतन्त्रे ७ अध्याये।
"दृष्टिर्भृशं विकलति द्वितीयं पटलं गते। मक्षिकान् मशकान् केशान् जालकानि च पश्यति॥")
समूहः। इति शब्दरत्नावली॥ (यथा, शाकुन्तले प्रथमाङ्के।
"वह्निं कर्णशिरीषरोधि वदने धर्म्माम्भसां जालकं बन्धे संसिनि चैकहस्तयमिता पर्य्याकुला मूर्द्धजाः॥")
वंशलौहादिनिर्म्मितजालाकृतिद्रव्यविशेषः। यथा, पञ्चतन्त्रे। ३। १७। ६।
"ततो यष्टिं शूलाकाञ्च जालकं पञ्जरं तथा। बभञ्ज क्रुध्यको दीनां कपोतीञ्च सुमोच तान्॥")

जालकं, क्ली क्ली, (जल संवरणे + भावे घञ्। जालेन आवरणेन कायति प्रकाशते इति। कै + कः।) मोचकफलम्। इति मेदिनी॥ के, ६२॥

जालकः, पुं, (जालेन वंशलौहादिनिर्म्मितजालाकृतिद्रव्यविशेषेण कायतीति। कै + कः।) गवाक्षः। इति हेमचन्द्रः। ४। ७८॥

जालकारकः, पुं, (जालं करोतीति। कृ + ण्वुल्। जालस्य कारको वा।) मर्कटकः। इति हेमचन्द्रः। ४। २७६॥ जालकर्त्तरि, त्रि॥

जालकिनी, स्त्री, (जालकं लोमसमूहस्तदस्त्यस्या इति। "अत इनिठनौ।" ५।२।११५। इति इनिस्ततो ङीप्।) मेषी। इति हेमचन्द्रः। ४।३।४३॥

जालगर्द्दभः, पुं, रोगविशेषः। तस्य लक्षणं यथा,
"विसर्पवत् सर्पति यः शोथस्तुदपाकवान्। दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्द्दभः॥"
अपाकवान् ईषत्पाकवान्। पित्तकृतत्वेन सर्व्वथा पाकाभावस्यायुक्तत्वात्। अयमग्निवात इति ख्यातः॥* अथ चिकित्सेन्द्रदृष्टागर्द्दभिकाजालगर्द्दभानां चिकित्सा।
"चिकितामिन्द्रदृष्टाञ्च गर्द्दभीं जालगर्द्दभम्। पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक्। पाके तु रोपयेदाशु: पक्वैर्मधुरभेषजैः॥"
इति भावप्रकाशः॥

जालगोणिका, स्त्री, (जालवत् गोण्या छिद्रवत्त्वेन कायतीति। कै + कः। ततो ङस्वः।) दधिमन्थनभाण्डविशेषः। तत्पर्य्यायः। कण्डाला २। इति शब्दरत्नावली॥

जालन्धरः, पुं, त्रिगर्त्तदेशः। इति हेमचन्द्रः। ४। १४॥ (देशोऽयं पीठस्थानानामन्यतमः। अत्र भगवती विश्वमुखीमूर्त्तिर्या विराजते। यथा, देवीभागवते। ७। ३०। ७६।
"जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते॥")
जालन्धरोऽभिजन एषामिति। अण्।) तद्देशस्थे पुं भूम्नि। (वैत्यवद्बहुषु। यथा, काशीखण्डे। २१। १०
"पुरा जालन्धरं दैत्यं ममापि परिकम्पनम्। पादाङ्गुष्ठाग्ररेखोत्थं चक्रं सृष्ट्वा हरोऽहरत्॥" ऋषिविशेषः। इति व्याकरणम्॥)

जालपात् [द्] पुं, (जालमिव पादौ यस्य।) हंसः। इति त्रिकाण्डशेषः॥ (यथाह सम्वर्त्तः। १४६।
"टिट्टिभं जालपादञ्च कोकिलं कुक्कुटं तथा॥")

जालप्राया, स्त्री, (जालस्य प्रायो बाहुल्यं यत्र।) अङ्गरक्षिणी। इति हेमचन्द्रः। ३। ४३३॥ लोहार सांजीया इति भाषा॥

जालबर्ब्बूरकः, पुं, (जालाकारो बर्ब्बूरकः। शाकपार्थिवादिवत्समासः।) बर्ब्बूरवृक्षविशेषः। तत्पर्य्यायः। कृचाकः २ शूलकण्टकः ३ क्षुद्रशाखः ४ तनुच्छायः ५ रन्ध्रकण्टः ६। अस्य गुणाः। रूक्षत्वम्। वातामयकफनाशित्वम्। पित्तदाहकारित्वम्। कषायत्वम्। उष्णत्वञ्च। इति राजनिर्घण्टः॥

जालिकः, पुं, (जालेन जीवतीति। जाल + "वेतनादिभ्यो जीवति।" ४। ४। १२। इति ठन्। यद्वा, जालेन चरतीति। "पर्षादिभ्यः ठन्।" ४। ४। १०। इति ठन्।) कैवर्त्तः। इति त्रिकाण्डशेषः॥ वागुरिकः। जालेन रुगबन्धनकर्त्ता इत्यमरः। २। १०। १४॥ मर्कटकः। इति हेमचन्द्रः। ४। २७७॥ (ऐन्द्रजालिकः। इति शाकरणम्॥)

जालिकः, त्रि, (जालेन जीवतीति। जाल + ठन्।) ग्रामजाली। जालोपजीवी। इति मेदिनी। के, ६४॥

जालिका, स्त्री, (जालं जालवदाकृतिरस्त्यस्याः। जाल + "अत इनिठनौ।" ५। २। ११५। इति ठन्।) वस्त्रविशेषः। गिरिसारः। (जलमेवेति स्वार्थे अण्। ततो जालं सलिलं उत्पत्तित्वेनास्त्यस्या इति ठन्।) जलौका। विधवा। भटानामक्षरचिताङ्गरक्षिणी। इति मेदिनी। के, ६४॥

जालिनी, स्त्री, (जालं चित्रकर्म्मवस्तुसमूहो विद्यतेऽस्यामिति। इनिस्ततो ङीप्।) चित्रशाला। इति हेमचन्द्रः। ४। ६५॥ (जालं आनायसदृशद्रव्यं विद्यतेऽस्या इति।) कोशातकी। इति राजनिर्घण्टः॥ (यथास्याः पर्य्याया भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"धामार्गवः पीतपुष्पो जालिनी क्षतवेधना। राजकोशातकी चेति तथोक्ता राजिमत्फला॥")
घोषातकी। इति रत्नमाला॥ प्रमेहरोगिणः पीड़काविशेषः। यथा, सुश्रुते निदानस्थाने ६ अध्याये। "तत्र वसामेदोभ्यामभिपन्नधूरोरस्त्रिभिर्दोषैश्चानुगतधातोः प्रमेहिणो दश पीड़का जायन्ते। तद्यथा, शराधिका सर्षपिका कच्छपिका जालिनी विनता पुत्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति।"
"जालिनी तीव्रदाहा तु मांसजालसमावृता॥")

जाली, स्त्री, (जालं जालाकृतिरस्त्यस्याः अच् ततो गौरादित्वात् ङीष्।) ज्योत्स्नी। इत्यमरः। २। ४। ११८॥ झिङ्गा। इति ख्याता। पटोलः। इति राजनिर्घण्टः॥

जाल्मः, त्रि, (जालयति दूरीकरोति हिताहितज्ञानमिति। जल + णिच् + बाहुलकात् मः।) पामरः। (यदुक्तम्।
"क्षणं विश्राम्यतां जाल्म! स्कन्धं ते यदि बाधति। न तथा बाधते स्कन्धं यथा बाधति बाधते॥")
क्रूरः। असमीक्ष्यकारी। इति मेदिनी। मे. १३॥ (यथा, माघे। १५। ३३।
"त्वयि पूजनं जगति जाल्म! कृतमिदमपाकृते गुणैः। हासकरमघटते नितरां शिरसीव कङ्कतमपेतमूर्द्धजे॥")

जाषकं, क्ली, (जष्यति सुचति सन्ध्यादिकमिति। जष + ण्वुल्। पृषोदरादित्वात् सस्य यत्वम्।) कालीयनामगन्धद्रव्यम्। इत्यमरटीकासारसुन्दरी॥

जाहकः, पुं, घोड़ः। घोड़ इति भाषा। मार्ज्जारः। खड़्गः। कारण्डिकः। इति मेदिनी। के, ६२॥ विलेशयजन्तुविशेषः। तत्पर्य्यायः। गात्रसङ्कोची २ मण्डली ३ बहुरूपकः ४ कामरूपी ५ विरूपी ६ विलवासः ७। इति राजनिर्घण्टः॥

जाह्नवी, स्त्री, (जह्नोरपत्यं स्त्री। जह्नु + अण् + ङीप्।) गङ्गा। इति हेमचन्द्रः। ४। १४७॥ एतन्नामकारणं यथा,—
"जानुद्वारा पुरा दत्ता जह्नुः संपीय कोपतः। तस्य कन्यास्वरूपा च जाह्नवी तेन कीर्त्तिता॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥*॥
तस्यां तिथिविशेषे स्नानफलं यथा,—
"सामान्यदिवसस्नानसङ्ख्यं शृणु सुन्दरि!। पुण्यं दशगुणञ्चैव मौषलस्नानतः परम्॥ ततस्त्रिंशद्गुणं पुण्यं रविसंक्रमणे दिने। अमायाञ्चापि तत्तुल्यं द्विगुणं दक्षिणायने॥ ततो दशगुणं पुण्यं नराणामुत्तरायणे। चातुर्म्मास्यां पौर्णमास्यामनन्तं पुण्यमेवच॥ अक्षय्यायाञ्च तत्तुल्यं नेतरेदानरूपितम्। असंख्यपुण्यफलदमेतेषु स्नानदानकम्। सामान्यदिवसस्नानात् दानात् शतगुणं भवेत्॥ मन्वन्तरायां देवेशि! युगाद्यायां तथैव च। माघस्य सितसप्तम्यां भौमाश्वत्थे तथैव च॥ ततोऽपि द्विगुणं पुण्यं नन्दायां भवदुर्ल्लभे!। दशहरादशम्याञ्च युगाद्यादि समं फलम्॥ नन्दासमञ्च वारुण्यां महत्पूर्व्वे चतुर्गुणम्। ततश्चतुर्गुणं पुण्यं द्विमहत्पूर्व्वके सति॥ पुण्यं कोटिगुणञ्चैव सामान्यस्नानतो हि यत्।

चन्द्रोपरागसमये सूर्य्ये दशगुणं ततः ॥
पुण्येऽप्यङ्गोदये काले ततः शतगुणं फलम् ।
सर्व्वेषामेव सङ्कल्पं वैगुण्यानां विपर्य्ययः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

जि, जये । अभिभवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकं च-अनिट् ।) जय उत्कर्षः स्वीकारश्च । उत्कर्षेऽकर्म्मकः । जयन्ति यमुनाकूले रङ्गैः-केलयः । मखैरसङ्ख्यैरजयत् सुरालयमिति काद-म्बरी । जयति शत्रुं बली । अनभिधानादस्मात् तुवन्त्योः प्रयोगाभावः । किञ्च तयोः स्थाने तिवन्तीति । किञ्च तुपः स्थाने तातङ् दृश्यते । यथा, भावगम्भलयः कोऽपि जयताङ्गगोचरः । इति दुर्गादासः ॥

जिः, त्रि, (जयतीति । जि + बाहुलकात् डिः ।) जेता । पिशाचे, पुं । इत्येकाक्षरकोषः ॥

जिगमिषु, पुं, (गन्तुमिच्छति । गम + "गमेः सन्वच्च ।" उणां ३ । ३१ । इति क्षुः सन्वत्कार्य्यञ्च । अनुदात्तोपदेशे इत्यादिना मलोपः ।) प्राण-वायुः । इत्युणादिकोषः ॥

जिगमिषा, स्त्री, (गन्तुमिच्छा । गम + सन् + अ । ततष्टाप् ।) गमनेच्छा । इति व्याकरणम् ॥

जिगीषा, स्त्री, (जेतुमिच्छा । जि + सन् + अ । ततष्टाप् ।) जयेच्छा । (यथा, महाभारते १ । ७६ । ६ ।
"जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम् ।") अवसायः । प्रकर्षः । इति मेदिनी । षे, ३६ ॥

जिघत्सा, स्त्री, (अत्तुमिच्छा । अद् भक्षणे + सन् + अः । "लुङ्सनोर्घस्लृ ।" २ । ४ । ३७ । इति घस्लृ ।) क्षुधा । इति हेमचन्द्रः ।३।५७ ॥

जिघत्सुः, त्रि, (अत्तुमिच्छुः । अद् + सन् + "लुङ्सनोर्घस्लृ ।" २ । ४ । ३७ । इति घस्-लादेशः । ततः "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) क्षुधितः । इत्यमरः । ३ । १ । २० ॥

जिघांसकः, त्रि, (जिघांसति हन्तुमिच्छतीति । हन + सन् + ण्वुल् ।) हननेच्छुकः । इति व्याकरणम् ॥

जिघांसा, स्त्री, (हन्तुमिच्छा । हन् + सन् + "अभ्यासाच्च ।" ७ । ३ । ५५ । इति कुत्वम् । "अज्झनगमां सनि ।" ६ । ४ । १६ । इति दीर्घः । ततः अप्रत्ययस्तः स्त्रियां टाप् ।) हननेच्छा । इति व्याकरणम् ॥ (यथा, मनुः । ११ । २०६ ।
"जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते ॥")

जिघांसुः, पुं, (हन्तुमिच्छुः । हन् + सन् + "सना-शंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) शत्रुः । इति हेमचन्द्रः । ३ । ३६३ । हननेच्छौ, त्रि । यथा, भट्टिः ।
"प्रशान्तचेष्टं हरिणं जिघांसुः ॥"
(यथाच, महाभारते । ३ । १५४ । १८ ।
"जिघांसवः क्रोधवशाः सुभीमा
मीमं समग्रात् परिवव्रुरुग्राः ॥")

जिघ्रः, त्रि, (जिघ्रतीति । घ्रा गन्धोपादाने + "घ्राध्माधेट्दृशः शः ।" ३ । १ । १३७ । इति शः ।) घ्राणकर्त्ता । यथा, साहित्यदर्पणे ।
"स्वामी निश्वसितेऽप्यस्यति मनोजिघ्रः
सपत्नीजनः ॥"

जिह्मिनी, स्त्री, वृत्तविशेषः । तत्पर्य्यायः । झिङ्गिनी २ झिङ्गी ३ सुनिर्य्यासा ४ प्रमो-दिनी ५ । (यथा, गारुडे १६४ अध्याये ।
"जिह्मिन्यैरण्डकं रुद्र ! मूकझिम्बीसमन्वितम् ।
शीतोदकेन तन्नस्यो बाहुशीर्षार्त्तिहरेत् ॥"
यथाच, वाभटे सूत्रस्थाने १५ अध्याये ॥
"रोध्रशावरकरोध्रपलाशा
जिह्मिनी सरलकट्फलयुक्ताः ।
कृत्तसिताम्लकदली गतशोकाः
सैलवालुपरिपेलवमोचाः ॥")
अस्या गुणाः । मधुरत्वम् । उष्णत्वम् । कषा-यत्वम् । योनिशोधनत्वम् । कटुत्वम् । व्रण-कृद्रोगवातातीसारनाशित्वम् । पटुत्वञ्च । इति भावप्रकाशस्य पूर्व्वखण्डे १ मे भागे ॥

जिह्मी, स्त्री, मक्षिका । इत्यमरः । २ । ४ । ६० ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठचिकित्सायाम् ।
"आसु जिह्मी महातिक्ता विशाला क्षुद्रि-पञ्चकम् ॥")

जिज्ञासा, स्त्री, (ज्ञातुमिच्छा । ज्ञा + सन् + अः । स्त्रियां टाप् ।) ज्ञातुमिच्छा । यथा,—
"अथातो ब्रह्मजिज्ञासा ।"
इति शारीरकप्रथमसूत्रम् ॥
तत्पर्य्यायः । अनुयोगः १ प्रश्नः २ पृच्छा ३ निरूपणा ४ । इति जटाधरः ॥

जिज्ञासितः, त्रि, (जिज्ञासास्य जाता । तार-कादित्वात् इतच् । यद्वा ज्ञा + सन् + कर्म्मणि क्तः ।) ज्ञातजिज्ञासः । दृष्टः । विचारितः । यथा, श्रीभागवते १ । ५ । ४ ।
"जिज्ञासितमधीतञ्च ब्रह्म यत्तत् सनातनम् ॥"
"किञ्च यत् सनातनं नित्यं परं ब्रह्म तच्च त्वया जिज्ञासितं विचारितं अधीतं अधिगतं प्राप्त-मेवेत्यर्थः ।" इति श्रीधरस्वामी ॥

जिज्ञासुः, त्रि, (ज्ञातुमिच्छुः । ज्ञा + सन् + "सना-शंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) आत्मज्ञानेच्छुः । यथा, श्रीभगवद्गीतायां ७ । १६ ॥
"चतुर्व्विधा भजन्ते मां जनाः सुकृतिनोऽर्জ্জুন ! ।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ! ॥"
सामान्यबोधेच्छकश्च ॥

जिज्ञास्यः, त्रि, (जिज्ञास्यते इति । ज्ञा + सन् + कर्म्मणि यत् ।) जिज्ञासितव्यः । जिज्ञासनीयः । (विचार्य्यम् । यथा, भागवते । २ । ६ । ३५ ।
"एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्व्वत्र सर्व्वदा ॥"
"आत्मनस्तत्त्वजिज्ञासुना एतावदेव जिज्ञास्यं विचार्य्यम् ॥" इति श्रीधरस्वामी ॥)

जितः, पुं, (जितं जयमस्यास्तीति । अच् ।) अर्हदुपासकविशेषः । इति हेमचन्द्रः ॥

जितः, त्रि, (जि + कर्म्मणि क्तः ।) प्राप्तपरा-जयः । तत्पर्य्यायः । पराभूतः २ परिभूतः ३ अभिभूतः ४ भग्नः ५ पराजितः ६ । इति हेमचन्द्रः ॥ (यथा, मनुः । ४ । १८१ ।
"एभिर्जितेश्च जयति सर्व्वान् लोकानि-मान् गृही ॥")

जितकाशिः, पुं, (जितेन जयोद्यमेन काशते प्रका-शते इति । काश + इन् ।) दृढ़मुष्टिः । इति भारतटीकायां नीलकण्ठः ॥

जितकाशी [न्] त्रि, (जितेन जयेन काशते इति । काश + णिनिः ।) जययुक्तः । तत्-पर्य्यायः । जिताह्वः २ । इति हेमचन्द्रः । ३ । ४७० ॥ (यथा, हरिवंशे । १७५ । १४१ ।
"अनिरुद्धं रणे वासो जितकाशी महाबलैः ।
वाक्यं प्रोवाच संक्रुद्धो गृह्यतां हन्यतामिति ॥")

जितनेमिः, पुं, (जिता नेमिर्येन ।) अश्वत्थ-निर्म्मितदण्डः । तत्पर्य्यायः । आश्वत्थः २ । इति हेमचन्द्रः । ३ । ४६० ॥

जितशत्रुः, पुं, (जितः शत्रुर्येन ।) वृत्ताईत्-पिता । इति हेमचन्द्रः । १ । ३६ ॥ क्षतशत्रु-पराजये, त्रि ॥

जिताक्षरः, त्रि, (जितानि आयत्तीकृतानि अक्ष-राणि येन ।) कृताक्षरजयः । वशीभूताक्षरकः । दृष्टिमात्रेणाक्षरबोधेन पाठकमः । इति लोक-प्रसिद्धिः ॥

जितामित्रः, पुं, (जिता अमित्रा रागद्वेषादयो बाह्यावरणादयश्च येन इति ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । १४६ । ६६ ।
"अजो महार्हः स्वाभाव्यो जितामित्रः
प्रमोदनः ॥"
जितोऽमित्रः शत्रुर्येन ।) क्षतशत्रुपराजये, त्रि ॥ (यथा, मार्कण्डेये । ३४ । ११३ ।
"ऋणप्रदाता वैद्यश्च श्रोत्रियः सजला नदी ।
जितामित्रो नृपो यत्र बलवान् धर्म्मतत्परः ॥")

जितारिः, पुं, (जिता अरयः कामक्रोधादयो येन ।) बुद्धः । इति त्रिकाण्डशेषः ॥ वृत्ताईत्पिता । इति हेमचन्द्रः । १ । ३६ ॥ (कुरुपुत्रस्या-विक्षितः पुत्राणामन्यतमः । यथा, महाभा-रते । १ । ६५ । ५० ।
"अविक्षितः परिक्षिच्च श्रवणाश्च वीर्य्यवान् ।
आदिराजो विराजश्च शिल्पिनश्च महाबलः ।
उक्षेः अवा भङ्गकारो जितारिश्चाष्टमः स्मृतः ॥")
जितशत्रौ, त्रि ॥

जिताष्टमी, स्त्री, (जिता पुत्रसौभाग्यदानेन सर्व्वोत्-कर्षेण स्थिता या अष्टमी ।) भीमूताष्टमी । सैव जीमूताष्टमी । यथा, "आश्विन-कृष्णाष्टम्यां जीमूतवाहनपूजा । तत्राष्टमी प्रदोषव्यापिनी ग्राह्या । भविष्योत्तरे ।
"इदे मास्यसिते पक्षे अष्टमी या तिथिर्भवेत् ।
पुत्रसौभाग्यदा स्त्रीणां स्नाता सा जीवपुत्रिका ॥
शालिवाहनराजस्य पुत्रो जीमूतवाहनः ।

तस्यां पूज्यः स नारीभिः पुत्रसौभाग्यलिप्सया ॥
प्रदोषसमये स्त्रीभिः पूज्यो जीमूतवाहनः ।
पुष्करिणीं विधायाथ प्राङ्गणे चतुरस्रिकाम् ॥"
किञ्च विष्णुधर्म्मोत्तरे ।
"पूर्व्वेद्युरपरेद्युर्वा प्रदोषे यत्र चाष्टमी ।
तत्र पूज्यः सदा स्त्रीभी राजा जीमूतवाहनः ॥"
तथा च । यद्दिने प्रदोषव्यापिनी अष्टमी तत्रैव व्रतं उभयदिने चेत् परदिने त्रिसन्ध्यव्यापित्वात् । उभयदिने प्रदोषाद्यापौ उदयगामिन्यां तदुक्तं निर्णयामृतसिन्धौ ।

"लक्ष्मीव्रतं चाश्विते प्रथमाङ्गे
यत्राष्टमी चाश्विनकृष्णपक्षे ।
तत्रोदयं वै कुरुते दिनेशः
सदा भवेल्लोवितपुत्रिका सा ॥" इति ।

अस्यामष्टम्यां स्त्रीभिर्न भोक्तव्यम् ।

"आश्विनस्यासिताष्टम्यां याः स्त्रियोऽन्नं हि भुञ्जते ।
मृतवत्सा भवेयुस्ता वैधव्यञ्च भवेद्ध्रुवम् ॥"
इति वचनात् ।

इति वाचस्पतिमिश्रकृतचमत्कारचिन्तामणिः ॥

जिताहवः, पुं, (जित आहवो युद्धं येन ।) जितकाशी । इति हेमचन्द्रः । ३ । ४७० ॥

जितेन्द्रियः, त्रि, (जितानि वशीकृतानि इन्द्रियाणि श्रोत्रादीनि येन ।) वशीकृतेन्द्रियः । तत्पर्य्यायः । शान्तः २ आन्तः ३ । इति हेमचन्द्रः ॥ (यथा, शब्दचिन्तामणिधृतवचनम् ।
"श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥",

जितेन्द्रियाङ्कः, पुं, (जितेन्द्रियं आह्वयते स्पर्द्धते इति । आ + ह्वे + कः ।) कामदहिवृक्षः । इति राजनिर्घण्टः ॥

जित्तमः, पुं, (अयमेषामतिशयेन जित् जयशीलः । जित् + तमप् ।) जितुमः । मिथुनराशिः । इति ज्योतिषतत्त्वम् ॥ जयशीलानां मध्ये उत्तमश्च ॥

जित्वा, स्त्री, (जि + "विपूयविनीयजित्वाशुक्लकृष्णहलिषु ।" ३ । १ । ११७ । इति क्वप् ।) हलिः । इति हेमचन्द्रः । ३।५५४ ॥ (सिद्धान्तकौमुदीमते तु पुंलिङ्गान्तोऽयं शब्दः ॥)

जित्वरः, त्रि, (जयतीति । जि + "इण्नशजिशृगृभ्यः क्वरप् ।" ३।२।१६३ । इति क्वरप् ।) जेता । इत्यमरः । २ । ८ । ७७ ॥ (यथा, माघे । २ । ६ ।
"करदीकृतभूपाली भालभिर्जित्वरैर्दृशाम् ।
विनाप्यस्मदलम्भूष्णुरिज्याये तपसः सुतः ॥")

जित्वरी, स्त्री, (जयति सर्व्वोत्कर्षेण वर्त्तते इति । जि + क्वरप् । "टिड्ढाणेति ।" ४ । १ । १५ । इति ङीप् ।) काशी । इति त्रिकाण्डशेषः ॥

जिष्णः, पुं, (जयतीति । जि + "इष्णुच् जिष्णुच् ।" उणां । ३ । २ । इति नक् ।) अर्জ্জुनः । बुद्धः । विष्णुः । इति हेमचन्द्रः । २ । १३० ॥ अतिवृद्धः । इत्युणादिकोषः ॥ जित्वरे, त्रि । इति मेदिनी । ने, ८ ॥

जिनयोनिः, पुं, स्त्रगः । इति शब्दरत्नावली ॥

जिनसद्म, [न्] क्ली, (जिनानां सद्म गृहम् ।) जिनगृहम् । तत्पर्य्यायः । चैत्यः २ विहारः ३ । इति हेमचन्द्रः । ४ । ६० ॥

जिनेन्द्रः, पुं, (जिनानां इन्द्रः ।) बुद्धः । इति हलायुधः ॥

जिम, उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्त्वात् क्त्वावेट् ।) उ, जिमित्वा जिग्ध्वा । इति दुर्गादासः ॥

जिरि, र न हिंसायाम् । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) रेफोपधः । र, वैदिकः । न, जिरिणोति । इति दुर्गादासः ॥

जिव, इ प्रीणने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इखी । इ, जिन्वति । जिन्वति लोकः पितरम् । इति दुर्गादासः ॥

जिवाजिवः, पुं, (जीवञ्जीवः पृषोदरादित्वात् साधुः ।) जीवञ्जीवपक्षी । इति शब्दरत्नावली ॥

जिष्णिः, पुं, (जीर्य्यत्यनेनेति । जॄष वयोहानौ + "जीर्य्यतेः क्त्रिन् रश्च वः ।" उणां ५ । ४६ । इति क्त्रिन् । इरादिकार्य्यं रेफस्य वः । बाहुलकात् इनि चेति न दीर्घः ।) समयः । पक्षी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (जीर्व्वि, त्रि । यथा, ऋग्वेदे । १ । ७० । ५ । [भरन्त ॥")
"विद्वा नरः पुत्रात् सपर्य्यन् पितुर्न जिष्णेर्वि वेदो

जिष्व, उ सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्त्वात् क्त्वा वेट् ।) उ, जेषित्वा जिष्ट्वा । इति दुर्गादासः ॥

जिष्णुः, पुं. (जयतीति । जि जये + "स्फायिजिवञ्चिमञ्जिभ्यस्नुक्नुसुः ।" ३ । २ । १३६ । इति स्नुक्नुसुः ।) विष्णुः । इति हेमचन्द्रः । २ । १२८ ॥ (यथा, महाभारते । ५ । ७० । १३ ।
"विष्णुर्विक्रमणाद्देवो जयनाज्जिष्णुरुच्यते ।
प्राप्तत्वादनन्तश्च गोविन्दो वेदनाद्गवाम् ॥")
इन्द्रः । (यथा, अथर्ब्ववेदे । ११ । ६ । १८ ।
"जयंश्च जिष्णुश्चामित्रा जयतामिन्द्रमेदिनौ ॥")
अर्জ্জुनः । (यथा, महाभारते । ४ । ४२ । २१ ।
"अहं दुरात्मा दुर्द्धर्षो दमनः पाकशासनिः ।
तेन देवमनुष्येषु जिष्णुर्नामास्मि विश्रुतः ॥"
भौत्यस्य मनोः पुत्राणामन्यतमः । यथा, हरिवंशे । ७ । ८८ ।
"तरङ्गभीरुश्चञ्चश्च तरस्वानुग्र एव च ।
अभिमानी प्रवीरश्च जिष्णुः संक्रन्दनस्तथा ॥
तेजस्वी सबलश्चैव भौत्यस्यैते मनोः सुताः ॥")
चेतरि त्रि । इति मेदिनी । णे, १३ ॥ (यथा, रघुः । ४ । ८५ ।
"इति जित्वा दिशो जिष्णुर्न्यवर्त्तत रथोद्धतम् ।
रजो विश्रामयन् राज्ञां क्षत्रमूलेषु मौलिषु ॥")

जिह्मं, क्ली, (जहातीति । हा + "जहातेः सन्वदालोपश्च ।" उणां । १ । १४० । इति मन् ।) तगरवृक्षः । इति मेदिनी । मे, १५ ॥

जिह्मः, त्रि, (जहाति परित्यजति सारत्वमिति । हा + "जहातेः सन्वदालोपश्च ।" उणां । १ । १४० । इति मन् ।) कुटिलः । (यथा, महाभारते । १ । १०२ । १८ ।
"क्रोधामर्षैर्जिह्मभ्रूकषायीकृतलोचनाः ॥")
मन्दः । इति मेदिनी । मे, १३ ॥

जिह्मगः, पुं, (जिह्मं कुटिलं वक्रमित्यर्थः यथा स्यात् तथा गच्छतीति । गम + डः ।) सर्पः । (यथा, महाभारते । १ । ६ । १६ ।
"स लब्ध्वा दुर्लभां भार्य्यां पद्मकिञ्जल्कवर्चसम् ।
व्रतं चक्रे विनाशाय जिह्मगानां धृतव्रतः ॥"
जिह्मं मन्दं गच्छतीति ।) मन्दगे, त्रि । इति मेदिनी । गे, २५ ॥

जिह्ममोहनः, पुं. (जिह्मं कुटिलं यथा तथा सृजतीति । सृह + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति ल्युः । यद्वा, जिह्मस्य कुटिलस्य सर्पस्य मोहनश्चित्तमोहनः । भक्षत्वात् ।) भेकः । इति शब्दरत्नावली ॥

जिह्मशल्यः, पुं, (जिह्मं कुटिलं शल्यं यस्मात् ।) खदिरः । इति जटाधरः ॥

जिह्मं, क्ली, (जिह्मं निपातनात् मस्य वत्वे साधुः ।) तगरमूलम् । इति रत्नमाला ॥

जिह्वः, पुंस्त्री, (हूयते आह्वयतेऽनेनेति । हृ + बाहुलकात् डप्रत्ययेन द्वित्वादौचेति साधुः ।) जिह्वा । इत्यमरटीकायां भरतः ॥ (यथा, हरिवंशे । ११२ । ६५ ।
"द्विसहस्रेण जिह्वेन वासुकिः कथयिष्यति ॥")

जिह्वलः, त्रि, (जिह्वेन जिह्वया लाति आदत्ते परद्रव्यमिति । जिह्व + ला + कः ।) लुब्धः । लोलुपः । यथा, भागवते ।
"आद्धं कृत्वा परश्राद्धे भुञ्जते ये च जिह्वलाः ।
पतन्ति नरके घोरे लुप्तपिण्डोदकक्रियाः ॥"

जिह्वा, स्त्री, (जयति रसमनयेति । जि + "ग्रैवातॄकृजिह्वाग्रीवाप्रभीवाः ।" उणां । १ । १५४ । इति वनु प्रत्ययेन हुगागमे निपातनात् साधुः ।) रसज्ञानेन्द्रियम् । जिव् इति भाषा । तत्पर्य्यायः । रसज्ञा २ रसना ३ । इत्यमरः । २ । ६ । ८१ ॥ रशना ४ रसनम् ५ जिह्मः ६ । इति तट्टीका ॥ रसालः ७ सुधासवा ८ रसिका ९ रसाङ्का १० । इति शब्दरत्नावली ॥ रसा ११ लोला १२ रसाला १३ रसला १४ ललना १५ । इति जटाधरः ॥ (यथा, मुकुन्दमालायाम् । २६ ।
"जिह्वे ! कीर्त्तय केशवं मुररिपुं चेतो ! भज श्रीधरं
पाणिद्वन्द्व ! समर्चयाच्युतकथां श्रोत्रद्वय ! त्वं शृणु ।
कृष्णं लोकय लोचनद्वय ! हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण ! मुकुन्दपादतुलसीं मूर्द्धन्नमाधोक्षजम् ॥")

अस्याः परीक्षा यथा, भावप्रकाशे ।
"शाकपत्रप्रभा रूक्षा स्फुटिता रसनानिलात् ।
रक्ता श्यामा भवेत् पित्तात् श्लेष्मार्द्रा धवला कफात् ॥
परिदग्धा खरस्पर्शा क्षया दोषत्रयेऽधिके ।
सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा ॥"
(यथास्या उत्पत्तिविधयः ।

"उद्रे पथ्यमानानामाध्मानादुक्तसारवत् ।
कफशोणितमांसानां सारो जिह्वा प्रजायते ॥"
इति सुश्रुते शारीरस्थाने ४र्थे अध्याये ॥)

जिह्वानिर्लेखनं, क्ली, (जिह्वाया निर्लेखनं संस्कारः ।) जिह्वामार्जनम् । जिवऽँाचड़ान इति भाषा । जिह्वामार्जनद्रव्यम् । जिवऽँाचड़ा चेयाड़ि इति भाषा । तत् दग्धाङ्गुलं कोमलं क्षुद्रं स्वर्णरूप्यताम्रलोहनिर्मितं जिह्वामलापकर्षणे प्रशस्तम् । तस्य गुणः । वक्त्रवैरस्यजिह्वाश्रित-मलनाशित्वम् । आरोग्यरुचिकारित्वञ्च । इति राजवल्लभः ॥
("जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्क्षमेव च ।
तन्मलापहरं श्रेष्ठं मृदुसूक्ष्मं दग्धाङ्गुलम् ।
मुखवैरस्यदौर्गन्ध्य-श्लेष्मजाद्यहरं सुखम् ॥"
अस्याधिक्येन रोगजनकता यथा.—
"जिह्वानिर्लेखनात्क्लेष्मश्चयादभिघातनः ।
कुपितो हनुमूलस्थः संक्षयित्वानिलो हनू ॥
करोति विवृतास्यत्वमथवा संवृतास्यताम् ।
हनुसंग्रहः स तेन स्यात् तस्माच्चार्च्यणभाषणम् ॥"
इति वाभटे निदानस्थाने षष्ठेऽध्याये ॥)

जिह्वापः, पुं, (जिह्वया पिबतीति । पा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) कुक्कुरः । व्याघ्रः । विड़ालः । भल्लूकः । इति शब्दरत्नावली ॥ चित्रकव्याघ्रः । इति विश्वः ॥

जिह्वामलं, क्ली, (जिह्वाया मलम् ।) जिह्वा-स्थितमलम् । तत्पर्य्यायः । कुलुकम् २ । इति त्रिकाण्डशेषः ॥

जिह्वामूलीयः, पुं, (जिह्वामूले भवः । "जिह्वा-मूलाङ्गुलेश्छः ।" ४ । ३ । ६२ । इति छः ।) वर्णाकृतिवर्णः । वोपदेवेनास्य ॠ इति संज्ञा कृता । स तु कण्ठपरे विसर्गस्थाने भवति । यथा हरि × काम्यः । अस्योच्चारणं विसर्गवत् । इति व्याकरणम् ॥
"अधोविरेकयुक्ताभ्यामात्रावद्वयरूपकः ।
जिह्वामूलीय इत्येव गजकुम्भोपमोऽपरः ॥"
इति मुग्धबोधव्याकरणटीका ॥

जिह्वारदः, पुं, (जिह्वा एव रदो दन्त इव यस्य ।) पक्षी । इति हारावली । ५६ ॥

जिह्वारोगः, पुं, (जिह्वाया रोगः ।) मुखरोगान्तर्गतरसनाजातव्याधिः । तत्र जिह्वारोगाणां निदाननामसंज्ञाः प्राह ।
"वातजः पित्तजश्चापि कफजोऽसृक्संज्ञकः ।
उपजिह्विका च गदा जिह्वायां पञ्च कीर्तिताः ॥"
तत्र वातजस्य लक्षणमाह ।
जिह्वानिलेनस्फुटिता प्रसुप्ता
भवेच्च शाकच्छदनप्रकाशा ।
स्फुटितामनाविद्धीर्वा । प्रसुप्ता रसानभिज्ञा-तया सुप्तेव । शाकच्छदनप्रकाशा शाकी मरु-भूमिजो द्रुमः तद्वत् कण्टकचिता ॥ * ॥
पित्तजमाह ।
पित्तात् सदाहैरुपचीयते च
दीर्घैः सरक्तैरपिकण्टकैश्च ।
अयं रोगो लोके जलौका इति ख्यातः । जाड़ौका इति वङ्गभाषा ॥ * ॥ कफजमाह ।
कफेन गुर्व्वी बहलाचिता च
मांसोच्छ्रयैः श्लाक्ष्णलिकण्टकाभैः ।
बहला स्थूला । मांसोच्छ्रयैः मांसजकण्टकैः ॥*॥ असासमाह ।
जिह्वातले यः श्वयथुः प्रगाढः
वोलाससंज्ञः कफरक्तमूर्त्तिः ।
जिह्वां सरुक् स्तम्भयति प्रवृद्धो
मूले च जिह्वा भृशमेति पाकम् ॥
प्रगाढः प्रकर्षेण गाढो दारुणः । कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य स कफरक्तज इत्यर्थः । जिह्वास्तम्भेन वायुरत्रापि बोद्धव्यः । भृशं पाकेन पित्तञ्च । अतस्त्रिदोषजोऽयम् । असाध्यत्व-मस्य ॥ * ॥ उपजिह्विकामाह ।
जिह्वाग्ररूपः श्वयथुश्च जिह्वा-
मुन्नाम्य जातः कफरक्तयोनिः ।
प्रसेककण्डूपरिदाहयुक्तः
प्रकथ्यतेऽसावुपजिह्विकेति ॥
जिह्वाग्ररूपः जिह्वायाग्रतिः ॥*॥
अथ जिह्वारोगाणां चिकित्सा ।
"जिह्वागतविकाराणां श्रेष्ठं शोणितमोक्षणम् ।
गुडुचीपिप्पलीनिम्बकवलः कटुभिः सुखः ॥
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक्चिकित्सितम् ।
कण्ठकेष्वनिलोत्थेषु तत् कार्य्यं भिषजा खलु ॥
पित्तजे परिशुष्के तु निःसृते दूषशोणिते ।
प्रतिसारणगण्डूषनस्यञ्च मधुरं हितम् ॥
कण्टकेषु कफोत्थेषु लिखितेष्वक्षत क्षये ।
पिप्पल्यादिर्मधुयुतः कार्य्यस्तु प्रतिसारणे ॥
उपजिह्वास्तु संलिख्य क्षारेण प्रतिसारयेत् ।
शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत् ॥
शोषक्षाराभयावह्निचूर्णमेतत् प्रघर्षणम् ।
उपजिह्वाप्रशान्त्यर्थमेभिश्चैलच पाचयेत् ॥"
इति भावप्रकाशः ॥

जिह्वालिट् [ह्] पुं. (जिह्वया लेढीति । लिह + क्विप् ।) कुक्कुरः । इति भूरिप्रयोग. ॥

जिह्वाश्लक्ष्णः, पुं, (जिह्वाया श्लक्ष्णमिव । अभिधानात् पुंस्त्वम् ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥

जिह्वास्वादः, पुं, (जिह्वया स्वाद आस्वादनम् ।) लेहनम् । इति हेमचन्द्रः । ३ । ८८ ॥

जीनः, त्रि, (जिनाति जीर्य्यतीति । ज्या वयो हानौ + "गत्यर्थेति ।" क्तः । यद्दिच्येति सम्प्र-सारणम् । हल इति दीर्घः । आदिर्ञिति नत्वम् ।) वृद्धः । इत्यमरः । २ । ६ । ४२ ॥ (चर्म्मपुटे । यथा, मनुः । ११ । १३८ ।
"जीनकाम्बुकवस्त्राणि पृथग् दद्यात् विशुद्धये ॥")

जीमूतः, पुं, (जयति आकाशमिति । जि + "जेर्मूट्चोदात्तः ।" उणां ३ । ६१ । इति क्तः । मुडागमो धातोर्दीर्घश्च ।) पर्व्वतः । (यथा-मत्स्यपुराणे । १२० । ७५ ।
"जीमूतो द्रावणश्चैव मैनाकश्चन्द्रपर्व्वतः ।
आयताश्चे महाशैलाः समुद्रं दक्षिणं प्रति ॥"*॥
जीवनं जलं सूचयति सावयतीति । पृषोदरा-दित्वात् साधुः । इति पुरुषोत्तमदेवः ।) मेघः । (यथा, महाभारते । ६ । १६ । ३१ ।
"राजानमब्रुवन् पश्चात् जीमूता इव वार्षिकाः ॥")
सुस्ता । देवताड़वृक्षः । इत्यमरः । ३ । ३ । ५८ ॥ इन्द्रः । भूतिकरः । घोषकलता । इति हेम-चन्द्रः ॥ (यथा, चरके सूत्रस्थाने प्रथमेऽध्याये ।
"धामार्गवमथेच्छाकु जीमूतं क्षतवेधनम् ॥"
सूर्य्यः । यथा, महाभारते । ३ । ३ । सूर्य्य-स्याष्टोत्तरशतनामकीर्त्तने । २२ ।
"वरुणः सागरोऽंशुश्च जीमूतो जीवनोऽरिहा ॥"
ऋषिविशेषः । यथा, महाभारते ५ । १११ । २४ ।
"जीमूतस्याथ विप्रर्षेरुपस्थे महात्मनः ॥"
मल्लविशेषः । भीमसेनस्तु विराटगृहवासकाले नियुद्धेनैनं क्षिपतवान् । यथा, महाभारते । ४ । १२ । २२ ।
"ततस्तु वृत्तसङ्काशं भीमो मल्लं समाह्वयत् ।
जीमूतं नाम तं तत्र मल्लं विख्यातविक्रमम् ॥"
स्वनामख्यातो दशार्हस्य पौत्रः । यथा, हरि वंशे । ३८ । २५ ।
"दशार्हस्य सुतो योमा योम्नो जीमूत
उच्यते ॥"
वसुमतृपुत्रः । स तु शाल्मलद्वीपस्य ईश्वर-विशेषः । यथा, ब्रह्माण्डे ३६ अध्याये ।
"शाल्मलस्येश्वराः सप्त सुतास्ते तु वपुष्मतः ।
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ॥"
अस्य वर्षस्तु एतन्नाम्नैव विख्यातः । यथा, तत्रैव,—
"जीमूतस्य च जीमूतो रोहितस्य च रोहितः ॥"
जगत्यतिधृतिप्रकृतिविशेषः । तल्लक्षणा-दिकं छन्दःशब्दे द्रष्टव्यम् ॥)

जीमूतकूटः, पुं, (जीमूतो मेघः कूटे शिखरे यस्य । आद्युदात्तत्वादेवास्य तथात्वम् ।) पर्व्वतः । इति हारावली । ५१ ॥

जीमूतमूलं, क्ली, (जीमूतस्य सुस्ताया मूलमिव मूलमस्य ।) शृटी । इति रत्नमाला ॥

जीमूतवाहनः, पुं, (जीमूतो मेघो वाहनं यस्य ।) इन्द्रः । मेघवाहन इत्यमरदर्शनात् । धर्म्मरत्न-नामकस्मृतिसंग्रहकर्त्ता ॥ (यदुक्तं दायभागे ।
"बहुविधपूर्व्वनिबन्धव्याख्यासङ्गतसंग्रयस्येतत् ।
जीमूतवाहनकृतं प्रकरणमपनुत्तये ध्येयम् ॥
परिभद्रकुलोद्भूतः श्रीमान् जीमूतवाहनः ।
दायभागं चकारेमं विदुषां संग्रयच्छिदे ॥"
शालिवाहनृपस्य पुत्रः । आश्विनकृष्णा-ष्टम्यां पुत्रसौभाग्यकामाभिर्नारीभिरयं पूज्यः । एतद्विवरणं जितन्तमीशब्दे द्रष्टव्यम् ॥ जीमूत-केतोर्नृपस्य पुत्रः । यथा, कथासरित्सागरे । २२ । २४ ।
"अथ तस्याचिराद्देव राज्ञः सूनुरजायत ।
जीमूतवाहनं तं च नाम्ना स विदधे पिता ॥")

जीमूतवाही, [न्] पुं. (जीमूतं वहति जीमूता-कारेणात्मानं परिणामयतीत्यर्थः । वह +

भिनिः। मेघयोनित्वादेवास्य तथात्वम्।) धूमः। इति हेमचन्द्रः॥

जौरः, पुं, (जवतीति। जु गतौ+"जोरी च।" उणा २। २३। इति रक् ईत्वान्तादेशः।) जीरकः। खड्गः। इति मेदिनी। रे, ३६॥ अदुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (विद्यायति, त्रि। यथा, ऋग्वेदे। १।४४।२१। "मनुष्वदेव धीमहि प्रचेतसं जौरं दूतमग्निम्।" "जौरं विद्यावन्तम्।" इति दयानन्दभाष्यम्॥)

जौरकः, पुं, (जौर+संज्ञायां कन्।) वणिग्द्रव्यविशेषः। जीरा इति भाषा। तत्पर्य्यायः। जरणः २ अजाजी ३ कणा ४। इत्यमरः। २। ६। ३६॥ जीर्णः ५ जीरः ६ दीप्यः ७ जीरगः ८ अजाजिका ९ वह्निशिखः १० मागधः ११ दीपकः १२। इति जटाधरः॥ अस्य गुणाः। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। वातगुल्माध्मानातीसारग्रहणीक्रिमिनाशित्वञ्च। इति राजनिर्घण्टः॥ रुचिस्वरकारित्वम्। गन्धयुक्तत्वम्। कफवातनाशित्वम्। पाके कटुत्वम्। तीक्ष्णत्वम्। लघुत्वम्। पित्तवर्द्धनत्वञ्च। इति राजवल्लभः॥ अपि च। शुक्लजीरा ह्यजीरा कलाञ्जी एषा नामानि गुणाश्च।

"जीरको जरणोऽजाजी कणा स्याद्दीर्घजीरकः।
ह्रस्वजीरः सुगन्धश्च तथैवोद्गारशोधनः॥
कलाजाजी तु सुषवी कालिका चोपकालिका।
पृथ्वीका कारवी पृथ्वी पृथुस्थूलोपकुञ्चिका॥
उपकुञ्ची च कुञ्ची च दृढजीरक इत्यपि।
जीरकत्रितयं रूक्षं कटुकं दीपनं लघु॥
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्।
ज्वरघ्नं पाचनं बल्यं दृष्यं रुच्यं कफापहम्॥
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्॥"
इति भावप्रकाशः॥

जौरगः, पुं, (जौरकः पृषोदरादित्वात् कस्य गः।) जीरकः। इति राजनिर्घण्टः॥

जौरिका, स्त्री, (जीर्य्यतीति। जॄ+बाहुलकात् रिक्। ईत्वान्तादेशः। ततः स्वार्थे कन्।) वंशपत्रीशाकम्। इति राजनिर्घण्टः॥

जौर्ण, क्ली, (जीर्य्यति स्मेति। जॄ वयोहानौ+गत्यर्थेति क्तः। निष्ठातस्य नत्वम्।) श्लेष्मजम्। इति राजनिर्घण्टः॥ (वयःप्रकारविशेषः। यथा, "तद्वयो यथा स्थूलभेदेन त्रिविधम्। बालं मध्यं जौर्णमिति।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)

जौर्णः, पुं, (जीर्य्यत्यनेनेति। जॄ+करणे क्तः।) जीरकः। इति राजनिर्घण्टः॥ (वृक्षः। इति हेमचन्द्रः। ४। १८०॥)

जौर्णः, त्रि, (जीर्य्यतीति। जॄ+"गत्यर्थाकर्म्मकश्लिषीति।" ३। ४। ७२। इति कर्त्तरि क्तः।) वृद्धः। इत्यमरः। २। ६। ४२॥ पुरातनः। इति हेमचन्द्रः॥ (यथा, देवीभागवते। १। २०। १७।

"तत्याज देहं धर्म्मात्मा देही जीर्णमिवाम्बरम्॥")

गतवहुवयः। जराविग्रिष्टः। पक्वः। पाकविग्रिष्टः॥ * ॥ (यथा, चाणक्ये। ७६।

"जीर्णमन्नं प्रशंसीयात् भार्य्यां च गतयौवनाम्।
रणात् प्रत्यागतं शूरं ग्रस्तञ्च गृहमागतम्॥")

अथ जीर्णद्रव्याणि।

"नारीकेलफलेषु तण्डुलमथ क्षीरं रसालेषु हितं
जम्बीरोत्थरसो घृते ससुचितः सर्पिस्तु मोचाफले।
गोधूमेषु च कर्कटी हिततमा मांसात्यये कांक्षिकं
नारङ्गे गुडभक्षणञ्च कथितं पिष्टान्नके कोद्रवः॥
पिष्टान्ने सलिलं प्रियालफलजे पथ्या हिता माषजे
खर्जूरं क्षीरभवे तु तक्रसुचितं कोष्ठाम्बु कोलम्बजे।
मत्स्ये चूतफलं त्वजीर्णगमनं मद्यम्बुपानात्यये
तैलं पौष्करजे कटुप्रशमनं ग्रैवांम्बु वृद्धा जयेत्॥

पनसे कदलं कदले च घृतं
घृतपाकविधावपि जम्बुरसः।
तदुपद्रवशान्तिकरं लवणं
लवणेषु च तण्डुलवारि वरम्॥
नारिकेलफलतालबीजयोः
पाचनं य इह तण्डुलं विदुः।
ते वदन्ति सुनयोऽथ तण्डुलात्
क्षीरवारि परिपाचयत्यपि॥
दाड़िमामलकतालतिन्दुकी-
बीजपूरकबलीफलान्यपि।
वाकुलेन फलेन च पाचयेत्
पाकमेति बकुलं स्वमूलतः॥
मधूक-मालूर-वृषादनानां
परूषखर्ज्जूरकपित्थकानाम्।
पाकाय पेयं पिचुमर्दबीजं
घृतेऽपि तक्रं प्रवदन्ति पथ्यम्॥
गोधूममाषहरिमन्थसतीनसुद्ग-
पाको भवेदिति च मातुलपत्रकेण।
खर्ज्जूरिकाविशुकशूरुसितासु मुक्तं
मृद्भाटके मधुफलेष्वपि भद्रमुक्तम्॥
पिष्टितपनसयोः स्यादाम्रबीजेन पाकः
क्षुरमहिषयोर्घृतक्षीरयोः सैन्धवेन।
चिपिटपरिणतिः स्यात् पिप्पलीदीप्यकाभ्या-
मपहरति तुषाम्भो वेदलानामजीर्णम्॥

कर्पूरपूगीफलनागवल्ली-
काश्मीरजातीफलजातिकोशम्।
कस्तूरिका सिक्थकनारिकेल-
जलं पचत्याशु ससुद्रफेनः॥
श्यामाकनीवारकुलत्थयष्टि-
निष्पावकङ्गूदधिमस्तकेषु।
चिञ्चाकुलत्थौ तिलतैलयोगात्
जटाब्दनादस्य निहन्त्यधाध्मम्॥
कपोतशङ्खाटशृगालगृद्ध्री-
खर्ज्जूरखड्गा अपि नागरेण।
पलाण्डुभक्षान्तु तथार्द्रको वा
रसो निहन्याद्रसमिक्षुजातम्॥

अन्नेन केनाप्यथ योगवेन
कोष्णाम्बुना वा घृतमेति पाकम्।
तिलादितैलान्यपि काङ्क्षिकेन
सर्ज्जस्य मज्जा पनसामलक्योः॥
किमत्र चित्रं बहुमांसमत्स्य-
भोजी सुखी स्यात् परिपीय शुक्तम्।
इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्यं परिपाकमेति॥
कपोतपारावतनीलकण्ठ-
कपिञ्जलानां पिशितानि जग्ध्वा।
काश्मस्य मूलं परिपेयसर्ष्पां
सुखीभवेन्ना बहुधो न भूतम्॥
यौवे रसाला सुरभीयवस्तु-
मद्येन कोष्णेन विपाकमेति।
गृध्रस्य चूर्णेन हयारिनारी-
पयोदधिक्षीरसुपैति पाकम्॥
वटो वेसवाराक्षवङ्गेन केशी-
ग्रहं पर्पटः शिग्रुबीजेन याति।
कणामूलतो लड्डुका पूपकादे-
र्विपाको भवेच्छ्रुल्लीमण्डयोश्च॥
श्वाविद्गोधा गण्डकाखिञ्चतैलाद्-
यावत् चारात् कोलकूर्म्मादयोऽपि।
जीर्य्यन्त्येवं पायसो सुद्गयूषात्
सासुद्रादप्यारनालं सुखाय॥
तप्तं तप्तं हेम वा तारमम्भौ
तोये क्षिप्तं सप्तकृत्यस्तदम्भः।
पीत्वावश्यं दीर्घकालोपपन्न-
मम्भो जीर्णं शीघ्रमेवं जहाति॥
पालङ्किकाकेसुककारवल्ली-
वार्त्ताकुवंशाङ्कुरमूलकानाम्।
उपोदकालाबुपटोलकानां
सिद्धार्थको मेवदरस्य पक्ता॥
शुक्लीसतीनस्य च नागरङ्ग-
जम्बीरयोः कोद्रवको निहन्ता।
जरामिरं गैरिकचन्दनाभ्या-
मभ्येति शीघ्रं बहुधो न भूतम्॥
पटोलवंशाङ्कुरकारवल्ली-
फलान्यलाबूनि बहूनि जग्ध्वा।
क्षारोदकं ब्रह्मतरोर्निपीय
भोक्तुं पुनर्व्याकृति तावदेव॥
विपच्यते शूरकको गुड़ेन
तथालुकं तण्डुलतोयपानात्।
जम्बीरजीरेण निशारजोनं
सक्षौद्रं तूर्णं परिपाकमेति॥
चञ्चूकसिद्धार्थकवास्तुकानां
गायत्रिसारक्षयितेन पाकः।
शाकानि सर्व्वाण्यपथ्यानि पाकं
क्षारेण सद्यस्सलनालजेन॥
आम्रातकोदुम्बरपिप्पलीनां
फलानि च ह्यश्वत्थादिकानाम्।
स्नुः ग्रामनं पर्य्युषितोदकेन
प्रियालमज्जा च कटुष्णकेन॥

केदारौर्वे गौरिर्यो मृडपुरे
आर्यो दुर्गो हरि वैदेशवारम्।
मार्गो मृदङ्गिमप्रेरे मात्र-
विष्ण नक्षत्रकर्तां पूर्वदोषात्।
गर्भेर औरं द्विहिरेर पौरु-
मर्भेर च द्वारकी गुरुत।
सैंदुर सौख्यं उमरालिदेवे
विदा हिता कार्तिर कहिराज:।
सावल्लमल्लिहरपूर्वदेर
संदहते दक्ष मुखं मरुत्।
वैदेर का वैश्वरकार्हदेर
हुकाव दक्षप्रजनौ विदक्षात्।
द्वौर्वेदर्वं मधुकरीहहारि
वारीवदक्षाद्वरवर्षिवार्हि।
दक्षौरवं मुखदे प्रहर्षं
वात्रीद्रवैरो।तिविदेवेषु।
वदक्ष मौर्वं यमदेवदूर्वं
प्रवालदृष्टि: सुरदारुसारे।
गौरीवधामेश्वरमाधिरम्
पाटाटकमुखं सुरनार्तिदेवे।
अवद्वपूरवदे दिवसेन्त:
अवद्वपूरवदेव मुखं दिट्ट:।
अवर्दद्दु दट्टेश्वर वारदेव
दक्षप्रजाटेकवटवर्षं पुर: ।"

इति जौर्वेज्जहरौ ।

जौर्वेज्वर:, पुं, (जौर्व: दुरालयौ ज्वर:।) दुरालयज्वरोक्त:। अस्य जौर्वेज्वरस्य चिकित्सामाह।

"यौ द्वादशाहौ दिवसि उद्धे
दौषक्रमर्ज्जिदुर्वेश्च उद्धेम्।
दूर्वा सरौ सिद्धति सप्तदेवी
सिद्धमिश्रसौ ज्वर दश जौर्व:।"

जौर्वेज्वरस्यैव विशेषं बालचिकित्सामाह।

"पिबं मन्दज्वरौ बाल: मूर: कुर्क्केल सिद्धति।
कामाङ्ग: वैद्यमूर्त्तिरौ दर्रो बालज्वरान्तकौ।"

बालज्वरान्तकौ ज्वरोन्मादेषु इति बालज्वरान्तकौ। ज्वर ईहमुर्वेषु। मूर: क्रीयौ। वैद्यमूर्त्तिरौ बहुकर्त्तेषु:।

अथ जौर्वेज्वरस्य मासान्तरचिकित्सा।

"जौर्वेज्वरौ ज्वर: कुर्याद्दोषमासं कदाचन।
अहत्वा न भवेत् जौर्वो ज्वरस्तु स्याद्भयो यत:।
दुरालभेति ज्वरे दोषा वहन्त्येव: दुरत्यया।
अहत्वैनन्तु तं यस्मात् पूर्ववत्कारयेत् क्रियाम्।"

तथा पूर्ववत्। ०।

"विदिग्विकासाम्रकाम्रतालां
कार्यं पिबेदुम्बिकलिङ्गलोकम्।
जौर्वेज्वरारोचकशूल-
प्लीहाग्निमान्द्यादिगतौरवेषु।
कन्दूदुकारं प्राय: सार्वं तैलावदुच्यते।"

इति भिषग्रत्नाकरे। ०।

"ज्वरोत्कृमंदुलाशयस्थिदोषोद्भवोद्भव:।
जौर्वेज्वरकरश्चंदो पञ्चमश्चकलोऽथवा।

कथ्यते। कथ्यतां दीर्घलोकलोरिम्।
मदुगतदुर्गं दीर्घं जौर्वेज्वरहरं परम्।
त्रिमलौषदुर्गसिद्धं दुर्दुरौषरवं पिबेत्।
जौर्वेज्वरवदोषकासारोचकहरम्।
जौर्वेज्वरोपिसाद्धे च इक्षुटे दुर्दुरिमलौ।
कासश्वासारुचिच्छर्दिहिक्काक्षुत्करोदरुद्।
द्विपुर: त्रिमलौषदुर्दुरौच्च त्रिवर्षं मत:।
त्रिमलौ मधुसंदुक्ता पेटाकर्षविवर्द्धनौ।
श्वासकासज्वरहरौ वाक्यदोषोदरापहा।
कासं त्रिदर्कं यथा त्रिमलौ मैलवं तथा।
दूर्षिरोगं सर्वा वैद्य: वर्द्धमानपुर: पर:।
मैत्रौ रविकर: वैद्यहर्षा दीर्घवत्तवर:।"

इति कालज्ञानादिपुराणे। ०।

"द्राक्षालता हरीतकी मुस्तकं रक्तचन्दनम्।
खादिरं कटुका पाटा भूनिम्ब: सप्तपर्णक:।
उशीरं धान्यकं पद्मं वालकं कट्फलारिका।
पुष्करं पिप्पलीमूलं दशाहाद्भिसिरं क्वथेत्।
जौर्वेज्वरातिसारघ्नमग्निमान्द्यहरं परम्।"

इति द्राक्षादशाङ्गघृतम्। ०।

"पिप्पली मधुयष्टी वा मधुयष्टीयवा बला:।
मधुशीरक संयुक्ता पिबेद्वा दिवसादि षि।
तण्डुल: सप्तरात्रेण: सर्वं पिप्पलिवासरात्।
पिबेत्तां जरयन्ति: क्षतपाण्डुरोगज्वरान्।
वात: पित्तोपिसाद्धश्च कफाधिक्यं यदा भवेत्।
तदादिदुर्द्दिवसाकर्षद्वि: दुग्धदृष्टिर्द्दिवसिदृष्टि:।

इति वङ्गसारसिद्धौ। ०।

"दार्वीक्वाथरसौक्षा स्यात् क्रिया बालज्वरान्तके।
जौर्वे ज्वरे कफे जौर्वे सन्निपातज्वरेऽपि ते।
पय: पौष्यमद्यं तद्वत् तु विरोधम्।
पञ्चसारं क्रियं तैलं जौर्वोपिकारकोत्तिमम्।
तथा दारुवलेलं जौर्वज्वरहरं परम्।"

इति जौर्वज्वरोपिकार:। इति भावप्रकाश:।

जौर्वेज्वर:, पुं, (जौर्वज्वर एव स्वार्थे अण्।) वृद्धदारकवृक्ष:। विदारीविशेष इति जटाधर:। जौर्वेज्वरो न सुरुचिकर:। कटुपर्णाद:। जौर्वेज्वरो न सुरुचिकर:। आवरा: न मूत्रा:। मौक्तिकम्। त्रिष्कवम्। ज्वरातिसारामदोषनाशित्वम्। वल्लभत्वं च। इति राजनिर्घण्टु:।

जौर्वेज्वरिका, स्त्री, (जौर्वेज्वर एवार्थे स्वार्थे कन्। टाप् अत इत्वम्।) वृद्धदारकवृक्ष:। इति राजनिर्घण्टु:।

जौर्वेज्वर:, पुं, (जौर्वेज्वर एवार्थे अण्।) वृक्ष:। इति राजनिर्घण्टु:। (जौर्वे पर्वे जातम्।) दुरालभायज्वर, क्ली। (जौर्वे पर्वे जातमिति विग्रहे दुरालभाजातमृषे च। यद्वृक्षं वैद्यके।

"पर्वमूले भवेद्यत्तिक्त: पर्वांशे दाहजन्वर:।
जौर्वेपर्वे हरेद्दाह: शिरादुद्विग्नवाहिनी।")

जौर्वेदुग्ध:, पुं, (जौर्वीव दुग्धो यस्मात्।) अर्कवृक्ष:। इति राजनिर्घण्टु:।

जौर्वेदुग्धक, क्ली, (जौर्वी दुग्धो यत्र यस्मात्। तत: कन्।) परिखेयम्। इति राजनिर्घण्टु:। कैवोटमुता इति भाषा।

जौर्वेज्वर, क्ली, (जौर्वे ज्वरं हरतीति।) देवदालवृक्ष:। इति राजनिर्घण्टु:।

जौर्वेज्वरक, क्ली, (जौर्वे दुरालभं ज्वरम्।) दुरालभज्वरम्। तत्पर्याय:। वटपत्रम् २। ज्वर: । २ । ६ । ११६ ।

जौर्वी, स्त्री, (जौर्वेदयतीति। ज्व+करणे क्विप्।) ज्वरकारक:। इति राजनिर्घण्टु:।

जौर्वी, स्त्री, (जृ+क्विप्।) ऋक्षि:। जौर्वेया। इत्यमर: । ३ । २ । ६ ।

जौर्वोद्धार:, पुं, (जौर्वाया मयमन्दिरादीनां उद्धार: संस्कार:।) मयमन्दिरादे: संस्कार:। यथा, विष्णुधर्म्मोत्तरे जौर्वोद्धारे।

"यस्य राष्ट्रस्य विषये देवेशः विद्यौर्वते।
तस्य सौदति तद्राष्ट्रं देवदेशः यथा तथा।
पूजा जौर्वेण संस्कारं तथा देवेशवेश्मनि।
द्विगुणं यजमानोति नात्र कार्या विचारणा।"

विष्णुरहस्ये।

"यस्तस्य च यः कर्त्ता यजमानश्च रक्षिता।
विधोरायतनस्यैव स याति विष्णुलोकताम्।"

कौर्म्मपुराणे।

"यतिनं यजमानस्तु यथार्हमुत्तिनं वरः।
समुद्धृत्य हरेर्धाम द्विगुणं यजमानुयात्।"

देवीपुराणे।

"मूलाच्छतगुणं पुण्यं प्राप्नुयाज्जौर्वोद्धारकः।
तस्मात् सर्व्वप्रयत्नेन जौर्वोद्धारमाचरेत्।"

हयशीर्षपञ्चरात्रे।

"दार्वीकुम्भसहस्राणां सुरद्वाणां तथैव च।
प्रतिमानां सहस्राच्च संस्कर्त्ता यो नरो भुवि।
पुण्यं शतगुणं तस्य सर्व्वभूतात् संक्षयः।
प्रतिष्ठाता दिवि: कामैस्तदा सन्दिरिमिते।
प्राप: शैलदरौर्वीरुपसारेण वैखरे:।
देवायतनप्रतिष्ठा च स्थाता सृष्टिक्षयेण किम्।
कौर्म्मेशाद्यैर्देवैर्देव संपूजां या दिवौकसः।
देवस्यैं देवताया: प्रतिष्ठाविधिना सदा।
संस्कार्यं यद्यतात्मा यजमानोऽक्षयेत्रगा।"

इति कौर्म्मरिमहिविलासे २० विलासः।

जौर्वि, पुं, (जौर्वेति छिद्रौमवद्भवतीति। जृ+"वृञ्जृसृजादृधः क्विन्।" उणा० ४। ५४। इति करणे क्विन्।) कुठारः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। (जौर्वतीति। कर्त्तरि क्विन्।) वृक्षटम्। काष्ठः। पशुः। इति संक्षिप्तसारे उणादिवृत्तिः।

जौव, ऋ प्राप्तौ। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-सेट्।) ऋ, अजौजिवत् अजिजीवत्। प्राप्तः प्राप्तवारवम्। जीवति लोकः। इति दुर्गादासः।

जौव:, पुं, (जौवनमिति। जौव+"हलश्च।" ३। ३। १२१। इति घञ्।) अनुधारवम्। इत्यमरः। २। ८। ११८। (यथा, हरिवंशे। १०८। ८३।

"अवेव चिन्तय क्षिप्र! जौवं प्रतिभाति मे।
सकार्यं मुक्तये जौवो यथा जौवं समाश्रयम्।")

(जीवतीति। जीव प्राणे+"ण्वुलृतृचौ।" ३।१।१३५। इति कः।) प्राणी। (यथा, भागवते। २।१।३३।
"अङ्गानि सहस्रानामपदानि चतुष्पदाम्।
पक्षमूनि तत्र महतां जीवो जीवस्य जीवनम्।")
इति:। इत्यविश्वेषः। (स एव महाविसर्पः। तत्पर्य्यायो यथा,—
"महाविसः क्षुतोन्मेषो रम्भको विश्वसूचिकः।
केशाम्बुचिनिमक्षश्च कार्ष्णको जीव इत्यपि।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
इहस्पतिः। इति मेदिनी। दे, ८। (यथा, काशीखण्डे। १७। ३३।
"अक्षालिङ्गार्थनाम्नि जीवभूतोऽसि मे वतः।
अतो जीव इति ख्यातिं त्रिषु लोकेषु यास्यसि।")
कर्म्म:। इति धरणी। शेषश्च:। तत्पर्य्यायः। आत्मा २ पुरुषः ३ पुद्गलः ४ अन्तर्यामी ५ ईश्वरः ६। इति विकाण्डशेषः। (यथा, भगवद्गीतायाम्। १३।२ टीकायां श्रीधरस्वामिधृतः।
"तच्च क्षेत्रज्ञं संसारिजं जीवं वस्तुतः सर्व्वक्षेत्रेष्वनुगतं मामेव विद्धि॥") तस्य स्वरूपं यथा,—
"कर्म्मणा जीवरूपश्च सन्ततं तत्फलप्रदः।
कर्म्मरूपश्च भगवान् श्रीकृष्णः प्रकृतेः परः।
सोऽपि तद्धेतुरूपश्च कर्म्म तेन भवेत् सति।
जीवः कर्म्मफलं भुङ्क्ते आत्मा विलिप्त एव च।
आत्मनः प्रतिबिम्बश्च देही जीवः स एव च।
प्राणदेहादिभृद्देही स जीवः परिकीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्। ४।
(तथाच भागवते। १२। १८३। १७।
"जीवं पश्यामि वृत्त्याभासचैतन्यं न विद्यते।")
वेदान्तमते घटावच्छिन्नाकाशवत् शरीरावच्छिन्नं चैतन्यम्। केशाग्रशतसहस्रांशसदृशचैतन्यप्रतिबिम्बवत् बुद्धिस्थचैतन्यप्रतिबिम्बम्। (जीवयति जीवत्यनेनात्मनेति करणे घञ्। जीव+णिच्+कर्त्तरि क्विप्। विष्णुः। यथा, महाभारते। १३। १५६। ६८।
"जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः॥")
जीवविशिष्टे, त्रि। यथा, महाभारते। १२। २८८। २३।
"मृते वा त्वयि जीवे वा यदा भोक्ष्यति वै जनः॥")
जीव:, पुं स्त्री, (जीव+भावे घञ्।) जीवितम्। इति मेदिनी। वे, ६। (यथा, भागवते। १। २। १०।
"जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्म्मभिः॥"
"जीवस्य जीवनस्य च पुंनर्ह्येभानुष्ठानद्वारा कर्म्मभिर्यं इह प्रसिद्धः स्वर्गादिः सोऽर्थो न भवति।" इति तट्टीकायां श्रीधरस्वामी॥)
जीवकः, पुं, (जीवयति आरोग्यं करोतीति। जीव+णिच्+ण्वुल्।) अष्टवर्गान्तर्गतौषधविशेषः। तत्पर्य्यायः। कूर्चशीर्षः २ मधुरकः ३ मङ्गल्यः ४ हंसाङ्घ्रिः ५। रत्नमालः। २। ४। १३२। जीवनः ६ दीर्घायुः ७ प्राणदः ८ जीवः ९ भद्राङ्गः १० प्रियः ११ चिरञ्जीवी १२ मधुरः १३ मङ्गल्यः १४ कूर्चशीर्षकः १५ इन्द्रियः १६ आयुष्मान् १७ जीवदः १८ बलदः १९। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। रक्तपित्तविसर्पिदाहज्वरवाग्नित्वम्। शुक्रश्लेष्मविवर्द्धनत्वञ्च। इति राजनिर्घण्टः। बलकारित्वम्। कार्श्यवातवाग्नित्वम्। तस्य रूपं यथा,—
"जीवकर्षभकौ श्वेतौ हिमाद्रिशिखरोद्भवौ।
रसोनकन्दवत्कन्दौ निःसारौ कन्दसंयुतौ।
जीवकः कूर्चकाकारः कपिलो ह्रस्वमूलवान्।
जीवकर्षभकस्थाने विदारीकन्दमाहरेत्॥"
इति भावप्रकाशः॥ ७॥
प्रावकः। पीतप्रावः। चणकः। इति मेदिनी। के, ८५।
जीवकः, त्रि, (जीवति प्रभुसेवानुज्ञया इति। जीव+ण्वुल्।) सेवकः। इङ्गाधरी। जीवी। (यथा, महाभारते। १३। १४१। ६६।
"जैविदो याजको विद्वान् न याध्ययनजीवकः॥")
अहितुण्डिकः। इति मेदिनी। के, ८५।
जीवजीवः, पुं, (जीवेन भक्षणदकीटादिना जीवतीति। जीव+अच्। यद्वा, जीवश्चासौ जीवश्च जीवः। तौ इरात् साधुः।) जीवञ्जीवपक्षी। इति शब्दरत्नावली।
जीवञ्जीवः, पुं, (जीवं जीवयति विश्वासेन याचयतीति। जीव+णिच्+कर्त्तरि क्विप्। पक्षोरपक्षी। रत्नमालः। २। ५। ३५॥ (अपरः पक्षिविशेषः। विषादिविकृतस्वाभाव्यादेः परीक्षार्थमस्यावश्यकत्वं भवति। यथा, वाभटे सूत्रस्थाने ७ अध्याये १६।
"हंसः प्रस्खलति ग्लानिर्ज्जीवञ्जीवस्य जायते।
पक्षोरक्षाक्षिवैराग्यं क्रौञ्चस्य स्वाग्नदोषयः॥")
इत्यविश्वेषः। इति मेदिनी। वे, ५६।
जीवन्तिका, स्त्री, (जीवन् तोकं अपत्यं यस्याः।) जीवत्पुत्रिका। तत्पर्य्यायः। जीवसूः २। इति हेमचन्द्रः॥
जीवत्पतिः, स्त्री, (जीवन् पतिर्यस्याः।) सधवा। इति हेमचन्द्रः॥
जीवत्पितृकः, पुं, (जीवन् पिता यस्य इति कप्।) विद्यमानपितृकः। यथा,—
"अमावास्यां गयायाञ्च दत्त्वान्नसुखभोजनम्।
न जीवत्पितृकः कुर्य्यात् कृतेऽपि पितृहा भवेत्॥"
इति तिथ्यादितत्त्वम्॥
जीवथः, पुं, (जीवत्यनेनेति। जीव+"ग्रीहृग्रधिस्कभिवधिजीवि प्राविभ्योऽथः।" उणा। ३। ११३। इति अथः।) प्राजः। क्रूरः। मयूरः। मेघः। धार्म्मिके चिरायुषि च त्रि। रत्नमालादिकोषः॥
जीवदः, पुं, (जीवं जीवनं ददाति औषधादिसुप्रयोगेणेति। दा+कः।) वैद्यः। विष्टि। इति मेदिनी। दे, २६। जीवनदातरि, त्रि।
जीवदात्री, स्त्री, (जीवं जीवनं ददातीति। दा+तृच् ङीप् च।) अहिः। इति राजनिर्घण्टः॥
जीवधनं, क्ली, (जीव एव धनमिति।) प्रवारिकम्। इति विकाण्डशेषः॥
जीवनं, क्ली, (जीवतोऽनेनेति। जीव+करणे ल्युट्।) इतिः। (यथा, भागवते। २।१३।३३।
"अङ्गानि सहस्रानामपदानि चतुष्पदाम्।
पक्षमूनि तत्र महतां जीवो जीवस्य जीवनम्।"
"जीवनं जीविकेति।" तट्टीकायां श्रीधरस्वामी॥)
जलम्। (यथा, आर्य्यासप्तशत्याम्। ६६।
"दशनाभा एव तस्याः सखि! मतिमं जीवनं मन्ये॥"
जीव+भावे ल्युट्।) प्राणधारणम्। इति मेदिनी। ने, ६८। (यथा, "हटयोगप्रदीपिकायाम्। २। ३।
"यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते॥"
"प्राणान् धत्ते यमत्प्राणो जीवनं तेन जीवनम्।
क्रियार्थे धारभूमौ प्राणदा वसुधतिका॥"
रघुनन्दनः॥)
देवकुशेषम्। इति शब्दचन्द्रिका। मज्जा। इति राजनिर्घण्टः। (यद्वा। यथा, काशीखण्डे। २६। ६५।
"जीवनं जीवनप्राणा यमन्नेहा यमस्मयी॥")
जीवनः, पुं, (जीवयति सेवयतीति। जीव+कर्त्तरि ल्युः।) जीवकौषधम्। वातः। इति राजनिर्घण्टः। सुदर्शनवृक्षः। इति शब्दचन्द्रिका। पुत्रः। इति हेमचन्द्रः। (सर्व्वान् प्राणरूपेण जीवयतीति। जीव+णिच्+कर्त्तरि ल्युः। विष्णुः। यथा, महाभारते। १३। १४८। ११९।
"वीरहा रक्षणः सन्तो जीवनः पर्य्यवस्थितः॥"
श्लिष्टः। महाभारते। १३। १७। १२१।
"सर्व्वेषो जीवनो मन्त्रः शुभाशो बहुकर्म्मकृत्॥")
जीवनकं, क्ली, (जीवतेऽनेन। जीव+करणे ल्युट्। ततः स्वार्थे कन्।) जलम्। इति हेमचन्द्रः॥
जीवनयोनिः, स्त्री, (जीवनस्य योनिः कारणम्।) जलविशेषः। स तु अतीन्द्रियः शरीरे प्राणसञ्चारकारणम्। इति भाषापरिच्छेदः॥
जीवनहेतुः, पुं, (जीवनस्य हेतुरुपायः।) वर्म्मोपायः। स च दशविधः। यथा,—
"विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः कृषिः।
इतिभैषं कुसीदञ्च दश जीवनहेतवः॥"
इति मात्स्ये ९१३ अध्यायः॥
जीवना, स्त्री, (जीवयतीति। जीव+णिच्+युच् स्त्रियां टाप्।) मेरौषधम्। इति मेदिनी। ने, ६८।
जीवनाधारं, क्ली, (जीवनं आहरत्यनेनेति। आ+हृ+करणे घञ्।) दिवसम्। इति शब्दचन्द्रिका॥
जीवनाधारः, पुं, (आवसत्यस्मिन्। आ+वस+घञ् जीवनं जलं आधारोऽस्य।) वरुणः। इति शब्दरत्नावली॥ (धारिवाचिनि, त्रि॥)
जीवनिका, स्त्री, (जीवन+ठन्। टाप्। यद्वा, जीवनी+संज्ञायां कन् इत्वञ्च।) हरीतकी। इति राज-

निर्घण्टः॥ (हरीतकीशब्दे विवरणविशेषोऽस्याः ज्ञातव्यः॥)

जीवनी, स्त्री, (जीवत्यनेनेति। जीव+करणे ल्युट् ङीप् च।) जीवन्ती। (पर्य्यायो यथा,—

"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा। मङ्गल्यनामधेया च श्रावणश्रेष्ठा पयस्विनी॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) काकोली। डोड़ी। मेदा। महामेदा। इति राजनिर्घण्टः॥ यूथी। इति शब्दचन्द्रिका॥

जीवनीयं, क्ली, (जीवतोऽनेन अस्मादा। जीव+करणे अपादाने वा अनीयर्।) जलम्। इति हेमचन्द्रः॥ (जीवनप्रदे, त्रि। यथा, सुश्रुते। १। ४५।

"गोक्षीरमनभिष्यन्दि स्निग्धं गुरु रसायनम्। जीवनीयं यथा वातपित्तघ्नं परमं स्मृतम्॥")

जीवनीयगणः, पुं, (जीवनीयानामोषधीनां गणः।) औषधविशेषः। यथा, वैद्यकपरिभाषायाम्।

"अष्टवर्गश्च पर्णिन्यौ जीवन्ती मधुकन्तथा। जीवनीयगणः प्रोक्तो जीवनस्तु पुनस्तथा॥"

("जीवन्ती काकोल्यौ मेदे द्वे सूक्ष्मावपर्ण्यौ च। ऋषभकजीवकमधुकं चेति गणो जीवनीयाख्यः॥"

इति च वाभटे सूत्रस्थाने पञ्चदशेऽध्याये॥)

जीवनीया, स्त्री, (जीवनीय+टाप्।) जीवन्ती। इत्यमरः। २। ४। १४२॥

जीवनेत्री, स्त्री, (जीवं नयतीति। जीव+णी+तृच्+ङीप् च।) सैंहली। इति राजनिर्घण्टः॥

जीवनौषधं, क्ली, (जीवनस्य औषधं उपायविशेषः।) येन म्रियमाणो जीवति तदौषधम्। जीवरक्षाकारि। जीवनोपायः। तत्पर्य्यायः। जीवातः २। इत्यमरः। २। ६। १२०॥

जीवन्नः, पुं, (जीवयति जीवतेऽनेन वा। जीव+"दृक्षिनन्दिजीविप्राणिभ्यः क्विप्राणिषि।" उणा। १। १२७। इति भक्त्।) औषधम्। प्राणः। आयुर्विशिष्टे, त्रि। इत्युणादिकोषः॥ जीवश्राकः। इति राजनिर्घण्टः॥

जीवन्तिकः, पुं, (जीवान्तकः। षृषोदरात् साधुः।) जीवान्तकः। इत्यमरटीकासारसुन्दरी॥

जीवन्तिका, स्त्री, (जीवयतीति। जीव+भ्वृच्+कन् टाप् च। कापि अत इत्वम्।) वन्दा। वृक्षोपरिजातवृक्षः। गुडूची। जीवाख्यशाकः। इति मेदिनी। के, १६०॥ जीवन्ती हरीतकी। इति राजनिर्घण्टः॥

जीवन्ती, स्त्री, (जीवन्त+ङीष्।) लताविशेषः। जीवद् इति जीयातो इति च भाषा। तत्पर्य्यायः। जीवनी २ जीवनीया ३ जीवा ४ मधुः ५। इत्यमरः। २। ४। १४२॥ जीवना ६ मधुस्रवा ७ स्रवा ८। इति तट्टीका॥ पयस्विनी ९ जीवा १० जीवदा ११ जीवदात्री १२ श्राकश्रेष्ठा १३ जीवभद्रा १४ भद्रा १५ मङ्गल्या १६ क्षुद्रजीवा १७ यशस्या १८ शुक्लाटी १९ जीवदृष्टा २० काङ्क्षिका २१ ग्रन्थपर्णिका २२ सुपिङ्गला २३। इति राजनिर्घण्टः॥ मधुस्रवा २४ जीवदृषा २५ सुखकरी २६ नगराटिका २७ जीवपत्री २८ जीवपुष्पा २९। इति केचित्॥ (यथा,—

"वरा श्राकेषु जीवन्ती सर्षपाखवरा परम्॥"

इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)

अस्या गुणाः। मधुरत्वम्। शीतत्वम्। रक्तपित्तवायुक्षयदाहज्वरनाशित्वम्। कफवीर्य्यविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ स्वादुत्वम्। स्निग्धत्वम्। त्रिदोषनाशित्वम्। रसायनत्वम्। बलकारित्वम्। चक्षुर्हितत्वम्। ग्राहित्वम्। लघुत्वञ्च। इति भावप्रकाशः॥ श्वासकासधातुक्षयनाशित्वम्। स्वरकारित्वञ्च। सुराष्ट्रदेशजस्वर्णवर्णहरीतकी। सा स्नेहपाके प्रशस्ता जीर्णरोगनाशिनी। इति राजवल्लभः॥ (अस्याः लक्षणं व्यवहारश्च यथा,—

"जीवन्ती स्वर्णवर्णिनी॥"

"जीवन्ती सर्व्वरोगघ्नी॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

ग्रन्थी। गुडूची। (पर्य्याया यथा,—

"गुडूची मधुपर्णी स्यादमृतात्मतवल्लरी। छिन्ना च्छिन्नरुहा च्छिन्नोद्भवा वत्सादनीति च॥ जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली। चक्रलक्षणिका धीरा विशल्या च रसायनी॥ चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) वन्दा। इति मेदिनी। ते, ११२॥ डोड़ी। इति राजनिर्घण्टः॥ (जीव इति श्राकविशेषः। श्रकैरावन्मधुरपुष्पा ब्रततिः। अस्याः पर्य्याया यथा,—

"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा। मङ्गल्यनामधेया च श्राकश्रेष्ठा पयस्विनी॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

जीवन्मुक्तः, त्रि, (जीवन्नेव मुक्तः आत्मज्ञानेन मायात्वरहितः।) जीवद्दशायां मायावन्धरहितः। (यथा, देवीभागवते। १। १६। ४८।

"जीवन्मुक्तः स राजर्षिर्ब्रह्मज्ञानमतिः शुचिः। तथवक्तातिशान्तश्च योगी योगप्रियः सदा॥")

तल्लक्षणं यथा। "स्वस्वरूपाखण्डशुद्धब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्य्यसञ्चितकर्म्मसंशयविपर्य्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः।

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः। क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे॥'

इत्यादिश्रुतेः।

अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेण अन्यमान्यापटुत्वादिभाजनेनेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च तत्ततूपूर्ब्बपूर्ब्बवासनया क्रियमाणानि कर्म्माणि सुख्यमानानि भोगाविरुद्धान्यारब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यति, यथा इदमिन्द्रजालमिति ज्ञानवान् तद्दिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव समना अमना इव सप्राणोऽप्राण इत्यादिश्रुतेः। उक्तञ्च।

'सुप्तमवज्ञाग्रति यो न पश्यति हृदयञ्च पश्यन्नपि चाहृदयवत्।
तथापि कुर्व्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः॥' इति।

अस्य ज्ञानात् पूर्ब्बं विद्यमानानामेवाहारविहारादीनां अदुष्टवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति। शुभाशुभयोरौदासीन्यं वा। तदुक्तम्।

'ब्रह्मवित्त्वं तथा सूक्ष्मं स आत्मेति न चेतरः।' इति।

तदानीममानित्वादीनि ज्ञानसाधनान्यहेतुकादयः सद्गुणाश्चालङ्कारवदनुवर्त्तन्ते। तदुक्तम्।

'उत्पन्नात्मावबोधस्य ह्यहेतुकादयो गुणाः। अयत्नतो भवन्त्यस्य न तु साधनरूपिणः॥' इति।

किं बहुना अयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने सति ब्रह्मज्ञानतत्कार्य्यसंस्काराणामपि विनाशात् परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डं ब्रह्मावतिष्ठते। न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते विमुक्तश्च विमुच्यते। इत्येवमादिश्रुतेः।" इति वेदान्तसारः॥

जीवपुत्रकः, पुं, (जीवः प्राणान् पुत्र इव। पुत्रवद्वर्द्धनकत्वात् तथात्वम्। स्वार्थे कन्।) इङ्गुदीवृक्षः। इति शब्दरत्नावली॥ वृक्षविशेषः। इत्यमरटीकायां रमानाथः॥ जीयापुता इति भाषा॥

जीवपुष्पा, स्त्री, (जीवयतीति। जीव+णिच्+अच्+जीवं प्राणदं पुष्पमस्याः।) वृद्धजीवन्ती। इति राजनिर्घण्टः॥

जीवप्रिया, स्त्री, (जीवानां प्राणिनां प्रिया हितकारित्वात्।) हरीतकी। इति राजनिर्घण्टः॥

जीवभद्रा, स्त्री, (जीवानां प्राणिनां भद्रं मङ्गलं यस्याः।) जीवन्तीलता। वृद्धिनामौषधम्। इति राजनिर्घण्टः॥

जीवमन्दिरं, क्ली, (जीवस्य आत्मनो मन्दिरं गृहमिव।) शरीरम्। इति शब्दचन्द्रिका॥

जीवला, स्त्री, (जीवं उदरस्थकृमिं लाति गृह्णाति नाशयतीति। ला+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) सैंहली। इति राजनिर्घण्टः॥

जीववल्ली, स्त्री, (जीवयतीति जीवा प्राणदात्री। सा चासौ वल्ली चेति।) क्षीरकाकोली। इति राजनिर्घण्टः॥

जीवशाकः, पुं, (जीवो हितकरः शाकः। जीवाख्यः शाको वा।) मालवे प्रसिद्धशाकविशेषः। तत्पर्य्यायः जीवन्तः २ रक्तनालः ३ ताम्रपत्रः ४ प्रवालः ५ शाकवीरः ६ सुमधुरः ७ मेधकः ८। अस्य गुणाः। सुमधुरत्वम्। दृंहणत्वम्। वस्तिशोधनत्वम्। दीपनत्वम्। पाचनत्वम्। बल्यत्वम्। दृष्यत्वम्। पित्तापहारकत्वञ्च। इति राजनिर्घण्टः॥

जीवशुक्ला, स्त्री, (जीवयतीति। जीव+णिच्+अच्। जीवा हितकरी शुक्ला शुभ्रवर्णलता।) क्षीरकाकोली। इति राजनिर्घण्टः॥

जीवश्रेष्ठा, स्त्री, (जीवाय जीवनाय श्रेष्ठा।) ऋद्धिनामौषधम्। इति राजनिर्घण्टः॥

जीवसंज्ञः, पुं, (जीव इति संज्ञा यस्य। यद्वा, जीवस्य संज्ञा आख्या संज्ञा यस्य।) कामदृद्धिवृक्षः। इति राजनिर्घण्टः॥

जीवसाधन, क्ली, (जीवस्य जीवनस्य साधनं कारणम्।) धान्यम्। इति राजनिर्घण्टः॥

जीवहः, स्त्री, (जीवं प्राणिनं हरते इति। हृ+किप्।) जीवत्तोका। जीवत्पुत्रिका। हेमचन्द्रः। ३। १६४॥ (यथा, महाभारते। १।२००।७।

"जीवहर्वीरहर्भद्रे! बहुसौख्यगुणान्विता।
सुभगा भोगसम्पन्ना यज्ञपत्नी पतिव्रता॥")

जीवस्थानं, क्ली, (जीवस्य जीवनस्य स्थानम्।) मर्म्म। इति हलायुधः॥

जीवा, स्त्री, (जीवयतीति। जीव+णिच्+अच्। ततष्टाप्।) जीवन्तीवृक्षः। मौर्व्वी। (यथा, आर्य्यासप्तशत्याम्। ३। २१।

"निर्गुण इति स्तुत इति च द्वावेकार्थाभिधायिनौ विद्वि।
यस्य धनुर्गुणशून्यं निर्ज्जीवं तदिह शंसन्ति॥"

"निर्गता जीवा ज्या यस्मात् तत्। 'जीवा ज्या ग्रिञ्जिनीत्यपि' इत्यभिधानात्।" इति तट्टीका॥) वचा। ग्रिञ्जितम्। भूमिः। इति मेदिनी। वे, ८॥ जीवितम्। इति जटाधरः॥

जीवातुः, पुं, क्ली, (जीवत्यनेनेति। जीव+"जीवेरातुः।" उणा।१।८०। इति करणे आतुः।) भक्तम्। जीवनौषधम्। (यथा, काशीखण्डे। २६। ६५।

"जीवजीवातुलतिका जन्मिजन्मनिवर्हिणी॥"

"जीवानां प्राणिनां जीवनौषधरूपा।" इति तट्टीका॥) (जीव+भावे आतुः।) जीवितम्। इति मेदिनी। तै, ११२॥ (यथा, उत्तररामचरिते २ अङ्के।

"रे हस्त दक्षिण! स्तस्य ग्रिग्रोर्द्विजस्य
जीवातवे विसृज शूद्रसुनौ कृपाणम्।
रामस्य गात्रमसि दुर्व्वहगर्भखिन्न-
सीताविवासनपटोः करुणा कुतस्ते॥")

जीवात्मा, [न्] पुं, (जीवस्य जीवनस्य आत्मा व्यधिष्ठाता। यद्वा, जीवश्चासौ आत्मा चेति कर्म्मधारयः।) देही। तत्पर्य्यायः। पुनर्भवी २ जीवः ३ असुमान् ४ सत्त्वभृत् ५ देहभृत् ६ जन्तुः ७ जन्तुः ८। इति हेमचन्द्रः॥ प्राणी ९ चेतनः १० जन्मी ११ शरीरी १२। इत्यमरः। १।४।३०॥ (यथा, भागवते। ८। २२। २५।

"यदा कदाचित् जीवात्मा संसरन्निजकर्म्मभिः।
नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत्॥"

"एवं चतुर्व्विंशतिभिस्तत्त्वैः सिद्धे वपुर्व्वरे।
जीवात्मा नियतो नित्यं वसति खात्मदूतवान्॥
स देही कथ्यते पापपुण्यदुःखसुखादिभिः।
याप्तो बद्धश्च मनसा क्लृप्तिभिः कर्म्मबन्धने॥
कामक्रोधौ लोभमोहावहङ्कारश्च पञ्चमः।
इन्द्रियाणि बुद्धिश्च तस्य बन्धाय देहिनः॥
आप्नोति बन्धमज्ञानादात्मज्ञानाच्च मुच्यते॥"

इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम्॥)

जीवाधारः, पुं, (जीवस्य क्षेत्रज्ञस्य आधारः आश्रयस्थानम्।) क्षेत्रम्। इति हेमचन्द्रः॥

जीवान्तकः, पुं, (जीवं अन्तयति नाशयतीति। अन्त+णिच्+ण्वुल्।) जीवनार्थे पक्षिघातकः। तत्पर्य्यायः। व्याकुनिकः २। इत्यमरः। २। १०। १४॥ जीवनाशके, त्रि॥

जीवाला, स्त्री, (जीवं उदरस्थकृमिं आलाति गृह्णाति नाशयतीत्यर्थः। आ+ला+कः।) सैंहिली। इति राजनिर्घण्टः॥

जीविका, स्त्री, (जीवतेऽनयेति। जीव+"गुरोश्च हलः।" ३।३।१०३। इत्यः। ततः संज्ञायां कन् टापि अत इत्वञ्च।) जीवनोपायः। तत्पर्य्यायः। आजीवः २ वार्त्ता ३ वृत्तिः ४ वर्त्तनम् ५ जीवनम् ६। इत्यमरः। २। ६। १॥ जीवः ७। इति शब्दरत्नावली॥ (यथा, मनुः। ४। ११।

"अनिन्द्यामग्रतो शुद्धां जीवेद्ब्राह्मणजीविकाम्॥")

जीवन्ती। इति मेदिनी। के, ६५॥

जीवितं, क्ली, (जीव+भावे क्तः।) जीवनम्। इति हेमचन्द्रः॥ (यथा, उत्तररामचरिते ३ अङ्के।

"त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुद्ध्य सुग्धां
तामेव शान्तमथवा किमिहोत्तरेण॥"* ॥

कर्त्तरि क्तः।) जीवनयुक्ते, त्रि॥ (यथा, रघुः। १२। ७५।

"कामं जीवति मे नाथ इति सा विजहौ शुचम्।
प्राङ्मुखा वत्सलस्यास्यं जीविताक्षीति लक्षिता॥")

जीवितकालः, पुं, (जीवितस्य जीवनस्य कालः।) आयुः। इत्यमरः। २। ८। १२०॥

जीवितज्ञा, स्त्री, (जीवितस्य जीवनस्य ज्ञा ज्ञानं यस्याः। नाड़ीसन्दर्शनेन हि जीवानां जीवनज्ञानादस्याः तथात्वम्।) नाड़ी। इति राजनिर्घण्टः॥

जीवितेशः, पुं, (जीवितस्य ईशः प्रभुः।) प्राणनाथः। यमः। (यथा, रघुः। ११। २०।

"राममन्मथशरेण ताड़िता
दुःसहेन हृदये निशाचरी।
गन्धवद्वधिरचन्दनोचिता
जीवितेशवसतिं जगाम सा॥"

"जीवितेशस्य अन्तकस्य प्राणेश्वरस्य च वसतिं जगाम।" इति तट्टीकायां मल्लिनाथः॥) चन्द्रः। सूर्य्यः। इति शब्दरत्नावली॥ जीवातुः। इति हेमचन्द्रः॥ जीवितेश्वरे, त्रि। इति मेदिनी। शे, ३५॥

जीवी, [न्] पुं, (जीवोऽस्यास्तीति। जीव+इनिः।) प्राणी। यथा, ब्रह्मवैवर्त्ते गणेशखण्डे।

"जीविनां दारुणो रोगः कर्म्मभोगः शुभाशुभः।
भक्तो वैद्यस्तं निहन्ति शक्तिभक्तिरसायनात्॥"

जीव्या, स्त्री, (जीवाय जीवनाय हिता। जीव+यत्।) गोक्षुरद्रुवा। जीवन्ती। हरीतकी। इति राजनिर्घण्टः॥

जु, रंहसि। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) रंहो वेगगतिः। जवति घोटकः। इति दुर्गादासः॥

जु, ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-अनिट्।) ङ, जवते। इति दुर्गादासः॥

जुगु, ङ त्यागे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ङ, कर्म्मणि जुगुप्यते। इति दुर्गादासः॥

जुगुप्सनं, क्ली, (गुप+स्वार्थे सन्+ल्युट्।) निन्दा। इति हेमचन्द्रः।२।१८५॥ (निन्दाशब्दे, त्रि। तत्र "अशुद्धार्त्तेश्च हलादेः।" ३।२। १४६। इति युच्॥)

जुगुप्सा, स्त्री, (गुप निन्दायाम्+सन्+भावे अङ्+तष्टाप्।) निन्दा। इत्यमरः। १। ६। १३॥ (यथा, साहित्यदर्पणे। ३। १७६।

"दोषैश्चतुर्भिर्गर्हा जुगुप्सा विषयोद्भवा॥")

जुङ्गः, पुं, (जुगि+अच्।) क्षुद्रदारकः। इत्यमरः। २। ४। १३०॥ (यथास्य पर्य्यायाः।

"जुङ्गर्ल्लगन्याच्छगलाद्व्रावेगी क्षुद्रदारकः॥"

इति वैद्यकरत्नमालायाम्॥)

जुङ्गकः, पुं, (जुङ्ग+स्वार्थे कन्।) क्षुद्रदारकवृक्षः। इति राजनिर्घण्टः॥

जुङ्गा, स्त्री, (जुङ्ग+टाप्।) जुङ्गः। इत्यमरटीकायां रमानाथः॥

जुङ्गितः, त्रि, (जुग इ त्यागे+कर्म्मणि क्तः।) त्यक्तः। इति व्याकरणम्॥

जुटकं, क्ली, (जुट संहतौ+"इगुपधेति।" ३। १। १३५। इति कः। ततः संज्ञायां कन्।) जटा। इति शब्दरत्नावली॥

जुटिका, स्त्री, (जुटक+टाप्। टापि अत इत्वञ्च।) शिखा। इति शब्दरत्नावली॥ झुँटी इति टिकी। इति च भाषा॥ (यथा, आह्निकसत्त्वधृतब्रह्मपुराणवचनम्।

"जुटिकाञ्च ततो बद्ध्वा ततः कर्म्म समारभेत्॥")

जुड़, क गोदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, जोड़यति। गोदः प्रेरणम्। इति दुर्गादासः।

जुड़, ग्र गतौ। इति कविकल्पद्रुमः॥ (तुदां परं-सकं-सेट्।) ग्र, जुड़ति जोड़िता। इति दुर्गादासः॥

जुड़, शि बन्धे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) शि, जुड़ति अजुड़ीत्। तानुच्छृङ्खलतापन्नान् ग्रन्थजेन जुड़त्यसौ। जुजोड़। इति दुर्गादासः॥

जुत, ऋ ड दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ऋ, अजुनोतत्। ड, जोततते। इति दुर्गादासः॥

जुन, ग्र गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, जुनति जोनिता। इति दुर्गादासः॥

जुर्व, ई वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ईखी। ऊ; जुर्वौ जुर्वः। ई, जूर्णः। इति दुर्गादासः॥

जुल, क पिधि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, जोलयति। पिधि चूर्णीकरणे। इति दुर्गादासः॥

जुष, कि तर्के। ल्गौ। इति कविकल्पद्रुमः॥ (चुरां पक्षे भ्वां-परं-सकं-अकं च-सेट्।) कि, जोषयति जोषत्यन्यगुणं सुधीः। तर्कयतीत्यर्थः। इति दुर्गादासः॥

जुष, ग्र ड ई ञि सुदि। सेवे। इति कविकल्पद्रुमः॥ (तुदां-आत्मं-अकं-सकं च-सेट्।) षष्ठमस्वरी। ग्र ड, जुषते। ई ञि, जुषोऽस्ति। सुदि हर्षे। इति दुर्गादासः॥

जुष्कः, पुं, (जुष्+कक्। ततः संज्ञायां कन्।) यूषः। इति शब्दचन्द्रिका॥

जुष्टं, क्ली, (जुष्यते स्म इति। जुष+क्तः।) उच्छिष्टम्। सेविते, त्रि। इति मेदिनी। टे, १५॥ (यथा, भट्टिः। १। ४।

"पुण्यो महात्रक्षसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः॥")

जुष्यः, त्रि, (जुष्+कर्मणि क्यप्।) सेव्यः। इति मुग्धबोधम्॥

जुहुवानः, पुं, (हूयते इति। हु+कर्मणि कानच्।) कठिनहृदयः। अग्निः। उच्चः। इति संक्षिप्तसारे उणादिवृत्तिः॥

जुहूः, स्त्री, (जुहोत्यनया। इति हु+"हुवः शुवश्च।" उणां। २।६०। इति क्विप् निपातनात् दीर्घत्वं द्वित्वञ्च।) पलाशकाष्ठनिर्मितार्द्धचन्द्राकृतियज्ञपात्रम्। जुहोत्यनया जुहूः। इत्यमरभरतौ॥ (यथा, ऋग्वेदे। १। ७६। ५।

"अग्ने! मन्द्रया जुह्वा यजस्व॥")

जुहूराणः, पुं, (जुहूं रणति इति। "कर्मण्यण्।" ३। २। १। इत्यण्।) अग्निः। अध्वर्युः। इति विश्वः॥ चन्द्रः। इत्युणादिकोषः॥

जुहूवान्, [त्] पुं, (जुहूः पात्रं होमक्रियोद्देश्यतयास्त्यस्मिन्। जुहू+मतुप् निपातनात् मस्य वत्वम्।) अग्निः। इति शब्दरत्नावली॥

जूः, स्त्री, (जु+"क्रिवृचिप्रच्छीति।" उणां। २। ५७। क्विप् दीर्घश्च।) आकाशः। सरस्वती। प्रियाची। जवनम्। इति शब्दरत्नावली॥ त्वरागमनम्। गमनम्। इति मेदिनी। जे, २॥

जूटः, पुं, (जट सङ्घाते+अच् निपातनादूत्वागमे साधुः।) शिवजटा। इत्यमरटीकायां भरतः। जटा। इति शब्दरत्नावली॥

जूटकं, क्ली; (जूट+स्वार्थे कन्।) केशबन्धः। जटा। इति भूरिप्रयोगः॥

जूतिः, स्त्री, (जु वेगे+"क्तियूतिजूतीति।" ३।३।९७। इति क्तिन् निपातनात् दीर्घत्वञ्च।) वेगः। इत्यमरः।३। २। ३९॥ (यथा, अथर्ववेदे। १३। २। १३।

"तं समाप्नोति जूतिभिः॥")

जूतिका, स्त्री, (जूत्या कायतीति। कै+कः। तत टाप्।) कर्पूरभेदः। इति राजनिर्घण्टः॥

जूर, ड य ई व्यानौ। वधे। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-अकं-सकं-च-सेट्।) दीर्घौ। ड य, जूर्यते। ई, जूर्णः। व्यानिर्गतबधुवयोभावः। इति दुर्गादासः॥

जूर्णाख्यः, पुं, (जूर+क्तः। जूर्ण इति आख्या यस्य।) लवणविशेषः। उलू इति भाषा॥ तत्पर्य्यायः। लवणम् २ लूनकः ३ दर्भः ४ खरच्छदः ५। इति रत्नमाला॥ उलूकम् ६ उलपः ७। इति केचित्॥

जूर्णाक्ष्यः, पुं, (जूर्ण इति आक्ष्यः आख्या यस्य।) देवधान्यम्। इति हेमचन्द्रः॥

जूर्णिः, स्त्री, (ज्वर+"वीप्याज्वरिभ्यो निः।" उणां। ४। ४८। इति निः। "ज्वरत्वरेति।" ६। ४। २०। इत्यूट् च।) वेगः। इत्युणादिकोषः॥ आदित्यः। देहः ब्रह्मा। ज्वरः। इति संक्षिप्तसारे उणादिवृत्तिः॥

जूर्णिः, स्त्री, (ज्वर्+भावे क्तिन्। "ज्वरत्वरेत्यादिना"ऊठ्च।) ज्वरः। इत्यमरः।३।२।३६॥

जूष, ञ वधे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) षष्ठस्वरी। ञ, जूषति जूषते। परस्मैपदीत्यन्ये। इति दुर्गादासः॥

जूषं, क्ली, पुं, (यूष+पृषोदरात् साधुः।) यूषम्। सुश्रुतादिकाथरसः। इति लिङ्गादिसंग्रहटीकायां भरतः॥

जूषणं, क्ली, (जूष्यतेऽनेनेति। जूष+करणे ल्युट्।) दर्वविशेषः। इति शब्दचन्द्रिका॥ धाइफुल इति भाषा॥

जृ, ष्टकारे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) ष्टकारस्तिरस्करणम्। जरति शत्रुं शूरः। इति दुर्गादासः॥

जृभ, इ ड जृम्भे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) षष्ठमस्वरी। इ, जृम्भते। ड, जृम्भते। इति दुर्गादासः॥

जृभ, ड ई जृम्भे। गात्रशैथिल्य इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ड, जर्भते। ई, जृभ्यः। इति दुर्गादासः॥

जृम्भः, पुं क्ली, (जृम्भ+भावे घञ्।) सुखादिविकाशः। हाइ इति भाषा॥ तत्पर्य्यायः। जृम्भणम् २ जृम्भा ३ जृम्भिका ४। इति शब्दरत्नावली॥ जम्भा ५ जम्भका ६। इति राजनिर्घण्टः॥

(यस्य लक्षणं यथा, सुश्रुते। ३। ४।

"निद्रार्तस्येव यस्येहा तस्य तन्द्रा विनिर्दिशेत्।
मीलैकमनिलोच्छ्वासमङ्गेषून् विततानन॥
यन्मुञ्चति सनेत्रास्यं स जृम्भ इति संज्ञितः॥")

"जृम्भात्यर्थं समीरणात्।" इति वैद्यकम्॥

"क्षुदुत्पतनजृम्भेषु जीवोत्क्षिप्ताङ्गलिध्वनिः।
अवश्यमेव कर्त्तव्यस्तान्यथा तद्वधो भवेत्॥"

इति कर्म्मलोचनम्॥ *॥

विकाशः। स्फारितः। इति शब्दरत्नावली॥ (यथा, प्रबोधचन्द्रोदये।४।२८। "एतानि प्रतिमुकुलनवमधुपावलीरञ्जितसुखरा जृम्भारम्भभरविगलन्मकरन्दद्रुहिणः कुसुमसुरभयः॥")

जृम्भणं, क्ली, (जृम्भ+भावे ल्युट्।) जृम्भः। इत्यमरः। १। ७। ३५॥ (यथा, सुश्रुते। ३। १।

"इन्द्रियार्थेष्वसंप्राप्तिर्गौरवं जृम्भणं क्लमः॥")

जृम्भा, स्त्री, (जृम्भ+भावे घञ् ततष्टाप्।) जृम्भः। इति शब्दरत्नावली॥ (यथा, देवीभागवते। १। १५। ६१।

"तुष्टिः पुष्टिः क्षमा लज्जा जृम्भा तन्द्रा च भूक्तयः॥")

जृम्भिका, स्त्री, (जृम्भा+स्वार्थे कन् टापि अत इत्वञ्च।) जृम्भः। इति शब्दरत्नावली॥ (निद्रावेगधारणजनितरोगविशेषः। यथा, वाभटे सूत्रस्थाने चतुर्थेऽध्याये।

"निद्राया मोहमूर्द्धाक्षिगौरवालस्यजृम्भिकाः।
अङ्गमर्दश्च तत्रेष्टः स्वप्नः संवाहनानि च॥"

जृम्भ+णिच्+खुल्। टापि अत इत्वम्। जृम्भणकारकोऽस्त्रविशेषः। यथा, महाभारते। ५। ६। ५२।

"अस्त्रजंस्ते महास्त्रज्ञा जृम्भिकां दत्तवान्हरीम्॥")

जृम्भितं, क्ली, (जृम्भि+भावे क्तः।) विचेष्टितम्। ग्रहणम्। जृम्भा। स्फुटितम्। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे।२६।८६।

"अहो किमेतदाश्चर्य्यमायाङ्गरजृम्भितम्॥")

स्त्रीणां करणम्। इति मेदिनी। ते, ११२॥

जृम्भिणी, स्त्री, (जृम्भि+णिनिः।) एलापर्णी। इति शब्दचन्द्रिका॥ (एलापर्णीशब्देऽस्या विशेषो ज्ञेयः॥)

जॄ, इर् य म य व्याने। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-अनिट्।) इर्; अजरत् अजारीत्। य, जरा। म, जरयति। य, जीर्य्यति। व्यानं गतबधुवयोभावः। इति दुर्गादासः॥

जॄ, गि कि व्याने। इति कविकल्पद्रुमः॥ (क्र्यां-चुरांपक्षे भ्वां-च-परं-अकं-सेट्।) गि, जृणाति जीर्णः जीर्णिः। कि, जारयति जरति। इति दुर्गादासः॥

जेता, [तृ] त्रि, (जयतीति। जि+तृच्।) जयशीलः। तत्पर्य्यायः। जिष्णुः २ जित्वरः ३ जैत्रः ४। इत्यमरः। २। ८। ७७॥ (यथा, रघुः। १२। ८६।

"जेतारं लोकपालानां स्वमुखैरर्चितेश्वरम्॥"

विष्णु:। यथा, महाभारते। १३। १४६। २६।
"अनघो विजयो जेता विश्वयोनि: पुनर्वसु:॥")

जेन्ताक:, पुं, खेदविशेष:। यथा, "अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत पूर्व्वस्यान्दिशि उत्तरस्यां वा गुणवति प्रशस्तभूमिभागे देशे क्षणमधुरस्निग्धे सुवर्णवर्णस्निग्धे वा नदीपरीवापपुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा क्षपतीर्थे समसुविभक्तभागे देशे सप्ताहौ वा अरत्नी: प्रक्रम्य उदक्तात् प्राङ्मुखसुदङ्मुखं वा अभिमुखतीर्थं कूटागारं कारयेत्। उत्सेधविस्तारत: परमरत्नी: षोड़शसमन्तात् संहृतं स्तृतकर्म्मसम्पन्नमनेकवातायनम्। अस्य च कूटागारस्यान्त: समन्तात्तो भित्तिमरत्निविस्तारोत्सेधां पिष्डिकां कारयेत् आकवाटान्मध्ये चास्य च कूटागारस्य चतुष्किष्कुमात्रं द्विपुरुषप्रमाणं स्तम्भत्रयं कन्दुसंस्थानं बहुसूत्राच्छिद्रं अङ्गारकोष्ठकस्तम्भं सपिधानं कारयेत्। तच्च खादिराणामाम्रकर्णिकानां वा मेध्येन काष्ठेनापूरयित्वा प्रदीपयेत्। स यदा जानीयात् साधु दग्धानि काष्ठानि गतधूमानि अथ तप्तं केवलमग्निना तदग्निगर्भं खेदयोग्येन चोष्मणा युक्तमिति। तत्रैनं वातहराभ्यङ्गाभ्यक्तगात्रं वस्त्रावच्छन्नं प्रवेशयेत् प्रवेशयंश्चैनमनुशिष्यात् सौम्य! प्रविश कल्याणायारोग्याय चेति प्रविश्य चैनां पिष्डिकामधिरुह्य पार्श्वापरपार्श्वाभ्यां यथासुखं शयीथा:। न च त्वया खेदमूर्च्छापरीतेनापि सता पिष्डिकैषा मोक्तव्या आप्राणोच्छ्वासात् भस्ममानो ह्यत: पिष्डिकावकाशात् द्वारमधिगच्छन् खेदमूर्च्छापरीततया सद्य: प्राणान् जह्या: तस्मात् पिष्डिकां न कथञ्चन मुञ्चेथा:। स यदा जानीयाद्विगताभिष्यन्दमात्मानं सम्यक् प्रशान्तखेदपिच्छं सर्व्वस्रोतोविसृत्तं लघुभूतमपगतविबन्धस्तम्भसुप्तिगौरववेदनमिति ततस्तां पिष्डिकामनुवसन् द्वारं प्रपद्येत निष्क्रम्य च न सहसा चक्षुषो: परिपालनार्थं शीतसुदकं स्पृशेत्। अपगतक्लमसन्तापस्तु सुहूर्त्तात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽन्नीयात्।" इति चरक:॥

जेमनं, क्ली, (जिमु भक्षणे + भावे ल्युट्।) भोजनम्। इत्यमर:। २। ६। ५६॥

जेय:, त्रि, (जीयते इति। जि जये + "अचो यत्।" ३। १। ६७। इति कर्म्मणि यत्।) जेतव्यमात्रकम्। इत्यमर:। २। ८। ७४॥ (यथा, मार्कण्डेये। २७। १२।
"तस्मात् कामादय: पूर्व्वं जेया: पुत्र! महीभुजा।
तज्जये हि जयोऽवश्यं राजा नश्यति तैर्जित:॥")

जेय, त्रि ङ गत्याम्। इति कविकल्पद्रुम:॥ (भ्वा-आत्मं-सकं-सेट्।) त्रि, अजिजेयत्। ङ, जेयते जिजेये। इति दुर्गादास:॥

जेह, ङ त्रि यत्ने। इति कविकल्पद्रुम:॥ (भ्वा-आत्मं-सकं-सेट्।) ङ, जेहते जिजेहे। त्रि, अजिजेहत्। इति दुर्गादास:॥

जै, क्षये। इति कविकल्पद्रुम:॥ (भ्वा-परं-अकं-अनिट्।) जायति। इति दुर्गादास:॥

जैत्रं, क्ली, (रोगजयात् जेतृ + तदेव। "प्रज्ञादिभ्यश्च।" ५। ४। ३८। इत्यण्।) औषधम्। इति राजनिर्घण्ट:॥

जैत्र:, त्रि, (जेतैव। जेतृ + प्रज्ञादित्वादण्।) जेता। इत्यमर:। २। ८। ७४॥ (यथा, माघे। ३। ६१।
"शरीरिणा जैत्रशरेण यत्र
नि:शल्यमूधे मकरध्वजेन॥")

पारदे, पुं। इति राजनिर्घण्ट:॥

जैत्ररथ:, पुं, (जैत्रो जयशीलो रथो यस्य।) जयशील:। इति हलायुध:॥

जैत्री, स्त्री, (जयति रोगादिनाशकतया सर्व्वोत्कर्षेण वर्त्तते इति। जि + क्तच्। ततः स्वार्थे अण् ततः स्त्रियां ङीप्।) जयन्तीवृक्ष:। इति शब्दरत्नावली॥

जैन:, पुं, (जिन एव। यद्वा, जिन उपास्यदेवतास्येति। जिन + अण्।) जिनोपासक:। बौद्ध:। इति हलायुध:॥ (धर्म्मश्चैत्रेऽस्मिन् भारतवर्षे प्रचलितेषु विविधेषु धर्म्मेषु जिनधर्म्म एव श्रेष्ठतम इति जैना: प्रवदन्ति। एषामुपास्यदेवता जिन:। ते तु श्वेताम्बरदिगम्बरभेदेन द्विविधा:। श्वेताम्बरास्तु प्रायश आश्रमिण:। अधुना नानाशाखासु विभक्ता: समभवन्। दिगम्बरास्तु प्रायशो निर्ग्रन्था:। एतेषां यन्मतं तत् सर्व्वदर्शनसंग्रहात् प्रदर्श्यते। यथा,—
"ननु न कश्चित् पुरुषविशेष: सर्व्वज्ञपदवेदनीय: प्रमाणपञ्चकस्य तत्राप्रवृत्तिमध्यक्षे सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्राप्रवृत्तेश्च। तथाचोक्तं तौतातितै:।
सर्व्वज्ञो दृश्यते तावन्नेदानीमसदादिभि:।
दृष्टो न चैकदेशोऽस्ति लिङ्गं वा योऽनुमापयेत्॥
न चागमविधि: कश्चिन्नित्यसर्व्वज्ञबोधक:।
न च तत्रार्थवादानां तात्पर्य्यमपि कल्पते॥
न चान्यार्थप्रधानेभ्यस्तदस्तित्वं विधीयते।
न चानुवदितुं शक्य: पूर्व्वमन्यैरबोधित:॥
अनादेरागमस्यार्थो न च सर्व्वज्ञ आदिमान्।
क्वचिन्मेन त्वसत्त्वेन स कथं प्रतिपाद्यते॥
अथ तद्वचनेनैव सर्व्वज्ञोऽनेन: प्रतीयते।
प्रकल्प्येत कथं सिद्धिरन्योन्याश्रययोस्तयो:॥
सर्व्वज्ञोक्ततया वाक्यं सत्यं तेन तदुक्तता।
कथं तदुभयं सिध्येत् सिद्धमूलान्तराद्ऋते॥
असर्व्वज्ञप्रणीतात्तु वचनान्मूलवर्जितात्।
सर्व्वज्ञमवगच्छन्तस्तद्वाक्योक्तं न जानते॥
सर्व्वज्ञसद्भावं किञ्चिदादि पश्येम सम्प्रति।
उपमानेन सर्व्वज्ञं जानीयाम ततो वयम्॥
उपदेशोऽपि बुद्धस्य धर्म्माधर्म्मादिगोचर:।
अन्यथा नोपपद्येत सार्व्वज्ञ्यं यदि नाभवत्॥
इत्यादि॥

अत्र प्रतिविधीयते यदभ्यधायि सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्राप्रवृत्तेश्चादिति तदयुक्तं तत्सद्भावादेकस्यानुमानादे: सद्भावात्। तथाहि कश्चिदात्मा सकलपदार्थसाक्षात्कारी तद्ग्रहणस्वभावत्वे सति प्रतीयप्रतिबन्धप्रत्ययत्वात् यदृयद्ग्रहणस्वभावत्वे सति प्रतीयप्रतिबन्धप्रत्ययं तत्तत्साक्षात्कारि यथा अपगततिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षात्कारि। तद्ग्रहणस्वभावत्वे सति प्रतीयप्रतिबन्धप्रत्ययश्च कश्चिदात्मा तस्मात् सकलपदार्थसाक्षात्कारीति। न तावदग्रेषार्थग्रहणस्वभावत्वमात्मनोऽसिद्धं चोदनाबलान्निखिलार्थज्ञानात् नोत्पत्त्यन्यथानुपपत्त्या सर्व्वमनेकान्तात्मकं सत्त्वादिति व्याप्तिज्ञानोत्पत्तेश्च। चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थमवगमयतीत्येवंजातीयकैरश्वरमीमांसागुरुभिर्विधिप्रतिषेधविचारव्याख्यानैर्बन्धनं सकलार्थविषयज्ञानं प्रतिपद्यमानै: सकलार्थग्रहणस्वभावकत्वमात्मनोऽभ्युपगतम्। न चाखिलार्थप्रतिबन्धकावरणप्रक्षयानुपपत्ति: सम्यग्-दर्शनादित्रयलक्षणस्यावरणप्रक्षयहेतुभूतस्य सामग्रीविशेषस्य प्रतीतत्वात् अन्यथा सुदूरापि मुक्तेरुपपद्यवा विदाक्षा:।

नन्वावरणप्रक्षयवशादशेषविषयं ज्ञानं विशदं सुखप्रत्यक्षं प्रभवतीत्युक्तं तदयुक्तं तस्य सर्व्वज्ञस्यानादिमुक्तत्वेनावरणस्यैवासम्भवादिति चेत्तन्न अनादिमुक्तत्वस्यैवासिद्धेर्न सर्व्वज्ञोऽनादिमुक्त: मुक्तत्वादितरमुक्तवत् बद्धापेक्षया च मुक्तव्यपदेश: तद्रहिते चास्याप्यभाव: स्यादाकाशवत्। गगनादे: चित्तादिकार्य्यपरम्परायाश्च कर्तृत्वेन तत्सिद्धि: तथाहि चित्तादिकं सकर्त्तृकं कार्य्यत्वाद्घटवदिति तदप्यसमीचीनं कार्य्यत्वस्यैवासिद्धे:। न च सावयवत्वेन तत्साधनमित्यभिधातव्यं यस्मादिदं विकल्पजालमवतरति सावयवत्वं किमवयवसंयोगित्वं अवयवसमवायित्वं अवयवजन्यत्वं समवेतद्रव्यत्वं सावयवबुद्धिविषयत्वं वा। न प्रथम: आकाशादावनैकान्त्यात्। न द्वितीय: सामान्यादौ व्यभिचारात्। न तृतीय: साध्याविशिष्टत्वात्। न चतुर्थ: विकल्पयुगलागलग्रहणलत्वात् समवायसम्बन्धमात्रवद्द्रव्यत्वं समवेतद्रव्यत्वमन्यच्च समवेतद्रव्यत्वं वा विवक्षितं हेतूक्रियते। आद्ये गगनादौ व्यभिचार: तस्यापि गुणादिसमवायवत्त्वद्रव्यत्वयो: सम्भवात्। द्वितीये साध्याविशिष्टता अन्यशब्दार्थेषु समवायकारणभूतेष्ववयवेषु समवायस्य साधनीयत्वात्। अभ्युपगम्यैतदभाक्तिवस्तुतस्तु समवाय एव न समस्ति प्रमाणाभावात्। नापि पञ्चम: आत्मादिनानैकान्त्यात्तस्य सावयवबुद्धिविषयत्वेऽपि कार्य्यत्वाभावात्। न च निरवयवत्वेऽप्यस्य सावयवार्थसम्बन्धेन सावयवबुद्धिविषयत्वमौपचारिकमित्येयं निरवयवत्वे व्यापित्वविरोधात् परमाणुवत्। किञ्च किमेक: कर्त्ता साध्यते किं वा स्वतन्त्र: प्रथमे प्रासादादौ व्यभिचार: स्थपत्यादीनां बहूनां

पुरुषार्थो तत्र कर्तृत्वोपलम्भादनेनैव सकलजगज्जननोत्पत्तादितरवैयर्थ्यञ्च। तदुक्तं वीतरागस्तुतौ।

कर्त्तास्ति नित्यो जगतः स चैकः
स सर्व्वगः सन् स्ववशः स सत्यः।
—इमाः कुदेवाः कुविडम्बनाः स्युः
स्वेषां न येषामनुशासकस्त्वम्॥ इति॥

अन्यत्रापि।

कर्त्ता न तावदिह कोऽपि यथेच्छया वा
दृष्टोऽन्यथा कटकृतावपि तत्प्रसङ्गः।
कार्य्यं किमत्र भवतापि च तत्त्वकाद्यै-
राहृत्य च त्रिभुवनं पुरुषः करोतीति॥

तस्मात् प्रागुक्तकारणचितयबलादावरणप्रक्षये सार्व्वज्ञ्यं युक्तम्। न चास्योपदेष्टृन्तराभावात् सम्यग्दर्शनादिचितयानुपपत्तिरिति भणनीयं पूर्व्वसर्व्वज्ञप्रणीतागमप्रभवत्वादस्मद्व्याख्येयार्थज्ञानस्य। नचान्योन्याश्रयतादिदोषः आगमसर्व्वज्ञपरम्परायां बीजाङ्कुरवदनादित्वाङ्गीकारादित्यलम्।

रत्नत्रयपदवेदनीयतया प्रसिद्धं सम्यग्दर्शनादिचितयमर्हत्प्रवचनसङ्गृहपरे परमागमसारे प्ररूपितं सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इति। विहितश्च योगदेवेन येन रूपेण जीवाद्यर्थो यावस्थितस्तेन रूपेणार्हता प्रतिपादिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यत्परपर्य्यायं श्रद्धानं सम्यग्दर्शनं तथा च तत्त्वार्थसूत्रं तत्त्वार्थे श्रद्धानं सम्यग्दर्शनमिति।

अन्यदपि।

रुचिर्जिनोक्ततत्त्वेषु सम्यक् श्रद्धानमुच्यते।
जायते तन्निसर्गेण गुरोरधिगमेन वेति॥

परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः बाह्यादिरूपपरोपदेशजनितं ज्ञानमधिगमः। येन स्वभावेन जीवादयः पदार्थाः यावस्थिताः तेन स्वभावेन मोहसंशयरहितत्वेनावगमः सम्यग्ज्ञानम्। यथोक्तम्।

यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा।
योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः॥
इति॥

तज्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्य्यायकेवलभेदेन। तदुक्तम् मतिश्रुतावधिमनः पर्य्यायकेवलानि ज्ञानमिति। अस्यार्थः ज्ञानावरणक्षयोपशमे सति इन्द्रियमनसी पुरस्कृत्य आपृतः सन् यथार्थं मनुते सा मतिः। ज्ञानावरणक्षयोपशमे सति मतिजनितं सत्यं ज्ञानं श्रुतम्। असम्यग्दर्शनादिगुणजनितक्षयोपशमनिमित्तमवच्छिन्नविषयं ज्ञानमवधिः। ईर्ष्यान्तरायज्ञानावरणबलयोपशमे सति परमनोगतस्यार्थस्य स्फुटं परिच्छेदकं ज्ञानं मनःपर्य्यायः। तपःक्रियाविशेषान् यदर्थं सेवन्ते तपस्विनस्तज्ज्ञानमन्यज्ञानसंस्पृष्टं केवलम्। तत्राद्यं परोक्षं प्रत्यक्षमन्यत्। तदुक्तम्।

विज्ञानं स्वपराभासि प्रमाणं बाधवर्ज्जितम्।
प्रत्यक्षञ्च परोक्षञ्च द्विधा मेयविनिश्चयादिति॥

अन्तर्गणिकभेदस्तु सविस्तरस्तत्रैवागमेऽवगन्तव्यः। संसरणकर्म्मोच्छित्तावुद्यतस्य श्रद्दधानस्य ज्ञानवतः पापागमनकारणक्रियानिवृत्तिः समाक्चारित्रम्। तदेतत् सप्रपञ्चमुक्तमर्हता। सर्व्वथावद्ययोगानां त्यागश्चारित्रमुच्यते। कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा॥
अहिंसासूनृतास्तेयब्रह्मचर्य्यापरिग्रहाः॥
न यत्प्रमादयोगेन जीवितव्यपरोपणम्।
चराणां स्थावराणाञ्च तदहिंसाव्रतं मतम्॥
प्रियं पथ्यं वचस्तथ्यं सूनृतं व्रतमुच्यते।
तत्तथ्यमपि नो तथ्यमप्रियञ्चाहितञ्च यत्॥
अनादानमदत्तस्यास्तेयव्रतमुदीरितम्।
बाह्याः प्राणा नृणामर्थो हरता तं हता हि ते॥
दिग्यौदरिककाभार्याः कृतानुमतकारितैः।
मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा मतम्॥
सर्व्वाभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः।
यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः॥
भावनाभिर्भावितानि पञ्चभिः पञ्चधा क्रमात्।
महाव्रतानि लोकस्य साधयन्त्यव्ययं पदमिति॥
भावनापञ्चकप्रपञ्चनञ्च प्ररूपितम्।
हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्।
आलोच्यभाषणेनापि भावयेत् सूनृतं व्रतम्॥
इत्यादिना॥

एतानि सम्यग्दर्शनज्ञानचारित्राणि मिलितानि मोक्षकारणं न प्रत्येकं यथा रसायनज्ञानं श्रद्धानावरणानि सम्भूय रसायनफलं साधयन्ति न प्रत्येकम्।

अत्र संक्षेपतस्तावज्जीवाजीवाख्ये द्वे तत्त्वे स्तः तत्र बोधात्मको जीवः अबोधात्मकस्त्वजीवः। तदुक्तं पद्मनन्दिना।

चिदचिद्वे परे तत्त्वे विवेकस्तद्विवेचनम्।
उपादेयमुपादेयं हेयं हेयञ्च कुर्व्वतः॥
हेयं हि कर्त्तृरागादि तत्कार्य्यमविवेकिनः।
उपादेयं परं ज्योतिरुपयोगैकलक्षणमिति॥

सहजचिद्रूपपरिणतिं स्वीकुर्व्वाणे ज्ञानदर्शने उपयोगः स परस्परप्रदेशासु प्रदेशवन्तात् कर्म्मणैकीभूतस्य आत्मनोऽन्यत्वप्रतिपत्तिकारणं लक्षणं भवति। सकलजीवसाधारणं चैतन्यमुपयोगक्षयोपशमभवाद्यौपशमिकक्षयात्मकक्षयौपशमिकभावेन कर्म्मेन्द्रियवशात् कलुषाद्याकारेण च परिणतजीवपर्य्यायजीवविवक्षायां स्वरूपं भवति। यदवोचदाचकाचार्य्यः औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ चेति। अनुदयप्राप्तिरूपे कर्म्मण उपशमे सति जीवस्योत्पद्यमानभावः औपशमिकः यथा पङ्के कलुषतां कुर्व्वति कतकादिद्रव्यसम्बन्धादधः पतिते जलस्य स्वच्छता। कर्म्मणः क्षयोपशमे सति जायमानो भावः क्षायिकः यथा मोक्षः। उभयात्मा भावो मिश्रः यथा जलस्यार्द्धस्वच्छता। कर्म्मोदये सति भवन् भाव औदयिकः। कर्म्मोपशमाद्यनपेक्षः सहजो भावश्चेतनत्वादिः पारिणामिकः। तदेतत् सत्त्वं यथासम्भवं भव्यस्याभव्यस्य वा जीवस्य तत्त्वं स्वरूपमिति सूत्रार्थः। तदुक्तं स्वरूपसम्बोधने।

ज्ञानाद् भिन्नो न चाभिन्नो भिन्नाभिन्नः कथञ्चन।
ज्ञानं पूर्व्वापरीभूतं सोऽयमात्मेति कीर्त्यते॥
इति॥

ननु भेदाभेदयोः परस्परपरिहारेणावस्थानादन्यतरस्येव वास्तवत्वाद्भयात्मकत्वमयुक्तमिति चेत्तदयुक्तं बाधे प्रमाणाभावात् अनुपलम्भो हि बाधकं प्रमाणं न सोऽस्ति समस्तेषु वस्तुष्वनेकरसात्मकत्वस्य स्याद्वादिनो मते सुप्रसिद्धत्वादित्यलम्।

अपरे पुनर्जीवाजीवयोरपरं प्रपञ्चमाचक्षते जीवाकाश-धर्म्माधर्म्म-पुद्गलास्तिकायभेदात्। एतेषु पञ्चसु तत्त्वेषु कालक्षयसम्बन्धितया स्थितिव्यपदेशः अनेकप्रदेशत्वेन शरीरवत् कायव्यपदेशः। तत्र जीवा द्विविधाः संसारिणो मुक्ताश्च भवाद् भवान्तरप्राप्तिमन्तः संसारिणः। ते च द्विविधाः समनस्का अमनस्काश्च तत्र संज्ञिनः समनस्काः शिक्षाक्रियालापग्रहणरूपा संज्ञा तद्विधुरास्त्वमनस्काः। ते चामनस्का द्विविधाः त्रसस्थावरभेदात् तत्र द्वीन्द्रियादयः शङ्खगण्डोलकप्रभृतयश्चतुर्विधास्त्रसाः पृथिव्यप्तेजोवायुवनस्पतयश्च स्थावराः। तत्र मार्गगतधूलिः पृथिवी इत्यादिः पृथिवीकायः पृथिवी कायत्वेन येन गृहीता स पृथिवीकायकः पृथिवीं कायत्वेन यो ग्रहीष्यति स पृथिवीजीवः। एवमवरादिष्वपि भेदचतुष्टयं द्रष्टव्यम्। तत्र पृथिव्यादि कायत्वेन गृहीतवन्तो गृह्णन्त्यवश्च स्थावरा गृह्यन्ते न पृथिव्यादिपृथिवीकायादयः तेषां जीवत्वात्। ते च स्थावराः स्पर्शनैकेन्द्रियाश्च भवान्तरप्राप्तिविधुरा मुक्ताः धर्म्माधर्म्माकाशास्तिकायास्त्रे एकत्वशालिनो निष्क्रियाश्च द्रव्यस्य देशान्तरप्राप्तिहेतुः। तत्र धर्म्माधर्म्मौ प्रसिद्धौ आलोकेनाविच्छिन्ने नभसि लोकाकाशप्रदेवदनीये सर्व्वत्रावस्थितिगतिस्थित्युपग्रहौ धर्म्माधर्म्मयोरुपकारः अतएव धर्म्मास्तिकायः प्रवृत्तानुमेयः अधर्म्मास्तिकायः स्थित्यनुमेयः। अन्यवस्तुप्रदेशमधीत्यस्य वस्तुनः प्रवेशोऽवगाहः तदाकाशकृत्यम्। स्पर्शरसवर्णवन्तः पुद्गलाः ते च द्विविधाः अणवः स्कन्धाश्च। भोक्तुमशक्या अणवः द्व्यणुकादयः स्कन्धाः। तत्र द्व्यणुकादिस्कन्धभेदादखण्डितत्वपटते अखण्डितसंघातात् द्व्यणुकादित्पद्यते क्वचिद्भेदसंघाताभ्यां स्कन्धोत्पत्तिः अतएव पूरयन्ति गलन्तीति पुद्गलाः। कालस्यानेक-प्रदेशत्वाभावेनास्तिकायत्वाभावेऽपि द्रव्यत्वमस्ति तल्लक्षणयोगात् तदुक्तं गुणपर्य्यायवद्द्रव्यमिति। द्रव्याश्रया निर्गुणा गुणाः यथा जीवस्य ज्ञानत्वादिसामान्यरूपाः पुद्गलस्य रूपत्वादिसामान्यस्वभावाः धर्म्माधर्म्माकाशकायानां यथासम्भवं गतिस्थित्यवगाहहेतुत्वादि-

सामान्यानि गुणाः। तस्य द्रव्यस्योक्तरूपेण भवनसुत्पादः तद्भावः परिणामः पर्याय इति पर्यायाः; यथा जीवस्य घटादिज्ञानसुखक्षीणादयः; पुद्गलस्य स्वत्विक्षघटादयः; धर्मादीनां गत्यादिविशेषाः; अतएव षट् द्रव्याणीति प्रसिद्धिः।

केचन सप्त तत्त्वानीति वर्णयन्ति तदाह जीवाजीवास्रव-बन्ध-संवर-निर्जर-मोक्षास्तत्त्वानीति। तत्र जीवाजीवौ निरूपितौ आस्रवो निरूप्यते। औदारिकादिकायादिसलनद्वारेणात्मनश्चलनं योगपदवेदनीयमास्रवः; यथा सलिलावगाहिद्वारं नद्यास्रवणं कारणत्वादास्रव इति निगद्यते तथा योगप्रणाडिकयाकर्मास्रवतीति स योग आस्रवः। यथा आर्द्रं वस्त्रं समन्ताद्वातानीतं रेणुजातमुपादत्ते तथा कषायसलार्द्र आत्मा योगानीतं कर्म सर्वप्रदेशैर्गृह्णाति यथा वा निष्प्लायः पिण्डे जले क्षिप्ते अम्भः समन्ताद् गृह्णाति तथा कषायोष्णो जीवो योगानीतं कर्म समन्तादादत्ते। कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः; क्रोधो मानो माया लोभश्च स द्विविधः; शुभाशुभभेदात्। तत्राहिंसादिः शुभः; काययोगः सत्यमितहितभाषणादिः शुभो वाग्योगः। तदेतदास्रवभेदप्रभेदजातं कायवाङ्मनःकर्मयोगः स आस्रवः; शुभः पुण्यस्य अशुभः पापस्येत्यादिना ग्रन्थसन्दर्भेण ससंरम्भमभाणि। अपरे त्वेवं मेनिरे आस्रवयति पुरुषं विषयेष्विन्द्रियप्रवृत्तिरास्रव इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् सृष्यङ्कुपादिज्ञानरूपेण परिणमत इति।

मिथ्यादर्शनाविरतिप्रमादकषायवशाद्योगवशाच्चात्मा सूक्ष्मैकक्षेत्रावगाहिनामनन्तान्तप्रदेशानां पुद्गलानां कर्मबन्धयोग्यानामादानसुपश्लेषणं यत् करोति स बन्धः। तदुक्तं सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते स बन्ध इति। तत्र कषायग्रहणं सर्वबन्धहेतूपलक्षणार्थम्। बन्धहेतून् प्रपाठ वाचकाचार्यः। मिथ्यादर्शनाविरतिप्रमादकषाया बन्धहेतव इति। मिथ्यादर्शनं द्विविधं मिथ्याकर्मोदयात् परोपदेशानपेक्षं तत्त्वश्रद्धानं नैसर्गिकमेकम् अपरं परोपदेशपूर्वम्। पृथिव्यादिषट्कायादानकं षड्विन्द्रियासंयमनश्च अविरतिः। पञ्चसमितिगुप्तिव्यतुत्साहः प्रमादः। कषायः क्रोधादिः। तत्र कषायान्ताः मिलितशुभाशुभबन्धहेतवः प्रकृतिप्रदेशबन्धहेतुर्योग इति विभागः। बन्धश्चतुर्विध इत्युक्तं प्रकृतिस्थित्यनुभावप्रदेशास्तु तद्विधय इति यथा निम्बगुडादेस्तिक्तत्वमधुरत्वादिस्वभावः एवमावरणीयस्य ज्ञानदर्शनावरणत्वमादित्यप्रभोच्छेदकाम्बोधरवत् प्रदीपप्रभातिरोधायककुम्भवच्च सदसद्वेदनीयस्य सुखदुःखोत्पादकत्वमसिधारामधुलेहनवद्दर्शनमोहनीयस्य तत्त्वार्थाश्रद्धानकारित्वं दुर्जनसङ्गवच्चारित्रे मोहनीयस्यासंयमहेतुत्वं मद्यमदवदायुषो देहबन्धकर्तृत्वं जलवत् नाम्नो विचित्रनामकारित्वं चित्रिकवल्लेचस्रोचनीचकारित्वं कुम्भकारवद्दानादीनां विघ्ननिदानलमन्तरायस्य स्वभावः कोष्ठागाराध्यक्षवत्। सोऽयं प्रकृतिबन्धोऽष्टविधः द्रव्यकर्मभावान्तरभेदमूलप्रकृतिवेदनीयः। तथाचोक्तमास्वातिवाचकाचार्यः; आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तराया इति तद्भेदश्च समग्रतः प्रपञ्चनवाशीतिशतचतुर्द्विपञ्चद्विपञ्चभेदा यथाक्रममिति। एतच्च सर्वं विद्यानन्दादिभिर्व्याख्यातमिति विस्तरभयान्न प्रस्तूयते। यथा अजागोमहिष्यादिक्षीरणामेतावत्तमनेहसं माधुर्यस्वभावादप्रच्युतिस्थितिः; तथा ज्ञानावरणादीनां मूलप्रकृतीनामादितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटिकोट्यः परास्थितिरित्यादुक्तं कालदुर्द्धानवत् स्वीयस्वभावादप्रच्युतिस्थितिः। यथा अजागोमोहिष्यादिक्षीराणां तीव्रमन्दादिभावेन स्वकार्यकरणे सामर्थ्यविशेषोऽनुभावः तथा कर्मपुद्गलानां स्वकार्यकरणे सामर्थ्यविशेषोऽनुभावः। कर्मभावपरिणतपुद्गलस्कन्धानामनन्तान्तप्रदेशानामात्मप्रदेशानुप्रवेशः प्रदेशबन्धः। आस्रवनिरोधः संवरः। येनात्मनि प्रविशत् कर्म प्रतिषिध्यते स गुप्तिसमित्यादिः संवरः। संसारकारणाद्योगादात्मनो गोपनं गुप्तिः। सा त्रिविधा कायवाङ्मनोनिमित्तहेदात्। प्राणिपीडापरिहारेण सम्यगयनं समितिः सा ईर्याभाषादिभेदात् पञ्चधा। प्रपञ्चितश्च हेमचन्द्राचार्यैः। लोकातिवाहिते मार्गे चलिते भास्वदंशुभिः। जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम्॥ आपद्य रागतः सर्वजनीनं मितभाषणम्। प्रिया वाचंयमानां सा भाषा समितिरुच्यते॥ द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम्। मुनिर्यदन्नमादत्ते सैषणासमितिर्मता॥ आसनादीनि संवीक्ष्य प्रतिलेख्य च यत्नतः। गृह्णीयान्निक्षिपेद्वायेत् सादानसमितिः स्मृता॥ कफमूत्रमलप्रायैर्निर्जन्तु जगतीतले। यत्नादुत्सृजतेत् साधुः सोत्सर्गसमितिर्भवेत्॥ अत एवास्रवः सोतसो द्वारं संवृणोतीति संवर इति निराहुः। तदुक्तमभियुक्तैः।

आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम्।
इतीयमार्हती मुष्टिरन्यदस्याः प्रपञ्चनम्॥

अर्जितस्य कर्मणस्तपःप्रभृतिभिर्निर्जरणं निर्जराख्यं तत्त्वं चिरकालप्रवृत्तक्षयोपशमं पुण्यं सुखदुःखे च देहेन जरयति नाशयति कैश्चोच्छ्वसनादिकं तप उच्यते। सा निर्जरा द्विविधा यथाकालौपक्रमिकभेदात् तत्र प्रथमा यस्मिन् काले यत् कर्म फलप्रदत्वेनाभिमतं तस्मिन्नेव काले फलदानाद्भवन्ती निर्जरा कामादिपाकेति च लेखीयते। यत् कर्म तपोबलात् सकामनयोदयावलिं प्रवेश्य प्रपद्यते तत कर्म निर्जरा। यदाह।

संसारबीजभूतानां कर्मणां जरणादिह।
निर्जरा संस्मृता देधा सकामा कामनिर्जरा॥
स्मृता सकामा यमिनामकामा सत्त्वदेहिनामिति॥

मिथ्यादर्शनादीनां बन्धहेतूनां निरोधः; अभिनवकर्माभावात् निर्जराहेतुसन्निधानेनार्जितस्य कर्मणो निरसनादात्यन्तिककर्ममोक्षणं मोक्षः; बन्धहेतुभवहेतुनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षणं मोक्ष इति तदनन्तरमूर्द्धं गच्छत्यालोकान्तात् यथा हस्तदण्डादिभिरभिप्रेरितं कुलालचक्रमुपरतेऽपि तस्मिन् तदनादेवासंस्कारक्षयं भ्रमति तथा भवक्षेणात्मना अपवर्गप्राप्तये बहुशो यत् हतं प्रणिधानं सुक्तस्य तदभावेऽपि पूर्वसंस्कारादालोकान्तं गमनमुपपद्यते यथा वा श्लिष्टालेपक्षतमलाबुद्रव्यं जलेऽधःपतति पुनरपेतल्लिप्तिकावन्धमूर्द्धं गच्छति तथा कर्मरहित आत्मा असङ्गत्वादूर्द्धं गच्छति बन्धच्छेदादेरण्डबीजवदूर्द्धगतिस्वभावाच्चाग्निशिखावत्। अग्नेर्ण प्रदेशानुप्रवेशे सत्यविभागेनावस्थानं बन्धः; परस्परप्राप्तिमात्रं सङ्गः। तदुक्तं पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथा गतिपरिणामाच्चाविरुद्धं कुलालचक्रवदव्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावदिति। अतएव पठन्ति।

गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः।
अद्यापि न निवर्तन्ते त्रैलोक्याकाशमागताः॥
इति।

अन्ये तु गतसमस्तक्लेशतद्धेतुसकलज्ञानावरणज्ञानस्य सुखैकतानस्यात्मन ऊर्ध्वगतेरवस्थानं मुक्तिरित्याख्यिषत। एवमुक्तानि सुखदुःखबाधनाभ्यां पुण्यपापाभ्यां सहितानि नव पदार्थान् केचनाङ्गीचक्रुः। तदुक्तं सिद्धान्ते जीवाजीवौ पुण्यपापयुतावास्रवः संवरो निर्जरणं बन्धो मोक्षश्च नव तत्त्वानीति। संग्रहे प्रवृत्ता वयमुपरताः स्म।

अत्र सर्वत्र सप्तभङ्गिनयाख्यां न्यायमवतारयन्ति जैनाः; स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः; स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः; स्यादस्ति च नास्ति चावक्तव्य इति तत्सर्वमनल्पबोधः प्रत्यपीपदत्। तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत्। स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते॥ क्रमेणोभयवाक्यायां प्रयोगः समुदायवाक्। युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः॥ आद्यावाक्यविवक्षायां पञ्चमो भङ्ग इष्यते। अन्त्यावाक्यविवक्षायां षष्ठभङ्गस्समुद्भवः॥ सप्तत्वेन मुक्तश्च सप्तमो भङ्ग उच्यत इति। स्याच्छब्दः स्वस्वयं निपातः तिङन्तप्रतिरूपको ऽनेकान्तद्योतकः। यथोक्तम्;

वाक्येष्वनेकान्तद्योतिगम्यं प्रति विशेषणम्।
स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपक इति॥

यदि पुनरेकान्तद्योतकः स्याच्छब्दोऽयं स्यात्तदा

स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् अनेकान्तद्योतकत्वे तु स्यादस्ति कथञ्चिदस्तीति स्यात्पदात् कथञ्चिदिति अयमर्थो लभ्यत इति नानर्थकम्। तदाह।
स्याद्वादः सर्व्वथैकान्तत्यागात् किं वृत्तचिद्विधेः।
सप्तभङ्गिनयापेक्षो हेयादेयविशेषकृदिति॥
यदि वस्त्वस्त्येकान्ततः सर्व्वथा सर्व्वदा सर्व्वत्र सर्व्वात्मनास्तीति न उपादित्सासंजिहासाभ्यां क्वचित् कदा केनचित् प्रवर्त्तेत निवर्त्तेत वा प्राप्तप्रापणीयत्वहेयहानानुपपत्तेश्च। अनेकान्तपक्षे तु कथञ्चित् क्वचित् केनचित् सत्त्वेन ज्ञानोपादाने प्रेक्षावतामनुपपत्तेते। किञ्च वस्तुनः सत्त्वं स्वभावः असत्त्वं वेत्यादि प्रश्नश्च न तावदस्तित्वं वस्तुनः स्वभाव इति समस्ति घटोऽस्तीत्यनयोः पर्य्यायतया युगपत्प्रयोगार्थायोगात् नास्तीति प्रयोगविरोधाच्च एवमन्यत्रापि योज्यम्। यथोक्तम्।
घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः।
नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोः॥
इत्यादि॥
तस्मादित्थं वक्तव्यं सदसत्सदसदनिर्व्वचनीयवादभेदेन प्रतिवादिनश्चतुर्व्विधाः पुनरप्यनिर्व्वचनीयमतेनामिश्रितानि सदसदादिमतानीति त्रिविधाः तान् प्रति किं वस्त्वस्तीत्यादिपर्य्यनुयोगे कथञ्चिदस्तीत्यादिप्रतिवचनसम्भवेन ते वादिनः सर्व्वे निर्व्विण्णाः सन्तः तूष्णीमासत इति सम्पूर्णार्थविनिश्चायिनः स्याद्वादमञ्जरीकुर्व्वतस्तत्र तत्र विजय इति सर्व्वमुपपन्नम्। यदवोचदाचार्य्यः स्याद्वादमञ्जर्य्याम्।
अनेकान्तात्मकं वस्तु गोचरः सर्व्वसंविदाम्।
एकदेशविशिष्टोऽर्थो न यस्य विषयो मतः॥
आप्तागमैकनिष्ठानां प्रवृत्तौ श्रुतवर्त्मनि।
सम्पूर्णार्थविनिश्चायि स्याद्वादश्रुतमुच्यत इति॥
अन्योन्यपक्षप्रतिपक्षभावाद्-
यथापरे मत्सरिणः प्रवादाः।
नयानशेषानविशेषमिच्छ-
न्नपक्षपाती समयस्तथार्हत इति॥
जिनदत्तसूरिणा जैनं मतमित्थमुक्तम्।
बन्धभोगोपभोगानामुभयोर्द्धनलाभयोः।
अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सितम्॥
हिंसा रत्यरती रागद्वेषौ मिथ्यात्वमेतेऽष्टादश दोषा नयस्य सः॥
जिनो देवो गुरुः सम्यक् तत्त्वज्ञानोपदेशकः।
ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्त्मनि॥
स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षमनुमापि च।
नित्यानित्यात्मकं सर्व्वं नव तत्त्वानि सप्त वा॥
जीवाजीवौ पुण्यपापे चास्रवः संवरोऽपि च।
बन्धो निर्ज्जरणं मुक्तिरेषां व्याख्याधुनोच्यते॥
क्षितनालत्वयो जीवः स्यादजीवस्तदन्यकः।
सत्कर्म्मपुद्गलाः पुण्यं पापं तस्य विपर्य्ययः॥
आस्रवः कर्म्मणां बन्धो निर्ज्जरस्तद्वियोजनम्।
अष्टकर्म्मचयान्मोक्षोऽन्तर्भावश्च केषुचित्॥
पुण्यस्य संसवे पापस्यास्रवे क्रियते पुनः।
लब्धानन्तचतुष्कस्य लोकाग्रस्थस्य चात्मनः।
चीणाष्टकर्म्मणो मुक्तिर्निर्व्याबाधत्तिर्ज्जिनोदिता॥
सरजोहरणा भैक्षसुजो लुञ्चितमूर्द्धजाः।
श्वेताम्बराः क्षमाशीलाः निःसङ्गा जैनसाधवः॥
लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः।
ऊर्द्धाग्निनो गृहे दातुर्द्वितीयाः क्षुल्लिकार्यकाः॥
मुङ्क्ते न केवलं न स्त्री मोक्षमेति दिगम्बरः।
प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सहेति॥"
इति सर्व्वदर्शनसंग्रहे आर्हतदर्शनम्॥)
जैपालः, पुं, (जयपालः पृषोदरादित्वात् साधुः।) जयपालवृक्षः। इति द्विरूपकोषः॥
जैमिनिः, पुं, मुनिविशेषः। स वेदव्यासशिष्यः उत्तरमीमांसाकर्त्ता भारतकृत् वक्ष्यवारकश्च। यथा, पुराणवचनम्।
"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च।
पुलस्त्यः पुलहश्चैव पक्षैते वक्ष्यवारकाः॥"
जैवालकः, पुं, (जीवयति ओषधिप्रभृतीनीति। जीव+णिच्+"आलकन् वृद्धिश्च।" उणां। १।८१। इति आलकन् ईकारस्य वृद्धिश्च।) चन्द्रः। कर्पूरः। इत्यमरः। १। ३। १४, २। ६। १३०॥ पुन्नः। इति संक्षिप्तसारे उणादिवृत्तिः॥ भेषजम्। इति हेमचन्द्रः॥
जैवालकः, त्रि, (जीवतीति। जीव+आलकन् वृद्धिश्च।) दीर्घायुः। (यथा, दशकुमारचरिते। "जैवालक! ननु श्रूयते प्रतिरथ्याः मिथिलायां प्रहारवर्म्मासीत्॥") क्षुद्रः। इति मेदिनी। के, १६०॥
जैह्मं, क्ली, (जिह्मस्य कुटिलस्य भावः। जिह्म+भावे ष्यञ्।) जिह्मता। कुटिलता। यथा, मनुः। ११। ६७।
"जैह्मं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम्॥"
जोङ्गकं, क्ली, (जुङ्गति त्यजति शङ्खमिति। जुङ्गि त्यागे+ण्वुल्। निपातनात् गुणः।) अगुरु। इत्यमरः। २। ६। १२६॥
जोङ्गटः, पुं, (जुङ्गति अरोचकत्वं परित्यजत्यनेनेति। जुङ्ग+बाहुलकात् अटन् गुणश्च।) गर्भिण्यभिलाषः। इति हारावली। २१६॥ साधु इति भाषा॥
जोटिङ्गः, पुं, (जूटेन इङ्गति प्रकाशते इति। अच्। पृषोदरादित्वात् साधुः।) महादेवः। महाव्रती। इति चिकाण्डशेषः॥
जोन्नाला, स्त्री, देवधान्यम्। इति हेमचन्द्रः। ४। २४४॥ (जोम्नाला इति क्वचित् पाठः॥)
जोषं, क्ली, (जुष हर्षे+भावे घञ्।) सुखम्। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे १।१२०।१।
"का राधद्धोत्राश्विना वां को वां जोष उभयोः॥"
"जोषे प्रीतिजनके व्यवहारे।" इति दयानन्दभाष्यम्॥)
जोषम्, व्य, (जुष्+बाहुलकात् अम्।) तूष्णीम्। (यथा, महाभारते। २। ६८। १६।
"मैवमित्यब्रवीच्चैनं जोषमास्सेति भारत!॥") सुखम्। इत्यमरः। ३। ३। २५०॥
जोषा, स्त्री, (जुष्यते सेव्यते उपभुज्यते इति। जुष्+घञ्। स्त्रियां टाप्।) योषा। इति शब्दरत्नावली॥
जोषिका, स्त्री, (जुष्यते सेव्यते इति। जुष+ण्वुल्। टापि अत इत्वम्।) जालिका। इति शब्दरत्नावली॥
जोषित्, स्त्री, (जुष्यते उपभुज्यते। जुष्+"हलश्च इह्यधिभ्य इतिः।" उणां। १। ६६। इतिप्रत्ययः। पृषोदरादित्वात् यस्य जः।) योषित्। इति शब्दरत्नावली॥
जोषिता, स्त्री, (जोषित्+हलन्तत्वाद्वा टाप्।) योषित्। इति शब्दरत्नावली॥
ज्ञः, पुं, (जानातीति। ज्ञा+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) ब्रह्मा। बुधः। पण्डितः। (यथा, चरके सूत्रस्थाने ३० अध्याये।
"पशुः पशूनां दौर्ब्बल्यात् क्वचित् मध्ये वृकायते।
सत्त्वं वृकमासाद्य प्रकृतिं भजते पशुः॥
तद्वदज्ञो जगन्मध्यस्थः कश्चित् मौख्यसाधनः।
स्वापयत्यात्मनात्मानमात्मं ज्ञासाद्य भिद्यते॥")
महीसुतः। इति धरणी॥
ज्ञप, क म ज्ञप्तौ। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) क म, ज्ञपयति। ज्ञप्तिर्म्मारणालोकनिशाणतोषणस्तुतयः। ज्ञाकृ इत्यनेनैवेऽसिद्धौ ज्ञपपाटशुरादिरुभयपदीतिमते फलवत्कर्त्तरि परस्मैपदार्थः। इति धातुप्रदीपः। वस्तुतस्तु ज्ञप्तिपदमसादेव निष्पादितम्। तेन अनिर्द्दिष्टार्थतया ज्ञप्तिरिह ज्ञानम्। अतएव प्रक्ष्यौ ज्ञ ज्ञीप्से इत्यत्र अस्येव सनन्तस्य निष्पादितेन ज्ञीप्सशब्देन ज्ञातुमिच्छा प्रतिपाद्यते। एवं ज्ञानपर्य्याये प्रतिपत्ज्ञप्तिश्चेतनेत्यमरः। इति दुर्गादासः॥
ज्ञपितः, त्रि, (ज्ञप्यते स्मेति। ज्ञप+णिच्+क्तः।) ज्ञापितः। इत्यमरः। ३। १। ६८॥
ज्ञप्तः, त्रि, (ज्ञप्यते स्मेति। ज्ञप+णिच्+क्तः। "वा दान्तशान्तेति।" ७। २। २७। इति साधुः।) ज्ञापितः। इत्यमरः। ३। १। ६८॥
ज्ञप्तिः, स्त्री, (ज्ञप्यते ज्ञायतेऽनयेति। ज्ञप+भावे क्तिन्। इडभावः।) बुद्धिः। इत्यमरः। १। ५। १॥ (यथा, कथासरित्सागरे। २५। ५७।
"ततो दीर्घतपोवाक्यात् सम्भाव्य द्वीपगाश्च ताम्।
तज्ज्ञप्तये दाशपतेरुत्स्थलद्वीपवासिनः॥")
ज्ञा, क प्रेरणे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) प्रेरणमिह नियोजनम्। क, ज्ञापयति भृत्यं स्वामी नियुक्तं करोतीत्यर्थः। इति दुर्गादासः॥
ज्ञा, क म मारणे। आलोके। निशाने। तोषणे। स्तुतौ। इति कविकल्पद्रुमः॥ (चुरां परं-सकं-सेट्।) क म, ज्ञपयति। अज्ञपि अज्ञापि ज्ञपं ज्ञप

ज्ञापं ज्ञापम्। आलोको दर्शनप्रेरणम्। निष्ठार्थं तिरस्कारणम्। तोषणं तुष्टीकरणम्। ज्ञपयति शत्रुं शूरो मारयतीत्यर्थः। ज्ञपयति रूपं कामिनी भिङ्गान् दर्शयतीत्यर्थः। ज्ञपयति खड्गं कर्मकारः शाणयतीत्यर्थः। ज्ञपयति गुरुं शिष्यस्तोषयतीत्यर्थः। स्तुतिः केचिन्न मन्यते। आलोको ज्ञानप्रेरणमित्यनुन्यास-रक्षितौ। अतएव क्रमदीश्वरोऽपि जानाते-र्घटादिवत् विभाषया मन्यते। तेन ज्ञपयितुं बोधयितुमिच्छामाणो ज्ञीप्समान इति पाणिनीय-वृत्तौ ज्ञानप्रेरणापि इच्छे सनि ज्ञीप्समान इति प्रसिद्धम्। एवं विज्ञप्तिरेषा मम जीववन्धौ इत्यादिषु च विज्ञापनमेवार्थः। इति दुर्गादासः॥

ज्ञा, ग बोधे। इति कविकल्पद्रुमः॥ (क्र्या-परं-सकं-अनिट्।) ग, जानाति। "सन्दर्भशुद्धिं गिरां जानीते जयदेव एवेत्यत्र अनुपसर्गात् फलवत्कर्मण्यात्मनेपदम्। ततोऽनुजज्ञे गमनं सुतस्य इत्यत्रानुशब्दस्योपसर्ग प्रतिरूपकत्वेना-नुपसर्गत्वात्॥" इति दुर्गादासः॥

ज्ञातं, त्रि, (ज्ञायते विद्यते स्मेति। ज्ञा+कर्मणि क्तः।) श्रुतज्ञानम्। जाना इति भाषा। तत्-पर्य्यायः। विदितम् २ बुद्धम् ३ बुधितम् ४ प्रमितम् ५ मतम् ६ प्रतीतम् ७ अवगतम् ८ मनितम् ९ अवसितम् १०। इति जटाधरः॥ (यथा, पञ्चतन्त्रे। १। १२३।
"पूर्व्वमेव मया ज्ञातं पूर्व्वमेतद्धि मेदसा॥")

ज्ञातव्यं, त्रि, (ज्ञायते यदिति। ज्ञा+तव्य।) ज्ञानीयम्। ज्ञेयम्। वेद्यम्। अवगन्तव्यम्। बोधम्। (यथा, महाभारते। ४। २८। ५।
"स्वराष्ट्रे परराष्ट्रे च ज्ञातव्यं बलमात्मनः॥")
मन्तव्यम्। इति व्याकरणम्॥

ज्ञातसिद्धान्तः, पुं, (ज्ञातो विदितः सिद्धान्तः शास्त्रतत्त्वार्थो येन।) शास्त्रतत्त्वज्ञः। तत्-पर्य्यायः। तान्त्रिकः २। इत्यमरः। २। ८। १५॥

ज्ञाता, [तृ] त्रि, (ज्ञा+तृच्।) ज्ञानशीलः। तत्-पर्य्यायः। विदुरः २ विन्दुः ३। इत्यमरः। ३। १। ३०॥ विदितः ४ ज्ञानसमन्वितः ५। इति शब्दरत्नावली॥

ज्ञातिः, पुं, जानाति छिन्नं कुलस्थितिञ्च ज्ञातिः नान्नीति तिक्। इत्यमरटीकायां भरतः॥ सपिण्डादिः। तत्पर्य्यायः। सगोत्रः २ बान्धवः ३ बन्धुः ४ स्वः ५ स्वजनः ६। इत्यमरः। २। ६। ३४॥ अंशकः ७ गन्धः ८ दायादः ९। इति त्रिकाण्ड-शेषः॥ सकुल्यः १० समानोदकः ११। इति जटाधरः॥ स चतुर्व्विधः। सप्तमपुरुषपर्य्यन्तं सपिण्डः। ततश्चतुर्थपुरुषपर्य्यन्तं सकुल्यः। तत-श्चतुर्थपुरुषपर्य्यन्तं समानोदकः। जन्मनामस्मृति-पर्य्यन्तमपि समानोदकः। ततः परं गोत्रजः। इति शुद्धितत्त्वम्॥ एषां विशेषस्तच्छब्दे द्रष्टव्यः॥*॥
ज्ञातिद्रोहे दोषो यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे।
"यानि कानि च पापानि ब्रह्महत्यादिकानि च।
ज्ञातिद्रोहस्य पापस्य कलां नार्हन्ति षोड़शीम्॥"
(ज्ञायते विद्यतेऽस्मादिति। ज्ञा+अपादाने क्तिन्।) पिता। इति मेदिनी। ते, २०॥

ज्ञातेयं, क्ली, (ज्ञातेर्भावः कर्म्म वा। ज्ञाति+"कपिज्ञात्योर्ढक्।" ५। १। १२७। इति ढक्।) ज्ञातित्वम्। इत्यमरः। २। ६। ३५॥

ज्ञानं, क्ली, (ज्ञा+भावे ल्युट्।) विशेषेण सामान्येन चावबोधः॥
"मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।"
इत्यमरः। १। ५। ६॥
अस्यार्थः। "मोक्षे शिल्पे शास्त्रे च या धीः सा ज्ञानं विज्ञानञ्चोच्यते एषा विशेषप्रवृत्तिः। अन्यत्र घटपटादौ या धीः सापि ज्ञानं विज्ञान-ञ्चोच्यते एषा सामान्यप्रवृत्तिः। मोक्षे धीर्ज्ञानं विज्ञानञ्च यथाज्ञानान्मुक्तिरिति सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति इति। अन्यत्र यथा ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे इति घटत्वप्रकारकज्ञानमिति ये केचित् प्राणिनो लोके सर्व्वे विज्ञानिनो मताः इति। ब्रह्मणो नित्यविज्ञानानन्दरूपत्वादिति एवं चित्रज्ञानं व्याकरणज्ञानं घटपटादिविज्ञानमित्यादिकं प्रयु-ज्यत एव। मोक्षनिमित्तं शिल्पशास्त्रयोर्धी-र्ज्ञानमुच्यते तन्निमित्ततोऽन्यनिमित्तं या तयोर्धीः सा विज्ञानमिति केचित्। मोक्षविषया मोक्ष-फला धीर्ज्ञानं अन्यधीर्विज्ञानं क्वान्यत्र इत्याह शिल्पशास्त्रयोरिति केचित्। अवबोध इत्य-थाहृत्य मोक्षविषये अवबोधो धीः अन्यत्र घटपटादिविज्ञानं शिल्पशास्त्रविषये विज्ञान-मिति केचित्।" इति भरतः॥ * ॥ योगशास्त्र-मते तु।
"एकत्वं बुद्धिमनसोरिन्द्रियाणाञ्च सङ्ग्रहः।
आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम्॥"
इति मोक्षधर्म्मः॥
"एकत्वं बुद्धिमात्रेणावस्थानं बुद्धिवृत्तिनिरोध इति यावत्।" इति तट्टीका॥ * ॥
"अमानित्वमदम्भित्वमहिंसाक्षान्तिरार्जवम्।
आचार्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥"
सात्त्विकराजसतामसभेदेन तत्त्रिविधम्।
सात्त्विकं यथा,—
"सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥"
राजसं यथा,—
"पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्वि-धान्।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥"
तामसं यथा.—
"यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्॥" ३॥
इति श्रीभगवद्गीतायाम्। १८। २०—२२॥
"सर्व्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु विभक्तेषु परस्परं व्यावृत्तेषु अविभक्तमनुस्यूतं एकमव्ययं निर्व्विकारं भावं परमात्मतत्त्वं येन ज्ञानेनेक्षते आलोचयति तज्ज्ञानं सात्त्विकं विद्धि॥ १॥
सर्व्वेषु भूतेषु नानाभावान् वस्तुत एवानेकान् क्षेत्रज्ञान् पृथग्विधान् सुखिदुःखित्वादिरूपेण विलक्षणान् येन ज्ञानेन वेत्ति तज्ज्ञानं राजसं विद्धि॥ २॥
एकस्मिन् कार्य्ये देहे प्रतिमादौ वा कृत्स्नवत् परिपूर्णवत् सक्तं एतावानेव आत्मा ईश्वरो वा इत्यभिनिवेशयुक्तं अहैतुकं निरूप-पत्तिकं अतत्त्वार्थवत् परमार्थालम्बनशून्यं अत-एवाल्पं तुच्छं अल्पविषयत्वात् अल्पफलत्वाच्च यदेवम्भूतं ज्ञानं तत् तामसमुदाहृतम्॥" ३॥
इति तट्टीकायां श्रीधरस्वामी॥
न्यायमते तु।
"अप्रमा च प्रमा चैव ज्ञानं द्विविधमुच्यते।
तत्रूप्ये तन्मतिर्या स्यादप्रमा सा निरूपिता॥
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः।
आद्यो देहे आत्मबुद्धिः शुक्त्यादौ रौतिमा मतिः॥
भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते।
किं स्विन्नरो वा स्थाणुर्व्वेत्यादि बुद्धिस्तु संशयः।
तदभावाप्रकारा धीस्तत्प्रकारा तु निर्णयः॥
स संशयो भवेदूया धीरेकत्राभावभाववोः।
साधारणादिधर्म्मस्य ज्ञानं संशयकारणम्॥
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्।
पित्तदूरत्वादिरूपो दोषो नानाविधो मतः॥"
"गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा।
अथवा तत्प्रकारं यज्ज्ञानं तद्धृत विशेष्यकम्॥
ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते।
तत् प्रमा न प्रमा नापि भ्रमः स्यान्निर्व्विकल्पकम्॥
प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्॥"
इति भाषापरिच्छेदः॥
(यथा, वायुपुराणे उत्तरभागे। ११। ३६।
"वैराग्याज्जायते ज्ञानं ज्ञानाद्योगः प्रवर्त्तते।
योगज्ञः प्रतितो वापि मुच्यते नात्र संशयः॥"
विष्णुः। यथा महाभारते। १३। १४६। ६१।
"सर्व्वदर्शी विमुक्तात्मा सर्व्वज्ञो ज्ञानमुत्तमम्॥"
"ज्ञानं प्रलयमजन्यमनवच्छिन्नं सर्व्वस्य साधक-मिति ज्ञानमुत्तमं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः॥" इति तद्भाष्यम्॥)

ज्ञानदर्पणः, पुं, (ज्ञानं दर्पण इव यस्य।) पूर्व्व-जिनः। इति त्रिकाण्डशेषः।

ज्ञानयोगः, पुं, (युज्यते ब्रह्मणानेनेति। युज+करणे घञ्। ज्ञानमेव योगः।) ब्रह्मज्ञान-प्राप्त्युपायः। यथा,—
"सर्व्वभूतेषु गोविन्दो बहुरूपो व्यवस्थितः।
इति मत्वा महाप्राज्ञः प्रतिकूलं न कारयेत्॥

शब्दादयो ये विषया विषयी चाथ पूरुषः। ज्ञानीयात्तदग्रेसरं वै स्वरूपं परमात्मनः॥ परमात्मा च भगवान् विश्वकर्त्तेनो जनार्द्दनः। तद्भक्तिमान् भगवतो नाल्पपुण्यैर्हि जायते॥ भगवच्छासनालम्बी भगवच्छासनप्रियः। भगवद्भक्तिमास्थाय वत्स! भागवतो भव॥ भगवान् भूतभव्येशो भूतादिप्रभवोऽव्ययः। भावेन तं भजस्वेशं भवभङ्गकरं हरिम्॥ भजस्व भावेन विभुं भगवन्तं भवेश्वरम्। ततो भागवतो भूत्वा भवस्यान्तं प्रयोत्स्यसि॥ तत्र चित्तं समाधातुं न शक्नोति भवान् यदि। तदभ्यासपरस्तस्मिन् कुरु योगं दिवानिशम्॥ तत्र यत्नस्समर्थ्यं ज्ञानयोगे महामते!। क्रियायोगे दिवारात्रौ तत्परः सततं भव॥" इत्यादौ वह्निपुराणे वैष्णवक्रियायोगे यमानुशासनो नामाध्यायः। विस्तारस्तु श्रीभगवद्गीतायां ७ अध्यायेऽवसेयः॥

ज्ञानलक्षणा स्त्री, (ज्ञानं लक्ष्यं स्वरूपं यस्याः।) त्रिविधालौकिकसन्निकर्षान्तर्गतसन्निकर्षः। तस्य लक्ष्यं यथा,—

"विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः॥"

इति भाषापरिच्छेदे। ६५॥

अस्यार्थः।"तद्विषयज्ञानजनकतद्विषयज्ञानम्। यथा पूर्व्वं घटादिज्ञाने सति पश्चात् घटादिज्ञानम्॥"

ज्ञानवापी, स्त्री, (ज्ञानस्य ज्ञानरूपोदकस्य वापी दीर्घकेव।) वाराणस्यन्तर्गततीर्थविशेषः। तदुत्पत्त्यादिर्यथा,—

अगस्त्य उवाच।

"स्कन्द! ज्ञानोदतीर्थस्य माहात्म्यं वद साम्प्रतम्। ज्ञानवापीं प्रशंसन्ति यतः स्वर्गौकसोऽप्यलम्॥

स्कन्द उवाच।

घटोद्भव! महाप्राज्ञ! शृणु पापापनोदिनीम्। ज्ञानवाप्याः समुत्पत्तिं कथ्यमानां मयाधुना॥ व्यतीतेषिद्धे संसारे पुरा देवयुगे मुने!। प्रायः कृतघ्नदीक्षानचरन् खेरमितस्ततः॥ न वर्षन्ति यदाभ्राणि न प्रावर्त्तन्त निम्नगाः। जलाभिलाषो न यदा स्नानपानादिकर्म्मणि॥ क्षारखादूदयोरेव यदासीज्जलदर्शनम्। पृथिव्यां नरसञ्चारे वर्त्तमाने क्वचित् क्वचित्॥ निर्व्वाणकमलाक्षेत्रं श्रीमदानन्दकाननम्॥" "सुखसन्तानजनकं मोक्षसाधनसिद्धिदम्। प्रविश्य क्षेत्रमेतत् स ईशानो जटिलस्तदा। जगन्मूलविमलरश्मिजालसमाकुलः॥ आकुलोके महालिङ्गं वैकुण्ठपरमेष्ठिनोः। महाहमहमिकायां प्रादुरास यदादितः॥ ज्योतिर्म्मयीभिर्म्मालाभिः परितः परिवेष्टितम्॥" "अस्मेशानस्य तल्लिङ्गं इति ख्येत्यभवत्तदा। स्थापयामि महालिङ्गं कलशैः प्रीतलेजसैः। पश्चान्न च त्रिशूलेन दक्षिणाग्रोपकल्पतः॥ कृत्वं प्रचण्डवेगेन रुद्रो रुद्रवपुर्द्धरः। पृथिव्यां वह्वयाभासि निष्क्रान्तानि तदा मुने॥ भूप्रमाणाद्गुणैर्यैरियं वसुधादृता। तैर्जलैः स्नापयाञ्चक्रे त्वसृष्टैरन्यदेहिभिः॥" "विश्वभर्त्तुरुमास्पर्शसुखातिसुखकारिभिः। महावभ्रुथसुस्नानमहाशुद्धिविधायिभिः॥ सहस्रधारैः कलशैः स ईशानो घटोद्भव!। सहस्रलक्षैः स्नपयामास संहृष्टमानसः॥ ततः प्रसन्नो भगवान् विश्वात्मा विश्वलोचनः। तस्मवाच तदेशानं रुद्रं रुद्रवपुर्द्धरम्॥ तव प्रसन्नोऽस्मीशान! कर्म्मणानेन सुव्रत! गुरुज्ञानन्यपूर्व्वेण समातिप्रीतिकारिणा॥ ततस्त्वं जटिलेशान! वरं ब्रूहि तपोधन!। अदेयं न तवास्त्यद्य महोद्यमपरायण!॥

ईशान उवाच।

यदि प्रसन्नो देवेश! वरयोग्योऽस्म्यहं यदि। तदेतदतुलं तीर्थं तव नाम्नास्तु शङ्कर!॥

विश्वेश्वर उवाच।

त्रिलोक्यां यानि तीर्थानि भूर्भुवःस्वःस्थितान्यपि। तेभ्योऽखिलेभ्यस्तीर्थेभ्यः शिवतीर्थमिदं परम्॥ शिवं ज्ञानमिति ब्रूयुः शिवशब्दार्थचिन्तकाः। तच्च ज्ञानं द्रवीभूतमिह मे महिमोदयात्॥ यतो ज्ञानोदनामैतत्तीर्थं त्रैलोक्यविश्रुतम्। अस्य दर्शनमात्रेण सर्व्वपापैः प्रमुच्यते॥ ज्ञानोदतीर्थसंस्पर्शाद्ब्रह्महत्यावधपातकं लभेत्। स्पर्शनाचमनाभ्याञ्च राजसूयाश्वमेधयोः॥ फलमुक्तीर्थे नरः स्नात्वा सन्तर्प्य तु पितामहान्। यत् फलं समवाप्नोति तदत्र श्राद्धकर्म्मणा॥" "ज्ञानरूपोऽहमेवात्र द्रवमूर्त्तिं विधाय च। आद्यविध्वंसनं कुर्य्यां कुर्य्यां ज्ञानोपदेशनम्॥ इति दत्वा वरान् शम्भुस्तत्रैवान्तरधीयत। कृतकृत्यमिवात्मानं सोऽप्यमंस्त त्रिशूलभृत्॥ ईशानो जटिलो रुद्रस्तत् प्राश्य परमोदकम्। अवाप्तवान् परं ज्ञानं येन निर्व्वृतिमाप्तवान्॥"

इति स्कान्दे काशीखण्डे ३३ अध्यायः॥

ज्ञानी, [न्] पुं, (ज्ञानमस्त्यस्येति। ज्ञान+ "अत इनिठनौ।"५।२।११५। इति इनिः।) देवज्ञः। (सामान्यबोधयुक्तमात्रे, त्रि। यथा, मार्कण्डेये। ८१। ३६।

"ज्ञानिनो मनुजाः सत्यं किन्तु ते नहि केवलम्। यतो हि ज्ञानिनः सर्व्वे पशुपक्षिमृगादयः॥") ज्ञानयुक्ते च, त्रि। इति मेदिनी। ते, ६८॥

तस्य लक्षणं यथा,—

"प्रजहाति यदा कामान् सर्व्वान् पार्थ! मनोगतान्। आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥ यः सर्व्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्। नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥ यदा संहरते चायं कर्म्मोऽङ्गानीव सर्व्वशः। इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥"

ज्ञानिनामपि कर्म्म कर्त्तव्यम्। यथा,—

"सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत! कुर्य्याद्विद्वांस्तथा सक्तश्चिकीर्षुर्लोकसङ्ग्रहम्॥ न बुद्धिभेदं जनयेदज्ञानां कर्म्मसङ्गिनाम्। योजयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन्॥ प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः। अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते॥ तत्त्ववित्तु महाबाहो! गुणकर्म्मविभागयोः। गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते॥"

ज्ञानिप्रशंसा यथा.—

"चतुर्व्विधा भजन्ते मां जनाः सुकृतिनोऽर्জ্জুন!। आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ!॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते। प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥ उदाराः सर्व्व एवैते ज्ञानी त्वात्मैव मे मतम्। आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्॥ बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते। वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः॥"

इति श्रीभगवद्गीता॥

ज्ञानेन्द्रियं, क्ली, (ज्ञायतेऽनेनेति। ज्ञा+करणे ल्युट्। ज्ञानप्रकाशकं ज्ञानसाधनं वा इन्द्रियमिति।) बुद्धीन्द्रियम्। तत् षड्विधम्। मनः १ नेत्रम् २ श्रोत्रम् ३ घ्राणम् ४ जिह्वा ५ त्वक् ६। इति श्रीभागवतम्॥

ज्ञापनं, क्ली, (ज्ञा+णिच्+भावे ल्युट्।) बोधनम्। इति व्याकरणम्। जानान इति भाषा॥ (यथा, राजतरङ्गिण्याम्। ४। १८२।

"क्षितिभृद्दार्ढ्यविज्ञात्यानां तिर्य्यक्त्वज्ञापनाय सः। पुच्छं महीतलस्पर्शि चक्रे कौपीनवाससि॥")

ज्ञाप्तिः, स्त्री, (ज्ञा+णिच्+भावे क्तिन्।) ज्ञापनम्। इति सुग्धबोधम्॥

ज्ञेयं, त्रि, (ज्ञायते इति। ज्ञा+कर्म्मणि यत्।) ज्ञानयोग्यम्। ज्ञातव्यम्। यथा,—

"ज्ञेयं यत् तत् प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते। अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते॥ सर्व्वतः पाणिपादं तत् सर्व्वतोऽक्षिशिरोमुखम्। सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति॥ सर्व्वेन्द्रियगुणाभासं सर्व्वेन्द्रियविवर्জ্জितम्। असक्तं सर्व्वभृच्चैव निर्गुणं गुणभोक्तृ च॥ बहिरन्तश्च भूतानामचरं चरमेव च। सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत्॥ अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम्। भूतभर्त्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च॥ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते। ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य धिष्ठितम्॥ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः। मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते॥"

इति श्रीभगवद्गीतायां १३ अध्यायः॥

ज्या, शि जरायाम्। इति कविकल्पद्रुमः॥ (ज्यां-परं-अक-अनिट्।) जरा गतवयोभावः। शि, जिनाति हन्ति। जीनः। इति दुर्गादासः॥

ज्या, स्त्री, (ज्या+अन्येभ्योऽपीति ङीप्।) धनुर्गुणः। तत्पर्य्यायः। मौर्व्वी २ शिञ्जिनी ३ गुणः ४ इत्यमरः। २। ८। ८५॥ शिञ्जा ५ जीवा ६

पतत्रिका ७। इति शब्दरत्नावली ॥ गया ८ वाणासनः ९ द्रुणा १० । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । २२६ । २० ।
"जग्राह बलमास्थाय ज्यया च युयुजे धनुः ॥")
माता । वसुधा । इति मेदिनी । ये, २ ॥

ज्यानिः, स्त्री, (ज्या + "वीज्याज्वरिभ्यो निः ।" उणा ४ । ४८ । इति निः ।) जीर्णता । हानिः । तटिनी । इति शब्दरत्नावली ॥

ज्यायान्, [स्] त्रि, (अयमनयोरतिशयेन वृद्धः प्रशस्यो वा इति । वृद्ध वा प्रशस्य + ईयसुन् ज्यादेशश्च ततो "ज्यादादीयसः ।" ६ । ४ । १६० । इत्यात्वम् ।) वृद्धतमः । तत्पर्य्यायः । वर्षीयान् २ दशमी ३ प्रशस्यः ४ । इत्यमरः । २ । ६ । ४३ ॥ अतिवृद्धः ५ दशमीस्थः ६ । इति जटाधरः ॥ (यथा, मनुः । ३ । १३७ । [पिता ॥")
"ज्यायांसमनयोर्विद्यात् यस्य स्याच्छ्रोत्रिय-
ज्यु, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ।) ङ, व्यवते । इति दुर्गादासः ॥

ज्युत, इर् दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) इर्, अज्युतत् अज्योतीत् जुज्योत । इति दुर्गादासः ॥

ज्युत, ऋ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) अन्तःस्थादियुक्तः । ऋ, अजुज्योतत् । ङ, ज्योतते चन्द्रः । इति दुर्गादासः ॥

ज्येष्ठः, त्रि, (अयमेषामतिशयेन वृद्धः प्रशस्यो वा इति । वृद्ध वा प्रशस्य + इष्ठन् ततो ज्यादेशः ।) अतिवृद्धः । श्रेष्ठः । (यथा, महाभारते । १३ । १४३ । ७ ।
"ज्येष्ठं वर्णमनुप्राप्य तस्माद्रक्षेत वै द्विजः ॥"
ज्येष्ठानक्षत्रयुक्ता पौर्णमासीलक्षण इति जेष्ठी सा अस्मिन् मासीति पुनरण् संज्ञापूर्व्वस्य विधेरनित्यत्वान्न वृद्धिः ।) ज्येष्ठमासि, पुं । इति मेदिनी । ठे, ५ ॥ अग्रजः । (यथा, रघुः । १२ । १६ ।
"दृढभक्तिरिति ज्येष्ठे राज्यलक्षणापराङ्मुखः ॥")
अधिकवयाः । इति भरतः ॥

ज्येष्ठतातः, पुं, (तातस्य पितुर्ज्येष्ठः । राजदन्तादिलात् पूर्व्वनिपाते साधुः ।) पितुरग्रजः । इति शब्दरत्नावली ॥ ज्येठा इति भाषा ॥

ज्येष्ठवर्णः, पुं; (वर्णानां ज्येष्ठः श्रेष्ठः निर्द्धारणे तु वर्णेषु ज्येष्ठः । पूर्व्वनिपातः ।) ब्राह्मणः । इति शब्दरत्नावली ॥

ज्येष्ठवला, स्त्री, (ज्येष्ठाख्या बला ।) सहदेवी । इति राजनिर्घण्टः ॥

ज्येष्ठश्वश्रूः, स्त्री, (ज्येष्ठा पूज्या श्वश्रूरिव संज्ञात्वात् पुंवद्भावः ।) पत्न्या ज्येष्ठभगिनी । बड़ननाली इति भाषा । तत्पर्य्यायः । कुली २ । इति हेमचन्द्रः ॥

ज्येष्ठसाम, [न्] क्ली, (ज्येष्ठं साम इति नित्यकर्म्मधारयः ।) सामभेदः । तदध्ययनाङ्गव्रतम् । इति मिताक्षरा ॥ (यथा, महाभारते । १२ । ३४८ । ३६ ।
"ज्येष्ठं नाम्नाभिविख्यातं ज्येष्ठसामव्रतो हरिः ॥")

ज्येष्ठा, स्त्री, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गताष्टादशनक्षत्रम् । सा तु शूकरदन्ताकृतितारकचित्रयात्मिका । इति कालिदासः ॥ वलयाकृतिः । अस्या देवता इन्द्रः मिश्रगुणः । इति दीपिका ॥ अत्र जातस्य फलम् ।
"सत्कीर्त्तिपुत्रैर्विविधैः समेतो
वित्तान्वितोऽत्यन्तलसत्प्रतापः
श्रेष्ठप्रतिष्ठो विकलस्वभावो
ज्येष्ठा भवेद्यस्य च जन्मकाले ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
(यथा, मार्कण्डेयपुराणे । ३४ । १३ ।
"कुर्व्वन्त्यानुराधासु लभन्ते चक्रवर्त्तिताम् ।
आधिपत्यञ्च ज्येष्ठासु मूले चारोग्यसुत्तमम् ॥")
गृहगोधिका । इति मेदिनी । ठे, ५ ॥ मध्यमाङ्गुलिः । इति हेमचन्द्रः ॥ गङ्गा । इति राजनिर्घण्टः ॥ धीरादिनायिकाभेदः । तस्या लक्षणं यथा । परिणीतत्वे सति भर्त्तुरधिकस्नेहा । इति रसमञ्जरी ॥ * ॥ अलक्ष्मीः । यथा भगवतीं प्रति महादेववाक्यम् ।
"मां प्रणम्य पुनर्देवा ममन्थुः क्षीरसागरम् ।
तस्मिन् प्रमथ्यमाने तु मया देवैश्च भाविनि ! ॥
ज्येष्ठा देवी समुत्पन्ना रक्तस्रग्वाससावृता ।
उत्पन्ना साब्रवीद्देवान् किं कर्त्तव्यं मयेति वै ॥
तामब्रुवंस्तदा देवीं सर्व्वे देवगणा भृशम् ।
येषां गृहान्तरे नित्यं कलहं संप्रवर्त्तते ॥
तत्ते स्थानं प्रयच्छामो वासस्तत्र शुभानने ! ।
यस्य गेहे कपालास्थिभस्मकेशादिचित्रितम् ॥
परुषं भाषते नित्यं वदन्त्यनृतवादिनः ।
सन्ध्याकाले च ये पापाः स्वपन्ति मलचेतसः ॥
तेषां वेश्मनि संतिष्ठ दुःखदारिद्र्यदायिनी ।
कपालकेशभस्मास्थितुषाङ्गारानि यत्र तु ॥
तत्र ते सततं स्थानं भविष्यति न संशयः ।
अकृत्वा पादयोः शौचं यस्तत्रामति दुर्म्मतिः ॥
तं भजस्व सदा देवि ! कलुषेणावृता भृशम् ।
व्रणाङ्गारकपालाश्मवासुकायसचर्म्मभिः ॥
दन्तधावनकर्त्तारो भविष्यन्ति नराधमाः ।
रमस्व कलिना देवि ! तेषां वेश्मसु नित्यशः ॥
तिलपिण्याकलशुनकालिङ्गशिग्रुगञ्जनम् ।
छत्राकं विड्वराहञ्च विल्वकोषातकीफलम् ॥
अलाबुश्लीफलं ये वै खादयन्ति नराधमाः ।
तेषां गृहे तव स्थानं देवि ! दारिद्र्यदे ! सदा ॥
इत्यादिश्य सुराः सर्व्वे ते ज्येष्ठां कलिवल्लभाम् ।
पुनश्च मन्थनं चक्रुः क्षीराब्धिं सुसमाहिताः ॥"
इति पाद्मे उत्तरखण्डम् ॥

ज्येष्ठामूलीयः, पुं, (ज्येष्ठां मूलां वा नक्षत्रमर्हति पौर्णमास्यामिति छः ।) जेष्ठमासः । इति त्रिकाण्डशेषः ॥ (यथा, ग्रन्थार्थचिन्तामणिः ।
"ज्येष्ठामूलीयमिच्छन्ति मासमाषाढपूर्व्वजम् ॥")

ज्येष्ठाम्बु, क्ली, (ज्येष्ठं विविधरोगविनाशकत्वात् श्रेष्ठं अम्बु तण्डुलधौतं जलमिति । नित्यकर्म्मधारयः ।) तण्डुलाम्बु । इति वैद्यकपरिभाषा ॥ चेलुनि जल इति भाषा ॥

ज्येष्ठाश्रमी, [न्] पुं, (आश्रमोऽस्यास्य इति । आश्रम + इनिः । ज्येष्ठः श्रेष्ठ आश्रमी ।)
"ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्ताः सर्व्वे गार्हस्थ्यमूलकाः ॥"
"यथा वायुं समाश्रित्य वर्त्तन्ते सर्व्वजन्तवः ।
तथा गार्हस्थ्यमाश्रित्य वर्त्तन्ते सर्व्व आश्रमाः ॥"
इति वचनाच्च गृहस्थाश्रमस्य सर्व्वाश्रमेषूत्कृष्टत्वात् तथात्वम् ।) गृहस्थः । इति हेमचन्द्रः ॥

ज्येष्ठी, स्त्री, गृहगोधा । जेठी इति टिकटिकी इति च भाषा । तत्पर्य्यायः । मुसली २ मुसलीश कुक्षिमत्स्या ४ गृहगोधिका ५ [illegible] ६ टुक्टुकी ७ शुक्लनखा ८ गृहापिका ९ । इति शब्दरत्नावली ॥ तस्याः पतनफलं यथा,—
"निपतति यदि पत्नी दक्षिणाङ्गे नराणां
स्वजनधनवियोगो लाभदा वामभागे ।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणकृदिस्था सर्व्वसौख्यं ददाति ॥"
इति ज्योतिषम् ॥
दिग्विशेषे तस्य शब्दफलम् ।
"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं
याम्यामग्निभयं सुरद्विषि कलिर्लाभः ससुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं दिश्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने ॥
ज्येष्ठीरुते च्युतेऽप्येवमूचुः केचिच्च कोविदाः ॥"
इति तिथ्यादितत्त्वम् ॥

ज्येष्ठः, पुं, (ज्येष्ठानक्षत्रयुक्ता पौर्णमासीलक्षण ङीप् च । सा अस्मिन् मासे इति पुनरण् ।) मासविशेषः । जेष्ठानक्षत्रयुक्ता पौर्णमासी जेष्ठी सा यत्र मासे भवति सः । वृषस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तचान्द्रः । वृषराशिस्थरविकः सौरः । इति स्मृतिः ॥ तत्पर्य्यायः । शुक्रः २ । इत्यमरः । १ । ४ । १६ ॥ ज्येष्ठः ३ । इति शब्दरत्नावली ॥ तत्र जातस्य फलं यथा,—
"विदेशवृत्तिः पुरुषः सुतीव्रः
क्षमान्वितः स्यात् खलु दीर्घसूत्रः ।
विचित्रबुद्धिर्विदुषां वरिष्ठो
जेष्ठाभिधाने जननं हि यस्य ॥"
इति कोष्ठीप्रदीपः ॥

ज्येष्ठसामा, [न्] पुं, (ज्येष्ठसाम अधीते यः सः । इत्यण् ।) ज्येष्ठसामा । ज्येष्ठसामवेदाध्येता । इति मिताक्षरा ॥

ज्येष्ठी, स्त्री, (ज्येष्ठानक्षत्रान्विता पौर्णमासीलक्षण ङीप् च ।) जेष्ठपूर्णिमा । इति शब्दरत्नावली ॥ (यथा, तिथितत्त्वधृतभविष्यपुराणवचनम् ।
"कार्त्तिकी फाल्गुनी चैत्री जेष्ठी पञ्चदशी
सिता ।
मन्वन्तरादयस्ता दत्तस्याक्षयकारिकाः ॥")
ज्येष्ठी च ॥

ज्यो, ङ नियमे । व्रतादेशे । उपनीतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं नियमार्थे-व्रतादेशादौ तु सकं-अनिट् ।) व्रतस्यादेशो व्रतादेशः । ङ, व्यवते यानिषो नियमौ स्यादित्यर्थः ।

व्यवते पण्डितो जनं व्रतमुपदिशतीत्यर्थः। व्यवते पुत्रं विप्रः उपनयतीत्यर्थः। इति दुर्गादासः॥

ज्योतिः, [स्] क्ली, (द्युत दीप्तौ + इसिः। यद्वा, द्युत दीप्तौ + "द्युतेरिसिन्नादेश्च जः।" उणा। २। १११। इति इसिन् दस्य च जः।) दृष्टिः। नक्षत्रम्। (यथा, "ज्योतींष्यग्निश्च मेध्यमश्वस्तच्च नाभिवीक्षेत॥" इति चरके सूत्रस्थानेऽष्टमेऽध्याये॥) प्रकाशः। इति मेदिनी। से, २३॥

ज्योतिः, [स्] पुं, (ज्योतते इति। द्युत + कर्त्तरि इसिः। द्युत + इसिन् वा।) अग्निः। (यथा,—
"तस्यान्तरंस नाभेस्तु ज्योतिः स्थानं ध्रुवं स्मृतम्। तदा धमति वातस्तु देहस्तेनास्य वर्द्धते॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥) सूर्य्यः। इति मेदिनी। से, २२॥ मेधिका। इति राजनिर्घण्टः॥ (विष्णु... यथा, महाभारते १३।१४६।७६।
"स्वधः स्वङ्गः श्रुतानन्दो नन्दिर्ज्योतिर्गणेश्वरः॥")

ज्योतिरिङ्गः, पुं, (ज्योतिषा इङ्गतीति। इगि गतौ + अच्। ज्योतिरिव इङ्गतीति वा।) खद्योतः। इति शब्दरत्नावली॥

ज्योतिरिङ्गणः, पुं, (ज्योतिरिव इङ्गतीति। इगि गतौ + ल्युः।) कीटविशेषः। ज्योनाकपोका इति भाषा। तत्पर्य्यायः। खद्योतः २ ध्वान्तोल्लेखः ३ तमोमणिः ४ दृष्टिबन्धुः ५ तमोज्योतिः ६ ज्योतिरिङ्गः ७ निमेषकः ८। इति शब्दरत्नावली॥ ज्योतिर्व्वीजम् ९ निमेषरुक् १०। इति चिकित्साशास्त्रम्॥

ज्योतिर्व्वीजं, क्ली, (ज्योतिर्व्वीजमिवास्य ज्योतिषो वीजमिव वा।) ज्योतिरिङ्गणः। इति चिकित्साशास्त्रम्॥

ज्योतिर्हस्ता, स्त्री, (ज्योतिर्ज्योतीरूपं हस्तं शरीरमस्याः।) दुर्गा। अस्या नामनिरुक्तिर्यथा,—
"हस्तं शरीरमित्याहुर्हस्तश्च गगनं तथा। ज्योतिषि ग्रहनक्षत्राण्यर्ज्योतिर्हस्ता ततः स्मृता॥"
इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः॥

ज्योतिश्चक्रं, क्ली, (ज्योतिर्मयं चक्रम्। ज्योतिर्भिः स्वस्वावस्थानेन विरचितं चक्रं वा।) चन्द्रसूर्य्यादिग्रहनक्षत्रमण्डलम्। राशिचक्रम्। यथा,
"ज्योतिश्चक्रं सुरो मानमर्हा प्रोवाच केशवः। चातुर्लक्षं ज्योतिषस्य सारं तदाय सत्वरः॥"
इति गरुडपुराणम्॥
अपि च तिथ्यादितत्त्वे।
"सप्तविंशतिभेर्ज्योतिश्चक्रं स्तिमितवायुगम्। तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः॥"

ज्योतिषं, क्ली, (ज्योतिः सूर्य्यादीनां ग्रहाणां गत्यादिकं प्रतिपाद्यतया अस्त्यस्येति अच्।) वेदाङ्गशास्त्रविशेषः। तत् ग्रहगणितगणनाशास्त्रम्। इत्यमरटीकायां भरतः॥
"पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिता। केरलैः प्राक्तनैश्चैव ——————— ॥"
इति प्रयोगरत्नटीका॥

अस्य सम्बन्धादि यथा,—
"अस्य शास्त्रस्य सम्बन्धो वेदाङ्गमिति चोदितः। अभिधेयञ्च जगतां शुभाशुभनिरूपणम्॥ इत्याधायनसंक्रान्तिग्रहर्क्षोडुशुक्रकर्म्मणाम्। प्रयोजनञ्च विज्ञेयं तत्तत्कालविनिर्णयः॥"
इति नारदीयम्॥ * ॥

अस्याध्ययनं द्विजैः कर्त्तव्यम्। यथा,—
"सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्। वेदस्य निर्म्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषम्॥ विनैतदखिलं श्रौतं स्मार्त्तं कर्म्म न सिध्यति। तस्माज्जगद्धितायेदं ब्रह्मणा निर्म्मितं पुरा॥ अतएव द्विजैरेतदध्येतव्यं प्रयत्नतः॥"
इति नारदः॥ * ॥

शूद्रस्य पाठनिषेधो यथा,—
"स्नेहाल्लोभाच्च मोहाच्च यो विप्रोऽज्ञानतोऽपि वा। शूद्रायासुपदेशन्तु दद्यात् स नरकं व्रजेत्॥"
इति गर्गः॥ * ॥

अस्य ज्ञानमावश्यकं यथा,—
"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्व्या विहिताश्च यज्ञाः। तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्॥
यथा शिखा मयूराणां नागानां मणयो यथा। तद्वदेदाङ्गशास्त्राणां गणितं मूर्द्धनि संस्थितम्॥"
इति वेदाङ्गज्योतिषम्॥ * ॥

अस्याध्ययनफलं यथा,—
"एवंविधस्य श्रुतिनेत्रशास्त्र-स्वरूपभर्त्तुः खलु दर्शनं वै। निहन्त्यघौघं कलुषं जनानां षड्जन्मजं धर्म्मसुखास्पदं स्यात्॥"
इति माधवः॥ * ॥

अस्य ज्ञाने फलं यथा,—
"ज्योतिश्चक्रे तु लोकस्य सर्व्वस्योक्तं शुभाशुभम्। ज्योतिर्ज्ञानन्तु यो वेद स याति परमां गतिम्॥"
इति गर्गः॥

ज्योतिषिकः, पुं, (ज्योतिर्ज्योतिःशास्त्रं अधीते इति। क्रतूक्थादित्वात् ठक् संज्ञापूर्व्वस्य विधेरनित्यत्वात् न वृद्धिः।) ज्योतिषिकः। इत्यमरटीका॥ (यथा, मार्कण्डेये।
"धर्म्मारण्या ज्योतिषिका गौरग्रीवा गुडाप्लकाः॥")

ज्योतिषी, स्त्री, (ज्योतिरस्त्यस्या इति अच् ङीप् च।) तारा। इति हेमचन्द्रः। ज्योतिषशास्त्रज्ञे, त्रि॥

ज्योतिष्कः, पुं, (ज्योतिरिव कायतीति। कै + कः।) चित्रकवृक्षः। मेथिकाबीजम्। इति राजनिर्घण्टः॥ (अस्य व्यवहारो यथा, "ज्योतिष्कफलतैलं वा क्षीरेण स्वल्पिकां पिबेत्॥" इति चिकित्सितस्थाने चतुर्दशेऽध्याये सुश्रुतेनोक्तम्॥) गणिकारिकावृक्षः। इति रत्नमाला॥

ज्योतिष्काः, पुं, (ज्योतिर्भिः कायतीति। कै + कः।) चन्द्रार्कग्रहनक्षत्रतारकाः। इति हेमचन्द्रः॥ बहुवचनान्तोऽयं शब्दः॥

ज्योतिष्का, स्त्री, (ज्योतिरिव कायतीति। कै + कः टाप् च।) ज्योतिष्मतीलता। इत्यमरटीकायां स्वामी॥

ज्योतिष्टोमः, पुं, (ज्योतींषि चित्तदादयः स्तोमा यस्य। "ज्योतिरायुषः स्तोमः।" ८।३।८२। इति षत्वम्।) षोड़शऋत्विक्साध्ययज्ञविशेषः। तच्च द्वादशप्रकारगोदक्षिणा। इति मलमासतत्त्वम्॥ (यथा, महाभारते। १। २२१। ३०।
"बहुधा निःसृतः कायाज्ज्योतिष्टोमः क्रतुर्यथा॥")

ज्योतिष्मती, स्त्री, (ज्योतिरस्त्यस्या इति। मतुप् उदित्वात् ङीप् च।) लताविशेषः। मालकङ्गनी इति लताफटकरी इति नयाफटकी इति च भाषा॥ तत्पर्य्यायः। पारावतांघ्रिः २ कटभी ३ पिण्या ४। इत्यमरः। २। ४। १५०॥ पारावतपदी ५ नगणा ६ स्फुटवल्गनी ७ पूतितैला ८ इन्दुदी ९। इति रत्नमाला॥ स्वर्णलता १० अनलप्रभा ११ ज्योतिर्लता १२ सुपिङ्गला १३ दीप्ता १४ मेध्या १५ मतिदा १६ दुर्ज्जरा १७ सरस्वती १८ अक्षता १९। अस्याः लक्षायाः गुणाः। अतितिक्तत्वम्। किञ्चित्कटुत्वम्। वातकफापहत्वञ्च। अस्याः मूलायाः गुणाः। दाहप्रदत्वम्। दीपनत्वम्। मेधाप्रज्ञादृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥ तीक्ष्णत्वम्। व्रणविस्फोटनाग्निदत्वञ्च। इति राजवल्लभः॥ रात्रिः। इति राजनिर्घण्टः॥ (नदीविशेषः। यथा, मात्स्ये। ११२०। ६५।
"सरस्वती प्रभवति तस्माज्ज्योतिष्मती तु या। अवगाढ़े शुभयतः समुद्रौ पूर्व्वपश्चिमौ॥"
ज्योतिर्विशिष्टे, त्रि। यथा, रघुः। ६। २२।
"नक्षत्रतारायहसङ्कुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः॥")

ज्योतीरथः, पुं, (ज्योतिरेव रथोऽस्य सर्व्वस्य ज्योतिश्चक्रस्य रथ इव वा ज्योतिःपदार्थानां सूर्य्यादीनामाधारत्वात् तथात्वमिति बोध्यम्।) ध्रुवः। इति चिकित्साशास्त्रम्॥

ज्योत्स्ना, स्त्री, (ज्योतिरस्त्यस्यामिति। "ज्योत्स्नातमिस्रेति।" ५।२।११४। इति निपातनात् नप्रत्यय उपधालोपश्च।) चन्द्रज्योतिः। चाँदनी इति हिन्दी भाषा॥ तत्पर्य्यायः। चन्द्रिका २ कौमुदी ३। इत्यमरः। १। ३। १६॥ चान्द्री ४ कामवल्लभा ५ चान्द्रातपः ६ चन्द्रकान्ता ७ प्रीता ८ अन्ततरङ्गिणी ९। (यथा, महाभारते। १। १। ८६।
"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः॥")
ज्योत्स्नायुक्तरात्रिः। इति मेदिनी। ने, ८॥ पटोलिका। इत्यमरटीकायां स्वामी॥ अस्याः गुणाः। त्रिदोषघ्नमलत्वम्। इति राजनिर्घण्टः॥ कषायत्वम्। मधुरत्वम्। दाहरक्तपित्तनाशित्वञ्च। इति राजवल्लभः॥ श्वेतघोषा। इति

रत्नमाला ॥ दुर्गा । यथा,—
"प्रभाप्रसादशीलत्वात् ज्योत्स्ना चन्द्रार्क-
मालिनी ।"
इति देवीपुराणे ४५ अध्यायः ॥
अपि च ।
"रौद्राये नमो नित्याये गौर्य्यै धात्र्य नमो नमः ।
ज्योत्स्नाये चेन्दुरूपिण्ये सुखाये सततं नमः ॥"
इति मार्कण्डेये देवीमाहात्म्ये ५ अध्यायः ॥
(प्रभातकालः । यथा, विष्णुपुराणे । १ । ५ । ३६ ।
"ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याऽभि-
धीयते ॥")
ज्योत्स्नाप्रियः, पुं, (ज्योत्स्ना प्रियाऽस्य ।) चकोरः ।
इति हेमचन्द्रः ॥
ज्योत्स्नावृक्षः, पुं, (ज्योत्स्नाया दीपधारणं वृक्ष
इव ।) दीपाधारः । इति त्रिकाण्डशेषः ॥
ज्योत्स्नी, स्त्री, (ज्योत्स्ना अस्त्यस्या इत्यण् ङीप्
च । संज्ञापूर्व्वकस्य विधेरनित्यत्वान्न वृद्धिः ।)
चन्द्रिकायुक्ता रात्रिः । ज्योत्स्नारात्रिरिति
ख्याता । पटोलिका । इत्यमरः । २ । ४ । ११८ ॥
झिङ्गा इति भाषा ॥ रेणुकानाम गन्धद्रव्यम् ।
इति शब्दचन्द्रिका ॥
ज्यौतिषिकः, पुं, (ज्योतिषं ज्योतिषशास्त्रमधीते
वेद वा इति ठक् वृद्धिश्च ।) दैवज्ञः । इत्य-
मरः । २ । ८ । १४ ॥
ज्यौत्स्नः, त्रि, (ज्योत्स्नया अन्वितः । इत्यण् ।)
दीप्तः । ज्योत्स्नायुक्तः ॥
ज्यौत्स्निका, स्त्री, (ज्योत्स्ना अस्त्यस्या इति
ठक् पूर्व्ववृद्धिष्टाप् च ।) ज्योत्स्नान्विता निशा ।
इति शब्दरत्नावली ॥
ज्यौत्स्नी, स्त्री, (ज्योत्स्ना पूर्णचन्द्रचन्द्रिका
व्यस्त्र्याः इत्यण् पूर्व्ववृद्धिः ङीप् च ।) पूर्णिमा-
युक्तरात्रिः । इति हेमचन्द्रः ॥ ज्योत्स्नी । इत्य-
मरटीकायां रायमुकुटः ॥
ज्वि, अभिभवे । इति कविकल्पद्रुमः ॥ (भ्वां परं-
सकं-अनिट् ।) रेफोपधः । अयति शत्रुं बली ।
इति दुर्गादासः ॥
ज्री, गि कि ज्याने । गतवद्वयोर्भाव इति यावत् ।
इति कविकल्पद्रुमः ॥ (क्र्यां-चुरां पक्षे भ्वां-परं-
सकं-अनिट् ।) गि, जीर्य्यति जीर्य्यः जीर्णिः ।
कि, जाययति जयति । गिकाभ्यामेव प्राप्तिक-
चुरादिके सिद्धे कि पाठो भ्वादिस्वार्थः । इति
दुर्गादासः ॥
ज्वर, म रोगे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
अकं-सेट् ।) ज्वरति जनो धातुवैषम्यात् । म,
ज्वरयति । इति दुर्गादासः ॥
ज्वरः, पुं, (ज्वरति जीर्य्यां भवत्यनेन । ज्वर +
करणे घञ् भावे घञ् वा । संज्ञापूर्व्वक-
त्वात् वृद्ध्यभावः ।) ज्वरणम् । स्वनामख्यात-
रोगः । तत्पर्य्यायः । जूर्त्तिः २ । इत्यमरः । ३ ।
२ । ३६ ॥ ज्वरिः ३ आतङ्कः ४ रोगश्रेष्ठः ५
महागदः ६ । इति राजनिर्घण्टः ॥ तापकः ७
सन्तापः ८ । इति शब्दरत्नावली ॥ * ॥
तस्योत्पत्तिर्यथा,—
"कालाग्निरुद्रः कोपेन चिक्षेप ज्वरमुल्बणम् ।
बभूवुर्व्याहताः सर्व्वे ज्वराक्रान्ता हरिं विना ॥
तं दृष्ट्वा भगवान् क्रुद्धः ससर्ज्ज वैष्णवं ज्वरम् ।
तं चिक्षेप ज्वरं हन्तुं माहेशं रणमूर्द्धनि ॥"* ॥
माहेशज्वराकारो यथा,—
"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः ।
शिवभक्तश्च योगी च स एव विकृताकृतिः ॥
भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः
भस्मग्रहरणो रौद्रः कालान्तकयमोपमः ॥"* ॥
तस्य भेदाः ।
"वायुजः पित्तजश्चैव श्लेष्मजश्च तथैव च ।
ज्वरस्त्रिदोषश्च त्रिविधाश्चतुर्थश्च त्रिदोषजः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
जातिभेदे ज्वरभेदो यथा, हरिवंशे ।
श्रीकृष्ण उवाच ।
"शृणुष्व ज्वर ! सन्देशं यथा लोके चरिष्यसि ।
सर्व्वजातिषु विन्यस्तस्तथा स्थावरजङ्गमे ॥
त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसि ।
चतुर्व्याहान् भजैकेन द्वितीयेन च स्थावरान् ॥
तृतीयो यश्च ते भागो मानुषेषूपपत्स्यते ।
त्रिधाभूतं वपुः कृत्वा पञ्चसु त्वं भव ज्वर ॥
चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् ।
एकान्तश्चतुर्भागः खोरकश्च चतुर्थकः ॥
मानुषेष्वथ खेदाय वस त्वं प्रविभज्य वै ।
जातिष्वथाग्नेयासु निवस त्वं शृणुष्व मे ॥"
अस्यार्थः । "मानुषेषु यस्तृतीयो भागः तस्य
चतुर्भागं कृत्वा एकांशेन पञ्चसु वस द्वितीयेन
एकाहा देवास्त्रेषु तृतीयांशः खोरकः चतु-
र्थांशेन मानुषेषु वस ॥"
"वृक्षेषु कीटरूपेण तथा सङ्कोचपत्रकः ।
पाण्डुपत्रश्च विख्यातः फलेष्वातुर्य्यमेव च ॥"
आतुर्य्यं निःसारता ॥
"पक्षिणीषु हिमो भूत्वा पृथिव्यामपि चोष्णरः ।
अपां तु नीलिकां विद्यात् शिखोद्भेदश्च वह्निजाम् ।
गैरिकः पर्व्वतेष्वेव मत्प्रसादाद्भविष्यसि ।
गोव्यपस्मारको भूत्वा खोरकश्च भविष्यसि ॥
एवं विविधरूपेण भविष्यसि महीतले ।
दर्शनात् स्पर्शनाच्चैव प्राणिनां वधमेष्यसि ॥
ऋते देवमनुष्यांश्च नान्यस्तां विषहिष्यति ॥"
तस्य गारुडोक्तनिदानादिर्यथा,—
धन्वन्तरिरुवाच ।
"वक्ष्ये ज्वरनिदानं हि सर्व्वज्वरविबुद्धये ।
ज्वरो रोगपतिः प्राणा ग्लपुराजोऽग्नीऽन्तकः ॥
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्द्धनयनोद्भवः ।
तत्सन्तापो मोहमयः सन्तापात्मापचारजः ॥
विविधैर्नामभिः क्रूरो नानायोनिषु वर्त्तते ।
पाकलो गजेष्वभितापो वाजिष्वलर्कः कुक्कुरेषु ।
इन्द्रमदो जलदेषु नीलिका ज्योतिरोषधिषु
भूम्यामघरो नाम ॥ * ॥
"वृक्षासञ्चर्द्दनं कासः स्तम्भः श्लैष्मं त्वगादिषु ।
अङ्गेषु शीतपिड़कामाचोदर्द्दः कफोद्भवे ॥
काले यथास्वं सर्व्वेषां प्रवृत्तिर्वृद्धिरेव वा ।
निदानोक्तानुपशयो विपरीतोपशायिता ॥
अरुचिश्चाविपाकश्च स्तम्भमालस्यमेव च ।
हृद्दाहश्च विपाकश्च तन्द्रा आलस्यमेव च ॥
वस्तिर्विसर्गविलया दोषाणामप्रवर्त्तनम् ।
लालाप्रसेको हृल्लासः क्षुन्नाशो रसदं मुखम् ॥
यश्च सुप्तगुरुत्वञ्च गात्राणां बहुसूत्रता ।
न विजीर्णा न चाश्वानिर्ज्वरस्यास्य लक्षणम् ॥
क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्द्दवम् ।
दोषप्रवृत्तिरद्यो निरामज्वरलक्षणम् ॥ * ॥
यथास्वलिङ्गं संसर्गे ज्वरसंसर्गजोऽपि वा ।
शिरोऽक्षिमूर्द्धावमिदेहदाह-
कण्ठास्यपाकारुचिपर्व्वभेदाः ।
उन्निद्रता संभ्रमरोमहर्षा
जृम्भातिवाक्त्वं पवनात् सपित्तात् ॥*॥
तापह्यारुचिपर्व्वशिरोरुक्-
पीनसश्वसनकासविबन्धाः ।
प्रीतजाग्रतिमिरभ्रमितन्द्राः
श्लेष्मवातजनितज्वरलिङ्गम् ॥ * ॥
प्रीतस्तम्भस्वेददाहव्यवस्था-
ल्पाकासश्लेष्मपित्तप्रवृत्तिः ।
मोहस्तन्द्रालिप्ततिक्तास्यता च
श्लेष्मं रूपं श्लेष्मपित्तज्वरस्य ॥ * ॥
सर्व्वजो लक्षणैः सर्व्वैर्द्दाहोऽत्र च मुहुर्मुहुः ।
तद्वच्छीतं महानिद्रा दिवा जागरणं निशि ॥
सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा ।
गीतनर्त्तनहास्यादिप्रकृतेर्हार्द्यवर्त्तनम् ॥
साश्रुणी कलुषे रक्ते भयो लुलितपक्ष्मणी ।
अक्ष्णी पिड्किकापार्श्वमूर्द्धपर्व्वास्थिरुग्भ्रमः ॥
सक्थनौ सरुजौ कर्णौ महास्वेदोऽति नैव वा ।
परिदग्धा खरा जिह्वा गुरुसस्राङ्गसन्निभा ॥
रक्तपित्तकफे जिह्वा लोचने शिरसोऽतिरुट् ।
कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम् ॥
हृद्व्यथा मलसंसर्गः प्रवृत्तिर्वाल्पशोऽति वा ।
स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता ॥
दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम् ।
सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम् ॥
वायुना कफरुद्धेन पित्तमन्तःसुपीड़ितम् ।
व्यवायित्वाच्च सौक्ष्म्याच्च बहिर्म्मार्गं प्रपद्यते ॥
तेन हारिद्रनेत्रत्वं सन्निपातोद्भवे ज्वरे ।
दोषे विदग्धे नष्टेऽग्नौ सर्व्वसंपूर्णलक्षणः ॥
असाध्यः सोऽन्यथा लक्ष्यो भवेद्दैकलदोषोऽपि वा ।
अन्यच्च सन्निपातोक्तौ यच्च पित्तं पृथक् स्थितम् ॥
त्वचि कोष्ठे च वा दाहं विदधाति पुरोगु वा ।
तद्वद्वातकफौ प्रीतं दाहादिर्दुस्तरस्तयोः ॥
प्रीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते ।
प्रीते ग्लानेऽके मूर्च्छा मदस्तृष्णा च जायते ॥
दाहादौ पुनरन्ते स्युस्तन्द्रास्वेदभमिक्रमाः ॥ * ॥
आगन्तुरभिघातादभिचाराभिचारतः ॥
चतुर्द्धा तु कृतच्छेददाहाद्यैरभिघातजः । * ।
अभाच्च तस्मिन् पवनः प्रायो रक्तं प्रदूषयन् ॥
सद्यथाग्नेयवैवर्ण्यं सरुजं कुरुते ज्वरम् ।

ग्रहावेशौषधिविषक्रोधभीशोककामजः ॥
अभिघङ्गादृग्रहैर्गोसिन्न कस्मात्तासरोदने ।
ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुः क्षवः ॥*॥
विषाद्मूर्च्छातिसारास्यशोषता दाहलड्भ्रमः ।
क्रोधात् कम्पः शिरोरुक् च प्रलापो भयशोकजे ॥
कामाद्मोहरुचिर्दाहो हीनिद्राधीधृतिक्षयः ॥
ग्रहादौ सन्निपातस्य रूपादौ मरणस्तयोः ॥
कोपः कोपेऽपि पित्तस्य यौ तु शापाभिचारजौ ।
सन्निपातज्वरौ घोरौ तावसद्भ्यतमौ मतौ ॥*॥
तत्राभिचारिकैर्मन्त्रैर्धूपमानस्य तप्यते ।
पूर्वचेतस्ततो देहस्ततो विस्फोटलड्भ्रमैः ॥
सदाहमूर्च्छैर्ग्रस्तस्य प्रबलं वर्द्धते ज्वरः ।
इति ज्वरोऽष्टधा दृष्टः समासाद्विविधस्तु सः ॥
शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्बहिराश्रयः ।
प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः ॥
पूर्वं शरीरे शारीरे तापो मनसि मानसे ।
पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत् ॥
दाहः पित्तयुते मिश्रं मिश्रेऽन्तःसंश्रये पुनः ।
ज्वरोऽधिकं विकाराः स्युरन्तःशोभो मलग्रहः ॥
बहिरेव बहिर्भागे तापोऽपि च सुसाधितः ।
वर्षाशरद्वसन्तेषु वातादेः प्राकृतः क्रमात् ॥
वैकृतोऽन्यः सुदुःसाध्यः प्रायश्च प्राकृतोऽनिलात् ।
वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् ॥
कुर्यात् पित्तच्च शरदि तस्य चानुबलः कफः ।
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ॥
कफो वसन्ते तमपि वातपित्तं मधेदनु ।
बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ॥
सर्व्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः ।
ज्वरोपद्रवतीक्ष्णत्वमज्ञानिर्व्वहुसूत्रता ॥
न प्रवृत्तिर्न विजीर्णा न क्षुत् क्षामज्वरार्त्तिः ।
ज्वरवेगोऽधिका तृष्णा प्रलापः श्वसनं भ्रमः ॥
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥
जीर्णतामविपर्य्यासात् सप्तरात्रच्च लङ्घनात् ।
ज्वरः षड्विधः प्रोक्तो मलकालबलाबलात् ॥
प्रायशः सन्निपातेन भूयसाप्युपद्रुयते ।
सप्तमः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ।
धातुमूत्रशुक्रहार्द्विमोत्सर्गा व्यापिनो मलाः ॥
तापयन्त्यनु सर्व्वा तुल्यादृष्ट्यादिवर्द्धिताः ।
बलिनो गुरवस्तद्वद्विधेयेन रसान्विताः ॥
सततं नित्यतिद्वन्द्वा ज्वरं कुर्य्युः सुदुःसहम् ।
मलं ज्वरोष्मा धातून् वा स शीघ्रं त्वपसेत्ततः ॥
सर्व्वाकाररसादीनां शुद्धाशुद्धाश्रिता क्रमात् ।
वातपित्तकफैः सप्तदशद्वादशवासरान् ॥
प्रायोऽनुयाति मर्य्यादां मोक्षाय च वधाय च ।
इत्यग्निवेशस्य मतं हारीतस्य पुनः स्मृतिः ॥
द्विगुणा सप्तमी या च नवम्येकादशी तथा ।
त्रयो त्रिदोषमर्य्यादा मोक्षाय च वधाय च ॥
शुद्धाशुद्धे ज्वरः कार्य्यो दीर्घमध्यच वर्त्तते ।
क्षयाणां व्याधियुक्तानां मिथ्याहारादिसेविनाम् ॥
अल्पोऽपि दोषो दुष्टादेर्व्यत्यन्तमतो बलम् ।
न प्रवृत्तिका विमं यस्मात्तद्द्विगुणान्वितः ॥
शोषिपक्षो ज्वरं कुर्य्याद्विषमत्वादिभाक् ।
दोषः प्रवर्त्तते तेषां खे काले ज्वरयन् बली ॥
निवर्त्तते पुनस्त्वेव प्रत्यनीकबलाबलः ।
द्वीपदोषे ज्वरः सूक्ष्मो रसादिष्वेव लीयते ॥
लीनत्वात् कार्य्यवैवर्ण्यजाड्यादीनादधाति सः ।
व्यासन्नविहतास्यत्वात् स्रोतसां रसवाहिनाम् ॥
आशु सर्व्वस्य वपुषो व्याप्तिर्दोषेण जायते ।
सन्ततः सततस्तेन विपरीतो विपर्य्ययात् ॥
विषमो विषमारम्भः स्वपाकालेन सङ्गवान् ।
दोषो रक्ताश्रयः प्रायः करोति सन्तं ज्वरम् ॥
अहोरात्रस्य सन्धिः स्यात् सकृदन्येद्युराश्रितः ।
तस्मिन्मांसवहा नाड़ी मेदोनाड़ी तृतीयके ॥
ग्राही पित्तानिलाम्भूर्ह्यस्त्रिकस्य कफपित्ततः ।
स पृष्ठास्थानिलकफात् स चैकाहान्तरः स्मृतः ॥
चतुर्थको मलैर्म्मेदो मज्जास्थ्यन्यतरस्थिते ।
मज्जामूत्तरैत्यपरः प्रभावमनुदर्शयेत् ॥
द्विविधं कफेन जङ्घाभ्यां सपूर्व्वं शिरसोऽनिलात् ।
अस्थिमज्जारुपगते चातुर्थकविपर्य्ययः ॥
त्रिधा चाहं ज्वरयति दिनमेकञ्च मुञ्चति ।
बलाबलेन दोषाणामनुवेलादिजन्मनाम् ॥
पक्वानामविपर्य्यासात् सप्तरात्रन्तु लङ्घयेत् ।
ज्वरः स्यात् मनसस्तद्वत् कर्म्मणश्च तदा तदा ॥
गम्भीरधातुचारित्वात् सन्निपातेन सम्भवात् ।
तुल्यो ब्रूयाच्च दोषाणां दुश्चिकित्स्यश्चतुर्थकः ॥
सूक्ष्मात् सूक्ष्मतरास्थेषु दूरादूरतरेषु च ।
दोषो रक्तादिमार्गेषु शनैरल्पशिरेषु यत् ॥
याति देहस्य नाशेषं सन्तापादीन् करोत्यतः ।
क्रमो यत्नेन विच्छिन्नः सन्तापो लक्ष्यते ज्वरः ॥
विषमो विषमारम्भः स्वपाकालानुसारवान् ।
यथोत्तरं मन्दमतिर्मन्दशक्तिर्यथायथम् ॥
कालेनाप्नोति सदृशान् स रसादींस्तथा तथा ।
दोषो ज्वरयति क्रुद्धस्त्रिरात्रिरतरेण च ॥*॥
भूमौ स्थितं जलैः सिक्तं कालेनेव प्रतीयते ।
अङ्कुराय यथा बीजं दोषबीजं भवेत्तथा ॥
क्षेपं कृत्वा विषं यद्वदाशये नीयते बलम् ।
कुप्यत्याप्नवलं भूयः काले दोषविषं तथा ॥
एवं ज्वराः प्रवर्त्तन्ते विषमाः सततादयः ॥*॥
उत्क्लेशो गौरवं दैन्यं भङ्गोऽङ्गानां विजृम्भणम् ॥
अरोचको वमिः श्वासः सर्व्वस्मिन्नृसृगे ज्वरे ।
रक्तनिष्ठीवनं तृष्णा अक्ष्णोस्तु पिड़कोद्गमः ॥
दाहरागश्रमसदप्रलापो रक्तसंश्रिते ।
लड्घनाग्निपक्वदोषस्कमन्तर्दाहो भ्रमस्तमः ॥
दौर्ब्बल्यं गात्रशैथिल्यं मांसस्थे मेदसि स्थिते ।
स्वेदोऽतिलवणा वमनं दौर्गन्ध्यं चासहिष्णुता ॥
प्रलापो ग्लानिरुच्छिरस्त्रिगे त्वस्थिभेदनम् ।
दोषप्रवृत्तिरूर्द्ध्वाधःश्वासाङ्गक्षेपकूजनम् ॥
अन्तर्दाहो बहिःशैत्यं श्वासो हिक्का च मज्जगे ।
तमसो दर्शनं सन्धिच्छेदनं स्वभेदृता ॥
शुक्रप्रवृत्तिर्मृत्युश्च जायते शुक्रसंश्रये ।
उत्तरोत्तरदुःसाध्याः पञ्चान्ये तु विपर्य्यये ॥
प्रक्लिन्नमिव गात्राणि श्लेष्मणा गौरवेति च ।
मन्दज्वरः प्रलापस्तु सप्रीतः स्यात् प्रलेपकः ॥
स्निग्धं मन्दज्वरो रूक्षः प्रीतः सक्थेन गच्छति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो भवेदङ्गबलाशकः ॥*॥
हरिद्राभेदवर्णाभस्तद्वल्लेपः प्रमेहति ।
स वै हारिद्रको नाम ज्वरभेदोऽन्तकः स्मृतः ॥
कफवातौ समौ यत्र हीनपित्तस्य देहिनः ।
तीक्ष्णोऽथवा दिवा मन्दो जायते रात्रिजो ज्वरः ॥
दिवाकरातीतबले व्यायामाद्य विशोषिते ।
शरीरे नियतस्थाता ज्वरः स्यात् पौर्व्वरात्रिकः ।
आमाशये यदा दुष्टे श्लेष्मपित्ते ह्यधःस्थिते ।
तदार्द्धं शीतलं देहे ह्यर्द्धं चोष्णं प्रजायते ॥*॥
कार्य्ये पित्तं यदा दुष्टं श्लेष्मा चान्ते व्यवस्थितः ।
उष्णत्वं तेन देहस्य शीतत्वं करपादयोः ॥*॥
रसरक्ताश्रयः साध्यो मांसमेदो गतश्च यः ।
अस्थिमज्जागतः कृच्छ्रस्तैस्तै साङ्गैर्हतप्रभः ॥*॥
विसंज्ञो ज्वरवेगार्त्तः सक्रोध इव वीक्ष्यते ।
सदोषशब्दश्च शुक्लद्रवं सुस्रवति वेगवत् ॥*॥
देहो लघुर्व्यपगतक्लमसोष्मतापः
पाको सुखे करणसौखवमव्यवत्वम् ।
स्वेदः स्रवः प्रकृतिगामि मनोऽभिलिप्सा
कण्डूश्च मूर्द्ध्नि विगतज्वरलक्षणानि ॥
इत्यादि महापुराणे गारुड़े ज्वरनिदानं समाप्तम् । १५२ अध्यायः ।

अथ ज्वरस्य चिकित्सा ।

धन्वन्तरिरुवाच ।

"ज्वरोऽष्टधा पृथक् द्वन्द्वसंङ्घातागन्तुजः स्मृतः ।
सुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः ।
पृथक्पृथक् जलं दद्यात् पिपासाज्वरशान्तये ॥१॥
नागरं देवकाष्ठञ्च धान्याकं वृहतीद्वयम् ।
दद्यात् पाचनकं पूर्व्वं ज्वरितायं ज्वरापहम् ॥२॥
आरग्वधाभयासुस्ततिक्तयन्थिकनिम्बितः ।
कषायः पाचनं सामे सशूले च ज्वरे हितः ॥३॥
मधूकसारभिन्नूत्यवचोषणकणाः समाः ।
श्लक्ष्णं पिष्ट्वाम्भसा नस्यं कुर्य्यात् संज्ञाप्रबोधनम् ॥४॥
चित्रद्विशालाचिफलाकटुकारग्वधैः कृतः ।
सक्षारो भेदनं क्वाथः पेयः सर्व्वज्वरापहः ॥५॥
महौषधन्तृतासुस्तचन्दनोशीरधान्यकैः ।
क्वाथस्तृतीयकं हन्ति शर्करामधुयोजितः ॥६॥
अपामार्गजटा कट्या लोहितैः सप्तपत्रभिः ।
बद्धा वारे रवेर्नूनं ज्वरं हन्ति तृतीयकम् ॥७॥
गङ्गाया उत्तरे कूले ह्युपुत्रस्तापसो मृतः ।
तस्मै तिलोदकं दद्यान्नश्यत्येकाहिको ज्वरः ॥८॥
गुड़च्याः क्वाथकल्काभ्यां त्रिफलाया वृषस्य च ।
स्नुहीकाया बलायाश्च सिद्धाः स्नेहाः ज्वरं क्षिपेत् ॥९॥
धात्री शिवा कणा वह्निक्वाथः सर्व्वज्वरान्तकः ।१०
ज्वरातिसारहरणमौषधं प्रवदाम्यथ ।
एष्टिपर्णीबिलाविल्वनागरैरुत्पलधान्यकैः ॥
पाठेन्द्रयवभूनिम्बसुस्तपर्पटकाः स्मृताः ।
जयन्त्याममतीसारज्वरं रसमहौषधाः ॥११॥
नागरातिविषासुस्तभूनिम्बाम्रास्तवत्सकैः ।
सर्व्वज्वरहरः क्वाथः सामीर्त्ति सारनाशनः ॥१२॥
सुस्तपर्पटकोदीच्यपद्मकवेवपद्मकं पयः ।

शालपर्णी पृश्निपर्णी दृहती कण्टकारिका ॥
बलाश्वदंष्ट्राविल्वानि पाठा नागरधान्यकम् ।
एतदाहारसंयोगे हितं सर्व्वातिसारिणाम् ॥१३
विल्वचूताग्निनिर्य्यूहः खर्जं मध्वतिसारगुत् ।१४।
अतीसारे हितस्तक्रं कुटजत्वक्फलाहृतः ॥१५॥
वत्सकातिविषाविल्ववालाकन्दकषायकः ।
सविश्व आमशूलार्त्तो ह्यतीसारे सशोणिते ॥"१६

इति गारुड़े १७४ अध्यायः ॥

अपि च ।

"हस्तवद्वं पलाशस्य अपामार्गस्य वा हर ! ।
मूलं सर्व्वज्वरहरं भूतप्रेतादिगुद्भवेत् ॥ १७ ॥
पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै ।
सार्द्धं विनाग्नयेदाहज्वरञ्च परमेश्वर ! ॥ १८ ॥
शिखायाश्चैव तद्वद्धं भवेदेकाह्निकादिगुत् ।१९।
एतत् सकाङ्क्षिकं पीतं रक्तकुष्ठज्वरादिगुत् ॥"२०

इति तत्रैव १९३ अध्यायः ॥

"वचा त्रिकटुकञ्चैव करञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता गिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटुगोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादग्रीषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च ग्रासनम् ॥२१
अभयामलकद्राक्षाः पाठा चैव विभीतकम् ।
शर्करा च समश्चैव जयं ज्वरहरं भवेत् ॥"२२

इति च गारुड़े १९९ अध्यायः ॥ * ॥

वैद्यकमते शिवज्वरस्योत्पत्तिर्यथा,—

"दक्षयज्ञापमानसंक्रुद्धरुद्रनिश्वाससम्भवः ।
ज्वरोऽष्टधा पृथग्द्वन्द्वसंघातागन्तुजः स्मृतः ॥
तस्य विपक्षष्टकारणकथनपूर्ब्बिका सम्प्राप्तिर्यथा,
"मिथ्याहारविहारस्य दोषा ह्यामाशयाश्रयाः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः ॥"
तस्य सामान्यलक्षणं यथा,—
"खेदावरोधः सन्तापः सर्व्वाङ्गग्रहणन्तथा ।
युगपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते ॥"*॥
तस्य पूर्ब्बरूपं यथा,—
"श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनस्रवः ।
इच्छाद्वेषौ सुहुश्चापि शीतवातातपादिषु ॥
जृम्भाङ्गमर्दौ गुरुता रोमहर्षोऽरुचिस्तमः ।
व्यप्रहर्षश्च शीतश्च भवत्युपस्थिते ज्वरे ॥"*॥
सन्ततादिज्वराणां प्रति नियतदूष्या धातवो यथा,
"सन्ततं रसरक्तस्थः सोऽन्येद्युः पित्तिताश्रितः ।
मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः ॥
कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम् ।
सप्ताहं वा दशाहं वा द्वादशाहमथापि वा ॥
सन्तत्या ह्योऽविसर्गी स्यात् सन्ततः स निगद्यते ।
अहोरात्रे सततको द्वौ कालावनुवर्त्तते ॥
अन्येद्युष्कस्त्वहोरात्र एककालं प्रवर्त्तते ।
तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ॥
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ।
कफपित्तात्त्रिकाद्याही दृष्टाद्दातकफात्मकः ॥
वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ।
चातुर्थको दर्शयति प्रभावं द्विविधं ज्वरः ॥
जङ्घाभ्यां श्लैष्मिकः पूर्ब्बं शिरस्तोऽनिलसम्भवः ।
विषमज्वर एवान्यश्चातुर्थकविपर्य्ययः ॥
मध्ये अहनी ज्वरयत्यादावन्ते च मुञ्चति ॥"*॥
वातबलासकज्वरो यथा,—
"नित्यं मन्दज्वरी रूक्षः शूनकक्षेन सीदति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी ॥"
विषमज्वरविशेषाः ।
"विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनाह्नि शीतलं देहे चार्द्धरात्रौ प्रजायते ॥"*॥
शीतपूर्ब्बो ज्वरो यथा,—
"लक्ष्यौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे ।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ॥"
दाहपूर्ब्बो ज्वरो यथा,—
"करोत्यादौ तथा पित्तं लक्ष्यं दाहमतीव च ।
तस्मिन् प्रशान्ते क्षितरौ कुरुते शीतमन्ततः ॥
द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्ब्बस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः ॥"
उक्तवातादिज्वराणां धातुविशेषदूष्यतया अधिकलक्षणानि यथा,—
"गुरुता हृदयोत्क्लेशः सदनं हृद्गलरोचकौ ।
रसस्थ तु ज्वरे लिङ्गं दैन्यञ्चास्योपजायते ॥ १ ॥
रक्तनिष्ठीवनं दाहो मोहश्चर्द्दनविभ्रमौ ।
प्रलापः पिड़का लक्ष्या रक्तप्राप्ते ज्वरे नृणाम् ॥२
पिच्छिलोद्वेष्टनं लक्ष्याहृद्गलपुरीषतः ।
उष्मान्तर्द्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ॥३
भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्चर्द्दिरेव च ।
दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे त्वसहिष्णुता ॥४
भेदोऽस्थां कूजनं श्वासो विरेकश्चर्द्दिरेव च ।
विक्षेपणञ्च गात्राणामेतदस्थिगते ज्वरे ॥ ५ ॥
तमःप्रवेशनं हिक्का कासः श्लैष्मं वमिस्तथा ।
अन्तर्द्दाहो महाश्वासो मर्म्मच्छेदश्च मज्जगे ॥६॥
मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
श्लेष्मणः स्तब्धता मोहः शुक्रस्य तु विशेषतः ॥"७
अथ वैद्यकमते सामान्यतो ज्वरस्य चिकित्सामाह ।
"अंशांशं यत्र दोषाणां निर्व्वेक्तुं नैव शक्नुयात् ।
साधारणीं क्रियां तत्र विदधीत चिकित्सकः ॥
सामान्यतो ज्वरी पूर्ब्बं निर्व्वाते निलये वसेत् ।
निर्व्वातमायुषो ह्येतन्मारोग्यं कुरुते यतः ॥
व्यजनस्यानिलस्तृष्णास्वेदमूर्च्छाश्रमापहः ॥
तालवृन्तभवो वातस्त्रिदोषशमनो मतः ॥
वंशव्यजनजः सोऽपो रक्तपित्तप्रकोपनः ।
चामरो वस्त्रसंभूतो मायूरो वेत्रजस्तथा ॥
एते दोषजिता वाताः स्निग्धा हृद्याः सुपूजिताः ।
नवज्वरी भवेद्यत्नाद्गुरूणावसनावृतः ।
यथर्त्तुपक्वं पानीयं पिबेत् किञ्चिन्निवारयन् ॥
विनापि भेषजैर्व्याधिः पथ्यादेव निवर्त्तते ।
न तु पथ्यविहीनस्य भेषजानां शतैरपि ॥"*।
ततो ज्वरे वर्জ্জनीयान्याह सुश्रुतः ।
"परिषेकान् प्रदेहांश्च स्नेहान् संशोधनानि च ।
दिवास्वप्नं व्यवायञ्च व्यायामं स्निग्धरं जलम् ॥
क्रोधप्रवातभोज्यानि वर्জ্জयेत्तरुणज्वरी ॥"
परिषेकः स्नानादिः । प्रदेहो अनुलेपनाभ्यङ्गादिः । स्नेहान् पाने निषिद्धान् ॥ * ॥
निषिद्धानिषेधादोषमाह ।
"श्लेष्मं ह्यर्द्धिं मदं मूर्च्छां भ्रमं तृष्णामरोचकम् ।
प्राप्नोत्युपद्रवानेतान् परिषेकादिसेवनात् ॥"
आदिशब्देन प्रदेहादयो गृह्यन्ते ॥ * ॥
हारीतेन प्रत्येवं दूषणमुक्तम् ।
"व्यायामाध्वरसंदृद्धिर्व्यवायात् स्तम्भमूर्च्छनम् ।
स्तम्भश्च स्नेहपानात्तु मूर्च्छा ह्यर्द्धिमदोऽरुचिः ॥
गुर्व्वन्नभोजनात् स्वप्नाद्विष्टम्भो दोषकोपनम् ।
अग्निसादः खरत्वञ्च स्रोतसां चाप्रबर्हणम् ॥"
स्तम्भरिति व्यवायादित्यत्र सम्बध्यते । स्वप्नात् दिवास्वापात् ॥ * ॥ अन्यच्च वर्জ্জयेत् ।
"सव्वरो ज्वरमुक्तो वा विदाहीनि गुरूणि च ।
असात्म्यान्यन्नपानानि विरुद्धाध्यशनानि च ।
व्यायाममतिचेष्टाञ्चाभ्यङ्गं स्नानञ्च वर्জ্জयेत् ।
तेन ज्वरः शमं याति न शान्तञ्च पुनर्भवेत् ॥
ज्वरी लङ्घनं कुर्य्यादिति चरकः वाग्भटश्च ।"
"आमाशयस्थो हृत्वाग्निं सामो मार्गं पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
अस्यायमर्थः । "यतो हेतोः आमाशयस्थो दोषो वातपित्तश्लेष्मरूपः स्वहेतुदुष्टः अग्निं हत्वा आच्छाद्य सामः व्यपकाहारसहितोमार्गं रसमार्गं पिधापयन् । अचार्थत्वादहेतावपि कर्मणीन् । तेन पिदधदित्यर्थः । ज्वरं करोति तस्माद्धेतोर्ज्वरी लङ्घनमाचरेदित्यर्थः ॥ * ॥
"त्रिविधं त्रिविधे दोषे तत्र समीक्ष्य प्रयोजयेत् ।
दोषेऽल्पे लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् ।
प्रभूते ग्रीवगं तस्य मूलादुत्क्लेशनात् ॥"
चरकश्च ।
"तरुणन्तु ज्वरं पूर्ब्बं लङ्घनेन उपाचरेत् ।
आमदोषमविज्ञाय लङ्घयीत यथाविधि ॥"
अन्यच्च ।
"ज्वरादौ लङ्घनं कुर्य्यात् ज्वरमध्ये तु पाचनम् ।
ज्वरान्ते रेचनं कुर्य्यात् कोष्ठशुद्ध्यै यथाबलम् ॥
दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च ।
लङ्घितस्याप्यदोषस्य यवागूपानमाचरेत् ।
शालिषष्टिकमुद्गानां यूषं वा भक्षमाहरेत् ।
पञ्चकोलेन संसिद्धा यवागूर्मध्यलङ्घने ॥
अतिलङ्घितञ्च तं ज्ञात्वा तस्य सन्तर्पणं हितम् ।
द्राक्षादाड़िमखर्জ্জूरप्रियालैः सपरूषकैः ॥
तर्पणार्हं तु कर्त्तव्यं तर्पणं ज्वरशान्तये ॥"
अत्र लङ्घनशब्देनानशनमुच्यते । यत आह सुश्रुतः ।
"आनद्धस्तिमितैर्दोषैर्व्याप्तं कालमातुरः ।
तावत्स्वनशनं कुर्य्यात्ततः संसर्गमाचरेत् ॥"
आनद्धस्तिमितैर्दोषैर्निरुद्धैर्दोषैः सम्बद्धः ।
संसर्गं औषधान्नादिप्रसङ्गम् ॥ * ॥
यत्तु चरक आह ।
"चतुःप्रकारा संशुद्धिः उपवासो मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥"
चतुःप्रकारा संशुद्धिः वमनविरेचननिरूहवस्ति-

ग्निरोविरेचनानि । न लघ्वासनं तस्य इंहण-त्वात् । अत्र लङ्घनं कर्त्तव्यमित्यर्थः । तथा च सुश्रुतः ।

"शरीरलाघवकरं यद्द्रव्यं कर्म वा पुनः ।
तल्लङ्घनमिति ज्ञेयं इंहणात्तु पृथग्विधम् ॥
लङ्घनात् कर्त्तव्यादन्यत् शरीरपोषकमित्यर्थः ॥*॥

नन्वत्र आमलङ्घनमितेर्हेमाद्रिप्रभृतिपूर्वोक्तसुश्रुत-वचनात् सामान्यतो ज्वरिणा यथाग्निरूपं लङ्घनं क्रियते तथा चतुःप्रकारा संशुद्धिः इत्यादिचरकवचनाद्वमनादिरूपं लङ्घनं सर्व्वैर्ज्वरिभिः कथं न क्रियते । तत्रोच्यते । वम-नादिकमवस्थाविशेषेषु क्रियते न तु सर्व्वज्वरेषु । तथा च सुश्रुतः ।

"श्लेष्मोल्लेशे बलिने देयं वमनं श्लैष्मिके ज्वरे ।
पित्तप्राये विरेकस्तु कार्यः प्रग्निधिलाग्नये ॥"

प्रग्निधिलाग्नये अत्र प्रोपसर्गः वैपरीत्ये तेन गताग्नये इत्यर्थः ॥*॥

"सशेषेऽनिलजे कार्यं सोदावर्त्ते निरूहणम् ।
कफाभिपन्ने शिरसि कार्यमूर्द्धविरेचनम् ॥"

अपि च । सर्व्वज्वरिभिः पिपासानियहश्च न कार्यः ॥ यत आह हारीतः ।

"दृष्ट्वा गरीयसी घोरा सदाःप्राणविनाशिनी ।
तस्माद्देयं दृष्टार्त्ताय पानीयं प्राणधारणम् ॥"

अतोऽवस्थाविशेष एव पिपासासहनम् ॥*॥

ज्वरिभिर्म्मारुतसेवनं न कार्य्यम् । सुश्रुतेन प्रवात-सेवनस्य सर्व्वथा निषिद्धत्वात् अतो मारुतसेवनं अवस्थाविशेष एव युक्तम् । आतपसेवनञ्चा-वस्थाविशेष एव संग्रहीतम् ॥*॥

"लङ्घनाम्बुयवागूभिर्य्यदा दोषो न पच्यते ।
तदा तं सुखवैरस्यदाहारोचकनाशनैः ॥
ज्वरघ्नैः पाचनैर्दीप्तैः कषायैः समुपाचरेत् ।"

दृष्टश्च लङ्घनपाचनयोः स्फुट एव भेदः । व्यायामोऽपि न कार्य्यस्तस्यातिनिषिद्धत्वात् । अवस्था-विशेषे पुनःपार्श्वपरिवर्त्तनादिरूपः सोऽपि कर्त्तव्यः । तस्माच्चतुःप्रकारा संशुद्धिरित्यादि-श्लोके लङ्घनपदं कर्त्तव्यपर्य्यायमिति निर्व्यूढम् ॥

अथाग्निरूपस्य लङ्घनस्य फलमाह ।

"लङ्घनेन क्षयं नीते दोषे सम्यक्षितेऽनले ।
विष्वग्वलं लघुत्वञ्च क्षुत्तैवास्योपजायते ॥"

लङ्घनेन अनग्निना दोषे प्रदहे क्षयं नीते ।

यत आह ।

"आहारं पचति ह्यग्निर्दोषानाहारवर्ज्जितः ।"

पचतीति । सम्यक्षितेऽनले व्यक्षादकदोषे संक्षीणे क्षयं प्रदीप्ते । यथोक्तसम्प्राप्तिसामग्री विघटनात् । विष्वग्वलं शरीरस्य गौरवाभावेन लघुत्वम् । क्षुत् बुभुक्षा च जायते इत्यर्थः ॥*॥

अन्यच्चाह सुश्रुतः ।

"अनवस्थितदोषार्थे लङ्घनं दोषपाचनम् ।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम् ॥
अनवस्थितदोषार्थैः अनवस्थितः स्वस्थानादि-क्षतो गतो दोषोऽग्निञ्च यस्य तस्य ज्वरिणः ।
काङ्क्षा अन्नाभिलाषः । रुचिः लङ्घनेनामपाका-न्मुखशोषादिनाशे सुखस्य यत् प्रसन्नत्वं सैव रुचिः शोभा । रुचिः स्त्री दीप्तौ शोभायामभि-लाषयोरिति मेदिनीकारः ॥*॥ संप्रति क्षतस्य लङ्घनस्य लक्षणमाह ।

"वातमूत्रपुरीषाणां विसर्गोद्गारलाघवे ।
हृदयोद्गारकण्ठास्य शुद्धौ तन्द्राक्लमे गते ॥
क्षुदे जाते रुचौ वापि क्षुत्पिपासासहोदये ।
क्षतं लङ्घनमादेश्यं निर्व्यूढे चान्तरात्मनि ॥"

हृदयस्य शुद्धिरनवरोधः । उद्गारशुद्धिःधूमा-ज्योद्गाराभावः । कण्ठस्य शुद्धिः कफाद्यलिप्तत्वम् । आस्यशुद्धिः मुखस्य प्रसन्नतरत्वम् । तन्द्राक्लमे तन्द्रया क्लमः तस्मिन् । तन्द्रा निद्रावत् । क्लमोऽत्र ग्लानिः । क्षुत्पिपासासहोदये क्षुत्-पिपासाभ्यां सह युगपदुदये । अन्तरात्मनि मनसि । एतानि लक्षणानि मिलितान्येव सम्यक् क्षतं लङ्घनं बोधयन्ति । न तु प्रत्येकम् ॥*॥

हीनस्य लङ्घनस्य लक्षणमाह ।

"कपोतग्रीवः सङ्क्षामः क्षीणश्च सुदुर्म्मुखः ।
कण्ठास्यहृदयाशुद्धिस्तन्द्रा स्याद्धीनलङ्घने ॥
कपोतग्रीवः कपस्य वमनायोपस्थितिः ॥
क्षामः हृदयात् कफनिर्गमः ॥*॥

अतिग्रथितस्य लङ्घनस्य लक्षणमाह ।

"पर्व्वभेदोऽङ्गमर्द्दश्च कासः ग्लौल्यं सुखस्य च ।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रोत्रनेत्रयोः ॥
मनसः संभ्रमोऽभीक्ष्णमूर्द्धवातस्तमो हृदि ।
देहाग्निबलहानिश्च लङ्घनेऽति कृते भवेत् ॥
दौर्ब्बल्यं श्रोत्रनेत्रयोः कर्णनेत्रयोः स्वविषय-ग्रहणासामर्थ्यम् । मनसः संभ्रमः भ्रान्तिः । ऊर्द्धवात उद्गारबाहुल्यम् । हृदि तमः अन्ध-कारप्रविष्टस्येव ज्ञानम् ॥*॥ बलं रक्षन् लङ्घनं कारयेदित्याह ।

"बलाविरोधिना चैनं लङ्घनेनोपपादयेत् ।
बलाधिष्ठानमारोग्यं यदयोऽयं क्रियाक्रमः ॥"

अयमर्थः । एनं ज्वरितं बलविरोधिना अनति-बलक्षयकारिणा लङ्घनेन उपपादयेत् उप-चरेत् । कुत इत्यपेक्षायाह । यदर्थ इति । यस्मै आरोग्याय अयं क्रियाक्रमः चिकित्सोपक्रमः । तत् आरोग्यं बलाधिष्ठानं बलाश्रयमित्यर्थः ॥*॥

केषाञ्चिदनग्नस्य निषेधमाह सुश्रुतः ।

तद्धि मारुतदृष्ट्यास्यशुष्मशोषभ्रमान्वितैः ।
न कार्यं गुर्व्विणीबालवृद्धदुर्ब्बलभीरुभिः ॥
न क्षयाध्वश्रमक्रोधकामशोकचिरज्वरे ।
तत्र अनग्नं उत्क्षयमारुतयुक्तेन ज्वरिणा न कार्य्यम् । मारुतोऽत्र निरामो बोद्धव्यः । सामे तु मारुते लङ्घनं कार्यमेव । यत आह तन्त्रान्तरे ।

"अवश्यमेव कुर्व्वीत ज्वरी सामे समीरणे ।
लङ्घनं श्लेष्मपाकार्थं न तदूर्द्धं यथा कफे ॥
तदूर्द्धं आमपक्वादूर्द्धम् । अतएवोक्तम् ।
कफपित्ते ह्रवे धातू सहिते लङ्घनं बहु ।
आमक्षयादूर्द्धमपि वायुर्न सहते क्षयम् ॥"*॥

आमस्य लक्षणमाह ।

"आहारस्य रसः सारो यो न पक्वोऽग्निवायवात् ।
आमसंज्ञो न लभते बहुव्याधिसमाश्रयः ॥"

तन्त्रान्तरे ।

"आममन्नरसं केचित् केचित्तु मलसञ्चयम् ।
प्रथमां दोषदुष्टिं वा केचिदामं प्रचक्षते ॥"

अन्यच्च ।

"अपि पक्वमसंसक्तं दुर्गन्धं बहुपिच्छिलम् ।
यदन्नं सर्व्वगात्राणामाम इत्यभिसंज्ञितः ॥
तेनामेन समायुक्ता दोषा दूष्याश्च तादृशाः ।
तदुद्भवा आमयाश्च सामा इति बुधैः स्मृताः ॥"

अत्र सामस्य वातस्य लक्षणमाह ।

"वायुः सामो विबन्धाग्निसादतन्द्राक्लजृम्भणैः ।
वेदना श्रोत्रनिस्तोदैः क्रमशोऽङ्गानि पीडयेत् ॥
विचरेदृग्युगपच्चापि यद्वाति कुपितो भृशम् ॥
खेष्वावृतेषु भायति मेघस्यूर्दिये निशि ॥"

विचरेदृग्युगपद्वायुरामश्चैककालं विचरेत् । कुपितः सामो वायुः भृशमतिशयेन यद्वाद्य-ङ्गानीत्यर्थः ॥*॥ तस्यैव निरामस्य लक्षण-माह ।

"निरामो विशदो रूक्षो निर्ब्बिबन्धोऽल्पवेदनः ।
विपरीतगुणैः प्राप्तिं लिङ्गैर्याति विशेषतः ॥*॥

अत्र प्रसङ्गात् सामस्य पित्तस्य लक्षणमाह ।

पित्तं सामं भवेदम्लं दुर्गन्धं हरितं गुरु ।
अम्लीकाकण्ठहृद्दाहकरं ग्लानौ तथा शिरम् ॥
अम्लीका अम्लिलपुकी इति लोके ॥*॥

तस्य निरामस्य लक्षणमाह ।

"निरामं पीतमात्रान्नमतुग्र्यं कटुकं सरम् ।
दुर्गन्धि रुचिलङ्घित्रबलवर्द्धनमीरितम् ॥

अथ सामस्य कफस्य लक्षणमाह ।

"आविलस्तन्तुसन्तानः कण्ठदेशेऽवतिष्ठते ।
सामो बलाग्नी दुर्गन्धस्तृट्क्षुधोरभिघातकृत् ॥
स्थानः संहतः ॥

तस्य निरामस्य लक्षणमाह ।

"श्लेष्मा निरामो निर्गन्धः फेनवांश्चेदवानपि ।
भवेत् स पिच्छितः पाण्डुरास्यवैरस्यनाशनकृत् ॥"

अथ सामस्य बाधैर्लक्षणमाह ।

"आलस्यतन्द्राहृदयाविशुद्धि-
दौर्बल्यप्रसक्ताविलमूत्रताभिः ।
गुरूदरत्वारुचिसुप्तताभि-
रामान्वितं व्याधिमुदाहरन्ति ॥
आमं जयेल्लङ्घनकोलपेया
लघ्वन्नरूक्षौदनतिक्तयूषैः ।
विरूक्षणस्वेदनपाचनैश्च
संशोधनैरूर्द्धमधश्च तस्य ॥

तद्धि मारुतदृष्ट्यास्युष्मित्यादिश्लोके दृष्ट्यापि निरा-मैव विवक्षिता तेन निरामदृष्ट्यान्वितेन लङ्घनं न कार्य्यम् । सामायान्तु दृष्ट्यायां लङ्घनं कार्यमेव । तथा मुखशोषभ्रमावपि निरामावेव विवक्षितौ । सामयोस्तु तयोर्लङ्घनं कार्यमेव । गुर्व्विणीबाल-वृद्धादिभिरपि निरामैरेव लङ्घनं न कार्यम् । सामैः पुनस्तैरपि लङ्घनं कार्यमेव । क्षयो धातु-क्षयो राजयक्ष्मा । वातजे ज्वरे लङ्घनं न कार्यम् ॥ ज्वरी लङ्घनेऽपि जलं पिबेदित्याह सुश्रुतः ।

क्षपितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
अतः सर्व्वास्ववस्थासु न क्वचिद्वारि वारयेत् ॥
हारीतश्च ।
क्षुधा गरीयसी घोरा सदाःप्राणविनाशिनी ।
तस्मादेयं क्षुधार्त्ताय पानीयं प्राणधारणम् ॥
अवश्यं पेयमपि जलं ज्वरी किञ्चिद्वारयन् पिवेदित्यत आह सुश्रुत एव ।
जीवनं जीविनां जीवो जगत् सर्व्वन्तु तन्मयम् ।
अतोऽत्यन्ततया सर्व्वो न क्वचिद्वारि वारयेत् ॥
जीवनं जलम् ॥ किञ्चित्तु वारयेदेव । तथा च ।
ज्वरे नेत्रामये कोठे मन्देऽग्यादरे तथा ।
अरोचके प्रतिश्याये प्रसेके च्यथौ क्षये ॥
ग्रहे च मधुमेहे च पानीयं मन्दमाचरेत् ॥
प्रसेके सुखप्रसेके । मन्दमाचरेत् अल्पं पिबेत् । यत आह ।
"अतियोगेन सलिलं क्षुद्यतेऽपि प्रयोजितम् ।
प्रयाति श्लेष्मपित्तत्वं ज्वरितस्य विशेषतः ॥"
तच्च जलं ज्वरी शृतं न पिबेदित्याह सुश्रुतः ।
नवज्वरे प्रतिश्याये पार्श्वशूले गलग्रहे ।
सद्यःशुद्धौ तथाध्माने आधौ वातकफोद्भवे ॥
अरुचिग्रहणीगुल्मश्वासकासेषु विभ्रमे ।
हिक्कायां स्नेहपाने च शृतं वारि विवर्ज्जयेत् ॥"
अन्यच्च स एव ।
"श्लेष्मणेन शृतेन ज्वरस्तोयेन वर्द्धते ।"
अत्र शृतं जलमक्वथितं निषिद्धम् । तथा सति क्वथितं ग्राह्यं आयातम् । तच्च क्वथितस्य विधिर्गौरवाच्च ।
"क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलञ्च यत् ।
तत्तोयं क्वथितं ज्ञेयं दोषघ्नं पाचनं लघु ॥
निर्व्वेगं गतवेगः । क्वथितस्य विधयानाह सुश्रुतः ।
"वातश्लेष्मज्वरार्त्ताय हितमुष्णाम्बु दीयते ।
दीपनं स्यात् कफच्छर्दि वातपित्तानुलोमनम् ॥
तद्धि माहेन्द्रदोषघ्नं स्रोतसां शृतमन्यथा ॥"
वाग्भटश्च ।
"क्षुधार्त्ता प्राप्तसुप्तास्तु पिबेद्वातकफज्वरे ।
तत् कफं विलयं नीत्वा क्षुधामाशु निवर्त्तयेत् ॥
उदीर्य्य चापि स्रोतांसि ससृतञ्च विशोषयेत् ।
वातपित्तकफक्लेदग्लानज्वाक्षि सारयेत् ॥" * ॥
अधोष्णोदकस्य जलस्य गुणाह ।
"क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलं तथा ।
अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते ॥
ज्वरकासकफश्वासवातपित्तामदोषजान् ।
नाशयेत् वह्निसंयोगि पञ्चमुष्णोदकं सदा ॥" ॥"
अथर्त्तुभेदे जलस्य पाकभेदः ।
त्रिपादशेषं सलिलं शीते शरदि शस्यते ।
हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः ॥" ॥
अन्ये तु ।
"निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम् ।
शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम् ।
अष्टमांशावशेषन्तु वारि वर्षासु शस्यते ।
इति केचिदुधाः प्राहुर्ज्ज्वेष्टागमदर्शनात् ॥"
केचित्तु ।
"वसुध्वङ्गेषु वाजेषु वेदेषु त्रिषु पक्षयोः ।
एकभागावशेषं स्यादम्बु वर्षादिषु क्रमात् ॥"
अत्र दोषाणां यथोक्तवत्ता हीनता वा तथा अवस्था कल्पनीया ॥
"तत् पादहीनं पित्तघ्नमर्द्धहीनन्तु वातजित् ।
त्रिपादहीनं श्लेष्मघ्नं संयाह्यग्निप्रदं लघु ॥" ॥
त्रिपादहीनस्य तत्रान्तरे आरोग्याम्बुसंज्ञा ।
तस्य लक्षणं गुणाश्च ।
"पादशेषन्तु यत्तोयमारोग्याम्बु तदुच्यते ।
आरोग्याम्बु सदा पथ्यं कासश्वासकफापहम् ॥
सद्यो ज्वरहरं प्राहि दीपनं पाचनं लघु ।
आनाहपाण्डुशूलार्शोगुल्मग्रोथोदरापहम् ॥"
अथर्त्तुभेदे जलस्य ग्रहणाय देशभेदः ।
"हेमन्ते शिशिरे चाम्बु सारसं वा तडागजम् ।
वसन्तग्रीष्मयोः कौप्यं वार्ष्यं वा नैर्झरं हितम् ॥
नादेयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः ।
विषवत् पञ्चपुष्पादिदुष्टं निर्झरयोगतः ॥
औद्भिदं चान्तरीक्षं वा कौपं प्रावृषि च स्मृतम् ।
ग्रहणं शरदि नादेयं नीरमंशूदकं परम् ॥
दिवा रविकरैर्जुष्टं शीतं शीतकरैर्निशि ॥
शैवलंशूदकं नाम स्निग्धं दोषत्रयापहम् ।
अनभिष्यन्दि निर्द्दोषमान्तरीक्षजलोपमम् ॥
वर्ष्यं रसायनं मेध्यं शृतं लघु सुधासमम् ॥"
अन्यच्च ।
"शरदृगस्त्येरुदयादक्षिलं सलिलं हितम् ।
इति सुश्रुतश्च ।
"कार्त्तिके मार्गशीर्षे च पयोमाद्यं प्रशस्यते ॥"
अथर्त्तुपक्वमपि जलं विषयविशेषे शृतं पिबेदित्याह सुश्रुतः ।
"दाहातिसारपित्तास्रमूर्च्छामदविषार्त्तिषु ।
मूत्रकृच्छ्रे पाण्डुरोगे क्षुद्याच्छर्द्यम्लपित्तेषु च ॥
मद्यपानात् ससृष्टे रोगे पित्तोत्थिते तथा ।
सन्निपातसमुत्थे च शृतं शीतं प्रशस्यते ॥"
क्वथितस्य जलस्य शीतलकरत्वविशेषे गुणविशेषमाह सुश्रुतः ।
"शृतस्तु तन्निदोषघ्नं यदत्यर्थंसुशीतलम् ।
अरुक्षमनभिष्यन्दि क्लमिहृद्ज्वरहृल्लघु ॥
धारासातेन विधिना दुर्ज्जरं पवनाहतम् ।
अत्यर्थंसुशीतलं शिशितमेव शीतलम् ।
अन्यापरेऽपि विशेषाः ।
"दिवा शृतं पयो रात्रौ गुरुतामधिगच्छति ।
रात्रौ शृतं दिवा पीतं गुरुत्वमधिगच्छति ॥
तत्तु पर्य्युषितं वह्निगुणभ्रष्टं विदोषजित् ।
गुर्व्वभ्यपाकं विष्टम्भि सर्व्वरोगेषु निन्दितम् ॥
शृतं शीतं पुनस्तप्तं तोयं विषसमं भवेत् ।
निर्व्युष्टोऽपि तथा शीतः पुनस्तप्तो विषोपमः ॥"
रात्रौ तृष्णोदकस्य लक्षणमन्यदाह ।
"अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा ।
अथवा क्वथनेनैव सिद्धसुप्तोदकं वदेत् ॥"
तस्य गुणाः ।
"श्लेष्मानिलामदोषघ्नं दीपनं वह्निशोधनम् ।
श्वासकासज्वरहरं पीतसुप्तोदकं निशि ॥"
अन्यच्च ।
"भिनत्ति श्लेष्मसङ्घातं मारुतं चापकर्षति ।
अजीर्णं जरयत्याशु पीतसुप्तोदकं निशि ॥"
रात्रावुष्णोदकञ्च तत्रैव पिबेदित्याह ।
"उष्णं तदभिजननं लघ्वच्छं वह्निशोधनम् ।
पार्श्वरुक्पीनसाध्मानहिक्कानिलकफापहम् ॥
ग्रस्तं कृच्छ्रश्वासशूलेषु सदाःशुद्धौ नवज्वरे ॥"
विषयविशेषे त्वाममेव जलं शीतलं पिबेदित्याह सुश्रुतः ।
"मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये ।
श्रमश्रमणरीतेषु तमके वमथौ तथा ॥
धूमोष्णारेऽविदग्धेऽन्ने ग्रीष्मे च सुखकक्षयोः ।
अङ्गेषु रक्तपित्ते च शीतमम्भः प्रशस्यते ॥"
शीतमम्भः आममेव न तु क्वथितम् । क्वथितन्तु शीतं दाहादिघ्नं यदुक्तं तत् सज्वरेषु । विज्वरेषु तु दाहादिघ्नं शीतं प्रशस्यते इति भेदः ॥
आमादिजलानां जठराग्निना पाककालावधिमाह ।
"आमं जलं पाकमुपैति यामं
पक्वं पुनः शीतलमर्द्धयामम् ।
पक्वं कटुत्वञ्च ततोऽर्द्धकालं
कालात्ययः पीतजलस्य पाके ॥
पित्तमद्यविषोत्थेषु तिक्तकैः शृतशीतलम् ॥"
जलं हितमिति शेषः । ॥ तिक्तानि बहुलानि तेभ्यो निर्द्धार्य्य योगमाह सुश्रुतः ।
"सुरसपर्पटकोदीच्यक्षुद्राख्योशीरचन्दनैः ।
शृतं शीतं जलं दद्यात् छर्द्दिदाहज्वरार्त्तये ॥"
क्षुद्रा धान्यकम् । यत आह निघण्टौ धन्वन्तरिः । कुस्तुम्बुरुः सबिकारा क्षुद्रा धान्यं धनुन्नकमित्यादि । तदुक्तञ्च ।
"धान्यकं दीपनं रुच्यं पाचनं स्वादुपाकि च ।
दोषत्रयहरादाहश्वासकासज्वरप्रणुदित्यादि ॥"
चक्रदत्तवङ्गसेनहारीतादयः क्षुद्राख्याने नागरं पठन्ति । तदुक्तं यथा,—
"सुरसपर्पटकोशीरचन्दनोदीच्यनागरैरिति ।
नागरं कटुकमपि नाम पित्तजनकं मधुरपाकित्वादिति तेषामभिप्रायः । नागरं नागरमुस्तकं इति केचित् । क्वचिदेकदेशेन समुदायोऽवगम्यते । यथा भीमो भीमसेन इति । तीक्ष्णे तु नागरख्याने पञ्चकम् ॥ * ॥ एतस्य प्रक्रिया । चन्दनैरित्यत्र सहार्थे तृतीया । तेन सुरसादिभिः षड्भिरामैरेव मुस्तैः सहितं जलं शृतं जलमेव केवलं यथर्त्तुपक्वं पश्चात्तच्छीतशीतलं दद्यात् । तथा च वङ्गसेनः ।
यदत्र शृतशीतास्तु षड्गादि प्रयुज्यते ।
कर्षमात्रं ततो द्रव्यं याह्येतत् प्रास्थिकेऽम्भसि ॥
अस्यायमर्थः । यत् हेतोः । अत्र जले । शृतशीतास्तु शृतास्तु केवलास्तेन यथर्त्तुपक्वाः । शीतास्तु शीतलीकृतास्तु । षड्गादि द्रव्यं प्रयुज्यते । आममेव संस्कृतं जलं स्याच्चेत् । ततः प्रक्षेप्यत्वात् कर्षमात्रं द्रव्यं समुदितं षड्गादि

प्राप्तिके ऽभ्यसि प्रथमाह्ने कथितशीतले जले क्षेप्तुं ग्राह्ययेत्। अतएव षड़ङ्गमभिधाय षड़ङ्गपानीयमिति वङ्गसेनादिभिरुक्तम्। अस्मिन् पक्षे चन्दनं श्वेतं ग्राह्यं न तु रक्तम्। तत्कषायलेपयोरेव प्रयोक्तुसुक्तम्। यत आह। कषायलेपयोः प्रायो युज्यते रक्तचन्दनमिति। षड़ङ्गपानीयमिदम्॥ * ॥ षड़ङ्गादेः पाने तु विधातव्ये प्रक्रिया भिन्ना तामाह वङ्गसेनः। कर्षमात्रमिह द्रव्यं ग्राह्ययेत् प्राप्तिके ऽभ्यसि। अर्द्धप्रस्थं प्रयोक्तव्यं पाने पेयादिसम्विधौ॥ आदिशब्देन यूषयवागूविलेपिभक्तानि गृह्यन्ते॥* पानप्रक्रियां शार्ङ्गधरोऽप्येनामेवाह।

क्षुण्णं द्रव्यं पलं साध्यं चतुःषष्टिपले जले। अर्द्धशिष्टन्तु तद्देयं पाने पेयादिसम्विधौ॥ पानप्रयोगश्च षड़ङ्गसुक्तवान्। अस्मिन् पक्षे चन्दनं रक्तं ग्राह्यम्। कषायलेपयोः प्रायो युज्यते रक्तचन्दनमिति वचनात्॥ * ॥

अथ रक्तचन्दनस्य गुणाः।

तत्तु रक्तं हिमं स्वादु स्फर्द्दिछर्द्दिश्रमपित्तजित्। तिक्तं नेत्रहितं दृष्यं ज्वरव्रणविषापहम्॥

षड़ङ्गादि प्रयुज्यते इत्यादि ग्रन्थेन वक्ष्यमाणा योगा उच्यन्ते। ते यथा,—

श्रीपर्णीचन्दनोशीरपरूषकमधुकजम्। पानं पित्तज्वरं हन्याच्छारिवाद्यं सशर्करम्॥

अत्र श्रीपर्णीपरूषकयोः पक्षे ग्राह्यं। मधूकस्य तु पुष्पम्। अन्यच्च।

हन्यात् सयष्टीमधुकं तथैवोत्पलपूर्व्वकम्। पानं घृतं हिमं किंवा सोत्पलं शर्करायुतम्॥

हन्यात् पित्तज्वरमिति शेषः। उत्पलमत्र कमलमित्यादि।

दिवास्वापं न कुर्व्वीत यतोऽसौ स्यात्कफावहः। शीतवर्षासु कालेषु दिवास्वापो निषिद्ध्यते॥ उचितो हि दिवास्वापो नित्यं तेषां शरीरिणाम्। वातादयः प्रकुप्यन्ति येषामस्वपतां दिवा॥ * ॥

तेषां दिवास्वप्न उचितत्वमाह।

व्यायामप्रमदाध्ववाहनरतान् क्षान्तानतीसारिणः
शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीड़ितान्।
चौक्षान् क्षीणकृशान् क्षिपून् मदहतान् दृष्ट्वानृषाजीर्णिनो
रात्रौ जागरितान् नरान् निरशनान् कामं दिवा स्वापयेत्॥ * ॥

अथ वातिकादिज्वराणां पाकावधिमाह।

वातिकः सप्तरात्रे तु दशरात्रेण पैत्तिकः। श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि॥*

रसस्यामत्वेऽवधिमतिक्रम्यापि ज्वरस्तिष्ठति। यत आह सुश्रुतः।

बहुदोषस्य मन्दाग्नेः सप्तरात्रात् परं ज्वरे। लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते॥ तदा तं सुखवैरस्यछर्द्यारोचकनाशनैः। कषायैः पाचनैर्द्दीप्तैर्ज्वरघ्नैः समुपाचरेत्॥ * ॥

ज्वरस्य तारुण्यमध्यावस्थता जीर्णतावधिः। आसप्तरात्रात्तरुणं ज्वरमाहुर्मनीषिणः। द्वादशाहमभिव्याप्य मध्यं जीर्णं ततः परम्॥ आसप्तरात्रादिति। अत्राङ् मर्य्यादायाम्। रात्रिशब्दो दिवसस्योपलक्षकः। तेन सप्तमदिवसादर्व्वाक् ज्वरस्तरुण इत्यर्थः। तथा चोक्तं तन्त्रान्तरे।

ज्वरे व्यतीते षड़हे जीर्णं इत्युच्यते बुधैरिति। दशरात्रात् परं जीर्णमाहुरन्ये मनीषिणः। अतएव जातूकर्णः। जीर्णज्वरोदग्रदिवस इति॥ अथ ज्वरे भेषजप्रयोगसमयः।

वातिके सप्तरात्रे तु दशरात्रेण पैत्तिके। श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजम्॥

सप्तरात्रे इत्यत्र रात्रिशब्दो दिवसस्योपलक्षकः। अतएवोक्तम्।

पाचनेदातुरं सामसौषधं सप्तमे दिने। ग्रामनेनाथ वा हत्वा निरामं तमुपाचरेदिति॥ शार्ङ्गधरेणाप्युक्तम्।

गुड़ूचीपिप्पलीमूलनागरैः पाचनं हृतम्। वातज्वरे तथा पेयं कालिङ्गं सप्तमेऽहनीति॥ हारीतेनाप्युक्तम्।

एतां क्रियां प्रयुञ्जीत षड़ाद्यं सप्तमेऽहनि। पिबेत् कषायसंयोगात् पेयां ज्वरविनाशिनीम्॥ एतां क्रियां लङ्घनादिरूपाम्। कषायसंयोगात् कषायेण साधितां पेयामित्यर्थः॥ खरनादेनाप्युक्तम्।

इति षड़ाद्यिकः प्रोक्तो नवज्वरहरो विधिः। ततः परं पाचनीयं ग्रामनीयं ज्वरे हितम्॥ ततः परं सप्तमेऽहनीत्यर्थः॥ वाग्भटश्च।

सप्ताहादौषधं केचिदाहुरन्ये दशाहतः। लघुन्नं भोजिते केचिद्देयमामोल्बणे न तु॥ सप्ताहात् सप्ताहमारभ्येत्यर्थः। अत्र ल्यब्लोपे कर्म्मणि पञ्चमी। अतएव सुश्रुतः।

दशरात्रात् परं सर्व्वैर्ज्ञातव्यमिति निश्चितम्। अतएव दशरात्रेण द्वादशाहेनेति लङ्घनवता व्यतीतेनेत्यर्थः॥ अत्र चरकस्त्वेवमाह।

ज्वरितं षड़हेऽतीते लघुन्नं प्रतिभोजितम्। पाचनं ग्रामनीयं वा कषायं पाययेत्तु तम्॥

अस्यायमर्थः। ज्वरितं षड़हे लङ्घनेन व्यतीते सप्तमेऽहनि भोजितलघुन्नं अष्टमे दिने कषायं पाययेदित्यर्थः॥ तथा च सुश्रुतः।

सप्तरात्रात् परं केचिन्मन्यन्ते देयमौषधम्॥ सप्तरात्रात् परं अष्टमेऽहनीत्यर्थः। केचिच्चरकादयः। चक्रदत्तोऽपि।

सप्तरात्रेण पच्यन्ते सप्तधातुगता मलाः। निरामस्तु ततः प्रोक्तो ज्वरः प्रायोऽष्टमे दिने॥

एवं सति कषायदाने सप्तमाष्टमयोर्दिवसयोर्विकल्पः॥ * ॥ तत्रापि वयोबलाग्निदोषदेशकालोचितं कुर्य्यात् भेषजमन्नञ्च दोषपाकं दृष्ट्वा दद्यादित्याह सुश्रुतः।

"पैत्तिके वा ज्वरे देयमल्पकालमसुत्थिते। अचिरज्वरितस्यापि भैषज्यं दोषपाकतः॥" इति। अस्यायमर्थः। अल्पकालसमुत्थिते पैत्तिके ज्वरे दोषपाकं दृष्ट्वा भैषज्यं देयम्। न तु तत्र दशरात्रापेक्षा। तथा अचिरज्वरितस्यापि पैत्तिकेतरनवज्वरयुक्तस्यापि दोषपाकं दृष्ट्वा भैषज्यं देयमित्यर्थः॥ * ॥ दोषपाकलक्षणमाह सुश्रुतः।

स्रुते ज्वरे लघौ देहे प्रचलेषु मलेषु च। पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधमिति॥

ज्वरे स्रुते। स्वल्पीभूते। मलेषु वातपित्तकफमूत्रपुरीषेषु। प्रचलेषु स्वमार्गसञ्चारिषु। पक्वं निरामम्। दोषप्रकृतिवैकृत्यादेकेषां पक्वलक्षणम्। दोषाणां दृष्टवातपित्तकफानां प्रकृतिः ज्वरस्य तदुपद्रवाणां चोत्पादनम्। तस्या वैकृत्यं वैपरीत्यं तस्मात् दोषपाकज्ञानं एकेषां मते।

क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्द्दवम्। दोषप्रकृतिरित्याहो निरामज्वरलक्षणम्॥

दोषप्रकृतिः दोषाणां स्वमार्गसञ्चारः। माधवनिदाने उत्साहस्थाने अयमाह इति पाठः॥*॥

ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम्। अचानुक्ते प्रभातं स्यात् कषायेषु विशेषतः॥

सुखभेषजसम्बन्धो निर्विघ्नस्तरुणे ज्वरे। तोयपेयादिसंस्कारैर्निर्दोषं तत्र भेषजम्॥

सुखभेषजं क्वाथः तस्य सम्बन्धः पानम्। यत आह।

न कषायं प्रयुञ्जन्ति नराणां तरुणे ज्वरे। कषायेणाकुलीभूता दोषा जेतुं सुदुस्तराः॥

आकुलीभूताः प्रवृद्धाः स्वमार्गं परित्यज्य यतस्ततो गताः। अत्र कषायशब्देन क्वाथो गृह्यते॥ * ॥ उक्तश्च क्वाथस्य पर्य्यायाः।

प्रस्तं क्वाथः कषायश्च निर्य्यूहः स निगद्यते। तोयपेयादिसंस्कारैर्निर्दोषं तत्र भेषजमिति॥

तत्र तरुणे ज्वरे भेषजं सुखभेषजं क्वाथरूपम्। तोयपेयादिसंस्कारैर्निर्दोषम्। यत आह।

न तु कल्पनमुद्दिश्य कषायः प्रतिषिद्ध्यत इति। कल्पनं तोयपेयायवाग्वादिकम्॥ * ॥ ननु।

खरस्य तथा कल्कः क्वाथश्च हिममाण्टकौ। ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम्॥

इति वचनात् खरसादयोऽपि कथं न निषिध्यन्ते। तन्न।

यः कषायः कषायः स्यात् स वर्ज्यस्तरुणे ज्वरे। इति।

यः कषायः कषायः स्यात् चतुर्थभागावशेषकरणेन अष्टमभागावशेषकरणेन वा कषायवर्ज्यः कषायरसश्च स्यात्। स कः क्वाथः। स तरुणज्वरे निषिद्धः॥ * ॥ क्वाथवाचकस्य कषायस्य लक्षणमाह।

पादशिष्टः कषायः स्यादयं षोड़शगुणाम्भसा। क्वथितोऽतः षड़ङ्गादि न निषिद्धो नवज्वरे॥

अस्यायमर्थः। यः कात्यायनोक्तात् षोड़शगुणेनाम्भसा क्वथितः पक्वः अथ च पादशिष्टः चतुर्थभागावशेषः स कषायः स्यात्। अतः षड़ङ्गादिस्तरुणज्वरे न निषिद्धः। अपाकादर्द्ध-

पाकाद्योत्कलत्वाभावेन कषायत्वाभावात् ॥*॥
तरुणज्वरे कषायस्य दोषमाह।
"दोषा वृद्धाः कषायेण स्तम्भितास्तरुणे ज्वरे।
स्तम्भान्ते न विपच्यन्ते कुर्व्वन्ति विषमज्वरम्॥
कषायेण स्तम्भिताः प्रवृत्तये निवारिताः।
यत आह कषायरसगुणान्।
कषायः स्तम्भनः शीतो रूक्षः पित्तकफापहः।
इत्यादि।
स्तम्भान्ते आमानं कुर्व्वन्ति। न विपच्यन्ते सुखेन न विपच्यन्ते दुःखं दत्त्वा विलम्बेन विपच्यन्ते इति यावत्॥ अन्यच्च।
"न व्रजन्ते न पच्यन्ते कषायैः स्तम्भिता मलाः।
तिर्य्यग्विमार्गगा वाते घोरं कुर्य्युर्नवज्वरम्॥*॥
अनुपस्थितदोषाणां वमनं तरुणे ज्वरे।
कृच्छ्रोगं श्वासमानाहमोहञ्च कुरुते भृशम्॥"
अस्यायमर्थः। कफादिदोषोपस्थितौ स्वयमेव चेद्भवति वमनं न तद्दोषाय। अनुपस्थितदोषाणान्तु तरुणे ज्वरे वमनं यत्नकृतं कृच्छ्रोगादीन् करोतीत्यर्थः। एतेन वचनेन तरुणे ज्वरे यत्नाद् वमनं निषिद्धम्॥*॥
अवस्थाविशेषे तदपि कर्त्तव्यमित्याह।
"सद्यो भुक्तस्य वा जाते ज्वरे सन्तर्पणोत्थिते।
वमनं वमनार्हस्य शस्तमित्याह वाग्भटः॥"
वमनं वेति विकल्पो लङ्घनापेक्षया वमनार्हस्येत्यनेन गर्भिण्यतिवृद्धातिबालादिनिरासः। वाग्भटोऽपि वृद्धवाग्भटः॥
"वमितं लङ्घयेत् प्राज्ञो लङ्घितं न तु वामयेत्।
वमनं श्लेष्मबाहुल्याद्बाल्याल्लङ्घनकर्षितम्।
न कार्य्यं गुर्व्विणीबालवृद्धदुर्ब्बलभीरुभिः॥"
अनशनमिति शेषः। अनेन वचनेन गुर्व्विण्यादीनामनशननिषेधात् ज्वरे सामे पाचनं निरामे शमनं पथ्यान्नमण्डादिकञ्च दद्यात्॥*॥
पाचनशमनयोर्लक्षणमाह।
"यत् पचत्यामसाहारं पचेदामरसञ्च यत्।
यदपक्वान् पचेद्दोषांस्तद्धि पाचनमुच्यते॥
न शोधयति यद्दोषान् समान्नोदीरयत्यपि।
समीकरोति संवृद्धांस्तत् संशमनमुच्यते॥"
न शोधयति नोर्द्धाधोमार्गाभ्यां पातयति, नोदीरयति न वर्द्धयति॥*॥ तयोः संप्रदानं कालञ्चाह।
"पाययेदातुरं सामं पाचनं सप्तमे दिने।
शमनेनाथवा वृद्धा निरामं तमुपाचरेत्॥
तस्मादादौ प्रदेयन्तु शमनं दिवसत्रयम्।
शमनीयं प्रदेयन्तु पञ्चरात्रं ततः परम्॥
शोधनं दीपनञ्चैव एकरात्रं प्रदापयेत्॥"
इत्यत्रिसंहितातः॥ अन्यच्च।
"शमनञ्चैवाल्पदोषञ्च शमनीयैरुपाचरेत्॥"
नव।
"कालाप्रसेको वृक्षासो हृदयाशुद्धारोचकौ।
तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता॥
क्षुन्माद्यो बहुमूत्रत्वं स्तब्धता बलवान् ज्वरः।
आमज्वरस्य लिङ्गानि न दद्यात्तत्र भेषजम्॥
भेषजं श्यामदोषस्य भूयो जनयति ज्वरम्॥"
भूयो बाहुल्येन। अन्यच्च।
"पाययेद्दोषहरणं मोहादामज्वरे तु यः।
स सुप्तं कृष्णसर्पन्तु करेणैव पराम्शेत्॥"
इति वचनादामज्वरे भेषजनिषेधात् कथं सामे ज्वरे पाचनं देयम्। उच्यते निरुपद्रवे सामे ज्वरे पाचनं देयम्। सोपद्रवे तु सामे भेषजं निषिद्धम्। तथा च वाग्भटः।
"सप्ताहात् परतोऽदृष्टे सामे स्यात् पाचनं ज्वरे।
निरामे शमनं स्तब्धे सामे नौषधमाचरेत्॥"
अदृष्टे निरुपद्रवे। स्तब्धे सोपद्रवे॥*॥ अथ सामान्यज्वरे पाचनं कषायमाह सुश्रुतः।
"नागरं देवकाष्ठञ्च धामकं वृहतीद्वयम्।
दद्यात् पाचनकं पूर्व्वं ज्वरितेभ्यो ज्वरापहम्॥
धामकं रौहिषम्। तदलाभादुशीरं दद्यात्। वृहतीद्वयं वृहत्फला सूक्ष्मफला वृहती। क्षुद्रा वृहती चेति। कण्टकारीद्वयं वा दद्यात्॥ कण्टकारीद्वयं शुण्ठी धामकं सुरदारु चेति शार्ङ्गधरेण उक्तत्वात्। नागरादिक्वाथः सर्व्वज्वरेषु॥*॥ अथ सामान्यतः संशमनीयान्याह सुश्रुतः।
"अथ संशमनीयानि कषायाणि निबोध मे।
सर्व्वज्वरेषु देयानि यानि वैद्येन जानता॥
वृक्षीरविल्ववर्षाभूपयः सोदकमेव च।
पचेत् क्षीरावशेषं तत् पेयं सर्व्वज्वरापहम्॥
वृक्षीरः श्वेतपुनर्नवा। वर्षाभूः रक्तपुनर्नवा। तथाच मदनपालः।
"पुनर्नवः श्वेतमूलो वृक्षीरो दीर्घपत्रकः।
पुनर्नवा परा रक्ता वर्षाभूः रक्तपुष्पकः॥"
पाकप्रकारमाह।
"क्षीरमष्टगुणं द्रव्यात् क्षीरात्क्षीरं चतुर्गुणम्।
क्षीरावशेषं पातव्यं क्षीरपाके ह्ययं विधिः॥"
द्रव्यात् पलपरिमितात्॥ अन्यच्च।
"वृक्षकादिगुणं क्षीरं शिग्रुपासारमेव च।
तत् क्षीरशेषं कथितं पेयं सर्व्वज्वरापहम्॥
गुडूचीधान्यकारिष्टं पञ्चकं रक्तचन्दनम्।
एषां क्वाथः सुप्रसिद्धः सर्व्वज्वरहरः स्मृतः॥
दीपनो दाहवृक्षासशूलाच्छर्द्यरुचीर्हरेत्॥"
गुडूच्यादिक्वाथः॥*॥ संशोधनं तरुणज्वरिणो निषिद्धं तदाह सुश्रुतः।
"वृद्धिं मूर्च्छां मन्दमोहं भ्रमवृद्धिमज्वरान्।
संशोधनस्य पानेन प्राप्नोति तरुणज्वरी॥"
संशोधनस्य लक्षणमाह।
"स्थानाद्वृद्धिर्मलैर्दुष्टैर्मधो वा दोषसञ्चयम्।
संशोधनं तदेव स्याद्देवदाल्यादिफलं यथा॥"
निषिद्धमपि संशोधनमवस्थाविशेषे देयं यत आह।
"रोगे शोधनसञ्ज्ञे तु यं विद्याद्दोषदुर्ब्बलम्।
तं समीक्ष्य भिषक् कुर्य्याद्दोषप्रत्यवरं मृदु॥"
शोधनसाध्यान् रोगानाह।
"सद्योज्वरे विषेऽजीर्णे मन्दाग्नावरुचौ तथा।
सान्यरोगे च वृद्धोगे कासे श्वासे च वामयेत्॥
जीर्णज्वरगरच्छर्द्यगुल्मप्लीहोदरेषु च।
शूले शोथे मूत्रघाते कृमिरोगे विरेचयेत्॥"
दोषदुर्ब्बलं दोषैरुपचितैर्दुर्ब्बलं न तु उपवासादिक्षपम्। अतएव समीक्षेति। अन्यच्च॥
"बले दोषे वृद्धौ कोष्ठे नेक्षेतान्नं बलं नृणाम्।
अन्यथापत् दुर्ब्बलस्यापि शोधनं हि तदा भवेत्॥"
कुतो बलं नापेक्षणीयमित्याशङ्क्यायामाह।
तदा तस्यामवस्थायां शोधनं दुर्ब्बलस्यापि दोषदुर्ब्बलस्यापि अन्यथापत् भवेत्। छर्द्यादिव्याधिकृत् न भवतीत्यर्थः॥*॥ बलवतः पुरुषस्य पक्वस्य दोषस्य स्वस्थानस्थितस्य शोधनाविधाने दोषमाह सुश्रुतः।
"पक्वोऽप्यनिर्हृतो दोषो देहे तिष्ठन्महाभयम्।
विषमं वा ज्वरं कुर्य्यादलब्धापादमेव च॥"
पक्वः लङ्घनतिक्ताम्बुपानपेयादिभिः। अनिर्हृतः अधोमार्गेणाहृतश्चेत्। महाभयं विषमज्वरं चातुर्थकम्। तस्यैव महाभयत्वादिति गदाधरः॥ गम्भीरमिति कार्त्तिकः॥ महाभयं महाकष्टं वा। बलव्यापादं बलक्षयम्॥*॥
संशोधनमाह।
"आरग्वधग्रन्थिकसुस्तितिक्ता-
हरीतकीभिः कथितः कषायः।
सामे सशूले कफवातपित्त-
ज्वरे हितो रेचनपाचनश्च॥"
आरग्वध धनवहेरा॥ अन्यच्च।
"पथ्यारग्वधतिक्ताब्दिवृदामलकैः शृतं लोयम्।
पाचनसारकसुक्तं सुनिभिर्व्वीर्णज्वरे सामे॥"
इति आरोग्यपञ्चकृतयम्॥*॥
"अनन्ता बालकं सुस्तं नागरं कटुरोहिणीम्।
पिष्ट्वा सुखाम्बुना कल्कं पाययेदज्वसम्मितम्॥
कल्कः खल्वेन कालेन हन्यात् सर्व्वज्वरानयम्।
विदध्यात् कोष्ठसंशुद्धिं दीपयेच्च हुताशनम्॥"
अनन्ता सारिवा। इति सारिवादिकल्कः॥*॥
संशोधनं संशमनञ्च येषां निषिद्धं तानाह।
"पीताम्बुर्लङ्घनक्षीणो जीर्णो भुक्तः पिपासितः।
न पिबेदौषधं यत्तु संशोधनमथेतरत्॥"
पीताम्बुः पीततिक्ताम्बुः। भुक्तः भुक्तवानित्यर्थः। अत्राधवसितादित्वात् कर्त्तरि क्तप्रत्ययः। इतरत् संशमनम्॥*॥
"त्रिफला रजनीयुग्मं कण्टकारीयुतं शृटी।
त्रिकटु ग्रन्थिकं मूर्व्वा गुडूची धन्वयासकः॥
कटुका पर्पटो मुस्तं चायमाणा च वालुकम्।
निम्बं पुष्करमूलञ्च मधुयष्टी च वत्सकः॥
यवानीन्द्रयवो भार्गी शिग्रुबीजं सुरेणुका॥
वचा वत्सकं पद्मकोशीरचन्दनातिविषा बला॥
शालीपर्णी पृश्निपर्णी विड्ङ्गं तगरं तथा।
चित्रकं देवकाष्ठञ्च चव्यं पत्रं पटोलजम्॥
जीवकर्षभकौ चैव लवङ्गं वंशलोचनम्।
पुष्करीकञ्च काकोली पत्रकं जातिपत्रकम्॥
तालीशपत्रमेतानि समभागानि चूर्णयेत्।
अर्द्धांशं सर्व्वचूर्णस्य किरातं प्रक्षिपेत् सुधीः॥
एतत् सुदर्शनं नाम चूर्णं दोषत्रयापहम्।

ज्वरांश्च निखिलान् हन्यान्नात्र कार्या विचारणा॥
पृथग्द्वन्द्वागन्तुजांश्च धातुस्थान् विषमांस्तथा।
सन्निपातोद्भवांश्चापि मानसानपि नाशयेत्॥
ग्रीतादीनपि दाहादीन् मोहं तन्द्रां भ्रमं ज्वराम्।
कासं श्वासञ्च पाण्डुञ्च कृद्रोगं कामलामपि॥
त्रिकपृष्ठकटीजानुपार्श्वशूलञ्च नाशयेत्।
ग्रीतामुना पिबेदेतत् सर्वज्वरनिवृत्तये॥
सुदर्शनं यथा चक्रं दानवानां विनाशनम्।
तद्वज्ज्वराणां सर्वेषां चूर्णमेतत् प्रणाशनम्॥"
पुष्करमूलाभावे कुष्ठमपि दद्यात्। भार्ग्यभावे कण्टकारीमूलम्। सौराष्ट्राभावे स्फटिकां दद्यात्। तगराभावे कुष्ठं देयम्। जीवकर्षभकयोरभावे विदारीकन्दस्य भागद्वयं दद्यात्। पुष्करीकं श्वेतकमलम्। काकोल्यभावे अश्वगन्धामूलं दद्यात्। तालीशपत्रिकाभावे खर्जूरादी प्रदीयते। इति। अथवा कण्टकारीजटा देया। इति सुदर्शनचूर्णम्। *।
"ग्रटी निशाद्वयं शुण्ठी दारु पुष्करमूलकम्।
एला गुडूची कटुका पर्पटश्च सवासकः॥
भार्गी किरातितिक्तश्च दशमूलं तथैव च।
क्वाथमेषां पिबेत् क्षौद्रसिन्धुचूर्णयुतं नरः॥
ज्वरान् सर्वान् इतं हन्ति नात्र कार्या विचारणा॥"
अद्भुतमद्भुतमेतत्॥ *।
"हरीतकीविडङ्गदृढदारुकर्षा पृथग्भवेत्।
पलद्वयं कणा शुण्ठी गुडूची गोक्षुरो वरी॥
सहदेवी विडङ्गश्च प्रत्येकं पलसम्मितम्।
मधुना वटिकां कृत्वा खादेत् ज्वरमपोहति॥
कासं श्वासं मलक्षयं वह्निमान्द्यं नियच्छति॥
क्वाथा दशाक्षा अरुजा षडङ्गा
वचन्दनं लोहितचन्दनञ्च;
त्वक्पत्रकं वारि सुरा वसुक्षा
प्रत्येकमेतानि पलोन्मितानि॥
किरातितिक्तक्षितृतासतिक्ता-
न्द्रताकषायापर्पटकण्टकार्याः।
विडङ्गविश्वामलकादि वाक्षा-
रसानिशाधारवसिन्धुवाराः॥
एतानि देयानि पृथक् पलार्द्ध-
मानानि सर्वाणि च भेषजानि।
कल्कानमीषां विदधीत गव्य-
दुग्धेन वै सार्द्धतुलामितेन॥
तैलं तिजानान्तु तुलाप्रमानं
तेनैव कल्केन घृतैः पचेत्तु।
हन्यात् ज्वरान् तैलमिदं समस्तान्
कुर्याद्बलं वीर्यमतीवपुष्टिम्॥
विमर्द्दनादास्य परिश्रमं श्रमं
भ्रमं नयेत् संजनयेत् द्युतिं तनोः।
तथा यथामस्यिसमुद्भवामपि
प्रहृत्य निद्रां सुखमाश्नयेत् सुखम्॥"
अक्षा मञ्जिष्ठा। वारि वासा। रसा राम्ना।
इति क्वाथादितैलम्॥ *॥
"क्वाथारससमं तैलं तैलाल्लस्तु चतुर्गुणम्।
अश्वगन्धानिशादारुकौन्तीकुष्ठाब्दचन्दनैः॥
समूर्वारोहिणीरास्नाशृताक्षामधुकैः समैः।
सिद्धं लाक्षादिकं नाम तैलमभ्यञ्जनादिना॥
सर्वज्वरक्षयोन्मादश्वासापस्मारवातनुत्।
यक्ष्मराक्षसभूतघ्नं गर्भिणीनाञ्च शस्यते॥"
मस्तु दधिजलम्। कौन्ती रेणुका। चन्दनमत्र श्वेतमेव न तु रक्तम्। रोहिणी कटुकी।
इति च लाक्षादितैलम्॥ *॥
"लाक्षा हरिद्रा मञ्जिष्ठा फेनिलं मधुकं बला।
लामज्जकं चन्दनञ्च चम्पकं नीलमुत्पलम्॥
प्रत्येकमेषां वसुधाः पक्षा तोये चतुर्गुणे।
चतुर्भागावशेषे तु गर्भे चैतत् समापयेत्॥
रेणुका पद्मकञ्चैव वाणिगन्धा तथैव च।
वेतसं चोरकं कुष्ठं देवदारु नखं त्वचम्॥
ग्रतपुष्पा पुष्करीकं मांसी मधुकमेव च।
एभिरष्टमितैः कल्कैः कषायेणैव पेषितैः॥
मस्तुसुक्तारनालानामाढ़काढ़कमावपेत्।
क्षीराढ़कसमायुक्तं तैलप्रस्थं विपाचयेत्॥
अभ्यङ्गात्तैलमेतद्धि ग्रीघ्रं दाहमपोहति।
अपोहति तथा वातं पित्तं श्लेष्मभवं ज्वरम्॥
सप्रलापं सदक्षञ्च तालुशोषभ्रमान्वितम्।
ग्रहोपसृष्टा ये बाला रक्षःसंदूषिताश्च ये॥
तेषां कष्टं प्रशमयेत्तैलं लाक्षादिकं महत्॥"
फेनिलं वदरम्। लामज्जकमुशीरवत् पीतच्छविर्लक्षविशेषः।
लामज्जकं यदा न स्यादुशीरं दीयते तदा।
चम्पकमित्यस्य स्थाने कुत्रापि गैरिकं इति पाठः।
नीलोत्पलस्थाने तु कुसुदं देयमित्यपि।
अपोहति अपाकरोति इत्यर्थः। चोरकं ग्रन्थिपर्णस्य भेदः भण्टिडर इति नेपालदेशे भवति। तदभावे ग्रन्थिपर्णो देयम्। पुष्करीकं श्वेतकमलम्। मस्तु दधिजलम्। शुक्तं सन्धानभेदः। आरनालमपि सन्धानभेदः। इति महालाक्षादितैलम्॥ *॥ अथ नवज्वरे रसाः।
"कृतो गन्धरसूतः ग्रोषणञ्च
सर्वैस्तुल्या शर्करा मत्स्यपित्तैः।
भूयो भूयो मर्दयेत्तं चिरात्रं
वह्नेर्दद्यः प्रद्रवेद्रव्यमेव॥
तापे ग्रीतं वीक्षनेत्सक्तभक्तं
तृष्णाकाद्यं पथ्यमेतत् प्रदिष्टम्।
अग्नौ चोग्रं हन्ति सद्यो ज्वरन्तु
पित्ताधिक्ये सर्पिषं तोयञ्च दद्यात्॥"
अस्य प्रक्रिया। पारा शुद्ध भाग १ गन्धक शुद्ध भाग १ सोहागाभ्रष्ट भाग १ मरिच भाग १ शर्करा भाग ४ रोहूमत्स्यकपित्त भाग ३। अमुं प्रतिदिनं सर्वं दिनत्रयं मर्दयेत्। रसमिमं रक्तित्रयमितमार्द्रकरसेन दद्यात्। ओदनं तक्रं तृष्णाकफलं भोक्तुं दद्यात्। अथनाद्यैः ग्रीतलमुपचारं कुर्यात्। उदकमक्षरीरसो नवज्वरेषु॥ *॥ रसरत्नप्रदीपे।
"अद्यात् समं कृतसमुद्भवेन
द्विगूनगन्धं परिमर्द्य यामम्।
नवज्वरे वह्नियुगं त्रिघस्र-
मार्द्राम्भसायं ज्वरधूमकेतुः॥"
प्रक्रिया। पारासुद्धगन्धकशुद्धद्विगुणशुद्धसमुद्रफेनसभागं सर्वं याममेकमार्द्रकरसेन संमर्द्य रक्तिकाषट्कमितमार्द्रकरसेन दिनत्रयं नवज्वरी भक्षयेत्। दिनत्रयान्नवज्वरो नश्येत्। इति ज्वरधूमकेतुः॥ * ॥ रसेन्द्रचिन्तामणौ।
"शुद्धः सूतो विषो गन्धः प्रत्येकं ग्राह्यसंमितः।
धूर्त्तबीजं त्रिगुणं स्यात् सर्वेभ्यो द्विगुणा भवेत्॥
हेमाङ्गा कारयेदेषां चूर्णं सूक्ष्मं प्रयत्नतः।
जम्बीरजीरकैर्द्वयंचूर्णं गृह्णाद्वयोन्मितम्॥
आर्द्रकस्य रसेनापि ज्वरं हन्ति त्रिदोषजम्।
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम्॥
विषमञ्च ज्वरं हन्यान्नवं जीर्णञ्च सर्वथा।
महाज्वराङ्कुशो नाम्ना रसोऽयं सर्वसंमतः॥"
प्रक्रिया। शुद्धपारा शुद्धगन्धक शुद्धविष प्रत्येकं टङ्क १ धत्तूरबीज टङ्क ३ धोकटङ्क १२ सर्वेषां चूर्णमतिसूक्ष्मं कर्त्तव्यम्। इति महाज्वराङ्कुशः॥*॥ सर्वज्वरेषु ग्राह्यंधरे।
"एको भागो रसात् शुद्धाच्छ्वेतायः पिप्पली शिवा।
आकारकरभो गन्धः कटुतैलेन शोधितः॥
पलानि चेन्द्रवारुण्याश्चतुर्भागमिता अमी।
एकत्र मर्दयेच्चूर्णमिन्द्रवारुक्रियारसैः॥
माषोन्मितां वटीं कृत्वा दद्यात् सद्योज्वरे बुधः।
छिन्नारसानुपानेन ज्वरघ्नी वटिका मता॥"
श्वेतायः श्वेत इति लोके। शिवात्र हरीतकी। आकारकरभः अकरकरहा इति लोके। चतुर्भागमिता अमी श्वेतायादयः षट् समुदिता भागचतुष्टयमिताः। इति ज्वरघ्नीवटिका॥*॥ ग्राह्यंधरे।
"रसं गन्धञ्च दरदं जैपालं क्रमवर्द्धितम्।
दन्तीरसेन संपिष्य वटी गुञ्जामिता कृता॥
प्रभाते सितया सार्द्धमसिता शीतवारिणा।
एकेन दिवसेनैषा नवज्वरहरी भवेत्॥"
इति च ज्वरघ्नीवटिका॥ * ॥ रसरत्नप्रदीपे।
"रसो गन्धो विषं शुण्ठी पिप्पली मरिचानि च।
पथ्या विभीतकं धात्री दन्तीबीजञ्च शोधितम्॥
चूर्णमेषां समांशानां द्वौशपुष्पीरसैः पुटेत्।
वटीं माषनिभां कुर्यात् भक्षयेन्नूतने ज्वरे॥"
इति नवज्वरीहरीवटी। इति नवज्वरे रसाः॥*॥
अथ सामान्यज्वरे रसाः।
"शुद्धं सूतं विषं गन्धं धूर्तबीजं त्रिभिः समम्।
चतुर्थांशं द्विगुणं शोधं चूर्णं गृह्णाद्वयोन्मितम्॥
आर्द्रकस्य रसैः किंवा जम्बीरस्य रसैर्युतम्।
महाज्वराङ्कुशो नाम्ना सर्वज्वरविनाशनः॥
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम्।
विषमं वा त्रिदोषं वा ज्वरं हन्ति न संशयः॥"
प्रक्रिया। शुद्धपाराटङ्क १ शुद्धविषटङ्क १ शुद्धगन्धटङ्क १ धत्तूरबीजटङ्क ३ शोटिटङ्क ४ पीपरीटङ्क ४ मरिचटङ्क ३ सर्वेषां चूर्णमतिसूक्ष्मं कर्त्तव्यम्। इति महाज्वराङ्कुशः॥ *॥

सर्व्वज्वरेषु सर्व्वरसग्रन्थेषु ।
"सूतं गन्धं विषञ्चैव टङ्कणञ्च मनःशिला ।
एतानि टङ्कमात्राणि मरिचं त्वष्टटङ्ककम् ॥
कटुत्रयं टङ्कयटकं खल्ले चिम्ना विचूर्णयेत् ।
रसः श्वासकुठारोऽयं श्वाससर्व्वज्वरापहः ॥"
इति श्वासकुठारो रसः ॥ * ॥
श्वासे सर्व्वज्वरे रसराजाकरे ।
"दारुमूषा शिखिग्रीवां रसकञ्च पृथक् पृथक् ।
टङ्कत्रयाणुमानेन गृहीत्वा कनकद्रवैः ॥
मर्द्दयेत्त्रिदिनं कार्य्या वटी चणकमात्रया ।
मरिचैरेकविंशत्या सप्तभिस्तुलसीदलैः ॥
खादेदृटीदयं पथ्यं दुग्धभक्तं सगर्करम् ।
तरुणं विषमं जीर्णं हन्यात् सर्व्वज्वरं ध्रुवम् ॥"
दारुमूषा दारुमयी । शिखिग्रीवा तुतिया ।
रसकं खपरिया । प्रत्येकं टङ्क ३ धत्तूरपत्रस्वरसेन मर्द्दयेत् । इति ज्वराङ्कुशः ॥ * ॥
सर्व्वज्वरेषु ।
"नागरं कर्षमात्रं स्यात् कर्षमात्रञ्च टङ्कणम् ।
मरिचं सार्द्धकर्षं स्यात् तावद्गन्धवराटकम् ॥
विषं कर्षचतुर्थांशं सर्व्वमेकत्र चूर्णयेत् ।
रसो हुताशनो नाम्ना खाद्यो गुञ्जामितो ज्वरे ॥"
इति हुताशनो रसो ज्वरे ॥ * ॥
"शुद्धजैपालटङ्कञ्तु कट्फीटङ्कद्वयोन्मितम् ।
गैरिकं टङ्कमेकञ्च कन्यानीरेण मर्द्दयेत् ॥
कलायसदृशीं कार्य्या वटिकां तान्च भक्षयेत् ।
शीतलेन जलेनैवा वटी जीर्णज्वरापहा ॥"
इति ज्वरान्तकवटी ॥

"त्रिभागतालेन हतञ्च ताम्रं
रसञ्च गन्धञ्च समीनमायुः ।
विषं समञ्च द्विगुणञ्च ताम्रं
त्रिसप्तरात्रेण दिवाकरांशैः ॥
विमर्द्दारिष्टस्वरसेन चूर्णं
गुञ्जैकदत्तं सितया समेतम् ।
ज्वराङ्कुशोऽयं रविसुन्दराख्यो
ज्वरान्निहन्त्यष्टविधान् समस्तान् ॥"

अस्य प्रक्रिया । पारादटङ्क १ गन्धकटङ्क १ विषटङ्क १ द्विगुणतालकहततात्रटङ्क२ रोहुमत्स्यकपित्त १ सब एकत्र खल्ले जवचूर्ण होइ मिले तब नीबिके पातकी स्वरसकभावना २१ बारे मह देवइ मात्रा रत्ती एक अनुपान श्वेतशर्करा रत्ती २ खार । इति सर्व्वज्वरे रविसुन्दरो रसः ॥ * ॥
"शुद्धं सूतं तथा गन्धं खल्ले तावद्विमर्द्दयेत् ।
सूतं न दृश्यते यावत् किन्तु कज्जलवद्भवेत् ॥
एषा कज्जलिका ख्याता दृंहयी वीर्य्यवर्द्धिनी ।
नागानुपानयोगेन सर्व्वव्याधिविनाशिनी ॥"*॥
कज्जलिकाविधानं तद्गुणञ्च रसराजप्रदीपे ।
"जयापत्ररसेनाथ भृङ्गराजरसेन च ।
भृङ्गराजरसेनापि काकमाच्या रसेन च ॥
रसं संशोध्य यत्नेन तत्समं शोधयेद्बलिम् ।
भृङ्गराजरसैः पिष्ट्वा शोधयेदर्करान्वितैः ॥
सप्तधा वा त्रिधा वापि पश्चाच्चूर्णं तु कारयेत् ।
चूर्णयित्वा समं तेन रसेन सह मर्द्दयेत् ॥
गन्धसूतं यदा चूर्णं भवेत् कज्जलसन्निभम् ।
निर्धूमे वरदाङ्गारे द्रवीकुर्य्यात् प्रयत्नतः ॥
तत्र तं महिषीविष्ठास्थापिते कदलीतले ।
निःक्षिप्य तदुपर्य्यन्यत् पत्रं दत्त्वा प्रपीड़येत् ॥
शीतलान्तात् ततः पत्रात् समुद्धृत्य विचूर्णयेत् ।
एवं सिद्धा भवेद्वटयाधिघातिनी रसपर्पटी ॥
ज्वरादिव्याधिभिर्व्याप्तं विश्वं दृष्ट्वा पुरा हरः ।
चकार कृपया युक्तः सुधावद्रसपर्पटीम् ॥
रक्तिकासंमितां तावद्भृष्टजीरकसंयुताम् ।
गुञ्जार्द्धभृष्टहिङ्गाढ्यां भक्षयेद्रसपर्पटीम् ॥
रोगानुरूपभैषज्यैरपि तां भक्षयेद्बुधः ।
पिबेत्तदनुपानीयं शीतलं शुक्लचन्दनम् ॥
प्रत्यहं वर्द्धयेत्तस्या एकैकां रक्तिकां भिषक् ।
यावदेकां दशगुञ्जामतो भक्षयेत्तां कदाचन ॥
एकादशदिनारम्भात् तां ततैवापकर्षयेत् ।
एवमेताः समश्नीयान्नरो विंशतिवासरान् ॥
घृतं गुरुं तथा विप्रान् पूजयित्वा प्रणम्य च ।
श्रद्धया भक्षयेदेतां क्षीरमांसरसाशनः ॥
ज्वरञ्च ग्रहणीञ्चापि तथातीसारमेव च ।
कामलां पाण्डुरोगञ्च शूलप्लीहजलोदरम् ॥
एवमादीन् गदान् हत्वा हृष्टः पुष्टश्च वीर्य्यवान् ।
जीवेद्वर्षशतं सार्द्धं वलीपलितवर्ज्जितः ॥"
इति रसपर्पटी ॥ * ॥
अथ ज्वरिणि अन्नदानसमयः । तत्र चरकः ।
"क्षुत् सम्भवति पक्वेषु रसदोषमलेषु च ।
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः ॥"
अन्यच्च ।
"आमे पाकं गते नृणां यदा भोजनलालसा ।
भवेत् काले ह्यकाले वा सोऽन्नकाल उदाहृतः ॥"
तत्र कालमाह । ज्वरस्य पाकावस्थान्नदानकालः ज्वरस्य पाककालश्च ।
"वातिकः सप्तरात्रेण दशरात्रेण पैत्तिकः ।
श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि ॥"
ज्वरस्य पाक उपशमः ॥ ज्वरपाकेनैव रसपाके दोषपाकोऽपि कथितः । यतो दोषपाकं विना ज्वरपाको न भवति रसपाकं विना दोषपाकश्च न भवति ॥*॥ ननु यथा पैत्तिको ज्वरो दशाहोरात्रेण पाकं याति । एकादशे दिनेऽन्नं दीयते । तथा श्लैष्मिको ज्वरो द्वादशाहोरात्रेण पाकं याति त्रयोदशदिवसेऽन्नं दीयते । तथा वातिको ज्वर सप्ताहोरात्रेण पाकं याति । अष्टमे दिवसेऽन्नं कथं न दीयते । कथं सप्तम एव दिवसेऽन्नं दीयते । इति । उच्यते ।
"कफपित्ते द्रवे धातू सहेते लङ्घनं बहु ।
आमज्वरादूर्द्धमपि वायुर्न सहते क्षयम् ॥"
इति वचनादामरसपाके जाते आहारलाभं विना वायुः क्षयमात्रमपि सोढुं न शक्नोति । स आशुकारित्वात् क्षयादाक्षेपकादीन् विकारान् संजनयति ॥ अतो वातिके ज्वरे पाकदिनानामन्तिमे सप्तम एव दिवेऽन्नं दीयते । तथा च धन्वन्तरिः ।

"ज्वराभिभूतः षड़हे व्यतीते
विपक्कदोषः क्षतलङ्घनादिः ।
यो भेषजं खादति वैद्यवश्यो
निःसंशयं हन्त्यचिरात् स रोगान् ॥"
ज्वराभिभूतः वातज्वराभिभूतः । विपक्कदोषः पक्कवातः । क्षतलङ्घनादिः आदिशब्दात् क्षतपक्कजलपानविश्रान्तिव्यहवासगुरुव्यवसनधारणादिः । भेषजमित्यन्नस्याप्युपलक्षणम् । अतएव चरकः ।
"ज्वरितं षड़हेऽतीते लघुन्नं प्रतिभोजितम् ।
पाचनं शमनीयंवा कषायं पाययेत्तु तमिति ॥"
ज्वरितं वातज्वरिणम् ॥ षड़हेऽतीते इत्युपलक्षणम् । पित्तज्वरिणं दशाहेऽतीते । श्लेष्मज्वरिणं द्वादशाहेऽतीते । लघ्वन्नं भोजितं ज्वरिणं पाचनं शमनीयंवा कषायं पाययेत् । पुनः स एव ।
"सर्व्वज्वरेषु ज्वरितं दिनान्ते भोजयेल्लघु ॥"
दिनान्तेऽन्तशब्दोऽत्र मध्यवाची तेन त्रिधा विभक्तस्य दिवसस्य मध्यभागे पित्तप्राधान्यसमये ॥ उक्तञ्च वाग्भटेन ।
"वयोऽहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमात् ।"
इति ।"
ते वातपित्तश्लेष्माणः ॥ पित्तकालेऽपि मध्याह्नादर्व्वाक् । यत आह ।
"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः ॥"इति ॥
एतत् सुश्रुतपरमिति चेत्तन्न । यत आह ।
"श्लेष्मक्षये प्रवृद्धोष्मा बलवानग्निरादृतः ।
वेगापाये ऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम् ॥"
तदा पित्तप्राधान्यसमये । अन्यथा उक्तसमयादन्यदा । वेगापाये जठराग्निवेगनाशे । ततः भोजनं ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः ॥ * ॥ अत्र विषमज्वरिणेऽन्नं दातुं कालविशेषमाह चरकः ।
"सर्व्वज्वरेषु सप्ताहं मात्रावल्लघु भोजयेत् ।
वेगापाये ऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम् ॥"
सर्व्वज्वरेषु सर्व्वविषमज्वरेषु । वेगापाये ज्वरवेगापाये भोजयेत् । अन्यथा ज्वरवेगापायं विना । ततः भोजनं ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः ॥ * ॥ अथान्नग्रहणाय स्नानमाह ।
"आहारनिद्राब्रह्मचर्य्ययोगाः
सदैव सद्भिर्विजने विधेयाः ॥" इति ॥*॥
अत्यबलस्य ज्वरितस्य भोजनार्थोपवेशनप्रकारमाह सुश्रुतः ।
"ज्वरे प्रमेहो भवति खल्वैरपि विचेष्टितैः ।
निषण्णं भोजयेत्तस्माच्चोत्थापौ च कारयेत् ॥"
निषण्णं यथास्थानस्थितमेव न तु स्थानान्तरं नीतम् ॥ * ॥ अन्नग्रहणसमये प्रथमं ज्वरितेन कवलः कर्त्तव्य इत्याह ।
"यथा दोषोचितैर्द्रव्यैः कर्त्तव्यः कवलग्रहः ।
अरोचकास्यवैरस्यमलपूतिप्रसेकहृत् ॥
भृङ्गीकर्षूरकैर्युक्तं सिन्धुलवणयुतेन च ।
जिह्वां दन्तान् सुखस्थान्तर्धृत्वा कवलमाचरेत् ॥

सुखे मलं विगन्मत्वं विरसत्वञ्च नश्यति ।
मनः प्रसन्नं भवति भोजनेऽतिरोचिर्भवेत् ॥
ज्वरितो हितमन्नीयादृद्यद्यस्यारुचिर्भवेत् ।
अन्नकाले त्वसुखान: क्षीयते म्रियतेऽपि च ॥"
अयमर्थः । यद्यपि अस्य ज्वरितस्य हिते भक्ष्ये अरुचिर्भवेत् तथापि ज्वरितो हितमेवान्नीयादिति नियमः । यत आह सुश्रुतः ।
"गुर्वभिष्यन्दाकालेषु ज्वरी नाद्यात् कथञ्चन ।
न तु तस्याहितं भुक्तमायुषे चासुखाय च ॥
आगङ्खिमितैर्दोषैर्यावन्नं कालमातुरः ।
तावत्कालं स लघ्वन्नमश्नीयात सविरिक्तवत् ॥"
आगङ्खिमितैर्दोषैः अपक्वैर्दोषैर्यावन्न इत्यर्थः ॥
ननु हिते वस्तुनि कथमरुचिः स्यादत आह ।
सातत्यात् स्वाङ्गभावाच्च पथ्यं द्वेष्यत्वमागतमिति ।
सातत्यात् एकस्यैव भक्ष्यस्य सर्व्वदोपयोगात् ।
स्वाङ्गभावाच्च भक्ष्यान्तरादपि विस्वादुतः । पथ्यमप्रियं स्यात् तथापि तदेव पथ्यम् । कल्पनाविधिभिस्तैस्तैः प्रियत्वं गमयेत् पुनरिति ॥
अथ च ज्वरितोऽन्नकालेऽन्नीयादेवेति द्वितीयो नियमः । कुत इतिचेत् हि यतो हेतो अभुञ्जानः क्षीयतेऽपक्वधातुर्भवति ततो म्रियतेऽपि च ॥*॥
ज्वरिताय हितान्यन्नादीन्याह ।
"रक्तशालास्यः शस्ता: पुराणाः षष्टिकैः सह ।
यवाग्वोदनलाजार्थे ज्वरितानां ज्वरापहाः ॥"
तत्र रक्तशालिगुणाः ।
"रक्तशालिर्वरस्तेषां बल्यो वर्ण्यस्त्रिदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्य्यः शुक्रलस्तृड्ज्वरापहः ॥
विषव्रणश्वासकासदाहकृद्वह्निपुष्टिदः ।
तस्मादल्पान्तरगुणाः शालयो मध्यदोषाः ॥"
रक्तशालिर्यो मगधदेशे दाउदखानी इति प्रसिद्धः ॥
"सुदृश्यान् मस्तरांश्चैव कान् कुलत्थान् समकुष्टकान् ।
यूषार्थे यूषसात्म्यानां ज्वरितानां प्रदापयेत् ॥"
तत्र मुद्गादिगुणास्तत्तच्छब्दे द्रष्टव्याः ॥ * ॥
"पटोलपत्रं वार्त्ताकुं कुलकं कारवेल्लकम् ।
कर्कोटकं पर्पटकं गोजिह्वां बालमूलकम् ॥
पत्रं गुडूच्याः शाकार्थे ज्वरितानां प्रदापयेत् ॥"
तत्र पटोलादिगुणास्तत्तच्छब्दे द्रष्टव्याः ॥ * ॥
"लावान् कपिञ्जलानेणान् हरिणान् पृषतान् शशान् ।
कुरङ्गान् कालपुच्छांश्च तथैव रुरुमार्ष्टकान् ॥
मांसार्थे मांससात्म्यानां ज्वरितानां प्रदापयेत् ।
सारसक्रौञ्चशिखिनस्तथा तित्तिरकुक्कुटान् ॥
गुरुत्वान्नात्र शंसन्ति केचिदेवं व्यवस्थिताः ॥"
तित्तिरिरत्र कृष्णतित्तिरिः । गौरतित्तिरेः कपिञ्जलपदेन पूर्व्वं गृहीतत्वात् ॥
"ज्वरितानां प्रकोपन्तु यदा याति सभीरुणः ।
तदेतेऽपि हि शस्यन्ते मात्राकालोपपादिताः ॥
कपिञ्जल इति ख्यातो लोकेषु गौरतित्तिरिः ॥"
इति ॥ * ॥
"निम्बकं दाडिमं धात्रीफलमम्लं प्रकाङ्क्षते ।
प्रदद्यादम्लसात्म्याय काङ्क्षिणे वा पुरातनम् ॥"
अथौषधसिद्धायाः पेयायाः गुणाश्च ।
"अन्नकाले हिता पेया यथास्वं पाचनैः कृता ।
दीपनी पाचनी लघ्वी ज्वरार्त्तानां ज्वरापहा ॥"
यथास्वं पाचनैः कृता यथादोषं पाचनैः कृता ।
यथा,—
"पञ्चमूल्याः कषायन्तु पाचनं वातिके ज्वरे ।
सक्षौद्रं पैत्तिके सुस्तकटुकेन्द्रयवैः कृतम् ॥
पिप्पल्यादिकषायन्तु पाचनं कफजे ज्वरे ।
लघुना पञ्चमूलेन पिप्पल्या सह धान्यया ॥
महत्या पञ्चमूल्याथ व्याघ्री दुस्पर्शगोक्षुरैः ।
सिद्धानि भिषगन्नानि प्रयुञ्जीत यथाक्रमम् ॥
वातपित्ते श्लेष्मपित्ते कफवाते त्रिदोषजे ।"
अस्यायमर्थः । वातपित्ते लघुना पञ्चमूलेन सिद्धान्यन्नानि भिषक् प्रयुञ्जीत ।
"श्रीफलः सर्व्वतोभद्रा पाटला गणिकारिका ।
श्योनाकः पञ्चमः प्रोक्तः पञ्चमूलमिदं महत् ॥
त्रिदोषजे ज्वरे देया व्याघ्री दुस्पर्शगोक्षुरैः ।
व्याघ्री कण्टकारिका । दुस्पर्शा यवासः ।
पेयांवा रक्तशालीनां वस्तिपार्श्वशिरोरुजि ।
श्वदंष्ट्राकण्टकारीभ्यां सिद्धां ज्वरहरीं पिबेत् ॥
विबद्धवर्च्चाः सयवां पिप्पल्यामलकैः शृतां ।
सर्पिष्मन्तीं पिबेत् पेयां ज्वरी दोषानुलोमनीम् ॥
कासीश्वासी च हिक्की च पञ्चमूलीशृतां पिबेत् ॥"
यवोऽन्नम् । अत्र पञ्चमूली शृतौ लघौ च हिता । तया शृतां पेयां पिबेदित्यर्थः ।
"पेया भेषजसंयोगाल्लघुत्वाच्चाग्निदीपिका ।
वातमूत्रपुरीषाणां दोषाणां चानुलोमिका ॥
स्वेदनाय च सोषाल्पत्वात् लट्वग्नाय च ।
आहारभावात् प्राणाय सरत्वाल्लाघवाय च ॥
ज्वरघ्नीहेतुसात्म्यत्वात्तस्मात्तां पूर्व्वमाचरेत् ॥"
हेतुसात्म्यत्वात् हेतवो वातपित्तकफास्तेषां सात्म्यत्वात् ॥
"यवकोलकुलत्थानां मुद्गमूलकयूषयोः ।
एकैकं मुष्टिमादाय पचेदष्टगुणे जले ॥
पञ्चमुष्टिक इत्येष वातपित्तकफापहः ।
मूले प्रशस्यते गुल्मे कासे श्वासे क्षये ज्वरे ॥"
पञ्चमुष्टिकयूषः ॥ * ॥
"रक्तमूत्रपुरीषस्य गुदे वर्त्तिं निधापयेत् ।
पिप्पलीपिप्पलीमूलं यवानीचव्यसाधितम् ॥
पाययेत यवागूं वा मारुतादनुलोमनीम् ॥"
पेयाया यवागूश्च क्वचित्प्रवादमाह ।
"मदात्यये मदात्यये ग्रीष्मे पित्तकफोत्थिते ।
ऊर्द्ध्वगे रक्तपित्ते च यवागूर्न्न हिता ज्वरे ॥
दाहच्छर्द्यर्हितं चामं निरन्नं क्षीणमान्वितम् ।
घृतैरामं मधुसंयुक्तं पाययेल्लाजतर्पणम् ॥"
लाजशक्तुरूपं तर्पणम् । तथा च अन्यान्तरे ।
"दाहच्छर्द्यर्हितं चामं निरन्नं क्षीणमान्वितम् ।
घृतैरामं मद्यपश्चापि तोयालोढितशक्तुकम् ॥
घृतैरामं मधुसंयुक्तं पाययेल्लाजतर्पणम् ।
ज्वरापहैः फलरसैर्युक्तमन्नं हितं क्वचित् ॥"*॥
सन्तर्पणस्वरूपञ्चाह धन्वन्तरिः ।
"द्राक्षादाडिमखर्ज्जूरशर्करोदितास्वसक्तूकरम् ।
लाजचूर्णं समध्वाज्यं सन्तर्पणमुदाहृतम् ॥
लाजाचूर्णम् द्राक्षादिजलशर्करामध्वाज्यसहितं तर्पणमुक्तमित्यर्थः ॥ लाजशक्तुगुणाश्च गुणग्रन्थे ।
"लाजानां शक्तवः क्षौद्रसिताघृक्ता विशेषतः ।
छर्द्यतीसारलट्दाहविषमूर्च्छाज्वरापहाः ॥"
चरकश्च ।
"तत्र तर्पणमेवादौ प्रदेयं लाजशक्तुतः ।
ज्वरापहैः फलरसैर्युक्तं मधुसशर्करम् ॥"
ज्वरघ्नानि फलान्याह चरक एव ।
"द्राक्षादाडिमखर्ज्जूरपियालैः सपरूषकैः ।
तर्पणार्हस्य दातव्यं तर्पणं ज्वरनाशनम् ॥"
पियालमत्र एकफलं न तन्मज्ज्ञातिगुरुत्वात् ।
तर्पणार्हस्य दाहच्छर्द्यतीसारार्तस्य लङ्घितस्य क्षीणस्येत्यर्थः ।
श्रमोपवासानिलजे हितो नित्यं रसौदनः ॥
रसोऽत्र मांसरसः । तेन सिक्त ओदनो रसौदनः । अन्नेन अञ्जनमित्यनेन समासः ॥
"मुद्गयूषौदनस्येव हितः कफसमुत्थिते ।
स एव सितया युक्तः शीतपित्तज्वरे हितः ॥"
स एव मुद्गयूषौदन एव ॥
"क्षीणोऽल्पदोषो यः क्षीणकफो जीर्णज्वरान्वितः ।
विबन्धारुग्दोषश्च रूक्षः पित्तानिलज्वरी ॥
पिपासार्त्तः सदाहश्च पयसा स सुखी भवेत् ॥"
अन्यच्च ।
"अजाङ्घ्रिं गुडौपेतं पातव्यं ज्वरशान्तये ।
तदेव तु पयः पीतं तरुणे हन्ति मानवम् ॥"
तरुणे ज्वरे ; अन्यच्च ।
"जीर्णे ज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम् ।
तदेव तरुणे पीतं विषवद्धन्ति मानवम् ॥"*॥
अथ ज्वरिणो नियममाह ।
"न द्विरह्नान्न पूर्व्वाह्णे नाभिष्यन्दि कदाचन ।
न तीक्ष्णं न गुरुप्रायो भुञ्जीत तरुणज्वरी ॥
न जातु तर्पयेत् प्राज्ञः सहसा ज्वरकर्षितम् ।
तेन संशमितोऽप्यस्य पुनरेव भवेज्ज्वरः ॥"*॥
अथ ज्वरविमुक्तेः पूर्व्वरूपमाह ।
"दाहः खेदो भ्रमस्तृष्णा कम्पविड्भिदसंज्ञिताः ।
कूजनं चाति वैगन्ध्यमाकृतिज्वरमोक्षणे ॥"
विड्भित् मलप्रवृत्तिः । अत्र सम्पदादित्वात् भावे क्विप् । कूजनं कूत्यनम् । अतिवैगन्ध्यं गात्रस्य । ज्वरमुक्तौ भविष्यत्यामेतल्लक्षणं भवति ॥
ननु दोषत्रयं विना न व्याधिनिवृत्तिः । क्षीणश्च दोषः कथमेवंविधं रूपं करिष्यति । उच्यते । क्वचित् क्षीणोऽपि दोषः विनाशकाले स्वशक्तिं दर्शयति । यथा निर्व्वाणावस्थायां दीपो विशेषात् प्रज्वलति । वाग्भटोऽप्याह ।
"धातून् प्रक्षोभयन्दोषो मोक्षकाले विलीयते ।
ततो नरः श्वसन् कूजन् वमन् क्लिद्यन्न चेष्टते ॥"
न चेष्टते अचेष्टश्च स्यात् ।

"त्रिदोषजे ज्वरे ह्येतदन्तर्वेगे च धातुगे।
लक्षणं मोक्षकाले स्यादन्यस्मिन् खेददर्शनम्॥"
एतद्वाग्भटादिकं लक्षणं मोक्षकाले एतेष्वेव ज्वरेषु स्यात्। कैश्चु त्रिदोषजे। अन्तर्वेगे। धातुगे ज्वरे। अन्यस्मिन् खेदमात्रं दर्शनं भवति॥ * ॥

अथ ज्वरमुक्तस्य लक्षणमाह।

"देहो लघुर्यथगतक्लममोहतापः
पाको मुखे करणसौष्ठवमग्यथत्वम्।
स्वेदः स्रवः प्रकृतियोगिमनोऽन्नलिप्सा
कण्ठस्य मूर्द्धि विगतज्वरलक्षणानि॥"

सुश्रुतोऽप्याह।

"खेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च।
स्रवथुश्चान्नकाङ्क्षा च ज्वरमुक्तस्य लक्षणम्॥"*॥

अथ ज्वरमुक्तस्य नियमाः।

"व्यायामञ्च व्यवायञ्च स्नानं चंक्रमणानि च।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत्॥"

अन्यच्च।

"व्यायामञ्च व्यवायञ्च प्रवातं शिशिरं जलम्।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत्॥
अपि ज्वरविमुक्तस्य स्नानं कुर्यात् पुनर्ज्वरम्।
तस्माज्ज्वरविमुक्तोऽपि स्नानं विषमिव त्यजेत्॥
बलवर्णाग्निवृद्धयो यावन्न प्रकृतिर्भवेत्।
तावज्जरेण मुक्तोऽपि वर्ज्जनीयानि वर्ज्जयेत्॥"

अथ वातज्वराधिकारः। तत्र वातज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्ब्बिकां संप्राप्तिमाह।

"वातलाहारचेष्टाभ्यां वायुरामाशयाश्रयः।
वह्निर्निरस्य कोष्ठाग्निं ज्वरकृत् स्यादसानुगः॥"

अथ तस्य पूर्ब्बरूपमाह। जृम्भात्यर्थं समीरणादिति। समीरणात् ज्वरे उत्पत्स्यति अत्यर्थं जृम्भा स्यात्। जृम्भा च श्रमादिपूर्ब्बिका भवति॥

अथ वातज्वरस्य लक्षणमाह।

"वेपथुर्विषमो वेगः कण्ठौष्ठमुखशोषणम्।
निद्रानाशः स्रवस्रम्भो गात्राणां रौक्षमेव च॥
शिरोहृन्नाभिरुग्बद्धवेरसं बद्धविट्कता।
मूलाधाने जृम्भणञ्च भवत्यनिलजे ज्वरे॥"

एतानि लक्षणानि प्रायो भावित्वेन सुश्रुतेन निर्द्दिष्टानि। चकारादन्यान्यपि चरकनिदानोक्तानि बोद्धव्यानि। तान्येव श्लोकेन प्रदर्श्यन्ते।

"भवन्ति विविधा वातवेदना स्वादसुप्रता।
पिण्डिकोद्वेष्टनं कर्णस्वनो वक्त्रकषायता॥
जरसादो हृतस्रम्भो विड्भेदः सन्निजानुनोः।
मुष्ककासो वमिर्लोमहर्षस्तृष्णमर्मसौ॥
अरुणं नैचमूत्रादि त्वट् प्रलापोष्णकामिता॥"

विषमो वेगः शरीरोष्मतादिरूपो ज्वरवेगो विषमो भवतीत्यर्थः। स्रवस्रम्भः क्षिक्काया अभावः। तथा च वाग्भटः।

"हर्षो रोमाङ्गदन्तेषु वेपथुः स्रवथोर्यहः॥"इति।

चरकोऽपि। स्रवथूद्गारनिग्रह इति। शिरोहृन्नाभिरुक् गात्रपदे प्रयुक्ते शिरोहृच्छब्दप्रयोगस्तत्र विप्रेप्सेन वेदनाबोधनार्थः॥ * ॥

अथ वातज्वरचिकित्सा।

"आमाशयस्थो हृत्वाग्निं सामो मार्गान् पिधापयन्।
विदधाति ज्वरं दोषस्तस्मात्तत्रुनमाचरेत्॥"

इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने वातज्वरिणो लङ्घनविधाने विशेषमाह चरकः।

"ज्वरितं बद्धविट्कं तु लघ्वन्नं प्रतिभोजितम्।
पाचनं शमनीयं वा कषायं पाययेद्भिषक्॥"

सुश्रुतोऽप्याह।

"वातिके सप्तरात्रेण दशरात्रेण पैत्तिके।
श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजमिति॥"

ननु अन्नं वै प्राणिनां प्राणा इति श्रुतिः तदन्नं विना प्राणिभिः कथं स्थातव्यमित्याह।

"दोषाक्रामेव सा शक्तिर्लङ्घने या सहिष्णुता।
न हि दोषक्षये क्वचित् सोढुं शक्नोति लङ्घनम्॥
कफपित्ते द्रवे धातू सहेते लङ्घनं बहु।
आमाशयादूर्द्ध्वमपि वायुर्न सहते क्षयम्॥"*॥

भेषजमाह।

"श्रीफलः सर्व्वतोभद्रा कामदूती च श्योनकः।
तर्कारी गोक्षुरः क्षुद्रा हृद्वती कलसी स्थिरा॥
राम्ना कणा कणामूलं कुष्ठं शुण्ठी किरातकः।
सुस्नाह्वता बला बालं द्राक्षा यासः घृतान्विता॥
एषां क्वाथो निहन्त्येव प्रभञ्जनकृतं ज्वरम्।
सोपद्रवञ्च योगोऽयं सर्व्वयोगवरः स्मृतः॥"

श्रीफलो बिल्वः। सर्व्वतोभद्रा गम्भारी। कामदूती पाटला। श्योनकः श्योनापाढ़ा इति लोके। तर्कारी गणिकारिका। कलसी वृश्चिपर्णी। स्थिरा शालिपर्णी। बालं सुगन्धबाला। यासो वासः। इति दशमूलादिक्वाथः॥ * ॥

सुश्रुतस्तु।

"पञ्चमूली कषायन्तु पाचनं वातिके ज्वरे।"इति।

अत्र पञ्चमूली हृत्पञ्चमूली। अतएव चिरुटी।

"श्रीपर्णी तर्कारी श्रीफलटुण्टुकपाटलामूलैः।
पाचनमुदितं मारुतजनितज्वरहारिवारिणि कथिते॥"

इति हृत्पञ्चमूली क्वाथः॥ * ॥

"किराताब्दाम्भोदीच्यहृतीड्यगोक्षुरैः।
त्रिपर्णीकलसीबिल्वैः क्वाथो वातज्वरापहः॥"

उदीच्यं बालकम्। त्रिपर्णी शालिपर्णी। कलसी वृश्निपर्णी। इति किरातादिक्वाथः॥*॥

"गुडूचीपिप्पलीमूलनागरैः पाचनं हृतम्।
वातज्वरे तथा पेयं कालिङ्गं सप्तमेऽहनि॥"

कालिङ्गं हृतं ऐन्द्रयवं हृतम्॥ * ॥

त्रिपुटी।

"विश्वाम्लतामन्थिकसिन्धुतोयं
मरुज्वरस्याग्निवतः कृतोऽयम्।
क्वाथोऽथ कुम्भुरुदेवदारु-
क्षुद्रौषधैः पाचनमत्र चारु॥"

औषधं शुण्ठी। क्वाथः पाचनमिति। वेदाः प्रमाणमितिवत्।

"पञ्चमूलीबलाराम्नाशुलत्यैः षड्भिः पुष्करैः।
क्वाथो हन्त्याशिरःकम्पं पर्व्वभेदं मरुज्वरम्॥"

पञ्चमूली बिल्वादिः। इति हृत्पञ्चमूल्यादिक्वाथः॥

"कणारसोनाग्निवह्निविश्वा-
निर्दिग्धिकासिन्धुकभूमिनिम्बैः।
समुस्तकैराचरितः कषायो
हिताग्निनां हन्ति गदानिमांस्तु॥
ज्वरं मरुद्दुष्टिसमुद्भवं तथा
बलासजञ्चानलमन्दताञ्च।
कण्ठावरोधं हृदयावरोधं
स्वेदञ्च रोमाञ्चहिमत्वमोहान्॥"

इति कणादिक्वाथः॥ * ॥

"शुण्ठ्यं शुङ्गरुजकमञ्चतुलितं मारारिगारीरजस्तावत्तावदमापतिस्फुटगलालङ्कारवस्तु स्मृतम्॥
तावत्येव मनःशिला च विमला तावत्तथा टङ्कणं
खण्डी द्व्यक्षमिता कणा च मरिचं दिक्पाल-संख्याधकम्॥
विश्वादि वस्तूनि शिलोपरिष्टा-
द्विचूर्णयेद्वाससि शोधयेच्च।
ततस्तु खल्ले रसगन्धकौ च
चूर्णञ्च तद्यामयुगं विमर्द्य॥
कल्पतरुनामधेयो यथार्थनामा रसः श्रेष्ठः।
समीरणश्लेष्मगदान् हरते मात्रास्य गुञ्जैका॥
आर्द्रकेण सममेष भक्षितो
हन्ति वातकफसम्भवं ज्वरम्।
श्वासकासमुखसेकशीलता-
वह्निमान्द्यविरुचींश्च नाशयेत्॥
नस्येनाप्येष हरति शिरोऽर्त्तिं कफवातजाम्।
मोहं महान्तमपि च प्रलापं स्रवथुञ्चरम्॥"

कल्पतरुरसः॥ सामान्यज्वरचिकित्सोक्तो महाज्वराङ्कुशः प्रदेयोऽत्र॥ * ॥

"विश्वमहौषधमागधिकोषणा
त्रुमिरिक्तकमार्द्रकमर्हितम्।
क्रमविवर्द्धितसुश्लिष्टज्वर-
च्छिप्ररभेरव एष रसो वरः॥"

त्रुमिः मारितं ताम्रं तस्य भागः एकः। रिक्तकं छिक्कलं तस्य भागः षट्। मारितं रक्तिकार्द्धम्। त्रिपुरभैरवो रसो ज्वरे॥ * ॥

"वातश्लेष्मज्वरे स्वेदं लङ्घनपार्श्वशिरशूलानि।
पीनसश्वासवाधिर्य्ये कारयेच्छिद्धाननिस्॥
लोतसां भार्ङ्गीं हत्वा नीत्वा पावकमाशयम्।
हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति॥
"क्षपरभरुपेटक्षितवाह्निकसंसिक्तवासुकाग्नेः
शमयति वातकफाम्बयमस्तकशूलाङ्गमर्द्दादीन्॥"

वासुकाग्नेः कर्म्म शिरोहृदयगात्रबन्धायां जृम्भायाम्। पादसुप्ततायां पिप्पलीभेदं ज्वरशाटे हृत्स्तम्भे लोमहर्षे च॥ * ॥

"मातुलुङ्गफलकेशरो हृतः
सिन्धुजन्मसरिचान्वितो सुखे।
हन्ति वातकफरोगमास्यग
श्लोषमाश्रु जडतामरोचकम्॥"

इति कवलः कण्ठौष्ठसुखशोषे॥ *

अन्यच्च ।
"शर्करादाडिमाभ्याच द्राक्षादाडिमयोरथा ।
कल्कं विधारयेदास्ये शोषवैरस्यनाशनम् ॥
द्राक्षामलकयोः कल्कं सर्पिषं वदने क्षिपेत् ।
तेन तृष्टा सुखस्थान्तः संशोषस्तेन शाम्यति ॥
सुरसं जायते वक्त्रं रुचिर्भवति भोजने ॥" * ॥
निद्रानाशस्य निदानमाह ।
"लाघवं लङ्घनं चिन्ता व्यायामः शोकभीक्रुधः ।
एभिरेव भवेन्निद्रानाशः श्लेष्मातिसंक्षयात् ॥"
अस्य चिकित्सामाह ।
"भृष्टस्तु विजयाचूर्णं मधुना निशि भक्षयेत् ।
निद्रानाशेऽतिसारे च ग्रहण्यां पावकक्षये ॥
गुडं पिप्पलीमूलस्य चूर्णेनालोड्य लिहन् ।
चिरादपि च संनष्टां निद्रामाप्नोति मानवः ॥
वायसजङ्घामूलं मूलं वा शिरसि काकमाच्याश्च ।
विधृतं निद्राजनकं खुड्मूलं वा धृतं सगुडम् ॥"
पीतमिति शेषः ॥
"मूलन्तु काकमाच्या वह्नं सूत्रेण मस्तके नियतम् ।
विदधाति नष्टनिद्रो निद्रामाश्वेव सिद्धामिदम् ॥
शीलयेन्मन्दनिद्रस्तु क्षीरमम्लरसान् दधि ।
अभ्यङ्गोद्वर्तनस्नानमूर्द्धकर्णाक्षितर्पणम् ॥"
रसं मांसरसम् ॥
"कान्तावाहुलतास्पर्शनिवृत्तिश्रान्तचेतसा ।
मनोऽनुकूला विषयाः कामं निद्रासुखप्रदाः ॥
रसे घ्राणे च रूपे च सर्पिर्यूषपयःसु च ।
निद्रां सङ्जनयत्याशु पलाण्डुरुपयोजितः ॥"
रसे मांसरसे ॥
"रैक्षवं पैत्तकी माषाः सुरा मांसरसः पयः ।
गोधूमतिलमत्स्याश्च निद्रां कुर्वन्ति देहिनाम् ॥"
निद्रानाशे ॥ * ॥
"दारु हैमवती कुष्ठं शृताक्षाहिङ्गुसैन्धवैः ।
लिम्पेत् कोलैरम्लपिष्टैः शूलाध्मानयुतोदरम् ॥"
हैमवती श्वेतवचा । दारुवट्कलेपः शूलाध्मानयोः ॥ * ॥
"कटुतैलं कणाहिङ्गुवचालशुनसाधितम् ।
उष्णं विनिहितं हन्ति कर्णयोर्निखनं व्यथाम् ॥"
तैलं कर्णशूले ॥ * ॥
"कणासुरभिवचया यवान्या च समन्विता ।
ताम्बूलसहिता हन्ति शुष्ककासं सखे धृता ॥"
शुष्ककासे ॥ * ॥ अथान्नमाह ।
"अमोपवासानिलजे हितो नित्यं रसौदनः ।
सुद्राम्लकव्यूषयुतः वह्निवृद्ध्यै दीयते ॥"
रसो विहितमांसरसः ॥
"पेयांश्च रक्तप्रालीनां वस्तिपार्श्वशिरोरुजि ।
श्रृङ्गाटकशटकारीभ्यां सिद्धां ज्वरहरीं पिबेत् ॥
काशी श्वासी च हिक्की च पञ्चमूलीहृतां पिबेत् ॥"
पेयमिति शेषः । इति वातज्वराधिकारः ॥*॥
अथ पित्तज्वराधिकारः । तत्र पित्तज्वरस्य विप्रकृष्टसन्निकृष्टकारणकार्यबन्धिकां संप्राप्तिमाह ।
"पित्तलाहारविष्टाभां पित्तामाशयाश्रयम् ।
वाहयेत्तरस कोष्ठाग्नं ज्वरजत्यादसाधुगम् ॥"
पित्तस्य पङ्गुत्वात्तेन कोष्ठाग्नेरुष्मा बहिर्नेतुं न शक्यते । यत आह ।
"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् ॥"
इति ॥
ततोऽत्र पित्तं वायुसहायं बोद्धव्यम् । यत आह ।
"द्वयमेकरसं नास्ति न रोगोऽपैत्तिकोद्भवः ।
एकस्तु कुपितो दोष इतरानपि कोपयेत् ॥" इति ।
अथ तस्य पूर्वरूपमाह । पित्तान्नयनयोर्हारिद्र इति । पित्तात् ज्वरे उत्पद्यमाने नेत्रदाहः स्यात् । स च अमादिपूर्वको भवति ॥ * ॥
अथ पित्तज्वरस्य लक्षणमाह ।
"वेगस्तीक्ष्णोऽतिसारश्च निद्रानाशस्तृषा वमिः ।
कण्ठौष्ठसुखनासानां पाकः स्वेदश्च जायते ॥
प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदक्लमौ ।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥"
अतिसारः पित्तस्य सरत्वात् सद्रवा प्रवृत्तिर्न त्वतीसार एव तस्य ज्वरोपद्रवत्वात् । वमिः यदा पित्तं कफस्थानं याति तदा बोद्धव्या । प्रलापोऽनर्थकं वचः । मूर्च्छारूपादैरज्ञानम् । मदः पूगकोद्रवपलूरभक्षणादिव मत्तता । भ्रमः चक्रारूढ़स्येव ज्ञानम् । पकारात् रक्तकोष्ठादयो बोद्धव्याः ॥*॥ अथ पित्तज्वरस्य चिकित्सा ।
"आमाशयस्थो हृत्वाग्निं सामो मारुत् पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने पित्तज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः । पैत्तिके दशरात्रेण ज्वरे युञ्जीत भेषजमिति । दशरात्रेण लङ्घनवता यतीतेनेत्यर्थः ॥ * ॥
किन्तद्भेषजं तदाह ।
'तिक्तासुस्तायवैः पाठाकटुफलाभ्यां सदीप्यकम् ।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥"
इति तिक्तादिकाथः ॥ * ॥
"पर्पटो वासकस्तिक्ता कैरातो धन्वयासकः ।
प्रियङ्गुश्च कृतः काथ एषां शर्करया युतः ॥
पिपासादाहपित्तासयुक्तं पित्तज्वरं हरेत् ॥"
इति पर्पटादिकाथः ॥ * ॥
"द्राक्षा हरीतकी सुस्ता कटुका कृतमालकः ।
पर्पटश्च कृतः काथ एषां पित्तज्वरापहः ॥
सुखशोषप्रलापान्तर्दाहमूर्च्छाभ्रमप्रणुत् ।
पिपासारक्तपित्तानां शमनो भेदनो मतः ॥"
इति द्राक्षादिकाथः ॥ * ॥
"पटोलयवधान्याकमधूकं मधुसंयुतम् ।
हन्ति पित्तज्वरं दाहं तृष्णां छर्दिप्रमाधिनीम् ॥"
इति पटोलादिकाथः ॥ * ॥
"गुडूच्यामलकीयुक्तः केवलो वापि पर्पटः ।
पित्तज्वरं हरेत्तूर्णं दाहशोषभ्रमान्वितम् ॥"
इति गुडूच्यादिकाथः ॥ * ॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः ।
किं पुनर्यदि युज्येत चन्द्र शीरवालकैः ॥"*॥
"क्षीवेरं चन्दनोशीरघनपर्पटसाधितम् ।
दद्यात् सुशीतलं वारि लट्छर्दिज्वरदाहजुत् ॥"
इति क्षीवेरादिकाथः ॥ * ॥
"भूनिम्बातिविषालोध्रमुस्तकेन्द्रयवाम्बुताः ।
बालकं धान्यकं बिल्वं कषायो माक्षिकान्वितः ।
विड्भेदश्वासकासांश्च रक्तपित्तज्वरं हरेत् ॥"
इति भूनिम्बादिकाथः ॥ * ॥
"द्राक्षाचन्दनपद्मानि सुस्ता तिक्ताम्बुतापि च ।
धात्री बालसुशीरञ्च लोध्रेन्द्रयवपर्पटाः ॥
परूषकं प्रियङ्गुश्च यवासो वासकस्तथा ।
मधूकं कुलकं चापि किराततो धान्यकं तथा ॥
एषां काथो निहन्त्येव ज्वरं पित्तसमुत्थितम् ।
तृषां दाहं प्रलापञ्च रक्तपित्तं भ्रमं क्लमम् ॥
मूर्च्छां छर्दिं तथा शूलं सखशोषमरोचकम् ।
श्वासं श्वासञ्च हिक्कासं नाशयेन्नात्र संशयः ॥"
इति महाद्राक्षादिकाथः ॥ * ॥
"ससितो निशि पर्युषितः प्रातर्धान्याकतण्डुलकाथः ।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम् ॥"
इति धान्याकाथः ॥ * ॥
"अष्टतायां हिमः प्रातः ससितः पैत्तिकज्वरम् ।
वासायाश्च तथा कासरक्तपित्तज्वरान् जयेत् ॥"
"गुडूची भूनिम्बश्च बालं वीरकशूलकम् ।
लघु सुस्तं चिरबिल्वाची द्राक्षा वासा च पर्पटः ॥
एषां काथो हरत्येव ज्वरं पित्तकृतं हतम् ।
सोपद्रवमपि प्रातर्निपीतो मधुना सह ॥"
इति गुडूच्यादिकाथः ॥ * ॥
"शलाटुस्य वदर्या वा निम्बस्य पटुपल्लवैः ।
अम्लपिष्टैः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम् ॥*॥
उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ति
निहन्ति दाहं त्वरितं ज्वरञ्च ॥ * ॥
पथ्यां तैलघृतक्षौद्रैर्लिह्यादुज्वरापहः ।
कासास्रकृपित्तवीसर्पश्वासान् हन्ति वमीरपि ॥
तैलघृतक्षौद्रैरित्यत्र न समुच्चयस्तेन केवलेन क्षौद्रेणापि लिह्यात् ॥ * ॥
"काङ्क्षिकार्द्रपटेनावगुण्ठनं दाहनाशनम् ।
अथ गोतक्रसंस्विन्नशीतलीकृतवाससा ॥ * ॥
द्राक्षामलककल्केन कवलोऽत्र हितो मतः ।
पक्वदाडिमबीजैर्वा धानाकल्केन च क्वचित् ॥"
धानाश्च धान्याकम् । इति कवलः ॥ * ॥
अथान्नमाह ।
"दाहज्वरार्दितं शालिं निरन्नं लघ्वन्वितम् ।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥"
लाजतर्पणं लाजाशृक्तरूपं तर्पणम् । सक्तुतर्पणस्वरूपमुक्तं सामान्यज्वरचिकित्सायाम् ॥*॥
"सुद्रयूषौदनो देयः सितया पैत्तिके ज्वरे ।
हर्म्ये शुभ्राभ्रसङ्काशे शशाङ्ककरशीतले ॥
मलयोदकसंसिक्ते स्वप्यात् पित्तज्वरी नरः ॥
हारावली चन्दनशीतलाना
सुगन्धपुष्पाम्बरभूषितानाम

नितम्बिनीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम् ॥
वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः।
नार्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः ॥"

इति पित्तज्वराधिकारः ॥ * ॥ * ॥

अथ श्लेष्मज्वराधिकारः। तत्र श्लेष्मज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विका संप्राप्तिमाह।

"श्लेष्मलाहारचेष्टाभ्यां कफ आमाशयाश्रयः।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत् स्वाद्रसानुगः ॥"

कफस्य कोष्ठाग्नितेजसो बहिर्नयनेन पङ्गुत्वादाशङ्कायां जातायां पित्तस्येव सिद्धान्तो बोद्धव्यः ॥ * ॥ अथ तस्य पूर्व्वरूपमाह।

कफोन्नाभिनन्दनमिति। कफात् ज्वरे उत्पन्नायां अन्नानभिलाषः स्यात्। स च श्रमादिपूर्व्वको भवति ॥ * ॥ अथ श्लेष्मज्वरस्य लक्षणमाह।

"स्तैमित्यं स्तिमितो वेगः आलस्यं मधुरास्यता।
शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च ॥
गौरवं प्रीतसुप्तक्लेदो रोमहर्षोतिनिद्रता।
प्रतिश्यायोरुचिः कासः कफजेऽल्पोऽतिशुक्लता ॥

स्तैमित्यं अज्ञानामार्द्रपटावगुण्ठितमिव। स्तिमितो वेगः ज्वरस्य भन्दवेगः। आलस्यं समर्थस्यापि कर्म्मण्यनुत्साहः। स्तम्भः अज्ञानत्वता। तृप्तिः अन्नाभिलाषे सत्यपि भोजनासामर्थ्यम्। गौरवं गात्राणाम्। प्रीतं प्रीतं लगति। उत्क्लेदः वमनोपस्थितिरिव। अतिनिद्रता निद्राधिक्यम्। प्रतिश्यायो नासारोगविशेषः। अरुचिः भोजनानिच्छा। चकारात् पिड़का प्रीता सुखप्रसेकश्चर्द्दिस्तन्द्रोष्णकामिता हृदयोपलेप उष्णाभिलाषो वह्निमान्द्यमिति। यत उक्तम्।

"प्रसेकः पिड़काः प्रीताश्चर्द्दिस्तन्द्रोष्णकामिता।
कफेन लिप्तहृदयं भवेदग्निश्च मन्दता ॥"

अथ श्लेष्मज्वरचिकित्सा।

"आमाशयस्थो हृत्वाग्निं सामो मार्गान् पिधाय च।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"

इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने श्लेष्मज्वरिणो लङ्घन विधाने विशेषमाह सुश्रुतः। श्लेष्मके द्वादशाहेन ज्वरे युञ्जीत भेषजमिति। द्वादशाहेन लङ्घनवता यतीतेनेत्यर्थः ॥ * ॥ किन्तच्छेषजं तदाह।

"पिप्पल्यादिकषायन्तु कफजे परियाचनमिति।"

पिप्पल्यादिगणमाह।

"पिप्पली पिप्पलीमूलं मरिचं गजपिप्पली।
नागरं चित्रकं चव्यं रेणुकैलाजमोदिका ॥
सर्षपो हिङ्गु भार्गी च पाठेन्द्रयवजीरकाः।
महानिम्बस्य मूर्व्वा च विषा तिक्ता विडङ्गकम्॥
पिप्पल्यादिगणो ह्येष कफमारुतनाशनः।
गुल्मशूलज्वरहरो दीपनश्चामपाचनः ॥"

इति पिप्पल्यादिकाथः ॥

"चौद्रोपकुल्यासंयोगः श्वासकासज्वरापहः।
प्रीहानं हन्ति हिक्काञ्च बालानामपि प्रस्थते ॥
पिप्पलीं चिफलाञ्चापि समभागां ज्वरी लिहन्।
मधुना सर्पिषा वापि कासी श्वासी सुखी भवेत् ॥ * ॥

कट्फलं पौष्करं शृङ्गी लक्षा च मधुना सह।
श्वासकासज्वरहरो लेहोऽयं कफनाशनः ॥"

इति चातुर्भेदिकावलेहः ॥ * ॥

"कटफलं पौष्करं शृङ्गी यवानी कारवी तथा।
कटुत्रयञ्च सर्व्वाणि समभागानि चूर्णयेत् ॥
आर्द्रकस्य रसैर्लिह्यान्मधुना वा कफज्वरी।
कासश्वासारुचिच्छर्द्दिश्लेष्मानिलनिवृत्तये ॥"

इत्यर्द्धश्लोकावलेहः ॥ * ॥

"सिन्धुवारदलक्काथं कणाढ्यं कफजे ज्वरे।
जङ्घयोश्च बले शीघ्रं कर्णे च पिप्पिते पिबेत् ॥
यवानी पिप्पली वासा तथा खाखसवल्कलम्।
एषां क्काथं पिबेत् कासे श्वासे च कफजे ज्वरे ॥
वासान्तुद्राष्टताक्काथः क्षौद्रेण ज्वरकासहृत् ॥"

इति वासादिकाथः ॥ * ॥

"मरिचं पिप्पलीमूलं नागरं कारवी कणा।
चित्रकं कट्फलं कुष्ठं ससुगन्धिवचा शिवा ॥
कण्टकारी वटा शृङ्गी यवानी पिप्पलीद्वयम्।
एषां क्काथो हरत्येव ज्वरं सोपद्रवं कफात् ॥"

इति मरिचादिकाथः ॥

वातज्वराधिकारोक्तकल्पतरुरसोऽपि। श्लेष्मज्वरे दातव्यस्तस्य कफस्याधिष्ठत्वात् ॥ * ॥

"सिन्धुत्रिकटुरास्नाभिरार्द्रकेण कफे हितः ॥"

कवल इति शेषः ॥ * ॥ अथान्नमाह।

"सूक्ष्मयूषौदनो दोषो ज्वरे कफसमुत्थिते ॥"

इति श्लेष्मज्वराधिकारः ॥ * ॥

अथ वातपित्तज्वराधिकारः। तत्र द्वन्द्वज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विका संप्राप्तिमाह। तत्र वातपित्तज्वरस्य।

"वातपित्तकरैर्भावैर्वातपित्ते आमाशयाश्रये।
बहिर्निरस्य कोष्ठाग्निं रसगे ज्वरकारिणी ॥"

स्यातामिति शेषः ॥ * ॥

अथ तस्य पूर्व्वरूपमाह।

"प्रायूषे वातपित्तस्य भवतो वातपैत्तिके ॥"

ज्वर इति शेषः ॥ * ॥

अथ वातपित्तज्वरस्य लक्षणमाह।

"तृष्णा मूर्च्छा भ्रमो दाहो निद्रानाशः शिरोरुजा।
कण्ठास्यशोषो वमथू रोमहर्षोरुचिस्तमः ॥
पर्व्वभेदश्च जृम्भा च वातपित्तज्वरालृतिः ॥"

पर्व्वभेदः पर्व्वाणि भिद्यन्त इवेति सन्धिषु यथा ॥

अथ वातपित्तज्वरस्य चिकित्सा।

"वातपित्तज्वरे देयमौषधं पञ्चमेऽहनि।
किराततिक्तामृतां द्राक्षामामलकीं घटीम्।
निष्काथ्य सगुड़ं क्काथं वातपित्तज्वरे पिबेत् ॥"

इति किरातादिकाथः ॥ * ॥

"गुड़ूची पर्पटो मुस्तं किरातो विश्वभेषजम्।
वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम् ॥"

इति पञ्चभद्रकाथः ॥ * ॥

"त्रिफलाशाल्मलीरास्नाराजवृक्षाटरूषकैः।
शृतमम्बु हरत्याशु वातपित्तभवं ज्वरम् ॥"

इति त्रिफलादिकाथः ॥ * ॥

"मधुकं सारिवा द्राक्षा मधूकं चन्दनोत्पलम्।
काश्मीरफलकं लोध्रं त्रिफला पद्मकेशरम्॥
परूषकं नृणालञ्च क्षिपेत् संचूर्ण्य वारिणि।
निशीथितं सिताक्षौद्रलाजयुक्तञ्च तत् पिबेत्।
वातपित्तज्वरं दाहं तृष्णामूर्च्छारुचिभ्रमान्॥
शमयेद्रक्तपित्तञ्च जीमूतमिव मारुतः ॥"

अत्र मधुकादिद्राक्षान्तं समुदितं पलपरिमितं संचूर्ण्य क्षिपेत् वारिणि षट्पलपरिमिते। मधुकादिर्द्विभो दाहे ॥ * ॥

अथान्नमाह।

"मुद्गामलकयूषस्तु वातपित्तज्वरे हितः।
महादाहे प्रदातव्यो यूषश्चणकसम्भवः ॥"

दाड़िमामलकमुद्गसम्भवो यूष उक्त इति वातपैत्तिके।

"कफपित्तहरा मुद्गाः कारवेल्लादयस्तथा।
प्रायेण न च ते देया वातपित्तोत्तरे ज्वरे॥
दक्षास्तु ज्वरविष्मशूलोदावर्त्तकारिणः ॥"

इति वातपित्तज्वराधिकारः ॥ * ॥

अथ वातश्लेष्मज्वराधिकारः। तत्र तस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विका सम्प्राप्तिमाह।

"वातश्लेष्मकरैर्भावैर्वातकफावामाशयाश्रयौ।
बहिर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ॥"

पूर्व्वरूपमाह।

"प्रायूषे वातकफयोः स्यातां वातकफज्वरे ॥"

तस्य लक्षणमाह।

"स्तैमित्यं पर्व्वणां भेदो निद्रागौरवमेव च।
शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्त्तनम्॥
सन्तापे मध्यवेगश्च वातश्लेष्मज्वरालृतिः॥"

स्वेदाप्रवर्त्तनं स्वेदस्य आ समन्ताद्भावेन प्रवृत्तिः॥

तथाह हारीतः।

"शिरोग्रहः स्वेदभवश्च कासो
ज्वरस्य लिङ्गं कफवातजस्येति॥"

स्वेदभवः स्वेदोत्पत्तिः॥ * ॥

नन्वु स्वेदः पित्तस्य धर्म्मः अतएव पित्तज्वरे कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायत इत्युक्तम्। तस्मात् कथं वातश्लेष्मज्वरे स्वेदोत्पत्तिः। उच्यते। विकृतिविषमसमवायारब्धत्वात्त दोष इति कार्त्तिकः। प्रकृतिसमसमवायस्य विकृतिविषमसमवायस्य चायमर्थः। प्रकृत्या हेतुभूतया समः कारणानुरूपः समवायः कार्य्यकारणभावः सम्बन्धः प्रकृतिसमसमवायः कारणानुरूपं कार्य्यमिति यावत्। यथा प्रकृतेर्यथास्थितैः शुक्लैस्तन्तुभिः समवायकारकैरारब्धः पटः शुक्ल एव भवति। तथा प्रकृतेरेव केवलेन वातेन पित्तेन कफेन वा जनितो ज्वरो वातादुचितैर्धर्म्मैर्वैमधुदैगाधिक्य-

नैमित्तादिभिर्युक्तो भवति। विकृतिविषमसमारभ्यस्तु विकृत्या हेतुभूतया विषमः कारणानुरूपः समवायः कार्यस्य कारणेऽसम्बन्धः। यथा संयोगाद्विकृताभ्यां हरिद्राचूर्णाभ्यां हेतुभूताभ्यां विषमः कारणगुरूपो लोहितो वर्णो जायते। तथा योगेन विकृताभ्यां वातश्लेष्मभ्यां हेतुभूताभ्यां विषमा कारणानुरूपा खेदस्यातिप्रवृत्तिरिति सिद्धान्तः॥ * ॥

अथ वातश्लेष्मज्वरस्य चिकित्सा।

"वातश्लेष्मज्वरे देयमौषधं नवमेऽहनि।
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरैः।
दीपनीयः स्मृतो वर्गो वातश्लेष्मज्वरापहः॥
कोलमात्रोपयोगित्वात् पञ्चकोलमिदं स्मृतम्।
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत्॥
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम्॥"

इति पञ्चकोलम्॥ * ॥

"किरातविश्वान्ततक्तिसिंहिका-
कणाकथामूलरसोनसिन्धुकैः।
स्रुतः कषायो विनिहन्ति सत्वरं
ज्वरं सशैरात् सकफात् ससूत्थितम्॥"

इति किरातादिकाथः॥ * ॥

"पिप्पल्यादिगणं काथं पिबेद्वातकफज्वरी।
नातःपरं किञ्चिदस्मिन् ज्वरे भेषजमुत्तमम्॥"

इति पिप्पल्यादिकाथः॥ * ॥

"पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः।
वचा सातिविषा जातीपाठावत्सकरेणुकम्॥
किराततिक्तको मूर्वा सर्षपा मरिचानि च।
कटफलं पुष्करं भार्गी विडङ्गं कर्कटाह्वयम्॥
अर्कमूलं दृषत्सिंही श्रेयसी सदुरालभा।
दीप्यकाजमोदा च शुकनासा च रूक्षका॥
एतानि समभागानि गन्धयोऽर्धविंशतिः।
एषां काथो निपीतः स्याद्वातश्लेष्मज्वरापहः॥
हन्ति वातं तथा शीतं प्रसेकमपि वेपथुम्।
प्रलापपङ्क्तितन्द्राच रोमहर्षपरुचौ तथा॥
महावातेऽपतन्त्रे च शून्यके सर्वजाजके।
पिप्पल्यादिर्महाकाथो ज्वरे सर्वत्र पूजितः॥"

इति बृहत्पिप्पल्यादिकाथ॥ * ॥

"दशमूलीरसः पीतः कणाढ्यः कफवातजे।
ज्वरे विपाके निद्रार्थी पार्श्वरुक्श्वासकासके॥

इति दशमूलीकाथः॥ * ॥

तत्र अग्र्यो रक्षा वातश्लेष्मज्वरहरत्वात्॥

"पिप्पलीभिः शृतं तोयमनभिष्यन्दि दीपनम्।
वातश्लेष्मज्वरं हन्ति सेवितं क्षणादग्निम्॥"

इति पिप्पलीकाथः॥ * ॥

"स्रुतकं टङ्गणं भृष्टं गन्धं शुद्धं समं समम्।
द्विगुणं स्रुतकात्क्षेयं जैपालं तुषवर्जितम्॥
सैन्धवं मरिचं चित्रा त्वक् क्षारः शर्करापि च।
प्रत्येकं स्रुततुल्यं स्याच्चूर्णमेतैर्विचक्षणैः॥
सर्वेषां स्रुतनामार्धं रसो गुञ्जाद्वयोन्मितः।
भक्षितस्तप्ततोयेन वातश्लेष्मज्वरापहः॥"

सूतेश्वरो रसो वातश्लेष्मज्वरे शीतज्वरे च॥

रसप्रदीपे।

"स्वेदोद्गमे भृष्टकुलत्थचूर्ण-
निपातनं ग्रस्तमिति ब्रुवन्ति।
जीर्णं गुडक्षौद्रयवस्य भाजनं
संचूर्णितं स्वेदहरं सुधूलनात्॥
मरिचं पिप्पली शुण्ठी पथ्या लोध्रस्य पौष्करम्।
भूनिम्बः कटुका कुष्ठं कर्चूरो लिङ्गिका शटी॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत्।
एतद्धूलनं श्रेष्ठं स्रोतोवत् स्वेदनिर्गमे॥"

लिङ्गिका पद्मगुरिया इति लोके। अत्र शटी गन्धपलाशी। इति मरिचाद्यधूलनम्॥ * ॥

"भूनिम्बकारवीतिक्तावचाकटफलजं रजः।
एषासुधूलनं श्रेष्ठं सन्ततं स्वेदसंसवे॥"

इति भूनिम्बाद्यधूलनम्॥ * ॥

पूर्वोक्तो बालुकास्वेदोऽप्यत्र समुचितः॥ यत उक्तम्।

"पौनस्वभ्रवाधीर्ये जङ्घापार्श्वास्थिशूलिनि।
वातश्लेष्मज्वरे स्वेदं कारयेत् तद्विधानवित्॥*॥
मातुलुङ्गफलकेशरो घृतः
सिन्धुजन्मसरिचान्वितो मुखे।
हन्ति वातकफरोगमास्यगं
श्लोषमाशु जडतामरोचकम्॥

इति कवलः॥"

अथान्नमाह।

"मसूरा पञ्चमूल्यान्नं सम्यक् सिद्धं चिकित्सकः।
सप्तमे दिवसे दद्यात् ज्वरे वातबलासजे॥"

इति वातश्लेष्मज्वराधिकारः॥ * ॥

अथ पैत्तिकश्लेष्मज्वराधिकारः। तत्र तस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्विकां सम्प्राप्तिमाह।

"पित्तश्लेष्मकरैः पित्तकफवामाग्न्यथौ।
वह्निर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ॥"

पूर्वरूपमाह।

"प्राग्रूपे पित्तकफयोः स्यातां पित्तकफे ज्वरे॥"

अथ तस्य लक्षणमाह।

"लिप्ततिक्तास्यता तन्द्रा मोहः कासोरुचिस्तृषा।
सुदुर्दिनो गुरुः शीतं पित्तश्लेष्मज्वरातिः॥"

आस्यस्य तिक्तत्वं पित्तेन। लिप्तत्वं श्लेष्मणा। तन्द्रा अर्द्धनिमीलितनेत्रत्वम्। मोहो मूर्च्छा॥*॥

अथ पित्तश्लेष्मज्वरस्य चिकित्सा।

"पित्तश्लेष्मज्वरे देयमौषधं दशमेऽहनि।
गुडूचीनिम्बधान्याकचन्दनं कटुरोहिणी॥
गुडूच्यादिरयं काथः पाचनो दीपनः स्मृतः।
तृष्णादाहरुचिच्छर्दिपित्तश्लेष्मज्वरापहः

इति गुडूच्यादिकाथः। *

"अन्दताकटुकारिष्टपटोलं वनचन्दनम्।
नागरेन्द्रयवक्षेतदष्टताश्वकमीरितम्॥
कथितं सकणाचूर्णं पित्तश्लेष्मज्वरापहम्।
हृल्लासारोचकच्छर्दितृष्णादाहनिवारणम्॥"

इति अन्दताश्वकम्॥ * ।

"कराटकार्यन्दता भार्गी विश्वेन्द्रयववासकाः
भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणीम्।
विपाच्य पाययेत् काथं पित्तश्लेष्मज्वरापहम्।
दाहतृष्णारुचिच्छर्दिकासशूलनिवारणम्॥"

इति कराटकार्यादिकाथः॥ * ॥

"नागरोशीरविल्वाब्दधान्यमोचरसाम्बुभिः।
स्रुतः काथो भवेद्ग्राही पित्तश्लेष्मज्वरापहः॥"

इति नागरादिकाथः॥ * ॥

"सशर्करामलमात्रां कटुकाक्षौद्रवारिणा।
पीत्वा ज्वरं जयेच्छीघ्रं पित्तश्लेष्मसमुद्भवम्॥"

अत्र कटुकाया द्वादशमाषाः। शर्करायाश्चत्वारो माषाः। एवं कर्ष इति चक्रदत्तः॥ वैद्यव्यवहारे तु कटुकाशर्करयोः समभागयोरेव कर्षः। इति कटुकीकल्कः॥ * ॥

"सपत्रपुष्पवासायाः रसः क्षौद्रसितायुतः।
पित्तश्लेष्मज्वरं हन्ति सासपित्तं सकामलम्॥"

अत्र वासाया रसो अर्द्धपलपरिमितो देयः। मधुसितयोः प्रत्येकं टङ्कः प्रक्षेप्यः॥ * ॥

अथान्नमाह।

"कषायः परिपीतस्तु शृङ्गवेरपटोलयोः।
पित्तश्लेष्मज्वरवमीदाहकण्डूहरो भवेत्॥"*॥

अन्यच्च।

"पटोलधान्ययोर्यूषः पित्तश्लेष्मज्वरापहः॥"

इति पित्तश्लेष्माधिकारः॥ * ॥

अथ सन्निपातज्वराधिकारः। तस्य निदानादिचिकित्सां सन्निपातज्वरशब्दे द्रष्टव्या॥*॥

अथागन्तुकज्वराधिकारमाह। तत्रागन्तुकज्वरस्य निदानान्याह।

"अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः।
आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत्॥"

अभिघातः शस्त्रमुष्टिलगुडादिभिरभिहननम्। अभिषङ्गः कामशोकभयक्रोधभूतादीनामावेशः। अभिचारः हत्याद्युत्पादनम्। अभिशापः ब्राह्मणगुरुवृद्धसिद्धादिकृतः शापः। तं आगन्तुज्वरं यथास्वं यथादोषलक्षणं दोषैर्विभावयेत् विजानीयात्॥ * ॥ अपरानपि निदानान्याह।

"ये भूतविषवायुग्निशस्त्रभङ्गादिसम्भवाः।
रागद्वेषभयाद्याश्च ते स्युरागन्तवो गदाः॥"

भयाद्येत्यादिशब्देन भूतविषवायुग्निशस्त्रभङ्गादयः संगृह्यन्ते। तेन रागादयोभङ्गाद्यन्ता हेतवोऽप्यागन्तुसंज्ञाः स्युः। कार्यकारणयोरभेदोपचारात्। एवं च आगन्तुजः स्मृत इत्यत्राप्यागन्तुशब्दो हेतुवाची आगन्तुर्जायते दोषैरित्यत्र व्याधिवाची अभिघाताभिषङ्गाभ्यामित्यादि श्लोके दोषैर्यथास्वं तं विभावयेदितिवचनेनैव प्रतीयते। अभिघातादीनां विप्रकृष्टकारणत्वं मिथ्याहारविहाराणामिव दोषाणां सन्निकृष्टकारणत्वम्। तथा सति दशापमानसंक्षुब्धेत्यादि श्लोके आगन्तुज्वरस्यात्मत्वविघातो दोषत्वेनैव प्रवेशात्। उच्यते। आगन्तुज्वरस्य दोषा आरम्भका न किन्तु पश्चादनुबन्धिनः॥*॥ तथा चागन्तुज्वरस्य सम्प्राप्तिमाह चरकः। आगन्तुर्हि यथापूर्वं जायते पश्चान्नैजैर्दोषैरनुबध्यत इति॥ * ॥

तत्र कस्यागन्तोः को निजो दोष इत्यपेक्षायामाह ।
'कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयो मलाः। भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः ॥"
कामशोकभयात् कामशोकभयजादागन्तोर्वायुः कुप्यति। क्रोधात् क्रोधजादागन्तोः पित्तं कुप्यति। भूताभिषङ्गात् भूतावेशजादागन्तोः त्रयो मला दोषाः कुप्यन्ति इत्यर्थः। भूतसामान्यलक्षणाः भूतस्य भूतलक्षणस्य सामान्यं समानता येषां तानि भूतसामान्यानि भूतसामान्यानि लक्षणानि येषां ते भूतसामान्यलक्षणाः मलाः ॥ * ॥

अथागन्तुज्वराणां हेतुभेदैर्लक्षणभेदानाह ।
"ध्यायास्यता विषक्षते तथातीसार एव च।
भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया ॥"
विषक्षते स्थावरजङ्गमदिग्धभक्षणकृते ज्वरे। ध्यायः शुक्लानुविद्धः कृष्णो वर्णः प्राक्तनवर्णो वा। अतीसारः स्थावरविषेणैव तस्याधोगामित्वात्। तोदः सूचीव्यधनेनेव यथा ॥ *
"ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा।
कामजे चित्तविभ्रंशस्तन्द्रालस्यमभोजनम् ॥
हृदये वेदना चास्य गात्रञ्च परिशुष्यति ॥"
कामजे समीहितकान्ताद्यप्राप्तिनिमित्तके ज्वरे। चकारात् वाग्भटोक्तान्यपि लक्षणानि बोद्धव्यानि। तानि यथा,—
"कामाद्भ्रमोऽरुचिर्हार्हो हीनिद्राधीधृतिक्षयः।
भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः ॥"
भयात् भयजे ज्वरे प्रलापः। शोकाच्च चकारेण प्रलाप एवानुक्रम्यते। कोपाच्च कोपादपि वेपथुर्भवति ॥ * ॥ ननु वेपथुर्वातस्य धर्मः; तत् कथं क्रोधजे ज्वरे वेपथुः। यत उक्तम्। क्रोधात् पित्तमिति। उच्यते।
"एकः प्रकुपितो दोष इतरानपि कोपयेत् ॥"
इति वचनात् पित्तकोपितवातजन्य एवाय वेपथुः ॥ * ॥ किञ्च क्रोधाद्वायुरपि भवति। यत उक्तं विदेहेन। क्रोधशोकौ स्मृतौ वातपित्तरक्तप्रकोपनाविति। यत उक्तम्।
"भूताभिषङ्गाद्धसितं रोदनं कोपने।
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ॥"
भूताभिषङ्गोत्थो विषमज्वरो भवति। कदाचिदपि वेगवान् कदाचिच्छान्तवेग इत्यर्थः ॥
"अतिचाराभिघातात्तु मोहस्तृष्णा च जायते।"
तृष्णा चेति चकारेण हारीतानुवादि वाग्भटोक्तञ्च बोद्धव्यम्। तद्यथा,—
"व्यभिचारिक्रमैर्मिथ्या ह्रियमाणस्य तप्यते।
पूर्वं मनस्ततो देहस्ततो विष्कोटविभ्रमैः।
सदाहस्तृष्णमत्यर्थमस्य प्रायेण वर्द्धते ज्वर इति ॥"
अथ तेषां चिकित्सा।
"आगन्तुजे ज्वरे नैव नरः कुर्वन्ति लङ्घनम् ॥"
तथा च वाग्भटः।
"शुद्धवातक्षयागन्तुजीर्णज्वरिषु लङ्घनम् ॥"
नेष्यते इति शेषः। अन्यच्च।
"लङ्घनं न हितं कामशोकचिन्ताग्रहारुजे।
भयभूतक्रमक्रोधलङ्घनेषु कृते ज्वरे ॥
किन्तु दीप्ताग्नये तत्र दद्यान्मांसरसौदनम् ॥
अभिघातज्वरे युञ्ज्यात् क्रियामुष्णविवर्जिताम् ॥
कषायं मधुरं स्निग्धं यथादोषमथापि वा।
अभिघातज्वरो नश्येत् पानाभ्यङ्गेन सर्पिषः ॥
रक्तावसेकैर्मेधेश्च तथा मांसरसौदनैः ॥"
मेधैर्मेधाय हितैः ॥ * ॥
"ग्रथवन्त्रश्रमात्यध्वभङ्गभ्रंशसमुद्भवान्।
ज्वरानुपाचरेत् पूर्वं क्षीरमांसरसौदनैः ॥"
ग्रथस्ताडनं कर्णादिवेधो वा। भङ्गश्छेदभेदादिकः। भ्रंशो वृक्षादितः पतनम् ॥ * ॥
"ग्रध्वश्रान्तेषु चाभ्यङ्गं दिवानिद्राञ्च कारयेत्।
ओषधीगन्धविषजौ विषपित्तज्वरापहैः।
जयेत् कषायैर्मतिमान् सर्वगन्धकृतैर्भिषक् ॥"
सर्वगन्धमाह।
"चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम्।
लवङ्गसहितश्चैव सर्वगन्धं विनिर्दिशेत् ॥ * ॥
क्रोधजे पित्तजे काम्ये नार्याः सङ्गात्यमेव च।
श्वासेनेश्वलाभेन वायोः प्रशमनेन च ॥
हर्षणेन शमं यान्ति कामशोकभयज्वराः।
कामैरथ मनोज्ञैश्च पित्तज्वरापक्रमैः ॥
सद्भाक्येन शमं याति ज्वरः क्रोधसमुत्थितः ॥"
कामैः कामावेशैः। मनोज्ञैः धिक्कारादिभिर्भयजनकवचनैर्वा ॥ * ॥
"कामात् क्रोधज्वरो नश्येत् क्रोधात् कामज्वरस्तथा।
घातिताभ्यामुभाभ्याञ्च कामक्रोधज्वरत्रयः ॥"
घातिताभ्यामुभाभ्यां मनसि निगृहीताभ्यां कामक्रोधाभ्याम् ॥ * ॥
"भूतविद्यासमुद्दिष्टैर्बन्धादेशनताडनैः।
जयेद्भूताभिषङ्गोत्थं मनःसान्त्वेन मानसम् ॥"
ताडनैरित्यस्य स्थाने केचित् पूजनैरिति पठन्ति ॥
"सहदेवाया मूलं विधिना कण्ठे निबद्धमपहरति।
एकद्वित्रिचतुर्भिर्दिवसैर्भूतज्वरं पुंसाम ॥
ग्रभिचाराभिग्रापोत्थौ ज्वरौ होमादिभिर्जयेत्।
दानस्वस्ययनातिथ्यैरुत्पातग्रहदुष्टिजौ ॥"
इत्यागन्तुज्वराधिकारः ॥ * ॥
ग्रथ विषमज्वराधिकारमाह। तत्र विषमज्वरस्य निदानादिचिकित्सापर्यन्तं विषमज्वरशब्दे द्रष्टव्यम् ॥ * ॥
ग्रथ जीर्णज्वराधिकारः। तस्य निदानादिकं जीर्णज्वरशब्दे द्रष्टव्यम् ॥ * ॥
ग्रथ दुर्ब्बलजनितस्य ज्वरस्य चिकित्सामाह।
"हरीतकी निम्बपत्रं नागरं सैन्धवोज्वलः।
एषां चूर्णं सदा खादेत् दुर्ब्बलज्वरशान्तये ॥"
इति हरीतक्यादि चूर्णम् ॥ * ॥
"ग्ररुचिमनलमान्द्यं पीनसश्वासकास-
मुदरमुदकदोषानास्य हन्याद्विशेषात्।
जनयति तनुकान्तिं चित्तवैक्लव्यसादं
पलपरिमितमुशीरोत्थितः कथायः ॥"
इति मुशीराकाथः ॥ * ॥
"विल्वं भागद्वयं दग्धकपर्दैः पञ्चभागकैः।
मरिचं नवभागाच्च चूर्णं वस्त्रेण शोधयेत् ॥
ग्रार्द्रकस्य रसेनास्य कुर्य्यान्मुद्गनिभां वटीम्।
वारिणा वटिकाद्वयं प्रातः सायञ्च भक्षयेत् ॥
ग्रयं रसो ज्वरे योज्यः सामे दुर्ब्बलजेऽपि च।
ग्रजीर्णाध्मानविष्टम्भशूलेषु श्वासकासयोः ॥"
इति दुर्ब्बलजेता रसः ॥ * ॥
"पटोलमुस्ताम्बतवल्लिवासकं
सनागरं धान्यकिरातितिक्तकम्।
कषायमेषां मधुना पिबन्नरो
निवारयेत् दुर्ब्बलदोषसम्भवम् ॥"
इति पटोलादिकाथः ॥ * ॥
"किराततिक्तत्रिवृदम्बुपिप्पली-
विड़ङ्गविश्वाकटुरोहिणीरजः।
निहन्ति लीढ़ं मधुनातिसत्वरं
सुदुस्तरं दुर्ब्बलदोषजं ज्वरम् ॥"
इति किराततिक्तादिचूर्णम् ॥ * ॥
"भोजनादौ नरैर्भुक्तं शुण्ठीराज्यमधोत्थितम्।
कल्कं तु सहते नित्यं नानादेशोद्भवं जलम् ॥
महार्द्रकयवक्षारौ पीत्वा चोष्णेन वारिणा।
नानादेशसमुद्भूतंवारिदोषमपोहति ॥"*॥
ग्रथ साध्यस्य ज्वरस्य लक्षणमाह।
"बलवत्स्वपि दोषेषु ज्वरः साध्योऽनुपद्रवः ॥"
ज्वरस्योपद्रवानाह।
"श्वासमूर्च्छारुचिच्छर्द्यतीसारविड्ग्रहाः।
हिक्काकासाङ्गभेदाश्च ज्वरस्योपद्रवा दश ॥"*॥
प्रसङ्गादुपद्रवाणां चिकित्सार्थां विशेषमाह।
"संजातोपद्रवो व्याधिस्त्याज्यो न स्याच्चिकित्सकैः।
व्याधौ शान्ते प्रशाम्यन्ति सद्यः सर्व्वेऽप्युपद्रवाः ॥
ग्रतो व्याधिं जयेदूर्ध्वात् पूर्व्वं पश्चादुपद्रवम्।
भिषग्वैः कुशलैः धीरैश्च जयेत् पूर्व्वमुपद्रवम् ॥
तेष्वपि प्रचुरेषु प्राक्प्राग्यदासुकारिणम्।
मूलव्याधिं जयेत् पूर्वं जेयो यो वा भवेद्बली ॥
ग्रविरोधेन वा कार्य्यादुभयोरपि च क्रियाम् ॥"
तत्र ज्वरे श्वासस्य चिकित्सा।
"सिंही व्याघ्री ताम्रमूली पटोली
भार्ङ्गी पद्मा पुष्करं रोहिणी च।
शार्ङ्गेष्टा शैलमल्लाश्च बीजं
श्वासं हन्यात् सन्निपाते दशाङ्गः ॥"
सिंही वड़ाकटेया। व्याघ्री कटेया। ताम्रमूली दुरालभा। पद्मा भार्गी। रोहिणी कटुकी। शैलमल्ली कोरैया। इति दशाङ्गो योगः ॥ * ॥
"भार्गीनिम्बधनाभयास्तलताभूनिम्बवासाविषा-
व्याघ्रीकटुकावचाचिकटुकाश्लोणाकणत्रुटमैः।
राज्ञायासपटोलपाटलिघृटीदार्व्वीविशाला-
चित्रक-
ब्राह्मीपुष्करसिंहिकाह्वयनिशाधात्र्यश्वदेव-
दुमैः ॥
क्वाथोऽयं खलु सन्निपातविहितान् हृच्चिंशुतां
पाननो।
दुर्ब्बर्षाक्रिकतैकसा विजयते सर्पान् गरुत्मानिव

किंच श्वासवलासकासगुदरुग्ग्रहणीगुल्महिक्कामरु-
न्मान्द्याग्निभगलामयार्हितमला विश्वम्भराप्य-
पि ॥"
विषा अतीस । शक्रद्रुमः ककुभः । देवद्रुमः देव-
दारु । इति हारिश्चन्द्रकाथः । * ॥
"मधुना क्षुण्णाकटफलकर्कटशृङ्गीभवं चूर्णम् ।
श्वासामये महोग्रे पीत्वा लोकः सुखी भवति ॥
वन्योपलाक्षितापितदार्वक्षाग्नेय पञ्जरे दाहः ।
अपहरति श्वासामयमसंशयं भाषितं मुनिभिः॥"
अथ ज्वरे मूर्च्छायाश्चिकित्सा ।
"आर्द्रकस्य रसैर्नस्यं मूर्च्छायामाचरेन्नरः ।
अञ्जनच प्रयुञ्जीत मधुसिन्धुशिलोद्भवे: ॥
शीताम्भसाभिषेकः सुरभिर्धूपः सुगन्धिपुष्पच ।
वृन्ततालवृन्तवातः कोमलकदलीदलशय्यः ॥"
अथ ज्वरे अरुचेश्चिकित्सा ।
"अरुचौ तु शृङ्गवेरजरसकैः सार्द्धैः ससिन्धुजैः
कवलः ।
सिन्धूत्थमातुलुङ्गीफलकेशरधारणं वक्त्रे ॥"
अन्यच ।
"अरुचौ मातुलुङ्गस्य केशरं साध्यसैन्धवम् ।
धात्रीद्राक्षासितानां वा कल्कमास्ये तु
धारयेत् ॥"
अथ ज्वरे छर्द्देश्चिकित्सा ।
"काथो गुडूच्याः समधुः सुशीतः
पीतः प्रशान्तिं वमनस्य कुर्यात् ।
विश्वाचिकाणां मधुनावलीढा
सचन्दना शर्करयान्विता च ॥"
अथ ज्वरे तृष्णायाश्चिकित्सा ।
"दन्तशठीबीजपूरकदाडिमवदरैः सयूषकैर्वन्दने ।
पेयो जयति पिपासामथ रजतशुटीसुखाम्भःसा ॥
शीतं पयः क्षौद्रयुतं निपीत-
मामलकमाक्षिक वदुद्गमेच ।
तर्षप्रकर्षप्रशमाय वक्त्रे
दधाद्रदच्छौद्रवटाग्रलाजान् ॥"*॥
अथ ज्वरे अतीसारस्य चिकित्सा ।
"लङ्घनमेकं सुखा न चान्यदस्तीह भेषजं बलिनः ।
सप्तदशैतद्दोषनिचयं शमयति तत् पाचयत्यपि च ॥
वत्सादनीवत्सकवारिवाह-
विश्वम्भरानिम्बविषाः सविश्वाः ।
ज्वरातिसारं त्वरितं जयन्ति
विश्वामृतावत्सकवारिवाहः ॥"
विश्वम्भरानिम्बो भूनिम्बः ।
"पाठाम्बुतापर्पटमुस्तविश्वा-
किराततिक्तेन्द्रयवान् विपाच्य ।
पिबन् हरत्येव दृढेन सर्व-
ज्वरातिसारानपि दुर्निवारान् ॥"*॥
अथ ज्वरे विड्ग्रहस्य चिकित्सा ।
"विड्ग्रहे वातजातु कर्म कुर्यादग्नानुलोमनम् ।
मलं प्रवर्त्तयेदाशु तीक्ष्णाभिः फलवर्त्तिभिः ॥
पथ्यारग्वधतिक्ताब्दामलकैः शृतं तोयम् ।
जीर्णज्वरे विबन्धे दद्यादाश्वेव विड्ग्रहः
शाम्येत् ॥"
अथ ज्वरे हिक्कायाश्चिकित्सा ।
"नीरेण सिन्धूत्थरजोऽतिरुक्षं
नस्येन नूनं विनिहन्ति हिक्काम् ।
मुखौ हठाद्वा सितया समेता
धूपोऽथवा हिङ्गुससुक्तवक्त्र ॥"*॥
अथ ज्वरे कासस्य चिकित्सा ।
"कासे कणाकणामूलं कलिङ्गमफलं रजः ।
सविश्वभेषजं लिह्यात् मधुना वा दृषान्नसम् ॥"
रजः पर्पटकम् ।
"पुष्करमूलकटुत्रिकशृङ्गीकट्फलयासककार-
विकाभिः ।
मधुगुलिताभिरयं खलु लेहः कासरिपुः कफ-
रोगहरश्च ॥"*॥
अथ ज्वरे दाहस्य चिकित्सा ।
"दाहाधिकारलिखितं दाहे कुर्याच्चिकित्सितम् ।
परं ज्वराविरुद्धं यन्मुखो नाम्नो ज्वरो यतः ॥"
अथ सुखसाध्यस्य ज्वरस्य लक्षणम् ।
"सप्ताहोऽभ्यधिको वाह्यस्तृष्णादीनाच मार्द्दवम् ।
बहिर्वेगस्य लिङ्गानि सुखसाध्यत्वमेव च ॥"
लक्षणादित्यादिशब्देनान्तर्दाहसन्धास्थि-वथा-
श्वासा गृह्यन्ते । तेषामार्द्दवमल्पता । बहि-
र्वेगस्य ज्वरस्य ।
"वर्षाशरद्वसन्तेषु वातादेः प्राक्तनः क्रमात् ।
प्राक्तनः सुखसाध्यस्तु शरत्सुरभिसम्भवः ॥"
सुरभिर्वसन्तः । * ॥
अथ कृच्छ्रसाध्यस्य ज्वरस्य लक्षणमाह ।
"वैकृतोऽन्यः स दुःसाध्यः प्राकृतेष्वनिलोद्भवः ॥"
अन्यः प्राकृतादन्यः वैकृतः । * । वर्षादिषु
ज्वरं जनयतां वातादीनां चिकित्साविशेषार्थं
प्राधान्यमप्राधान्यञ्चाह ।
"वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितं ज्वरम् ।
कुर्यात् पित्तञ्च शरदि तस्य चानुबलः कफः ॥"
तस्य पित्तज्वरस्य चिकित्सामाह ।
"ततप्रशमो विसर्गाच्च तच्च नानशनाद्भयम् ॥"
ततप्रशमः तस्य पित्तस्य प्रशमः स्वभावेन ।
यत उक्तम् ।
"कफपित्ते द्रवे धातू सन्तिते लङ्घनं बहु ॥" इति ।
विसर्गाच्च शरदो विसर्गकालत्वाच्च । यत उक्तम् ।
वर्षाशरद्धेमन्ता विसर्गादानसंज्ञकाः कालास्तूपचितबला-
प्राणिनो भवन्ति सोमस्य बलवत्त्वादिति । तच्च
शरदि पित्तज्वरे अनशनाद्भयं न । कफो वसन्ते
तमपि वातपित्तं भवेदतु । वसन्ते कफज्वरेऽपि
कफप्रकृत्या लङ्घनाद्भयं न भवति । किन्तु
वसन्तस्यादानकालत्वात् निःशङ्कं न कर्त्तव्यम् ।
यत उक्तम् । शिशिरवसन्त-ग्रीष्मास्वादानकालाः
क्षीणापचितबलाः प्राणिनो भवन्ति सूर्य्यस्य
बलवत्त्वादिति । एतेनेदं उक्तम् । वर्षासु वायुः
प्रधानं पित्तश्लेष्माणावप्रधाने । शरदि पित्तं
प्रधानं कफोऽप्रधानम् । वसन्ते श्लेष्मा प्रधानं
वातपित्ते अप्रधाने । तत्र प्रधानस्य प्राधा-
न्येन चिकित्सा कर्त्तव्या । सा चाप्रधाना
निर्हिता विधेया । एवं वैकृतेष्वपि प्रधा-
नस्य प्राधान्येन चिकित्सा कर्त्तव्या । तथा
चोक्तम् ।
"संसर्गे यो गरीयान् स्यादुपक्रम्य स वै भवेत् ।
भेषजदोषविरोधेन सन्निपाते तथैव च ॥"
संसर्गे दोषद्वयस्य संसर्गः । गरीयान् प्रधानः ।
"अन्तर्दाहोऽधिका तृष्णा प्रलापः श्वसनं भ्रमः ।
सन्ध्यस्थिशूलमस्वेदो दोषवर्चोविनिग्रहः ॥
अन्तर्वेगस्य लिङ्गानि कृच्छ्रसाध्यत्वमेव च ॥"
वर्चोविनिग्रहः पुरीषाप्रवृत्तिः ॥ * ॥
अथासाध्यस्य ज्वरस्य लक्षणमाह ।
"ज्वरः क्षीणस्य शूलस्य गम्भीरो दैर्घरात्रिकः ।
असाध्यो बलवान् यच्च केशसीमन्तकृत् ज्वरः ॥"
दैर्घरात्रिकः बहुरात्रानुबन्धी । केशसीमन्तकृत्
प्रभावात् केशेषु सीमन्तं यः करोति ॥ * ॥
गम्भीरस्य लक्षणमाह ।
"गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया ।
आनद्धत्वेन चास्यर्थं कासश्वासोद्भमेन च ॥"
आनद्धत्वेन विबद्धमलत्वेन ॥ * ॥ सामान्य-
ज्वरेऽपि कर्णमूलग्रीवास्वासाध्यत्वादिकमाह ।
"ज्वरस्य पूर्वं ज्वरमध्यतो वा
ज्वरान्ततो वा श्रुतिमूलग्रीवः ।
क्रमादसाध्यः खलु लक्ष्यसाध्यः
सुखेन साध्यो मुनिभिः प्रदिष्टः ॥"*॥
अथारिष्टमाह । तत्रारिष्टस्य लक्षणम् ।
"रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्यादरिष्टमप्यभिधीयते ॥
हेतुभिर्बहुभिर्ज्ञातो बहुभिर्बहुलक्षणः ।
ज्वरः प्राणान्तकृद्यश्च ग्रीवमिन्द्रियनाशनः ॥"
ग्रीवमिन्द्रियनाशनः तत्पन्नमात्र एव चिकित्-
स्यमानोऽपीन्द्रियाणां चक्षुरादीनां शक्तिं यो
नाशयति ॥ * ॥ अन्यचारिष्टमाह ।
"विसंज्ञस्त्रास्यते यस्तु ग्लेवे निपतितोऽपि वा ।
ग्लानार्हितोऽन्नरुग्यश्च ज्वरेण म्रियते नरः ॥"
विसंज्ञः विगतज्ञानः । त्रास्यते नष्टहर्षः । ग्लेवे
निपतितोऽपि वा अत्रापिशब्द एवार्थः निप-
तित एव तिष्ठति न चोत्थातुं समर्थः तथा सन्
ग्लेत एव । ग्लानार्हितः बहिः । अन्तरुग्यः
अन्तर्दाहवान् । * ॥ अन्यच ।
"यो ह्रस्वरोमा रक्ताक्षो हृदि सङ्घातमूलवान् ।
वक्त्रेण चैवोच्छ्वसिति ज्वरस्तं हन्ति मानवम् ॥"
ह्रस्वरोमा रोमाल्पवान् । हृदि सङ्घातमूलवान्
सान्निपातिकशूलवान् । वक्त्रेण चैवोच्छ्वसिति
न तु नासिकया ॥ * ॥ अन्यच ।
"हिक्काश्वासश्रमायुक्तं मूढं विभ्रान्तलोचनम् ।
सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः ॥"
क्षपयति समापयतीत्यर्थः ॥ * ॥ अन्यच ।
"हतप्रभेन्द्रियं क्षाममरोचकनिपीडितम् ।
गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्जयेत् ॥"
हता प्रभा दीप्तिर्येषाम् । अथवा हता प्रभा
प्रतिभा विषयग्रहणशक्तिर्येषां तथाविधानीन्द्रि-
याणि यस्य तं हतप्रभेन्द्रियम् । क्षामं क्षीणम् ।
गम्भीरतीक्ष्णवेगार्त्तं गम्भीरः उक्तलक्षणः

तीक्ष्णवेगः अतिदुःसहवेगः ताभ्यां आर्त्तं दुःखितम् ॥ * ॥ अन्यच्च ।
"मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
शेषस्तु लभ्यता मोघः शुक्रस्य तु विशेषतः ॥"
व्याख्यातोऽयं श्लोकः ॥ * ॥
विषमज्वरस्यारिष्टमाह ।
"आरम्भाद्विषमो यस्य यस्य वा दैर्घ्यरात्रिकः ।
क्षीणस्य चातिरूक्षस्य गम्भीरो हन्ति यस्य तम् ॥"
यस्य आरम्भाद्विषमः प्रथमोत्पत्तेरेव विषमः न तु ज्वरोत्तरस्य । यस्य दैर्घ्यरात्रिको वा यस्य क्षीणस्यातिरूक्षस्य च गम्भीरो भवति तं विषमो दैर्घ्यरात्रिको गम्भीरश्च हन्तीत्यर्थः ॥ इति ज्वराधिकारः ॥ * ॥ अथ ज्वरातिसाराधिकारः ।
"ज्वरातिसारयोरुक्तं निदानं यत् पृथक् पृथक् ।
तस्माज्ज्वरातिसारस्य निदानं नोदितं पुनः ॥"
अथ ज्वरातिसारस्य चिकित्सामाह ।
"ज्वरातिसारयोरुक्तं भेषजं यत् पृथक् पृथक् ।
न तन्मिलितयोः कार्य्यमन्योन्यं वर्द्धयेत् पुनः ॥"
अयमभिप्रायः । ज्वरहरमनुलोमनं भवति । अतीसारहरं स्तम्भनं भवति । अतः परस्परविरुद्धत्वात् पृथक् उक्तं भेषजं मिलितयोर्न कार्य्यम् । यत आह ।
"अनुलोमनं ज्वरघ्नं ग्राहकमतिसारनुद्भवति ।
पृथगुक्तमौषधं तज्ज्वरातिसारे विरुद्धमन्योन्यम् ॥
अतस्तौ प्रतिकुर्व्वीत विशेषोक्तचिकित्सितैः ।
लङ्घनमेकं सुक्त्वा नान्यदस्तीह भेषजं बलिनः ।
समुदीर्णदोषनिचयं तत् पाचयेत्तथा शमयेत् ॥
लङ्घनसुभयोरुक्तं मिलिते कार्य्ये विशेषतस्तद्वत् ।
उत्पलषष्टकसिद्धं लाजमण्डादिकं सकलम् ॥"
उत्पलषष्टकं यथा,—
"पृश्निपर्णीबलाविल्वधनिकानागरोत्पलैः ।
ज्वरातिसारी पेयां वा पिबेत् साम्लां प्लुतां नरः ॥"
अत्र लाजमण्डाद्यपेक्षया वाशब्दः । व्यतिसारे पुरीषातिप्रवृत्त्या साम्लत्वञ्च दाड़िमरसादिना कर्त्तव्यम् । इत्युत्पलषष्टकम् ॥ * ॥
"कणा करिकणा लाजकाथो मधुसितायुतः ।
पीतो ज्वरातिसारस्य तृष्णावम्योश्च नाशनः ॥"
इति कणादिक्काथः ॥ * ॥
"नागरातिविषामुस्ताभूनिम्बवत्सकैः ।
क्काथः सर्व्वज्वरहरः सर्व्वातीसारनाशनः ॥"
इति नागरादिक्काथः ॥ * ॥
"गुडूच्यतिविषाधान्यसुण्ठीबिल्वाब्दवालकैः ।
पाठा भूनिम्बकुटजं चन्दनोशीरपर्पटैः ।
पिबेत् कषायं सक्षौद्रं ज्वरातीसारशान्तये ॥
श्लेष्मासृक्पित्तविड्दाहवमीनां विनिवृत्तये ॥"
इति गुडूच्यादिक्काथः ॥ * ॥
"उत्पलं दाड़िमत्वक् च पद्मकेशरमेव च ।
पिबेत्तण्डुलतोयेन ज्वरातीसारनाशनम् ॥"
इत्युत्पलादिचूर्णम् ॥ * ॥
बिल्ववालकभूनिम्बगुडूचीधान्यनागरैः ।
कुटजाब्दयुतः क्काथो ज्वरातीसारशूलजुत् ॥
इति बिल्वादिक्काथः ॥ * ॥
"नागरातिविषाविश्वागुडूचीबिल्वमुस्तकैः ।
कषायः पाचनः श्लेष्मज्वरातीसारवारणः ॥"
इति नागरादिक्काथः ॥ * ॥
"दशमूलीकषायेण विश्वामत्तसमां पिबेत् ।
ज्वरे चैवातिसारे च सप्लीहे यकृतीगदे ॥"
इति दशमूलीक्काथः ॥ * ॥
इति ज्वरातिसाराधिकारः । इति भावप्रकाशः ॥
ज्वरघ्नः, पुं, (ज्वरं हन्तीति । हन् + टक् ।) गुडूची । वासकम् । इति राजनिर्घण्टः ॥ ज्वरनाशके, त्रि । (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"ज्वरघ्नं पाचनं बल्यं दृष्यं रुच्यं कफापहम् ॥")
ज्वरहन्त्री, स्त्री, (ज्वरं हन्ति या । हन् + क्तच् ङीप् च ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥ ज्वरघ्नी च ॥
ज्वराग्निः, पुं, (ज्वर एवाग्निः । दाहकत्वादस्य तथात्वम् ।) ज्वररूपाग्निः । तत्पर्य्यायः । आधिमन्थवः २ । इति हारावली ॥
ज्वराङ्गी, स्त्री, (ज्वरमङ्गति विनाशयतया प्राप्नोतीति । अङ्ग गतौ + अच् । गौरादित्वात् ङीष् ।) भद्रदन्तिका । इति राजनिर्घण्टः ॥
ज्वरान्तकः, पुं, (ज्वरस्य अन्तको विनाशकः ।) नेपालनिम्बः । आरग्वधः । इति राजनिर्घण्टः ॥ ज्वरघ्नौषधविशेषः । यथा,—
"भास्करो गन्धकः शुल्वं देवी विहङ्गतीक्ष्णकम् ।
श्रोत्रितं गगनञ्चैव पुष्यकञ्च महेश्वरम् ॥
भूनिम्बादिगणैर्भाव्यं मधुना गुटिका दृढ़ा ।
चातुर्थकं तृतीयञ्च ज्वरं सन्ततकं तथा ।
आमज्वरं भूतशतं सर्व्वज्वरमपोहति ॥
अत्र भास्करः ताम्रम् । शुल्वं रसः । देवी सौराष्ट्रमृत्तिका । विहङ्गं स्वर्णमाक्षिकम् । गगनं अभ्रकम् । पुष्यकं रसाञ्जनम् । महेश्वरं सुवर्णम् । अन्यत् सुगमम् । ताम्रादीनां समभागचूर्णं भूनिम्बादिक्काथेन भावयेत् । भूनिम्बादशदशपत्राणि सर्व्वत्रयतुल्यानि अष्टभागावशिष्टं क्काथं छाला दिनत्रयं विभाव्य विशोष्य मधुना विमर्द्द्य अनुरूपं लिहेत् । ज्वरान्तको रसः ।" इति भैषज्यरत्नावली ॥ ज्वरनाशकश्च ॥
ज्वरापहा, स्त्री, (ज्वरं अपहन्ति नाशयतीति । अप + हन + ड ।) विल्वपत्री । इति शब्दचन्द्रिका ॥ वेलशुंठा इति भाषा ॥ ज्वरनाशके, त्रि ॥
ज्वरारिः, पुं, (ज्वरस्य अरिः शत्रुर्नाशकत्वात् ।) ज्वरघ्नौषधविशेषः । यथा,—
"दरदवलिरसानां शुक्लनागाभ्रकाणां
सुभगविटशिलानां सर्व्वमेकत्र योज्यम् ।
विपिनतृपदलोत्थैर्भावितं श्लोययेत्तं
दिवसदशसमाप्तौ रक्तिकैकाञ्च कुर्य्यात् ॥
एकैकां भक्षयेदस्य चार्द्धकस्य रसैर्युतम् ।
दत्तमात्रं ज्वरं हन्ति ज्वरारिः स निगद्यते ॥
सर्व्वमूलविनाशी च कफपित्तविनाशनः ॥
बलिः । गन्धकः । सर्व्वं श्लोनालिपत्ररसेन दशदिनं भावयित्वा गुञ्जाप्रमाणमार्द्रकरसेन देयम् ।
ज्वरारौ रसः ।" इति भैषज्यरत्नावली ॥
ज्वराग्निः, पुं, (ज्वरे अग्निर्वह्निमिवामोघत्वात् ।) ज्वरनाशकौषधविशेषः । यथा,—
"रसं गन्धं सैन्धवञ्च विषं ताम्रसमं भवेत् ।
सर्व्वचूर्णसमं लौहं ततुसमं चूर्णमभ्रकम् ॥
लौहं च लौहदण्डे च निर्गुण्ड्याः स्वरसेन च ।
मर्द्दयेदयत्नतः पश्चान्मरिचं शततुल्यकम् ॥
पर्णेन सह मातयो रसो रक्तिकसम्मितः ।
सर्व्वज्वरहरश्रेष्ठो ज्वराग्निरुदाहृतः ॥
कासं श्वासं महाघोरं विषमाख्यं ज्वरं वमिम् ।
धातुस्थं प्रबलं दाहं ज्वरदोषं चिरोद्भवम् ॥
यकृत्प्लीहोदरग्रन्थिहृदयघ्नञ्च विनाशयेत् ॥
ज्वराग्नौ रसः ।" इति भैषज्यरत्नावली ॥
ज्वरितः, त्रि, (ज्वरः सञ्जातोऽस्य । ज्वर + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) ज्वरी । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये ।
"सदृगन्नं मद्यरागाम्लकुलत्थान् समकुष्ठकान् ।
आहारकाले यूषार्थं ज्वरिताय प्रदापयेत् ॥"
यथाच,—
"ज्वरितो हितमश्नीयात् यद्यप्यस्यारुचिर्भवेत् ।
अन्नकाले ह्यसुस्थानः पीयते म्रियतेऽथवा ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
ज्वरी, [न्] त्रि, (ज्वरोऽस्यास्तीति । ज्वर + इनिः ।) ज्वरयुक्तः । (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये ।
"गुर्व्वभिष्यन्दिकाले वा ज्वरी गाढात् कथञ्चन ॥")
ज्वल, ज म चले । लिघि । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) वकारयुक्तः । ज, ज्वालः ज्वलः । म, प्रज्वलयति । मित्त्वेऽपि णौ ज्वलङ्कलञ्चल इत्यादिना केवलस्य ह्रस्वविकल्पनात् सोपसर्गस्यैव नित्यं ह्रस्वः । ज्वालयति ज्वलयति प्रज्वलयति । लिट् दीप्तिः । ज्वलति वह्निः । इति दुर्गादासः ॥ (यथाह कश्चित् ।
"जागर्त्ति लोको ज्वलति प्रदीपः
सखीगणः पश्यति कौतुकेन ।
सुदूर्त्तमात्रं कुरु नाथ ! धैर्य्यं
वुभुक्षितः किं द्विकरेण भुङ्क्ते ॥")
ज्वलः, पुं, ज्वालः । दीप्तिः । (ज्वलतीति । ज्वल दीप्तौ + अच् ।) दीप्तिविशिष्टे, त्रि । इति मुग्धबोधम् ॥
ज्वलका, स्त्री, (ज्वलतीति । ज्वल + बाहुलकात् वुन् ।) अग्निशिखा । इति हेमचन्द्रः ॥
ज्वलत्, त्रि, (ज्वल + शतृ ।) दीप्तिमत् । तत्पर्य्यायः । जमत् १ कल्मलीकिनम् २ जङ्गनाभवन् ३ मल्मलाभवन् ४ अर्चिः ५ श्रोचिः ६ तपः ७ तेजः ८ हरः ९ क्षणिः १० प्रज्वङ्गाणि ११ । इत्येकादश ज्वलति नामधेयानि ॥ * ॥ भ्राजते १ भासते २ भास्वति ३ दीदयति ४ श्रोचति ५ मन्दते ६ भन्दते ७ रोचते ८ द्योतते ९

द्योतते १० दुमत् ११। इत्येकादश ज्वलति-कर्म्माणः। इति वेदनिघण्टौ १ अध्यायः॥

ज्वलनः, पुं, (ज्वलतीति। ज्वल+"कुचड्क्रम्य-दन्क्रम्यक्षृधिज्वलशुचलषपतपदः।" ३। २। १५०। इति युच्।) अग्निः। (यथा, कला-विलासे। १। ४।

"यत्र त्रिनयननयनज्वलनज्वालावलीमुलभ-वृत्तिः।
जीवति मानसजन्मा शुभ्रिवदनावदनकान्ति-पीयूषैः॥",

चित्रकृत्तः। इत्यमरः। १।१।५६॥ (ज्वल+भावे ल्युट्।) दहने, क्ली॥

ज्वलनाश्मा, [न्] पुं, (ज्वलनः सूर्य्यवद्दीप्ति-विशिष्टः अश्मा प्रस्तरमणिः। नित्यकर्म्मधारयः।) सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥

ज्वलितः, त्रि, (ज्वल+क्तः।) दग्धः। उज्ज्वलः। इति मेदिनी। ते, ११०॥ (प्रदीप्तः। यथा, महाभारते। ६। १८। ६।

"काञ्चनाङ्गदिनो रेजुर्ज्वलिता इव पावकाः॥")

ज्वलिनी, स्त्री, (ज्वलो दीप्तिरस्त्यस्याः। ज्वल+इनिः+ङीप्।) मूर्व्वालता। इति राज-निर्घण्टः॥

ज्वालः, पुं स्त्री, (ज्वलतीति। ज्वल+"ज्वलितिक-न्तेभ्यो णः।" ३। १। १४०। इति णः। पक्षे स्त्रियां टाप्।) अग्निशिखा। इत्यमरः। १।१।६०॥ (यथा, महाभारते। ३। २१८। ३।

"दीप्तो ज्वालैरनेकाभैरग्निरेषोऽथ वीर्य्यवान्॥")

दीप्तिविशिष्टे, त्रि। इति सुग्धबोधम्॥

ज्वाला, स्त्री, दग्धान्नम्। इति शब्दचन्द्रिका॥ (ज्वलतीति। ज्वल+णः+टाप्।) अग्निशिखा। इत्यमरः। १। १। ६०॥ (यथा, विष्णुपुराणे। १। १२। २४।

"अभ्युद्यतोग्रशस्त्राग्नि ज्वालामालाकुलैर्मुखैः॥")

दाहश्च॥ (खनामख्याता ऋक्षस्य पत्नी। यथा, महाभारते। १। ६५। २५।

"ऋक्षः खलु तच्चकदुहितरमुपयेमे ज्वालां नाम। तस्यां पुत्रं मतिनारं नामोत्पादयामास॥")

ज्वालागर्द्दभकः, पुं, (ज्वालगर्द्दभ+स्वार्थे कन्। ततः पृषोदरादित्वात् साधुः।) रोगविशेषः। तत्पर्य्यायः। ज्वालारसभकाभयः २ ज्वाला-खरगदः ३ गर्द्दभगदः ४। इति राजनिर्घण्टः॥ अस्य लक्षणं ज्वालगर्द्दभशब्दे द्रष्टव्यम्॥

ज्वालाजिह्वः, पुं, (ज्वाला शिखा एव जिह्वा यस्य।) अग्निः। इति हेमचन्द्रः। ३।१६५॥ (स्कन्दस्यानुचरविशेषः। यथा, महाभारते ६। ४५। ५८।

"ज्वालाजिह्वः करालश्च शितकेशो जटी हरिः॥")

दानवविशेषः। स तु बलिराजस्य सेनानी-विशेषः। यथा, हरिवंशे। २३२। ६।

"करालो ज्वालजिह्वश्च शतास्रः शतलोचनः॥")

ज्वालासुखी, स्त्री, (ज्वालेव सुखं प्रधानं यस्याम्। तत्रात्रस्तप्रज्वलितज्वालाभिरेव पूजादिकं गृह्णाति देवीत्यतोऽस्यास्तथात्वम्।) पीठस्थानावयवः। तत्र भगवत्या जिह्वा पतिता। तत्र अम्बिका देवी। उन्मत्तनामकभैरवश्च। इति पीठमाला॥ यथाच।

"ज्वालासुखां महाजिह्वां देव उन्मत्तभैरवः।
अम्बिका सिद्धिदा नाम्नी स्तनं जालन्धरे मम॥"

इति तन्त्रचूड़ामणौ पीठनिर्णयः॥

विद्याविशेषः। यथा,—

"ज्वालासुखीक्रमं वक्ष्ये सा पूज्या मध्यतः शुभे!।
नित्यारुणा मदनान्तरा मदमोहापञ्चशरेषु॥
कमला श्रीभारती च आकर्षणी महेन्द्रापि।
ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा।
वाराही चैव माहेन्द्री चासुखेति च पूजयेत्।
विजया चाजिता चैव मोहनी चापराजिता॥
स्तम्भनी जृम्भनी पूज्या कालिका पद्मवाह्यतः।
ज्वालासुखीक्रमं पूज्य विद्यादिहरणं भवेत्॥"

इति गारुड़े ज्वालासुखीविद्या २०४ अध्यायः॥

झ

झ, झकारः। स व्यञ्जननवमवर्णः चवर्गचतुर्थ-वर्णश्च। अस्योच्चारणस्थानं तालु। इति शाक-रणम्॥ (यदुक्तं शिक्षायाम्। १७।

"कण्ठ्यावहाविचुयशास्तालव्या ओष्टजावुपू॥")

अस्योत्पत्तिर्यथा,—

"विसर्गस्तालुगः सोष्मा झं चवर्गश्च यन्तथा॥"

इति प्रपञ्चसारः॥

(वङ्गीयवर्णमालायाम्) अस्य लेखनप्रकारो यथा,

"त्रिकोणकुण्डलीरूपा वामदक्षिणयोगतः।
क्रमशस्तासु तिष्ठन्ति चन्द्रसूर्य्याग्नयः प्रिये!॥
तत्र क्रोड़गता माद्या शक्तित्रयसरूपिणी।
ऊर्द्धमात्रा तथेन्द्राणी मध्ये नारायणी स्मृता॥"

अस्य ध्यानं यथा, वर्णोद्धारतन्त्रे।

"ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!।
सन्तप्तहेमवर्णाभां रक्ताम्बरविभूषिताम्॥
रक्तचन्दनलिप्ताङ्गीं रक्तमाल्यविभूषिताम्।
चतुर्हस्तयुतां देवीं रत्नहारोज्ज्वलां पराम्॥
ध्यात्वा ब्रह्मस्वरूपां तां तन्मन्त्रं दशधा जपेत्॥"

अस्य स्वरूपं यथा,—

"झकारं परमेशानि! कुण्डली मोक्षरूपिणी।
रक्तविद्युल्लताकारं सदा त्रिगुणसंयुतम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा।
त्रिबिन्दुसहितं वर्णं त्रिशक्तिसहितं तथा॥"

इति कामधेनुतन्त्रम्॥

तस्य ३५ पञ्चत्रिंशत् नामानि यथा,—

"झो झङ्कारी गुहो झञ्झावायुः सत्यः षडुन्नतः।
अजेशो द्राविणी नादः पाशी जिह्वा जलं स्थितिः॥
विराजेन्द्रो धनुर्हस्तः कर्कशो नादजः कुजः।
दीर्घबाहुबली रूपमञ्जन्दितः सुचञ्चलः॥
दुर्मुखो गण आत्मवान् विकटा कुचमण्डलः॥
कलहंसप्रिया वामा अङ्गुलीमध्यपर्व्वकः।
दन्तहासाट्टहासश्च पाथात्मा यञ्जनः स्मरः॥"

इति नानातन्त्रशास्त्रम्॥

झः, पुं, (झटति सङ्घीभवतीति। झट सङ्घाते+बाहुलकात् डः।) झञ्झावातः। अम्बुवर्षणम्। इति शब्दरत्नावली॥ झण्टीशः। सुरगुरुः। देवराजः। ध्वनिः। तारवायुः। इति मेदिनी। झे, १॥ नष्टे, त्रि। इति शब्दरत्नावली॥

झगझगायमानः, त्रि, (झगझग इवाचरतीति। झगझग+"कर्त्तुः क्यङ् सलोपश्च।" ३।१।११। इति क्यङ् ततः शानच्।) चाकचिक्ययुक्तः। झक्‌झकिया इति भाषा। यथा,—

"मयूरवरगामिनीं सुरदशुद्धवर्णोत्कटां
रणत्क्वणितघण्टिकां निश्चितशक्तिहस्तोद्यताम्।
प्रभानिकररश्मिभिर्झगझगायमानांशुकां
नयामि गृहसम्भवां त्रिदशशृङ्खलानिर्ज्जगीम्॥"

इति देवीपुराणे रुरुवधे मालतीवनामाध्यायः॥

झङ्कारः, पुं, (झ+भावे घञ् कारः। झमित्यव्यक्त-शब्दस्य कारः करणं यत्र।) भ्रमरादिशब्दः। यथाह वल्लालसेनः।

"प्रारब्धो मधुपैरकारणमहो झङ्कारकोला-हलः॥"

(तथाच पद्मतन्त्रे। ५। ४२।

"शरज्ज्योत्स्नाहते दूरं तमसि प्रियसन्निधौ।
धन्यानां विभ्रति श्रोत्रे गीतझङ्कारजा सुधा॥")

झञ्झा, स्त्री, (झमित्यव्यक्तशब्देन झटति वेगेन वहतीति। झट+बाहुलकात् डः। ततष्टाप्।) ध्वनिविशेषः। जलकणवर्षणम्। इति शब्द-रत्नावली॥

झञ्झानिलः, पुं, (झञ्झाध्वनियुक्तोऽनिलः।) प्रावृषिजवायुः। झञ्झावातः। इति त्रिकाण्ड-शेषः॥

झञ्झावातः, पुं, (झञ्झाध्वनियुक्तो वातः।) प्रावृषिजवायुः। इति हलायुधः॥ (यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्याये।

"झञ्झावातं रक्तवृष्टिं वात्याञ्च वृक्षपातनम्॥")

झट, संहतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) झटति केशः। परस्परं लग्नः स्यादित्यर्थः। इति दुर्गादासः॥

झटिः, पुं, (झटति परस्परं संलग्नो भवतीति। झट संहतौ+"सर्व्वधातुभ्य इन्।" उणा। ४। ११७। इति इन्।) क्षुद्रवृक्षः। इत्युणादिकोषः॥

झटिति, अ, द्रुतम्। शीघ्रम्। तत्पर्य्यायः। झाक् २ अञ्जसा ३ अञ्जाय ४ सपदि ५ द्राक् ६ मंक्षु ७। इत्यमरः। ३। ४। २॥ (यथा, पद्मपुराणे। ७। १२५।

"तत्त्वविस्मृतिमात्रान्नरकः किन्तु विपर्य्ययात्।
विपर्य्येतु न कालोऽस्ति झटिति स्मरतः क्वचित्॥")

झत्ति, अ, (झटिति इति शब्दस्य प्राकृतभाषायां झत्ति इति सिद्धम्।) झटिति। इति प्राकृत-भाषायां काव्यप्रकाशः॥

झनत्कारः, पुं, (झ+भावे घञ् कारः। झनदित्यव्यक्तशब्दस्य कारः करणं यत्र।) अनुकरणशब्दः। कङ्कणादिध्वनिः। यथा, कालिदासः।
"उदृवेल्लद्भुजवल्लिकङ्कणझनत्कारः चयं वार्थताम्॥"

झम, उ भत्वे। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्। उदित्त्वात् क्त्वावेट्।) उ, झमित्वा झान्त्वा। इति दुर्गादासः॥

झम्पः, पुं. (लम्फः पृषोदरादित्वात् साधुः।) सम्पातपतनम्। लम्फः। इति जटाधरः॥ (यथा, महावीरचरिते। [तः॥")
"पुच्छास्फोटदलत्-ससुद्रविवरैः पातालझम्पाश्च

झम्पाकः, पुं, (झम्पं लम्फं आराति आददातीति। आ+रा+बाहुलकात् डुः।) वानरः। इति शब्दरत्नावली॥

झम्पाग्नी, [न्] पुं, (झम्पेन सम्पातेन अश्नातीति। अग्न+णिनिः। मतुस्यादिधारयकाले झम्पदानपूर्ब्बकपतनादस्य तथात्वम्।) मतुस्यरङ्गपक्षी। इति जटाधरः॥

झम्पी, [न्] पुं, (झम्पो लम्फोऽस्यास्तीति। झम्प+"अत इनिठनौ।" ५।२।११५। इति इनिः।) वानरः। इति शब्दरत्नावली॥

झरः, पुं, (झीर्यते जीर्णीभवति पतनादिस्थानमनेनेति। झॄ+"ऋदोरप्।" ३।३।५७। इत्यप्।) निर्झरः। पर्व्वतावतीर्णजलप्रवाहः। इत्यमरः। २।३।५॥ (समूहः। यथा, मेघदूते।२।३२।
"कलसे निजहेतुदत्तजः
किसु चक्रभ्रमिकारिता गुणः।
य तदुच्चकुचौ भवन् प्रभा-
झरचक्रभ्रमिमातनोति यत्॥"
"य कलसः प्रभाझरूपेण कान्तिसन्दोहेन चक्रभ्रमिं कुलालचक्रभ्रमभ्रमातनोति जनयति। यद्वा प्रभाझरे कान्तिप्रवाहे चक्रभ्रमिं चक्रवाकभ्रान्तिमातनोति।" इति तट्टीका॥)

झरा, स्त्री, (झर+टाप्।) झरः। इत्यमरटीकायां भरतः॥

झरी, स्त्री, (झर+ङीष्।) झरः। इत्यमरटीकायां भरतः॥

झर्ष, ग्र उत्तौ। भर्त्सने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) रेफोपधः। ग्र, झर्षतीति झर्षन्ती। गुणस्थानरहितानां तुदादिपाठफलन्तु ग्रन्थान्तरादवगन्तव्यम्। भर्त्सस्तर्ज्जनम्। इति दुर्गादासः॥

झर्ष्ट, ग्र उत्तौ। भर्त्सने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, झर्ष्टती झर्ष्टन्ती। भर्त्सस्तर्ज्जनम्। इति दुर्गादासः॥

झर्म्म, ग्र उत्तौ। भर्त्सने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्र, झर्म्मती झर्म्मन्ती। भर्त्सस्तर्ज्जनम्। इति दुर्गादासः॥

झर्झरः, पुं, (झर्झ इत्यव्यक्तशब्दं रातीति। रा+कः। यद्वा, झर्झायते शब्दायते इति। झर्झ+बहुलवचनात् अरः।) वाद्यविशेषः। इत्यमरः। १।७।८॥ चर्म्मपुटाच्छादितकाष्ठस्थानम्। इति तट्टीकासारसुन्दरी॥ करड इति ख्यातः।
"डिण्डिमो डेङ्करी प्रोक्तो झर्झरः पटहः स्मृतः॥"
इति भरतधृतवेकुण्ठः॥
तत्पर्य्यायः। झल्लकी २ झल्ली ३ झल्लरी ४ झर्झरी ५। इति शब्दरत्नावली॥ (यथा, हठयोगप्रदीपिकायाम्। ४। ८५।
"आदौ जलधिनीमूतभेरीझर्झरसम्भवः॥"
झर्झर्यते निन्द्यते इति। झर्झ भर्त्सने+अरः।) कलियुगम्। (झर्झरो झर्झरशब्द इवास्यास्येति। अच्।) नदभेदः। इति मेदिनी। रे, १५८। (हिरण्याक्षपुत्रविशेषः। यथा, हरिवंशे। ३। ७६।
"हिरण्याक्षसुताः पञ्च विद्वांसः सुमहाबलाः।
झर्झरः शकुनिश्चैव भूतसन्तापनस्तथा।
महानाभश्च विक्रान्तः कालनाभस्तथैव च॥")

झर्झरकः, पुं, (झर्झर+स्वार्थे कन्।) कलियुगम्। इति त्रिकाण्डशेषः॥

झर्झरा, स्त्री, (झर्झायते निन्द्यते इति। झर्झ भर्त्सने+बाहुलकात् अरः। ततष्टाप्।) वेश्या। इति त्रिकाण्डशेषः॥ (जलशब्दविशेषः। यथा, काशीखण्डे। २६। ६८। [वतो॥")
"झिण्टीशवन्द्या झाङ्कारकारिणी झर्झरा-

झर्झरी, स्त्री, (झर्झर+गौरादित्वात् ङीष्।) झर्झरवाद्यम्। इति शब्दरत्नावली॥ (यथा, हरिवंशे। २३७। २।
"गोमुखाडम्बराणाञ्च भेरीणां सुरजः सह।
झर्झरीडिण्डिमानाञ्च वश्रयन्त महास्वनाः॥")

झर्झरीकः, पुं, (झर्झतीति। झर्झ+"पर्षरीकादयश्च।" उणां। ४।२०। इति ईकन् प्रत्ययेन निपातनात् साधुः।) शूरौरभ्रः। इत्युणादिकोषः॥ देशः। चित्रम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

झलज्झला, स्त्री, (झलज्झल इत्यव्यक्तशब्दोऽस्यास्यति। अच्।) हस्तिकर्णास्फालनम्। इति त्रिकाण्डशेषः॥

झलरी, स्त्री, (झल्लरी। पृषोदरादित्वात् लकोपः।) डुडुकः। झर्झरवाद्यम्। बालचक्रम्। केशचक्रम्। इति मेदिनी। रे, १५६॥

झला, स्त्री, कन्या। आतपस्योर्म्मिः। इति मेदिनी। ने, २०॥

झल्लः, पुं, वर्णसङ्करजातिविशेषः। इति जटाधरः॥ स च क्षत्रियात् व्रात्यात् सवर्णायां जातः। (यथा, मनुः। १०।२२।
"झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च॥")
प्रहासकः। इति महाभारतम्॥ भाँड़ इति भाषा॥ (स्त्री, झर्झरवाद्यम्॥)

झल्लकं, क्ली, (झल्ल+स्वार्थे कन्।) कांस्यनिर्म्मितकरतालकम्। यथा, तिथ्यादितत्त्वे।
"शिवागारे झल्लकञ्च सर्व्वागारे च शङ्खकम्।
दुर्गागारे वंशिवाद्यं मधुरीञ्च न वादयेत्॥"

झल्लकण्ठः, पुं, (झल्लो झल्लकशब्द इव कण्ठः कण्ठस्वरो यस्य।) पारावतः। इति हारावली। ८७॥

झल्लरी, स्त्री, (झल्लं झल्लकशब्दं रातीति। रा+कः। स्त्रियां ङीष्।) डुडुकः। झर्झरवाद्यम्। (यथा, काशीखण्डे। २६। ६८।
"झल्लरीवाद्यझल्ला झलज्झालजलाप्लुता॥")
बालचक्रम्। बालड़ीति ख्यातम्। इति मेदिनी। रे, १५६॥ शुद्धम्। क्षेदः। इत्यजयपालः॥

झल्लिका, स्त्री, (झल्लीव कायतीति। के+कः। पृषोदरादित्वात् साधुः।) उड्डीनपटः। छोतः। इति मेदिनी। के, ६६॥ उड्डीनमलम्। इति शब्दरत्नावली॥

झल्ली, स्त्री, (झल्ल+ङीष्।) झर्झरवाद्यम्। इति शब्दरत्नावली॥

झल्लोलः, पुं, (झर्झ किप् तादृशः सन् लोलः। ततः पृषोदरादित्वात् साधुः।) तर्कुलासकः। इति हारावली। २१३॥ टेकुआरि वाँटुल इति भाषा॥

झष, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) आद्यक्षरी। झषति। षष्ठक्षरी चायमिति केचित्। झूषति। इति दुर्गादासः॥

झष, ञ यष्टे। पिधाने। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) ञ, झषति ज्ञपते वस्त्रं जनो यज्ञाति परिदधाति वेत्यर्थः। सप्तमस्वरादिरयमिति पूर्णचन्द्रविलोचनरामाः। अर्षति अर्षते। इति दुर्गादासः॥

झर्ष, क्ली, (झष यष्टे+अच्।) खिलम्। इत्यजयपालः॥

झषः, पुं, (न्यक्षते वध्यते भक्ष्यार्थं झष्यते यज्ञते इति वा। झष+"खनो च च।" ३।३।१२५। इति च।) मत्स्यः। इत्यमरः। १।१०।१॥ (यथा, भगवद्गीतायाम्। १०।३१।
"झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥")
मकरः। यथा, रामायणे। २।११४।४।
"लीनमीनझषग्राहां लग्नां गिरिनदीमिव॥")
तापः। वनम्। इति मेदिनी। षे, १२। मीनराशिः। यथा,—
"सार्द्धसप्तझषे मेषे वसुसार्द्धे घटे वृषे॥"
इति समयप्रदीपः॥

झषकेतनः, पुं, (झषो मकरो मीनो वा केतनं केतुरस्य।) कन्दर्पः। इति हेमायुधः॥

झषा, स्त्री, (झष+अच् ततष्टाप्।) नागबला। इत्यमरः। २।४।११७॥

झषाङ्कः, पुं, (झषः अङ्को यस्य।) अनिरुद्धः। इति हेमचन्द्रः॥ (कन्दर्पः। यथा, श्रीकण्ठचरिते। ११।२।
"यत्कला किल झषाङ्कपुलिन्द-
स्यन्दमानवडिशव्रतमाधात्॥")

झषाशनः, पुं, (झषान् मत्स्यान् अश्नातीति। अश ग भोजने+कर्त्तरि ल्युः।) शिशुमारः। इति त्रिकाण्डशेषः॥

भगोदरी, स्त्री, (भगो मनुष्य एव उदरं उत्पत्तिस्थानमस्याः । भगस्य उदरं उत्पत्तिस्थानतयास्त्यस्याः इति अर्शआदित्वात् अच् ।) योनिमाता । इति चिकित्साशेषः ॥

भाङ्कृतं, क्ली, (भाम् इत्यव्यक्तशब्दस्य कृतं करणं यत्र ।) चरणालङ्कारविशेषः । इति धरणिः ॥

भाटः, पुं, (भट + घञ् ।) निकुञ्जः । कान्तारः । व्रणादीनां मार्ज्जनम् । इति मेदिनी । टे, १६ ॥

भाटलः, पुं, (भाटं लातीति । ला + कः ।) घण्टापाटलिः । इत्यमरः । २ । ४ । ३६ ॥

भाटा, स्त्री, (भट् + णिच् + अच् ततष्टाप् च ।) भूम्यामलकी । इत्यमरः ॥ यूथीवृक्षः । इति शब्दचन्द्रिका ॥

भाटिका, स्त्री, (भाटा + स्वार्थे कन् । टापि अत इत्वञ्च ।) भूम्यामलकी । इति शब्दचन्द्रिका ॥

भामकं, क्ली, (भम् + ण्वुल् ।) दर्पणकः । इति हारावली । २१४ ॥ भामा इति भाषा ॥

भामरः, पुं, (भामं रातीति । रा + कः ।) तर्कुग्राहः । इतिशब्दरत्नावली ॥ टेकुयार ग्राहु इति भाषा ॥

भार्भरः, पुं क्ली, (भर्भरवादनं शिल्पमस्य । "मड्डुकभर्भरादन्यतरस्याम् ।" ४ । ४ । ५६ । इति अण् ।) भार्भरिकः । भर्भरवाद्यकर्त्ता । इति व्याकरणम् ॥

भालिः, स्त्री, वह्ननविशेषः । भारि इति ख्याता । यथा, भावप्रकाशस्य पूर्व्वखण्डे २ भागे ।

"आम्रमागधजं पिष्टं राजिकालवणान्वितम् ।
भृष्टं छिन्नयुतं पूतं चोलितं भालिरुच्यते ॥
भालिर्हरति जिह्वायाः कण्ठस्थं कण्ठशोधिनी ।
मन्दं मन्दं निपीता सा रोचनी वह्निबोधिनी ॥"

(भारिः भालिः इति पाठोऽपि कुत्रचित् दृश्यते ॥)

भावुः, पुं, (भा इति ज्ञात्वा वाति वायुरत्र । वा + डुः ।) वृक्षविशेषः । इति शब्दरत्नावली ॥ भाउ इति भाषा ॥

भावुकः, पुं, (भावुरेव । स्वार्थे कन् ।) वृक्षविशेषः । भाउ इति भाषा । तत्पर्य्यायः । पिचुलः २ भावुः ३ भादुः ४ । इति शब्दरत्नावली ॥

भिङ्गाकं, क्ली, (भिङ्गि + आकन् । पृषोदरादित्वात् साधुः ।) फलविशेषः । भिङ्गा इति भाषा । अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । श्लेष्मवातमन्दाग्निकारित्वञ्च । इति राजवल्लभः ॥

भिङ्गिनी, स्त्री, (भिङ्गि + इनिः । पृषोदरात् साधुः । ङीप् च ।) भिङ्गिनीवृक्षः । इति भावप्रकाशः ॥ उल्का । इति शब्दरत्नावली ॥

भिङ्गी, स्त्री, (भिङ्गि + अच् ङीष् । पृषोदरात् साधुः ।) भिङ्गिनीवृक्षः । इति भावप्रकाशः ॥

भिञ्जिमः, पुं, (भिम् इत्यव्यक्तशब्दं जित्वा भ्रमति अस्ति वृक्षादौ दृश्यतीत्यर्थः । (भ्रम भये + अच् । पृषोदरादित्वात् साधुः ।) दावाग्निः । इति हारावली ॥ २६८ ॥

भिञ्जिरिटा, स्त्री, क्षुपविशेषः । भिञ्जिरीटा । इति भाषा । तत्पर्य्यायः । सुवहा २ पीतपुष्पा ३ भिञ्जिरा ४ रोमाश्रयफला ५ वृत्ता ६ । अस्या गुणाः । कटुत्वम् । शीतत्वम् । कषायत्वम् । रक्तातिसारनाशित्वम् । दृष्यत्वम् । सन्तर्पणत्वम् । वल्यत्वम् । मस्तिष्कौष्ण्यवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥

भिञ्जी, स्त्री, (भिञ्जा इत्यव्यक्तशब्दोऽस्यस्याः । अच् ततो ङीष् च ।) भिञ्जी । यथा,—

"भिञ्जीवाव्यक्तमधुरा कूजन्ती मधुराकृतिः ।"

इत्यागमः ॥

भिरण्टी, स्त्री, (भिरिमिति ज्ञात्वा रटतीति । रट् + अच् । ङीष् च पृषोदरात् साधुः ।) पुष्पवृक्षविशेषः । झाँटी इति भाषा । तत्पर्य्यायः । सैरीयकः २ इत्यमरः । २ । ४ । ७५ ॥ कण्टकुरण्टः ३ सैरेयकः ४ भिरिण्टिका ५ । इति राजनिर्घण्टः ॥ नीलभिरण्टायाः पर्य्यायः । वाणा १ दासी २ अर्ज्जगलः ३ । इत्यमरः । २ । ४ । ७४ ॥ वाणः ४ आर्ज्जगलः ५ इति तट्टीका ॥ सहचरः ६ नीलकुरण्टकः ७ । इति रत्नमाला ॥ अरुणभिरण्टायाः पर्य्यायः । कुरवकः १ । इत्यमरः ॥ पीतभिरण्टायाः पर्य्यायः । कुरण्टकः १ सहचरी २ । इत्यमरः ॥ सहचरः ३ सहाचरः ४ । इति तट्टीका ॥ वीरः ५ पीतपुष्पः ६ दासी ७ कुरण्टकः ८ । इति रत्नमाला ॥ अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । दन्तामयव्रणवातकफशोफकासत्वग्दोषनाशित्वञ्च । कुन्दरत्नम् । इति राजनिर्घण्टः ॥

भिरिका, स्त्री, (भिरीति अव्यक्तशब्देन कायति शब्दायते इति । कै + कः टाप् च ।) भिञ्जी । इति शब्दरत्नावली ॥

भिरी, स्त्री, (भिर् इत्यव्यक्तशब्दो अस्यस्याः । अच् ङीष् ।) भिञ्जी । इति शब्दरत्नावली ॥

भिल्लिः, स्त्री, (भिर् इत्यव्यक्तशब्देन लिशतीति । लिश् + डिः । रस्य लः ।) वाद्यविशेषः । यथा. गूढार्थदीपिकायाम ।

"घण्टाशङ्खकथा भेरीन्दङ्गौ भिल्लिरेव च ।
पञ्चानां शब्दते वाद्यं देवताराधनेषु च ।"

भिल्लिका स्त्री, (भिर् इत्यव्यक्तशब्दं लिशतीति । लिश् + डिः रस्य लत्वे साधुः । ततः स्वार्थे कन् ।) भिञ्जी । (यथा, रामायणे । २।६६।११।

"भिल्लिकाविरुतैर्घोरैः रुदतीव समन्ततः ।")

आतपस्थरुचिः । विलेपनमलम् । इति हेमचन्द्रः ॥ भिल्लिकारावः । उङ्कारवस्वरुचिः । इति शब्दरत्नावली ॥ (उङ्कारवस्वम् । भिरण्टी । इति मेदिनी । के, ६६ ।)

भिल्ली, स्त्री, (भिल्लि + ऋदिकारादिति वा ङीष् ।) कीटविशेषः । झिँझिणोका इति भाषा । तत्पर्य्यायः । भिल्लीकाः २ भिल्लिकाः ३ भिरिकाः ४ झीरुका ५ भिरी ६ चीलिका ७ चीलिका ८ चिल्ली ९ झङ्कारी १० चीलका ११ । इति शब्दरत्नावली ॥ चीरी १२ । इत्यमरः । २ । ५ । २८ ॥ चीरका १३ । इति तट्टीका ॥ (यथा, भागवते, ७ । १२ । ५

"अदृश्यभिल्लीखनकर्णशूल-
उलूकवाग्भिर्व्यथितान्तरात्मा ॥")

आतपरुचिः । वर्त्ती । उङ्कर्णनांशुकम् । इति मेदिनी ॥ खालीलयदग्धान्नम् । इत्यजयपालः ॥

भिल्लीकण्ठः, पुं, (भिल्लीवत् कण्ठः कण्ठशब्दोऽस्य ।) शृङ्गकपोतः । इति चिकित्साशेषः ॥

भिल्लीका, स्त्री, (भिल्ली + संज्ञायां कन् ततष्टाप् ।) भिल्लिका । इति हेमचन्द्रः ॥

भीरुका, स्त्री, (भिर इति ज्ञात्वायत्तं रौतीति । रु + शब्दे बाहुलकात् कक् टाप् च ।) भिञ्जी । इत्यमरः । २ । ५ । २८ ॥

भुङ्, ड गत्याम् । (भ्वां-आत्मं-सकं-अनिट् ।) भुड-स्थाने भुड इत्यपि केचित् । ड, भवते । इति दुर्गादासः ॥

भुण्टः, पुं, (भट् रुणत्ति + घञि पृषोदरात् साधुः ।) स्तम्बः । अग्रकाण्डवृक्षः । इति शब्दचन्द्रिका ॥

भुमरिः, स्त्री, रागिणीविशेषः । यथा,—

"प्रायः शृङ्गारबहुला माध्वीकमधुरा लघुः ।
एकैव भुमरिर्लोके वर्णादिनियमोज्झिता ॥
अतो लक्षणमेतस्या नोदाहारि विशेषकम् ।
इदं हि ग्राहकं सर्व्वं प्रसिद्धं नृपरञ्जनम् ॥"

इति सङ्गीतदामोदरः ॥

भूजिः, पुं, क्रमुकभेदः । स्त्री, दुष्टदेवस्मृतिः । इति मेदिनी । जे, १२ ॥

भू, ष य ष्याने । गतवृद्धिभाव इति यावत् । (दिवां-परं-अकं-अनिट् ।) इति कविकल्पद्रुमः ॥ ष, भरा । य, भौर्य्यति । इति दुर्गादासः ॥

भोड्रः, पुं, गुवाकवृक्षः । इति भूरिप्रयोगः ॥

भ्रुङ्, ड गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ॥)

म

म, मकारः । स च अङ्गनदग्रमवर्ज्जः चवर्गपञ्चमवर्णश्च । (असौ तु अर्द्धमात्राकालेनोच्चार्य्यः ।) अस्योच्चारणस्थानं तालु । इति आकरग्रन्थम् ॥ ● ॥ अस्योत्पत्तिर्यथा,—

"विसर्गलाघवः सोष्मा यं चवर्गश्च यत्तथा ॥"

इति प्रपञ्चसारः ॥ ● ॥

(पाणिनिमते तु अस्योत्पत्तिस्थानं नासिकान्वितताल्वौ । अस्योच्चारणे जिह्वामध्यं तालुमध्यस्थ सम्पृक्तः आभ्यन्तरप्रयत्नः । संवारनादघोषा अल्पप्राणश्च बाह्यप्रयत्नाः । माहेश्वरसूत्रेऽस्य वामभ्रूलाङ्गूल्यर्थे व्याख्यक्रिया स्यात् । वङ्गीयवर्णमालायां अस्य लक्षणप्रकारो यथा,

"कुण्डलीरूपमास्याय दक्षतो वामतस्ततः ।
ऋजुधाधोगता माया वामतः कुञ्चिता पुनः ॥
तिष्ठन्ति तासु निलासु सर्व्वेश्वरवरूथाः सदा ।
कुण्डलीद्वयरूपा तु या माया मध्यतः स्थिता ॥
सप्तशक्तिस्वरूपा सा ध्यानमस्य प्रचक्षते ॥ ● ॥
चतुर्भुजां घूम्रवर्णां ज्वलत्खरविभूषिताम् ।
नागालङ्कारसंयुक्तां जटासुकुटराजिताम् ॥

ईषद्धास्यसुखीं नित्यां वरदां भक्तवत्सलाम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥ * ॥

अस्य स्वरूपं यथा,कामधेनुतन्त्रे।
"सदा ईश्वरसंयुक्तं णकारं शृणु सुन्दरि!।
रक्तविद्युल्लताकारं या स्वयं परकुण्डली॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा॥"
तस्य २२ द्वाविंशतिर्नामानि यथा,—
"णकारो बोधनी विश्वा कुण्डली मखदो वियत्।
कौमारी नागविज्ञानी सव्याङ्गुलनखो वकः॥
गुर्व्वीगुरुर्चिता बुद्धिः स्वर्गात्मा घर्घरध्वनिः।
धर्मैकपादः सुमुखो विरजा चन्द्रनेश्वरी॥
मनः पुण्यधन्या च रागात्मा च वराधिपी॥"
इति नागातन्त्रग्रन्थम्॥

णः, पुं, गायनः। घर्घरध्वनिः। इत्येकाक्षरकोषः॥ बलीवर्दः। शुक्रः। वामभृतिः। इति मेदिनी। णे, १॥ (गणपाठे धातोरुभयपदत्वविज्ञापकोऽनुबन्धविशेषः। इति बोपदेवः॥)

णिः, पुं, प्रत्ययविशेषः। स प्रेरणार्थे भवति। तस्य इकारस्तिष्ठति। धातोरनुबन्धविशेषः। स वर्त्तमानस्थप्रत्ययबोधकः। इति बोपदेवस्वामी॥

णान्तः, पुं, (णिः प्रत्ययविशेषोऽन्ते यस्य।) णिप्रत्ययान्तः। यथा, "णिश्रन्थिग्रन्थिदम्भिस्वपिनमिमसिवसिहनिक्षिखादिभ्यो यक्" इत्यादि आत्मनेपदप्रकरणीयसूत्रम्॥ स च प्रत्ययः धातोः शब्दाच्च भवति। यथा, णिः प्रेरणे इति वेः क्त्वाख्याने णिरिति च मुग्धबोधव्याकरणम्॥ सुग्धबोधव्याकरणस्य परिच्छेदविशेषः। यथा, इति णान्तपादः॥

ट

ट, टकारः। स वक्त्रनेकादशवर्णः। टवर्गप्रथमवर्णश्च। अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम्॥ (अस्योच्चारणे मूर्द्धस्थानेन जिह्वाग्रस्थस्य स्पर्शः आभ्यन्तरप्रयत्नः। माहत्काल्यासेऽस्य दक्षिणस्फिचि न्यासत्वम्। वक्षीयवर्णमालायाम्) तस्य लेखनप्रकारो यथा,—
"ऊर्द्धाधःक्रमतो रेखा कुण्डलीरूपतस्त्रयः।
तिष्ठन्ति तासु नित्यासु कुवेरयमवायवः॥
मात्रा कोणगता चोर्द्धा तत ऊर्द्धगता तु सा।
या नित्या परमा शक्तिश्चतुर्व्वर्गप्रदायिनी॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व वरवर्णिनि!।
मालतीपुष्पवर्णाभां पूर्णचन्द्रनिभेक्षणाम्॥
दशबाहुसमायुक्तां सर्व्वालङ्कारसंयुताम्।
परमोक्षप्रदां नित्यां सदा क्षीरसुखीं पराम्॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥ * ॥

अस्य स्वरूपं यथा,—
"टकारं चञ्चलापाङ्गि! स्वयं परमकुण्डली।
कोटिविद्युल्लताकारं पञ्चदेवमयं सदा॥
पञ्चप्राणयुतं वर्णं गुणत्रयसमन्वितम्।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा॥"
इति कामधेनुतन्त्रम्॥

तस्य २७ सप्तविंशतिनामानि यथा,—
"टङ्कारः कपाली च सोमवाः खेचरी ध्वनिः।
सुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नवः॥
दक्षाङ्गार्द्धचन्द्रश्च जरा भूतिः पुनर्भवः।
बृहस्पतिर्धनुश्चित्रा प्रमोदा विमला कटिः॥
राजा गिरिर्मेहाघशुद्धात्मा सुसुखो मरुत्॥"
इति गणातन्त्रग्रन्थम्॥

टं, क्ली, (टक्+डः।) करङ्कः। इति विश्वः॥

टः, पुं, (टल्+डः।) वामनः। पादः। निखनः। इति मेदिनी। टे, १॥

टक, इ क बन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इ क, टङ्कयति। इति दुर्गादासः॥

टङ्कदेशीयः, पुं, (टङ्कदेशे भव इति छः।) वास्तूकशाकः। इति त्रिकाण्डशेषः॥

टङ्गरः, पुं, (टः टङ्कणः क्षारविशेषः गर इव। तीव्रगुणत्वात्तथात्वम्।) टङ्कणक्षारः। हेलाविभ्रमगोचरः। केकराक्षे, त्रि। इति मेदिनी। रे, १६०॥

टङ्कः, पुं, (टकि+घञ्।) कोपः। कोषः। असिः। शावदारणः। इति मेदिनी। के, २४॥ (यथा, अनर्घराघवे। १। २२।
"यः चन्द्रदेहं परितस्य टङ्के-
स्तोमैर्मयैर्ब्रह्मसुचक्रकार॥")
परिमाणविशेषः। स तु चतुर्म्भायकरूपश्चतुर्विंशतिरक्तिकारूपो वा। भङ्गा। इति हेमचन्द्रः। ३। ५८३॥ दर्पः। इति हलायुधः॥

टङ्कः, पुं क्ली, (टकि+घञ् अच् वा।) नीलकपित्थः। (यथा, सुश्रुते सूत्रस्थाने ४६।
"शीतं कषायं मधुरं टङ्कं मारुतकृद्गुरु॥")
खनित्रम्। टङ्कणः। इति मेदिनी। के, २४॥ दर्पः। इति शब्दरत्नावली॥

टङ्ककः, पुं, (टङ्कति बध्नाति मनः खेदेनेति। टकि+खुल्। यद्वा, टङ्कते रुध्यतेऽनेन मन इति। घञ्। ततः संज्ञायां कन्।) रजतमुद्रा। इति रूप्याध्यक्षशब्दे अमरटीकासारसुन्दरी भरतश्च॥ टाका इति भाषा॥

टङ्ककपतिः, पुं, (टङ्कस्य पतिः रक्षकः।) रूप्याध्यक्षः। टङ्कशालानियुक्तः। इत्यमरटीकासारसुन्दरी। टाकशालेर अधक्ष इति भाषा॥

टङ्कशाला, स्त्री, (टङ्कस्य शाला।) रजतमुद्रागृहम्। इत्यमरटीकासारसुन्दरी॥ टाकशाल इति भाषा॥

टङ्कटीकः, पुं, शिवः। इति त्रिकाण्डशेषः॥

टङ्कणः, पुं, (टङ्कि बन्धे+ल्युः। पृषोदरात् गत्वे साधुः।) क्षारविशेषः। सोहागा इति भाषा। (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"विरूक्षणोऽनिलकरः क्लेश्मघ्नः पित्तदूषणः।
अग्निदीप्तिकरस्तीक्ष्णश्टङ्कणः क्षार उच्यते॥")

टङ्कणकः, पुं, (टङ्कं दर्पं कोपं वा आनयति उद्दीपयतीति। अन्+णिच्+खुल्।) ब्रह्मदारुवृक्षः। इति शब्दचन्द्रिका॥

टङ्कारः, पुं, (टल् वैक्लवे+बाहुलकात् घञ्। टं वैक्लवं चित्तस्य विक्षतिं करोतीति। कृ+कर्म्मण्यण्।) विस्मयः। प्रसिद्धः। शिञ्जितध्वनिः। इति मेदिनी। रे, १६०॥ (यथा, काश्मीरखण्डे। २६। ६६।
"टीकिताग्रेषपाताला टङ्किकैलोऽद्रिपाटवे।
टङ्कारशब्दतृप्तक्षोणा टीकनीया महाभटा॥"
कृ+घञ्। कारः टं इति अव्यक्तशब्दस्य कारः करणं यत्र। ध्वनिमात्रे। यथा, भागवते। ३। १७। ६।
"अन्तर्गतेषु सुखतो वमन्तो वह्निमुल्बणम्।
शृगालोलूकटङ्कारैः प्रणेदुरशिवाः शिवाः॥")

टङ्कारी, स्त्री, (टङ्कं ऋच्छतीति। ऋ+"कर्म्मण्यण्।" ३। २। १। ङीष्। ततो गौरादित्वात् ङीष्।) क्षुपविशेषः। टेंकारी इति भाषा। अस्य गुणाः। पातश्लेष्मशोषोदरव्रणानाशित्वम्। तिक्तत्वम्। दीपनत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥

टङ्गः, पुं क्ली, (टकि+अच्।) खनित्रम्। खड्गभेदः। भङ्गा। इति मेदिनी। गे, ७॥

टङ्गः, पुं, (टङ्ग+पृषोदरात् साधुः।) नक्रः। इति शब्दचन्द्रिका॥ सोहागा इति भाषा। चतुर्म्भायकपरिमाणम्। इति वैद्यकपरिभाषा॥

टङ्गणः, पुं क्ली, (टङ्गण+पृषोदरात् साधुः।) टङ्कणः। सोहागा इति भाषा। अस्य गुणाः। श्लेष्मवायुनाशित्वम्। तीक्ष्णत्वम्। उष्णत्वम्। अग्निवर्द्धकत्वम्। विरूक्षणत्वम्। भेदकत्वम्। बलवर्द्धनत्वञ्च। इति राजवल्लभः॥

टङ्किणी स्त्री, (टकि बन्धे+णिनिः। ततः पृषोदरात् गत्वे ङीषि च साधुः।) वृक्षविशेषः। इति शब्दचन्द्रिका॥ आकनादि इति भाषा॥

टट्टनी, स्त्री, (टट्ट इत्यव्यक्तशब्दं नयतीति। नी+क्विप्।) ज्येष्ठी। इति त्रिकाण्डशेषः॥

टट्टरी, स्त्री, (टट्टमित्यव्यक्तशब्दं रातीति। रा+कस्ततो ङीष्।) दृषावादः। जम्बावाद्यम्। पटहवाद्यम्। इति मेदिनी। रे, १५६॥

टट्टुरः, पुं, (टट्टु इत्यव्यक्तशब्दं रातीति। रा+कः।) भेरीशब्दः। इति हेमचन्द्रः॥

टल, ञ विलवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ञ, टालः टलः। विलवो विश्लेषीभावः। इति दुर्गादासः॥

टलनं, क्ली, (टल+भावे ल्युट्।) विलवः। टला इति भाषा॥

टा, स्त्री, (टलति प्रलये भूकम्पादौ वा। टल+ड टाप् च।) पृथिवी। इत्येकाक्षरकोषः॥

टाङ्करः, पुं, (टङ्कस्येदं टाङ्कम्। टङ्क+अण्। टाङ्कं रातीति। रा+कः।) नागवीटः। इति त्रिकाण्डशेषः॥

टारः, पुं, (टां पृथ्वीं ऋच्छतीति। ऋ+अण्।) तुरङ्गः। तुरङ्गः। इति हेमचन्द्रः॥

टिक, ऋ ड गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सर्वं-सेट्।) ऋ, अटिटिकत्। ड, टेकते। इति दुर्गादासः॥

टिट्टिभकः, पुं, (टिटीत्यव्यक्तशब्दं भजतीति। भज+ड्वुः। ततः स्वार्थे कन्।) टिट्टिभपक्षी। इत्यमरटीका॥

टिट्टिभः, पुं, (टिट्टीत्यव्यक्तशब्दं भजतीति। भज+ड्वुः।) पक्षिविशेषः। टौठि इति भाषा। तत्पर्य्यायः। टौटिभकः २। इति शब्दरत्नावली॥ टिट्टिभकः ३। इत्यमरः। २।५।३५॥ टिट्टिभकः ४। इति तट्टीका॥ (यथा, मनुः। ५। ११।

"अनिर्दशां चैकशफाटिट्टिभीञ्च विवर्जयेत्॥")

ऋषोदग्रमन्वन्तरीयेन्द्रशत्रुदानवविशेषः। यथा,

"इन्द्रो दिवस्पतिः शत्रुटिट्टिभो नाम दानवः।
मायूरेण च रूपेण घातयिष्यति माधवः॥"

इति गारुडे ८७ अध्यायः॥

(ध्वजयमभारश्चकदाशवानामन्यतमः। अग्नौ हि मर्त्यैरमैर्विवर्जितैः। यथा, महाभारते। २।६।१५।

"टिट्टिभो विटभूतश्च संहादश्चेन्द्रतापनः॥"

रघुपक्षान्वाह।

"सर्वे वयवराः शूराः सर्वे विगतसंशयाः॥")

टिट्टिभकः, पुं, (टिट्टिभ+स्वार्थे कन्।) टिट्टिभपक्षी। इत्यमरः। २।५।३५॥ [प्रकाशः॥

टिण्टिडिका, स्त्री, अम्बुशिरोरिका। इति भावप्रकाशः॥

टिण्डिशः, पुं, वृत्तविशेषः। डिण्डिशा। इति डेँड़शी इति च भाषा। तत्पर्य्यायः। रोमशफलः २ तिन्दिशः ३ सुनिषण्णकः ४। इति राजनिर्घण्टः॥ डिण्डिशः ५। अस्य गुणाः। रुचिकारित्वम्। भेदकत्वम्। पित्तश्लेष्मास्रशोषितापहत्वम्। सन्धानत्वम्। वातलत्वम्। रूक्षत्वम्। स्रंसनत्वञ्च। इति भावप्रकाशः॥

टिप, क तुदि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, टेपयति। तुदि प्रेरणे। इति दुर्गादासः।

टिप्पनी, स्त्री, (टेपयति व्याख्यायतेऽनया। टिप+करणे ल्युट् ङीप् च। पृषोदरादित्वात् पस्य द्वित्वे साधुः।) टीका। यथा,—

"श्रीमत्तज्ञानभं नत्वा लीलावत्याः सुटिप्पनी।
भवेद्येन सुबोधार्थं क्रियते यद्गुरोः श्रुतम्॥")

टीक, ऋ ड गत्याम्। इति कविकल्पद्रुमः। (भ्वां-आत्मं-सकं-सेट्।) ऋ, अटिटीकत्। ड, टीकते। इति दुर्गादासः॥

टीका, स्त्री, (टीक्यते गम्यते प्रविश्यते ज्ञायते वानया। टीक+घञर्थे कः। टाप् च।) विवरणग्रन्थः। इति लिङ्गादिसंग्रहे अमरः॥

टुण्टुकः, पुं, (श्लोनाकवृक्षः। इत्यमरः।२।४।५६॥ लाक्षाद्रिद्रुवृक्षः। इति शब्दचन्द्रिका। (टुण्टु इत्यव्यक्तशब्देन कायति शब्दायते इति। कै+कः।) पक्षिविशेषः। इति शब्दरत्नावली॥ टुण्टुनि इति भाषा। श्लोनाकप्रभेदः। इति राजनिर्घण्टः॥

टुण्टुकः, त्रि, नीचः। इति मेदिनी॥ क्रूरः। इति विश्वः॥

टुण्टुका, स्त्री, टङ्किकावृक्षः। इति शब्दचन्द्रिका॥

टुनाका, स्त्री, तालमूलीवृक्षः। इति शब्दचन्द्रिका॥

टेरक, त्रि, वक्रचक्षुः। टेरा इति भाषा। तत्पर्य्यायः। वलिरः २ केकरः ३ केदरः ४। इति शब्दरत्नावली॥

ट्वल, ञ विलवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वकारयुक्तः। ञ, ट्वालः ट्वलः। विलवो विश्लेषीभावः। इति दुर्गादासः॥

ठ

ठ, ठकारः। स यज्ञनदाद्यवर्गः टवर्गद्वितीयवर्णश्च। (अर्द्धमात्राकालेनोच्चार्य्योऽयं वर्णः।) अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम्॥ (अस्योच्चारणे जिह्वामध्येन मूर्द्धस्थानमस्पृशेत्। आभ्यन्तरप्रयत्नः। विवारश्वासघोषौ महाप्राणत्वञ्च बाह्यप्रयत्नाः। वर्णमालायाम्) तस्य लेखनप्रकारो यथा,—

"वामोर्द्धकुण्डलाकारो रेफाधिष्ठितदेवताः।
तिष्ठन्ति क्रमतो नित्यं चन्द्रस्थैर्य्यायवः प्रिये!॥
मात्राहीनस्तूर्द्धबिन्दुसकारः परमेश्वरि!॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!।
पूर्णचन्द्रप्रभां देवीं विकसत्पङ्कजेक्षणाम्॥
सुन्दरीं षोड़शभुजां धर्म्मकामार्थमोक्षदाम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

इति तन्त्रोद्धारतन्त्रम्॥ *॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।

"ठकारं चञ्चलापार्श्वे! कुण्डली मोक्षरूपिणी।
पीतविद्युल्लताकारं रक्षा त्रिगुणसंयुतम्॥
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा।
त्रिविन्दुसहितं वर्णं त्रिशक्तिसहितं सदा॥"

तस्य ३१ एकत्रिंशन्नामानि यथा—

"ठः मूर्त्तो मञ्जरी बीजः पाविनी जाह्नवी तथा।
वनजो नन्दनो जिह्वा सुनन्दो चूर्णकः सुधा॥
वर्त्तुलः कुण्डली वह्निरन्तकं चन्द्रमण्डलः।
दग्धजानूद्भवश्च देवभर्त्ता दृढव्रतिः॥
एकपादो विभूतिश्च जलाटं सर्व्वमित्रकः।
दग्धो नलिनी विष्णुर्मेहेशो ग्रामणीः शुभौ॥"

इति नाममालातन्त्रम्॥

ठः, पु, शिवः। महाध्वनिः। चन्द्रमण्डलः। इत्येकाक्षरकोषः॥ मण्डलः। शून्यम्। लोकगोचरः। इति मेदिनी। ठे, १॥

ठक्कुरः, पुं, देवता। ठाकुर इति ख्यातः। यथा,

"श्रीदामनामगोपालः श्रीमान् सुन्दरठक्कुरः॥"

इत्यनन्तसंहिता॥

ठठं } ठ, अनुकरणशब्दः। ठन् ठन् इति
टठठं } भाषा। यथा, महाभाष्टके। ६६।

"रामाभिषेके मदविह्वलायाः
कथाश्रुतौ हेमघटस्खलद्यशः।
सोपानमारुह्य चकार शब्दं
ठठं ठठं ठं ठठठ ठठं ठः॥"

ठेरः, त्रि, वृद्धः। यथा, जा ठेरं व हसती। इति काव्यप्रकाशे देशीभाषा॥

ड

ड, डकारः। स यञ्जनचयोदशवर्णः टवर्गतृतीयवर्णश्च। अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७।

"स्पृष्टैर्ड्ढेन्ना ऋटुरषा दग्धा ऋतुलसाः स्मृताः॥")

वर्णीयवर्णमालायामस्य लेखनप्रकारो यथा,

"ऊर्द्धाधःक्रमतो रेखा मध्ये त्वाकुञ्चिता तथा।
तत्पार्श्वायी भवानी च क्रमशस्तत्र संस्थिता॥
ब्रह्मरूपा तथा मात्रा महाशक्तिः प्रकीर्त्तिताः।
ध्यानमस्य प्रवक्ष्यामि शृणुष्वावहिता मम।
जवासिन्दूरसङ्काशां वराभयकरां पराम्॥
त्रिनेत्रां वरदां नित्यां परमोक्षप्रदायिनीम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

इति वर्णोद्धारतन्त्रम्॥ *॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।

"डकारं चञ्चलापार्श्वे! सदा त्रिगुणसंयुतम्
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा॥
त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा।
चतुर्ज्ञानमयं वर्णं आत्मादित्वसंयुतम्॥
पीतविद्युल्लताकारं डकारं प्रणमाम्यहम्॥"

तस्य २४ चतुर्विंशतिनामानि यथा,—

"डः क्षतिर्हारुको नन्दिरूपिणी योगिनी प्रियः।
कौमारी शूकरस्थाश्वक्रियो ब्रह्मो ध्वनिः॥

दुरूहो जटिली भीमा द्विजिह्वः पृथिवी सती।
कोरगिरिः क्षमा कान्तिर्नाभिः खाती च
लोचनम्॥"
इति नानार्थतत्त्वप्रकाशम्॥
(पद्मादौ अस्य प्रथमोपन्यासे फलं श्रीभा। यदुक्तं वृत्तरत्नाकरटीकायाम्।
"डः श्रीभां दो विश्रीभां भयञ्चमथ रः यस्तु
खं यस्तु युद्धम्॥")

डः, पुं, (डयते उड्डीयते भक्षार्थं हृदयाकाशे यः। डी+दाडृञ्कात् डः।) शिवः। (डीयते आकाशमार्गे नभोगुणत्वादिति। डी+डः।) शब्दः। त्रासः। इत्येकाक्षरकोषः॥ वाड़वाग्निः। इति मेदिनी। डे, १।

डङ्गरी, स्त्री, (डं अरोचकादिजनितत्रासं गिरति नाशयतीति। गॄ+अच्। निपातनात् समागमः। ततो ङीष्।) फलविशेषः। तत्पर्य्यायः। डाङ्गरी २ दीर्घेम्बारः ३ दङ्गरी ४ डङ्गारी ५ गामशुण्डी ६ रजदन्तफला ७। अस्या गुणाः। शीतलत्वम्। रुचिकारित्वम्। दाहपित्तास्रदोषार्शोनाशमूत्ररोधनाशित्वम्। तर्पणत्वम्। गौल्यत्वञ्च। इति राजनिर्घण्टः॥

डङ्गारी, स्त्री, (डङ्गरी पृषोदरादित्वादात्वम्।) डङ्गरीफलम्। इति राजनिर्घण्टः॥

डप, ङ क ड न संहतौ। इति कविकल्पद्रुमः॥ (चुरां-उभं-आत्मं च-सकं-सेट्।) मूर्द्धन्यवर्गद्वितीयादिः। ङ क ड, डम्भयते। न, डम्भयति डम्भयते। अयमात्मनेपदीत्यन्ये। संहतौ राशीकरणम्। इति दुर्गादासः॥

डप, क ड न संहतौ। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-उभं च-सकं सेट्।) मूर्द्धन्यवर्गद्वितीयादिः। क ड, डापयते। न, डापयति डापयते। पुनःपाठान्नेदुपधः। अयमात्मनेपदीत्यन्ये। संहतौ राशीकरणम्। इति दुर्गादासः॥

डभ, ङ क ड नोदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) मूर्द्धन्यवर्गद्वितीयादिः। ङ क, डम्भयति। नोदः प्रेरणम्। इति दुर्गादासः॥

डभ, ङ क ड न सङ्घे। इति कविकल्पद्रुमः॥ (चुरां-उभं-अकं-सेट्।) मूर्द्धन्यवर्गद्वितीयादिः। ङ क, डम्भयति डम्भयते। अयमात्मनेपदीति केचित्। सङ्घो राशीकरणम्। इति दुर्गादासः॥

डमः, पुं, (डं नीचयोनित्वाय भीतिं माति ददातीति। मा+कः।) वर्णसङ्करजातिविशेषः। डोम इति भाषा। सञ्चाकाङ्क्षां वेटात् जातः। इति ब्रह्मवैवर्त्तपुराणम्॥

डमरं, क्ली, (डं+मृ वधे अप्। मरं पलायनं धातूनामनेकार्थत्वात्। उन चासेन मरम्।) भीत्यापत्ज्ञायनम्। तत्पर्य्यायः। प्रदगालिका २ विद्रवः ३ डिम्भः ४। इति हारावली॥६६॥

डमरः, पुं, (डेन भयेन मरो मृतिर्विरम्यत्र।) परचक्रादिभयम्। अस्यकलहः। इत्यमरटीकायां स्वामी। तत्पर्य्यायः। डिम्भः २ विप्लवः ३। इत्यमरः। ३। २। १४॥ डिम्भः ४ विम्बः ५ डामरः ६। इति भरतः॥ (यथाह गर्गः।
"तल्लक्षणोऽस्त्रिकेतुः स तु रूक्षः क्षुद्भयावहः
प्रोक्तः।
स्निग्धस्ताडक् प्राप्यां ग्राम्याख्यो डमर-
मरकाय॥")

डमरः, पुं, (डमित्यव्यक्तशब्दं ऋच्छतीति। ऋ+"सृगृधृदृधृभ्यश्च।" उणां १। ३८। इति कु-प्रत्ययेन निपातनात् साधुः।) वाद्यभेदः। इत्यमरः। १। ७। ८॥ कपालियोगिवाद्यम्। इति भरतः॥ चौरमध्यो गुटिकाद्वयालम्बितः। इति सारसुन्दरी॥ (यथा, योगसारे २ परिच्छेदे।
"वादयन् डमरुं योगी यत्र कुत्राश्रमे स्थितः॥")
चमत्कारः। इति त्रिकाण्डशेषः॥

डयनं, क्ली, (डीयते आकाशमार्गे गम्यतेऽनेनेति। डी+करणे ल्युट्।) कर्णीरथः। (डी ङ नभोगतौ+भावे ल्युट्।) नभोगतिः। इति हेमचन्द्रः। ३। ३८४॥

डलकं, क्ली, (वंशादिनिर्म्मितपात्रम्। डाला इति भाषा। यथा,—
"त्रिशूलञ्च वटाधिकं डलकं वस्त्रसंयुतम्।
सभोज्यं सोपवीतञ्च सोपहारं मनोहरम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

डवित्थः, पुं, काष्ठमयन्दगः। यथा,—
"डित्थः काष्ठमयो हस्ती डवित्थस्त्वयो नगः॥"
इति सुपद्मव्याकरणे विभक्तिपादः॥
(द्रव्यवाचिसंज्ञाशब्दविशेषः। यथा साहित्यदर्पणे। "द्रव्यशब्दा एकयक्तिवाचिनो हरिहरडित्थडवित्थादयः॥")

डहुः, पुं, (दहति तापयति सर्व्वशरीरमिति। दह+सृगृधृदृधृभ्यादित्वात् कुप्रत्ययेन निपातनात् साधुः।) वृक्षविशेषः। डेहुया इति मादार इति च भाषा। तत्पर्य्यायः। अर्कपुष्पः २ लिकुचः ३। इत्यमरः। २। ४। ९०॥ अस्य गुणाः। गुरुत्वम्। विष्टम्भित्वम्। त्रिदोषश्लेष्मकृद्दृष्टिकारित्वञ्च। इति राजवल्लभः॥

डहुः, पुं, (डहुः। पृषोदरादित्वात् दीर्घः।) डहुः। इति शब्दरत्नावली॥

डा, स्त्री, (डीयते नभोमार्गे गच्छतीति। डी+अन्येष्वपीति डः स्त्रियां टाप्।) डाकिनी। इति मेदिनी। डे, १॥

डाकिनी, स्त्री, (डाय भयदानाय वक्रति कुटिलं व्रजतीति। वक्र वक्रगतौ+इनिः। ततो ङीप्।) कालीगणविशेषः। यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे।
"सार्द्धञ्च डाकिनीनाञ्च विकटानां त्रिकोटिभिः॥"
(डाकानां समूहः। "खलादिभ्य इनिर्वक्तव्यः।" ४। २। ५१। इत्यस्य वार्त्तिकोक्त्या इनिः। डाकानां समूहः। इति सिद्धान्तकौमुदी॥)

डाङ्गरी, स्त्री, (डङ्गरी पृषोदरादित्वादात्वम्।) डङ्गरीफलम्। इति राजनिर्घण्टः॥

डामरः, पुं, शिवोक्तशास्त्रविशेषः। (यथा, कालीखण्डे। २६। ७०।
"डमडुमरुहस्ता च डामरोक्तमहाडका॥"
"डामरो डामरकल्पो नवाक्षरदेवीमन्त्रस्य प्रतिपादको ग्रन्थो महाराष्ट्रे सुप्रसिद्धस्तन्त्रोक्तं प्रतिपादितं मन्त्रमयं महच्छरीरं यस्याः॥"
इति तट्टीकायां॥) स तु षड्विधः। तेषां नामानि श्लोकसंख्याश्च यथा। योगडामरः २३,५३३। शिवडामरः ११,००७। दुर्गाडामरः ११,५०३। सारस्वतडामरः ६,६०५। ब्रह्मडामरः ७,१०५। गन्धर्व्वडामरः ६०,०६०। इति वाराहीतन्त्रम्॥ डमरः। इत्यमरटीकायां भरतः॥ चमत्कारः। यथा। भूतानां डामरत्वमतत्कारोऽनेनेति भूतडामरशब्दनिर्व्वचने निबन्धकारः॥ (गर्व्वः। आटोपः। यथा, गीतगोविन्दे। १२। २२।
"मम रुचिरे चिकुरे कुरु मानद! मानसज-
ध्वजचामरे।
रतिगलिते ललिते कुसुमानि शिखण्ड-
शिखण्डकडामरे॥"
कोटचक्रविशेषः। यथा, समयाचारे
"अथातः संप्रवक्ष्यामि कोटचक्रमिहाद्भुतं॥"
इत्युपक्रम्य,—
"पञ्चमो गिरिकोटश्च षष्ठः कोटश्च डामरः॥"
इत्युक्तवान्॥
अस्य विशेषविवृतिः चक्रशब्दे द्रष्टव्या॥*॥
क्षेत्रपालविशेषः। यथा, प्रयोगसारे।
"भेदा एकोनपञ्चाशत् क्षेत्रपालस्य कीर्त्तिताः॥"
इत्युपक्रम्य,—
"टङ्कपाणिस्तथा चान्यस्थानवन्धुश्च डामरः॥")

डालिमः, पुं, (दाडिम्बः पृषोदरादित्वात् साधुः।) दाडिमः। इत्यमरटीकायां भरतः॥

डाहलः, पुं, त्रिपुरदेशः। इति भूरिप्रयोगः॥

डाहुकः, पुं, दात्यूहपक्षी। इति जटाधरः॥

डिङ्गरः, पुं, डङ्गरः। क्षेपः। खलः। धूर्त्तः। सेवकः। इति शब्दरत्नावली॥

डिण्डिमः, पुं, (डिण्डीति शब्दं मातीति। मा+कः।) वाद्यप्रभेदः। इत्यमरः। १। ७। ८॥ डेङ्गरीति ख्यातः। इति भरतः॥ माहेश्वरडण्डीति ख्यातः। इति सारसुन्दरी॥ (यथा, महाभारते। ७। १६३। ४४।
"भेरीशाभ्यहनन् हृष्टा डिण्डिमांश्च सहस्रशः॥"
डिण्डिम इव आकृतिरस्यस्येति। अर्श आदित्वादच्।) क्षुद्रपाकफलः। इति शब्दचन्द्रिका॥ मानी आमला इति भाषा॥

डिण्डिरः, पुं, (डिण्डिरः पृषोदरादित्वात् ह्रस्वः।) समुद्रफेनः। इति हेमचन्द्रः। ३। १४३॥

डिण्डिरमोदकं, क्ली, (मोदयतीति। मुद्+ण्वुल्। डिण्डिर इव मोदकम्।) शुक्लनम्। इति राजनिर्घण्टः॥

डिण्डिशः, पुं, टिण्डिशः। टेंड़श् इति भाषा। (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमभागे।

"डिडिम्भो रोमशपक्षी सुनिर्लिमित इत्यपि। डिडिम्भो रविशङ्खेदी पित्तश्लेष्मापहः स्मृतः। सुशीतो वातलो रूक्षो मूत्रलक्षाश्मरीहरः॥")

डित्थः, पुं, (काष्ठमयहस्ती। यथा, सुपद्मव्याकरणे विभक्तिपादे।

"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो नरः॥" विशेषलक्षणयुक्तपुरुषः। यथा,—

"श्यामरूपो युवा विद्वान् सुन्दरः प्रियदर्शनः। सर्व्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते॥"

इति कलापटीकायां दुर्गादासः॥

(द्रव्यवाचिसंज्ञाशब्दभेदः। यथा, साहित्यदर्पणे। "द्रव्यशब्दा एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः॥")

डिप, क्षेपे ड अ संहतौ। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-उभं च-सकं-सेट्।) मूर्द्धन्यवर्गलतीयादिः। क ड, डेपयते। अ, डेपयति डेपयते। पुनःपाठान्नेदुवन्धः। अयमात्मनेपदीत्यन्ये। संहतौ राशीकरणम्। इति दुर्गादासः॥

डिप, क्षेपे क ड अ संहतौ। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-उभं च सकं-सेट्।) मूर्द्धन्यवर्गलतीयादिः। क ड, डेपयते। अ, डेपयति डेपयते। पुनःपाठान्नेदुवन्धः। अयमात्मनेपदीत्यन्ये। संहतौ राशीकरणम्। इति दुर्गादासः॥

डिप, क्षिप्तौ क य इर गुदि। इति कविकल्पद्रुमः॥ (तुदां-चुरां-दिवां च-सकं-सेट्।) क्षि, डिपति अडिपीत्। क, डेपयति। य, डिप्यति। इर् अडिपत् अडेपीत्। तुदादयन्तर्गणस्यैव कुटादित्वमिति दिवादिपक्षे हुयः। दिवादिपक्षे पुषादित्वान्नित्यं ड इत्यन्ये। गुदि प्रेरणे। इति दुर्गादासः॥

डिप, क्षेपे क ओदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) मूर्द्धन्यवर्गलतीयादिः। क, डिमयति। ओदः प्रेरणम्। इति दुर्गादासः॥

डिभ, क्षेपे क अ सङ्घे। इति कविकल्पद्रुमः॥ (चुरां-उभं-सकं-सेट्।) क ड, डिम्भयति डिम्भयते। अयमात्मनेपदीति केचित्। सङ्घो राशीकरणम्। इति दुर्गादासः॥

डिम, हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) डिडिमः। सौत्रधातुरयम्। इति दुर्गादासः॥

डिमः, पुं, (नाटकस्य रूपकविशेषः। इति हेमचन्द्रः। २। १६८॥ (लक्षणादिकं यदुक्तं साहित्यदर्पणे। ६। २४६।

"मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः। उपरागेण च भूयिष्ठो डिमः स्यात्प्रतिवृत्तकः॥ अङ्गी रौद्ररसश्चात्र सर्व्वेऽङ्गानि रसाः पुनः। चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ॥ नायका देवगन्धर्व्वयक्षराक्षसभोगिनः। भूतप्रेतपिशाचाद्याः षोड्शात्यन्तसङ्गताः। वृत्तयः कौशिकीहीना निर्विमर्शाश्च सन्धयः। दीप्ताः स्युः षड्रसाः प्रायो हास्यशृङ्गारवर्জ্জिताः॥")

डिम्ब, क्लीं, (डिम्ब+घञ्।) भयम्। कलहम्। फुप्फुसः। इति हारावली। २४४॥ डमरः। इत्यमरः। ३। २। १४॥

डिम्बः, पुं, (डिबि भेदे+भावे घञ्।) भयध्वनिः। अरुम्। फुप्फुसः। क्षीहा। विप्लवः। इति मेदिनी। बे, ५॥ डिम्भः। इति द्विरूपकोषः॥

डिम्बाहवः, पुं, (डिम्बः नृपतिहीनत्वात् विप्लवमूल आहवः।) नृपतिरहितयुद्धम्। इति जटाधरः॥ (यथा, मनुः। ५। ६५।

"डिम्बाहवहतानाञ्च विद्युता पार्थिवेन च॥"

"डिम्बाहवो नृपरहितयुद्धं तत्र हतानाम्।" इति तट्टीकायां कुल्लूकभट्टः॥)

डिम्बिका, स्त्री, (डिम्बयति नायकसमीपे नोदयत्यात्मानमिति। डिम्ब+ण्वुल्। टाप् अत इत्वञ्च।) कासकी। जलविम्बः। ग्रीवाकृतः। इति शब्दरत्नावली।

डिम्भः, त्रि, (डिम्भयति संहतो भवतीति। डिम्भ+पचाद्यच्।) शिशुः। इत्यमरः। २। ५। ३८॥ (यथा, रसिकरञ्जने। १।

"शुभारम्भेऽदम्भे महितमतिडिम्भेङ्गितशतं। मखिस्तम्भे रम्भेवजसकुचकुम्भे परिचितम्॥") मूर्खः। इति मेदिनी। भे, ४॥ अस्य रूपान्तरं डिम्बः। इति द्विरूपकोषः॥

डिम्भकः, त्रि, (डिम्भ एव। डिम्भ+स्वार्थे कन्।) बालकः। इति शब्दरत्नावली॥ (खनामख्यातः ग्राख्यदेशाधिपतेर्ब्रह्मदत्तस्य पुत्रः। यथा, हरिवंशे भविष्यपर्व्वणि। ३२। १८।

"हंसो व्येष्ठो नृपसुतो डिम्भकोऽन्तरोऽभवत्॥" अस्य विशेषविवरणं तत्रैव विस्तरशो द्रष्टव्यम्॥)

डिम्भचक्रं, क्लीं, (डिम्भ इव चक्रम्।) नराणां शुभाशुभनिर्णायकचक्रविशेषः। यथा,—

"डिम्भचक्रे त्रयस्त्रेङ्गानि भानुभादित्रिमस्तके। मुखे त्रीणि हृयं स्कन्धे चैकैकं बाहुहस्तयोः॥ हृदि पञ्च नाभिगुह्ये चैकैकं षट् च जानुनोः। चरणाभ्यां तथैकैकं जन्मर्क्षपतनात् फलम्॥ ग्रीवर्क्षे क्षत्रलाभः स्यात् वक्त्रे मिष्टान्नभोजनम्। स्कन्धे धनी च बाहुभ्यां स्यानभ्रष्टो भवेन्नरः॥ पाणिभ्यां तस्करो लक्ष्मीर्हृदयाशुच नाभितः। गुह्ये कामो भगो जान्वोरल्पजीवी च पादयोः॥"

इति खरोदयः॥

डिम्भा, स्त्री, (डिम्भ+टाप्।) अतिशिशुः। इत्यमरः। २। ६। ४१॥

डी, ओ ड य गतौ। नभोगतौ। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं अकं च-सेट्।) ओ, डीनः। ड य, डीयते। इति दुर्गादासः॥

डी, ड नभोगतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ड, डयते पक्षी। अस्यापि निष्ठायां डीनः। इति कातन्त्राद्याः। धातुपारायणिकास्तु एमन्निषेधे ओदुपधत्वाद्धौ यङ्लुगादसादिमिवक्तव्यादृगुधे डयित इत्याहुः। गोयीचन्द्रोऽपि। डयितः डयितवान् इत्युदाहरत्। खमते तु डीत इत्येव। इति दुर्गादासः॥

डीनं, क्लीं, (डी+भावे क्तः।) पक्षिगतिः। इति जटाधरः॥ तद्भेदा यथा,—

"पक्षात् संपत्य निष्क्रम्य पक्षसम्पातमुच्यते। ऊर्द्धाधोगतिसम्बन्धः समुदीर्णं प्रचक्षते॥ संकल्प्य प्रक्षगमनमुच्यते व्यतिरिक्तकम्। षड्विप्लुतिरमी भेदाः पातानामिह दर्शिताः॥ महाडीनं विहायेषां पातानां त्रिविधा गतिः। गतं तत्र यथोद्दिष्टं आगतं पुनरागमः॥ प्रत्यावृत्तिः प्रतिगतिरिति षट् सद्भिः स्मृताः। तेषां निपाताः कथ्यन्ते प्रत्येकं पञ्चविंशतिः॥" तद्यथा। उच्चीनं ऊर्द्धगमनम् १ अवडीनं अधःपतनम् २ प्रडीनं पतनवेगवत्ता ३ डीनं पतनमात्रम् ४ निडीनं नीचैःपतनम् ५ संडीनं सम्यक्पतनम् ६ तिर्य्यग्डीनं तिर्य्यक्पतनम् ७ विडीनं विचित्रं पतनम् ८ परिडीनं सर्व्वतः पतनम् ९ पराडीनं पराङ्मुख्य गमनम् १० सुडीनं सुकुमारपातः ११ अभिडीनं आभिमुख्येन पुनः पुनः पतनम् १२ महाडीनं क्षुद्रपतनेन प्रत्यावृत्तिः १३ निडीनं भक्ष्यमाश्रयं वा पश्यतः पतनम् १४ अतिडीनं दीर्घपतनम् १५ अवडीनं अधःपतनम् १६ प्रडीनं अधःपतने वेगवत्ता १७ अवसंडीनं अधःपतने शोभनवत्ता १८ डीनडीनकं पतनं निर्विशेषं कुत्सितञ्च १९ संडीनोड्डीनं शोभनमूर्द्धगमनम् २० संडीनडीनं शोभनगगनमात्रम् २१ पुनर्डीनं तदेव सामान्यगमनम् २२ डीनावडीनकं तदेवाधः कुत्सितञ्च २३ सम्पातं बहुभिः सह गमनम् २४ समुदीर्णं परस्परस्पर्द्धया गमनम् २५ ततोऽन्यत् व्यतिरिक्तकं तस्मात् ऊर्द्धाक्षतादेत्यक्षेद्यतं पतनम् २६। एतेषु षड्विप्लुतिसंख्येषु पतनं एकं डीनसंज्ञकं निर्विशेषं पतनमात्रं सविशेषाणि पतनानि पञ्चविंशतिसंख्यानि तत्र तानि सविशेषाणि दर्शयन्नाह चतुर्भिर्विशेषकैर्विशिष्टानि इति शतं निर्विशेषैकमिति एकोत्तरं शतम्। तानि चत्वारि विशेषयानि यथा। गतं गमनमात्रम्। आगतं आगमनम्। प्रतिगतं गत्वैव पुनरागमनं आगत्यैव पुनर्गमनञ्च। इति महाभारते। ८। ४१ अः। ६॥

आगमशास्त्रविशेषः। यथा, सुश्रुतसंहितायाम्।

"डामरं डमरं डीनं श्रुतं कालीविलासकम्। सप्तकोटिमहातन्त्रा मम वक्त्राद्विनिर्गताः॥"

डीनडीनकं, क्लीं, (डी+भावे क्तः। ततः स्वार्थे कन्। डीनेन सह डीनकं निर्विशेषं कुत्सितं वा पतनम्।) पक्षिणां गतिक्रियाविशेषः। इति जटाधरः। अस्य विवरणं डीनशब्दे द्रष्टव्यम्॥

डीनावडीनं, क्लीं, (डीनेन सह अवडीनम्।) पक्षिगतिविशेषः। तस्य एकस्यां गतौ गत्यन्तरमिश्रणम्। अधःकृतसितगमनञ्च। इति महाभारते कर्णपर्व्वटीका॥

ढुण्डुः, पुं, (ढुमिति शब्दं कृत्वा ढयते गच्छतीति। डी+डुः।) डुण्डुभसर्पः। इति त्रिकाण्डशेषः॥

ढुण्डुभः, पुं, (ढुण्डुः सन् भातीति। ढुण्डु इत्यनुकरणशब्देन भाति वा। भा+कः।) सर्पविशेषः। ढोंड़ा इति भाषा। तत्पर्य्यायः। राजिलः २ इत्यमरः।१।८।५॥ डुण्डुभः ३। इति भरतः॥ नागभट् ४ डुण्डुः ५। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते।२।१२।२८।
"एकदा स वने घोरं डुण्डुभं जरसान्वितम्।
अपश्यद्दण्डमुद्यम्य हन्तुं तं समुपाययुः॥")

डुण्डुलः, पुं, (डुण्डुरिति शब्दं लातीति। ला+कः।) क्षुद्रपेचकः। तत्पर्य्यायः। क्षुद्रोलूकः२ शाकुनेयः ३ पिङ्गलः ४ दृष्टान्धयी ५ दृष्टद्रावी ६ विघ्नाशात्तः ७ भयङ्करः ८। इति राजनिर्घण्टः॥

डुलिः, स्त्री, (डुलि+पृषोदरादित्वात् साधुः।) डुलिः। कमठी। इत्यमरटीकायां रायमुकुटः॥

डुलिका, स्त्री, (डुलिरिव कायतीति। कै+कः। ततष्टाप्।) खञ्जनाकारपक्षिविशेषः। इति शब्दाधरः॥

डुली, स्त्री, (डुलिः+ङीष् वा।) चिल्लीशाकः। इति राजनिर्घण्टः॥

डोड़ी, स्त्री, क्षुपविशेषः। तत्पर्य्यायः। जीवन्ती २ शाकश्रेष्ठा ३ सुखासुका ४ बहुवल्ली ५ दीर्घपत्रा ६ ह्रस्वपत्रा ७ जीवनी ८। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। दीपनत्वम्। कफवातकण्डूकामयरक्तपित्तार्शिदाहनाशित्वम्। रक्तपित्तत्वम्। इति राजनिर्घण्टः॥

डोमः, पुं, स्वनामख्यातशूद्रजातिः। यथा,—
"चाण्डालश्चैव डोमश्च श्वानश्च तथा हरिः।
हलीरश्चैव भङ्गीरो भूयुण्डश्च त्रयाश्रमी॥
त्रयाणामी त्रिभङ्गधारी सभा एते यज्ञसिनि!।
भूत्वा प्रमादतः स्नात्वा गायत्र्यायुतं जपेत्॥"
इति मत्स्यसूक्ततन्त्रे ३६ पटलः॥

डोरं, क्ली, हस्तादिबन्धनसूत्रम्। यथा,—
"कोऽनन्त इत्युदीर्य्याथ हस्ते तत्करपल्लवम्।
हस्तादाकृष्य तद्डोरं त्रिप्रवात् पावकोपरि॥"
इति भविष्यपुराणे अनन्तव्रतकथा॥

डोरकं, क्ली, (डोर+स्वार्थे कन्।) डोरम्। यथा,
"चतुर्ग्रन्थियुक्तं कुङ्कुमाक्तं सुडोरकम्।
स्त्रियश्च पुरुषश्चैव बध्नीयात् वामदक्षिणे॥"
इति भविष्यपुराणे अनन्तव्रतकथा॥

डोरडी, स्त्री, (डोरमिव दृश्यते इति। डी+किप्।) दृष्टती। इति राजनिर्घण्टः॥

ढ

ढ, ढकारः। स च वर्गचतुर्थवर्णश्च। (अर्द्धमात्राकालेनोच्चार्य्यः।) अस्योच्चारस्थानं मूर्द्धा। इति व्याकरणम्। (पाणिनीयादिशिक्षायां अस्योच्चारणे जिह्वाग्रमध्यभागेन मूर्द्धः स्पर्शः आभ्यन्तरप्रयत्नः। संवारनादघोषा महाप्राणश्च बाह्यप्रयत्नाः। माहेन्द्रव्याकरणेऽस्य दन्तपादाङ्गुलीमूले व्यापक्रिया। वङ्गीयवर्णमालायाम्।) तस्य लेखनप्रकारो यथा,—
"ऊर्द्धाधःक्रमतो रेखा वामदक्षिणतो गता।
ततः सा कुण्डलीरूपा विष्णोर्ग्रन्थिरूपिणी॥
महाशक्तिमयी माता ध्यानमस्य प्रचक्षते।
रक्तोत्पलनिभां रम्यां रक्तपङ्कजलोचनाम्॥
अष्टादशभुजां भीमां महामोक्षप्रदायिनीम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥ * ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे।
"ढकारं परमाराध्यं या स्वयं कुण्डली परा।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा॥
सदा त्रिगुणसंयुक्तं आत्मादितत्त्वसंयुतम्।
रक्तविद्युल्लताकारं ढकारं प्रणमाम्यहम्॥"
तस्य २६ षड्विंशतिनामानि यथा,—
"ढो ढक्का निर्ऋतिः पूर्व्वो यज्ञेशादनदेश्वरः।
अर्द्धनारीश्वरस्तोयमीश्वरी त्रिग्रिखी नवः॥
दन्तपादाङ्गुलेर्मूलं सिद्धिदस्त्रा विनायकः।
प्रहासा त्रिवेरा ऋद्धिर्निर्गुणो निधनो ध्वनिः॥
विघ्नेशः पाणिनी लक्षधारिणी क्रोड़पुच्छकः।
एलापूरं लगाला च विशाखा श्रीमनोरतिः॥"
इति नानातन्त्रशास्त्रम्॥

ढः, पुं, (ढौकते उच्चैःशब्देन आहयोति अवबोधयतीति। ढौक गत्यावरणयोः+डः।) ढक्का। (यथा, तन्त्रे।
"ढो ढक्का निर्ऋतिः पूर्व्वो यज्ञेशादनदेश्वरः॥")
श्वा। श्लेष्मकूर्चम्। इति मेदिनी। ढे, १॥ निर्गुणः। ध्वनिः। इत्येकाक्षरकोषः॥

ढक्कः, पुं, देशविशेषः। इति भूरिप्रयोगः॥ ढाका इति भाषा॥

ढक्का, स्त्री, (ढक् इति शब्देन कायतीति। कै+कः टाप् च।) वाद्यविशेषः। ढाक इति भाषा। तत्पर्य्यायः। यज्ञपटहः २। इत्यमरः।१।७।६॥ विजयमर्दलः ३। इति शब्दरत्नावली॥ (यथा, अर्य्यासप्तशत्याम्।२४७।
"ढक्कामाहत्य मदं वितन्वते करिण इव चिरं पुरुषाः॥")

ढक्कारी, स्त्री, (ढक्कं जयढक्कावत् गभीरसिंहनादं करोति समराङ्गणे इति। कृ+अण् ङीप् च।) तारिणी। यथा,—
"ढक्कारवा च ढक्कारी ढक्कारवरवा ढक्का॥"
इति कुलसङ्केते ताराष्टसहस्रनामस्तोत्रम्॥

ढण्ढी, स्त्री, वाद्यविशेषः। यथा, रुद्रयामले अन्नपूर्णासहस्रनाम कथने।
"ढण्ढीवाद्यस्वरूपा च ढकाराक्षररूपिणी॥"

ढालं, क्ली, (ढौकते आहयोति शरीरं अनेन। ढौक+अप्। पृषोदरात् आलं लत्वे च साधुः।) फलकम्। ढालिपद्मजयकरीति अन्नदाकल्पीयसहस्रनामविवरणात्॥

ढाली [न्] त्रि, (ढालमस्त्यस्येति। इनिः।) ढालविशिष्टः। चर्म्मी। यथा,—
"ढालिपद्मजयकरी ढकारवर्णरूपिणी॥"
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम्॥

ढामरा, स्त्री, हंसी। इति धनञ्जयः॥

ढुण्ढ, अन्वेषणे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ढाढ्यन्तो दन्त्यनोपधः। ढयोगाच्मूर्द्धन्यः। तेन यगादौ तङ्लोपे ढुण्ढते इत्यादि। ढुण्ढति धनं लोकः। इति दुर्गादासः॥

ढुण्ढिः, पुं, (ढुण्ढतेऽसौ भक्तैरिति। ढुण्ढ अन्वेषणे+इन्।) गणेशः। तन्नामकरणं यथा,—
गणेशं प्रति शिववाक्यम्।
"अन्वेषणे ढुण्ढिरयं प्रथितोऽस्ति धातुः
सर्व्वार्थढुण्ढिततया भव ढुण्ढिनामा।
काशीप्रवेशमपि को लभतेऽत्र देही
तोषं विना तव विनायक! ढुण्ढिराज!॥"
तच्चाहात्म्यं यथा,—
"ढुण्ढे! प्रणम्य पुरतस्तव पादपद्मं
यो मां नमस्यति गुमानिह काशिवासी।
ततकर्णमूलमधिगम्य गुरादिशामि
ततकिञ्चिदत्र न पुनर्भवतास्ति येन॥"
"यः प्रत्यहं नमति ढुण्ढिविनायक! त्वां
काश्यां प्रगे प्रतिहताखिलविघ्नसङ्घः।
नो तस्य जातु जगतीतलवर्त्ति वस्तु
दुष्प्रापमत्र परत्र च किञ्च नापि॥"
"प्रथमं ढुण्ढिराजोऽसि मम दक्षिणतो मनाक्।
आढुण्ढ्य सर्व्वभक्तेभ्यः सर्व्वार्थान् संप्रयच्छसि॥"
तस्य याचाविधानं यथा,—
"माघशुक्लचतुर्थ्यान्तु नक्तं व्रतपरायणाः।
ये त्वां ढुण्ढेऽर्चयिष्यन्ति तेऽर्चाः स्युरसुरद्विषाम्॥
विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तापसीम्।
शुक्लां शुक्लतिलैर्मिश्रान् प्राश्नीयाल्लड्डुकान् व्रती॥
कार्य्या यात्रा प्रयत्नेन सेवसिद्धिमभीप्सुभिः।
तस्यां चतुर्थ्यां तत्प्रीत्यै ढुण्ढे! सर्व्वोपसर्गहृत्॥
तां यात्रां नाच यः कुर्य्यान्निवेद्य तिलसंहुकान्।
उपसर्गसहस्रेषु स हन्तव्यो! ममाज्ञया॥
होमं तिलाज्यद्रव्येण यः करिष्यति भक्तितः।
तस्यां चतुर्थ्यां मन्त्रज्ञस्तस्य मन्त्रः प्रसेत्स्यति॥"
इति काशीखण्डे। ५० अध्याये॥

ढौकः, पुं, (ढः ढक्का तदाकारं जातीति। जा+कः पृषोदरात् ढौले साधुः। दुल उत्क्षेपे अच्। पृषोदरात् साधु वा।) स्वनामख्यातवाद्यम्। यथा,—
"ढक्काढौलप्रिया सिद्धा ढौलवाद्यप्रमोदिनी।
ढौलरूपा ढौलधरा ढौलशब्दस्वरूपिणी॥"
इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम्॥

ढौक, ढ ढ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) चतुर्ह्यन्तरी। ढ, अढौकत्। ढ, ढौकते। इति दुर्गादासः॥ (आहतौ। मदनं ढौकते। इति कालिदासः॥

ण

ण, णकारः। स च व्यञ्जनपञ्चदशवर्णः। टवर्ग पञ्चमवर्णश्च ॥ (अर्द्धमात्राकालेनोच्चारणीयः।) अस्योच्चारणस्थानं मूर्द्धा। इति वाकरणम्॥ (शिक्षायान्त्वादिमते तु अस्योच्चारणे जिह्वामध्येन मूर्द्धः सार्द्धः नासिकायत्नप्रभेदश्च आभ्यन्तरप्रयत्नः। संवारनादघोषाः अल्पप्राणश्च बाह्यप्रयत्नाः। मालतीमाधवेऽस्य दन्तपादाङ्गुल्यये व्यासक्रिया॥ वङ्गीयवर्णमालायाम्।) तस्य लेखनप्रकारो यथा,—

"कुण्डलीत्रयगता रेखा मध्यतस्तत ऊर्द्धतः।
वामादधोगता सैव पुनरूर्द्धं गता प्रिये!॥
ब्रह्मेशविष्णुरूपा सा चतुर्व्वर्गफलप्रदा॥
ध्यानमस्य णकारस्य प्रवक्ष्यामि च तत् शृणु।
द्विभुजां वरदां रम्यां भक्ताभीष्टप्रदायिनीम्॥
राजीवलोचनां नित्यां धर्म्मकामार्थमोक्षदाम्।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

इति वर्णोद्धारतन्त्रम्॥ *॥

अस्य स्वरूपं यथा,—

"णकारं परमेशानि! या स्वयं परकुण्डली।
पीतविद्युल्लताकारं पञ्चदेवमयं सदा॥
पञ्चप्राणमयं देवि! सदा त्रिगुणसंयुतम्।
आत्मादितत्त्वसंयुक्तं महामोहप्रदायकम्॥"

इति कामधेनुतन्त्रम्॥

तस्य ५४ चतुर्विंशतिनामानि यथा,—

"णो निर्गुणं रतिर्ज्ञानं जगत्सः पक्षिवाहनः।
जया ब्रह्मो नरकजित् निष्कला योगिनीप्रियः॥
द्विसुखं कोटवी श्रोत्रं सप्तद्विर्बोधनी मता।
त्रिनेत्रो मानुषी श्रोमदष्टपादाङ्गुलेर्मुखः॥
माधवः ग्रन्थिनी वीरो नारायणश्च निर्णयः॥"

इति नानातन्त्रग्राह्यम्॥

णः, पुं, (णखति गच्छति जानात्यनेन इति। णख गतौ + ड:। पृषोदरादित्वात् णत्वम्।) ज्ञानम्। निश्चयः। इत्येकाक्षरकोषः। विष्णुदेवः। स रुद्रदेवताविशेषः। भूषणम्। गुणवर्जितः। पानीयनिलयः। इति मेदिनी। णे, १॥

णख, व्रजे। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) नखति। व्रजो गतिः। इति दुर्गादासः॥

णख, गतौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) प्रणखति। इति दुर्गादासः॥

णट, नृत्यहिंसयोः। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सकं च-सेट्।) प्रणटति। गोपदेशविधौ वर्ज्जनेऽपि अस्य परस्य चेह पाठः केषाञ्चिदनुरोधात्। अत्र नृत्यं साभिनयनर्त्तनम्। इति दुर्गादासः॥

णट, म नृतौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) म, प्रणटयति। नृतावितिं नृत्यतेरीणादिकिप्रत्यये रूपम्। अत्र मिकारानुबन्धनैवेहासिद्धे पूर्व्वं नृत्यगृह्यमभेदार्थम्। तेन पूर्व्वं नृत्यं साभिनयनर्त्तनम् इह तु नृत्तिरभिनयरहितनर्त्तनमिति। यथा पूर्व्वस्य। स्फटिककटकभूतिर्नाटयत्येव ग्रैलः। इति माघः। अस्य तु। नाट्येन केन नटयिष्यति दीर्घमायुरिति मुरारिः। इति दुर्गादासः॥

णद, ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) ध्वनिरत्रोक्तः। नदति घण्टा। इति दुर्गादासः॥

णद, क भाषि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, नादयति। इति दुर्गादासः॥

णभ, ह ड हिंसे। इति कविकल्पद्रुमः॥ (भ्वा-आत्मं-सकं-सेट्।) ह, अनभत्। ड, नभते। इति दुर्गादासः॥

णभ, थ ग हिंसे। इति कविकल्पद्रुमः॥ (दिवां-क्र्यां-च-परं-सकं-सेट्।) य, नभ्यति। ग नभ्नाति। इति दुर्गादासः॥

णम, औ शब्दे। नतौ। इति कविकल्पद्रुमः। (भ्वा-परं-अकं-नतौ सकं अकं च अनिट्।) औ, नम्ता। शब्दार्थो न भाषायाम्। नतिरिह नमस्कारो नम्रीभावश्च। नमति गुरुं लोकः। नमन्ति फलिनो वृक्षाः। अमन्तोऽप्यस्य त्वलङ्कलक्षेत्यादिना केवलस्य वृक्षविकल्पनात् सोपसर्गस्यैव नित्यं वृक्षः। नमयति नामयति प्रणमयति। वृक्षस्य अवनामितं वधिरकर्णेजापः कृतः। इत्यादौ अवनमनं अवनामः घञ् ततो अवनामं करोतीति णौ रूपम्। इति दुर्गादासः॥

णय, ड गतौ। रक्षे। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-सेट्।) ड, नयते। इति दुर्गादासः॥

णर्द, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) गोपदेशविधावस्य वर्ज्जनेऽपि इह पाठः केषाञ्चिदनुरोधात्। प्रणर्दति। इति दुर्गादासः॥

णल, ज वन्धे। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं सेट्।) ज, नालः गलः। नलति केशं लोकः बध्नाति इत्यर्थः। गन्धे इति केचित्। गन्धोऽदर्शनमिति गोविन्दभट्टः। इति दुर्गादासः॥

णश, ल य ऊ नाशे। इति कविकल्पद्रुमः॥ (दिवां-परं-अक-वेट्-स्वरड्वान्।) नाशो दर्शनाभावः। इति प्राचः। लुकायनमिति सर्व्वस्वः। ल, अनेशत् अनशत्। य, नश्यति नष्टस्त्रिरोभवति इत्यर्थः। ऊ, नशिष्यति नङ्क्षति। इति दुर्गादासः॥

णस, ड कृतौ। इति कविकल्पद्रुमः॥ (भ्वा-आत्मं-अकं-सकं च-सेट्।) कृतिरिह कुटिलीभावस्तत्करणञ्च। ड, नसते खलः कुटिलः स्यादित्यर्थः। नसते लतां वायुः कुटिलांकरोतीत्यर्थः। इति दुर्गादासः॥

णह, य ब औ बन्धे। इति कविकल्पद्रुमः॥ (दिवां-उभं-सकं-अनिट्।) य ब, नह्यति नह्यते। औ, अनद्ध। इति दुर्गादासः॥

णाथ, ऋ ड आशिषि। एवेशेऽर्थे। इति कविकल्पद्रुमः॥ (भ्वा-आत्मं-सकं-अकं च-सेट्।) गोपदेशविधौ वर्ज्जनेऽप्यस्य पाठः कस्य चिदनुरोधात्। ऋ, अननाथत्। ड, प्रणाथते। एव उपतापः। आशीरिहार्थस्याशंसनम्। ङित्त्वेऽपि अपथाशीर्गत्यनुकारे इति नियमादाभ्यामाशिषोऽन्यत्र परस्मैपदम्। नाथति ग्रन्थं बली उपतापयति इत्यर्थः। नाथते श्रियं लोकः आशंसत इत्यर्थः। नाथति धनी ईश्वरःस्यादित्यर्थः। नाथति भूपं भूमिं विप्रः प्रार्थयतीत्यर्थः। मार्गणेरथ तव प्रयोजनं नाथसे किमु न भूभृतः पतिमिति भारवौ। याचनमप्याशंसाविशेषः। आशिषि नित्यमात्मनेपदमन्यत्र विभाषेति केचित्। इति दुर्गादासः॥

णाध, ऋ ड नाथे। इति कविकल्पद्रुमः॥ (भ्वा-आत्मं-सकं-सेट्।) गोपदेशविधावस्य वर्ज्जनेऽपि इह पाठः कस्यचिदनुरोधात्। ऋ, अननाधत्। ड, नाधते नाथो दवाशीरैश्वर्य्यार्थनानि। इति दुर्गादासः॥

णास, ऋ ड ध्वाने। शब्द इति यावत्। इति कविकल्पद्रुमः॥ (भ्वा-आत्मं-अकं-सेट्।) ऋ, अननासत्। ड, नासते। इति दुर्गादासः॥

णिच, चुम्बने। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) निचति। इति दुर्गादासः॥

णिज, इल ड शुद्धौ। इति कविकल्पद्रुमः॥ (अदां-आत्मं-सकं सेट्-इदित्।) शुद्धिरिह शुद्धीकरणम्, इ, कर्म्मणि निञ्जाते। ल ड, प्रणिङ्क्ते। इच्छौ, यानां विप्राणां समूहः इति हलायुधः। इति दुर्गादासः॥

णिज, लि इर् ण औ पोषे। शुद्धौ। इति कविकल्पद्रुमः॥ (जुहो-उभं-सकं-अनिट्।) णि अनेनेक्ति नेनिक्ते। इर्, अनिजत् अनेक्षीत्। औ, नेक्ता। इति दुर्गादासः॥

णिद, इ कुत्सने। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्-इदित्।) निंसनिन्दनिक्षां गोपदेशग्रहणं चिन्त्यम्। गत्वविकल्पने स्वरूपग्रहणात्। केचित्तु क्षतिविकल्पमिच्छन्ति त्वादौ तूपसर्गात्समासे उपसर्गात् समासे त्वादौ नित्यमित्यर्थः। यथा, प्रणिन्दकः प्रनिन्दकः। प्रणिन्दति। भट्टौ तु त्वादावपि विकल्पो दृश्यते। इ, कर्म्मणि निन्द्यते। निन्दति दुष्टं लोकः। इति दुर्गादासः॥

णिद, ऐ ण सन्निधौ। कुत्सने। इति कविकल्पद्रुमः॥ (भ्वा-उभं-अकं-कुत्सने-सकं-सेट्-ऋदित्।) सन्निधिः सन्निकर्षः। ऋ, अनिनेदत्। ण, नेदति नेदते दयालुं दीनः। निनिदुः। इति दुर्गादासः॥

णिल, ग्रह ने। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्रहो। ग्रहनं दुर्ब्बोधः। ग्र, निलति ग्राह्यं कुधीः दुःखेन जानातीत्यर्थः। इति दुर्गादासः॥

णिव, इ सेके। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्। इदित्।) क्षरो। इ, निन्वते। इति दुर्गादासः॥

क्लिश्, क्लीबे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) क्लीबे समाधौ । नेश्यति योगी । निनिक्ष्यतुः । इति दुर्गादासः ॥

क्लिश, उ सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदितात् क्त्वेट् ।) उ, नेक्ष्यिता निक्ष्टा । इति दुर्गादासः ॥

क्लिस, इ ङ ण चुम्बने । इति कविकल्पद्रुमः ॥ (अदां-आत्मं-सकं-सेट् ।) ल ङ, निक्लिसे । इ, निक्लिसते । इति दुर्गादासः ॥

क्ली, ण प्रापणे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-अनिट् ।) क्लीपदेशप्राट्ठो नादित्वेन प्राक्लम इति शब्दार्थः । प्रक्लयति । एवं सर्वत्र । प्रापणमिह ज्ञानस्य रूपम् । तथा च । वृक्षाति जन्मवति च वैद्यत्वपि नयत्वम् । इति क्रियानिर्घण्टः ॥ ण, नयति नयते गां वनं गोपः प्रापयतीत्यर्थः । इति दुर्गादासः ॥

क्लीब, वर्त्ते । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सक्रं च-सेट् ।) वर्त्ते इह ज्ञाप्यवर्त्तीभावस्तत्करत्वच्च । नैवति पत्रं तमालस्य । नैवति कर्त्रं तन्तुवायः । इति दुर्गादासः ॥

क्लीब, क्लीबे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) नीवति क्लीबः स्थूलः स्त्रादित्वार्थः । इति दुर्गादासः ॥

क्षु, ञ क्षुतौ । इति कविकल्पद्रुमः ॥ (अदां-परं-सकं-सेट् ।) ञ, क्षौति । इति दुर्गादासः ॥

क्षुद, ण ग्र औ प्रेरणे । इति कविकल्पद्रुमः ॥ (तुदां-उभं-सकं-अनिट् ।) ण ग्र, क्षुदति क्षुदते ग्रहं योधः । औ, क्षोत्ता । इति दुर्गादासः ॥

क्षू, ण्यि स्वपने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) क्षुखान्तोऽयमिति वररुचिः । ण्यि, क्षुवति । अक्षुवीत् । इति दुर्गादासः ॥


क्षेद, ऋ ण सन्निधौ । कुत्सने । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-अकं-सकं च-सेट् ।) सन्निधिः सन्निकर्षः । ऋ, अनिनेदत् । ण, नेदति नेदते दयालुं दीनः । निनेदुः । इति दुर्गादासः ॥

क्षेप, ऋ ङ प्रेरणे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अनिनेषत् । ङ, नेषते निनेषे । प्रणो गतिः । इति दुर्गादासः ॥ * ॥

इते धातवः स्वभावतो दन्त्यनादयो लोपदेशेन मूर्द्धन्यादयाः ॥

त

तं, तकारः । स वक्त्रनोष्ठ्यवर्णः । तवर्गप्रथमवर्णश्च । (अर्धमात्राकालेनोच्चार्यः ।) अस्योच्चारणस्थानं दन्तः । इति व्याकरणम् । (अस्योच्चारणे दन्तमूलेन जिह्वाग्रस्य स्पर्शः आभ्यन्तरप्रयत्नः । विवारश्वासघोषाः बाह्यप्रयत्नाः । माहकान्यासेऽस्य वामस्फिचि न्यासक्रिया स्यात् । वङ्गीयवर्णमालायां) तस्य लेखनप्रकारो यथा,—



"आदौ विन्दुसतो मध्ये कुण्डलीलसवाग्यदा ।
दग्धाङ्गमगता निता ब्रह्मविष्णुशिवरूपिणी ।
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने ! ।
चतुर्भुजां महाशान्तां महामोक्षप्रदायिनीम् ॥
सदा षोड़शवर्षीयां रक्ताम्बरधरां पराम् ।
नानालङ्कारभूषां वा सर्व्वसिद्धिप्रदायिनीम् ॥
एवं ध्यात्वा तकारन्तु तन्मन्त्रं दशधा जपेत् ॥"

इति वर्णोद्धारतन्त्रम् ॥ * ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।

"तकारं चञ्चलापाङ्गि ! शृणु परमकुण्डली ।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा ॥
त्रिगुणसहितं वर्णं आत्मादितत्त्वसंयुतम् ।
त्रिबिन्दुसहितं वर्णं पीतविद्युत्समप्रभम् ॥"

तस्य ३२ द्वात्रिंशन्नामानि यथा,—

"तः पूतना हरिः शुद्धिः शुक्लो शुक्लिर्जटी भगा ।
वामस्फिक्वामकटौ च कामिनी मध्यकर्त्तकः ॥
आषाढ़ी तक्षतुरङ्गः कामिका पृष्ठपुच्छकः ।
रक्तकश्च श्यामसुखो वाराही मकरोऽरुणा ॥
सुगतोऽर्द्धसंज्ञा पृष्ठजानुश्च क्रोड़पुच्छकः ।
गन्धो विश्वामदच्छत्रधातुरात्मा च कौरवः ॥
जवनिपुलजो जानिरङ्गमदमातुरा ॥"

इति नानातन्त्रशास्त्रम् ॥

तं, क्ली क्लौ, (त+मादे डः ।) तरत्वम् । (तरति भवसागरमनेनेति । तॄ+करणे डः ।) पुण्यम् । इति मेदिनी । ते, १ ॥

तः, पुं, (तर्दति तर्मति वा हिंसति ब्रह्मादिहरत्वेन जगदिति । तर्द् तम् वा+डः ।) चौरः । अन्ततम् । पुच्छम् । क्रोड़ः । लोकः । इति मेदिनी । ते, १ । गर्भः । गृहः । इति शब्दरत्नावली ॥ रत्नम् । सुगतः । योधः । गौरविवर्जितपुच्छम् । क्रोड़पुच्छम् । इत्येकाक्षरकोषः ॥

तक, सहने । हासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-हासे अकं-सेट्) तकति । इति दुर्गादासः ॥

तक, इ दौर्ब्बल्ये । इति कविकल्पद्रुमः (भ्वां-परं-अकं-सेट् ।) दौर्ब्बल्यं दुःखेन जीवनम् । इ, तक्कते दरिद्रतेव दुःखेन जीवते इत्यर्थः । तक्कति दीनः दुःखेन जीवति इत्यर्थः । इति दुर्गादासः ॥

तकिनः, त्रि, (तक्+"मिथिलादयश्च ।" उणां । १ । ५६ । इति इनच् नलोपश्च ।) धूर्त्तः । इत्यद्रिकोषः ॥

तकिला, स्त्री, (तकिल+टाप् ।) ओषधम् । इत्युणादिकोषः ॥

तक्कः, त्रि, (तकं हासमर्हतीति । तक+यत् ।) हास्यः । (तक सहने+"तकिशृधि यजि जनिभ्यो यङ्लुगन्तेभ्यः ।" ६ । ३ । ६५ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या यत् ।) सहनीयः ॥

तक्रं, क्ली, (तनक्ति सङ्कोचयति दुग्धं पादानुदधिरूपेण परिणमयतीत्यर्थः ।"क्याचित्रचीति." उणां । २ । १३ । इति रक् ञ्च्युट्रादित्वात् कुत्वं च ।) पादानुसंयुतदधि । इत्यमरः ।२।९।५३ ॥

तत्पर्य्यायः । गोरसजम् २ घोलम् ३ कालशेयम् ४ विलोड़ितम् ५ दध्याहृतम् ६ अरिष्टम् ७ अम्लम् ८ उदश्वित् ९ मथितम् १० ह्रयः ११ । इति राजनिर्घण्टः ॥ तत् षड्विधम् । तेषां निष्पन्नि गुणानि गुणाश्च यथा,—

"सवारं निर्जलं शीतं मथितं खसरोदकम् ।
तक्रं पादजलं प्रोक्तमुदश्विद्दर्द्धवारिकम् ॥
हृच्छिका सरहीनं स्यादच्छा प्रचुरवारिका ॥"

तेषां गुणाः ।

"वातपित्तहरं घोलं मथितं कफपित्तनुत् ।
तक्रं व्याधि कषायाम्लं स्वादुपाकरसं लघु ॥
वीर्य्योष्णं दीपनं हृद्यं ग्रीहनं वातनाशनम् ।
ग्रहण्यादिमतां पथ्यं भवेत् संग्राहि लाघवात् ॥
किञ्च स्वादु विपाकिलान्न च पित्तप्रकोपनम् ।
कषायोष्णविकाशित्वादर्शोघ्नमपि कफघ्नम् ॥
न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः ।
यथा सुराभाजनदग्धं सुरायै
तथा नराणां सुखि तक्रमाहुः ॥
उदश्वित् कफपित्तघ्नं श्रमघ्नं वरमं मतम् ।
हृच्छिका श्रोतसां शुद्धौ पित्तश्रमहरा परा ॥
वातघ्नं कफघ्नं वा तु दीपनी लवणान्विता ॥"

अथोद्धृतदृष्टलोकोद्धृतदृष्टानां तक्राणां गुणाः ।

"सद्युद्धृतं दृष्टं तक्रं पथ्यं लघु विशेषतः ।
लोकोद्धृतदृष्टं तस्माद्गुरु दृष्यं कफापहम् ॥
अद्युद्धृतदृष्टं सान्द्रं गुरु पुष्टिकरमुदरम् ॥"*॥

अथ दोषविशेषे व्याधिविशेषे च तक्रविशेषाः ।

"वातेऽम्लं ग्रस्यते तक्रं गुडेनैव्यवसंयुतम् ।
पित्ते स्वादुसितायुक्तं कफोल्बणमदं कणैः ॥
हिङ्गुजीरयुतं घोलं शैम्बवेन घृतप्लुतम् ।
भवेदतीव वातघ्नमर्शोऽतीसारनुत् परम् ॥
सुदधं पुष्टिदं वृष्यं वह्निमूलविनाशनम् ।
न्यग्रोधे तु सगुड़ं माक्षुरोगे सचित्रकम् ॥"*॥

अथामयभेदतक्रगुणाः ।

"तक्रमामं कफं कोठे हन्ति कुक्षौ करोति च ।
पीनसश्वासकासादौ प्रकुप्यति प्रशाम्यति ॥"*॥

अथ तक्रसेवननिमित्तानि ।

"ग्रीष्मकालेऽग्निमान्द्ये च तथा वातामयेषु च ।
अरुचौ स्रोतसां रोधे तक्रं स्वादन्तोपमम् ॥
तत्तु हन्ति गरच्छर्द्दिप्रसेकविषमज्वरान् ।
पाण्डुमेहोदरश्वयथ्वर्शोव्रणभगन्दरान् ॥
मेहं गुल्ममतीसारं मूत्रकृच्छ्रोदरव्रणौ ।
चित्रकोष्ठहतवाधौ कुष्ठशोथप्लीहमौदु ॥"

अथातक्रविधयः ।

"नैव तक्रं पिबेत् स्वल्पोष्णकाले न दुर्जले ।
न क्षौद्रमदहेत् न रोगे रक्तपैत्तिके ॥"*॥

अथ गवादीनां तक्राणां विशिष्टगुणाः ।

"गव्यमाजं दधीत्याद्यं तद्गुणं तक्रमादिशेत् ॥"

इति भावप्रकाशः ॥

("गव्यस्निग्धोष्णमम्लं तक्रं श्लेष्मन्दुच्यते ।
दीपनं रुचिदन्मेध्यमग्नेर्दीरविकारजित् ॥"
इति गव्यतक्रगुणाः ॥
"माहिषं कफलत् किञ्चिद्धनं शीतकरं गुरु ।
ग्रीहार्शोग्रहणीगुल्मपाण्डामयविनाशनम् ॥"
इति माहिषतक्रगुणाः ॥
"छागलं लघु संस्निग्धं त्रिदोषघ्नमनं परम् ।
गुल्माग्निग्रहणीमूलं पाण्डामयविनाशनम् ॥"
इति छागीतक्रगुणाः ॥
"तथाच त्रिविधं तक्रं कथ्यते ग्रन्थ पुत्रक ! ।
यथायोगेन तत् सम्यक् ग्रस्यते येन रोगिह ॥
समुद्धृतघृतं तक्रमर्द्धोद्धृतघृतञ्च तत् ।
अनुद्धृतघृतञ्चान्यदित्येतत्त्रिविधं मतम् ॥
सर्व्वं लघु च पञ्चच त्रिदोषघ्नमनं वरम् ।
ततः परं गुणैतस्मं क्रमेण समुदीरितम् ।
समुद्धृतघृतन्तक्रं लघु पञ्चतमं मतम् ॥
गरोदरार्शोग्रहणीपाण्डुरोगज्वरातुरे ।
वर्च्चोग्रहणदे वापि शीतावापदमेहिनि ॥
हितं संग्रोधनं वच्यं पित्तरक्तविशोधनात् ॥
अर्द्धोद्धृतघृतं तस्मादूर्द्धं गुरु कफप्रदम् ।
मधुरं पित्तरक्तघ्नं श्रमघ्नं परमं मतम् ॥
अनुद्धृतघृतं सान्द्रं गुरु विद्यात् कफावहम् ।
बलप्रदञ्च शीतानामामघ्नीपातिसारजित् ॥"
इति त्रिविधतक्रगुणाः ॥७॥
"तक्रं ग्राहि कषायाम्लं दीपनं लघु ।
श्रमापहरणं स्निग्धं ग्रहण्यर्शोऽतिसारहृत् ।
इति तक्रगुणाः प्रोक्ता न दद्याद् यत्र तक्रकम् ।
वाते शोषे च पीतानां रोगाणाञ्चे ग्ररक्तके च ॥
संमूर्च्छाभ्रमशोषासु तथाच रक्तपित्तके ।
न ग्रस्तं तक्रपानञ्च करोति विविधान् गदान् ॥"
एतेषां तक्रं निषिद्धम् ।
इति हारीते प्रथमस्थाने २७मेऽध्याये ॥७॥)

तक्रकूर्चिका, स्त्री, (तक्रजाता कूर्चिका ।) तक्रयोगेन जाताद्दुग्धात् जाता । छाना इति भाषा । अस्या गुणाः । मलबद्धवातकारित्वम् । रूक्षत्वम् । दुर्ज्जरत्वञ्च । इति राजवल्लभः ॥
(यथा सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"ग्राहिणी वातला रूक्षा दुर्ज्जरा तक्रकूर्चिका॥")

तक्रमांसं, क्ली, (तक्रयोगेन पाचितं मांसम् ।) व्यञ्जनविशेषः । एखनि इति पारस्य भाषा । तस्य पाकप्रकारो यथा,—
"पाकपात्रे घृतं दत्त्वा हरिद्राद्विङ्गु भर्ज्जयेत् ।
छागादेः सकलस्यापि खण्डान्यष्टौ च भर्ज्जयेत् ॥
सिद्धियोग्यं जलं दत्त्वा पचेन्मृदुतरं यथा ।
राजिकादियुतं तक्रं मांसखण्डानि वारयेत् ॥"
तस्य गुणाः ।
"तक्रमांसन्तु वातघ्नं लघु वच्यं बलप्रदम् ।
कफघ्नं पित्तलं किञ्चित् वर्ण्यमाहारस्य पाचनम्॥"
इति भावप्रकाशः ।

तक्राटः, पुं, (तक्राय तक्रोत्पादनाय अटतीति । अट्+अच् ।) मन्थानदण्डः । इति हारावली । ३४ ॥

तक्ष, त्वचो त्याहे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) त्वचो त्याहश्लेषो यद्यत्वम् । तक्ष त्वचने इति प्राचः । त्वचनं संवरणमिति रमानाथः । तक्षति कार्यं वर्म्मेवा भटः । इति दुर्गादासः ॥

तक्ष, ऊ कार्श्ये । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ऊ, तक्ष्णिष्यति अतक्षीत् । कार्श्ये ऊयकरत्वम् । तक्षति काष्ठं तक्षा । इति दुर्गादासः ॥

तक्ष, ऊ न दृष्टौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-ऊभं-सेट् ।) तक्षः ऊयकरत्वम् । ऊ, तक्ष्णिष्यति अतक्षीत् । न, तक्ष्णोति काष्ठं तक्षा । इति दुर्गादासः ॥

तक्षकः, पुं, (तक्षतीति । तक्ष+ण्वुल् ।) पातालस्थनागानामर्गतनागविशेषः । स कश्यपात् कद्रुगर्भे जातः इन्द्रसखः । अस्य वासः खाण्डवबने आसीत् । अयं परीक्षितं दष्टवान् । इति श्रीभागवतम् ॥ (अयं हि क्षपणकरूपधारी उतङ्कस्य सुनेर्मृदङ्गिवार्थमागीते कुण्डले ऽपहृत्य नागलोकं गतवान् । यथा, महाभारते । १ । ३ । १२७ ।
"तक्ष तक्षको दङ्गमाचक्षः स तं जग्राह । ग्रहीतमात्रः स तदूर्ध्वं विहाय तक्षकरूपं त्यक्त्वा सहसा धरण्यां विततं महाविलं प्रविवेश ॥
तत्र तनूकरणे+"क्षुभ्नादिषु च ।"उक्तौ । ८ । ३९ । इति क्षुभ् ।) लङ् । इत्यमरः । १ । ३ । ४ ॥ विश्वकर्म्मा । इति शब्दरत्नावली ॥ हृमभेदः । इति हेमचन्द्रः ॥ रत्नधारः । इत्यमरटीकायां रायमुकुटः ॥ (खगमन्त्रात्तः प्रसेनजित्-पुत्रः । यथा, भागवते । ९ । १२ । ८ ।
"ततः प्रसेनजित् तस्मात् तक्षको भविता पुनः ॥"
हेदके, त्रि । यथा, रामायणे । २ । ८० । १२ ।
"तथा वर्द्धकयश्चैव मार्गिणो दृढतक्षकाः ॥")

तक्ष्ण्यं, क्ली, (तक्ष तनूकरणे+भावे ष्यञ् ।) ऊयकरत्वम् । (यथा, मनुः । ५ । ११५ ।
"द्रव्याणामेव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम् ।
प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्ष्णम् ॥")

तक्ष्णी, स्त्री, (तक्ष्णत्यनेनेति । तक्ष+करणे ल्युट् । टित्वात् ङीप् ।) वासी अस्त्रम् । इति शब्दरत्नावली ॥

तक्ष्णिका, स्त्री, देशविशेषः । इति सिद्धान्तकौमुदी । (यथा, महाभारते । २ । ३१ । २९ ।
"तेनैवसुत्ता मातरश्च तथा चक्रुः स तथा मातृन् सन्दिश्य तक्ष्णिकां प्रत्यभिप्रतस्थे ॥")

तक्ष्ना, [न्] पुं. (तक्षति तनूकरोतीति । तक्ष+"कनिन् युवृषितक्षिराजीति ।" उक्तौ २ । १५६ । इति कनिन् ।) लङ् । इत्यमरः । २ । १० । ६ ॥
(यथा, माघे । १२ । २५ ।
"उत्क्षाङ्कवत्यौ विगताञ्चपाटवे
वृषा निकामं विकलीबतां रथे ।
"व्यापेन तक्ष्णा भिषजेव तत्क्षणं
प्रचक्रमे लङ्घनपूर्व्वकः क्रमः ॥")

तग, ट खलने । कर्म्मे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-गतौ तु सकं-सेट् ।)
ट, कर्म्मणि तङ्गते । इति दुर्गादासः ॥

तगरं, नदीदृष्टः । पिङ्गतगर इति कोङ्कणे प्रसिद्धः । तगरमूल इति ख्यातस्य । तत्पर्य्यायः । कालानुसारिवा २ वक्रम् ३ कुटिलम् ४ शठम् ५ महीरुहम् ६ नतम् ७ शिखम् ८ दीपनम् ९ तगरपादिकम् १० । इति रत्नमाला । विलम्बम् ११ कुटिलम् १२ षण्ढम् १३ नडुलाख्यम् १४ दण्डवल्लम् १५ वर्ष्टम् १६ पिङ्गतगरकम् १७ पार्थिवम् १८ राजवर्म्मम् १९ कालानुसारकम् २० वक्रम् २१ दीर्घम् २२ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । दोषत्रिविषार्त्तिभूतोन्मादभयनाशित्वम् । मधुरत्वञ्च । आनुलोम्यकृत्त्वम् । इति राजनिर्घण्टः ॥
गन्धद्रव्यविशेषः । तस्य पर्य्यायगुणाः ।
"कालानुसार्य्यं तगरं कठिनं वक्रमुन्नतम् ।
अपरं पिङ्गतगरं दण्डवल्लि च वर्ष्टकम् ॥
तगरद्वयमुक्तं स्यात् खादु स्निग्धं लघु स्मृतम् ।
विषापस्मारकुष्ठार्शश्चिरोन्मादोदरव्रणापहम् ॥"
इति भावप्रकाशः ॥

तगरः, पुं, (तं क्रोधभावं गिरतीति । गृ+अच् ।) पुण्यद्रुमविशेषः । टगर इति भाषा । तत्पर्य्यायः । चित्रपुष्पः २ । कालपर्व्वः ३ कटुस्कन्धः ४ । इति शब्दरत्नावली । (यथा, महाभारते । १३ । १०४ । ८५ ।
"प्रियङ्गुचन्दनाभ्याञ्च विल्वेन तगरेण च ।
वृषगेवाङ्गिरस्येत केशरेण च बुद्धिमान् ॥")
मदनवृक्षः । इति राजनिर्घण्टः ॥

तगरपादिकं, क्ली, (तगरस्य पादो मूलदेश इव विद्यतेऽस्य इति उन् ।) तगरम् । इति रत्नमाला ॥

तङ्गः, पुं क्ली, (टङ्ग+एषोदरात् साधुः ।) पाषाणदारवः । इत्यमरटीकायां रमानाथः ॥ (तङ्कि शङ्कृजीवने+भावे घञ् ।) प्रियविरहजन्यस्तापः । भयम् । इति जिह्वादिवर्गटीकायां भरतः ॥

तञ्ची, स्त्री, (तं दुःखाकारं अञ्चतीति । तृ+क्विप् ङीप् ।) छिन्नपत्नी । इति राजनिर्घण्टः ॥

तट, उच्छ्राये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) उच्छ्राय उच्चीभावः । तटति उच्चिनम् । इति दुर्गादासः ॥

तट, क आघातौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, ताटयति । इति दुर्गादासः ॥

तटं, क्ली, (तटति उच्छ्रितं भवतीति । तट उच्छ्राये + घञर्थात् क ।) क्षेत्रम् । इति मेदिनी । टे, १६ ॥ (प्रदेशः । यथा, महाभारते । १ । ३६ । ३ ।
"गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे ॥")

तटः, त्रि, (तटति उच्छ्रितो भवतीति । तट्+अच् ।) तीरम् । इत्यमरः । २ । १० । ७ ॥

तड् इति भाषा ॥ (यथा, हरिवंशे । ६०।५५ ।
"कर्म्मवमार्गौ आक्षेते हृदस्याश्च तटाद्भौ ॥"
महादेवे, पुं । सर्व्वोच्छ्रितत्वादस्य तथात्वम् ।
यथा, महाभारते । १२ । २८४ । ३६ ।
"नमस्तटाय तथाय: तटागाभ्यतये नमः ॥")
तटस्थं, क्ली, लक्षणविशेषः । तस्य स्वरूपं यथा,
तद्विशिष्टे सति तद्बोधकत्वम् । तथाच ।
"स्वरूपं तटस्थं द्विधालक्षणं स्यात्
स्वरूपस्य बोधो यतो लक्षणाभ्याम् ।
स्वरूपे प्रविष्टात् स्वरूपेऽप्रविष्टात्
यथा काकवन्तो गृहाः सन्ति विलक्ष ॥"
इति वेदान्तकारिका ॥
(तटे तिष्ठतीति । स्था + कः ।) तटस्थिते,
त्रि ॥ (उदासीनः । यथा, वैद्यके । ३ । ५५ ।
"धिक् चापले वत्सिमवत्सलत्वं
यत्प्रेरणाद्गुरुतरलीभवन्त्या ।
समीरसङ्गादिव नीरभङ्गा
मया तटस्थस्तपहृतोऽसि ॥"
समीपस्थः । यथाह बलः ।
"तटस्थः स्याद्दासीने तीरस्थनिकटस्थयोः ॥")
तटाकः, पुं, (तटमकति गच्छतीति । अक +
"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तड़ागः ।
पद्मादियुक्तसरः । इति शब्दरत्नावली । (यथा,
वैराग्यशतके । ४६ ।
"प्रादेशमात्रसुदरं परिपूरयितुं कियानयं यत्नः ।
सुजकेनाम्नः पातुं खनितव्यः किं तटाकोऽपि ॥")
तटिनी, स्त्री, (तटमस्यस्या इति । तट + "अत
इनिठनौ ।" ५ । २ । ११५ । इति इनि-
स्ततो ङीप् ।) नदी । इत्यमरः । १।१०।३० ॥
(यथा, आर्य्यासप्तशत्याम् । ६६२ ।
"कृत्वा तटिनि ! तरङ्गैर्भमितभ्रूभङ्गेषु नाथ्ये
निहितः ।
मकरदलवल्कलरहितस्खयान्तरिक्षे तरस्यक्तः ॥")
तटी, स्त्री, (तटति उच्छ्रिता भवतीति । तट +
अच् । ङीप् ।) तीरम् । इत्यमरः । १।१०।७ ॥
(यथा, साहित्यदर्पणे । ३ । ८६ ।
"मालयच्च प्रसागच्च नद्यादीनां तटौ तथा ॥")
तड, इ ड आघातौ । इति कविकल्पद्रुमः ॥ (भ्वां-
आत्मं-सर्क-सेट् ।) इ, तड्यते । ड, तडते ।
इति दुर्गादासः ॥
तड, क त्विषि । आघातौ । इति कविकल्पद्रुमः ॥
(चुरां-परं-अर्क-सर्क च-सेट् ।) क, ताड-
यति । त्विषि दीप्तौ । इति दुर्गादासः ॥
तड़ागः, पुं, (तड्यते आहन्यते ऊर्म्मिभिरिति ।
तड + आगः । एषोदरादित्वात् आलोपे साधुः ।)
तड़ागः । इति द्विरूपकोषः ॥
तड़ाकः, पुं, (तड्यते आहन्यते ऊर्म्मिमालाभि-
रिति । तड़ि आहतौ + "पिनाकादयश्च ।"
उणां ४ । १५ । इति आकप्रत्ययेन निपातनात्
साधुः ।) तड़ागः । इति शब्दरत्नावली ॥
तड़ाका, स्त्री, (तड़ाक + स्त्रियां टाप् ।) नदी-
वसुद्राणां तटभागः । (तड़ि आहतौ + भावे
आकः ।) आघातः । इति संक्षिप्तसारे उणादि-
वृत्तिः ॥ (प्रभा । इत्युज्ज्वलदत्तः । ४ । १५ ॥)
तड़ागः, पुं क्ली, (तड + तड़ागादयश्च । इति
आगप्रत्ययेन निपातनात् साधुः ।) यत्नकूटकः ।
इति मेदिनी । गे, ३६ ॥ (तड्यते आहन्यते
ऊर्म्मिमालाभिरिति । तड़ि आहतौ + कर्म्मणि
आकः ।) पद्मादियुक्तं सरः । तत्पर्य्यायः ।
पद्माकरः २ । इत्यमरः । १ । १० । २८ ॥
तड़ाकः ३ तटाकः ४ । इति शब्दरत्नावली ॥
तड़गः ५ । इति द्विरूपकोषः ॥ शुचिव्रत-
धनुःपरिमाणजलाशयः । चतुर्हस्तु पञ्चचत्वा-
रिंशद्धस्तात्यूनतायां सहस्रहस्तितयहस्तात्यूनत्वेन
तड़ागः । इति नयवर्द्धमानधृतो वह्निपुः ॥ * ॥
तस्य जलगुणाः । वायुकारित्वम् । स्वादुत्वम् ।
कषायत्वम् । पाके कटुत्वम् । स्निग्धरुक्षकारित्वे
प्रशस्तत्वञ्च । इति राजवल्लभः ॥ * ॥ तस्योत्-
सर्गविधिर्यथा,—
पुलस्त्य उवाच ।
"शृणु राजन्महाबाहो ! तड़ागादिषु यो विधिः ।
पुराणेष्वितिहासेषु मन्यते राजसत्तम ! ॥
प्राप्य पर्व्व शुभं शुक्लमागते चोत्तरायणे ।
पुण्येऽह्नि विप्रैः क्रियते ह्यत्वा ब्राह्मणवाचनम् ॥
प्राकप्रसवयादम्भस्तड़ागस्य समीपतः ॥
चतुर्हस्तसमा वेदी चतुरस्रा समन्ततः ।
तथा षोड़शहस्तः स्यान्मण्डपश्च चतुर्मुखः ॥
वेद्या उत्तरतो गर्त्तारत्निमात्रा तु मेखला ।
नवसप्तथवा पञ्च योनिवक्त्रा नृपात्मज ! ॥
वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुल-
विस्तृता ।
सर्व्वे खड़स्तमात्राः स्युस्त्रिपर्व्वोच्छ्रितमेखलाः ॥
सर्व्वे च सर्व्ववर्णाः स्युः पताकाध्वजसंयुताः ।
अश्वत्थोड़म्बरप्लक्षवटशाखाश्रितानि च ॥
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ॥
शुभास्तत्राष्ट होतारो द्वारपालास्तथापरे ।
अष्टौ तु जापकाः कार्य्या ब्राह्मणा वेदपारगाः ॥
सर्व्वलक्षणसम्पूर्णा मन्त्रविद्भिर्जितेन्द्रियाः ।
कुम्भश्रीतसमायुक्ताः स्थापिता द्विजसत्तमाः ॥
प्रतिस्तम्भेषु कलशा यज्ञोपस्करकाणि च ।
यजमानासनं शुभ्रं ताम्रपात्रं सुविस्तरम् ॥
आचार्य्यः प्रथिपेड़्घ्र्यामशुचन्नं विचक्षणः ।
चतुरत्निमितो यूपः स्यात् खादिरश्चविनिर्म्मितः ॥
यजमानप्रमाणो वा संख्याप्यो भूतिमिच्छता ॥
हेमालङ्करिणः कार्य्याः पञ्चविंशतिऋत्विजः ॥
कुण्डलानि च हेमानि केयूरकटकानि च ।
तथाङ्गुलीयविन्नानि वासांसि विविधानि च ॥
दद्युः समानि सर्व्वेषामाचार्य्ये द्विगुणं पुनः ।
दद्याच्छयनसंयुक्तमात्मनश्चापि यत् क्षतम् ॥
सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यकुक्कुभौ ।
तथा कुलीरमण्डूका वायसः शिशुमारकः ॥
एवमाषाद्य ततः सर्व्वं सर्व्वमात्रं विशाम्पते ! ।
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ॥
सर्व्वौषधिकषायाक्तः पाठितो वेदपुङ्गवैः ।
यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः ॥
पश्चिमं द्वारमासाद्य प्रविशेद्यागमण्डपम् ।
ततो मङ्गलशब्देन भेरीणां निस्वनेन च ॥
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन चार्चितम् ।
षोड़शारं ततश्चक्रं पद्मरागसुशोभनम् ॥
वेद्यासुपरि ततः क्षिप्त्वा यद्यान् यद्यपतीक्षया ।
संन्यसेच्छतः सर्व्वान् प्रतिदिक्षु विचक्षणः ॥
ततः पात्रं स्थापयेन्मध्ये वास्तुं मन्त्रमाश्रितम् ।
ब्रह्माणञ्च शिवं विष्णुं तत्त्वेन स्थापयेद्बुधः ॥
विनायकञ्च विन्यस्य कमलामम्बिकां ततः ।
ग्रान्त्यर्थं सर्व्वलोकानां भूतग्रामगणैर्वृतः ।
पुण्यभक्ष्यफलैर्युक्तमेवं कृत्वाधिवासनम् ।
कुम्भांश्च रत्नगर्भांश्च वासोभिः परिवेष्टयेत् ॥
गन्धपुष्पैरलङ्कृत्य द्वारपालान् समन्ततः ।
पठध्वमिति तान् ब्रूयादाचार्य्यमपि पूजयेत् ॥
वह्नौ पूर्व्वतः स्थाप्यौ दक्षिणे च यजुर्विदौ ।
पश्चिमे सामगौ स्थाप्यावुत्तरेऽथर्व्वगौ ॥
उदङ्मुखौ दक्षिणतो यजमान उपाविशेत् ।
पठध्वमिति तान् ब्रूयात् यजध्वमिति याजकम् ॥
उत्तरन्यासपाठेन तिष्ठध्वं मन्त्रजापकाः ।
एवमादिश्य तान् सर्व्वान् पर्य्युक्षार्थं च
मन्त्रवित् ॥
जुहुयादाहुतीर्मन्त्रैराज्यञ्च समिधस्तथा ।
ऋत्विग्भिश्चैव होतव्यं वारुणैरेव सर्व्वतः ॥
वैराजं पौरुषं सूक्तं प्रौष्ठं चन्द्रं सुसंहितम् ।
शैवं पञ्चनिधनं गायन्ति ज्येष्ठसामगाः ॥
वामदेवं बृहत्साम रौरवं सरथन्तरम् ।
गवां व्रतं विकर्णञ्च रथोन्नं नरथन्तथा ॥
गायन्ति सामगा राजन् ! पश्चिमद्वारमाश्रिताः ।
अथर्व्वगा शान्तितः शान्तिकं पौष्टिकं तथा ॥
जपन्ते मनसा देवमाश्रिता वरुणं प्रभुम् ।
पूर्व्वेद्युरभितो मन्त्रैरेवं कृत्वाधिवासनम् ॥
गजाश्वरथावल्मीकसंग्रामरवगोकुलात् ।
मृदमादाय दद्याच्च प्रथिपेच्च यथा तथा ॥
रोचनाच्च ससिद्धार्थान् गन्धान् गुग्गुलमेव च ।
जपनं तस्य कर्त्तव्यं पञ्चगव्यसमन्वितम् ॥
सृष्टिं कर्त्तुमेहामन्त्रैरेवं कृत्वा विधानतः ।
एवं रक्षति राज्यार्थान् विधियुक्तेन कर्म्मणा ॥*॥
ततः प्रभाते विमले संजाते तु गवां शतम् ।
ब्राह्मणेभ्यः प्रदातव्यं होमान्ते वाथवा पुनः ॥
पञ्चाशद्वाथ षट्त्रिंशत् पञ्चविंशतिरेव च ।
ततः संवत्सरे प्राप्ते शुद्धे लग्ने सुशोभने ॥
वेदशब्देश्च गान्धर्व्वैर्वाद्यैश्च विविधैः पुनः ।
कनकालङ्कृतां कृत्वा जले गामवतारयेत् ॥
सामगाय च सा देया ब्राह्मणाय विशाम्पते ! ।
पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ॥
तत्र निःक्षिप्य मकरं मत्स्यादींश्चैव सर्व्वशः ।
धृतांश्चतुर्भिर्व्विप्रैश्च वेदवेदाङ्गपारगैः ॥
महानदीजलोपेतान् दध्यक्षतविभूषितान् ।
उत्तराभिमुखो गुरुो जलमध्ये प्रकालयेत् ॥
आथर्व्वणेन सुस्नातः पुरुषैः सांस्तथैव च ।
आपो हि ष्ठेति मन्त्रेण त्रिपेदागत्य मण्डपम् ॥

पूजयित्वा सुरांस्तत्र बलिं दद्यात् समन्वितः।
पुनर्हविंषि होतव्यं चत्वारि राजसत्तम!॥
चतुर्थीकर्मणे कार्यं देयं तत्रापि शक्तितः।
स्नात्वा तु यज्ञपात्राणि यज्ञोपकरणानि च॥
ऋत्विग्भ्यस्तु समं दद्यात् भक्ष्यं विभजेत् पुनः।
होमशाम्नाय ब्रह्माणं आचार्यांश्च निवेदयेत्॥
ततः सहर्षं विप्राणामशनाद्यन्नतं तथा।
भोजयेच्च यथान्यायं पश्चाद्दद्याच्च दक्षिणाः॥
इत्येष पुरतोद्दिष्ट तडागविधिरुच्यते।
भूमयश्चोद्दिशेत् तत्र तथा पुष्करिणीश्च ह।
इत्य इत्य विधिर्दृष्टः प्रतिष्ठाया तथैव च।
मण्डपस्तु विशेषः स्यात् प्रासादोद्यानभूमिषु॥
अथवा ऋत्विगाचार्यैर्विधिदृष्टेन कर्मणा।
अन्येनैवाधिवत् कार्यं वित्तशाठ्यादते नृणाम्॥"
तड़ागे कालविशेषे जलस्थितेः फलं यथा,—
"प्रावृट्काले स्थितं तोयमग्निरोगसमं स्मृतम्।
शरत्काले स्थितं तोयं वातपित्तबलदायकम्॥
वाजपेयफलसमं हैमन्तशिशिरस्थितम्।
अश्वमेधसमं ग्रीष्मवसन्तसमयस्थितम्॥
योगेऽपि तु स्थितं तोयं राजसूयफलाधिकम्॥"
तड़ागकरणे फलं यथा,—
"एतान्महाराज! विशेषधर्मान्
करोति योऽर्थोंल्लभते सुबुद्धिः।
स याति ब्रह्मालयमेककल्पं
दिवं पुनर्याति ततैव दिवम्॥"
इति पाद्मे क्रियाखण्डम्॥

तड़ाघातः, पुं, (तटे आघातः। एषोदरात् टस्य डत्वम्।) उद्वौलत्य इक्षिप्तजलाघातः। यथा,
"उच्चैःकरिकराक्षेपे तड़ाघातं विदुर्बुधाः॥"
इति कुमारसम्भवटीका॥

तड़ित्, स्त्री, (ताड़यत्यभ्रमिति। तड़ आघाते+"वार्तिबिंयुक् च।" उणां। १।१००। इति इतिप्रत्ययः वेर्गुक् च।) विद्युत्। इत्यमरः।१।३। ६। (यथा, रघुः। ६।५४।
"अथ यमस्य इव त्रिदशायुधं
कनकपिङ्गतडिद्गुणसंयुतम्।
धनुरधिज्यमनाधिरपाहरद्
नरपतेः परपौरुषकेतुरी॥")

तड़ित्वान्, [त्] पुं, (तड़ित् विद्युदस्यास्तीति। तड़ित्+मतुप्। मस्य वः।) मेघः। सुरकम्। इत्यमरः। १।३। ७,९। ४। १५६॥ (विद्युद्विशिष्टे, त्रि। यथा,—
"सस्तुदितनिचयेन तड़ित्वतीं
जयवता शरदस्तुदसंहतिम्॥"
इति किरातार्जुनीये। ५। ४॥)

तक्कः पुं, (तक्कते हसतीति। तक्क+क्विप्।) खञ्जनपक्षी। पेगः। समाक्षप्रायवाक्। शब्दारः। तस्करः। मायावकुलके, त्रि। इति मेदिनी। के, ६८॥

तक्कः, पुं क्ली, (तक्क+घञ्।) परिच्छदः। इति जिङ्गादिसंग्रहे अमरः॥

तक्कः, पुं, शिवद्वारपालविशेषः। इति हलायुधः॥

तक्कुरीकः, पुं, कोटमात्रम्। (तक्कुरे भवः। तक्कुर+ढक्। लस्य रः।) तक्कुरोदकम्। वर्म्मरे, त्रि। इति मेदिनी। के, ६५॥

तक्कुलः, पुं, (तक्कते आहन्यते इति। तक्क आघाते+"वासक्लिवर्षेति।" उणां॥।१०७। इति उलच्। यद्वा, "इन्मुटितनितड़िम्ब उलन् तक्कश्च।" उणां ५।६८। इतिउलन् तक्कादेशश्च।) विड़ङ्गम्। इति मेदिनी। के, ६६॥
("पुंसि क्लीबे वेल्लः स्यात् कमिघ्नो जन्तुनाशनः।
तक्कुलश्च तथा वेल्लममोघा चित्रतक्कुला॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तक्कुलीयशाकम्। इति शब्दरत्नावली॥
धान्यादिनिकरः। इति मेदिनी। के, ६६॥
चाउल इति भाषा। (यथा, पञ्चतन्त्रे। २।५५।
"बहुस्तिः श्रेयसी पुंसां स्वपत्ये च विशेषतः।
तुषैरपि परिष्कारो न प्ररोहन्ति तक्कुलाः॥
सुदुर्जरः खादुरसो दृढ़ंश्यस्तक्कुलो नवः।
शस्यानामग्निरेवैकः पुराणस्तक्कुलः स्मृतः॥
क्रयसंयोगसंस्कारविकारान् समवेक्ष्य तु।
यदाकारमवासाद्य भोक्तृणां छन्दतोऽपि वा॥
अनेकद्रव्ययोनित्वाच्छास्त्रतस्तान् विनिर्दिशेत्॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)
भृष्टतक्कुलगुणाः। सुगन्धित्वम्। कफनाशित्वम्। रूक्षत्वम्। पित्तकारित्वञ्च। इति राजवल्लभः॥

तक्कुलपरीक्षा, स्त्री, (तक्कुलेन परीक्षा।) नवविधदिव्यान्तर्गतदिव्यविशेषः। चालघड़ा इति भाषा। तद्विधानं यथाह पितामहः।
"शौर्ये तु तक्कुला देया नान्यत्रेति विनिश्चयः।
तक्कुलान् कारयेच्छुद्धान् काश्मर्य्यान्यस्य कस्य चित्॥
अरक्षये भाजने स्नात्वा आदित्यस्याग्रतः शुचिः।
स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत्॥
प्राक्सुखोपोषितं स्नातं शिरोरोपितपञ्चकम्।
तक्कुलान् भक्षयित्वा तु पञ्च निष्ठीवयेत्त्रिधा॥
भूर्ण्यस्तेन तु गात्रस्य अभावे पिण्यकस्य तु।
श्लोषितं दृश्यते यस्य हनुकाभ्यां च शीर्य्यते।
गात्रञ्च कम्पते यस्य तमशुद्धं विनिर्दिशेत्॥"
स्नानोदकेन देवतास्नानोदकेन। तथा च कात्यायनः।
"देवतास्नानपानीयक्लिन्नतक्कुलभक्षणे।
शुद्धनिष्ठीवनात् शुद्धो नियम्योऽशुचिरन्यथा॥"
शिरोरोपितपञ्चकं तक्कुलान् भक्षयित्वा निष्ठीवयेत् प्राड्विवाकः इति। निष्ठीवयेदिति ण्यन्तात् सिद्धम्। तुलानिरूपितं सर्व्वदिव्यसाधारणञ्च धर्म्मशास्त्रादिदहनानां पूर्व्ववदिहापि कर्त्तव्यम्॥
शिरोरोपितपञ्चकेक्षणमन्त्रादि यथा,—
तत्रार्थमभियुक्तस्य लेखयित्वा तु पत्रके।
मन्त्रेणानेन सहितं कुर्य्यात्तस्य शिरोगतम्॥
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मो हि जानाति नरस्य वृत्तम्॥
इति दिव्यतत्त्वम्॥

तक्कुला, स्त्री, (तक्कते आहन्यते इति। तक्क+उलच् ततष्टाप्।) महाशमला। विड़ङ्गम्। इति राजनिर्घण्टः॥

तक्कुलाम्बु, क्ली, (तक्कुलस्य अम्बु।) तक्कुलोदकम्। वेलुनि इति भाषा। तत्पर्य्यायः। क्लेदालु २। इति वैद्यकपरिभाषा॥ तक्कुलीत्यम् ३। इति राजनिर्घण्टः॥ यथा, वैद्यकचक्रपाणिसंग्रहे अहरण्यधिकारे।
"पिबेत् यमांशं तत्कूर्चं सचौद्रं तक्कुलाम्बुना॥"

तक्कुली, स्त्री, (तक्कुल+ङीष्।) यवतिक्ता लता। ग्रन्थाकुलीकर्कटी। तक्कुलीयशाकः। इति राजनिर्घण्टः॥ (विहतिरस्यास्तक्कुलीवृन्दे ज्ञातव्या॥)

तक्कुलीकः, पुं, (तक्कुलीव कायतीति। के+कः।) तक्कुलीयशाकः। इति शब्दरत्नावली॥

तक्कुलीयः, पुं, (तक्कुलाय हितः। तक्कुल+"विभाषा हविरपूपादिभ्यः।" ५।१।४। इति छः।) पत्रशाकविशेषः। क्षुद्रियानटिया इति चाँपानटिया इति च वङ्गभाषा। चवराइ इति अल्पमरुवा इति च हिन्दी भाषा। तत्पर्य्यायः। अल्पमारिषः २। इत्यमरः।२।४। १३६॥ तक्कुलीकः ३ तक्कुलः ४। इति शब्दरत्नावली॥ भक्कीरः ५ तक्कली ६ तक्कुलीयकः ७ ग्रन्थिलः ८ बहुवीर्य्यः ९ मेघनादः १० घनस्वनः ११ सुशाकः १२ पथ्यशाकः १३ स्फूर्जथुः १४ खनिताक्षयः १५ वीरः १६ तक्कुलनामा १७। अस्य गुणाः। स्निग्धित्वम्। मधुरत्वम्। विषपित्तदाहभ्रमनाशित्वम्। रुचिकारित्वम्। दीपनत्वम्। पथ्यत्वञ्च। तद्गुणाः। हिमत्वम्। अर्शःपित्तरक्तविषकासविनाशित्वम्। बाहुल्यत्वम्। मधुरत्वम्। विपाके दाहग्लोपशमनत्वम्। रुचिदाल्यत्वञ्च। इति राजनिर्घण्टः॥ विड़ङ्गम्। ताप्यम्। इति मेदिनी। ये, ११६॥
अस्य पर्य्यायगुणाः।
"तक्कुलीयो मेघनादः वाक्कीरस्तक्कुलेरकः।
भक्कीरस्तक्कुलीबीजो विषघ्नश्चाग्निमारिषः॥
तक्कुलीयो लघुः शीतो रूक्षः पित्तकफापहः।
हृद्यस्त्वमलो रुच्यो दीपनो विषहारकः॥"
तद्भेदः। जलतक्कुलीयं शाके कच्चटमिति प्रसिद्धम्।
"पानीयतक्कुलीयन्तु कच्चटं सशुदाहृतम्।
कच्चटं तिक्तकं रक्तपित्तानिलहरं लघु॥"
इति भावप्रकाशः॥

तक्कुलीयकः, पुं, (तक्कुलीय+स्वार्थे कन्।) तक्कुलीयशाकः। (यथा, हारीते १ स्थाने १० अः।
"स्वादुः पाके लवक्पित्तविषघ्नस्तक्कुलीयकः।
हन्ति वातं विड्विबन्धं मूत्रवातकफे हितः॥")
विड़ङ्गम्। इति राजनिर्घण्टः॥

तक्कुलीयिका, स्त्री, (तक्कुलीय+स्वार्थे कन् स्त्रियां टाप्। कापि अत इत्वञ्च।) विड़ङ्गम्। इति राजनिर्घण्टः॥

तक्कुलुः, स्त्री, (तक्कुल+एषोदरात् उले साधुः।) विड़ङ्गम्। इति शब्दरत्नावली॥

तण्डुलेरः, पुं, (तण्डुल+वाहुलकात् स्वार्थे ढ्रक्।) तण्डुलीयशाकः। इति हेमचन्द्रः। ४। २५०॥

तण्डुलोत्थं, क्ली, (तण्डुलात् तण्डुलप्रक्षालनात् उत्तिष्ठतीति। उत्+स्था+कः।) तण्डुलाम्बु। इति राजनिर्घण्टः॥

तण्डुलोदकं, क्ली, (तण्डुलस्य तण्डुलक्षालनस्य उदकम्। तण्डुलक्षालितं उदकं वा।) तण्डुलाम्बु। यथा, वैद्यकपरिभाषायाम्।

"जलमरुगुर्वं दत्वा पर्वं कल्पिततण्डुलात्।
भावयित्वा ततो देयं तण्डुलोदककल्पने॥"

(चरके गुडा यथा,—

"सन्धानं शीतलं वल्यं मद्यातिसारनाशनम्।
सुखाङ्गु शीतलञ्चैव टंकणं तण्डुलोदकम्॥"

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये॥)

तण्डुलोयः, पुं, (तण्डुलानामोघ इव यत्र।) वेतसवृक्षः। इति शब्दचन्द्रिका॥ वेउड़वाँश इति भाषा। तण्डुलवल्मीकच॥

तत्, व, हेतुः। इत्यमरः। ३। ४। २॥ (यथा, रघुः। ३। ४६।

"तदङ्गमर्थं मघवन्! महाक्रतो-
रसुं तुरङ्गं प्रतिमोक्तुमर्हसि॥")

तत्, [द्] त्रि, बुद्धिस्थपरामर्शः। वेद इति भाषा। सर्वनामशब्दोऽयम्। इति वाकरणम्। (यथा, किरातार्जुनीये। २। २।

"अपि वागधिपस्य दुर्वचं
वचनन्तद्विदधीत विस्मयम्॥")

तत्, क्ली, ब्रह्मणो नामविशेषः। यथा,—

"ओँ तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥
तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥
तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥"

इति श्रीभगवद्गीतायाम्। १७। २३-२५॥

ततं, क्ली, (तनोति मनोऽनेनेति। तन+"तनि-पत्दन्भ्यां किच्च।" उणा। ७।८८। इति तन्।) वीणादिवाद्यम्। इत्यमरः। २। ७। ४॥

ततः, त्रि, (तन्यते स्म इति। तन्+क्तः।) विस्तृतः। (यथा, महाभारते। ३। ५। १।

"ते वीरा बद्धनिस्त्रिंशास्ततायुधकलापिनः॥")

आप्तः। (यथा, भगवद्गीतायाम्। ८। २२।

"यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्॥")

वायौ, पुं। इति मेदिनी। ते, २०॥

ततः, [स्] अ, (तद्+"पञ्चम्यास्तसिल्।" ५। ३। ७। इति तसिल्। वह्वा, सर्व्वविभक्तिषु तसिल्।) हेतुः इत्यमरः। ३। ३। ३॥ (यथा, महाभारते। १२। ३३८। ७६।

"होमाः सत्येन कल्पेन तपो वेकारिणः स्मृताः॥"

आदिः। परिग्रहः। पक्षान्तरं। (यथा, मनुः। १२। ८५।

"सर्व्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्।
तद्ह्यग्र्यं सर्व्वविद्यानां प्राप्यते ह्यमृतं ततः॥"

सप्तम्यर्थः। यथा, मनुः। ४। १५।

"न विद्यमानेष्वर्थेषु नार्त्तोऽमपि यतस्ततः॥"

तृतीयार्थः। यथा, नारदपञ्चरात्रे। २। ६।

"आराधितो यदि हरिस्तपसा ततः किं
नाराधितो यदि हरिस्तपसा ततः किम्॥")

कथान्तरम्। आनन्तर्य्यम्। इति विश्वः॥ (यथा, महाभारते। ३। ५। २।

"ततस्ते दक्षिणं तीरमन्वगच्छन् पदातयः॥")

ततपत्री, स्त्री, (ततं विस्तृतं पत्रमस्याः।) कदली-वृक्षः। इति शब्दचन्द्रिका॥

ततमः, त्रि, (तेषां मध्ये निर्द्धारितो योऽसौ। तद्+"वा बहूनां जातिपरिप्रश्ने डतमच्।) ५। ३। ९२। इति डतमच्।) बहुत्व मध्ये सः। अनेकेषां मध्ये शेष इति भाषा। (यथा, ऐतरेयोपनिषदि। ३। १२। १३।

"स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिति॥")

ततरः, त्रि, (तयोर्मध्ये निर्द्धारितो योऽसौ। तद्+"किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच्।" ५। ३। ९२। इति डतरच्।) द्वयोर्मध्ये सः। दुयेर मध्ये शेष इति भाषा॥

ततस्, अं, त्रि, (ततस्तत्र भवसीति। ततस्+"अत्रया-ष्ट्याप्।" ४। २। १०४। इत्यस्य "अमेह-तवत्तिलेभ्य एव।" इति वार्त्तिकोक्तेः त्याप् प्रत्ययः।) तत्रभवम्। ततस्त्वन्ति। इति वाकरणम्॥ तार इति भाषा॥

ततिः, स्त्री, (तन्+भावे क्तिन्।) श्रेणी। इति हेमचन्द्रः। ३। ५६॥ (यथा, विष्णुपादादि-केशान्तवर्णनस्तोत्रे। १५।

"अकालार्कं विकचयाद्यैरप्यखिलसुनिजनप्रार्थ-
नीयानि सेयं
दद्यादाद्यागवद्या ततिरतिदचिरामङ्गलान्यङ्गु-
लीनाम्॥")

तति, त्रि, (तत् परिमाणमेषामिति। तद्+डति।) तत्परिमाणम्। ततगुणि इति भाषा। बहु-वचनान्तोऽयम्। इति वाकरणम्॥

ततुकालः, पुं, (स चासौ कालश्चेति।) वर्त्तमान-कालः। तत्पर्य्यायः। तदात्वम् १। इत्यमरः। २।८।२६॥ (यथा, कथासरित्सागरे। २। ८२।

"वर्षस्य वेद्मि वसुभिः स किलादरेण
ततुकालमेव समपूरयदुन्नतश्रीः॥")

ततुकालधीः, त्रि, (तस्मिन् काले कार्य्यकाले धीरुपस्थिता बुद्धिर्यस्य।) प्रत्युत्पन्नमतिः। उपस्थितबुद्धिः। इति हेमचन्द्रः। ३। ८॥

ततुक्रियः, त्रि, (सा क्रिया निसर्गतो वेतनलते यस्येति।) कर्म्मकारः। वेतनं विना भारवहादि-कर्त्ता। इत्यमरः॥

ततुत्वकः, पुं, (स चासौ त्वक्चेति स एव त्वचो वा।) सत्वः। इत्यमरः। ३। ४। ६॥ (यथा, रघुः। ३। १४।

"दिशः प्रसेदुर्मरुतो ववुः सुखाः
प्रदक्षिणार्चिर्हविरग्निराददे।

वभूव सर्व्वं शुभशंसि तत्क्षणं
भवो हि लोकाभ्युदयाय ताद्दशाम्॥")

तत्(त्व)त्वं, क्ली, (तनोति सर्व्वमिदमिति। तन्+क्विप् तुक् च। पृषोदरादित्वात् साधुः। यद्वा, "सर्व्वं खल्विदं ब्रह्म।" "ब्रह्मैवेदं सर्व्वम्।" इति श्रुतेस्तस्य ब्रह्मणो भावः इति। तत्+त्व।) स्वरूपम्। परमात्मा। विस्तृतपृथ्वम्। इति मेदिनी। वे, ६॥ वाद्यप्रभेदः। इति विश्वः॥ वस्तु। इति चिकाकशेषः॥ पैतः। इति धरणिः॥ * ॥ चतुर्विंशतितत्त्वानि यथा। क्षितिः १ आपः २ तेजः ३ मरुत् ४ व्योम ५ गन्धः ६ रसः ७ रूपम् ८ स्पर्शः ९ शब्दः १० नेत्रम् ११ नासिका १२ जिह्वा १३ कर्णः १४ त्वक् १५ हस्तः १६ पादः १७ सुखम् १८ पायुः १९ लिङ्गम् २० प्रकृतिः २१ मनः २२ बुद्धिः २३ अहङ्कारः २४। इति पुराण-तन्त्रे॥ तत्तु नानासृष्टिभिर्नानाविधमुक्तम्। तत्र त्रीणि तत्त्वानि यथा। सत्त्वम् १ रजः २ तमः ३। चतुर्विंशानि यथा। तेजः १ आपः २ पृथ्वी ३ आत्मा ४। पञ्चविंशानि यथा। शब्दः १ स्पर्शः २ रसः ३ गन्धः ४ रूपम् ५। षड्विंशानि यथा। क्षितिः १ आपः २ तेजः ३ वायुः ४ आकाशम् ५ परमात्मा ६। सप्तविंशानि यथा। क्षितिः १ आपः २ तेजः ३ वायुः ४ आकाशम् ५ जीवः ६ आत्मा ७। नवविंशानि यथा। पुरुषः १ प्रकृतिः २ महत्तत्त्वम् ३ अहङ्कारः ४ नभः ५ वायुः ६ ज्योतिः ७ आपः ८ क्षितिः ९। एकादशविंशानि यथा। श्रोत्रम् १ त्वक् २ चक्षुः ३ घ्राणम् ४ जिह्वा ५ वाक् ६ पाणिः ७ उपस्थः ८ पायुः ९ अङ्घ्रिः १० मनः ११। त्रयोदशविंशानि यथा। नभः १ वायुः २ ज्योतिः ३ आपः ४ क्षितिः ५ श्रोत्रम् ६ त्वक् ७ चक्षुः ८ घ्राणम् ९ जिह्वा १० मनः ११ जीवात्मा १२ परमात्मा १३। षोड़शविंशानि यथा। नभः १ वायुः २ ज्योतिः ३ आपः ४ पृथ्वी ५ शब्दः ६ स्पर्शः ७ रूपम् ८ रसः ९ गन्धः १० श्रोत्रम् ११ त्वक् १२ चक्षुः १३ जिह्वा १४ घ्राणम् १५ मनः १६। सप्तदशविंशानि यथा। पूर्व्वोक्तानि षोड़श १६ आत्मा च १७। पञ्च-विंशतितत्त्वानि यथा। पूर्व्वोक्तानि सप्तदश १७ पुरुषः १८ प्रकृतिः १९ महान् २० अहङ्कारः २१ सुक्ष्मम् २२ पाणिः २३ उपस्थः २४ पायुः २५। षड्विंशतिविधानि यथा। पूर्व्वोक्तानि पञ्चविंशतिः २५ जीवः २६। सप्तविंशति-विधानि यथा। पूर्व्वोक्तानि षड्विंशतिः २६ ईश्वरः २७। इति श्रीभागवतम्॥

तत्त्वज्ञानं, क्ली, (तत्त्वस्य ब्रह्मतत्त्वस्य ज्ञानम्।) बुद्धिगुणविशेषः। तच्च ब्रह्मज्ञानम्। इति हेम-चन्द्रः। २। २२५॥ यथा,—

"प्रमाणप्रमेयसंशय-प्रयोजनदृष्टान्त-सिद्धान्ता-वयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छल-जातिनिग्रहस्थानानां षोड़शपदार्थानां तत्त्व-ज्ञानान्निःश्रेयसाधिगमः।" इति गोतमसूत्रैः१॥

तत्त्वन्यासः, पुं, (तत्त्वानां न्यासः।) विष्णुपूजाविषयकन्यासविशेषः। यथा,—
"मादिकान्तानथार्णांश्च जीवादीकैकशो वदेत्।
नमः परायेत्युच्चार्य ततस्तत्त्वात्मने नमः॥
जीवं प्राणं हृदयं प्रोक्ता सर्व्वाङ्गेषु विन्यसेत्।
ततो हृदयमध्ये च तत्त्वत्रयञ्च विन्यसेत्॥
इत्यभ्युक्तीक्षततुर्व्विदधीत तत्त्व-
न्यासं समूर्ब्बकपराक्षरनल्युपेतम्।
भूयः पराय च तदाक्षयमात्मने च
नत्यन्तसुन्दरतु तत्त्वमनुक्रमेण॥
सकलवपुषि जीवं प्राणमायोज्य मध्ये
न्यसतु मतिमहङ्कारं मनश्चेति मन्त्री।
कसुखहृदयगुह्याङ्घ्रिष्वथोग्रब्दपूर्ब्बं
गुणगणमथ कर्णादिस्थितं श्रोत्रपूर्ब्बम्॥
वागादीन्द्रियवर्गमात्मनिलये त्वाकाशपूर्ब्बं गणं
मूर्द्धास्ये हृदये शिरे चरणयोर्द्वंतुपुष्करीकं हृदि॥
भूं बीजं हृत्पुष्करीकतत्त्वं हृदि विन्यसेत्।
हूं बीजं सूर्य्यमण्डलतत्त्वं हृदि विन्यसेत्॥
सं बीजं चन्द्रमण्डलतत्त्वं तत्रैव विन्यसेत्।
रं बीजं वह्निमण्डलतत्त्वं तत्रैव विन्यसेत्॥
यं बीजं परमेष्ठितत्त्वं वासुदेवञ्च मूर्द्धनि।
यं बीजमथ पुंस्तत्त्वं सङ्कर्षणमथो मुखे॥
लं बीजं विश्वतत्त्वञ्च प्रद्युम्नञ्च हृदि न्यसेत्।
वं बीजं तैजसतत्त्वञ्च अनिरुद्धमथस्तके॥
लं बीजं सर्व्वतत्त्वञ्च पादे नारायणं न्यसेत्।
क्ष्रौं बीजं लोपतत्त्वञ्च नृसिंहं सर्व्वगात्रके॥
एवं तत्त्वानि विन्यस्य प्राणायामं समाचरेत्॥"
अस्य फलं यथा,—
"तत्त्वन्यासं ततः कुर्य्यात् साधकः सिद्धिहेतवे।
ज्ञातेन येन देवस्य रूपतामेव याप्यसौ॥"
इति गौतमीयतन्त्रम्॥

ततूपरः, त्रि, (यः परोऽस्य। यद्वा, तदेव परं सर्व्वोत्तममस्य।) आसक्तः। इत्यमरः। ३। १। ६॥ (यथा, भागवते। ४। १५। ६।
"एष साध्वाहरेरंशो जातो लोकरिरक्षया।
इयञ्च तत्परा हि श्रीरनुजज्ञेऽनपायिनी॥")

ततूपरायणः, त्रि, (तदेव परमयनमस्य।) तदासक्तः। यथा,—
"मुह्यन्ति यद्यन्येऽन्यजाः ज्ञानपरायणाः॥"
इति पद्मोत्तरखण्डम्॥

ततूफलः, पुं, (तदेव फलमस्य। यद्वा, तनोति तन्यते वा। तन + क्विप् तुक् च। ततू विस्तृतं फलमस्य।) कुवलयम्। कुष्ठनामौषधिः। चौरनामसुगन्धिद्रव्यम्। इति धरणिः॥

तत्र, इ कुटुम्बधारणे। इति प्राचः। (भ्वां-परं-अकं-सेट्।) द्वावेतौ धारणेऽर्थे वर्त्तेते। इति चान्द्राः। केचित्तु कुटुम्बधातुममन्यमानास्तत्रिधातुः कुटुम्बस्य धारणेऽर्थे वर्त्तते इत्याहुः। तत्र धारणे इत्यनेनैवेरसिद्धे इदनुबन्धो वेदेभूचारणभेदार्थः। इति दुर्गादासः॥

तत्र } इ साढे। मोहे। (भ्वां-परं-अकं-सेट्।)
तद्र } दन्त्यवर्गाद्योपधः। तन्त्रीः। दन्त्यवर्गद्वितीयोपधः। तन्त्रीः। सौत्रधातुरयम्। इति दुर्गादासः॥

तत्र, इ क ड धारणे। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) आदिमध्ययोस्कारः यैयो रेफयुक्तः। धारणं धरणम्। भाषायामस्य विस्तारणे प्रायः प्रयोगः। इ क ड, तन्त्रयते तन्त्रम् तन्त्रवायः। इति दुर्गादासः॥

तत्र, अ, (तस्मिन्निति। तद् + "सप्तम्याश्चल्।" ५।३।१०। इति चल्।) तस्मिन्। तयोः। तेषु। इति व्याकरणम्॥ सेखाने इति भाषा। (यथा, मनुः। २। ११२।
"धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा।
तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे॥")

तत्रभवान्, [त्] त्रि, (इतराभ्योऽपि दृश्यन्ते इति प्राग्दीव्यतीयः प्रथमार्थे चल्। ततः सुप्सुपेति समासः।) श्राद्धः। इति जटाधरः॥

तथा, अ, (तेन प्रकारेण। तद् + "प्रकारवचने थाल्।" ५।३।२३। इति थाल्। तेन प्रकारेत्यर्थः। यथा, मनुः। १। ४।
"स तैः दृष्टस्तथा सम्यगमितौजा महात्मभिः।
प्रत्युवाचार्च्य तान् सर्व्वान् महर्षीन् श्रूयतामिति॥")
साम्यम्। इत्यमरः। ३। ४। ६॥ (यथा, मनुः। ६। ६०।
"यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम्।
तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिम्॥")
अभ्युपगमः। दृष्टप्रतिबन्धम्। वसुचयः। (यथा, देवीभागवते। १। २। २६।
"सप्तादशञ्च तथा भारतं मुनिना श्रुतम्।
इतिहास इति प्रोक्तं पञ्चमं वेदसम्मतम्॥")
निश्चयः। इति मेदिनी। थे, ३६॥ (यथा, रघुः। १। २६।
"तं वेधा विदधे नूनं महाभूतसमाधिना।
तथा हि सर्व्वे तस्यासन् परार्थैकफला गुणाः॥")

तथागतः, पुं, (यथा पुनरावृत्तिर्न भवति तथा तेन प्रकारेण गतः। यद्वा, तथा सत्यं गतं ज्ञानं यस्य। सुप्सुपेति समासः।) बुद्धः। इत्यमरः। १। १। १३॥ (यथा, सर्व्वदर्शनसंग्रहे।
"यथा गतास्ते सुनयः शिवां गतिं
तथा गतिं सोऽपि गतस्तथागतः।"*॥
तथा तेन प्रकारेणागतः।) पूर्व्वोक्तप्रकारेणागते, त्रि॥ (यथा, महाभारते। १। ७०। ५।
"ततो बभूव नगरे सुमहान् हर्षजः स्वनः।
जनस्य संप्रहृष्टस्य नलं दृष्ट्वा तथागतम्॥")

तथाच, अ, (तथा च, च च इति द्वन्द्वसमासः।) पूर्व्वोक्तार्थदृढ़ीकरणम्। इति संक्षिप्तसारव्याकरणम्॥

(यथा, मनुः। ६। १६।
"तथाच श्रुतयो वक्त्रो निगीता निगमेष्वपि॥"
अत्रयज्ञयेनैव सिद्धेः केचिदयं ग्रन्थो न मन्यते॥)

तथैव, अ, (तथा च एव च।) तद्वदेव। सेइ प्रकार इति भाषा। यथा, चाणक्ये। ४२।
"अस्ति पुत्रो वशे यस्य भार्य्या भर्त्तुस्तथैव च॥"
अत्रयज्ञयेनैव सिद्धेः केचिच्छब्दोऽयं न मन्यते॥)

तथ्यं, क्ली, (तथा साधु। तथा + "तत्र साधुः।" ४। ४। ६८। इति यत्।) सत्यम्। (यथा, मनुः। ८। २७४।
"कार्य्यं वाप्यथवा खल्पमल्पं वापि तथाविधम्।
तत्थेनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम्॥")
तद्वति त्रि। इत्यमरः। १। ६। २२॥ (यथा, महाभारते। ७। १५७। ३।
"यदर्ज्जुनगुणांस्तथ्यान् कौरव्यानं नराधम!।
शूरदेवात् सुतुर्ब्बुद्धे! त्वं भर्तृ सयसि मातुलम्॥")

तदा, अ, (तस्मिन् काले। "तदो दा च।" ५। ३। १६। इति दा।) तस्मिन् काले। इत्यमरः। ३। ४। २२॥ सेइ समये इति भाषा॥ (यथा, मनुः। १। ५५।
"न च स्वं कुरुते कर्म्म तदोद्क्रामति मूर्त्तितः॥")

तदात्वं, क्ली, (तदा इत्यस्य भावः। तदा + "तस्य भावस्त्वतलौ।" ५। १। ११६। इति त्व।) तत्कालः। वर्त्तमानकालः। इत्यमरः। २। ८। २६॥ (यथा, महाभारते। २। ५६। १४।
"स चोपभोगजोभान्यो हिरण्यार्थे परन्तप!।
आयतिञ्च तदात्वञ्च उभे सत्यो वनाश्नुयत्॥")

तदानीं, [म्] अ, (तस्मिन् काले। "तदो दा च।" ५। ३। १६। इति चकारात् दानीम्।) तस्मिन् काले। इत्यमरः। ३। ४। २२॥ (यथा, ऋग्वेदे। १०। १२६। १।
"नासदासीन्नोसदासीत्तदानीं
नासीद्रजो नो व्योमा परो यत्॥")

तदासुखं, क्ली, (तदा तस्मिन्नेव काले सुखं यस्य।) आरम्भः। इति भूरिप्रयोगः॥

तद्दिनं, [म्] अ, (तत् प्रखरकिरणत्वेन प्रसिद्धं दिनं दिनांशुः।) दिनमध्यम्। (तत्रैव दिनम्।) प्रतिदिनम्। इति हेमचन्द्रः॥ (तदेव दिनम्।) पूर्व्वोक्तदिने, क्ली॥

तद्धनः, पुं, (तदेव अव्ययेनाहीनं धनं यस्य।) कृपणः। इति हेमचन्द्रः। २। ३२॥ (तदेव धनमिति विग्रहे पूर्व्वोक्तधने, क्ली॥)

तद्वलः, पुं, (तस्मिन् तस्मे एव बलं यस्य।) वायुविशेषः। इति हेमचन्द्रः। ३। ४४४॥

तन, उ कि उपक्षतौ। अश्लाघायाम्। ग्रन्थोपतापयोः। इति कविकल्पद्रुमः॥ (चुरां पक्षे भ्वां-परं-अकं-सकं च-सेट्। उदित्त्वात् क्त्वेट्।) उ, तनित्वा तत्वा। कि, तानयति तनति। उपक्षतिरपकारः। अश्लाघा हिंसावर्ज्जनम्। सुनीतिरिति गोविन्दभट्टः। उपसर्गादिर्घकः। दैर्घकं दीर्घीकरणम्। वितानयति यः कीर्त्तिं वितनत्यमलं यशः। इति हलायुधः। इति दुर्गादासः॥

तन, द ज उ विस्तृतौ। इति कविकल्पद्रुमः॥ (तनां-उभं-सर्कं-सेट्। उदित्वात् क्त्वेट्।) द ज, तनोति तनुते पुत्रं ऋषिः। उ, तनित्वा तत्वा। इति दुर्गादासः॥

तनयः, पुं. (तनोति विस्तारयति कुलमिति। तनु+"वलिमलितनिभ्यः कयन्।" उणा। ४। ६६। इति कयन्।) पुत्रः। इत्यमरः। २। ६। २७॥ (यथा, मनुः। ३। १६।

"भूतावेदी पतत्यत्रेरुतथ्यतनयस्य च॥")

तनया, स्त्री, (तनोति कुलमिति। तन+कयन्+टाप्।) कन्या। इत्यमरः। २। ६। २७॥ (यथा, भागवते। १। १६। २।

"य उत्तरस्य तनयामुपयेमे इरावतीम्॥") चक्रकुल्यालता। इति शब्दचन्द्रिका॥

तनिष्ठः, त्रि, अयमनयोरतिशयेन तनुः। (तनु+इष्ठन्।) क्षुद्रः। इति व्याकरणम्॥

तनीयान् [स्] त्रि, अयमेषामतिशयेन तनुः। (तनु+ईयसुन्।) अल्पः। इति व्याकरणम्॥

तनुः, स्त्री, (तनोति तन्यते इति वा। तन+"भृञ्शीतृचरीति।" उणा। १। ७। इति उः।) शरीरम्। (यथा, विष्णुपुराणे। १। १७। ५।

"देवाः स्वर्गं परित्यज्य तत्रासात् सुनिसत्तम!। विचेरुरवनौ सर्व्वे विभ्राणा मानुषीं तनुम्॥") त्वक्। इति मेदिनी। ने, ६॥ स्त्री। इति राजनिर्घण्टः॥

तनुः, त्रि, (तन+"भृञ्शीति।" उणा। १। ७। इत्नुः।) अल्पः। विरलः। (यथा, मनुः। ३। १०।

"तनुरोमकेशदशनां मृदङ्गीमुद्वहेत् स्त्रियम्॥") क्षुद्रः। इति मेदिनी। ने, ६॥ (यथा, आर्य्यासप्तशत्याम्। ५२५। [गात्रि!]॥")

"वितरन्ती रसमन्तर्मनाङ्नैर्भार्यं तनोषि तनु-

तनुः, [स्] स्त्री, (तनोति तन्यते वा। तन+"अर्त्तिपृवपियजितनिधनितपिभ्यो नित्।" उणा। २। ११८। इति उसिः स च नित्।) शरीरम्। इत्यादिकोषः॥

तनुच्छदः, पुं, (तनुर्विरला छदा यस्य।) आम्रातकः। इति राजनिर्घण्टः॥

तनुच्छायः, पुं, (तनुर्विरला छाया यस्य।) आम्रवर्ब्बूरकवृक्षः। इति राजनिर्घण्टः॥ (तनोश्छाया।) शरीरच्छायायां स्त्री स्त्री च॥

तनुजः, पुं, (तनोः शरीरात् जायते इति। जन+"कर्म्मण्यपि दृश्यते।" ३। २। १०१। इति डः।) पुत्रः। इति हलायुधः॥ (यथा, पञ्चतन्त्रे। ५। २३।

"जामी देहि सुसेवितोऽपि बहुशा
प्रोज्झन्ति सद्बान्धवा
द्योतन्ते न गुणाश्चलन्ति तनुजाः
क्षारीभवन्त्यापदः।
भार्य्या नो तमवैति जातु भजते
नो यान्ति मित्राणि च
न्यायारोपितविक्रमाणि नरान् वेषां
न हि स्याद्धनम्॥")

तनुजा, स्त्री, (तनोः शरीरात् जायते इति। जन+डः+टाप्।) कन्या। इति शब्दरत्नावली॥

तनुजं, क्ली, (तनुं त्रायते इति। त्रै+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) वर्म्म। इत्यमरः। २। ८। ६४॥

तनुत्राणं, क्ली, (त्रायतेऽनेनेति। त्रै+करणे ल्युट्। तनोः शरीरस्य त्राणम्।) तनुत्रम्। इति हलायुधः॥ (यथा, महाभारते। ३। १७४। ४।

"इदञ्च मे तनुत्राणं प्रायच्छन्मघवान् प्रभुः॥") शरीररक्षणञ्च॥

तनुत्वचा, स्त्री, (तनुः तन्वी त्वक् वल्कलमस्याः।) क्षुद्रामिमत्स्यः। इति राजनिर्घण्टः॥

तनुपत्रः, पुं, (तनूनि पत्राणि यस्य।) इक्षुदीर्घः। इति राजनिर्घण्टः॥

तनुभस्त्रा, स्त्री, (तनोः शरीरस्य भस्त्रा इव। निश्वासवायुनिर्गमात्तथात्वम्।) नासिका। इति शब्दरत्नावली॥

तनुरसः, पुं, (तनोर्देहस्य रस इव तनोर्निर्गतो रस इति वा।) वर्म्मः। इति हारावली। १५४॥

तनुरुट्, [ह्] क्ली, (तनौ शरीरे रोहतीति। रुह+क्विप्।) तनूरुहम्। इति शब्दरत्नावली॥

तनुरुहं, क्ली, (तनौ रोहति उत्पद्यते इति। रुह+"रुगुपधाच्चाप्रीकिरः कः।" ३। १। १३५। इति कः।) तनूरुहम्। इति शब्दरत्नावली॥

तनुलः, त्रि, (तन्यते स्म इति। तन+उलच्।) विस्तृतः। इति संक्षिप्तसारे उणादिवृत्तिः॥

तनुवातः, पुं, (तनुः क्षीणो वातः वायुर्यत्र।) नरकविशेषः। इति हेमचन्द्रः। ५। २॥

तनुबीजः, पुं, (तनु क्षीणं स्वल्पमात्रं वा बीजमस्य।) राजबदरः। इति राजनिर्घण्टः॥

तनुव्रणः, पुं, (तनुः क्षुद्रः स्वल्पः व्रणो यत्र।) वल्मीकरोगः। इति शब्दरत्नावली॥

तनुसञ्चारिणी, स्त्री, (तनु अल्पमात्रं यथा स्यात् तथा सञ्चरतीति। सम्+चर+णिनिः ङीप् च।) बालिका स्त्री। इति शब्दमाला॥

तनूः, स्त्री, (तनु+ऊङ्।) शरीरम्। इत्यमरः। २। ६। ७१॥

तनूकृतः, त्रि, (अतनुस्तनुरकारि। कृ+कर्म्मणि क्तः।) तनूः। अल्पीकृतः। इत्यमरः। ३। १। ६६॥

तनूजः, पुं, (तन्वाः शरीरात् जायते इति। जन+डः।) पुत्रः। इति जटाधरः॥ (यथा, रघुः। ५। ५३।

"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य॥"

स्त्री, कन्या॥)

तनूनपात्, [द्] पुं, (तनूनपं हृतं अत्तीति। अद्+विच् किञ्चिदिकं। यद्वा, तनूं स्वशरीरं न पातयतीति। पत+णिच्+क्विप्।"नभ्राण्नपात्।" ६। ३। ७५। इति निपातितः।) अग्निः। (यथा, ऋग्वेदे। ३। २६। ११।

"तनूनपाद्यते गर्भ आसुरो
नराशंसो भवति यद्विजायते॥")
चित्रकवृक्षः। इत्यमरः। २। ४। ८०॥

तनूरुहं, क्ली, (तन्वां रोहतीति। रुह+कः।) रोम। (यथा, भागवते। ७। ८। २२।

"चन्द्रांशुगौरैरुरितं तनूरुहै-
र्विभ्राजमानाननकुण्डलोल्लसम्॥"

तथाच शिवपुराणे। वायुसंहितायाम्। १। १४।

"नमश्चकार तं दृष्ट्वा हृष्टसर्व्वतनूरुहः॥")
पतत्रम्। इति मेदिनी। हे, ३०॥

तनूरुहः, पुं, (तन्वाः शरीरात् रोहति उत्पद्यते। रुह+कः।) पुत्रः। गरुत्। (यथा, हरिवंशसंहितायाम्। ६३। १।

"कुक्कुटक्षतजातनूरुहाङ्कुलि-
ताम्रवक्त्रनखचूलिकः सितः॥")
लोम। इति हेमचन्द्रः॥

तनूह्रदः, पुं, (तन्वाः तन्वां वा ह्रद इव।) पायुः। इति चिकित्सारत्नम्॥

तनूच, उ इत्यौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सर्कं-सेट्।) उ, तनित्वा तत्वा। इति दुर्गादासः॥

तनूच, उ घ सङ्कुचि। इति कविकल्पद्रुमः॥ (भ्वां-परं-चर्कं-सेट्।) उ, तनित्वा तत्वा। घ, तनत्भूमि योम विस्तृतम्। इति दुर्गादासः॥

तनूज, उ घ सङ्कोचे। इति कविकल्पद्रुमः॥ (भ्वां-परं-चर्कं-सेट्।) उ, तञ्जित्वा तञ्जा। घ, तनज्भूमि योम विस्तृतम्। इति दुर्गादासः॥

तन्तुः, पुं, (तन्यते विस्तीर्य्यते इति तनोति वा। तन+"सितनिगमीति।" उणा। १। ७०। इति तुन्।) सूत्रम्। इत्यमरः। २। १०। २८॥ (यथा, महाभारते। १२। ४७। २२।

"यस्मिन् नित्यं तते तन्तौ इदं सर्गिव विश्वति॥")
आहः। इति हेमचन्द्रः॥ सन्ततिः। यथा,—

"आत्मःस्थः सर्व्वभूतानामात्मा योगेश्वरो हरिः।
स्वमायया सृष्टयोर्म्मध्ये वैराजाः कुरुतन्तवे॥"

इति श्रीभागवतम्॥

तन्तुकः, पुं, (तन्तुरिव तन्तुनेव वा कायतीति। कै+कः। तन्तु+संज्ञायां कन् वा।) तन्तुभः। सर्षपः। इत्यमरटीकायां रमानाथः॥ (यथा, सुश्रुते कल्पस्थाने ४ अध्याये। "पिङ्गलस्तन्तुकपुष्यप्राप्तुः षड्गोऽग्निको वभ्रुकषायः॥")

तन्तुकाष्ठं, क्ली, (तन्तुसमन्वितं काष्ठम्।) तूली। इति शब्दरत्नावली॥ ताँतेर काट इति भाषा॥

तन्तुकी, स्त्री, (तन्तुरिव कायतीति। कै+कः ङीप् च।) नाड़ी। इति राजनिर्घण्टः॥

तन्तुकीटः, पुं, (तन्तूत्पादकः कीट इति। आकपार्थिववत् मध्यपदलोपी समासः।) कौषकारः। इति जटाधरः॥ गुटिपोका इति भाषा॥

तन्तुगः, पुं, (तन+बाहुलकात् तुनन् निपातनात् गत्वं दन्त्यनकारान्त इत्येके।) आहः। इति हेमचन्द्रः॥ डाङ्गर इति भाषा॥

तन्त्रपर्व्व, [न्] क्ली, (तन्त्रः यज्ञोपवीतेः तत्प्रदानाय यत् पर्व्व तिथिरित्यर्थः।) परमेश्वरोपवीतिदानतिथिः। यथा श्रावणी पूर्णिमा। इति तिथ्यादितत्त्वम्॥

तन्त्रभाजः, पुं, (तन्त्रर्भाज इव।) याडः। इति हेमचन्द्रः॥

तन्त्रनिर्य्यासः, पुं, (तन्त्रेण निर्य्यासः तन्त्रवत् निर्य्यासो यस्य वा।) ताडः। इति शब्दरत्नावली॥

तन्त्रभः, पुं, (तन्त्रुरिव भातीति। भा+कः।) सर्षपः। इत्यमरः। २।४।१७॥ वत्सः। इति जटाधरः॥

तन्त्ररं, क्ली, (तन्त्ररस्यतेति। तन्त्र+कृञादित्वात् रः।) रत्नाजम्। इति शब्दरत्नावली॥

तन्त्ररं, क्ली, (तन्त्ररम्। रस्य लत्वम्।) रत्नाजम्। इति हेमचन्द्रः॥

तन्त्रवायः, पुं, (तन्त्रून् वयतीति। वय+"कर्म्मण्यण्।" ३। २। १। इति अण्।) तन्त्रवायः। इति जटाधरः॥ ताँति इति भाषा। तन्त्रम्। इति शब्दभाषा॥ ताँतु इति भाषा॥

तन्त्रुवायः, पुं, (तन्त्रून् वयति विस्तारयति जालाकारेणेति। वे+"अंशायाच।" ६। २। ७७। इत्वम्।) लूता। इत्यमरः। २।४।१३॥ (तन्त्रून् वयतीति। वे+"कर्म्मण्यण्।" ३। २। १। इत्वम्।) तन्त्रवायः। इति शब्दरत्नावली॥ (यथा, मनुः। ८। ३६७।
"तन्त्रुवायो दशपलं दद्यादेकपलाधिकम्॥")

तन्त्रुविग्रहा, स्त्री, (विग्रह्यतेऽसौ। वि+ग्रह+अप्। विग्रहो देहः। तन्त्रुभिर्निर्म्मितो विग्रहोऽस्याः।) कदली। इति त्रिकाण्डशेषः॥

तन्त्रुशाखा, स्त्री, (तन्त्रुवपनार्थं या शाखा यज्ञमित्यर्थः।) तन्त्रुवपनयज्ञम्। ताँतघर इति भाषा। तत्पर्य्यायः। गर्ज्जिका २। इति हेमचन्द्रः॥

तन्त्रुसन्ततं, त्रि, (तन्त्रुना तन्त्रुभिर्वा सन्ततं व्याप्तम्।) क्षत्रविस्तृतवस्त्रादि। सिङ्गार कापड़ इति भाषा। तत्पर्य्यायः। ऊतम् २ स्यूतम् ३ उतम् ४। इत्यमरः। ३। १। १०१॥

तन्त्रुसारः, पुं, (तन्त्रुः एव सारो यत्र।) गुवाकवृक्षः। इति त्रिकाण्डशेषः॥

तन्त्रं, क्ली, (तनोति तन्यते इति वा। तन+कर्त्रादौ यथायथं ष्ट्रन्। तत्रि कुटुम्बभारत्वे+षण् वा।) कुटुम्बभरत्वम्। (कुलप्रतिष्ठादिकक्षितिः। यथा, महाभारते। १३।४८।६।
"सर्व्वानुपायानथ सम्प्रधाय
बहुद्धरेत् स्वस्य कुलस्य तन्त्रम्॥")
सिद्धान्तः। ओषधिः। प्रधानम्। तन्त्रवायः। परिच्छदः। श्रुतिशास्त्राविशेषः। हेतुः। उभयार्थप्रयोजकम्। इतिकर्त्तव्यता। इति मेदिनी॥ राष्ट्रम्। परच्छन्दः। करणम्। अर्थबोधकः। तनुः। सैन्यम्। खराश्वचिन्ता। इति हेमचन्द्रः॥ (यथा, माघे। २। ८८।
"तन्त्रावापविदा योगैर्मङ्कलान्यधितिष्ठता॥")
प्रबन्धः। इति शब्दरत्नावली॥ ग्रन्थः। इति धरणिः। धनम्। यज्ञम्। वपनवापनम्। (यथा, महाभारते। १।३।१३०। "तदापश्यत् स्त्रियौ तन्त्रे अधिरोप्य सुवेमे पटं वयन्तौ॥") कुलम्। इति नानार्थध्वनिमञ्जरी। (ज्ञानम्। इति विश्वः। यथा, देवीभागवते। २।११।१६। "अवैरश्रमतन्त्रार्थं बालदैत्यासमन्वितम्॥" व्यवहारः। नियमादिः। यथा, महाभारते। १। १०३। २६।
"मुक्ता त्वं प्रतिपद्यस्व प्राप्तैः सह पुरोहितैः।
आपद्धर्म्मार्थकुशलैर्लोकतन्त्रमवेक्ष्य च॥")
शिवोक्तशास्त्रम्। तच्च चतुःषष्टिसंख्यकम्। यथा,—
"सिद्धेश्वरं महातन्त्रं कालीतन्त्रं कुलार्णवम्।
ज्ञानार्णवं नीलतन्त्रं पितृकारीतन्त्रमुत्तमम्॥
देवागमं उत्तराख्यं श्रीक्रमं सिद्धियामलम्।
मतस्यसूक्तं सिद्धसारं सिद्धिसारस्वतं तथा॥
वाराहीतन्त्रं देवेशि! योगिनीतन्त्रमुत्तमम्।
गवेश्वरविमर्षिण्यौ तन्त्रं निलातन्त्रं शिवागमम्॥
चामुण्डाख्यं महेशानि! सुक्ष्मामाख्यतन्त्रकम्।
हंसमाहेश्वरं तन्त्रं निरुत्तरमनुत्तमम्॥
कुलप्रकाशकं देवि! कल्पं गान्धर्व्वकं शिवे!।
क्रियासारं विचन्द्राख्यं खतन्त्रं तन्त्रमुत्तमम्॥
सम्मोहनं तन्त्रराजं ललिताख्यं तथा शिवे!।
राधाख्यं मालिनीतन्त्रं वज्रयामलमुत्तमम्॥
दुष्टतन्त्रीक्रमं तन्त्रं गवाक्षं सुकुसुदिनी।
विमुद्धेश्वरतन्त्रञ्च मालिनीविजयं तथा॥
समयाचारतन्त्रञ्च भैरवीतन्त्रमुत्तमम्।
योगिनीहृदयं तन्त्रं भैरवं परमेश्वरि!॥
सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम्।
तन्त्रान्तरञ्च देवेशि! नवरत्नेश्वरं तथा॥
कुलचूड़ामणितन्त्रं भावचूड़ामणीयकम्।
तन्त्रदीपप्रकाशञ्च कामाख्यातन्त्रकं तथा॥
कामधेनु कुमारी च भूतडामरसंज्ञकम्।
मालिनीविजयं तन्त्रं यामलं ब्रह्मयामलम्॥
विश्वसारं महातन्त्रं महाकालं कुलाद्भुतम्।
कुलोड्डीशं कुलिकाख्यं यन्त्रचिन्तामणीयकम्॥
एतानि तन्त्ररत्नानि सफलानि युगे युगे।
कालीविलासकादीनि तन्त्राणि परमेश्वरि!॥
कालकल्पे सुसिद्धानि अश्वक्रान्तासु भूमिषु।
महाचीनादितन्त्राणि व्यविकल्पे महेश्वरि!॥
सुसिद्धानि वरारोहे! रथक्रान्तासु भूमिषु॥"
इति महासिद्धिसारस्वतम्॥ *॥
अपि च।
"चतुःषष्टिश्च तन्त्राणि यामलादीनि पार्व्वति!।
सफलानीह वाराहे! विष्णुक्रान्तासु भूमिषु॥
कल्पभेदेन तन्त्राणि कथितानि च यानि च।
पाशवक्षोभणायैव विफलानीह सुन्दरि!॥"
इति महाविश्वसारतन्त्रम्॥
तन्त्रागमस्य लक्षणं यथा,—
"सृष्टिश्च प्रलयश्चैव देवतानां यथार्च्चनम्।
साधनञ्चैव सर्व्वेषां पुरश्चरणमेव च॥
षट्कर्म्मसाधनञ्चैव ध्यानयोगश्चतुर्व्विधः।
सप्तभिर्लक्षणैर्युक्तमागमं तद्विदुर्बुधाः॥" *॥
यामलस्य लक्षणम्।
"सृष्टिश्च ज्योतिषाख्यानं नित्यञ्चात्यप्रदीपनम्।
क्रमश्चैव वर्णभेदो जातिभेदस्तथैव च॥
युगधर्म्मश्च संख्यातो यामलस्यारलक्षणम्॥" *॥
तन्त्रस्य लक्षणम्।
"सर्गश्च प्रतिसर्गश्च मन्वनिर्णय एव च।
देवतानाञ्च संस्थानं तीर्थानाञ्चैव वर्णनम्॥
तथैवाश्रमधर्म्मश्च विप्रसंस्थानमेव च।
संस्थानञ्चैव भूतानां यन्त्राणाञ्चैव निर्णयः॥
ऋतुप्रतिष्ठिविधानाञ्च तरूणां कल्पसंश्रितम्।
संस्थानं ज्योतिषाञ्चैव पुराणाख्यानमेव च॥
लोकस्य वर्णनञ्चैव व्रतानां परिभाषणम्।
श्रौताश्रौतस्य शास्त्रस्य नरकाणाञ्च वर्णनम्॥
हरशास्त्रस्य शास्त्रस्य स्त्रीपुंसोश्चैव लक्षणम्।
राजधर्म्मो दानधर्म्मो युगधर्म्मस्तथैव च॥
व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम्॥
इत्यादिभिर्लक्षणैर्युक्तं तन्त्रमित्यभिधीयते॥" *॥
तस्य माहात्म्यम्।
"विष्णुर्मेरौ देवानां हृदागासुदधिर्यथा।
नदीनाञ्च यथा गङ्गा पर्व्वतानां हिमालयः॥
व्रतत्यः वर्म्मदाचार्य्यो राजामिन्द्रो यथा वरः।
देवीनाञ्च यथा दुर्गा वर्णानां ब्राह्मणो यथा॥
तथा समस्तशास्त्राणां तन्त्रशास्त्रमनुत्तमम्॥
सर्व्वकामप्रदं पुण्यं तन्त्रं वै वेदसम्मितम्।
कीर्त्तनं देवदेवस्य हरस्य मतमेव च॥
पावनं श्रद्दधानानामिह लोके परत्र च॥" *॥
तस्य श्लोकसंख्या यथा,—
"न शक्यं विस्तराद्वक्तुमपि वर्षशतैरपि।
संक्षेपादहं प्रवक्ष्यामि लोकसंख्योक्तवर्त्मना॥
दिवि देवे नवलक्षं पातालेऽब्रह्मशासने।
लक्षमात्रं भारते च स्थितौ तन्त्राणि यानि च।
आगमं त्रिविधं प्रोक्तं चतुर्थमेश्वरं स्मृतम्॥
कल्पश्चतुर्व्विधः प्रोक्तः आगमो डामरस्तथा।
यामलश्च तथा तन्त्रं तेषां भेदाः पृथक् पृथक्॥
सृष्टिसंख्यं प्रपञ्चश्च सारदाख्यश्च नारदः।
महार्णवश्च कपिलो योगः कल्पः कपिञ्जलः॥
अष्टतन्त्रविधिर्वीरश्च सिद्धसंवरतन्त्रथा।
प्रथमोऽष्टसहस्राणि श्लोका दश प्रकीर्त्तिताः॥
द्वितीयो मुक्तकेशश्च षट्सहस्राणि संख्यया।
श्लोकाः श्रुताईसंख्याताश्चतुर्थोक्षिसहस्रकः॥
श्रुतद्वयं साधिकञ्च श्लोकानां पञ्चविंशतिः।
त्रिंशोत्तरसहस्राणि श्लोकानां भानुसंख्यया॥
प्रपञ्चे प्रथमे तन्त्रे द्वितीये वसुसंख्यया।
सहस्राणि तथा श्लोकाः सप्तविंशतिसंख्यया॥
भूतनेत्रसहस्राणि तृतीये पञ्चसहस्रकम्।
श्रुतत्रयं सहस्रञ्च श्लोकाः प्रपञ्चः कथितस्त्रिधा॥
कलासंख्या सहस्राणि शारदायाः प्रकीर्त्तिताः।
पञ्चविंशाधिकाः श्लोका वसुश्लोकाश्च नारदे॥
विंशतिश्च सहस्राणि षट्सहस्राणि संख्यया।
वसुश्लोकाश्च कथिताः कपिले श्लोकसंख्यया॥
नवोदग्रसहस्राणि कालोत्तरश्रुतत्रयम्।

श्लोकसंख्याससुद्दिष्टं योगे कल्पे च संख्यया ॥
वाणसंख्यासहस्राणि श्लोका नवति: कीर्त्तिता: ।
श्लोकानान्तु सहस्राणि अष्टाविंशतिसंख्यया ॥
श्लोकाश्च भानुसंख्यातास्तन्त्रेऽपि च कपिञ्जले ।
अन्तस्तुद्दौ सहस्राणि पञ्चश्लोकाधिकानि च ॥
पञ्चैव कथिता नेत्रसंख्यातानि यथार्थत: ।
वीरागमे षड़धिकानि शतानि परिसंख्यया ॥
सहस्राणि च तावन्ति श्लोकानान्तु यथार्थत: ।
पञ्चाधिकसहस्राणि श्लोकानान्तुसंख्यया ॥
सिद्धसम्भरणोल्लासे ऐश्वरेण यथा पुरा ॥ * ॥
डामर: षड़्विधो ज्ञेय: प्रथमो योगडामर: ॥
श्लोकास्तत्र त्रयस्त्रिंशत् तथा पञ्चशतानि च ।
त्रिविंशतिसहस्राणि श्लोकानि वेद संख्यया ।
एकादशसहस्राणि संख्याता: शिवडामरे ॥
श्लोका: सर्व्वेव निखिल ईश्वरेणैव भाषिता: ।
तावत्श्लोकसहस्राणि पञ्चश्लोकशतानि च ।
गुणोत्तराणि दुर्गाया डामरे कथितानि च ॥
नवश्लोकसहस्राणि नवश्लोकशतानि च ।
सारस्वते तथा श्लोका: पञ्चैव परिकीर्त्तिता: ॥
खरसंख्यासहस्राणि श्लोकानां ब्रह्मडामरे ।
पञ्चोत्तरशतान्यत्र संख्यातानि शिवेन तु ॥
बहि: श्लोकसहस्राणि गान्धर्व्वे डामरोत्तमे ।
श्लोकाश्च बहिसंख्याता ब्रह्मणायत्नयोनिना ॥
वामला: षट्च संख्यातास्तन्त्रादावादियामले ।
द्वात्रिंशच्च सहस्राणि त्रयस्त्रिंशत्शतानि च ॥
द्वितीये ब्रह्मसंज्ञे ते द्वात्रिंशत्तिथ संख्यया ।
सहस्राणि शतान्यत्र तान्येव कथितानि च ॥
तावत्संख्यासहस्राणि शतानि परिसंख्यया ।
विंशतिश्च तथा संख्या श्लोकाश्च विष्णुयामले ॥
कालसंख्यासहस्राणि वेदसंख्याशतानि च ।
पञ्चषष्टिसंख्या श्लोका: कनिष्ठे रुद्रयामले ।
नवश्लोकसहस्राणि त्रयोदशशतानि च ।
द्वात्रिंशत्तिसंख्या श्लोका गणेशे यामलोत्तमे ॥
रविसंख्यासहस्राणि आदित्याख्ये तु यामले ।
तन्त्रे नीलपताकायां सहस्राणि च पञ्च च ॥
पञ्चविंशतिश्लोकाश्च कथिता वामकेश्वरे ।
त्रयोदशसहस्राणि द्वे शते विंशतिसंख्या ॥
श्लोका लघुत्रये तन्त्रे संख्याताश्चन्द्रवेदिभि: ।
गजसंख्यासहस्राणि नेत्रे संख्याशतानि च ॥
सप्तश्लोकास्तथैवात्र तन्त्रे योगार्णवोत्तमे ।
दशश्लोकसहस्राणि तावन्त्येव शतानि च ॥
मायाख्ये च महातन्त्रे यथार्थत: प्रकीर्त्तिता: ।
पञ्चश्लोकसहस्राणि तावन्त्येव शतानि च ॥
शतार्द्धसंख्या श्लोका दधिवाह्नृत्तिसंज्ञके ।
दशश्लोकसहस्राणि तावन्त्येव शतानि च ॥
त्रयोदश तथा श्लोका: कालिकाख्ये च तन्त्रके ।
कामेश्वर्य्यास्तन्त्ररे सहस्राणि त्रयं महत् ॥
श्लोकानां संख्या चात्र तन्त्रराजे च संख्या ।
नवश्लोकसहस्राणि नवश्लोकशतानि च ॥
द्वात्रिंशति सहस्राणि हरगौर्य्योश्च तन्त्रके ।
तथा च विंशति: श्लोकास्तन्त्रेऽस्मिन् परि-
कीर्त्तिता: ।
अर्कसंख्यासहस्राणि द्वितीये तन्त्रवेदिभि: ।
अष्टाविंशतिश्च श्लोका: सङ्ख्यातास्तन्त्रनिर्ण्णये ॥
कुलिकाख्ये महातन्त्रे श्लोकाश्च दशसंख्यया ।
सहस्राणि तथा सप्तशतानि मनीषिभि: ॥
द्वितीये षट्सहस्राणि तदर्द्धञ्च कनिष्ठके ।
अर्कसंख्यासहस्राणि तथाङ्कशतानि च ॥
तावद्वेदा महातन्त्रे सङ्ख्यातानि द्विजोत्तमै: ।
द्वात्रिंशतिसहस्राणि द्वात्रिंशतिशतानि च ॥
कालायन्यास्तु तन्त्रस्य सङ्ख्यातानि मनीषिभि: ।
वसुश्लोकसहस्राणि तावन्त्येव शतानि च ॥
प्रत्यङ्गिरायास्तन्त्रे च निश्चितानि यथार्थत: ।
भूतसङ्ख्यासहस्राणि तथाहि तच्छतानि च ॥
महालक्ष्म्यास्तन्त्रराजे पञ्चश्लोकाश्च कीर्त्तिता: ।
गजसंख्यासहस्राणि श्लोकाश्च ऋतुसङ्ख्या ।
त्रिपुरार्णवे महातन्त्रे लिखिता: परमर्षिभि: ।
खरसंख्या: सहस्रे द्वे द्वे शते सङ्ख्या स्मृते ॥
पञ्चश्लोकास्तथैवात्र विज्ञातव्या द्विजातिभि: ।
द्वात्रिंशतिसहस्राणि आद्ये तन्त्रोत्तमोत्तरे ॥
अष्टसङ्ख्याशतान्यत्र श्लोका: पञ्चदशैव तु ।
द्वात्रिंशतिसहस्राणि तथा वाणशतानि च ।
द्वात्रिंशच्च तथा श्लोका योगिन्यास्तन्त्रराजके ।
द्वितीये षट्सहस्राणि तथा च त्रिशतानि च ॥
त्रय: श्लोकास्तथैवात्र वाराह्यास्तन्त्र उत्तमे ।
ऊर्म्मिसङ्ख्यासहस्राणि तत्त्वसङ्ख्याशतानि च ॥
गवाक्षे तन्त्रराजेऽस्मिन् श्लोका हि तत्त्वसङ्ख्या ।
वर्ण्णसङ्ख्यासहस्राणि द्वे शते परिनिश्चिते ॥
श्लोकाश्चयच सङ्ख्याता स्तन्त्रे नारायणीयके ।
वेदसङ्ख्यासहस्राणि तान्येव च शतानि च ॥
श्लोका नवतिसङ्ख्याता रुद्रडामरतन्त्रराजके ।
द्वितीये त्रिसहस्राणि त्रिशतानि कनिष्ठके ॥
त्रिंशत्तुश्लोकाश्च सङ्ख्याता ज्ञातव्यास्तन्त्र-
वेदिभि: ॥"

उपतन्त्राणि यथा,—
"गौडोक्तान्युपतन्त्राणि कापिलोक्तानि यानि च ।
अद्भुतानि च एतानि जैमिन्युक्तानि यानि च ॥
वशिष्ठ: कपिलश्चैव नारदो गर्ग एव च ।
पुलस्त्यो भार्गव: सिद्धो याज्ञवल्क्यो भृगुस्तथा ॥
शुक्रो दक्षश्चतिश्चैव अन्ये ये मुनिसत्तमा: ।
एभि: प्रकीर्त्तितान्यत्र उपतन्त्राणि यानि च ॥
न सङ्ख्यातानि तान्यत्र ब्रह्मभिर्द्विजैरन्यैश्च साधुभि: ।
वाराह्यास्तन्त्रराजस्यैव सङ्ख्यातानि निबोधत ॥"
इति वाराहीतन्त्रम् ।

(आगमतत्त्वविलासोक्ततन्त्रनामानि यथा,—
"खतन्त्रतन्त्रं पैतृकारीतन्त्रमुत्तरतन्त्रकम् ।
नीलतन्त्रं वीरतन्त्रं कुमारीतन्त्रमुज्ज्वलम् ।
कालीनारायणीतन्त्रे तारिणीतन्त्रमुत्तमम् ।
वाराहतन्त्रञ्च समयातन्त्रं भैरवतन्त्रकम् ॥
भैरवीत्रिपुरातन्त्रे वामकेश्वरतन्त्रकम् ।
कुब्जिकेश्वरतन्त्रञ्च मालतीतन्त्रमेव च ॥
पवनकुमारतन्त्रञ्च विमुक्तेश्वरतन्त्रकम् ।
सम्मोहनाख्यतन्त्रञ्च गौतमीयञ्च तन्त्रकम् ॥
द्रवज्ञोतमीयतन्त्रं भूतभैरवतन्त्रकम्
चातुष्काम्नित्रिलातन्त्रे वाराहीतन्त्रकं तथा ॥
सुरुमालाखतन्त्रञ्च योगिनीतन्त्रमुत्तमम् ।
मालिनीविजयं तन्त्रं तन्त्रं स्वच्छन्दभैरवम् ॥
महातन्त्रं शक्तितन्त्रं तन्त्रं चिन्तामणिं परम् ।
उच्छ्रष्टभैरवं तन्त्रं त्रैलोक्यसारतन्त्रकम् ॥
विश्वसाराख्यं तन्त्रं तथा तन्त्रान्तराभिधम् ।
महापैतृकारीयतन्त्रं वायवीयञ्च तोड़लम् ॥
मालिनीविजयतन्त्रे त्रिशक्तितन्त्रकं तथा ।
राजराजेश्वरीतन्त्रं महामोहखरोत्तरम् ॥
गवाक्षतन्त्रं गान्धर्व्वं तन्त्रं त्रैलोक्यमोहनम् ।
हंसमाहेश्वरं हंसपरमेश्वरतन्त्रकम् ॥
कामधेन्वाख्यतन्त्रञ्च तन्त्रं वर्णविलासकम् ।
मायातन्त्रं मन्त्रराजं कुलिकातन्त्रमुत्तमम् ॥
विज्ञानलतिकां लिङ्गागमं कालोत्तरं तथा ॥"

* * * *

"ब्रह्मजामलकाद्यजामलं रुद्रजामलम् ॥
दक्षिणामलकं सिद्धजामलं कल्पसूचकम् ।
मतङ्गसूक्तं कल्पसूक्तं कामराजं शिवागमम् ॥
उड्डीशञ्च कुलोड्डीशमुड्डीशं वीरभद्रकम् ।
भूतडामरकं तद्वत् डामरं यक्षडामरम् ॥
कालिकाकुलसर्व्वस्वं कुलसर्व्वस्वमेव च ।
कुलचूड़ामणिं दिव्यं कुलसारं कुलार्णवम् ॥
कुलाम्नतकुलावल्यौ तथा कालीकुलार्णवम् ।
कुलप्रकाशं वाग्विलं सिद्धसारस्वतं तथा ॥
योगिनीहृदयं कालीहृदयं मालतीर्णवम् ।
योगिनीजालकुरकं तथा लक्ष्मीकुलार्णवम् ॥
तारार्णवं चन्द्रपीठं मेरुचन्द्रं चतु:शतीम् ।
तत्त्वबोधं महोदयञ्च स्वच्छन्दसारसंग्रहम् ॥
तारादीपं सङ्केतचन्द्रोदयमतिस्फुटम् ।
षट्त्रिंशत्तत्त्वकं लक्ष्मनिर्ण्णयं त्रिपुरार्णवम् ॥
विष्णुधर्म्मोत्तरं मन्त्रदर्पणं वैष्णवाग्नतम् ।
मानसोल्लासकं पूजाप्रदीपं भक्तिमञ्जरीम् ॥
भुवनेश्वरीं पारिजातं प्रयोगसारसुत्तमम् ।
कामरत्नं क्रियासारं तथैवागमदीपिकाम् ॥
भावचूड़ामणियन्त्रं तन्त्रचूड़ामणिं परम् ।
दक्षक्रौक्रमसंज्ञञ्च तथा श्रीक्रमसंज्ञकम् ॥
सिद्धान्तशेखरं यन्त्रं तां गवीग्रविमर्शिनीम् ।
मन्त्रसुत्तावलीं तन्त्रकौमुदीं तन्त्रकौमुदीम् ॥
मन्त्रतन्त्रप्रकाशाख्यं श्रीरामार्चनचन्द्रिकाम् ।
शारदातिलकं ज्ञानार्णवं सारसमुच्चयम् ॥
कल्पद्रुमं ज्ञानमालां पुरश्चरणचन्द्रिकाम् ।
आगमोत्तरकं तत्त्वसागरं सारसंग्रहम् ॥
देवप्रकाशिनीं तन्त्रार्णवञ्च क्रमदीपिकाम् ।
तारारहस्यं श्यामाया रहस्यं तन्त्ररत्नकम् ॥
तन्त्रप्रदीपं तारायाविलासं विश्वमालतीम् ।
प्रपञ्चसारं तं तन्त्रसारं रत्नावलीं तथा ॥"
कालतन्त्रम् । वासनाभाष्यम् । यथा, मत्स्य-
भारते । १ । ३ । १४२ ।
"तन्त्रञ्चेदं विश्वरूपे युवत्यौ
वयत्यजस्रन्तु सततं वर्त्तयन्ती ।"
"तन्त्रं कालतन्त्रं विश्वोपादाननिमित्तादिकारण-
समूहसमन्वयम् ।" इति दुर्घटार्थप्रकाशिन्यां

विमलबोधः। "इह तन्त्रं वासनात्राजम्।" इति गौडकोषः।)

तन्त्रवर्त्म, क्ली, (तन्त्रात् क्षुद्रवायात् अधिरापद्यतम्। तन्त्र+"तन्त्रादचिरापहृते।५।२।७१। इति ष्यञ्।) नूतनवस्त्रम्। इत्यमरः। २।६।११२॥

तन्त्रवाड्, क्ली, (तन्त्रस्यं वाटम्।) तन्त्रवायस्य तुरी। इति त्रिकाण्डशेषः॥

तन्त्रता, स्त्री, (तन्त्रस्य भावः। तन्त्र+तल्।) अनेकसहिश्च सङ्गतप्रवृत्तिः। यथा।"आग्नेयाष्टाकपालेन्द्राग्नेन्द्रपयोयागानां अवार्यां आग्नेयाष्टाकपालोपांशुयागाग्नीषोमीयैकादशकपालयागानां अवार्यां सङ्गत् सङ्गदनुष्ठितेन प्रयाजाद्यङ्गोपकारः सिध्यति।""तथा नानाप्रकारबधस्थले सर्व्वोद्देशेन सङ्गत् प्रायश्चित्ते कृते प्रकारबधजन्यपापनाशः।" "तन्त्रतायां हेतुश्च। अष्टदार्थैकवातीयकर्म्मैकः कालदेशप्रकर्त्रादीनां प्रयोगाङ्गत्वबैधहेतुभूतानामभेदे उद्देश्यविशेषायच इति। एवञ्च।

'स्नातोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि।
पत्नियाञ्चां तथा याज्ञे दाने च विधिदर्शितः॥'

इति विष्णूक्तम्॥

'अज्ञात्वा नाचरेत् कर्म्म जपहोमादि किञ्चन।' इति दक्षोक्तञ्च क्रियाज्ञानं कर्त्तृसंस्कारद्वारैव तद्विकर्त्तव्याग्नेयकर्म्मार्थमेकमेव न तु प्रतिकर्म्म कर्त्तव्यम्।" इति प्रायश्चित्ततत्त्वम्॥

तन्त्रवायः, पुं, (तन्त्रते विस्तीर्य्यते इति तन्त्रं क्षुद्रवम्। तत् वयतीति। वय+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) तन्त्रवायः। तन्त्रे, पुं क्ली। इति शब्दरत्नावली॥

तन्त्रवायः, पुं, (तन्त्रेण वयतीति। वे न तन्तुसन्ताने +"घञादयश्च।" ३।२।२। इत्यण्।) वर्णसङ्करजातिविशेषः। तँाँति इति भाषा। अम्बोतृपत्तिर्यथा, पराशरपद्धतौ।

"ताम्रकुट्टाच्छूद्रकन्यां मणिकारश्च जायते। मणिकारात् ताम्रकुट्टां मणिबन्धोऽप्यजायत। मणिबन्धान्मणिकार्य्यां तन्त्रवायाश्च अग्मिरे॥" तत्पर्य्यायः। कुविन्दः २। इत्यमरः।२।१०।६। तन्त्रवापः३। इति भरतः। तन्तुवापः४। इति जटाधरः। तन्तुवायः५। इति शब्दरत्नावली॥ जूता। इत्यमरटीकायां स्वामी॥

तन्त्रिका, स्त्री, (तन्त्री एव। तन्त्री+स्वार्थे कन्। पूर्व्वह्रस्वश्च।) गुडूची। इत्यमरः। २।४।८२॥ (यथास्याः पर्य्यायाः।

"गुडूचीमधुपर्णी स्यादमृतास्तवसारी।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली।
चक्रलक्षणिका वीरा विश्वद्या च रसायनी॥
चन्द्रहासी वयस्था च मद्यगन्धा देवनिर्म्मिता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

तन्त्रिपालकः, पुं, जयद्रथराजः। इति शब्दमाला॥

तन्त्रीः, स्त्री. (तन्त्रयति मोदयति श्रोतारमिति। तन्त्र+"अवितृस्तृतन्त्रिभ्य ईः।" उणां। ४। १५८। इति ईः।) वीणागुणः। (यथा, रामायणे। २।३६।२६।

"गातव्यविद्यते वीणा नाम्नी विद्यते रवः॥"

वीणा। यथा, तत्रैव। १।२।१८।

"पादवद्धोऽक्षरसमस्त्रीलयसमन्वितः।
श्लोकाख्यस्तु प्रवृत्तो मे श्लोको भवतु नान्यथा॥")

गुडूची। देहस्थिरा। इति मेदिनी॥ वरीविशेषः। युवतीभेदः। इति शब्दरत्नावली॥ रज्जुः। इति हेमचन्द्रः॥ (यथा, मनुः।३।६८।

"न तन्त्रीवाद्यतन्त्रज्ञो न प्रधार्य्येत वर्षति।
न गोप्तरि निरीक्षेत खं रूपमिति धारणा॥")

तन्त्रवायः, पुं, (तन्त्रवायः निपातनात् तस्य दः।) तन्त्रवायः। इत्यमरटीकायां रायमुकुटः॥

तन्द्रा, स्त्री, (तत् द्रातीति। तत्+द्रा+कः। निद्रातन्द्रेति मान्तत्वं निपात्यते। यद्वा, तन्द्र अवसादे+भावे घञ् ततष्टाप्।) निद्रा। आलस्यम्। इति हेमचन्द्रः॥ (यथा, हठयोगप्रदीपिकायाम्। ३। ३६।

"न रोगो मरणं तन्द्रा न निद्रा न क्षुधा तृषा॥")

तस्या निदानं यथा। "तमोवातकफात्तन्द्रा।" इति। चक्रदत्तः।

"इन्द्रियार्थेष्वसंविष्टगौरवं जृम्भणं श्रमः।
निद्रार्त्तस्येव यस्येहा तस्य तन्द्रा विनिर्द्दिशेत्॥"

इति माधवकरः॥

(कारकपूर्व्वकमस्याः सम्पाद्यत्वेनेष्टं चिन्तितसिद्धञ्च यथा, चरके सिद्धिस्थाने नवमेऽध्याये।

"मधुरस्निग्धगुर्व्वम्लसेवनाच्चिन्तनाद्भयात्।
श्लोकाद्याश्रयगुप्तेश्च वायुनोदीरितः कफः॥
यदासौ समवस्कन्द्य हृदयं हृदयाश्रयात्।
समाद्योति ज्ञानादींस्तदा तन्द्रोपजायते॥
हृदये चाकुलीभावो वाक्चेष्टेन्द्रियगौरवम्।
मनोनुग्रहप्रसादश्च तन्द्राया लक्षणं मतम्॥
कफश्च तत्र कर्त्तव्यं श्लोधनं श्रमणानि च।
व्यायामो रक्तमोक्षश्च भोज्यञ्च कटुतिक्तकम्॥")

तन्द्राक्षुः, त्रि, (तत् द्रातीति। तत्+द्रा+"सृद्धि यद्दीति।" ३।२।१५८। इति आक्षुच् ततः शब्दस्य नान्तत्वं निपात्यते।) निद्राक्षुः। इति जटाधरः॥ (यथा, सुश्रुते उत्तरतन्त्रे३६ अध्याये।

"अपि जायत् स्वपन् जन्तुस्तन्द्राक्षुश्च प्रलापवान्॥")

तन्द्रिः, स्त्री, (तदि खेदे धातुः+"सृज्ञाग्रादयश्च।" उणां। ४। ६६। इति क्रिन्।) निद्रा। आलस्यम्। इत्यमरादिकोषः॥ (यथा, भागवते। ३।२०।४०।

"क्षुद्रा भूतपिशाचाश्च भगवन्मायातन्द्रिका।
दिग्वासो हसन्केशान् वीक्ष्य यामीत्यधद्दशौ॥")

तन्द्रिका, स्त्री, (तन्द्रिरेव। स्वार्थे कन् टाप् च।) तन्द्रिः। इति शब्दरत्नावली॥

तन्द्री, स्त्री, (तन्द्रि+"ऋदिकारादिति।" वा ङीष्।) अवसन्नमनादिना चर्म्माङ्गनिमीलनं क्रियासङ्कटेति भाषा। इत्यमरः। इति भरतः॥ तत्पर्य्यायः। प्रमीला २। इत्यमरः॥ तन्द्रा ३ तन्द्रिः ४। इति तट्टीका॥ तन्द्रिका ५ विषयाज्ञानम् ६। इति राजनिर्घण्टः॥ (यथा, महाभारते। ३।३०३।१६।

"निक्षिप्य राजपुत्री तु तन्द्रीं मानं तथैव च।
आतस्थे परमं यत्नं ब्राह्मणस्याभिराधने॥")

निद्रा। इति मेदिनी। रे, ४२॥ (केचित्तु तन्द्रातोर्वा कुषकात् ङीप्प्रत्ययेन तन्द्रीरिति पदं साध्यन्ति यथा, चरके सूत्रस्थाने त्रयोदशेऽध्याये।

"प्राकृता गौरवं जाड्यं पुरीषस्याविपक्वता।
तन्द्रीरत्यधिवर्त्तश्च स्यादतिस्निग्धलक्षणम्॥")

तन्त्रिः, स्त्री, (तन्त्रयतीति। तन्त्र+बाहुलकात् क्विः।) चक्रकुल्या। इति रत्नमाला॥ तन्त्रिरपि पाठः॥

तन्मात्रं, क्ली, (तदेवेति। तत्+स्वार्थे मात्रच्। यद्वा, सा मात्रा यस्य।) अपञ्चीकृतरूपरसगन्धस्पर्शशब्दानां संज्ञा। यथा,—

"एभ्यश्चैव सूक्ष्मभूतानि तन्मात्राख्यपञ्चीकृतानि चोत्पद्यन्ते। एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते।" इति वेदान्तसारः।४०॥ तट्टीका यथा। "तन्मात्रेभ्यात् पञ्चतन्मात्रादि क्रमेण जायन्ते इति हि श्रुतौतिहासपुराणेषु प्रसिद्धिरस्तु कथमाकाशादेरित्थोत्पत्तिरान्नायते इति तत्राह एतेभ्यश्चेति। एतेभ्यश्चाकाशादीनि सूक्ष्मभूतानि अवद्धारावयवादि शब्दादितावन्मात्रैकस्वभावानि अपञ्चीकृतानि परमसंहृतानि चेति श्रुत्यादिषूच्यन्ते महर्षिभिरित्यर्थः।" इति विद्वन्मनोरञ्जिन्यां॥ * ॥ अपि च।

"भूतादिस्तु विकुर्व्वाणः सर्गे तन्मात्रिकं ततः।
सदर्थं शब्दतन्मात्राकाशं शब्दलक्षणम्॥"

इति विष्णुपुराणे १२ अध्यायः॥

तन्यतुः, पुं, (तनोति विस्तारयति तमः शब्दं वा। तनु विस्तारे+"ऋतन्यञ्जिवनीति।" उणां।४। २। इति यतुच्।) रात्रिः। वायुः। इत्युणादिकोषः॥ (वायुः। इत्युज्ज्वलदत्तः॥ अग्निः। इति माधवः॥ विद्युत्। इति द्व्यक्षरकोषः॥ यथा, ऋग्वेदे। १।५२।६।

"दृक्षस्य यत् प्रवधे दुर्गृभिश्वनो निवघस्य हन्वो रिश्रतन्यतुम्॥")

तन्वी, स्त्री, (तनुः+"ओतो गुणवचनात्।" ४। १।४४। इति ङीष्।) क्षुद्राङ्गी। यथा,—

"तव तन्वि! कृशायाः कृतो नियतो चक्रवर्त्तिनौ।
आवयुदकरण्याद्यो भवान् कच करप्रदः॥"

इति कालिदासः॥

शालपर्णी। इति राजनिर्घण्टः॥ (चतुर्भिश्छन्दश्चरद्वृत्तिविशेषः। इति छन्दोमञ्जरी॥ तस्या लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्।)

तप, क्ष दाहे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, तापयति। अयमात्मनेपदीत्येके। इति दुर्गादासः॥

तप, ड न दाहे। इति कविकल्पद्रुमः। (भ्वां-आत्मं-उभयं-सकं-सेट्।) ड, तपते। न, तपति तपते। अयमात्मनेपदीत्यन्ये। इति दुर्गादासः।

तप, औ } दैवेश्वर्ययोः। इति कविकल्प-
तप, य ड औ } द्रुमः। (भ्वां-परं-सकं-अकंच-अनिट्। दिवादिपक्षे आत्मं।) दव उपतापः। "तपति तनुगात्रि! मदनस्त्वाम्।" औ, अतापीत्। य ड, तप्यते धनी ईश्वरः स्वादिरित्यर्थः। औ, अतप्त। दिवादिपक्षे ऐश्वर्ये एव इत्यन्ये। इति दुर्गादासः।

तपः, [स्] क्ली, (तपति तापयति वा। तप उपतापे + "सर्वधातुभ्योऽसुन्।" उणां। ४।१८८। इति असुन्।) वैधक्लेशजनकं कर्म्म। यथा,—

"उमेऽतितपसा पुत्रि! न त्वमं तावकं वपुः।
सोढुं क्लेशसहावस्य तपसः सौम्यदर्शने॥"

इति तिथ्यादितत्त्वे मत्स्यपुराणवचनम्। ●।

तत्फलं यथा,—

"तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्वतः।
दुर्भगत्वं हृथा लोको वहते यति साधने॥"

इति च तत्रैव तद्वचनम्। ●।

अपि च। भरीचिरुवाच।

"ब्राह्मणस्य तपोमूलं यज्ञः स्वाध्याय एव च।
तस्मादग्रे! परं ब्रूहि तपसोऽध्ययनस्य च॥

ब्रह्मिरुवाच।

स्वाध्यायतपसोर्वक्ष्ये तत्त्वं निगदितं ब्रह्म।
तपसो हि परं नास्ति तपसा विन्दते महत्॥
तपसा क्षीयते पापं मोदते सह दैवतैः।
तपसा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः॥
तपसा सर्व्वमाप्नोति तपसा विन्दते परम्।
ज्ञानविज्ञानसम्पन्नः सौभाग्यं रूपमेव च॥
तपसा लभते सर्व्वं तथैवाध्ययनेन च।
तस्मात् स्वधर्म्मसंयुक्तो नित्यं सिध्यति पण्डितः॥
धर्म्मात् सुखमवाप्नोति इह लोके परत्र च॥"

इत्याद्ये वह्निपुराणे नित्याह्निकज्ञानविधिनामाध्यायः॥ तपस्या। तत्त्रिविधम्। शारीरं वाचिकं मानसञ्च। यथा,—

"देवद्विजगुरुप्राज्ञपूजनं शौचमार्ज्जवम्।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते॥१॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्।
स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते॥२॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥३॥

तदपि त्रिविधम्। सात्त्विकं राजसं तामसञ्च यथा,—

"श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥१॥
सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥२॥
मूढग्राहेणात्मनो यत् पीड़या क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥"३॥

इति श्रीभगवद्गीतायाम्। १७। १४—१९॥

जनलोकादूर्द्ध्वलोकः। यथा,—

"अस्योपरि तपोलोकस्तेजोमय उदाहृतः।
वैराजा यत्र ते देवा वसेयुर्द्देवपूजिताः॥
वासुदेवे मनो येषां वासुदेवेऽर्पितक्रियाः।
तपसा तोयमोक्षिण्मभिलाषविवर्जिताः॥
तं तपोलोकमासाद्य वसन्ति विजितेन्द्रियाः।
त्रिलोच्छृतयो ये वै ये दग्धोलूखलिकाश्च ये॥
वैश्वसृक्षाश्च सुनयः श्रीवैष्णवाग्निगश्च ये।
शीर्णैः पर्णायितपथो वर्षासु स्थण्डिलेशयाः॥
हेमन्ते शिशिरे वा ये क्षिपन्ति सलिले क्षमाः।
कुशाग्रगोरविन्दूंश्च क्षुधिता वतयोऽपिबन्॥
वाताग्निगोऽतिक्षुधिताः पादाङ्गुष्ठाग्रभूसृग्भः।
ऊर्द्धहस्ता रविद्वग्लक्ष्यैकाङ्घ्रिस्थानस्थिताः॥
ये वै दिवानिरुच्छ्वासा मासोच्छ्वासाश्च ये परे।
मासोपवासं कुर्व्वन्ति चातुर्म्मास्यव्रताश्च ये॥
ऋक्षन्ने तोयपाना ये ये षण्मासोपवासकाः।
ये च वर्षानिमेषा वै वर्षधारामृतर्षकाः॥
स्थाणुसाम्योपसंप्राप्ता जगत्कूतिसौख्यदाः।
जटाटवीकोटरान्तः क्षतनीड़ाश्च ये॥
प्ररूढ़वल्मिकाङ्गाश्च कायुनड़ाखिसञ्चयाः।
लताप्रतानैः परितो वेष्टितावयवाश्च ये॥
शुष्काणि च प्ररूढ़ानि यदक्षेषु महीपते!।
इत्येतैर्नियमैर्य्यै तु क्षिरात्मानस्तपोधनाः॥
ब्रह्मायुषस्तपोलोके ते वसन्त्यकुतोभयाः॥"

इति पद्मपुराणम्। ●।

चान्द्रायणादिव्रतम्। धर्म्मः। इति मेदिनी। से, २४॥

तपः, पुं, (तपति तापयति वा। तप उपतापे + पचाद्यच्।) सूर्य्यः। इत्यमरः। १। ४। १६॥ (यथा, माघे। १। ६६।

"तपेन वर्षाः शरदो हिमागमो
वसन्तजघ्मा शिशिरः समेत्य च।
प्रसूनकृत्तिं दधतः सदर्त्तवः
पुरोऽस्य वास्तव्यकुटुम्बितां ययुः॥")

तपःकरः, पुं, (तपः करोतीति। क + टः।) तपस्वी मत्स्यः। इति शब्दरत्नावली। तपस्याकारके, त्रि॥

तपःक्लेशसहः, त्रि, (तपसः क्लेशं सहते इति। सह + अच्।) दान्तः। इत्यमरः। २। ७।४३॥

तपःस्थली, स्त्री, (तपसः स्थली।) काशी। इति त्रिकाण्डशेषः॥

तपती, स्त्री, छाया नाम सूर्य्यपत्नी। इति त्रिकाण्डशेषः॥ सूर्य्यकन्या। सा पूरुवंशीयऋक्षराजपुत्रसम्वरणभार्य्या। इति श्रीभागवतम्॥ (यथा, महाभारते। १। ६४। ४७।

"ततः सम्वरणात् सौरी सुषुवे तपती कुरुम्॥"

अस्या विशेषविवरणादिकं तत्रैव १७२ अध्याये द्रष्टव्यम्॥)

तपनः, पुं, (तपतीति। तप + कर्त्तरि ल्युः।) सूर्य्यः। (यथा, महाभारते। ३। ३। ६२।

"सहस्ररश्मिरादित्यस्तपनस्तं गवां पतिः॥")

भल्लातवृक्षः। अग्न्यादिदाहात्मकनरकः॥ शीघ्रः। इति हेमचन्द्रः॥ तापः। इति धरणिः॥ अर्कवृक्षः। क्षुद्रायिमन्यवृक्षः। सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥ (यथा, आर्य्यासप्तशत्याम्। २६।

"अगस्यपथे प्रिये! न यथा यथा डाह एव दुष्प्रापे।
ज्ञानेऽकीर्त्तनं निशि तपनशिखा वासरे ज्वलति॥"

अग्निविशेषः। यथा, हरिवंशे। १७८। ३१।

"ते जातवेदसः सर्व्वे ज्वालाभिः कुसुमप्रभाः।
दहनः शोषणश्चैव तपनश्च महाबलः॥"

स्त्रीणां सप्तसे अलङ्कारविशेषे, स्त्री। तल्लक्षणं यथा साहित्यदर्पणे। २। ११६।

"तपनं प्रियविच्छेदे सन्तापेनोत्यचेष्टितम्॥"

उदाहरणं यथा, तत्रैव,—

"श्वासान्धुक्षति भूतले विलुठति त्वन्मार्गमालोकते
दीर्घं रोदिति विक्षिपत्यत इतः शय्यां सुधा-
वल्लरीम्।
किञ्च प्राणसमानकाङ्क्षितवती स्वप्नेऽपि ते
सङ्गमं
निद्रां वाञ्छति न प्रयच्छति पुनर्हन्त्यो विधि-
स्तामपि॥")

तपनच्छदः, पुं, (तपनः अतिरूक्षच्छदो यस्य।) आदित्यपत्रवृक्षः। इति राजनिर्घण्टः॥

तपनतनया, स्त्री, (तपनस्यापत्यं यत्। तपनस्य सूर्य्यस्य तनया।) यमुना। इति राजनिर्घण्टः॥

तपनमणिः, पुं, (तपनः सूर्य्यस्तत्प्रियो मणिः।) सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥

तपनात्मजा, स्त्री, (तपनस्य सूर्य्यस्य स्वयमात्मजा कन्या।) गोदावरी नदी। इति हेमचन्द्रः॥ यमुना च॥

तपनी, स्त्री, (तपनः सूर्य्यो जनकतयास्त्यस्या इति अच्। ततो गौरादित्वात् ङीष्।) गोदावरी। इति हेमचन्द्रः॥

तपनीयं, क्ली, (तप + अनीयर्। यद्वा शीघ्रतीव्रपरीक्षणीयत्वादस्य तथात्वम्।) सुवर्णम्। इत्यमरः। २। ६। ८४॥ (यथा, रघुः। १५।३१।

"तस्मादधः किपिदिवावतीर्णा-
वसंसृशन्तौ तपनीयपीठम्॥")

तपनीयकं, क्ली, (तपनीय + स्वार्थे कन्।) सुवर्णम्। इति राजनिर्घण्टः॥

तपनेष्टं, क्ली, (तपनस्य सूर्य्यस्येष्टम्। सूर्य्यप्रियत्वादस्य तथात्वम्।) ताम्रम्। इति राजनिर्घण्टः॥

तपसः, पुं, (तपतीति। तप + "अशनायोदन्यधनायतपसः।" उणां। ३। ११७। इति असच्।) चन्द्रः। इति त्रिकाण्डशेषः॥ मधौ। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

तपस्कषः, पुं, (तपस्कषति तनूकरोतीति। तप तनूकरणे + अच्। सूर्य्येणातिशयेन तपस्विनां तपोविघ्नकरत्वादस्य तथात्वम्।) इन्द्रः। इति हेमचन्द्रः। २। ८७॥

तपस्यं, क्ली, (तपसि ग्रीष्मे भवम्। तपस्+यत्।) कुन्दपुष्पम्। इति शब्दचन्द्रिका॥ (तपश्चरतीति। तपस्+क्तौ क्वच्। ततो भावे यञ्। तपश्चरणम्। यथा, महाभारते। १३।१०।१३। "अथाख्य बुद्धिरभवत् तपस्ये भरतर्षभ!॥")

तपस्यः, पुं, (तपसि ग्रीष्मे साधुः। तपस्+"तत्र साधुः।" ४।४।९८। इति यत्।) फाल्गुनमासः। इत्यमरः। १।४।१५। (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये। "तत्र माघादयो द्वादशमासाः हिमाभिकल्पितं ज्ञात्वा बहुतरो भवन्ति। ते शिशिरवसन्तयोर्ग्रीष्मवर्षाशरद्धेमन्ताः। तेषां तपस्तपस्यौ शिशिरः॥") अर्जुनः। इति हेमचन्द्रः॥ (तामसस्य मनोः पुत्रविशेषः। यथा, हरिवंशे। ७।२४।

"द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोधनः।
तपोरतिरकल्मषस्तपो धन्यो परन्तपः।
तामसस्य मनोरेते दश पुत्रा महाबलाः॥")

तपस्या, स्त्री, (तपश्चरतीति। "कर्म्मणो रोमन्थतपोभ्यां वर्त्तिचरोः।" ३।१।१५। इति क्यङ्। ततः "अ प्रत्ययात्।" ३।३।१०२। इति अ ततष्टाप्।) तपः। तत्पर्य्यायः। व्रतादानम् २ परिव्रज्या ३ नियमस्थितिः ४। इति हेमचन्द्रः॥ व्रतचर्य्या ५। इति मेदिनी॥

तपस्विनी, स्त्री, जटामांसी। इत्यमरः। २।४। १३४॥ (तपस्वितुल्यजटायुक्तत्वादस्याः तथात्वम्। यथा, वैद्यकरत्नमालायाम्।

"नलदं नन्दिनी पेषी मांसी क्षुद्रजटा जटी।
किरातिनी च जटिला लोमशा तु तपस्विनी॥")
कटुरोहिणी। इति हेमचन्द्रः॥ महाश्रावणिका। इति भावप्रकाशः॥ (तपोऽस्या अस्तीति। तपस्+"तपःसहस्राभ्यां विनीनी।" ५।२।१०२। इति विनिः। ततः स्त्रियां ङीप्।) तपोयुक्ता स्त्री॥ (यथा, रामायणे। ३।२।७।

"यत्नीं स च महाहृद्धां सिद्धां शुद्धां तपस्विनीम्।
अनसूयां महाभागां सर्व्वभूतहिते रताम्॥"
दीना। दुःखिता। यथा, भागवते। १।६।४४।
"ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम्।
पितरं सान्त्वयामास गान्धारीञ्च तपस्विनीम्॥"
पतिव्रता। यथा, नैषधे। १।१३५।

"मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्व्वरटा तपस्विनी।
गतिस्तयोरेव ममस्मदर्द्दय-
ग्रहो विधे! त्वां करुणा रुणद्धि न॥"
"वरटा हंसी मम स्त्री नवा नूतना प्रसूतिः प्रसवो यस्याः सा तादृशी सापि सती जीवितुमसमर्था तर्हि पत्यन्तरेण तस्या जीविका भवेदित्यपि निषेधयति यतस्तपस्विनी पतिव्रता मम मरणानन्तरं पत्यन्तराश्रयणाभावात् तस्या जीवनं शिशूनां पोषणञ्च दुर्घटमेव भवेदिति भावः॥" इति तट्टीका॥)

तपस्विप्रियः, पुं, (तपस्विप्रियं पत्रमस्य।) दमनकवृक्षः। इति राजनिर्घण्टः॥

तपस्वी, [न्] त्रि, (तपोऽस्यास्तीति। तपस्+"तपःसहस्राभ्यां विनीनी।" ५।२।१०२। इति विनिः।) तपोयुक्तः। तत्पर्य्यायः। तापसः २ पारिकाङ्क्षी ३। इत्यमरः।२।७।४२॥ पारकाङ्क्षी ४ पारिकाङ्क्षकः ५। इति शब्दरत्नावली॥ तपोधनः ६। (यथा, मनुः। ४। १६२। [खिनः॥")

"न हिंस्यादब्राह्मणान् गाश्च सर्व्वांश्चैव तपस्विनः।" इति मेदिनी। ने, १८५॥

तपस्वी, [न्] पुं, (तपस्+अस्त्यर्थे विनिः।) नारदः। इति शब्दरत्नावली॥ मत्स्यविशेषः। तपस्या माछ इति भाषा। तत्पर्य्यायः। तपःकरः २ चेष्टकः ३ चेष्टः ४। इति शब्दचन्द्रिका॥ (चाक्षुषस्य मनोः पुत्रविशेषः। यथा, हरिवंशे। २।१८।

"ऊरुः पुरुः शतद्युम्नस्तपस्वी सत्यवान् कविः॥")
हृतकरञ्जश्च। इति राजनिर्घण्टः॥

तपाः, [स्] पुं, (तप्यन्तेऽस्मिन्निति। तप+असुन्।) ग्रीष्मः। इत्यमरटीकायां नयनानन्दः॥ माघमासः। शिशिरकालः। इति मेदिनी। से, २४॥ (यथा, सुश्रुते सूत्रस्थाने ६ अध्याये।

"तेषां तपस्तपस्यौ शिशिरः॥")

तपात्ययः, पुं, (तपस्य ग्रीष्मस्य अत्ययो यत्र।) वर्षाकालः। इति हेमचन्द्रः। २।७१॥ (यथा, कुमारे। ५। २३।

"तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणमसूचदूर्द्धगम्॥")

तपित, त्रि, (तप्यते स्मेति। तप दाहे+क्तः।) तप्तम्। इति द्विरूपकोषः॥ (यथा, हरिवंशे। २३४। २६।

"सपितकनकविन्दुपिङ्गलाक्षो
दितितनयोऽसुरसैन्यमुद्वमेता॥")

तपुः, [स्] पुं, (तपति तापयतीति वा। तप+"अर्त्तिपॄवपीति।" उणा। २। ११८। इति उसिः।) अग्निः। सूर्य्यः। इत्युज्ज्वलदत्तः॥ (ऋक्। इत्युज्ज्वलदत्तः॥ तापयुक्ते तापने च, त्रि। यथा, ऋग्वेदे। १।३६।१६।

"तपुर्जम्भ यो अग्नेधुक्॥")

तपोधनः, पुं, (तप एव धनं यस्य।) तपस्वी। इति मेदिनी॥ (यथा, मनुः। ११।२४२।

"यत्किञ्चिदेनः कुर्व्वन्ति मनोवाङ्मूर्त्तिभिर्जनाः।
तत् सर्व्वं निर्द्दहन्त्याशु तपसैव तपोधनाः॥")
दमनकवृक्षः। इति राजनिर्घण्टः॥ (यथास्य पर्य्यायाः।

"उक्तो दमनको दान्तो सुनिपुत्रस्तपोधनः।
गन्धोत्कटो ब्रह्मजटो विनीतः कुलपत्रकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

तपोधना, स्त्री, (तपो ग्रीष्मकाल एव घनमिव यस्याः।) शुण्डीरी। इति मेदिनी॥ (तपोधने, त्रि। यथा, महाभारते। ५।१८८।२०।

"वल्कवासाः वायुभक्षा च स्याद्भूता तपोधना॥")

तपोवटः, पुं, ब्रह्मावर्त्तदेशः। इति त्रिकाण्डशेषः॥

तप्तः, त्रि, (तप्यते स्मेति। तपौ सन्तापे+क्तः।) तापयुक्तः। तत्पर्य्यायः। सन्तापितः २ दूनः ३ धूपायितः ४ धूपितः ५। इति हेमचन्द्रः॥ (यथा, हठयोगप्रदीपिकायाम्। १।१०।

"अग्नेश्चतापतप्तानां समाश्रयमठो दृढः॥")

तप्तकुम्भः, पुं, (तप्तः उत्तापितः कुम्भो यत्र। नरकविशेषः॥ (यथा, मार्कण्डेये। १२।३४-३६।

"अतःपरं भीमतरं तप्तकुम्भं निबोध मे।
समन्ततस्तप्तकुम्भा वह्निज्वालासमाकुलाः॥
ज्वलदग्निचयोद्दृप्ततैलायश्चूर्णपूरिताः।
तेषु दुष्कृतकर्म्माणो याम्यैः क्षिप्ता ह्यधोमुखाः॥
क्राथन्ते विस्फुटद्गात्रगलन्मज्जासृगाविलाः।
स्फुटत्कपालनेत्रास्थिछिद्यमाना विभीषणैः॥
यमैरुत्पाद्य सुच्यन्ते पुनस्तेष्वेव वेगितैः।
पुनः सिमसिमायन्ते तैलेनैवं व्रजन्ति च॥
द्रवीभूतैः शिरागात्रक्षायुमांसत्वगस्थिभिः।
ततो याम्यैर्नरैरुग्रैः दर्व्याघट्टनघट्टिताः॥
क्षतावर्त्ते महातैले मथ्यन्ते पापकर्म्मिणः।
एष ते विस्तरेणोक्तस्तप्तकुम्भो मया पितः!॥")

तप्तकृच्छ्रः, पुं क्ली, (तप्तेन जलदुग्धादिना आचरितं कृच्छ्रं कष्टं यत्र। यद्वा, तप्तेनाचरितं कृच्छ्रम्।) व्रतविशेषः। यथा, "पयोष्टसगदकं वायुतप्तं प्रतित्र्याहं पिबेत् स तप्तकृच्छ्रः।" इति गौतमः॥ (द्वादशाहसाध्यव्रतमेतत्। यथा, मनुः। ११। २१५।

"तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान्।
प्रतित्र्याहं पिबेदुष्णान् सकृत्स्नायी समाहितः॥"
"तप्तकृच्छ्रं चरन् द्विजातिः त्र्याहसुष्णोदकं त्र्याहसुष्णगोक्षीरं त्र्याहसुष्णघृतं त्र्याहसुष्णवायुं एकवारं स्नानं कुर्व्वन् संयतवान् पिबेत्। अत्र पराशरोक्तविशेषः।

षट्पलन्तु पिबेदम्भः क्षिपलन्तु पयः पिबेत्।
पलमेकं पिबेत् सर्पिस्तप्तकृच्छ्रं विधीयते॥"
इति तट्टीकायां कुल्लूकभट्टः॥)

तप्तपाषाणकुड्यं, क्ली, (तप्तानां पाषाणानां कुड्यमिव।) नरकविशेषः। इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

तप्तबालुकः, पुं, (तप्ता बालुका यत्र।) नरकविशेषः। इति पुराणम्॥ (उत्तप्तबालुकामये, त्रि। यथा, भागवते। ३। ३०। २२।

"क्षुत्तृड्भ्यां परिशोषदेहदहनालोकैः
संतप्यमानः पथि तप्तबालुके॥)

तप्तमाषकं, क्ली, (तप्तं माषमितं सुवर्णादिकं यत्र कप्।) परीक्षाविशेषः। तद्विधिर्यथा। पितामहः।

"कारवेदाथवं पात्रं ताम्रं वा लोहमाहुलम्।
चतुरङ्गुलखातन्तु वृत्तं वाथ मण्डलम्॥
मण्डलं कुर्य्यमण्डलाकारं वर्त्तुलमिति यावत्।
पूरयेद्घृततैलाभ्यां विंशत्या तु पलेषु तत्।
सुवर्णमाषकं तस्मिन् सुतप्ते निःक्षिपेत्ततः॥

अङ्गुष्ठाङ्गुलियोगेन उद्धरेत्तप्तमाषकम् ।
कराग्रं यो न धुनुयात् विस्फोटो वा न जायते ।
शुद्धो भवति धर्म्मेण पितामहवचो यथा ॥
कल्पान्तरमाह ।
सौवर्णे राजते ताम्रे आयसे न्यग्रयेऽपि वा ।
गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः ॥
सौवर्णीं राजतीं ताम्रीमायसीञ्च सुशोधिताम् ।
सलिलेन सङ्गृह्णीतां प्रक्षिपेत्तत्र मुद्रिकाम् ॥
भग्नहीनितरङ्गाढ्ये न गच्छत्यग्नेगोचरे ।
परीक्षेतार्द्रपर्णेन पुष्पकारं सघोषकम् ॥
ततश्चानेन मन्त्रेण सङ्गृह्णीतदभिमन्त्रयेत् ।
परं पवित्रमन्तं घृत ! त्वं यज्ञकर्म्मसु ॥
दह पावक ! पापं त्वं हिमग्नीतः शुचौ भव ।
उपोषितं ततः स्नातमार्द्रवाससमागतम् ॥
व्याहरेन्मुद्रिकां तासु घृतमध्यगतान्तथा ।
प्रदेशिनीञ्च तस्याथ परीक्षेयुः परीक्षकाः ॥
यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाशुचिः॥
प्रयोगस्तु । मध्यविधाढ्यवतङ्गुलमध्यमिताङ्गुलिबोढ्याङ्गुलमितप्रस्तारे तथाविधाङ्गुलिचतुष्टयखाते ताम्रादिपट्टिते ऽग्नौ ज्वलिते वा चक्राकारे वर्त्तुले पात्रे लौकिकाष्टरत्तिकाधिकमाषद्वयाधिकत्रयस्त्रिंशद्गुञ्जातोलकरूप- ३३ । २ । ८। वैदिकपलदशकमितं घृतं एवं तैलञ्च निक्षिप्य लौकिकचतुरत्तिकाधिकपञ्चमाषकषट्यष्टितोलकरूप- ६६।५ । ४ । वैदिकविंशतिपलपरिमितं केवलं गव्यं घृतं वा निक्षिप्य तस्मिन् घृतपात्रे सङ्गृह्णीतां पञ्चरत्तिकामितां काञ्चनमुद्रिकां रजतादिकां वा निक्षिपेत् । धर्म्मावाहनादिदहनान्तं तुलोक्तं सदक्षिणं कर्म्म कृत्वा,—
ओम् परं पवित्रमन्तं ! घृत त्वं यज्ञकर्म्मसु ।
दह पावक ! पापं त्वं हिमग्नीतः शुचौ भव ।
इत्यनेनाभिमन्त्रयेत् प्राङ्विवाकः । ततः कृतोपवासः स्नातार्द्रवासाः ग्रोथग्निरसि प्रतिज्ञापत्रं निधाय,—
ओम् त्वमग्ने ! सर्व्वभूतानामन्तश्चरसि पावक !!
साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं करे मम ॥
इत्यनेनाभिमन्त्र्य आर्द्रपत्रनिक्षेपन्नतपुष्पकमुन्मृद्यात् घृतात् मुद्रिकां तर्ज्जन्यङ्गुष्ठाभ्यां उत्तोलयेत् । घृततैलाभ्यां वा तप्तमाषकमुत्तोलयेत् । अदग्धचेत्तदा शुद्ध इति । ततो दक्षिणां दद्यात् ।"
इति दिव्यतत्त्वम् ॥

तप्तमुद्रा, स्त्री, (तप्ता अग्निसन्तप्ता मुद्रा ।) शरीरधार्य्यग्नितप्तधातुमयभगवदायुधचिह्नम् । यथा,
"आषाढ़शुक्लद्वादश्यां हरौ शिशयिषौ सति ।
वैष्णवः पारणं कृत्वा तप्तमुद्राञ्च धारयेत् ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैकान्तिनर्द्विजे ।
कुर्य्यात्तप्तार्पणं तप्तमुद्राभिर्दैहमङ्कयेत् ॥*॥
तप्तमुद्राधारणं वाराहे तप्तमुद्राप्रसङ्गे ।
चक्रादिधारणं पुंसां परं सम्बन्धवेदनम् ।
यातिम्रक्षनिमित्तं हि वलयादिविभूषणमिति ॥*
अथ तप्तमुद्राधारणविधिः । वायुपुराणे ।

अग्निनैव च सन्तप्तं चक्रमादाय वैष्णवः ।
धारयेत् सर्व्ववर्णानां हरिसालोक्यविच्छया ।"
ब्रह्मखण्डे ।
छत्वा धातुमयीं मुद्रां तापयित्वा स्वकां तनूम् ।
चक्रादिचिह्नितां भूप ! धारयेद्वैष्णवो नरः ॥
नारदीयपञ्चरात्रे ।
द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम् ।
हरेः सुदर्शनं तप्तं धारयेत्सुप्रयत्नतः ॥
सौपर्णे च श्रीभगवन्मन्त्रकल्पादे तप्तमुद्राप्रकरणे ।
गरुडध्वजविप्रेषु सर्व्ववर्णेष्वयं विधिः ।
विप्रो वा क्षत्रियो वापि वैश्यः शूद्रस्तथैव च ॥
पाद्मे ।
अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ।
ब्राह्मणस्य तथैवेदं तप्तचक्रादिधारणम् ॥
किञ्च । तत्रैवोत्तरखण्डे श्रीशिवोमासम्वादे ।
शङ्खचक्राङ्कनं कुर्य्याद्ब्राह्मणो बाहुमूलयोः ।
हुताग्निनैव सन्तप्य कर्म्मणापापशुद्धये ॥
चक्रं वा शङ्खचक्रे वा तथा पद्मायुधानि वा ।
धारयित्वैव विधिवद्ब्रह्मकल्पे समारभेत् ॥*॥
किञ्च । तत्रैव ।
अकृत्वा विधिना चक्रं ब्राह्मणः प्राकृतो भवेत् ॥
किञ्च ।
न तस्य किञ्चिदन्नादमपि शास्त्रविदः ।
सर्व्ववेदविदो वापि सर्व्वशास्त्रविशारदः ॥
अकृत्वा विधिना चक्रं ब्राह्मणः पतितो भवेत् ॥
किञ्च ।
तप्तेनैवाङ्कनं कुर्य्यात् ब्राह्मणस्य विजानतः ।
औतस्मार्त्तादिसिद्ध्यर्थं मन्त्रसिद्धेः तथैव च ॥
हरेः पूजाधिकारार्थं चक्रं सार्द्धं विजानतः ।
वैष्णवस्य विहारार्थं भक्तिसिद्धेः विशेषतः ॥
किञ्च ।
उपवीतादिवद्दार्य्यः शङ्खचक्रादयस्तथा ।
ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः ॥*॥
श्रुतयश्च । यो ह वै शुभ्रौ मौवेर्ध्यौ बाहुश्रुतिष्ठमानोऽग्निनाचक्रं धत्ते । अग्निर्वै सहस्रारः सहस्रारो नेमिर्न्नेमिना तप्ततनुः सायुज्यं सलोकतामाप्नोतीति ॥

चक्रं बिभर्त्ति वपुषाभितप्तं
वर्णं देवानामन्नतस्य विष्णोः ।
स इति नाकं दुरितं विधूय
विमुक्ति यद्यतयो वीतरागा इति ॥"

ऋक्परिशिष्टे । अतप्ततनुर्नतदामो अश्नुतेऽश्नुता सह दहदहन्नत्तसमासतेति यजुः ॥ ऋग्वेदीयाश्वलायनश्राखायाञ्च ।

प्रतप्तिश्चोरजचक्रे सुतप्ते
जन्मान्तोधिं वर्त्तते चक्रवोन्नाः ।
मूढे बाहोर्दैवतेऽग्नौ पुराणा
लिङ्गान्यन्ये तप्तायुधान्यर्चयन्ते इति ॥
छन्दोगपरिशिष्टे । छन्दोगाच्च यज्ञवल्क्यात्तप्तपुराणात्तप्तिताव प्रेनृषा हरिमन्वेत् । शुक्लो कर्मौवेर्ध्यमाग्नेयमग्निनाधत्ते इति श्रुतयो स्मृतिः ॥

अथर्व्वपरिशिष्टे तप्तचक्रादिप्रकरणे ।

देवासो यत्र वितनेन बाहुना
सुदर्शनेन प्रयताः स्वर्गमायन् ।
येनाङ्किता मनवो लोकसृष्टिं
वितन्वते ब्राह्मणास्तद्वदन्तीति ॥*॥

किञ्च । पाद्मे श्रीशिवेन तप्तमुद्राप्रसङ्गे ।

विष्णुचक्राङ्कितं विप्रं पूजयेत् सर्व्वकर्म्मसु ।
विष्णुचक्रविहीनन्तु प्रयत्नेन विवर्ज्जयेत् ॥

नारदीये तप्तमुद्राप्रसङ्गे ।

श्रीलक्ष्मचक्राङ्कविहीनगात्रः
श्मशानतुल्यः पुरुषोऽथ नारी ।
दृष्ट्वा नरस्तं नृपते ! सवासाः
स्नात्वा समर्च्चेद्धरिमङ्ग सद्य इति ॥*॥

यतश्च वेङ्कटाचार्य्यपादप्रभृतिभिर्बुधैः ।
श्रुतयः स्मृतयोऽप्यत्र विख्याता लिखिताः परा ॥
अतएव तदनादरे दोषाः । पाद्मे ।

तप्तचक्राङ्कितं दृष्ट्वा ये निन्दति नराधमाः ।
अवलोक्य मुखं तेषामादित्यमवलोकयेत् ॥

अग्निपुराणे च । दशरथहतपुत्रविप्रविलापे ।

शिलावृष्टिः श्रुता किंवा प्रतिमायां हरेर्म्मया ।
किं मया पथि दृष्टस्य विष्णुभक्तस्य कर्हिचित् ॥
तप्तमुद्राङ्कितदेहस्य चेतसा नादरः कृतः ।
येन कर्म्मविपाकेन पुत्रशोको ममेदृशः ॥*॥

अथ तप्तमुद्राधारणमाहात्म्यं सौपर्णे ।

अशुचिर्म्लेच्छनाचारः सर्व्वधर्म्मबहिष्कृतः ।
प्रतप्तशङ्खचक्राभ्यामङ्कितः षड्विधापवनः ॥
वाराहे तप्तमुद्राधारणप्रसङ्गे ।

म्लेच्छदेशे शुभे वापि चक्राङ्को यत्र तिष्ठति ।
योजनानि तथा त्रीणि मम चेत्रं वसुन्धरे ! ॥
ब्रह्मखण्डे ।
आयुधैर्व्वैष्णवैः सर्व्वैस्तापितैः स्वतनुं यदि ।
चिह्नयेद्वैष्णवो यस्तु स याति परमां गतिम् ॥
पाद्मे च तत्रैव ।
अग्नितप्तं पवित्रञ्च धृत्वा तु बाहुमूलयोः ।
ब्रह्मा यमपुरं घोरं यान्ति विष्णोः परं पदम् ॥
हुताग्नितप्तचक्रेण शरीरं यस्य चिह्नितम् ।
तेन तीर्थानि यज्ञाश्च लभ्यन्ते नात्र संशयः ॥
अग्नितप्तेन चक्रेण ब्राह्मणो बाहुमूलयोः ।
अकृत्वा जपकर्म्मं संसाराम्भोधिभाग्भवेत् ॥
अग्नितप्तेन चक्रेण बाहुमूलेषु लाञ्छिताः ।
ते सर्व्वे पापनिर्म्मुक्ता यान्ति विष्णोः परं पदम् ॥
किञ्च ।
अप्राप्ता मद्दासानो विष्णुचक्रेण लाञ्छिताः ।
विष्णुचिह्नविहीनास्तु प्राप्ताः पतिताः स्मृताः ॥
इति ॥

इत्थं निवेद्यवचनं निर्म्मलं सदनादृतम् ।
सत्यं यच्च तत् सत्यविश्वभावादितत्परम् ॥*॥
अथ तप्तमुद्राधारणविधिः ।
तप्तमुद्राधारणार्थमुपचारेषु पञ्चभिः ।
स्नानमभ्यर्च्च संपूज्य चक्रमुद्रौ तथा नमेत् ॥
तत्र मन्त्रः ।
सुदर्शन ! नमस्तेऽस्तु पाञ्चजन्य नमोऽस्तु ते इति ।

अग्निमभ्यर्च्च्य मूलेन हुत्वा चाज्याहुतीः शतौ ।
चक्रशङ्खगदादीनि शस्त्राण्यस्त्राणि प्रतापयेत् ॥
तत्तन्मन्त्रैरथावाह्य तान्यभ्यर्च्च्य प्रणम्य च ।
गुरुं कृताञ्जलिं बन्ध्वा भक्त्या विज्ञापयेदिदम् ॥
उच्छिष्टभोजनादेव किङ्करः शरणागतः ।
तप्तचक्रगदादीनि तवाङ्गानीह धारये । इति ॥

अथ चक्रादीनामावाहनादिमन्त्राः ।

ओम् नमो भगवते सुदर्शनाय निर्दारितसकलदुरितरिपुव्रजाय भगवत्प्रियकराम्भोरुहकर्णिकार्द्धदुर्ललिताय ।
एह्येहि सं वहसार चक्रराज सुदर्शन ! ।
यज्ञभागं प्रयच्छ पूजामेव नमो नमः ॥
ओम् नमो भगवते पाञ्चजन्याय विष्णुशङ्खाय गम्भीरधीरध्वन्याकुलीकृतकौरववाहिनीनादाय त्रिरेखादधिवर्णाय त्रिप्रणवाय ।
एह्येहि पाञ्चजन्य ! त्वं नारायणकरस्थित ! ।
यज्ञभागं प्रयच्छ पूजामेव नमो नमः ॥
ओम् रं खं मं नं पाञ्चजन्याय नमः ॥ ओम् भगवते खड्गाय नन्दकाय त्रैलोक्यपालिवाय जयिने वज्रवज्रसुरासुररक्षःसुरीनेत्रोत्पलार्चिताय ॥
एह्येहि खड्गराज ! त्वं नन्दकाख्य सुरार्चित ! ।
यज्ञभागं प्रयच्छ पूजामेव नमो नमः ॥
ओम् खड्गाय नमः ॥ ओम् नमो भगवते कौमोदक्यै गदायै दानवेन्द्रनिकृन्तनायै भगवद्भट्टारकवासुदेवजालितायै ।
एह्येहि त्वं गदे ! देवि कौमोदक्यायुधेश्वरि ! ।
यज्ञभागं प्रयच्छ पूजामेव नमो नमः ॥
ओम् रं सं चं कं वं गदायै नमः ॥ एवं पञ्चाय नमः । वज्रराय शार्ङ्गाय नमः । इति ॥ * ॥

अथ धारणमन्त्राः ।

सुदर्शन ! महाज्वाल कोटिसूर्यसमप्रभ ! ।
अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय ॥
तथा ।
पाञ्चजन्य ! विषज्वालाभक्षणोत्पातकक्षय ।
पाहि मां पापिनं घोरसंसारार्णवपातिनमिति ॥
इत्यनुधारयन् मन्त्रं दक्षिणादिक्रमेण तु ।
भुजयोश्चक्रपूर्वाणि शस्त्राण्यस्त्राणि धारयेत् ॥
कलत्रादिपरीवारान् निजान् सर्वांश्च वैष्णवः ।
भगवत्प्रपेयन् तप्तमुद्राभिस्ताभिरङ्कयेत् ॥
तथा च । वाराहे ।
अङ्कयेत्तप्तचक्राद्यैरालयो बाहुमूलयोः ।
कलत्रापत्यभृत्येषु पत्न्यादिषु च सम्यदे ॥
किञ्च ।
आयुधं विधिवत् कृत्वा मन्त्रायुधविधानतः ।
तत्तन्मन्त्रैश्च मन्त्रज्ञः प्रतिष्ठाप्य पृथक् पृथक् ॥
ललाटे च गदा धार्या नाभौ चापं शरस्तथा ।
नन्दकश्चैव खड्गश्च दक्षबाहौ सुशङ्खके ॥
किञ्च ।
दक्षिणे तु भुजे विप्रो विभ्रद्बाहौ सुदर्शनम् ।
सव्ये च शङ्खं विभ्रद्बाहौ ब्रह्मविदो विदुः ॥
अथ चक्रादिप्रतिष्ठातिक्रमम् । नवमन्त्रमन्त्रराजे ।

सौवर्णं राजतं ताम्रं कांस्यमायसमेव वा ।
चक्रं कृत्वा तु मेधावी धारयेत् विधिवच्च इति ॥
एवमेव प्रयोधर्म्यां द्वारवत्यां भगवत्पुरे: ।
तप्तमुद्रा धृतं धार्या द्वारकायां विशेषतः ॥

इति श्रीहरिभक्तिविलासे १५ विलासः ॥

तप्तरूपकं, क्ली, (तप्तं वह्निप्रोक्षितं रूपकं रूप्यम् ।) शुद्धरौप्यम् । इति राजनिर्घण्टः ॥

तप्तभूमिकुड्यं, क्ली, (तप्ता अग्निमयी भूमिः कौड्यप्रतिमूर्तिर्यत्र । तथाविधं कुड्यं यस्मिन् ।) नरकविशेषः । इति ब्रह्मवैवर्ते प्रकृतिखण्डम् ॥

तप्तसुराकुड्यं, क्ली, (तप्तायाः सुरायाः कुड्यमिव ।) नरकविशेषः । इति ब्रह्मवैवर्ते प्रकृतिखण्डम् ॥

तम, उ इर् भ य खेदे । इच्छायाम् । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट् ।) उ, तमित्वा तान्त्वा । इर्, अतमत् अतमीत् । अस्मात् पुषादित्वात् निष्ठा ङ इत्यत्वे । भ य, ताम्यति लोकः उत्पन्नः स्यादित्यर्थः । इति दुर्गादासः ॥

तमं, क्ली, (ताम्यत्यनेनेति वा । तम + अपादाने करणे वा संज्ञायां घः ।) अन्धकारः । इति शब्दरत्नावली ॥ पादाग्रम् । इति शब्दचन्द्रिका ॥

तमः, पुं, (ताम्यत्यनेनेति । तम + संज्ञायां घः ।) तमोगुणः । इत्यमरटीकायां रायमुकुटः ॥ तमालवृक्षः । इति शब्दचन्द्रिका । (राहुः । इत्यमरः । १ । ३ । २६ । यथा, ज्योतिषे होरायाम् । "श्रुतमनुधनजैरिति । कितवस्त्रमस्रेति वराहः ॥" इति उद्वाहतत्त्वटीकायां उद्भटदत्तः । ४ । १८८ ॥)

तमः, [स्] क्ली, (ताम्यत्यनेनेति । तम + "सर्व्वधातुभ्योऽसुन् ।" उणा० । ४ । १८८ । इति असुन् ।) प्रकृतेर्गुणविशेषः । यथा,—

"सत्त्वं रजस्तम इति त्रयस्तत्र गुणाः ।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्ते आत्मनि ॥
प्रभूतत्त्व यदा सत्त्वं मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याद्धाने तपसि यद्रतिः ॥
यदा कर्म्मसु कार्य्येषु शक्तिर्यशसि देहिनाम् ।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक ! ॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्म्मणामाशिषां काम्यानां द्वापरस्तदनुक्रमः ॥
यदा मृषातन्द्रिनिद्राहिंसादिर्यशोधनम् ।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥"

इति गारुडे ९२० अध्यायः ॥ * ॥

अपि च ।

"तमस्त्वज्ञानजं विद्धि मोहनं सर्व्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ! ॥
सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत ! ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत ! ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥"
"अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ! ॥

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते ॥
रजसि प्रलयं गत्वा कर्म्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥
कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥
सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥
ऊर्द्धं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥"

इति श्रीभगवद्गीतायाम् । १४ । ८ १८ ॥

तत्तु आवरकं मोहहेतुः । इत्यमरभरतौ ॥ अस्य कार्य्यं संहारः । इति श्रीधरस्वामी ॥ तस्य धर्म्मो यथा । प्रमादः १ मोहः २ भयम् ३ क्लान्तिः ४ विषादः ५ शोकः ६ अरतिः ७ अगार्य्यता ८ । इति मोक्षधर्म्मः ॥ भ्रमः ९ तन्द्रा १० । इत्यग्निपुराणे ॥ अन्धकारः । (यथा, महाभारते । १ । १०५ । १० ।

"तमसा लोकमावृत्य नौगतामेव भारत ! ।")

तत्पर्य्यायः । तमसम् २ निद्राचर्म्म ३ गौणपङ्कम् ४ रजोवर्च्चम् ५ दिवान्धकः ६ वियद्भूतिः ७ क्षणुक् ८ दृक् ९ । इति त्रिकाण्डशेषः ॥ रजोरसम् १० दिनान्तरम् ११ अन्धकम् १२ । इति शब्दरत्नावली ॥ अमरोक्तपर्य्यायोऽन्धकारशब्दे द्रष्टव्यः ॥ शोकः । इति मेदिनी । से, २४ ॥ पापम् । इति हेमचन्द्रः ॥ (राहुः । इति मेदिनी । से, २४ ॥ यथा, रघुः । ८ । ३० ।

"निमिमीव नरोत्तमप्रिया
कृतचन्द्रा तमसेव कौमुदी ।")

तमङ्कः, पुं, (तमः कोपः । मयूरव्यंसकादित्वात् समासः ।) मशकः । इति हेमचन्द्रः त्रिकाण्डशेषश्च ॥

तमतः, त्रि, (तम + "शृन्द्रुद्भ्रियजिपर्व्विपच्चमितमीति ।" उणा० । ३ । ११० । इति अतच् ।) दृप्तितः । वाञ्छितः । इत्युणादिकोषः ॥

तमप्रभः, पुं, (तम इव प्रभाऽस्य अस्मिन् वा ।) नरकभेदः । इति हेमचन्द्रः ॥

तमरं, क्ली, (तमं रातीति । रा + कः ।) वङ्गम् । इति हेमचन्द्रः ॥

तमराजः, पुं, (तम इव राजते । राज + अच् ।) शूकरः । नवात इति ख्यात इति केचित् । तत्पर्य्यायः । शूलकः २ । तस्य गुणः । दृष्ट्यादृग्रक्तपित्तनाशित्वम् । इति राजवल्लभः ॥

तमसं, क्ली, (तम + "अत्यविचमितमीति ।" उणा० । ३ । ११० । इति असच् ।) अन्धकारः । इति त्रिकाण्डशेषः ॥ नगरम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

तमसः, पुं, (तम + असच् ।) कूपः । अन्धकारः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

तमसा, स्त्री, (तमइव जलमस्यस्याः । अच् टाप् च ।) नदीविशेषः । इति संक्षिप्तसारेउणादिवृत्तिः ॥ (यथा, महाभारते । ३ । २२१ । २३ ।

"तमसा नर्म्मदा चैव नदी गोदावरी तथा ॥")

तमस्तति:, स्त्री, (तमसस्तति: सम्हः ।) अन्धकारसम्हः । इति तमिस्राशब्दार्थे मेदिनी ॥

तमस्विनी, स्त्री, (तमो विद्यतेऽस्यामिति विनिः ङीप् च ।) रात्रिः । (यथा, महाभारते । ४ । २१ । ३८ ।

"अदृश्यमानजन्तुत्वात् तमस्विन्यामनिन्दिते ! ।
गोगोचिलमिवाक्रम्य गोचरिष्यामहं शिरः ॥")

हरिद्रा । इत्यमरः । २ । ६ । ४१ ॥

तमा, स्त्री, (तमोऽस्यस्यामिति । तम + अच् टाप् च ।) रात्रिः । इति हेमचन्द्रः । तमालवृक्षः । इति शब्दचन्द्रिका ॥

तमाः, [स्] पुं, राहुः । इति मेदिनी । से, २४ ॥

तमाखं, स्त्री, (तम्यते काङ्क्ष्यते इति । तमु काङ्क्षायाम् + "तमिविशिविडिभ्यः ।" उणा । १ । ११७ । इति काखन् ।) पत्रकम् । इति राजनिर्घण्टः ॥

तमाखः, पुं, (तमु काङ्क्षायाम् + काखन् ।) वृक्षविशेषः । तत्पर्य्यायः । कालस्कन्धः २ तापिञ्जः ३ । इत्यमरः । २ । ४ । ६८ ॥ तापिञ्जः ४ । इति भरतः ॥ नीलतालः ५ तमालकः ६ नीलध्वजः ७ कालतालः ८ महावलः ९ । (यथा, भागवते । २ । १२ । ३३ ।

"तमालनीलं सितदन्तकोट्या
क्ष्मातृष्विषन्तं गजलीलयाङ्ग ॥")

अस्य गुणाः । मधुरत्वम् । वल्यत्वम् । दृढत्वम् । स्निग्धत्वम् । गुरुत्वम् । कफपित्तव्रणदाहश्रमभ्रान्तिकरत्वञ्च । इति राजनिर्घण्टः ॥ तिलकम् । (यथा, कुट्टनीमते । १६ ।

"यस्यासुपवनवीथ्यां तमालपत्राणि युवतिवदने च ।
नखरप्रहाररचितं तन्वीवाद्येषु सुरतकथयेह ॥"

तमालक्षाधिष्ठितवृक्षः युवतिवदनमध्ये तिलकमिति ॥) खड्गः । वलयवृक्षः । इति मेदिनी । ले, ६० । तमालखदिरः । इति शब्दचन्द्रिका ॥ इयमेदें वंशत्वेऽपि च पुं स्त्री । इति जिह्वादिसंग्रहे अमरभरतौ ॥

तमालपत्रं, स्त्री, (तमालपत्रवत् वर्णेन कायतीति । के + कः ।) सुगन्धद्रव्यभेदः । इति चिकाण्डशेषः ॥ (तमालमेव । स्वार्थे कन् ।) पत्रकम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥

तमालकः, पुं, स्त्री, (तमाल एव । स्वार्थे कन् ।) तमालवृक्षः । (यथा, रामायणे । २ । ६१ । ५० ।

"ततः सरजताभाश्च तिलकाः सतमालकाः ।
प्रहृष्टाश्चाभ्यशोभन्त वृक्षा भूषाय वामनाः ॥")

वंशत्वेक् । इति शब्दरत्नावली ॥

तमालपर्णं, स्त्री, (तमालस्य पत्रमिव वर्णोऽस्येति । अर्शआदित्वात् अच् ।) तिलकम् । पत्रकम् । (यथास्य पर्य्यायाः ।

"पत्रन्तमालपत्रञ्च तथा स्यात् पत्रनामकम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) तमालवृक्षः । इति मेदिनी । रे, १०२ ॥ (तमालस्य पत्रम् । यथा, रघुः । ६ । ६४ ।

"तमालपत्रासरभाजि रन्तुं
प्रसीद शश्वन्नलयस्थलीषु ॥")

तमालिका, स्त्री, (तमालाः सन्त्यत्र । तमाल + ठन् ।) तामलिप्तदेशः । इति चिकाण्डशेषः ॥ तान्त्रवल्ली । भूम्यामलकी । इति राजनिर्घण्टः ॥

तमालिनी, स्त्री, (तमालो तमालवर्णोऽस्यस्या इति । इनिः ततो ङीप् ।) भूम्यामलकी । इति राजनिर्घण्टः ॥ तामलिप्तदेशः । इति हेमचन्द्रः ॥

तमाली, स्त्री, (तम + कालन् । गौरादित्वात् ङीष् ।) तान्त्रवल्ली । वलयवृक्षः । इति राजनिर्घण्टः ॥

तमिः, स्त्री, (तम्यते ज्ञायतेऽत्र । तम + "वर्षधातुभ्य इन् ।" उणा । ४ । ११७ । इतीन् ।) रात्रिः । इत्यमरटीकायां भरतः ॥

तमिस्रं, स्त्री, (तमोऽस्यत्र । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति निपातनात् साधुः । यद्वा, तमिस्रा अस्त्यास्मन्नर्थत्वेनास्य अच् ।) अन्धकारः । इत्यमरः ॥ (यथा, महाभारते । ४ । २१ । १७ ।

"यदेतन्नगनागारं मत्स्यराजेन कारितम् ।
दिवाच कन्या वृत्यन्ति रात्रौ यान्ति यथासुखम् ॥
तमिस्रे तत्र गच्छेयं मत्स्यराजस्य जानतः ।")

क्रोधः । इति मेदिनी । रे, ६१ ॥ (नरकविशेषः । यथा, भागवते । ४ । ७ । ४४ ।

"अमङ्गलाभाच्च तमिस्रमुख्यं
विपर्य्ययः केन तदेव कस्यचित् ॥")

तमिस्रपक्षः, पुं, (तमिस्रमन्धकारं तत्प्रधानः पक्षः ।) कृष्णपक्षः । यथा, तमिस्रपक्षचुटिकूटभक्षितमिति श्रीहर्षः ॥

तमिस्रा, स्त्री, (तमोबहुलमस्त्यस्याम् । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति निपातनात् साधुः ।) अन्धकाररात्रिः । कृष्णपक्षनिशा । इत्यमरः ॥ तमोयुक्तरात्रिमात्रम् । इति रायमुकुटः ॥ दर्शरात्रिः । इति वाचस्पतिः ॥ तमस्ततिः । इति मेदिनी । रे, १६१ ॥ (यथा, रघुः । ५ । १३ ।

"सूर्य्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा ॥")

तमी, स्त्री, (तमिः छन्दिकारादिति वा ङीष् ।) रात्रिः । (यथा, माघे । ६ । २३ ।

"दहशेऽपि भास्करदयाद्रि न यः
स तमीं तमोभिरभिगम्य ततान्त ॥")

हरिद्रा । इत्यमरः । २ । ६ । ४१ ॥

तमोघ्नः, पुं, (तमोऽन्धकारं मोहमज्ञानं वा हन्तीति । हन + टक् ।) वह्निः । सूर्य्यः । (यथा, महाभारते । ७ । १४३ । ११६ ।

"स देवराजभूयिष्ठ देवराजः
किरीटमाली वपुषा यशस्वान् ।
यथा तमांस्युदितस्तमोघ्नः
पूर्व्वप्रतिष्ठां यशसाप्य वीरः ॥")

चन्द्रः । गुहः । वेदाग्निः । शम्भुः । इति मेदिनी । घे, ७१ ॥

तमोज्योतिः, [स्] पुं, (तमसि ज्योतिर्यस्य ।) ज्योतिरिङ्गणः । इति शब्दरत्नावली ॥

तमोनुत्, [द्] पुं, (तमोऽन्धकारं नुदतीति ॥ नुद् + क्विप् ।) अग्निः । सूर्य्यः । चन्द्रः । दीपः इति शब्दरत्नावली ॥ (तमोनाशके, त्रि । यथा महाभारते । १३ । १६६ । ८ ।

"एवमुक्तस्तदात्रिर्वै तमोनुदमवच्छ्रुतौ ।
अभवत् चौन्यभावाच्च सोमवत् प्रियदर्शनः ॥")

तमोनुदः, पुं, (तमोऽन्धकारं नुदतीति । नुद् + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) सूर्य्यः । चन्द्रः । इति शब्दरत्नावली ॥ (अग्निः । चन्द्रः । इति विश्वः ॥ यथा, रघुः । ३ । २३ ।

"नरेन्द्रकन्यात्वमवाप्य वत्सपतिं
तमोनुदं दक्षसुता ह्यवाप्तः ॥"

प्रकृतिप्रेरकः । यथा, मनुः । १ । ६ ।

"ततः स्वयम्भुर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥")

तमोपहः, पुं, (तमोऽन्धकारं अपहन्तीति । अप + हन् + "अपे क्रोशतमसोः ।" ३ । २ । ५० । इति डः ।) सूर्य्यः । चन्द्रः । बुद्धिः । अग्निः । इति मेदिनी । दे, ३० ॥ (अज्ञाननाशके, त्रि । यथा, किरातार्জ্জুनीये । ५ । २२ ।

"आगमादिव तमोपहादितः
सम्भवन्ति मतयो भवच्छिदः ॥")

तमोभित्, [द्] पुं, (तमस्तिमिरं भिनत्ति खद्योतिःप्रकाशनेन नाशयतीति । भिद् + क्विप् ।) खद्योतः । इति शब्दमाला ॥

तमोमणिः, पुं, (तमसि अन्धकारे मणिरिव ।) खद्योतः । इति चिकाण्डशेषः ॥ गोमेदकमणिः । इति राजनिर्घण्टः ॥

तमोलिप्ती, स्त्री, (तमसा लिप्यते इति । लिप + क्तः निपातनात् ङीप् ।) देशविशेषः । तमोलुक इति भाषा ॥ तत्पर्य्यायः । तामलिप्तः २ वेलाकूलम् ३ तमालिका ४ । इति शब्दरत्नावली ॥ तामलिप्तम् ५ तामलिप्ती ६ । इति चिकाण्डशेषः ॥ दामलिप्तम् ७ तमालिनी ८ ताम्रपूः ९ विष्णुगृहम् १० । इति हेमचन्द्रः ॥

तमोविकारः, पुं, (तमसैव विकारो यत्र ।) रोगः । इति राजनिर्घण्टः ॥

तमोहरः, पुं, (तमो हरतीति । हृ + अच् । तमस्य हर इति वा ।) चन्द्रः । इति शब्दरत्नावली ॥ (अग्निः । सूर्य्यः । इति व्युत्पत्तिलभ्योऽर्थः ॥)

तम्या, स्त्री, (तमति गच्छतीति । तम + अच् । पृषोदरादित्वात् साधुः ।) गौः । इति हेमचन्द्रः । ४ । ३३ ॥

तम्र, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ओकारयमगेवोपधः । तम्रति । इति दुर्गादासः ॥

तम्रा, स्त्री, (तम्रति गच्छतीति । तम्र + अच् ।) गौः । इति हेमचन्द्रः । ४ । ३३ ॥

तय, ङ गतौ । रक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, तयते । इति दुर्गादासः ॥

तरः, पुं, (तॄतरते + "ऋदोरप्।" ३।३।५७। इति अप्।) तरणम्। (यथा, मनुः। ८। ४०४। "पथं यानं तरे दाप्यं पौरुषोऽर्घपथं तरे॥") लङ्घनम्। इति मेदिनी। रे, ४०॥ दक्षः। इति भूरिप्रयोगः॥ ("तरतमौ द्विबहूनामेकोत्कर्षे।" इति सुग्धबोधव्याकरणात् प्रत्ययविशेषश्च॥)

तरः, [स्] क्ली, (तॄ प्लवनतरणयोः + करणादौ यथायथं असुन्।) बलम्। (यथा, रघुः। ११। ७७।

"तिष्ठतु प्रथनमेवमग्रहं
तुल्यबाहुतरसा जितक्षया॥")

वेगः। तीरम्। प्लवगः। इति शब्दरत्नावली॥

तरक्षुः, पुं, (तरक्षु + पृषोदरादित्वात् उलोपः।) तरक्षुः। इत्यमरटीकायां भरतः॥ (यथा, हरिवंशे तृतीयायाम्। १२। ६।

"शैलकूटैस्तरक्षुभिर्गृहीत्वा वृक्षान्वाऽन्यगाधास्तिष्ठेयुः॥")

तरक्षुः, पुं, (तरं बलं मार्गं वा क्षिणोति। क्षिण हिंसायाम् + मितद्वादित्वात् कुः।) व्याघ्रविशेषः। नेकड़े बाघ इति भाषा॥ तत्पर्य्यायः। तर्क्षुः २ ऋक्षादनः ३ तरक्षुकः ४। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १६३।१४।

"ततो मायां परां चक्रे देवश्रेष्ठः प्रतापवान्।
सिंहान् व्याघ्रान् वराहांश्च तरक्षून् ऋक्षवानरान्॥")

तरक्षुकः, पुं, (तरक्षु + स्वार्थे कन्।) तरक्षुः। इति शब्दरत्नावली॥

तरङ्गः, पुं, (तरति प्लवते इति। तॄ + "तरत्यादिभ्यश्च।" उणा। १। ११६। इति अङ्गच्।) वायुना नाट्यादिजलस्य तिर्य्यगूर्द्ध्वभवनम्। ढेउ इति भाषा॥ तत्पर्य्यायः। भङ्गः २ ऊर्म्मिः ३ वीचिः ४। इत्यमरः॥ ऊर्म्मी ५ वीची ६ विचिः ७ लहरी ८ हली ९ विलिः १०। इति भरतः॥ लहरिः ११। इति सारसुन्दरी॥ चलजता १२ भङ्गिः १३। इति हारावली॥ उत्कलिका १४ ऊर्म्मिका १५। इति जटाधरः॥ वस्त्रम्। इत्यादीनां समुत्पादः। इत्यु-णादिकोषः॥

तरङ्गिणी, स्त्री, (तरङ्गो वीचिरस्त्यस्या इति। तरङ्ग + "अत इनिठनौ।" इति इनिः।) नदी। इत्यमरः। १। १०।२०॥ (यथा, माघः।

"तरङ्गिणी वैगिरिवायता भुवः॥")

तरङ्गं, क्ली, (तॄ + भावे घञ्।) प्लवपूर्व्वकदेशान्तरगमनम्। इति दुर्गादासः॥ पारगमनम्। सन्तारणम्। यथा, मोक्षधर्म्मे। ६।

"यद्यपि बहुभिः पुरुषैरेका
भवति भवार्णवतरणे नौका॥"

तरङ्गः, पुं, (तीर्य्यतेऽनेनेति। तॄ + करणे घञ्।) भेलकः। इति चिकाकश्रेयः॥ खर्गः। इति शब्दचन्द्रिकासिंहः॥

तरङ्गिः, स्त्री, (तीर्य्यतेऽनयेति। तॄ + "अर्त्तिस्तुधर्म्मीति।" उणा। २। १०३। इति अञ्निः।) नौका। (यथा, आर्य्यासप्तशत्याम्। ३६०।

"स्नानमुद्यावति तरङ्गिण्यादि गुणाकर्षतरङ्गे-यम्॥")

हतकुमारी। इत्यमरः। ४। २। ७२॥

तरङ्गिः, पुं, (तरति पापमनेनेति। तॄ + अङ्गिः।) खर्गः। (यथा, देवीभागवते। ३। ६। २८।

"इत्युक्त्वा तरङ्गिः कुर्वीं तत्सनस्कां सुलज्जिताम्।
उक्त्वा जगाम देवेशो वरं दत्त्वाभिवाञ्छितम्॥")

अर्कवृक्षः। इत्यमरः॥ भेलकः। (यथा, बोपदेवप्रणीतशतश्लोकः।

"सोऽयं व्याकरणार्णवैकतरङ्गिण्यातुर्य्यचिन्तामणि-
र्जीवात् कोविदमण्डपण्डितपतिः श्रीबोपदेवः
कविः॥")

किरणः। इति हेमचन्द्रः॥

तरङ्गिपेटकः, पुं, (तरङ्गिः पेटक इव।) काष्ठानुवाहिनी। इति जटाधरः॥

तरङ्गिरत्नं, क्ली, (तरङ्गिः खर्गस्तत्प्रियं रत्नम्।) माणिक्यम्। इति राजनिर्घण्टः॥

तरङ्गी, स्त्री, (तरङ्गिः। ऋदिकारादिति वा ङीष्।) नौका। इति शब्दरत्नावली॥ पद्मचारिणी। इति शब्दचन्द्रिका॥ हतकुमारी। इत्यमरटीकायां भरतः॥

तरङ्कः, पुं, क्ली, (तरति प्लवत इति। त प्लवनतरणयोः + बाहुलकात् अङ्कन्।) वड़िशौकस्तवल्लकाष्ठादि। प्लवः। नौका। इति मेदिनी। के, २६॥ कुम्भतुम्बीरभादिवचरः। इति शब्दरत्नावली॥

तरङ्कः, पुं, देशविशेषः। इति शब्दरत्नावली॥

तरङ्गपादा, स्त्री, (तरङ्गः प्लवगग्रीवः पादः प्रायेण तुरीयांशो यस्याः।) नौका। इति शब्दरत्नावली॥

तरङ्गी, स्त्री, (तरत्यनयेति। त + अङ्गन्। गौरादित्वात् ङीष्।) नौका। इति शब्दरत्नावली॥ (तरङ्गा। इति हारावलीधृतपाठः। ५५॥)

तरत्, [द्] क्ली, (तरत्यनेनेति। त + वाहुलकाददिः।) प्लवः। (तरतीति। तॄ + कर्त्तरि अदिः।) कारण्डवपक्षी। इति मेदिनी। दे, २६॥

तरदी, स्त्री, कण्टकिवृक्षभेदः। तत्पर्य्यायः। तारदी २ तीक्ष्णा ३ खर्व्वुरा ४ रक्तबीजका ५। अस्रा गुह्या। तिक्तलम्। मधुरलम्। गुरुलम्। वल्यलम्। कफगन्धिलञ्च। इति राजनिर्घण्टः॥

तरन्तः, पुं, (तरतीति। त + "तॄभूवहिवसीति।" उणा। २।१२७ इति झच्।) भेकः। आचारः। (तीर्य्यते इति। + कर्म्मणि झच्।) वसुमः। इत्युणादिकोषः॥

तरन्ती, स्त्री, (तीर्य्यतेऽनयेति। तॄ + झच्। ततो ङीष्।) तरिः। इत्युणादिकोषः॥

तरपत्रं, क्ली, (तॄ + भावे अप्। तरञ्चरत्रं तस्य पत्रम्।) आतरः। इत्यमरः। १। १०। ११॥ नौका भाड़ा इति भाषा॥

तरमुजं, क्ली, (तरं तरत्वं अमुवत् जायतेऽत्र। जन + बहुलवचनात् डः।) फलविशेषः। तरमूज इति ख्यातः। यथा, उत्तरकामाख्यातन्त्रे।

"ज्येष्ठे माधिमहेशानि! पौर्णमास्यां निशार्द्धके।
छत्रातुरा महाकाली भ्रमन्ती पिल्लकानने॥
तज्ज्ञात्वा ब्रह्मया तस्यै फलं दत्तं तरमुजम्।
तत्फलभक्षणात्तृप्ता वरदा सा हरप्रिया॥
यो मे दद्यात् फलं रम्यं स चिरायुश्चतुर्युगम्॥"

तरलः, पुं, (तॄ + "तृदाधिभ्यश्चित्।" उणा। १। १०८। इति कलप्रत्ययश्चित्।) हारः। हारमध्यमणिः। (यथा, महाभारते। ८। ६४।१६।

"प्रकीर्णका विप्रकीर्णाश्च राजन्!
प्रवालमुक्तातरलाश्च हाराः॥")

तलम्। इत्यजयपालः॥ (जनपदविशेषः। तद्देशवासिनि बहुवचनान्तः। यथा, महाभारते। ८। ८। २०। [नृपि॥")

"वतृषान् कलिङ्गान् तरलानङ्गकान्तृषिकान्-

तरलः, त्रि, (तॄ + कलच्।) चलः। (यथा वैद्यके। ५। २४।

"आः स्वभावमधुरैरशुभावे-
लावकैरतितरां तरलाः स्युः॥")

खिद्गः। भास्करः। इति मेदिनी। ले, ६५॥ मध्यमूल्यमानम्। इति धरणिः। द्रवीभूतञ्च॥

तरलक्षोचना, स्त्री, (तरले चपले लोचने यस्याः।) चञ्चलनयना नारी। इति हेमचन्द्रः॥

तरला, स्त्री, (तॄ + कलच् टाप् च।) यवागूः। सुरा। इति मेदिनी। ले, ६६॥ मधुमक्षिका। इति हेमचन्द्रः॥

तरलितं, त्रि, (तरलं तारल्यमस्य जातम्। तरल + इतच्। तरल इवाचरति तारलं करोतीति। तरल + क्विप् + क्विप् + क्त इति केचित्।) जाततारल्यम्। तत्पर्य्यायः। प्रेङ्खोलितम्२ लुलितम् ३ प्रेङ्खितम् ४ हृतम् ५ चलितम् ६ कम्पितम् ७ धूतम् ८ वेल्लितम् ९ आन्दोलितम्१०। इति हेमचन्द्रः॥ (यथा, गीतगोविन्दे। १२। १५।

"बालोल-कोलशशिरश्मिरलितमलकैः खेदलोलौ कपोलौ॥")

तरवारिः, पुं, (तरं समागतविपक्षवलं वारयतीति। तॄ + क्विप् + इन्।) खड्गः। तरवार इति भाषा। इति हेमचन्द्रः। २। ४४५॥

अथ खड्गपरीक्षा।

"अङ्गं रूपं तथा जातिर्नेत्रादिं च भूमिका।
अभिमानमिति प्रोक्तं खड्गज्ञानाष्टकं शुभम्॥
अभिन्ने ह्रस्यते वाढक् विभिन्ने वर्द्धते तथा।
यदैव ह्रस्यते चिह्नं तदङ्गं संप्रचक्षते॥
गौलङ्घ्यादिकं खड्गे रूपमित्यभिधीयते।
तेनैव यत् प्रतीतं स्यात् तज्जातिरिति गद्यते॥
अङ्गातिरिक्तं यज्ज्ञातिस्तन्नाहालोपलक्षकम्।
तन्नेममिति जानीयात् खड्गे खड्गविशारदाः॥
अङ्गातिरिक्तं खड्गादियच्छुद्धत्वापलक्षकम्।
तदरिष्टमिति प्राहुर्भूमिरङ्गादिधारयम्॥

यः खड्गे जायते ग्रन्थो नखदक्षादिनाहते ।
स ध्वनिस्तुलनामानं ज्ञानमष्टविधन्त्विदम् ॥
पश्चाद्वा निपुणैः खड्गे सम्भाव्यन्तेऽपि कृत्रिमाः।
अन्यावक्त्रिमौ ज्ञेयौ तावेव सहजाविति ॥
प्रतमङ्गानि चत्वारि रूपाणि जायतस्तथा ।
चिंग्रन्नेत्राणि जानीयादरिष्टानि तथैव च ॥
भूमिश्च द्विविधा ज्ञेया ध्वनिरष्टविधो मतः ।
मानन्तु द्विविधं प्रोक्तमित्येषां संग्रहो मतः ॥"॥

अथ खड्गस्य प्रताङ्गगणना लौहार्णवे ।

"रूप्यस्वर्णगजोरुवूकदमनस्थूलाङ्गकृष्णारुण-श्वेता-
भोलगदातिलानलकणाग्रन्थिस्थिरातेत्तिराः ।
मालाजीरकवट्पदोर्द्वमरिचश्यामाश्ववर्हाञ्जन-
क्षौद्रक्षुद्रकमक्षिकातुषयवव्रीहिक्षुमासर्षपाः ॥
सिंहीतण्डुलगोधिराशिवनखग्राहाहि केशोपल-
द्रोणीकाककपालपत्रतुवरीविम्बीफलीसर्षपाः ।
नीलीरक्तवचारसोनसुमनाजिङ्गीध्वमीरोहित-
प्रोष्ठीमारिषमार्कवाखुरतक्रिमेघाद्रिगुञ्जाप्रराः॥
दूर्वाबिल्वमसूरटुण्टुकगुटीमार्जारिकाकेतकी-
मूर्वावत्सकलायचम्पकबलान्यग्रोधवंशासनाः ।
ज्येष्ठीजालपिपीलिकानखरजः कृष्णाक्षरोम-
स्फोटी
कर्कन्धुम्रकुलारनालमहिषस्कन्धुक्रा इति ।
प्रोक्ता लौहविशारदेन मुनिना खड्गस्य भेदाः
क्रमात् ॥"

अथ तस्य चत्वारि रूपाणि ।

"नीलः कृष्णः पिशङ्गश्च धूम्रश्चेति चतुर्विधः ।
वर्णप्रकर्षः खड्गानां कथितो मुनिपुङ्गवैः ॥"

अथ चतसो जातयः ।

"ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति चतुर्विधः ।
जातिभेदो विनिर्दिष्टः खड्गानां मुनिपुङ्गवैः ॥"

अथ चिंग्रन्नेत्राणि ।

"चक्रं पद्मं गदा ग्रन्थो डमरुर्हुंकुरङ्कुशः ।
कुन्तं पताका वीणा च मत्स्यलिङ्गध्वजेन्दवः ॥
कुम्भः शूलश्च शार्दूलः सिंहः सिंहासनं गजः ।
हंसो मयूरो निक्षो च दण्डनः खड्ग एव च ॥
पुत्रिका चामरं शैलः पुष्पमाला भुजङ्गमः ।
चिंग्रदेतानि नेत्राणि खड्गानां कथितानि वै ॥"

अथ चिंग्रदरिष्टानि ।

"छिद्रं काकपदं रेखा भिन्नं भेकश्च मूषिकः ।
विड़ालः शर्करा नीली मण्डलो भृङ्गलक्षिके ॥
चिचिण्डः कालिका दारी कपोतः काक एव च ।
खर्परः शकली क्रोड़ी कृष्णपक्षकणालिके ॥
करालकङ्कखञ्जूरश्वङ्गपुच्छखनित्रकम् ।
लाङ्गलं वड़िशाख्यश्च मुनिना तत्त्ववेदिना ॥
प्रोक्तोन्येतान्यरिष्टानि खड्गानां चिंग्रदेव हि ॥"

अथ द्विविधा भूमिः ।

"दिव्यभौमविभागेन भूमिस्तु द्विविधा भवेत् ।"

अथाष्टधा ध्वनिः ।

"हंसकांस्याश्वदक्षाणां काकतन्त्रीखराक्षगम् ।
ध्वनयोऽष्टविधाः प्रोक्ता नागार्जुनमुनेर्मताः ॥"

अथ द्विविधं मानम् ।

"उत्तमाधममेदेन मानं तद्विविधं भवेत् ।
इति प्रोक्तानि सूत्राणि खड्गानां ज्ञानहेतवे ॥
एतानि तत्त्वतो ज्ञात्वा भवेन्नृपतिपूजितः ॥"

इति सूत्राध्यायः ॥ * ॥

तत्र प्रथमतोऽङ्गानां लक्षणानि निबोधत ॥

लौहप्रदीपे ।

"रूप्यपत्रसमा भूमिरङ्गं श्वेतं प्रतीयते ।
ऊर्द्धं तर्तुं महालक्ष्यं रूप्यवत्सुखमन्ति तम् ॥
एष खड्गवरो दद्याल्लक्ष्मीमायुर्यशो बलम् ॥१॥
स्वर्णरेखा वली तन्वी यङ्गमौ निकषोपमा ।
स्वर्णवत्सामिति प्राहुरायुर्लक्ष्मीजयप्रदम् ॥२॥
गजयुग्माकृतिर्भूमौ कृष्णायामङ्गसम्भवः ।
गजवत्सामिति प्राहू रक्तस्वर्णे तु तद्विशेत् ॥
ज्वरादिव्याधिग्रमनं तस्य प्रक्षालनाम्भसा ।
अपि क्षीणोऽपि भूपालस्तद्दीर्घात् साधयेन्
महीम् ॥३॥

एरण्डबीजप्रतिमसङ्गं भूमिः सितेतरा ।
रुचुवत्सामिदं नाम्ना ग्रन्थुदर्पक्षयङ्करः ॥
एतस्य स्वर्णमात्रेण नरः सम्यक्त्रिमुच्यते ।
महिषाख्यामिदं वत्सं केचिदाहुर्मनीषिणः ॥४॥
अङ्गं दमनपत्राभं खड्गे यस्मिन् प्रतीयते ।
विद्याद्दमनवत्सञ्च तज्ज्ञेयं द्विविधं बुधैः ॥
नीला शुभा भवेद्भूमिस्तत्र नीला गरीयसी ।
तस्मिन् पर्युषितं तोयं गन्धे दमनकोपमम् ॥
तत्प्रभावान्महीपालः क्षत्तृष्णां पृथ्वीं हि साध-
येत् ॥५"॥

प्राङ्गरस्य ।

"एका स्थूला सिता रेखा भूमिर्नीला दृढ़ा यदि ।
स्थूलाङ्गसङ्गवत्सं तद्विद्याल्लक्ष्मीयशःप्रदम् ॥
एतत्सदृशे भवेत्क्षोभः स्थूलस्थिरतरस्थितिः ।
एतं महान्तमपरे वदन्ति खड्गकोविदाः ॥६॥
दृष्टायां दृश्यते भूमौ अङ्गश्च प्रतिबिम्बितम् ।
अङ्गवत्सं भवेत्तस्य द्विधाभूमिः सितासिता ॥७"॥

लौहप्रदीपेऽपि ।

"निरङ्गं रूप्यपत्राभमीषच्छ्यामशिनिभञ्च यत् ।
दुर्लभं तन्महालक्ष्यं कान्तलौहं प्रचक्षते ॥
कृष्णा भूमिर्भवेत् स्वच्छा पीता वर्णाङ्गसङ्गता ।
कृष्णवत्सामिति प्राहुस्तत्सदृशे मोह उच्यते ॥"

प्रदीपेऽपि ।

"कृष्णा भूमिः सुवर्णाभमीषच्छुक्लाङ्गसङ्गतम् ।
डाहुलीवत्सकं विद्यात् कालसंज्ञमथापरे ॥८॥
अरुणं सूक्ष्मरूर्द्धरेखङ्गं भूमिः सितेतरा ।
अरुणाख्यामिदं वत्सं ग्रन्थुदर्पनिसूदनम् ॥
सूर्य्यांशुसदृशमात्रेण वह्निरूपां वमेत् शिखाम् ।
तस्य स्वर्णनमात्रेण पद्मकोषः स्फुटेन्निशि ॥
दुर्लभं तन्मनुष्याणां भाग्ये कुत्रापि लभ्यते ।
तदूर्योजनसहस्रस्य रिष्टं नाशयति ध्रुवम् ॥९॥
श्वेतास्थिसो यदा रेखा आमूलादुपलक्ष्यते ।
श्वेताङ्गमिति तद्विद्यादृषभौजोबलप्रदम् ॥१०॥
अम्भोजदलसङ्काशमङ्गं भूमिः सितेतरा ।
अम्भोजवत्सं तज्ज्ञेयं कथितं मुनिपुङ्गवैः ॥११॥
अङ्गं यस्य गदाकारं भूमिश्चैव सितेतरा ।
गदावत्सामिदं ब्रूयात् ततृष्णते मूलसम्भवः ॥१२॥

अङ्गं क्षौद्रतिलाकारं भूमिश्चैव सितासिता ।
तिलवत्सामिदं ज्ञेयं लक्ष्मीबलयशःप्रदम् ॥
तत्तृष्णते तिलतैलाभा वसा प्रध्यवतेऽधिकम् ॥१३॥
धूम्रवर्णा भवेद्भूमिरङ्गं वह्निशिखोपमम् ॥
अग्निवत्सामिदं ज्ञेयं ग्रन्थूनां दाहकारकम् ।
अत्र घृतोदकं न्यस्तं तप्तं भवति च क्षणात् ॥
ग्रासे वह्निं वमेद्यस्तु तथा सूर्य्यांशुसङ्गमात् ।
तत्तृष्णते बलवान् दाहो दग्धवच्च व्रणो भवेत् ॥
एतत् परमभाग्येन लभ्यते धरणीतले ।१४।
भूमिः सिता तिला वापि अङ्गञ्चेत् पिप्पली-
प्रभम् ॥
कृष्णावत्सामिदं ज्ञेयमन्तर्दाहस्तु तत्तृष्णते ।१५।
कृष्णाभूमिर्यदैवाङ्गे दृश्यते ग्रन्थिसञ्चयः ॥
ग्रन्थिवत्सामिदं ज्ञेयं वैरिपक्षविनाशनम् ।
तत्तृष्णते बलवान् दाहस्तृषा च ज्वर एव च॥१६॥
ग्रालपर्णीदलाकारमङ्गं कृष्णासिपुत्रिका ।
शिरावत्सामिदं प्राहुस्तत्तृष्णते वेपथुर्भवेत् ॥१७॥
यदा तित्तिरिपक्षाभमङ्गं भूमिः सितेतरा ।
एतत्तित्तिरिवत्सं स्यात् तत्तृष्णते बहुवेदनम् ॥१८॥
वनमालासमा यस्मिन् माला खड्गे प्रदृश्यते ।
मालाङ्गमिति तद्विद्यात्तत्तोयं गन्धवद्भवेत् ॥
अत्र तप्तोदकं न्यस्तं घृतं भवति तत्क्षणात् ।
एष दाहपरीतानामाप्ते पित्तहतात्मनाम् ॥
भवेत् परममैश्वर्यं भाग्येनैतद्धि लभ्यते ।१९।
यदा क्षीरकसङ्काशमङ्गं भूमिः सितासिता ॥
एतत्क्षीरकवत्सं स्यात्तत्तृष्णते ततृष्णाच्छरः॥२०॥
भूमिः सितासितचित्रा अङ्गं भृङ्गाभमिष्यते ॥
तत्र चैवमधस्यन्तं श्लेष्मामोति केवलम् ।
एतद्भ्रमरवत्सं स्यात्तत्तृष्णते स्याद्विसूचिका॥२१॥
ऊर्द्धगं कपिलाभासमङ्गं यस्मिन् प्रतीयते ।
ऊर्द्धवत्सामिदं प्राहुर्विषवेगनिसूदनम् ॥"

लौहप्रदीपेऽपि ।

"ऊर्द्धगं कपिलाभासमङ्गं यस्मिन् प्रतीयते ।
लाङ्गलाङ्गन्तु तद्विद्यात् स्वर्णे तस्याहिनाशनम् ॥
२२ ॥

अङ्गं मरीचसङ्काशं भवेद्भूमिः सितेतरा ।
मरीचाङ्गमिदं वत्सं तत्तृष्णते कटुरक्तता ॥
ततःप्रक्षालनतोयेन नश्यन्ति पीनसादयः ॥२३॥
यदा सर्पफणाकारमङ्गं भूमिस्तु निर्मला ॥
भुजङ्गवत्सं तद्विद्यात्तत्तृष्णते विषवद्रुजा ।
तस्य स्वर्णनमात्रेण भेकः प्राणैर्विमुच्यते ॥
एकस्यास्य प्रसादेन तत्तृष्णां ग्रास्ति मही नृपः ।
२४ ।

यदाश्वखुरसङ्काशमङ्गं भूमिस्तु निर्मला ॥
अश्वाङ्गमिति तं विद्यात् खड्गं परमदुर्लभम् ।
तस्य संयोगमात्रेण वाजी मन्दोऽपि धावति ॥
तस्य क्षालनतोयेन हयानां रोगनाशनम् ।
एतत्तृष्णते भृशं मूर्च्छा दाहश्च भ्रम एव च ॥२५॥
मयूरपिच्छसङ्काशमङ्गं भूमिः सितेतरा ।
वर्हाङ्गमिति तं विद्यात्तत्तृष्णते वान्तिरिष्यते ॥
सर्पाणामिह सर्व्वेषामस्य स्पर्शोऽहिषुक्तता ।
एतदेव नृपतिभिर्भाग्यैः कुत्रापि लभ्यते ॥२६॥

भूमिरञ्जनसङ्काशा धारा चास्य सिता भवेत् ।
अङ्गनाख्यमिदं प्राय: सर्व्वदेवोपलभ्यते ॥"
लौहप्रदीपेऽपि ।
"धारा मुग्धा भवेद्यस्य भूमि: कज्जलसन्निभा ।
क्षणरङ्गेचितं वापि विद्यात् कज्जलवच्चकम् ॥२७॥
मधुवर्णसमा भूमिरङ्गं वा मधुबिन्दुवत् ।
चौद्राख्यमिति जानीयात् जयलक्ष्मीयग्र:प्रदम् ॥"
ग्रार्ङ्गधरेऽपि ।
"निच्चक्यो भवेद्यत्र रात्रिन्दिवविशेषित: ।
मधुरो मधुवर्णाभ: स खड्गो देवबल्लभ: ॥
विशेषाद्यात्र रण्यन्ति सततं मक्षिकादय: ।२८।
आसीमकोणिका यस्य क्षुद्राङ्गं कृष्णलीक्षतम् ॥
क्षुद्रवच्चकनामानं प्राह नागार्ज्जुनो मुनि: ।
इदं कृष्णलवच्चच प्राह लौहार्णवे मुनि: ॥
अस्य क्षतेषु बलवान् दाह: समवलोकित: ।२९।
यदङ्गं मक्षिकाकारं भूमिश्चैव सितासिता ॥
क्षेद: सुष्यति चैवात्र मक्षिकाङ्गं तमादिशेत् ।३०।
अङ्गं यदा तुषाकारं या च भूमि: सितासिता ॥
तुषवच्चमिदं ख्यातं प्राह नागार्ज्जुनो मुनि: ।३१।
अङ्गं यवफलाकारं भूमि: क्षणा सिता तथा ॥
यवाङ्गमिति तं विद्यात्तत्सर्ग्गे कङ्कुसम्भव: ।
एष खड्गाधमख्याप्यो यदीच्छेद्भूतिमात्मन: ।३२
अङ्गं व्रीहिप्रसूनाभं भूमिर्धूम्रा क्षतेऽतिरुक् ।
तद्व्रीहिवच्चं जानीयाच्छ्रूणां भयवर्द्धनम् ३३ ॥
अतसीफलसङ्काशमङ्गं भूमि: सितासिता ।
अतसीवच्चमाहुस्तं तत्क्षते ग्निरसो रुजा ३४ ॥
यदा सर्षपगौराभमङ्गं भूमि: सितासिता ।
खरधार: खरसर्ग्गै: सर्षपाङ्ग: स दुर्ल्लभ: ।३५॥
सिंह्याकारं भवेद्यस्य अङ्गं भूमि: सितासिता ।
सिंहीवच्चन्तु तद्विद्यात्तत्क्षते प्रलपेन्नर: ॥
एतद्भावनतोयेन कासरोगोपनाशनम् ।३६॥
अङ्गं तण्डुलसङ्काशं भूमिर्धूम्रा सितासिता ।
तण्डुलाङ्गमिमं विद्यादृग्यग्र:शोबलवर्द्धनम् ।
एतत्पर्य्युषितं तोयं तण्डुलोदकसन्निभम् ॥
अस्य प्रभावाच्चतुरो धरां हि लभते श्रियम् ।३७
अङ्गचेन्नोत्पुराकारं भूमिराघातनि:सहा ॥
खड्गाधमिदं विद्यान्नीवच्चं नाम नामत: ।३८॥
सूक्ष्मा दीर्घो: शिरा: क्षणा भूमिश्चैव सिता-
सिता ॥
शिराङ्गमिति तं ब्रूयादेनं खड्गाधमं बुधा: ।३९।
शिवच्छिन्नाक्षतिच्चाङ्गे धारा चैव सिताथवा ॥
शिवाङ्गमिति तं ब्रूयाच्छुभपक्षनिकृन्तनम् ।४०॥
यदा व्याघ्रनखाकारमङ्गं भूमिस्तु पिङ्गला ।
नखवच्चमिदं ब्रूयात्तत्क्षते व्ययधुर्भवेत् ।
एतदामिषसंज्ञार्त्तं प्रविशेत् स्वयमेव हि ।४१॥
गोहपुच्छोपमाख्यङ्गं भूमिर्धूम्रा खराक्षति: ।
गोहाङ्गमिति जानीयाच्छुभपक्षोपनाशनम् ।
अस्य सर्ग्गेनमात्रेण जीवच्चतृष्णा जहत्यसून् ।४२॥
यदा मृगनेत्राभमङ्गं भूमि: सितासिता ॥
नेत्राङ्गमिति जानीयात् संग्रामे विजयप्रदम् ।
एतद्भावनतोयेन नूनमन्धोऽपि पश्यति ।४३॥
अङ्गं केशसमं यस्य भूमिर्धूम्रा सितासिता ।
केशाङ्गमिति जानीयात् क्लेशदु:खभयापहम् ।४४॥
निरङ्गं स्थूलप्रक्षतिसुपलाङ्गं विदुर्बुधा: ।
एतद्धि प्रायशो लोके दृश्यते द्विजसत्तम ! ।"४५
पद्मपुराणस्य ।
"निरङ्गा निम्निता धारा ग्राशे वह्निं वमत्यपि ।
द्रोणीवच्चमिदं ज्ञेयं पृथिव्यां नातिदुर्ल्लभम् ।४६।
अङ्गं काकपदाकारं भूमिराघातनि:सहा ।
एष खड्गाधमख्याप्यो काकाङ्गो भूति-
मिच्छता ॥४७॥
यदा कपालसङ्केषु दृश्यते स्वर्ग्गत: खरम् ।
एतद्धि दु:खजनकं कपालाङ्गं बुधस्त्यजेत् ।४८॥
तन्वीपत्रा बलाङ्गा या सुवर्णाङ्गासिपुत्रिका ।
पत्रवच्चकमाहुस्तं आयुर्व्वेदविदो जना: ।"
लौहार्णवेऽपि ।
"सुपर्णसन्निभा भूमिरङ्गं कालं प्रतीयते ।
तत् पत्रवच्चं काकस्य सुपर्णसमुपजायते ।४९॥
तुवरीदलसङ्काशमङ्गं यस्मिन् प्रतीयते ।
तुवरीवच्चमाहुस्तं तत्क्षते ग्निरसो भम: ॥
एष खड्गाधमख्याप्यो यदीच्छेज्जीवनं निजम् ॥
५०॥
बिम्बीदलसमा भूमिरङ्गं बिम्बीफलोपमम् ॥
बिम्बीवच्चन्तु तद्विद्यात्तच्चलं तिक्तसुच्यते ।
पित्तश्लेष्मविकाराणां प्रशमाय प्रयुच्यते ।५१॥
प्रियङ्गुसदृशच्चङ्गं भूमिश्च कपिलाक्षति: ।
फलवच्चमिदं प्रोक्तं ग्राशे धूम्रं वमत्यपि ।५२॥
अङ्गं सर्षपपुष्पाभं भूमिश्चैव सितासिता ।
एतत् सर्षपवच्चं स्यात् ग्राशे वह्निं वमत्यपि ॥
अपि कुष्ठक्रियां याति एतद्बल्मकोमलम् ।
एतत्प्रसादात् क्षितिप: क्षतृष्णां साधयते महीम् ।
५३ ॥
नीलीरससमा भूमिरङ्गं नीलीतरङ्गवत् ।
नीलीवच्चमिदं ज्ञेयं ग्राशे वह्निशिखां वमेत् ॥
एष खड्गवरो नृणामरिष्टभयनाशन: ।५४॥
रक्तास्त्रिको महारेखा भूमिश्चैव सितासिता ॥
रक्ताङ्गमिति जानीयादेरिपक्षविनाशनम् ।
ग्राशेन यस्तु रक्तांवा नीलांवा वमते शिखाम् ॥
रक्तसर्ग्गनमात्रेण स्वयमेव निहन्यति ।
क्षतेऽस्य रक्तमयधुस्तृषा दाहश्च जायते ।५५॥
अङ्गं वंशादलसमं भूमिश्चैव सितासिता ।
वंशवच्चमिदं ज्ञेयं तत्क्षताद्विषनाशनम् ॥
एष खड्गवरो राज्ञा साधनीय: प्रयत्नत: ।५६॥
रसोनादृत्तमं ह्यङ्गं भूमिस्तस्य दलोपमा ।
रसोनवच्चं जानीयात् ग्राशे वह्निं वमत्यपि ।
अस्य धावनतोयेन वातवातविनाशनम् ।५७॥
निरङ्गा निम्नेला भूमिर्धारा तीक्ष्णा खर: खर: ।
सुमनावच्चमेतत् स्याद्भुवि नात्यन्तदुर्ल्लभम् ।५८॥
मञ्जिष्ठासदृशा दीर्घास्तन्वो रेखा: सुविस्तरा: ।
जिङ्गीवच्चमिदं नाम सर्व्वकामार्थसाधनम् ।५९॥
अङ्गं भ्रमीपत्रसमं भूमिर्धूम्रा सितासिता ।
भ्रमीवच्चमिदं ज्ञेयं भ्रमेश्वरसदाक्षतम् ॥
ग्राशेषु वमते वह्निं सक्षते वह्निपीड़नम् ।६०॥
रोहितवल्कलसदृशमङ्गं भूमि: सितासितापि ।
धूम्रा गम्भीरखरयुक्तं धारा तीक्ष्णा सिता
भवेन्नेखा ॥
रोहिताख्यमिदं वच्चं सर्व्वारिष्टविनाशनम् ।
वह्निसंस्पर्शमात्रेण किचिच्चिमिचिमायते ।
इत्ययं दुर्ल्लभ: खड्गो देवानामपि कथ्यते ।६१॥
शफरीवल्कसाकारमङ्गं भूमि: सितासिता ।
प्रोष्ठीवच्चमिदं प्रोक्तं त्यक्तं तरति वारिणि ॥
एष खड्गोत्तमो राज्ञां विपक्षकुलनाशक: ।
कदाचिल्लभ्यते भाग्यैर्लभ्यते लभ्यते मही ।६२॥
अङ्गं मारिषपत्राभं भूमि: स्याद्विषमक्षिभि: ।
इत्ययं मारिषाङ्ग: स्यात् पृथिव्यां नातिदुर्ल्लभ: ॥
६३ ॥
भृङ्गराजस्य पुष्पाभमङ्गं भूमिर्दलप्रभा ।
आघातं सहते नैव एष खड्गाधमो मत: ।६४ ॥
धारा तीक्ष्णा खराकारा भूमिरङ्गविवर्ज्जिता ।
आघातं सहते घोरं ग्राशे वह्निं वमत्यपि ।
खराङ्गमिति जानीयात् पृथिव्यां नातिदुर्ल्ल-
भम् ।६५॥
निर्म्मला समला भूमिर्भवेच्चैव कदा कदा ।
मन्दा तीव्रा भवेद्धारा तद्विद्यच्चस्य लक्षणम् ।६६॥
नीलाञ्जनसमा भूमिरङ्गं जलतरङ्गवत् ।
मेघाङ्गमिति जानीयाच्छाशे प्रीतं भवत्यपि ॥
एष खड्गाधमख्याप्यो यदीच्छेद्भूतिमात्मन: ।
भर्त्तु: प्रतापं ग्रसयेद्रविबिम्बं यथा घन: ।६७॥
मन्दा धारा भृशं गाढ़ा भूमिरङ्गविवर्ज्जिता ।
पर्व्वताङ्गमिदं नाम सर्व्वत्रैवोपलभ्यते ।६८॥
अङ्गं गुञ्जाफलसमं भूमिर्म्मौनदलोपमा ।
गुञ्जावच्चमिदं दृष्टं तत्र भवति घर्षणे ॥
ग्राशे सिन्दूरसङ्काशं रजो वमति चासकृत् ।
एष खड्गवरो राज्ञा भाग्यादेवोपलभ्यते ॥
अस्य प्रभावात्तन्नास्ति यन्न साधयते नृप: ।६९॥
अङ्गं तनुशराकारं भूमिश्चैव सितासिता ।
धारा तीक्ष्णा वमति च ग्राशे वह्निसमा:
शिखा: ।
शरवच्चमिदं ज्ञेयं राज्ञां वाञ्छितसिद्धये ।७०॥
दूर्व्वादलनिभा भूमिर्धारा तीक्ष्णा खर: खर: ।
ग्राशेन वमते वह्निं दूर्व्वावच्चं सुदुर्ल्लभम् ।७१॥
अङ्गं विल्वदलाकारं भूमिश्चैव सितासिता ।
विल्ववच्चमिदं ग्राशे नीलपीते वमेच्छिखे ॥
एष खड्गवर: प्रोक्त: शत्रूणां कुलनाशन: ।७२॥
मस्तरदलसङ्काशा भूमिरङ्गं मस्तरवत् ।
मस्तराङ्गमिदं ग्राशे रजो वमति चारुणम् ।७३॥
प्रोथपुष्पनिभा रेखा दीर्घा भूमि: सितेतरा ।
प्रोथाङ्गमिति जानीयात् खड्गं परमदुर्ल्ल-
भम् ।७४॥
ग्रटीदलसमा भूमिरङ्गं तत्कुसुमोपमम् ।
ग्रटीवच्चमिदं प्राहो लभ्यते गुरुवत्तरम् ।७५॥
मार्ज्जारलोमसदृशमङ्गं भूमि: सितेतरा ।
मार्ज्जाराङ्गमिदं ज्ञात्वा रोगशोकभयावहम् ।
एष खड्गाधमख्याप्यो यदीच्छेद्भूतिमात्मन: ॥
७६॥
केतकीपत्रसदृशमङ्गं यस्मिन् प्रतीयते ।

विद्यात् केतकवर्चं तत् वाराणससमुद्भवम्।”७७
लौहप्रदीपस्य ।
“अङ्गं म्लेच्छातनुनिभं भूमिर्मूर्वादलच्छविः ।
घ्राणेन वमते शुक्लां शिखां मौर्वीं भवेत्ततः ॥
मौर्व्याङ्गमिदमुत्तमं यशःश्रीर्तिबलावहम् ॥७८॥
स्निग्धं तीक्ष्णं खरं गाढं घ्राणे वह्निं वमेत् कणम्॥
छिनत्त्यन्यविधं लौहं वज्राङ्गमिति तद्विदुः ॥७९॥
कलायपुष्पसदृग्गमङ्गं भूमिः सितासिता ।
कलायवर्चं जानीयात् तत्त्वचते पाक इष्यते ॥८०॥
अङ्गं चम्पकपुष्पाभं भूमिः श्यामा तथा सिता ।
शिखां घ्राणे वमेच्छीतं तिक्तं तस्य जलं भवेत् ।
इदं चम्पकवर्चं स्यात् सर्वत्र विजयप्रदम्॥८१॥
अङ्गं बलादलसमं भूमिः शुक्ला तथेतरा ।
बलावर्चमिदं ज्ञेयं नागाभावं भवेद्दृढम् ॥
इत्ययं वातरोगाणां नाशने परमौषधम् ॥८२॥
अङ्गं वटारोहसमं भूमिर्वटदलच्छविः ।
वटवर्चमिदं ज्ञेयं खरं खड्गाधमं बुधैः ।
एतस्य सर्षपमात्रेण नरो सुप्येत सम्यदा ॥८३॥
वंशपत्रीलीसमा भूमिः खरधारा सितासिता ।
वंशाङ्गमिति जानीयादंशदृष्टिकरं परम् ॥८४॥
भूमिः घ्राणदलाकारा अङ्गं लघु सितासितम् ।
घ्राणाङ्ग एव खड्गः स्यात् पूज्यः सर्व्वार्थदायकः ।
अयं घ्राणे वमेद्वह्निं धारा चाप्यधवा भवेत्॥८५॥
भूमिः सितासिता वापि अङ्गं श्येष्ठीसमं लघु ।
श्येष्ठीवर्चमिदं निन्द्यं न खड्गं वा हितेच्छुभिः ॥
८६ ॥
पुराणशालसदृग्गमङ्गं भूमिः सितासिता ॥
शालवर्चमिदं पूज्यं शत्रुसम्पत्तिनाशनम् ।
यदि घ्राणे वमेन्नीलां शिखां वह्निं वमेच्च वा ॥
तदेष दुर्लभः खड्गो नान्यथा भयहेतुकः॥८७॥
अङ्गं पिपीलिकाकारं भूमिर्घूम्रा तथासिता ॥
पिपीलिकाङ्ग इत्येष तत्त्वचते कच्छुसम्भवः ।
स्वयं यदि भवेद्धूम्रः घ्राणे पूज्यतमस्तदा ॥८८॥
नलपत्रसमा भूमिरङ्गन्तत्कुसुमोपमम् ।
नलाङ्गमिति जानीयाद्भर्तुः सर्व्वार्थसाधकः ॥
८९ ॥
निरङ्गा निर्मला भूमिर्घृष्टं दृष्टं वमेन्नरः ।
दृढा धारा भृशं स्थूला आघातं सहते न च ॥
रज्जोवर्चमिदं निन्द्यं शत्रूणां विजयावहम्॥९०॥
कुशाङ्कुरबीजसदृग्गमङ्गं भूमिः सितासिता ॥
कुशाङ्कवर्चं जानीयात्तत्त्वचते वेगनिग्रहः ॥९१॥
अङ्गं शूरोमसदृग्गं भूमिर्घूम्रा सितासिता ।
रोमाङ्गमिति जानीयात्तत्त्वचते पिङ्गकोन्नमः॥९२॥
भूमिः खड्गीदलसमा अङ्गं तत्कण्टकोपमम् ॥
धारा तीक्ष्णा रक्तलोक्ष्णी लघुर्भानं खरा शुभा ।
सुधाङ्गः खड्ग इत्येष तत्त्वचते दाहदुःक्षमाः ॥
सुखाद्यिकर्षणनासानां दाहः पाकश्च जायते ।
अयं यदि च सर्पाणां फणाशूपरि विश्यते ॥
फणाविदारमाप्नोति सर्पो लोटयते शिरः ।
अस्य धावनतोयेन कुष्ठरोगविनाशनम् ॥९३॥
कर्कन्धुदलदृष्टाभा भूमिरङ्गञ्च तत्समम् ।
कर्कन्धुवर्चं जानीयात्तत्त्वचते दाहनाशनम् ॥
एष खड्गाधमख्याप्यो जेतव्या यदि विद्विषः ॥
९४ ॥
रङ्गं वकुलपुष्पाभं भूमिस्तत्फलसन्निभा ॥
वकुलाङ्गमिदं पूज्यं घ्राणे सुरभिगन्धवत् ।
तन्नास्ति जगतीमध्ये यदनेन न साध्यते ॥९५॥
अङ्गं संमिश्रितं यस्मिन्न किञ्चिद्व्यक्तमीक्ष्यते ।
सर्व्वेषां दर्शनं वापि तीक्ष्णधारः खरस्वरः ॥
एष काञ्जिकवर्चः स्यादृथलादेर्नोपलभ्यते ।
नेनं प्राप्यापि वर्द्धन्ते श्वेवाश्चित्रादयोऽपि च ॥
९६ ॥
भूमिः श्यामा निरङ्गा चेद्धारा तीक्ष्णा दृढापि वा ।
आघातं सहते घोरं रक्तं सर्शनेन यो विशेत् ॥
घ्राणेन वह्निं वमति ध्रुवं वाप्यतिघर्षणात् ।
महिषाङ्गः स वै खड्गः पृथिव्यां नातिदुर्लभः ॥
९७ ॥
अत्यन्तनिर्मला भूमिः शरीरं प्रतिबिम्बितम् ।
धारा तीक्ष्णा खरस्तीक्ष्णः स्वच्छाङ्गं तद्विनिर्दिशेत् ॥९८॥
तस्मिन् यदा भवेद्रेखा ऊर्द्धा ऋत्वाख्यकं तदा॥९९
अस्मिन्नपि भवेद्वक्रा रेखा वक्राभिधन्तु तत्॥१००॥
एतत्त्रितयसुद्दिष्टं खड्गानां प्रवरं बुधैः ।
प्रायशो लभ्यते लोके यदि सर्व्वगुणावहम् ॥
इतीदं निखिलं प्रोक्तं वर्चाणां लक्षणं मया ।
प्रयत्नेलिखितं चक्रं सर्व्वेषां हितकाम्यया ॥
इतः परन्तु लौहानां लक्षणं यत्र लक्ष्यते ।
तस्य दोषो भवान्येव प्रतिज्ञेति श्रुता मया ॥
द्विजिह्वमिश्रमालोक्य मिश्राङ्गमिति निर्दिशेत् ।
सर्व्वेषामङ्गमालोक्य सर्व्वाङ्गमिति निर्दिशेत् ॥”
इति खड्गपरीक्षायामङ्गाध्यायो द्वितीयः ॥*॥
खड्गस्य रूपाणि यथा,—
“नीलोत्पलायकुसुमच्छविरञ्जनाभा
या चन्द्रनीलमणिकाचमणिप्रभा च ।
भूमिश्च या मरकतप्रतिमावभासा
खड्गस्य नीलमिति रूपमिदं वदन्ति ॥
तत्र चैन्निन्दितान्यङ्गान्यरिष्टानि बहून्यपि ।
दृश्यन्ते बहुदोषापि तथापि गुणवत्तरम् ॥१॥
या कालकामुदमसीरसकालसर्प-
शृङ्गान्धकारकचभारसमा विभाति ।
भूमिश्च या भ्रमरबन्धुसमावभासा
खड्गस्य श्यामिति रूपमिदं वदन्ति ॥
अत्र नेचाणि सम्पत्तौ अरिष्टान्यशुभानि च ।
साधारणमिदं रूपं प्राह नागार्ज्जुनो मुनिः ॥२॥
या प्रावृषेण्यनवमेकसमानवर्णा
गोमेदरत्नसदृशापि च यस्य भूमिः ।
खड्गस्य पिङ्गमिति रूपमिदं वदन्ति
भर्त्तुर्य्यशोबलधनक्षयकारणाय ॥३॥
या मन्दधूमसदृशा च शिरीषपुष्प-
तुल्या विभाति मलिनापि च खड्गभूमिः ।
नागार्ज्जुनो वदति मूलमिदं हि रूपं
भर्त्तुर्य्यशोबलधनायुविवर्द्धनाय ॥४॥
द्विरूपं मिश्रितं ज्ञात्वा शुभं प्रवदेद्बुधः ।
त्रिभी रूपैः समेतन्तु खड्गं त्रिपुरसङ्गितम् ॥
रूपैश्चतुर्भिः संयुक्तं चतुरं खड्गमुत्तरम् ॥”
इति लौहार्णवस्य खड्गपरीक्षायां वर्णाध्यायस्तृतीयः ॥ * ॥
“जातिश्चतुर्व्विधा प्रोक्ता खड्गानां या पुरा मया ।
सम्प्रत्यपि प्रयत्नेन तासां लक्षणमुच्यते ॥
शुक्लाङ्गः शुक्लवर्णश्च सुनेत्रः सुस्वरश्च यः ।
स्निग्धदुर्गन्धः सुसह्यस्तीक्ष्णधारो महागुणः ॥
खड्गं ब्राह्मणजातिं तं प्राह नागार्ज्जुनो मुनिः ।
अस्य क्षते भवेच्छोथो घोरः सर्व्वाङ्गगोचरः ॥
मूर्च्छा पिपासा दाहश्च ज्वरो मृत्युश्च जायते ।
अदृष्टं त्रिपलाकल्कमर्द्धरात्रेन्दिवोधितम् ।
मलिनत्वं न मुञ्चन्ते निर्म्मलं कुरुते परम् ।
तरुणादित्यकिरणस्पर्शादेव क्षये स्थितः ॥
दहेत् सर्व्वं न तु करं पुरुषस्य हि धारिणः ।
गायत्र्युच्चारमात्रेण खरतां व्रजति स्फुटम् ॥
एष खड्गवरः सर्व्वमरिष्टं नाशयेद्ध्रुवम् ।
अस्य प्रसादात् पुरुषस्त्रिलोकमपि साधयेत् ॥
तस्मादेष मनुष्याणां सुलभो न हि भूतले ।
दृश्यन्ते प्रायशः स्वर्गे कुशद्वीपे हिमालये ॥१॥
धूम्रवर्णः महाधारः तीक्ष्णधारं खरस्वरम् ।
सर्व्वाघातसहं सर्व्वनेत्रवर्णखराकरम् ॥
खड्गं क्षत्रियजातिं तं जानीयात् खड्गकोविदः ।
अस्य क्षते भवेदाहस्तृषानाहो ज्वरो भ्रमः ॥
मृत्युश्च जायते घ्राणे वमेद्वह्निकणान् बहून् ।
संस्कारे चाप्यसंस्कारे नैर्म्मल्यं तस्य लक्ष्यते ॥
घ्राणेऽप्यघ्राणे खरता मर्द्दने चाप्यतीक्ष्णता ।
रक्तसर्शनमात्रेण विशेदन्तरमन्तरम् ॥
अयं खड्गवरः पूज्यो मनुष्येरपि लभ्यते ॥२॥
नीलवर्णः श्यामवर्णः संस्कारे निर्म्मलो भवेत् ॥
घ्राणेन खरता चास्य घाततुल्यं निगद्यते ।
वैश्यजातिरयं खड्गः क्षते रक्ताच्चदर्शनम् ॥
नालुतुल्यो नातिहीनं सर्व्वत्रैवोपलभ्यते ॥३॥
सजलाम्भोदसङ्काशः स्थूलधारो दृढुखरः ॥
संस्कारे चैव मलिनः घ्राणे चापि खरेतरः ।
शूद्रजातिरयं खड्गः क्षते नाख्यापि वेदना ॥
दूरादेवोऽधमख्याप्यो यदीच्छेद्धितमात्मनः ।
प्रायशः सर्व्वलोकेषु स्वयमेवोपदृश्यते ॥४॥
इत्योर्लक्षणमालोक्य जातिं खड्गमादिशेत् ।
जयार्थी क्षत्रियेणैव जातिसङ्करमुच्यते ॥”
इति लौहार्णवस्य खड्गपरीक्षायां जात्यध्यायः ॥ * ॥
अथ त्रिंशन्नेत्राणां लक्षणानि ।
“चक्राकारं यदा नेत्रं खड्गस्याङ्गे प्रदृश्यते ।
तं चक्रनेत्रं जानीयात् भर्त्तुः सर्व्वार्थसाधनम् ॥
अनेनैकेन खड्गेन क्षत्रियां साधयते महीम् ॥१॥
प्रफुल्लपद्मसङ्काशं नेत्रं पद्मदलोपमम् ॥
यदि वा दृश्यते खड्गे पद्मनेत्रं समादिशेत् ।
अयं खड्गवरो यत्र तत्रैव कमलालया ॥२॥
ऊर्द्धा स्थूला यदा रेखा गदाकारा प्रतीयते ।
गदानेत्रमिदं विद्धि सर्व्वशत्रुनिसूदनम् ॥३॥
शङ्खाकारं यदा नेत्रं खड्गमध्येऽभिदृश्यते ।

ग्रहनेत्रमिदं सर्व्वदेवानामपि दुर्ल्लभम् ॥४॥
डमरूप्रतिमं नेत्रं यस्य भूमौ प्रतीयते ।
सर्व्वार्थसाधकं खड्गं तं विद्याद्विजयप्रदम् ॥५॥
धनुःसदृशं यन्नेत्रं धनुर्नेत्रमुशन्ति तम् ।
तस्य स्पर्शनमात्रेण मन्दोऽपि प्रसुखायते ॥
अयं निग्रीथे विजने खड्गो भानभनायते ॥६॥
यन्नेत्रमङ्कुशाकारं तंविद्यादृगुशवत्तरम् ॥
खड्गमङ्कुशनेत्राख्यं भर्त्तुः सर्व्वार्थसाधकम् ।
अलक्ष्मीपापरोगघ्नं क्षत्रायुष्करणं वरम् ॥७॥
क्षुराकारं यदा नेत्रं क्षुरनेत्रं वदन्ति तम् ।
अस्य प्रभावात् चीरोऽपि सार्व्वभौमो भवेन्नृपः॥
दीनोऽपि च सुखी भूयात् सुखी भूयान्महेश्वरः ।
महेश्वरोऽपि सचिवः सचिवो मरुदेश्वरः ॥
मरुदेशाधिपत्वं भवेदत्र न संशयः ॥८॥
पताकाकृतिनेत्रश्चेत् सर्व्वसम्पत्तिकारकम् ॥
पताकानेत्रमाहुस्तं संग्रामे विजयप्रदम् ॥९॥
नेत्रं वीणाकृति यदा वीणानेत्रमुशन्ति तम् ।
निग्रीथे विजने खड्गो वीणावत् खनमावहेत् ।
अस्य प्रभावात् सर्व्वेशा अपि वशा भवन्ति
हि ॥१०॥
मत्स्याकृति यदा नेत्रं मत्स्यनेत्रमिमं विदुः ।
अस्य प्रभावात् क्षितिपः क्षतृक्षां साधयते
महीम् ॥११॥
शिवलिङ्गसमं नेत्रं लिङ्गनेत्रमिमं विदुः ।
भर्त्तुः सर्व्वार्थसंसिद्ध्यै शूरूणां नाशनाय च ॥
वामपार्श्वे तु यात्रायां धर्त्तव्योऽयं तथा रणे१२।
अत्र ध्वजाङ्कुशचन्द्रकलसानां लक्षणानि पतितानि । १३ । १४ । १५ ।
मूलाकृति यदा नेत्रं मूलनेत्रं वदन्ति तम् ।
सर्व्वार्थसाधकः सर्व्वारिष्टनिष्टप्रणाशनः ॥१६॥
शार्दूलनेत्रं तं विद्यात् शार्दूलाकृतिनेत्रतः ।
शत्रुश्रेणीविनाशाय संग्रामे विजयाय च ॥१७॥
सिंहाकृति यदा नेत्रं सिंहनेत्रमिमं विदुः ।
अस्य प्रभावात् चीरोऽपि क्षतृक्षां साधयते
महीम् ॥१८॥
तत् सिंहासननेत्रं स्यात् नेत्रं सिंहासनोपमे ।
अस्य प्रभावात् क्षितिपः क्षतृक्षां साधयते
महीम् ॥१९॥
गजाकृति यदा नेत्रं गजनेत्रं वदन्ति तम् ।
अस्य प्रभावात् चीरोऽपि लभते राजसम्पदम् ॥
२० ॥
नेत्रं हंसाकृति यदा हंसनेत्रं वदन्ति तम् ।
अस्य प्रभावात् भूपालो यशः प्राप्नोत्यनुत्तमम् ॥
२१ ॥
मयूराकृतिनेत्रे द्वे तन्नेत्रमिति निर्द्दिशेत् ।
अस्य प्रभावान्नृजः सर्पदर्पान्निरुदयेत् ॥२२॥
जिह्वाकारं यदा नेत्रं जिह्वानेत्रं वदन्ति च ।
संग्रामखर्परेष्वेवं विवेद्वैरिशिरोरुहः ॥२३॥
दन्ताकारं यदा नेत्रं दन्तनेत्रं वदन्ति तम् ।
अयं रिपुगजं हन्ति चर्म्मयत्यतिभैरवम् ॥२४॥
खड्गाकारं यदा नेत्रं खड्गनेत्रं वदन्ति तम् ।
तस्य प्रभावान्मनुजस्त्रिलोकीं वशयेदपि ॥२५॥

मनुष्यपुत्रिकाकारा पुत्रिकानेत्रमुच्यते ।
अयं सग्रैलां सद्वीपां क्षतृक्षां साधयेत् क्षितिम् ।
न चेयं पुत्रिका किन्तु जयलक्ष्मीरिह स्वयम् ॥
तस्मान्नायं मनुष्याणामस्यभाग्येन लभ्यते ॥२६॥
चामराकृतिनेत्रत्वात्तन्नेत्रमिति निर्द्दिशेत् ।
अस्य प्रभावाज्जायन्ते चामरोद्धूतसम्पदः ॥२७॥
एकानेकशिखे ग्रैलनेत्रे तन्नेत्रसंज्ञकम् ।
अपि राष्ट्रभये युद्धे विषमे वैरिसङ्कटे ।
स्थिरीकरोति धरणीं धरणीं पर्व्वतो यथा ॥२८॥
पुष्पमालासमं नेत्रं पुष्पनेत्रं वदन्ति तम् ।
अस्य प्रभावात्तुष्यन्ति यक्षाः सर्व्वाश्च देवताः ॥
२९ ॥
भुजङ्गमसमे नेत्रे सर्पनेत्रमिदं मतम् ।
अयं शत्रुगणं हन्ति यथा मर्त्तेंद्र भुजङ्गमः॥३०॥
सवर्णं समवर्णश्च तत् सर्व्वं द्विविधं भवेत् ।
सवर्णं शान्तिसम्पत्तेः रिपुनाशे तथापरम् ॥
द्वयोरेकत्र दृष्टे च तत् पुनर्व्विविधं भवेत् ।
एकलोकसुखं नेदं ददाति द्विविधं द्वयोः ॥
मूलमध्याग्रसंस्थानात्तत् पुनर्द्विविधं भवेत् ।
अग्रे चाग्राफलं नेयं मध्ये मध्यफलं मतम् ।
मूले फलं जघन्यं स्यात् प्राह नागार्ज्जुनो मुनिः ।
एकं द्वे चीणि नेत्राणि नात्र संख्या व्यतिक्रमः ॥
एकं धर्म्मः स्वर्गकामौ द्वे चीणि च त्रिवर्गकम् ।
तत्फलानि प्रयच्छन्ति प्राह नागार्ज्जुनो मुनिः ॥
द्विनेत्रमिति जानीयात् स्वसंज्ञां नेत्रयोर्द्वयोः ।
त्रिनेत्रञ्च त्रिभिर्ज्ञेयं बहुनेत्रमतः परम् ॥
यथोत्तरं गुणवद्धं खड्गमाहुरनुत्तमम् ।
दिङ्मात्रमिति निर्द्दिष्टं नेत्राणां शुभदायिनाम् ॥
तीव्राणां मङ्गलानाञ्च दर्शनञ्च शुभावहम् ।"
इति खड्गपरीक्षायां नेत्राध्यायः पञ्चमः ॥*॥
"यथा नेत्रस्य संस्थानं तथारिष्टस्य लक्षयेत् ।
नेत्रेषु स्थाननियमो नारिष्टे स्थाननिर्णयः ॥
प्रशस्ताङ्गोऽपि यः खड्गोऽरिष्टनेत्रेण
निन्दितः ॥"
अथ चिह्नदरिष्टानां लक्षणानि ॥
"छिद्रवद्दृश्यते खड्गे स्वभावेन च लक्ष्यते ।
छिद्रारिष्टमिदं विद्धि भर्त्तुर्व्वीर्य्यबलापहम् ॥१॥
यदा काकपदाकारमरिष्टं दृश्यते क्वचित् ।
अयं काकपदारिष्टः सर्व्वाभीष्टविनाशनः ॥२॥
रेखाकारं यदारिष्टमृर्द्धे वा तिर्य्यगेव वा ।
रेखारिष्टमिदं विद्धि भर्त्तुर्वीर्य्यबलापहम् ॥३॥
भिन्नभ्रान्तिकरं पापं भिन्नारिष्टमिदं विदुः ।
भर्त्तुः कुलं यशो राष्ट्रं नाहत्वा न व्रजेत्
स्वयम् ॥४॥
यदा भेकशिरोरूपमरिष्टं दृश्यते क्वचित् ।
भेकारिष्टमिदं ज्ञात्वा संग्रामे भयदायकम् ॥५॥
अरिष्टे सुषिकाकारे सुषिकारिष्टमुच्यते ।
अयं खड्गाधमः कुर्य्यात् प्रभुः पातालसङ्गमम् ॥६॥
विड़ालनयनाकारो बिन्दुरेकोऽतिविस्तरः ।
विड़ालारिष्टमेतत् स्यात् भर्त्तुः सर्व्वार्थनाशनम् ॥७॥

अरिष्टे शूकराकारं यदा स्पर्शेन बुध्यते ।
शूकरारिष्टमेतत् स्याद्धनबुद्धिविनाशनम् ॥८॥
यदा नीलीरसाभासमरिष्टं दृश्यते क्वचित् ।
नील्यरिष्टमिदं ज्ञेयं यशोलक्ष्मीविनाशनम् ॥९॥
अरिष्टे मशकाकारे मशकारिष्टमुच्यते ।
भर्त्तुः कुलं यशो बुद्धिं धृतिं प्रीतिञ्च नाशयेत् ॥
१० ॥
भृङ्गप्रतिमो बिन्दुरेकोऽनेकोऽथवा यदा ।
भृङ्गारिष्टं इत्येव धृतिस्मृतिविनाशनः ॥११॥
स्रुचीरूपमरिष्टेर्द्वे वा तिर्य्यगेव वा ।
स्रुचारिष्टमिदं नाम भर्त्तुः कुलविनाशनम् ॥१२॥
जयच्छिन्द्रो राजन् ! षड्क्षयो विषमेऽथ वा ।
उपर्य्युपरि बाधोऽक्षिबिन्दाख्यामरिष्टकम् ।
तस्य स्पर्शनमात्रेण सचेलः स्नानमाचरेत् ॥१३॥
कार्षिकारिष्टमित्येतद् धीधृतिस्मृतिनाशनम् ॥
१४ ॥
एकत्र यदि न श्लेष प्रयत्नेनापि वंशतः ।
दारी नाम महारिष्टं सर्व्वाभीष्टविनाशनम् ॥
अनेकगुणसम्पन्नः खड्गो लोकैर्न पूज्यते ॥१५॥
कपोतपक्षप्रतिममरिष्टक्षेत्रदाहयम् ।
भर्त्तुः कुलं यशो विद्यां बलं बुद्धिञ्च नाशयेत् ॥१६॥
काकाकृति यदारिष्टं काकारिष्टं तदोच्यते ।
अनेन भर्त्तुः संग्रामे भङ्ग एवोपजायते ॥१७॥
अरिष्टे खर्पराकारे खर्परारिष्टमुच्यते ।
भर्त्तुर्यशो बलं वीर्य्यं बुद्धिं प्रीतिञ्च नाशयेत् ॥१८॥
यदान्यलक्षोद्भवकलं लक्ष्यं स्यादिव लक्ष्यते ।
शूकलीति स वै खड्गः सर्व्वाभीष्टनिसूदनः॥१९॥
क्रोड़ीकुक्षुपक्षकयोर्लक्ष्ये यतिते २० । २१ ।
यक्षिन्निम्नमिवाभाति मध्ये वा दृश्यते क्वचित् ।
जालारिष्टमिदं नाम भर्त्तुः कुलधनापहम्॥२२॥
एकैकरेखा दीर्घाग्रा यदा पक्षविनी भवेत् ।
स्पर्शे वाथ करेणाय करालारिष्टमुच्यते ।
अयं हि क्षितिपालानां इष्टियोग्यो भवेन्न हि ।
दर्शनादेव नश्यन्ति यशोलक्ष्मीजयादयः ॥२३॥
अरिष्टे कङ्कपत्राभे कङ्कारिष्टं तदुच्यते ।
अस्य स्पर्शनमात्रेण गच्छत्यायुर्यशो बलम् ॥२४॥
खर्ज्जूरदृष्टप्रतिमं यदारिष्टन्तु लक्ष्यते ।
खर्ज्जूरारिष्टमेतत् स्याद्भर्त्तुः कुलधनापहम् ॥२५॥
गोशृङ्गाभमरिष्टञ्चेत् शृङ्गारिष्टं तदुच्यते ।
अनेन भर्त्तुर्नश्यन्ति लक्ष्मीबलकुलादयः ॥२६॥
गोपुच्छाकृति चेत् खड्गे अरिष्टं संप्रतीक्ष्यते ।
पुच्छारिष्टमिदं नाम भर्त्तुः सर्व्वार्थनाशनम्॥२७॥
खनित्राभमरिष्टञ्चेत् खनित्रारिष्टमुच्यते ।
शूराणामपि संग्रामे भङ्गमेतत् प्रयच्छति ॥२८॥
अरिष्टे जाङ्गलाकारे जाङ्गलारिष्टमुच्यते ।
अयं पापात् पापतरः प्रेक्षणीयो न भूभुजा ।
अयमायुः श्रियं हन्ति विद्यां बलमशेषतः॥२९॥
वड़िशारिष्टस्य लक्षणं पतितम् ॥३०॥
इत्यरिष्टानि प्रोक्तानि नागार्जुनात् प्रयत्नतः ।
विचार्य्यैतानि मतिमान् खड्गं कोशे निधापयेत्॥
दिङ्मात्रमिदमुद्दिष्टमरिष्टानां हितात्मनाम् ।
अमङ्गलानां मन्दानां दर्शनञ्चाशुभावहम् ॥

अरिष्टमेकमेव स्यादरिरिष्टं शुभावहम्।
अन्योन्यमशुभं हन्यादविषस्य हि विषं यथा॥
एकमारभ्य सप्तान्तमरिष्टं प्राह नान्यथा।
यथोत्तरं द्विगुणितं फलमाहुर्मनीषिणः॥
इति खड्गपरीक्षायामरिष्टाध्यायः षष्ठः॥*॥

अथ द्विविधा भूमिः।
दिव्यभौमविभागेन भूमिर्या द्विविधा मता।
दिव्या दिवि समुद्भूता भौमा भूमिसमुद्भवा॥
तल्लक्षणमशेषेण लिख्यते तन्निबोधत।
देवदानवयोर्मध्ये खड्गरूपेरभूत् पुरा॥
ते खड्गाः पुण्यदेशेषु केषु केषु प्रतिष्ठिताः॥
दिव्यलक्षणं यथा,—
ये खड्गाः शूलधारा भृशमतिलघवो निर्म्मलाङ्गाः सुनेत्रा
ये रिष्टाभाखरूपाः सुविमलतनवश्चाप्यसंस्कारयोगात्।
दुर्भेद्या दुर्घटाश्च ध्वनिगुणगुरवो यत्नतो दाहपाकौ
ते दिव्याः कुर्वतेऽमी कुलधनविजयश्रीयशोदृद्धिमाशु॥१॥

अथ भौमलक्षणं दृष्टहारीते।
पूर्व्वं मन्वेशेन विषाणि यानि
मुक्तानि तेषां पतितासु बिन्दवः।
यस्मिन् प्रदेशे स स एव देशः
कालायसाकरतां जगाम॥
पुराऽन्तं क्षीरसमुद्रमथा-
दुत्पाद्य संयुक्ष्य ययुः सुरेन्द्राः।
तद्बिन्दवो यत्र निपेतुरेष
शुद्धायसाकरतां जगाम॥
ये विषोत्था भृशङ्काला खराङ्गाः सम्भवन्ति हि।
मूर्च्छादाहज्वरानाहशोकहिक्कावमीकराः॥
येऽन्तोत्थाः कर्बुराङ्गा मन्दाङ्गाः संभवन्ति च।
बलीपतितमालिन्यजराव्याधिविनाशनाः॥
यत्रैव पतितं यत्तु तत्तदाकरताङ्गताः॥
तद्यथा,—
वाराणसीमगधसिंहलभूमिभागे
नेपालभूमिषु तथाङ्गमहीप्रदेशे।
सौराष्ट्रिकेऽन्यतरधन्यमहीविभागे
शुद्धायसाः क्षतिवराः प्रवदन्ति सन्तः॥
तद्यथा,—
वाराणसेयाः सुस्निग्धाश्लक्ष्णधाराः सदङ्गिनः।
लघवः सुखसन्धेया ग्रेया श्यामेदग्रालिनः॥
मागधाः कर्कशाः शूलधारा गूढतराङ्गिनः।
गुरवो दुःखसन्धेयाः खड्गा ग्रेया विचक्षणैः॥
नेपालदेशप्रभवा निरङ्गा निश्चलाश्च ये।
ग्रेयाः सदङ्गा मलिना लघवः शूलधारिणः॥
कालिङ्गा गुरवः स्वच्छा यत्नाङ्गास्तनुहेतवः।
सौराष्ट्रा निर्म्मलाः स्निग्धाः सुखक्षाङ्गा भृशं खराः॥
सिंहलद्वीपजातानां चतुर्द्धा भेद उच्यते।
केचित् सदङ्गा गुरवः कर्कशाः स्निग्धधारिणः॥
केचित् सदङ्गा लघवः सुस्निग्धा शूलधारिणः।
एषां रूपेण मिश्रेण ग्रेया हि द्विजातयः॥
सामान्यात् द्विगुणश्चौड्रः कलिर्दग्धगुणस्ततः।
कलेः शतगुणं भद्रं भद्राद्दशं सहस्रधा।
वक्त्रात् षष्ठिगुणः पाण्डिर्निरविर्द्दग्धभिर्गुणैः।
ततः कोटिसहस्रेण क्षयस्कान्तः प्रशस्यते॥"
इत्यादिकं रसायनौपयोगिकमेव न तु खड्गे दृष्टफलम्॥ यदाह।
आसान्तु लौहजातीनां वक्ष्यं खड्गाय युज्यते।
तथाच।
ये खड्गास्तीक्ष्णधारा भृशमतिगुरवः षड्गुणाढ्याः सुभेद्याः
केचित् साङ्गा निरङ्गाः कति च न समला निर्म्मलाः केचिदेव।
ते भौमाः कुर्वतेऽमी धनविजयबलं षड्गुणा निर्गुणा वा
ते दुःखं शोकमुग्रं दधति बलकुलश्रीयशोनाशकास्ते॥
इति खड्गपरीक्षायां भूम्यध्यायः सप्तमः॥२॥*॥

अथाष्टधा ध्वनिः।
ध्वनिरष्टविधः प्रोक्तो यः पूर्व्वं सूत्रसंग्रहे।
तेषामपि लिखाम्यत्र सगुणं लक्षणाष्टकम्॥
तद्यथा,—
पूर्व्वे चत्वारः शुभदाः परे निन्द्यास्तथा स्मृताः।
विचार्य्य खड्गमानञ्च कर्त्तव्यं खड्गकोविदैः॥
घोरस्तार इति ख्यातो द्विविधः खड्गकोविदैः।
घोरः स्यात् सुखसन्धेयस्तार उच्चाटने मतः॥
यत्र हंसरवस्येव खड्गे नखहते ध्वनिः।
हंसध्वनिरयं खड्गः सकलार्थप्रसाधनः॥१॥
कांस्यशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः।
कांस्यध्वनिरयं खड्गः प्राह नागार्জ্জुनो मुनिः॥२॥
अश्मस्थलक्षणं पतितम्॥३॥
टङ्कशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः।
टङ्कध्वनिरयं खड्गः सर्व्वशत्रुनिसूदनः॥४॥
काकस्वर इवाभाति यस्मिन् खड्गे हते ध्वनिः।
काकस्वरोऽयं खड्गः स्यात् श्रीयशःकुलनाशनः॥५॥
तन्त्रीस्वरसमो यस्मिन् भवेत् खड्गे हते ध्वनिः।
तन्त्रीध्वनिरयं खड्गः कुलश्रीधननाशनः॥६॥
स्वरस्येव ध्वनिर्यस्मिन् स्वरध्वनिरयं मतः।
श्रीयशोज्ञानविज्ञानजयतेजोविनाशनः॥७॥
प्रस्वरस्येव यः खड्गः स निन्द्यः खड्गलक्षणे॥८॥
गभीरतारध्वनिता खड्गस्यासुभलक्षणम्।
उत्तानमन्द्रध्वनिता खड्गस्यासुभलक्षणम्॥
अपाङ्गनेत्रहीनोऽपि खड्गः सुध्वनिरुत्तमः।
अन्धः कुरूपो मधुजो यथा भुवि सुगायनः॥
सर्व्वलक्षणसम्पन्नः खड्गो यो ध्वनिवर्জ্জितः।
स निन्द्यः सुन्दराङ्गोऽपि यथा वाक्यविवर्জ्जितः॥
नखेन वाथ दण्डेन तथा लौहशलाकया।
लोष्टेन प्रकरैराभिर्वा ध्वनिविज्ञानमुच्यते॥"
इति खड्गपरीक्षायां ध्वन्यध्यायोऽष्टमः॥*॥

अथ द्विविधं मानम्।
यन्मानं द्विविधं प्रोक्तं तस्य लक्षणमुच्यते।
उत्तमाधममेदेन भेदो हि द्विविधो मतः॥
उत्तमं यद्विशालं स्याल्लघुमानं प्रकीर्त्तितम्॥१॥
अधमं तच्च यत् खर्व्वं गुरुमानं प्रकीर्त्तितम्॥२॥
तत्पुनस्त्रिविधं प्रोक्तमादिमध्यान्तभेदतः।
यो मुष्टिविंशतिसमायततीव्रधारो
भर्त्तुर्भवेत् प्रसरतोऽपि षड्डुलीभिः।
मानेन चारुपलिकः स हि खड्गमध्ये
नातिप्रशस्यनविशस्यफलप्रदः स्यात्॥
यो द्वादशाष्टनवसुष्टिभिरायतः स्यात्
मन्दो भवेत् प्रसरतोऽपि चतुर्थभागः।
तावत्पलैः परिमितस्तु ततोऽधिको वा
खड्गाधमो धनयशःकुलनाशनाय॥
नागार्জ্জुनोऽपि।
यावत्यो मुष्टयो दैर्घ्ये तदर्द्धाङ्गुलयो यदा।
प्रसरे तच्चतुर्थांशमिति वै मानमुत्तमम्॥
यावत्यो मुष्टयो दैर्घ्ये प्रसरे तत्त्रिभागिकः।
पलैस्तदर्द्धैर्मुलितः स खड्गो मध्य उच्यते॥
यावत्यो मुष्टयो दैर्घ्ये तुर्य्यांशः प्रसरे तु तत्।
अधमः कीर्त्तितः खड्गस्तत्समो वाधिकः पलैः॥
भौमानामिदमुद्दिष्टं दिव्यानां लघवो मताः॥"
इति खड्गपरीक्षायां मानाध्यायः॥*॥

भोजस्तु।
"दीर्घता लघुता चैव खरविस्तीर्णता तथा।
दुर्भेद्यता सुघटता खड्गानां गुणसंग्रहः॥
खर्व्वता गुरुता चैव मन्दता तनुता तथा।
सुभेद्यता दुर्घटता खड्गानां दोषसंग्रहः॥
इति निखिलसुदारसूक्तमत्र
बहुतन्त्रेषु निरूप्य खड्गयष्टेः।
नृपतिरिति विचिन्त्य यो विधत्ते
स चिरतरां श्रियमुच्छ्रितां लभेत॥"
इति युक्तिकल्पतरूक्तखड्गपरीक्षा समाप्ता॥

तरस्, क्ली, (तृ+बाहुलकात् असच्।) मांसम्। इत्यमरः। २।६।६३॥ (यथा, काश्यायनश्रौतसूत्रे।
"तरसमया पूर्व्वोक्तभागाः॥"
"तरसमया मांसमयाः।" इति कर्कः॥)

तरस्थानं, क्ली, (तराय अवतरणाय यत् स्थानम्। तरस्य स्थानं वा।) घट्टः। इति शब्दरत्नावली॥

तरस्वान्, [त्] त्रि, (तरो वलं वेगो वा अस्त्यस्येति मतुप्। मस्य वः।) शूरः। वेगी। इति शब्दरत्नावली॥ (चतुर्थमनुपुत्रविशेषः। यथा, हरिवंशे। ७। ८८।
"तरङ्गभौरुर्बुद्धश्च तरस्वाञ्छुच एव च।
अभिमानी प्रवीरश्च शिबिः सङ्कर्षणस्तथा॥")

तरस्वी, [न्] त्रि, (तरो वेगः बलं वास्त्यस्य। तरस्+"अस्मायामेधास्रजो विनिः।" ५।२।१२१। इति विनिः।) शूरः। वेगी। इत्यमरः। ३।३।१२७। (यथा, भागवते। ८।१०।३१।
"राहुश्च तमा सोमः पुलोमा युयुधेऽनिलः।

निशुम्भशुम्भयोर्देवी भद्रकाली तरस्विनी ।") गरुड़े वायौ च पुं । इति राजनिर्घण्टः ॥

तराम्बुः, पुं, (तराय तरणाय तरे तरणे वा अम्बुरिव अतिगभीरमध्यदेशत्वात् तथात्वम् ।) नौकाविशेषः । भड़ इति भाषा । तत्पर्य्यायः । डोङ्गः २ वहनम् ३ वार्व्वटः ४ वहित्रम् ५ । इति त्रिकाण्डशेषः ॥

तरालुः, पुं, (तराय तरणार्थं अलति पर्य्याप्नोतीति । अल + उन् ।) नौकाविशेषः । इति हारावली ॥

तरिः, स्त्री, (तरत्यनया इति । तॄ + "अच इः ।" उणां । ४ । १३८ । इति इः ।) नौका । इत्यमरः । २।१०।१० । (यथा, महाभारते । १ । १०० । ४८ ।

"तालवीद्दारुकन्याकि धर्म्मार्थं वाहये तरिम् ।") द्रव्या । वस्त्रादिपेटकः । इति हेमचन्द्रः ॥

तरिकः, पुं, (तराय तरणाय हितः । तॄ + ठन् ।) क्रयः । इति त्रिकाण्डशेषः । (तरणे तरणनिमित्तकदेयशुल्के अधिकारोऽस्यार्थ । तरणशुल्कग्रहणाधिकारी । यथा, याज्ञवल्क्यः । २ । २६६ । [दण्ड्यः ।")

"तरिकः खलकं शुल्कं गृह्णन् दाप्यः पणान् दश ।

तरिका, स्त्री, (तरिक + टाप् ।) नौका । इति शब्दरत्नावली ॥

तरिणी, स्त्री, (तरस्तरणं शब्दलेनाख्यस्याः इति इनिः ङीप् च ।) नौका । इति हेमचन्द्रः ॥

तरिता, स्त्री, (तर + इतच् ।) तर्त्तनी । इति शब्दचन्द्रिका ॥ गञ्जनम् । गाँजा इति भाषा । यथा, कुलार्णवतन्त्रे ।

"धत्तूरो बालकूटश्च ताम्रकूटश्च धुस्तुरः ।
बहिर्वेगं खर्ज्जुरसञ्चारिका तरिता तथा ॥"

तरित्रः, पुं, (तरेर्नौकाया रथ इव तत्परिचालनात्तथात्वम् ।) अरित्रम् । इति हारावली ॥

तरीः, स्त्री, (तरत्यनया इति । तॄ + "अवितॄस्तृतन्त्रिभ्य ईः ।" उणां । ४ । १५८ । इति ईः ।) नौका । (यथा, माघे । ३ । ७६ ।

"तरीव तत्त्वमयत्नगुणाकृष्टम् ॥")

द्रव्या । वस्त्रादिपेटकः । इत्यमरादिकोषः ॥ भूमः । इति त्रिकाण्डशेषः ॥ द्रोणी । इति घटाधरः । दृश्या । इति मेदिनी । रे, ४० ॥

तरीषः, पुं, (तॄ + "तॄस्तृभ्यामीषन् ।" उणां । ४ । २६ । इति ईषन् ।) शोभनाकारः । भेलः । अवसायः । इत्यमरादिकोषः ॥ समुद्रः । समर्थः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ स्वर्गः । इति मेदिनी । षे, ३७ ॥

तरीषी, स्त्री, (तरीष + संज्ञायां ङीष् ।) इन्द्रकन्या । इति मेदिनी । षे, ३८ ॥

तरुः, पुं, (तरति समुद्रादिकमनेनेति । तॄ + "भृञ्जृशीतॄचरीति ।" उणां । १ । ७ । इति उः ।) वृक्षः । इत्यमरः । २ । ४ । १ ॥ (यथा, रघुः । १ । ७० ।

"सनिवनतरुच्छायां देव्या तया सह शिश्रिये ॥")

तरुकुणिः, पुं, (तरौ वृक्षे कूणयतीति । कूण + इन् ।) वाग्दुदपक्षी । इति त्रिकाण्डशेषः ॥

तरुजीवनं, क्ली, (तरोर्जीवनं जीवनकारणम् ।) वृक्षमूलम् । इति शब्दचन्द्रिका ॥

तरुणं, क्ली, (त + "चौ रच लो वा ।" उणां । ३ । ५४ । इति उनन् ।) कुसुमपुष्पम् । इति मेदिनी । णे, ४६ ॥

तरुणः, पुं, (तॄ + उनन् ।) स्थूलजीरकः । एरण्डः । इति राजनिर्घण्टः ॥

तरुणः, त्रि, (तरति व्रवते प्रमोदचलिते इति । तॄ + "चौ रच लो वा ।" उणां । ३ । ५४ । इति उनन् ।) युवा । इति मेदिनी । णे, ४६ । (यथा, महाभारते । १ । ४० । २६ ।

"तरुणस्तस्य पुत्रोऽभूत्तिग्मतेजा महातपाः ॥")

नूतनः । इति धरणिः ॥ (यथा, छन्दोमञ्जर्य्याम् ।

"तरुणं सर्षपशाकं नवौदनं पिच्छिलानि दधीनि ।
स्वल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥")

तरुणज्वरः, पुं, (तरुणश्चासौ ज्वरश्चेति ।) सद्यो भावि ज्वरः । (यथा, चक्रदत्तः ।

"आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः ॥"

तरुणदधि, क्ली, (तरुणं तरुणत्वयोक्तं दधीति ।) पक्वदिनोत्तोलितदधि । इति वैद्यकम् ॥

"गुरुं मांसं स्त्रियो दृष्ट्वा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"

इति भावप्रकाशे । ६४ ॥

तरुणी, स्त्री, (तरुण + गौरादित्वात् ङीष् ।) द्वितीयवयाः स्त्री । (यथा,—

"ततस्तु तरुणी श्रेया द्वात्रिंशद्गृहतुसराविध ।
निदाघशरदोर्बाला हिता विषयिणी मता ॥
तरुणी प्रौढसमये ॥"

'नित्यबाला सेव्यमाना नित्यं वर्द्धयते बलम् ।
तरुणी द्वात्रयेच्छक्तिम् ॥"

"वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भूयोभूयः प्रवर्त्तमानरजाः स्त्री । इत्यमरटीकासारसुन्दरी ॥ तत्पर्य्यायः । युवती २ । इत्यमरः । २ । ६ । ८ ॥ तनुनी ३ युवतिः ४ । इति भरतः ॥ यूनी ५ दिक्करी ६ धनिका ७ धनीका ८ । इति शब्दरत्नावली ॥ यक्षकन्या । दन्तीवृक्षः । चीड़ानामगन्धद्रव्यम् । पुष्पविशेषः । सेउती इति भाषा ॥ तत्पर्य्यायः । सहा २ कुमारी ३ गन्धाढ्या ४ चारुकेशरा ५ भद्रेष्टा ६ रामतरुणी ७ सुदला ८ बहुपत्रिका ९ भद्रवल्लभा १० ॥ इति राजनिर्घण्टः ॥ सेवती ११ । यथा, गारुडे पुराणे ।

"चम्पकात् पुष्पशतकादशोकं पुष्पसप्ततम् ।
अशोकात् पुष्पसाहस्रात् सेवतीपुष्पसप्ततम् ।
सेवतीपुष्पसाहस्रात् कुब्जकं पुष्पसप्ततम् ॥"

(यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"गुलपञ्ची तरुणयुक्ता कर्णिका चारुकेशरा ।
महाकुमारी गन्धाढ्या लाक्षाढ्यातिमङ्गला ॥"

तर्क, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, तर्कयति । वितर्कणोऽप्ययम् । (अत्र सकं ।) तर्कयत्यन्धगुहं सुधीः । इति दुर्गादासः ॥

तर्कः, पुं, (तर्क+भावे घञ्।) आकाङ्क्षा। वितर्कः। व्यभिचारशङ्कानिवर्त्तकः। इति भाषापरिच्छेदः॥ (यथा, महाभारते। ३। १६६। १०८।
"शुष्कतर्कं परित्यज्य आश्रयस्व श्रुतिं स्मृतिम्॥")
स च षड्विधः। यथा। आत्माश्रयः १ अन्योन्याश्रयः २ चक्रकः ३ अनवस्था ४ प्रमाणबाधितार्थकः ५। इति जगदीशः॥ एषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि॥ ऊहः। हेतुद्वारकम्। तत्तु मीमांसादि। इति मेदिनी। के, २५। (यथा, मनुः। १२। १०६।
"आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥"
न्यायशास्त्रम्। यथा, नैषधे।
"यत्काव्यं मधुवर्षिभिर्धवितपरास्तर्केषु यस्योल्लसः॥"
ज्ञानम्। यथा, महाभारते। १। १६८। १८।
"तं वै फलार्थिनं मन्ये भ्रातरं तर्कचक्षुषा॥"
अर्थवाद इति कर्मोपाध्यायः। यथा, अक्ताः शर्करा उपदधातीति विधिः श्रूयते। तच्चाञ्जनसाधनं घृतं तैलं वा तन्मध्ये केनाक्ता इति संशये तैजो वै घृतमित्यर्थवादात् घृतेनाक्ता इति निर्णीयते। अतस्तर्कोऽर्थवादः॥")
तर्ककः, पुं, (तर्केण आकाङ्क्षया कायति प्रकाशते इति। के+कः।) याचकः। इति हेमचन्द्रः॥ (यथा, महाभारते। १२। ४५। ६।
"सधानुजीविनो भृत्यान् संश्रितानतिदीनपि।
कामैः सन्तर्पयामास क्षपयांस्तर्ककानपि॥"
तर्कयतीति। तर्क+ण्वुल्।) तर्ककारकश्च॥
तर्कविद्या, स्त्री, (तर्कोपदेशी विद्या तर्करूपा या विद्या वा।) न्यायविद्या। तत्पर्य्यायः। आन्वीक्षिकी २। इत्यमरः। १।६।५॥ (यथा, महाभारते। १३। ३७। १२।
"आन्विक्षिकीं तर्कविद्यामगुरक्तो निरर्थिकाम्॥")
तर्कारी, स्त्री, (तर्कं ऋच्छतीति। ऋ+कर्म्मण्यण्।" ३। २। १। इत्यण्। ङीप् च।) जयन्तीवृक्षः। इत्यमरः। ४। २। ६५॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम्।
"वैजयन्ती च तर्कारी जयन्ती विजया जया॥"
अस्या गुणा यथा,—
"तर्कारी वरघं स्वादु सतिक्तं कफवातजित्॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥
अस्याः पत्रहारो यथा,—
"तर्कारी विश्वशिग्रुसुरसवत्सकनिम्बजैः।
पत्रमूलफलैस्तोयं प्रतप्तमुष्णाच्च सेचनम्॥
इति चरके चिकित्सास्थाने सप्तविंशेऽध्याये॥
इयं गणिकारिकापि वाच्या। तत्पर्य्याया यथा,
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका॥
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
तर्किणः, पुं, चक्रमर्दवृक्षः। इतिरत्नमाला॥ तर्कीलोऽपि पाठः॥ (चक्रमर्दशब्देऽस्य विवृतिर्व्याख्याता॥)

तर्की, [न्] त्रि, (तर्कयितुं शीलमस्य यद्वा तर्कयतीति। तर्क+णिनिः।) तर्कविशिष्टः। मीमांसकः। यथा,—
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः।
त्रयस्त्राश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा॥"
इति मनुः। १२। १११॥
तर्कुः, स्त्री, (कृत्+उः। निपातनात् साधुः।) सूत्रनिर्म्माणयन्त्रम्। टेको इति भाषा॥ तत्पर्य्यायः। कपालनालिका २। इति त्रिकाण्डशेषः॥ तर्कुटी ३ सूत्रला ४। इति हारावली॥ (कुम्भकारस्य चक्राकारशिलाभाण्डम्। यथा, अनर्घराघवे। २। ६।
"शुद्धे सम्पति यावदभ्युदयते तत्तर्कुटक्षोनृष्टजा
रथ्याहिम्बरजश्छटावलयितो देवस्त्विषामीश्वरः॥")
तर्कुटं, क्ली, (तर्कयति सूत्रोत्पादकतया शोभते इति। तर्क दीप्तौ+बाहुलकात् उटन्।) कर्पटम्। इति त्रिकाण्डशेषः॥ काटनाकाटा इति भाषा॥
तर्कुटी, स्त्री, (तर्कुट+स्त्रियां गौरादित्वात् ङीष्।) तर्कुः। इति हारावली। २१३।
तर्कुपिण्डः, पुं, (तर्कुस्थितः पिण्डः। मध्यपदलोपिसमासः।) तर्कुस्थितदृत्तपिण्डः। टेकोर वाँटुल इति भाषा॥ तत्पर्य्यायः। वर्त्तिनी २। इति जटाधरः॥ तर्कुपीठी ३ वर्त्तुला ४। इति हारावली। २१३॥
तर्कुपीठी, स्त्री, (तर्कुस्थिता पीठी खण्डो यत्र पिण्डः।) तर्कुपिण्डः। इति हारावली। २१३॥
तर्कुलासकः, पुं, (लासयति श्लोभयतीति। लस कान्तौ+ण्यच्+ण्वुल्। तर्कुः सूत्रनिर्म्माणयन्त्रं तस्य लासकः।) भक्षोलः। इति हारावली। २१३॥ खरसा इति भाषा॥
तर्कुग्राहः, पुं, (तर्कोः ग्राहः।) सामकः। इति त्रिकाण्डशेषः॥ टेकोर ग्राह इति भाषा॥
तर्क्षुः, पुं, (तरत्नुः पृषोदरादित्वात् साधुः।) तरत्नुः। इति शब्दरत्नावली॥
तर्क्ष्यः, पुं, यवक्षारः। इति रत्नमाला॥
तर्ज्ज, भर्त्सने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) तर्ज्जति। इति दुर्गादासः॥
तर्ज्ज, क ड भर्त्सने। इति कविकल्पद्रुमः॥ (चुरां-आत्मं सकं-सेट्।) क ड, तर्ज्जयते। भर्त्सनम्। तामतर्ज्जयदमरे। इति रघुप्रयोगस्तु तर्ज्जनं तर्ज्जः। तर्ज्जं करोतीति णौ साध्यः। इति दुर्गादासः॥
तर्ज्जनं, क्ली, (तर्ज्ज+भावे ल्युट्।) भर्त्सनम्। यथा। अधीरायास्तर्ज्जनताड़नादि। इति रसमञ्जरी॥ (यथाच कुमारे। ६। ४५।
"भूमेर्दिभिः सकम्पोष्ठैर्लक्षिताङ्गुलितर्ज्जनैः।
यच्च कोपैः कृता स्त्रीणामाप्रसादार्थिनः प्रियाः॥")
तर्ज्जनी, स्त्री, (तर्ज्यतेऽनयेति। तर्ज्ज भर्त्सने+करणे ल्युट्। ततः स्त्रियां ङीप्।) अङ्गुष्ठसमीपाङ्गुलिः। तत्पर्य्यायः। प्रदेशिनी २।

इत्यमरः। २। ६। ८१॥ सा तु मन्त्रस्य चतुर्भिर्मासैर्भवति। इति सुश्रुतोधः॥ (यथा, कथासरित्सागरे। १७। ८८।
"तच्छ्रुत्वा शम्बरं तं सा वधूः सोमप्रभा क्रुधा।
विलोक्य भ्रामयामास यमाज्ञामिव तर्ज्जनीम्॥")
तर्ज्जिकः, पुं, (तर्ज्जस्तर्ज्जनमस्त्यस्य। तर्ज्ज+ठन्।) देशविशेषः। तत्पर्य्यायः। तार्किकः २। इति हेमचन्द्रः। ४। २४॥
तर्णः, पुं, (तर्णोति क्षुदादिकं भक्षयतीति। तृह् भक्षणे+अच्।) वत्सः। इति हेमचन्द्रः। ४। ३२६॥
तर्णकः, पुं, (तर्ण एव। स्वार्थे कन्।) शशोवात-वत्सः। इत्यमरः। २। ६। ६१॥ कोमले बाछुर इति भाषा॥ (यथा, राजतरङ्गिण्याम्। ५। ४३६।
"म्लानचीरां वरां पत्नीं वहद्भारां निषादतः।
आलिङ्गमानां क्रन्दद्भिस्तर्णकैरिव दारकैः॥"
बालकः। यथा, अनर्घराघवे। २। २३।
"मुनिविनियोगलूनप्ररूढदुग्धाहुतानि बर्हींषि।
गोकर्णतर्णकोऽयं तर्णोत्पुलकच्छकच्छेद॥")
तर्बिः, पुं, (तरन्ति प्लवोदरादित्वाद्बोपः।) सूर्य्यः। शवः। इति शब्दार्थकल्पतरुः॥
तर्मरीकं, क्ली, (तीर्य्यतेऽनेनेति। तॄ+"पर्णरीकादयश्च।" उणां। ४। २०। इति ईकन्प्रत्ययेन निपातनात् साधुः।) नौका। (तरतीति। कर्त्तरि ईकः।) पारगे, त्रि। इति मेदिनी। के, १६१॥
तर्द, हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) तर्दति। इति दुर्गादासः॥
तर्दूः, स्त्री, (तरति प्लवते इति। तॄ+"भृञो दुक् च।" उणां। १। ६१। इति ऊः दुगागमश्च।) दारुहस्तकः। इत्यमरः। २। ६। ३४। काठेर हाता इति भाषा॥
तर्पणं, क्ली, (तृप प्रीणने+भावे ल्युट्।) तृप्तिः। प्रीणनम्। इत्यमरः। २। ६। ५६॥ (यथा, कथासरित्सागरे। २६। २३६।
"तच्चाहूय तरोर्मूले वेतालं वृक्षवेश्मनि।
पूजयित्वाकरोत्तस्य तृप्तांसबलितर्पणम्॥")
यज्ञकाष्ठम्। इति हेमचन्द्रः॥ (दर्भाग्नि पितरौ येन। तृप्+करणे ल्युट्।) देवर्षिपितृमनुष्याणां जलाञ्जलिदानेन तृप्तिसम्पादनम्। यथा,
"एवं स्नात्वा पितॄन् देवान् मनुष्यांस्तर्पयेन्नरः।
नाभिमात्रे जले स्थित्वा चिन्तयेदूर्द्धमानसः॥
आगच्छन्तु मे पितर इमं गृह्णन्त्वपोञ्जलिम्।
तीर्थोदकाञ्जलाञ्जलीन्दद्यादाकाशे दक्षिणे तथा॥
वसित्वा वसनं शुक्लं स्मृत्वा चाक्षीर्ज्जनार्दनम्।
विधिवत्तर्पणं कुर्य्युर्न पात्रे तु कदाचन॥
यदपां क्रूरसंस्पृष्टं यदमेध्यासु किञ्चन।
अज्ञानान्मलिनं यच्च तत् सर्व्वमपगच्छतु॥
गृहीत्वानेन मन्त्रेण तोयं सव्येन पाणिना।
प्रक्षिपेद्दक्षिणे नैर्ऋत्यां दर्भोपहितयेऽङ्गुलम्॥
अनाक्षिकन्तु यद्दुष्टं पापाद्यच्च प्रतिग्रहम्।

दुष्कृतं यच्च मे किञ्चिदाजन्मकायकर्म्मभिः ॥
प्रीयतां मे तदिन्द्रस्तु वरुणः सहदेवतिः ।
सविता च भगश्चैव सुनयः सनकादयः ॥
आब्रह्मस्तम्बपर्य्यन्तं जगत् तृप्यतिति ब्रुवन् ।
त्रिपेदपोऽञ्जलीँस्त्रीँस्तु कुर्व्वन् सङ्कल्पतर्पणम् ॥"
इति गारुडे २१५ अध्यायः ॥

तर्पणविशेषस्तु गारुडे २१६ अध्याये तथा वह्निपुराणे नित्याह्निकस्नानविधिनामाध्याये च द्रष्टव्यः ॥ * ॥ जीवत्पितृकस्य तर्पणनिषेधो यथा,—

"दर्शस्नानं गयाश्राद्धं तिलैस्तर्पणमेव च ।
न जीवत्पितृको भूप! कुर्य्यात् कृत्वाघमाप्नुयात्॥"
इति कालिकापुराणे ८६ अध्यायः ॥

महायज्ञविशेषः । तत्तु पितृयज्ञः । पितॄणां कव्यगलादीनाञ्च विधिना जलान्नदानेन तृप्तिसम्पादनम् । इत्यमरटीकायां भरतः ॥ "तत् द्विविधं प्रधानं अङ्गञ्च । तत्राद्यं यथा,—

'तर्पणञ्च शुचिः कुर्य्यात् प्रत्यहं स्नातको द्विजः ।
देवेभ्यञ्च ऋषिभ्यञ्च पितृभ्यञ्च यथाक्रमम् ॥'
इति प्राचेतसः ॥

विधवामधिकृत्य काश्यीखण्डे ।

'तर्पणं प्रत्यहं कार्य्यं भर्तुः कुशतिलोदकैः ।
तत्तृप्तिस्तत्पितुश्चापि नामगोत्रादिपूर्ब्बकम् ॥'

द्वितीयं यथा, ब्रह्मपुराणे ।

'नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ।
तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम् ॥'

तर्पणाकरणे दोषः । यथा, योगियाज्ञवल्क्यः ।

'नास्तिक्यभावादृक्थाद्यैरपि न तर्पयति वै सुतः ।
पिबन्ति देहरुधिरं पितरो वै बलार्थिनः ॥"

तस्य निषिद्धस्नानादि यथा । "नेरुकारचिते स्थाने पितॄंस्तर्पयेत् ।' इति ब्रह्मवैवर्त्ते ॥

'यत्र सर्व्वाय चोत्सृष्टं यत्राभोज्यनिपातनम् ।
तद्वर्ज्यं सलिलं तात ! सदैव पितृकर्म्मणि ॥'
इति मार्कण्डेयपुराणम् ॥ * ॥

तस्य विधानं यथा । स्नातश्चार्द्रवासा देवपितृतर्पणमम्भःस्थ एव कुर्य्यात् परिवर्त्तितवासाश्चेत् तीरमुत्तीर्य्येति । इति विष्णुः ॥ तीर्थे विशेषो यथा, मत्स्यपुराणे ।

'तिलोदकाञ्जलिर्द्देयो जलस्थैस्तीर्थवासिभिः ॥'

तीर्थे स्नातस्तर्पयेत् तर्पणं करोति तदा जलैकचरणः आचम्य कुर्य्यात् तस्य जले च तर्पणमविरुद्धम् । स्थले तर्पणं दर्भेषु कार्य्यम् । यथा,—

'प्रागग्रेषु सुरांस्तर्प्पेत् मनुष्यांश्चैव मध्यतः ।
पितॄंश्च दक्षिणाग्रेषु दद्यादिति जलाञ्जलीन् ॥'
इति आग्नेयपुराणम् ॥

अशुचिदेशे तु ।

'यत्रानुचिस्थलं वा स्याद्दूरे देवतापितॄन् ।
तर्पयेत्तु यथाकाममसु सर्व्वं प्रतिष्ठितम् ॥'
इति विष्णुः ॥

'प्रादेशमात्रं उद्धृत्य सलिलं प्राङ्मुखः सुरान् ।
उदङ्मुखान्यवान्तर्प्पेत पितॄन् दक्षिणतस्तथा ॥'
इति दक्षः ॥

उद्धृतोदके तु ।

'पात्राद्वा जलमादाय शुचौ पात्रान्तरे क्षिपेत् ।
जलपूर्णेऽथवा गर्त्ते न स्थले तु विवर्द्धयेत् ॥'
इति हारीतः ॥

'यद्युद्धृते: प्रसिञ्चेत्तु तिलान् संमिश्रयेज्जले ।
अतोऽन्यथा तु सर्व्वेण तिला ग्राह्या विचक्षणैः ॥'
इति योगियाज्ञवल्क्यः ॥

"अङ्गुष्ठानामिकाभ्याञ्च दक्षिणस्तेतरात् करात्।
तिलान् गृहीत्वा पात्रस्थान् ध्यायन् सन्तर्पयेत् पितॄन् ॥'
इति नारदः ॥ * ॥

देवतर्पणं यथा,—

'ब्रह्माणं तर्पयेत् पूर्ब्बं विष्णुं रुद्रं प्रजापतिम् ।
देवा यक्षास्तथा नागा गन्धर्व्वाश्चरसोऽसुराः ॥
क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भकाः खगाः ।
विद्याधरा जलाधारास्तथैवाकाशगामिनः ॥
निराहाराश्च ये जीवाः पापे धर्म्मे रताश्च ये ।
तेषामाप्यायनायैतद्दीयते सलिलं मया ॥'

इदं उपवीतिना प्राङ्मुखेन देवतीर्थेन कार्य्यम् ॥

मनुष्यतर्पणं यथा,—

'सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ॥
सर्व्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ।'

इदं निवीतिना मनुष्यतीर्थेन सामगेन प्रत्यङ्मुखेन कार्य्यम् । अन्यवेदिना उदङ्मुखेन कार्य्यम् ॥ * ॥ तत ऋषितर्पणं प्राङ्मुखेन उपवीतिना देवतीर्थेन कार्य्यम् । ततो दिव्यपितृतर्पणं दक्षिणामुखेन प्राचीनावीतिना सतिलजलेन पितृतीर्थेन कार्य्यम् । ततः पितृतर्पणम् ॥ * ॥ भीष्माय्यं भीष्मतर्पणम् । तस्य मन्त्रो यथा,—

'वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च ।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे ॥'

प्रार्थनमन्त्रो यथा,—

'भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥'

प्रेतपतृर्द्दश्यां यमतर्पणं यथा,—

'यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥'
प्रत्येकनामभिस्त्रीँस्त्रीन् अञ्जलीन् दद्यात् ॥ * ॥

तिलतर्पणनिषेधो यथा,—

'रविशुक्रदिने चैव द्वादश्यां श्राद्धवासरे ।
सप्तम्यां जन्मदिवसे न कुर्य्यात् तिलतर्पणम् ॥'
इति स्मृतिः ॥

'संक्रान्त्यां निशि सप्तम्यां रविशुक्रदिने तथा ।
श्राद्धे जन्मदिने चैव न कुर्य्यात्तिलतर्पणम् ॥'
इति मत्स्यपुराणम् ॥

तत्र प्रतिप्रसवो यथा,—

'अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च ।
उपाकर्म्मणि चोत्सर्गे युगादौ मृतवासरे ॥
सूर्य्यशुक्रादिवारेऽपि न दोषस्तिलतर्पणे ।
तीर्थे तिथिविशेषे च कार्य्यं प्रेते च सर्व्वदा ॥'
इति स्मृतिः ॥

'तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्य्यात् तर्पणं तिलमिश्रितम् ॥'
इति मरीचिवचनम् ॥ * ॥

तिलाभावे प्रतिनिधिर्यथा ।

'तिलानामप्यभावे तु सुवर्णरजतान्वितम् ।
तदभावेऽपि सिञ्चेत्तु दर्भैर्मन्त्रेण चाग्रथ ॥'
इति याज्ञवल्क्यः ॥ * ॥

अशक्तौ । आब्रह्मस्तम्बपर्य्यन्तं जगत्तृप्यतु । इत्यनेन चोत्सर्पयेत् ।" इत्याह्निकतत्त्वम् ॥

काश्मीरखण्डमते तु ।

"आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु सर्व्वे पितरो मातृमातामहादयः ॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ॥"* ॥

जन्माष्टम्यां तर्पणस्य फलं यथा,—

"तस्यां तिथौ वारिमात्रं पितृभ्यां यः प्रयच्छति ।
गयाश्राद्धं कृतं तेन घृताक्तं नात्र संशयः ॥"
इतिब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

तर्पणी, स्त्री, (तृप्यतेऽनयेति । तृप्+करणे ल्युट् । स्त्रियां ङीप् ।) गुरुस्कन्धवृक्षः । स च श्लेष्मातकवृक्षः । इति शब्दमाला ॥ (सर्व्वजनतृप्तिप्रदायित्वात् गङ्गा । यथा, काश्मीरखण्डे ।२६।७२।

"तर्पणी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी ।"
प्रीतिप्रदे, त्रि । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"क्षुत्तृट्श्रमग्लानिहरी पेया वातानुलोमनी ।
विशेषी तर्पणी हृद्या ग्राहिणी बलवर्द्धनी ॥")

तर्पणेच्छुः, पुं, (तर्पणमिच्छतीति । तृप+उः निपातनात् साधुः ।) भीष्मः । इति शब्दरत्नावली ॥ तर्पणाकाङ्क्षिणि, त्रि ॥

तर्पयन्ती, स्त्री, (तर्पयति प्रीणयतीति । तृप्+णिच्+शतृ+ङीः । ततो ङीप् ।) पद्मचारिणी । इति शब्दचन्द्रिका ॥

त(र्ब)र्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) रेफोपधः । तर्बति । इति दुर्गादासः ॥

तर्बटः, पुं, (तर्बति हतं गच्छतीति । तर्ब+बाहुलकात् अटन् ।) वत्सरः । इति शब्दरत्नावली ॥ चक्रमर्दः । इति राजनिर्घण्टः ॥

तर्म्मे, [न्] क्ली, (तरतीति । तॄ+"सर्व्वधातुभ्यो मनिन् ।" उणा ४ । १४४ । इति मनिन् ।) यूषाख्यम् । इत्यमरः । २ । ७ । १६ ॥

तर्षः, पुं, (तृष पिपासायाम्+भावे घञ् ।) अभिलाषः । (यथा, महाभारते । १२ । २०४ । ६ ।

"तर्षक्षेदो न भवति पुरुषस्येह कल्मषात् ।
निवर्त्तते तदा तर्षः पापमात्मगतं यदा ॥")
तृष्णा । इत्यमरः । २ । ६ । ५५ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ४८० ।

"लवणार्णवपानेन तर्षोत्कर्षमिवोद्वहन् ।

यतप्रतापो रिपुस्त्रीणां सनेत्राम्भोऽभजन्मुखम्॥"
यथा, वैद्यकचक्रपाणिसंग्रहे क्षयाधिकारे।
"कार्श्यमग्निकरायुक्तं चन्दनोशीरपद्मकम्।
द्राक्षामधुकसंयुक्तं पित्ततर्षे जलं पिबेत्॥"
तीर्य्यतेऽनेनेति। तॄ प्लवनतरणयोः+"तृतॄवदिहनीति।" उणां ३। ६२। इति सः।) प्लवः। (तीर्य्यतेऽसौ इति कर्म्मणि सः।) समुद्रः। इत्युणादिकोषः॥ सूर्य्यः। इति संक्षिप्तसारे उणादिवृत्तिः॥

तर्षः, क्ली, (तृष+भावे घञ्।) पिपासा। इति जटाधरः॥ (अभिलाषः। यथा, भागवते। ३। २५। ७।
"निर्विण्णा नितरां भूमन्नसदिन्द्रियतर्षणात्।
येन संभाव्यमानेन प्रपन्नान्धं तमः प्रभो!॥")

तर्षितः, त्रि, (तर्षोऽस्य जातः। तर्ष+तारकादित्वात् इतच्।) क्षुधितः। इति त्रिकाण्डशेषः॥ (यथा, भागवते। ६। ६। २७।
"राजा तदृषिवचनसदनं प्रविष्टो निशि तर्षितः।
दृष्ट्वा शयानान् विप्रांस्तान् पपौ मन्त्रजलं स्वयम्॥"
जाताभिलाषः। यथा, रामायणे। २।१०४।१।
"वशिष्ठः पुरतः कृत्वा दारान् दशरथस्य च।
अभिचक्राम तं देशं रामदर्शनतर्षितः॥")

तल, गतौ। (भ्वां-परं-सकं-सेट्।) सौत्रधातुरयम्। तालिग्रः। इति दुर्गादासः॥

तल, कि प्रतिष्ठितौ। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-अकं-सेट्।) कि, तालयति तलति व्रतम्। संपूर्वः स्वादित्वर्थः। इति दुर्गादासः॥

तलं, क्ली पुं, (तलतीति। तल प्रतिष्ठायाम्+पचाद्यच्।) स्वरूपम्। यथा महीतलम्। (यथाच माघे। २। १११।
"क्षत्वा क्षत्रविदस्त्रीर्थैश्चन्नः प्रश्निधयः पदम्।
विदार्य्यन्तु महत्तलं विद्विषद्दम्भसः॥"
"तलं स्वरूपं प्रमाणमिति यावत्॥" इति तट्टीकायां मल्लिनाथः॥) अनूर्द्धम्। इति मेदिनी। ले, २१॥ (अधः। इत्यमरः। ३। ३। २०१॥ यथा, मनुः। २। ५६।
"अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते॥"
यथा च श्रुतौ। २। १६।
"वासो वल्कलमास्तरः किशलयान्योक-
स्तरूणां तलं
मूलानि क्षतये क्षुधां गिरिनदीतोयं
क्षयाश्रान्तये॥"
हस्तादीनामुपरिभागः। यथा,—
"तलं प्रत्यङ्गुलीनां याः कण्डरा बाहुपृष्ठतः।
बाह्वोः कर्म्मक्षयकरी————————॥"
इति माधवकृतरुग्विनिश्चये वातव्याधौ॥
"तलं हस्तस्योपरिभागः तलशब्दोऽत्र उपरिवचनः यथा भूतलमिति गयदासः। तेनायमर्थः, बाह्वोः पृष्ठं बाहुपृष्ठं तत आरभ्य हस्ततलं तस्योक्तमिति॥" इति विजयरक्षितकृतव्याख्यानम्॥)

तलं, क्ली, (तलतीति। तल+अच्।) व्याघातवारणम्। (यथा,—
"ततः समुत्पेतुरुदायुधास्ते
महीक्षितो बद्धतलाङ्गुलित्राः॥")
इति महाभारते। १। १६०। १५।
काननम्। कार्य्यबीजम्। इति मेदिनी। ले, २१॥ गर्भः। इति त्रिकाण्डशेषः॥ पादतलस्य मध्यम्। इति हेमचन्द्रः। ३। २८२॥ (यथा, भागवते। ८। २०। २३।
"रसामचष्टाङ्घितलेऽथ पादयो-
र्महीं महीध्रान् पुरुषस्य जङ्घयोः।
पतत्त्रिणो जानुनि विश्वमूर्त्ते-
रूर्व्वोर्गजं मारुतमिन्द्रसेनः॥"
हस्तस्य मध्यमपि। यथा, मनुः। ४। १४३।
"पृष्ठे तानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्।
गात्राणि चैव सर्व्वाणि नाभिं पाणितलेन तु॥")

तलः, पुं, तालवृक्षः। चपेटः। (यथा, मार्कण्डेये। ६०। १६।
"स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः।
देयास्त्वयापि सा देवी तलेनोरस्यताडयत्॥"
करतलाघातजन्यशब्दः। यथा, महाभारते। ३। २७७। २४।
"ततः प्रहसिताः सर्व्वे तेऽन्योन्यस्य तलान् ददुः॥")
तूणरः। सव्यपाणिना तन्त्रीघातः। इति मेदिनी। ले, २१॥ स्वभावः। आधारः। इति हेमचन्द्रः॥ महादेवः। यथा, महाभारते शिवसहस्रनामस्तोत्रे। १३। १७। १२८।
"तलस्तालः करस्थाली ऊर्द्धसंज्ञनको महान्॥")

तलकं, क्ली, (तलेन गभीरगर्त्तेन कायतीति। के+कः।) पुष्करिणी। इति हारावली। ४२॥ तलाओ इति हिन्दी भाषा॥

तलप्रहारः, पुं, (तलेन पाणितलेन प्रहारो यस्य।) चपेटः। तत्पर्य्यायः। चर्व्वा २। इति हारावली। १६७॥ (यथा, मार्कण्डेये। ६०। १७।
"तलप्रहाराभिहतो निपपात महीतले॥
तलस्य प्रहारः।) तलाघातः॥

तलसारकं, क्ली, (तले सारो यस्य कम्।) घोटकस्थान्नभोजनपात्रम्। इति केचित्॥ घोटकस्य वक्त्रस्थबन्धनरज्जुः। तत्पर्य्यायः। वक्त्रपट्टः २ तलिका ३। इति हेमचन्द्रः। ४। ३१७॥

तलहृदयं, क्ली, (तलस्य पादतलस्य हृदयमिव।) पादतलस्य मध्यम्। इति हेमचन्द्रः। ३। २८२॥

तला, स्त्री, (तल+स्त्रियां टाप्।) गोधा। व्याघातवारणा। इत्यमरः। २। ८। ८४।

तलाची, स्त्री, (तलमञ्चतीति। अञ्चु+क्विप्। स्त्रियां ङीष्।) नखनिर्म्मितकटः। इति हारावली। १७७॥

तलातलं, क्ली, (नास्ति तलं यस्येति व्यतलम्। तलादपि व्यतलम् अत्यन्तनिश्चलतयास्य तथात्वम्।) पातालविशेषः। इति शब्दमाला॥ तत्र मयनामा दानवेन्द्रस्त्रिपुराधिपतिर्भवता

त्रिपुरारिणा त्रिलोक्याः शं चिकीर्षुणा निदग्धस्वपुरत्रयस्तत्प्रसादात् लब्धपदो मायाविनामाचार्य्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते।" इति श्रीभागवतम्॥

तलिका, स्त्री, (तलं वक्त्रसोऽधोभागो बन्धनस्थानत्वेनास्त्यस्या इति। तल+ठन्।) तलसारकम्। इति हेमचन्द्रः। ४। ३१७॥

तलितं, क्ली, भृष्टमांसम्। यथा,—
"शुद्धमांसावघातेन मांसं सम्यक् प्रसाधितम्।
पुनस्तदाज्ये संभृष्टं तलितं प्रोच्यते बुधैः॥"
अस्य गुणाः। यथा, भावप्रकाशे। १। १।
"तलितं बलमेधाग्निमांसौजःशुक्रवर्द्धनम्।
तर्पणं लघु सुस्निग्धं रोचनं दृढ़ताकरम्॥"

तलिनं, क्ली, (तल्यते गम्यतेऽत्र। तल+"तलिपुलिभ्यां नः।" उणां। २। ५३। इति इनन्।) गृहम्। इति हारावली। १७२॥

तलिनः, त्रि, (तल+इनन्।) विरलः। श्लोकः। स्वच्छः। इति मेदिनी। ने, ७०॥ दुर्बलः। इति हेमचन्द्रः॥

तलिमं, क्ली, (तल+बाहुलकात् इमन्।) कृत्रिमम्। तल्पम्। चन्द्रातपः। वितानकः॥ इति मेदिनी। मे, ४४॥

तलुनः, पुं, (तरति वेगेन गच्छतीति। त+"ऋोरच लश्च वा।" उणां। ३। ५४। इति उनन् रस्य लश्च।) पवनः। युवा। इति मेदिनी। ने, ७०॥

तलुनी, स्त्री, (तलुन+गौरादित्वात् ङीष्।) तरुणी। युवतिः। इति शब्दरत्नावली॥

तलेचरः, पुं, (तले अधोभागे चरणं इष्टिरस्य।) शूकरः। इति शब्दार्थकल्पतरुः॥

तलोदरी, स्त्री, (तलमतिगभीरमपर्य्यन्तमेतिभावः उदरं यस्याः। बहुव्रीहौऽपि "नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च।" ४। १। ५५। इति ङीष्। आद्ययोर्बहुव्रीह्योर्निषेधो बाधते पुरस्तादपवादन्यायतः।) भार्य्या। इति शब्दार्थकल्पतरुः॥

तलोदा, स्त्री, (तले उदकं यस्याः। उदकशब्दस्योदादेशश्च।) नदी। इति त्रिकाण्डशेषः॥

तल्कं, क्ली, (तल्+बाहुलकात् कन्।) वनम्। इति त्रिकाण्डशेषः॥

तल्पं, क्ली पुं, (तल्यते शय्यार्थं गम्यतेऽत्र। तल+"खण्यशिल्पशय्याध्यारूपपर्पतल्पाः।" उणां। ३। २८। इति पप्रत्ययेन निपातनात् साधुः।) शय्या। (यथा, मनुः। ३। ६।
"सङ्विधिं तल्प आसीनमर्हयेत् प्रथमं गवा॥")
अट्टालिका। दारः। इत्यमरभरतौ॥ (यथा, सम्बन्धसंहितायाम्। १५८।
"पितृव्यदारगमने श्यालभार्य्यागमे तथा।
गुरुतल्पव्रतं कुर्य्यात् तान्या निष्कृतिरुच्यते॥")

तल्पकीटः, पुं, (तल्पे शय्यायां जातः कीटः।) कीटविशेषः। डारपोका इति भाषा। यथा,
"जन्मैकं तल्पकीटश्च तदा शुद्धो भवद्धवम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्ण जन्मखण्डम्॥

तस्पनं, क्ली, (तस्प इत्याचरति। तस्प+क्विप्+ल्युच्।) करिपृष्टम्। इति भूरिप्रयोगः॥ पृष्ठवंशस्थ मांसम्। इति हारावली॥

तस्तं, क्ली, (तस्मिन् भूदेशे लीयते इति। ली+डः।) विलम्। इति त्रिकाण्डशेषः॥

तस्तः, पुं, (तस्मिन् लीयते इति। ली+डः।) जलाधारविशेषः। इति मेदिनी। बे, २२॥ तलाओ इति हिन्दीभाषा॥

तस्तज, पुं, (तत प्रसिद्धं यथास्यात् तथा तनोतीति। तन+अच्।) प्रग्रस्तः। इत्यमरः॥ अयं अजहल्लिङ्गः समासे उत्तरपदे भवति। यथा कुमारीतस्तजः। इत्यमरटीका॥

तस्ती, स्त्री, (तत् प्रसिद्धं यथा तथा तनोतीति। तन+डः स्त्रियां ङीष् च।) वरत्री। इति मेदिनी। बे, २२॥

तवचीरं, क्ली, (तु+अच्। तवं चीरमिति नित्यकर्म्मधारयः।) तोयाचीर इति ख्यातम्। तत्पर्य्यायः। पयःचीरम् २ यवजम् ३ यवजोद्भवम् ४। अस्य गुणाः। मधुरत्वम्। स्निग्धरत्वम्। दाहपित्तक्षयकासकफश्वासदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

तवचीरी, स्त्री, (तवचीर+ङीष्।) मद्यपर्णी। इति राजनिर्घण्टः॥

तवराजः, पुं, (तु+अच् तवः पूर्णः सन् राजते। राज+अच्।) यवासग्रकैरा। इति राजनिर्घण्टः॥ (यवासग्रकैराशब्दे ऽस्य विवृतिर्गीतया॥)

तवराजोद्भवखड्कः, पुं, (उद्भवत्यस्मादिति। उत्+भू+अच्। उद्भव उत्पत्तिस्थानम्। तवराज उद्भवोऽस्य। यद्वा, तवराजात् उद्भवतीति। उद्+भू+अच्।) ततः कर्म्मधारयः। यवासग्रकैराभवखड्कः। तत्पर्य्यायः। सुधामोदकजः २ खड्कोद्भवजः ३ सिद्धमोदकः ४ अम्लतसारजः ५ सिद्धखड्कः ६। अस्य गुणाः। दाहतापक्षयाग्मोहमूर्च्छाश्वासनाशित्वम्। इन्द्रियतर्पणत्वम्। प्रीतत्वम्। सदासुमधुरत्वञ्च। इति राजनिर्घण्टः॥

तविषः, पुं, (तव+"तवेर्विद्वा।" उणा।१।४६। इति टिषच्।) स्वर्गः। सप्तमः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

तविषी, स्त्री, (तविष+संज्ञायां ङीष्।) नदी। देवकन्या। भूमिः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (बलम्। यथा, ऋग्वेदे।१।३५।३।

"क्षयाय जिष्णो तविषीं दधानः॥")

तष्टः, त्रि, (तक्ष+क्तः। पृषोदरात् कलोपे साधुः।) तनूकृतः। इत्यमरः। ३।१।६६।

तष्टा, [ऋ] पुं, (तक्षकार्य्ये+तृच् पृषोदरात् कलोपे साधुः।) त्वष्टा। कुतार इति भाषा। विश्वकर्म्मा। आदित्यविशेषः। इत्यमरटीकायां रमानाथः॥

तस, द कि अवक्षेदनौ। इति कविकल्पद्रुमः॥ (चरां-पक्षे भ्वां-परं-सकं-सेट्।) द, कर्म्मणि तंस्यते। कि, तंसयति तंसति हारो जनम्। इति दुर्गादासः॥

तस, य उ इर उतृचेपे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्। उदित्वात् क्त्वावेट्।) य, तस्यति धूलिं वायुः। उ, तसित्वा तस्त्वा। इर, अतसत्। अतासीत्। अतसीत्। अक्षात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

तसरः, पुं, (तनोतीति। तन+"तॄफलिभजिमनितसिगमिदम्पिशिक्षिभ्यः क्सरन्।" उणा ३। ७५। इति सरन् किच्च।) वसरः। सूत्रवेष्टनम्। इत्युणादिकोषः॥ (यथा, वाजसनेयसंहितायाम्। १६। ८३।

"रसं परिस्रुता न रोहितं
नयद्धुर्धीरस्तसरं न वेम॥")

तस्करः, पुं, (तत् करोतीति। तत्+"तत्करोतीति।" ३।२।२१। इत्यस्य सूत्रस्य "किं यत्तद्बहुषु ब्रह्मोद्विधानम्।" इति वार्त्तिकोक्तेरच्। ततः।) "तदूढतोः करपत्योः इति सुट्दलोपौ।) चौरः। एकाग्राकः। इति रत्नमाला॥ मदनवृक्षः। इति जटाधरः॥ कर्णः। यथा, रघुः। १।२७।

"वाङ्मात्रा यत् परस्वेभ्यः स्मृतौ तस्करता स्थिता॥"

"तस्करः कर्णचौरयोरिति कोषान्तरम्।" इति तट्टीका॥

तस्करवायुः, पुं, (तस्करस्य एकाग्राकस्य वायुरिव।) काकनासालता। इति राजनिर्घण्टः॥

तस्करी, स्त्री, (तद्+ल+चौरार्थे टः टित्वात् ङीप्। सुटि दलोपे च साधुः।) क्षोपना नारी। इति शब्दार्थकल्पतरुः॥

ताटङ्कः, पुं, (ताड्यङ्क+पृषोदरात् साधुः।) ताड्यङ्कः। इति त्रिरूपकोषटीकायां भरतः॥ (यथा, देवीभागवते। १२। ६। ७१।

"तडोदरी तिरोभावा ताटङ्कप्रियवादिनी॥")

ताटस्थ्य, क्ली, (तटस्थ+भावे ष्यञ्।) उदासीनत्वम्। निकटस्थत्वम्। यथा, ताटस्थ्येन उदासीनत्वेन इति। तटस्थो निकटस्थः प्रसिद्धपूर्व्वप्रत्यय इति च काव्यप्रकाशटीकायां चण्डिदासः॥

ताड़ः, पुं, (तड़+भावे घञ्।) ताड़नम्। शब्दः। सुष्टिमेयत्वादि। इति मेदिनी। ड़े, १४॥ पर्व्वतः। इति हेमचन्द्रः॥

ताड़का, स्त्री, राक्षसीविशेषः। सा सुकेतुयक्षकन्या ब्रह्मवरेण सहस्रहस्तिबलयुता सुन्ददैत्यपुत्रस्य सुन्दस्य भार्य्या मारीचमाता सुन्दे निहते पुत्रेण सह अगस्त्यमृषिं धर्षयितुमुद्यता तस्य शापात् सपुत्रा राक्षसत्वं गता श्रीरामेण निहता। इति रामायणम्॥

ताड़काफलं, क्ली, (तारकेव नक्षत्रमिव फलमस्य। रस्य ड़त्वम्।) इङ्गुदीफलम्। इति रत्नमाला॥

ताड़ङ्कः, पुं, (तालं तालपत्रमिव अङ्कयते लक्ष्यते इति। अङ्क+घञ्। लस्य ड़त्वम्। एकाग्रादित्वात् साधुः।) कर्णभूषा। कानतड़का इति भाषा॥ तत्पर्य्यायः। कर्णदर्पणः २। इति त्रिकाण्डशेषः॥ ताटङ्कः १। इति त्रिरूपकोषटीकायां भरतः॥ कर्णिका ४ तालपत्रम् ५। इत्यमरः॥ ताड़पत्रम् ६। इति हेमचन्द्रः। ३। ३२०॥ कर्णसुक्कुरः ७। इति जटाधरः॥ (यथा, मनसाधाने।

"ताड़ङ्काङ्गदमेखलागुणरणन्मञ्जीरतां प्रापितां
केयूरां वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे॥")

ताड़नं, क्ली, (ताड़ि+भावे ल्युट्।) आघातः। यथा, श्रद्धातत्त्वे। [तपः॥"

"श्राद्धं नीरसकाष्ठताड़नभृतं श्राद्धः प्रचण्डा-

यथाच, गारुड़े ६६ अध्याये।

"श्रुतिस्मृत्युक्तमाचारं कुर्य्याच्चर्म्मादि न स्पृशेत्
न निन्दाताड़ने कुर्य्यात् सुतं शिष्यञ्च ताड़येत्
आचरेत् सर्व्वदा धर्म्मं तद्विरुद्धन्तु नाचरेत्॥"

अपि च चाणक्ये। १२।

"लालने बहवो दोषास्ताड़ने बहवो गुणाः।
तस्मात् पुत्रञ्च शिष्यञ्च ताड़येन्न तु लालयेत्॥"

ताड़नी, स्त्री, (ताड्यतेऽनयेति। ताड़ि+करणे ल्युट् स्त्रियां ङीप्।) अश्वताड़नयष्टिः। तत्पर्य्यायः। चर्म्मयष्टिः २ कशा ३ भीमाः चर्म्मलालिका ५। इति शब्दमाला॥

ताड़पत्रं, क्ली, (तालस्य पत्रमिव। लस्य ड़त्वम्।) ताड़ङ्कः। इति हेमचन्द्रः। ३। ३२०॥

ताड़िः, स्त्री, (ताड़यति पत्रैः शोभते इति। तड़ शोभौ+क्विप्+इन्।) वृक्षविशेषः। इत्यमरटीकायां भरतः॥ ताड़ियातु इति भाषा॥ (यथा, राजतरङ्गिण्याम्। ३। ३२८।

"शुयाकमालपत्राणि शीर्णताड़ीदलानि च।
तत्सेनार्णवतीराणि चक्रेऽरिस्त्रीसुखानि च॥")

आभरणविशेषः। इति दुर्गासिंहः॥

ताड़ुलः, पुं, (ताड़यतीति। तड़+क्विप्+उल।) ताड़यिता। इति संक्षिप्तसारे उणादिवृत्तिः॥

ताड्यमानः, पुं, (ताड्यते असौ। ताड़ि+कर्म्मणि शानच्।) पटहादिः। इति त्रिकाण्डशेषः॥

ताड़ुशयुक्ते, त्रि। (यथा, कुमारे। १। ३५।

"अप्यन्यपुष्टा प्रतिकूलशब्दा
श्रोतुर्व्वितन्त्रीरिव ताड्यमाना॥")

ताण्डवं, क्ली, पुं, नृत्यम्। इत्यमरः। १। ७।१०॥ ताण्डेन मुनिना कृतं ताण्डि नृत्यशास्त्रं तदस्यास्तीति। इति भरतः॥ तण्डुना प्रोक्तमिति स्वामी॥

("पुंनृत्तं ताण्डवं प्राहुः स्त्रीनृत्तं लास्यमुच्यते॥" इति शब्दार्थचिन्तामणिधृतवचनेन पुंनृत्तम्॥) लयविशेषः। उद्धतनृत्तम्। इति मेदिनी। बे, ३६॥ (यथा, मत्स्यपुराणे। १। १।

"प्रचण्डताण्डवाटोपे-प्रक्षिप्ता येन दिग्गजाः।
भवन्तु विघ्नभङ्गाय भवस्य चरणाम्बुजाः॥")

ताण्डवतालिकः, पुं, (ताण्डवे शिवनृत्यकाले यस्तालः स कार्य्यतयास्त्यस्येति । ठन् ।) नन्दी। स शिवद्वारी। इति त्रिकाण्डशेषः ॥

ताण्डवप्रियः, पुं, (ताण्डवं उद्धतनृत्यं प्रियमस्य ।) शिवः। इति शब्दमाला ॥

ताण्डि, क्ली, (ताण्डेन मुनिना कृतम्। ताण्ड+बहुलवचनात् इञ् ।) वृत्यशास्त्रम्। इत्यमरटीकायां भरतः ॥

तातः, पुं, (तनोति विस्तारयति गोत्रादिकमिति। तन+"दुतनिभ्यां दीर्घश्च ।" उणा० । ३ । ६० । इति क्तः दीर्घश्च । यद्वादात्तेति नलोपः ।) पिता। इत्यमरः। २ । ६ । २८। (यथा, रघुः । ६ । ७५ ।

"हा तातेति क्रन्दितमाकर्ण्यविवस्वत्स्वस्त्यान्विष्यन् वेतसगृहं प्रभवं सः ।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं तापादन्तःशल्य इवासीत् क्षितिपोऽपि ॥")

अशुकम्पाः। इति मेदिनी । ते, २१ ॥ (यथा, भागवते । १ । १४ । ३६ ।

"कच्चित्तेऽनामयं तात ! भ्रश्यतेजा विभासि मे ।
अलब्धमानोऽवज्ञातः किं वा तात ! चिरोषितः ॥")

पूज्ये, त्रि । इति शब्दरत्नावली ॥ (यथा, रघौ । १ । ७२ । वशिष्ठं प्रति दिलीपोक्तिः।

"तस्मात् सुखे यथा तात ! संविधातुं तथार्हसि।
इच्छाकूर्या दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥")

तातगुः, पुं, (तातस्य पितुरिव गौर्वाचकशब्दो यत्र । गवाम्तातात् गौरग्ये इक्षः । ।) क्षुद्रतातः। पितृव्यः। जनकस्य हिते, त्रि । इति मेदिनी । गे, ३६ ॥

तातजनयित्र्यौ, स्त्री, (तातश्च जनयित्री च ते ।) मातापितरौ । इत्यमरः ॥ द्विवचनान्तोऽयम् ॥

ततुल्यः, त्रि, (तातस्य पितुस्तुल्यः ।) पितृसमः। तत्पर्य्यायः। मनोभवसः २। इति हेमचन्द्रः । ३ । १५२ ॥ मनोभवः ३ पितृसन्निभः४। इत्यमरः । तातलः ५ इति मेदिनी ॥

तातनः, पुं, (तातं मनोहरं यथा तथा वृत्यतीति। वृत्+बाहुलकात् डः ।) खञ्जनपक्षी । इति त्रिकाण्डशेषः ॥

तातलः, पुं, (तापं जातीति । जा+कः । पृषोदरादित्वात् पस्य तः ।) रोगः । पाकः । लौहकूटः । मनोभवः । इति मेदिनी । ले, ६८ ॥ तप्तमात्रे, त्रि । इत्यजयपालः ॥

तातिः, पुं, पुत्रः । इति शटाधरः ॥

तात्कालिकः, त्रि, (तत्काले भवः । तत्काल+"आपदादिपूर्व्वपदात्कालान्तात् ।" ४ । २ । ११६ । इत्यस्य वार्त्तिकोक्त्या ठञ् ।) तत्कालभवः । यथा, शुद्धितत्त्वे ग्रहः ।

"ततः श्राद्धमशुद्धौ तु कुर्य्यादेकादशे तथा ।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥"

तात्पर्य्यं, क्ली, (तत्परस्य भावः । तत्पर+ष्यञ् ।) अभिप्रायः । इति शब्दार्थकल्पतरुः ॥ वक्तुरिच्छा । (यथा, भाषापरिच्छेदे । ८४ ।

"आकाङ्क्षा वक्तुरिच्छा तु तात्पर्य्ये परिकीर्त्तितम् ॥")

तादात्म्यं, क्ली, (तदात्मनो भावः । तदात्मन्+ष्यञ् ।) तत्स्वरूपम् । अभेदसम्बन्धः । इति न्यायशास्त्रम् ॥

ताद्दक्, [ग्] त्रि, स इव दृश्यतेऽसौ ।(तद्+दृश्+"त्यदादिषु दृशेरनालोचने कञ्च ।" ३ । २ । ६० । इति क्विन् । "आ सर्व्वनाम्नः ।" ६ । ३ । ६१ । इति आत्वम् ।) ताद्दृशः । ताहार मत इति भाषा ॥ इति मुग्धबोधम् ॥ (यथा, पञ्चतन्त्रे । १ । २७६ ।

"यादृशैः सेवते भृत्यैर्यादृग्भोपसेवते ।
कदाचिन्नात्र सन्देहस्तादृग् भवति पूरुषः ॥")

ताद्दृशः, त्रि, (स इव दृश्यते इति । तद्+दृश्+त्यदादिष्वित्यत्र क्सोऽपि वाच्य इति क्सः ।) ताद्दक् । इति मुग्धबोधम् ॥ (यथा, राजतरङ्गिण्याम् । ४ । २४२ ।

"ततः प्रभृति ताद्दृश्ययोग्यार्थप्राप्तिलालसः ।
परिहासपुरे चक्रे स्थिरां गुर्व्वीं सपर्य्यिणीम्॥")

ताद्दृशः, त्रि, (स इव दृश्यते इति । तद्+दृश्+"त्यदादिष्विति ।" ३ । २ । ६० । इति कञ् ।) ताद्दक । (यथा, पञ्चतन्त्रे । १।४३५ ।

"उपदेशो न दातव्यो यादृशे ताद्दृशे जने ॥")

तानं, क्ली, (तन दु न विस्तारे+भावे घञ् ।) विस्तारः। ज्ञानविषयः। इति शब्दार्थकल्पतरुः॥

तानः, पुं, (तन्यते गीतमनेनेति। तन+घञ् ।) गानाङ्गविशेषः। यथा, सङ्गीतदामोदरे।

"विस्तार्य्यन्ते प्रयोगा येर्मूर्च्छनाग्रामसंश्रयाः।
तानास्तेऽपूर्णपञ्चाशत् षड्जस्वरसमुद्भवाः ॥
तेभ्य एव भवन्त्यन्ये कूटतानाः पृथक् पृथक्।
ते स्युः पञ्चसहस्राणि त्रयस्त्रिंशच्छतानि च ॥"

तानवं, क्ली, (तनोर्भावः । तनु+"इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इत्यण् ।) गात्रे तनुता । यथा, उज्ज्वलनीलमणिः ।

"तानवं तनुता गात्रे दौर्ब्बल्यश्रमजादिकृत् ॥"
(यथा, आर्य्यासप्तशत्याम् । ३६३ ।

"परपतिनिर्दयकुलटाशोषित शुष्क ! नेर्ष्यया न कोपेन ।
दग्धममतोपतप्ता रौद्रिमि तव तानवं वीक्ष्य ॥")

तानूरः, पुं, (तनु+बाहुलकात् ऊरच् ।) पयसां भ्रमः । आवर्त्तः । इति भूरिप्रयोगः ॥

तान्तः, त्रि, (तम+क्तः ।) आन्तः । इति शब्दार्थकल्पतरुः॥ (यथा, प्रबुद्धविजये । २ अङ्के ।

"पान्थं श्रान्तिनितान्ततान्तमतुलं सन्तोषयत्याश्रयत्
यत्रात्यन्तघनच्छदैर्विटपिभिश्छन्ने निरुत्तापते ॥")

तान्त्रिकः, त्रि, (तन्त्रं सिद्धान्तं अधीते वेद वा । तन्त्र+"उक्थादिभ्यष्ठक् ।) ज्ञातसिद्धान्तः । शास्त्रतत्त्वज्ञः । इत्यमरः । २ । ८ । २५ ॥ तन्त्रशास्त्रवेत्ता तत्सम्बन्धी च ॥ (यथा, भागवते । ११ । ६ । ६ ।

"श्रेयोऽर्थिभिर्वैदिकतान्त्रिकेण ॥")

तापः, पुं, (तप+घञ् ।) सन्तापः । (यथा, भागवते । १ । १४ । ४८ ।

"नेदानघं तापमिवोडुराजः ॥")

दुःखम्। इति मेदिनी । पे, ७ ॥ (त्रिविधदुःखम् । यथा देवीभागवते । १ । १ । ७ ।

"दीर्घायुर्भव सर्व्वज्ञ ! तापत्रयविवर्ज्जितः ॥")

तापकः, पुं, (तापयतीति । तप+णिच्+ण्वुल् ।) ज्वरः । इति शब्दरत्नावली ॥ तापकर्त्तरि त्रि ॥

तापत्यः, पुं, (तपती सूर्य्यकन्या तस्या अपत्यं पुमान् । तपती+ण्यः ।) अर्च्छुनः । इति पुराणम् ॥ (यथा, महाभारते । ५।४६।२ ।

"तस्मात्तापत्य ! यत्किञ्चिन्मां श्रेय इहेप्सितम्।
तस्मिन् कर्म्मणि योक्तव्या दान्तात्मानः पुरोहिताः ॥"

तपतीवंशोद्भवकौरवमात्रम्। यथा, तत्रैव । १ । १७१ । ६६ ।

"सोऽहं त्वयेह विजितः संख्ये तापत्यवर्त्मना ! ॥"

तपत्या उपाख्यानम् । तपती+ष्यञ् । तपत्युपाख्याने, क्ली । यथा, तत्रैव । १।२।१०६ ।

"तापत्यमथ वाग्ग्रिष्ठमौर्व्वोपाख्यानसुत्तमम् ॥"

एतदुपाख्यानन्तु महाभारते आदिपर्व्वणि १७२ अध्याये द्रष्टव्यम् ॥)

तापनः, पुं, (तापयतीति । तप+णिच्+कर्त्तरि ल्युः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ६ ॥ (यथा, महाभारते । ५ । ४६ । २ ।

"शुक्रादब्रह्म प्रभवति ब्रह्म शुक्रेण वर्द्धते ।
तच्छुक्रं ज्योतिषां मध्ये तप्तं तपति तापनम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥")

कामबाणः । इति शटाधरः ॥ (यदुक्तं,—

"सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा ।
स्तम्भनश्चेति कामस्य पञ्च बाणाः प्रकीर्त्तिताः॥")

सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥ (क्ली, नरकविशेषः । .यथा, याज्ञवल्क्ये । ३ । २२४ ।

"असिपत्रवनञ्चैव तापनञ्चैकविंशकम् ॥"

भावे ल्युट् । तापकरणम् । यथा, सुश्रुते । १।४१ ।

"तद्दहनपचनदारणतापनप्रकाशनगमनभावकर्म्मकरमिति ॥") तापयितरि, त्रि ॥ (यथा, महाभारते । १ । १६ । २१ ।

"ततोऽम्बराच्चिन्तितमात्रमागतं
महाप्रभं चक्रममित्रतापनम् ॥")

तापसं, क्ली, तमालपत्रम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥

तापसः, त्रि, (तपोऽस्त्यस्येति। तपस्+"अस्य च।" ५ । २ । १०३ । इति अण् । यद्वा, तपः शीलमस्य । "कृत्वादिभ्यो णः ।" ४ । ४ । ६२ । इति णः ।) तपस्वी । इत्यमरः । २ । ७ । ४२ ॥ (यथा, मनुः । ६ । २७ ।

"तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ॥"

तपःसम्बन्धी । यथा, गोः रामायणे । २।५२।५ ।

"तापसं व्रतमास्थाय ततो गुरुसुवाच ह ॥")

पुं, दमनकवृक्षः । वकपक्षी । इति राजनिर्घण्टः ॥ (इक्षुविशेषः । यथा, सुश्रुते । १ । ४५ ।

"कान्तारतापसेष्वेव कार्हिचित् सचिपत्नकः ॥"
"इमेता जातयः स्त्रीत्वात् गुणान् वक्ष्यन्त्यतः परम् ॥"
"कान्तारतापसाविष्वे वंशकानुगुणौ मतौ ॥")
तापसतरुः, पुं, (तापसप्रियस्तरुर्वृक्षः।) इङ्गुदीवृक्षः। इत्यमरः। २। ४। ४६॥ (इङ्गुदीशब्देऽस्य विवरणं ज्ञातव्यम्॥)
तापसद्रुमः, पुं, (तापसप्रियो द्रुमः।) इङ्गुदीवृक्षः। इति हेमचन्द्रः। ४। २०६॥ (पर्य्यायोऽस्य यथा,—
"इङ्गुदोऽङ्गारवृक्षश्च तिक्तकस्तापसद्रुमः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तापसद्रुमसन्निभा, स्त्री, (तापसद्रुमस्य सन्निभा यस्याः।) गर्भदात्रीस्तुपः। इति राजनिर्घण्टः॥
तापसप्रियः, पुं, (तापसानां प्रियः।) प्रियालवृक्षः। इति राजनिर्घण्टः॥ (इङ्गुदीवृक्षः। यथा, वैद्यकरत्नमालायाम्।
"पीतपुष्पोऽङ्गारपुष्प इङ्गुदी तापसप्रियः॥")
तापसप्रिया, स्त्री, (तापसानां प्रिया।) द्राक्षा। इति राजनिर्घण्टः॥ (द्राक्षाशब्देऽस्या गुणादयो ज्ञातव्याः॥)
तापहरी, स्त्री, (तापं अरुचिजन्यसन्तापं हरतीति। हृ+बाहुलकात् टः। स्त्रियां ङीप्।) अञ्जनविशेषः। यथा,—
"इति हरिदासंयुक्ता माषार्धा भर्जयेद्घटीः।
तद्गुलिकामपि निर्धौतान् सहैव परिभर्जयेत्॥
सिद्धियोग्यं जलं तत्र प्रक्षिप्य कुशलः पचेत्।
लवङ्गैकद्विकृत्वो मात्रया तत्र निःक्षिपेत्॥
एषा खिल्लिं समायाता प्रोक्ता तापहरी बुधैः॥"
अस्या गुणाः।
"भवेत्तापहरी वल्या दृष्या श्लेष्मान्यमाचरेत्।
दृष्टश्री तर्पणी रुच्या गुर्व्वी तस्या गुणाः स्मृताः॥"
ताहरी इति लोके। इति भावप्रकाशः॥
तापहारिण्यां स्त्री॥
तापिञ्छः, पुं, (तापिनं सन्तापं छदति आच्छादयतीति। छद्+अन्येष्वपीति डः। पृषोदरादित्वात् साधुः।) तमालवृक्षः। इत्यमरः। २। ४। ६८॥ (यथा, गीतगोविन्दे। ११।११।
"अनयोर्निचितपदक्षनं श्रवणयोस्तापिञ्छगुच्छावलीम्॥"
क्लीबे, तापिञ्छस्य पुष्पम्। फले लुगिति तद्धितलुक्। द्विहीनं प्रसवे सर्व्वमिति नपुंसकत्वम्। तापिञ्छपुष्पम्। यथा, माघे। १। २२।
"प्रफुल्लतापिञ्छनिभैरभीक्षुभिः
सुभेच सप्तच्छदपांशुपाण्डुभिः॥")
तापिञ्जं, क्लो, (तापिनं जयतीति। जि+डः।) धातुमाक्षिकम्। इति राजनिर्घण्टः॥
तापिञ्जः, पुं, तापिञ्छः। इत्यमरटीकायां भरतः॥
तापी, स्त्री, (तापयतीति। तप+णिच्+अच्। गौरादित्वात् ङीष्।) तापिनी नदी। सा पश्चिमवाहिनी विन्ध्याचले प्रसिद्धा। इति राजनिर्घण्टः॥ (यथा, मात्स्ये। ११३। २७।
"तापी पयोष्णी निर्व्विन्ध्या क्षिप्रा च ऋषभा नदी।
विन्ध्यपादप्रसूतास्ताः सर्व्वाः शीतजलाः शुभाः॥"
इयं सह्यपादोद्भवा इति विष्णुपुराणम्। २। ३। ११॥
"तापी तापा च गोलोमी गोमती ग्राहिता मही।
सरस्वती युता नद्यो नर्म्मदा पश्चिमानुगाः॥
आसां जलं घनं शीतं पित्तघ्नं कफलत्तथा।
वातदोषहरं हृद्यं कण्डूकुष्ठविनाशनम्॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये॥)
यमुना। इति त्रिकाण्डशेषः॥
तापी, [न्] (तापोऽस्यास्तीति। ताप+"अत इनिठनौ।" ५। २। ११५। इति इनिः।) बुद्धः। इति त्रिकाण्डशेषः॥ तापयुक्ते, त्रि॥
ताप्यं, क्लो, (तापे हितम्। ताप+यत्।) धातुमाक्षिकम्। इति रत्नमाला॥ हेमचन्द्रे पुंलिङ्गोऽयम्। ४२१॥ (यथा, भावप्रकाशे।
"ताप्यस्य पलत्रितयं हे लोहभावलीकायाः॥")
ताप्यकं, क्लो, (ताप्यमेव। स्वार्थे कन्।) माक्षिकम्। इति राजनिर्घण्टः॥ (माक्षिकशब्दे विवृतिरस्य ज्ञेया॥)
ताप्यसंज्ञकं, क्लो, (ताप्यसंज्ञा यस्य। कप्।) माक्षिकधातुः। इति रत्नमाला॥
तामः, पुं, (तान्यत्यनेनेति। तम+करणे घञ्।) भीषणः। दोषः। इत्यजयपालः॥
तामरं, क्लो, (तामं म्लानिं रातीति। रा+कः।) जलम्। घृतम्। इति भरतधृतरुद्रः॥
तामरसं, क्लो, (तामरे जले सरतीति। सस्+डः। यद्वा, बाहुलकात् अमेरप्यसच्। तस्य णित्त्वञ्च। धातोस्तुगागमश्च। णित्त्वात् वृद्धिः। इत्युज्ज्वलदत्तः। ३। ११७॥) पद्मम्। (यथा, राजेन्द्रकर्णपूरे। ५४।
"जाता तामरसोदरे भगवतो धातुः सतार्था स्थितिः॥")
सारसः। इत्यमरः। १। १०। ४०॥ स्वर्णम्। ताम्रम्। इति मेदिनी। से, ५३॥ (छादयत्याचरच्छन्दोविशेषः। तस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥)
तामलकी, स्त्री, भूम्यामलकी। इत्यमरः। २। ४। १२७॥ (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये।
"कटुकैरम्लवोधीरसिंही तामलकीघनैः॥")
तामलिप्तं, क्लो, } देशविशेषः। तमलुक् इति
तामलिप्ती, स्त्री, } भाषा। तत्पर्य्यायः। दामलिप्तम् २ तामलिप्ती ३ तमालिनी ४ ताम्रपूः ५ विष्णुगृहम् ६। इति हेमचन्द्रः। ४। ४५॥ तमोलिप्ती७ वेलाकूलम् ८ तमालिका ९। इति त्रिकाण्डशेषः॥
तामसं, त्रि, (तम एव। तमस्+स्वार्थे अण्।) प्रकृतिगुणविशेषः। तद्धर्म्मो यथा,—
"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥
यातयामं गतरसं पूतिपर्य्युषितञ्च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥
मूढ्ग्राहेणात्मनो यत् पीड़या क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञानं तत्तामसमुदाहृतम्॥"
इति श्रीभगवद्गीतायां १७ अध्यायः॥ * ॥
किञ्च तत्रैव १८ अध्याये।
"नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥
यत्तु कृतवदेकस्मिन् कार्य्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्॥
अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म्म यत्तत्तामसमुच्यते॥
अयुक्तः प्राकृतस्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते॥
अधर्म्मं धर्म्ममिति या मन्यते तमसावृता।
सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ! तामसी॥
यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्म्मेधा धृतिः सा तामसी मता॥
यदग्रे चानुबन्धे च सुखमोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्॥"
तामसः, पुं, (तमसो गुणः प्रधानत्वेनास्यास्तीति। अण्।) सर्पः। खलः। इति मेदिनी। से, २५॥ उलूकः। इति राजनिर्घण्टः॥ चतुर्थमनुः। अस्मिन्मन्वन्तरे हरिनामा विष्णोरवतारः। त्रिशिखनामा इन्द्रः। वैधृतयो देवाः। ज्योतिर्धामादयः सप्तर्षयः। दृषख्यातिनराद्यो मनुसुताः। इति श्रीभागवतम्॥ * ॥ तमोगुणयुक्ते, त्रि॥ (यथा, मनुः। १२। ३३।
"लोभः स्वप्नोऽधृतिः क्रौर्य्यं नास्तिक्यं भिन्नवृत्तिता।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम्॥")
तामससुनयो यथा। कणादः१ गौतमः२ अत्रिः३ उपमन्युः ४ जैमिनिः ५ दुर्व्वासाः ६ रुक्कुः ७ दृढस्युतिः ८ भार्गवः ९ जमदग्निः १०॥ तामसशास्त्राणि यथा। असुरमोहनार्थानि शिवकृतशैवपाशुपतादि १ कणादकृतनयनीलपटादि २ ब्राह्मणरूपिभगवद्कृतबौद्धशास्त्रम् ३ जैमिनिकृतनिरीश्वरसांख्यम् ४॥ तामसपुराणानि यथा। मात्स्यम् १ कौर्म्मम् २ लैङ्गम् ३ शैवम् ४ स्कान्दम् ५ आग्नेयम् ६॥ तामसस्मृतयो यथा। गौतमम् १ बाहस्पत्यम् २ सासुद्रम् ३ यमम् ४ शाङ्खम् ५ औशनसम् ६॥ * ॥ राजसतामसकर्म्माणि यथा,—
"यत् शैवं दैवतं पैत्रमौपदेवं तथार्षकम्।
शान्तं शैवं गार्हपत्यं यागहोमादिकं तथा॥

पौरोहित्यं याजनञ्च देवल्कं ग्रामयाजकम् ।
विष्णुसेवापराधञ्च तथा नामापराधकम् ॥
असत्प्रतिग्रहं देवि ! साङ्कल्यमाभिचारिकम् ।
पशुजीवादिहननं पातकञ्चोपपातकम् ॥
अतिपापं महापापमनुपातकमेव च ।
लोभं मोहमहङ्कारं कामं क्रोधं मदन्तथा ॥
एतद्यदपरं कर्म्म गर्हितञ्च वरानने ! ।
राजसं तामसं प्रोक्तं मया च मुनिभिः सदा ॥"
इति पाद्मोत्तरखण्डम् ।

तामसिकं, त्रि, (तमसा तमोगुणेन निर्वृत्तम् । तमस् + ठञ् ।) तामसम् । तमोगुणकार्य्यम् ॥

तामसी, स्त्री, (तमोऽन्धकारः प्राधान्येन अस्ति अस्याम् । तमस् + अण् । स्त्रियां ङीष् ।) निशा । दुर्गा । इति मेदिनी । से, २५ ॥ जटामांसी । इति राजनिर्घण्टः ॥ (तमोगुणसम्बन्धिनी । यथा, देवीभागवते । ३ । ८ । ५ ।
"सात्त्विकी राजसी चैव तामसी च तथा परा ।
श्रद्धा तु त्रिविधा प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः ॥")

तामिस्रं, क्ली, (तमिस्रं अन्धकारततिरस्त्यस्येति । तमिस्र + अण् ।) अन्धकारमयनरकम् । इति मेदिनी । से, ६ ॥ परवित्तापत्यकलत्रापहर्त्तृणां यमदूतैर्निर्यातत्वे यत्र । इति श्रीभागवतम् ॥ (अन्धकारमये, त्रि । यथा, महाभारते । ३ । १६२ । १० ।
"तामिस्रं प्रथमं पञ्चं वीतशोकभयो वस ॥"
अन्धकारविचारिणि । यथा, रघुः । १५ । २ ।
"लवणेन विलुम्पेष्वास्तामिस्रेण तमश्चयुः ॥")

तामिस्रः, पुं, (तमिस्रं तमोगुणोत्थः क्रोधः प्रचुरतयास्त्यस्येति । अण् ।) भोगेच्छाप्रतिघाते क्रोधः । इति श्रीभागवतटीकायां स्वामी ॥ (यथा, भागवते । ३ । १२ । २ ।
"सप्तम्यामन्धतामिस्रमथ तामिस्र आदिशत् ॥")

ताम्बूलं, क्ली, (तम + "खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणा । ४ । ६० । इति ऊलच् वुगागमो दीर्घश्च ।) पर्णम् । पान इति भाषा । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । मधुरत्वम् । क्षारत्वम् । कषायत्वम् । वातश्लेष्मिककफदुःखदोषनाशित्वम् । कामाग्निसन्दीपनत्वम् । स्त्रीसम्भावनभूषणत्वम् । धृतिवक्त्रपाटवोत्साहकान्तिकारित्वम् । सुप्तोत्थिते भुक्ते च प्रशस्तत्वम् । दन्तास्यहृद्गन्धे त्याज्यत्वम् । स्वर्गेऽपि दुर्लभत्वञ्च । इति राजवल्लभः ॥ अपि च । तीक्ष्णत्वम् । पीनसकासनाशित्वम् । रुच्यत्वम् । दाहकारित्वञ्च ॥ * ॥ क्षयाढ्यपर्णस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । दाहवक्त्रजाढ्यमलधारित्वञ्च ॥ * ॥ शुभ्रपर्णस्य गुणाः । श्लेष्मवातामयनाशित्वम् । पथ्यत्वम् । रुच्यत्वम् । दीपनत्वम् । पाचनत्वञ्च ॥ * ॥ सद्यस्त्रोटिततांबूलभक्षणगुणाः । सुखरोगजाड्यदोषवातारोचकरक्तमलविष्टम्भकान्तिकारित्वम् ॥ चिराच्चोटितभूयोजलयोजिततांबूलगुणाः । उत्तमत्वम् । रुचिबलकारित्वम् । त्रिदोषाग्निनाशित्वञ्च ॥ * ॥

"शिरापर्णन्तु ग्रैथिल्यं कुर्य्यात्तस्याग्रहृद्रसः ।
ग्रीर्णं त्वग्दोषदन्तस्य भक्षिते तु सितासिते ॥
अनिधाय मुखे पर्णं पूगं खादयते नरः ।
मतिभ्रंशो दरिद्रः स्यादन्ते न स्मरते हरिम् ॥"
इति राजनिर्घण्टः ॥*॥

"पर्णमूले वसेद्ब्राह्मीः पर्णाग्रे पापसञ्चयः ।
चूर्णपर्णं हरेदायुः शिरा बुद्धिविनाशिनी ॥
गायत्र्यग्रे विधं मूले मध्येऽलक्ष्मीर्व्यवस्थिता ।
तस्मादग्रञ्च मूलञ्च मध्यं पर्णस्य वर्ज्जयेत् ॥
चूर्णाधिकं हरति गन्धमथाधिपूगं
रागं तथाधिकदलञ्च सुगन्धिकारि ।
ताम्बूलसुत्तमिदं रसनाग्रभिन्न-
पर्णं निशास्वधिकखण्डितपर्णमन्यत् ॥
ताम्बूलं न हितं प्रोक्तं शरीरे रूक्षदुर्बले ।
ज्वरास्रश्लीपित्तास्रमदमूर्च्छाक्षिरोगिषु ॥
ताम्बूलाद्युपयोगात् स्याच्छोषः पित्तानिलासृजाम् ।
देहहृत्कोष्ठदन्तास्यिश्रोत्रवर्णबलक्षयः ॥"
इति राजवल्लभः ॥ * ॥

"विना पर्णं मुखे दत्त्वा गुवाकं भक्षयेद्यदि ।
तावद्भवति चण्डालो यावद्गङ्गां न गच्छति ॥"
इति कर्म्मलोचनम् ॥ * ॥

"ताम्बूलं विधवास्त्रीणां यतिनां ब्रह्मचारिणाम् ।
तपस्विनाञ्च विप्रेन्द्र ! गोमांससदृशं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥ * ॥

अस्य नामानि गुणाश्च । यथा, भावप्रकाशे ।
"ताम्बूलवल्ली ताम्बूली नागिनी नागवल्लरी ।
ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरम् ॥
वह्निं तिक्तकटुक्षारं रक्तपित्तकरं लघु ।
बलं श्लेष्मास्यदौर्गन्धमलवातश्रमापहम् ॥"
क्रमुकम् । इति मेदिनी । ले, ६७ ॥

ताम्बूलकरङ्कः, पुं, (ताम्बूलस्य ताम्बूलरक्षणाय वा करङ्कः ।) ताम्बूलपात्रम् । पानेर वाटा इति भाषा ॥ तत्पर्य्यायः । स्थगी २ । इति हेमचन्द्रः । ३ । ३८२ ॥

ताम्बूलदः, त्रि, (ताम्बूलं ददातीति । दा + कः ।) ताम्बूलदाता । तत्पर्य्यायः । वाग्गुलिकः २ । इति त्रिकाण्डशेषः ॥

ताम्बूलपत्रः, पुं, (ताम्बूलस्य पत्रमिव पत्रमस्य ।) पिण्डालुः । इति राजनिर्घण्टः ॥ (ताम्बूलपर्णे, क्ली । यथा, सुश्रुते । १ । ४६ ।
"ताम्बूलपत्रं तीक्ष्णोष्णं कटुपित्तप्रकोपनम् ॥")

ताम्बूलरागः, पुं, (ताम्बूलस्य चर्व्वितताम्बूलस्य राग इव रागोऽत्र ।) मस्करः । इति हारावली । १३३ ॥ ताम्बूलस्य रङ्गश्च ॥

ताम्बूलवल्लिका, स्त्री, (ताम्बूलस्य वल्ली ततः स्वार्थे कन् टापि पूर्व्वह्रस्वश्च ।) ताम्बूली । इति शब्दरत्नावली ॥

ताम्बूलवल्ली, स्त्री, (ताम्बूलस्य वल्ली ।) ताम्बूललता । पानेर गाछ । इति भाषा ॥ तत्पर्य्यायः । ताम्बूली २ नागवल्ली ३ । इत्यमरः । २ । ४ । १२० ॥ पर्णलता ४ सप्तशिरा ५ सर्पलता ६ पत्रिवल्ली ७ भुजगलता ८ भक्ष्यपत्रा ९ । इति राजनिर्घण्टः ॥ ताम्बूलवल्लिका १० पर्णवल्ली ११ ताम्बूलिः १२ । इति शब्दरत्नावली ॥ नागिनी १३ नागवल्लरी १४ । इति भावप्रकाशः ॥

ताम्बूली, स्त्री, (ताम्बूल + गौरादित्वात् संज्ञायां वा ङीष् ।) ताम्बूलवल्ली । इत्यमरः । २ । ४ । १२० ॥ (यथा, कथासरित्सागरे । ६ । ८१ ।
"ताम्बूलीश्च सहाम्राणिमालातिलकयुक्तिभिः ॥")

ताम्रं, क्ली, (तम्यते आकाङ्क्ष्यते इति । तमु काङ्क्षायाम् + "अमिनमोर्दीर्घश्च ।" उणा । २ । १६ । इति रक् उपधाया दीर्घश्च ।) तैजसधातुविशेषः । तामा इति तांवा इति च भाषा ॥ तत्पर्य्यायः । ताम्रकम् २ शुल्बम् ३ म्लेच्छमुखम् ४ द्वाष्टम् ५ वरिष्टम् ६ उडुम्बरम् ७ । इत्यमरः । २ । ६ । ६७ ॥ द्विष्टम् ८ उदम्बरम् ९ औदुम्बरम् १० उदुम्बरम् ११ औडुम्बरम् १२ । इति तट्टीका ॥ तपनेष्टम् १३ अम्बकम् १४ अरविन्दम् १५ रविलोहम् १६ रविप्रियम् १७ रक्तम् १८ नैपालिकम् १९ रक्तधातु २० सुनिपित्तलम् २१ अर्कम् २२ सूर्य्याङ्गम् २३ लोहितायसम् २४ । इति शब्दरत्नावली ॥ सुपक्वस्य तस्य गुणाः । मधुरत्वम् । कषायत्वम् । तिक्तत्वम् । विपाके कटुत्वम् । शीतलत्वम् । कफपित्तविबन्धमूलपाण्डूदरगुल्मनाशित्वञ्च । इति राजनिर्घण्टः ॥ अम्लत्वम् । सारकत्वम् । रोपणत्वम् । लघुत्वम् । लेखनत्वम् । अर्शोव्रणकुष्ठकासश्वासक्षयपीनसान्नपित्तश्लीपक्रमिनाशित्वम् । अल्पदृङ्मलत्वञ्च । इति भावप्रकाशः ॥ परिणामशूलजीर्णज्वरायामशूलवङ्क्षणरोगनाशित्वम् । सुष्ठिकारित्वम् । बलायुस्तेजःपुष्टिस्मृतिकारित्वं नित्यसेवने वलीपलितनाशित्वञ्च ॥ * ॥ स्पृष्टवेष्टितशूरणकन्दगर्भनिहितगोमयाग्निभस्मीकृतपक्वाम्लद्वारा पक्वपुटदत्तताम्रस्य गुणाः । वान्तिभ्रान्तिशूलाग्निमान्द्यान्नपित्तनाशित्वम् । बलकारित्वञ्च ॥ * ॥ अशोधितताम्रदोषाः । आयुःशुक्रबलनाशित्वम् । रोगवृद्धिच्छर्द्दिमूर्च्छाभ्रमक्लेदनानारोगकुष्ठशूलविदाहस्वेदारुचिक्षित्तसन्तापकारित्वम् । विषतुल्यत्वञ्च । इति सुखबोधः ॥ * ॥ तस्योत्पत्तिर्यथा,—
"शुक्रं यत् कार्त्तिकेयस्य पतितं धरणीतले ।
तस्मात् ताम्रं समुत्पन्नमिदमाहुः पुराविदः ॥"
तस्य लक्षणं यथा,—
"जपाकुसुमसङ्काशं स्निग्धं स्पृष्टं घनं क्षमम् ।
लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते ॥
क्षणारूक्षमतिस्निग्धं श्वेतच्छायि घनासृहम् ।
लोहनागयुतञ्चेति शुल्बं दुष्टं प्रकीर्त्तितम् ॥"
तस्य शोधनविधिर्यथा,—
"पत्तलीकृतयत्राणि ताम्रस्याग्नौ प्रतापयेत् ।
निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा
एवं ताम्रस्य पत्राणां विशुद्धिः संप्रजायते ॥"
अथ तस्य मारणविधिर्यथा,—
"सूक्ष्माणि ताम्रपत्राणि क्षिप्त्वा खंसेदयेद्बुधः ।

वासरत्रयमर्द्धेन ततः खल्वे विनिःक्षिपेत् ॥
पादांशं सूतकं दत्त्वा याममर्द्धेन मर्द्दयेत् ।
ततः उद्धृत्य पत्राणि लेपरेद्विगुणेन च ।
गन्धकेनाम्लदृष्टेन तस्य कुर्य्याच्च गोलकम् ॥
ततः पिष्ट्वा च मीनाक्षीं षाड्गेरीं सपुनर्नवाम् ।
ततःकल्केन बहिर्गोलं लेपयेद्रुद्धगोलितम् ॥
शुष्कं तन्गोलकं भाण्डे मृरावेश्य च रोधयेत् ।
वालुकाभिः प्रपूर्य्याथ विभूतिलवणाम्बुभिः ॥
दत्त्वा भाण्डमुखे सम्यक् ततश्चुल्यां विपाचयेत् ।
क्रमवृद्ध्याग्निना सम्यक् यावद्यामचतुष्टयम् ॥
स्वाङ्गशीतं समुद्धृत्य मर्द्धयेच्चूरणाद्भवेः ।
यामैकं गोलकं तच्च निःक्षिपेच्चूरणोदरे ॥
सदा लेपस्तु कर्त्तव्यः सर्व्वतोऽङ्गुष्ठमात्रकः ।
पाच्यं गजपुटे स्निग्धं भवति निश्चितम् ॥
वमनञ्च विरेकञ्च भस्म क्षममथार्द्धिम् ।
विदाहं खेदमुत्क्लेदं न करोति कदाचन ॥"
इति भावप्रकाशः ॥ * ॥

शुक्लनिभः । अरुणवर्णः । इति हेमचन्द्रः ग्रन्थरत्नावली च ॥ तद्गुणाः, त्रि ॥
("न विषं विषमित्याहुस्ताम्रञ्च विषमुच्यते ।
एकदोषो विषे त्वष्टौ दोषास्ताम्रे प्रकीर्त्तिताः ॥
भ्रमो मूर्च्छा विदाहश्च उत्क्लेदश्छर्द्दिरेव च ।
अरोचकश्चित्तसन्ताप एते दोषा विषोपमाः ॥
तस्माद्विशुद्धं ताम्रं हि ग्राह्यं रोगोपशान्तये ।
पटुना रविदुग्धेन ताम्रपत्राणि लेपयेत् ।
अथौ सन्ताप्य निर्गुण्डीरसे सिञ्चेत् पुनः पुनः ॥
मतान्तरम् ।
गोमूत्रेण पचेद्यामं ताम्रपत्रं दृढाग्निना ।
शुध्यते नात्र सन्देहो मारणञ्चात्र कथ्यते ॥
इति ताम्रशोधनम् ॥ * ॥

अथ ताम्रमारणम् ।
शतमेकं द्विधा गन्धं यामं मर्द्यन्तु कन्यया ।
द्वयोस्तुल्यं ताम्रपत्रं लिप्त्वा स्याल्यां निधापयेत् ।
सम्यक् शूरणजैः सार्द्धं पार्श्वे भस्म निधापयेत् ।
चतुर्थांशं पचेच्चुल्यां पाचयेत्तु सगोमये ॥
जलं पुनः पुनर्देयं स्वाङ्गशीतं विमर्द्धयेत् ।
म्रियते नात्र सन्देहः सर्व्वरोगेषु योजयेत् ॥
मतान्तरम् ।
जम्बूनाम्भसा सैन्धवसंयुतेन
सगन्धकं स्थापय शुल्वपत्रम् ।
पक्वायमानं पुटपेत् सुयुक्त्या
वातादिकं यावदुपैति शान्तिम् ॥
अन्यतरमतम् ।
शुद्धं ताम्रदलं विमर्द्य पटुना क्षारेण जम्बीरजै-
र्नीरैर्घर्षसमिदं खल्वकंपयसा लिप्तं घर्मे सप्तधा ।
निर्गुण्ड्यम्बुहिमं रसेन्द्रकलितं दुग्धाज्यगन्धेन तत्
तुल्यैनाथ गतं भवेत् सुपठितं पञ्चान्दलेन त्रिधा ॥
गुणा यथा,—
वान्तिभ्रान्तिविवर्ज्जितं क्षयरुजाकुष्ठानि
पाण्डामयं
शूलं मेहगदाङ्कुरानिलगदाश्लीपाग्निमान्द्यं जयेत् ।
गुञ्जामात्रमिदं नवं द्विगुणितं तच्छुद्धकायेन चेत्
भुक्तं स्यौल्यजरापलण्डुगुदमं पथ्याग्निना वत्सरात् ॥
ताम्रसूर्णं गरहरं यकृत्प्लीहोदरापहम् ।
क्रिमिशूलाग्निवातघ्नं ग्रहणग्रन्थिभिन्नपित्तजित् ॥"
इति ताम्रमारणम् ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे मारणमारणाधिकारे ॥)

ताम्रः, पुं, (ताम्रस्येव वर्णोऽस्यास्य । अच् । ताम्रवर्णत्वादस्य तथात्वम् ।) कुष्ठरोगविशेषः । इति कर्म्मविपाकः ॥ (द्वीपभेदः । यथा, महाभारते । २ । ३१ । ६५ ।
"द्वीपं ताम्राक्षयञ्चैव पर्व्वतं रामकं तथा ॥")

ताम्रकं, क्ली, (ताम्र + स्वार्थे संज्ञायां वा कन् ।) ताम्रम् । इत्यमरः । २ । ६ । ६७ ॥

ताम्रकर्णी, स्त्री, (ताम्रवर्णौ कर्णौ यस्याः स्त्रियां ङीष् ।) अञ्जना नाम पश्चिमदिग्गजहस्तिपत्नी । इत्यमरः । १ । ३ । ५ ॥

ताम्रकारः, पुं, (ताम्रं करोति ताम्रधातुभिः पात्रादिकं निर्म्मातीति । कृ + अण् ।) वर्णसङ्करजातिविशेषः । तत्पर्य्यायः । ताम्रिकः २ प्रौष्किकः ३ ताम्रकुट्टकः ४ । इति शब्दरत्नावली ॥ अस्योत्पत्तिः कंसकारशब्दे द्रष्टव्या ॥

ताम्रकुट्टकः, पुं, (ताम्रं कुट्टयतीति । कुट्ट + ण्वुल् ।) ताम्रकारः । इत्यमरः । २ । १० । ८ ॥

ताम्रकूटः, पुं क्ली, (ताम्रनिर्म्मितं कूटमिव ताम्रस्य कूटमिव वा ।) क्षुपविशेषः । तामाक् इति भाषा । यथा,—
"सम्विदा कालकूटश्च ताम्रकूटश्च धुस्तुरम् ।
अहिफेनं खेर्ज्जुरसः तारिका तरिता तथा ॥
इत्यष्टौ सिद्धिदाश्चापि यथा सूर्य्यादकं प्रिये ॥"
इति कुलार्णवतन्त्रम् ॥

ताम्रकृमिः, पुं, (ताम्रवर्णः कृमिः कीटः ।) इन्द्रगोपकीटः । इति भूरिप्रयोगः हारावली च ॥

ताम्रगर्भं, क्ली, (ताम्रं गर्भे उत्पत्तिस्थानमस्य ।) तुत्थम् । इति राजनिर्घण्टः ॥

ताम्रचूड़ः, पुं क्ली, (ताम्रा ताम्रवर्णा चूड़ा अस्य ।) कुक्कुटः । इत्यमरः । २ । ५ । १७ ॥ (यथा, महाभारते । ३ । २२४ । २४ ।
"अपरेणाग्निदायादस्ताम्रचूड़ं शुभेक्षणः ।
महाकायमुपक्षिप्तं कुक्कुटं बलिनां वरम् ॥"
यथा चोत्तरतन्त्रे ३६ अध्याये सुश्रुतेनोक्तम् ।
"ताम्रचूड़स्य मांसेन पिबेद्वा मद्यमुत्तमम् ॥")
कुक्कुरः । इति राजनिर्घण्टः ॥

ताम्रदुग्धा, स्त्री, (ताम्रं रक्तवर्णं दुग्धं क्षीरं रसोऽस्याः ।) गोरक्तदुग्धा । इति राजनिर्घण्टः ॥

ताम्रपट्टं, क्ली, (ताम्रेण निर्म्मितं पट्टं पत्रम् ।) ताम्रनिर्म्मितलेखनपत्रम् । यथा,—
"दत्त्वा भूमिं निवर्त्तं वा क्रीत्वा लेखयतु कारयेत् ।
आगामिभद्रनृपतिः परिज्ञानाय पार्थिवः ॥
पटे वा ताम्रपट्टे वा समद्रोपरिचिह्नितम् ॥"
इति मिताक्षरा ॥

ताम्रपत्रः, पुं, (ताम्रं ताम्रवर्णं पत्रमस्य ।) जीवग्राकः । इति राजनिर्घण्टः ॥ ताम्रनिर्म्मितपत्रे, क्ली ॥

ताम्रपर्णी, स्त्री, दीर्घकामेदः । इति भूरिप्रयोगः ॥ नदीविशेषः । इति पुराणम् ॥ (यथा, रघुः । ४ । ५० ।
"ताम्रपर्णीं समेतस्य मुक्तासारं महोदधेः ॥")

ताम्रपल्लवः, पुं, (ताम्रवर्णं पल्लवमस्य ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायाः यथा,—
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

ताम्रपाकी, [न्] पुं, (पच्यते इति । पच + घञ् कुत्वञ्च । ताम्रः ताम्रवर्णः पाकः परिणतिरस्यास्येति । इनिः ।) गर्द्दभाण्डवृक्षः । इति रत्नमाला ॥

ताम्रपादी, स्त्री, (ताम्रो रक्तवर्णः पादो मूलदेशोऽस्याः ।) हंसपदी । इति राजनिर्घण्टः ॥ (हंसपदीशब्दे विवृतिरस्या ज्ञातव्या ॥)

ताम्रपुष्पः, पुं, (ताम्रवर्णं पुष्पमस्य ।) कृतकाञ्चनः । इति जटाधरः ॥ (अस्य पर्य्यायाः यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुञ्जली ताम्रपुष्पश्च रक्तकः खरपत्रकः ॥")
भूमिचम्पकः । इति शब्दचन्द्रिका ॥

ताम्रपुष्पिका, स्त्री, (ताम्रवर्णं पुष्पमस्याः । कप् टापि अत इत्वञ्च ।) रक्तचित्रतृण् । इति राजनिर्घण्टः ॥ (रक्तचित्रतृणशब्दे ज्ञातव्यमस्या विवरणम् ॥)

ताम्रपुष्पी, स्त्री, (ताम्रवर्णं पुष्पमस्या इति । ङीष् ।) धातकी । (अस्याः पर्य्यायाः यथा,—
"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पाटलावृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायाः यथा,—
"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
अमोघा कुबेराक्षी कालस्थाल्यालवल्लभा ॥
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

ताम्रफलः, पुं, (ताम्रं ताम्रवर्णं फलमस्य ।) अङ्कोटवृक्षः । इति राजनिर्घण्टः ॥

ताम्रमूला, स्त्री, (ताम्रं ताम्रवर्णं मूलमस्याः ।) दुरालभा । (यथा, भावप्रकाशे । ज्वराधिकारे श्वासचिकित्सायाम् ।
"सिंही यात्री ताम्रपर्णी पटोली ॥")
लम्बालुः । इति राजनिर्घण्टः ॥ कच्छुरा । इति रत्नमाला ॥ खिराइ इति भाषा ॥

ताम्रवर्णः, पुं, (ताम्रस्येव वर्णोऽस्य ।) पक्षिबाहुल्यम् । इति राजनिर्घण्टः ॥ (भारतवर्षीयखण्डोपभेदः । यथा, मात्स्ये । ११३ । ८ ।

"भारतस्याम्य वर्षस्य नव भेदान् निबोध मे।
इन्द्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान्॥")
ताम्रवर्णा, स्त्री, (ताम्रस्येव वर्णोऽस्या इति। टाप्।) ओड्रपुष्पवृक्षः। इति शब्दचन्द्रिका॥
ताम्रवल्ली, स्त्री, (ताम्रवर्णा वल्ली। मध्यपदलोपी समासः।) मञ्जिष्ठा। इति रत्नमाला॥ चित्रकूटदेशप्रसिद्धा लता। तत्पर्य्यायः। ताम्रा २ ताली ३ तमाली ४ तमालिका ५ रक्तवल्ली ६ सुलोमा ७ शोधनी ८ तालिका ९। अस्या गुणाः। कषायत्वम्। कफदोषमुखकण्ठोत्थरोगनाशित्वम्। श्लेष्मशुद्धिकारित्वञ्च। इति राजनिर्घण्टः॥
ताम्रवीजः, पुं, (ताम्रवर्णं वीजमस्य।) कुलत्थः। इति राजनिर्घण्टः॥
ताम्रवृक्षः, पुं, (ताम्रमिव रक्तवर्णो वृक्षः।) रक्तचन्दनम्। कुलत्थः। इति रत्नमाला॥
ताम्रवृन्तः, पु, (ताम्रमिव रक्तवर्णं वृन्तमस्य।) कुलत्थः। इति त्रिकाण्डशेषः॥
ताम्रवृन्ता, स्त्री, (ताम्रमिव रक्तवर्णं वृन्तमस्याः इति टाप्।) कुलत्थिका। इति हेमचन्द्रः। ४।२४१॥
ताम्रशिखी, [न्] पुं स्त्री, (ताम्रवर्णा शिखा चूड़ा अस्यास्त इति इनिः।) कुक्कुटः। इति जटाधरः॥
ताम्रसारं, क्ली, (ताम्रवत् रक्तवर्णः सारोऽस्य।) रक्तचन्दनम्। इति रत्नमाला॥
ताम्रसारकं, क्ली, (ताम्रसार+स्वार्थे कन्।) रक्तचन्दनम्। इति राजनिर्घण्टः॥
ताम्रसारकः, पुं, (ताम्रवत् रक्तवर्णः सारोऽस्येति कप्।) रक्तखदिरः। इति राजनिर्घण्टः॥
ताम्रा, स्त्री, (ताम्र+टाप्।) सैंहली। इति राजनिर्घण्टः॥ (प्रजापतेः कश्यपस्य पत्नीनामन्यतमा। यथा, मात्स्ये। ६। २।
"सुरभिर्विनता तद्वत्ताम्रा क्रोधवशा इरा॥"
समुद्गतगर्भतचतुर्थस्त्रविशेषः। यथा,—
"चतुर्थी ताम्रा नामाष्टभागप्रमाणा विविधकिलासकुष्ठाधिष्ठाना॥" इति सुश्रुते शारीरस्थाने चतुर्थोऽध्यायः॥)
ताम्राक्षः, पुं, उपद्वीपभेदः। इति शब्दमाला॥
ताम्राक्षः, पुं, (ताम्रे रक्तामे अक्षिणी यस्य। अक्षिन्+समासे षच्।) कोकिलः। इति त्रिकाण्डशेषः॥ (ताम्रनयने, त्रि। यथा, भागवते। १। ७। ३३।
"तत आसाद्य तरसा दारुणं गौतमौसुतम्।
वधन्तामर्षताम्राक्षः पशुं रसनया यथा॥")
ताम्राभं, क्ली, (ताम्रमिवाभातीति। आ+भा+कः। ताम्रवदाभा अस्येति वा रक्तवर्णत्वात् तथात्वम्।) रक्तचन्दनम्। इति शब्दचन्द्रिका॥ (पर्व्वतविशेषः। यथा, ब्रह्माण्डे ४७ अध्याये।
"रुचका निषधं प्राप्ता ताम्राभं निषधादपि॥")
ताम्रार्द्धं, क्ली, (ताम्रस्यार्द्धं अर्द्धभागतया उत्पत्तिकारणमस्य ताम्रस्यार्द्धं उत्पादकोऽस्य इति वा।) कांस्यम्। इति त्रिकाण्डशेषः॥

ताम्रिकः, पुं, (ताम्रं तत्पात्रादिनिर्म्माणं कार्य्यमेषामस्य। ताम्र+ठन्।) कंसकारः। इति शब्दरत्नावली॥ ताम्रनिर्म्मिते, त्रि। यथा, कार्षिके ताम्रिके पणः। इत्यमरः। २। ६। ८८॥ (यथा, मनुः। ८। १३६।
"कार्षापणन्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः॥")
ताम्रिका, स्त्री, (ताम्रवद्वर्णोऽभा अस्यस्या इति ठन् ततः टाप्।) गुञ्जा। इति राजनिर्घण्टः॥ मानरत्नावाद्यम्। इति भूरिप्रयोगः॥
ताम्री, स्त्री, (ताम्रस्य विकारः। इति अण् ततो ङीप्।) वाद्यविशेषः। तत्पर्य्यायः। मानरन्ध्रा २ विकारिका ३। इति त्रिकाण्डशेषः॥
ताय, ञ्च ड पालने। सन्ततौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) सन्ततिर्विस्तारः। ञ, तायतायत्। ड, तायते विद्यां सुधीः। इति दुर्गादासः॥
तायिकः, पुं, (तायं पालने साधुरिति ठञ्।) तन्त्रिकाभिधदेशः। इति हेमचन्द्रः। ४। २४॥
तारं, क्ली, (तार्य्यते विस्तार्य्यते इति। तॄ+णिच्+घञ्।) रूप्यम्। इति मेदिनी। ते, ४३॥
("दग्धोत्तीर्णं सुगीतं यन्निर्म्मलं कुन्दसन्निभम्। गुरुस्निग्धकुमारञ्च तारसूत्तममिष्यते॥"
अशुद्धस्याष्टतस्यास्य गुणा यथा,—
"आयुः शुक्रं बलं हन्ति रोगसंघं करोति च। अशुद्धघाष्टतन्तारं शुद्धमार्थमतो बुधैः॥"
अस्य मारणं यथा,—
"कण्टवेध्यं तारपत्रं दिव्याद्विगुणहिङ्गुलम्। पातयन्ते रसो याह्यो रजतं ध्रतसुच्यते॥"
इति वैद्यकरसेन्द्रसारसंग्रहे चारणमारणाधिकारे॥) सूक्ता। इति राजनिर्घण्टः॥ (यथा, रसेन्द्रसारसंग्रहे त्रैलोक्यचिन्तामणिवटिकायाम्।
"हारं सुवर्णं सुध्रतञ्च तारम्॥"
"तारं मौक्तिकम्। तारशब्देनात्र मौक्तिकमेवोच्यते न तु रजतम्।" इति तट्टीका॥ गौणसिद्धिभेदः। यथा, "विहन्यमानस्य दुःखस्य चित्तात् तद्विघातार्थञ्च इति इमा सुखाख्याः सिद्धयस्तदुपायतया त्वितरा गौण्यः पञ्चसिद्धयश्चापि हेतुमत्तया तिस्रः हेतुतया पञ्च व्यवस्थिताः। तासाञ्चा अध्ययनादिलक्षणाः सिद्धयो हेतवः सुखास्तु हेतुमत्यः। विधिवद्गुरुमुखादध्यात्मविद्यानां श्रवणरूपग्रहणमध्ययनं प्रथमसिद्धिस्तारसुच्यते॥" इति तत्त्वकौमुदी॥ अग्निमन्थम्। इति मेदिनी। रे, ४३॥)
तारः, पुं, वानरविशेषः। सुक्तादिशुद्धिः। शुद्धमौक्तिकः। इति मेदिनी। रे, ४३॥ (तार्य्यते उत्तार्य्यते भवसागरादनेन। तॄ+णिच्+घञ्। यद्वा तारयति खोद्धारणजनादिभिर्लोकान्। तॄ+णिच्+अच्। एतन्निरुक्तिर्यथा, काशीखण्डे। ७३ अध्याये।
"तारयेद् यद् भवाम्भोधेः खजपासक्तमानसम्।
ततस्तार इति ख्यातो यस्तं ब्रह्मादयोऽलिकवत्॥")
प्रणवः। इति तन्त्रम्॥ (यथा, महागणपतिस्तोत्रे। २।
"तारश्रीपरशक्तिकामवसुधारूपागुगं यं विदुस्तस्मै स्वात् प्रणतिर्गणाधिपतये यो रागिभाभ्यर्च्यते॥")
तरणम्। इति विश्वः॥ कूर्चबीजम्। इति तन्त्रसारम्॥ (नक्षत्रम्। इति मेदिनी। रे, ४३॥ अक्षुद्रशब्दः। इति हेमचन्द्रः। ६। ३८॥ यथा, हेमचन्द्रटीकायाम्।
"वृषासुरसि मन्त्रस्तु द्वात्रिंशतिविधो ध्वनिः। स एव कण्ठमध्यः स्यात् तारः शिरसि गीयते॥"
विष्णुः। यथा, महाभारते। १३। १४६। ११७।
"अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः॥"
राक्षसविशेषः। यथा महाभारते। ३। २८४। ६।
"युयुधे लक्षणश्चापि तथैवेन्द्रजिता सह।
विरूपाक्षेण सुग्रीवस्तारेण च निखर्व्वटः॥"
दैत्यविशेषः। यथा, हरिवंशे। ४३। ६।
"तारस्तु क्रोशविस्तारमायसं वायसध्वजम॥")
महादेवः।
"काश्यां विश्वेश्वरोऽहं गिरिपतितनयासंयुतो वामभागे
शुण्डादण्डेन दत्ते त्रिपथगतटिनीतीरशुद्धाम्बुभागे।
मायाबीजञ्च कर्णे सुरमुनिसहितो ध्यानमुक्तं वदामि
प्रीत्या लोकस्य तस्मात् सुरमुनिगणकैरुच्यते तारनाम॥"
इति शब्दार्थचिन्तामणिः॥)
तारः, त्रि, अक्षुद्रशब्दविशिष्टः। इति मेदिनी। रे, ४४॥ स्फुरितकिरणः। निर्म्मलः। इति धरणिः॥ (तारं सुक्तास्त्यस्येति अच्। सुक्ताविशिष्टः। यथा, अमरशतके। २८।
"उरसि निहितसारो हारः क्षता जघने घने॥")
तारकं, क्ली, (तारेव कनीनिकया कायतीति। कै+कः।) चक्षुः। इति मेदिनी। के, १००॥
तारकं, क्ली, स्त्री, (तारमेव। स्वार्थे कन्।) चक्षुस्तारा। नक्षत्रम्। इति मेदिनी। के, १००॥
तारकः, पुं, (तारयति देवानिति। तॄ+णिच्+ण्वुल्।) द्वादशमन्वन्तरीयेन्द्रशत्रुरसुरविशेषः। यथा,—
"मनोस्तु दक्षपुत्रस्य द्वादशस्यात्मजान् शृणु।
देववानुपदेवश्च देवश्रेष्ठो विदूरथः॥
मित्रवान् मित्रदेवश्च मित्रविन्दश्च वीर्य्यवान्।
मित्रवाहः सुवर्चाश्च दक्षपुत्रमनोः सुताः॥
तपस्वी सुतपाश्चैव तपोमूर्त्तिस्तपोरतिः।
तपोधृतिर्दुतिश्चान्य ऋषयश्च तपोधनाः॥
सुधर्म्माणः सुतपसो हरिता रोहितास्तथा।
सुरारयो गणाः पञ्च प्रत्येकं दशको गणः॥

ऋतधामा च तत्रेन्द्रस्तारको नाम तद्रिपुः ।
हरिर्नपुंसको भूत्वा घातयिष्यति शङ्कर ! ॥
इति गारुडे ८७ अध्याये ॥
(असुरोऽसुरविशेषः । कार्त्तिकेयः एनं निहतवान् । यथा, मत्स्यपुराणे । १४५ । ५—११ ।
"वज्राङ्गो नाम दैत्योऽभूत्तस्य पुत्रस्तु तारकः ।
सुराननुद्वासयामास पुरेभ्यः स महाबलः ॥
ततस्ते ब्रह्मणोऽभ्याशं जग्मुर्भयनिपीड़िताः ।
भीतांश्च त्रिदशान् दृष्ट्वा ब्रह्मा तेषामुवाच ह ॥
सन्त्यलभ्यं भयं देवाः । शुक्रस्यात्मजः शिशुः ।
तुहिनाचलदोर्द्दिग्धं हनिष्यति दानवम् ॥
ततः काले तु कस्मिंश्चित् दृष्ट्वा वै शैलजां शिवः ।
स्रस्तो बिन्दुर्वह्निवदने यत्नजत्कारणान्तरे ॥
तद्गर्भं पन्नगवदने रेतो देवानतर्पयत् ।
विदार्य्य जठराग्नेयो अजीर्णं निर्गतं सुने ! ॥
पतितं तत् सरिद्वरे ततस्तु शरकानने ।
तस्मात्तु स समुद्भूतो गुहो दिनकरप्रभः ।
स सप्तदिवसो बालो निजघ्ने तारकासुरम् ॥"
अस्य विशेषविवरणन्तु तत्रैव १४५ अध्यायमारभ्य १५६ अध्यायेषु द्रष्टव्यम् ॥ तारयतीति । तृ + णिच् + ण्वुल् ।) कर्णधारः । इति मेदिनी । के, ६६ ॥ भेलकः । इति शब्दरत्नावली ॥ (तरणोपायः । यथा, हठयोगप्रदीपिकायाम् । ४ । ४०।
"केचिद्रागमगालेन केचिन्नियमसङ्कुलैः ।
केचित्तर्केण मुह्यन्ति नैव जानन्ति तारकम् ॥"
"तारयतीति तारकस्तं तारकं तरणोपायं नैव जानन्ति ।" इति तट्टीका ॥ महादेवः । यथा, महाभारते । १२ । २८४ । ३५ ।
"गर्भमांसङ्गमालाय तारकाय तराय च ।
नमो यज्ञाय यजिने हुताय प्रहुताय च ॥")
त्रातरि, त्रि । इति मेदिनी । के, १०० ॥ (यथा, प्रबोधचन्द्रोदये । २ । १३ ।
"कथयति भगवान् इहान्तकाले
भवभयकातरतारकं प्रबोधम् ॥"
स्त्रियां टापि यत इत्वम् । यथा, गोः रामायणे । २ । ६७ । २६ ।
"नारीणां तारिकाः काश्चित् काश्चित् परमवाजिनाम् ॥")

तारकजित्, पुं, (तारकं तारकासुरं जयतीति । जि + क्विप् तुगागमश्च ।) कार्त्तिकेयः । इत्यमरः । १ । १ । १४२ ॥ (एतद्विवरणं मात्स्ये १५६ अध्याये द्रष्टव्यम् ॥)

तारकब्रह्म, क्ली, (तारकं संसारसागरपारकारकं ब्रह्म ।) षड़क्षरमन्त्रविशेषः । यथा,—
"षड़क्षरं महामन्त्रं तारकं ब्रह्म उच्यते ।
ये भजन्ति च मां भक्त्या तेषां मुक्तिर्न संशयः ॥
रामाय नम इत्येवमुच्चार्य्य मन्त्रमुत्तमम् ।
सर्व्वदुःखहरश्चैतत् पापिनामपि मुक्तिदम् ॥
इमं मन्त्रं जपन्नित्यममलत्वं भविष्यसि ।
भस्मास्थिधारणादूर्ध्वं सम्भूतंचाशुचित्वयि ॥
मङ्गलं तदभूत सर्व्वं मन्त्रोच्चारणात् शुभात् ।
तस्मात्तेन श्रीरामतारकाख्येन मन्त्रतः ॥
भूत्वा काश्यां विश्वनाथो महाज्ञापरिपालकः ।
कृत्वा मुक्तान् जीवमात्रान् मानुषादीन् परं पदम् ॥
अन्यत् किन्ते भयं मन्त्रप्रभावात् प्राप्स्यसि ।
इति सन्दिश्य मां विष्णुर्विससर्ज्ज मरुद्गणान् ॥"
इति पाद्मोत्तरखण्डे श्रीशिवं प्रति श्रीविष्णुवाक्यम् ॥ अपि च ।
"सुम्भर्गोमुखिकर्ण्यान्तु ब्रह्मोदुम्बरनिवासिनः ।
अहं दिशामि ते मन्त्रं तारकं ब्रह्मवाचकम् ॥
ओँ श्रीरामरामरामेतितत्तारकमुच्यते ।
अतस्त्वं जानकीनाथ ! परं ब्रह्म विनिश्चितम् ॥"
इति पाद्मोत्तरखण्डे श्रीरामं प्रति श्रीशिववाक्यम् ॥

तारका, स्त्री, क्ली, (तरति तारयति वा । तृ + णिच् + ण्वुल् । टाप् । "तारका ज्योतिषि ।" ७ । ३ । ४५ । इत्यस्य वार्त्तिकोक्त्या न अत इत्वम् ।) नक्षत्रम् । (यथा, मार्कण्डेये । १५ । ७१ ।
"व्यप्-विन्दवो यथाम्भोधौ यथा वा दिवि तारकाः ।
यथा वा वर्षतो धारा गङ्गायां सिकता यथा ॥")
कनीनिका । इति मेदिनी । के, १०० ॥
(यथा, रघुः । ११ । ६६ ।
"चक्रकोपहृनार्द्धिं ततः
सन्दधे दृशमुदयतारकाम् ॥")
इन्द्रवारुण्यां स्त्री । इति राजनिर्घण्टः ॥

तारकारिः, पुं, (तारकस्य तारकासुरस्य अरिः ।) कार्त्तिकेयः । इति हेमचन्द्रः । २ । १२३ ॥

तारकिणी, स्त्री, (तारकाः सन्त्यत्र । तारका + इनिः ङीप् ।) रात्रिः । इति राजनिर्घण्टः ॥

तारकितं, त्रि, (तारकाः सञ्जाता अस्य । तारका + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) तारकायुक्तम् । यथा,—
"सिति निशा दृशदि स्फुटदुत्पतत्
कणगणाधिपतारकिताम्बरः ॥"
इति नैषधम् ॥

तारणः, पुं, (तारयतीति । तृ + णिच् + ल्युः ।) भेलकः । इति शब्दरत्नावली ॥ (संसारसागरात् तारयतीति । विष्णुः । यथा, महाभारते । १३ । १४६ । ५० ।
"अशोकस्तारणस्तारः शूरः सर्व्वजनेश्वरः ॥"
महादेवः । यथा, तत्रैव । १३ । १७ । ११७ ।
"तोरणस्तारणो वातः परिधीपतिखेचरः ॥"
क्ली, यष्टिवत्सरेषु अष्टादशवत्सरः । यथा, ज्योतिषतत्त्वे ।
"अतिवृष्टिश्च जायेत धान्यस्यार्घ प्रपीड़नम् ।
शस्यं भवति सामान्यं तारणे सुरवन्दिते ! ॥"
तथाच बृहत्संहितायाम् । ८ । ३६ ।
"तारणं तदनु भूरिवारिदं
शस्यवृद्धिसुदितञ्च पार्थिवम् ॥"
तृ + णिच् + भावे ल्युट् । उत्तारणम् । उद्धारणम् । यथा, महाभारते । ४ । ४ । ५३ ।
"तारणायास्य दुःखस्य प्रस्थानाय जयाय च ।")
तरणकारयितरि, त्रि ॥

तारणिः, स्त्री, (तारयतीति । तृ + णिच् + अनिः ।) नौका । इति हारावली । ५६ ॥

तारतण्डुलः, पुं, (तारं शुक्लं इव शुभ्रस्तण्डुलो यस्य ।) धवलयावनालः । इति राजनिर्घण्टः ॥

तारतम्यं, क्ली, तरतमयोर्भावः । (तरतम + ष्यञ् ।) न्यूनाधिक्यम् । यथा,—
"निर्द्धनं निधनमेतयोर्द्वयो-
स्तारतम्यविधिमुग्धचेतसा ।
बोधनाय विधिना विनिर्म्मिता
रेफ एव जयवैजयन्तिका ॥"
इत्युद्भटः ॥

तारदी, स्त्री, (तरदी एव । स्वार्थे अण् ततो ङीप् ।) तरदीवृक्षः । इति राजनिर्घण्टः ॥

तारपुष्पः, पुं, (तारं रूप्यमिव शुभ्रं पुष्पं यस्य ।) कुन्दवृक्षः । इति राजनिर्घण्टः ॥

तारलः, त्रि, (तरल एव । स्वार्थे अण् ।) विटः । इति भूरिप्रयोगः ॥

तारविमला, स्त्री, (तारं रूप्यमिव विमला ।) धातुविशेषः । इति शब्दार्थकल्पतरुः ॥

तारशुद्धिकरं, क्ली, (तारस्य रजतस्य शुद्धिं करोतीति । कृ + टः ।) सीसकम् । इति राजनिर्घण्टः ॥

तारा, स्त्री, पुं, (तारयतीति । तृ + णिच् + अच् ।) नक्षत्रम् । इत्यमरः । १ । ३ । २१ ॥ (यथा, महाभारते । १ । २११ । २६ ।
"चन्द्रादित्यौ ग्रहास्तारा नक्षत्राणि दिवौकसः ॥")
यथाच कर्म्मलोचने ।
"एकतारं नमो दृष्ट्वा सार्त्तयो नारदो मुनिः ।
तावद्भवति चाण्डालो यावद्न्यां न पश्यति ॥"
अक्षिमध्यम् । इति मेदिनी । रे, ४३ ॥ श्लेष्मस्य पर्य्यायः । विभिनी २ कनीनिका ३ । इति राजनिर्घण्टः ॥ तारका ४ । इत्यमरः । १ । ३ । २१ ॥ (यथा, हठयोगप्रदीपिकायाम् । ४ । ३६ ।
"तारे ज्योतिषि संयोज्य किञ्चिदुन्नमयेद्भ्रुवौ ॥")

तारा, स्त्री, (तारयति तापादिति । तृ + णिच् + अच् + टाप् ।) बुद्धदेवतामेदः । हर्षस्यभार्य्या । इति मेदिनी । रे, ४३ ॥ (यथा, देवीभागवते । १ । ११ । ७५ ।
"ततः कालेन कियता तारारूपं सुतं शुभम् ॥")
वालिभार्य्या । सा सुषेणवानरकन्या । इति रामायणम् ॥ (यथा, महाभारते । ३ । २७६ । १८ ।
"हेममाली ततो बाली तारां तारापिपानताम् ।
उवाच वचनं वाग्मी तां वानरपतिः पतिः ॥")
घोड़ा । मुक्ता । इति राजनिर्घण्टः ॥ * ॥
द्वितीया शक्तिः । यथा,—
"लीलया वाक्प्रदा चेति तेन लीलसरस्वती ।
तारकत्वात् सदा तारा मुक्तिमोक्षप्रदायिनी ॥
उग्रापत्तारिणी यस्माद्उग्रतारा प्रकीर्त्तिता ॥"

अस्या ध्यानं यथा,—
"प्रत्यालीढपदार्पिताङ्घ्रिशवहृद्घोराट्टहासा परा
खड्गेन्दीवरकर्त्तृखर्परसृणा क्रूङ्कारबीजोद्भवा।
खर्व्वा नीलविशालपिङ्गलजटाजूटैकनागैर्युता
जाड्यं न्यस्य कपालके त्रिजगतां हन्त्युग्रतारा-
स्वयम्॥"
अपि च।
"प्रत्यालीढपदां घोरां मुण्डमालाविभूषिताम्।
खर्व्वां लम्बोदरीं भीमां व्याघ्रचर्म्मावृतां कटौ॥
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम्।
चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदाम्॥
खड्गकर्त्तृसमायुक्तसव्येतरभुजद्वयाम्।
कपालोत्पलसंयुक्तसव्यपाणियुगान्विताम्॥
पिङ्गोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषिताम्।
बालार्कमण्डलाकारलोचनत्रयभूषिताम्॥
स्फुरद्दंष्ट्रामधगतां घोरदंष्ट्रां करालिनीम्।
सावष्टम्भशवहृदां व्याघ्रचर्म्मविभूषिताम्॥
विश्वव्यापकतोयान्तःश्वेतपद्मोपरिस्थिताम्॥"
अस्या दक्षाचरमन्त्रोक्तध्यानं यथा,—
"श्यामवर्णां त्रिनयनां द्विभुजां वरपङ्कजे।
दधानां बहुवर्णाभिर्बहुरूपाभिराहृताम्॥
शक्तिभिः शोरवदनां शोरमौक्तिकभूषणाम्।
रक्तपादुकयोर्न्यस्तपादाम्बुजयुगां स्मरेत्॥"
इति तन्त्रसारः॥
(अस्या बीजं यथा, "ह्रीँ स्त्रीँ हुँ फट्॥")

तारापतिः, पुं, (तारायाः पतिः।) शिवः। चन्द्रः। (यथा, राजेन्द्रकर्णपूरे। २७।
"ध्वान्तध्वान्तकलङ्क शङ्करशिखालङ्कार तारापते
राकाकान्त सविभ्रमं भ्रम सदा निःशङ्कमङ्के दिवः॥")
दृष्टस्तिः। वाली। सुग्रीवः। इति पुराणम्॥
(यथा, नैषधे। १६। ८।
"व्रजति कुसदे दृष्ट्वा मोहं दृशोरपिधायके
भवति च नवे दूरं तारापतौ च हतौजसि।
लघु रघुपतेर्ज्यायां मायामयीमिव रावणि-
स्त्रिमरचिकुरव्याहं रात्रिं हिनस्ति गभस्ति-
राट्॥")

तारापथः, पुं, (तारायां नक्षत्रायां पन्थाः। समासे अ।) आकाशः। इति हेमचन्द्रः॥
(देशविशेषः। यथा, रघुः। १५। ६०।
"अङ्गदं चन्द्रकेतुञ्च लक्ष्मणोऽप्यात्मसम्भवौ।
ग्राहयामास रघुनाथस्य चक्रे तारापथेश्वरौ॥"
"तारापथेश्वरौ।" इति वा पाठः॥)

तारापीड़ः, पुं, (तारायां नक्षत्रायां आपीड़ो भूषणमिव।) चन्द्रः। इति त्रिकाण्डशेषः॥
(स्वनामख्यातचन्द्रापीड़स्य राज्ञो भ्राता। यथा, राजतरङ्गिण्याम्। ४। ४६।
"तारापीड़ोऽपि तनयः क्रमात् तस्यामजायत॥"
कादम्बरीकथितनायकविशेषः। यथा, कादम्बर्याम्। १०२ पत्रे। "अवतार इव धर्म्मस्य प्रतिनिधिरिव पुरुषोत्तमस्य परिच्छदप्रजापीड़ो राजा तारापीड़ोऽभवत्॥")

तारापूजा, स्त्री, (तारा नक्षत्राणि भूषा भूषणं यस्याः।) रात्रिः। इति राजनिर्घण्टः॥

ताराभः, पुं, (तारो निर्म्मलोऽभ्र इव। शुक्लवर्णत्वादस्य तथात्वम्।) कर्पूरः। इति राजनिर्घण्टः॥ (विवरणमस्य कर्पूरशब्दे द्रष्टव्यम्॥)

तारामण्डलः, पुं, (तारानां मुक्तानां मण्डलं यत्र।) ईश्वरगृहविशेषः। इति शब्दरत्नावली॥ (नक्षत्रमण्डले, क्ली॥)

तारारिः, पुं, (तारस्य रूप्यस्य अरिः। एतत्संसर्गेण रूप्यस्य चाकचिक्यादिकं विनश्यतीत्यतोऽस्य तथात्वम्।) विटमाक्षिकः। इति हेमचन्द्रः। ४। १२१॥

तारावती, स्त्री, चन्द्रशेखरराजपत्नी। सा च ककुत्स्थराजेन तत्पत्न्यां मनोरमायां जातः। अस्यौ गिरिजांशजा। यथा,—
"इक्ष्वाकुवंशजो राजा ककुत्स्थो नाम धार्म्मिकः।
भोगवत्याङ्गयायान्तु पुर्य्यां रिपुनिसूदनः॥
सर्व्वलक्षणसम्पन्नो भूपालगुणसंयुतः।
तस्य भार्य्या महाभागा भर्गदेवस्य पुत्रिका॥
सा मनोरमिनी नाम्ना पूजिता पतिवल्लभा।
तस्याः पुत्रशतं जज्ञे देवगर्भोपमद्युतम्॥
बलवीर्य्यसमायुक्तं ककुत्स्थनृपसत्तमात्।
पुत्री न विद्यते तस्यास्तदर्थं सा गृहान्तरे॥
निभृतं स्थण्डिलं कृत्वा चण्डिकां समपूजयत्।
पूज्यमाना महादेवी चण्डिका राजभार्य्यया॥
प्रसन्ना सा त्रिभिर्व्वर्षैस्तां स्वप्ने चाम्बवीदिदम्।
योगिलक्षणसंयुक्ता सार्व्वभौमस्य भाविनी॥
नक्षत्रमालया युक्ता पुत्री तव भविष्यति।
सापि स्वप्ने वरं प्राप्य मुदितामूद्वपाङ्गना॥
पार्व्वत्यपि स्वयं तस्या गर्भे काले विवेश ह।
सा मनोरमिनी देवी प्रवृत्ते ऋतुसङ्गमे॥
गर्भं दधौ महासत्त्वं चन्द्रिकेवाम्ततोयकरम्।
सम्पूर्णे तु ततः प्राप्ते तदा नक्षत्रमालिनीम्॥
सा मनोरमिनी देवी सुषुवे तनयां शुभाम्।
तां दृष्ट्वा हारसंयुक्तां प्रस्फुरद्योतस्नोपमां शुभाम्॥
ककुत्स्थो भार्य्यया सार्द्धमत्यन्तमुदितोऽभवत्।
सहजेनाथ हारेण भूषिता सा ककुत्स्थजा॥
ववृधे मन्दिरे तस्य वर्षासिव सुरापगा।
तेनैव हारचिह्नेन तस्यास्तारावतीति वै॥
नामाकरोत् पिता काले यथोक्ते नृपसत्तमः।
कालक्रमेण सा बाल्यं यतीत्य वरवर्णिनी॥
मञ्जुलं यौवनोद्भेदं प्राप श्रीरिव माधवे।
तस्यास्तु यौवनोद्भेदं दृष्ट्वा राजा सुतैः सह॥
ककुत्स्थः कारयामास समयेऽथ स्वयंवरम्।
माधवे मासि संप्राप्ते चन्द्रदृष्टौ शुभे दिने॥
स्वयंवरसभां चक्रे तारावत्याः पिता सुतैः।
वार्त्तिकान् सुबहून् राजा वहवाभिः क्रमेण वै॥
तूर्णं प्रस्थापयामास नानादेशनृपान् प्रति।
ते राजानस्तथा श्रुत्वा वार्त्तां वै वार्त्तिकाननात्॥
तूर्णमेव समाजग्मुस्तारावत्याः स्वयंवरम्।
तत् श्रुत्वा पौष्यसनयश्चतुरङ्गबलैर्यतः॥
स्वयंवरं जगामाशु देवालङ्कारमण्डितः।
एतस्मिन्नन्तरे राज्ञः कुमारी वरवर्णिनी॥
दृष्ट्वा धात्रीं निजां सम्यक् सम्पूर्णज्ञानशालिनीम्।
स्वयंवरसभां द्रष्टुं प्राहिणोत् सदृशं प्रति॥
स्वयंवरसभां गत्वा चारुरूपं सुलक्षणम्।
नृपं निरूप्य भो धात्रि! मह्यमेत्य निवेदय॥
एवं तां प्रेषयित्वाथ धात्रीं नृपतिपुत्रिका।
सा मनोरमिनी यत्र प्राराधयति चण्डिकाम्॥
तत्र प्रायान्महाभागा शुभा तारावती तदा।
तत्र गत्वा महादेवीं प्रणम्य कालिकाङ्कयाम्॥
मानुषेणाथ भावेन न ज्ञात्वात्मानमात्मना।
प्रणनाम महाभक्त्या वाक्यमेतदुवाच ह॥
प्रणमामि महामायां योगनिद्रां जगन्मयीम्।
सा मे प्रसीदतां गौरी चण्डिका भक्तवत्सला॥
यदि सत्यं जनन्या मे मदर्थे त्वं प्रपूजिता।
तेन सत्येन सुभगः पतिर्मम नृपोत्तमः॥
स्वयंवरेऽद्य भवतु प्रसीद हरवल्लभे!॥
इति तस्या वचः श्रुत्वा चण्डिका हरमोहिनी॥
मोहयन्ती नृपसुतां यथात्मानं न वेत्ति च।
अथ प्राहाशरीरिरिदं सा कृतं वचः॥
श्रीदेव्युवाच।
पौष्यस्य तनयो योऽसौ नाम्ना तु चन्द्रशेखरः।
स मनोहररूपस्ते प्रियः स्वामी भविष्यति॥
तस्मिन्कलया पूर्णे चिह्नितं नृपसत्तमम्।
वरय त्वं वरारोहे पार्व्वतीव वृषध्वजम्॥
अथाजगाम सा धात्री निरूप्य सदृशं पतिम्।
तारावत्यास्तदाचष्ट रहस्यं नृपसत्तमम्॥
दृष्ट्वा तामागतां धात्रीं प्रहृष्टा नृपतेः सुता।
पप्रच्छ निभृतं कीदृक् को वा दृष्टस्त्वया नृपः॥
सा प्राह धात्री वचनात्तव भूपा विलोकिताः।
चारुरूपाः कुलीनाश्च ज्ञाने शास्त्रे च पारगाः॥"
"नृपौ पुनर्म्महासत्त्वौ सिंहस्कन्धौ दृढ़भुजौ।
सर्व्वलक्षणसम्पन्नौ देवालङ्कारमण्डितौ॥
तयोरपि वयःख्यातः प्रशस्तश्चन्द्रशेखरः।
स एव ते पतिर्योग्यश्चिह्नेनानेन सुन्दरि॥
तं त्वं वरय राजानं तव योग्यं शुभोदयम्।
धात्र्यास्तथेति वचः श्रुत्वा राजपुत्री जगाद ताम्॥
मत्पार्श्वचारिणीं भूत्वा निदेशय नृपोत्तमम्।
तारावतीं तदा धात्र्यागात्तारावती तदा॥
धात्र्या चानुगया युक्ता चरन्त्या सदशोऽन्तरे।
सभामध्ये चिरं सा तु विलुल्ल वरवर्णिनी॥
भाविलाभियतेर्योगाच्चण्डिकायाः प्रसादतः।
तयोः समत्वादेकत्वात्तया धात्र्या विमोहिता॥
इति खेदजधर्म्माम्भःकलिकानिचितानना।
पतिं पूर्व्वतरं पुत्री राज्ञस्तारावती सती॥
स्वयं सा पार्व्वती देवी वव्रे च चन्द्रशेखरम्।
वैवाहिकेन विधिना स राजा चन्द्रशेखरः॥
तारावतीं तदा भार्य्यां ककुत्स्थनृपतेः सुताम्।
संस्कृत्य भ्रातरं श्यालं देवेभ्यो वैदिकैर्मखैः॥
प्राप्तियज्ञसंस्कारं कृत्वा तां सहचारिणीम्।
कश्मीरपुरमासाद्य प्रथयौ चन्द्रशेखरः॥"
इति कालिकापुराणे ४८ अध्यायः॥

II.77/153.

तारिका, स्त्री, (तारस्तीव्रतास्या अस्तीति। तार+"अत इनिठनौ।" ५।२।११५। इति ठन्।) तालरसः। ताड़ी इति भाषा। यथा,—
"सन्दिग्धा कालकूटश्च ताम्रकूटश्च धुस्तुरम्।
अहिफेनं खर्जुरसस्तारिका तरिता तथा॥"
इति कुलार्णवतन्त्रम्॥
(तरणमस्त्री, क्ली। यथा, मनुः। ८। ४०७।
"गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः।
ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे॥")
तारिणी स्त्री, (तारयतीति। तृ+णिच्+णिनिः ङीप् च।) बृहद्देवतामेदः। तत्पर्य्यायः। तारा २ महाश्रीः ३ ओंकारा ४ खाहा ५ श्रीः ६ मनोरमा ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ अग्निनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥*॥ द्वितीया शक्तिः। यथा,—
"अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्व्वसिद्धिदान्।
येषां विज्ञानमात्रेण जीवन्मुक्तस्तु साधकः॥
कवितां लभते शुद्धामनर्गलविजृम्भिणीम्।
पाण्डित्यं सर्व्वशास्त्रेषु धनैर्धनपतिर्भवेत्॥
राजद्वारे सभायाञ्च विवादे व्यवहारके।
सर्व्वत्र जयमाप्नोति बृहस्पतिरिवापरः॥"
इति तन्त्रसारः॥
अस्या ध्यानं तारापब्दे द्रष्टव्यम्।
("तारा चोग्रा महोग्रा च वज्रा नीला सरस्वती।
कामेश्वरी भद्रकाली बुद्धयो तारिणी स्मृता॥"
इति मन्त्रकोषः॥
त्रि, उद्धारकर्त्री। यथा, मार्कण्डेये।
"तारिणी भवसंसारसागरस्य कुलोद्भवे!॥")
तारुण्यं, क्ली, (तरुणस्य भावः। तरुण+ब्राह्मणादित्वात् ष्यञ्।) यौवनम्। इत्यमरः। २। ६। ४०॥ (यथा, मार्कण्डेये। २४। ७।
"बृहत्कोटिसमं वित्तं तारुण्यादुत्तिकोटिषु॥")
तारेयः, पुं, (तारायां बालिपत्न्यां अपत्यं पुमान्।) तारा+ढक्।) बालिपुत्रः। इति जटाधरः॥ (यथा, रामायणे। ४। २२। १२।
"अङ्गदप्रमुखान् कुमारान् विक्रम्य बलवान् रणे।
करिष्यत्येष तारेयस्तेजस्वी तरुणोऽङ्गदः॥"
बृहस्पतिपत्न्यास्तारायाः पुत्रो बुधोऽपि॥)
तार्किकः, त्रि, (तर्कं वेत्ति अधीते वा। तर्क+ठक्।) तर्कशास्त्रवेत्ता। तर्काध्ययनकर्त्ता। इति शाकरभाष्यम्॥ स षड्विधो यथा। वैशेषिकः १ औलूक्यः २ वार्हस्पत्यः ३ नास्तिकः ४ लौकायतिकः ५ चार्व्वाकः ६। इति हेमचन्द्रः॥ (यथा, अप्पयदीक्षित-वैराग्यशतके। ६१।
"कापो मैत्रावरुणेः ग्रापो वा तार्किकस्य सुनेः।
संसर्ग्यते यदि सकृच्छ्मश्रोरपि मास्तु शुक्र-
पदम्॥")
तार्क्षः, पुं, (तृक्ष एव। स्वार्थे अण्।) कश्यपः। यथा, श्रीभागवते।
"प्रमथ्य तरसा राज्ञः शालादीश्चैद्यपक्षगान्।
पश्यतां सर्व्वलोकानां तार्क्ष्यपुत्रः सुधामिव॥"
(विनतायां जातः कश्यपपुत्रविशेषः। यथा, महाभारते। १। १२३। ७०।
"तार्क्ष्यश्चारिष्टनेमिश्च गरुड़श्चामितध्वजः।
अरुणश्चारुणिश्चैव वैनतेया व्यवस्थिताः॥")
तार्क्षी, स्त्री, (तार्क्ष+गौरादित्वात् ङीष्।) पातालगरुड़लता। इति राजनिर्घण्टः॥
तार्क्ष्यं, क्ली, रसाञ्जनम्। इति मेदिनी। ये, २७॥ (यथास्य पर्य्यायाः वैद्यकरत्नमालायाम्।
"तार्क्ष्यं शैलं नीलवर्णमञ्जनञ्च रसाञ्जनम्॥")
तार्क्ष्यः, पुं, (तार्क्षस्य कश्यपस्य अपत्यम्। तार्क्ष+"गर्गादिभ्यो यञ्।" ४। १। १०५। इति यञ्।) अश्वः। सर्पः। गरुड़ाग्रजः। गरुड़ः। इति मेदिनी। रे, २७॥ (यथा, रघुः। १।४६।
"अस्त्रेण तार्क्ष्यात् किल कालियेन
मणिं विसृष्टं यमुनौकसा यः॥"
तथाच ऋग्वेदे। १। ८६। ६।
"स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिः
स्वस्तिनो बृहस्पतिर्दधातु॥"
"बृहस्पत्य पुत्रो गरुत्मान् नोऽस्माकं स्वस्ति अविनाशं विदधातु।" इति तद्भाष्ये सायणः॥
"तार्क्ष्यो रथो गरुड़ो वा नः स्वस्ति दधातु॥"
इति वाजसनेयसंहिताभाष्ये महीधरः। २५। १६॥ बृहस्पतेर्गोत्रापत्यम्। यथा, महाभारते। ३। १८४। ८।
"जग्मुश्चारिष्टनेम्नोऽथ तार्क्ष्यस्याश्रममञ्जसा॥"
तथाच तत्रैव। १२। २८८। ४।
"एवमुक्तस्तदा तार्क्ष्यः सर्व्वशास्त्रविदां वरः।
विबुध्य सम्पदश्चाद्यां तद्वाक्यमिदमब्रवीत्॥")
शालवृक्षः। स्वर्गम्। इति शब्दरत्नावली॥ अश्वकर्णवृक्षः। स्यन्दनम्। इति हेमचन्द्रः। ४। २६८॥ (क्षत्रियविशेषः। यथा, महाभारते। २। ५१। १५। [सह॥"
"अम्बष्ठाः कौकुरास्तार्क्ष्या वस्त्रपाः पह्नवैः सहादेवः। यथा, महाभारते। १३। १७। ६०।
"गन्धर्व्वा ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुधारदः॥"
पर्व्वतविशेषः। इति कश्चित्॥)
तार्क्ष्यजं, क्ली, (तार्क्ष्यः सुवर्णं तद्वत् जायते। यद्वा, तार्क्ष्ये पर्व्वते जायते इति। जन+डः।) रसाञ्जनम्। इति भावप्रकाशः॥
तार्क्ष्यध्वजः, पुं, (तार्क्ष्यो गरुड़ः ध्वजे यस्य।) विष्णुः। इति हेमचन्द्रः। २। १२८॥
तार्क्ष्यनायकः, पुं, (तार्क्ष्याणां सर्पाणां नायकः प्रापकः। खमातुर्दासत्वकाले विमोक्षपुत्रसर्पाणां वहनात् तथात्वम्।) गरुड़ः। इति राजनिर्घण्टः॥ (तार्क्ष्यनायकः। इति कश्चित्॥)
तार्क्ष्यप्रसवः, पुं, (तार्क्ष्यः पर्व्वतः प्रसवोऽस्य।) अश्वकर्णवृक्षः। इति राजनिर्घण्टः॥
तार्क्ष्यशैलं, क्ली, (तार्क्ष्यशैले भवम्। अण्।) रसाञ्जनम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये।
"सिन्धूद्भूतं शक्रमर्द्दस्य बीज-
मिक्षूद्भूतं केशवं तार्क्ष्यशैलम्॥")
तार्क्ष्यी, स्त्री, (तार्क्ष्यस्य पक्षिणः स्त्रियां। अण् ङीप् च।) वनलताविशेषः। इति शब्दरत्नावली॥
तालं, क्ली, (तलत्यनेनेति। तल प्रतिष्ठायाम्+"हलश्च।" ३। ३। १२२। इति घञ्।) हरितालम्। (अस्य नामानि यथा,—
"हरितालं तालमालं मालं शैलेयभूषणम्।
पिञ्जकं रोमहरणं तालकं पातमित्यपि॥"
इति वैद्यकरत्नसारसंग्रहे जारणमारणाधिकारे॥)
तालीशपत्रम् इति राजनिर्घण्टः॥ दुर्गासिंहासनम्। इति हेमचन्द्रः। ४। २०२॥ (तालस्य विकारः। "तालादिभ्योऽण्।" ४। ३। १५२। इत्यस्य तालाद्गुणे इति वार्त्तिकोक्त्या अण्। धनुः। इति सिद्धान्तकौमुदी॥ तालस्येदम्। अण् तस्य लुक्।) तालपत्रम्॥ (यथा, महाभारते। ३। १०१। ५।
"शिरोभिः प्रपतद्भिश्चाप्यन्तरीक्षात् महीतलम्।
तालैरिव महाराज! वृन्ताद्भ्रष्टैरदृश्यत॥")
तालः, पुं, (तलत्यत्र। तल+"हलश्च।" ३। ३। १२२। इति घञ्।) वृक्षविशेषः। तत्पर्य्यायः। तालद्रुमः २ पत्री ३ दीर्घस्कन्धः ४ ध्वजद्रुमः ५ वृक्षराजः ६ मधुरसः ७ महाद्रुः ८ दीर्घपादपः ९ चिरायुः १० तरुराजः ११ दीर्घपत्रः १२ गुच्छपत्रः १३ आसवद्रुः १४। इति राजनिर्घण्टः॥ लेखपत्रः १५ महोन्नतः १६। इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। शीतलम्। पित्तदाहश्रमापहत्वञ्च॥*॥ अस्य रसगुणः। कफपित्तदाहशोषनाशित्वम्। मदकारित्वञ्च॥*॥ तत्फलगुणाः। शीतलत्वम्। बल्यत्वम्। स्निग्धत्वम्। स्वादुरत्वम्। गुरुत्वम्। विष्टम्भित्वम्। वातपित्तास्रवतदाहक्षयनाशित्वञ्च। इति राजनिर्घण्टः॥ पित्तरक्तश्लेष्मविवर्द्धनत्वम्। दुर्ज्जरत्वम्। बहुमूत्रत्वम्। तन्द्राभिष्यन्दिशुक्रदाढ्यत्वञ्च। इति भावप्रकाशः॥ वातश्रमिक्कृशरक्तपित्तनाशित्वम्। हृद्यत्वम्। तृष्यत्वम्। स्वादुत्वञ्च। इति राजवल्लभः॥*॥ तद्बीजस्य अर्थात् तालशस्यस्य गुणाः। मूत्रकरत्वम्। मिष्टत्वम्। वातपित्तहरत्वम्। गुरुत्वञ्च॥*॥ तदस्थिमज्जगुणाः। मधुरत्वम्। मूत्रलत्वम्। शीतलत्वम्। गुरुत्वञ्च॥*॥ तालाम्बुगुणाः। पित्तनाशित्वम्। शुक्रस्तन्यवृद्धिकारित्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥ तालजतरुणतोयगुणः। अतिश्रमयमदकारित्वम्। तदेवान्नीभूतं पित्तवातदोषघ्नत्। इति भावप्रकाशः॥ कफघ्नमिष्टरत्वम्। रुच्यत्वम्। वातघ्नत्वम्। दुर्ज्जरत्वञ्च। इति राजवल्लभः॥*॥ तालप्रलम्बगुणः। रूक्षत्वम्। कृमिरोगनाशित्वञ्च। इति राजनिर्घण्टः॥*॥ तालतरुणमज्जगुणाः। किञ्चिन्मदकरत्वम्। लघुत्वम्।

श्लेष्मकारित्वम्। वातपित्तनाशित्वम्। सक्षेहत्वम्। मधुरत्वम्। सारकत्वञ्च। इति भावप्रकाश:॥ * ॥ तालशिरोगुणा:। स्वादुत्वम्। तिक्तत्वम्। कषायत्वम्। मूत्रातङ्करोगनाशित्वम्। बलप्राणशुक्रवृद्धिकारित्वञ्च। इति। राजवल्लभ:॥ * ॥

गीतकालक्रियामानम्। अयं स्वर इयत् कालं गेय:। इयत् कालं विलम्बितं इयत् कालं द्रुतं इयत् कालं मध्यमिति बोधयितुं इडापिङ्गलैरङ्गुल्याक्षुण्ण प्रसारणादिक्रियाभिर्नर्त्तितव्यं गातव्यचेति कालक्रिययो: प्रमाणं ताल:॥ साङ्गे इदमियद् कालं गेयमिति कालेनाङ्गुल्याद्याक्षुण्णादिक्रियामानं ताल इति॥ कालस्य एकद्वित्रिमात्राद्युच्चारणनियमितस्य क्रियाया: परिच्छन्दात्मिकाया: परिच्छेदहेतुस्ताल इति मधु:॥ कालेन नर्त्तनगलवादनक्रियाणां मानं ताल:। तारादेककालमेषां विरामस्ताल इत्यग्ने। इत्यमरटीकायां भरत:॥ * ॥ तस्योत्पत्तिर्यथा। गौरीहरयोर्नृत्तेन तालो बभूव। तस्य कारणम्। क्रियाकालश्च। हरनृत्तस्य ताण्डवं गौर्या नृत्तस्य लास्यं इति संज्ञा अर्थात् पुरुषनृत्तस्य ताण्डवं नार्या नृत्तस्य लास्यमिति नाम। ताण्डवस्याद्याक्षरेण लास्यस्याद्याक्षरेण च मिलित्वा ताल इति संज्ञा जाता। इति सङ्गीतशास्त्रम्॥ * ॥ तस्य भेदा यथा,—

"चचत्पुट१ चाचपुट:२ षट्पितापुत्रकस्तथा३। उद्घट्टक:४ सन्निपात:५ कङ्कण:६ कोकिलारव:७॥ राजकोलाहलो८ रङ्गविद्याधर९ श्चचीप्रियौ१०। पार्व्वतीलोचनो ११ राजचूड़ामणि १२ जयश्रियौ १३॥ वादकाकुल१४ कन्दर्प१५ मलकूवर१६दर्पणा:१७। रतिलीलो १८ मोचपति:१९ श्रीरङ्ग: २० सिंहविक्रम: २१॥ दीपको २२ मल्लिकामोदो २३ गजलीलश्च २४ चर्च्चरी २५। कुहको २६ विजयानन्दो २७ वीरविक्रम २८ टेङ्किके २९॥ रङ्गाभरण ३० श्रीकीर्त्ति ३१ वनमालि ३२ चतुर्म्मुखा:३३। सिंहनन्दन ३४ नन्दीश्व ३५ चन्द्रबिम्ब ३६ द्वितीयका: ३७॥ जयमङ्गल ३८ गन्धर्व्व ३९ मकरन्द ४० विभङ्गय: ४१। रतितालो ४२ वसन्तश्च ४३ जगझम्पो ४४ अथ गरुड़ि: ४५॥ कविप्रेखर ४६ घोषौ च ४७ हरवल्लभ ४८ भैरवौ ४९। गतप्रत्यागतो ५० मल्लतालो ५१ भैरवमस्तक:५२॥ सरस्वतीकण्ठाभरण: ५३ क्रीड़ा ५४ नि:सारुरेव च ५५। सुक्तावली ५६ रङ्गराज ५७ भरतानन्दा ५८ दितालका: ५९॥

सम्यक्केटाक ६० इत्यादि ताला भरतसंमता:। संक्षेपतो निगदिता अर्थेषां लक्षणं यथा॥*॥

अर्द्धमात्रं द्रुतं ज्ञेयमेकमात्रं लघु स्मृतम्। द्विमात्रन्तु गुरु ज्ञेयं त्रिमात्रन्तु प्लुतं मतम्॥ ताले चचत्पुटे ज्ञेयं गुरुद्वन्द्वं लघु: प्लुत: १। गुरुर्लघु: प्लुतश्चैव भवेच्चाचपुटाभिधे॥ २॥ गलगालगलाश्चैव षट्पितापुत्रके मता: ३। उद्घट्टके तु गमना: ४ सन्निपाते गुरुर्म्मत:॥५॥ चतुर्व्विध: परिज्ञेयस्ताल: कङ्कणनामक: ६। पूर्ण: खण्ड: समश्चैव विषमश्चैव कथ्यते॥ लघुचतुष्कं गलौ पूर्णे खण्डे विन्दुद्वयं गुरु:। यगणस्तु समे ज्ञेयस्तगणो विषमे भवेत्॥ खण्डचतुष्कं सयत्यन्तं गुरुर्बिन्दुचतुष्टयम्। सयत्यन्तं लघुश्चैव तालोऽयं कोकिलारव:॥७॥ लघुचतुष्कं सयत्यन्तं खण्डयं खण्डयं लघु:। लघुर्बिन्दुद्वयञ्चेति राजकोलाहलाभिधे॥८॥ खण्डयं द्वौ प्लुतौ यत्र रङ्गविद्याधर: स तु ९। लघूनि त्रीणि यत्र स्युर्गुरूणि त्रीणि यत्र वै॥ प्लुतद्वयञ्च यत्रास्ति स ताल: स्याच्चचीप्रिय:॥१०॥ खण्डयं गुरवौ बिन्दुर्गौ प्लुतौ गौ प्लुतौ पुन:। यत्र ताल: स विज्ञेय: पार्व्वतीलोचनाभिध:॥११॥ राजचूड़ामणौ बिन्दुर्लघ्च बिन्दुर्लगौ मतौ॥ १२॥ रगणो नो गुरुश्चैव जयश्रीरिति कथ्यते॥ १३॥ प्लुतौ लघुचतुष्कञ्च मौ नौ द्वितयुगं लघु:। लघुचतुष्कं विना ग्रन्थं ताल: स्याद्वादकाकुल:॥१४॥ द्वितयं यकारश्च कन्दर्पेपि प्रकीर्त्तित:॥ १५॥ चत्वारो गुरवो यत्र चत्वार: प्लुतका अपि। लघ्वक्षराणि चत्वारि तालोऽयं मलकूवर:॥१६॥ बिन्दुद्वयं गुरुश्चैव भवेद्यत्र स दर्पण:॥ १७॥ रतिलीले विधातव्यं लघुद्वन्द्वं गुरुद्वयम्॥१८॥ आदौ षोड़शगुरवो द्वात्रिंशल्लघवस्तत:। चतु:षष्टिर्द्रुता यत्र सोऽयं मोचपतिर्मत:॥१९॥ श्रीरङ्गसंज्ञके ताले मगणाल्लघुप्लुतौ मतौ॥ २०॥ सिंहविक्रमताले तु मगणो नखगा: खगौ॥२१॥ प्लुतो लघु: प्लुतश्चैव ताले दीपकनामनि॥ २२॥ ताले स्याल्लिकामोदे लघ्वयं खण्डचतुष्टयम्॥२३॥ लघुचतुष्कं विरामान्तं गजलीले प्रकीर्त्तितम्॥२४॥ अष्टलघुस्तु चर्च्चर्य्यां विरामान्ते द्रुतौ लघु:॥२५॥ द्रुतद्वन्द्वं भवेत्ताले कुहकाख्ये लघुद्वयम्॥२६॥ भवेद्युर्विजयानन्दे लघ्वश्च लघुत्रयम्॥ २७॥ वीरविक्रमताले तु द्रुतौ लगौ तत: प्लुत:॥ २८॥ टेङ्किका रगणेन स्यादेकेनैव लताद्यदे॥ २९॥ भगणो गप्लुतौ स्यातां रङ्गाभरणनामके॥ ३०॥ श्रीकीर्त्तिसंज्ञके ताले गुरुद्वन्द्वं लघुद्वयम्॥३१॥ चतुर्द्रुता लघू द्वौ तु द्रुतौ गो वनमालिनि॥ ३२॥ चतुर्म्मुखाभिधे ताले यगणानन्तरं प्लुत:॥ ३३॥ भगण: प्लुतो लगौ बिन्दुद्वयं गौ न: प्लुतस्तथा। लघु: प्लुतो द्रुतश्चैको लघुद्वयमथापि च॥ नि:ग्रन्थं लघुतश्चैव ताले स्यात् सिंहनन्दने॥३४॥ गो लघुर्गौ लघु: प्लुतस्ताले नन्दीश्वरे मता:॥३५॥ गो द्रुतौ नौ प्लुतद्वन्द्वं चन्द्रबिम्बे प्रकीर्त्तितम्॥३६॥ द्रुतद्वन्द्व लघुश्चैवास्ताले स्याण् द्वितीयके॥३७॥

सकारश्च यकारश्च जयमङ्गलनामनि॥ ३८॥ चत्वारो गुरवो बिन्दुश्चत्वारश्च प्लुता अपि। बिन्दवो दशघट् लाश्च ताले गन्धर्व्वसंज्ञके॥३९॥ मकरन्दे द्रुतद्वन्द्वं लघुद्वन्द्वमथो गुरु:॥ ४०॥ गुरुर्लघु: प्लुतश्चैव त्रिभङ्गि: परिकीर्त्तित:॥४१॥ अत्र रतितालस्य लक्षणं पतितम्॥ ४२॥ वसन्ततालें कर्त्तव्यो नगणो मगणस्तथा॥ ४३॥ जगझम्पे गुरुश्चैको विरामान्तश्च खण्डयम्॥४४॥ गप्लुतौ लौ द्रुतौ लश्च प्लुतो गारुणि। ४५। शेखरे॥ ४६॥ प्लुत: शून्ये नगौ लश्च खण्डयञ्च ततो लघु:॥ खचतुष्कं विना ग्रन्थं यत्र घोष: स उच्यते॥४७॥ हरवल्लभताले च प्लुतो लो गौ च खण्डम्॥४८॥ भगण: प्लुतौ नगौ गयौ प्लुतो लघुश्च भैरवे॥४९॥ गतप्रत्यागते ताले लो मौ गौ नौ प्रकीर्त्तितौ॥५०॥ चतुर्लघुर्मल्लताले विरामान्तं द्रुतद्वयम्। लगौ गौ नो नगौ गश्च खण्डयं लण्डयं पुन:॥५१॥ नचतुष्कं विना ग्रन्थं ताले भैरवमस्तके। ५२। सरस्वतीकण्ठाभरणे गौ लघुश्च द्रुतद्वयम्॥५३॥ एक एव प्लुतो यत्र क्रीड़ाताल: स उच्यते॥५४॥ द्रुतद्वयं विरामान्तं ताले नि:सारुके मतम्॥५५॥ खण्डयं सविरामान्तं गौ पुन: खण्डयन्तथा॥ प्लुतौ ग: खयुगं गश्च यत्र सुक्तावली तु सा॥५६॥ लगौ बिन्दुयुगं गौ लो रङ्गराजे प्रकीर्त्तित:॥५७॥ खण्डयं सविरामान्तं गुरु: प्लुतद्वयं लघु:॥ यत्र ताले स विज्ञेयो भरतानन्दसंज्ञक:॥ ५८॥ आदिताले लगुश्चैक इत्याह भरतो मुनि:॥५९॥ मगणश्च प्लुतान्त: संपक्केटाकताले॥ ६०॥ एकाधिकशते ताले षष्टिर्म्मुखतमा इमे॥"*॥

अथ प्रस्तार:।

"गुरु: प्लुताधोभागे तु गुर्व्वधोभागतो लघु:। द्रुतं लघोरधोभागे तुल्या तु षड़ङ्किका॥ उद्दिष्टा च कला पश्चादित्थं प्रस्तारक्रम:। सर्व्वप्लुतात् समारभ्य यावन्निर्व्विप्लुतात्॥ तावत् प्रस्तारयेदन्तं यावत् सर्व्वद्रुतं भवेत्॥"

अत्र तालप्रस्तारे पिङ्गलवन्नष्टोद्दिष्टभेदपताकादय: सन्ति बाहुल्यभयान्नोक्ता:॥ * ॥

अथ प्लुतादिमात्रामेदेन तालघातनम्।

"ताले निष्टातहस्त: प्लुतमथ घटयेद्घातमेकं सगुह्यं
ततपश्चात् द्वौ च घातौ निगदविरहितौ दर्शयेदूर्द्ध्वतोऽध:।
शून्यत्वात् पक्षतालाविति जगति पुन: सूचयिद्वौ सनन्दा-
वित्थं घातत्रयं तत् त्रिकलतगुणहिर्व्वर्द्धयेद्वर्णभेदम्॥
एको घात: सगुह्यो द्विकल इह गुरौ ग्रन्थहीनस्तथाऽन्य:
षोऽपूर्व्वं याति लीलावलयवलयितोत्तानहस्ताङ्गुलीभि:।
किञ्चोद्भेदैकमात्रा यमुदधिमि लघौ घात एको निगारी

घात्यो मात्रार्द्धभागि हतवपुषि लघोरर्द्धनादेन घातः ॥
इति तालघातनप्रकारः ॥ * ॥
श्रीरङ्गो मणिबन्धकङ्कणवहो सुक्तावलीमण्डनः
क्रीड़ाहेतुवसन्तरक्तहृदयो गन्धर्वलीलारतः ।
साचान्मोचपतिश्चतुर्मुखनतो यो राजचूड़ामणिः
सोऽयं तालमयस्त्रयोदुलघवत् संसारवन्यं हरिः ॥
अपि च ।
नन्दीशोऽर्द्धतनुर्मुखेन वलतस्तच्चन्द्रबिम्बोदयः
कन्दर्पो नलकूवरश्च तुलितौ यस्यातिरूपे तुले ।
कण्ठान्तः किल कोकिलारवभवो बाहौ जयश्रीरहो
तालात्मा सुरचिच्छिनत्तु सगुणः संसारपाशावलीम् ॥
ख्यातो यः कविचक्रवर्त्तिपदवीं विद्याचनैरर्चितः
सौभद्रेयमिमं यमञ्जुनयशाः सोऽनीजनत् श्रीधरः ।
तस्य श्रीलगुभङ्करस्य भणितौ सङ्गीतदामोदरे
तालाद्यः स्रवकोद्युतस्तवलतौ यातस्तृतीयः पटुः ॥"*॥

अन्यच्च ।
"आदावष्टसथा रुद्रो ब्रह्म रुद्रश्चतुर्द्दशः ।
दशावतारवन्यादि गुरुनाटां ततः परम् ॥
अथाष्टतालभेदाः । आड़ः १ दोणः २ ज्योतिः ३ चन्द्रशेखरः ४ गञ्जनम् ५ पञ्चतालः ६ रूपकम् ७ समतालः ८ ॥ अथ रुद्रतालस्य भेदाः । वीरविक्रमः १ विषमसमुद्रः २ धरणम् ३ वीरदर्पकः ४ मल्लूकः ५ कन्दर्पः ६ डाँशपाड़िड़ः ७ ध्रुवचरणम् ८ दर्पकोषी ९ गणेन्द्रगुरुः १० छुटका ११ । अथ ब्रह्मतालभेदाः । ब्रह्म १ विराम-ब्रह्म २ षट्कला ३ सप्तमात्रा ४ ॥ अथेन्द्रतालभेदाः । देवसारः १ देवचाली २ मदनदोला ३ गुरुगन्धर्व ४ पञ्चाली ५ इन्द्रभाः ६ ॥ अथ चतुर्दशतालभेदाः । चिह्नतालः १ चन्द्रमात्रा २ वेगमात्रा ३ अर्द्धज्योतिक ४ स्वर्णसारः ५ चमाष्टः ६ धराधरा ७ वसन्तवाक् ८ काकबला ९ वीरगन्धा १० तालवती ११ हर्षधारिका १२ भावा १३ अर्द्धमात्रा १४ ॥
तेषां लक्षणानि यथा,—
एकतालस्तथा शून्यं युगलं तालिका परे ।
सङ्गीतः प्रथमः सारः आड़तालः प्रकीर्त्तितः १ ॥
एकतालश्च शून्यश्च क्रमेणापि त्रिधा भवेत् ।
श्रेयशून्यं कलाभेदे दोणाख्यश्च भवेत् पृथक् २ ॥
प्रथमं युगलं तालं एक एकस्तथापरे ।
कलाभेदे गानभेदं ज्योतिश्च परिकीर्त्तितम् ३ ॥
चन्द्रश्चन्द्रस्तथा युग्मं तथा चन्द्रस्तथापरे ।
षट् ताला निभवन्त्येवं चन्द्रशेखरभाषितः ४ ॥
एकतालो भवेच्छ्रेष्ठः क्रमेणापि चतुष्टयम् ।
श्रेयशून्यं गञ्जनश्च सर्व्वतो मुनिभाषितम् ५ ॥
प्रथमं युगलश्चैव ततपरं तालमेककम् ।
श्रेये युग्मं तथा शून्यं पञ्चतालं प्रकीर्त्तितम् ६ ॥
युगलं प्रथमं तालं ततपरश्चैकशून्यकम् ।
श्रेये च युगलं तालं रूपकं परिकीर्त्तितम् ७ ॥
एकतालं तथा शून्यं क्रमेण द्विविधं भवेत् ।
श्रेये युगलतालश्च समतालं भवेत् परम् ८ ॥
एकतालं तथा शून्यं क्रमेण त्रिविधं भवेत् ।
ततपरं युगलं तालमित्येवं वीरविक्रमः १ ॥
युग्मतालं तथा शून्यं ततपरं द्वयतालकम् ।
श्रेये च युगलं तालं समुद्रविषमं स्मृतम् २ ॥
युग्मतालश्च शून्यश्च एकतालश्च ततपरे ।
श्रेयैकत्र त्रिशून्यश्च विषमं धरणं भवेत् ३ ॥
एकतालं तथा शून्यं क्रमेणापि त्रिधा भवेत् ।
युगलं युगलं पश्चात् स वीरदर्पकः स्मृतः ४ ॥
प्रथमं एकतालश्च ततपरं शून्यमेककम् ।
श्रेयैकत्र त्रितालश्च मल्लूकस्य गतिर्यथा ५ ॥
समतालं यथा दृष्टं तथा कन्दर्पसंज्ञितम् ।
समतालो भवेत् शून्यं कन्दर्पे नास्ति तत् पुनः ६ ॥
पञ्चतालात् परं शून्यं डाँशपाड़िड़मुत्तमम् ।
अर्द्धतालश्च भवेत् चत्वं संग्रामस्य यथा गतिः ७ ॥
एकतालं तथा शून्यं क्रमेणापि द्विधा भवेत् ।
श्रेयैकत्र त्रितालश्च ध्रुवचरणभाषितम् ८ ॥
एकतालमेकशून्यमित्येवञ्च भवेत् क्रमात् ।
विरामं एकतालश्च वाग्भेदे दर्पकोषिका ९ ॥
युगलं युगलं पश्चात् तदन्तेऽप्येकतालकम् ।
श्रेये च युग्मशून्यश्च गणेन्द्रगुरुभाषितम् १० ॥
युग्मशून्यं विरामे च एकतालं भवेत् क्रमे ।
छुटकाख्यानकं धीर सङ्गीतपरिनिष्ठितम् ११ ॥
युग्मश्च चत्वं प्रथमैकतालं
किञ्चिद्विरामे पुनरेकतालम् ।
ब्रह्मस्य तालश्च सङ्गीतमध्ये
यथा कपोती हि करोति शब्दम् १ ॥
युग्मतालं भवेच्चत्वं एकतालश्च ततपरे ।
श्रेये द्वितीयशून्ये च विरामब्रह्मतालकम् २ ॥
प्रथमश्चैकतालश्च युग्मशून्यं तथा परे ।
श्रेयैकत्र त्रितालेति षट्कला खलु कथ्यते ३ ॥
आदौ युग्मं तथा युग्मं त्रितालश्च तथा परे ।
सप्तमात्रा भवत्येवा ब्रह्मतालान्तरे शुभे ४ ॥
सविरामं त्रितालश्च एकं शून्यन्तथापरे ।
श्रेये चत्वं त्रितालश्च देवसार इतीर्य्यते १ ॥
द्वितयशून्यं विरामे भवति ततश्च तितालानि ।
श्रेयैश्च द्विशून्यमित्येवं देवचाली २ ॥
प्रथममेव युग्मतालं ततपश्चादेकशून्यं विरामे ।
श्रेये त्रितयतालं भवतीति मदनदोला ३ ॥
युग्मतालं समारभ्य पञ्चतालं भवेत्तथा ।
अर्द्धतालश्च तथा चत्वं गुरुगन्धर्व ईरितः ४ ॥
आदावस्य यथा धारास्तथा तालो भवेद्ध्रुवः ।
पञ्चतालान्तरालीति पञ्चालीति प्रकीर्त्तिता ५ ॥
सविरामं चतुस्तालं त्रितालं शून्यमन्ततः ।
मेघारम्भे यथा केका रूयन्ते इन्द्रभाविताः ६ ॥
एकतालश्च शून्यश्च क्रमेण त्रितयं ततः ।
श्रेये चतुष्टयं चत्वं चिह्नताल इतीर्य्यते १ ॥
एकचन्द्रस्तथा युग्मं तालं प्रत्येकतद्वयम् ।
श्रेये त्रीणि च शून्यानि चन्द्रमात्रा भवेत् परा २ ॥
प्रथमं षट्कतालश्च अर्द्धतालं भवेत् क्रमे ।
श्रेये युग्मं तथा शून्यं देवमात्रा च सोच्यते ३ ॥
चन्द्रशून्यं त्रितालश्च विरामेण क्रमेण तु ।
अर्द्धतालं तु भवत्येवं अर्द्धज्योतिरिति स्थितिः ४ ॥
एकैकतालान्तरयुग्मतालात्
शून्यत्रयं ततपरमेकतालम् ।
कलाभिदा शून्यभिदा समाख्या
स स्वर्णसाराख्यनवीनतालः ५ ॥
युग्मशून्यं विरामेण देवतालमिति क्रमात् ।
चमाद्याख्योऽन्तरे शून्यं इति सर्व्वत्र भाषितम् ६ ॥
नवाम्बुदे दामिनि श्रीघ्रयानं
तथा सुसम्बद्धसुतालभागम् ।
युग्मं सचत्वं क्रमतश्च तालं
श्रेये त्रितालश्च धराधराख्या ७ ॥
एकतालश्च शून्यश्च क्रमेणापि चतुष्टयम् ।
क्रमात्तालत्रयश्चैव वसन्तवागुदाहृतः ८ ॥
सविरामं द्वयं तालं युग्मतालं तथा परे ।
श्रेयैकत्र त्रितालश्च काकबलेति सा ९ ॥
त्रितालश्च भवेच्चत्वं ततपरं त्वेकतालकम् ।
श्रेयोऽपि च त्रितालश्चेत् वीरगन्धा प्रचक्षते १० ॥
युग्मं युग्मं तथा युग्मं तालत्वेकं भवेत् क्रमात् ।
श्रेयशून्यं कलाभेदे तालवतीति भवेत् पृथक् ११ ॥
सविरामं द्वयं तालं युग्मशून्यश्च ततपरम् ।
श्रेयोऽर्द्धन्तु त्रितालश्च हर्षधारा प्रकीर्त्तिता १२ ॥
चन्द्रशून्यं विरामेण द्वयं तालं भवेत् क्रमात् ।
अर्द्धतालं भवेच्चत्वं भावाख्यं तालमुत्तमम् १३ ॥
अर्द्धतालं तु त्रितालश्च द्वयं तालं विरामकम् ।
इत्यर्द्धमात्रा विज्ञेया सङ्गीतसुवि सर्व्वतः ॥"
इति सङ्गीतदामोदरः ॥
दशावतारप्रबन्धलक्षणं प्रबन्धशब्दे नित्यनाथप्रबन्धवाद्यलक्षणं वाद्यशब्दे द्रष्टव्यम् ॥ * ॥
करतलम् । अङ्गुलमध्यभाग्यां सम्मितम् । करास्फालः । (यथा, मेघदूते । ७६ ।
"तालैः सिद्धिलयसुभगैर्नर्त्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः ।")
कांस्यनिर्म्मितवाद्यभाण्डम् । त्रिषुरः । इति मेदिनी । ले, २४ । (महादेवः । यथा, महाभारते । १३ । १७ । १२८ ।
"तलत्राणः करस्त्राणी ऊर्द्धसंहननो महान् ।")
तालकं, क्ली, (तालमेव । ताल + स्वार्थे कन् ।) हरितालम् । इति राजनिर्घण्टः ॥ (अथ तालकस्याशुद्धस्य दोषमाह ।
"अशुद्धं तालमादत्ते तुत्थफल्गुसमेदलम् ।
तापस्फोटाङ्गसङ्कोचं कुरुते तेन शोधयेत् ॥
अथ तालकस्य शोधनविधिः ।
तालकं कथयः क्षुत्वा तच्चूर्णं कारिके पचेत् ।
दोलायन्त्रेण यामैकं ततः क्षाराम्बुनैर्द्रवैः ॥
तिलतैले पचेद्यामं यामञ्च चिक्कणाजले ।
एवं यत्रे चतुर्थांमं पक्वं शुध्यति तालकम् ॥
अथ तालकस्य मारणविधिः ।
सदृशं तालकं शुद्धं पौगनैवरसेन तु ।
खल्वे विमर्द्दयेदेवं दिनं पञ्चाद्विशोधयेत् ॥
ततः पुनर्नवाचारैः श्लक्ष्णचामर्द्दं प्रपूरयेत् ।

तत्र तन्नोलकं धृत्वा पुनस्तेनैव पूरयेत् ।
आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे ।
शालीं शुक्लां समारोप्य क्रमाद्वह्निं विवर्द्धयेत् ॥
दिनान्यन्तरशून्यानि पञ्चवह्निं प्रदापयेत् ।
एवं तन्म्रियते तालं मात्रा तुल्यैकरक्तिका ॥
अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत् ॥"
अन्यच्च ।
"तालकं हरते रोगान् कुष्ठन्वयुज्वरापहम् ।
शोधितं कुरुते कान्तिं वीर्य्यबुद्धिं तथायुषम् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥
अन्यान्यविधं हरितालमारणम् । यथा, वैद्यक-रसेन्द्रसारसंग्रहे जारणमारणाधिकारे ।
"तालकं कणशः कृत्वा सुस्थं कुक्किकान्तरे ।
चूर्णोदकेन संपिष्टमपामार्गजटोद्भवैः ॥
चारोदकेन संपिष्टमर्द्धाहो यावशूकजम् ।
चूर्णं दत्त्वा निरुध्याथ कुम्भाद्धेन प्रपूरयेत् ॥
पुनर्मुखं निरुध्याथ चतुर्यामं क्रमाग्निना ।
पचेदेवं हि तच्चूर्णं कुष्ठादौ परियोजयेत् ॥"
मतान्तरम् ।
"अम्ललोणजलैर्भाव्यं तालं द्वादशयामकम् ।
तथैव विम्बनीरेण ततश्चूर्णोदकेन च ।
प्रत्येकं प्रत्यहं त्रीणि त्रीणि शुष्कं प्रमर्दयेत् ।
विधाय कवचीयन्त्रं वालुकाभिः प्रपूरयेत् ।
द्वादशप्रहरं पक्त्वा खाङ्गशीतञ्च चूर्णयेत् ।
खादयेन्नित्यकालेषु कुष्ठशीपदशान्तये ॥"
इति हरितालमारणम् ॥)
(तालमिव कायतीति । के + कः ।) द्वारयन्त्रम् । इति हेमचन्द्रः । ४ । ७१ ॥ ताला इति भाषा ॥ तुवरिका । इति शब्दरत्नावली ॥
तालकाभः, पुं, (तालकस्य हरितालस्य आभा इव आभा यस्य ।) हरितवर्णः । इति हेमचन्द्रः । ६ । ३१ ॥ तद्वति, त्रि ॥
तालकी, स्त्री, (तालकस्य तालवृक्षस्य इयम् । तालक + अण् + ङीष् ।) तालसुरा । इति त्रिकाण्डशेषः ॥ ताड़ी इति भाषा ॥
तालक्षीरकं, क्ली, (तालजातं क्षीरमिव । ततः इवार्थे स्वार्थे वा कन् ।) तालसम्भूतताक्षीरम् । इति राजनिर्घण्टः ॥
तालध्वजः, पुं, (ताली ध्वजो यस्य ।) बलदेवः । इति हलायुधः ॥ (यथा, महाभारते । ६ । ५४ । १० ।
"नातिदूरं ततो गत्वा नगं तालध्वजो बली ।
पुण्यं तीर्थवरं दृष्ट्वा विसायं परमं गतः ॥"
पर्व्वतविशेषः । यथा, शत्रुञ्जयमाहात्म्ये । १३५२ ।
"शत्रुञ्जयो रैवतश्च सिद्धिक्षेत्रं सुतीर्थराट् ।
टङ्कः कपर्दी सौवित्यस्तालध्वजकदम्बकौ ॥")
तालध्वजा, स्त्री, (तालस्तालवृक्षो ध्वजश्चिह्नं यस्याः ।) पुरीविशेषः । यथा, क्रियायोगसारे ।
"अस्ति तालध्वजा नाम नगरी त्रिदिवोपमा ॥"
तालनवमी, स्त्री, (तालोपहारा नवमी । शाकपार्थिववत् समासः ।) भाद्रशुक्लनवमी । यथा,
"भाद्रे भाद्रपदे या स्यान्नवमी बहुवेतरा ।
तस्यां संपूज्य वै दुर्गामश्वमेधफलं लभेत् ॥"
इति संवत्सरकौमुदीधृतगरुड़पुराणवचनम् ॥
इयमेव तालनवमी ख्याता । (अस्यां नवम्यां सौभाग्यफलकाङ्क्षिणीभिः स्त्रीभिर्यथाविधानं नारायणं लक्ष्मीञ्च संपूज्य व्रतकथा श्रोतव्या । तत्कथा यथा,—
"मेरुपृष्ठे सुखासीनं शय्यां कमलया सह ।
उवाच मधुरं वाक्यं स्मितपूर्व्वं सुरार्च्चिका ॥
श्रृणु मे वचनं देव! स्त्रीणां सौभाग्यकारणम् ।
केन वा सुभगा चासीत् केन वा दुर्भगा भवेत् ॥
किं व्रतेन विमुच्येत किं व्रतेन फलं लभेत् ।
तन्मे ब्रूहि सुरश्रेष्ठ! नारीणां कारणं ध्रुवम् ॥
श्रीभगवानुवाच ।
पूर्व्वं हि मम भार्य्ये द्वे सत्यभामा च रुक्मिणी ।
रुक्मिणी सुभगा साध्वी सत्यभामा च दुर्भगा ॥
तस्याः कर्म्मविपाकेन सौभाग्यमन्यथा गतम् ।
केनचिन्नावदोषेण सत्यभामा च दुर्भगा ॥
दुःखार्त्ता शोकसन्तप्ता रुदती बहुशो मुहुः ।
कियत्कालेन च सम्यग्ने व्रजन्ती च तपोवने ॥
अरण्ये विजने गत्वा कस्मिञ्चिन्मुनिवराश्रमे ।
रुदित्वा च विधानेन सर्व्वं दुःखं न्यवेदयत् ॥
तच्छ्रुत्वा तु मुनिश्रेष्ठः प्रोवाच रुदतीं शुभाम् ।
भद्रे पुत्रिणि! मा रोदीः सौभाग्यं ते भविष्यति ॥
सत्यभामोवाच ।
दुःखं मे बहुशस्तात! शरीरं दुर्भगं कथम् ।
कथ्यतां मुनिशार्दूल! स्वामिसौभाग्यकारणम् ॥
मुनिरुवाच ।
भाद्रे मासि सिते पक्षे नवमी या तिथिर्भवेत् ।
तस्यां नारायणं लक्ष्मीं पूजयेच्च विधानतः ॥
सत्यभामोवाच ।
विधानं कीदृशं तस्य किं दानं किञ्च पूजनम् ।
तन्मे ब्रूहि मुनिश्रेष्ठ! कारणं किन्तदुच्यताम् ॥
मुनिरुवाच ।
स्वच्छिद्रे मण्डलं कृत्वा घटं तत्र निवेशयेत् ।
तत्र नारायणं लक्ष्मीं गन्धपुष्पादिनार्च्चयेत् ॥
नैवेद्येन सदा भक्त्या पूजयेत् भक्तवत्सलाम् ।
तालेन पूजयेत् देवीं तालेनैव विनिर्म्मितम् ॥
तस्यै ततु पिष्टकं दत्त्वा ब्राह्मणायोपपादयेत् ।
गन्धमाल्यैः समभ्यर्च्च्य विप्रहस्ते समर्पितम् ॥
स्वस्तीति ब्राह्मणो ब्रूयात् व्रतं साङ्गं समाचरेत् ।
एवं क्रमेण साध्वीभिः कर्त्तव्यमतियत्नतः ॥
नवमं वत्सरं यावत् मासि भाद्रपदे तथा ।
पुत्रपौत्रैः परिवृता सौभाग्यमतुलं भवेत् ॥
धनधान्यसमृद्धिश्च ह्यवैधव्यञ्च नित्यशः ।
अभीष्टफलमाप्नोति नवमीव्रतकारणात् ॥
सम्पूर्णे तु व्रते भूते प्रतिष्ठां तदनन्तरम् ।
विप्राय दक्षिणां देया सुभोज्यञ्च विधानतः ।
एवं कुरु सदा विज्ञे! शृणु भाग्यसुत्तमम् ॥
तथा चक्रे च सा साध्वी सुनेर्व्वचनगौरवात् ।
व्रते सम्पूर्णतां याते केशवस्तामुपागतः ॥
उवाच प्रहसन् देवो वचनं मधुरं शुभम् ।
त्वत्सौभाग्येन यद्दुःखं तत् ते सर्व्वं विनश्यतु ॥
सौभाग्यमतुलं प्राप्य यथा गौरी हरस्य च ।
शचीव पुरुहूतस्य रतीव मदनस्य च ॥
यथा नारायणे लक्ष्मीस्तथा त्वं भव शोभने! ।
इति तस्मै वरं दत्त्वा गृहीत्वा तां पुरं ययौ ॥
इदं यो कुरुते साध्वी व्रतं सा सुभगा भवेत् ।
एवं व्रतञ्च या नारी करोति धर्म्मतत्परा ॥
तस्याञ्च भवने लक्ष्मीश्चञ्चला निश्चला भवेत् ।
जन्मान्तरे भवेत् साध्वी ह्यवैधव्यं सदा पुनः ॥
पश्चाच्च सुभगा साध्वी पुत्रपौत्रान्विता भवेत् ।
धनधान्यसमृद्धिञ्च ततो मोक्षमवाप्नुयात् ॥"
इति भविष्यपुराणोक्ततालनवमीव्रतकथा समाप्ता ॥*॥ व्रतेऽस्मिन् नवफलानि दातव्यानि । तानि यथा,—
"पिण्डखर्জ্জूरं जातिञ्च एला चैव हरीतकी ।
नारिकेलं तथा पूगं रम्भाफलफलन्तथा ।
तत्र सूर्य्यं प्रदातव्यं तालस्य फलसुत्तमम् ॥"*॥)
तालपत्रं, क्ली, (तालस्य पत्रमिव ।) ताड़पत्रः । इत्यमरः । २ । ६ । १०३ ॥ तालवृक्षस्य पर्णञ्च ॥ (एतस्य गुणा यथा,—
"तालपत्रमरुद्वृद्धः कोष्ठो वातस्य शान्तिकृत् ।
निद्राकरः प्रीतिकरः शोथरोगविकारहा ॥
दाहपित्तश्रमग्लानिनाशनो भ्रमशान्तिकृत् ।
मधुरोऽतिश्रमघ्नः स्यादार्द्रस्तु कफकोपनः ॥"
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥)
तालपत्रिका, स्त्री, (तालपत्री + स्वार्थे कन् टाप् ह्रस्वश्च ।) सुवली । तालमूली । इति राजनिर्घण्टः ॥ (तालमूलीशब्देऽस्या विवृतिर्ज्ञातव्या ॥)
तालपत्री, स्त्री, (तालस्य पत्रमिव पत्रमस्याः ।) मूषिकपर्णी । इति मेदिनी । रे, २६३ ॥ (यथा,
"गोजी च पिठा सह तालपत्र्या
यष्ट्या विधेयोऽनिलजे प्रलेपः ॥"
इति सुश्रुते चिकित्सितस्थाने १८ अध्याये ॥)
तालपर्णी, स्त्री, स्त्री, (तालः खड्गसुरिरिव पर्णमस्य ।) सुरानामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥
तालपर्णी, स्त्री, (तालस्य पर्णमिव पर्णमस्याः । ङीष् ।) मधुरिका । इति जटाधरः ॥ सुरा । इत्यमरः । २ । ४ । १२३ ॥
तालपुष्पकं, क्ली, (तालस्य पुष्पमिव पुष्पमस्य । कप् ।) प्रपौण्डरीकम् । इति शब्दरत्नावली ॥
तालभृत्, पुं, (तालं बिभर्त्ति ध्वजरूपेणेति । भृ + क्विप् ।) बलदेवः । इति त्रिकाण्डशेषः ॥
तालप्रलम्बं, क्ली, (ताले तालवृक्षे प्रलम्बते इति । प्र + लम्ब + घञ् ।) तालजटा । यथा,—
"तथा तालप्रलम्बञ्च रूक्षं क्षतरुजापहम् ॥"
इति राजवल्लभः ॥
तालमूलिका, स्त्री, (तालमूली + स्वार्थे कन् टाप् ह्रस्वश्च ।) तालमूली । इत्यमरः । २।४।११६ ॥
तालमूली, स्त्री, (तालस्य मूलमिव मूलमस्याः । ङीष् ।) स्वनामख्यातवृक्षः । तत्पर्य्यायः । अर्शोघ्नी २ सुवली ३ ताली ४ खजिनी ५ ।

इति रत्नमाला ॥ सुवहा ६ तालपत्रिका ७ गोधापदी ८ हेमपुष्पी ९ भूतालो १० दीर्घकन्दिका ११। अस्या गुणाः। मधुरत्वम्। स्निग्धत्वम्। दृष्यत्वम्। पुष्टिबलकफप्रदत्वम्। पित्तिश्लेष्मत्वम्। पित्तदाहश्रमहरत्वञ्च। इति राजनिर्घण्टः॥ उष्णवीर्य्यत्वम्। दृंहणत्वम्। गुरुत्वम्। तिक्तत्वम्। रसायनत्वम्। गुदजरोगानिलनाशित्वञ्च। इति भावप्रकाशः॥

"मुषली च द्विधा प्रोक्ता श्वेता चापरसंज्ञका।
श्वेता स्वल्पगुणोपेता अपरा च रसायनी॥"
इति राजनिर्घण्टः॥

(अस्या विषयो यथा, वैद्यकरसेन्द्रसारसंग्रहे ज्वरे महाराजवल्याम्।

"माषद्वयमितं भागं तालमूल्या रसेन च।
पिष्ट्वा च वटिका कार्य्या चतुर्गुञ्जाप्रमाणतः॥")

तालपर्ण्णा, [न्] पुं, (तालः एव लक्ष्म चिह्नं यस्य।) बलदेवः। इति हेमचन्द्रः। २।१३८॥

तालपत्रं, क्ली, (तालस्य तालपत्रस्य वृन्तं कारणत्वेन अस्ति अस्य। अच्।) व्यजनम्। इति हेमचन्द्रः। ३। ३५१। तालपातार पाखा इति भाषा॥ (यदुक्तम्,—

"परे ब्रह्मणि विज्ञाते समस्तैर्नियमैरलम्।
तालवृन्तेन किं कार्य्यं लब्धे मलयमारुते॥")

तस्य वायुगुणः। त्रिदोषश्रमनत्वम्। लघुत्वञ्च। इति राजवल्लभः॥ (सोमविशेषे, पुं। यथा,—

"एक एव खलु भगवान् सोमः स्थाननामाकृतिवीर्य्यविशेषैश्चतुर्विंशतिधा भिद्यते।"
"प्रतानवांस्तालवृन्तः करवीरोऽग्रवानपि॥"
इति सुश्रुते चिकित्सितस्थाने २६ अध्याये॥)

तालवृन्तकं, क्ली, (तालवृन्तमेव। स्वार्थे कन्।) व्यजनम्। इत्यमरः। २। ७। १४०॥

तालवेधनकः, पुं, (तालस्य वेधनं एथक्करणं संस्थानेन नियमनं यत्र। कप्।) नटः। इति शब्दरत्नावली॥ तालरेचनकोऽपि पाठः॥

तालव्यं, त्रि, (तालोर्णातम्। तालु+"शरीरावयवात् यत्।" ५। १। ६। इति यत्।) तालुजातम्। इति व्याकरणम्॥ (यथा, ऋग्वेदे। १७।

"कण्ठ्यावहाविद्युद्यद्गोस्तालव्या ओष्ठजावुपू॥")

तालाख्या, स्त्री, (तालं तालपर्णं आख्या यस्याः।) सुरा। इति शब्दचन्द्रिका॥

तालाङ्कः, पुं, (तालस्तालवृक्षः अङ्को ध्वजो यस्य।) बलदेवः। इत्यमरः। १। १। २५॥ करपत्रम्। शाकभेदः। महालक्षणसम्पन्नपुरुषः। पुस्तकम्। हरः। इति हेमचन्द्रः॥

तालावचरः, पुं, (तालेन अवचरति वृत्यतीति। अव+चर+अच्।) नटः। इति त्रिकाण्डशेषः॥

तालिः, स्त्री, (तालयति प्रतितिष्ठत्यनयेति। तल प्रतिष्ठायाम्+ बिच् + "सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इतीन्।) भूम्यामलकी। इति रत्नमाला॥ (ताड्यते निहन्यते मतिरनयेति। तड़ ताड़ने+णिच्+करणे इन्। ड़स्य लत्वम्।) ताली। इत्यमरटीकायां भरतः॥

तालिकः, पुं, (तलेन करतलेन निर्वृत्तः। तल+"तेन निर्वृत्तम्।" ५। १। ७६। इति ठक्।) प्रसारिताङ्गुलिपाणिः। तत्पर्य्यायः। चपेटः २ प्रतलः ३ तलः ४ प्रहस्तः ५ तालः ६। इति हेमचन्द्रः। ३। २३०॥ (यथा, पञ्चतन्त्रे। २। १३७।

"यथैकेन न हस्तेन तालिकः सम्प्रपद्यते।
तथोद्यमपरित्यक्तं न फलं कर्म्मणः स्मृतम्॥")

लिखितस्य निबन्धनम्। तत्पर्य्यायः। काचनी २ काचनकी ३। इति शब्दरत्नावली॥

तालिका, स्त्री, (तलेन निर्वृत्ता। तल+ठक्। स्त्रियां टाप्।) चपेटः। तालमूली। इति शब्दरत्नावली॥ ताम्रवल्ली। इति राजनिर्घण्टः॥

तालितं, क्ली, (ताड्यते यदिति। तड़ ताड़ने+णिच्+क्तः। ड़स्य लत्वम्।) वाद्यभाण्डम्। तुलितपटः। गुणः। इत्यजयः॥

तालिशः, पुं, (तलतीति। तल गतौ+"इशः कप्यपिवड़िभ्यश्चलेषु णित्।" १। ३३६। इत्युणादिकोषटीकाधृतसूत्रात् इशः णित्वात् ड़त्वञ्च।) पर्व्वतः। इत्युणादिकोषः॥

तालो, स्त्री, (तालि+ङ्यादिकारादिति वा ङीष्।) ताड़ी। ताड़ियात् इति भाषा। तामलकी। इत्यमरः। २। ४। २२७॥ भूँइ आमला इति भाषा॥ (अस्याः पर्य्याया यथा,—

"बहुपुष्पी जडाध्यक्षा तालो भूम्यामलक्यपि।
तामलक्यञ्जटा क्षुद्रफला चेत्तालमलक्यपि॥"
इति वैद्यकरत्नमालायाम्॥)

तुवरिका। इति शब्दरत्नावली॥ तालमूली। इति रत्नमाला॥ प्रतितालो। कुक्षिकाविशेषः। इति हेमचन्द्रः॥ ताम्रवल्ली। इति राजनिर्घण्टः॥ सुराभेदः। इति स्मृतिः॥ ताड़ी इति भाषा॥ (करास्फालनम्। यथा, अग्निपुराणे। ५।

"यावतीभिरालतनुतालो सलतं प्रियकपालीषु खेलति भयवालीनकुलासितचूलीभरा चरणधूलीलसन्मुनिवरा॥")

तालीपत्रं, क्ली, (तालस्य पत्रमिव पत्रमस्य।) तालीशपत्रम्। इति राजनिर्घण्टः॥

तालीशं, क्ली, (तालीव श्यति नाशयति रोगानिति। शो नाशे+डः।) तालीशपत्रम्। इति राजनिर्घण्टः॥

तालीशपत्रं, क्ली, (तालीशं रोगनाशकं पत्रं यस्य।) वृक्षविशेषः। तत्पर्य्यायः। तालीशम् २ पत्राढ्यम् ३ शुकोदरम् ४ घाटीपत्रम् ५ चक्रवेधम् ६ करिपत्रम् ७ करिच्छदम् ८ नीलम् ९ नीलाम्बरम् १० तोयम् ११ तालीपत्रम् १२ तमाडयम् १३ तालीशपत्रकम् १४। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। मधुरत्वम्। कफवातकासहिक्काक्षयश्वासक्षर्द्दिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ लघुत्वम्। अरुचिगुल्मामवह्निमान्द्यनाशित्वञ्च। इति भावप्रकाशः॥ भूम्यामलकी। इति मेदिनी। रे, ३०३॥

तालु, क्ली, (तरत्यनेन वर्णा इति। तॄ+"तॄशॄभ्यां लः।" उणां। १। ५। इति कुण् रस्य लश्च।) जिह्वेन्द्रियाधिष्ठानम्। यथा, श्रीभागवते।

"सुखतस्तालु निर्भिन्नं जिह्वया तच्चोपजायते।
ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते॥"

तेलुया इति टाकरा इति च भाषा॥ तत्पर्य्यायः। काकुदम् २। इत्यमरः। २। ६। ८१॥ तालुकम् ३। इति राजनिर्घण्टः॥

तालुजिह्वः, पुं, (तालु एव जिह्वा यस्य।) कुम्भीरः। इति हेमचन्द्रः। ४। ४१५॥

तालूरः, पुं, (तालयतीति। तल+णिच्+बाहुलकात् ऊरः।) आवर्त्तः। इति हेमचन्द्रः। ४। १४२॥

तावकीनं, त्रि, तव इदम्। (युष्मद्+"युष्मदस्मदोरन्यतरस्यां खञ्च।" ४। ३। १। इति खञ्। ततः "तवकममकावेकवचने।" ४। ३। ३। इति तवकादेशः।) त्वदीयम्। इति व्याकरणम्॥ तोमार एइ इति भाषा॥

तावत्, व्य, (तत् परिमाणमस्य। तद्धिता इति बहुवचनेनान्येभ्योऽपि दृश्यन्ते इति डावतुप्रत्ययः।) साकल्यम्। अवधिः। मानम्। (यथा, कुमारे। ५। ६०।

"स्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः॥"

"तावत् इति मानार्थे यावन्मात्रं विचारयोग्यं तावन्मात्रमित्यर्थः॥" इति तट्टीकायां मल्लिनाथः॥) अवधारणम्। इत्यमरः। ३। ३। २४५॥ (यथा, माघे। २। ६३।

"इन्द्रप्रस्थगमस्तावत् कारि मा यन्तु चेदयः॥")

प्रशंसा। पश्चात्तरम्। इति शब्दरत्नावली॥ (तत्परिमाणमस्येति। "यत्तदेतेभ्यः परिमाणे वतुप्।" ५। २। ३६। इति वतुप् प्रत्ययेन ततुपरिमाणे, त्रि। यथा, भागवते। ३। २६। १२।

"महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः।
तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे॥")

तावरं, क्ली, धनुर्गुणः। इति भूरिप्रयोगः॥

तावियः, पुं, (तवयते गम्यते सतृकाभिरिति। तव सौत्रो धातुः+"तवेर्यिड्डा।" उणां। १। ४६। इति टियच् स च णित्।) स्वर्गः। समुद्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

तावियी, स्त्री, (तवति सौन्दर्य्यं गच्छतीति। तव+टियच् सच णित्। टित्त्वात् ङीष्।) देवकन्या। नदी। पृथिवी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

तावीषः, पुं, (तावियं+एषोदरादित्वात् दीर्घः।) स्वर्गः। समुद्रः। काशम्। इति मेदिनी। षे, ३०॥

तावीषी, स्त्री, (तावियी + पृषोदरादित्वात् दीर्घः।) चन्द्रकन्या। इति मेदिनी। ते, ३८॥ (इन्द्रकन्या। इति कुत्रचित्॥)

ताइरिः, पुं, ज्वराग्निः। इति दीपिका॥

तिक, ऋ ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ऋ, अतितेकत्। ङ, तेकते। इति दुर्गादासः॥

तिक, न आस्कन्दे। वधे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) न, तिङ्क्ते। इति दुर्गादासः॥

तिक्तं, क्ली, (तेजयतीति। तिज + बाहुलकात् क्तः।) पर्पटिकौषधिः। इति हेमचन्द्रः॥

तिक्तः, पुं, (तेजयतीति। तिज + सामान्याश्रयेऽपि ज्ञापकात् चुरादीनां णिजभावे गत्यर्थाकर्म्मकेति क्तः।) रसविशेषः। तित इति भाषा॥ (यथा, सुश्रुते। १। ४२।
"यो गले चोषसुप्तादयति सुखवेशद्यं जनयति भक्तरुचिञ्चापादयति हर्षञ्च स तिक्तः॥")
स वायुकाग्निगुणबाहुल्यात् भवति। इति शिवदासः॥ तस्य गुणाः। जन्तुकुष्ठज्वरार्शिकासदाहनाशित्वम्। रोचनत्वम्। इति राजनिर्घण्टः॥ शीतत्वम्। दृष्यान्दर्च्छापित्तकफविषोत्क्लेशरक्तगदनाशित्वम्। स्वयमरोचिष्णुत्वम्। कण्डूत्यास्यशोधनत्वम्। वातलत्वम्। अग्निकारित्वम्। नासाशोषणत्वम्। रूक्षत्वम्। लघुत्वञ्च। अतियुक्तस्य तस्य गुणाः। शिरःशूलमन्यास्तम्भभ्रमार्शिकम्पमूर्च्छाटव्याकारित्वम्। वलशुक्रक्षयप्रदत्वञ्च। इति भावप्रकाशः॥ *॥
("तिक्तास्तो वत वातलोऽपि हि गुणं कुष्ठादि दोषापहः
सोऽल्पः सर्व्वरुजापहो भ्रमहरो रुच्योऽपि संदीपनः।
जिह्वास्फोटकनाशनोऽथ भवति श्रीखण्डतानां हितो
यत्नोत्पन्नकरात्तिहरः प्रकटगुणश्चैतत् निम्बादिकानां रसः॥"
इति हारीते प्रथमे स्थाने चतुर्थेऽध्याये॥)
सुगन्धः। इति मेदिनी। ते, २१॥ (सुरभिः। यथा, माघे। ५। ३३।
"नादातुमन्धकरिसूक्तमदाम्बुतिक्तं
धूलाङ्कुशेन न विहातुमपीच्छताभः॥")
तिक्तस्तिक्तरसोऽस्यास्तीति। अर्शं आदित्वात् अच्।) कुटजवृक्षः। इति शब्दचन्द्रिका॥ वरुणवृक्षः। इति शब्दमाला॥ तिक्तरसयुक्ते, त्रि। इत्यमरः। १। ५। ६॥

तिक्तकः, पुं, (तिक्तेन तिक्तरसेन कायतीति। कै + कः।) पटोलः। इत्यमरः। २। ४। १५५॥ चिरतिक्तः। इति शब्दरत्नावली॥ चिरता इति भाषा॥ (यथा, वाभटे चिकित्सितस्थाने। ३।
"पित्तकासे तनुकफे त्रिफृतां मधुरैर्युताम्।
युञ्जात् विरेकाय युतां घनश्लेष्मणि तिक्तकैः॥")
क्षुद्रखदिरः। इति शब्दमाला। इक्षुदीक्षवः।

इति भावप्रकाशः॥ (तिक्तप्रधाने, त्रि। यथा, सुश्रुते। ४। २४।
"निम्बश्च तिक्तके श्रेष्ठः कषाये खदिरस्तथा॥")
द्रव्याणां गणः। यथा चक्रपाणिसंग्रहे ज्वराधिकारे।
"क्वथ्यते सलिलद्रोणे द्व्याङ्गातकफज्वरे।
मटोत्थे पैत्तिके वापि शीतलं तिक्तकैः हृतम्॥"
"सुस्नपर्पटकोशीरचन्दनोदीच्यनागरैः।
हृतशीतं जलं दद्यात् पिपासाज्वरशान्तये॥"
"तिक्तकैः हृतमिति यदुक्तं तदाह सुस्नेत्यादि।"
इति तट्टीका॥)

तिक्तकन्दिका, स्त्री, (तिक्तरसप्रधानः कन्दो मूलं सोऽस्यस्या इति। तिक्तकन्द + ठन्।) गन्धपत्रा। इति राजनिर्घण्टः॥

तिक्तका, स्त्री, (तिक्तेन रसेन कायतीति। कै + कः।) कटुतुम्बी। इति शब्दरत्नावली॥ (कटुतुम्बीशब्देऽस्या विवरणं ज्ञातव्यम्॥)

तिक्तगन्धिका, स्त्री, (तिक्तो गन्धो यस्याः। कप् ततष्टाप् अत इत्वञ्च।) वराहक्रान्ता। इति शब्दमाला॥

तिक्तगुञ्जा, स्त्री, (गुञ्जेव तिक्ता। राजदन्तादित्वात् प्राङ्निपातः।) करञ्जः। तत्पर्य्यायः। क्षुद्रञ्जा २ रसञ्जा ३ विह्वलकण्टी ४। इति हारावली। १०१॥

तिक्ततण्डुला, स्त्री, (तिक्तस्तण्डुलोऽन्नमस्यं यस्याः।) पिप्पली। इति राजनिर्घण्टः॥ (अस्याः पर्य्याया यथा,—
"पिप्पली चपला रौद्री वैदेही मागधी कणा।
तण्डुलीयकुला मगधी कोला स्यात्तिक्ततण्डुला॥"
इति वैद्यकरत्नमालायाम्॥)

तिक्ततुम्बी, स्त्री, (तिक्ततुम्बी। पृषोदरादित्वात् साधुः।) कटुतुम्बीलता। इति राजनिर्घण्टः॥

तिक्ततुम्बी, स्त्री, (तिक्ता तुम्बी।) कटुतुम्बी। इति रत्नमाला॥

तिक्तदुग्धा, स्त्री, (तिक्तं दुग्धं क्षीरं यस्याः।) क्षीरिणी। अजशृङ्गी। इति राजनिर्घण्टः॥

तिक्तधातुः, पुं, (तिक्तस्तिक्तरसप्रधानो धातुः।) पित्तम्। इति राजनिर्घण्टः॥

तिक्तपत्रः, पुं, (तिक्तानि पत्राणि यस्य।) कर्कोटकः। इति हेमचन्द्रः। ४। २५६॥ काकरोल इति भाषा॥

तिक्तपर्व्वा, [न्] पुं, (तिक्तं पर्व्व ग्रन्थिर्यस्य।) दूर्व्वा। इति जटाधरः॥ स्त्री, छिन्नरुहा। गुडूची। यष्टिमधु। इति मेदिनी। ने, २३७॥

तिक्तपुष्पा, स्त्री, (तिक्तानि पुष्पाणि यस्याः।) पाठा। इति राजनिर्घण्टः॥ (पाठाशब्देऽस्या विवरणं ज्ञातव्यम्॥)

तिक्तफलः, पुं, (तिक्तानि फलानि यस्य।) कतकवृक्षः। इति राजनिर्घण्टः॥

तिक्तफला, स्त्री, (तिक्तानि फलानि यस्याः।) यवतिक्तालता। वार्त्ताकी। षड्गुणा। इति राजनिर्घण्टः॥

तिक्तभद्रकः, पुं, (तिक्तश्चासौ तिक्तरसप्रधानो भद्रो हितकारी चेति कर्म्मधारयः। ततः स्वार्थे कन्।) पटोलः। इति शब्दचन्द्रिका॥

तिक्तमरिचः, पुं, (तिक्तो मरिच इव।) कतकवृक्षः। इति राजनिर्घण्टः॥

तिक्तरोहिणिका, स्त्री, (तिक्तरोहिणी + स्वार्थे कन् टाप् पूर्व्वहस्वश्च।) कटुका। इति रत्नमाला॥

तिक्तरोहिणी, स्त्री, (तिक्ता सती रोहतीति। रुह + णिनिः + ङीप्।) कटुका। इति राजनिर्घण्टः॥ (कटुरोहिणीशब्देऽस्या विवृतिर्ज्ञातव्या॥)

तिक्तवल्ली, स्त्री, (तिक्ता वल्ली।) मूर्व्वालता। इति रत्नमाला॥

तिक्तवीणा, स्त्री, (तिक्तं वीणमस्याः।) कटुतुम्बी। इति राजनिर्घण्टः॥

तिक्तशाकः, पुं, (तिक्तः शाको यस्य।) खदिरवृक्षः। वरुणवृक्षः। (अस्य पर्य्याया यथा,—
"वरुणस्तिक्तशाकश्च सेतुवृक्षोऽश्मसंभवः॥"
इति वैद्यकरत्नमालायाम्॥)
पद्मसुन्दरवृक्षः। इति मेदिनी। के, १६१॥

तिक्तसारं, क्ली, (तिक्तः सारो निर्य्यासो यस्य।) दीर्घरोहिषकवृक्षः। इति राजनिर्घण्टः॥

तिक्तसारः, पुं, (तिक्तः सारो निर्य्यासोऽस्य।) खदिरवृक्षः। इति रत्नमाला॥ (खादिरशब्देऽस्य गुणादयो ज्ञेयाः॥)

तिक्ता, स्त्री, (तिक्तस्तिक्तरसोऽस्यस्याः। अर्श्व ततष्टाप्।) कटुरोहिणी। इति मेदिनी। ते, २२॥ (यथास्याः पर्य्यायाः।
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
पाठा। इति रत्नमाला। यवतिक्तालता। षड्गुणा। इति राजनिर्घण्टः॥ छिक्कनी। इति भावप्रकाशः॥

तिक्ताख्या, स्त्री, (तिक्तः आख्या अभिधानं यस्याः।) कटुतुम्बी। इति राजनिर्घण्टः॥

तिक्ताङ्गा, स्त्री, (तिक्तं अङ्गं यस्याः।) पातालगरुडीलता। इति राजनिर्घण्टः॥

तिक्तिका, स्त्री, (तिक्ता + स्वार्थे कन्। टाप् अत इत्वम्।) कटुतुम्बी। इति शब्दरत्नावली॥

तिग, न हिंसायाम्। आस्कन्दे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) न, तिग्नोति। आस्कन्दः केचिन्न मन्यते। इति दुर्गादासः॥

तिग्मं, क्ली, (तेजयति उत्तेजयतीति। तिज + "युजिरुजितिजां कुच।" उणां। १। १४५। इति मक् कवर्गान्तादेशः।) तीक्ष्णम्। खरम्। तद्वति, त्रि। इत्यमरः। १। ४। ३५॥ (यथा, महाभारते। १। २०। ११।
"तिग्मवीर्य्यविषा ह्येते दन्दशूका महाबलाः॥")
वज्रम्। इति निघण्टुः। २। २०॥ पुं, क्षत्रियविशेषः। यथा, विष्णुपुराणे। ४। २१। १।

"ततो नदुक्तसात् तिग्मस्तिग्मात् दृढव्रथ: ॥"
मतस्यपुराणमते तु अयं उर्व्यस्य सुत: । यथा, तत्रैव । ५० । ८४ ।
"उर्व्यो भाव्यो सुतस्तस्य तिग्मात्मा तस्य चात्मज: ।
तिग्मात् दृढव्रथो भाव्यो वसुदामा दृढव्रथात् ॥"
अयं तिमिरित्याख्ययापि प्रसिद्ध: । इति राजावली ॥ अस्य राज्यपालनकालादिकं तिमिशब्दे द्रष्टव्यम् ॥)

तिग्मांशु:, पुं, (तिग्मास्तीक्ष्णा अंशव: किरणानि यस्य ।) सूर्य्य: । इति हलायुध: ॥ (यथा, महाभारते । १ । २ । १३६ ।
"धौम्योपदेशात् तिग्मांशुप्रसादादप्रसम्भव: ॥"
अग्नि: । यथा, महाभारते । १ । २३३ । १८ ।
"इदं वै सद्म तिग्मांशो वरुणस्य परायणम् ॥"
तीक्ष्णकिरणे, त्रि ॥)

तिज, न घातने । इति कविकल्पद्रुम: ॥ (स्वां-परं-सकं-सेट ।) न, तिन्नेति । तिज घाते इति जौमरा: पठन्ति । तेन तदर्थकल्पनमेवोचितम् । ततश्च घातनमिति हन्त्यर्थस्य प्राचिकचुरादिनेव हन्ते: स्वार्थे णौ रूपम् । हनन मित्यर्थ: । किञ्च । हिंसनपाठेनैवेदसिद्धे घातनपाठो हिंसाप्रेरणार्थ: स्यात्न वेति काकदन्तान्नेयमवद्यिमलं चवाकामेव कातन्त्राद्यसम्मतत्वात् । इति दुर्गादास: ॥

तिज, क शिते । इति कविकल्पद्रुम: ॥ (चुरां-परं-सकं-सेट् ।) क, तेजयति । शितं तीक्ष्णीकरणम् । इति दुर्गादास: ॥

तिज, ङ क्षान्तौ । निघ्राणे । इति कविकल्पद्रुम: ॥ (भ्वां-आत्मं-सकं सेट् ।) क्षान्ति: सहनम् । ङ, तितिक्षते दु:खं दीन: । तेजते । तत्र तिवादयो न प्रयुज्यन्ते । इतिरमानाथ: । इति दुर्गादास: ॥

तिजिल:, पुं, (तेजयति तीक्ष्णीकरोति । यद्वा, तिज्यते सह्यते सर्व्वैरिति । तिज + "गुपादिभ्य: कित् ।" उणा । १ । ५७ । इति इलच् स च कित् ।) चन्द्र: । इत्युणादिकोष: ॥ राक्षस: । इति संक्षिप्तसारे उणादिवृत्ति: ॥

तिट्टी, स्त्री, त्रिहत् । इति शब्दचन्द्रिका ॥ (त्रिहत्शब्दे गुणादिरस्या ज्ञातव्य: ॥)

ततउ:, पुं, (तन्यन्ते भृष्टसवा अनेति । तन विस्तारे + "तनोतेर्डउ: सन्वच्च ।" उणा । ५ । ५२ । इति डउ: सन्वच्च तेन अभ्यासस्येत्वादिकार्य्यम् ।) चालनी । इत्यमर: । २ । ६ । २६ ॥ हेमचन्द्रश्च । ४ । ८४ ॥ (यथा, ऋग्वेदे । १० । ७१ । २ ।
"सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ॥"
यथाच,—
"शूर्पवद्दोषसूतृणन्य गुणं गृह्णन्ति साधव: ।
दोषग्राही गुणत्यागी असाधुस्तितउर्यथा ॥"
इत्युणट: ॥
"शूर्पच्छिन्नसमोपेतं चालनं ततउ स्मृतम् ॥"
इत्युक्तेरस्य स्त्रीत्वमपि ॥ क्लीबत्वम् । इति उज्ज्वलदत्त: । ५ । ५२ ॥)

तितिक्षा, स्त्री, (तिज + स्वार्थे सन् + "अ प्रत्ययात् ।" ३ । ३ । १०२ । इति अ ततष्टाप् ।) क्षान्ति: । इत्यमर: । १ । ७ । २४ ॥ (परापराधसहनम् । यथा, भागवते । ३ । १६ । २६ ।
"शमो दमस्तप: सार्य्यं तितिक्षोपरति: श्रुतम् ॥")
श्रीतोष्णादिद्वन्द्वसहिष्णुता । इति वेदान्तसार: ॥ (यथा, भागवते । ४ । २२ । २४ ।
"यमैरकामैर्नियमैश्चाप्यनिन्द्या
गिरीहया द्वन्द्वतितिक्षया च ॥")

तितिक्षित:, त्रि, (तितिक्षा सञ्जातास्य । "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) क्षान्त: । इति जटाधर: ॥

तितिक्षु:, त्रि, (तितिक्षते इति । तिज क्षमायाम् + "गुप्तिज्किद्भ्य: सन् ।" ३ । १ । ५ । इति सन् । तत: तितिक्ष + "सनाशंसभिक्ष उ: ।" ३ । २ । १६८ । इत्यु: ।) क्षमाशील: । क्षान्त: । इत्यमर: । ३ । १ । ३१ ॥ (यथा, महाभारते । १ । ८७ । ६ ।
"अक्रोधन: क्रोधनेभ्यो विशिष्ट-
स्तथा तितिक्षुरतितिक्षोर्विशिष्ट: ॥"
पुरुवंशीयस्य महामनस: पुत्रविशेष: । यथा, हरिवंशे । ३१ । २१ ।
"महामनास्तु पुत्रौ द्वौ जनयामास भारत ! ।
उशीनरञ्च धर्म्मज्ञं तितिक्षुञ्च महाबलम् ॥")

तितिभ:, पुं, (तितीति शब्देन भयतीति । भय + ड: ।) इन्द्रगोपकीट: । इति हेमचन्द्र: ।४।२७५॥

तितिलं, क्ली, (तिलति स्निह्यतीति । तिल + बाहुलकात् क: द्वित्वञ्च ।) नन्दकम् । नादा इति भाषा । तैतिलकरञ्च । तिलपिष्टम् । इत्यमर: ॥

तित्तिर:, पुं, (तित्ति इति शब्दं राति ददातीति । रा + "आतोऽनुपसर्गे क: ।" ३ । २ । ३ । इति क: ।) तित्तिरिपक्षी । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५ । ६ । ३८ ।
"निलयेषु तलयेषु निष्क्रामन्ति शिर: स्वथ ।
कपिञ्जलास्तित्तिराश्च कलविङ्काश्च सङ्घश: ॥"
अस्य गुणा: । यथा,—
"तथैव तित्तिरो वृष्यो मेधाग्निबलवर्द्धन: ।
सर्व्वदोषहरो बल्यो लावकै: समतागुणै: ॥
क्षय्यगौरवभेदाच्च श्रेष्ठो गौरश्च तित्तिर: ।
तृतीयस्तित्तिरोऽन्योऽपि सामान्यगुणलक्षणै: ।
सवातश्लेष्मविबलक्षद्घन: किञ्चिदम्लपाक: ॥"
इति हारीते प्रथमे स्थाने ११ अध्याये ॥
जनपदविशेष: । तद्देशजातौ बहुवचनान्त: । यथा, महाभारते । ६ । ४० । ५० ।
"वाह्लीकास्तित्तिराश्चैव चोला: पाण्ड्याश्च भारत ॥")

तित्तिरि:, पुं, (तरतीति । तॄ + "तरते: सन्वत्तुक् चाभ्यासस्य ।" उणा । ४ । १४२ । इत्यत्र उज्ज्वलदत्तधृतसूत्रात् इ: सन्वत्कार्य्यमभ्यासस्य । तुगागमश्च ।) पक्षिविशेष: । तित्तिरि इति भाषा । तत्पर्य्याय: । तित्तिर: २ । इति शब्दरत्नावली ॥ तितिरि:३ तैतिर:४ याजुषोदर:५ । अस्य मांसस्य गुणा: । रुच्यत्वम् । लघुत्वम् । वीर्य्यबलप्रदत्वम् । कषायत्वम् । मधुरत्वम् । शीतत्वम् । त्रिदोषघ्नत्वञ्च । इति राजनिर्घण्ट: ॥
"तित्तिरि: क्षयवर्ण: स्यात् स तु गौर: कपिञ्जल: ।
तित्तिरिर्व्वर्य्यदो ग्राही त्रिकादोषचयापह: ।
श्वासकासज्वरहरस्तस्मान्नीरोऽधिको गुण: ॥"
इति भावप्रकाश: ॥
मुनिविशेष: । इति विश्व: ॥ (यथा, महाभारते । २ । ४ । १२ ।
"तित्तिरिर्याज्ञवल्क्यश्च सप्तमो लोमहर्षण: ॥")
तैत्तिरीशाखा । इत्युणादिकोष: ॥ (नागविशेष: । यथा, महाभारते । १ । ३५ । १५ ।
"कुसुद: कुसुदाक्षश्च तित्तिरिर्हरिणिस्तथा ॥"
तथा च स्कान्दे सह्याद्रिखण्डे । ४ । ५ ।
"तित्तिरिर्हरिभद्रश्च जमदग्नो बलाहक: ॥")

तिथ:, पुं, (तेजयतीति । तिज + "तिथपृष्ठगूथयूथप्रोथा: ।" उणा । २ । १२ । इति थक्प्रत्ययेन निपातनात् साधु: ।) अग्नि: । काम: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥ काल: । इति त्रिकाण्डशेष: ॥ प्रावृट्काल: । इति संक्षिप्तसारे उणादिवृत्ति: ॥

तिथि:, स्त्री पुं, (तनोति विस्तारयति चन्द्रकलामिति । तन्यते चन्द्रकलयेति वा । तन + बाहुलकात् इथिन् नादिलोपश्च । तदुक्तं "तन्यन्ते कलया यस्मात् तस्मात् तास्तिथय: स्मृता: ।" इति । यद्वा, अततीति । अत सातत्यगमने + "ऋतन्यञ्जीति ।" उणा । ४ । २ । इथिन् प्रत्ययेन व्यतिथिरिति सिद्धे बाहुलकात् अलोप: । इति वर्णविवेक: ।) चन्द्रकलाक्रियारूपा । चन्द्रकलाक्रियोपलक्षित: काल इति वा । तस्या: स्वरूपं यथा,—
"अमादिपौर्णमास्यन्ता या एव शुक्लिन: कला: ।
तिथयस्ता: समाख्याता: षोड़शैव वरानने ! ॥
तत्र प्रथमकलाक्रियारूपा प्रतिपत् एवं द्वितीयादिकलाक्रियारूपा द्वितीयादि: । सा च दृद्धिरूपा चेत् शुक्ला ह्रासरूपा चेत् कृष्णा ॥ यथा,
"तत्र पञ्चदशौ मासे शुक्लकृष्णक्रमेण हि ।
चन्द्रदृद्धिकर: शुक्ल: कृष्णश्चन्द्रक्षयात्मक: ॥
पञ्चत्याद्यास्तु तिथय: क्रमात् पञ्चदश स्मृता: ।
दर्शान्ता: कृष्णपक्षे ता: पूर्णिमान्ताश्च शुक्लके ॥
गोभिलोक्तामावास्याघटकोपर्य्यधोभावापन्नसमसूत्रपातन्यायेन राश्येकावच्छेदेन सहावस्थानयुक्तार्कमण्डलाच्चन्द्रमण्डलस्य राश्यिंशादर्शांशद्वादशांशभोगात्मकनिर्गमरूपवियोगेन शुक्लायाः प्रतिपदादितत्तत्तिथ्येरुत्पत्ति: । एवं गोभिलोक्तपौर्णमासीघटकसप्तमराश्यवस्थानरूपपरमनियोगानन्तरमर्कमण्डलप्रवेशाय चन्द्रमण्डलस्य राश्यिंशादर्शांशद्वादशांशभोगात्मकप्रवेशरूपसन्निकर्षेण कृष्णायास्तत्तत्तिथ्येरुत्पत्तिरिति ।

यथा,—
अर्कांङ्गिनिःसृतः प्राचीं यदूर्ध्वात्यहरहः शुक्ली।
भागैर्द्वादशभिस्तत् स्यात्तिथिश्चान्द्रमसं दिनम्॥
चिंशांशकस्तथा रामेभाग इत्यभिधीयते।
आदित्याद्विप्रकृष्टस्तु भागं द्वादशकं यदा॥
चन्द्रमाः स्यात्तदा राम तिथिरित्यभिधीयते॥*॥
सा देवकृत्ये पूर्व्वाह्णयुता ग्राह्या। एकादश्युपवासातिरिक्तस्थले सर्व्वत्र त्रिसन्ध्यव्यापिनी ग्राह्या॥*॥

अथ प्रतिपत्।

सा च कृष्णा द्वितीयायुता ग्राह्या शुक्ला अमावस्यायुता ग्राह्या कृष्णाप्युपवासे द्वितीयायुता न ग्राह्या। अत्र तैलाभ्यङ्गं कृष्णाऽभक्षणं चौरत्वं न कार्य्यम्॥*॥

अथ द्वितीया।

सा च कृष्णा पूर्व्वयुता शुक्ला परयुता ग्राह्या। भ्रातृद्वितीया तु अष्टधाविभक्तदिनपञ्चमांशयुता ग्राह्या उभयदिने तल्लाभे परयुता ग्राह्या। तत्र दन्तधावनभक्षणं न कार्य्यम्॥*॥

अथ तृतीया।

सा च रम्भाव्रतेतरदेवकार्य्येषु चतुर्थीयुता ग्राह्या रम्भाव्रते तु द्वितीयायुता। तत्र मांसभक्षणं पटोलभक्षणञ्च न कार्य्यम्॥*॥

अथ चतुर्थी।

सा च पञ्चमीयुता ग्राह्या। विनायकव्रते तृतीयायुता ग्राह्या। मङ्गलवारे शुक्ला चतुर्थी अक्षया। अत्र मूलकभक्षणं चौरं प्रदोषे अध्ययनञ्च न कार्य्यम्। भाद्रमासे चतुर्थ्यां चन्द्रो न द्रष्टव्यः। प्रमादाद्दृष्ट्वा,—
सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारक! मा रोदीस्तव ह्येष स्यमन्तकः॥
अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम्॥*॥

अथ पञ्चमी।

सा च चतुर्थीयुता ग्राह्या अत्र विद्धं न भोक्तव्यम्॥*॥

अथ षष्ठी।

सा सप्तमीयुता ग्राह्या। स्कन्दषष्ठी तु पञ्चमीयुता ग्राह्या अस्यां शिरोऽभ्यङ्गो निम्बभक्षणञ्च न कर्त्तव्यम्॥*॥

अथ सप्तमी।

सा षष्ठीयुता ग्राह्या तत्र तालं न भक्षयेत्। शुक्लपक्षस्य सप्तम्यां यदि रविवारो भवेत् सा विजया सप्तमी। माघमासस्य शुक्लसप्तम्यां दिवाकरो रथमापुः तस्मात् सा रथसप्तमी॥ सा मन्वादिश्च। तस्यां अध्ययनं न कर्त्तव्यम्॥*॥

अथाष्टमी।

सा शुक्ला नवमीयुता ग्राह्या कृष्णा सप्तमीयुता। तत्राध्ययनं नारिकेलभक्षणञ्च न कर्त्तव्यम्॥ शनिवारे अथवा मङ्गलवारे कृष्णाष्टमी पुण्यतरा। दन्तस्नातवारे शुक्लाष्टमी अक्षया। दूर्व्वाष्टमी पूर्व्वविद्धा ग्राह्या। जन्माष्टमीव्रतस्था तच्छब्दे द्रष्टव्या॥*॥

अथ नवमी।

सा चाष्टमीयुता ग्राह्या। तत्रालाबुभक्षणं न कर्त्तव्यम्। माघस्य शुक्ला नवमी महानन्दा। रामनवमीव्रतस्था तच्छब्दे द्रष्टव्या॥*॥

अथ दशमी।

सा च शुक्ला एकादश्या कृष्णा तु नवम्या युता ग्राह्या। अत्र कलम्बीभक्षणं न कर्त्तव्यम्॥*॥ एकादशीव्रतस्था श्रीविष्णोः शयनव्रतस्था च तत्तच्छब्दे द्रष्टव्या॥*॥ अथ द्वादशी।

सा च एकादशीयुता ग्राह्या। अत्र पूतिकाभक्षणं न कर्त्तव्यम्। फाल्गुनस्य शुक्ला द्वादशी पुष्यनक्षत्रयुक्ता चेत् गोविन्दद्वादशी॥*॥

अथ त्रयोदशी।

सा च शुक्ला द्वादशीयुता कृष्णा परयुता ग्राह्या। अत्र वार्त्ताकीभक्षणं न कर्त्तव्यम्॥*॥

अथ चतुर्दशी।

सा शुक्ला पूर्णिमायुता कृष्णा त्रयोदशीयुता ग्राह्या। तत्र माषो न भोक्तव्यः। ज्येष्ठकृष्णचतुर्दश्यां प्रदोषे सावित्रीव्रतं कर्त्तव्यम्। तत्र यदा त्रयोदशी दिवाभागे दण्डद्वयमात्रस्पर्शेऽपि चतुर्दशी भवेत् तर्हि व्रतं कर्त्तव्यम्। पूर्व्वाह्णे तद्विद्धत्वेऽपि पराह्णे त्रिसन्ध्यव्यापित्वे पराह्ण एव। यदा तु पूर्व्वापरयोर्न तथाविधा तदापि पराह्ण एव। भाद्रे माघि कृष्णा चतुर्दशी अघोरा। माघे कृष्णा चतुर्दशी रटन्ती। शिवरात्रिव्रतस्था तच्छब्दे द्रष्टव्या॥*॥

अथ पौर्णमासी।

तत्र मांसं न भोक्तव्यम्। सा च चतुर्दश्यायुता ग्राह्या। सा तु मासर्क्षयुता चेत् तदा महती। कार्त्तिकमासे कृत्तिकानक्षत्रयुता पौर्णमासी महाकार्त्तिकी एवमन्यत्रापि। महाज्येष्ठीव्रतस्था तच्छब्दे द्रष्टव्या। कोजागरव्रतस्था तच्छब्दे द्रष्टव्या॥*॥ अथामावस्या।

अत्र मांसं न भोक्तव्यम्। सा प्रतिपद्युता ग्राह्या। मङ्गलवारे यदि अमावस्या भवेत् तदा अरुणोदयमारभ्य मौनी भूत्वा यो गङ्गायां स्नायात् स सहस्रगोदानजन्यफलमाप्नुयात्। अमावस्याश्राद्धव्रतस्था श्राद्धशब्दे द्रष्टव्या। पौषमाघयोरमावास्या यदि दिवारविवारव्यतीपात-अवयनक्षत्रयुक्ता भवति तदा अर्द्धोदययोगः स्यात्। अयं कोटिसूर्य्यग्रहतुल्यः अत्र तावज्जलं गङ्गोदकतुल्यं यत्किञ्चिद्दानं सेतुसन्निभञ्च भवति। इति तिथ्यादितत्त्वम्। तिथिक्षयं मासशब्दे द्रष्टव्यम्॥

तिथिक्षयः, पुं, (तिथीनां तिथ्युपलक्षितचन्द्रकलानां क्षयो यत्र।) अमावस्या। इति शब्दार्थकल्पतरुः॥ दिनक्षयः। चान्द्रसूर्य्यः। यथा,—
"एकस्मिन् सावने लब्धे तिथीनां चितयं यदा।
तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम्॥"
अपिच।
"शतमिन्दुक्षये पुण्यं सहस्रन्तु दिनक्षये॥"
इति तिथ्यादितत्त्वम्॥

तिथिप्रणीः, पुं, (तिथिं प्रणयति ह्रासवृद्धिरूपकलाक्रिययेति। प्र+नी+क्विप् णत्वञ्च।) चन्द्रः। इति हेमचन्द्रः। ३। १८॥

तिथी, स्त्री, (तिथिः। ऋदिकारादिति वा ङीष्।) तिथिः। इति भरतः॥ (यथा, महाभारते। १३। ८७। १८।
"कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम्।
श्राद्धकर्म्मणि तिथ्यस्तु प्रशस्ता न तथेतराः॥")

तिनाग्रकः, पुं, (तिनिग्र एव। स्वार्थे कन्। पृषोदरादित्वात् आत्वम्।) तिनिग्रवृक्षः। इति शब्दरत्नावली॥

तिनिग्रः, पुं, (अतिग्रयेन नेग्रतीति। निग्र समाधौ+"इगुपधेति।" ३। १। १३५। इति कः। यद्वा, अतिक्रान्तो निग्राः अवयव इति समासः। पृषोदरादित्वात् साधुः।) वृक्षविशेषः। मथुरादौ तिनाग्र इति ख्यातः। कुचचित् सादन इति ख्यातश्च। तत्पर्य्यायः। स्यन्दनः २ नेमी ३ रथद्रुः ४ अतिसुरूकः ५ वङ्गुलः ६ चित्रकृत् ७। इत्यमरः। २।४।२६॥ चक्री ८ शताङ्गः ९ शकटः १० रथः ११ रथिकः १२ भस्मगर्भः १३ मेघी १४ जलधरः १५। (यथा, सुश्रुते चिकित्सितस्थाने। १६।
"शुल्लकोदरीविल्वपलाशप्रतिनिग्रत्वचः॥")
अस्य गुणाः। कषायत्वम्। उष्णत्वम्। कफरक्तातीसारवातामयनाशित्वम्। ग्राहकत्वम्। दाहजनकत्वञ्च। इति राजनिर्घण्टः॥

तिन्तिड़ः, पुं, (तिन्यते क्लिद्यते सुखाद्यनेनेति। तिम+ईकन्प्रत्ययेन तिन्तिड़ीकः। ततः पृषोदरादित्वात् साधुः।) दिक्षा। वृक्षाम्लः। इति विश्वः॥ देशभेदः। इति हेमचन्द्रः॥

तिन्तिड़िका, स्त्री, (तिन्तिड़ी+स्वार्थे कन्। टाप् पूर्व्वह्रस्वश्च।) तिन्तिड़ी। इति शब्दरत्नावली॥

तिन्तिड़ी, स्त्री, (तिन्यते क्लिद्यते सुखाभ्यन्तरमनेनेति। तिम+ईकन्प्रत्ययेन तिन्तिड़ीका। ततः पृषोदरादित्वात् साधुः।) वृक्षविशेषः। तेँतुल इति भाषा॥ तत्पर्य्यायः। चिञ्चा २ अम्लिका ३। इत्यमरः। २। ४। ४१॥ तिन्तिड़िकः ४ तिन्तिड़ीकम् ५ तिन्तिड़ीका ६ अम्लीका ७ आम्लिका ८ चाम्लीका ९। इति तट्टीका॥ तिन्तिली १० तिन्तिड़िका ११ आन्ध्रिका १२ पुक्कः १३ पुक्का १४ पुल्लिका १५ अम्बा १६ नाम्बा १७ सक्ता १८ सक्तिका १९ चारिचा २० गुडफला २१ चिञ्चिणा २२ यमदूतिका २३। इति शब्दरत्नावली॥ पूरक पुक्किका २४ सपुक्किका २५ सतिन्तिड़ा २६। अम्ला आमचक्षस गुणाः। अग्नित्वम्। कफपित्तकारित्वञ्च। इति राजनिर्घण्टः॥ वातनाशित्वम्। अम्लाः पक्वफलस्य गुणाः। रौक्षत्वम्। रुचिकारित्वम्। मेदित्वम्। उष्णत्वम्। क्रमवातानाशित्वञ्च। इति राजवल्लभः॥ विल्वनाशित्वम्। मधुराम्लत्वम्। पित्तदाहास-

कफदोषप्रकोपणत्वञ्च। पक्वचिञ्चाफलरसगुणाः। मधुराम्लत्वम्। रुचिप्रदत्वम्। श्लेष्मपाककरत्वम्। लेपे व्रणदोषनाशित्वञ्च॥ अस्याः पत्रस्य गुणाः। श्लेष्मरक्तदोषवातनाशित्वम्। अस्याः शुष्कत्वक्षारस्य गुणाः। मूलमन्दाग्निनाशित्वम्। इति राजनिर्घण्टः॥

"अम्लिकायाः फलं पक्वं महिषं वारिणा दृढम्।
शर्करामरिचोन्मिश्रं लवङ्गैस्सुवासितम्॥
अम्लिकाफलसम्भूतं पानकं वातनाशनम्।
पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधकम्॥"

इति भावप्रकाशः॥

वृक्षाम्लम्। इति विश्वः॥

तिन्तिड़ीकं, क्ली, (तिम्यते क्लिद्यते सुखं येन। तिम + "फलेरीकादयश्च।" उणा ४। २०। इति ईकन्प्रत्ययेन निपातनात् साधुः।) वृक्षाम्लम्। इत्यमरः। २। ६। ३५॥ (यथा, तन्त्रसारे पुरश्चरणप्रकरणे।

"रम्भाफलं तिन्तिड़ीकं कमला नागरङ्गकम्।
फलान्येतानि भोज्यानि एभ्योऽन्यानि विवर्जयेत्॥"

यथास्य पर्य्यायाः।

"वृक्षाम्लन्तिन्तिड़ीकञ्च युक्तं स्यादम्लवृक्षकम्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥

आमपक्वाम्लयोरस्य गुणा यथा,—

"वातापहं तिन्तिड़ीकमामं पित्तबलासकृत्।
याम्लुञ्चां दीपनं रुच्यं सम्यक् कफवातजित्॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

तिन्तिड़ीकः, पुं, (तिम + ईकन्। निपातनात् साधुः।) तिन्तिड़ी। इत्यमरटीकायां भरतः॥

तिन्तिड़ीद्रुतम्, क्ली, (तिन्तिड़ीभिस्तिन्तिड़ीजातैर्वा द्रव्यैर्यद्द्रुतम्।) चुक्चुरी। इति शब्दरत्नावली॥ काँइवौचिर खेला इति भाषा॥

तिन्तिलिका, स्त्री, (तिन्तिडिका। डस्य लत्वम्।) तिन्तिड़ी। इत्यमरटीका॥

तिन्तिली, स्त्री, (तिन्तिड़ी। डस्य लत्वम्।) तिन्तिड़ी। इति शब्दरत्नावली॥

तिन्तिलीका, स्त्री, (तिन्तिड़ीका। डस्य लत्वम्।) तिन्तिड़ी। इत्यमरटीका॥

तिन्दिशः, पुं, टिट्टिभवृक्षः। इति राजनिर्घण्टः॥

तिन्दुः, पुं, (तिम्यति आर्द्रीभवतीति। तिम आर्द्रीभावे + "रुगयादयश्च।" इति कुप्रत्ययेन साधुः।) तिन्दुकवृक्षः। इति शब्दरत्नावली॥

तिन्दुकं, क्ली, (तिन्दुरिव कायतीति। कै + कः।) कर्षपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, शार्ङ्गधरे पूर्ब्बखण्डे १ अध्याये।

"कोलद्वयञ्च कर्षः स्यात् स प्रोक्ता पाणिमालिका।
व्यक्षः पिक्षः पाणितलं किञ्चित्पाणिश्च तिन्दुकम्॥"

अस्याः पर्य्यायाः।

"विडालपदकञ्चैव कर्षे सुवर्णकञ्चापमेव च।
विडालपदकञ्चैव पिचुमन्दाभिधस्तथा॥
तिन्दुकश्च विजानीयात् कवड़ग्रहमेव च॥"

इति कल्पस्थाने द्वादशोऽध्याये चरकेणोक्तम्॥)

तिन्दुकः, पुं, क्ली, (तिन्दु + स्वार्थे संज्ञायां वा कन्।) वृक्षविशेषः। गाव् इति ख्यातः। इत्यमरटीकासारसुन्दरी॥ केन्दुकवृक्षः। इति भरतः॥ इति राजनिर्घण्टश्च। तेंदु इति भाषा॥ तत्पर्य्यायः। स्फूर्जकः २ कालस्कन्धः ३ श्रीतिसारकः ४। इत्यमरः। २। ४। ३८॥ स्फूर्जकः ५ केन्दुः ६ तिन्दुः ७ तिन्दुलः ८ तिन्दुकिः ९ तिन्दुकी १०। इति शब्दरत्नावली॥ नीलसारः ११ अतिसुक्तकः १२ स्वर्ण्यकः १३ रामठः १४ स्फूर्जनः १५ सन्दनाक्षयः १६ कालसारः १७। (यथा, महाभारते। ३। ६४। ३।

"शालवेणुधवाश्वत्थतिन्दुकेङ्गुदकिंशुकैः।
अर्जुनारिष्टसंकाशं स्यन्दनैश्च समाकुलैः॥")

अस्य आमफलस्य गुणाः। कषायत्वम्। गुरुत्वम्। वातकारित्वम्। शीतलत्वम्। लघुत्वञ्च। पक्वफलस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। दुर्जरत्वम्। श्लेष्मदत्वम्। गुरुत्वम्। व्रणवातनाशित्वम्। पित्तप्रमेहास्रकारित्वम्। विषदत्वञ्च। इति राजनिर्घण्टः॥ पित्तप्रमेहास्रश्लेष्मनाशित्वम्। इति भावप्रकाशः॥ तत्सारं चिररोगजित्॥ विश्वतिन्दुकमप्येवं विशेषात् स्याद्धि शीतलम्॥ इति राजनिर्घण्टः॥

तिन्दुकिः, स्त्री, (तिन्दुकी। निपातनात् ह्रस्वः।) तिन्दुकः। इति शब्दरत्नावली

तिन्दुकिनी, स्त्री, (तिन्दुकस्तदाकारः फलेऽस्यस्याः। तिन्दुक + इनि + ङीप्।) आवर्त्तकी। इति राजनिर्घण्टः॥

तिन्दुकी, स्त्री, (तिन्दुक + गौरादित्वात् ङीष्।) तिन्दुकः। इति शब्दरत्नावली॥ (यथा, सुश्रुते चिकित्सितस्थाने २ अध्याये।

"पियालवीजं तिन्दुकास्रुरुवाणि फलानि च।
यथालाभं समाहृत्य तैलमेभिर्विपाचयेत्।
सद्यो व्रणेषु देयानि तानि वैद्येन जानता॥"

अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम्।

"कालस्कन्दस्तिन्दुकश्च स्फूर्ज्जकस्तिन्दुकीति च॥")

तिन्दुलः, पुं, तिन्दुकवृक्षः। इति शब्दरत्नावली॥

तिप, ऊ क्षरणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-वेट्।) ऊ, तेपिष्यते तेप्साते। क्ष, अतितेपत्। ङ, तेपते तितिपे। द्युतृ क्षरणम्। इति दुर्गादासः॥

तिम, क्लेदने। आर्द्रीभाव इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।)

तिम, य क्लेदने। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्।) य, तिम्यति। तितेम। क्लेदनमार्द्रीभावः। इति दुर्गादासः॥

तिमिः, पुं, (तिम्यतीति। तिम क्लेदने + इन्। यद्वा, ताम्यति आकाङ्क्षतीति। तम काङ्क्षायाम् + "क्रमितमिग्रतिसम्भामत इच्।" उणा ४। १२१। इति इन् अकारस्य इकारादेश्च।) मत्स्यविशेषः। इत्यमरः। १। १०। १६॥ तिमिर्महाकायो मत्स्यः कश्चित् सामुद्रः। तथा च। अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तरः। इति भरतः॥ (यथा च रघौ। १३। १०।

"ससत्त्वमादाय नदीमुखाभ्र-
संभीलयन्तो विततानतत्वात्।
अमी शिरोभिस्तिमयः सरन्ध्रै-
रूर्द्धं वितन्वन्ति जलप्रवाहान्॥")

समुद्रः। इति चिकाण्डशेषः॥ (राजविशेषः। स तु दूर्व्वस्य पुत्रः। यथा, भागवते। ६। २२। ४२।

"नृपञ्जयस्ततो दूर्व्वस्तिमिस्तस्माच्चनिष्यति॥"

अयं हि नवमासाधिकसप्तचत्वारिंशत्वर्षं यावत् राज्यं पालयामास। यथा, राजावल्याम्। १ परिच्छेदे।

"तिमिं पुत्रं ततो राज्ये न्यस्य स्वर्गं स्वयं गतः।
मुनिवेदमितान् वर्षान्नवमासाधिकान् तिमिः॥
पालयित्वाखिलं राज्यं भुक्त्वा भोगमनुत्तमम्।
पुत्रं बृहद्रथं राज्ये सोऽभिषिच्य वनं ययौ॥")

तिमिकोषः, पुं, (तिमेः कोष इव।) समुद्रः। इति चिकाण्डशेषः॥

तिमिङ्गिलः, पुं, (तिमिं गिरतीति। गॄ + कः। रस्य लः। गिलेऽगिलस्येति सुम्।) मत्स्यविशेषः। इत्यमरः। १। १०। २०॥ (यथा, महाभारते। १। २२। ३।

"तिमिङ्गिलसमाकीर्णं मकरैराततं तथा॥"

द्वीपविशेषः। तद्दीपजाते, त्रि। यथा, महाभारते। २। ३२। ६६।

"तिमिङ्गिलञ्च स नृपं वशे कृत्वा महामतिः॥")

तिमिङ्गिलगिलः, पुं, (तिमिङ्गिलमपि गिरतीति। गॄ + कः। सुम् च।) महामत्स्यविशेषः। इति हेमचन्द्रः। ४। ४१४॥

तिमितः, त्रि, (तिम + कर्त्तरि क्तः।) स्निग्धः। इति धरणिः॥ (यथा, पञ्चदश्यौ। २। ५५।

"अतस्तिमितगम्भीरं न तेजो न तमस्ततम्॥")

क्लिन्नः। इत्यमरः। ३। १। १०५॥

तिमिरं, क्ली, (तिम्यतीति। तिम + "इषिमदिसदीति।" उणा। १। ५२। इति किरच्।) अन्धकारः। इत्यमरः। १। १०। ३॥ (यथा, रामायणे। २। २८। १८।

"अतीववातस्तिमिरं बुभुक्षा चास्ति नित्यशः।
भयानि च महान्त्यत्र अतो दुःखतरं वनम्॥")

नेत्ररोगविशेषः। तस्य लक्षणमाह माधवकरः।

"तिमिराख्यः स वै दोषश्चतुर्थं पटलं गतः।
रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाशमतः परम्॥"

(अस्य लक्षणानि यथा,—

"दोषे मण्डलसंस्थाने मण्डलानीव पश्यति।
द्वित्रैकं दृष्टिमध्यस्थे बहुधा बहुधास्थिते॥
दृष्टेरभ्यन्तरगते ह्रस्वदृङ्विषयभ्रमम्।
नात्यिकस्यमधःसंस्थे दूरगं नोपरिस्थितम्॥
पार्श्वे पश्येन्न पार्श्वस्थे तिमिराख्योऽयमामयः।
प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते॥
तेनोर्द्धमीक्षते नाधस्तनुचेलाद्रुतोपमम्।

यथा वर्णश्च रक्ष्येत दृष्टिर्हीयेत च क्रमात् ॥
तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः ।
लिङ्गनाशं मलः कुर्वन् क्षादयेद्दृष्टिमण्डलम् ॥
तत्र वातेन तिमिरे चाविद्धमिव पश्यति ।
चलाविलारुणाभासं प्रसन्नश्चेक्षते मुहुः ॥
जालानि केशान् मशकान् रश्मींश्चोपेक्षिते
च च ।
काचीभूते दृगरुजा पश्यत्यास्यमनासिकम् ॥
चन्द्रदीपाद्यनेकत्वं वक्रत्वञ्चापि मन्यते ।
वृद्धः काचो दृशं कुर्याद्रजोधूमाहतामिव ॥
सधारुणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनाम् ।
श्लिङ्गनाशो घाते तु सङ्कोचयति दक्पिराः ॥
दृङ्मण्डलं विशत्यन्तर्गम्भीराद्गम्भसौ स्रुता ।
पित्तजे तिमिरे विद्युत् खद्योतद्योतदीपितम् ॥
ग्रिखितित्तिरिपिच्छाभं प्रायो नीलञ्च पश्यति ।
काचे दकाचनीलाभा ताद्दगेव च पश्यति ॥
अर्केन्दुपरिवेषाग्निमरीचीन्द्रधनूंषि च ।
भङ्गनीला निरालोका दक्क्लिन्ना लिङ्गनाशतः ॥
दृष्टिः पित्तेन दृक्ताख्या सा दृक्ता दृक्तदर्शना ।
भवेत् पित्तविदग्धाख्या पीता पीताभदर्शना ॥
कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति ।
ग्रन्थेन्दुकुन्दकुसुमैः कुसुदैरिव चाचितम् ॥
काचे तु निष्पभेन्दर्कं प्रदीपाद्यैरिवाचितम् ।
सिताभा सा च दृष्टिः स्याल्लिङ्गनाशे तु लक्ष्यते ॥
सूत्रं कफो दृष्टिगतः स्निग्धो दर्शननाशनः ।
विन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः ॥
उष्णे सङ्कोचमायाति क्षायायां परिसर्पति ।
ग्रन्थकुन्देन्दुकुसुदस्फटिकोपमशुक्लिमा ॥
रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति ।
काचेन रक्ता क्षया वा दृष्टिस्ताद्दक् च पश्यति ॥
लिङ्गनाशेऽपि ताद्दक्तदृङ्निष्प्रभा हतदर्शना ।
संसर्गसन्निपातेषु विद्यात् सङ्कीर्णलक्षणान् ॥
तिमिरादीनकस्माच्च तैः स्याद्व्यक्ताकुलेक्षणम् ।
तिमिरे श्लेष्मयोर्दृष्टौ चित्रो रागः प्रजायते ॥"
इति वाभटोत्तरस्थाने द्वादशेऽध्याये उक्तम् ॥
अस्य चिकित्सा यथा,—
"तिमिरं काचतां याति काचोऽप्यन्धा-
सुपेक्षया ।
नेत्ररोगेष्वतो घोरं तिमिरं साधयेद्दृढम् ॥
तुलां पचेत जीवन्त्या द्रोणेऽपां पादशेषिते ।
तत्काथे द्विगुणं क्षीरं घृतप्रस्थं विपाचयेत् ॥
प्रपौण्डरीककाकोली पिप्पली लोध्रसैन्धवैः ।
घृताक्षा मधुकद्राक्षा सितादारुफलत्वचैः ॥
कार्षिकैर्नेत्रि तत् पीतं तिमिरापहरं परम् ॥"
"पटोलनिम्बकटुका दार्वीसेव्यवराष्टयम् ।
सधन्वयासत्रायन्ती पर्पटं पालिकं पृथक् ॥
प्रस्थमामलकानाञ्च क्वाथयेन्नस्यगेऽम्भसि ।
तदाढ्यैर्द्विपलिकैः पिष्टैः प्रस्थं घृतात् पचेत् ॥
सुस्तभूनिम्बषड्ग्रन्थकुटजोदीच्यचन्दनैः ।
सपिप्पलीकैस्तत्सर्पिर्नाणकर्णाक्षरोगजित् ॥
विद्रधिज्वरदुष्टारुर्विसर्पापचिकुष्ठजुत् ।
विशेषाच्छुक्लतिमिरनक्तान्ध्योष्णाब्दाहजुत् ॥"
"चिंशद्भागा भुजङ्गस्य गन्धपाषाणपञ्चकम् ।
शुल्वतालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनात्रयम् ॥
अन्यन्मधूकृतं भ्रातं पक्वं विमलमञ्जनम् ।
तिमिरान्तकरं लोके द्वितीय इव भास्करः ॥
गोमूत्रे क्रुगलरसैरञ्जकाक्षिके च
स्त्रीस्तन्ये हविषि विषे च माक्षिके च ।
यत्तुल्यं ज्वलितमनेकशो निषिक्तं
सत्कुर्य्यात् गरुड़समं नरस्य चक्षुः ॥"
"रसेन्द्रभुजगौ तुल्यौ तयोस्तुल्यभयाञ्जनम् ।
ईषत् कर्पूरसंयुक्तमञ्जनं नयनाप्तम ॥"
"सामान्यं साधनमिदं प्रतिदोषमतः शृणु ।
वातजे तिमिरे तत्र दध्नमूलाम्भसा घृतम् ॥
क्षीरे चतुर्गुणे श्रेष्ठाकल्कपक्वं पिबेत्ततः ॥"
"पित्तजे तिमिरे सर्पिर्जीवनीयफलत्रयैः ।
विपाचितं पाययित्वा स्निग्धस्य वधयेच्छिराम् ॥
श्लेष्मोद्भवेऽस्तताक्षीवरकाक्षद्वतं घृतम् ।
विध्येच्छिरां पीतवतो दद्याच्चानुविरेचनम् ॥"
"रक्तजे पित्तवत्सिद्धिः प्रीतैस्तस्यं प्रसादयेत् ।"
"दध्याद्यैरनिर्यूहचूर्णितं कणसैन्धवम् ॥
तत् घृतं सघृतं भूयः पचेत् क्षौद्रं घने पिबेत् ।
घृते चास्मिन् हितमिदं सर्वजे तिमिरेऽञ्जनम् ॥"
"चक्षूरक्षार्थं सर्वकालं मनुष्यै-
र्यत्नः कर्त्तव्यो जीविते यावदिच्छा ।
यस्मात् लोकोऽयं तुल्यरात्रिन्दिवानां
पुंसामन्धानां विद्यमानेऽपि वित्ते ॥"
इति श्रीमत्तरस्थाने त्रयोदशेऽध्याये वाभटे-
नोक्तम् ॥
"सौवीरमञ्जनन्तुत्थन्ताप्यो धातुर्मनःशिला ।
चक्षुष्यं मधुकं लोध्रा मधुयः पौष्पमञ्जनम् ॥
सैन्धवं शौकरीदंष्ट्रा कतकक्षाञ्जनं शुभम् ।
तिमिरादिषु चूर्णं वा वर्त्तिर्व्वेद्यमयुक्तमा ॥"
"वदने क्षयासर्पस्य निहितं मासमञ्जनम् ।
ततस्तस्मात् समुद्धृत्य सशुष्कं चूर्णयेद्बुधः ॥
सुमनःचारकैः शुष्कैरर्द्धांशैः सैन्धवेन च ।
एतन्नित्याञ्जनं कार्यं तिमिरघ्नमयुक्तमम् ॥"
इति चरके चिकित्सास्थाने २६ अध्याये ॥)

तिमिरः, पुं, (तिम्यति क्लिद्यति चक्षुरनेन । तिम + "इषिमदिसदीति ।"उणा ।१।५२। इति किरच् ।) चक्षूरोगविशेषः । तस्य निदानादि यथा । चतुर्थपटलगतदोषमाह ।
"तिमिराख्यः स यो दोषश्चतुर्थपटलं गतः ।
यस्माद्धि सर्व्वतो दृष्टिं लिङ्गनाश इति क्वचित् ॥
अस्मिन्नपि तमोभूते नातिरूढ़े महागदे ।
चन्द्रादित्यौ स नक्षत्राण्यभ्रारीचे च विद्युतः ॥
निर्म्मलानि च तेजांसि भास्वराणि च पश्यति ।
स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः ॥
यो दोषः दोषोऽथ रोगः चतुर्थपटलं बाह्य-
पटलं गतः स तिमिराख्यः । तिमिरदर्शनेन तिमिरमस्यास्तीति तिमिरः अर्श आदित्वात् । तस्य लक्षणमाह रुग्वर्ज्जीत्यादि । स तिमिराख्यः । सर्व्वतः सर्व्वत्र । लिङ्गनाश इति क्वचित् तन्त्रान्तरे लिङ्गनाशसंज्ञः । तस्य निरुक्तिश्च । लिङ्गयते चिह्नयते अनेनेति लिङ्गं दृष्टितेजः तस्य नाशोऽस्मिन् इति लिङ्गनाशः । अस्मिन्नपि तिमिरेऽपि तमोभूते तमस्तुल्ये । अत्र तु भूतशब्दस्तुल्यार्थः । भूतं प्राप्नोतीते समे चिथित्यमरवचनात् । नातिरूढ़े अप्रौढ़े । चन्द्रादित्यौ नक्षत्राणि च पश्यति । अन्तरौचे अन्तरीक्षस्य प्रकाशमयत्वेन तमोऽभिभावात् । तेजांसि अम्भादेः । भास्वराणि रत्नसुवर्णादीनि । अस्मिन् प्रौढ़े नीरजे च चन्द्रादित्यादीन्न पश्यतीत्यन्वयः । नीलिकाकाचसंज्ञितः नीलिकाकाचेति नामान्तराभ्यां युक्तः ॥ * ॥
दृष्टिरोगाणां सङ्ख्यानामानि चाह ।
दृष्ट्याश्रया षट् च षड़ेव रोगाः
षड्लिङ्गनाशा हि भवन्ति तत्र ।
वातेन पित्तेन कफेन सर्व्वै-
रक्तात् परिस्राव्य विधिञ्च षष्ठः ॥
दृष्ट्याश्रया षट् च षड़ेव रोगाः षट् षट् द्वादशेत्यर्थः । तत्र लिङ्गनाशाः षट् तान् विशेषेति वातेनेत्यादि । * ॥
तथा नरः पित्तविदग्धदृष्टिः
कफेन चान्यश्च धूमदर्शी ।
यो दृक्तनाशो नकुलान्धसंज्ञो
गम्भीरसंज्ञा च तथैव दृष्टिः ॥
पित्तविदग्धदृष्ट्यादयः षट् । एवं दृष्ट्यादयश्च षट् । एवं दृष्ट्याश्रया द्वादशरोगाः ॥ * ॥
तत्र द्वावन्यौ चाह ।
तत्रैवान्यौ गदौ वह्नौ सनिमित्तानिमित्तकौ ॥
तेषु वातजस्य लिङ्गनाशस्य लक्षणमाह ।
वातेन खलु रूपाणि भ्रमन्तीव च पश्यति ।
आविलान्यरुणाभानि आविद्धानीव मानवः ॥
आविलानि कलुषाणि । अरुणानि अव्यक्तलौहित्ययुक्तानि । आविद्धानीव कुटिलानीव ॥ *
पैत्तिकमाह ।
पित्तेनादित्यखद्योतशक्रचापतड़िद्द्युतान्
दृश्यतश्चैव स्निग्धिनः सर्व्वं नीलञ्च पश्यति ॥
आदित्यादीनां गुणान् रूपाणि ॥ * ॥
श्लैष्मिकमाह ।
कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च ।
सलिलप्लावितानीव जालकर्णीव मानवः ॥ *॥
सन्निपातजमाह ।
सन्निपातेन चित्राणि विपरीतानि पश्यति ।
बहुधापि द्विधा वापि सर्व्वाण्येव समश्नुतः ॥
हीनाधिका स्यान्यथा वा व्योमीत्यपि च
पश्यति ॥
चित्राणि नानावर्णानि । विपरीतानि वैपरीत्यं विवृणोति बहुधेत्यादि ॥ * ॥
रक्तजमाह ।
पश्येद्रक्तेन रक्तानि तमांसि विविधानि च ।
हरितान्यथ क्षाणानि पीतान्यपि च मानवः ॥ *॥
परिस्रावणमाह ।
रक्तेन मूर्च्छितं पित्तं परिस्रावयेन्नमाचरेत् ।
तेन पीता दिशः पश्येदुद्यन्तमिव भास्करम् ॥

विकीर्यमाणान् खद्योतैर्वृश्चिकैर्जोषि चैव हि ॥
विकीर्यमाणान् व्याप्यमानान् अम्भादिभिरिव ॥
वातादिजनितैर्नैकवर्णैरपि स षड्विधः ।
लिङ्गनाशो निगदितो वर्णो वातादितो यथा ॥
रागारुणो मारुततः प्रदिष्टो
न्यायी च नीलश्च तथैव पित्तात् ।
कफात् सितः श्लोणिततः सरक्तः
समस्तदोषप्रभवो विचित्रः ॥ * ॥
वातादिना हेतुभूतेन जनिते नेत्रविषये मण्डले रूपविशेषमाह ।
अरुणं मण्डलं वाताच्चलं परुषं तथा ।
पित्ततो मण्डलं नीलं कांस्याभं वा सपीतकम् ॥
श्वेतं पीतं वा कथमेतत् व्याधिप्रभावात् ॥
श्लेष्मणा बहलं स्निग्धं शुक्लकुन्देन्दुपाण्डुरम् ।
चलत्पद्मपलाशस्थशुक्लो बिन्दुरिवाम्भसः ।
स्तब्धमाने तु नयने मण्डलं तद्विसर्पति ॥
बहलं स्थूलम् ।
मण्डलं तु भवेच्चित्रं लिङ्गनाशे त्रिदोषजे ।
प्रवालपद्मपत्राभं मण्डलं श्लोणितात्मकम् ॥
चित्रं वातादिवर्णम् ।
रक्तजं मण्डलं दृष्टौ स्थूलकाचारुणप्रभम् ।
परिम्लायिनि रोगे स्यात् म्लानं नीलमथापि वा ॥
दोषचयात् स्वयं तच्च कदाचित् स्यात्तु दर्शनम् ॥
रक्तजं पित्तानुगामिरक्तजम् । स्थूलकाचारुण-
प्रभं स्थूलकाचस्येवारुणा प्रभा यस्य तत् । एतेन
स्थौल्यमरुणत्वञ्च बोध्यते । दोषचयादित्यादि ।
तच्च परिम्लायिनि कालान्तरेण दोषचयात्
कदाचित् स्वयमेव दर्शनं स्यात् ॥ * ॥ अनुक्त-
व्यधादाहगौरवादिदोषलिङ्ग-संग्रहणार्थमाह ।
यथास्वं दोषलिङ्गानि सर्व्वेष्वेव भवन्ति हि ॥*॥
पित्तविदग्धदृष्टेर्लक्षणमाह ।
पित्तेन दुष्टेन गतेन दृष्टिं
पीता भवेद्यस्य नरस्य दृष्टिः ।
पीतानि रूपाणि च तेन पश्येत्
सर्व्वो नरः पित्तविदग्धदृष्टिः ॥
पित्तेन गतेन दृष्टिं दृष्टावपि प्रथमद्वितीये
पटले गतेनेति बोद्धव्यम् । तेन व्याधिना ॥ * ॥
तस्मिन्नेव पित्ते दृष्टौ तृतीयं पटलं गते रूप-
विशेषमाह ।
प्राप्ते तृतीयं पटलं तु दोषे
दिवा न पश्येन्निशि वीक्षते सः ।
रात्रौ स पीतानुगृहीतदृष्टिः
पित्तात्ययभावात् सकलानि पश्येत् ॥
दोषेऽत्र पित्ते ॥ * ॥ अथ श्लेष्मविदग्धदृष्टि-
लक्षणमाह ।
तथा नरः श्लेष्मविदग्धदृष्टि-
स्तान्येव शुक्लानि हि मन्यते तु ।
अत्रापि श्लेष्मणोदृष्टौ प्रथमद्वितीयपटलगतस्ये-
तल्लिङ्गं बोद्धव्यम् ॥ * ॥ स एव श्लेष्मा दृष्टौ
पटलत्रयं गतो नक्तान्धं करोतीत्याह ।
त्रिषु स्थितो यः पटलेषु दोषो
नक्तान्ध्यमापादयति प्रसह्य ।
दिवा स सूर्य्यानुगृहीतदृष्टिः
पश्येत्तु रूपाणि कफात्ययभावात् ॥
दोषोऽत्र कफस्तस्योपक्रान्तत्वात् । नक्तान्धस्य
श्लेष्मविदग्धदृष्टावन्तर्भूतत्वाच्च पृथग्गणना ॥*॥
धूमदर्शिनमाह ।
शोकज्वराया: सशिरोऽभितापै-
रथाहता यस्य नरस्य दृष्टिः ।
धूम्रांस्तु यः पश्यति सर्व्वभावात्
स धूमदर्शीति नरः प्रदिष्टः ॥
शिरोऽभितापः शिरसि घर्म्मादिना सन्तापः ।
एतस्य पित्तदोषो बोद्धव्यः ॥ * ॥
दृखजात्यमाह ।
यो वासरे पश्यति कष्टतोऽथ
रूपं महच्चापि निरीक्षतेऽल्पम् ।
रात्रौ पुनर्यः प्रकृतानि पश्येत्
स दृखजात्यो मुनिभिः प्रदिष्टः ॥ * ॥
नकुलान्ध्यमाह ।
विद्योतते यस्य नरस्य दृष्टि-
र्दीर्घाभिपन्ना नकुलस्य यद्वत् ।
चित्राणि रूपाणि दिवा स पश्येत्
स वै विकारो नकुलान्ध्यसंज्ञः ॥ * ॥
गम्भीरकमाह ।
दृष्टिर्विरूपा श्वसनोपदृष्टा
सङ्कुच्य याभ्यन्तरतः प्रयाति ।
रुजावगाढ़ा च तमश्चिरोगं
गम्भीरकेति प्रवदन्ति तज्ज्ञाः ॥
विरूपा विकृता । श्वसनोपदृष्टा वातोपहता ।
रुजावगाढ़ा गम्भीरवेदनान्विता ॥ * ॥
वाह्यौ पुनर्द्वावपि संप्रदिष्टौ
निमित्ततश्चाप्यनिमित्ततश्च ।
निमित्ततस्तस्य शिरोऽभितापात्
स्नेह्यस्राभिष्यन्दनिदर्शनैः सः ॥
वाह्यौ सुश्रुतोक्तद्वादशसंख्येभ्योऽधिकौ तत्र
निमित्तत आह शिरोऽभितापात् शिरोऽभि-
ताप्यते येन विषकुसुमगन्धवहपवनसर्शेन स
शिरोऽभितापस्तस्मात् । अभिष्यन्दनिदर्शनैः
रक्ताभिष्यन्दलिङ्गैरिति गदाधरः । सन्निपाता-
भिष्यन्दलिङ्गैरिति कार्त्तिकः ॥ * ॥
अनिमित्तत आह ।
सुरर्षिगन्धर्व्वमहोरगाणां
सन्दर्शनेनापि च भास्करस्य ।
हन्येत दृष्टिर्भुजगस्य तस्य
स लिङ्गनाशस्त्वनिमित्तसंज्ञः ॥
अनुपलभ्यमानानां सुरादीनां दर्शननिमित्त-
मप्यनिमित्तं मन्यते ॥ * ॥
अनिमित्ततो लिङ्गनाशस्य लक्षणमाह ।
तत्राक्षिविस्रंसमिवावभाति
वैदूर्य्यवर्णा विमला च दृष्टिः ।
विस्रंसं ज्योतिर्युक्तम् । वैदूर्य्यवर्णा श्यामा
विमला निर्म्मला । इति दृष्टिरोगाः ॥ * ॥
अथ तिमिरचिकित्सा ।
"शुक्ला पाण्डितलं दृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥*॥
गृध्रनाभिर्विभीतस्य पथ्यामञ्जा मनःशिला ।
पिप्पली मरिचं कुष्ठं वचा चेति समांशकम् ॥
छागीक्षीरेण संपिष्य वटीं कुर्य्यादृयोन्मिताम् ।
हरेणुमात्रां संघृष्य जलेनाञ्जनमाचरेत् ॥
तिमिरं मांसदृद्धिञ्च काचं पटलमर्ब्बुदम् ।
रात्र्यन्धं वार्षिकं पुष्पं वटी चन्द्रोदया हरेत् ॥"
इति चन्द्रोदया वटी ॥ * ॥
कणा सलवणोषणा सहरसाञ्जना साञ्जना
सरित्पतिकफः सिता सितपुनर्नवा सम्भवा ।
रजन्यरुणचन्दनं मधु च तुल्यपथ्याशिला
अरिष्टदलसारवरस्फुटिकगृध्रनाभीन्दवः ॥
इमानि तु विचूर्णयेन्निविड़वाससा श्लोधये-
त्तथायसि विमर्द्दयेत् समधृतास्रखर्ज्जेन तत् ।
इदं मुनिभिरीरितं नयनश्लोषनामाञ्जनं
करोति तिमिरत्रयं पटलपुष्पनाशं बलात् ॥
लवणं सैन्धवम् । अञ्जनं सुरमा इति लोके ।
सरित्पतिकफः समुद्रफेनः । शिला मनःशिला ।
सारवो लोध्रः । स्फुटिका: फट्कारी । इन्दुः
कर्पूरः । नयनश्लोषं तिमिरे नूतनकुसुमे नूतन-
पटले च ॥ * ॥
हरीतकी वचा कुष्ठं पिप्पली मरिचानि च ।
विभीतकस्य मञ्जा च गृध्रनाभिर्म्मनःशिला ॥
सर्व्वमेतत् समं कृत्वा गव्यक्षीरेण पेषयेत् ।
नाशयेत्तिमिरं कृष्णं पटलाख्यर्ब्बुदानि च ॥
अपि चैवार्षिकं शुक्लं मासेनैकेन नाशयेत् ।
अधिकानि च मांसानि रात्रान्धत्वमेव च ॥
चन्द्रोदया वटी पुष्पे तिमिरे च ॥ * ॥
रजनी निम्बपत्राणि पिप्पली मरिचानि च ।
विड़ङ्गं भद्रमुस्तञ्च सप्तमी त्वभया स्मृता ॥
एषामञ्जेन संपिष्य छायायां श्लोषयेद्वटीम् ।
वारिणा तिमिरं हन्ति गोमूत्रेण तु पिष्टिकाम् ॥
मधुना पटलं हन्ति नारीक्षीरेण पुष्पकम् ।
एषा चन्द्रप्रभावर्त्तिः स्वयं रुद्रेण निर्म्मिता ॥
इति चन्द्रप्रभावर्त्तिः ॥ * ॥
कणा छागयकृन्मध्ये पक्वा तद्रसपेषिता ।
अचिराद्धन्ति नक्तान्ध्यं तद्वत् सक्षौद्रनूपयम् ॥
त्रिफलाया रसं प्रस्थं प्रस्थं भृङ्गरजस्य च ।
दृषस्य च रसं प्रस्थं घृतावर्य्याश्च तत्समम् ॥
गुड़ूच्या आमलक्याश्च रसं छागीपयस्तथा ।
प्रस्थं प्रस्थं समाहृत्य सर्व्वैरेभिर्घृतं पचेत् ॥
कल्कः कणा सिता द्राक्षा त्रिफला नीलसूत-
पलम् ।
मधुकं क्षीरकाकोली मधुपर्णी निदिग्धिका ॥
तत्साधुसिद्धं विज्ञाय शुभे भाण्डे निधापयेत् ।
ऊर्द्धं पानमधःपानं मध्ये पानं प्रशस्यते ॥
यावन्तो नेत्रजा रोगास्तान् पानादपकर्षति ।
सुरक्तं रक्तदृष्टे च रक्ते वा विस्रुते तथा ॥
नक्तान्धे तिमिरे काचे नीलिका पटलार्ब्बुदे ।
अभिष्यन्देऽधिमन्थे च यच्चकोपे सुदारुणे ॥
नेत्ररोगेषु सर्व्वेषु दोषत्रयकृतेष्वपि ।
परं हितमिदं प्रोक्तं त्रिफलाद्यं महाघृतम् ॥

भृङ्गराज: भृङ्गराज: भङ्गरा इति लोके ।
क्षीरकाकोल्या अलाभे अश्वगन्धामूलं ग्राह्यम् ॥
मधुपर्ण्यश्च जलजं यष्टीमधु च चक्षुष्यत्वात् । तदलाभे सामान्यं यष्टीमधु ग्राह्यं तूल्यगुणत्वात् ॥
त्रिफलाद्यं घृतम् ॥ * ॥
शतमेकं हरीतक्या द्विगुणश्च विभीतकम् ।
चतुर्गुणं त्वामलकं वृषमार्कवयो: समम् ॥
चतुर्गुणोदकं दत्त्वा घृतेभ्यंदग्निना पचेत् ।
भागं चतुर्थं संरक्ष्य क्वाथं तमवतारयेत् ॥
शर्करा मधुकं द्राक्षा मधुयष्टिर्न्निदिग्धिका ।
काकोली क्षीरकाकोली त्रिफला नागकेशरम् ॥
पिप्पली चन्दनं सुक्ष्मं क्वाथमाणामथोत्पलम् ।
घृतप्रस्थसमं क्षीरं कल्कैरेतै: घृतं पचेत् ॥
हन्यात् सतिमिरं कासं वक्त्रान्मं शुक्रमेव च ।
तथा स्रावञ्च कण्डूञ्च व्रयथुञ्च कषायताम् ॥
कलुषत्वञ्च नेत्रस्य विधर्म्मोपटलान्वितम् ।
बहुनात्र किमुक्तेन सर्व्वान् नेत्रामयान् हरेत् ॥
यस्य चोपहता दृष्टि: सूर्य्याग्निभ्यां प्रपश्यत: ।
तस्येतद्भेषजं प्रोक्तं मुनिभि: परमं हितम् ॥
मार्ज्जितं दर्पणं यद्वत् परां निर्म्मलतां व्रजेत् ।
तद्दृष्टेन पीतेन नेत्रं निर्म्मलतामियात् ॥
वारिद्रोणदयं चात्र वृषमार्कवयोस्तुले ।
काकोलीयुगलालाभे अश्वगन्धामूलं ग्राह्यम् ॥
द्वितीयं त्रिफलाद्यं घृतम् ॥ * ॥
वासाविश्वाम्बुदाद्यैरक्तचन्दनचित्रकै: ।
भूनिम्बनिम्बकटुकापटोलत्रिफलामुदै: ॥
निशाकलिङ्गकुटजै: क्वाथ: सर्व्वाक्षिरोगहा ।
वैशद्यं प्रीनसं श्वासं कासं नाशयति ध्रुवम् ॥
वासादिक्वाथ: ।

इति नेत्ररोगाधिकार:।" इति भावप्रकाश: ॥*॥
किञ्च । गारुडे १६८ अध्याये ।
"कतकस्य फलं शुष्कं सैन्धवं चूर्णयेत् समम् ।
पेनो रसाञ्जनं चौद्रं विड्ङ्गानि मन:शिला ॥
एषां वर्त्तिर्हरन्ति कासं तिमिरं पटलं तथा ॥"

तिमिररिपु:, पुं, (तिमिरस्य अन्धकारस्य रिपु: ।) सूर्य्य: । इति हलायुध: ॥
तिमिष:, पुं, याम्यकर्कटी । इति त्रिकाण्डशेष: ॥ नाटाम्ब: । इति हारावली । १२६ ॥
तिमी:, पुं, (तिमि: एषोदरादित्वात् साधु: ।) तिमिमत्स्य: । इति हिरूपकोष: ॥ (तिमि+वा ङीष् । तिमिजातित्वात् । इति केचित् ॥)
तिर:, [स्] अ, (तरति डलिपथमिति । तॄ+"सर्व्वधातुभ्योऽसुन् ।" उणा । ४ । १८८ । इति असुन् । छन्दिदपवादविषयेऽप्युतसर्गोऽभिनिविशते इति गुणविषये इर् ।) अन्तर्द्धानम् । (यथा, भागवते । २ । ६ । ४१ ।
"यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम् ॥")
तिर्य्यगर्थ: । इत्यमर: । ३ । ४ । २२५ ॥ तिरस्कार: । इति तट्टीकायां स्वामी ॥
तिरश्ची, स्त्री, (तिर्य्यक्जाति: स्त्रियां ङीष् ।) पशुपक्ष्यादीनां स्त्री । इति मुग्धबोधम् । मादी इति भाषा ॥
तिरस्करिणी, स्त्री, (तिरोऽन्तर्धानं करोतीति । तिरस्+कृ+"नन्दिग्रहीति ।" ३ । १ । १३४ । इति ल्युनि: । संज्ञापूर्व्वकविधेरनित्यत्वात् वृद्ध्यभाव: । ततो ङीप् ।) व्यवधायकपट: । इत्यमर: । २ । ६ । १२० ॥ कानात् इति भाषा ॥ (यथा, कुमारे । १ । १४ ।
"यत्रांशुकाक्षेपविलज्जितानां
यदृच्छया किम्पुरुषाङ्गनानाम् ।
दरीगृहद्वारविलम्बिबिम्बा-
स्तिरस्करिण्यो जलदा भवन्ति ॥")
तिरस्कार:, पुं, (तिरस्+कृ+घञ् ।) अनादर: । इति हलायुध: ॥ (यथा, पद्मपुराणे । ७ । ८ ।
"अहंग्रहस्य तिरस्कारात् अधिष्ठानप्रधानता ।
यदा तदा चिदात्माहमसङ्गोऽस्मीति बुध्यते ॥")
तिरस्कारिणी, स्त्री, (तिरोऽन्तर्धानं करोतीति । तिरस्+कृ+णिनि: ङीप् ।) तिरस्करिणी । इत्यमरटीकायां नीलकण्ठ: ॥
तिरस्कृत:, त्रि, (तिरस्+कृ+क्त: ।) अनादृत: । कृततिरस्कार: । यथा,—
"अविवक्षितवाच्यो यत्तत्र वाच्यं भवेद्ध्वनौ ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ॥"
इति भावप्रकाश: ॥
(तन्त्रसारोक्तमन्त्रविशेषे, पुं । यथा,—
"यस्य मध्ये हकारोऽस्ति कवर्गं भूर्द्वनि द्विधा ।
अर्द्धं तिष्ठति मन्त्र: स तिरस्कृत उदीर्य्यते ॥")
तिरस्क्रिया, स्त्री, (तिरस्करणमिति । "क्रञ: ष्ण च ।" ३ । ३ । १०० । इति भावे ष्ण: ।) अनादर: । तिरस्कार: । इत्यमर: । १ । ७ । २२ ॥ (यथा, माघे । १ । ३६ ।
"हरे ! हिरण्याक्षपुर:सरासुर-
द्विषद्विष: प्रत्युत सा तिरस्क्रिया ॥")
तिरिटि:, पुं, इक्षुयन्थि: । इति शब्दमाला ॥
तिरिम:, पुं, शालिभेद: । इति राजनिर्घण्टु: ॥
तिरिय:, पुं, शालिविशेष: । अस्य गुणा: । मधुरत्वम् । स्निग्धत्वम् । शीतलत्वम् । दाहपित्तसर्व्वामयनाशित्वम् । त्रिदोषशमनत्वम् । रुच्यत्वम् । पथ्यत्वञ्च । इति राजनिर्घण्टु: ॥
तिरीटं, क्ली, (तीर्य्यते शिरोविपदोऽनेनेति । तॄ+"कृतॄभ्यि: कीटन् ।" उणा । ४ । १८४ । इति कीटन् ।) किरीटम् । इत्युणादिकोष: ॥
तिरीट:, पुं, (तॄ+कीटन् ।) लोध्र: । इत्यमर: । २ । ४ । ३३ ॥ (यथा, भावप्रकाशे अर्शोरोगाधिकारे ।
"समङ्गोत्पलमोचाम्रतिरीटतिलचन्दनै: ॥")
तिरोधानं, क्ली, (तिरस्+धा+भावे ल्युट् ।) अन्तर्धानम् । इत्यमर: । १ । ३ । १३ ॥ (यथा, भागवते । ३ । २१ । ४४ ।
"सिद्धान् विद्याधरांश्चैव तिरोधानेन सोऽहनत् ॥")
तिरोहित:, त्रि, (तिरस्+धा+क्त: ।) अन्तर्हित: । (यथा, मार्कण्डेये । ३६ । २४ ।
"अतीतानागतानर्थान् विप्रलब्धतिरोहितान् ॥")
आच्छादित: । इत्यमर: । २ । ८ । ११२ ॥
तिर्य्यक्, [च्] अ, वक्रम् । तत्पर्य्याय: । साचि २ तिर: ३ । इत्यमर: । ३ । १ । ३४ । (यथा, रामायणे । २ । २३ । ४ ।
"तिर्य्यग्गूर्द्धं शरीरे च पातयित्वा शिरोधराम् ॥")
तिरोऽर्थ: । निरुक्तार्थ: । इति शब्दरत्नावली ॥
तिर्य्यक्स्रोता:, [स्] पुं, (तिर्य्यक् वक्रं स्रोत आहारसञ्चारो यस्य । भुक्तान्नस्य तिर्य्यक्तया उदरे सञ्चारादस्य तथात्वम् ।) पशुपक्ष्यादि: । (यथा, विष्णुपुराणे । १ । ५ । ८ ।
"तस्याभिध्यायत: सर्गं तिर्य्यक्स्रोताभ्यवर्त्तत ।
यस्मात् तिर्य्यक्प्रवृत्त: स तिर्य्यक्स्रोतास्ततः स्मृत: ॥")
स ब्रह्मणोऽष्टम: सर्ग: । स तु अष्टाविंशद्विधः । यथा,—
"तिरश्चामष्टम: सर्ग: सोऽष्टाविंशद्विधो मत: ॥"
तेषां लक्षणं यथा,—
"अविदो भूरितमसो ज्ञानशक्तिविवर्जिता: ॥"
इति श्रीभागवते । ३ । १० । २१ ॥
"तिरश्चां तिर्य्यक्स्रोतसाम् । अविद: वस्तुज्ञानादिज्ञानशून्या: । भूरितमस: आहारादिमात्रनिष्ठा: । घ्राणज्ञा घ्राणेनैव इदमर्थं जानन्ति । क्षुद्दि अवेदिन: दीर्घानुसन्धानशून्या: ।" इति तट्टीकायां श्रीधरस्वामी ॥ अष्टाविंशतिभेदा यथा,—
"गौरजो महिष: क्षत्त: शूकरो गवयो रुरु: ।
द्विशफा: पशवश्चैमे अविरुष्ट्र च सत्तम ! ॥
खरोऽश्वोऽश्वतरो गौर: शरभश्चमरी तथा ।
एते चैकशफा: क्षत्त: शृणु पञ्चनखान् पशून् ॥
श्वा शृगालो वृको व्याघ्रो मार्ज्जार: शशयल्लकौ ।
सिंह: कपिर्गज: कूर्म्मो गोधा च मकरादय: ॥
कङ्कगृध्रबकश्येनभासभल्लुकबर्हिण: ।
हंससारसचक्राह्वकाकोलूकादय: खगा: ॥"
इति श्रीभागवते । ३ । १० । २२-२५ ॥
"गवादय उष्ट्रान्ता द्विशफा द्विखुरा नव ।
खरादयश्चमर्य्यन्ता एकशफा: षट् । श्वादयो गोधान्ता: पञ्चनखा द्वादश । एते भूचरा: सप्तविंशति: । मकरादयो जलचरा: कङ्कादय: खगा: अभूचरत्वेनैकीकृत्य गृहीता एवमष्टाविंशतिभेदान् वदन्ति । अन्येषामपि तिर्य्यक्प्राणिनां यथायथमेतेष्वन्तर्भाव: ।" इति तट्टीकायां श्रीधरस्वामी ॥
तिर्य्यग्यान:, पुं, (तिर्य्यक् वक्रं यानं गमनं यस्य ।) कुलीर: । इति त्रिकाण्डशेष: ॥
तिर्य्यञ्च, [च्] पुं, (तिर्य्यगञ्चतीति । अनुच+क्विप् । "तिरसस्तिर्य्यलोपे ।" ६ । ३ । ६४ । इति तिर: ।) विहङ्गादि: । इति मेदिनी ॥ (यथा, महाभारते । १३ । १११ । १२५ ।
"पापानि तु नर: कृत्वा तिर्य्यग् जायेत भारत ! ॥")

यथाच मनुः । ५ । ४० ।
"ओषधयः पशवो वृक्षास्तिर्य्यञ्चः पक्षिणस्तथा॥"
"तिर्य्यञ्चः कूर्म्मादयः।" इति तट्टीकायां कुल्लूकभट्टः॥) पशुः । इति हेमचन्द्रः । ३ ।१०८॥
(यथा, पद्मतन्त्रे । ३ । ११६ ।
"तिर्य्यञ्चं मानुषं वापि यो नृतं संसृजेत् कुधीः।
पक्षगयेन शुद्धिः स्यात् तस्य चान्द्रायणेन च॥")
वक्रगामी । इति शब्दरत्नावली ।

तिर्य्यञ्ची, स्त्री, (तिर्य्यञ्च + स्त्रियां ङीप् ।) तिरश्ची । स्त्रीपशुपक्ष्यादिः । इति मुग्धबोधम्॥

तिल, गतौ । इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट् ।) इखौ । तेलति । इति दुर्गादासः॥

तिल, क ग्र स्निहि । इति कविकल्पद्रुमः॥ (पुरां-तुदां च-परं-अकं-सेट् ।) स्निहि स्निग्धीभावे । क, तेलयति । ग्र, तिलति तैलेनाङ्गम् । इति दुर्गादासः॥

तिलः, पुं, (तिलति स्निह्यति तैलेन पूर्णो भवतीति । तिल + "इगुपधज्ञेति ।"३।१।१३५ । इति कः।) स्वनामख्यातशस्यम्। तत्पर्य्यायः। होमधान्यम् २ पवित्रः ३ पितृतर्पणः ४ पापघ्नः ५ पूतधान्यम् ६। इति राजनिर्घण्टः॥ स्नेहफलः ७ स्नेहफलपूरफलः ८। अस्य गुणाः। रसे कटुत्वम्। तिक्तत्वम्। मधुरत्वम्। तुवरत्वम्। गुरुत्वम्। विपाके कटुत्वम्। स्वादुत्वम्। स्निग्धत्वम्। उष्णत्वम्। कफपित्तकारित्वम्। बल्यत्वम्। केश्यहितत्वम्। हिमस्पर्शत्वम्। त्वग्यत्वम्। स्तन्यत्वम्। व्रणे हितत्वम्। दन्त्यत्वम्। अल्पमूत्रकारित्वम्। ग्राहित्वम्। वातघ्नत्वम्। अग्निमतिप्रदत्वञ्च। इति भावप्रकाशः॥ वर्णकारित्वम् ॥ * ॥

"कृष्णः पथ्यतमः सितोऽल्पगुणदः स्त्रीणां किलार्घ्ये तिलाः॥"
इति राजनिर्घण्टः॥

अपि च। भावप्रकाशः।
"कृष्णश्रेष्ठतमस्तेषु शुक्लो मध्यमः सितः।
अन्ये हीनतराः प्रोक्तास्तज्ज्ञैरक्तादयस्तिलाः॥"
तत्तैलगुणाः। बलकृत्वम्। केश्यत्वम्। मधुरत्वम्। तिक्तत्वम्। कषायत्वम्। उष्णत्वम्। तीक्ष्णत्वम्। बलकारित्वम्। कफवातजन्तुस्वर्जुव्रणकण्डूतिनाशित्वम्। कान्तिदत्वम्। वस्त्यभ्यङ्गपाननस्यकर्णाक्षिपूरणेषु हितत्वञ्च। इति राजनिर्घण्टः॥ (तिलप्रतिग्रहनिषेधो यथा, ब्रह्मपुराणे।
"ब्राह्मणः प्रतिगृह्णीयात् कृच्छ्रार्थं साधुसत्तमः।
अश्वत्थमपि मातङ्गतिललौहांश्च वर्ज्जयेत्॥"
तिलदाने फलमाह विष्णुः।
"तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम्॥"
तथा महाभारते।
"कल्यमुत्थाय यो विप्रः स्नातः शुक्लेन वाससा।
तिलपात्रं प्रयच्छन् वै सर्व्वपापैः प्रमुच्यते॥"
गरुडपुराणे।
"धेनुमुद्दिश्य यो दद्यात् हेमगर्भांस्तिलान्नृप!।
यावन्तस्ते तिलाः स्वर्गे तावत्कालं स मोदते॥"
सप्तमीं नवमीं पर्व्वकालञ्च त्यक्त्वा तिलतैलेनाङ्गानि विष्णोः स्नानं कर्त्तव्यम्। यथा, मार्कण्डेये।
"सर्व्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनेः।
श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः।
सप्तमीं नवमीञ्चैव पर्व्वकालञ्च वर्ज्जयेत्॥"
तिथितत्त्वे जन्मतिथिकृत्ये।
"तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः।
तिलभुक् तिलवापी च षट्तिली नावसीदति॥"
रात्रौ तिलान्वितवस्तुमात्रं न भक्षयेत्। यथा, काश्मीरखण्डे।
"सर्व्वञ्च तिलसम्बद्धं नाद्यादस्तमिते रवौ॥"
तिलैस्तर्पणनिषेधस्तत्प्रतिप्रसवादिकञ्च तर्पणशब्दे द्रष्टव्यम्॥) तिलकालकः। यथा,—
"देवगुरुप्रसादेन जिह्वाग्रे मे सरस्वती।
तेनाहं नृप जानामि भानुमत्यास्तिलं यथा॥"
इति कालिदासः॥
(स्वल्पप्रमाणम्। तिलतुल्यत्वादस्य तथात्वम्। यथा, राजतरङ्गिण्याम्। ४। ३२८।
"तिलं तिलं तं कृत्वा च चिक्षिपुर्दिक्षु सर्व्वतः।
नगरान्निर्गतैः सैन्यैर्हन्यमानाः पदे पदे॥")

तिलकं, क्ली, (तिलति स्निह्यतीति। तिल + "कृञ् श्रिस्त्रिसंज्ञयोः।" इति कुन्।) क्षोम। क्षौमवस्त्रसौवर्चलम्। इत्यमरः। २। ६। ९५॥ सौवर्चलम्। इति मेदिनी। के, १००॥

तिलकः, पुं, (तिल इव कायतीति। के + कः।) पुष्पवृक्षविशेषः। तत्पर्य्यायः। विशेषकः २ सुखमण्डनकः ३ पुण्ड्रकः ४ पुण्ड्रः ५ स्थिरपुष्पी ६ छिन्नरुहः ७ दग्धरुहः ८ क्षतजीवः ९ तरुणीकटाक्षकामः १० वासन्तसुन्दरः ११ दुग्धरुहः १२ भालविभूषणसंज्ञः १३ पुन्नागः १४ रेवकः १५। इति राजनिर्घण्टः॥ क्षुरकः १६ श्रीमान् १७ पुरुषः १८ क्षत्रपुष्पकः १९। इति भावप्रकाशः॥ (यथा, रघुः। ६।४१।
"न खलु गोभयति स्म वनस्थलीं
न तिलकस्तिलकः प्रमदामिव॥")
अस्य गुणाः। पाके कटुत्वम्। वातपित्तकफनाशित्वम्। बलपुष्टिमेदःकारित्वम्। हृद्यत्वम्। लघुत्वञ्च। तत्त्वग्गुणाः। कषायत्वम्। उष्णत्वम्। पुंस्त्वदन्तदोषकृमिशोफव्रणरक्तदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ * ॥ (तिल + स्वार्थे कन्।) शरीरस्थतिलः। तत्पर्य्यायः। तिलकालकः २। इत्यमरः। २। ६। ४९॥ कालकः ३ पिप्रुः ४ जडुलः ५। इति हेमचन्द्रः॥ * ॥ मस्तकः। इति रत्नमाला॥ व्रणभेदः। रोगभेदः। इति मेदिनी। के, १००॥ श्वेतस्य विदाहलक्षणं यथा,—
"क्षणानि तिलमात्राणि नीरुजानि समानि च।
वातपित्तकफोच्छेकात् तान् विद्यात्तिलकालकान्॥"
इति माधवकरः॥

प्रधाने त्रि। इति नानार्थध्वनिमञ्जरी॥ ध्रुवकभेदः। यथा,—
"पञ्चविंशतिवर्णाङ्कितिलको ध्रुवको भवेत्।
इष्टश्चतुष्पुटे ताले रसे वीरेऽद्रुतेऽपि वा॥"
इति सङ्गीतदामोदरः॥

तिलकः, पुं क्ली, (तिलवत् तिलपुष्पवत् कायतीति। के + कः।) चन्दनादिना ललाटादिद्वादशाङ्गकर्त्तव्यचिह्नविशेषः। तत्पर्य्यायः। तमालपत्रम्२ चित्रकम् ३ विशेषकम् ४। इत्यमरः। २। ६। १२३॥ (यथा, माघे। ३। ६३।
"विशेषको वा विशिशेष यस्याः
श्रियं त्रिलोकीतिलकः स एव॥")
अथ द्वादशतिलकविधिः। पद्मपुराणे उत्तरखण्डे।
"ललाटे केशवं ध्यायेन्नारायणमथोदरे।
वक्षःस्थले माधवन्तु गोविन्दं कण्ठकूपके॥
विष्णुञ्च दक्षिणे कुक्षौ बाहौ च मधुसूदनम्।
त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके॥
श्रीधरं वामबाहौ तु हृषीकेशन्तु कन्धरे।
पृष्ठे तु पद्मनाभञ्च कट्यां दामोदरं न्यसेत्॥
तत्प्रक्षालनतोयन्तु वासुदेवेति मूर्द्धनि॥"
किञ्च।
"ऊर्द्ध्वपुण्ड्रं ललाटे तु सर्व्वेषां प्रथमं स्मृतम्।
ललाटादिक्रमेणैव धारणन्तु विधीयते॥ इति।
एवं न्यासं समाचर्य्य सम्प्रदायानुसारतः।
न्यसेत् किरीटमन्त्रञ्च मूर्द्ध्नि सर्व्वार्थसिद्धये॥"
अथ किरीटमन्त्रः। ओम् श्रीकिरीटकेयूरहारमकरकुण्डलचक्रगदापद्महस्तपीताम्बरधरश्रीवत्साङ्कितवक्षःस्थलश्रीभूमि-सहितसकलज्योतिर्दीप्तिकराय सहस्रादित्यतेजसे नमो नमः।" इति श्रीहरिभक्तिविलासे ४ विलासः॥
तस्य धारणप्रकारो यथा,—
"द्वादशाङ्गे ललाटादौ तिलकं हरिमन्दिरम्।
स्नानान्ते वैष्णवः कुर्य्यात् प्रत्येकं क्षणनामभिः॥
वामे वक्षसि नेत्रान्ते शङ्खेऽग्नौ शङ्खचिह्नितम्।
तथैव दक्षिणे कुर्य्याद्धरेश्चक्राङ्कितं सुने!॥ * ॥
ललाटे केशवं विद्यात् कण्ठे श्रीपुरुषोत्तमम्।
वामबाहौ वासुदेवं सखे दामोदरन्तथा॥
नाभौ नारायणञ्चैव माधवं हृदये तथा।
गोविन्दं दक्षिणे पार्श्वे वामे चैव त्रिविक्रमम्॥
विष्णुं सखे कर्णमूले दक्षिणे मधुसूदनम्।
शिरोमध्ये हृषीकेशं पद्मनाभञ्च पृष्ठतः॥
हरेर्द्वादशनामानि पठित्वा तिलकानि तु।
यः कुर्य्यादैष्णवो नित्यं स प्रेमभक्तिमाप्नुयात्॥*॥
ये कण्ठलग्नतुलसीभवकाष्ठमाला
ये द्वादशाङ्गहरिनामकृतोर्द्ध्वपुण्ड्राः।
ये क्षणभक्तिसुदृढा धृतशङ्खचक्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति॥ * ॥
तिलकन्तूर्द्ध्वपुण्ड्राख्यं मध्यच्छिद्रं हि नारद!।
यदि कुर्य्याल्ललाटे तद्विज्ञेयं हरिमन्दिरम्॥
आनासामूलमाश्रित्य शिरोमध्यगतं सुने।
हरिपादाङ्कितं नासामूलमारभ्य यत्नतः॥

हरिमन्दिरवत् सर्व्वं तदाधारवल्लभीयकम् ।
श्रीराधावल्लभीयं यत्तिलकं सुमनोहरम् ॥
यौगलं तत्तु विज्ञेयं यदि मध्यसुरङ्गितम् ॥ * ॥
यदूर्द्धपुण्ड्रं तिलकं शोभनं तन्मनोहरम् ।
तन्मध्यगीतरेखञ्च श्रीमद्रामानुजं विदुः ॥ * ॥
श्रीरामोपासना यस्य तिलकं तूर्द्धपुण्ड्रकम् ।
भ्रुवोर्म्मध्ये सबिन्दु स्यादृर्द्ध विप्र ! मनोहरम्॥
हरेः सर्व्वावतारानां मत्स्यादीनां विशेषतः ।
उपासकानां तिलकं केवलं हरिमन्दिरम् ॥*॥
ऊर्द्धपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियाणां तथैव च ।
वैश्यानान्तु तथा विप्र ! शूद्रादेर्मण्डलाङ्कितम् ॥
अच्छिद्रमूर्द्धपुण्ड्रन्तु ये कुर्व्वन्ति जनाधमाः ।
तेषां ललाटे सततं शुनः पादो न संशयः ॥
दृष्ट्वा भाले द्विजातीनामच्छिद्रमूर्द्धपुण्ड्रकम् ।
कार्य्याः कृष्णस्तुतिं कृत्वा वस्त्रेणाच्छादयेन्मुखम् ॥
ललाटदक्षिणे ब्रह्मा वसेद्रामे महेश्वरः ।
मध्ये विष्णुर्वसेन्नित्यं तस्मान्मध्यं न लेपयेत् ॥*॥
वर्त्तुलं तिर्य्यगच्छिद्रं ह्रस्वं दीर्घं ततं न तु ।
षड्लक्षणसंयुक्तं तिलकं यन्निरर्थकम् ॥
खनित्रयष्टिकुक्कुरचित्रशूलमुकुराङ्कितम् ।
त्रिपुण्ड्रमर्द्धचन्द्रञ्च तिलकं यन्निरर्थकम् ॥
प्रमाणन्तूर्द्धपुण्ड्रस्य दीर्घं स्यात् कलिवर्द्धनम् ।
आनासामूलमारभ्य ब्रह्मरन्ध्रगतं यदि ॥
शूद्रस्यैकाङ्गुलं प्रोक्तमायतं द्व्यङ्गुलं विप्र ।
क्षत्रिये त्र्यङ्गुलं तद्वद्ब्राह्मणे चतुरङ्गुलम् ।
नासिकायास्त्रिभागेको भागो मानेन योभवेत् ।
भ्रुवोर्म्मध्यादधःस्थानं मूलमाहुर्म्मनीषिणः ॥*॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
कुर्य्यादूर्द्धपुण्ड्रं तद्वैष्णवा हरिमन्दिरम् ॥
वैष्णवा विप्र ! भूपाश्चेत् वैश्यशूद्रान्त्यजाश्रमाः ।
यदूर्द्धपुण्ड्रं विभ्रत्युस्तदेव हरिमन्दिरम् ॥
नरो वाप्यथवा नारी यदि कृष्णपथं लभेत् ।
यत्नतस्तुलसीमाला सन्धार्य्या हरिमन्दिरम् ॥
मध्यच्छिद्रं न कुर्य्यादूर्द्धतिलकं यदि वैष्णवः ।
श्वपदं तच्चितातुल्यं भवेन्नारद ! नान्यथा ॥ * ॥
दक्षाकारद्विरेखं यत्तिलकं मूलकोणकम् ।
मध्यच्छिद्रन्तु तत् प्राहुरूर्द्धपुण्ड्रं मनोहरम् ॥
अधोमुखाब्जकलिकाकारं तिलकमुत्तमम् ।
मध्यच्छिद्रं युग्मरेखमूर्द्धपुण्ड्रं प्रकीर्त्तितम् ॥*॥
तीर्थमृद्यज्ञकाष्ठञ्च विल्वो मलयसम्भवम् ।
अश्वत्थतुलसीमूलमृत्तिका गोमयस्य च ॥
जाह्नवीमृन्महानिम्बतुलसीकाष्ठमेव च ।
कस्तूरी कुङ्कुमं फल्गु सिन्दूरं रक्तचन्दनम् ॥
गोरोचना गन्धकाष्ठं जलं चागुरु गोमयम् ।
धात्रीमूलस्य मृन्नद्यो हरिद्रा गोगृहस्य च ॥
स्नानान्ते सर्व्ववर्णानामाश्रमाणान्तथैव च ।
एतानि तिलकान्याहुः सन्ध्यादिसर्व्वकर्म्मसु ॥"*॥
अपि च ।
"गङ्गाम्बुतुलसीमूलमृत्तिका मलयोद्भवम् ।
साधोश्चरणसंलग्नं रजो मृद्गोमयस्य च ॥
याश्वत्थमूलमृद्गोपीचन्दनं तीर्थमृत्तिका ।
कुङ्कुमं तुलसीकाष्ठं वैष्णवाङ्गतमृत्तिका ॥
गोरोचना च कस्तूरी हरिद्रागुरुचन्दनम् ।
वल्मीकमृत्तिका गन्धः पद्मकं हरिचन्दनम् ॥
गन्धकाष्ठं महानिम्बो यमुनातीरमृत्तिका ।
गुरुपादरजोवारिणी साध्वङ्घ्रिरजोजले ॥
कृत्वा प्रतिदिनं स्नानमेतैर्गन्धमृदादिभिः ।
चारु यत्तिलकं भाव्यं तन्नाम्ना वैष्णवैर्ध्रुवम् ॥*॥
काम्यं नैमित्तिकं नित्यं यत्किञ्चित् कर्म्म नारद ! ।
वर्णाश्रमाणां तत्सर्व्वं स्नानान्ते तिलकं विना ॥
कर्म्म वर्णाश्रमाणां स्यात् देवं पैत्रं न तत्फलम् ।
स्नानं सन्ध्यां पश्चयज्ञान् पैत्रं होमादि कर्म्म यः ।
विना तिलकदर्भाभ्यां कुर्य्यात्तन्निष्फलं भवेत् ॥"
इति पाद्मोत्तरखण्डम् ॥ * ॥
"वीक्ष्यादर्शे जले वापि यो विदध्यात् प्रयत्नतः ।
ऊर्द्धपुण्ड्रं महाभाग ! स याति परमाङ्गतिम् ॥"
इति पाद्मे पातालखण्डम् ॥ * ॥
"शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक् त्रिपुण्ड्रकम् ।
विष्ण्वागमे दीक्षितस्तु ऊर्द्धपुण्ड्रं विधारयेत् ॥"
इति नागोजीभट्टधृतस्मृतसंहिता ॥

तिलकटः, पुं, तिलस्य रजः । (तिल + "अलाबू-तिलोभाभङ्गाभ्यो रजस्युपसंख्यानम्" ५ । २ । २६ । इत्यस्य वार्त्तिकोक्त्या कटच् ।) तिलचूर्णम् । इति शब्दार्थकल्पतरुः आकरणञ्च ॥

तिलका, स्त्री, (तिलस्तिलबीजकोष इव कायतीति । कै + कः ।) हारभेदः । इति जटाधरः ॥ (षड्क्षरपादके छन्दोभेदे । शब्दार्थचिन्तामणिधृततल्लक्षणादिकं यथा,—
"सगणद्वितयं भवतीह यदा ।
रसवर्णपदा तिलकेति तदा ॥"
उदाहरणम् ।
"वनमालिकथा सकलालि ! वृथा ।
पुनरेति कथं मम दृष्टिपथम् ॥")

तिलकालकः, पुं, (तिल इव कालकः कृष्णवर्णः ।) शरीरस्थतिलः । इत्यमरः । २ । ६ । ४६ ॥ तल्लक्षणानि यथा,—
"कृष्णानि तिलमात्राणि नीरुजानि समानि च ।
वातपित्तकफोद्रेकात्तान् विद्यात्तिलकालकान् ॥"
समानि अनुद्गतानि । अयं तिल इति लोके प्रसिद्धः । तच्चिकित्सा यथा,—
"चर्म्मकीलं जतुमणिं मशकान् तिलकालकान् ।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः ॥"
इति भावप्रकाशः ॥

तिलयुक्तः । इत्यमरटीका ॥

तिलकाश्रयः, पुं, (तिलकस्य आश्रयः ।) ललाटम् । इति शब्दार्थकल्पतरुः ॥

तिलकिट्टं, क्ली, (तिलस्य किट्टं मलम् ।) तिलमलम् । (खरल इति भाषा ॥) तत्पर्य्यायः । पिण्याकः २ तिलखलिः ३ । अस्य गुणाः । स्रंपनत्वम् । रूक्षत्वम् । विष्टम्भित्वम् । दृष्टिदूषकत्वञ्च । इति भावप्रकाशः ॥

तिलकी, [न्] त्रि, (तिलकमस्यास्तीति । तिलक + इनिः ।) तिलकयुक्तः । यथा । शिखी तिलकी कर्म्म कुर्य्यात् । इति स्मृतिः ॥

तिलचित्रपत्रकः, पुं, (तिलचित्राणि तिलवच्चित्रयुक्तानि पत्राणि यस्य । कप् ।) तेलकन्दः । इति राजनिर्घण्टः ॥

तिलचूर्णं, क्ली, (तिलस्य चूर्णम् ।) चूर्णीकृततिलः । तत्पर्य्यायः । तिलकल्कम् २ पललम् ३ पिष्टकम् ४ । अस्य गुणाः । मधुरत्वम् । रुच्यत्वम् । पित्तास्रबलपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, पञ्चतन्त्रे । २ । ८३ ।
"ततस्तिलान् सुखयित्वा तिलचूर्णेन ब्राह्मणं भोजयिष्यामि ॥")

तिलतण्डुलकं, क्ली, (तिलस्य तण्डुल इव संश्लेषेण कायतीति । कै + कः । तिलतण्डुलवत् दृढ़संश्लेषणादस्य तथात्वम् ।) आलिङ्गनम् । इति शब्दमाला ॥ तिलमिश्रिततण्डुलम् ॥ (तिलस्य शस्यञ्च ॥)

तिलतैलं, क्ली, (तिलस्य स्नेहः । तिल + "स्नेहे तैलच् ।" ५ । २ । २६ । इत्यस्य वार्त्तिकोक्त्या तैलच् ।) तिलस्नेहः । तिलेषु तैलम् । इति व्याकरणम् ॥ (यथा, सुश्रुते । १ । ४५ ।
सर्व्वेभ्यस्त्विह तैलेभ्यस्तिलतैलं प्रशस्यते ॥")
अस्य गुणाः तिलशब्दे द्रष्टव्याः ॥ (अपरे गुणाश्च । यथा, हारीते १ स्थाने नवमेऽध्याये ।
"तत्र स्नेहं समासेन यथायोगं यथाविधि ।
कषायानुरसं स्वादु सूक्ष्मसृष्टं व्यवायि च ॥
पित्तरक्तहितश्लेष्मरोगादिवर्द्धनम् ।
अल्पं रुचिकरं मेध्यं कण्डूकुष्ठविकारनुत् ॥
दृष्यं श्रमापहं श्लेयं तिलतैलं विदुर्बुधाः ।
छिन्ने भिन्ने च्युते दृष्टे क्षते भग्नेऽग्निदाहके ॥
वाताभिष्यन्दिस्फुटने चाभ्यङ्गे तिलतैलकम् ।
विधे शालशोनसर्ष्पे सेकाभ्यङ्गावगाहने ॥
पाने वस्तौ च नस्ये च तथाकर्णप्रपूरणे ।
तिलतैलं विधेयं स्यात् सर्व्वरोगनिवारणम् ॥"
"तथा छिन्नभिन्नविद्धोत्पिष्टच्युतमथितक्षतपिच्छितभग्नस्फुटितक्षाराग्निदग्धविश्लिष्टदारिताभिहतदुर्भग्नदग्धशालविदग्धप्रभृतिषु च परिषेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ।
तद्वस्तिषु च पाने च नस्ये कर्णाक्षिपूरणे ।
अन्नपानविधौ चापि प्रयोज्यं वातशान्तये ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

तिलधेनुः, स्त्री, (तिलैर्विहिता धेनुः । आकपार्थिवादिवत् समासः ।) तिलनिर्म्मिता धेनुः । यथा,—
"विधानं तिलधेनोस्त्वं ब्रूहि शीघ्रं द्विजोत्तम ! ।
मुनिः प्राह विधानं यत् तच्छृणुष्व नराधिप ! ॥
षोड़शाढ़मयी धेनुश्चतुर्भिर्व्वत्सकी भवेत् ।
इक्षुदण्डमयाः पादा दन्ताः पुष्पमयाः शुभाः ॥
नासा गन्धमयी तस्या जिह्वा गुड़मयी तथा ।
स्थितां कृष्णाजिने धेनुं वासोभिर्व्वासितां शुभाम् ॥
सूत्रेण वाससा बद्धां कृत्वा प्रस्तरसमन्विताम् ।
सर्व्वौषधिसमायुक्तां मन्त्रपूतान्तु दापयेत् ॥
अन्नं मे जायतां सद्यः पानं सप्तरसात्मकम् ।
कामं सन्तर्पयत्वार्कं तिलधेनुरुपाश्रिता ॥

याचामि त्वां देवि! भक्त्या कुटुम्बार्थे विशेषतः।
कुटुम्बकामं कुरुतां तिलधेनो! नमोऽस्तु ते॥
एवंविधां नरो दत्त्वा तिलधेनुं नृपोत्तम!।
सर्व्वकामसमाप्तिन्तु कुरुते नात्र संशयः॥"
इति पाद्मे क्रियाखण्डम्॥

तिलपर्णं, क्ली, (तिलस्येव पर्णमस्य।) चन्दनम्। इति राजनिर्घण्टः॥ (रक्तचन्दनम्। यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम्।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम्॥"
तिलस्य पर्णम्।) तिलवृक्षपत्रञ्च॥

तिलपर्णः, पुं, (तिलस्य पर्णानीव पर्णान्यस्य।) श्रीवेष्टः। इति राजनिर्घण्टः॥

तिलपर्णिका, स्त्री, (तिलपर्णी+स्वार्थे कन् टाप् च।) रक्तचन्दनम्। इति हेमचन्द्रः॥ (यथा,—
"वेत्राग्रं दहती वासा कुन्तली तिलपर्णिका॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)

तिलपर्णी, स्त्री, (तिलस्येव पर्णान्यस्याः। पाकर्णेति ङीष्। तिलपर्णी नदी आकरोऽस्यस्या इति अच् ङीष् च। इत्यमरटीका।) रक्तचन्दनम्। इत्यमरः। २। ६। १३२॥ (यथा, सुश्रुते। १। ४६।
"चित्रकस्तिलपर्णी च कफमेदोहरौ लघुः॥"
नदीविशेषः। इत्यमरटीका। २। ६। १३२॥)

तिलपिष्टकं, क्ली, (तिलस्य पिष्टकम्। एषोदरादित्वात् साधुः।) तिलपिष्टकम्। इति कैचित्॥ तिलकुटा इति भाषा॥

तिलपिञ्जः, पुं, (निष्कलस्तिलः। तिल+"तिलान्निष्कलात् पिञ्जपेजौ।" ४। २। ३६। इत्यस्य वार्त्तिकोक्त्या पिञ्जः।) निष्कलतिलवृक्षः। इत्यमरः। २। ६। १६॥

तिलपेजः, पुं, (निष्कलस्तिलः। "तिलान्निष्कलात् पिञ्जपेजौ।" ४। २। ३६। अस्य वार्त्तिकोक्त्या पेजः।) निष्कलतिलः। इत्यमरः। २। ६। १६॥

तिलमयूरः, पुं, (तिलाङ्कितवत् चित्रितो मयूरः। शाकपार्थिववत् समासः।) मयूरविशेषः। तत्पर्य्यायः। गुरुवृष्टकः २। इति त्रिकाण्डशेषः॥

तिलरसः, पुं, (तिलस्य रसः।) तिलतैलम्। इति शब्दार्थकल्पतरुः॥

तिलस्नेहः, पुं, (तिलस्य स्नेहः।) तिलतैलम्। इति शब्दार्थकल्पतरुः॥

तिलाङ्कितदलः, पुं, (तिलवदङ्कितानि दलानि यस्य।) तेलकन्दः। इति राजनिर्घण्टः॥

तिलापत्या, स्त्री, (तिलवत्कृष्णं क्षुद्रशाकपत्यं बीजमस्याः।) कृष्णजीरकः। इति शब्दचन्द्रिका॥

तिलित्सः, पुं, गोनससर्पः। इत्यमरः। १। ८।१५॥

तिलोत्तमा, स्त्री, (तिलैः तिलप्रमाणैः सर्व्वरत्नानामंशैरुत्तमा।) स्वर्व्वेश्या। इति शब्दचन्द्रिका॥ तस्या नामकारणं यथा, महाभारते। १। २१२। १७।
"तिलं तिलं समानीय रत्नानां यद्विनिर्म्मिता।
तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः॥"

तिलौदनं, क्ली, (तिलमिश्रितं ओदनम्।) क्षुरः। इति हारावली। १६६॥ (यथा, रामायणे। २। ६६। १०।
"ततस्तिलौदनं भुक्त्वा पुनः पुनरधःशिराः॥"
तिलोदनमिति पाठोऽपि दृश्यते॥)

तिल्वं, क्ली, (तिलानां भवनं क्षेत्रं वा। तिल+"विभाषा तिलमाषोमाभङ्गाद्यण्भ्यः।" ५। २। ४। इति यत्।) तिलक्षेत्रम्। तत्पर्य्यायः। तैलीनम् २। इत्यमरः। २। ६। ७॥ (तिलाय हितम्। "खलयवमासतिलतृणसूलाच्च।" ५। १। ७। इति यत्। तिलहिते, त्रि॥)

तिल्ल, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) लट्यान्तः। इस्वी। तिल्लति। इति दुर्गादासः॥

तिल्वः, पुं, (तिलतीति। तिल+"उल्वादयश्च।" उणां। ४। ६५। इति वनुप्रत्ययेन निपातनात् साधुः।) लोध्रः। इत्यमरः। २। ४। ३३॥ श्वेतलोध्रः। इति तट्टीकायां सुभूतिः॥ रक्तलोध्रः। इति स्वामी॥

तिल्वकः, पुं, (तिल्व+स्वार्थे कन्।) लोध्रः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—
"तिल्वकस्तु मतो लोध्रो दृढत्वक्सिरीटकः॥"
अस्य विशिष्टव्यवहारो यथा,—
"तस्य मूलत्वचं शुष्कामन्तर्व्वल्कलवर्ज्जिताम्।
चूर्णयेत्तु त्रिधा कृत्वा द्वौ भागौ त्र्योतयेत्ततः॥
लोध्रस्येव कषायेण तृतीयं तेन भावयेत्।
भागं तं दशमूलस्य पुनः क्वाथेन भावयेत्॥
शुष्कं चूर्णं पुनः कृत्वा तत ऊर्द्धं प्रयोजयेत्।
दधितक्रसुरामण्डदारुणैरेरसीधुना॥
रसेनामलकानां वा ततः पाक्षिकलं पिबेत्॥"
"तिल्वकस्य कषायेण दशमूलस्य सुभावितम्।
मात्रां कम्पिल्लकस्यैव कषायेण पुनः पिबेत्।
चतुरङ्गुलकल्पेन लेहोऽन्यः कार्य्य एव च॥"
"तिल्वकस्य कषायेण कल्केन च सपूर्कः।
सघृतः साधितो लेहः स च श्रेष्ठं विरेचनम्॥"
इति चरके कल्पस्थाने नवमेऽध्याये॥)

तिष्ठद्गुः, पुं, (तिष्ठन्ति गावो यस्मिन् काले दोहाय। "गावो हि रात्रिप्रथमयामाङ्घ्रिकायामतीतायां विश्रान्ताः सत्यः उत्थाप्य दुह्यन्ते।" इति जयमङ्गलः। "तिष्ठद्गुप्रभृतीनि च।" २। १। १७। इति निपातनात् साधुः।) सन्ध्याकालः। यथा, भट्टिः। ४। १४।
"अतिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम्॥"

तिष्यः, पुं, (तुष्यन्त्यस्मिन्निति। तुष+क्यप्। निपातनात् साधुः।) पुष्यनक्षत्रम्। इत्यमरः। १।३।२२॥ (यथा, महाभारते।३।१६०।८७।
"यदा सूर्य्यश्च चन्द्रश्च तथा तिष्यदृहस्पती।
एकराशौ समेष्यन्ति प्रवर्त्स्यति तदा कृतम्॥"
तिष्यः पुष्यनक्षत्रं पौर्णमास्यामस्यस्येति। ष्यञ्।) पौषमासः। इत्यमरः। १। ४। १४॥ इति शब्दरत्नावली॥ कलियुगम्। इति मेदिनी। ये, २८॥ (अत्र स्त्रीवेऽपि दृश्यते। यथा, महाभारते। ६। १०। ४।
"चत्वारि भारते वर्षे युगानि भरतर्षभ!।
कृतं त्रेता द्वापरञ्च तिष्यञ्च कुरुवर्द्धन!॥")

तिष्यकः, पुं, (तिष्य एव। स्वार्थे कन्।) पौषमासः। इति शब्दरत्नावली॥

तिष्यपुष्या, स्त्री, (तिष्ये पौषे पुष्यमस्याः।) आमलकी। इति शब्दचन्द्रिका॥

तिष्यफला, स्त्री, (तिष्ये पौषमासे फलमस्याः।) आमलकी। इत्यमरः। २। ४। ५७॥ (विवरणमस्या आमलकीशब्दे ज्ञातव्यम्॥)

तिष्या, स्त्री, (तिष्यः पौषमासः उत्पत्तिकालत्वेनास्त्यस्या इति। अच् टाप् च।) आमलकी॥ इति शब्दरत्नावली॥ (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"धात्री कार्षफला तिष्या वयस्यामलकी शिवा॥")

तिह्वा, [न्] पुं, व्याधिः। व्रीहिः। धनुः। सद्भावः। इति संक्षिप्तसारे उणादिवृत्तिः॥

तीक्ष्णं, क्ली, (तेजयति तेज्यतेऽनेन वा। तिज निशाने+"तिजेर्दीर्घश्च।" उणां। ३। १८। इति क्नसः दीर्घश्च।) खरम्। विषम्। लौहम्। (यथास्य पर्य्यायाः वैद्यकरत्नमालायाम्।
"क्षणायसं काललोहं रुक्मं तत्तीक्ष्णमन्यथा॥")
युद्धम्। इत्यमरः। ३। ३। ५३॥ भरणम्। शस्त्रम्। शीघ्रम्। इति तट्टीकासारसुन्दरी॥ सामुद्रलवणम्। सुष्कः। इति मेदिनी। णे, १५॥ चक्रकम्। इति राजनिर्घण्टः॥ मरकम्। इति हेमचन्द्रः॥ * ॥ तीक्ष्णवस्तूनि यथा। प्रतिभा १ हीरकम् २ कटाक्षः ३ दुर्व्वाक्यम् ४ नखः ५ लवणम् ६ रविकरः ७। इति कविकल्पलता॥

तीक्ष्णः, पुं, (तिज+क्नसः दीर्घश्च।) यवक्षारः। इति मेदिनी। णे, १५॥ (पर्य्यायो यथा,—
"यावशूको यवक्षारो यवशूको यवाग्रजः।
क्षारस्तीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः॥"
इति वैद्यकरत्नमालायाम्॥)

श्वेतकुशः। कुरुरुकः। इति राजनिर्घण्टः॥ तीक्ष्णागणो यथा। अश्लेषा आर्द्रा ज्येष्ठा मूला। इति ज्योतिषम्॥

तीक्ष्णः, त्रि, (तिज+क्नसः दीर्घश्च।) तिग्मः। (उग्रः। यथा, मनुः। ७। १४०।
"तीक्ष्णश्चैव मृदुश्च स्यात् कार्य्यं वीक्ष्य महीपतिः॥"
असह्यः। यथा, वाजसनेयसंहितायाम्। १६। ३६। "नमस्तीक्ष्णेषवे चायुधिने।"
"तीक्ष्णा असह्या इषवो बाणा यस्य स तीक्ष्णेषुस्तस्मै नमः।" इति महीधरः॥) आत्मत्यागी। इति मेदिनी। णे, १५॥ निरालस्यः। सुबुद्धिः इति धरणी॥ योगी। इत्यजयपालः॥

तीक्ष्णकः, पुं, (तीक्ष्ण+संज्ञायां कन्।) शुष्कः। गौरसर्षपः। इति राजनिर्घण्टः॥

तीक्ष्णकण्टकः, पुं, (तीक्ष्णानि कण्टकानि यस्य।) धुस्तूरः। इति जटाधरः॥ वर्व्वरः। इक्षुदी। करीरः। इति राजनिर्घण्टः॥

तीक्ष्णकण्टका, स्त्री, (तीक्ष्णं कण्टकं यस्याः।) कण्टारीवृक्षः। इति राजनिर्घण्टः॥

तीक्ष्णकन्दः, पुं, (तीक्ष्णः कन्दोऽधोगेऽङ्कुरोऽस्य।) पलाण्डुः। इति राजनिर्घण्टः॥

तीक्ष्णकर्म्मा, [न्] त्रि, (तीक्ष्णं कर्म्मास्य।) तीव्रकर्म्मा। तत्पर्य्यायः। आयःशूलिकः २। इति त्रिकाण्डशेषः॥

तीक्ष्णकल्कः, पुं, (तीक्ष्णः कल्को यस्य।) तुम्बुरुवृक्षः। इति राजनिर्घण्टः॥

तीक्ष्णकान्ता, स्त्री, (तीक्ष्णा उग्रा कान्ता कमनीया च।) मङ्गलचण्डिकाया रूपभेदः। यथा,—

"पीठे दिक्करवासिन्या द्विरूपा रमते शिवा।
तीक्ष्णकान्ताह्वया चैका योगतारा प्रकीर्त्तिता॥
पुरा ललितकान्ताख्या या श्रीमङ्गलचण्डिका।
तस्यास्तु सततं रूपं तीक्ष्णकान्ताह्वयं शृणु!॥
कृष्णा लम्बोदरी या तु सा स्यादेकजटा शिवा।
तेन रूपेण तां देवीं सततं परिपूजयेत्॥
अङ्गाङ्गिमन्त्रौ रूपञ्च तस्याः प्राक् प्रतिपादितम्।
त्रिकोणं मण्डलं चास्याः कर्त्तव्यं मन्त्रपूर्ब्बकम्॥
आदौ रेफे ततः पश्चात् सुरेफेति पदं ततः।
तथा पदं चाधिगत्य तिष्ठन्त्विति पदं ततः॥
मण्डलन्यासमन्त्रोऽयं तीक्ष्णायाः परिकीर्त्तितः।
नव त्रिपुरदेवादियमवेतालदुर्द्धराः॥
गणाश्चमेऽत्यन्तकान्ता द्वारपालाः प्रकीर्त्तिताः।
एतांस्तु पूजयेत् सम्यक् मण्डलस्याष्टदिक्षु वै॥
आदौ सम्बोधनं कृत्वा वज्रपुष्पं ततः परम्।
वह्निजाया ततः पश्चात् मन्त्रमेषां प्रकीर्त्तितम्॥
पात्रोपकरणादीनां स्थानन्यासस्य सर्व्वतः।
सर्व्वमुत्तरतन्त्रोक्तं ग्राह्यं रूपङ्घटेऽपि च॥
चामुण्डा च कराला च सुभगा भीषणा भगा।
विकटेति च योगिन्यः प्रोक्तास्तस्यासु भूपते!॥
हे भगवत्येकजटे विघ्नं हे पदमन्ततः।
विकटदंष्ट्रे धीमहीति तन्नस्तारे प्रचोदयात्॥
एषा तु तीक्ष्णा गायत्री पीठदेवाः प्रकीर्त्तिताः।
निर्म्माल्यधारिणी चास्या देवी विकटचण्डिका॥
माला तु रुद्रमयी प्रोक्ता रुद्राक्षसम्भवापि वा।
विघ्नेश एव देवास्तु पूजने परिकीर्त्तितः॥
उपचारादिकं कृत्वा बलिदानं जपादिकम्।
सर्व्वन्तु पूर्ब्ववद्ग्राह्यं कामाख्यापूजने यथा॥
पानेषु मदिरा ग्रस्ता नरो बलिषु पार्थिव!।
मोदको नारिकेलश्च मांसं व्यञ्जनमेव च॥
नैवेद्येषु प्रियकरास्तीक्ष्णायाः परिकीर्त्तिताः॥"

इति कालिकापुराणे ८२ अध्यायः॥

तीक्ष्णगन्धः, पुं, (तीक्ष्णः प्रवृद्धो गन्धो यस्य।) श्लेष्मान्तकवृक्षः। इति राजनिर्घण्टः॥ रक्ततुलसी। इति रत्नमाला॥ कुङ्कुमनामगन्धद्रव्यम्। इति जटाधरः॥

तीक्ष्णगन्धकः, पुं, (तीक्ष्णो गन्धोऽस्य। "श्लेष्मातविभाषा।" ५। ४। १५४। इति कप्।) श्लेष्मान्तकवृक्षः। इत्यमरः। २। ४। ३१॥

तीक्ष्णगन्धा, स्त्री, (तीक्ष्ण उग्रो गन्धो यस्याः।) श्वेतवचा। कण्टारी। राजिका। इति राजनिर्घण्टः॥ (पर्य्यायो यथा,—

"राजी तु राजिका तीक्ष्णगन्धा कुञ्जनिकासुरी।
शवः शुतामिजनकः कृमिघ्नतृणधान्यसर्षपः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) वचा। इति मेदिनी। धे, ४६॥ जीवन्ती। इति शब्दचन्द्रिका॥ (यथा, सुश्रुते उत्तरतन्त्रे २४ अध्याये।

"उग्रा कुष्ठं तीक्ष्णगन्धा विड्गं
श्रेष्ठं नित्यं चावपीड़े करञ्जम्॥")

क्ष्वेलो। इति रत्नमाला॥

तीक्ष्णतण्डुला, स्त्री, (तीक्ष्णास्तण्डुला यस्याः।) पिप्पली इति रत्नमाला॥ (अस्याः पर्य्यायो यथा,

"पिप्पली मागधी क्षुण्णा वैदेही चपला कणा।
उपकुल्योषणा ग्रौढी कोला स्यात्तीक्ष्णतण्डुला॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

तीक्ष्णतैलं, क्ली, (तीक्ष्णमयं तैलं स्नेहो यस्य।) सर्ज्जरसः। खुहीक्षीरम्। सुरा। इति शब्दरत्नावली॥

तीक्ष्णदंष्ट्रः, पुं, (तीक्ष्णा दंष्ट्रा यस्य।) व्याघ्रः। इति राजनिर्घण्टः॥

तीक्ष्णपत्रः, पुं, (तीक्ष्णानि पत्राणि यस्य।) तुम्बुरुवृक्षः। इति राजनिर्घण्टः॥

तीक्ष्णपुष्पं, क्ली, (तीक्ष्णानि पुष्पाणि यस्य।) लवङ्गम्। इति राजनिर्घण्टः॥ (लवङ्गशब्दस्यास्य गुणादयो ज्ञातव्याः॥)

तीक्ष्णपुष्पा, स्त्री, (तीक्ष्णं पुष्पं यस्याः।) केतकी। इति राजनिर्घण्टः॥

तीक्ष्णफलः, पुं, (तीक्ष्णं फलं यस्य।) तुम्बुरुवृक्षः। इति राजनिर्घण्टः॥

तीक्ष्णमूलः, पुं, (तीक्ष्णं मूलमस्य।) शिग्रुः। कुलञ्जनः। इति राजनिर्घण्टः॥ (शिग्रुशब्दे विवृतिरस्य ज्ञातव्या॥)

तीक्ष्णरसः, पुं, (तीक्ष्णो रसोऽस्य।) यवक्षारः। इति रत्नमाला॥

तीक्ष्णशूकः, पुं, (तीक्ष्णः शूकोऽग्रभागो यस्य।) यवः। इति हेमचन्द्रः। ४। २३६॥

तीक्ष्णसारा, स्त्री, (तीक्ष्णः कठिनः सारो यस्याः।) शिंशपा। इति राजनिर्घण्टः॥

तीक्ष्णा, स्त्री, (तीक्ष्ण + टाप्।) वचा। सर्पकङ्कालिकावृक्षः। इति रत्नमाला॥ कपिकच्छूः। महाज्योतिष्मती। अत्यम्लपर्णी। इति जटाधरः॥

तीक्ष्णायसं, क्ली, (अय एव आयसम्। तीक्ष्णञ्च तत् आयसञ्चेति।) लोहविशेषः। तीखा इति हिन्दुस्थान इति च भाषा॥ तत्पर्य्यायः। लोहमूरं २ शूलायसम् ३ शूलम् ४ सिक्थम् ५ पिण्डायसम् ६ शूठम् ७ आयसम् ८ निशितम् ९ तीव्रम् १० खड्गम् ११ सुस्थितम् १२ अयः १३ चित्रायसम् १४ चीनजम् १५। अस्य गुणाः। रूक्षत्वम्। उष्णत्वम्। तिक्तत्वम्। वातपित्तकफप्रमेहपाण्डूशूलनाशित्वम्। तीक्ष्णत्वम्। सुखलोहाधिकत्वञ्च। इति राजनिर्घण्टः॥ (अयहारोऽस्य यथा, रसेन्द्रसारसंग्रहे शूलाधिकारे त्रिफलालौहे,॥

"तीक्ष्णायचूर्णसंयुक्तं त्रिफला चूर्णसुत्तमम्।
क्षौद्रेण पाययेद्धीमान् सद्यः शूलनिवारणम्॥")

तीम, य क्लेदने। इति कविकल्पद्रुमः॥ (दिवादिरयं अकर्त्तृसेट्।) य, तीम्यति तितीम। क्लेदनमार्द्रीभावः। इति दुर्गादासः॥

तीर, तृ क कर्म्मणां समाप्तौ। इति कविकल्पद्रुमः॥ (अदन्तचुरादिरयं परस्मैपदसकर्म्मकसेट्।) कर्म्मणामिति सम्बन्धार्थः। अतितीरत् व्रतं लोकः समापितवानित्यर्थः। इति दुर्गादासः॥

तीरं, क्ली, (तीरयति समापयति नद्यादिकमिति। तीर + अच्।) नदीकूलम्। इत्यमरः। १।२।७॥ गङ्गातीरं यथा,—

"सार्द्धहस्तप्लुतं यावत् गर्भतस्तीरमुच्यते।
भाद्रकृष्णाचतुर्दश्यां यावदाक्रमते जलम्।
तावद्गर्भं विजानीयात् तदन्यत्तीरमुच्यते॥"

इति प्रायश्चित्ततत्त्वम्॥

ज्ञायकः। इति त्रिकाण्डशेषः॥

तीरः, पुं, (तीरयतीति। तीर + पचाद्यच्।) चषः। इति मेदिनी। रे, ४५॥

तीरभुक्तिः, पुं, (तीरे भुक्तिरस्य।) देशविशेषः। तीरहोत इति भाषा॥ तत्पर्य्यायः। निच्छविः २ विदेह ३। इति त्रिकाण्डशेषः॥

तीरितं, क्ली, (तीर कर्म्मणां समाप्तौ + भावे क्तः।) कर्म्मणां समाप्तिः। इति व्याकरणम्॥

तीर्णः, त्रि, (तॄ प्लवनतरणयोः + कर्त्तरि क्तः। उत्तीर्णः। (यथा, वह्निपुराणे कन्यादाननामाध्याये।

"तीर्णं सर्व्वैर्दुःखेभ्यः परं स्वर्गमवाप्नुयात्॥")

अभिभूतः। श्रुतः। (तॄ + कर्म्मणि क्तः। ततोत्तरणः। यथा, महाभारते। १। १। १६२।

"सत्यां तीर्णां शुचुमध्ये च तेन
तदा नाशंसे विजयाय सञ्जय!॥")

तीर्णपदी, तालमूली। इति शब्दचन्द्रिका॥

तीर्थं, क्ली, (तरति पापादिकं यस्मात्। तॄ + "थातृतुदिवचीति।" उणा। २। ७। इति थक्।) पुण्यस्थानादि। तीर्थतोयस्य स्नाने पुण्यत्वं यथा,—

"नदीदेवनिखातेषु तड़ागेषु सरःसु च।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च॥
निपानादुद्धृतं पुण्यं ततः प्रस्रवणादिकम्।
ततोऽपि सारसं पुण्यं ततो नादेयमुच्यते॥
तीर्थतोयं ततः पुण्यं गङ्गातोयं ततोऽधिकम्॥"

इत्याद्ये वह्निपुराणे स्नानविधिर्नाम ४ अध्यायः॥ जलसमीपस्थारत्निमात्रस्थानम्। यथा, आदित्यपुराणे।

"अरत्निमात्रं जलं त्यक्त्वा कुर्य्याच्छौचमहर्हृदि
पश्चाच्च शौचयेत्तीर्थमन्यथा न शुचिर्भवेत्॥

तस्मिन् देशे शौचं कर्त्तव्यं यस्मादरत्निमात्रव्यवहितं जलं तत् स्थलमेव तीर्थं जलसमीपत्वात् ।"
इत्याह्निकाचारतत्त्वम् ॥ * ॥
विप्रचरणयोस्तीर्थवासस्थानत्वं ब्राह्मणशब्दे द्रष्टव्यम् ॥ * ॥ विप्रदक्षिणकर्त्तुस्तीर्थवासस्थानत्वं यथा । पराशरः ।
"प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ।
विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत् ॥"
इत्याह्निकाचारतत्त्वम् ॥
हस्तस्थिततीर्थानि यथा,—
"अङ्गुल्यग्रे तीर्थं दैवं खल्वाङ्गुल्योर्मूले कायम् ।
मध्येऽङ्गुष्ठाङ्गुल्योः पैत्रं मूले ह्यङ्गुष्ठस्य ब्राह्मम् ॥"
इत्यमरः । २ । ७ । ५१ ॥
(यथा च मार्कण्डेये ।३४ । १०३—१०६ ।
"कुर्य्यात् कर्म्माणि तीर्थेन स्वेन स्वेन यथाविधि ।
देवादीनां तथा कुर्य्याद् ब्राह्मेणाचमनक्रियाम् ॥
अङ्गुष्ठोत्तरतो रेखा पार्श्वेयं दक्षिणस्य तु ।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै ॥
तर्ज्जन्यङ्गुष्ठयोरन्तः पैत्रं तीर्थमुदाहृतम् ।
पितृणां तेन तोयादि दद्यान्नान्दीमुखादृते ॥
अङ्गुल्यग्रे तथा दैवं तेन दिव्यक्रियाविधिः ।
तीर्थं कनिष्ठिका मूले कायं तेन प्रजापतेः ॥
एवमेभिः सदा तीर्थैर्देवानां पितृभिः सह ।
सदा कार्य्याणि कुर्व्वीत नान्यतीर्थेन कर्हिचित् ॥
ब्राह्मेणाचमनं प्रोक्तं पित्र्यं पैत्रेण सर्व्वदा ।
दैवतीर्थेन देवानां प्राजापत्यं निजेन च ॥
नान्दीमुखानां कुर्व्वीत प्राज्ञः पिण्डोदकक्रियाम् ।
प्राजापत्येन तीर्थेन यच्च किञ्चित् प्रजापतेः ॥")
तीर्थं त्रिविधम् । यथा । जङ्गमम् १ मानसम् २ स्थावरम् ३ । तथा च ।
"ब्राह्मणा जङ्गमं तीर्थं निर्म्मलं सार्व्वकामिकम् ।
येषां वाक्योदकेनैव शुद्ध्यन्ति मलिनो जनाः ॥
अगस्तिरुवाच ।
शृणु तीर्थानि गदतो मानसानि ममानघे ! ।
येषु सम्यक् नरः स्नात्वा प्रयाति परमां गतिम् ॥
सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः ।
सर्व्वभूतदया तीर्थं सर्व्वत्रार्জ্জवमेव च ॥
दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते ।
ब्रह्मचर्य्यं परं तीर्थं तीर्थञ्च प्रियवादिता ॥
ज्ञानं तीर्थं धृतिस्तीर्थं प्रणवं तीर्थमुदाहृतम् ।
तीर्थानामपि तत्तीर्थं विशुद्धिर्म्मनसः परा ।
एतत्ते कथितं देवि ! मानसं तीर्थलक्षणम् ॥
भौमानामपि तीर्थानां पुण्यत्वे कारणं शृणु ।
यथा शरीरसोद्देशाः केचिन्मेध्यतमाः स्मृताः ।
तथा पृथिव्यासुद्देशाः केचित् पुण्यतमाः स्मृताः ॥
प्रभावाद्दृषदादूभूमेः सलिलस्य च तेजसा ।
परिग्रहान्मुनीनाञ्च तीर्थानां पुण्यता स्मृता ॥
तस्माद्भौमेषु तीर्थेषु मानसेषु च नित्यशः ।
उभयेष्वपि यः स्नाति स याति परमां गतिम् ॥"
तीर्थागमने दोषो यथा,—
"अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अदत्वा काञ्चनं गाञ्च दरिद्रो नाम जायते ॥"
तीर्थगमने फलं यथा,—
"अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः ।
न तत्फलमवाप्नोति तीर्थाभिगमनेन यत् ॥ * ॥
तीर्थान्यनुसरन् धीरः श्रद्दधानः समाहितः ।
क्षतपापो विशुध्येत किं पुनः शुद्धकर्म्मकृत् ॥
तिर्य्यग्योनिं न वै गच्छेत् कुदेशे न च जायते ।
न दुःखी स्यात् स्वर्गभाक् च मोक्षोपायञ्च विन्दति ॥
तीर्थफलभागिनो यथा,—
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ।
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥
प्रतिग्रहादुपावृत्तः सन्तुष्टो येन केनचित् ।
अहङ्कारविमुक्तश्च स तीर्थफलमश्नुते ॥
अदाम्भिको निरारम्भोलघ्वाहारो जितेन्द्रियः ।
विमुक्तः सर्व्वसङ्गेभ्यः स तीर्थफलमश्नुते ॥
अकोपनोऽमलमतिः सत्यवादी दृढव्रतः ।
आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥
अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः ।
हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः ॥"
इति काशीखण्डम् ॥ * ॥
तीर्थयात्राविधानं यथा,—
"यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे ।
कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥
देवान् पितॄन् ब्राह्मणांश्चैव साधून्
धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात् ।
प्रत्यागतश्चापि पुनस्तथैव
देवान् पितॄन् ब्राह्मणान् पूजयेच्च ॥
एवं कुर्व्वंतस्य तीर्थे यदुक्तं
फलं तत् स्यान्नात्र सन्देह एव ॥"
इति ब्रह्मपुराणम् ॥ * ॥
"प्रयागे तीर्थयात्रायां पितृमातृवियोगतः ।
कक्षानां वपनं कुर्य्यात् तथा न विकचो भवेत् ॥"
इति भविष्यपुराणम् ॥ * ॥
"तीर्थयात्रासमारम्भे तीर्थात् प्रत्यागमेऽपि च ।
दृद्धिश्राद्धं प्रकुर्व्वीत बन्धुसर्षिःसमन्वितम् ॥"
इति कूर्म्मपुराणम् ॥ * ॥
"ऐश्वर्य्यलाभमाहात्म्यात् गच्छेद्यानेन यो नरः ।
निष्फलं तस्य तत्तीर्थं तस्माद्यानं विवर्ज्जयेत् ॥"
इति मत्स्यपुराणम् ॥ * ॥
"संवत्सरं द्विमासोनं पुनस्तीर्थं व्रजेद्यदि ।
सङ्कल्पोपवासञ्च तदा यत्नेन कारयेत् ॥"
इति गङ्गावाक्यावली ॥ * ॥
तीर्थप्राप्त्यनन्तरविधानं यथा,—
"न परीक्ष्यो द्विजस्तीर्थेष्वन्नार्थी भोज्य एव हि ।
सक्तुभिः पिण्डदानञ्च चरुणा पायसेन च ॥
कर्त्तव्यमृषिभिर्दृष्टं पित्र्यार्केण गुडेन च ।
श्राद्धं तत्र तु कर्त्तव्यमर्घ्यावाहनवर्জ्जितम् ॥
व्यक्ताभेऽप्यथवा काले तीर्थश्राद्धन्तु तर्पणम् ।
अविलम्बेन कर्त्तव्यं नैव विघ्नं समाचरेत् ॥
तीर्थप्राप्तिः स्यात्ततोऽह्नः पूर्व्ववासरे ।
प्राप्तेऽह्नि श्राद्धदो भवेत् ॥
तीर्थोपवासः कर्त्तव्यः शिरसो मुण्डनं तथा ।
शिरोगतानि पापानि यान्ति मुण्डनतो यतः ॥
तीर्थं प्राप्य प्रसङ्गेन स्नानं तीर्थे समाचरेत् ।
स्नानजं फलमाप्नोति तीर्थयात्राश्रितं न तु ॥"
इति काशीखण्डम् ॥
"मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः ।
वर्জ्जयित्वा गयां गङ्गां विशालां विरजान्तथा ॥"
इति स्कान्दम् ॥ * ॥
"घोड़शांशं स लभते यः परार्थेन गच्छति ।
अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ॥"
इति पैठीनसिः ॥
"स्नापयेत् स्निग्धमिश्रादीन् स्नातीस्तीर्थे नरोत्तमः ।
अन्यथापहरन्त्येते बलात्तीर्थभवं फलम् ॥"
इति स्कान्दम् ॥
"मातरं पितरं जायां भ्रातरं सुहृदं गुरुम् ।
यस्तिरश्च निमज्जेत अष्टभागं लभेत सः ॥"
इति प्रायश्चित्ततत्त्वे मार्कण्डेयपुराणम् ॥ * ॥
कलौ तीर्थानां पृथिव्यां स्थितिकालो यथा,—
"सरस्वती पुण्यचित्रमाजगाम च भारतम् ।
गङ्गा भागेन कलया स्वयं तस्थौ हरेः पदे ॥
पद्मावतीगिरिधानीता मही भागीरथी शुभा ।
समाजगाम कलया वाणी भागेन नारद ! ॥
पद्मा जगाम कलया सा च पद्मावती नदी ।
भारतं भारती भागात् स्वयं तस्थौ हरेः पदे ॥
कले; पञ्चसहस्रञ्च वर्षं स्थित्वा च भारते ।
जग्मुस्ताश्च सरिद्रूपं विहाय श्रीहरेः पदम् ॥
यानि सर्व्वाणि तीर्थानि काशीं वृन्दावनं विना ।
यास्यन्ति ताभिः सार्द्धञ्च वैकुण्ठमाज्ञया हरेः ॥"
तीर्थप्रतिग्रहे दोषो यथा,—
"तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे ।
वाराणस्यां वदर्य्याञ्च गङ्गासागरसङ्गमे ।
पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले ।
हरिद्वारे च केदारे सोमे वदरपाचने ।
सरस्वतीनदीतीरे पुण्ये वृन्दावने वने ।
गोदावर्य्याञ्च कौशिक्यां त्रिवेण्याञ्च हिमाचले ।
एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ * ॥
यानादिना गमने दोषो यथा,—
"पुण्यार्द्धं हरते याने तदर्द्धं छत्रपादुके ।
तदर्द्धं तैलमांसाभ्यां सर्व्वं हरति मैथुने ॥"
इति कर्म्मलोचनम् ॥ * ॥
युगभेदे तीर्थविशेषस्य श्रेष्ठत्वं पाद्मे ।
"कृते तु पुष्करं तीर्थं त्रेतायां नैमिषन्तथा ।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गां समाश्रयेत् ॥"
तीर्थसंख्या यथा,—
"तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत् ।
दिवि भुव्यन्तरीक्षे च तानि ते सन्ति जाह्नवि ! ॥"
अथ भूमण्डलस्य प्रादक्षिण्येन तीर्थानि यथा ।
पुष्करम्१ तत्तु ब्रह्मणः स्थानं तीर्थराजेति गाय-
ख्यातं तत्र त्रिसन्ध्यं दशकोटितीर्थान्यायान्ति ।
तस्य फलं अश्वमेधतुल्यं ब्रह्मलोकगमनञ्च । जम्बू-

मार्गः २ तस्य फलं अश्वमेधतुल्यं विष्णुप्राप्तिश्च ॥ तण्डुलिकाश्रमः ३ तस्य फलं दुर्गतिविनाशः ब्रह्मलोकप्राप्तिश्च ॥ अगस्त्यसरः ४ तत्र चिरात्रोपवासेन वाजपेयतुल्यं फलं शाकाहारेण कौमारलोकप्राप्तिश्च ॥ धर्मारण्यम् ५ तत्तु कण्वाश्रमः तस्य फलं प्रवेशमात्रेण पापक्षयः देवपितृपूजनेन अश्वमेधतुल्यं फलं विबुधलोकप्राप्तिश्च ॥ ययातिपतनम् ६ तत्र गमनेन अश्वमेधयज्ञतुल्यं फलम् ॥ कोटितीर्थम् ७ तत्र महाकालस्तिष्ठति स्नानेन अश्वमेधतुल्यं फलम् ॥ भद्रवटः ८ तत्र उमापतिस्तिष्ठति तं दृष्ट्वा गोसहस्रदानफलं दशकुलस्य गाणपत्यञ्च भवति ॥ नर्मदा नदी ९ तत्र पितृदेवतर्पणात् अग्निष्टोमतुल्यं फलम् । दक्षिणसिन्धुः १० तत्र ब्रह्मचर्य्येण अग्निष्टोमतुल्यं फलं चिदिवप्राप्तिश्च । चर्म्मण्वती नदी ११ तत्रेन्द्रियसंयमनेन ज्योतिष्टोमफलम् । हिमवत्सुतार्व्वुदः १२ तत्र वशिष्ठाश्रमः तस्मिन्नेकरात्रवासेन गोसहस्रदानफलम् । पिङ्गतीर्थम्१३ तत्रेन्द्रियसंयमनेन सवत्सशतकपिलादानफलम् । प्रभासः १४ तत्र हुताशनस्तिष्ठति तत्र स्नानेन अग्निष्टोमातिरात्रयोः फलम् । सरस्वतीसागरसङ्गमः १५ तत्र स्नानेन गोसहस्रदानफलं चिरात्रोपवासेन पितृदेवतर्पणेन च अश्वमेधफलम् । वरदानम्१६ यत्र विष्णवे दुर्व्वाससा वरो दत्तः तत्र स्नानेन गोसहस्रदानफलम् । द्वारवत्यां पिण्डारकतीर्थम् १७ तत्र पद्मचिह्नयुक्ता मुद्राः शूलचिह्नितानि पद्मानि अद्यापि दृश्यन्ते महादेवस्तिष्ठति स्नानेन बहुसुवर्णयज्ञफलम् । समुद्रसिन्धुसङ्गमः १८ तत्र स्नानेन पितृदेवतर्पणेन च वरुणलोकप्राप्तिः । द्रिमीतीर्थम् १९ तत्र महादेवस्तिष्ठति तत्र स्नानेनाश्वमेधफलं महादेवदर्शनार्चनाभ्यां सर्व्वपापनाशः । वसुधारा २० तस्या दर्शनेन अश्वमेधफलं स्नानतर्पणाभ्यां विष्णुलोकप्राप्तिः । सिन्धूत्तमम् २१ तत्र स्नानेन बहुसुवर्णयज्ञफलम् । यदुतुङ्गम् २२ तत्र गमनेन ब्रह्मलोकप्राप्तिः । कुमारिकाशुक्रतीर्थम् २३ तत्र स्नानेन विमलत्वं भवति । प्रभवनदः २४ तत्र पशुयज्ञफलम् । भीमास्थानम् २५ तत्र स्नात्वा नरो देवीपुत्रो भवति गोसहस्रदानफलञ्च लभते । गिरिकुब्जम्२६ तत्र ब्रह्मा तिष्ठति तस्य नत्वा गोसहस्रदानफलम् । विमलतीर्थम् २७ अद्यापि तत्र सौवर्णराजतमत्स्या दृश्यन्ते तत्र स्नानपानाभ्यां वाजपेयफलम् । वितस्ता नदी २८ तत्र तर्पणेन वाजपेयफलं स्वर्गप्राप्तिश्च । काश्मीरे वितस्ताख्यं तत्रकनागसदनम् २९ तत्र स्नानेन वाजपेयफलं विष्णुलोकप्राप्तिश्च । ग्रामपरा ३० तत्र सायंसन्ध्यायां स्नानेन सप्तार्चिषे चरुनिर्व्वपनेन च अश्वमेधसहस्राधिकफलम् । रुद्रास्यदम् ३१ तत्र महादेवदर्शनात् अश्वमधफलम् । मणिमान् पर्व्वतः ३२ तत्र चिरात्रोपवासेन ज्योतिष्टोमफलम् । देविका नदी ३३ तत्र महादेवस्थानम् तत्र स्नानमहादेवदर्शनाभ्यां महादेवाय चरुनिवेदनेन च सर्व्वकामप्राप्तिर्देवलोकप्राप्तिश्च । देविकायां रुद्रतीर्थे तत्र स्नानात् सिद्धिप्राप्तिः । एवं देविकायां यजनयाजनब्रह्मवालुकपुण्यन्याससंङ्गकानि तीर्थानि तेषु स्नानात् मरणभयविनाशः । दीर्घसत्रम्३४ तत्र गमनादेव दीर्घसत्रफलप्राप्तिः राजसूयाश्वमेधफलप्राप्तिश्च । विनशनम्३५ मेरुपृष्ठे अन्तर्हिता सरस्वती यत्र याति सा चमसतीर्थे एवं शिरोद्भेदे नागोद्भेदे च दृश्यते चमसे स्नानात् वाजपेयफलं नागोद्भेदे स्नानात् नागलोकप्राप्तिः । अप्रपानतीर्थम्३६ तत्र स्नानात् शिववद्दीप्तिः गोसहस्रदानफलप्राप्तिश्च । कुमारकोटी ३७ तत्र स्नानेन पितृदेवपूजनेन च गवामययागफलप्राप्तिः । रुद्रकोटी ३८ यत्र कोटिर्ऋषयो मिलिता अहमग्रे रुद्रं द्रक्ष्यामीति प्रस्थितानां तेषां सन्तोषार्थं एको रुद्रः कोटिर्रूपेयोऽभवत् । तत्र स्नानात् अश्वमेधफलप्राप्तिः कुलोद्धरणञ्च । सरस्वतीसङ्गम: ३९ तत्र जनार्द्दनस्तिष्ठति तत्र स्नानात् बहुसुवर्णयागफलप्राप्तिः । सयावसानम्४० तत्र गमनात् गोसहस्रदानफलप्राप्तिः । कुरुक्षेत्रम् ४१ तत्र गमनात् सर्व्वपापक्षयः ततो मचक्रुकद्वारपालस्य नमस्कारेण गोसहस्रदानफलप्राप्तिः । विष्णुस्थानं ४२ तत्र स्नानात् विष्णुदर्शनात् अश्वमेधफलं विष्णुलोकप्राप्तिश्च । परिप्लवम् ४३ तत्र अग्निष्टोमातिरात्रयागफलप्राप्तिः । पृथिवीतीर्थम् ४४ तत्र गोसहस्रदानफलम् । शालूकिनीतीर्थम् ४५ तत्र दशाश्वमेधिके स्नानात् गोसहस्रदानफलम् । सर्पिर्द्दीर्व्वी ४६ सा नागतीर्थं तत्र गमनेन अग्निष्टोमफलं नागलोकप्राप्तिश्च । अवर्णकद्वारपालः ४७ तत्रैकरात्रवासात् गोसहस्रदानफलप्राप्तिः । पद्मदम् ४८ तत्र कोटितीर्थे स्नानात् अश्वमेधफलम् । अश्वितीर्थम् ४९ तत्र रूपप्राप्तिः । वराहतीर्थम् ५० यत्र वराहरूपी विष्णुः स्थितः तत्र स्नानात् अग्निष्टोमफलप्राप्तिः । जयन्तम्५१ तत्र सोमतीर्थे स्नानात् राजसूयफलप्राप्तिः । एकहंसतीर्थम् ५२ तत्र गोसहस्रदानफलप्राप्तिः । क्षतशौचम् ५३ तत्र गमनात् पुण्डरीकयज्ञफलप्राप्तिः । सुज्ञावटतीर्थम् ५४ तत्तु महादेवस्थानं तत्रैकरजनीवासात् गाणपत्यप्राप्तिः तत्रैव विप्रालाचीयचीदर्शनात् सर्व्वकामप्राप्तिः । जामदग्न्याहृतपुष्करतीर्थम् ५५ तत्र स्नानपूजनाभ्यां हयमेधफलम् । रामह्रदः ५६ यत्र रामेण क्षात्रं सुतसाद्य तेषां रक्तेन पञ्च ह्रदाः कृताः तेषु स्नानतर्पणाभ्यां पितृगणाद् वरप्राप्तिः बहुसुवर्णयज्ञफलप्राप्तिश्च । वंशमूलकम् ५७ तत्र स्नानात् स्वकुलोद्धरणम् । कायशोधनम्५८ तत्र स्नानात् देहशुद्धिः । लोकोद्धारः ५९ तत्र स्नानात् स्वकीयलोकोद्धारः । प्रीतीर्थम् ६० तत्र गमनात् उत्तमश्रीप्राप्तिः । कपिलातीर्थम् ६१ तत्र स्नानदेवपितृपूजनाभ्यां कपिलासहस्रदानफलम् । सूर्य्यतीर्थम् ६२ तत्र स्नानोपवासपितृपूजनैरग्निष्टोमफलं देवलोकप्राप्तिश्च । गवां भवनम् ६३ तत्राभिषेकेण गोसहस्रदानफलम् । गृद्धिनीतीर्थम् ६४ तत्र स्नानात् उत्तमवीर्य्यप्राप्तिः । ब्रह्मावर्त्तः ६५ तत्र स्नानात् ब्रह्मलोकप्राप्तिः । सुतीर्थकम् ६६ तत्र पितृदेवानां सान्निध्यं तत्र स्नानपितृदेवपूजनैरश्वमेधफलं पितृलोकप्राप्तिश्च । अम्बुमतीह्रद ६७ तत्र काश्मीश्वरतीर्थे स्नानात् सर्व्वरोगनाशः ब्रह्मलोकप्राप्तिश्च तत्रैव माल्यतीर्थं तत्र स्नानात् सन्तानवृद्धिः श्रीप्राप्तिश्च ॥ प्रीतवनम् ६८ तत्र केशाभ्युक्षणेन पवित्रता ॥ स्वामलोमाभद्रः ६९ तत्र स्नानात् परमगतिप्राप्तिः । दशाश्वमेधिकम् ७० तत्र स्नानात् निश्चलगतिप्राप्तिः ॥ मानुषतीर्थम् ७१ तत्र व्याधपीड़िताः क्षणाल्मृगा विगाह्य मानुषत्वं प्राप्ताः तत्र स्नानात् सर्व्वपापमुक्तिः स्वर्गवसतिश्च ॥ आपगानदी७२ तत्र देवपितृहेयेनैकब्राह्मणभोजनेन कोटिब्राह्मणभोजनसिद्धिः ॥ प्रचोडुस्वरः७३ तत्र ब्रह्मा तिष्ठति तत्र सप्तर्षिकुण्डे स्नानात् सर्व्वपापनाशो ब्रह्मलोकप्राप्तिश्च । कपिलस्य केदारम् ७४ तत्र तपसा सर्व्वपापनाशः अन्तर्धानप्राप्तिश्च । सरकम् ७५ तत्र दृषध्वजप्रणामेन सर्व्वकामशिवलोकयोः प्राप्तिः । इलाह्रदम् ७६ तत्र स्नानदेवपितृपूजनाभ्यां दुर्गतिविनाशः वाजपेयफलप्राप्तिश्च । किन्दानम् ७७ तत्र स्नानादप्रमेयदानफलम् । किंशप्यम् ७८ तत्र स्नानात् अप्रमेयतपफलम् । अनाशकतीर्थम् ७९ तत्र नारदस्थानं तत्र प्राणत्यागात् पुरुषोत्तमलोकप्राप्तिः ॥ वैतरणी नदी ८० तत्र स्नानभूतपाणिपूजनाभ्यां सर्व्वपापमुक्तिः परमपदप्राप्तिश्च । फलकीतीर्थम् ८१ फलकीवने देवाश्चरन्ति । मिश्रकम् ८२ तत्र नारदेन सर्व्वतीर्थानि मिश्रितानि तत्र स्नानात् सर्व्वतीर्थस्नानफलम् ॥ मधुवटी ८३ सा देवीस्थानं तत्र स्नानदेवपितृपूजनाभ्यां गोसहस्रदानफलप्राप्तिः कौशिकीह्रदतीसङ्गमः ८४ तत्र स्नानात् सर्व्वपापमुक्तिः । किन्दत्तकूपः ८५ तत्र तिलप्रस्थदानात् ऋणक्षयमुक्तिः परमसिद्धिप्राप्तिश्च । वेदीतीर्थम् ८६ तत्र स्नानात् गोसहस्रदानफलप्राप्तिः ॥ अहः सुदिनं तीर्थत्रयम् ८७ तयोः स्नानात् सूर्य्यलोकप्राप्तिः । वृगधूमः ८८ तत्र विष्णुपदे स्नानात् वामनपूजनाच्च सर्व्वपापमुक्तिः रविलोकप्राप्तिश्च ॥ सरस्वत्यां तीर्थे श्रीकुब्जम् ८९ तत्र स्नानात् स्वर्गवसतिः ॥ नैमिषकुब्जम् ९० तस्मिन् स्नानात् हयमेधफलप्राप्तिः । कन्यातीर्थम् ९१ तत्र स्नानात् ज्योतिष्टोमफलप्राप्तिः । ब्रह्मस्थानम् ९२ तत्र स्नानात् शूद्रस्यापि ब्राह्मणत्वं ब्राह्मणस्य परमगतिः ॥ सोमतीर्थम् ९३ तत्र स्नानात् सोमयागफलप्राप्तिः ॥ सप्तसारस्वततीर्थम् ९४ तत्र स्नानजपाभ्यां ब्रह्मलोकप्राप्तिः ॥ औशनसकम् ९५ तत्र त्रिसन्ध्यं कार्त्तिकेयस्य सन्निधानम् । कपालमोचनम् ९६ तत्र स्नानात् सर्व्वपापनाशः ॥ अग्नितीर्थम् ९७ तत्र स्नानात् वह्निलोकप्रा

कुलोद्धरत्वञ्च। विश्वामित्रतीर्थम् ९८ तत्र स्नानात् ब्रह्मण्यप्राप्तिः। ब्रह्मयोनिः ९९ तत्र स्नानात् ब्रह्मलोके वासः। पृथूदकम् १०० तत् कार्त्तिकेयस्थानं तत्राभिषेकात् अश्वमेधफलप्राप्तिः पापिनामपि स्वर्गप्राप्तिः। मधुस्रवम् १०१ तत्र स्नानात् गोसहस्रदानफलप्राप्तिः॥ सरस्वत्यरुणासङ्गमः १०२ तत्र चिराचोपवास-स्नानाभ्यां ब्रह्महत्यापापनाशः। अवकीर्णम् १०३ तत् दर्भिमुनिनिर्म्मितं दर्भिणा चत्वारः समुद्रा आनीताः तत्र स्नानात् दुर्गतिविनाशः। शतसहस्रकम् १०४ साहस्रकम् १०५ उभयत्र स्नानात् गोसहस्रदानफलं दानोपवासौ सहस्र-गुणौ भवेत्॥ रेणुकातीर्थम् १०६ तत्राभिषेक-पिल्लदेवपूजनाभ्यां सर्व्वपापनाशः अग्निष्टोमफल-प्राप्तिश्च। विमोचनम् १०७ तत्र स्नानात् सर्व्व-प्रतिग्रहकृतपापनाशः। पञ्चवटतीर्थम् १०८ तत्र गमनात् महापुण्यप्राप्तिः स्वर्गगमनञ्च॥ तैजसम् १०९ यत्र ब्रह्मादिभिः सेनापत्ये कार्त्ति-केयोऽभिषिक्तः। कुरुतीर्थम् ११० तत्र स्नानात् रुद्रलोकप्राप्तिः। स्वर्गद्वारम् १११ तत्र गम-नात् स्वर्गलोकाग्निष्टोमफलप्राप्तिः। अनरकम् ११२ तत्र स्नानात् दुर्गतिनाशः। अस्थिपुरम् ११३ तत्र पिल्लदेवतर्पणात् अग्निष्टोमफलप्राप्तिः। गङ्गाह्रदकूपः ११४ तत्र स्नानात् ब्रह्मलोक-प्राप्तिः। स्थाणुवटतीर्थम् ११५ तत्र स्नानैक-रात्रवासाभ्यां रुद्रलोकप्राप्तिः। बदरीपाचनम् ११६ तत्तु वशिष्ठाश्रमः तत्र चिराचोपवास-बदरभक्षणाभ्यां अश्वमेधफलम् हरलोक-प्राप्तिश्च। इन्द्रमार्गम् ११७ तत्राहोरात्रोप-वासात् इन्द्रलोकप्राप्तिः। आदित्याश्रमः ११८ तत्र स्नानात् सूर्य्यलोकप्राप्तिः। सोमतीर्थम् ११९ तत्र स्नानात् सोमलोकप्राप्तिः। कन्या-श्रमः १२० तत्र चिरात्रवासोपवासाभ्यां कन्या-व्रतप्राप्तिः ब्रह्मलोकगमनञ्च। दधीचतीर्थम् १२१ तत्र स्नानात् वाजपेयफलप्राप्तिः। सन्नि-हितातीर्थम् १२२ तत्र अमावस्यायां सर्व्वाणि तीर्थान्यायान्ति एवं सूर्य्यग्रहणे स्नानात् शत-अश्वमेधफलप्राप्तिः स्नानदानाभ्यां स्वर्गलोक-प्राप्तिश्च। तत्रामावस्यायां सूर्य्यग्रहणे स्नान-श्राद्धाभ्यां अश्वमेधसहस्रफलप्राप्तिः। स्नान-मात्रात् सर्व्वपापनाशः ब्रह्मलोकप्राप्तिश्च॥ गङ्गाह्रदः १२३ तत्र स्नानात् राजसूयाश्वमेध-फलप्राप्तिः। कुरुक्षेत्रम् १२४ तत् तरन्तुकारन्तुकयोः एवं रामह्रदमक्रुकयोरन्तरं एतत् खमन्तपञ्चकं पितामहस्योत्तरवेदिः॥ धर्म्म-तीर्थम् १२५ तत्र स्नानादासप्तमकुलोद्धरत्वम्॥ कारापचनम् १२६ तत्र स्नानात् अग्निष्टोम-फलं विष्णुलोकप्राप्तिश्च। सौगन्धिकवनम् १२७ यत्र ब्रह्मादयो देवाः प्रत्यहमायान्ति तद्दन-प्रवेशमात्रेण सर्व्वपापनाशः॥ ब्रह्मसरस्वती १२८ तत्र स्नानपिल्लदेवपूजनाभ्यां अश्वमेधफल-प्राप्तिः। ईशानाधुषितम् १२९ तत्र शाक-म्भरी देवी तत्र चिराचोपवासशाकाहाराभ्यां द्वादशवर्षशाकाहारफलप्राप्तिः। सवर्णाख्यम् १३० तत्र शिवस्तिष्ठति तस्य पूजनात् अश्व-मेधफलशाम्भवपत्ययोः प्राप्तिः। धूमावती १३१ तत्र चिरात्रोपवासात् मनस्कामप्राप्तिः। धूमा-वती दक्षिणार्द्धे रथावर्त्तः १३२ तत्रारोहणेन महादेवप्रसादात् परमगतिप्राप्तिः। धारा १३३ तत्र स्नानात् शोकनाशः। गङ्गाद्वारम् १३४ तत्र कोटितीर्थे स्नानात् पुष्करीकयागफल-प्राप्तिः कुलोद्धरत्वं एकरात्रवासेन गोसहस्रदान-फलप्राप्तिश्च। सप्तगङ्गम् १३५ त्रिगङ्गम् १३६ सप्तावर्त्तः १३७ एतेषु पिल्लदेवतर्पणात् पुण्य-लोकप्राप्तिः। गङ्गायमुनासङ्गमः १३८ तत्र स्नानात् दशाश्वमेधफलप्राप्तिः कुलोद्धरत्वञ्च। कनखलः १३९ तत्र स्नानत्रिरात्रोपवासाभ्यां वाजिमेधफलब्रह्मलोकयोः प्राप्तिः॥ कपिला-वटः १४० तत्रैकरात्रवासेन गोसहस्रदानफल-प्राप्तिः। कपिलनागराजः १४१ तत्राभिषेकात् कपिलासहस्रदानफलप्राप्तिः। ललितिका १४२ सा शान्तनुतीर्थं तत्र स्नानात् दुर्गतिविनाशः॥ सुगन्धा १४३ तत्र गमनात् सर्व्वपापविशुद्धिः ब्रह्मलोकप्राप्तिश्च। रुद्रावर्त्तः १४४ तत्र स्नानात् ब्रह्मलोकप्राप्तिः॥ गङ्गासरस्वतीसङ्गमः १४५ तत्र स्नानात् अश्वमेधफलप्राप्तिः स्वर्गगमनञ्च॥ भद्रकर्णह्रदः १४६ तत्र स्नानश्राद्धपूजनाभ्यां दुर्गतिनाशः विष्णुलोकप्राप्तिश्च। कुब्जाम्रकम् १४७ तत्र गमनात् स्वर्गप्राप्तिः। अरुन्धतीवटः १४८ तत्रैकरात्रवासात् गोसहस्रदान-फलप्राप्तिः कुलोद्धरत्वञ्च। वासुद्रकम् १४९ तत्र चिरात्रोपवासेन गोसहस्रदानफलं कुलोद्धर-त्वञ्च॥ ब्रह्मावर्त्तः १५० तत्र गमनात् अग्नि-ष्टोमफलं ब्रह्मलोकप्राप्तिश्च। यमुनाप्रभवः १५१ तत्र स्नानात् अश्वमेधफलस्वर्गलोकयोः प्राप्तिः॥ दर्व्वीसंक्रमणम् १५२ तत्र गमनात् वाजिमेध-फलप्राप्तिः ब्रह्मलोकगमनञ्च। सिन्धुप्रभवः १५३ तत्र पञ्चरात्रवासात् बहुसुवर्णयज्ञफलप्राप्तिः॥ अर्थवेदी १५४ तत्र गमनात् अश्वमेधफल-स्वर्गयोः प्राप्तिः॥ वाशिष्ठी नदी तत्रैव ऋषि-कुल्या १५५ वाशिष्ठी गमनात् सर्व्ववर्णानां द्विजत्वप्राप्तिः ऋषिकुल्यायां स्नानैकमासवास-शाकाहारैः ऋषिलोकप्राप्तिः॥ शृङ्गतुङ्गम् १५६ तत्र गमनात् वाजिमेधफलप्राप्तिः॥ वीर-प्रमोचः १५७ तत्र गमनात् सर्व्वपापप्रणाशः॥ सन्ध्या सा विद्यातीर्थम् १५८ उक्त स्नानात् यत्र तत्रैव विद्याप्राप्तिः॥ महाश्रमः १५९ तत्रैक-कालनिराहारात् शुभलोकप्राप्तिः॥ महालयः १६० तत्र षष्ठकालोपवासेनैकमासवासात् आत्मना सहैकविंशतिपुरुषोद्धारः तत्रैव महे-श्वरदर्शनात् सर्व्वपापमरणभययोर्विनाशः बहु-सुवर्णयागफलप्राप्तिश्च॥ वेतसीका १६१ तत्र गमनात् अश्वमेधफलं औशनसगतिप्राप्तिश्च॥ सुन्दरिका १६२ तत्र गमनात् रूपप्राप्तिः॥ ब्राह्मणिका १६३ तत्र गमनात् ब्रह्मलोकप्राप्तिः। नैमिषम् १६४ तत्र ब्रह्मा तिष्ठति तत्र प्रवेशात् सर्व्वपापनाशः स्नानात् गवामयज्ञफलप्राप्तिः सप्तकुलोद्धारः उपवासेन प्राजापत्यात् स्वर्ग-प्राप्तिश्च॥ गङ्गोद्भेदः १६५ तत्र चिराचोप-वासात् वाजिमेधफलप्राप्तिः विष्णुलोकवासश्च॥ सरस्वती १६६ तत्र पिल्लदेवतर्पणात् सारस्वत-लोकवासः॥ बाहुदा नदी १६७ तत्रैकरात्रि-वासात् ब्रह्मलोकप्राप्तिः। गोप्रचारतीर्थम् १६८ ततु सरयूतीरं तत्र स्नानात् सर्व्वपापनाशः देवलोकप्राप्तिश्च॥ गोमत्यां रामतीर्थम् १६९ तत्र स्नानात् अश्वमेधफलप्राप्तिः निजकुलपाव-नत्वञ्च। साहस्रवम् १७० तत्र गमनात् राज-सूयाश्वमेधफलप्राप्तिः। राजगृहम् १७१ तत्र स्नानात् कुबेरवदाज्ञादप्राप्तिः। मणिनागः १७२ तत्र गमनात् गोसहस्रदानफलप्राप्तिः एवं तत् समीपे नित्यकर्म्मकरणात् सर्पविषभय-नाशः एकरात्रवासात् सर्व्वपापनाशश्च। गोतम-वनम् १७३ तत्र अहल्याह्रदे स्नानात् परम-गतिप्राप्तिः। श्रीदेवी १७४ तत्र गमनात् श्रीप्राप्तिः। उदपानम् १७५ तत्राभिषेकात् वाजिमेधफलप्राप्तिः। जनकराजकूपः १७६ तत्राभिषेकात् विष्णुलोकप्राप्तिः॥ विनशनम् १७७ तत्र गमनात् वाजपेयफलप्राप्तिः। विशल्या १७८ सा सर्व्वतीर्थजलोद्भवा तत्र गमनात् वाजपेयफलप्राप्तिः रविलोकगमनञ्च॥ तपोवनम् १७९ तत्राधिवासात् गुह्यकलोक-वासः। कन्यका नदी १८० सा सिद्धनिषेविता तत्र गमनात् पुष्करीकयागफलप्राप्तिः। विशल्या नदी १८१ तत्र गमनात् अग्निष्टोमफलं देव-लोके चिरवासश्च। माहेश्वरी १८२ तत्र गम-नात् अश्वमेधफलप्राप्तिः स्वकुलोद्धरत्वञ्च। दिवौकःपुष्करिणी १८३ तत्र गमनात् दुर्गति-विनाशः वाजिमेधफलप्राप्तिश्च। रामपदम् १८४ तत्र गमनात् अश्वमेधफलम्। माहेश्वरपदम् १८५ तत्र स्नानात् अश्वमेधफलं तत्र तीर्थ-कोटी तत्र स्नानात् पुष्करीकयागफलप्राप्तिः। नारायणस्थानम् १८६ यत्र शालग्रामनामा हरिस्तिष्ठति तत्र गमनात् अश्वमेधफलं विष्णु-लोकगमनञ्च। तत्रैव उदपानं यत्र चत्वारः समुद्राः सन्निहिताः तत्र स्नानात् दुर्गतिनाशः तत्र महादेवस्तिष्ठति तत्र गमनात् अश्वमेध-फलप्राप्तिः इन्द्रलोकवासश्च॥ जातिस्मरः १८७ तत्र स्नानात् जातिस्मरत्वप्राप्तिः। वटेश्वरपुरम् १८८ तत्र केशवस्य दर्शनपूजनाभ्यासुपवासेन च वाञ्छितकामप्राप्तिः। वामनतीर्थम् १८९ तत्र गमनात् दुर्गतिविनाशः विष्णुलोक-प्राप्तिश्च। तत्र कौशिकी तिष्ठति तस्याः सेव-नात् राजसूययज्ञफलप्राप्तिः। चम्पकारण्यम् १९० तत्रैकरात्रवासात् गोसहस्रदानफल-प्राप्तिः। गोष्ठीनम् १९१ तत्रैकरात्रोपवासात् अग्निष्टोमफलप्राप्तिः। तत्र देवा सह विश्वे-

श्च रक्षिष्यति तस्य दर्शनात् मित्रावरुणलोकवासः ॥ कन्यासंवेद्यम् १६२ तत्राहारजयात् मनुलोकप्राप्तिः तत्रान्नदानमक्षयं भवति ॥ निश्चीरा नदी १६३ तत्र गमनात् अश्वमेधफलप्राप्तिः स्वकुलोद्धरणञ्च । निश्चीरासङ्गमे अन्नदानेन ब्रह्मलोकगमनम् । तत्र वशिष्ठाश्रमः तत्राभिषेकात् वाजपेयफलप्राप्तिः ॥ देवकूटम् १६४ तत्र गमनात् वाजिमेधफलप्राप्तिः कुलोद्धरणञ्च ॥ कौशिकमुनिह्रदः १६५ तत्र मासवासात् अश्वमेधफलप्राप्तिः ॥ सर्व्वतीर्थवरह्रदः १६६ तत्र वासात् बहुसुवर्णयागफलप्राप्तिः दुर्गतिविनाशश्च ॥ वीराश्रमः १६७ तत्र कुमारस्तिष्ठति तत्र गमनात् अश्वमेधफलप्राप्तिः । अग्निधारा १६८ तत्र गमनात् अश्वमेधफलप्राप्तिः कुलोद्धरणञ्च । पितामहसरः १६६ तत्र गौरीराजप्रतिष्ठितौ शिवविष्णू तिष्ठतः तत्राभिषेकात् अग्निष्टोमफलप्राप्तिः । तत्रैव कुमारधारा तत्र स्नानात् कृतार्थता त्रिकालोपवासेन ब्रह्महत्यानाशः ॥ गौरीशिखरम् २०० तत्रारोहणात् शुद्धता तत्र कुण्डे स्नानपिण्डदेवार्चनाभ्यां अश्वमेधफलप्राप्तिः स्वर्गगमनञ्च । ताम्रारुणा २०१ तत्र गमनात् वाजिमेधफलप्राप्तिः शुक्रलोकगमनञ्च ॥ नन्दिनी २०२ तत्र चिरमृषिसेवितः कूपः तत्र गमनात् नरमेधफलप्राप्तिः ॥ कौशिकारण्यसङ्गमः २०३ तत्र चिरात्रोपवासात् सर्व्वपापमुक्तिः ॥ उर्व्वशीतीर्थम् २०४ सोमाश्रमः २०५ कुम्भकर्णाश्रमः २०६ तेषु स्नानात् अश्वमेधफलप्राप्तिः स्वर्गगमनञ्च ॥ कोकामुखम् २०७ तत्र स्नानात् जातिस्मरत्वम् ॥ नन्दा २०८ तत्र गमनात् कृतार्थता सर्व्वपापनाशः स्वर्गगमनञ्च । ऋषभद्वीपः २०६ तत्र क्रौञ्चनिसूदनसेवनात् सरस्वत्यां स्नानाच्च विमाने विराजः ॥ औद्दालकतीर्थम् २१० तत्राभिषेकात् सर्व्वपापनाशः । ब्रह्मतीर्थम् २११ तत्र गमनात् वाजपेयफलप्राप्तिः । चम्पा २१२ तत्र गमनात् गोसहस्रदानफलप्राप्तिः । नरेतिका २१३ तत्र गमनात् वाजपेयफलं विमानप्राप्तिश्च । संविद्यतीर्थम् २१४ तत्र स्नानात् विद्याप्राप्तिः । लौहित्यम् २१५ तत्र गमनात् बहुसुवर्णयागफलप्राप्तिः । करतोया २१६ तत्र चिरात्रोपवासात् वृषभैकादशदानफलप्राप्तिः ॥ कोशलायां कालतीर्थम् २१७ तत्र गमनात् गोसहस्रदानफलप्राप्तिः स्वर्गगमनञ्च । गङ्गासागरसङ्गमः २१८ तत्र गमनात् शताश्वमेधफलप्राप्तिः । गङ्गायाः परद्वीपः २१६ तत्र स्नानचिरात्रोपवासाभ्यां सर्व्वकामप्राप्तिः । वैतरणी २२० तत्र गमनात् सर्व्वपापनाशः ॥ विरजम् २२१ तत्र गमनात् चन्द्रवद्दीप्तिः ॥ प्रभवः २२२ तत्र गमनात् सर्व्वपापनाशः गोसहस्रदानफलस्वकुलपावनञ्च । प्रोष्ठपदीतीर्थसङ्गमः २२३ तत्र पिण्डदेवतर्पणात् अग्निष्टोमफलप्राप्तिः ॥ प्रोष्ठप्रभवः २२४ नर्म्मदाप्रभवः २२५ वंशगुल्मः २२६ तत्र स्नानात् वाजिमेधफलप्राप्तिः । ऋषभः २२७ तत्र गमनात् गोसहस्रदानफलप्राप्तिः । पुष्पवती २२८ तत्र स्नानचिरात्रोपवासाभ्यां गोसहस्रदानफलप्राप्तिः कुलोद्धरणञ्च ॥ वदरिकम् २२६ तत्र स्नानात् दीर्घायुष्कप्राप्तिः स्वर्गगमनञ्च । महेन्द्रपर्व्वतः २३० तत्र रामतीर्थे स्नानात् वाजिमेधफलप्राप्तिः । मतङ्गकेदारम् २३१ तत्र स्नानात् स्वर्गलोकप्राप्तिः । श्रीपर्व्वतः २३२ तत्र नदीतीरे स्नानात् अश्वमेधफलं परमसिद्धिप्राप्तिञ्च तत्र महादेवो देव्या सह तिष्ठति तत्र देवह्रदे स्नानात् अश्वमेधफलप्राप्तिः शिवलोकगमनञ्च । पाञ्चालदेशे ऋषभपर्व्वतः २३३ तत्र गमनात् वाजपेयफलप्राप्तिः स्वर्गगमनञ्च ॥ कावेरी २३४ तत्र गमनात् गोसहस्रदानफलम् । समुद्रतीरे कन्यातीर्थम् २३५ तत्र स्नानात् सर्व्वपापनाशः । समुद्रमध्ये गोकर्णतीर्थम् २३६ तत्र शिवस्तिष्ठति तस्य पूजनात् चिरात्रोपवासाच्च दशाश्वमेधतुल्यफलज्ञानपत्रप्राप्तिः । द्वादशरात्रोपवासात् कृतार्थता च । तत्र गायत्रीस्थानं तत्र चिरात्रोपवासात् गोसहस्रदानफलप्राप्तिः ब्राह्मणस्य गायत्रीपाठात् सदा सम्पन्नता अब्राह्मणस्य पाठात् तस्या विनाशः ॥ समर्णवापी २३७ तत्र गमनात् रूपसौभाग्यप्राप्तिः । वेरवा २३८ तत्र पिण्डदेवतर्पणात् मयूरहंसयुक्तविमानप्राप्तिः ॥ गोदावरी २३६ तत्र गमनेन गवामयज्ञफलप्राप्तिः वायुलोकगमनञ्च । वेरवासङ्गमः २४० तत्र स्नानात् सर्व्वपापनाशः । वरदासङ्गमः २४१ तत्र स्नानात् वाजिमेधफलप्राप्तिः । ब्रह्मस्थूणा २४२ तत्र चिरात्रोपवासात् गोसहस्रदानफलप्राप्तिः स्वर्गगमनञ्च । कुशप्लवनम् २४३ तत्र स्नानचिरात्रोपवासाभ्यां चन्द्रलोकप्राप्तिः । देवह्रदः २४४ ब्रह्मवेरवासङ्गववनम् २४५ ज्योतिर्मात्रह्रदः २४६ कन्याश्रमः २४७ तेषु गमनात् अग्निष्टोमफलप्राप्तिः । देवह्रदे स्नानात् गोसहस्रदानफलप्राप्तिः । ज्योतिर्मात्रह्रदे स्नानात् जातिस्मरत्वम् ॥ पयोष्णी नदी २४८ तत्र स्नानतर्पणाभ्यां गोसहस्रदानफलप्राप्तिः । दण्डकारण्यम् २४६ तत्र महाराजे जलस्पर्शात् गोसहस्रदानफलप्राप्तिः । शरभङ्गाश्रमः २५० कुशाश्रमः २५१ तत्र गमनात् दुर्गतिनाशः कुलपवित्रता च ॥ सूर्पारकम् २५२ तत्तु रामतीर्थम् तत्र स्नानात् बहुसुवर्णयज्ञफलप्राप्तिः । सप्तगोदावरम् २५३ तत्र स्नानात् महापुण्यप्राप्तिः देवलोकगमनञ्च । देवपथम् २५४ तत्र गमनेन देवसत्रफलप्राप्तिः ॥ तुङ्गकारण्यम् २५५ तत्र प्रवेशात् सद्यः पापनाशः मासवासात् स्वकुलस्य पवित्रता ब्रह्मलोकगमनञ्च । मेधाविकम् २५६ तत्र पिण्डदेवतर्पणात् अग्निष्टोमफलस्मृतिमेधानां प्राप्तिः ॥ कालञ्जरपर्व्वतः २५७ तत्र देवह्रदे स्नानात् सूर्य्यलोकप्राप्तिः । चित्रकूटपर्व्वतः २५८ तत्र मन्दाकिन्यां स्नानपिण्डदेवतर्पणाभ्यां अश्वमेधफलप्राप्तिः परमगतिलाभश्च ॥ भर्तृस्थानम् २५६ तत्र कार्त्तिकेयस्तिष्ठति तत्र गमनात् सर्व्वकामप्राप्तिः । कोटितीर्थे स्नानात् गोसहस्रदानफलप्राप्तिः । ज्येष्ठस्थानम् २६० तत्र महादेवस्तिष्ठति तद्दर्शनात् चन्द्रवद्दीप्तिः । तत्र कूपे चत्वारः समुद्रास्तिष्ठन्ति तत्र स्नानपदक्षिणाभ्यां परमगतिप्राप्तिः । शृङ्गवेरपुरम् २६१ यत्र रामो गङ्गामुत्तीर्णः तत्र स्नानात् सर्व्वपापनाशः विष्णुलोकप्राप्तिश्च । शृङ्गावटः २६२ तत्र महादेवस्तिष्ठति तस्य पूजनप्रदक्षिणाभ्यां गाणपत्यप्राप्तिः । तत्तीर्थे जाह्नवीस्नानात् सर्व्वपापनाशः ॥ प्रयागः २६३ तत्र त्रीण्यग्निकुण्डानि तत्र यमुनया गङ्गा सङ्गता यत्र ब्रह्मादयो देवा सिद्धाः पितरः सनत्कुमारमुखा ऋषयो नागसुपर्णसिद्धऋतुगन्धर्व्वाप्सरस्तिष्ठन्ति एवं वेदा यज्ञाश्च मूर्त्तिमन्तः ब्रह्माणमुपासते । स सर्व्वतीर्थेभ्योऽधिकः । तस्य नामसङ्कीर्त्तनश्रवणोत्तिष्ठतां कालभनेः सर्व्वपापनाशः तत्र स्नानात् त्रिलोके एवं वेदविद्यासु यत् पुण्यं तत्प्राप्तिः राजसूयाश्वमेधफलप्राप्तिश्च तत्र वपनं महत् ॥ भोगवती नाम वासुकितीर्थम् २६४ तत्राभिषेकात् अश्वमेधफलप्राप्तिः ॥ * ॥

"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः ॥
तासु वासं प्रकुर्व्वन्ति ये स्नाता वा नराः परम् ।
लभन्ते न पुनर्जन्म मातृगर्भेषु कुत्रचित् ॥"
इति पाद्मे भूमिखण्डम् ॥

ग्राह्यम् । अध्वरः । क्षेत्रम् । उपायः । (यथा, महाभारते । ५ । १२५ । २६ ।
"वासुदेवेन तीर्थेन तात ! गच्छस्व संयमम् ॥"
"तीर्थेन उपायेन ।" इति तट्टीकायां नीलकण्ठः ॥ अवसरः । यथा, भागवते ।३।१६।४।
"स तदा लब्धतीर्थोऽपि न बबाधे निरायुधम् ।
मानयन् स वृषे धर्म्मे विष्वक्सेनं प्रकोपयन् ॥")
नारीरजः । अवतारः । ऋषिजुष्टाम्बु । (यथा, रामायणे । १ । २ । ४ ।
"अकर्दमिदं तीर्थं भरद्वाज ! निशामय ।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥")
पात्रम् । (यथा, मनुः । ३ । १३० ।
"दूरादेव परीक्षेत ब्राह्मणं वेदपारगम् ।
तीर्थन्तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः ॥")
उपाध्यायः । (यथा, महाभारते ।१।४०।१८।
"शिक्षितो ह्यसि सारथ्ये तीर्थज्ञः पुरुषर्षभ ! ॥"
"तीर्थज्ञो गुरुतः ।" इति नीलकण्ठः ॥)
मन्त्री । इति मेदिनी । थे, ८ ॥ (मन्त्रिप्रभृत्यष्टादशश्रेण्यस्मत् । यथा, महाभारते । २ । ५ । ३८ ।
"कञ्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च ।
त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ॥"
"तीर्थानि मन्त्रिप्रभृतीन्यष्टादश यान्यवगाह्य

राजाज्ञप्तज्ञत्वो भवति। तानि चोक्तानि नीतिशास्त्रे यथा,—
'मन्त्री पुरोहितश्चैव युवराजश्च भूपतिः।
पञ्चमो द्वारपालश्च षष्ठोऽन्तर्वंशिकस्तथा॥
कारागाराधिकारी च द्रव्यसञ्चयकस्तथा।
ज्ञात्याज्ञप्तेषु चार्थानां नवमो विनियोजकः॥
प्रदेष्टा नगराध्यक्षः कार्य्यनिर्म्माणकस्तथा।
धर्म्माध्यक्षः सभाध्यक्षो दण्डपालस्त्रिपञ्चमः॥
वोड्रगो दुर्गपालश्च तथा राष्ट्रान्तपालकः।
अटवीपालकान्तानि तीर्थान्यष्टादशैव तु॥
चारान् विचारयेत्तीर्थे स्वात्मनश्च परस्य च।
पाषण्डादीनविज्ञातानन्योन्यमितरेष्वपि॥
मन्त्रिणं युवराजञ्च हित्वा स्वेषु पुरोहितम्॥'
इत्येषां तीर्थशब्दवाच्यत्वम्॥ हलायुधः।
योनौ जलावतारे च मन्त्रग्राह्यादग्रखपि।
पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यात् दर्शनेष्वपि॥"
इति तट्टीकायां नीलकण्ठः॥)
योनिः। दर्शनम्। वक्त्रः। इति हेमचन्द्रः॥
विप्रः। आगमः। निदानम्। अग्निः। इति संक्षिप्तसारे उणादिवृत्तिः॥ (पुण्यकालः। इति स्वामी॥ यथा, भागवते। १। १२। १४।
"हिरण्यं गां महीं ग्रामान् हस्त्यश्वान् नृपतिर्वरान्।
प्रादात् स्वनाच्च विप्रेभ्यः प्रजातीर्थे स तीर्थवित्॥"
पुं. सत्यासिनासुपाधिविशेषः। यथा, प्रायश्चित्तविवेके अवधूतप्रकरणे।
"त्रिवेणीसङ्गमे तीर्थे तत्त्वमस्यादिलक्षणे।
स्नायात्तत्त्वार्थभावेन तीर्थेनामा स उच्यते॥")
तीर्थकरः, पुं, (करोतीति करः। तीर्थस्य शास्त्रस्य पुण्यक्षेत्रस्य वा करः।) जिनः। इति हेमचन्द्रः। १। २४॥ (विष्णुः। यथा, महाभारते। १३। १४६। ८७।
"मनोयवस्तीर्थकरो वसुरेता वसुप्रदः॥"
"चतुर्दशप्रविद्यानां वाङ्मयविद्यामयानाञ्च प्रणेता प्रवक्ता चेति तीर्थकरः।" इति तद्भाष्यम्॥)
तीर्थकृत्, पुं, (तीर्थं करोतीति। कृ+क्विप् तुगागमश्च।) जिनः। इति धरणिः॥
तीर्थङ्करः, पुं, (तीर्थं करोतीति। कृ+खच् मुम् च।) जिनः। इति हेमचन्द्रः। १।२४॥
तीर्थयात्रा, स्त्री, (तीर्थे यात्रा गमनम्।) तीर्थगमनम्। तद्विधिनिषेधौ यथा,—
ऋषय ऊचुः।
"कर्म्मणा तीर्थयात्रासिन् लोके केन कथं द्विजैः।
श्रोतुं न एतदिच्छामो वद वह्निमतां मुने!॥
सूत उवाच।
एतत् श्रुत्वा ततः सूतः पुराणो मुनिसत्तमः।
प्रोवाच तान् मुनिश्रेष्ठान् स्वधर्म्मे ह्यनुतागघाः॥
यज्ञाधिकारे च गते द्विजेन्द्राः
सर्व्वस्वनाशे क्षितिपोऽथ वैश्यः।
शुश्रूषणायां बलवीर्य्यहीनः
शूद्रस्तु तीर्थानि भजेत् सुदान्तः॥
तस्मात्तुभिस्तीर्थगतिर्मुनीन्द्रैः
कार्य्या तथा तत्फलकाङ्क्षिभिश्च।
तां ब्रह्मचारी विधिवत् करोति
स्वयं यतो गुरुणा सन्नियुक्तः॥
नित्यं गृहस्थाश्रमसंस्थितस्य
मनीषिभिस्तीर्थगतिर्निगद्या।
मातुः पितुर्भक्तिमना गृहस्थः
सुतो न कुर्य्यात् खलु तीर्थयात्राम्॥
गङ्गाजलेनानुदिनं मनुष्यो
यत्नोद्यमेनापि सदा सुनीन्द्राः।
स्नातोऽह सम्यक् यदि भावशुद्धः
फलं तदाप्नोति न चान्यदेतत्॥
सर्व्वाणि तीर्थानि हि यानि तानि
स्वर्गेऽन्तरीक्षेऽपि पुनः पृथिव्याम्।
तुल्यानि सम्यक् सुनयोऽभिहोत्रे
सत्यं गृहस्थाश्रमसंश्रितस्य॥
यस्येह यज्ञेष्वधिकारितास्ति
गृहेऽन्वहं दानवतो सुनीन्द्राः।
संक्षुब्धतः कल्कविवर्ज्जितस्य
तीर्थे गतिः पूर्व्वतरैर्निगद्या॥"
इति वह्निपुराणे १ अध्यायः॥
तीर्थराजी, स्त्री, (तीर्थानां राजी श्रेणिरिव। यद्वा, तीर्थेषु राजते शोभते इति। राज+क्विप्। ततो वा ङीष्।) काशी। इति त्रिकाण्डशेषः॥
तीर्थवाक्, पुं, (तीर्थस्येव वाक्यो वचनमस्य। उक्तमाङ्गस्थित्या प्रश्नसनीयत्वादस्य तथात्वम्।) केशः। इति हेमचन्द्रः। ३। २३१॥
तीर्थसेवी, [न्] पुं स्त्री, (तीर्थं षड्दर्शनलक्षणस्थानं सेवते इति। सेव+णिनिः।) वकपक्षी। इति राजनिर्घण्टः॥ तीर्थवासिनि, त्रि॥
तीव, स्थौल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) तीवति। इति दुर्गादासः॥
तीवरः, पुं, (तीर्यते इति। तॄ प्लवनतरणयोः+"छित्वरच्छत्वरेति।" उणां ३। १। इति ष्वरच्प्रत्ययेन निपातनात् साधुः।) सङ्करः। (तीरयति कर्म्मसमाप्तिं करोतीति। तीर+ष्वरच्। गुणाभावो रेफलोपश्च। इत्युज्ज्वलदत्तः।) व्याधः। इति मेदिनी। रे, १६३॥ वर्णसङ्करजातिविशेषः। तेओर इति भाषा। स तु राजपुत्रस्त्रियां क्षत्रियाज्जातः। इति ब्रह्मवैवर्त्तम्॥ चूर्णकभार्य्यायां पुल्कसाज्जातः। इति पराशरपद्धतिः॥
तीवरी, स्त्री, (तीवर+ङित्त्वात् ङीप्।) व्याधपत्नी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
तीव्रं, क्ली, (तीव स्थौल्ये+बाहुलकात् रक्। तिज निशाने+बाहुलकात् रन्। दीर्घत्वम्। जकारस्य वकारः। इत्युज्ज्वलदत्तः। २।२८॥) अतिशयः। इत्यमरः। १। २। ७०॥ तीक्ष्णम्। तीक्ष्णम् त्रपु। इत्युणादिकोषः॥ लोहम्। इति राजनिर्घण्टः॥
तीव्रः, त्रि, (तिज+बाहुलकात् रन्।) दीर्घत्वादिकञ्च। अत्युग्रः। नितान्तः। (यथा, रघुः। ८।६५।
"तान् हत्वा गजकुलबद्धतीव्रवैरान्
काकुत्स्थः कुटिलनखायलभमुक्तान्॥")
कटुः। इत्युणादिकोषः॥ (दुःसहः। यथा, आर्य्यासप्तशत्याम्। ६६१।
"हन्त विरहः समन्ताज्ज्वलयति दुर्व्वारतीव्रसंवेगः॥"
तीक्ष्णम्। यथा, तत्रैव।१५२।
"कृतकस्याप मदीयश्चासध्वनिदत्तकर्ण! किं तीव्रैः।
विध्यसि मां निश्वासैः सरः शरैः शब्दवेधीव॥")
शिवे, पुं। इति शब्दरत्नावली॥
तीव्रकण्ठः, पुं, (तीव्रः कण्ठो यस्मात्। अस्य भक्षणेन हि कण्ठदेशे पीड़ोत्पत्तेस्तथात्वम्।) शूरणः। इति राजनिर्घण्टः॥
तीव्रगन्धा, स्त्री, (तीव्रः कटुर्गन्धो यस्याः।) यवानी। इति राजनिर्घण्टः॥
तीव्रज्वाला, स्त्री, (तीव्रं यथा स्यात् तथा ज्वालयति उत्तेजयति सेविनमिति। ज्वल+णिच्+अच् टाप् च।) धातकी। इति राजनिर्घण्टः॥
तीव्रवेदना, स्त्री, (तीव्रा अत्यन्ता वेदना।) यातना। अतिशयवेदना। इत्यमरः।१।१०।३॥
तीव्रा, स्त्री, (तीव्र+टाप्।) कटुरोहिणी। गरुडलूता। राजिका। इति मेदिनी। रे, ४५॥ नदीविशेषः। इति शब्दरत्नावली॥ महाज्योतिष्मती। तरदीक्षः। तुलसी। इति राजनिर्घण्टः॥
तु, ल ४सौ। हिंसायाम्। पूर्त्तौ। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-सकं च-सेट्।) ल, तौति तवीति। इति दुर्गादासः॥
तु, अ, पादपूरणम्। (यथा, मनुः। ११। २०७।
"अवगूर्य्य लब्धग्रतं सहसमभिहत्य च।
जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते॥")
भेदः। अवधारणम्। इत्यमरः॥ समुच्चयः। (यथा, मनुः। ११। २०२।
"उच्चयानं समारुह्य खरयानन्तु कामतः।
स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति॥")
पश्चान्तरम्। नियोगः। प्रशंसा। विनिग्रहः। इति शब्दरत्नावली॥
तुक्, [च्] पुं, (तुज्यते तौयैतेऽनेनेति। तुज प्राणे+क्विप्।) अपत्यम्। इति हेमचन्द्रः॥
तुकाचौरी, स्त्री, (तुगाचौरी+पृषोदरादित्वात् गस्य कः।) तुगाचौरी। इति हेमचन्द्रः।४।२२०॥
तुगा, स्त्री, (तुज+बाहुलकात् घः किच्च।) वंशलोचना। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"स्यादवंशरोचना वंशी तुगाचौरी तुगा शुभा।
त्वक्चौरी वंशजा शुभ्रा वंशचौरी च वेणुवी॥")
तुगाचौरी, स्त्री, (तुगा सा एव चौरी।) वंशलोचना। इति राजनिर्घण्टः॥ वंशलोचनाभेदः। अस्या गुणाः। क्षयश्वासकासनाशित्वम्। मधुरत्वम्। हिमत्वञ्च। इति राजवल्लभः॥ (यथा, भावप्रकाशे मध्यखण्डे २ भागे काश्मरीगाधिकारे।
"द्विगुणा च तुगाचौरी सिता सर्व्वत्तुगुणा॥")

तुङ्गः, पुं, (तुजि हिंसायाम् + घञ् ।) पुन्नागवृक्षः । (यथा, वैद्यकरत्नमालायाम् ।
"कुम्भीकः पुरुषस्तुङ्गः पुन्नागो रक्तकेशरः ॥")
पर्व्वतः । बुधग्रहः । इति हेमचन्द्रः । ६ । ६४ ॥
नारिकेलः । गण्डकः । इति राजनिर्घण्टः ॥
योगभेदः । इति शब्दरत्नावली ॥ स तु ग्रहार्य्या उच्चराशिः । यथा,—
"सूर्य्यादुच्चान् क्रियवृषमृगस्त्रीकुलीरान्त्ययूके
दिग्वह्नीन्द्रद्वयतिथिशरान् सप्तविंशांश्च विंशान् ।
अंशानेतान् वदति भवनश्चान्यतुङ्गान् सुतुङ्गां-
स्त्वानेवांशान् मदनभवनेष्वाह नीचान् सुनी-
चान् ॥"
इति दीपिका ॥
"आदित्यमेषे वृषभे मृगाङ्के
कन्यागते मे च गुरौ कुलीरे ।
मीने च शुक्रे मकरे महीजे
शनौ तुलायामिति तुङ्गगेहाः ॥"
इति समयाभ्रतम् ॥ * ॥
अथ तुङ्गस्थग्रहफलम् ।
"तुङ्गेऽर्के: शुभसंयुतः शुभकरैर्मित्रेण दृष्टो यदा
दैवात् पश्यति सोऽपि वा शुभकरानेकं द्विकं वा
त्रिकम् ।
विघ्नेशः प्रथितो विमर्दितरिपुः चौर्यीशमान्यो
व्यापाराश्चितपादपद्मयुगलो राजा त्रिकोणे
यदा ॥
तुङ्गे चन्द्रमसि प्रसन्नवपुषि ब्रह्मादनष्टद्युतौ
प्रख्यातोऽरिविमर्दकोऽगदतनू राजेश्वरो रूप-
वान् ।
व्यापाराश्चितपादपद्मयुगलो वा धर्म्मशीलो
महान्
यौ म्येरेव युतोऽथवा प्रियतमेर्दृष्टे त्रिकोणेऽपि
च ॥
यदि भवति शशाङ्को भूमिपुत्रस्तदा वै
न दिनकरमयूखादभ्रदूरभ्रिनरेन्द्रः ।
अगदतनुरभीतः शत्रुदर्पापहारी
प्रथितरिपुनरेन्द्रः स्यात्त्रिकोणेऽपि जातः ॥
कन्यायाः शशलाञ्छनस्य तनयस्त्विन्द्यग्रकैः
संयुतो
दृष्टो वा यदि संयुतः शुभकरैर्ज्ञातस्तदा
भूपतिः ।
याचार्य्यां तुरगोष्ट्रमत्तकरिणां यातैर्महीं कम्पते
सद्माभ्रद्वरशीरुहा विगलिता यान्ति त्रिकोणे-
ऽपि च ॥
तुङ्गे गुरौ मित्रखगेन दृष्टो
राजा भवेदिन्द्रसमानमूर्त्तिः ।
गजाश्वनौकागरपूर्णलक्ष्मीः
पृथ्वीपतिः स्वस्य त्रिकोणगेऽपि ॥
तुङ्गे भृगौ शुभसुहृत्प्रयुते च दृष्टे
दैवात् पुनः स यदि पश्यति मित्रसंघान् ।
भूपाधिपो भवति कीर्त्तिकरप्रधानो
दीर्घायुरुग्रसुखभुग्भृगुजे त्रिकोणे ॥
तुङ्गे शनौ मित्रखगेन दृष्टे
प्रचण्डदण्डो नृपतिप्रधानः ।
न दृश्यते दिग्गमने च धुर्व्वी
त्रिकोणगे चापि नरेन्द्रमूर्त्तिः ॥
भवति धरणिपालो नीचबुद्धिः प्रतापी
हयगजधनपूर्णो जातिवर्गे विरक्तः ।
कुटिलमतिरनीतो भूरिभाण्डारयुक्त-
स्तमसि मिथुनसंस्थे जायते मानवेन्द्रः ॥
भृगपतिदृष्टकन्याकर्कटस्थे च राहौ
भवति विपुललक्ष्मी राजराजाधिपो वा ।
हयगजनरनौकामण्डितः सार्व्वभौमो
नृपतिरमरपूज्यो राहुतुङ्गी चिरायुः ॥
अरिनिधनव्ययतुङ्गे कीर्त्तितमेतत् फलं यथर्क्षम् ।
केन्द्रत्रिकोणे लाभे वा तुङ्गफलं यथोद्दिष्टम् ॥"
इति कोष्ठीप्रदीपः ॥
तुङ्गः, त्रि, (तुजि हिंसायाम् + घञ् ।) उग्रः । प्रधानम् । उन्नतः । इति शब्दरत्नावली ॥ (यथा, रघुः । ६ । ३ ।
"शिलाविभङ्गैर्व्वनराजशाव-
स्तुङ्गं नगोत्सङ्गमिवारुरोह ॥"
प्रचुरः । यथा, तत्रैव । ४ । ७० ।
"तेषां सदम्बभूयिष्ठास्तुङ्गा द्रविणराशयः ॥")
किञ्जल्के क्ली । इति राजनिर्घण्टः ॥
तुङ्गकः, पुं, (तुङ्ग + स्वार्थे संज्ञायां वा कन् ।) पुन्नागवृक्षः । इति शब्दरत्नावली ॥ (अरण्यरूप-तीर्थविशेषे, क्ली । यथा, महाभारते । ३ । ८५ । ४६-५४ ।
"तुङ्गकारण्यमासाद्य ब्रह्मचारी जितेन्द्रियः ।
वेदानध्यापयत् तत्र सनीन् सारस्वतः पुरा ॥
तत्र वेदेषु नष्टेषु सनेरङ्गिरसः सुतः ।
ऋषीणामासनरीयेषु रूपविष्टो यथासुखम् ॥
ओंकारेण यथान्यायं सम्यगुच्चारितेन ह ।
येन यत् पूर्व्वमभ्यस्तं तत् सर्व्वं समुपस्थितम् ॥
ऋषयश्चैव देवाश्च वरुणोऽग्निः प्रजापतिः ।
हरिर्नारायणश्चैव महादेवस्तथैव च ॥
पितामहश्च भगवान् देवैः सह महाद्युतिः ।
भृगुं नियोजयामास यजनार्थं महाद्युतिम् ॥
ततः स चक्रे भगवान्ऋषीणां विधिवत्तदा ।
सर्व्वेषां पुनराधानं विधिदृष्टेन कर्म्मणा ॥
आप्यभागेन तत्राग्निं तर्पयित्वा यथाविधि ।
देवाः स्वभवनं याता ऋषयश्च यथाक्रमम् ॥
तदरण्यं प्रविष्टस्य तुङ्गकं राजसत्तम ! ।
पापं प्रणश्यत्यखिलं स्त्रिया वा पुरुषस्य वा ॥
तत्र मासं वसेद्धीरो नियतो नियताशनः ।
ब्रह्मलोकं व्रजेद्राजन् ! कुलञ्चैव समुद्धरेत् ॥")
तुङ्गभद्रः, पुं, (तुङ्ग उच्चोऽपि भद्रः ।) मदोत्कटहस्ती । इति मेदिनी । रे, २६३ ॥
तुङ्गभद्रा, स्त्री, (तुङ्गा प्रधाना भद्रा निर्म्मला च ।) नदीविशेषः । सा दक्षिणे प्रसिद्धा । (यथा, मत्स्यपुराणे । ११३ । २६ ।
"तुङ्गभद्रा सुप्रयोगा वाह्या कावेरी चैव तु ।
दक्षिणापथनद्यस्ताः सह्यपादाद्विनिःसृता ॥")
तस्या जलस्य गुणाः । स्निग्धत्वम् । निर्म्मलत्वम् । स्वादुत्वम् । गुरुत्वम् । कफपित्तामदाहत्वम् । प्रायःसात्म्यत्वम् । मेधाकरत्वञ्च । इति राजनिर्घण्टः ॥
तुङ्गशेखरः, पुं, (तुङ्गान्युच्चानि शेखराणि शृङ्गाणि यस्य ।) पर्व्वतः । इति शब्दमाला ॥
तुङ्गा, स्त्री, (तुङ्ग + टाप् ।) वंशलोचना । भूमी । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायाः यथा,—
"भूमी भूस्तुफला तुङ्गा केशग्रहणी शिवा फला ।
मङ्गल्या च तथा लक्ष्मीः शमीरः सात्त्विका
स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तुङ्गिनी, स्त्री, (तुङ्गो वृक्षविशेषस्तद्वदाकृतिरस्त्यस्याः । तुङ्ग + इनिः । ङीप् ।) महाशृङ्गतावरी । इति राजनिर्घण्टः ॥
तुङ्गी, स्त्री, (तुङ्ग + गौरादित्वात् ङीष् ।) हरिद्रा । वर्व्वरी । इति मेदिनी । गे, ८ ॥ (अस्याः पर्य्यायाः यथा, भावप्रकाशस्य पूर्व्वखण्डे १भागे ।
"वर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका ।
पर्णाह्वस्तत्र क्षुपे तु कटिल्लककुटेरकौ ॥"
रात्रिः । इति त्रिकाण्डशेषः ॥)
तुङ्गी, [न्] पुं, (तुङ्गः उच्चस्थानं आश्रयत्वेन अस्त्यस्य । इनिः ।) तुङ्गस्थानस्थितः । उच्चग्रहः । इति ज्योतिषम् ॥
तुङ्गीपतिः, पुं, (तुङ्गा निशायाः पतिः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥
तुङ्गीशः, पुं, (तुङ्गी सर्व्वप्रधाना ईशः प्रभुश्च ।) शिवः । ब्रह्मा । सूर्य्यः । इति शब्दरत्नावली ॥
तुच्छं, क्ली, (तौति असारत्वं गच्छतीति । तु + "छोऽदिकचिभ्यां श्रुतुभ्यान्तु कित् पीपूडोः खच्च।" २ । ३३ । उणादिकोषटीकाधृतसूत्रात् छः स च कित् ।) पुलाकजम् । इत्युणादिकोषः ॥ भुधि इति भाषा ॥
तुच्छः, त्रि, (तुद् + क्विप् । तेन तं वा क्षतीति । छो + कः ।) शून्यः । रत्नमरः । ३ । १ । ५६ ॥ हीनः । इत्युणादिकोषः ॥ (यथा, भागवते । ७ । ७ । ४५ ।
"किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः ॥")
अल्पः । इति हेमचन्द्रः । ६ । ६२ ॥
तुच्छदुः, पुं, (तुच्छो हीनो दुर्वृत्तः ।) एरण्डवृक्षः । इति शब्दचन्द्रिका ॥
तुच्छधान्यकं, क्ली, (तुच्छं धान्यम् । अल्पार्थे कन् ।) पुलाकः । इति रत्नमाला ॥ आगड़ा इति भाषा ॥
तुच्छा, स्त्री, (तुच्छ + टाप् ।) तुत्था । नीलीवृक्षः । इति भावप्रकाशः ॥ (क्षुद्रैला । गुजराट्देशीया एलाची । अस्याः पर्य्यायाः यथा,
"क्षुद्रोपकुञ्चिका तुच्छा कोरङ्गी द्राविड़ी
गुटिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तुज, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) तोजति । इति दुर्गादासः ॥

तुज, इ प्राणे। वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकं च-सेट्।) पञ्चमस्वरी। इ, तुञ्जते। प्राणो जीवनम्। हिंसायाञ्चनायामिति कश्चित्। इति दुर्गादासः॥

तुज, इ क भाषवृद्धौ। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सकं च-सेट्।) पञ्चमस्वरी। इ क, तुञ्जयति। भा दीप्तिः। यद्वार्थो निकेतनहिंसाबलदानानि। इति दुर्गादासः॥

तुट, श्लि कलहे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) श्लि, तुटति अतुटीत् नीचः परस्परं वचसा। तुतोट। इति दुर्गादासः॥

तुटुमः, पुं, (तुटति नाशयति द्रव्यजातमिति। तुट+बाहुलकात् उमः।) उन्दुरुः। इति त्रिकाण्डशेषः॥

तुड, इ ड वधे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) पञ्चमस्वरी। इ, तुण्डते। इ, तुण्डते। वधो निष्पीड़नमिति रमानाथः। तुण्डते पात्यं पिकः। इति दुर्गादासः॥

तुड, ऋ वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पञ्चमस्वरी। ऋ, अतुतोड़त्। वधो द्विधाकरणमिति गोविन्दभट्टः। तोड़ति मल्लो मल्लाङ्गं भिनत्तीत्यर्थः। इति दुर्गादासः॥

तुड, श्लि भेदे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) श्लि, तुड़ति अतुड़ीत् तुतोड़। उपसूचने इति कश्चित्। इति दुर्गादासः॥

तुड्, नादरे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पञ्चमस्वरी ङ्ङ्यान्तः। नादरः अनादरः। तुड्डति। फलाभावान्न ऋदनुबन्धः। इति दुर्गादासः॥

तुण, ग्र जैह्म्ये। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) जैह्म्यमिह कुटिलीकरणम्। ग्र, तुणति ह्रस्वं वायुः। तोणिता। इति दुर्गादासः॥

तुणिः, पुं, (तुणति सङ्कोचयतीति। तुण जैह्म्ये+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्।) कुणिः। तुन्नदृच्चः। इत्यमरटीकायां स्वामी॥ (अस्य पर्य्याया गुणाश्च यथा,—

"तुणिस्तुन्नक आपीनस्तुणिकः कच्छकस्तथा।
कुटेरकः कान्तलको नन्दिवृक्षश्च नन्दकः॥
तुणी रक्तः कटुः पाके कषायो मधुरो लघुः।
तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्तजित्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

तुण्डं, क्लीं, (तुण्डते निष्पीड़यति अभ्यन्तरस्थद्रव्यमिति। तुण्ड+पचाद्यच्।) मुखम्। इत्यमरः। २। ६। ८६॥ (चञ्चुः। यथा, देवीभागवते। २। १। २६।

"आमिषं स तु विज्ञाय श्येनरूपमथाद्रवत् खगम्।
तुण्डयुद्धमथाकाशे तावुभौ समचक्रतुः॥"

पुं महादेवः। यथा, हरिवंशे भविष्यपर्व्वणि। १५। १५।

"नमस्तुण्डाय तुथाय नमस्तुटितुटाय च।"

राक्षसविशेषः यथा, महाभारते। ३।२८४।६।

"तुण्डेन च नमस्तस्य पटुघ्नः पनसेन च॥")

तुण्डकेरिका, स्त्री, कार्पासी। इति राजनिर्घण्टः॥

तुण्डकेरी, स्त्री, (प्रशस्तं तुण्डम्। प्रशंसायां कन्। ङीष्। तदीर्त्ते ईरयति वा तत्तुल्यशोभाधारणात्। ईर+कर्म्मण्यण्। स्त्रियां ङीष्।) बिम्बिका। इत्यमरटीकायां भरतः॥ तेलाकुचा इति भाषा॥

तुण्डिः, पुं, (तुण्डते निष्पीड़यति मध्यस्थद्रव्यमिति। तुण्ड+"सर्व्वधातुभ्य इन्।" उणां ४। ११७। इतीन्।) मुखम्। चञ्चुः। इत्युणादिकोषः॥ नाभौ स्त्री। इति शब्दरत्नावली॥

तुण्डिका, स्त्री, (तुण्डिरेव। तुण्डि+स्वार्थे कन् टाप् च।) नाभिः। बिम्बिका। इति शब्दरत्नावली॥ (अस्या गुणा यथा,—

"तुण्डिका चाग्निरुचिकृद्वातपित्तनिवारणी॥"

इति हारीते प्रथमे स्थाने दशमेऽध्याये॥)

तुण्डिकेरी, स्त्री, कार्पासी। बिम्बिका। इत्यमरः। २। ४। ११६॥ (अस्या पर्य्यायाः यथा,

"तुण्डी रक्तफला बिम्बी तुण्डिकेरी च बिम्बिका॥"

इति वैद्यकरत्नमालायाम्॥)

अस्या रूपान्तराणि। तुण्डिकेरिका तुण्डिकेरिः तुण्डकेरी तुण्डिकेयी। इत्यमरटीका॥

तुण्डिकेयी, स्त्री, बिम्बिका। इति शब्दचन्द्रिका॥

तुण्डिभः, त्रि, (तुण्डिर्वृन्दा नाभिरस्य। "तुन्दिवलिवटेभैः।" ५।२।१४०। इति भः।) मुक्तनाभिः। इत्यमरः। २। ६। ६१॥

तुण्डिलः, स्त्री, (तुण्डिरस्त्यस्येति। सिध्मादित्वात् लच्।) मुक्तनाभिः। इत्यमरः। २।६।६१॥ सुखरः। इत्युणादिकोषः॥

तुत्थ, तृ क स्तुतौ। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) आद्ये पञ्चमस्वरः शेषो दन्त्यवर्गाद्ययुक्तस्यकारः। तुत्थयति तुत्थापयति। स्तुतिराच्छादनम्। इति दुर्गादासः॥

तुत्थं, क्लीं, (तुदति पीड़यत्यनेन। तुद+"मातृतुदेति।" उणां २। ७। इति थक्। यद्वा, तुत्थ आच्छादने+अच्।) खर्परीतुत्थम्। उपधातुभेदः। तुतिया इति भाषा। तत्पर्य्यायः। नीलाञ्जनम् २ हरिताश्मम् ३ तुत्थकम् ४ मयूरग्रीवकम् ५ ताम्रगर्भम् ६ अम्लतोड्डवम् ७ मयूरतूत्थम् ८ शिखिकण्ठम् ९ नीलम् १०। इति राजनिर्घण्टः॥ तुत्थाञ्जनम् ११ शिखिग्रीवम् १२ वितुन्नकम् १३ मयूरकम् १४। इत्यमरः। २।६।१०१॥ तूतकम् १५ स्फटातुत्थम् १६ स्फटामदम् १७। इति शब्दचन्द्रिका॥ अस्य गुणाः। कटुत्वम्। कषायत्वम्। उष्णत्वम्। श्वित्रनेत्रामयनाशित्वम्। सर्व्वविषदोषघ्नमनत्वम्। वान्तिकारकत्वञ्च। इति राजनिर्घण्टः॥ क्षारत्वम्। निर्म्मलत्वम्। लघुत्वम्। भेदकत्वम्। कृमिकण्डुकुष्ठकफनाशित्वञ्च। इति राजवल्लभः॥ *॥

"तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरकम्।
तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत्॥
किञ्चित्ताम्रगुणं तस्माद्रूक्ष्यमाणगुणञ्च तत्।
तुत्थकं कटुकं क्षारं कषायं वामकं लघु॥
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत्।
विषाश्मकुष्ठकण्डूनं खर्परं चापि तद्गुणम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥

(अस्य शोधनविधिर्यथा,—

"ओतोर्म्बिडासमं तुत्थं सप्तधा टङ्कणाङ्गि युक्।
त्रिधा सुपुटितं शुद्धं वान्तिभ्रान्तिविवर्ज्जितम्॥"

अन्यच्च।

"गन्धकेन समं तुत्थं तुत्थार्द्धेनार्द्धयामकम्।
वान्तिभ्रान्ती यदा न स्तस्तदा सिद्धिं विनिर्द्दिशेत्॥"

शोधितस्यास्य गुणा यथा,—

"तुत्थं सकटुकक्षारं कषायं विशदं लघु।
लेखनं भेदि चक्षुष्यं कण्डूक्रिमिविषापहम्॥"

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥)

रसाञ्जनम्। श्यामा। इत्युणादिकोषः॥ अग्निः। इति संक्षिप्तसारे उणादिवृत्तिः॥ अयौ पुं। इति हेमचन्द्रः॥

तुत्थकं, क्लीं, (तुत्थमेव। स्वार्थे कन्।) तुत्थम्। इति शब्दचन्द्रिका॥ (अस्य गुणा यथा,—

"तुत्थकं कटुकं क्षारं कषायं वामकं लघु।
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत्।
विषाश्मकुष्ठकण्डूनं खर्परञ्चापि तद्गुणम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

तुत्था, स्त्री, (तुत्थ+टाप्।) नीलीवृक्षः। क्षुद्रेला। इत्यमरः। २। ४। ६५॥ महानीली। इति राजनिर्घण्टः॥

तुत्थाञ्जनं, क्लीं, (तुत्थयति तुत्थ्यते वा। तुत्थ+अच्। तुत्थञ्च तदञ्जनञ्चेति कर्म्मधारयः।) उपधातुविशेषः। तुत्थम्। इत्यमरः।२।६।१०१॥

तुद, व्य ग्र औ वधे। इति कविकल्पद्रुमः॥ (तुदां-उभं-सकं-अनिट्।) व्य ग्र, तुदति तुदते। औ, तोत्ता। वध इह ज्ञानस्य रूपम्। तुदोद गदया वारिम्। इति भट्टिः॥ विध्यतुदः। इति दुर्गादासः॥

तुन्दं, क्लीं, (तुदतीति। तुद+"अन्दादयश्च।" उणां ४। ६८। इति दन् तुदेर्नुमश्च इत्युक्तेर्नुम् ततो दस्य लोपः।) उदरम्। इत्यमरः। २। ६। ७७॥

तुन्दकूपिका, स्त्री, (क्षुद्रः कूपः कूपिका। तुन्दस्य उदरस्य कूपिकेव।) नाभिः। इति हेमचन्द्रः। ३। २। ७०॥

तुन्दकूपी, स्त्री, (तुन्दस्य उदरस्य कूपी क्षुद्रकूप इव।) नाभिः। इति त्रिकाण्डशेषः॥

तुन्दपरिमार्ज्जः, त्रि, (तुन्दमुदरं परिमार्ष्टीति। परि+मृज+अण्।) तुन्दपरिघृजः। इत्यमरटीकायां रमानाथः॥ (अलसादप्यत्र तुन्दपरिमार्ज्ज एव।" इति सिद्धान्तकौमुदी। पां ३। २। ५॥)

तुन्दपरिमृजः, त्रि, (तुन्दसुदरं परिमार्ष्टीति। परि+मृज+"तुन्दशोकयोः परिमृजापनुदोः।" ३।२।५। इत्यत्र "आलस्यसुखाहरणयोरिति वक्तव्यम्।" इति वार्त्तिकोक्त्या कः।) अलसः। इत्यमरः। २।१०।१८॥

तुन्दि, क्ली, (तुद+इन् बाहुलकात् नुम् च।) उदरम्। इति हेमचन्द्रः। ३।१६८॥ गन्धर्व्वविशेषे, पुं। इति जटाधरः॥

तुन्दिः, स्त्री, (तुद्+इन् बाहुलकात् नुम् च।) नाभिः। इति चिकाण्डशेषः॥

तुन्दिकः, त्रि, (अतिशयितं तुन्दसुदरमस्यास्य। "तुन्दादिभ्य इलच्च।" ५।२।११७। इति चकारात् ठन्।) विशालजठरो जनः। इति शब्दरत्नावली॥

तुन्दिका, स्त्री, (तुन्दसुदरं आश्रयत्वेनास्त्यस्याः। तुन्द+ठन् टाप् च।) नाभिः। इति शब्दरत्नावली॥

तुन्दितः, त्रि, तुन्दिलः। इति भरतस्य द्विरूपकोषः॥

तुन्दिभः, त्रि, (तुन्दिर्हिंसा नाभिरस्त्यस्येति। तुन्दि+"तुन्दिवलिवटेर्भः।" ५।२।१३६। इति भः।) तुन्दिलः। इति शब्दरत्नावली॥

तुन्दिलः, त्रि, (तुन्दं विशालसुदरमस्त्यस्येति। तुन्द+"तुन्दादिभ्य इलच्च।" ५।२।११७। इतीलच्।) विशालजठरो जनः। भुँड़ि इति भाषा॥ तत्पर्य्यायः। पिचिण्डिलः २ दृढत्वक्कुक्षिः ३ तुन्दिकः ४ तुन्दिभः ५ तुन्दी ६। इति शब्दरत्नावली॥

तुन्दिलफला, स्त्री, (तुन्दिलवत् फलमस्याः।) त्रपुषी। इति राजनिर्घण्टः॥

तुन्दी, स्त्री, (तुन्दि+वा ङीष्।) नाभिः। इति शब्दरत्नावली॥

तुन्दी, [न्] त्रि, (तुन्दं विशालसुदरमस्त्यस्येति। "तुन्दादिभ्य इलच्च।" ५।२।११७। इति चकारात् इनिः।) तुन्दिलः। इति शब्दरत्नावली अमरश्च॥

तुन्नः, पुं, (तुद्यते इति। तुद+क्तः।) नन्दीवृक्षः। तुँद इति भाषा। इत्यमरः। २।४।१२७॥ त्रि, व्यधितः। (यथा, रामायणे। २।१४।२३।

"स तुन्न इव तीक्ष्णेन प्रतोदेन हयोत्तमः।
राजा प्रचोदितोऽभीक्ष्णं कैकेयीमिदमब्रवीत्॥"

क्षिप्ते। द्विधाकृते च॥)

तुन्नवायः, पुं, (तुन्नं क्षिप्तं वयतीति। वे+"कृवापाजिमिस्वदिसाध्यशूदृञ्धाञ्सः।" ३।२।२। इत्यण्।) सौचिकः। इत्यमरः। २।१०।६॥ दरजी इति भाषा॥ (यथा, मनुः। ४।२१४।

"ग्रैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च॥")

तुन्प, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) तुम्पति। इति दुर्गादासः॥

तुन्प, प्र वधे। क्षेपे। इति कविकल्पद्रुमः॥ (तुदां-सकं-अकं च-सेट्।) प्र, तुप्तति ततुम्प। इति दुर्गादासः॥

तुप, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) तोपति। इति दुर्गादासः॥

तुप, इ क अर्दने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) पञ्चमस्वरी। इ क, तुम्पयति। अर्दनं वधः। इति दुर्गादासः॥

तुप, प प्र क्षेपे। वधे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सकं च-सेट्।) प प्र, तुम्पति तुतोप। इति दुर्गादासः॥

तुफ, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) तोफति। इति दुर्गादासः॥

तुफ, प फ क्षेपे। वधे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सकं च-सेट्।) प फ, तुम्फति तुतोफ। इति दुर्गादासः॥

तुब, इ कि अर्दे। इति कविकल्पद्रुमः॥ (चुरां-पञ्चे भ्वां-परं-सकं-सेट्।) तवर्गाद्यादिः। पञ्चमस्वरी। इ, तुम्बते। कि, तुम्बयति तुम्बति। अर्दौ वधः। इति दुर्गादासः॥

तुभ, ल ड हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ल, अतुभत्। ड, तोभते। इति दुर्गादासः॥

तुभ, य ग हिंसे। इति कविकल्पद्रुमः॥ (दिवां-क्र्यां च-परं-सकं-सेट्।) य, तुभ्यति। ग, तुभ्नाति। ततोभ। इति दुर्गादासः॥

तुसरः, पुं क्ली, (तुसति। रस्य लः।) तुसलः॥ इत्यमरटीकायां रायमुकुटः॥ (क्षत्रियजातिविशेषः। यथा, मात्स्ये। ११३। ५३।

"तुसरास्तुम्बराश्चैव पङ्क्तमा नैषधैः सह॥")

तुसुलं, क्ली, (तु सौत्रो धातुः+बाहुलकात् सुलक्।) रणसङ्कुलम्। सङ्कीर्णयुद्धम्। इत्यमरमेदिनीकरौ॥ परस्परसम्बाधो रणसंघट्टः। इति भरतः॥ (यथा, देवीभागवते। ५।३१।२८।

"तत्राभूत्तुसुलं युद्धं देवदानवसैन्ययोः॥")

तुसुलः, पुं, (तु+बाहुलकात् सुलक्।) कलिवृक्षः। इति मेदिनी। ले, ६८॥ बाकुलो रणः। इति चिकाण्डशेषः॥ (प्रपञ्चे उग्रे सङ्कुलमात्रे च त्रि। यथा, राजतरङ्गिण्याम्। ४।५४१।

"एकस्य करुणाक्रन्दैः सैन्यस्यान्यस्य गर्ज्जितैः।
सरित्तरङ्गघोषेण बभूवुस्तुमुला दिशः॥"

तथा, महाभारते। १।५३।१२।

"ववौ गन्धश्च तुसलो दह्यतामनिशं तदा॥")

तुम्बः, पुं क्ली, (तुम्बति नाशयत्यरुचिमिति। तुम्ब अर्दने+अच्।) अलाबुः। इत्यमरटीकायां भरतः॥ (अलाबोः शुष्कत्वक्। यथा, हरिवंशे। ६४।५।

"सन्निधयतुम्बकरकौ गोपवेणुप्रवादकौ॥")

तुम्बकः, पुं, (तुम्बति अरुचिमिति। तुम्ब+खुल्।) अलाबुः। इति शब्दरत्नावली॥ राजालाबुः। इति राजनिर्घण्टः॥

तुम्बा, स्त्री, (तुम्ब+टाप्।) अलाबुः। इति शब्दरत्नावली॥ (यथा, अश्वाष्टके। ७।

"कुम्भावतीसमविडम्बा गवेन नवतुम्बाभवीक्षणविधा
ग्रं बाहुवेयग्रन्थिविम्बाभिरामसुखसंबाधितस्तनभरां॥")

गवी। इति चिकाण्डशेषः॥

तुम्बिः, स्त्री, (तुम्बति नाशयत्यरुचिमिति। तुबि अर्दने+"सर्व्वधातुभ्य इन्।" उणा ४।११७। इतीन्।) अलाबुः। इति शब्दरत्नावली॥ (अलाबुशब्देऽस्या विवरणं ज्ञातव्यम्॥)

तुम्बिका, स्त्री, (तुम्ब अर्दने+खुल्। टापि अत इत्वम्।) अलाबुः। इति शब्दरत्नावली॥ कटुतुम्बी। इति राजनिर्घण्टः॥

तुम्बिनी, स्त्री, (तुम्बति नाशयत्यरुचिमिति। तुम्ब+णिनिः ङीप्।) कटुतुम्बी। इति राजनिर्घण्टः॥

तुम्बी, स्त्री, (तुम्बि+ऋदिकारादिति वा ङीष्।) अलाबुः। इत्यमरः। २।४।१५६॥ (यथा, भ्रान्तिशतके। ३।१६।

"अरे चेतोमौन! भ्रमयमधुना यौवनजले
व्यज त्वं स्वच्छन्दं युवतिजनधौ पश्यसि न किम्।
तनूजालीनालं स्तनयुगलतुम्बीफलयुगं
मगौघ्नः कैवर्त्तः क्षिपति परितस्त्वां प्रति मुहुः॥"

"अलाबुः कथिता तुम्बी द्विधा दीर्घा च वर्त्तुला।
मिष्टं तुम्बीफलं वृष्यं पित्तश्लेष्मापहं गुरु॥
दृष्यं रुचिकरं प्रोक्तं धातुपुष्टिविवर्द्धनम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) कुलिकवृक्षः। इति रत्नमाला॥

तुम्बीपुष्पं, क्ली, (तुम्बाः पुष्पमिव पुष्पमस्य।) लताम्बुजम्। अलाबुपुष्पम्। इति हारावली। २०२॥

तुम्बुकं, क्ली, (तुम्ब+बाहुलकात् उकः।) अलाबुफलम्। इति हेमचन्द्रः॥

तुम्बुकः, पुं, (तुम्ब+बाहुलकात् उकः।) अलाबुः। इति भरतधृतहेमचन्द्रः॥

तुम्बुरी, स्त्री, (तुम्बवदाकारं रातीति। रा+कः। ङीप्। पृषोदरादिलादुत्वम्।) कुकुरी। धन्याकम्। इति मेदिनी। रे, १६३॥

तुम्बुरु, क्ली, कुस्तुम्बुरु। इत्यमरटीकायां भरतः॥ (यथा, वैद्यके।

"तुम्बुरुभृङ्गषड्ग्रन्थकन्दकं कटुरोहिणी॥"

अस्य तैलगुणाः।

"तुम्बुरुत्यं करञ्जोत्थं ज्योतिष्मत्युद्भवन्तथा।
अर्शःकुष्ठक्रमिश्लेष्मशुक्रमेदोऽनिलापहम्॥"

इति हारीते प्रथमे स्थाने नवमे ऽध्याये॥)

तुम्बुरुः, पुं क्ली, गन्धर्वविशेषः। स्वर्गगायकः। इति जटाधरः॥ (यथा, महाभारते। १।१२३।१५।
"गन्धर्वैः सहितः श्रीमान् प्रागायत च तुम्बुरुः॥"
तपस्विविशेषः। यथा, हरिवंशे। १२६। ६।
"अर्चिष्मांस्तुम्बुरुश्चैव भारिश्च वदतां वरः।
नेतारो देवदेवानामेते हि तपसान्विताः॥")
अष्टदुपासकविशेषः। इति हेमचन्द्रः॥ फलवृक्षविशेषः। तत्फलन्तु आम्रसदृशं मरीचवत्। तत्पर्य्यायः। शृङ्गः २। इति रत्नमाला॥ सैरेयः ३ सौरः ४ वनजः ५ सानुजः ६ द्विजः ७ तीक्ष्णकल्कः ८ तीक्ष्णफलः ९ तीक्ष्णपत्रः १० महासनिः ११ स्फुटलः १२ सुगन्धिः १३। अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। कफवातशूलगुल्मोदरार्शानाक्रिमिनाशित्वम्। वह्निदीपनत्वञ्च। इति राजनिर्घण्टः॥ तद्वृक्षपर्य्यायास्तत्फलगुणाश्च।
"तुम्बुरुः सौरभः सौरो वनजः सानुजोऽन्यकः।
तुम्बुरु प्रथितं तिक्तं कटुपाके हि तत् कटु॥
रूक्षोष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च।
वातश्लेष्मार्शिकर्णौष्ठशिरोरुग्गुरुतानुदम्॥
कुष्ठशूलारुचिश्वासक्रीहकृच्छ्राणि नाशयेत्॥"
इति भावप्रकाशः॥
तुर, लि र वेगे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अक-सेट्।) इस्वी। लि, तुतोर्त्ति। र, वैदिकः। वेगः शीघ्रगमनम्। अदादिर्व्यधातुभ्यः शपो विधाननेव सिद्धे अदादेः शपं विधाय तल्लुक्करणं निष्ठायां भावादिधे वोदुडोऽन्यत इत्यनेन गुणार्थमिति चतुर्भुजः। तेन तोरितं तुरितमिति। तन्मते रुदेरपि रोदितं रुदितमिति स्यात्। इति दुर्गादासः॥
तुरः, त्रि, (तुतोर्त्ति वेगेन गच्छतीति। तुर+कः।) वेगवान्। इति तुरगशब्दटीकायां भरतः॥ (यथा, ऋग्वेदे। ७। ५६। १६।
"इमे तुरं मरुतो रामयन्तीमे सहः सहस
आ गमन्ति॥"
"तुरं कर्म्मसु क्षिप्रवन्तम्।" इति सायनः॥ क्षिप्रस्तोत्रकारी। यथा, ऋग्वेदे। ८।२६।४।
"उपस्तोमान्तुरस्य दर्शयः श्रिये॥"
"तुरस्य क्षिप्रं स्तोत्रं कुर्वतः।"
इति सायनः॥)
तुरगः, पुं, (तुर वेगे+भावे घञर्थे कः। तुरेण वेगेन गच्छतीति। गम+अन्येष्वपीति डः।) चित्तम्। घोटकः। इति मेदिनी। गे, ३८॥ (यथा, रघुः। ३। ५१।
"ततः प्रहस्याभयः पुरन्दरं
पुनर्बभाषे तुरगस्य रक्षिता॥")
तुरगगन्धा, स्त्री, (तुरगस्य गन्ध इव गन्धो यस्याः।) अश्वगन्धा। इति रत्नमाला॥ (अश्वगन्धाशब्देऽस्या विवरणमालोक्यतम्॥)
तुरगब्रह्मचर्य्यकं, क्ली, (तुरगस्येव ब्रह्मचर्य्यम्। ततः स्वार्थे कन्।) अभावादङ्गनात्यागः। इति त्रिकाण्डशेषः॥
तुरगलीलकः, पुं, (तुरगस्येव लीला यस्य ततः कन्।) तालप्रभेदः। यथा, सङ्गीतदामोदरः।
"हतद्वन्द्वं विरामान्तं लघुस्तुरगलीलके॥"
तुरगी [न्] त्रि, (तुरगो घोटको वाहनत्वेनास्यास्तीति। तुरग+इनिः।) अश्वारोहः। इति हेमचन्द्रः। ३। ४२५॥
तुरगी, स्त्री, (तुरगवत् गन्धोऽस्यस्याः। अर्श आदित्वात् अच् ततो गौरादित्वात् ङीष्।) अश्वगन्धा। इति मेदिनी। गे, ३८॥ अश्वखी। इति व्याकरणम्॥
तुरङ्गः, पुं स्त्री, (तुरेण वेगेन गच्छतीति। तुर+गम्+"गमे सुपि वाच्यः।" ३। २। ३८। इत्यस्य वार्त्तिकोक्त्या खच्। "खच्च डिद्वा वाच्यः।" इति डित्। "अरुर्द्विषदिति।" ६। ३। ६७। इति सुम्।) घोटकः। इत्यमरः। २। ८। ४३॥ (यथा, पञ्चतन्त्रे। १। ३१४।
"स्तना स्तनैः सङ्गमनुव्रजन्ति
गावश्च गोभिस्तुरगास्तुरङ्गैः॥")
चित्तम्। इति शब्दरत्नावली॥
तुरङ्कः, पुं, (तुरङ्ग इव कायतीति। के+कः।) घोषकाकृतिः। इति रत्नमाला॥ हस्तिघोषा इति ख्यातः॥
तुरङ्गदेषणी, स्त्री, (द्विष भावे ल्युट्। तुरङ्गेण सह द्वेषणं शत्रुता यस्याः। ततो ङीप्।) घोटकेन सह स्वभाववैरिभावात्तेषां सख्यत्वम्।) महिषी। इति राजनिर्घण्टः॥ (तुरङ्गद्विषणी तुरङ्गद्वेषिणी इत्यपि च कुत्रचिद् दृश्यते॥)
तुरङ्गप्रियः, पुं, (तुरङ्गाणां घोटकानां प्रियः।) यवः। इति राजनिर्घण्टः॥
तुरङ्गमः, पुं, क्ली, (तुरेण वेगेन गच्छतीति। गम+खच्+मुम् च।) घोटकः। इत्यमरः। २। ८। ४३॥ (यथा, रघुः। ७। ४७।
"तुरङ्गमस्कन्धनिषक्तदेहं
प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष॥")
तुरङ्गवक्त्रः, पुं, (तुरङ्गस्येव वक्त्रं वदनं यस्य।) किन्नरः। इति जटाधरः॥
तुरङ्गवदनः, पुं, (तुरङ्गस्येव वदनं यस्य।) किन्नरः। इत्यमरः। १। २। ७४॥
तुरङ्गारिः, पुं, (तुरङ्गस्य अरिः शत्रुः। अश्वनाशकत्वादस्य तथात्वम्।) करवीरः। इति रत्नमाला॥
तुरङ्गिका, स्त्री, (तुरङ्गवत् आकृतिरस्यस्य फलादौ। तुरङ्ग+ठन्।) देवदालीलता। इति राजनिर्घण्टः॥ (गुणादयोऽस्या देवदालीशब्दे ज्ञातव्याः॥)
तुरङ्गी, स्त्री, (तुरङ्गस्तद्गन्धोऽस्यस्याः। अच्। गौरादित्वात् ङीष्।) अश्वगन्धा। इति शब्दरत्नावली॥ घोटिकाकृक्षः। इति राजनिर्घण्टः॥
तुरायणः, त्रि, (तुरेण वेगेन अयनं यत्र। "पूर्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) परायणः। इत्यमरटीकायां स्वामी॥ (क्ली, यज्ञविशेषः। इति सिद्धान्तकौमुदी॥ यथा, कात्यायनश्रौतसूत्रे। २४। ८। १। २।
"तुरायणं वैश्वानरपञ्चम्याम्। चैत्रस्य वा॥"
यथा, महाभारते। १३। १०३। ३५।
तुरायणं हि व्रतमप्यधीष्य-
मक्रोधनोऽकरवं चिंशतोऽन्यान्॥")
तुराषाट्, [ड्] पुं, (तुरं वेगवन्तं साढ्यति अभिभवतीति। सह+णिच्+क्विप्। "सहेः साढ्यः सः।" ८। ३। ५६। इति षत्वम्। अन्येषामपीति पूर्व्वपदस्य दीर्घः।) इन्द्रः। इत्यमरः। १। १। ४७॥ अस्य रूपान्तरम्। तुराषाड्॥ (यथा, देवीभागवते। ३।११।६६।
"तुराषाड्रपि तच्छ्रुत्वा क्रोधयुक्तो बभूव ह॥")
तुरिः, स्त्री, (तुतोर्त्ति हतं गच्छतीति। तुर+इन्।) तुरी। इति शब्दरत्नावली॥
तुरी, स्त्री, (तुरि+ङादिकारादिति वा ङीष्।) तन्त्रवायस्य काष्ठनिर्म्मितोपकरणविशेषः। तत्पर्य्यायः। तन्त्रकाष्ठम् २ तुलिः ३ तुली ४ तुरिः ५। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ४४३।
"मेदिन्यां तव निपतति न पदं वधुवल्लभेति
गर्व्वेण।
अस्थिव्य कैर्न तरुणैस्तुरीव वसनैर्विसृक्तासि॥")
तुरीयं, क्ली, (चतुर्णां पूरणम्। चतुर्थस्थानस्थितत्वादस्य तथात्वम्।) ब्रह्म। इति वेदान्तसारः॥
"अज्ञानतदुपहितचैतन्ययोराधारभूतं अनुपहितचैतन्यम्। यथा। वनवृक्षतदवच्छिन्नाकाशयोर्जलजलाशयतद्गतप्रतिबिम्बाकाशयोर्वा आधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते। प्राज्ञं शिवमद्वैतं चतुर्थं मन्यन्ते। इत्यादि श्रुतेः।" इति वेदान्तसारः॥ (शुक्लयजुर्व्वेदान्तर्गतोपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि।
"तुरीयातीतसंन्यासपरिव्राजाश्चमालिका॥")
तुरीयः, त्रि, (चतुर्णां पूरणः। चतुर्+"चतुरश्यतावाद्यचरलोपश्च।" ५। २। ५१। इत्यस्य वार्त्तिकोक्त्या छः। चस्य लोपश्च।) चतुर्थः। इति मुग्धबोधम्॥ (यथा, देवीभागवते। १। १६। ८।
"जायत्स्वप्नसुषुप्तिश्च तव राजन्! भवन्ति हि।
अवस्थासु यथाकालं तुरीया तु कथं नृप!॥"
तारकः। इति सायनः॥ यथा, ऋग्वेदे। ३। ४। ६।
"तन्नस्तुरीयमध पोषयित्नु
देव त्वष्टर्विरराणः स्यस्व॥")
तुरीयवर्णः, पुं, (तुरीयश्चतुर्थो वर्णः।) शूद्रः। इति हलायुधः॥
तुरुष्कः, पुं, गन्धद्रव्यभेदः। शिलारस इति ख्यातः। तत्पर्य्यायः। यवनः २ धूम्रः ३ धूम्रवर्णः ४ सुगन्धिकः ५ सिक्थकः ६ सिक्थसारः ७ पीतसारः ८ कपिः ९ पिण्याकः १० कपिलः ११ कल्कः १२ पिण्डितः १३ पिण्डितैलकः १४ करेवरः १५ क्षत्रिमकः १६ लेपनः १७ सिक्थः

१८ कपिचषला: १६ यावल: २० तैलाख: २१ पिण्डिक: २२ जाव: २३ यावत: २४। इति शब्दरत्नावली ॥*॥ अस्य गुणा:। सुरभित्वम्। तिक्तत्वम्। कटुत्वम्। स्निग्धत्वम्। कुष्ठकफपित्तास्रशरीरकृच्छ्रमूत्राघातज्वरार्त्तिनाशित्वञ्च। इति राजनिर्घण्ट:॥ अन्यच्च "अथ शिलारस:। सिक्तकस्तु तुरुष्क: स्यादृयतोऽपवनदेशज:। कपिलेलश्च स ख्यातस्तथा च कपिनामक: ॥ सिक्तक: कटुक: स्वादु: स्निग्धोष्ण: शुक्रकान्तिकृत्। हृद्य: कण्डूखेदकुष्ठज्वरदाहग्रहापह: ॥"

इति भावप्रकाश:॥

(अस्य शोधनविधिर्यथा,—

"तुरुष्को मधुना भाव्य: काञ्जीरेणापि सर्षपा॥"

इति वैद्यकचक्रपाणिसंग्रहे वातरोगाधिकारे॥)

म्लेच्छजातिविशेष:। इति मेदिनी। के, १०२॥

तुरुक् इति भाषा। देशविशेष:। तुरुक्स्तान् इति पारस्य भाषा। तत्पर्य्याय:। म्लाखि: २। इति हेमचन्द्र:। ४। २५॥ श्रीवासवृक्ष:। इति विश्व:॥ (घोटकविशेष:। यथा, अश्ववैद्यके। ६। ११।

"तुरुष्क: कीर्त्तितो वाजी स्थूलवक्त्रसुखश्च य:॥")

तुर्य्य:, त्रि, (चतुर्णां पूरण:। चतुर्+"चतुरश्छयतावाद्यक्षरलोपश्च।" ५। २। ५१। इत्यस्य वार्त्तिकोक्त्या यत् चस्य लोपश्च।) चतुर्थ:। इति मुग्धबोधम्॥ (यथा, भागवते। ७। ६। ३२।

"योगेन मीलितदृगात्मनिपीतनिद्र-
स्तुर्य्ये स्थितो न तु तमो न गुणांश्च युङ्क्ते॥")

तुर्व्व, ई हिंसे। इति कविकल्पद्रम:॥ (भ्वां-परं-सकं-सेट्।) दृब्बी। तूर्व्वी तुर्व:। ईर्व्व, तूर्ण:। इति दुर्गादास:॥

तुर्व्वसु:, पुं, ययातिराजपुत्र:। (अयं हि देवयानीगर्भसम्भूत:। शापग्रस्तस्य पितुर्ययातेर्जरां नासौ गृहीतवान्।) यथा,—

ययातिरुवाच।

"यत्त्वं मे हृदयाज्जातो वय: स्वं न प्रयच्छसि।
तस्मात् प्रजासमुच्छेदं तुर्व्वसो! तव यास्यति॥
संकीर्णाचारधर्म्मेषु प्रतिलोमचरेषु च।
पिशिताशिषु लोकेषु नूनं राजा भविष्यसि॥
गुरुदारप्रसक्तेषु तिर्य्यग्योनिगतेषु च।
पशुधर्म्मेषु म्लेच्छेषु पापेषु च भविष्यसि॥"

इति मत्स्यपुराणम्॥

तुल, कि उन्मितौ। इति कविकल्पद्रम:॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) उन्मिति: परिमाणम्। कि, तोलयति तोलति काञ्चनं भणिक्। त्वदीयं सौन्दर्य्यं तुहिनगिरिकन्ये! तुलयितुमिति शङ्करोक्तम्। तुलां करोति इति णौ साधम्। इति दुर्गादास:॥

तुलसारिणी, स्त्री, (तुलेन वेगेन सरतीति। सृ+णिनि+ङीप्।) लवणम्। इति शब्दमाला॥

तुलसी, स्त्री, (तुलां सादृश्यं स्यति नाशयतीति। सो+क:। गौरादित्वात् ङीष्। सर्व्वोत्तमत्वादेव सादृश्याभावादस्यास्तथात्वम्। यदुक्तं ब्रह्मवैवर्त्ते प्रकृतिखण्डे। १५। १५।

"नरा नार्य्यश्च तां दृष्ट्वा तुलनां दातुमक्षमा:।
तेन नाम्ना च तुलसीं तां वदन्ति पुराविद:॥"

अस्या अन्या निरुक्तिरुक्ता दृहद्धर्म्मपुराणे। ७। ६३।

"तकारो मरणं प्रोक्तं तद्योग: स्यादुकारत:।
स्तता लसति सेत्येवं तुलसीत्येव गीयते॥")

स्वनामख्यातवृक्ष:। तत्पर्य्याय:। सुभगा २ तीव्रा ३ पावनी ४ विष्णुवल्लभा ५ सुरेष्टा ६ सुरसा ७ कायस्था ८ सुरदुन्दुभि: ९ सुरभि:१० बहुपत्री ११ मञ्जरी १२ हरिप्रिया १३ अपेतराक्षसी १४ श्यामा १५ गौरी १६ त्रिदशमञ्जरी १७ भूतघ्नी १८ भूतपत्री १९। इति राजनिर्घण्ट:॥ पर्णास:२० वृन्दा २१ कठिञ्जर:२२ कुठेरक:२३। इति शब्दरत्नावली॥ वैष्णवी २४ पुण्या २५ पवित्रा २६ माधवी २७ अम्लता २८ पत्रपुष्पा २९ सुगन्धा ३० गन्धहारिणी ३१। इति भरतधृतमधुमित्र:॥ सुरवल्ली ३२ प्रेतराक्षसी ३३ सुवहा ३४ ग्राम्या ३५ सुलभा ३६ बहुमञ्जरी ३७ देवदुन्दुभि: ३८। इति भावप्रकाश:॥*॥ क्षुद्रपत्रतुलस्या: पर्य्याय:। खरपत्र: १ जम्बीर: २ पत्रपुष्प: ३ फणिज्झक: ४ अल्पपत्र: ५ समीरण: ६। इति रत्नमाला॥ मरुवक: ७ प्रस्थपुष्प: ८। इत्यमर:। २। ४। ७६॥*॥ गन्धतुलस्या: पर्य्याय:। सुगन्धक:१ गन्धनामा २ तीक्ष्णगन्ध: ३ फणिज्झक: ४ गन्धफणिज्झक: ५ सुगन्ध: ६ देवदुन्दुभि: ७ इति रक्ततुलस्या: पर्य्याया:। इति लोकव्यवहार:॥*॥ विल्वगन्धतुलस्या: पर्य्याय:। वैकुण्ठक:१ विल्वगन्ध: २ अल्पमानक: ३॥*॥ श्वेततुलस्या: पर्य्याय:। अर्ज्जक:१ श्वेतपर्णास:२ गन्धपत्र: ३ कुठेरक: ४ असार्ज्जक: ५ तीक्ष्ण:६ तीक्ष्णगन्ध: ७ सितार्ज्जक: ८॥*॥ कृष्णतुलस्या: पर्य्याय:। कृष्णार्ज्जक:१ कृष्णवर्ण:२ कालमान:३ कराल्क: ४ कालपर्ण:५ सुरभि: ६ मानक: ७ कालमानक: ८॥*॥ वर्ब्बरीतुलस्या: पर्य्याय:। सुरभि: १ तुलसीदेवा २ सुरसा ३ अपेतराक्षसी ४। इति रत्नमाला॥ वर्ब्बरी ५ कवरी ६ तुङ्गी ७ खरपुष्पा ८ व्रजगन्धिका ९। इत्यमर:। २। ४। १४६॥*॥ सामान्यतुलस्या गुणा:। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। सुरभित्वम्। श्लेष्मवातजन्तुभूतकृमिवान्तिनाशित्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्ट:॥ दाहपित्तकारित्वम्। दीपनत्वम्। कुष्ठकृच्छ्रास्रपार्श्वरुङ्नाशित्वञ्च। शुक्ला कृष्णा च तुलसी गुणैस्तुल्या। इति भावप्रकाश:॥*॥ अस्या उत्पत्तिर्यथा। गोलोके इयं तुलसी गोपी श्रीकृष्णप्रिया श्रीकृष्णेन सह अस्या: क्रीड़ां दृष्ट्वा राधा शशाप त्वं मानवीं योनिं याहि। तच्छ्रुत्वा सा खिन्ना। गोविन्दस्तामुवाच त्वं भारते तपस्तप्त्वा ममांशं नारायणं लभिष्यसि। सा पृथिव्यां धर्म्मध्वजराजपत्न्यां माधव्यां कार्त्तिकीपूर्णिमायां जाता नरा नार्य्यश्च तां दृष्ट्वा तुलनां दातुमयोग्यास्तेन इह लोकेऽपि तुलसीति नाम्ना ख्याता। सा तपस्तप्तुं वनं गता। तदानीं राधाशापात् सुदामगोपालो दानवीं योनिं प्राप्य शङ्खचूड़नाम्ना ख्यात:। सोऽपि ब्रह्मणो वरात् सर्व्वावध्यत्वं प्राप्तवान् परन्तु यदा तव पत्न्या: सतीत्वनाशो भविष्यति तदा मरिष्यसीति ब्रह्मा तमुक्तवान्। स तुलसीमुवाह देवानामधिकारञ्जहार। देवा: ब्रह्मसभां गता:। ब्रह्मा तै: सार्द्धं शिवलोकं गतवान्। शिवस्तै: सार्द्धं वैकुण्ठं गतवान्। नारायणो ब्रह्माणमुवाच मम शूलं गृहीत्वा शिवो युद्धार्थं तत्र गच्छतु अहञ्च शङ्खचूड़रूपेण तत्पत्न्या: सतीत्वभङ्गं करिष्यामीति श्रुत्वा शिवस्तत्र जगाम, स शिवेन सह युद्धे नियुक्तस्तदानीं नारायणस्तत्पत्नीं तद्रूपेण धर्षितवान्। पश्चात् सा नारायणं ज्ञात्वा शशाप त्वं पाषाणो भव जन्मान्तरे आत्मानं विस्मरिष्यसि इत्युक्त्वा तच्चरणे पपात रुरोद च। तदा नारायणस्तामुवाच त्वमिदं शरीरं त्यक्त्वा रमासदृशी भव मया सह क्रीड़ इयं तनुर्गण्डकी नदी भवतु तव केशसमूहस्तुलसीनामा पुण्यवृक्षो भवतु तदा तत् सर्व्वमभूत्। एतद्विवरणन्तु ब्रह्मवैवर्त्ते प्रकृतिखण्डे १५ अध्यायमारभ्य विस्तरशो द्रष्टव्यम्॥*॥ पद्मपुराणमते जलन्धरपत्नीवृन्दावणयदर्शनेन विष्णुर्मुग्ध:। तन्मोहवारणार्थं देवा महादेवशरणङ्गता:। महादेवस्तानुवाच मायामाराधय। ते मायां तुष्टुवु: माया तानुवाच अहं रज:सत्वतमोगुणैर्गौरीलक्ष्मीसरस्वतीरूपेण तिष्ठामि। ता युष्माकं कार्य्यं विधास्यन्ति तच्छ्रुत्वा देवास्तासां समीपमागत्य प्रणेमु: तासेभ्यो बीजानि ददुर्वाक्यानि जगदुश्च यत्र विष्णुस्तिष्ठति तत्रेमानि बीजानि वपत देवास्तथा चक्रुस्तद्दत्तेभ्यस्त्रयो वृक्षा अभवन् धात्री मालती तुलसी च धात्री स्वयांशभूता मालती लक्ष्म्यंशभूता तुलसी गौर्य्यंशभूता॥*॥ तुलस्या माहात्म्यं यथा।

ब्रह्मोवाच।

"तुलस्या: शृणु माहात्म्यं पापघ्नं सर्व्वकामदम्।
यत् पुरा विष्णुना प्रोक्तं तच्छृणुष्व वदाम्यहम्॥
सम्पूज्य कार्त्तिकं दृष्ट्वा नियमेन जनार्दनं।
पूजनीयो महद्भिश्च कोमलैस्तुलसीदलै:॥
दृष्टा स्पृष्टा तथा ध्याता कार्त्तिके नमिताऽर्चिता।
रोपिता सेविता नित्यं पापं हरति युगार्ज्जितम्॥
अथवा तुलसी यैस्तु सेविता द्विजसत्तम!।
युगकोटिसहस्राणि ते वसन्ति हरेर्गृहे॥
रोपिता तुलसी यावत् कुरुते मूलविस्तृतम्।
तावद्युगसहस्राणि तनोति सुहृतं हरि:॥
तुलसीदलपुष्पाणि यो दद्याद्धरये सुने!।
कार्त्तिके सकलं पापं सोऽत्र जन्मार्ज्जितं दहेत्॥
रोपिता तुलसी यावत् वर्द्धते वसुधातले।
तावत्कल्पसहस्राणि विष्णुलोके महीयते॥
यत् फलं सर्व्वपुण्येषु सर्व्वपर्व्वसु यत् फलम्।

तुलस्यास्तद्दलार्द्धेन पुण्यं स्याद्विष्णुपूजने ॥
तुलसीगन्धमादाय यत्र गच्छति मारुतः ।
दिशो दश पुनात्याशु भूतग्रामांश्चतुर्विधान् ॥
तुलसीकाननोद्भूता छाया यत्र भवेन्मुने ! ।
तत्र श्राद्धं प्रदातव्यं पितॄणां तृप्तिहेतवे ॥
तुलसीबीजनिकरो यस्मिन् पतति वै सुने ! ।
तत् स्थानं परमं ज्ञेयं पितॄणां प्रीतिवर्द्धनम् ॥
यस्मिन् गृहे द्विजश्रेष्ठ ! तुलसीतलमृत्तिका ।
तत्रैव नोपसर्पन्ति भूतले यमकिङ्कराः ॥
तुलसीमृत्तिकालिप्तो यदि प्राणान् परित्यजेत् ।
यमेन नेक्षितुं शक्यो सुक्तः पापशतैरपि ॥
तुलसीमृत्तिकालिप्तं ललाटं यस्य दृश्यते ।
कुलं सुशुद्धति नो तस्य कलिर्दुःनिवारणम् ॥
यः कश्चित्तुलसीमूले कार्त्तिके केशवप्रियः ।
दीपं ददाति विप्रेन्द्र ! स लभेद्वैष्णवं पदम् ॥
तुलसीकाननञ्चैव गृहे यस्यावतिष्ठते ।
तद्गृहं तीर्थभूतं हि नायान्ति यमकिङ्कराः ॥
दर्शनं नर्म्मदायास्तु गङ्गास्नानं तथैव च ।
तुलसीवनसंसर्गः समभेतत्त्रयं स्मृतम् ॥
रोपणात् पालनात् सेवाद्दर्शनात् स्पर्शनात्नृणाम् ।
तुलसी दहते पापं वाङ्मनःकायसञ्चितम् ॥
तुलसीमञ्जरीभिर्यः कुर्य्याद्धरिहरार्चनम् ।
न स गर्भगृहं याति मुक्तिभागी भवेन्नरः ॥
पुष्करादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ।
वासुदेवादयो देवा वसन्ति तुलसीदले ॥
तुलसीमञ्जरीयुक्तो यस्तु प्राणान् विमुञ्चति ।
यमो न वीक्षितुं शक्तो युक्तः पापशतैरपि ॥"

इति पाद्मोत्तरखण्डम् ॥ * ॥

"यत्रैकस्तुलसीवृक्षस्तिष्ठति द्विजसत्तम ! ।
तत्रैव चिदृशाः सर्व्वे ब्रह्मविष्णुशिवादयः ॥
कैशवः पञ्चमध्येषु पत्राग्रेषु प्रजापतिः ।
पत्रवृन्ते शिवस्तिष्ठेत् तुलस्याः सर्व्वदेव हि ॥
लक्ष्मीः सरस्वती चैव गायत्री खाण्डका तथा ।
मूची चान्या देवपत्न्यस्तत्पुष्पेषु वसन्ति वै ॥
इन्द्रोऽग्निः शमनश्चैव नैर्ऋतो वरुणस्तथा ।
पवनश्च कुबेरश्च तच्छाखायां वसन्त्यमी ॥
आदित्यादिग्रहाः सर्व्वे विश्वेदेवाश्च सर्व्वदा ।
वसवो मरुतश्चैव तथा देवर्षयोऽखिलाः ॥
विद्याधराश्च गन्धर्व्वाः सिद्धाश्चाप्सरसस्तथा ।
तुलसीपत्रमाश्रित्य सर्व्वदा निवसन्ति वै ॥
तिष्ठन्ति दशजातीनि तुलसीमूलजानि वै ।
तद्दृष्ट्वा ब्रह्महत्यान्निवर्त्तति ततक्षणाद्धरिः ॥
योगकाले द्विजश्रेष्ठ ! सुगन्धैः घृतलेर्जलैः ।
तुलसीसेचनं कृत्वा नरो निर्व्वाणमाप्नुयात् ॥
चन्दनार्पं वा कृत्वं वा तुलसे यस्तु यच्छति ।
विशेषतो निदाघेषु स मुक्तः सर्व्वपातकैः ॥
पञ्चामृतैश्चतधाराभिरर्च्चयेत्तुलसीं जनः ।
सिञ्चयेत् सोऽश्वमेधस्य फलं प्राप्नोति निश्चयः ॥
अहन्यहनि तुलसीं दत्त्वा सिञ्चेद्यो नरोत्तमः ।
तस्य पद्मनि विप्रर्षे ! लक्ष्मीर्भवति निश्चला ॥
गोमयेरुत्तमोत्तमे यः कुर्य्यादनुलेपनम् ।
सम्मार्जनञ्च कृत्वा तस्य पापक्षयं शृणु ॥
रजांसि तस्य यावन्ति दूरीभूतानि जैमिने ! ।
तावत्कल्पसहस्राणि मोदते ब्रह्मणा सह ॥
यद्यन्मैकर्म्म कुरुते मनुजः पृथिव्यां-
नारायणप्रियतमां-तुलसीं विना च ।
तत् सर्व्वमेव विफलं भवति द्विजेन्द्र !
पद्मेक्षणोऽपि न हि तुष्यति देवदेवः ॥
यस्य स्यात् तुलसीपत्रं मुखे शिरसि कर्णयोः ।
मृत्युकाले द्विजश्रेष्ठ ! तस्य स्वामी न भास्करिः ॥"

इति पाद्मे क्रियायोगसारः ॥ * ॥

"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
तुलसीपत्रतोये च योऽभिषेकं समाचरेत् ॥
गवामयुतदानेन यत् फलं लभते नरः ।
तुलसीपत्रदानेन तत् फलं कार्त्तिके सति ॥
तुलसीतोयकणिकां मृत्युकाले च यो लभेत् ।
रत्नयानं समारुह्य वैकुण्ठं स प्रयाति च ॥
त्रिकालं तुलसीपत्रं शुद्धं पर्य्युषितं सति ।
श्राद्धे व्रते वा दाने वा प्रतिष्ठायां सुरार्च्चने ॥
भुक्तं तोयपतितं यद्दत्तं विष्णवे सति ।
मुहुस्तु तुलसीपत्रं क्षालनादन्यकर्म्मणि ॥"* ॥

तुलसीक्षयनिषेधकालो यथा,—

"पूर्णिमायाममायाञ्च द्वादश्यां रविसंक्रमे ।
तैलाभ्यङ्गे च स्नातेन मध्याह्ने निशिसन्ध्ययोः ॥
अपौचेऽशुचिकाले च रात्रिवासान्वितेऽपि वा ।
तुलसीं ये च चिन्वन्ति ते छिन्दन्ति हरेः
शिरः ॥" * ॥

तुलसीस्पर्शनेन मिथ्याप्रतिज्ञायां मिथ्याशपथे च दोषो यथा,—

"तुलसीं सकरे कृत्वा स्वीकारं यो न रक्षति ।
स याति कालसूत्रञ्च यावच्चन्द्रदिवाकरौ ॥
करोति मिथ्याशपथं तुलस्या यो हि मानवः ।
स याति कुम्भीपाकञ्च यावदिन्द्राश्चतुर्दश ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ।

तुलसीपत्रचयने मन्त्रो यथा,—

"मातस्तुलसि गोविन्दहृदयानन्दकारिणि ! ।
नारायणस्य पूजार्थं चिनोमि त्वां नमोऽस्तु ते ॥
कुसुमैः पारिजाताद्यैः सुगन्धैरपि केशवः ।
त्वया विना नैव तुष्टिं चिनोमि त्वामतः शुभे ॥
त्वया विना महाभागे समस्तं कर्म्म निष्फलम् ।
अतस्तुलसि देवि ! त्वां चिनोमि वरदा भव ॥
चयनोद्भवदुःखं यद्देवि ! ते हृदि वर्त्तते ।
तत् क्षमस्व जगन्मातस्तुलसि ! त्वां नमाम्यहम् ॥
क्षीताञ्जलिरिमान्मन्त्रान् पठित्वा वैष्णवो जनः ।
करतालचयं दत्त्वा चिनुयात्तुलसीदलम् ॥
घृतैः घृतैस्तथाकारैश्चीयते तुलसीदलम् ।
यथा न कम्पते शाखा तुलस्या द्विजसत्तम ! ॥
पत्राणां चयने विप्र ! भग्नशाखा यथा भवेत् ।
तथा कुरु यथा विष्णोर्दीयते तुलसीपतेः ॥"

इति पाद्मे क्रियायोगसारः ॥ * ॥

तुलसीकाष्ठमालाभाहात्म्यं यथा,—

"तुलसीकाष्ठनिर्म्माणमालां कुर्व्वन्ति ये नराः ।
पदे पदेऽश्वमेधानां लभते निश्चितं फलम् ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

"सालग्रामशिलायाञ्च तुलसीकाष्ठमाला कृष्णसमुद्भवा ।
धार्य्या नित्यं प्रयत्नेन सर्व्वतीर्थफलप्रदा ॥
हरिभक्तस्य तुलसीकृष्णकाष्ठसमुद्भवा ।
चिह्नार्थमात्मनो माला पुरा कृष्णेन दर्शिता ॥"

इति पाद्मोत्तरखण्डम् ॥ * ॥

गणेशपूजने तुलसीनिषेधो यथा । तुलसीं प्रति गणेशवाक्यम् ।

"पुण्यानां सारभूता त्वं भविष्यसि मनोरमे ! ।
कलांशेन महाभागे ! स्वयं नारायणप्रिया ॥
प्रिया त्वं सर्व्वदेवानां कृष्णस्य च विशेषतः ।
पूजा विमुक्तिदा नृणां मम त्याज्या च सर्व्वदा ॥"

इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥ * ॥

तुलस्याः स्तवो यथा,—

नारायण उवाच ।

"वृन्दां वृन्दावनीं विश्वपूजितां विश्वपावनीम् ।
पुष्पसारां नन्दिनीञ्च तुलसीं कृष्णजीवनीम् ॥
एतन्नामाष्टकञ्चैतत् स्तोत्रं नानार्थसंयुतम् ।
यः पठेत्ताञ्च संपूज्य सोऽश्वमेधफलं लभेत् ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

महादेवाय तस्याः पत्रदानफलं यथा,—

"यथाश्राद्धफलं दातुः पितॄणां परितोषदम् ।
तत्फलं स्याच्छतगुणं तुलसीपत्रदानतः ॥"

इति बृहद्धर्म्मपुराणे १० अध्यायः ॥ * ॥

तस्यास्तन्मञ्जर्य्याञ्च हरिहरपूजने मुक्तिप्रदत्वं पाद्मे देवऋतविकुण्डलसंवादे ।

"तुलसीमञ्जरीभिर्यः कुर्य्याद्धरिहरार्चनम् ।
न स गर्भगृहं याति मुक्तिभागी भवेन्नरः ॥"

इति श्रीहरिभक्तिविलासे ७ विलासः ॥ * ॥

तत्पत्रेण पुष्पपूजाविधिर्यथा,—

"वाजिदन्तकपत्रेण पुष्पैरपि चण्डिकाम् ।
तुलसीकुसुमैः पत्रैरर्चयेच्छ्रीविष्णवे ॥"

इति श्रीकालिकापुराणे ६८ अध्यायः ॥ * ॥

अथ तुलसीग्रहणविधिः । वायुपुराणे ।

"अक्षालां तुलसीं छित्त्वा यः पूजां कुरुते नरः ।
सोऽपराधी भवेत् सद्यं तत् सर्व्वं निष्फलं भवेत् ॥"

तत्रादौ मन्त्रः । स्कान्दे ।

"तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया ।
केशवार्थं चिनोमि त्वां वरदा भव शोभने ॥
त्वदङ्गसम्भवैः पत्रैः पूजयामि यथा हरिम् ।
तथा कुरु पवित्राङ्गि कलौ मलविनाशिनि ! ॥"

गारुडे च ।

"मोक्षैकहेतो धरणीप्रसूते
विष्णोः समस्तस्य गुरोः प्रियेति ।
आराधनार्थं वरमञ्जरीकं
लुनामि पत्रं तु क्षमस्व ॥

मुक्त्वा तुलसीं नत्वा चित्वा दक्षिणपाणिना ।
पत्राग्रेणैकशो न्यस्येत् सत्पात्रे मञ्जरीरपि ॥"

तन्माहात्म्यञ्च स्कान्दे ।

"मन्त्रेणानेन यः कुर्य्याद् गृहीत्वा तुलसीदलम् ।
पूजनं वासुदेवस्य लक्षकोटिफलं लभेत् ॥"

किञ्च ।

"ग्रामस्यामग्निलार्चार्थं प्रत्यहं तुलसीच्छिदौ ।

तुलसीं ये विचिन्वन्ति धन्यास्ते करपल्लवाः ॥"
इति ॥ * ॥
"संक्रान्त्यादौ निषिद्धोऽपि तुलस्यवचयः स्मृतः ।
परं श्रीविष्णुभक्तैस्तु द्वादश्यामेव नेष्यते ॥"*॥
अथ तुलस्यवचयनिषेधकालः । विष्णुधर्मोत्तरे ।
"न छिन्द्यात् तुलसीं विप्रा द्वादश्यां वैष्णवः
क्वचित् ॥"
गारुडे ।
"भानुवारं विना दूर्वां तुलसीं द्वादशीं विना ।
जीवितस्याविनाशाय न विचिन्वीत धर्मवित् ॥"
पाद्मे च ।
श्रीकृष्णसत्यासंवादीयकार्त्तिकमाहात्म्ये ।
"द्वादश्यां तुलसीपत्रं धात्रीपत्रञ्च कार्त्तिके ।
स्पृशति स नरो गच्छेन्निरयानतिगर्हितान् ॥"
अतएवोक्तम् ।
"देवार्थे तुलसीच्छेदो होमार्थे समिधान्तथा ।
इन्द्रत्वाय न दुष्येत गवार्थे तु तृणस्य च ॥
एवं ज्ञात्वा महापूजामङ्गोपाङ्गादिकं प्रभोः ।
क्रमादृथा सम्प्रदायं तत्तत्स्थानेषु पूजयेत् ॥"
इति श्रीहरिभक्तिविलासे ७ विलासः ॥ * ॥
अथ तुलसीविवाहः प्रतिष्ठाविधिश्च ।
श्रीवशिष्ठ उवाच ।
"विवाहं संप्रवक्ष्यामि तुलस्यास्तु यथाविधि ।
यथोक्तं पद्मरात्रे वै ब्रह्मणा भाषितं पुरा ॥
आदावेव वनेऽवाप्य तुलसीं खगडेऽपि वा ।
वर्द्धनेयेन पूर्णेन ततो यजनमारभेत् ॥
सौम्यायने प्रकर्त्तव्यं गुरुशुक्रोदये तथा ।
अथवा कार्त्तिके मासि भीष्मपञ्चदिनेषु च ॥
वैवाहिकेषु ऋक्षेषु पूर्णिमायां विशेषतः ।
मण्डपं कारयेत्तत्र कुण्डवेदीं तथा पुनः ॥
शान्तिकञ्च प्रकर्त्तव्यं मातृणां स्थापनं तथा ।
मातृश्राद्धादिकं सर्वं विवाहवत् समाचरेत् ॥
ब्राह्मणांश्च शुचिस्नातान् वेदवेदाङ्गपारगान् ।
वरं चादेशकञ्चैव चत्वारश्च तथर्त्विजः ॥
वैष्णवेन विधानेन वर्द्धनीकलसं यजेत् ।
मण्डपं कारयेत्तत्र लक्ष्मीनारायणं शुभम् ॥
गृह्यसूत्रं पुरः कृत्वा मातृणां यजनं तथा ।
कृत्वा नान्दीमुखं श्राद्धं सौवर्णं स्थापयेद्धरिम् ॥
कृत्वारोप्य च तुलसीं लग्ने लग्नमिते रवौ ।
वासः शुक्लेन मन्त्रेण वस्त्रयुग्मेन वेष्टयेत् ॥
यदा वध्नाति मन्त्रेण कङ्कणं पाणिपल्लवे ।
कोऽदादिति च मन्त्रेण पाणिग्राहो विधीयते ॥
ततः कुण्डे समागत्य आचार्यः सहसा द्विजैः ।
आचार्यो वैदिकाकुण्डे जुहुयाच्च नवाहुतीः ॥
विवाहकर्म्मवत् सर्वं वैष्णवं दैशिकोक्तमेः ।
कर्त्तव्यञ्च ततो होमो विशेषाद्विधिपूर्वकम् ॥"
ॐ नमो भगवते केशवाय नमः स्वाहा । नारायणाय स्वाहा । माधवाय । गोविन्दाय । विष्णवे । मधुसूदनाय । त्रिविक्रमाय । वामनाय । श्रीधराय । हृषीकेशाय । पद्मनाभाय । दामोदराय । उपेन्द्राय । अनिरुद्धाय । अच्युताय ाय । गदिने । चक्रिणे । विश्वाकसेनाय । वैकुण्ठाय । जनार्द्दनाय । मुकुन्दाय । अधोक्षजाय स्वाहा । इति होमः ॥
यजमानः सपत्नीको ज्ञात्वा ये गोत्रबान्धवाः ।
प्रदक्षिणाश्च कर्त्तव्याश्चत्वारो विष्णुना सह ॥
तुलस्याः पाणिग्रहणे वैदिकायां विभावसौ ।
घृतकुम्भं जपेत् सूक्तं पावमानीं विशेषतः ॥
तथैव शान्तिकाध्यायं नवसूक्तं तथैव च ।
जीवसूक्तं पुनर्ज्जप्त्वा तथा वैष्णवसंहिताम् ॥
शङ्खभेरिनिर्घोषैर्भेरीतूर्य्यस्य निस्वनैः ।
गायन्ते मङ्गला नार्य्यो माङ्गल्यं विधिमाचरेत् ॥
दद्यात् पूर्णाहुतिं पश्चादभिषेकविधिं ततः ।
ब्राह्मणे वृषभं दद्यादाचार्य्यं परिधाप्य च ॥
गां पटञ्च तथा शय्यामाचार्य्याय प्रदापयेत् ।
ऋत्विग्भ्यो दापयेद्दक्षाराश्यैवां दद्याच्च दक्षिणाम् ॥
एवं प्रतिष्ठितां देवीं विष्णुना च समर्द्धयेत् ।
आजन्मोपार्ज्जितं पापं दर्शनेन प्रणश्यति ॥
रोपयेत्तुलसीं यस्तु सेवयेच्च प्रयत्नतः ।
प्रतिष्ठाप्य यथोक्तेन विष्णुना सह मानवः ॥
स मोक्षं लभते जन्तुर्विष्णुलोकं तथाक्षयम् ।
प्राप्नोति विपुलान् भोगान् विष्णुना सह
मोदते ॥
प्रतिष्ठा श्रीतुलस्यास्तु लिखिता विष्णुयामले ॥"
इति श्रीहरिभक्तिविलासे २० विलासः ॥
तुलसीदेवी, स्त्री, (तुलसीं देष्टि तुल्यगन्धत्वात् खण्डयति इति । दिष+अच् । ततष्टाप् ।) वर्व्वरी । इति रत्नमाला ॥ (वर्व्वरीशब्देऽस्या गुणादिकं ज्ञेयम् ॥)
तुला, स्त्री, (तोल्यतेऽनया । तुल उन्माने भिदादाङ् । यतुलोपमाभ्यामिति निर्द्देशात् गुणाभावः ।) साडश्यम् । (यथा, रघुः । ८।१५ ।
"नभसा निभृतेन्द्रना तुलामुदितार्केण समारुरोह तत् ॥")
मानम् । (यथा, पञ्चतन्त्रे । २ । ८४ ।
"सकृदपि दृष्ट्वा पुरुषं विबुधा जानन्ति सारतां तस्य ।
हस्ततुलयापि निपुणाः पलपरिमाणं विजानन्ति ॥")
गृहाणां दारुबन्धाय पीठिका । पलशतम् । (यथा, अमरकोषे । २ । ६ । ८७ ।
"तुला स्त्रियां पलशतं भारः स्यात् विंशतिस्तुला ॥")
भारडम् । इति मेदिनी । ले, २५ ॥ मेषादिद्वादशराश्यन्तर्गतसप्तमराशिः । तत्पर्य्यायः । यूकः २ युक् ३ घटः ४ तौली ५ तुलाभृत् ६ । इति ज्योतिषम् ॥ सा चित्रार्द्धपादद्वयस्वातीविशाखाप्रथमपादत्रयेण भवति । तदधिष्ठातृदेवता तुलाधारिपुरुषः । अस्याः शीर्षस्य उदयः नानावर्णः उष्णस्वभावः । सा पश्चिमदिक्स्वामिनी वायुराशिः स्निग्धा चित्रणा निःशब्दा वनचारिणी अल्पसन्तानः अल्पस्त्रीसङ्गा शूद्रवर्णा समानाङ्गा च । तत्र जातस्य फलम् । वक्ता विद्यावरः स्त्रीदुःखितः । इति जातकम् ॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम् ।
"वृषतुरङ्गगजक्रयविक्रयो
द्विजसुरार्चनदानमनाः पुमान् ।
अग्निनि तौलिगते बहुदारभाविभवसंस्थितचित्तविक्रमः ॥"
इति कोष्ठीप्रदीपः ॥
तस्या उदये तन्नामकलग्नं भवति । तस्य गणितप्राप्तपरिमाणं दशघट्यूनाधिकपञ्चाङ्गुलप्रमे देशे वर्त्तमानोनविंशायनांशे षट्चिंशत् पलाधिकपञ्चदण्डाः । इति ज्योतिषम् ॥ तत्र जातफलम् ।
"तुलालग्ने पुमान् जातः सुधीः सत्कर्म्मतत्परः ।
विद्वान् सर्व्वकलाविज्ञो धनाढ्यो जनपूजितः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
परीक्षाविशेषः । यथा नारदः ।
"ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः ।
वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु ॥
साधारणः समस्तानां कोषः प्रोक्तो मनीषिभिः ।
विषवर्ज्जं ब्राह्मणस्य सर्व्वेषान्तु तुला स्मृता ॥"*
अथ तस्या उत्पत्तिविधिः । यन्त्रियं वृत्तं यूपवन्मन्त्रपूर्व्वकं क्षित्वा लोकपालेभ्यः प्रदाय पश्चिमे चतुर्हस्ता चतुरस्रा वृत्ता तुला कार्य्या तत्र विष्णुस्थानेषु बलयानि दातव्यानि । तत्र वक्ष्यमाणौ स्तम्भौ कृत्वा हस्तद्वयप्रमाणेन दक्षिणोत्तरयोर्दिशोर्हस्तद्वयनिखननं कृत्वा षट्धारककीलकाग्रस्तम्भयोरुपरि अन्तर्हस्तच्छिद्रं मध्यनिवेशितलौहाङ्कुशपट्टकं निधाय तत्पट्टकस्य मध्यस्थिताङ्कुशेन तुलामध्यबलयस्थलौहं संयुञ्जयात् । एवञ्च सति स्तम्भयोरन्तरतिर्य्यक् तुलादण्डस्तिष्ठति तुलाग्रस्थिताभ्यामायसकीलकाभ्यां शिक्यहयरज्ज्वन्तं कुर्य्यात् । तुलायाः पार्श्वयोः प्राक्प्रत्यक्दिशोस्तोरणस्तम्भौ तुलातो दशाङ्गुलोच्छ्रायौ कार्य्यौ तोरणयोरुपरिरज्जुसंनद्धौ लम्बमानावधोमुखौ घटमस्तकमुन्निनावबलम्बौ कार्य्यौ । तुलादण्डः पूर्व्वपश्चिमयोर्धार्य्यः । पूर्व्वशिक्ये शिलां तोलयेत् पश्चिमे कर्त्तारं तुलाया उपरि जलं देयं यदि जलं न भवते तदा तुला समा ज्ञेया ॥ * ॥ अथैतत्प्रयोगः । कृतोपवासः कृतस्नानादिः प्राङ्विवाको ब्राह्मणः कार्य्यं पृच्छेत् निवेदितं विवेचयेत् । ततोऽभियुक्तं तोलयित्वावतार्य्य धर्म्मावाहनादिकं कुर्य्यात् । ॐ तत् सदित्युच्चार्य्य ब्राह्मणत्रयं गन्धादिना पूजयित्वा तान् स्वस्तिपुण्याहवाचं प्रत्येकं त्रिर्व्वाचयित्वा दिशाङ्गभूतहोमार्थं ब्रह्मचतुष्टयं ऋत्विक्चतुष्टयञ्च पाद्यादिभिरभ्यर्च्य वृणुयात् । अथ वृत्तावेकं ब्राह्मणमेकं ऋत्विजञ्च । ततस्तुलासमताकां ध्वजालङ्कृतां भूमौ निधाय तस्यां प्राङ्मुखः प्राङ्विवाकः पुण्याहमुदाय ॐ भूर्भुवः स्वरित्युच्चार्य्य ।
एह्येहि भगवन् धर्म्म! दिव्ये ह्यस्मिन् समाविश ।

सहितो लोकपालेश्च वस्वादित्यमरुद्गणैः ॥
इति मन्त्रेण धर्म्ममावाह्य इदमर्घ्यं ॐ धर्म्माय नमः इत्यादिप्रयोगेणार्घ्यपाद्याचमनीयमधुपर्काचमनीयवस्त्रयज्ञोपवीताचमनीयमुकुटकटकभूषणान्तं दत्त्वा तथैवार्घ्यादिभूषणान्तं प्रणवादिनमोऽन्तेन स्वस्वनाम्ना पूर्व्वस्यां इन्द्राय दक्षिणस्यां यमाय पश्चिमे वरुणाय उत्तरस्यां कुबेराय आग्नेय्यां अग्नये नैर्ऋत्यां निर्ऋतये वायव्यां वायवे ऐशान्यां ईशानाय। इन्द्रस्य दक्षिणपार्श्व अष्टवसुभ्यः प्रत्येकं नामभिः। तत्र धराय ध्रुवाय सोमाय आपाय अनिलाय अनलाय प्रत्यूषाय प्रभासाय। इन्द्रेशानयोर्म्मध्ये तथा द्वादशादित्येभ्यः तत्र धात्रे अर्य्यमणे मित्राय वरुणाय अंशवे भगाय इन्द्राय विवस्वते पूष्णे पर्ज्जन्याय त्वष्ट्रे विष्णवे। अग्निपश्चिमभागे तथैकादशरुद्रेभ्यः तत्र वीरभद्राय शम्भवे गिरीशाय अजैकपदे अहिब्रध्नाय पिनाकिने अपराजिताय भुवनाधीश्वराय कपालिने स्थाणवे भवाय। यमरक्षसोर्म्मध्ये तथा माढ्यः तत्र ब्राह्म्यै माहेन्द्र्यै कौमार्य्यै वैष्णवै वाराह्यै माहेन्द्र्यै चामुण्डायै निर्ऋत्युत्तरे गणेशाय वरुणोत्तरे अष्टमरुद्भ्यः तत्र असनाय स्पर्शनाय वायवे अनिलाय मारुताय प्राणाय प्राणेशाय जीवाय घटोत्तरभागे दुर्गायै पाद्यादिभूषणान्तं दत्त्वा धर्म्माय गन्धपुष्पधूपदीपनैवेद्यानि पूर्ब्ववद्दत्त्वा इन्द्रादिदुर्गान्तेभ्यो गन्धादिकं दद्यात्। ततश्चतुर्हिस्तु चतुर्भिर्ऋत्विग्भिश्चतुरोऽमीन् अग्रस्थापकर्त्विजे कर्मणि प्राड्विवाकः ग्रन्थोक्तविधिना संस्थाप्य प्रणवपुटितां सव्याहृतिकां गायत्रीं स्वाहान्तां सुवार्घ्यं घृतेन पायसेन समिद्भिर्मिलिताभिरष्टोत्तरशतं अष्टाविंशतिं अष्टौ वा जुहुयात्। ततो दक्षिणां दद्यात्। एवं हवनान्तं देवपूजां विधाय ग्रीष्मे कृतोपवासं आद्यंवासं पश्चिमाग्नेये कृत्वा दक्षांश्च पूर्ब्वाग्नेये कृत्वा उक्तोक्त्य घटोपरि जलदानेन साम्यमवगम्य अवतारयेत्। ततः प्राड्विवाकः तद्दिनकञ्चलग्नस्था विच्छेदादिशून्यां षट्त्रिंशद्येन समसंख्याक्षरेण

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मोऽपि जानाति नरस्य वृत्तम् ॥

इति चतुश्चत्वारिंशदक्षरमन्त्रसमेतामभियुक्तार्थकरणाकरणरूपमिदमस्मे दत्तमिदमन्यमस्मान्मया न गृहीतमित्यादिरूपां प्रतिज्ञां लिपिपत्रे विलिख्य तत् पत्रं ग्रीष्म शिरोगतं कुर्य्यात्। ततः प्राड्विवाको घटमामन्त्रयेदेभिः।

त्वं घटो ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम्।
धकाराङ्कस्मृर्त्तिरूपं टकारात् कुटिलं नरम्॥
धृतो धारयते यस्माद्घटस्तेनाभिधीयते।
त्वं वेत्सि सर्व्वभूतानां पापानि सुकृतानि च॥
त्वमेव देव! जानीषे न विदुर्यानि मानवाः।
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति॥
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि॥"

तुलाधारकश्च नियमेदनेन। [साक्षिणः।
"ब्रह्मघ्ना ये स्मृता लोका ये लोकाः कूटतुलाधारस्य ते लोकास्तुलां धारयतो ध्रुवा॥"

ग्रीष्मस्तु तुलामभिमन्त्रयेदनेन।
त्वं तुले! सत्यधामासि पुरा देवैर्विनिर्म्मिता।
तत् सत्यं वद कल्याणि! संशयान्मां विमोचय॥
यदस्मिन् पापसम्भारस्ततो मां त्वमधो नय।
शुद्धश्चेन्मयोर्द्ध्वं मां सर्व्वं वेत्सि ऋतात्मतम्॥

ततः प्राड्विवाकः पूर्व्वाननं तं पूर्व्ववद्दृढमारोपयेत्। आरोपितं मा कान्ते पक्षस्थान्ते पर्य्यन्ताग्रे देशे स्थापयेत्। कान्तं वक्रं दृष्ट्वा पूर्णं चन्द्रं मत्वा रात्रौ चेत्। च्युतग्रामः प्राटंश्चेतश्चेतो राहुः क्रूरः प्राप्यात्तस्माद्वान्ते धर्म्मस्थान्ते ग्रथ्यैकान्ते कर्त्तव्या इत्यस्य पक्षधा पाठकालस्तत्र शुद्धाशुद्धज्ञानाय स्थापयेत्। ततः प्रतिमानद्रव्यादूर्द्धावस्थाने शुद्धः। अधोऽवस्थाने त्वशुद्धः। समावस्थाने अल्पदोषः। सन्देहे पुनःपरीक्षा देया। कक्षकीलकग्रन्थिक्षयपादाद्यादीनां दृष्टकारणव्यतिरेकेण छेदे भङ्गे वाप्यशुद्धिमादिशेत्। ततः पुरोहिताचार्य्यादीन् दक्षिणादिभिस्तोषयेत्।" इति दिव्यतत्त्वम्॥

तुलाकोटिः, स्त्री, (तुलां षाडयं कोटयते इति। कुट+इन्।) नूपुरः। (यथा, माघे। १२।४३।
"लोलाचलत्क्वणितरञ्जितपत्त्रखेलत्तुलाकोटिनिनादकोमलः॥"
तुलया मानेन कुटतीति। कुट कौटिल्ये+इन्।) मानभेदः॥ अर्व्वुदः। इति हेमचन्द्रः। ३। ३२६॥

तुलाकोटी, स्त्री, (तुलाकोटि+ङीदिकारादिति वा ङीष्।) तुलाकोटिः। इत्यमरटीकायां भरतः॥

तुलाकोषः, पुं, (तुलायाः परिमाणस्य कोष इव।) तुलापरीक्षा। इति मिताक्षरा॥

तुलाधारः, पुं, (तुलां धरति धारयति वा। तुला+धृ+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) तुलाराशिः। वणिजि, त्रि। इति मेदिनी। रे, २६४॥ तुलागुणः। इति हेमचन्द्रः॥ (खनामख्यातो वणिग्धर्म्मा पुरुषविशेषः। यथा, महाभारते। १२। २६०। ८।
"तुलाधारो वणिग्धर्म्मा वाराणस्यां महायशाः।
सोऽप्येवं नाहते वक्तुं यथा त्वं द्विजसत्तम!॥")

तुलापुरुषदानं, क्ली, (तुलापुरुषस्य तुलोन्मितपुरुषभारसमपरिमितद्रव्यस्य दानम्। यद्वा, तुलापुरुषविधिना दानम्।) षोड़शमहादानान्तर्गतदानविशेषः। यथा,—
"आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञितम्॥"
तस्य कालो यथा,—
"नोक्तानि यानि गुह्यानि महादानानि षोड़श।
तानि ते संप्रवक्ष्यामि यथावदनुपूर्ब्वशः॥
तुलापुरुषयागोऽयं येषामादौ विधीयते।
अयने विषुवे चैव व्यतीपाते दिनक्षये॥
युगादिषूपरागेषु तथा मन्वन्तरादिषु।
संक्रान्त्यां पौर्णमास्यां च द्वादशीष्वष्टकासु च॥
यज्ञोत्सवविवाहेषु दुःस्वप्नादृभुतदर्शने।
ग्रहयज्ञाङ्गलाभो वा श्रद्धा वा यत्र जायते॥"
तस्य देशो यथा,—
"तीर्थे वायतने गोष्ठकूपारामसरित्सु च।
गृहे वाथ वने वापि तड़ागे रुचिरेऽथवा॥
महादानानि देयानि संसारभयभीरुणा॥"
अस्य विधानं यथा,—
"पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम्।
मण्डपं रचयेद्विद्वान् षोड़श द्वादश वा करान्॥
मण्डपं कारयेद्विद्वांश्चतुर्भद्रासनं बुधः।
सप्तहस्ता भवेद्वेदी मध्ये पञ्चकराथ वा॥
तन्मध्ये तोरणं कुर्य्यात् सारदारुमयं शुभम्।
कुर्य्यात् कुम्भानि चत्वारि चतुर्दिक्षु विचक्षणः॥"
तुलारोपणप्रस्तावे।
"रज्ज्वाभस्तोरणाग्रे तु बध्नयेच्च विधानतः।
सुमेखलायोनिसमायुतानि
संपूर्णकुम्भानि सहासनानि।
सुताम्रकुम्भद्वयसंयुतानि
सयज्ञपात्राणि सहस्रवाणि॥
हस्तप्रमाणानि तिलाज्यपूर्णोपहाराणि सुशोभनानि।
पूर्ब्वोत्तरे हस्तमिता च वेदी
ग्रहादिदेवेश्वरपूजनाय॥
अर्घ्यार्चनं ब्रह्मशिवाच्युतानां
तत्रैव कार्य्यं फलवच्छमाख्यैः।
ब्रह्मशिवाच्युतानां प्रतिमासु पूजा कार्य्या इतरेषां स्थण्डिले कार्य्या।
लोकेशवर्णाः परितः पताका-
मध्ये ध्वजं किङ्किणिकायुतं स्यात्॥
द्वारेषु कार्य्याणि च तोरणानि
चत्वार्यपि क्षीरवनस्पतीनाम्।
द्वारेषु कुम्भद्वयमत्र कार्य्यं
सगन्धपूपाम्ररवयुक्तम्॥ * ॥
यत्पूर्ब्वं सारदारुमयं कुर्य्यादित्युक्तं तस्येदानीमनुष्ठानमाह।
सालेङ्गुदीचन्दनदेवदारु-
श्रीपर्णिबिल्वप्रियकाश्वगोत्थम्।
स्तम्भद्वयं हस्तयुगावखातं
कृत्वा दृढं पञ्चकरोच्छ्रितं तत्॥
तदन्तरं हस्तचतुष्टयं स्या-
दधोत्तरायाश्च तदङ्गमेव॥ * ॥
चतुर्हस्ता तुला कार्य्या पादौ कार्य्यौ तथाविधौ।
अन्तरन्तु तयोर्हस्तौ भवेदर्द्धमेव च॥
समानजातिस्थ तुलावलम्बा
हैमेन मध्ये पुरुषेण युक्ता।
हैमेन पुरुषेणेति सुवर्णनिर्म्मितवासुदेवाद्यतिनेति बोद्धव्यम्।
दैर्घ्येण सा हस्तचतुष्टयं स्यात्
पूर्णत्वमस्यास्तु दशाङ्गुली स्यात्॥
सुवर्णपत्राभरणा च कार्य्या
सुलोहपाशद्वयमत्र हस्तलाभिः।

युता सुवर्णेन तु रत्नमाला
विभूषिता माल्यविलेपनाढ्या ॥
चक्रं लिखेद्वारिजगर्भयुक्तं
नानारजोभिर्भुवि कीर्णपुष्पम् ।
वितानकस्योपरि पञ्चवर्णं
संस्थापयेत् पञ्चपताकशोभम् ॥
इति तुलानिर्म्माणमुक्तम् ॥ * ॥
अथ द्विजा वेदविदश्च कार्ष्ण्यः
सुवामवेशाग्न्वयशीलयुक्ताः ।
विधानदक्षाः पटवोऽनुकूला
ये चार्य्यदेशप्रभवा द्विजेन्द्राः ॥
गुरुञ्च वेदाङ्गविदार्य्यदेश-
समुद्भवः शीलकुलाभिरूपः ।
कार्य्यः पुराणाभिरतोऽतिदक्षः
प्रसन्नगम्भीरसरस्वतीकः ॥
पूर्व्वेण ऋग्वेदविदौ यथास्तां
यजुर्विदौ दक्षिणतश्च पश्चात् ।
स्याप्यौ द्विजौ सामविदौ च पश्चा-
दथर्व्वणाभ्युत्तरतश्च कार्य्यौ ॥
विनायकादित्यहलोकपाल-
वसूरुकादित्यमरुद्गणानाम् ।
ब्रह्माच्युतेशानवनस्पतीनां
स्वमन्त्रतो होमचतुष्टयं स्यात् ॥
जप्यानि सूक्तानि तथैव चैषा-
मनुक्रमेणापि यथा स्वरूपम् ।
अभ्यर्च्चयेल्लोकपतीन् क्रमेण
मन्त्रैरमीभिर्यजमानयुक्तः ॥
इत्यावाह्य सुरान्दद्यादित्यग्भ्यो हेमभूषणम् ।
कुण्डलानि च हैमानि सूत्राणि कटकानि च ॥
द्विगुणं गुरवे दद्याद्भूषणाच्छादनादिकम् ।
जपेयुः शान्तिकाध्यायं जापकाः सर्व्वतो दिशम् ॥
उपोषितास्ततः सर्व्वे कृत्वैवमधिवासनम् ।
आदावन्ते च मध्ये च कुर्य्याद्ब्राह्मणवाचनम् ॥
ततो मङ्गलशब्देन स्नापितो वेदपुङ्गवैः ।
त्रिः प्रदक्षिणमाकृत्य गृहीतकुसुमाञ्जलिः ॥
शुक्लमाल्याम्बरो भूत्वा तां तुलामभिमन्त्रयेत् ।
नमस्ते सर्व्वदेवानां शक्तिरूपं शक्तिमाश्रिता ।
साक्षीभूता जगद्धात्रा निर्म्मिता विश्वयोनिना ॥
एकतः सर्व्वसत्यानि तथा भूतशतानि च ।
धर्म्माधर्म्मकृतां मध्ये स्थापितासि जगद्धिते ॥
त्वं तुले ! सर्व्वभूतानां प्रमाणमिह कीर्त्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते ॥
योऽस्य तत्त्वाधिपो देवः पुरुषः पक्षविग्रहः ।
स एवाधिष्ठितो देवि ! त्वयि तस्मान्नमोऽस्तु ते ॥
नमो नमस्ते गोविन्द ! तुलापुरुषसंज्ञक ! ।
त्वं हरे ! तारयस्वास्मानस्मात् संसारसागरात् ॥
पुण्यं कालमथासाद्य कृत्वाधिवासनं पुनः ।
पुनः प्रदक्षिणं कृत्वा तां तुलामारुहेद्बुधः ॥
सखड्गचर्म्मः कवची सर्व्वाभरणभूषितः ।
धर्म्मराजमथादाय हेमं सूर्य्येण संयुतम् ॥
कराभ्यां मृदुमुद्धिभ्यामास्ते पश्यन् हरेर्मुखम् ।
ततोऽपरे तुलाभागे न्यसेयुर्द्विजपुङ्गवाः ॥
सा स्याद्यधिकं यावत् काञ्चनं चातिनिर्म्मलम् ।
पुष्टिकामस्तु कुर्व्वीत भूमिसंस्थन्नरेश्वर ! ॥
क्षणमात्रं ततः स्थित्वा पुनरेतद्वदीरयेत् ।
नमस्ते साक्षीभूतानां साक्षीभूते सनातनि ! ॥
पितामहेन देवि ! त्वं निर्म्मिता परमेष्ठिना ।
त्वया धृतं जगत् सर्व्वं सहस्थावरजङ्गमम् ॥
सर्व्वभूतात्मभूतस्थे नमस्ते विश्वधारिणि ।
ततोऽवतीर्य्य गुरवे पूर्व्वमर्हं निवेदयेत् ॥
प्राप्य तेषामनुज्ञाञ्च तथान्येभ्योऽपि दापयेत् ।
दीनानाथविशिष्टादीन् पूजयेत् ब्राह्मणैः सह ॥
न चिरं धारयेद्गेहे हेम संप्रोक्षितं बुधः ।
तिष्ठद्भ्यावहं यस्माच्छोकव्याधिकरं नृणाम् ॥
क्षीघ्रं परस्त्रीकरणात् श्रेयः प्राप्नोति पुष्कलम् ॥"
तस्य फलविशेषेण फलं यथा,—
"अश्मनामपि धातूनां यस्तुलां कुरुते नरः ।
सर्व्वपापैः प्रमुच्येत मनोवाक्कायसम्भवैः ॥
यावद्धातु स्थितं तत्र तावत् कोटिशतानि च ।
मोदते तत्र वर्षाणां स्वर्गलोके न संशयः ॥
अथ मानुष्यमाक्रम्य कदाचित् कालपर्य्यये ।
धनधान्यसमृद्धो वै जायते भूपतां कुले ॥
आत्मनस्तु तुलां कृत्वा सुवर्णं यः प्रयच्छति ।
स तारयेत् पितृगणान् दश पूर्व्वान् दशापरान् ॥
आत्मनस्तु तथा तद्वत् फलभागुजायते नरः ।
जन्मप्रभृति यत् पापं मातृतं पैतृकं तथा ॥
सुवर्णदानात् दारिद्र्यं न पश्यति कदाचन ।
रजतस्य तुलां कृत्वा सुकृती यः प्रयच्छति ॥
तावद्वर्षप्रमाणेन निर्म्मलः स्वर्गभाग्भवेत् ।
अनन्तरं भवेद्राजा पृथिव्यां नात्र संशयः ॥
सुवर्णहारी कुष्ठी वा सर्व्वव्याधियुतोऽपि वा ।
ताम्रस्य तु तुलां कृत्वा मुच्यते नात्र संशयः ॥
स तु वर्षसहस्रं वै स्वर्गलोके महीयते ।
कांस्यस्य तु तुलां कृत्वा विप्रेभ्यो यः प्रयच्छति ॥
स तु इन्द्रपदं प्राप्य ऊर्व्वशा सह मोदते ।
आयसस्य तुलां कृत्वा दाता रत्नाधिपो भवेत् ॥
लभते द्युत्तमस्थानं बलवान् जायते सदा ।
त्रैत्यस्य तु तुलां कृत्वा यो ददाति द्विजातये ॥
सोऽमरः शतसंकीर्णे विमाने दिवि मोदते ।
सीसकस्य तुलां कृत्वा यो ददातीह मानवः ॥
स गन्धर्व्वपदं गच्छेत् नानाभरणभूषितः ।
रङ्गस्य तु तुलां कृत्वा विप्रेभ्यो यः प्रयच्छति ॥
विमुक्तः सर्व्वपापेभ्यश्चन्द्रसायुज्यमाप्नुयात् ।
घृतस्य तु तुलां कृत्वा ये प्रयच्छन्ति मानवाः ॥
तेजस्विनोऽभिजायन्ते गोभिश्च चिरजीविनः ।
तैलस्य तु तुलां कृत्वा यो वै दद्याद् द्विजा-
तये ॥
अरोगित्वं सुखित्वं वै आयुष्मानपि जायते ।
अन्नदः सर्व्वसौभाग्यं सर्व्वान् कामान् मधुप्रदः ॥
अनेन विधिना यस्तु तुलापुरुषमाचरेत् ।
प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत् ॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत् ॥
कल्पकोटिशतं यावत्तस्मिंल्लोके महीयते ॥
कर्म्मक्षयादिह पुनर्भुवि राजराजो
भूपालमौलिमणिराजितपादपीठः ।
अह्नान्वितो भवति यज्ञसहस्रयाजी
दीप्रप्रतापजितसर्व्वमहीपलोकः ॥
यो दीप्यमानमपि पश्यति तन्नियुक्तः
कालान्तरे स्मरति वाचयतीह लोके ।
यो वा शृणोति पठतीन्द्रसमानरूपः
प्राप्नोति वासवपुरं परदेवदुष्टम् ॥"
इति दानसागरः ॥

तुलाबीजं, क्ली, (तुलायास्तोलनस्य बीजं मूलम् । यद्वा, तुलायै परिमाणाय बीजम् ।) गुञ्जा । इति त्रिकाण्डशेषः ॥

तुलिः, स्त्री, (तुरिः । रस्य लः ।) तुरी । इति शब्दरत्नावली ॥ तूलिका । इत्यमरटीकायां भरतः ॥

तुलिका, स्त्री, (तोलयति सादृश्यं गच्छतीति । तुल + बाहुलकात् इकन् । स च कित् ।) खञ्जनिका । इति त्रिकाण्डशेषः ॥

तुलिनी, स्त्री, (तूलमस्ति फलेऽस्याः । तूल + इनिः । ङीप् । पृषो० ह्रस्वः ।) शाल्मलिः । इति रत्नमाला ॥

तुलिफला, स्त्री, (तूलि तूलयुक्तं फलं यस्याः । पृषोदरादित्वात् ह्रस्वः ।) शाल्मलिः । इति रत्नमाला ॥

तुली, स्त्री, (तुरी + रस्य लः ।) तुरी । इति शब्दरत्नावली ॥

तुल्यः, त्रि, (तुलया सम्मितः । "नौवयोधर्म्मेति ।" ४ । ४ । ९१ । इति यत् ।) सादृश्ययुक्तः । तत्पर्य्यायः । समः २ सदृक्षः ३ सदृशः ४ सदृक्ष ५ साधारणः ६ समानः ७ । इत्यमरः । २ । १० । ३७ ॥ सधर्म्मः ८ सम्मितः ९ सरूपः १० । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । १ । २७८ ।
"तुल्यार्थं तुल्यसामर्थ्यं मन्त्रिणं व्यवसायिनम् ।
अर्द्धराज्यहरं भृत्यं यो न हन्यात् स हन्यते ॥")
उत्तरपदस्थास्तुल्यवाचकाः यथा । निभः १ सङ्काशः २ नीकाशः ३ प्रतीकाशः ४ उपमा ५ । इत्यमरः । २ । १० । ३८ ॥ भूतः ६ रूपः ७ कल्पः ८ । इति भरतः ॥ प्रभः ९ । इति शब्दरत्नावली ॥ (पुं, स्वनामख्यातो गन्धर्व्वविशेषः । यथा, महाभारते । १ । १०१ । ७ ।
"गन्धर्व्वराजो बलवांस्तुल्यनामाभ्ययात्तदा ॥")

तुल्यपानं, क्ली, (तुल्यैरात्मीयजनैः सह पानम् ।) आत्मीयेन जनेन सह मिलित्वा एककाले कृतं पानम् । तत्पर्य्यायः । सप्रीतिः २ । इत्यमरः । २ । ९ । ५५ ॥

तुवरः, पुं क्ली, (तवति हिनस्ति रोगानिति । तु + बाहुलकात् वरच् प्रत्ययेन साधुः ।) कषायरसः । इत्यमरः । १ । ५ । ९ ॥ त्रि, कषाययुक्तः । (यथा, सुश्रुते १ । ४५ ।
"नातिस्नान्द्रवं तक्रं बाह्लं तुवरं रसे ॥")
ह्रस्वहीनः । इत्युणा ॥

तुवरयावनालः, पुं, (तुवरः कषायो यावनालः ।) धान्यविशेषः । तत्पर्य्यायः । तुवरः २ कषाय-

यावनालः ३ रलयावनालः ४ लोहितकुसुम्भुरुधान्यम् ५। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। विरेचकत्वम्। संग्राहित्वम्। वातघ्नत्वम्। विदाहित्वम्। ग्रीवकारित्वञ्च। इति राजनिर्घण्टः॥

तुवरिका, स्त्री, (तुवरः कषायरसोऽस्त्यस्याः। तुवर+ठन्।) सुराकृन्नत्तिका। इत्यमरः। २। ४। १३१॥ (तुवर्य्येव। तुवरी+स्वार्थे कन् ङीषञ्च।) आफ़ची। इति भरतः॥

तुवरी, स्त्री, (तुवर+विच्वात् ङीष्।) आफ़ची। (यथा, वैद्यकरत्नमालायाम्।

"आफ़ची तुवरी ज्ञेया॥"

बर्ब्बरी तुलसी। तत्पर्य्यायाश्च यथा,—

"बर्ब्बरी तुवरी तुङ्गी खरपुष्पाजगन्धिका॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

सौराष्ट्रवृत्तिका। तत्पर्य्यायः। वृत्त २ सौराष्ट्री ३ वृत्तखा ४ आसङ्गः ५ मसी ६ सुराकृता ७ वृत्तालकम् ८ काली ९ वृत्तिका १० सुरवृत्तिका ११ स्तुत्या १२ काची १३ सुजाता १४। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। कषायत्वम्। उष्णत्वम्। लेखनत्वम्। चक्षुष्यत्वम्। ग्राहित्वम्। छर्दिपित्तज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥

"तुवरी ग्राहिणी ग्रीता लघ्वी कफविषास्रजित्।
तीक्ष्णोष्णा वह्निदा कंण्डूकुष्ठकोठकृमिप्रणुत्॥"

इति भावप्रकाशः॥

तुवरीशिम्बः, पुं, (तुवरी आफ़चीव शिम्बः। तुवरीसदृशत्वात् तथात्वम्। यद्वा, तुवर्य्या इव शिम्बा फलत्वक् यस्य।) चक्रमर्दवृक्षः। इति शब्दचन्द्रिका॥

तुवि, स्त्री, तुम्बी। इति शब्दमाला॥ (बहुशब्दार्थः। इति निघण्टुः। ३। १॥ "तवतिवृंहार्थः सौत्रो धातुः। 'अच इः।' उणां ४। १३८। इति इः। 'वृंहिर्हि बहुः।' इति तट्टीका॥ "उरु। तुवि। पुरु। भूरि। प्रथत्। विश्वम्। परीणसा। यानग्निः। प्रतम्। सहस्रम्। सलिलम्। कुविदिति द्वादश बहुनामानि॥" इति निघण्टुः। ३। १॥ यथा, ऋग्वेदे। ३। ३०।

"तुविकूर्मिर्ऋधावान्॥")

तुष, ल च औ णि तुषौ। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-अनिट्।) ल, अतुषत्। य, तुष्यति। औ, तोष्टा। णि, तुषोऽक्ति। इति दुर्गादासः॥

तुषः, पुं, (तुष+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) धान्यत्वक्। (यथा, प्रबोधचन्द्रोदये द्वितीयाङ्के।

"क्रोहीन् जिहासति सितोत्तमतण्डुलाद्यान्
को नाम भोक्तुमकणोपहितान् हितार्थी॥")

विभीतकवृक्षः। इत्यमरः। २। ४। ५८॥

तुषग्रहः, पुं, (तुषेण गृह्यते इति। ग्रह+कर्म्मणि अप्।) अग्निः। इति त्रिकाण्डशेषः॥

तुषसारः, पुं, (तुषं सरति अनुसरतीति। सृ+अण्। तुषपुञ्जाभ्यन्तरे क्रमशः सञ्चारादस्य तथात्वम्।) अग्निः। इति शब्दमाला॥

तुषानलः, पुं, (तुषस्यानलः।) तुषाग्निः। तत्पर्य्यायः। कुक्कूलः २। इति हेमचन्द्रः। ४।१६७॥ (यथा, धूर्त्तसमागमे।

"तुषानलकणप्रायाश्च भूरेणवः॥")

तुषारः, पुं, (तुष्यत्यनेन ग्रस्यादिरिति। तुष तुष्टौ+"तुषारादयश्च।" उणां ३। १३६। इति आरन् स च कित्।) हिमम्। (यथा, ऋतुसंहारे। ४। १।

"विलीनपद्मः प्रपतत्तुषारो
हेमन्तकालः समुपागतः प्रिये!॥"

तौषारलक्षणगुणाश्च यथा,—

"अपि नद्याः समुद्रान्ते वह्निरापस्तदुद्भवाः।
धूमावयवनिर्मुक्तास्तुषाराख्यास्तु ताः स्मृताः॥
अपि नद्याः समुद्रान्ते वह्निः नदीमारभ्य समुद्रपर्य्यन्ते वह्निरास्ते तदुद्भवाः। वह्निभवा धूमावयवनिर्मुक्ता धूमांशरहिताः। आपस्तुषाराख्याः। तुष इति लोके। तुषार इति च।
अपथ्याः प्राणिनां प्रायः भूरुड्डाणास्तु न हिताः।
तुषारास्तु हिमं रूक्षं स्वाद्वातलमपित्तलम्।
कफोरुस्तम्भकण्ठाग्निमेहगण्डादिरोगनुत्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥)

देशभेदः। (तदेशोद्भवे, पुं भूमि। यथा, मात्स्ये। १२०। ४५।

"तुषारान् बर्ब्बरान् कारान् पह्लवान् पारदान् शकान्॥")

ग्रीकरः। हिमभेदः। इति हेमचन्द्रः। ६।२१॥ (यथा, मार्घे। १। १५।

"न यावदेतावुदपश्यदुत्थितौ
जनस्तुषाराञ्जनपर्व्वताविव॥")

कर्पूरभेदः। इति राजनिर्घण्टः॥ ग्रीतले, त्रि। यथा, नैषधे। ३। ६३।

"अपां हि लघ्नाय न वारिधारा
स्वादुः सुगन्धिः खदते तुषारा॥"

तुषितः, पुं, (तुष्यतीति। तुष तुष्टौ+बाहुलकात् कितच्। यद्वा, तुष+क्विप्। तुट् सन्तोषोऽस्य जातः। तारकादित्वात् इतच्।) देवगणविशेषः। इत्यमरः। १। १। १०॥ ते षट्त्रिंशत्स्मृताः। इति भरतः॥ केषाञ्चिन्मते द्वादश। ते तु मन्वन्तरभेदे विभिन्ननामानः। यथा,—

"प्राणापानसमाभाश्च उदानो व्यान एव च।
चक्षुः श्रोत्ररसा घ्राणस्पर्शो बुद्धिर्मनस्तथा।
द्वादशैते तु तुषिता देवाः सारोचिषेऽन्तरे॥"

इति सारसुन्दरी॥

(यथाच विष्णुपुराणे। १। १५।१२७-१३३।

"पूर्व्वमन्वन्तरे श्रेष्ठा द्वादशासन् सुरोत्तमाः।
तुषिता नाम तेऽन्योन्यमूचुर्वैवस्वतेऽन्तरे॥
उपस्थितेऽतियज्ञेऽस्मिन्नष्टाविंशे युगे मनोः।
समवायीकृताः सर्व्वे समागम्य परस्परम्॥
आगच्छत द्रुतं देवा अदितिं संप्रविश्य वै।
मन्वन्तरे प्रसूयामस्तन्नः श्रेयो भविष्यति॥
एवमुक्त्वा तु ते सर्व्वे चाक्षुषस्यान्तरे मनोः।
मारीचात् कश्यपात् जातास्तेऽदित्या दक्षकन्यया॥
तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव च।
अर्य्यमा चैव धाता च त्वष्टा पूषा तथैव च॥
विवस्वान् सविता चैव मित्रो वरुण एव च।
अंशो भगश्चादितिजा आदित्या द्वादश स्मृताः॥
चाक्षुषस्यान्तरे पूर्व्वमासन् ये तुषिताः सुराः।
वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः॥"

तथा च मत्स्यपुराणे। ६। ३—४।

"तुषिता नाम ये देवाश्चाक्षुषस्यान्तरे मनोः।
वैवस्वतेऽन्तरे चैते आदित्या द्वादश स्मृताः॥
इन्द्रो धाता भगस्त्वष्टा मित्रोऽथ वरुणो यमः।
विवस्वान् सविता पूषा अंशुमान् विष्णुरेव च॥"

तथा, भागवते। ८। १। ७।

"तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः।
इध्मः कविर्विभुः स्वाहा सुदेवो रोचनो द्विषट्।
तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे॥")

तुषोत्थं, क्ली, (तुषादुत्तीर्ष्यतीति। उत्+स्था+कः।) तुषोदकम्। इति राजनिर्घण्टः॥

तुषोदकं, क्ली, (तुषादुत्थितमुदकम्।) काञ्जिकम्। इति हारावली। ११५॥ काञ्जिकभेदः। अस्य लक्षणं यथा,—

"तुषोदकं यवैरामैः सतुषैः शुक्लीकृतैः॥
यवैरुदकसहितैः सन्धानवर्गोक्तत्वात्॥

अस्य गुणाः। दीपनत्वम् लघुत्वम्। पाण्डुक्रिमिगदवस्तिशूलनाशित्वम्। तीक्ष्णत्वम्। उष्णत्वम्। पाचनत्वम्। पित्तरक्तकारित्वञ्च। इति भावप्रकाशः॥ (यथाच।

"तुषोदकं वातहरं प्रभेदि
प्रकोपयेदम्लकपित्तं सदैव।
विपाचनं स्याच्चरणं कृमिघ्न-
मजीर्णहन्तृ कटुकं विपाके॥"

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये॥)

तुष्टः, त्रि, (तुष+कर्म्मणि क्तः।) तोषप्राप्तः। यथा, पुराणे।

"तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्॥"

(यथाच हितोपदेशे।

"सर्व्वा एवापदस्तस्य यस्य तुष्टं न मानसम्॥")

तुष्टिः, स्त्री, (तुष+भावे क्तिन्।) तोषः। (यथा, मनुः। २। ६। [दाम्।

"वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥")

अधिगतार्थादन्यच्च तुच्छत्वबुद्धिः। इति चण्डीटीकायां नागोजीभट्टः॥ (सा च नवविधा। इति सांख्याचार्य्याः॥ तथाचोक्तम्।

"आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।
बाह्याविषयोपरमात् पञ्च नव तुष्टयोऽभिमताः॥"

इयमेव पुराणमते दक्षस्य प्रजापतेः कन्या धर्म्मस्य पत्नी च। यथा, मार्कण्डेये। ५०।१६।२१।

"प्रस्तुत्याच तथा दत्त्वाचतस्रो विंशतिस्तथा।
ससप्त कन्यास्तासाच सम्यङ्नामानि मे शृणु॥
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिश्चयो-
दशी॥
पत्न्यर्थे प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः॥")
माढकाविशेषः। इति भवदेवभट्टः॥ (शक्ति-
विशेषः। यथा, देवीभागवते। १। १५। ६१।
"तुष्टिः पुष्टिः क्षमा लज्जा तृष्णा तन्द्रा च शक्तयः।
संस्थिताः सर्व्वतः पार्श्वे महादेव्याः पृथक्
पृथक्॥")
तुष्टुः, पुं, (तुष+बाहुलकात् तुक्।) कर्ब्बु-
मधिः। इति शब्दचन्द्रिका॥
तुस, ध्याने। इति कविकल्पद्रुमः॥ (भ्वां-परं-
अकं-सेट्।) तोषति। इति दुर्गादासः॥
तुसः, पुं, (तुषः। पृषोदरादित्वात् सत्वम्।) तुषः।
इत्यमरटीकायां रमानाथः॥
तुस्सं, क्ली, धूलिः। इति लिङ्गादिसंग्रहे वृत्तशब्द-
टीकायां सारसुन्दरी॥
तुह, इर् अर्द्दने। इति कविकल्पद्रुमः॥ (भ्वां-
परं-सकं-सेट्।) इरु, अतुहत् अतोहीत्।
अर्द्दनमिह वधः। इति दुर्गादासः॥
तुहिनं, क्ली, (तोहति अर्द्दति तुह्यतेऽनेनेति वा।
तुह+"वेपितुहोर्डिनच्च।" उणां। २। ५२।
इति इनन् गुणे ह्रस्वश्च।) हिमम्। इत्य-
मरः। १। ३। १८॥ (यथा, आर्य्यासप्त-
शत्याम्। ६३२।
"सा श्यामा तन्वङ्गी दहता प्रीतोपचारतीव्रेण।
विरहेण पाण्डिमानं नीता तुहिनेन दूर्व्वेव॥")
चन्द्रतेजः। इत्युणादिकोषः॥ (यथा, पद्य-
तन्त्रे। २। ५८।
"किं चन्दनैः सकर्पूरैस्तुहिनैः शीतलैश्च किम्।
सर्व्वे ते मित्रगात्रस्य कलां नार्हन्ति षोड़शीम्॥"
शीतले, त्रि। यथा, आर्य्यासप्तशत्याम्। ३६६।
"प्रसरतु शरत्रियामा जगन्ति धवलयतु धाम
तुहिनांशोः।
पक्षरसकोरिकाणां कथिकाकल्पोऽपि न
विशेषः॥")
तुहिनांशुतैलं, क्ली, (तुहिनांशोः कर्पूरस्य तैलम्।)
कर्पूरतैलम्। इति राजनिर्घण्टः॥
तूड, ऋ अनादरे। इति कविकल्पद्रुमः॥ (भ्वां-
परं-सकं-सेट्।) बहुस्वरः। ऋ, अतुतूड़त्।
इति दुर्गादासः॥
तूण, क सङ्कोचे। इति कविकल्पद्रुमः॥ (चुरां-
परं-अकं-सेट्।) दन्त्यवर्गादादिः। क, तूणयति
चक्षुः सङ्कुचितं स्यादित्यर्थः। इति दुर्गादासः॥
तूण, क ड पूरणे। इति कविकल्पद्रुमः॥ (चुरां-
आत्मं-सकं-सेट्।) क ड, तूणयते। इति दुर्गा-
दासः॥
तूण, तृ क सङ्कोचे। इति कविकल्पद्रुमः॥ (अदन्त-
चुरां-परं-अकं-सेट्।) दीर्घौ ऋदन्योपधः।
अतुतूणत्। इति दुर्गादासः॥
तूणः, पुं स्त्री, (तूण्यते पूर्य्यते बाणैरिति। तूण+
पूरणे घञ्।) बाणाधारः। तत्पर्य्यायः। उपा-
सङ्गः २ तूणीरः ३ निषङ्गः ४ इषुधिः ५। इत्य-
मरः। २। ८। ८८॥ तूणी ६। इति शब्द-
रत्नावली॥ (यथा, महाभारते। ३। १७०।३।
"तूणखड्गधरः शूरो बहुगोधाङ्गुलित्रवान्॥")
तूणकं, क्ली, (तूणयति सङ्कुचितं भवति समा-
निकापदद्वयमिति। तूण+खुल्।) छन्दो-
विशेषः। यथा, छन्दोमञ्जर्य्याम्।
"तूणकं समानिकापदद्वयं विनान्तिमम्॥"
तूणी, स्त्री, (तूण्यते पूर्य्यते बाणैरिति। तूण+
कर्म्मणि घञ्। गौरादित्वात् ङीष्।) तूणः।
इति शब्दरत्नावली॥ (यथा, रघुः। ६। ५६।
"तूणीमुखोद्धृतशरेण विशीर्णपङ्क्ति॥"
वेदनाविशेषः। यथा, सुश्रुते निदानस्थाने
१ अध्याये।
"अधो या वेदना याति वर्च्चोमूत्राग्रयोस्थिता।
भिन्दतीव गुदोपस्थं सा तूणीत्युपदिश्यते॥")
तूणी, [न्] पुं, (तूणवदाकृतिरस्यस्येति। तूण+
इनिः।) गन्धीदृचः। इति राजनिर्घण्टः॥
(अस्य पर्य्याया यथा,—
"तूणी तुम्बक आपीनस्तुम्बिकः कच्छकस्तथा।
कुठेरकः कान्तलको नन्दिवृक्षश्च गन्धकः॥"
गुणाश्चास्य यथा,—
"तूणी रूक्षः कटुः पाके कषायो मधुरो लघुः।
तिक्तो वाही हिमो वृष्यो व्रणकुष्ठास्रपित्त-
जित्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तूणयुक्ते, त्रि॥ (यथा, हरिवंशे भविष्यपर्व्वणि।
१८। ३५।
"आरुह्य भगवान् विष्णुर्गरुड़ं पक्षिपुङ्गवम्।
शङ्खी चक्री गदी खड्गी शार्ङ्गी तूणी तलत्र-
वान्॥")
तूणीकः, पुं, (तूणी तूण इव कायतीति। के+
कः।) गन्धीदृचः। इति राजनिर्घण्टः॥
तूणीरः, पुं, (तूण्यते पूर्य्यते बाणैरिति। तूण+
बाहुलकात् ईरन्।) तूणः। इत्यमरः। २। ८।
८८॥ (यथा, महाभारते। ७। २८। १६।
"तस्य पार्श्वौ धनुश्चिह्नौ तूणीरौ चक्रिरक्षतौ च
शरमार्गौ द्विषन्नृणां सर्म्मसंक्षतकाङ्क्षयत्॥"
स्त्रीलिङ्गेऽपि दृश्यते। यथा, तत्रैव। ६। ५१।
५१।
"तूणीरायुध वस्त्राणि विचित्राणि शरूंषि च॥")
तूतवं, क्ली, तुत्थम्। इतिशब्दचन्द्रिका॥ तुतिया
इति भाषा॥ (तुत्थशब्देऽस्य गुणादिर्ज्ञात-
व्यम्॥)
तूदः, पुं, (तुदतीति। तुद व्यथने+"इगुपधेति।"
३। १। १३५। इति कः। पृषोदरादित्वात्
दीर्घः।) तूलदृचः। इति राजनिर्घण्टः॥
तूर, व ड ई हिंसे। वेगे। इति कविकल्पद्रुमः।
(दिवां-आत्मं-सकं-वेगे अकं-सेट्।) व ड,
तूर्य्यते। ई, तूर्णः। इति दुर्गादासः॥
तूरं, क्ली, (तूर्य्यते ताड्यते इति। तूर+घञ्।)
वाद्यम्। इति हेमचन्द्रः। २। २००॥
तूरी, स्त्री, (तूरं वाद्यविशेषस्तदाकृतिः पृषोदरा-
दित्वात् साधुरिति। तूर+अण्। गौरादित्वात् ङीष्।)
धुस्तूरवृक्षः। इति भावप्रकाशः॥
तूर्णं, क्ली, (त्वर सम्भ्रमे+क्तः। पक्षे इडभावः
"ज्वरत्वरेति।" ६।४।२०। इत्यूट्। "रदाभ्यां
निष्ठातो नः पूर्व्वस्य च दः।" ८। २। ४२।
इति तस्य नः।) शीघ्रम्। (यथा, देवीभाग-
वते। १। १०। ३१।
"तां दृष्ट्वा चपलापाङ्गीं समीपस्थां वराश्वराम्।
पप्रच्छाब्धरीताङ्गस्तूर्णमाशौचतत्परः॥")
तड्डति, त्रि। इत्यमरः। १। २। ६८॥
तूर्द्दिः, पुं, (त्वरते त्वरयं वा। त्वर+"वह्निमि-
नृहनिधान्यायिभ्यो दित्।" उणां। ४। ५१।
इति दिः स च दित्।) मलम्। इत्युणादि-
कोषः। २। १४१॥ त्वरा। इति हेमचन्द्रः।
२। २३६॥ श्लोकः। मनः। इति संक्षिप्तसारे
उणादिवृत्तिः॥ (क्षिप्रे, त्रि। इति निघण्टुः।
२। १५॥ यथा, ऋग्वेदे। १०। ८८। ६।
"मायान्तु यज्ञियानामेतामपो यत्तूर्द्दिरन्ति
प्रजानन्॥"
"तूर्द्दिरन्ति क्षरमाणः।" इति सायणः॥)
तूर्य्यं, क्ली, (तूर्य्यते ताड्यते इति। तूर्+यत्।)
वाद्यम्। इति हेमचन्द्रः। २। २८६॥ (यथा,
महाभारते। १। ११३। ४४।
"स तूर्य्यशतशब्दानां भेरीणाञ्च महास्वनैः।
हर्षयन् सर्व्वशः पौरान् विवेश्य गजसाह्व-
यम्॥")
तूर्य्यखरः, पुं, (तूर्य्यस्य खर इव।) द्रगड़वाद्यम्।
इति शब्दरत्नावली। २२२॥ (क्वचित् तूर्य्यगन्धोऽपि
पाठः॥)
तूल, क ड पूरणे। इति कविकल्पद्रुमः॥ (चुरां-
आत्मं-सकं-सेट्।) दीर्घौ। क ड, तूलयते। इति
दुर्गादासः॥
तूल, क निष्कर्षे। इति कविकल्पद्रुमः॥ (चुरां-
परं-सकं-सेट्।) दीर्घौ। निष्कर्षे दृढ दृश्यता-
परिच्छेदः। क, तूलयति काञ्चनं वह्निः। इति
दुर्गादासः॥ (क्वचित् तूल कि निष्कर्षे इति
पाठोऽपि दृश्यते। कि, तूलति तूलयति॥)
तूलं, क्ली, (तूलयते पूरयति सर्व्वं व्यापकत्वात्।
तूल पूरणे+कः।) आकाशम्। इति मेदिनी।
ले, २५॥ अश्वत्थाकारवृक्षविशेषः। पलाश-
पिप्पल इति तूल इति च भाषा॥ तत्पर्य्यायः।
तूदः २ ब्रह्मकाष्ठम् ३ ब्राह्मवेधः ४ पूषकः ५
ब्रह्मदारु ६ सुपुष्पम् ७ सुरूपम् ८ नीलपत्र-
कम् ९ कसुकः १० विप्रकाष्ठम् ११ मदसारः १२।
इति राजनिर्घण्टः॥ पुंगः १३। तत्पञ्चकस्य
गुणाः। गुरुत्वम्। स्वादुत्वम्। हिमत्वम्।
पित्तानिलनाशित्वञ्च। तदामफलगुणाः। गुरु-
त्वम्। सारकत्वम्। अम्लत्वम्। उष्णत्वम्।
रक्तपित्तकारित्वञ्च। इति भावप्रकाशः॥ मधु-

राज्यत्वम्। दाहप्रशमनत्वम्। दृष्यत्वम्। कषायत्वम्। कफनाशित्वञ्च। इति राजनिर्घण्टः॥

तूलं, क्ली पुं, (तूल्यते इयत्तया परिच्छिद्यते इति। तूल+कर्म्मणि घञ्। यद्वा, तूलयते स्वल्पोऽपि बहुस्थानं पूरयतीति। तूल+"इगुपधेति।"कः।) कार्पासादितूलः। (इति मेदिनी। ले, २६॥) तत्पर्य्यायः। पिचुः २। इत्यमरः। २।६।१०६॥ पिचुलः ३ पिचुतूलः ४ तूलपिचुः ५। इत्यमरटीका॥ पिचुतूलम् ६। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। ५। १०। ३६।

"विपरीतं यदा दैवं तूलं वज्रसमं भवेत्।
विधिचेत् सुसुखः कामं कुलिशं तूलवत्तदा॥")

तूलकं, क्ली, (तूल+स्वार्थे कन्।) तूलः। इति हेमचन्द्रः। ४। २०। ५॥

तूलकार्म्मुकं, क्ली, (तूलाय तूलस्फोटनाय कार्म्मुकमिव।) तूलस्फोटनार्थधनुः। धुनखरा इति भाषा। तत्पर्य्यायः। पिञ्जलम् २। इति त्रिकाण्डशेषः॥

तूलचापः, पुं, (तूलाय तूलस्फोटनाय चाप इव।) तूलकार्म्मुकम्। इति शब्दरत्नावली॥

तूलनालिका, स्त्री, (तूलनिर्म्मिता नालिका नाली।) पिञ्जिका। इति त्रिकाण्डशेषः॥ पाँइज इति भाषा॥

तूलनाली, स्त्री, (तूलनिर्म्मिता नाली।) तूलनालिका। इति भूरिप्रयोगः॥

तूलपिचुः, पुं, (तूलप्रधानः पिचुस्तूलवृक्षः।) तूलः। इत्यमरटीकायां भरतः॥

तूलवृक्षः, पुं, (तूलस्य तूलप्रधानो वा वृक्षः।) शाल्मली। इति राजनिर्घण्टः॥

तूलशर्करा, स्त्री, (तूलस्य शर्करेव।) कार्पासबीजम्। इति शब्दमाला॥

तूलसेचनं, क्ली, (तूलस्य सेचनम्।) सूचकर्म्मनम्। इति शब्दमाला॥ काटना इति भाषा॥

तूला, स्त्री, (तूलयते पूरयति स्थानमिति। तूल+अच्+ततः स्त्रियां टाप्।) कार्पासी। इति राजनिर्घण्टः॥ तूलिः। इति शब्दरत्नावली॥

तूलिः, स्त्री, (तूलतीति। तूल निष्कर्षे+"इगुपधात् कित्।"उणां। ४। ११६। इति इन् स च कित्।) स्वनामख्यातचित्रकरोपकरणम्। इति सिद्धान्तकौमुदीसुबादिवृत्तिः॥

तूलिका, स्त्री, (तूलिरेव। स्वार्थे कन्।) चित्रकरोपकरणम्। तूली इति भाषा। (यथा, कुमारे। १। ३२॥

"उन्मीलितं तूलिकयेव चित्रं
सूर्य्यांशुभिर्भिन्नमिवारविन्दम्॥")

तत्पर्य्यायः। ईषिका २। इत्यमरः। २।१०।३३॥ तुलिः ३ तूली ४ ईषीका ५ इषीका ६। वीरखादिशूलाका। इत्यन्ये। आवर्त्तितमणावर्त्तितं सुवर्णं ज्ञातुं यन्निखिप्यते तच्चेत्यन्ये। आवर्त्तितसुवर्णं द्रवाकारं यत्र निखिप्यते तच्चेति केचित्। इति भरतः॥ (तूलमस्त्यस्या इति। तूल+ठन्।) ग्रन्थोपकरणम्। इति मेदिनी। के, १०२॥ तोषक् इति भाषा। (यथा, कथासरित्सागरे। २६। ७८।

"प्रविश्य चान्तः सदन्तपर्य्यङ्के न्यस्ततूलिके।
पटावगुण्ठिततनुं शयानां काचिदैक्षत॥"

तथा च काशीखण्डे। ४। ६७।

"कञ्चुकं तूलगर्भञ्च तूलिकां रूपवीतिकाम्॥")

वर्त्तिः। इति शब्दरत्नावली॥

तूलिनी, स्त्री, (तूलोऽस्त्यस्याः। तूल+इनिः। ङीप्।) लक्ष्मणाकन्दः। इति राजनिर्घण्टः॥ शाल्मलिवृक्षः। इति भावप्रकाशः॥ (तद्यथा,

"ताम्बूलं कटुतैलसुप्तभवनं तूलीपटी तूलिनी॥"

इति वैद्यकपथ्यापथ्यविधौ ग्रिग्रिराद्याचारे॥)

तूलिफला, स्त्री, (तूलि तूलयुक्तं फलमस्याः।) शाल्मलिः। इति रत्नमाला॥

तूली, स्त्री, (तूलयतीति। तूल+इन् ह्रस्वादिकारादिति वा ङीप्।) नौली। वर्त्तिः। इति शब्दरत्नावली॥ तूलिका। इत्यमरटीकायां भरतः॥ (यथा,—

"उच्चैस्तूलीविलासं सुललितशयनं प्राणिनामाभिरामम्॥"

इति वैद्यकपथ्यापथ्यविधौ हेमन्तऋत्वे॥)

तूवरः, पुं, (तु सौत्रो धातुः+बाहुलकात् ष्वरच् दीर्घश्च।) काले अजातश्मश्रुर्गौः। नेड़ा गरु इति भाषा। अश्मश्रुपुरुषः। इत्यमरः। ३।३। १६४॥ माकुन्दिया इति भाषा। पुरुषव्यञ्जनत्यक्तः। कषायरसः। इति मेदिनी। वे, १६४॥

तूवरिका, स्त्री, (तूवरी+स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च।) तुवरिका। इत्यमरटीकायां रमानाथः॥

तूवरी, स्त्री, (तूवर+विलात् ङीष्।) आढ़की। सौराष्ट्रवृत्तिका। इत्यमरटीकायां भरतः॥

तूष, तुष्टौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वडखरी। तूषन्ति कुलदेवताः। इति दुर्गादासः॥

तूष्णीं, [म्] व्य, मौनम्। इत्यमरः। ३। ४। ६॥ (यथा, मनुः। ८। १४७।

"यत्किञ्चिदुपचारार्थं समिधौ प्रेक्षते धनी।
भृत्यभानं परेस्तूष्णीं न स तत्फलमर्हति॥")

तूष्णींशील, त्रि, (तूष्णीं मौनं शीलं स्वभावो यस्य।) मौनी। तत्पर्य्यायः। तूष्णीक। इत्यमरः। ३। १। ३६॥

तूष्णीक, त्रि, (तूष्णीं शीलं यस्य। "शीले को मलोपश्च।" ५। ३। ७३। इत्यस्य वार्त्तिकोक्त्या कः मलोपश्च।) तूष्णींशीलः। इत्यमरः। ३। १। ३६॥ (यथा, महाभारते। ५। ३४। २३।

"आसीनमपि तूष्णीकमनुरुध्यन्ति तं प्रजाः॥")

तूष्णीकां, [म्] व्य, (तूष्णीम्+अकचप्रकरणे "तूष्णीमः कामु वक्तव्यः।" इति वार्त्तिकोक्त्या कामु। मित्त्वादन्त्यादचः परः।) मौनम्। इत्यमरः। ३। ४। ६॥

तूस्तं, क्ली, (तुस शब्दे+बाहुलकात् तुसेरपि तन् दीर्घश्च। इत्यौणादिकः। ३। ८६।) धूलिः। ("तूस्तानि विनिहन्ति वितूस्तयति पन्थानं वातः।" इति सुग्धबोधम्॥) जटा। इति मेदिनी। ते, २२॥ पापम्। सूक्ष्मम्। इति शब्दरत्नावली॥

तृच, इत्यास्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) सन्नमस्करी। तृचति। तृचां गतौ। इति दुर्गादासः॥

तृणं, क्ली, जातीफलम्। इति शब्दचन्द्रिका॥

तृट्, [ट्] स्त्री, (तृष+क्विप्।) इच्छा। तृष्णा। (यथा, ऋतुसंहारे। १। १।

"त्वगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालवः॥")

कामकन्या। इति मेदिनी। टे, १३॥

तृड, द न उ भत्ते। इति कविकल्पद्रुमः॥ (तर्नां-उभं-सकं-सेट्। क्त्वावेट्।) द न, तृणोति तर्णोति तृणुते तर्णुते। उ, तर्णिला तृला। इति दुर्गादासः॥

तृणं, क्ली, (तृण्यते भक्ष्यते गवादिभिरिति। तृह+घञ्। संज्ञापूर्व्वकत्वात् न गुणः। यद्वा, तृह हिंसायाम्+"तृहेः क्नो हलोपश्च।"उणां ५। ८। इति क्नप्रत्ययो हकारलोपश्च।) नड़ादि। चिनाखड़ इति ख्यातम्। इति केचित्। इति भरतः॥ तत्पर्य्यायः। अर्च्चुनम् २। इत्यमरः। २। ५। १६७॥ त्रिणम् ३ खटम् ४ खेट्टम् ५ हरितम् ६ ताण्डवम् ७। इति शब्दरत्नावली॥*॥ (यथा, पञ्चतन्त्रे। १। ३४। [त्रम्।

"जातस्य नदीकूले तस्य तृणस्यापि जन्म कल्याय
यत् सलिलमज्जनाकुलजनहस्तावलम्बनं भवति॥")

गोभ्यस्तृणदानफलं यथा,—

"तीर्थस्नानेषु यत् पुण्यं यत् पुण्यं विप्रभोजने।
यत् पुण्यञ्च महादाने यत् पुण्यं हरिसेवने॥
सर्व्वव्रतोपवासेषु सर्व्वेष्वेव तपःसु च।
भुवः पर्य्यटने यत्तु सत्यवाक्येषु यद्भवेत्॥
यत् पुण्यं सर्व्वयज्ञेषु दीक्षायाञ्च लभेन्नरः।
तत् पुण्यं लभते प्राज्ञो गोभ्यो दत्वा तृणानि च॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥*॥

धनिष्ठादिपञ्चनक्षत्रेषु गृहनिर्म्मितस्तृणकाष्ठादारणे दोषा यथा,—

"अग्निचौरभयं रोगो राजपीड़ा धनक्षतिः।
संयहे तृणकाष्ठानां छते वस्वादिपञ्चके॥"

इति ज्योतिःसारसंग्रहः॥

(गन्धद्रव्यविशेषः। रामकर्पूर इति भाषा॥ अस्य पर्य्यायाः यथा,—

"कुलञ्जनञ्च सुगन्धञ्च तृणं प्रीतं सुशीतलम्॥"

इति वैद्यकरत्नमालायाम्॥)

तृणकुङ्कुमं, क्ली, (तृणरूपं कुङ्कुमम्।) सुगन्धद्रव्यभेदः। तत्पर्य्यायः। तृणाक्तं २ गन्धि ३ तृणशोणितम् ४ तृणपुष्पम् ५ गन्धाधिकम् ६ तृणोत्थम् ७ तृणगौरम् ८ शोणितम् ९। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफमारुतशोथकृमितृषामाकुष्ठामदोषनाशित्वम्। परमभाग्यरत्नम्। इति राजनिर्घण्टः॥

तृणकुटी, स्त्री, (तृणाच्छादिता कुटी।) तृणाच्छादितगृहम्। तत्पर्य्यायः। कायमानम् २। इति त्रिकाण्डशेषः॥ तृणौकः ३। इति हेमचन्द्रः॥

तृणकूर्म्मः, पुं, (तृणस्य कूर्म्म इव।) तुम्बी। इति शब्दमाला॥

तृणकेतुः, पुं, (तृणेषु केतुर्ध्वज इव।) वंशः। इति हारावली। १०८॥

तृणकेतुकः, पुं, (तृणकेतु+स्वार्थे कन्।) वंशः। इति राजनिर्घण्टः॥

तृणगोधा, स्त्री, (तृणस्य गोधेव चुम्बनात्।) चित्रकोलः। ककलासः। इति मेदिनी। धे, ४६॥ तृणजलौका। इति केचित्॥

तृणग्रन्थिः, स्त्री, (तृणस्य ग्रन्थिरिव ग्रन्थिर्यस्य।) स्वर्णजीवन्ती। इति राजनिर्घण्टः॥

तृणग्राही, [न्] पुं, (तृणं गृह्णातीति। ग्रह+णिनिः।) नीलमक्षिः। इति राजनिर्घण्टः॥ मक्षिविशेषः। इति शब्दार्थकल्पतरुः॥ काफुरदाना इति भाषा। तत्पर्य्यायः। शूकापूट्टः २ तृणमक्षिः ३। इति हारावली॥

तृणजम्भा, [न्] त्रि, (तृणं जम्भो भक्ष्यं यस्य। "जम्भा सुहरिततृणसोमेभ्यः।" ५।४।१२५। इति निपातनात् साधुः।) तृणभक्षकः। (तृणमिव जम्भो दन्तो यस्य।) तृणवद्दन्तयुक्तः। इति सिद्धान्तकौमुदी॥

तृणता, स्त्री, धटुः। (तृणस्य भावः। तृण+भावे तल्।) तृणत्वम्। इति मेदिनी। ते, ११३॥

तृणद्रुमः, पुं, (तृणप्रधानो द्रुमः। तृणमिव द्रुमो वा।) तालः। गुवाकः। तालौ। केतकी। खर्ज्जूरः। खर्ज्जूरी। नारिकेलः। हिन्तालः। एषां निर्य्यासगुणाः। शीतलत्वम्। लघुत्वम्। मोहनत्वम्। बलकारित्वम्। हृद्यत्वम्। तृष्णासन्तापनाशित्वञ्च। इति राजनिर्घण्टः॥

तृणधान्यं, क्ली, (तृणवद्धुलं धान्यम्।) धान्यविशेषः। उड़िधान इति भाषा। तत्पर्य्यायः। नीवारः २। इत्यमरः। २। ६। २५॥

तृणध्वजः, पुं, (तृणेषु ध्वज इव दीर्घत्वात्।) वंशः। इत्यमरः। २। ४। १६०॥

तृणनिम्बः, पुं, (तृणाकारो निम्बः।) नेपालनिम्बः। इति राजनिर्घण्टः॥

तृणपत्रिका, स्त्री, (तृणस्येव पत्रमस्त्यस्याः। ठन् टाप् च।) दर्भः। इति राजनिर्घण्टः॥

तृणपत्री, स्त्री, (तृणमिव पत्रमस्याः। ङीष्।) गुडाग्निनी। इति राजनिर्घण्टः॥

तृणपुष्पं, क्ली, (तृणस्य पुष्पमिव।) तृणकुङ्कुमम्। इति राजनिर्घण्टः॥

तृणपुष्पी, स्त्री, (तृणमिव पुष्पमस्याः। ङीष्।) सिन्दूरपुष्पीवृक्षः। इति राजनिर्घण्टः॥

तृणपूली, स्त्री, (तृणस्य पूलः संहतिर्यत्र। ततो गौरादित्वात् ङीष्। तृणनिर्म्मितत्वादस्य तथात्वम्।) चषा। इति हारावली। १६६॥ चाँच इति भाषा॥

तृणमणिः, पुं, (तृणेषु मणिः।) तृणग्राही। इति हारावली। २१६॥

तृणमत्कुणः, पुं, तृणकः। इति त्रिकाण्डशेषः॥ जामिनू इति भाषा॥

तृणराजः, पुं, (तृणेषु राजते शोभते इति। राज+अच्।) तालवृक्षः। इत्यमरः। २। ५। १६८॥ (यथा, आर्य्यासप्तशत्याम्। ५६७। [लक्ष्मः।
"श्रीः श्रीफलेन राज्यं तृणराजेनाक्षयसाम्बतो कृष्णयोः सम्यक् साम्यात् गतौ घटचक्रवर्त्तित्वम्॥")
नारिकेलः। इति राजनिर्घण्टः॥

तृणवल्लजा, स्त्री, (तृणरूपा वल्लजा।) वल्लजा। इति राजनिर्घण्टः॥

तृणवीजः, पुं, (तृणस्य वीजमिव वीजमस्य।) श्यामाकः। इति रत्नमाला॥

तृणवीजोत्तमः, पुं, (तृणवीजेषु उत्तमः।) श्यामाकः। इति राजनिर्घण्टः॥

तृणशीतं, क्ली, (तृणेषु शीतं शीतलम्।) कर्त्तृणम्। गन्धतृणम्। इति रत्नमाला॥

तृणशीता, स्त्री, (तृणेषु शीता शीतला।) जलपिप्पली। इति राजनिर्घण्टः॥

तृणशून्यं, क्ली, (तृणेन शून्यम्।) मल्लिका। केतकीफलम्। इति मेदिनी। ये, ११६॥ (एतद्गुणा यथा,—
"नीपं सभार्गवं पीलु तृणशून्यं विकङ्कतम्।
प्राचीनामलकञ्चैव दोषघ्नङ्करहारि च॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥)
तृणरहिते, त्रि॥

तृणषट्पदः, पुं, (तृणमिव षट् पदा यस्य।) वरोलः। इति हारावली। २१७॥ बोलता इति भाषा॥

तृणसारा, स्त्री, (तृणवत् सारो यस्याः। असारत्वात् तथात्वम्।) कदली। इति हारावली। १०५॥

तृणसिंहः, पुं, (तृणेषु सिंह इव तन्नाशकत्वात्।) कुठारः। इति शब्दार्थकल्पतरुः॥

तृणहर्म्मा, पुं, (तृणाच्छादितो हर्म्म्यः।) तृणयुक्ताट्टालिका। अट्टालिकोपरि तृणनिर्म्मितगृहम्। तत्पर्य्यायः। मयटः २। इति हारावली। २२३॥

तृणाङ्घ्रिपः, पुं, (तृणरूपोऽङ्घ्रिपो वृक्षः।) मत्स्याक्षकतृणम्। इति राजनिर्घण्टः॥

तृणाग्निः, पुं, (तृणजातोऽग्निः। शाकपार्थिववत् समासः।) तृणजातायिः। तत्पर्य्यायः। वत्सलः २। इति त्रिकाण्डशेषः॥

तृणाञ्जनः, पुं, (तृणमिव अञ्जनो ज्येष्ठी। तृणवदाकृतित्वादस्य तथात्वम्।) ककलासः। इति त्रिकाण्डशेषः॥

तृणाट्यं, क्ली, (तृणेषु आढ्यं पुष्टत्वात्।) पर्व्वततृणम्। इति राजनिर्घण्टः॥

तृणाम्लं, क्ली, (तृणेषु अम्लम्।) लवणतृणम्। इति राजनिर्घण्टः॥

तृणास्रक्, [ज्] पुं, (तृणेषु असृगिव रक्तवर्णत्वात्।) तृणकुङ्कुमम्। इति राजनिर्घण्टः॥

तृणेक्षुः, पुं, (तृणेषु इक्षुरिव।) वल्लजा। इति राजनिर्घण्टः॥

तृणोत्तमः, पुं, (तृणेषु उत्तमः।) उशीरवालतृणम्। इति राजनिर्घण्टः॥

तृणोद्भवः, पुं, (तृणैः सह उद्भवतीति। उत्+भू+अच्।) नीवारः। इति राजनिर्घण्टः॥

तृणौकः, [स्] क्ली, (तृणनिर्म्मितमौको वसतिस्थानम्।) कायमानम्। तृणनिर्म्मितगृहम्। इति हेमचन्द्रः। ४। ६२॥ खड़ुया घर इति भाषा॥

तृणौषधं, क्ली, (तृणात्मकं औषधम्।) एलवालुकाख्यगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

तृण्या, स्त्री, (तृणानां समूहः। "पाशादिभ्यो यः।" ४। २। ६८। इति यः।) तृणसमूहः। इत्यमरः। २। ५। १६८॥

तृतीयः, त्रि, (त्रयाणां पूरणः। त्रि+"त्रेः सम्प्रसारणञ्च।" ५। २। ५५। इति तीयः सम्प्रसारणञ्च।) त्रयाणां पूरणः। तिकरणम्॥ तेसरा इत्यादि भाषा। (यथा, मनुः। २। ३५।
"चूड़ाकर्म्म द्विजातीनां सर्व्वेषामेव धर्म्मतः।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात्॥")

तृतीयप्रकृतिः, स्त्री, तृतीया प्रकृतिः। इत्यमरटीकायां भरतः॥

तृतीया, स्त्री, (त्रयाणां पूरणी। त्रि+"त्रेः सम्प्रसारणञ्च।" ५। २। ५५। इति तीयः सम्प्रसारणञ्च। ततष्टाप्।) तिथिविशेषः। सा चन्द्रमण्डलस्य तृतीयकलाक्रियारूपा तत्क्रियोपलक्षितः कालो वा। इति तिथ्यादितत्त्वम्॥
अस्यां जातस्य फलं यथा,—
"सकलगुणगभीरो भूमिपालानुरागी
पवनगरविगाही सर्व्वलोकोपकारी।
परविषयनिवासी कौतुकी सत्यवादी
भवति निखिलविद्यो यस्तृतीयाप्रसूतः॥"
इति कोष्ठीप्रदीपः॥
सा वैशाखस्य शुक्ला अक्षयतृतीया। यथा, स्मृतिः।
"वैशाखे मासि राजेन्द्र! शुक्लपक्षे तृतीयिका।
अक्षया सा तिथिः प्रोक्ता कृत्तिकारोहिणीयुता॥
तस्यां दानादिकं पुण्यं अक्षयं समुदाहृतम्॥"
भविष्ये।
या शुक्ला कुरुशार्दूल! वैशाखे मासि वै तिथिः।
तृतीया साक्षया लोके गौर्व्वाणैरभिवन्दिता॥
योऽस्यां ददाति करकान् वारिवासनसंयुतान्।
स याति पुरुषो वीर! लोकान् वै हेममालिनः॥
करकान् कुम्भान्। वासनमन्नम्। हेममालिनः सूर्य्यस्य॥ ब्रह्मपुराणे।
"यः प्रयच्छति तृतीयायां कृष्णं चन्दनचर्च्चितम्।

वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ॥" स्कन्दपुराणम् ।
"वैशाखस्य सिते पक्षे तृतीयाद्वयसंज्ञिता । तत्र मां वेपयेद्गन्धलेपनैरतिशोभनैः ॥"* ॥ ब्रह्मपुराणम् ।
"वैशाखशुक्लपक्षे तु तृतीयायां जनार्दनः । ययातुतृपादयामास युगद्वारभवान् हृतम् ॥ ब्रह्मलोकाच्चिपथगां पृथिव्यामवतारयत् । तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् ॥ यवान् दद्यात् द्विजातिभ्यः प्रयतः प्राश्नयेद्-यवान् । पूजयेत् शङ्करं गङ्गा कैलासञ्च हिमालयम् ॥ भगीरथञ्च नृपतिं सागराणां सुखावहम् । जातं दानं तपः आद्धं जपहोमादिकञ्च यत् ॥ अक्षया क्रियते तच्च तदानन्त्याय कल्पते ॥ अत्रानन्त्यफलश्रुतेः पूर्ब्बवचने गत्वयोगः प्रजातिशयार्थः ।" इति तिथ्यादितत्त्वम् ॥ * ॥
भाद्रे श्रीवराहधरणीसंवादे ।
"त्रेतायुगं तृतीयायां शुक्लायां माधि माधवे । प्रवृत्तञ्च यतोधर्म्मः प्रवृत्ताश्चे प्रवर्त्तिताः ॥ अक्षया सोच्यते लोके तृतीया हरिवल्लभा । स्नाने दाने ऽर्चने आद्धे जपे पूर्ब्बवतर्पणे ॥ ये ऽर्चयन्ति यवैर्विष्णुं आद्धं कुर्ब्बन्ति यत्नतः । तस्यां ददति दानानि धन्यास्ते वैष्णवा नराः ॥"
इति श्रीहरिभक्तिविलासे १४ । १३४ ॥
तृतीयाव्रतं, क्ली, (तृतीयं कर्त्तव्यं व्रतम् । "तस्य पूरणे डट्" ५ । १ । ४८ । इति डट् ।) वारत्रयव्रतविशेषम् । इत्यमरः । २ । ८ । ४८ ॥ तिनबार बाच देओया चेत इति भाषा ॥
तृतीयाप्रकृतिः, स्त्री, (तृतीया प्रकृतिः । "संज्ञापूरण्याञ्च ।" ६ । ३ । ३८ । इति न पुंवद्भावः ।) नपुंसकम् । इत्यमरः । २ । ६ । ३६ ॥
तृद, हिंसे । (भ्वां-परं-सकं-सेट् ।) तर्दति । इति दुर्गादासः ॥
तृद्, उ न घ इर् । अनादरे । हिंसे । इति कविकल्पद्रुमः ॥ (रुधां-उभं-सकं-सेट् । उदित्वात् क्त्वेट् ।) उ, तर्दित्वा तृत्वा । न घ, तृन्त्ति तृन्ते । इर्, अतृदत् अतर्दीत् । इति दुर्गादासः ॥
तृनृप, ग्र प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) प्रीणनमिह प्रीतीभावः । ग्र, तृप्यति तृम्पति वा लाभाल्लोकः । तत्रम्य । इति दुर्गादासः ॥
तृनृह, ग्र प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) ग्र, तृंहति तृम्हति । तत्रम्ह । इति दुर्गादासः ॥
तृनृह, ऊ ग्र हिंसे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-वेट् ।) सन्नमस्करी । ऊ, अतृंहीत् अतृङ्क्षीत् । ग्र, तृंहति । इति दुर्गादासः ॥
तृप, किं सन्दीपने । प्रीणने । इति कविकल्पद्रुमः ॥ (पुरां-पञ्चे-भ्वां-परं-सकं-सेट् ।) किं, तर्पयति तर्पति । योऽग्निचयं तर्पयतीति हलायुधः । इति दुर्गादासः ॥
तृप, न प्रीणने । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) प्रीणनं प्रीतीकरणम् । न, तृप्नोति पितरं पुत्रः । ततर्प । इति दुर्गादासः ॥
तृप, प ग्र प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) प ग्र, तृम्पति ततर्प । इति दुर्गादासः ॥
तृप, णि ल य ऊ प्रीणने । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सकं च-वेट् ।) णि, तृप्तोऽस्मि । ल, अतृपत् । अस्य ह्रदित्वेऽपि क्षयन्तृप्यतृप्तेत्यादि-विशेषविधानात् पक्षे टाप्सिचेन अतार्षीत् अत्रार्षीत् अतर्पीदित्यपि । य, तृप्यति । ऊ, तर्पिष्यति तर्प्स्यति । प्रीणनमिह प्रीतीभावः प्रीतीकरणञ्च । स्वन्दीनि तृप्यतु मधूनि पिबत्विवायमिति श्रीहर्षः । पितृनतार्षीन्नृपरक्ततोयैरिति भट्टिः । इति दुर्गादासः ॥
तृपत्, पुं, (तृप्नोति प्रीणयतीति । तृप + "संज्ञायां भृतृवृदृहः ।" उणां २ । ८५ । इति अतिप्रत्ययेन निपातनात् साधुः ।) चन्द्रः । इत्युणादिकोषः ॥ हृत्वम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (प्रीणयति, त्रि । यथा, ऋग्वेदे । २ । २२ । १ । "तृपत्वोमपिबद्विष्टना सुतं यथावशृत ।" "तृप प्रीणने तुदादिः । आगमानुशासनस्यानित्यत्वान्नुमभावः तृप्यन् इन्द्रः ॥" इति सायणः ॥)
तृपला, स्त्री, (तृप्यतीति । तृप प्रीणने + "कलशतृपत्रप ।" उणां १ । १०६ । इति कलः । ततष्टाप् ।) लता । इत्युणादिकोषः ॥ त्रिफला । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (त्रिफलप्रहारिणि, त्रि । यथा, ऋग्वेदे । ६ । ६७ । ८ । "प्रहंसासस्तृपलं मन्युमच्छामादस्तं वृषणश्वा अयासुः ॥" "तृपलशब्दः त्रिफलवाची । तदुक्तं यास्केन । तृपलप्रभर्म्मा त्रिफलप्रहारीति । त्रिफलप्रहारिणं मन्युम् ।" इति सायणः ॥)
तृप्तः, त्रि, (तृप प्रीणने + क्तः ।) तृप्तियुक्तः । इत्यमरः । ३ । १ । १०३ ॥ (यथा, नैषधे । ३ । ६३ ।
"गृहान्तसम्भोगनितान्ततुष्टे न नैषधे कार्य्यमिदं निगद्यम् । अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः खदते तुषारा ॥")
तृप्तिः, स्त्री, (तृप प्रीणने + भावे क्तिन् ।) भक्षणादिनाकाङ्क्षानिवृत्तिः । तत्पर्य्यायः । सौहित्यम् २ तर्पणम् ३ । इत्यमरः । २ । ६ । ५६ ॥ प्रीणनम् ४ आसितम्भवम् ५ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । १ । २० ।
"शतान्यन्यानि सर्व्वाग्र ! तच्छतान्नि शतानि च । नैव तृप्तिं व्रजामोऽद्य सुधापानेऽमरा यथा ॥")
तृप्रः, पुं, (तृप्यत्यनेनेति । तृप + "स्फायितञ्चीति ।" उणां २ । १३ । इति रक् ।) हृतम् । इत्युणादिकोषः ॥ पुरोडाग्रः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (तर्पके, त्रि । यथा, ऋग्वेदे । ८ । २ । ५ ।
"न यं शुक्रो न दुराधीर्न तृप्रा उरुशंसम् । अपसूखते सुहार्दम् ॥" "तृप्राः तर्पका अन्ये चरुपुरोडाशादयश्च यस्मिन्नं नापसूखते न न प्रीणयन्ति अपि तु प्रीणयन्त्येव तस्मिन्नं स्तुमः इति शेषः ।" इति तद्भाष्ये सायणः ॥)
तृप, प ग्र प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) प ग्र, तृम्फति ततर्फ । इति दुर्गादासः ॥
तृफला, स्त्री, (तृम्फति प्रीणातीति । तृफ + "कलशतृपत्रप ।" उणां १ । १०६ । इति चकारात् तृपतेरपि कलः ।) त्रिफला । इति त्रिकाण्डशेषः ॥
तृफूः, पुं, (तृफति प्रीड्यतीति । तृफ क्रीडे + "खर्ज्जादिभ्य ऊः ।" १ । ४६६ । इत्युणादिकोषटीकाधृतसूत्रेण ऊः । निपातनात् न गुणः ।) सर्पजातिः । इत्युणादिकोषः ॥
तृम, इर् य तृम्णि वि । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् ।) इर्, अतृमत् अतर्मीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । य, तृम्यति । णि, तृमितोऽस्मि । तृट् आकाङ्क्षा । तथा च । इच्छाकाङ्क्षा बुभुक्षा तृट् वाञ्छा लिप्सा मनोरथः । इत्यमरसिंहः । तदुपस्थितमयूखादिदनः पितुराशेति न भोगतृष्णयेति रघुः । तृष्यति धनं लोकः । तृषि पिपासायामिति प्राचः । तृष्यति तोयं गाव्यः । इति रमानाथः । इति दुर्गादासः ॥
तृषा, स्त्री, (तृष + क्विप् पक्षे टाप् ।) तृष्णा । (अस्याः निवारणोपायो यथा,—
"काश्मर्य्यं पद्मकोशीरं द्राक्षामधुकचन्दनम् । बालकं शर्करायुक्तं कार्यं पित्ततृषापहम् ॥
वटद्रुमो रोध्रसिता च चन्दनं सदाड्रिमं तण्डुलधावनेन च । पिष्टं सुशीतेन जलेन वापि पीतञ्च पित्तोत्थतृषापहञ्च ॥"
इति हारीते चिकित्सितस्थाने चतुर्दशेऽध्याये ॥ शुक्लोद्भवायास्तृषाया हेतुर्यथा,—
"स्निग्धं तथाम्लं लवणञ्च भुक्तं गुर्व्वन्नमेवाशु तृषां करोति ॥"
इति वैद्यकमाधवकरहतरुग्विनिश्चये तृष्णाधिकारे ॥) इच्छा । (यथा, हितोपदेशे । १ । २६६ ।
"लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् । तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः ॥") कामकन्या । इति शब्दरत्नावली । बाह्लिकीदृश्यः । इति शब्दचन्द्रिका ॥
तृषाभूः, स्त्री, (तृषाया भूरुत्पत्तिस्थानम् ।) क्लोम । इति शब्दचन्द्रिका ॥
तृषाहं, क्ली, (तृषां हन्तीति । हन + डः ।) जलम् । इति शब्दचन्द्रिका ॥
तृषाहा, स्त्री, (तृषां हन्तीति । हन + डः + टाप् ।) मधुरिका । इति शब्दचन्द्रिका ॥
तृषितः, त्रि, (तृट् तृषा वा सञ्जातास्य । तारकादित्वात् इतच् ।) तृष्णायुक्तः । तत्पर्य्यायः ।

तर्पितः २ षष्ठट् ३। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। २। ८। २०।
"तृषितश्च परिश्रान्तः क्षुधितश्चोत्तरासुतः॥"
भावे क्तः।) तृषायाम्, स्त्री॥
तृषितोत्तरा, स्त्री, (तृषितः उत्तरो यस्याः।) अग्नपर्णी। इति शब्दचन्द्रिका॥
तृष्णक्, [ष्ण्] त्रि, (तृष्यति आकाङ्क्षतीति। तृष् + "सर्पितृषिगोनेजिह्।" ३। २। १७२। इति नजिह्। यद्वा तृष्णः। इत्यमरः। ३। १। ९२॥ (तृषितः। यथा, ऋग्वेदे। १। ५। ११।
"अविष्टनुत्वं गोतमाय तृष्णजे॥")
तृष्णा, स्त्री. (तृष + "तृषिमृषिकृशेः काश्यपेः।" उणा ३। १२। इति नः स च कित्।) अनात्मीयस्त्रीकारेच्छा। इति चण्डीटीकायां नागोजीभट्टः॥ सा त्रिधा। (यथा, रघुः। ८। ९।
"तदुपस्थितमग्र्यदीदृशः
पितुराज्ञेति न भोगतृष्णया॥")
पानेच्छा। इति मेदिनी। णे, १६॥ तत्पर्य्यायः। उदन्या २ पिपासा ३ षट् ४ तर्षः ५ इत्यमरः। ३। ३। ५१॥ तृषा ६। इति शब्दरत्नावली॥ तर्षणम् ७। इति जटाधरः॥*॥
रोगविशेषः। तन्निदानं यथा,—
"वातात् पित्तात् कफात् तृष्णा सन्निपातात् क्षयात्।
षष्ठी स्वादुपसर्गाच्च वातपित्ते तु कारणम्॥
सर्व्वासु तत्र प्रकोपो हि स्नैग्ध्यधातुप्रशोषणात्।
सर्व्वदेहे भ्रमात् कम्पतापदाहमोहकृत्॥
जिह्वाकण्ठगलस्रोतस्तालुतोयवहाः शिराः।
संशोष्य तृष्णा जायन्ते तासां सामान्यलक्षणम्॥*॥
सुखशोषो जलाटन्निरन्नद्वेषः स्वरक्षयः।
कण्ठोऽतिजिह्वाकार्कश्यं जिह्वानिष्क्रमणं क्लमः॥
प्रलापश्चित्तविभ्रंशो दृष्टिरुद्विग्नतारया।
मरुतः श्यामता दैन्यं शूकतोदः शिरोभ्रमः॥
गन्धाज्ञानास्यवैरस्यश्रुतिनिद्रावलक्षयाः।
शीताम्बुफेनदृष्टिश्च पित्ताच्मूर्च्छास्यतिक्तता॥
रक्तक्षयश्च सततं शोषो दाहोऽतिधूमकः।
कफं रुणद्धि कुपितस्तोयवाहिषु मारुतः॥
स्रोतःसु स कफस्तेन पङ्कवत्क्षोभ्यते ततः।
मूकैरिवाचितः कण्ठो निद्रामधुरवक्त्रता॥
आलस्यः शिरसो जाड्यं स्तैमित्यच्छर्द्यरोचकाः।
आलस्यमविपाकश्च यः स स्यात् सर्व्वलक्षणः॥
आमोद्भवा च भक्तस्य संरोधाद्ग्रातपित्तजा।
उद्ग्रक्रान्तस्य सहसा शीताम्भो भजतस्तृषा॥
तृष्णा बोद्धुं गतं कोष्ठं कुर्व्वात् पित्तरुजैव सा।
या च पानातिपानोत्था तीव्रस्वाद्यैः कोष्ठपाकजा॥
स्निग्धकट्वम्लवह्न्यौजनेन कफोद्भवा।
क्षयात्रक्षयोत्थेन लक्षणेन क्षयात्मिका॥
शोषमोहज्वरादूयस्य दीर्घरोगोपसर्गतः।
या तृष्णा जायते तीव्रा सोपसर्गात्मिका स्मृता॥"
इति गारुडे तृष्णानिदानम् १५६ अध्यायः॥*॥

तदौषधं यथा,—
"त्रिफलापिप्पलीचूर्णं भक्षितं मधुना युतम्।
भोजनादौ हि समधु पिपासां त्वरितं हरेत्॥"
इति तत्रैव १६४ अध्याये॥*॥
अपि च। "अथ तृष्णाधिकारः। तत्र तृष्णाया निदानपूर्ब्बिकां सम्प्राप्तिमाह।
भयश्रमाभ्यां बलसङ्क्षयाद्वा
ऊर्द्धं क्षितं पित्तविवर्द्धनैश्च।
पित्तं सवातं कुपितं नराणां
तालुप्रपन्नं जनयेत् पिपासाम्॥
स्रोतःस्वपां वाहिषु दूषितेषु
दोषैश्च तट् सम्भवतीह जन्तोः।
तिस्रः स्मृतास्ताः क्षतजा चतुर्थी
क्षयात्तथान्यामयसङ्गवा च॥
मुक्तोद्भवा सन्निकेति तासां
निबोध लिङ्गान्यनुपूर्ब्बशस्तु॥
नराणां क्षितं स्वस्थान एव सञ्चितं पित्तं सवातं पित्तविवर्द्धनैः कट्वम्लोष्णादिभिः कुपितम्। भयश्रमाभ्यां बलसङ्क्षयादुपवासादेश्च वातः कुपितः। तद्यं ऊर्द्धं प्रसरन् तालुप्रपन्नं सत् पिपासां जनयेत्। न केवलं तालुन्येव दूषिते तृषा भवति। किन्तु जलवाहिस्रोतःस्वपि। अत आह। स्रोतःस्वित्यादि। गन्धत्र बहुवचनं युक्तम्। यतो जलवहे द्वे स्रोतसी सुश्रुतेनोक्ते। उच्यते। तयोरेवानेकप्रतानयोगान्न दोषः। अपां वाहिषु स्रोतःस्विति जिह्वादेरप्युपलक्षणम्। यत आह चरकः। रसवाहिनीश्च धमनीर्जिह्वा हृदयमेवताल्वोष्ठौ च। संशोष्य नृणां देहे कुरुतस्तृष्णामतिबलां पित्तानिलाविति॥ सङ्ग्रामाह। तिस्र इत्यादि॥
तृष्णायाः सामान्यं लक्षणमाह।
सततं यः पिबेत्तोयं न तृप्तिमधिगच्छति।
तृड्डुः काङ्क्षति तोयन्तु तं तृष्णार्दितमादिशेत्॥
वातजाया लक्षणमाह।
श्यामास्यता मारुतसम्भवायां
तोदस्तथा शूकशिरःसु चापि।
स्रोतोनिरोधो विरसत्वं वक्त्रं
शीताभिरद्भिश्च विवृद्धमेति॥
शूकशिरःसु शूकयोः शिरसि च। स्रोतोनिरोधो रसाम्बुवाहिधमनीनिरोधः॥*॥ पित्तजामाह।
मूर्च्छाभ्रमविदाहविलापदाहा
रक्तक्षयत्वं प्रततञ्च शोषः।
शीताभिनन्दा सुखतिक्तता च
पित्तात्मिकायां परिधूपनञ्च॥
विलापः प्रलापः। प्रततञ्च शोषः अविरतञ्च शोषः। शीताभिनन्दा शीतेच्छा। परिधूपनं कण्ठाद्धूमनिर्गम इव॥
कफजामाह।
वास्यावरोधात् कफसंवृतेऽग्नौ
तृष्णा बलासेन भवेन्नरस्य।
निद्रागुरुत्वं मधुरास्यता च
तयार्दितः शुष्यति चातिमात्रम्॥
अग्नौ जठराग्नौ। कफसंवृते स्वकारणकुपितेन कफेनोपरिरुद्धादाच्छादिते। वास्यावरोधात् अग्नेरास्यावरोधात्। अवरुद्धानलोष्मणाम्बुवहस्रोतःशोषणात् बलासेन कफेन नरस्य तृष्णा भवेत्। तया तृष्णया अर्द्दितः पीड़ितः। शुष्यति शुष्को भवति॥*॥
क्षतजामाह।
क्षतस्य रक्तशोणितनिर्गमाभ्यां
तृष्णा चतुर्थी क्षतजा मता तु।
क्षतस्य शूलादिक्षतयुक्तस्य। रुक् पीड़ा॥*॥
क्षयजामाह।
रसक्षयाद्या क्षयसम्भवा सा
तयाभिभूतस्तु निशादिनेषु।
पेपीयतेऽम्भः स सुखं न याति
तां सन्निपातादिति केचिदाहुः॥
रसक्षयोक्तानि च लक्षणानि
तस्यामशेषेण भिषग्विदित्वा।
रसक्षयलक्षणानि सुश्रुतेनोक्तानि॥ रसक्षये क्षुत्पीड़ा कम्पः शोषः शून्यता तृष्णा चेति। अवस्थेत् जानीयात्॥*॥
आमजामाह।
क्लिद्योत्क्लिष्टामसमुद्भवा च
कृच्छ्रोल्लसिष्टीवनवादकर्त्री॥*॥
मुक्तोद्भवामाह।
स्निग्धं तथाम्लं लवणञ्च भुक्तं
गुर्व्वन्नमेवासु तृषां करोति।
लवणञ्चेति चकारात् कटु च॥*॥
उपसर्गजामाह।
शीतज्वरः प्रतान्यन् दीनाननहृदयशुष्कगलतालुः।
भवति खलु सोपसर्गात् तृष्णा सा शोषिणी कष्टा॥
शोषिणी धातुशोषिणी॥*॥
उपसर्गानाह।
ज्वरो मोहः क्षयः श्वासो वाधिर्य्यं कास एव च।
बहिर्निर्गतजिह्वात्वं सप्तैते तदुपद्रवाः॥*॥
तदुपद्रवा अरिष्टत्वेनाह।
ज्वरमोहक्षयकासश्वासाद्युपद्रुतदेहानाम्।
सर्व्वास्वतिप्रसक्ता रोगलक्षणानां वमिप्रसक्तानाम्॥
घोरोपद्रवयुक्तास्तृष्णा मरणाय विज्ञेयाः।
आदिशब्दात्तीसारादीनां ग्रहणम्। अतिप्रसक्ताः निरन्तराः। घोरोपद्रवयुक्ताः अतीवसुखशोषादियुताः॥*॥
अथ तृष्णायाश्चिकित्सा।
वातघ्नमन्नपानं स्वदु लघु शीतञ्च वाततृष्णायाम्।
तृष्णायां पवनोत्थायां सगुड़ं दधि शस्यते।
स्वादु तिक्तं द्रवं शीतं पित्ततृष्णापहं परम्॥*॥
मुक्तपर्ण्यटकोशीरचक्राह्वोशीरचन्दनैः।
शृतं शीतं जलं दद्यात् तृड्दाहज्वरशान्तये॥
क्वथ्य धान्याकम्। कश्चिद्वाचीरञ्च दद्यात्।
चन्दनञ्च धवलं दद्यात्तस्यातितृष्णाहरत्वात्।
घृतमङ्गपक्वमन्नं कर्त्तव्यम्। इति षड़ङ्गपानम्॥१॥
लाजोदकं मधुयुतं शीतं गुड़विमर्दितम्।
काश्मरीशर्करायुक्तं पिबेत् तृष्णार्दितो नरः॥२॥

वाससरणमार्द्रवासः प्रावरणं चार्द्रमेव स्यात् ।
तेन पिपासा शाम्यति दाहश्चोग्रोऽपि देहिनां
नियतम् ॥ ३ ॥
गोस्तनीक्षुरसक्षीरयष्टीमधुमधूत्पलैः ।
नियतं नासिकापीतैस्तृष्णा शाम्यति दारुणा ॥४॥
वेषत्रं जनयत्यास्ये सन्दधाति सुखे जलम् ।
तृष्णादाहप्रशमनं मधुशस्यधारणम् ॥ ५ ॥
जिह्वातालुगलक्लोमशोषे मूर्द्धनि दापयेत् ।
केशरं मातुलुङ्गस्य घृतसैन्धवसंयुतम् ॥ ६ ॥
दाडिमं बदरं लोध्रं कपित्थं बीजपूरकम् ।
पिष्ट्वा मूर्द्धनि लेपस्तु पिपासादाहनाशनः ॥७॥
वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम् ।
पाययेद्वामयेद्वापि तेन तृष्णा प्रशाम्यति ॥ ८ ॥
प्रातः सशर्करः पेयो हिमो धान्याकसम्भवः ।
जयेत् तृष्णां तथा दाहं भवेत् स्रोतोविशोधनम् ॥ ९ ॥
आमलं कमलं कुष्ठं लाजाश्च वटरोहकम् ।
एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे ॥
तृष्णां प्रबलां हन्त्येषा सुखशीघ्रं च दारुणम् ॥१०॥
घृतोद्भवां रविनिवारणेन
जयेत् घृतानामसहत्वतश्च पीतैः ।११।
पयोत्थितां क्षीरजलं निहन्या-
न्नारिकेलोदकं वा मधूदकं वा ॥ १२ ॥
आमोद्भवां विल्ववचायुतानां
जयेत् कषायैरथ दीपनानाम् ।१३।
गुर्वन्नजासुक्षिखनैर्न्नवेच
क्षयं विना सर्वकृताच्च तृष्णाम् ॥
उक्षिखनैः लेखनद्रव्यैः ॥ १४ ॥
स्निग्धोष्णे भुक्तवतो वा तृष्णा स्यात्तां गुडाम्बुना
शमयेत् ।
अतिरोगदुर्बलानां तृष्णां शमयेन्नृणामिहाशु
पयः ॥
पयोऽत्र दुग्धम् ॥ १५ ॥
मृच्छर्कराहिमयवादाहक्षीमद्यभृङ्गकधिताः ।
पिबेयुः शीतलं तोयं रक्तपित्ते मदात्यये ॥ १६ ॥
सात्म्यान्नपानभैषज्यैस्तृष्णां तस्य जयेत् पुनः ।
तस्यां जितायामप्यस्थाधिः शुष्कचिकित्-
सितुम् ॥ १७ ॥ * ॥
तृष्यन् पूर्व्वाभ्यस्तोषो न लभेत जलं यदि ।
मरणं दीर्घरोगं वा प्राप्नुयात् त्वरितं नरः ॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
तस्मात् सर्व्वास्ववस्थासु न कथञ्चिद्वारि वारयेत् ॥
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम् ।
तोयाभावात् पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते ॥
इति तृष्णाधिकारः ॥" इति भावप्रकाशः ॥
(अथास्याः पथ्यापथ्यनियमः ॥ पथ्यानि यथा,—
"शोधनं शमनं निद्रा स्नानं कवलधारणम् ।
जिह्वाधःशिरसोद्दोहो दीपदग्धहरिद्रया ॥
कोद्रवाः शालयः पेया विलेपी लाजशक्तवः ।
मुद्गमण्डो धन्वरसाः शर्करा वागवाढ्यौ ॥
मृद्वीमुद्गैर्मसूरैर्व्वा चणकैर्वा कृतो रसः ।
रम्भापृष्ठं तैलकूष्माण्डपटोलवाः ॥
कपित्थं कोलमम्लीका कुष्माण्डकसुपोदिका ।
खर्ज्जूरं दाडिमं धात्री कर्कटी नलदाम्बु च ॥
जम्बीरं करमर्द्दश्च बीजपूरं गवां पयः ।
मधूकपुष्पं क्षीवेरं तिक्तानि मधुराणि च ॥
बालतालाम्बु शीतानि पयः पेटीप्रपानकम् ।
माक्षिकं सरसां तोयं घृताक्तो नागकेशरम् ॥
एलाजातीफलं पथ्या कुसुम्बुरु च टङ्कणम् ।
वनसारो गन्धसारः कौसुदी ग्रिथिरानिलः ॥
चन्दनार्द्रप्रियाङ्गवो रक्ताभरणधारणम् ।
हिमानुलेपनञ्च स्यात् पथ्यमेतत्तृषातुरे ॥"
अपथ्यानि यथा,—
"स्नेहाञ्जनस्वेदनधूमपान-
व्यायामनस्यातपदन्तकाष्ठम् ।
गुर्व्वन्नमम्लं लवणं कषायं
कटु स्त्रियं दुष्टजलानि तीक्ष्णम् ॥
एतानि सर्व्वाणि हिताभिलाषी
तृष्णातुरो नैव भजेत् कदाचित् ॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे तृष्णाधिकारे ॥)
तृष्णाक्षयः, पुं. (तृष्णाया विषयलिप्साया: क्षयो नाशो यत्र ।) शान्तिः । इति हेमचन्द्रः । २ । २१८ ॥ (यथा, ग्रन्थारम्भे चण्डीमाहात्म्यवचनम् ।
"यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम् ।
तृष्णाक्षयसुखस्यैते कलां नार्हन्ति षोडशीम् ॥"
तृष्णायाः पिपासायाः क्षयः । पिपासानाशश्च ॥
तृष्णारिः, पुं, (तृष्णायाः पिपासायाः अरिः शत्रुः ।) पर्पटः । इति राजनिर्घण्टः ॥
तृह, घ ऊ ग्र हिंसे । इति कविकल्पद्रुमः ॥ (वर्त्तां-तृदां च-परं-सकं-वेट् ।) षष्ठसखरी । घ, तर्हेढि । (यथा, भट्टिः ।
"तर्हेटु रामः सह लक्ष्मणेन ॥")
ऊ, अतर्हीत् अतर्हत् । ग्र, तर्हति । इति दुर्गादासः ॥
तृ, तरे । अभिभवे । भ्वादाम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-श्रुतौ अकं-सेट् ।) तरः । प्लवनपूर्व्वकदेशान्तरगमनम् । श्रुतिमैञ्जनाभावः । तरति नदीं भेलया पान्थः । तरति सकलदुःखं वामनं भावयेद्दृयः । तरति शुष्ककाष्ठं जले मज्जति नेत्यर्थः ॥ इति दुर्गादासः ॥
ते, ष, त्रया । इति त्रिकाण्डशेषः ॥ (गौरी । यथा, सङ्गीतदामोदरः ।
"तेजश्शब्देनोच्यते गौरी गशब्देनोच्यते हरः ।
तेन माङ्गलिकार्थं गशब्दस्तेन इति स्मृतः ॥")
तेजः, [स्] क्ली, (तेजयति तेज्यतेऽनेन वा । तिज निशाने + "सर्व्वधातुभ्योऽसुन्" उणा । ४ । १८८ । इति असुन् ।) दीप्तिः । (यथा, माघे । २ । ६२ ।
"अन्यदुच्चैरुलं सत्त्वमन्यच्छास्त्रनियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥")
प्रभावः । (यथा, महाभारते । ६ । १४ । ४८ ।
"तस्मान्नूनं महावीर्य्याद्भार्गवाद्युद्धदुर्म्मदात् ।
तेजोवीर्य्यबलैर्भूयान् शिखण्डी द्रुपदात्मजः ॥")
पराक्रमः । (यथा, महाभारते । ३ । २८ । ६ ।
"न श्रेयः सततं तेजो न नित्यं श्रेयसी क्षमा ।
इति तात ! विजानीहि ह्यथमेतदसंशयम् ॥")
रेतः । इति मेदिनी । से, २५ ॥ (यथा, रघुः ।
"अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ॥"
"तत्र स्त्रीपुंसयोः संयोगे तेजः शरीराद्धातुरुदीरयति । ततस्त्रेजोऽनिलसन्निपाताच्छुक्रं च्युतं योनिमभिप्रतिपद्यते संहन्यते चार्त्तवेन ।"
"तत्र तेजोधातुः सर्व्ववर्णानां प्रभवः स यदा गर्भोत्पत्तावबधातुप्रायो भवति तदा गर्भं गौरं करोति पृथिवीधातुप्रायः कृष्णं पृथिव्याकाशधातुप्रायः कृष्णश्यामं तोयाकाशधातुप्रायो गौरश्यामम् ॥" इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ॥ सारः । यथा, सुश्रुते ।१।१५।
"रसादीनां शुक्रान्तानां धातूनां यत् परं तेजस्तत् खल्वोजस्तदेव बलमित्युच्यते खशास्त्रसिद्धान्तात् ॥"
"यत् परं तेजः इति यदुक्तं सारः ।"
इति तट्टीका ॥
शारीराग्निसम्भूतपदार्थविशेषः । तद्यथा,—
"तेजोऽग्न्याग्नेयं क्रमशः पच्यमानानां धातूनामभिनिर्वृत्तमन्तरस्थं स्नेहजातं वसास्थं स्त्रीणां विशेषतो भवति तेन मार्द्दवसौकुमार्य्यश्लक्ष्णरोमतोत्साहदृष्टिस्थितिपक्तिकान्तिदीप्तयो भवन्ति तत् कषायतिक्तशीतरूक्षविष्टम्भिवेगविघातव्यवायव्यायामव्याधिकर्म्मक्षयेण विक्रियते ॥"
इति च सुश्रुते सूत्रस्थाने पञ्चदशेऽध्याये ॥)
त्विट् । (देहजकान्तिः । यथा, वाजसनेयसंहितायाम् । १ । ३१ ।
"तेजोऽसि शुक्रमस्यमृतमसि ।
धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥"
"हे आप्य ! त्वं तेजोऽसि शरीरकान्तिहेतुत्वात्तेजस्कम् ।" इति महीधरः ॥) नवनीतम् । अग्निः । इति हेमचन्द्रः । २ । १५ ॥ सुवर्णम् । मज्जा । पित्तम् । इति राजनिर्घण्टः ॥ असृक्कम् । यथा, साहित्यदर्पणे । ३ । ६४ ।
"अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् ।
प्राबल्यमेत्यसहनं तत्तेजः समुदाहृतम् ॥"
पञ्चमहाभूतान्तर्गतृतीयमहाभूतम् । यथा,—
"तृतीयं ज्योतिरित्याहुश्चतुरध्यात्मसुच्यते ।
अधिभूतं ततो रूपं सूर्य्यश्चाधिदैवतम् ॥"
इत्याग्नेयमैधिकपर्व्व ॥
अस्य धर्म्माः । रूपम् १ द्रवत्वम् २ प्रत्ययोगित्वम् ३ ॥ अस्य गुणाः । सङ्ख्या १ संख्या २ परिमाणम् ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ रूपम् ९ द्रवः १० वेगः ११ । अस्य नैमित्तिकद्रवत्वम् । अस्य सङ्घः उष्णः । रूपं शुक्लभास्वरम् । इदं द्विधा । परमाणुस्वरूपं नित्यम् । सावयवमनित्यम् । अनित्यं त्रिधा देहः इन्द्रियं विषयः । इति

भाषापरिच्छेदः ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ४३ ।
"ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः ॥"
शिवः । यथा, तत्रैव । १३ । १७ । ५२ ।
"तेजोऽपहारी बलहा सुदितोऽर्थोऽजितोऽवरः ॥"
द्विसप्ततिसाध्यमौलिककायस्थानामन्यतमः । तच्च अकारान्तोऽयम् । यथा, कुलदीपिकायाम् ।
"खामः चोमो घर वैद्योषो
वोदस्तेजचार्थव आग्नः ॥")
तेजःफलः, पुं, (तेजसे बलाय तेजःप्रदं वा फलमस्य ।) वृक्षविशेषः । तेजफल इति भाषा । तत्पर्य्यायः । बहुफलः २ आम्रलोफलः ३ स्तवकफलः ४ स्तेयफलः ५ गन्धफलः ६ कण्टवृक्षः ७ । अस्य गुणाः । कटुत्वम् । तीक्ष्णत्वम् । सुगन्धित्वम् । दीपनत्वम् । वातश्लेष्मारुचिनाशित्वम् । वातरक्ताकरत्वञ्च । इति राजनिर्घण्टः ॥
तेजनः, पुं, (तेजयति अग्निमिति । तिज + ल्युः ।) वंशः । इत्यमरः । २ । ४ । १६१ ॥ सुञ्जः । भद्रसुञ्जः । इति राजनिर्घण्टः ॥ (वाग्यादीनां फलके । यथा, मनुः । ७ । ६० ।
"न कार्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥"
उद्दीपने, क्ली । यथा, सुश्रुते चिकित्सास्थाने । २४ अध्याये ।
"शिरासुखविविक्तत्वं त्वक्स्थस्थाग्नेश्च तेजनम् ॥")
तेजनकः, पुं, (तेजयतीति । तिज + णिच् + ल्युः संज्ञायां कन् । यद्वा, तेजनेन फलकेन कायतीति । के + कः ।) शरः । इत्यमरः । २ । ४ । १६२ ॥
तेजनी, स्त्री, (तेजयतीति । तिज + णिच् + ल्युः । गौरादित्वात् ङीष् ।) मूर्व्वा । इत्यमरः । २ । ४ । ८३ ॥ (अस्याः पर्य्याया यथा,—
"तेजनी पिप्पली देवा तिक्तवल्ली पृथक्त्वचा ।
धनुः श्रेष्ठी मधुरसा मूर्व्वा निर्द्दहनीति च ॥"
इति वैद्यकरत्नमालायाम् ।
पर्य्यायान्तरं यथा,—
"मूर्व्वा मधुरसा देवी मोरटा तेजनी सुवा ।
मधूलिका मधुश्रेष्ठी गोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥)
ज्योतिष्मती । इति शब्दरत्नावली ॥ (तेजवती । अस्या पर्य्यायाः यथा,—
"तेजस्विनी तेजवती तेजोढ्या तेजनी तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तेजपत्रं, क्ली, (तेजयतीति । तिज + णिच् + अच् । तेजं पत्रमस्य ।) खगामख्यातवृक्षः । तज इति तेजपात इति च भाषा । तत्पर्य्यायः । गन्धजातम् २ पत्रम् ३ पत्रकम् ४ । इति शब्दरत्नावली । अस्य गुणाः । कफवायुशूलकृमिनाशित्वम् । इति राजवल्लभः ॥ अमरोक्तपर्य्यायास्तूक्तपत्रशब्दे द्रष्टव्याः ॥ तस्य नामगुणाः ।
"त्वक्पत्रञ्च वराङ्गं स्यादुष्णं चौद्यं तथोत्कटम् ।
त्वचं लघूष्णं कटुकं स्वादु तिक्तञ्च रूक्षकम् ।
पित्तलं कफवातघ्नं कण्ठामयविनाशनम् ।
कृमिश्लिरोगवातार्शःश्लेष्मपीनसशुक्रकृत् ॥"
इति भावप्रकाशः ॥
तेजलः, पुं, (तेजति अतिशयेन पालयति श्रावकानिति । तेज पालने + बाहुलकात् कलच् ।) कपिञ्जलपक्षी । इति राजनिर्घण्टः ॥
तेजस्करं, त्रि, (तेजः करोतीति । तेजस् + कृ + टः ।) तेजोवर्द्धिकारकद्रव्यम् । इति वैद्यकम् ॥
तेजस्विनी, स्त्री, (तेजो विद्यतेऽस्याः । तेजस् + विनिः स्त्रियां ङीप् ।) ज्योतिष्मती । इति शब्दरत्नावली ॥ महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (तेजवल्कल इति च । तत्पर्य्याया यथा,—
"तेजस्विनी तेजवती तेजोढ्या तेजनी तथा ॥"
अस्या गुणा यथा,—
"तेजस्विनी कफश्वासकासास्रामयवातहृत् ।
पाचन्युष्णा कटुक्षिप्ता रुचिवह्निप्रदीपनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तेजस्वी, [न्] त्रि, (तेजोऽस्यस्येति । विनिः ।) तेजोयुक्तः । यथा,—
"महातपस्वी तेजस्वी ब्रह्मचारी च सुव्रती ।
युग्मद्विधोक्तं श्राद्धञ्च प्रतिलान्यच्च पण्डितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
(इन्द्रस्य पुत्रविशेषः । यथा, महाभारते । १ । १६८ । २६ ।
"भ्रान्तिश्चतुर्थस्त्वेवं वै तेजस्वी पञ्चमः स्मृतः ॥")
तेजितः, त्रि, (तिज + क्तः ।) तीक्ष्णीकृतः । शाण इति भाषा । तत्पर्य्यायः । निशितः २ क्षुतः ३ शाणितः ४ । इत्यमरः । ३ । १ । ८१ ॥ शान्तः ५ शाणादिभिर्ज्ञातः ६ । इति शब्दरत्नावली ॥ क्षुतः ७ निशातः ८ शितः ९ शातः १० । इति जटाधरः ॥
तेजीयान्, [स्] त्रि, (तेजो विद्यतेऽस्य । तेजस् + ईयसुन् ।) तेजोयुक्तः । यथा,—
"अज्ञानी पुरुषः शून्यश्चण्डित्वञ्च स्वकर्म्मजा ।
तेजीयसां न दोषाय वह्नेः सर्व्वभुजो यथा ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
तेजोमन्थः, पुं, (तेजो मथ्नातीति । मन्थ + कर्म्मण्यण् ।) गणिकारिका । इति रत्नमाला ॥
तेजोरूपं, क्ली, (तेजः सर्व्वप्रकाशकं चैतन्यं रूपं यस्य ।) ब्रह्म । यथा,—
"अशरीरं विश्वहृदिन्द्रियवर्त्तीन्द्रियम् ।
यदसाक्षि सर्व्वसाक्षि तेजोरूपं नमाम्यहम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
तैजोवती, स्त्री, (तेजोऽस्यस्या इति । तेजस् + मतुप् मस्य वः ।) गजपिप्पली । इति शब्दरत्नावली ॥ चविका । इति रत्नमाला ॥ महाज्योतिष्मती । इति राजनिर्घण्टः ॥ तेजल इति तेजवल्कल इति च भाषा । तस्याः पर्य्यायगुणाः ।
"तेजस्विनी तेजवती तेजोढ्या तेजनी तथा ।
तेजस्विनी कफश्वासकासास्रामयवातहृत् ॥
पाचन्युष्णा कटुक्षिप्ता रुचिवह्निप्रदीपनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
(अग्नेर्विमानम् । यथा, ब्रह्माण्डे ३८ अध्याये ।
"महाविमानं ग्रथितं भास्करं जातवेदसः ।
सा हि तैजोवती नाम हुताशस्य महासभा ॥")
तैजोदृष्टः, पुं, (तेजोयुक्तो दृष्टः । अमुतृपादकत्वादस्य तथात्वम् ।) खद्योतः । इति राजनिर्घण्टः ॥
तैन, य, तद्धेतुना । इत्यमरटीकायां भरतः ॥ सेद निमित्ते इति भाषा ॥
तैनः, पुं, (ते गौरी न शिवो यत्र ।) गानाङ्गविशेषः । यथा, सङ्गीतदामोदरे ।
"तेनेति शब्देन स्यात् मङ्गलानां प्रदर्शकः ।
ते शब्देनोच्यते गौरी नशब्देनोच्यते हरः ॥
तेन माङ्गलिकार्थायं शब्देन इति स्मृतः ॥"
तैप, ऋ उ कम्पे । क्षुतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ऋ, अतितैपत् । उ, तैपते दृष्टः । तितैपे । इति दुर्गादासः ॥
तैमः, पुं, (तिम आर्द्रीभावे + भावे घञ् ।) आर्द्रीभावः । इत्यमरः । ३ । २ । २६ ॥
तैमनं, क्ली, (तिम + भावे ल्युट् ।) आर्द्रीकरणम् । व्यञ्जनम् । इति मेदिनी । ने, ७२ ॥
तैमनी, स्त्री, (तिम्यतेऽनेनेति । तिम + ल्युट् + ङीप् ।) पुत्रीभेदः । इति हेमचन्द्रः ॥
तैव, ऋ उ देवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) देवनमिह क्रीडा । ऋ, अतितैवत् । उ, तैवते । तैवते बालः कन्दुकेनित्यमिति हलायुधः । देवनमिह रोदनमिति भट्टमल्लः । इति दुर्गादासः ॥
तैवनं, क्ली, (तैवते दीव्यतेऽक्षिभिरिति । तैव क्रीडायाम् + अधिकरणे ल्युट् ।) केलिकाननम् । (भावे ल्युट् ।) क्रीडा । इति मेदिनी । ने, ७१ ॥ (यथा,शब्दार्थचिन्तामणिधृतरामायणवचनम् ।
"तैवनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ॥")
तैक्ष्ण्यं, क्ली, (तीक्ष्णस्य भावः । तीक्ष्ण + ष्यञ् ।) तीक्ष्णता । इति व्याकरणम् ॥ (यथा, सुश्रुते । १ । ५ ।
"ग्रीष्ममाशुक्रियाग्राह्यतैक्ष्ण्यमस्वेदवेपथू ॥"
कठोरता । यथा, रामायणे । २ । २१ । ४४ ।
"तदेतां विद्धि जानक्यां चण्डधर्म्मात्रितां मतिम् ।
धर्म्ममाश्रय मा तैक्ष्ण्यं मद्वृद्धिरनुगम्यताम् ॥"
क्रूरता । यथा, मनुः । ४ । १६३ ।
"हर्षं दर्पञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्जयेत् ॥"
"मातृवर्य्यं धर्म्मानुत्सादामिमानकोपक्रौर्य्याण्यिच्छेत् ।" इति तट्टीकायां कुल्लूकभट्टः ॥)
तैजसं, क्ली, (तेजसो विकारः । तेजस् + "तस्य विकारः ।" ४ । ३ । १३४ । इत्यण् ।) घृतम् । इति स्मृतिः ॥ धातुद्रव्यम् । इत्यमरः । २ । ६ । ६६ ॥ (यथा, मनुः । ५ । १११ ।
"तैजसानां मणीनाञ्च सर्व्वस्याश्मभयस्य च ॥"
तीर्थविशेषः । यथा, महाभारते । ६ । ४६ । १०३ ।
"तैजसं नाम तत्तीर्थं यत्र पूर्व्वमपाप्लुतिः ।

अभिषिक्तः सुरगणैर्ब्रह्मणो भरतर्षभ ! ॥"
तेजःसम्बन्धिनि, त्रि । यथा, रघुः । ११ । ४३ ।
"तेजसस्य धनुषः प्रवृत्तये
तोयदानिव सहस्रलोचनः ॥")
तैजसः, पुं, (तेजसो विकारः । तैजस + अण् ।) सूक्ष्मशरीरस्थोपप्रहितचैतन्यम् । यथा,—
"एतद्वाप्युपप्रहितं चैतन्यं तैजसो भवति तैजोमयान्तःकरणोपप्रहितत्वात् ॥" इति वेदान्तसारः ॥ (तैजसाहङ्कारविशेषः । यथा, भागवते । २ । ५ । २४ ।
"सोऽहङ्कार इति प्रोक्तो विकुर्व्वन् समभूत्त्रिधा ।
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ॥"
घोटकविशेषः । तल्लक्षणादिकं यथा, भोजराजकृततन्त्रयुक्तिकल्पतरौ ।
"ये क्रोधशीला भृंगवेगयुक्ता
सक्ता दिनात् क्रोशशतं व्रजन्ति ।
ते तैजसाः पुण्यवतां प्रदेशे
भवन्ति पुण्यैरपि ते मिलन्ति ॥"
सुमतिपुत्रः । यथा, ब्रह्माण्डे ३६ अध्याये ।
"तैजसस्तनुसूतश्चापि प्रजापतिरमित्रजित् ॥")
तैजसावर्त्तनी, स्त्री, (आवर्त्तते ऽत्र । आ + वृत् + ल्युट् स्त्रियां ङीप् । तैजसानां धातुद्रव्याणां सुवर्णादीनां आवर्त्तनी ।) मूषा । इत्यमरः । २ । १० । ३३ ॥ तैजसगलान मूचो इति भाषा ॥
तैतिलं, क्ली, वर्षाद्येकादशकरकरम्बान्तर्गतचतुर्थकरः यम् । तच्च जातफलं यथा,—
"कलासु दक्षो जलनाभिलाषी
सुमूर्त्तिसम्पत्तिकामदेवः ।
वक्ता गुणज्ञः कुशलः सुशीलः
स्यात्तैतिलाख्यं करणं प्रसूतौ ॥"
इति कोष्ठीप्रदीपः ॥
तैतिलः, पुं, गण्डकः । इति मेदिनी । ने, ६६ ॥
तैत्तिरं, क्ली, (तित्तिरीणां पक्षिणां समूहः । तित्तिरि + "अनुदात्तादेरञ्" । ४ । २ । ४४ । इति अञ् ।) तित्तिरिगणः । इत्यमरः । २ । ६ । ४३ ॥ (यथा, गोः रामायणे । २ । १०० । ६३ ।
"वाप्यो मैरेयपूर्णाश्च भक्ष्यमांसचयैर्वृताः ।
प्रतप्तैः पेटरैश्चैव मार्गमायूरतैत्तिरैः ॥")
तैत्तिरः, पुं, (तित्तिर एव । स्वार्थे अण् ।) तित्तिरिपक्षी । इति राजनिर्घण्टः ॥ (गर्भिणी एतन्मांसभक्षणादपत्यं सुतं जनयेत् तदुपर्यथा,
"नित्यभीतश्च तैत्तिरात् ॥"
इति सुश्रुते शारीरस्थाने तृतीयाध्याये ॥)
तैत्तिरीयकः, पुं, (तैत्तिरं तित्तिरिप्रोक्तयजुर्व्वेदीयशाखामधीते वेत्ति वा । छण् । ततः स्वार्थे कन् ।) तैत्तिरीयी । यजुर्व्वेदीयशाखाविशेषवेत्ता ॥ (उपनिषद्विशेषे, स्त्री । तच्च ब्रह्मयजुर्व्वेदान्तर्गतम् । इति मुक्तिकोपनिषत् ॥)
तैत्तिरीया, स्त्री, (तित्तिरिणा प्रोक्ता । छण् ।) यजुर्व्वेदस्य शाखाविशेषः । यथा,—
"दैवरातसुतः सोऽपि छर्दित्वा यजुषां गणम् ।
ततो गत्वोऽथ मुनयो दद्युस्तान् यजुर्गणान् ॥
यजूंषि तित्तिरा भूत्वा तल्लोलुपतया दृढः ।
तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ॥"
इति श्रीभागवतम् ॥
तैरणी, स्त्री, (तीरे नमतीति । नम + डः । ततः स्वार्थे अण् । स्त्रियां गौरादित्वात् ङीष् ।) क्षुपविशेषः । तत्पर्य्यायः । तैरवः २ तैरः ३ कुनीली ४ रागदः ५ । अस्य गुणाः । शिशिरत्वम् । तिक्तत्वम् । व्रणनाशित्वम् । अरुग्रक्तदत्वञ्च । इति राजनिर्घण्टः ॥
तैलं, क्ली, (तैलं तैलवत् स्नेहोऽस्यस्येति । अच् ।) स्नेहकः । इति रत्नमाला ॥ (तिलस्य तत्सदृशस्य वा विकारः । तिल + "तस्य विकारः" । ४ । ३ । १३४ । इत्यण् ।) तिलादिजातस्नेहः । यथा, भावप्रकाशे ।
"तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् ॥"
तत्पर्य्यायः । स्नेहनम् २ स्नेहः ३ अभ्यञ्जनम् ४ । इति हेमचन्द्रः । ३ । ८१ ॥ अस्य गुणाः । कषायत्वम् । मधुरत्वम् । लवणत्वम् । उष्णत्वम् । वयोयित्वम् । पित्तकारित्वम् । बद्धविण्मूत्रत्वम् । श्लेष्मावर्द्धकत्वम् । सर्व्ववातविकारनाशित्वम् । मेधाग्निबलवर्द्धनत्वञ्च ।
"नास्ति तैलात् परं किञ्चित् भेषजं मारुता-
पहम् ॥"
इति राजनिर्घण्टः ॥
पक्वपुरातनतैलस्य गुणः । महद्गुणत्वम् । किञ्चिन्नत्वहीनत्वञ्च । द्रव्यसंयोगे संस्कृततैलस्य सर्व्वरोगनाशित्वम् ॥ अवगाहने युक्ततैलस्य गुणः । शरीरबलकारित्वम् । शिरासुखरोमकूपधमनीनाड़ीद्वारा लघ्निकारित्वञ्च । नित्यं मस्तके अधिकतैलदानगुणाः । शिरःशूलखालित्यपालित्यनाशित्वम् । केशशूलस्य दृढ़ताकारित्वम् । केशस्रापतनघनतालम्बतादीर्घताकारित्वम् । इन्द्रियप्रसन्नताग्निशुद्धिकारित्वञ्च ॥ नित्यं कर्णे तैलपूरणस्य गुणाः । मन्याहनुसंग्रहोत्थैः श्रुतिबाधिर्य्यकर्णवातजरोगाजनकत्वम् ॥ मर्द्दने तैलस्य गुणः । घृतादप्यधिकगुरुत्वम् । इति राजवल्लभादिः ॥ * ॥
"प्रातःस्नाने व्रते श्राद्धे द्वादश्यां मङ्गले तथा ।
मद्यलेपसमं तैलं तस्मात्तैलं विवर्जयेत् ॥"
इति कर्म्मलोचनम् ॥
"घृतञ्च सार्षपं तैलं यत्तैलं पुंस्त्ववासितम् ।
अदृष्टं पक्वतैलञ्च तैलाभ्यङ्गे च नित्यशः ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
वारविशेषे तैलग्रहणफलं यथा,—
रवौ क्षुद्रोगः, सोमे कीर्त्तिलाभः, कुजे क्षत्युः, बुधे पुत्रप्राप्तिः, गुरौ अर्थहानिः, शुक्रे शोकः, शनौ दीर्घायुः ॥ * ॥
अथ निषिद्धदिने तैलग्रहणदोषशान्त्यर्थदेयद्रव्यनियमः । रवौ पुष्पं गुरौ दूर्व्वा कुजे भूमिः शुक्रे गोमयम् । अस्य प्रमाणं यथा,—
"अर्के मूलं दहति हृदयं कीर्त्तिलाभञ्च सोमे
भौमे क्षत्युर्भवति नियतं चन्द्रजे पुत्रलाभः ।
अर्थध्वंसो भवति च गुरौ भार्गवे शोकयुक्त-
स्तैलाभ्यङ्गात्तनयमरणं सूर्य्यजे दीर्घमायुः ॥"
इति ज्योतिःसारसंग्रहः ॥
वारादिविशेषे तदभ्यङ्गे गुणदोषौ यथा,—
"सन्तापः कीर्त्तिरक्षायुर्धनं निधनमेव च ।
आरोग्यं सर्व्वकामाप्तिरभ्यङ्गाद्भास्करादिषु ॥
उपोषितस्य व्रतिनः क्षत्तकेशस्य नापितैः ।
तावत् श्रीस्तिष्ठति प्रीता यावत्तैलं न संस्पृशेत् ॥"
इति गारुड़े ११४ अध्यायः ॥ * ॥
अथ तैलवर्गः । तत्र तैलस्य स्वरूपनिरूपणम् ।
"तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् ।
तत्तु वातहरं सर्व्वं विशेषात्तिलसम्भवम् ॥"*॥
अथ तिलतैलगुणाः ।
"तिलतैलं गुरु स्थैर्य्यं बलवर्णकरं परम् ।
दृष्यं विकाशि विशदं मधुरं रसपाकयोः ॥
सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम् ।
वीर्य्येणोष्णं हिमं सर्ष्पे दृंहणं रक्तपित्तहृत् ॥
लेखनं बद्धविण्मूत्रवर्गमाग्नेयशोधनम् ।
दीपनं बुद्धिदं मेध्यं वयसि व्रणमेहनुत् ॥
श्रोत्रयोर्निशिरःशूलनाशनं लघुताकरम् ।
त्वच्यं केश्यञ्च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा ॥
छिन्नभिन्नक्षुतोत्पिष्टमथितक्षतपिच्छिले ।
भस्मस्फुटितविड्दाहाग्निदग्धाग्निक्षरदारिते ॥
तथाभिहतनिर्भुग्नदष्टगात्राद्यभिक्षते ।
वस्तौ पाने ऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे ॥
सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ॥"*॥
नन्वत्र दृंहणलेखनयोः कथं सामानाधिकरण्यमित्याह ।
"रूक्षादिदुष्टपवनः स्रोतः सङ्कोचयेद्यदा ।
रसेऽस्यग्रहणं कार्श्ये कुर्य्याद्रक्तादवर्द्धनम् ॥
तेषु प्रवेशं सरता स्नैग्ध्यात्स्निग्धबलमार्द्दवैः ।
तैलं चयं रसं नेतुं क्षयाणां तेन दृंहणम् ॥
यदायस्रूक्ष्मतीक्ष्णोष्णसरत्वैर्म्मेदसः क्षयः ।
घ्नैः प्रकुरुते तैलं तेन लेखनमीरितम् ॥
हृतं पुरीषं बध्नाति खलितं तत् प्रवर्त्तयेत् ।
ग्राहकं सारकं चापि तेन तैलमुदीरितम् ॥
घृतमभ्यात् परं पक्वं हीनवीर्य्यं प्रजायते ।
तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम् ॥"*
अथ सरिद्वरादितैलगुणाः ।
"दीपनं सार्षपं तैलं कटुपाकरसं लघु ।
लेखनं सर्व्ववीर्य्याणां तीक्ष्णं पित्तासृदूषकम् ।
कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम् ।
कण्डूकोठक्षमिश्चित्रकुष्ठदुष्टव्रणप्रणुत् ॥
तद्वद्राजिकयोस्तैलं विशेषाच्छूलहृल्लुत् ।
राजिकयोः क्षयाराद्य आरक्तराद्य इयोः ॥*॥
अथ तोरीतैलगुणाः ।
तीक्ष्णोष्णं तुवरीतैलं लघु स्याद्वि कफापहम् ।
वह्निकृद्विषहृत् कण्डूकुष्ठकोठक्षमिप्रणुत् ॥
मेदोदोषापहञ्चापि व्रणशोथहरं परम् ॥ * ॥
अथ तिसीतैलगुणाः ।
"अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तहृत् ।
कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु ॥

मलक्षयप्रसः खादु ग्राहि लघ्वदोषदुष्टव्रणम्।
वस्तौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे॥
अनुपानविधौ चापि प्रयोज्यं वातशान्तये॥*॥
अथ वरटतैलगुणाः।
कुसुम्भतैलमम्लं स्यादुष्णं गुरु विदाहि च।
चक्षुर्भ्यामहितं बल्यं रक्तपित्तकफप्रदम्॥*॥
अथ खाखसबीजतैलगुणाः।
तैलं खाखसबीजानां बल्यं वृष्यं गुरु स्मृतम्।
वातदुत् कफदुच्छीतं स्वादुपाकरसच्च तत्॥*॥
अथ एरण्डतैलगुणाः।
एरण्डतैलं तीक्ष्णोष्णं दीपनं पित्तिलं गुरु।
वृष्यं त्वच्यं वयःस्थापि मेधाकान्तिबलप्रदम्॥
कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम्।
विसं स्वादु रसे पाके सतिक्तं कटुकं सरम्॥
विषमज्वरदुष्टोगवृष्टगुल्मादिशूलदुत्।
हन्ति वातोदरानाहगुल्माष्ठीलाकटीग्रहान्॥
वातश्लेष्मितविड्बन्धव्रणशोथामविद्रधीन्।
आमवातगजेन्द्रस्य शरीरवनचारिणः।
एक एव निहन्तायमेरण्डस्नेहकेशरी॥*॥
अथ रालतैलगुणाः।
तैलं सर्ज्जरसोद्भूतं विस्फोटव्रणनाशनम्।
कुष्ठपामाकृमिहरं वातश्लेष्मामयापहम्॥*॥
अथ सर्ज्जतैलगुणाः।
तैलं खयोनिगुग्गुलुदागभटेनाखिलं मतम्।
अतः श्रेष्ठस्य तैलस्य गुणा ज्ञेयाः खयोनिवत्॥
इति भावप्रकाशे तैलवर्गः॥*॥
अथ पुराणतैलगुणाः।
"यामं कल्ककषायवीर्य्यमखिलं चूर्णञ्च पञ्चत्रयं
वस्त्रासान् घृतमोदकौ सहगुड़ौ मासत्रयं
गुग्गुलोः।
सिद्धानां रसभस्मनां सुविपुलं वीर्य्यन्तु वर्षत्रयं
किञ्चिन्न्यूनविवर्जितं गुणपरं तैलं पुराणं
महत्॥"
इति नारायणदासकृतपरिभाषा॥
तैलकं, क्ली, (स्वल्पं तैलम्। अल्पार्थे कन्।) अल्पपरिमाणतैलम्। इति व्याकरणम्॥
तैलकन्दः, पुं, (तैलप्रधानः कन्दः।) कन्दविशेषः। तत्पर्य्यायः। द्रावककन्दः २ तिलाह्वितदलः ३ करवीरकन्दसंज्ञः ४ तिलचित्रपत्रकः ५। अस्य गुणाः। लोहद्रावित्वम्। कटुत्वम्। उष्णत्वम्। वातापस्मारविषश्लेष्मनाशित्वम्। रसस्य बन्धकारित्वम्। स्नेहसिद्धिकारित्वञ्च। इति राजनिर्घण्टः॥
तैलकारः, पुं, (तैलं करोतीति। कृ+"कर्म्मण्यण्।" ३।२।१।इत्यण्।) वर्णसङ्करजातिविशेषः। कलु इति भाषा। स कोटकस्त्रीगर्भे कुम्भकाराज्जातः। इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥ तत्पर्य्यायः। धूसरः २ चाक्रिकः ३ तैली ४। इति हेमचन्द्रः॥ (यथा, आर्य्यासप्तशत्याम्। ५६२।
"स्नेहमयान् पीड़यत किं चक्रेणापि तैलकारस्य।
चालयति पार्थिवानपि यः स कुलालः परं चक्री॥"
याचाकालेऽस्य दर्शनममङ्गलसूचकम्। यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्याये।
"दर्शनमङ्गलं राजा पुरो वर्त्तनि वर्त्तनि॥"
"कुम्भकारं तैलकारं वार्धं सर्पोपजीविनम्॥")
तैलकिट्टं, क्ली, (तैलस्य किट्टं मलम्।) तैलमलम्। खलि इति ख्यातम्। तत्पर्य्यायः। पिण्याकः २ खलिः ३ तैलकल्कजः ४। अस्य गुणाः। कटुत्वम्। गौल्यत्वम्। कफवातप्रमेहनाशित्वञ्च। इति राजनिर्घण्टः॥
तैलङ्गः, पुं, देशविशेषः। इति शब्दरत्नावली॥ (यथा, शब्दार्थचिन्तामणिधृतवचनम्।
"श्रीशैलन्तु समारभ्य चोलेशान्मध्यभागतः।
तैलङ्गदेशो देवेशि! ध्यानाध्ययनतत्परः॥")
तैलचौरिका, स्त्री, (तैलस्य चौरिकेव। चौरवत् तैलपानादस्यास्तथात्वम्।) तैलपायिका। इति शब्दरत्नावली॥
तैलद्रोणी, स्त्री, (तैलपूर्णा द्रोणी।) कण्ठपर्य्यन्तमज्जनार्थतैलपूर्णकाष्ठादिनिर्म्मितपात्रविशेषः। तत्रावस्थितिगुणाः। वातरोगव्याकुलरोगपङ्गुवार्धक्यमिन्मिनगदृग्दधन्वङ्गस्तब्धदृष्टप्रचलितपवनगात्रकम्पकपाटीग्रीवाभङ्गापतन्तकक्षयरुधिरभवस्रवक्षक्षुवस्तिरोगेषु शस्तत्वम्। इति राजवल्लभः॥
तैलपर्णकं, क्ली, (तैलं तैलयुक्तमिव पर्णमस्य। कप्।) ग्रन्थिपर्णवृक्षः। इति भावप्रकाशः॥
तैलपर्णिकं, क्ली, (तैलयुक्तं पर्णमस्यस्य। यद्वा, तिलपर्णो वृक्ष उत्पत्तिस्थानत्वेनास्त्यस्येति। उन्।) हरिचन्दनम्। इत्यमरः। २।६।१३१॥ चन्दनविशेषः। तत्तु तिलपर्णवृक्षजातं धवलं सुग्रीतलम्। इति भरतः॥ (अस्य पर्य्याया यथा,
"श्रीखण्डं चन्दनं न स्त्री भद्रश्रीस्तैलपर्णिकः।
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
वृक्षविशेषे, पुं। यथा, हरिवंशे। २२३। ६८।
"कदम्बाश्चैव भव्याश्च दाड़िमा बीजपूरकाः।
कालीयका दुकूलाश्च छिन्नवस्तैलपर्णिकाः॥")
तैलपर्णी, स्त्री, (तिलपर्णे वृक्षे जातः। "तत्र जातः।" ४।३।२५। इत्यण् ततो ङीप्।) चन्दनम्। श्रीवासः। (पर्य्यायोऽस्या यथा,—
"तैलपर्णी दधित्याख्यः पिण्याको रक्तगन्धिकः।
वेल्लो रसाढ्यः श्रीवासः श्रीपिण्डसरलद्रवौ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
सिल्हक। इति मेदिनी। ले, ६६॥
तैलपा, स्त्री, (तैलं पिबतीति। पा पाने+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) तैलपायिका। इति राजनिर्घण्टः॥
तैलपायिका, स्त्री, (तैलं पिबतीति। पा+खुल्। टापि अत इत्वम्।) कीटविशेषः। तैलापोका इति आरसुला इति च भाषा। तत्पर्य्यायः। पयोष्णी २। इत्यमरः। २।५।२६॥ तैलचौरिका ३। इति शब्दरत्नावली॥ तैलपा ४। इति राजनिर्घण्टः॥ तैलाम्बुका ५ खलाधारा ६। इति जटाधरः॥ (यथा, महाभारते। १३। १०४। १११।
"गृहे पारावता धन्याः शुकाश्च सहसारिकाः।
गृहेष्वेते न पापाय तथा वै तैलपायिकाः॥")
तैलपिपीलिका, स्त्री, (तैलप्रिया पिपीलिका।) पिपीलिकाभेदः। तत्पर्य्यायः। उदवृत्ता २ कपिजाङ्घिका ३। इति राजनिर्घण्टः॥
तैलफलः, पुं, (तैलप्रधानं फलं यस्य।) इङ्गुदी। विभीतकः। इति राजनिर्घण्टः॥
तैलभाविनी, स्त्री, (तैलं भावयति सुगन्धं करोतीति। भू+णिच्+णिनि+ङीप्।) जातीपुष्पवृक्षः। इति राजनिर्घण्टः॥
तैलमाली, स्त्री, (तैलानां माला समूहो यत्र। ततो गौरादित्वात् ङीष्।) वर्त्तिः। इति शब्दमाला॥
तैलम्याता, स्त्री, (तिलपातोऽस्यां वर्त्तते। "घञः सास्यां क्रियेति घः।" ४।२।५८। इति णः। "म्लेनतिलस्य पाते ञे।" ६।३।७१। इति सुम्।) खधा। तिलपातोऽस्यां खधायां सा। इति लिङ्गादिसंग्रहे अमरभरतौ॥
तैलसाधनं, क्ली, (तैलं साधयति निष्पादयति सुगन्धीकरोतीति। साध+णिच्+ल्युः।) गन्धद्रव्यविशेषः। काकला इति भाषा। तत्पर्य्यायः। काकोलम् २ कोलकम् ३ गन्धव्याकुलम् ४ ककोलकम् ५ कोषफलम् ६। इति शब्दचन्द्रिका॥
तैलस्फटिकः, पुं, (तैलाक्तः स्फटिक इव। स्वच्छत्वात् तथात्वम्।) लवणभेदः। इति हेमचन्द्रः। ४। १३४॥
तैलागुरु, क्ली, (तैलाक्तमिव अगुरु।) दाहागुरु। इति राजनिर्घण्टः॥
तैलाटी, स्त्री, (तैलेन तैलप्रदानेन अटति दूरीभवतीति। अट गतौ+अच्+गौरादित्वात् ङीष्।) वरटा। इति हेमचन्द्रः। ४।२८१॥
तैलाम्बुका, स्त्री, (तैलं अम्बु जलमिव पेयं यस्याः। कप्। टाप् च।) तैलपायिका। इति जटाधरः॥
तैलिकः, पुं, (तैलं पण्यत्वेनास्त्यस्य। तैल+ठन्।) तैलकारः। इति व्याकरणम्॥ (अस्य व्यपाङ्क्तेयत्वमुक्तम्। यथा, मनुः। ३। १५८।
"समुद्रयायी वन्दी च तैलिकः कूटकारकः॥")
तैलिनी, स्त्री, (तैलं भक्ष्यत्वेन आश्रयत्वेन वा अस्त्यस्येति। तैल+इनि+ङीप्।) कीटभेदः। तत्पर्य्यायः। तैलकीटः २ षड्ङ्घ्रिका ३ रङ्गनाशिनी ४। इति राजनिर्घण्टः॥ दग्धावर्षिः। इति शब्दमाला॥
तैलिशाला, स्त्री, (तैलिनस्तिलसम्बन्धिनस्तैलकारस्य वा शाला गृहम्।) यन्त्रगृहम्। इति हेमचन्द्रः। ४। ६३॥ घाणिघर इति भाषा॥
तैली, [न्] पुं, (तैलं निष्पाद्यत्वेन पण्यत्वेन वास्त्यस्येति। तैल+इनिः।) तैलकारः। इति हेमचन्द्रः। ३। ५८१॥ तैलसम्बन्धिनि, त्रि॥

तैलीनं, क्ली, (तिलानां भवनं क्षेत्रम्। तिल+ "विभाषा तिलमाषेति।" ५।२।४। इति पक्षे खञ्।) तिलक्षेत्रम्। इत्यमरः।२।९।७॥ (यथाच शब्दरत्नावल्याम्। "तिलोद्भवोचितं यत्तु तिल्लं तैलीनमित्यपि॥") तैषः, पुं, (तैषी तिष्यनक्षत्रयुक्ता पौर्णमासी अस्मिन्निति। तैषी+"सास्मिन् पौर्णमासीति।" ४।२।२१। इत्यण्।) पौषमासः। इत्यमरः। १।४।१५॥ (तिष्यनक्षत्रसम्बन्धिनि, त्रि। "तैषमहः। तैषी रात्रिः।" इति सिद्धान्तकौमुदी॥) तैषी, स्त्री, (तिष्येण नक्षत्रेण युक्ता। "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।" ४।३।१। इत्यण्। "तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्।" इति यलोपः। ङीप्।) पुष्यनक्षत्रयुक्ता पौर्णमासी। इति मुग्धबोधम्॥

तोकं, क्ली, (तौति पूरयति गृहमिति। तु पूर्त्तौ + बाहुलकात् कः।) अपत्यम्। पुत्रो दुहिता च। इत्यमरः। २।६।२८॥ (यथा, ऋग्वेदे। १।६४।१४।
"तोकं पुष्येम तनयं प्रजां हिमाः॥"
शिशुः। बालकः। यथा, भागवते। २।७।२७।
"तोकेन जीवहरणं यदुलूकिकाया-
स्त्रैमासिकस्य च पदा शकटोऽपतत्तः॥")

तोकं, क्ली, कर्णमलम्। इति हैमचन्द्रः॥ मेघः। इत्यजयपालः॥

तोक्मः, पुं, (तकन्ति हसन्ति आनन्दिता भवन्ति लोका अनेनेति। तक+बाहुलकात् मः ओत्वञ्च।) हरिद्रयवः। अपक्वयवः। इत्यमरः। २।९।१६। ("यवास्तोक्माः भृष्टबीहयो लाजाः।" इति वाजसनेयसंहितायां महीधरः। १६।१॥ क्वचित् क्लीवलिङ्गोऽयम्। यथा, वाजसनेयसंहितायाम्। १६।१६।
"दीक्षायै रूपश्रद्यागि प्रायणीयस्य
तोक्मानि॥")
पल्लवाद्यङ्कुरः। यथा,—
"पञ्चपुष्पफलच्छायामूलवल्कलदारुभिः।
गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते॥"
इति श्रीभागवते। १०।२२।२५॥
"निर्यासः घनरसः तोक्माः पल्लवाद्यङ्कुराः।"
इति तट्टीकायां श्रीधरस्वामी॥

तोटकं, क्ली, द्वादशाक्षरपादच्छन्दः। इति छन्दोमञ्जरी॥ (अस्य लक्षणादिकन्तु छन्दःशब्दे द्रष्टव्यम्॥)

तोड, ऋ नादरे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ऋ, अतुतोडत्। नादरोऽनादरः। इति दुर्गादासः॥

तोत्रं, क्ली, (तुद्यते ताड्यतेऽनेनेति। तुद+"हात्रीशस्युयुजस्तुतुदेति।" ३।२।१८२। इति ष्ट्रन्।) गवादितोदनदण्डः। पाँचनी इति ख्यातः। तत्पर्य्यायः। प्राजनम् २ तोदनम् ३ गजस्य तोदनदण्डः। तत्पर्य्यायः। वैणुकम् २। इत्यमरः। २।८।४१॥ वैणुकम् ३। इति भरतः॥ (यथा, रामायणे। २।४०।४१।
"न हि तत्पुरुषव्याघ्रो दुःखजं दर्शनं पितुः।
मातुश्च सहितुं शक्तस्तोत्त्रैर्नुन्न इव द्विपः॥")

तोदः, पुं, (तुद अर्त्तौ+भावे घञ्।) व्यथा। इति रत्नमाला॥ (यथा, भागवते। ३।१८।६।
"तोदं स्वशिरगादम्बुमध्याद्-
ग्राहाहृतः सकरेणुर्यथेभः॥"
तुदतीति। तुद+अच्। पीड़ादायके, त्रि। यथा, ऋग्वेदे। ४।१६।११।
"यासि कृत्सेन सरथमवस्युस्तोदो वातस्य
हर्य्योरीशानः॥"
"तोदस्तोदकः।" इति सायणः॥)

तोदनं, क्ली, (तुद्यतेऽनेनेति। तुद+करणे ल्युट्।) तोत्त्रम्। इत्यमरः। २।९।१२॥ (तुद+भावे ल्युट्।) व्यथा। इति मेदिनी॥ ने, ७२॥ (यथा, सुश्रुते। १।२२।
"तोदनभेदनताड़नच्छेदनायमनमन्थनेत्यादि॥"
दृश्यविशेषः। यथा, तत्रैव। १।४६।
"क्षीरदृक्षफलजाम्बवराजादनतोदनतिन्दुकबकुलधन्वनाम्रसन्तकाम्रकर्णफलगुपरूष्यकगार्ङ्गेरुकीपुष्करवर्त्तिविल्वविम्बीप्रभृतीनि॥")

तोमरः, पुं क्ली, (तुम्यति हिनस्तीति। तुम्य+बाहुलकात् अरप्रत्ययेन साधुः। इत्युज्ज्वलदत्तेनोक्तम्। ३।१३१।) अस्त्रविशेषः। शावली इति भाषा। तत्पर्य्यायः। शल्मली २। इत्यमरः। २।८।६३॥ (यथा, देवीभागवते। ५।५।२६।
"गदाभिः पट्टिशैः शूलैश्चक्रैश्च शक्तितोमरैः॥")
हस्तत्रयोन्नताङ्गश्च रक्तवर्णस्त्वगक्रगः॥"
शार्ङ्गधरेण तु,—
"कणवत् शीर्षदेशः स्यात्तोमरस्त्वायसस्तथा॥"
वैद्यशास्त्रोक्तान्यस्य कार्य्याणि यथा,—
"उद्धानं विनियुक्तिञ्च वेधनञ्चेति तत्क्रमम्।
वलगितं शल्यतत्त्वज्ञाः कथयन्ति नराधिपाः॥"
अग्निपुराणोक्तधनुर्व्वेदमतेऽस्य कार्य्याणि यथा,
"दृष्टिघातं भुजाघातं पार्श्वघातं द्विजोत्तम!।
ऋजुपक्षेषुणा पातं तोमरस्य प्रकीर्त्तितम्॥"
जनपदविशेषः। यथा, मात्स्ये। १२०।५७।
"तोमरान् शावयन्तो च हंसमार्गान्
समूहकान्॥"
नवाक्षरछन्दोविशेषे, क्ली। ग्रन्थार्थचिन्तामणिधृतं तल्लक्षणादिकं यथा,—
"प्रथमं सर्कं विनिधाय
जगणद्वयञ्च निधाय।
कुरु तोमरं सुखकारि
कविराजवक्त्रविहारि॥"
उदाहरणम्,—
"सखि! माद्रके मधुमासि
व्रज सत्वरं किमिहासि।
सहते न किं विहरामि
किमु पावकं प्रविशामि॥")

तोमरधरः, पुं, (तोमरं धरतीति। धृ+अच्। यद्वा, तोमरस्य अस्त्रविशेषस्य धरः।) अग्निः। इति शब्दार्थकल्पतरुः॥

तोमरिका, स्त्री, (तोमर+संज्ञायां कन्। स्त्रीलिङ्गत्वात् टाप् अत इत्वञ्च।) तुवरिका। इति शब्दरत्नावली॥

तोयं, क्ली, ("तवतेर्वृद्धिकर्म्मणः+'अन्नादयश्च।' उणा ४।१०८। इति यत्प्रत्ययो निपातितो द्रष्टव्यः। वर्द्धते वर्षासु। 'तुदति तोयम्' इति क्षीरस्वामी। तुदतेः पूर्ब्ववत् यत्प्रत्यये निपातनात् दकारलोपे गुणः। यद्वा, तुदिः सौत्र आवरणार्थः।" इति निघण्टुनिर्ब्बचने देवराजयज्वा। १।१२।६२।) जलम्। इत्यमरः। १।१०।४॥ (यथा, देवीभागवते। १।६।२६।
"तया ततमिदं तोयं तदाधारश्च तिष्ठति॥"
पूर्ब्बाषाढ़ानक्षत्रम्। जलदेवतत्वादस्य तथात्वम्॥)

तोयकामः, पुं, (तोयं जलं कामयते इति। कम्+अण्।) परिव्राजः। जलवेतसः। इति जटाधरः॥ जलाभिलाषिणि, त्रि॥

तोयक्रच्छ्रं, क्ली, (तोयेन तोयमात्रपानेन यत् क्रच्छ्रं व्रतम्।) जलमात्रपानरूपव्रतविशेषः। इति मिताक्षरा॥ (यथा, मार्कण्डेये।
"मूलक्रच्छ्रं स्मृतं मूलैस्तोयक्रच्छ्रं जलेन तु॥")

तोयडिम्भः, पुं, (तोयस्य जलस्य डिम्भ इव।) घनोपलः। इति हारावली। ५८॥

तोयदः, पुं, (तोयं ददातीति। दा+कः।) मेघः। (यथा, महानिर्ब्बाणतन्त्रे। ४।५३।
"यदा चौषी स्वल्पफला तोयदाः स्तोकवर्षिणः।
असम्यक्फलिनो वृक्षास्तदैव प्रबलः कलिः॥")
मुस्तकम्। इति क्लीवे। इति मेदिनी। दे, ३०॥ जलदातरि त्रि॥ (यथा, महाभारते शान्तिपर्ब्बणि।
"तोयदो मनुजव्याघ्र! स्वर्गं गत्वा महाद्युते!।
अक्षयान् समवाप्नोति लोकानित्यब्रवीन् मनुः॥")

तोयधरः, पुं, (तोयं जलं धरतीति। धृ+अच्। तोयस्य धरो वा।) मेघः। मुस्ता। सुनिषण्णकशाकः। इति मेदिनी। रे, २६५॥ (जलधारिणि, त्रि। यथा, रामायणे। २।६३।१०।
"सुवन्ति कुसुमान्येते नगाः पर्ब्बतसानुषु।
नीला इवातपापाये तोयन्तोयधरा घनाः॥")

तोयधिः, पुं, (तोयानि धीयन्तेऽत्र। धा+"कर्म्मण्यधिकरणे च।" ३।३।९३। इति किः। आतो लोपः।) समुद्रः। इति पुराणम्॥ (यथा, सूर्य्यसिद्धान्ते भूगोलाध्याये। ३७।
"समन्तात् मेरुमध्यात्तु तुल्यभागेषु तोयधेः॥")

तोयधिप्रियं, क्ली, (प्रीणातीति। प्री+"इगुपधेति।" ३।१।१३५। इति कः। तोयधिः प्रियो यस्य।) लवङ्गम्। इति शब्दचन्द्रिका॥

तोयनिधिः, पुं, (तोयानि निधीयन्तेऽत्र। नि+धा+किः। तोयानां निधिर्वा।) समुद्रः। इति शब्दरत्नावली॥ (यथा, कुमारे। १। १।

"पूर्व्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः॥")

तोयपिप्पली, स्त्री, (तोये जले पिप्पलीव।) काँचड़ा इति ख्यातजलजशाकभेदः। तत्पर्य्यायः। लाङ्गली २ शारदी ३ शाकुलादनी ४। इत्यमरः। २। ४। १११॥

तोयपुष्पी, स्त्री, (तोयेन बहुजलप्रदानेन पुष्पाणि यस्याः।) पाटलावृक्षः। इति शब्दमाला॥

तोयप्रसादनं, क्ली, (प्रसादयतीति। प्र+सद्+णिच्+ल्युः। तोयस्य प्रसादनम्। यस्य फलयोगेन जलस्य निर्म्मलत्वं भवतीति तथात्वम्।) कतकम्। इति भूरिप्रयोगः॥

तोयप्रसादनफलं, क्ली, (तोयप्रसादनस्य तोयप्रसादनाय वा फलम्।) कतकफलम्। इति रत्नमाला॥

तोयफला, स्त्री, (तोयप्रधानं फलं यस्याः।) इन्द्रवारुः। इति राजनिर्घण्टः॥

तोयवल्ली, स्त्री, (तोये जलप्रधानस्थाने वल्ली लतासन्ततिर्यस्याः।) कारवेल्लः। इति रत्नमाला॥ उच्छे इति भाषा॥

तोयशुक्तिका, स्त्री, (तोयजाता शुक्तिका। शाकपार्थिवादित्वात् समासः।) जलशुक्तिः। इति राजनिर्घण्टः॥

तोयशूचकः, पुं, (तोयं जलवर्षणं सूचयति दर्शयतीति। सूच्+ण्वुल्।) भेकः। इति शब्दार्थकल्पतरुः॥

तोयाधिवासिनी, स्त्री, (तोयं जलप्रधानस्थलं अधिवसतीति। अधि+वस+णिनिः। यद्वा, तोयेन अधिवास इव संस्कारोऽस्यस्येति। इनिः।) पाटलावृक्षः। इति रत्नमाला॥ तोयादिवासिन्यपि पाठः॥ (पाटलाशब्देऽस्या विवृतिर्ज्ञातव्या॥)

तोरणं, क्ली, (तोलयति उन्नमयति मस्तकमिति। तुल+ल्युः। लस्य रः।) कन्धरा। कण्ठी। इति हारावली। १७४॥

तोरणः, पुं क्ली, (तुरोत्ति त्वरया गच्छत्यनेनेति। तुर त्वरणे+करणे ल्युट्।) बहिर्द्वारम्। इत्यमरः। २। ३। १६॥ (यथा, कुमारे। ७। ३।

"भासोज्ज्वलत्काञ्चनतोरणानां
स्थानान्तरं स्वर्ग इवावभासे॥")

मूलद्वाराद्बाह्यद्वारम्। इति कौक्कटादयः॥ द्वारार्थे निखातस्तम्भयोरुपरिनिबद्धं नानावस्त्ररत्नादिमयं धनुराकारं यद्वस्त्रं तत् तोरणमिति बहवः॥ उपरिस्थगादियुक्तस्तम्भादिद्वयनिर्म्मितपुरादिबहिर्द्वारम्। इति साङ्गः॥ बन्धनमालेति ख्यातं इति कैश्चित्। इत्यमरटीकायां भरतः॥ (महादेवे, पुं। यथा, महाभारते। १३। १७। ११७।

"तोरणस्तारणो वातः परिधीपतिखेचरः॥")

तोलं, क्ली पुं, (तुल्यते परिमीयते इति। तुल+कर्म्मणि घञ्।) तोलकम्। यथा,—

"एकतोलं द्वितोलं वा त्रितोलं वेदतोलकम्।
इतोऽधिकं नरः कृत्वा प्रायश्चित्तीयते ध्रुवम्॥"
इत्यागमः॥

तोलकं, क्ली पुं, (तोलमेव+स्वार्थे कन्।) ग्राह्यमानम्। इति शब्दमाला॥ अशीतिरक्तिपरिमाणम्। तत्तु षोड़शमाषकः यस्यवतिरक्तिपरिमाणञ्च। तोला इति भरि इति च भाषा। तत्पर्य्यायः। कोलम् २ द्रङ्क्षम् ३ वटकम् ४ कर्षार्द्धम् ५। इति वैद्यकपरिभाषा। कर्षम् ६। इति लीलावती॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे दृष्टज्वरान्तके।

"रसं गन्धं तोलकञ्च जातीकोषफले तथा।"
"किराततिक्तकं बालं तोलकञ्च समाहरेत्॥")

तोषः, पुं, (तुष सन्तोषे+भावे घञ्।) तुष्टिः। इति धरणिः॥ (यथा,—

"देवञ्च परमं तोषं जगाम च सहोमया॥"
इति हरिवंशे। १७३। १३॥

स्वायम्भुवमन्वन्तरगततुषितानां देवानामन्यतमः। यथा, भागवते। ४। १। ७।

"तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिड़स्पतिः।
इध्मः कविर्विभुः स्वाह्नः सुदेवो रोचनो द्विषट्।
तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे॥")

तौक्तिकः, पुं, धनूराशिः। इति दीपिका॥ (यथा, दीपिकायाम्।

"क्रियतावरिणित्तमकुलीरलेयप्राधेययूककौर्पाख्याः।
तौक्तिक आकोकेरो वृद्रोगच्छान्धभं चेत्यम्॥")

तौतातिकं, क्ली, (तुतातेन निर्वृत्तम्। तुतात+"तेन निर्वृत्तम्।" ५। १। ७८। इति ठक्।) तुतातभक्षणशास्त्रम्। यथा,—

"नैवाश्रावि गुरोर्म्मतं न विदितं तौतातिकं दर्शनम्।
तत्त्वं ज्ञातमहो न प्राक्तिकगिरां वाच्यस्ततः का कथा॥"
इति प्रबोधचन्द्रोदयः। २। ३॥

तौतिकं, क्ली, सुक्ता। इति राजनिर्घण्टः॥

तौतिकः, पुं, शुक्तिः। इति राजनिर्घण्टः॥

तौर्य्यं, क्ली, (तूर्य्ये सूरजादौ भवम्। तूर्य्य+अण्।) तूर्य्ये सूरजादौ भवं शब्दरूपम्। इत्यमरटीकायां भरतः॥

तौर्य्यत्रिकं, क्ली, (त्रयोऽवयवा यस्य तत्। त्रि+"संख्याया अतिशदन्तायाः कन्।" ५।२।२२। इति कन्। तौर्य्योपलक्षितं त्रिकम्।) गीतवाद्यमिदं समुदितं त्रयं नाट्यञ्च। इत्यमरः। १। ७। १०॥ नटसम्बन्धि गीतवाद्यमिति त्रयम्। इति तट्टीकासारसुन्दरी॥ (यथा, मनुः। ७। ४७।

"मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥")

विष्णुधर्म्मे गीतवाद्यनृत्यफलं यथा,—

"गायनं ये प्रकुर्व्वन्ति मम कर्म्मपरायणाः।
तेषां यद्यत् फलं भूमे! शृणुष्व गदतो मम॥
यावन्ति चाक्षराण्येव गीयमाने यशस्विनि!।
तावद्वर्षसहस्राणि इन्द्रलोके महीयते॥
रूपवान् गुणवान् सिद्धः सर्व्ववेदविदां वरः।
नित्यं पश्यति वै वक्त्रमाद्यं देवं न संशयः॥
मद्भक्तश्चैव जायेत इन्द्रलोकपथे स्थितः।
सर्व्वकर्म्मगुणश्रेष्ठस्तत्रापि मम पूजकः॥
इन्द्रलोकात् परिभ्रष्टो मम गीतपरायणः।
प्रसक्तः सर्व्वसंसारान्मम लोकाय गच्छति॥
यस्तु गायति सुश्रोणि! कौसुदाश्चैव द्वादशीम्।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति॥
यस्तु गायति गीतानि मम जागरणे सदा।
सर्व्वसङ्गात् प्रमुक्तो वै मम लोकाय गच्छति॥
एतत्ते कथितं देवि! गायनस्य फलं महत्।
यस्य गीतस्य शब्देन तरेत् संसारसागरम्॥*॥
वादित्रस्य प्रवक्ष्यामि तत् शृणुष्व वसुन्धरे!।
प्राप्नवान्मनुजो येन देवेभ्यः समतां स्वयम्॥
सम्यक्कालप्रयोगेण सन्निपातेन वा पुनः।
नववर्षसहस्राणि नववर्षशतानि च॥
कुबेरभवनं गत्वा मोदते वै यदृच्छया।
कुबेरभवनाद्भ्रष्टः स्वच्छन्दगमनालयः॥
शून्यादितालसम्यातैर्मम लोकाय गच्छति॥*॥
नृत्यमानस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे!।
मनुजो येन गच्छन्ति क्षित्वा संसारसागरम्॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च।
पुष्करद्वीपमासाद्य स्वच्छन्दगमनालयः॥
फलं प्राप्नोति सुश्रोणि! मम कर्म्मपरायणः।
रूपवान् गुणवान् शूरः शीलवान् सुपथे स्थितः॥
मद्भक्तश्चैव जायेत संसारपरिमोचितः॥*॥
यस्तु जागरतो नित्यं गीतवाद्येन गर्ज्जकः।
जम्बुद्वीपं समासाद्य राजराजस्तु जायते॥
सर्व्वकर्म्मसमायुक्तो रचिता वै महीपतिः।
मद्भक्तश्चैव जायेत मम कर्म्मपरायणः॥"
इति वराहपुराणम्॥

तौलं, क्ली, (तुला एव। स्वार्थे अण्। स्वार्थिका अपि प्रत्ययाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते इत्युक्तेरस्य क्लीबत्वम्।) तुला। तुलाराशौ, पुं। तौली। इति ज्योतिषम्॥

तौलिकः, पुं, (तुल्या तुलिकया जीवतीति। तुलि+ठक्।) चित्रकारः। इति शब्दमाला॥ (तुलानिर्वृत्ते, त्रि। यथा, सुश्रुते चिकित्सितस्थाने १२ अध्याये।

"शतं शतं तुलायान्तु सहस्रं दशतौलिके॥")

तौलिकिकः, पुं, (तुलिकया जीवतीति। तुलिका+ठक्।) चित्रकारः। तत्पर्य्यायः। रङ्गाजीवः २ चित्रज्ञः ३। इति हेमचन्द्रः। ३। ५०५॥ तौलिकः ४। इति शब्दमाला॥

तौषारं, क्ली, (तुषारस्येदम्। तुषार+"तस्येदम्।"४।३।१२०। इत्यण्।) तुषारजलम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १।४५। "धारं कारं तौषारं हैममिति॥")

त्यक्तृ, त्रि, (त्यज्यते स्मेति। त्यज त्यागे+क्तः।) कृतत्यागम्। तत्पर्य्यायः। हीनम् २ विधुतम् ३ सनुज्झितम् ४ धूतम् ५ उत्सृष्टम् ६। इत्यमरः। ३।१।१०७॥ विनाकृतम् ७ विरहितम् ८ निर्व्यूढम् ९। इति त्रिकाण्डशेषः॥ (यथा, रामायणे। २।३७।२। "त्यक्तभोगस्य मे राजन्! वने वन्येन जीवतः। किं कार्य्यमनुयात्रेण त्यक्तसङ्गस्य सर्व्वतः॥")

त्यज, औ हानौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) औ, अत्याक्षीत्। हानिर्वर्জ্জनम्। त्यजति दुष्टलोकं जनः। इति दुर्गादासः॥

त्यजन, क्ली, (त्यज+भावे ल्युट्।) त्यागः। वर्জ্জनम्॥

त्यत्, [द्] त्रि, (त्यजति संसर्गमिति। त्यज्+"त्यजितनियजिभ्यो डित्।" उणां १।१३१। इति अदिः स च डित्।) तत्। सेइ इति भाषा। अस्य पुंलिङ्गस्त्रीलिङ्गयो रूपं स्यः स्या। सर्व्वनामशब्दोऽयम्। इति व्याकरणम्॥ (यथा, ऋग्वेदे। १।६३।४। "त्वं ह त्यदिन्द्र चोदीः सखा वृत्रं यद्धनिन् वृषकर्म्मन्नृभूः॥")

त्यत्, [द्] क्ली, (त्यज्+"त्यजितनीति।" उणां १।१३१। इति अदिः स च डित्।) वायुः। आकाशः। यथा,—

"सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितञ्च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः॥"
इति भागवते। १०।२।२६॥

"सत्यव्रतमिति। सत्यं व्रतं सङ्कल्पो यस्य तम्। सत्यपरं सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिन् तम्। त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः पूर्व्वं प्रलयानन्तरं स्थितिसमये च सत्यं व्यभिचारेण वर्त्तमानम्। तदेवाहुः सत्त्वस्य योनिमिति। सच्छब्देन पृथिव्यप्तेजांसि तच्छब्देन वायुराकाशौ एवं सच्च त्यच्च सत्ये भूतपञ्चकम्। 'तत् सत्यमित्याचक्षते।' इति श्रुतेः। तस्य योनिं कारणम्। अनेन सृष्टेः पूर्व्वं वर्त्तमानतोक्ता। तथा सत्ये तस्मिन्नेव निहितं अन्तर्यामितया स्थितम्। अनेन स्थितिसमयेऽपि सत्यत्वमुक्तम्। तथा सत्यस्य सत्यं तस्यैव सत्यस्य सत्यं पारमार्थिकं नाशेऽप्यनश्वरमाद्यरूपम्। अनेन प्रलयेऽप्यविधित्वे न सत्यत्वं दर्शितम्। एवं त्रिसत्यत्वमुपपादितम्। तथा ऋतसत्यनेत्रं ऋतं कृतं वाक्यं सत्यं समदर्शनम्। तथाभयवत्ता वाक्यस्य मानत्वात्। सत्यञ्च समदर्शनम्। ऋतञ्च कृतं वाक्यं कविभिः परिकीर्त्तिता इति। तयोर्नेत्रं नयनसाधनं नेतारं प्रवर्त्तकमिति यावत्। एवं सर्व्वप्रकारेण सत्यात्मकं त्वां वयं शरणं प्रपन्ना इत्यर्थः।" इति तट्टीकायां श्रीधरस्वामी॥

त्याग, पुं, (त्यज्+घञ्।) दानम्। इत्यमरः। २।७।२६॥ (यथा, रघुः। १।७। "त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्॥") वर्জ্জनम्। इति मेदिनी। गे, ८॥ (यथा, मनुः। ८।३८९। "न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति॥") विवेकिपुरुषः। इति शब्दरत्नावली॥ सर्व्वकर्म्मफलविसर्জ্জनम्। यथा,—

"काम्यानां कर्म्मणां न्यासं सन्न्यासं कवयो विदुः।
सर्व्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥
त्याज्यं दोषवदित्येके कर्म्म प्राहुर्म्मनीषिणः।
यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम!।
त्यागो हि पुरुषव्याघ्र! त्रिविधः संप्रकीर्त्तितः॥
यज्ञो दानं तपः कर्म्म न त्याज्यं कार्य्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥
एतान्यपि च कर्म्माणि सङ्गं त्यक्त्वा फलानि च।
कर्त्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम्॥
नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥
दुःखमित्येव यत् कर्म्म कायक्लेशभयात् त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥
कार्य्यमित्येव यत् कर्म्म नियतं क्रियतेऽर्জ্জुन!।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः॥"
इति श्रीभगवद्गीतायाम्। १८। २-९॥

(त्रि, दाता। यथा, ऋग्वेदे। ४।२४।३। "मिथो यत्त्यागमुभयासो अग्मन् नरः स्तोकस्य तनयस्य सातौ॥" "उभयास उभये यजमानाः स्तोतारश्च त्यागं त्यागकर्त्तारं दातारमिन्द्रं अग्मन् उपगच्छन्ति॥" इति सायनः॥)

त्यागिन्, त्रि, (त्यागेन निर्व्वृत्तः। भावप्रत्ययत्वादिनप्।) त्यक्तः। त्यागेन निष्पन्नः। इति व्याकरणम्॥

त्यागी, [न्] त्रि, (त्यजतीति। त्यज्+"सम्यृचानुरुधाङ्यमेति।" ३।२।१४२। इति घिनुण्।) दाता। (यथा, पञ्चतन्त्रे। ३।२५६। "त्यागिनि शूरे विदुषि च संसर्गरुचिर्जनो गुणी भवति॥") शूरः। इति मेदिनी। नि, ७१॥ वर्জ্জनशीलः। यथा,—

"यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते॥"
इति भगवद्गीता। १८।११।

कर्म्मफलत्यागवान्। यथा,—

"न द्वेष्ट्यकुशलं कर्म्म कुशलेनानुषज्यते।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः॥
न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते॥"
इति श्रीभगवद्गीतायां १८।१०-११।

त्याज्यः, त्रि, (त्यज्यते इति। त्यज+कर्म्मणि ण्यत्। "त्यजेश्च।" इति ७।३।६६। इत्यस्य वार्त्तिकोक्त्या न कुत्वम्।) त्यागयोग्यः। वर्জ্জनीयः। यथा, प्रायश्चित्ततत्त्वे।

"तीरे प्रतिग्रहस्याज्यस्याज्यो धर्म्मस्य विक्रयः॥"
(यथा च देवीभागवते। १।११।५६।
"तारामप्यगुरुक्तां च यथा न तु तथा गुरौ।
अगुरुक्तां कथं त्याज्यां धर्म्मतो न्यायतस्तथा॥")

त्रक, इ ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) दन्त्यवर्गादिः। इ, त्रङ्क्ते। ङ, त्रङ्कते। इति दुर्गादासः॥

त्रग, इ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इ, त्रङ्गति। इति दुर्गादासः॥

त्रङ्ग, पुं क्ली, (त्रङ्गति श्लोभादिकं गच्छतीति। त्रङ्ग+अच्।) पुरविशेषः। इति त्रिकाण्डशेषः॥

त्रद, इ चैर्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) दन्त्यवर्गादिः। इ, त्रन्दते तत्रन्द। इति दुर्गादासः॥

त्रप, ऊ ष मि ङ ह्रियि। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-वेट्।) ऊ, अत्रपिष्ट अत्रप्त। ष, त्रपा। मि, त्रपयति त्रापयति। ङ, त्रपते। ह्रियि लज्जायाम्। इति दुर्गादासः॥

त्रपा, स्त्री पुं, (त्रप्यते इति। त्रप+"ष्ठिवुक्लमुचमां शिच्च।" ३।३।१०४। इत्यङ्। ततष्टाप्।) लज्जा। इत्यमरः। १।७।२३॥ (यथा, रत्नावल्याम्।

"नीचं वर्षवरेण्यगुण्यगणनाभावादपास्य त्रपामन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः॥"

त्रप्यते अनया अस्याः वा। करणे अपादाने वा अङ्।) कुलटा। इति मेदिनी। पे, ७॥ कुलम्। कीर्त्तिः। इति शब्दरत्नावली॥

त्रपाकः, पुं, (त्रप्यते लज्ज्यते इति। त्रप+"आकः खजादेः।" १।२१६। इति उणादिकोषटीकाधृतसूत्रात् आकः।) स्वेच्छविशेषः। इत्युणादिकोषः॥

त्रपारङ्गा, स्त्री, (त्रपायां रङ्गेव। लज्जाहीनत्वादेव तथात्वम्।) वेश्या। इति जटाधरः॥

त्रपिष्ठः, त्रि, (अयमेषामतिशयेन तृप्रः। तृप्र+"अतिशायने तमबिष्ठनौ।" ५।३।५५। इति इष्ठन्। "प्रियस्थिरेति।" ६।४।१५७। इति तृप्रस्य त्रप्-आदेशः।) अतिलज्जितः। इति मुग्धबोधम्॥

त्रपीयान्, [स्] त्रि, (अयमनयोरतिशयेन तृप्रः। तृप्र+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५।३।५७। इति ईयसुन्। "प्रियस्थिरेति।" ६।४।१५७। इति तृप्रस्य त्रबादेशः।) त्रपिष्ठः। इति व्याकरणम्॥

त्रपु, क्ली, (त्रपते अग्निसंयोगेन लज्जते इव। त्रप + "ग्रस्त्रसिहिचपीति।" उणां। १।११। इति उ:।) सीसकम्। रङ्गम्। इति मेदिनी। पे, ६॥ (यथा, प्रपञ्चतन्त्रे। १। ८५।

"कनकभूषणसंग्रहणोचितो
यदि मणिस्त्रपुणि प्रतिबध्यते।
न स विरौति न चाप्युपशोभते
भवति योजयितुर्वचनीयता॥")

त्रपुः, [स्] क्ली, (त्रपते वह्निं प्राप्य लज्जते इव। त्रप + "उस् स्यात्तपादेः स तु कित्।" १।४६०। इति उणादिकोषटीकाधृतसूत्रात् उस्।) रङ्गम्। इत्युणादिकोषः॥ (यथा, भावप्रकाशे।

"भौमे त्रपुः शुनौ लौहं राहावभ्राणि कीर्त्तयेत्॥"

रङ्गशब्देऽस्य विवरणं ज्ञातव्यम्॥)

त्रपुकर्कटी, स्त्री, (त्रपुवत् शुभ्रा कर्कटी।) त्रपुषी। इति राजनिर्घण्टः॥

त्रपुटी, स्त्री, सूक्ष्मैला। इति रत्नमाला॥

त्रपुलं, क्ली, (त्रपते वह्निसंसर्गेण लज्जते इव। त्रप + बाहुलकात् उलच्।) रङ्गम्। इति भरतधृतद्विरूपकोषः॥

त्रपुषं, क्ली, (त्रप + बाहुलकात् उषः।) रङ्गम्। इति भरतधृतद्विरूपकोषः॥ त्रपुषीफलम्। घृसा इति भाषा। तत्पर्य्यायः। कण्टकिफलम् २ सुधावासम् ३ सुशीतलम् ४। तल्लघुफलगुणाः। नीलत्वम्। बलतृड्भ्रमदाहपित्तरक्तपित्तनाशित्वम्। स्वादुत्वम्। शीतत्वञ्च। तत्पक्वफलगुणाः। अम्लत्वम्। उष्णत्वम्। पित्तलत्वम्। कफवातनाशित्वञ्च। तद्वृहत्फलगुणाः। मूत्रलत्वम्। शीतलत्वम्। रूक्षत्वम्। पित्तासृक्क्षुन्नाशित्वञ्च। इति भावप्रकाशः॥ अस्य सामान्यगुणाः। स्वादुत्वम्। गुरुत्वम्। विष्टम्भित्वम्। शीतलत्वम्। सुखप्रियत्वम्। रूक्षत्वम्। अतिमूत्रलत्वञ्च। इति राजवल्लभः॥

त्रपुषी, स्त्री, (त्रपुष + गौरादित्वात् ङीष्।) कर्कटी। इति हेमचन्द्रः। ४। २५५॥ (यथा,

"पटोलकैर्बारुत्रपुष्यलाबूः॥"

इति हारीते प्रथमेस्थाने दशमेऽध्याये॥)

दन्त्यसान्तोऽपि पाठः॥

त्रपुसं, क्ली, (त्रपते वह्नियोगेन लज्जते इव। त्रप + बाहुलकात् उसः।) रङ्गम्। इति राजनिर्घण्टः॥ कर्कटी। अस्य गुणा यथा,—

"बालं सुनीलं त्रपुसं तेषां पित्तहरं स्मृतम्।
तत् पाण्डुकफक्लेदोर्णमस्रं वातकफापहम्॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

त्रपुसी, स्त्री, (त्रपुस + गौरादित्वात् ङीष्।) महेन्द्रवारुणी। कर्कटी। लताविशेषः। घृसा इति क्षीरा इति च भाषा। तत्पर्य्यायः। पीतपुष्पा २ काण्डालुः ३ त्रपुकर्कटी ४ बहुफला ५ कोषफला ६ तुन्दिलफला ७ कण्टकीलता ८ सुधावासा ९। अस्याः फलस्य गुणाः। रुच्यत्वम्। मधुरत्वम्। शिशिरत्वम्। गुरुत्वम्। भ्रमपित्तविदाहार्शिवान्तिनाशित्वम्। बहुमूत्रदत्वञ्च। काण्डालुरित्यत्र कण्टालुरपि पाठः। इति राजनिर्घण्टः॥ (अस्या व्यवहारो यथा, सुश्रुते उत्तरतन्त्रे ४५ अध्याये।

"त्रपुसीमूलकल्कं वा सक्षौद्रं तण्डुलाम्बुना।
पिबेदक्षसमं कल्कं यष्टीमधुकमेव वा॥")

त्रप्रां, क्ली, (द्रप्रां निपातनात् दस्य तः।) द्रप्राम्। घनेतरदधि। इत्यमरटीकायां भरतधृतविद्याविनोदः॥ पातला दइ इति भाषा॥

त्रयं, क्ली, (त्रयोऽवयवा यस्य। त्रि + "संख्याया अवयवे तयप्।" ५।२।४२। इति तयप्। "द्वित्रिभ्यां तयस्यायच्वा।" ५।२।४३। इति तयस्यायच्।) त्रयावयवम्। इति सुग्धबोधम्॥ तिन इति भाषा॥ (यथा, मनुः। २।७६।

"अकारश्चाप्युकारश्च मकारश्च प्रजापतिः।
वेदत्रयात् निरदुहत् भूर्भुवःस्वरितीति च॥")

त्रयः, पुं, (तरतीति। तॄ + "तरतेर्डिः।" उणां ५।६६। इति डिः।) त्रिसंख्या। तिन इति भाषा। त्रिशब्दस्य बहुवचनान्तरूपोऽयम्। अस्य स्त्रीलिङ्गजीवलिङ्गयो रूपे तिस्रः तीणि। इति व्याकरणम्॥ तद्वाचकानि यथा,—

काल: १ अग्निः २ सुवनम् ३ गङ्गामार्गः ४ त्रिनेत्रचक्षुः ५ गुणः ६ त्रीवारेखा ७ कालिदासकाव्यम् ८ बलिः ९ सन्ध्या १० पुरम् ११ पुष्करम् १२ रामः १३ विष्णुः १४ ज्वरपादः १५। इति कविकल्पलता॥ त्रिसंख्याविशिष्टे, त्रि। इत्यमरः॥

"तिस्रोभार्य्या त्रिशालाश्च त्रयो भृत्याश्च बान्धवाः।
ध्रुवं वेदविरुद्धाश्च न ह्येते मङ्गलप्रदाः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

त्रयी, स्त्री, (त्रय + "टिड्ढेति।" ४।१।१५। इति ङीप्।) ऋक्सामयजुर्भेदा एतन्नितयम्। इत्यमरः। १।६।३॥ (यथा, मनुः। ७।४३॥

"त्रैविद्येभ्यस्त्रयीं विद्यात् दण्डनीतिञ्च शाश्वतीम्।
आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भाञ्च लोकतः॥")

पुरन्ध्री। सुमतिः। इति विश्वः॥ सोमराजीवृक्षः। इति शब्दचन्द्रिका॥ दुर्गा। यथा,—

"ऋग्यजुःसामभागेन साङ्गवेदगतापि वा।
त्रयीति पठ्यते लोके इहाङ्गार्थसाधिनी॥"

इति देवीपुराणे ४५ अध्यायः॥

त्रयीतनुः, पुं, (त्रयी वेदा एव तनुः शरीरं यस्य। "त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्य्यमात्मानं यजन्ते।" इति भागवतवाक्यात्। ५।२०।४। अस्य तथात्वम्।) सूर्य्यः। इति हलायुधः॥

त्रयीधर्म्मः, पुं, (त्रय्या वेदत्रयेण विहितो धर्म्मः।) ऋग्यजुःसाम्नां विधानम्। त्रिवेदोक्तकर्म्म। इत्यमरः। १।६।३॥ (यथा, महाभारते। ३।१५०।३२।

"सा चेद्धर्म्मैकता न स्यात्त्रयीधर्म्मेष्वते भुवि॥")

त्रयीमुखः, पुं, (त्रयी वेदा मुखे यस्य।) ब्राह्मणः। इति हेमचन्द्रः। ३।४।७५॥

त्रयोदश, [न्] त्रि, (त्र्यधिका दश इति कर्म्मधारयः। "त्रेस्त्रयः।" ६।३।४८। इति त्रयस्।) संख्याविशेषः। १३ तेर इति भाषा। बहुवचनान्तोऽयम्। (यथा, मनुः। ६।१२६।

"दशौ स दश धर्म्माय कव्यपाय त्रयोदश॥")

तत्संख्यायुक्तञ्च। इत्यमरः॥ तद्वाचकः। ताम्बूलगुणः। १। इति कविकल्पलता॥

त्रयोदशः, त्रि, (त्रयोदशानां पूरणः। "तस्य पूरणे डट्।" ५।२।४८। इति डट्।) त्रयोदशानां पूरणः। इति व्याकरणम्॥ तेरह इत्यादि भाषा। (यथा, रामायणे।२।७७।२२।

"त्रयोदशोऽयं दिवसः पितुर्वृत्तस्य ते विभो!।
सावशेषास्त्रिनिचये किमिह त्वं विलम्बसे॥")

त्रयोदशी, स्त्री, (त्रयोदश + टित्त्वात् ङीप्।) तिथिविशेषः। सा चन्द्रस्य त्रयोदशकलाक्रियारूपा त्रयोदशकलाक्रियावच्छिन्नकालरूपा वा। इति तिथ्यादितत्त्वम्॥ तत्र जातस्य फलं यथा,

"रूपान्वितः सात्त्विकभावहीनः
सुखी च बाल्ये जननीप्रियश्च।
सदालसः शिल्पगुणैकवेत्ता
त्रयोदशी जन्मतिथिर्यदि स्यात्॥"

इति कोष्ठीप्रदीपः॥

इयं धर्म्मस्य तिथिः। इति वराहपुराणम्॥

त्रस, क भृतौ। अद्दे। निषेधे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) एतदाद्याश्चत्वारो रेफयुक्ताद्याः। क, त्रासयति स्वगं बाधः वधति गृह्णाति निराकरोति वा इत्यर्थः। इति दुर्गादासः॥

त्रस, इ किं भाषि। इति कविकल्पद्रुमः॥ (चुरां-पक्षे णां-परं-अकं-सेट्।) इ, त्रंसयते। कि, त्रंसयति त्रंसति। भाषि दीप्तौ। इति दुर्गादासः॥

त्रस, ईं ण भये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्। ईदित्वात् अनिङ्निष्ठः।) ईं, त्रस्तः। ण, त्रेसतुः तत्रसतुः। त्रसति। इति दुर्गादासः॥

त्रस, य ईं भये। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्। ईदित्वादनिङ्निष्ठः।) य, त्रस्यति। ईं, त्रस्तः। इति दुर्गादासः॥

त्रसं, क्ली, (त्रस्यति भिनत्त्यक्षिन् इति। त्रस भये + घञर्थे कः।) वनम्। इति त्रिकाण्डशेषः॥

त्रसः, त्रि, (त्रसतीति। त्रस भये + पचाद्यच्।) जङ्गमः। इत्यमरः। ३।१।७४॥ (यथा, महाभारते। १२।६।१६।

"ऋजुः प्रणिहितो गच्छंस्त्रसस्थावरवर्ज्जकः॥")

त्रसरः, पुं, (त्रसन्ति धातूनामनेकार्थत्वात् सूत्राणि वेष्टयन्त्यनेनेति। त्रस + बाहुलकात् अरन्।) तन्त्रवायोपकरणविशेषः। तांसनी इति भाषा। तत्पर्य्यायः। सूत्रवेष्टनम् २। इत्यमरः।३।२।२४॥ तसरः ३। इति भरतः॥

त्रसरेणुः, स्त्री, सूर्य्यभार्य्याविशेषः। इति त्रिकाण्डशेषः॥

त्रसरेणुः, पुं, (त्रसत्यचलत्वात् भीत इव रेणुः।) त्रिंशत्परमाणुपरिमाणम्। स गवाक्षान्तर्गते सूर्य्यकिरणे दृश्यते। तत्पर्य्यायः। ध्वंसी २। यथा, वैद्यकपरिभाषायाम्।
"ज्वालान्तरगते सूर्य्यकरे ध्वंसी विलोक्यते।
त्रसरेणुस्तु विज्ञेयस्त्रिंशता परमाणुभिः॥"
(द्व्यणुकत्रयात्मकरेणुः। यथा, ब्रह्मवैवर्त्ते।
"परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते त्रयः॥"
तथाच मनुः। ८। १३२।
"ज्वालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः।
प्रथमन्तत् प्रमाणानां त्रसरेणुं प्रचक्षते॥")

त्रसुरः, पुं, (त्रस्यतीति। त्रस भये+उरच्।) भीरुकः। इति संक्षिप्तसारे उणादिवृत्तिः॥

त्रस्तः, त्रि, (त्रस भये+क्तः।) भीतः। इति जटाधरः॥ (यथा, देवीभागवते।१।५।२६।
"प्रत्यक्षायां विमुक्तायां मुक्ता कोटिस्तथोत्तरा।
शुम्भः समभवद्घोरस्तेन त्रस्ताः सुरास्तदा॥")
शीघ्रे, क्ली। यथा,—
"सविरामं त्रितालञ्च एकं शून्यन्तथापरे।
शीघ्रे त्रस्तं त्रितालञ्च देवसार इतीर्य्यते॥"
इति सङ्गीतदामोदरः॥

त्रस्नुः, त्रि, (त्रस्यतीति। त्रस भये+"त्रसिगृधिधृषिक्षिपेः क्नुः।" ३।२।१४०। इति क्नुः।) त्रासशीलः। इत्यमरः। ३।१।२६॥ (यथा, भट्टिः। ६।७।
"सीतां सौमित्रिणा त्यक्तां सप्रीचीं त्रस्नुमेकिकाम्।
विज्ञायामंस्त काकुत्स्थः त्रये क्षेमं सुदुर्लभम्॥")

त्रा, ङ पालने। इति कविकल्पद्रुमः॥ (भ्वां आत्मं-सकं-अनिट्।) त्रै ङ पालन इत्यत्र केचिददादौ वा पठन्ति। इति क्रमदीश्वरः॥ इति कविकल्पद्रुमटीकायां दुर्गादासः॥

त्राणं, क्ली, (त्रै+भावे ल्युट् क्लो वा। यदविदेति पक्षे नत्वम्।) रक्षणम्। (यथा, भागवते। १ अङ्के।
"आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि॥"
त्रायते इति कर्त्तरि ल्युः। रक्षिता। यथा, महाभारते। १। २३। १८।
"त्वं प्रभास्वमभिप्रेतं त्वं यज्ञाङ्गमनुत्तमम्॥"
तथाच रघौ। १५। ३।
"अवेक्ष्य रामं ते तस्मिन् न प्रजहुः स्वतेजसा।
त्राणाभावे हि शस्त्राणां कुक्षेस्ति तपसो व्ययम्॥"
त्रायतेऽनेनेति करणे ल्युट्। कवचम्। अस्त्रम्। यथा महाभारते। ३। १६८। १४।
"दंशिता विविधैस्त्राणैर्विचित्रायुधपाणयः॥")
त्रायमाणलता। रक्षिते, त्रि। इति मेदिनी। णे, १४॥

त्राणा, स्त्री, (त्रायते पालयतीति। त्रै+ल्युः। टाप्।) त्रायमाणा। इति राजनिर्घण्टः॥

त्रातं, त्रि, (त्रै+क्तः। उदविदेति नत्वाभावः।) रक्षितम्। इत्यमरः। ३। १। १०६॥ (यथा, मार्कण्डेये। ८४। २२।
"त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवन्नमस्ते॥"
भावे क्तः।) रक्षणे, क्ली॥

त्रापुषं, त्रि, (त्रपुषेण निर्वृत्तम्। त्रपुष+"तेन निर्वृत्तम्।" ४। २। ६८। इत्यण्।) त्रपुषनिर्म्मितम्। इति व्याकरणम्॥ (त्रपुणो विकारः। "त्रपुजतुनोः षुक्।" ४। ३। १३८। इत्यण् षुगागमश्च। रङ्गस्य विकारः। इति सिद्धान्तकौमुदी॥)

त्रायन्ती, स्त्री, (त्रै+सम्पदादित्वात् क्विप्। त्रां त्राणं अयतीति। इ गतौ+अच्। यद्वा, त्रै ङ पालने+क्वचित् आत्मनेपदी धातुरपि परस्मैपदमिच्छतीति व्याघात् अच्। "उगितश्च।" इति ङीप्।) त्रायमाणा लता। इत्यमरः। २। ४। १५०॥ (यथा,—
"त्रायन्ती तु वरा तिक्ता सरा पित्तकफापहा।
ज्वरकुष्ठोगगुल्मार्शोभ्रमशूलविषप्रणुत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
त्राणकर्त्री च॥

त्रायमाणं, त्रि, (त्रायते इति। त्रै+कर्म्मणि शानच्।) रक्ष्यमाणम्। इति व्याकरणम्॥ (यथा, अथर्ब्ववेदे। ६। ४। १।
"त्वष्टा मे दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः।
पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रायमाणं सहः॥")

त्रायमाणा, स्त्री, (त्रायते इति। त्रै+शानच्।) वला इति बहुला इति च ख्याता। तत्पर्य्यायः। वार्षिकम् २ त्रायन्ती ३ वलभद्रिका ४। इत्यमरः।२।४।१०५॥ क्षतजा ५ त्रायमाणिका ६ वलभद्रा ७ सुकामा ८ वार्षिकी ९ गिरिजा १० अतुजा ११ माङ्गल्याङ्गी १२ देववला १३ पालिनी १४ भयनाशिनी १५ अवली १६ रक्षणी १७ त्राणा १८। इति राजनिर्घण्टः॥ सुभद्राखी १९ भद्रनामिका २०। इति रत्नमाला॥ अस्य गुणाः। शीतत्वम्। मधुरत्वम्। गुल्मज्वरकफासृग्भ्रमतृष्णात्रयस्त्रानिविषच्छर्द्दिविनाशित्वञ्च। इति राजनिर्घण्टः॥ पित्तनाशित्वम्। इति राजवल्लभः॥ (यथा,—
"पटोलं पिचुमर्दञ्च वार्ब्बीं कटुकरोहिणीम्।
वृष्याङ्गीं त्रायमाणाञ्च दद्याद्दोषेषु शान्तये॥"
इति चरके चिकित्सास्थाने एकादशेऽध्याये॥)

त्रासः, पुं, (त्रस+भावे घञ्।) भयम्। इत्यमरः। १।७।२१॥ (यथा आर्य्यासप्तशत्याम्। ३७६।
"प्रणयचलितोऽपि सकपटकोपकटाक्षैर्भया-
द्धितस्तम्भः।
त्रासतरलो गृहीतः सहासरभसं प्रियः कण्ठे॥")
मणिदोषः। इति मेदिनी। से, ४॥

त्रासदायी, [न्] त्रि, (त्रासं भयं ददातीति। दा+णिनिः।) भयदाता। तत्पर्य्यायः। अङ्कुरः २। इति हेमचन्द्रः। ३। १४३॥

त्रिंशः, त्रि, (त्रिंशत्+"तस्य पूरणे डट्।" ५। २। ४८। इति डट्।) त्रिंशत्पूरणः। इति व्याकरणम्॥ (यथा, तिथ्यादितत्त्वे।
"त्रिंशांशकक्रमेणा राशेर्भाग इत्यभिधीयते॥")

त्रिंशकः, त्रि, त्रिंशत्समूहः। समूहार्थे डकप्रत्ययः। इति सुपद्मव्याकरणम्॥ (त्रिंशता क्रीतः। त्रिंशत्+"विंशतित्रिंशद्भ्यां ड्वुन्संज्ञायाम्।" ५। १। २४। इति असंज्ञायां ड्वुन्। त्रिंशत्संख्यकद्रव्येण क्रीतः। इति सिद्धान्तकौमुदी॥)

त्रिंशत्, स्त्री, (त्रयोदशतः परिमाणमस्य। "षड्त्रिंशदिति।" ५। १। ५६। इति निपातनात् साधुः।) संख्याविशेषः। त्रिंश इति भाषा। एकवचनान्तोऽयम्। त्रिंशद्वये त्रिंशतौ। त्रिंशतो बहुत्वे त्रिंशतः। इति व्याकरणम्॥ (यथा, मनुः। १। २२।
"निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कलाः।
त्रिंशत्कला मुहूर्त्तः स्यादहोरात्रन्तु तावतः॥")

त्रिंशत्पत्रं, क्ली, (त्रिंशत्संख्यकानि पत्राणि दलानि यस्य।) कुसुदम्। इति शब्दमाला॥

त्रिकं, क्ली, (त्रयाणां समूहः। "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु।" ५। १। ५८। इति कन्।) पृष्ठवंशाधारः। इत्यमरः। २। ६। ७६॥ (यथा, माघे। १२। १०।
"नम्रा यष्टीरुपि ध्रुवन्विषाद्यो-
र्युग्मं सत्कृत्कारविवर्त्तितत्रिकः॥")
त्रयम्। इति मेदिनी। के, २६॥ (यथा, मनुः। ७। ५१।
"दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा॥")
त्रिपथसंस्थानम्। इति हेमचन्द्रः। ३। ५२॥

त्रिफला। त्रिकटु। त्रिमदः। यथा, सुखबोधे।
गुडूचीसारसंयुक्तात्त्रिकत्रयसमन्वयात्।
वातरक्तं निहन्त्याशु सर्व्वरोगहरत्रयः॥"
(तृतीयेन रूपेण यहणं यस्य। तृतीय+"तावतियं यहणमिति वुञ्वा।" ५। २। ७७। इति कन् पूरणप्रत्ययस्य च लुक्। तृतीयके, त्रि। यथा, मनुः। ८। १४२।
"द्विकं त्रिकं चतुष्कञ्च पञ्चकञ्च शतं समम्।
मासस्य दृष्टिं यच्छीयात् वर्णानामनुपूर्व्वशः॥")

त्रिककुत्, [द्] पुं, (त्रीणि ककुत्-सदृशानि ध्वजतुल्यानि शृङ्गाणि यस्य।) त्रिकूटपर्व्वतः। इत्यमरः। २।३।२॥ (यथा, शतपथब्राह्मणे। ३। १। ३। १२। "यत्र वा इन्द्रो वृत्रमहंस्तस्य यदस्यासीत्तं गिरिं त्रिककुदमकरोत्।" विष्णोर्नामविशेषः। यथा, महाभारते। १२। ३४२। ६०।
"तथैवासं त्रिककुदो वाराहं रूपमास्थितः।
त्रिककुत्त्वेन विख्यातः शरीरस्य प्रमाणतः॥"

दशरात्रसाध्ययज्ञविशेषः। यथा, तैत्तिरीयसंहितायाम्। ७। २। ५। २।
"त्रिककुद्वा एष यज्ञो यद्दशरात्रः ककुत्पञ्चदशः ककुदेकविंशः ककुत्त्रयस्त्रिंशो य एवं विद्वान् दशरात्रेण यजते त्रिककुदेव समानानां भवति॥")

त्रिकटः, पुं, (त्रीन् वातपित्तश्लेष्मदोषान् कटति नाशयतीति। कट+अच्।) गोक्षुरकः। इति शब्दरत्नावली॥

त्रिकटु, क्ली, (त्रयाणां कटूनां शुण्ठीमरीचपिप्पलीनां समाहारः।) मिश्रितशुण्ठीमरीचपिप्पल्यः। तत्पर्य्यायः। चुत्रयम् २ घोषम् ३। इत्यमरः। २। १०। १११॥ कटुत्रयम् ४ कटुत्रिकम् ५। अस्य गुणाः। दीपनत्वम्। श्वासकासत्वगामयगुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसाग्नित्वञ्च। इति राजनिर्घण्टः॥ तन्नामगुणाः।
"विश्वौषकुल्या मरिचं त्रयं त्रिकटु कथ्यते।
कटुत्रयन्तु त्रिकटु चुत्रयं घोषमुच्यते॥
चुत्रयं दीपनं हन्ति श्वासकासत्वगामयान्।
गुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसान्॥"
इति भावप्रकाशः॥

त्रिकण्टं, क्ली, (त्रयाणां कण्टानां दृढत्वग्विदमनीदुःस्पर्शरूपाणां समाहारः।) मिलितदृढत्वग्विदमनीदुःस्पर्शत्रयरूपम्। तत्पर्य्यायः। कण्टकारीत्रयम् २ कण्टकत्रयम् ३। इति राजनिर्घण्टः॥

त्रिकण्टः, पुं, (त्रीणि कण्टानि कण्टकानि यस्य।) गोक्षुरकः। इति शब्दरत्नावली॥ पत्रगुम्फवृक्षः। इति शब्दचन्द्रिका॥ तेकाँटासिज इति भाषा। मत्स्यभेदः। टेङ्गरा इति भाषा। अस्य गुणाः। पित्तकफनाशित्वम्। रूक्षत्वम्। अग्निदीपनत्वम्। लघुत्वञ्च। इति राजवल्लभः॥
(पर्य्यायोऽस्य, यथा, वैद्यकरत्नमालायाम्॥
"त्रिकण्टः स्थलशृङ्गाटो गोकण्टोऽथ त्रिकण्टकः।
त्रिपुटः कण्टकफलः शृङ्गी गोक्षुरः क्षुरः॥")

त्रिकण्टकः, पुं, (त्रीणि कण्टकानि यस्य।) लघुगर्गमत्स्यः। इति त्रिकाण्डशेषः॥ गोक्षुरकवृक्षः। इति हेमचन्द्रः। ४। २२२॥ (यथा,—
"त्रिकण्टः स्थलशृङ्गाटो गोकण्टोऽथ त्रिकण्टकः॥"
इति वैद्यकरत्नमालायाम्॥)

त्रिका, स्त्री, (तिस्रोऽग्रयो यस्याः। "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु च।"५। १। ५८। इति कन्। ततष्टाप्।) कूपोपरिस्थपट्टप्रान्तभागः। भूमिष्ठकूपपट्टम्। इत्यन्ये॥ कूपस्य समीपे रज्जुधारणार्थं त्रिखिदारयन्त्रम्। इति स्वामी॥ इत्यमरटीकायां भरतः॥

त्रिकायः, पुं, (त्रिकं आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रयं अयति गच्छत्यस्मादिति। अय गतौ+अपादाने घञ्। यद्वा, त्रिकं त्रिकालमयति वेत्तीति। अय+अच्।) बुद्धः। इति हेमचन्द्रः। २। १४८॥

त्रिकार्षिकं, क्ली, (कर्षाय हितम् कार्षिकम्। त्रयाणां कार्षिकाणां समाहारः।) मिलितनागरातिविषासुस्ताद्रव्यरूपम्। इति राजनिर्घण्टः॥

त्रिकालज्ञः, पुं, (त्रिकालं वर्त्तमानातीतभविष्यत्कालविवरणं जानातीति। ज्ञा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) बुद्धः। इति हेमचन्द्रः। २। १४६॥ सर्व्वज्ञे, त्रि॥ (यथा, बृहत्संहितायाम्। १७। १।
"बुद्धं यथा यदा वा भविष्यदादिश्यते त्रिकालज्ञैः॥")

त्रिकालदर्शी, [न्] पुं, (त्रिकालं वर्त्तमानातीतभविष्यद्रूपं पश्यतीति। दृश+णिनिः।) ऋषिः। इति हलायुधः॥ भूतभविष्यद्वर्त्तमानवेत्तरि, त्रि॥ (यथा, बृहत्संहितायाम्। २१। ४।
"प्रध्वंसिन्यपि काले त्रिकालदर्शी कलौ भवति॥")

त्रिकालवित्, पुं, (त्रिकालं वेत्तीति। विद्+क्विप्।) बुद्धः। इति हलायुधः॥ त्रिकालज्ञे, त्रि॥

त्रिकूटं, क्ली, (त्रिकूटः पर्व्वतः उत्पत्तिस्थानत्वेनास्त्यस्येति अर्श आदित्वादच्।) सिन्धुलवणम्। सामुद्रलवणम्। इति रत्नमाला॥

त्रिकूटः, पुं, (त्रीणि कूटानि शृङ्गाणि यस्य।) पर्व्वतविशेषः। यस्योपरि लङ्का। (यथा, रामायणे। ५। २। १।
"स सागरमनाधृष्यमतिक्रम्य महाबलः।
त्रिकूटस्य तटे लङ्कां स्थितः स्वस्थो ददर्श ह॥")
तत्पर्य्यायः। त्रिककुत् २। इत्यमरः। २। ३। २॥ सुवेलः ३ त्रिशृङ्गः ४। इति हेमचन्द्रः॥ त्रिशृङ्गः ५। त्रिचकूटकः ६। इति शब्दरत्नावली॥ (अयन्तु पीठस्थानानामन्यतमः। अत्र भगवती रुद्रसुन्दरीरूपेण विराजते। यथा, देवीभागवते। ७। ३०। ६६।
"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥")
क्षीरोदसमुद्रतीरस्थपर्व्वतः। यथा,—
"सर्व्वरत्नमयः श्रीमान् त्रिकूटो नाम पर्व्वतः।
सुतः पर्व्वतराजस्य सुमेरोर्भास्करद्युतेः॥
क्षीरोदजलवीच्या यो धौतामलशिलातलः।
उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः॥
अप्सरोभिः परिवृतः श्रीमान् प्रस्रवणाकुलः।
गन्धर्व्वैः किन्नरैर्यक्षैः सिद्धचारणपन्नगैः॥
विद्याधरैः सपत्नीकैः संयुतेषु तपस्विभिः।
नगद्वीपिगजेन्द्रैश्च वृतगात्रो विराजते॥
पुन्नागैः कर्णिकारैश्च विल्वामलकपाटलैः।
चूतनिम्बकदम्बैश्च चन्दनागुरुचम्पकैः॥
शालैस्तालैस्तमालैश्च शरलार्जुनपिप्पलैः।
तथान्यैर्विविधैर्वृक्षैः सर्व्वतः समलङ्कृतः॥
नानाधातुकृतैः शृङ्गैः प्रस्रवद्भिः समन्ततः।
शोभितो रुचिरप्रख्यैस्त्रिभिर्व्वर्णैश्च सानुभिः॥
नगैः शाखामृगैः सिंहैर्मातङ्गैश्च सदामदैः।
जीवञ्जीवकसंघुष्टैश्चकोरशिखिनादितैः॥
तस्यैकं काञ्चनं शृङ्गं सेवते यद्दिवाकरः।
नानापुष्पसमायुक्तं नानागन्धाधिवासितम्॥
द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः।
पाण्डुराम्बुदसंकाशं तुषारचयसन्निभम्॥
वज्रेन्द्रनीलवैदूर्य्यतेजोभिर्भासयन् दिशः।
तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमुत्तमम्॥
न तत् कृतघ्नाः पश्यन्ति न वृथ्रसा न नास्तिकाः।
नातप्ततपसो लोके ये च पापकृतो जनाः॥
तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम्।
कारण्डवसमाकीर्णं राजहंसोपशोभितम्॥
गजो ह्यचलसंकाशो मदाचलितलोचनः।
क्षतिः पातुकामोऽसावतीर्य्यैव तज्जलम्॥
स लीनः पङ्कजवने यूथमध्यगतश्चरन्।
यद्दीप्तलेन रौद्रेण ग्राहेणायुक्तमर्षिणा॥
गरुड़स्तो जगन्नाथो लोकाधारस्तपोधन!।
ग्राहयस्तं गजेन्द्रं तं तच्च ग्राहं जलाशयात्॥
उज्जहारात्मप्रमेयात्मा तरसा मधुसूदनः।
स्वलक्ष्यं दारयामास ग्राहं चक्रेण माधवः॥
मोचयामास नागेन्द्रं पापेभ्यः शरणागतम्॥"
इति वामनपुराणम्॥
(घोटकविशेषः। यथा, नकुलकृताश्वचिकित्सिते। ४। ६।
"त्रयो यस्य ललाटस्था आवर्त्ता अधरोत्तराः।
त्रिकूटः स परिज्ञेयो वाजिदङ्गिकरः परः॥")

त्रिकूटलवणं, क्ली, (त्रिकूटं सामुद्रमिव लवणम्।) द्रौणीलवणम्। इति राजनिर्घण्टः॥

त्रिकोणं, क्ली, (त्रयः कोणा यस्य।) योनिः। इति शब्दार्थकल्पतरुः॥ (कामरूपपीठविशेषः। यथा, शब्दार्थचिन्तामणिधृतवचनम्।
"करतोयां समारभ्य यावद्दिक्करवासिनी।
शतयोजनविस्तारं त्रिकोणं सर्व्वसिद्धिदम्॥")
लक्षात् नवपञ्चमलये। इति दीपिका॥ (त्रिभुजक्षेत्रभेदः। इति लीलावती॥) त्र्यस्रे, त्रि। त्रिकोणवस्तूनि यथा। हलः १ शिवचक्षुः २ कामाख्या ३ वह्निमण्डलम् ४ एकारः ५ वज्रम् ६ शृङ्गाटम् ७ शृकटादि ८ योनिः ९। इति कविकल्पलता॥

त्रिकोणफलं, क्ली, (त्रिकोणं त्र्यस्रं फलं यस्य।) शृङ्गाटकम्। इति भावप्रकाशः॥

त्रिक्षारं, क्ली, (त्रयाणां क्षाराणां समाहारः।) क्षारत्रयम्। मिलितस्वर्जिकाक्षारयवक्षारटङ्कणक्षाराणि। इति राजनिर्घण्टः॥ (यथा, वैद्यकरत्नसारसंग्रहे क्षारमारणाधिकारे।
"सर्জ্জिका टङ्कणश्चैव यवक्षार उदाहृतः॥")

त्रिक्षुरः, पुं, (त्रीणि क्षुराग्रीवाग्राणि यस्य।) कोकिलाक्षवृक्षः। इति रत्नमाला॥ कुलेखारा इति भाषा॥

त्रिखं, क्ली, त्रयूषम्। इति शब्दचन्द्रिका॥

त्रिखट्टं, क्ली, तिसृणां खट्टानां समाहारः। खट्टात्रयम्। इत्यमरः। ३। ५। ४१॥

त्रिखट्टी, स्त्री, (तिसृणां खट्टानां समाहारः। "द्विगोः।" ४। १। २१। इति ङीप्।) त्रिखट्टम्। इत्यमरः। ३। ५। ४१॥

त्रिगणः, पुं, (त्रयाणां धर्म्मार्थकामानां गणो वर्गः।) त्रिवर्गः। धर्म्मार्थकामाः। इत्यमरटीकायां नीलकण्ठः॥ (यथा, किरातार्জ্জुनीये। १। ११।

"गुणानुरागादिव सख्यमीयिवा-
न्न बाधतेऽस्य त्रिगणः परस्परम्॥")

त्रिगर्त्तः, पुं, (त्रयो गर्त्ता यत्र।) देशविशेषः। साम्प्रतराखादेशैकभागः। तत्पर्य्यायः। जालन्धरः २। इति हेमचन्द्रः। ४। २४॥ (देशोऽयं भूमेर्विभागे उत्तरस्यामुक्तः। यथा, बृहत्संहितायाम्। १४। २५।

"उत्तरतः कैलासः" इत्युपक्रम्य,—

"त्रिगर्त्ततुरगाननाश्वसुखाः॥"

इत्युक्तवान्॥)

तद्देशस्थे पुंभूम्नि। (यथा, महाभारते। २। २७। १८।

"तत्रस्त्रिगर्त्ताः कौन्तेयं दार्व्वाः कोकनदास्तथा।
क्षत्रिया बहवो राजन्नुपावर्त्तन्त सर्व्वशः॥")

शब्दार्थान्तरम्। इति मेदिनी। ते, ११३॥

त्रिगर्त्तकः, पुं, (त्रिगर्त्त एव। स्वार्थे कन्।) त्रिगर्त्तदेशः। इति त्रिकाण्डशेषः॥

त्रिगर्त्ता, स्त्री, (त्रयो गर्त्ता यस्याः।) घुर्घुरिका। (त्रयो बहवो गर्त्ता इव योनिद्वाराणि यस्याः।) कासकाङ्गना। इति मेदिनी। ते, ११३॥

त्रिगर्त्तिकः, पुं, (त्रयो गर्त्ताः सन्ति यत्र। त्रिगर्त्त + बहुलवचनात् ठन्।) त्रिगर्त्तदेशः। इति भूरिप्रयोगः॥

त्रिगुणं, क्ली, (त्रयाणां सत्त्वरजस्तमसां गुणानां समाहारः।) सत्त्वरजस्तमांसि। इति श्रीभागवतम्॥ (प्रधानम्। यथा, भागवते। ४। २४। २८।

"यः परं रहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात्।"

"रहसः क्षेत्रात् त्रिगुणात् प्रधानात् जीवसंज्ञितात् पुरुषाच्च परम्॥" इति तट्टीकायां स्वामी॥) त्रयाणां पूरणे गुणत्रययुक्ते च त्रि॥ (यथा, मनुः। १। १५।

"महान्तमेव चात्मानं सर्व्वाणि त्रिगुणानि च।
विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च॥"

त्रयो गुणा आवृत्तयो यस्य। त्रिभिर्गुणिते। यथा, रघुः। २। २५।

"सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य॥")

त्रिगुणा, स्त्री, (त्रयो गुणा यस्याः।) दुर्गा। यथा, देवीपुराणे ४५ अध्याये।

"पदेस्त्रिभिर्व्वलिर्बद्धो रागादित्रिपदाथ वा।
उत्पत्तिस्थितिनाशेषु रजादित्रिगुणा मता॥"

(तथाच देवीभागवते। १२। ६। ६५।

"त्रिगुणा त्रिपदा तन्त्रीसुलसी तरुणातरुः॥"

स्वनामख्यातो वीजभेदः। इति तन्त्रसारः॥)

त्रिगुणाकृतं, त्रि, (त्रिगुणं कर्णं कृतम्। त्रिगुण + कृतम्। "संख्यायाश्च गुणान्तायाः।" ५। ४। ५६। इति डाच्।) वारत्रयकृष्टचेलम्। इत्यमरः। २। ६। ६॥

त्रिजटा, स्त्री, (तिस्रो जटा यस्याः।) राक्षसीविशेषः। यथा,—

"सीतां ताभिरनार्य्याभिर्दृष्ट्वा सन्तर्ज्जितां तदा।
राक्षसी त्रिजटा दृष्ट्वा प्रबुद्धा वाक्यमब्रवीत्॥"

इति रामायणे सुन्दरकाण्डे २७ अध्यायः॥*॥

विष्णुदृष्टः। यथा, ज्ञानभैरवतन्त्रे ६ पटोले।

"शृणु देवि! प्रवक्ष्यामि रहस्यं त्रिजटोत्तमम्।
पत्रं ब्रह्ममयं देवि! चक्षुतं वरवर्णिनि!॥
श्रीवृक्षशिखरे जातः श्रीफलः श्रीनिकेतनः।
विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा॥
ब्रह्मविष्णुशिवाः यत्र तिष्ठन्ति शक्तिरूपिणी।
तत्पत्रे तु वरं स्यात् पत्रं ब्रह्म त्रिदं प्रिये!॥
एकञ्च त्रिजटापत्रैर्हरं वा हरिमर्च्चयेत्।
कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः॥"

अन्यत् विल्वशब्दे द्रष्टव्यम्॥ (भगवती। सा च गायत्रीस्वरूपा। यथा, देवीभागवते।१२।६।७२।

"त्रिजटा तित्तिरी ख्याता त्रिविधा तरुणाकृतिः॥")

त्रिजातकं, क्ली, (त्रिभिर्जातं जातं सुगन्धिद्रव्यरूपम्। ततः स्वार्थे कन्।) मिलिततुल्यत्वगेलापत्राणि। यथा,—

"एलादित्रिभिरुद्दिष्टं त्रिजातं त्रिसुगन्धिकम्।
चातुर्जातं सनागन्तु ह्यथ वातकफापहम्॥"

अपि च।

"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते॥"

इति राजनिर्घण्टः॥

(अस्य लक्षणपर्य्यायो यथा,—

"त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्।
तदर्द्धं रेचनं रूक्षं तीक्ष्णोष्णं सुखगन्धहृत्।
लघुपित्तास्रदाहघ्नं कफवातविषापहम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

त्रिदं, क्ली, (दम + दृषोदरादित्वात् साधुः।) दमम्। इति शब्दरत्नावली॥ (यथा, दम-शब्दद्युतपत्तौ उज्ज्वलदत्तः। ५। ८।

"रेफेकारसंयुक्तमद्युतपन्नं शब्दान्तरमस्ति।
'उत्तिष्ठप्रत्रिपत्रप्राप्तुविहगः सौम्यस्तनः
पूजितः।'

इति वराहः॥")

त्रिदता, स्त्री, (त्रिषु स्थानेषु दता। "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति षत्वम्।) धनुः। इति त्रिकाण्डशेषः॥ (यथा, माघे। १९। ६१।

"खगुणेरात्मफलप्राप्तेराक्षस्य गणिका इव।
कासका इव नालीकांस्त्रिदता सहसासृजन्॥"

त्रिदस्य भावः। त्रिद + तल्।) त्रिदत्वञ्च। (त्रिषु स्थानेषु दते, त्रि। यथा, रामायणे। ६। २०। २८।

"भिन्नसृष्टिपरिच्छिन्नं त्रिदतं रक्षरक्षितम्।
बाणपातान्तरे रामः पतितं पुरुषर्षभम्।
शयानं लक्ष्मणं दृष्ट्वा निराशो जीवितेऽभवत्॥")

त्रिणाचिकेतः, पुं, (त्रिश्चासौ चिकेतोऽग्निर्येन। पूर्व्वपदादिति णत्वम्।) यजुर्व्वेदैकदेशो ग्रन्थः। तदेदाध्यायी। (यथा, मनुः। ३। १८५।

"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्ण्णः षडङ्गवित्॥"

"त्रिणाचिकेतः अध्वर्य्युवेदभागस्तदुच्चारणात् पुरुषोऽपि त्रिणाचिकेतः॥" इति तट्टीकायां कुल्लूकभट्टः॥ नारायणस्य नामविशेषः। यथा, महाभारते १२। ३३८। ४।

"पञ्चाग्ने! त्रिणाचिकेत! षडङ्गनिधान!॥")

त्रितत्त्वं, क्ली स्त्री, त्रयाणां तत्त्वानां समाहारः। तत्त्वत्रयम्। इत्यमरः। ३। ५। ४१॥

त्रितयं, क्ली, (त्रयोऽवयवा अस्य। त्रि + "संख्याया अवयवे तयप्।" ५। २। ४२। इति तयप्।) त्रयम्। इति शाकरभाष्यम्॥ (यथा, महाभारते। १३। १११। १८।

"धर्म्मश्चार्थश्च कामश्च त्रितयं जीविते फलम्।
एतत्त्रयमवाप्नुवन्नधर्म्मपरिवर्জ্জितम्॥"

त्रिप्राकारे, त्रि। यथा, पद्मदशम्। १। ४६।

"त्रितयीमपि तां सृक्ष्मां परस्परविरोधिनीम्।
अखण्डं सच्चिदानन्दं महावाक्येन लक्षयते॥")

त्रिदण्डः, पुं, (त्रिदण्डं चतुरङ्गुलगोबालवेष्टनादन्योन्यसम्बन्धं अस्त्यस्येति। अर्शआदित्वादच्।) सन्न्यासाश्रमः। यथा,—

"यस्संयतषड्वर्गः प्रणष्टेन्द्रियसारथिः।
ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति॥"

इति श्रीभागवतम्॥

(त्रयाणां दण्डानां समाहारः। यतित्रिदण्डे, क्ली। यथा, महाभारते। १२। ३२०। १५५।

"सम्राड्ह्यस्य राज्यस्य त्रिदण्डस्येव तिष्ठतः।
अन्योन्यगुणयुक्तस्य कः केन गुणतोऽधिकः॥"

कायवाङ्मनोदण्डचये। यथा, मनुः। १२। ११।

"त्रिदण्डमेतन्निक्षिप्य सर्व्वभूतेषु मानवः।
कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति॥

"सत्त्वमात्मा शरीरञ्च त्रयमेतत्त्रिदण्डवत्।
लोकात्तिष्ठति संयोगात्तत्र सर्व्वं प्रतिष्ठितम्॥"

इति परके सूत्रस्थाने प्रथमेऽध्याये॥)

त्रिदण्डी, [न्] पुं, (त्रिदण्डमस्त्यस्येति। इनिः।) त्रिदण्डधारियतिः। (यथा, महाभारते। १२। ३२०। ८।

"तया जगदिदं कृत्स्नमटन्त्या मिथिलेश्वरः।
तत्र तत्र श्रुतो मोक्षे कथ्यमानस्त्रिदण्डिभिः॥")

कायवाङ्मनोदण्डयुक्तः। इति श्रीभागवतम्॥ (यथा, मनुः। १२। १०।

"वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च।
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते॥")

यज्ञोपवीतम्। इति लोकप्रसिद्धिः॥

त्रिदला, स्त्री, (त्रीणि त्रीणि दलानि पत्राणि यस्याः।) गोधापदी लता। इति जटाधरः॥

त्रिदलिका, स्त्री, (त्रीणि दलानि यस्याः। कापि अत इत्वम्।) चर्म्मकषा। इति शब्दचन्द्रिका॥

त्रिदशः, पुं, (तृतीय यौवनावस्था दशा यस्य। त्रिशब्दस्यात्र त्रिभागवतृतीयार्थकता। यद्वा, तिस्रो जन्मसत्त्वाविनाशाः। नतु मरणानामिव

दृद्धिपरिणामत्रयाख्याः दृशा यस्य। यद्वा, त्रीन् तापान् दृणति नाशयतीति। दृणश+मूलविभुजादित्वात् कः पृषोदरादित्वात् नलोपः। यद्वा, त्र्यधिकाखिराट्तत्त्वाच्च दृश परिमाणमस्य। समासे डच्। प्राकपार्थिवादिवत् मध्यलोपः।) देवः। इत्यमरः। १। १। ७॥ (यथा, महाभारते। ३।८५।१६।

"न्यवसत् परमप्रीतो ब्रह्मा च त्रिदृशैः सह॥"

ते च अर्का द्वादश १२ रुद्रा एकादश ११ वसवोऽष्टौ ८ विश्वेदेवौ द्वौ २ समुदायेन त्रयस्त्रिंशत् ३३॥ त्रिंशत् परिमिते, त्रि। यथा, महाभारते। १। ११३। २१।

"ततः स कौरवो राजा विहृत्य त्रिदृशा निशाः॥")

त्रिदृशदीर्घिका, स्त्री, (त्रिदृशानां देवानां दीर्घिका।) स्वर्गङ्गा। इति हेमचन्द्रः। ४। १४७॥

त्रिदृशमञ्जरी, स्त्री, (त्रिदृशप्रिया मञ्जरी यस्याः।) तुलसी। इति राजनिर्घण्टः॥ (तुलसीशब्देऽस्या गुणादयो व्याख्याताः॥)

त्रिदृशायुधं, क्ली, (त्रिदृशानां देवानां आयुधम्।) वज्रम्। इति त्रिकाण्डशेषः॥

त्रिदृशारिः, पुं, (त्रिदृशानामरिः शत्रुः।) असुरः। इति शब्दरत्नावली॥

त्रिदृशालयः, पुं, (त्रिदृशानां देवानां आलयः।) स्वर्गः। इत्यमरः। १। १। ६॥ (यथा, महाभारते। १। ७६। ६६।

"गुरोरन्य सकाशे तु दृशवर्षशतानि सः।
अनुज्ञातः कचो गन्तुमियेष त्रिदृशालयम्॥")

सुमेरुपर्व्वतः। इति हलायुधः॥

त्रिदृशावासः, पुं, (त्रिदृशानां सुराणां आवासो वासस्थानम्।) स्वर्गः। इति हलायुधः॥

त्रिदृशाहारः, पुं, (त्रिदृशानां आहारः।) अमृतम्। इति हलायुधः॥

त्रिदृशेश्वरी, स्त्री, (त्रिदृशानामिन्द्रादिदेवानामीश्वरी।) दुर्गा। यथा,—

"सुराङ्गनास्त्रिदृशा देवा नन्दिनी दुन्दुभिर्मता।
तेषाञ्च वन्दिनी नन्दी दृशत्वात् त्रिदृशेश्वरी॥"

इति देवीपुराणे ४५ अध्यायः॥

(गङ्गा। यथा, काशीखण्डे। २६। ७२।

"तपस्वी तीर्थतीर्था च त्रिपथा त्रिदृशेश्वरी॥")

त्रिदिनसृक्, [ज्] पुं, (त्रिदिनं चान्द्रदिनत्रयं सृजतीति। सृज्+क्विप्।) त्र्यहसर्ज्जः। यथा,

"तिथ्यन्तद्वयमेको दिनवारः सृजति यत्र तद्भवत्यवमदिनम्। त्रिदिनसृक् दिनत्रयसर्ज्जनादृक्षः।" इति ज्योतिषतत्त्वम्॥

त्रिदिवः, पुं, (त्रयो ब्रह्मविष्णुरुद्रा दीव्यन्त्यत्रेति। दिव+"हलश्च।" ३। २। १२१। इति घञ्। संज्ञापूर्व्वकत्वात् न गुणः। यद्वा, दीव्यन्तीति दिवाः। इगुपधज्ञेति कः। त्रयः सत्त्वरजस्तमोरूपाः दिवाः क्रीड़का विलासका इत्यर्थः यत्र।

"तृतीया द्यौस्त्रिदिवः। घनर्थे कविधानं इति विधये संख्याशब्दस्य पूरणार्थत्वं त्रिभागवत्।" इति श्रीभुपालवधटीकायां मल्लिनाथः। १। ३६।) स्वर्गः। इत्यमरः। १। १। ६॥ (यथा, मनुः। ६। २५३।

"रक्षणादार्य्यवृत्तानां कण्टकानाञ्च शोधनात्।
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः॥")

क्ली, आकाशः। इति हेमचन्द्रः॥

त्रिदिवा, स्त्री, नदीभेदः। इति मेदिनी। वे, ३७॥ (यथा, मत्स्यपुराणे। ११३। ३१।

"त्रिभामा ऋषिकुल्या च इक्षुदा त्रिदिवा-वला॥")

त्रिदिवेशः, पुं, (त्रिदिवस्य स्वर्गस्य ईशः।) देवः। इत्यमरः। १। १। ७॥

त्रिदिवोद्भवा, स्त्री, (त्रिदिवादुद्भवो यस्याः।) स्थलेला। इति राजनिर्घण्टः॥ (गङ्गा। स्वर्गोद्भवमात्रे, त्रि। इति व्युत्पत्तिलभ्योऽर्थः॥)

त्रिदृक्, [ग्] पुं, (तिस्रः दृशो नेत्राणि यस्य।) शिवः। इति हेमचन्द्रः। २। ११०॥

त्रिदोषं, क्ली, (त्रयाणां दोषाणां समाहारः।) दोषत्रयम्। वातपित्तकफरूपम्। इति राजनिर्घण्टः॥

त्रिदोषज्ञः, त्रि, (त्रिदोषाज्ञायते इति। ज्ञन+"प्रज्ञाश्रद्धाऽऽज्ञाऽऽतो।" ३। २। ६८। इति डः।) त्रिदोषजनितः। सन्निपातरोगः। यथा,—

"चिरज्वरे वातकफोल्बणे वा
त्रिदोषजे वा दृशमूलमिश्रः।
किराततिक्तादिगणः प्रगोण्यः
शुद्ध्यर्थिने वा त्रिवृता विमिश्रः॥"

इति चक्रपाणिदत्तः॥

("दृष्ट्वा त्रिदोषजं घोरं ज्वरं प्राणापहारकम्।
तस्मादादौ कफस्यास्य शोधनं परिकीर्त्तितम्॥
न कुर्य्यात् पित्तशमनं यदीच्छेदात्मनो यशः।
कफो वातो बलीयांसु सद्यो हन्ति रुजातुरम्॥
लङ्घनं वमनं वारि क्षौद्रं स्यात्त्रिदोषजे।
चिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा॥
लङ्घनञ्च समुद्दिष्टं ज्ञात्वा दोषबलाबलम्।
कफं विशोधितं ज्ञात्वा ततो वातनिवारणम्॥
पित्तसंशमनं कार्य्यं ज्ञात्वा पित्तस्य कोपनम्।
शोधनीयौ वातकफौ न तु पित्तं विनाशयेत्॥"
इति हारीते चिकित्सितस्थाने द्वितीयोऽध्याये॥)

त्रिधा, अ, (त्रि+"संख्याया विधार्थे धा।" ५। ३। ४२। इति धा।) त्रिप्रकारः। इति सुग्धबोधम्॥ यथा, वराहपुराणे।

"नारायणः परो देवः सत्त्वरूपो जगार्द्दनः।
त्रिधात्मानं स भगवान् ससर्ज्ज परमेश्वरः॥"
(यथा, महाभारते। १३। १४१। ७८।

"धर्म्मेणार्थः समाहार्य्यो धर्म्मलब्धं त्रिधा धनम्।
कर्त्तव्यं धर्म्मपरमं मानवेन प्रयत्नतः॥")

त्रिधातुः, पुं, (त्रीन् धर्म्मार्थकामान् दधाति पुष्णातीति। धा+तुन्।) शिवः। इति त्रिकाण्डशेषः॥ (त्रयाणां धातूनां समाहारः।) धातुत्रये, क्ली॥

त्रिधामा, [न्] पुं, (त्रीणि भूरादीनि सत्त्वादीनि वा धामानि स्थानानि यस्य।) विष्णुः। (यथा, मुकुन्दमालायाम्। ११।

"तृष्णातोये मदनपवनोद्धूतमोहोर्म्मिमाले
दारावर्त्ते सहजतनयग्राहसङ्घाकुले च।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्!
पादाम्भोजे वरद! भवतो भक्तिनावे प्रसीद॥")

शिवः। अग्निः। रत्नुः। इति शब्दार्थकल्पतरुः॥ (दशमद्वापरस्य व्यासः। यथा, देवीभागवते। १। ३। २८।

"खारस्वतस्तु नवमे त्रिधामा दशमे तथा॥")

धामत्रये, क्ली स्त्री च॥ (क्ली, स्वर्गः। यथा, भागवते। ३। २४। २०।

"हंसो हंसेन यानेन त्रिधाम परमं ययौ॥"

"त्रिधाम तृतीयं धाम स्वर्गः तस्य परां काष्ठां सत्यलोकम्॥" इति तट्टीकायां स्वामी॥)

त्रिधारकः, पुं, (त्रिस्रो धारा यस्य। ततः स्वार्थे संज्ञायां वा कन्।) गुग्गुलतृणम्। इति राजनिर्घण्टः॥ (त्रयाणां धारकाणां समाहारः।) धारकत्रये, क्ली॥

त्रिधारस्रुही, स्त्री, (त्रिस्रु भागेषु धारा यस्याः। सा एव स्रुही।) स्रुहीविशेषः। तत्पर्य्यायः। व्याघ्रः २ धारास्रुही ३। इति राजनिर्घण्टः॥

त्रिनयनः, पुं, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि नयनानि यस्य। "स्रुभ्रादिषु च।" ८। ४। ३६। इति निषेधात् न णत्वम्।) शिवः। इति हलायुधः॥ (यथा, महाभारते। १४। ८। २७।

"त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम्॥")

नयनत्रये, स्त्री॥ (लोचनत्रयविशिष्टे, त्रि। यथा, माढकासरस्वतीध्याने।

"सुप्रामोच्चयुगं सुधाढ्यकलसं विद्याक्ष हस्ताम्बुजे-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये॥")

त्रिनयना, स्त्री, (त्रीणि नयनानि यस्याः। टाप्।) दुर्गा। यथा, देवीपुराणे ४५ अध्याये।

"पश्चिमां चोत्तरं लोकं तथा ब्रह्मायनं परम्।
नयं धर्म्मार्थधर्म्मज्ञं दृष्ट्वा त्रिनयना मता॥"

त्रिनेत्रः, पुं, (त्रीणि नेत्राणि यस्य।) शिवः। यथा, नैषधे। १। ६।

"दिगीशदृन्दांशुविभूतिरोचिषा
दिशां स कामप्सरसावरोधिनीम्।
दधार प्राक्षाणि दृशं दृषाधिकां
निजत्रिनेत्रावतरत्सबोधिकाम्॥"

तस्य गणाः। यथा, मत्स्यपुराणे।

"ततः साध्यगणानीशस्त्रिनेत्रानहनत् पुनः।
कोटयश्चतुराशीतिर्नरामरगणर्जिताः॥
वामः स्कन्दमर्मज्ञांस्तान् ब्रह्मणा विनिवारितः।
नैवंविधा भवेत् सृष्टिर्ज्जरामरणवर्ज्जिता॥"

त्रिनेत्रचूड़ामणिः, पुं, (त्रिनेत्रस्य महादेवस्य चूड़ामणिः शिरोभूषणम्।) चन्द्रः। इति त्रिकाण्डशेषः॥

त्रिनेत्रा, स्त्री, (त्रीणि नेत्राण्येव शरीरे यस्याः।) वाराहीकन्दः। इति राजनिर्घण्टः॥ नेत्रत्रययुक्ता च॥

त्रिपताकं, क्ली, (तिस्रः पताका इव रेखा यत्र।) रेखात्रयाङ्कितभागम्। इति हारावली।१।१४॥ (तिस्रः पताका इव अङ्गुलयो यत्र। त्रिपताकलक्षणान्विते हस्ते, पुं। यथा, साहित्यदर्पणे। ६।१५४।

"त्रिपताकरेखात्रयानपवार्यान्तरा कथाम्।
अन्योन्यामन्त्रणं यत् स्यान्त्रजनान्ते तज्जनान्तिकम्॥"

"यः कश्चिदर्थो यस्माद् गोपनीयस्तस्यान्तरत एवं सर्वाङ्गुलिनामितागामिकं त्रिपताकलक्षणं करं ललाट्येन सह यत्रन्यस्यते तत्त्रजनान्तिकम्॥")

त्रिपत्रं, क्ली, (त्रीणि त्रीणि पत्राणि यत्र।) दलत्रययुक्तबिल्वपत्रम्। यथा,—

विष्णुरुवाच।

"ऊर्द्धपत्रं हरो ज्ञेयः पत्रं वामं विधिः स्वयम्।
अधः दक्षिणपत्रञ्च त्रिपत्रदलमिष्यते॥"

इति दृहद्धर्म्मपुराणे बिल्वपत्रमाहात्म्ये ११ अध्यायः॥

त्रिपत्रः, पुं, (त्रीणि त्रीणि पत्राणि यस्य।) बिल्वः। इति राजनिर्घण्टः॥ पत्रत्रये, स्त्री॥

त्रिपत्रकः, पुं, (त्रीणि त्रीणि पत्राणि यस्य।) पलाशवृक्षः। इति हेमचन्द्रः। ४।२०२॥ (त्रयाणां पत्राणां समाहारः। ततः कन्। तुलस्यादि पत्रत्रये, स्त्री। यथा, देवीपुराणे।

"तुलसीकुन्दमालूरपत्राण्याहुस्त्रिपत्रकम्॥")

त्रिपथं, क्ली, (त्रयाणां पथां समाहारः। "ऋक्पूरिति।"५।४।७४। टच्।) त्रिमार्गम। तेषामयं पथ इति भावः। ततष्ठञ्। त्रैपथिकम् २। इति हेमचन्द्रः। ४।५२॥

"शून्यागारे श्मशाने वा निर्जने वा चतुष्पथे।
बिल्वयात्रीद्भवस्तस्यात्त्रिपथे वा भजेन्निशि।
स भवेत् सर्व्वसिद्धीशः सर्व्ववेदविदां वरः॥"

इति गुप्तसाधनतन्त्रम्॥

(तिस्रां गाड़ीनां पन्थाः। इति विग्रहे कपालकुहरे, पुं। यथा, हठयोगप्रदीपिकायाम्।३।३७।

"कलां परादृसखीं कला त्रिपथे परियोजयेत्।
सा भवेत् खेचरी मुद्रा व्योमचक्रं तदुच्यते॥")

त्रिपथगा, स्त्री, (त्रिपथे स्वर्गमर्त्यपातालमार्गे गच्छतीति। गम+डः।) गङ्गा। इत्यमरः। १।१०।३१॥ (अस्या निरुक्तिरुक्ता यथा, रामायणे। १।४३।६।

"गङ्गा त्रिपथगा नाम दिवा भागीरथीति च।
त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता॥")

त्रिपदा, स्त्री, (त्रयः पादा मूलानि यस्याः। टापि पादस्य पद्भावः।) हंसपदीवृक्षः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—

"गोधापदी तु सुवहा त्रिपदा हंसपद्यपि॥"

इति वैद्यकरत्नमालायाम्।

(त्रयः पादाश्चरणानि यस्याः। त्रिपादयुक्ते, त्रि। यथा, मनुः। २।८१।

"ओङ्कारपूर्व्विकास्तिस्रो महाव्याहृतयोऽव्ययाः।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम्॥")

त्रिपदिका, स्त्री, (त्रयः पादा अस्याः इति त्रिपदी ततः संज्ञायां कन् ततष्टाप्।) अर्द्धार्थधातुनिर्म्मितत्रिपादयुक्तगृहाधारः। इति तन्त्रसारः॥ ("तत्र त्रिपदिकामारोप्य तदुपरि गृहं स्थापयेत्।" इति पूजापद्धतिः॥)

त्रिपदी, स्त्री, (त्रयः पादा अस्याः। ङीपि पद्भावः।) गोधापदी। इति रत्नमाला॥ हस्तिगात्रबन्धः। इति हेमचन्द्रः।४।२६६॥ (हस्तिपादबन्धनम्। इति यादवः॥ यथा, रघुः। ४।४८।

"नासयत् करिणां येवं त्रिपदीच्छेदिनामपि॥")

त्रिपादयुक्ता। पद्यत्रयम्। इति व्याकरणम्॥ भाषाकवितायाञ्छन्दोविशेषः। यथा,—

"षण्मात्रिकान्ता यदि यमकान्ता
द्वादश परिवर्त्तमात्रा।
किन्नरगीतिः तदिति निगीतिः
स्याद्देसमाचरणगात्रा॥"

स्यपादान्त उदाहृतः।

"येषा सङ्गीतके नित्यं निगीतिः किन्नराङ्गिका।
सैव स्यात् प्राकृते गाने त्रिपदीति परिश्रुता॥"

इति काव्योदयः॥

(त्रिषु मार्गेषु पादो गमनं यस्याः। गङ्गा। यथा, काशीखण्डे। २६।७६।

"त्रैलोक्यलक्ष्मीस्त्रिपदी तथा तिमिरचन्द्रिका॥")

त्रिपर्णः, पुं, (त्रीणि त्रीणि पर्णानि यस्य।) पलाशः। इति राजनिर्घण्टः॥

त्रिपर्णिका, स्त्री, (त्रीणि त्रीणि पर्णानि यस्याः। संज्ञायां कन्। टापि अत इत्वञ्च।) कन्दविशेषः। तत्पर्य्यायः। दृढत्वचा २ छिन्नग्रन्थिनिका ३ कन्दालुः ४ कन्दबल्ली ५ आम्रवल्ली ६ विनारुहा ७ त्रिपर्णी ८। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। श्वासकासविषव्रणविनाशित्वम्। पित्तप्रकोपशमनत्वञ्च। इति राजनिर्घण्टः॥

त्रिपर्णी, स्त्री, (त्रीणि त्रीणि पर्णानि यस्याः। गौरादित्वात् ङीष्।) शालपर्णी। इति भावप्रकाशः॥ (अस्या गुणा यथा,—

"यातुकः शालकल्याणी त्रिपर्णी पीलुपर्णिका।
शाकशूरश्च रूक्षश्च प्रायो विष्टम्भ जीर्य्यति।
मधुरं शीतवीर्य्यञ्च पुरीषस्य च भेदनम्॥"

इति चरके सूत्रस्थाने २७ अध्याये॥) वनकार्पासी। एतत्पर्य्यायभेदः। इति रत्नमाला॥

त्रिपात्, [द्] पुं, (त्रयः पादा अस्य। "संख्या सुपूर्व्वस्य।" ५।४।१४०। इति पादस्यान्तलोपः।) विष्णुः। इति त्रिकाण्डशेषः॥ (वेदादिमते संसाररहितो ब्रह्मस्वरूपः पुरुषः। यथा, ऋग्वेदे। १०।६०।४।

"त्रिपादूर्द्ध उदैत् पुरुषः पादोऽस्येहाभवत् पुनः॥"

पुराणादिमते वामनावतारे त्रिपात् भूत्वा बलिसकाशात् सर्व्वं राज्यादिकं गृहीतवानित्यसोऽस्य तथात्वम्। तथाच भागवते।८।२०।३६।

"क्षितिं पदैकेन बलेर्विचक्रमे
नभः शरीरेण दिशश्च बाहुभिः॥
पदं द्वितीयं क्रमतस्त्रिविष्टपं
न वै तृतीयाय तदीयमण्वपि।
उरक्रमस्याङ्घ्रिरुपर्य्युपर्य्यथो
महर्जनाभ्यां तपसः परं गतः॥")

ज्वरः। यथा,—

"विद्राविते भूतगणे ज्वरस्तु त्रिपिराक्षिपात्॥"

इति श्रीभागवतम्॥

त्रिपादिका, स्त्री, (त्रयः पादाः मूलानि यस्याः। कप् ततष्टापि अत इत्वम्।) हंसपदीलता। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—

"हंसपादी हंसपदी कीटमाता त्रिपादिका॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)

त्रिपिष्टपं, क्ली, (त्रिदशानां देवानां पिष्टपं वासस्थानम्। एषोदरादित्वात् दशब्दस्य लोपः। यद्वा, मर्त्यपातालापेक्षया तृतीयं पिष्टपम् भुवनम्। तृतौ त्रिशब्दस्य त्रिभागवत् पूरणार्थता।) स्वर्गः। इत्यमरः। १।१।६॥ (यथा, महाभारते। १।२०८।३५।

"ततः त्रिपिष्टपसङ्काशमिन्द्रप्रस्थं वरोचत॥")

आकाशम्। इति शब्दरत्नावली॥

त्रिपिष्टपसत्, [द्] पुं, (त्रिपिष्टपे स्वर्गे सीदतीति। सद+क्विप्।) देवता। इति हलायुधः॥

त्रिपुटः, पुं, (त्रीणि पुटानि यस्य।) सतीलकः। तीरम्। इति मेदिनी। के, ४५। इक्षुभेदः। तालकः। इति शब्दरत्नावली॥ गोक्षुरवृक्षः॥ इति रत्नमाला॥ (कलायविशेषः। खेसारी इति भाषा॥ अस्य पर्य्याया गुणाश्च यथा,—

"त्रिपुटः खञ्जिकोऽपि स्यात् कथ्यन्ते तद्गुणा अथ।

त्रिपुटो मधुरश्चिक्कस्तुवरो रूक्षको गुरुः॥
कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा।
किन्तु खञ्जलपङ्गुत्वकारी वातातिकोपनः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

"अन्यानि चैव शस्यानि कौलत्थान्युषितानि च।
मसूराश्चिपुटा वल्ल्यः कलायाद्याश्च वर्ज्जिताः॥"

इति हारीते प्रथमे स्थाने नवमोऽध्याये॥)

त्रिपुटा, स्त्री, (त्रीणि पुटानि दलवृत्तयो यस्याः।) मल्लिका। खूलेखा। त्रिवृत्। इति मेदिनी। के, ४५॥ कर्णस्फोटा। खूलेखा। रक्तत्रिवृत्। इति राजनिर्घण्टः॥ देवीविशेषः। यथा,—

"ऋषिः सम्मोहनश्छन्दो गायत्री देवता पुनः।
त्रिपुटाख्या द्विरक्तैस्तैर्व्वीजैरङ्गानि षट् क्रमात्॥"

अस्या रूपं यथा,—

"पारिजातवने रम्ये मरुपे मणिकुट्टिमे।
रत्नसिंहासने रम्ये पद्मे षट्कोणशोभिते॥
अधस्तात् कल्पवृक्षस्य निवसां देवतां स्मरेत्।

चापं पाशाम्बुजसरसिजान्यङ्कुशं पुष्पबाणान्
संबिभ्राणां करसरसिजै रत्नमौलिं त्रिनेत्राम्।
हेमाभाभां कुचभरनतां रत्नमञ्जीरकाञ्ची-
ग्रैवेयाद्यैर्विलसिततनुं भावयेच्छक्तिमाद्याम्॥
चामरादर्शताम्बूलकरङ्ककसङ्कान्।
वहन्तीभिः कुचार्त्ताभिर्भूतीभिः परिवारिताम्॥
कनद्वाग्भवबीजाद्या प्रज्ञप्तौ साधकं दृशा॥"

इति तन्त्रसारः॥

त्रिपुटी, [न्] पुं, (त्रिपुट इव आकारोऽस्यास्येति। त्रिपुट+इनिः।) एरण्डवृक्षः। इति शब्दमाला॥

त्रिपुटी, स्त्री, (त्रीणि पुटानि यस्याः। गौरादित्वात् ङीष्।) त्रिपुटा। इत्यमरटीकायां भरतः॥ (त्रयाणां ज्ञातृज्ञानज्ञेयरूपाणां पुटानामाकाराणां समाहारः। "द्विगोः।" इति ङीप्। ज्ञातृज्ञानज्ञेयरूपपुटत्रयम्। यथा, पञ्चदश्याम्। ११।१४।

"भूतोत्पत्तेः पुरा भूमा त्रिपुटीहेतवर्जनात्।
ज्ञातृज्ञानज्ञेयरूपा त्रिपुटी प्रलये हि नो॥")

त्रिपुटीपत्रः, पुं, (त्रिपुटी पुटत्रयं पत्रे यस्य।) एरण्डः। इति हारावली। १०८॥

त्रिपुरुषं, क्ली, (त्रयाणां पुरुषाणां रज्जुवदाकाराणां समाहारः।) भक्षादिक्षतकपालस्थतिर्यग्रेखात्रयम्। यथा,—

"विना भक्षत्रिपुरुषेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः॥
तस्मान्मृन्दापि कर्त्तव्यं ललाटेऽपि त्रिपुरुषकम्॥"

इति तिथ्यादितत्त्वम्॥

ब्रह्माण्डपुराणे।

"ऊर्द्धपुण्ड्रं सदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा।
तिलकं वै द्विजः कुर्य्यात् चन्दनेन यदृच्छया॥
ऊर्द्धपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियश्च त्रिपुण्ड्रकम्।
अर्द्धचन्द्रञ्च वैश्यश्च वर्त्तुलं शूद्रयोनिजः॥"

इत्याह्निकाचारतत्त्वम्॥

"शिवागमे दीक्षितेषु धार्य्यं तिर्यक्त्रिपुण्ड्रकम्।
विष्ण्वागमे दीक्षितस्तु ऊर्द्धपुण्ड्रं विधारयेत्॥"

इति नागोजीभट्टधृतसङ्गतिसंहिता॥

(यथा, शब्दचिन्तामणिधृतदेवीभागवतम्।

"येषां वपुर्मनुष्याणां त्रिपुण्ड्रेण विना स्थितम्।
श्मशानसदृशं तत् स्यान्न ग्रेह्यं पुण्यकर्म्मभिः॥"

"त्रिपुण्ड्रं ये विनिन्दन्ति निन्दन्ति शिवमेव ते।
धारयन्ति च ये भक्त्या धारयन्ति तमेव ते॥
तिर्य्यग्रेखा प्रदृश्यन्ते ललाटे सर्व्वदेहिनाम्।
तथापि मानवा मूर्खा न कुर्व्वन्ति त्रिपुण्ड्रकम्॥")

त्रिपुण्ड्रकं, क्ली, (त्रिपुण्ड्रमेव। स्वार्थे कः।) त्रिपुण्ड्रम्। यथा,—

"वक्त्रं ललाटगास्त्रिस्रो भस्मरेखास्त्रिपुण्ड्रकम्॥"

इति हारावली। ६२॥

त्रिपुरं, क्ली, (त्रयाणां पुराणां समाहारः। तद्धितार्थेति समासः। पात्रादित्वात् क्लीवत्वाभावः।) मयदानवनिर्म्मितं पुरत्रयम्। (यथा, महाभारते। ३। ४१। ३८।

"महात्मना शङ्करेण त्रिपुरं निहतं यदा।
तदेतदक्षं निर्म्मुक्तं येन दग्धा महासुराः॥")

पुरा असुरा देवैर्निर्जिताः सन्तो मायिनां परमाचार्य्यं मयं शरणमाययुः। स गगनागमने अदक्षा दुर्व्वितर्क्यपरिच्छदा हैमी रौप्यायसीति तिस्रः पुरो निर्म्माय तेभ्यो ददौ ते असुरास्ताभिः पुरीभिरलक्षिताः पूर्व्ववैरमनुस्मरन्तः सेश्वरान् त्रीन् लोकान् नाशयाञ्चक्रुरतः सेश्वरा लोका हरं उपासाञ्चक्रिरे। हरो मा भैरिति सुरानुचार्य्य धनुषि शरं सन्धाय पुरेषु असृजत्। तैः शरैः क्षुण्णाः पुरौकसोऽसुरा असवः सन्तो निपेतुः। महायोगी मयस्तानसुरानानीय त्रिपुरस्थितसिद्धामृतरसकूपेऽक्षिपत् तेऽसुरास्तद्रसं पीत्वा दृढशरीराः सन्त उत्तस्थुस्तदा विष्णुर्गौरिन्द्रा च वत्सो भूत्वा त्रिपुरं प्रविश्य रसकूपान्तर्तं पपौ असुरा विष्णुमायया मोहिताः सन्तो न व्यचेयन् तदा विष्णुः स्वाभिः शक्तिभिः शरमौर्य्यद्रोपकरणं रथसारथिधनुर्व्वाणादिकं ससर्ज। ततः शम्भुः सन्नद्धो रथमास्थाय शरमनुधि सन्धाय मध्याह्नकाले त्रिपुरं ददाह। इति श्रीभागवतम्॥ (त्रीणि पुराणि यस्येति विग्रहे त्रिपुरासुरे, पुं। यथा, महाभारते। ७। २००। ७६।

"आरुह्य स रथं दिव्यं सर्व्वदेवमयं शिवः।
त्रिपुरस्य वधार्थाय स्थाणुः प्रहर्त्तुं वरः॥")

त्रिपुरदहनः, पुं, (त्रिपुरं दहतीति। दह+ल्युः।) शिवः। इति हारावली। ८॥

त्रिपुरभैरवी, स्त्री, (त्रिपुरा धर्म्मार्थकामानां दात्री। सा चासौ भैरवी चेति।) देवीविशेषः। तन्मन्त्रादि यथा,—

"वैष्णवा मन्त्रसख्येषु त्रिपुरायास्तथा शृणु।
तस्यास्तु सर्व्वमन्त्राणि त्रयोदशयुतानि वै॥
विंशतिस्तु सहस्राणि तत्राद्यं वाग्भवं स्मृतम्।
द्वितीयं कामराजाख्यं मोहनञ्च तृतीयकम्॥
आग्नेयितं वाग्भवन्तु चतुर्थं परिकीर्त्तितम्।
नेत्रबीजं द्वितीयन्तु द्विरुक्तं वाग्भवं तथा॥
आद्यं तत् पञ्चमं प्रोक्तं चतुर्भिरपि चाक्षरैः।
नेत्रबीजं द्वितीयन्तु प्रथमं परिकीर्त्तितम्॥
द्वितीयं कामराजन्तु तृतीयं वाग्भवं तथा।
एभिस्त्रिभिश्च यन्मन्त्रं तत् षष्ठं परिकीर्त्तितम्॥
नेत्रबीजद्वितीयेन वाग्भवाद्येन सप्तमम्।
तदेव वाग्भवाद्यन्तु अष्टमं परिकीर्त्तितम्॥
वाग्भवं कामराजञ्चेत्ताभ्यां नवमं स्मृतम्।
कामराजं तथैवाद्यं द्वितीयञ्चैव मोहनम्॥
एकादशमिदं प्रोक्तं तदेवाद्यन्तु वाग्भवम्।
द्वादशं कीर्त्तितं मन्त्रं ग्रेवतस्त्रैपुरं महत्॥
तन्महत् त्रैपुरं मन्त्रं प्रज्ञप्तौ कमनाश्रितम्।
प्राणादिस्तस्य चाद्यादिर्द्विर्व्वाग्भवसंश्रितः॥
आद्यं त्रिपुरभैरव्या बीजमाद्यं प्रकीर्त्तितम्।
उपान्त्यश्च तदादिश्च वह्निः ग्रेवस्वरस्तथा॥
चतुर्थस्वरविन्दुस्थयुक्तश्चैतत् द्वितीयकम्।
उपान्त्यश्च तदादिश्च वह्निः ग्रेवस्वरस्तथा॥
समाग्निर्विन्दुसहिता संहितास्तु तृतीयकम्।
एतत्त्रयं विजानाति यो नरो भुवि भूमनि॥
सिद्धविद्याधरेभ्यश्च सोऽधिको मन्त्रयो महान्।
एतत्त्रयोदशं प्रोक्तं मन्त्रा मन्त्रेषु चोज्ज्वलाः॥
विंशतेस्तु सहस्रेभ्यः पराभ्यैते प्रकीर्त्तिताः।
विंशतेस्तु सहस्राणामाद्यमेतत् प्रकीर्त्तितम्॥"

तस्या ध्यानं यथा,—

"चतुर्भुजां रक्तवर्णां रक्तवस्त्रविभूषिताम्।
दधियोर्द्धे वामाधो विभ्रतीं पुस्तकोत्तमम्॥
अभयं वामहस्ताभ्यां वरञ्च दधतीं तथा।
सहस्रसूर्य्यसङ्काशां त्रिनेत्रां गजगामिनीम्॥
पीनोत्तुङ्गस्तनयुगां सितप्रेतासनस्थिताम्।
स्मितप्रभिन्नवदनां सर्व्वालङ्कारसंयुताम्॥
तिस्रभिर्मुण्डमालाभिः शिरोवक्षःकटीषु च।
त्रिगुणां त्रिगुणीभूतैः प्रत्येकं परिभूषिताम्॥
मदिरापूर्णनयनां रक्तदन्तच्छदद्वयाम्।
चिन्तयेद्वरदां देवीमेवं त्रिपुरभैरवीम्॥"

इति कालिकापुराणे ७७ अध्यायः॥

त्रिपुरमल्लिका, स्त्री, (त्रीणि पुराणि दग्धवत्तयो यस्याः। सा चासौ मल्लिका चेति।) पुष्पवृक्षविशेषः। त्रिपुरमालिका इति ख्याता। तत्पर्य्यायः। ग्रेष्मप्रा २। इति चिकित्सारत्नम्॥

त्रिपुरा, स्त्री, (त्रीन् धर्म्मार्थकामान् पुरति पूरयतीति। पूरयतेर्गमने ऋच अयदाने+"इगुपधज्ञेति।" ३।१।१३५। इति कः। ततष्टाप्।) देवीविशेषः। तन्मन्त्रध्यानादिकं यथा,—

"श्रुतं त्रिपुरामूर्त्तेः कामाख्यायास्तु पूजनम्।
एतस्या मूलमन्त्रस्तु पूर्व्वमुत्तरतन्त्रके॥
युवयोरिदयोः सम्यक् क्रमात्तु प्रतिपादितम्।
वाग्भवं कामराजन्तु डामरञ्चेति तत्त्रयम्॥
सर्व्वधर्म्मार्थकामादिसाधनं कूटजीयुतम्।
त्रीन् यस्मात् पूरयेत् दुर्गा ध्याता महेश्वरी॥
त्रिपुरेति ततः ख्याता कामाख्या कामरूपिणी।
तस्यास्तु स्थापनं यादृक् कामाख्यायाः प्रकीर्त्तितम्॥
तेनैव स्थापनं कुर्य्यात् मूलमन्त्रेण साधकः।
त्रिकोणं मण्डलं चास्यास्त्रिपुरस्तु त्रिरेखकम्॥
मन्त्रस्तु त्र्याक्षरं ग्रेयं तथा रूपत्रयं पुनः।
त्रिविधा कूटजीशक्तिस्त्रिदेवाश्च ईरिते॥
सर्व्वं त्रयं त्रयं यस्मात् तस्मात्तु त्रिपुरा मता॥"

दहनं प्रथमं कृत्वा आद्यां मूर्त्तिं विचिन्तयेत्।
त्रिधावर्त्याथ हृदये तां मूर्त्तिं ध्यायेद्भैरवि!॥
सिन्दूरपुञ्जसङ्काशां त्रिनेत्रान्तु चतुर्भुजाम्।
वामोर्द्धे पुस्तकोद्दण्डं दक्षाधः पुस्तकं तथा॥
दधियोर्द्धे पञ्चबाणानञ्चमालां दधाद्यधः।
चतुर्थां कुसुमापाशान्तु एष्ठेऽयं कुसुमाशरम्॥
विधाय तस्य एष्ठे तु धनुषादेन संस्थिताम्।
जटाजूटाहिचन्द्रैस्तु समायुक्तशिरोरुहाम्॥
नवीनयौवनभरैः भावमध्यां मनोहराम्।
सर्व्वालङ्कारसम्पूर्णां सम्भोगसुन्दरीं शुभाम्॥
सर्व्वविघ्नसमूहानां सर्व्वसत्त्वसमन्वितां।
एवन्तु प्रथमं ध्यात्वा त्रिधाह्वानञ्च चिन्तयेत्॥

द्वितीयं त्रिपुरारूपं तथैव तु तृतीयकम् ।
आवाहनार्थं देवास्तु चिन्तयेत् योनिमुद्रया ॥
वन्यकुसुमसङ्काशां जटाजूटेन्दुमण्डिताम् ।
सर्व्वलक्षणसम्पूर्णां सर्व्वालङ्कारभूषिताम् ॥
उद्यद्रविप्रख्यवस्त्रां पद्मपर्य्यङ्कसंस्थिताम् ।
मुक्ताहारावलीयुक्तां पीनोन्नतपयोधराम् ॥
बलीविभङ्गचतुरामसवामोदमोदिताम् ।
नेत्राब्जादकरीं शुद्धां क्षोभिणीं जगतां तथा ॥
त्रिनेत्रां योगनिद्रां यामीषद्धासससमायुताम् ।
नवयौवनसम्पन्नां नृत्यालाभचतुर्भुजाम् ॥
वामोर्द्ध पुस्तकं धत्ते अक्षमालान्तु दक्षिणे ।
वामेनाभयदां देवीं दक्षिणाधोवरप्रदाम् ॥
प्रसन्नवक्त्रसुश्यामां शिरोमालान्तु बिभ्रतीम् ।
आपादलम्बिनीं कल्पद्रुममासाद्य संस्थिताम् ॥
कदम्बोपवनान्तःस्थां कामाब्जादकरीं शुभाम् ।
द्वितीयां त्रिपुरां ध्यायेद्देवरूपां मनोहराम् ॥*॥
तृतीयं त्रिपुरारूपं शृणु वेतालभैरव ! ।
जवाकुसुमसङ्काशां मुक्तकेशीं वराननाम् ॥
सदाशिवं हसन्तन्तु प्रेतवह्निनिधाय वै ।
हृदये तस्य देवस्य शुद्धपद्मासनस्थिताम् ॥
रक्तोत्पलैर्मिश्रितान्तु सुरुमालां पदानुगाम् ।
ग्रीवायां धारयन्तीन्तु पीनोन्नतपयोधराम् ॥
चतुर्भुजां तथा नग्नां दक्षिणोर्द्ध्वक्षमालिनीम् ।
वरदां तदधो वामे जगन्मायां तथाभयम् ॥
अधस्तु पुस्तकं धत्ते त्रिनेत्रां हसिताननाम् ।
सर्व्वदुर्विणभोगाढ्यां तथा सर्व्वाङ्गसुन्दरीम् ॥
एवंविधं तृतीयन्तु रूपं ध्यायेत्तु पूजकः ।
आद्यन्तु वाग्भवं रूपं द्वितीयं कामराजकम् ॥
डामरं मोहनञ्चापि तृतीयं परिकीर्त्तितम् ।
एकैकन्तु त्रिरूपाणि प्राग्विचिन्त्याथ साधकः ॥
मन्त्रत्रयेण प्रत्येकं हृदि षोढ़ान्यसेत्तथा ।
पूजयेदुपचारैस्तु बहिर्यन्त्रे तथैव च ॥"

इति कालिकापुराणे ६२ अध्यायः ॥

(अस्याः बीजम् । "ह्सरैं" "ह्सकलरीं" "ह्सरौं" इति मन्त्रकोषः ॥ ऋग्वेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि । "सहोवाच श्रीरामः । ऐतरेयकौपीतकीनादबिन्दुतेजःप्रबोधनिर्व्वाणमुद्गलाक्षमालिकात्रिपुरासौभाग्यबह्वृचानाम्नवेदगतानां दशसंख्यकानामुपनिषदां वाङ्मे मनसीति शान्तिः ॥" नगरीविशेषः । यथा, महाभारते । ३ । २५३ । ६ ।

"मोहनं पत्तनञ्चैव त्रिपुरां कोशलां तथा ।
एतान् सर्व्वान् विनिर्जित्य करमादाय सर्व्वशः ॥")

त्रिपुरान्तकः, पुं, (त्रिपुरस्य अन्तकः ।) शिवः । इत्यमरः । १ । १ । ३५ ॥ (यथा, काशीखण्डे १०० अध्याये ।

"साङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् ॥"

तथाच महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे ।

"आशुतोषो मित्रमर्द्दी शत्रूणां त्रिपुरान्तकः ॥")

त्रिपुरी, स्त्री, देशविशेषः । त्रिपुरा इति ख्याता । तत्पर्य्यायः । मेदिनगरी २ । इति हेमचन्द्रः । ४ । ४१ ॥

त्रिपुषा, स्त्री, (त्रीन् वातादिदोषचयान् पुष्णातीति । पुष + कः । ततष्टाप् ।) ऋष्यजिह्वा । इति शब्दचन्द्रिका ॥

त्रिपृष्ठः, पुं, (त्रयो वंश्याः पृष्ठे पश्चिमप्रदेशेऽस्येति ।) राजभेदः । तत्पर्य्यायः । प्राजापत्यः २ । इति हेमचन्द्रः । ३ । ३५६ ॥

त्रिफला, स्त्री, (त्रयाणां फलानां समाहारः । अजादित्वात् "द्विगोः ।" ४ । १ । २१ । इति न ङीप् ।) मिलितसमभागहरीतकीविभीतकामलकीफलानि । तत्पर्य्यायः । त्रिफली २ फलत्रयम् ३ फलत्रिकम् ४ । इति राजनिर्घण्टः ॥ अस्या गुणाः । त्रिदोषनाशित्वम् । नात्युष्णत्वम् । मलभेदित्वञ्च । इति राजवल्लभः ॥ तन्नामगुणाः ।

"पथ्याविभीतधात्रीणां फलैः स्यात्त्रिफला समैः ।
फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्त्तिता ॥
त्रिफला कफपित्तघ्नी मेहकुष्ठहरा परा ।
चक्षुष्या दीपनी रक्ष्या विषमज्वरनाशिनी ॥"

इति भावप्रकाशः ॥

("हरीतक्याश्चामलक्या विभीतस्य फलस्तथा ।
त्रिफलेत्युच्यते वैद्यैर्वक्ष्यामि भागनिर्णयम् ॥
एकभागं हरीतक्या द्वौ भागौ च विभीतकम् ।
आमलक्यास्त्रिभागञ्च सहैकत्र प्रयोजयेत् ॥
त्रिफला कफपित्तघ्नी महाकुष्ठविनाशिनी ॥
आयुष्या दीपनी चैव चक्षुष्या व्रणशोधिनी ।
वशप्रदायिनी दृष्टा विषमज्वरनाशिनी ॥
सर्व्वरोगप्रशमनी मेधास्मृतिकरी परा ।
वक्ष्यामि योगयुक्तिञ्च रोगे रोगे पृथक् पृथक् ॥
वाते घृतगुडोपेता पित्ते समधुशर्करा ।
श्लेष्मणि त्रिकटूपेता मेहे समधुवारिणा ॥
कुष्ठे च घृतसंयुक्ता सैन्धवेनाग्निमान्द्यहा ।
चक्षुर्धावनके क्वाथो नेत्ररोगनिवारणः ॥
घृतेन हरते कण्डूं मातुलुङ्गरसैर्वमिम् ।
गुल्मार्शः शूलगुडैः सद्यः स्यादरुचकारकः ॥
क्षीरेण राजयक्ष्माणं पाण्डुरोगं गुडेन च ।
भृङ्गराजरसेनापि घृतेन सह योजितः ॥
बलीपलितहृन्नाम च तथा मेधाकरः स्मृतः ।
सक्षीरः सगुडः क्वाथो विषमज्वरनाशनः ॥
सशर्करो घृतक्वाथः सर्व्वजीर्णज्वरापहः ॥

एषा नराणां हितकारिणी च
सर्व्वप्रयोगे त्रिफला स्मृता च ।
सर्व्वामयानां शमनी च सद्यः
सतेजकान्तिं प्रतिमां करोति ॥
ग्रीथे तथा कामलपाण्डुरोगे
तथोदरे मूत्रयुता हिता च ।
हितातिसारे ग्रहणीविकारे
हिता च तक्रेण फलत्रिका च ॥
चक्षुरिन्द्रिये यक्ष्मणि जीर्णरोगे
क्षीरेण युक्ता त्रिफला हिता च ।
स्यान्नेत्ररोगे च शिरोगदे च
कुष्ठे च कण्डूव्रणपीड़िते च ।
मूत्रग्रहे कामलकेऽग्निमान्द्ये
हिता जलेन त्रिफला हि कल्कः ॥

स शीतकाले गुड़नागरेण
सशर्करा क्षीरयुता तथोष्णा ।
वर्षासु शुण्ठी सहिता नराणां
फलत्रिका सर्व्वरुजाहरा स्यात् ॥"

इति महर्ष्याचेयभाषिते हारीतोत्तरे कल्पस्थाने त्रिफलाकल्पोनाम द्वितीयोऽध्यायः ॥)

त्रिफली, स्त्री, त्रिफला । इति राजनिर्घण्टः ॥

त्रिवलीकं, क्ली, (तिस्रो वल्यो यत्र । कप् ।) आयुः । इति हेमचन्द्रः । ३ । २७६ ॥

त्रिभण्डी, स्त्री, (त्रीन् वातादिदोषान् भण्डति परिहसतीति । भण्ड परिहासे + अण् । ततो ङीप् ।) त्रिवृता । इत्यमरः । २ । ४ । १०८ ॥ (पर्य्यायोऽस्या यथा,—

"त्रिवृद्भण्डाक्षी सुवहा त्रिभण्डी त्रिपुटा च सा ।
व्याघ्रादनी कूटरुग्णा निःसृता त्रिवृता कथा ॥"

इति वैद्यकरत्नमालायाम् ॥

यथाच सुश्रुते चिकित्सितस्थाने । १७ ।

"श्यामा त्रिभण्डी त्रिफला सुसिद्धं
हरिद्रयो रोधकटुत्रयेण च ।
घृतं सदुग्धं त्रयतर्पणेन
हन्याद्दृगतिं कोष्ठगतापि या स्यात् ॥")

त्रिभद्रं, क्ली, (त्रिषु गवाश्वदन्तश्मश्रुमर्द्दनेष्वपि भद्रं यस्मिन् ।) सुरतम् । इति त्रिकाण्डशेषः ॥

त्रिभुवनं, क्ली, त्रयाणां भुवनानां समाहारः । (तद्धितार्थेत्यादिना समासः । पात्रादित्वात् न ङीप् । पां २ । ४ । १७ ।) त्रिलोकी । इति शाकरत्नम् ॥ (यथा, भागवते । ३ । ११ । ३० ।

"तावन्निभुवनं सद्यः कल्पान्तोधितसिन्धवः ।
प्लावयन्त्युत्कटाटोपचण्डवातेरितोर्म्मयः ॥")

त्रिमदः, पुं, (त्रयाणां मदानां समाहारः । अभिधानात् पुंस्त्वम् ।) सुश्रुताश्चक्षविड्रङ्गानि । इति वैद्यकम् ॥ (यथा, वैद्यकपरिभाषायाम् ।

विड्रङ्गसुश्रुताश्चक्ष त्रिमदः समुदाहृतः ॥"

त्रिगुणितो मदः । विद्याधनाभिजनोत्पन्नं गर्व्वत्रयम् । यथा, भागवते । ३ । १ । ४३ ।

"नूनं कृपायां त्रिमदोत्पथानां
महीं सुहृच्चालयतां चमूभिः ।
वधात् प्रपन्नार्त्तिजिहीर्षयेशो
युष्मेक्षतार्थं भगवान् कुरूणाम् ॥")

त्रिमधु, क्ली, (त्रयाणां मधूनां मधुराणां समाहारः ।) मिलितसितामाक्षिकसर्पींषि । तत्पर्य्यायः । मधुरत्रयम् २ मधुत्रयम् ३ । इति राजनिर्घण्टः ॥

त्रिमधुः, पुं, (मधुवाता ऋचादयस्त्रयो मधुशब्दा यत्र ।) ऋग्वेदैकदेशः । (यथा, ऋग्वेदे । १ । ९० । ६—८ ।

"मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥
मधुनक्तमुतोषसो मधुमत् पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्य्यः ।
माध्वीर्गावो भवन्तु नः ॥")

मधुवातादिऋक्त्रयवेत्ता। यथा,—
"त्रिनाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित्॥"
इति षड्लिंगपावनवर्णने मार्कण्डेयपुराणम्। ३१। २३॥ तद्व्रतस्थ। तद्व्रताचरणेन यस्तद्ध्यायी सोऽपि। इति विज्ञानेश्वरः॥ * ॥ आह्निकवारमधुग्रन्थोच्चारणविधिर्यथा,—
"गायत्रीं त्रिः सकृद्वापि जपेद्व्याहृति-
पूर्विकाम्।
मधुवाता इति ऋचं मध्वित्येतत् त्रिकं जपेत्॥"
इति आह्निकतत्त्वे मिताक्षराधृतपारस्करवचनम्॥)

त्रिमार्गी, स्त्री, त्रयाणां मार्गाणां समाहारः। त्रिपथम्। इति व्याकरणम्॥

त्रिमुकुटः, पुं, (त्रीणि मुकुटानीव शृङ्गाण्यस्य।) त्रिकूटपर्व्वतः। इति हेमचन्द्रः। ४। ६६॥

त्रिमुखः, पुं, (त्रीणि मुखानि यस्य।) वृद्ध-विशेषः। इति हेमचन्द्रः। १। ४१॥

त्रिमुखा, स्त्री, (त्रीणि मुखानि यस्याः।) वृद्ध-देवताभेदः। सा मायादेवी। तत्पर्य्यायः। मारीची २ वज्रकालिका ३ विकटा ४ वज्र-वाराही ५ गौरी ६ मौहिरथा ७। इति त्रिकाण्डशेषः॥

त्रिमूर्त्तिः, पुं, (तिस्रो मूर्त्तयो यस्य।) वृद्धः। इति त्रिकाण्डशेषः॥ त्रि, ब्रह्मविष्णुशिवात्मक-मूर्त्तित्रयवान्। यथा,—
"त्रिमूर्त्तेर्यः सर्गस्थितिविलयकर्म्माणि तनुते।"
इति गङ्गेशोपाध्यायः॥
(यथाच कुमारे। २। ४।
"नमस्त्रिमूर्त्तये तुभ्यं प्राक् सृष्टेः केवलात्मने॥")

त्रियष्टिः, पुं, (त्रिषु वातपित्तकफात्मकेषु दोषेषु यष्टिरिव तन्नाशकत्वात्।) वेत्रभण्टी। इति रत्नमाला॥

त्रियामकं, क्ली, (त्रीन् धर्म्मार्थकामरूपान् त्रिवर्गानपि यमयति नाशयतीति। यम+णिच्+ण्वुल्।) पापम्। इति शब्दमाला॥

त्रियामा, स्त्री, (त्रयो यामाः प्रहरा यस्याः।)
"त्रियामां रजनीं प्राहुस्तस्याद्यन्तचतुष्टयम्॥"
इति वचनात् आद्यन्तयोर्द्वयामयोर्वेधाकाल-त्वेन दिनप्रायत्वात् तथात्वम्।) रात्रिः। (यथा, हरिवंशे। १०२। २६।
"स मत्तो वलिनां श्रेष्ठो रराजाभूषितानन:।
ग्रैग्रिरीषु त्रियामासु यथा खेदालसः शशी॥"
त्रिप्रहरान्विते, त्रि। यथा, गोः रामायणे। २। १०। १७।
"त्रियामापि भृशार्त्तस्य सा रात्रिरभवत्तदा।
तथा विलपतस्तस्य राज्ञो वर्षशतोपमा॥")
हरिद्रा। इत्यमरः। २। ६। ४१॥ यमुना। नीली। क्षत्रचिरत्। इत्युणादिकोषः॥

त्रियुगः, पुं, (त्रीणि युगानि सत्यत्रेताद्वापर-रूपाणि आविर्भावकालोऽस्य।) विष्णुः। यथा, भागवते। ७। ६। ३८।
"इत्थं नृतिर्य्यगृषिदेवझषावतारै-
र्लोकान् विभावयसि हंसि जगत्प्रतीपान्।
धर्म्मं महापुरुष! पासि युगानुवृत्तं
छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम्॥"
"एकस्त्वमेव इत्यादिभिरृषिभिः शोकैर्यदुक्तं पक्ष-पातेन रहितं तद्विपक्षवधश्च सत्त्वोपाधितो न खत इति तदुपसंहरति इत्यमिति विभावयसि पालयसि हंसि घातयसि। कलौ तु तन्न करोषि यतस्तदा त्वं छन्नोऽभवः यतस्त्विष्वेव युगेष्वावि-र्भावात् स एवभूतस्त्वं त्रियुग इति प्रसिद्धः।" इति तट्टीकायां श्रीधरस्वामी॥ (तथाच तत्रैव। ३। २४। २६।
"स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम्।
विविक्त उपसंगम्य प्रणम्य समभाषत॥"
वसन्तप्राट्शरद्रूपकालत्रये, क्ली। यथा, वाज-सनेयसंहितायाम्। १२। ७५।
"या ओषधीः पूर्व्वाजाता देवेभ्यस्त्रियुगं पुरा॥"
"युगशब्दः कालवाची। त्रयाणां युगानां समा-हारस्त्रियुगं त्रिकालं वसन्ते प्राट्शरदि च।" इति तद्भाष्ये महीधरः॥ कृतत्रेताद्वापर-रूपयुगत्रयम्। इति ऋग्वेदस्य। १०। ६७। १। भाष्ये सायनः॥ षड्ऐश्वर्य्यशालिनि, त्रि। यथा, महाभारते। ३। ८६। ५।
"त्रियुगौ पुष्करीकाक्षौ वासुदेवधनञ्जयौ॥"
"त्रियुगौ धर्म्मस्य भार्य्यायां मूर्त्तिसंज्ञायां कृत-युगेऽवतीर्णौ नरनारायणौ तावेव द्वापरान्ते केशवार्জ্জुनौ इति पुराणपुरुषावेतौ नरसदादि-वन्मानुषाविति भावः। यद्वा, त्रीणि युगानि युगलानि षड्ऐश्वर्य्याणि भगसंज्ञानि वा षड्-ङ्गानि वा ययोस्तौ त्रियुगौ॥" इति तट्टी-कायां नीलकण्ठः॥)

त्रियूहः, पुं, कपिलाम्रः। इति हेमचन्द्रः॥ (यथा, अश्ववैद्यके। ३। १०२।
"नीलो नीलक एवाम्रस्त्रियूहः कपिलः
स्मृतः॥")

त्रिरात्रं, क्ली, रात्रित्रयम्। तिसृणां रात्रीणां समाहारः। इति लिङ्गादिसंग्रहटीकायां भरतः॥ (यथा, मनुः। ४। ११६।
"उपाकर्म्मणि चोत्सर्गे त्रिरात्रं शैषिकं
स्मृतम्।
अष्टकासु त्वहोरात्रमृष्यन्वष्टासु च रात्रिषु॥")

त्रिरेखः, पुं, (तिस्रो रेखा यत्र।) शङ्खः। इति हेमचन्द्रः। ४। २७२॥

त्रिलवणं, क्ली, (त्रयाणां लवणानां समाहारः। पात्रादित्वात् न ङीप्।) सैन्धवं विड्ं रुचकं मिलितैतत्त्रिलवणत्रयम्। इति राजनिर्घण्टः॥ ("सिन्धुसौवर्चलञ्चैव विड्ं सामुद्रमौद्भिदम्। एक-द्वि-त्रि-चतुः-पञ्च लवणानि क्रमादिह॥" इति वैद्यकपरिभाषा॥)

त्रिलोकी, स्त्री, त्रयाणां लोकानां समाहारः। ("द्विगोः।" ४। १। २१। इति ङीप्।) लोकत्रयम्। यथा, भूर्लोकः भुवर्लोकः स्वर्लो-कश्च। इति लिङ्गादिसंग्रहटीकायां भरतः॥ (यथा, भागवते। १। ५। ७।
"त्वं पर्य्यटन्नर्क इव त्रिलोकी-
मन्तश्चरो वायुरिवात्मसाक्षी॥")

त्रिलोकेशः, पुं, (त्रयाणां लोकानामीशः।) सूर्य्यः। इति शब्दचन्द्रिका॥ (विष्णुः। इति महा-भारते। १३। १४६। ८२।
"त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः॥"
"त्रयो लोकास्तदात्मानः स्वेषु स्वेषु कर्म्मसु वर्त्तन्त इति त्रिलोकेशः॥" इति शाङ्करभाष्यम्॥ महादेवः। यथा, महाभारते। १४। ८२७।
"त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम्॥"
त्रिलोकाधिपतौ, त्रि। यथा, तत्रैव। ३। ८४। ११७।
"अभिगम्य त्रिलोकेशं वरदं विष्णुमव्ययम्।
अश्वमेधमवाप्नोति विष्णुलोकञ्च गच्छति॥")

त्रिलोचनः, पुं, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि लोचनानि यस्य।) शिवः। इत्यमरः। १। १। ३४॥ (यथा, कुमारे। ५। ७२।
"वपुर्विरूपाक्षमलक्षणञ्च ता
दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद्बालमृगाङ्कशेखरे!
प्रलुप्यते तदस्ति किं यत्नमपि त्रिलोचने॥"
लोचनत्रयविशिष्टे, त्रि। यथा, माघे। १। ७०।
"स बाल आखीड्रपुरा चतुर्भुजो
सुखेन पूर्व्वेऽनिभत्रिलोचनः॥")

त्रिलोचना, स्त्री, (त्रीणि लोचनानि यस्याः।) वृद्धदेवीभेदः। इति त्रिकाण्डशेषः। दुर्गा च॥ (सा च गायत्रीस्वरूपिणी। यथा, देवीभाग-वते। १२। ६। ६७।
"त्रिकालज्ञानसम्पन्ना त्रिवली च त्रिलोचना॥")

त्रिलोचनाष्टमी, स्त्री, (त्रिलोचनाय त्र्यम्बक-पूजायै या अष्टमी।) गौणचान्द्रज्येष्ठशुक्लाष्ट-मी। यथा,—
"ज्येष्ठे मासि नृपश्रेष्ठ! शुक्लाष्टम्यां त्रिलोचनम्।
यः पूजयति देवेशमीशलोकं स गच्छति॥"
इति संवत्सरकौमुदीधृतभविष्यपुराणवचनम्॥ अपि च।
"ज्येष्ठे माससिते पक्षे अष्टम्यान्तु महेश्वरि!।
शिवार्च्चने च तल्लोकं लभते नात्र संशयः॥"
इत्युत्तरकामाख्यातन्त्रे ११ पटलः॥

त्रिलोचनी, स्त्री, (त्रीणि लोचनानि यस्याः।) दुर्गा। इति पुराणम्॥

त्रिलोहकं, क्ली, (त्रयाणां लोहकानां समाहारः।) सुवर्णं रजतं ताम्रं एतद्धातुत्रयम्। इति राज-निर्घण्टः॥

त्रिलौही, स्त्री, (त्रीणि लौहानि साधनत्वेना-स्त्यस्याः। अर्श। गौरादित्वात् ङीष्।) मुद्राविशेषः। यथा, अथ मन्त्रिणां हितार्थाय त्रिलौही मुद्रा निरूप्यते।
"सोमसूर्य्याग्निरूपाः स्युर्वर्णा लौहत्रयं तया।
रौप्यमिन्दुः स्मृतो हेम सूर्य्यस्तान्त्रो हुताशनः॥
लौहभागाः समुद्दिष्टाः खराद्यष्टरसंख्यया।

तैलौंघैः कारयेन्मुद्रामसङ्कलितसङ्गताम् ॥
एते स्वराः स्मृताः सौम्याः सप्तार्णाः सौराः
शुभोदयाः ।
आग्नेया वापकाः सर्व्वे सोमसूर्य्याग्निदेवताः ॥
स्वराः षोड़श विख्याताः सप्तार्णास्ते पञ्चविंशतिः ।
वापका दश ते कामधनधर्म्मप्रदायिनः ॥
साष्टं सहस्रं संजप्य सृष्ट्वा तां जुहुयात्ततः ।
तस्यां सम्पातयेन्नाम्नी सर्पिषा पूर्व्वसंख्यया ॥
निःक्षिप्य कुम्भे तां सुद्रामभिषेकोक्तवर्त्मना ।
आवाह्य पूजयेद्देवीमुपचारैर्विधानतः ॥
अभिषिच्य विनीताय दद्यात्तां सुद्रिकां गुरुः ।
इयं मुद्रा क्षुद्ररोगविषज्वरविनाशिनी ॥
बालचौरग्रहादिभ्यो रक्षां कुर्य्याद्विशेषतः ।
युद्धे विजयमाप्नोति धारयन् मनुजेश्वरः ॥
मन्त्रसिद्धिकरी पुंसां चतुर्व्वर्गफलप्रदा ।
धारयन्मनुजो नित्यं देवतुल्यो भवेद्भुवि ॥”
इति तन्त्रसारः ॥

त्रिवर्गः, पुं, (त्रयाणां वर्गः समूहः ।) धर्म्मकामार्थाः । इत्यमरः । २ । ७ । ५८ ॥ (यथा, महाभारते । १ । १८१ । ३ ।
“यो हि कारणतः क्रोधं संजातं चन्तुमर्हति ।
नालं स मनुजः सम्यक् त्रिवर्गं परिरक्षितुम् ॥”)
त्रिफला । त्रिकटु । (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये ।
“भागान् दशैतान् विपचेद्विधिज्ञो
दत्त्वा त्रिवर्गं मधुरञ्च ऋतुस्थम् ॥”)
दृष्टिस्थानत्रयाः । (यथा, महाभारते । १२ । ६६ । ६६ ।
“त्रिवर्गेऽपि यः प्रोक्तस्त्रिभिरेकमनाः शृणु ।
त्रयः स्थानेषु दृष्टिश्च त्रिवर्गः परमक्षया ॥”)
सत्त्वरजस्तमांसि । इति मेदिनी । गे, ३७ ॥
सुनीतिः । इति शब्दरत्नावली ॥

त्रिवर्षकं, क्ली, (त्रयो वर्षाः सन्त्यवयवादौ यस्य । कप् ।) गोक्षुरकः । त्रिफला । (यथा, सुश्रुते । १ । ४४ ।
“त्रिवर्षकचूर्णयुक्तमेतद्
गुड़ेन लिह्यादनुवेन चूर्णम् ॥”)
त्रिकटु । इति मेदिनी । के, १६२ । (ब्राह्मणादिवर्णत्रये, श्यामारक्तपीतालके वर्णत्रये च ॥)

त्रिवर्षिका, स्त्री, (त्रीणि वर्षाणि वयो यस्याः सा त्रिवर्षा । ततः स्वार्थे कन् । टापि अत इत्वञ्च ।) त्रिवायवी । त्रिवर्षा गौः । इति हेमचन्द्रः । ४ । ३३८ ॥

त्रिवलिः, स्त्री, (त्रिभुवित्रा वलिश्चक्षरङ्गः ।) जठरावयवविशेषः । (यथा, देवीभागवते । ५ । ८ । ७१ ।
“ऐन्द्रेणाङ्गुलमानेन मध्यं यातं त्रिवलिसंयुतम् ॥”
ह्रदिकारादिति पक्षे ङीपि त्रिवलीत्यपि ।) यथा,
“त्रिवलीवलयोपेताम् ॥”
इति जगद्धात्रीध्यानम् ॥

त्रिविक्रमः, पुं, (त्रीन् लोकान् विशेषेण क्रामति व्याप्नोतीति । वि + क्रमं + अच् । यद्वा, त्रिषु लोकेषु बलिबन्धनार्थं भूयोभूयर्गेषु क्रमः प्रादन्यासो यस्य ।) विष्णुः । इत्यमरः । १ । १ । २० ॥ (यथा, महाभारते । १३ । १४६ । ६६ ।
“आनन्दो नन्दनो नन्दः सत्यधर्म्मत्रिविक्रमः ॥”
“त्रयो विक्रमाश्चित्रेषु लोकेषु यस्य स त्रिविक्रमः ।
‘त्रीणि पदानि विचक्रमे’ इति श्रुतेः ।
‘त्रिरित्थं त्रयो लोकाः कीर्त्तिता मुनिसत्तमैः ।
विक्रामंस्तु ततः सर्व्वांस्त्रिविक्रमोऽसि जगार्द्दन ॥’
इति हरिवंशे ॥” इति शाङ्करभाष्यम् ॥)
त्रिविष्टपं, क्ली, (त्रयीयं विष्टपं भुवनम् ।) त्रिपिष्टपम् । स्वर्गः । इत्यमरटीकायां स्वामी ॥ (यथा, रामायणे । २ । १०८ । ६ ।
“विहर त्वमयोध्यायां यथा शक्रस्त्रिविष्टपे ॥”)
त्रिभुवनञ्च ॥

त्रिविष्टपसत्, [द्] पुं, (त्रिविष्टपे स्वर्गे सीदतीति । सद् + क्विप् ।) त्रिपिष्टपसत् । (देवः ।) इति हलायुधः ॥

त्रिवीजः, पुं, (त्रीणि त्रीणि बीजानि यस्य ।) श्यामाकः । इति राजनिर्घण्टः ॥

त्रिवृत्, स्त्री, (त्रीण्यवयवान् वृणोतीति । वृ + क्विप् तुक् च ।) लताविशेषः । तेउड़ी इति भाषा । तत्पर्य्यायः । सर्व्वानुभूतिः २ सुवहा ३ त्रिपुटा ४ त्रिवृता ५ त्रिभण्डी ६ रेचनी ७ । इत्यमरः । २ । ४ । १०८ ॥ सवहा ८ सरणा ९ सरसा १० त्रिपुटी ११ रोचनी १२ । एते त्रिवृता सामान्ये शुक्लत्रिवृतायामिति केचित् । इति भरतः ॥ मालविका १३ मस्करी १४ श्यामा १५ अर्द्धचन्द्रा १६ विदला १७ सुषेणी १८ कालिङ्गिकम् १९ कालमेघी २० कालो २१ त्रिवेला २२ त्रिवृत्तिका २३ । इति राजनिर्घण्टः ॥ श्वेता २४ सारा २५ । इति शब्दरत्नावली ॥
श्यामायाः पर्य्यायः । श्यामा १ पालिन्दी २ सुषेणिका ३ काला ४ मस्करविदला ५ अर्द्धचन्द्रा ६ कालमेघिका ७ । इत्यमरः । २ । ४ । १०८ ॥ पालिन्दी ८ कालमेघिका ९ । इति भरतः ॥ श्वेतायाः पर्य्यायः । त्रिवृत् १ रुक्काची २ सुवहा ३ त्रिभण्डी ४ त्रिपुटा ५ ॥ अरुणायाः पर्य्यायः । व्याघ्रादनी १ कुटरुहा २ निःस्फुटा ३ त्रिवृता ४ अरुणा ५ । इति रत्नमाला ॥ सामान्यत्रिवृतागुणाः । कटुत्वम् । उष्णत्वम् । श्लेष्मश्लेष्मोदरार्त्तिकुष्ठकण्डूव्रणगरानिलम् । विरेचने प्रशस्तत्वञ्च । इति राजनिर्घण्टः ॥ अरुणवर्णत्रिवृद्गुणाः । स्वादुत्वम् । कषायत्वम् । मृदुत्वम् । रेचनत्वम् । रूक्षत्वम् । कटुत्वम् । दोषपाके पित्तकफापहत्वञ्च ॥ अन्यान्यवर्णान्तरगुणा विज्ञेया त्रिवृता सिता । इति राजवल्लभः ॥
श्वेतत्रिवृद्गुणाः । विरेचनत्वम् । स्वादुत्वम् । उष्णत्वम् । वायुकारित्वम् । रूक्षत्वम् । पित्तज्वरश्लेष्मपित्तशोफोदरापहत्वञ्च ॥ कृष्णत्रिवृतागुणाः । श्वेतात्रीगुणत्वम् । तीव्रत्वम् । विरेचनत्वम् । मूर्च्छादाहमदश्रान्तिकफशोफकर्षणकारित्वञ्च । इति भावप्रकाशः ॥ (त्रिभिर्युक्ते, त्रि । यथा, ऋग्वेदे । १ । ३४ । ६ ।
“क्व त्री चक्रा त्रिवृतो रथस्य ॥”
यथा च मनुः । २ । ४२ ।
“मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ॥”)

त्रिवृत्करणं, क्ली, (त्रिवृतस्त्रयवयवस्य करणं मिश्रीकरणम् ।) त्रिद्रव्यतैजसानां मिश्रीकरणम् । यथा, “तेजोजलक्षितिमयः प्रत्येकं द्वेधा विभज्य एकस्मिन्नर्द्धे खेतरयोरर्द्धार्द्धं प्रक्षिपेत् ।” इति मोक्षधर्म्मटीकायां नीलकण्ठः ॥

त्रिवृत्पर्णी, स्त्री, (त्रीन् दोषान् नाशयत्येन वृणोति प्राप्नोतीति त्रिवृत् त्रिदोषघ्नम् । त्रिवृत् पर्णं यस्याः । ङीप् ।) हिलमोचिका । इति शब्दचन्द्रिका ॥ (हिलमोचिकाशब्दे विवृतिरस्मा ज्ञेया ॥)

त्रिवृता, स्त्री, (त्रिभिरवयवैर्वृता ।) त्रिवृत् । इत्यमरः । २ । ४ । १०८ ॥ (अस्याः पर्य्यायो यथा,—
“त्रिभण्डी त्रिवृता श्यामा सुरभा कोटरा तथा ।
सर्व्वानुभूतिः सुवहा शब्दैः पर्य्यायवाचकैः ॥”
“त्रयश्चं त्रिफला हिङ्गु कार्षिकं त्रिवृतारसम् ।
सौवर्च्चलार्द्धकर्षञ्च पलार्द्धं चाज्यवेतसात् ॥
तद्भूर्ं शर्करायुक्तं मद्येनाक्षेन वा पिबेत् ।
गुल्मपार्श्वार्त्तिजुत् स्निग्धं जीर्णे चाद्याद्यवौदनम् ॥”
“तुल्याभं त्रिवृताकल्कं स्निग्धं गुल्महरं घृतम् ।
मूलं श्यामात्रिवृतयोः पचेदामलकैः सह ।
जले तेन कषायेण पक्त्वा सर्पिः पिबेन्नरः ॥”
इति चरके कल्पस्थाने सप्तमेऽध्याये ॥)

त्रिवेणी, स्त्री, (तिस्रो वेणयः वारिप्रवाहा वियुक्ताः संयुक्ता वा यत्र ।) स्थानविशेषः । यत्र गङ्गया यमुनासरस्वत्योर्वियोगः । सा दक्षिणप्रयागः । तस्य सीमानिर्णयः । यथा,—
“प्रद्युम्नस्य हृदात् याम्ये सरस्वत्यास्तथोत्तरे ।
तद्दक्षिणप्रयागस्तु गङ्गातो यमुना मता ॥”
इति प्रायश्चित्ततत्त्वम् ॥
इयं मुक्तवेणीति कथ्यते । प्रयागे युक्तवेणी ॥ (अत्र गङ्गया यमुनासरस्वत्योः सङ्गमात् ॥॥ हठयोगोक्तक्रियाविशेषजलासुषुम्नाकल्पपरिभाषिकनदीत्रयसङ्गमस्थानम् । यथा, हठयोगप्रदीपिकायाम् । ३ । २४ ।
“कालपाशमहाबन्धविमोचनविचक्षणः ।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः ॥”
इदन्तत्वादुत्वे ङीवित्यपि त्रिवेणिरपि पाठः ॥)

त्रिवेला, स्त्री, (तिस्रो वेला अवयवसीमानो यस्याः ।) त्रिवृत् । इति राजनिर्घण्टः ॥

त्रिशङ्कुः, पुं, (त्रीणि शङ्कूनि यतिक्रमणानि यस्य ।) सूर्य्यवंशीयराजविशेषः । स तु इक्ष्वाकुवंशीयबृहदश्वराजपुत्रः । (अस्य नामनिरुक्तिर्यथा, हरिवंशे । १३ । १६ ।
“एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महायशाः ।
त्रिशङ्कुरिति होवाच त्रिशङ्कुरिति स स्मृतः ॥”)

एव वशिष्ठमाह अहं सशरीरेण स्वर्गं गन्तुं यजेयं वशिष्ठ एतदशक्यमित्याह ततो राजा तस्य पुत्रानुवाच सशरीरो यज्ञेन स्वर्गं यथाभ्रुवं तथा कुरुत यदि भवद्भिः परित्यक्तस्तदान्यं गुरुसपाश्रियेयं वशिष्ठपुत्रास्तच्छ्रुत्वा राजानमब्रुवंश्चिरो भगवान् अशक्यमिति यत् प्राह तदस्माभिः कथं शक्यम् । राजोवाच यदुमन्यां गतिं गमिष्यामि तच्छ्रुत्वा ऋषिपुत्रा राजानं शेपुः श्वचाण्डालो भविष्यसि । ततस्तस्यां रात्र्यामतीतायां स चाण्डालदर्शनो भूत्वा विश्वामित्रं शरण्यमाययौ विश्वामित्रस्तं दृष्ट्वेव यागयाभास तस्मिन् यज्ञे देवा भागार्थं नागच्छन् ततो विश्वामित्रः क्रोधात् राजानमब्रवीत् मया वाक्यात् प्रभृति यत्तपः कृतं तेन त्वं दिवं व्रज तदा राजा सशरीरो दिवं ययौ । तदा शक्रस्तमुवाच त्रिशङ्को ! त्वं भूमौ पत ततोऽवाक्शिराः पतन् राजा पाहीति विश्वामित्रमुवाच विश्वामित्रस्तिष्ठेति तस्तम्भ स्वर्गदत्रिधमार्गेऽपरान् सप्तर्षीन् सृष्ट्वापरं नक्षत्रचक्रं सप्तसप्तकमे देवाः सम्भ्रान्ता ऋषिमुपुरथं सशरीरः स्वर्गं गन्तुं नार्हेति विश्वामित्रस्तानुवाच अहमस्य स्वर्गारोहणं प्रतिज्ञाय कथमनृतं करिष्यामि अतो यावल्लोकाः स्थास्यन्ति तावदस्मिन् नक्षत्रायणे च तिष्ठन्तु त्रिशङ्करप्यवाक्शिरास्तिष्ठतु । इति रामायणम् ॥ * ॥ विड़ालः । शलभः । इति मेदिनी । के, १०१ ॥ चातकपक्षी । इति शब्दरत्नावली ॥ खद्योतः । इति शब्दमाला ॥ (महादेवः । यथा, महाभारते । १३ । १७ । १०२ ।
"अनेकपाश्च कापाली त्रिशङ्करजितः शिवः ॥")

त्रिशङ्कुजः, पुं, (त्रिशङ्कोर्जायते इति । जन + डः ।) हरिश्चन्द्रराजः । इति हेमचन्द्रः । ३ । ३६५ ॥

त्रिशङ्कुयाजी, [न्] पुं, (त्रिशङ्कुं स्वर्गं यः शरीरराजविशेषं याजयतीति । यज + णिच् + णिनिः ।) विश्वामित्रः । इति हेमचन्द्रः । ३ । ५१४ ॥

त्रिशरणः, पुं, (त्रीणि शरणान्यस्येति ।) जिनः । इति त्रिकाण्डशेषः ॥

त्रिशर्करा, स्त्री, (त्रिभिर्गुणिता शर्करा । शाकपार्थिवादित्वात् समासः ।) मिलितगुड़ोत्पन्ना हिमोत्था मधुरा । इति राजनिर्घण्टः ॥

त्रिशला, स्त्री, (तिस्रः शाला यस्याः । पृषोदरादित्वात् साधुः ।) इक्ष्वाकुभूपालविशेषः । सा वर्द्धमानमाता । इति हेमचन्द्रः । १ । ४१ ॥

त्रिशाखपत्रः, पुं, (त्रिशाखं त्रिदलं पत्रमस्य ।) बिल्वः । इति राजनिर्घण्टः ॥

त्रिशिखं, क्ली, (तिस्रः शिखा यस्य ।) त्रिशूलम् । किरीटम् । इति हेमचन्द्रः ॥

त्रिशिखः, पुं, (तिस्रः शिखा अस्य ।) राक्षसविशेषः । स रावणपुत्रः । इति हेमचन्द्रः ॥ बिल्वः । इति राजनिर्घण्टः ॥ (तामसमन्वन्तरस्य इन्द्रः । यथा, भागवते । ८ । १ । २८ ।
"सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ।
ज्योतिर्धामादयः सप्त ऋषयस्तामसेऽन्तरे ॥"

त्रिशिखाश्रययुक्ते, त्रि, । यथा, महाभारते । २ । ४२ । ११ ।
"त्रिशिखां भ्रुकुटीञ्चास्य ददृशुः सर्व्वपार्थिवाः ।
ललाटस्थां त्रिकूटस्थां गङ्गां त्रिपथगामिव ॥")

त्रिशिखिदशा, स्त्री, (तिस्रः शिखाः सन्त्यस्येति इनिः । त्रिशिखिनि दलं अस्याः ।) मालाकन्दः । इति राजनिर्घण्टः ॥

त्रिशिराः, [स्] पुं, (त्रीणि शिरांसि मस्तकानि यस्येति ।) कुबेरः । इति हेमचन्द्रः । २ । १०३ ॥ खरः । यथा,—
"त्रिशिरास्ते प्रयच्छेऽहं येतु ते मच्चराङ्गयम् ॥"
इति श्रीभागवतम् ॥
रावणपुत्रविशेषः । (यथा, रामायणे । ६ । १२५ । ६ ।
"अकम्पनश्च निहतो बलिनोऽन्ये च राक्षसाः ।
त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ ॥")
खरसेनापतिः । इति रामायणम् ॥ (यथा, रघुवंशे । १२ । ४७ ।
"तं शरैः प्रतिजग्राह खरत्रिशिरसौ च सः ॥"
खगामखातरक्षुः प्रजापतेः पुत्रः । यथा, महाभारते । ५ । ६ । २ ।
"त्वष्टा प्रजापतिर्य्योसौ देवश्रेष्ठो महातपाः ।
सपुत्रं वै त्रिशिरसमिन्द्रद्रोहात् किलाहनत् ॥"
असुरविशेषः । यथा, तत्रैव । ६ । ३१ । १२ ।
"वातापिरिल्वलश्चैव त्रिशिराश्च तथा विभो ॥"
शिखात्रयविशिष्टे, त्रि । यथा, तत्रैव । २६ । १४७ । ५४ ।
"त्रिशिराश्चास्य देवस्य शातकुम्भमयो द्रुमः ।
ध्वजस्तृणेन्द्रो देवस्य भविष्यति रथाश्रितः ॥")

त्रिशीर्षकं, क्ली, (त्रीणि शीर्षाणि यस्य । कप् ।) त्रिशूलम् । इति हेमचन्द्रः । ३ । ४५१ ॥

त्रिशूलं, क्ली, (त्रीणि शूलानि इव अस्याणि यस्य ।) अस्त्रविशेषः । तत्पर्य्यायः । त्रिशिखम् २ । इति मेदिनी । खे, ६ ॥ शूलम् ३ त्रिशीर्षकम् ४ । इति हेमचन्द्रः ॥ (यथा, महाभारते । २ । ३० । ४६ ।
"चक्राणि परिघाश्चैव त्रिशूलानि परश्वधान् ॥")

त्रिशूली, [न्] पुं, (त्रिशूलमस्त्रमस्यास्येति । त्रिशूल + इनिः ।) शिवः । यथा,—
"त्र्यक्षो भैद्यस्त्रिशूली च दृषकेतुर्महाबलः ॥"
इति स्कन्दपुराणे नीलकण्ठस्तवः ॥
(त्रिशूलधारिणि, त्रि । स्त्रियां ङीप् । यथा, हरिवंशे । १६१ । ११ ।
"त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम् ॥")

त्रिशृङ्गः, पुं, (त्रीणि शृङ्गाणि यस्य ।) त्रिकूटपर्व्वतः । इति शब्दरत्नावली ॥ (यथा, ब्रह्माण्डे । ३६ । १२ ।
"त्रिशृङ्गो जरधिश्चैव पर्व्वतावुत्तरौ वरौ ॥")
त्रिकोणः । यथा, कुरङ्गेण हीनस्त्रिशृङ्गस्तदन्त-रिति सारसमुच्चयः ॥

त्रिशृङ्गी, [न्] पुं, (त्रीणि शृङ्गाणीव सन्त्यस्येति । त्रिशृङ्ग + इनिः ।) रोहितमत्स्यः । इति शब्दार्थकल्पतरुः ॥

त्रिष्टुप्, [भ्] स्त्री, (त्रिषु स्थानेषु स्तुभ्यते जड़ीक्रियते इति। स्तुभ जड़ीकरणे + क्विप् । यत्वम् ।) छन्दोविशेषः । इति छन्दोमञ्जरी ॥ (यथा, वाजसनेयसंहितायाम् । ६ । ३३ ।
"इन्द्र एकादशाक्षरेण त्रिष्टुभसृजयत्तासुर्ज्येष्ठम् ॥")
अस्य विवरणं छन्दःशब्दे द्रष्टव्यम् । अस्योत्पत्तिविवरणं यथा, श्रीभागवते । ३ । १२ । २६ ।
"तस्योद्गिरागासील्लोमभ्यो गायत्री च त्वचो विभोः ।
त्रिष्टुप् मांसात् स्नुतोऽनुष्टुप् जगत्यस्थ्नः प्रजापतेः ॥
मज्ज्ञायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत् ॥"

त्रिसन्धिः, स्त्री, (त्रयः सन्धयो विकाशकालाः यस्य ।) पुष्पविशेषः । तत्पर्य्यायः । सान्ध्यकुसुमा २ सन्धिवल्ली ३ सदाफला ४ त्रिसन्ध्यकुसुमा ५ कान्ता ६ सुकुमारा ७ सन्धिला ८ । सा त्रिविधा । रक्ता १ सिता २ असिता च ३ । अस्या गुणाः । कफकासहरत्वम् । रुच्यत्वम् । त्रिदोषघ्नमनलत्वञ्च । इति राजनिर्घण्टः ॥

त्रिसन्ध्यं, क्ली, (तिसृणां सन्ध्यानां समाहारः । आवश्यकोवेति षाष्टिकी स्त्रीत्वता ।) पूर्व्वाह्णमध्याह्नापराह्णकालः । इत्यमरः । १ । ४ । ३ ॥ अस्य रूपान्तरम् । त्रिसन्ध्यी । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ३ । ८२ । २१ ।
"सान्निध्यं पुष्करे येषां त्रिसन्ध्यं कुरुनन्दन ! ।
आदित्या वसवो रुद्राः साध्याश्च समरुद्गणाः ।
गन्धर्व्वाप्सरसश्चैव नित्यं सन्निहिता विभो ! ॥")

त्रिसन्ध्याव्यापिनी, स्त्री, (त्रिसन्ध्यं व्याप्नोतीति । वि + व्याप् + णिनि + ङीप् ।) त्रिसन्ध्यघटकीभूतयावत्कालव्यापिनी तिथिः । यथा,—
"त्रिसन्ध्यव्यापिनी या तु सैव पुण्या सदा तिथिः ।
न तत्र युग्मादरणमन्यत्र हरिवासरात् ॥"
इति पराशरीयेण त्रिसन्ध्यव्यापित्वेन नियमाभिधानं तदपवादकम् । इति तिथ्यादितत्त्वम् ॥ तयोर्युग्मसांमुख्योरपवादकं तदपवादकम् । इति तट्टीका ॥

त्रिसमं, क्ली, (त्रीणि हरीतकीनागरगुड़ानि समानि यत्र ।) समत्रयम् । समहरीतकीनागरगुड़रूपम् । इति राजनिर्घण्टः ॥

त्रिसरः, पुं, (त्रिभिः सीयते इति । सृ + अप् ।) शरः । इति हेमचन्द्रः । ३ । ६२ ॥

त्रिसवनं, क्ली, (त्रयाणां सवनानां कालानां समाहारः ।) त्रिकालम् । इति प्रायश्चित्ततत्त्वम् ॥

त्रिसवनस्नायी, [न्] पुं, (त्रिसवने त्रिकाले स्नातीति । स्ना + णिनिः ।) त्रिकालस्नायी । इति स्मृतिः ॥

त्रिसिता, स्त्री, (त्रिगुणिता सिता शर्करा ।) त्रिशर्करा । इति राजनिर्घण्टः ॥

त्रिसौत्यं, क्ली, (त्रिवारं सौत्यया सहितम् । "नौवयोधर्म्मेति ।" ४ । ४ । ६१ । इति यत् ।) वारत्रयशरश्चेत्रम् । इत्यमरः । २ । ६ । ६ ॥

त्रिसुगन्धि, क्ली, (त्रयाणां सुगन्धिद्रव्याणां समाहारः।) त्रिजातकम्। इति राजनिर्घण्टः॥ (यथा, अश्ववैद्यके। १२। ७३।
"लवंगोपचसंयोगे त्रिसुगन्धि त्रिजातकम्।
नागकेसरसंयुक्तं चतुर्जातकमुच्यते॥")

त्रिसुपर्णः, पुं, वह्वृचानां वेदभागः। तद्व्रतञ्च। तद्योगात् पुरुषोऽपि त्रिसुपर्णः। इति मनुटीकायां कुल्लूकभट्टः॥ (यथा, मनुः।३। १८५।
"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्॥")

त्रिस्रोताः, [स्] स्त्री, (त्रीणि स्रोतांसि यस्याः। यद्वा, त्रिषु लोकेषु स्वर्गमर्त्यरसातलेषु स्रोतांसि यस्याः।) गङ्गा। (यथा, माघे। ३। १०।
"अङ्कुरनिर्गतमिवोर्द्ध्वसुचे-
स्त्रिस्रोतसः सन्ततधारमम्भः॥")

नदीभेदः। इति मेदिनी। से, ५४॥

त्रिहलं, त्रि, (त्रिवारं हलेन कृष्टम्। हल+"मतजनहलात् करणजन्यकर्षेषु।" ४।४।६७। इति यत्।) वारत्रयकृष्टक्षेत्रम्। तत्पर्य्यायः। त्रिगुणाकृतम् २ तृतीयाकृतम् ३ त्रिसीत्यम् ४। इत्यमरः। २। ६। ६॥

त्रिहायणी, स्त्री, (त्रयो हायना यस्याः। "दामहायनान्ताच्च।" ४। १। २७। इति ङीप्। "त्रिचतुर्भ्यो हायनस्य।" इति णत्वम्।) त्रिवर्षा गौः। इत्यमरटीकायां रमानाथः॥ (यथा, कात्यायनश्रौतसूत्रे। २२। ६। १३।
"वत्सतर्य्यश्च त्रिहायण्योऽप्रीताः पञ्चवर्षा राजीव एत्रयो नवनीतएत्रयोऽरुणाः पिशङ्गाः सारङ्गाः॥") द्रौपदी। यथा,—
"कृते युगे वेदवती त्रेतायां जनकात्मजा।
द्वापरे द्रौपदीच्छाया तेन कृष्णा त्रिहायणी॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥
(त्रिवत्सरे, त्रि। यथा, महाभारते। ३। २३६। ६।
"अथ संस्मारणां कृत्वा लक्षयित्वा त्रिहायणान्।
हृतो गोपालकैः प्रीतो यदूनां कुरुनन्दनः॥")

त्रुट, क ड } छिदि। इति कविकल्पद्रुमः॥
त्रुट, य शि } (भ्वां-आत्मं-दिवां तुदां-परं-अवयवद्विधाभावमात्रे अर्कं-छेदनमात्रे सकं-सेट्।) द्वौ दन्त्यवर्गप्रथमादी। क ड, त्रोटयते। य, त्रुन्त्यति त्रोटिष्यति। तुदादावन्तर्गणस्यैव कुटादित्वमिति। दिवादिपक्षे न कुटादित्वम्। शि, त्रुटति अत्रुटीत्। प्रेयस्तु विदीर्णभावेऽपि। यथा, चुक्रुटभीमधनुःकठोरनिनद इति महाभाटकम्। मयूखनखरत्रुटत्तिमिरकुम्भिकुम्भस्थले। कचिच्छनीभावेऽपि यथा। आहृयते यदि वरास्त्रुटति वासरादा जघने इत्युद्भटः। इति दुर्गादासः॥

त्रुटिः, स्त्री, (त्रुट्यते इति। त्रुट्+"इसुपधात् कित्।" उणां।४।२१८। इति इन् सच कित्।) सुदैला। (यथा, सुश्रुते। उत्तरतन्त्रे। ५२।
"उत्कारिकां सर्षपि नागराज्ञां
पक्वा सम्मूलैस्त्रुटिकोलमात्रैः॥"

अस्याः पर्य्यायो यथा,—
"वयस्या तीक्ष्णगन्धा च सूक्ष्मैला त्रिपुटा त्रुटिः॥"
इति वैद्यकरत्नमालायाम्॥)
अल्पम्। संशयः। कालभेदः। स च ह्रस्वाक्षरचतुर्भागयहस्वात्मकः। इत्यमरः।३।३।७॥ त्रुट्यात्मकः। इति तट्टीकायां स्वामी॥ यथा, भागवते। ३। ११। ५।
"अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः।
जालार्करश्म्यवगतः खमेवानुपतन्नगात्।
त्रसरेणुस्त्रिकं भुङ्क्ते यः कालः सा त्रुटिः स्मृता॥")

त्रुटिबीजः, पुं, (त्रुटिरल्पं बीजमस्य।) कणुः। इति शब्दमाला॥

त्रुटी, स्त्री, (त्रुटि+"ऋदिकारादक्तिनः।" इति वा ङीष्।) त्रुटिः। इत्यमरटीकायां भरतः॥

त्रुनुप, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रुम्पति। इति दुर्गादासः॥

त्रुनुप, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रुम्फति। इति दुर्गादासः॥

त्रुप, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रोपति। इति दुर्गादासः॥

त्रुफ, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रोफति। इति दुर्गादासः॥

त्रेता, स्त्री, (त्रीन् भेदान् एति प्राप्नोतीति। यद्वा, त्रित्वमिता। पृषोदरादित्वात् साधुः। एतन्निरुक्तिर्यथा, हरिवंशे। २०५। ५।
"त्रिधा प्रणीतो ज्वलनो मुनिभिर्वेदपारगैः।
यतस्त्रेतात्वमापन्नो यदेकस्त्रिविधः स्मृतः॥")
दक्षिणाग्निः गार्हपत्यः आहवनीयः एकीक्रिया इदमग्नित्रयम्। इत्यमरः।२।७।२०॥ (यथा, हरिवंशे। २६। ४५-४६।
"मथित्वाग्निं त्रिधा कृत्वा अयजत् स नराधिपः।
दृष्ट्वा यज्ञैर्बहुविधैर्गतस्तेषां सलोकताम्॥
गन्धर्व्वेभ्यो वरं लब्ध्वा चेताग्निं समकारयत्।
एकोऽग्निः पूर्व्वमेवासीदैलस्त्रेतामकारयत्॥")
द्वितीययुगम्। तस्य परिमाणं यथा,—
"त्रिचत्वारिंशल्लक्षैस्तु विंशत्सहस्राधिकेन च।
चतुर्युगं परिमितं नरमानक्रमेण च॥
द्विषट्लक्षपरिमितं वत्सरैतिसहस्रकम्।
त्रेतायुगं परिमितं कालविद्भिः प्रकीर्त्तितम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥
तस्य धर्म्मो यथा,—
"त्रेतायुगे समायाते धर्म्मः पादोनतां गतः।
अल्पक्लेशान्विता लोकाः केचित् केचित् दयान्वयाः॥
विष्णुध्यानरता लोका यज्ञदानपरायणाः।
वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः॥
त्यक्त्वा भूमिसुरान् शूद्राः सर्व्वे ब्राह्मणसेविनः।
ब्राह्मणाश्च महात्मानो वेदवेदाङ्गपारगाः॥
प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः।
तपोव्रतरता नित्यं दातारो विष्णुसेविनः॥
कालवर्षी तडित्वांश्च स्त्रियः सर्व्वाः पतिव्रताः।
वसुन्धरा च शस्याढ्या पुत्राश्च पितृसेविनः॥"
इति पाद्मे क्रियायोगसारः॥

त्रेतायुगं, क्ली, (त्रेतैव युगम्।) द्वितीययुगम्। तस्योत्पत्त्यादि यथा,—
"कार्त्तिकशुक्लनवम्यां सोमवारे त्रेतायुगोत्पत्तिः। तच्च अवतारत्रयम्। रामनपरशुरामश्रीरामचन्द्राः। पुष्यं त्रिपादम्। पापमेकपादम्। पुष्करनामकं तीर्थम्। साग्निको ब्राह्मणः। अस्थिगताः प्राणाः। चतुर्दशहस्तपरिमितो मानवदेहः। दशसहस्रवर्षं परमायुः। अवहार्य्यं रौप्यपात्रम्। तद्युगाब्दाः १२९६०००। तत्र राजानः सूर्य्यवंशीयबाहुकसगरांशुमदसमञ्जसदिलीपभगीरथाजदशरथश्रीरामचन्द्रकुशीलवा एते चक्रवर्त्तिनः। तल्लक्षणम्।
दानधर्म्मरता नित्यं तपस्या तीर्थदर्शनम्।
अग्निहोत्रपरा लोका राजानो यज्ञकारिणः॥
तत्र तारकब्रह्मनाम।
रामनारायणानन्त मुकुन्द मधुसूदन।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन!॥"
इति सुदाङ्कितपञ्जिकातः संगृहीतम्॥

त्रेतायुगाद्या, स्त्री, (त्रेतायुगस्य आद्या प्रथमा तिथिः।) त्रेतायुगारम्भतिथिः। सा च कार्त्तिकशुक्लनवमी। तत्प्रमाणं युगाद्याशब्दे द्रष्टव्यम्॥

त्रेधा, व्य, (त्रिप्रकारम्। "संख्याया विधार्थे धा।" ५। ३। ४२। इति धा। "एधाच्।" ५। ३। ४६। इति धा इत्यस्य एधाच्।) त्रिधा॥ इति मुग्धबोधम्॥ (यथा, ऋग्वेदे।१।२२।१७।
"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूळ्हमस्य पांसुरे॥")

त्रै, ङ पालने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-अनिट्।) दन्त्यवर्गाद्यादिः। ङ, त्रायते। चक्रिंस्त्राहीत्यादौ त्राहीति त्रायते त्रा विप् प्रत्ययात् त्रा इत्याचरतीति क्वौ साध्यम्। केचिदादौ त्रा पठन्ति। इति क्रमदीश्वरः। इति दुर्गादासः॥

त्रैगुण्यं, क्ली, (त्रिगुणानां भावः कर्म्म वा। त्रिगुण+ष्यञ्।) त्रिगुणधर्म्मः। सत्त्वरजस्तमस्त्वम्। यथा,—
"त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्জ্জुन!।"
इति श्रीभगवद्गीतासु॥
ग्रैव्यसौगन्ध्यमान्द्यम्। यथा,—
"त्रैगुण्यललितैराद्यमरुद्भिरुपवीजिते॥"
इति शिवरात्रिव्रतकथा॥
त्रिभिः पूरणञ्च॥

त्रैधं, व्य, (त्रिप्रकारमिति त्रिधा। ततः "द्वित्रिभ्यां धमुञ्।" ५।३।४५। इति धा इत्यस्य धमुञ्।) त्रिधा। इति मुग्धबोधम्॥ (यथा, महाभारते। ३। ३२। ३२।
"सर्व्वमेव हठेनेके दैवेनेके वदन्त्युत।
पुंसः प्रयत्नजं किञ्चित् त्रैधमेतन्निरुच्यते॥")

त्रैपुरः, पुं, (त्रिपुर एव। स्वार्थे अण्।) त्रिपुरदेशः। तत्पर्य्यायः। डाहलः २ चैद्यः ३ चेदिः ४। इति हेमचन्द्रः। ४। २२॥ (देशोऽयं कामरूपस्य सीमाप्रदेशः। यथा, कामाख्यातन्त्रे।

"कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतम्। कामरूपाभिधो देशो गणेशगिरिरुच्यते॥"

कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतं यावत्॥ त्रिपुरस्य राजा। यथा, महाभारते। २। ३१। ५८।

"माद्रीसुतसुतः प्रायाद्विजयी दक्षिणां दिशम्। त्रैपुरं खवशे कृत्वा राजानमपराजितम्। निजघ्राह महाबाहुस्तरसा पौरवेश्वरम्॥"

तद्देशवासिनि, पुंभूमि। यथा, मात्स्ये। ११३। ५३।

"स्तोभ्राः कोसलाश्चैव त्रैपुरा वैदिशास्तथा॥"

त्रिपुराधिष्ठितासुरभेदे। यथा, हरिवंशे। १२६। ५४।

"येनोद्धृतास्त्रैपुरा मायिनो वै दग्धा घोरेण वितथान्तः पुरेण॥")

त्रैलोक्यं, क्ली, (त्रिलोकी एव। चतुर्व्वर्णादित्वात् स्वार्थे ष्यञ्।) त्रिलोकी। यथा, मार्कण्डेये।

"त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा॥"

त्रैलोक्यविजया, स्त्री, (त्रैलोक्यस्य विजयो यस्याः। एतस्याः सेवनेन हि त्रैलोक्यमधीनमिव प्रतिभातीति ज्ञानात् तथात्वम्।) भङ्गा। इति शब्दचन्द्रिका॥ भाङ् इति ख्याता॥

त्रैविद्यः, पुं, (ऋग्वेदयजुर्व्वेदसामवेदरूपास्त्रिस्रो विद्या यस्येति त्रिविद्यस्ततः स्वार्थे अण्। यद्वा, तिस्रो विद्या अधीते वेद वा। "तदधीते तद्वेद।" ४। २। ५९। इति अण्।) त्रिवेदज्ञः। त्रिविद्यावेत्ता। यथा। मनुः। १२। १११।

"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः। त्रयाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा॥"

(व्रतविशेषे, क्ली। यथा, मनुः। २। २८।

"स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः। महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥"

"त्रैविद्याख्येन च व्रतेन।" इति तट्टीकायां कुल्लूकभट्टः॥ वेदत्रयप्रतिपाद्ये, त्रि। यथा, भागवते। ६। २। २४।

"धर्म्मं भागवतं शुद्धं त्रैवेद्यञ्च गुणाश्रयम्॥"

"त्रैवेद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयं यमदूतानां धर्म्मम्।" इति तट्टीकायां स्वामी॥)

त्रोटकी, स्त्री, रागिणीविशेषः। इति हलायुधः॥

त्रोटिः, स्त्री, (त्रोटयते भिद्यतेऽनेनेति। त्रोटि+"अच इः।" उणां। ४। १३८। इति इः।) चक्षुः। कटफलम्। मत्स्यी। मीनभेदः। इति मेदिनी। टे, १८॥

त्रोटिहस्तः, पुं, (त्रोटिरिव हस्तो हस्त इव ग्रहणसाधनं यस्य।) मत्स्यी। इति शब्दचन्द्रिका॥

त्रोटी, स्त्री, (त्रोटि+ऋदिकारादिति वा ङीष्।) त्रोटिः। इति शब्दरत्नावली॥

त्रोत्रं, क्ली, (त्रायते शिष्यते नियम्यतेऽनेनेति। त्रै पालने+"अग्रिचादिभ्य इत्रोत्रौ।" उणां। ४। १७२। इति उत्रः।) गवादिताड़नदण्डः। पाँचनी इति ख्यातः। तत्पर्य्यायः। प्राजनम् २ तोदनम् ३ प्रवयणम् ४। गजस्य तोदनदण्डः। तत्पर्य्यायः। वेणुकम् २ वेणुकम् ३ इत्यमरभरतौ॥ अङ्कुशम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ आरूपक्रिया। व्याधिभेदः। इति संक्षिप्तसारे उणादिवृत्तिः॥

त्रौक, ऋ ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) चतुर्दृग्खरी। रेफमध्यः। ऋ, अतुत्रौकत्। ङ, त्रौकते। इति दुर्गादासः॥

त्र्यक्षः, पुं, (त्रीणि अक्षीणि नेत्राणि यस्य। ततः समासान्तपप्रत्ययः।) शिवः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। १०६। ११।

"आससाद महात्मानं त्र्यक्षं त्रिपुरमर्द्दनम्॥"

देत्यविशेषः। यथा, भागवते। ७। २। ४।

"भो भो दानवदैतेया द्विमूर्द्धंस्त्र्यक्ष! शम्बर!। शतबाहो! हयग्रीव! नमुचे! पाक! इल्वल!।"

नेत्रत्रयविशिष्टे, त्रि। यथा, महाभारते। २। ४३। १।

"चेदिराजकुले जातस्त्र्यक्ष एष चतुर्भुजः॥")

त्र्यक्षरः, पुं, (त्रीणि अक्षराणि यत्र।) घटकः। इति त्रिकाण्डशेषः॥ (त्रीणि अकारोकारमकारात्मकानि अक्षराणि यत्र। प्रणवादौ, त्रि। यथा, मनुः। ११। २६६।

"आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता। स गुह्योऽभ्यस्यिदृष्टर्षेर्यं वेद स वेदवित्॥"

छन्दोभेदे, क्ली। यथा, वाजसनेयसंहितायाम्। ६। ३१।

"विष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयत्तानुज्येषम्॥"

"विष्णुस्त्र्यक्षरेणाक्षरत्रयात्मकेन छन्दसा तान् तादृशान् मनुष्यानुज्येषमधिकं जयेयम्।" इति वेददीपे महीधरः॥)

त्र्यङ्गटं, क्ली, (त्रिभिरङ्गैरव्यते गम्यते इति। त्र्यङ्ग+अट्+अप्। प्रकन्धादित्वादलोपः।) शिवभेदः। धौताङ्गनी। इति मेदिनी। टे, ४४॥

त्र्यङ्गटः, पुं, (त्रिभिरङ्गैरटतीति। अट्+अच्।) धौताङ्गनी। शिवभेदः। ईश्वरः। इति हेमचन्द्रः॥

त्र्यङ्गं, क्ली, (त्रयाणां अङ्गानां समाहारः।) अङ्गनचयम्। यथा, कालाङ्गं पुष्पाङ्गं रसाङ्गनम्। इति राजनिर्घण्टः॥

त्र्यध्वगा, स्त्री, (त्रिषु अध्वसु मार्गेषु गच्छतीति। गम+डः।) गङ्गा। इति त्रिकाण्डशेषः॥

त्र्यम्बकः, पुं, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि अम्बकानि नेत्राणि यस्य। शिवः। इत्यमरः। १। १। ३५॥ (यथा, ऋग्वेदे। ७। ५९। १२।

"त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्॥"

"त्रयाणां ब्रह्मविष्णुरुद्राणामम्बकः पिता।" इति ऋग्वेदभाष्ये सायणः।) एकादशरुद्राणामन्यतमः। यथा, मात्स्ये। ५। २६—३०।

"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रेवतः। हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः॥ सावित्रश्च जयन्तश्च पिनाकी चापराजितः। एते रुद्राः समाख्याता एकादशगणेश्वराः॥")

शिवांशुचन्द्रशेखरनामकपौण्ड्रराजपुत्रः। यथा,

"एवं तिरूपनामानां गर्भे जातो यतो हरः। अतस्त्र्यम्बकनामाभूत् प्रथितो लोकदेवयोः॥ स राजपुत्रः कौमारावस्थां प्राप यदा तदा। सर्व्वशास्त्रार्थतत्त्वज्ञो निष्णोऽस्त्रेषु बभूव ह॥ बले वीर्य्ये प्रहरणे व्यूहे शौचे च तत्समः। नान्योऽभूत्पृथिवीशूलः। नो वरः भूमौ भविष्यति॥ अभिषिच्याथ तं राजा कुमारं बलवत्तरम्। दशपञ्चैकवर्षीयं सर्व्वराजगुणैर्युतम्॥ तिसृभिः सह भार्य्याभिर्व्वनं पौण्ड्रो विवेश ह। दृष्टोचितक्रियां कर्त्तुं राजा परमधार्म्मिकः॥ गते पितरि राजा स वनवासं महाबलः। सर्व्वां चिन्तां वपुषि चक्रेऽमात्यैः स चन्द्रशेखरः॥ सार्व्वभौमो नृपो भूत्वा राजभिः परिसेवितः। अमरैरिव देवेन्द्रो विजहार श्रिया युतः॥ एवं पौण्ड्रसुतो भूत्वा त्र्यम्बकः प्राप्य निर्व्वृतिम्। ब्रह्मावर्त्ताख्ये रम्ये करवीराख्ये पुरे॥ दृषद्वतीनदीतीरे राजा भूत्वा समोदत॥"

इति कालिकापुराणे ४६ अध्यायः॥*॥

अन्यत् चन्द्रशेखरशब्दे द्रष्टव्यम्॥

त्र्यम्बकसखः, पुं, (त्र्यम्बकस्य महादेवस्य सखा बन्धुः। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) कुबेरः। इत्यमरः। १। १। ७१॥

त्र्यम्बका, स्त्री, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि अम्बकानि नेत्राणि यस्याः।) दुर्गा। यथा,—

"सोमसूर्य्यानलाख्यानि यस्या नेत्राणि अम्बिका। तेन सा त्र्यम्बका देवी मुनिभिः परिकीर्त्तिता॥")

इति देवीपुराणे ४५ अध्यायः॥

त्र्यहस्पृक्, पुं, (त्र्यहं चान्द्रदिनत्रयं स्पृशतीति। स्पृश+पचाद्यच्।) त्रिदिनस्पृक्। तिथित्रयसंयुक्तमहः। इति ज्योतिषम्॥

त्र्यहस्पृक्, क्ली, (त्र्यहं स्पृशतीति। स्पृश+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) त्र्यहस्पर्शः। तथा च वशिष्ठः।

"एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा। तदा दिनत्रयः प्रोक्तस्त्र्यहस्पृक् सांहसिकं फलम्। फलमिति वैदिककर्म्मपरम्॥ अधिमासे दिनपाते धनुषि रवौ भाद्रसंज्ञिते मासि। चक्रिणि सुप्ते कुर्य्यान्नो माङ्गल्यं विवाहश्च॥

इति भीमपराक्रमः॥

दिनपाते दिनक्षये।

त्र्यहस्पृक् नाम यदेतदुक्तं तत्र प्रयत्नः कृतिभिर्व्विधेयः॥ विवाहयात्राशुभपुष्टिकर्म्म सर्व्वं न कार्य्यं त्रिदिनस्पृशे तु॥"

इति ज्योतिस्तत्त्वम्॥

त्र्याहैहिकः, त्रि, (ईहायां चेष्टायां भवमैहिकं धनम्। "तत्र भवः।" ४।३।५३। इति ठञ्। त्र्याहे दिनत्रये पर्य्याप्तं ऐहिकं धनं यस्य।) दिनत्रयनिर्व्वाहोचितधनयुक्तः। यथा,

"कुम्भूलधान्यको वा स्यात् कुम्भीधान्यक एव वा।
त्र्याहैहिको वापि भवेदश्वस्तनिक एव वा॥"

इति मानवे। ४। ७॥

"कुम्भूलधान्यक इति। कुम्भूलो मृन्मयागारं स्यादित्याभिधानिकाः। इष्टकादिनिर्म्मितागार-धान्यसञ्चयो भवेत्। अत्र कालविशेषापेक्षायाम्। यस्य चैवार्षिकं भक्तं पर्य्याप्तं भृत्यवृत्तये। अधिकं वापि विद्येत स सोमं पातुमर्हति॥ इति मनूक्त एव कालो ग्राह्यः। तेन नित्य-नैमित्तिकधर्म्मैकत्यपोष्यवर्गसहितस्य गृहिणो यावता धान्यादिधनेन वर्षत्रयं समधिकं वा निर्व्वाहो भवति तावद्धनः कुम्भूलधान्यक उच्यते। वर्षनिर्व्वाहोचितधान्यादिधनः कुम्भी-धान्यः। प्राक् सौम्यिकीः क्रियाः कुर्य्यात् यस्मान्नार्षिकं भवेदिति याज्ञवल्क्येन गृह-स्थस्य वार्षिकसञ्चयाभ्यनुज्ञानात्। मनुरपि यदा वानप्रस्थस्यैव समानिचय एव वेत्यनेन समासञ्चयं वक्ष्यति तदपेक्षया बहुपोष्यवर्गस्य गृहिणः समुचितः संवत्सरसञ्चयः। मेधा-तिथिस्तु। यावता धान्यादिधनेन बहुभृत्य-दारादिमतस्त्रिसंवत्सरस्थितिर्भवति तावत् सुव-र्णादिधनवानपि कुम्भूलधान्यक इत्यभिधाय कुम्भी उष्ट्रिका वाष्मायिकधान्यादिनिचयः कुम्भीधान्यक इति व्याख्यातवान्। गोविन्द-राजस्तु कुम्भूलधान्यक इत्येतद्व्याचक्ष्य कोष्ठ-प्रमाणधान्यसञ्चयो वा स्यात् द्रोणग्राह-मात्रपर्य्याप्तधनः। कुम्भीधान्यक इत्येतद्व्याचक्षे उष्ट्रिकाप्रमाणधान्यादिसञ्चयो वा षड्ग्रहमात्र-पर्य्याप्तधनः।

द्रोणग्राह्यं कुम्भूलेन वृत्तिः कुम्भ्या दिनानि षट्।
इमाममूलां गोविन्दराजोक्तिं नाद्रियन्महे।

ईहा चेष्टा तस्यां भवं ऐहिकं त्र्याहपर्य्याप्तमैहिकं धनं यस्य स त्र्याहैहिकः तथा वा स्यात् दिन-त्रयनिर्व्वाहोचितधन इत्यर्थः। स्वोभवं श्वस्तनं भक्तं तदस्यास्तीति मत्वर्थीयमिकं श्वस्त-समासः तथा वा भवेत्।" इति कुल्लूकभट्टः॥

आर्षेयाः, पुं, (ऋषेरयं आर्षेयः। ऋषि+ढक्। यद्वा आर्षेयाः ऋषिधर्म्मा नेत्रादीन्द्रियक्रियाभावरूपा येषाम्।) अन्धबधिरमूकाः। यथा।

"अचोक्तानि वचनानि सर्व्वाणि तिर्य्यगधिकरण-न्यायमूलानि। तथा हि तिर्य्यगधिकरणे। तिर्य्यक्पक्षिसर्पार्षेयदेवतानामनधिकार इति यागमात्रे उक्तम्। तत्र हेतवः तिरश्चां विशि-ष्टान्धकरणविरहात् पक्षेः प्रचरणविरहात् सर्पार्षेयाणामन्यबधिरमूकानां अवेक्षणश्रवणो-च्चारणविरहादिति श्रीचन्द्रशेखरवाचस्पतिकृत-चन्द्रकान्तु-विधिभृततिर्य्यगधिकरणम्॥ (त्रय आर्षेया ऋषयो यत्र। त्रिप्रवरो गोत्रभेदः॥)

त्र्याहिकः, त्रि, (त्र्याहे भवः। त्र्याह+ठञ्।) क्षतोवेऽह्नि भवः। यथा, ऐकाहिकद्व्याहिक-त्र्याहिकचातुर्थिकसततज्वरविषमज्वर इत्याद्य-पराजितास्तोत्रम्॥

("ऐकाहिको द्व्याहिकश्च त्र्याहिकश्च तथापरः।
वेलाज्वरश्चतुर्थोऽपि विज्ञानीयाद्विचक्षणः॥"

इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये॥ अस्यौषधं यथा,—

"रसेन गव्यं घृतञ्च शिखिग्रीवञ्च पाचिकम्।
गोजिह्वया जयन्त्याश्च तल्लीयेच्च भावयेत्॥
प्रत्येकं सप्तसप्ताथ शुष्कं गुञ्जाचतुष्टयम्।
जलेन घृतेनाद्यात् त्र्याहिकज्वरशान्तये॥"

इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे॥)

त्र्यूषणं, क्ली, (त्रयाणां ऊषणानां समाहारः। पात्रादित्वात् क्लीबत्वं न।) मिलितशुण्ठीपिप्पली-मरिचम्। इत्यमरः। २।१०।१११। (यथा, गारुडे १६८ अध्याये।

"यमानी चित्रकं धान्यं त्र्यूषणं जीरकं तथा॥")

त्र्यूषणं, क्ली, (त्रयाणां ऊषणानां पिप्पलीमरिच-शुण्ठीनां समाहारः।) त्र्यूषणम्। इत्यमर-टीकायां भरतः॥

("पिप्पलीमरिचं शुण्ठीत्रयमेतद्विमिश्रितम्।
त्रिकटु त्र्यूषणं योगं कटुत्रयमथोच्यते॥"

इति वैद्यकपरिभाषायाम्॥

अस्य गुणा यथा,—

"त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान्।
गुल्ममेहकफश्लोत्थमेदस्यपदपीनसान्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

(वृतविशेषः। यथा, चरके चिकित्सास्थाने २२ अध्याये।

"त्र्यूषणं त्रिफलां द्राक्षां काश्मर्य्याणि परूषकम्।
दे पाठे सरलं व्याघ्रीं खगुप्तां चित्रकं घृटीम्॥
त्रायन्तीं तामलकीं मेदां काकनासां घृतावरीम्।
चिकणैकां विदारीञ्च पिष्ट्वा कर्षसमं घृतात्॥
प्रस्थं चतुर्गुणं क्षीरं सिद्धं कासहरं पिबेत्।
ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत्॥
कामलार्शोऽनिलाष्ठीलाव्रणशोषक्षयापहम्।
त्र्यूषणं नाम विख्यातमेतद्वृतमनुत्तमम्॥")

त्वं, त्रि, (युष्मद्+सु। "त्वाहौ सौ।" ७।२। ९४। इति त्वादेशः।) भवान्। तुमि इति भाषा। युष्मच्छब्दस्य प्रथमैकवचनान्तरूपोऽयं लिङ्गत्रये समानः। इति व्याकरणम्॥

त्वः, त्रि, (तनोति विस्तारयतीति। तन+"तनो-तेरनच वः।" उणां। २।६३। इति त्वात् क्विप् अनच्च वः। आगमानित्यत्वात् तुवे-कल्पिकः।) भिन्नः। अन्यः। इत्यमरः। ३। १।८२॥ (एकः। इति निरुक्तिः। १।७॥ यथा, ऋग्वेदे। १०।७१।४।

"उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः॥"

"त्वगुच्च एकवाची। एकः। उतशब्दोऽप्यर्थे। पश्यन्नपि मनसा पर्य्यालोचयन्नपि वायं न ददर्श। दर्शनफलाभावान्न पश्यति। त्व एकः शृण्वन्न-प्येनां वाचं न शृणोति अवश्यफलाभावात्। इत्यनेनार्थेनाविद्वानभिहितः॥" इति तद्भाष्ये सायणः॥)

त्वक्, [च्] स्त्री, (त्वचति संवृणोति मेदश्शोणिता-दिकमिति। त्वच संवरणे+क्विप्। यद्वा, तनोति विस्तारयतीति। तन+"तनोतेरनच्च वः।" उणां। २।६३। इति क्विप् अनच्च वः।) इन्द्रियविशेषः। यथा,—

"पूर्व्ववन्नित्यतायुक्तं देहव्यापि त्वगिन्द्रियम्।
प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः॥
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपान्यच्चक्षुषो योग्यं रूपमन्यापि कारणम्॥
द्रव्याश्रयि त्वचो योगो मनसा ज्ञानकारणम्॥"

इति भाषापरिच्छेदः॥

वल्कलम्। (यथा, रघुः। २। ३७।

"कण्डूयमानेन कटं कदाचित्
वन्यद्विपेनोन्मथिता त्वगस्य॥")

गुडत्वक्। (यथा, वृहत्संहितायाम्। ७७।१२।

"त्वगुशीरपत्रभागैः सूक्ष्मैलार्धेन संयुतैश्चूर्णैः।
पटवासः प्रवरोऽयं मृगाकपूरप्रबोधेन॥")

चर्म्म। इति मेदिनी। चे, ६॥ अस्य पर्य्यायः। अस्रधरा २। इत्यमरः॥ असृग्धरा ३। इति तट्टीका॥ त्वचम् ४ त्वचा ५ चर्म्म ६ छली ७ छल्ली ८। इति शब्दरत्नावली॥ (यथा, रघुः। ३। ३१।

"त्वचं स मेध्यां परिधाय रौरवीं
मणिश्चिताङ्गं पितुरेव मन्त्रवत्।
न केवलं तद्गुरुरेकपार्थिवः
शिताववूदेकधनुर्द्वितीयवत्॥"

कञ्चुकः। यथा, मनुः। २। ७६।

"महतोऽप्येनसो मासात् त्वचैवाहिर्विमुच्यते॥")

त्वचम्। इति राजनिर्घण्टः॥ दारचिनी इति भाषा॥

त्वक्कण्डूरः, पुं, (कण्डूं रातीति। रा+कः। त्वचः कण्डूरः।) व्रणः। इति हारावली। १५६॥

त्वक्क्षीरा, स्त्री, (वंशत्वचः क्षीरमस्यच।) वंशरोचना। इत्यमरः। २। ६। १०६॥ (वंशरोचनाशब्दे विवृतिरस्या ज्ञातव्या॥)

त्वक्क्षीरी, स्त्री, (वंशत्वचः क्षीरमस्य। गौरा-दित्वात् ङीष्।) त्वक्क्षीरा। इति राज-निर्घण्टः॥ (यथा, सुश्रुते। १। ४४।

"सिताजगन्धा त्वक्क्षीरी विदारी क्षिप्रतः समाः॥"

(पर्य्यायोऽस्या यथा,—

"स्याद्वंशरोचना वांशी तुगाक्षीरी तुगा शुभा।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वेणुवी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

त्वक्छदः, पुं, (त्वगेव छदो यस्य।) क्षीरीवृक्षः। इति रत्नमाला॥ क्षीरकञ्चुकी इति भाषा॥

त्वक्पत्रं, क्ली, (त्वगिव पत्राण्यस्य ।) गुडत्वक् । इत्यमरः ।२।४।१३४॥ तेजपत्रम् । इति केचित् । इति भरतः॥ तत्पर्य्यायः । सूतकटम् २ भद्रम् ३ त्वचम् ४ चोचम् ५ वराङ्गकम् ६ । इत्यमरः ।२ । ४ । १३४ ॥ (यथा, महाभारते ।१२।२७०।१८ "चन्दनागुरुसुखानि त्वक्पत्राद्यानि वनानि च ॥" यथा, सुश्रुते । १ । ४४ । "रेचनं सुकुमाराणां त्वक्पत्रमरिचांशकम् ॥")

त्वक्पत्री, स्त्री, (त्वक्पत्र+गौरादित्वात् ङीष् ।) छिन्नपत्री । तत्पर्य्यायः । कारवी २ पृथ्वी ३ वासीका ४ कवरी ५ पृथुः ६ । इत्यमरः । २ । ६ । ४० ॥ तत्पत्री ७ । इति भरतः ॥

त्वक्पुष्पं, क्ली, (त्वचस्वर्म्मणः पुष्पमिव ।) रोमाणः । इति त्रिकाण्डशेषः । किलासम् । इति हेमचन्द्रः । ३ । १३१ ॥

त्वक्पुष्पिका, स्त्री, (त्वक्पुष्पी+स्वार्थे कन् पूर्व्ववत् ।) किलासम् । इति त्रिकाण्डशेषः ॥ कुली इति भाषा ॥

त्वक्पुष्पी, स्त्री, (त्वक्पुष्प+गौरादित्वात् ङीष् ।) किलासम् । इति जटाधरः ॥

त्वच्, त्वचोयाचे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) त्वचो ग्राहस्वर्म्मणो ग्रहणम् । त्वच त्वचने इति प्राचः । त्वचनं संवरणमिति रमानाथः । त्वक्षति कार्यं वर्म्मणा भटः । इति दुर्गादासः ॥

त्वच, ऊ कार्श्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-वेट् ।) ऊ, त्वचिष्यति त्वक्ष्यति । कार्श्यं क्षीणीकरणम् । त्वक्षति काष्ठं तक्षा । इति दुर्गादासः ॥

त्वक्सारः, पुं, (त्वचि सारो यस्य ।) वंशः । इत्यमरः । २ । ४ । १६० ॥ (यथा, मनुः ।१०।३७ । "चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ॥"

वंशस्य त्वगपि । नँचाड़ि इति भाषा ॥ यथा, सुश्रुते । १ । ८ ।

"अनुग्रन्थानि तु त्वक्सारस्फटिकाकाचकुरुविन्दचर्म्मकौशिकाचारनखगोजीगोफालिकाग्राकपक्षकरीरवालाङ्कुलय इति ॥") गुडत्वक् । इति ग्रन्थरत्नावली ॥ श्रीखण्डवृक्षः । वन्धुवंशः । इति राजनिर्घण्टः ॥ (सल्लताबाँश इति भाषा ॥ यथा, माघः । ४ । ६१ ।

"त्वक्सारस्नुपरिपूरितलक्ष्यगीति-
रक्षिप्रमर्मा हरितपक्ष्मलरक्षकाङ्गः ॥")

त्वक्सारभेदिनी, स्त्री, (त्वचः सारं भिनत्तीति । भिद्+णिनिः+ङीप् ।) क्षुद्रचक्षुष्यः । इति राजनिर्घण्टः ॥

त्वक्सारा, स्त्री, (त्वक्सारो वंश उत्पत्तिकारणत्वेनास्त्यस्याः अच् ततष्टाप् ।) वंशरोचना । इति राजनिर्घण्टः ॥ (वंशरोचनाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

त्वक्सुगन्धः, पुं, (त्वचि सुगन्धः सद्गन्धो यस्य ।) नागरङ्गः । इति राजनिर्घण्टः ॥

त्वक्सुगन्धा, स्त्री, (त्वचि सुगन्धो यस्याः ।) एलावालुकनामगन्धद्रव्यम् । इति जटाधरः ॥

त्वग, इ कम्पे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-गतौ सकं-सेट् ॥)

त्वगङ्कुरः, पुं, (त्वचश्चर्म्मणः अङ्कुर इव ।) रोमाणः । इति त्रिकाण्डशेषः ॥

त्वगाचोरी, स्त्री, (त्वक्चोरी । पृषोदरादित्वात् साधुः ।) तुगाचीरी । वंशलोचना । इति जटाधरः ॥

त्वग्गन्धः, पुं, (त्वचि गन्धो यस्य ।) नागरङ्गः । इति राजनिर्घण्टः ॥

त्वग्जं, क्ली, (त्वचः जायते इति । जन+डः ।) रोम । रुधिरम् । इति राजनिर्घण्टः ॥

त्वग्दोषः, पुं, (त्वचो दोषो दूषणं यस्मात् ।) कोठरोगः । इति राजनिर्घण्टः ॥ त्वग्जातरोगः । तस्यौषधं यथा,—

"मन्दोशालोध्रनीराम्बुचूर्णानु कनकस्य च ।
तेनोद्वर्त्तितदेहस्य हरेद्ग्रीष्मप्रसारिकाम् ॥
त्वद्दोषश्चैव सेऽपि च धर्म्मदोषश्च नश्यति ॥"

इति गारुड़े १६८ अध्यायः ॥

स तु महारोगः । यथा, "महारोगाः: पापरोगाश्चकान्यतमरोगवतः । ते च उन्मादस्वद्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः उदरोऽर्शसरी इत्यष्टौ पापरोगा नारदोक्ताः ।" इति शुद्धितत्त्वम् ॥

त्वग्दोषारिः, पुं, (त्वग्दोषस्य रोगविशेषस्य अरिः शत्रुः । तत्राग्र्यकत्वात् तथात्वम् ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥

त्वच्, ग्र ग्रहणे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) वकारयुक्तः । दन्त्यवर्गाद्यादिः । ग्र, त्वचती त्वचन्ती । इतिः संवरणम् । त्वचति कवचेन देहं वीरः । इति दुर्गादासः ॥

त्वचं, क्ली, (प्रशस्ता त्वगस्त्यस्येति । अर्शं आदित्वात् अच् ।) वृक्षविशेषः । दारचिनी इति भाषा ॥ (यथा, सुश्रुते कल्पस्थाने १ अध्याये । "सोमवल्ल्याश्च सा श्वेता पर्णं कालीयकं त्वचम् ॥") तत्पर्य्यायः । त्वक् २ वल्कलम् ३ भद्रम् ४ वराङ्गम् ५ सुखग्रीवनम् ६ ग्रकलम् ७ सिंहलम् ८ वन्यम् ९ सुरसम् १० कामवल्लभम् ११ उत्कटम् १२ बहुगन्धम् १३ विष्णुप्रभम् १४ वरप्रियम् १५ नटपर्णम् १६ गन्धवल्कम् १७ वरम् १८ प्रीतम् १९ । अस्य गुणाः । कटुत्वम् । प्रीतलत्वम् । कफकासविनाशित्वम् । शुक्रामग्रमनत्वम् । कण्ठशुद्धिकरत्वम् । लघुत्वम् । इति राजनिर्घण्टः ॥ वल्कलम् । चर्म्म । (यथा, हरिवंशे । १७७ । १३६ ।

"श्रीवत्साङ्कोऽरविन्दाक्ष जर्झरोमा मृदुत्वचः ॥")

कक्षुकः । खोलस् इति भाषा ॥ यथा, महाभारते । १२ । २४६ । ११ ।

"विमुक्तः सर्व्वपापेभ्यो मुक्तत्वच इवोरगः ॥")

गुड़त्वक् । इति धरणिः ॥

त्वचा, स्त्री, (त्वच्+पक्षे टाप् । यद्वा, त्वचति संवृणोति सर्व्वशरीरमिति अच् ततष्टाप् ।) त्वक् । इति ग्रन्थरत्नावली ॥

त्वचापत्रं, क्ली, (त्वचा त्वक् पत्रमिव यस्य ।) त्वक्पत्रम् । इति ग्रन्थरत्नावली ॥

त्वचिष्ठः, त्रि, (अतिशयेन त्वक्वान् । त्वक्वत्+इष्ठन् । "विन्मतोर्लुक् ।" ५ । ३ । ६४ । इति मतुपो लुक् ।) त्वचीयान् । अतिशयत्वक्विशिष्टः । इति व्याकरणम् ॥

त्वचिसारः, पुं, (त्वचि सारो यस्य । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इति सप्तम्या अलुक् ।) वंशः । इत्यमरः । २ । ४ । १६० ॥

त्वचिसुगन्धा, स्त्री, (त्वचि सुगन्धो यस्याः । सप्तम्या अलुक् ।) क्षुद्रेला । इति हारावली ।६७॥

त्वत्, त्रि, (तनोतीति । तन+"तनोतेरनश्च वः ।" उणां २ । ६३ । इति चकारात् क्विप् तुक् अनश्च वः ।) भिन्नः । इति जटाधरः ॥ (युष्मद्शब्दस्य पञ्चम्येकवचनस्य रूपम् ।) भवतः । इति व्याकरणम् ॥ तोमा हइते इति भाषा ॥

त्वनृच, उ द्रुतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । क्लावेट् ।) वकारयुक्तादिः । उ, त्वचिता त्वक्ता । इतिर्गतिः । इति दुर्गादासः ॥

त्वनृच, उ ध सङ्कोचे । इति कविकल्पद्रुमः ॥ (दधां-परं-सकं-सेट् । क्लावेट् ॥)

त्वदीयं, त्रि, (तव इदम् । युष्मद्+छः । "प्रत्ययोत्तरपदयोश्च ।" ७ । २ । ९८ । इति सप्तम्यन्तस्य त्वादेशः ।) भवदीयम् । इति व्याकरणम् ॥ (यथा, रघुः । ३ । ५० ।

"अतोऽयमन्यः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः ॥")

त्वर, त्रि य म ङ त्वरे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) त्रि, त्वरितः तूर्णोऽस्ति । वा रभामङ्क्षत्वरसंभ्रमाक्षनिभ्यो लिङर्थायां वेमखेऽपि वेदेषूद्धारत्वमेदार्थमेतदनुवचनमन्ये मन्यन्ते । य, त्वरा । म, त्वरयति । ङ, त्वरते । त्वद रह औत्रमनुष्ठानम् । नाघुनेतुमवक्राः स तत्वरे । इति दुर्गादासः ॥

त्वरकं, क्ली, (त्वर+भावे क्वुट् ।) त्वरा । इति व्याकरणम् ॥ (त्वरते शीघ्रं गच्छतीति । त्वर+क्वुः । द्रुतगामिनि, त्रि । यथा, अथर्ववेदे ।११। ८ । २८ ।

"आक्षेयीश्च वाक्षेयीश्च त्वरकाश्च याः ॥")

त्वरा, स्त्री, (त्वरणमिति । त्वर+"जटादयश्चित्तः ।" इति अङ् । ततः स्त्रीत्वविवक्षायां टाप् ।) वेगः । तत्पर्य्यायः । सम्भ्रमः २ । इत्यमरः ।३। २ । २६ ॥ आवेगः ३ त्वरिः ४ तूर्त्तिः ५ संवेगः ६ । इति हेमचन्द्रः ।२।२३६॥ (यथा, महाभारते । ३ । २७८ । २७ ।

"यच्चक्रत्वं मया पूर्व्वं निर्जितो जीवितप्रियः ।
सुखो ज्ञातिरिति ज्ञात्वा का त्वरा मरणे पुनः ॥")

त्वरिः, स्त्री, (त्वरणमिति । त्वर+भावे इन् ।) त्वरा । इति हेमचन्द्रः । २ । २३६ ॥

त्वरितं, क्ली, (त्वर+क्तः ।) शीघ्रम् । (त्वरते स्मेति । त्वर+गत्यर्थाकर्म्मकेति कर्त्तरि क्तः । यद्वा, त्वरा सञ्जातास्य । त्वरा+तारकादित्वात् इतच् ।) तद्विशिष्टे, त्रि । इत्यमरः ।१।१।६८॥ (यथा, पञ्चतन्त्रे । ३ । १०२ ।

"बह्वन्तराययुक्तस्य धर्म्मस्य त्वरिता गतिः ॥")

त्वरितोदितं, त्रि, (त्वरितं शीघ्रं यथा तथा उदितं कथितम् ।) शीघ्रोच्चारितवर्णः । तत्पर्य्यायः । निरस्तभ् २ । इत्यमरः । १ । ६ । २० ॥

त्वष्टः, त्रि, (त्वक्ष्यते तनूक्रियते स्मेति । त्वक्ष तनूकरणे+क्तः ।) तनूकृतः । चाँचा छोला इत्यादि भाषा । तत्पर्य्यायः । तष्टः २ । इत्यमरः । ३ । ११ । ६६ ॥

त्वष्टा, [ष्टृ] पुं, (त्वेषति दीप्यतीति । त्विष दीप्तौ+"नप्तृनेष्टृत्वष्टृहोत्रेति ।" उणां ।२।६६। इति तृच् इतोऽत्वच् ।) आदित्यविशेषः । (यथा, महाभारते । १ । ६५ । १४-१५ ।

"अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः । ये राज्ञामतलांस्तेषां कीर्त्तयिष्यामि भारत ! ॥ धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च । भगो विवस्वान् पूषा च सविता दशमस्तथा । एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ॥" एते तु चाक्षुषस्य मनोरन्तरे तुषिता नाम देवा आसन् वैवस्वतेऽन्तरे तु द्वादश आदित्याः । इति विष्णुपुराणे । १ । १५ । १३१—१३३ ॥ तथा मात्स्ये च । ६ । ३—५ ॥ त्वक्षति तनूकरोति काष्ठादिकं शिल्पकार्य्यत्वात् । तक्ष+तृच् ।) विश्वकर्म्मा । इति हेमचन्द्रः ।३।५८१॥ (यथा, माघे । १ । ३५ ।

"त्वष्टुः सदाभ्यासगृहीतशिल्प-
विज्ञानसम्पत्प्रसवस्य सीमा ॥"

अयन्तु माघमासे सूर्य्यरथपरिभ्रमणाधिकारिणामन्यतमः । यथा, विष्णुपुराणे । २ । १० । १५ ।

"त्वष्टाथ जमदग्निश्च क्रमशोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ अतजित् धृतराष्ट्रोऽथ वत्सरः ।
माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे ॥"

विश्वकर्म्मणः पुत्रविशेषः । यथा, विष्णुपुराणे । १ । १५ । १२२ ।

"तस्य पुत्रास्तु चत्वारस्तेषां नामानि मे शृणु ।
अजैकपादहिर्बुध्न्यत्वष्टा रुद्रश्च बुद्धिमान् ॥"

प्रजापतिविशेषः । यथा, महाभारते ।५।६।३ ।

"त्वष्टा प्रजापतिर्ज्ञांसीत् देवश्रेष्ठो महातपाः ।
स पुत्रं वै त्रिशिरसमिन्द्रद्रोहात् किलाच्छिनत् ॥"

महादेवः । यथा, महाभारते । १३।१७।१०३ ।

"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥")

वर्णसङ्करजातिविशेषः । इत्यमरः । २ ।१०।६ ॥ अस्य पर्य्यायः । काष्ठतट्टशब्दे उत्पत्तिश्च द्रष्टव्या ॥ (इन्द्रः । इति ऋग्वेदभाष्ये सायणः । १ । ११७ । २८ ॥ असुरभेदः । इति तत्रैव सायणः । ३ । ४८ । ४ ॥

त्वाचप्रत्यक्षं, क्ली, (त्वाचं त्वच्-सम्बन्धि प्रत्यक्षम् ।) सर्व्वज्ञानम् । त्वगादेः सर्व्वद्वारा बोधः । यथा, "अथ ज्ञानमाचे त्वज्ञानःसंयोगस्य यदि कारणत्वं तदा रासनधात्वादिकाले त्वाचप्रत्यक्षं स्यात् ।" इति सिद्धान्तसुक्तावली ॥

त्वाष्टी, स्त्री, दुर्गा । यथा,—

"तुष्ट तुष्टो स्तुतो धातुस्तस्य तुष्टी निपातने ।
स्तवनेषा प्रजास्तुष्टी त्वाष्टी तेन प्रकीर्त्तिता ॥"

इति देवीपुराणे ४५ अध्यायः ॥

त्वाष्ट्रः, पुं, (त्वष्टुरपत्यं पुमान् । अण् ।) वृत्रासुरः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । ५ । ५ । ४ ।

"उद्यमेन हतस्त्वाष्ट्रो नमुचिर्बल एव च ॥"

विश्वरूपः । यथा, भागवते । ६ । ८ । ३ ।

"वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुशृण्वते ॥"

त्वष्टृसम्बन्धिनि, त्रि । यथा, मार्कण्डेये ।२१।८५।

"ततोऽस्त्रं त्वाष्ट्रमादाय चिच्छेद प्रति दानवान् ॥"

तथा, भागवते । ६ । १४ । २७ ।

"अपयित्वा चरं त्वाष्ट्रं त्वष्टारमजयद्विभुः ॥"

त्वष्टा अधिष्ठात्री देवतास्येति अण् । चित्रानक्षत्रम् । यथा, बृहत्संहितायाम् । ७ । ११ ।

"घोरा अवश्यस्त्वाष्ट्रं वसुदेवं वारुणञ्चैव ॥")

त्वाष्ट्री, स्त्री, (त्वष्टा अधिष्ठात्री देवतास्याः । त्वष्टृ+अण्+ङीप् ।) चित्रानक्षत्रम् । इति हेमचन्द्रः ॥ (त्वष्टुर्विश्वकर्म्मणोऽपत्यं स्त्री ।) संज्ञानामसूर्य्यपत्नी । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ६६ । ३५ ।

"त्वाष्ट्री तु सवितुर्भार्य्या वडवा रूपधारिणी ।
अश्वयत् महाभागा सान्त्वरीत्यश्विनावुभौ ॥")

रथिका । क्षुद्ररथः । इति त्रिकाण्डशेषः ॥

त्विट्, [ष्] स्त्री, (त्विष दीप्तौ+सम्पदादित्वात् क्विप् ।) शोभा । (यथा, महाभारते । ३ । २० । २ ।

"कपर्द्दं द्वारकावासं महाराज ! हतत्विषम् ॥")

प्रभा । (यथा, माघे । १ । ३ ।

"वपुस्त्विषामित्यवधारितं पुर-
स्तात् पुरारेरिति विभावितात्मभिः ॥")

वाक् । इति मेदिनी । षे, १६ ॥ अवसायः । जिगीषा । इति विश्वः ॥ (दीप्यमाने, त्रि । यथा, ऋग्वेदे । ४ । १७ । २ ।

"तव त्विषो जनिमन्नुत द्यौरेजद्भूमिर्भियसा सस्मन्मन्योः ॥"

"हे इन्द्र त्विषो दीप्यमानस्य तव स्वदीये जनिमन् जन्मनि सति।" इति तद्भाष्ये सायणः ॥)

त्विष, ओ, ञ भासे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-दाने-सकं-अनुदात्तेत् ।) ओ, अत्विक्षत् । ञ, त्वेषति त्वेषते । भासो दीप्तिः । अदानिवासे दाने च त्विषौ ञ अनुवर्त्तते । ओ, अवात्विक्षत् । ञ, अवत्वेषति अवत्वेषते । अनो निवसति ददाति दीप्यते वा इत्यर्थः । इति दुर्गादासः ॥

त्विषा, स्त्री, (त्विष्+इलन्तात् वा टाप् ।) दीप्तिः । इति शब्दरत्नावली ॥

त्विषाम्पतिः, पुं, (त्विषां प्रभाणां पतिः । षष्ठ्या असुक् ।) सूर्य्यः । इत्यमरः । १ । ३ । ३० ॥

त्विषिः, स्त्री, (त्विष दीप्तौ+"इगुपधात् कित् ।" उणां ४ । ११६ । इति इन् स च कित् ।) किरणम् । इति हेमचन्द्रः । २ । १४ ॥ (यथा, ऋग्वेदे । ६ । ७१ । ६ ।

"उच्चैव यूथा परियन्नरावीदधि
त्विषीरधित सूर्य्यस्य ॥")

त्वसर, क्षद्मगतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकं च-सेट् ।) दन्त्यवर्गाद्यस्त्राधोदन्त्यसकारः । त्वसरति धूर्त्तः क्षद्मेन गच्छतीत्यर्थः । इति दुर्गादासः ॥ (यथा, अथर्ब्ववेदे । ८ । ६ । ८ ।

"यस्या स्वपन्तीं त्वसरति यस्या दिप्सति जाग्रतीम् ॥")

त्वसरः, पुं, (त्वसरति कौटिल्यं गच्छतीति । त्वसर + "भृञ्शीतृचरित्वसरीति ।" उणां १ । ७ । इति उः ।) खड्गमुष्टिः । इत्यमरः । २ । ८ । ६० ॥ तत्पर्य्यायः । मुष्टिः २ तालतलः ३ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । २४३ ।

"ज्योत्स्नाभिसारसमुचितवेषे ! याकोय-
मल्लिकोत्तंसे ! ।
विभ्रमि मनो निशितेव स्मरस्य कुसुमदृत्वसरुच्छ-
रिका ॥"

सर्पः । यथा, ऋग्वेदे । ५ । ५० । १ ।

"मा मां पदेन रपसा विदत्त्वसरुः ।"

"तथा त्वसरुश्छद्मगामी जिह्मगः सर्प इत्यर्थः मां पदेन पादभवेन रपसा । रपि शब्दकर्म्मा । शब्देन मा विदत् मा जानातु ।" इति तद्भाष्ये सायणः ॥)

थ

थ, थकारः । स श्वसनसन्दश्यवर्णः । तवर्गद्वितीयवर्णश्च । अस्योच्चारणस्थानं दन्ताः । इति शाकरणम् ॥ (यथा, शिक्षायाम् । १७ ।

"सुमूर्द्धन्याऽष्टुरसा दन्त्या लृतुलसाः स्मृताः ॥")

अस्य स्वरूपं यथा,—

"थकारं पद्मलापाङ्गि ! कुण्डली मोक्षरूपिणी ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा ।
अरुणादित्यसङ्काशं थकारं प्रणमाम्यहम् ॥"

इति कामधेनुतन्त्रम् ॥

(बङ्गीयवर्णमालायाम्) अस्य लेखनप्रकारो यथा,—

"कुञ्चिता कुण्डला भूत्वा वामाद्दक्षिणतस्ततः ।
वामतः कुञ्चिता भूत्वा दक्षाधोदक्षतो गता ॥
ऊर्द्धे ऋज्वायता रेखा सुरा गङ्गादयः क्रमात् ।
वाणी भवानी लक्ष्मीश्च ध्यानमस्य प्रचक्षते ॥"

अस्य ध्यानादि यथा,—
"नीलवर्णां त्रिनयनां षड्भुजां वरदां पराम्।
पीतवस्त्रपरीधानां सदा सिद्धिप्रदायिनीम्॥
एवं ध्यात्वा यकारन्तु तन्मन्त्रं दशधा जपेत्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा॥
तरुणादित्यसङ्काशं यकारं प्रथमाम्यहम्॥"
इति वर्णोद्धारतन्त्रम्॥ * ॥

अस्य नामानि यथा,—
"यः स्थिरामी महाग्रन्थिर्ग्रन्थिग्राहो भयानकः।
ग्रिली ग्रिरसिजो दक्षो भद्रकाली ग्रिलोच्चयः॥
क्षयो वृद्धिर्विकर्म्मा च दक्षनाग्राधिपोऽमरः।
वरदा भोगदा केशो वामजानुरसोऽनघः॥
लोलौजश्चयिनी गुह्यः ग्रारचन्द्रविदारकः॥"
इति नानातन्त्रग्राह्यम्॥

यं, क्ली, रत्नधनम्। मङ्गलम्। साध्यसम्। इति मेदिनी। धे, १॥

यः, पुं, (युङ् संहतौ + डः।) पर्व्वतः। भयङ्करः। इति मेदिनी। धे, १॥ व्याधिभेदः। भयचिह्नम्। भक्षणम्। इति ग्रब्दरत्नावली॥

युङ, ग्रि संहतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) ग्रि, युड्डति। अयुड्डीत् तुयोड्ड। इति दुर्गादासः॥

युतुकारः, पुं, (क्त + भावे घञ्। युदित्यव्यक्त-ग्रब्दस्य कारः करणं यत्र।) निष्ठीवनत्यागानुकरणग्रब्दः॥

युर्व्व, ईं वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पञ्चमस्वरौ। यूः युरौ युरः। ईं. घूर्णः। इति दुर्गादासः॥

युर्व्वणं, क्ली, हननम्। युर्व्वधातोर्भावे अनटि (ल्युटि) निष्पन्नम्॥

थूथू, व, निष्ठीवनत्यागानुकरणग्रब्दः। यथा,—
थूथूकृत्य वमन्निरध्वगजनैरिति क्षत्रियकान्तम्॥

यैथे, व, वाद्यानुकरणग्रब्दविशेषः। इति सङ्गीतदामोदरः॥

योड्डनं, क्ली, संवरणम्। इति युडधातोर्भावेऽनट् प्रत्ययः (ल्युट्)॥

द

द, दकारः। स वक्त्रनाशदग्धवर्णः तवर्गद्वितीयवर्णश्च। अस्योच्चारणस्थानं दन्तः। इति वाकरणम्॥ (यथा, ग्रिक्षायाम्। १७।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः
स्मृताः॥")

अस्य स्वरूपं यथा,—
"दकारं ग्रृणु चार्व्वङ्गि! चतुर्व्वर्गप्रदायकम्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा॥
त्रिग्रक्तिसहितं देवि! त्रिविन्दुसहितं सदा।
व्योमादितत्त्वसंयुक्तं स्वयं परमकुण्डली॥
रत्नविद्युल्लताकारं दकारं हृदि भावय॥"
इति कामधेनुतन्त्रम्॥

अस्य ध्यानादि यथा,—
"ध्यानमस्य दकारस्य वक्ष्यते ग्रृणु पार्व्वति!।
चतुर्भुजां पीतवस्त्रां नवयौवनसंस्थिताम्॥
अनेकरत्नघटितहारनूपुरशोभिताम्।
एवं ध्यात्वा दकारन्तु तन्मन्त्रं दशधा जपेत्॥"
अस्य नामानि यथा, नानातन्त्रग्राह्ये।
"दोर्द्दीर्घो घातकिर्धाता दाता दक्षं कलाचकम्।
दीनं ग्रानच्च दानच्च भक्तिराड्दवनी धरा॥
सुषुम्ना योगिनी सद्यः कुण्डली वामगुल्फकः।
कात्यायनी ग्रिवा दुर्गा लङ्घना गा त्रिकण्डकी॥
खस्तिकः कुटिलारूपः क्षयाक्षोमा जितेन्द्रियः।
धर्म्मेन्द्रद्वारदेवच्च ग्रमा बहुसुवत्सला॥
हरिद्वापुरमत्नौ च दक्षपार्श्वस्थिरेखकः॥"

दं, क्ली, (ददाति आनन्दमिति। दा + बाहुलकात् कः।) भार्य्या। इत्येकाक्षरकोषः॥

दः, पुं, (दै प ग्रुद्धौ वा दा दाने + बाहुलकात् कः।) अचलः। दत्तः। दाता। इति मेदिनी दे, १॥ (दो क्षये + डः।) खण्डनम्। इति ग्रब्दरत्नावली॥ (यथा, माघे। १६। ११४।
"दाददोड्डइड्डादी दादादोड्डदर्द्दा ददोः।
डुड्डादं ददते डुड्डे ददाद्द ददोऽद्दः॥"
"ददते इति दादोदागम्। ददाने कर्म्मणि घञ्। दादं ददातीति दादो दानप्रदः।" इत्यादौ मल्लिनाथशततीकायामर्थविशेषा द्रष्टव्याः॥)

दंशः, पुं, (दशतीति। दंश दंशने + पचाद्यच्।) कीटविशेषः। दाँश इति भाषा। तत्पर्य्यायः। वनमक्षिका २। इत्यमरः। २। ५। २७॥ गोमक्षिका ३ अरण्यमक्षिका ४ भम्भरालिका ५। इति ग्रब्दरत्नावली॥ पांशुरः ६ दंशकः ७। इति हारावली॥ दुष्टसुखः ८ क्रूरः ९ क्षुद्रिका १०। इति राजनिर्घण्टः॥ (यथा, मनुः। १। ४५।
"खेदजं दंशमशकं यूकामक्षिकमत्कुणम्।
उष्णग्योपजायन्ते यच्चान्यत् किञ्चिदीदृग्रम्॥"
दशतीव ग्ररीरमिति।) वर्म्म। (यथा, भागवते। ३। १८। ६।
"परानुवक्त्रं तपनीयोपकल्पं
महागदं काञ्चनचित्रदंशम्॥"
दंश + भावे घञ्।) दंशनम्। इति मेदिनी। शे, ७।
("सुप्रता जायते दंशे क्षयाश्चातिसवत्सरक्॥"
इति सुश्रुते कल्पस्थाने षष्ठेऽध्याये॥)
दन्तः। इति हेमचन्द्रः। ३। २४८॥ खण्डनम्। (दन्तक्षतम्। यथा, आर्य्यासप्तग्रत्याम्। ५११।
"वर्षाक्षुतिर्न ललाटे न ग्रुलितमङ्गं न चाधरे दंशः।
उत्पलमहारि वारि च न सरसुपायस्तपरेण॥")
दोषः। मर्म्म। सर्पदन्तम्। इति विश्वः॥ (यथा, "सर्व्वैरेवादितः सर्पैः ग्राखादस्य देहिनः।
दंशस्योपरि वक्तीयादरिष्टाश्चतुरङ्गुले॥

द्योतचर्म्मान्तवल्कानां ग्रुद्धनाग्यतमेन च।
न गच्छति विषं देहमरिष्टाभिर्निवारितम्॥"
इति सुश्रुते कल्पस्थाने पञ्चमेऽध्याये॥
असुरविशेषः। यथा, महाभारते। १२। ३। १६।
"सोऽब्रवीदहमांसं प्राक् दंशो नाम महासुरः॥"
अयन्तु भृगुभार्य्यामपहरन् तच्छापात् मांसग्योणिताग्री कीटो जातः। ततः कदाचित् गुरोः परग्रुरामस्य निद्रां प्रतिपालयितुः कर्णस्य ऊरुदेग्रं निर्भिद्य ग्रोणितं पीतवान्। ततः परग्रुरामेणायं ग्रापात् निर्म्मोचितः॥ एतद्-विवरणन्तु तत्रैवाध्याये द्रष्टव्यम्॥)

दंशकः, पुं, (दशतीति। दंश + ण्वुल्।) दंशः। इति हारावली। १२३॥ (नृपविशेषः। स तु कम्पनादेग्राधिपतिः। यथा, राजतरङ्गिण्याम्। १७८।
"दंशकः कम्पनाधीशः प्रहृष्टे तत्र सङ्गरे।
विहृतो विक्रमाटायां निपत्य निहतः खड्गैः॥")

दंशनं, क्ली, (दशतीव ग्ररीरमिति। दंश + ल्युः।) वर्म्म। (यथा, महाभारते। ३। २६८। १८।
"संनह्यध्वं सर्व्व एवेन्द्रकल्पा
महान्ति चारूणि च दंशनानि॥"
दंश + भावे ल्युट्।) दन्तादिना खण्डनम्। इति हेमचन्द्रः॥ कामड़ान कुलफुटान इति भाषा। (यथा, महाभारते। ८। ८३। ३४।
"दंशनव्याहिभिः क्षय्यैर्दाहच्च जतुवेश्मनि॥")

दंशभीरुः, पुं क्ली, (दंशात् वनमक्षिकातः भीरुर्भयग्रीलः।) महिषः। इति त्रिकाण्डग्रेषः॥

दंशमूलः, पुं, (दंशवदयं मूलमस्य।) ग्रिग्रुः। इति राजनिघण्टः॥ (गुणादयोऽस्य ग्रिग्रुग्रब्दे ज्ञातव्याः॥)

दंशितः, त्रि, (दंशो वर्म्म सञ्जातोऽस्य परिहितत्वादिति। दंश + तारकादित्वात् इतच्।) वर्म्मितः। (यथा, महाभारते। २। २६। २।
"महता बलचक्रेण पररादृावमर्द्दिना।
दक्ष्यन्नरथपूर्ण्येन दंग्रितेन प्रतापवान्॥"
दंशते इति। दंश + णिच् + भावे क्तः।) दष्टः। इति हेमचन्द्रः॥ (भासमानः। यथा. महाभारते। ४। ४०। २।
"धारया यत्र सौवर्णाः पृष्ठे भासन्ति दंग्रिताः।
सुपाग्र्य सुग्रहत्वेव कस्तेतद्धनु रुक्तमम्॥"
"दंशिता भासमानाः।" इति नीलकण्ठः॥)

दंष्ट्री, क्ली, (क्षुद्रो दंशः। स्वार्थे ङीष्। यद्वा, दशतीति। दंश + अच्। गौरादित्वात् ङीष्।) क्षुद्रदंशः। इत्यमरः। २। ५। २७। छोट-दाँश इति भाषा॥

दंष्ट्रा, क्ली, (दशतेऽनयेति। दद्ग्र + "दाम्नी-ग्रसेति।" ३। २। १८२। इति करणे ष्ट्रन्। यद्वा, "सर्व्वधातुभ्यष्ट्रन्।" उणां ४। १५८। इति ष्ट्रन्। गौरादिपाठे पितामहीग्रब्दस्य पाठात् पितां ङीषोऽविद्यत्वात् टाप्।) दन्त-

विशेषः। तत्पर्य्यायः। दाढ़ा २। इति हेमचन्द्रः। ३। २४७॥ (यथा, साहित्यदर्पणे। १। ३।

"यस्यालीयत शुल्कसीन्नि जलधिः पृष्ठे जगन्मण्डलम्।
दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी॥")

दंष्ट्रिका, स्त्री, (दंष्ट्रा विद्यतेऽस्याः। दंष्ट्रा+"ब्रीह्यादिभ्यश्च।" ५। २। ११६। इति ठन्।) दाढ़िका। इति हेमचन्द्रः। ३। २४७॥

दंष्ट्री, [न्] पुं स्त्री, (प्रशस्ता दंष्ट्रा अस्त्यस्येति। दंष्ट्रा+"ब्रीह्यादिभ्यश्च।" ५। २। ११६। इति इनिः।) शूकरः। इत्यमरः। २। ५। २॥ सर्पः। इति शब्दरत्नावली॥ (यथा, रामायणे। २। ३३। २३।

"विषाणि दंष्ट्रिणः सर्व्वे सानूनि मृगपक्षिणः।
त्यजन्त्यसह्यवाङ्गीता गजाः सिंहा वनाश्रयम्॥")

दंष्ट्राविशिष्टे, त्रि। यथा,—

"दंष्ट्रिभिः शृङ्गिभिर्व्वापि हता स्वेच्छेच तस्करैः।
ये स्वार्थ्ये हता यान्ति राजन्! स्वर्गं न संशयः॥"

इति शुद्धितत्त्वे अग्निपुराणम्॥

दक्, स्त्री, (उदक+एषोदरादित्वात् साधुः।) जलम्। इति त्रिकाण्डशेषः॥

दक्ष, ड क्षदे। वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) क्षद दृह श्रीघ्रकरणम्। ड, दक्षते धनसृद्योगी। श्रीघ्रसृत्पादयति इत्यर्थः। इति दुर्गादासः॥ (सामर्थ्ये अकर्म्मकोऽयम्। यथा, ऋग्वेदे। २। १।११।

"तमिळा घृतमिन्नसि दक्षसे॥"

"दक्षसे दानाय समर्थो भवसि॥" इति तद्भाष्ये सायणः॥)

दक्ष, ष म ड हन्त्यर्थे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) म, अदक्षि अदाक्षि। दक्षं दक्षम्। दाक्षं दाक्षम्। मानुबन्धवलादनुपधयोरपि दीर्घः। क्षमते तु दीर्घविधिरुपधां नापेक्षते। ष, दक्षा। सेमक्षात् सरोरित्यनेनेवेदधिक्षेऽस्य धातुबन्धस्वरूपर्य्यन्तघटादिभ्यो ड इति प्राचीनमतानुवादार्थः। ड, दक्षते। हन्त्यर्थे गतिवधयोः। इति दुर्गादासः॥

दक्षः, पुं, (दक्षते वृद्धिप्रवृद्धये समर्थो भवतीति। दक्ष+अच्।) प्रजापतिविशेषः। स ब्रह्मणो दक्षिणाङ्गुष्ठात्जातः। ततः प्रभृति मैथुनेन प्रजा जाताः। यथा,—

"शरीरात्तस्य वक्ष्यामि मानसान् प्रजापतेः।
अङ्गुष्ठाद्दक्षिणाद्दक्षः प्रजापतिरजायत॥"

इति मत्स्यपुराणे। ३। ६॥

"यथा ससर्ज चैवादौ तथैव शृणुत द्विजाः!।
यदा तु दक्षतत्तस्य दैवर्षिगणपन्नगान्॥
न वृद्धिमगमल्लोकस्तदा मैथुनयोगतः।
दक्षः पुत्रसहस्राणि पत्न्यजन्यामजीजनत्॥"

इति च तत्रैव। ८। ३—४॥

अस्य भार्य्या स्वायम्भुवमनुकन्या प्रसूतिः। अस्य षोड़शकन्याः यथा, श्रद्धा १ मैत्री २ दया ३ शान्तिः ४ तुष्टिः ५ पुष्टिः ६ क्रिया ७ उन्नतिः ८ बुद्धिः ९ मेधा १० स्मृतिः ११ तितिक्षा १२ ह्रीः १३ स्वाहा १४ स्वधा १५ सती १६। तस्य त्रिसहस्रपुत्राः। दक्षप्रजापतिर्द्वितीयश्चाक्षुषे दक्षप्रचेतसः सुतो भूत्वा षष्ठमन्वन्तरे प्रजासृष्टिमकार। स असिक्न्यां पत्न्यां षष्टिं कन्या जनयित्वा प्रजापतिभ्यो दत्तवान्। धर्म्माय दश। कश्यपाय सप्तदश। चन्द्राय सप्तविंशतिः। शशाङ्काय दे। भूताय दे। अङ्गिरसे दे। इति श्रीभागवतम्॥ * ॥

ताम्रचूड़ः। (यथा, चरके सूत्रस्थाने २७ अध्याये।

"धार्त्तराष्ट्रचकोराणां दक्षाणां शिखिनामपि।
चटकानाञ्च यानि स्युरङ्गानि च हितानि च॥")

सुनिभेदः। (यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ४। ६७।

"कणादो गौतमः कण्वः पाणिनिः शाकटायनः।
ग्रन्थञ्चकार यद्भूत्वा दक्षः कात्यायनः स्वयम्॥"

अयं हि धर्म्मशास्त्रप्रयोजकानामन्यतमः। यथा, याज्ञवल्क्ये। १। ५।

"प्राचेतसो मनुर्व्यासः शङ्खलिखितौ दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥")

हरहयः। द्रुमभेदः। वह्निः। इति विश्वः॥ महेशः। इति शब्दरत्नावली॥ (यथा, महाभारते। १३। १७। ११३।

"धृतिमान् मतिमान् दक्षः सत्यवाक्यञ्च युगाधिपः॥"

विष्णोर्नामविशेषः। यथा, महाभारते। १३। १४८। १११।

"अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः॥"

बलम्। इति निघण्टुः। २। ६। "दक्ष ग्रैवेय चकारात् वृद्धौ। दक्ष गतिहिंसनयोः। दक्षतिरुत्साहार्थः। इति स्कन्दस्वामी। असुन्। ग्रन्थुविजये स्त्रिग्रो भवत्यनेन स्त्रिग्धन्तं वानेन ग्रन्थुः प्रोतृसाहित्यो वा भवति ग्रन्थुविजये।"

"दक्ष इति सकारान्तं बलनाम अकारान्तमपि तस्यैवमर्थान्तरे द्रष्टव्यम्॥" इति तट्टीकायां देवराजयज्वा। यथा, ऋग्वेदे।१।८५।६।

"स दक्षाणां दक्षपतिर्बभूव॥"

"सोऽग्निर्दक्षाणां सर्व्वेषां बलानां दक्षपतिर्बलाधिपतिर्बभूव।" इति तद्भाष्ये सायणः॥ गरुड़स्य पुत्राणामन्यतमः। यथा, महाभारते। ५। १०१। १२।

"मेघवृत् कुमुदो दक्षः सर्पान्तः सोमभोजनः॥")

चि, पटुः। इति मेदिनी। के, १४॥ अस्य पर्य्यायः चतुरग्रन्थे द्रष्टव्यः॥ (यथा, महाभारते। १। ७४। ३६।

"सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रजावती।
सा भार्य्या या पतिप्राणा सा भार्य्या या पतिव्रता॥"

समर्थः। यथा, ऋग्वेदे। १। ५६। ४।

"दक्षयन्ती इव क्षत्रं रोदसी
गिरो होता मनुष्यो न दक्षः॥"

प्रवृद्धः। यथा, तत्रैव। १। १५। ६।

"युवं दक्षं धृतव्रत मित्रावरुण दूळभम्॥"

"दक्षं प्रवृद्धम्।" इति तद्भाष्ये सायणः॥

दक्षिणः। अपसव्यम्। यथा, महानिर्व्वाणे। ३। ४४।

"प्राणायामं ततः कुर्य्यान् मूलेन प्रणवेन वा।
मध्यमानामिकाभ्याञ्च दक्षनासस्य पार्श्वतः॥")

दक्षकन्या, स्त्री, (दक्षस्य प्रजापतेः कन्या।) दुर्गा। इति त्रिकाण्डशेषः॥ दक्षप्रजापतेः सुताः। ताः षष्ट्यामृतसञ्ज्ञकाः। तासां नामानि यथा,—

"सती ज्योतिः क्षमा क्षान्तिः स्वाहा क्षुत्क्षया स्वधा तथा।
प्रीतिः क्षमा च संभूतिः सन्नतिश्च अरुन्धती॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः सिद्धिस्तथा रतिः॥
अरुन्धती वसुर्यामी लवा भानुर्मरुत्वती।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामतः॥
अदितिश्च दितिश्चैव दनुः काला दनायुषा।
सिंहिका सुरसा कद्रुर्विनता सुरभिः खसा॥
क्रोधा दरा च प्रोवा च दक्षकन्याः प्रकीर्त्तिताः।
षष्ट्यामृता सिद्धियोगिन्यः सर्व्वलोकस्य मातरः॥"

इति वह्निपुराणे गणभेदनामाध्यायः॥

(अयं द्वितीयजन्मनि प्राचेतसो भूत्वा षष्टिं कन्या जनयामास। यथा, मत्स्यपुराणे। ५।१२-१४।

"ततस्तेषु विनष्टेषु षष्टिं कन्याः प्रजापतिः।
वैरिण्यां जनयामास दक्षः प्राचेतसस्तथा॥
प्रादात् स दश धर्म्माय कश्यपाय त्रयोदश।
सप्तविंशतिसोमाय चतस्रोऽरिष्टनेमये॥
द्वे चैव भृगुपुत्राय द्वे शशाङ्काय धीमते।
द्वे चैवाङ्गिरसे तद्वत्तासां नामानि विस्तरः॥
शृणुध्वं देवमातॄणां प्रजाविस्तरमादितः॥"

एतासां नामानि तत्रैव द्रष्टव्यानि॥)

दक्षजा, स्त्री, (दक्षात् प्रजापतेर्जायते इति। जन+"षष्ठ्यामजातौ।" ३। २। ६२। इति डः।) दुर्गा। इति हेमचन्द्रः॥ (अश्विन्यादिनक्षत्रञ्च॥)

दक्षजापतिः, पुं, (दक्षजानां अश्विन्यादिदक्षकन्यानां पतिः।) चन्द्रः। इति हेमचन्द्रः॥ (दक्षजायाः सत्याः पतिः इति विग्रहे शिवः॥)

दक्षसावर्णिः, पुं, नवममनुः। अस्मिन् मन्वन्तरे ऋषभनामा भगवदवतारः। शुचिनामा इन्द्रः। पारमरीचिगर्भाद्या देवाः। द्युतिमदाद्याः सप्तर्षयः। भूकेतुदीप्तिकेतुप्रभृतयो मनुपुत्रा भविष्यन्ति। इति श्रीभागवतम्॥ (अस्य विशेषविवृतिस्तु मार्कण्डेयपुराणे ९४ अध्याये द्रष्टव्या॥)

दक्षा, स्त्री, (दक्षते वर्द्धते भारधारणे समर्था भवतीति वा। दक्ष+अच्। टाप्।) पृथिवी। इति मेदिनी। के, १५॥

दक्षाध्वरध्वंसकृत्, पुं, (दक्षाध्वरस्य दक्षयज्ञस्य ध्वंसं नाशं करोतीति। कृ+क्विप् तुगागमश्च।) शिवः। इति हलायुधः॥

दक्षाय्यः, पुं, (दक्षते कार्य्येषु समर्थो भवतीति। दक्ष+"शुदक्षिक्षुक्षिभ्यः क्याय्यः।" उणा॰ ३। ६६। इति क्याय्यः।) गरुड़ः। यज्ञः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (दक्ष वृद्धौ+क्याय्यः। त्रि, वर्द्धकः। यथा, ऋग्वेदे। १। ६१। ३।

"शुचिर्द्युमधि प्रियो न मित्रो
दक्षाय्यो अर्य्यमेवासि सोम!॥"

"त्वमर्य्यमेवासाभिर्द्धनमानः क्षयं इव दक्षाय्योऽसि सर्व्वेषां वर्द्धकोऽसि।" इति सायणः॥ पूजनीयः। यथा, तत्रैव। ७। १। २।

"दक्षाय्यो यो दम आस नित्यः॥"

"योऽग्निर्हे मे गृहे दक्षाय्यः पूजनीयो हविर्भिः समर्धनीयो वा।" इति तद्भाष्ये सायणः॥)

दक्षिणः, त्रि, (दक्षते इति। दक्ष वृद्धौ+"हृदक्षिभ्यामिनन्।" उणा॰। २। ५०। इति इनन्।) दक्षिणोद्भूतः। (दक्षिणदिग्भवः। यथा, रघुः। ४। ८।

"स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः॥"

दक्षिणदिक्स्थितः। यथा, मनुः। ५। ६२।

"दक्षिणेन स्पृशं शूद्रं पुरुषारेण निर्हरेत्॥")

सरलः। (यथा, महाभारते। ४। ५। २७।

"दक्षिणां दक्षिणाचारो दिशं येनाजयत् प्रभुः॥")

परच्छन्दानुवर्त्ती। आरामः। इति मेदिनी॰ खे, ५०॥

("दक्षिणः सरलावामपरच्छन्दानुवर्त्तिषु।
वाच्यवद्दक्षिणावाटीयज्ञदानप्रसिद्धयोः॥"
इति विश्वप्रकाशात्। खे, ४५॥)

दक्षः। अपसव्यम्। इति हेमचन्द्रः॥ डाहिन इति भाषा। (यथा, मनुः। २। ६३।

"उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः॥")

दक्षिणहस्तप्रदाने दोषो यथा,—

"दत्तहस्तप्रदाता च सर्पश्च सप्तजन्मसु।
ततो भवेद्धस्तहीनो मानवश्च ततः शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥

दक्षिणहस्ते प्रतिग्रहो यथा,—

"ओंकारसञ्चरन् प्राज्ञो द्रविणं ग्रहणोदकम्।
गृह्णीयाद्दक्षिणे हस्ते तदन्ते स्वस्ति कीर्त्तयेत्॥"
इत्यादित्यपुराणम्॥

(प्रदक्षिणः। यथा, भागवते। १। १४। १३।

"ग्रस्ताः कुर्व्वन्ति मां सर्वं दक्षिणं पशवोऽपरे।
वाङ्मांश्च पुरुषव्याघ्र! लक्षये रुदतो मम॥")

पुं, चतुर्थनायकान्तर्गतनायकविशेषः। तस्य लक्षणम्। (यथा, साहित्यदर्पणे। ३। ४०।

"यस्त्वनेकमहिलासु समरागो दक्षिणः
कथितः॥")

यथा च "सकलनायिकाविषयसमसदृशानुरागः। अस्योदाहरणं यथा,—

"अन्तःपुरे स्फुरति पद्मदृशां सहस्र-
मप्रिप्रियं कथय कुत्र निवेशयामि।
इत्याकलय्य नयनाम्बुरुहे निमील्य
रोमाञ्चितेन वपुषा स्थितमच्युतेन॥"
इति रसमञ्जरी॥ *॥

(तन्त्रोक्ताचारविशेषे, स्त्री। यथा, कुलार्णवे ५ खण्डे।

"सर्व्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं महत्।
वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम्॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम्।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं न हि॥")

दक्षिणकालिका, स्त्री, (दक्षिणा अनुकूला कालिका।) आद्याशक्तिः। यथा,—

"ऊर्द्धे वामे क्षपायां करकमलतले छिन्नमुण्डं तथाधो
हस्ते चाभीवरञ्च त्रिजगदघहरे दक्षिणे कालिके च।" इति तन्त्रसारः॥

दक्षिणतः, अ, (दक्षिण+"दक्षिणोत्तराभ्यामतसुच्।"५।३।२८। इति अतसुच्।) दक्षिणस्यां दिशि। इत्यमरटीकायां रायमुकुटः॥ (यथा, मनुः। ३। ६१।

"पृष्ठवास्तुनि कुर्व्वीत बलिं सर्व्वात्मभूतये।
पित्रभ्यो बलिशेषन्तु सर्व्वं दक्षिणतो हरेत्॥"
दक्षिण+तसिल्। दक्षिणभागे। यथा, महानिर्व्वाणतन्त्रे। ३। ४८।

"पुनर्दक्षिणतः कुर्य्यात् पूर्व्ववत् सुरपूजिते॥")

दक्षिणतारं, क्ली, दक्षिणतीरम्। यथा, "दिक्शब्देभ्यस्तीरस्य तारभावो वा। दक्षिणतारं दक्षिणतीरं उत्तरतारं उत्तरतीरम्।" इति सिद्धान्तकौमुद्यां समासप्रकरणम्॥

दक्षिणपूर्व्वा, स्त्री, (दक्षिणस्याः पूर्व्वस्याश्च दिशोरन्तरालम्। "दिङ्नामान्यन्तराले।" २। २। २६। इति समासः।) पूर्व्वदक्षिणकोणः। इति व्याकरणम्॥ (यथा, भागवते। ६। १६। २२।

"दिशि दक्षिणपूर्व्वस्यां हृत्वा दक्षिणतो यदुम्॥"
तद्दिग्भागस्थे, त्रि। यथा, आश्वलायनश्रौतसूत्रे। ४। २। ११।

"दक्षिणपूर्व्व उद्धृत्यान्वाहवनीयं निदधाति॥")

दक्षिणस्थः, पुं, (दक्षिणे भागे तिष्ठतीति। स्था+कः।) सारथिः। इत्यमरः। २। ८। ६०॥ दक्षिणस्थिते, त्रि।

दक्षिणा, स्त्री, (दक्षते इति। दक्ष वृद्धौ+"हृदक्षिभ्यामिनन्।" उणा॰। २। ५०। इति इनन्। ततष्टाप्।) दक्षिणदिक्। तत्पर्य्यायः। अवाची २ ग्रामनी ३ यामी ४ वैश्वस्तरी ५। इति राजनिर्घण्टः॥ (यथा, कुमारे। ३। २५।

"दिक् दक्षिणा गन्धवहं सुखेन
बलीकनिश्वासमिवोत्ससर्ज॥")

दक्षिणवायुगुणाः। षड्रसयुक्तत्व। चक्षुर्हितत्वम्। बलवर्द्धनत्वम्। रक्तपित्तप्रशमनत्वम्। सौख्यकान्तिमतिप्रदत्वम्। ग्रस्ननाशित्वम्। विदाहित्वम्। अस्मारुतकोपनत्वम्। गण्डूपदादिकीटानां जनकत्वञ्च। इति द्रव्यगुणः॥ *॥

अस्या दिशोऽधिपतयः दृषकन्यामकरराशयः। इति ज्योतिषम्॥ यज्ञादिविधिदानम्। इति मेदिनी॥ प्रतिष्ठा। इति हेमचन्द्रः॥ यज्ञादिसम्पादकतदन्तविहितदानम्। सा यज्ञपत्नी श्रीकृष्णदक्षिणांशभूता। यथा,—

"कार्त्तिकीपूर्णिमायान्तु रासे राधामहोत्सवे।
आविर्भूता दक्षिणांशात् कृष्णस्य तेन दक्षिणा॥"

दक्षिणाया अदाने तस्या इङ्गितं यथा,—

"यज्ञो दक्षिणया सार्द्धं पुत्रेण च फलेन च।
कर्म्मिणां फलदाता चेत्येवं वेदविदो विदुः॥
कृत्वा कर्म्म च तत्रैव तूर्णं दद्याच्च दक्षिणाम्।
तत्कर्म्मफलमाप्नोति देवैरुक्तमिदं मुने!॥
कर्म्मणः कर्म्मणि पूर्णे च तत्फलं यदि दक्षिणाम्।
न दद्याद्ब्राह्मणेभ्यश्च देवेनाज्ञानतोऽथ वा॥
मुहूर्त्ते समतीते तु द्विगुणा सा भवेद्ध्रुवम्।
एकरात्रे व्यतीते तु भवेत् शतगुणा च सा॥
त्रिरात्रे तद्गुणा सप्ताहे द्विगुणा ततः।
मासे लक्षगुणा प्रोक्ता ब्राह्मणानाञ्च वर्द्धते॥
संवत्सरे व्यतीते तु सा त्रिकोटिगुणा भवेत्॥
कर्म्म तद्दृषलमात्राणां सर्व्वञ्च निष्फलं भवेत्।
स च ब्रह्मस्वापहारी न कर्म्मार्होऽशुचिर्नरः॥
दरिद्रो व्याधियुक्तश्च तेन पापेन पातकी।
तद्गृहाद्याति लक्ष्मीश्च शापं दत्त्वा सुदारुणम्॥
पितरो नैव गृह्णन्ति तद्दत्तं आहुतर्पणम्।
एवं सुराश्च तत्पूजां तद्दत्तामग्निराहुतिम्॥*॥
दाता न दीयते दानं गृहीता च न याचते।
उभौ तौ नरकं यातश्छिन्नरज्ज्वर्यथा घटः॥
नार्पयेद्दूषणमानञ्चेद्दद्याच्चिरात्तु दक्षिणाम्।
भवेद्ब्रह्मस्वापहारी कुम्भीपाकं व्रजेद्ध्रुवम्॥
वर्षलक्षं वसेत्तत्र यमदूतेन ताड़ितः।
ततो भवेत् स चाण्डालो व्याधियुक्तो दरिद्रकः॥
पातयेत् पुरुषान् सप्त पूर्व्वांश्च सप्तजन्मनः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥

नायिकाविशेषः। यथा,—

"या गौरवं भयं प्रेम सद्भावं पूर्व्वनायके।
न सुचत्यन्यसक्तेऽपि सा ज्ञेया दक्षिणा बुधैः॥"
इति विष्णुपुराणटीकायां स्वामी॥
(अ, दक्षिणस्यां दिशि दक्षिणा दिग् वा। "दक्षिणादाच्।" ५। ३। ३६। इति आच्। दक्षिणस्यां दिशि॥)

दक्षिणाग्निः, पुं, (दक्षिणः अनुकूलोऽग्निः।) यज्ञाग्निविशेषः। इत्यमरः। २। ७। १८॥ दक्षिणस्या दिशोऽग्निर्दक्षिणाग्निः। इति भरतः॥ अस्य नामकरणम्। यथा,—

"दत्तासु दक्षिणासादौ ह्यग्निर्भूत्वा यतोऽमरान्।
नयसे दक्षिणाभागं दक्षिणाग्निस्ततोऽभवत्॥"
इति वराहपुराणम्॥

दक्षिणाचलः, पुं, (दक्षिणा दिक् दक्षिणस्यां दिशि दक्षिणे दक्षिणप्रदेशे वा स्थितोऽचलः पर्व्वतः।) मलयपर्व्वतः। इति हेमचन्द्रः। ४। ६५॥

दक्षिणाचारः, पुं, (दक्षिणोऽप्रतिकूल आचारः।) आचारविशेषः। यथा,—
"स्वधर्मनिरतो भूत्वा पञ्चतत्त्वेन पूजयेत्।
स एव दक्षिणाचारः शिवो भूत्वा शिवं यजेत्॥"
इत्याचारभेदतन्त्रम्॥
(एतदाचारोक्तकर्म्मादिकं वामाचारवत् कठोरतरं न। तथाच काश्मीराजप्रणीतदक्षिणाचारतन्त्रे।
"दक्षिणाचारतन्त्रोक्तं कर्म्म तच्छ्रुतवेदिकम्॥"
दक्षिणोऽनुकूलः साधुराचारो व्यवहारो यस्य। शिष्टाचारविशिष्टे, त्रि। यथा, महाभारते। ४। ५। २०।
"दक्षिणां दक्षिणाचारो दिशं येनाजयत् प्रभुः॥")

दक्षिणात्, य, (यस्यांगतो रमणीयं वा। दक्षिणस्यां दिशि दक्षिणस्या दिशः दक्षिणा वा दिक् इति। "उत्तराधरदक्षिणादातिः।" ५। ३। ३४। इति आतिः।) दक्षिणस्यां दिशि। इत्यमरटीकायां रायमुकुटः॥

दक्षिणापथजन्मन्, [न्] पुं, (दक्षिणा दक्षिणस्यां दिशि यः पन्थाः तत्र जन्म यस्य।) जातिविशेषः। यथा, महाभारते।१२।२०७।४२-४५।
"दक्षिणापथजन्मानः सर्व्वे नरवरात्मकाः।
गुहाः पुलिन्दाः शवराः चुचुका मद्रकैः सह॥
उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि।
यौधकाम्बोजगान्धाराः किराता बर्ब्बरैः सह॥
एते पापकृतस्तात! चरन्ति पृथिवीमिमाम्।
अपाकबलयुद्धानां सधर्म्मायो वराधिप!॥
नेते कृतयुगे तात! चरन्ति पृथिवीमिमाम्।
नेताप्रभृति वर्त्तन्ते ते जना भरतर्षभ!॥"

दक्षिणासुखः, त्रि, (दक्षिणा दक्षिणस्यां दिशि सुखं यस्य।) दक्षिणदिक्सुखः। यथा,—
"अमात्यानं यथाग्रं दक्षिणासुखभोजनम्।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत्॥"
इति तिथ्यादितत्त्वम्॥

दक्षिणायनं, क्ली, (दक्षिणा दक्षिणस्यां दिशि दक्षिणे गोले वा अयनम्।) सूर्य्यस्य दक्षिणामतिः। सा श्रावणादिषट्सु मासेषु भवति। इत्यमरः॥ *। यथा,—
"कर्कटावस्थिते भानौ दक्षिणायनमुच्यते।
उत्तरायणमप्युक्तं मकरस्थे दिवाकरे॥ इति।
अयनस्योत्तरस्यादौ मकरं याति भास्करः।
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम्॥"
इति विष्णुपुराणोक्तात्यूढादावयनपरिग्रहः सौरेण।
दिनमानादिवोधे तु सिद्धान्तादयनपरिग्रहः।
इति॥
अजसंक्रान्तितः पूर्व्वं पञ्चाशारादिमात्परं।
एकवर्षं चतुःपञ्चघटमानक्रमेण तु॥
षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः।
एव चतुःपञ्चदिनमयनारम्भकं क्रमात्॥
अयनक्रमेण च तदत् स्यादुदगयनं रवेर्ध्रुवम्॥
कर्किसंक्रमणे तद्वदभितो दक्षिणायनम्।
अयनाग्रक्रमेणैव विषुवारम्भणं तथा॥"
इति च ज्योतिस्तत्त्वम्॥
तच्च जातस्य फलं यथा.—
"याम्यायने यस्य भवेत् प्रसूतिः
शठः कठोरः पिशुनस्वभावः।
चतुष्पदाढ्यः क्षयिमानहृद्यु-
व्यायामशक्तो मनुजः प्रतापी॥"
इति कोष्ठीप्रदीपः॥ *॥
कर्कटसंक्रान्तिः। यथा,—
"स्टगकर्कटसंक्रान्तौ हे तूदग्दक्षिणायने।
विषुवती तुलामेषे गोलमध्ये तथापरा॥"
इति तिथ्यादितत्त्वम्॥ *॥
अयनचक्रं यथा,—
"चक्रं सारं विलिख्य ग्रहपतिरयने संक्रमचेत् करोति
यस्मिन्नृक्षे तदृक्षं मरणभयकरं मूलमूले निदध्यात्।
ततपश्चादारमूले विविधभयकरं मूलपार्श्वेऽर्थलाभः
सौख्यं स्याच्चक्रगर्भे विविधसुनिमतं विद्धि वामक्रमेण॥"
इति ज्योतिषम्॥
("त इते प्रीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने हे भवतो दक्षिणमुत्तरञ्च। तयोर्दक्षिणं वर्षाशरद्धेमन्तात्मेषु भगवानाप्यायते सोमोऽमृतवलमधुराच्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमभिवर्द्धते॥"
इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥)

दक्षिणाहः, [सु] पुं, (दक्षिणो दक्षिणभागे अरुर्द्रव्यमस्य।) आधकर्तृकदक्षिणाङ्गग्रथितस्कन्धः। इत्यमरः। २। १०। २४॥

दक्षिणार्हः, त्रि, (दक्षिणामर्हतीति। अर्ह+"अर्हः।" ३। २। १२। इत्यच्।) दक्षिणायोग्यः। ऋत्विग्भ्यो दक्षिणामर्हति यः। इति भरतः॥ तत्पर्य्यायः। दक्षिणीयः २ दक्षिण्यः ३। इत्यमरः। ३। १। ५॥

दक्षिणावर्त्तकी, स्त्री, (दक्षिणे आवर्त्तते इति। आ+वृत्+ण्वुल्। गौरादित्वात् ङीष्।) वृश्चिकालिः। इति राजनिर्घण्टः॥

दक्षिणाशापतिः, पुं, (दक्षिणाशाया दक्षिणस्या दिशः अधिपतिः।) यमः। इति हेमचन्द्रः। २। ६८॥

दक्षिणीयः, त्रि, (दक्षिणामर्हतीति। दक्षिणा+"कडङ्करदक्षिणाच्छ च।" ५। १। ६६। इति छः।) दक्षिणार्हः। इत्यमरः। ३। १। ५।
(यथा, हरिवंशे। ६८। ७६।
"क्रतवः संप्रवर्त्तन्तां दक्षिणीयैर्हि जातिभिः।
दक्षिणाश्चोपवर्त्तन्तां यथोक्ताः सर्व्वसञ्चयः॥"
तथाच अथर्व्ववेदे। ८। १०। ४।
"यज्ञतोदक्षिणीयो वासतेयो भवति य एवं वेद॥")

दग्धरेचन, य, (दक्षिण+"एतवन्यतरस्यामदूरेऽपञ्चम्याः।" ५। ३। ३५। इति एनप्।) दक्षिणदिग्भि। इति रायमुकुटः॥ दक्षिणभागे। (अस्य योगेन द्वितीया भवति।) यथा,—
"दक्षिणेन हरिं रुद्रो गोविन्दमतिनेश्वरः।
येनेशं हरिरीशञ्च तेनेशमभितोऽचैकाः॥"
इति सुग्धबोधम्॥
(क्वचित् द्वितीयाप्रयोगाभावोऽपि दृश्यते। यथा, महाभारते। ३। ८३। ४।
"दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिपिष्टपे॥")

दक्षिणेर्म्मा, [न्] पुं, (दक्षिणे इर्म्मे व्रणं यस्य। "दक्षिणेर्म्मा सुध्यथोगे।" ५। ४। १२६। इति अनिच्।) आधग्रराघातात् दक्षिणाङ्गव्रणयुक्तस्टगः। तत्पर्य्यायः। दक्षिणागः २। इत्यमरः। १०। २४॥ (यथा, भट्टिः। ४। ४४।
"स्टगयूथमिव स्टगोऽथ दक्षिणेर्म्मा
दिशमिव दाहवतीं मरावुदन्यन्॥")

दक्षिण्यः, त्रि, (दक्षिणामर्हतीति। "कडङ्करदक्षिणाच्छ च।" ५। १। ६६। इति चकारात् यत्।) दक्षिणार्हः। इत्यमरः। ३।१।५॥
(यथा, भट्टिः। २। २६।
"दक्षिण्यदिष्टा कृतमार्त्तिजीने-
ष्वदृश्यतुधानेषिचिते प्रसर्पत्॥")

दग्धं, क्ली, कर्तृशम्। इति रत्नमाला॥

दग्धः, त्रि, (दह्यते स्म इति। दह+क्तः।) भस्मीकृतः। पोड़ा इति भाषा। तत्पर्य्यायः। प्लुष्टः २ प्रुष्टः ३ उषितः ४। इत्यमरः। ३। १। ६६॥ (यथा, मनुः। ८। १८६।
"चौरैर्हृतं जलेनोढ़मग्निना दग्धमेव वा।
न दद्यात् यदि तस्मात् स न संहरति किञ्चन॥")
"पञ्चाशामामिषं पर्व्वम्।
गोवैर्य्यमामिषं चीरं फले जम्बीरमामिषम्।
आमिषं रक्तशाकञ्च सर्व्वञ्च दग्धमामिषम्॥"
इति कर्म्मलोचनम्॥
(स्नानम्। यथा, अमरशतके। २४।
"दग्धायामपि वाचि सञ्चितमिदं दग्धानलं जायते॥"
चन्द्राश्रितराशिमूलकपारिभाषिकग्रहम्। यथा, ज्योतिषतत्त्वे।
"स्टगसिंहौ तृतीयायां प्रथमायां तुलाऽलगौ।
पञ्चम्यां बुधराशी द्वौ सप्तम्यां चापयन्त्रमे॥
नवम्यां सिंहकोटाख्यावेकादश्यां गुरोर्गृहे।
द्वयमीनौ त्रयोदश्यां दग्धसंज्ञास्त्रमी यहाः।
दग्धसद्मनि यत् कर्म्म कृतं सर्व्वं विनश्यति॥")

दग्धकाकः, पुं, (दग्ध इव कृष्णवर्णः काकः।) दीर्घकाकः। इति हेमचन्द्रः। ४। ३८६॥

दग्धरथः, पुं, (दग्धो रथोऽस्य।) चित्ररथगन्धर्व्वः। इति महाभारतम्॥ (यथा, महाभारते। ९। १७१। ६६।
"अस्त्राग्निना विचित्रोऽयं दग्धो मे रथ उत्तमः।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम्॥")

दग्धरुहः, पुं, (दग्धोऽपि रोहतीति। रुह+कः।) तिलकवृक्षः। इति राजनिर्घण्टः॥

दग्धरुहा, स्त्री, (दग्धापि रोहतीति। रुह+कः टाप्।) दग्धावृक्षः। इति राजनिर्घण्टः॥

दग्धा, स्त्री, (दह्यते स्म इव या। दह+क्तः। ततष्टाप्।) स्थितार्का दिक्। इति मेदिनी। रे, ७॥ वृक्षविशेषः। कुरुह इति ख्यातः॥ तत्पर्य्यायः। दग्धरुहा २ दग्धिका ३ स्थलेरुहा ४ रोमशा ५ कर्कशदला ६ भस्मरोहा ७ सुदग्धिका ८। अस्या गुणाः। कटुत्वम्। कषायत्वम्। उष्णत्वम्। कफवातनाशित्वम्। पित्तप्रकोपनत्वम्। जठरानलदीपनत्वञ्च। इति राजनिर्घण्टः॥ *॥

मासदग्धा यथा,—सौरचैत्रपौषयोर्द्वितीया एवं ज्येष्ठफाल्गुनयोश्चतुर्थी वैशाखश्रावणयोः षष्ठी आषाढ़ाश्विनयोरष्टमी भाद्राग्रहायणयोर्दशमी कार्त्तिकमाघयोर्द्वादशी। अस्याः प्रमाणं यथा,

"द्वितीया मीनधनुषोश्चतुर्थी वृषकुम्भयोः।
मेषकर्कटयोः षष्ठी कन्यामिथुनकेऽष्टमी॥
दशमी वृश्चिके सिंहे द्वादशी मकरे तुले।
एभिर्यातो न जीवेत यदि शक्रसमो भवेत्॥"

अस्याः प्रतिप्रसवो यथा, वैशाखे शुक्ला षष्ठी ज्येष्ठे कृष्णा चतुर्थी आषाढ़े शुक्लाष्टमी श्रावणे कृष्णा षष्ठी भाद्रे शुक्ला दशमी आश्विने कृष्णाष्टमी कार्त्तिके शुक्ला द्वादशी अग्रहायणे कृष्णा दशमी पौषे शुक्ला द्वितीया माघे कृष्णा द्वादशी फाल्गुने शुक्ला चतुर्थी चैत्रे कृष्णा द्वितीया। एतत्प्रमाणं यथा,—

"मेषे दिनेशे वृषगे शशेन्द्रे
यूके धनुःस्थे कलसे च शुक्ला।
कुलीरकन्यालिझषास्थमीन-
वृषेषु कृष्णास्तिथयः प्रदग्धाः॥"*॥

दिनदग्धा यथा,—रविवारे द्वादशी सोमे एकादशी मङ्गले दशमी बुधे तृतीया वृहस्पतौ षष्ठी शुक्रे पञ्चदशी शनौ सप्तमी। एतत्प्रमाणं यथा,

"मासा रुद्रा दिशो रामाः षट्पञ्चमुनयस्तथा।
दह्यन्ते तिथयः सप्त क्रमात्सोमादिभिः सप्तसप्तभिः॥"

इति ज्योतिःसारसंग्रहः॥

दग्धिका, स्त्री, (कृतसिता दग्धा। "कृतसिते।" ५।३।७४। इति कन्।) दग्धान्नम्। पोड़ा भात इति भाषा। चाची इति ख्याता इति केचिदिति भरतः॥ तत्पर्य्यायः। भिस्सटा २। इत्यमरः। २।९।४६॥ भिस्सिटा ३ भिञ्जिटा ४ भिञ्जिटा ५ भिञ्जिका ६। इति तट्टीकासारसुन्दरी॥ दग्धावृक्षः। इति राजनिर्घण्टः॥

दग्धेरुका, स्त्री, (दग्धा इरुका।) भ्रामकम्। इति हारावली। २१४॥

दघ, ङ त्यागे। अवने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ङ, दङ्घते। अवनं रक्षणम्। इति दुर्गादासः॥

दघ, न घातने। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) न, दघ्नोति। दघ घाते। इति जौमराः पठन्ति। तेन तदर्थकल्पनमेवोचितम्। ततश्च घातनमिति हन्त्यर्थस्य प्राचिकचुरादित्वेन स्वार्थे णौ रूपं हननमित्यर्थः। किञ्च हिंसनपाठेनैवेहसिद्धे घातनपाठो हिंसाप्रेरणार्थः स्यान्न वेति काकदन्तान्वेषणवद्विफलं जयाणामेव कातन्त्रादसम्मतत्वात्। इति दुर्गादासः॥

दङ्क, तृ क तत्पाते। इति कविकल्पद्रुमः॥ (अदन्तपुरां-परं-सकं-सेट्।) तत्पातस्तद्धक्षपातनम्। क, दङ्कयति दङ्कापयति अमराधिपं राणा। इति दुर्गादासः॥

दण्डः, पुं क्ली, (दण्डयति अनेनेति। दण्ड+घञ्। यद्वा, दान्त्यत्वनेनेति। दम्+"अमन्तात् डः।" उणां १।११३। इति डः।) लगुड़ः। इत्यमरः। २।३।४१॥ (यथा, हठयोगप्रदीपिकायाम्। ३।११।

"यथा दण्डहतः सर्पो दण्डाकारः प्रजायते॥")

तस्य धारणगुणाः। खलतः संप्रतिष्ठानत्वम्। शत्रुनिषेधनत्वम्। अवष्टम्भनत्वम्। आयुष्यत्वम्। भयघ्नत्वञ्च। इति राजवल्लभः॥ (यथा, चिकित्सितस्थाने चतुर्विंशेऽध्याये सुश्रुतेनोक्तम्।

"पुनः सरोष्णजलविषाग्निभ्यो भयागमे।
अमर्षस्खलनदोषन्नं स्थविरे च प्रशस्यते॥
सत्त्वोत्साहबलस्थैर्य्यधैर्य्यवीर्य्यविवर्द्धनम्।
अवष्टम्भकरत्वाच्च भयघ्नं दण्डधारणम्॥")

शरीरागतरक्षणादि। यथा,—

"शरीरागतसंरक्षां भूतानामप्यहिंसनम्।
बहिर्वेदि च यद्दानं दण्डमित्यभिधीयते॥

इति मोक्षधर्म्मः॥

(दण्डाकारत्वात् छत्रादीनामङ्गविशेषः। यथा, वृहत्संहितायाम्। ७३।४,६।

"युवराजनृपतिपत्न्याः सेनापतिदण्डनायकानाञ्च।
दण्डोऽर्धपञ्चहस्तः समपञ्चकृताङ्गविस्तारः॥"

"अन्येषाञ्च नराणां प्रीतातपवारणन्तु चतुरस्रम्।
समवृत्तदण्डयुक्तं छत्रं कार्य्यं तु विप्राणाम्॥"

चामरादीनामङ्गविशेषश्च। यथा, तत्रैव। ७२।३-४।

"अर्धार्धहस्तप्रमितोऽस्य दण्डो
दण्डोऽथवारत्निसमोऽथवान्यः।
काष्ठाच्छुभात् काञ्चनरूप्यगुम्फात्
रत्नैर्विचित्रैश्च हिताय राज्ञाम्॥
वज्रातपत्राङ्कुशवेत्रचाप-
वितानकुन्तध्वजचामराणाम्।
व्यापीतनीलीमधुकल्यवर्णा
वर्णक्रमेणैव हिताय दण्डाः॥"

ब्रह्मचारिधार्य्यदण्डगुरुकारपदार्थः। यथा, देवीभागवते। १।१६।३१। शुकं प्रति जनकस्योक्तिः।

"दण्डाजिनजटा चिन्ता यथा तव धनेऽपि च।
तथैव राज्यचिन्ता मे चिन्तयाश्रम एव वा॥"

वर्णभेदेन तत्प्रमाणादिकमुक्तम्। यथा, मनौ। २।४५-४७।

"ब्राह्मणो वैल्वपालाशौ क्षत्रियो वटखादिरौ।
पैलवौदुम्बरो वैश्यो दण्डानर्हन्ति धर्म्मतः॥
केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः।
ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः॥
ऋजवस्ते तु सर्व्वे स्युरव्रणाः सौम्यदर्शनाः।
अनुद्वेगकरा नृणां सत्वचो नाग्निदूषिताः॥"

वाणनिक्षेपकालीन स्थानविशेषे, क्ली। यथा, आग्नेयधनुर्व्वेदे।

"तिर्य्यग्भूतो भवेद्वामो दक्षिणेऽपि भवेदृजुः।
गुल्फौ मार्ज्जियहौ चैव स्थितौ पश्चाङ्गुलान्तरौ॥
स्थानं दण्डं भवेदेतत् द्वादशाङ्गुलमायतम्॥")

दण्डः, पुं, (दण्डयत्यपराधिनमनेनेति। दण्ड+घञ्। यद्वा, दान्यतिं शान्तं करोत्यनेन। दम+डः।) राज्ञां चतुर्थोपायः। (यथा, देवीभागवते। १।१७।३।

"विना दण्डं कथं राज्यं करोति जनकः किल।
धर्म्मे न वर्त्तते लोको दण्डभेन्न भवेद् यदि॥")

स च त्रिविधः। वधः अर्थग्रहणं बन्धनताड़नादिच। इत्यमरटीकासारसुन्दरी॥ तत्पर्य्यायः। साहसम् २ दमः ३। इत्यमरः। २।८।२१। (दण्ड+भावे घञ्। दमनम्। (यथा, मनुः। १२।१०।

"वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च॥"

दण्ड इवाचरतीति। दण्ड+क्विप्। ततो भावे घञ्।) ऊर्द्धस्थितिः। दाँड़ान इति भाषा। इति सारसुन्दरी॥ व्यूहभेदः। (अस्य लक्षणभेदादिकं यथा, अग्निपुराणे २४१ अध्याये।

"मण्डलासंहतौ भागौ दण्डास्ते बहुधा स्मृतः।
तिर्य्यग्वृत्तिस्तु दण्डः स्यात् भोगोऽन्या वृत्तिरेव च॥
मण्डलः सर्व्वतोवृत्तिः पृथग्वृत्तिरसंहतः।
प्रदरो दृढकोऽसह्यश्चापो वैकुण्ठिरेव च॥
प्रतिष्ठः सुप्रतिष्ठश्च श्येनो विजयसञ्जयौ।
विशालो विजयः रुचौ सूचा कर्णश्चमरसुखौ॥
सर्पाखो वलयश्चैव दण्डभेदाश्च दुर्ज्जयाः।
अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्यां चैकपक्षतः॥
अतिक्रान्तस्तु पक्षाभ्यां जयोऽन्ये तद्विपर्य्ययः।
पक्षोरक्षैरतिक्रान्तः प्रतिष्ठोऽन्यो विपर्य्ययः॥
सूचापक्षो धनुःपक्षो द्विसूचो दण्ड ऋङ्गजः।
द्विगुणोऽयन्त्वतिक्रान्तपक्षोऽन्यस्य विपर्य्ययः॥
द्विचतुर्दण्ड दण्डेते ज्ञेया लक्षयतः क्रमात्।
गोमूत्रिका हि सञ्चारी शकटो मकरस्तथा॥")

प्रकाण्डः। अंशः। कोणः। मन्थानः। सैन्यम्। कालः। घड़ी इति भाषा। मानभेदः। काठा इति भाषा। ("दण्डैश्चतुर्भिर्भवतीह दण्डः।" इति लीलावती॥) चण्डांशोः पारिपार्श्विकः। (यथा, महाभारते। ३।३।६८।

"ये च तेऽनुचराः सर्व्वे पादोपान्तं समाश्रिताः।
माठरारुणदण्डाद्यास्तान् वन्देऽहमविचारितान्॥")

यमः। अभिभागः। इति मेदिनी। दे, १६॥ गद-

भेदः । इति हेमचन्द्रः ॥ इक्ष्वाकुराजपुत्रः । इति रामायणम् ॥ (यथा, हरिवंशे । १० । २२ ।
"धृष्टकाम्बरीषश्च दण्डसेति सुताक्षयः ।
यच्चकार महात्मा वै दण्डकारण्यमुत्तमम् ॥"
क्रोधहन्तुरसुरस्यांशेनावतीर्णः स्वनामख्यात-नृपविशेषः । यथा, महाभारते ।१।६७।४६।
"क्रोधहन्तेति यस्तस्य बभूवावरजोऽसुरः ।
दण्ड इत्यभिविख्यातः स आसीन्नृपतिः क्षितौ ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । १०५ ।
"धनुर्हरो धनुर्वेदो दण्डो दमयिता दमः ॥"
महादेवः । यथा तत्रैव । १२ । २८४ । १६ ।
"शूलमुद्यम्य दण्डाय पर्णचीरपटाय च ॥")
कालभेददण्डस्य प्रमाणं यथा,—
"षट्पलं पात्रनिर्म्माणं गभीरं चतुरङ्गुलम् ।
सर्व्वमाषैः कृतच्छिद्रं कुर्य्याच्च चतुरङ्गुलैः ॥
यावच्चलति पात्रं तत्कालं दण्डमेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ * ॥
ब्राह्मणं प्रति दण्डोद्यमे दण्डनिपातने च दोषो यथा, प्रायश्चित्ततत्त्वे ।
विप्रदण्डोद्यमे लक्षमतिलक्षं निपातने ॥"
"कौटसाक्ष्ये दण्डा यथा,—
लोभान्मोहाद्भयान्मैत्रात् कामात् क्रोधात्तथैव च ।
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते ॥
एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत् ।
तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्व्वशः ॥
लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्व्वन्तु साहसम् ।
भयाद्वौ मध्यमौ दण्डौ मैत्रात् पूर्व्वं चतुर्गुणम् ॥
कामाद्दशगुणं पूर्व्वं क्रोधात्तु त्रिगुणं परम् ।
अज्ञानात् द्वे शते पूर्णे बालिश्याच्छतमेव तु ॥
एतानाहुः कौटसाक्ष्ये प्रोक्तान् दण्डान्मनीषिभिः ।
धर्म्मस्यात्यभिचारार्थमधर्म्मनिधनाय च ॥
कौटसाक्ष्यन्तु कुर्व्वाणान् त्रीन् वर्णान् धार्म्मिको नृपः ।
प्रवासयेद्दण्डयित्वा ब्राह्मणन्तु विवासयेत् ॥ * ॥
दण्डस्य स्थानानि यथा,—
दण्डस्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् ।
त्रिषु वर्णेषु यानि क्षुरचतो ब्राह्मणो व्रजेत् ॥
उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥
अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः ।
सारापराधौ वालोक्य दण्डं दण्ड्येषु पातयेत् ॥*॥
अधर्म्मादण्डेषु दोषो यथा,—
अधर्म्मदण्डनं लोके यशोघ्नं कीर्त्तिनाशनम् ।
अस्वर्य्यञ्च परत्रापि तस्मात्तत् परिवर्ज्जयेत् ॥
अदण्ड्यान् दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकञ्चैव गच्छति ॥ * ॥
दण्डस्य पौर्व्वापर्य्यनियमो यथा,—
वाग्दण्डं प्रथमं कुर्य्यात् धिग्दण्डं तदनन्तरम् ।
तृतीयं धनदण्डन्तु वधदण्डमतः परम् ।
वधेनापि यदा तेषान्निग्रहीतुं न शक्नुयात् ॥
तदेषु सर्व्वमेवैतत् प्रयुञ्जीत चतुष्टयम् ॥
दण्डस्य भेदा यथा,—
प्रणानां हि शते सार्द्धे प्रथमः साहसः स्मृतः ।
मध्यमः पञ्च विज्ञेयः सहस्रन्त्वेव चोत्तमः ॥
ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ॥ * ॥
दोषविशिष्टकन्यादाने दण्डो यथा,—
यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्य्यान्नृपो दण्डं स्वयं षण्णवतिं पणान् ॥
अकन्येति च यः कन्यां ब्रूयाद्द्वेषेण मानवः ।
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन् ॥ * ॥
गवादीनां शस्त्रभक्षणे दण्डो यथा,—
पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः ।
स पालः शतदण्डार्हो विपालान् वारयेत् पशून् ॥
क्षेत्रादिसीमाविवादे दण्डा यथा,—
क्षेत्रकूपतडागानामारामस्य गृहस्य च ।
सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः ॥
सामन्तास्त्रिषु वा ब्रूयुः सेतौ विवदतां नृणाम् ।
सर्व्वे पृथक् पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ॥
गृहं तडागमारामं क्षेत्रं वा भीषया हरन् ।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विगुतो दमः ॥*॥
वाक्पारुष्ये दण्डा यथा,—
शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति ।
वैश्योऽध्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति ॥
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने ।
वैश्य स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः ॥
समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे ।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥
एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन् ।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः ॥
नामजातिग्रहन्त्वेषामभिद्रोहेण कुर्व्वतः ।
निःक्षेपोऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥
धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः ।
तप्तमासे चयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥
श्रुतं देशञ्च जातिञ्च कर्म्मशरीरमेव च ।
वितथेन ब्रुवन् दर्पाद्दाप्यः स्याद्द्विशतं दमम् ॥
काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम् ।
तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम् ॥
मातरं पितरं जायां भ्रातरं तनयं गुरुम् ।
आक्षारयन् शतं दाप्यः पन्थानं चाददद्गुरोः ॥
ब्राह्मणक्षत्रियाभ्यान्तु दण्डः कार्य्यो विजानता ।
ब्राह्मणे साहसः पूर्व्वः क्षत्रिये त्वेव मध्यमः ॥
विट्शूद्रयोरेवमेव स्वजातिं प्रतितत्त्वतः ।
छेदवर्ज्जं प्रणयनं दण्डस्येति विनिश्चयः ॥ * ॥
दण्डपारुष्ये दण्डा यथा,—
येन केनचिदङ्गेन हिंसाद्वेत् श्रेष्ठमन्यजः ।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम् ॥
पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ।
पादेन प्रहरन् कोपात् पादच्छेदनमर्हति ॥
सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः ।
कट्यां कृताङ्को निर्व्वास्यः स्फिचं वास्यावकर्त्तयेत् ॥
अवनिष्ठीवतो दर्पात् द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रमवगूर्द्धयतो गुदम् ॥
केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् ।
पादयोर्हाढ़िकायान्तु ग्रीवायां वृषणेषु च ॥
त्वग्भेदकः शतं दण्ड्यो लोहितस्य तु दर्शकः ।
मांसभेत्ता तु षण्निष्कान् प्रवास्यस्त्वस्थिभेदकः ॥
वनस्पतीनां सर्व्वेषामुपभोगो यथा यथा ।
तथा तथा दमः कार्य्यो हिंसायामिति धारणा ॥
मनुष्याणां पशूनाञ्च दुःखाय प्रहृते सति ।
यथा यथा महद्दुःखं दण्डं कुर्य्यात्तथा तथा ॥
अङ्गानां पीड़नायाञ्च प्राणशोणितयोस्तथा ।
समुत्थानव्ययं दाप्यः सर्व्वं दण्डमथापि वा ॥
इत्याग्नि हिंसादृयो यस्तु ज्ञानतोऽज्ञानतोऽपि वा ।
स तस्योत्पादयेत्तुष्टिं राज्ञो दद्याच्च तत्समम् ॥
चर्म्मचार्म्मिकभाण्डेषु काष्ठलोष्टमयेषु च ।
मूल्यात् पञ्चगुणो दण्डः पुण्यमूलफलेषु च ॥
यानस्यैव तु यातुश्च यानस्वामिन एव च ।
दण्डातिवर्त्तनान्याहुः शेषे दण्डो विधीयते ॥
छिन्नाक्षे भिन्नयुगे तिर्य्यक् प्रतिसुखागते ।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥
छेदने चैव यन्त्राणां योक्त्ररश्मेस्तथैव च ।
आक्रन्दे चाप्यपेहीति न दण्डं मनुरब्रवीत् ॥
यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विगुतं दमम् ॥
प्राजकस्त्वेदृभवेदाप्तः प्राजको दण्डमर्हति ।
युग्यस्थाः प्राजकेनार्त्ते सर्व्वे दण्ड्याः शतं शतम् ॥
स चेत्तु पथि संरुद्धः पशुभिर्व्वा रथेन वा ।
प्रमापयेत् प्राणभृतस्तत्र दण्डो विधारितः ॥
मनुष्यमारणे क्षिप्रं चौरवत्किल्बिषी भवेत् ।
प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु ॥
क्षुद्रकाणां पशूनाञ्च हिंसायां द्विगुतो दमः ।
पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥
गर्द्दभाजाविकानाञ्च दण्डः स्यात् पञ्चमाषकः ।
माषकस्तु भवेद्दण्डः शूकरनिपातने ॥
भार्य्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथातु प्रहरन् प्राप्तः स्याच्चौरकिल्बिषम् ॥
चौरस्य दण्डविधिर्यथा,—
यस्तु रज्जुं घटं कूपाद्धरेच्छिन्द्याच्च यः प्रपाम् ।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत् ॥
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः ।
शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम् ॥
तथाधरिममेयानां शतादभ्यधिके वधः ।
सुवर्णरजतादीनामुत्तमानाञ्च वाससाम् ॥
पञ्चाशत्तदभ्यधिके हस्तच्छेदनमिष्यते ।
शेषेऽप्येकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥
पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः ।
मुख्यानां चैव रत्नानां हरणे वधमर्हति ॥
महापशूनां हरणे शस्त्रस्यौषधस्य च ।
कालमासाद्य कार्य्यञ्च राजा दण्डं प्रकल्पयेत् ॥
गोषु ब्राह्मणसंस्थासु क्रूरिकायाञ्च भेदने ।
पशूनां हरणे चैव सदः कार्य्योऽर्थसादिकः ॥
सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च ।

दधः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च ॥
वेणुवेदलभाण्डानां लवणानान्तथैव च ।
मृण्मयानाञ्च हरणे मृदो भस्मन एव च ॥
मत्स्यानां पक्षिणाञ्चैव तैलस्य च घृतस्य च ।
मांसस्य मधुनश्चैव यच्चान्यत् पशुसम्भवम् ॥
अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च ।
पक्वान्नानाञ्च सर्व्वेषां तन्मूल्याद्द्विगुणो दमः ॥
पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च ।
अन्येष्वपरिपूतेषु दण्डः स्यात् पञ्च कृष्णलः ।
परिपूतेषु धान्येषु शाकमूलफलेषु च ॥
निरन्वये शतं दण्डः सान्वयेऽर्द्धशतं दमः ।
स्यात् साहसं त्वन्वयवत् प्रसभं कर्म्म यत् कृतम् ॥
निरन्वयं भवेत् स्तेयं हृत्वापह्नवते च यत् ।
यस्तेतान्युपकृष्टानि द्रव्याणि स्तेनयेन्नरः ॥
तमाद्यं दण्डयेद्राजा यश्चाग्निं चोरयेदगृहात् ।
येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥"*॥
परदारहरणे दण्डो यथा,—
परदाराभिमर्षेषु प्रवृत्तान् नक्षमहीपतिः ।
उद्वेजनकरैर्दण्डैश्छिन्द्यिला प्रवासयेत् ॥
परस्य पत्न्या पुरुषः संभाषां योजयन् रहः ।
पूर्व्वमाचारितो दोषैः प्राप्नुयात् पूर्व्वसाहसम् ॥
परस्त्रियं योऽभिवदेत् तीर्थेऽरण्ये वनेऽपि वा ।
नदीनामपि संभेदे स संग्रहणमाप्नुयात् ॥
उपचारक्रिया केलिः सख्यं भूषणवाससाम् ।
सहस्वाशनशय्येव सर्व्वं संग्रहणं तथा ॥
स्त्रियं सृग्गेददेशे यः स्पृशेद्वा मर्म्मयेत्तथा ।
परस्परस्यानुमते सर्व्वं संग्रहणं स्मृतम् ।
अब्राह्मणः संग्रहणे प्राणान्तं दण्डमर्हति ॥
न सभाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत् ।
निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति ॥
नैष चारणदारेषु विधिर्नालोपजीविषु ।
सञ्चयन्ति हि ते नारीर्निगूढाचारयन्ति च ॥
किञ्चिदेव तु दाप्यः स्यात् संभाषां ताभिराचरन् ।
योऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति ॥
सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः ।
कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेत् ॥
जघन्यं सेवमानान्तु संयतां वासयेद्गृहे ।
उत्तमां सेवमानस्तु जघन्यो वधमर्हति ॥
शुल्कं दद्यात् सेवमानः समामिच्छेत् पिता यदि ।
अभिगम्य तु यः कन्यां कुर्य्यादर्थेन मानवः ॥
तस्याश्च कर्त्तावङ्गुल्यौ दण्डञ्चार्हति षट्शतम् ।
सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमाप्नुयात् ।
द्विशतन्तु दमं दाप्यः प्रसङ्गविनिवृत्तये ॥
कन्यैव कन्यां या कुर्य्यात् तस्याः स्याद्द्विशतो दमः ।
शुल्कञ्च द्विगुणं दद्याच्छिफाश्चैवास्याद्दशैव ॥
या तु कन्यां प्रकुर्य्यात् स्त्री सा सद्यो मौण्ड्यमर्हति ।
अङ्गुल्योरेव च च्छेदं खरोष्ट्रारोहणं तथा ॥
भर्त्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता ।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते ॥
पुमांसं दाहयेत् पापं शयने तप्त आयसे ।
अभ्यादधुश्च काष्ठानि तत्र दह्येत पापकृत् ॥
संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः ।
व्रात्यया सह संवासे चाण्डाल्या तावदेव तु ॥
शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन् ।
अगुप्तमङ्ग सर्व्वेणं गुप्तं सर्व्वेण हीयते ॥
वैश्यः सर्व्वस्वदण्ड्यः स्यात् संवत्सरनिरोधतः ।
सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं सूत्रेण चार्हति ।
ब्राह्मणीं यद्यगुप्तान्तु गच्छेतां वैश्यपार्थिवौ ।
वैश्यं पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम् ॥
उभावपि तु तावेव ब्राह्मण्या गुप्तया सह ।
विज्ञतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ॥
सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन् ।
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः ॥
मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते ।
इतरेषान्तु वर्णानां दण्डः प्राणान्तिको भवेत् ॥
वैश्यश्चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् ।
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः ॥
सहस्रं ब्राह्मणो दण्डं दाप्यो मुण्ड्यस्तु तौ व्रजन् ।
शूद्रायां क्षत्रियविशोः साहस्रो वै भवेद्दमः ।
क्षत्रियायामगुप्तायां वैश्ये पञ्चशतं दमः ॥
सूत्रेण मौण्ड्यमर्हेत्तु क्षत्रियो दण्डमेव वा ॥
अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् ।
शतानि पञ्च दण्ड्यः स्यात् सहस्रमन्त्यजस्त्रियम् ॥ * ॥
ऋत्विजं यस्त्यजेद्याज्यो याज्यञ्चर्त्विक् त्यजेदृत्विजं ।
यदि ।
अकृत्यं कर्म्मणयदुष्टञ्च तयोर्दण्डः शतं शतम् ॥
न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति ।
त्यजन्नपतितानेतान् राज्ञा दण्ड्यः शतानि षट् ॥"
इति मनुः ॥ * ॥
दण्डस्य फलं यथा, युक्तिकल्पतरौ ।
"दण्डः संरक्षते धर्म्मं तथैवार्थं विधानतः ।
कामं संरक्षते यस्मात् त्रिवर्गो दण्ड उच्यते ॥
राजदण्डभयाल्लोकाः पापाः पापं न कुर्व्वते ।
यमदण्डभयादेके परलोकभयात्तथा ॥
दण्डश्चेन्न भवेल्लोके विभजन् साध्वसाधु वा ।
शूले मत्स्यानि वा यद्वन् दुर्ब्बलान् बलवत्तराः ॥
अपराद्धेषु भूपालो दण्डं कुर्य्यादृथाविधि ।
अन्यथाकरणात्तस्मात् राजा भवति किल्बिषी ॥
विरुद्धमपि जल्पन्तो दूता दण्ड्या न भूभृता ।
दूतहन्ता तु नरकमाविशेत् सचिवैः सह ॥
विपश्चिद्वचनादन्यो भृत्यो दण्डं न चार्हति ।
विपश्चिद्वचनाद्दण्डः स्वामिनं नरकं नयेत् ॥"

दण्डकः, पुं क्ली, (दण्ड इव कायतीति । कै + कः ।) श्लोकविशेषः । छन्दोभेदः । इत्यमरटीकाभारतसुन्दरी ॥ अस्य विवरणं छन्दःशब्दे द्रष्टव्यम् ॥ (दृश्यो दण्डः । "दृश्ये" ५ । ३ । ८६ । इति कन् । क्षुद्रलगुडः । सोंटा इति भाषा ॥ पुं, इक्ष्वाकुपुत्रः । यथा, भागवते । ९ । ६ । ४ ।
"श्रुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः ।
तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदण्डकाः ॥"
एतन्नृपसन्निवेशस्थानं दण्डकारण्यमितिख्यातम् । यथा, रामायणे । १ । १ । ४० ।
"रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह ॥")

दण्डकन्दकः, पुं, (दण्डवत् कन्दो मूलं यस्य । कप् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥

दण्डका, स्त्री, (दण्डक + स्त्रीत्वविवक्षायां टाप् ।) जनस्थानम् । दण्डकारण्यम् । इति जटाधरः ॥ (यथा, रामायणे । २ । ३० । ३६ ।
"मम सन्ना मतिः सीते ! नेतुं त्वां दण्डकावनम् ।
वृषिष्यामीति सा त्वं मामनुयातुं सुनिश्चिता ॥")

दण्डकाकः, पुं, (दण्डो यमदण्ड इव काकः । अशुभसूचकत्वादस्य तथात्वम् ।) दीर्घकाकः । इति हेमचन्द्रः ॥

दण्डटक्का, स्त्री, (दण्डताड्यमाना टक्का ।) वाद्यविशेषः । दामामा इति नागरा इति च भाषा । तत्पर्य्यायः । नाडी २ घटी ३ यामनाडी ४ यमेरुका ५ यामघोषः ६ । इति त्रिकाण्डशेषः ॥ दन्दमः ७ दुन्दुभिः ८ दुन्दुः ९ गभीरिका १० । इति शब्दरत्नावली ॥

दण्डताम्त्री, स्त्री, (दण्डेन ताड्यमाना ताम्त्री ताम्त्रनिर्म्मितवाद्यम् ।) ताम्त्रीवाद्यम् । इति शब्दरत्नावली ॥

दण्डधरः, पुं, (दण्डस्य धरः । दण्डं धारयति । धृञ् धारणे + पचाद्यच् णिलुक् । इत्युज्ज्वलदत्तः । २ । २२ ।) यमः । इत्यमरः । १ । १ । ६२ ॥ (यथा, राजतरङ्गिण्याम् । ४ । ६५६ ।
"नक्षदण्डक्षतं दण्डं मुक्ता दण्डधराधिपः ।
अकाण्डदण्डस्खलाय ययौ दण्डधरान्तिकम् ॥")
राजा । इति जटाधरः ॥ (यथा, रघुः । ६ । ३ ।
"बलनिषूदनमर्थपतिञ्च तं
श्रमशुदं मनुदण्डधरान्वयम् ॥")
क्षि, लगुडधारकः ॥ (ग्राहकः । यथा, महाभारते । १२ । २३ । ४३ ।
"एवमेतन्मया कार्य्यं नाहं दण्डधरस्तव ॥"
चतुर्थोपाययुक्तः । यथा, भागवते । ४ । २१ । २२ ।
"अहं दण्डधरो राजा प्रजानामिह योजितः ॥")

दण्डधारः, पुं, (दण्डं धरतीति । धृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) पृथ्वीनाथः । (यथा, गोः रामायणे । २ । ८८ । ७ ।
"उदीच्याश्च प्रतीच्याश्च दाक्षिणात्याश्च केरलाः ।
दण्डधाराश्च सासुद्रा रत्नान्युपहरन्तु ते ॥")
प्रेताधिपः । इति मेदिनी । रे । २६६ ॥ (सगरसम्भातनृपविशेषः । स तु क्रोधवर्द्धनस्यासुरस्यांशेन जातः । यथा, महाभारते । १ । ६७ । ३७ ।
"क्रोधवर्द्धन इत्येव यस्यन्यः परिकीर्त्तितः ।
दण्डधार इति ख्यातः सोऽभवन्मनुजेश्वरः ॥"
धृतराष्ट्रपुत्राणामेकतमः । यथा, तत्रैव धृतराष्ट्रपुत्रनामकथने । १ । ६७ । १०२ ।
"निषङ्गी कवची बाह्वी दण्डधारो धनुर्द्धरः ॥"

चि, दण्डधरः। (शासकः। यथा, राजतरङ्गिण्याम्। ४। १०६।
"दण्डधारे त्वयि शासति क्षितिमेतां प्रशासति।
को वैरक्षेद्वयोः पारमनाद्यावसीदति॥")
दण्डनायकः, पुं, (दण्डं राज्ञां चतुर्थोपायं नयतीति। नी+ण्वुल्।) सेनानीः। स चतुरङ्गबलाध्यक्षः। इति हेमचन्द्रः। ३। ३८६॥ (यथा, राजतरङ्गिण्याम्। ७। ६६६।
"कन्दर्पे कोटभूतानां भिन्नानां सङ्गरोद्यते।
क्रुधन् राजपुरीं राजा यस्तदण्डनायकम्॥")
दण्डनीतिः, स्त्री, (दण्डेन नीयते या। यद्वा, दण्डो नीयतेऽनयेति। नी+कर्म्मणि करणे वा क्तिन्।) अर्थशास्त्रम्। इत्यमरः। १। ६। ५॥ तत् शास्त्रकारादिप्रणीतं नीतिशास्त्रम्। इति भरतः। तस्य निरुक्तिर्यथा,—
"दण्डेन नीयते चेदं दण्डं नयति वा पुनः।
दण्डनीतिरिति ख्याता लोकोंकागतिवर्त्तते॥
तच्च ब्रह्मशतग्रन्थसहस्राध्यायपरिमितम्।
तद्यथा,—
"ततोऽध्यायसहस्राणां ग्रन्थकर्त्रे सुबुद्धिजम्।
यत्र धर्म्मस्तथैवार्थः कामश्चैवाभिवर्णितः॥
त्रिवर्ग इति विख्यातो यत्र एष स्वयम्भुवा।
चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गुणः॥
मोक्षस्यापि त्रिवर्गोऽन्यः प्रोक्तः सत्त्वं रजस्तमः।
स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दण्डजः॥
आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च।
सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः॥
त्रयी वार्त्ता च दण्डश्च विद्या ह्यान्वीक्षिकी चैव वार्त्ता च भरतर्षभ!।
दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः॥
अमात्यरक्षा प्रणिधी राजपुत्रस्य लक्षणम्।
चारश्च विविधोपायः प्रणिधेयः पृथग्विधः॥
सामभेदप्रदानञ्च ततो दण्डश्च पार्थिव।
उपेक्षा पञ्चमी चात्र कार्त्स्न्येन समुदाहृता॥
मन्त्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव च।
विभ्रमश्चैव मन्त्रस्य सिद्धसिद्धौ च यत् फलम्॥
सन्धिश्च विविधाभिख्यो हीनो मध्यस्तथोत्तमः।
भयं सत्कारवित्ताख्यं कार्त्स्न्येन परिवर्णितम्॥
यात्राकालश्च चत्वारस्त्रिवर्गस्य च विस्तरः।
विजयो धर्म्मयुक्तश्च तथार्थविजयश्च ह॥
आसुरश्चैव विजयस्तथा कार्त्स्न्येन वर्णितः।
लक्षणं पञ्चवर्गस्य त्रिविधश्चात्र वर्णितम्॥
प्रकाशश्चाप्रकाशश्च दण्डोऽथ परिगृह्यितः।
प्रकाशोऽष्टविधस्तत्र गुप्तश्च बहुविस्तरः॥
रथा नागा हयाश्चैव पादाताश्चैव पाण्डव!।
विष्टिर्नावश्चराश्चेह देशिका इति चाष्टमम्॥
अङ्गान्येतानि कौरव्य! प्रकाशानि बलस्य च।
अङ्गमाज्ञप्तिमाख्यातमर्थयोगा विधादयः॥
सर्गे चाभ्यवहार्य्ये वाप्युपांशुस्त्रिविधः स्मृतः।
अरिभिश्चसुदासीन इत्येतेऽप्यनुवर्णिताः॥
कृत्स्नो मार्गगुणश्चैव तथा भूमिगुणाश्च ह।
आत्मरक्षणमाख्यातः सर्गाणां चान्ववेक्षणम्॥
कल्पना विविधाश्चापि नृनागरथवाजिनाम्।
यूहाश्च विविधाभिख्या विविधं युद्धकौशलम्॥
उत्पातांश्च निपातांश्च सुयुद्धं सुपलायनम्।
शस्त्राणां पालनं ज्ञानं तथैव भरतर्षभ!॥
बलव्यसननिर्युक्तं तथैव बलहर्षणम्।
पीड़ा चापदकालश्च पत्तिज्ञानञ्च पाण्डव!॥
तथा खातविधानञ्च योगसञ्चार एव च।
चौरैराटविकैश्चोग्रैः परराष्ट्रस्य पीड़नम्॥
अग्निदैरसदैश्चैव प्रतिरूपकचारकैः।
औषधिसुखोपजापेन वीरुधश्छेदनेन च॥
दूषणेन च नागानां आशुक्षाजननेन च॥
आराधनेन भक्तस्य प्रत्ययोपार्जनेन च॥
सम्राज्ञश्च च राज्यस्य ह्रासवृद्धौ समक्षसम्।
दूतसामर्थ्ययोगाश्च राष्ट्रस्य च विवर्द्धनम्।
अरिमध्यमित्राणां सम्यक् चोक्तं प्रपञ्चनम्॥
अवमर्दैः प्रतीघातस्तथा चैव बलीयसाम्।
व्यवहारः सुतत्त्वञ्च तथा कण्टकशोधनम्॥
श्रमो व्यायामयोगश्च त्यागो द्रव्यस्य संग्रहः॥
अभृतानाञ्च भरणं भृतानाञ्चाप्रवेक्षणम्।
अर्थस्य काले दानञ्च व्यसने चाप्रसङ्गिता॥
तथा राजगुणाश्चैव सेनापतिगुणाश्च ह।
कारणञ्च त्रिवर्गस्य गुणदोषास्तथैव च॥
दुश्चेष्टितञ्च विविधं वृत्तिश्चैवाशुजीविनाम्।
गृद्धितत्वञ्च सर्व्वस्य प्रमादस्य च वर्ज्जनम्॥
अलब्धलाभो लब्धस्य तथैव च विवर्द्धनम्।
प्रदानञ्च विवृद्धस्य पात्रेभ्यो विधिवत्तदा॥
विसर्गोऽर्थस्य धर्म्मार्थं कामहेतुकमुच्यते।
चतुर्थं व्यसनाघाते तच्चैवाचानुवर्णितम्॥
क्रोधजानि तथोग्राणि कामजानि तथैव च।
दृष्टोक्तानि क्रुरश्रेष्ठ! व्यसनान्यत्र चैव ह॥
मृगयाश्चास्तथा पानं स्त्रियश्च भरतर्षभ!।
कामजान्याहुराचार्य्याः प्रोक्तानीह स्वयम्भुवा॥
वाक्पारुष्यं तथोग्रत्वं दण्डपारुष्यमेव च।
निग्रहोऽथात्मनस्त्यागमर्थदूषणमेव च॥
व्यसनानि विविधान्येव क्रियासंश्चाथ वर्णिताः।
अवमर्दैः प्रतीघातः केतनानाञ्च भञ्जनम्॥
चैत्यद्रुमावमर्दश्च रोधः कर्म्मान्तनाशनम्॥
उपस्कारोऽथ वसनं तथोपायाश्च वर्णिताः।
पनवानकशङ्खानां भेरीणाञ्च युधिष्ठिर!॥
उपार्ज्जनञ्च द्रव्याणां परिमर्दश्च तानि षट्।
लक्षस्य च प्रशमनं सतां चैवाभिपूजनम्॥
विद्वद्विरेकीभावश्च दानहोमविधिज्ञता।
मङ्गलालभनञ्चैव शरीरस्य प्रतिक्रिया॥
आहारयोजनञ्चैव नित्यमास्तिक्यमेव च।
एकेन च पथोक्तेयं सत्यत्वं मधुरा गिरः॥
उत्सवानां समाजानां क्रियाः केतनजास्तथा।
प्रत्यक्षाश्च परोक्षाश्च सर्व्वाधिकरणेष्वथ॥
वृत्तिर्भरतशार्दूल! नित्यश्चैवान्ववेक्षणम्।
अदण्डाद्यं च विप्राणां युक्त्या दण्डनिपातनम्॥
अनुजीविजनातिभ्यो गुणिभ्यश्च समुद्भवः।
रत्नाश्चैव पौराणां राष्ट्रस्य च विवर्द्धनम्॥
मण्डलस्या च या चिन्ता राजन्! द्वादशराजिका॥
हासप्रतिविधा चैव शरीरस्य प्रतिक्रिया।
देशजातिकुलानाञ्च धर्म्माः समनुवर्णिताः॥
धर्म्मश्चार्थश्च कामश्च मोक्षश्चात्रानुवर्णितः।
उपायश्चात्र लिप्सा च विविधा भूरिदक्षिण!॥
मूलकर्म्मक्रिया चात्र मायायोगश्च वर्णितः।
दूष्यं स्रोतांसि चैव वर्णितश्च स्थिराम्भसाम्॥
यैर्यैरुपायैर्लोकस्तु न चलेदार्य्यवर्त्मनः।
तत् सर्व्वं राजशार्दूल! नीतिशास्त्रेषु वर्णितम्॥
एतत् श्रुत्वा शुभं शास्त्रं ततः स भगवान् प्रभुः।
देवासुराश्च संहृष्टः सर्व्वान् शुक्रपुरोगमान्॥
उपकाराय लोकस्य त्रिवर्गस्थापनाय च।
नवनीतं सरस्वत्या बुद्धिरेषा प्रभाविता॥
दण्डेन सहिता श्लेषा लोकरक्षणकारिका।
नियहानुग्रहरता लोकाननुचरिष्यति॥"
इति महाभारते राजधर्म्मः॥
दुर्गा। यथा,—
"नयानयगतालोके विकल्पनिलयामला।
दण्डनाङ्गमनाङ्गापि दण्डनीतिरिति स्मृता॥"
इति देवीपुराणे ४५ अध्यायः॥
दण्डपांशुलः, पुं, (दण्डेन दण्डधारकेण पांशुलो नीचः।) द्वारपालः। इति शब्दरत्नावली॥
दण्डपाणिः, पुं, (दण्डः पाणौ यस्य।) यमः। (यथा, भागवते। १। १७। ३५।
"परीक्षितेवमादिष्टः स कलिर्जातवेपथुः।
असुतृपासिमादत्त दण्डपाणिमिवापतत्॥")
काश्मीरस्थशिवगणविशेषः। स पूर्व्वभद्रयशपुत्रः हरिकेशनामा शिवमाराध्य शिववरेण काश्यां दण्डनायकत्वमवाप्तवान्। यथा,—
"भक्तस्य धीरस्य तपोनिधेर्दृढं
हरो वराणां निकरं तदा ददौ।
क्षेत्रस्य यस्यास्य मम प्रियस्य भो
भवाधुना दण्डधरो वराश्रम॥
स्थिरस्त्वमद्यादि दुरात्मदण्डकः
सुपालकः पुण्यकृतान्त मत्प्रियः।
त्वं दण्डपाणिर्भव नामतोऽधुना
सर्व्वान् गणान् प्राधि समाज्ञयोत्कटान्॥"
"त्वत्सात्कृतक्षेत्रवरेऽद्य यच्चराट्
कक्षामनाराध्य सुमुक्तिभाग्जनः।
सभाजनं प्राप्तत एव ते चरेत्
ततः समर्च्चां मम भक्त आदरात्॥
मद्भक्तियुक्तोऽपि विना त्वदीयां
भक्तिं न काश्मीवसतिं लभेत।
गणेषु देवेषु हि मानवेषु
तदग्रमान्यो भव दण्डपाणे!॥"
इति काश्मीरखण्डे ३२ अध्यायः।
(खनामख्यातचन्द्रवंशीयनृपविशेषः। यथा, मात्स्ये। ५०। ८७।
"वह्नीनरात्मजश्चैव दण्डपाणिर्भविष्यति॥"
अयन्तु मासत्रयाधिकचत्वारिंशद्वर्षपर्य्यन्तं राज्यं चकार। यथा, राजावल्याम् १ परिच्छेदे।
"चत्वारिंशत् समाश्चैव सोऽपि मासत्रयाधिकाः।
बुभुजे पृथिवीमेतां दण्डपाणिर्महाबलः॥"

दण्डधरे, त्रि। यथा, महाभारते। १।१३६।२८।
"भीमसेनो महाबाहुर्दण्डपाणिरिवान्तकः।
प्रविवेश महासेनां मकरः सागरं यथा॥")
दण्डपारुष्यं, क्ली, (दण्डेन यत् पारुष्यं परुषता। दण्ड्यतेऽनेनेति दण्डो देहक्लेशेन यत् पारुष्यं विरुद्धाचरणमिति मिताक्षरा।) राज्ञां सप्तव्यसनान्तर्गतव्यसनविशेषः। इति हेमचन्द्रः। ३। ४०३॥ अष्टादशविवादान्तर्गतविवादविशेषः। तत्तु ताड़नादि। इति मनुटीकायां कुल्लूकभट्टः॥ (यथा, मनुः। ८। २७८।
"अत ऊर्द्धं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम्॥")
दण्डपालः, पुं, (दण्डं शरीरं पालयतीति। पालि+अण्।) अङ्गेश्वरभेदस्यः। दाँड़िका इति भाषा। इति हारावली। १६०॥ (दण्डेन पालयतीति। पालि+अच्।) द्वारपालः॥
दण्डपालकः, पुं, (दण्डपालवत् कायतीति। के+कः।) शुक्लभेदस्यः। इति हारावली। १६१॥
दण्डबालधिः, पुं, (दण्ड इव बालधिर्यस्य।) हस्ती। इति शब्दरत्नावली॥
दण्डभृत्, पुं, (दण्डं चक्रभ्रामणार्थं लगुड़ादिकं बिभर्त्तीति। भृ+क्विप् तुगागमश्च।) कुम्भकारः। इति त्रिकाण्डशेषः॥ (दण्डं दमनं बिभर्त्तीति।) दण्डधारके, त्रि॥
दण्डयात्रा, स्त्री, (दण्डाय शत्रुदमनाय या यात्रा प्रयाणम्।) दिग्विजयः। संयानम्। वरयात्रा। इति मेदिनी। रे, २६५॥
दण्डयामः, पुं, (दण्डं यच्छतीति। यम+अण्।) यमः। दिनम्। अगस्त्यः। इति मेदिनी। मे, ६०॥
दण्डरी, स्त्री, डङ्गरीफलम्। इति राजनिर्घण्टः॥
दण्डवादी, [न्] पुं, (दण्डेन वदतीति। वद+णिनिः।) दर्व्वटः। द्वारपालः। इति हारावली। १२८॥ दण्डवक्तरि, त्रि॥
दण्डवासी, [न्] पुं, (दण्डेन वसतीति। वस+णिनिः।) द्वारपालः। इति त्रिकाण्डशेषः॥ एकग्रामाधिष्ठातजनः। इति जटाधरः॥
दण्डविष्कम्भः, पुं, (दण्डं मत्तानदण्डं विष्कभ्नाति निबध्नाति यत्र। वि+स्कभ+अधिकरणे घञ्। वेः स्कभ्नातेर्नित्यमिति वत्वम्।) यत्र स्तम्भादौ आकर्षणार्थं रज्वा दण्डो निबध्यते सः। घोलमञ्चीया खुँटी इति भाषा। तत्पर्य्यायः। कुठरः २। इत्यमरः। २।६।७४॥
दण्डवृक्षकः, पुं, (पत्रविहीनत्वात् दण्ड इव वृक्षः। ततः स्वार्थे कन्।) स्नुही। इति राजनिर्घण्टः॥
दण्डहस्तं, क्ली, (दण्ड इव हस्तो वृन्तरूपो यस्य।) तगरपुष्पम्। इति राजनिर्घण्टः॥
दण्डाजिनं, क्ली, द्वारम्। इति शब्दार्थकल्पतरुः॥ (कपटिनां बहिर्द्वारादिकं यतीनां दण्डाजिनवत् आर्य्यलिङ्गत्वेन प्रतीयमानत्वात् तदर्थोपचर्य्यते। दण्डश्च अजिनञ्च द्वयोः समाहारः। यतीनां दण्डं व्रतचर्म्म च। यथा, देवीभागवते। १। १६। ३१।
"दण्डाजिनव्रता चिन्ता यथा तव वनेऽपि च।
तथैव राज्यचिन्ता मे चिन्तयानस्य वा न वा॥")
दण्डादण्डि, व्य, (दण्डेन दण्डेन प्रहृत्य प्रवृत्तं युद्धम्। "इच् कर्म्मव्यतिहारे।" ५। ४। १२७। इति इच्।) परस्परदण्डकरणकप्रहाररूपयुद्धम्। इति व्याकरणम्॥ लाठालाठि इति भाषा॥
दण्डारः, पुं, (दण्डं ऋच्छतीति। ऋ+अण्।) वाहनम्। मत्तहस्ती। शरयन्त्रकम्। कुम्भकारस्य चक्रम्। इति मेदिनी। रे, १६८॥
दण्डाहतं, क्ली, (दण्डेन आहतम्।) घोलम्। इत्यमरः। २।६।५३॥ (दण्डेन ताड़िते, त्रि॥)
दण्डिकः, पुं, (दण्डोऽस्यास्तेति। दण्ड+"अत इनिठनौ।" ५। २। ११५। इति ठन्।) दण्डधारकः। छड़िवरदार इति आसावरदार इति च भाषा। मत्स्यविशेषः। डाणिकजा माछ इति भाषा। अस्य गुणाः। कफवायुपित्तनाशित्वम्। तिक्तत्वम्। लघुत्वञ्च। इति राजवल्लभः॥ (दण्डदातरि नियामके, त्रि। यथा, महाभारते। ६। ११। ३६।
"न तत्र राजा शासेन्द्र! न दण्डो न च दण्डिकः।
स्वधर्म्मेणैव धर्म्मज्ञ! ते रक्षन्ति परस्परम्॥")
दण्डिका, स्त्री, (दण्डवदाकृतिरस्यस्याः। दण्ड+ठन्+टाप्।) द्वारविशेषः। इति जटाधरः॥ रज्जुः। यथा, अङ्कुस्रोतःकर्षे दण्डिकां छिनत्ति। इति सुपद्मव्याकरणम्॥ दण्डिका रज्जुरिति तट्टीकाकारः॥
दण्डित, त्रि, (दण्डः सञ्जातोऽस्येति। दण्ड+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) ज्ञातदण्डः। तत्पर्य्यायः। दापितः २ साधितः ३। इति हेमचन्द्रः॥
दण्डी, [न्] पुं, (दण्डोऽस्यास्तेति। दण्ड+"अत इनिठनौ।" ५। २। ११५। इति इनिः।) जिनविशेषः। इति त्रिकाण्डशेषः॥ (स तु कवीनामन्यतमः काव्यादर्शदशकुमारचरितादिग्रन्थप्रणेता। शङ्कराचार्यसमकालीनोऽयम्। यथा, शङ्करविजये। १५। १४०।
"स कथाभिरवन्तिषु प्रसिद्धान्
विदुषान् वाग्मयरुद्दण्डिमुख्यान्।
ग्रथिलीकृतदुर्म्मताभिमानान्
निजभाष्यश्रवणोत्सुकांश्चकार॥")
यथा, कालिदासः।
"जाते जगति वाल्मीकौ कविरित्यभिधा त्वयि।
कवौ इति ततो व्यासे कवयस्त्वयि दण्डिनि॥"
दमनकवृक्षः। इति राजनिर्घण्टः॥ यमः। (यथा, महाभारते। १। १६०। १७।
"तं वृक्षमादाय रिपुप्रमाथी
दण्डीव दण्डं पितृराज उग्रम्॥")
द्वाःस्थः। चतुर्थाश्रमी। (अस्य व्यवहारादिकं यदुक्तं मनौ। ६। ४१-५८।
"आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः।
समुपोढ़ेषु कामेषु निरपेक्षः परिव्रजेत्॥
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान्।
सिद्धिमेकस्य संपश्यन्न जहाति न हीयते॥
अनग्निरनिकेतः स्याद् ग्राममन्नार्थमाश्रयेत्।
उपेक्षकोऽसङ्कसुको मुनिर्भावसमाहितः॥
कपालं वृक्षमूलानि कुचेलमसहायता।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्॥
नाभिनन्देत मरणं नाभिनन्देत जीवितम्।
कालमेव प्रतीक्षेत निर्देशं भृतको यथा॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम्।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत्॥
अतिवादांस्तितिक्षेत नावमन्येत कञ्चन।
न चेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित्॥
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत्।
सप्तद्वारावकीर्णाञ्च न वाचमनृतां वदेत्॥
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः।
आत्मनैव सहायेन सुखार्थी विचरेदिह॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्॥
न तापसैर्व्राह्मणैर्वा वयोभिरपि वा क्वचित्।
आकीर्णं भिक्षुकैर्व्वान्यैरागारमुपसंव्रजेत्॥
कुल्माषैश्चरुनखघ्नः पात्री दण्डी कुसुम्भवान्।
विचरेन्नियतो नित्यं सर्व्वभूतान्यपीडयन्॥
अतैजसानि पात्राणि तस्य स्युर्न्नियतानि च।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे॥
अलाबुं दारुपात्रञ्च मृन्मयं वैदलन्तथा।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत्॥
एककालञ्चरेद्भैक्षं न प्रसज्जेत विस्तरे।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति॥
विधूमे सन्नमुषले अङ्गारे शुक्तवज्जने।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत्॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत्।
प्राणयात्रिकमात्रः स्यात् मात्रासङ्गाद्विनिर्गतः॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः।
अभिपूजितलाभैश्च यतिर्भुक्तोऽपि बध्यते॥")
दण्डग्रहणादेव दण्डी। भार्य्यादिषु विद्यमानेषु दण्डग्रहणेन प्रत्यवायो जायते। यदुक्तं महानिर्व्वाणतन्त्रे १३ पटले।
"स्थितायां यौवनयुतकान्तायां परमेश्वरि!।
सर्व्वं हि विफलं तस्य यः कुर्य्याद्दण्डधारणम्॥
विद्यते पितरौ देवि! यः कुर्य्याद्दण्डधारणम्।
सन्न्यासं विफलं तस्य रौरवाख्यं गमिष्यति॥
विद्यते बालभावेन यस्य कान्ता सुतस्तथा।
सन्न्यासधारणं तस्य वृथा हि परमेश्वरि!॥
सगुरुश्चापि शिष्यश्च रौरवाख्यं प्रयद्यते॥")
अधुनातनदण्डिनस्तु प्रायशः शङ्कराचार्य्यसम्प्रदायान्तर्गता अतस्तेषां निर्गुणब्रह्मोपासनैव परमो धर्म्मः। एते तु सुखिनः प्रायशः परिहितरञ्जितवस्त्रा रुद्राक्षमालाधारिणश्च। दण्डिनस्तु द्वादशवर्षपर्य्यन्तं भिक्षापर्य्यटनादिकं विधाय दण्डान् परित्यज्य परमहंसाश्रममाश्र-

वेयुः इति साम्प्रदायिकाः ॥ एतेषां काश्यप एव प्रधानतमं वासस्थानम् ॥ * ॥ महादेवः । यथा, महाभारते । १३ । १७ । १२६ ।
"मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः ॥"
योगाचार्य्यविशेषः । यथा, शिवपुराणे वायुसंहितायाम् । उत्तरभागे । १० । ५ ।
श्रीकृष्ण उवाच ।
"युगावर्त्तेषु सर्व्वेषु योगाचार्य्यस्वरूपेण तु ।
अवतारांश्च मुख्यांश्च शिष्यांश्च भगवन् ! वद ॥"
उपमन्युरुवाच ।
"महाकालश्च शूली च दण्डी मुण्डी स एव च ॥"
धृतराष्ट्रपुत्राणामेकतमः । यथा, महाभारते धृतराष्ट्रपुत्रनामकथने । १ । ६७ । १०२ ।
"निषङ्गी कवची दण्डी दण्डधारो धनुर्द्धरः ॥"
दण्डीत्यत्र प्राप्नोति केचित् ॥) दण्डयुक्ते त्रि । इति हेमचन्द्रः । ३ । ३८५ ॥ (यथा, महाभारते । १३ । १४ । ३७४ ।
"दण्डी मुण्डी कुशी चीरी धृताक्षो मेखलीकृतः ॥")
दण्डोत्पलं, क्ली, (दण्डयुक्तसृत्पलमिव ।) वृक्षविशेषः । डानिपोला इति डानकुनि इति च भाषा । अस्य गुणाः । क्षयश्वासकासनाशित्वम् । अग्निदीपनत्वञ्च । इति राजवल्लभः ॥
तत्तु पीतरक्तश्वेतपुष्पभेदेन त्रिविधम् । पीतस्य पर्य्यायः । गोवन्दनी २ गन्धवल्ली ३ सहदेवी ४ सहा ५ । रक्तस्य पर्य्यायः । विश्वदेवा १ । श्वेतस्य । दण्डोत्पला १ । इति रत्नमालाः ॥
दण्डोत्पला, स्त्री, (दण्डोत्पल + टाप् ।) श्वेतपुष्पदण्डोत्पलम् । इति रत्नमाला ॥
दण्ड्यः, त्रि, (दण्डयते इति । दण्ड + कर्म्मणि ण्यत् । यद्वा, दण्डमर्हतीति । दण्ड + "दण्डादिभ्यो यत्।" ५ । १ । ६६ । इति यत् ।) दण्डनीयः । दण्डितव्यः । (यथा, मार्कण्डेये । २८ । ३४ ।
"यश्चोल्लङ्घ्य स्वकं धर्म्मं स्ववर्णाश्रमसंज्ञितम् ।
नरोऽन्यथा प्रवर्त्तेत स दण्ड्यो भूभृतो भवेत् ॥")
तत्पर्य्यायः । दण्डार्हः २ । इति जटाधरः ॥ (यथा, रघुः । १ । २५ ।
"स्थिते दण्ड्यतो दण्ड्यान् परिणेतुः प्रसूतये ॥")
दत्, पुं, दन्तः । इति शब्दचन्द्रिका । अस्य बहुवचने दतः ॥
दत्तं, त्रि, (दीयते इति । दा + क्तः ।) दत्तितम् । कृतदानम् । तत्पर्य्यायः । विसृष्टम् २ । इति त्रिकाण्डशेषः ॥ विश्राणितम् ३ । इति शब्दरत्नावली ॥ (यथा, माघे । १ । १५ ।
"स्वहस्तदत्ते सुनिमासने सुनि-
श्चिरन्तनस्तावदभिन्यवीविशत् ॥"
दा + भावे क्तः ।) दाने, क्ली । तत् सप्तविधं यथा,—
"दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकम् ।
पण्यस्त्रियं श्रुतिस्मृत्या स्नेहात् प्रत्युपकारतः ।
स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः ॥
अदत्तन्तु भयक्रोधशोकावेशगुरुगन्विते ।
पर्य्यायक्रोचपरीहारव्यलीकच्छलयोगतः ॥
बालनष्टोन्मत्तदासत्वार्त्तमत्तोन्मत्तापवर्ज्जितम् ।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत् ॥
अपात्रे पात्रमित्युक्ते कार्य्ये चाधर्म्मसंहिते ।
यद्दत्तं स्यादवज्ञानात् तददत्तमिति स्मृतम् ॥"
इति मिताक्षरा ॥
दत्तः, पुं, राजविशेषः । स अग्निसिंहनन्दनः । इति हेमचन्द्रः । ३ । ३६० ॥ (स तु जैनविशेषः । अपरः क्षत्रियवंशोत्पन्नो नृपविशेषः । यथा, महाभारते । १२ । २६६ । १५ ।
"आयुर्मतङ्गो दत्तश्च द्रुपदो मातृस एव च ॥"
यदुवंशीयस्य राजाधिदेवस्य पुत्रः । यथा, हरिवंशे । ३८ । २ ।
"राजाधिदेवपुत्रास्तु जज्ञिरे वीर्य्यवत्तराः ।
दत्तातिदत्तौ वलिनौ पालश्च श्वेतवाहनः ॥")
वैश्यस्योपाधिविशेषः । यथा,—
"शर्म्मा देवश्च विप्रस्य वर्म्मा त्राता च भूभुजः ।
भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत् ॥"
इत्युद्वाहतत्त्वम् ॥
अधुना कायस्थादेरुपाधिश्च । (यथा, कुलदीपिकायाम् ।
"गौड़ेऽौ कीर्त्तिमन्तश्चिरवसतिकृता मौलिका ये हि सिद्धा
स्ते दत्ताः सेनदासाः करणगुहसहिताः पालिताः सिंहदेवाः ॥")
भगवदवतारविशेषः । स अत्रिपुत्रः दत्तात्रेय इति नाम्ना ख्यातः । इति श्रीभागवतम् ॥ (पुत्रविशेषः । यथा, देवीभागवते । १ । ६ । ४८ ।
"क्रीतः सहोढ़ः कानीनः क्रीतः प्राप्तस्तथा वने ।
दत्तः केनापि चाप्तश्च धनग्राहिसुताः स्मृताः ॥"
तथा, महाभारते । १ । १२० । ३४ ।
"दत्तः क्रीत उपक्रीत उपगच्छेत् स्वयञ्च यः ॥")
दत्तकः, पुं, (दत्त एव । स्वार्थे कन् ।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः । सपिण्डदत्तकस्य अशौचव्यवस्था । यथा, "सापिण्डस्य पुत्रीकरणे तु सपिण्डमरणादिनिमित्तं दत्तकस्य तन्मरणादिनिमित्तं सपिण्डानां दशराचमेव निर्विवादम् । इति श्रीमन्तभट्टधृतदत्तकदीधितिः ॥ * ॥
औरसपुत्रेण सह तस्य समभागित्वम् । यथा,—
"दत्तपुत्रे यथाजाते कदाचित्त्वौरसो भवेत् ।
पितुर्वित्तस्य सर्व्वस्य भवेतां समभागिनौ ॥
इत्यपि वचनं शूद्रविषयम् ।" इति दत्तकचन्द्रिका ॥
अन्यत् पोष्यपुत्रशब्दे द्रष्टव्यम् ॥
दत्तकपुत्रः, पुं, (दत्तक एव पुत्रः ।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः । यथा, याज्ञवल्क्ये ।
"दद्याच्चाता पिता वा यं स पुत्रो दत्तको भवेत् ॥"
तत्परिग्रहस्य प्रकारो यथा,—
"शुक्रशोणितसम्भवः पुत्रो मातापित्रनिमित्तकः ।
तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः ॥
नैवैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्व्वेषाम् ।
स्त्री पुत्रं न दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः ॥
पुत्रं प्रतिगृह्णीयन् बन्धूनाकार्य्य राजनि निवेद्य निवेदनस्य मध्ये व्याहृतिभिर्हुत्वा प्रतिगृह्णीयादिति ।" इति वशिष्ठः ॥ तस्य गोत्रधनप्राप्तिर्यथा,—
"गोत्रऋक्थे जनयितुर्हरेदौरसिमः सुतः ।
गोत्रऋक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥
पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते ! ।
आचूड़ान्तं न पुत्रः स पुत्रतां याति चान्यतः ॥
चूड़ादा यदि संस्कारो निजगोत्रेण वै कृतः ।
दत्तादासनयास्ते सुरन्यथा दास उच्यते ॥
ऊर्द्धन्तु पञ्चमाद्वर्षान्न दत्ताद्याः सुता नृप ! ।
गृहीत्वा पञ्चवर्षीयपुत्रेष्टिं प्रथमञ्चरेत् ॥"
इत्युद्वाहतत्त्वम् ॥
दत्तको द्विविधः । केवलदत्तकः द्व्यामुष्यायणदत्तकश्च । केवलदत्तको जनकेन प्रतिगृहीतैवार्थमेव दत्तः तस्यैव पुत्रः । द्व्यामुष्यायणस्तु जनकप्रतिग्रहीतृभ्यामावयोरयमिति संप्रतिपन्नः स उभयोरपि पुत्रः ।" इति मिताक्षरा ॥
दत्ताप्रदानिकं, क्ली, (दत्तस्य आप्रदानं ग्रहणमस्यस्य । दत्ताप्रदान + ठन् ।) अष्टादशविवादपदान्तर्गतविवादपदविशेषः । दत्तस्य पुनराहरणं यस्मिन् विवादपदे तत् । यथा, नारदः ।
"दत्त्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति ।
दत्ताप्रदानिकं नाम व्यवहारपदं हि तत् ॥"
"असम्यग्विहितमार्गेण ।" इति मिताक्षरा ॥
दत्तात्मा, [त्मन्] पुं, (दत्तः आत्मा येन ।) पुत्रविशेषः । यथा,—
"दत्तात्मा तु स्वयं दत्तः ।" इति कात्यायनः ॥ अस्य विवरणम् । "दत्तात्मा तु पुत्रो यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयं दत्तत्वमुपगतः ।" इति मिताक्षरा ।२।१३४॥ (विश्वदेवानामन्यतमः । यथा, महाभारते । १३ । ६२ । ३४ ।
"सोमपः स्वर्य्यसावित्रो दत्तात्मा पुष्करीयकः ॥")
दत्तानपकर्म्म, [न्] क्ली, (दत्तस्य अनपकर्म्म आदानं यत्र ।) दत्ताप्रदानिकम् । इति मनुः ॥
दत्तिः, स्त्री, (दा + भावे क्तिन् ।) दानम् । इति शब्दरत्नावली ॥ (यथा, रघुः । ८ । ८६ ।
"अपत्योत्पादनाः कुटुम्बिनी-
मतृणह्यीव निवापदत्तिभिः ॥")
दत्तेयः, पुं, (दत्तायाः अपत्यं पुमान् । दत्ता + ढक् ।) इन्द्रः । इति त्रिकाण्डशेषः ॥
दद, ङ दाने । धृतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ङ, ददते । इति दुर्गादासः ॥
ददनं, क्ली, (दद + भावे ल्युट् ।) दानम् । इति शब्दरत्नावली ॥
ददः, पुं, कच्छपः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (ददाति कण्डूमिति । दद + बाहुलकात् रुः । यद्वा, दरिद्राति दुर्गच्छत्यनेनेति । दरिद्रा + डगयादिलात् कुप्रत्ययेन साधुः । इत्युज्ज्वलदत्तः । १ । ६२ ।) रोगविशेषः । दाद

इति भाषा। तस्य रूपान्तराणि। दद्रुः २ दद्रः ३ दर्द्रः ४। इति भरतधृतशब्दभेदः॥
तस्य लक्षणं यथा,—
"सकण्डुरागपिड़कं दद्रुमण्डलसंयुतम्॥"
इति माधवकरः॥
तस्यौषधम् यथा,—
"विड़ङ्गेड़गजाकुष्ठनिम्बासिन्धूत्थसर्षपैः।
मूत्रामुपिष्टो लेपोऽयं दद्रुकुष्ठविनाशनः॥
प्रपुन्नाड़स्य बीजानि धात्री सर्ज्जरसः खुही।
सौवीरपिष्टं दद्रूणामेतद्दुर्दर्शनं परम्॥
आरग्वधस्य पत्राणि आरनालेन पेषयेत्।
दद्रुकिट्टिमकुष्ठानि हन्ति सिध्मानमेव च॥"
इति गारुड़े १७५ अध्यायः॥ *॥
"एकञ्च त्रिफलाभागस्तथा भागद्वयं शिव!।
सोमराजस्य बीजानां चूर्णं पथ्या च दद्रुजित्॥
अम्लतक्रं सगोमूत्रं कथितं लवणान्वितम्।
कांस्यदृष्टं खरं लेपात् कुष्ठदद्रुविनाशनम्॥
हरिद्रा हरितालञ्च दूर्व्वा गोमूत्रसैन्धवम्।
अयं लेपो हन्ति दद्रुं पामानं वै गरं तथा॥"
इति गारुड़े १९४ अध्यायः॥ *॥
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम्॥
विशाला करवीरञ्च अर्कक्षीरं भृङ्गतुण्डजम्।
एषाञ्च चार्द्धिको भागो विषस्यार्द्धपलं भवेत्॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत्।
मृत्पात्रे लौहपात्रे वा अग्नेर्दूरमिना पचेत्॥
पामा विचर्चिका चैव दद्रुविस्फोटकानि च।
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते॥"
इति च गारुड़े १९८ अध्यायः॥ *॥
अथ दद्रुचिकित्सा।
"कुष्ठलाङ्गलिनो दद्रोर्निशासैन्धवसर्षपाः।
चक्रपिष्टः प्रलेपोऽयं दद्रुकुष्ठनिसूदनः॥
दूर्व्वाभयासैन्धवचक्रमर्द्द-
कुठेरकाः काञ्जिकतक्रपिष्टाः।
त्रिभिः प्रलेपैरपि बद्धमूलां
दद्रुञ्च कुष्ठञ्च विनाशयन्ति॥"
कुठेरकः ममरी इति लोके।
लोके गर्जिलकाख्या सिद्धार्थकश्च खुहीक्षीरम्।
त्रयमिति समभागं स्यादेषां द्विगुणस्तु दद्रुघ्नः॥
अष्टगुणे गोतक्रे तानि प्रक्षेतानि संदधात्।
दिवसचितयादूर्द्धं सम्यक् निष्पेषयेत्तानि॥
बन्धोपलेन घृष्ट्वा दद्रुमालेपयेत्तेन।
सप्ताहाल्लेपोऽयं दद्रुकण्डूमवश्यं विनाशयति॥"
इति भावप्रकाशः॥
("लाक्षाकुष्ठं सर्षपाः श्रीनिकेतं
रात्रिर्व्योषं चक्रमर्द्दस्य बीजम्।
क्षत्वैकस्थं तक्रपिष्टः प्रलेपो
दद्रुयुक्तो मूलकाड्डीजयुक्तः॥
सिन्धूद्भूतं चक्रमर्द्दस्य बीज-
मिक्षूद्भूतं केशरं तार्क्ष्यशैलम्।
पिष्ट्वा लेपोऽयङ्कपित्थाद्रसेन
दद्रून्सर्वं नाशयत्येव योगः॥
हेमक्षीरी व्याधिघातः शिरीषो
निम्बः सर्ज्जो वत्सकः साजकर्ण्यः।
शीघ्रं तीव्रा नाशयन्तीह दद्रः
क्षानाभेपोदुर्धर्षभेषु प्रयुक्ताः॥"
इति च सुश्रुते चिकित्सितस्थाने नवमेऽध्याये॥)
दद्रुकः, पुं, (दद्रुरेव। स्वार्थे कन्।) दद्रुरोगः। इति शब्दरत्नावली॥
दद्रुघ्नः, पुं, (दद्रुं दद्रुरोगं हन्तीति। हन+टक्।) चक्रमर्दकः। इत्यमरः। २।४।१४०॥ (यथा, भावप्रकाशे क्षुद्रकुष्ठचिकित्सायाम्।
"वाकुची चाथ दद्रुघ्नः पिचुमर्दो हरीतकी॥"
अस्य गुणा यथा,—
"दद्रुघ्नपत्रं दोषघ्नमग्नं वातकफापहम्।
कण्डूकासक्रमिश्वासदद्रुकुष्ठप्रणाशनम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
दद्रुघ्नः, त्रि, (दद्रुरस्यस्येति। दद्रु+"लोमादिपामादिपिच्छादिभ्यः शनेलचः।" ५।२।१००। इति नः।) दद्रुरोगी। इत्यमरः। २।६।५६॥
दद्रुनाशिनी, स्त्री, (दद्रुं नाशयतीति। नश्+णिच्+णिनिः। ङीप्।) तेजिनीकोटः। इति राजनिर्घण्टः॥
दद्रुरोगी, [न्] त्रि, (दद्रुरोगोऽस्यस्येति। दद्रुरोग+इनिः।) दद्रुरोगविशिष्टः। देदुया इति भाषा। तत्पर्य्यायः। दद्रुघ्नः २। इत्यमरः। २।६।५६॥
दद्रूः, पुं, (दरिद्राति दुर्गच्छत्वङ्मननेनेति। दरिद्रा+"दरिद्राते र्लोपश्च।" उणा १।९२। इति कः रकारेकारलोपाश्च।) दद्रुः। इत्यमरटीकायां भरतः॥
दद्रूघ्नः, पुं, (दद्रूं हन्तीति। हन+टक्।) दद्रुघ्नः। इति शब्दरत्नावली॥
दद्रूरः, त्रि, (दद्रूरस्यस्येति। दद्रू+पामादित्वात् नः।) दद्रुघ्नः। इत्यमरटीकायां रमानाथः॥
दध, ङ दधे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, दधते। दधे दानधृत्योः। आदध्यादन्धकारे रतिमतिशयिनीमिति मयूरभट्टोक्तम्। गत्यर्थतावित्यात् अस्येव दीपरक्षेपसाध्यत्वमिति रमानाथः। वस्तुतस्तु दु धाञ् धारणे इत्यस्येव स्यां साध्यम्। इति दुर्गादासः॥
दधि, क्ली, (दधातीति। धा+"भावायां धाञ्रुहृगमिजनिनमिभ्यः।" ३।२।१७१। इत्यस्य वार्त्तिकोक्त्या किः स च णिद्वत्।) श्रीवासः। वसनम्। इति शब्दरत्नावली॥ क्षीरोत्तरावस्थाभावः। दह इति भाषा। तत्पर्य्यायः। क्षीरजम् २ मङ्गल्यम् ३ विरलम् ४। इति राजनिर्घण्टः॥ पयस्यम् ५। घनेतरत् दधि दध्याम्। इत्यमरः ३ अस्य गुणाः। अम्लत्वम्। गुरुत्वम्। वातदोषघ्नमनलत्वम्। संग्राहित्वम्। मूत्रावहत्वम्। बलत्वम्। श्लेष्मकफाभिवृद्ध्यग्निमान्द्यनाशनत्वम्। वह्निभ्रान्तिकारित्वम्। कासश्वासपीनसविषमज्वरशीतज्वरहितत्वम्। रक्तोद्रेकशुक्रदृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥ उष्णत्वम्। दीपनत्वम्। स्निग्धत्वम्। कषायानुरसत्वम्। पाकेऽम्लत्वम्। पित्तमेदःप्रदत्वम्। सूक्ष्मश्लक्ष्णातिस्रावातीसाररुचिकार्श्येषु शस्तत्वञ्च। इति भावप्रकाशः॥ स्वादुत्वम्। हृद्यत्वम्। रोचनत्वम्। मङ्गल्यत्वम्। इति राजवल्लभः॥*॥
अथ पक्वदुग्धदधिगुणाः। रूक्षत्वम्। स्निग्धत्वम्। उत्तमगुणत्वम्। पित्तानिलापहत्वम्। सर्व्वधात्वग्निबलवर्द्धनत्वञ्च॥ * ॥
निःसारदुग्धदधिगुणाः। संग्राहित्वम्। शीतलत्वम्। वातलत्वम्। लघुत्वम्। विष्टम्भित्वम्। दीपनत्वम्। रूक्षत्वम्। ग्रहणीरोगनाशित्वञ्च॥*॥
बह्वदधिगुणाः। सुस्निग्धत्वम्। मधुरत्वम्। नातिपित्तकरत्वञ्च॥ * ॥
शर्करासहितदधिगुणाः। श्रेष्ठत्वम्। क्षयापित्तास्रदाहनाशित्वञ्च॥ * ॥
गुड़युक्तदधिगुणाः। वातनाशित्वम्। हृद्यत्वम्। हृंहणत्वम्। तर्पणत्वम्। गुरुत्वञ्च। इति भावप्रकाशः॥ * ॥
वातजक्षयाणाशित्वम्। इति चक्रदत्तः॥ * ॥
रात्रौ दधिसेवने विशेषो यथा, रात्रौ दधि न भुञ्जीत किन्तु सघृतशर्करं ससुङ्गरूपं सक्षौद्रं उष्णं सामलकं भुञ्जीत। रक्तपित्तकफोत्थेषु विकारेषु च अभुक्तान्वितमपि दधि नहितम्॥ ऋतुविशेषे विधिनिषेधौ। हेमन्तशिशिरवर्षासु दधि शस्तं शरद्ग्रीष्मवसन्तेषु प्रायशो विगर्हितम्॥ * ॥
अविधिना दधिसेवने दोषः। ज्वरारुचकपित्तवीसर्पकुष्ठपाण्डुभ्रमकामलारोगप्राप्तिः॥ * ॥
अथ गोदधिगुणाः। विशेषस्वादुत्वम्। बल्यत्वम्। रुचिप्रदत्वम्। पवित्रत्वम्। दीपनत्वम्। स्निग्धत्वम्। पुष्टिकारित्वम्। वायुनाशित्वम्। अशेषदधिमध्ये गुणाधिकत्वञ्च॥ * ॥
माहिषदधिगुणाः। सुस्निग्धत्वम्। श्लेष्मलत्वम्। वातपित्तनाशित्वम्। स्वादुपाकित्वम्। अभिष्यन्दित्वम्। गुरुत्वम्। रक्तकफदूषणत्वञ्च॥ * ॥
छागीदधिगुणाः। उत्तमत्वम्। ग्राहित्वम्। त्रिदोषनाशित्वम्। श्वासकासार्शःक्षयकार्श्येषु शस्तत्वम्। दीपनत्वञ्च। इति भावप्रकाशः॥*॥
आविकदधिगुणाः। दुर्नामकफव्याधिप्रकोपनत्वम्॥ अश्वीदधिगुणाः। वातनाशित्वम्। दीपनत्वम्। चक्षुर्हितत्वञ्च॥ * ॥
औष्ट्रदधिगुणाः। क्षारत्वम्। अत्यम्लत्वम्। कटुपाकित्वञ्च॥ * ॥
हस्तिनीदधिगुणाः। वीर्य्योष्णत्वम्। कषायत्वम्। कफवातनाशित्वञ्च॥ * ॥
मानुष्यदधिगुणाः। मधुरत्वम्। बलत्वम्। स्निग्धत्वम्। सन्तर्पणत्वञ्च। इति राजवल्लभः॥*॥
अथ दधिभेदाः।
"आदौ मन्दं ततः स्वादु स्वाद्वम्लञ्च ततः परम्।
अम्लञ्चतुर्थमत्यम्लं पञ्चमं दधि पच्यते॥" * ॥
मन्दादीनां लक्षणानि गुणाश्च।
"मन्दं दुग्धवदत्यल्परसं किञ्चिद्घनं भवेत्।

मन्दं स्यात् दृष्टविण्मूत्रं दोषत्रयविदाहकृत् ।
यत् सम्यग् घनतां यातं यत्तं स्वादुरसं भवेत् ।
स्वाद्वम्लस्य गुणा ज्ञेयाः सामान्यदधिवज्जनैः ॥
यत्तिरोहितमाधुर्य्यं यत्तास्यत्वं तदम्लकम् ।
अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ॥
तदत्यम्लं दन्तरोमहर्षकण्ठादिदाहकृत् ।
अत्यम्लं दीपनं रक्तपित्तपुष्टिकरं परम् ॥"

इति भावप्रकाशः ॥ * ॥

"लवणमधुरसर्पिःशर्करासुद्गधात्री-
कुसुमरसविहीनं नैतदश्नन्ति नित्यम् ।
न च शरदि वसन्तं नोष्णकाले न रात्रौ
न दधि कफविकारे पित्तदोषेऽपि खादेत् ॥
त्रिकटुकयुतमेतद्राजिकाजीर्णमिश्रं
कफहरमनिलघ्नं वह्निसन्दीपनञ्च ।
तुहिनगिरिशिरःकाले सेवितञ्चातिपथ्यं
रचयति तनुदार्ढ्यं कान्तिसत्वञ्च नृणाम् ॥
दधिमधुरमतीवस्निग्धं वाहितञ्च नात्युष्णम् ।
यावद् यावन्मधुरं दोषहरं तावदुच्यमिदम् ॥"

इति राजनिर्घण्टः ॥ * ॥

"दधि यत् स्वादु तन्मेदःकफाभिष्यन्दकारकम् ।
दध्नस्तदतियत्नोक्तदूष्यं कफपित्तजित् ॥
विदाहि दृष्टविण्मूत्रं मन्दजातं त्रिदोषजित् ।
दधि त्वसारं रूक्षन्तु ग्राहि विष्टम्भि वातलम् ॥
पीनसे चातिसारे च शीतके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ॥"

इति राजवल्लभः ॥ * ॥

(ऋतुभेदे दधिविशेषगुणा यथा,—

"शारदं दधिगुर्व्वम्लं रक्तपित्तविवर्द्धनम् ।
श्लेष्मं दृष्ट्वा ज्वरं शूलं करोति विषमज्वरम् ॥

इति शारददधिगुणाः ॥ * ॥

गुरु स्निग्धञ्च मधुरं कफशुक्रबलवर्द्धनम् ।
दृष्यं मेध्यञ्च हैमन्तं पुष्टिदं तुष्टिदृद्दिदम् ॥

इति हैमन्तदधिगुणाः ॥ * ॥

शैशिरं सर्व्वमेवाह्नं मधुरं गुरु एव च ।
दृष्यं बलकरं पित्तश्रमापहरयं परम् ।

इति शैशिरदधिगुणाः ॥ * ॥

वासन्तं मधुरं स्निग्धं किञ्चिदम्लं कफात्मकम् ।
बलशुक्रौजस्यहा प्रोक्तं वसन्ते न प्रशस्यते ।

इति वासन्तदधिगुणाः ॥ * ॥

लघु चान्नं भवेद्ग्रीष्मे वात्युष्णं रक्तपित्तजित् ।
श्लेष्मश्रमपिपासाहृद्दधियुक्तं न ग्रीष्मके ॥

इति ग्रीष्मदधिगुणाः ॥ * ॥

वार्षिकं हितकृत् प्रोक्तं दधि शस्तं न दोषलम् ।
श्लेष्मवातश्रमान् हन्ति श्रमातीसारनाशनम् ॥"

इति वार्षिकदधिगुणाः ॥ * ॥

"हिक्काश्वासग्रहार्शांसमतिसारे भगन्दरे ।
शस्तं प्रोक्तं दधि क्षौद्रा लवणेन विमर्द्दितम् ॥

इति दधिभोजनविधिः ॥" * ॥

इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये ॥

"रोचनं दीपनं दृष्यं स्नेहनं बलवर्द्धनम् ।
पाकेऽम्लसुखं वातघ्नं मङ्गल्यं दृंहणं दधि ॥
पीनसे चातिसारे च शीतके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ॥"
"त्रिदोषं मन्दकं जातं वातघ्नं दधि शुक्रलम् ॥"

इति चरके सूत्रस्थाने २७ अध्याये ॥

"दधि तु मधुरमम्लमल्पक्षेति तत्कषायानुरसं स्निग्धसुष्णं पीनसविषमज्वरातिसारारोचक-मूत्रकृच्छ्रकार्श्यापहं दृष्यं प्राणकरं माङ्गल्यञ्च ॥
महाभिष्यन्दि मधुरं कफमेदोविवर्द्धनम् ।
कफपित्तहृदृद्यं स्वादम्लं रक्तदूषणम् ॥
विदाहि दृष्टविण्मूत्रं मन्दजातं त्रिदोषजित् ।
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम् ॥
वातापहं पवित्रञ्च दधि गव्यं रुचिप्रदम् ।
दध्याजं कफपित्तघ्नं लघुवातक्षयापहम् ॥
दुर्नामश्वासकासेषु हितमग्नेः प्रदीपनम् ।
विपाके मधुरं दृष्यं वातपित्तप्रसादनम् ॥
बलासवर्द्धनं स्निग्धं विशेषाद्दधि माहिषम् ।
विपाके कटु सक्षारं गुरु भेदोऽर्शिकं दधि ॥
वातमर्शांसि कुष्ठानि क्रिमीन् हन्युदराणि च ।
दीपनं कफवातानां दुर्नाम्नाश्वाधिकं दधि ॥
रसे पाके च मधुरमम्लाभिष्यन्दि दोषलम् ।
दीपनीयमचक्षुष्यं वाड्वं दधि वातलम् ॥
रूक्षसुष्णं कषायञ्च कफमाशापहञ्च तत् ।
स्निग्धं विपाके मधुरं बल्यं सन्तर्पणं गुरु ॥
चक्षुष्यमग्र्यं दोषघ्नं दधि नार्य्या गुणोत्तरम् ।
लघु पाके बलासघ्नं वीर्य्योष्णं पित्तनाशनम् ॥
कषायानुरसं नार्या दधि वर्च्चोविबन्धनम् ।
दधीन्युक्तानि यानीह गव्यादीनि पृथक् पृथक् ॥
विज्ञेयानि सर्व्वेषु गव्यमेव गुणोत्तरम् ।
वातघ्नं कफकृत् स्निग्धं दृंहणं न च पित्तकृत् ॥
कुर्य्याद्रुक्ताभिलाषञ्च दधि यत् सुपरिस्रुतम् ।
प्रतात् चीरात्तु यज्जातं गुणवद्दधि तत् स्मृतम् ॥
वातपित्तहरं रुच्यं धात्वग्निबलवर्द्धनम् ।
दध्नः सरो गुरुर्वृष्यो विष्टम्भीनिलनाशनः ॥
वह्निविबन्धनश्चापि कफशुक्रविवर्द्धनः ।
दधि त्वसारं रूक्षञ्च ग्राहि विष्टम्भि वातलम् ॥
दीपनीयं लघुतरं सकषायं रुचिप्रदम् ।
शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम् ॥
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते ।"

इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

धारणकर्त्तरि, त्रि । इति सुग्धबोधम् ॥

दधिकूर्चिका, स्त्री, (दधिजाता कूर्चिका ।) अर्द्धोदकोष्णदुग्धे दध्नःसंयोगात् जाता । इति केचित् । उष्णदुग्धे दध्नःसंयोगात् जाता इत्यर्थे ॥ छेना इति भाषा । अस्या गुणाः । वातनाशित्वम् । ग्राहित्वम् । रूक्षत्वम् । दुर्ज्जरत्वञ्च । इति राजवल्लभः ॥ (पर्य्यायोऽस्या यथा,—

"दध्ना सह पयः पक्वं यत् स्यात्तद्दधिकूर्चिका ॥"

इति वैद्यकरत्नमालायाम् ॥)

दधिचारः, पुं, (दधिं चालयति विलोड़यतीति । दधि + चल + घञ् + अण् । लस्य रत्वम् ।) दधिमन्थनदण्डः । तत्पर्य्यायः । वैणवः २ तक्राटः ३ करटवंशः ४ । इति हारावली ।२४॥

दधिज, क्ली, (दध्नो जायते इति । जन + "पचाद्यजातौ ।" ३ । २ । ६८ । इति डः ।) नवनीतम् । इति राजनिर्घण्टः ॥ (नवनीतशब्दे ऽस्य विशेषो ज्ञातव्यः ॥)

दधित्थः, पुं, (दधिवर्णो द्रवस्तिष्ठत्यस्मिन्निति । स्था + "सुपिस्थः ।" ३ । २ । ४ । इति कः । पृषोदरादित्वात् साधुः ।) कपित्थः । इत्यमरः । २ । ४ । २१ ॥ (यथा,—

"तद्दधित्थविल्वाम्लं जम्बुमध्वेः प्रपञ्चयेत् ॥"

इति वाभटे चिकित्सास्थाने नवमेऽध्याये ॥

"दधित्थविल्वचाङ्गेरी तक्रदाड़िमसाधिता ।
पाचनी ग्राहिणी पेया सवाते पाच्यनुल्बिका ॥"

इति चरके सूत्रस्थाने द्वितीयेऽध्याये ॥)

दधित्थाख्यः, पुं, (दधित्थं आख्याति कपित्थवृक्षं अनुकरोतीति । आ + ख्या + कः ।) अरलवृक्षः । इति रत्नमाला ॥ लोवान् इति भाषा ॥

दधिधेनुः, स्त्री, (दधिनिर्म्मिता धेनुः ।) दानार्थदध्यादिनिर्म्मिता धेनुः । यथा, वराहपुराणे ।

"दधिधेनोर्म्मे हाराज ! विधानं शृणु साम्प्रतम् ।
अनुलिप्ते महीभागे गोमयेन नराधिप ! ॥
गोचर्म्ममात्रे तु पुनः पुण्यप्रकरशोभिते ।
कुशैरास्तीर्य्य वसुधां क्षौमाजिनकुशोत्तराम् ॥
दधिकुम्भं सुसंस्थाप्य सदा धान्यचयोपरि ।
चतुर्थांशेन वत्सन्तु सौवर्णसुखमङ्कितम् ॥
आच्छाद्य वस्त्रयुगलेन पुष्पगन्धैस्तु पूजिताम् ।
ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते ॥
क्षमादिगुणयुक्ताय दद्यात्तां दधिधेनुकाम् ।
पुच्छदेशोपविष्टस्तु सुद्रिकाकर्णमाधकैः ॥
पादुकोपानहौ छत्रं दत्त्वा मन्त्रमनुस्मरेत् ।
दधिक्रावेति मन्त्रेण दधिधेनुं प्रदापयेत् ॥
एवं दधिमयीं धेनुं दत्त्वा राजर्षिसत्तम ! ॥
एकाहारो दिनं तिष्ठेद्दत्ता च वृषगन्धज ! ॥
यजमानो वसेद्राजन् चिरायच्च द्विजोत्तम ! ॥
दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ॥
यत्र क्षीरवहा नद्यो यत्र पायसकर्द्दमाः ।
सुनय ऋषयः सिद्धास्तत्र गच्छन्ति धेनुदाः ॥
य इदं श्रावयेद्वक्त्रा शृणुयाद्वापि मानवः ।
सोऽश्वमेधफलं प्राप्य विष्णुलोकं स गच्छति ॥"

दधिपुष्पिका स्त्री, (दधीव शुभ्रं पुष्पमस्याः । कप् । टापि अत इत्वम् ।) श्वेतापराजिता । इति राजनिर्घण्टः ॥

दधिपुष्पी, स्त्री, (दधीव पुष्पमस्याः । जातित्वात् ङीष् ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

दधिफलः, पुं, (दधीव शुभ्रो द्रवः फले यस्य ।) कपित्थवृक्षः । इत्यमरः । २ । ४ । २१ ॥

दधिमण्डः, पुं, (दध्नः मण्डः ।) मस्तु । इति रत्नमाला ॥ मात् इति भाषा ॥

दधिमण्डोदः, पुं, (दधिमण्ड इव उदकं यत्र । उदकस्य उदादेशः ।) दधिसमुद्रः । (यथा, भागवते ।५ । १ । ३३ ।

"क्षीरोदेक्षुरसोदसुरोदशतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः ॥")

दधिमुखः पुं, (दधिवत् शुभं मुखं यस्य ।) वानर-विशेषः । स सुग्रीवश्वशुरः तस्य मधुवनपाल-कश्च । इति रामायणम् ॥ (यथा, महाभारते । ३ । २८२ । ७ । [वान्" "श्रीमान् दधिमुखो नाम हरिरुद्वोऽति वीर्य्य-नागविशेषः । यथा, महाभारते । १ । ३५ । ८ । "सुरासुखो दधिमुखस्तथा विमलपिङ्गकः ॥" अयन्तु दर्व्वी करायां सर्पाणामन्यतमः । इति सुश्रुते कल्पस्थाने ४ अध्याये ॥)

दधिग्रीवः, पुं, वानरः । इति त्रिकाण्डशेषः ॥

दधिस(ग्र)क्तवः, पुं, दध्युपसिक्ताः सक्तवः । करम्भः । इत्यमरः । २ । ६ । ४८ ॥ दहिकातु इति भाषा ॥ नित्यबहुवचनान्तोऽयम् ॥ (यथा, महाभारते । १३ । १०४ । ६१ ।

"न प्राशौ लवणं विद्वान् प्राश्नीयान्न च रात्रिषु । दधिसक्तून् न भुञ्जीत तथामांसञ्च वर्जयेत् ॥")

दधिसारं, क्ली, (दध्नः सारम् ।) नवनीतम् । इति हेमचन्द्रः । ३ । ७२ ॥

दधिस्नेहः, पुं, (दध्नः स्नेहः ।) घोलम् । इति जटाधरः ॥

दधीचः, पुं, दधीचिसुनिः । इति शब्दभेदप्रकाशः ॥ (यथा, महाभारते । १ । १३८ । १२ ।

"दधीचस्यास्थितो वज्रं कृतं दानवसूदनम् ॥")

दधीचिः, पुं, मुनिविशेषः । स अथर्व्वमुनेरौरसात् कर्दमकन्यायां शान्तिनाम्न्यां जातः । वृत्र-वधार्थं देवैरस्थ्ना वज्रं निर्म्मितम् । इति श्रीभागवतम् ॥ यथा,—

"ऋतेऽस्थिभ्यो दधीचस्य हिंसां चिदशृङ्गिणः । तस्मात् यत्नादधिश्रेष्ठो याचितां सुरसत्तमाः ॥ दधीचेऽस्थीनि देहीति तैर्व्वधिश्चथ दानवान् । तत् श्रुत्वा सहसा देवैर्याचितो मुनिभिस्तथा ॥ ददौ चास्थीनि देवेभ्यो दधीचिः सुमनास्ततः । प्राणायामं ततः कृत्वा देहं त्यक्त्वा शुभाक्षरान् ॥ सर्व्वलोकान् त्रयान् प्राप्तो येभ्यो नावर्त्तनं पुनः । तस्यास्थिभिरथो वज्रः प्रहृतः सुमनास्तथा ॥ कारयामास दित्यानि तानि प्रहरणान्युत । वज्रासिशूलचक्रञ्च परिघा विविधा गदाः ॥ विश्वकर्म्मा सुरास्त्राणि परिघाद्यायुधानि च ॥"

इति वह्निपुराणे दानवस्थानिर्णयनामाध्यायः ॥

दधीचस्थि, क्ली, (दधीचेरस्थि ।) वज्रम् । हीरकम् । इति त्रिकाण्डशेषः ॥

दधृक् [ष्] त्रि, (धृष्णोतीति । धृष प्रागल्भ्ये + "ऋत्विग्दधृगिति ।" ३ । २ । ५९ । इति क्विन् ह्रित्वादिकञ्च निपात्यते ।) धृष्टः । इति त्रिकाण्ड-शेषः ॥ (धर्षकः । यथा, ऋग्वेदे । ५ । ६६ । ३ ।

"रातहव्यस्य सुष्टुतिं दधृक्षोमैमेनामहे ॥")

दध्नः, पुं, (दधते जीवेभ्यः पापपुण्यफलानि ददातीति । दध दाने + बाहुलकात् नः ।) यमः । इति शब्दरत्नावली ॥

दध्याकरः, पुं, (दध्नः आकर इव ।) दधिसमुद्रः । इति शब्दार्थकल्पतरुः ॥

दध्यानी, स्त्री, (दधिवत् शुभतां आनयतीति । आ + नी + क्विप् ।) सुदग्धना । इति रत्नमाला ॥ सुदर्शनगुलञ्च इति भाषा । दरखए इति केचित् । पुरातिं इति केचित् । मदनमस्त इति हिन्दी भाषा ॥

दध्युत्तरं, क्ली, (दध्नः उत्तरं श्रेष्ठजातम् ।) दधि-स्नेहः । इति शब्दचन्द्रिका ॥ (यथा, हरिवंशे । ७८ । ६२ ।

"पयसः सर्पिषश्चैव दध्नो दध्युत्तरस्य च । यथाकामं प्रदानाय भोज्यादिश्रयणाय च ॥")

दध्युत्तरगं, क्ली, (दध्न उत्तरं चरमावस्थां गच्छ-तीति । गम + डः ।) दधिस्नेहः । इति रत्न-माला ॥

दध्युदः, पुं, (दधिवदुदकं यस्य । उत्तरपदस्य च इत्युदकस्योदादेशः ।) दधिसमुद्रः । इति जटा-धरः ॥

दनुः, स्त्री, कश्यपपत्नी । सा दक्षकन्या दानवमाता च । इति त्रिकाण्डशेषः ॥ (यथा, मत्स्यपुराणे ६ अध्याये ।

"कश्यपस्य प्रवक्ष्यामि पत्नीभ्यः पुत्रपौत्रकान् । अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा तथा ॥ सुरभिर्विनता तद्वत् ताम्रा क्रोधवशा इरा । कद्रूर्विश्वा मुनिस्तद्वत्तासां पुत्रान्निबोधत ॥" "दनुः पुत्रशतं लेभे कश्यपाद् बलदर्पितम् । विप्रचित्तिः प्रधानोऽभूत् येषां मध्ये महाबलः ॥ द्विमूर्द्धा शङ्कुनिश्चैव तथा शङ्कुशिरोधरः । अयोमुखः शम्बरश्च कपिलो वामनस्तथा ॥ मरीचिर्मेघवांश्चैव इरा गर्भशिरास्तथा । विद्रावणश्च केतुश्च केतुवीर्य्यः शतह्रदः ॥ इन्द्रजित् सत्यजिच्चैव वज्रनाभस्तथैव च । एकचक्रो महाबाहुर्व्वाचश्चारकस्तथा ॥ अस्थिलोमा पुलोमा च विन्ध्यवाणो महासुरः । स्वर्भानुर्वृषपर्व्वा च एवमाद्या दनोः सुताः ॥" दानवविशेषे, पुं । यथा, गोः रामायणे कबन्ध-स्योक्तौ । ३ । ७५ । २४ ।

"श्रियो मां मथमं पुत्रं दनुं नाम्ना च दानवम् ॥")

दनुजः, पुं, (दनोर्जायते इति । जन + डः ।) असुरः । इत्यमरः । १ । १ । १२ ॥ (यथा, भागवते । ६ । ६ । ४० ।

"तवैव विभूतयो दितिदनुजादयश्चापि ॥")

दनुजद्विट्, [ष्] पुं, (दनुजानां असुराणां द्विट् शत्रुः । यद्वा, दनुजान् हेडोति । डिट् + क्विप् ।) देवः । इति शब्दरत्नावली ॥ (दानवघ्नौ, त्रि । यथा, प्रयोगरत्नमालायां शब्दप्रकरणस्थादौ ।

"नमो नन्दकुमार वराय दनुजद्विषे ॥")

दनुसुतः, पुं, (दनोः सुतः पुत्रः ।) असुरः । इति जटाधरः ॥

दन्तः, पुं, (दम + "हसिमृग्रिणीति ।" उणां । ३ । ८६ । इति तन् ।) अस्थिकटकः । कृष्णः । इति मेदिनी । ते, २३ ॥ शैलशृङ्गम् । इति त्रिकाण्डशेषः ॥ चर्व्वणसाधनास्थि । दाँत इति भाषा । गर्भस्थस्य षष्ठे मासि गुह्यदन्तपङ्क्ति-र्भवति । इति सुखबोधः ॥ तत्पर्य्यायः । रदनः २ दशनः ३ रदः ४ । इत्यमरः । २ । ६ । ९१ ॥ द्विजः ५ खरः ६ । इति शब्दरत्नावली ॥ * ॥ तत्प्रयोग-कारकौषधं यथा,—

हरिरुवाच ।

"हरितालं यवक्षारं पत्राङ्गं रक्तचन्दनम् । जातीं हिङ्गुलकं लाक्षां पक्वतेलेन पेषयेत् ॥ हरीतकीकषायेण दृष्ट्वा दन्तान् प्रलेपयेत् । दन्ताः सुलोहिताः पुंसः श्वेता रक्ष ! न संशयः ॥"

इति गारुडे १८३ अध्यायः ॥ * ॥

"शुक्लमामलकीपत्रं धातक्याः कुसुमानि च । पिष्ट्वा तत् पयसा सार्द्धं सप्ताहं धारयेन्मुखे ॥ स्निग्धाः श्वेताश्च दन्ताश्च भवन्ति विमलप्रभाः ॥"

इति तत्रैव १८५ अध्यायः ॥ * ॥

"मूलं गोक्षुरकस्यैव चर्व्वित्वा नीललोहित ! । दन्तकीटव्यथां नश्येदन्त्यासुरविमर्द्दन ! ॥"

इति च गारुडे १९३ अध्यायः ॥ * ॥

सदन्तजातस्य शुभाशुभफलं यथा,—

अथ जातभदादि । तत्र दन्तजन्मचिन्ता ।

"जातः सदन्तः पितृमाद्दहन्ता तातं विहन्यात् प्रथमे तु मासे । अम्बां द्वितीये सहजं तृतीये मासि चतुर्थे शुभकारकः स्यात् ॥ मिष्टान्नभोजी सुभगः सुताख्ये षष्ठे सुखी पण्डितकल्पबुद्धिः । ततोऽधिकः स्यात् बलवान् दृढाख्ये मासेऽष्टमे वित्तसुखैर्विहीनः ॥ सुरप्रतापी नवमे ऋतुश्च दशमे तथा । एकादशे द्वादशे च सुखी च सुभगो भवेत् ॥ अष्टौ पुत्तलिकान् कृत्वा सुगन्धैर्गन्धकैस्तथा । स्रोतःसु संक्रमे चापि स्थापयेत् शुक्लपुष्पकैः ॥ स्नानं संक्रमजस्याथ ग्रन्थोर्द्धं चमन्ततः । होमं विप्रार्चनञ्चैवमशुभे दन्तदर्शने ॥"

इति ज्योतिस्तत्त्वम् ॥

रतिक्रीड़ायां तस्याघातस्थानानि यथा,—

"स्तनयोर्गण्डयोश्चैव ओष्ठे चैव तथाधरे । दन्ताघातः प्रकर्त्तव्यः कामिनीनां सुखावहः ॥"

इति कामशास्त्रम् ॥ * ॥

अथ दन्तरोगाणां निदानादि यथा,—

"श्लेष्मितं दन्तवेष्टेभ्यो यस्याक्षसात् प्रवर्त्तते । दुर्गन्धीनि सशब्दानि प्रक्लेदीनि चलानि च । दन्तमांसानि शीर्य्यन्ते पच्यन्ति च परस्परम् । शीतादो नाम स व्याधिः कफशोणितसम्भवः ॥१॥ दन्तयोस्त्रिषु वा यस्य स्वयथुर्जायते महान् । दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥ २ ॥ स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च । दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥ ३ ॥ स्वयथुर्दन्तमूलेषु रुजावान् कफरक्तजः । लालास्रावी स विज्ञेयः शौषिरो नाम नामतः ॥ कण्डूमान् शौषिरो गदः । इति च पाठः ॥ ४ ॥

दन्ताश्चलन्ति वेदेभ्यस्तासु चाप्यवदीर्य्यते ।
दन्तमांसानि पच्यन्ते सुखञ्च परिहृष्यते ॥
यस्मिन् स सर्व्वजो व्याधिर्महाग्नेयगिरसंज्ञितः ॥५॥
दन्तमांसानि ग्रीर्य्यन्ते यस्मिन् क्षीवति चाप्यसृक् ।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥६॥
वेदेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति च ।
अभ्याहताः प्रस्रवन्ति ग्रीवितं दन्तवेदना ॥
आध्मायन्ते सुते रक्ते सुखं पूति च जायते ।
यस्मिन् सोपक्रुशो नाम पित्तरक्तकृतो गदः ॥७॥
दुष्टेषु दन्तमांसेषु संरम्भो जायते महान् ।
भवन्ति दन्ताश्च चलाः स वेदर्भोऽभिघातजः ॥८॥
मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।
खलिवर्द्धनसंज्ञोऽसौ जाते रुक् च प्रशाम्यति ॥९॥
घुने: घुने: प्रकुरुते वायुर्दन्तसमाश्रितः ।
करालान् विकृतान् दन्तान् करालो न स सिध्यति ॥ १० ॥
ह्रासये पञ्चमे दन्ते महान् ग्रीवो महारुजः ।
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः ॥ ११ ॥
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ।
दीर्य्यमाणेव रुजा यस्य दन्तेषु जायते ॥
दालनो नाम स व्याधिः सदागतिनिमित्तजः ॥१२॥
क्षय्याच्छिद्रबलः स्रावी ससंरम्भो महारुजः ।
अनिमित्तरुजो घातात् स ज्ञेयः क्रिमिदन्तकः ॥१३॥
वक्रं वक्रं भवेद्दृश्यं दन्तभङ्गश्च जायते ।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥ १४ ॥
ग्रीतरूक्षप्रवातास्रसङ्घातसङ्घा हिलाः ।
विक्षमारुतकोपेन दन्तहर्षः स नामतः ॥ १५ ॥
(दन्तमांसेर्मलस्रावैर्वाह्यान्तः क्षयपुर्गुरुः ।
सदाहरुक्स्रवेद्विड्रः पूयासृं दन्तविद्रधिः ॥)
मलो दन्तमतो यस्तु कफमारुतग्रोषितः ।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥ १६ ॥
कपालेष्विव दीर्य्यन्तु दन्तानां सैव शर्करा ।
कपालिकेति पठिता सदा दन्तविनाशिनी ॥१७॥
योऽस्थिक्षयेण पित्तेन दग्धो दन्तस्त्रयेण वा ।
ग्रावतां नीयतां वापि गतः स ग्रावदन्तकः ॥"१८
इति माधवकरः ॥

दन्तकः, पुं, (दन्त एव । स्वार्थे कन् ।) पर्व्वतशृङ्गम् । नागदन्तः । इति हेमचन्द्रः । ४ । १०० ॥ (दन्तः । इति युत्पत्तिलब्धोऽर्थः ॥ त्रि, दन्तेषु प्रसितः । दन्त + "स्वाङ्गेभ्यः प्रसिते । ५ । २ । ६६ । इति कन् ॥)

दन्तकर्षणः, पुं, (दन्तान् कर्षतीव यः । कृष् + ल्युः ।) जम्बीरः । इति शब्दरत्नावली ॥

दन्तकाष्ठं, क्ली, (दन्तधावनार्थं यत् काष्ठम् ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥ दन्तधावनार्थकाष्ठम् । तदृयथा नरसिंहपुराणे ।
"दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्यताम् ।
सर्व्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥"
महाभारते ।
"तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम् ।
क्षीरिणो वृक्षगुल्माद्या भक्षयेद्दन्तधावनम् ॥"
निषिद्धकाष्ठानि यथा,—
"गुवाकतालहिन्तालास्तथा ताड़ी च केतकी ।
खर्ज्जूरनारिकेलौ च सप्तैते तृणराजकाः ॥
तृणराजशिरापत्रैर्यः कुर्य्याद्दन्तधावनम् ।
तावद्भवति चाण्डालो यावद्गङ्गां न पश्यति ॥"
तस्य स्थौल्यं परिमाणञ्चाह विष्णुः ।
"कनिष्ठ्यसमं स्थौल्यं सकूर्चं द्वादशाङ्गुलम् ।
प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावकम् ॥"
मरीचिः ।
"द्वादशाङ्गुलन्तु विप्राणां क्षत्रियाणां नवाङ्गुलम् ।
अष्टाङ्गुलञ्च वैश्यानां शूद्राणान्तु षडङ्गुलम् ॥
चतुरङ्गुलमानेन नारीणां विधिरुच्यते ।
अन्तरप्रभवाणाञ्च षड़ङ्गुलमुदाहृतम् ॥"
इत्याह्निकतत्त्वम् ॥

दन्तकाष्ठकं, क्ली, (दृश्यं काष्ठं काष्ठकम् । दन्तधावनयोग्यं काष्ठकम् ।) आहुल्यवृक्षः । इति राजनिर्घण्टः ॥

दन्तच्छदः, पुं, (दन्तान्छादयत्यनेनेति । छद संवरणे + णिच् + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९ । इति ह्रस्वः ।) ओष्ठः । इति हलायुधः ॥ (यथा, ऋतुसंहारे हेमन्तवर्णनायाम् । १२ ।
"दन्तच्छदैर्दन्तविधातचिह्नैः
स्तनेषु पाण्ड्यक्षतताभिवेशैः ।
संलक्ष्यते निर्दयमङ्गनानां
रतोपभोगो नवयौवनानाम् ॥")

दन्तच्छदोपमा, स्त्री, (दन्तच्छदस्य ओष्ठस्य उपमा सादृश्यं यत्र । यद्वा, उपमीयतेऽनयेति उपमा । दन्तच्छदस्य उपमा सादृश्यस्थानम् ।) विम्बी । इति राजनिर्घण्टः ॥

दन्तधावनं, क्ली, (दन्तानां धावनम् ।) दन्तमार्ज्जनम् । (दन्तानां धावनं यस्मात् ।) दन्तकाष्ठम् । यथा, गारुड़े २१४ अध्याये ।
"उषःकाले तु सम्प्राप्ते शौचं कृत्वा यथार्थवत् ।
ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्व्वकम् ॥
सुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः ।
तस्मात् सर्व्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥
कदम्बविल्वखदिरकरवीरवटार्ज्जुनाः ।
तगरं दहती जातिकरञ्जार्कातिसुक्तकाः ॥
जम्बूमधूकापामार्गशिरीषोडुम्बरार्जुनाः ।
क्षीरिकण्टकिवृक्षाद्याः प्रशस्ता दन्तधावने ॥
कटुतिक्तकषायाश्च बलारोग्यसुखप्रदाः ।
प्रक्षाल्य शुक्ला च शुचौ देशे व्यक्ता तदाचमेत् ॥
अमावास्यां तथा षष्ठ्यां नवम्यां प्रतिपद्यपि ।
वर्ज्जयेद्दन्तकाष्ठन्तु तथैवाकस्य वासरे ॥
अभावे दन्तकाष्ठस्य निषिद्धायां तथा तिथौ ।
अपां द्वादशगण्डूषैः कुर्य्यात् सुखशोधनम् ॥"
दन्तशुद्धिः । तस्य विधिर्यथा,—
"प्रातर्भुक्त्वा च सुहृद्यं कषायकटुतिक्तकम् ।
भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन् ॥"*॥
तस्य काष्ठानि यथा,—
"कोविदस्य करवीरास्य करञ्जवकुलाम्रजान् ।
दन्तकाष्ठार्थमन्ये तु सर्व्वान् कण्टकिनोऽभ्यधुः ॥
खदिरञ्च कदम्बञ्च करञ्जञ्च वटस्तथा ।
तिन्तिड़ी वेणुपृष्ठञ्च आम्रनिम्बौ तथैव च ॥
अपामार्गञ्च विल्वञ्च अर्कश्चोडुम्बरस्तथा ।
एते प्रशस्ताः कथिता दन्तधावनकर्म्मणि ॥"*॥
तस्य निषिद्धकाष्ठानि यथा,—
"गुवाकतालहिन्तालखर्ज्जूरैः केतकीयुतैः ।
नारिकेलेन ताभ्यां च न कुर्य्याद्दन्तधावनम् ॥"*॥
तस्य दिङ्मेदेन शुभाशुभफलं यथा,—
"प्रत्यूषः स्याद्दक्षिणास्येन पश्चिमास्येन चामयः ।
पूर्व्वास्येनोत्तरास्येन सम्पदो दन्तधावनात् ॥"*॥
तस्य तिथिविशेषे निषेधो यथा,—
"प्रतिपद्दर्शषष्ठीषु नवम्येकादशीषु च ।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥"*॥
दन्तधर्षणानन्तरं चक्षुःसेचनं यथा,—
"दन्तानूर्द्धमधो दृष्ट्वा प्रातः सिञ्चेच्च लोचने ।
तोयपूर्णसुखस्थेन दृष्टिरासु प्रसीदति ॥"*॥
रोगविशेषे दन्तकाष्ठवर्ज्जनं यथा,—
"अर्हिती कर्कशमूली च दन्तरोगी नवज्वरी ।
ग्रीवी कासी च मूर्च्छार्त्तो दन्तकाष्ठं विवर्जयेत् ॥"*॥
तस्य गुणा यथा,—
"निहन्ति वक्त्रवैरस्यं जिह्वादन्ताश्रितं मलम् ।
आरोग्यं रुचिमाधत्ते सद्यो दन्तविशोधनम् ॥"
इति राजवल्लभः ॥ * ॥
"क्षतशौचस्ततः प्राज्ञः कुर्य्याद्दन्तस्य धावनम् ।
जिह्वायाश्चार्जनञ्चापि रसज्ञच्छदवादिभिः ॥
दधिज्ञाभिमुखो भूत्वा पश्चिमाभिमुखस्तथा ।
न दन्तधावनं कुर्य्यात् कुर्य्याच्चेन्नारकी भवेत् ॥
मध्यमानामिकाभ्याञ्च दृङ्गाङ्गुष्ठेन च द्विजः ।
दन्तस्य धावनं कुर्य्यात् तर्जन्या न कदाचन ॥
अश्वत्थवटविल्वानां धाराभिः काष्ठकेन वुधः ।
न दन्तधावनं कुर्य्यात्तथैवासुरसस्य च ॥
विल्वक्रियापत्रं प्रेक्षुरसेन दन्तधावनम् ।
प्रभाते कुरुते प्राज्ञः सूर्य्योदयविवर्ज्जिते ॥
सूर्य्योदये द्विजश्रेष्ठ ! यः कुर्य्याद्दन्तधावनम् ।
निष्क्रियापत्रं तस्य सर्व्वमेव विनश्यति ॥
यः स्नानसमये कुर्य्यात् जैमिने ! दन्तधावनम् ।
निराशाः पितरो यान्ति तस्य देवाः सुरर्षयः ॥
दन्तस्य धावनं कुर्य्यादृयो मध्याह्नापराह्णयोः ।
तस्य पुण्यं न गृह्णन्ति देवताः पितरो जलम् ॥
स्नानकाले पुष्करिण्यां यः कुर्य्याद्दन्तधावनम् ।
तावज्ज्ञेयः स चण्डालो यावद्गङ्गां न पश्यति ॥
भगवत्युदिते सूर्य्ये यः कुर्य्याद्दन्तधावनम् ।
तद्दन्तकाष्ठीं पितरो भुक्त्वा गच्छन्ति दुःखिनः ॥
उपवासदिने विप्र ! पिण्डश्राद्धदिने तथा ।
न च तत्फलमाप्नोति दन्तधावनजन्मरः ॥
प्रभाते मार्जयेद्दन्तान् वाससा रसनां तथा ।
कुर्य्याद्दादश विप्रेन्द्र ! कवलानि जलैर्मुखः ॥
उपवासे पिण्डश्राद्धे विधिनानेन जैमिने ! ।
दन्तधावनजन्यानां संपूर्णं लभते फलम् ॥"
इति पाद्मे क्रियायोगसारः ॥

दन्तधावनः, पुं. (धावयत्यनेनेति। धावि+ल्युट्। दन्तानां धावनः।) खदिरवृक्षः। गुच्छकरञ्जः। इति राजनिर्घण्टः॥ वकुलः। इति शब्दचन्द्रिका॥

दन्तपत्रं, क्ली, (दन्ता इव पत्राणि यस्य।) कुरुबकम्। इति शब्दरत्नावली॥ (यथा कुमारे। ७। २३।

"कर्णावसक्तामलदन्तपत्रं
माता तदीयं मुखमुन्नमय्य॥")

दन्तपत्रकं, क्ली, (दन्त इव शुभ्रं पत्रं दलं यस्य। कप्।) कुन्दपुष्पम्। इति शब्दचन्द्रिका॥

दन्तपुष्पं, क्ली, (दन्त इव शुभ्रं पुष्पमस्य।) कतकफलम्। इति शब्दचन्द्रिका॥

दन्तफलं, क्ली, (दन्त इव शुक्लं फलमस्य।) कतकम्। इति शब्दचन्द्रिका॥

दन्तफलः, पुं, (दन्त इव शुक्लं फलमस्य।) कपित्थः। इति राजनिर्घण्टः॥

दन्तफला, स्त्री, (दन्तवत् शुभ्रं फलं यस्याः। टाप्।) पिप्पली। इति राजनिर्घण्टः॥

दन्तभागः, पुं, (दन्तसहितो भागः। प्राकपार्थिवादिवत् समासः।) गजाग्रभागः। गजस्य मुखतः स्कन्धपर्य्यन्तो योऽग्रभागः स दन्तसहितः। इत्यमरभरतौ॥

दन्तमलं, क्ली, (दन्तलग्नं दन्तस्य वा मलम्।) दन्तलग्नक्लेदः। तत्पर्य्यायः। पुप्पिका २। इति हारावली। १६५॥

दन्तमूलिका, स्त्री, (दन्त इव शुक्लं मूलमस्याः। कप्+टापि अत इत्वञ्च।) दन्तीवृक्षः। इति शब्दरत्नावली॥

दन्तरोगः, पुं, (दन्तस्य रोगः।) रदनामयः। तन्निदानादि दन्तशब्दे द्रष्टव्यम्। तस्यौषधं यथा,

"काकजङ्घाग्निमूले सुखेन विधृते शिव!।
चर्वित्वा दन्तरोगाणां विनाशो हि भवेद्ध्रुवं॥"

दन्तरोगाणामित्यत्र दन्तकीटानामिति पुस्तकान्तरे पाठः॥ इति गारुड़े १८६ अध्यायः॥ अपि च गारुड़े १६८ अध्याये।

"शुष्कमूलकमुष्ठीनां चारो हिङ्गुजागरम्।
घृतपुष्पी वचा कुष्ठं दारु गृध्रि रसाञ्जनम्॥
सौवर्चलं यवक्षारं सामुद्रं लैन्धवं तथा।
भृङ्गयन्थि विड़ं सुक्ष्मं मधु शुक्रं चतुर्गुणम्॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम्।
वाधिर्य्यं कर्णनादञ्च पूयस्रावञ्च दारुणः।
पूरणादस्य तैलस्य क्रमयः कर्णयोः खिलाः॥
क्षिप्रं विनाशमायान्ति गृध्राङ्गीतक्षेश्वर!।
चारतैलमिदं श्रेष्ठं सुखदन्तामयापहम्॥"

अन्यच्च।

"तैलं क्षाराक्षारसं क्षीरं पृथक् प्रस्थमितं पचेत्।
द्रव्यैः पलमितैरेतैः क्वाथेष्वापि चतुर्गुणैः॥
लोध्रकट्फलमांसरोहिषपद्मकैः।
चन्दनोत्पलयष्ट्याह्वैस्तत्तैलं वदने धृतम्॥
दालनं दन्तचालञ्च दन्तमोक्षं कपालिकाम्।
शीतादं पूतिवक्त्रञ्च विरुचिं विरसास्यताम्॥
हन्यादाशु गदानेतान् कुर्य्याद्दन्तानपि स्थिरान्।
लाक्षादिकमिदं तैलं दन्तरोगेषु पूजितम्॥
इति लाक्षादं तैलम्।

जयेद्विसर्पवर्त्मः खिन्नमवलं क्रमिदन्तकम्।
तथा च पीतैर्व्रातघ्नैः स्नेहगण्डूषधारणैः॥
भद्रदार्व्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः।
क्रमिदन्तापहं कोष्णं हिङ्गुदन्तान्तरे स्थितम्॥
दृष्टतीभूमिकदम्बीपक्वाङ्कुलकण्टकारिकाक्वाथः।
गण्डूषस्तैलयुतः क्रमिदन्तकवेदनाशमकः॥
नीली वायसवल्ली कटुतुम्बीमूलमेकैकम्।
संचूर्ण्य दशनविधृतं दशनक्रमिपातनं प्राहुः॥
स्नेहानां कवलाः कोष्णाः सर्पिषश्चैतस्य च।
निर्यूहाच्चानिलाघ्नानां दन्तहर्षप्रमर्दनाः॥

चैतस्य सर्पिषः चित्रता पक्षस्य सर्पिषः कवल इत्यर्थः।

स्नेहिकोऽत्र हितो धूमो नस्यं स्नेहिकमेव च।
पेया रसयवाग्वश्च क्षीरसन्तानिकाद्यतम्॥
शिरोवस्तिश्चितश्चापि क्रमो यश्चानिलापहः।
अत्र दन्तहर्षे।
अच्छिद्रदन्तमूलानि शर्करासुहरेद्भिषक्।
लाक्षाक्षौद्रसैन्धवयुतैस्तत्तत्क्षान् प्रतिसारयेत्॥
दन्तहर्षक्रियां चात्र कुर्य्यान्निरवशेषतः।
कपालिका क्षतक्षततमा तत्राप्येषा क्रिया हिता॥
अत्र दन्तशर्करायाम्। एषा क्रिया दन्तहर्षक्रिया।
फलान्यम्लानि शीतानि रूक्षान्नं दन्तधावनम्।
तथातिकठिनं भक्ष्यं दन्तरोगी विवर्ज्जयेत्॥"
इति भावप्रकाशः॥

दन्तवल्कं, क्ली, (दन्तानां वल्कमिवाच्छादकत्वात्।) ओष्ठः। इति हेमचन्द्रः। ३। २४५॥

दन्तवासाः, [स्] पुं, (दन्तस्य वासो वल्कमिवावरकत्वात्।) ओष्ठः। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। ५। ३४।

"अपि त्वदावञ्जितवारिसम्भृतं
प्रवालमासामनुबन्धि वीरुधाम्।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा॥")

दन्तवीजकः, पुं, (दन्ता इव वीजानि यस्य। ततः स्वार्थे कन्।) दाड़िमः। इति राजनिर्घण्टः॥

दन्तशटः, पुं, (दन्तेषु शट इव म्लानिजनकत्वात्।) दन्तशठः। इत्यमरटीकायां मथुरानाथः॥

दन्तशठः, पुं, (दन्तेषु शठ इव म्लानिकारकत्वात्।) जम्बीरः। कपित्थः। कर्म्मरङ्गकः। नागरङ्गकः। इति मेदिनी। ठे, १६॥ (यथा, सुश्रुते। १। ४६।

"रेरावतं दन्तशठमग्रं श्लोत्तिपित्तकृत्॥")

अम्बः। इति हेमचन्द्रः। ६। २४॥

दन्तशठा, स्त्री, (दन्तेषु शठा।) चाङ्गेरी। इति मेदिनी। ठे, १६॥ (यथा, भावप्रकाशे।

"चाङ्गेरी चुक्रिका दन्तशठाम्लशाकलोणिका॥")

क्षुद्राम्बिका। इति राजनिर्घण्टः॥

दन्तशर्करा, स्त्री, (दन्तस्य शर्करेव।) दन्तरोगविशेषः। कफवायुश्लोषितदन्तगतमलम्। पाथुरि इति भाषा॥ (तस्य लक्षणं यथाह माधवकरः।

"मलो दन्तगतो यस्तु कफमारुतशोषितः।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा॥"

यथा च सुश्रुते निदानस्थाने १६ अध्याये।

"शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै।
सा दन्तानां गुणघ्नी तु विज्ञेया दन्तशर्करा॥")

तस्यौषधम् यथा,—

"गोरक्षकर्कटीमूलं पिष्टं वास्योदकेन च।
पीतं दिनत्रयेणैव नाशयेत् दन्तशर्कराम्॥"
इति गारुड़े १६० अध्यायः॥

दन्तशाणः, पुं, (दन्तानां शाण इव। चिक्कणताजनकत्वात्।) निचुलवृक्षः। इति त्रिकाण्डशेषः॥ मिचि इति भाषा॥

दन्तशिरा, स्त्री, (दन्तानां शिरा यत्र।) माड़ी। इति शब्दरत्नावली॥

दन्तशूलः, पुं, (दन्तस्य शूल इव। शूलवेदनवद्वेदनादायकत्वात्।) दशनवेदना। तस्यौषधम्॥ यथा,—

"चिफलानिम्बयष्ट्याह्वं कटुकारग्वधैः शृतम्।
पाययेन्मधुना मिश्रं दन्तशूलोपशान्तये॥"
इति गारुड़े १७४ अध्यायः॥

दन्तहर्षः, पुं, (दन्तानां हर्षो यस्मात्।) दन्तरोगविशेषः। इति माधवकरः॥ (अस्य लक्षणं यथा, सुश्रुते निदानस्थाने १६ अध्याये।

"दशनाः शीतसुप्ताश्च सहन्ते सर्शनं न च।
यस्य तं दन्तहर्षन्तु व्याधिं विद्यात् समीरणात्॥"

दन्तखानिः। यथा,—

"यस्य वै स्नातमात्रस्य हृदयं वीक्षते भृशम्।
जायते दन्तहर्षश्च तं गतायुषमादिशेत्॥"
इति वायुपुराणम्॥)

दन्तहर्षकः, पुं, (दन्तान् हर्षयतीति। हृष+णिच्+ण्वुल्।) जम्बीरः। इति शटाधरः॥

दन्तहर्षणः, पुं, (दन्तान् हर्षयतीति। हृष+णिच्+ल्युः।) जम्बीरः। इति त्रिकाण्डशेषः॥

दन्ताघातः, पुं, (दन्तानाहन्तीति। आ+हन+अण्।) निम्बूकः। इति राजनिर्घण्टः॥ दशनाघातः। (यथा, गीतगोविन्दे।

"दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरम्॥")

रतिक्रीड़ायां तस्य स्थानानि दन्तशब्दे द्रष्टव्यानि॥

दन्तार्ब्बुदं, क्ली, पुं, (दन्तस्य अर्ब्बुदमिव।) दन्तरोगभेदः। तत्पर्य्यायः। दन्तमूलम् २ दन्तशोफः ३ द्विजव्रणः ४। इति राजनिर्घण्टः॥

दन्तायुधः, पुं, (दन्त एव आयुधं यस्य।) शूकरः। इति त्रिकाण्डशेषः॥

दन्तालिका, स्त्री, (दन्तान् अलति पर्य्याप्नोतीति। अल+ण्वुल्। टापि अत इत्वम्।) वल्गा। इति त्रिकाण्डशेषः॥

दन्तावलः, पुं, (अतिशयितौ दन्तौ अस्य। दन्त+"दन्तशिखात् संज्ञायाम्।" ५।२।११३।

इति वलच्। "वले।" ६।३।११८। इति दीर्घः।) हस्ती। इत्यमरः। २।८।३४॥ (यथा, मनुटीकायां कुल्लूकभट्टः। ७।१०६। "सिंहः प्रबलमतिस्थूलमपि दन्तावलं हनुमाक्रमति॥")

दन्तिका, स्त्री, दन्तिका। इति शब्दरत्नावली॥

दन्तिनी, स्त्री, (दन्तस्तदाकारो मूलेऽस्त्यस्याः। दन्त+इनिः+ङीप्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥

दन्तिमदः, पुं, (दन्तिनो मदः।) हस्तिमदः। इति राजनिर्घण्टः॥

दन्ती, स्त्री, (दान्त्यत्वनयेति। दम+"हसिमृग्रिण्वेति।"उणा।३।८६। इति तन्। ततो गौरादित्वात् ङीष्।) स्वनामख्यातवृक्षः। तत्पर्य्यायः। ग्रीवा २ श्येनघण्टा ३ निकुम्भी ४ नागस्फोता ५ दन्तिनी ६ उपचित्रा ७ भद्रा ८ रूक्षा ९ रेचनी १० अनुकूला ११ निःशल्या १२ चक्रदन्ती १३ विशल्या १४ मधुपुष्पा १५ एरण्डफला १६ तरुणी १७ एरण्डपत्रिका १८ अशुरेवती १९ विशोधनी २० कुम्भी २१ उडुम्बरदला २२। इति राजनिर्घण्टः॥ निकुम्भः २३। दन्तिका २४ प्रत्यक्पर्णी २५ उदुम्बरपर्णी २६। इत्यमरः। २।८।३४॥ अस्या गुणाः। कटुत्वम्। उष्णत्वम्। शूलामवातदोषार्शोव्रणाश्मरीशल्यशोथनत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ अस्थीलिकाभागगुल्मोदरनाशित्वम्। सारकत्वञ्च। इति राजवल्लभः॥ अथ लघुदन्ती।

"लघ्वी दन्ती विशल्या च स्याद्दुड़म्बरपर्ण्यपि। अधैरण्डफला ग्रीवा श्येनघण्टा घुणप्रिया॥ वाराहाङ्घ्री च कथिता निकुम्भश्च मकूलकः॥"

अथ वृहद्दन्ती।

"एरण्डपत्रविटपा द्रवन्ती सम्वरी वृषा। चित्रोपचित्रा न्यग्रोधी प्रत्यक्पर्णाखुकर्ण्यपि॥*॥ दन्तीद्वयं सरं पाके रसे च कटु दीपनम्। गुदाङ्कुराश्मशूलासकफकुष्ठविदाहनुत्॥ तीक्ष्णोष्णं हन्ति पित्तासकफशोथोदरक्रिमीन्॥ लघुदन्तीफलगुणाः।

क्षुद्रदन्तीफलं तु स्याच्चमरं रसपाकयोः। शीतलं रक्तविण्मूत्रगरशोथकफापहम्॥"

इति भावप्रकाशः॥

दन्ती, [न्] पुं; (प्रशस्तौ दन्तौ यस्येति। दन्त+इनिः।) हस्ती। इत्यमरः।२।८।३४॥ (यथा, देवीभागवते। २। ६। ४५। "मल्लिपुत्रः स्थितस्तत्र स्थापयामास दन्तिनः॥" स्त्रियां ङीप्। यथा, आर्य्यासप्तशत्याम्। ६५२। "स्नेहस्रुतिर्जिगीषा समरः प्राणक्षयावधिः करिणाम्। न वितनुते कमनर्थं दन्तिनि! तव यौवनोद्भेदः॥")

दन्तीबीजं, क्ली, (दन्त्या इव बीजमस्य।) जयपालः। इति राजनिर्घण्टः॥

दन्तुरः, त्रि, (उन्नता दन्ताः सन्त्यस्येति। "दन्त उन्नत उरच्।" ५।२।१०६। इति उरच्।) उन्नतदन्तः। दाँतो इति भाषा।

"कदाचिद्दन्तुरो मर्त्यः कदाचिल्लोमशः सुखी। कदाचित् तुन्दिलो दुःखी कदाचिच्चपला सती॥"

इति सामुद्रकम्॥

उन्नतानतः। इति मेदिनी। रे, १६६॥

दन्तुरच्छदः, पुं, (दन्तुर उन्नतानतश्छदो यस्य।) बीजपूरः। इति राजनिर्घण्टः॥

दन्तोलूखलिकः, त्रि, (दन्त एव उलूखलः। सोऽस्यास्येति। "अत इनिठनौ।"५।२।११५। इति ठन्।) वानप्रस्थविशेषः। दन्तमात्रेण क्षित्वा यो भक्षति सः। इति श्रीभागवतम्॥ (यथा, मनुः। ६। १७।

"अश्मकुट्टो भवेद्वापि दन्तोलूखलिकोऽपि वा॥")

दन्त्यः, त्रि, (दन्तेषु भवः। दन्त+"शरीरावयवाच्च।" ४। ३। ५५। इति यत्।) दन्तोद्भवः। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७। "स्फुर्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः॥" दन्तेभ्योहितः। "शरीरावयवाद्यत्।" ५।१।६। इति यत्। दन्तहितजनकः। यथा, सुश्रुते। १। ४६।

"दन्त्योऽग्निमेधाजननोऽग्र्यमूत्र-स्नायोऽथ केश्योऽनिलहा गुरुश्च॥")

दन्दशूकः, पुं, (गर्हितं दशतीति। दन्दश+यङ्+"यजजपदशां यङः।" ३।२।१६६। इति ऊकः।) सर्पः। (यथा, वैद्यकरत्नमालायाम्। "चक्षुःश्रवा दन्दशूको गूढपात् पन्नगोरगाः॥") राक्षसः। इति मेदिनी। के, १६३॥ (हिंसे, त्रि। यथा, भट्टिः। १। २६।

"रघुमति रघुनिंदे दन्दशूकान् निधांसौ धनुरतिरभिरस्त्रं सृष्टिपीड़ं दधाने॥")

दन्दभ, उ न दम्भे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्। उदित्त्वात् क्त्वावेट्।) दम्भः परवञ्चनहेतुव्यापारः। उ, दम्भित्वा दम्भ्वा। न, दम्भोति खलश्छलयति इत्यर्थः। इति दुर्गादासः॥

दन्दभ, क ड संघाते। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) क ड, दम्भयते। सङ्घातो राशीकरणम्। इति दुर्गादासः॥

दन्दश्, औ दंशने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) औ, अदाङ्क्षीत्। दशति विम्बफलं शुकशावकः। दंशनमित्यनुस्वारहीनं पठित्वा तन्निर्देशात् अनटि नकारलोप इत्याहुः। अतएव दशनो दन्तः। नाहिर्दंश्यते कश्चिद्विद्यया गरुड़ाख्यया। इति हलायुधः। भट्टमल्लमते दंशनमिह सन्नाहः। तेन अदंश्यपन्नवहितग्रौर्य्यदंशनास्तनूरयं नय इति वृष्णिभूभृतः। इति माघः। तनूः कवचवृतास्यकुरिल्वर्थः। अत्र परस्मैपदं चिन्त्यमिति वल्लभः। वस्तुतस्तु दंशं करोतीति णौ साध्यम्। इति दुर्गादासः॥

दभ, इ क गोदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इ क, दम्भयति। गोदः प्रेरणम्। इति दुर्गादासः॥

दभ, क गोदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, दाभयति। इति दुर्गादासः॥

दम्भ, त्रि, (दभ्नोतीति। दनुभ दम्भे+"स्फायितञ्चीति।"उणा। २।१३। इति रक्।) अल्पम्। इत्यमरः। ३।१। ६१॥ (यथा, निघण्टौ। ३।२। "ऋहन्। इक्षः। निष्टप्वः। मायुकः। प्रतिष्ठा। क्षधु। वन्धकः। दभ्रम्। अभकः। क्षुल्लकः। अल्प इत्येकादशक्षुद्रनामानि॥"यथा, ऋग्वेदे। १।८१।२।

"असि दभ्रस्य चिद्वृधः॥")

समुद्रे, पुं। इत्युणादिकोषः॥

दम, भ य उ इर् शमे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सकच-सेट्। उदित्वात् क्त्वावेट्।) भ य, दाम्यति। उ, दमित्वा दान्त्वा। इर्, अदमत् अदमीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। शमः शान्तीभावः। दाम्यति मुनिः। शम इतिपदस्य व्याप्तस्यापि सम्भवे शान्तीकरणेऽप्ययमिति धातुप्रदीपः। दमित्वाप्यरिसङ्घातान्। इति दुर्गादासः॥

दमः, पुं, (दमनमिति। दम+भावे घञ्।"नोदात्तोपदेशस्येति।"७।३।३४। इति वृद्धाभावः।) दण्डः। इत्यमरः। २।८।२१॥ दण्डस्य लक्षणं यथा,—

"दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः। यत्र श्यामो लोहिताक्षो दण्डश्चरति निर्भयः। प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति॥"

इति मत्स्यपुराणम्॥

(यथा, मनुः। ८।१६२।

"निग्रहेष्वापहर्त्तारं तत्समं दापयेद्दमम्॥") तपःक्लेशसहिष्णुता। तत्पर्य्यायः। दान्तिः २ दमथः ३। इत्यमरः। ३।२।३॥ दमनम्। तत्तु बाह्येन्द्रियनिग्रहः। इति वेदान्तसारः॥ विषयाद्ग्राह्यतस्य मनसो यथेष्टविनियोगयोग्यता। इति केचित्॥ दमस्य लक्षणं यथा,—

"कृतसिद्धात् कर्म्मणो विप्र! यच्च चित्तनिवारणम्। स कीर्त्तितो दमः प्राज्ञैः समस्ततत्त्वदर्शिभिः॥"

इति पाद्मे क्रियायोगसारः॥

(यथा, मनुः। ६। ६२।

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्॥") कर्षणम्। इति मेदिनी। मे, १४॥ (यदम्। इति निघण्टुः।३।४॥ यथा, ऋग्वेदे।१।७५।५।

"अग्ने यद्वि स्वं दमम्॥"

महर्षिविशेषः। यथा, महाभारते। १३।२६।५।

"विश्वामित्रः स्थूलशिराः सम्वर्त्तः प्रमतिर्दमः॥"

मरुत्तस्य राज्ञः पुत्रः। यथा, भागवते।६।२।२६।

"मरुत्तस्य दमः पुत्रस्तस्यासीद्राजवर्द्धनः॥"

मरुत्तस्य पौत्रः। इति मार्कण्डेयपुराणम्। यथा तत्रैव। १३४। १—५।

"एवं स राजा धर्म्मात्मा नरिष्यन्तोऽभवत् पुरा।
मरुत्ततनयो विप्र! विख्यातबलपौरुषः॥"
"नरिष्यन्तस्य तनयो दुष्टारिदमनो दमः।
शक्रस्येव बलं तस्य दयाशीलं सुनेरिव॥
वाभ्रव्यामिन्द्रसेनायां स जज्ञे तस्य भूभृतः।
नववर्षाणि जठरे स्थित्वा मातुर्महायशाः॥
यदृच्छाह्वयामास दमं मातरं जठरे स्थितः।
दमशीलश्च भविता यतश्चायं नृपात्मजः॥
ततस्त्रिकालविज्ञानः स हि तस्य पुरोहितः।
दम इत्यकरोत् नाम नरिष्यन्तसुतस्य तु॥
स दमो राजपुत्रस्तु धनुर्वेदमशेषतः।
जग्राह नरराजस्य सकाशाद्दृषपर्व्वणः॥"
अस्य विशेषविवरणन्तु तत्रैवाध्याये विशेषतो द्रष्टव्यम्। भीमस्य राज्ञः पुत्रविशेषः। यथा, महाभारते। ३। ५३। ६।
"कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः।
दमयन्तीं दमं दान्तं दमनञ्च सुवर्चसम्॥"
विष्णुः। यथा, तत्रैव। १३। १४६। १०५।
"धनुर्धरो धनुर्व्वेदो दान्तो दमयिता दमः॥")

दमकः, त्रि, (दमयतीति। दम+णिच्+ण्वुल्।) दमनकर्त्ता। इति व्याकरणम्। (यथा मनुः। ३। १६२।
"हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति॥")

दमघोषः, पुं, चन्द्रवंशीयराजविशेषः। स चेदिदेशपतिः शिशुपालपिता च। इति पुराणम्। (यथा, भागवते। ६। २४। ३६।
"दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत्॥")

दमघोषसुतः, पुं, (दमघोषस्य सुतः।) शिशुपालः। इति त्रिकाण्डशेषः॥

दमथः, पुं, (दसु उपशमे+"वाहुलकात् दृशमिदमिभ्यश्च।" ३। ११४। इति अथः। इत्युज्ज्वलदत्तः।) दमः। दक्षः। इत्युणादिकोषः॥

दमन, क्ली, (दम+भावे ल्युट्।) दक्षः। यथा,
"अनुच्छ्रितस्य दमनसुचितस्य श्रुतौ श्रुतम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥

दमनः, पुं, (दाम्यतीति। दम+ल्युः।) पुष्पविशेषः। दोना इति भाषा। तत्पर्य्यायः। पुष्पशामरः २। इति त्रिकाण्डशेषः॥ (यथा,
"दमनस्तु वरस्तिक्तो हृद्यो दृष्यः सुगन्धिकः।
ग्रहबाह्विषकुष्ठास्रदोषकण्डूत्रिदोषजित्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वीरः। उपशान्तः। इति शब्दरत्नावली॥
कुन्दवृक्षः। इति राजनिर्घण्टः॥ (ऋषिविशेषः। यथा, महाभारते। ३। ५३। ६।
"तमभ्यगच्छत् ब्रह्मर्षिर्दमनो नाम भारत!।
तं स भीमः प्रजाकामस्तोषयामास धर्म्मवित्॥"
अस्य भीमस्य पुत्रविशेषः। यथा, तत्रैव। ३। ५३। ६।
"कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः।
दमयन्तीं दमं दान्तं दमनञ्च सुवर्चसम्॥"
विष्णुः। यथा, महाभारते। १३। १४६। ३४।
"मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः॥"

"स्वाधिकारात् प्रमाद्यन्तीः प्रजा दमयितुं शीलं यस्य वैवस्वतादिरूपेण स दमनः।" इति तट्टीकायां भरतः। महादेवः। यथा, महाभारते। १३। १७। १३६।
"महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः॥")

दमनकः, पुं, (दमन एव। स्वार्थे कन्।) वृक्षविशेषः। दोना इति भाषा। तत्पर्य्यायः। दमनः २ दान्तः ३ गन्धोत्कटः ४ सुविः ५ जटिला ६ दक्षी ७ पाण्डुरागः ८ ब्रह्मजटः ९ पुष्करीकः १० तापसप्रभौ ११ पत्री १२ पवित्रकः १३ देवशेखरः १४ कुलप्रजः १५ विनीतः १६ तपस्विपत्रः १७। इति राजनिर्घण्टः॥ मुनिपुत्रः १८ तपोधनः १९ गन्धोत्कटः २० ब्रह्मजटी २१ कुलपुत्रकः २२। इति भावप्रकाशः॥ अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। कषायत्वम्। कटुत्वम्। कुष्ठदोषद्वन्द्वत्रिदोषविषविस्फोटविकारहरत्वञ्च। इति राजनिर्घण्टः॥ रूक्षत्वम्। दृष्यत्वम्। सुगन्धित्वम्। ग्रहव्रणरक्तदोषकण्डूनाशित्वञ्च। इति भावप्रकाशः॥ (स्त्री, षड्क्षरच्छन्दोविशेषः। यथा, चिन्तामणिधृतवचनम्।
"द्विगुणनगणमिह वितनु हि।
दमनकमिति गदति मुनि हि॥"
एकादशाक्षरच्छन्दोविशेषोऽपि। यथा, तत्रैव।
"द्विनवरगणयुगममलं तदनु च कलय करतलम्।
पतिपतिवरपरिगदितं दमनकमिदमतिललितम्॥")

दमनकारोपणोत्सवः, पुं, (दमनकस्य आरोपणार्थे य उत्सवः।) श्रीकृष्णस्य दमनकार्पणार्थमहापूजारूपोत्सवः। यथा,—
"चैत्रस्य शुक्लद्वादश्यां दमनारोपणोत्सवम्।
विदध्यात्तद्विधिर्वैष्णवादुक्तोऽत्र लिख्यते॥
मधोः सितैकादश्याञ्च प्रातःकृत्यं समाप्य च।
गत्वा दमनकारामं तत्राशोकं स्मरं यजेत्॥
तत्र मन्त्रः।
अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन!।
श्रीकान्तिं हर मे नित्यमानन्दं जनयस्व मे॥
नेष्यामि त्वां पूजनार्थं त्वां त्वत्प्रीतिकारकम्।
इति संप्रार्थ्य नत्वा च गृह्णीयाद्दमनं शुभम्॥
प्रोक्ष्य तत् पञ्चगव्येन प्रक्षाल्याङ्गिः प्रपूज्य च।
वस्त्रेणाच्छाद्य वेदादिघोषेण गृहमानयेत्॥*॥

अथ दमनकाधिवासविधिः।
छत्त्रस्याग्रे समुद्धृत्य सर्व्वतोभद्रमण्डलम्।
निधाय दमनं तत्र रात्रौ तदधिवासयेत्॥
तत्र मन्त्रः।
पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः।
दमन! त्वमिहागच्छ सान्निध्यं कुरुते नमः॥इति
सबीजं कामदेवञ्च तथा भक्षशरीरकम्।
अनङ्गं मन्मथञ्चैव वसन्तसखमेव च॥
स्मरं तथैक्षुचापञ्च पुष्पबाणञ्च पूजयेत्।
प्रागादिदिक्षु रत्याद्यं विधिवद्दमने क्रमात्॥

अशोकरक्तं कामगायत्र्या चाभिमन्त्र्य ततः।
दत्त्वा पुष्पाञ्जलिं कामदेवं वन्देत मन्त्रवत्॥
मन्त्रश्चायम्।
नमोऽस्तु पुष्पबाणाय जगदाह्लादकारिणे।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रदायिने॥ इति॥
आमन्त्रितोऽसि देवेश! पुराणपुरुषोत्तम!।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव!॥
निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभम्।
सर्व्वथा सर्व्वदा विष्णो! नमस्तेऽस्तु प्रसीद मे॥
इत्यामन्त्र्य देवेशं दत्त्वा पुष्पाञ्जलिं पुनः।
गीतवृत्यादिना रात्रौ कुर्य्याज्जागरणं सदा॥*॥

अथ दमनकार्पणविधिः।
प्रातःस्नानादि निर्व्वर्त्त्य नित्यपूजां विधाय च।
दमनारोपणार्थञ्च महापूजां समाचरेत्॥
ततो दमनकं भक्त्या पाणिभ्यां परिगृह्य च।
घण्टादिवाद्यघोषेण श्रीकृष्णाय समर्पयेत्॥
तत्र मन्त्रः।
देवदेव जगन्नाथ वाञ्छितार्थप्रदायक!।
छत्त्रस्थान् पूरय मे सर्व्वान् कामान् कामेश्वरीप्रिय!॥
इदं दमनकं देव गृहाण मदनुग्रहात्।
इमां सांवत्सरीं पूजां भगवन्निह पूरय॥ इति॥
ततो दामनकीं मालां गन्धादीनि समर्प्य च।
गीतादिनोत्सवं कृत्वा श्रीकृष्णं प्रार्थयेदिदम्॥
मणिविद्रुममालाभिर्म्मन्दारकुसुमादिभिः।
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज!॥
वनमालां यथा देव! कौस्तुभं सततं हृदि।
तद्वद्दामनकीं मालां पूजाञ्च हृदये वहेत्यादि॥
भगवन्तं प्रणम्याथ गुरुं संपूज्य भक्तितः।
संपूज्य ब्राह्मणान् भक्त्या भुञ्जीत सह बन्धुभिः॥
पारणाहे न लभ्येत द्वादशी घटिकापि चेत्।
तदा त्रयोदशी ग्राह्या पवित्रा दमनार्पणे॥
न कृत्वा दमनारोपः स्वाम्बुधौ विप्रतो यदि।
वैशाख्यां श्रावणे मासि कर्त्तव्यं वा तदैकदम्॥
अतएवोक्तं ब्रह्मणा देवीपुराणे।
चैत्रादौ कारयेत् पूजां सम्यक्त्वत्स! यथाविधि॥
गन्धधूपार्घ्यनैवेद्यैर्म्मालयैर्दमनकोद्भवैः।
सहोमं पूजयेद्देवं सर्व्वान् कामानवाप्नुयात्॥
सर्व्वतीर्थाभिषेकस्य फलं प्राप्नोति मानवः॥"
इति श्रीहरिभक्तिविलासे १४ विलासः॥

दमनी, स्त्री, (दम्यतेऽनयेति। दम+ल्युट्। स्त्रियां ङीप्।) अग्निदमनीवृक्षः। इति राजनिर्घण्टः॥

दमयन्ती, स्त्री, (दमयति नाशयति अमङ्गलादिकमिति। दम+णिच्+शतृ+ङीप्।) भद्रमल्लिका। इति शब्दमाला॥ नलराजपत्नी। सा विदर्भदेशीयभीमराजकन्या। (यथा, महाभारते। ३। ५३। ५-६।
"तथैवासीद्विदर्भेषु भीमो भीमपराक्रमः।
शूरः सर्व्वगुणैर्युक्तः प्रजाकामः स चाप्रजः॥
स प्रजार्थे परं यत्नमकरोत् सुसमाहितः।
तमभ्यगच्छद्ब्रह्मर्षिर्दमनो नाम भारत!॥
तं स भीमः प्रजाकामस्तोष्यामास धर्म्मवित्।

महिष्या सह राजेन्द्र ! सत्कारेण सुवर्चसम् ॥
तस्मै प्रसन्नो दमनः सभार्य्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीनुदारान् महाबलाः ॥
दमयन्तीं दमं दान्तं दमनञ्च सुवर्चसम् ।
उपपन्नान् गुणैः सर्व्वैर्भीमान् भीमपराक्रमान् ॥
दमयन्ती तु रूपेण तेजसा यशसा श्रिया ।
सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥"
अस्या विशेषविवरणन्तु तमेवाधिकृत्य विस्तरशो द्रष्टव्यम् ॥)

दमितः, त्रि, (दम्यते स्म इति । दम+क्तः ।
"वा दान्तशान्तेति ।" ७ । २ । २७ । इति पक्षे इट् ।) दान्तः । इत्यमरः । ३ । १ । ६७ ॥
(यथा, हरिवंशे । ६७ । ५६ ।
"यथेयं सरिदम्भोदा भवेच्छिवजलाश्रया ।
त्रयोपभोग्या च यथा नागे वै दमिते मया ॥")
क्लेशसहमात्रम् । इति भरतः ॥ भारवाहनादि-क्लेशसहः । इति सुभूतिः ॥

दमी, [न्] त्रि, (दमोऽस्यास्तीति । दम+इनिः ।) दमनविशिष्टः । (तीर्थविशेषे, क्ली । तत्प्रवर्त्तक-ऋषिभेदे, पुं । यथा, महाभारते । ३ । ८२ । ७१—७४ ।
"प्रदक्षिणमुपावृत्य गच्छेत भरतर्षभ ! ।
तीर्थं कुरुवरश्रेष्ठ ! त्रिषु लोकेषु विश्रुतम् ॥
दमीति नाम्ना विख्यातं सर्व्वपापप्रमोचनम् ।
यत्र ब्रह्मादयो देवा उपासन्ते महेश्वरम् ॥
तत्र स्नात्वाचयित्वा च रुद्रं देवगणैर्वृतम् ।
जन्मप्रभृति यत् पापं तत् स्नातस्य प्रणश्यति ॥
दमी चात्र नरश्रेष्ठ ! सर्व्वदेवैरभिष्टुतः ।
तत्र स्नात्वा नरश्रेष्ठ ! ह्ययमेधमवाप्नुयात् ॥"
दमीत्यत्र त्रिमीति क्वचित् पाठः ॥)

दमुनाः, [स्] पुं, (दाम्यतीति । अन्तर्भूतण्यर्थात् दमधातोः + "दमेरुनसिः ।" उणा० । ३ । २३४ । इति उनसिः ।) अग्निः । इत्यमरः । १ । १ । ५६ ॥ शुक्राचार्य्यः । इत्युणादिकोषः ॥

दमूनाः, [स्] पुं, (दमूनस् + अन्येषामपि दृश्यते इति पक्षे दीर्घः । यद्वा, दमेरूनसिरिति पठित्वा ऊनसिप्रत्ययः ।) अग्निः । इति शब्दरत्नावली ॥ (त्रि, दमनीयः । यथा, ऋग्वेदे । १ । १४१ । ११ ।
"अक्षे रथिं न खर्य दमूनसं भगं दक्षं न पपृचासि धर्णसिम् ॥"
दानमनाः । दान्तचित्तः । यथा, तत्रैव । ५ । ४ । ५ ।
"सुदो दमूना अतिथिर्दुरोण इमं नो यज्ञ-मुपयाहि विद्वान् ॥")

दम्पती, पुं, (जाया च पतिश्च । राजदन्तादिगणे पाठात् जायाया दम्भावो वा निपात्यते ।) भार्य्यापती । इत्यमरः । २ । ६ । ३८ ॥ (यथा, मनुः । ३ । ११६ ।
भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि ।
भुञ्जीयातां ततः पश्चादग्निहुत्रं दम्पती ॥")

दम्भः, पुं, (दम्भते इति । दम्भ दम्भे + घञ् ।) कपटः । (यथा, पञ्चतन्त्रे । १ । २२२ ।
"सुगुप्तस्यापि दम्भस्य ब्रह्मण्यन्तं न गच्छति ॥"
अयन्तु अधर्म्मात् त्वष्टागर्भे संजातः । यथा, भागवते । ४ । ८ । २ ।
"त्वष्टाऽधर्म्मस्य भार्य्यासीद्दम्भं मायाच सूनृतम् ॥
असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजाः ॥")
कल्कम् । शाठ्योपाधिकृतिः । इति शब्दरत्नावली ॥ (यथा, गीतायाम् । १६ । ४ ।
"आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्व्वकम् ॥"
धर्म्माशुतृसाहः । यथा, मनुः । ४ । १६३ ।
"नास्तिक्यं वेदनिन्दाच देवतानाञ्च कुत्सनम् ।
द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्ज्जयेत् ॥"
महादेवः । यथा, महाभारते । १३ । १७ । ७८ ।
"दम्भो ह्रदम्भो वेदम्भो वह्नो वह्नकरः कविः ॥")

दम्भोलिः, पुं, (दम्भ नोदे + भावे असुन् । दम्भसि प्रेरणे अलति पर्य्याप्नोतीति । अल + इन् ।) वज्रम् । इत्यमरः । १ । १ । ५० ॥

दम्यः, पुं, (दम्यते इति । दम + यत् ।) वत्सतरः । स तु प्राप्तदमनकालो गौः । इत्यमरः । २ । ६ । ६२ ॥ अनड्वान् । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १३ । ६६ । ४ ।
"शकटं दम्यसंयुक्तं दत्तं भवति चैव हि ॥")
दमनीये, त्रि ॥

दय, णि ङ गतौ । गतौ । वधे । दाने । अवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) अवनं पालनम् । णि, दयितोऽस्ति । ङ, दयते दीर्घं दयालुः । तेषां दयसे न कस्मात् । अत्र कर्म्मणि षष्ठी । इति दुर्गादासः ॥

दयः, पुं, (दय + बाहुलकात् अप् ।) दया । इति शब्दरत्नावली ॥

दया, स्त्री, (दय + भिदादित्वाङ् । ततष्टाप् ।) करुणा । अस्या लक्षणं यथा, पाद्मे क्रियायोगसारे ।
"यदापि परदुःखं हर्त्तुं या हृदि जायते ।
इच्छा भूमिसुरश्रेष्ठ ! सा दया परिकीर्त्तिता ॥"
अपि च मत्स्यपुराणे ।
"आत्मवत् सर्व्वभूतेषु यो हिताय शुभाय च ।
वर्त्तते सततं हृष्टः क्रिया स्नेहा दया स्मृता ॥"*॥
"परे वा बन्धुवर्गे वा मित्रे द्विषरि वा सदा ।
आत्मवद्भावितव्यं हि दयेषा परिकीर्त्तिता ॥"
इत्येकादशीतत्त्वम् ॥
(दयं हि शुक्लीनामन्यतमा । यथा, देवीभागवते । १ । १५ । ६० ।
"श्रद्धा मेधा स्वधा स्वाहा क्षुधा निद्रा दया गतिः ।
"संस्थिताः सर्व्वतः पार्श्वे महादेव्याः पृथक् पृथक् ॥")

दयाकूर्च्चः, पुं, (दयायां कूर्च्चः श्रीर्यमिव प्रधानम् ।) बुद्धः । इति हेमचन्द्रः । २ । १४८ ॥

दयालुः, त्रि, (दयते इति । दय + "सृदिरिहीति ।" उणा० । २ । १५८ । इति आलुच् ।) दयायुक्तः । तत्पर्य्यायः । कारुणिकः २ कृपालुः ३ करतः ४ । इत्यमरः । ३ । १ । १५ ॥ (यथा, रघुः । १० । १६ ।
"दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥")

दयितं त्रि, (दयते स्मेति । दय + क्तः ।) प्रियम् । इत्यमरः । ३ । १ । ५३ ॥ (यथा, आर्य्यासप्तशत्याम् । २८८ ।
"हृदमद्दृष्प्रायं दयितं ज्ञात्वा प्रकाशितस्नेहम् ।
हृदयं करेण ताडितमथ मिथ्याक्षितवचया ॥"
यथा च पञ्चतन्त्रे । २ । १८६ ।
"दयितजनविप्रयोगो वित्तवियोगश्च केन तुल्याः स्युः ।
यदि सुमहौषधकल्पो वयस्यजनसङ्गमो न स्यात् ॥")

दयितः, पुं, (दय + क्तः ।) पतिः । इति जटाधरः ॥

दयिता, स्त्री, (दयित + टाप् ।) भार्य्या । इति हलायुधः ॥ (यथा, रघुः । २ । ३ ।
"निवर्त्तय राजा दयितां दयालु-स्तां सौरभेयीं सुरभिर्यशोभिः ॥")

दर, य, (दीर्य्यते इति । दृ + अप् ।) ईषद्भेदः । इति मेदिनी । रे, ४७ ॥ (यथा, आर्य्यासप्तशत्याम् । ३०० ।
"दरतरलेऽपि वचसि दरोन्नते तव सुखे च दरहसिते ।
आस्तां कुसुमं वीरः सरोऽधुना चिबुकमपि ॥"
"अपिशब्दो नेषदर्थवचने सति । तवेषदुन्नमिते वचसि सुखे च किञ्चिद्धसितवति सति ।" इति तट्टीका ॥)

दरं, क्ली, शूकः । यथा । विघ्नं वन्दे दरकमलकौमोदकीचक्रपाणिमिति क्रमदीपिका ॥

दरः, पुं क्ली, (दीर्य्यते वधोऽनेन । दृ + "यङ्हृदृविभिभ्यश्च ।" ३ । ३ । ५८ । इति अप् ।) भयम् । (यथा, आर्य्यासप्तशत्याम् । २६५ ।
"दरविद्राणस्यापि स्मरस्य शिखिनेव निर्गतास्तनू मे ।
मुग्धे ! तव दृष्टिरसावर्जुनयन्नेहुरिव हन्ति ॥")
गर्त्तः । इत्यमरः । ३ । ३ । १८४ ॥ (शूकः । यथा, भागवते । १ । ११ । २ ।
"स उच्चकाशे भवभोदरो दरो-ऽरुणत्रिकक्षस्थधरोरुशोणिमा ।
दाक्षायमाणः करकक्षसंपुटे यथालबद्धो कलहंस उत्स्वनः ॥")
कन्दरे, पुं क्ली । इत्यमरटीकायां भरतः ॥ (स्त्रियां ङीप् । यथा, ऋतुसंहारे । १ । २५ ।
"भ्रमति पवनविद्धः पर्व्वतानां दरीषु स्फुटति पटुनिनादः शुष्कवंशस्थलीषु ॥")

दरकन्थिका, स्त्री, (दर ईषत् कन्थो यस्याः कप् । टापि अत इत्वम् ।) शृतावरी । इति राजनिर्घण्टः ॥

दरणिः, पुं, (दृ विदारणे + "इगुपधात्कित्रिः ।" २ । १०३ । इति उण्प्रत्ययो नित्कश्च ।) कुलभङ्गः । भाङ्गन इति भाषा । तत्पर्य्यायः । कुलहन्ता २ । इति शब्दरत्नावली ॥ कुलकण्टकः ३ । इति भूरिप्रयोगः ॥

दरः, [द] स्त्री, (दृ भ्वादीति । दृ विदारणे + "गृदृभसोऽदिः ।" उणा । १ । १२६ । इति अदिः ।) प्रपातः । भयम् । पर्व्वतः । इति मेदिनी । दे, ३० ॥ क्लेच्छजातिः । इति लिङ्गादिसंग्रहे अमरः ॥ (देशविशेषः । यथा, राजतरङ्गिण्याम् । १५७ ।
"दरदुरस्काधिपयोर्यः केशरिवराहयोः ।
हिमवद्विन्ध्ययोरासीदार्य्यावर्त्त इवान्तरे ॥")
कृत् । तीरम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

दरदं, क्ली, (दर ईषत् दायति शुध्यतीति । दै + कः ।) हिङ्गुलम् । इति राजनिर्घण्टः ॥ (क्वचित् पुंस्त्वेऽपि दृश्यते । अस्य पर्य्यायो यथा,—
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥"
इति वैद्यकरत्नमालायाम् ॥
पर्य्यायान्तरं यथा,—
"हिङ्गुलन्दरदं क्लेच्छं चिताङ्गञ्चूथमारदम् ।
दरदश्चिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः ॥
हंसपादस्तृतीयः स्यादगुणत्वादुत्तरोत्तरम् ।
चर्म्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः ॥
अवाक्पुष्पसङ्काशो हंसपादो महोत्तमः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"दरदं तण्डुलसूर्णं क्षत्वा क्षत्वाम्बुके त्रिदिनम् ।
भावं जम्बीररसैर्व्याङ्गैर्या वा रसैर्वहुधा ॥
ततश्च जम्बीरवारिणा चाङ्गैर्या रसेन परिप्लुतम् ।
क्षत्वा स्थालीमध्ये निधाय तदुपरिकठिनीष्टरम् ॥
चारु शरावं तत्र निधृङ्गारं चक्रं देयं उर्ध्वे देयं
तथैव तदूर्द्धपातनेन विस्रवणं ग्रिवणः ॥"
"हिङ्गुले हिङ्गुलुर्याति दरदः शुकतुण्डकः ।
रसगन्धकसम्भूतो हिङ्गुलो वैद्यरत्नकः ॥
अम्लवर्गद्रवैः पिष्ट्वा दरदो माहिषैरज च ।
दुग्धेन सप्तधा पिष्टः शुष्कीभूतो विशुध्यति ॥
अन्यच्च ।
मेषीदुग्धेन दरदमम्लवर्गैर्विभावितम् ।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम् ॥
अन्यमतम् ।
दरदं दोलिकायन्त्रे पक्वं जम्बीरजैर्द्रवैः ।
सप्तवारमथास्त्रैर्भावितं शुद्धिमेति हि ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे आरग्वधारग्वधाधिकारे ॥)

दरदः, पुं, (दरं भयं ददातीति । दा + कः ।) देशविशेषः । भयम् । क्लेच्छजातिभेदः । इति ग्रन्दरत्नावली ॥ (अयन्तु पूर्व्वं क्षत्रिय आसीत् पश्चात् क्रमशः उपनयनादिक्रियालोपात् शूद्रत्वादिकं प्राप्तः । यदुक्तं मनौ । १० । ४३-४४ ।
"शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः ।
पारदा पह्लवाश्चीनाः किराता दरदाः खशाः ॥")

दरिः, स्त्री, (दृ + इन् ।) दरी । इति शब्दरत्नावली ॥ (तच्चकुलोत्पन्ने सर्पे, पुं । इति महाभारतम् ॥)

दरितः, त्रि, (दरो भयमस्य सञ्जातः । दर + तारकादित्वात् इतच् ।) भीतः । इति हेमचन्द्रः । ३ । २६ ॥

दरिद्रः, पुं, (दरिद्राति दुर्गच्छतीति । दरिद्रा + अच् ।) निर्धनः । तत्पर्य्यायः । निस्वः २ दुर्विधः ३ दीनः ४ दुर्गतः ५ । इत्यमरः । ३ । १ । ४६ ॥ कीकटः ६ दुस्थः ७ । इति जटाधरः ॥ अल्पमितः ८ । इति दानधर्म्मः । तस्य कारणं यथा,—
"अशुचीश्च चिराचारि तीर्थान्यनभिगम्य च ।
अदत्वा हेमधेनूनां दरिद्रो जायते नरः ॥"
इति पाद्मे भूखण्डम् ॥
"दरिद्रो यस्त्वसन्तुष्टः कृपणो योऽजितेन्द्रियः ॥"
इति श्रीभागवतम् ॥

दरिद्रा, च गु दुर्गत्याम् । इति कविकल्पद्रुमः ॥ (अदां-परं-अकं-सेट् ।) दुर्गतिरकिञ्चनीभावः । च गु, उपर्य्युपरि पश्यन्तः सर्व्व एव दरिद्रति । इति दुर्गादासः ॥

दरिद्रायकः, त्रि, (दरिद्रातीति । दरिद्रा + ण्वुल् ।) दरिद्रः । इति मुग्धबोधम् ॥

दरिद्रितः, त्रि, (दरिद्रा + कर्त्तरि क्तः ।) दरिद्रः । दारिद्र्ययुक्तः ॥

दरिद्रिता, [तृ] त्रि, (दरिद्रा + तृच् ।) दरिद्रायकः । दरिद्राधातोः कर्त्तरि तृप्रत्ययः ॥

दरोदरं, क्ली, (दरो भयं तज्जनकं उदरं यस्य । प्रायशः सर्व्वत्रासकत्वादेवास्य तथात्वम् ।) द्यूतोदरम् । इत्यमरटीकायां भरतः ॥

दरोदरः, पुं, (दरजनकमुदरं यस्य ।) द्यूतोदरः । इत्यमरटीकायां भरतः ॥ (यथा, उद्भटकृतटीकायां उज्ज्वलदत्तधृतगोवर्द्धनः । ५ । १६ ।
"आश्रित्य दुर्गं गिरिकंदरोदरं
क्रीड़न्त्यसुस्निग्धं सततं दरोदरम् ॥")

दर्द्दरः, पुं, पर्व्वतः । (यथा, रामायणे । २ । ६१ । २४ ।
"मलयं दर्द्दरञ्चैव ततः स्वेदमुदो गिरः ॥"
क्वचित् दर्द्दरोऽपि पाठः ॥) ईषद्गमनभाजने, त्रि । इति मेदिनी । रे, १६६ ॥

दर्द्दराम्रः, पुं, ब्रह्मवृक्षविशेषः । तत्पर्य्यायः । मीनाम्रोजः २ । इति शब्दमाला ॥

दर्द्दरीकं, क्ली, (दारयतीव कर्णौ । दृ + क्विप् + "पर्परीकादयश्च ।" उणा । ४ । २० । इति ईकनुप्रत्ययेन साधुः ।) वाद्यम् । इत्युणादिकोषः ॥

दर्द्दरीकः, पुं, (दारयतीव कर्णौ इति । दृ + क्विप् + "पर्परीकादयश्च ।" उणा । ४ । २० । इति ईकनुप्रत्ययेन साधुः ।) मेघः । वाद्यभेदः । भेकः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दर्द्दुरं, क्ली, धामार्गवम् । इति मेदिनी । रे, १६७ ॥

दर्द्दुरः, पुं, (दृणाति कर्णौ शब्देनेति । दृ + "मकृदर्द्दुरौ ।" उणा । १ । ४१ । इति उरच् प्रत्ययेन निपातनात् साधुः ।) भेकः । इत्यमरः । १ । १० । २४ ॥ (यथा,—
"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे ।
दर्द्दुरा यत्र वक्तारश्च मौनं हि शोभनम् ॥"
इत्युद्भटः ॥)
मेघः । वाद्यभाण्डभेदः । पर्व्वतविशेषः । इति मेदिनी । रे, १६७ ॥ (यथा, रघौ । ४ । ५१ ।
"स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः प्रेयसौ मलयदर्द्दुरौ ॥")
राक्षसः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (अभ्रकधातुभेदः । यथा, भावप्रकाशे ।
"पिनाकं दर्द्दुरं नागं वज्रमिति चतुर्विधम् ॥"
"दर्द्दुरं खनिनिक्षिप्तं कुरुते दर्द्दुरध्वनिम् ।
गोवकानू बहुशः क्षत्वा स खान्मृत्युप्रदायकः ॥")

दर्द्दुरा, स्त्री, (दृणाति दारयति वा असुरानिति । दृ + उरच् प्रत्ययेन निपातनात् साधुः । ततष्टाप् ।) चक्रिका । इति मेदिनी । रे, १६७ ॥

दर्द्दुः, पुं, (दरिद्राति दुर्गच्छत्यङ्गमनेनेति । दरिद्रा + "दरिद्राते र्योलोपः ।" उणा । १ । ८० । इति कुः । रकारेकारयकारार्द्धा लोपश्च ।) दद्रुरोगः । इति शब्दरत्नावली ॥

दर्द्दुः, पुं, (दरिद्रा + बाहुलकात् कुः । र्योलोपश्च ।) दद्रुरोगः । इत्युणादिकोषः ॥

दर्द्दुरः, पुं. (दर्द्दुं हन्तीति । दर्द्दु + हन् + टक् ।) चक्रमर्द्दकः । इति शब्दरत्नावली ॥

दर्द्दुरः, त्रि, (दर्द्दुरस्यास्तीति । दर्द्दु + "लोमादिपामादिपिच्छिलादिभ्यः शनेलचः ।" ५ । २ । १०० । इति पामादिषु पाठात् नः । ततो मत्वर्थे च ।) दद्रुरोगी । इत्यमरटीकायां भरतः ॥

दर्द्दूः, पुं, (दरिद्रा + कुः । र्योलोपश्च ।) दद्रुरोगः । इत्युणादिकोषः ॥

दर्द्दूरः, त्रि, (दर्द्दूरस्यास्तीति । दर्द्दू + नः ।) दद्रुरोगी । इत्यमरटीकायां भरतः ॥

दर्द्दूरोगी, [न्] त्रि, (दर्द्दूरोगोऽस्यास्तीति । दर्द्दूरोग + इनिः ।) दद्रुरोगी । इत्यमरटीकायां भरतः ॥

दर्पः, पुं, (दृप्यते इति । दृप् + भावे घञ् ।) उच्छृङ्खलत्वम् । इति गौलकच्छः । कस्तूरी । इति मेदिनी । पे, ७ ॥ उक्षा । इति त्रिकाण्डशेषः ॥ अहङ्कृतिः । तत्पर्य्यायः । गर्व्वः २ अहङ्कारः ३ अवलिप्तता ४ अभिमानः ५ ममता ६ मानः ७ चित्तोन्नतिः ८ स्मयः ९ । इति हेमचन्द्रः । २ । २३१ ॥ * ॥
"अहङ्कारश्च सर्व्वेषां पापबीजसमङ्गलम् ।
ब्रह्मादेषु च सर्व्वेषां गर्व्वपर्य्यन्तसुन्नतिः ॥
येषां येषां भवेद्दर्पो ब्रह्मादेषु परात्परे ।
विज्ञाय सर्व्वं सर्व्वात्मा तेषां श्राद्धाहमेव च ॥
क्षुद्राणां महतां चैव येषां गर्व्वो भवेत् प्रिये ! ।
एवंविधमहं तेषां चूर्णीभूतं करोमि च ॥
चकार दर्पभङ्गञ्च महाविष्णोः पुरा विभुः ।
ब्रह्मणश्च तथा विष्णोः शैवस्य च शिवस्य च ॥
धर्म्मस्य च यमस्यापि शाक्रस्य चन्द्रसूर्य्ययोः ।
मरुतश्च च वह्नेश्च गुरोर्दुर्व्वाससस्तथा ॥
द्वारिकस्य भक्तस्य जयस्य विजयस्य च ।

सुरायामसुरायाश्च भवतः कामशुक्रयोः ॥
लैङ्गस्यार्ज्जुनस्यापि वाजस्य च भृगोस्तथा ।
सुमेरोश्च समुद्राणां वायोश्च वरुणस्य च ॥
सरस्वत्याश्च दुर्गायाः पद्मायाश्च भुवस्तथा ।
सावित्र्याश्चैव गङ्गाया मनसायास्तथैव च ॥
प्राणाधिष्ठातृदेवायाश्च प्रियायाः प्राणतोऽपि च ।
प्राणाधिकायाः राधायाश्चान्येषामपि का कथा ।
हत्वा दर्पञ्च सर्व्वेषां प्रसादञ्च चकार सः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

दर्पकः, पुं, (दर्पयति हर्षयति मोहयति वेति । दृप दर्पमोहनयोः + णिच् + ण्वुल् ।) कामदेवः । इत्यमरः । १ । १ । २३ ॥

दर्पणं, क्ली, (दर्पयति सन्दीपयतीति । दृप् + णिच् + ल्युः) चक्षुः । इति जटाधरः ॥ (भावे ल्युट् ।) सन्दीपनम् । इति दृपधात्वर्थदर्शनात् ॥

दर्पणः, पुं, क्ली, (दर्पयति सन्दीपयतीति । दृप् + णिच् + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति ल्युः ।) रूपदर्शनाधारः । आर्शि इति भाषा । तत्पर्य्यायः । सुकुरः २ आदर्शः ३ । इत्यमरः । २ । ७ । १४० ॥ आत्मदर्शः ४ मन्दरः ५ दर्शनम् ६ प्रतिबिम्बातम् ७ । इति शब्दरत्नावली ॥ कर्कः ८ कर्करः ९ । इति जटाधरः ॥ (यथा, चाणक्ये । १०६ ।

"यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥")

अक्ष गुणः । आयुःश्रीकारितम् । पापनाशित्वञ्च । इति राजवल्लभः ॥ पुं, पर्व्वतभेदः । तद्विशेषः । यथा,—

और्व्व उवाच ।

"ततः पूर्व्वे महाराज ! दर्पणो नाम पर्व्वतः ।
कुबेरो यत्र वसति धनपालैः समं सदा ।
यस्मिन्नग्रे मध्यभागे रोहिणी रोहिताकृतिः ।
यस्मिँल्लोहादिकं सृष्टं स्वर्णतां याति तत्क्षणात् ॥
यन्नातिदूरे स्रवति दर्पणो नाम वै नदः ।
हिमाद्रिप्रभवो नित्यं लौहित्यसदृशः पये ॥
यस्मात्प्रसूतं हि लौहित्यं सर्व्वैर्देवगणैर्हरिः ।
सर्व्वतीर्थोदकैः सम्यक् स्नापयामास तं सुतम् ॥
तस्य स्नानप्रभावात् पापदर्पस्य पाटनः ।
तेनायं दर्पणो नाम पुरा देवगणैः कृतः ॥
तस्मिन् स्नात्वा नदवरे नरोऽन्येऽपर्व्वणीषु ये ।
कुबेरं प्रतिपत्तिथ्यां कार्त्तिके शुक्लपक्षतः ॥
स याति ब्रह्मसदनमिह भूतिशतैर्युतः ॥"

इति कालिकापुराणे ८१ अध्यायः ॥

दर्पारम्भः, पुं, (दर्पस्य आरम्भः) अहङ्कारारम्भः । तत्पर्य्यायः । मटस्फाटिः २ । इति जटाधरः ॥

दर्भः, पुं, (दृभाति विदारयतीति । "दृभिब्यां भः ।" उणां ३ । १५१ । इति भः ।) कुशः । इत्यमरः । २ । ४ । १६६ ॥ उलपतृणम् । इति रत्नमाला ॥ काशः । इति शब्दरत्नावली ॥ * ॥
("कुशो दर्भस्तथा बर्हिः स्तरणो यज्ञभूषणः ।
ततोऽन्यो दीर्घपत्रः स्यात् शरपत्रस्तथैव च ॥
दर्भेडयं त्रिदोषघ्नं मधुरानुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीरक्तपित्तविसर्पजित् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

"हरिताः सपिञ्जलाश्चैव पुष्टाः स्निग्धाः समाहिताः ।
गोकर्णमात्रास्तु कुशाः सक्थिच्छिन्नाः समूलकाः ॥
पिप्पलतीर्थेन देयाः स्रुवूर्व्वाग्द्वयामाकमेव च ।
काशाः कुशा वल्वजाश्च तथान्ये तीक्ष्णरोमशाः ॥
मौञ्जाश्च शाद्वलाश्चैव षड्दर्भाः परिकीर्त्तिताः ॥
सपिञ्जलाः साग्राः तीक्ष्णरोमशा इति वल्वजानां विशेषणम् । शाद्वला इति सर्व्वेषां विशेषणम् । तेन तेषामभावे मूलकाग्रमूलीयवल्वजनलशुष्कवर्षे सर्व्वत्रगानीति गोभिलेन तद्व्यतिरिक्तवल्वजानां निषेधो बोद्धव्यः । मूलानि फलपुष्पमञ्जर्य्यस्तानि येषां तृणानां सन्ति तानि मूलतृणानि इति भट्टनारायणचरणाः ॥ गोकर्णमिता विस्तृताङ्गुष्ठानामिकापरिमाणाः ।
दैर्घ्यप्रमाणाः शस्ता वै पिप्पलतीर्थेन संस्कृताः ।
उपमूले तथा लूनाः प्रस्तरार्थे कुशोत्तमाः ॥

इति वायुपुराणम् ॥ * ॥

वध्यप्रतिप्रसवमाह हारीतः ।
पथि दर्भाश्चितौ दर्भा ये दर्भा यज्ञभूमिषु ।
क्षारणासनपिण्डेषु षड्दर्भान् परिवर्जयेत् ॥
पिण्डार्थं ये स्मृता दर्भा ये क्रतं पिप्पलतर्पणम् ।
मूत्रोच्छिष्टप्रलिप्ते च त्यागस्तेषां विधीयते ॥
क्षुते: क्षते च विण्मूत्रे त्यागस्तेषां विधीयते ।
क्षुतेरित्युपलक्षणेन क्षतोत्था क्षतैर्दैवैरुपलक्षितेन युक्तेषु ।
नीलीमधे च ये दर्भा ब्रह्मस्थे च ये क्षुताः ।
पवित्रांस्तान् विजानीयादृथा कार्यस्तथा कुशाः ॥
आचम्य प्रयतो नित्यं पवित्रेण द्विजोत्तमः ।
नोच्छिष्टस्तु भवेत्तस्तु सुस्थश्चैनं विवर्जयेत् ॥
क्षतं समापितमित्यर्थः ॥ * ॥
दर्भषट्कलक्षणमाह रत्नाकरे यज्ञसंग्रहः ।
अर्द्धमेको भवेद्ब्रह्मा तत्सकेऽग्रस्तु विष्टरः ।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ॥
भ्रान्तिदीपिकायाम् ।
सप्तभिर्नवभिर्वापि बाह्मैक्षितयवेष्टितम् ।
ॐकारेणैव मन्त्रेण द्विजः कुर्य्यात् कुशग्रहिम् ॥
नवभिरित्यत्र पञ्चभिरिति कर्म्मोपदेशिन्यां पाठः । दर्भसंख्याविशेषाभिधानं छन्दोगेतरपरम् ।
यज्ञवास्तुनि सुत्याश्च स्नाने ब्रह्मवटौ तथा ।
दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि ॥
इति गोभिलपरिशिष्टीयवचनात् ।" इति श्राद्धतत्त्वम् ॥

दर्भटं, क्ली, (दृभ्यते निभृतस्थाने विरच्यते इति । दृभ यत्नणे + बाहुलकात् अटन् ।) निभृतगृहम् । इति त्रिकाण्डशेषः ॥

दर्भपत्रः, पुं, (दर्भस्य कुशस्येव पत्राणि यस्य ।) काशः । इति राजनिर्घण्टः ॥

दर्भाङ्कयः, पुं, (दर्भैः आङ्क्यते लक्ष्यते सङ्ख्यायते । आ + अङ्क् + अच् ।) सुङ्गः । इति राजनिर्घण्टः ॥ (सुङ्गशब्दस्य विवरणं ज्ञातव्यम् ॥)

दर्भः, पुं, (दृभाति विदारयतीति । दृ + "कृगृदृभ्यो वः ।" उणां १ । १५५ । इति वः ।) राक्षसः । हिंस्रः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (जातिविशेषः । यथा, महाभारते । २ । ५१ । १३ ।
"कैरता दरदा दर्व्वाः शूरा वैयामकास्तथा ।
औदुम्बरा दुर्व्विभागाः पारदाः सह वाह्लिकैः ॥"

स्त्रियां टाप् । उशीनरपत्नीभेदः । यथा, हरिवंशे । ३१ । २२ ।
"उशीनरस्य पत्न्यास्तु पञ्च राजर्षिवंशजाः ।
वृषा क्षमी नवा दर्व्वा पञ्चमी च दृषद्वती ॥")

दर्व्वरीकः, पुं, (दृ विदारे + "वर्षरीकादयश्च ।" उणां । ४ । २० । इति ईकन्प्रत्ययेन निपातात् साधुः ।) इन्द्रः । वायुः । वाद्यभेदः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दर्व्वटः, पुं, (दर्व्वाय हिंसायै अटतीति । अट + अच् । शकन्ध्वादित्वात् पररूपम् ।) दस्युवादी । इति हारावली । १२८ ॥

दर्व्विः, स्त्री, (दृभाति विदारयत्यनेनेति । दृ + "दृदृभ्यां विन् ।" उणां ४ । ५३ । इति विन् ।) यज्ञपात्रादिदारकः । हाता इति भाषा । तत्पर्य्यायः । कम्बिः २ खजाका ३ । इत्यमरः । २ । ६ । ३४ ॥ दर्व्वी ४ कम्बी ५ खजाकः ६ । धवा । इति शब्दरत्नावली ॥

दर्व्विकः, पुं, (दर्व्वि + स्वार्थे कन् । अभिधानात् पुंस्त्वम् ।) दर्व्वी । इति द्विरूपकोषः ॥

दर्व्विका, स्त्री, (दर्व्वि + स्वार्थे कन् + टाप् ।) दार्व्विका । इत्यमरटीकायां रायमुकुटः ॥ खजाका । इति द्विरूपकोषः ॥ कच्छलम् । यथा,
"सौवीरं जाम्बलं तुत्थं मयूरग्रीवकं तथा ।
दर्व्विका मेघनीलञ्च अञ्जनानि भवन्ति षट् ॥"

तल्लक्षणम् यथा, कालिकापुराणे ६८ अध्याये ।
"सवद्रूपन्तु सौवीरं जाम्बलं प्रस्तरं तथा ।
मयूरग्रीवकं रत्नं मेघनीलन्तु तैजसम् ॥
दृष्ट्वा निघ्याद्य चैतानि ग्लिलायां तैजसेऽथवा ।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पुत्रक ! ॥
घृततैलादियोगेन तन्मात्रादौ दीपवह्निना ।
यदञ्जनं जायते तु दर्व्विका परिकीर्त्तिता ॥

दर्व्वी, स्त्री, (दर्व्वि + वा ङीष् ।) दर्व्विः । इति शब्दरत्नावली ॥ (यथा, उत्तरगीतायाम् । २ । ३० ।
"आलोड्य चतुरो वेदान् धर्म्मशास्त्राणि सर्व्वदा ।
योऽदन्नन्नञ्च न जानाति दर्व्वी पाकरसं यथा ॥")

दर्व्वीकरः, पुं, (दर्व्वीं फलां करोतीति कृ + "कृञो हेतुताच्छील्यानुलोम्येषु ।" ३ । २ । २० । इति टः । यद्वा, दर्व्वीं फला कर इवास्य ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥ (यथा, सुश्रुते कल्पस्थाने चतुर्थाध्याये ।
"दर्व्वीकरा मण्डलिनो राजिमन्तश्च पन्नगाः ।
तेषु दर्व्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः ॥"

"रथाङ्गलाङ्गलच्छत्रस्रिकाङ्कुशधारिण:।
ज्ञेया दर्वीकरा: सर्पा: फणिन: शीघ्रगामिन:॥"
तत्र दर्वीकरभेदा यथा,—
"दर्वीकरा: कृष्णसर्पो महाकृष्ण: कृष्णोदर: श्वेत-
कपोतो गृहाकपोतो बलाहको महासर्प: शुक्ल-
पाली गोहिताक्षो गवेधुक: परिसर्प: खरुकण:
ककुद: पद्मो महापद्मो दर्भपुष्पो दधिमुख: शुक्ल-
रीको भृकुटीमुखो विष्किर: पुष्पाभिकीर्णो
गिरिसर्प अनुसर्प: श्वेतोदरो महाशिरा अल-
गर्द आशीविष इति॥"
एतद्दूषणनिवृत्तलक्षणादिकं यथा,—
"तत्र दर्वीकरविषेण लङ्घनयननखदशनमल-
पुरीषदंशक्षणात्तं रोक्ष्य शिरसो गौरवं सन्धि-
वेदना कटीपृष्ठग्रीवादौर्बल्यं जृम्भणं वेपथु:
स्वरावसादो घुर्घुरको जड़ता शुष्कोद्गार: कास-
श्वासौ हिक्का वायोरूर्द्धगमनं मूलोद्देहनं क्षणा-
लालास्राव: फेनागमनं स्रोतोऽवरोधस्तास्ताश्च
वातवेदना भवन्ति॥" दर्वीकरदष्टानां विष-
वेगादिकमाह यथा,—
"तत्र सर्व्वेषां सर्पाणां विषस्य सप्तवेगा भवन्ति।
तत्र दर्वीकराणां प्रथमे वेगे विषं श्लेष्मितं दूषयति
तत् प्रदुष्टं क्षणात्तासुपैति तेन कार्ष्ण्यपिपीलिका-
परिसर्पणमिव चाङ्गे भवति। द्वितीये मांसं
दूषयति तेनात्यर्थं क्षणात् श्लेष्मो मन्यास्तम्भश्चाङ्गे
भवन्ति तृतीये मेदो दूषयति तेन दंशक्लेद:
शिरोगौरवं स्वेदश्चतुर्थेऽस्थि च। चतुर्थे कोष्ठमनु-
प्रविश्य कफप्रधानान् दोषान् दूषयति। तेन तन्द्रा
प्रसेकसन्धिविश्लेषा भवन्ति। पञ्चमे अस्थीन्यनु-
प्रविशति प्राणमेवैष दूषयति तेन पर्व्वभेदो
हिक्कादाहश्च भवति। षष्ठे मज्जानमनुप्रवि-
शति यद्दोषाभ्यर्थं दूषयति। तेन गात्राणां
गौरवमतिसारो मूर्च्छा तृट्पीड़ा मूर्च्छा च भवति।
सप्तमे शुक्रमनुप्रविशति यानत्वात्यर्थं कोपयति।
कुपितश्च सर्व्वस्रोतोभ्य: प्रधावयति तेन सर्व्ववर्णि-
प्रादुर्भाव: कटिपृष्ठभङ्गश्च सर्व्वेन्द्रियविघातो
बालस्त्रैदयोरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति॥"
अथ दर्वीकरदष्टस्य चिकित्सामाह तत्रैव।
"दर्वीनां विषवेगे तु प्रथमे श्लेष्मितं हरेत्।
द्वितीये मधुसर्पिर्भ्यां पाययेत्सागदं भिषक्॥
नस्यं कर्म्माञ्जने युक्त्या तृतीये विषनाशने।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ पाययेत्॥
श्लीतोपचारं लघ्वादौ भिषक् पञ्चमषष्ठयो:।
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तिताम्॥
सप्तमे लवणैर्युक्तं शीरक्षीरेण श्लोधयेत्।
तीक्ष्णमेवाञ्जनं दद्यात् तीक्ष्णञ्चैव नस्यकर्म्म च॥
कुर्य्यात् काकपदं पश्चात् साधयित्वा घृतं पिबेत्॥")
श्यामाकाकारके, त्रि॥
दर्श:, पुं, (दृश्यते उत्तरमेघोभागापसमसूचपात-
स्थानेन रात्रावाकाशदेशेन सहावस्थितौ चन्द्र-
सूर्य्यौ यत्र। दृश् + आधारे घञ्।) अमा-
वस्या। इत्यमरः। १। ४। ८॥
"अन्योन्यं चन्द्रसूर्य्यौ तु दर्शनादर्श उच्यते॥"
इति मत्स्यपुराणम्॥
(अयं अग्निवारुण्यां विशाखायां तस्मात् जातः।
यथा, भागवते। ६। १८। ३।
"धातुः कुहूः अग्निवारुण्यां काका चानुमतिस्तथा।
सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात्॥"
दृश + भावे घञ्।) अवलोकनम्। इति
मेदिनी। शे, ७॥ (यथा, महाभारते। १३।
१४४। ४५।
"दुर्दर्शाः केचिदाभान्ति नराः काष्ठमया इव।
प्रियदर्शास्तथा चान्ये दर्शनादेव मोक्षदाः॥")
पशुहननत्यागविशेषः। स यागक्रियात्मकः।
यथा। "आग्नेयाष्टाकपालेनेन्द्रदर्शेन्द्रपयोयागा-
क्षयोऽमावास्यायां स च यावज्जीवं कर्त्तव्यः
कौशपायिकर्त्तव्यो मासमाधश्च।" इति मल-
मासतत्त्वम्॥
दर्शकः, पुं, (दर्शयति नृपादिसमीपगमनपथमिति।
दृश् + णिच् + ण्वुल्।) द्वारपालः। इत्य-
मरः। २। ८। ६॥ (जातिविशेषः। यथा,
महाभारते। ६। ८। ५३। [क्षत्रा॥")
"काश्मीरा सिन्धुसौवीरा गान्धारा दर्शका
अपि, दर्शयिता। (यथा, कुमारे। ६। ५२।
"विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः॥")
प्रवीणः। इति मेदिनी। के, १०३॥ (प्रकाश-
कः। यथा, हितोपदेशे। १। ११।
"अज्ञैकसंग्रयोच्छेदि गरीयोऽर्थस्य दर्शकम्।
सर्व्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥"
दृश + ण्वुल्। द्रष्टा। यथा, महाभारते।
१। १४१। १७।
"दक्षाय: स्यादविद्वांसो नित्यं विवरदर्शकः।
राजन्यान्यं सपत्नेषु नित्योद्विग्नः समाचरेत्॥")
दर्शतः, पुं, (दृश्यते गगनमार्गे इति। दृश +
"भृञ्जदृशीति।" उणा। ३। ११०। इति
अतच्।) सूर्य्यः। चन्द्रः। इति सिद्धान्त-
कौमुद्यामुणादिवृत्तिः॥ (दर्शनीये, त्रि। यथा,
भट्टौ। १। ५१४। ७।
"यो विश्वतः प्रत्यदृङसि दर्शतो रथः संदृशौ
पितुर्न सूनवे यथः॥")
दर्शनं, क्ली, (दृश्यतेऽनेनेति। दृश् + करणे ल्युट्।)
नयनम्। स्वप्नः। बुद्धिः। धर्म्मः। उपलब्धिः।
दर्पणः। (दृश्यते यथार्थतत्त्वमनेनेति।)
शास्त्रम्। इति मेदिनी। ने, ७३॥ शास्त्रञ्च
द्विविधम्। वैशेषिकन्यायमीमांसाद्वयात-
ज्ञानवेदान्तरूपम्। एतानि तत्त्वज्ञानार्थं वेदान्
विचार्य्य कणादगोतमजैमिनिकपिलपतञ्जलि-
वेदव्यासाख्यैर्मुनिवरैः कृतानि॥ दृश्यते।
दृश् + भावे ल्युट्। वर्त्म। इति त्रिकाण्डशेषः॥ चाक्षुष-
ज्ञानम्। देखा इति भाषा। तत्पर्य्यायः।
निर्व्यर्णनम् २ निध्यानम् ३ आलोकनम् ४ ईक्ष-
णम् ५। इत्यमरः। १। २। २१॥ निभा-
क्षणम् ६। इति जटाधरः॥ *॥ (यथा, माघे।
१। ६। ६४।
"आकृत इव मे श्रोत्रं दर्शनं याति चेतसि॥")
पुण्यदर्शनानि यथा,—
नन्द उवाच।
"येषाञ्च दर्शने पुण्यं पापञ्च यस्य दर्शने।
तत् सर्व्वं वद सर्व्वज्ञ! श्रोतुं कौतूहलं हि मे॥
श्रीभगवानुवाच।
सुब्राह्मणानां तीर्थानां वैष्णवानाञ्च दर्शने।
देवताप्रतिमादर्शात् तीर्थस्नायी भवेन्नरः॥
सूर्य्यस्य दर्शने भक्त्या सतीनां दर्शने तथा।
सन्ध्याग्निनां यतीनाञ्च तथैव ब्रह्मचारिणाम्॥
भक्त्या गवाञ्च वह्नीनां गुरूणाञ्च विशेषतः।
गजेन्द्राणाञ्च सिंहानां श्वेताश्वानान्तथैव च॥
शुकानाञ्च शिकानाञ्च खञ्जनानान्तथैव च।
हंसानाञ्च मयूराणां चासानां शुक्लपक्षिणाम्॥
वत्सप्रयुक्तधेनूनामश्वत्थानां तथैव च।
पतिपुत्रवतीनाञ्च नराणां स्त्रीयुतात्मनाम्॥
प्रदीपानां सुवर्णानां रत्नानाञ्च विशेषतः।
मुक्तानां हीरकाणाञ्च माणिक्यानां महात्मनः।
तुलसीशङ्खपद्मानां दर्शनं पापनाशनम्।
कुशानि अक्षतान्नानि दूर्वां दधि मधूनि च॥
पूर्णकुम्भञ्च लाजाञ्च राजेन्द्र दर्शनं जलम्।
मालाञ्च शुक्लपुष्पाणां दृष्ट्वा पुण्यं लभेन्नरः॥
गोरोचनाञ्च कर्पूरं रजतञ्च सरोवरम्।
पुष्पोद्यानं पुष्पितञ्च दृष्ट्वा पुण्यं लभेन्नरः॥
देवाश्रितं देवगृहं सुगन्धिपवनं तथा।
शुक्लञ्च दुन्दुभिं दृष्ट्वा सद्यः पुण्यं लभेन्नरः॥
शुक्लपक्षस्य चन्द्रस्य पीयूषं चन्दनं तथा।
कस्तूरीं कुङ्कुमं दृष्ट्वा नन्द! पुण्यं लभेन्नरः॥
पताकामक्षयवटं तरुं देवोत्थितं शुभम्।
देवालयं देवखातं दृष्ट्वा पुण्यं लभेन्नरः॥
शुक्तिं प्रवालं रजतं स्फाटिकं कुशमूलकम्।
गङ्गाम्बुदं कुशं ताम्रं दृष्ट्वा पुण्यं लभेन्नरः॥
पुराणपुस्तकं शुद्धं सवीजं विष्णुयन्त्रकम्।
स्निग्धदूर्व्वाश्रितं रत्नं दृष्ट्वा पुण्यं लभेन्नरः॥
तपस्विनं सिद्धमन्त्रं सस्यं क्षणसारकम्।
यज्ञं महोत्सवं दृष्ट्वा सुपुण्यं लभते नरः॥
गोमूत्रं गोमयं दुग्धं गोधूलिं गोष्ठगोसदम्।
पक्वशस्यान्वितं क्षेत्रं दृष्ट्वा पुण्यं लभेन्नरः॥
रुचिरां पद्मिनीं श्यामां न्यग्रोधपरिमण्डलाम्।
सवेश्मकां सवसनां दिव्यभूषणभूषिताम्॥
वेश्यां वेशमदरीं गन्धं सदूर्व्वाक्षततण्डुलम्॥
सिद्धान्नं घरमान्नञ्च दृष्ट्वा पुण्यं लभेद्ध्रुवम्॥
कार्त्तिकीपूर्णिमायाञ्च राधिकाप्रतिमां शुभाम्
संपूज्य दृष्ट्वा नत्वा च करोति जन्मखण्डनम्॥
हिङ्गुलायां तथाष्टम्यामश्वे माघि सिते सुते।
गौड़ीप्रतिमां दृष्ट्वा करोति जन्मखण्डनम्॥
शिवरात्रौ च काश्याञ्च विल्वनाथस्य दर्शनम्।
कृत्वोपवासं पूजाञ्च करोति जन्मखण्डनम्॥
जन्माष्टमीदिने भक्त्या दृष्ट्वा मां विल्वमाधवम्।
प्रणम्य पूजां कृत्वा च करोति जन्मखण्डनम्॥
उपोष्य व्रजभूमौ च भाद्रे मासि सिते दिने।
संपूज्य राधां माधवं करोति जन्मखण्डनम्।

पौषे मासि शुक्लरात्रौ यत्र तत्र स्थले नरः।
पञ्चायाः प्रतिमां दृष्ट्वा करोति जन्मखण्डनम्॥
सप्तजन्म भवेत्तस्य पुत्रः पौत्रो धनेश्वरः॥
उपोष्यैकादशीं स्नात्वा प्रभाते द्वादशीदिने।
दृष्ट्वा काञ्चनमन्नपूर्णां करोति चण्डखण्डनम्॥
दत्त्वा विष्णुपदे पिण्डं विष्णुं यत्र प्रपूजयेत्।
पितॄणां स्वात्मनश्चैव करोति जन्मखण्डनम्॥
प्रयागे क्षवनं कृत्वा यत्र पितॄन् प्रतर्पयेत्।
उपोष्य नैमिषारण्ये करोति जन्मखण्डनम्॥
उपोष्य पुष्करे स्नात्वा किंवा वदरिकाश्रमे।
संपूज्य दृष्ट्वा मामेव करोति जन्मखण्डनम्॥
सिद्धां कृत्वा च वदरीं मुक्तो वदरिकाश्रमे।
दृष्ट्वा मत्प्रतिमां नन्द! करोति जन्मखण्डनम्॥
दोलायमानं गोविन्दं दृष्ट्वा वृन्दावने च माम्।
दृष्ट्वा संपूज्य नत्वा च करोति जन्मखण्डनम्॥
भाद्रे दृष्ट्वा च मथुरां मामेव मधुसूदनम्।
संपूज्य नत्वा भक्त्या च करोति जन्मखण्डनम्॥
रथस्थञ्च जगन्नाथं यो वीक्षति कलौ नरः।
संपूज्य भक्त्या नत्वा च करोति जन्मखण्डनम्॥
उत्तरायणसंक्रान्त्यां प्रयागे स्नानमाचरेत्।
संपूज्य नत्वा मामेव करोति जन्मखण्डनम्॥
कार्त्तिकीपूर्णिमायाञ्च दृष्ट्वा मत्प्रतिमां शुभाम्।
उपोष्य पूजां कृत्वा च करोति जन्मखण्डनम्॥
चन्द्रभागासमीपे च माघ्यान्तु मां नयेत् शुभैः।
राधया सह मां दृष्ट्वा करोति जन्मनः क्षयम्॥
रामेश्वरं सेतुबन्धे आषाढीपूर्णिमादिने॥
उपोष्य दृष्ट्वा संपूज्य करोति जन्मनः क्षयम्॥
दीनाथं दिनकरं लोलार्के चोत्तरायणे।
उपोष्य दृष्ट्वा संपूज्य करोति जन्मनः क्षयम्॥
कपिलोष्ठे सुवसने कलविङ्के सुगन्धरे।
विस्यन्दके राजकोष्ठे नन्दके पुण्यभद्रके॥
पार्वतीप्रतिमां दृष्ट्वा कार्त्तिकेयं गणेश्वरम्।
नन्दिनं शृङ्गरं दृष्ट्वा करोति जन्मनः क्षयम्॥
त्रिकूटे मलिभद्रे च पश्चिमोदधिसन्निधौ।
समुपोष्य दधि प्राश्य मां दृष्ट्वा मुक्तिमाप्नुयात्॥"

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डम्॥

दर्शनीयः, त्रि, (दृश्यते इति। दृश्+अनीयर्।) मनोज्ञः। इति भरतः॥ (यथा, महाभारते। ११। १५। ३०.

"अकुप्यद्यावि दद्यो देवी पटान्तरेण सा।
ततः स कृतशोभूतो दर्शनीयतनो नृपः॥")

दर्शनयोग्यः। इति शाकरत्नम्॥ (यथा, पञ्चतन्त्रे। ४। ४०।

"शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक!।
यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते॥")

दर्शयामिनी, स्त्री, (दर्शस्यामावास्याया इव यामिनी रात्रिः।) तमिस्रा। अन्धकाररात्रिः। इति हेमचन्द्रः। २। ५०॥ (दर्शस्य यामिनी इति विग्रहे। अमावास्यारात्रिश्च।)

दर्शयिता, [तृ] त्रि, (दर्शयतीति। दृश्+णिच्+"ण्वुल्तृचौ।" ३। १। १३३। इति तृच्।) दर्शकः। (यथा, महाभारते। ६। ३। ६१।

"प्रसादये त्वामतुलप्रभाव!
त्वं नो गतिर्दर्शयिता च धीरः॥")

प्रतीहारः। इति भरतः॥

दर्शविपत्, [द्] पुं, (दर्शे अमावास्यायां विपत् प्रणाशोऽदर्शनं यस्य।) चन्द्रः। इति हारावली। १३॥

दर्शितः, त्रि, (दृश्+णिच्+क्तः।) दर्शनं कारितः। तत्पर्य्यायः। प्रकाशितः २ आविष्कृतः ३ प्रकटितः ४। इति हेमचन्द्रः॥ (यथा, आर्य्यासप्तशत्याम्। २८६।

"दर्शितसकलनलोकाये भूविभ्रमभाजि वलति तव नयने।
चिह्नहले हलधर इव सर्वं पुरमर्ज्जितं सुतनु॥")

दल, क भेदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, दालयति गात्रं बाणः। इति दुर्गादासः॥

दल, मि भेदे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अकं च सेट्।) मि दलयत्यौ कुलद्म्भाभृतः। इति मुरारिः। दालयति। भेदो विदारणम्। दलति कुठारः काष्ठम्। क्वचिद्विदीर्णीभावे विकसने चायम्। श्रीमद्बाहुदण्डविदलत्कोदण्डचण्डध्वनिरिति महानाटकम्। दरविदलितमल्लीवल्लिपत्रत्परागेति जयदेवः। इति दुर्गादासः॥

दलं, क्ली, (दलतीति। दल+अच्।) उत्सेधः। खण्डम्। (यथा, मनुः। ८। २६६।

"भार्य्या पुत्रश्च दासश्च भ्रिष्यो भ्राता च सोदरः।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा॥")

शस्त्रीच्छदः। अपत्रथम्। पत्रम्। इति मेदिनी। ले, २६॥ (यथा, आर्य्यासप्तशत्याम्। ६६२।

"दृष्ट्वा तटिनि! तरङ्गैर्भमितस्कन्धेषु नाग्रये निहितः।
फलदलवल्कलरहितस्वयान्तरीचे तरुस्वत्तः॥")

धनम्। इति शब्दरत्नावली॥ तमालपत्रम्। इति राजनिर्घण्टः॥ अर्द्धम्। इति जीवानन्दः॥ (पुं, इक्ष्वाकुकुलोत्पन्नपरिप्लवराजपुत्रः। स च मद्भूकराजकन्यासम्भूतः। यथा, महाभारते। ३। १६२। ४४।

"अथ कस्यचित् कालस्य तस्यां कुमारा जज्ञिरे तस्य राज्ञः सप्तभूवुः शूलो दलो बलश्चेति॥")

वृत्तविशेषः। तत्पर्य्याया यथा,—

"वातपोतः पलाशः स्याद्दानशस्यश्च किंशुकः।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोत्तरः॥"

इति वैद्यकरत्नमालायाम्॥)

दलकोषः, पुं (दलान्येव कोषा यस्य। तस्य पुष्पेषु कोषाभावात् तथात्वम्।) कुन्दपुष्पवृक्षः इति शब्दमाला॥

दलनिर्मोकः, पुं, (दलति विदारयतीति दलं वल्कलम्। तदेव निर्मोक इवास्य।) भूर्जवृक्षः। इति शब्दमाला॥

दलनी, स्त्री, (दल्यते अनेनेति। दल+करणे ल्युट्। ङीप्।) लोष्टम्। इति शब्दरत्नावली।

डेला इति भाषा॥ (दलति विदारयतीति। दल+कर्त्तरि ल्युः ङीप् च।) भेदकर्त्तरि, त्रि। यथा,—

"सा दुर्गा भवभीतिरीतिशमनी लोकत्रयत्रायिणी
भूयाद्वः प्रतिपक्षपक्षदलनी वाञ्छाफलोल्लासिनी॥"

इति विद्वन्मोदतरङ्गिणी॥

दलपः, पुं, (दल्यते असौ दलति अनेन वा। दल+"उषिकुटिदलिकटिखजिभ्यः कपन्।" उणा०। ३। १४३। इति कपन्।) स्वर्णम्। शुक्लम्। इत्युणादिकोषः॥ (दलं यूथं पातीति। पा+कः। दलपतिः॥)

दलपुष्पा, स्त्री, (दलानि पत्राणीव पुष्पाण्यस्याः।) केतकी। इति राजनिर्घण्टः॥ (केतकीशब्देऽस्या विवरणं विलोक्यम्॥)

दलसारिणी, स्त्री, (सारोऽस्त्यस्या इति। सार+इनिः। ङीप् च। दले पत्रे सारिणी।) केसुकः। इति रत्नमाला॥

दलसूचिः, पुं, (दलस्य सूचिरिव।) कण्टकम्। इति हारावली। ६१॥

दलसेना, स्त्री, (दलस्य सेना स्वामिः।) पत्तिः। तत्पर्य्यायः। माढिः २। इति हेमचन्द्रः। ४। १६०॥

दलाढ्कः, पुं, (दलैराढ्क इव।) स्वयं जातलवणः। शृङ्गी। गैरिकम्। फेनः। खातकम्। नागकेशरः। मङ्कुतरः। इति मेदिनी। के, १८२॥ कुन्दः। करिकर्णः। गिरीषः। वाल्या। इति हेमचन्द्रः॥

दलाढ्यः, पुं, (दलेन भेदेन आढ्यः।) मङ्कुतरुवृक्षः। इति त्रिकाण्डशेषः॥ दलदनि इति भाषा॥

दलामलं, क्ली, (दलैः अमलम्।) मदनवृक्षः। मदनवृक्षः। इति मेदिनी। ले, १५५॥ मदनवृक्षः। इति शब्दरत्नावली॥

दलाम्लं, क्ली, (दलेषु अम्लो रसो यस्य।) चुक्रम्। इति राजनिर्घण्टः॥

दलिः, स्त्री, पुं, (दल्यते इति। दल+"सर्व्वधातुभ्य इन्।" उणा०। ४। ११७। इति इन्।) लोष्टम्। इति शब्दरत्नावली॥ दला इति डेला इति च भाषा॥

दलिकं, क्ली, (दल्यते भिद्यते इति। दल+इन्+कन्। ह्रस्वायां कन्।) काष्ठम्। इति हेमचन्द्रः। ४। १८८॥

दलितं, त्रि, (दलस्य जातम्। दल+तारकादित्वात् इतच्।) प्रफुल्लम्। इति हेमचन्द्रः। ४। १६४॥ (दल+क्त।) खण्डितम्। यथा,—

दलितालक्तमेदपुञ्जैत्यादि क्रमदीपिका॥ (यथा च प्रबोधचन्द्रोदये। २। ३५।

"दलितकुचनखाङ्कभङ्गपाली
रचय ममाङ्गरुहेषु वीरोध!॥"

विचित्रम्: यथा, आर्य्यासप्तशत्याम्। ३०५।

"दलिते पलालपुञ्जे दृषभं परिभक्षयन्त्यतिपतौ
कृषिणे।")

दशैकाग्नि:, पुं, (दशै एकश्चासावग्निश्च। दशन्शब्दस्य सप्तम्या अलुक् च।) सप्तर्षयस्तदाख्यः। इति त्रिकाण्डशेषः॥

दाम्भः, पुं, (दलति विशीर्णो भवत्यनेनेति। दल+"हलिभ्यां भः।" उणा०। ३। १५१। इति भः।) प्रतारणा। पापम्। सुनिभेदः। इत्यु-णादिकोषः॥ चक्रम। इति सिद्धान्तकौमुदा-मुणादिवृत्तिः॥

दाक्षः, पुं, (दलति विदारयति असुरानिति। दल+"दक्षिः।" उणा०।४।३७। इति मिः।) इन्द्रः। इति हेमचन्द्रः। २। ८६॥ (दल्यते अनेनेति।) वज्रम्। इति सिद्धान्तकौमुदा-मुणादिवृत्तिः॥

दश, ट्र क्षये। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ट्र, दन्यते। क्षयो गतिः। इति दुर्गादासः॥

दृः, पुं, (दुनोति पीड़यतीति। दु+अच्।) वनम्। वनाग्निः। इत्यमरः।२। ३। २०५॥ (यथा, भागवते। ८। ६। १३।

"दृष्ट्वा गता निर्वृतिमद्य सर्व्वे
गना इवार्त्ता इव गाङ्गमम्भः॥")

अग्निः। इत्यमरटीकायां भरतः॥ (दु उपतापे+"ऋदोरप्।"३। ३। ५७। इत्यप्।) उपतापः। इति केचित्॥

दवथुः, पुं, (दवनमिति। दु दु उपतापे+"हितो-ऽथुच्।" ३।३।८६। इति भावे अथुच्।) परि-तापः। इति जटाधरः॥ (यथा, काशीखण्डे। २६। ८६।

"दुरोदरस्त्री दावार्त्तिर्दैवदग्धैकशैवधिः।
दीनसन्तापशमनी दात्री दवथुवैरिणी॥"

दूयतेऽनेनेति। करणे अथुच्।) चक्षुरादि-दाहः। इति राजनिर्घण्टः॥

दवाग्निः, पुं, (दवानां वनानामग्निः। यद्वा, दव एवाग्निः।) दावानलः। इति द्विरूपकोषः॥ (यथा, मेघदूते। ५५।

"क्षेदाथौ सरति सवलस्कन्धसंघट्टजन्मा-
वाधीतोल्का क्षपितचमरी बालभारो दवाग्निः॥")

दविष्ठः, त्रि, (अयमेषामतिशयेन दूर इति। दूर+ इष्ठन्। "स्थूलदूरयुवेति।"६। ४। १५६। इति रस्य लुप् ऊकारस्य च गुणः।) सुदूरः। अत्यन्तदूरवर्त्ती। इत्यमरः। ३। १। ६६॥

दवीयान्, [स्] त्रि, (इदमनयोरतिशयेन दूरम्। दूर+ईयसुन्। स्थूलदूरेत्यादिना साधुः।) सुदूरः। इत्यमरः। ३। १। ६६॥ (यथा, प्रद्युम्नविजये। २। १६।

"कोऽयमान् दवीयांसमपीन्दुबिम्बं
न वेद यदाभिमिन्द्रमौलेः।
पातालधामानमपि प्रविष्टं
न वाडवं सुन्दरि! वेद को वा॥")

दश, ट्र क लिखि। इति कविकल्पद्रुमः॥ (चुरां-परं-अर्कं-सेट्। ट्र कं, दंशयति। लिखि दौत्यौ। इति दुर्गादासः॥

दश, ट्र क ड दर्शे। दंशने। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सर्कं-सेट्।) ट्र क ड, दंशयते। दर्शो दर्शनम्। इति दुर्गादासः॥

दश, [न्] त्रि, (दंशयति दीर्य्यते इति। दृशि +बाहुलकात् कनिन्। "दृनृभ्र दंशने। न लोपः।" इत्यौणादिकसूत्रम्।१। १५६।) संख्या-विशेषः। द्विगुणितनवक १०। (यथा, महाभारते। ३। १३४ १०।

"दिशो दशोक्ताः पुरुषस्य लोके
सहस्रमाहुर्दशपूर्णं शतानि।
दशैव मासान् बिभ्रति गर्भवत्यो
दशैरका दश दाम्ना दशार्हाः॥")

दशकाम्रकाणि यथा। हस्तपुङ्गलिः १ ग्रम्भुबाहुः २ रावणमस्तकम् ३ कृष्णावतारः ४ दिक् ५ विश्वदेवः ६ अवस्था ७ चन्द्राश्वः ८ पंक्तिः ९। इति कविकल्पलता॥ बहुवचनान्तोऽयं शब्दः। तत्संख्याविशिष्टः। इत्यमरः। २। ६। ६१॥

दशकण्ठः, पुं, (दश कण्ठा गला यस्य।) रावणः। इति शब्दरत्नावली॥ (यथा, रघुः। ८। २६।

"दशपूर्व्वरथं यमाख्यया
दशकण्ठारिरिपुं विदुर्बुधाः॥")

दशकन्यजित्, पुं, (दशकन्यं रावणं जयतीति। जि+क्विप् तुक् च।) रामः। इति त्रिकाण्ड-शेषः॥

दशकन्धरः, पुं, (दश कन्धरा ग्रीवा यस्य।) रावणः। इति हेमचन्द्रः। ३। ३७०॥ (यथा, भागवते। २। ७। २३।

"असत्प्रसादसुमुखः कलया कलेश
इक्ष्वाकुवंश अवतीर्य्य गुरोर्निदेशे।
तिष्ठन् वनं सदयितानुज आविवेश
यस्मिन् विरुध्य दशकन्धर आर्त्तिमार्च्छत्॥")

दशग्रीवः, पुं, (दश ग्रीवा यस्य।) रावणः। इति शब्दमाला॥ (यथा, महाभारते। ३।२७४।१०।

"दशग्रीवस्तु सर्व्वेषां श्रेष्ठो राक्षसपुङ्गवः।
महोत्साहो महावीर्य्यो महासत्त्वपरा-
क्रमः॥")

एकादशमन्वन्तरीयदृषनामकेऽङ्गभुविशेषः। यथा,—

"रुद्रपुत्रस्य ते पुत्रान् वक्ष्याम्येकादशस्य तु।
सर्व्वत्रगः सुधर्म्मा च देवानीकः पुरुर्गुरुः॥
चित्रबह्वा दृढायुश्च आर्द्रकः पुत्रकस्तथा।
हविष्मांश्च हविष्यश्च वरुणो विश्वविस्तरः॥
विष्णुश्चैवाग्नितेजाश्च ऋषयः सप्त कीर्त्तिताः।
विहङ्गमाः कामगमा निर्म्माणरुचयस्तथा॥
एकैकस्मिंश्चकस्मेषां गणाश्चैवैक वै दृषः।
दशग्रीवो रिपुस्तस्य स्त्रीरूपो घातयिष्यति॥"

इति गरुड़े ८७ अध्यायः॥

(असुरविशेषः। यथा महाभारते।२।६।१४।

"दशग्रीवश्च बाली च मेघवासा दशारुधः॥"

दमघोषस्य पुत्रविशेषः। यथा, हरिवंशे। ११६। २२।

"दमघोषश्च पुत्रास्तु पञ्च भीमपराक्रमाः।
भार्य्या वासुदेवस्य श्रुतश्रवसि जज्ञिरे।
शिशुपालो दशग्रीवो रेभोऽथोपदिशो
ऽवधीत्॥")

दशति:, स्त्री, (दशाट्टत्या दश। निपातनात् साधुः।) शतम्। इति महाभारते दानधर्म्मः॥ (यथा, महाभारते। १। १६। १३।

"कालेन महता कद्रूरवाप्तानां दशतीर्दश।
जनयामास विप्रेन्द्र! ये चाक्षे विनता तथा॥"

"यथा नव दशाट्टत्या नवतिस्तथा दश दश-ट्टत्या दशतः शतमित्यर्थः। दश दशतीर्दश-शतानीत्यर्थः॥" इति तत्र नीलकण्ठः॥)

दशधा, अ, (दशानां प्रकारः। दश+"संख्याया विधार्थे धा।" ५। ३। ४२। इति धा।) दश प्रकारम्। इति व्याकरणम्॥ (यथा, ऋक्। ६। १५२।

"सर्व्वं वा रिक्थजातन्तु दशधा परिकल्पय च।
धर्म्म्यं विभागं कुर्व्वीत विधिनानेन धर्म्म-
वित्॥")

दशन, क्ली, (दश्यते इव शरीरमनेनेति। दृशु+ करणे ल्युट्। दहदशेति निर्देशात् क्वचिद-कित्यपि नलोपः।) कवचम्। शिखरे, पुं। इति मेदिनी। ने, ७४॥

दशन:, पुं, क्ली, (दश्यतेऽनेनेति। दृशु+ ल्युट्। दहदशेति निर्देशात् अत्र अकित्यपि न-लोपः।) दन्तः। इत्यमरभरतौ॥ (यथा, रघुः। ५। ५२।

"उवाच वाग्मी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः॥")

दशनवास:, [स्] क्ली, (दशनानां वास इव आच्छा-दकत्वात्।) ओष्ठः। इत्यमरः। २। ६। ८०॥

दशनाढ्या, स्त्री, (दशनः आढ्यो यस्याः। एतत् सेवनेन हि दन्तस्य दार्ढ्यात् अस्य तथा-त्वम्।) गुञ्जिका। इति शब्दचन्द्रिका॥

दशनोच्छिष्टः, पुं, निश्वासः। (दशनेन उच्छिष्टः।) अधरचुम्बनम्। इति मेदिनी। टे, ६२। दन्त-त्यक्ते, त्रि॥

दशधारमिताधरः, पुं, बुद्धः। इति हेमचन्द्रः। २। १४७॥

दशपुरं, क्ली, (दश दिशः पिपर्त्तीति। प+ कः।) कैवर्त्तोस्तकम्। इत्यमरः। २। ४। १३१॥ (दश पुरो यत्र। "ऋक्पूरब्धूः पथामानक्षे।" ५। ४। ७४। इति अः।) देशभेदः। स मालवदेशैकदेशः। पुरभेदः। इति मेदिनी। रे, २६६॥ (यथा, मेघदूते। ४६।

"कुन्दक्षेपानुगमधुकरश्रीयुषामात्मबिम्बं
पात्रीकुर्व्वन् दशपुरवधूनेत्रकौतूहलानाम्॥")

दशपूरम् क्ली, (दश दिशः पूरयतीति। पूर+ अच्।) दशपुरम्। इत्यमरटीकायां भरतः॥

दशफल:, पुं, (दशत दिक्षु फलं यस्य। यद्वा, "दाडिमीलवणाजीर्णकाम्लाम्लफलानि च।

सोऽपि तत्फलमाप्नोति गङ्गां संपूज्य यत्नतः।' इति स्कान्दे प्रतिपदादिदशमीपर्य्यन्तदिनदृद्धिसंख्यया पठनीयमिति श्रिष्टाः। अत्र सर्व्वोऽपि विस्तरः स्कान्दादिके भट्टकृतनिबन्धसौरीतोरवधेयः। विस्तरभीतेस्तु न लिख्यते। * । एवं कुर्व्वतः फलमुक्तं काश्यीखण्डे।

'एवं ज्ञात्वा विधानेन वित्तशाठ्यविवर्ज्जितः।
उपवासी वत्सरादेर्दशपापैः प्रमुच्यते।
सर्व्वान् कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते॥'
इति।

अस्यां सेतुबन्धरामेश्वरस्य प्रतिष्ठादिनत्वात् विशेषेण पूजा कार्य्या। तदुक्तं स्कान्दे सेतुमाहात्म्ये।

'ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः।
गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ।
दशयोगे सेतुमध्ये लिङ्गरूपधरं हरम्।
रामो वै स्थापयामास शिवलिङ्गमनुत्तममिति॥"
इति निर्णयसिन्धुद्वितीयपरिच्छेदे संवत्सरकृत्यम्॥ किञ्च।

"अद्य हस्ते तु नक्षत्रे दशम्यां ज्येष्ठके सिते।
दशपापहरायाञ्च अतस्तामावकल्पयम्॥
विरुद्धाचरणं हिंसा परदारोपसेवनम्।
पारुष्यानृतपैशुन्यमसम्बद्धञ्च भाषणम्॥
परद्रव्याभिध्यानञ्च मनसानिष्टचिन्तनम्।
एतद्दशाघघाताय गङ्गाम्भः करोम्यहम्॥"
इति गारुडे २१५ अध्यायः। * ॥

अपरञ्च।

"ज्येष्ठे दशहरायान्तु निशीथे हि नृप! प्रभो!।
येन वा विधिना कार्य्या तेष्टिर्विप्रोनृपैः सदा॥
प्रत्यब्दं पार्थिवः कुर्य्यात् प्रतिमां काष्ठवीं हरेः।
अन्यतेजोमयीं वापि दारवीं वा शिलामयीम्॥
प्रतिष्ठां विधिवत्तस्याः कुर्य्याद्विप्रः पुरोहितः।
तां संस्थाप्य हरागारे स्वयं वा यजतः क्षिते॥
वासुदेवस्य बीजेन पूर्व्वोक्तविधिना तथा।
सर्व्वोपचारैर्भक्त्या तु वासुदेवं प्रपूजयेत्॥
पूजान्ते संस्कृते वह्नौ कुण्डमध्ये स्थितो द्विजः।
आज्यैः सहस्रं जुहुयादाहुतीनां हरेः क्षिते॥
संपूर्ण्य वासुदेवन्तु होमं कृत्वा ततो द्विजः।
नृपस्यानुमते तान्तु प्रतिमां मस्तके नयेत्॥
प्रतिमायाः कपोलौ द्वौ कृष्णा दक्षिणपाणिना।
प्राणप्रतिष्ठां कुर्व्वीत तस्यां देवस्य वै हरेः॥
कृतायान्तु प्रतिष्ठायां प्राणानां नृपसत्तम!।
विष्णोः प्राणास्तु प्रतिमामायान्ति नियतं स्वयम्॥
प्राणेष्वथागतेषु स्याद्देवत्वं नियतं भवेत्।
अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च॥
यथा पूर्व्वं तथा भावः सर्व्वादीनां न विद्यते॥
अन्येषामपि देवानां प्रतिमास्वपि पार्थिव!।
प्राणप्रतिष्ठा कर्त्तव्या तस्या देवत्वसिद्धये॥
सुवर्णेन सुवर्णं स्यात् शिला दारु तथा शिला।
अन्यच्च मृद्रूपं स्यात् प्राणस्थानन्तु सर्व्वदा॥
वासुदेवस्य बीजेन तद्विप्रोरिष्टनेन च।
तज्जेवाङ्घ्रिसमाख्यां प्रतिष्ठामाचरेद्धरेः॥
तयैव हृदयेऽभीष्टं दत्त्वा मन्त्रवित्।
एभिर्मन्त्रैः प्रतिष्ठान्तु हृदयेऽपि समाचरेत्॥
अस्मे प्राणाः प्रतिष्ठन्तु अस्मे प्राणाः चरन्तु च।
अस्मे देवत्वसञ्जाये स्वाहेति यजुरुच्चरन्॥
अङ्गमन्त्रैरङ्गमन्त्रैर्व्वैदिकैरितरेण च।
प्राणप्रतिष्ठां सर्व्वत्र प्रतिमासु समाचरेत्॥
प्रतिमापूजने कुर्य्यादात्मन्यपि च मन्त्रवित्।
प्राणप्रतिष्ठां प्रथमं पूजाभागविशुद्धये॥
अस्मिन् प्राणप्रतिष्ठान्तु प्रतिमापूजनादते।
न क्वचित्तु बुधः कुर्य्यात् ज्ञात्वा तत्फलमाप्नुयात्॥
विष्णोरिदमिमां ज्ञात्वा दशम्यां पार्थिवोत्तमः।
तस्यामेव तु पूर्व्वायां प्रतिमां स्थापयेत्ततः॥
एवं दशहरायान्तु ज्ञात्वेष्टिं पार्थिवो हरेः।
सर्व्वान् कामानवाप्नोति निर्व्विघ्नोऽपि स
जायते॥"
इति कालिकापुराणे ८८ अध्यायः॥

दशा, स्त्री, (दशतीव। दंशृ + ऋज्वादिभ्यः कः। जपजभदहदशेति निर्देशात् अकित्वेऽपि नलोपः। यद्वा, दश्नते इति। गुरोश्चेत्यङ्। ततष्टाप्।) अवस्था। (यथा, पञ्चतन्त्रे १।३८१।

"आपदि येनोपकृतं येन च हसितं दशासु विषमासु।
उपकृत्य तयोरुभयोः पुनरपि जातं गतं मन्ये॥")
दीपवर्त्तिः। (यथा, कुमारे। ४। ३०।

"अहमस्य दशेव पक्ष्म मा-
मविषह्यव्यसनेन धूमिताम्॥")
वस्त्राग्ने बहुवचनान्तोऽयं शब्दः। इति मेदिनी। शे, ८॥ (यथा, मनुः। ३। ४४।

"वसनस्य दशा गाव्या भूषयोत्कृष्टवेदने॥")
चेतः। रत्नजयपालः। * ॥ शरीरस्य दशा दशा यथा,—

गर्भवासः १ जन्म २ बाल्यम् ३ कौमारम् ४ पौगण्डम् ५ यौवनम् ६ स्थाविर्य्यम् ७ जरा ८ प्राग्भारोधः ९ नाशः १०। इति मोक्षधर्म्मटीकायां नीलकण्ठः॥* ॥ कामजदशदशा यथा,

"पञ्चरागरक्तदृशं मनसः सङ्कल्पितभावना च
चाष्टतिः स्यात्तदशु विषयव्यामतश्चेतसोऽपि।
निद्राच्छेदस्तदशु तनुता निश्चलं ततोऽनु-
न्मादो मूर्च्छा तदनु मरणं स्युर्दशाः प्रक्रमेण॥"
इत्यलङ्कारग्रन्थम्॥ * ॥

कर्म्मणो नरायां यथोक्तायुषः सूर्य्यादग्रहभोग्यादंशविशेषः। तत्र वार्षिकी दशा यथा,—

"षट् सूर्य्यस्य दशा ज्ञेया मन्त्रिणो दशपञ्च च।
अष्टावङ्गारके प्रोक्ता बुधे सप्तदश स्मृताः॥
शनैश्चरे दश प्रोक्ता गुरोरेकोनविंशतिः।
राहोर्द्विदशवर्षाणि भृगोरेकविंशतिः॥"*॥
जन्मकालीननक्षत्रविशेषघटितग्रहाणां दशानियमो यथा,—

"कृत्तिकादित्रये सूर्य्यः मृगो रौद्रचतुष्टये।
मघादाश्लेषये भौमो बुधो हस्तचतुष्टये॥
अनुराधात्रये शौरिर्गुरुः पूर्व्वचतुष्टये।
धनिष्ठात्रितये राहुः शेषे शुक्रचतुष्टये॥ * ॥
सूर्य्योपप्लवभौमार्किदशातिकष्टदा नृणाम्।
गुरुचन्द्रज्ञशुक्राणां यथेप्सितफलप्रदाः॥"
दशाफलन्तु।

"उद्विग्नचित्तपरिखेदितवित्तनाश-
क्लेशप्रवासगदभीतिमहाभिघाताः।
संक्षोभितं स्वजनबन्धुवियोगदुःख-
भागोर्कदशा भवति कष्टकरी नराणाम्॥१॥
सौख्यं विभर्त्ति वरवाहनयानरत्न-
कीर्त्तिप्रतापबलवीर्य्यसुभान्वितञ्च।
मिष्टान्नपानशयनासनभोजनानि
चन्द्रो ददाति धनकाञ्चनभूमिसंघम्॥२॥
भ्रात्राभिघातवधबन्धनरेन्द्रपीड़ां
चित्तास्थिरं विकलतान्च गृहे करोति।
चौराग्निदाहभयभङ्गविपत्तिरोग-
कीर्त्तिप्रतापधनहा च दशा कुजस्य॥३॥
दिव्यान्नवाहनधनप्रभुजन्मवर्षं
लीलाविलासशयनासनभोजनञ्च।
नानाप्रकारविभवागमकोषवृद्धिः
शिघ्रं भवेद्बुधदशासु हितार्थसिद्धिः॥४॥
मिथ्यापवादवधबन्धनशार्य्यङ्गानि-
र्मानस्वर्य्यसुकप्रियसुखक्षयविग्रहैर्वा।
मैत्रे च वैरमभिवाञ्छति वैरयुक्तः
कष्टासु पापदृशासु शनैश्चरस्य॥५॥
रम्यं गृहं विनयसञ्चयमागवृद्धिं
प्राप्नोति सौख्यधनधान्यविभूतियुक्तम्।
धर्म्मार्थकामसुखभोगवधूपयोगं
यावद्दृढस्य तिदृशा पुरुषो हि तावत्॥६॥
वृद्धा विहीनमतिनाशवियोगदुःख-
नष्टार्थसिद्धिभयभङ्गविषार्त्तिरोगम्।
सन्तापशोकपरदेशगतं करोति
राहोर्दृशा भवति जीवनसंशयाय॥७॥
मन्त्रप्रभावनिपुणाः प्रमदाविलासाः
श्वेतातपत्रनृपपूजितदेशलाभाः।
हस्त्यश्वलाभधनपूर्णमनोरथश्च
शुक्रीदृशा भवति निश्चितराजलक्ष्मीः॥८॥

रवेरन्तर्दशा मासाः ६ तस्य फलम्।

उद्विग्नचित्तपरिखेदितवित्तनाश-
क्लेशप्रवासगदभीतिमहाभिघातम्।
दुःखप्रयोगवधबन्धभयानि चैव
भानोर्दृशा प्रकुरुते खलु राजपीड़ाम्॥१॥

सोमस्य मासाः १० फलम्।

गदसङ्कटसंत्रासं स्वेच्छाहानिं मनःक्षतिम्।
कुरुते रजनीनाथो भानोरन्तर्दशां गतः॥२॥

मङ्गलस्य मासाः ५ दिनम् १० फलम्।

सर्व्वेषां तिलको भूत्वा मणिरत्नप्रधानकम्।
प्राप्नोति धनधान्यानि रवेरन्तर्गते कुजे॥३॥

बुधस्य मासाः ११ दिनम् १० फलम्।

व्याधिः शत्रुभयं नित्यं सर्व्वगात्रे विचर्च्चिका।
नश्यन्ति सर्व्वकार्य्याणि भानोरन्तर्गते बुधे॥४॥

शनैर्मासाः ६ दिनम् २० फलम्।

सन्तापं वित्तनाशञ्च बन्धुनाशं पराभवम्।
सौरिः करोति वैकल्यं भानोरन्तर्दशां गतः॥५॥

दशा

गुरोर्वर्षः १ दिनम् २० फलम् ।
धर्मार्थकर्मसाख्यानि ददाति विबुधार्चितः ।
कृष्णादिगविपिङ्गाक्षो भानोः पाकदशागतः ॥६॥
राहोर्मायुः ८ फलम् ।
चक्षुर्भानुभवं द्वेषं चारभीतिसंतप्तताम् ।
कुरुते सिंहिकासूनू रविपाकदशां गतः ॥७॥
शुक्रस्य वर्षः १ मासौ २ फलम् ।
कौक्षीवाश्मिरोरोगज्वरान् शूलादिदारुणान् ।
शोकं करोति भृगुजः स्वदशान्तर्दशां गतः ॥८॥
एवं वर्षाः ८ ॥ * ॥ चन्द्रस्य स्थूलदशावर्षाः १५

तस्येशान्तर्दशार्वी २ मासः १ फलम् ।

कर्णादिमनिगरवाङ्गवक्त्रपच-
क्षेत्रव्रतपवलवीर्यसमन्वितानि ।
मिष्टान्नपानशयनासनभोजनानि
चान्द्रौ दशा प्रचुरकाञ्चनभूमिदात्री ॥

कुजस्य वर्षः १ मासः १ दिनानि १० फलम् ।
पित्तशोणितपीडाश्च चौरादीनां भयन्तथा ।
मङ्गलः कुरुते नित्यं विधोरन्तर्दशां गतः ॥
बुधस्य वर्षौ २ मासाः ४ दिनानि १० फलम् ।
सर्वत्र द्रव्यलाभश्च गजाश्वौषधानि च ।
चन्द्रजः कुरुते सौख्यं विधोरन्तर्दशाङ्गतः ॥
गुरोर्वर्षः १ मासः ४ दिनानि २० फलम् ।
बन्धुक्लेशं नृपाद्भीतिं व्यसनं शोकसम्भवम् ।
विनाशं कुरुते सौरिश्चन्द्रस्यान्तर्दशाङ्गतः ॥
गुरोर्वर्षौ २ मासाः ७ दिनानि २० फलम् ।
दानसौख्यानि सम्भोगं वस्त्रालङ्कारभूषणम् ।
कुरुते विबुधाचार्यो विधोरन्तर्दशाङ्गतः ।
राहोर्वर्षः १ मासाः ८ फलम् ॥
वह्निशत्रुभयं दुःखं शोकं बन्धुधनक्षयम् ।
कुरुते राहुरत्यर्थं चन्द्रपाकदशाङ्गतः ॥
शुक्रस्य वर्षौ २ मासाः ११ फलम् ।
सेव्यते वरनारीभिर्नरो लक्ष्मीञ्च वर्धते ।
मुक्ताहारमणिप्राप्तिर्विधोरन्तर्गते सिते ॥
रवेर्मासाः १० फलम् ।
ऐश्वर्यं बन्धुसौख्यञ्च व्याधिनाशमरिक्षयम् ।
नृपतेर्नो रविः कुर्याद्विधोः पाकदशाङ्गतः ॥
एवं वर्षाः १५ ॥*॥ कुजस्य स्थूलदशावर्षाः ८ ।
तस्यान्तर्दशामासाः ७ दिनानि ३।२०। फलम् ।

क्रूराभिधानत्वसबन्धुभयानि धत्ते
चिन्ताज्वरं विकलभूक्षयदाश्रमञ्च ।
चौरादिभीतिधनहानिरनेत्रपीडाः
कुर्याद्दिनाधिपनिधनञ्च दशा कुजस्य ॥

बुधस्य वर्षौ १ । ३ । ३ । २० । फलम् ।
परमैश्वर्यमतुलं नानाविधसुखाश्रयम् ।
करोति सोमपुत्रश्च क्षितिजान्तर्दशाङ्गतः ॥
शनेर्मासाः ८ । २६ । ४० । फलम् ।
रिपुचौरव्यभीतिश्च रोगमन्तरसम्भवम् ।
महाजनकलो द्वेषः कुजस्यान्तर्गते शनौ ॥
गुरोर्वर्षः १ । ४ । २३ । ४० । फलम् ।
पुष्पधूपान्नवस्त्राद्यैर्देवब्राह्मणपूजनम् ।
नृपतुल्यत्वमाप्नोति कुजस्यान्तर्गते गुरौ ॥
राहोर्मासाः १० । २० । फलम् ।

दशा

आत्मकार्यार्थसुहृदं बन्धचौरादिसाध्वसम् ।
कुरुते सिंहिकापुत्रो भौमस्यान्तर्दशाङ्गतः ॥
बुधस्य वर्षः १ । ६ । २० । फलम् ।
धनवृद्धिं सुखादींश्च नानावस्त्रं वरस्त्रियः ।
प्राप्नोति विपुलां लक्ष्मीं कुजस्यान्तर्गते भृगौ ॥
रवेर्मासाः ५ । १० । फलम् ।
नानारत्नञ्च सौख्यञ्च भूमिलाभमथापि वा ।
नृपपूजामवाप्नोति कुजस्यान्तर्गते रवौ ॥
सोमस्य वर्षः १ । १ । १० । फलम् ।
धनलाभं सुखं भोगं शरीरारोग्यमेव च ।
लोकानन्दमवाप्नोति क्षितिजान्तर्गते विधौ ॥
एवं वर्षाः ८ ॥ * ॥ बुधस्य स्थूलदशावर्षाः १७ ।
तस्यान्तर्दशा २ । ८ । ३ । २० । फलम् ।

दिव्याङ्गनावदनपङ्कजषट्पदत्वं
लीलाविलासवरभोगसुखोदयञ्च ।
नानाप्रकारविभवागमकोषवृद्धिं
क्षिप्रं क्षजेद्बुधदशा प्रबलाश्च सिद्धिम् ॥

शनेर्वर्षः १ । ५ । २६ । ४० । फलम् ।
वातश्लेष्मजता पीडा विरहो बन्धुभिः सह ।
विदेशगमनञ्चैव बुधस्यान्तर्गते शनौ ॥
गुरोर्वर्षौ २ । ११ । २६ । ४० । फलम् ।
व्याधिशत्रुभयत्यक्तो धनाढ्यो नृपवल्लभः ।
लभेद्भार्यां सुपुत्रञ्च बुधस्यान्तर्गते गुरौ ॥
राहोर्वर्षः १ । १० । २० । फलम् ।
बन्धुनाशं मनस्तापं देशत्यागञ्च बन्धनम् ।
करोति बहुदुःखानि बुधस्यान्तर्गतस्तमः ।
शुक्रस्य वर्षाः ३ । ३ । २० । फलम् ।
धनाढ्यं बन्धुपुत्रञ्च धर्मवन्तं धनागमम् ।
कुरुते दानवाचार्यो बुधपाकदशाङ्गतः ॥
रवेर्मासाः ११ दिनानि १० । फलम् ।
श्रिया परमया युक्तो गजवाजिधनान्वितः ।
प्रभाकरः करोत्याशु बुधपाकदशाङ्गतः ॥
सोमस्य वर्षौ २ । ४ । १० । फलम् ।
कण्टकादिप्रवेशश्च ऋक्षिभ्यो भयमेव च ।
निशाकरः करोत्याशु बुधपाकदशाङ्गतः ॥
कुजस्य वर्षः १ । ३ । ३ । २० । फलम् ।
कफपित्तसमुद्भूता शिरःपीडा भयावहाम् ।
भाग्यं करोते श्लोकं बुधस्यान्तर्दशाङ्गतः ॥
एवं वर्षाः १७ ॥*॥ शनेः स्थूलदशावर्षाः १० ।
अस्यान्तर्दशामासाः ११ । ३ । २० । फलम् ।

मिथ्यापवादवधबन्धनिराश्रयत्वं
चौरादिभूपतिशुजङ्गभभीतिसुग्राम् ।
व्याधानिराश्रमथ चाञ्चनकार्यहानिं
यच्छेदशा प्रकुरुते नियतं नराणाम् ॥

गुरोर्वर्षः १ । ६ । ३ । २० । फलम् ।
देवतागुरुतं ज्ञानं नानाप्राप्तिं करोति च ।
तुङ्गसौख्यसमायुक्तं शनेरन्तर्गतो गुरुः ॥
राहोर्वर्षः १ । १ । १० । फलम् ।
नृपाद्भयं ज्वरं घोरं दुःखञ्च प्राणसंशयम् ।
धनक्षयञ्च कुरुते शनेरन्तर्गतस्तमः ॥
बुधस्य वर्षः १ । ११ । १० । फलम् ।
सुहृद्बन्धुधनैः पूर्णो भार्यावित्तसमन्वितः ।

दशा

स्वर्गं सुखञ्च लभते सौरस्यान्तर्गते सिते ॥
रवेर्मासाः ६ । २० । फलम् ।
परदाराभिगमनं करोति खरदीधितिः ।
जीवनस्य च सन्देहं शनेरन्तर्दशाङ्गतः ॥
सोमस्य वर्षः १ । ४ । २० । फलम् ।
स्त्रीनाशं कुष्ठिरोगञ्च कफपित्तगदं शशी ।
बन्धुद्वेषञ्च कुरुते शनेरन्तर्दशाङ्गतः ॥
कुजस्य मासाः ८ । २६ । ४० । फलम् ।
देहक्लेशं महारोगं नानादुःखानि भूमजः ।
धननाशञ्च कुरुते शनेरन्तर्दशाङ्गतः ॥
बुधस्य वर्षः १ । ६ । २६ । ४० । फलम् ।
आरोग्यं विजयं राज्यं बहुवित्तानि सोमजः ।
करोति चादरं लोके शनेरन्तर्दशाङ्गतः ॥
एवं वर्षाः १० ॥*॥ गुरोः स्थूलदशावर्षाः १६ ।
तस्यैवान्तर्दशावर्षाः ३ । ४ । ३ । २० । फलम् ।

राज्यासादं तनयवित्तविलासभोगान्
पर्य्याप्तसौख्यधनधान्यसमाश्रयञ्च ।
विद्याप्रसादवररत्नसुखार्थभोग-
सिद्धिं दशा सुरगुरोः कुरुते प्रियत्वम् ॥

राहोर्वर्षौ २ । १ । १० । फलम् ।
बन्धुद्वेषं स्त्रधावादं स्थानभ्रंशं निराश्रयम् ।
कलहं कारयेद्राहुर्गुरोरन्तर्दशाङ्गतः ॥
शुक्रस्य वर्षाः ३ । ८ । १० । फलम् ।
कलहं बन्धुभिः सार्द्धं वित्तनाशं मनःक्षतिम् ।
स्त्रीवियोगञ्च कुरुते जीवस्यान्तर्गतः सितः ॥
रवेर्वर्षः १ । दिनानि २० । फलम् ।
बहुमित्रं बहुधनं सौभाग्यं राजवल्लभम् ।
कुरुते भास्करः प्राप्तिं गुरोरन्तर्दशाङ्गतः ॥
सोमस्य वर्षौ २ । ७ । २० । फलम् ।
भोगाढ्यो बहुभार्यः स्यादिपुरोगविवर्जितः ।
नृपतुल्यो भवेच्चैव गुरोरन्तर्दशाङ्गतः ॥
कुजस्य वर्षः १ । ४ । २६ । ४० । फलम् ।
शौर्यशत्रोर्वो रिपोर्हन्ता गजवह्नीमदर्शनः ।
सुखसौभाग्यसंयुक्तः कुजे चान्तर्गते गुरोः ॥
बुधस्य वर्षौ २ । ११ । २६ । ४० । फलम् ।
सुखी सुखः सुखी दुःखी शुभवृद्धिः पुनः पुनः ।
देवाद्वैवमरं नित्यं जीवस्यान्तर्गते बुधे ॥
शनेर्वर्षः १ । ६ । ३ । २० । फलम् ।
वेश्यान्नाश्रयगात सौख्यं भवेद्वित्तविवर्जितः ।
सुमनोतिमना नित्यं गुरोरन्तर्गते शनौ ॥
एवं वर्षाः १६ ॥ * ॥ राहोः स्थूलदशावर्षाः १२ । तस्यान्तर्दशावर्षः १ । ४ । फलम् ।

भार्यादिदूषण-निदानविवादवन्ध-
शस्त्राभिघातभयदीनपराक्रमञ्च ।
अप्राप्तसौख्यधनकाञ्चनदीनदेहो
राहोर्दशा भवति जीवनसंशयाय ॥

शुक्रस्य वर्षौ २ । मासाः ४ । फलम् ।
शिरोरोगं कुदेहञ्च कुर्याद्भार्याञ्च चञ्चलाम् ।
बान्धवैः कलहो नित्यं राहोरन्तर्गते भृगौ ॥
रवेर्मासाः ८ । फलम् ।
शिरोरोगभयं घोरं ज्वरं शोकञ्च दारुणम् ।
हृद्रुग्भयं कुर्याद्राहोरन्तर्गतो रविः ॥

सोमस्य वर्षं: १ । ८ । फलम् ।
स्त्रीपुत्रकलहश्चैव वित्तनाशं मनःक्षतिम् ।
करोति क्षेत्रमत्यर्थं राहोरन्तर्गतो विधुः ॥
कुजस्य मासाः २० । २० । फलम् ।
विषशस्त्राग्निचौरेभ्यो नियतं दारुणं भयम् ।
प्रेतस्थान्तर्गतः कुर्याद्गदराजां भूमिनन्दनः ॥
बुधस्य वर्षं: १ । १० । २० । फलम् ।
ज्वरक्षुदग्निसंपीडा कलहं स्वजनैः सह ।
भृत्यापत्तेषु विद्वेषं कुर्यात् पातान्तरे बुधः ॥
शनेर्वर्षं: १ । १ । १० । फलम् ।
स्त्रीपुत्रैः कलहो नित्यं बान्धवैः सह वैरिता ।
भवेत्तु बहुधा दुःखं राहोरन्तर्गते शनौ ॥
गुरोर्वर्षाः २ । १ । १० । फलम् ।
व्याधिदुःखभयैश्वर्यक्षती देवद्विजपूजनम् ।
कार्यसिद्धिर्भवेदिष्टा राहोरन्तर्गते गुरौ ॥
एवं वर्षाः १२ ॥*॥ शुक्रस्य स्वदशावर्षाः २१ ।
तस्यान्तर्दशावर्षाः ४ । १ । फलम् ।
मन्त्रप्रचारस्थिरप्रमोदविलास-
सम्मानदानकृषिपूजनकन्यलाभान् ।
हस्त्यश्वयानपरिपूर्णमनोरथश्च
प्राप्तौ दशं स्वजति निश्चलराजलक्ष्मीम् ॥
रवेर्वर्षं: १ । फलम् ।
देहस्त्रीव्रणाक्रान्तस्त्रीव्रतापो ज्वरान्वितः ।
क्षतः स्वादुवान्धवैः सर्वैर्भार्गवान्तर्गते रवौ ॥
सोमस्य वर्षौ २ । ११ । फलम् ।
सम्मानलाभो रोगश्च कार्यनाशश्च नित्यशः ।
शुक्रस्यान्तर्गते चन्द्रे स्त्रीलाभो नियतं भवेत् ॥
कुजस्य वर्षं: १ । ६ । २० । फलम् ।
उत्साही बलधान्याढ्यः कन्यश्च सुमनाः सुधीः ।
भूमिलाभो भवेच्चैव शुक्रस्यान्तर्गते कुजे ॥
बुधस्य वर्षाः ३ । ३ । २० । फलम् ।
सर्वत्र लभते सौख्यं मानसक्षयभूषणम् ।
भार्या सुशीलतामेति भार्गवान्तर्गते बुधे ॥
शनेर्वर्षं: १ । ११ । १० । फलम् ।
शुचुक्षयमवाप्नोति मित्रदृद्भिश्च जायते ।
चौराद्वित्तस्य लाभः स्यात् शुक्रस्यान्तर्गते शनौ ॥
गुरोर्वर्षाः ३ । ८ । १० । फलम् ।
राजपूजा सुखं प्रीतिः कन्याजननमेव च ।
भार्गवान्तर्गते जीवे चौरान्नश्च लभ्यते ॥
राहोर्वर्षौ २ । ४ । फलम् ।
बन्धनं बन्धुपुत्राद्यैर्बन्धुनाशो रिपोर्भयम् ।
शरीरं देन्यमाप्नोति शुक्रोरन्तर्गतस्तमः ॥
एवं वर्षाः २१ । इत्यन्तर्दशाकथनम् ॥ * ।
अथ प्रत्यन्तर्दशा ।
यद्दशान्तरं दिनं कृत्वा लब्धिलब्धं ध्रुवं भवेत् ।
ध्रुवाब्धि गजयेद्भक्तान् रव्यादेः क्रमतो यथा ।
रवौ च वेदा वसवः सुधांशौ
कुजे च बाणाः शशिजे तथाङ्काः ।
गुणाष्टतुर्दिक् च दृहस्पतौ स्या-
द्राद्धौ तुरङ्गा भृगुजे च रुद्राः ॥
ग्रहस्यान्तर्दशामासान् दिनीकृत्य गुणाहतान् ।
सप्ताङ्गभं विजानीयात् प्रत्यन्तर्दशवासरान् ॥
इति प्रत्यन्तर्दशा ।" इति ज्योतिस्तत्त्वम् । * ।
युगभेदे दशाविशेषा यथा,—
"सत्ये लक्ष्मदशा चैव त्रेतायां हरगौरिका ।
द्वापरे योगिनी चैव कलौ नाक्षत्रिकी दशा ।"
इति समयान्ततत्त्वम् । * ।
दशधा दशा यथा,—
योगिनी १ वार्षिकी २ नाक्षत्रिकी ३ लाग्निकी ४ सुकन्दा ५ विंशोत्तरा ६ चिंशोत्तरा ७ पताकी ८ हरगौरी ९ दिनदशा १० । इति जातरत्नम् ।
दशाकर्षः, पुं, (दशया वर्षैरा आकर्षति तेजादिकमिति । आ+कृष्+घञ् ।) प्रदीपः । इति हेमचन्द्रः । ३ । ३५१ ॥
दशाकर्षी, [न्] पुं, (दशया आकर्षतीति । दशा+कृष्+णिनिः ।) प्रदीपः । इति हारावली ।२४॥
दशाङ्गुलं, क्ली, (दश अङ्गुलय इव शिराचिह्नानि फलतलयुपरि सन्त्यस्येति । अच् ।) खर्जूरम् । इति भावप्रकाशः ॥ (दश अङ्गुलयः परिमाणमस्येति तद्धितार्थद्विगोः उच् तस्य लुक् समासान्तः अच्प्रत्ययः । दशाङ्गुलपरिमिते, त्रि । यथा, मनुः । ८ । २७१ ।
"नामजातिग्रहं स्त्रीणामभिद्रोहेण कुर्वतः ।
निःक्षेपोऽयमयःशङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥"
यथा च ऋग्वेदे । १० । ९० । १ ।
"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥"
"विश्वतः सर्वतो वृत्वा परिवेष्य दशाङ्गुलं दशाङ्गुलपरिमितं देशमत्यतिष्ठत् ।" इति तद्भाष्ये सायणः ॥")
दशानन:, पुं, (दश आननानि वदनानि यस्य ।) रावणः । इति शब्दरत्नावली । (दश आननानि इति विग्रहे दशवदनेऽपि, स्त्री । यथा,
"युद्धाय क्षते खड्गनगङ्गनाथि !
शिरो मदीयं यदि याति यातु ।
लूनानि नूनं जगतां भयार्थे
दशाननेनापि दशाननानि ॥"
इत्युद्भटः ।)
दशानिकः, पुं, (अश्यते इति भावे घञ् आर्शो जीवनम् । तस्मिन् हितः आनिकः । दशाय अवस्थाविशेषे आनिकः ।) दन्तोष्ठः । इति शब्दचन्द्रिका ।
दशारोहा, स्त्री, (दशसु दिक्षु आरोहति अङ्गैर्व्याप्नोतीति । आ+रुह+कः ।) केवर्तिका । इति राजनिर्घण्टः ।
दशार्णः, पुं, (दश ऋणानि दुर्गभूमयो जलाधारा वा यत्र । "एत्येधत्यूठ्सु ।" ८ । ३ । ६५ । इत्यस्य "प्रवृत्तसरकमलवसनार्थदशार्णाद्यत्वे ।" इति वार्त्तिकोक्त्या दृद्धिः ।) देशविशेषः । स विन्ध्यपर्वतस्य पूर्व्वदक्षिणस्यां दिशि वर्त्तते । (यथा, बृहत्संहितायाम् । १४ । १० ।
"किष्किन्धकाष्टकस्थलनिषादराङ्गालि पुरिक-
दशार्णाः ।"
तदस्याभिजनः तस्य राजा वा अण् । तद्देशवासिनि तन्नृपतौ च त्रि । यथा महाभारते । १ । ११३ । २५ ।
"पूर्वभागास्कृतो गत्वा दशार्णाः समरे जिताः ।
पाण्डुना नारसिंहेन कौरवाश्च प्रधर्षिताः ।"
दश अर्णानि वर्णानि यस्य । दशाक्षरमन्त्रविशेषः । यथा, गौतमीयतन्त्रे । २ अध्याये ।
"दशार्णानामपि तत्त्वानां सारं वेत्ता तथाक्षरम् ।
दशाक्षर इति ख्यातो मन्त्रः परात्परः ॥
शुभबीजस्वभावत्वात् दशार्णं इति कथ्यते ।")
नदीविशेषे, स्त्री । इति मेदिन्यर्थकल्पतरुः ॥
दशार्हः, पुं, (दश्यते दानादिबलेषु अर्हः ।) वृद्धः । यदुदेशः । (क्रोष्टुवंशीयराजपुत्रविशेषः । यथा, हरिवंशे । ३८ । २५ ।
"भृतस्य जज्ञिरे शूरा जयः परमधार्मिकाः ।
आवन्त्यश्च दशार्हश्च बली विष्टरश्च यः ॥")
तद्देशवासिनि, पुं भूमि । इति त्रिकाण्डशेषः । (यथा, महाभारते । १ । १६ । २० ।
"तमर्चितं धर्मदशार्हपूगै-
राप्तैर्विवाहाग्निज्वलनप्रकाशम् ॥")
दशावतारः, पुं, (दश अवतारा यस्य ।) विष्णुः । इति त्रिकाण्डशेषः । तस्य दशावतारा यथा,—
मत्स्यः १ कूर्मः २ वराहः ३ नृसिंहः ४ वामनः ५ जामदग्न्यः ६ रामः ७ कृष्णः ८ बुद्धः ९ कल्किः १० ।
इति वराहपुराणम् । अपि च ।
"धर्म्मनारायणस्यांशः संभूतश्चाक्षुषेऽन्तरे ।
यज्ञश्च वर्षयामास्तदैवा वैवस्वतेऽन्तरे ॥
प्रादुर्भावे ततस्तस्य ब्रह्मा शक्रादीत् पुरोहितः ।
युगाख्यायाच्च संख्यान्तु आपन्नेषु सुरेषु वै ॥
संभूतः स बलस्तस्मिन् हिरण्यकशिपोर्वधे ।
द्वितीये नरसिंहाख्ये बली शक्रादीत् पुरोहितः ॥
बलिसंस्थेषु लोकेषु त्रेतायां सप्तमं प्रति ।
तृतीये वामनस्यार्थे धर्म्मेण तु पुरोधसा ॥
एतास्मिन् क्षत्रात्तस्य द्विजाः संभूतो द्विजाः ।
भार्गव्याः सप्त येऽपत्ये तु ग्रामणास्तानिबोधत ॥
त्रेतायुगे तु प्रथमे दत्तात्रेयो बभूव ह ।
नष्टे धर्म्मे चतुर्थांशे मार्कण्डेयपुरःसरः ॥
पञ्चमः पञ्चधाम्नां त्रेतायां सम्भव ह ।
मान्धाता चक्रवर्त्ती तु सत्यौतथ्यः पुरःसरः ॥
एकोनविंशां त्रेतायां सर्व्वक्षत्रान्तकृद्विभुः ।
जामदग्न्यस्तथा वत्सो विश्वामित्रपुरःसरः ॥
चतुर्विंशे युगे रामो वसिष्ठेन पुरोधसा ।
सप्तमो राक्षसध्वंसार्थे सह दशरथात्मजः ॥
अष्टमे द्वापरे विष्णुरहं विप्रे पराशरात् ।
वेदव्यासस्तदा जज्ञे जातूकर्ण्यपुरःसरः ॥
कर्त्तुं धर्म्मव्यवस्थानं सुराणां प्रभवाप्ययम् ।
बुद्धो नवमके जज्ञे तपसा पुष्करेक्षणः ॥
देवक्षत्रविनाशाय देवायनपुरःसरः ।
दशमेऽस्मिन्नेव युगे चौरैः सन्ध्यांशके भविष्यति ॥
कल्की विष्णुयशा नाम याज्ञवल्क्यपुरःसरः ।
दशमो भाक्तसंभूतो याज्ञवल्क्यपुरःसरः ॥"
इति मत्स्यपुराणम् ।

दशाश्वः, पुं, (दश्र अश्वा रथे यस्य।) चन्द्रः। इति शब्दरत्नावली॥ (यथा, यज्ञयागतत्त्वे सोमध्याने।
"दशाश्वं श्वेतपद्मस्थं विचिन्योमाधिदैवतम्।
जलप्रबोधिदेवञ्च सूर्य्याश्वमाहरेत्तथा॥"
दृषाकोर्दशमपुत्रः। यथा, महाभारते। १३। २। ६।
"दशमस्तस्य पुत्रोऽभूद् दशाश्वो नाम भारत!॥")
दशास्यः, पुं, (दश आस्यानि वदनानि यस्य।) रावणः। इति भूरिप्रयोगः॥ (यथा, रघुवंशे। ५।
"अकलियुगमखर्व्वमत्र हृदां
अचरदपापघनो यतः कुटुम्बी।
मम रुचिरिह लक्ष्मबायवेन
प्रभवति शुभ्रमे दशास्यमर्हणेन॥")
दशास्यजित्, पुं, (दशास्यं जयतीति। दशास्य+जि+क्विप्। तुगागमश्च।) श्रीरामः। इति भूरिप्रयोगः॥
दशेन्धनः, पुं, (दशा वर्त्तिका इन्धनं काष्ठमिव यस्य।) प्रदीपः। इति त्रिकाण्डशेषः॥
दशेरः, पुं, (दशतीति। दनश+"यतिकठिकुठिगडिशुडिदंशिभ्य एरक्।" उणा। १। ५६। इति एरक्।) हिंसः। इत्युणादिकोषः॥
दशेरकः, पुं, (दशति दुःखं ददातीति। दनश+एरक्। ततः कन्।) मरुदेशः। तद्देशजे, पुं भूम्नि। इति हेमचन्द्रः॥ (यथा, महाभारते। ७। ६। १६। [कान्।")
"आवन्त्यान् दाक्षिणात्यांश्च पार्व्वतीयान् दशेरकान्।
दशेरुकः, पुं, (दशति दुःखानि ददातीति। दश+बाहुलकात् एरुक् ततः स्वार्थे कन्।) मरुदेशः। इति भूरिप्रयोगः॥
दस, इ क भाषि। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) इ क, दंसयति दंसति। भाषि दीप्तौ। इति दुर्गादासः॥
दस, इ ऽ क दृष्टौ। दंशे। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) इत्थिरिति पश्यतेरौणादिकक्विप्प्रत्यये रूपम्। इ ऽ क, दंसयते पक्षे अस्यिः पश्यति दशति वेत्यर्थः। भट्टमल्लमते दंश इह सन्नाहः। इति दुर्गादासः॥
दस, य उ एर् उत्क्षेपे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्। उदित्त्वात् क्षावेट्।) य, दस्यति धूलिं वायुः। उ, दसिता दस्ता। एर्, अदसत् अदासीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादासः॥
दस्रः, पुं, (दस्यति उत्क्षिपति दस्यादिकमिति। दस+"इषियुधीन्धिदसिश्रीति।" उणा। १। १४४। इति मक्।) यजमानः। चौरः। कृताग्नः। इति मेदिनी। मे, १५॥ खलः। इति शब्दरत्नावली॥ (त्रि, उपक्षेपकः। यथा, ऋग्वेदे। १। १४८। ४।
"पुरूणि दस्रो नि रिणाति जम्भैराद्रोचते दम
आ विभ्राट्॥"
"दस्र उपक्षयतिथायमिः।" इति तद्भाष्ये सायनः॥ दर्शनीयः। यथा, ऋग्वेदे। १। ७७। ३।
"तं मेधेषु प्रथमं देवयन्तीर्विश उपब्रुवते दस्रमारीः॥"
"दस्रं दर्शनीयं तमग्निमारीर्गच्छन्त्यः।" इति तद्भाष्ये सायनः॥)
दस्युः, पुं, (दस्यति परस्वान् नाशयतीति। दस+"यजिमनिशुन्धिदसिजनिभ्यो युच्।" उणा। ३। २०। इति युच्। बाहुलकादनादेशाभावः।) चौरः। (यथा, मनुः। ७। १४३।
"विक्रोशन्त्यो यस्य राष्ट्राद्विलुप्यन्ते दस्युभिः प्रजाः।
संपश्यतः सभृत्यस्य क्षतः स न तु जीवति॥")
रिपुः। (यथा, ऋग्वेदे। २। १२। १०।
"यः शर्द्धते नानुददाति शर्द्धते यो दस्योर्हन्ता स जनास इन्द्रः॥"
"दस्योरुपक्षयितुः शत्रोर्हन्ता घातकः॥" इति तद्भाष्ये सायनः॥) महासाहसिकः। इति शब्दरत्नावली॥ असुरः। यथा, तत्रैव। ६। ४७। २।
"शतानीकस्य कर्त्ता चेतते दस्युतर्हणा॥"
"दस्युतर्हणा दस्यूनामसुराणां तर्हणा॥" इति तद्भाष्ये सायनः॥ कर्म्मवर्ज्जिते, त्रि। यथा, ऋग्वेदे। ६। २४। ८।
"न वीळवे नमते न स्थिराय न शर्द्धते दस्युजूताय स्तवान्॥"
"शर्द्धते उत्साहमानाय दस्युजूताय कर्म्मवर्ज्जिते: प्रेरिताय।" इति तद्भाष्ये सायनः॥)
दस्रं, क्लीं, (दंसयते क्षयादीन् दशतीति। दसि दंशे+"स्फायितञ्चिवञ्चिप्रकीति।" उणा। २। १३। इति रक्।) शिशिरम्। इति संक्षिप्तसारे उणादिवृत्तिः॥
दस्रः, पुं, (दस्यति उत्क्षिपति पांशूनिति। दस उत्क्षेपे+"स्फायितञ्चीति।" उणा। २। १३। इति रक्।) खरः। (दस्यति रोगान् क्षिपतीति।) अश्विनीसुतः। इति मेदिनी। रे, ४०॥ (यथा, हरिवंशे। ६। ५३।
"नासत्यश्चैव दस्रश्च सूतौ ह्यश्विनीसुतौ।"
दर्शनीये, त्रि। यथा, ऋग्वेदे। ६। ६६। ७।
"इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम्॥"
"दस्रा दर्शनीयाविन्द्राविष्णू॥" इति तद्भाष्ये सायनः॥)
दस्रौ, पुं, (दस्यतः क्षिपतो रोगानिति। दस+"स्फायितञ्चीति।" उणा। २। १३। इति रक्।) अश्विनौ। इत्यमरः। १। १। ५४॥ द्विवचनान्तोऽयं शब्दः॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"दक्षादवीत्य दस्रौ वितनुतः संहितां स्वयाम्।
सकलचिकित्सकलोकप्रतिपत्तिविहृये धन्याम्॥
"देवासुरयज्ञे देवा दैत्यैर्यै सत्रताः कृताः।
अयताक्षै कृताः सद्यो दस्राभ्यामद्भुतं महत्॥
वज्रिणोऽभूद्भुजस्तम्भः स दस्राभ्यां चिकित्सितः।
सोमाग्निप्रतितत्त्वज्ञस्ताभ्यामेव सुखीकृतः॥")
दस्रदेवता, स्त्री, (दस्रौ अश्विनौ अधिष्ठातृदेवते यस्याः।) अश्विनीनक्षत्रम्। इति हेमचन्द्रः। २। २२॥
दस्रसू, स्त्री, (दस्रौ अश्विनौ सूते इति। सू प्रसवे+क्विप्।) संज्ञा। सा सूर्य्यपत्नी अश्विनीकुमारमाता च। इति त्रिकाण्डशेषः॥
दह, औ दाहे। इति कविकल्पद्रुमः॥ (भां-परं-सकं-अनिट्।) औ, अधाक्षीत्। दाहो भस्मीकरणम्। दहत्यग्निः काष्ठम्। इति दुर्गादासः॥
दह, इ क दीप्तौ। दाहे। इति कविकल्पद्रुमः॥ (चुरां-परं-दीप्तौ अकं-दाहे सकं-सेट्।) इ क, दंहयति। इति दुर्गादासः॥
दहनं, क्लीं, (दहौ दाहे+भावे ल्युट्।) दाहः। भस्मीकरणम्। पोड़ान इति भाषा॥ (यथा, रघुः। ८। २०।
"इतरो दहने स्वकर्म्मणां
वहते ज्ञानमयेन वह्निना॥")
दहनः, पुं, (दहतीति। दह दाहे+ल्युः।) अग्निः। (यथा, आर्य्यासप्तशत्याम्। ३०४।
"धूमेरश्रु निपातय दह शिखया दहन! मलिनयाङ्गारैः।
जागरयिष्यति दुर्गतयहिवौ त्वां तदपि शिशिरनिशि॥"
तृतीयसंख्या। यथा, सूर्य्यसिद्धान्ते। १२। ८५।
"स्वत्रयाग्निदहनाः कथा तु हिमदीधितेः॥"
कृत्तिकानक्षत्रस्य अधिष्ठातृदेवत्वात् कृत्तिकानक्षत्रम्। यथा, ज्योतिस्तत्त्वे।
"दहनविधिश्चतास्वा मैत्रभं सौम्यवारे॥")
चित्रकः। भल्लातकः। इङ्गुदीतरौ, त्रि। इति मेदिनी। ने, ७५॥ (दह्यते कामाग्निना इति। दह+ल्युट्।) कपोतः। इति राजनिर्घण्टः॥ (रुद्रविशेषः। यथा, महाभारते। १। ६६। ३।
"दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः।
स्थाणुर्भगश्च भगवान् सदा एकादश स्मृताः॥"
स्कन्दस्यानुचरविशेषः। यथा तत्रैव। ६। ४५। ३३।
"दहतिं दहनञ्चैव प्रथक्षौ वीर्य्यसम्मतौ।
अंशोऽप्युपाचरन् पञ्च ददौ स्कन्दाय धीमते॥"
दाहकमात्रे, त्रि। यथा, भागवते। ८। ७। २१।
"त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात्॥")
दहनकेतनं, क्लीं, (दहनस्य केतनं भवनं इव।) धूमः। इति हेमचन्द्रः। ४। १७॥
दहनप्रिया, स्त्री, (दहनस्यार्य्यः प्रिया।) स्वाहा। इति त्रिकाण्डशेषः॥
दहनागुरु, क्लीं, (दहनाय अगुरु।) दाहागुरु। इति राजनिर्घण्टः॥
दहनारातिः, पुं, (दहनस्यार्य्यः अरातिः शत्रुः।) जलम्। इति राजनिर्घण्टः॥
दहनीयः, त्रि, (दह्यते इति। दह+कर्म्मणि अनीयर्।) दाह्यः। दहनार्हः॥
दहनोपलः, पुं, (दहनाय वह्न्युत्पादनाय उपलः प्रस्तरखण्डः।) सूर्य्यकान्तमणिः। इति हेमचन्द्रः। ४। १३३॥ दहनोपमोऽपि पाठः॥

दहरं, क्ली, (दह+बाहुलकात् अरः।) सूक्ष्मम्। यथा, श्रीभागवते। १०। ८७। १८।
"उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः।
परिसरपद्धतिं हृदयमारुण्यो दहरम्॥"
"आरुण्यस्तु साक्षात् हृदयस्थं दहरं सूक्ष्ममेवोपासते।" इति तट्टीकायां श्रीधरस्वामी॥

दहरः, पुं, (दहति ग्रहदयनाग्निनेन सन्तापयतीति। दह+अरः।) भ्रमिका। सूक्ष्मम्। भ्राता। बालकः। इति विश्वमेदिन्यौ॥

दहः, पुं, (दहतीति। दह+"स्फायितञ्चीति।" उणां २। १३। इति रक्।) अग्निः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ दावानलः। इत्यादिकोषः॥ नरकम्। वनम्। इति संक्षिप्तसारे उणादिवृत्तिः॥ हृदयाकाशम्। यथा, श्रीभागवते। ३। १२। ३३।
"आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथैव च।
एवं चाङ्गतयोपासन् प्रणवो ह्यस्य हृद्दहः॥"
"हृद्दहः हृदयाकाशात्।" इति तट्टीकायां श्रीधरस्वामी॥ *॥ जठरम्। यथा, तत्रैव। ४। १। ३६।
"पुनर्यज्ञोऽजनयत् पत्न्यामग्नीध्रमेव च। विभुंवि।
सोऽन्यजन्मनि दहाग्निर्विश्रवाश्च महातपाः॥"
"दहाग्निः जठराग्निः।" इति श्रीधरस्वामी॥

दा, दाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) दा तु दाने दान दाने प्रसिद्धोऽयम्। अस्येव यच्छादेशः। यच्छति। इति दुर्गादासः॥

दा, डु ञ लि दाने। इति कविकल्पद्रुमः॥ (ह्वां-उभं-सकं-अनिट्।) डु, दत्तिमम्। ञ लि, ददाति दत्ते। इति दुर्गादासः॥

दा, ञ लूनौ। इति कविकल्पद्रुमः॥ (क्र्यादां-परं-सकं-अनिट्।) ञ, दाति। लूनिरुछेदः। केचित्तु दाप लवने इति पठित्वा पित्त्वाद्दा-संज्ञाभावे यङादौ दापयते इत्यादि मन्यन्ते। क्षमते तु पित्त्वाभावाद्दासंज्ञायां दीयते इत्येव। इति दुर्गादासः॥

दा, स्त्री, (दा+क्विप्।) शोधनम्। दानम्। छेदः। उपतापः। रक्षा। इति मेदिनी। दे, १॥

दाकः, पुं, (ददाति दक्षिणामिति। दा+"ल्लदाघा-र्थाभ्यैकलिभ्यः कः।" उणां ३। ४०। इति कः।) यजमानः। इत्यादिकोषः॥ दाता। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

दाक्षकं, क्ली, (दक्ष+वुञ्।) दक्षाणां समूहः। इत्यमरटीकायां रायमुकुटः॥ (दाक्षीणां विषयोदेशः। दाक्षि+"राजन्यादिभ्यो वुञ्।" ४। २। ५३। इति वुञ्। दाक्षेर्विषये। इति व्याकरणम्॥)

दाक्षायणी, स्त्री, (दक्षस्यापत्यं स्त्री। दक्ष+ञिण्। गौरादित्वात् ङीष्।) अश्विन्यादयो रेवत्यन्ताः सप्तविंशतितारकाः। इत्यमरः। १। ३। २१॥ दुर्गा। इति मेदिनी। णे, ६६॥ रोहिणीनक्षत्रम्। इति हेमचन्द्रः॥ (दक्षकन्यामात्रम्। यथा, मार्कण्डेये। ५०। २१।
"वृद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिक्षयो-दशौ।
पत्न्यर्थं प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः॥"
अदितिः। यथा, महाभारते। १। ७५। ६।
"त्रयोदशानां पत्नीनां या तु दाक्षायणी वरा।
मारीचः कश्यपस्तस्यामादित्यान् समजीजनत्॥"
कद्रूः। विनता। यथा, तत्रैव। १। २२। ५।
"जग्मतुः परया प्रीत्या परं पारं महोदधेः।
कद्रूश्च विनता चैव दाक्षायण्यौ विहायसा॥")
"दक्षश्च तेषामारभ्य प्रजाः सम्यग्विवर्द्धिताः।
तत्र दाक्षायणीपुत्राः सर्व्वे देवाः सवासवाः॥
वसवोऽष्टौ च रुद्राश्च आदित्या मरुतस्तथा।
सापि दृष्ट्वा सुरश्रेष्ठा गौरी दक्षाय ब्रह्मणा॥
दुहितॄंस्ते पुरा याहि रुद्रेणोढ़ा महात्मना।
सा च दाक्षायणी देवी पुनर्भूत्वा नृपोत्तम!॥"
इति वराहपुराणम्॥
इन्द्राणी। इति रत्नमाला॥ *॥

दाक्षायणीपतिः, पुं, (दाक्षायणीनां अश्विन्यादिनक्षत्राणां पतिः।) चन्द्रः। इति त्रिकाण्डशेषः॥

दाक्षायणीरमणः, पुं, (रमयतीति। रम+ल्युः। दाक्षायणीनां रमणः।) चन्द्रः। इति हलायुधः॥

दाक्षायण्यः, पुं, (दक्षाय एव। स्वार्थे अण्।) गृध्रः। इत्यमरः। २। ५। २१॥

दाक्षिकन्या, स्त्री, (दाक्षीणां कन्या। "संज्ञायां कन्योशीनरेषु।" २। ४। २०। इति उशीनरत्वाभावात् न ङीषन्ता।) वार्क्षीकेषु ग्रामसंज्ञा। इति नपुंसकलिङ्गसंग्रहटीकायां भरतः॥

दाक्षिणात्यः, त्रि, (दक्षिणा दक्षिणस्यां दिशि भवः। दक्षिणा+"दक्षिणापश्चात्पुरसस्त्यक्।" ४। २। ६८। इति त्यक्।) दक्षिणदेशोद्भवः। इति शब्दार्थकल्पतरुः॥ (यथा, महाभारते। ३। २३६। ३।
"प्राच्याश्च दाक्षिणात्याश्च प्रतीच्योदीच्य-वासिनः॥")
नारिकेलः। इति राजनिर्घण्टः॥

दाक्षिण्यं, क्ली, (दक्षिणस्य भावः। दक्षिण+ष्यञ्।) अनुकूलता। इति हेमचन्द्रः। ६। १२॥ (सरलता। यथा, आर्य्यासप्तशत्याम्। ६०१।
"सौभाग्यं दाक्षिण्यान्नेत्युपदिशं हरेण तरुणी-नाम्।
वामार्द्धमेव देयाः खलु पुरुषैर्ग्रीष्मे निवेशयता॥"
परेच्छानुवर्त्तनम्। यथा, रघुः। १। ३१।
"तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा॥")
भावविशेषः। तत्तु दक्षिणाचाररूपम्। यथा,
"राजानु वामदाक्षिण्यभावाभ्यामपि पूजयेत्।
ब्रह्मज्ञानैश्वरौ देवौ सत्यतारां तथैव च॥"
अपि च।
"ऋषीन् देवान् पितॄंश्चैव मनुष्यान् भूतसङ्घयान्।
यो यजत् पञ्चभिर्यज्ञैर्ब्रह्मयज्ञं परिद्योधयत्॥
विधियत् स्नानदानाभ्यां कुर्व्वन् यद्विधिपूजनम्।
क्रियते मरहस्यन्तु तद्दाक्षिण्यमिहोच्यते॥
सर्व्वत्र पितृदेवादौ यस्माद्भवति दक्षिणा।
देवी च दक्षिणा यस्मात्तस्माद्दाक्षिण्यमुच्यते॥"
इति कालिकापुराणे ७७ अध्यायः॥
दाक्षिणात्यार्हे, त्रि। इत्यमरः। ३। १। ५॥ (दक्षिणे भवम्। दक्षिण+ष्यञ्। दाक्षिणभवे। दक्षिणदिक्सम्बन्धिनि च। यथा, आर्य्यासप्तशत्याम्। २८२।
"दाक्षिण्यात् स्निह्यमानं दधतं सा भानुमेन-मवमंस्था:।")

दाक्षीपुत्रः, पुं, (दाक्ष्याः पुत्रः।) पाणिनिमुनिः। इति त्रिकाण्डशेषः॥ (यथा, नैषधे। १८। ६१।
"दाक्षीपुत्रस्य तर्क्ये ध्रुवमयमभवत् कोऽप्यधीती कपोतः॥")

दाक्षेयः, पुं, (दाक्ष्या अपत्यं पुमान्। दाक्षी+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) पाणिनिमुनिः। इति हेमचन्द्रः। ३। ५१५॥

दाक्ष्यं, क्ली, (दक्षस्य भावः कर्म्म वा। दक्ष+ष्यञ्।) दक्षता। निपुणता। दक्षशब्दात् भावे ष्यञ्प्रत्ययः॥ (यथा, महाभारते। २। ३८। २०।
"दानं दाक्ष्यं श्रुतं शौर्य्यं ह्रीः कीर्त्तिर्बुद्धिरुत्तमा।
सन्नतिः श्रीर्धृतिस्तुष्टिः पुष्टिश्च नियताऽच्युते॥")

दाड़कः, पुं, (दालयति सुखाभ्यन्तरस्थद्रव्यं विचूर्णीकरोतीति। दल+णिच्+ण्वुल्। लस्य ड़ः।) दन्तः। इति शब्दार्थकल्पतरुः॥

दाड़िम, त्रि, (दलनमिति दाल्। तेन निर्वृत्तः। भावप्रत्ययान्तादिमप्। लयोरैक्यम्।) रक्तः। इति मेदिनी मे, ४४॥ फलवृक्षविशेषः। (यथा, देवीभागवते। १। १२। ८।
"दाड़िमैर्नारिकेलैश्च माधवीमक्षपाटलम्॥")
तत्पर्य्यायः। करकः २। इत्यमरः। २। ४। ६५॥ पिच्छपुष्पः ३ दाड़िमः ४ पर्व्वरुक् ५ खाड़ुवः ६ पिक्कीरः ७ फलशाखवः ८ शुकवल्लभः ९। इति त्रिकाण्डशेषः॥ रक्तपुष्पः १०। इति रत्नमाला॥ दाड़िमीसारः ११ कुट्टिमः १२ फलसाखवः १३ गुर्ह्यन्धमधोऽपि। रक्तबीजः १४ सुफलः १५ दन्तबीजकः १६ मधुबीजः १७ कुचफलः १८ रोचनः १९ मणिबीजः २० कक्कफलः २१ वृत्तफलः २२ सुनीलः २३ नीलपत्रः २४। अस्य गुणाः। मधुराम्लत्वम्। कषायत्वम्। वातकफश्रमपित्तविनाशित्वम्। ग्राहित्वम्। दीपनत्वम्। लघुत्वम्। उष्णत्वम्। शीतलत्वम्। रुचिदाढत्वञ्च। इति राजनिर्घण्टः॥ हृद्यत्वम्। अम्लत्वम्। श्वासारुचिप्लवानाशित्वम्। कण्ठशोधनत्वम्। कफपित्तादिरोधित्वञ्च॥*॥
"द्विविधं तत्तु विज्ञेयं मधुराम्लमेव च।
मधुरं तत् त्रिदोषघ्नमम्लं वातकफापहम्॥"
इति राजवल्लभः॥
तापहारि मधुरं लघु पथ्यम्। इति राजनिर्घण्टः॥
"तत्पक्वं त्रिविधं खाद्यं खाद्यं देवताभक्ष्यम्।

तत्तु स्वादु त्रिदोषघ्नं लघ्वग्निदीपनम्॥
कृतकक्षसुखरोगघ्नं तर्पणं शुक्रलं लघु।
कषायानुरसं ग्राहि स्निग्धं मेदोबलावहम्॥
स्वाद्वम्लं दीपनं रुच्यं किञ्चित् पित्तकरं लघु।
अम्लन्तु पित्तजनकमम्लं वातकफापहम्॥"
इति भावप्रकाशः॥

दाड़िमपुष्पकः, पुं, (दाड़िमस्य पुष्पमिव पुष्पं यस्य। कन्।) रोहितकवृक्षः। इत्यमरः। २। ४। ४६॥ रोहड़ा इति ख्यातः॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"रोही रोहितकः शीघ्रपुनर्दाड़िमपुष्पकः॥")

दाड़िमप्रियः, पुं, (दाड़िमफलं प्रियं यस्य।) शुकपक्षी। इति शब्दरत्नावली॥

दाड़िमभक्षयः, पुं, (भक्षयतीति। भक्षि+ण्यः। भक्ष्यो भक्षकः। दाड़िमस्य भक्ष्यः।) कीरपक्षी। इति शब्दचन्द्रिका॥ (दाड़िमभक्षके, त्रि॥)

दाड़िमीसारः, पुं, (दाड़िमीं दाड़िमीशब्दं सरति प्राप्नोतीति। दाड़िमी+सृ+अण्।) दाड़िमः। इति राजनिर्घण्टः॥

दाड़िम्बः, पुं, दाड़िमः। इति त्रिकाण्डशेषः॥ (दाड़िमशब्दोऽस्य विशेषो ज्ञातव्यः॥)

दाढ़ा, स्त्री, (देप् शोधने, दा दाने वा+किप्। दे शुद्धये दानाय वा ढौकते इति। ढौक+डः।) दन्तविशेषः। तत्पर्य्यायः। दंष्ट्रा २ जम्भः ३। इति हेमचन्द्रः। ३।२४७॥ प्रार्थना। समूहः। इति शब्दार्थकल्पतरुः॥

दाढ़िका, स्त्री, (दाढ़ाये केशसमूहाय प्रभवतीति। ठक् ततष्टाप्।) मुखावयवविशेषः। दाड़ि इति भाषा। (यथा, मनुः। ८। २८३।
"पादयोर्दाढ़िकायाञ्च गोवायां वृषणेषु च॥"
"दाढ़िकायां श्मश्रुणि॥" इति तट्टीकायां कुल्लूकभट्टः॥ दाढ़ा+स्वार्थे कप् कापि अत इत्वञ्च।) दंष्ट्रिका। इति हेमचन्द्रः। ३।२४७॥

दाक्षाजिनिकः, त्रि, (दक्षाजिनेन ग्राह्येण दम्भेन वा अर्थान्वित्क्षतीति। दक्षाजिन+"अयः-शूलदक्षाजिनाभ्यां ठक्ठञौ।" ५।२।७६। इति ठञ्।) कुहकः। इति हेमचन्द्रः। ३। ४१॥

दात, त्रि, (दायते स्म इति। दा लवने+क्तः) छिन्नम्। इत्यमरः। ३।१।१०३॥ (देप् शोधने कर्म्मणि क्तः। शुद्धम्॥)

दाता, [तृ] त्रि, (ददातीति। दा दाने+"खुलृचौ।" ३।१।१३३। इति लृच्।) दानकर्त्ता। तत्पर्य्यायः। दारुः २ सुचिरः ३। इति त्रिकाण्डशेषः॥ (यथा, ऋग्वेदे। ७।२०।२।
"कर्त्ता सुदासे अह वा उ लोकं
दाता वसु सुष्टुरादाशुषे भूत्॥")

दात्यूहः, पुं स्त्री, (दाप् लवने+क्तिन्। दा रत्नं ऊहते इति। दाति+ऊह+अण्, यद्वा, दो अवखण्डने क्तिन्। दितं वहतीति। वह+क+ऊट्। दित्यूहः। ततः स्वार्थे अण्। ततः "देविकाग्निंग्रपादित्यवाहदीर्घसत्रश्रेयसामात्॥" ७।३।१। इति आत्वम्।) पक्षिविशेषः। डाउक इति भाषा। तत्पर्य्यायः। कालकण्ठकः २। इत्यमरः। १।५।२१॥ अत्यूहः ३ दात्यौहः ४ कालकण्ठः ५ मासङ्गः ६ ग्रीतिकण्ठः ७ कचाटुरः ८। इति शब्दरत्नावली॥ काकमद्गुः ९। इति त्रिकाण्डशेषः॥ (यथा, मनुः। ५। १२।
"सारसं रज्जुवालञ्च दात्यूहं शुकसारिके॥"
(अस्य गुणा यथा,—
"दात्यूहो मरुतञ्च नाशनकरो वृष्योऽतिशुक्रप्रदः श्रेष्ठः सर्व्वगुणः समोषणगमनः तुष्टिप्रदो वातहा॥"
इति हारीते प्रथमेस्थाने एकादशेऽध्याये॥)
"प्रावृट्काले सुखी भूत्वा को वा कुत्र न गच्छति।
इति वदति दात्यूहः को वा को वा क वा क वा॥"
इत्युद्भटः॥)
जलकाकः। इति राजनिर्घण्टः॥ पातकः। इति मेदिनी। हे, १७॥ मेघः। इति शब्दरत्नावली॥

दात्यौहः, पुं, स्त्री, (दित्यौह+स्वार्थे अण्। देविकाग्निंग्रपेत्यादिना आत्वम्।) दात्यूहः। इति शब्दरत्नावली॥

दात्रं, क्ली, (द्यति दाति वानेनेति। दो अवखण्डने दा लवने वा+"दात्रीशूर्पेति।" ३। २। १८२। इति ष्ट्रन्। यद्वा, दात्रमिव छन्दसीति वत्। यद्वा।) अस्त्रविशेषः। इति भरतः॥ दा इति काश्यां इति च भाषा। तत्पर्य्यायः। लवित्रम् २। इत्यमरः। २।८।१३॥ खड्गीकम् ३। इति शब्दरत्नावली॥ (यथा, महाभारते। ५।१५४।७।
"सम्पूर्णपिटकाः सर्व्वे सदात्राङ्कुशतोमराः॥"
भावे ष्ट्रन्। दानम्। यथा, ऋग्वेदे।१।११६।६।
"तद्वां दात्रं महिकीर्त्तेन्यम्"।
"तद्दात्रं दानम् महि महदतिगम्भीरम्।" इति तद्भाष्ये सायनः॥ दात्रकर्त्तरि, त्रि। यथा, वाजसनेयसंहितायाम्। १०। ६।
"सोमस्य दात्रमसि॥")

दात्री, स्त्री, (ददातीति। दा+लृच्+ङीप्।) दात्रकर्त्री। इति व्याकरणम्॥ (गङ्गा। यथा, काशीखण्डे।२६।८६। तस्याः सहस्रनामकीर्त्तने।
"दीनसन्तापशमनी दात्री दयुवैरिणी॥")

दात्रः, पुं, (ददातीति। दा+"जनिदाच्युमिति।" उणा॥ ३। १०४। इति त्रन्।) दाता। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (स्त्री, यज्ञ कर्म्मणि। इत्युज्ज्वलदत्तः॥)

दाधिकं, त्रि, (दधि दध्ना वा संस्कृतं दध्ना चरति दधि+"चरति।" ४।४।८। इति ठक्। (दध्ना उपसिक्तम्। "व्यञ्जनैरुपसिक्ते।" ४। ४। २६। इति ठक् वा।) दधिसंस्कृतवस्तु। इति हेमचन्द्रः। ३। ७४॥ (औषधविशेषे, क्ली। यथा, सुश्रुते उत्तरतन्त्रे। ४२।
"बीजपूररसोपेतं सर्पिर्दधिचतुर्गुणम्।
साधितं दाधिकं नाम गुल्महृत् प्लीहशूलजित्॥")

दान, न आर्जवे। छिदि। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं सेट्।) ऋजुरवक्रस्य भाव आर्জ্জवं ऋजुकरणम्। न, दीदांसति दीदांसते काष्ठं वर्द्धकिः ऋजु करोतीत्यर्थः। ऋजुभावः इति विद्यानिवासः। दीदांसति साधुः। ऋजुः स्यादित्यर्थः। छेदे दानति दानते। इति बोपदेवः। तत्र तिवादयो न स्युरिति रमानाथः। इति दुर्गादासः॥

दानं, क्ली, (दा दाने दो अवखण्डने वेप शोधने भावादौ ल्युट्।) गजमदः। (यथा, माघे। ५। ३७।
"दानं दद्वापि जलैः सहचाधिरूढ़े
को विद्यमानगतिरासितुमुत्सहेत॥"
"दीयते इति दानं धनं गजमदश्च।" इति तट्टीकायां मल्लिनाथः॥) पालनम्। छेदनम्। शुद्धिः। इति मेदिनी। ने, १०॥ वृक्षकोटरकीटजमधु। अस्य गुणाः। रूक्षत्वम्। दीपनत्वम्। कफच्छर्दिमेहनाशित्वञ्च। इति राजवल्लभः॥ देवब्राह्मणादिसम्प्रदानकद्रव्यमोचनम्। तत्पर्य्यायः। त्यागः २ विहापितम् ३ उत्सर्जनम् ४ विसर्जनम् ५ विश्राणनम् ६ विसरणम् ७ सर्गणम् ८ प्रतिपादनम् ९ प्रादेशनम् १० निर्व्वपणम् ११ अपवर्जनम् १२ अंहतिः १३। इत्यमरः। २।७।२६॥ दायः १४। इति त्रिकाण्डशेषः॥ प्रदानम् १५ दत्तम् १६ विश्राणनम् १७ दत्तिः १८ अंहती १९ उत्सर्गः २० अतिसर्जनम् २१ सर्गः २२ विसर्गः २३ वपनम् २४ प्रदेशनम् २५। इति शब्दरत्नावली॥ *॥
तस्य लक्षणादि यथा,—
"अर्थौघनाहृदिति पात्रे श्रद्धया प्रतिपादनम्।
दानमित्यभिनिर्द्दिष्टं व्याख्यानं तस्य वक्ष्यते॥
सम्प्रदानस्वत्वापादकद्रव्यत्यागो दानमिति॥*॥
दाता प्रतिग्रहीता च श्रद्धादेयञ्च धर्म्मयुक्।
देशकालौ च दानानामङ्गान्येतानि षड्विदुः॥
मनसा पात्रमुद्दिश्य भूमौ तोयं विनिःक्षिपेत्।
विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते॥
परोक्षे कल्पितं दानं पात्राभावे कथं भवेत्।
गोत्रजेभ्यस्तथा दद्यात् तदभावेऽस्य बन्धुषु॥
यदा तु न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः।
दद्यात् स्वजातिग्रिष्येभ्यस्तदभावेषु वा निःक्षिपेत॥
स्नात्वा शुद्धे समे देशे गोमयेनोपलेपिते।
वसित्वा वसनं शुद्धं दानं दद्यात् सदक्षिणम्॥*॥
एकां गां दशगुर्द्दद्यात् दश दद्याच्च गोयुतौ।
शतं सहस्रगुर्द्दद्यात् सहस्रं बहुगोधनः॥
यासादहमपि यासमर्थिभ्यः किन्न दीयते।
इच्छाशुरूपो विभवः कदा कस्य भविष्यति॥
अपरावाधमक्लेशं प्रयत्नेनार्জ্জितं धनम्।
स्वल्पं वा विपुलं वापि देयमित्यभिधीयते॥*॥
विक्रयञ्चैव दानञ्च न नेयाः स्थूरनिच्छवः।
दाराः पुत्राश्च सर्व्वस्वमात्मन्येव च योजयेत्॥
आपत्काले च कर्त्तव्यं दानं विक्रय एव वा।
अन्यथा न प्रवर्त्तेत इति शास्त्रार्थनिश्चयः॥*॥
यज्ञो दानं तपो जाप्यं श्राद्धञ्च सुरपूजनम्।

यदृगङ्गायां कृतं सर्व्वं कोटि कोटि गुणम्भवेत् ।
शिवस्य विष्णोरग्रेच सन्निधौ दत्तमक्षयम् ।
ग्रालग्रामशिला यत्र तत्तीर्थं योजनत्रयम् ।
तत्र दानच होमच कोटिकोटिगुणम्भवेत् ।
यदृयत्र दुर्लभं द्रव्यं यस्मिन् कालेऽपि वा पुनः ।
दानार्हौ देशकालौ तौ स्यातां श्रेष्ठौ न चान्यथा ।
पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम् ।
केवलं धर्म्मबुद्धा यद्धर्म्मदानं प्रकथ्यते ।
सहस्रगुणितं दानं भवेद्दत्तं युगादिषु ।
कर्म्मश्राद्धादिकञ्चैव तथा मन्वन्तरादिषु ॥*॥
आहारं मैथुनं निद्रां सन्ध्याकाले विवर्जयेत् ।
कर्म्म चाध्ययनञ्चैव तथा दानप्रतिग्रहौ ॥*॥
तामसेन तु यत्नेन दानेन तपसा तथा ।
देवलोके ध्रुवं वासो देवसायुज्यमेव च ॥*॥
गत्वा यद्दीयते दानं तदनन्तफलं स्मृतम् ।
सहस्रगुणमाहूय याचिते च तदर्द्धकम् ।
आशां दत्वा ह्रदातारं दानकाले निषेधकम् ।
दत्वा सन्तप्यते यस्तु तमाहुर्ब्रह्मघातकम् ।
योऽसङ्ग्रः प्रतिगृह्यापि पुनः सङ्ग्रः प्रयच्छति ।
आत्मानं संक्रमं कृत्वा परांस्तारयते हि सः ॥*॥
यस्य यद्दीयते वस्त्रमलङ्कारादि किञ्चन ।
तेषां दैवतमुद्धार्य्य कृत्वा प्रोक्षणपूजने ।
उत्सृज्य मूलमन्त्रेण प्रतिनाम्ना निवेदयेत् ।
योऽर्चितः प्रतिगृह्णाति दद्यादर्चितमेव वा ।
तावुभौ गच्छतः स्वर्गं नरकञ्च विपर्य्यये ।"

इति वृद्धितत्त्वम् ॥*॥

दानं त्रिविधं सात्त्विकं राजसं तामसञ्च ।
सात्त्विकं यथा,—
"दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥
राजसं यथा,—
"यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं विदुः ॥"
तामसं यथा,—
"अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥"

इति श्रीभगवद्गीता ॥*॥

"हस्त्यश्वं गामजाश्वं मणिमुक्तादिकाञ्चनम् ।
परोक्षं हरते यस्तु पश्चाद्दानं प्रयच्छति ॥
न स गच्छति वै स्वर्गं दातारो यत्र भागिनः ।
अनेन कर्म्मणा युक्ताः पच्यन्ते नरकेऽधमाः ॥"

इति मत्स्यपुराणम् ॥*॥

नित्यनैमित्तिकादिभेदेन तच्चतुर्व्विधं यथा,—
"नित्यं नैमित्तिकं काम्यं त्रिविधं दानमुच्यते ।
चतुर्थं विमलं प्रोक्तं सर्व्वदानोत्तमोत्तमम् ॥
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ।
अनुद्दिश्य फलन्तत् स्याद्ब्राह्मणाय च नित्यकम् ॥
यत्तु पापोपशान्त्यर्थं दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥
अपत्यवित्तनैश्वर्य्यस्वर्गार्थं यत् प्रदीयते ।
दानन्तत् काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः ॥
ईश्वरप्रीणनार्थं ब्रह्मवित्सु प्रदीयते ।
चेतसा धर्म्मयुक्तेन दानं तद्विमलं शिवम् ॥"

इति कूर्म्मपुराणम् ॥

रोगोपशमनाय दानविधिर्यथा,—
"गोदानं भूमिदानच सर्व्वदानं सुरार्चनम् ।
कृत्वा पश्चात् प्रतीकारं कुर्य्यात् पाकूपशान्तये ॥
महापापेषु सर्व्वेषु तदर्द्धं सुखदोषजे ।
अथवापि षड्दांशात् कल्पं वाधिबलाबलात् ॥
कुर्य्यात् सर्व्वं कृतं कर्म्म कुष्ठरोगोपशान्तये ।
गोभूहिरण्यदानच तथामिष्टान्नभोजनम् ॥
चतुर्व्विधं दानमिदं दत्त्वा कुर्य्यात् प्रतिक्रियाम् ।
कदाचिदपि सिध्येत आयुश्च बलक्रिया ॥
मेहे सुवर्णदानच शूले श्वासे भगन्दरे ।
अग्नींश्चस्वन्नदानेन श्वासात् कासाद्विमुच्यते ॥
ज्वरेचेश्वरपूजा च रुद्रजाप्यं समाचरेत् ।
मतिदानान्नदानच ग्राह्यदानं क्षमातुरे ॥
अग्निहोमश्चाग्निमान्द्ये कन्यादानच गुल्मके ।
मेहाश्मरीविनाशाय लवणच्च प्रदापयेत् ॥
बहुभोजनदानेन शूलरोगाद्विमुच्यते ।
घृतमधुप्रदानेन रक्तपित्तं प्रशाम्यति ॥
चतुर्व्विधेन दानेन साध्यः स्याद् ग्रहजोगदः ।
सुवर्णदानात् कुनखी ग्रावदन्तः सुखी भवेत् ॥
रौप्यदानाच्छ्वित्रकुष्ठं साध्यं वापि प्रशाम्यति ।
सिध्यन्ति व्रणदानच वर्ब्बरे लोहदानकम् ॥
सुवर्णदो ददेन्नागं गोदानं बहुसञ्चके ।
नेत्ररोगे घृतं दद्यात् सुगन्धं नासिकागदे ॥
तैलदानं कफरोगे रसदानच जिह्वके ।
उष्णं दद्यात् पित्तरोगे लूतारोगे च शैवलः ।"

इति हारीते द्वितीयस्थाने प्रथमेऽध्याये ॥

दानकर्म्मन्, क्ली, (दानमेव कर्म्म ।) दानक्रिया । तत्पर्य्यायः । दाति १ दाशति २ दासति ३ राति ४ रासति ५ प्रयच्छि ६ प्रयच्छति ७ श्रियति ८ तुञ्जति ९ मंहतः १० । इति दश दानकर्म्माणः । इति देवनिघण्टौ ३ अध्यायः ॥

दानधर्म्मः, पुं, (दानाख्यो धर्म्मः दानरूपो धर्म्मो वा मध्यलोपिसमासः ।) दानस्य फलम् । यथा,

ब्रह्मोवाच ।

"अथातः संप्रवक्ष्यामि दानधर्म्ममनुत्तमम् ।
अर्थानासाद्य पात्रे श्रद्धया प्रतिपादनम् ॥
दानन्तु कथितं तज्ज्ञैर्भुक्तिमुक्तिफलप्रदम् ।
न्यायेनोपार्ज्जयेद्वित्तं दानभोगफलञ्च तत् ॥
अध्यापनं याजनञ्च वृत्तमाहुः प्रतिग्रहम् ।
कृषीदं क्षत्रियाश्चिन्त्यं चक्रवृत्तोऽथ चार्ज्जयेत् ॥
यद्दीयते च पात्रेभ्यस्तद्दानं परिकीर्त्तितम् ।
नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम् ॥
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ।
अनुद्दिश्य फलं तत् स्यात् ब्राह्मणाय तु नित्यकम् ॥
यत्तु पापोपशान्त्यै च दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥
अपत्यवित्तनैश्वर्य्यस्वर्गार्थं यत् प्रदीयते ।
दानं तत् काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः ॥
ईश्वरप्रीणनार्थाय ब्रह्मवित्सु प्रदीयते ।
चेतसा सत्त्वयुक्तेन दानं तत् विमलं स्मृतम् ॥
रत्नैः सन्ततां भूमिं यवगोधूमशालिनीम् ।
ददाति वेदविदुषे स न भूयोऽभिजायते ।
भूमिदानात् परं दानं न भूतं न भविष्यति ॥
विद्यां दत्त्वा ब्राह्मणाय ब्रह्मलोके महीयते ।
दद्यादहरहस्तान्तु श्रद्धया ब्रह्मचारिणे ।
सर्व्वपापविनिर्म्मुक्तो ब्रह्मस्थानमवाप्नुयात् ॥
वैशाख्यां पौर्णमास्यान्तु ब्राह्मणान् सप्त पञ्च च ।
उपोष्याभ्यर्च्चयेद्विद्वान् मधुना तिलशर्क्करैः ॥
गन्धादिभिः समभ्यर्च्च वाचयेद्वा स्वयं वदेत् ।
प्रीयतां धर्म्मराजेति यथा मनसि वर्त्तते ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥
कृष्णाजिने तिलान् कृत्वा हिरण्यमधुसर्पिषा ।
ददाति यस्तु विप्राय सर्व्वं तरति दुष्कृतम् ॥
छत्रान्नसुदकुम्भञ्च वैशाख्याञ्च विशेषतः ।
निर्द्दिश्य धर्म्मराजाय विप्रेभ्यो सुखमेधते ॥
द्वादश्यामथवैयेद्विष्णुमुपोष्याघप्रजाग्निनीम् ।
सर्व्वपापविनिर्म्मुक्तो नरो भवति निश्चितम् ॥
यो हि यां देवतामिच्छेत् समाराधयितुं नरः ।
ब्राह्मणान् भोजयेद्यत्नाद्भोगाय तोषिताः
सुराः ॥
सन्ततिकामः सततं पूजयेद्वै पुरन्दरम् ।
ब्रह्मवर्च्चसकामस्तु ब्राह्मणान् ब्रह्मविद्यया ॥
आरोग्यकामोऽथ रविं धनकामो हुताशनम् ।
कर्म्मणां सिद्धिकामस्तु पूजयेद्वै विनायकम् ॥
भोगकामो हि अग्निं धनकामः समीरणम् ।
मुमुक्षुः सर्व्वसंसारात् प्रयत्नेनार्च्चयेद्धरिम् ॥
अकामः सर्व्वकामो वा पूजयेत्तु गदाधरम् ।
वारिदस्तृप्तिमाप्नोति सुखमक्षयमन्नदः ॥
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ।
भूमिदः सर्व्वमाप्नोति दीर्घमायुर्हिरण्यदः ॥
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ।
वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ॥
अनड्वाहं श्रियं पुष्टां गोदो ब्रह्मस्व पिप्पलम् ।
धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्म शाश्वतम् ।
वेदवित्तु ददद्दानं स्वर्गलोके महीयते ॥
गवां घासप्रदानेन सर्व्वपापैः प्रमुच्यते ।
इन्धनानां प्रदानेन दीप्ताग्निर्जायते नरः ॥
औषधं क्षौद्रमाहारं रोगिणो रोगशान्तये ।
ददानो रोगरहितः सुखी दीर्घायुरेव च ॥
असिपत्रवनं मार्गं क्षुरधारासमन्वितम् ।
तीक्ष्णातपञ्च तरति छत्रोपानत्प्रदानतः ॥
यद्यदिष्टतमं लोके यच्चास्य हृदयं प्रिये ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥
अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः ।
संक्रान्त्यादिषु कालेषु दत्तं भवति चाक्षयम् ।
प्रयागादिषु तीर्थेषु गयायाञ्च विशेषतः ।
दानधर्म्मात् परो धर्म्मो भूतानां नेह विद्यते ॥
स्वर्गायुर्भुक्तिकामेन देयं पापोपशान्तये ।
दीयमानन्तु यो मोहात् गोविप्राग्निसुरेषु च ।
निवारयति पापात्मा तिर्य्यग्योनिं व्रजेन्नरः ॥

यस्तु दुर्भिक्षवेलायामन्नार्थं न प्रयच्छति ।
स्त्रियमाणेषु विप्रेषु ब्रह्महा स तु गर्हितः ॥"
इति गारुडे दानधर्म्मनाम ५१ अध्यायः ॥*॥
अन्यत् महाभारते ग्लानिपर्व्वणि द्रष्टव्यम् ॥

दानपतिः, पुं, (दाने पतिः श्रेष्ठः ।) सततदाता ।
इति जटाधरः ॥ (यथा, महाभारते । ५ । ११६ । २२ ।
"जातो दानपतिः पुत्रस्त्वया शूरस्तथापरः ॥")
अक्रूरः । इति श्रीभागवतम् ॥ (यथा, हरिवंशे । ७८ । ८४ ।
"गच्छ दानपते ! क्षिप्रं तावित्यानयितुं व्रजात् ।
नन्दगोपस्य गोपांश्च करदान् मम शासनात् ॥"
देवभेदः । यथा, हरिवंशे । २३२ । ७ ।
"सहस्रपादः सुमुखः क्षत्रश्चैव महासुरः ।
रथोत्कटो दानपतिः शैलकर्णी कृताकुलः ॥")

दानफलं, क्ली, (दानस्य फलम्) दानजन्यफलम् ।
तद्विवरणं यथा,—
"श्रद्धया यद्दीयते दानं भक्त्या पात्रे विधानतः ।
तदनन्तफलं विद्धि अवस्थात्रितये नृप ! ॥
तमोवृतस्तु यो दद्यात् भयात् क्रोधात्तथैव च ।
नृप ! दानन्तु तत् सर्व्वं शुक्ले गर्भस्थ एव तु ॥
ईर्षामत्सरमनार्य्यैव दम्भार्थं चार्थकारणात् ।
यो ददाति द्विजातिभ्यः स वाल्ये तु तदश्नुते ॥
वैष्णवैर्देवविहीनैश्च सन्ध्योपासनवर्ज्जितम् ।
यद्दानं दीयते तस्मै दृद्धकाले तदश्नुते ॥
वृथा जन्मानि चत्वारि वृथा दानानि षोड़श ।
साम्प्रतं संप्रवक्ष्यामि यथावदनुपूर्व्वशः ॥
अपुत्रस्य वृथा जन्म धर्म्मवाह्या नराः सदा ।
परपाकं सदाश्नन्ति परतापरताश्च ये ॥
देवपित्रविहीनं यत् ईश्वरेभ्यः सदीयतः ।
दत्त्वानुकीर्त्तनाच्चैव वेदाग्निव्रतत्यागिने ॥
अन्यायोपार्ज्जितं दानं अर्थं ब्रह्महणे तथा ।
गुरवेऽनृतवक्त्रे च क्लीनाय पतिताय च ॥
क्रतघ्नाय च यद्दत्तं सर्व्वदा ब्रह्मविद्विषे ।
याचकाय च सर्व्वस्व दृष्वल्याः पतये तथा ॥
परिचारकाय भृत्याय सर्व्वत्र पिशुनाय च ।
इत्येतानि तु राजेन्द्र ! वृथादानानि षोड़श ॥"
इत्याद्ये वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ॥

दानवः, पुं, (दनोरपत्यम् । दनु + "तस्यापत्यम् ।" ४ । १ । १२ । इति अण् ।) असुरः । इत्यमरः । १ । १ । १२ । (यथा, ऋग्वेदे । २ । ११ । १० ।
"नि मायिनो दानवस्य माया
अपादयत् पपिवान्त्सुतस्य ॥")
स दनुकन्यादनुगर्भे कश्यपाज्जात एकषष्टिसंख्यकास्तेष्वष्टादश प्रधानास्तेषां नामानि यथा,
द्विमूर्द्धा १ शम्बरः २ अरिष्टः ३ हयग्रीवः ४ विभावसुः ५ अयोमुखः ६ शङ्कुशिराः ७ स्वर्भानुः ८ कपिलः ९ अरुणः १० पुलोमा ११ वृषपर्व्वा १२ एकचक्रः १३ तापनः १४ धूम्रकेशः १५ विरूपाक्षः १६ विप्रचित्तिः १७ दुर्ज्जयः १८। इति श्रीभागवतम् ॥ (महाभारते चत्वारिंशत्तमेऽनोः पुत्रा उक्ताः । यथा, तत्रैव । १ । ६५ । २१—२२ ।
"चत्वारिंशद्दनोः पुत्राः ख्याताः सर्व्वत्र भारत ॥
तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः ॥
शम्बरो नमुचिश्चैव पुलोमा चेतिविश्रुतः ।
असिलोमा च केशी च दुर्ज्जयश्चैव दानवः ॥"
इत्यारभ्य तत्रैवाध्याये विस्तरशो द्रष्टव्यम् ॥)

दानवजः, पुं, (दाने वज्र इव ।) वैश्यः । इति पुराणम् ॥ (वैश्यजातिको गान्धर्व्वो देवश्च अश्वविशेषः । यथा, महाभारते । १ । १७१ । ५१ ।
"वज्रमाणिर्व्रजश्च; स्यात् चक्रं वज्रमथ स्रुतम् ।
वैश्या वै दानवज्राश्च कर्म्मवज्रा यवीयसः ॥")

दानवारिः, पुं, (दानवानामरिः ।) देवता । इत्यमरः । १ । १ । ६ ॥ (विष्णुः । यथा, काशीखण्डे । २६ । ८० ।
"दर्शितानेककुतुका दुष्टदुर्ज्जयदुःखहृत् ।
दैत्यकुञ्जरदुर्व्वारी च दानवारिपदाब्जजा ॥"
"दानवारिपदाब्जजा विष्णुपादार्घ्यसम्भूतेति स्रुतेः ।" इति तट्टीका ॥ दानमेव वारि इति विग्रहे गजमदजले, क्ली ॥)

दानविधिः, पुं, (दानस्य विधिः ।) दानस्य विधानम् । यथा,—
"अथ दानविधिं वक्ष्ये तं मे शृणुत सुव्रताः ।
अन्येभ्यो ब्राह्मणाः श्रेष्ठास्तेभ्यश्चैव क्रियापराः ॥
ब्रह्मवेत्ता च तेभ्योऽपि प्राज्ञं विद्यातपोन्वितः ।
गोभूधान्यहिरण्यादि पात्रे दातव्यमर्च्चितम् ॥
विद्यातपोभ्यां हीनेन न तु याच्ञाः प्रतीयहः ।
याचन् प्रदातारमधो नयत्यात्मानमेव च ॥
दातव्यं प्रवरं पात्रे निमित्तेषु विशेषतः ।
याचितेनापि दातव्यं श्रद्धापूतन्तु शक्तितः ॥
हेमशृङ्गी शफे रौप्यैः सुशीला वस्त्रसंयुता ।
सकांस्यपात्रा दातव्या धौरिणी गौः सदक्षिणा ॥
दशसौवर्णिकं शृङ्गं शफं सप्तपलैः कृतम् ।
पञ्चाशत्पलिकं पात्रं कांस्यं वत्सस्य कीर्त्तितं ॥
स्वर्णपिण्यलपात्रेण वत्सो वा वत्सिकापि वा ।
तस्यामपि च दातव्यं अपत्यं रोगवर्ज्जितम् ॥
दाता स्वर्गमवाप्नोति वत्सरान् रोमसम्मितान् ।
कपिला चेत्तारयते भूयश्चासप्तमं कुलम् ॥
यावद्वत्सस्य द्वौ पादौ मुखं योन्यां प्रदृश्यते ।
तावद्भौः पृथिवी ज्ञेया यावद्गर्भे न सुच्यति ।
यथाकथञ्चिद्दत्त्वा गां क्षेत्रं वाधेनुमेव वा ।
अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते ॥
श्रान्तसंवाहनं रोगिपरिचर्य्या सुरार्च्चनम् ।
पादशौचं द्विजोच्छिष्टमार्ज्जनं गोप्रदानवत् ॥
द्विजाय यदभीष्टन्तु दत्त्वा स्वर्गमवाप्नुयात् ।
भूदीपाश्वान्नवस्त्राम्बिलसर्पिःप्रतिश्रयान् ॥
गृहधान्यच्छत्रमालायानवस्त्रहृतं जलम् ।
शय्याशूलेषनं दत्त्वा स्वर्गलोके महीयते ॥
ब्रह्मदाता ब्रह्मलोकं प्राप्नोति सुरदुर्ल्लभम् ॥
वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि ।
मूल्येनापि लिखित्वापि ब्रह्मलोकमवाप्नुयात् ॥
एतन्मूलं जगत् यस्मादश्नुते भूमीश्वरः ।
तस्मात् सर्व्वप्रयत्नेन कार्य्यो वेदार्थसंग्रहः ॥
इतिहासं पुराणं वा लिखित्वा यः प्रयच्छति ।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणोन्नतिम् ।
लोकायतं कुतर्कञ्च प्राहतं म्लेच्छभाषितम् ।
न श्रोतव्यं द्विजेनैव तद्धो नयति द्विजम् ॥
समर्थो यो न शृणुयात् दाढ्यलोकमवाप्नुयात् ॥
कुशाः शाकं पयो गन्धाः प्रत्याख्येयं न वारि च ।
अयाचितादृतं ग्राह्यमपि दुष्कृतकर्म्मणः ॥
अन्यत्र कुलटाशूद्रपतितेभ्यो द्विजस्त्रियाः ।
देवार्तिश्राद्धयज्ञेषु पित्रर्थमेव च ।
सर्व्वतः प्रतिगृह्णीयादात्मनश्चार्थमेव च ॥"
इति गारुडे ६८ अध्यायः ॥

दानशीलः, त्रि, (दाने शीलं स्वभावो यस्य । यद्वा, दानस्य शीलं सन्ततमनुष्ठानं यस्य ।) दाता । तत्पर्य्यायः । वदान्यः २ वदन्यः ३ । इति हेमचन्द्रः । ३ । १५ ॥ (यथा, महाभारते । ५ । १२२ । ५ ।
"यत् फलं दानशीलस्य क्षमाशीलस्य यत् फलम् ।
यच्च मे फलमाधाने तेन संयुज्यतां भवान् ॥")

दानशौण्डः, त्रि, (दानेषु शौण्डः अतिदक्षः ।
"सप्तमी शौण्डैः ।" २ । १ । ४० । इति समासः ।)
बहुप्रदः । इत्यमरः । ३ । १ । ६ ॥ (यथा, माघे । १४ । ४६ ।
"निर्गुणोऽपि विमुखो न भूपते-
र्दानशौण्डमनसः पुरोऽभवत् ॥")

दानसागरः, पुं, (दानानां सागर इव ।) षोड़शसङ्ख्यकषोड़शः । यथा,—
"यः कश्चित् कुरुते देवि ! यद्वशे दानसागरम् ।
वृषोत्सर्गे महादानं यत्किञ्चित् पृथिवीतले ।
पुरश्चरणं तथा होमं यः कुर्य्याद्विधिबोधितम् ।
सर्व्वं तस्य वृथा देवि ! श्रीगुरोरर्च्चनं विना ॥"
इति श्रीकामधेनुतन्त्रे आगमसन्दर्भे ज्ञानदर्पणे देवदेवीसंवादे २५ पटलः ॥

दानीयः, त्रि, (दीयतेऽसौ इति । दा दाने + "ऋत्यक्लृपृजि वहुलम् ।" ३ । ३ । ११३ । इति सम्प्रदाने अनीयर् ।) सम्प्रदानम् । इति मुग्धबोधम् । (यथा, तत्रैव कारकप्रकरणे ।
"सर्व्वोऽर्थो जीवनः पाता दानीयः प्रभवो लयः ॥")

दातृ, त्रि, (ददातीति । दा + "दाभाभ्यां नुः ।" उणा । ३ । ३२ । इति नुः ।) दाता । विक्रान्तः । इति मेदिनी । ने, १० ॥ शूरे । वायुः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (पुं, दानवः । यथा, ऋग्वेदे । २ । १२ । ११ ।
"ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥"
दीयते इति कर्म्मणि तुः । देयः । यथा, ऋग्वेदे । ८ । २५ । ६ ।
"सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः ॥")

दान्तः, त्रि, (दाम्यतीति । दम + कर्त्तरि क्तः ।) तपःक्लेशसहः । (यथा, मनुः । ४ । ३५ ।
"कुलघ्नक्लेशनखघ्नमृदन्तः शुक्लाम्बरः शुचिः ॥")

दमितः। इत्यमरः। २। ७। ४३॥ (यथा, महाभारते। १। २२२। ४६।
"तथैवाश्वतरीणाञ्च दान्तानां वातरंहसाम्॥"
दम्भेन निर्वृत्तम्। दम्भ+"तेन निर्वृत्तम्।" ४। २। ६८। इति अण्। दम्भनिर्म्मितम्। यथा, महाभारते। ५। ४६। ५।
"रुचिरैरासनैर्लीलां काञ्चनैर्दारवैरपि।
अक्षसारमयैर्दान्तैः स्वास्तीर्णैः सोत्तरच्छदैः॥")
दाता। इति संक्षिप्तसारे उणादिवृत्तिः॥
पुं, दमनवृक्षः। श्रिक्षितवृक्षः। इति राजनिर्घण्टः॥ (विदर्भराजपुत्रविशेषः। यथा, महाभारते। ३। ५३। ८—६।
"तस्मै प्रसन्नो दमनः सभार्य्याय वरं ददौ।
कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः॥
दमयन्तीं दमं दान्तं दमनञ्च सुवर्चसम्॥")
स्त्री, अक्षरोविशेषः। यथा, महाभारते। १३। १६। ४५।
"विद्युता प्रथमा दान्ता विद्योता रतिरेव च॥")
दान्तिः, स्त्री, (दम+क्तिन्। "अनुनासिकस्येति।" ६। ४। १५। इति दीर्घः।) तपःक्लेशसहिष्णुता। तत्पर्य्यायः। दमथुः २ दमः ३। इत्यमरः। ३। २। ३॥
दापितः, त्रि, (दाप्यते स्म इति। दा+णिच्+कर्म्मणि क्तः।) साधितः। इत्यमरः। ३। १। ४०॥ धनादिना आयत्तीकृतः। इति भरतः॥ श्रुती इति ख्यातं वक्षे दत्तं स इति रमानाथः॥ दक्षितः। इति विद्याविनोदः॥ शोधितद्रव्यम्। इति नयनानन्दः॥ दायित इति पाठोऽपि। इति कालिङ्गपुरुषोत्तमौ॥
दाम, [न्] क्ली स्त्री, (दीयते इति। दा दाने दो अवखण्डने वा+"सर्व्वधातुभ्यो मनिन्।" उणा। ४। १४५। इति मनिन्।) यत्रैकस्मिन् बहुप्रग्रहयुक्ते अनेकगावो बध्यन्ते ततः। दाउनि इति दौंका इति च भाषा। तत्पर्य्यायः। सन्दानम् २। इत्यमरः। २। ६। ७३॥ रज्जुः। इति दामोदरदर्शनात्॥ (यथा, भागवते। १। ८। ३१।
"गोप्याददे त्वयि कृतागसि दाम तावत्
या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम्।
वक्त्रं निनीय भवभावनयास्थितस्य
सा मां विमोहयति भीरपि यद्बिभेति॥"
माला। यथा, माघे। ४। ५०।
"चलमलघुविलम्बिपिच्छदाम्नः
शिखरशिखाः शिखिशेखरानुयान्ति॥"
दातरि, त्रि। यथा, ऋग्वेदे। ६। ४४। २।
"यः शग्मस्तविशग्म ते रायो दामा मतीनाम्॥"
"रायो धनस्य दामा दाता भवति।" इति तद्भाष्ये सायणः॥)
दामनपर्व्व, [न्] क्ली, (दमनो दमनवृक्षस्तस्येदमित्यण्प्रत्यये दामनं तद्भञ्जनसम्बन्धि पर्व्व यस्मिन्।) दमनभञ्जननिधिः। सा चैत्रशुक्लचतुर्दश्यौ। इति तिथ्यादितत्त्वम्॥
दामनी, स्त्री, (दामैव। दामन्+स्वार्थे प्रज्ञादित्वात् अण्। "अन्।" ६। ४। १६७। इति प्रकृतिभावः। "टिड्ढेति।" ४। १। १५। इति ङीप्।) पशुबन्धनरज्जुः। तत्पर्य्यायः। पशुरज्जुः २। इत्यमरः। २। ६। ७३॥ (यथा, हरिवंशे। ६५। २४।
"कीलैरारोप्यमाणेषु दामनीपाशपाशिते॥")
दामलिप्तं, क्ली, तमोलिप्तदेशः। इति हेमचन्द्रः। ४। ४५॥
दामा, स्त्री, (दामन्+"टाबुभाभ्यामन्यतरस्याम्।" ४। १। १३। इति पक्षे ङाप्।) दाम। इति भरतः॥
दामाचर्णं, क्ली, (दामाचलम्। पृषोदरादित्वात् लस्य नः।) अश्वादेः पादबन्धनरज्जुः। इति हेमचन्द्रः। ४। ३१७॥
दामाचलं, क्ली, (दाम्नः अचलमिव।) एकग्रफाङ्गबन्धः। अश्वादिपादबन्धनरज्जुः। इति हारावली। ६१॥ (यथा, माघे। ५। ६१।
"सस्नुः सरोवपरिषारकवार्य्यमाणा
दामाचलस्खलितलोलपदं तुरङ्गाः॥")
दामोदरः, पुं, ("दमादिसाधनेनोदारा उत्कृष्टा मतिर्यत्र तया गम्यते इति दामोदरः। 'दाम्ना दामोदरं विदुः।' इति भगवद्वचनात्। यशोदया दाम्नोदरे बद्ध इति वा दामोदरः। 'दामानि लोकनामानि तानि यस्योदरान्तरे। तेन दामोदरो देवः श्रीधरस्तु रमाश्रितः॥' इति वा।" इति विष्णुसहस्रनामभाष्ये शङ्करः॥ ५३॥ तथा, महाभारते। ५। ७०। ८।
"देवानां स्वप्रकाशत्वात् दमाद्दामोदरो विभुः॥")
विष्णुः। इत्यमरः। १। १। १८॥ (दाम रज्जुरुदरे यस्य। श्रीकृष्णः। यथा, महाभारते। १। १६०। १६।
"दामोदरो भ्रातरमुग्रवीर्य्यं
हलायुधं वाक्यमिदं बभाषे॥"
यशोदयासौ उदरदेशे दाम्ना बद्ध आसीत् अतोऽस्य तथा नाम। यथा, हरिवंशे। ६३। १४, २६।
"दाम्ना चैवोदरे बद्धा प्रत्यबन्धद्दुदूखले।
यदिप्रकृष्टोऽसि गच्छेति तस्मात्ता कर्म्म साकरोत्॥"
"स च तेनैव दाम्ना तु कृष्णो वै दामबन्धनात्।
गोष्ठे दामोदर इति गोपीभिः परिगीयते॥")
भूताङ्गदृविशेषः। इति हेमचन्द्रः। २। १३०॥ (ग्रालग्रामस्यूर्त्तिविशेषः। तल्लक्षणं यथा, पद्मपुराणे।
"स्थूलो दामोदरो ज्ञेयः सुव्यक्तचक्रो भवेत्तु सः।
चक्रे तु मध्यदेशेऽस्य पूजितः सुखदः सदा॥"
अस्य अन्यद्विवरणन्तु ग्रालग्रामशब्दे द्रष्टव्यम्॥*॥ काश्मीरस्य नृपविशेषः। यथा, राजतरङ्गिण्याम्। १। ६४।
"गतिं प्रवीरसुतभां तस्मिन् सुचरित्रिये गते।
श्रीमान् दामोदरो नाम ततस्तुरुरभूत क्षितिम्॥")
दाम्भिकः, पुं स्त्री, (दम्भेन चरतीति। दम्भ+"चरति।" ४। ४। ८। इति ठक्।) वक पक्षी। इति राजनिर्घण्टः॥ दम्भयुक्ते, त्रि॥ (यथा, मनुः। ३। १५६।
"पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी॥")
दाय, ऋ ङ दाने। इति क्रविकल्पद्रुमः॥ (भ्वादयात्मं-सर्क-सेट्।) ऋ, अददायत्। ङ, दायते। इति दुर्गादासः॥
दायः, पुं, (दीयते इति। दा दाने+घञ्।"आतो युक्चिण्कृतोः।" ७। ३। ३३। इति युक्।) यौतुकादिदेयधनम्। (यथा, महाभारते। २। ५१। १।
"दायन्तु विविधं तस्मै द्रव्यं मे गदतोऽनघ!।
यज्ञार्थं राजभिर्दत्तं महान्तं धनसञ्चयम्॥")
कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्राह्मणादिभ्यश्च यद्द्रव्यं दीयते तत्। इति भरतः॥ तत्पर्य्यायः। हरद्यम् २। इत्यमरः। २। ८। २८॥ दोह्यद्रव्यभाजनम्। विभक्तव्यपिण्डद्रव्यम्। (यथा, मनुः। ६। १६४।
"औरसो विभजन् दायं पित्र्यं पञ्चममेव वा॥"
विभागार्हधनमात्रम्। यथा, तत्रैव। ६। ७०।
"संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः।
ऊर्द्धं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत्॥"
दा दाने+भावे घञ्।) दानम्। इति मेदिनी। ये, ३०॥ (यथा, मनुः। ८। १६६।
"अस्वामिना कृतो यस्तु दायो विक्रय एव वा।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः॥")
स्थानम्। (दो छेदे+घञ्।) खण्डनम्। इति शब्दरत्नावली॥ जयः। इत्यजयपालः॥ (ददातीति। दा+"ग्रास्यसिदाधेति।" ३। १। १४१। इति क्यः। दातरि, त्रि। इति व्याकरणम्॥)
दायकः, त्रि, (ददातीति। दा+ण्वुल्।) दाता। यथा। इतारिगतिदायक इति भक्तिरसाश्रितसिन्धुः॥ (यथाच महाभारते। ३। १६३। ३३।
"तावतां गोसहस्राणां फलं प्राप्नोति दायकः॥")
दायबन्धुः, पुं, (दाये बन्धुः।) भ्राता। इति शब्दरत्नावली॥
दायभागः, पुं, (दायस्य भागः।) सम्बन्धिभ्रात्रेश्च सम्बन्धिधनविभागः। पूर्व्वद्रव्यस्वामिसम्बन्धाधीनं ततस्त्याज्यपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दस्तस्य विभागः। एकदेशगतस्यैव भूदिरण्यादेरुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया व्यवस्थितस्य गुटिकापातादिना यद्भजनम्। अथवा विशेषेण भजनं स्वत्वज्ञापनं वा। यत्र चैकं दासीगवादिकं बहुसाधारणं तत्रापि तत्तत्कालविशेषवहनदोहनफलेन स्वत्वं व्यज्यते॥*॥ अथ दायाधिकारक्रमे पुंधनाधिकारिणः। तत्रादौ मृतधने औरसपुत्रस्याधिकारः। तदभावे पौत्रस्य। तदभावे प्रपौत्रस्य। मृतपितृकपौत्रस्तत्पितामहकप्रपौत्रयोः पुत्रेण सह तुल्याधिकारः। एषामभावे पत्नी धनाधिकारिणी। तत्रायं विशेषः पत्नी धनं गृह्णीत

एव न तु तस्य दानाधमनविक्रयान् कर्त्तुमर्हति। किन्तु भर्त्तुरौर्द्धदेहिकक्रियार्थं दानादिकमप्यनुमतम्। वर्त्तनाशक्तौ आधमनमप्यनुमतं तदशक्तौ विक्रयश्चमपि। भर्त्तुरौर्द्धदेहिकक्रियार्थमर्थानुरूपं भर्त्तृसपिण्डभर्त्तृगुरुभर्त्तृदौहित्रसन्तानभर्त्तृभागिनेयभर्त्तृमातुलेभ्यो दद्यात्। एतेषामभावे स्वपितृकुले दद्यात्॥ पत्यभावे दुहिता। तत्रापि प्रथमं कुमारी। अत्रायं विशेषः कन्या जाताधिकारा सत्यात् परिणीता सती अविद्यमानपुत्रा यदि मृता तदा ततपितृदाये सपुत्रायाः सम्भावितपुत्रायाः भगिन्यास्तुल्याधिकारः। कुमार्यभावे चोढ़ायाः पुत्रवत्या सम्भावितपुत्रायाश्च तुल्याधिकारः। एतयोरेकतराभावे अन्याधिकारिणी। एतयोरभावेऽपि वन्ध्यापुत्रहीनविधवयोर्नाधिकारः। सर्व्वदुहित्रभावे दौहित्रस्याधिकारः। तदभावे पितुरधिकारः। तदभावे मातुरधिकारः। तदभावे सोदरस्याधिकारः। सोदराभावे सजातीयवैमात्रेयाधिकारः। तदभावे सौदरभ्रातृपुत्राद्यामधिकारः। संसर्ग्यसंसर्गिसोदरभ्रातृपुत्रेषु संसर्गिभ्रातृपुत्रस्याधिकारः। एवं संसर्ग्यसंसर्गिवैमात्रेयभ्रातृपुत्रे सति संसर्गिवैमात्रेयभ्रातृपुत्रस्याधिकारः। यदा त्वसंसर्गी सोदरभ्रातृपुत्रः संसर्गी चासोदरभ्रातृपुत्रस्तदा तयोर्युगपदधिकारः। यदा पुनः सोदरवैमात्रेयभ्रातृपुत्रौ संसर्गिणावसंसर्गिणौ वा तदा उभयथैव सोदरभ्रातृपुत्रस्याधिकारः। भ्रातृपुत्राभावे भ्रातृपौत्रस्याधिकारः। अत्रापि सोदरवैमात्रेयभ्रातृपुत्रवत् क्रमो द्रष्टव्यः। भ्रातृपौत्राभावे पितृदौहित्रस्याधिकारः। अत्र सोदरभगिनीपुत्रवैमात्रेयभगिनीपुत्रयोस्तुल्यवदधिकारः। पितुर्दौहित्राभावे पितामहस्याधिकारः। पितामहाभावे पितामह्या अधिकारः। पितामह्यभावे पितृव्यस्याधिकारः। तदभावे पितृव्यपुत्रस्याधिकारः। तदभावे पितृव्यपौत्रस्याधिकारः। पितृव्यपौत्राभावे पितामहदौहित्रस्याधिकारः। पितामहदौहित्राभावे पितृव्यदौहित्रस्याधिकारः। तदभावे प्रपितामहस्याधिकारः। तदभावे प्रपितामह्या अधिकारः। ततः पितामहभ्रातृधिकारी। तदभावे पितामहभ्रातृपुत्रः। तदभावे पितामहभ्रातृपौत्रः। ततः प्रपितामहदौहित्रोऽधिकारी। ततः पितामहभ्रातृदौहित्रोऽधिकारी। तदभावे मातामहः। तदभावे मातुलः। तदभावे मातृष्वसीयः। तदभावे मातुलपुत्रः। तदभावे मातुलपौत्रः। एषामभावे सकुल्याः। सकुल्योऽपि द्विविधः अधस्तन ऊर्द्धतनश्च तत्र प्रपौत्रपुत्रावधयोऽधस्तनाश्चयः वृद्धप्रपितामहादिश्च ऊर्द्धतनास्तत्राप्यादावधस्तनानां सकुल्यानां क्रमेणाधिकारः। तेषामभावे ऊर्द्धतनानां क्रमेणाधिकारः। एवंविधसकुल्याभावे समानोदकाः। तदभावे आचार्यः। तदभावे शिष्यः तदभावे सहवेदाध्यायिब्रह्मचारिणः। तदभावे ग्रामस्थाः सगोत्राः। तदभावे तथाविधाः समानप्रवराः। उक्तपर्य्यन्ताभावे तद्ग्रामस्थाश्चविद्यादिगुणयुक्ता ब्राह्मणा धनाधिकारिणः। एतेषामभावे ब्राह्मणधनवर्ज्जं राजाधिकारी। ब्राह्मणधनस्य तु गुणवद्ब्राह्मणपर्य्यन्ताभावे ब्राह्मणान्तरस्य ग्रामान्तरस्यापि अधिकारः। वानप्रस्थयतिब्रह्मचारिणां धनं धर्म्मभाङ्सच्छिष्याचार्य्या गृह्णीयुः। तदभावे चैकत्रवासी एकाश्रमी वा गृह्णीयात्। ब्रह्मचारी च द्विविधः नैष्ठिक उपकुर्व्वाणश्च। तत्र नैष्ठिकधने आचार्य्यस्याधिकारः। उपकुर्व्वाणस्य तु धनं पित्रादिभिरेव ग्राह्यम्। इति पुंधनाधिकारिणः॥ * ॥

अथ स्त्रीधनाधिकारक्रमः।

तत्र कुमारीधने प्रथमं सोदरभ्रात्राधिकारी। तदभावे माता तदभावे पिता। क्वदत्तधने वरोऽधिकारी॥ * ॥

अथोढ़ास्त्रीधनाधिकारक्रमनिरूपणार्थं तद्धनं निरूप्यते। विवाहकाले लब्धं यौतुकं धनम् १ भर्त्तृनीयमाना पितृभ्रातृकुलात् यद्धनं लभते तत् २ भर्त्तृदत्तम् ३ भ्रातृदत्तम् ४ पितृदत्तम् ५ मातृदत्तम् ६ द्वितीयविवाहार्थिना पूर्व्वस्त्रिये पारितोषिकं यद्दत्तं तत् ७ अन्याच्छादनम् ८ अलङ्करणम् ९ गृहादिकर्म्मिरूपण्यिस्त्रिभर्त्तृद्वारेणान्येषां गृहादिनिष्पादनादुत्कोचविधयान्येभ्यो यद्धनं लब्धं तत् १० पुत्रदत्तम् ११ मातुलादिदत्तम् १२ विवाहात् परतः पित्रादिना भर्त्रादिना च यद्दत्तम् १३। भर्त्तृदत्तस्यावरातिरिक्तानामेतेषां धनानां स्त्री दानादिकं कर्त्तुमर्हति॥ * ॥

तदेवं स्त्रीधने निरूपिते तस्यां मृतायां तद्धनाधिकारो निरूप्यते। तत्र यौतुकधने कुमार्याः प्रथममधिकारः। तदभावे वाग्दत्तायाः तदभावे चोढ़ायाः पुत्रवत्याः सम्भावितपुत्रायाश्च युगपदधिकारः। तदभावे वन्ध्याविधवयोस्तुल्यवदधिकारः। तत्र कुमारी वाग्दत्ता जाताधिकारानन्तरं परिणीता सती पश्चाद्वन्ध्यात्वेनावधृता पुत्रमप्युत्पाद्यैव विधवा भूता वा तदा तस्यां मृतायां तत्संक्रान्तमाल्धने तद्भगिन्योः पुत्रवतीसम्भावितपुत्रयोरभावे वन्ध्याविधवयोरप्यधिकारः। सर्व्वदुहित्रभावे पुत्रस्याधिकारः। पुत्राभावे दौहित्रोऽधिकारी दौहित्राभावे पौत्रः। तदभावे प्रपौत्रः। तदभावे सपत्नीपुत्रः। तदभावे सपत्नीपौत्रः। तदभावे सपत्नीप्रपौत्रः। एतत्पर्य्यन्ताभावे ब्राह्मदैवार्षगान्धर्व्वप्राजापत्याख्यविवाहपञ्चकलब्धयौतुकधने भर्त्रधिकारः। भर्त्तुरभावे भ्रातुः। तदभावे मात्राधिकारिणी। तदभावे पितुः। सपत्नीप्रपौत्रपर्य्यन्ताभावे आसुरराक्षसपैशाचाख्यविवाहत्रिकलब्धयौतुकधने तु प्रथमं मातुरधिकारः। तदभावे पितुः। पितुरभावे भर्त्तुः॥ अथायौतुकस्त्रीधनाधिकारिक्रमः। तत्र विवाहपूर्व्वापरकालपित्रादत्तयौतुकाभ्यामतिरिक्तस्त्रीधने कन्यापुत्रयोर्युगपदधिकारः। तयोरेकतराभावे अन्यतरस्य तद्धनं तयोर्द्वयोरभावे जरावाः पुत्रवत्याः सम्भावितपुत्रायाश्च तुल्यवदधिकारः। एतयोरेकतराभावे अन्यस्या अधिकारः। एतयोर्द्वयोरभावे पौत्रः। पौत्राभावे दौहित्रः। तदभावे प्रपौत्रः। तदभावे सपत्नीपुत्रः तदभावे सपत्नीपौत्रः। तदभावे सपत्नीप्रपौत्रोऽधिकारी। ततो वन्ध्या विधवा च तुल्यवदधिकारिण्यौ। एतयोरेकतराभावे चान्यतरस्याः। वन्ध्याविधवापर्य्यन्ताभावे यौतुकवत् ब्राह्मादिविवाहपञ्चकविवाहिताया धने भर्त्तृभ्रातृमातृपितॄणां क्रमशोऽधिकारः। विवाहकाले तत्पूर्व्वापरकाले वा स्त्रिये यद्धनं पित्रा दत्तं तत्र धने प्रथमं कुमार्याः। तदनन्तरमूढ़यो: पुत्रवतीसम्भावितपुत्रयोः। तदनन्तरं वन्ध्याविधवयोश्चाधिकारः। सर्व्वदुहित्रभावे पुत्राटैर्यौतुकधनान्तरवत् क्रमेणाधिकारः। ततो ब्राह्मादिविवाहपञ्चकलब्धयौतुकधनेषु पितृपर्य्यन्ताभावे आसुरादिविवाहत्रिकलब्धयौतुकधनेषु च भर्त्तृपर्य्यन्ताभावे देवराद्दैरधिकारः। तदभावे देवरभ्रातृभगिन्योः सुतानां युगपदधिकारः। एतेषामभावे असपिण्डोऽपि भगिनीपुत्रः। तदभावे भर्त्तृभागिनेयः। तदभावे भ्रातृसुतः। तदभावे जामाता। जामातृपर्य्यन्ताभावे सपिण्डानन्तर्य्यक्रमेण श्वशुरभ्रातृश्वशुरादीनां सपिण्डानामधिकारः। सपिण्डाभावे सकुल्याः समानोदकाः सगोत्राः समानप्रवराश्च पुंधनवत् क्रमेणाधिकारिणः। एतत्सर्व्वाभावे ब्राह्मणीधने स्वग्रामश्रोत्रियादेरधिकारः। क्षत्रियादिधने राज्ञ एवाधिकारः। इति स्त्रीधनाधिकारिणः॥ * ॥

अथ विभागानधिकारिणः।

क्लीवपतितजात्यन्धजन्मबधिर-उन्मत्तजड़-मूकपङ्गुपितृद्विट्निरिन्द्रियौपपातिकाचिकित्स्यरोगार्त्ताः। पतितवर्ज्जं एते भरणीयाः। पतितपुत्रवर्ज्जमेतेषां पुत्रा यदि निर्दोषाः तदांशभाजिनः। क्लीवादीनां अपुत्रा भार्य्याः यदि सहृत्ताऽनुदा भर्त्रा। एषां दुहितरो विवाहपर्य्यन्तं भरणीयाः॥ * ॥

अथ विभाज्याविभाज्यधननिर्णयः।

तत्र पैतामहं पित्र्यार्ज्जितं साधारणधनोपघातेनार्ज्जितञ्चेति त्रिविधं धनं सर्व्वैरेव विभाज्यम्। किन्तु तत्रार्ज्जकस्य द्वावंशौ अन्येषामेकैकांशः साधारणधनाद्युपघातेन शौर्य्यप्राप्तं धनं एवं साधारणधनाद्युपघातेनार्ज्जितविद्याधनं पितृपितृव्यादिप्रसादादिना लब्धं धनं भार्य्याप्राप्तिकाले लब्धं धनं मित्रताप्राप्तं धनं आर्ज्जित्यलब्धं एतान्यविभाज्यानि। विद्याधनन्तु समविद्याधिकविद्येभ्यो देयं एवं यदि विद्याभ्यस्यतो भ्रातुः कुटुम्बभरो भ्राता स्वधनव्ययशरीरायासाभ्यां बिभर्त्ति तदा तद्विद्यार्ज्जितधने न्यूनस्यापि अपरभ्रातुरंशित्वम्। स्वकृतात् पित्रादितो

लब्धविद्यार्जितधने तु सर्व्वेषां मूर्खामूर्खाणामंशित्वम्। विद्याधनं यथा, यदि भवान् भद्रमुपन्यस्यति तदा भवते एतावद्धनं दातव्यं इति पण्डितं तत्र भद्रोपन्यासेन यत् पण्डितं धनं लब्धं तत्। अध्यापितशिष्याद्यल्लब्धम्। ऋत्विक्कर्म्मकरणेन यजमानाद्दक्षिणादिरूपं लब्धं धनम्। यत्किञ्चित् विद्यायाः प्रश्ने कृते तत्र सभ्यगुत्तरेण परितोषादपण्डितमेव किञ्चिद्धनं ददाति तत्। यो ह्यस्मिन् श्राद्धार्थे मम संशयमपनयति तस्मै सुवर्णादिकमिदं दास्यामीत्युक्ते तस्य संशयमपनीय यल्लब्धम्। वादिनोः कुत्रचिद्विषयसन्देहे न्यायकरणार्थमागतयोः सभ्यङ्निरूपणेन यल्लब्धम्। श्राद्धादिषु खड्गानं प्रकाश्य प्रतिग्रहादिना यल्लब्धम्। तथात्यर्थवादाद्यविचारे वा परं निर्जित्य यल्लब्धम्। एकस्मिन् देये वस्तुनि बहूनां ब्राह्मणानां सप्तत्याने येन प्रकृष्टं वेदमधीत्य यल्लब्धम्। चित्रकरसुवर्णकारादिभिः शिल्पिभिर्मूल्यादधिकं यल्लब्धम्। द्यूतेनापि परं निर्जित्य यल्लब्धम्। एतानि अविभाज्यानि ॥ * ॥

क्रमादभ्यागतं द्रव्यमन्येन कृतं यदि दायादानामनुमत्या तेषामेकतरेण साधारणधनानुपघातेन इतरव्यापारनैरपेक्ष्येण च धनमुद्धरति तदा तद्धनमुद्धारकर्त्तुरेव। भूमिस्तु यदि अन्येर्द्धृता एकेनोद्धृता तदा स तुरीयांशं गृहीत्वा अवशिष्टभागत्रयं अन्यैः सह समं विभजेत्। अयं निष्कर्षः विभक्तेनाविभक्तेन वा साधारणधनानुपघातेनापरव्यापारनैरपेक्ष्येण येन यद्भक्षितं तदर्जकस्यैव न तु तद्विभाज्यमितरैः। किन्तु विद्याजीवनमात्रे विशेषः स च प्रागेवाभिहितः। अङ्गयोजितं वस्त्रालङ्कारं अश्वादिवाहनं लङ्घुकादिकूपवाप्यादिगतं पित्रादिसम्बन्धिजलं दासीव्यतिरिक्ता स्त्री गोप्रचारः स्त्रियः एतानि नान्यधनवद्विभाज्यानि किन्तु स्वव्यापारेण तदुपार्जितव्यं एवं स्वस्वव्यापारोपयुक्तभूषणभोजनपात्रादि न विभजनीयं येन यदुपार्जितं तत्तस्यैव। पुस्तकन्तु मूर्खेण यात्तं किन्तु पण्डितेन तदन्तर्गतस्वांशतुल्यद्रव्यान्तरं मूल्यमेव वा दत्त्वा ग्रहीतव्यं एवं शिल्पिनां शिल्पोपयुक्तद्रव्यं नाशिल्पिनां तत्रापि पुस्तकवद्व्यवस्था। पितरि जीवति यस्मिन् वास्तौ येन गृहोद्यानादिकं कृतं तस्य न विभागः यद्यपरेणापि वास्तव्यान्तरे तथा कृतम् ॥ * ॥

अथ संसृष्टविभागक्रमार्थमादौ संसर्गो निरूप्यते।

पितृभ्रातृपितृव्याणामन्यतरेण सह विभक्तः सन् पुनरन्योन्येच्छया पूर्व्वकृतविभागमपेक्ष्य यत्तव धनं तन्मम धनं यन्मम तत्तवापीति व्यवस्थया एकपरिच्छदतयावस्थानं संसर्गः। अथ संसृष्टविभागः। अत्र भ्रातॄणां अन्येषां तुल्यसम्बन्धिनां वा संसर्ग्यसंसर्गिणां मध्ये संसर्गिणामेव प्रथमं मृतसंसर्गिधनेऽधिकारः। तदभावे तथाविधा संसर्गिणामिति क्रमः ॥ * ॥ एवं यदा पिता पुत्रान् विभज्य यथाशास्त्रं भागं गृहीत्वा पुत्रैः सहासंसृष्ट एव पुत्रान्तरसुतपात्रं गतस्तदा विभागानन्तरजात एव तद्धनाधिकारी न पूर्व्वविभक्तः एवं पूर्व्वभ्रातृविभागेऽपि विभक्तजस्य नांशित्वम्। यदि तु येन केनचित् पुत्रेण संसृष्टः सन् पिता मृतः तदा तद्धनं संसृष्टविभक्तज्ञाभ्यां समं विभाज्यं यथा धने तथांशेऽपि। यद्यविज्ञातगर्भायामेव स्त्रियां पुत्रा विभक्तास्तद्गर्भजातो विभक्तद्रव्याणामेकोनत्रिंशत्तमं पुनर्विभज्य स्वांशं गृहीयात् न तु विभक्तेन सह पितृद्रव्येऽंशित्वम्॥ * ॥

अथ पितृगतविभागो निरूप्यते।

यत्र पितृगतविभागस्तत्र स्वोपार्जितधने पितुरिच्छैव नियामिका। पितामहधने तु मातरजोनिवृत्तिसहकृता तदिच्छा नियामिका। स्वोपार्जितधने पिता इच्छया धनं गृहीतुं शक्नोति कस्मैचिदधिकं कस्मैचिन्न्यूनं दातुमर्हति। पैतामहधनविभागे तु पिता स्वयमंशद्वयं गृहीत्वा पुत्रेभ्य एकैकांशं दद्यात्। किन्तु पैतामहभक्तिमुक्ताप्रवालादिषु पितुः स्वाच्छन्द्यं भूमिनिबन्धद्विपदान्यतमे न स्वाच्छन्द्यम्। स्वार्जितधनविभागे पित्रा अपुत्रपत्नीभ्यः पुत्रतुल्यांशो देयः यदि ताभ्यः स्त्रीधनं न दत्तं स्त्रीधने दत्ते सति अर्द्धं देयम्। पुत्रकर्त्तृकविभागे तु विमातुरंशाभावः ॥ * ॥ शूद्रस्य दासीपुत्रोऽपि पितुरिच्छया परिगीतस्त्रीजातपुत्रेण सह तुल्याधिकारी मृते पितरि तदंशार्द्धाधिकारी। तथाविधभ्रात्रभावे दौहित्रे वासति पितुः सर्व्वधनाधिकारी सति दौहित्रे तेन सह तुल्याधिकारी ॥ * ॥ पितरि मृते मातरि जीवन्त्यां पुत्राणां विभागो न धर्म्म्यः यदि जीवन्त्यां मातरि विभागं कुर्व्वन्ति तदा मातापि पुत्रतुल्यांशभागिनी। विमातुरंशाभावः किन्तु सा ग्रासाच्छादनादिना भर्त्तव्या। एवं पितामहधने पौत्रैर्विभाज्यमाने पितामह्याः पौत्रतुल्यांशभागित्वम् ॥ * ॥ औरसेन दत्तकादीनां विभागे औरसस्य द्व्यंशित्वं सर्व्वदत्तकादेरेकैकांशित्वम्। विभागस्तु पित्रादेर्धनिनः ऋणं परिशोध्य तदवशिष्टधनस्य करणीयः। उत्तमर्णेच्छया विभज्य वा तद्ऋणं परिशोधनीयम्। एकेन भ्रात्रादिना बहुपोष्यतया यत्राधिकं भुक्तं तत्र न विभक्तांशो विभागमध्ये प्रवेशनीयः। किन्तु भुक्तावशिष्टस्य विद्यमानधनस्यैव विभागः कार्य्यः ॥ * ॥ असंस्कृतभ्रातृभगिनीनां पैतृकधनेन संस्कारः कर्त्तव्यः। विभागकाले केनचिन्निह्नुतस्य पश्चात् प्राप्तस्य समभागः कर्त्तव्यः। भ्रमादिना कृताशास्त्रीयविभागधनस्य पुनः शास्त्रीयविभागः कार्य्यः ॥ * ॥

अथ विदेशागतस्य विभागः।

विभक्तादप्यार्या देशान्तरगतस्य चिरकालानन्तरागतस्य सप्तमपुरुषपर्य्यन्तं तत्सन्ततेरपि मौलसामन्तादिना वा स्वज्ञापनपूर्व्वकं क्रमागतधनात् यथाशास्त्रमंशभागित्वमिति स्थितं। एषा व्यवस्था विदेशागतविषयिणी देशस्थविषये तु धनिनश्चतुर्थपर्य्यन्त एव तद्धनविभागार्हता। साधारणधनेऽपि खांशदानं कर्त्तव्यम्। इति श्रीकृष्णतर्कालङ्कारकृतक्रमसंग्रहः ॥ * ॥

"देशस्थ जातेः संस्थस्य धर्म्मो ग्रामस्य यो भृगुः।
उदितः स्यात् स तेनैव दायभागं प्रकल्पयेत्॥"

इति दायतत्त्वम्॥

दायविभागः, पुं, (दायस्य विभागः।) दायभागः। यथा। "किं दायस्य विभागो विभक्तावयवत्वं किंवा दायेन सह विभागोऽसंयुक्तत्वम्।" इति जीमूतवाहनः॥

दायादः, पुं, (आदत्ते इति। आ+दा+"आतश्चोपसर्गे।" ३।१।१३६। इति कः। दायस्य आदः ग्राहकः।) सपिण्डः। पुत्रः। इत्यमरः। ३।३।८८। (यथा, महाभारते। १। ८५। २।
"पुरुषा तु कृतं वाक्यं मानितश्च विशेषतः।
कनीयान् मम दायादो धृता येन जरा मम।")

दायादी, स्त्री, (दायं अर्त्तीति। ऋ+अच्। स्त्रियां ङीप्।) कन्या। इति शब्दार्थकल्पतरुः॥

दायितः, त्री, (दाय दाने+क्विप्+क्तः।) दापितः। इत्यमरटीकायां भरतः॥

दारकः, पुं, (दारयति नाशयति जनकस्य प्रीतृमिति। दृ+क्विप्+ण्वुल्।) पुत्रः। इति हेमचन्द्रः। ३।२०६॥ (यथा, महाभारते। १। ८३। १३।
"कल्पेते दारका राजन् देवपुत्रोपमाः शुभाः।
वर्च्चसा रूपतश्चैव सदृशा मे मताश्च वै॥")

बालकः। इति मेदिनी। के, १०३॥ (यथा, महाभारते। १। ८३। १६।
"भूमिष्ठां मातरञ्चैव तथा चक्षुश्च दारकाः॥")

दारकः, इति शब्दार्थकल्पतरुः॥ ग्राम्यशूकरः। इति राजनिर्घण्टः॥

दारकः, त्रि, (दारयतीति। दृ+क्विप्+ण्वुल्।) भेदकः। इति मेदिनी। के, १०३॥ (यथा,—

"अशेषदुर्नामकरोगदारकं
करोति दृष्टं सहसैव दारकम्॥"

इति वैद्यकचक्रपाणिसंग्रहेऽर्शोऽधिकारे॥")

दारकर्म्म, क्ली, (दारार्थं पत्न्यर्थं यत् कर्म्म।) विवाहः। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। १। १४। २६।
"दारकर्म्म ततो व्यासः शुकस्य पर्य्यचिन्तयत्॥")

दारणं, क्ली, (दारयति नाशयति जलमलमनेनेति। दृ+क्विप्+करणे ल्युट्।) कतकम्। इति शब्दचन्द्रिका॥ (दृ+क्विप्+भावे ल्युट्।) विदारणम्। यथा, "दारुदारणपर्व्वेः" समाहृतम्। इति लीलावती॥ (ब्रह्मादिस्फोटनसम्पादके औषधविशेषः। यथा, सुश्रुते। १। ३६।
"चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः।
कपोतबृक्षकक्षारा पुरीषाणि च दारणम्॥
चारद्रव्याणि वा यानि क्षारो वा दारणं परम्॥")

दारयतीति। दृ+क्विप्+कर्त्तरि ल्युः। विदारके, त्रि। यथा, महाभारते। ८। ४६। १७।
"समाधत्तास्त्रितं वाणं गिरीणामपि दारणम्॥")

दारदः, पुं, (दरदे देशविशेषे भवः। दरद+ष्यञ्।) दरददेशोद्भवविषभेदः। इत्यमरः। २। ८। ११॥ पारदः। हिङ्गुलम्। इति मेदिनी। दे, ३१॥ ससुद्रः। इति हारावली। ५६॥

दारबलिभुक्, पुं, (दारेण चक्षुराघातजन्यविदारणेन बलिं सृङ्क्ते इति। भुज+क्विप्।) वकपक्षी। इति त्रिकाण्डशेषः॥

दारः, पुं, (दारयन्ति स्वात्मबन्धूनिति। दृ+"दारजारौ कर्त्तरि णिलुक् च।" ३। ३। २०। इत्यस्य वार्त्तिकोक्त्या घञ् णिलुक् च।) भार्य्या। बहुवचनान्तोऽयम्। इत्यमरः। २। ६। ६॥ (यथा, महाभारते। १। १५६। २७।

"आपदर्थं धनं रक्षेत् दारान् रक्षेत् धनैरपि। आत्मानं सततं रक्षेत् दारैरपि धनैरपि॥")

दारा, स्त्री, (दारयति ज्ञातिबन्धूनिति। दृ+णिच्+अच्+टाप्।) दारः। इत्यमरटीकायां भरतः॥ (यथा, भागवते। ७। १४। ११।

"अर्थोकामात्मनो दारा गृहा खलयज्ञो यतः॥")

दारिः, स्त्री, (दारयतीति। दृ+णिच्+इन्।) विदारकः। इति शब्दार्थकल्पतरुः॥

दारिका, स्त्री, (दारक+टाप्+अत इत्वम्।) कन्या। इति जटाधरः॥ (यथा, हरिवंशे। ४१। १५६।

"अरिष्टं वृषभं कृत्वा पूतना दैत्यदारिकाम्॥")

दारितः, त्रि, (दार्य्यते स्मेति। दृ+णिच्+क्तः।) छिन्नदारणः। तत्पर्य्यायः। भिन्नः २ भेदितः ३। इत्यमरः। ३। १। १००॥ विदारितः ४। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। १०७। ४६।

"अंशुमानेवमुक्तस्तु सगरेण महात्मना। जगाम दुःखात् तं देशं यत्र वै दारिता मही॥"

ताड़ितः। यथा, कालिकापुराणे ६० अध्याये।

"ततः सुदर्शनो राजा गदया दारितोऽपतत्॥")

दारिद्र्यं, क्ली, (दरिद्रस्य भावः। दरिद्र+ष्यञ्।) दरिद्रता। यथा,—

"प्रणीय दारिद्र्यादरिद्रतां नृपः।"

इति नैषधे। १। १५॥

(यथा, रुक्मकटिके १ अङ्के।

"दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम्।

अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम्॥")

निर्यकारान्तोऽप्ययम्॥

दारी, स्त्री, (दारयति पदतलमिति। दृ+णिच्+"सर्व्वधातुभ्य इन्।" उणां ४। ११८। इति इन्। ङीदिकरादिति पक्षे ङीष्।) क्षुद्ररोगविशेषः। विवाई इति लोके। तल्लक्षणम् यथा,—

"परिक्रमणशीलस्य वायुरत्यर्थरूक्षणैः।

पादयोः कुरुते दारीं सरुजां तलसंश्रिताम्॥"

तच्चिकित्सा यथा,—

"पाददार्य्यां शिरां प्राज्ञो मोक्षयेत्तज्ज्ञोधिनीम्।

स्नेहस्वेदोपपन्नौ च पादौ वा लेपयेन्मुहुः।

मधूच्छिष्टवसामज्जाघृतैः क्षारविमिश्रितैः॥

क्षारो यवक्षारः।

सर्ज्जाङ्गसिन्धूद्भवयोश्चूर्णं मधुघृतप्लुतैः।

निर्म्मथ्य कटुतैलाक्तं क्षितं पादप्रमार्ज्जने॥

मधुसिक्थकगैरिकघृतगुग्गुलमहिषाक्ष-शाल-निर्य्यासैः।

गैरिकसहितैर्लेपः पादस्फुटनापहः सिद्धः॥

मधुसिक्थकं मोम। प्रथमं गैरिकं शिलाजतु। द्वितीयं गैरिकं गेरु इति लोके। सालनिर्य्यास राल।

उन्मत्तकस्य बीजेन माणकक्षारवारिणा।

विपक्वं कटुतैलन्तु हन्याद्दारीं न संशयः॥

इति धन्वन्तरेतैलम्॥" इति भावप्रकाशः॥

दारु, क्ली, पुं, (दीर्य्यते इति। दृ+"दृसनिजनीति०" उणां। १। ३। इति उण्।) काष्ठम्। इत्यमरभरतौ॥ (यथा, महाभारते।१।१४५।१२।

"घृतं तैलं घृतञ्चैव जतु दारूणि चैव हि।

तस्मिन् वेश्मनि सर्व्वाणि निक्षिपेथाः समन्ततः॥")

दारु, क्ली, (दृ+उण्।) देवदारु। (यथा, सुश्रुते उत्तरतन्त्रे। १७।

"दारुपद्मकशुण्ठीभिरेवमेव श्रृतोऽपि वा॥"

अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"सुरदारु हकिलिमं सुराङ्गं भद्रदारु च।

देवकाष्ठं पीतदारु देवदारु च दारु च॥")

पित्तलम्। इति मेदिनी। रे, ४७॥

दारुः, त्रि, (दृ+उण्।) शिल्पी। दारकः। इति धरणी॥ (यथा, ऋग्वेदे। ७। ६। १।

"इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि॥"

"दारुं पुरां भेत्तारं वन्दे।" इति तत्र सायणः॥) दाता। इति त्रिकाण्डशेषः॥

दारुकं, क्ली, (दारु+स्वार्थे कन्।) देवदारु। इति राजनिर्घण्टः॥

दारुकः, पुं, श्रीकृष्णसारथिः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। २। २। २८।

"दारुकेण च सूतेन सहितो देवकीसुतः॥"

योगाचार्य्यविशेषः। स तु महादेवस्य अवतारविशेषः। यथा, शिवपुराणे वायुसंहितायाम्। २। १०। ४।

"जटामाली चाट्टहासो दारुको लाङ्गली तथा॥")

दारुकदली, स्त्री, (दारुवत् काठिन्या कदली।) वनकदली। इति राजनिर्घण्टः॥

दारुका, स्त्री, (दारुणा काष्ठेन कायतीति। कै+कः। टाप्।) काष्ठमयस्त्री। काठेर पुतुल इति भाषा। तत्पर्य्यायः। पुत्रिका २ दारुस्त्री ३ शालभञ्जिका ४ शालभञ्जी ५ शालाङ्गी ६। इति शब्दरत्नावली॥ दारुपुत्रिका ७ सूत्रगण्डी ८ दारुगर्भा ९। इति हारावली। ७१॥

दारुगन्धा, स्त्री, (दारुणि गन्धो यस्याः।) नीलाङ्गानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

दारुगर्भा, स्त्री, (दारुमयो गर्भो यस्याः।) दारुमयस्त्री। इति हारावली। ७१॥

दारुणः, पुं, (दारुणो जायते इति। जन+डः।) मद्यम्। इति शब्दरत्नावली॥ कालनिर्म्मिते, त्रि॥ (यथा, कालिकापुराणे। ६७ अध्याये।

"आसनं प्रथमं दद्यात् पौष्यं दारुणमेव वा॥")

दारुणः, पुं, (दारयतीति। दृ+णिच्+"कृदृदारिभ्य उनन्।" उणां ३।५३। इति उनन्।) चित्रकः। इति राजनिर्घण्टः॥ भयानकरसः। (विष्णुः। यथा, महाभारते।१३।१४६।७४

"सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः॥"

"सन्मार्गविरोधिनां दारुणत्वात् (खण्डकत्वात्) दारुणः।" इति तट्टीकायां श्रीधरः॥) भयङ्करौ, त्रि। इत्यमरः। १।७।२०॥ (यथा, देवीभागवते। ५।४।२७।

"हाहाकारो महानासीत् सम्प्लवाराव दारुणः।

उत्पपात ततः सिंहो नृपस्योपरि दारुणः॥"

कठोरः। यथा, तत्रैव।१।४।५२।

"दारुणं देहदमनं सर्व्वलोकभयङ्करम्॥")

दारुणकं, क्ली, (दारुणवत् कायतीति। कै+कः।) मस्तकजातक्षुद्ररोगविशेषः। लीके रूसी इति ख्यातः। तस्य लक्षणमाह।

"दारुणा कर्कुरा रूक्षा केशभूमिः प्रजायते।

मारुतश्लेष्मकोपेन विद्याद्दारुणकन्तु तत्॥

दारुणा कर्कशा॥"

तस्य चिकित्सा यथा,—

"कार्य्यो दारुणके स्नेहः प्रलेपो मधुसंयुतः।

पियालबीजमधुककुष्ठमाषैः ससैन्धवैः॥

आम्रबीजं तथा पथ्या हृयं स्यात् माक्षया समम्।

दुग्धेन पिष्टं तल्लेपो दारुणं हन्ति दारुणम्॥

दुग्धेन खाखसं बीजं प्रलेपाद्दारुणं हरेत्।

गुञ्जाफलैः श्रृतं तैलं भृङ्गराजरसेन च॥

कण्डुदारुणदुष्टं कुष्ठकपालव्याधिनाशनम्॥"

इति गुञ्जातैलम्।" इति भावप्रकाशः॥

(अथ भृङ्गराजतैलम्।

"भृङ्गराजत्रिफलोत्पलशारि

लौहपुरीषसमन्वितकारि।

तैलमिदं पच दारुणहारि

कुष्ठितकेशघनस्थितकारि॥"

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे॥)

दारुनिशा, स्त्री, (दारुबहुला निशा हरिद्रा।) दारुहरिद्रा। इति रत्नमाला॥ (अस्या गुणा यथा,—

"दार्व्वीनिशागुणां किन्तु नेत्रकर्ण्यास्यरोगजित्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

दारुपत्री, स्त्री, (दारुणः पत्रमिव पत्रमस्याः। ङीष्।) हिङ्गुपत्री। इति राजनिर्घण्टः॥

दारुपीता, स्त्री, (दारुणा पीतेव। काष्ठप्रधानत्वात् तथात्वम्।) दारुहरिद्रा। इति राजनिर्घण्टः॥

दारुपुत्रिका, स्त्री, (दारुमयी पुत्रिका।) दारुका। इति हारावली। ७१॥

दारुसुखाख्या, स्त्री, (दारुसुखमाख्यते खण्ड्यते इति। ख्या+कै+अच्।) गोधा। इति राजनिर्घण्टः॥

दारुसिता, स्त्री, (दारुणि सिता शर्करेव।) त्वक्। दारुचिनि इति भाषा। तन्नामगुणाः। "त्वक्खाडौ तु ततुत्वक् स्यात् तथा दारुसिता मता।
उक्ता दारुसिता खाडौ तिक्ता वातानिलपित्तहृत्।
सुरभिः शुक्रला बल्या सुखशीतलघामहा॥"
इति भावप्रकाशः॥

दारुकी, स्त्री, (दारुमयी स्त्री।) दारुका। इति त्रिकाण्डशेषः॥

दारुहरिद्रा, स्त्री, (दारुप्रधाना हरिद्रा।) स्वनामख्यातवृक्षविशेषः। तत्पर्य्यायः। पीतद्रुः २ कालेयकः ३ हरिद्रुः ४ दार्व्वी ५ पचम्पचा ६ पर्ज्जनी ७। इत्यमरः। २।४।१०२॥ पीतिका ८ पीतदारु ९ स्थिरारागा १० कामिनी ११ कटङ्कटेरी १२ पर्ज्जन्या १३ पीता १४ दारुनिशा १५ काञ्चीयकम् १६ कामवती १७ दारुपीता १८ कर्कटिनी १९ दारु २० निशा २१ हरिद्रा २२। इति शब्दरत्नावली॥ अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। व्रणमेहकण्डुविसर्पत्वङ्दोषविषकर्णाक्षिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ कफपित्तश्लेष्मनाशित्वम्। विशेषेण कफाभिष्यन्दनाशित्वञ्च। इति राजवल्लभः॥

दारुहस्तकः, पुं, (हस्त एव प्रतिकृतिः। "हस्ते प्रतिकृतौ।" ५।३।९६। इति कन्। दारवो हस्तकः।) काष्ठनिर्म्मितहस्तः। काठेर हाता इति भाषा। तत्पर्य्यायः। तर्द्दूः २। इत्यमरः। ९।२।३४

दार्घसत्रः, त्रि, (दीर्घसत्रे भवः। दीर्घसत्र+अण्। "देविकाशिंशपेति।" ७।३।१। इति आद्यच आत्।) दीर्घसत्रयागे भवः। इति सिद्धान्तकौमुदी॥

दार्ढ्यं, क्ली, (दृढस्य भावः। दृढ+"वयसिदृढादिभ्यः ष्यञ् च।" ५।१।१२३। इति ष्यञ्।) दृढता। (यथा, पञ्चदश्याम्। ६।१०४।
"वाक्यान्यपि यथाप्रत्र दार्ढ्यायोदाहरन्ति हि॥")

दार्दुरं, क्ली, दक्षिणावर्त्तशङ्खः। जतु। जलम्। इति शब्दार्थकल्पतरुः॥ दर्दुरधर्म्मश्च॥

दार्व्वटं, क्ली, चिक्कावेश्म। इति हारावली।१६८॥

दार्व्वकः, पुं, (दारुवत् कठिनमङ्गं यस्य।) मयूरः। इति शब्दकल्पतरुः॥

दार्व्वाघाटः, पुं, (दारु काष्ठं आहन्तीति। आ+हन्+"दारावाहनोऽन्तस्य च टः संज्ञायाम्।" ३।२।४६। इत्यस्य वार्त्तिकोक्त्या अण टश्चान्तादेशः।) घृतपक्वकपत्नी। इत्यमरः। २।५।१७॥ काठठोक्रा इति भाषा। (यथा, महाभारते। १०।७।१८।
"दार्व्वाघाटमुखाश्चापि शस्त्रवन्तश्च भारत!॥")

दार्व्वाघातः, पुं, (दारूणि काष्ठानि घातो यस्मात्।) दार्व्वाघाटपक्षी। इति शब्दरत्नावली॥

दार्व्विका, स्त्री, (दारयतीति। दृ+उत्खादिभ्यात् षाधुः। दार्व्वी च दारुहरिद्राविकारः। ततः स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च।) क्राथोद्भवतुत्थम्। गोजिङ्गा। इत्यमरः। २।४।११९॥

दार्व्विपत्रिका, स्त्री, (दार्व्व्याः पत्रमिव पत्रमस्याः। दार्व्विपत्रा ततः स्वार्थे कन् टापि अत इत्वञ्च।) गोजिङ्गा। इति रत्नमाला॥

दार्व्वी, स्त्री, (दारयति। दृ+"उत्खादयश्च।" उणा ४।६७। इति निपातनात् साधुः।) दारुहरिद्रा। (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"कटङ्कटेरी दार्व्वी स्यात्तथा दारुनिशेति च।
ख्याता दारुहरिद्रा च पर्ज्जनी च पचम्पचा॥"
अस्या गुणा यथा,—
"दार्व्वी निशागुणा किन्तु नेत्रकर्णास्यरोगनुत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
गोजिङ्गा। इति मेदिनी। वे, ११॥ देवदारु। हरिद्रा। इति विश्वः॥

दार्व्वीक्वाथोद्भवं, क्ली, (दार्व्व्याः दारुहरिद्रायाः क्वाथादुद्भवो यस्य।) रसाञ्जनम्। इति राजनिर्घण्टः॥ क्षत्रिमरसाञ्जनम्। इति रत्नमाला॥

दार्षदः, त्रि, (दृषदि पिष्टः। दृषद्+"शैषिके।" ४।२।६२। इत्यण्।) दृषद्भवः। इति सिद्धान्तकौमुदी॥

दार्वं, क्ली, (दारुभ्यः खचितम्। दारु+अण्। यद्वृक्षम्,—
"संसृत्य पतितं पुष्पात् यत्तु पत्रोपरि स्थितम्।
मधुराम्लकषायञ्च तद्दार्वं मधु कीर्त्तितम्॥")
वन्यमधु। इति शब्दार्थकल्पतरुः॥ इन्द्रनीलाकारश्लक्ष्णमक्षिकोत्पन्नं वृक्षकोटरान्तरभवं मधु। अस्य गुणाः। कटुत्वम्। कषायत्वम्। अम्लत्वम्। मधुरत्वम्। पित्तदोषकारित्वञ्च। इति राजनिर्घण्टः॥

दालः, पुं, (दले जातम्। दल+अण्।) कोद्रवः। इति हेमचन्द्रः॥

दालवः, पुं, स्थावरविषभेदः। इति हेमचन्द्रः। ४।२६६॥

दाला, स्त्री, (दल्यते स्थूलमतिभिरिति। दल+घञ्+टाप्।) महाकालः। इति भावप्रकाशः॥

दालिका, स्त्री, (दालेव। स्वार्थे कन् टाप् अत इत्वञ्च।) महाकालः। इति भावप्रकाशः॥

दालिमः, पुं, (दाड़िमः। डस्य लः।) दाड़िमः। इत्यमरटीकायां भरतः॥

दाली, स्त्री, (दाल्यते इति। दल+णिच्+इन्। ङीदिकारादिति ङीष्।) देवदाली लता। इति राजनिर्घण्टः॥

दाल्भ्यः, पुं, (दलभस्य मुनेर्गोत्रापत्यम्। "गर्गादिभ्यो यञ्।" ४।१।१०५। इति यञ्।) मुनिविशेषः। (यथा, महाभारते।१।४।१२।
"वको दाल्भ्यः स्थूलशिरा: कृष्णद्वैपायन:
शुक:॥")

दाल्भिः, पुं, (दालयति असुरानिति। दल+णिच्+बाहुलकात् मिः।) इन्द्रः। इति त्रिकाण्डशेषः॥

दावः, पुं, (दुनोति उपतापयतीति। दु+"दुञ्रोरनुपसर्गे।" ३।१।१४२। इति घः।) वनम्। (यथा, महाभारते।१।२२४।६।
"इदमिन्द्रः सदा दावं खाण्डवं परिरक्षति॥")
वनवह्निः। इत्यमरः। ३।३।२०५॥ (यथा, महाभारते। ३।६६।१।
"उत्सृज्य दमयन्ती तु नलो राजा विशांपते!।
ददर्श दावं दह्यन्तं महान्तं गहने वने॥")
अग्निः। इत्यमरटीकायां नीलकण्ठः॥ सन्तापः। इति भरतकृतद्विरूपकोषः॥

दावाग्निः, पुं, (दावोद्भवोऽग्निः। प्राकपार्थिवादिषतृसमासः।) वनोद्भवाग्निः। तत्पर्य्यायः। दवाग्निः २ दावानलः ३। इति शब्दरत्नावली॥ दवः ४ दावः ५। इत्यमरः। ३।३।२०५॥ (यथा, महाभारते। १।१५५।१५।
"दावाग्निधूमसङ्घातं चक्रतुः पार्थिवं रजः॥")

दावानलः, पुं, (दावोद्भवः अनलः। दाव एवानलो वा।) दावाग्निः। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। २६।६८।
"यद्दावानलतप्तस्य सुधाह्रदनिमज्जने॥")

दाविकः, त्रि, (देविकायां भवः। अण्। "देविकाशिंशपेति।" ७।३।१। इति आद्यच आत्।) देविकानदीसम्भवः। इत्यमरः।१।१०।३६॥

दाश्, ऋ ड क दाने। इति कविकल्पद्रुमः॥ (पुरां-अत्मं-सकं-सेट्।) द्वितीयस्वरी। ऋ, अददाशत्। क ड, दाशयते। इति दुर्गादासः॥

दाश्, ऋ ण दाने। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) ऋ, अददाशत्। ण, दाशति दाशते। इति दुर्गादासः॥

दाश्, न र हिंसने। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-सेट्।) द्वितीयस्वरी। न, दाश्नोति। र वैदिकः। इति दुर्गादासः॥

दाश्रः, पुं, (दाश्यते दीयते भृतिमन्नमस्मै। दाश दाने+सम्प्रदाने घञ्।) भृत्यः। इत्यमरटीकायां रमानाथः॥ (दशति हिनस्ति मत्स्यानिति। दृनृश+"दंशेश्च।" उणा ५।११। इति टः नस्य आत्वञ्च। धीवरः। यथा, देवीभागवते। २।१।३६।
"मत्स्यगन्धेति नाम्ना वै गुणेन समजायत।
विवर्द्धमाना दाश्रस्य गृहे सा वासवी सुभा॥")

दाश्रपुरं, क्ली, (दाश्रान् कैवर्त्तान् पिपर्त्ति पालयतीति। पॄ+कः। "उदोष्ठ्यपूर्व्वस्य।" ७।२।१०२। इति उत्वम्।) दाश्रपुरम्। इत्यमरटीकायां स्वामी॥

दाश्ररथः, पुं, (दाश्ररथस्य अयम्। तस्येदमिति पितापुत्रत्वरूपसम्बन्धार्थे अण्।) श्रीरामः। इति शब्दरत्नावली॥ (यथा, महानाटके।
"प्रदीयतां दाश्ररथाय मैथिली॥"
दाश्ररथसम्बन्धिनि, त्रि। यथा, भट्टिः। २।५३।
"अजीगणद्दाश्ररथं न वाक्यम्॥")

दाश्ररथिः, पुं, (दाश्ररथस्य अपत्यं पुमान्। "अत इञ्।" ४।१।९५। इतीञ्।) श्रीरामः

इति हेमचन्द्रः ॥ (यथा, रामायणे ।२।४५।११।
"यथा यथा दाशरथिर्धर्ममेवाश्रितोऽभवत् ।
तथा तथा प्रकृतयो रामं पतिमकामयन् ॥")
दाशार्हः, पुं, (दाश दाने + भावे घञ् । दाशं दानमर्हतीति । अर्ह + अच् ।) विष्णुः । इति हेमचन्द्रः ॥ (यथा, महाभारते ।१३।१४८।६७।
"विजयो जयः सत्वसत्वो दाशार्हः सात्वतां पतिः ॥")
दशार्हदेशश्च ॥
दाशेरकः, पुं, मालवदेशः । इति त्रिकाण्डशेषः ॥
दाश्वः, त्रि, (दाशति ददातीति । दाश + वाहुलकात् वन् ।) दाता । इति जटाधरः ॥
दाश्वान्, [स्] त्रि, (दाश दाने + "दाश्वान् साङ्वान् मीढ्वांश्च ।" ६।१।१२। इति क्वसुप्रत्ययेन निपातनात् साधुः ।) दत्तवान् । इति मुग्धबोधम् ॥ (यथा, रघुः । १४ । ७१ ।
"तस्मै मुनिर्दोहदलिङ्गदर्शी
दाश्वान् सुपुत्राभियमित्युवाच ॥")
दास, ऋ च दाने । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ऋ, अददासत् । ञ, दासति दासते । इति दुर्गादासः ॥
दास, र न वधे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं सेट् ।) र वैदिकः । न, दास्नोति । इति दुर्गादासः ॥
दासः, पुं, (दस्यतीति । दसि + "दंसेष्टनौ नः आत् ।" उणां ५ । १० । इति टः नकारस्य आकारः ।) शूद्रः । (यथा, ऋग्वेदे ।२।१२।४।
"यो दासं वर्णमधरं गुहाकः ॥"
अधुना कायस्थानां उपाधिभेदः । स तु अष्टसिद्धौलिकानामन्यतमः । यथा, कुलदीपिकायाम् ।
"गौड़े२ौ कौर्त्तिमन्तश्चिरयसतिकृता मौलिका ये हि सिद्धाः
ख्याते दत्ता सेनदासाः करगुहसहिताः पालिताः सिंहदेवाः ॥")
ज्ञातात्मा । धीवरः । इति मेदिनी । से, ६ ॥
दानपात्रम् । इति विश्वः ॥ शूद्राणां नामान्तप्रयोज्यपदवृत्तिविशेषः । यथा,—
"ब्रह्मणानां ब्राह्मणस्यात् वर्म्मणानं क्षत्रियस्य च ।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥"
इत्युद्वाहतत्त्वम् ॥ * ॥
दास्यते दीयते भूतिमूल्यादिकं यस्मै सः । चाकर इति भाषा । तत्पर्य्यायः । भृत्यः २ दासेरः ३ दासेयः ४ गोप्यकः ५ चेटकः ६ नियोज्यः ७ किङ्करः ८ प्रेष्यः ९ भुजिष्यः १० परिचारकः ११ । इत्यमरः । २ । १० । १७ ॥ प्रेष्यः १२ प्रेषः १३ प्रेषः १४ । इति भरतः ॥ परिकर्म्मा १५ परिचरः १६ सहायः १७ उपस्थाता १८ सेवकः १९ अभिगरः २० अनुगः २१ । स पञ्चदशविधः । यथा नारदः ।
"गृहजातस्तथा क्रीतो लब्धो दायाद्यागतः ।
अन्नाकालभृतस्तद्वदाहितः स्वामिना च यः ॥
मोचितो महतश्चार्णात् युद्धे प्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव वडवाकृतः ।
विक्रेता चात्मनः प्राज्ञैर्दासाः पञ्चदश स्मृताः ॥"
अस्यार्थः । गृहजातो दास्यासुतपुत्रः । दायादुपागतः क्रमागतः । अन्नाकालभृतः दुर्भिक्षपोषितः । स्वामिना आहितो बन्धकीकृतः । मोचितः ऋणमोचनेनाङ्गीकृतदासः । तवाहमित्युपगतः कस्याप्यदासः सन् स्वयं दासत्वेन दत्तरूपः । प्रव्रज्यावसितः सन्न्यासभ्रष्टः । कृतः केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दास इति कृतसमयः । भक्तदासः सुभिक्षेऽपि भक्तार्थमङ्गीकृतदास्यः । वडवाकृतः वडवा दासी तल्लाभादङ्गीकृतदास्यः । इति श्रीकृष्णतर्कालङ्कारकृतक्रमसंग्रहः ॥ तस्य कर्म्म यथा,—
"कर्म्मापि द्विविधं ज्ञेयमशुभं शुभमेव च ।
अशुभं दासकर्म्मोक्तं शुभं कर्म्मकृतां स्मृतम् ॥
यद्द्वारापुञ्छिमानरथावस्करग्रोधनम् ।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रक्षेपणोज्झनम् ॥
अशुभं कर्म्म विज्ञेयं शुभमन्यदतः परम् ॥"
इति मिताक्षरायां नारदः ॥
"विप्रस्य किङ्करो भूपो वैश्यो भूपस्य भूमिप ! ।
सर्व्वेषां किङ्करः शूद्रो ब्राह्मणस्य विशेषतः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥
दासनन्दिनी, स्त्री, (दासस्य धीवरस्य नन्दिनी ।) सत्यवती । इति शब्दरत्नावली ॥
दासपूरं, क्ली, (दासान् धीवरान् पूरयतीति । पूर + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) कैवर्त्तासुखकम् । इति शब्दरत्नावली ॥
दासिका, स्त्री, (दासति ददाति आत्मानमिति । दास दाने + ण्वुल् । टाप् अत इत्वञ्च ।) दासी । इत्यमरटीकायां भरतः ॥
दासी, स्त्री, (दासति ददात्यात्मानमिति । दास + अच् । गौरादित्वात् ङीष् ।) भुजिष्या । इति मेदिनी । से, ४ । तत्पर्य्यायः । कर्म्मकरी २ । इति सुग्धबोधम् ॥ दासपर्य्यायशब्दाः स्त्रीलिङ्गे अस्याः पर्य्यायशब्दा भवन्ति ॥ (यथा, देवीभागवते । १ । २० । ७२ ।
"न गता च वधूस्तत्र प्रेष्या संप्रेषिता तया ।
तस्याश्च विदुरो जातो दास्यां धर्म्मांशतः शुभः ॥")
काकजङ्घा । नीलाञ्जनः । नीलभिण्टी । इति राजनिर्घण्टः ॥ पीतभिण्टी । इति रत्नमाला ॥ वेदी । इति विश्वः ॥ (दास + ङीप् ।) शूद्रपत्नी कैवर्त्तपत्नी च । (नदीभेदः । यथा, महाभारते । ६ । ९ । ३१ ।
"सरयां तमसां दार्षीं सामान्यां वरणासरीम् ॥")
दासीघटः, पुं, (दासीपादनिक्षेप्यो घटः । मध्यपदलोपिसमासः ।) गवर्य्या महापातकिनः परित्यागार्थं सपिण्डसमानोदकनियुक्तदधिज्ञाभिमुखदासीपादनिःक्षेप्यजलपूर्णकलसः । तदनुष्ठानं यथा, मनुः । ११ । १८३—१८५ ।
"पतितस्योदकं कार्य्यं सपिण्डैर्बान्धवैर्बहिः ।
निन्दितेऽहनि सायाह्ने ज्ञातीनृत्विग्गुरुसन्निधौ ॥
दासीघटमपां पूर्णं पर्य्यस्येत् प्रेतवत् पदा ।
अहोरात्रमुपासीरन्नशौचं बान्धवैः सह ॥
निर्वर्त्तेरंश्च तस्मात्तु सम्भाषणसहासने ।
दायादस्य प्रदानञ्च याज्ञा चैव हि लौकिकी ॥"
"पतितस्येति । महापातकिनो जीवत एव प्रेतस्योदकक्रिया वक्ष्यमाणरीत्या सपिण्डैः समानोदकैश्च ग्रामाद्बहिर्गत्वा ज्ञात्विग्गुरुसन्निधाने रिक्तायां नवम्यां तिथौ दिनान्ते कर्त्तव्या ॥ दासीति । सपिण्डसमानोदकनियुक्ता दासी उदकपूर्णं घटं प्रेतवदिति दक्षिणाभिमुखीभूय पादेन क्षिपेत् । यथा स निरुदको भवति तदनु ते सपिण्डाः समानोदकैः सहाहोरात्रमशौचमाचरेयुः ॥ निवर्त्तेरन्निति । तस्मात् पतितात् सपिण्डादीनां सम्भाषणमेकासनोपवेशनञ्च तस्मै श्राद्धप्रदानं सांवत्सरिकादौ निमन्त्रणादिरूपो लोकव्यवहार एतानि निवर्त्तेरन् ॥" इति कुल्लूकभट्टः ॥
दासीसभं, क्ली, (दासीनां सभा । "अश्वशालाश्च ।"२।४। २४ । इति क्लीवत्वम् ।) दासाः सभा । इत्यमरः । ३ । ५ । २७ ॥
दासेयः, पुं, (दास + स्वार्थे ढक् ।) दासः । इत्यमरः । २ । १० । १७ ॥ कैवर्त्तः । इति शब्दरत्नावली ॥ (दासस्य अपत्यमिति ।) दासीतनये, त्रि ॥
दासेयी, स्त्री, (दासेय + स्त्रियां ङीप् ।) सत्यवती । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १०० । ४६ ।
"समीक्ष्य राजा दासेयीं कामयामास भारत ॥")
दासेरः, पुं, (दासा अपत्यम् । ढक् ।) दासः । इत्यमरः । २ । १० । १७ ॥ कैवर्त्तः । इति शब्दरत्नावली ॥ (दास + बाहुलकात् एरच् ।) उष्ट्रः । दासिकापत्ये, त्रि । इति मेदिनी । रे, १६६ ॥
दासेरकः, पुं, (दासेर + स्वार्थे कन् ।) उष्ट्रः । इति राजनिर्घण्टः ॥ (यथा, माघे । ५ । ६६ ।
"दासेरकः सपदि संवलितं निषादै-
र्विप्रं पुरा पतगराडिव निर्जगार ॥")
दासीसुतः । इति हारावली । २४८ ॥ (जातिभेदः । यथा, महाभारते । ६ । ४७ । ४६ ।
"दशार्णकाः प्रयागाश्च दासेरकगणैः सह ॥")
दास्यं, क्ली, दासस्य भावः । (दास + ष्यञ् ।)
दासत्वम् । यथा,—
"अर्चनं वन्दनं मन्त्रजपः सेवनमेव च ।
स्मरणं कीर्त्तनं श्रुत्वदृगुत्सवश्रवणेक्षितम् ॥
निवेदनं स्वस्य दास्यं नवधा भक्तिलक्षणम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
दास्यमानः, त्रि, दाधातोः कर्म्मणि स्यमानप्रत्ययेन निष्पन्नः । भविष्यद्दानसम्बन्धिवस्तु । इति व्याकरणम् । "अपि च ऊनविंशतिदास्यमानपिण्डस्थानानि यथा ।" इति तिथ्यादितत्त्वम् ॥
दाहः, पुं, (दह + भावे घञ् ।) दहनम् । भस्मीकरणम् । (यथा, मार्कण्डेये । ३० । २३ ।
"तदभावे च नृपतिः कारयेत् सकुटुम्बिनः ।

तज्ज्ञातीयैर्नरैः सम्यक्दाहादाः सकलाः क्रियाः॥")
अथ ध्रुवदाहविधिर्यथा,—
"गतप्राणं ज्ञात्वा पुत्रादिः स्नात्वा अग्नं कृत्वा स्थापयेत्। ततो गतप्राणं स्थापयित्वा वाससा सर्व्व शरीरमाच्छाद्यास्तीर्णकुशायां भूमौ दक्षिणाग्निरसं स्थापयेत्। ततो घृतेनाभ्यज्य,
ॐ गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः।
कुरुक्षेत्रञ्च गङ्गाञ्च यमुनाञ्च सरिद्वराम्॥
कौशिकीं चन्द्रभागाञ्च सर्व्वपापप्रणाशिनीम्।
भद्रावकाशां गन्धर्व्वां सरयूं पनसां तथा॥
वेश्यवञ्च वराहञ्च तीर्थं पिण्डारकं तथा।
पृथिव्यां यानि तीर्थानि सरितः सागरास्तथा॥
इति चिन्तयित्वा पुनः स्नापयेत्। वस्त्रान्तरं परिधाप्य उपवीतमुत्तरीयञ्च दत्त्वा चन्दनादिनोपलिप्य कर्णनासिकानेत्रद्वयमुखात्मकेषु सप्तच्छिद्रेषु सप्तसुवर्णखण्डिकाक्षतदभावे कांस्यादिखण्डिका निःक्षिपेत् ततो वस्त्रान्तरेणाच्छाद्य वहेयुः। वहनकाले वामपार्श्वं तदभावे वामार्द्धं वा चेत् अर्द्धं पिण्डार्थमवशेषयेत्। ततोऽग्निदाता पुत्रादिश्चिताभूमौ गत्वा तदभावे तिलसहितं पिण्डदानेतिकर्त्तव्यतया उत्सृजेत्। सा यथा,—गोमयेनोपलिप्तायां भूमौ प्राचीनावीती कुशमूलेन ॐ अपहता असुरा रक्षांसि वेदिषद इत्यनेन दक्षिणाग्रेरेखां कुर्य्यात् तदुपरि कुशानास्तीर्य ॐ इहि प्रेत सौम्य गम्भीरेभिः पथिभिः पूर्व्विणेभिर्देवयानैरिष्टापूर्त्तमभि वसानो उत्तमे नाके अधि विक्षि यत्रैते अधि वदन्ति सप्तऋषय इत्यावाह्य सतिलजलपात्रं वामहस्तादक्षिणहस्तेन गृहीत्वा ॐ अद्यामुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते तिलोदकं क्षीरखण्डयुतं स्वधा नमः इत्यवनेजयेत्। ॐ अद्यामुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते तिलोदकं क्षीरखण्डयुतं स्वधा नमः इति वामहस्तगृहीतामपात्रादन्नं सतिलं दक्षिणहस्तेन गृहीत्वा कुशोपरि दद्यात्। पिण्डपात्रप्रक्षालनजलेन तदुपरि प्रत्यवनेजनं तूष्णीं गन्धादिदानं सामगेतरेषान्तु नावाहनमिति विशेषः। ततः पुत्रादिः स्नात्वा चितां रचयित्वा तत्र दारुचयं कुर्य्यात्। तदुपरि वस्त्रद्वयसहितं दक्षिणाग्रिरसं सामगमधोमुखं पुमांसं न्यसेत्। नार्य्यास्तूत्तानदेहत्वं सामगेतरेषां उत्तराग्रिरत्वम्। ततो देवाद्याग्निमुखाः सर्व्वे हुताशनं गृहीत्वा एनं दहन्तु इति मनसा ध्यात्वाग्निं गृहीत्वा,
ॐ कृत्वा तु दुष्करं कर्म्म जानतावाप्यजानता।
मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम्॥
धर्म्माधर्म्मसमायुक्तं लोभमोहसमावृतम्।
दहेयं सर्व्वगात्राणि दिव्यान् लोकान् स गच्छतु॥
इति पठित्वा त्रिः प्रदक्षिणीकृत्य दक्षिणमुखः शिरःस्थाने दद्यात्। स्त्रीदाहे नरमित्येव पाठः नृ. नारीमित्यूहः। ततो दाहे दग्धे प्रादेशप्रमाणाः सप्तकाष्ठिका गृहीत्वा चितामिं सप्तवारान् प्रदक्षिणीकृत्य सप्तकाष्ठिका एकैकक्रमेण चितायौ प्रक्षिपेत्। ततः कुठारेण क्रव्यादाय नमस्तुभ्यमिति मन्त्रं सकृत् पठित्वा चितास्थव्यक्तदारूपरि सप्तप्रहारा देयाः तमग्निमपश्यन्निवावामावर्त्तेन स्नातुं नदीं गन्तव्या। नग्नं ध्रुवं न दहेत् ध्रुवसन्धिवस्त्रादि श्मशानवासिचाण्डालादिभ्यो दद्यात्। स्फुटिकां रज्जुखलाञ्च वस्त्रान्तरावृतां सतिलपक्वगर्त्तं जलपूर्णकुम्भं आयोहिष्टीयवामदेव्यादिभिरभिमन्त्र्य स्नापयित्वा दहेदिति विशेषः। गर्भवत्यास्तु गर्भं निःसार्य्य स्थानान्तरे निःक्षिप्य तस्या दाहः कार्य्यः। ततो जलसमीपं गत्वा पुत्रादयः प्रयोगदानाभिज्ञं श्यालकादिकं प्रार्थयेयुः। उदकं करिष्याम इति तेन च कुरुध्वं मा चैवं पुनरित्यशुतवर्षे प्रेते कुरुध्वमेवेतरस्मिन् इत्युत्तरे दर्भे दृढपुरःसरमवतरणं जले। ततः परिहितवस्त्रं प्रक्षाल्य तदेव परिधाय प्राचीनावीतिनो दक्षिणामुखाः ॐ अपमृत्योरुच्चदघमित्यनेन मन्त्रेण वामहस्तानामिकया अप आलोड्य एकवस्त्राः सप्तन्निमज्योन्मज्याचम्य दक्षिणामुखास्तर्पयेयुः। ततः ॐ अमुकगोत्रं प्रेतममुकदेवशर्म्माणं तर्पयामीति सामगानां प्रयोगः यजुर्व्वेदिनान्तु अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते तिलोदकं क्षीरखण्डयुतं स्वधा नमः इत्येकाञ्जलिदानमावश्यकं अञ्जलित्रयदाने फलातिशयः। ततः पुनः स्नात्वा जलादुत्थानं बालपुरःसरं कार्य्यम्। ततः साश्रुले उपविश,
मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम्।
यः करोति स संमूढो जलबुद्बुदसन्निभे॥
पञ्चधा सम्भृतः कायो यदि पञ्चत्वमागतः।
कस्मैभिः स्वशरीरोत्थैरुच्च का परिदेवना॥
गन्धर्व्वी वसुमती नागश्रुतिर्देवतानि च।
फेनप्रख्यः कथं गार्ग्य मर्त्यलोको न यास्यति॥
श्रेयांसु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः।
अतो न रोदितव्यं हि क्रिया कार्य्या विधानतः॥
इति चिन्तयित्वा गृहद्वारं समागत्य निम्बपत्राणि दन्तैः खण्डयित्वा भूमौ पापं भूमयत्विति भूमौ क्षिप्त्वा अश्मेव शिरो भूयासं इत्यश्मानं पदा स्पृष्ट्वा अग्निनः भूमे यच्छतु इति अग्निं स्पृष्ट्वा घृतभक्षणार्थोम्मध्ये स्थित्वा लोगिति मन्त्रेण द्वावपि स्पृष्ट्वा गोमयसुदकं गौरसर्षपांश्च स्पृष्ट्वा बालपुरःसरा गृहं विशेयुः। दिवा चेद्दाहस्तदा रात्रौ ग्रामप्रवेशः रात्रौ चेत्तदा दिवसे। अश्रुस्रौ ब्राह्मणानुमतिं गृहीत्वा कालप्रतीक्षणं विना प्रवेष्टव्यम्।" इति शुद्धितत्त्वम्॥

दाहकः, पुं, (दहतीति। दह + ण्वुल्।) चित्रकः। रक्तचित्रकः। इति राजनिर्घण्टः॥ दाहकर्म्मन्, क्ली॥ (यथा, याज्ञवल्क्ये। २।२८५।
"सेचवेश्मवनग्रामविवीतखलदाहकाः।
राजपत्न्यभिगामी च दग्ध्वास्तु कटाभिगा॥"
उष्णगुणः। यथा, राजनिर्घण्टे।
"काङ्क्षिकं दधितैलन्तु वह्नीपक्षितनाशनम्।
दाहकं गात्रशैथिल्यं वह्नं चन्द्रपैत्तं परम्॥")

दाहज्वरः, पुं, (दाहप्रधानो ज्वरः।) गात्रज्वालायुक्तज्वररोगः। तस्यौषधम्। यथा,—
"पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै।
दाहं विनाशयेद्दाहज्वरञ्च परमेश्वर!॥"
इति गारुडे १८३ अध्यायः॥

दाहनं, क्ली, (दह + णिच् + भावे ल्युट्।) भस्मीकरणप्रेरणम्। दाहकरान इति भाषा॥ (यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे। १। ६२।
"कलौ कलुषभूयिष्ठे दाहनायाग्निरूपिणी॥")

दाहसरः, पुं, (दाहार्थं सियते गम्यतेऽस्मिन्निति। सि + अप्।) श्मशानम्। इति त्रिकाण्डशेषः॥

दाहहरणं, क्ली, (दाहस्य हरणं यस्मात्।) वीरणमूलम्। इति शब्दचन्द्रिका॥

दाहागुरु, क्ली, (दाहाय यदगुरु।) सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। दाहनागुरु २ दाहकाष्ठम् ३ धूपागुरु ४ तैलागुरु ५ पूरम् ६ वनवल्लभम् ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। केशवर्द्धनत्वम्। वर्ण्यत्वम्। केशदोषनाशित्वम्। सततसौगन्ध्यविस्तारकारित्वञ्च। इति राजनिर्घण्टः॥

दिक्, [श्] स्त्री, (दिशति अवकाशं ददाति या। दिश + "ऋत्विग्दृक्पृगिति।" ३। २। ५९। इति क्विन्-प्रत्ययेन साधुः।) पूर्व्वपश्चिमदक्षिणोत्तरादिरूपा। तत्पर्य्यायः। ककुप् २ काष्ठा ३ आशा ४ हरित् ५। इत्यमरः। १।३।८॥ निदेशिनी ६ दिशा ७ ककुभः ८ हरितः ९ गौः १०। इति शब्दरत्नावली॥ अपि च।
आताः १ आशाः २ उपराः ३ आष्टाः ४ काष्ठाः ५ व्योम ६ ककुभः ७ हरितः ८ इत्यष्टौ दिङामानि। इति वेदनिघण्टौ १ अध्यायः॥ अस्या उत्पत्तिर्यथा,—
"ह्रस्वैवमवधिं तस्मादिदं पूर्व्वञ्च पश्चिमम्।
इति देशो निदिश्येत यया सा दिगिति स्मृता॥"
तस्या वायोर्गुणाः।
"विश्वस्यायुरनायुष्यः प्राणिनां नैकदोषकृत्।
सर्व्वपुंनिन्दको हन्ता ह्यलोत्पातपुरःसरः॥"
इति राजवल्लभः॥ * ॥
सा दशधा यथा। पूर्ब्बा १ आग्नेयी २ दक्षिणा ३ नैर्ऋती ४ पश्चिमा ५ वायवी ६ उत्तरा ७ ऐशानी ८ ऊर्द्धम् ९ अधः १०॥ * ॥ तासां उत्पत्तिर्यथा,—
महातपा उवाच।
"शृणु राजन्नवहितः प्रजापाल! कथामिमाम्।
यथा दिशः ससृत्पन्नाः श्रोत्रेभ्यः पृथिवीपते!॥
ब्रह्मणः सृजतः सृष्टिमादिसर्गे ससृत्यिते।
चिन्ताभून्महती को मे प्रजाः सृष्टा धरिष्यति॥
एवं चिन्तयतस्तस्य अवकाशं व्रजत्यिह।
प्रादुर्ब्बभूवुः श्रोत्रेभ्यो दश कन्या महाप्रभाः॥
पूर्ब्बा च दक्षिणा चैव प्रतीची चोत्तरा तथा।
ऊर्द्धाध एव यमुखाः कन्या ह्यासंस्तदा नृप!॥
तासां मध्ये चतसस्तु कन्याः परमशोभनाः।
याःपश्यन्त्यो महाभागा गामीर्य्येण समन्विताः॥

ता ऊचुः प्रणयाद्देवं प्रजापतिमकल्मषम् ।
अवकाशन्तु नो देहि देवदेव प्रजापते ! ॥
यत्र तिष्ठामहे सर्व्वा भर्तृभिः सहिताः सुखम् ।
प्रतयज्ञ महाभाग ! देहि नोऽयक्तसम्भव ! ॥

ब्रह्मोवाच ।

ब्रह्माण्डमेतत् सुश्रोण्यः शृतकोटिप्रविस्तरम् ।
तस्यान्ते स्वेच्छया तुष्टा उष्यतां मा विलम्बथ ॥
भर्तृंश्च वः प्रयच्छामि दृष्ट्वा रूपमिनोऽनघाः ।
यथेष्टं गम्यतां देशो यस्या यो रोचतेऽधुना ॥
एवमुक्ताश्च ताः सर्व्वा यथेष्टं प्रययुस्तदा ।
ब्रह्मा ससर्ज तूर्णं तान् लोकपालान् महा-
बलान् ॥
दृष्ट्वा तु लोकपालांस्तु ताः कन्याः पुनराद्रयन् ।
विवाहं कारयामास ब्रह्मा लोकपितामहः ॥
एकामिन्द्राय स प्रादादन्येभ्यो यमाय च ।
निर्ऋतये च देवाय वरुणाय महात्मने ॥
वायवे धनदेशाय ईशानाय च सुव्रत ! ।
ऊर्द्धं स्वयमधिष्ठाय ग्रेषावाधोवस्थिताम् ॥
एवं दत्वा पुनर्ब्रह्मा तिथिं प्रादात् दिशां पुनः ।
दशमीं भर्तृनाम्नस्तु अर्द्धनाम्नोदनः प्रभुः ॥
ततःप्रभृति ताः देवः सेन्द्राद्याः परि-
कीर्त्तिताः ॥"

इति वराहपुराणम् ॥*॥

न्यायमते अस्याः सर्व्वगतत्वम् । परममहत्त्व-
परिमाणम् । दूरान्तिकादिधीहेतुत्वम् । नित्य-
त्वम् । एकत्वेऽपि उपाधिभेदात् प्राच्यादिव्यप-
देशभाक्त्वम् । अस्या गुणाः । संख्या १ परि-
मितिः २ पृथक्त्वम् ३ संयोगः ४ विभागः ५ ।
इति भाषापरिच्छेदः ॥ (सामान्यम् । यथा,
सुश्रुते । १ । ४३ ।
"वसनद्रव्ययोगानां दिगियं सम्प्रकीर्त्तिता ॥")

दिक्कः, पुं, (दिशि कायते शब्दायते इति । के+
कः ।) करभः । इति शब्दरत्नावली ॥

दिक्करः, पुं, (दिशं आदेशं करोति उत्साहान्वि-
तत्वात् । क+टः ।) युवा । इति माधवीकाः
शृतकोषः ॥ (महादेवः । यथा, कलिकापुराणे ।
८२ अध्याये ।
"दिक्करस्तरुणः प्रोक्तस्तथा शम्भुश्च दिक्करः ॥")

दिक्करवासिनी, स्त्री, (दिक्करे शम्भौ वसतीति ।
वस+णिनिः+ङीप् ।) देवीविशेषः । यथा,
"एवं दिक्करवासिन्याः कथितः पूर्व्ववत् क्रमः ।
यं श्रुत्वा नाशुभं किञ्चिदाप्नोति श्रवणे रतः ॥
दिक्करस्तरुणः प्रोक्तस्तथा शम्भुश्च दिक्करः ।
तस्मिन्नध्युषिता देवी तस्माद्दिक्करवासिनी ॥"

इति कालिकापुराणे ८२ अध्यायः ॥

दिक्करिका, स्त्री, (दिक्करिणो दिग्गजस्य सका-
शात् कायते शोभते इति । दिक्करिन्+के+
कः । ततष्टाप् ।) नदीविशेषः । यथा,—
"अस्ति ताटकशैले तु सरो मानससन्निभम् ।
यत्र सार्द्धं शैलपुत्र्या जलक्रीड़ां सदा हरः ॥
कुरुते नरशार्दूल ! स्वर्णपङ्कजशोभिते ।
तस्य पश्चाच्चपूर्व्वभागेभ्यश्च सरित्त्रयम् ॥
अवतीर्णं प्रयात्येव दक्षिणं सागरं प्रति ।
तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया ॥
दिग्गजस्पर्शसंजाता तेन दिक्करिका स्मृता ॥"

इति कालिकापुराणे ८२ अध्यायः ॥

दिक्करी, स्त्री, (दिक्कर+ङीष् ।) युवती । इति
हेमचन्द्रः । ३ । १७५ ॥

दिक्पतिः, पुं, (दिशां पतिः ।) दिग्गधीश्वरः ।
तद्यथा । प्राच्यधिपो रविः । अग्निकोणाधिपः
शुक्रः । दक्षिणाधिपः कुजः । नैर्ऋतकोणाधिपो
राहुः । प्रतीच्यधिपः शनिः । वायुकोणाधिप-
चन्द्रः । उत्तराधिपो बुधः । ईशानकोणाधिपो
गुरुः । तस्य प्रमाणं यथा,—
"सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी ।
सौम्यश्चेदग्रगन्ता च प्राच्यादिदिग्गधीश्वराः ॥"

इति ज्योतिस्तत्त्वम् ॥

दिक्पालः, पुं, (दिशः पालयतीति । दिश्+पालि
+अण् ।) पूर्व्वादिदशदिशां पालकः । यथा ।
पूर्व्वस्यां दिशि इन्द्रः । अग्निकोणे वह्निः ।
दक्षिणस्यां दिशि यमः । नैर्ऋतकोणे निर्ऋतिः ।
पश्चिमस्यां दिशि वरुणः । वायुकोणे मरुत् ।
उत्तरस्यां दिशि कुबेरः । ईशानकोणे ईशः ।
ऊर्द्धदिशि ब्रह्मा । अधोदिशि अनन्तः । इति
पुराणम् ॥ यथा, मत्स्यपुराणे ।
"यच्चार्घ्यन्ति विधिना दिक्पालादींस्तु कर्म्मिणः ।
तत्र प्रपूजयेदेनं विधिं भागवतं शुकम् ॥"

दिक्शूलं, क्ली, (दिशि शूलमिव ।) दिग्विशेष-
गमने निषिद्धवारः । यथा,—
पश्चिमायां शुक्रवारौ । उत्तरस्यां बुधमङ्गलौ ।
पूर्व्वस्यां शनिसोमौ । दक्षिणस्यां दृहस्पतिः ।
तथा च ।
"शुक्रादित्यदिने न वारुणदिशं न क्षौ कुजे चोत्तरां
मन्दीन्दोश्च दिने न शुक्रकुजौ याम्यां गुरौ न
व्रजेत् ।
शूलानीति विलङ्घ्य यान्ति मनुजा ये वित्त-
लाभाशया
भग्नाशाः पुनरापतन्ति यदि ते शुक्रेण तुल्या
अपि ॥"

इति ज्योतिःसारसंग्रहः ॥

कैश्चिदुक्तं ।
„————बौधे गुरौ दक्षिणाम् ।
ईशाने ज्वलने चैव नैर्ऋते मारुते तथा ।
न गन्तव्यं सुराचार्य्ये प्रतीच्यां रविशुक्रयोः ॥"

इति सुखबोधः ॥

दिगम्बरः, पुं, (दिगेव अम्बरं वस्त्रं यस्य । उलङ्ग-
त्वात् तथात्वम् ।) शिवः । क्षपणः । (स तु
जैनविशेषः । यथा, पद्मपुराणम् । ६ । ८२ ।
"दिगम्बरा मध्यमलम्बिमाहुरापादमस्रक्कमुं ।
चैतन्यशाम्भिसंदृष्टैरानखाग्रमृतैरपि ॥")
तमः । इति मेदिनी । रे, २६७ ॥ (नग्ने, त्रि ।
यथा, पञ्चतन्त्रे । ५ । १४ ।
"एकाकी गृहसन्त्यक्तः पाणिपात्रो दिगम्बरः ।
सोऽपि संवाह्यते लोके कष्टया पश्य कौतुकम् ॥")

दिगम्बरी, स्त्री, (दिगम्बर+ङीष् ।) दुर्गा ।
दिगम्बरस्य पत्नी । इति कुलार्णवः ॥ नग्ने, त्रि ।
इत्यमरः । ३ । १ । ३६ ॥ (यथा, कालीध्याने ।
"महामेघप्रभां श्यामां तथा चैव दिगम्बरीम् ॥")

दिग्गजः, पुं, (दिशो गजः ।) दिग्हस्ती । यथा,—
"ऐरावतः पुष्करीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः ॥"

इत्यमरः । १ । ३ । ४ ॥

एते क्रमेण पूर्व्वाद्यदिशां हस्तिनः ॥

दिग्धः, पुं, (दिह्यते लिप्यते स्म विषादिना इति ।
दिह+क्तः ।) विषाक्तबाणः । तत्पर्य्यायः ।
लिप्तकः २ । इत्यमरः । २ । ८ । ८८ ॥ (यथा,
रामायणे । २ । ३० । २३ ।
"सा विद्धा बहुभिर्बाणैर्दिग्धैरिव गजाङ्गना ॥")
स्नेहः । अग्निः । इति हेमचन्द्रः ॥ प्रबन्धः ।
इत्यजयपालः ॥

दिग्धः, त्रि, (दिह+क्तः ।) लिप्तः । इति मेदिनी ।
धे, ७ ॥ (यथा, भट्टिः । ३ । २१ ।
"सचन्दनोशीरलवालदिग्धः
शीकायिनागाद् द्युनिवासभूयम् ॥")

दिग्वासाः, [स्] पुं, (दिगेव वासो वस्त्रं यस्य ।)
शिवः । इति हेमचन्द्रः । २ । ११२ ॥ (यथा,
महाभारते । १३ । १७ । ४१ ।
"गणकर्त्ता गणपतिर्दिग्वासाः काम एव च ॥")
नग्ने, त्रि ॥ (यथा, मनुः । ११ । २०२ ।
"स्नात्वातुविप्रोदिग्वासाः प्राणायामेन शुध्यति ॥")

दिग्विजयः, पुं, (दिशां दिक्स्थितलोकानां विजयः ।)
विद्यया युद्धेन वा दिशां विजयः । यथा शङ्कर-
दिग्विजयः पाण्डवदिग्विजय इत्यादि ॥

दिङ्नः, पुं, (स्फोटनकाले दिङ् इति शब्दं कायति
शब्दायते इति । के+कः ।) उत्कुणछिन्नः ।
इति शब्दार्थकल्पतरुः ॥

दित, त्रि, (दीयते स्मेति । दो अवखण्डने+क्तः
"द्यतिस्यतीति ।" ७ । ४ । ४० । इति इत्वम् ।)
छिन्नम् । इत्यमरः । ३ । १ । १०३ ॥

दितिः, स्त्री, देत्यमाता । सा दक्षकन्या (यथा,
महाभारते । १ । ६५ । १२ ।
"अदितिर्दितिर्दनुः काला दनायुः सिंहिका
तथा ॥")
इयं कश्यपपत्नी च । (दो+भावे क्तिन् ।)
खण्डनम् । इति मेदिनी । ते, २४ ॥ राजविशेषे,
पुं । इति शब्दार्थकल्पतरुः ॥ (दातरि, त्रि ।
यथा, ऋग्वेदे । ४ । २ । ११ ।
"राये च नः स्वपत्याय देव दितिं च रास्वा-
दितिमुरुष्य ॥"
"दितिं दातारं च रास्व देहि ।" इति तद्भाष्ये
सायणः ॥)

दितिजः, पुं, (दितेर्जायते इति । दिति+जन+
डः ।) दैत्यः । इति हेमचन्द्रः । २ । १५२ ॥
(यथा, महाभारते । १ । २३१ । १७ ।
"ऋतस्य कर्त्ता दितिजान्तकस्थं
जेता रिपूणां प्रवरः सुराणाम् ॥")

दितिसुतः, पुं, (दितेः सुतः ।) दैत्यः । इत्यमरः । १ । १ । १२ ॥ (यथा, नैषधे । १६ । १५ ।
"दितिसुतगुरुः प्राग्यैर्युक्तं न किं कथयत्तमः ॥")
दित्यः, पुं, (दितौ भवः । दिति + यत् ।) दैत्यः । इति शब्दार्थकल्पतरुः ॥ (छेदनार्हे धान्यादौ, क्ली । यथा, वाजसनेयसंहितायाम् । १४ । १० ।
"दित्यवाड्यो विराट् छन्दः ॥"
"दोऽवखण्डने क्तिन्प्रत्ययः । दितिं खण्डनमर्हति दित्यं धान्यं वहति दित्यवाट् ।" इति तद्भाष्ये महीधरः ॥)
दिद्युत्, त्रि, (द्योतते दीप्यतीति । द्युत् + "द्युतिगामिस्तुहोतीनां दे च ।" ३ । २ । १७८ । इत्यस्य वार्त्तिकोक्त्या क्विपि द्वित्वे "द्युतिस्वाप्योः सम्प्रसारणम् ।" ७ । ४ । ६७ । इत्यभ्यासस्य सम्प्रसारणम् ।) दीप्तिविशिष्टः । इति सुग्धबोधम् ॥ (स्त्री, दीप्तिः । यथा, ऋग्वेदे । २ । १३ । ७ ।
"यच्चासमा अजनो दिद्युतो दिवः ।"
"असमा विषमा नानाप्रकारा दिद्युतः दीप्तीरजनः अजनयः ।" इति तद्भाष्ये सायनः ॥ वज्रम् । इति निघण्टुः । २ । २० ॥ यथा, ऋग्वेदे । १ । ६६ । ७ ।
"अस्तुर्न दिद्युत्क्षेपप्रतीका ॥")
दिधिषाय्यः, पुं, (दधाति आनन्दमिति । धा + "दिधिषाय्यः ।" उणां ३ । ६७ । इति आय्यः धातोर्द्वित्वं हस्वं युक् च ।) आरोपितबन्धुः ॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (धारके, त्रि । यथा, ऋग्वेदे । २ । ४ । १ ।
"मित्र इव यो दिधिषायो भूदेव आदेव जने जातवेदाः ॥"
"दिधिषायो धारयिता भूत् ।" इति तद्भाष्ये सायनः ॥ उज्ज्वलदत्तस्तु "दधिषायः" इति उणादिसूत्रं कल्पयित्वा दधिपूर्वात् स्यतेरायः यत्वञ्च इति व्याख्याय दधिषायो घृतम् इत्युक्तवान् ॥)
दिधिषुः, पुं, (दिधिं धैर्यं स्यतीति । सो + बाहुलकात् कुः । यद्वा, दिधिषूं आत्मन इच्छतीति । सुप आत्मनः क्यच् । क्विप् । बाहुलकात् ह्रस्वः ।) द्विरूढ़ापतिः । इत्यमरः । २ । ६ । २३ ॥ (गर्भाधानकर्त्ता । यथा, ऋग्वेदे । १० । १८ । ८ ।
"हस्तग्राभस्य दिधिषोरुतेदं पत्युर्जनित्वमभि सं बभूव ॥"
"दिधिषोर्गर्भस्य निधातुः ।" इति तद्भाष्ये सायनः ॥ यथा च भागवते । ६ । ६ । ३५ ।
"ब्राह्मणो वीक्ष्य दिधिषुं पुरुषादेन भक्षितम् । शोचन्त्यात्मानमुर्व्यामग्रपत् कृपिता सती ॥"
"दिधिषुं गर्भाधानकर्त्तारम् ।" इति श्रीधरः ॥) द्विरूढ़ायाम्, स्त्री । इति शब्दरत्नावली ॥ (धारके, त्रि । यथा, ऋग्वेदे । १० । ७८ । ५ ।
"अश्वासो न ये श्वसनास आशवो दिधिषवो न रथ्यः सुदानवः ।"
"तथा दिधिषवो न वहनाः धारका इव ।" इति तद्भाष्ये सायनः ॥)

दिधिषूः, स्त्री, (दधाति धार्यं यद्वा दिधिं धैर्यं इन्द्रियदौर्बल्यात् स्यति त्यजतीति । दा वा सो + "अन्येष्वपि दृश्यते ।" उणां । १ । ६५ । इति कूप्रत्ययेन साधुः ।) द्विरूढ़ा । वारद्वयविवाहिता स्त्री । तत्पर्य्यायः । दिधीषूः २ पुनर्भूः ३ दिधिषुः ४ । इति शब्दरत्नावली ॥ विवाहितायां कनिष्ठायां सत्यां अविवाहिता ज्येष्ठा भगिनी । यथा, उद्वाहतत्त्वे ।
"ज्येष्ठायां विद्यमानायां कन्यायामसंस्कृतेऽगुणा । सा चाग्रेदिधिषूर्ज्ञेया पूर्व्वा च दिधिषूः स्मृता ॥" (धारके, त्रि । यथा, ऋग्वेदे । १ । ७१ । ३ ।
"इषन्नृतं धनयन्नस्य धीतिमादिद्यौं दिधिषो विभृत्राः ॥")
दिधिषूपतिः, पुं, दिधिषूर्द्विरूढ़ा तस्याः पतिः स्वामी । द्विरूढ़ापतिः । (यथा, मनुः । ३ । १७३ ।
"भ्रातुर्मृतस्य भार्य्यायां योऽनुरज्येत कामतः । धर्म्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ॥")
दिनं, क्ली, (द्यति खण्डयति महाकालमिति । दो छेदे + "बहुलमन्यत्रापि ।" उणां २ । ६६ । इति इनच् ।) कालविशेषः । तत्पर्य्यायः । घस्रः २ अहः ३ दिवसः ४ वासरः ५ । इत्यमरः । १ । ४ । २ । भास्करः ६ दिवा ७ । इति राजनिर्घण्टः ॥ वारः ८ अंशकः ९ द्यु १० अंशकम् ११ । इति शब्दरत्नावली ॥ (यथा, रघुः । ३ । ८ ।
"दिनेषु गच्छत्सु नितान्तपीवरं तदीयमालीनमुखं स्तनद्वयम् ॥")
तत्तु मनुष्यमाने षष्टिदण्डात्मकम् । पित्रमाने गौणचान्द्रमासात्मकम् । देवासुरमाने वत्सरात्मकम् । ब्रह्ममाने दिव्यद्विसहस्रयुगात्मकम् । मनुष्यमाने ब्रह्मणो दिनस्य संख्या ।८,६४०,०००,००० । इति पुराणम् ॥ तदेव मनुष्याणां सौरसावनचान्द्रनाक्षत्रभेदेन चतुर्विधम् । यथा,—
सावनं दण्डाः षष्टिरहः खलयखगुणांशाप्तास्तदैनं भवेत् । १ ।
उदयादुदयाज्ज्ञानोर्भौमसावनवासराः । २ ।
तिथिनैकेन दिवसश्चान्द्रमासे प्रकीर्त्तितः । ३ ।
आयुर्हाये स्मृतं प्राज्ञैर्नाक्षत्रं षष्टिनाडिकम् ॥४॥
नीलतवाहनमते तु सूर्य्यकिरणावच्छिन्नचतुर्यामयुक्तम् ॥
दिनं, क्ली, (दो छेदे + इनच् ।) सूर्य्यकिरणावच्छिन्नकालः । तदुवैदिकपर्य्यायः । वस्वः १ द्युः २ भाद्रः ३ वासरम् ४ खसराणि ५ ध्रंसः ६ धर्म्मः ७ घृणः ८ दिनम् ९ दिवा १० दिवे-दिवे ११ द्वाविद्यवि १२ । इति द्वादशाहर्नामानि । इति वेदनिघण्टौ १ अध्यायः ॥ * ॥ सिंहकन्यातुलाधन्विकुम्भमीनलग्नानि । यथा,—
"अजगोपतियुग्मञ्च कर्किधन्विघटास्तथा । निशासंज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मकाः ॥"
इति ज्योतिस्तत्त्वम् ॥
दिनकरः, पुं, (करोतीति । कृ + अच् । दिनस्य करः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ११ ॥ (यथा, ऋतुसंहारे । १ । २२ ।
"दिनकरपरितापात् पीतजीवाः समन्तात् विदधति भयसूचैर्धौतमाया वनान्ताः ॥")
दिनकरात्मजा, स्त्री, (दिनकरस्य सूर्य्यस्य आत्मजा ।) यमुना । इति हलायुधः ॥
दिनकेशरः, पुं, (दिनस्य केशर इव ।) अन्धकारः । इति शब्दरत्नावली ॥
दिनज्योतिः, [स्] क्ली, (दिनस्य ज्योतिः ।) आतपः । इति राजनिर्घण्टः ॥
दिनदुःखितः, पुं, क्ली, (दिने दिवसे दुःखितः । दिवाभागे वियोगित्वात्तथात्वम् ।) चक्रवाकः । इति शब्दरत्नावली ॥
दिनप्रणीः, पुं, (दिनं प्रणयतीति । प्र + नी + क्विप् ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (अर्कवृक्षः । सूर्य्यपर्य्यायत्वात् ॥)
दिनबलः, पुं, (दिने बलं यस्य ।) पञ्चमषष्ठसप्तमाष्टमैकादशद्वादशराशयः । इति ज्योतिषम् ॥ (सूर्य्यगुरुशुक्रचन्द्राः । इति दृङ्मातकम् ॥)
दिनमणिः, पुं, (दिनस्य मणिरिव ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (यथा, गीतगोविन्दे । १ । १८ ।
"दिनमणिमण्डलमण्डन ! भवखण्डन ! मुनिजनमानसहंस ! जय जय देव हरे ! ॥"
अर्कवृक्षः । सूर्य्यपर्य्यायत्वात् ॥)
दिनमूर्द्धा, [न्] पुं, (दिनस्य मूर्द्धा मस्तकमिव । दिनस्य आदिस्थानत्वादस्य तथात्वम् ।) पूर्व्वाह्णः । उदयाचलः । इति त्रिकाण्डशेषः ॥
दिनांशुः, पुं, (दिनस्य अंशुः ।) प्राङ्मध्याह्नापराह्णसायाह्नादिः । इति राजनिर्घण्टः ॥
दिनादिः, पुं, (दिनस्य आदिः ।) प्रभातम् । इति राजनिर्घण्टः ॥
दिनान्तः, पुं, (दिनस्य अन्तः ।) सायम् । दिवावसानम् । इत्यमरः । १ । ४ । ३ । (यथा, ऋतुसंहारे । १ । १ ।
"दिनान्तरम्योरुभुजप्रशान्तमन्मथो निदाघकालः समुपागतः प्रिये ! ॥")
दिनान्तकः, पुं, (दिनस्य अन्तकः नाशकः ।) अन्धकारः । इति त्रिकाण्डशेषः ॥
दिनावसानं, क्ली, (दिनस्य अवसानं यत्र ।) दिनान्तः । इति हेमचन्द्रः । २ । ५४ ॥ (यथा, रघुः । २ । ४५ ।
"दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥")
दिनिका, स्त्री, (दिनं क्षत्यहेतुतया अस्त्यस्येति । दिन + ठन् ।) एकदिनसत्कर्मनिरूप्यम् । इति शब्दमाला ॥
दिनुभ, क ड संघाते । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं सकं-सेट् ।) क ड, दिम्भयते । सङ्घातो राशीकरणम् । इति दुर्गादासः ॥
दिभ, द क नोदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) द क, दिम्भयति । नोदः प्रेरणम् । इति दुर्गादासः ॥
दिम्य, ण क संघाते । इति कविकल्पद्रुमः ॥ (चुरां-उभं-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । तृतीय-

स्वरौ। अक, दिव्यति दिव्यते। सङ्गतौ राशीकरणम्। एवः केचिन्न मन्यते। इति दुर्गादासः॥

दिलीपः, पुं, सूर्य्यवंशीयराजविशेषः। सूर्य्यवंशे दिलीपनामानौ द्वौ नृपौ जातौ एकः अंशुमतः पुत्रः भगीरथपिता अपरः दशरथपितामहश्च। इति रामायणम्॥ (यथा च हरिवंशे। १५। १२-१४, २३-२५।

"सुतः पञ्चजनस्यासीदंशुमान्नाम वीर्य्यवान्।
दिलीपस्तनयस्तस्य खट्वाङ्ग इति विश्रुतः॥
येन स्वर्गादिहागत्य मुहूर्त्तं प्राप्य जीवितम्।
त्रयोऽनुसन्विता लोका बुद्ध्या सत्येन चानघ!॥
दिलीपस्य तु दायादो महाराजो भगीरथः।
यः स गङ्गां सरिच्छ्रेष्ठामवातारयत प्रभुः॥"
"अनमित्रस्य धर्म्मात्मा विद्वान् दुलिदहोऽभवत्।
दिलीपस्तनयस्तस्य रामस्य प्रपितामहः॥
दीर्घबाहुर्दिलीपस्य रघुर्नाम्नाभवत् सुतः।
अयोध्यायां महाराजो रघुश्चासीत् महाबलः॥
अजस्तु रघुतो जज्ञे अजाद्दशरथोऽभवत्।
रामो दशरथात् जज्ञे धर्म्मात्मा सुमहायशाः॥")

दिलीपराट्, [ज्] पुं, (दिलीप एव राट् राजा।) दिलीपराजः। इति त्रिकाण्डशेषः॥

दिलीरं, क्ली, ग्रिलीन्द्रकम्। इति हारावली। २५॥

दिव, इ प्रीतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इ, दिन्वति। प्रीतिरिह प्रीतीकरणम्। दिन्वति लोकः पितरम्। इति दुर्गादासः॥

दिव, क अर्हे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, देवयति। अर्हं इह पीडनमिति मैत्रेयः। यातनं गमनं वेति रमानाथः। इति दुर्गादासः॥

दिव, क ड परिकूजने। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-अकं-सेट्।) क ड, परिदेवयते कश्चित्तस्य राष्ट्रे न दुःखितः। इति हलायुधः। इति दुर्गादासः॥

दिव, य उ जिगीषेच्छयोः, पञ्चौ, द्युतौ। क्रीड़ायाम्। गतौ। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सकं-च सेट्। उदित्त्वात् क्त्वायेट्।) य, दीव्यति। उ, देवित्वा द्यूत्वा। दीव्यमानं शितान् बाणान्। इति भट्टौ साक्षीस्थे श्रुतः-ग्राम्यः। पणित्वेवहारः स्तुतिश्च। व्यवहारस्तु क्रयविक्रयरूपः। द्युतावेवाकर्म्मकः। क्रीड़ायान्तु दीव्यतेः करणस्य नित्यं कर्म्मत्वम्। तच्च तृतीयाविभक्तिरेव विभाव्यते। इति साम्प्रदायिकम्। तेन अक्षा दीव्यन्ते छात्रेण इति कर्म्मणि प्रत्ययः स्यात्। अक्षैर्दीव्यते छात्रेण इति भावे प्रत्ययो न स्यात् अक्षैर्देवयति छात्रेण गुरुरित्यभ्यासस्य कर्तुः कर्म्मत्वं न स्यात्। तेनाद्यूद्वयप्रयामं स्थगेण स्थगयोचना। इति भट्टौ तु तैनेतिकरणं दुष्टप्रेरेव न तु दीव्यतेः। तेनाकर्म्मकत्वात् रामभित्यभ्यासस्य कर्तुः कर्म्मत्वम्। इति दुर्गादासः॥

दिवं, क्ली, (दीव्यन्त्यस्मिन्निति। दिवु क्रीड़ायाम्+घञर्थे अधिकरणे कः।) स्वर्गः। (यथा, देवीभागवते। ५। ३। १०।

"गच्छ वीर! महाबाहो दूतत्वं कुरु मेऽनघ॥
ब्रूहि शुम्भं दिवं गत्वा निःशुम्भः सुरसन्निधौ॥")

आकाशम्। इति मेदिनी। वे, ११॥ वनम्। दिवा। इति हेमचन्द्रः। २। ५२॥

दिवसः, पुं, क्ली, (दीव्यन्त्यत्रेति। दिव+"दिवः कित्।" उणां। ३। १२१। इति असच् स च कित्।) दिनम्। इत्यमरः। १। ४। २॥ (यथा, आर्य्यासप्तशत्याम्। २७८।

"द्राघयता दिवसानि त्वदीयविरहेण तीव्रतापेन।
ग्रीष्मेणेव नलिन्या जीवनमल्पीकृतं तस्याः॥")

दिवसकरः, पुं, (करोतीति। कृ+अच्। दिवसस्य करः।) सूर्य्यः। इति हेमचन्द्रः। २। ११॥ (यथा, आर्य्यासप्तशत्याम्। ६३६।

"सुन्दरि सखी दिवसकरबिम्बे तुहिनांशुरेखेव॥")

दिवसमुखं, क्ली, (दिवसस्य मुखम्।) प्रभातम्। इति हलायुधः॥

दिवस्पतिः, पुं, (दिवः पतिः। अलुक्समासः।) इन्द्रः। इत्यमरः। १। १। ४५॥ (यथा, महाभारते। ५। १२। ६।

"इन्द्राणीमासयिष्यामो यदि चक्षुषि दिवस्पते!॥")

दिवस्पृथिवौ, क्ली, (द्यौश्च पृथिवी च। "दिवसश्च पृथिव्याम्।" ६। ३। ३०। इति दिवो दिवसादेशः।) रोदसी। स्वर्गभूम्यौ। इति हेमचन्द्रः। ३। ४॥ द्विवचनान्तोऽयम्। (यथा, ऋग्वेदे। २। २। ३।

"तं देवा युज्ञे रजसः सुदंस संदिवस्पृथिवोः
ररतिं श्चरिरे॥")

दिवा, अ, दिनम्। इत्यमरः। ३। ४। ६॥ (यथा, महाभारते। २। ११। ३४।

"त्वया लवा सुहूर्त्ताश्च दिवा रात्रिस्तथैव च॥")

दिवा, [न्] पुं, (दिव्यत्यस्मिन्निति। दिव+"कनिन् युवृषीति।" उणां। १। १५६। इति कन्। "बहुलवचनात् कैलादपि कनिन्।" इति उज्ज्वलदत्तोक्त्या कनिन्।) दिनम्। इत्युणादिकोषः॥

दिवाकरः, पुं, (दिवा दिनं करोतीति। कृ+"दिवाविभेति।" ३। २। २१। इति टः।) सूर्य्यः। (यथा, देवीभागवते। २। ६। १८।

"उदितश्च तदा भानुस्तया दृष्टो दिवाकरः॥")

अर्कवृक्षः। इत्यमरः॥ काकः। पुष्यविशेषः। इति शब्दचन्द्रिका॥

दिवाकीर्त्तिः, पुं, (दिवा दिवसे एव कीर्त्तिर्यस्य। रात्रौ चौरकर्म्मनिषेधात्।) नापितः। चण्डालः। ("रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च।
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः॥"
१०। ५४। इति मनुवचनात् अस्य दिवाचरत्वात् तथात्वम्॥ यथा, मनुः। ५। ८५।

"दिवाकीर्त्तिस्तदक्षाश्च पतितं क्षतिकञ्चुका।
प्रव्रजन्ता सूचिनक्षेव सूत्रा स्नानेन शुध्यति॥"

स्मृत्याच काश्मीरखण्डे। ७६। ८७।

"दीप्तितो वा दिवाकीर्त्तिः पण्डितो वाप्यपण्डितः।
तुल्यो मे मोचरीच्छायां संप्राप्य मणिकर्णिकाम्॥")

उलूकः। इति हेमचन्द्रः। ३। ५६७॥

दिवाटनः, पुं, (दिवा अटतीति। अट गतौ+ल्युः।) काकः। इति शब्दार्थकल्पतरुः॥ (चाण्डालः। "दिवाचरेयुः कार्य्यार्थं चिह्निता राजशासनैः।"१०।५४। इति मनुशासनात्॥)

दिवातनः, त्रि, (दिवा भवः। दिवा+"सार्व्वचिरंप्राह्णेप्रगेयथेभ्यष्ठाट्ठाौ तुट् च।" ४। ३। २३। इति ट्युः तुट् च।) दिनभवः। यथा, भट्टिः। ५। ६५।

"सायन्तनीं तिथिप्रथः पङ्कजानां दिवातनीम्।
कान्तिं कान्ता सदातन्या क्षेपयन्ती रुचिस्मिता॥"

दिवान्धः, पुं, (दिवा दिवसे अन्धः।) पेचकः। इति त्रिकाण्डशेषः॥ (यथा, पञ्चतन्त्रे। ३। ७५।

"यत् मयूरहंसकोकिलचक्रवाकशुकसारङ्गहारीतकसारसादिषु पक्षिप्रधानेषु विद्यमानेषु तस्य दिवान्धस्य करालवक्त्रस्याभिषेकः क्रियते नैतत् मम मतम्॥") दिगन्धे, त्रि। यथा,—

"दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदर्शनाः॥"

इति चण्डी॥

दिवान्धा, स्त्री, (दिवा दिवसे अन्धा।) वल्गुला पक्षी। इति राजनिर्घण्टः॥

दिवान्धकी, स्त्री, (दिवा अन्धकी दर्शनक्रियावर्जिता।) कुक्कुन्दरी। इति पुराणम्॥

दिवाभीतः, पुं, (दिवा दिवसे भीतः।) उलूकः। कुसुदाकरः। चौरः। इति मेदिनी। ते, १६७॥ (दिवसभीते, त्रि। यथा, कुमारे। १। १२।

"दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्॥")

दिवाभीतिः, स्त्री, (दिवा दिवसे भीतिर्भयं यस्याः।) पेचकः। इति शब्दरत्नावली॥

दिवामणिः, पुं, (दिवा दिनस्य मणिरिव।) सूर्य्यः। इति शब्दरत्नावली॥

दिवामध्यं, क्ली, (दिवा दिवसस्य मध्यम्।) मध्याह्नः। इति हेमचन्द्रः। २। ५३॥

दिवास्वापः, क्ली, (दिवा दिवसे स्वापो निद्रा यस्याः।) वल्गुला पक्षी। इति राजनिर्घण्टः॥

दिविः, पुं, (दीव्यतीति। दिवु क्रीड़ायाम्+"इगुपधात् कित्।" उणां ४। ११६। इति इन् स च कित्।) चाषपक्षी। इति शब्दमाला॥

दिविजः, त्रि, (दिवि स्वर्गे जायते इति। दिव+जन+डः। "प्रावृट्शरत्कालदिवो जे।" ६। ३। १५। इति सप्तम्या अलुक्।) स्वर्गीयः। इति संक्षिप्तसारः॥

दिविषत्, [द्] पुं, (दिवि सीदतीति। षद्+क्विप्। सप्तम्या अलुक्। मत्वञ्च।) देवः।

दिवौकाः

इत्यमरः ।१।१।८॥ (यथा, गीतगोविन्दे ।६।११।
"सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरा-
दानम्रैर्मुकुटेन्द्रनीलमणिभिः सन्द्रीतेन्दीवरम् ॥"
स्वर्गवासिनि, त्रि । यथा, अथर्ववेदे ।१८।४।८०।
"स्वधा पितृभ्यो दिविषद्भ्यः ॥")

दिविषः, त्रि, (दिवि स्वर्गे तिष्ठतीति । स्था + कः । अयुक् । "अमाभ्यगोभूमीति ।" ८ । ३ । ६७ । इति षत्वम् ।) स्वर्गस्थः । इति संक्षिप्तसारः ॥ (यथा, महाभारते ।३।१००।२४।
"ततो हतारिः सगणं सुखं वै
प्रशाधि क्षत्रं त्रिदिवं दिविषः ॥"
क्वचित् अशतबलोऽपि दृश्यते । यथा, भागवते ।४।२३।२०।
"नत्वा दिविस्पृक्तिदशपतिः परीत्य
विवेश वह्निं ध्यायती भर्तृपादम् ॥")

दिवी, स्त्री, (दिव + इन् । ह्रस्वादिकारादिति वा ङीष् ।) उपनिष्किकाकोटः । इति हारावली । १६० ॥

दिवौकाः, [स्] पुं, (द्यौः स्वर्गं आकाशो वा ओको यस्य ।) देवः । चातकः । इति मेदिनी । से, ५४ ॥

दिवोदासः, पुं, (दिवः स्वर्गात् दासो दानं यस्मै ।) काशीराजः । स चन्द्रवंशीयभीमरथराजपुत्रः ।
इति पद्मपुराणम् ॥
("अधीत्य चातुषो वेदमिन्द्राद्धन्वन्तरिः पुरा ।
आगत्य पृथिवीं काशीराज्ञातो वाहुजवेश्मनि ॥
गत्वा तु सोऽभवत् ख्यातो दिवोदास इति क्षितौ ॥"
"वत्स ! वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ॥
तत्र गत्वा दिवोदासः काशिराजोऽस्ति वाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्वेदविदांवरः ॥"
"अथ धन्वन्तरिं सर्वे वाराणस्याश्रमे स्थितम् ।
भगवन्तं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम् ॥
काशिराजं दिवोदासं तेऽपश्यन् विनयान्विताः ।
स्वागतञ्च इति प्राह दिवोदासो यशोधनः ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥
"अथ खलु भगवन्तममरवरवन्दितगणवरिष्ठतमाश्रमस्थं काशिराजं दिवोदासं धन्वन्तरिमौपधेनवैतरणौरभ्रपौष्कलावतकरवीर्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः ।"
इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये ॥)

दिवौकस्या, स्त्री, (दिवे वने ओकस्वी यस्याः ।) एला । इति शब्दार्थकल्पतरुः ॥ (दिवे स्वर्गे ओकस्वी यस्य ।) दिविवासिते, त्रि ॥

दिवौकाः, [स्] पुं, (दिवं स्वर्गं आकाशो वा ओको यस्य ।) देवः । इत्यमरः ।१।१।७॥ (यथा, महाभारते ।३।८४।११५।
"दिवौकसां पुष्करिणीं समासाद्य नराधिप ! ।
न दुर्गतिमवाप्नोति वाजिमेधञ्च विन्दति ॥")

दिव्यः

चातकः । इति मेदिनी । से, ५४ ॥ स्वर्गवासिनि, त्रि । यथा, महाभारते ।१।६।६।
"सा तु विध्वस्तवपुषः कश्मलाभिहतस्य च ।
ददर्श पथि गच्छन्ती वसून् देवान् दिवौकसः ॥")

दिव्यं, क्ली, (दिवे वने भवम् । दिव + यत् ।) लवङ्गम् । इति मेदिनी । ये, ३१ ॥ हरिचन्दनम् । इति राजनिर्घण्टः ॥ शुभपथः । तद्भेदा यथा, दिव्यतत्त्वे दृश्यते ।
"घटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमम् ।
तण्डुलः षष्ठ इत्युक्ताः सप्तमं सप्तमायकम् ॥
अष्टमं फलमित्युक्तं नवमं धर्म्मजं स्मृतम् ।
दिव्यान्येतानि सर्व्वाणि निर्द्दिष्टानि स्वयम्भुवा ॥"
एषां विवरणं तत्तच्छब्दे केषाञ्चित् परीक्षाशब्दे च द्रष्टव्यम् ॥* ॥ गङ्गाजलस्पर्शपूर्व्वकशपथस्य च मिथ्याकथने दोषश्च यथा,—
"ब्रह्मणो वचनं श्रुत्वा ज्ञानेशो ज्ञानिनांवरः ।
गङ्गातोयं करे कृत्वा स्वीकारञ्च चकार सः ॥
गङ्गातोयस्पर्शञ्च मिथ्या यदि वदेज्जनः ।
स याति कालसूत्रञ्च यावद्वै ब्रह्मणो वयः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥*॥
गङ्गाजलादिस्पर्शपूर्व्वकशपथे दोषो यथा ।
"तथा गङ्गोदकं ताम्रं गोमयं गोरजस्तथा ।
सत्यं वा यदि वासत्यं यदि दिव्यं करोति यः ॥
कर्त्ता च रौरवं याति तथा कारयिता प्रिये ! ।
उभयोः पुनरावृत्तिर्नरयोनिषु नास्ति वै ॥
तस्मात्ति पुनरावृत्तिर्यात्यूर्ध्वकरयोनिषु ।
दिव्यं कर्त्तुः कारयितुर्जपपूजा वृथा यथा ॥
गायत्रीरहितस्यापि नरकश्चोत्तरोत्तरम् ॥"
इति गायत्रीतन्त्रे पञ्चमपटलः ॥

दिव्यः, त्रि, (दिवि भवः । यत् ।) मनोज्ञः । दिवि भवः । इति मेदिनी । ये, ३१ ॥ (यथा, विष्णुपुराणे । १।६।१०४ ।
"दिव्यमाल्याम्बरधरा स्नाता भूषणभूषिता ।
पश्यतां सर्व्वदेवानां ययौ पत्युः सकाशं हरेः ॥")

दिव्यः, पुं, (दिवे वने भवः । दिव + यत् ।) यवः । गुग्गुलुः । इति राजनिर्घण्टः ॥ भावविशेषः । यथा,—
"शृणु भावमथ दैवि ! दिव्यवीरपशुक्रमात् ।
दिव्यस्तु देववत् प्रायो वीरश्चोद्दतमानसः ॥
सत्यत्रेताद्वापर्य्यन्तं दिव्यभावविनिर्णयः ।
त्रेताद्वापरपर्य्यन्तं वीरभाव इतीरितम् ॥
मद्यं मत्स्यं तथा मांसं मुद्रां मैथुनमेव च ।
श्मशानसाधनं भद्रे ! चितासाधनमेव च ॥
एतत्ते कथितं सर्व्वं दिव्यवीरमतं प्रिये ! ।
दिव्यवीरमतं नास्ति कलिकाले सुलोचने ! ॥"
इति कालीविलासतन्त्रम् ॥
नायकभेदः । यथा,—
"यत्तु तासां दिव्या अदिव्या दिव्यादिव्याभेदेन गणनया द्विपञ्चाशदधिकशतयुतसङ्ख्यं भेदा भवन्ति । दिव्या इन्द्राण्यादयः । अदिव्या मालत्यादयः । दिव्यादिव्या द्रौपद्यादय इति वदन्ति तन्न तत्र अवस्थाभेदेनैव नायिकानां

दिव्यच

भेदात् जातिभेदेन भेदस्वीकारे अनन्तनायिकानामिव नायकानामप्यानन्त्यं स्यात् । तथा हि इन्द्रादयो दिव्याः । अदिव्या माधवादयः । दिव्यादिव्या अर्জ্জुनादयः ।" इति रसमञ्जरी ॥ (सात्वतस्य पुत्राणामन्यतमः । यथा, भागवते । ६ । २४ । ६ ।
"भजमानो भजिर्दिव्यो वृष्टिर्देवावृधोऽन्धकः ।
सात्वतस्य सुताः सप्त महाभोजश्च मारिष ! ॥")

दिव्यकुण्डं, क्ली, (दिव्यं पुण्यप्रदत्वात्स्रुतञ्च कुण्डमिति कर्म्मधारयः ।) कामरूपे चौभकशैलपूर्व्वभागस्थपुष्करिणीविशेषः । यथा,—
"तदुदक्शिखरे महाशैलः क्षोभको नाम नामतः ।
तस्मिन् गिरौ शिलापृष्ठे वक्त्रं देवी व्यवस्थिता ॥
पञ्चपुष्करिणी नाम्ना पञ्चयोनिस्वरूपिणी ।
एकत्र पञ्चभिर्दुर्गायोनिभिः पञ्चवक्त्रकम् ॥
स्थिता रमयितुं तत्र नित्यमेव हिमाद्रिजा ।
तच्छैलपूर्व्वभागात्तु कान्ता नाम महानदी ॥
दक्षिणं सागरं याति प्रथमा चोत्तरस्रवा ।
दिव्यकुण्डं महाकुण्डं तच्छैलोपत्यकां गता ।
संस्थितस्तत्र स्नात्वा तु तां देवीं परिपूजयेत् ।
दिव्यकुण्डे नरः स्नात्वा पञ्चपुष्करिणीं शिवाम् ॥
यः पूजयेन्महाभागः स योनौ न हि जायते ॥"
इति कालिकापुराणे ८१ अध्यायः ॥

दिव्यगन्धं, क्ली, (दिव्यो मनोहरो गन्धोऽस्य ।) लवङ्गम् । इति राजनिर्घण्टः । (लवङ्गशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

दिव्यगन्धः, पुं, (दिव्यः गन्धो यस्य ।) गन्धकः । इति राजनिर्घण्टः ॥ (गन्धकशब्देऽस्य विवृतिर्विज्ञेया ॥)

दिव्यगन्धा, स्त्री, (दिव्यो गन्धोऽस्याः ।) शूलेला । महाचक्षुष्काः । इति राजनिर्घण्टः ॥

दिव्यगायनः, पुं, (दिव्यः स्वर्गीयः गायनः ।) गन्धर्व्वः । स्वर्गगायकः । इति शब्दरत्नावली ॥

दिव्यचक्षुः, [स्] त्रि, (दिव्यमलौकिकं चक्षुर्यस्य ।) ज्ञानचक्षुः । यथा, नीलकण्ठस्तोत्रे ।
"नमस्तुभ्यं विरूपाक्ष ! नमस्ते दिव्यचक्षुषे ।"
क्ली, ज्ञानात्मकचक्षुः । यथा,—
"न तु मां शक्यते द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥"
इति श्रीभगवद्गीतायाम् । ११ । ८ ॥ "अतो दिव्यमलौकिकं ज्ञानात्मकं चक्षुस्तुभ्यं ददामि ।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ (दिव्यं स्वर्गीयं मनोज्ञं वा चक्षुः ।) स्वर्गीयचक्षुः । सुन्दरलोचनम् । उपचक्षुः । चक्षुमा इति भाषा । इति लोकप्रसिद्धम् ॥ (पुं, दिव्यं मनोज्ञं चक्षुर्यस्य । यद्वा, दिव्यं दूरज्ञानमनेन यस्मात् । ऊर्জ্জनाभस्य सूत्रसर्জ্জनग्रहणमवलोक्येश्वरस्य सर्জ্জनसंहरणपरित्यागात् तथात्वम् ।) मर्कटः । इति शब्दमाला ॥ सुगन्धभेदः । त्रि, (दिव्ये आकाशभूते चक्षुषी यस्य ।) अन्धः । (दिव्ये सुन्दरे चक्षुषी यस्य ।) सुलोचनः । इति मेदिनी । से, ६८ ॥

दिव्यतेजाः, [स्] स्त्री, (दिवं स्वर्गीयं देवतुल्यं तेजो यस्याः । अस्याः सेवनेन दिव्यतेजोवत्तेजआधायकत्वात् तथात्वम् ।) ब्राह्मी । इति राजनिर्घण्टः ॥ (दिवं तेजो यस्य । अलौकिकतेजस्के, त्रि ॥)

दिव्यदोहदं, त्रि, (दिवं स्वर्गीयं दोहदम् अभिलाषो यत्र ।) उपयाचितम् । देवदेयवस्तु । इति त्रिकाण्डशेषः ॥ यथा, हारावली । २१ ॥

"यद्दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये ।
उपयाचितकं दिव्यदोहदं तद्विदुर्बुधाः ॥

दिव्यपञ्चाङ्गं, स्त्री, (पञ्चानां अङ्गतानां तत्तुल्यत्वादङ्गत्ववद्व्यानां समाहारः पञ्चाङ्गम् । दिव्यं पञ्चाङ्गमिति कर्म्मधारयः ।) मिश्रितगव्याज्यगव्यदधिगव्यक्षीरमाक्षिकशर्करारूपम् । इति राजनिर्घण्टः ॥

दिव्यपुष्पः, पुं, (दिव्यं मनोरमं पुष्पं यस्य ।) करवीरः । इति राजनिर्घण्टः ॥

दिव्यपुष्पा, स्त्री, (दिव्यानि मनोज्ञानि पुष्पाण्यस्याः ।) महाद्रोणा । इति राजनिर्घण्टः ॥

दिव्यपुष्पिका, स्त्री, (दिव्यपुष्प + संज्ञायां कन् टाप् अत इत्वञ्च ।) लोहितवर्णाकैटभः । इति रत्नमाला ॥

दिव्यधेनुका, स्त्री, (दिव्या धेनुका तत्तुल्यफलप्रदत्वात् ।) कामरूपे दमनिकाया नद्याः पूर्ब्बभागस्थसरिद्भेदः । यथा,—

"तस्या नद्याः पूर्ब्बभागे गङ्गेव फलदायिनी ।
माघन्तु सकलं मासं तस्यां स्नात्वा नरोत्तमः ॥
तथा दमनिकायाञ्च परं निर्व्वाणमाप्नुयात् ।
ततः पूर्ब्बे परा देवी नाम्ना सा सरिदुत्तमा ॥
महती दिव्यधेनुका धेनुनावत् फलप्रदा ।
इत्यिवादिसमुद्भूता दक्षिणोदधिगामिनी ॥
तस्यान्तु कार्त्तिकं मासं स्नात्वा मोक्षमवाप्नुयात् ॥"

इति कालिकापुराणे ८१ अध्यायः ॥

दिव्यरत्नं, स्त्री, (दिव्यं चिन्तामात्रं तदर्थप्रदायकत्वादलौकिकं रत्नम् ।) चिन्तामणिः । इति शब्दार्थकल्पतरुः ॥

दिव्यरथः, पुं, (दिव्यः स्वर्गीयः अन्तरीक्षचरो वा रथः ।) व्योमयानम् । देवविमानः । इति शब्दरत्नावली ॥

दिव्यरसः, पुं, (दिव्यो रस इति नित्यकर्म्मधारयः ।) पारदः । इति राजनिर्घण्टः ॥

दिव्यलता, स्त्री, (दिव्या वनभवा लता ।) सूर्व्वालता । इति राजनिर्घण्टः ॥

दिव्यवस्त्रः, पुं, (दिव्यं वस्त्रमिव । अभिधानात् पुंस्त्वम् ।) सूर्य्यप्रभा । इति शब्दरत्नावली ॥ (दिव्यं सुन्दरं वस्त्रमस्य ।) सुन्दरवस्त्रयुक्ते, त्रि । दिव्यं सुन्दरं वस्त्रम् ।) क्लीं, सुन्दरवस्त्रम् ॥ दिवि भवम् । यत् । दिव्यं वस्त्रमिति कर्म्मधारयः ।) दिविभववस्त्रम् ॥

दिव्यसारः, पुं, (दिव्यो मनोज्ञः सारो यस्य ।) श्रीवृक्षः । इति राजनिर्घण्टः ॥

दिव्या, स्त्री, (दिवि भवा । मनोज्ञत्वगुणवत्त्वात् दिव्यैवेत्यर्थः ।) धात्री । इति मेदिनी । ये, ३१ ॥ वन्ध्या कर्कोटकी । घृतावरी । महामेदा । ब्राह्मी । स्थूलजीरकः । श्वेतदूर्व्वा । हरीतकी । पुरा । इति राजनिर्घण्टः ॥

दिव्या, स्त्री, (दिवि भवा । यत् । ततष्टाप् ।) नायिकाभेदः ॥ (सा च इन्द्राण्यादिः ॥)

दिव्यादिव्यः, पुं, (दिव्यः स्वर्गीयः अदिव्यश्च ।) नायकभेदः ॥ (स च अर्জ্জुनादिः ॥)

दिव्यादिव्या, स्त्री, (दिव्या अदिव्या च ।) नायिकाभेदः । अस्याः प्रमाणं दिव्यादिव्यशब्दे द्रष्टव्यम् ॥ उपदेवीविशेषः । इति शब्दार्थकल्पतरुः ॥

दिव्योदकं, क्लीं, (दिव्यमान्तरीक्षसुदकम् ।) आकाशजलम् । तत्पर्य्यायः । खवारि २ आकाशसलिलम् ३ व्योमोदकम् ४ अन्तरीक्षजलम् ५ । अस्य गुणाः । त्रिदोषनाशित्वम् । मधुरत्वम् । पथ्यत्वम् । परमरुच्यत्वम् । अग्निदत्वम् । क्षुधाश्रममेहापहारकत्वम् । पाचापेक्षिगुणत्वञ्च ॥ अनार्त्तवस्य तस्य गुणः । सर्व्वेषां देहिनां त्रिदोषजनकत्वम् । सद्योभूमिष्ठस्य तस्य गुणः । कलुषत्वम् । दोषदायकत्वञ्च । चिरस्थितस्य गुणाः । लघुत्वम् । स्वच्छत्वम् । पथ्यत्वम् । स्वादुत्वम् । सुखापहत्वञ्च । इति राजनिर्घण्टः ॥

दिव्योपपादुकः, त्रि, (दिवि भवः । दिव + "तुप्रागपागुदक्प्रतीचो यत् ।" ४।३।१०१। इति यत् । उपपद्यते इति । उप + पद् + "अन्यतपदस्येति ।" ३।२।१५४। इति उकञ् । ततो दिव्यश्चासौ उपपादुकश्चेति ।) देवता । इत्यमरः । ३ । १ । ५० ॥ ("मानुषिभ्यादिदृष्टकारणनिरपेक्षा अदृष्टसहकृतेभ्यो जाता ये देवास्ते दिव्योपपादुका उच्यन्ते ।" इति शब्दार्थचिन्तामणिः ॥)

दिव्यौघः, पुं, (दिव्यानां स्वर्गीयगुणानामोघः समूहो यत्र ।) गुरुविशेषः । यथा, शक्तिरत्नाकरतन्त्रे ।

"महादेवो महाकालश्चिपुरश्चैव भैरवः ।
दिव्यौघा गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते ॥"

अपि च ।

"अथ तारागुरून् वक्ष्ये इष्टादृष्टफलप्रदान् ।
ऊर्द्धकेशो व्योमकेशो नीलकण्ठो हयध्वजः ॥
दिव्यौघान् सिद्धिदान् वत्स ! शृणुष्वावहितो सदा ॥"

अपि च ।

"शृणु वत्स ! महादेव ! गुरून् दुर्गामनुव्रजान् ।
परमात्मा परानन्दः परमेष्ठी शुभोदयः ॥
क्षमाः कालः कलानाथो दिव्यौघा भैरवा-
दिकाः ॥"

इति तन्त्रसारः ॥

दिश्, औ न श्र ओचे । इति कविकल्पद्रुमः ॥ (तुदां-उभं अकं-सकं न-अनिट् ।) ओं, अदिशत् । न श्र, दिश्यति दिश्यते । ओच इति उचिर्य समवायने इत्यस्य अति रूपम् । धातूनामनेकार्थत्वादोष इह दानमाज्ञापनं वा । दिदेशे कौतुकाय समस्तमेवेति रघुः । कथनेऽप्ययम् । धर्म्मं दिशति देशिकः । इति दुर्गादासः ॥

दिशा, स्त्री, (दिश् + टाप् ।) दिक् । इति व्याकरणम् ॥ (यथा महाभारते । ४ । ५३ । १६ ।

"अत्र मध्ये यथार्कस्य रश्मयस्तिग्मतेजसः ।
दिशासु च तथा राजन् ! न संख्याताः शरास्तदा ॥")

दिशाः, [स्] स्त्री, (दिशतीति । दिश् + बाहुलकात् कसुन् ।) दिक् । इत्यमरटीकायां मथुरानाथः ॥

दिश्यं, त्रि, (दिशि भवमिति । दिश् + "दिगादिभ्यो यत्" ।४।३।५४। इति यत् ।) दिग्भववस्तु । इत्यमरः । १ । ३ । २ ॥

दिष्टं, क्लीं, (दिशति इष्टानिष्टफलं ददातीति । दिश् + "क्तिच्क्तौ च संज्ञायाम् ।" ३।३।१७४। इति क्तः ।) भाग्यम् । इत्यमरः । १ । ४ । २८ ॥ (यथा, महाभारते । १४ । ५३ । १६ ।

"तस्मात्ते निधनं प्राप्ताः सर्व्वे संसुतबान्धवाः ।
न दिष्टमतिक्रान्तुं शक्यं बुद्ध्या बलेन वा ॥"

दिश् + कर्म्मणि क्तः ।) उपदिष्टे, त्रि । इति त्रिकाण्डशेषः ॥ (कथितं च । यथा, भट्टौ । २।३२।

"गाधेयदिष्टं विरसं रसज्ञं
रामोऽपि भायाजनमत्यभुङ्क्त ॥")

दिष्टः, पुं, (दिशतीति । दिश् + संज्ञायां क्तः ।) कालः । इत्यमरः । १ । ४ । १ ॥ (वैवस्वतमनोः पुत्रविशेषः । यथा, भागवते । ८ । १३ । २ ।

"नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते ॥")

दारुहरिद्रा । इति शब्दमाला ॥

दिष्टान्तः, पुं, (दिष्टस्य भाग्यस्य अन्तो यत्र ।) मरणम् । इत्यमरः । २ । ८ । ११६ ॥ (यथा, महाभारते । १ । ५८ । २७ ।

"मोक्षयित्वा तु सुजगान् सर्पसत्राद्विजोत्तमः ।
जगाम काले धर्म्मात्मा दिष्टान्तं पुत्रपौत्रवान् ॥")

दिष्टिः, स्त्री, (दिश् + क्तिन् संज्ञायां क्तिच् वा ।) हर्षः । परिमाणम् । इति मेदिनी । टे, १८ ॥

दिष्ट्या, व, (दिशतीति सम्पदादित्वात् भावे क्विप् दिश्म् । देश्मनं स्थायति । स्थे + किप् । ह्रस्वम् । संज्ञापूर्ब्बकत्वात् जश्त्वं न । यद्वा, दिशतीति । दिश् + "अन्नाद्यादिभ्यश्चेति ।" वक्ष्यमाणेन साधुः ।) आनन्दः । इत्यमरः । ३ । ३ । १०० ॥ भाग्येन । यथा,—

"दिष्ट्यान्न ! ते कुक्षिगतः परः पुमान् ॥"

इति श्रीभागवतम् ॥

दिष्टृ, त्रि, (ददातीति । दा + बाहुलकात् क्तिच्तृ ।) दाता । इत्युणादिकोषः ॥

दिह, उ न श्र औ लिहे । इति कविकल्पद्रुमः ॥ (अदां-उभं अकं-सकं न-अनिट् ।) दिह उपचये इति प्राचः । उपचयो वृद्धिस्तत्करणञ्च । तत्र, देग्धि दिग्धे दृष्टः प्रतिदिनमुपचितः स्यादित्यर्थः । देग्धि दोग्धं गवया धेनुकः । उपचितं करोतीत्यर्थः । अग्धि, अधिक्षत् इति दुर्गादासः ॥

दी, ओ ड य चये। इति कविकल्पद्रमः॥ (दिवां-आत्मं-अकं-सेट्।) ओ, दीनः। ड य, दीयते। इति दुर्गादासः॥

दीक्ष, ड मौण्ड्ये। इच्छायाम्। क्षोऽर्थे। इति कविकल्पद्रमः॥ (भ्वां-आत्मं-अकं-क्षोऽर्थे अकं-सकं च-सेट्।) मौण्ड्यं मुण्डितमस्तकीभावः। इच्छा यजनम्। क्षोऽर्थो नियमव्रतादेश्चोपनीतयः। ड, दीक्षते वटुर्मुण्डितमस्तकः स्यादित्यर्थः। दीक्षते जनो यजतीत्यर्थः। दीक्षते याज्ञिको नियमं स्यादित्यर्थः। दीक्षते पण्डितो जनं व्रतमुपदिशतीत्यर्थः। दीक्षते पुत्रं विप्रः उपनयतीत्यर्थः। इति दुर्गादासः॥

दीक्षणीयेष्टिः, स्त्री, (दीक्षणीया इष्टिः।) यज्ञविशेषः। तत्पर्य्यायः। सौमिकी २। इति हेमचन्द्रः॥३।४८७॥

दीक्षा, स्त्री, (दीक्ष+भावे अ। स्त्रियां टाप्।) यजनम्। पूजनम्। इत्यजयपालः॥ व्रतसंग्रहः। इति हेमचन्द्रः॥३।४८७॥ गुरुमुखात् स्वेष्टदेवमन्त्रग्रहणम्। (एतन्निरुक्तिर्यथा, गौतमीयतन्त्रे।७।२।

"ददाति ज्ञानमत्यन्तं क्षीयते पापसञ्चयः।
तेन दीक्षेति विख्याता मुनिभिस्तत्त्वदर्शिभिः॥")

यथाच,—

"दीयते ज्ञानमत्यन्तं क्षीयते पापसञ्चयः।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः॥
दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य संक्षयम्।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्ववेदिभिः॥
उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः॥"

इत्यत्र गुरुशिष्ययोर्लक्षणं तत्तच्छब्दे द्रष्टव्यम्॥ योगिनीतन्त्रे।

"पितुर्मन्त्रं न गृह्णीयात् तथा मातामहस्य च।
बोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च॥"

रुद्रयामले।

"न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम्।
न पुत्रश्च तथा भ्राता भ्रातरं न च दीक्षयेत्॥
सिद्धमन्त्रो यदि पतिस्तस्य पत्नी च दीक्षयेत्।
भक्तिभावेन वरारोहे! न च सा कन्यका भवेत्॥"

तथा गरुडग्रविमर्षिण्याम्।

"यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः।
विविक्षाश्रमिणां दीक्षा न सा कल्याणदायिका॥"

इत्यादिनिषेधवचनादेभ्यो मन्त्रं न गृह्णीयादित्यर्थः। इति तु सिद्धेतरविषयम्। सिद्धमन्त्रो न दुष्यतीति वचनात्॥*॥ मुक्तियामले।

"तीर्थाचारव्रतो मन्त्री ज्ञानवान् सुसमाहितः।
नित्यनिष्ठो यतिः ख्यातो गुरुः स्याद्भौतिकोऽपि च॥"

सिद्धयामले।

"यदि भाग्यवशेनैव सिद्धविद्यां लभेत् प्रिये!।
तदैव तान्तु दीक्षेत तत्र नो गुरुविचारणम्॥"

गरुडग्रविमर्षिण्याम्।

"प्रमादाच्च तथाज्ञानात् पितुर्दीक्षां समाचरन्।
प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत्॥"

पितुरित्युपलक्षणम्। मातामहादीनामपि। प्रायश्चित्तन्तु अयुतसावित्रीजपः। सर्व्वत्र तथा दर्शनात्। तथा च भृगुः।

"दशसाहस्रजप्येन सर्व्वकल्मषनाशिनी।"

श्रीक्रमेऽपि।

"मातुर्विष्ण्य दातव्यो ज्येष्ठपुत्राय धीमते॥"

मत्स्यसूक्ते।

निर्वीर्य्यश्च पितुर्मन्त्रं ग्रैवे ग्राह्ये न दुष्यति॥"

इति कौलिकमन्त्रदीक्षापरम्। योगिनीतन्त्रे गृह्यादिविद्यामधिकृत्य दीक्षानिषेधात्। यद्वा ग्राह्ये तारादिविद्यायां मत्स्यसूक्ते तथा प्रतिपादनात्। तथा च।

"शतसुशतसहस्रानेकजन्मप्रभावे-
र्भवति यदि मनुष्यो दुर्ल्लभोनश्चिराय।
कथमपि मनुमेनं प्राप्य शिष्यः परस्मै
निजकुलतिलकाय ज्येष्ठपुत्राय दद्यात्॥"

इति॥ महातीर्थे उपरागे सति सर्व्वत्र न दोषः। तथा च विष्णुमन्त्रमधिकृत्य।

"साधु पृष्टं त्वया ब्रह्मन्! वक्ष्यामि सकलं तव।
ब्रह्मणा कथितं पूर्व्वं वशिष्ठाय महात्मने॥
वशिष्ठोऽपि स्वपौत्राय मत्पित्रे दत्तवान् स्वयम्।
प्रयत्नहृदयः स्वच्छः पिता मे करुणानिधिः॥
कुरुक्षेत्रे महातीर्थे सूर्य्यपर्व्वणि दत्तवान्॥"

इत्यादि वैशम्पायनसंहितायां शौनकं प्रति आसवाक्यम्॥*॥ योगिनीतन्त्रे।

"निर्वीर्य्यश्च पितुर्मन्त्रं तथा मातामहस्य च।
स्वप्नलब्धं स्त्रिया दत्तं संस्कारेणैव शुध्यति॥"

मनुः।

"साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया।
सर्व्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता॥
गुरुयोग्या भवेत् सा हि विधवापरिवर्ज्जिता।
स्त्रिया दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा स्मृता॥"

इदन्तु गुरोरुपासितमन्त्रपरम्। तथा च भैरवीतन्त्रे।

"स्त्रीयमन्त्रोपदेशे तु न कुर्य्याद्गुरुचिन्तनम्॥"

मातुरित्युपासितेऽष्टगुणं अनुपासिते शुभफलदमित्यर्थः। सिद्धमन्त्रविषयं वा। वस्तुतस्तु योगिनीतन्त्रे स्त्रीपदं विधवापरम्। एकवाक्यतावलात्॥ दीक्षायां विधवादीनामधिकारं विशेषयति कुलार्णवे।

"विधवायाः सुतादेश्चात् कन्यायाः पितुराज्ञया।
नाधिकारः स्वतो नार्य्या भार्य्याया भर्त्तुराज्ञया॥"

योगिनीतन्त्रे।

"स्वप्नलब्धे तु कलसे गुरोः प्राप्तं निवेदयेत्।
वटपत्रे कुङ्कुमेन लेखित्वा गन्धकं शुभम्॥
ततः शुद्धिमवाप्नोति चान्यथा विफलं भवेत्॥"

इदन्तु सद्गुरोरभावे तत्सत्त्वे तस्मादेव गृह्णीयात् स्वप्ने तु नियमो न हीति नारदवचनात्॥*॥ तथा विद्याधराचार्य्यधृतजाबालवचनम्।

"मध्यदेशभुजङ्गक्षेत्रनाटकोड्रयवभवाः।
अन्तर्व्वेदिप्रतिष्ठागा आवाल्याच्च गुरुत्तमाः॥
गौड़ाः प्राग्ज्योतिषा सौरा मागधाः कैरलास्तथा।
कोसलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः॥
कर्णाटगर्ज्जरेदारेवाकच्छातीरोद्भवास्तथा।
कालिङ्गाश्च कलम्बाश्च कामोजाश्चाधमा मताः॥"*॥

तथा।

"वैष्णवे वैष्णवो ग्राह्यः शैवे शैवश्च शाक्तिके।
सौरः शाक्तोऽपि सर्व्वत्र दीक्षास्वामी न संशयः॥"

दीक्षां विना जपस्य दुष्टत्वात् प्रथमं सा निरूप्यते।

"दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य सङ्क्षयम्।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्ववेदिभिः॥"

मन्त्रलक्षणमाह। पिङ्गलामते।

"मननं विश्वविज्ञानं त्राणं संसारबन्धनात्।
यतः करोति संसिद्धेर्मन्त्र इत्यथते ततः॥"

अन्यच्च।

"मननात्त्रायते यस्मात्तस्माद्मन्त्रः प्रकीर्त्तितः॥"

सर्व्वाश्रमेषु दीक्षायाः आवश्यकत्वम्। तथा च।

"दीक्षामूलं जपं सर्व्वं दीक्षामूलं परं तपः।
दीक्षामाश्रित्य निवसेत् यत्र कुत्राश्रमे वसन्॥
अदीक्षिता ये कुर्व्वन्ति जपपूजादिकाः क्रियाः।
न भवन्ति प्रिये! तेषां सिद्धिर्नात्रामुत्रचेश्वरि॥
देवि! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः।
तस्मात् सर्व्वप्रयत्नेन गुरुणा दीक्षितो भवेत्॥
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत्।
तस्माद्दीक्षां प्रयत्नेन सदा कुर्य्याच्च तान्त्रिकात्॥
मन्त्रं दृष्ट्वा तु मन्त्रं वै यो गृह्णाति नराधमः।
मन्वन्तरसहस्रेषु निष्कृतिर्नैव जायते॥
नादीक्षितस्य कार्य्यं स्यात्तापोभिर्नियमव्रतैः।
न तीर्थगमनेनापि न च शारीरयत्नतः॥"

मत्स्यसूक्ते।

"अदीक्षितानां मर्त्यानां दोषं शृणु वरानने!।
अन्नं विष्ठासमं तस्य जलं मूत्रसमं स्मृतम्॥
ततश्चतं तस्य वा श्राद्धं सर्व्वं याति ह्यधोगतिम्॥"

शूद्रस्य मन्त्रविशेषनिषेधमाह।

"प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्व्वथा।
आत्ममन्त्रं गुरोर्मन्त्रं मन्त्रं चाभयसंज्ञकम्॥
स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्विजः।
शूद्रो नरियमाप्नोति ब्राह्मणो याम्यगोगतिम्॥"

श्रुतिरपि। "ब्राह्मणीं प्रणवं बलुर्लक्ष्मीं क्षीरूदो यदि जानीयात् स भ्रष्टोऽधो गच्छति।" इति॥*॥ विशेषमाह वाराहीये।

"गोपालस्य मनुर्देयो महेशस्यापि पार्वते।
तत्पत्न्याश्चापि सूर्य्यस्य गणेशस्य मनुस्तथा॥
एषां दीक्षाधिकारी स्यादन्यथा पापभाग्भवेत्॥"

इति॥*॥ गोविन्दार्च्चनदीपे।

"अदीक्षितस्य मरणे प्रेतत्वं न च मुच्यति॥"

नक्षत्रेश्वरे।

"सर्व्वासामपि दीक्षाणां मुक्तिः फलमसङ्कितम्।
अविरोधात् भवत्येव प्रासङ्गिकस्तु भक्तये॥"

तथा।
"उपपातकलक्षाणि महापातककोटयः।
क्षणात् दहति देवेशि दीक्षा हि विधिना कृता॥"
यामले।
"आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः।
न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः॥"
अतः सद्गुरोराहितदीक्षः सर्व्वकर्म्माणि साधयेत्।*। तत्राप्यनुकूलमन्त्रं दीक्षेत। तथा च सारदायाम्।
"खतारराशिकोष्ठानामनुकूलान् भवेन्मनून्॥"
तथा वाराहीये।
"ताराचक्रं राशिचक्रं नामचक्रं तथैव च।
अत्र चेत् सगुणो मन्त्रो नान्यचक्रं विचारयेत्॥"
इति तु प्रधानतया बोद्धव्यम्। तथा च।
"धनिमन्त्रं न गृह्णीयात् अकुलञ्च तथैव च।"
इत्यादिदर्शनात् तत्तच्चक्रविचारस्य आवश्यकत्वात् प्रथमं तन्निरूप्यते॥*। तत्र सिद्धसाध्यसुसिद्धारिसाधकभेदेन पञ्चविधं चक्रम्। तत्र सिद्धसाध्यचक्रम्।
"कृत्तिकाद्यं राशिचक्रं सिद्धसाध्यसुसाधकम्।
सिद्धारिसाधकं चैव क्रमात् पञ्चविधं स्मृतम्॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणि।
"अकथहचक्रं कुलचक्रं राशिचक्रं तथैव च।
नक्षत्रचक्रं नामचक्रं तथैव च॥
एतानि पञ्चचक्राणि सिद्धसाध्यसुसाधकाः।
सिद्धारिसाधकाश्चैव क्रमात् पञ्चविधं स्मृतम्॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां फलम्।
"सिद्धचक्रे तु यो मन्त्रः साध्यचक्रे च साधकः।
सुसिद्धचक्रे सुसिद्धः स्यात् अरिचक्रे तु हन्ति सः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां प्रयोजनम्।
"सिद्धचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
सिद्धिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
साध्यचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
साध्यहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
सुसिद्धचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
सुसिद्धिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
अरिचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
अरिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां विचारः।
"सिद्धचक्रं साध्यचक्रं सुसिद्धचक्रं तथैव च।
अरिचक्रं विचारेण ज्ञात्वा मन्त्रं जपेत् सुधीः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां शोधनम्।
"सिद्धचक्रं साध्यचक्रं सुसिद्धचक्रं तथैव च।
अरिचक्रं विचारेण शोधयेत् साधकोत्तमः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां फलम्।
"सिद्धचक्रे तु यो मन्त्रः साध्यचक्रे च साधकः।
सुसिद्धचक्रे सुसिद्धः स्यात् अरिचक्रे तु हन्ति सः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां प्रयोजनम्।
"सिद्धचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
सिद्धिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
साध्यचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
साध्यहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
सुसिद्धचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
सुसिद्धिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
अरिचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
अरिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां विचारः।
"सिद्धचक्रं साध्यचक्रं सुसिद्धचक्रं तथैव च।
अरिचक्रं विचारेण ज्ञात्वा मन्त्रं जपेत् सुधीः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां शोधनम्।
"सिद्धचक्रं साध्यचक्रं सुसिद्धचक्रं तथैव च।
अरिचक्रं विचारेण शोधयेत् साधकोत्तमः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां फलम्।
"सिद्धचक्रे तु यो मन्त्रः साध्यचक्रे च साधकः।
सुसिद्धचक्रे सुसिद्धः स्यात् अरिचक्रे तु हन्ति सः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां प्रयोजनम्।
"सिद्धचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
सिद्धिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
साध्यचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
साध्यहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
सुसिद्धचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
सुसिद्धिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
अरिचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
अरिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां विचारः।
"सिद्धचक्रं साध्यचक्रं सुसिद्धचक्रं तथैव च।
अरिचक्रं विचारेण ज्ञात्वा मन्त्रं जपेत् सुधीः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां शोधनम्।
"सिद्धचक्रं साध्यचक्रं सुसिद्धचक्रं तथैव च।
अरिचक्रं विचारेण शोधयेत् साधकोत्तमः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां फलम्।
"सिद्धचक्रे तु यो मन्त्रः साध्यचक्रे च साधकः।
सुसिद्धचक्रे सुसिद्धः स्यात् अरिचक्रे तु हन्ति सः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां प्रयोजनम्।
"सिद्धचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
सिद्धिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
साध्यचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
साध्यहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
सुसिद्धचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
सुसिद्धिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
अरिचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
अरिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां विचारः।
"सिद्धचक्रं साध्यचक्रं सुसिद्धचक्रं तथैव च।
अरिचक्रं विचारेण ज्ञात्वा मन्त्रं जपेत् सुधीः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां शोधनम्।
"सिद्धचक्रं साध्यचक्रं सुसिद्धचक्रं तथैव च।
अरिचक्रं विचारेण शोधयेत् साधकोत्तमः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां फलम्।
"सिद्धचक्रे तु यो मन्त्रः साध्यचक्रे च साधकः।
सुसिद्धचक्रे सुसिद्धः स्यात् अरिचक्रे तु हन्ति सः॥"
इति गौतमीयात्।
अथ सिद्धसाध्यसुसाधकारिसाधकचक्राणां प्रयोजनम्।
"सिद्धचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
सिद्धिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
साध्यचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
साध्यहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
सुसिद्धचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
सुसिद्धिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥
अरिचक्रं विना मन्त्रं यो जपेत् साधकाधमः।
अरिहानिर्भवेत्तस्य मन्त्रस्य च न संशयः॥"
इति गौतमीयात्।

तथा,—
"शिरलग्नं विष्णुमन्त्रे ग्रीवमन्त्रे वरं शुभम्।
हृत्स्वभावगतं लग्नं शक्तिमन्त्रे प्रशस्यते॥"
अगस्त्यसंहितायाम्।
"त्रिषष्ठायगताः पापाः शुभाः केन्द्रत्रिकोणगाः।
दीक्षायान्तु शुभाः सर्वे बन्धुस्थाः सर्वनाशकाः॥"

अथ पक्षनियमः।

"शुक्लपक्षे भवेद्दीक्षा लग्नशुद्ध्यापचन्द्रमाद्दिनात्।
तिथिहीनेष्वपि मासेषु विशेषो सुनिभेदतः॥"
रत्नावल्याम्।
"षष्ठी भाद्रपदे दर्शे तथा लग्नचतुर्दशी।
कार्त्तिके नवमी शुक्ला मार्गे शुक्ला त्रयोदशिका॥
पौषे तु नवमी शुक्ला माघे शुक्ला चतुर्थिका।
फाल्गुने नवमी शुक्ला चैत्रे कामचतुर्दशी॥
वैशाखे पञ्चमी चैव ज्येष्ठे दशहरा तिथिः।
आषाढ़े पञ्चमी शुक्ला श्रावणे लग्नपञ्चमी॥
एतानि देवपर्वाणि तीर्थकोटिफलं लभेत्।
अत्र दीक्षा प्रकर्तव्या न मासस्य परीक्षयेत्॥
न वारं न च नक्षत्रं न तिथ्यादिकदूषणम्।
न योगकरणञ्चैव गुरवेश्च न भावितम्॥"
अन्यच्च मतम्।
"त्रयोदशी शुक्ला वैशाखैकादशी सिता।
ज्येष्ठे चतुर्दशी लग्ना आषाढ़े नागपञ्चमी॥
श्रावणैकादशी भाद्रे रोहिणीसहिताष्टमी।
आश्विने च महापुण्या महाश्चर्यप्रभोदया॥
कार्त्तिके नवमी शुक्ला मार्गशीर्षे सिते तथा।
षष्ठी चतुर्दशी पौषे माघेऽप्येकादशी सिता॥
फाल्गुने च सिता षष्ठी चैति कालविनिर्णयः॥"
योगिनीतन्त्रे।
"अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः।
रविसंक्रान्तिदिवसे युगाद्यायां सुरेश्वरि!॥
मन्वन्तरासु सर्वासु महापूजादिने तथा।
चतुर्थी पञ्चमी चैव चतुर्दशाष्टमी तथा॥
तिथयः शुभदाः प्रोक्ता दीक्षायामृक्षकर्मणि॥"
इत्यादिवचनात् चतुर्दश्यष्टमीति शक्तिविषयम्।
चतुर्थीति गणेशविषयम्। तत्तत्कल्पोक्तत्वात्।
"निन्दितेष्वपि मासेषु दीक्षोक्ता ग्रहणे शुभा।
सूर्यग्रहणकालस्य समानो नास्ति भूतले॥
विशेषतो महादेवि! दीक्षायामृक्षकर्मणि।
तत्र यद्यत् कृतं सर्वमनन्तफलदं भवेत्॥
रविसंक्रमणे चैव सूर्यस्य ग्रहणे तथा।
तत्र लग्नादिकं किञ्चिन्न विचार्यं कथञ्चन॥
रविसंक्रमणे चैव नान्यदन्वेषितं भवेत्।
न वारतिथिमासादिशोधनं सूर्यपर्वणि॥"
एवं चन्द्रग्रहणेऽपि। तथा रुद्रयामले।
"न कुर्याच्छाक्तिकीं दीक्षामुपरक्ते विभावसौ।
न कुर्याद्वैष्णवीं तान्तु यदि चन्द्रमसो ग्रहः॥"
एतच्च गोपालश्रीविद्येतरविषयम्।
"अन्येषु पुण्ययोगेषु ग्रहणे चन्द्रसूर्ययोः।"
इति गौतमीयात्।
"सूर्यग्रहणकाले च नान्यदन्वेषितं भवेत्।"
इति योगिनीहृदयाच्च॥*॥

तारादौ तु विशेषो यथा,—
"दीक्षाकालं प्रवक्ष्यामि नीलतन्त्रानुसारतः।
लग्नपञ्चक चाष्टम्यां शुभे लग्ने शुभे दृश्ये॥
पूर्वभाद्रपदा युक्ते मित्रतारादिसंयुते।
अथवा अनुराधायां रेवत्यां वा प्रशस्यते॥
जानीयाच्छोभनङ्कालं मन्त्रस्य ग्रहणं प्रति।
इष्टे चैव विशेषेण कार्त्तिके च विशेषतः॥"
यामले।
"श्रीपरा कालीबीजानि लोपो दीर्घश्च योनुः।
सूर्यस्योपग्रहे लब्धो वृथा मुक्तिफलप्रदः॥
अमावास्या सोमवारे भौमवारे चतुर्दशी।
सप्तमी रविवारे च सूर्यपर्व्वप्रकीर्त्तितः समा॥"
कुलार्णवे।
"सप्तमी रविवारे च सोमे दर्शस्तथैव च।
चतुर्थी कुजवारे च अष्टमी च दृष्टसप्तमी॥
देवपर्व्वसमा ज्ञेयास्तासु दीक्षां समाचरेत्॥"
यामले।
"पुण्यतीर्थे कुरुक्षेत्रे देवीपीठचतुष्टये।
प्रयागे श्रीगिरौ काश्यां कालाकालं न शोधयेत्॥"
विष्णुयामले।
"देवीबोधं समारभ्य यावत् स्नानवती तिथिः।
क्षता तासु बुधैर्दीक्षा सर्व्वाभीष्टफलप्रदा॥
शुक्लपक्षे विशेषेण तत्रापि तिथिरष्टमी।
तत्रापि शारदी दुर्गा यत्र देवी गृहे गृहे॥
तत्र दीक्षा प्रकर्तव्या मासचन्द्रादीन्न शोधयेत्॥"
तथा।
"बोधने चैव दुर्गायाः कालाकालं न शोधयेत्॥
अशोकाख्यष्टमी यत्र रामाख्या नवमी तथा।
लग्ने वाप्यथवा लग्ने यत्र स्यात्तिथिरष्टमी॥
गुरोराज्ञानुरूपेण दीक्षा कार्य्या विशेषतः॥"
समयाचारतन्त्रे।
"युगाद्यायां मन्वादिने विषुवायनयोर्दिने तथा।
विषुवायनयोर्दिने नैव किञ्चिद्विचारयेत्॥"
तथा,—
"शिष्यागारुप्य गुरुणा कृपया दीयते यदा।
तदा लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन॥
सर्वे वारा ग्रहाः सर्वे नक्षत्राणि च राशयः।
यस्मिन्नहनि सन्तुष्टो गुरुः सर्व्वे शुभावहाः॥"
सारसंग्रहे योगिनीतन्त्रे च।
"ग्रहणे च महातीर्थे नास्ति कालस्य निर्णयः।
गयायां भास्करक्षेत्रे विरजे चन्द्रपर्व्वते॥
चट्टले च मतङ्गे च तथा कन्याश्रमेषु च।
न शोधयेत्ततो दीक्षां तीर्थेष्वेतेषु पार्व्वति!॥"
वाराहीतन्त्रे।
"शुक्लोऽसौ यदि वा कृष्णो गुर्व्वादित्यो भवेद्यदि।
मेषस्थिकसिंहेषु तदा दोषो न विद्यते॥"*॥
महाविद्यासु सर्व्वासु कालादिविचारो नास्ति।
तदुक्तं सुरूपमालातन्त्रे।
"कालादिशोधनं नास्ति न चामित्रादिदूषणम्।"
अत्र मालानिर्णयो मालाशब्दे द्रष्टव्यः। पुरश्चरणं तच्छब्दे द्रष्टव्यम्। कलावतीदीक्षा कलावतीशब्दे द्रष्टव्या।

अथ पञ्चायतनीदीक्षा। यामले।
"भवानीन्तु यदा मध्ये ऐशान्यामच्युतं यजेत्।
आग्नेय्यां पार्व्वतीनाथं नैर्ऋत्यां गणनायकम्॥
वायव्यां तपनञ्चैव पूजाक्रम उदाहृतः।
यदा तु मध्ये गोविन्दं ऐशान्यां शङ्करं यजेत्॥
आग्नेय्यां गणनाथञ्च नैर्ऋत्यां तपनं तथा।
वायव्यामम्बिकाञ्चैव भोगमोक्षैकभूमिकाम्॥
शङ्करञ्च यदा मध्ये ऐशान्यामच्युतं यजेत्।
आग्नेय्यां तपनञ्चैव नैर्ऋत्यां गणनायकम्॥
वायव्यां पार्व्वतीञ्चैव स्वर्गमोक्षप्रदायिनीम्।
आदित्यञ्च यदा मध्ये ऐशान्यां शङ्करं यजेत्॥
आग्नेय्यां गणनाथञ्च नैर्ऋत्यां केशवं यजेत्॥
वायव्यामम्बिकां देवीं स्वर्गसाधनभूमिकाम्॥
गणनाथं यदा मध्ये ऐशान्यां केशवं यजेत्।
आग्नेय्यामीश्वरञ्चैव नैर्ऋत्यां तपनं तथा॥
वायव्यामीश्वरीञ्चैव पूजयेन्मोक्षसाधनीम्।
सर्व्वज्ञानवर्जिता देवा दुःखशोकभयप्रदाः॥"
तथा च गणेशग्रहविमर्षिण्याम्।
"शम्भौ मध्यगते हरीशहरभूदेवो हरौ शङ्करे
भास्वे नागसुता रवौ हरगणेशाज्ञात्मिकाः
स्थापिताः।
देव्यां विष्णुहरेकदन्तरवयो लक्ष्मीहरेऽजेश्वरे
नार्य्याः शङ्करभागतोऽतिसुखदा यस्मात्तु ते
हानिदाः॥"
रामार्चनचन्द्रिकायां गौतमीये च।
"यदा तु मध्ये गोविन्दं आग्नेय्यां गणनायकम्।
नैर्ऋत्यां हंसमभ्यर्च्य वायव्यामर्चयेच्छिवाम्॥
ऐशान्यां शङ्करं चैव भोगमोक्षफलाप्तये॥"इति।
यद्यङ्गदेवताया पूजने आग्नेय्यादौ गणेशादिपूजनमुक्तं तदामगोपालविषयमिति केचित्।
वस्तुतो वैकल्पिकमिति सम्प्रदायः। एतेषां पूजनन्तु गौतमीये।
"गन्धादिभिरथाभ्यर्च्य षड़ङ्गार्चनमेव च।
विंशत्यक्षरो जपेन्मन्त्रं नमस्कृत्य समापयेत्॥"*॥
अङ्गदेवतापूजाकालस्तु पीठपूजानन्तरम्।
तथा च सनत्कुमारतन्त्रे।
"पीठस्यार्चनमङ्गदेवयजनं प्राणप्रतिष्ठा तथा
आह्वानं निजमुद्रिकाविरचनं ध्यानं प्रभोः
पूजनम्।"
यस्तु देवे पुष्पाञ्जलिं दत्त्वा अङ्गदेवान् समर्चयेत्।
तस्तु प्रतिष्ठितयन्त्रादिविषयम्॥*॥
यन्त्रातिरिक्ताधारे पूजने तु कुलार्णवे।
"एकपीठे पृथक्पूजां विना यन्त्रं करोति यः।
अङ्गाङ्गित्वं परित्यज्य देवताग्रासमाप्नुयात्॥"
एवञ्च।
"आवाह्य देवतामन्यामर्घ्यपात्रस्थदेवताम्।
उभाभ्यां सभते शापं मन्त्री तरलदुर्मतिः॥"
तदेतदतिरिक्तविषयम्॥*॥
सर्व्वेषामङ्गमन्त्राणां सिद्धादिविचारो नास्ति।
तथा च,
"सिद्धादिशोधनं नैषां अङ्गत्वे सति राजते
ग्रामादौ तु प्रपायतनाभावः।

तथा च रुद्रयामले ।
"श्यामायां भैरवीतारास्त्रिन्नमस्तासु भैरवे ।
मञ्जघोषे तथा रौद्रे प्रत्यङ्गं नेष्यते बुधैः ॥
उपविद्यासु सर्व्वासु षट्कर्म्मादिषु साधने ।
नात्र दीक्षादयेच्चास्ति नाचाङ्गादिप्रपूजनम् ॥"
तन्त्रसारे ।
"उपविद्यासु सर्व्वासु तथा प्रयोगसाधने ।
दीक्षां विनैव कर्त्तव्य उपदेशः सदैव हि ॥"*॥

अथ सङ्क्षेपदीक्षा ।

"सङ्कूर्च्चे सर्व्वतोभद्रे नवं कुम्भं निधाय च ।
सोदकं गन्धपुष्पाढ्यमर्चितं वस्त्रसंयुतम् ॥
सर्व्वौषधिनवरत्नपञ्चपल्लवसंयुतम् ।
ततो देवार्चनं कृत्वा हुनेदष्टोत्तरं शतम् ॥"
पञ्चपल्लवमिति । पनसाश्वत्थवटवकुलानि ।
तथा च वाग्भिष्टे ।
"पनसान्नं तथाश्वत्थं वटं वकुलमेव च ।
पञ्चपल्लवमित्युक्तं मुनिभिस्तन्त्रवेदिभिः ॥"*॥
नवरत्नमिति ।
"मुक्तामाणिक्यवैदूर्य्यं गोमेदान् वज्रविद्रुमौ ।
पद्मरागं मरकतं नीलञ्चेति यथाक्रमात् ॥"*॥
निबन्धे ।
"शिष्यं स्वलङ्कृतं वेद्यासुपाग्निसुपवेशयेत् ।
मन्त्रितं प्रोक्षणीतोयैः शान्तिकुम्भजलैस्तथा ॥
मूलमन्त्रेणाष्टशतं मन्त्रितैरभिषेचयेत् ॥"
अष्टशतम् अष्टोत्तरशतम् ।
"अथ सम्पादयेन्मन्त्रं हस्तं शिरसि धारयन् ।
समोऽस्त्रिन्त्रशतान् दद्यात् ततः शिष्योऽर्चयेद्-
गुरुम् ॥"
यद्वा दीक्षान्तरम् । ब्रह्मभ्यश्च साचतं तदस्तु-
नादष्टवारं मूलेन शिरसि करं निधाय अष्टौ
वारान् कर्णौ जपेत् । तथा च ।
"तत्राप्यशक्तः कस्त्रिंस्तदब्रह्मभ्यश्च साचतम् ।
तदस्तुनाभिधायाष्टवारं मूलेन केवलम् ॥
निधायाष्टौ जपेत् कर्णौ उपदेशे त्वयं विधिः ॥"

इति सङ्क्षेपदीक्षा ॥

उपदेशान्तरमाह । विश्वसारे ।
"चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते ॥"
विश्वसारे ।
"महादीक्षा तथा दीक्षा उपदेशस्ततः परम् ।
युगे युगे च कर्त्तव्या उपदेशः कलौ युगे ॥"

इति ज्ञानानन्दकृततन्त्रसारः ।

दीक्षान्तः, पुं, (दीक्षायाः प्रधानयज्ञस्य अन्तः अन्तोपलक्षितो यज्ञः ।) अवभृथः । इत्यमरः । २।७।२७ ॥ "प्रधानयागो दीक्षा तस्याः अन्तः समाप्तौ योऽपरो यज्ञो न्यूनत्वादिदोषशान्त्यर्थं प्रधानयागस्य पूरणार्थं प्रतिष्ठार्थं क्रियते सोऽवभृथ उच्यते । अवघीनं बिभर्त्ति शोषयतीति नाम्नीति यक् । यज्ञावशेषे स्नाने चावभृथः । यज्ञावशेषे स्नानं यत् तदेवावभृथं विदुरिति त्रिकाण्डशेषः ॥ यज्ञान्ते तमवभृथाभिषेकपूत-मिति रघुः ।" इत्यमरटीकायां भरतः ॥

दीक्षितः, त्रि, (दीक्ष+कर्त्तरि क्तः । यद्वा, दीक्षा सञ्जाता अस्येति । तारकादित्वात् इतच् ।) सोमपानविशिष्टयागकर्त्ता । यथा । स सोम-वति दीक्षितः । इत्यमरः । २।७।८ ॥ "स व्रती सोमपानवति अध्वरे यजमानः सन् दीक्षित उच्यते । अन्यत्राप्युपचारात् । दीक्ष मौण्ड्यो-पनयनव्रतादेशेषु क्तः दीक्षाशब्दादितो वा ।" इति तट्टीकायां भरतः ॥ * ॥ गुरुमुखादृ-गृहीतमन्त्रः । यथा,—
"अदीक्षिता ये कुर्व्वन्ति जपपूजादिका क्रियाः ।
न भवन्ति प्रिये ! तेषां शिलायामुप्तबीजवत् ॥
देवि ! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः ।
तस्मात् सर्व्वप्रयत्नेन गुरुणा दीक्षितो भवेत् ॥
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत् ॥"

इति तन्त्रसारः ॥ * ॥

काम्पिल्यनगरस्थयज्ञदत्तनामब्राह्मणः । यथा,
"आसीत् काम्पिल्यनगरे सोमयाजिकुलोद्भवः ।
दीक्षितो यज्ञदत्ताख्यो यज्ञविद्याविशारदः ॥
वेदवेदाङ्गवेदार्थवेदोक्ताचारचतुरः ।
राजमान्यो बहुधनो वदान्यः कीर्त्तिभाजनः ॥
अग्निशुश्रूषणरतो वेदाध्ययनतत्परः ॥"

इति स्कान्दे काशीखण्डे गन्धवत्यलकावर्णनं नाम १३ अध्यायः ॥*॥ (क्षीरतदीक्षः । यथा, महाभारते । २ । ७३ । १ ।
"ततः पराजिताः पार्था वनवासाय दीक्षिताः ।
अजिनाम्बुत्तरीयाश्च जग्मुश्च यथाक्रमम् ॥")

दीक्षिता, [ऋ] पुं, (दीक्ष+"सूददीपदीक्षश्च ।" ३।२।१५३। इति युच् वाधित्वा ग्रीनार्थे टच् ।) सोमयाजी । इति केचित् ॥ दीक्षाविशिष्टः । दीक्षधातोः कर्त्तरि ल्युट्प्रत्ययेन निष्पन्नः ॥

दीक्षितायनी, स्त्री, (दीक्षितः स्वनामख्यातब्राह्मण एव अयनं गतिर्यस्याः । स्त्रियां टित्वात् ङीप् ।) काम्पिल्यनगरस्थदीक्षितनामकब्राह्मणपत्नी । यथा, काशीखण्डे १३ अध्याये ।
"महाएतिव्रतां सम्यक् पत्नीं श्रोवाच तामथ ।
दीक्षितायनि ! कुत्रासि क्व ते गुरुनिधिः सुतः ॥
अथ तिष्ठतु किन्तेन क्व सा मम सुभोर्म्मिका ।
अङ्गोद्वर्त्तनकाले या त्वया मेऽङ्गुलिका हृता ॥
नवरत्नमयी श्रीघ्रं तामानीय प्रयच्छ मे ।
इति श्रुत्वाय तद्वाक्यं भीता सा दीक्षितायनी ॥"

दीदिविः, पुं क्ली, (दिद्यत्यनेनेति । दिव+"दिवो द्वे दीर्घश्चाभ्यासस्य ।" उणा । ४ । ५५ । इति किन् अभ्यासस्य दीर्घश्च ।) अन्नम् । इत्यमरः । २ । ६ । ४८ ॥ (दिद्यतीति किन् ।) दृश्यतौ, पुं । इति मेदिनी । वे, ३७ ॥ (स्वर्गे भस्मे च । इत्युणादिवृत्तौ उज्ज्वलदत्तः ॥)

दीदिविः, त्रि, (दिव्+किन् ।) उदितः । इति शब्दरत्नावली ॥ (पुनःपुनर्द्योतकः । यथा, ऋग्-वेदे । १ । १ । ८ ॥
"राजन्तमध्वराणां गोपामृतस्य दीदिविम् ॥"
"दीदिविं पौनःपुन्येन भृशं वा द्योतकम् ।"
इति तद्भाष्ये सायणः ॥)

दीधितिः, स्त्री, (दीधीते दीप्यते इति । दीधी+ संज्ञायां क्तिच् । इट् । "अयङ्हादीनाम् ।" इति वार्त्तिकसूत्रात् "यीवर्णयोर्दीधीवेव्योः ।" ३।४।५३। इति अन्त्यस्य लोपः ।) किरणः । इत्यमरः । १ । ४ । ३३ ॥ (यथा, रघुः । ३ । २२ ।
"पुमोष वृद्धिं हरिदश्वदीधिते-
रनुप्रवेशादिव बालचन्द्रमाः ॥")

दीधी, र ङ लु च देवने । दीप्तौ । इति कविकल्प-द्रुमः ॥ (अदां-आत्मं-अकं-सेट् ।) दीर्घमध्यः । र वैदिकः । ङ लु, दीधीते । च, अदीधयुः । बहुलं ब्रह्मणीति परस्मैपदे अनुसुस्विड्डेरिति अन् उस् गुरुस्यामिति गुणः । इति दुर्गादासः ॥

दीर्घं, क्ली, (दीयते स्म इति । दी+क्तः । ततः निष्ठा-तस्य नः ।) तगरपुष्पम् । इति राजनिर्घण्टः । (अस्य पर्य्यायो यथा,—
"कालानुसारिवा वक्रं तगरं कुटिलं शठम् ।
मद्दोरगं नतं जिह्मं दीर्घं तगरपादिकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

दीनः, त्रि, (दीयते स्मेति । ओ दीङ् क्षये+ "गत्यर्थाकर्म्मकेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठा-तस्य नः । यद्वा, दी+"इगुधिज्गिदीडुभ्य-विभ्यो नक् ।" उणा । ३ । २ । इति नक् ।) दरिद्रः । इत्यमरः । ३ । १ । ४६ ॥ (यथा, मनौ । ६ । २३८ ।
"चरेयुः पृथिवीं दीनाः सर्व्वधर्म्मबहिष्कृताः ॥")
भीतः । इति मेदिनी । ने, २१ ॥ (दुःखितः । यथा, रघुः । २ । २५ ।
"सप्त यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥")

दीना, स्त्री, (दीन+टाप् । सततं भीतभीतेव दृश्यत्वात् तथात्वम् ।) भूधिकस्त्री । इति मेदिनी । ने, १० ॥

दीनारः, पुं, (दीयते इति । दी+"दीङो युट् च ।" उणा । ३ । १४० । इति आरन् युट् च ।) स्वर्णभूषा । सुद्रा । इत्युणादिकोषः ॥ (यथा, पञ्चतन्त्रे ३ । १३६ ।
"अथ प्रातर्यावदेव पश्यति तावद्दीनारमेकं शरावे दृष्टवान् ॥") निष्कपरिमाणम् । इत्य-मरः । ३ । ३ । १४ ॥ सुवर्णकर्षद्वयम् । इति तट्टीकासारसुन्दरी ॥ सम्यग्व्यवहारार्थं मान-वस्तु । लौकिकः । द्वात्रिंशद्रक्तिकापरिमितं काञ्चनम् । इति भरतः ॥

दीप, ईं ड य ऋ दीपने । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सेट् ।) दीपनसुज्ज्वली-भावः । ईं, दीप्यते । ड य, दीप्यते निशि चन्द्रमाः । ऋ, अदीदिपत् अदिदीपत् । इति दुर्गादासः ॥

दीपः, पुं, (दीप्यते दीपयति वा स्वं परञ्चेति । दीप् दीपि वा+"इगुपधज्ञाप्रीकिरः कः ।" ३। १।१३५। इति कः ।) वर्त्तिस्नेहज्वलदग्निशिखा । तत्पर्य्यायः । प्रदीपः २ स्नेहाग्रः ३ दीपकः ४ कज्जलध्वजः ५ शिखातरः ६ ब्रह्ममणिः ७

ज्योत्स्नाहरः ८ दर्शेन्धनः ९ दीपातिलकः १० दोषास्यः ११ नयनोत्सवः १२ । इति शब्दरत्नावली ॥ (यथा, मनौ । ४ । २२९ ।
"वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः ।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥")
तदर्थं स्नेहादिनियमो यथा,—
"घृतं तैलञ्च दीपार्थे स्नेहान्यन्यानि वर्জ্জयेत् ।"
इत्याद्ये वह्निपुराणे आह्निकतपोनामाध्यायः ॥
अन्यच्च ।
"पुरश्चरणकृत्यञ्च दीपं प्रस्थिह्य भैरव ! ।
दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः ॥
चतुर्वर्गप्रदो दीपस्तस्माद्दीपैर्यजेत् श्रिये ॥"
इत्युपक्रम्य,—
"घृतप्रदीपः प्रथमस्तिलतैलोद्भवस्ततः ।
सार्षपः फलनिर्य्यासजातो वा राजिकोद्भवः ॥
दधिजस्त्वाम्रजश्चैव प्रदीपाः सप्त कीर्त्तिताः ।
पद्मरुद्रभवा दर्भगर्भरुद्रभवाथवा ॥
शृङ्गजा बादरी वापि फलकोद्भवाथवा ।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधाः स्मृताः ॥*॥
तैजसं दारवं जौहं मार्त्तिकं नारिकेलजम् ।
लवणध्वजोद्भवं वापि दीपपात्रं प्रशस्यते ॥*॥
दीपदश्चाज्य कर्त्तव्यास्तैलसाद्येन भैरव ! ।
वृत्तेषु दीपो दातव्यो न तु भूमौ कदाचन ॥
सर्व्वंसहा वसुमती सहते न त्विदं द्वयम् ।
अकार्य्यपादघातञ्च दीपतापं तथैव च ॥
तस्मादृषया तु पृथिवी तापं नाप्नोति वै तथा ।
दीपं दद्यान्महादेवे अन्येभ्योऽपि च भैरव ! ॥
कुर्व्वन्तं पृथिवीतापं यो दीपस्तृप्तये नरः ।
स ताम्रतापं नरकमाप्नोत्येव शतं समाः ॥
सुवर्णवर्णिसङ्केपपात्रेऽभ्यर्च्य सदर्शने ।
शुक्लाये वृत्तकोटौ तु दीपं दद्यात् प्रयत्नतः ॥
लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात् ।
न स दीप इति ख्यातो ज्योतिर्व्वह्निस्तु स स्मृतः ॥
नेत्राञ्जनकरः स्वर्द्धिर्दूरतापविवर्জ্জितः ।
सुस्निग्धः शब्दरहितो निर्धूमो नातिदुस्सहः ॥
दधिजावर्त्तवर्त्तिस्तु प्रदीपः श्रीविवृद्धये ।
दीपवृक्षस्थिते पात्रे शुद्धक्षेत्रप्रपूरिते ॥
दधिजावर्त्तवर्त्ता तु चारुदीप्तः प्रदीपकः ।
उत्तमः प्रोच्यते पुत्र ! सर्व्वतुष्टिप्रदायकः ॥
वृत्तेन वर्त्तितो दीपो मध्यमः परिकीर्त्तितः ।
विहीनः पात्रतैलाभ्यामधमः परिकीर्त्तितः ॥
ग्राम्यं वा बादरं वास्त्रं जौर्णं मलिनमेव वा ।
उपयुक्तन्तु नो दद्यात् वर्त्तिकार्थन्तु साधकः ॥
उपादद्यान्नूतनमेव सततं श्रीविवृद्धये ॥ * ॥
कोषणं रोमजं वस्त्रं वर्त्तिकार्थं न चादरेत् ।
न मिश्रीकृतं दद्यात्तु दीपं स्नेहान् घृतादिकान् ॥
कृत्वा मिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत् ।
वसामज्जास्थिनिर्य्यासैः स्नेहैः प्राणिशरुसम्भवैः ॥
प्रदीपं नैव कुर्य्यात्तु कृत्वा पङ्के विशीदति ।
अस्थिपात्रेऽथवा गर्त्ते दुर्गन्धादुपवासिनि ! ॥
नैव दीपः प्रदातव्यो विदुषः शैवविवृद्धये ।
नैव निर्व्वापयेद्दीपं कदाचिदपि यत्नतः ॥
सततं लक्षणोपेतं देवार्थंसुपकल्पितम् ।
न हरेज्जानतो दीपं तथा लोभादिना नरः ॥
दीपहर्त्ता भवेदन्धः काणो निर्व्वापको भवेत् ।
उद्दीप्तदीपप्रतिमः काष्ठकाञ्चसमुद्भवः ॥
विस्फोटोद्भवमेवाथ दीपाङ्गाभे निवेदयेत् ।
उत्सर्गं नैव दीपार्थे कदाचिदति चोत्सृजेत् ॥
प्रसन्नार्थन्तु तं दद्यादुपचाराहृदिःस्थितम् ।
एवं वा कथितो दीपो धूपश्च श्रुतं सुतौ ॥"
इति कालिकापुराणे ६८ अध्यायः ॥
आद्ये वह्निपुराणे वह्नियुक्तदीपनिषेधो यथा,—
"दीपं वर्জ्जेत् वह्नियुक्तां प्रज्वलं तैलमेव च ।"
इति योगिनीतन्त्रे प्रथमखण्डे २ भागे ५ पटलः ॥
कार्त्तिकमासे दीपदानस्य माहात्म्यं यथा,—
"शृणु दीपस्य माहात्म्यं कार्त्तिके च हरिप्रिय ! ।
यस्य श्रवणमात्रेण दीपदाने मतिर्भवेत् ॥
सूर्य्यग्रहे कुरुक्षेत्रे नर्म्मदायां प्रयत्नतः ।
तुलादानस्य यत् पुण्यं तदूर्ज्जे दीपदानतः ॥
घृतेन दीपकं यस्तु तिलतैलेन वा पुनः ।
व्याघ्रयेनसुनिग्राहूल ! अश्वमेधेन तस्य किम् ॥
तेनेष्टं क्रतुभिः सर्व्वैः स्नातं तीर्थावगाहनम् ।
दीपदानं कृतं येन कार्त्तिके केशवायतः ॥
तावद्गर्জ্জन्ति पापानि देहेऽस्मिन् मुनिसत्तम ! ।
यावत् कार्त्तिकमासेन दीपदानं कृतं भवेत् ॥
तावद्गर्জ্জन्ति पुण्यानि स्वर्गे मर्त्ये रसातले ।
यावत्तु ज्वलते दीपः कार्त्तिके केशवायतः ॥
श्रूयतेऽत्रापि पिङ्गभिर्गाथा गीता महात्मने ! ।
भविष्यन्ति कुले अस्माकं कदाचित्ते सुता भुवि ॥
कार्त्तिके दीपदानेर्थे तोषयिष्यन्ति केशवम् ।
अपि नस्ते भविष्यन्ति कुले सुचरिता शुभैः ।
दीपदानं कार्त्तिके ये दास्यन्ति हरितुष्टिदम् ॥
गयार्था पिङ्गदानेन कृतं न प्रीणनं सुतैः ।
येऽप्यापि कार्त्तिके दत्तो दीपस्तुष्टिकरो हरेः ॥
दीपं दास्यन्ति ये पुत्रास्तुष्ट्यर्थं चक्रपाणिनः ।
कार्त्तिके तेर्मुनिश्रेष्ठ ! नरकादुद्धृता वयम् ॥
मन्त्रहीनं क्रियाहीनं शुद्धिहीनं जनार्দ্দन ! ।
व्रतं संपूर्णतां यातु कार्त्तिके दीपदानतः ॥
अनेनैव हि मन्त्रेण दीपं संकल्पयेच्छुने ! ।
मधुसूदनतुष्ट्यर्थं कार्त्तिके मुनिपुङ्गव ॥"
इति पाद्मे उत्तरखण्डे ॥
अपि च ।
"दास्यते देवदेवाय दीपपुण्यानुलेपनम् ।
अपि नः स कुले भूयादेकादश्यां तिथौ नरः ॥
करिष्यत्युपवासन्तु सर्व्वप्रातकहानिदम् ।
इत्थं पितृणां वचनं श्रुत्वा भृगुपतिस्तदा ॥
ददौ च दीपान् विधिवत् विष्णोरायतने द्विजः ।
सुगन्धतैलसंपूर्णान् दीपान् सप्ततिलकान् ॥
सर्षपस्य सुतैलेन मधुकासिसिसम्भवैः ।
दीपप्रदानान्नरकान्न्यतामिस्रसंज्ञकान् ।
तीर्त्वा सभार्य्यया ब्रह्मन् ! विष्णुलोकमगात्ततः ॥"
इति वामनपुराणम् ॥

दीपं सृष्ट्वा वैधकर्म्मकरणे दोषो यथा,—
"दीपं सृष्ट्वा तु यो देवि ! मम कर्म्माणि कारयेत् ।
तस्यापराधादे भूमे ! पापं प्राप्नोति मानवः ।
तच्छृणुष्व महाभागे ! कथ्यमानं मयानघे ! ॥
जायते वधिरर्षाणि कुष्ठी गात्रपरिप्लुतः ।
चाण्डालस्य गृहे तत्र एवमेव न संशयः ॥
एवं भूत्वा तु तत् कर्म्म मम शेषे स्थितो यदि ।
मद्भक्तश्चैव जायेत शुद्धे भागवते गृहे ॥
प्रायश्चित्तं प्रवक्ष्यामि दीपस्य सर्ग्गनाशुचि ।
तरन्ति मनुजा येन कृत्वं चाण्डालयोनिषु ॥
यस्य कस्यापि मासस्य शुक्लपक्षे च द्वादशी ।
चतुर्थभक्तमाहारमाकाशशयने स्वपेत् ॥
दीपं दत्त्वापराधार्त्ते तरन्ति मनुजा भुवि ।
शुचिर्भूत्वा यथान्यायं मम कर्म्म पथे स्थितः ॥
एतत्ते कथितं देवि ! सर्ग्गनात् दीपकस्य तु ।
संसारशोधनञ्चैव यत् कृत्वा लभते शुभम् ॥"
इति वराहपुराणम् ॥ * ॥
पुरुषस्य दीपनिर्व्वापणे दोषो यथा,—
"दीपनिर्व्वापणात् पुंसः कृष्णाक्ष्णोश्छेदनात् स्त्रियः ।
अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवम् ॥*॥
देवार्थकल्पितदीपस्य निर्व्वापणे दोषो यथा,—
नैव निर्व्वापयेद्दीपं देवार्थंसुकल्पितम् ।
दीपहर्त्ता भवेदन्धः काणो निर्व्वापको भवेत् ॥"
इत्येकादशीतत्त्वे कालिकापुराणम् ॥
कार्त्तिककृष्णचतुर्দ্দश्यां नरकनिवृत्तये दीपदानं यथा,—
"नरकाय प्रदातव्यो दीपः संपूज्य देवताः ।"
इति तिथितत्त्वधृतलिङ्गपुराणम् ॥ * ॥
पृथिव्यां दीपो न संस्थाप्यः । यथा,—
"सर्व्वंसहा वसुमती सहते न त्विदं द्वयम् ।
अकार्य्यपादघातञ्च दीपतापस्तथैव च ॥"
इत्येकादशीतत्त्वधृतकालिकापुराणम् ॥
दीपक, क्ली, (दीपयतीति । दीप् + णिच् + ण्वुल् ।) वाक्यालङ्कारः । दीप्तिकारके, त्रि । इति मेदिनी । के, १०४ । कुङ्कुमम् । इति शब्दरत्नावली ॥*॥
वाक्यालङ्कारस्य लक्षणं यथा,—
"पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्म्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥
अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥
यथा, माघे ,
बलावलेपादथुनापि पूर्ब्ववत्
प्रसाध्यते तेन जगन्त्रिगौरुता ।
सती च योगित्व प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥"
इति साहित्यदर्पणे ।१०।६७॥
अपि च काव्यलिङ्गायाम् ।
"जातिक्रियागुणद्रव्यवाचकेन पदेन तु ।
एकत्र वर्त्तिना सर्व्ववाक्यार्थो दीपकम्भवेत् ॥"
यथा,—
अलमुन्मरुदुद्धारपुंस्कोकिलकलध्वनिः ।
मन्दमन्दमवातोऽपि हरति हृदयं युवाम् ॥

दीपकः, पुं, (दीपयति जठराग्निमिति । दीपि + ण्वुल् ।) यमानी । इति रत्नमाला ॥ (गुणाश्चास्य यमानीशब्दे ज्ञेयाः ॥) लोधसमकः । इति शब्दरत्नावली ॥ दीपः । (यथा, ब्रह्माण्डपुराणे ।

"विष्णवेऽग्नौ यो ददात् कार्त्तिके मासि दीपकम् ।
अश्विमेधसहस्रस्य फलमाप्नोति मानवः ॥")

येन पश्चिमाग्ये पश्चिमो ग्रहस्तौ वः । इति हेमचन्द्रः । ४ । ४०८ ॥ वाज् इति श्रिकरा इति च भाषा । रागविशेषः । अयं हनूमन्मते षड्रागेषु द्वितीयरागः । सूर्य्यनेत्राग्निर्गतः । अस्य जातिः सम्पूर्णा । ग्रहस्तु षड्जस्वरः । गानसमयस्तु ग्रीष्मर्त्तौ मध्याह्नः । अस्य रूपं यथा । वर्णौ रक्तः । वस्त्रं पाटलवर्णम् । गलभूषणं रुद्राक्षमुक्तामाल्यम् । मत्तहस्त्यारूढोऽयम् । बहुस्त्रीपरिवृतश्च । कस्यचिन्मते । लज्जया दीपनिर्व्वापणेनान्धकारमयं गृहं कृत्वा स्त्रीभी रमते । अस्य रागिण्यः पञ्च यथा । देशी १ कामोद २ नट ३ केदारा ४ कानरा वा कर्णाटी ५ । पुत्राश्चाष्टौ यथा । कुन्तलः १ कमलः २ कलिङ्गः वा कलिन्द्रः ३ चम्पकः ४ कुसुम्भः वा कुसुमः ५ रामः ६ लहिलः ७ हिमालः ८ । भरतमते अस्य रागिण्यो यथा । केदारा १ गौरा २ गौड ३ गुज्जरी ४ रत्नावली ५ । तस्यते पुत्रा यथा । कुसुमः १ टङ्कः २ नटनारायणः ३ विहागराः ४ किरोदत्तः ५ रहसमङ्गला वा रभसमङ्गला ६ मङ्गलाख्यः ७ आढानुः वा आढाना ८ । इति तद्रहस्यतोलहिन्दाख्यसंगीतशास्त्रसंग्रहः ॥ (तालविशेषः । यथा, सङ्गीतदामोदरे ।

"प्लुतो लघुः प्लुतश्चैव ताले दीपकनामनि ॥")

दीपकिट्टं, क्ली, (दीपस्य किट्टम् ।) दीपजातकज्जलम् । इति शब्दार्थकल्पतरुः ॥

दीपकूपी, स्त्री, (दीपस्य कूपीव तैलधारकत्वात् ।) दीपवर्त्तिः । शलिता इति भाषा । तत्पर्य्यायः । तैलमाली २ दीपखोरी ३ विदाहिका ४ । इति शब्दमाला ॥

दीपखोरी, स्त्री, (दीपं खोरयति गर्त्ताघातं करोति स्थिरीकरोतीति । खोर् गर्त्ताघाते + अच् + ङीष् । गौरादित्वादिति ङीष् ।) दीपकूपी । इति शब्दमाला ॥

दीपध्वजः, पुं क्ली, (दीपस्य ध्वज इव ।) कज्जलम् । इति जटाधरः ॥

दीपनं, क्ली, (दीपयति वह्निमिति । दीप + णिच् + ल्युः ।) तगरमूलम् । इति रत्नमाला ॥ कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ (मन्त्रसंस्कारविशेषः । यथा, शारदातिलके ।

"मन्त्राणां दश कथ्यन्ते संस्कारा सिद्धिदायिनः ।
जननं जीवनं पश्चात्ताडनं बोधनं तथा ॥
अथाभिषेको विमलीकरणाप्यायने तथा ।
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ॥"
"तारमायारमायोगो मनोदीपनमुच्यते ॥")

दीपनः, पुं, (दीप्यते इति । दीप + ल्युः ।) मयूरशिखा । (दीप + णिच् + ल्युः ।) शालिपर्णाकः । इति शब्दचन्द्रिका ॥ कासमर्दः । पलाण्डुः । इति राजनिर्घण्टः ॥ दीपयितरि, त्रि ॥ (यथा, ऋतुसंहारे । १ । ३ ।

"सुवासितं हर्म्यतलं मनोरमं
प्रगाढसुप्तोच्छ्वसविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥")

दीपनी, स्त्री, (दीप्यते जठरवह्निरनया । दीप + णिच् + ल्युट् । स्त्रियां ङीप् ।) मेथिका । (अस्याः पर्य्यायाः यथा,—

"मेथिका मिथिनी मेथिर्दीपनी बहुपत्रिका ।
बोधिनी गन्धबीजा च ज्योतिर्गन्धफला तथा ॥
वल्लरी चन्द्रिका मन्था मित्रपुष्पा च केरवी ।
कुक्षिका बहुपर्णी च पीतबीजा सुनिच्छदा ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
पाठा । यवानी । इति राजनिर्घण्टः ॥

दीपनीयः, पुं, (दीप्यते जठरवह्निरनेनेति । दीप + णिच् + अनीयर् ।) यवानी । इति राजनिर्घण्टः ॥ दीपनयोग्ये, त्रि । (यथा सुश्रुते । १ । ४५ ।

"दीपनीयमचक्षुष्यं वाङ्मेधं दाघ वातलम् ॥")

औषधवर्गविशेषः । यथा,—

"पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
दीपनीयः स्मृतो वर्गः कफानिलजगदापहः ॥"

इति चक्रदत्तः ॥

दीपपादपः, पुं, (दीपस्य पादप इव ।) दीपवृक्षः । इति शब्दार्थकल्पतरुः ॥

दीपपुष्पः, पुं, (दीप इव पुष्पं यस्य ।) चम्पकवृक्षः । इति राजनिर्घण्टः ॥

दीपवती, स्त्री, (दीपवत् तेजस्वित्वं अस्त्यस्या इति । दीप + मतुप् । मस्य वः ।) कामाख्यायां नदीविशेषः । यथा,—

और्व्व उवाच ।

"ग्राम्यती कथिता या तु नदी मत्स्यध्वजा सिता ।
तस्याः पूर्ब्बे समाख्याता नदी दीपवती मता ॥
एषा च हिमवज्जाता छिन्दन्ती दीपपर्व्वतम् ।
तेन देवमनुष्येषु नदी दीपवती स्मृता ॥
दीपवत्याः पूर्ब्बतस्तु श्रृङ्गाटो नाम पर्व्वतः ॥"

इति कालिकापुराणे ८२ अध्यायः ॥

दीपवृक्षः, पुं, (दीपस्य वृक्ष इव आधारः ।) दीपाधारः । पिलसुज् इति देशुका इति च भाषा । तत्पर्य्यायः । दीपतरुः २ ज्योतिर्वृक्षः ३ । इति त्रिकाण्डशेषः ॥ दीपपादपः ४ । इति शब्दार्थकल्पतरुः ॥ (यथा, महाभारते ।१२।२०२।६।

"यथा प्रदीप्तः पुरुषः प्रदीपः
प्रकाशमन्यस्य करोति दीप्यन् ।
तथैव पञ्चेन्द्रियदीपवृक्षा
ज्ञानप्रदीप्ताः परदेहिनां स्युः ॥")

दीपशिखा, स्त्री, (दीपस्य शिखा कारणत्वेन अस्त्यस्याः । अच् । टाप् ।) कज्जलम् । इति शब्दार्थकल्पतरुः ॥ (दीपस्य शिखा ।) प्रदीपज्वाला ॥ (यथा, रघुः । ६ । ६७ ।

"सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ॥")

दीपश्रेणी, स्त्री, (दीपानां श्रेणीव ।) दीपाली । इति हारावली । १२४ ।

दीपान्विता, स्त्री, (दीपैरन्विता युक्ता ।) गौणचान्द्रकार्त्तिकस्यामावास्या । यथा, भविष्यपुराणम् ।

"येयं दीपान्विता राजन्! ख्याता पञ्चदशी भुवि ।
तस्यां दद्यान्न चेद्दत्तं पितृणां वै महालये ॥
पञ्चदशी अमावास्या । अमावास्यामधिकृत्य ।
दीपमालाश्च कर्त्तव्याः शक्त्या देवगृहेषु च ।
रथ्यापण्यप्रसृतानेषु नदीपर्व्वतसानुषु ॥
इति ब्रह्मपुराणोक्तनानास्थानदीपदानेन दीपान्विता ख्याता येयमिति विशेषणाच्च ।" इति आह्निकतत्त्वम् ॥* ॥ तत्र कर्म्माणि यथा,—

"प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् ।
दीपदानं तथा कार्य्यं भक्त्या देवगृहेष्वपि ॥
चतुष्पथे श्मशानेषु नदीपर्व्वतसानुषु ।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥
वल्मीकः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः ।
दीपमालापरिक्षिप्ते प्रदीपे तदनन्तरम् ॥
ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षितान् ।
स्वयं कृतेन भोक्तव्यं नववस्त्रोपशोभिना ॥
स्निग्धैर्मधुरैर्विदग्धैश्च बान्धवैर्वेष्टितैः सह ॥"

इति तिथितत्त्वम् ॥

तत्र श्यामापूजाप्रमाणं यथा,—

"दीपान्विता पार्ब्बणाय स्मृता काल्यर्चनाय च ।
महानिशि द्वितीयं स्यात् पूर्ब्बेद्युर्याम्ययामयोः ॥
महानिशि याम्ययामयोः पूर्ब्बेद्युरेव द्वितीयं काल्यर्चनं स्यात् इत्यर्थः । प्रथमं पार्ब्बणं द्वितीयं काल्यर्चनमिति द्वितीयशब्दस्य तात्पर्य्यार्थः ।"
इति स्मृतिसारसंग्रहधृतयोगिनीतन्त्रम् ॥*॥

अपरञ्च ।

"दीपोत्सर्गं चतुर्दश्यां संमिश्रा या भवेत् कुहूः ।
तस्यां या तामसी रात्रिः सोच्यते कालरात्रिका ॥
तस्यां पूजा प्रकर्त्तव्या कालौ तारा प्रियङ्करी ॥"

इति कालीकुलसद्भावः ॥

दीपाली, स्त्री, (दीपानां आली श्रेणी ।) दीपमाला । तत्पर्य्यायः । दीपश्रेणी २ । इति हारावली । १२४ ॥ (दीपानां आली यत्र ।) दीपान्वितामावास्या । तत्पर्य्यायः । यक्षरात्रिः २ । इति त्रिकाण्डशेषः ॥

दीपिका, स्त्री, (दीपयति प्रकाशयति गृहादीनिति । दीप + णिच् + ण्वुल् । टापि अत इत्वम् ।) महिन्तापनीयश्रीनिवासतन्त्रज्योतिर्व्यन्थविशेषः । यथा, अस्तं गतवति मिहिरे तिमिरदोषाकुले च गोविभवे । उद्गाहादिह शुद्धिग्रहणार्थं दीपिका क्रियते ॥ एतद्विधा भुवनचण्डजातकशुक्राद्रिदीपिकाः सन्ति ॥ राजदीपिका

विग्रहः। सा हिक्कोलरोगस्य पत्नी। अस्या ज्ञानं यथा,—
"प्रदोषकाले गृहसम्मृविद्या
प्रदीपहस्तारुणगात्रवस्त्रा।
सीमन्तसिन्दूरविराजमाना
सुरक्तमाल्या किल दीपिकेयम्॥"
तस्या गानकालः सायाह्नः। इति सङ्गीतदामोदरः॥ (प्रदीपः। यथा, रघुः।६।७०।
"स ललितकुसुमप्रवालशय्यां
ज्वलितमहौषधिदीपवासनाथाम्॥")
प्रकाशिकायाम्, त्रि॥

दीपिता, [ऋ] त्रि, (दीपयतीति। दीप+णिच्+तृच्।) दीप्तिकर्त्ता। इति व्याकरणम्॥

दीप्तं, क्ली, (दीपी दीप्तौ+क्तः। "श्रीदितो निष्ठायाम्।" ७।२।१४। इति नेट्।) स्वर्णम्। हिङ्गु। इति राजनिर्घण्टः॥ (स्वर्णशब्दे हिङ्गुशब्दे च विवृतिरस्य ज्ञेया॥)

दीप्तः, पुं, (दीप+क्तः।) निम्बुकः। सिंहः। इति राजनिर्घण्टः॥ (नासागतरोगविशेषः। यथा, सुश्रुते उत्तरतन्त्रे २२ अध्याये।
"घ्राणे भृशं दाहसमन्विते तु
विनिःसरेद्धूम इवेह वायुः।
नासा प्रदीप्तेव च यस्य जन्तो-
र्व्याधिस्तु तं दीप्तमुदाहरन्ति॥"
अस्य प्रतिषेधमाह तत्रैव २३ अध्याये।
"दीप्ते रोगे पैत्तिकं संविधानं
कुर्य्यात् सर्व्वं स्वादु यच्छीतलञ्च॥")

दीप्तः, त्रि, (दीप+क्तः।) निर्भासितः। दग्धः। ज्वलितः। इति मेदिनी। ते, २५॥ (यथा, हरिवंशे। १६८। ३।
"ततः शकुनयो दीप्ता गृध्राश्च क्रूरभाषिणः।
दीप्तायां दिशि भाषन्तो भयमावेदयन्ति मे॥")

दीप्तकं, क्ली, (दीप्तमेव। स्वार्थे कन्।) स्वर्णम्। इति राजनिर्घण्टः॥

दीप्तजिह्वा, स्त्री पुं, (दीप्ता जिह्वा यस्याः।) उल्कामुखी द्रुमाली। इति हारावली।७६॥ (प्रदीप्तजिह्वे, त्रि। यथा, महाभारते। १। २२६। ३७।
"दीप्ताक्षो दीप्तजिह्वश्च संप्रदीप्तमहाननः॥")

दीप्तपिङ्गलः, पुं, (दीप्तः पिङ्गलश्च। दीप्तं स्वर्णं तद्वत् पिङ्गलो वा।) सिंहः। इति राजनिर्घण्टः॥

दीप्तरसः, पुं, (दीप्त उष्णलो रसो यस्य।) किण्वलुकः। इति शब्दचन्द्रिका॥

दीप्तलोचनः, पुं, (दीप्ते लोचने नेत्रे यस्य।) विड़ालः। इति राजनिर्घण्टः॥

दीप्तलोहं, क्ली, (दीप्तं लोहमिव।) कांस्यम्। इति राजनिर्घण्टः॥

दीप्ता, स्त्री, (दीप्त+टाप्।) लाङ्गलिकावृक्षः। इति रत्नमाला॥ ज्योतिष्मती। शातला। इति राजनिर्घण्टः॥

दीप्ताक्षः, पुं, (दीप्ते अक्षिणी यस्य।) विड़ालः। इति शब्दरत्नावली॥ (प्रदीप्तनेत्रे, त्रि। यथा, महाभारते। १। २२६। ३७।
"दीप्ताक्षो दीप्तजिह्वश्च संप्रदीप्तमहाननः॥")

दीप्ताग्निः, पुं, (दीप्तः अग्निर्जठराग्निर्यस्य।) अगस्त्यः। इति त्रिकाण्डशेषः॥ (प्रदीप्तो वह्निः। यथा, भट्टिः। २। २।
"सधूमदीप्ताग्निरुचीनि रेषु-
स्ताम्रोत्पलान्याकुलषट्पदानि॥")
तीक्ष्णजठरानलयुक्ते, त्रि॥ (यथा, सुश्रुते। १। २०।
"सात्म्यतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च॥")

दीप्ताङ्गः, पुं, (दीप्तं भासितमङ्गमस्य।) मयूरः। इति शब्दरत्नावली॥

दीप्तिः, स्त्री, (दीप+क्तिन्।) दीपनम्। तत्पर्य्यायः। प्रभा २ रुक् ३ रुचिः ४ त्विट् ५ भा ६ भाः ७ छविः ८ द्युतिः ९ रोचिः १० श्रोचिः ११। इत्यमरः।१।४।३४॥ वाग्देवेगस्य तीव्रता। स्त्रिया आयतलक्षणम्। इति हेमचन्द्रः।२।१३॥
"कान्तिरेव वयोभोगदेशकालगुणादिभिः।
उद्दीपितातिविस्तारं प्राप्ता चेद्दीप्तिरुच्यते॥"
इत्युज्ज्वलनीलमणिः॥
(यथा, साहित्यदर्पणे। ३। १३१।
"कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते॥")
लाक्षा। कांस्यम्। इति राजनिर्घण्टः॥

दीप्तिकः, पुं, (दीप्तिरस्त्यस्येति। कै+कः।) दुग्धपाषाणवृक्षः। इति राजनिर्घण्टः॥

दीप्तोपलः, पुं, (दीप्तः सूर्य्यकिरणसम्पर्कात् ज्वलितः उपलः।) सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥

दीप्यः, पुं, (दीपाय अग्निदीपनाय हितमिति। दीप+"तस्मै हितम्।" ५। १। ४। इति अपूपादित्वात् पक्षे यत्।) यमानी। (अस्य पर्य्यायो यथा,—
"यमानी दीप्यको दीप्यो भूतिकश्च यमानिका॥"
इति वैद्यकरत्नमालायाम्॥)
जीरकः। इति राजनिर्घण्टः॥ (दीपाय साध्विति। दीप+"तत्र साधुः।" ४। ४। ९८। इति यत्।) मयूरशिखा। कदलटा इति ख्याता। इत्यमरः। २। ४। १११॥

दीप्यकं, क्ली, (दीपाय हितं साध्विति वा। दीप+यत्। ततः स्वार्थे कन्।) अजमोदा। यमानी। (यथा भावप्रकाशे क्षुद्ररोगाधिकारे।
"सैन्धवं चन्दनं कुष्ठं दीपकश्च फलं पृथक्॥")
वह्निचूड़ा। इति मेदिनी। के, १०५॥

दीप्यकः, पुं, (दीप्य+संज्ञायां स्वार्थे वा कन्।) अलङ्कारः। यमानी। (अस्य पर्य्याया यथा,—
"यमानी दीप्यको दीप्यो भूतिकश्च यमानिका॥"
इति वैद्यकरत्नमालायाम्॥)
लोचमस्तकः। इति भरतधृतधरणिः॥ (अजमोदा। तत्पर्य्यायो यथा,—
"अजमोदा खरास्वा च मायूरो दीप्यकस्तथा।
तथाऽजकुशा प्रोक्ता कारवी लोचमस्तका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)

दीप्रः, त्रि, (दीप्यते इति। दीप+"नमिकम्पिस्म्यजसकमहिंसदीपो रः।" ३। २। १६७। इति रः।) दीप्तिविशिष्टः। इति व्याकरणम्॥ (यथा कथासरित्सागरे। २५। १३५।
"क्वचित् क्वचिच्चिताज्योतिर्दीप्रदीपप्रकाशितम्॥")

दीयमानः, त्रि, (दीयते इति। दा+कर्म्मणि शानच्।) वर्त्तमानदानसम्बन्धिवस्तु। इति व्याकरणम्। यथा, हेत्यधिकृत्तामग्नौ।
"विवाहोत्सवयज्ञेषु व्यन्तरा ऋतुरक्षके।
पूर्व्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति॥"
इति तिथ्यादितत्त्वम्।

दीर्घ, त्रि, (दृणातीति। दृ विदारणे+बाहुलकात् घञ्।) आयतम्। इत्यमरः। ३।१।६८। (यथा मेघदूते। १०३।
"दीर्घोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती
सङ्कल्पैस्ते विशति विधिना वैरिणा रुद्धमार्गः॥")

दीर्घः, पुं, (दृ+बाहुलकात् घञ्।) लताशालवृक्षः। (यथा, वैद्यकरत्नमालायाम्।
"तार्क्षोऽश्वकर्णः कुम्भिको वल्ली दीर्घो लतादुमः॥")
इतकटः। इति रत्नमाला॥ रामशरः। उदकः। इति राजनिर्घण्टः॥ पञ्चमस्वरसप्तमाष्टमस्वराश्रयः। यथा। दुन्दुभिककन्थान्दगपतिवल्लिको दीर्घाः। इति ज्योतिषतत्त्वम्॥ द्विमात्रवर्णः। तदुयथा। आ ई ऊ ॠ ॡ ए ऐ ओ औ। गुरुवर्णः। इति व्याकरणम्॥ (दीर्घलक्षणं यथा,—
"एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम्॥")

दीर्घकक्षा, स्त्री, (दीर्घा कक्षेति नित्यकर्म्मधारयः।) गौरजीरकः॥ इति राजनिर्घण्टः॥

दीर्घकण्टकः, पुं, (दीर्घः कण्टकोऽस्य।) वल्वुरः। इति राजनिर्घण्टः॥

दीर्घकण्टकः, पुं, (दीर्घः कण्टोऽस्य। कप्।) वकपक्षी। इति शब्दचन्द्रिका॥

दीर्घकन्दकं, क्ली, (दीर्घः कन्दो यस्य। कप्।) मूलकम्। इति राजनिर्घण्टः॥ (मूलकशब्दे ऽस्य गुणादयो विज्ञेयाः॥)

दीर्घकन्दिका, स्त्री. (दीर्घकन्दक+टाप् अत इत्वञ्च।) सुवली। इति राजनिर्घण्टः॥

दीर्घकन्धरः, पुं, (दीर्घः कन्धरो यस्य।) वकः। इति राजनिर्घण्टः॥

दीर्घकाण्डः, पुं, (दीर्घः काण्डो यस्य।) गुरुडतृणम्। इति राजनिर्घण्टः॥

दीर्घकाण्डा, स्त्री, (दीर्घः काण्डोऽस्याः।) पातालगरुडलता। इति राजनिर्घण्टः॥

दीर्घकीलः, पुं, (दीर्घः कीलः शाखादण्डो यत्र।) अश्वोष्ठवृक्षः। इति राजनिर्घण्टः॥

दीर्घकीलकः, पुं, (दीर्घकील+स्वार्थे कन्।) अश्वोष्ठवृक्षः। इति भटाधरः॥

दीर्घकूरकं क्ली, (दीर्घं कूरकमन्नम्।) राजान्नम्। इति राजनिर्घण्टः॥

दीर्घकेशः, पुं, (दीर्घाः केशा इव लोमान्यस्य।) भल्लूकः। इति राजनिर्घण्टः॥ (देशभेदः। यथा, बृहत्संहितायाम्। १४। २१।
"एकविलोचनमूलिकदीर्घग्रीवास्यकेशाश्च॥")
दीर्घकेशी, स्त्री, (दीर्घाः केशा यस्याः।) आयतकेशे, त्रि॥ (स्त्रियां वा ङीष् स्वाङ्गत्वात्। यथा, महाभारते १।६१।
"विम्बोष्ठी चारुदशना गजपतिगमना दीर्घकेशी सुमध्या॥")
दीर्घकोशिका, स्त्री, (दीर्घः कोशो यस्याः। ततः संज्ञायां कन् टाप् अत इत्वञ्च।) दीर्घकोशिका। इत्यमरटीकायां भरतः॥
दीर्घकोषिका, स्त्री, (दीर्घः कोषोऽस्याः। कापि अत इत्वम्।) भिण्डिका। भिण्डक इति ख्याता। तत्पर्य्यायः। दुर्गमा २। इत्यमरः। १। १०। २५॥
दीर्घगतिः, पुं, (दीर्घा आयतस्थानगता गतिः पादविक्षेपो यस्य।) उष्ट्रः। इति राजनिर्घण्टः॥
दीर्घग्रन्थिः, पुं, (दीर्घो ग्रन्थिः पर्व्वास्य।) गजपिप्पली। इति राजनिर्घण्टः॥ (विवृतिरस्य गजपिप्पलीशब्दे विज्ञेया॥)
दीर्घग्रीवः, पुं, (दीर्घा ग्रीवास्य।) उष्ट्रः। इति हेमचन्द्रः। ४। ३२६॥ नीलक्रौञ्चः। इति राजनिर्घण्टः॥ (देशभेदः। यथा, बृहत्संहितायाम्। १४। २३।
"एकविलोचनमूलिकदीर्घग्रीवास्यकेशाश्च॥")
दीर्घघाटिकः, पुं, (दीर्घा घाटास्त्रासयति। ठन्।) उष्ट्रः। इति शब्दरत्नावली॥
दीर्घजङ्घलः, पुं, (दीर्घे यथा तथा जङ्घलो गतिशीलः।) भल्लातमत्स्यः। इति शब्दमाला॥
दीर्घजङ्घः, पुं, (दीर्घा जङ्घास्य।) वकः। इति त्रिकाण्डशेषः॥ उष्ट्रः। इति जटाधरः॥ आयतजङ्घायुक्ते, त्रि॥
दीर्घजिह्वः, पुं, (दीर्घा जिह्वा यस्य।) सर्पः। इति हेमचन्द्रः। ४। ३६६॥ (दानवविशेषः। यथा, महाभारते। १। ६५। ३०।
"गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः॥"
स्त्रियां टाप्। राक्षसीविशेषः। यथा, महाभारते। ३। २८६। ४४।
"द्वाभ्यां बाभ्यां जलाटाभ्यां दीर्घजिह्वामजिह्मिकाम्॥")
दीर्घतरुः, पुं, (दीर्घश्चासौ तरुश्चेति कर्म्मधारयः।) तालः। इति शब्दार्थकल्पतरुः॥
दीर्घतिमिषा, स्त्री, (दीर्घस्तिमिषः। अभिधानात् स्त्रीत्वम्।) कर्कटी। इति शब्दमाला॥
दीर्घतुण्डा, स्त्री, (दीर्घं तुण्डं यस्याः।) छुछुन्दरी। इति कोषान्तरम्॥
दीर्घदलः, पुं, (दीर्घं दलमिति नित्यकर्म्मधारयः। अभिधानात् पुंस्त्वम्।) पलाशवृक्षः। इति राजनिर्घण्टः॥
दीर्घदण्डः, पुं, (दीर्घो दण्ड इव काण्डावच्छेदेन।) एरण्डवृक्षः। इति भावप्रकाशः॥
दीर्घदण्डकः, पुं, (दीर्घदण्ड+स्वार्थे कन्।) एरण्डवृक्षः। इति जटाधरः॥
दीर्घदन्ती, स्त्री, (दीर्घदन्त+गौरादित्वात् ङीष्।) गोरक्षी। इति राजनिर्घण्टः॥
दीर्घदर्शी, [न्] पुं, (दीर्घं दीर्घात् वा पश्यतीति। णिनिः।) पण्डितः। इत्यमरः। २। ७। ६॥ गृध्रः। इति शब्दरत्नावली॥ भल्लूकः। इति राजनिर्घण्टः॥ दूरदर्शके, त्रि॥ (यथा, महाभारते। २। ३८। ४६।
"स हि धर्म्मं पुरस्कृत्य दीर्घदर्शी परं हितम्॥")
दीर्घदृष्टिः, पुं, (दीर्घा दृष्टिर्दर्शनमस्य।) दीर्घदर्शी। इति हलायुधः॥
दीर्घद्रुः, पुं, (दीर्घश्चासौ द्रुश्चेति कर्म्मधारयः।) तालवृक्षः। इति शब्दचन्द्रिका॥
दीर्घद्रुमः, पुं, (दीर्घो द्रुम इति नित्यकर्म्मधारयः।) प्राक्शालिः। इति राजनिर्घण्टः॥
दीर्घनादः, पुं, (दीर्घो दूरगो नादोऽस्य।) गृध्रः। इति राजनिर्घण्टः॥
दीर्घनालं, क्ली, (दीर्घं नालमस्य।) दीर्घरोहितकम्। इति राजनिर्घण्टः॥
दीर्घनालः, पुं, (दीर्घं नालं यस्य।) वृक्षगुग्गुलुः। यावनालः। इति राजनिर्घण्टः॥
दीर्घनिद्रा, स्त्री, (दीर्घा निद्रेति नित्यकर्म्मधारयः।) मृत्युः। इति हेमचन्द्रः। २। २१८॥ (यथा, मार्कण्डेये। ७। १३।
"सोऽद्य मत्कार्म्मुकाक्षेपविदीपितदिगन्तरैः। शरैर्विभिन्नसर्व्वाङ्गो दीर्घनिद्रां प्रवेक्ष्यति॥")
दीर्घपटोलिका, स्त्री, (दीर्घा पटोलिका।) लताफलविशेषः। घुँदुल इति भाषा। अस्य गुणाः। स्निग्धत्वम्। कटुत्वम्। विष्टम्भित्वम्। गुरुत्वम्। वायुपित्तश्लेष्मरुचिभेदकारित्वम्। मधुरत्वम्। शीतलत्वञ्च। इति राजवल्लभः॥
दीर्घपत्रः, पुं, (दीर्घं पत्रमस्य।) राजपलाण्डुः। विष्णुकन्दः। हरिदर्भः। कुन्दरः। तालः। इति राजनिर्घण्टः॥ कुपीलुः। इति भावप्रकाशः॥ (इक्षुभेदः। यथा, सुश्रुते सूत्रस्थाने ४५ अः।
"कान्तारस्थापसेच्यञ्च काण्डेक्षुः सूचिपत्रकः। नेपालो दीर्घपत्रश्च नीलपोरोऽथ कोषकृत्॥")
दीर्घपत्रकः, पुं, (दीर्घपत्र+संज्ञायां कन्।) रक्तलशुनः। एरण्डः। हिज्जलः। वेतसः। इति राजनिर्घण्टः॥ करीरवृक्षः। इति शब्दचन्द्रिका॥ जलजमधूकः। इति जटाधरः॥ लशुनः। इति हेमचन्द्रः। ४। २५३॥ (इक्षुभेदः। यथा, सुश्रुते सूत्रस्थाने ४५ अः।
"सूचिपत्रो नीलपोरो नेपालो दीर्घपत्रकः। वातलाः कफपित्तघ्नाः सकषाया विदाहिनः॥")
दीर्घपत्रा, स्त्री, (दीर्घपत्र+टाप्।) चित्रपाठेका। चाकुलियाभेदः। (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"शालिपर्णी स्थिरा सौम्या त्रिपर्णी गौरवी गुरुः। विदारिगन्धा दीर्घाङ्गी दीर्घपत्रांशुमत्यपि॥")
इक्षजम्बुः। इति रत्नमाला॥ गन्धपत्रा। केतकी। डोङ्गेक्षुपः। इति राजनिर्घण्टः॥ (चित्रापरपर्य्याय उद्भिदभेदः। यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"चित्रा चक्षुश्चुकी च दीर्घपत्रा सतिक्तका॥")
दीर्घपत्रिका, स्त्री, (दीर्घपत्र+संज्ञायां कन् टाप् अत इत्वञ्च।) श्वेतवचा। घृतकुमारी। शालपर्णी। इति राजनिर्घण्टः॥
दीर्घपत्री, स्त्री, (दीर्घपत्र+गौरादित्वात् ङीष्।) पलाशीलता। महाचक्षुष्काः। इति राजनिर्घण्टः॥
दीर्घपर्णी, स्त्री, (दीर्घं पर्णमस्याः। गौरादित्वात् ङीष्।) वृश्चिपर्णी। इति राजनिर्घण्टः॥ (वृश्चिपर्णीशब्देऽस्या विवरणं ज्ञातव्यम्॥)
दीर्घपल्लवः, पुं, (दीर्घः पल्लवो यस्य।) शालवृक्षः। इति राजनिर्घण्टः। आयतच्छदे, क्ली। तद्वति, त्रि॥
दीर्घपात्, पुं, (दीर्घौ पादावस्य। समासे अन्यलोपः।) कङ्कपक्षी। इति शब्दरत्नावली॥
दीर्घपादः, पुं, (दीर्घौ पादौ यस्य। समासान्तविधेरनित्यत्वात् अन्यलोपाभावश्च।) कङ्कपक्षी। इति हेमचन्द्रः। ४। ४००॥
दीर्घपादपः, पुं, (दीर्घश्चासौ पादपश्चेति नित्यकर्म्मधारयः।) तालः। पूगः। इति राजनिर्घण्टः॥
दीर्घपृष्ठः, पुं, (दीर्घं पृष्ठं यस्य।) सर्पः। इत्यमरः। १। ८। ८॥
दीर्घफलः, पुं, (दीर्घं फलं यस्य।) आरग्वधवृक्षः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—
"आरग्वधो राजवृक्षः सम्पाकश्चतुरङ्गुलः। आरेवतो व्याधिघातः कृतमालः सुवर्णकः॥ कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
दीर्घफलकः, पुं, (दीर्घफल+संज्ञायां कन्।) अगस्त्यवृक्षः। इति राजनिर्घण्टः॥ (गुणादयोऽस्यागस्त्यशब्दे व्याख्याताः॥)
दीर्घफला, स्त्री, (दीर्घाणि फलानि यस्याः।) कपिलद्राक्षा। जतुका। इति राजनिर्घण्टः॥
दीर्घबाला, स्त्री, (दीर्घः बालो यस्याः।) चमरी। इति राजनिर्घण्टः॥
दीर्घमारुतः, पुं, (दीर्घः अधिकसमयव्यापी मारुतो निःश्वासवायुर्यस्य।) हस्ती। इति त्रिकाण्डशेषः॥
दीर्घमूलं, क्ली, (दीर्घं मूलं यस्य।) लामज्जकम्। इति राजनिर्घण्टः॥
दीर्घमूल, पु, (दीर्घं मूलं यस्य।) मोरटलता। विस्खान्तरवृक्षः इति राजनिर्घण्टः॥
दीर्घमूलकं, क्ली, (दीर्घमूल+संज्ञायां कन्।) मूलकम्। इति राजनिर्घण्टः॥
दीर्घमूला, स्त्री, (दीर्घं मूलं यस्याः। टाप्।) श्यामालता। शालपर्णी। इति रत्नमाला॥ (यथा, सुश्रुते। १। ३८।
"प्रियङ्गु समङ्गधातकी पुन्नागरक्तचन्दनकुचन्दन-

मोचरसरसाञ्जनकुम्भीकसोतोऽञ्जनपद्मकेसर-मोचनवल्को दीर्घमूला चेति ॥")

दीर्घनली, स्त्री, (दीर्घं नलमस्याः । ङीप् ।) दुरालभा । इति शब्दमाला ॥

दीर्घरदः, पुं, (दीर्घौ रदौ दन्तौ यस्य ।) शूकरः । इति त्रिकाण्डशेषः ॥ आयतदन्ते, त्रि ॥

दीर्घरसनः, पुं, (दीर्घा रसना जिह्वा यस्य ।) सर्पः । इति शब्दचन्द्रिका ॥

दीर्घरागा, स्त्री, (दीर्घः अधिककालस्थायी रागो यस्याः ।) हरिद्रा । इति राजनिर्घण्टः ॥

दीर्घराज्यं, क्ली, (दीर्घाः प्रभुरा राज्यः सन्त्यत्र । अर्श आदित्वात् अच् ।) चिरकालम् । इति त्रिकाण्डशेषः ॥ (पुं. दीर्घा चासौ रात्रिश्चेति विग्रहे । "सर्व्वैकदेशसङ्खातपुण्यवर्षादीर्घरात्रेः।" इति सुश्रुतोक्तेश्च रः । पुंस्त्वमभिधानात् ।) दीर्घा निशा च ॥

दीर्घरोमा, [न्] पुं, (दीर्घाणि रोमाणि यस्य ।) भल्लूकः। इति शब्दार्थकल्पतरुः ॥ (महादेवस्य भूतानामन्यतमः । यथा, हरिवंशे भविष्यपर्व्वणि ।१४।२। "तस्यापि समपद्यन्त भूतसङ्घाः सहस्रशः ।" "दीर्घरोमा दीर्घभुजो दीर्घबाहुरिरञ्जनः ॥")

दीर्घरोहिषकं, क्ली, (दीर्घं रोहिषम् । ततः स्वार्थे संज्ञायां वा कन् ।) कस्तृणभेदः । सुगन्धिद्रव्यविशेषः । बड़ रोहिष इति भाषा । तत्पर्य्यायः । दृढ़काण्डम् २ दृढ़च्छदम् ३ यवेष्टम् ४ दीर्घनालम् ५ तिक्तसारम् ६ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफवातभूतयक्ष्मविषनाशित्वम् । व्रणशोथतृषिरोपशमत्वञ्च । इति राजनिर्घण्टः ॥

दीर्घवंशः, पुं, (दीर्घो वंश इव ।) नलः । इति राजनिर्घण्टः ॥ आयते ह्रस्वपत्रे कुले च ॥

दीर्घवक्त्रः, पुं, स्त्री, (दीर्घं वक्त्रं मुखं यस्य ।) हस्ती । इति शब्दमाला ॥ (लम्बवदने, त्रि ॥)

दीर्घवल्किका, स्त्री, कुम्भीरः । इति शब्दार्थकल्पतरुः ॥

दीर्घवल्ली, स्त्री, (दीर्घा वल्ली ।) महेन्द्रवारुणी । पातालगरुड़ी । पलाशी । इति राजनिर्घण्टः ॥ आयता लता च ॥

दीर्घवृन्तः, पुं, (दीर्घं वृन्तं यस्य ।) श्योनाकवृक्षः । इत्यमरः ।२। ४। ५७ ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"श्योनाको भूतपुष्पश्च पूतिवृक्षो सुनिद्रुमः ।
दीर्घवृन्तश्च कट्फलो भल्लूकवृष्टकोऽरुषः ॥")

दीर्घवृन्तकः, पुं, (दीर्घवृन्त+स्वार्थे कन् ।) श्योनाकः । इति शब्दमाला । श्योनाकभेदः । इति राजनिर्घण्टः ॥ (श्योनाकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

दीर्घवृन्ता, स्त्री, (दीर्घं वृन्तं यस्याः सा । टाप् ।) चिर्भिटी । इति राजनिर्घण्टः ॥

दीर्घवृन्तिका, स्त्री, (दीर्घं वृन्तं यस्याः । कप् । टापि अत इत्वम् ।) एलापर्णी । इति शब्दचन्द्रिका ॥

दीर्घशरः, पुं, (दीर्घैः शरैः ।) यावनालः । इति राजनिर्घण्टः ॥

दीर्घशाखः, पुं, (दीर्घा शाखा यस्य ।) प्लक्षवृक्षः । इति राजनिर्घण्टः ॥ प्राणवृक्षः । इति शब्दचन्द्रिका ॥

दीर्घशाखिका, स्त्री, (दीर्घा शाखा यस्याः । कापि अत इत्वम् ।) नीलाम्बीक्षुपः । इति राजनिर्घण्टः ॥

दीर्घश्रिण्किः, पुं, (दीर्घा श्रिण्किर्यस्य । कप् ।) शवः । इति राजनिर्घण्टः ॥

दीर्घशूर्कं, क्ली, (दीर्घं शूर्कं यस्य । कप् ।) राजान्नम् । इति राजनिर्घण्टः ॥

दीर्घसक्थं, त्रि, (दीर्घे सक्थिनी यस्य । "बहुव्रीहौ सक्थ्यक्ष्णोः खाङ्गात् षच् ।" ५ । ४ । ११३। इति षच् ।) दीर्घोरु । इति व्याकरणम् ॥

दीर्घसक्थि, क्ली, (दीर्घे सक्थिनी यस्य । खाङ्गादित्वात्तत्करत्वं न षच् ।) शकटम् । इति व्याकरणम् ॥

दीर्घसत्रं, क्ली, (दीर्घं बहुकालसाध्यं सत्रम् ।) यज्ञविशेषः । (यथा, भागवते । २ । १ । २१ । "कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम् । आसीना दीर्घसत्रेण कथायां सत्रया हरेः ॥") तीर्थविशेषः । इति शब्दार्थकल्पतरुः ॥ (यथा, महाभारते । ३ । ८२ । १०३—१०४ । "ततो गच्छेत राजेन्द्र ! दीर्घसत्रं यथाक्रमम् । तत्र ब्रह्मादयो देवाः सिद्धाश्च परमर्षयः । दीक्षयन्त्रसुपासन्ते दीक्षिता नियमव्रताः ॥ गमनादेव राजेन्द्र ! दीर्घसत्रमरिन्दम ! । राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ॥")

दीर्घसुरतः, पुं, (दीर्घं बहुकालव्यापकं सुरतं मैथुनं यस्य ।) कुक्कुरः । इति त्रिकाण्डशेषः ॥

दीर्घसूत्रः, त्रि, (दीर्घैण बहुकालेन सूत्रं कार्य्यारम्भो यस्य ।) चिरक्रियः । इत्यमरः ।३।१।१७॥ "अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिवः । दीर्घसूत्रस्य नृपतेः कर्म्मेहानिर्ध्रुवं भवेत् ॥ रागे द्वेषे च कामे च क्रोधे पापे च कर्म्मणि । अप्रिये चैव कर्त्तव्ये दीर्घसूत्रश्च दृश्यते ॥"
इति मत्स्यपुराणम् ॥
(आयततन्तुकम् । यथा, माघे । १० । ६१ ।
"मेखलागुणविलम्बमस्यां
दीर्घसूत्रमकरोत् परिधानम् ॥")
विस्तृते तन्तौ, क्ली ॥

दीर्घसूत्री, [न्] त्रि, (दीर्घसूत्रं बहुकालं व्याप्य कर्म्मारम्भोऽस्यस्येति । दीर्घसूत्र+इनिः ।) दीर्घसूत्रः । इति हलायुधः ॥ (यथा, गीतायाम् । १८ । २८ ।
"क्रियादी दीर्घसूत्री च कर्त्ता तामस उच्यते ।")

दीर्घस्कन्धः, पुं, (दीर्घः स्कन्धो यस्य ।) तालवृक्षः । इति राजनिर्घण्टः ॥

दीर्घा, स्त्री, (दीर्घ+टाप् ।) एलापर्णी । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
"एलापर्णी एथकपर्णी लाङ्गुली क्रोष्टुपुच्छिका । धामनिः कलशी तन्वी गूढा क्रोष्टुकमेखला ॥
दीर्घा श्वगालविन्ना सा श्रीपर्णी सिंहपुच्छिका । दीर्घमत्रा लतिशुद्धा धृतिला चित्रपर्णिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

दीर्घाध्वगः, त्रि, (दीर्घमध्वानं गच्छतीति । गम+डः ।) वेगसञ्चारः । घाउड़िया इति भाषा । उष्ट्रः, पुं । इति मेदिनी ॥ गे, ५७ ॥

दीर्घायुः, [स्] पुं, (दीर्घं आयुर्यस्य ।) शाल्मलिवृक्षः । काकः । जीवकवृक्षः । मार्कण्डेयः । चिरजीविनि, त्रि । इति मेदिनी । से, ५५ ॥ (यथा, महाभारते । ७ । ५७ । १४ । "दीर्घायुषः प्रजाः सर्व्वा युगा न म्रियते तदा ॥")
"तत्र महापाणि-पाद-पार्श्वपृष्ठसक्थ्यादशनवदनस्कन्धललाटं दीर्घाङ्गुलिपर्व्वोच्छ्वासग्रैवबाहुं विस्तीर्णभ्रूनासान्तरोष्ठं ह्रस्वजङ्घामेढ्रवृषणं गम्भीरसत्त्वस्वरनाभिमनुद्वेवह्रस्वसुपचितमहारोमशकर्णं पद्माक्षास्त्रिस्कं स्नायुसुश्लिष्टं सुहृदनुपूर्व्वाग विशुद्धमायुश्शरीरं प्रज्ञाच विशुद्धमायुर्हृदयं पुरुषं जानीयाद्दीर्घायुः सत्त्वयमिति ।"
"गूढसन्धिसिरास्नायुः संहताङ्गः स्थिरेन्द्रियः । उत्तरोत्तरसुश्लेष्मा यः स दीर्घायुरुच्यते ॥ गर्भात् प्रभृत्यरोगो यः शतैः सम्परिवीयते । शरीरज्ञानविज्ञानैः स दीर्घायुः समासतः ॥"
इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

दीर्घायुधः, पुं, (दीर्घं आयुधः ।) कुन्तास्त्रम् । इति त्रिकाण्डशेषः ॥ (दीर्घौ आयुधौ इव दन्तौ यस्य ।) शूकरः । इति शब्दमाला ॥

दीर्घायुष्यः, पुं, (दीर्घं आयुष्यं जीवनं यस्य ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

दीर्घार्कः, पुं, (दीर्घं अर्कं इव ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

दीर्घिका, स्त्री, (दीर्घैव । दीर्घा+संज्ञायां कन् । टापि अत इत्वम् ।) चिरप्रतिष्ठतजलाशयः । दीघि इति भाषा । तत्पर्य्यायः । वापी २ । इत्यमरः ।१।१०।२८। (यथा, रघुः । १६ । १३ ।
"वनेरिदानीं महिषैरसंदमः
प्रक्षालितं क्रोशति दीर्घिकाणाम् ॥")
तस्यागुणाः । गुरुत्वम् । कटुत्वम् । क्षारत्वम् । पित्तजत्वम् । कफवातनाशित्वञ्च । हिङ्गुपत्री । इति राजनिर्घण्टः ॥

दीर्घीद्वारुः, पुं, (दीर्घा द्वारुः ।) डङ्गरी । इति राजनिर्घण्टः ॥

दीर्णः, त्रि, (दॄ विदारे+क्तः ।) विदारितः । (यथा, गोः रामायणे । २ । ३६ । २६ ।
"आर्यसं हृदयं नूनं राममातुः सुसंहतम् ।
यन्न दीर्णं प्रिये पुत्रे वनवासाय निर्गते ॥")
भीतः । इति मेदिनी । णे, १६ ॥ (यथा, महाभारते । ६ । ३ । ७६ ।
"एको दीर्णां दारयति सेनां सुमहतीमपि ।
सा दीर्णामनु दीर्य्यन्ते योधाः शूरतरा अपि ॥")

दीविः, पुं, किकीदिविः । इति शब्दमाला ॥

दु, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट ।) दवति । इति दुर्गादासः ॥

दु, ट् ओ न उपतापे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-अकं च-अनिट्।) टु, दवथुः। ओ, दून:। न, दुनोति। उपताप इहोपतापीभावः उपतापीकरणञ्च। मन्मथेन दुनोमीति जयदेवः। वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्व चेतः। इति कालिदासः। इति दुर्गादासः॥

दुः, [र्] अ, निषेधः। दुःखम्। निन्दा। अवक्षेपणम्। इति दुर्गादासधृतपुरुषोत्तमदेवः॥

दुः, [स्] अ, दुःखभावनम्। क्लेशः। इति दुर्गादासधृतमेदिनी॥

दुःकूलः, पुं, (दुर्दुःखं तच्जनकं कूलं रोधो यस्मात्। एतदुत्पत्त्या तटस्य विघ्नत्वात् अस्य तथात्वम्।) चोरनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

दुःख, त् क तत्कृतौ। इति कविकल्पद्रुमः॥ (अदन्त चुरां-परं-सकं-सेट्।) विसर्गमध्यः।

"काले तड़ित्लताजाले घनपीनपयोधरे।
कान्तः सर्व्वगुणोपेतो बालेन्दुः खे न लभ्यते॥"

इति विन्दुधृतकम्। अस्यार्थः। तड़ित्लतासमूहवति घनस्थूलमेघे काले कमनीयः सर्व्वगुणोपेतो बालेन्दुः खे आकाशे न लभ्यते पक्षे हे बाले सर्व्वगुणोपेतः कान्तः प्रतिदुःखेन लभ्यते। दुःखयति दुःखापयति। मूर्द्धन्यषमध्यः। इति केचित्। तत्कृतिर्दुःखकरत्वम्। इति दुर्गादासः॥

दुःखं, क्ली, (दुर् दुष्टं खनतीति। खन+डः। यद्वा, दुःखयतीति। दुःख+पचाद्यच्।) संसारः। इति त्रिकाण्डशेषः॥ (रोगः। यथा, भावप्रकाशे अर्शोरोगाधिकारे।

"मेकाभः पीड्यते दुःखैः श्लोणितक्षयसम्भवैः।"

"दुःखे रोगैः।" इति तट्टीका॥) मनोधर्म्मविशेषः। व्यायमते आत्मगुणभेदः। तत् अधर्म्मजन्यं सचेतसां प्रतिकूलम्। इति भाषापरिच्छेदः॥ तत्पर्य्यायः। पीड़ा २ बाधा ३ व्यथा ४ व्यसनम् ५ प्रसूतिजम् ६ कष्टम् ७ कृच्छ्रम् ८ आभीलम् ९। इत्यमरः॥१।१०।३॥ अर्त्तिः १० आर्त्तिः ११ पीड़नम् १२ अवाधा १३ बाधनम् १४ व्यसनम् १५ व्यासनम् १६ विबाधनम् १७ पीड़ितम् १८ विद्वेषणम् १९। इति शब्दरत्नावली॥ *॥

"सुखं दुःखञ्च हर्षञ्च शोकञ्च मङ्गलालयम्।
मया दत्तञ्च तत्सञ्च योगिनामपि दुर्लभम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥ *॥

(दुःखन्तु आध्यात्मिकाधिदैविकाधिभौतिकभेदात् त्रिविधम्। यदुक्तं तत्त्वकौमुद्याम्। "दुःखत्रयाभिघातात्।" इति।

"दुःखानां चयं दुःखचयं तत् खलु त्रिविधं आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च। तत्र आध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम्। मानसं कामक्रोधलोभमोहभयेर्षाविषादविषयाविशेषादर्शननिबन्धनम्। सर्व्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च। तत्र आधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहावेशनिबन्धनम्। तदेतत्प्रत्यात्मवेदनीयं दुःखं रजःपरिणाममेदो न शक्यते प्रत्याख्यातुम्। तदनेन दुःखविकेचाग्नाः करणवर्त्तिना चेतनाग्रन्थेः प्रतिकूलतयाभिसम्बन्धोऽभिघातः इति। एतावता प्रतिकूलवेदनीयत्वं जिहासाहेतुरुक्तः॥")

"दुःखमेवं प्रवक्ष्यामि सच्छृणुष्व वसुन्धरे!।
उचितेनोपचारेण दुःखं मोक्षविनाशनम्॥
अहङ्कारकृतो नित्यं नरो मोहेन चावृतः।
ये मां नैव प्रपद्यन्ते ततो दुःखतरन्तु किम्॥
सर्व्वाग्नौ सर्व्वविक्रेता नमस्कारविवर्जितः।
ये च मां न प्रपद्यन्ते ततो दुःखतरन्तु किम्॥
सर्व्वान्नानि तु सिद्धानि पाकभेदन्तु कारयेत्।
अवैश्वदेवे नरोऽश्नन्ति तत्र दुःखतरन्तु किम्॥
प्राप्तकाले वैश्वदेवे दृष्टमतिथिमागतम्।
अदत्त्वा तस्य यो भुङ्क्ते तत्र दुःखतरन्तु किम्॥
असन्तुष्टस्तु वैषम्ये परदाराभिमर्शकः।
नरोपतापी मन्दात्मा तत्र दुःखतरन्तु किम्॥
अकृत्वायुर्व्वलं कर्म्म यद्दे संवसते नरः।
क्षुत्कालवश्यं प्राप्नश्च दुःखतरन्तु किम्॥
हस्त्यश्वरथयानानि गच्छमानानि पश्यति।
न वै तस्याग्रतः पृष्ठे तत्र दुःखतरन्तु किम्॥
अश्नन्ति पिण्डितं केचित् हृतग्रालिसमन्वितम्।
शुष्कान्नं केचिदश्नन्ति तत्र दुःखतरन्तु किम्॥
परवश्यास्तु गृह्यां सभासेवन्ति भूषिताः॥
केचित् क्षयेयु शैरन्ते ततो दुःखतरन्तु किम्॥
विद्वान् क्षती गुणज्ञश्च सर्व्वशास्त्रविशारदः।
केचिन्मूकाश्च जड़ाश्च तत्र दुःखतरन्तु किम्॥
विद्यमाने धने केचित् क्षपणा भोगवर्जिताः।
दरिद्रो जायते दाता तत्र दुःखतरन्तु किम्॥
पुरुषस्य द्वये भार्य्ये तयोरेका प्रसूयेत।
एकापि दुर्भगा तत्र ततो दुःखतरन्तु किम्॥
श्रुत्वा तु मानुषीं संज्ञां पञ्चभूतसमन्विताम्।
ग्रामेव न प्रपद्यन्ते ततो दुःखतरन्तु किम्॥
लब्ध्वा ब्राह्मणभावन्तु त्रयो वर्णाः सुमध्यमे!।
पापकर्म्मरता ह्यार्यास्ततो दुःखतरन्तु किम्॥
एतत्ते कथितं भद्रे! दुःखकर्म्म विनिश्चयम्।
सर्व्वभूतहितार्थाय यत्नया परिपृच्छति॥"

इति वराहपुराणम्॥ *॥

दुःखदानि यथा,—

पारतन्त्र्यम् १ व्याधिः २ मानच्युतिः ३ शत्रुः ४ कुभार्य्या ५ नैःस्वम् ६ कुग्रामवासः ७ कुस्वाभिसेवनम् ८ बहुकन्या १० दरिद्रत्वम् ११ परगृहवासः १२ वर्षाप्रवासः १३ भार्य्याद्वयम् १४ कुपुत्रः १५ दुर्जनकरग्रहणम् १६। इति कविकल्पलता॥ (तद्विपरीते, त्रि। इत्यमरः। १।४।२६॥ यथा, हरिवंशे। २२३। ४८।

"सुखानि न च दुःखानि सा न शीता न चोष्णदा॥")

दुःखदोह्या, स्त्री, (दुःखेन दुह्यते इति। दुह+"ऋहलोर्ण्यत्।" ३।४।१२४। इति ण्यत्।) दुर्दोहगवी। तत्पर्य्यायः। करटा २। इति हेमचन्द्रः। ४। ३३५॥

दुःखित:, त्रि, (दुःखं सञ्जातमस्येति तारकादित्वादितच्।) यद्वा, दुःखधानीः कर्त्तरि क्तप्रत्ययः। दुःखी। (यथा, मनौ। ८। २८८।

"वन्धनानि च सर्व्वाणि राजमार्गे निवेशयेत्।
दुःखिता यत्र दृश्येरन् विक्रियाः पापकारिणः॥")

भावे क्ते, दुःखम्। तत्र क्ली॥

दुःखी, [न्] त्रि, (दुःखमस्यास्तीति इनिः।) दुःखान्वितः। दुःखितः। यथा,—

"दुःखिनोऽदुःखिनो वापि प्राणिनो लब्धचक्षुषः।
आत्मवत् परिपश्यन्ति ते यान्ति परमां गतिम्॥
त्यक्त्वात्मसुखभोगेच्छां सर्व्वसत्त्वसुखैषिणः।
भवन्ति परदुःखेन साधवो नित्यदुःखिताः॥"

इति वह्निपुराणे ग्रिवेदपाख्यानमाधायः॥)

दुःखमम्, अ, (दुर्दुष्टं सम यत्र। "तिलदृग्रुभ्रतीतौ च।" इत्यव्ययीभावः। "सुविनिर्दुर्भ्यः सुपि।" ८।३।८८। इति षत्वम्।) निन्दनीयम्। तत्पर्य्यायः। निःषमम् २ गर्ह्यम् ३। इत्यमरः। ३।४।१४॥

दुःषमम्, त्रि, (दुःषमम्। बाहुलकात् षत्वाभावः।) असमञ्जसम्। इति त्रिकाण्डशेषः॥

दुःसङ्गा, स्त्री, (दुःखेन सङ्गतेऽसौ। दुः+सङ्ग+अच्। टाप् च।) नागदमनी। इति राजनिर्घण्टः॥ (दुःसङ्गे, त्रि। यथा, रघुः।११।२०।

"राममन्मथशरेण ताड़िता
दुःसहेन हृदये निशाचरी।
गन्धवद्विधिरचन्द्रबोधिता
बोधितेव वनितं जगाम सा॥")

दुःसाधो, [न्] ई, (दुर्दुष्टं कर्म्म साधयतीति। दुः+साधि+णिच्+इः।) दौस्साधिकः। इति शब्दरत्नमाला॥

दुःसाध्यः, त्रि, (दुःखेन साध्यते इति। दुः+साध+ण्यत्।) दुःसाध्यान्वाद्यः। दुःखेन साध्यते निष्पाद्यते यः॥ (यथा, पञ्चतन्त्रे। १। २५८।

"ततो दुर्गस्थो दुःसाध्यो रिपुर्भवति॥")

दुःस्थः, त्रि, (दुर्दुःखेन दुष्टं वा तिष्ठतीति। स्था+कः।) दुर्गतः। नष्टः। दुःखेन तिष्ठति यः। इति मेदिनी। थे, ८॥ (यथा, भागवते। १। १६। २४।

"स्त्रां दुःस्थगतपदमाप्नुहि पौरवेन्द्र
सम्यादमं यदुत रन्यमविध्यदङ्गम्॥")

दुःस्थः, त्रि, (दुःखेन तिष्ठति इति। दुः+स्था+कः।) दुर्गतः। नष्टः। दुःखेन तिष्ठति यः। इति मेदिनी। थे, ८॥ (यथा, भागवते। १। १७। ५।

दुःस्पर्शः, पुं, (दुःखेन स्पृश्यते इति। दुः+स्पृश्+"दृशेदृशः सुश्च लक्षणेऽर्थेषु खल्।" ३।३।१२६। इति कर्म्मणि खल्।) दुरालभा। इत्यमरः। २। ४। ८१॥ (अस्य पर्य्याया यथा,—

"यावो यवाशो दुःस्पर्शो बहुवर्षोऽतिदुरालभा॥"

इति वैद्यकरत्नमालायाम्॥)

लताकरञ्जः। इति राजनिर्घण्टः॥ खरस्पर्शे, त्रि। इति मेदिनी। शे, २१॥ (यथा, भागवते। ३। १७। ५।

"रवौ वायुः सुदुःस्पर्शः फूत्कारानीरयन् मुहुः।
उन्मूलयन्नगपतीन् वात्यानीको रथध्वजः॥")

दुःस्पर्शा, स्त्री, (दुःखेन स्पृश्यते इति। स्पृश्+खल्+टाप् च।) कपिकच्छुः। आकाशवल्ली। कण्टकारी। (अस्याः पर्य्यायो यथा,—

"कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका।
कण्टालिका कण्टिकिनी धावनी दहती तथा॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

दुरालभा। इति राजनिर्घण्टः॥

दुःस्फोटः, पुं, (दुर्दृष्टं स्फोटयतीति। स्फोटि+अच्।) ग्रन्थभेदः। इति हेमचन्द्रः॥३। ४५१॥

दुकूलं, क्ली, (दुष्टं कूलति आच्छोतीति। कूल+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः। पृषोदरात् साधुः। यद्वा, दु+"खनिपिज्ञादिभ्य उरोलौचौ।" उणा०। ४। ६०। इति ऊलच्। धातोः कुक् च।) चौमवस्त्रम्। (यथा, रघौ। ७। १६।

"दुकूलवासाः स वधूसमीपं
निन्ये विनीतैरवरोधरक्षैः।")

तत्पर्य्यायम्। इति मेदिनी। के, ६६॥

दुगूलम्, क्ली, (दुकूलं पृषोदरात् कस्य गः।) दुकूलम्। पट्टवस्त्रम्। इति हेमचन्द्रः॥३। ३३३॥

दुग्धम्, क्ली, (दुह्यते स्मेति। दुह+कर्म्मणि क्तः।) स्त्रीजातिस्तनजनितस्वेतवर्णद्रवविशेषः। दुध इति भाषा। तत्पर्य्यायः। क्षीरम् २ पीयूषम् ३ उधस्यम् ४ स्तन्यम् ५ पयः ६ अन्नतम् ७। इति राजनिर्घण्टः॥ बालजीवनम् ८। इति भावप्रकाशः॥ अस्य सामान्यगुणाः। स्वादुरसत्वम्। स्निग्धत्वम्। ओजःकारित्वम्। धातुवर्द्धकत्वम्। वातपित्तहरत्वम्। दृश्यत्वम्। शैत्यजनकत्वम्। गुरुत्वम्। श्लेष्मलत्वम्। पित्तकारदूषणगुणत्वञ्च॥ गोदुग्धगुणाः। प्राणधारकत्वम्। बलायुःपुरुषत्वशुक्रकारित्वम्। मेध्यत्वम्। रक्तपित्तरोगवायुनाशित्वम्। रसायनत्वञ्च॥ छागीदुग्धगुणाः। मधुरत्वम्। शीतलत्वम्। मलबन्धकारित्वम्। रक्तपित्तविकारश्वासकाससर्व्वदोषनाशित्वञ्च॥ मेषीदुग्धगुणाः। गुरुत्वम्। स्वादुत्वम्। स्निग्धत्वम्। उष्णत्वम्। कफपित्तनाशित्वञ्च॥ माहिषदुग्धगुणाः। अतिस्निग्धत्वम्। निद्राकारित्वम्। अग्निनाशित्वञ्च॥ उष्ट्रीदुग्धगुणाः। रूक्षत्वम्। उष्णत्वम्। श्लीपवातकफनाशित्वम्॥ अश्वीदुग्धगुणाः। लवणत्वम्। मधुराम्लरसत्वम्। लघुत्वञ्च॥ हस्तिनीदुग्धगुणाः। मधुरत्वम्। शुक्रकारित्वम्। कषायानुरसत्वम्। गुरुत्वञ्च॥ मानुषदुग्धगुणाः। प्राणधारकत्वम्। शरीरहितकारित्वम्। दृश्यत्वम्। स्निग्धजनकत्वञ्च॥ प्रत्यूषकाले गोदुग्धपानगुणाः। गुरुत्वम्। विष्टम्भित्वम्। दुर्জ্জरत्वम्। तस्मात् सूर्य्योदयात् परं यामं यामार्द्धमेव वा उत्तार्य्य पयो ग्राह्यम्। ततपथ्यं दीपनं लघु॥ शिवतृषावालवत्सानां पयः दोषत्वम्। एकवर्षवत्सगोदुग्धं श्वेतवर्णत्वगवर्णगोदुग्धञ्च प्रशस्तम्॥ तत्तुभक्षकमावपर्य्यभक्षकीहेयदुग्धगोदुग्धं पक्षमपक्षं वा हितकारकम्॥ पर्य्युषितदुग्धगुणाः। गुरुत्वम्। विष्टम्भित्वम्। दुर्জ্জरत्वञ्च॥ अपक्वदुग्धगुणः। प्रायोऽभिष्यन्दित्वम्। गुरुत्वञ्च॥ घृतोत्थं कफवातनाशनम्। घृतशीतं पित्तनाशनम्। धारोष्णदुग्धं अन्नतुल्यम्। क्षीरस्थदुग्धं विना सर्व्वमपक्वं दुग्धं त्याज्यम्। सलवणदुग्धं विषधर्मि नट इति ख्यातं दुग्धञ्च त्याज्यम्॥ दुग्धान्नगुणाः। पुष्टिहितत्वम्। बलकारित्वम्। पित्तनाशित्वम्। रसायनत्वञ्च॥

"घृताक्तान्नपलपिण्याकगुलत्यलवणामिषैः।
करीरदधिमात्रेच्च प्रायः क्षीरं विरुध्यते॥"

इति राजवल्लभः।

अथ चतुर्व्विधक्षीरगुणः।

"कैरव्याविकं पञ्चतमं घृतोत्थं
क्षीरं त्वजानां घृतशीतमाहुः।
दोहान्तशीतं महिषीपयस्तं
गव्यन्तु धारोष्णमिदं प्रशस्तम्॥

दृश्यं हृद्यमग्निवर्द्धनकरं पूर्व्वाह्णपीतं पयो मध्याह्ने बलदायकं रतिकरं शुक्रस्य विच्छेदनम्। वार्द्धे वह्निकरं ततो बलकरं वीर्य्यप्रदं वार्द्धके रात्रौ क्षीरमनेकदोषशमनं सेव्यं ततः सर्व्वदा॥

क्षीरं सुकूर्म्मचितयोषितं य-
दत्तप्तमेतदहितं प्रयाति।
यस्मात्तु दोषं कुरुते तदुष्णं
विषोपमं स्यादुषितं दशानाम्॥

क्षीरोष्णवे कपे क्षीरे क्षीरं स्यादमृतोपमम्। तदेव तरुणे पीतं विषवह्नि माशुगम्॥

क्षीरकाथगुणः।

चतुर्थभागं सलिलं निधाय
यन्नादृदावर्त्तितमुत्तमं तत्।
सर्व्वामयघ्नं बलपुष्टिकारि
वीर्य्यप्रदं क्षीरमतिप्रशस्तम्॥

तच्च पूर्व्वाह्णकाले स्यादपराह्णे तु माहिषम्। क्षीरं सशर्करं पथ्यं यद्वा सात्म्यञ्च सर्व्वदा॥

क्षीरं न भुञ्जीत कदाप्यतप्तं
तप्तञ्च नैतल्लवणेन सार्द्धम्।
पिष्टान्नसत्यानकमाषमुद्ग-
कोष्णातकीकन्दफलादिकैश्च॥

तथा च,

मत्स्यमांसगुडहस्तिमूलकैः
कुष्ठमावहति सेवितं पयः।
श्लीपकार्व्बुदविसर्पकुष्ठिनां
मारयत्यनुदिनं सदैव तत्॥

स्निग्धं घृतं गुरु क्षीरं सर्व्वकालं न सेवयेत्। दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नरमेव च॥ निम्बजीरादिना सैन्धं युक्तं माहिषं पयः। पुष्णाति धातवः सर्व्वे बलपुष्टिविवर्द्धनम्॥ क्षीरं बलासजनकं मधुरं चारु नवप्रसूतानाम्। रूक्षञ्च पित्तहरं करोति रक्तामयं जयति॥ मधुरं त्रिदोषशमनं क्षीरं मध्यप्रसूतानाम्। लवणं मधुरं क्षीरं विदाहजननं चिरप्रसूतानाम्॥ गुणहीनं निःसारं क्षीरं प्रथमप्रसूतानाम्। मध्यमवयसां रसायनसुरूपमिदं दुर्ब्बलतनु हृद्वानाम्॥

तासां मासत्रयादूर्द्धं गुर्व्विणीनाञ्च यत् पयः। तद्धि लवणं क्षीरं मधुरं पित्तश्लेष्महृत्॥

दुग्धाम्लं शीतलं स्वादु हृद्यं वर्णकरं गुरु। वातपित्तापहं रुच्यं दृंहणं बलवर्द्धनम्॥"

इति राजनिर्घण्टः॥

अथ भावप्रकाशोक्तसामान्यदुग्धगुणाः।

"दुग्धं सुमधुरं स्निग्धं वातपित्तहरं सरम्। सद्यःशुक्रकरं शीतं सात्म्यं सर्व्वशरीरिणाम्॥ जीवनं हृंहणं वृष्यं मेध्यं वाजीकरं परम्। वयःस्थापकमायुष्यं सन्धिकारि रसायनम्॥ विरेकवान्तिबस्तीनां तुल्यमोजोविवर्द्धनम्॥ जीर्णज्वरे मनोरोगे शीर्षमूर्च्छाभ्रमेषु च॥ यक्ष्मण्यां पाण्डुरोगे च दाहे छर्दि हृदामये। शूलोदावर्त्तगुल्मेषु वस्तिरोगे गुदाङ्कुरे॥ रक्तपित्तातिसारे च योनिरोगे भ्रमे क्लमे। गर्भस्रावे च सततं हितं सुनिवरैः स्मृतम्॥ बालवृद्धक्षतक्षीणाः क्षुद्व्यायामकृशाश्च ये। तेभ्यः सदातिप्रथितं हितमेतदुदाहृतम्॥"

इति भावप्रकाशः॥

(दुग्धोत्पत्तिविवृतिर्यथा,—

"यद् यदाहारजातन्तु रसं क्षीरशिरागुगम्। सरं जलञ्च शुक्लञ्च तथा पित्तेन संयुतम्॥ पाचितं जाठरे वह्नौ पित्तेन सह मूर्च्छितम्। पच्यमानं शिराप्राप्तं क्षीरं तद्धि पुलक!॥ तेन क्षीरमिति ख्यातमिमेषोमात्मकं पयः। अन्नतं सर्व्वभूतानां जीवनं बलवर्द्धनम्॥

हारीतः संशयापन्नः पप्रच्छ पितरं पुनः। कथं रसस्य सम्पत्तिः कथं सञ्जायते विभो!॥ कथं रक्तस्य संस्थाने क्षीरं पाण्डुत्वमीयते। कथं तत्र कुमारीणां वन्ध्यानां न कथं भवेत्॥

एवं पृष्टो महाचार्य्यः प्रोवाच मुनिपुङ्गवः। अति हर्षप्रदं पुत्र! परिपृष्टं भिषग्वर!॥ सितास्निग्धं तथा रक्तं पित्तेन पाकतां गतम्। रक्तं श्वेतत्वमायाति तथा क्षीरं सितं भवेत्॥ क्षीरनाथः कुमारीणां वन्ध्यानां न कथं भवेत्। अस्थिधातुबलं यस्मात्तस्मात् क्षीरं न जायते॥ वन्ध्यानां क्षीरनाथस्तु वातेन परिपूरितः। क्षीरञ्च न भवेत्तस्मादार्त्तवाधिक्यं यतः॥ प्रसूतासु च नारीषु रक्तेन सह स्रवते। तेन स्रोतो विमुह्यन्ति क्षीरमासु प्रवर्त्तते॥ तस्मात् सद्यः प्रसूतायां जायते स्त्रैणिकं पयः। तेन काठिन्यमायाति तस्मात्तत् परिवर्জ্জयेत्॥ पयश्चाविकृतं ग्राह्यं बलशुक्रौजनाशनम्॥"

इति हारीते प्रथमे स्थाने अष्टमेऽध्याये॥)

(कृष्णम्। तत्पर्य्यायाश्च यथा,—

"कृष्णं श्यामकं दुग्धम्।" इति च वैद्यकरत्नमालायाम्॥

दुग्धः, त्रि, (दुह + क्तः ।) प्रपूरितः । इति मेदिनी । धे, ८ । क्षतदोहः । (यथा, हरिवंशे । २ । २५ ।
"तेनेयं गौर्मेहाराज ! दुग्धा ग्रस्यानि भारत ! ।"
दुह + भावे क्तः ।) दोहने, क्ली ॥

दुग्धकूपिका, स्त्री, (दुग्धकूपः साधनत्वेनास्त्यस्या इति । दुग्धकूप + ठन् । टाप् ।) पिष्टकविशेषः । यथा,—
"तण्डुलचूर्णविमिश्रितनवचीरेण साम्द्रपिष्टेन ।
डुकूपिकां विदध्यात्ताम्र पचेत् सर्पिषा सम्यक् ॥
अथ तां कौरितमध्यां घनपयसा पूर्णगर्भाच्च ।
ग्रक्तसुन्नितवदनां तप्तहतेन पक्वदनाच्च ।
अतिपाण्डुखण्डपाके क्षपयेत् कर्पूरवासिते
कुशलः ॥"
अस्या गुणाः ।
"अथ दुग्धकूपिका सा बल्या पित्तानिलापहा ।
हृद्या प्रीता गुर्व्वी शुक्रकरी तर्पणी रुच्या ।
विदधाति कायपुष्टिं दाहं दूरप्रसारिणीरम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे २ भागे ॥

दुग्धतालीयं, क्ली, (दुग्धस्य तालाय प्रतिष्ठायै हितम् । दुग्धताल + छः ।) दुग्धाज्यम् । चीरफेनः । इति मेदिनी । ये, १३३ । दुग्धाज्यम् । इति हेमचन्द्रः ॥

दुग्धपाचनं, क्ली, (पच्यतेऽस्मिन्निति । पच् + अधिकरणे ल्युट् । दुग्धस्य पाचनं पात्रम् ।) दुग्धपाकपात्रम् । तत्पर्य्यायः । वचकम् २ । इति हारावली । २२० ॥

दुग्धपाषाणः, पुं, (दुग्धं चीरं पाषाण इव कठिनं यस्य ।) दृग्धविशेषः । शिरगोला इति भाषा । तत्पर्य्यायः । दुग्धपाषाणकः २ दुग्धाश्मा ३ चीरी ४ गोमेदसन्निभः ५ वज्राभः ६ दीप्तिकः ७ दुग्धी ८ चीरवयः ९ । अस्य गुणाः । रूक्षत्वम् । ईषदुष्णत्वम् । ज्वरपित्तरक्तदोषगरशूलकासाधागविनाशित्वञ्च । इति राजनिर्घण्टः ॥

दुग्धपुच्छी, स्त्री, (दुग्धवत् शुभ्रं पुच्छं मूलदेशो यस्याः । गौरादित्वात् ङीष् ।) दृग्धविशेषः । दुग्धपेया इति ख्याता । तत्पर्य्यायः । क्षीरकाकुः २ निशा ३ भद्रा ४ नक्तह्वरी ५ । इति शब्दचन्द्रिका ॥

दुग्धफेनः, पुं, (दुग्धस्य फेन इव फेनो यत्र ।) चीरद्विक्षीरः । तत्पर्य्यायः । शार्करः २ । इति राजनिर्घण्टः ॥

दुग्धफेनी, स्त्री, (दुग्धवत् शुभ्रः फेनो यस्याः । गौरादित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पयःफेनी २ फेनदुग्धा ३ पयस्विनी ४ तूतारिः ५ व्रणकेतुश्री ६ गोजापर्णी ७ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । शिशिरत्वम् । विषव्रणनाशित्वम् । रूक्षत्वम् । युक्ता रसायनत्वञ्च । इति राजनिर्घण्टः ॥

दुग्धबीजा, स्त्री, (दुग्धवत् शुभ्रं बीजं यस्याः ।) यावनालाद्यलतातप्रतण्डुलचिपिटः । अस्या गुणाः । सुमधुरत्वम् । दुर्जरत्वम् । वीर्य्यपुष्टिदाढत्वञ्च । इति राजनिर्घण्टः ॥

दुग्धाक्षः, पुं, (दुग्धवत् शुभ्रं अक्षं नेत्रं चिह्नविशेषो यस्य ।) उपलविशेषः । इति शब्दार्थकल्पतरुः ॥

दुग्धाब्धितनया, स्त्री, (दुग्धाब्धेः क्षीरसमुद्रस्य तनया ।) लक्ष्मीः । इति कविकल्पलता ॥

दुग्धाश्मा, [न्] पुं, (दुग्धं क्षीरं अश्मा प्रस्तर इव कठिनं यस्य ।) दुग्धपाषाणः । इति राजनिर्घण्टः ॥

दुग्धिका, स्त्री, (दुग्धं निर्य्यासो बहुलतया विद्यते यस्याः । दुग्ध + ठन् । टाप् च ।) दृग्धविशेषः । दुधी इति दुधाचीर इति च भाषा । तत्पर्य्यायः । स्वादुपर्णी २ क्षीरावी ३ क्षीरिणी ४ दुग्धी ५ क्षीरी ६ क्षीरालिका ७ । इति शब्दरत्नावली ॥ अस्या गुणाः । उष्णत्वम् । गुरुत्वम् । रूक्षत्वम् । वातलत्वम् । गर्भकारित्वम् । स्वादुक्षीरत्वम् । कटुत्वम् । तिक्तत्वम् । मलमूत्रोपसर्गकारित्वम् । पटुत्वम् । स्वादुत्वम् । विदग्धित्वम् । दृष्यत्वम् । कफकुष्ठव्रणनाशित्वञ्च । इति भावप्रकाशः । दृग्धभेदः । गन्धिका इति ख्याता । तत्पर्य्यायः । उत्तमा २ युग्मफला ३ उत्तमफलिनी ४ । इति रत्नमाला ॥

दुग्धिनिका, स्त्री, रक्तापामार्गः । इति राजनिर्घण्टः ॥

दुग्धी, स्त्री, (दुग्धं क्षीरं बहुलतया अस्त्यस्या इति । अर्शं आद्यच् । ततो गौरादित्वात् ङीष् ।) क्षीरावी । इति मेदिनी । धे, ८ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।
"उत्तमा दुग्धिका दुग्धी फलोत्तमा फलिन्यपि ॥")
दुग्धपाषाणः । इति राजनिर्घण्टः ॥

दुच्छकः, पुं, (दुः उपतापे + भावे क्विप् तुक् च । दुत् उपतापः । तन्निराकरणे शक्नोतीति । शक + पचाद्यच् ।) सुरागमगन्धद्रव्यम् । विहारादावकाशकः । इति मेदिनी । के, १०५ ॥

दुड़िः, स्त्री, (दुलिः + लस्य डः ।) दुलिः । कच्छपी । इत्यमरटीकायां रायमुकुटः ॥

दुड्डुकः, त्रि, दुरुचित्तः । इति शब्दार्थकल्पतरुः ॥

दुड्डुभः, पुं, (द्रोढति मज्जतीति । द्रुढ मज्जने + "उभः कित् कुकिद्रडिभ्यां कनुग्णौ रलोपश्च ।" १ । ४४० । इति उणादिकोषटीकाधृतसूत्रात् उभः णुन् रलोपश्च ।) डुड्डुभसर्पः । इत्युणादिकोषः । (यथा, महाभारते । ६ । १५४ । १०० ।
"शरभौनां महारौद्रां प्रासशक्त्युद्यतडुड्डुभाम् ।"
"श्रोत्रितौघवहां घोरां द्रोढिः प्रावर्त्तयन्नदीम् ।") ॥

दुदमः, पुं, (दुर् दुष्टो दमः । पृषोदरादित्वात् रलोपः ।) हरितपत्राङ्कः । इत्यमरः । २ । ४ । १४८ ॥

दुन्दमः, पुं, (दुन्द इत्यव्यक्तशब्देन मदति शब्दायते इति । मद शब्दे + डः ।) दुन्दुभिः । इति शब्दरत्नावली ॥

दुन्दुः, पुं, वसुदेवः । इति त्रिकाण्डशेषः । दुन्दुभिवाद्यम् । इति शब्दरत्नावली ॥

दुन्दुभिः, पुं, (दुन्द इत्यव्यक्तशब्देन भातीति । भा + बाहुलकात् किः ।) हरहरढक्का । तत्पर्य्यायः । गेरी २ आनकः ३ । इत्यमरः । १ । ७ । ६ ॥ (यथा, महाभारते । १ । १२३ । ४६ ।
"आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः ॥")
वरुणः । दैत्यभेदः । इति मेदिनी । मे, १६ । (दानवविशेषः । यथा, हरिवंशे । ३ । ८१ ।
"अभवन् दशपुत्राश्च शूरा सौवीरपराक्रमाः ।"
"शुष्कश्चर्मो विदारश्च गवेष्टो दुन्दुभिस्तथा ॥")
रथभेदः । वाद्यभेदः । इति शब्दरत्नावली ॥ विषम् । इति हेमचन्द्रः । २ । २०७ ॥ (कुकुरवंशीयस्य अन्धकस्य पुत्रः । यथा, भागवते । ९ । २४ । २० ।
"अन्धकाद्दुन्दुभिस्तस्मादविद्योतः पुनर्व्वसुः ॥"
क्रौञ्चद्वीपाधिपतेर्द्युतिमतः पुत्राणामन्यतमः ।
क्रौञ्चद्वीपस्य देशभेदश्च । यथा, ब्रह्माण्डे ३६ अध्याये ।
"सुनिश्च दुन्दुभिश्चैव सुता द्युतिमतस्तु वै ।
तेषाञ्च नामभिर्देशाः क्रौञ्चद्वीपाश्रयाः स्मृताः ॥"
"सुनेस्तु सुनिर्देशो वै दुन्दुभेर्दुन्दुभिः स्मृतः ॥"
पर्व्वतविशेषः । यथा, मत्स्यपुराणे ।१२१।१६।
"स एव दुन्दुभिर्नाम श्यामपर्व्वतसन्निभः ।
शब्दवद्भः पुरा तस्मिन् दुन्दुभिर्भाषितः सुरैः ॥"
असुरविशेषः । यथा, रामायणे । ४ । ६ । ४ ।
"मायावी नाम तेजस्वी पूर्व्वजो दुन्दुभेः सुतः ।
तेन तस्य महद्वैरं बलिनः क्षीवतं पुरा ॥")

दुन्दुभिः, स्त्री, अक्षः । पाशकः । इत्यमरः । ३ । ३ । १३५ ॥ अक्षे पाशकविषये दानविशेषो विन्ति इति ख्यातः । इति केचित् ॥ अक्षविन्दुविकल्पयम् । इति रभसः ॥ विन्दन्तिवस्तुन्यर्थान् सर्व्वान् इन्द्रादिमयत्वेनोपकरणं पाशटो इति ख्याता । इति केचित् ॥ इति तट्टीकायां भरतः ॥

दुन्दुमारः, पुं, शुन्शुमारः । इति शब्दार्थकल्पतरुः ॥

दुरदृष्टं, क्ली, (दुर्दृष्टमेवस्वार्थे कन् ।) दुर्भाग्यम् । इति क्षितितत्त्वे ॥

दुरध्वः, पुं, (दुर्दुष्टोऽध्वा । "उपसर्गादध्वनः ।" ५ । ४ । ८५ । इति अच् ।) कुपथः । इत्यमरः । २ । १ । १६ ॥

दुरभियहः, पुं, (दुर्दुःखेन आभिमुख्येन ग्रहणेऽस्यौ इति । दुर् + अभि + ग्रह + खल् ।) अभागः । इति राजनिर्घण्टः ॥ (दुरभि + ग्रह + कर्म्मणि खल् ।) दुःखग्राह्ये, त्रि ॥

दुरभियहा, स्त्री, (दुरभियह + टाप् ।) कपिकच्छुः । दुरालभा । इति राजनिर्घण्टः ॥

दुराकः, पुं, (दुनोतीति । दु न उपतापे + "आकः । खजादेः स तु कित् ।" १ । २१६ । इति उणादिकोषटीकाधृतसूत्रात् आकप्रत्ययेन निपातनात् साधुः ।) म्लेच्छभेदः । इत्युणादिकोषः ॥

दुराचारः, पुं, (आचर्य्यते इति भावे घञ् । दुष्टं आचारः इति प्रादिसमासः ।) विरुद्धाचरणम् । यथा, अध्यात्मरामायणे ।
"प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः ।
दुराचाररताः सर्व्वे सत्यशौचपराङ्मुखाः ॥"

(दुष्ट आचारो यस्य।) निन्दिताचारवति, त्रि॥ (यथा, देवीभागवते। १। ११। १६।
"महापातकयुक्तत्वं दुराचारोऽतिगर्हितः॥")

दुराधर्षः, पुं, (दुष्टान् यज्ञविघ्नकारिराक्षसादीन् आधर्षति दूरीकरोतीति। धृष्+अच्।) गौरसर्षपः। इति राजनिर्घण्टः॥ (विष्णुः। यथा, महाभारते। १३। १४६। २२।
"अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्।"
"दैत्यादिभिर्धर्षयितुं न शक्यते इति दुराधर्षः।" इति तद्भाष्ये शङ्करः॥ दुःखेन वा ईषदपि धर्षयितुमशक्यः इति। धृष्+"ईषद्दुःसुष्विति। ३। ३। १२६। इति खल्।) अधर्षणीये, त्रि॥ (यथा, महाभारते। ६। १६। ३२।
"भीमसेनो गदां भीमां प्रकर्षन् परिवोपमाम्।
प्रकर्षं महासैन्यं दुराधर्षो महामनाः॥")

दुराधर्षा, स्त्री, (दुराधर्ष+स्त्रियां टाप्।) कुटुम्बिनीवृक्षः। इति राजनिर्घण्टः॥

दुरारुहः, पुं, (दुःखेन आरुह्यते इति। दुर्+आ+रुह+घञर्थे कर्म्मणि कः।) विल्वः। नारिकेलः। इति राजनिर्घण्टः॥ (दुःखारोहणीये, त्रि। यथा, महाभारते। ३। १४७। ६१।
"क्व वा त्वयाद्य गन्तव्यं ब्रूहि पुरुषर्षभ!।
अतःपरमगम्योऽयं पर्व्वतः सुदुरारुहः॥")

दुरारुहा, स्त्री, (दुरारुह+टाप्।) खर्জ্জুरी। इति राजनिर्घण्टः॥

दुरारोहः, पुं क्ली, (दुःखेन आरुह्यते इति। रुह+कर्म्मणि खल्।) प्ररटः। इति राजनिर्घण्टः॥ दुःखारोहणीये, त्रि॥ (यथा, महाभारते। ४। ५। १४।
"इयं कूटे मनुष्येन्द्र! गहने महती ग्रमी।
भौमग्राखा दुरारोहा ग्रग्राणस्य समीपतः॥")

दुरारोहा, स्त्री, (दुरारोह+टाप्।) ग्राम्यलिङ्गिनी वृक्षः। इति चिकित्सासंग्रहः॥ श्रीवल्ली। इति राजनिर्घण्टः॥

दुरालभा, स्त्री, (दुःखेन आलभ्यते गृह्यते खण्ड्यते वासौ। दुर्+आ+लभ+खल्+टाप्। आगमविधेरनित्यत्वात् न नुम्।) खनामख्यातकण्टकयुक्तक्षुद्रवृक्षविशेषः। स यथासप्रभेदः। हिङ्गुया इति ख्याता। तत्पर्य्यायः। दुरालम्भा २ धन्वयासः ३ ताम्रमूला ४ कक्कुरा ५ दुस्पर्शा ६ धन्वी ७ धन्वयवासकः ८ प्रबोधनी ९ क्षुद्रपत्रा १० विरूपा ११ दुरभिग्रहा १२ दुर्लभा १३ दुःप्रधर्षा १४। इति राजनिर्घण्टः॥ यासः १५ यवासः १६ दुस्पर्शः १७ कुनाशकः १८ गोदनी १९ अनन्ता २० वसुदान्ता २१। इत्यमरः। २। ४। ६२॥ गान्धारी २२ काषाया २३। इति भावप्रकाशः॥ धन्वयासः २४ युवसः २५ कच्छुरा २६। इति शब्दरत्नावली॥ विकण्टकः २७। इति जटाधरः॥ (पद्मसखी २८। इति शब्दचन्द्रिका॥) अस्या गुणाः। सारत्वम्। व्वरच्छर्द्दिश्लेष्मपित्तविसर्पवेदनानाशित्वञ्च। इति राजवल्लभः॥ कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। चारत्वम्। अम्लत्वम्। मधुरत्वम्। वातगुल्मप्रमेहनाशित्वञ्च। इति राजनिर्घण्टः॥
"यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा॥"
इति भावप्रकाशः॥
(गङ्गा। यथा, काशीखण्डे। २६। ८८।
"दीर्घव्रता दीर्घदृष्टिर्दीप्ततोया दुरालभा॥")

दुरालम्भनीये, त्रि॥

दुरालम्भा, स्त्री, (दुःखेन आलभ्यते इति। दुर्+आ+लभ+खल्+नुम् च।) दुरालभा। इति राजनिर्घण्टः॥ (यथा, महाभारते। १३। ६८। ३१।
"तीक्ष्णवीर्य्यास्तु भूतानां दुरालम्भाः सकण्टकाः।
रक्तभूयिष्ठवर्णाश्च क्षणाच्चैवोपहारयेत्॥")

दुरालापः, पुं, (दुष्टः आलापः इति प्रादिसमासः।) गालिः। इति शब्दार्थकल्पतरुः॥

दुरासदः, त्रि, (दुःखेन आसद्यते इति। दुर्+आ+सद्+"ईषद्दुःसुष्विति।" ३। ३। १२६। इति खल्।) दुष्प्राप्यः। यथा,—
"दुरासदो दुर्विषहो भूतानां स बभूव ह॥"
इति श्रीभागवतम्॥
(यथा च, देवीभागवते। १। १०। ३२।
"धर्म्मस्य पुरतः प्राप्ते कामभावे दुरासदे॥"
(दुष्प्रवेशः। यथा, माघे। १६। १०।
"घनजालनिभैर्दुरासदाः
परितो नागकदम्बकैस्तव।
नगरेषु भवन्तु वीथयः
परिकीर्णा वनजैर्मृगादिभिः॥")

दुरितं, क्ली, (दुष्ट भावे+क्तः। दुष्टमितं गमनं नरकादिदुर्गतिप्राप्तिर्यस्मात्।) पापम्। इत्यमरः। १। ४। २३॥ (यथा, रघौ। ८। २।
"दुरितैरपि कर्त्तुमात्मसात्
प्रयतन्ते नृपसूनवो हि यत्॥")
तद्वति, त्रि॥

दुरितदमनी, स्त्री, (दुरितं पापं दम्यते यया इति। दम+करणे ल्युट्। ङीप् च।) भ्रमी। इति राजनिर्घण्टः॥ (दम+ल्युः।) पापनाशिनी च॥

दुरिष्टकृत्, पुं, (दुरिष्टम् अभिचारयज्ञं करोतीति। दुरिष्ट+कृ+क्विप् तुगागमश्च।) अभिचारकर्त्ता। तस्य नरकं यथा,—
"देवद्विजपितॄन् हित्वा रतदूषयिता च यः।
स याति कृमिभक्षे वै कृमीणे च दुरिष्टकृत्॥"
इति विष्णुपुराणे। २। ६। १४॥
"दुरिष्टकृत् अभिचारकर्त्ता।" इति तट्टीका॥

दुरिष्टः, त्रि, (दुर्+इष्टन्।) अतिमन्दः। अयमनयोरेषां वा अतिग्रयेन दुः निन्दितः। इति व्याकरणम्॥

दुरीषणा, स्त्री, (दुष्टेषा ईषणा इच्छाभिर्ग्रसनम्। प्रादिसमासः।) ग्रासः। इति शब्दार्थकल्पतरुः॥

दुरूहः, त्रि, (दुःखेन ऊह्यते इति। दुर्+ऊह+कर्म्मणि खल्।) दुर्विज्ञेयः। यथा,—
"काव्यप्रकाशस्य दुरूहपङ्क्ती-
र्गदाधरो व्याकुरुते प्रयत्नात्।"
इति गदाधरभट्टाचार्य्यकृतकाव्यप्रकाशटीका॥

दुरोदरं, क्ली, (दुर्दुष्टमासमन्तादुदरं यस्य। दुष्टमुदरमस्य वा। दृषोदरादित्वात् साधुः।) द्यूतभेदः। पाशकक्रीड़ा। इत्यमरः। २। ३। १०१॥ (यथा, वक्रोक्तिपञ्चाशिकायाम्। २६।
"व्यर्थं किं तनुषे दुरोदरमिदं न स्वापतेयं तव॥")

दुरोदरः, पुं, (दुष्टं व्या समन्तात् उदरं यस्य।) द्यूतकृत्। (यथा, महाभारते। २। ५६। ६।
"दुरोदरा विहिता ये तु तत्र
महात्मना धृतराष्ट्रेण राज्ञा॥")
पणः। इति मेदिनी। रे, २६०॥

दुर्गं, क्ली, (दुःखेन गच्छत्यत्र। दुर्+गम+"शुदुरोरधिकरणे।" ३। २। ४८। इतस्य वार्त्तिकोक्त्या डः।) पर्व्वतादिभिर्दुर्गमं पुरम्। इत्यमरः। २। ८। १७॥ गढ़ इति केल्লা इति च भाषा। तत्पर्य्यायः। कोट्टम् २। यथा,—
"स्कन्धावारो राजधानी कोट्टदुर्गे पुरः समे॥"
इति हेमचन्द्रः॥
"अथ कोट्टी राजधानी राजधानकमित्यपि।"
इति शब्दरत्नावली।
"पुरं दुर्गमधिष्ठानं कोट्टोऽस्त्री राजधान्यपि।"
इति जटाधरः॥
तत्तु षड्विधम्। यथा,—
"तत्र दुर्गं नृपः कुर्य्यात् वक्ष्यामेकतमं बुधः।
धन्वदुर्गं महीदुर्गं नरदुर्गं तथैव च॥
वार्क्षञ्चैवाम्बुदुर्गञ्च गिरिदुर्गञ्च पार्थिव!।
सर्व्वेषाञ्चैव दुर्गाणां गिरिदुर्गं प्रशस्यते॥
दुर्गञ्च परिखोपेतं वप्राट्टालकसंयुतम्।
शतघ्नीयन्त्रसम्पन्नं शतशस्त्र समावृतम्॥"
इति मात्स्ये १६१ अध्यायः॥
राजसत्कर्त्तव्यावश्यकालं तच्छुभाशुभत्वञ्च यथा,—
"दुर्गाणि सततं कुर्य्यात् प्राकाराट्टालतोरणैः।
दूषितान्नगराद्राजा दुर्गं दुर्गाश्रयं चरेत्॥
दुर्गं वज्रं नृपाणान्तु नित्यं दुर्गं प्रशस्यते।
शतमेको योधयति दुर्गस्थो यो धनुर्द्धरः॥
शतं दश सहस्राणि तस्मात् दुर्गं प्रशस्यते।
जलदुर्गं भूमिदुर्गं वृक्षदुर्गं तथैव च॥
अरण्यवनदुर्गञ्च शैलजं परिखोद्भवम्।
दुर्गं कार्य्यं नृपतिना यथायोग्यं स्वदेशतः॥
दुर्गं कुर्व्वन् पुरं कुर्य्यात् त्रिकोणं धनुराकृति।
वर्त्तुलं वा चतुष्कोणं नान्यथा नगरं चरेत्॥
शतदण्डाकृति दुर्गे सततं कुलनाशनम्॥
यथा राक्षसराजस्य लङ्कादुर्गा जिता पुरा॥
बले पुरी शोणिताख्यं तेजो दुर्गे प्रतिष्ठितम्।
यस्मात् शत्रुनाकारमती भवश्रियो बाल॥
सौभाग्यं शाल्वराजस्य नगरं मधकोणकम्
दिवि यद्भ्रमते राजंस्तच्च भ्रमं भविष्यति॥

यत्रायोध्याऽयं भूप! पुरमिक्ष्वाकुभूसुताम्।
धनुराकृति तत्रापि ततोऽभूद्विजयप्रदम्॥
दुर्गभूमौ यजेद्दुर्गां दिक्पालांश्चैव द्वारतः।
पूजयित्वा विधानेन जयं भूपः समाप्नुयात्॥
अतो दुर्गं नृपः कुर्य्यात् सततं जयवृद्धये॥"
इति कालिकापुराणे राजनीतिविशेषः ८५ अ:॥
(शैलभेदः। यथा, कालिकापुराणे। ७४ अ:।
"यत्र दुर्गाऽऽलयं शैलं शिवस्यास्ते महत्तरम्॥")
दुर्गः, पुं, असुरभेदः। यं हत्वा चण्डिकाया दुर्गेति नामाभूत्। इति काशीखण्डम्॥ (यथा, हरिवंशे। १६४। ६।
"विन्ध्यवासिनीं दुर्गान्नीं रणदुर्गां रणप्रियाम्॥"
विष्णुः। यथा, महाभारते। १३। १४६। ६६।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥")
गुगमुलुः। इति राजनिर्घण्टः॥ (दुःखेन गम्यते अत्रेति। दुर्+गम्+अधिकरणे डः।) दुर्गमे, त्रि। इति मेदिनी। गे, ६॥
दुर्गकारकं, क्ली, (निजशत्रुतवेष्टनेन दुर्गं करोतीति। कृ+"ण्वुल्तृचौ।"३। १। ३३। इति ण्वुल्।) वृक्षविशेषः। इति शब्दमाला। दुर्गकर्त्तरि, त्रि॥
दुर्गतः, त्रि, (दुर्+दुरवस्थां गच्छति स्मेति। दुर्+गम्+"गत्यर्थाकर्म्मकश्लिषेति।" ३। ४। ७२। इति कर्त्तरि क्तः।) दरिद्रः। इत्यमरः। ३। १। ४६॥ (यथा आर्य्यासप्तशत्याम्। २६६।
"दुर्गतगृहिणी तनये करुणार्द्रा प्रियतमे च रागमयी।
सुखा रताभियोगं न मन्यते न प्रतिक्षिपति॥")
दुर्गतिः, स्त्री, (दुष्टा क्लेशदायिनी गतिः।) नरकः। इत्यमरः। १। ६। १॥ (यथा, देवीभागवते। ३। १२। ६८।
"कृत्वा यज्ञं विधानेन दत्त्वा पुत्रं सखाग्निकम्।
समुद्धर महाराज! पितरं दुर्गतिं गतम्॥")
दारिद्र्यम्। इति मेदिनी। ते, ११५॥ (यथा, महाभारते। १३। ७०। ८।
"कथं भवान् दुर्गतिमीदृशीं गतो
नरेन्द्र तद्ब्रूहि किमेतदीदृशम्॥")
दुर्गतिनाशिनी, स्त्री, (दुर्गतिं नाशयतीति। नश+णिच्+णिनिः+ङीप्।) दुर्गा। यथा,—
"ब्रह्माऽहविषयस्यास्य कवचस्य प्रजापतिः।
ऋषिश्छन्दश्च गायत्री देवी दुर्गतिनाशिनी॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम्॥
दुर्गन्धं, क्ली, (दुर्दुष्टो गन्धो यस्य।) सौवर्चललवणम्। इति हेमचन्द्रः। ६। २७॥
दुर्गन्धः, पुं, (दुष्टो गन्धः।) दुष्टगन्धः। तत्पर्य्यायः। पूतिगन्धिः २। इत्यमरः।१।५।१२॥ (यथा, सुश्रुते। १। ३०।
"सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धिताम्।
यो वा गन्धान्न जानाति गतासुं तं विनिर्दिशेत्॥")
आम्रवृक्षः। इति शब्दचन्द्रिका॥ पलाण्डुः। इति भावप्रकाशः॥ (दुर्दुष्टो गन्धो यत्र।) दुष्टगन्धयुक्ते, त्रि॥ (यथा, मार्कण्डेये। ८। ८१।
"अथाजगाम त्वरितो धर्म्मश्चाऽऽलरूपधृक्।
दुर्गन्धो विकृतो रूक्षः श्मश्रुलो दुन्दुरो घृणी॥")
दुर्गन्धी, [न्] त्रि, (दुर्गन्धोऽस्यस्येति। दुर्गन्ध+इनिः।) दुर्गन्धयुक्तः। इत्यमरटीकायां रायमुकुटः॥ (यथा, मनुः। ६। ७६।
"अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम्।
चर्म्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः॥")
दुर्गपृष्पी, स्त्री, (दुर्गं दुष्प्राप्यं पुष्पं यस्याः। जातित्वात् ङीष्।) वृक्षविशेषः। केशपुष्पा इति ख्याता। तत्पर्य्यायः। मानसी २ वालाची ३ केशधारिणी ४। इति शब्दचन्द्रिका॥
दुर्गमः, त्रि, (दुर्दुःखेन गम्यते इति। दुर्+गम+"इषुगमियमो छः।" ३। ३। १२६। इति खल्।) दुर्गः। दुःखेन गमनीयस्थानादि। इति शब्दमाला॥ (यथा, महाभारते। ६। १४। ३५।
"मार्ग्यतेः केऽभरक्षन्त गच्छन्तो दुर्गमां गतिम्॥"
दुर्दुःखेन गम्यते ज्ञायते इति। दुर्ज्ञेयः। यथा, महाभारते। १३। १४। २६५।
"नमो वृषभवाहाय गजेन्द्रगमनाय च।
दुर्गमाय नमस्तुभ्यमगम्यागमनाय च॥"
पुं, विष्णुः। यथा, तत्रैव। १३। १४६। ६६।
विष्णुसहस्रनामकीर्त्तने।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥"
असुरविशेषः। यथा, मार्कण्डेये। ८१। ४४।
"तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम्॥"
क्ली, वनम्। सङ्कटस्थलम्। यथा, महाभारते। १। ८१। ३०।
"राजायं नाहुषस्तात दुर्गमे माभिमन्यतु॥")
दुर्गलङ्घनः, पुं, (दुर्गं दुर्गमस्थानं मरुभूम्यादि लङ्घतेऽनेनेति। लङ्घ+करणे ल्युट्।) उष्ट्रः। इति हेमचन्द्रः। ४। ३२०॥
दुर्गसञ्चरः, पुं, (दुर्गे दुर्गमस्थानं मरुभूम्यादि सञ्चर्य्यतेऽनेनेति। सम्+चर+पुंसीति घः।) संक्रमः। इत्यमरः। ३। २। २५॥ साँको इति भाषा॥
दुर्गसञ्चारः, पुं, (दुर्गं मरुभूम्यादिपारदुर्गमस्थानं सञ्चर्य्यते गम्यतेऽनेनेति। सम्+चर+घञ्।) दुर्गसञ्चरः। इत्यमरटीकायां स्वामी॥
दुर्गा, स्त्री, (दुर्दुःखेन गम्यते प्राप्यतेऽसौ। गम+अन्यत्रापि दृश्यते। इति डः। दुर्दुःखेन गम्यतेऽस्यामिति। दुर्+गम+"सुदुरोरधिकरणे।" ३।२।४८। इत्यस्य वार्त्तिकोक्त्या डः। ततष्टाप्।) नीली। इति मेदिनी। गे, ६॥ अपराजिता। इति शब्दचन्द्रिका॥ श्यामापक्षी। इति राजनिर्घण्टः॥ (नववर्षा कुमारी। यथा, देवीभागवते। ३। २६। ४३।
"नववर्षा भवेद्दुर्गा सुभद्रा दशवार्षिकी॥"
अस्याः पूजाफलमाह। तत्रैव। ३। २६। ५०।
"दुःखदारिद्र्यनाशाय संग्रामे विजयाय च।
क्रूरग्रहविनाशार्थं तथोग्रकर्म्मसाधने॥
दुर्गाञ्च पूजयेद्भक्त्या परलोकसुखाय च॥"
अस्याः पूजामन्त्रं यथा, तत्रैव। ३। २६। ६०।
"दुर्गां त्रायति भक्तं या सदा दुर्गार्त्तिनाशिनी।
दुर्गेया सर्व्वदेवानां तां दुर्गां पूजयाम्यहम्॥")
हिमालयकन्या। सा शिवभार्य्या गणेशकार्त्तिकेयोर्माता च। तत्पर्य्यायः।
उमा २ कात्यायनी ३ गौरी ४ काली ५ हैमवती ६ ईश्वरी ७ शिवा ८ भवानी ९ रुद्राणी १० सर्व्वाणी ११ सर्व्वमङ्गला १२ अपर्णा १३ पार्व्वती १४ दुर्गा १५ चण्डिका १६ अम्बिका १७। इत्यमरः।१।१।३८॥ शारदा १८ चण्डी १९ चण्डवती २० चण्डा २१ चण्डनायिका २२ गिरिजा २३ मङ्गला २४ नारायणी २५ महामाया २६ वैष्णवी २७ महेश्वरी २८ महादेवी २९ शिवा ३० ईश्वरी ३१ कौट्टवी ३२ वटी ३३ माधवी ३४ नगनन्दिनी ३५ जयन्ती ३६ भार्गवी ३७ रम्भा ३८ सिंहरथा ३९ सती ४० भ्रामरी ४१ दक्षकन्या ४२ महिषमर्द्दिनी ४३ हैरम्बजननी ४४ सावित्री ४५ कृष्णपिङ्गला ४६ वृषाकपायी ४७ उमा ४८ हिमशैलजा ४९ कार्त्तिकेयप्रसूः ५० आद्या ५१ नित्या ५२ विद्या ५३ शुभङ्करी ५४ सात्त्विकी ५५ राजसी ५६ तामसी ५७ भीमा ५८ नन्दनन्दिनी ५९ महामायी ६० शूलधरा ६१ सुनन्दा ६२ शुम्भघातिनी ६३। इति शब्दरत्नावली॥ ह्रीः ६४ पर्व्वतराजतनया ६५ हिमालयसुता ६६ महेश्वरवनिता ६७। इति कविकल्पलता॥ सत्या ६८ भगवती ६९ ईशाना ७० सनातनी ७१ महाकाली ७२ शिवानी ७३ हरवल्लभा ७४ उग्रचण्डा ७५ चामुण्डा ७६ विधात्री ७७ आनन्दा ७८ महामात्रा ७९ महासुद्रा ८० माकरी ८१ भौमी ८२ कल्याणी ८३ क्षमा ८४ मानदात्री ८५ मदालसा ८६ मानिनी ८७ चार्व्वङ्गी ८८ वाणी ८९ ईशा ९० वलेशी ९१ भ्रमरी ९२ भूम्या ९३ फाल्गुनी ९४ यती ९५ ब्रह्ममयी ९६ भाविनी ९७ देवी ९८ अचिन्ता ९९ त्रिनेत्रा १०० त्रिशूला १०१ चर्च्चिका १०२ तीव्रा १०३ नन्दिनी १०४ नन्दा १०५ धरित्रिणी १०६ माल्का १०७ चिदानन्दस्वरूपिणी १०८ मनस्विनी १०९ महादेवी ११० निद्रारूपा १११ भवानिका ११२ तारा ११३ नीलसरस्वती ११४ कालिका ११५ उग्रतारा ११६ कामेश्वरी ११७ सुन्दरी ११८ भैरवी ११९ राजराजेश्वरी १२० भुवनेशी १२१ त्वरिता १२२ महालक्ष्मीः १२३ राजीवलोचनी १२४ धनदा १२५ वागीश्वरी १२६ त्रिपुरा १२७ ज्वालामुखी १२८ वगलामुखी १२९ सिद्धविद्या १३० अन्नपूर्णा १३१ विशालाक्षी १३२ सुभगा १३३ सगुणा १३४ निर्गुणा १३५ धवला १३६ गीतिः १३७ गीतवाद्यप्रिया १३८ अट्टालवासिनी १३९ अट्टहासिनी १४० घोरा १४१ प्रेमा १४२ वटेश्वरी १४३ कौशिकी १४४ वृद्धिदा १४५ अवीरा १४६ पल्लितालयवासिनी १४७ मलिता १४८ संवत्सरा १४९ क्षणरूपा १५० बलि-

प्रिया १५१ तुलसी १५२ कामिनी १५३ कामरूपा १५४ पुण्यदा १५५ विष्णुचक्रधरा १५६ पञ्चमी १५७ वृन्दावनस्वरूपिणी १५८ अयोध्यारूपिणी १५९ मायावती १६० जीमूतवसना १६१ जगन्नाथस्वरूपिणी १६२ क्षत्रियसना १६३ त्रियामा १६४ जमलार्जुनी १६५ यामिनी १६६ यशोदा १६७ यादवी १६८ जगती १६९ छाया १७० सत्यभामा १७१ सुभद्रिका १७२ लक्ष्मणा १७३ दिगम्बरी १७४ एणुका १७५ तीक्ष्णा १७६ आचारा १७७ अक्रूरा १७८ जाह्नवी १७९ गरुडी १८० धेया १८१ नृभगी १८२ मोहिनी १८३ विकारा १८४ अक्षरवासिनी १८५ अंशका १८६ पत्रिका १८७ पवित्रिका १८८ तुलसी १८९ अतुला १९० जानकी १९१ वन्द्या १९२ कामना १९३ नारसिंही १९४ शिरीषा १९५ साध्वी १९६ कल्याणी १९७ कमला १९८ कान्ता १९९ श्रान्ता २०० फुला २०१ वेदमाता २०२ कर्म्मदा २०३ सन्ध्या २०४ त्रिपुरसुन्दरी २०५ रासेशी २०६ दक्षयज्ञविनाशिनी २०७ अनन्ता २०८ धर्म्मेश्वरी २०९ चक्रेश्वरी २१० खञ्जना २११ विदग्धा २१२ कृत्तिका २१३ चित्रा २१४ सुवेशा २१५ चतुर्भुजा २१६ राका २१७ प्रज्ञा २१८ ऋद्धिदा २१९ तापिनी २२० तपा २२१ सुमनसा २२२ दूती २२३ । इति तस्याः सहस्रनामान्तर्गतः ॥

अथ दुर्गानाम्नो व्युत्पत्तिर्यथा,—

"दुर्गो दैत्ये महाविघ्ने भवबन्धे कुकर्म्मणि ।
शोके दुःखे च नरके यमदण्डे च जन्मनि ॥
महाभयेऽतिरोगे चाप्याद्यशब्दो ह्यन्तवाचकः ।
एतान् हन्त्येव या देवी सा दुर्गा परिकीर्त्तिता ॥"

अपि च ।

"दैत्यनाशार्थवचनो दकारः परिकीर्त्तितः ।
उकारो विघ्ननाशस्य वाचको वेदसम्मतः ॥
रेफो रोगघ्नवचनो गश्च पापघ्नवाचकः ।
भयशत्रुघ्नवचनश्चाकारः परिकीर्त्तितः ॥
श्रुत्युक्तिश्रवणाद्यस्या ऋते नश्यन्ति निश्चितम् ।
ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्त्तिता ॥
दुर्गेति दैत्यवचनोऽप्याकारो नाशवाचकः ।
दुर्गं नाशयति या नित्यं सा दुर्गा वा प्रकीर्त्तिता ॥
विपत्तिवाचको दुर्गश्चाकारो नाशवाचकः ।
तं नाशयेत् पुरा तेन दुर्गेदुर्गा प्रकीर्त्तिता ॥"*॥

अस्याः स्वरूपं यथा, नन्दं प्रति श्रीकृष्णवाक्यम् ।

"आद्या नारायणी शक्तिः सृष्टिस्थितान्तकारिणी ।
करोमि च यया सृष्टिं यया ब्रह्मादिदेवताः ॥
यया जयति विश्वञ्च यया सृष्टिः प्रजायते ।
यया विना जगन्नास्ति मया दत्ता शिवाय सा ॥
दया निद्रा च तृष्णा च क्षुधा ब्रह्मा क्षमा धृतिः ।
तुष्टिः पुष्टिस्तथा भ्रान्तिर्जन्माधिदेवता हि सा ॥
वैकुण्ठे सा महालक्ष्मीर्गोलोके राधिका सती ।
सर्व्वे लक्ष्म्यश्च क्षीरोदे दक्षकन्या सतो च सा ॥
सा दुर्गा मेनकाकन्या दैत्यदुर्गतिनाशिनी ।
सर्व्वलक्ष्म्यश्च दुर्गा सा प्रकीर्त्तितेयं मया मुने ॥
सा वाणी सा च सावित्री विप्राधिष्ठातृदेवता ।
वह्नौ सा दाहिका शक्तिः प्रभाशक्तिश्च भास्करे ॥
शोभा शक्तिः पूर्णचन्द्रे जले शक्तिश्च शीतला ।
शस्यप्रसूतिशक्तिश्च धारणा च धरासु सा ॥
ब्राह्मण्यशक्तिर्विप्रेषु देवशक्तिः सुरेषु सा ।
तपस्विनां तपस्या सा गृहिणां गृहदेवता ॥
मुक्तिप्रदाश्च मुक्तानां माया सांसारिकस्य सा ।
मद्भक्तानां भक्तिप्रदा मयि भक्तिप्रदा सदा ॥
कृपाणां राज्यलक्ष्मीश्च वणिजां लभ्यरूपिणी ।
पारे सांसारसिन्धूनां तरी दुस्तरतारिणी ॥
सतां सद्बुद्धिरूपा च मेधाशक्तिस्वरूपिणी ।
आस्थाशक्तिः श्रुतौ शास्त्रे दाक्षशक्तिश्च दक्षतु ॥
चन्द्रादीनां विप्रभक्तिः पतिभक्तिः सतीषु च ।
एवंरूपा च या शक्तिर्मया दत्ता शिवाय सा ॥"

अपि च, शङ्करं प्रति पार्व्वतीवाक्यम् ।

"वैकुण्ठे चाहं महालक्ष्मीर्गोलोके राधिका स्वयम् ॥
शिवाहं शिवलोकेऽपि ब्रह्मलोके सरस्वती ।
अहं निहत्य दैत्यांश्च दक्षकन्या सती पुरा ।
तस्मिन्नन्या पुरा त्यक्ता सा चाहं शैलकन्यका ।
रत्नवीजस्य युद्धे च काली च मूर्त्तिभेदतः ॥
सावित्री वेदमाताहं सीता जनककन्यका ।
रुक्मिणी द्वारवत्याञ्च भारते भीष्मकन्यका ॥
सुदामः शापतो देवात् तुलसीभाग्यतां गता ॥
धर्म्मपत्नी च सत्यस्य पुण्ये वृन्दावने वने ॥"*॥

अपरञ्च, शङ्खं प्रति पार्व्वतीवाक्यम् ।

"एकाहं राधिकारूपा गोलोके रासमण्डले ।
रासशून्यञ्च गोलोकं परिपूर्णं कुरु प्रभो ! ॥
परिपूर्णतमाहञ्च तव वक्षःस्थलस्थिता ।
तवाज्ञया महालक्ष्मीरहं वैकुण्ठवासिनी ।
सरस्वती च तत्रैव वामपार्श्वे हरेरपि ॥
तवाहं मनसा जाता सिन्धुकन्या तवाज्ञया ।
सावित्री वेदमाताहं कलया विधिसन्निधौ ॥
तेजःसु सर्व्वदेवानां पुरा सत्ये तवाज्ञया ।
अधिष्ठानं कृतं तत्र धृतं दिव्यं शरीरकम् ॥
शुम्भादयश्च दैत्याश्च निहताश्चावलीलया ।
दुर्गां निहत्य दुर्गाहं त्रिपुरा त्रिपुरे वधे ॥
निहत्य रक्तबीजञ्च रक्तबीजविनाशिनी ।
तवाज्ञया दक्षकन्या सती सत्यस्वरूपिणी ।
योगेन त्यक्ता देहञ्च शैलजाहं तवाज्ञया ।
त्वया दत्ता शङ्कराय गोलोके रासमण्डले ॥
विष्णुभक्तिरहं तेन विष्णुमाया च वैष्णवी ।
नारायणस्य मायाहं तेन नारायणी स्मृता ॥
लक्ष्म्याद्याधिकाहञ्च राधाधिष्ठातृदेवता ।
महद्विष्णोश्च रासे च जननी राधिका स्वयम् ॥
तवाज्ञया पञ्चधाहं पञ्चप्रकृतिरूपिणी ।
कलाकलांशयाश्चैव देवपत्न्यो यदे यदे ॥"*॥

अथ तस्याः पूजाप्रकाशः ।

"प्रथमे पूजिता सा च कृष्णेन परमात्मना ।
वृन्दावने च वृन्दादौ गोलोके रासमण्डले ॥
मधुकैटभभीतेन ब्रह्मणा सा द्वितीयतः ।
त्रिपुरप्रेषितेनैव तृतीये त्रिपुरारिणा ॥
सुरत्रिया महेन्द्रेण शापाद्दुर्व्वाससः पुरा ।
चतुर्थे पूजिता देवी ब्रह्मणा भगवती सदा ॥
तदा मुनीन्द्रैः सिद्धेन्द्रैर्देवैश्च मनुमानवैः ।
पूजिता सर्व्वविघ्नेषु बभूव सर्व्वतः सदा ॥
तेजःसु सर्व्वदेवानामाविर्भूता पुरा मुने ! ।
सर्व्वे देवा ददुस्तस्यै शस्त्राण्यि भूषणानि च ॥
दुर्गादयश्च दैत्याश्च निहता दुर्गया तया ।
दत्तं स्वाराज्यं देवेभ्यो वरञ्च यदभीप्सितम् ॥
कालान्तरे पूजिता सा सुरथेन महात्मना ।
राज्ञा मेधसरिच्छ्रेष्ठे नद्यामाश्च सरित्तटे ।
मेधादिभिश्च मुनिभिः शस्यसारैश्च गन्धकैः ।
शङ्खैर्मौनैश्च कुशकैः पत्रिभिर्बलिभिर्मुने ॥
वेदोक्तानि च दत्त्वैवमुपचाराणि षोडश ।
धृत्वा च कवचं ध्यात्वा संपूज्य च विधानतः ॥
राजा लब्ध्वा परीहारं वरं प्राप यथेप्सितम् ।
मुक्तिं सम्प्राप वैश्यश्च संपूज्य च सरित्तटे ।
तुष्टाव राजा वैश्यश्च साश्रुनेत्रः पुटाञ्जलिः ।
विससर्ज्ज नद्यामेतां गभीरे निर्म्मले जले ॥
नद्यम्भो लवणमयीं दृष्ट्वा जलधौतां नराधिपः ।
वरोद तत्र वैश्यश्च ततः स्थानान्तरं ययौ ॥
त्यक्त्वा देहञ्च वैश्यश्च पुष्करे दुष्करं तपः ।
लब्ध्वा जगाम गोलोकं दुर्गादेवीवरेण च ।
राजा ययौ स्वराज्यञ्च पूज्यो निष्कण्टकं बली ।
भोगञ्च भुक्त्वे भूपः षष्टिवर्षसहस्रकम् ॥
भार्य्यां स्वराज्ये संन्यस्य पुत्रे च कालयोगतः ।
मनुर्बभूव सावर्णिस्तत्रा च पुष्करे तपः ॥
इत्येवं कथितं वत्स ! समासेन यथागमम् ।
दुर्गाख्यानं मुनिश्रेष्ठ ! किं भूयः श्रोतुमिच्छसि ॥"

इति ब्रह्मवैवर्त्तपुराणम् ॥

अथ दुर्गापूजाविधिः ।

"शरत्काले महापूजा क्रियते या च वार्षिकी ।
शारदीया महापूजा चतुःकर्म्ममयी शुभा ॥
तां तिथित्रयमासाद्य कुर्य्याद्भक्त्या विधानतः ॥
चतुःकर्म्ममयी स्नपनपूजनबलिदानहोमरूपा सा च प्रतिवर्षं कर्त्तव्या ।

'द्विशरीरे वरे चैव लग्ने केन्द्रगते रवौ ।
वर्षे वर्षे विधातव्यं स्थापनञ्च विसर्ज्जनम् ॥
यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे ।
न पूजयति दम्भाद्वा देवाद्वाप्यथ भैरव ! ॥
क्रुद्धा भगवती तस्य कामानिष्टान् निहन्ति वै ॥'

दीक्षा अकरणे प्रत्यवायश्रुतेश्च सा पूजा नित्या विधिसमभिव्याहृतमन्त्रश्रुतेः काम्या च ।

यथा,—

'कृत्वैवं परमामापुर्निर्वृतिं त्रिदिवौकसः ।
एवमन्यैरपि सदा देवाः कार्य्यं प्रपूजनम् ॥
विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकम् ।'

काम्यतया पूजने तत्तत्प्रयुक्तानित्यपूजासिद्धिः । तत्तद्वचनात् कृष्णजन्मवन्यादिप्रतिपदादिषष्ठ्यादिसंप्रत्यादिमहाष्टम्यादिकैवलमहाष्टमीकैवलमहानवमीपूजारूपाः कल्पा उन्नेयाः । तदनन्तरमशौचमपि न प्रतिबन्धकम् ॥*॥ सा पूजा त्रिविधा । यथा,—

'शारदी चण्डिकापूजा त्रिविधा परिगीयते ।

सात्त्विकी राजसी चैव तामसी चेति विश्रुतिः ॥
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः ।
माहात्म्यं भगवत्याश्च पुराणादिषु कीर्तितम् ॥
पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनास्तथा ।
देवीसूक्तजपश्चैव यज्ञो वह्नितु तर्पणम् ॥
राजसी बलिदानैश्च नैवेद्यैः सामिषैस्तथा ।
सुरामांसादुपाहारैर्जपयज्ञैर्विना तु या ॥
विना मन्त्रैस्तामसी स्यात् किरातानान्तु सम्मता ।
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च सेवकैः ॥
एवं नानाविधैर्यज्ञैः पूज्यते सर्वदस्युभिः ।
स्वयं वाप्यन्यतो वापि पूजयेत् पूजयेत वा ॥
अर्चकस्य तपोयोगादर्चनस्यातिशायनात् ।
आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छति ॥'

अथ नवम्यादिकल्पः ।

'इषे माससिते पक्षे कन्याराशिगते रवौ ।
नवम्यां बोधयेद्देवीं क्रीडाकौतुकमङ्गलैः ॥
ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां विल्वाभिमन्त्रणम् ।
सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ॥
पूर्वाषाढ़युतायान्तु पूजाहोमादुपोषणम् ।
उत्तरेण नवम्यान्तु बलिभिः पूजयेच्छिवाम् ॥
श्रवणेन दशम्यान्तु प्रतिपत्य विसर्जयेत् ॥'

प्रतिवर्षं कन्यार्के कर्तव्यत्वानुपपत्तेः सिंहार्केऽपि बोधनं तुलार्केऽपि स्थापनादिकं क्रियते चान्द्रत्वात् कन्यार्के मलमासे न तदारभ्यते यदि पूर्वमारब्धं तदा मलमासेऽपि पूजादेवीमाहात्म्यपाठादिकं प्रवृद्धं कर्तव्यमेव ।

'यावद्भूर्वायुराकाशं जलं वह्निश्च तिष्ठति ।
तावच्च चण्डिकापूजा भविष्यति सदा भुवि ॥'

तत्र ज्ञानवम्यां देवत्वात्मत्वेन पूर्वाह्णे बोधनम् । उभयदिने पूर्वाह्णे नवमीलाभे पूर्वदिने आर्द्रानुरोधे तु पूर्वाह्णं विना दिवामात्रे युग्मादरं विनापि परदिने बोधनं उभयदिने पूर्वाह्णे नवम्यार्द्रालाभे पूर्वदिने बोधनं युग्मात् ।

'कन्यादिमीनपर्यन्तं यत्र संप्राप्यते शिवः ।
तत्र बोधः प्रकर्तव्यो देवा राज्ञां शुभप्रदः ॥'

बोधनमन्त्रो यथा,—

'इषे माससिते पक्षे नवम्यामार्द्रयोगतः ।
श्रीवृक्षे बोधयामि त्वां यावत् पूजां करोम्यहम् ॥
ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देवास्त्वयि कृतः पुरा ।
अहमप्यद्यिने तद्वद्बोधयामि सुरेश्वरीम् ।
प्रक्रियापि च सम्बोध्य प्राप्तं राज्यं सुरालये ॥
तस्मादहं त्वां प्रतिबोधयामि
विभूतिराज्यप्रतिपादनेतोः ।
यथैव रामेण हतो दशास्य-
स्तथैव शत्रून् विनिपातयामि ॥

षष्ठीबोधने तु अहमद्यादिने षष्ठ्यां सायाह्ने बोधयाम्यत इति पठनीयम् ॥ * ॥

अथ प्रतिपदादिकल्पः ।

'आश्विने शुक्लपक्षे तु कर्तव्यं नवरात्रकम् ।
प्रतिपदादिकल्पेनैव यावच्च नवमी भवेत् ॥'

प्रतिपदादितत्तत्तिथिषु ज्ञात्यमाह भविष्ये ।

'केशसंस्कारदत्याभि प्रदद्यात् प्रतिपद्दिने ।
पट्टडोरं द्वितीयायां केशसंयमदेतवे ।
दर्पणञ्च तृतीयायां सिन्दूराक्तकं तथा ॥
मधुपर्कं चतुर्थ्यान्तु तिलकं नेत्रमञ्जनम् ।
पञ्चम्यामङ्गरागञ्च शुक्लाम्बरयुगानि च ।
षष्ठ्यां विल्वतरौ बोधं सायं सन्ध्यासु कारयेत् ।
सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत् ॥
उपोषणमथाष्टम्यामष्टशूक्तैः प्रपूजनम् ।
नवम्यासुपचक्रायाखड्डेदाचैव दिवा ॥
पूजा च बलिदानञ्च तद्वन्मातृः प्रपूजयेत्
कुमारी पूजनीया च भूषणीया च भूषणैः ॥
संपूज्य प्रेषणं कुर्यात् दशम्यां श्रावरोत्सवैः ।
अनेन विधिना यस्तु देवीं प्रीणयते नरः ॥
स्कन्दवत् पालयेत्तस्तु देवी सर्वापदि स्थितम् ।
पुत्रदारधनर्द्धीनां संख्या तस्य न विद्यते ।
भुक्त्वेह परमान् भोगान् प्रेत्य देवीगणो भवेत् ॥'

अथ षष्ठ्यादिकल्पः ।

'बोधयेद्विल्वशाखायां षष्ठ्यां देवीं नवेषु च ।
सप्तम्यां विल्वशाखान्तामाहृत्य प्रतिपूजयेत् ॥
पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ।
जागरञ्च स्वयं कुर्यात् बलिदानं महानिशि ॥
प्रभूतबलिदानञ्च नवम्यां विधिवच्चरेत् ।
श्यामेदृशभुजां देवीं दुर्गामन्त्रेण पूजयेत् ॥
विसर्जनं दशम्यान्तु कुर्याद्वै श्रावरोत्सवैः ।
धात्रीकदंबविल्वैः क्रीडाकौतुकमङ्गलैः ॥
भगलिङ्गाभिधानेन भगलिङ्गप्रगीतकैः ।
भगलिङ्गाभ्यधाभिश्च कुर्याच्च दशमीदिने ।'*॥

नवमीबोधनासामर्थ्ये षष्ठ्यां सायं बोधनं यथा,

'षष्ठ्यां विल्वतरौ बोधं सायंसन्ध्यासु कारयेत् ॥'

षष्ठ्यां बोधनामन्त्रकरणेऽपि पत्रीप्रवेशपूर्वदिने सायं षष्ठीलाभे एकादेवोभयकरणं यदा तु पूर्वदिने सायं षष्ठीलाभः परदिने सायं विना षष्ठीलाभस्तदा पूर्वेद्युर्बोधनं परदिने सायमामन्त्रणम् । यदा तूभयदिने सायं षष्ठीलाभस्तदा परेऽह्नि षष्ठ्यां बोधनम् । उभयदिने सायं षष्ठ्यभावे पूर्वाह्णेऽपि षष्ठ्यां बोधनम् । आमन्त्रणमन्त्रस्तु ।

'मेरुमन्दरकैलासहिमवच्छिखरे गिरौ ।
जातः श्रीफलवृक्ष त्वमम्बिकायाः सदा प्रियः ॥
श्रीशैलशृङ्गिखरे जातः श्रीफलः श्रीनिकेतनः ।
नेतयोऽसि मया मन्त्रैः पूज्यो दुर्गास्वरूपतः ॥
सायं षष्ठ्यान्तु कर्तव्यं पार्वत्या अधिवासनम् ।
षष्ठ्यभावेऽपि कर्तव्यं सप्तम्यामपि नारद ! ॥'*॥

अथ सप्तम्यादिकल्पः ।

'आश्विने शुक्लपक्षे तु सप्तम्यादिदिनत्रये ।
तत्र पूजा विशेषेण कर्तव्या मम मानवैः ॥
विशेषं तत्र वक्ष्यामि शृणु पुत्रक ! मन्मतम् ।
सप्तम्यां पत्रिकापूजा रम्भादिनवभिर्युता ॥
महीमयी च मूर्तिर्मे पुत्रायुधनवद्वये ।
अष्टमी वा महापुण्या तिथिः प्रीतिकरी मम ॥
कुर्यात्तत्र महाज्ञानं पशुबलियुतैस्तथा ।
गायत्रीभिः कवायेश्च मन्त्रादेस्तैश्चतुर्विधैः ॥
ओषधीभिश्च सर्वाभिर्भृङ्गराजैः कलसैस्तथा
पुष्पैरन्यादितोयैश्च गन्धैर्मलयजैस्तथा ॥
गीतवादित्रनादेन स्नापयेन्माञ्च भक्तितः ।
पूजा सदुपहारैश्च नैवेद्यैश्च मनोहरैः ॥
बिल्वपत्रैर्घृतास्तैश्च तिलधान्यादिसंयुतैः ।
जुहुयाज्ज्वलिते वह्नौ तस्य पुण्यफलं शृणु ॥
संसारे यानि सौख्यानि कान्यानि नरपुङ्गव ! ।
दीर्घमायुर्यशः पुत्रं विपुलं धनधान्यकम् ॥
लभते मत्प्रसादेन अन्ते मम पुरं व्रजेत् ।
बलिस्तत्र विशेषेण देयो मत्प्रीतये नरैः ॥
अनेन विधिना यस्तु नवमीमतिवाहयेत् ।
भुक्त्वेह च विपुलान् भोगानन्ते शिवपुरं व्रजेत् ॥
ततः सप्तम्यां मूलयुक्तायां केवलायां वा पूर्वाह्णे पत्रीप्रवेशः उभयत्र पूर्वाह्णे सप्तमीलाभे परत्र

'युगाद्या वर्षर्तवश्च सप्तमी पार्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥'

पूर्वाह्णे नवपत्रिका शुभकरी सर्वार्थसिद्धिप्रदा
आरोग्यं धनदा करोति विजयं चण्डीप्रवेशे शुभा ।
मध्याह्ने जनपीड़नक्षयकरी संग्रामघोरावहा
सायाह्ने वधबन्धनानि कलहं सर्पन्ति सर्वदा ॥
सप्तम्यामक्षगायां यदि विशति गृहं पत्रिका श्रीफलाढ्या
राज्ञः सप्ताङ्गराज्यं जनसुखमखिलं हन्ति मूलानुरोधात् ।
तस्मात् सूर्योदयस्थां नरपतिशुभदां सप्तमीं प्राप्य देवीं
भूपालो वेशयेत्तां सकलजनहितां राज्यवर्षं विधाय ॥

लिङ्गस्थां पूजयेद्देवीं मङ्गलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पावकें प्रतिमासु च ।
चित्रे च विल्वशिखे खड्गे जलस्थाञ्चापि पूजयेत् ॥'

स्नात्वा यथाविधि विधौतकरानवाङ्मुराचम्य सम्यगमलाम्बरयुग्मधरः प्रागानतो धनददिग्दनोऽथवापि वह्न्यासनो गणपतिञ्च गुरुञ्च नत्वा ।

'कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत् ।
सोपवासो निशार्द्धे तु महाविभवविस्तरैः ॥
पूजां समारभेद्देव्या नवमे वासरेऽपि वा ।
पशुघातश्च कर्तव्यो नवम्यामवधन्यथा ॥'

उक्तवचने पशुघातश्च कर्तव्य इति श्रुतेः ।

'अष्टम्यां रुधिरैर्मांसैः कुसुमैश्च सुगन्धिभिः ।
पूजयेद्बहुजातीयैर्बलिभिर्भोजनैः शिवाम् ॥'

इति कालिकापुराणाच्च ॥

'अष्टम्यां बलिदानेन पुत्रनाशो भवेद्ध्रुवम् ।'

इति देवीपुराणीयं सन्धिपूजाबलिदानपरम् ॥ ततपूजायां उभयतिथिकर्तव्यत्वेन तद्विधिरत्र नवम्यां सावकाशत्वात् । ततपूजाविधानन्तु कालिकापुराणे वचनान्तरम् ।

'अष्टमीनवमीसन्धौ द्वितीया खलु कथ्यते ।
तत्र पूज्या त्वहं पुत्र ! योगिनीगणसंयुता ।
उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् ।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत् ॥

मूलेन प्रतिपूजयेद्भगवतीं चण्डीं प्रचण्डाकृति-
चाष्टाभिर्मुण्डसंयतधिया भक्त्या समा-
राध्य च।
ग्रामापामुक्षमज्जगोक्षरुधिरैः छत्वा नवम्यां
बलिं
नैवेद्यं भवनं तिथिश्च दशमीं संप्राप्य संप्रेषयेत्।
भगवत्याः प्रवेशादिविसर्गान्तांश्च याः क्रियाः।
तिथाइदयगामिन्यां सर्वास्ताः कारयेद्बुधः॥'
अशौचयुक्तौ नीलपटिकामात्रतिथौ सम्यक्पूज-
नासामर्थ्ये कालिकापुराणम्।
'सम्यक् कर्त्तोदितां पूजां यदि कर्त्तुं न शक्यते।
उपचारांस्तदा दातुं पत्रैतान् वितरेत्तदा॥
गन्धं पुष्पञ्च धूपञ्च दीपं नैवेद्यमेव च।
अभावे गन्धपुष्पाभ्यां तदभावे च भक्तितः॥
संक्षेपपूजा कथिता तथा वस्त्रादिकं पुनः॥
प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत्।
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत्॥'
अत्र प्रातःपदं पूर्वाह्णपरम्।
'अतो प्रपूजयेद्देवीं सप्तम्यादिदिनत्रये।
अशक्तौ चतुरश्रोभिर्वा ह्यावहद्विशुद्धितिथेः॥'
अशक्तावुपवासः पुत्रवतो ग्रहस्थस्य निषिद्धः।
यथा कालिकापुराणम्।
'उपवासं महाष्टम्यां पुत्रवान् समाचरेत्।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत्॥
नवम्यां बलिदानन्तु कर्त्तव्यं वै यथाविधि।
जपं होमञ्च विधिवत् कुर्य्यात्तत्र विभूतये॥'
अथ नवम्यां होमश्रुतेः पूर्वाह्णाद्युत्तराष्टम्यां
पूजाहोमाद्युपोषणं इति श्रुतेश्च उभयत्र एक-
तरस्मिन् वा होमः शारदायाः पूजाया नवम्यामेव
दक्षिणा देया॥*॥
अथाष्टम्यादिकेवलमहाष्टमी केवलमहानवमी-
कल्पा यथा,—
'भद्रकाल्यां घटे छत्वा तत्र संपूजयेद् द्विजः।
आश्विने शुक्लपक्षस्य चाष्टम्यां नियतव्रतः॥
उपोषितो द्वितीयेऽह्नि पूजयेत् पुनरेव ताम्॥'
इति विष्णुधर्म्मोत्तरम्॥
'यस्येकस्यामथाष्टम्यां नवम्यां वाथ साधकः।
पूजयेद्वरदां देवीं शुद्धभावेन चेतसा॥'
इति कालिकापुराणम्॥*॥
दुर्गायाः ध्यानं यथा,—
'जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम्॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम्।
नवयौवनसम्पन्नां सर्व्वाभरणभूषिताम्॥
सुचारुदशनां तद्वत् पीनोन्नतपयोधराम्।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्द्दिनीम्॥
त्रयोदशायतसंयुक्तैर्दशबाहुसमन्विताम्।
त्रिशूलं दक्षिणे भागे खड्गं चक्रं क्रमादधः॥
तीक्ष्णबाणं तथा शक्तिं दक्षभागे निवेशयेत्।
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च॥
घण्टां वा परशुं वापि वामतः संनिवेशयेत्।
अधस्तान्महिषं तद्वच्छिरश्चैव प्रदर्शयेत्॥
शिरश्चैवोद्भवं तद्वद्दानवं खड्गपाणिनम्।
हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम्॥
रक्तरक्तीकृताङ्गञ्च रक्तविस्फुरितेक्षणम्।
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम्॥
सपाशवामहस्तेन धृतकेशञ्च दुर्गया।
वमद्रुधिरवक्त्रञ्च देयाः सिंहं प्रदर्शयेत्॥
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम्।
किञ्चिदूर्द्धं तथा वाममङ्गुष्ठं महिषोपरि॥
प्रभुशक्तिकरीं देवीं देवदानवदर्पहाम्।
प्रसन्नवदनां देवीं सर्व्वकामफलप्रदाम्॥
स्तूयमानञ्च तद्रूपममरैः सन्निवेशयेत्॥
उपचारा प्रचण्डा च चण्डोग्रा चण्डनायिका।
चण्डा चण्डवती चैव चण्डरूपातिचण्डिका॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम्।
चिन्तयेत् सततं दुर्गां धर्म्मकामार्थमोक्षदाम्॥'
इति ध्यात्वा महाज्ञानपूर्व्वकषोढ़ोपचारा-
दिना बलिदानादिभिः पूजयित्वा आवरणं
पूजयेत्॥*॥

अथ दशमीकृत्यम्।

'संपूज्य प्रेषणं कुर्य्याद्दशम्यां श्रावणोत्तरे।'
देवीयात्राकाले निर्म्मल्यविधिमाह पूजारत्ना-
करे देवीपुराणम्।
'भक्त्या पिष्टप्रदीपाद्यैश्चूताश्वत्थादिपल्लवैः।
ओषधीभिश्च मेध्याभिः सर्व्वबीजैर्यवादिभिः॥
नवम्यां पर्व्वकाले तु यात्राकाले विशेषतः।
यः कुर्य्यात् अहया वीर! देव्या नीराजनं नरः॥
ग्रहभेर्य्यादिनिर्घोषैर्जयशब्दैश्च पुष्कलैः।
यावतो दिवसान् वीर! देव्यै नीराजनं कृतम्॥
तावत्कालसहस्राणि दुर्गालोके महीयते।
यस्तु कुर्य्यात् प्रदीपेन सूर्य्यलोके महीयते॥*॥
तद्दिने अपराजितापूजनम्। यथा,—
'आश्विने शुक्लपक्षस्य दशम्यां पूजयेत्तथा।
एकादश्यां न कुर्व्वीत पूजनञ्चापराजितम्॥'
तद्दिने राजा यात्रां कुर्य्यात्। यथा,—
'दशमीं यः समुद्दिश्य प्रस्थानं कुरुते नृपः।
तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत्॥'
स्वयमशक्तौ खड्गादियात्रा कर्त्तव्या। यथा,—
'कार्य्यवशात्स्वयमक्षमे भूभर्त्तुः केचिदाहुरा-
चार्य्याः।
छत्रायुधाद्यमिश्रं वैजयिकं विर्गमे कुर्य्यात्॥'*॥
खड्गलक्षणफलादिर्यथा,—
'हस्तागते तु मित्रे यया दिशा खड्गं यात्रां
नृपः पश्येत्।
तया प्रयातस्य क्षिप्रमरातिर्व्वध्रसुपैति॥
छत्रा नीराजनं राज्ञा बलदृद्ध्यै यथाक्रमम्।
शोभनं खड्गं पश्येत् जलगोगोलसन्निधौ॥
अश्वेषु गोषु गजवाजिमहीरगेषु
राज्यप्रदः कुशलदः क्षितिपाङ्गनेषु
भक्षास्थिकेशनखलोमसु वीक्षितो ह्यो
दुःखं ददाति बहुशः खलु खड्गरोटः॥
अशुभं खड्गं दृष्ट्वा देवब्राह्मणपूजनम्।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः॥

अथ विसर्জ্জনম্।

'नौयानेनेरयानैर्व्वा नीत्वा भगवतीं शिवाम्।
लोलोजले प्रक्षिपेयुः क्रीड़ाकौतुकमङ्गलैः॥
परैर्नाक्षिप्यते यस्तु परं नाक्षिपते तु यः।
तस्य दत्ता भगवती शापं दद्यात् सुदारुणम्॥"
इति तिथ्यादितत्त्वदुर्गार्चातत्त्वे॥
विसर्জ্জनमन्त्रो यथा,—
"दुर्गे देवि जगन्मातः! स्वस्थानं गच्छ पूजिते।
संवत्सरव्यतीते तु पुनरागमनाय वै॥
विमर्জ্জनाम्भसि देवि त्वं चण्डिकाप्रतिमा शुभा।
पुत्रायुर्धनदृद्ध्यर्थं स्थापितासि जले मया॥"*॥
विसर्জ্জनानन्तरं गृहमागत्य अक्षिस्रावधारणं
कृत्वा घटस्थजलेन एभिर्म्मन्त्रैर्यजमानमभि-
षिञ्चेत्। यथा,—
"ॐ उत्तिष्ठ ब्रह्मणस्पते देवा यज्ञमवन्तुमे उप-
प्रयन्तु मरुतः सुदानव इन्द्रप्रातर्भवासचा॥
ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणः प्रभुः॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतस्तथा॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहितो ह्येते दिक्पालाः पान्तु ते सदा॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः॥
एतास्त्वामभिषिञ्चन्तु धर्म्मपत्न्यः सुसंयताः।
आदित्यश्चन्द्रमा भौमो बुधश्चोशनसार्कजाः॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः।
ऋषयो मुनयो गावो देवमातर एव च॥
देवपत्न्योऽप्सरो नागा दैत्याश्चाप्सरसां गणाः।
अस्त्राणि सर्व्वशस्त्राणि राजानो वाहनानि च॥
औषधानि च रत्नानि कालस्यावयवाश्च ये।
सरितः सागराः शैलास्तीर्थानि जलदा ह्रदाः॥
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः।
एते त्वामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये॥"
इति तन्त्रान्तरेश्वरपुराणपद्धतिः॥*॥

अथ दुर्गानाममाहात्म्यम्।

"तवर्गस्य तृतीयोऽर्णः पञ्चमस्वरसंयुतः।
वकर्गस्य तृतीयोऽर्णो बिन्दुरेखोपरि स्थितः॥
द्वितीयस्वरसंयुक्तं नामेदं परिकीर्त्तितम्।
आरोग्यस्य च सम्पत्तेर्नामेदं परमो हेतुर्मुक्तये भवभक्तिनाम्।
कलिकाले विशेषेण महापातकिनामपि॥
निस्सारबीजं विघ्नेयं नामसंसारं प्रिये!॥
परदारहरोऽपि स्यात् परद्रव्यापहारकः।
सोऽपि पापात् प्रमुच्येत यदि स्यादतिपानकी॥
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
एतेभ्योऽपि विमुच्येत यदि नाम स्मरेत् सुधीः॥"
इति रुद्रयामले॥
"दुर्गा दुर्गेति दुर्गेति दुर्गानाम परं मनुम्।
यो जपेत् सततं भक्त्या जीवन्मुक्तः स मानवः॥
महोत्पाते महारोगे महाविपदि सङ्कटे।
महाभयेषु सर्व्वेषु महाभयसमुत्थिते॥

यः स्मरेत् सततं दुर्गां जपेत् यः परमं मनुम् ।
स जीवन्मोक्षो देवेशि! लोकरक्षत्वमवाप्नुयात् ॥"
इति सुरूपमालातन्त्रम् ।

दुर्गाध्यक्षः, पुं, (दुर्गस्य अध्यक्षः ।) दुर्गरक्षकः । तस्य लक्षणं यथा,—
"अनाहार्य्यश्च शूरश्च तथा प्राज्ञः कुलोद्भवः ।
दुर्गाध्यक्षः स्मृतो राज्ञस्तदयुक्तः सर्व्वकर्म्मसु ॥"
इति मत्स्यपुराणम् ॥

दुर्गानवमी, स्त्री, (दुर्गायाः पूजोपलक्षिता नवमी ।) कार्त्तिकशुक्लनवमी । सा त्रेतायुगादौ । तत्र जगद्धात्रीपूजा कर्त्तव्या । यथा, योगिनीतन्त्रे ।
"कार्त्तिकेऽमलपक्षे तु नवम्यान्तु विशेषतः ।
प्रयत्नाच्च जगद्धात्रीं पूजयेद्दीपमालया ॥
तन्त्रान्तरे ।
'त्रिकालं पूजयेद्दुर्गां मनुनैकाक्षरेण च ।
नानाबलिविधानेन गीतवाद्यपुरःसरम् ॥
कार्त्तिकस्य सिते पक्षे नवम्यान्तु विशेषतः ।
लक्षैवं साधकश्रेष्ठो लभेद्राज्यमकण्टकम् ।'
कुब्जिकातन्त्रे ।
'कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम् ।
दुर्गां प्रपूजयेद्भक्त्या धर्म्मकामार्थसिद्धये ॥'
शक्तिसङ्गमतन्त्रे ।
'कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम् ।
त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत् ॥
निर्म्माय प्रतिमां शक्त्या जगद्धात्र्या विधानतः ।
पूजयित्वा परदिने प्रतिमां तां विसर्জयेत् ॥
एवं कृत्वा चक्रवर्त्ती भवेत् साधकसत्तमः ।
पुत्रपौत्रधनैश्वर्य्यसंयुक्तश्च भवेत् पुरी ॥
दासदासीगजैर्युक्तो मुक्तः स्यात् पापसङ्कटात् ।
विशेषतो वसुयुता नवमीं प्राप्य साधकः ।
पूजयित्वा जगद्धात्रीं तां लभते वाञ्छितं फलम् ॥'
भविष्ये ।
'मासेऽप्यतुर्भियेत् पुण्यं विधिना पूज्य चण्डिकाम् ।
तत् फलं लभते वीर! नवम्यां कार्त्तिकस्य च ॥"
इति तिथितत्त्वम् ॥

दुर्गाशः, पुं, (दुर्गाया आज्ञा आज्ञा आज्ञा यस्य ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥

दुर्घोषः, पुं, (दुर्दुरः घोषो निनादो यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥ निन्दितरवः । तद्वति, त्रि ॥

दुर्जनः, त्रि, (दुर्दुष्टो जनः । "कुगतिप्रादयः ।" २ । २ । १८ । इति समासः ।) खलः । इत्यमरः । १ । १ । ४० ॥ (यथा, चाणक्यशतके । २४—२५ ।
"दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥
दुर्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सः ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥")

दुर्जयः, पुं, (दुःखेन जीयतेऽसौ । जि जये + खल् ।) कार्त्तवीर्य्यराजवंशोद्भवराजपुत्रः । इति भूमिपुराणम् ॥ (विष्णुः । यथा, महाभारते । १३ । १४८ । ६६ ।
"समावर्त्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ॥"
दानवविशेषः । यथा, महाभारते ।१।६५।२२।
"असिलोमा च केशी च दुर्জ্জयश्चैव दानवः ॥"
राक्षसविशेषः । यथा, रामायणे ।३।२८।३०।
"तं दृष्ट्वा निःसृतं पूर्व्वं राक्षसा अपि निःसृताः ।
दुर्জয়ः कालकाक्षश्च प्रघसः कालिकामुखः ॥")
त्रि, दुर्জেয়ः । (यथा, देवीभागवते ।५।८२।२।
"वरदानेन धातुः स दुर्জ্জयो मधुसूदन ! ॥")

दुर्जरा, स्त्री, (दुर्दुःखेन जीर्य्यतीति । दुर् + जृ + अच् । ततष्टाप् ।) ज्योतिष्मती लता । इति राजनिर्घण्टः ॥ त्रि, दुर्জरः ॥ (यथा, सुश्रुते ।१।४६।
"स्वादु पाकरसं शीतं दुर्জरं हरिमन्थजम् ॥"
दुर्জयः । यथा, देवीभागवते । १ । १८ । २६ ।
"दुर्জरं वायुगात्रञ्च न श्रान्तिमुपयाति वै ॥")

दुर्जातं, क्ली, (दुर्दुष्टं यथा तथा जातम् । प्रादिसमासः ।) असनम् । (यथा, रघुः ।१३।७२।
"दुर्জातबन्धुरयशःशरीरो मे
पौलस्त्य एष समरेषु पुरः प्रहर्त्ता ॥")
असमञ्जसम् । इति त्रिकाण्डशेषः ॥ असम्यक् जाते, त्रि । इति मेदिनी । ते, ११४ ॥ (यथा, महाभारते । १२ । २२४ । ३३ ।
"दौष्कुलेयस्तथा मूढो दुर्জातः शक्र उच्यते ॥")

दुर्दान्तः, पुं, (दुर्दुःखेन दान्तो दमितः ।) कजदः । वृषभतरः । इति राजनिर्घण्टः ॥ अशान्ते, त्रि । (यथा, माघे । १२ । २२ ।
"दुर्দান্তसुतमृत्यु निरस्तसादिनं
सहासहाकारमशोकयज्वनः ॥")

दुर्दिनं, क्ली, (दुर्दुष्टं दिनम् ।) मेघाच्छन्नदिनम् । इत्यमरः । १ । ३ । १२ ॥ (यथा, हरिवंशे । १६७ । १८ ।
"सुखं दुर्दिनमासीत् सविद्युत्स्तनयित्नुमत् ।
तदुर्दिनतमं भित्त्वा नारदः प्रत्यदृश्यत ॥"
घनान्धकारः । यथा, कुमारे । ६ । ४१ ।
"यन्नौषधिप्रकाशेन नक्तं दर्शितसञ्चराः ।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः ॥")
दृष्टिः । यथाह शाङ्गः ।
"घनान्धकारे दृष्टौ च दुर्दिनं नवयो विदुः ॥"
(यथा, रघुः । ४ । ४१ ।
"स्त्रियं विषक्तकाञ्चीगुणस्खलन्नितम्बदुर्दिनम् ।
सलक्षलक्षयात इव प्रतिपेदे जयश्रियम् ॥"
कृत्सितदिनम् ।)
"सुदिनं दुर्दिनञ्चैव सर्व्वं कर्म्मोद्भवे भव ।
तत् कर्म्म तपसा साध्यं कर्म्मणाच्च शुभाशुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
"यदभ्युदकधाराग्रपरसपीयूषवर्षितम् ।
तद्दिनं दुर्दिनं मन्ये मेघाच्छन्नं न दुर्दिनम् ॥"
दुष्टुष्टः ॥
(दुर्दिनं वर्षः, घनान्धकारो वा अस्त्यस्येति । अच् । वर्षयुक्ते घनान्धकारविशिष्टे च, त्रि । यथा, हरिवंशे । ६० । ६६ ।
"सम्प्राप्ते दुर्दिने काले दुर्दिनं भाति वै नभः ॥"
तथा, महाभारते । ८ । ६१ । २३ ।
"नीलतोयं दिशः सर्व्वाश्चक्रे तिमिरदुर्दिनाः ॥")

दुर्दुरूटः, पुं, (दोलयति उत्क्षिपति आस्तिकतामिति । दोलि + बाहुलकात् कूटप्रत्ययेन साधुः ।) नास्तिकः । इति जटाधरः ॥

दुर्दृता, स्त्री, लताविशेषः । इति जटाधरः ॥

दुर्द्दमः, पुं, (दुर्दुष्टो दमः ।) हरितपलाण्डुः । इति राजनिर्घण्टः ॥

दुर्धर(र्द्ध)रः, पुं, (दुर्दुःखेन ध्रियते इति । दुर् + धृ + "ईषदुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ।" ३ । ३ । १२६ । इति खल् ।) नरकविशेषः । ऋषभौषधिः । इति मेदिनी । रे, १६६ ॥ पारदः । भल्लातकः । इति राजनिर्घण्टः ॥ महिषासुरस्य सेनापतिविशेषः । यथा, मार्कण्डेये ।८३।१६।
"दुर्द्धरं दुर्म्मुखञ्चोभौ शूरौ निर्य्यौ यमक्षयम् ॥"
(धृतराष्ट्रपुत्रभेदः । यथा, महाभारते । ७ । १३३ । ६० ।
"नाशयन्त महेष्वासाः सोदर्य्याः पञ्च भारत ! ।
दुर्म्मर्षणो दुःसहश्च दुर्म्मदो दुर्द्धरो जयः ।
पाण्डवं चित्रसन्नाहाः प्रतीपमुपयान्तवत् ॥"
ग्रसरासुरस्य मन्त्रिविशेषः । यथा, हरिवंशे । १६२ । १८ ।
"दुर्द्धरः केतुमाली च शत्रुहन्ता प्रमर्दनः ।
एते परिवृतोऽमात्यैर्युतुत्सुः प्रस्थितो रथी ॥"
विष्णुः । यथा, महाभारते । १३ । १४८ । ८६ ।
तस्य सहस्रनामकथने ।
"दर्पहा दर्पदो दृप्तो दुर्द्धरोऽथापराजितः ॥"
"न शक्या धारणा यस्य प्रधिद्यानादिह
सर्व्वोपाधिविनिर्म्मुक्तलाभतोऽपि ततप्रसादतः
क्लिशितुः खेन धार्य्यते जन्मान्तरसहस्रेषु भावनात् तस्मात् दुर्द्धरः ।
'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥'
इति भगवद्गीतायाम् ॥" इति तद्भाष्ये शङ्करः ॥
तथा तत्रैव । ४२ श्लोके ।
"सुसुखो दुर्द्धरो वाग्मी महेन्द्रो वसुदो वसुः ॥"
"पृथिव्यादीनि धारकाण्यन्येन धारयितुमशक्यत्वात् न केनापि धारयितुं शक्यते इति दुर्द्धरः ।
दुःखेन ध्यानसमये सुसूक्ष्मैर्बुद्धिभिर्धार्य्यते इति दुर्द्धरः ।" इति तद्भाष्यम् । ईषेन कृत्पत्तिभेदात् नामभेदोत्पत्त्या न द्विरुक्तिः सहस्रनामपूर्त्तिश्च भाता ॥) दुःखधार्य्ये, त्रि । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १३४ । ६८ ।
"अथाब्रवीन्महात्मानं भारद्वाजो महारथम् ।
एहीदं महाबाहो! विग्रिष्टमिति दुर्द्धरम् ॥
अस्त्रं ब्रह्मशिरो नाम सप्रयोगनिवर्त्तनम् ॥"
दुर्জেয় च । यथा, महाभारते । ७।११७।६ ।
"निर्জিत्य दुर्द्धरं शौरिं सपदानुगमाहवे ।
हार्दिक्यं योधयध्यैच प्राप्तं मन्ये धनञ्जयम् ॥")

दुर्धृ(र्द्ध)र्षा, स्त्री, (दुर्दुःखेन धृष्यतेऽसौ । दुर् + धृष + खल् ।) नागदमनी । कन्यारीवृक्षः । इति राजनिर्घण्टः ॥ (पुं, धृतराष्ट्रपुत्रविशेषः । यथा, महाभारते । १ । ११७ । ३ ।
"विन्दानुविन्दौ दुर्धर्षः सुबाहुर्दुष्प्रधर्षकः ॥")

दुःखधर्षबोधे, त्रि॥ (यथा, महाभारते। ६। १२। ६।
"सुनामा नाम दुर्धर्षो द्वितीयो हेमपर्व्वतः॥"
दुर्ज्जयः। तथा, तत्रैव। १। १३४। ८०।
"ततः प्रीतमना होवो सुकूर्त्तादिव तं पुनः।
प्रत्यभाषत दुर्धर्षः पाकशासनमारुषम्॥")
दुर्दुरूटः, पुं, (दोलयति उत्क्षिपति युक्त्यादिकमिति। दुल क उत्क्षेपे+बाहुलकात् कूटप्रत्ययेन साधुः तस्य रः।) युक्तिं विना गुरुवाक्यममन्यमानः। इति तत्त्वबोधनी॥
दुर्नाम, [न्] क्ली, (दुर्दुरं नाम यस्य।) अर्शोरोगः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ४५।
"दध्यामं कषायितन्नं लघु वातक्षयापहम्।
दुर्नामग्रहणीकासेषु हितमग्नेः प्रदीपनम्॥"
पित्तजश्लेष्मजयोरत्यर्थं तुर्यथा,—
"कट्वम्ललवणोष्णानि विदाह्यहितानि गुरूणि च।
सेवनानिलतोयेन श्रमाद्व्यायामपीड़या।
व्यायामाद्दोषाद्वा दुर्नाम पित्तसम्भवम्॥
अव्यायामात्तस्य श्लीपादजस्रं
श्लीपाद्व्याधद्वातसंसेवनाच्च।
गौण्यात्मज्ञात्तैलसर्पिश्छिदेन
दुर्नामा सञ्जायते स्नेहदोषात्॥"
इति हारीते चिकित्सितस्थाने द्वादशोऽध्याये॥
चिकित्सा यथा,—
"श्योवाण्यरुष्करविड्गतिलाभयानां
चूर्णं गुड़ेन सहितन्तु सदोपयोज्यम्।
दुर्नामकुष्ठगरशोथग्रहण्विबन्ध-
नर्म्मेक्षयत्वबलतां क्रिमिपाण्डुतान्च॥"
इति श्योवादिचूर्णम्॥
पचेद्वारिचतुर्द्रोणे कषटकार्य्यन्तु शाणतम्।
तत्रामिचिफलाश्योपूतिकलककलिङ्गकैः॥
स काक्षैर्यविड़ङ्गैस्तु सिद्धं दुर्नाममेहनुत्।
घृतं सिंह्मन्तं नाम श्रोधिसत्त्वेन भाषितम्॥
इति सिंह्मन्तं घृतम्॥"
इति वैद्यकचक्रपाणि संग्रहे अर्शोऽधिकारे॥
"श्लक्ष्णं शौरभं कन्दं पक्वाम्बौ पुटपाकवत्।
अद्यात् सतैललवणं दुर्नामविनिवृत्तये॥"
"चूर्णीकृता: षोड़श शूरवल्ल्या
भागास्ततोऽर्द्धेन च चित्रकस्य।
महौषधाद्दौ मरिचस्य चैको
गुड़ेन दुर्नामभयाय पिण्डी॥"
इति शूरवल्लिपिण्डी॥
इति वाभटे चिकित्सास्थाने अष्टमेऽध्याये॥
"मांसशूरणभल्लातचित्रदन्तीसमन्वितम्।
चिकित्सयसमायुक्तं शौचं दुर्नामनाशनम्॥
इति मांसाद्यं शौचम्॥"
इति वैद्यकरत्नसारसंग्रहे अर्शोऽधिकारे॥
"सर्व्वाः स्युर्वलयो येषां दुर्नामभिरुपद्रुताः।
तेषु प्रतिहतो वायुरपानः सन्निवर्त्तते॥
ततो यानेन सङ्गम्य ज्योतिर्मुद्गति देहिनाम्॥"
इति सुश्रुते चिकित्सास्थाने तृतीयेऽध्याये॥)

दुर्नामकं, क्ली, (दुर्नाम+स्वार्थे संज्ञायां वा कन्।) अर्शोरोगः। इत्यमरः। २।६।५४॥ (यथा,—
"सनागराब्धरट्टङ्कारकं
गुड़ेन यो मोदकमुद्दारकम्।
अर्शोदुर्नामकरोगदारकं
करोति दृढं सहसैव दारकम्॥"
इति वैद्यकचक्रपाणिसंग्रहेऽर्शोऽधिकारे॥)
दुर्नामा, [न्] पुं, क्ली, (दुर्निन्दितं नाम यस्य।) दीर्घकोविदारः। इत्यमरः। २।४।२५॥ भिषक् इति भाषा॥
दुर्नामारिः, पुं, (दुर्नाम्नश्चार्शोरोगस्य अरिः शत्रुः।) शूरणः। इति राजनिर्घण्टः॥
दुर्नाम्नी, स्त्री, (दुर्निन्दितं नाम यस्याः। ङीप्।) दुर्नामा। इति शब्दरत्नावली॥
दुर्बलः, त्रि, (दुर्निन्दितं बलं यस्य।) क्षयः। तत्पर्य्यायः। अमांसः २ क्षातः ३। इत्यमरः। २। ६। ४४॥ क्षान्तः ४ क्षातः ५ क्षितः ६ अबलः ७। इति शब्दरत्नावली॥ (यथा, देवीभागवते। १। ६। ५६।
"सबलो जयमाप्नोति दैवाच्च्यवति दुर्बलः॥"
क्षितिजः। यथा, रघुः। ५। १२।
"स्वार्थोपपत्तिं प्रति दुर्बलाश्च-
क्षत्रियत्वोचद्धरतनुग्रियः॥"
दुष्कर्म्मा। यथा, मनुः। ३। १५१।
"अटिलश्चानधीयानं दुर्बलं क्षितवन्तथा।
याजयन्ति च ये पूगांस्तांश्च श्राद्धेन भोजयेत्॥")
दुर्बला, स्त्री, (दुर्दुरं खल्पमित्यर्थः बलं यस्याः।) अश्वशिरीषिका। इति भावप्रकाशः॥
दुर्भगा, स्त्री, (दुर्दुरं भगं भाग्यं यस्याः।) पतिस्नेहरहिता। दुया इति भाषा। तत्पर्य्यायः। विरक्ता २। इति त्रिकाण्डशेषः। विद्विक्ता ३ निस्ना ४ सौभाग्यरहिता ५। इति शब्दरत्नावली॥ (यथा, भागवते। १। १७। २६।
"श्रीवत्सश्रुकला साध्वी दुर्भगेवोज्झिता सती॥"
भाग्यहीने, त्रि। यथा, महाभारते। १। १३०। ७।
"कर्म्मभिः स्वकृतैः सा तु दुर्भगा समपद्यत॥")
दुर्भिक्षं, क्ली, (भिक्षायाः अभावः।) भिक्षायाः अप्राप्तिकालः। अकाल इति भाषा। यथा,
"दुर्भिक्षमल्पं सरजं चिराय।" इत्युद्भटः॥
भिक्षायाः प्रायो निष्फलत्वमित्ययीभावसमासः। यद्देशे यत्काले तद्देशतत्कालयोग्यशस्यादिकं न जायते तद्देशे तदा याच्यमानदयालाभात् दुर्भिक्षं जातमिति व्यवह्रियते सन्निरिति। तत्कारकवर्षाणि यथा,—
"राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैरुपपीड़नम्।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने!॥१३॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम्।
अनावृष्टिः समाख्याता शुभे संवत्सरे प्रिये॥२०॥
क्वचिद्वर्षति पर्ज्जन्यो देशे संक्षिप्तमण्डलः।
दुर्भिक्षं तत्परीवर्त्ते व्यवहारो विपर्य्ययः॥ ३४॥
दुर्भिक्षं जायते सर्व्वा मेदिनी दुष्यति प्रिये!।
शुभे ह्रसन्ति लोकानि पीड़िता मानवा भुवि॥३५॥

दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम्।
अनले च समाख्याता नात्र कार्य्या विचारणा॥५०॥
देशभङ्गः सुदुर्भिक्षं समासात् कथयाम्यहम्।
पिङ्गले चारुणाक्षि! दुर्भिक्षं गर्भशातटे॥५१॥
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते।
भवेद्वै मध्यमा वृष्टिर्दुर्भिक्षौ सप्तपक्षिते॥ ५५॥
दुर्भिक्षं मरणं घोरं धान्यौषधिप्रपीड़नम्।
मारणेरोगो भवेद्देवि! रक्ताक्षेऽमरवन्दिनि!॥५८॥
रोगो मरणदुर्भिक्षं विरोधोपद्रवाकुलम्।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये!॥५९॥
मेदिनी चलते देवि! सर्व्वभूतं चराचरम्।
देशभङ्गश्च दुर्भिक्षं क्षये सञ्जीयते प्रजा॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये!॥"५०॥
इति ज्योतिस्तत्त्वधृतवशिष्ठवर्षाज्ञानगर्गवर्षविशेषफलबोधकभविष्यपुराणीयवचनानि॥ * ॥
अद्भुतेऽपि दुर्भिक्षं भवति यथा,—
"मांसास्थिनी समादाय श्वशृगालादयश्चवायसाः।
स्था शृगालोऽथवा मर्त्ये पुरस्य प्रविशन्ति चेत्॥
विकिरन्ति गृहादौ च श्वशृगानं सा मही भवेत्।
चौरेश्च हन्यते लोकः परचक्रसमागमः॥
संग्रामश्च महाघोरो दुर्भिक्षं मरकस्तथा।
अद्भुतानि प्रदृश्यन्ते तत्र देशस्य विप्लवः॥
अकाले फलपुष्पादि देशविद्रवकारकम्॥"
इति ज्योतिस्तत्त्वम्॥ * ॥
"तत्राग्नौचिभिधाग्रहणे दोषाभाव इति हारलताप्रभृतयः॥ कौर्म्मे।
सद्यःशौचं समाख्यातं दुर्भिक्षे चाग्नपन्नवे।
विप्लवाहवे हताशाच विद्युता पार्थिवैर्हिते॥
सद्यःशौचं समाख्यातं ग्रामादिमरणे तथा॥"
इति शुद्धितत्त्वम्॥
अपि च गारुड़े २२६ अध्याये।
"दुर्भिक्षयुक्तराष्ट्रे च मृतके सूतकेऽपि वा।
नियमाश्च न दुष्यन्ति दानधर्म्मरताश्च ये॥
दीक्षिताश्चाभिषिक्ताश्च व्रततीर्थपराश्च ये।
दीक्षाकाले विवाहादौ देवद्रोणां निमन्त्रिते॥
पूर्व्वसङ्कल्पिते चापि नाशौचं मृतसूतके॥"
दुर्म्मनाः, [स्] त्रि, (दुर्दुरं मनो यस्य।) चिन्ताद्याकुलचित्तः। तत्पर्य्यायः। विमनाः २ अन्यमनाः ३। इत्यमरः। ३। १। ८॥ (यथा, भागवते। १। ६। १६।
"रूपं भगवतो यत्तन्मनः कान्तं शुचापहम्।
अपश्यन् सहसोत्तस्थे वैक्लव्याद्दुर्म्मना इव॥"
शतावर्य्याम्, स्त्री। इति राजनिर्घण्टः॥ (दुर्दुरं मनः इति विग्रहे। दुष्टचित्ते, क्ली। यथा, रामायणे। २। ३१। २०।
"यदि दुःखो न रक्षेत भरतो राज्यमुत्तमम्।
प्राप्य दुर्म्मनसा वीर गर्व्वेण च विशेषतः॥")
दुर्म्मरा, स्त्री, (मृ+भावे अप्। दुर्दुःखेन मरणमस्याः। क्षिप्रायामपि पुनस्तत्तत्पत्तेरस्यास्तथात्वम्।) दूर्व्वा। इति जटाधरः॥ श्वेतदूर्व्वा। इति राजनिर्घण्टः॥

दुर्म्मुखः, पुं, (दुर्निन्दितं मुखं यस्य ।) वानरविशेषः । (यथा, रामायणे । ४ । ३६ । ३३ ।
"अयुतेन शतेनैव सहस्रेण शतेन च ।
ततो यूथपतिर्वीरो दुर्म्मुखो नाम वानरः ॥")
नागभेदः । इति मेदिनी । खे, १० ॥ (यथा, हरिवंशे । ३ । ११४ ।
"कुहरः पुष्पदंष्ट्रश्च दुर्म्मुखः सुमुखस्तथा ॥")
अश्वः । इति हेमचन्द्रः । ३ । १५५ ॥ (सर्पः । इति त्रिकाण्डशेषः । ३ । ३ । ५६ ॥) महिषासुरसेनापतिविशेषः । यथा, मार्कण्डेये । ८३ । १६ ।
"दुर्द्धरं दुर्म्मुखञ्चोभौ शूरैर्निर्य्यं यमुद्यमम् ॥"
नृपविशेषः । यथा, महाभारते । २ । ४ । २१ ।
"संग्रामजिद्दुर्म्मुखश्च उग्रसेनश्च वीर्य्यवान् ॥"
धृतराष्ट्रस्य पुत्रविशेषः । यथा, तत्रैव । १ । ११७ । ३ ।
"दुर्म्मर्षणो दुर्म्मुखश्च दुष्कर्णः कर्ण एव च ॥"
राक्षसविशेषः । यथा, भागवते । ६ । १० । १८ ।
"रथः पतिस्तद्वलोल्बण निकुम्भकुम्भ-
धूम्राक्षदुर्म्मुखसुरान्तकनरान्तकादीन् ॥"
यक्षविशेषः । इति ब्रह्मपुराणम् ॥ गजपतेर्गजानामन्यतमः । यथा, महाभारते ।
"षट्कोणाश्रिषु षट्सु षड्गजसखाः पाशाङ्कुशाभीरवान्-
विभ्राणाः प्रमदासखाः पृथुमहाशोणाश्मसुज्ज्वलिवः ।
आमोदः पुरतः प्रमोदसुखौ तं चाभितो दुर्म्मुखः
पश्चात्पार्श्वगतोऽस्य विघ्न इति यो यो विघ्नकर्त्तेति च ॥"
वर्षविशेषः । यथा, ज्योतिषतत्त्वधृतभविष्यपुराणवचनम् ।
"तुषधान्यक्षयो देवि ! सर्व्वशस्यमहार्घता ।
अवहारात्र नश्यन्ति दुर्म्मुखे दुर्म्मुखाः प्रजाः ॥")

दुर्म्मुखः, त्रि, (दुर्दुःखजनकं सुखं सुखनिःसृतवचनादिकं यस्य ।) अप्रियवादी । तत्पर्य्यायः । सुखरः २ अवद्धसुखः ३ । इत्यमरः । ३ । १ । ३६ ॥ (अप्रियदर्शनम् । यथा, कथासरित्सागरे । १२ । ५२ ।
"चक्रे वसन्तकस्यापि रूपं दन्तुरदुर्म्मुखम् ॥")

दुर्म्मूल्यं, क्ली, (दुर्दुःस्थितं मूल्यम् । प्रादिसमासः ।) महार्घम् । इति लोकप्रसिद्धम् ॥

दुर्म्मेधाः, त्रि, (दुर्निन्दिता मेधा धारणावती बुद्धिर्यस्य । "नित्यमसिच् प्रजामेधयोः ।" ५ । ४ । १२२ । इति असिच् ।) मन्दमेधाः । इति व्याकरणम् । (यथा, महाभारते । ३ । १० । २६ ।
"न किञ्चिदुक्ता दुर्म्मेधास्तूष्णीं किञ्चिदवाङ्मुखः ॥")

दुर्म्मोहः, पुं, (दुर्निन्दितो मोहो यस्मात् ।) काकतुण्डी । इति राजनिर्घण्टः ॥

दुर्य्योधनः, पुं, (दुर्दुःखेन युध्यतेऽसौ । युध + "भावार्थां शासियुधीति ।" युच् ।) स्वनामख्यातकुरुवंशभवराजविशेषः । स धृतराष्ट्रस्येक्षपुत्रः कुरुपाण्डवयुद्धे भीमेन हतः । तत्पर्य्यायः । कुरुराट् २ गान्धारेयः ३ सुयोधनः ४ । इति त्रिकाण्डशेषः ॥ (अयं कलेरंशेन पृथिव्यामवतीर्णः । यथा, महाभारते । १ । ६७ । ८८-८६ ।
"कलेरंशस्तु संजज्ञे सुवि दुर्य्योधनो नृपः ।
दुर्बुद्धिर्दुर्म्मतिश्चैव कुरूणामयशस्करः ॥
जगतो यस्तु सर्व्वस्य विद्विषः कलिपुरुषः ।
यः सर्व्वा घातयामास पृथिवीं पृथिवीपते ! ॥")

दुर्लभः, त्रि, (दुर्दुःखेन लभ्यते इति । दुर् + लभ + "दुरेदद्दुःसुभ्विति ।" ३ । ३ । १२६ । इति खल् ।) दुष्प्रापः । इति मेदिनी । भे, १६ ॥ यथा,—
"दुर्लभं प्राप्तं वाक्यं दुर्लभः क्षेमकृत् सुतः ।
दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः ॥"
इति चाणक्ये । ५४ ॥
अतिप्रशस्तः । इति शब्दरत्नावली ॥
"सर्व्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ।
हरिद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥"
इति कूर्म्मपुराणम् ॥
प्रियः । इति हेमचन्द्रः ॥

दुर्लभः, पुं, (दुर् + लभ + खल् ।) कचुरः । इति मेदिनी । भे, १६ ॥ कर्च्चूरः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ६६ ।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥"
"दुर्लभस्तथा दुर्लभः ।
'जन्मान्तरसहस्रेषु तपोदानसमाधिभिः ।
नराणां क्षीणपापानां कृष्णभक्तिः प्रजायते ।'
इति वचनात् भक्त्या लभ्य इति भगवद्वचनाच्च ।" इति तत्र शाङ्करभाष्यम् ॥)

दुर्लभा, स्त्री, (दुर्लभ + टाप् ।) श्वेतकण्टकारी । दुरालभा । इति राजनिर्घण्टः ॥

दुर्व्व, ईं वधे । इति कविकल्पद्रुमः । (भ्वां-परं-सकं-सेट् । ईदित्त्वात् निष्ठायामिट् ।) पञ्चमस्वरी । दूः दुरौ दुरः । ईं, दूर्व्वः । इति दुर्गादासः ॥

दुर्व्वचं, त्रि, (दुर्दुःखेन उच्यते । दुर् + वच् + खल् ।) दुःखकथ्यम् । यथा, भारविः । २ । २ ।
"अपि वागधिपस्य दुर्व्वचं
वचनन्नाद्दिधीत विस्मयम् ॥"

दुर्व्वचः, [स्] क्ली, (दुर्निन्दितं वचः ।) मन्दवाक्यम् । यथा,—
"असह्यं दुर्व्वचो भ्रातुर्मेघान्तरितरौद्रवत् ।"
इत्युद्भटः ॥
(दुष्टवक्तरि, त्रि ॥)

दुर्व्वर्णं, क्ली, (दुर्निन्दितं सुवर्णादपेक्षयेत्यर्थः वर्णो यस्य ।) रजतम् । इत्यमरः । २ । ६ । ६६ ॥ (यथा, माघे । ४ । २८ ।
"दुर्व्वर्णभित्तिरिह सान्द्रसुधासवर्णा ॥")
एलवालुकम् । इति मेदिनी । णे, ५२ ॥ मन्दवर्णे, त्रि । (यथा, भागवते । ३ । १४ । ४४ ।
"योगेर्द्धेमेव दुर्व्वर्णं भावयिष्यन्ति साधवः ॥")

दुर्व्वर्णकं, क्ली, (दुर्व्वर्ण + स्वार्थे संज्ञायां वा कन् ।) रजतम् । इति हेमचन्द्रः ॥

दुर्व्वाक्, [च्] त्रि, (दुर्दुष्टा वाक् यस्य ।) कटुवाक्यः । इति हेमचन्द्रः । ३ । ११ ॥ (यथा, अथर्व्ववेदे । ४ । १७ । ५ ।
"दुर्व्वाच्यां सर्व्वा दुर्व्वाचस्या अशान्ताय्या मसि ॥")
दुर्दुष्टा वाक् ।) दुष्टवाक्ये, स्त्री ॥ (यथा, महाभारते । २ । ७४ । ८८ ॥
"अतीव जल्पन् दुर्व्वाचो भवतीह विहेठकः ॥")

दुर्व्वादः, पुं, (दुर्दुष्टो वादः ।) स्तुतिपूर्व्वकदुर्व्वाक्यम् । इति जटाधरः ॥ निन्दितवाक्यञ्च ॥

दुर्व्वासाः, [स] पुं, (दुर्दुष्टं निगूढमित्यर्थः वास इव धर्म्मावरणत्वं यस्य । तथा च महाभारतवचनम् ।
"निगूढनिश्चयं धर्म्म यं तं दुर्व्वाससं विदुः ॥")
मुनिविशेषः । स अत्रिमुनिपुत्रः ब्रह्मरांशजातः । इति श्रीभागवतम् ॥ (यथा, विष्णुपुराणे । १ । ६ । २ ।
"दुर्व्वासाः शङ्करस्यांशश्चचार पृथिवीमिमाम् ॥")
तत्पर्य्यायः । कुशारणिः २ । इति त्रिकाण्डशेषः ॥ तस्य भार्य्या और्व्वमुनिकन्या कन्दली । इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ६२ । तस्य सहस्रनामकीर्त्तने ।
"साक्षात्प्रसादो दुर्व्वासाः सर्व्वसाधुनिषेवितः ॥"

दुर्निन्दितं वाक्यो वक्त्रं यस्य ।) मन्दवक्त्रयुक्ते, त्रि ॥ (यथा, ऋग्वेदे । ७ । १ । १६ ।
"मा नो अस्मेऽवीरते परा दा दुर्व्वासेऽमतये मा नो अस्मे ॥")

दुर्व्विधः, त्रि, (दुर्दुष्टा विधा यस्य ।) दरिद्रः । इत्यमरः । ३ । १ । ४६ ॥ खलः । इति मेदिनी । धे, ३१ ॥ मूर्खः । इति शब्दरत्नावली ॥ (यथा, गोः रामायणे । २ । १०६ । ३० ।
"ग्राम्येष्वन्येषु सुखेषु विद्यमानेषु दुर्व्विधाः ।
बुद्धिमान्वीक्षिकीं प्राप्य निरर्थान् प्रवदन्ति ते ॥")

दुर्व्विनीतः, पुं, (वि + नी + भावे क्तः । दुर्दुष्टं विनीतं विनयो यस्य । यद्वा, दुर् + वि + नी + क्तः ।) अविनीतमात्रः । तत्पर्य्यायः । शूकलः २ । इति हेमचन्द्रः । ४ । ३०१ । अविनीतमात्रे त्रि ॥ (यथा, पञ्चतन्त्रे । ५ । १७ ।
"कुपुत्रोऽपि भवेत् पुंसां हृदयानन्दकारकः ।
दुर्व्विनीतः कुरूपोऽपि मूर्खोऽपि व्यसनी खलः ॥")

दुर्व्वृत्तः, त्रि, (दुर्दुष्टं वृत्तं चरित्रं यस्य ।) दुर्जनः । यथा,—
"दुर्व्वृत्तदुष्टशमनं तव देवि ! शीलम् ॥"
इतिचण्डी ॥
दुश्चरित्रे, क्ली । (यथा, महाभारते । १ । १ । १०० ।
"दुर्व्वृत्तं धार्त्तराष्ट्राणामुक्तवान् भगवानृषिः ॥")

दुर्हृत्, [द्] त्रि, (दुर्दुष्टं हृदयं यस्य । "सुहृद्दुर्हृदौ मित्राभित्रयोः ।" ५ । ४ । १५० । इति निपातनात् हृदयस्य हृद्भावः ।) शत्रुः । इत्यमरः । २ । ८ । १० ॥ (यथा, मार्कण्डेये । २६ । ३४ ।

"मित्राणामुपकाराय दुर्हृदां नाशनाय च ॥")
दुष्टचित्ते, त्रि। (यथा, महाभारते ।३।३१२।१२।
"अश्मसारमयं नूनं हृदयं मम दुर्हृदः।
यन्नौ यदेनौ दृष्ट्वाद्य पतितौ नावदीर्य्यते ॥")
दुर्हृदयः, त्रि, (दुर्हृष्टं हृदयं यस्य। अशुभत्वेन न हृद्भावः।) दुरन्तःकरणः। इति शब्दार्थकल्पतरुः ॥
दुल, क उत्क्षेपे। इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट्।) क, दोलयति धूलिं वायुः। इति दुर्गादासः ॥
दुलिः, पुं, (दोलतीति। दुल+"इगुपधात् कित्।" उणां ४। ११६। इति इन्। कित्।) सुनिविशेषः। कमठ्याम् स्त्री। इति मेदिनी। ले, २६ ॥
दुली, स्त्री, (दुल+इन्। वा ङीष्।) दुलिः। इत्यमरटीकायां भरतः ॥
दुश्चरः, पुं, (दुर्दुःखेन चरतीति। दुर्+चर+अच्।) ग्रामूक। इति हारावली। ११२ ॥ भल्लूकः। इति राजनिर्घण्टः। (दुर्दुःखेन चर्य्यते इति। खल्।) दुष्कर्म्मणि, त्रि। (यथा, रामायणे। ३। २६। ७।
"प्रविष्टो सीतया सार्द्धं दुश्चरं दण्डकं वनम् ॥"
दुश्चरणीये, त्रि। यथा, महाभारते। १२। ७३। ६।
"तच्चराद्य विधिं पार्थ! दुश्चरं दुर्ल्लभेन्द्रियैः॥")
दुश्चर्म्मा, [न्] पुं, (दुष्टं चर्म्म यस्य।) अप्राप्ततेटुः। "यथा, दुश्चर्म्मा गुरुतल्पगः।" इति स्मृतिः॥ तत्पर्य्यायः। द्विनखकः २ चण्डः ३ श्लिपिविष्टः ४। इति हेमचन्द्रः। १। ११८॥ कोढरोगः। इति राजनिर्घण्टः ॥
दुश्चिक्यं, क्ली, त्रयात् तृतीयत्रयम्। यथा,—
"खं मेघरन्ध्रमाषाढं मदनभे यामित्रमस्तदुने
दूनत्वापि सुहृद्दृष्टे तु द्विदुकं पातालमम्भोऽपि च।
दुश्चिक्यं सहजे वदन्ति सुनयो रिपुर्क्षं ततो द्वादशे षट्कोणं रिपुमन्दिरे नवमभे त्र्याद्यं त्रिकोणं पुनः॥"
इति दीपिका ॥
दुश्च्यवनः, पुं, (दुर्दुःखेन च्यवनं बहुकालानन्तरं पतनं यस्य। दुर्दुष्टश्च्यवनः शिरो यस्य। शिरेण अभिभूतत्वात् तथात्वम्। यद्वा, दुर्दुःखेन च्यवते इति। च्यु ङ गतौ+"कृन्दसि गत्यर्थेभ्यः।" ३। ३। १२६। इति युच्।) इन्द्रः। इत्यमरः। २। १। ४७॥ (अविचार्य्ये, त्रि। यथा, ऋग्वेदे। १०। १०३। २।
"घृतकारेण दुश्च्यवनेन धृष्णुना॥")
दुष, ईर् य ओ वैक्लवे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-अनिट्।) वैक्लवमशुद्धीभावः॥ ईर्, अदुषत् अदुषत्। अस्मात् पृषादित्वान्नित्यं ङ इत्यन्ये। य, दुष्यति लोकः पापात्। ओ, दोष्टा। इति दुर्गादासः॥
दुष्करं, क्ली, (दुर्दुःखेन क्रियते इति। कृ+खल्।) आकाशम्। इति शब्दार्थकल्पतरुः॥ (भावे खल्।) दुःखेन करणम्। (कर्म्मणि खल्।) दुष्करेण क्रियया च, त्रि। इति सुग्धबोधम॥ (यथा, देवीभागवते। ५। १। ३।
"वने गत्वा तपस्तप्तं वासुदेवेन दुष्करम्।
विष्णोरंशावतारेण शिवस्याराधनं कृतम्॥")
दुष्कर्म्मन्, [न्] क्ली, (दुष्टं कर्म्म।) पापम्। यथा,
"दुष्कर्म्मजा नृणां रोगा यान्ति चैव क्रमाच्छमम्।
जपैः सुरार्चनैर्होमैर्दानैस्तेषां शमो भवेत्॥"
इति श्रीतातपीयकर्म्मविपाकः॥
(निन्दितकर्म्म॥*॥ दुष्टं कर्म्म अस्येति विग्रहे। दुष्कर्म्मकारके, त्रि। यथा, महाभारते। ५। १३२। २०।
"ततो वसति दुष्कर्म्मा नरके शाश्वतीः समाः॥")
दुष्कुलीनः, पुं, चोरनामगन्धद्रव्यम्। इति शब्दरत्नावली॥ (दुष्कुले भवः। दुष्कुल+पक्षे खः। दुष्कुलोद्भवे, त्रि। इति शब्दार्थकल्पतरुः॥ (यथा, महाभारते। ५। ३६। ४६।
"दुष्कुलीनः कुलीनो वा मर्य्यादां यो न लङ्घयेत्॥")
दुष्कृतं, क्ली, (दुष्टं कृतम्।) पापम्। इत्यमरः। १। ४। २३॥ तत्तु तत्कर्त्तुर्मरणानन्तरं तेन यद्यद् गच्छति। यथा,—
"गृहादर्थो निवर्त्तन्ते श्मशानादपि बान्धवाः।
सुकृतं दुष्कृतं लोके गच्छन्तमनुगच्छति॥
तस्माद्धर्म्मं समासाद्य देवाद्या पौरुषादपि।
दद्यात् सम्यक् द्विजातिभ्यः कौर्त्तनानि च कारयेत्॥"
इति वह्निपुराणे यमानुग्रासमनामाध्यायः॥
(दुष्टकृते, त्रि। यथा, महाभारते।६।४३।२०।
"युष्माकञ्चाप्रसादेन दुष्कृतेन च कर्म्मणा।
यत्पापं वर्द्धतेऽस्माकं यतः स्त्री ब्रह्मराक्षसाः॥")
दुष्क्रीत त्रि, (दुर्दुःखेन क्रीयते स्म इति। दुर्+क्री+क्तः।) महार्घम्। यथा,—
"क्रीत्वा स्वल्पेन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी।
विक्रेतुः प्रतिदेयन्तत् तस्मिन्नेवाह्नि विक्षतम्॥"
इति प्रायश्चित्ततत्त्वे नारदः॥
दुष्खनं क्ली, (दुष्टं खनति आविष्करोतीति। खन+ड।) "इगः षः।" ८। ३। ३६। इति विसर्गस्य षः।) दुःखम्। इत्यमरटीकायां भरतः॥
दुष्खदिरः पुं, (दुष्टः खदिर इति प्रादिसमासः।) खदिरवृक्षभेदः। तत्पर्य्यायः। काम्बोजी २। कालस्कन्धः ३ गोरटः ४ अमरजः ५ पत्ततरुः ६ वज्रसारः ७ सारखदिरः ८ महासारः ९ क्षुद्रखदिरः १०। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। तिक्तत्वम्। रक्तव्रणोत्थदोषकण्डूति विषवीसर्पज्वरकुष्ठोन्मादभूतनाशित्वञ्च। इति राजनिर्घण्टः॥
दुष्टं, क्ली, (दुष्+क्तः।) कुष्ठम्। इति शब्दचन्द्रिका॥ कुड़ इति ख्यातम्॥
दुष्टः, त्रि, (दुष्यतीति+दुष्+कर्त्तरि क्तः।) दुर्ब्बलः। अधमः। इति विश्वः॥ (यथा, महाभारते।३।२३३।११।
"महाकुलीनाभिरपापिकाभिः
स्त्रीभिः सतीभिस्तव सख्यमस्तु।
चक्राय शौक्राय महाग्रहाय
चौराय दुष्टाय गवाञ्च वर्ष्मणे॥")
दुष्टव्रणः, पुं, (दुष्टो व्रण इति कर्म्मधारयः।) ग्रन्थ्युर्ब्बुदः। गड़ा गरु इति भाषा। तत्पर्य्यायः। गलिः २। इति हेमचन्द्रः। ४। ३२६॥
दुष्टा, स्त्री, (दुष्यति स्म योनिदोषेणेति। दुष्+क्त+टाप्।) पुंश्चली। इति शब्दरत्नावली॥
दुष्ठु, अ. (दुर् निन्दितं तिष्ठतीति+दुर्+स्था+"अपदुःसुषु स्थः।" उणां। १। २६। इति कुः। "सुषमादिषु च।" ८। ३। ९८। इति सुषमादित्वात् षत्वम्।) निन्दा। इत्यमरः। ३। ४। १२८।
दुष्ठ, त्रि, (दुर्निन्दितस्तिष्ठतीति+दुर+स्था+कुः षत्वञ्च।) अविनीतः। इत्युणादिकोषः॥
दुष्पत्रः, पुं, (दुष्टानि पत्राणि यस्य।) चोरनामगन्धद्रव्यम्। इत्यमरः। २। ४। १२८॥
दुष्पधर्षणी, स्त्री, (दुर्दुःखेन प्रधृष्यते इति। धृष्+कर्म्मणि ल्युट् स्त्रियां ङीप्। यद्वा, भावार्थां दुष्पधर्षतीति युच्।) वार्त्ताकी। इत्यमरः। २। ४। १२४॥ (पुं, धृतराष्ट्रपुत्रभेदः। यथा, महाभारते। १। ६७। ६४।
"विन्दानुविन्दौ दुर्द्धर्षः सुबाहुर्दुष्पधर्षणः॥"
दुःखेन धर्षणीये, त्रि। यथा, रामायणे। ३। १८। ६।
"प्रविश्य चाश्रमपदं तस्यर्षेर्दुष्पधर्षणम्।
तपोलक्ष्माश्रमपदं प्रविवेश निवेदितुम्॥")
दुष्पधर्षा, स्त्री, (दुःखेन प्रधृष्यते इति। प्र+धृष+अच्+टाप्।) दुरालभा। खर्ज्जूरी। इति राजनिर्घण्टः॥ (पुं, धृतराष्ट्रपुत्रभेदः। यथा, महाभारते। १। ६७। ६५।
"उग्रो भीमरथो भीमो वीरबाहुरलोलुपः।
दुर्म्मुखो दुष्पधर्षश्च विवित्सुर्विकटः समः॥"
(दुःखेन पराभवनीये, त्रि। यथा, महाभारते। ५। १५१। ४६।
"सारवद्बलमस्माकं दुष्पधर्षं दुरासदम्॥")
दुष्पधर्षिणी, स्त्री, (पौनःपुन्येन दुःखेन धृष्यते इति। धृष्+आभीक्ष्ण्ये णिनिः।) दुष्पधर्षणी। इत्यमरटीकायां भरतः॥ कण्टकारी। इति राजनिर्घण्टः॥ दृष्टतो। इति भावप्रकाशः॥
दुष्पवेशा, स्त्री, (दुःखेन प्रविश्यते इति। प्र+विश्+कर्म्मणि अच्। टाप् च।) कण्टारी-वृक्षः। इति राजनिर्घण्टः॥ (दुष्पवेशनीये, त्रि। यथा, रामायणे। ३। ६। २।
"कुशचीरपरिक्षिप्तं द्वाक्षया लक्ष्म्या समावृतम्।
दुष्पवेशं दुरालक्ष्यं सूर्य्यमण्डलवर्च्चसम्॥")
दुष्मन्तः, पुं, (दुष्ट दोषवतीं मन्यते शकुन्तलामिति। दुष्+मन्+क्तः। निपातनात् साधुः।) चन्द्रवंशीयराजविशेषः। स ऐतिपुत्रः। तस्य पुत्रो भरतराजचक्रवर्त्ती। पत्नी शकुन्तला। इति श्रीभागवतम्॥ (यथा, महाभारते।१।६८।३।
"पौरवाणां वंशकरो दुष्मन्तो नाम वीर्य्यवान्।

पृथिव्याश्चतुरन्तायाः गोप्ता भरतसत्तम ।॥"
विवरणमस्य तदध्यायात् विस्तरशो द्रष्टव्यम् ।
दुह्यन्त इत्यपि पाठः ॥)

दुस्पर्शः, पुं, (दुःखेन स्पृश्यते इति । दुर्+स्पृश+कर्म्मणि खल् । विसर्गस्य वा लोपः ।) दुरालभा । इत्यमरटीकायां भरतः ॥ (पर्य्यायोऽस्य यथा,
"यासो यवासो दुस्पर्शो धन्वयासः कुनाशकः ।
दुरालभा दुरालम्भा वसुदात्री च रोदिनी ॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

दुःस्पृश्ये, त्रि ॥

दुस्थः, पुं, (दुःखेन तिष्ठतीति । दुः+स्था+कः ।) कुक्कुरः । कुक्कुटः । इति शब्दार्थकल्पतरुः ॥ (दुःस्थिते, त्रि । यथा, भट्टौ । २ । ३६ ।
"बलिर्देवत्वे जलधिर्मथत्वे
जङ्घालत्वं दैत्यकुलं विजित्ये ।
कल्पान्तदुस्था वसुधा तथोद्धे
येनैव भारोऽति गुरुर्न तस्य ॥")

दुह, दृर् अर्द्दने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) दृर्, अदुहत् अदोहीत् । अर्द्दनमिह वधः । इति दुर्गादासः ॥

दुह, ल न औ दुहि । इति कविकल्पद्रुमः ॥ (अदां-उभं-सकं-अनिट् ।) धुक् दोहनम् । तच्च वस्त्रीकरणमिति धातुपारायणिकाः । न ल, दोग्धि दुग्धे गां दुग्धं गोपः । स्वयं प्रदुग्धास्य गुणैरपरुसुता वस्त्रपमानस्य वसूनि मेदिनीति किराते वसूनीति कर्म्मणो विद्यमानतया कर्म्मकर्तृत्वाभावात् स्खलितमित्येके । दुहादेरप्रधानकर्म्मविषये कर्म्मकर्तृत्वे प्रधानकर्म्मप्रयोगो दुर्निवारः । इति कुलचन्द्रः ॥ क्षमते तु अतएवानयोर्द्वयोरपि द्वयत्वमिति वचनात् पचदुहोः कर्म्मणि विद्यमानेऽपि कर्म्मकर्तृत्वम् । इति दुर्गादासः ॥

दुहिता, [तृ] स्त्री, (दोग्धि विवाहादिकाले धनादिकमाजन्य यद्यातीति । यद्वा, दोग्धि गा इति । आर्षकाले कन्यासु एव गोदोहनभारस्थितेस्तथात्वम् । दुह+"नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।" उणा । २ । ९६ । इति तृच् । निपातनात् गुणाभावः ।) कन्या । इत्यमरः । २ । ६ । २८ ॥ कन्यादानपात्रापात्रं यथा,—
"ज्ञात्वा परीक्षां कान्यस्य दद्यादिति कामिनी वरम् ।
वराय रूपहीनाय दुष्टायाज्ञानिने तथा ॥
दरिद्राय च मूर्खाय योगिने कुत्सिताय च ।
अत्यन्तकोपयुक्ताय चाल्पदुर्भुखाय च ॥
चपलायाङ्गहीनाय क्रान्याय वधिराय च ।
जडाय चैव मूर्खाय क्लीवतुल्याय पापिने ॥
ब्रह्महत्यां लभेत् सोऽपि यः स्वकन्यां ददाति च ।
ग्रामाय गृहिणे चैव धूर्त्ते च विक्रयेऽपि च ॥
वैद्याय सुतां दत्त्वा दग्धवापैफलं लभेत् ।"॥
कन्यादिक्रये दोषो यथा,—
'यः कन्यापालनं कृत्वा करोति विक्रयं यदि ।
विपदा ग्रस्यतेनैव कल्पोपार्कं च गच्छति ।
कन्यामूत्रपुरीषञ्च तत्र भक्षति पातकी ।
क्षमिभिर्दैशितः काकैर्वायदिन्द्राग्नितुर्दृश ॥
स्पृष्टश्च श्वाधयोनौ च स लभेच्चास्य निश्चितम् ।
विक्रीणीते मांसभारं बहुत्वेवं दिवानिशम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
कन्यादानफलं यथा,—
"दग्धवापीसमा कन्या दीयते ब्राह्मणाय तत् ।
वेदज्ञाय पवित्राय चाप्रतिग्रहशालिने ॥
सन्ध्यायज्ञवेदपाठकारिणे सत्यवादिने ।
अग्नौ प्रदत्ता कन्या च दग्धवापीफलप्रदा ॥
त्रिसन्ध्याकारिणे सत्यवादिने ग्रहशालिने ।
वेदज्ञाय च विप्राय दत्तार्द्धफलदायिनी ॥
प्रतिग्रहग्रहीताय सन्ध्याहीनाय नित्यशः ।
मूर्खाय दत्ता कन्या च सा चतुःफलदायिनी ॥
परदारग्रहीताय याजकाय द्विजाय च ।
ग्रहाय सन्ध्याहीनाय वार्द्धुषफलदा सुता ॥
सर्व्वसन्ध्याखगायत्रीविहीनाय ग्रहाय च ।
विप्रोद्वाहाय दत्ता या वाप्यर्द्धफलदा सुता ॥
पापिने मूढजाताय विप्रचैवोद्वाहाय च ।
दत्ता चाण्डालतुल्याय कन्या सा नरकप्रदा ॥
विष्णुभक्ताय विदुषे विप्राय सत्यवादिने ।
जितेन्द्रियाय दत्ता या विष्णुद्वापीफलप्रदा ॥
बहिर्वर्षसहस्राणि दिव्यरूपं विधाय च ।
एवम्भूताय दत्ता च मोदते विष्णुमन्दिरे ॥
दत्त्वा कन्यां सुशीलाञ्च हराय हरयेऽथवा ।
नारायणस्वरूपञ्च भवेदेव श्रुतौ श्रुतम् ॥
विष्णुभक्तो यदा कन्यां ददाति विष्णुप्रीतये ।
स लभेद्धरिदास्यञ्च ध्रुवं विप्रोद्वाहाय च ॥" * ॥
विवाहानन्तरं कन्याया भर्त्तृगृहगमनसमये पित्रादीनां रोदनं ग्राम्यसिद्धम् । यथा दुर्व्वासस, सह और्व्वकन्यायाः कन्दल्या विवाहे ।
"कन्यासमर्पणं कृत्वा मोहाद्रुदे ररोद च ।
मूर्च्छामवाप स मुनिः स्वकन्याविरहातुरः ॥
अपत्यभेदशोकौघः स्वात्मारामं न सृजति ।
अबोधं चेतनां प्राप्य बोधयामास कन्यकाम् ॥
मूर्च्छितां तातविच्छेदाद्दन्दीं शोकार्णवयुताम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डश्रीकृष्णजन्मखण्डे ॥

दुहितुःपतिः, पुं, (दुहितुः सुतायाः पतिः ।"विभाषा श्वश्रूश्वशुरात्" । ६ । ३ । २४ । इति विभक्तेरलुक् ।) जामाता । इत्यमरटीकासारसुन्दरी ॥

दुह्य, क्ली, (दुह्यते इति । दुह+"ऋतिसृ ग्राभ्यः ष्टक्युक्वुरः क्यप् ।" ३ । १ । १०६ । इत्यत्र "ग्रंसि दुहिगुहिभ्यो वा ।" इति काशिकोक्तेः क्यप् ।) दोहनयोग्यम् । दोह्यम् । इति शाकरभाष्यम् ॥

दू, ओ ड य खेदे । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सकं च-सेट् ।) खेद इह उपतापोत्करणमुपतापीभावश्च । ओ, दूनः । ड य, दूयते देहं जनम् । इति चतुर्भुजः । मां कथं पश्यन्न दूयसे इति रघुः । इति दुर्गादासः ॥

दूड़भः, त्रि, (दुर्दुःखेन दभ्यते इति । दुर्+दभ+खल् । "दुरो दाग्नाग्नदभध्येषूत्तरपदादेः खुलच ।" ६ । ३ । १०६ । इत्यत्रेति वार्त्तिकोक्त्या ऊलं ऊलच ।) दुःखेन दम्भनीयः । इति सिद्धान्तकौमुदी ॥ (यथा, ऋग्वेदे । १ । १५ । ६ ।
"युवं दक्षं धृतव्रतमिन्नावरुणदूळभम् ॥"
"दूड़भं दुर्दृशं शत्रुभिर्दंशुं विनाशयितुमशक्यमित्यर्थः ।" "दूड़भं दृशं भक्षीकरणे दुःखेन दृश्यते इति दुर्दृशं ईषद्दुःसुष्विद्यादिनाडुरित्युपपदे दृशेः खल् बाहुलकमित्युकारस्य ऊकारो रेफस्य लोपः दकारस्य ड़कारो हकारस्य च भकारः ॥" इति तद्भाष्ये सायणः ॥)

दूड़ाश्वः, त्रि, (दुःखेन दाश्यते यः । दुर्+दाशृ+खल् । "पृषोदरादि यथोपदिष्टम् ।" ६ । ३ । १०९ । इत्यस्य "दुरो दाश्वनाशीति ।" वार्त्तिकोक्त्या ऊलं ऊलच ।) पीड़ायुक्तः । इति सिद्धान्तकौमुदी ॥ (यथा, अथर्व्ववेदे । १ । १३ । १ ।
"इमस्ते अक्षदशने येना दूड़ाशे अस्यसि ॥")
इत्यसाप्योऽपि ॥

दूढ्यः, त्रि, (दुःखेन ध्यायतीति । दुर्+ध्यै+खल् । "दुरो दाश्वनाश्वदभध्येषूत्तरपदादेः खुलच ।" ६ । ३ । १०६ । इत्यस्य वार्त्तिकोक्त्या ऊलं ऊलच ।) अधमः । इति सिद्धान्तकौमुदी ॥

दूनाश्वः, त्रि, (दुःखेन नाश्यते ऽसौ । दुर्+नाशृ+खल् । "दुरो दाश्वनाशीति ।" ६ । ३ । १०६ । इत्यस्य वार्त्तिकोक्त्या ऊलं ऊलच ।) दुःखेन नष्टः । इति सिद्धान्तकौमुदी ॥ (नाशयितुमशक्यः । यथा, ऋग्वेदे । ६ । ६६ । ११ ।
"यो दूनाशो वसुत्यसा ॥")

दूतः, पुं, (दूयते वार्त्ताबहनादिनेति । दू+"दूतविभ्यां दीर्घश्च ।" उणा । ३ । ६० । इति क्तः दीर्घश्च ।) वार्त्ताहरः । तत्पर्य्यायः । सन्देशहरः २ । इत्यमरः । १ । २ । ८ । १६ ॥ सन्दिष्टकथकः ३ । इति शब्दरत्नावली ॥ तस्य लक्षणं यथा,—
"यथोक्तवादी दूतः स्यादेङ्गिताकारविग्रहः ।
शक्तः क्लेशसहो वाग्मी देशकालविभागवित् ॥
विज्ञातदेशकालश्च दूतः स्यात् स महीपतेः ।
वक्ता नयस्य यः काले स दूतो नृपतेर्भवेत् ॥"
इति मत्स्यपुराणम् ॥

अपि च ।
"मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः ।
धीरो यथोक्तवादी च एष दूतो विधीयते ॥"
इति चाणक्ये । १०६ ॥

अन्यच्च ।
"परेङ्गितज्ञः परवाक्याभ्यार्थस्यापि तत्त्ववित् ।
सदोत्पन्नमतिर्धीरो दूतः स्यात् पृथिवीपतेः ॥
दूतश्चैव प्रकुर्व्वीत सर्व्वशास्त्रविशारदम् ।
इङ्गितज्ञं तथा सभ्यं दक्षं स्वकुलसम्भवम् ॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित् ।
वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ।
दूत एव हि सन्धत्ते भिनत्त्येव हि सङ्गतान् ।
सिद्ध्यार्थी मितार्थञ्च तथा ग्राह्यवहारकः ॥

दूतास्त्रयोऽमात्यगणैः समैः पादार्द्धवर्जितैः ।
विस्पष्टार्थं कार्य्यवशात् ग्रासनं न करोति यः ॥
मितार्थः कार्य्यमाचष्टौ न कुर्य्यादुत्तरोत्तरम् ।
यथोक्तवादी सन्देशहारको लेखहारकः ॥
तत्र दूतो व्रजन्नेव-चिन्तयेदुत्तरोत्तरम् ।
वार्त्ताविशेषं भूपाय भाटिंनिलङ्घवेश्मनि ॥
दूतो हि न लिखेत् किञ्चित् निर्ज्ञेता विनि-
संग्रयम् ।
पृच्छ्यमानोऽपि न ब्रूयात् स्वामिनः क्वापि
वैग्रसम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥
अथ दूते वर्ज्जनीयानि । निजप्रभुतेजः श्रीविक्रमौ-
न्नत्यकरत्वाद्यम् १ गुरुचोभकरचेष्टा २ अधर्म-
शीयता ३ दक्षता ४ निर्भयत्वम् ५ । इति क्षवि-
कल्पलता ॥ (वैद्यकोक्तदूतो यथा,—
"आतुरोपक्रमार्थेषु दूतो याति भिषग्गृहे ।
तस्य परीक्ष्यं कार्य्यं येन संलक्ष्यते गदः ॥
खञ्जान्धमूर्क्षं बधिरञ्च वामनं
स्त्रियञ्च कुब्जं लुलितञ्च जीर्णम् ।
श्रान्तं क्षुधार्त्तं श्रमितञ्च दीनं
ग्रस्तं न वै वेदविदो वदन्ति ॥"
"यः कर्कशः क्रोधनपाशुपाणि-
र्भिषग्विगर्हीक्षितगृहीतश्च ।
एते न ग्रस्ताः प्रवदन्ति घोरा
दूता विकारं प्रतिवर्द्धयन्ति ॥
यः काष्ठहस्तोऽतपाशुपाणि-
स्तथातुरो दीर्घवपाहि रोदितः ।
प्रक्षिप्तनेत्रोऽगमनोत्सुकोऽपि
वर्ज्ज्या नृणार्त्तोऽशुभकारिदूतः ॥"
"नकटश्चक्षोऽवश्य वक्रपादेन तिष्ठति ।
तस्मादाकुरुवादी यो न ग्रस्तो वैद्यकर्म्मणि ॥
यथा गच्छति ग्रीवेण व्याविश्लोत्याय सुञ्चति ।
पादौ प्रसार्य्य विग्रति मस्तके विन्यसेत् करम् ॥
भिनत्ति लोष्टकाष्ठञ्च लवं स्फोटयते क्वचित् ।
अथवा क्षुग्रते नार्त्ता स्तनं वा सृग्रते पुनः ॥
भूमिं लिखति पादेन रेखां वापि करोति यः ।
निद्रां वा कुरुते यस्तु स दूतोऽरिष्टकारकः ॥
यः श्वेतवस्त्रावृतपूर्णपाणिः
सम्पूर्णताम्रमुखः प्रग्रस्तः ।
द्विजस्तथा मागधकः सुशीलः
प्रग्राधिकश्चाङ्क्यते सुखाय ॥"
"आगत्योदीच्यपूर्व्वाभ्यं वरुणदिग्भेग्रमाश्रित्य
ग्रामो
दृष्ट्वा वैद्यं प्रहस्य प्रवदति निपुणं नातिनीचं
न चोच्चम् ।
उत्तिष्ठेति प्रवादं कुरु वचनमिदं सौख्यवार्त्तां
तनोति
ग्रामैः खार्य्यं प्रहरं सुखमगदहरं रोगिणां
वैद्यलाभम् ॥
पूर्व्वां दिशं समासाद्य प्रशान्तः ग्रान्तया गिरा ।
वदन्ति वैद्यलाभाय रोगिणाञ्च सुखावहम् ॥
यद्यामत्योप्रविष्टोऽपि श्लोकं वाथ सुभाषितम् ।
वदत ग्रान्तया वाचा वैद्यलाभञ्च ग्रान्तये ॥
योऽभिवाद्यापि वैद्यस्य क्षेमं संपृच्छते पुनः ।
फलं ददाति पुण्यं वा रोगिणाञ्च सुखावहम् ॥
तस्य सौख्यं तथा ग्रान्तिरस्य दूता इदं विदुः ।
किमत्र बहुनोक्तेन रम्यो दूतः सुखावहः ॥"
इति हारीते द्वितीयस्थाने षष्ठेऽध्याये ॥)
दूतनी, स्त्री, (दु उपतापे + भावे औणादिकक्तः
दीर्घश्च । दूतं उपतापं हन्तीति । हन + टक् ।
ङीप् ।) कदम्बपुष्पी । इति ग्रब्दचन्द्रिका ॥
दूतिः, स्त्री, (दूयते नायकादिवार्त्ताहरणा-
दिनेति । दु + बाहुलकात् तिः दीर्घश्च । इत्यु-
ज्ज्वलदत्तः । ४।१७६ ।) दूती । इति ग्रब्दरत्ना-
वली ॥ (यथा, रघुः । १८ । ५३ ।
"प्रतिक्रतिरचनाभ्यो दूतिसन्दर्ग्रिताभ्यः
समधिकतररूपाः ग्रुद्धसन्तानकामैः ॥")
दूतिका, स्त्री, (दूतिरेव । स्वार्थे कन् । ततष्टाप् ।)
दूती । इति ग्रब्दरत्नावली ॥ (यथा, पञ्च-
तन्त्रे । १ । १७८ ।
"नमुको हुडुयुद्धेन वयं आवाढ़भूतिना ।
दूतिका परकार्य्येण त्रयो दोषाः स्वयं क्रताः ॥")
दूती, स्त्री, (दूतिः । क्रदिकादिति वा ङीष् ।)
सारिका । इति राजनिर्घण्टः ॥ दौत्यकर्म्मणि-
नियुक्ता स्त्री । स्त्रीपुंसोः सन्देग्रप्रापिका । तत्-
पर्य्यायः । सञ्चारिका २ । इत्यमरः । २ । ६ ।
१७ ॥ दूतिः ३ दूतीका ४ दूतिका ५ । इति
ग्रब्दरत्नावली ॥ (यथा, आर्य्यासप्तग्रत्याम् । २८० ।
"दयितप्रहिता दूतीमालम्ब्य करेण तमसि गच्छन्ती ।
स्खेदच्युतलग्नाभिर्दूरादगौरास्मि ! दृग्भासि ॥")
दौत्यव्यापारपारङ्गमा । तस्याः संघट्टनविरह-
निवेदनादीनि कर्म्माणि । इति रसमञ्जरी ॥
(तद्गुणा यथा, साहित्यदर्पणे । ३ । १२६-
१२७ ।
"दूत्यः सखी नटी दासी धात्रेयी प्रतिवेग्निनी ।
बाला प्रव्रजिता कारुः ग्रिल्पिन्याद्याः स्वयं
तथा ॥
कलाकौग्रलसुतृसाद्यो भक्तिचित्तज्ञता स्मृतिः ।
माधुर्य्यं नर्म्मविज्ञानं वाग्मिता चेति तद्गुणाः ।
एता अपि यथौचित्याद्दत्तमाधममध्यमाः ॥")
दूतीका, स्त्री, दूती । इति ग्रब्दरत्नावली ॥
दूत्यं, क्लौ, (दूतस्य भावः कर्म्म वा । दूत + "दूत-
वणिग्भ्याच्च ।" ५।१।१२६। इत्यस्येति वार्त्ति-
कोक्त्या यः । वैदिके तु "दूतस्य भागकर्म्मणी ।"
४ । ४ । १२० । इति यः ।) दूतकर्म्म । (यथा,
हरिवंग्रे । १०६ । ४१ ।
"वचनञ्च यथाभाषिदूत्ये नः क्षन्तविग्रहे ॥"
तथा च ऋग्वेदे । १ । १६१ । १ ।
"किमीयते दूत्यम् ॥") दूतस्य भावः । इत्यमरः ।
२।८।१६ ॥ दूतस्वभावः । इति मेदिनी । ये, ३२॥
दून, त्रि, (ओ दूङ् य खेदे + क्तः । "ओदि-
तश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः ।
यद्वा, दु गतौ + क्तः । "दुस्वोर्दीर्घश्च ।" इति
वार्त्तिकोक्त्या तस्य नः दीर्घश्च ।) अध्वादिना
श्रान्तः । इत्यमरः । ३ । १ । १०२ ॥ उपतप्तः ।
यथा, नैषधे । ३ । ६४ ।
"पित्तेन दूने रसने सितापि
तिक्तायते हंसकुलावतंस ! ॥"
दूरं, त्रि, (दुर्दुःखेनेयते प्राप्यते इति । दुर् +
इण् + "दुरीणो लोपश्च ।" उणा २ । २० । रक्
धातोर्लोपश्च ।) अनिकटम् । असन्निकृष्टम् ।
तत्पर्य्यायः । विप्रकृष्टम् २ । इत्यमरः । ३ । १ ।
६८ ॥ अनासन्नम् ३ । इति ग्रब्दरत्नावली ॥
(यथा, हितोपदेग्रे । १ । ४३ ।
"ग्ररीरस्य गुणानाञ्च दूरमत्यन्तमन्तरम् ।
ग्ररीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥")
आके १ पराके २ पराचे ३ आरे ४ परा-
वतः ५ । इति पञ्च दूरनामानि । इति वैद्य-
निघण्टौ ३ अध्यायः ॥
दूरदर्ग्शनः, पुं. (दूरेऽपि दर्ग्शनं दृष्टिर्यस्य ।) गृध्रः ।
इति राजनिर्घण्टः ॥ (दुर्लभे, त्रि । यथा, भाग-
वते । १ । ११ । ८ ।
"अहो सनाथा भवता स्म यद्वयं
वैपिष्टपानामपि दूरदर्ग्शनम् ।
प्रेमस्मितस्निग्धनिरीक्षणाननं
पश्येम रूपं तव सर्व्वसौभगम् ॥")
दूरदर्ग्शी, [न्] पुं, (दूरात् दूरमपि वा पग्यतीति ।
दृग्श + णिनिः ।) पक्षिः । इत्यमरः । २ । ७ । ६ ॥
गृध्रः । इति त्रिकाण्डग्रेषः ॥ दीर्घदर्ग्शके, त्रि ॥
दूरदृक्, [ग्] पुं, (दूरं दूरात्रा पग्यतीति । दृग्श +
क्विप् ।) पक्षिः । इति ग्रब्दरत्नावली ॥ गृध्रः ।
इति हेमचन्द्रः । ४ । ४०१ ॥ दीर्घदर्ग्शके, त्रि ॥
दूरमूलः, पुं, (दूरे असन्निकटे मूलं यस्य ।) सुञ्ज-
लक्षणम् । इति राजनिर्घण्टः ॥
दूरवेधी, [न्] त्रि, (वेधोऽस्यस्येति । इनिः ।
दूरात् वेधी ।) दूरात् लक्ष्यभेदकः । तत्पर्य्यायः ।
दूरापाती २ । इति हेमचन्द्रः । ३ । ४३७ ॥
दूरेरितेक्षणः, त्रि, (दूरे ईरिते ईक्षणे यस्य ।)
केकरः । इति ग्रब्दमाला ॥
दूर्य्यं, क्लौ, (दूरे परित्याज्यम् । दूर + यत् ।) विष्ठा ।
इति ग्रब्दरत्नावली ॥ (दूराय रोगदूरीकर-
णाय साधु इति यत् ।) ग्रटी । इति राज-
निर्घण्टः ॥
दूर्व्वा, स्त्री, (दुर्व्वते दुर्व्वति वा । दुर्व्व हिंसायाम् +
क्विप् घञ् वा । "उपधायाच्च ।" ८।२।७८ ।
इति दीर्घः ।) खगामखातघासः । तत्पर्य्यायः ।
शतपर्व्विका २ सहस्रवीर्य्या ३ भार्गवी ४ रुहा ५
अनन्ता ६ । इत्यमरः ।२।४।५५८॥ तिक्तपर्व्वा ७
दुर्म्मरा ८ । बहुवीर्य्या ९ हरिता १० हरि-
ताली ११ कच्छरुहा १२ ॥ शुक्लायाः पर्य्यायः ।
शतवीर्य्या १ गन्धाली २ शुक्लाख्यः ३
गोलोमी ४ । इति जटाधरः ॥ शतपर्व्वा ५
सितदूर्व्वा ६ सिता ७ । इति रत्नमाला ॥ नन्दा ८
महावरा ९ । इति ग्रब्दरत्नावली ॥ (यथा,
महाभारते । १ । ११० । १७ ।

"कृष्णाकारेव दूर्व्वेयं संस्तीर्णेव च भूरियम्।") अस्या गुणः। रक्तपित्तकफकुलग्दोषनाशित्वम्। इति राजवल्लभः॥

दूर्व्वाष्टमी, स्त्री, (दूर्व्वा तद्रूपा गौरी तत्प्रिया अष्टमी।) भाद्रशुक्लाष्टमी। तत्र कर्त्तव्यव्रतविधिर्यथा.—

"ब्रह्मन् भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः। दूर्व्वां गौरीं गणेशञ्च फलाकारं शिवं यजेत्॥ पलाशैरक्षतैः सर्व्वैः शम्भुं नमः शिवाय च। अनन्तिपक्रमश्रीयाञ्जुषते ब्रह्महत्यया॥"

इति संवत्सरकौमुदीधृतभविष्यपुराणवचनम्॥* तद्व्रतप्रयोगविधिर्यथा,—

पूर्व्वदिने संयमं विधाय तद्दिने प्रातः स्नानादिः आसने चोपविश्यात्मन्य ब्राह्मणान् स्वस्तिवाच्य सूर्य्यार्घ्यं दत्वा सङ्कल्पं कुर्य्यात्। विष्णुर्नमोऽद्य भाद्रे मासि शुक्ले पक्षे अष्टम्यां तिथावारभ्यासुकगोत्रा श्रीअसुकी मर्त्यलोकाधिकरणकसुखसौभाग्याविच्छिन्नपुत्रपौत्रादिलाभपूर्व्वकब्रह्मलोकप्राप्तिकामा श्रीविष्णुप्रीतिकामा वा भविष्यपुराणोक्ताष्टावर्षनिष्पादितदूर्व्वाष्टमीव्रतमहं करिष्ये। इति सङ्कल्प्य सङ्कल्पं पठित्वासनशुद्ध्यादिकं विधाय गणेशादिदेवताः संपूज्य ध्यानं कुर्य्यात्। *। यथा,—

"नीलोत्पलदलश्यामं चतुर्बाहुं किरीटिनम्। शङ्खचक्रगदापद्मधारिणं वनमालिनम्॥ श्रीवत्सलक्षणोपेतं श्रिया वाण्या समन्वितम्॥"

इति ध्यात्वा स्वशिरसि पुष्पं दत्वा मानसैरुपचारैः संपूज्यार्घस्थापनं कृत्वा पुनर्ध्यात्वावाह्य पाद्यादिभिः पूजयेत्। एतत् पाद्यं ॐ कृष्णाय नमः। एवं क्रमेण संपूज्य आवरणदेवताः पूजयेत्। यथा ॐ गणेशाय नमः। एवं दुर्गायै गौर्य्यै श्रियै सरस्वत्यै गङ्गायै दित्यै अदित्यै सुरेशायै अरुन्धत्यै मन्दोदर्य्यै सुभद्रायै ह्राड्डिन्यै जयायै विजयायै रमायै दीप्तायै रेवत्यै दमयन्त्यै प्रीतायै सुकेशायै रम्भायै वासुदेवाय देवक्यै विष्णवे महादेवाय सर्व्वेभ्यो देवेभ्यः सर्व्वाभ्यो देवीभ्यः। ततो दूर्व्वां ध्यायेत्। *।

ॐ नीलोत्पलदलश्यामां सर्व्वदेवशिरोधृताम्। विष्णुदेहोद्भवां पुण्यामन्तैरभिविचिन्तिताम्॥ सर्व्वदेवाजरां दूर्व्वाममरां विष्णुरूपिणीम्। दिव्यस्नानसदार्द्रां धर्म्मार्थकाममोक्षदाम्॥

एवं ध्यात्वा षोढ़ोपचारैः पूजयेत्। इदमासनं ॐ दूर्व्वायै नमः। एवं क्रमेण संपूज्य अरुन्धतियुक्तडोरकं फलानि यज्ञोपवीतादिकं दत्वा प्रणमेत्।

"त्वं दूर्व्वेऽमृतनामासि पूजितासि सुरासुरैः। सौभाग्यसन्ततिं दत्वा सर्व्वकार्य्यकरी भव॥ यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले। तथा ममापि सन्तानं देहि त्वमजरामरम्॥"

ततो भोज्यमुत्सृजेत्। डोरकं वामहस्ते बद्धा कथां शृणुयात्॥ *।

'अथ कथा।

युधिष्ठिर उवाच।

"व्रतमेकं समाचक्ष्व विचार्य्य मधुसूदन!। येन सन्ततिविच्छेदो जायते न कदाचन॥

श्रीकृष्ण उवाच।

माघि भाद्रपदेऽष्टम्यां शुक्लपक्षे युधिष्ठिर!। दूर्व्वाष्टमीव्रतं नाम या करोति पतिव्रता॥ न तस्याः क्षयमाप्नोति सन्तानं साम्प्रपौरुषम्। वर्द्धते वर्द्धते नित्यं यथा दूर्व्वा तथा कुलम्॥

युधिष्ठिर उवाच।

कथमेषा समुत्पन्ना कस्माद्दूर्व्वा चिरायुषी। कस्मादवन्ध्या पवित्रा च लोके धन्या महीतले॥ केन वा तद्व्रतं देव! चरितं केन हेतुना॥

श्रीकृष्ण उवाच।

क्षीरोदसागरे पूर्व्वं मथ्यमानेऽमृतार्थिना। विष्णुना बाहुजङ्घाभ्यां विधृतो मन्दरो गिरिः॥ भ्रमता तेन वेगेन लोमान्याघर्षितानि वै। ऊर्ध्वमिश्रीणि रोमाणि चोत्पिञ्जानि तटान्तरे॥

जायत शुभा दूर्व्वा रम्या हरितशाड्वला। एवमेषा समुत्पन्ना दूर्व्वा विष्णुतनूद्भवा॥ तस्या उपरि विन्यस्तं मथितान्तस्तुत्तमम्। देवदानवगन्धर्व्वयक्षविद्याधरोरगैः॥ तत्र येऽमृतशुभ्रस्य निपेतुर्व्वारिबिन्दवः। तैरियं सम्भवमासाद्य दूर्व्वा चैवाजरामरा॥ वन्द्या पवित्रा देवेषु सर्व्वदाभ्यर्चिता तथा। पूजयेत्तां प्रयत्नेन प्रयोगानाविधैरपि॥ अष्टम्यां फलपुष्पेषु गुवाकैर्नारिकेलकैः। द्राक्षाखर्जूरतीक्ष्णैश्च मोचकैर्नायकैस्तथा॥ नागरङ्गैश्च जम्बीरैर्बीजपूरैश्च शोभनैः। दध्यक्षतैः पयोभिश्च धूपनैर्वेद्यदीपकैः॥ मन्त्रेणानेन राजेन्द्र! शृणुष्व कथितं मया। त्वं दूर्व्वेऽमृतनामासि वन्दितासि सुरासुरैः॥ सौभाग्यं सन्ततिं दत्वा सर्व्वकार्य्यकरी भव। यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले॥ तथा ममापि सन्तानं देहि त्वमजरामरम्। एवमेव पुरा पार्थ! पूजिता त्रिदशोत्तमैः॥ तेषां पत्नीभिरनिशं भगिनीभिस्तथैव च। पूजिता च तथा गौर्य्या देव्या रत्या श्रिया तथा॥ सरस्वत्या गङ्गया च दित्यादित्या सुशीलया। विन्ध्यमत्या वेणुमत्या इन्द्रमत्या सुशीलया॥ मन्दोदर्य्या चक्रिकया मायया दीप्तया तथा। मर्त्यलोके च रेवत्या दमयन्त्या सुशीलया॥ सुकेश्या घृताच्या च रम्भया मिश्रकेश्या। मञ्जुलया मेनकया तथैव सानिकादिभिः॥ स्त्रीभिरभ्यर्चिता दूर्व्वा सौभाग्यसुखदायिनी। स्नाताभिः शुचिवस्त्राभिर्दूर्व्वा संपूजिता जनैः॥ दत्वा पिण्डानि विप्रेभ्यः फलानि विविधानि च। तिलपिष्टानि गोधूमधान्यपिष्टानि पायसम्॥ भोजयित्वा सुहृन्मित्रं सम्बन्धिस्वजनं तथा। ततो शुक्लौत तच्छेषं स्वयं भक्त्या समाहिता॥ नारी चैव प्रकुर्व्वीत चाष्टमीव्रतमुत्तमम्।

सर्व्वतः सुखसौभाग्यपुत्रपौत्रादिभिर्युता॥ मर्त्यलोके चिरं स्थित्वा चतुर्व्वर्गं गता पुनः। वसते रमया सार्द्धं यावच्चन्द्रदिवाकरौ॥

मेषार्कतेऽमरतले विशुद्धे च पचे याचाष्टमीव्रतमदो नभसीह कुर्य्युः। दूर्व्वां तदत्ततिलैः प्रतिपूजयेयुस्ता प्राप्नुयुः सकलसिद्धिसमृद्धिमृद्धिम्॥"

इति भविष्योत्तरे दूर्व्वाष्टमीव्रतकथा समाप्ता॥

दूलिका, स्त्री, (दूली+स्वार्थे कन्। टाप् पूर्व्वह्रस्वश्च।) नीली। इति शब्दरत्नावली॥

दूली, स्त्री, (दूरं दूरत्वमस्या अस्तीति। दूर+अच्। रस्य लः। गौरादित्वात् ङीष्।) नीली। इति शब्दरत्नावली॥

दूष्यं, क्ली, (दूयते इति। भावे क्यिप्। दूः खेदस्तं श्यायते अन्तर्भूतण्यर्थाद्गमयतीति। दू+श्यै+कः।) दूष्यम्। वस्त्रगृहम्। इत्यमरटीकासारसुन्दरी॥

दूषकः, त्रि, (दूषयतीति। दुष्+णिच्+"ण्वुल्तृचौ।" ३।१।१३३। इति ण्वुल्।) दोषोत्पादकः। तत्पर्य्यायः। पांसनः २। इति त्रिकाण्डशेषः॥ (यथा, मनौ। ६। २६२।

"कूटशासनकर्त्तॄंश्च प्रकृतीनाञ्च दूषकान्। स्त्रीबालब्राह्मणघ्नाञ्च हन्याद्विट्सेविनस्तथा॥")

दूषणः, पुं. (दूषयतीति। दूषि+ल्युः।) रावणभ्रातृखरसेनापतिः। इति रामायणम्॥ (यथा, रघुः। १२। ४६।

"असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम्। न चक्षमे शुभाचारः स दूषणमिवाननः॥"

दूषि+भावे ल्युट्।) दोषः, स्त्री॥ (यथा, देवीभागवते। १। १७। २४।

"वह्निस्तोऽहं स्वयं पित्वा दूषणं कस्य दीयते॥")

दूषणारिः, पुं, (दूषणस्य राक्षसस्य अरिः।) श्रीरामः। इति शब्दरत्नावली॥

दूषिः, स्त्री, (दूषयतीति। दुष+क्विप्+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्।) दूषिका। इति शब्दरत्नावली॥

दूषिका, स्त्री, (दूषि+स्वार्थे कन्। टाप्। यद्वा, दूषि+खुल्+टाप् अत इत्वञ्च।) नेत्रमलम्। इत्यमरः। २। ६। ६७॥ पिचुटि इति भाषा॥ तत्पर्य्यायः। पिच्चोड़कम् २ दूषिः ३ दूषी ४। इत्यमरटीकायां भरतः॥ दूषीका ५ पिञ्जेटः ६ पिच्चटः ७। इति शब्दरत्नावली॥ (यथा, मनौ। ५। १३५।

"वसाशुक्रमसृङ्मज्जामूत्रविट्श्लेष्मकर्णविट्। श्वेताक्षिदूषिकास्वेदो द्वादशैते नृणां मलाः॥")

तूलिका। इति मेदिनी। के, १०५॥ (दूषयतीति। दूषि+ण्वुल्। यथा, महाभारते। १२।३५।३०।

"स्त्रियास्तथापचारिण्या निष्कृतिः स्याद्दूषिका।
अपि सा पूयते तेन न तु भर्त्ता प्रदुष्यति॥")

दूषितः, त्रि, (दुष्+णिच्+क्तः।) प्राप्तदोषः। (यथा, महाभारते। १। १४०। २६।

"ततो वलमिति ख्यातं विज्ञाय दृढ़धन्विनाम्। दूषितः सहसा भावो धृतराष्ट्रस्य पाण्डुषु॥") मैथुनापवादयुक्तः। तत्पर्य्यायः। अभिग्रस्तः २ वाधः ३ चारितः ४। इति हेमचन्द्रः।३।१००॥ आचारितः ५। इति शब्दरत्नावली॥

दूषिता, स्त्री, (दूषित+टाप्।) दूषणयुक्ता कन्या। तत्पर्य्यायः। सखेदा २ धर्षकारिणी ३ प्रमादिका ४। इति शब्दरत्नावली॥

दूषी, स्त्री, (दूषि+"ऋदिकारादिति।" वा ङीष्।) दूषिका। इत्यमरटीकायां भरतः॥

दूषीका, स्त्री, (दूषयतीति+दूषि+"कृषिदूषिभ्यामीकन्।" उणा ४। १६। इति। ईकन् ततष्टाप्।) दूषिका। इति शब्दरत्नावली॥

दूषीविषं, क्ली, (दूषयतीति। दूषि+बाहुलकात् ईः। ततः कर्म्मधारयः।) औषधादिभिरवीर्य्यं विषम्। इति हेमचन्द्रः। ४। ३८०॥ आदिपदात्तदावाग्निवायुरौद्रप्रयोगितविषम्। स्वभावतो गुणहीनं विषम्। अस्य गुणः। उदररोगप्लीहगुल्मकुष्ठप्रमेहनाशित्वम्। इति राजवल्लभः॥ यथा,—

"जीर्णं विषन्नौषधिभिर्हतं वा
दावाग्निवातातपप्रयोगितं वा।
स्वभावतो वा गुणविप्रहीनं
विषं हि दूषीविषतामुपैति॥"

इति माधवकरः॥

दूष्यं, क्ली, (दूष्यते इति। दुष्+णिच्+"अचो यत्।" ३। १। ९७। इति यत्। "दोषो णौ।" ६। ४। ६०। इति उपधाया ऊत्वम्।) वस्त्रम्। वस्त्रयुग्मम्। इति मेदिनी। ये, ३१॥ पूयम्। इति हेमचन्द्रः। ३। २८८॥

दूष्यः, त्रि, (दुष+णिच्+यत्।) दूषणीयः। इति मेदिनी। ये, ३१॥ (यथा, महाभारते। १२। १६५। ३२।

"क्षीरकं दुग्धकुलाचापि विषादप्यमृतं पिबेत्।
आदूष्या हि स्त्रियो रक्षमाप इत्येव धर्म्मतः॥"

निघण्टौ। इति त्रिकाण्डशेषः। ३। ३। ३१३॥ यथा, कामन्दकीयनीतिसारे। ६। ६।

"राज्ञोपघातं कर्व्वाणा ये प्रापा राजवल्लभाः।
एकैकशः संहता वा दूष्यास्तान् परिचक्षते॥")

दूष्या, स्त्री, (दूष्यते इति। दुष+णिच्+यत्+टाप्।) हस्तिकक्षरज्जुः। काछड़ि इति भाषा॥ तत्पर्य्यायः। कक्षा २ वरत्रा ३। इति हेमचन्द्रः। ४। २६८॥ धूषा ४। इत्यमरः। २। ८। ४२॥

दृ, ड भ आदरे। इति कविकल्पद्रुमः। (तुदादयमात्मं-सकं-अनिट्।) आदरः प्रीत्या सम्भ्रमः। ड भ, द्रियते गुरुं लोकः। मानुषस्त्रीय्यमित्येके। इति दुर्गादासः॥

दृक्, [श्] स्त्री, (पश्यत्यनेनेति। दृश्+करणे क्विप्।) चक्षुः। इत्यमरः। २। ६। ८४। (यथा, साहित्यदर्पणे।

"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः॥"

भावे क्विप्।) दर्शनम्। वृद्धिः। इति मेदिनी। शे, ८॥ (यथा, भागवते। २। ६। ५।

"तां नाध्यगच्छद्दृढ़मत्र सम्मतां
प्रपत्तिनिर्भाणविधिर्यया भवेत्॥")

दृक्, [श्] त्रि, (पश्यतीति। दृश+कर्त्तरि क्विन्।) वीक्षकः। इति मेदिनी। शे, ८॥ (यथा, भागवते। ४। २२। ६।

"यथा सर्व्वदृशं सर्व्व आत्मानं येऽस्य हेतवः॥")

ज्ञाता। इति शब्दरत्नावली॥

दृकं, क्ली, (दीर्य्यते इति। दॄ विदारे+बाहुलकात् कक् ह्रस्वश्च।) छिद्रम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

दृकाणः, पुं, द्रेक्काणः। इति ज्योतिषम्॥

दृक्कर्णः, पुं, (दृशौ नेत्रावेव कर्णौ यस्य।) सर्पः। इति हेमचन्द्रः। ४। ३६६॥ यदाह कश्चित्।

"दृक्कर्णो मशकः शिला सरसिजं वाणो जलौकाः शुकः
शुभ्रांशुर्गगनं कुशोत्तमबली पाण्डो नभश्चातकः।
वादी चक्रचरो वको मधुलिहो लालाटिको लम्पटः
श्रीमद्भोज! भवन्तु विंशतिरमी सदृशिरिणां सेवकाः॥")

दृक्काणः, पुं, द्रेक्काणः। इति ज्योतिषम्॥

दृक्प्रसादा, स्त्री, (दृशौ नेत्रौ प्रसादयतीति। दृश+प्र+सद्+णिच्+अच्।) कुलत्था। कुलत्यागाछनम्। इति राजनिर्घण्टः॥

दृक्प्रिया, स्त्री, (दृशोर्नेत्रयोः प्रिया।) शोभा। इति राजनिर्घण्टः॥

दृक्श्रुतिः, पुं, (दृशौ एव श्रुती कर्णौ यस्य।) सर्पः। इति हलायुधः॥

दृग्मध्यः, पुं, (दृशोर्नेत्रयोरध्यः अधिष्ठातृदेवः।) सूर्य्यः। इति शब्दार्थकल्पतरुः॥

दृग्गोलः, पुं, खगोलान्तर्गतगोलविशेषः। यथा,

"खस्वस्तिके चाधःखस्वस्तिके चान्तःकीलकौ ध्रुवतत्तयोः प्रोतं सूत्रं दृङ्मण्डलं कार्य्यं तत् पूर्व्ववृत्तस्थः किञ्चिदूनं कार्य्यं यथा खगोलान्तर्भ्रमति यद्येक एव ग्रहगोलस्तदैकमेव दृङ्मण्डलम्। यो यो ग्रहो यत्र यत्र वर्त्तते तस्य तस्योपरि परिभ्राम्येदमेव विम्बस्य दृग्ज्याग्रङ्कादिकं दर्शनीयम्। अथवा पृथक् पृथगष्टौ दृङ्मण्डलानि रचयेत्। तच्चाद्यं विम्बिभलम्बस्य तत्र दृक्क्षेपमण्डलं तस्मिन् खगोले ध्रुवचिह्नयोर्मेलिकाद्वयं दत्त्वा तन्मेलिकाधारमेव खगोलाद्बहिरङ्कलनयान्तरे दृग्गोलं रचयेत्। कथितैः खगोलवृत्तैर्व्वलयमार्गैर्भगोलवृत्तैः क्रान्तिमण्डलादैर्यो विबध्यते स दृग्गोलः। यतोऽस्या कुण्याकमग्रङ्कुवाद्यचक्रेणापि द्विगोलजातानि भगोलवृत्तानि खगोलवृत्तमिलितानि उत्तप्रत्यक्षे गोलबन्धे सम्यङ्नोपलक्ष्यन्त इति दृग्गोलः स्मृतः।" इति सिद्धान्तशिरोमणिः॥

दृग्विषः, पुं, (दृशि नेत्रे विषं यस्य।) नागः। इति हेमचन्द्रः। ४। ३७८॥

दृढ़ं, क्ली, (दृह दृढ़ौ+क्तप्रत्ययेन निपातनात् साधुः।) लौहम्। इति शब्दचन्द्रिका॥ अतिशूरः। इत्यमरः। ३। १। ७६॥

दृढ़ः, त्रि, (दृह+क्तः। निपातनात् साधुः।) स्थूलः। अतिशूरः। प्रगाढ़ः। (यथा, देवीभागवते। १। ६। ३१।

"तदाकाशे श्रुतं ताभ्यां वाग्बीजं सुमनोहरम्।
गृहीतञ्च ततस्ताभ्यां तस्माभ्यां दृढ़ः सुतः॥")

बलवान्। इति मेदिनी। ढे, २॥ कठिनः। इत्यमरः। ३। ३। ४४॥

दृढ़ः, पुं, रूपकभेदः। यथा,—

"दृढ़ः प्रौढ़ोऽथ खचरो विभवश्चतुरक्रमः।
निर्घातरुक्मः प्रतिसारः कथिताः सप्त रूपकाः॥"

तल्लक्षणं यथा,—

"दृढ़ाख्यः स्यात्रघुछन्दं तारे च हंसलीलके।
चतुर्दशाक्षरैर्युक्तः शृङ्गारे परिकीर्त्तितः॥"

इति सङ्गीतदामोदरः॥

(क्षयोदग्रमनो रौच्यस्य पुत्रविशेषः। यथा, हरिवंशे। ७। ८३।

"सुनेत्रः क्षत्रवृद्धिश्च सुतपा निर्भयो दृढ़ः।
रौच्यस्येते मनोः पुत्रा अन्तरे तु क्षयोदग्रे॥")

दृढ़कण्टकः, पुं, (दृढ़ानि कठिनानि कण्टकानि यस्य।) क्षुद्रफलकण्टः। इति शब्दचन्द्रिका॥ धलकाँकड़ा इति भाषा॥

दृढ़काण्डं, क्ली, (दृढ़ं काण्डं यस्य।) दीर्घरोहिषकम्। इति राजनिर्घण्टः॥

दृढ़काण्डः, पुं, (दृढ़ः कठिनः काण्डो यस्य।) वंशः। इति राजनिर्घण्टः॥

दृढ़काण्डा, स्त्री, (दृढ़ः कठिनः काण्डो यस्याः।) पातालगरुडौषधता। इति राजनिर्घण्टः॥

दृढ़क्षुरा, स्त्री, (दृढ़ः क्षुर इवाग्रभागो यस्याः। यद्वा, दृढ़ः क्षुर इव फलमस्त्यस्या इति अर्शआदिभ्योऽच् ततष्टाप्।) वल्लजा। इति राजनिर्घण्टः॥

दृढ़गात्रिका, स्त्री, (दृढ़ं गात्रमस्याः। कप्। ततष्टापि अत इत्वम्।) मत्स्यखण्डी। इति शब्दचन्द्रिका॥

दृढ़ग्रन्थिः, पुं, (दृढ़ो ग्रन्थिर्यस्य।) वंशः। इति राजनिर्घण्टः॥

दृढ़च्छदं, क्ली, (दृढ़च्छदो यस्य।) दीर्घरोहिषकम्। इति राजनिर्घण्टः॥

दृढ़तरुः, पुं, (दृढ़स्तरुश्च।) धवतरुः। इति राजनिर्घण्टः॥

दृढ़लवा, स्त्री, (दृढ़ं कठिनं लवं यस्य।) सुन्नलवम्। इति राजनिर्घण्टः॥

दृढ़लता, स्त्री, (दृढ़ं लतं यस्याः।) वल्लजा। इति राजनिर्घण्टः॥

दृढ़लक्, [च्] पुं, (दृढ़ो लक् यस्य।) यावनालशरः। इति राजनिर्घण्टः॥

दृढ़दंशकः, पुं, (दृढ़ं यथा तथा दशतीति। दृढ़श+ण्वुल्।) जलजन्तुविशेषः। इति शब्दार्थकल्पतरुः॥ हाङ्गर इति भाषा॥

दृढनीरः, पुं, (दृढं प्रचुरं नीरं यस्मिन्निति ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥

दृढपत्रः, पुं, (दृढानि कठिनानि पत्राणि यस्य ।) वंशः । इति राजनिर्घण्टः ॥

दृढपत्री, स्त्री, (दृढानि पत्राणि यस्याः । गौरादित्वात् ङीष् ।) वल्लजा । इति राजनिर्घण्टः ॥

दृढपादा, स्त्री, (दृढः पादो मूलं यस्याः ।) यवतिक्ता । इति राजनिर्घण्टः ॥

दृढपादी, स्त्री, (दृढः कठिनः पादो मूलं यस्याः ।) गौरादित्वात् ङीष् ।) भूम्यामली । इति राजनिर्घण्टः ॥

दृढप्ररोहः, पुं, (दृढः प्ररोहोऽङ्कुरो यस्य ।) न्यग्रोधवृक्षः । इति राजनिर्घण्टः ॥

दृढफलः, पुं, (दृढं कठिनं फलं यस्य ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥

दृढबन्धिनी, स्त्री, (दृढं यथा तथा बध्नातीति । बन्ध + णिनिः । ङीप् ।) श्यामालता । इति शब्दचन्द्रिका ॥

दृढमुष्टिः, पुं, (दृढा सुष्टिर्धारणाय यस्य ।) खड्गादिः । (दृढा दानाद्यभावात् कठिना मुष्टिर्यस्य ।) कृपणे, त्रि । इति विश्वः । टै, ६५ ॥ (दृढमुष्टिधारकः । यथा, हरिवंशे । २० । ६८ । "नियहीतः कन्धरायां गृध्रेणा दृढमुष्टिना ॥") दृढमूलः, पुं, (दृढं मूलं यस्य ।) सुस्थिरमूलम् । मन्थानकवृक्षः । इति राजनिर्घण्टः ॥ नारिकेलः । इति शब्दार्थकल्पतरुः ॥

दृढरङ्गा, स्त्री, (दृढः स्थिरः रङ्गो रागो यस्याः ।) स्फटी । इति राजनिर्घण्टः ॥

दृढलता, स्त्री, (दृढा कठिना लता ।) पातालगरुडी । इति राजनिर्घण्टः ॥

दृढलोमा, [न्] पुं, (दृढानि लोमानि यस्य ।) शूकरः । इति शब्दचन्द्रिका ॥ कठिनलोमयुक्ते, त्रि ॥

दृढवल्कलः, पुं, (दृढं वल्कलं त्वग् यस्य ।) वकुलः । पूगः । इति राजनिर्घण्टः ॥

दृढवल्का, स्त्री, (दृढं वल्कं यस्याः ।) अम्बष्ठा । इति राजनिर्घण्टः ॥

दृढवीजः, पुं, (दृढं वीजमस्य ।) चक्रमर्दः । वदरः । वर्बूरः । इति राजनिर्घण्टः ॥

दृढसन्धिः, त्रि, (दृढः स्थूलः सन्धिर्यस्य ।) निश्छिद्रः । तत्पर्य्यायः । संहतः २ । इत्यमरः । ३ । १ । ७५ ॥

दृढस्त्रिका, स्त्री, (स्त्रमस्त्यस्या इति । स्त्र + ठन् । दृढा कठिना स्त्रिका चेति कर्म्मधारयः ।) मूर्व्वा । इति शब्दचन्द्रिका ॥

दृढस्कन्धः, पुं, (दृढः स्कन्धो यस्य ।) शौरिकावृक्षः । इति जटाधरः । (दृढस्कन्धविशिष्टे, त्रि ॥)

दृढाङ्गं, क्ली, (दृढं अङ्गं यस्य । तद्विशेषणादर्थादस्य कठिनत्वात् तथात्वम् ।) हीरकम् । इति राजनिर्घण्टः ॥ (कठिनाङ्गविशिष्टे, त्रि ॥)

दृतः, त्रि, (दृ + क्तः ।) आदृतः । आदरार्थकधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥

दृता, स्त्री, (म्रियते स्मेति । दृ + कर्म्मणि क्तः । टाप् । भिषग्भिर्बहुव्याधिप्रयोगेषु क्षतादरत्वादस्याः तथात्वम् ।) जीरकः । इति शब्दचन्द्रिका ॥

दृतिः, पुं, (दृणातीति । दृ विदारे + "दृणातेर्ह्रस्वश्च ।" उणां । ४ । १८३ । इति तिः हृस्वश्च ।) चर्म्मपुटकः । अस्य पर्य्यायः । खल्लः २ । इति हेमचन्द्रः । ४ । ६१ ॥ (यथा, मनुः । २ । ६६ । "इन्द्रियाणान्तु सर्व्वेषां यद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम् ॥") मत्स्यः । इति मेदिनी । तै, २६ ॥ (गलकम्बलः । यथा, महाभारते । १३ । ७६ । १८ । "सवत्सां पीवरीं दत्त्वा दृतिकण्ठामलङ्कृताम् । वैश्वदेवसमंवार्धं स्थानं श्रेष्ठं प्रपद्यते ॥" "दृतिकण्ठां प्रलम्बगलकम्बलाम् ।" इति तट्टीकायां नीलकण्ठः ॥ मेघः । इति निघण्टुः । १ । १० ॥ यथा, ऋग्वेदे । ७ । १०३ । २ ।

"दिवा पयो अभि यदेनमायन्
दृतिं न शुष्कं सरसी शयानम् ॥")

दृतिधारकः, पुं, (दृतिचर्म्मपुटकस्तदाकारं धारयतीति । धारि + "ण्वुल् तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) वृत्तविशेषः । आकनपाता इति भाषा । तत्पर्य्यायः । आनन्दी २ स्थविकारावृ ३ वामनः ४ । इति शब्दचन्द्रिका ॥

दृतिहरिः, पुं, (दृतिं चर्म्ममयद्रव्यं हरतीति । दृति + हृ + "हरतेर्दृतिनाथयोः पशौ ।" ३ । २ । २५ । इति इन् ।) कुक्कुरः । इति सुग्धबोधव्याकरणम् ॥

दृन्, य, हिंसा । इति सुग्धबोधटीकायां दुर्गादासः ॥

दृनृप, प अ उत्क्लेशे । इति कविकल्पद्रुमः ॥ (तुदां-परं सकं सेट् ।) दन्त्यवर्गद्वितीयादिः । सप्तमस्वरी । प अ, दम्फति । अ, दफति चौरं राजा क्षिप्रातीत्यर्थः । ददम्फ ददर्फ । इति दुर्गादासः ॥

दृनृभूः, स्त्री, (दम्फतीति । दृनृप + "अन्दूदृनृभू-जन्यूकन्यूकफेलूककर्कन्यूदिधिषूः ।" उणां । १ । ६५ । इति कूप्रत्ययान्तो निपातितः ।) सर्पः । चक्रम् । इति मेदिनी । भे, ५ ॥ (क्वचित् दनूपूरिति पाठोऽपि दृश्यते ।)

दृनृभूः, पुं, (दृनृप + कूः । निपातनात् साधुः ।) चक्रम् । सर्पः । इति हेमचन्द्रः ॥ राजा । इति शब्दरत्नावली ॥ अन्तकः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दृप, कि सन्दीपने । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे-भ्वां-परं-सकं-सेट् ।) कि, दर्पयति दर्पति । इति दुर्गादासः ॥

दृप, ण य ऊ हर्षे । गर्व्वे । इति कविकल्पद्रुमः ॥ (दिवां-उभं-अकं-वेट् ।) ण, दृप्नोत्ति । य, दृप्यति । ऊ, दर्पीत्यात् दर्पं स्यति । हर, अदृपत् अदार्षीत् अदार्क्षीत् अदर्पीत् । इति दुर्गादासः ॥

दृप, शृ वाधने । इति कविकल्पद्रुमः ॥ (तुदां-परं सकं-सेट् ।) शृ, दृपति दर्पिता । वाधनं विहृतिः । इति दुर्गादासः ॥

दृप्तः, त्रि, (दृप्यतीति । दृप् + कर्म्मणि क्तः ।) गर्व्वितः । इति धरणिः ॥ (यथा, महाभारते । १ । १ । १६२ ।

"यदाश्रौषं कालकेयास्तदस्रे
पौलोमानो वरदानाच्च दृप्ताः ।
देवैरजेया निर्ज्जिताश्चार्জ্জुनेन
तदा नाशंसे विजयाय सञ्जय ! ॥")

दृप्रः, त्रि, (दृपति बाधते इति । दृप् + "स्फायितञ्चीति ।" उणां । २ । १३ । इति रक् ।) दृप्तः । इत्युणादिकोषः ॥ (बलवान् । इत्युज्ज्वलदत्तः ॥)

दृफ, प शृ उत्क्लेशे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) प शृ, दम्फति । शृ, दफति चौरं राजा क्षिप्रातीत्यर्थः । ददर्फ । इति दुर्गादासः ॥

दृब्धः, त्रि, (दृभ्यते ग्रथ्यते इति । दृभ + कर्म्मणि क्तः ।) ग्रथितः । इत्यमरः । ३ । १ । ८६ ॥ (दृभ + कर्म्मणि क्तः ।) भीतः । इति भयाधर्थदृभधातुदर्शनात् ॥

दृभ, ई कि भये । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-अकं-सेट् ।) कि, दर्भयति दर्भति । ई, दृब्धः । रमानाथस्तु ड भौ इति धातुद्वयं मत्वा दारयति दरति भाययति भयति इत्याह । इति दुर्गादासः ।

दृभ, शृ ई कि गुम्फने । इति कविकल्पद्रुमः ॥ (तुदां-चुरां पक्षे भ्वां-सकं-सेट् ।) शृ, दृभति । ई, दृब्धः । कि, दर्भयति दर्भति । गुम्फनं ग्रथनम् । इति दुर्गादासः ॥

दृम्प, ञ क ङ संघाते । इति कविकल्पद्रुमः ॥ (चुरां-उभं-आत्मं च-सकं-सेट् ।) ओष्ठ्यवर्गपञ्चमोपधः । सप्तमस्वरी । ञ क, दृम्पयति दृम्पयते । ङ, दृम्पयते । संघातो राशीकरणम् । एषः केषिन्न मन्यते । इति दुर्गादासः ॥

दृम्भूः, स्त्री, (दम्फतीति । दृनृप + "अन्दूदृनृभूजन्यूकन्यूकफेलूककर्कन्यूदिधिषूः ।" उणां । १ । ६५ । इति कूः । निपातनात् साधुः ।) सर्पः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

दृम्भूः, स्त्री, (दम्फतीति + दृनृप् + कूः । निपातनात् साधुः ।) दृनृभूः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

दृश, दृर् औ प्रेक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) दृर अदर्शत् अद्राक्षीत् । औ, द्रष्टा । प्रेक्षणाच्चक्षुर्ज्ञानम् । पश्यति चक्षुर्लोकः । ततः स दद्रशे च तौ इति अमरोद्धारे व्याख्यानेपदम् । कदा द्रक्ष्येऽहं परमेश्वरि त्रिपथगे भागरथि ! त्वं वपुरिति गणङ्गतानित्यत्वात् । इति दुर्गादासः ॥

दृश्वत्, [द्] स्त्री, (दृश्वत् । इवोदरादित्वात् साधुः ।) पायसः । इत्यमरः । २ । ९ । ४ ॥ निर्य्यासगुग्गुलपङ्कम् । इति मेदिनी । शे, १२ ॥

दृश्यवती, स्त्री, (दृश्यत् पाषाणोऽस्यस्यामिति। दृश्यत्+मतुप् मस्य वः।) नदीविशेषः। सा आर्य्यावर्त्तस्य पूर्व्वसीमा। (यथा, महाभारते। ३। ८३। ४।
"दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे॥")
कात्यायनी। इति मेदिनी। ते, १६८॥

दृशा, स्त्री, (दृश्+पाषिकटाप्।) चक्षुः। इति शब्दचन्द्रिका॥

दृशाकाङ्क्षं, क्ली, (दृशा दृश्यया वा आकाङ्क्षं अभिलषणीयम्।) पद्मम्। इति शब्दचन्द्रिका॥

दृशान, क्ली, (दृश्यते अनेनेति। दृश्+आनच्।) ज्योतिः। इति मेदिनी। ने, ७५॥

दृशानः, पुं, (पश्यतीति। दृश्+"युधिबुधिदृशः किच्च।" उणा। २। ६०। इति आनच्। स च कित्।) आचार्य्यः। इत्युणादिकोषः॥ लोकपालः। ब्राह्मणः। उपाध्यायः। इति संक्षिप्तसारे उणादिवृत्तिः॥ विरोचनः। इति मेदिनी। ने, ७५॥ (दृश्यते इति। कर्म्मणि आनच्। दृश्यमाने, त्रि। यथा, ऋग्वेदे। १०। ४५। ८।
"दृशानो रुक्म उर्व्या व्यद्यौद्दुर्म्मर्षमायुः श्रिये रुचानः॥")

दृशिः,) स्त्री, (दृश्यतेऽनयेति। दृश्+इन्। स च
दृशी,) कित्। वा ङीष्।) चक्षुः। इति शब्दरत्नावली॥ (यथा,—
"किं सम्भृतं रुचिरयोर्द्विणदृक्षयोस्ते
मध्ये क्षणो वहसि यत्र दृशिः श्रिता मे॥"
इति भागवते। ५। २। १२।
चेतनः पुरुषः। यथा, पातञ्जलसूत्रम्। २।२५।
"तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम्।"
"तस्या अविद्याया अभावात् नाशात् संयोगाभावः संयोगस्य नाशो भवतीति शेषः। तच्च हानं संयोगविगमः। दृशेः पुरुषस्य कैवल्यं मुक्तिरिति चोच्यते।" दृक्शक्तिः। यथा, तत्रैव। २। २०।
"द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः।"
दृशिमात्र इति दृक्शक्तिरेव विशेषेण पराङ्दृश्यं।" इति भाष्यम्॥ दर्शनम्। यथा, ऋग्वेदे। ५। ८०। ५।
"एषा सुभा न तन्वो विदानोर्द्यावेव द्यातो दृशये नो अस्यात्॥"
"दृशये दर्शनाय" इति तद्भाष्ये सायनः॥")

दृशीपमं, क्ली, (दृशाया नेत्रस्य उपमा यत्र।) श्वेतपद्मम्। इति शब्दचन्द्रिका॥

दृश्यं, त्रि, (दृश्यते इति। दृश्+कर्म्मणि क्यप्।) दर्शनीयम्। द्रष्टव्यम्। इति व्याकरणम्॥ (यथा, महाभारते। ३। १३०। ५।
"एष वै चमसोद्भेदो यत्र दृश्या सरस्वती॥"
काव्यविशेषे, क्ली। यथा, साहित्यदर्पणे। ६।१।
"दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।
दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम्॥")

दृषत्, [द्] स्त्री, (दीर्य्यते असाविति। दृ+"इगातेः डुगच्च।" उणा। १। १३१। इति अदिः डुक् च।) पाषाणः। (यथा, मेघदूते। ५०।
"तत्र यक्षं दृषदि चरणन्यासमर्द्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः॥")
निर्व्वेदगन्धिला। इति मेदिनी। दे, ३२॥
("मांसं निरस्थि सुस्निग्धं पुनर्दृषदि चूर्णितम्॥"
इति सुश्रुते सूत्रस्थाने ४६ अः॥)

दृषत्सारं, क्ली, (दृषदः पाषाणस्य सार इव सारो यत्र।) सुवर्णायसम्। इति राजनिर्घण्टः॥

दृष्टं, क्ली, (दृश्+कर्म्मणि क्तः।) स्वपरचक्षुर्जन्यम्। इत्यमरः। २। ८। ३०॥ ईक्षिते, त्रि। यथा, मार्कण्डेये।
"दृष्टदोषेऽपि विषये ममत्वाक्षप्तचेतनः॥"

दृष्टरजाः, [स्] स्त्री, (दृष्टं रजो यस्याः।) प्राप्तरजस्का। तत्पर्य्यायः। मध्यमा २। इत्यमरः। २। ६। ८॥ प्रौढ़ा। इति राजनिर्घण्टः॥

दृष्टान्तः, पुं, (दृष्टः अन्तो निश्चयो यस्मिन्।) उदाहरणम्। (यथा, माघे। २। ३१।
"हरिर्योगः परेणापि महिम्ना न महात्मनाम्।
पूर्णचन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः॥")
प्रत्यक्षम्। सरणम्। इति मेदिनी। ते, ११५॥ (अलङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ६६८।
"दृष्टान्तस्तु सधर्म्मस्य वस्तुनः प्रतिबिम्बनम्॥"
सधर्म्मस्येति प्रतिवस्तूपमाव्यवच्छेदः। अयमपि साधर्म्म्यवैधर्म्म्याभ्यां द्विधा। क्रमेणोदाहरणं यथा,—
अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला॥")

दृष्टिः, स्त्री, (पश्यत्यनेनेति। दृश्+करणे क्तिन्।) चक्षुः। इत्यमरः। २। ६। ८२॥ (यथा, साहित्यदर्पणे। ३। ६८।
"द्रष्टा दृष्टिमधोददाति कुरुते गात्रापमाभाषिताम्॥")
दृष्टिः। (दृश्+भावे+क्तिन्।) दर्शनम्। इति मेदिनी। टे, १०॥ (यथा, मनुः। ६। ४६।
"दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत्॥")
ग्रहाणां दृष्टिकथनम्। यथा,
तृतीयगृहे दशमगृहे च शनेः पूर्णदृष्टिरन्येषां पाददृष्टिः। पञ्चमगृहे नवमगृहे च गुरोः पूर्णदृष्टिरन्येषामर्द्धदृष्टिः। चतुर्थगृहे अष्टमगृहे च कुजस्य पूर्णदृष्टिरन्येषां त्रिपाददृष्टिः। सप्तमगृहे सर्व्वेषां पूर्णदृष्टिः। पञ्चमगृहे सप्तमे नवमे द्वादशे च राहोः पूर्णदृष्टिः। द्वितीये दशमे च त्रिपाददृष्टिः। तृतीये षष्ठे चतुर्थे अष्टमे चार्द्धदृष्टिः॥* ग्रहाणां दृष्टाभावनिर्णयो यथा,—
स्थितिभवने एकादशे च राहोर्दृष्टाभावः। स्थितिभवने द्वितीये षष्ठे एकादशे द्वादशे चान्येषां दृष्टाभावः॥* एषां प्रमाणं यथा,—
"तृतीये दशमे चैव पाददृष्टिरुदाहृता।
अर्द्धदृष्टिश्च नवमे पञ्चमे च प्रकीर्त्तिता॥
चतुर्थे चाष्टमे चैव पादोना परिकीर्त्तिता।
सप्तमे परिपूर्णा च फलमेवं प्रकल्पयेत्॥
तृतीयदशमावार्किः पश्यन् पूर्णफलप्रदः।
त्रिकोणगान् गुरुश्चैव चतुर्थाष्टमगान् कुजः॥
सप्तमदर्शनवान्यें पूर्णदृष्टिः सुरारेर्-
युगलदशमराशौ दृष्टिमात्राच्चयार्द्धः।
सहजरिपुचतुर्थेष्वष्टमे चार्द्धदृष्टिः
स्थितिभवनसुपान्त्यं नैव दृश्यं हि राहोः॥
सप्तमश्च द्वितीयश्च षष्ठमेकादशस्तथा।
द्वादशाख्यं न पश्यन्ति शेषं पश्यन्ति ते ग्रहाः॥"
इति ज्योतिषतत्त्वम्॥

दृष्टिकृत्, क्ली, (दृष्टिं दृष्टिप्रसादं करोतीति। कृ+क्विप् तुगागमश्च। अतीवशोभया लोकानां नेत्राकर्षकत्वादस्य तथात्वम्।) स्वर्णपद्मम्। इति शब्दचन्द्रिका॥ (दर्शनकारके, त्रि॥)

दृष्टिकृतं, क्ली, (दृष्टेर्दर्शनाय कृतमिव। अतीवशोभाकरत्वात् तथात्वम्।) स्वर्णपद्मम्। इति शब्दरत्नावली॥

दृष्टिगुणः, पुं, (दृष्ट्या गुण्यते अभ्यस्यते यत्र। गुणत् क अभ्यासे+घञ्।) व्याधादिलक्ष्यम्। इति शब्दमाला॥

दृष्टिबन्धुः, पुं, (दृष्टेश्चक्षुषो बन्धुरिव।) खद्योतः। इति शब्दरत्नावली॥

दृष्टिविक्षेपः, पुं, (दृष्टेर्विक्षेपः।) कटाक्षः। इति हलायुधः॥

दृह, वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) सप्तमस्वरी दर्हति। इति दुर्गादासः॥

दृह, ङ वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) सप्तमस्वरी। ङ, दृंह्यते। इति दुर्गादासः॥

दृहितः, त्रि, (दृह्धातोः कर्त्तरि क्तेन निष्पन्नः। वृद्धिप्राप्तः॥

दृ, गि भिये। इति कविकल्पद्रुमः॥ (क्र्यां-परं-अकं-सेट्।) गि, दृणाति दीर्णः दीर्णिः। भिये भये। इति दुर्गादासः॥

दृ, म भिये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) म, दरयति। भिये भये। इति दुर्गादासः॥

दृ, य गि विदारे। इति कविकल्पद्रुमः॥ (दिवां-क्र्यां च-परं-सकं-सेट्।) य, दीर्य्यते। गि, दृणाति दीर्णः दीर्णिः। इति दुर्गादासः॥

दे, ङ पालने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-अनिट्।) ङ, दीनान् यो दयते नित्यम्। इति हलायुधः। इति दुर्गादासः॥

देदीप्यमानः, त्रि, पुनःपुनरतिशयेन वा दीप्यते यः। (दीप+यङ्+शानच्।) अतिशयदीप्तिविशिष्टः। इति व्याकरणम्॥

देयं, त्रि, (दा+"अचो यत्।" ३। १। ९७। इति यत्। "ईद्यति।" ६। ४। ६५। इति

देत् ।) दातव्यम् । दानीयम् । इति व्याकरणम् ॥
यथा, हितोपदेशे । १ । ३६ ।
"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति ॥")
देव, ऋ ड देवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) देवनमिह क्रीड़ा । ऋ. अदिदेवत् । ड, देवते बालः कन्दुकेनिति मुकुटः । देवनमिह रोदनमिति भट्टमल्लः । इति दुर्गादासः ॥
देवं, क्ली, (दीव्यत्यनेनेति । दिव + करणे घञ् ।) इन्द्रियम् । इति मेदिनी । वे, १२ ॥ (यथा, सुश्रुतोपनिषदि । ३ । १ । ८ ।
"न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्व-
स्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥")
देवः, पुं. (दीव्यति आनन्देन क्रीड़तीति । दिव + अच् ।) देवता । (यथा, मनुः । ३ । १९७ ।
"देवान्पूर्वं मनुष्यांश्च पितॄन् यत्नाच्च देवताः ।
पूजयित्वा ततः पश्चात् गृहस्थः श्रेयसृग् भवेत् ॥")
नाग्नोक्तौ राजा । इत्यमरः । १ । ७ । १३ ॥ राजा । (यथा, काद्म्बरी । १८ ।
"सकलभूतलरत्नभूतोऽयं वैश्वम्पायनो नाम शुकः । सर्व्वरत्नानामुदधिरिव देवो भाजनमिति श्लेनमादायास्मत्स्वामिदुहिता देवपाद-मूलमाधाता तदयमात्मीयः क्रियतामिति ॥")
मेघः । इति मेदिनी । वे, १२ ॥ (यथा, महाभारते । ३ । २३५ । २३ ।
"क्षेत्रे सुकृष्टे क्षुपिते च बीजे
देवे च वर्षत्यृतुकालयुक्तम् ॥"
केचित्तु देवशब्देन इन्द्र इति व्याचक्षते ॥)
पारदः । इति राजनिर्घण्टः ॥ ब्राह्मणानामुपाधिभेदः । यथा, स्मृतिः ।
"देवपूर्व्वं नराख्यं स्यात् शर्म्मवर्म्मादिसंयुतम् ॥"
(ऋत्विक् । यथा, ऋग्वेदे । ६ । ६६ । ६ ।
"ब्रह्मा देवानां पदवीः कवीना-
मृषिर्विप्राणां महिषो मृगाणाम् ॥"
"देवानां स्तोत्रकारिणामृत्विजां ब्रह्मा ब्रह्माख्यर्त्विक्स्थानीयो भवति ।" इति तद्भाष्ये सायनः ॥) कायस्थादीनां पदवितिभेदः । तस्य विवरणं कायस्थशब्दे द्रष्टव्यम् ॥ (चि, दाता । द्योतयिता । दीपयिता । यथा, ऋग्वेदे ।१।१।१।
"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ॥"
"देवशब्दो दानदीपनद्योतनानामन्यतममर्थमाचष्टे । यज्ञस्य दाता दीपयिता द्योतयिता यमग्निरित्युक्तं भवति ।" इति तद्भाष्ये सायनः ॥ विष्णुः । यथा, महाभारते । १३ । १४६ । ५४ ।
"उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ॥"
"दीव्यति यत् क्रीड़ति सर्गादिति विजिगीषति असुरान् व्यवहरति सर्व्वभूतेष्वात्मतया द्योतते स्तूयते स्तुत्यैः सर्व्वत्र गच्छति तस्माद्देवः । एको-देव इति मतुवर्णात् ॥" इति तद्भाष्ये भरतः ॥ महादेवः । यथा, महाभारते ।१३।१७।६८।
"परश्वधायुधो देवः अनुकारी सुबान्धवः ॥")
देवकः, पुं, यदुवंशीयराजविशेषः । स श्रीकृष्णस्य मातामहः । इति श्रीभागवतम् ॥ (अयन्तु गन्धर्व्वपतेरंशावतारः । यथा, महाभारते । १ । ६७ । ६६ ।
"यस्त्वासीद्देवको नाम देवराजसमद्युतिः ।
स गन्धर्व्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः ॥")
देवकर्दमः, पुं, (देवप्रियः कर्दम इव ।) सुगन्धिद्रव्यविशेषः । स श्रीखण्डागुरुकर्पूरकुङ्कुमसंमिश्रितैर्भवति । इति राजनिर्घण्टः ॥
देवकात्मजा, स्त्री, (देवकस्य आत्मजा कन्या ।) देवकी । इति शब्दरत्नावली ॥
देवकाष्ठं, क्ली, (देवप्रियं काष्ठम् ।) देवदारु । इति रत्नमाला ॥ देवदारुप्रभेदः । तत्पर्य्यायः । पूतिकाष्ठम् २ भद्रकाष्ठम् ३ सुकाष्ठकम् ४ स्निग्धदारुकम् ५ काष्ठदारु ६ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । रूक्षत्वम् । श्लेष्मानिलापहत्वञ्च । इति राजनिर्घण्टः ॥
देवकिरी, स्त्री, (देवं मेघं किरतीति । कृ + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः । गौरादित्वात् ङीष् ।) मेघरागस्य भार्य्या । यथा,—
"ललिता मालवी गौरी नाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥"
अस्याः स्वरूपं यथा,—
"भ्रमन्ती नन्दने श्यामा पुष्पप्रचयतत्परा ।
ख्याता देवकिरी श्लेषा करार्पितसखीकरा ॥"
इति सङ्गीतदामोदरः ॥
देवकी, स्त्री, (देवक + ङीष् ।) देवकराजकन्या । सा वसुदेवपत्नी श्रीकृष्णमाता । तत्पर्य्यायः । देवकी २ कृष्णजननी ३ देवकात्मजा ४ । इति शब्दरत्नावली ॥ इयं कश्यपपत्नी अदितेर्भगिनी जाता । यथा,—
"देवकी रोहिणी चेमे वसुदेवस्य धीमतः ।
रोहिणी सुरभिर्देवी अदितिर्देवकी त्वभूत् ॥"
अपि च ।
"कश्यपो वसुदेवश्च देवमाता च देवकी ।
पूर्व्वपुण्यफलेनैव संप्राप श्रीहरिं सुतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥
देवकीनन्दनः, पुं, (देवक्या नन्दनः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥ (यथा, भागवते । १ । ८ । २१ ।
"कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥"
क्वचिदीकारस्य ह्रस्वोऽपि दृश्यते । यथा, महाभारते । २ । २४ । ३१ ।
"नैतच्चित्रं महाबाहो ! त्वयि देवकिनन्दने ॥")
देवकीसुतः, पुं, (देवक्याः सुतः पुत्रः ।) श्रीकृष्णः । इति हेमचन्द्रः । २ । १३२ ॥ (यथा, भविष्ये ।
"तुष्ट्यर्थं देवकीसूनोर्जयन्ती संज्ञकं व्रतम् ।
कर्त्तव्यं चिन्त्यमानेन भक्त्या भक्तजनैः सह ॥")
देवकुरुजा, स्त्री, महाद्रोणा । इति राजनिर्घण्टः ॥
देवकुलं, क्ली, (देवाय कोलतीति । कुल सङ्घाते + कः ।) विनासुखम् । इति हारावली । १६८ ॥ देउल इति भाषा ॥ (यथा, कथासरित्सागरे । १२ । १२७ ।
"सोऽहं दारिद्र्यसन्तप्तश्च नारायणाश्रयः ।
निराहारः स्थितोऽकार्षं गत्वा देवकुलं तपः ॥")
अस्य विवरणं चैत्यशब्दे द्रष्टव्यम् ॥
देवकुसुमं, क्ली, (देवप्रियं कुसुमं पुष्पं यस्य ।) नवङ्गम् । इत्यमरः । २ । ६ । १२५ ॥
देवखातं, क्ली, (देवेन खातम् । अकृत्रिमत्वादस्य तथात्वम् ।) देवखातकम् । इत्यमरटीकायां भरतः ॥ (यथा, मनुः । ४ । २०३ ।
"नदीषु देवखातेषु तड़ागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्भप्रस्रवणेषु च ॥")
देवखातकं, क्ली, पुं, (देवखातमेव । स्वार्थे कन् ।) अकृत्रिमजलाशयः । अपौरुषेयं देवकृतमित्यन्ये । इति सुभूतिः ॥ नागादिकृतमकृत्रिममिति स्वामी ॥ तत्पर्य्यायः । आखातम् २ । इति भरतः ॥ अखातम् । इत्यमरः । १ । १० । २७ ॥ दैवविनिर्म्मितम् ३ । इति शब्दरत्नावली । गुहा । इत्यमरटीकायां भरतः ॥
देवखातविलं, क्ली, (देवखातं अकृत्रिमं विलम् । नित्यकर्म्मधारयः ।) गुहा । इत्यमरः ।२।३।६॥
देवगन्धा, स्त्री, (देवप्रियो गन्धो यस्याः ।) मदामेदा । इति राजनिर्घण्टः ॥
देवगान्धारी, स्त्री, श्रीरागस्य भार्य्या । यथा,—
"गान्धारी देवगान्धारी मालवश्रीश्च सारवी ।
रामकिर्य्यपि रागिण्यः श्रीरागस्य प्रिया इमाः ॥"
इति सङ्गीतदामोदरः ॥
अस्या गानसमयः शिशिरे ऋतौ तृतीयप्रहरार्द्धरात्रार्द्धपर्य्यन्तम् ॥
देवगायनः, पुं, (देवानां गायनः ।) गन्धर्व्वः । इति हेमचन्द्रः । २ । ६७ ॥
देवगिरी, स्त्री, रागिणीविशेषः । इति हलायुधः ॥ सा सोमेश्वरमते वसन्तरागस्य भार्य्या वसन्तऋतौ सदा गेया । भरतमते हिन्दोलरागपुत्रनागध्वनिभार्य्या । सङ्गीतदर्पणमते तु नटकल्याणभार्य्या । अस्याः स्वरूपं यथा, अत्यभिरामवपुश्यामतनुः उत्तुङ्गपीनस्तनी हारकङ्कणभूषणा स्त्रीपङ्क्तिमध्यस्था मत्तचकोरनयना सुभङ्गभ्रूश्च । अस्या गानसमयः हेमन्ते दिवाचतुर्थप्रहरार्द्धरात्रार्द्धपर्य्यन्तम् ॥
देवगुरुः, पुं, (देवानां गुरुः ।) बृहस्पतिः । इति पुराणम् ॥ (देवानां गुरुः पिता । कश्यपः । यथा, हरिवंशे । २६६ । ८ ।
"अपश्यन् कश्यपं तत्र मुनिं दीप्ततपोनिधिम् ।
आद्यं देवगुरुं दिव्यं क्षिप्रं चिन्तयतामुभिः ॥")
देवगृहं क्ली, (देवानां सूर्य्यादीनां गृहमिव ।) सूर्य्यचन्द्रादीनां ज्योतिर्म्मण्डलानि । यथा,—
"मन्वन्तरेषु सर्व्वेषु ऋक्षे सूर्य्यग्रहास्तथा ।
तानि देवगृहाणि स्युः स्थानास्थानि भवन्ति हि ॥"
इति मत्स्यपुराणम् ॥

देवालयः ॥ (यथा, कथासरित्सागरे । ४।१०२।
"मूर्त्ते देवगृहे देहभिन्नदत्तस्य रचितुम् ॥")
देवचिकित्सकौ, पुं, (देवानां चिकित्सकौ ।) अश्विनीकुमारौ । इति हलायुधः ॥ द्विवचनान्तोऽयम् ॥
देवच्छन्दः, पुं, (देवैश्छन्द्यते आकाङ्क्ष्यते इति । छन्द + घञ् ।) हारविशेषः । स च शतयष्टिकः । इत्यमरः । २ । ६ । १०५ ॥ अष्टोत्तरशतयष्टिकोऽयमिति केचित् । इति भरतः ॥ (यथा, बृहत्संहितायाम् । ८१ । ३२ ।
"शतमष्टयुतं हारो देवच्छन्दो ह्यशीतिरेकयुता । अष्टाधिकोऽर्द्धहारो रश्मिकलापश्च नवषट्कः ॥")
देवजग्धं, क्ली, (देवैरद्यते इति । अद् + क्तः । "अदोजग्धिर्लुप्तिकिति ।" २ । ४ । ३६ । इति जग्धादेशः ।) देवजग्धकम् । इति हेमचन्द्रः । ४ । २५७ ॥
देवजग्धकं, क्ली, (देवजग्ध + स्वार्थे कन् ।) कत्तृणम् । इत्यमरः । २ । ४ । १६६ ।
देवटः, त्रि, (दिवतीति । दिव + "ग्रकादिभ्योऽटन् ।" उणा । ४ । ८१ । इति अटन् ।) शिल्पी । इत्युणादिकोषः ॥
देवट्टी, स्त्री, (देवं देवगृहं अट्टते अतिक्रामतीति । अट् + अण् । ग्रकन्यादिलादलोपः । गौरादिलात् ङीष् ।) गङ्गाचिल्ली । इति हारावली । ८५ ॥
देवतरुः, पुं, (देवानां तरुः ।) मन्दारः । पारिजातः । सन्तानः । कल्पवृक्षः । हरिचन्दनम् । इत्यमरः । १ । १ । ५१ ॥ चैत्यवृक्षः । इति त्रिकाण्डशेषः ॥
देवता, स्त्री, (देव एवं । स्वार्थे तल् ।) देवं द्युतिं क्रीड़ां वा तनोति या । तत्पर्य्यायः । अमरः २ निर्ज्जरः ३ देवः ४ त्रिदशः ५ विबुधः ६ सुरः ७ सुपर्व्वा ८ सुमनाः ९ त्रिदिवेशः १० दिवौकाः ११ आदितेयः १२ दिविषत् १३ लेखः १४ अदितिनन्दनः १५ आदित्यः १६ ऋभुः १७ अक्षयः १८ अमर्त्यः १९ अन्धतामाः २० बर्हिर्मुखः २१ क्रतुभुक् २२ गीर्व्वाणः २३ दानवारिः २४ पुरन्दरः २५ देवतम् २६ । इत्यमरः । १ । १ । ९ ॥ खाहाभुक् २७ दनुजहित् २८ हुवत् २९ दौषत् ३० खर्गी ३१ धौमः ३२ निलिम्पः ३३ सुचिरायुः ३४ स्थिरः ३५ । इति शब्दरत्नावली ॥ तस्याः संख्या चतुस्त्रिंशत्कोटयः । यथा,—
"सदारा विबुधाः सर्व्वे स्वानां स्वानां गणैः सह । त्रैलोक्यं तत्र चतुस्त्रिंशत्कोटीसंख्या यथा भव ॥"
इति प्राग्भोत्तरखण्डम् ॥ * ॥
गणदेवता यथा,—
"आदित्यास्तुषिता भास्वत्प्रभाभास्वरभास्वताः । महाराजिकवह्नाद्य वसवो गणदेवताः ॥
आदित्या द्वादश प्रोक्तास्तुषिताख्यिंशदेव हि । विश्वेदेवा दश प्रोक्ताः साध्या द्वादश कीर्त्तिताः ॥
आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः । महाराजिकनामानो हे शते विंशतिस्तथा ।
रुद्रा एकादश प्रोक्ता वसवोऽष्टौ समीरिताः ॥"
इति शब्दरत्नावली ॥ * ॥
तेषां चत्वारो वर्णा यथा, —
"आदित्याः क्षत्रियास्तेषां विप्रश्च मरुतस्तथा । अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ ॥
स्मृतास्त्वङ्गिरसा देवा ब्राह्मणा इति निश्चयः । इत्येतत् सर्व्वदेवानां चातुर्व्वर्ण्यं प्रकीर्त्तितम् ॥"
इति महाभारते मोक्षधर्म्मः ॥ * ॥
वैष्णवानां पञ्चदेवता यथा,—
"यत्र यत्र सुराः पूज्या गणीग्राद्यास्तु कर्म्मिणाम् । विष्णुर्वैनं तत्र तत्र वैष्णवानां हि वैष्णवाः ॥
विश्वक्सेनं सनकं सनातनमतःपरम् । सनन्दं सनत्कुमारञ्च पञ्चैवं पूजयेत्ततः ॥"
इति याज्ञे उत्तरखण्डम् ॥ * ॥
देवषट्कं यथा,—
"गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवां शिवाम् । देवषट्कञ्च संपूज्य नमस्कृत्य विचक्षणः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
अपि च ।
"आदित्यं गणनाथञ्च देवीं रुद्रं यथाक्रमम् । नारायणं विष्णुमाख्यमग्नेश्च कुलदेवताः ॥"
इत्याह्निकतत्त्वम् ॥ * ॥
शक्तिविशेषस्य उपास्यदेवता यथा,—
"या यस्याभिमता पुंसः सा हि तस्यैव देवता । किन्तु कार्य्यविशेषेण पूजिता चेतरा वृथाम् ॥
विशेषात् सर्व्वदा नार्य्यः निन्द्यो ह्यन्यथा वृथाः । वृथाणां देवतं विष्णुस्तथैव च पुरन्दरः ॥
विप्राणामग्निरादित्यो ब्रह्मा चैव पिनाकधृक् । देवानां देवतं विष्णुर्दानवानां त्रिशूलभृत् ॥
गन्धर्व्वाणां तथा सोमो यक्षाणामपि कथ्यते । विद्याधराणां वाग्देवी साध्यानां भगवान् हरिः ॥
रक्षसां शूकरो रुद्रः किन्नराणाञ्च पार्व्वती । ऋषीणां देवतं ब्रह्मा महादेवश्च शूलभृत् ॥
मनूनां स्यादुमा देवी तथा विष्णुः सभास्करः । ग्रहाणाञ्च सर्व्वे स्युर्ब्रह्मा वै ब्रह्मचारिणाम् ॥
वैखानसाम्भृगिका स्यादृषतीनाञ्च मद्देश्वरः । भूतानां भगवान् रुद्रः कुष्माण्डानां विनायकः ॥
सर्व्वेषां भगवान् ब्रह्मा देवदेवः प्रजापतिः । इत्येवं भगवान् ब्रह्मा स्वयं देवोऽभ्यभाषत ॥"
इति कूर्म्मपुराणम् ॥ * ॥
सामान्यदेवप्रतिष्ठादिनं यथा,—
तत्रोक्तनक्षत्राणि । उत्तरफल्गुन्युत्तराषाढ़ोत्तरभाद्रपदरोहिणी चित्रानुराधा मृगशिरो रेवती पुष्योऽश्विनी हस्ता श्रुतभिधा श्रवणा स्वाती पुनर्व्वसुर्धनिष्ठा । तत्र तिथयः शुभाः । तत्र चन्द्रस्तृतीयदशमसप्तमलग्नेकादशस्थः शोभनः ॥ अथ सामान्यदेवप्रतिष्ठादिनम् । तत्र मासाः । माघफाल्गुनचैत्रवैशाखज्यैष्ठाः हरिशयनात् पूर्व्वमाषाढ़श्च । तत्र नक्षत्राणि धनिष्ठाश्रुतभिषाशतभिषापुनर्व्वस्वश्विनीभरणीरोहिणीविशाखाभिन्नानि । तत्र तिथयः शुभाः । तत्र लग्नानि वृषमिथुनकन्याधनुर्मीनसंज्ञकानि । तत्र चन्द्रः शोभनः । लग्नादपेक्षया दृश्यतिः केन्द्रस्थ शोभनः लग्नादपेक्षया शुक्रस्तृतीयषष्ठैकादशस्थः शोभनः । इति ज्योतिषम् ॥
(देव + भावे तल् । देवत्वम् । यथा, ऋग्वेदे । १० । २४ । ६ ।
"मधुमन्मे परायणं मधुमत् पुनरायनम् । ता नो देवा देवतया युवं मधुमतस्कृतम् ॥"
"हे देवा देवौ द्योतमानौ तौ युवं युवां नोऽस्मान् मधुमतः प्रीतियुक्तान् कृतम् कुरुतम् । केनेति उच्यते । देवतया देवत्वेन अग्निमादिदेवतंशब्दयोगेनेत्यर्थः ।" इति तद्भाष्ये सायणः ॥)
देवताड़ः, पुं, (देवी दीप्तास्त्र इति । तस्य डः ।) वृक्षविशेषः । देताड़ा इति ख्यातः । तत्पर्य्यायः । वेणी २ खरा ३ गरी ४ भीष्मः ५ । इत्यमरः । २ । ४ । ६६ ॥ अगरी ६ खरागरी ७ गरागरी ८ । इति तट्टीकायां भरतः ॥ देवताड़ी ९ आखुविषहा १० । इति जटाधरः ॥ आखुः ११ विषनिघ्नः १२ महाच्छदः १३ कदमः १४ खड्गाकः १५ देवताड़कः १६ । इति रत्नमाला ॥ (देवौ चन्द्रार्कौ ताड़यतीति । ताड़ि + कर्म्मणि अण् ।) राहुः । अग्निः । इति मेदिनी । ड़े, ३६ ॥ घोषकलता । इति विश्वः ॥
देवताड़कः, पुं, (देवताड़ + स्वार्थे कन् ।) देवताड़ः । इति रत्नमाला ॥
देवताधिपः, पुं, (देवतानां अधिपः ।) इन्द्रः । इति शब्दरत्नावली ॥
देवत्वं, क्ली. (देवस्य भावः कर्म्म वा । "तस्य भावस्त्वतलौ ।" ५ । १ । ११९ । इति त्वप्रत्ययः ।) देवभूयम् । देवसायुज्यम् । इत्यमरः । २ । ७ । ५२ ॥ देवस्य भावः कर्म्म वा । इति संक्षिप्तसारव्याकरणम् ॥
देवदग्धा, स्त्री, (देवात् मेघाद्दग्धोऽस्याः ।) गागवला । इति राजनिर्घण्टः ॥
देवदत्तः, पुं, बुद्धानुजः । इति चिकाण्डशेषः । अर्জ্জुनशङ्खः । (यथा, महाभारते । ६ । २४ । १५ ।
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः । पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥")
शरीरवाय्वन्तर्गतवायुविशेषः । इति शब्दार्थकल्पतरुः ॥ विशदार्थे देवदत्तः शुद्धस्फटिकसन्निभः । इति सारदातिलकटीका ॥ (देवा एनं देयासुरिति । "क्तिच्क्तौ च संज्ञायाम् ।" ३ । ३ । १७४ । इति आधिधि क्तः । "दो दद्घोः ।" ७ । ४ । ४६ । इति ददादेशश्च ।) संज्ञाविशेषः । यथा, देवदत्तादिसंज्ञाशब्दस्य सर्व्वलिङ्गभाजित्वाभावात् जातित्वमायाति । इति दुर्गादासः ॥ (नागभेदः । यथा, भागवते । ५ । २४ । ३१ । "ततोऽधस्तात् पातालेनागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूड़कम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षाः निवसन्ति ॥" देवेन दत्तं, त्रि । यथा,
"अश्वमारुरुहे देवदत्तं जगत्पतिः ।

अखिनासाधुदमनमष्टैश्वर्यगुणान्वितः ॥"
इति कल्किपुराणेऽनुभागवते भविष्ये कल्कि-जन्मोपनयने २ अध्यायः ॥)

देवदत्ताग्रजः, पुं, (देवदत्तस्य अग्रजो ज्येष्ठः।) बुद्धः। इति हेमचन्द्रः। २। १५१।

देवदानी, स्त्री, (देव प्रोधने + भावे ल्युट्। देव-स्येव दानं शुद्धिर्यस्याः। गौरादित्वात् ङीष्।) घोषकाकृतिः। हस्तिघोषा इति भाषा। इति रत्नमाला॥

देवदारु, क्ली, (देवानां दारु। तेषां प्रियत्वात्।) वृक्षविशेषः। (यथा, महाभारते। ३। १७८। १०।
"वनानि देवदारूणां मेघानामिव वागुराः॥")
तत्पर्य्यायः। भद्रपादपः २ परिभद्रकः ३ भद्र-दारु ४ हिकिलिमम् ५ पीतदारु ६ दारु ७ पूतिकाष्ठम् ८। इत्यमरः। २। ४। ५४॥ सुर-दारु ९ सरुकम् १० स्निग्धदारु ११ अमरदारु १२ स्निग्धदारु १३ ग्राम्यभवम् १४ भूतहारि १५ भवदारु १६ भद्रवत् १७ इन्द्रदारु १८ मस्तदारु १९ सुरभूरुहः २०। इति भावप्रकाशः॥ सुराष्ठम् २१ देवकाष्ठम् २२। इति रत्नमाला॥ अस्य गुणाः। तिक्तत्वम्। रूक्षत्वम्। श्लेष्मानिलभूत-दोषनाशित्वञ्च। इति राजनिर्घण्टः॥ लघुत्वम्। स्निग्धत्वम्। उष्णत्वम्। कटुपाकित्वम्। विब-न्धाध्मानशोथामतन्द्राहिक्काज्वरश्वासप्रमेहपीनस-श्लेष्मश्वासकासकण्डूसमीरनाशित्वञ्च। इति भाव-प्रकाशः॥ तस्य तैलगुणः। कान्तिदत्वम्। आमदोषविषमेदार्शःप्रमेहज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ ज्वररक्तपित्तशीरशोविष-नाशित्वम्। इति राजवल्लभः॥

देवदारुः, पुं, (देवप्रियं दारु यत्र।) खनामख्यात-वृक्षः। स च पार्व्वतीयः। यथा,—
"असुं पुरः पश्यसि देवदारुं
पुत्रीकृतोऽयं वृषभध्वजेन।
यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः॥"
इति रघौ। २। ३६॥

देवदालिका, स्त्री, (देवदालीव कायतीति। कै + कः। टाप् पूर्व्वह्रस्वः।) महाकालः। इति राजनिर्घण्टः॥

देवदाली, स्त्री, (दैवेन मेघोदयेन दालो दलनं यस्याः। गौरादित्वात् ङीष्।) लताविशेषः। घघरवेल इति खोनेया इति च हिन्दीभाषा। लक्षणावत्पुष्पवल्ली। (यथा, सुश्रुते, सूत्रस्थाने। ४६ अध्याये।
"कोशातकी घण्टली घण्टिनी देवदालीकार-वेल्लिका नैलुभयतो भागहराणि॥")
तत्पर्य्यायः। जीमूतकः २ कण्टफला ३ गरा ४ गरी ५ वेणी ६ महाकोषफला ७ कटुफला ८ घोरा ९ कल्मी १० विधड्डा ११ कर्कटी १२ सारमूषिका १३ वृन्ताकोषा १४ आखुविषड्डा १५ दाली १६ रोमशपत्रिका १७ कुरङ्गिका १८ सुतकारी १९ देवताड़ः २०॥ अस्या गुणाः। तिक्तत्वम्। उष्णत्वम्। कटुत्वम्। पाण्डुकफ-दुर्नामश्वासकासकामलाभूतनाशित्वञ्च। तस्याः फलस्य गुणाः। तिक्तत्वम्। कृमिश्लेष्मगुल्मशूलार्शो-वातनाशित्वम्। संसत्वञ्च।
"पीता गरा खरस्पर्शा विषघ्नी गरनाशिनी॥"
इति राजनिर्घण्टः॥
तन्नामगुणाः। यथा, भावप्रकाशे।
"देवदाली तु वेणी स्यात् कर्कटी च गरागरी।
देवताड़ी वृन्ताकोशूक्ष्मफला जीमूत इत्यपि॥
पीतापरा खरस्पर्शा विषघ्नी गरनाशिनी।
देवदाली रसे तिक्ता कफार्शःशोथपाण्डुता॥
गाण्डीरेष्टामनी तिक्ता वयस्थिकाक्षमिज्वरान्।
देवदालीफलं तिक्तं कृमिश्लेष्मविनाशनम्॥
संसर्गं गुल्मशूलघ्नमग्नीप्तं वातजित् परम्॥"

देवदासी, स्त्री, (देवं देवस्त्रियं दास्यति ददाति।) देव + दासृ + अण्। गौरादित्वात् ङीष्।) वन-बीजपूरकः। इति राजनिर्घण्टः। (देवाय क्रीड़ायै दासी इव।) वेश्या। इति शब्दार्थ-कल्पतरुः॥ (देवपरिचारिका च॥)

देवदीपः, पुं, (देवं दीप्तिशीलं दीपयति प्रकाश-यति बुद्धिस्थं करोतीति। दीप् + णिच् + अण्। यद्वा, देवेषु इन्द्रियेषु दीपः प्रकाशकः।) लोचन-मञ्जनम्। इति शब्दरत्नावली॥

देवदुन्दुभिः, पुं, (देवानां दुन्दुभिरिव हर्षजनक-त्वात्।) गन्धपर्णासः। स रक्ततुलसी। इति रत्नमाला॥ देवानां दुन्दुभिवाद्यञ्च॥

देवदूती, स्त्री, (देवानिन्द्रियाणि दूयन्ते अवसाद-यन्तीति। दूङ् उपतापे + "स्त्रियां क्तिच्क्तौ च संज्ञा-याम्।" ३। ३। १७४। इति क्तिच् ततो ङीष्।) वनबीजपूरकः। इति राजनिर्घण्टः॥

देवदेवः, पुं, (दीव्यतीति। दिव् + अच्। देवानां देवेषु वा देवः श्रेष्ठत्वात्।) शिवः। (यथा, महाभारते। १। १। १६०।
"यदाश्रौषमर्জ্জুनं देवदेवं
किरातरूपं त्र्यम्बकं तोष्य युद्धे॥")
ब्रह्मा। इति शब्दरत्नावली॥ (यथा, देवी-भागवते। १। ५। १८।
"स वव्रौ सन्दिदेशाथ देवदेवः सनातनः॥"
"देवदेवो ब्रह्मेति।" तट्टीका॥ विष्णुः। यथा, देवीभागवते। १। ४। ३५।
"कारणं सर्व्वलोकानां देवदेवं जगद्गुरुम्।
वासुदेवं जगन्नाथं तथ्यमानं महत्तपः॥"
गणेशः। यथा, कथासरित्सागरे। २०। ५५।
"अस्तीह प्रमदोद्याने तरुमण्डपमध्यगः।
इष्टप्रभावो वरदः देवदेवो विनायकः॥")

देवद्रोणी, स्त्री, देवयात्रा। इति हारावली। १२६॥ (देवानां द्रोणी द्रोणाकारत्वात् अवस्थान-गह्वरम्। गिरिलिङ्गादीनामवस्थानगह्वरम्। यथा, प्रायश्चित्ततत्त्वे रघुनन्दनधृतसम्वर्त्तवचनम्।
"देवद्रोण्यां विहारे च कूपेष्वायतनेषु च।
एषु गोषु विपन्नासु प्रायश्चित्तं न विद्यते॥"
"देवद्रोणी स्वयम्भूलिङ्गाद्यवस्थानगह्वरम्।"
इति रघुनन्दनः॥)

देवद्रुड्, [च्] त्रि, (देवानद्रुह्यति पूजयतीति। द्रुहु गतिपूजनयोः + "ऋत्विग्दधृक्" इति।" ३। २। ५९। इति क्विन्। "विश्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये।" ६। ३। ९२। इति अद्रादेशः।) देवपूजकः। देवसमीपगन्ता। इत्यमरः। ३। १। ३४॥

देवधान्यं, क्ली, (देवयोग्यं धान्यमिति मध्यलोपी समासः।) धान्यविशेषः। देधान इति भाषा। जोयार इति हिन्दीभाषा। तत्पर्य्यायः। यव-नालः २ योगलः ३ जूर्णाह्वयः ४ जोन्नाला ५ बीजपुष्पिका ६। इति हेमचन्द्रः। ४। २४४॥

देवधूपः, पुं, (देवप्रियो धूप इति मध्यलोपी समासः।) गुग्गुलुः। इति रत्नमाला॥

देवनं, क्ली, (दिव् + भावे ल्युट्।) अवहारः। जिगीषा। क्रीड़ा। इति मेदिनी। ने, ७६॥ (दीव्यति अस्मिन्निति अधिकरणे ल्युट्।) स्त्रीलो-चनम्। इति त्रिकाण्डशेषः॥ (दीव्यति अने-नेति। दिव + करणे ल्युट्।) पद्मम्। इति शब्दचन्द्रिका॥ परिदेवनम्। इत्यमरटीकायां भरतः॥ द्युतिः। स्तुतिः। कान्तिः। गतिः। शोकः। इत्यमरटीकायां मथुरेशः॥ द्यूतम्। इति स्वामी॥ (यथा, मनौ। ६। २२२।
"प्रकाशमेतत् तास्कर्य्यं यद्देवनसमाह्वयौ।
तयोर्नित्यं प्रतिघाते नृपतिर्यत्नवान् भवेत्॥")

देवनः, पुं, (दीव्यत्यनेनेति। दिव + करणे ल्युट्।) पाशकः। इत्यमरः। २। १०। ४५॥

देवनद्वी, [न्] पुं, (देवमिन्द्रं नन्दयतीति। नन्दि + णिनिः।) इन्द्रद्वारपालः। इति हेम-चन्द्रः। २। ६०॥

देवनलः, पुं, (देवः आकारवर्त्तितर्केण श्रेष्ठो नलः।) नलभेदः। तत्पर्य्यायः। देवनालः २ महानलः ३ नन्दः ४ नलोत्तमः ५ स्थूलनालः ६ स्थूलदण्डः ७ सुरनालः ८ सुरहमः ९। अस्य गुणाः। अतिमधुरत्वम्। दृढत्वम्। ईषत्-कषायत्वम्। नलादधिकवीर्य्यत्वम्। रसकर्म्मणि गुरुत्वञ्च। इति राजनिर्घण्टः॥

देवना, स्त्री, (दिव् + भावे युच् टाप् च।) क्रीड़ा। सेवा। इति शब्दरत्नावली॥

देवनालः, पुं, (देवो दीप्तिशीलः श्रेष्ठो वा नालः।) देवनलः। इति राजनिर्घण्टः॥

देवपतिः, पुं, (देवानां पतिः।) इन्द्रः। इति हेमचन्द्रः। २। ८७॥ (यथा, महाभारते। ४। २१। ३३।
"सत्यं भ्रातश्च धर्म्मञ्च पुरस्कृत्य ब्रवीमि ते।
कौचकं निहनिष्यामि वृत्तं देवपतिर्यथा॥")

देवपत्नी, स्त्री, (देवानां पत्नीव प्रियदर्शनादित्वात्।) मध्वालुकम्। इति त्रिकाण्डशेषः। (देवानां पत्नी।) देवभार्य्या॥ (यथा, महाभारते। १३। १४। ३६३।
"देवानां मातरः सर्व्वा देवपत्न्यः सकन्यकाः॥")

देवपथः, पुं, (देवानां पन्थाः। "ऋक्पूरब्धूः पथामानक्षे। ५। ४। ७४। इति अः।) देवानां पन्थाः। तत्पर्य्यायः। क्षायापथः २ सोमधारा ३ नभःसरित् ४। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। १४८। २०।

"दिशो देवपथो ह्येष नात्र गच्छन्ति मानुषाः॥"

तीर्थविशेषः। यथा, महाभारते। ३। ८५। ४५।

"ततो देवपथं गत्वा नियतो नियतासनः।
देवसत्रस्य यत् पुण्यं तदवाप्नोति मानवः॥")

देवपर्ण्णं क्ली, (देवानां प्रियं पर्ण्णमस्य।) सुरपर्ण्णम्। इति राजनिर्घण्टः॥

देवपुत्रिका, स्त्री, (देवानां पुत्रिकेव प्रियत्वात्।) पृक्का। इति राजनिर्घण्टः॥

देवपुत्री, स्त्री, (देवानां पुत्रीव प्रियत्वात्।) पृक्का। इति जटाधरः॥

देवपूः, [र्] स्त्री, (देवानां पूः पुरी।) अमरावती। इति जटाधरः॥

देवप्रश्नः, पुं, (देवानां ग्रहदेवतानां प्रश्नः।) ग्रहनक्षत्रादिघटितजिज्ञासा। तत्पर्य्यायः। उपश्रुतिः २। इति हेमचन्द्रः। २। १७७॥

देवप्रियः, पुं, (देवानां प्रियः।) पीतभृङ्गराजः। वकपुष्पः। इति राजनिर्घण्टः॥

देवबला, स्त्री, (देवप्रिया बला।) सहदेवी। चायमाना। इति राजनिर्घण्टः॥

देवब्रह्मा, [न्] पुं, (देवेषु ब्रह्मा इव। देवर्षित्वादस्य तथात्वम्।) नारदमुनिः। इति हेमचन्द्रः। ३। ५१३॥

देवभवनं, क्ली, (देवानां भवनं गृहमिव। देवानां आश्रयत्वादस्य तथात्वम्।) अश्वत्थः। इति शब्दचन्द्रिका॥ स्वर्गः॥ (देवप्रतिमा-निकेतनञ्च॥)

देवभूः, पुं, (देवं देवत्वं भवते प्राप्नोतीति। भू प्राप्तौ + क्विप्।) देवः। इति शब्दरत्नावली॥ (देवानां भूनिवासभूमिरुत्पत्तिर्वा यत्र।) स्वर्गश्च॥

देवभूतिः, स्त्री, (देवात् देवलोकात् भूतिरुत्पत्तिर्यस्याः।) मन्दाकिनी। इति शब्दरत्नावली॥ (देवानां भूतिरिति विग्रहे। देवैश्वर्य्यम्॥)

देवभूयं, क्ली, (देवस्य भावः। भू + "सुवो भावे।" ३। १। १०७। इति क्यप्।) देवत्वम्। देवसायुज्यम्। इत्यमरः। २। ७। ५२॥

देवमणिः, पुं, (देवेषु मणिरिव।) भर्गः। (देवोद्योतनशीलो मणिः।) कौस्तुभः। अश्वरोमावर्त्तः। इति मेदिनी। णे, ६७॥ (यथा, शिशुपालवधे। ५। ४।

"आवर्त्तिनः शुभफलप्रदशुक्तियुक्ताः
सम्पन्नदेवमणयो भृतरत्नभागाः।
अम्भाः व्यधुर्वसुमतीमतिरोचमाना-
स्तूर्णं पयोधय इवोर्म्मिभिरापतन्तः॥")

महाभेदा। इति राजनिर्घण्टः॥

देवमाता, [ऋ] स्त्री, (देवानां माता।) अदितिः। इति त्रिकाण्डशेषः॥ (यथा, भागवते। ३। १। ३३।

"कश्चिच्छिवं देवकभोजपुत्र्या
विष्णुप्रजाया इव देवमातुः॥"

देवमातृमात्रम्। यथा, महाभारते। १३। १४। ३८।

"देवपत्न्यो देवकन्या देवमातर एव च॥")

देवमातृकः, त्रि, (देवो दृष्टिर्मातेव ग्रस्योत्पादनेन पालकत्वात् जननीव यस्य। कप्।) दृष्ट्यम्बुसम्पन्नव्रीहिपालितदेशः। इत्यमरः। २। १। १२॥ (यथा, महाभारते। २। ५। ७८।

"कश्चिद्राष्ट्रे तडागानि पूर्णानि च दृहन्ति च।
भागशो विनिविष्टानि न क्षविर्देवमातृका॥")

देवमानकः, पुं, (देवेषु मानो यस्य। कप्। संज्ञायां कन् वा।) कौस्तुभमणिः। इति शब्दरत्नावली॥

देवमासः, पुं, (देवाय भूभुवस्य क्रीड़नाय यो मासः। अत्र हि ऋतेरोणश्च प्रादुर्भावात् गर्भस्य क्रीड़नादित्वात् तथात्वम्।) गर्भस्याष्टममासः। तत्पर्य्यायः। गर्भाष्टमः २। इति त्रिकाण्डशेषः॥ देवानां मासः। स मनुष्यमाने चिंशद्वर्षात्मकः॥

देवयजिः, पुं, (देवान् यजते इति। यज + "सर्व्वधातुभ्य इन्।" उणां ४। ११७। इति इन्।) देवपूजकः। मुनिः। यथा, भट्टिः। २। ३४।

"अग्नौ द्विजान् देवयजीन् निहत्य॥"

देवयज्ञः, पुं, (देवानां यज्ञः।) होमः। इति हेमचन्द्रः। ३। ४८५॥ (यथा, मनुः। ४। २१।

"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा॥")

देवयात्रा, स्त्री, (देवानां यात्रा।) देवगमनम्। तत्पर्य्यायः। देवक्रीडी २। इति हारावली। १२६॥ देवोत्सवादि॥ (यथा, कथासरित्सागरे। २५। १२१।

"एकदा देवयात्रायां तत्र मल्लसमागमे।
अगादेको महामल्लः ख्यातिमान् दक्षिणापथात्॥")

देवयानं, क्ली, (देवानां यानम्।) देवविमानम्। देवरथः। इति शब्दार्थकल्पतरुः॥ (त्रि, देवप्रापनीयम्। यथा, ऋग्वेदे। १। १६२। ४।

"यद्वविष्यन्नृतुथा देवयानं
त्रिर्मानुषा पर्य्येषं नयन्ति॥"

देवप्रापकम्। यथा, तत्रैव। ७। ७६। २।

"प्र मे पन्था देवयाना अदृश्र-
न्नमर्द्धन्तो वसुभिरिष्कृतासः॥")

देवयानी, स्त्री, शुक्राचार्य्यकन्या। सा ययातिराजपत्नी। इति श्रीभागवतम्॥ (पुरा किल बृहस्पतिपुत्रः कचो देवकार्य्यार्थं सञ्जीवनविद्यार्थी असुरगुरुमुपागमत्। देवयानीयं तं युवानं मनोहरञ्चावलोक्य तेन सङ्गता भवितुमिच्छेत्। कचस्तु गुरुकन्यामेनां ज्ञात्वा पाणिमस्या ग्रहीतुं न स्वीचकार। अस्मादेवासौ देवयानी प्राप्नवित्तं "न ते विद्या सिद्धिमेषा गमिष्यति" इति शशाप। कचस्तु निरपराधोऽपि शापाहतः क्रुद्धश्च "ऋषिपुत्रो न ते कश्चिज्जातु पाणिं ग्रहीष्यति" इत्येनां शशपवान्। अयमेवास्या ब्राह्मणकन्याया अपि क्षत्रियपत्नीत्वे हेतुः।

अथ कदाचित् क्रीड़न्तीनां कन्यानां वस्त्रवैपरीत्यं जातम्। देवयानी स्त्रीयवस्त्रग्रहणेन वृषपर्व्वणोऽसुरराजस्य सुतां शर्म्मिष्ठां शुक्रोशत्। शर्म्मिष्ठा तु तदसहमाना तां कूपमध्ये प्राक्षिपत्। अथ गच्छति काले ययातिर्मृगयां गतस्तृषार्तो जलमन्विष्यन् तत्रैव कूपसमीपमागत्य देवयानीं तन्मध्यस्थां दृष्ट्वा तस्या दक्षिणं पाणिं गृहीत्वा उत्थापयामास। अथ देवयानी कूपात् सुक्ता पितृसमीपमागत्य सर्व्वं विज्ञापितवती। अथ शुक्रे क्रोधादसुरराज्यात् गन्तुमुद्यते वृषपर्व्वासुरराजः स्वीयकन्यां शर्म्मिष्ठां कन्यासहस्रपरिवृतां परिचारकत्वेन प्रदाय स्वगुरुं देवयानीञ्च प्रसादयामास। अथ कदाचित् देवयानी पितृशुश्रूषया नाकुर्वं ययातिं पतित्वेन स्वीकृत्य तेन सह विजहार। अस्याः पुत्रौ द्वौ यदुस्तुर्व्वसुश्च।

गच्छति काले देवयानी राज्ञा सह वनं गत्वा त्रीनधरान् कुमारान् क्रीड़तश्च दृष्ट्वा तृषौरसात् शर्म्मिष्ठागर्भे जातांश्च तान् विज्ञाय क्रोधपरवशा पितृसमीपं प्रस्थितवती। शुक्रस्तु दुहितरमवमानितां विदित्वा राजानं जरया योजयामास॥ एतद्विशेषविवरणविस्तृतिस्तु महाभारते। १। ७६-८३। अध्यायेषु ज्ञातव्या॥ (१)

देवयुः, त्रि, (देवं याति उपास्यत्वेन प्राप्नोतीति। या + "नृजयादयश्च।" उणां १। ३८ इति कुः।) धार्म्मिकः। (यथा, ऋग्वेदे। १। १५४। ५।

"तदस्य प्रियमभिपाथो अश्यां नरो यत्र देवयवो मदन्ति॥"

"देवयवो देवं द्योतनस्वभावं विष्णुमात्मन इच्छन्तो यज्ञदानादिभिः प्राप्तुमिच्छन्तो नरः।" इति तद्भाष्ये सायणः॥) लोकयात्रिकः। इति मेदिनी। ये, ८६॥ देवे, पुं। इति शब्दरत्नावली॥

देवयोनिः, पुं, स्त्री, देव एव योनिर्निदानभूतो यस्य सः। तद्यथा, विद्याधराः १ अप्सरसः २ यक्षाः ३ राक्षसाः ४ गन्धर्व्वाः ५ किन्नराः ६ पिशाचाः ७ गुह्यकाः ८ सिद्धाः ९ भूतगणाः १०। इत्यमरः। १। १। ११॥ (देवानां योनिः। देवस्थानम्। यथा, महाभारते। ३। ११४। २८।

"अन्यथा हि कुरुश्रेष्ठ! देवयोनिरपापतिः।
कृशाश्वेनापि कौन्तेय! न प्रदग्धो महोदधिः॥")

देवरः, पुं, (दीव्यत्यनेनेति। दिवु क्रीड़ायाम् + "अर्त्तिकमिभमीति।" उणां ३। १३२। इति अरः।) पतेः कनिष्ठभ्राता। देओर इति भाषा। ("देवरः कस्मात् द्वितीयो वर उच्यते।" इति निरुक्तेः। ३। १५॥) तत्पर्य्यायः। देवा २। इत्यमरः। २। ६। ३२॥ देवृः ३ दवारः ४ देवान्ः ५। इति जटाधरः॥ तुरागावः ६ देवक्षी ७। इति शब्दरत्नावली॥ (यथा, मनुः। ९। ५९।

"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये॥")

पत्युर्ज्येष्ठो भ्राता तु श्वशुरः। इति भरतः॥

देवरथ:, पुं, (देवानां रथ: ।) देवानां विमान: । इति हलायुध: ॥ स च पुष्पकादि: ॥

देवराज:, पुं, (देवानां राजा । "राजाह:सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) इन्द्र: । इति त्रिकाण्डशेष: ॥ (यथा, महाभारते । १ । ८६ । ७ ।

"देवराजसमो ह्यासीत् ययाति: पृथिवीपति: ॥")

तस्य नामानि यथा,—

"इन्द्र: सुरपति: शक्रो दितिज: पवनाग्रज: ।
सहस्राक्षो भगाङ्क: कश्यपाङ्गज एव च ॥
विडोजाश्च सुनासीरो मरुत्वान् पाकशासन: ।
जयन्तजनक: श्रीमान् शचीशो दैत्यसूदन: ॥
वज्रहस्त: कामसखा गौतमीव्रतनाशन: ।
वृत्रहा वासवश्चैव दधीचिदेहभिक्षुक: ॥
जिष्णुश्च वामनभ्राता पुरुहूत: पुरन्दर: ।
दिवस्पति: शतमख: सुत्रामा गोत्रभिद्विभु: ॥
खेखर्षभो बलारातिर्जम्भभेदी सुराश्रय: ।
संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहन: ॥
आखण्डलो हरिहयो नमुचिप्राणनाशन: ।
वृद्धश्रवा वृषश्चैव दैत्यदर्पनिसूदन: ॥
षट्चत्वारिंशन्नामानि पापघ्नानि विनिश्चितम्॥"

इति ब्रह्मवैवर्ते जन्मखण्डम् ॥

देवरात:, पुं, (दे + क्त: । देवेन श्रीकृष्णेन रात: रक्षित: ।) परिक्षित् राजा । इति श्रीभागवतम् ॥ सारसप्तविविशेष: । इति शब्दार्थकल्पतरु: ॥ (विश्वामित्रपुत्र: । यथा, हरिवंशे । २७ । ४७ ।

"विश्वामित्रस्य पुत्रास्तु देवरातादय: स्मृता: ॥"

एतन्निरुक्तिर्यथा भागवते । ९ । १६ । ३२ ।

"यो रातो देवयजने देवैर्गाधिषु तापस: ।
देवरात इति ख्यात: शुन:शेफस्तु भार्गव: ॥"

निमेर्ज्येष्ठ: पुत्र: । यथा, रामायणे । १ । ६६ । ८ ।

"देवरात इति ख्यातो निमेर्ज्येष्ठो महीपति: ॥"

युधिष्ठिरस्य सभास्थक्षत्रियाणामन्यतम: । यथा, महाभारते । २ । ४ । २६ ।

"चानूरो देवरातश्च भोजो भीमरथश्च य: ॥")

देवर्षि:, पुं, (देव ऋषिश्च । देवानां ऋषिर्वा ।) सुरर्षि: । तद्यथा । नारद: १ अत्रि: २ मरीचि: ३ भरद्वाज: ४ पुलस्त्य: ५ पुलह: ६ क्रतु: ७ भृगु: ८ वशिष्ठ: ९ प्रचेता: १० । इत्यमरटीकासारसुन्दरी ॥ (यथा, महाभारते । १२ । २१० । २१ ।

"देवर्षिचरितं गार्ग्य: कथयाञ्चक्रेऽसितसुतम्॥"

तुम्बुरुभरतादि: । इति तट्टीकायां भरत: ॥ कश्यपादि: । इति त्रिकाण्डशेष: ॥ (महादेव: । यथा, महाभारते । १३ । १७ । १४४ ।

"देवादिदेवो देवर्षिर्देवासुरवरप्रद: ॥")

देवल:, पुं, (देवं लाति गृह्णाति निजजीविकार्थमिति । देव + ला आदाने + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति क: ।) देवाजीव: । जीविकार्थं यो देवान् गृहीतवान् । इत्यमर: । २ । ७ । ११ ॥ पूजारि वामन इति भाषा ॥ देवीपनीवजीवी । यथा,—

"देवोपजीवजीवी च देवलश्च प्रकीर्त्तित: ॥"

इति ब्रह्मवैवर्तपुराणम् ॥

"चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा ।
विपणेन च जीवन्तो वर्ज्या: स्युर्हव्यकव्ययो: ॥"

इति मनु: । ३ । १५१ ॥

"देवल: प्रतिमापरिचारक: वर्णनार्थत्वेनैतत् कर्म्म कुर्व्वतोऽयं निषेध: न तु धर्म्मार्थम् । देवकोशेपजीवी च नाम्ना देवलको भवेदिति देवलवचनात् ।" इति तट्टीकायां कुल्लूकभट्ट: ॥ * ॥ (दीव्यति आनन्देनेति । दिव + "दृवादिभ्यश्चित् ।" उणा १ । १०८ । इति कलच् ।) धार्म्मिक: । इत्युणादिकोष: ॥ नारदमुनि: । इति त्रिकाण्डशेष: ॥ (रत्नयोरैक्यात् ।) ईश्वर: । इति शब्दरत्नावली ॥ धर्म्मशास्त्रवक्ता मुनिविशेष: । इति भगवद्गीता ॥ स असितमुनिपुत्र: रम्भाशापेनाशावक्त्रो बभूव । इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डम् ॥ (व्यासस्य वेदव्यासस्य शिष्य: । यथा, देवीभागवते । १ । २० । ३ ।

"असितो देवलश्चैव वैशम्पायन एव च ।
जैमिनिश्च सुमन्तुश्च गता: सर्व्वे तपोधना: ॥"

प्रत्यूषस्य ऋषे: पुत्र: । यथा, विष्णुपुराणे । १ । १५ । ११५ ।

"प्रत्यूषस्य विद: पुत्रं ऋषिं नाम्नाथ देवलम् ॥")

देवलक:, पुं, (देवल एव । स्वार्थे कन् ।) देवल: । इति जटाधर: ॥ (यथा, महाभारते । १३ । ७६ । ६ ।

"आङ्गायका देवलका नक्षत्रग्रामयाजका: ।
एते ब्राह्मणचाण्डाला महापथिकपञ्चमा: ॥")

देवलता, स्त्री, (देवप्रिया लता ।) नक्तमालिका । इति शब्दचन्द्रिका ॥

देवलाङ्गुलिका, स्त्री, (देवयति परिदेवयत्यनेनेति । देव + णिच् + घञ् । देव: लाङ्गुलिक: यूको यस्या: ।) वृश्चिकालि: । इति राजनिर्घण्टु: ॥

देवलोक:, पुं, (देवानां लोक: ।) स्वर्ग: । इति त्रिकाण्डशेष: ॥ (यथा, देवीभागवते । ५ । ३ । ४६ ।

"तस्मात् सज्जा भवन्त्वद्य देवलोकजयाय वै ॥") अपि च । मत्स्यपुराणे ।

"भूर्लोकोऽथ भुवर्लोक: स्वर्लोकोऽथ महर्जन: ।
तप: सत्यञ्च सप्तैते देवलोका: प्रकीर्त्तिता: ॥")

देववर्त्म, क्ली, (देवानां वर्त्म । तद्द्वारेणैव यज्ञादौ हव्यादिभोजनात् तथात्वम् ।) अग्नि: । इति शब्दचन्द्रिका ॥ देवानां सुखञ्च ॥

देववर्द्धकि:, पुं, (देवानां वर्द्धकिरिव ।) विश्वकर्म्मा । इति हेमचन्द्र: । २ । ६६ ॥

देववल्लभ:, पुं, (देवानां वल्लभ: प्रिय: ।) पुन्नागवृक्ष: । इत्यमर: । २ । ४ । २५ ॥

देववृक्ष:, पुं, (देवप्रियो वृक्ष: ।) सप्तपर्णवृक्ष: । मन्दारवृक्ष: । गुग्गुलु: । इति मेदिनी । षे, ५२ ॥ अदग्धिष्टा देवतरुशब्दे पुं द्रष्टव्या: ॥

देवव्रत:, पुं, (देवं व्यपरिग्रहादिरूपत्वात् द्योतनशीलं व्रतं यस्य । यद्वा, देवस्येव व्रतं स्थिरप्रतिज्ञा यस्य ।) भीष्म: । इति त्रिकाण्डशेष: ॥ (यथा, देवीभागवते । १ । २० । १६ ।

"चित्राङ्गदं ततो राज्ये स्थापयामास वीर्य्यवान् ।
स्वयं न लतवान् राज्यं तस्माद्देवव्रतोऽभवत् ॥")

देवानां व्रतञ्च ॥

देवशेखर:, पुं, (देव: क्रीड़ाप्रद: शेखरो यस्य ।) एलवक: । इति राजनिर्घण्टु: ॥ देवानां मस्तकञ्च ॥

देवश्रुत:, पुं, (देवेषु श्रुत: विख्यात: ।) ईश्वर: । शास्त्रम् । नारद: । इति शब्दार्थकल्पतरु: ॥ (शुकस्य पुत्रविशेष: । यथा, देवीभागवते । १ । १६ । ४१ ।

"स तस्माज्जनयामास पुत्रांश्चतुर एव हि ।
कृष्णं गौरप्रभञ्चैव भूरिं देवश्रुतं तथा ॥")

देवश्रेणी, स्त्री, (देवानां श्रेणीव ।) रम्भा । इति राजनिर्घण्टु: ।

देवसभा, स्त्री, (देवानां सभा ।) देवानां समाज: । तत्पर्य्यायं: । सुधर्म्मा २ । इत्यमर: । १ । १ । ५१ ॥ शुभा ३ । सुधर्म्मा [न्] ४ । इति शब्दरत्नावली ॥ सुधर्म्मा ५ । इत्यमरटीकायां भरत: ॥

देवसभ्य:, त्रि, (देवस्य क्रीड़ाया: सभा तस्यां साधुरिति । यत् ।) क्रीड़ाकुशल: । तत्पर्य्यायं: । सभिक: २ । इति त्रिकाण्डशेष: ॥ देवसामाजिकञ्च ॥

देवसर्षप:, पुं, (देवप्रिय: सर्षप: ।) वृक्षप्रभेद: । तत्पर्य्यायं: । अम्बाय: २ वदर: ३ रक्तफलक: ४ सुरसर्षपक: ५ क्षुद्रफल: ६ निर्ज्जरसर्षप: ७ कुररादि: ८ । अस्य गुणा: । कटुत्वम् । उष्णत्वम् । कफवातदोषरक्तामयनाशित्वम् । दृष्यत्वञ्च । इति राजनिर्घण्टु: ॥

देवसहा, स्त्री, (सहते या । सह + अच् + टाप् । देवस्य सहा ।) दर्भोत्पत्तौषधि: । भिक्षाभाजनम् । इति विश्व: ॥

देवसात्, य, (देवाय देयं देवाधीनं वा करोतीति । देव + सात् ।) सकलजना देवभावाश्रया: । देवाधीनम् । देवदेयम् । यथा,—

"साकल्याधीनत्वदेवार्थेषु असंपूर्णपदभूधातुषु परेषु चसात्प्रत्ययो भवति । देवेऽर्थे पूर्व्वोक्तधातुषु परेषु चाच्प्रत्ययोऽपि । यथा देवाय देयं करोति देवसाकरोति ।" इति सुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । ७ । १८७ । ५८ ।

"जित्वा वा बहुभिर्यज्ञैर्यजध्वं भूरिदक्षिणै: ।
हता वा देवसाद्भूत्वा लोकान् प्राप्स्थ पुष्कलान् ॥")

देवसायुज्यं, क्ली, (देवेन सायुज्यं संमिलनम् ।) देवत्वम् । इत्यमर: । २ । ७ । ५२ ॥

देवस्थली, स्त्री, (देवाय क्रीड़ार्थं स्थली ।) मठम् । इति हेमचन्द्र: । ३ । ५६७ ॥

देवसेना, स्त्री, इन्द्रकन्या । इति मेदिनी । ने, १०७ ॥ (प्रजापते: कन्या । इति महाभारतम् । ३ । २२३ । १ ॥) सा षष्ठी । (यथा, ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे । २ । ७२—७४ ।

"प्रधानांशस्वरूपा या देवसेना च नारद ! ।
माघकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता ॥
शिशूनां प्रतिविम्बेषु प्रतिपालनकारिणी ।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी ॥"
इयं हि यथा यथा कार्त्तिकेयस्य पत्नी जाता तद्विवरणं महाभारते ।३।२२३ अध्यायमारभ्य विस्तरशो द्रष्टव्यम् ॥) देवानां सेना । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । २२२ । ५ ।
"देवसेनां दानवेभ्यो भयाद् दृष्ट्वा महाबलः ।
पालयेद्वीर्य्यमाश्रित्य स ज्ञेयः पुरुषो मया ॥")

देवसेनापतिः, पुं, (देवसेनायाः पतिः ।) कार्त्तिकेयः । इति शब्दरत्नावली ॥

देवस्वं, क्ली, (देवस्य स्वं धनम् ।) देवखात्स्वादिधनम् । यथा,—
"ब्रह्मस्वञ्च गुरोर्द्रव्यं देवस्वञ्च हरेस्तु यः ।
कन्यां ददाति शुल्केन स प्रेतो जायते ध्रुवः ॥"
इति महाभारते पञ्चप्रेतोपाख्यानम् ॥
(यथा च मनुः । ११ । २६ ।
"देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः ।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥"
यज्ञशीलधनम् । यथा, मनुः । ११ । २० ।
"यद्वृत्तं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः ॥")

देवहूः, पुं, (हृ + भावे क्विप् । देवानां हूराह्वानमनेनेति ।) वामकर्णः । यथा,
"व्यापत्तौ व्यवहारोऽत्र चित्रमञ्चो बहूदनम् ।
पिङ्गदूर्देविषः कर्णं उत्तरो देवहूः स्मृतः ॥"
इति श्रीभागवते । ४ । २६ । १२ ॥
(चि, देवानाह्वयतीति । हृ + कर्त्तरि क्विप् । देवानां आह्वाता । यथा, वाजसनेयसंहितायाम् । १७ । ६२ ।
"देवहूर्यज्ञ आ च वक्षत्सुम्नहूर्यज्ञ आ च वक्षत् ॥")

देवा, [ऋ] पुं, (दीव्यत्यनेनेति । दिव + "दिवेर्ऋः।" उणां २ । १०० । इति ऋः ।) देवरः । इत्यमरः । २ । ६ । ३२ ॥ (यथा, ऋग्वेदे । १० । ८५ । ४६ ।
"ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥")
रक्षापतिः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

देवा, स्त्री, (दियते ऽनया । दिव + घञ् । ततष्टाप् ।) पद्मचारिणी । अग्निपर्णी । इति शब्दचन्द्रिका ॥ (मूर्व्वा । अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"तेजनी पिलुनी देवा तिक्तवल्ली दृयक्लचा ।
धनुःश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च ॥")

देवाजीवः, पुं, (देवेन देवप्रतिमासेवनेन आजीवतीति । आ + जीव + अच् ।) देवलः । इत्यमरटीकायां रमानाथः ॥

देवाटः, पुं, (अट गतौ + भावे घञ् । देवानां आटो गमनं यत्र ।) हरिहरक्षेत्रम् । यथा,
"यदा नन्दी शूलपाणिर्गोधनेन पुरस्कृतः ।
स्थितवान् तद्दिनादेव क्षेत्रं हरिहरात्मकम् ।
देवानामटनाच्चैव देवाट इतिसंज्ञितम् ॥"
इति वराहपुराणम् ॥

देवात्मा, [न्] पुं, (देव आत्मा अधिष्ठातृदेवता यस्य ।) अश्वत्थः । इति शब्दचन्द्रिका ॥

देवानाम्प्रियः, पुं स्त्री, (देवानां प्रियः । "देवानां प्रिय इति च मूर्खे ।" ६ । ३ । २१ । इत्यस्येति वर्त्तिकोक्त्या षष्ठ्या अलुक् । छागस्य पशुत्वादेव मूर्खत्वं बोध्यम् ।) छागः । इति त्रिकाण्डशेषः ॥ चि, जाड्यः । इति हेमचन्द्रः । ३ । १७ ॥

देवापिः, पुं, प्रतीपराज्ञः पुत्रः । स सुमेरुसमीपे कलापग्रामे योगी भूत्वा आस्ते स कलौ लुप्तं चन्द्रवंशं पुनः सत्ययुगे भावयिष्यति । इति श्रीभागवतम् ॥ स च कुष्ठी प्रजाभिरप्रधार्य्यः । इति मत्स्यपुराणम् ॥ (यथा, महाभारते । १ । ६५ । ४४—४५ ।
"प्रतिश्रवसः प्रतीपः प्रतीपः खलु शैव्यासुपयेमे सुनन्दां नाम तस्यां पुत्रानुत्पादयामास देवापिं शान्तनुं बाह्लीकञ्चेति । देवापिः खलु बाल एवारण्यं विवेश शान्तनुस्तु महीपालो बभूव ॥"
वैदिकमते तु अयं ऋष्टिषेणस्य पुत्रः । यथा, निरुक्ते । २ । १० ।
"देवापिरार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः । स शन्तनुः कनीयानभिषेचयाञ्चक्रे देवापिरृषिः प्रतिषेदे । ततः शन्तनो राज्ये द्वादश वर्षाणि देवो न ववर्ष । तस्मुः ब्राह्मणा अधर्म्मस्वया चरितो ज्यैष्ठं भ्रातरमन्वरित्याभिषेचितं तस्मात् ते देवो न वर्षतीति । स शन्तनुर्देवापिं शिशिक्षे राज्येन । तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति । तस्मै तद्वर्षकामस्तूक्तम् ॥" तथा च ऋग्वेदे । १० । ६८ । ५ ।
"आर्ष्टिषेणो होत्रमृद्धिर्निषीदन् देवापिर्देव-
सुमतिं चिकित्वान् ॥")

देवाभीष्टा, स्त्री, (देवानामभीष्टा प्रिया ।) ताम्बूली । इति शब्दचन्द्रिका ॥

देवायतनं, क्ली, (देवानामायतनं गृहम् ।) देवालयः । यथा, कूर्म्मपुराणे ।
"न देवायतनं गच्छेत् कदाचिद्वाप्रदक्षिणम् ।
न पीड़येद्वा वस्त्राणि न देवायतनेष्वपि ॥")

देवायुधं, क्ली, (देवस्य इन्द्रस्य आयुधम् ।) शक्रधनुः । इति हेमचन्द्रः ।२।८३ ॥ देवानामस्त्रञ्च ॥

देवार्हं, क्ली, (देवमर्हतीति । अर्ह + अण् ।) सुरपर्णम् । इति राजनिर्घण्टः ॥

देवार्हा, स्त्री, (देवार्ह + टाप् ।) सहदेवी लता । इति राजनिर्घण्टः ॥

देवालयः, पुं, (देवानामालय आवासः ।) स्वर्गः । (यथा, देवीभागवते । ५ । ४१ । ४ ।
"त्वञ्च देवालयं शक्र ! यथेष्टं व्रज वासव ! ॥")
देवगृहम् । इति शब्दार्थकल्पतरुः ॥ (यथा, साहित्यदर्पणे । ३ । ८६ ।
"क्षेत्रं वाटो भयदेवालयो दूतीगृहं वनम् ॥")

देवाला, स्त्री, (देवानपि आलाति स्वायत्तीकरोतीति । आ + ला + कः ।) रागिणीविशेषः । इति हलायुधः ॥

देवावासः, पुं, (देवानां आवासो वासस्थानम् ।) अश्वत्थवृक्षः । इति त्रिकाण्डशेषः ॥

देवाश्वः, पुं, (देवस्य इन्द्रस्य अश्वः ।) इन्द्रघोटकः । उच्चैःश्रवाः । इति हलायुधः ॥

देविका, स्त्री, (दीव्यतीति । दिव + ण्वुल् । टाप् अत इत्वम् ।) नदीविशेषः । इति शब्दरत्नावली ॥ तस्याः परिमाणं यथा,—
"अर्द्धयोजनविस्तारां पञ्चयोजनमायताम् ।
एतावद्देविकामाहुर्देवर्षिपरिसेविताम् ॥"
इति पाद्मे भूमिखण्डम् ॥
(इयं हिमवत्पादगिःसृता । इति मत्स्यपुराणम् । ११३ । २१ ॥ अनया सह सरयूः सङ्गता । इति कालिकापुराणम् । २३ अः ॥ इयन्तु तीर्थस्थानानामन्यतमा । अत्र नरः स्नात्वा महादेवं समभ्यर्च्च्य यथाशक्ति चरुं निवेद्य च सर्व्वकामसमृद्धस्य यज्ञस्य फलं लभते । इति महाभारतम् । ३ । ८२ । ६६ ॥ इयं हि पीठस्थानानां अन्यतमा । अत्र भगवती नन्दिनीरूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ६६ ।
"शिवकुण्डे शुभानन्दा नन्दिनी देविकातटे ॥"
युधिष्ठिरस्य पत्नीविशेषः । यथा, महाभारते । १ । ६५ । ७६ ।
"युधिष्ठिरस्तु गोवासनस्य शैव्यस्य देविकां नाम कन्यां स्वयंवरां लेभे । तस्यां पुत्रं जनयामास यौधेयं नाम ॥") धुस्तूरः । इति भावप्रकाशः ॥ देवसम्बन्धिनि, त्रि ॥

देविलः, पुं, (दीव्यति आनन्देनेति । दिव + "गुपादिभ्यः कित् ।" उणां १ । ५७ । इति इलच् ।) धार्म्मिकः । इत्युणादिकोषः ॥

देवी, स्त्री, (दीव्यतीति । दिव + अच् ततो ङीप् ।) दुर्गा । इति धरणी ॥ (यथा, मार्कण्डेये ।८४।२।
"देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्या ॥")
ब्राह्मोक्तौ स्नानाभिषेका राजपत्नी । इत्यमरः । १।७।१३॥ मूर्व्वा । (यथा, भावप्रकाशे ।१।१।
"मूर्व्वा मधुरसा देवी मोरटा तेजनी सुवा ॥")
पृक्का । इति मेदिनी । वे,१२ ॥ (देवानां पत्नी । ङीप् ।) सामान्यदेवपत्नी । यथा, देवीनां दक्षिणायने इति स्मृतिः ॥ ब्राह्मणस्त्रीनामोपपदम् । यथा, देवस्त्रो हि स्त्रियो मताः । इत्युद्वाहतत्त्वम् ॥ अपि च, कर्म्मविपाके ।
"देवस्त्राश्च स्त्रियः सर्व्वा दास्यन्ताः शूद्रयोगयः ॥"
आदित्यभक्ता । लिङ्गिनी । वन्ध्याकर्कोटकी । शालिपर्णी । महाद्रोणी । पाठा । नागरमुस्ता । मूर्व्वा । हरीतकी । अतसी । श्यामानामप्यभिजातिः । इति राजनिर्घण्टः ॥ (उपनिष-

द्विजैश्च । स तु अथर्ववेदान्तर्गतः । यथा, सुन्दिकोपनिषदि ।
"त्रिपुरातापनं देवी त्रिपुराकटभावना ॥")
देवीकोटः, पुं, (देव्याः कोटो दुर्गमिव ।) वाण-पुरम् । इति त्रिकाण्डशेषः ॥
देवेज्यः, पुं, (देवानामिज्यः पूज्यः ।) बृहस्पतिः । इति शब्दरत्नावली ॥
देवेष्टः, पुं, (देवानामिष्टः प्रियः ।) महामेदा । गुग्गुलुः । इति राजनिर्घण्टः ॥ देवताभिष्टे, त्रि ॥
देवेष्टा, स्त्री, (देवानामिष्टा ।) वनबीजपूरकः । इति राजनिर्घण्टः ॥
देवोद्यानं, क्ली, (देवानां उद्यानं वनम् ।) देवानां वनम् । तदृथा । वैभ्राजम् । मिश्रकम् । शिल्प-कारण्यम् । चैत्ररथम् । इति त्रिकाण्डशेषः ॥
देशः, पुं, (दिश्यते निर्दिश्यते इति । दिश निर्देशे + कर्मणि घञ् ।) भूगोलभागविशेषः । इति सिद्धान्तमञ्जरी ॥ जनपदे जनपदसमुदाये जनपदैकदेशे सजलनिर्जलस्थानमात्रे च । इत्य-मरटीकायां भरतः ॥ स त्रिविधः । जाङ्गलः, अनूपः साधारणश्च । तत्पर्य्यायः । जनपदः २ नीवृत् २ विषयः ३ उपवर्त्तनम् ४ । इति राज-निर्घण्टः ॥ प्रदेशः ५ राष्ट्रम् ६ । इति शब्द-रत्नावली ॥ * ॥ अथ देशे वर्णनीयानि । रत्नम् १ खनिः २ द्रव्यम् ३ पण्यम् ४ धान्यम् ५ करोद्भवः ६ दुर्गग्रामः ७ जनाधिक्यम् ८ नदी-मालकतादि ॥ * ॥ अथ ग्रामे वर्णनीयानि । धान्यम् १ लता २ वृक्षः ३ सरः ४ पशुपुष्टिः ५ क्षेत्रम् ६ वरवृक्षः ७ केदारः ८ ग्रामेयीसुखम् ९ विभ्रमः १० । इति कविकल्पलता ॥ * ॥
अथ मध्यदेशीयजनपदा यथा,—
"तास्मिन् कुरुपाञ्चालाः शाल्वाश्चैव सजाङ्गलाः ।
शूरसेना भद्रकारा बोधकाः सपटच्चराः ॥
मत्स्याः किरातः कुल्याश्च कुन्तयः कान्ति-कोशलाः ।
आवन्त्याश्च सुलिङ्गाश्च लोकाश्चैवान्धकैः सह ॥
मध्यदेश्या जनपदाः प्रायशः परिकीर्त्तिताः ॥"
अथ उदीच्या देशा यथा,—
"वाह्लीका वाटधानाश्च आभीराः कालतोयकाः ।
परन्त्राश्चैव शूद्राश्च पह्लवाश्चात्मखड्किकाः ॥
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ।
शूका दूह्याः पुलिन्दाश्च पारदा हारमूर्त्तिकाः ॥
रामठाः कण्ठकाराश्च कैकया देशमानिकाः ।
क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ॥
आत्रेयोऽथ भरद्वाजः प्रस्थलाः सदधेरकाः ।
जम्बकास्तलगानाश्च सैनिकाः सह साङ्गजैः ॥
एते देशा उदीच्यास्तु प्राच्यान्देशान्निबोधत ॥"
अथ प्राच्या देशा यथा,—
"अङ्गवङ्गा मद्गुरका अन्तर्गिरिबहिर्गिराः ।
ततः प्रवङ्गा मातङ्गा मलया मलवर्त्तकाः ॥
सुह्मोत्तराः प्रविजया भार्गवाङ्गेयमालवाः ।
प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलि-प्तकाः ॥
प्राच्या मागधगोनर्दा प्राच्या जनपदाः स्मृताः ॥"
अथ दक्षिणापथदेशा यथा,—
"तथापरे जनपदा दक्षिणापथवासिनः ।
पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च ॥
सेतुका मूलकाश्चैव कुपथाश्चारवासिकाः ।
नवराष्ट्रा माहिषका कलिङ्गाश्चैव सर्व्वशः ॥
कावेराश्च सहेलीकैराटव्याः शबरास्तथा ।
पुलिन्द्रा विन्ध्यमूलीका वैदर्भा दण्डकैः सह ॥
कुलीयाश्च शिरालाश्च रूपसास्तापसैः सह ।
तथा तैत्तिरकाश्चैव सर्व्वे कारस्करास्तथा ॥
मूषिकाद्याश्च ये चान्ये ये चैवान्तरनर्म्मदाः ।
भानुकच्छाः समाहेयाः सह सारस्वतैस्तथा ॥
कच्छीयाश्च सुराष्ट्राश्च आभीर्त्ताश्चार्ब्बुदैः सह ।
इत्येते अपरान्ताश्च शृणु ये विन्ध्यवासिनः ॥"
अथ विन्ध्यवासिदेशा यथा,—
"मालवाश्च करूषाश्च मेकलाश्चोत्कलैः सह ।
उत्तमार्णा दशार्णाश्च भोजाः किष्किन्धिकैः सह ॥
तोषलाः कोशलाश्चैव चैपुरा वैदिकास्तथा ।
तुम्बुरास्तुम्बुराश्चैव पटुमान्निषधैः सह ॥
अनूपास्तुण्डिकेराश्च वीतिहोत्राः सवन्त्यः ॥
एते जनपदाः ख्याता विन्ध्यपृष्ठनिवासिनः ॥"
पर्व्वताश्रयिदेशा यथा,—
"अतो देशान् प्रवक्ष्यामि पर्व्वताश्रयिणश्च ये ।
निर्झारा हंसवर्णाश्च कुपथा अपथाः खशाः ॥
कुथप्रावरणाश्चैव ऊर्णा दर्भाः समूहकाः ।
त्रिगर्त्ता मण्डलाश्चैव किराताश्चामरैः सह ॥"
इति मत्स्यपुराणम् ॥
अपि च ।
"देशव्यवस्था देवेशि ! कथ्यते शृणु तत्परा ।
वैद्यनाथं समारभ्य सुवनेशान्तगं शिवे ! ॥
तावदङ्गाभिधो देशो यात्रायां नहि दृश्यति ।
रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं शिवे ! ।
वङ्गदेशो मया प्रोक्तः सर्व्वसिद्धिप्रदर्शकः ॥
जगन्नाथात् पूर्व्वभागात् कृष्णतीरान्तगं शिवे ।
कलिङ्गदेशः संप्रोक्तो वाममार्गपरायणः ॥
कलिङ्गदेशमारभ्य पञ्चाशद्योजनं शिवे ! ।
दक्षिणस्यां महेशानि ! कालिङ्गः परिकीर्त्तितः ॥
सुब्रह्मण्यं समारभ्य यावद्देवी जनार्द्दनः ।
तावत् केरलदेशः स्यात् तन्मध्ये सिद्धकेरलः ॥
रामेश्वरात् चक्रटेशात् हंसकेरलनामकः ।
अनन्तशैलमारभ्य यावत् स्यादव्ययं परे ॥
तावत् सर्व्वेगुणामा तु केरलः परिकीर्त्तितः ।
शारदामठमारभ्य कुङ्कुमाङ्कितटान्तकम् ॥
तावत् काश्मीरदेशः स्यात् पञ्चाशद्योजनाऽन्तकम् ॥
कालेश्वरं श्वेतगिरिं चैपुरं नीलपर्व्वतम् ॥
कामरूपाभिधो देशो गन्धर्व्वगिरिरुच्यते ।
त्रिपक्षकं समारभ्य मध्ये चोज्जयिनी शिवे ! ॥
माहेश्वरीतीर्थं राजेन्द्र ! कोलापुरनिवासिनी ।
तावद्देशो महाराष्ट्रः कर्णाटस्त्रामिगोचरः ॥
जगन्नाथादूर्द्ध्वभागमर्व्वाक् श्रीभमरालिकात् ।
तावदन्त्याभिधो देशः सौराष्ट्रं शृणु सादरम् ॥
कोङ्कणात् पश्चिमं तीर्थं सप्तद्रव्यान्तगोचरम् ।
हिङ्गुलाजान्तको देवि ! दशयोजनदेशगः ॥
सौराष्ट्रदेशो देवेशि ! तस्मात्तु गुर्ज्जराभिधः ।
श्रीशैलन्तु समारभ्य चोलेशाम्बधभागतः ॥
तैलङ्गदेशो देवेशि ! धानाध्ययनतत्परः ।
सुराम्बिकां समारभ्य मलयाद्रान्तगं शिवे ! ।
मलयालाभिधो देशो मल्लसिद्धिप्रवर्द्धकः ।
रामनाथं समारभ्य श्रीरङ्गान्तं विलेश्वरि ! ॥
कर्णाटदेशो देवेशि ! साम्राज्यभोगदायकः ।
ताम्रपर्णीं समासाद्य शैलाङ्गिश्चरोद्गतः ॥
अवन्तीसंज्ञको देशः कालिकात तच्च तिष्ठति ।
भद्रकालीमहापूर्व्वे रामदुर्गाच्च पश्चिमे ।
श्रीविदर्भाभिधो देशो वैदर्भी तच्च तिष्ठति ॥
गुर्ज्जरात् पूर्व्वभागे तु द्वारकातो हि दक्षिणे ।
मरुदेशो महेशानि ! उद्भोत्पत्तिपरायणः ॥
श्रीकोङ्कणादधोभागे तापीतः पश्चिमे परे ।
आभीरदेशो देवेशि ! विन्ध्यशैले अवस्थितः ॥
अवन्तीतः पूर्व्वभागे गोदावर्य्याश्चयोत्तरे ।
मालवाख्यो महादेशो धनधान्यपरायणः ॥
द्रविडतैलङ्गयोर्मध्ये चोलदेशः प्रकीर्त्तितः ।
जलकर्याश्च ते प्रोक्ताश्चन्द्रो वाप्तरे भवेत् ॥
कुरुक्षेत्रात् पश्चिमे तु तथा चोत्तरभागतः ।
इन्द्रप्रस्थान्महेशानि ! दशयोजनकन्तये ॥
पाञ्चालदेशो देवेशि ! सौन्दर्य्यगर्व्वभूषितः ।
पाञ्चालदेशमारभ्य म्लेच्छाद्रिशिखरान्तकम् ॥
काम्बोजदेशो देवेशि ! वाजिराशिपरायणः ।
वैदर्भदेशादूर्द्धञ्च इन्द्रप्रस्थाच्च दक्षिणे ॥
मरुदेशात् पूर्व्वभागे वैराटः परिकीर्त्तितः ।
काम्बोजादुत्तरभागे तु इन्द्रप्रस्थाच्च पश्चिमे ॥
पाञ्चालदेशो महेशानि ! महाशूरत्वकारकः ।
गङ्गकीतीरमारभ्य चम्पारण्यान्तकं शिवे ! ॥
विदेहभूः समाख्याता तैरभुक्ताभिधः स तु ।
काम्बोजदेशमारभ्य महाम्लेच्छात्तु पूर्व्वके ।
वाह्लीकदेशो देवेशि ! अश्वोत्पत्तिपरायणः ।
तप्रकुरुं समारभ्य रामक्षेत्रान्तकं शिवे ! ।
किरातदेशो देवेशि ! विन्ध्यशैलेऽवतिष्ठते ॥
करतोयां समारभ्य हिङ्गुलाजान्तकं शिवे ! ।
सुह्मतानदेशो देवेशि ! महाम्लेच्छपरायणः ॥
हिङ्गुपीठं समारभ्य मक्केशान्तं महेश्वरि ! ।
खुरासानाभिधो देशो म्लेच्छमार्गपरायणः ॥
तन्मध्ये चोत्तरे देवि ! ऐराकः परिकीर्त्तितः ।
काश्मीरन्तु समारभ्य कामरूपान्तु पश्चिमे ।
भोटान्तदेशो देवेशि ! मानसेशाच्च दक्षिणे ॥
मानसेशादूर्द्धपूर्व्वे चीनदेशः प्रकीर्त्तितः ।
कैलासीरं समारभ्य सरयूं परितः परे ॥
अमरगां महेशानि महाचीनाभिधो भवेत् ।
जटेश्वरं समारभ्य योगिन्यन्तं महेश्वरि ! ॥
नेपालदेशो देवेशि ! शिलहट्टं शृणु प्रिये ! ।
गणेश्वरं समारभ्य महोदध्यन्तगं शिवे ! ॥
शिलहट्टाभिधो देशः पर्व्वते तिष्ठति प्रिये ! ।
वङ्गदेशं समारभ्य सुवनेशान्तगं शिवे ! ॥

गौड़देश: समाख्यात: सर्व्वविद्याविशारद: ।
गोकर्णेशात् पूर्व्वभागे चार्य्यावर्त्तास्तु चोत्तरे ॥
तैरभुक्तात् पश्चिमे तु महापूर्व्वाच्च सर्व्वत: ।
महाकोशलदेशश्च सूर्य्यवंशपरायण: ॥
त्रासेश्वरं समारभ्य तप्तकुम्भान्तकं शिवे ।
मगधाख्यो महादेशो याचार्य्यां न हि दुष्यति ॥
दक्षोत्तरक्रमेणैव क्रमात् कीकटमागधौ ।
चरणाद्रिं समारभ्य शृङ्गकूटान्तकं शिवे ! ॥
तावत् कीकटदेश: स्यात्तदन्तर्मागधो भवेत् ।
जगन्नाथप्रान्तदेशश्चोत्कल: परिकीर्त्तित: ॥
कामगिरिं समारभ्य द्वारकान्तं महेश्वरि ! ।
औत्कलाभिधो देशो दूरं शृणु महेश्वरि ! ॥
कामगिरेर्दक्षभागे मरुदेशात्तथोत्तरे ।
शूरदेश: समाख्यात: शूरास्तत्र रमन्ति च ॥
अर्द्धागङ्गं समारभ्य कोटिदेशस्य मध्यगे ।
वसुद्रप्रान्तदेशो हि कोङ्कण: परिकीर्त्तित: ॥
ब्रह्मपुत्रात् कामरूपात् मध्यभागे तु कैकय: ।
मागधाद्दक्षभागे तु विन्ध्यात् पश्चिमत: शिवे ! ॥
सौरसेनाभिधो देश: सूर्य्यवंशप्रकाशक: ।
हस्तिनापुरमारभ्य कुरुक्षेत्रान्त दक्षिणे ॥
पाञ्चालपूर्व्वभागे तु कुरुदेश: प्रकीर्त्तित: ।
मरुदेशात् पूर्व्वभागे कामाद्रेर्दक्षिणे शिवे ! ॥
सिंहलाख्यो महादेश: सर्व्वदेशोत्तमोत्तम: ।
शिखरद्वात् पूर्व्वभागे कामरूपात्तथोत्तरे ॥
पुलिन्ददेशो देवेशि ! नरनारायण: पर: ।
गजेश्वरात् पूर्व्वभागे वसुद्राद्दक्षिणे शिवे ! ॥
कच्छदेश: समाख्यात: सुदेशं शृणु सादरम् ।
पुलिन्दाद्दक्षिणे भागे कच्छाच्च पश्चिमे शिवे ! ॥
मत्स्यदेश: समाख्यातो मत्स्यबाहुल्य-
कारक: ।
वैराटपाञ्चाल्योर्म्मध्ये पूर्व्वदक्षक्रमेण तु ॥
मद्रदेश: समाख्यातो माद्रीहा तत्र तिष्ठति ।
शूरसेनात् पूर्व्वभागे गङ्गक्षा: पश्चिमे शिवे ! ॥
सौवीरदेशो देवेशि ! सर्व्वदेशाधमाधम: ।
अवन्तीत: पश्चिमे तु वैदर्भाद्दक्षिणोत्तरे ॥
नाटदेश: समाख्यातो वर्व्वरं शृणु पार्व्वति ! ॥
मायापुरं समारभ्य यमद्रङ्गात्तथोत्तरे ।
वर्व्वराख्यो महादेश: सैन्धवं शृणु सादरम् ।
लङ्काप्रदेशमारभ्य मङ्कान्तं परमेश्वरि ! ॥
सैन्धवाख्यो महादेश: पर्व्वते तिष्ठति प्रिये ! ।
एते षट्पञ्चाशद्देशा मया प्रोक्ता महेश्वरि ! ॥
एतन्मध्येऽपि देवेशि ! देशभेदा ह्यनेकश: ।
कोटिश: सन्ति देवेशि ! एते मुख्या: प्रकीर्त्तिता: ॥
रहस्यातिरहस्यञ्च गोप्यं पशुसङ्कटे ।
इति संक्षेपत: प्रोक्तं किमन्यत् श्रोतुमिच्छसि ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटल: ॥

देशक:, त्रि, (दिशतीति । दिश् + आदेशे + "खुल् तृचौ ।" ३ । १ । १३३ । इति खुल् ।) शास्ता । इति हेमचन्द्र: । ३ । १५२ ।
"तथोन्मार्गप्रवृत्तस्य चास्तु सन्मार्गदेशक: ।
मनु मेरतिथय: श्रद्धा वित्तदाने तथार्चये ॥"
इति मार्कण्डेये । १६ । १७ ।

देशकारी, स्त्री, रागिणीविशेष: । हनूमन्मते मेघरागस्य भार्य्या । अस्या जाति: संपूर्ण: गेहं षड्जस्वर: गानसमय: वर्षर्त्तौ निशान्त: । अस्या: स्वरूपं सुन्दरस्त्री तिलपुष्पाननना कमलपत्राक्षी दाड़िमस्तनी गौराङ्गी बिम्बोष्ठी मुक्ताहारकण्ठी कर्पूरचन्दनलिप्ताङ्गी साल-ङ्कारा नायकेन सहोपविष्टा हावभावकटाक्षान् कुर्व्वती । सङ्गीतदर्पणमते अस्या गानसमय: प्रातर्वैराटीरागिण्या सह । अस्या: स्वरूपं नायकेन सह केलिकौतुकरता श्यामकेशभारा जितशरत्पूर्णचन्द्राननना अनङ्गरागिलाङ्गी काञ्चनकलशद्युतिहारिकुचा कमलनयना मृदु-भाषिणी । इति सङ्गीतशास्त्रम् ।

देशरूपं, क्ली, (दिश्यते इति । दिश् + कर्म्मणि घञ् । देशस्य हेतुयुक्तिदेशकालपात्रादिभिर्दि-श्यमानस्य रूपम् । यद्वा, देशस्य देशानुरूपा-चारस्य रूपम् ।) उचितम् । इत्यमर: । २ । ८ । २४ ॥ (यथा, महाभारते । १२ । १०७ । ५ ।
"चीर्णव्रतवृत्तिश्च यथा धर्म्मं प्रकीर्त्तितम् ।
लघुना देशरूपेण तन्मयोगेन भारत ! ॥")

देशाखी, स्त्री, रागिणीविशेष: । हनूमन्मते हिन्दोलरागस्य द्वितीयरागिणी । तस्या जाति: षाड़व: गेहं गान्धारस्वर: गानसमय: वस-न्तर्त्तौ पूर्व्वाह्ण: । अस्या: स्वरूपम् । सुरूपा नारी चन्द्रवदना क्रोधना कलहप्रिया रोमहर्षा निष्कोपकरवालकरा मल्लवत् धूल्यवगुण्ठित-बाहुवक्षा: बलमर्द्दितकक्षस्थापितशत्रुपक्षा सर्व्वदा स्वसमीपस्थापितनायका च । राग-मालामते तु तस्या: स्वरूपं मल्लवत् परस्पर-मल्लक्रीड़ायां नियुक्ता । सा क्रीड़ामल्लकालो-त्तेपणप्रस्तराद्युत्तोलनभूमिखननादिरूपा । कल्लिनाथमते वसन्तरागस्य भार्य्या । सङ्गीत-दर्पणमते अस्या जाति: संपूर्ण: । अस्या: स्वरूपं कर्पूरादपि कमनीयाङ्गी कमलरागित-नयना हर्षयुक्ता रसिका अतिधीरा किञ्चित्-सङ्कुचिता दीर्घभुजा मल्लद्युतिमोचिनी च । इति सङ्गीतशास्त्रम् ।

देशान्तरं, क्ली, (अन्यो देश: । मयूरव्यंसकादि-वत् समास: ।) सुमेरुलङ्कयोर्म्मध्यरेखास्वरूप-देशस्वदेशयोरन्तरयोजनम् । इति सिद्धान्तरह-स्यम् । ये उदयान्तरकर्म्मणा लङ्कायामौद-यिका ग्रहा ज्ञातास्ते देशान्तरकर्म्मणा स्वपुरो-दयिका: स्यु: । तच्च द्विविधं एकं पूर्व्वापरं द्वितीयं याम्योत्तरं तत्तरसंज्ञमुक्तम् । यथा,—
"येनेन लङ्कोदयकालिकास्ते
देशान्तरेण स्वपुरोदये स्यु: ।
देशान्तरं प्रागपरं तथान्यत्
याम्योत्तरं तत्तरसंज्ञमुक्तम् ॥"
इति सिद्धान्तशिरोमणि: ॥*॥
देशान्तरपरिभाषायां वृद्धमनु: ।
"वाचो यत्र विभिद्यन्ते गिरिर्व्वा व्यवधायक: ।
महान्तदन्तरं यत्र तद्देशान्तरमुच्यते ॥
देशनामनदीभेदान्निकटोऽपि भवेद्यदि ।
तत्तु देशान्तरं प्रोक्तं स्वयमेव स्वयम्भुवा ॥
दशरात्रेण या वार्त्ता यत्र न श्रूयतेऽथवा ॥
दृश्यते: ।
देशान्तरं वदन्त्येके षष्टियोजनमायतम् ।
चत्वारिंशद्वदन्त्येके त्रिंशदेके तथैव च ॥"
इत्युद्वाहतत्त्वम् ॥
"मुनिभिर्यवचनोक्तयोगादियोजनादिभेदसामञ्ज-स्यार्थं एवं व्याख्यायते त्रिंशद्वेशिष्ट्ये त्रिंशद्-योजनाभ्यन्तरे द्वित्रयवेशिष्ट्ये तदुपरि एक वेशिष्ट्ये चत्वारिंशद्योजनोपरि वाक्षीगिरि-महान्तदन्तरित्वभेदाभावेऽपि षष्टियोजनोपरि वेदेश्यम् ।" इति शुद्धितत्त्वचिन्तामणि: ॥

देशिक:, पुं, (देशे प्रसित: इति । देश + ठक् ।) पथिक: । इति हेमचन्द्र: । ३ । १५७ ॥ (यथा, महाभारते । ७ । ५ । १० ।
"अदेशिको यथा सार्थ: सर्व्वं दुर्गं सञ्चक्षति ।
अनायका तथा सेना सर्व्वान्दोषान् सञ्चक्षति ॥")
गुरु: । यथा मूलमन्त्रेण इत्यागम: ॥
(यथा, महाभारते । १३ । १४७ । ४२ ।
"धर्म्माणां देशिक: साक्षात् स भविष्यति धर्म्म-
भाक् ।
धर्म्मविद्भि: सदैवेशो नमस्कार्य्य: सदोद्यते: ॥")

देशिनी, स्त्री, (दिशतीति । दिश् आदेशे + णिनि: । स्त्रियां ङीप् ।) तर्ज्जनी । इति शब्द-रत्नावली ॥ (यथा, याज्ञवल्क्यसंहितायाम् । १ । १६ ।
"कनिष्ठादेशिन्यङ्गुष्ठमूलान्यं करस्य च ।
प्रजापतितिपित्र्यदेवतीर्थान्यशुक्रात् ॥")

देशी, स्त्री, रागिणीविशेष: । हनूमन्मते दीपक-रागस्य भार्य्या । अस्या जाति: षाड़व: गेहं ऋषभस्वर: गानसमय: श्रीग्रत्तौ मध्याह्न: । अस्या: स्वरूपं सुरूपा नारी हरिद्रसना अलङ्कृता यौवनमदेन कामासक्ता सती नायकस्यान्-नागारमागत्य निधुवनरता च । भरतमते तु मेघरागस्य पत्नी । सङ्गीतदर्पणमते हिन्दोल-रागस्य भार्य्या । तस्या गानसमय: यामयुग-लम् । तस्या: स्वरूपम् । निद्रायुक्तनयना आलस्ययुक्ता प्रियाभिमुखी नायकस्य निद्रा-भञ्जनार्थं मनोरञ्जनतानं गायन्ती रसगीतक्रिया रचितवेशा । भूषणगणशोभिता गौराङ्गी परि-हितहरिद्वर्णशाटिका । इति सङ्गीतशास्त्रम् ॥ (सङ्गीतभेद: । यथा, सङ्गीतदर्पणे । १ । ३—६ ।
"गीतं वाद्यं नर्त्तनञ्च त्रयं सङ्गीतमुच्यते ।
मार्गदेशी विभागेन सङ्गीतं द्विविधं मतम् ॥
दक्षिणेन यदन्विष्टं प्रयुक्तं भरतेन च ।
महादेवस्य पुरतस्तन्मार्गाख्यं विमुक्तिदम् ॥
तदृहेशस्यया रीत्या यत् स्याल्लोकानुरञ्जनम् ।
देशे देशे तु सङ्गीतं तद्देशीत्यभिधीयते ॥")

देश्य, क्ली, (दिश्यते इति । दिश् + कर्म्मणि ण्यत् ।) पूर्व्वपक्ष: । इति शब्दरत्नावली ॥ देशार्हे, त्रि ॥ (देशे भव: । देश + "दिगादिभ्यो यत् ।" ४ ।

३। ५४। इति यत्।) देशभवे। यथा, राजतरङ्गिण्याम्। ३। ६।
"भोगाय देश्यभिच्छूनां वल्लभास्याप्तप्रभा॥")
देशुः, त्रि, (ददातीति। दा+-"गादाभ्यामिण्णुच्।" उणां ३। १६। इति इण्णुच्।) दाता। दुर्दमः। इति हेमचन्द्रः॥ रजकः। इति संक्षिप्तसारे उणादिवृत्तिः॥
देहः, पुं क्ली, (देहि प्रतिदिनम्। दिह् वृद्धौ+अच्।) शरीरम्। इत्यमरः। २। ६। ७१। न्यायमते पृथिव्या देहं योनिजम् अयोनिजञ्च। योनिजं जरायुजमण्डजञ्च। अयोनिजं स्वेदजोद्भिदादिकम्। नारकिणां शरीरमप्ययोनिजम्। जलीयं देहमयोनिजं वरुणलोके प्रसिद्धम्। तेजसं देहमयोनिजं सूर्य्यलोके प्रसिद्धम्। वायोर्देहमयोनिजं तदेव पिशाचादीनाम्। इति सिद्धान्तमुक्तावली॥ *॥
अथ नरकभोगदेहविवरणम्। तत्र यमं प्रति सावित्रीप्रश्नः।
"स्वदेहे भस्मसाद्भूते यान्ति लोकान्तरं नराः।
केन देहेन वा भोगं भुञ्जते च शुभाशुभम्॥
सुचिरं क्लेशभोगेन कथं देहो विनश्यति।
देहो वा किंविधो ब्रह्मन्! तन्मे व्याख्यातुमर्हसि॥"
यमस्योत्तरम्।
"शृणु देहविवरणं कथयामि यथागमम्।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम्॥
देहिनां देहबीजञ्च सप्तः सृष्टिविधौ परम्।
पृथिव्यादिपञ्चभूतैर्यो देहो निर्म्मितो भवेत्॥
स क्षत्रियो नश्वरञ्च भस्मसाच्च भवेद्दिह॥
दृढाङ्गुष्ठप्रमाणञ्च यो जीवपुरुषः स्मृतः।
बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे॥
स देहो न भवेद्भस्म ज्वलदग्नौ यमालये।
जले न नष्टो देही वा प्रहारे सुचिरे कृते॥
न शस्त्रे च न चास्त्रे च न लौहकण्टके तथा।
तप्तदण्डे तप्तलौहे तप्तपाषाण एव च॥
प्रतप्तप्रतिमास्तम्भेष्वग्न्यूर्द्धपतनेऽपि च।
न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव च॥
कथितं देहदृष्टान्तकारणञ्च यथागमम्॥"
इति ब्रह्मवैवर्त्तपुराणम्॥
ईश्वरदेहस्य प्रमाणं यथा,—
"यस्ते गुह्यतमं देहं सर्व्वगं तत्त्वदर्शिनः।
प्रविशन्ति मम व्यायुष्यं लभन्ते योगिनोऽव्ययम्॥"
इति कूर्म्मपुराणम्॥
देहकोषः, पुं, (देहस्य कोष इव आवरकत्वात्।) यत्नः। इति शब्दचन्द्रिका॥ पाखा इति भाषा॥
देहक्षयः, पुं, (देहस्य क्षयो हानिर्यस्मात्।) रोगः। इति शब्दचन्द्रिका॥
देहदः, पुं, (देहं ददाति यद्वा दायति क्षतादेः शोधयतीति। दा दाने दैप शोधने वा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) पारदः। इति राजनिर्घण्टः॥ (देहदातरि, त्रि॥)
देहदुर्गन्धता, स्त्री, (देहस्य दुर्गन्धता) शरीरदौर्गन्ध्यम् तन्नाशकौषधं यथा,—
"अर्जुनस्य च पुष्पाणि जम्बुपत्रयुतानि च।
सलोध्राणि च तक्रेपो देहदुर्गन्धतां हरेत्॥"
इति गारुडे १६४ अध्यायः॥
देहधारकं, क्ली क्ली, (देहं धारयतीति। धारि+"खुलृचौ।" १। ३। १३३। इति खुल्।) अस्थि। इति हेमचन्द्रः। ३। २६०॥
देहधिः, पुं, (देहो धीयते अस्मिन्निति। देह+धा+आधारे किः।) पक्षः। इति शब्दचन्द्रिका॥ पाखा इति भाषा॥
देहधृक्, [ञ्] पुं, (देहे धर्त्तरि सञ्चरतीति। धृञ्+क्विप्।) वायुः। इति शब्दचन्द्रिका॥ (यथा, सुश्रुते। २। १।
"वायुर्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक्॥")
देहभृत्, पुं, (देहं बिभर्त्तीति। देह+भृ+क्विप् तुगागमश्च।) जीवः। इति हेमचन्द्रः। ६। २॥ (यथा, रघौ। ८। ५१।
"धिगिमं देहभृतामसारताम्॥")
देहयात्रा, स्त्री, (देहस्य यात्रा लोकान्तरगमनम्।) यमपुरीगमनम्। मरणम्। (देहाय देहरक्षणाय या यात्रा उद्यमादिः।) भोजनम्। इति मेदिनी। रे, २६८॥ (यथा, भागवते। ४। २३। २०।
"अतीव भर्त्तुर्व्रतधर्म्मनिष्ठया
शुश्रूषया चारुदेहयात्रया।
नाविन्दतार्त्तिं परिकर्शितापि सा
प्रेयस्करस्पर्शनमाननिर्वृतिः॥")
देहला, स्त्री, (देहं लाति देहस्य पुष्टिं ददातीति। देह+ला+कः टाप्। सेवनेन प्रथमं पुष्टिवर्णादिप्रदानादस्यास्तथात्वम्।) मद्यम। इति शब्दचन्द्रिका॥
देहलिः, पुं, (देह+भावे घञ्। देहो लेपस्तं लाति गृह्णातीति। देह+ला+बाहुलकात् किः।) देहली। इति शब्दरत्नावली॥
देहली, स्त्री, (देहं लेपं लातीति। देह+ला+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः। गौरादित्वात् ङीष्।) गृहावग्रहणी। इत्यमरः। २। २। १३॥ द्वारप्रिक्षिका। द्वारावग्रहणम्। इति केचित्॥ द्वातिना इति ख्याता इति केचित्॥ अथ उड्डम्बरम्। तत्पुष्पिलाया अधोदारुपाषाणो वा। इति स्वामी॥ इत्यमरटीकायां भरतः॥ (यथा, मेघदूते। ८०।
"प्रेक्षान्ते मासान् गमनदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीमुक्तपुष्पैः॥")
देहसारः, पुं, (देहस्य सारः।) मज्जा। इति राजनिर्घण्टः॥
देहात्मवादी, [न्] त्रि, (देहमेवात्मानं परब्रह्म वदतीति। वद्+णिनिः।) चार्व्वाकः। तस्येदं मतम्। शरीरमेवात्मा प्रज्वलितत्वहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् स्थूलोऽहं कृशोऽहमित्यनुभवाच्च। अत्र प्रमाणम्। देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृताः। इति शारीरिकसूत्रभाष्यम्॥
अपि च।
"आत्मास्ति देहाद्व्यतिरिक्तभूर्मि-
र्भोक्ता स लोकान्तरितः फलानाम्।
आग्नेयमाकाशतरोः प्रसूनात्
प्रधीयसः स्वादुफलप्रसूतौ॥"
इति प्रबोधचन्द्रोदयः॥
देहिका, स्त्री, (देहीति। दिह् वृद्धौ+ण्वुल्। टापि अत इत्वम्।) कौटविशेषः। तत्पर्य्यायः। वटिः २ उपादिकः ३। इति त्रिकाण्डशेषः॥ उपजिह्विका ४ उत्पादिका ५ उद्देहिका ६ दिवी ७। इति हारावली॥
देही, [न्] (देहोऽस्यस्येति। देह+इनिः।) शरीरी। प्राणी। अस्य गुणा यथा,—
"बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा।
धर्म्माधर्म्मौ गुणा एते आत्मनः सुखचतुर्थ्य॥"
अयं इन्द्रियाद्यधिष्ठाता पुण्यपापाश्रयः। ज्ञानसुखादियोगतो मानसप्रत्यक्षविषयः। परदेहादौ प्रवृत्त्यादिनानुमेयः। अहमित्याकारप्रत्ययाश्रयः। मनोमात्रस्य गोचरः। विभुः परममहत्त्ववान्। इति भाषापरिच्छेदः॥
तथा च। श्रीभगवद्गीतायाम्।
"देही नित्यमवध्योऽयं देहे सर्व्वस्य भारत!।
तस्मात् सर्व्वाणि भूतानि न त्वं शोचितुमर्हसि॥"
अपि च।
"देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥"
दे, प शोधने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) पित्त्वादासंज्ञाभावे यगादौ दायते इत्यादि। शोधनमिह शुद्धीकरणम्। दायति ताम्रमम्लेन लोकः। अवपूर्व्वः शुद्धौ भावे (अव अकर्म्मकः।) म्रियते श्वेतते जीवि स्यु; शुक्लत्वेऽवदायते। इति भट्टमल्लः। इति दुर्गादासः।
दैतेयः, पुं, (दितेरपत्यं पुमान्। दिति+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) दैत्यः। इत्यमरः। १। १। १२॥ (यथा, हरिवंशे। १८२। ७६।
"जय वार्त्रघ्नहा! दैतेयं देवपूजित!।
यदर्थमवतीर्णोऽसि तत् कर्म्म सफलीकुरु॥")
दैत्यः, पुं, दितेरपत्यं ("दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः।" ४। १। ८५। इति ण्यः।) असुरः। इत्यमरः। १। १। १२॥ (यथा, मनुः। १२। ४८।
"तापसा यतयो विप्रा ये च वैमानिका गणाः।
नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः॥")
दितिसम्बन्धिनि, त्रि॥
दैत्यगुरुः, पुं, (दैत्यानां गुरुः।) शुक्रः। इत्यमरः। १। ३। २५॥ (यथा, बृहत्संहितायाम्। १०४। ३४।
"आशार्थमानास्यदभूतिवक्त्र-
ग्रहुत्वयात् दैत्यगुरुस्तुतीये॥")
दैत्यदेवः, पुं, (दैत्यानां देवः।) वरुणः। इति त्रिकाण्डशेषः॥ वायुः। इति हेमचन्द्रः। ४। १७१

दैत्यनिसूदनः, पुं, (निसूदयतीति । नि+सूद+ल्युः । दैत्यानां निसूदनः नाशकः ।) विष्णुः । इति पुराणम् ॥

दैत्यपुरोधाः, [स्] पुं, (दैत्यानां पुरोधाः पुरोहितः ।) शुक्रः । इति हारावली । ३६ ॥

दैत्यमाता, [तृ] स्त्री, (दैत्यानां माता ।) दितिः । इति त्रिकाण्डशेषः ॥ (दैत्यमात्रमात्रम् । यथा, हरिवंशे । १६६ । १२ ।
"अदितिर्दितिर्दनुश्चैव सिंहिका दैत्यमातरः ॥") दैत्यपरिमाणकर्त्तरि, त्रि ॥

दैत्यमेदजः, पुं, (दैत्यमेदात् जायते इति । दैत्यमेद+जन्+डः ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥ एथिव्याम्, स्त्री । मधुकैटभमेदोजातत्वात् ॥

दैत्ययुगं, क्ली, (दैत्यानां युगम् ।) दैत्यानां युगविशेषः । तत् देवपरिमाणेन द्वादशसहस्रवर्षाणि । मनुष्यमानेन चतुर्युगसंख्यम् । इति शब्दार्थकल्पतरुः ॥

दैत्या, स्त्री, (दितेरियमिति यत् । ततष्टाप् ।) सुरागामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२३ ॥ चक्रौषधिः । इति मेदिनी । ये, ३२ ॥ मद्यम् । इति त्रिकाण्डशेषः ॥ दैत्यभार्य्या च ॥

दैत्यारिः, पुं, (दैत्यानामरिः ।) विष्णुः । इत्यमरः । १ । १ । १६ ॥ (यथा, प्रबोधचन्द्रोदये । २ । २८ ।
"दैत्यारिः कमलाकपोलमकरीलेखाङ्कितोरःस्थलः ।
प्रीतेश्चाविततरेषु जन्तुषु पुनः का नाम शान्तेः कथा ॥")
देवता । इति मेदिनी । रे, १७० ॥

दैत्याहोरात्रः, पुं, (दैत्यानामहोरात्रः ।) दैत्यानां दिवानिशम् । स मनुष्यमानेन वर्षैकसंख्यः । इति शब्दार्थकल्पतरुः ॥

दैनं, क्ली, (दीनस्य भावः । अण् ।) दीनता । (दिनस्य दिवसस्य इदम् । दिन+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) दिनसम्बन्धिनि, त्रि ॥

दैनन्दिनं, त्रि, (दिनं दिनं भवं इत्यच् निपातनात् साधुः ।) दिनेदिने भवम् । (यथा, भागवते । ३ । १५ । २६ ।
"एष दैनन्दिनः सर्गो ब्राह्मस्त्रैलोक्यवर्त्तनः ।
तिर्यङ्नृपितृदेवानां सम्भवो यत्र कर्म्मभिः ॥")
स्वार्थेऽण् प्रतिदिनम् । इति निपातनसाध्यम् ॥

दैनन्दिनप्रलयः, पुं, (दैनन्दिनश्चासौ प्रलयश्चेति कर्म्मधारयः ।) प्रलयविशेषः । यथा,—
"चतुर्दशेन्द्रावच्छिन्ने ब्रह्मणो दिनमुच्यते ।
तावती ब्रह्मणो रात्रिः सा च ब्राह्मी निशा नृप ! ॥
कालरात्रिश्च सा ज्ञेया वेदेषु परिकीर्त्तिता ।
इदं सप्रकल्पजीवी मार्कण्डेयो महातपाः ॥
ब्रह्मलोकादधः सर्व्वे लोका दग्धाश्च तत्र वै ।
जल्पतेनैव सदृशा सङ्घर्षसुखार्जना ॥
चन्द्रार्कमण्डलपुटाच्च ब्रह्मलोकं गता द्रुतम् ।
ब्रह्मरात्रे व्यतीते तु पुनश्च सृजते विधिः ॥
तस्य ब्राह्मीनिशायाश्च क्षुद्रप्रलय उच्यते ।
देवाश्च मुनयश्चैव तत्र दग्धा नरादयः ॥
एवं त्रिंशद्दिवारात्रैर्ब्रह्मणो मास एव च ।
वर्षं द्वादशमासैश्च ब्रह्मसम्मित एव हि ॥
एवं पञ्चदशाब्दे च गते च ब्रह्मणो नृप ! ।
दैनन्दिनस्तु प्रलयो वेदेषु परिकीर्त्तितः ॥
अहो रात्रिश्च सा प्रोक्ता वेदविद्भिः पुरातनैः ।
तत्र सर्व्वे प्रनष्टाश्च चन्द्रार्कादिदिगीश्वराः ॥
आदित्या वसवो रुद्रा मन्विन्द्रा मानवादयः ॥
ऋषयो मुनयश्चैव गन्धर्व्वा राक्षसादयः ॥
मार्कण्डेयो लोमशश्च पैप्पलश्चिरजीविनः ।
इन्द्रद्युम्नश्च नृपतिश्चाकूपारश्च कच्छपः ।
नाड़ीजङ्घो वकश्चैव सर्व्वे नष्टाश्च तत्र वै ॥
ब्रह्मलोकादधः सर्व्वे लोका नागालयास्तथा ।
ब्रह्मलोकं ययुः सर्व्वे ब्रह्मलोकादयस्तथा ॥
गते दैनन्दिने ब्रह्मा लोकांश्च सकलान् पुनः ।
एवं शतायुःपर्य्यन्तं परमायुश्च ब्रह्मणः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

दैनारं, त्रि, दीनारमितमर्घ्यजातवस्तु । दीनारे भवं दीनारमिदं वेति (अण्) ञ्यप्रत्ययः ॥

दैनिकी, स्त्री, (दिने भवः । दिन+"कालात् ठञ् ।" ४ । ३ । ११ । इति ठञ् । गौरादित्वात् ङीष् ।) दिनभृतिः । एकदिनकर्म्ममूल्यम् । इति शब्दमाला । (दिनभवे, त्रि ।)

दैन्यं, क्ली, (दीनस्य भावः । दीन+ष्यञ् ।) कार्पण्यम् । इति हेमचन्द्रः । २ । २३३ ॥ दीनता । यथा, मार्कण्डेयपुराणे ।
"याच्ञादैन्यपराणि यस्य कलाहायन्ते मित्रस्वं दृश
त्वं दक्षिणभितो सुखानि स दृग्गोचः कथं कथ्यताम् ॥"
इति सुरारिमिश्रः ॥
(अलङ्कारोक्तव्यभिचारिगुणभेदः । यथा, साहित्यदर्पणे । ३ । १४१ ।
"दौर्गत्याद्वैरनैर्लज्जं दैन्यं मलिनतादिकृत् ॥")

दैर्घं, त्रि, दीर्घसम्बन्धि । दीर्घस्येदमित्यर्थे (अण्) ञ्यप्रत्ययः ॥

दैर्घ्यं, क्ली, (दीर्घस्य भावः । दीर्घ+ष्यञ् ।) दीर्घत्वम् । तत्पर्य्यायः । आयामः २ । आरोहः ३ । इत्यमरः । २ । ६ । ११४ ॥ आरोहस्थाने आनाह इति भरतः ॥ (यथा, सुश्रुतसंहितायाम् । ११ । ३३ ।
"अपरस्यां चलकेतुः
ग्रिवया याम्यगयाङ्गुलोच्छ्रितया ।
गच्छेद्यथा यथोदक्
तथा तथा दैर्घ्यमायाति ॥")

दैलीपिः, पुं, दिलीपराजपुत्रो रघुः । दिलीपस्यापत्यमिति ञिप्रत्ययः (इञ्) ॥

दैव, क्ली, (देवस्येदम् । देव+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) देवतीर्थम् । तत् दक्षिणहस्ताङ्गुल्यग्रवर्त्ति । इत्यमरः । २ । ७ । ५१ ॥ (यथा, मनुः । २ । ५६ ।
"कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ॥")

दैवसम्बन्धिनि, त्रि । यथा,—
"प्रमीतौ पितरौ यस्य देहस्तस्यासुचिर्भवेत् ।
यावि दैवं न वा पित्र्यं यावत् पूर्णं न वत्सरः ॥"
इति शुद्धितत्त्वम् ॥

विवाहविशेषे, पुं । इत्युद्वाहतत्त्वम् ॥ अस्य विवरणं उद्वाहशब्दे द्रष्टव्यम् । (दिवि भवः । दिव्+अण् ।) दिविभवे, त्रि ॥

दैवं, क्ली, पुं, (दैवात् नियतादागतम् । देव+अण् ।) भाग्यम् । इत्यमरः । १ । १ । २८ ॥
"दैवाधीनं जगत् सर्व्वं जन्मकर्म्मसुभासुभम् ।
संयोगाश्च वियोगाश्च न च दैवात् परं बलम् ॥
छायायास्तच्च तद्देवं स देवात् परतस्ततः ।
भजन्ति सततं सन्तः परमात्मानमीश्वरम् ॥
देवं वर्द्धयितुं शक्तः स्वयं कर्त्तुं स्वलीलया ।
न देवबहस्तदभक्तश्चाविनाशी च निर्गुणः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥ * ॥
मनुरुवाच ।
"दैवे पुरुषकारे च किं व्यायस्तद्ब्रवीतु मे ।
अत्र मे संशयो देव ! छेत्तुमर्हस्यशेषतः ॥
मत्स्य उवाच ।
स्वमेव कर्म्म दैवाख्यं विद्धि देहान्तरार्ज्जितम् ।
तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥
प्रतिकूलं यथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यसत्यानशीलिनाम् ॥
येषां पूर्व्वकृतं कर्म्म सात्त्विकं मनुजोत्तम ! ।
पौरुषेण विना तेषां कैश्चिदृष्टश्यते फलम् ॥
कर्म्मणा प्राप्यते लोके राजसस्य तथा फलम् ।
कृच्छ्रेण कर्म्मणा विद्धि तामसस्य तथा फलम् ॥
पौरुषेणाप्यते राजन् ! मार्गितव्यं फलं नरैः ।
दैवमेव विजानन्ति नराः पौरुषवर्ज्जिताः ॥
तस्मात्त्रिकालसंयुक्तं दैवेन सफलं भवेत् ।
पौरुषं दैवसम्पन्नं काले फलति पार्थिव ! ॥
दैवं पुरुषकारश्च कालश्च मनुजोत्तम ! ।
चयमेव मनुष्यस्य सिद्धिकृत् स्यात् फलावहम् ॥
कृषेर्वृष्टिसमायोगात् दृश्यन्ते फलसिद्धयः ।
तासु काले प्रदृश्यन्ते नैवाकाले कथञ्चन ॥
तस्मात् सदैव कर्त्तव्यं सधर्म्मं पौरुषं बुधैः ।
एवन्ते प्राप्नुवन्तीह परलोके फलं ध्रुवम् ॥
नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः ।
तस्मात् सदैव यत्नेन पौरुषे यत्नमाचरेत् ॥
त्यक्तालसान्दैवपरान् मनुष्या-
नुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः ।
अन्विष्य यत्नादृच्छते नृपेन्द्र !
तस्मात् सदोत्थानवता हि भाव्यम् ॥"
इति मत्स्यपुराणे १६५ अध्यायः ॥

दैवकी, स्त्री, (देवकी एव । स्वार्थे अण् । ततो ङीष् ।) कृष्णमाता । वसुदेवपत्नी । इति श्रीभागवतम् ॥

दैवकीनन्दनः, पुं, (दैवक्याः नन्दनः पुत्रः ।) श्रीकृष्णः । इत्यमरः । १ । १ । २१ ॥ (यथा, पाद्मोत्तरखण्डे १११ अध्याये ।
"दैवकीनन्दनः श्यामः श्रीश्यामाप्राणवल्लभः ॥")

दैवकोविदा, स्त्री, (दैवे दैवनिमित्तशुभाशुभज्ञाने कोविदा विज्ञा।) दैवज्ञा। इति शब्दरत्नावली॥ दैवपण्डिते, त्रि॥

दैवज्ञः, त्रि, (दैवं जानातीति। ज्ञा+कः।) गणकः। इत्यमरः। २।८।१४॥ (यथा, देवीभागवते। १। २०। ३४।

"दैवज्ञान् वेदविदुषः पर्य्यपृच्छत्सुदं दिनम्॥") अस्योत्पत्तिर्यथा, दैवज्ञाह्मणधनापहारी धूमान्धनरकं भुक्त्वा शतजन्मस्वधिक-नानाविधपक्षिक्रमिदंशभार्य्यावंशहीनत्वाधियुतश्चरस्वर्णकारसुवर्णबणिग्यवनसेविविप्रब्राह्मणगणका भूत्वा दैवज्ञो गणनोपजीविविप्रो भवति॥ *॥

अपि च।

"लाक्षालोहादिव्यापारी रसादिविक्रयी च यः।
स याति नागवेश्म नागैर्वेष्टित एव च॥
वसेत् स्वलोममानाब्दं तत्रैव नागदंशितः।
ततो भवेत् स गणको वेदज्ञश्च सप्तजन्मसु॥
गोपश्च चर्म्मकारश्च रङ्गकारस्तथा शुचिः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

दैवज्ञा, स्त्री, (दैवं जानातीति। ज्ञा+कः। ततष्टाप्।) दैवज्ञभार्य्या। प्रश्नादिना शुभाशुभज्ञा। लक्षणादिना शुभाशुभनिरूपिणी। तत्पर्य्यायः। विप्रस्त्रिका २ ईक्षणिका ३। इत्यमरः। २।६।२०॥

दैवतः, पुं क्ली, (देवता एव। स्वार्थे अण्।) देवता। इत्यमरः। १। २। ६॥ (यथा, रामायणे। २। ५०। २।

"आपृच्छे त्वां पुरश्रेष्ठे! काकुत्स्थपरिपालिते!।
दैवतानि च यानि त्वां पालयन्त्यावसन्ति च॥"

दैवतानां समूहः। देवता+अण्।) देवतासमूहे, क्ली। (देवतायाः इदम्। अण्।) देवसम्बन्धिनि, त्रि॥

दैवदीपः, पुं, (दैवः सूर्य्याधिष्ठाढको दीपः। दर्शनेन्द्रियस्य सूर्य्याधिष्ठाढत्वात्तथात्वम्।) चक्षुः। इति त्रिकाण्डशेषः॥ देवसम्बन्धिप्रदीपश्च॥

दैवपरः, त्रि, (दैवमेव परं प्रधानं यस्य।) दैवनिष्ठः। तत्पर्य्यायः। यज्ञविघ्नः २। इति हेमचन्द्रः। ३। ४७॥ (यथा, मार्कण्डेये। ४३।८८।

"सार्द्धं न बलिभिः कुर्य्यान्न च न्यूनैर्न निन्दितैः।
न सर्व्वशङ्किभिर्नित्यं न च दैवपरैर्नरैः।
कुर्व्वीत साधुभिर्मैत्रीं सदाचारावलम्बिभिः॥")

दैवप्रश्नः, पुं, (दैवे दैवनिमित्तशुभाशुभविषये यः प्रश्नः।) प्राक्तनशुभाशुभकर्म्मजिज्ञासा। तत्पर्य्यायः। उपश्रुतिः २। इति त्रिकाण्डशेषः॥ (दैववाणी। यदुक्तं हारावल्याम्। २२।

"नक्तं निर्गत्य यत्किञ्चित् शुभाशुभकरं वचः।
श्रूयते तद्विदुर्धीरा दैवप्रश्नमुपश्रुतिम्॥")

दैवयुगं, क्ली, (दैवं देवसम्बन्धि युगम्।) देवानां युगम्। तच्च देवमानेन द्वादशसहस्रवर्षम्। मनुष्यपरिमाणेन चतुर्युगमानम्। इति शब्दार्थकल्पतरुः॥ (यदुक्तं मनौ। १। ७१।

"यदेतत् परिसंख्यातमादावेव चतुर्युगम्।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते॥")

दैवलकः, पुं, (देवल इव कायतीति। कै+कः। ततः स्वार्थे अण्।) भौतः। भूतसेवकः। इति हारावली। १५०॥ देवलसम्बन्धिनि, त्रि॥

दैवलेखकः, पुं, (दैवं दैवनिमित्तशुभाशुभं लिखतीति। लिख+ण्वुल्।) मौकूर्त्तः। गणकः। इति त्रिकाण्डशेषः॥

दैववाणी, स्त्री, (दैवी आकाशसम्बन्धिनी वाणी।) आकाशवाणी। अमानुषी वाक्। तत्पर्य्यायः। चित्तोक्तिः २ पुष्पशकटी ३ दैवप्रश्नः ४ उपश्रुतिः ५। इति त्रिकाण्डशेषः॥ संस्कृतवाक्यम्। यथा, दक्षौ।

"संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः॥"

"गौर्वाणवाणीवदनं सुकुन्द-
संकीर्त्तनश्चेत्युभयं हि लोके।
सुदुर्लभं तच्च न सुग्धबोधा-
न्न लभ्यतेऽतः पठनीयमेतत्॥"

इति बोपदेवः॥

दैवाकरिः, पुं, (दिवाकरस्य अपत्यं पुमान्। दिवाकर+इञ्।) शनिः। यमः। यमुनायां, स्त्री। एतेषामुदाहरणं यथा,—

"सम्मतिं दैवाकरितः पारमिताहरितारुणकरितः।
नायं कोऽपि विशेषः स्वाहितराधिवशात्तशुशेषः॥"

इति काव्योदयधृतसङ्गीतकम्॥

दैवात्, अ, दृष्टात्। यथा, "दैवादपाङ्गबलनं किल मानवत्याः।" इति काव्योदयः॥

दैवाहोरात्रः, पुं, (दैवः देवसम्बन्धी अहोरात्रः।) देवानामेकदिवसः। स मनुष्याणां संवत्सरः। इति शब्दार्थकल्पतरुः॥

दैविकः, त्रि, (दैवस्य अयं देवे भवो वा। दैव+ठक्।) देवसम्बन्धी। (यथा, मनुः। १। ६५।

"अहोरात्रे विभजते सूर्य्यो मानुषदैविके।
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्म्मणामहः॥")

दैवे भवः। इति व्याकरणम्॥

दैवी, स्त्री, (दैवस्य इयम्। दैव+अण् अञ् वा। ततो ङीप्।) देवसम्बन्धिनी। यथा,—

"ब्रह्मोपास्यमिति स्फुरत्यपि हृदि यावत्स्थिरा वासना
का नामेयमतर्क्यसेतुगहना देवी सतां यातना।"

इति भ्रान्तिशतके। ७॥

चिकित्साविशेषः। यथा, वैद्यके।

"आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता॥"

दैव्यं, क्ली, (देवस्य इदम्। "देवाद्यञञौ।" ४। १। ८५। इत्यस्य वार्त्तिकोक्त्या यञ्।) दैवम्। भाग्यम्। इत्यमरटीकायां भरतः॥ (देवसम्बन्धे, त्रि। यथा, ऋग्वेदे। २। ३०। ११।

"तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम्॥")

दैशिकं, त्रि, (देशे भवं देशस्य इदं वा। देश+ठञ्।) देशसम्बन्धि। भवार्थे ष्ठिकप्रत्ययेन सिद्धम्। सम्बन्धविशेषः। यथा। कालभावयोः सप्तमीति सूत्रं भाव: सत्त्वं तच्च द्विविधं कालिकं दैशिकञ्चेति कारकचक्रे भवानन्दसिद्धान्तवागीशः॥ देशनिष्ठविशेषणता। इति नैयायिकाः॥

दैष्टिकः, पुं, दिष्टेन भवः। (दिष्ट+ठक्।) भाग्याधीनजातः। कालेन जातः। इति व्याकरणम्॥ (दिष्टं भागधेयमिति मतिर्यस्य। "अस्ति नास्ति दिष्टं मतिः।" ४। ४। ६०। इति ठक्। देवपरः। इति सिद्धान्तकौमुदी॥)

दैहिकं, त्रि, (देहस्य इदं देहे भवं वा। देह+ठञ्।) देहसम्बन्धि। यथा,—

"भीरूणां भैरवाणां भवति सुविहिता दैहिकी गोपितार्त्ता।"

इति कूर्च्चिकातन्त्रेऽन्त्यर्णागः॥

दो, य छेदे। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-सेट्।) यः, शिरोऽवयवति विद्विषां यः। इति दुर्गादासः॥

दोः, [स्] पुं, (दाम्यत्यनेनेति। दम उपशमे+"दमेर्डोसिः।" उणा। २। ६६। इति डोसिः।) बाहुः। इत्यमरः। २। ६। ८०॥ (यथा, अनर्घराघवे। २। ३४।

"दातव्येयमवश्यमेव दुहिता कस्मैचिदेनामसौ
दोर्लीलामहणीकृतत्रिभुवनो लङ्केश्वरो याचते॥")

दोःशिखरं, क्ली, (दोष्णः शिखरम्।) स्कन्धः। इति राजनिर्घण्टः॥

दोःसहस्रभृत्, पुं, (दोःसहस्रं बाहुसहस्रं बिभर्त्तीति। भृ+क्विप्।) कार्त्तवीर्य्यार्জ্জुनः। इति हेमचन्द्रः। ३। ३६६॥ वाणराजा च॥

दोग्धृ, [ऋ] पुं, (दोग्धीति। दुह+तृच्।) अर्थोपजीविकविः। वत्सः। गोपालः। इति मेदिनी। धे, ८॥ दोहनकर्त्तरि, त्रि॥ (यथा, कुमारे। १। २।

"यं सर्व्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे॥")

दोग्ध्री, स्त्री, (दोग्धृ+ङीप्।) गौः। इति राजनिर्घण्टः॥ (यथा, रघुः। २। २३।

"दोहावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छ्रिमरिपुर्निरस्याम्॥")

दोदुल्यमानः, त्रि, (दुल+यङ्+शानच्।) पुनः-पुनरतिशयेन वा दोलनविशिष्टः। इति व्याकरणम्॥

दोधः, पुं, (दोग्धीति। दुह+घञ्। निपातनात् साधुः।) गोवत्सः। यथा,—

"देव सदोधकदम्बतलस्थ-
श्रीधर तारकनामपदं मे।
कण्ठतलेऽसुविनिर्गमकाले
स्वल्पमपि क्षणमेष्यति योगम्॥"

इति छन्दोमञ्जरी॥

दोधकः, पुं, छन्दोविशेषः। यथा, श्रुतबोधे।

"आद्यचतुर्थमहीनतमत्वे
सप्तमकं दशमञ्च तथान्त्यम्।

यत्र गुरु प्रकटसाररागे
तत् कथितं तव दोधकवृत्तम् ॥"

दोधयमानः त्रि, (पुनः पुनरतिशयेन वा धूयते। धु कम्पने + "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्।" ३।१।२२। इति यङ्। "गुणो यङ्लुकोः।" ७। ४। ८२। इति अभ्यासस्य गुणः। ततः अभ्यासस्य चात्वमुसारेण दोधूयधातुः। यङन्तत्वादात्मनेपदम्। ततः शानच्।) पुनः-पुनरतिशयेन वा कम्पविशिष्टः। यथा,—

"नभस्वदासङ्गभयेव साध्वी
दोधयमाना वडभीपताका।"

इति क्षत्रभङ्गरी ॥

"प्रलयेऽपि दोधूयमानाः परमाणवः तिष्ठन्ति।"

इति शिरोमणिः ॥

दोरकः पुं, (डोरक + निपातनात् डस्य दः।) कौशातन्तुवत्सनरज्जुः। इति शब्दार्थकल्पतरुः ॥

दोर्गडुः, पुं, (दोषा बाहुना गडुः कुक्षितः।) कुक्षितहस्तः। तत्पर्य्यायः। कुन्यः २ बाहुकुण्ठः ३। इति जटाधरः ॥

दोर्ग्रहः, त्रि, (दोर्गृह्यते अनेनेति। ग्रह + करणे वन्।) बलवान्। तत्पर्य्यायः। कैरातः २ शालः ३। इति हारावली। १२७ ॥ (दोष्णो ग्रहः।) भुजस्य ग्रहणं तस्य यथा च ॥

दोर्दण्डः, पुं, (दोर्दण्ड इव।) बाहुरूपदण्डः। यथा। "दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयम्।" इत्युद्भटः ॥

दोर्मध्यं, क्ली, (दोष्णो मध्यम्।) बाहुमध्यभागः। इति शब्दार्थकल्पतरुः ॥ बाहु इति भाषा ॥

दोर्मूलं, क्ली, (दोष्णो मूलम्।) कक्षः। बगल इति भाषा। तत्पर्य्यायः। भुजकोटरः २ खण्डिकः ३ कक्षा ४। इति हेमचन्द्रः। ३। २५३ ॥

दोलः, पुं, दोलनम्। दुलधातोर्भावे घञ्प्रत्ययेन निष्पन्नः। (दोल्यते अस्मिन् क्षणेनेति। दोलि + अधिकरणे घञ्।) श्रीकृष्णस्य यात्राविशेषः। अस्य प्रमाणं यथा, पाद्मे पातालखण्डे।

"विशेषतः कलियुगे दोलोत्सवो विधीयते।
फाल्गुने च चतुर्दश्यामष्टमे यामसंज्ञके ॥
अथवा पौर्णमास्यान्तु प्रतिपत्सन्धिसम्मितौ।
पूजयेद्विधिवद्भक्त्या फल्गुचूर्णैश्चतुर्विधैः ॥
सिन्दूरकुङ्कुमैर्गौरपीतैः कर्पूरादिविमिश्रितैः।
हरिद्राचारयोगाच्च रङ्गरम्यैर्मनोहरैः ॥
अन्यैर्वा रङ्गरम्यैश्च प्रीणयेत् परमेश्वरम्।
एकादश्यां समारभ्य पञ्चम्यन्तं समापयेत् ॥
पञ्चाहानि त्र्यहाणि स्युर्दोलोत्सवो विधीयते।
दक्षिणाभिमुखं कृत्वा दोलयानं सहोदराः ॥
दृष्ट्वापराधनिचयैर्मुक्तास्ते नात्र संशयः ॥"

अपि च।

जैमिनिरुवाच।

"फाल्गुने मासि कुर्वीत दोलारोहणमुत्तमम्।
यत्र क्रीडति गोविन्दो लोकानुग्रहणाय वै ॥
प्रत्यक्षं देवदेवस्य गोविन्दास्यान्तु कारयेत्।
प्रासादं पुरतः कुर्य्यात् षोड़शस्तम्भसुश्रितम् ॥
चतुरस्रं चतुर्द्वारं मण्डपं वेदिकान्वितम्।
चारुचन्द्रातपं माल्यचामरध्वजशोभितम् ॥
भद्रासनं वेदिकायां श्रीपर्णीकाष्ठनिर्म्मितम्।
फल्गूत्सवं प्रकुर्व्वीत पञ्चाहानि त्र्यहाणि वा ॥
फाल्गुन्याः पूर्व्वतो विप्राश्चतुर्दश्यां निशामुखे।
वह्न्युत्सवं प्रकुर्व्वीत दोलमण्डपपूर्व्वतः ॥
एतत् सर्व्वं प्रकुर्व्वीत दोलमण्डपपूर्व्वतः।
गोविन्दागुग्रहीतन्तु यात्राङ्गं तत् प्रकीर्त्तितम् ॥
आचार्य्यवरणं कृत्वा वह्निं निर्म्मथनोद्भवम्।
भूमिं संस्कृत्य विधिवत् तत्रवाग्निं समाहितम् ॥
समर्प्य कारयित्वा तु वह्निं तत्र विनिक्षिपेत्।
पूजयित्वा विधानेन कुम्भाब्जविधिना क्षुनेत् ॥
गोविन्दं पूजयित्वा तु भ्रामयेत् सप्त तं विभुम्।
तस्मिन् काले हरिं दृष्ट्वा सर्व्वपापैः प्रमुच्यते ॥
यत्रास्तं रचयेद्वह्निं यावद्यात्रा समाप्यते ॥*॥
प्रान्तयामे चतुर्दश्यां गोविन्दप्रतिमां शुभाम् ॥
वासयित्वा हरेरग्रे पूजयेत् पुरुषोत्तमम्।
उपचारावशिष्टैस्तु प्रत्यर्चामपि पूजयेत् ॥
ततो वरञ्च वसनं मालाञ्च द्विजसत्तमाः।
अर्च्चायां विन्यसेन्मन्त्रं परं ज्योतिर्विभावयन् ॥
ततश्च प्रतिमा साक्षात् जायते पुरुषोत्तमः।
रत्नान्दोलिकया तां वै नयेत् स्नानस्य मण्डपम् ॥
नानातूर्य्यनिनादैश्च शङ्खध्वनिपुरःसरम्।
जयशब्दैस्तथा स्तोत्रैः पुण्यदृष्टिभिरेव च ॥
छत्रध्वजपताकाभिश्चामरव्यजनैस्तथा।
निरन्तरं दीपिकाभिस्तथा कुर्य्याच्छोभोत्सवम् ॥
आगच्छन्ति तदा देवाः पितामहपुरोगमाः।
द्रष्टुन्दधिगणैः सार्द्धं गोविन्दस्य महोत्सवम् ॥
भद्रासनेऽधिवास्यैनं पूजयेदुपचारकैः ॥
महास्नानस्य विधिना स्नपनं तस्य कारयेत्।
पञ्चाङ्गतैश्च सर्व्वैर्वै तेषामन्यतमेन वा।
स्नानान्ते गन्धतोयेन श्रीसूक्तेनाभिषेचयेत् ॥
संप्रोक्ष्य भूषयेद्देवं वस्त्रालङ्कारमाल्यकैः।
नीराजयित्वा संपूज्य प्रासादं परिवेष्टयेत् ॥
सप्तप्रदक्षिणं देवं दोलमण्डपमानयेत्।
सुसंस्कृतायां रथ्यायां पताकातोरणादिभिः ॥
अधोदेशे मण्डपं तं सप्तधा भ्रामयेत्ततः।
ऊर्द्ध्वदेशे पुनः सप्तस्तम्भवेद्यान्तु सप्त वै ॥
यात्रावसाने च पुनर्भ्रामयेदेकविंशतिम्।
इयं लीला भगवतः पितामहसुखेरिता ॥
राजर्षिशेन्द्रद्युम्नेन कारिता पूर्व्वमेव हि।
फलपुष्पावनम्रैश्च शाखाभिः परिकल्पिते ॥
वृन्दावनान्तरे रम्ये मत्तसारसवारिणि।
कोकिलारावमधुरे नानापक्षिगणाकुले ॥
नानोपग्रोभारचिते कालागुरुसुधूपिते।
प्रफुल्लकेतकीषण्डगन्धामोदि-दिगन्तरे ॥
मल्लिकाशोकपुन्नागचम्पकैरुपशोभिते।
तन्मध्याननान्तर्घटिते मण्डपे चारुतोरणे ॥
भूषिते माल्यवसनचामरैरुपशोभिते।
रत्नखट्वान्दोलिकायां तन्मध्ये वासयेत् प्रभुम् ॥
अनर्घ्यरत्नघटितकुरुलोद्भासितश्रुतिम्।
यथास्थानं यथाशोभं दिव्यालङ्काररञ्जनम् ॥
विकचाम्बुजमध्यस्थं विश्वधात्रा श्रिया युतम्।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ॥
सुप्रसन्नं सुनासाभ्रूपीनवक्षःस्थलोज्ज्वलम्।
पुरो योगस्थितैर्देवैर्ब्रह्मादैर्नतकन्धरैः ॥
कृताञ्जलिपुटैर्भक्त्या जयशब्दैरभिष्टुतम्।
गन्धर्व्वैरप्सरोभिश्च किन्नरैः सिद्धचारणैः ॥
हाहाहूहूप्रभृतिभिः सत्वरं दिव्यगायनैः।
अग्रपूर्व्विकया वृत्यगीतवादित्रकारिभिः ॥
नेत्राम्बुजसहस्रैश्च पूज्यमानं सुदान्वितैः।
विकिरद्भिः सर्व्वदिक्षु गन्धचन्दनजं रजः ॥
उपवेश्याथ गोविन्दं पूजयेदुपचारकैः।
वल्लवीवृन्दमध्यस्थं कदम्बतरुमूलगम् ॥
हावहास्यविलासैश्च क्रीड़मानं वनान्तरे।
गोपीभिश्चैव गोपालैर्लीलान्दोलिकया नगम् ॥
चिन्तयित्वा जगन्नाथं विकिरेन्नन्दचूर्णकैः।
सकर्पूरै रक्तपीतसुक्लैर्दिव्यैश्च सन्नतः ॥
दिव्यैर्वस्त्रैर्दिव्यमाल्यैर्दिव्यगन्धैः सुधूपकैः।
चामरान्दोलनैर्गानैः स्तुतिभिश्च समर्चितम् ॥
आन्दोलयेत् दोलिकास्थं सप्तवारान् मुनेः मुनेः।
तदा पश्यन्ति ये कृष्णं मुक्तिस्तेषां न संशयः ॥
ब्रह्महत्यादिपापानां पञ्चानां संक्षयो भवेत्।
त्रिवारं दोलयेद्देवं सर्व्वपापापनोदनम् ॥
भक्तानुग्रहकं पुंसां मुक्तिमुक्तिकारणम्।
लीलाविचेष्टितं यस्य कृत्रिमं सहजं यथा ॥
अंहःसंघक्षयकरं मूलाविद्यानिवर्त्तकम्।
पश्यन् द्वितीयं हरति गोहत्यादुपपातकम् ॥
त्रिरात्रोत्थपापानि तृतीयं नात्र संशयः।
दृष्ट्वा दोलास्थितं देवं सर्व्वपापैः प्रमुच्यते ॥
आध्यात्मिकैराधिदैवैराधिभूतैर्विमुच्यते।
इमां यात्रां कारयित्वा चक्रवर्त्ती भवेन्नृपः ॥
ब्राह्मणस्तु चतुर्व्वेदी ज्ञानवान् जायते ध्रुवम् ॥"

इति स्कान्दे उत्कलखण्डे ४२ अध्यायः ॥*॥

तस्य संक्षेपव्यवस्था यथा,—यदा अरुणोदयकाले पौर्णमासीलाभस्तत्रैव दोलयात्रा। उभयदिने अरुणोदयकाले पौर्णमासीलाभे पूर्व्वदिने। सङ्गवमध्याह्नकालव्यापित्वात् त्रिमुहूर्त्तव्यापित्वेन तिथेर्बलवत्त्वाच्च। यदा तिथित्रयवशादरुणोदयकाले न पौर्णमासीलाभस्तदा कदाचित् सहायभावेन चतुर्दश्यादयः। एतेन पूर्व्वदिने अरुणोदयं विना पूर्व्वाह्णे पौर्णमासीलाभः परदिने सुहूर्त्तान्यूनतिथिलाभस्तदा फल्गूत्सवः पूर्व्वदिने युग्मवचनानुरोधादिति शिरस्थम्। उभयदिने कर्म्मयोग्यप्रशस्तकालप्राप्तितिथिसन्देह एव युग्मवचनप्रवृत्तेः। एवं पञ्चमीपर्य्यन्तासु तिथिषु तत्करणे अन्यथैव दिशा व्यवस्थोन्नेयेति। इति दोलयात्रातत्त्वम् ॥*॥

चैत्रे मासि दोलस्य प्रमाणं गारुड़े।

"चैत्रे मासि सिते पक्षे दक्षिणाभिमुखं हरिम्।
दोलारूढं समभ्यर्च्च मासमान्दोलयेत् कली ॥"

तन्त्रिलता च पद्मपुराणे।

"ऊर्ज्जे रथं मधौ दोलां श्रावणे तनुं पर्व्व च।
चैत्रे मदनकारोपमकुर्व्वाणो व्रजत्यधः ॥

विष्णुं दोलास्थितं दृष्ट्वा त्रैलोक्यस्थोत्सवो भवेत्।
तस्मात् कार्य्यमृतं त्यक्त्वा दोलाहे उत्सवं कुरु ॥"

अथ दोलोत्सवविधिः।

"चैत्रस्य शुक्लद्वादश्यां प्रातःकृत्यं समाप्य च।
नित्यपूजां विधायाथ कुर्य्याद्दोलोत्सवं व्रती ॥
तदर्थञ्च विशेषेण नैवेद्यादिकमर्पयेत्।
संमान्य वैष्णवांस्तेभ्य गीतवृत्यादि कारयेत् ॥
महानीराजनं कृत्वा प्रक्षिपेदच्युतोपरि।
गन्धानुलेपचूर्णानि विचित्राणि विभागशः ॥
सन्तोष्य वैष्णवांस्तेभ्य गीतवृत्यादिभिः प्रभुम्।
नत्वाभ्यर्च्याप्रमत्तः सन् दोलामारोहयेच्छुभाम् ॥
नीत्वा बहिर्वेदिकायासुत्तुङ्गायां यथाविधि।
अभ्यर्च्यान्दोलयेत् कृष्णं सर्व्वलोकावलोकितम् ॥
एवमभ्यर्चयन् यामे यामे त्वान्दोलयन् प्रभुम्।
महोत्सवेन गमयेद्दिनं रात्रिञ्च यत्नतः ॥
एवं जागरणं कृत्वा वैष्णवैः सह वैष्णवः।
प्रणम्य प्रार्थ्य निर्म्मल्यं कृष्णं स्वालयमानयेत् ॥
चैत्रे मासि सिते पक्षे तृतीयायां रमापतिम्।
दोलारूढं समभ्यर्च्य मासमान्दोलयेत् कलौ ॥
यत् फाल्गुनस्य राकादावुत्तराफाल्गुनी यदा।
तदा दोलोत्सवः कार्य्यस्तत्र श्रीपुरुषोत्तमे ॥"

इति हरिभक्तिविलासः ॥

दोला, स्त्री, नीलिनी। दोल्यते अस्यामिति। दोलि+घञ्+टाप्। उद्यानादिषु क्रीड़ार्थं काष्ठादिमयो हिन्दोलकः। हैँदला इति भाषा। वाह्यखट्वा। डुली इति भाषा। तत्पर्य्यायः। प्रेङ्खा २। इत्यमरः। २। ८। ५३ ॥ दोली ३ खट्वाला ४ दोलिका ५। इति शब्दरत्नावली ॥ प्रेङ्खः ६। इति भरतधृतरत्नकोषः ॥ हिन्दोला ७। इति हारावली। २१४ ॥ (यथा, महाभारते। ३। ६२। २७।

"हृदयं तस्य दुःखितस्याभवत् तदा।
दोलेव सुहुरायाति याति चैव सभां प्रति ॥")

दोलाद्वाराभ्रमणगुणः। वातकोपनत्वम्। अङ्गस्थैर्य्यबलाधिकारित्वञ्च। इति राजवल्लभः ॥ अस्य विवरणं चतुर्दोलशब्दे द्रष्टव्यम् ॥

दोलायमानः, त्रि, (दोलां करोतीति। दोला+क्यङ्। ततः शानच्।) दोलनविशिष्टः। यथा,

"दोलायमानं गोविन्दं भक्त्यं मधुसूदनम्।
भक्त्यं वामनं दृष्ट्वा पुनर्जन्म न विद्यते ॥"

इत्युत्कलखण्डम् ॥

दोलिका, स्त्री, (दोला+स्वार्थे कन्। टापि अत इत्वम्।) हिन्दोला। इति हारावली। १८१ ॥

दोली, स्त्री, (दोल्यते अनयेति। दोलि+इन्। ङादिकारादिति वा ङीष्।) दोला। इति शब्दरत्नावली ॥ डुली इति भाषा ॥

दोषः, पुं, (दूष्यते इति। दुष वैकृत्ये+घञ्+भावे घञ्।) दूषणम्। यथा,—

"अदाता वंशदोषेण कर्म्मदोषाद्दरिद्रता।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता ॥"

इति चानक्यम्। ४८ ॥

(दुष्यत्यनेनेति करणे घञ्।) पापम्। इति मेदिनी। षे, ४ ॥ वातपित्तकफाः। इति शब्दचन्द्रिका ॥ (यथा,—

"नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः।
अयुक्तमपि दोषाणां लिङ्गैर्याधिमुपाचरेत् ॥"

इति सुश्रुते। १। ३५ अध्यायः ॥)

गोवत्सः। इति शब्दरत्नावली ॥ (दुष्यतेऽन्धकारेणेति। दुष्+घञ्। प्रदोषः। यथा, भागवते। ६। ८। १६।

"देवोऽपराह्णे मधुहोऽग्रतो वा
सायं त्रिधामावतु माधवो माम्।
दोषे हृषीकेश उताऽर्द्धरात्रे
निशीथ एकोऽवतु पद्मनाभः ॥")

काव्यगुणेतरः। स च रसाद्यपकर्षकः। यथा,

"सुखार्थहतिदोषो रसस्य सुखरूपताश्रयाद्वाच्यः।"

तत्र पददोषा यथा,—

"दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम्।
निहतार्थमनुचितार्थं निरर्थकमप्रयोजकं त्रिधाश्लीलम् ॥

सन्दिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम्।
अविमृष्टविधेयांशं विरुद्धमतिकृत् समासगतमेव ॥"

वाक्यदोषो यथा,—

"प्रतिकूलवर्णमुपहतरसप्रविसर्गं विसन्धि हतवृत्तम्।
न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम्॥
अर्द्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम्।
अपदस्थपदसमासं सङ्कीर्णगर्भितं प्रसिद्धिहतम् ॥
भग्नप्रक्रममसंगतपरार्थकं वाक्यमेवं तथा ॥"

अर्थदोषा यथा,—

"अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्करग्राम्याः।
सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च ॥
अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्तः।
साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः ॥
विध्यनुवादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः ॥"

रसदोषा यथा,—

"अभिचारिरसस्थायिभावानां शब्दवाच्यता।
कष्टकल्पनया व्यक्तिरनुभावविभावयोः ॥
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः।
अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः ॥
अङ्गिनोऽनुसन्धानं प्रकृतीनां विपर्य्ययः।
अनङ्गस्याभिधानञ्च रसे दोषाः सुरीढ़याः ॥"

उक्तपदादिदोषाः स्थानविशेषे क्वचित् गुणा भवन्ति। इति काव्यप्रकाशः ॥ * ॥ दोषविशेषा यथा, राजधर्म्मे।

"यतः प्रभवति क्रोधः कामो वा भरतर्षभ!।
श्लोकमोहौ विधित्सा च परासुत्वञ्च तद्वद ॥
लोभो मात्सर्य्यमीर्ष्या च कृत्सासूया कृपा भयम्॥"

आचमनं विना भक्षणे दोषाभावो यथा,—

"मधुपर्के च सोमे च ताम्बूलस्य च भक्षणे।
फलमूले चेक्षुदण्डे न दोषं प्राह वै मनुः ॥"

इति कूर्म्मपुराणम् ॥ * ॥

द्वाविंशद्भृत्यप्रकारा दोषा यथा,—

"यानेर्वा पादुकैर्वापि गमनं भगवद्गृहे।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः ॥
उच्छिष्टे चैव चाशौचे भगवद्वन्दनादिकम्।
एकहस्तप्रणामस्तु तथा चैकं प्रदक्षिणम् ॥
पादप्रसारणञ्चापि तथा पर्य्यङ्कबन्धनम्।
शयनं भक्षणञ्चापि मिथ्याभाषणमेव च ॥
उच्चैर्भाषो मिथोजल्पो रोदनादि च विग्रहः।
निग्रहानुग्रहौ चैव स्त्रीयूथक्रूरभाषणम् ॥
कश्मलावरणञ्चैव परनिन्दा परस्तुतिः।
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा ॥
अपराधास्तथा विष्णोर्द्वाविंशद्भृत्यपरिकीर्त्तिताः ॥"

इति पाद्मे पातालखण्डम् ॥ * ॥

(आततायिमारणे अधर्म्मादयो दोषो न भवति। यथा, मनुः। ८। ३५१।

"नातताय्यवधे दोषो हन्तुर्भवति कश्चन।
प्रकाशं वाप्रकाशं वा मन्युस्तन्मन्युमृच्छति ॥"

"न कश्चिदपि अधर्म्मादृष्टः प्रायश्चित्ताख्यो दोषो वा भवति।" इति तट्टीकायां कुल्लूकभट्टः ॥ अष्टवस्वनामन्यतमः स च वसुः। यथा, भागवते। ६। ६। १६।

"द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः॥")

दोषकः, पुं, (दोष एव। स्वार्थे कन्।) गोवत्सः। इति शब्दरत्नावली ॥

दोषग्राही, [न्] त्रि, (दोषं गृह्णातीति। ग्रह+णिनिः।) दोषग्रहणकर्त्ता। तत्पर्य्यायः। खलः २ पूरोभागी ३ द्विजिह्वः ४ मत्सरी ५। इति हलायुधः ॥

"विहाय सर्व्वदोषान् गुणान् गृह्णन्ति साधवः।
दोषग्राही गुणत्यागी चालनीव हि दुर्ज्जनः ॥"

इत्युद्भटः ॥

दोषज्ञः, त्रि, (दोषं जानातीति। दोष+ज्ञा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) पण्डितः। इत्यमरः। २। ७। ५ ॥ (यथा, रघुः। १। ८३।

"अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम्।
सूनुः सूनृतवाक् सूतः विससर्जोदितश्रियम् ॥"

दोषान् वातपित्तकफान् जानातीति। कः।) चिकित्सकः। इति हेमचन्द्रः। ३। ५ ॥ दोषविषयकज्ञानयुक्तश्च ॥

दोषत्रयं, क्ली, (दोषाणां वातपित्तकफानां त्रयम्।) वातपित्तकफाः। इति राजनिर्घण्टः ॥ (दोषाणां त्रयम्। यथाह व्यासः।

"रूपं रूपविवर्ज्जितस्य भवतो ध्यानेन यद्वर्णितं
स्तुत्या निर्व्वचनीयताखिलगुरोर्दूरीकृतं यन्मया।
व्यापित्वञ्च विनाशितं भगवतो यत्तीर्थयात्रादिना
क्षन्तव्यं जगदीश! तत् विकलतादोषत्रयं मामकम् ॥")

दोषा, स्त्री, (दुष्यतेऽन्धकारेणेति। दुष् + घञ् + टाप्।) रात्रिः। (यथा, आर्य्यासप्तशत्याम्। २६८।
"दोषदग्धा कुलयुवतिर्वैदग्ध्येनैव मलिनतामेति।
दोषा अपि भूषाये गणिकायाः ग्रन्थिकलायाश्च॥"
दान्यत्रनेनेति। दम् + "दमेर्डोसिः।" उणां। २। ६८। इति डोसिः। भागुरिमते टाप्।) भुजः। इति मेदिनी। षे, १५॥

दोषा, व्य, (दुष्यत्यत्रेति। दुष् + "आः समिण्-निकषिभ्यः।" उणां। ४। १७४। इत्यत्र। "बाहुलकात् दिविदुषिभ्यश्च।" इत्युज्ज्वलदत्तोक्तेः आः।) "खरादिनिपातमव्ययम्।" १। १। ३७। इति खरादिपाठात् अव्ययत्वम्।) नक्तम्। रजन्याम् इत्यर्थः। इत्यमरः। ३।४।३॥ (यथा, माघे। ४। ४६।
"दोषापि नूनमहिमांशुरसौ किलेति
व्याकोशकोकनदतां दधते मलिम्लः॥")
निशासुखम्। इति हेमचन्द्रः॥

दोषाकरः, पुं, (दोषा रात्रौ करो यस्य। यद्वा, दोषां करोतीति। दोषा + कृ + बाहुलकात् टः।) चन्द्रः। यथा, ज्योतिषतत्त्वे।
"मूलत्रिकोणनिजमन्दिरगोऽथ पूर्णो
मित्रर्क्षसौम्यगृहगोऽथ तदीक्षितो वा।
यामित्रवेधविहितानपहृत्य दोषान्
दोषाकरः सुखमनेकविधं विधत्ते॥"
(यथा च, प्रद्युम्नविजये। ६। ३।
"दोषाकराङ्कमलिनान्तरक्षिता ते
पक्षप्रसूनशरता च मनोभवस्य।
प्राणात्मनस्य जगताञ्च समीरणस्य
मन्येऽद्य पुण्यजनतेव निशाचराणाम्॥")
दोषाणामाकरश्च॥

दोषालेखी, स्त्री, (दोषां सुखं लिखातीति। लिख् + ण्वुल्। गौरादित्वात् ङीष्।) वनवर्त्तिका। इति राजनिर्घण्टः॥

दोषातनः, त्रि, (दोषा रात्रौ भवः इति। दोषा + "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट्च च।" ४। ३। २३। इति ट्युः तुट् च।) रात्रिभवः। इति व्याकरणम्॥

दोषातिलकः, पुं, (दोषाया रजन्यास्तिलक इव।) प्रदीपः। इति त्रिकाण्डशेषः॥

दोषास्यः, पुं, (दोषा रात्रिरास्यमिव यस्य। दोषातिलकत्वादस्य तथात्वम्।) प्रदीपः। इति शब्दचन्द्रिका॥

दोषिकः, पुं, (दोषाः वातपित्तकफाः कारणत्वेन सन्त्यस्येति। ठन्।) रोगः। इति शब्दचन्द्रिका॥

दोषी, [न्] त्रि, (दुष्यतीति। दुष् + "संपृचानुरुधाङ्याङासपरिस्कसंस्कृजेति।" ३। २। १४२। इति घिनुण्।) दोषयुक्तः। अपराधी। दोषशब्दादस्त्यर्थे इनिप्रत्ययेन निष्पन्नः इति वा॥

दोषैकदृक्, [श्] त्रि, (दोषे एवैकस्मिन् न तु गुणसंघे दृक् ज्ञानमस्येति। यद्वा, दोषमेव एकं केवलं पश्यतीति। दृश् + क्विप्।) दोषमात्रदर्शी। यो गुणं त्यक्त्वा केवलं दोषमेव पश्यति सः। दोषे एकस्मिन्नेव ज्ञानं यस्य सः। इति भरतः॥ तत्पर्य्यायः। पुरोभागी २। इत्यमरः। ३। १। ४६॥

दोष्यः, पुं, (दोषि हस्ते लक्षणया दोर्व्यापारे वा तिष्ठतीति। स्था + कः।) क्रीड़ा। क्रीड़कः। सेवा। सेवकः। इति त्रिकाण्डशेषः॥ दोःस्थिते, त्रि॥

दोह्यः, पुं, (दोग्धि अस्मिन्निति। दुह + आधारे घञ्।) दोहनपात्रम्। इति शब्दचन्द्रिका॥ (यथा, भागवते। ४। १८। २७।
"एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः।
दोहवत्सादिभेदेन चीरभेदं कुरूद्वह!॥"
दुह्यते इति। दुह + कर्म्मणि घञ्।) दुग्धम्। ("दुह्यते इति दोहः क्षीरं स्त्री गोदोहस्य विकारः हेयङ्गवीनम्।" इति सिद्धान्तकौमुदी॥ दुह् + भावे घञ्।) दोहनम्॥ (यथा, रघुः। २। २३।
"दोहावसाने पुनरेव दोग्धीं
भेजे भुजोच्छिन्नरिपुर्निषण्णाम्॥")

दोहदं, क्ली, (दोहात् दोहनाज्जायते इति। दोह + जन् + डः।) दुग्धम्। इति शब्दार्थकल्पतरुः॥

दोहड़िका, स्त्री, छन्दोविशेषः। इति छन्दोमञ्जरी॥ दोहा इति भाषा। अस्य विवरणं छन्दःशब्दे द्रष्टव्यम्॥

दोहदं, क्ली, (दोहमाकर्षणं ददातीति। दोह + दा + "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) इच्छा। इत्यमरः। १। ७। २७॥

दोहदः, पुं, क्ली, (दोहमाकर्षणं ददातीति। दा + कः।) गर्भिण्यभिलाषः। साद इति भाषा। तत्पर्य्यायः। दौर्हृदम् २ अद्भा ३ लालसा ४। इति हेमचन्द्रः। ३। २०५॥ जातुजः ५। इति रत्नकोषः॥ (यथा, याज्ञवल्क्यसंहितायाम्। ३। ७६।
"दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात्।
वैरूप्यं मरणं वापि तस्मात् कार्य्यं प्रियं स्त्रियाः॥")
गर्भचिह्नम्। इति भरतधृतकोषान्तरम्॥ (पुष्पोद्गमकौषधम्। यथा, रघौ। ८। ६२।
"कुसुमं कृतदोहदस्त्रया
यदशोकोऽयमुदीरयिष्यति।
अलकाभरणं कथं नु तत्
तव नेष्यामि निवापमाल्यताम्॥"
यथा च, मेघदूते। ७८।
"रक्ताशोकश्चलकिसलयः केसरश्च कान्त,
प्रत्यासन्नः कुरुवकवृतेर्मालतीमालभस्य।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः॥"
अत्र यस्य यो दोहदः स तृतो मल्लिनाथेन यथा,—
"स्त्रीणां स्पर्शात् प्रियङ्गुर्विकसति वकुलः सीधुगण्डूषसेकात्

पादाघातादशोकस्तिलककुरुवकौ वीक्षणालिङ्गनाभ्याम्।
मन्दारो नर्म्मवाक्यात् पटुरुदितसनात् चम्पको वक्त्रवातात्
चूतो गीतान्मेरविंकसति च पुरो नर्त्तनात् कर्णिकारः॥")

दोहदलक्षणं, क्ली, (दोहदस्य गर्भस्य लक्षणं यत्र।) व्यधिकरणसन्धिः। गर्भः। इति मेदिनी। णे, ११७॥

दोहदवती, स्त्री, (दोहदो गर्भिण्यभिलाषोऽस्यस्या इति। दोहद + मतुप् मस्य वः। ङीप् च।) अन्नपानादिद्रव्यविशेषाभिलाषवती गर्भवती। इति भरतः॥ तत्पर्य्यायः। अद्भालुः २। इत्यमरः। २। ६। २१॥*॥ गर्भिणीकर्त्तव्याकर्त्तव्यं यथा,—
"दित्सा गर्भमथाधत्त कश्यपः प्राह तां पुनः।
त्वया यत्नो विधातव्यः अस्मिन् गर्भे वरानने!॥
संवत्सरव्रतन्त्वेकमस्मिन्नेव तपोवने।
सन्ध्यायां नैव भोक्तव्यं गर्भिण्या वरवर्णिनि!॥
न स्नातव्यं न गन्तव्यं वृक्षमूलेषु सर्व्वदा।
नोपस्करेषूपविशेन्मुषलोलूखलादिषु॥
जलञ्च नावगाहेत शून्यागारञ्च वर्জ্জयेत्।
वल्मीकेषु न तिष्ठेत न चोद्विग्नमना भवेत्॥
विलिखेन्न खनेद्भूमिं नाङ्गारेण न भस्मना।
न शून्यालः सदा तिष्ठेद्द्वारायाञ्च विवर्জ্জयेत्॥
न तुषाङ्गारभस्मास्थिकपालेषु समाविशेत्।
वर्জ্জयेत् कलहं लोकं गात्रभङ्गञ्च वर्জ্জयेत्॥
न सुक्तकेशा तिष्ठेत नाशुचिः स्यात् कदाचन।
न शून्योत्तरशीरा न चापरशिराः क्वचित्॥
न वस्त्रहीना नोद्विग्ना न चार्द्रचरणा सती।
नामाङ्गल्यां वदेद्वाचं न च हास्याधिका भवेत्॥
कुर्य्याच्च गुरुशुश्रूषां नित्यमङ्गलतत्परा।
सर्व्वौषधीभिः कोष्णेन वारिणा स्नानमाचरेत्॥
कृतरक्षा सुभूषा च वास्तुपूजनतत्परा।
तिष्ठेत् प्रसन्नवदना भर्त्तुः प्रियहिते रता॥
दानशीला तृतीयायां पार्व्वत्या नक्तमाचरेत्।
इतिकृत्या भवेन्नारी विशेषेण तु गर्भिणी॥
यस्तु तस्या भवेत् पुत्रः शतायुर्बुद्धिसंयुतः।
अन्यथा गर्भपतनमवाप्नोति न संशयः॥
तस्मात्त्वमनया कृत्या गर्भेऽस्मिन् यत्नमाचर।"
इति मत्स्यपुराणम्॥

दोहदान्विता, स्त्री, (दोहदेन गर्भजनिताभिलाषेण अन्विता।) दोहदवती। इति हेमचन्द्रः। ३। २०३॥

दोहनं, क्ली, (दुह + भावे ल्युट्।) स्तनादुग्धनिःसारणम्। दोया इति भाषा। दुहधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम्॥ (दुह्यतेऽस्मिन्निति। दुह + आधारे ल्युट्। दोहनपात्रम्। यथा, महाभारते। १३। ६४। ४१।
"बालत्वेन निदानेन कांस्यं भवतु दोहनम्।
दुह्यते परवत्सत्वेन यस्मै हरति पुष्करम्॥")

दोहनी, स्त्री, (दुह्यतेऽस्यामिति। दुह + आधारे ल्युट्। ङीप्।) दोहनपात्रम्। तत्पर्य्यायः।

लेपनम् २ पारी ३ दोहः ४ दोहनम् ५ । इति शब्दरत्नावली ।

दोहलः, पुं, (दोहमाकर्षं लातीति । ला + "आतो ऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) दोहदः । इच्छा । इति शब्दार्थकल्पतरुः ॥ (यथा, मालविकाग्निमित्रनाटके । ८ । ४७ ।

"अशोक ! यदि सत्य एव सुकुसुमैर्न सम्पत्स्यते सुधा वहसि दोहलं ललितकामिसाधारणम् ॥")

दोहलवती, स्त्री, (दोहलोऽस्यस्या इति मतुप् । मस्य वः । ङीप् ।) दोहदवती । इति शब्दार्थकल्पतरुः ॥

दोहली, स्त्री, (दोहं लातीति । ला + कः । गौरादित्वात् ङीष् ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (अशोकशब्देऽस्या विवरणं द्रष्टव्यम् ॥)

दोहापनयः, पुं, (दोहं दोहनमपनयति खनिः-सरत्वेनेति । अप + नी + अच् ।) दुग्धम् । इति त्रिकाण्डशेषः ॥

दोहीयान्, [स्] त्रि, (अयमनयोरतिशयेन दोग्धा । "तुरिष्ठेमेयःसु ।" ६ । ४ । १५ । इति ईयसुन् । "तुरिष्ठेमेयःसु ।" ६ । ४ । १५४ । इति ऌशब्दस्य लोपः ।) अतिशयदोहकः ॥

दोह्यं, त्रि, (दुह्यते इति । दुह् + ण्यत् ।) दोहनीयम् । दुह्यम् । दोग्धव्यम् । इति व्याकरणम् । (दुह्यतेऽस्या इति । गोमहिष्यादि । इति मिताक्षरा ॥ यथा, याज्ञवल्क्यः । २ । १८० ।

"दशैकपञ्चसप्ताहमासचाद्धार्द्धमासिकम् ।
बीजायोद्वाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् ॥")

दौःसाधिकः, पुं, (दुर्दुष्टः साधः कर्म्म तत्र नियुक्तः । ठक् ।) द्वाःस्थितः । द्वारपालः । इति त्रिकाण्डशेषः ॥

दौकूलं, त्रि, (दुकूलेन परिवृतो रथ इति । "परिवृतो रथः ।" ४ । २ । १० । इति अण् ।) दुकूलेनावृतरथादि । इत्यमरटीकायां भरतः ॥

दौत्यं, क्ली, (दूतस्य भावः कर्म्म वा । ष्यञ् ।) दूतत्वम् । दूतस्य भावः । दूतस्य कर्म्म । इत्यमरटीकायां भरतः ॥ (यथा, हरिवंशे । १७२ । १८ ।

"दौत्यञ्च तत् कृतं घोरे विग्रहे जनमेजय ! ॥")

दौरात्म्यं, क्ली, दुर्निन्दित आत्मा यस्य इतिः बुद्धिः स्वभावः शरीरं वा यस्य स दुरात्मा । तस्य भावकर्म्मार्थे ष्यञ्प्रत्ययः । (ष्यञ् ।) दुरात्मनो भावः । दुरात्मनः कर्म्म । (यथा, महाभारते । २ । १५ । ७ ।

"शङ्किताः स्म महाभाग ! दौरात्म्यात् तस्य चानघ ॥")

दौर्गन्ध्यं, क्ली, (दुर्दुष्टो गन्धोऽस्य दुर्गन्धः । ततो भावे ष्यञ् ।) दुर्गन्धता । (यथा, महाभारते । ३ । २६० । १३ ।

" न संक्लेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव वा ॥")

तन्नामकर्त्तेषं यथा,—

"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीफलोशीरपूगानां खदिरस्य फलानि च ॥
अगुरुश्चीरकाश्मर्य्यः कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च चोलं मदनकं नखम् ॥
सरलः सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्पूरकः पद्मकश्च एतैस्तैलं प्रसाधितम् ॥
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम् ॥"

इति गारुडे १९८ अध्यायः ॥

दौर्ग्यं, क्ली, दुर्गवृत्तिधर्म्मः । दुर्गसम्बन्धि । दुर्गस्य भावः दुर्गस्येदं वेत्यर्थे ष्यञ्प्रत्ययः (ष्यञ्) ॥

दौर्ब्बल्यं, क्ली, दुर्ब्बलस्य भाव इदं वेत्यर्थे ष्यञ्प्रत्ययः (ष्यञ् ।) दुर्ब्बलता । अल्पबलत्वम् । (यथा, मनुः । ८ । १७१ ।

"अनादेयस्य चादानादेयस्य च विवर्ज्जनात् ।
दौर्ब्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति ॥")

दौर्भागिनेयः, पुं, (दुर्भगाया अपत्यं पुमान् । दुर्भगा + "कल्याणयादीनामिनङ् च ।" ४ । १ । १२६ । इति ढक् इनङादेशश्च ।) दुर्भगापुत्रः । इति शब्दरत्नावली ॥ दुर्भगायाः कन्या दौर्भागिनेयी ॥

दौर्भाग्यं, क्ली, दुर्भगस्य दुर्भगाया वा भावः । (ष्यञ् । "दुर्भगसिंहयन्मूर्खपरमस्य च ।" ७ । ३ । १६ । इत्युभयपदवृद्धिः ।) दुर्भगत्वम् । यथा, ज्योतिस्तत्त्वे ।

"शुक्रो पितृपदे नारी शुक्रे स्वामियुते यदि ।
दौर्भाग्यं जायते तस्याः प्रपश्यन्ति कुलदेवताः ॥"

दुर्भाग्यमेव दौर्भाग्यम् । इति स्वार्थे ष्यञ्प्रत्ययः ॥

दौर्मनस्यं, क्ली, दुर्मनसो भावः (ष्यञ्) । दुःखनिबन्धनचित्तावसादः । इति चक्रपाणिटीकायां नागोजीभट्टः ॥ (यथा, मार्कण्डेये । ८१ । २६ ।

"तेषां श्रुते मे निःश्वासा दौर्मनस्यञ्च जायते ॥")

दौर्व्वीर्यं, क्ली, (दुर्व्वीरस्य इदम् । दुर्व्वीर + ष्यञ् ।) दुष्टपराक्रमः । दुर्व्वीरस्य । इति मेदिनी । यै, ५३ ॥

दौर्हृदं, क्ली, (दुर्हृदो भावः । युवादित्वात् अण् । बाहुलकात् न द्विपदवृद्धिः ।) इच्छा । दोहदम् । इति हेमचन्द्रः । ३ । २०५ ॥("लब्धदौर्हृदा हि वीर्य्यवन्तं चिरायुषञ्च पुत्रं जनयति ।" इति सुश्रुते ॥ दूषितहृदयत्वम् । यथा, महाभारते । ५ । २६ । १४ ।

"दुर्भाविनो मनुष्यस्य
कामात्मनो दौर्हृदे भाविनस्य ॥")

दौहेयः, पुं, (दुहेरपत्यमिति । "इतश्चानिञः ।" ४ । १ । १२२ । इति ढक् ।) कच्छपः । इति हेमचन्द्रः । ४ । ४१५ ॥

दौल्मिः, पुं, (दुल्मस्यापत्यम् । दुल्म + इञ् ।) इन्द्रः । इति शब्दार्थकल्पतरुः ॥

दौवारिकः, पुं. (द्वारि नियुक्तः । "तत्र नियुक्तः ।" ४ । ४ । ६८ । इति ठक् । ततः "द्वारादीनाञ्च ।" ७ । ३ । ४ । इति न द्वृद्धिः औ-आगमश्च ।) द्वाररक्षकः । (यथा, राजतरङ्गिण्याम् । ५ । १८ ।

"राजदौवारिकः श्रीमाञ्छूरस्यासीन्महोदयः ॥")

तत्पर्य्यायः । द्वाःस्थः २ चेत्ता ३ दण्डी ४ वेत्रधरः ५ । इति हलायुधः ॥ प्रतीहारः ६ प्रतिहारः ७ दर्शकः ८ द्वारी ९ वेताल: १० द्वारपालकः ११ दौःसाधिकः १२ वर्षरूढः १३ गर्व्वाटः १४ दण्डपाशुलः १५ । इति शब्दरत्नावली ॥ द्वाःस्थितः १६ वेत्रधारकः १७ वर्षरूढकः १८ दण्डवासी १९ । इति त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा,—

"प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः ।
चित्तज्ञश्च सर्व्वेषां प्रतीहारो विधीयते ॥"

इति मत्स्यपुराणम् ॥

"इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी सदा दक्षः प्रतीहारः स उच्यते ॥"

इति गारुडम् । १०८ ॥

दौष्कुलेयः, त्रि, (दुष्कुलस्यापत्यम् । "दुष्कुलात् ढक् ।" ४ । १ । १४२ । इति ढक् ।) दुष्कुलोद्भवः । निन्दितवंशजातः । दुष्कुलशब्दात् भवार्थे वा ढ्यप्रत्ययः ॥ (यथा, महाभारते । ३ । १६३ । २३ ।

"कुले जातास्च क्लिश्यन्ते दौष्कुलेयवशानुगाः ॥")

दौष्मन्तिः, पुं, (दुष्मन्तस्यापत्यं पुमान् । दुष्मन्त + "अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) दुष्मन्तराजपुत्रः । स तु भरतराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । ७४ । २ ।

"रूपौदार्य्यगुणोपेतं दौष्मन्तिं जनमेजय ! ॥")

दौहित्रः, पुं, स्त्री, (दुहितृ + "अवृद्धाभ्यन्तर्य्ये विदादिभ्योऽञ् ।" ४ । १ । १०४ । इति अञ् ।) दुहितुरपत्यम् । इति हेमचन्द्रः । ३ । २०८ ॥ तत्पर्य्यायः । कुतपः २ । इति शब्दरत्नावली ॥

"श्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ।
दौहित्रं खड्गमित्याहुरपत्यं दुहितुस्तिलाः ॥
कपिलाया इतश्चैव दौहित्रमिति घोष्यते ॥"

इति मार्कण्डेयपुराणम् ॥

"पौत्रदौहित्रयोर्लोके विशेषो नास्ति कश्चन ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"

इति दायभागः ॥

दौहित्रोऽपि स्वतुल्यैनं सन्तारयति पौत्रवदिति मनुः ॥ तदुत्पत्तौ कन्यायां पितुर्भोजने दोषाभावो यथा,—

"कन्यायां ब्रह्मदेयायामशुद्धः शुद्धमश्नुते ।
अथ शुद्धति यो मोहात् शुद्धा स नरकं व्रजेत् ॥
अप्रजायाञ्च कन्यायां न शुद्धीयात् कदाचन ।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि ॥
महाशस्त्रसमाकीर्णात् नास्ति ते नरकाद्भयम् ।
तीर्त्वेमं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि ।
दौहित्रस्य तु दानेन तृप्यन्ति पितरः सदा ॥
यत्किञ्चित् कुरुते दानं तदानन्त्याय कल्पते ॥
मातुः पितुश्च विज्ञेयं तच्छ्रुत्वाभिगमिष्यसि ।
मातुः पितुर्हिरण्यस्य दौहित्रोऽर्हमवाप्नुते ॥"

इत्याद्ये वह्निपुराणे कन्यादानमाहात्म्यं नाम ॥

शूद्रमात्रस्य दौहित्रो दत्तको भवति । यथा,—
"दौहित्रो भागिनेयश्च शूद्रेषु क्रियते सुतः ।
ब्राह्मणादित्रये नास्ति भागिनेयसुतः क्वचित् ॥"
इति दत्तकमीमांसाधृतशौनकवचनम् ॥
तस्य मातामहधनाधिकारित्वम् । यथा,—
"दुहितृभावे दौहित्रः ।
'पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥'
इति मनुवचने पौत्रतुल्यत्वाभिधानेन यथा पुत्राभावे पौत्रस्तथा दुहितृभावे दौहित्रः ।
अतएव गोविन्दराजधृतो विष्णुः ।
अपुत्रपौत्रे संसारे दौहित्रा धनमाप्नुयुः ।
पूर्व्वेषां हि स्वधाकारे पौत्रदौहित्रकाः समाः ॥"
इति दायतत्त्वम् ॥
अपि च, सर्व्वदुहितृभावे दौहित्रस्य अधिकारः ।
दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् ।
स एव दद्यात् द्वौ पिण्डौ पित्रे मातामहाय च ॥
इत्यादिवचनात् । अपुत्रस्य इति दुहितृपर्य्यन्ताभावोपलक्षणम् ॥ १ ॥ भ्रातृपौत्रस्याभावे पितुर्दौहित्रस्याधिकारः । धनिपित्रादित्रयपिण्डदातृत्वात् ॥२॥ पितुर्दौहित्राभावे भ्रातृदौहित्रोऽधिकारी । धनिभोग्यपितृपितामहपिण्डदातृत्वात् ॥३॥ पितृत्रयपौत्राभावे पितामहदौहित्रस्य अधिकारः धनिभोग्यपितामहप्रपितामहपिण्डदातृत्वात् ॥४॥ पितामहदौहित्रस्याभावे पितृत्रयदौहित्रस्याधिकारः । धनिभोग्यतत्पितामहप्रपितामहपिण्डत्रयदातृत्वात् ॥ ५ ॥ तदभावे पितामहभ्राता तदभावे पितामहभ्रातृपुत्रः तदभावे पितामहभ्रातृपौत्रः । तेषां धनिभोग्यतत्प्रपितामहपिण्डदातृत्वात् । ततः प्रपितामहदौहित्रोऽधिकारी । धनिभोग्यप्रपितामहपिण्डदातृत्वात् ॥६॥ प्रपितामहदौहित्राभावे पितामहभ्रातृदौहित्रोऽधिकारी । धनिभोग्यप्रपितामहपिण्डदातृत्वात् ॥७॥ पितामहभ्रातृदौहित्राभावे मातामहः । तदभावे मातुलः । तदभावे मातुलपुत्रः । तदभावे मातुलपौत्रः । तदभावे मातामहदौहित्रोऽधिकारी ॥ ८ ॥ मातामहदौहित्राभावे प्रमातामहः । तदभावे प्रमातामहपुत्रः । तदभावे प्रमातामहपौत्रः । तदभावे प्रमातामहप्रपौत्रः । तदभावे प्रमातामहदौहित्रोऽधिकारी ॥ ९ ॥ प्रमातामहदौहित्राभावे वृद्धप्रमातामहोऽधिकारी । तदभावे वृद्धप्रमातामहपुत्रः । तदभावे वृद्धप्रमातामहपौत्रः । तदभावे वृद्धप्रमातामहप्रपौत्रः । तदभावे वृद्धप्रमातामहदौहित्रोऽधिकारी ॥१०॥ स्त्रीधने तु पुत्राभावे दौहित्रोऽधिकारी । पुत्राधिकारात् प्राक् दाहत्रयोक्तेः । तद्बाधकाया दाहतः पुत्रश्राद्धाप्युत्तरश्राद्धेऽप्यन्वयात् ॥११॥
इति श्रीकृष्णतर्कालङ्कारकृतदायक्रमसंग्रहः ॥
ब्राह्मणप्राशस्त्यम् । यथा,—
"व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् ।
कुतपेष्वासने दद्यात्तिलैश्च विकिरेन्महीम् ॥"
इति मानवे । ३ । २३४ ॥

द्यावाक्षमे, स्त्री, (द्यौश्च क्षमा च । "दिवो द्यावा।" ६ । ३ । २६ । इति द्यावादेशः ।) स्वर्गपृथिव्यौ । इति हेमचन्द्रः । ३ । ४ ॥ द्विवचनान्तोऽयम् ॥

द्यावापृथिव्यौ, स्त्री, (द्यौश्च पृथिवी च । "दिवश्च पृथिव्याम् ।" ६ । ३ । ३० । इति पात् दिवो द्यावा ।) स्वर्गपृथीव्यौ । इति हेमचन्द्रः । ३ । ४ ॥ (यथा, मनुः । ३ । ८६ ।
"कूपे चैवानुमत्यै च प्रजापतय एव च ।
सह द्यावापृथिवीभ्यां तथा स्विष्टकृतेऽन्ततः ॥")
तद्वैदिकपर्य्यायः । खधे १ पुरन्ध्री २ धिषणे ३ रोदसी ४ व्योमी ५ अम्बसी ६ नभसी ७ रजसी ८ सदसी ९ सद्मनी १० घृतवती ११ बहुले १२ गभीरे १३ गम्भीरे १४ व्योमन्यौ १५ चम्वौ १६ पार्श्वी १७ मही १८ ऊर्व्वी १९ पृथ्वी २० अदिती २१ अद्री २२ दूरे २३ अन्ते २४ अजारे २५ अरे २६ पारे २७ । इति सप्तविंशतिर्द्यावापृथिव्योर्नामधेयानि । इति वैद्यनिघण्टौ ३य्यः ॥

द्यावाभूमी, स्त्री, (द्यौश्च भूमिश्च । "दिवो द्यावा।" ६ । ३ । २६ । इति द्यावादेशः ।) स्वर्गपृथिव्यौ । इति हेमचन्द्रः । ३ । ४ ॥ (यथा, ऋग्वेदे । ३ । ५५ । १ ।
"को वस्त्राता वसवः को वरूता
द्यावाभूमी अदिते त्रासीथां नः ॥")

द्यु, ल अभिसर्पणे । इति कविकल्पद्रुमः ॥ (अदां-परं-सकं-अनिट् ।) अभिसर्पणं आभिमुख्येन गमनम् । ल, द्यौति सिंहो मृगानिव । इति दुर्गादासः ॥

द्युः, स्त्री, (द्यौतीति । द्यु+क्विप् ।) दिनम् । गगनम् । स्वर्गः । इति विश्वः ॥ [ये, २ ॥

द्युः, पुं, (द्यु+क्विप् ।) अग्निः । इति मेदिनी ।

द्युगः, पुं, (द्युनि गगने गच्छतीति । गम+डः ।) पक्षी । इति राजनिर्घण्टः ॥

द्युगयः पुं, (द्यूनां दिनानां गयः ।) अहर्गणः । तल्लक्षणयनमाह ।
"कथितकल्पगतोऽर्कसमा गया
रविगुणो गतमासयुतान्वितः ।
खदहनैर्गुणितस्त्रिहतः पृथग्
गतयुतोऽधिकमासयुताहतात् ॥
रविदिनाप्तगताधिकमासकैः
क्षतदिनैः सहितो द्युगणो विधोः ।
पृथगतः पतितावमसंगुणा-
द्विधुदिनाप्तगतावमनन्वितः ॥
भवति भास्करवासरपूर्व्वको
दिनगणो रविमध्यमसाधनः ।
अधिकमासदिनक्षयशेषतो
द्युघटकादिकमत्र न यत्नते ॥"
इति सिद्धान्तशिरोमणिः ॥

द्युत्, ल ड दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ल, अद्युतत् । ड, द्योतते दिद्युते । इति दुर्गादासः ॥

द्युतः, पुं, (द्युत् दीप्तौ+क्विप् ।) किरणः । इति हेमचन्द्रः । २ । ९४ ॥ (द्योतमाने, त्रि । यथा, ऋग्वेदे । १० । ६६ । २ ।
"स हि द्युता विद्युता वेति साम ॥"
द्यु ल अभिसर्पणे + क्विप् तुगागमश्च । अभिगामिनि । यथा, भट्टिः । ५ । ४७ ।
"हरामि रामसौमित्री मृगो भूत्वा मृगद्युतौ ॥")

द्युतिः, स्त्री, (द्योतते ऽनयेति । द्युत् दीप्तौ+"इगुपधात् कित् ।" उणा ४ । ११६ । इति इन् स च कित् ।) दीप्तिः । शोभा । इत्यमरः । १ । ३ । १७ ॥ (यथा, भागवते । ८ । ५ । ३२ ।
"श्लोभोऽधरात् प्रीतिरुपर्य्यभूद्द्युतिर्-
नस्तः पयश्चः स्पर्शेन कामः ॥")
रश्मिः । इति मेदिनी । ते, २५ ॥ (पुं, चतुर्थस्य मनोः ऋषिविशेषः । यथा, हरिवंशे । ७ । ७५ ।
"चतुर्थस्य तु सावर्णेर्ऋषीन् सप्त निबोध मे ।
द्युतिर्वपुष्मान्पुत्रश्च आत्रेयः सुतपास्तथा ॥"
तामसस्य मनोः पुत्रविशेषः । यथा, तत्रैव । ७ । २३ ।
"पुत्रांश्चैव प्रवक्ष्यामि तामसस्य मनोर्नृपः ।
द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोधनः ॥")

द्युतिकरः, पुं, (करोतीति । कृ+अच् । द्युतेः करः ।) ध्रुवः । इति भूरिप्रयोगः । दीर्घिकारके, त्रि ॥

द्युतितं, त्रि, (द्युत+क्तः । बाहुलकात् न गुणः ।) दीप्तिविशिष्टम् । द्योतितम् । इति मुग्धबोधव्याकरणम् ॥

द्युनं, क्ली, (द्यवते सप्तमराशिः । इति ज्योतिषतत्त्वम् ॥

द्युनिशं, क्ली, (द्यु च निशा च द्वयोः समाहारः ।) अहोरात्रः । इति व्याकरणम् ॥ यथा,—
"भवति किं द्युनिशं द्युनिवासिनाम् ।"
इति सिद्धान्तशिरोमणिः ॥

द्युनिवासी, [न्] पुं, (द्युनि स्वर्गे निवसतीति । नि+वस+णिनिः ।) देवता । स्वर्गवासी । इति सिद्धान्तशिरोमणिः ॥

द्युपतिः, पुं, (द्यूनां दिनस्य पतिः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ११ ॥ (द्युनो स्वर्गस्य पतिः ।) इन्द्रः ॥

द्युमणिः, पुं, (द्युनो गगनस्य मणिरिव ।) सूर्य्यः । (यथा, भागवते । ८ । १० । ३८ ।
"रेणुर्दिग्रः खं द्युमणिश्च छादयन्
व्यदृश्यतात्यक्कसुतिभिः परिश्रुतात् ॥")
अर्कवृक्षः । इत्यमरः ॥ (परिश्रोधितसताम्रम् । यथा,—
"विषमहौषधभागमधिकोषणा
द्युमणिरक्तलमार्हकभार्हतम् ॥"
द्युमणिः मारितं ताम्रम् ॥" इति भावप्रकाशस्य मध्यखण्डे १ भाग वातव्याधिकार ॥)

द्युमयी, स्त्री, विश्वकर्म्मकन्या । सा सूर्य्यपत्नी । इति विष्वक्सेनेयः ॥

द्यूतं, क्ली, (द्यूयते अभ्यस्यते इति। क्यु+क:।) "धनमिच्छेत् हुताशनात्।" इति वचनात् धनकामानां अग्न्याराधनादस्य तथात्वम्।) धनम्। इत्यमरः। २। ६। ६०॥ (यथा, ऋग्वेदे। २। २। १०।

"अक्षाकं द्यूतमधि पश्च कृष्टिभ्या खर्गं मुमुचीत दुष्टरम्॥"

द्युं तेजो मनतीति।) बलम्। इति मेदिनी। मे, ११॥ (बलाधायकत्वात् अन्नम्। यथा, ऋग्वेदे। ६। ८। ८।

"वृष्टिं दिवः परि स्रव द्यूतं पृथिव्या अधि॥")

द्यूता, [न्] पुं, (द्यौतीति। द्यु+"कनिन् युवृषीति।" उणां १। १५६। इति कनिन्।) सूर्य्यः। इत्युणादिकोषः॥ द्यौः। इति संक्षिप्तसारे उणादिवृत्तिः॥

द्युष(ष)त्, [द्] पुं, (दिवि स्वर्गे सीदतीति। षद्+क्विप्। छन्दसि बलम्। लोके ऽबलम्।) देवः। इति त्रिकाण्डशेषः॥ (यथा, माघे। १। ४३।

"भयस्य पूर्व्वावतरन्तरक्षिणा
मनःसु येन द्युसदां व्यधीयत॥")

यद्वः। इति गोलाध्यायः॥

द्यूतः, पुं, क्ली, (देवनमिति। दिवु क्रीड़ायाम्+भावे+क्तः। ऊट् च।) पाशकादिक्रिया। अप्राणिकरणकक्रीड़ा। जुया इति भाषा। तत्पर्य्यायः। अक्षवती २ कैतवम् ३ पणः ४। इत्यमरः। २। १०। ४५॥ (यथा, देवीभागवते। १। १८। ५१।

"द्यूतक्रीड़ा तथा प्रोक्ता व्रतानि विविधानि च॥")

"द्यूतं समाह्वयश्चैव राजा राष्ट्रान्निवर्त्तयेत्।
राजान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम्॥
प्रकाशमेतत्तास्कर्य्यं यद्देवनसमाह्वयौ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत्॥
अप्राणिभिर्यत् क्रियते तल्लोके द्यूतसञ्ज्ञते।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः॥
द्यूतं समाह्वयञ्चैव यः कुर्य्यात् कारयेत वा।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः॥
द्यूतमेतत् पुराकल्पे दृष्टं वैरकरं महत्।
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान्॥"

इति मनुः। ६। २२१-२२७॥

कङ्क उवाच।

"किमत्र द्यूतेन राजेन्द्र! बहुदोषेण मानद!।
देवने बहवो दोषास्तस्मात्तत् परिवर्ज्जयेत्॥
श्रुतस्ते यदि वा दृष्टः पाण्डवो हि युधिष्ठिरः।
स राज्यं सुमहत् स्फीतं भ्रातॄंश्च त्रिदशोपमान्॥
द्यूते हारितवान् सर्व्वं तस्माद्द्यूतं न रोचये॥"

इति महाभारते। ४। ६६। ३३-३५॥

द्यूतकरः, त्रि, (करोतीति। क्र+अच्। द्यूतस्य करः।) द्यूतकर्त्ता। जुयारी इति भाषा। तत्पर्य्यायः। धूर्त्तः २ शूर्त्तः ३ अक्षधूर्त्तः ४ अक्षदेवी ५ टुण्टेरः ६ द्यूतकृत् ७ कितवः ८ लक्षणकोकलः ९। इति शब्दरत्नावली॥

द्यूतकारः, त्रि, (द्यूतं कारयतीति। क्र+णिच्+अच्।) द्यूतकारयिता। सहियार इति ख्यातः। इति भरतः॥ तत्पर्य्यायः। सभिकः २। इत्यमरः। २। १०। ४४॥ सभीकः ३। इति शब्दरत्नावली॥ (यथा, पञ्चतन्त्रे। १। ४३१।

"मुहुर्व्विन्नितकर्म्माणं द्यूतकारं पराजितम्॥")

द्यूतकारकः, त्रि, (द्यूतं कारयतीति। द्यूत+क्र+णिच्+ण्वुल्।) द्यूतकारयिता॥

द्यूतक्रतु, त्रि, (द्यूतं करोतीति। क्र+क्विप् तुगागमश्च।) द्यूतकरः। अक्षक्रीड़कः। इत्यमरः। २। १०। ४४॥

द्यूतपूर्णिमा, स्त्री, (द्यूताय या पूर्णिमा।) कोजागरपूर्णिमा। इति त्रिकाण्डशेषः॥

द्यूतपौर्णमासी, स्त्री, (द्यूताय या पौर्णमासी।) द्यूतपूर्णिमा। इति भूरिप्रयोगः॥

द्यूतप्रतिपत्, [द्] स्त्री, (द्यूताय क्रीड़ार्थं या प्रतिपत्।) कार्त्तिकशुक्लप्रतिपत्। सा च कौमुदी। यथा,—

"तुष्ट्यर्थं कार्त्तिके तस्य शुक्ला या प्रतिपत्तिथिः।
विष्णोर्देहा मही तत्र कौमुदी सा स्मृता बुधैः॥
कुशब्देन मही ज्ञेया सदा हर्षे च वै द्विज!।
धातुज्ञैः सर्व्वशब्देज्ञैः सा च वै कौमुदी स्मृता॥"

इति पाद्मोत्तरखण्डम्॥ *॥

अत्र तिथौ बलिदैत्यपूजादि कार्य्यम्। तद्यथा, "वामनपुराणे कार्त्तिकशुक्लपक्षमधिकृत्य बलिस्मृति भगवद्वाक्यम्।

वीरप्रतिपदा नाम तव भावी महोत्सवः।
अत्र त्वां नरशार्दूल! दृष्ट्वाः पुष्टाः सुखान्विताः॥
पुण्यदीपप्रदानेन पूजयिष्यन्ति मानवाः॥
अत्र मन्त्रः।
बलिराज! नमस्तुभ्यं विरोचनसुत! प्रभो।
भविष्येन्द्र सुरारीते! पूजेयं प्रतिगृह्यताम्॥
ब्रह्मपुराणे तु बलिराजेतिमन्त्रस्य पूर्व्वम्।
मन्त्रेणानेन राजेन्द्र! समन्त्री सपुरोहितः॥
इत्यर्द्धम्। पश्चादपि।
एवं पूजां नृपः कृत्वा रात्रौ जागरणं चरेत्।
इत्युक्तम्॥ पुनर्ब्रह्मपुराणे।
शुक्रस्य पुरा द्यूतं सक्रे सुमनोहरम्।
कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते!॥
जितश्च शुक्रस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्चयेच्छुक्रं दुःखी गौरी नित्यं सुखोचिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरं शुभः॥
पराजयो विरुद्धश्च सत्यनाशकरो भवेत्॥
भविष्योत्तरे।
यो यो याद्यभावेन तिष्ठत्यस्यां युधिष्ठिर!।
हर्षदेन्यादिना तेन तस्य वर्षं प्रयाति हि॥
महापुण्या तिथिरियं बलिराज्यप्रवर्द्धनी।
स्नानं दानं व्रतगुणं कार्त्तिकेऽस्यां तिथौ भवेत्॥"

इति तिथितत्त्वम्॥

द्यूतबीजं, क्ली, (द्यूतस्य बीजं कारणम्।) कपर्द्दकः। इति त्रिकाण्डशेषः॥ द्यूतस्य कारणञ्च॥

द्रगड़ं, क्ली, (द्रयात् सप्तमराशिः। यथा—

"धीस्थानं पञ्चमं ज्ञेयं धामित्रं रन्ध्रमं स्मृतम्।
द्रगं द्रूनं तथास्त्राख्यं षट्कोणं रिपुभान्दरा म्॥"

इति ज्योतिस्तत्त्वम्॥

(दिव्+क्तः। "दिवोऽविजिगीषायाम्।" ८। २। ४६। इति निष्ठातस्य नः। ष्ठीरित्यूट्। द्यूते, त्रि॥)

देव, व्यवहारे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) अन्त्यस्याद्ययुक्तः। दायति दुष्टं लोकः। इति दुर्गादासः॥

द्योतः, पुं, (द्युत्+भावे घञ्।) प्रकाशः। (यथा, हरिवंशे। २३३। २४।

"विद्युद्द्योतनिकाशेन मुकुटेनार्कवर्चसा॥")

आतपः। इत्यमरः। १। ४। ३४॥

द्योतनं, क्ली, (द्युत+भावे ल्युट्।) दर्शनम्। इति हेमचन्द्रः। ३। २४१॥ प्रकाशनम्॥ (द्यूत्+युच्। द्योतमाने, त्रि। यथा, भट्टिः। ७। १५।

"विलोक्य द्योतनं चन्द्रं लक्षणं प्रोच्यनोऽवदत्॥")

द्योतनः, पुं, (द्योतयतीति। द्युत+"बहुलमन्यापि।" उणां २। ७८। इति युच्।) दीपः। इत्युणादिकोषः॥

द्योतितं, त्रि, (द्युत+क्तः।) द्युतितम्। दीप्तम्। इति सुग्धबोधव्याकरणम्॥ (यथा, रामायणे। २। ८२। २।

"वक्त्राङ्गरागप्रभया द्योतिता सा सभोत्तमा॥")

द्योभूमिः, पुं, (द्यौराकाशं भूमिरिव यस्य।) पक्षी। इति शब्दचन्द्रिका॥ स्वर्गपृथिव्योः स्त्री। तत्र द्विवचनान्तः॥

द्योषत्, [द्] पुं, (द्यवि स्वर्गे सीदतीति। सद्+क्विप्।) देवः। इति शब्दरत्नावली॥

द्यौः, [द्यो] स्त्री, (द्योतन्ते देवा यत्र। द्युत्+बाहुलकात् डोः।) स्वर्गः। (यथा, महाभारते। १। ७३। २८।

"आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मश्च जानाति नरस्य वृत्तम्॥")

आकाशम्। इत्यमरः। १। १। ६॥ (पुं, अष्टवसूनामन्यतमः। यथा, देवीभागवते। २। ३। ३५।

"पृथ्वादीनां वसूनाञ्च अष्टौ कोऽपि वसूत्तमः।
द्यौर्गामा तस्य भार्य्या या नन्दिनीं गां ददर्श ह॥"

अयमेव वशिष्ठशापात् पृथिव्यां जन्म परिग्रहन् भीष्म इति ज्ञात्वा विख्यात आसीत्॥ अस्य विवरणन्तु देवीभागवते २ स्कन्धे ३ अध्याये तथा महाभारते। १। ६६ अध्याये द्रष्टव्यम्॥)

द्यौत्नं, क्ली, (द्यौरत्नमिति। दिव+"दिवेर्द्युञ्च।" उणां ४। १६०। इति त्नप् द्युञादेशश्च। द्यौतिः। इति संक्षिप्तसारे उणादिवृत्तिः॥

द्रगड़ः, पुं, वाद्यविशेषः। दगड़ इति भाषा। तत्पर्य्यायः। प्रतिपत्पूर्णिमम् २। इति त्रिकाण्डशेषः॥

द्रङ्गं, क्ली, (द्राङ्ग्यतेनेति। द्राङ्ग आकाङ्क्षायाम् + क्युट्। एषोदरादित्वात् डस्य लः।) तोलकम्। इति शब्दमाला॥ तत्पर्य्यायः। कोलम् २ वटकम् ३ कर्षार्द्धम् ४। इति वैद्यकपरिभाषा॥ (पुंलिङ्गेऽपि। यथा,—

"————————तद्द्वयं कोल उच्यते।
चुद्रको वटकश्चैव द्रङ्गः स निगद्यते॥"

इति पूर्व्वखण्डे प्रथमेऽध्याये धान्वन्तरेरुक्तम्॥)

द्रङ्गः, त्रि, पुरौ। इति हेमचन्द्रः। ४।३७॥ (यथा, राजतरङ्गिण्याम्। ८। २०११।

"तेन खनान्वा भाक्तेषु द्रङ्गे सिन्धुरसद्रशा॥")

द्रढिमा, [न्] पुं, (दृढ़स्य भावः। दृढ़+"पृथ्वादिभ्य इमनिज्वा।" ५। १। १२२। इति इमनिच्। "र ऋतो हलादेर्लघोः।" ६।४।१६१। इति ऋकारस्य रकारः।) दृढ़ता॥ (यथा, शिवशतके। ४३।

"लघुगुरुतुलनातुलाप्रकाण्ड-
द्रढिमगुणः स भवद्गुणत्वयस्य॥")

द्रढ़िष्ठः, त्रि, अयमनयोरेषां वा अतिशयेन दृढ़ः। इत्यर्थे इष्ठप्रत्ययेन साध्यः। द्रढ़ीयान्॥

द्रप्पं, क्ली, (दृप्यन्त्यनेनेति। दृप+अन्नाद्यत्वम्। इति निपातनात् साधुः।) घनेतरदधि। वया दर इति भाषा। इत्यमरः। २। ९। ५१॥ अस्य रूपान्तराणि। द्रप्सम् २ द्राप्सम् ३ चप्साम् ४। इति तट्टीकायां भरतः॥ (युक्तम्। इति निरुक्तम्। ५। १७॥ त्रि, हुतगमनशीलः। हुतहननशीलः। यथा, ऋग्वेदे। ९। ६९। २।

"पवमानः सन्तनिः प्रप्रतामिव
मधुमान् द्रप्सः परिवारमर्षति॥")

द्रम, गतौ। इति कविकल्पद्रमः। (भ्वां-परं-सकं-सेट्।) दन्त्यवर्गद्वितीयादिः। द्रमति। इति दुर्गादासः॥

द्रवः, पुं. (द्रु+"ऋदोरप्।" ३।३।५७। इति भावे अप्।) परीहासः। पलायनम्। इत्यमरः। १। ७। ३२॥ (यथा, हरिवंशे। २११। १०।

"ततो देवद्रवकरं पौराणं गरुडसुतमम्॥")

रसः। गतिः। इति विश्वः॥ वेगः। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १९३। ५।

"तत्र शब्दगतिर्भूत्वा मारुतद्रवसम्भवः॥"

द्रवत्वरूपो गुणविशेषः। यथा, भाषापरिच्छेदे। २८।

"गुरुत्वी द्रे रसवती द्वयोर्नैमित्तिको द्रवः॥"

आर्द्रे, त्रि। यथा, रघुः। ७। ७।

"प्रसाधिकालम्बितमग्रपाद-
मात्तिष्य काचित् द्रवरागमेव॥")

द्रवणः, पुं, (द्रवात् जायते इति। जन्+डः।) गुडः। इति राजनिर्घण्टः॥ द्रवजातवस्तुमात्रञ्च॥

द्रवणं, क्ली, (द्रु+भावे ल्युट्।) गमनम्। (यथा, हरिवंशे। १९६। ३६।

"ते रुदन्तो द्रवन्तश्च भगवन्तं पितामहम्।
रोदनाद्द्रवणात् चैव ततो रुद्रा इति स्मृताः॥")

चरणम्। अनुतापः॥ द्रुधातोर्भावेऽनट्॥

द्रवत्वं, क्ली, (द्रव+त्व।) द्रवस्य भावः। तद्विविधम्। यथा,—

"सांसिद्धिकं द्रवत्वं स्यात् नैमित्तिकमुदाहृतम्।
सांसिद्धिकन्तु सलिले द्वितीयं क्षितितेजसोः॥
परमाणौ जले नित्यमन्यतोऽनित्यमुच्यते।
नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु॥
द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत्॥"

इति भाषापरिच्छेदः॥

द्रवत्पत्री, स्त्री, (द्रवत् पत्रं यस्याः। ङीष्।) शिग्रुवृक्षः। इति राजनिर्घण्टः॥

द्रवन्ती, स्त्री, (द्रवतीति। द्रु+शतृ+ङीप्।) नदी। इति शब्दरत्नावली॥ अस्यां पर्य्यायौ। अम्बाकाखी छोटा इति भोयनी इति च हिन्दी भाषा। तत्पर्य्यायः। शम्बरी २ चित्रा ३ व्यथोघी ४ शतमूलिका ५ शतक्रमेणी ६ वृषा ७ चक्रा ८ पत्रश्रेणी ९ आखुकर्णिका १० मूषिककर्णी ११ प्रतिपर्णशिफा १२ सहस्रमूली १३ विक्रान्ता १४। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। रसवन्धकारित्वम्। ज्वरक्रिमिनाशित्वम्। शूलशमनत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

द्रवरसा, स्त्री, (द्रवो रसो यस्याः।) लाक्षा। इति राजनिर्घण्टः॥

द्रवाधारः, पुं, (द्रवाणां द्रव्याणामाधारः।) चुलुकः। इति शब्दार्थकल्पतरुः॥ द्रवद्रव्यरक्षापात्रञ्च॥

द्रविड़ी, स्त्री, रागिणीविशेषः। इति हलायुधः॥

द्रविणं, क्ली, (द्रवति गच्छति द्रूयते प्राप्यते वेति। द्रु+"इदन्दिभ्यामिनन्।" उणा। २। ५०। इति इनन्।) धनम्। (यथाह कश्चित्।

"द्रविणं परिमितममितव्ययिनं जनमाकुलीकुरुते।
क्षीराब्धिजलमिव क्षीणस्तनजघनायाः कुलीनायाः॥")

काञ्चनम्। बलम्। इत्यमरमेदिनीकरौ॥ (यथा महाभारते। १। १०३। १६।

"एवमुक्ता तु पुत्रेण भूरिद्रविणतेजसा।
माता सत्यवती भीष्मसुवाच तदनन्तरम्॥"

पुं, घरनाम्नो वसोः पुत्रविशेषः। यथा, महाभारते। १। ६६। २१।

"घरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा॥"

पृथोः पुत्रविशेषश्च। यथा, भागवते। ४। २२। ५४।

"पुत्रानुत्पादयामास पञ्चार्चिष्यात्मसम्मतान्।
विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकम्॥"

कुशद्वीपस्थितसीमागिरिभेदः। यथा, भागवते। ५। २०। १५।

"तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्तसप्तैव बभूवुः। प्रङ्गः कपिलश्चित्रकूटो देवानीक ऊर्द्धरोमा द्रविण इति॥" क्रौञ्चद्वीपस्थवर्षपुरुषविशेषः। यथा, भागवते। ५। २०। २२।

"यासामम्भः पवित्रममलमुपयुञ्जानाः पुरुषर्षभ-द्रविणदेवकसंज्ञा वर्षपुरुषाः॥")

द्रविणनाशनः, पुं, (नाशयतीति। नाश+ल्युः।) द्रविणानां नाशनः। तत्सेवनेन धनविनाशात् अस्य तथात्वम्।) शोभाञ्जनवृक्षः। इति शब्दरत्नावली॥

द्रविणोदाः, [स्] पुं, अग्निः। अस्य निरुक्तिर्यथा,—

"द्रविणं बलमित्युक्तं धनञ्च द्रविणं ततः।
ददाति तद्भवानेव द्रविणोदास्ततो भव॥"

इति वराहपुराणम्॥

(धनप्रदे, त्रि। यथा, ऋग्वेदे। १। १५। ७।

"द्रविणोदा द्रविणसो यावहसासो अध्वरे॥"

"कीदृशं देवं द्रविणोदाः धनप्रदम्। यद्वा, धनप्रदोऽग्निः सोमं पिबतीति शेषः। तमेतं मन्त्रं यास्क एवं निर्वक्ति,—द्रविणोदाः कस्मात् धनं द्रविणमुच्यते यदेनदभिद्रवन्ति बलं वा द्रविणं यदेनेनाभिद्रवन्ति तस्य दाता द्रविणोदास्तस्मैषा भवति द्रविणोदा द्रविणं स इत्यादि सोऽयं यास्कोक्तो निर्व्वचनप्रपञ्चः तस्मिन्नेव ग्रन्थेऽवगन्तव्यः। द्रविणोदाः द्रुदक्षिभ्यामिनन् नित्त्वादाद्युदात्तोद्रविणशब्दः तद्दातीति द्रविणोदाः। क्विप्चेति क्विप्। पूर्व्वपदस्य सकारोपजनश्छान्दसः। दत्वोत्वे। छन्दुत्तरपदप्रकृतिस्वरत्वम्। देवविशेषबलत्वेनैकवाक्यतापक्षे द्वितीयायाः सुखादेशः। अथवा द्रविणमात्मन इच्छन्ति द्रविणस्यन्ति। सुप आत्मनः क्यच् सर्व्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्य इति क्यचि परतः सुगागमः द्रविणस्यते: सम्यदादित्वाद्भावे क्विप्। अतो लोपः। क्यौलुप्तं न स्थानिवद्भवतीति तस्य स्थानिवत्त्वप्रतिषेधाल्लोपः एवं द्रविणस्यशब्दो धनेच्छावचनः। द्रविणेच्छान्दस्यति यथेष्टधनप्रदानेनोपचयलौल्यं तस्य उपचये इत्यसादन्तर्भावितण्यर्थात् क्विप्त्वेति क्विप्। एवं द्रविणोदःशब्दः सकारान्तो भवति। तथा हाविणोदसः प्रवादो भवन्नीतिनैरुक्तो व्यवहार उपपद्यते अतो द्रविणोदसशब्दः भिन्नवाक्यत्वे स्वार्थे प्रथमा। एकवाक्यत्वे तु वत्ययेन द्वितीयार्थो भवति द्रविणस इत्यत्रापि वाक्यभेदपक्षे द्रविणसः सोमस्येत्यर्थे सकारोपजनश्छान्दसः। आद्युदात्तत्वन्तु नियमेन स्थितम्। ऋत्विग्विशेषबलत्वेनैकवाक्यत्वपक्षे तु त्वदन्तात् क्विप्। अतो लोपादिपूर्व्ववत्। अत्र तु पक्षे व्यत्ययेनान्तोदात्तत्वे प्राप्ते वत्ययेनाद्युदात्तम्॥" इति सायणः॥)

द्रवीकरणं, क्ली, अद्रवस्य द्रवकरणम्। इति क्विप्प्रत्ययेन साध्यम्॥ गलान इति भाषा॥

द्रष्टं, क्ली, (दृशेरिव। दृ+"द्रष्टञ्च भवे।" ५। ३। १०४। इति यत्प्रत्ययेन निपातनात् साधुः।) वस्तु। (यथा, मनुः। ७। ९।

"एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम्॥")

तस्य क्रियाविशेषे नवपुराणभेदेन प्रशस्तत्वं यथा,—

"प्रथाद्यमभिनवान्येव प्रशस्तानि क्रियाविधौ।
ऋते गृहक्षेत्रसौधान्यक्षवाविङ्कृतः॥"

इति नारायणदासकृतपरिभाषा॥

("केचिदाचार्या ब्रुवते द्रव्यं प्रधानं कस्माद्-व्यवस्थितत्वादिह खलु द्रव्यं व्यवस्थितम्। न रसादयो यथा ये फले ये रसादयस्ते पक्वे न सन्ति। नित्यत्वाच्च नित्यं हि द्रव्यमनित्या गुणा यथा कल्कादिप्रविभागः स एव सम्पन्नरसगन्धो वापन्नरसगन्धो वा भवति। स्वजात्यवस्थानाच्च यथा हि पार्थिवं द्रव्यमन्यभावं न गच्छत्येवं शेषाणि। पञ्चेन्द्रियग्रहणाच्च पञ्चभिरिन्द्रियैर्-गृह्यते द्रव्यं न रसादयः। आश्रयत्वाच्च द्रव्य-माश्रिता रसादयो भवन्ति। आरम्भसामर्थ्याच्च द्रव्याश्रित आरम्भो यथा विदारिगन्धादिमाहृत्य सङ्क्षुद्य विपचेदित्येवमादिषु न रसादिष्वारम्भः। घ्राणप्रामाण्याच्च घ्राणे हि द्रव्यं प्रधानमुप-देशे हि योगानां यथा मातुलुङ्गाग्निमन्थौ चेति न रसादय उपदिश्यन्ते। क्रमापेक्षितत्वाच्च रसादीनां रसादयो हि द्रव्यक्रममपेक्षन्ते यथा तरुणे तरुणाः सम्पूर्णे सम्पूर्णा इति। एकदेश-साध्यत्वाच्च द्रव्याणामेकदेशेनापि व्याधयःसाध्यन्ते यथा महाद्रुचन्दनेरेयेति तस्माद्द्रव्यं प्रधानं द्रव्य-लक्षणन्तु क्रियागुणवत्समवायिकारणमिति।"

"पाको नास्ति विना वीर्य्याद्वीर्य्यं नास्ति विना रसात्।
रसो नास्ति विना द्रव्याद्द्रव्यं श्रेष्ठमतः स्मृतम्॥"
"वीर्य्यसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः।
रसेषु न वसन्त्येते निर्गुणास्तु गुणाः स्मृताः॥
द्रव्ये द्रव्याणि यस्माद्धि विपच्यन्ते न चेतराः।
श्रेष्ठं द्रव्यमतो ह्येषां भावास्तदाश्रयाः॥"
इति सुश्रुते। १। ४०॥)

पित्तलम्। वित्तम्। पृथिव्यादि। विक्षेपनम्। क्लीवम्। भेषजम्। भक्ष्यम्। (द्रोर्विकारः। "द्रोश्च।" ४। ३। १६९। इति यत्।) द्रुम-विकारे, त्रि। इति मेदिनी। ये, २६॥ (द्रुमा-वयवः। इति सिद्धान्तकौमुदी॥) द्रुह्। विनयः। इति हेमचन्द्रः॥ मद्यम्। यथा,—

"सद्यश्च्यं न पिबेद्द्रव्यम्।" इति भावप्रकाशः॥

न्यायमते तन्नवविधं यथा,—

"क्षित्यप्तेजोमरुद्व्योमकाला दिग्देहिनौ मनः।"

तेषां साधर्म्यमादि यथा,—

"क्षित्यादीनां नवानान्तु द्रव्यत्वगुणयोगिता।
क्षितिर्जलं तथा तेजः पवनो मन एव च॥
परापरत्वसंस्कारक्रियावेगाश्रया अमी।
कालश्चात्मदिशां सर्व्वगतत्वं परमं महत्॥
क्षित्यादिपञ्चभूतानि चत्वारि सर्व्वदानि हि।
द्रव्यारम्भश्चतुर्ष्वं स्यादथाकाशशरीरिणाम्॥
अथाप्यवृत्तिः क्षणिको विशेषगुण इष्यते।
रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमं त्रिकम्॥
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः।
आत्मानो भूतवर्गाच्च विशेषगुणयोगिनः॥"
इति भाषापरिच्छेदः॥

द्रव्यहस्तभक्षणादिदोषादोषौ यथा,—

"उच्छावचाभ्रपात्रेषु द्रव्यहस्तो भवेन्नरः।
भूमौ निःक्षिप्य तद्द्रव्यमाचम्याभ्युच्चयेत्तु ततः॥
तैलक्तं वै समादाय यदुच्छिष्टो भवेद्द्विजः।
भूमौ निःक्षिप्य तद्द्रव्यमाचम्याभ्युच्चयेत्तु ततः॥
यद्यद्द्रव्यं समादाय भवेदुच्छिष्टसंयुतः।
अनिधायेतरद्द्रव्यमाचान्तः शुचितामियात्॥
वस्त्रादिषु विकल्पः स्यात्तत् स्पृष्ट्वा चाचमेद्द्विजः।
अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि।
ज्ञात्वा मूत्रपुरीषं वा द्रव्यहस्तो न दुष्यति॥"
इति कूर्म्मपुराणम्॥

द्रा, ल स्वप्ने। पलायने। इति कविकल्पद्रुमः॥ (अदां-परं-अकं-अनिट्।) स्वप्नो निद्रा। निपूर्ब्बः एव निद्रायामिति रमानाथः। ल, निद्राति निद्रालुः। द्राति चौरः पलायते इत्यर्थः। इति दुर्गादासः॥

द्राक्, व्य, (द्रातीति। द्रा+बाहुलकात् कुः।) द्रुतम्। शीघ्रम्। इत्यमरः। ३। ४। २॥ (यथा, नैषधे। ३। २।

"आकस्मिकः पञ्चपुटाहतायाः
क्षितेस्तदा यः खल उच्चचार।
द्रागन्यविघ्नस्तदभूत् स तस्याः
सम्भ्रान्तमन्तःकरणं चकार॥")

द्राक्ष, इ काङ्क्षे। घोरवते। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकंच-सेट्।) रेफयुक्तः। घोर-वतमिह तिरश्चामेव घोरशब्दः। इ, द्राक्षति काङ्क्षतीति काकः। नमश्यपाठेनैवसिद्धे एतस्य इदुपधस्यो वेदेषूच्चारणभेदार्थः। इति दुर्गादासः॥

द्राक्षा, स्त्री, (द्राक्ष्यते काङ्क्ष्यते इति। द्राक्षि काङ्क्षि+घञ्। आगमशासनस्यानित्यत्वात् न लोपः।) फलविशेषः। दाख इति किश्मिश्म इति च भाषा। अङ्गूर इति यवनभाषा। तत्पर्य्यायः। गोस्तनी २ खाद्वी ३ मधुरसा ४। इत्यमरः। २। ४। १०७॥ चारु-फला ६ क्षुण्णा ७ प्रियाला ८ तापसप्रिया ९ गुच्छफला १० रसाला ११ अम्लफला १२ क्षुण्णा १३ चारुफला १४। इति जटाधरः॥ रसा १५। इति शब्दरत्नावली॥ अस्य गुणाः। अतिमधुरत्वम्। अम्लत्वम्। शीत-पित्तार्शिदाहमूत्रदोषनाशित्वम्। रुच्यत्वम्। तृप्यत्वम्। सन्तर्पणत्वञ्च। इति राजनिर्घण्टः॥ स्निग्धत्वम्। शीतबलकारित्वम्। वृष्यत्वम्। क्षयावायुरक्तपित्तक्षतक्षीणतानाशित्वञ्च। इति राजवल्लभः॥

द्राख, ऋ ओखार्थे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) दन्त्यवर्गलतीयादिः। रेफ-युक्तः। ऋ, अदद्राखत्। ओखार्थे ओखाल-मर्थयोः। इति दुर्गादासः॥

द्राघ, ऋ ङ अभायामशक्तिषु। इति कविकल्प-द्रुमः॥ (भ्वां-परं-अकं-दीर्घीकरणे सकं-सेट्।) श्रमः खेदः। आयामो दीर्घीकरणम्। शक्तिः सामर्थ्यम्। ऋ, अदद्राघत्। ङ, द्राघते जनः खेदयते इत्यर्थः। द्राघते वस्त्रं जनो दीर्घं करोति इत्यर्थः। द्राघते धावितुं वाजी समर्थः स्यादि-त्यर्थः। इति दुर्गादासः॥

द्राघिमा, [न्] पुं, दीर्घस्य भावः। (दीर्घ+इमनिच्। "प्रियस्थिरस्फिरोरुबहुलेति।" ६। ४। १५७। इति द्राघादेशः।) दीर्घत्वम्। इति व्याकरणम्॥ भूगोलस्य दीर्घता। इत्याधुनिक-ज्योतिर्विदाः॥

द्राघिष्ठः, त्रि, (अतिशयेन दीर्घः इति। दीर्घ+इष्ठन्। दीर्घस्य द्राघादेशः।) अतिदीर्घः। इत्यमरः। ३। १। ११२॥

द्राड, ऋ ङ शीर्णौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) रेफयुक्तः। ऋ, अदद्राड्त। ङ, द्राड्ते। शीर्णौ विभेदे। इति दुर्गादासः॥

द्राढः, त्रि, (द्रा+कर्त्तरि क्तः। निष्ठातस्य नः। ढत्वञ्च।) सुप्तः। पलायितः॥

द्रापः, पुं, (द्रापयतीति। द्रा+णिच्। पुगागमे द्रापि+अच्।) पङ्कः। आकाशः। कर्पटः। मूर्खः। इति शब्दार्थकल्पतरुः॥

द्रामिलः, पुं, (द्रमिलाख्यो देशोऽभिजनोऽस्येति। अण्।) चाणक्यमुनिः। इति हेमचन्द्रः। ३।५१७॥

द्रावः, पुं, द्रुधातोर्भावे घञ् प्रत्ययः। गमनम्। स्रवणम्। अनुतापः॥

द्रावकं, क्लीं, (द्रवति द्रावयति वा। द्रु द्रावि वा+ण्वुल्।) सिक्थकम्। इति राजनिर्घण्टः॥ श्लीहरोगस्य औषधविशेषः। (यथा,—

"स्फटिकारीद्वयञ्चैव पलं द्विपलिकन्तथा।
नरसारं पलं देयं टङ्कणञ्च पलार्द्धकम्॥
कासीसं भ्राष्टयुग्मञ्च प्रत्येकं श्लक्ष्णचूर्णितम्।
सपञ्चलवणक्षारं कर्षमानं पृथक् पृथक्॥
अपामार्गद्वयस्यापि तथा कृष्णाश्वकस्य च।
रम्भावल्कलजं क्षारं प्रत्येकञ्चार्द्धभाजकम्॥
श्लक्ष्णचूर्णीकृतञ्चैतत् लिम्बाकरसे क्षिपेत्।
सर्व्वमेतत् सुपिष्ट्वाथ रौद्रे द्रव्याद्विचक्षणः॥
आनीय काचपाचन्तु तत्र तत् पाचयेत् भिषक्।
प्रहरार्द्धं ददौ ज्वालां सालकाष्ठाग्निना मृदु।
सुतप्ते काचकुम्भे च ततो ज्वालां निवारयेत्॥
शीतं गते तदुद्धृत्य प्रक्षिपेच्च वराटकम्।
वराटे द्रवतां याते ततः कर्म्मसु योजयेत्॥
द्रावकस्य परीक्षेयं नान्यथा च भवेत्फलम्।
गुञ्जैकं खादयेच्चापि चूर्णेन माषेण च॥
घृतपुष्पेण वा देयं तोयसूपं पिबेदनु॥
पथ्यमेतद्धृतं देयं दुश्शीतामुदर्व्वितम्॥"
इति वैद्यककथायाञ्च संग्रहे श्लीहसर्व्वोदरयक्ष-दधिकारे॥) अस्य अन्यद् विवरणं महाद्रावक-शब्दे द्रष्टव्यम्॥

द्रावकः, पुं, (द्रवति चन्द्रांशुसम्पर्कादिति। द्रु+ण्वुल्।) प्रस्तरभेदः। (द्रावयतीति+द्रु+णिच्+ण्वुल्।) विदग्धः। (द्रवति क्लाम्यति इति। द्रु+ण्वुल्।) मोचकः। इति मेदिनी। के, १०४॥ श्लिङ्गः। इति शब्दमाला॥ रस-भेदः। इति शब्दरत्नावली॥ (द्रावि+ण्वुल्।) हृदयग्राही। द्रवकारकः। इति धरणिः॥

द्रावकन्दः, पुं, (द्रावकः कन्दो यस्य।) तैलकन्दः। इति राजनिर्घण्टः॥

द्रावकरं, क्ली. (दावं सुवर्णादेर्द्रवं करोति यसंयोगेनेति। द्राव+ल+टः।) श्वेतटङ्कणम्। इति राजनिर्घण्टः॥

द्रावणं, क्ली, (द्रावयति जलमलं खसम्पर्केणेति। द्रु+णिच्+ल्युट्।) कतकफलम्। इति रत्नमाला॥ निर्मली इति भाषा॥ (द्रावि+ल्युट्।) विद्रावणश्च॥ (द्रावयतीति। द्रावि+ल्युः। पलायनकारयितरि, त्रि। यथा, महाभारते। ८। ३४। ६८।

"स देवयुक्तो रथसत्तमो नो
दुराधरो द्रावकः शात्रवाणाम्॥")

द्राविका, स्त्री, (द्रावक+टाप्। अत इत्वञ्च।) लाला। इति शब्दरत्नावली॥

द्राविड़ः, त्रि, (द्राविड़ो देशोऽभिजनोऽस्येति। अण्।) देशविशेषजातः। (यथा, महाभारते। ८। १२। १४।

"साल्वकिरीतानञ्च द्राविडैः सैनिकैः सह॥")

पञ्चद्राविड़ाः। यथा, द्रविड़ः १ कर्णाटः २ गुर्ज्जराटः ३ महाराष्ट्रः ४ तैलङ्गः ५। यथा, स्कन्दपुराणे।

"कार्णाटाश्चैव तैलङ्गा गुर्ज्जरा राष्ट्रवासिनः।
आन्ध्राश्च द्राविडाः पञ्च विन्ध्यदक्षिणवासिनः॥"

संज्ञाभेदः। वेधसुखः। इति मेदिनी। ड़े, ३०॥ कर्पूरः। इति राजनिर्घण्टः॥

द्राविड़कं, क्ली, (द्रविड़े देशे भवः। अण् ततः संज्ञायां कन्।) विड़ङ्गवृक्षः। इति राजनिर्घण्टः॥

द्राविड़कः, पुं, (द्राविड़ एव। स्वार्थे कन्।) वेधसुखकः। इत्यमरः। २। ४। १३५। जिँयच्च यही इति भाषा॥

द्राविड़भूतिकः, पुं, (द्राविड़ एव भूतिरुत्पत्तिस्थानं यस्य। कप्।) द्राविड़कः। इति शब्दरत्नावली॥

द्राविड़ी, स्त्री, (द्रविड़े भवा। द्रविड़+अण्। ङीप्।) एला। इति राजनिर्घण्टः॥ (इयं एला तु गुजरातीति ख्याता॥ अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"स्थूलैलोपकुल्किका तुच्छा कोरङ्गी द्राविड़ी गुटिः॥")

द्राव्यं, त्रि, (द्रु+ण्यत्।) अवश्यगमनीयम्। अवश्यचरणीयम्। अवश्यश्रुतपनीयम्। इति धातोरवश्यम्भावार्थे ण्यत्प्रत्ययः॥

द्राह, ऋ ड जागरे। निद्रायें। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ऋ, अद्राहत्। ड, द्राहते। इति दुर्गादासः॥

द्रु, स्रुतौ। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) द्रवति। इति दुर्गादासः॥

द्रु, र न उपतापे। इति कविकल्पद्रुमः॥ (स्वां-परं-अकं सकं च-अनिट्।) र, वैदिकः। न, द्रुणोति। उपताप इह उपतापीभावः उपतापीकरणञ्च। इति दुर्गादासः॥

द्रुः, पुं, (द्रवति ऊर्द्धं गच्छतीति। द्रु+मितद्रुादिलात् डुः।) वृक्षः। इत्यमरः। २। ४। ५॥ (यथा, मनुः। ७। १३१।

"आददीताथ षड्भागं दुमांसमधुसर्पिषाम्॥")

गतौ, स्त्री। इति शब्दरत्नावली॥

द्रुकिलिमं, क्ली, (किल्यतेऽनेनेति। किल श्वेतक्रीड़नयोः+बाहुलकात् किमच्। द्रुषु वृक्षेषु किलिमम्।) देवदारुवृक्षः। इत्यमरः। २। ४। ५३॥ (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम्।

"देवदारुद्रुकिलिमं सुराह्वं भद्रदारु च।
देवकाष्ठं पीतदारु देवदारु च दारु च॥")

द्रुघणः, पुं, (द्रुर्वृक्षः हन्यतेऽनेनेति। हन+"करणेऽयोविद्रुषु।" ३। ३। ८२। इति अप् घनादेशश्च। "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्। द्रुममयो घनः इति वा।) मुद्गरः। इत्यमरः। २। ८। ६१॥ शस्त्रधारादिसुद्गराकारलौहमयास्त्रभेदः। इति भरतः॥ (वैद्यभ्यायनोक्तधनुर्व्वेदमतेऽयं परशुवल्लौहास्त्रम्। यदुक्तम्।

"द्रुघणस्त्वायसाङ्गः स्यात् वक्रग्रीवो दृढच्छिराः।
पञ्चाशद्दङ्गुलोत्सेधो सुष्टिसम्मितमण्डलः॥"

अस्य चतसः क्रियाः। यथा,—

"उन्नामनं प्रपातश्च स्फोटनं दारणं तथा।
चतस्रोऽस्यैताः क्रियाः कुलगितानि श्रितानि वै॥"

द्रुः संसारवृक्षो हन्यतेऽनेनेति।) ब्रह्मा। कुठारः। इति मेदिनी। घे, ५३॥ भूमिचम्पकः। इति शब्दचन्द्रिका॥ दन्त्यनान्तोऽपि॥

द्रुड, मज्जने। इति कविकल्पद्रुमः॥ (चुरां परं-अकं-सेट्।) रेफयुक्तः। मज्जनमिति मस्जधातोरूपम्। द्रोड़ति प्रस्तरो जले। द्रुड्डयति। इति दुर्गादासः॥

द्रुड, द्रि मज्जने। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) द्रि, द्रुड्डति अद्रुड्डीत् द्रुड्डः। एषः कैश्चिन्न मन्यते। क्रमदीश्वरस्तु कुटादिमेव मन्यते। इति दुर्गादासः॥

द्रुण, द्रु चैक्ष्ण्ये। गतौ। वधे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) दन्त्यवर्गद्वितीयादिः। द्रु, द्रुणति द्रुद्रोणिषति। चैक्ष्ण्ये कुटिलीकरणम्। इति दुर्गादासः॥

द्रुण्ड, पुं, (द्रुणति छिनत्तीति। द्रुण+ड।) वृश्चिकः। भृङ्गः। इति हेमचन्द्रः। ४। २७७॥ त्रि, पिशुनः। इति शब्दमाला॥

द्रुण्डस, त्रि, (द्रुरिव दीर्घा नासिका यस्य। "अल्पनासिकायाः संज्ञायां नसं चास्थूलात्।" ४। ४। ११८। इति अच्। नसादेशश्च। "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्।) दीर्घनासिकायुक्तः। इति संक्षिप्तसारव्याकरणम्॥

द्रुणहः, पुं, (द्रुणं खड्गं हन्ति गच्छतीति। हन गतौ+डः।) खड्गपिधानम्। इति हारावली। १२५॥

द्रुता, स्त्री, (द्रुतं धनुराश्रयत्वेनास्त्यस्याः। अच्। टाप्।) व्या। इति हेमचन्द्रः। ३। ४३६॥

द्रुणिः, स्त्री, (द्रुणति जलादिकमिति। द्रुण गतौ+"द्रुपधात् कित्।" उणां। ४। ११८। इति इन्।) द्रोणी। इत्यमरटीकायां भरतः॥

द्रुणी, स्त्री, (द्रुण+इन्। वा ङीप्।) कर्ज्जलौकाः। कच्छपी। इति लिङ्गादिसंग्रहे अमरभरतौ॥ काष्ठाम्बुवाहिनी। इति द्रोणीशब्दटीकायां भरतः॥

द्रुतं, त्रि, (द्रवति स्मेति। द्रु+गत्यर्थेति कर्त्तरि क्तः।) जातद्रवीभावघृतसुवर्णादि। तत्पर्य्यायः। अवदीर्णम् २ विलीनम्३ विद्रुतम् ४। इत्यमरः। ३। १। १००॥ शीघ्रम्। (यथा, महाभारते। १३। २६। ८१।

"वायुरीरिताभिः सुमनोहराभि-
र्हंसाभिरत्यर्थसमुत्थिताभिः।
गङ्गोर्म्मिभिर्भानुमतीभिरिद्धाः
सहस्ररश्मिप्रतिमा भवन्ति॥")

विद्रावम्। पलायितम्। इति मेदिनी। ते, २५॥ (यथा रघुः। ६। ५६।

"जग्राह स द्रुतवराहकुलस्य मार्गं
सूचस्तमार्द्रदृषदुत्किरिभिरायताभिः॥")

द्रुतं, क्ली, (द्रु+क्तः।) शृत्यविषयकशीघ्रगमनम्। तत्पर्य्यायः। ओघः २। इत्यमरः १। २। ६८॥ शीघ्रनयः। इति मधुः॥ शृत्यगीतादौ द्रवन्ति गच्छन्ति समुदायगतिप्रदर्शनार्थे करादयोऽत्र। इति भरतः॥ साङ्गे।

"द्रुतामध्ययने वृत्तिं प्रयोगार्थे तु मध्यमाम्।
शिष्याणामनुरोधार्थे विलम्बितां समाचरेत्॥"

इति वेदव्यवस्था॥

(क्षिप्रम्। यथा, मनुः। ६। १७२।

"अभ्याघातेषु मध्यस्थान् शिष्यान्वैराणिव द्रुतम्॥"

क्रियाविशेषणत्वादस्य क्लीवता॥)

द्रुमः, पुं, (द्रवति स्म ऊर्द्धमिति। द्रु+क्तः।) द्रुमः। इति धरणिः॥

द्रुनखः, पुं, (द्रोर्वृक्षस्य नख इव। असंज्ञात्वात् अत्र णत्वाभावः।) कण्टकम्। इति चिकाण्डशेषः॥

द्रुपदः, पुं, पञ्चालदेशीयचन्द्रवंशीयराजविशेषः। तस्य कन्या द्रौपदी। पुत्रौ शिखण्डिधृष्टद्युम्नौ। इति महाभारतम्॥ (क्ली, यूपैकदेशः। यथा, ऋग्वेदे। १। २४। १६।

"शुनःशेपो ह्यह्वद्गृभीतस्त्रिषु आदित्यं द्रुपदेषु बद्धः।"

"द्रुपदेषु द्रोः काष्ठस्य यूपस्य पदेषु प्रदेशविशेषेषु बद्धः।" इति तद्भाष्ये सायनः॥ काष्ठपादुका। यथा, वाजसनेयसंहितायाम्। २०। २०।

"द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव॥"

"द्रुस्तरुस्तन्मयं पदं द्रुपदं पादुका तस्मान्मुमुचानः एषग् भवन्।" इति वेददीपः॥)

द्रुपदा, स्त्री, ऋक्। सा च वैदिकमन्त्रविशेषः। यथा, उच्छिष्टस्य चाण्डालादिस्पर्शे आपस्तम्बः।

"भुक्तोच्छिष्टखनाचान्तस्नाताऽऽर्द्रालैः श्वपचेन वा। प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम्॥ गायत्र्याश्चसहस्रन्तु हुतं वा घृतं जपेत्॥"

इत्याह्निकाचारतत्त्वम्॥

द्रुमः, पुं, (समुदाये वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते इति न्यायात् द्रुः शाखा विद्यतेऽस्य। "द्रुद्रुभ्यां मः।" ५।२।१०८। इति मः।) वृक्षः। इत्यमरः। २।४।५॥ (यथा, मनुः। ६।२५५।

"निर्भयन्तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितम्। तस्य तद्वर्द्धते नित्यं सिच्यमान इव द्रुमः॥") पारिजातः। कुबेरः। इति मेदिनी। मे, १५॥ (खनामख्यातः किम्पुरुषेश्वरः। यथा, महाभारते। २।१०।२८।

"द्रुमः किम्पुरुषैश्चैव उपास्ते धनदेश्वरम्॥" खनामख्यातवृषविशेषः। स तु शिविनामदैत्येश्वरांशात् जातः। यथा, तत्रैव।१।६७।८।

"यस्तु राजन्! शिविर्नाम दैतेयः परिकीर्त्तितः। द्रुम इत्यभिविख्यातः स आसीद्भुवि पार्थिवः॥" कश्यपौरसभार्य्याजातः क्रव्यस्य पुत्रविशेषः। यथा, हरिवंशे। १६०।६।

"क्रव्यभद्रक्रव्यगर्भः सुदंष्ट्रो द्रुम एव च॥") द्रुमनखः, पुं, (द्रुमस्य नख इव।) कण्टकम्। इति हारावली॥

द्रुमरः, पुं, (द्रुन्निर्यतेऽनेनेति। द्रु+करके अप्।) कण्टकम्। इति हारावली। ६१॥

द्रुमव्याधिः, पुं, (द्रुमस्य व्याधिरिव।) लाक्षा। इति राजनिर्घण्टः॥

द्रुमश्मश्रुः, क्ली, (द्रुमस्य श्मश्रुरिव श्मश्रु यस्य।) कृत्रिमभेदः। यथा,—

"कपिश्मश्रुः द्रुमश्मश्रुः तथा चाखोटश्मश्रुकम्। इति कृत्रिमभेदाः स्युः शाल्मिकेः समुदाहृताः॥"

इति शब्दरत्नावली॥

(द्रुमस्य श्मश्रुः इति विग्रहे वृक्षाग्रम्॥)

द्रुमश्रेष्ठः, पुं, (द्रुमेषु लक्षणवृक्षेषु श्रेष्ठः।) तालवृक्षः। इति शब्दार्थकल्पतरुः॥ वृक्षश्रेष्ठश्च॥

द्रुमामयः, पुं, (द्रुमस्य आमयो व्याधिः।) लाक्षा। इत्यमरः। २।६।१२५॥

द्रुमारिः, पुं, (द्रुमस्य अरिः। वृक्षनाशकत्वात् तथात्वम्।) हस्ती। इति राजनिर्घण्टः॥

द्रुमाश्रयः, पुं, (द्रुमः आश्रयो यस्य।) खरटः। इति राजनिर्घण्टः॥ वृक्षाश्रितमात्रेषु, त्रि॥

द्रुमेश्वरः, पुं, (द्रुमेषु ईश्वरः श्रेष्ठः।) तालवृक्षः। इति शब्दार्थकल्पतरुः॥ (द्रुमाणां ओषधीनामीश्वरः।) चन्द्रः। इति हरिवंशीः॥

द्रुमोत्पलः, पुं, (द्रुमे उत्पलमिव पुष्पं यस्य।) कर्णिकारवृक्षः। इत्यमरः। २।४।६०॥

द्रुवयं, क्ली, (द्रोर्वृक्षस्य विकारभूतं प्रस्थादिपरिमाणम्। द्रु+"माने वयः।" ४।३।१६२। इति वयः।) परिमाणम्। इत्यमरः।२।८।८५॥ (पुंलिङ्गेऽपि। यथा, अथर्ववेदे। ५।२०।२।

"सिंह इवाक्षानीद्द्रुवयो विवद्धः॥")

द्रुसक्तकः, पुं, (द्रुषु सक्तक इव।) पियालवृक्षः। इति शब्दरत्नावली॥

द्रुह्, ह्लु य ऊ जिघांसे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-वेट्।) जिघांस इच्छानिष्टाचरणमिति विद्यानिवासः। ह्लु, अद्रुहत्। य, द्रुह्यति खलः साधवे। ऊ, द्रोहिष्यति द्रोग्धि। इति दुर्गादासः॥

द्रुहः, पुं, (द्रुह्यति धनादिलाभाशया पिलविनाशं चिन्तयतीति। द्रुह+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) पुत्रः। इति शब्दार्थकल्पतरुः॥ (द्रोहकारके, त्रि। यथा, ऋग्वेदे। ७। १०४। १७।

"नक्तमप द्रुहा तन्वं गूहमाना।"

"या राक्षसी नक्तं रात्रौ द्रुहा द्रोहेण युक्ता।" इति तद्भाष्ये सायनः॥)

द्रुहण्वः, पुं, (द्रुं संसारगतिं हन्तीति। हन्+अच्। "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) ब्रह्मा। इति भरतद्विरूपकोषः॥

द्रुहिणः, पुं, (द्रुह्यति दुष्टेभ्य इति। द्रुह+"बहुलमन्यत्रापि।" उणां २। ४६। इति इनन्। गुणाभावश्च।) ब्रह्मा। इत्यमरः। १।१।१७॥ (यथा, देवीभागवते। १।८।२८।

"द्रुहिणे सृष्टिशक्तिञ्च हरौ पालनशक्तिता॥")

द्रुही, स्त्री, (द्रुह्यति पित्रे विवाहकालीनधनाग्रहणादिना। द्रुह+कः। ततो ङीष्।) दुहिता। इति शब्दार्थकल्पतरुः॥

द्रू, गं ग ण वधे गतौ। इति कविकल्पद्रुमः॥ (स्वां-क्रां च-उभं-सकं-सेट्।) ग ण, द्रूणोति द्रूणुते। ग ण, द्रूणाति द्रूणीते। इति दुर्गादासः॥

द्रूः, पुं, (द्रवति स्रवतीति। द्रु+"क्विप् वचिप्रच्छीति।" उणां २।५७। इति क्विप् दीर्घश्च।) स्वर्णम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

द्रूघणः, पुं, (द्रूघणः। पृषोदरादित्वात् दीर्घः।) हनुः। इति भरतद्विरूपकोषः संक्षिप्तसारश्च॥

द्रूणः, पुं, (द्रूणः। पृषोदरादित्वात् दीर्घः।) हनुः। इक्षिकः। इति शब्दार्थकल्पतरुः॥

द्रेक, ङ्क ङ स्वनोत्साहे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) तवर्गलतीयादिः। रेफयुक्तः। द्वावर्थौ। उत्साहो दृढ्रिरिति चन्द्रः। औन्नत्यमिति चौरस्वामी। ङ, व्यद्रिद्रेकत्। ङ, द्रेकते लोकः शब्दायते उत्सहते वेत्यर्थः। स्वनेनोत्साहः स्वनोत्साहः। स्वनेनोत्साहः। तच्छब्दे शब्दनोत्सहते इत्यर्थः। इति दुर्गादासः॥

द्रेकः } पुं, लम्बतीयभागैकभागः। यथा,
द्रेकाणः } ज्योतिस्तत्त्वे।

"खपञ्चनवमानां ये राशीनामधिपा यदाः। ते द्रेकाणाधिपा ज्ञेया द्रेकाणास्तय एव हि॥"

द्रै, खप्ने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) द्रायति। इति दुर्गादासः॥

द्रोणः, पु, क्ली, (द्रवतीति। द्रु गतौ+"कृवृजिसिद्रुस्फुन्यनिखनिभ्यो नित्।" उणां ३। १०। इति नः।) आढकपरिमाणम्। आढकचतुष्टयम्। इति शब्दरत्नावली॥ ३२ शेर इति लौकिकमानम्। तत्पर्य्यायः। घटः २ कलसः ३ उन्मानम् ४ लक्षणः ५ अर्म्मणः ६। इति वैद्यकपरिभाषा॥ "द्रोणस्तु खार्य्याः खलु षोड्शांशः।" इति लीलावती॥ (अरणीकाष्ठम्। यथा, ऋग्वेदे। ६।२।८।

"क्रत्वा हि द्रोणे अध्यसेऽग्ने वाजी न जिग्युषः।"

"हे अग्ने क्रत्वा कर्म्मणा मन्थनरूपेण द्रोणे द्रुमे काष्ठेऽरण्यां विद्यमानस्त्वमध्यसे हि।" इति तद्भाष्ये सायनः॥ काष्ठनिर्म्मितकलशः। यथा, तत्रैव। ६।३७।२।

"प्रो द्रोणे हरयः कर्म्मागमन् पुनानास ऋज्यन्तो अभूवन्॥"

"द्रोणे द्रोणकलशे ऋज्यन्त ऋजु गच्छन्तोऽभूवन्।" इति सायनः॥ द्रुममयरथः। इति निरुक्तम्। ५। २६॥ यथा, ऋग्वेदे।६।४४।२०।

"आ ते वृषन् वृषणो द्रोणमक्षुः।"

"द्रोणं द्रुममयं रथमक्षुः।" इति सायनः॥)

द्रोणः, पुं, (द्रोणः कलस उत्पत्तिस्थानत्वेनास्यास्य। द्रोण+अच्।) द्रोणाचार्य्यः। (अयं कुरुपाण्डवानां आचार्य्यः। अस्य पिता भरद्वाजः। अस्य जन्मवृत्तान्तं यदुक्तं महाभारते। १। १३१। ६-१६।

"गङ्गाद्वारं प्रति महान् बभूव भगवानृषिः। भरद्वाज इति ख्यातः सततं संशितव्रतः॥ सोऽभिषेक्तुं ततो गङ्गां पूर्व्वमेवागमन्नदीम्। महर्षिभिर्भरद्वाजो हविर्द्धाने चरन् पुरा॥ ददर्शाप्सरसं साक्षात् घृताचीमाप्लुतान्दधिः। रूपयौवनसम्पन्नां मदहृतां मदालसाम्॥ तस्याः पुनर्नदीतीरे वसनं पर्य्यवर्त्तत। अपक्रष्टाम्बरां दृष्ट्वा तान्दधिश्चकमे ततः॥ तत्र संसक्तमनसो भरद्वाजस्य धीमतः। ततोऽस्य रेतश्चस्कन्द तद्दधिर्द्रोण आदधे॥ ततः समभवद्द्रोणः कलसे तस्य धीमतः। अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्व्वशः॥ अग्निवेशं महाभागं भरद्वाजः प्रतापवान्। प्रत्यपादयदाग्नेयमस्त्रमस्त्रविदांवरः॥ अग्नेस्तु जातः स तु निशातो भरतसत्तम!। भारद्वाजं तदाग्नेयं महास्त्रं प्रत्यपादयत्॥" अस्य पत्नी कृपाचार्य्यभगिनी कृपी पुत्रस्तु अश्वत्थामा। अयं हि भारतयुद्धे दुर्य्योधनस्य पक्षमवलम्ब्य पञ्चदशदिनं यावत् युद्धमकरोत्। तत्र पूर्व्वं दशदिनं भीष्मदेवस्यार्द्धनत्वेन स्थित्वा पश्चादस्य शरशय्याशरणागमनानन्तरं एकादशदिनात् स्वयं सेनापतिरभवत्। तत एनं अधर्म्मयुद्धनिरतं दृष्ट्वा ऋषयः समागत्य सम्यगं ऋतुकालं विज्ञापयामासुः। यथा, महाभारते। ७।१८८। ४६-५२।

"त एनमब्रुवन् सर्व्वे द्रोणमाहवशोभिनम्। अधर्म्मतः कृतं युद्धं समयो निधनस्य ते॥ न्यस्यायुधं रणे द्रोण! समीक्ष्याक्षानवस्थिताम्। जातः क्रूरतरं कर्म्म पुनः कर्त्तुमिहार्हसि॥

वेदवेदाङ्गविदुषः सत्यधर्म्मरतस्य ते ।
ब्राह्मणस्य विशेषेण तवैतन्नोपपद्यते ॥
त्यजायुधममोघेषो ! तिष्ठ वत्मनि ब्राह्मणे ।
परिपूर्णश्च कालस्ते वस्तुं लोके त्वमायुषे ॥
ब्रह्मास्त्रेण त्वया दग्धा अनस्त्रज्ञा नरा युधि ।
यदेतदीदृशं विप्र ! कृतं कर्म्म न साधु तत् ॥
नास्यायुधं रणे क्षिप्रं द्रोण ! मा त्वं चिरं कृथाः ।
मा पापिष्ठतरं कर्म्म करिष्यसि पुनर्द्विज ! ॥"
अयं हि जमदग्निप्रभृतिभिरुक्तो व्यस्तश्चस्त्रश्च द्रुपदपुत्रेण धृष्टद्युम्नेन निहतः । यथा, तत्रैव । ७ । १६० । २२—४० ।
"तस्य तच्छिद्रमाज्ञाय धृष्टद्युम्नः प्रतापवान् ।
सशरं तद्धनुर्घोरं संन्यस्याथ रथे ततः ।
खड्गी रथादवप्लुत्य सहसा द्रोणमभ्ययात् ॥
हाहाकृतानि भूतानि मानुषाणीतराणि च ।
द्रोणं तथागतं दृष्ट्वा धृष्टद्युम्नवशं गतम् ॥
हाहाकारं भृशञ्चक्रुरहो धिगिति चाब्रुवन् ।
द्रोणोऽपि शस्त्राण्युत्सृज्य परमं ब्राह्ममास्थितः ॥
तथोक्त्वा योगमास्थाय ज्योतिर्भूतो महातपाः ।
पुराणं पुरुषं विष्णुं जगाम मनसा परम् ॥
सेखं किञ्चित्समुन्नाम्य विष्टभ्य उरमयतः ।
निमीलिताक्षः सत्त्वस्थो निक्षिप्य हृदि धारणाम् ॥
ओम् इत्येकाक्षरं ब्रह्म ज्योतिर्भूतो महातपाः ।
स्मरित्वा देवदेवेशमक्षरं परमं विभुम् ॥
दिवमाक्रामदाचार्य्यः सद्भिः सह दुराक्रमम् ।
द्वौ सूर्य्याविव नो बुद्धिरासीत्तस्मिंस्तथागते ॥
एकाग्रमिव चासीच्च ज्योतिर्भिः पूरितं नभः ।
समपद्यदथार्कांभं द्रोणस्य निधने तथा ॥
निमेषमात्रेण च तज्ज्योतिरन्तरधीयत ।
आसीत् किलकिलाशब्दः प्रहृष्टानां दिवौकसाम् ।
ब्रह्मलोकं गते द्रोणे धृष्टद्युम्ने च मोहिते ॥
वयमेव तदाद्राक्ष्म पञ्च मानुषयोनयः ।
योगयुक्तं महात्मानं गच्छन्तं परमां गतिम् ॥
अहं धनञ्जयः पार्थः कृपः शारद्वतस्तथा ।
वासुदेवश्च वार्ष्णेयो धर्म्मपुत्रश्च पाण्डवः ॥
अथे तु सर्व्वे नापश्यन् भारद्वाजस्य धीमतः ।
महिमानं महाराज ! योगयुक्तस्य गच्छतः ॥
ब्रह्मलोकं महद्दिव्यं देवगुह्यं हि तत्परम् ।
गतिं परमिकां प्राप्तमजानन्तो वृथोनयः ।
नापश्यन् गच्छमानं हि तं भारद्वाजपुङ्गवैः ।
आचार्य्यं योगमास्थाय ब्रह्मलोकमरिन्दमम् ॥
वितुन्नाङ्गं शरव्रातैर्व्यस्तायुधमरक्षकम् ।
धिक्कृतः पार्षतस्तस्तु सर्व्वभूतैः पराङ्मुखः ॥
तस्य मुहूर्त्तमालम्ब्य गतसत्त्वस्य देहिनः ।
किञ्चिदभ्युद्यतः कायादिषुकर्त्तासिना शिरः ॥"
"क्रोशमानेऽर्जुने चैव पार्थिवेषु च सर्व्वशः ।
धृष्टद्युम्नोऽवधीद्द्रोणं रथतल्पे नरर्षभम् ॥
शोणितेन परिक्लिन्नो रथाङ्गमिरिन्दमः ।
लोहिताङ्ग इवादित्यो दुर्द्धर्षः समपद्यत ॥"*॥)
दग्धकाकः । इति मेदिनी । णे, १७ ॥ (यदुक्तम् ।
"के शब्दं कुर्वतं दृष्ट्वा द्रोणो हर्षसुपागतः ।
रुदन्ति पाण्डवाः सर्व्वे हाहा के शब्द के शब्द ॥")
दुष्किकः । इति राजनिर्घण्टः ॥ चतुःघृतधृतः-परिमितजलाढ्यः । यथा, घृतेन घृतैः पुष्करिणी । चिभिः घृतैर्दोधिका । चतुर्भिर्द्रोणः । पञ्चभिस्तडागः । द्रोणाद्द्विगुणा वापी । इति जलाढ्यतत्त्वम् ॥ मेघनायकः । यथा,—
"त्रिद्युते द्यावर्षे तु चतुर्भिः प्रेरितः क्रमात् ।
आवर्त्तो विद्धि सम्वर्त्तः पुष्करं द्रोणमम्बुदम् ॥
आवर्त्तो निर्जलो मेघः सम्वर्त्तश्च बहूदकः ।
पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः ॥"
इति ज्योतिस्तत्त्वम् ॥
श्वेतवर्णश्चुद्रपुष्पवृक्षविशेषः । चलचसिया इति हलकसिया इति च भाषा ॥ यथा,—
"ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम् ।
तस्मै दुर्गे ! प्रयच्छामि पवित्रन्ते सुरेश्वरि ! ॥"
इति स्वार्थकृतदुर्गापूजाप्रयोगः ॥
(शाकद्वीपान्तर्गतपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ५६ ।
"चतुर्थः पर्व्वतो द्रोणो यत्रौषध्यो महागिरौ ।
विशल्यकरणी चैव सञ्जीवनी तथा ॥"
वसुपुत्रविशेषः । यथा भागवते । ६ । ६ । ११ ।
"वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ।
द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वास्तुर्विभावसुः ॥")
द्रोणकाकः, पुं, (द्रोण एव काकः ।) वनकाकः । दाँड़काक इति भाषा । तत्पर्य्यायः । काकोलः २ । इत्यमरः । २ । ५ । २९ ॥ द्रोणः ३ अरण्यवायसः ४ वनवासी ५ महाप्राणः ६ क्रूरराबी ७ पलप्रियः ८ । इति राजनिर्घण्टः ॥ काकलः ९ । इति शब्दरत्नावली ॥
द्रोणगन्धिका, स्त्री, (द्रोणस्य द्रोणपुष्पस्य गन्ध इव गन्धो यस्याः । कप् । टापि अत इत्वम् ।) राखा । इति चटाधरः ॥
द्रोणघा, स्त्री, (द्रोणदुघा । पृषोदरादित्वात् दुलोपः ।) द्रोणदुघा । इति शब्दचन्द्रिका ॥
द्रोणदुग्धा, स्त्री, (द्रोणपरिमितं दुग्धं यस्याः ।) द्रोणक्षीरा । इति हैमचन्द्रः । ४ । ३३५ ॥
द्रोणदुघा, स्त्री, (द्रोणं दोग्धीति । दुह+"दुहः कप् घश्च ।" ३।२।७०। इति कप् घश्चान्तादेशः ।) द्रोणपरिमितदुग्धदात्री गवी । तत्पर्य्यायः । द्रोणक्षीरा २ । इत्यमरः । २।९ । ७२ ॥ द्रोणमाना ३ द्रोणघा ४ पयस्विनी ५ । इति शब्दचन्द्रिका ॥ द्रोणदुग्धा ६ । इति हैमचन्द्रः । ४ । ३३५ ॥ द्रोणमानपयस्विनी ७ । इति शब्दरत्नावली ॥
द्रोणपुष्पी, स्त्री, (द्रोणवत् पुष्पं यस्याः ङीष् ।) क्षुद्रक्षुपविशेषः । गूमा इति ख्याता । तत्पर्य्यायः । खर्व्वपत्रा २ कुम्भयोनिः ३ कुरुम्बिका ४ चित्राक्षुपः ५ कुरुम्बा ६ सुपुष्पा ७ चित्रपत्रिका ८ । इति राजनिर्घण्टः ॥ द्रोणा ९ फलेपुष्पा १० । इति भावप्रकाशः ॥ अस्या गुणाः । कटुत्वम् । उष्णत्वम् । रूक्षत्वम् । वातकफाग्निमान्द्यपक्षतनाशित्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । स्वादुत्वम् । रूक्षत्वम् । वातपित्तकारित्वम् । सत्वारत्वगुणत्वम् । स्वादुपाकित्वम् । मेदकत्वम् । आमकामलाश्लीपतमकश्वासजन्तुनाशित्वञ्च । इति भावप्रकाशः ॥ गोश्लीर्षकवृक्षः । इति रत्नमाला ॥ चलचसिया इति भाषा । अस्य गुणः । कफार्शःकामलाक्रिमिश्लीपनाशित्वम् । इति राजवल्लभः ॥
द्रोणमाना, स्त्री, (द्रोणो मानं दुग्धस्य यस्याः ।) द्रोणदुघा । इति शब्दचन्द्रिका ॥
द्रोणसुखं, क्ली, चतुःघृतग्राममधे मनोहरग्रामः । इति हारावली । १२० ॥
द्रोणस्थः, त्रि, (द्रोणं द्रोणपरिमितं पचतीति । द्रोण+पच+"परिमाणे पचः ।" ३ । २।३३। इति खश् ।) द्रोणपरिमितवस्तुपाककर्त्ता । इति सुग्धबोधव्याकरणम् ॥
द्रोणा, स्त्री, (द्रोण+टाप् ।) द्रोणपुष्पी । इति भावप्रकाशः ॥
द्रोणाचार्य्यः, पुं, (द्रोण एव आचार्य्यः ।) भरद्वाजपुत्रः । सः अश्वत्थामपिता कुरौपतिः । पाण्डवानामस्त्रशिक्षागुरुश्च । तत्पर्य्यायः । द्रोणः २ गुरुः ३ आचार्य्यः ४ कौरविभाक् ५ भारद्वाजः ६ कुम्भयोनिः ७ द्रोणाचार्य्यकः ८ । इति शब्दरत्नावली ॥ (विशेषविवरणमस्य द्रोणशब्दे द्रष्टव्यम् ॥)
द्रोणिः, स्त्री, (द्रवतीति । द्रु गतौ+"वहिश्रिश्रुयुद्रुस्रुभ्य इः ।" उणा ४।५१ । इति निः स च नित् ।) द्रोणी । इत्यमरटीकायां भरतः ॥ (पुं, अश्वत्थामा । स तु अष्टममन्वन्तरगतानां ऋषीणामन्यतमः । यथा, मार्कण्डेये । ८० । ४ ।
"ऋष्यशृङ्गकृपा द्रोणिस्तच सप्तर्षयोऽभवन् ॥")
द्रोणिका, स्त्री, (द्रोणिरिव कायति प्रकाशते इति । कै+क+टाप् ।) नीलीवृक्षः । इति शब्दरत्नावली ॥
द्रोणी, स्त्री, (द्रोणि+ऋदिकारादिति वा ङीष् ।) देशविशेषः । काष्ठाम्बुवाहिनी । गदादनी । इति मेदिनी । णे, १७ ॥ (कलशाकारपात्रविशेषः । यथा, महाभारते । १ । ६३ । १०३ ।
"भरद्वाजस्य च स्कन्नं द्रोण्यां शुक्रमवर्द्धत ॥")
नीलीवृक्षः । इति शब्दरत्नावली ॥ शैलभेदः । शैलयोः सन्धिः । इति हैमचन्द्रः । ४ । २०० ॥ इन्द्रचिर्भिटी । द्रोणीलवणम् । इति राजनिर्घण्टः ॥ नदीविशेषः ॥ इत्युणादिकोषः ॥ द्विरूपपरिमाणम् । १२८ शेर इति भाषा । तत्पर्य्यायः । वाहः २ गोणी ३ । इति वैद्यकपरिभाषा ॥
द्रोणीदलः, पुं, (द्रोण्या इव दलं यस्य ।) केतकीपुष्पः । इति हारावली । ६२ ॥
द्रोणीसुखं, क्ली, (द्रोण्यां इव सुखं यस्य ।) द्रोणसुखम् । इति भूरिप्रयोगः ॥
द्रोणीलवणं, क्ली, (द्रोणीसम्भूतं लवणम् ।) उपकर्षाटदेशप्रसिद्धलवणविशेषः । तत्पर्य्यायः । द्रोणेयम् २ वार्द्धेयम् ३ द्रोणीजम् ४ वारिजम्

५ वार्ड्डिभवम् ६ द्रोणी ७ त्रिकूटलवणम् ८। अस्य गुणाः। पाकेनाल्पगुणत्वम्। अविदाहित्वम्। भेदनत्वम्। स्निग्धत्वम्। मूलनाग्नित्वम्। अल्पपित्तलत्वञ्च। इति राजनिर्घण्टः॥

द्रोहः, पुं, (द्रुह्+भावे घञ्।) जिघांसा। अनिष्टचिन्तनम्। तत्पर्य्यायः। अपक्रिया २। इति हेमचन्द्रः।६।१५१॥ यथा, कूर्म्मपुराणे।

"देवद्रोहाद्गुरोर्द्रोहः कोटिकोटिगुणाधिकः॥"

(हन्त्रवधः। यथा, मनौ। ७। ४८।

"पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजञ्चापि पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥"

"द्रोहस्त्र्यवधः।" इति तट्टीकायां कुल्लूकभट्टः॥)

द्रोहचिन्तनं, क्ली, (द्रोहस्य चिन्तनम्।) परानिष्टचिन्ता। तत्पर्य्यायः। आपादः २। इत्यमरः। १। ५। ४॥

द्रोहाटः, पुं, (द्रोहाय अटतीति। अट्+अच्।) गाथाप्रभेदः। ऋगलुब्धकः। वेड़ालव्रतिकः। इति मेदिनी। टे, ४६॥

द्रोही, [न्] पुं, (द्रोहोऽस्यास्तीति इनिः। यद्वा, द्रुह्यतीति णिनिः।) द्रोहकः। परानिष्टचिन्तकः। यथा,—

"मित्रद्रोही कृतघ्नश्च ये च विश्वासघातकाः।
ते नरा नरके यान्ति यावच्चन्द्रदिवाकरौ॥"

इति सर्ब्बमिरोपाख्यानम्॥

(यथा च, कथासरित्सागरे। ५। ६३॥

"तच्छ्रुत्वाचिन्तयद्राजा नूनं द्रोही स एव मे॥")

द्रौणायनः, पुं, (द्रोणस्यापत्यम्। द्रोण+फक्।) अश्वत्थामा। इति त्रिकाण्डशेषः॥

द्रौणिः, पुं, (द्रोणस्यापत्यम्। द्रोण+इञ्।) अश्वत्थामा। इति शब्दरत्नावली॥ (यथा, महाभारते। ४। ५६। ७४।

"आहत्य तु महाबाहुर्यतो द्रौणिर्व्यतिष्ठतो ह्यान्॥"

अयं हि एकोनचित्रशद्द्वापरयुगस्य व्यासः। यथा, देवीभागवते। १। ३। २३।

"एकोनत्रिंशत्तमे प्राप्ते द्रौणिर्व्यासो भविष्यति॥")

द्रौणिक, त्रि, (द्रोणस्य द्रोणपरिमितबीजस्य वापः इति। द्रोण+"तस्य वापः।" ५। १। ४५। इति ठक्।) द्रोणपरिमितबीजवपनयोग्यक्षेत्रम्। इत्यमरः। २।४।१०॥ (द्रोणेन क्रीतः। निष्कादित्वात् ठक्। द्रौणक्रीतः॥ द्रोणं द्रोणपरिमितमन्नं पचतीति। द्रोण+"संभवत्यवहरति पचति।" ५। १। ५२। इति ठञ्। द्रौणपाचकः। इति सिद्धान्तकौमुदी॥)

द्रौपदी, स्त्री, (द्रुपदस्यापत्यं स्त्री। द्रुपद+अण्। ङीप्।) द्रुपदराजकन्या। तत्पर्य्यायः। याज्ञसेनी २ कृष्णा ३ सैरिन्ध्री ४ नित्ययौवना ५ वेदिजा ६ यज्ञसेनी ७। इति हेमचन्द्रः। ३। ३७४॥ अस्याः पञ्चस्वामिकारणं यथा,—

वह्निरुवाच।

"शृणु राम! महाभाग! सीतासंगोपनं कुरु।
समाहाभ्यन्तरे चैव रावणो दुष्टराक्षसः।
दुर्निवार्य्यः प्राक्तनेन जानकीञ्च हरिष्यति॥

राम उवाच।

सीतां गृहीत्वा त्वं गच्छ छायाञ्चैव तु तिष्ठतु।
कलत्रवर्ज्जनं कर्म्म सर्ब्बेषाञ्च जुगुप्सितम्॥
सीतां गृहीत्वा प्रययौ रुदन्तीञ्च हुताशनः।
सीतायाः सदृशी छाया तस्थौ श्रीरामसन्निधौ॥
सा च छाया कृता पूर्ब्बं रावणेन बलीयसा।
समुद्धार तां रामो निहत्य तं सबान्धवम्॥
वह्नौ परीक्षाकाले च छाया वह्नौ विवेश ह।
अग्निश्छायाञ्च संरक्ष्य ददौ रामाय जानकीम्॥
सा च छाया तपश्चक्रे नारायणसरोवरे।
तपश्चकार दिव्यञ्च शतवर्षञ्च शूलिनः॥
वरं वृणुष्व भद्रे! तमुवाच शङ्करश्च ताम्।
उवाच सा शिवं यथा भर्त्तुर्दुःखेन दुःखिता॥
पतिरन्देहि पञ्चधा या वरं वव्रे त्रिलोचनम्।
सर्ब्बसम्मतपद्मस्तुरक्षस्वे शूर्व्वी वरं ददौ॥

महादेव उवाच।

साध्वि! त्वं पञ्चधा ब्रूहि पतिरन्देहीति व्याकुला।
पञ्चेन्द्राश्च हरेरंशा भविष्यन्ति प्रियास्तव॥
ते च सर्ब्बे च पञ्चेन्द्राश्चाधुना पञ्च पाण्डवाः।
सा च छाया द्रौपदी च यज्ञकुण्डसमुद्भवा॥
कृते युगे वेदवती चेतायां जनकात्मजा।
द्वापरे द्रौपदी छाया तेन कृष्णा चिरायणी॥
वैश्यवी कृष्णभक्ता च तेन कृष्णा प्रकीर्त्तिता।
स्वर्गलक्ष्मीर्भविष्यन्ती सा च पञ्चाङ्गविष्यति॥
राजा ददौ फाल्गुनाय कन्यायाञ्च स्वयंवरे।
पप्रच्छ मातरं वीरो वस्तु प्राप्तं मयाधुना॥
तमुवाच स्वयं माता गृहाण भ्रातृभिः सह।
शुभ्रोर्वरेण पूर्ब्बञ्च परत्र मातुराज्ञया॥
द्रौपद्याः स्वामिनस्तेन हेतुना पञ्चपाण्डवाः।
चतुर्दशानामिन्द्राणां पञ्चेन्द्राः पञ्चपाण्डवाः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११५ अध्यायः॥

द्वन्द्वं क्ली, (द्वन्द्वं एवोदरादित्वात् वस्य लोपः।) मिथुनम्। इति शब्दरत्नावली॥

द्वन्द्वं, क्ली, (द्वौ द्वौ सहाभियत्तौ। "द्वन्द्वं रहस्यमर्य्यादावचन-व्युत्क्रमण-यज्ञपात्रप्रयोगाभिधानेषु।" ८। १। १५। इति द्विशब्दस्य द्विर्वचनं पूर्ब्बपदस्यामभावोऽत्वञ्चोत्तरपदस्य णत्वञ्च निपात्यते।) रहस्यम्। कलहः। (यथा, स्तोत्रे। ३। ३२।

"शतं दद्यान्न विवदेदिति प्राहस्य लक्षणम्।
विना हेतुमपि द्वन्द्वमेतन्मूर्खस्य लक्षणम्॥")

मिथुनम्। (यथा, रघुः। १। ४०।

"परस्परातिसादृश्यमदूरोन्नतिवर्त्मसु।
ऋगद्वन्द्वेषु पश्यन्तौ स्यन्दनावहतद्विषु॥")

युग्मम्। इति मेदिनी। वे, १०॥ (यथा, महाभारते। १। १३०। १५।

"द्वन्द्वयुद्धञ्च पार्थेन कर्त्तुमिच्छाम्यहं प्रभो!॥"

शीतोष्णादि। यथा, माघे। ४। ६४।

"सर्ब्बर्त्तुनिर्वृतिकरे निवसन्नुपेति
न द्वन्द्वदुःखमिह किञ्चिदकिञ्चनोऽपि॥")

दुर्गम्। (अत्र पुंस्त्वमपि।) अथ द्वन्द्वयुक्तिः।

"राज्ञो बलं न हि बलं द्वन्द्वमेव बलं बलम्।
अप्यल्पबलवान् राजा स्थिरो द्वन्द्वबलाद्भवेत्॥"

तथा च।

"एकः शतं योधयति प्राकारस्थो धनुर्द्धरः।
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते॥
अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत्।
यद्दैवसृष्टितं द्वन्द्वं गिरिनद्यादिसंश्रितम्।
अकृत्रिममिदं ज्ञेयं दुर्लङ्घ्यमरिभूभुजाम्॥
प्राकारपरिखारण्यसंश्रयं यद्भवेदिह।
कृत्रिमं नाम विज्ञेयं लङ्घालङ्घ्यञ्च वैरिणाम्॥"

तत्राकृत्रिमद्वन्द्वयुक्तिर्यथा,—

"अत्युच्चविस्तीर्णगिरौ दुरारोहः सकाननः।
सलिलाशयसम्भारभोज्यद्रव्यसमाश्रयः॥
सुखनिःसरणो द्वन्द्वः पर्व्वताख्यो महीभुजाम्।
नद्यो गभीरविस्तीर्णाश्चतुर्दिक्षु व्यवस्थिताः॥
तन्मध्ये भूप्रदेशो यो नदीद्वन्द्वः स उच्यते।
यदन्यच्चिरकालीनं दुर्लङ्घ्यविपिनादिकम्॥
तन्मध्यरचिता भूमिर्द्वन्द्वलेनोपतिष्ठते।
वनद्वन्द्वमिति ख्यातं यथापूर्ब्बं महत्तरम्॥"

कृत्रिमद्वन्द्वयुक्तिर्यथा,—

"यस्मिन् राज्ये गिरिर्नास्ति नद्यो वा गहनोदकाः।
तस्य मध्ये महीपालः कृत्रिमं द्वन्द्वमारभेत्॥
गजैरलङ्घ्या विस्तीर्णा गम्भीराः पूर्णवारयः।
द्वन्द्वलेन समादिष्टाः परिखा बहुयादसः॥
विशालशालं सुघनं बहुकण्टकिसङ्कटम्।
द्वन्द्वलेन समादिष्टं विस्तीर्णं विषमं बलम्॥
अधोऽधोवध्यमानोऽपि कन्दरोऽल्पजलं स्रवन्।
द्वन्द्वलेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम्॥
सर्ब्बतः परिखां कृत्वा निबन्धोपरि कन्दरम्।
तज्जलप्लुतदेशत्वात् जलद्वन्द्वं तदुच्यते॥
एषामभावे निम्नस्थ भूप्रदेशस्य बन्धनात्।
वर्षासु प्रवते वारि जलद्वन्द्वं ततो भवेत्॥
एतयोरपि संमिश्रात् संमिश्रं द्वन्द्वमाचरेत्।
आश्रित्य कृत्रिमं द्वन्द्वं बलवद्वैरिणो दिशि॥
अन्यच्च कृत्रिमं द्वन्द्वं कृत्वा नरपतिर्वसेत्।
रथपतिर्यदा वैरी स्थलद्वन्द्वं तदाचरेत्॥
गजाश्वनाथश्चेद्वैरी जलद्वन्द्वं तदाचरेत्।
गिरिद्वन्द्वं नृपः सेवेत् यस्य स्यादधिको रिपुः॥
सर्ब्बो हि त्रिविधो युद्धः समासादुपदिश्यते।
प्रतिराजस्य राज्यान्ते प्रकटे गुप्त एव च॥
राज्यान्ते सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम्।
गुप्ते स्त्रीकोषसम्भारं संरक्षेदिति निश्चयः॥"

अथ सामान्यतो गुणाः।

तथा हि। नीतिशास्त्रम्।

"सप्रवेशापसरणं द्वन्द्वसत्तमसुच्यते।
अन्यच्च वन्दिशालेव न ताडगवरोधमाश्रयेत्॥
धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च।
मनुष्यद्वन्द्वसंसर्गं वरद्वन्द्वञ्च तानि षट्॥"

अन्ये तु।

"न द्वन्द्वं द्वन्द्वमित्याहुर्योद्वृद्वन्द्वं प्रकीर्त्तितम्।
योद्वृशून्यं हि यत् द्वन्द्वं मृतकायसमं हि तत्॥"

अथाऽत्रापि।
"यावत् प्रमाणं नगरं हि राज्ञां
ततो भवेदुत्तममध्यमान्त्यम्।
चिंशत्तदर्द्धोत्तरयोत्तरेण
चिदेशचानां धरणीपतीनाम्॥"
गर्गस्तु।
"यदन्यद्विविधं द्वन्द्वं प्रोच्यते धरणीभुजाम्।
ताभ्यामेवातिरिच्येत मल्लद्वन्द्वं विशेषतः॥
अन्येषु देवाद् भिन्नेषु मल्लद्वन्द्वात् जयेन्नृपः।
मल्लद्वन्द्वे हि भिन्ने हि न चान्यत् कार्य्यकारकम्॥"
भोजस्तु।
"यदेव वैरिदुर्लक्षं विस्तीर्णं विषमञ्च तत्।
सप्रवेशापसरणं तद्वन्द्वमुत्तमं विदुः॥"
इति भोजराजकृतयुक्तिकल्पतरुः॥

द्वन्द्वः, पुं, (द्वौ द्वौ सहाभिधत्ते इति। निपातनात् साधुः। चार्थे द्वन्द्व इति निर्देशात् पुंस्त्वम्।) रोगविशेषः। समासभेदः। इति शब्दरत्नावली॥ स तु भिन्नार्थानां पदानां समासः। वोपदेवेनास्य चसंज्ञा कृता। स इतरेतरयोगसमाहारभेदेन द्विधा भवति। इतरेतरद्वन्द्वो यथा। हरिश्च हरश्च हरिहरौ। अत्र प्रत्येकपदप्राधान्यात् द्वित्वं बहुत्वं शेषशब्दलिङ्गभाजित्वञ्च भवति। समाहारद्वन्द्वो यथा। वाक् च त्वक् च द्वयोः समाहारः वाक्त्वचम्। अत्र संहतेरेकत्वादेकवचनं नित्यक्लीवलिङ्गत्वञ्च भवति। इति सुग्धबोधम॥ (यदुक्तं,— [भावः॥")
"द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययो-
द्वन्द्वचरः, पुं, (द्वन्द्वेन चरतीति। चर+अच्।) चक्रवाकः। इति हेमचन्द्रः। ४। ३६६॥ (यथा, रघुः। १६। ६३।
आवर्जशोभा नतनाभिकान्ते-
र्भङ्गो भुवां द्वन्द्वचराः स्तनानाम्।
जातानि रूपावयवोपमाना-
न्यपूरवस्तूनि विलासिनीनाम्॥")
द्वन्द्वचारी, [न्] पुं, (द्वन्द्वेन चरतीति। चर+णिनिः।) चक्रवाकः। इति चिकाण्डशेषः॥
द्वन्द्वजः, पुं, (द्वन्द्वात् जायते इति। जन+डः।) द्विदोषजरोगः। इति निदानम्॥ कलहजाते, त्रि॥
द्वयं, क्ली, (द्वौ अवयवौ यस्य। द्वि+"संख्याया अवयवे तयप्।" ५। २। ४२। इति तयप्। "द्वित्रिभ्यामयड्वायच्।" ५। २। ४३। इति तयस्यायच्।) द्वयात्मकम्। दुइ इति भाषा। तत्पर्य्यायः। उभौ २ द्वौ ३ युगलम् ४ द्वितयम् ५ युगम् ६ द्वैतम् ७ यमम् ८ द्वन्द्वम् ९ युग्मम् १० यमलम् ११ यामलम् १२। इति हेमचन्द्रः। ६। ५६॥
द्वयाधिः, पुं, (द्वयो द्विरूपोऽधिर्यत्र।) वृक्षभेदः। रोंचिता इति भाषा। तत्पर्य्यायः। प्राटी २ वृक्षाधिः ३। इति शब्दचन्द्रिका॥

द्वयातिगः, त्रि, (द्वयं अतिगच्छति अतिक्रामतीति। अति+गम+डः।) रजस्तमोगुणशून्यः। सत्त्वगुणयुक्तः। इत्यमरः। २। ७। ४५॥
द्वारः, [र्] क्ली, (द्वारयतीति। दृ वरणे+णिच्+बाहुलकात् किप्।) द्वारम्। इत्यमरः। २। २। १३॥ (यथा, भागवते। ३। ५। १।
"द्वारि द्युनद्या ऋषभः कुरूणां
मैत्रेयमासीनमगाधबोधम्॥")
उपायः। यथा, ज्ञानद्वारा भवेन्मुक्तिरिति ज्ञानशब्दे दृश्यम्॥
द्वारस्थः, पुं, (द्वारि तिष्ठतीति। स्था+कः।) द्वारपालः। इति शब्दरत्नावली॥ (यथा, भागवते। १। १८। ३४।
"ब्राह्मणैः क्षत्रबन्धुर्हि द्वारपालो निरूपितः।
स कथं तद्गृहे द्वारस्थः सभाजं भोक्तुमर्हति॥")
नन्दिकेश्वरः। इति भूरिप्रयोगः॥
द्वारःस्थितः, त्रि, (द्वारि स्थितः।) द्वारपालः। इत्यमरकोषशब्दरत्नावल्यौ॥
द्वारःस्थितदर्शकः, त्रि, (द्वारःस्थितः सन् पश्यतीति। दृश्+ण्वुल्।) द्वारपालः। इत्यमरटीकायां भरतः॥
द्वारःस्थितदर्शी, [न्] त्रि, (द्वारि स्थितः सन् पश्यतीति। दृश्+णिनिः।) द्वारपालः। इति भरतधृतहरिवंशः॥
द्वाचत्वारिंशत्, स्त्री, (द्व्यधिका चत्वारिंशत्। द्विशब्दस्य वा आत्वम्।) द्विचत्वारिंशत्। इति व्याकरणम्॥ ४२ बेयालिश इति भाषा॥
द्वाचिंशत्, स्त्री, (द्व्यधिका विंशत्। "द्वादशन्। संख्यायामिति।" ६। ३। ४७। इति आत्वम्।) द्व्यधिकविंशत् संख्या। ततुसंख्येयाच्च। ३२ बत्तिश इति भाषा। यथा, द्वाचिंशत्प्रसवे नार्य्याश्चतुस्त्रिंशद्दृगमे वृषाभित्यादि ज्योतिस्तत्त्वम्॥
द्वाचिंशद्वरी, [न्] पुं, (द्वाचिंशद्वराणि सन्ति अत्र। बाहुलकात् इनिः।) यत्यः। इति चिकाण्डशेषः॥
द्वाचिंशल्लक्षणोपेतः, पुं, (द्वाचिंशल्लक्षणैरुपेतः।) महापुरुषः। इति शब्दार्थकल्पतरुः॥ तल्लक्षणानि यथा,—
"रागः सप्तसु चाष्टसपि शिरोरङ्घ्रेर्बलं तुङ्गता
विस्तारश्चिषु खर्व्वता त्रिषु तथा गम्भीरता च त्रिषु।
दैर्घ्यं पञ्चसु किञ्च पञ्चसु सखे! संश्लेष्यते सूक्ष्मता
द्वाचिंशद्वरलक्षणः कथमसौ गोपेषु सम्भाव्यते॥"
इति श्रीहरिभक्तिरसाब्धतसिन्धुः॥
"राग इति। श्रीमद्व्रजेश्वरं प्रति कस्यचित् सवयसो गोपस्य वाक्यमिदम्। सप्तसु नेत्रान्तप्रादकरतललाक्षधरौष्ठजिह्वानखेषु षट्सु वक्षःस्थलनखनासिकाकटिमुखेषु। त्रिषु कटिललाटवक्षःसु। केचित् कटिस्थाने शिरः पठन्ति।

पुनस्त्रिषु शीवाजङ्घाभेहनेषु। पुनस्त्रिषु नाभिस्वरसत्त्वेषु। पञ्चसु नासाभुजनेत्रहनूजानुषु। पुनः पञ्चसु त्वक्केशरोमदन्तास्थ्यङ्गुलिपर्व्वसु। तथैव महापुरुषलक्षणे सासृक्कण्यग्रन्थप्रसिद्धेः। द्वाचिंशद्वराणि तल्लक्षणेभ्यः अन्येभ्योऽपि श्रेष्ठानि लक्षणानि यस्य सः गोपेषु कथमिति भगवदवतारादिषु अप्येतादृशत्वाश्रवणादिति भावः।" इति श्रीजीवगोस्वामिविरचिता दुर्गमसङ्गमनीनाम्नी टीका॥
द्वादश, [न्] त्रि, (द्व्यधिका दश। "द्वादशन्। इति।" ६। ३। ४७। इति आत्वम्।) द्व्यधिका दश। १२ बार इति भाषा। द्वादशसंख्या ततुसंख्येयाच्च। अयं नित्यबहुवचनान्तः। त्रिलिङ्गे समानरूपः। इति व्याकरणम्॥ द्वादशवाचकानि यथा। सूर्य्यः १ मासः २ राशिः ३ संक्रान्तिः ४ गुहबाहुः ५ सारिकोष्ठः ६ गुहनेत्रम् ७ राशमण्डलम् ८। इति कविकल्पलता॥
द्वादशः, त्रि, (द्वादशानां पूरणः। "तस्य पूरणे डट्।" ५। २। ४८। इति डट्।) द्वादशानां पूरणः। इति व्याकरणम्॥ बारइ इति भाषा। (यथा, मनुः।
"गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः॥"
महादेवः। यथा, महाभारते। १३। १७। ६३।
"द्वादशस्याग्नयश्चादौ यज्ञो यज्ञसमाहितः॥")
द्वादशकरः, पुं, (द्वादश करा भुजा यस्य।) द्वादशतिः। इति चिकाण्डशेषः॥ कार्त्तिकेयश्च॥
द्वादशपञ्चकं, क्ली, (द्वादश अक्षराणि मन्त्राणि इव यस्य।) योगविशेषः। यथा,—
"पितामहोऽपि तं पुत्रं साध्यं सनिधये रतम्।
सनत्कुमारं प्रोवाच योगं द्वादशपञ्चकम्॥
शिखासंस्थानु ओंकारं मेधोऽस्य शिरसि स्थितः।
मासो वैशाखनामा च प्रथमं पञ्चकं स्मृतम्॥
नकारः शिरसि प्रोक्तो द्वयोऽस्य शिरसि स्थितः।
ज्येष्ठमासश्च तत् पञ्चं द्वितीयं परिकीर्त्तितम्॥
मोकारो भुजयोर्युग्मं मिथुनं तच्च संस्थितम्
मास आषाढ़नामा च तृतीयं पञ्चकं स्मृतम्॥
भकारो नेत्रयुगलं कर्कटस्तत्र संस्थितः।
मासः श्रावण इत्युक्तश्चतुर्थं पञ्चकं स्मृतम्॥
गकारो हृदयं प्रोक्तं सिंहो वसति तत्र च।
मासो भाद्रस्तथा प्रोक्तः पञ्चमं पञ्चकं स्मृतम्॥
वकारं कथितं विद्यात् कन्या तत्र प्रतिष्ठिता।
मासश्चाश्वयुजो नाम षष्ठं ततुपञ्चकं स्मृतम्॥
तेकारमन्त्रयामश्च तुलाराशिश्रितोऽयवः।
मासश्च कार्त्तिको नाम सप्तमं पञ्चकं स्मृतम्॥
वाकारो नाभिसंयुक्तः स्थितस्तत्र च वृश्चिकः।
मासो मार्गशिरो नाम त्वष्टकं पञ्चकं स्मृतम्॥
सुकारो जघनः प्रोक्तस्तत्रस्थश्च धनुर्धरः।
पुष्येति गदितो मासो नवमं परिकीर्त्तितम्॥
देकारश्चोरुयुगलं मकरोऽप्यत्र संस्थितः।
माघो निगदितो मासः पञ्चकं दशमं स्मृतम्॥
वाकारो जानुयुगलं कुम्भस्तत्रापि संस्थितः।

पत्रकं फाल्गुनः प्रोक्तं तदेकादशसुत्तमम् ॥
पादौ यकारो मीनो हि स चेत्ते वसते सुने ! ।
इदन्तु द्वादशं प्रोक्तं पत्रं वै केशवस्य हि ॥
द्वादशारन्तथा चक्रं यत्राभिद्विभुजन्तथा ।
त्रिपृष्ठन्त्वेकमूर्त्तिञ्च तथोक्तः परमेश्वरः ॥
एतत्तवोक्तं देवस्य रूपं द्वादशपत्रकम् ।
यस्मिन् ज्ञाते मुनिश्रेष्ठ ! न भूयो मरणं भवेत् ॥"
इति वामनपुराणेऽष्टषष्टितमोऽध्यायः ॥

द्वादशलोचनः, पुं, (द्वादश लोचनानि नेत्राणि यस्य । बहुव्रीहौ देवास्य तथात्वम् ।) कार्त्तिकेयः । इति त्रिकाण्डशेषः ॥

द्वादशांशुः, पुं, (द्वादश अंशवः किरणानि यस्य ।) दृढसूतिः । इति भूरिप्रयोगः ॥ (यदुक्तं मात्स्ये । १२७ । ५५ ।
"लोहितो नवरश्मिस्तु स्थापमापन्न तस्य वै ।
दृष्ट्वा द्वादशरश्मीकं हरिद्राभन्तु वेधसः ॥")

द्वादशाक्षः, पुं, (द्वादश अक्षीणि यस्य ।) कार्त्तिकेयः । (द्वादशविषयेषु अक्षिणी यस्य ।) बुद्धः । इति हेमचन्द्रः । २ । १४८ ॥ (कार्त्तिकेयस्य अनुचरविशेषः । यथा, महाभारते । ६ । ४५ । ५६ ।
"एकाक्षो द्वादशाक्षश्च तथैवैकजटः प्रभुः ॥")

द्वादशाक्षरमन्त्रः, पुं, (द्वादश अक्षराणि अस्य । ताडशो मन्त्रः ।) द्वादशवर्णात्मकविष्णुविषयकमन्त्रविशेषः । यथा,—
"नमो भगवते वासुदेवायोङ्कारपूर्व्वकम् ।
महामन्त्रमिमं प्राहुस्तत्त्वज्ञा द्वादशाक्षरम् ॥"
इति आग्ने क्रियायोगसारः ॥

द्वादशाख्यः, पुं, (द्वादश ज्ञानकर्म्मादिविषयान् आख्यातीति । ख्या कथने + कः ।) बुद्धः । इति त्रिकाण्डशेषः ॥

द्वादशाङ्गुलः, पुं, (द्वादश अङ्गुलयः परिमाणमस्य । "ततपुरुषस्याङ्गुलेः संख्याव्ययादेः ।" ५ । ४ । ८६ । इति अच् ।) वितस्तिः । इत्यमरः । २ । ६ । ८४ ॥

द्वादशात्मा, [न्] पुं, (द्वादश आत्मानो मूर्त्तयो यस्य ।) सूर्य्यः । (यथा, महाभारते । ३ । ३ । २६ ।
"द्वादशात्मारविन्दाक्षः पिता माता पितामहः ॥")
अर्कवृक्षः । इत्यमरः ॥

द्वादशायुः, [स्] पुं, (द्वादशवर्षपर्य्यन्तं आयुर्यस्य ।) कुक्कुरः । इति शब्दमाला ॥

द्वादशार्चिः, [स्] पुं, (द्वादश अर्चींषि किरणानि यस्य ।) दृढसूतिः । इति हेमचन्द्रः । २ । ३२ ॥

द्वादशी, स्त्री, (द्वादश + टित्वात् ङीप् ।) तिथिविशेषः । सा चन्द्रस्य द्वादशकलाक्रियारूपा । सा च विष्णुतिथिः । यथा,—
"त्रैलोक्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदा प्रिया ।
द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते ॥
हुताशनो भवेद्यस्तु द्वादश्यां तत्परायणः ।
स्वर्गवासी स भवतु, पुमान् स्त्री वा विशेषतः ॥"
मार्गशीर्षीया शुक्लद्वादशी मत्स्यद्वादशी १ पौषी कूर्म्मद्वादशी २ माघी वराहद्वादशी ३ फाल्गुनी नृसिंहद्वादशी ४ चैत्री वामनद्वादशी ५ वैशाखी श्रीमद्द्वादशी ६ ज्यैष्ठी रामद्वादशी ७ आषाढ़ी शयनद्वादशी ८ श्रावणी वुद्धद्वादशी ९ भाद्री कल्किद्वादशी १० आश्विनी पद्मनाभद्वादशी ११ कार्त्तिकी नारायणद्वादशी १२ । एतासां नाम धरणीव्रतम् । एतत्करणे महापातकम् । इति वराहपुराणम् ॥

अथ पिपीतकद्वादशी । नारदीये ।
"वैशाखे शुक्लपक्षे तु द्वादशी वैष्णवी तिथिः ।
तस्यां प्रीतजलोयेन स्नापयेत् केशवं शुचिः ॥"
इयं पिपीतकद्वादशी । अत्र ।
"षष्ठीसमेता कर्त्तव्या सप्तमी नात्रभीयुता ।
पतङ्गोपासनायेह षष्ठ्यामाहुरुपोषणम् ॥
एकादश्यां प्रकुर्व्वन्ति उपवासं मनीषिणः ।
उपासनाय द्वादश्यां विष्णोर्यद्वदियं तथा ॥"
इति भविष्यपुराणेन एकादश्युपवासानन्तरं द्वादश्यां विष्णूपासनाया उक्तत्वात् । अत्रापि तथा सवत्सरन्नीति नाच दुग्मादरः । द्वादशीक्षये तूपवासानन्तर्य्ये विनापि पूजेति । इयं पूर्व्ववचनोक्ता षष्ठीयुता सप्तमी ॥ आषाढ़ादिद्वादशीषु व्रतयनादिकम् ॥ * ॥

अथ श्रवणद्वादशी ।
सा भाद्रशुक्लद्वादश्यामेव सम्भवति । "भविष्योत्तरे ।
'द्वादशी श्रवणोपेता सर्व्वपापहरा तिथिः ।
बुधवारसमायुक्ता ततः शतगुणा भवेत् ।
तासुपोष्य समाप्नोति द्वादशद्वादशीफलम् ॥'
उभयदिने तल्लाभे तु एकादशीयुतैव ग्राह्या ।
'द्वादशी च प्रकर्त्तव्या एकादश्यन्विता विभो ।
सदा कार्य्या च विद्वद्भिर्विष्णुभक्तैश्च मानवैः ॥'
इति स्कान्दात् ॥
यदा त्वेकादश्यामेव श्रवणा तदा तासुपवसेत् । तथा च नारदः ।
'याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः ।
तासेव तद्व्रतं कुर्य्यात् श्रवणद्वादशीं विना ॥'
भविष्योत्तरेऽपि ।
'एकादशी यदा तु स्यात् श्रवणेन समन्विता ।
विजया सा सदा प्रोक्ता भक्तानां विजयप्रदा ॥
तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
तावदेव न भोक्तव्यं यावन्नैकस्य संक्षयः ॥
विशेषेण महीपाल ! श्रवणं वर्त्तते यदि ।
तिथिक्षयेण भोक्तव्यं द्वादशीं नैव लङ्घयेत् ॥'
तिथिक्षयेण एकादशीतिथिक्षयेण भोक्तव्यं द्वादश्यां पारयेदित्यर्थः । अत्र हेतुर्द्वादशीमित्यादि । यदा त्वेकादश्युपवासदिने श्रवणं नास्ति परदिने द्वादश्यां श्रवणं तदोपवासद्वयमाह ब्रह्मवैवर्त्तः ।
'एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्देवता हरिः ॥'
अत्र असमाप्ते व्रते पूर्व्वे नैव कुर्य्याद्व्रतान्तरमिति स्मृतेः ॥ पारणस्याकरणेन पूर्व्वोपवासा-

समाप्तावुपवासान्तरारम्भे विधिलोपो न भवेदित्यर्थः; हेतुमाह उभयोरित्यादि । उभयोरुपवासासामर्थ्ये तु श्रवणद्वादश्येवोपोष्या । तथा च स्मृतिः ।
'वरमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत् ।
पूर्व्वोपवासजं पुण्यं सर्व्वं प्राप्नोत्यसंशयम् ॥
उपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण संयुताम् ।
एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयम् ॥'
द्वादश्युपवासः काम्यः । तथा च मार्कण्डेयपुराणम् ।
'द्वादश्यामुपवासेन शुद्धात्मा भूप ! सर्व्वदा ।
चक्रवर्त्तित्वमतुलं संप्राप्नोत्यतुलां श्रियम् ॥'
कार्त्तिकशुक्लद्वादशी मन्वन्तरा । "तथा च भविष्यव्रतस्थयोः ।
'अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा ।'
इत्यादिवचनात् ।" इति तिथितत्त्वम् ॥ * ॥
"अथ हायशुक्लद्वादशी अखण्डद्वादशी । तत्रोपोष्य विष्णुपदप्राप्तिकामोऽखण्डद्वादश्यां विष्णुं पूजयिष्ये इति संकल्प्य पञ्चगव्येन स्नापयित्वा यथाशक्त्युपचारेण संपूज्य यवत्रीहिपूर्णपात्रं गृहीत्वा ।
'ॐ सप्तजन्मसु यत्किञ्चिन्मया खण्डव्रतं कृतम् ।
भगवंस्तत्प्रसादेन तदखण्डमिहास्तु मे ॥
यथा खण्डं जगत् सर्व्वं त्वमेव पुरुषोत्तम ! ।
ततोऽखिलान्यखण्डानि व्रतानि मम सन्तु वै ॥'
इति प्रार्थ्य दक्षिणां दद्यात् ।" इति कृत्यचन्द्रिका ॥
भैमीपरद्वादश्यां षट्तिलाचरणम् । यथा विष्णुधर्म्मोत्तरे ।
"नभस्यमासे शुक्लपक्षे माघे मासि प्रणश्यते ! ।
एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः ।
द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते ॥
तिलस्नायी तिलोदर्त्ती तिलहोमी तिलोदकी ।
तिलस्य दाता भोक्ता च षट्तिली नावसीदति ॥
सकृत्तु षट्तिली भूत्वा सर्व्वपापैः प्रमुच्यते ।
चिंशद्वर्षसहस्राणि स्वर्गलोके महीयते ॥"

अथ गोविन्दद्वादशी ।
"फाल्गुने शुक्लपक्षस्य पुण्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥"
अत्र गङ्गायां पद्मपुराणीयो मन्त्रः ।
"महापातकसंज्ञानि यानि पापानि सन्ति मे ।
गोविन्दद्वादशीं प्राप्य तानि मे हर जाह्नवि ! ॥"
इति तिथ्यादितत्त्वम् ॥

अथ द्वादशीजातफलम् ।
"बहुप्रजः सर्व्वजनाद्दरागी
भूपालमान्यस्तिथिप्रियः स्यात् ।
चेत् द्वादशी यस्य जनस्य सूतौ
प्रवासशीलो व्यवहारदक्षः ॥"
इति कोष्ठीप्रदीपः ॥

द्वापरः, पुं, (द्वयोर्विषययोः परस्तात्परं आसक्तः इत्यर्थः । पृषोदरादित्वात् साधुः ।) सन्देहः । (द्वौ सत्यत्रेतायुगौ परौ श्रेष्ठौ यस्मात् ।) युगविशेषः । इत्यमरः । ३ । ३ । १६१ ॥ तद्युगपरिमाणं यथा,—

"अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु ।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम् ॥"
८६४,००० ॥ तस्य धर्म्मो यथा,—
"अत ऊर्द्धं प्रवक्ष्यामि द्वापरस्य विधिं पुनः ।
तत्र त्रेतायुगे शीर्णे द्वापरं प्रतिपद्यते ॥
द्वापरादौ प्रजानान्तु विद्विद्भतायुगे तु या ।
परिवृत्ते युगे तस्मिंस्तता सा विप्रणश्यति ॥
ततः प्रवर्त्तते तासां प्रजानां द्वापरे पुनः ।
लोभो धृतिर्वैषिगयुद्धं तत्त्वानामविनिश्चयः ॥
प्रध्वंसश्च वर्णानां कर्म्मणाञ्च विपर्य्ययः ।
यज्ञे वधः पशोर्दैष्टो मानो दर्पः क्षमा बलम् ॥
तथा रजस्तमो भूयः प्रवर्त्तते द्वापरे पुनः ।
आद्ये हते न धर्म्मोऽस्ति च त्रेतायां प्रवर्त्तितः ॥
द्वापरे व्याकुलो भूत्वा प्रणश्यति कलौ पुनः ।
वर्णानां द्वापरे ध्वंसः संक्षीयन्ते तथाश्रमाः ॥
त्रैधमुत्पद्यते चैव युगे तस्मिन् श्रुतौ स्मृतौ ।
विधा श्रुतिः स्मृतिश्चैव निश्चयो नाधिगम्यते ॥
अनिश्चयोऽधिगमनाद्धर्म्मतत्त्वं न विद्यते ।
धर्म्मतत्त्वे ह्यविज्ञाते मतिभेदस्तु जायते ॥
परस्परविभिन्नैस्तैर्दृष्टीनां विभ्रमेण तु ।
ततो दृष्टिविभिन्नैस्तैः कृतं शास्त्राकुलं त्विदम् ॥
एकं वेदं हि वै व्यासः संक्षेप्तुं तु पुनः पुनः ।
संक्षेपादायुषश्चैव दृश्यते द्वापरे त्विह ।
वेदश्चैकश्चतुर्द्धा तु व्यस्यते द्वापरादिषु ॥
ऋषिपुत्रैः पुनर्भेदाद्विद्यन्ते दृष्टिविभ्रमैः ।
मन्त्रब्राह्मणविन्यासैः स्वरक्रमविपर्य्ययैः ॥
संहिता ऋग्यजुःसाम्नां सहितास्तैः श्रुतर्षिभिः ।
सामान्यादेकतश्चैव दृष्टिभिन्नैः क्वचित् क्वचित् ॥
ब्राह्मणं कल्पसूत्राणि भाष्यविद्यास्तथैव च ।
अन्ये तु प्रस्थितास्तत्र वै केचिन्न प्रत्यवस्थिताः ॥
द्वापरेषु प्रवर्त्तन्ते भिन्नार्थैस्तैः सुदर्शनैः ।
एवमाध्वर्य्यवं पूर्व्वमासीद्वेधं ततः पुनः ॥
सामान्यविपरीतार्थैः कृतं शास्त्राकुलं त्विदम् ।
आध्वर्य्यवस्य प्रस्थानैर्बहुधा व्याकुलीकृतम् ॥
तथैवाथर्व्वणां साम्नां विकल्पैः स्वस्य संक्षयैः ।
व्याकुलो द्वापरेष्वर्थः क्रियते भिन्नदर्शनैः ॥
द्वापरे त्वनिवृत्तास्ते वेदा नश्यन्ति वै कलौ ।
तेषां विपर्य्ययोत्पन्ना भवन्ति द्वापरे पुनः ॥
अदृष्टिमरणञ्चैव तथैव व्याधयश्चवाः ।
वाङ्मनःकर्म्मभिर्दुःखैर्निर्वेदो जायते ततः ।
निर्वेदाज्जायते तेषां दुःखं मोक्षविचारणा ।
विचारणायां वैराग्यं वैराग्याद्दोषदर्शनम् ॥
दोषाणां दर्शनाच्चैव ज्ञानोत्पत्तिश्च जायते ।
तेषां मेधाविनां पूर्व्वमाद्ये स्वायम्भुवेऽन्तरे ।
उत्पद्यन्तीह शास्त्राणां द्वापरे परिपन्थिनः ॥
आयुर्व्वेदविकल्पाश्च अङ्गानां ज्योतिषस्य च ।
अर्थशास्त्रविकल्पाश्च हेतुशास्त्रविकल्पनम् ॥
प्रक्रियाकल्पसूत्राणां भाष्यविद्याविकल्पनम् ।
स्मृतिशास्त्रप्रभेदाश्च प्रस्थानानि पृथक् पृथक् ॥
द्वापरेष्वभिवर्त्तन्ते मतिभेदास्तथा नृणाम् ।
मनसा कर्म्मणा वाचा क्षुद्रादानो यविध्यति ॥
द्वापरः सर्व्वभूतानां कायक्लेशपुरस्कृतः ।

लोभो धृतिर्वैषिगयुद्धन्तत्त्वानामविनिश्चयः ॥
वेदशास्त्रप्रणयनं धर्म्माणां सङ्करस्तथा ।
वर्णाश्रमपरिध्वंसः कामहेतौ तथैव च ॥
पूर्व्वे वर्षसहस्रे द्वे परमायुस्तदा नृणाम् ।
निःश्रेये द्वापरे तस्मिन् तस्य सन्ध्या तु पादतः ॥
गुणहीनाश्च तिष्ठन्ति धर्म्मस्य द्वापरस्य तु ।
तथैव सन्ध्यापादेन अंशुस्तस्य प्रतिष्ठितः ॥"
इति मत्स्यपुराणे १२० अध्यायः ॥

द्वापरयुगं, क्ली, (द्वापर एव युगम् ।) तृतीययुगम् । तस्योत्पत्त्यादि यथा । "भाद्रकृष्णत्रयोदश्यां गुरुवासरे द्वापरयुगोत्पत्तिः । तत्र अवतारद्वयम् । कृष्णबुद्धौ । पुरुषमर्द्दम् । पापमर्द्दम् । नैमिषारण्यं तीर्थम् । नाड़ीचौ ब्राह्मणः । रक्तगताः प्राणाः । सप्तहस्तपरिमितो मानवदेहः । सहस्राब्दमायुः । ताम्रपात्रे भोजनम् । इति द्वापरयुगस्य लक्षणम् । द्वापरयुगाब्दाः ८६४,००० । द्वापरयुगस्य राजानः शाल्वविराटहंसध्वजकंसध्वजमयूरध्वजवज्रवाहनरुक्माङ्गदजरासन्धदुर्य्योधनयुधिष्ठिराः । धर्म्माधर्म्मरतो लोकः प्रजासी चपलः सदा । ज्ञाननिष्ठः कपटवाक् द्वापरे राजविस्तरः ॥ तत्र तारकब्रह्मनाम ।

हरे ! मुरारे मधुकैटभारे
गोपाल गोविन्द मुकुन्द शौरे ।
यज्ञेश नारायण कृष्ण विष्णो !
निराश्रयं मां जगदीश ! रक्ष ॥"
इति सुब्राह्मणपञ्जिकातः संगृहीतम् ॥

द्वापरयुगाद्या, स्त्री, (द्वापरयुगस्य आद्या आरम्भिका तिथिः ।) द्वापरयुगारम्भतिथिः । सा च गौणभाद्रकृष्णत्रयोदशी । तत्प्रमाणं युगाद्याशब्दे द्रष्टव्यम् ॥

द्वारं, क्ली, (द्वरति निर्गच्छति गृहाभ्यन्तरादनेनेति । द्वृ + घञ् ।) निर्गमनम् । अभ्युपायः । इति मेदिनी । रे, ४८ ॥ आद्यस्य पर्य्यायः । द्वाः २ प्रतीहारः ३ । इत्यमरः । २ । ३ । १६ ॥ वारकम् ४ । इति शब्दरत्नावली ॥

"गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ।
न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिकं शुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

द्वारकः, पुं, (द्वारेण प्रशस्तप्रतीहारेण कायति शोभते इति । कै + कः ।) द्वारका । इति शब्दरत्नावली ॥

द्वारकण्टकः, पुं, (द्वारस्य कण्टक इव ।) कवाटम् । इति शब्दरत्नावली ॥

द्वारका, स्त्री, (द्वारेण बहुना प्रशस्तेन च प्रतीहारेण कायतीति । कै + कः । स्त्रियां टाप् ।) स्वनामख्यातपुरी । तत्पर्य्यायः । द्वारावती २ द्वारवती ३ वनमालिनी ४ द्वारिका ५ अब्धिनगरी ६ द्वारकः ७ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । १३२ । ४६ ।
"सत्यकं प्रेषयामास द्वारकां द्वारमालिनीम् ॥")
तस्या निर्म्माणप्रकारो यथा,—

श्रीकृष्ण उवाच ।
"हे सखद्र महाभाग ! स्मरत्व शतयोजनम् ।
देहि मे नगरार्थञ्च यथाहास्यामि निश्चितम् ॥
नगरं कुरु हे कारो त्रिषु लोकेषु दुर्लभम् ।
रमणीयञ्च सर्व्वेषां कमनीयञ्च योषिताम् ॥
वाञ्छितञ्चापि भक्तानां वैकुण्ठसदृशं परम् ।
सर्व्वेषामपि स्वर्गाणां परं परमभीप्सितम् ॥
दिवानिशं खगश्रेष्ठ ! सन्निधौ विश्वकर्म्मणः ।
स्थितिं कुरु भद्राभाग ! यावन्निर्म्माति द्वारकाम् ॥
विश्वकारुरुवाच ।
द्वारकाञ्च किमाकारां करोमि जगतां विभो ! ।
कथयस्व महाभाग ! निर्म्माणक्षमतीश्वर ! ॥
भगवानुवाच ।
शतयोजनपर्य्यन्तं नगरं सुमनोहरम् ।
पद्मरागैर्मरकतैरिन्द्रनीलैरनुत्तमैः ॥
रत्नकैः पारिभद्रैश्च पालङ्कैश्च सुमन्तकैः ।
गन्धकैर्गालिमैश्चैव चन्द्रकान्तादिभिस्तथा ॥
सूर्य्यकान्तादिभिश्चैव पुत्तैश्च स्फटिकाहतैः ।
हरिदर्णैश्च मणिभिः श्यामैर्गैरिसुखैश्च वै ॥
गोरोचनाभैः पीतैश्च दाड़िम्बबीजरूपकैः ।
पद्मबीजनिभैश्चैव नीलैः कमलवर्णकैः ॥
मणिभिः कज्जलाकारैरञ्जनैश्च परिष्कृतैः ।
श्वेतचम्पकवर्णाभैस्तप्तकाञ्चनसन्निभैः ॥
सर्व्वशस्यगुणैरीषद्रत्नैश्च रूपकैः ।
गरिष्ठैश्च वरिष्ठैश्च मणिश्रेष्ठैश्च पूजितैः ॥
यथाविधानं यद्योग्यं यच्च यद्युक्तमीप्सितम् ।
मणीनां हरणञ्चैव यत्नसंघा हिमालयात् ॥
दिवानिशं करिष्यन्ति यावन्निर्म्माणपूर्व्वकम् ।
यत्नेश्च सप्तभिर्लक्षैः कुबेरप्रेरितैरपि ॥
वेतालसङ्घैः कुष्माण्डलक्षैः गुह्यकयोजितैः ।
दानवैर्बलवद्भिश्च शैलकन्यानियोजितैः ॥
कुरु दिव्यञ्च पत्नीनां सहस्राणाञ्च षोड़श ।
अन्यपत्नीजनस्यापि चाद्याधिकशतस्य च ॥
शिविरं परिखायुक्तसुखैःप्राकारवेष्टितम् ।
युक्तं द्वादशसारञ्च सिंहद्वारपुरस्कृतम् ॥
युक्तं चित्रैर्विचित्रैश्च क्षत्रिमैश्च कवाटकैः ।
निश्छिद्रवरहितं प्रविष्टैश्च पुरस्कृतम् ॥
सुखदञ्च चन्द्रवेधं प्राङ्गनञ्च तथैव च ।
यदूनामाश्रमं दिव्यं किङ्कराणान्तथैव च ॥
सर्व्वप्रसिद्धं निलयसुग्रसेनस्य भूभृतः ।
आश्रमं सर्व्वतोभद्रं वसुदेवस्य मत्पितुः ॥
कथितः लोकशिक्षार्थं कुरु कार्य्यं विना पुरीम् ।
शुभक्षणाध्याधुना गच्छ वत्स ! यथासुखम् ॥
विश्वकर्म्मा हरिं नत्वा जगाम पक्षिणा सह ।
समुद्रस्य समीपञ्च वटमूलं मनोहरम् ॥
सुस्थाप तत्र नक्षत्रं कारुश्च पक्षिणा सह ।
स्वप्ने द्वारवतीं रम्यां ददर्श गरुड़स्तथा ॥
यत्किञ्चित् कथितः कारुः कृष्णेन परमात्मना ।
तदेव लक्षणं सर्व्वं ददर्श नगरे सुने ! ॥
कारुं हसन्ति स्वप्ने च सर्व्वे ते शिल्पकारिणः ।
गरुड़ं गरुड़ाद्यान्ये बलवन्तञ्च पक्षिणः ॥
बुद्ध्वा ददर्श गरुड़ो विश्वकर्म्मा च लक्षितः ।

अतीव द्वारकां रम्यां शतयोजनविस्तृताम् ॥
ब्रह्मादीनाञ्च नगरं विजित्य च विराजिताम् ।
तेजसाच्छादितां सूर्य्ये रत्नानाञ्च परिष्कृताम् ॥
वासुदेव उवाच ।
पैलकौतीर्थतुल्या सा किं तीर्थं द्वारकापरम् ।
सर्व्वतीर्थपरा श्रेष्ठा द्वारका बहुपुण्यदा ॥
यस्याः प्रवेशमात्रेण नराणां जन्मखण्डनम् ॥
दानञ्च द्वारकायाञ्च श्राद्धञ्च देवपूजनम् ।
चतुर्गुणञ्च तीर्थानां गङ्गादीनाञ्च भूमिप ! ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

द्वारकेशः, पुं, (द्वारकायां नगर्य्यां ईशः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥

द्वारदातुः, पुं, (द्वारं ददातीति । दा + तुन् ।) वरदातुः । भूमीसहदृच्यः । इति भावप्रकाशः ॥

द्वारपालः, त्रि, (द्वारं पालयतीति । पालि + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) द्वाररक्षकः । दरवान् । इति पारस्य भाषा । तत्पर्य्यायः । प्रतीहारः २ द्वाःस्थः ३ द्वाःस्थितः ४ दर्शकः ५ । इत्यमरः । २ । ८ । ६ ॥ वेत्रधारकः ६ द्वौःसाधिकः ७ वर्षधरकः ८ गर्व्वाटः ९ दण्डवाशी १० । इति त्रिकाण्डशेषः ॥ द्वारस्थः ११ चक्री १२ द्वारपालकः १३ द्वौवारिकः १४ वेत्री १५ उत्सारकः १६ दण्डी १७ । इति हेमचन्द्रः ॥ अस्य विवरणं द्वौवारिकशब्दे द्रष्टव्यम् ॥

द्वारपालकः, पुं, (पालयतीति ण्वुल् । द्वाराणां पालकः । यद्वा, द्वारपाल + स्वार्थे कन् ।) द्वारपालः । इति शब्दरत्नावली ॥

द्वारपिण्डी, स्त्री, (द्वारस्य पिण्डी पिण्डिकेव ।) देहली । इति जटाधरः ॥

द्वारबलिभुक्, [ज्] पुं, (द्वारदत्तं बलिं भुङ्क्ते इति । भुज् + क्विप् ।) वकः । इति त्रिकाण्डशेषः ॥

द्वारयन्त्रं, क्ली, (द्वारबन्धकं यन्त्रं मध्यलोपी समासः ।) तालकम् । इति हेमचन्द्रः ।४।७१॥ ताला इति कुलुप इति च भाषा ॥

द्वारवती, स्त्री, (द्वाराणि सन्त्यत्र । यद्वा, चतुर्व्वर्णानां मोक्षद्वाराणि सन्ति अत्रेति । द्वार + मतुप् । मस्य वः ।) द्वारका । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे । १० । ३४ ।
"श्रुतां द्वारवतीं नाम बहुद्वारां मनोरमाम् ॥"
तथा च तत्रैव,—
"चतुर्णामपि वर्णानां यत्र द्वाराणि सर्व्वतः ।
अतो द्वारवतीयुक्ता विद्वद्भिस्तत्त्ववेदिभिः ॥"
इयं हि पीठस्थानानामन्यतमा । अत्र भगवती रुक्मिणीरूपेण विराजते । यथा, देवीभागवते । ७ । ३० । ६६ ।
"रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ॥")

द्वारस्थः, पुं, (द्वारे तिष्ठतीति । स्था + कः ।) द्वारपालः । इति हेमचन्द्रः । ३ । ३८५ ॥ (द्वारस्थिते, त्रि । यथा, कथासरित्सागरे ।१८।११६।
"सुप्ते च तस्मिन् द्वारस्थो जागरामास स द्विजः ॥")

द्वारावती, स्त्री, (द्वाराणि प्रशस्तबहुलप्रतीहाराः सन्त्यत्र । द्वार + मतुप् मस्य वः । निपातनात् पूर्व्वदीर्घश्च ।) द्वारका । इति हेमचन्द्रः ।४।४६॥
"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ॥
एतासु पृथिवीमध्ये न गण्यन्ते कदाचन ।
पुरी द्वारावती विष्णोः पाञ्चजन्योपरिस्थिता ॥
मुक्तिदा एताः सर्व्वाश्च एकत्र गणिताः सुरैः ।
यानि यानि च क्षेत्राणि काशीप्राप्तिकराणि षट् ॥"
इति भूतशुद्धितत्त्वम् ॥

द्वारिकः, पुं, (द्वारं पाल्यत्वेनाऽस्त्यस्येति ठन् ।) द्वारपालः । इत्यमरटीकासारसुन्दरी ॥ (यथा, पञ्चतन्त्रे । १ । ८५ ।
"यो मूर्खं लौल्यसम्पन्नं राजद्वारिकमाचरेत् ।
मिथ्यावादं विशेषेण तस्य कार्य्यं न सिध्यति ॥")

द्वारिका, स्त्री, (प्रशस्तानि द्वाराणि सन्त्यस्यामिति । ठन् टाप् च ।) द्वारकापुरी । इति शब्दरत्नावली ॥

द्वारी, [न्] त्रि, (द्वारं पाल्यतयास्त्यस्येति इनिः ।) द्वारपालः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १२६ । १० ।
"द्वारिणं तापसा ऊचू राजानञ्च प्रकाशय ॥")

द्वाविंशतिः, स्त्री, (द्वाधिका विंशतिरिति । "द्वाद्वः संख्यायामबहुव्रीह्यशीत्योः ।" ६ । ३ । ४७ । इति आत्प्रत्ययः ।) द्वाधिकविंशतिः । इति व्याकरणम् । वाइश इति भाषा । (यथा, महाभारते । ७ । ४६ । १८ ।
"कर्म्मा द्वाविंशतिं भक्षान् क्षतवर्म्मा चतुर्दश ॥")

द्वासप्ततिः, स्त्री, (द्वाधिका सप्ततिरिति । "षिभाषा चत्वारिंशत्प्रभृतौ सर्व्वेषाम् ।" ६ । ३ । ४६ । इति पाक्षिक आत्प्रत्ययः ।) द्विसप्ततिः । यथा, द्वासप्ततिश्च वन्ध्यायामिति ज्योतिस्तत्त्वम् ॥

द्वास्थः, पुं, (द्वारि तिष्ठतीति । स्था + "सुपिस्थः । ३ । २ । ४ । इति कः । "खर्परे शरि वा विसर्ज्जनीयस्य लोपो वक्तव्यः ।" ८ । ३ । ३६ । इत्यस्य वार्त्तिकोक्त्या विसर्गस्य पाक्षिकलोपः ।) द्वारपालः । इत्यमरटीकायां भरतः ॥

द्वास्थितः, पुं, (द्वारि स्थितः । विसर्गस्य पाक्षिकलोपः ।) द्वारपालः । इत्यमरटीकायां भरतः ॥

द्वास्थितदर्शकः, पुं, (द्वास्थितः सन् दर्शकः ।) द्वौवारिकः । इत्यमरटीकायां भरतः ॥

द्विः, अ, द्वौ वारौ, इति सुच्प्रत्ययेन साध्यम् । (यथा, रामायणे । २ । १८ । ३० ।
"करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ॥")
सर्व्वनामात्मर्गतद्विशब्दस्य पुंसि रूपं द्वौ । स्त्रियां स्त्रीत्वे च द्वे । तद्वाचकानि यथा, पद्मः १ नदीकूलम् २ असिधारा ३ रामपुत्रः ४ चक्षुः ५ हस्तः ६ स्तनः ७ । इति कविकल्पलता ॥ सहचरौ यथा, इन्द्राणी १ नारदश्चैतौ २ अश्विनीकुमारौ ३ भार्य्यापती ४ । इति महाभारते वनपर्व्व ॥

द्विकं, क्ली, (द्वाभ्यां कायतीति । कै + कः ।) हयम् । यथा,—
"अग्रीतिभागं गृह्णीयान्मासाद्दाढ्यिकः शतात् ।
द्विकं शतं वा गृह्णानो न भवेदर्थकिल्बिषी ॥"
इत्याह्निकतत्त्वम् ॥
(द्वितीयेन रूपेण ग्रहणमिति । "तावतिथं ग्रहणमिति लुगा ।" ५ । २ । ७७ । इति कन् पूरणप्रत्ययस्य च लुक् । द्वितीयके, त्रि । इति सिद्धान्तकौमुदी ॥)

द्विकः, पुं, (द्वौ कौ ककारवर्णौ यत्र ।) काकः । कोकः । इति मेदिनी । के, २६ ॥

द्विककारः, पुं, (द्वौ ककारौ यत्र ।) काकः । इति शब्दरत्नावली ॥

द्विककुत्, [द्] पुं, (द्वे ककुदौ यस्य ।) उष्ट्रः । इति हेमचन्द्रः । ४ । ३२० ॥

द्विगुः, पुं, षट्समासान्तर्गतसमासविशेषः । स तु संख्यापूर्व्वपदानां समासः । वोपदेवेनास्य गणसंज्ञा कृता । स च त्रिविधः । तद्धितार्थः १ समाहारः २ उत्तरपदपरश्च ३ । तद्धितार्थोऽपि त्रिविधः । तद्धितप्रत्ययमात्रस्य अजादेर्हलादेर्वा अर्थे विषये दृष्टेकः । अपत्यार्थप्राग्दिगादिकं वृद्धा अजादेस्तद्धितस्यार्थे वाच्ये इत्यमरः । तद्धितार्थविषयो यथा, द्वयोर्मात्रोरपत्यं हैमातुरः । पञ्चानां गोपितॄणामपत्यं पाञ्चनापितिः ॥ तद्धितार्थवाची यथा, पञ्चभिर्गोभिः क्रीतः पञ्चगुः ॥ समाहारो यथा, त्रयाणां सखीनां समाहारः त्रिसखम् । समाहारे अदन्तानां क्लीबत्वं मात्रादेस्तु क्लीबत्वम् ॥ उत्तरपदपरो यथा,—
पञ्च गावो धनं यस्य स पञ्चगवधन इत्यादि ।
इति सुग्धबोधटीकायां दुर्गादासः ॥ (द्वौ वा गावौ यस्य इति विग्रहे गौशब्दस्य ङस्यः । द्विगवस्वामिके, त्रि । यथा,—
"इन्द्रो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः ।
तत् पुरुष कर्म्म धारय येनाहं स्यां बहुव्रीहिः ॥"
इत्युक्तेः ॥)

द्विगुणं, त्रि, द्वाभ्यां पूरणम् । अवृद्धयाभ्यां घातः । इति लीलावती ॥ (यथा, आर्य्यासप्तशत्याम् । ४६१ ।
"बहुसरसप्रसवस्रालिभिरयं नतं प्रियं प्रति मे ।
स्रोतस इव निम्नं प्रतिरागस्य द्विगुण आवेगः ॥")

द्विगुणाकृतं, त्रि, (द्विगुणं कर्षणं कृतम् । "संख्यायाश्च गुणानायाः ।" ५ । ४ । ५६ । इति डाच् ।) वारद्वयकृतक्षेत्रम् । इत्यमरः । २ । ६ । ६ । दोचसा भूँइ इति भाषा ॥

द्विजः, पुं, (द्विर्जायते इति । जन + "अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) संस्कृतब्राह्मणः । यथा,—
"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।"
इति स्मृतिः ॥
सदृत्तब्राह्मणः । तल्लक्षणं यथा,—

अम्बरीष उवाच ।
"कीदृशाय प्रदातव्यं महादानं द्विजातये ।
विदुषे वा निराधारे साचारेऽविदुषे सुने ! ॥
एतन्मे सर्व्वमाख्याहि यथातथ्यं द्विजोत्तम ! ।
उत्तारयति संग्रह्य दातारं दानमेव हि ॥
वशिष्ठ उवाच ।
जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च ।
एभिर्युक्तो हि यश्छिष्टेत् नित्यं स द्विज उच्यते ॥
न जातिर्न कुलं राजन् ! न स्वाध्यायः श्रुतं न च ।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥"
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥
क्षत्रियः । वैश्यः । इति मेदिनी । जे, १० ॥ (यथा, याज्ञवल्क्ये । १ । ३६ ।
"मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ॥"
दन्तः । (यथा,—
"न क्षिप्ता द्विजैर्भवेत् ॥" इति चरके सूत्रस्थाने ऽष्टमेऽध्याये ॥) अक्षजः । स पक्षिसर्पमत्स्यादिः । इत्यमरः । ३ । ३ । ३० ॥ (यथा, रघुः । १२ । २२ ।
"ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः ॥")
तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥ द्विर्जातं, त्रि ॥
द्विजकुत्सितः, पुं, (द्विजानां द्विजेषु वा कुत्सितः । द्विजानां तद्धर्म्मनिषेधात् तथात्वम् ।) श्लेष्मातकवृक्षः । इति राजनिर्घण्टः शब्दमाला च ॥
द्विजदासः, पुं, (द्विजानां दासः ।) शूद्रः । इति राजनिर्घण्टः ॥ द्विजानां दासे, त्रि ॥
द्विजन्मा, [न्] पुं, (द्वे जन्मनी यस्य ।) ब्राह्मणः । (यथा, देवीभागवते । ५ । ५ । ३ ।
"यतीनां भूषणं ज्ञानं सन्तोषो हि द्विजन्मनाम् ॥")
इन्द्रः । पक्षी । इति शब्दरत्नावली ॥ क्षत्रियः । वैश्यश्च । त्रि, द्विवारजन्मयुक्तः । (द्वाभ्यां जायमानः । यथा, ऋग्वेदे । १ । १४० । २ ।
"अभिद्विजन्मा त्रिवृदन्नमश्नुते ।
संवत्सरे वावृधे जग्धमीयुषः ॥"
"द्वाभ्यामरणीभ्यां जायमानत्वात् यज्ञा मथनेनाधानसंस्कारेण चोत्पन्नत्वात् द्विजन्मत्वम् ।"
इति तद्भाष्ये सायणः ॥)
द्विजपतिः, पुं, (द्विजानां पतिः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते ।१।१२।२६।
"क्रूराणि चैवमादीनि भाषमाणानि दृष्टवते ।
श्रुत्वा द्विजपतिः शीघ्रं निर्गतं सदनाद्बहिः ॥")
द्विजप्रपा, स्त्री, (द्विजानां पक्षिणां प्रपा ।) आलवालम् । तत्पर्य्यायः । तडागम् २ विडम् ३ तलम् ४ । इति त्रिकाण्डशेषः ॥
द्विजप्रिया, स्त्री, (द्विजानां याज्ञिकब्राह्मणादीनां प्रिया ।) सोमलता । इति राजनिर्घण्टः ॥ द्विजस्य प्रियवस्तुनि, त्रि ॥
द्विजबन्धुः, पुं, (द्विजस्य बन्धुरिव ।) अब्राह्मणः स भट्टदेवज्ञादिः । यथा,—
"स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।"
इति स्मृतिः ॥
द्विजब्रुवः, पुं, (आत्मानं द्विजं ब्रूते इति । ब्रू + कः ।' ब्राह्मणब्रुवः । स च जातिमात्रोपजीवी ब्राह्मणः । इति हेमचन्द्रः । ३ । ५१६ ॥ यथा,—
"सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
अधीते शतसाहस्रमनन्तं वेदपारगे ॥"
इति स्मृतिः ॥
द्विजराजः, पुं, (द्विजानां राजा । "राजाहः-सखिभ्यष्टच् ।"५ । ४ । ९ । इति टच् ।) चन्द्रः । (यथा, देवीभागवते । १ । ११ । ७२ ।
"द्विजराजस्तु तच्छ्रुत्वा भृगोर्ब्रह्मसुतस्य च ।
ददावतप्रियां भार्य्यां गुरोर्गर्भवतीं शुभाम् ॥")
कर्पूरः । इत्यमरः ॥ अनन्तः । गरुड़ः । इति मेदिनी । जे, ३२ ॥
द्विजलिङ्गी, [न्] पुं, (द्विजस्य लिङ्गं चिह्नमस्यास्तीति । इनिः ।) क्षत्रियः । इति त्रिकाण्डशेषः ॥ ब्राह्मणवेषधारिणि, त्रि ॥ (यथा, मनुः । ९ । २२४ ।
"द्यूतं समाजमास्थाय यः कुर्य्यात् कारयेत वा ।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥")
द्विजवरः, पुं, (द्विजस्य दन्तस्य वरः ।) दन्तार्बुदः । इति राजनिर्घण्टः ॥
द्विजश्रमः, पुं, (द्विजैः श्रमः ।) राजयक्ष्मा । इति शब्दचन्द्रिका ॥ वरवटी इति भाषा ॥
द्विजसेवकः, पुं, (द्विजानां सेवकः ।) शूद्रः । इति शब्दरत्नावली ॥ त्रिवर्णसेवाकर्त्तरि, त्रि ॥
द्विजा, स्त्री, (द्विर्जायते इति । जन् + डः । टाप् ।) रेणुकानामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२० ॥ (अस्याः पर्य्यायो यथा,—
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपत्री स्मृता कौन्ती हरेणुका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भार्य्या । इति मेदिनी । जे, १० ॥ पालङ्की । इति शब्दचन्द्रिका ॥
द्विजाङ्गी, स्त्री, (द्विजस्य पक्षिणोऽङ्गमिव अङ्गं यस्याः । ङीप् ।) कटुका । इति राजनिर्घण्टः ॥
द्विजातिः, पुं, (द्वे जाती यस्य ।) ब्राह्मणः । इत्यमरः । २ । ७ । ४ ॥ (यथा, महाभारते । ९ । ७४ । ६१ ।
"वेदेष्वपि वदन्त्येनं मन्त्रजातं द्विजातयः ॥")
अक्षजः । इति मेदिनी । ते, ११४ ॥ क्षत्रियः । वैश्यः । यथा,—
"शूद्रो द्विजातिभिर्जातो न भूमेर्भागमर्हति ।"
इति स्मृतिः ॥
(यथा च मनुः । १० । ४ ।
"ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥")
द्विजायनी, स्त्री, (द्विजः अयतेऽनयेति । अय + करणे ल्युट् । स्त्रियां ङीप् ।) यज्ञोपवीतम् । इति शब्दरत्नावली ॥
द्विजालयः, पुं, (द्विजानां पक्षिणामालयः ।) कोटरम् । इति शब्दचन्द्रिका ॥ द्विजानां गृहञ्च ॥
द्विजिह्वः, पुं, (द्वे जिह्वे यस्य ।) सर्पः । (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम् ।
"व्याडव्याडीविषः सर्पो द्विजिह्वोऽहिः सरीसृपः ।
चक्षुःश्रवा दन्दशूको गूढ़पात्पन्नगोरगाः ॥")
क्षपकः । इत्यमरः । १ । ३ । २३ ॥ (यथा, माघे । १ । ६३ ।
"परस्य मर्म्माविधसूद्भतां निजं
द्विजिह्वतादोषमलिप्तमागभिः ॥")
खलः । इति मेदिनी । वे, १२ ॥ चौरः । दुःसाधुः । इति शब्दरत्नावली ॥ (रोगविशेषः । यथा, सुश्रुते निदानस्थाने १४ अध्याये ।
"श्रेयो द्विजिह्वः खलु रोग एष
विवर्ज्जयेदागतपाकमेनम् ॥"
त्रि, द्विजिह्वाविशिष्टः । यथा, महाभारते । १ । ३४ । २४ ।
"द्विजिह्वाश्च स्मृताः सर्पा गरुड़ेन महात्मना ॥")
द्विजोत्तमः, पुं, (द्विजेषु उत्तमः ।) ब्राह्मणः । इति हलायुधः ॥ (यथा, मनुः । २ । ४६ ।
"भवत्पूर्व्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः ॥")
दिट्, [ष्] पुं, (द्वेष्टीति । द्विष् + क्विप् ।) शत्रुः । इत्यमरः । २ । ८ । ११ ॥ (यथा, महाभारते । ४ । १६ । ७ ।
"तस्मिन् जीवति पापिष्ठे सेनावाहे मम द्विषि ।
तत् कर्म्म कृतवत्यद्य कथं निद्रां निषेवसे ?")
द्वेष्टरि, त्रि । (यथा, रघौ । १ । ४५ ।
"त्रिलोकनाथेन सदा मखद्विष-
क्षया नियम्या ननु दिग्यचक्षुषा ॥")
दिठः, पुं, वह्निजायाः स्वाहा । विसर्गः । इति पैतृकारीयतन्त्रम् ॥ ठकारद्वयम् ॥
दितयं, क्ली, (द्वौ अवयवौ अस्य । द्वि + "संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् ।) द्वयम् । इति हेमचन्द्रः । २ । ५० । १२ ॥ (यथा, भागवते । ५ । २२ । ४ ।
"अत ऊर्द्धमङ्गारकोऽपि योजनलक्षद्वितय उपलभ्यमानलक्षिभिर्लक्षिभिः पञ्चैरेकैकराशीन् द्वादशानुभुङ्क्ते ॥" द्वित्वसंख्याविशिष्टे, त्रि । यथा, रघुः । ८ । ६० ।
"इमसानुमतां किमन्तरं
यदि वायौ दितयेऽपि तेऽचलाः ॥")
द्वितीयं, त्रि, (द्वयोः पूरणम् । द्वि + "द्वेस्तीयः ।" ५ । २ । ५४ । इति तीयः ।) द्वयम् । इति हेमचन्द्रः । ३ । १०० ॥ (यथा, रघुः । २ । ४६ ।
"तथा विदुर्मां सुनयः श्रुतक्रतुं
द्वितीयगामी न हि शब्द एष नः ॥")
द्वितीयः, पुं, (द्वयोः पूरणः । आत्मनो द्वितीयत्वादेवास्य तथात्वम् ।) पुत्रः । इति त्रिकाण्डशेषः ॥
द्वितीया, स्त्री, (द्वितीय + टाप् ।) गेहिनी । भार्य्या । इत्यमरः । २ । ६ । ५ ॥ तिथिविशेषः । सा चन्द्रस्य द्वितीयकलाक्रियारूपा । शुक्लपक्षे २ कृष्णपक्षे १७ एतद्बोधिता । इति ज्योतिषम् ॥ * ॥ सा च अश्विनीकुमारयोर्जन्मतिथिः यथा,—

ब्रह्मोवाच ।
"रूपं कान्तिरनौपम्यं भिषक्त्वं सर्व्ववस्तुषु ।
सोमपत्वञ्च लोकेषु सर्व्वमेतद्भविष्यति ॥
महातपा उवाच ।
एतत् सर्व्वं द्वितीयायामश्विभ्यां ब्रह्मणा पुरा ।
दत्तं यस्मात्ततस्त्वेषा तिथीनामुत्तमा तिथिः ॥
एतस्यां रूपकामस्तु पुष्याहारो भवेन्नरः ।
संवत्सरं शुचिर्नित्यं सुखरूपी भवेन्नरः ॥
अश्विभ्यां ये गुणाः प्रोक्तास्ते तस्यापि भवन्ति च॥"
इति वराहपुराणम् ॥
अत्र जातफलम् ।
"निखिलगुणगभीरो दानशीलो दयालुः
सकुलकुमुदचन्द्रः स्वच्छचित्तोऽतिशूरः ।
निजभुजबलगर्व्वाच्छादितारातिवर्गो
भवति विपुलकीर्त्तिर्यो द्वितीयाप्रसूतः ॥"
इति कोष्ठीप्रदीपः ॥
अथ रथद्वितीया । स्कन्दपुराणे ।
"आषाढ़स्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ॥
यात्रोत्सवं प्रकृत्याथ प्रीणयेच्च द्विजान् बहून् ।
ऋक्षाभावे तिथौ कार्य्या सदा सा प्रीतये मम ॥
सा यात्रा । मां जगन्नाथम् ॥
अथ मनोरथद्वितीया ।
सा श्रावणशुक्लद्वितीया । 'मनोरथद्वितीयायां दिवा वासुदेवार्च्चनं रात्रौ चन्द्रोदयेऽर्घ्यदानं नक्तञ्च भोजनादिकम् ॥' यथा विष्णुधर्म्मोत्तरे ।
'देवमभ्यर्च्च पुष्पैस्तु धूपदीपानुलेपनैः ।
उद्यच्छतश्च बालेन्दोरैन्द्रादर्घं समाहितः ॥
नक्तं भुञ्जीत च नरो यावत्तिष्ठति चन्द्रमाः ।
अस्तं गते न भुञ्जीत व्रतभङ्गभयान्नरः ॥'
अथ भ्रातृद्वितीया । लिङ्गपुराणे ।
'कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम् ।
या न कुर्य्याद्विनश्यन्ति भ्रातरः सप्तजन्मनि ॥'
तस्या इति शेषः ॥ महाभारते ।
'कार्त्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर ! ।
यमो यमुनया पूर्व्वं भोजितः स्वगृहे स्वयम् ॥
तस्यां निजगृहे पार्थ ! न भोक्तव्यमतो बुधैः ।
यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ॥
दानानि च प्रदेयानि भगिनीभ्यो विशेषतः ॥'
तथा ।
'यमश्च चित्रगुप्तश्च यमदूताश्च पूजयेत् ।
अर्घ्यञ्चात्र प्रदातव्यो यमाय सहजद्वये ॥'
सहजद्वयेभगिनीभ्राद्भिः । अर्घ्यमन्त्रः ।
ॐ एह्येहि मार्त्तण्डज पाशहस्त
यमान्तकालोकधरामरेश ! ।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते ॥
प्रणाममन्त्रः ।
ॐ धर्म्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज ।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्र नमोऽस्तु ते ॥
यमुनाञ्च संपूज्य नमस्कुर्य्यात् ।
ॐ यमुनायै नमस्तेऽस्तु यमुने लोकपूजिते ।
वरदा भव मे नित्यं सूर्य्यपुत्रि ! नमोऽस्तु ते ॥
अन्नं दत्त्वा पठति ।
भ्रातस्त्वयानुज्ञाताहं भुञ्जे भक्तमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषतः ॥
ज्येष्ठा तवाग्रजाताहमिति वदेत् ।
तथा यमद्वितीयायां यात्रायां मरणं भवेत् ॥
अनध्यायद्वितीया यथा ।
प्रे-को-चै-चाद्वितीयास्तु प्रेतपक्षे गते तु या ।
या च कोजागरे जाते चैत्रावल्याः परेऽपि या ॥
चातुर्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः ।
परास्तेष्वनध्यायः पुराणैः परिकीर्त्तितः ॥"
इति तिथितत्त्वम् ॥
"पक्षयोर्मासमासस्य द्वितीयां परिवर्ज्जयेत् ॥"
इति विष्णुपुराणम् ॥
द्वितीयाक्षतं, त्रि, (द्वितीयं कर्षणं क्षतमिति । "क्षुधो द्वितीयक्षतीयशृङ्गवीणात् क्षयौ । ५ । ४ । ५८ । इति डाच् ।) वारद्वयकृतक्षेत्रम् । इत्यमरः ।२।४।६॥ दोबसा भूँइ इति भाषा ॥
द्वितीयाभा, स्त्री, (द्वितीया हरिद्रावत् आभातीति । आ+भा+कः ।) दारुहरिद्रा । इति शब्दचन्द्रिका ॥
द्विचः, त्रि, (द्वौ वा त्रयो वा । "संख्याव्ययासन्नादूराधिकसंख्याः संख्येये ।" २ । २ । २५ । इति समासः । "बहुव्रीहौ संख्येये डजबहुगणात् ।" ५ । ४ । ७२ । इति डच् ।) द्वौ वा त्रयो वा इमे । इति संक्षिप्तसारः । नित्यबहुवचनान्तोऽयम् ॥ (यथा, रघुः । ५ । २५ ।
"द्वित्राण्यहान्यर्हसि सोढुमर्हन्
यावद् यते साधयितुं तदर्थम् ॥")
द्विदन्, [त्] त्रि, (द्वौ दन्तौ यस्य । "वयसि दन्तस्य दत्त ।"५।४।१४१। इति दन्तस्य दत्त-आदेशः ।) दन्तद्वययुक्तद्व्यादिः । इति हेमचन्द्रः ।४।३२६॥
द्विदाम्नी, स्त्री, (द्वे दामनी बन्धनरज्जू यस्याः । "दामद्व्यादनान्ताच्च ।" ४।१।२७। इति ङीप् ।) रज्जुद्वययुक्ता गौः । इति शब्दचन्द्रिका ॥
द्विदेहः, पुं, (द्वाभ्यां देहोऽस्येति । गजाननत्वादेवास्य तथात्वम् ।) गणेशः । इति त्रिकाण्डशेषः ॥ (द्व्यात्मकराशिः । इति ज्योतिषम् ॥)
द्विधा, अ, (द्वि+"संख्याया विधार्थे धा ।" ५।३। ४२ । इति धा ।) द्विप्रकारम् । इति मुग्धबोधम् ॥ (यथा, देवीभागवते । ३ । ६ । ५ ।
"यथा दीपस्तथोपाधेर्थोगात् सञ्जायते द्विधा ।
छायेवादर्शमध्ये वा प्रतिबिम्बं तथावयोः ॥")
द्विधागतिः, पुं, (द्विधा द्विप्रकारा गतिर्यस्य ।) कुम्भीरः । इति हेमचन्द्रः ।४।४१८॥ द्विप्रकारगतियुक्ते, त्रि ॥
द्विधातुः, पुं, (द्वौ धातू यस्य । देवगजदेहत्वादेवास्य तथात्वम् ।) गणेशः । इति शब्दरत्नावली ॥ (द्वौ धातू ताम्रादिधातुद्वये यस्य ।) धातुद्वये, क्ली ॥
द्विधात्मकं, क्ली, (द्विधा आत्मा यस्य । कप् ।) जातीकोषम् । इति शब्दचन्द्रिका ॥
द्विधालेख्यः, पुं, (द्विधा लिख्यते यत्र । लिख+आधारे ण्यत् ।) हिन्तालवृक्षः । इति राजनिर्घण्टः ॥ द्विप्रकारलेखनीये, त्रि ॥
द्विनयकः, पुं, (द्वितीयो नयक इव ।) दुर्जनः । इति हेमचन्द्रः ॥
द्विपः, पुं, (द्वाभ्यां शुण्डसृक्काभ्यां पिबतीति । या+कः ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, माघे । ३ । ६० ।
"तेजोमहद्विस्तमसेव दीपै-
र्द्विपैरसह्याध्वमयाम्बभूवे ॥")
पुं, नागकेशरः । इति रत्नमाला ॥
द्विपथं, क्ली, (द्वयोः पथोः समाहारः । तद्धितार्थेत्यादिना समासः । "ऋक्पूरब्धूः पथामानक्षे ।" ५ । ४ । ७४ । इति अः ।) पथद्वयम् । दोमाता पथ इति भाषा । तत्पर्य्यायः । चारुपथः २ । इति हेमचन्द्रः । ४ । ५२ ॥ द्वौ पन्थानौ यत्रेत्यर्थे, त्रि ॥
द्विपदः, पुं, (द्वे पदे यस्य ।) मनुष्यः । (यथा, महाभारते । १ । ७४ । ५६ ।
"ब्राह्मणो द्विपदां श्रेष्ठो गौर्वरिष्ठचतुष्पदाम् ॥")
देवः । पक्षी । राक्षसः । यथा, प्रश्नसारे ।
"द्विपदेऽपि चतुर्भेदा दृदेवपक्षिराक्षसाः ॥"
द्विपदराशिः, पुं, (द्वे पदे यस्य । स चासौ राशिश्चेति ।) मिथुनम् । तुला । कुम्भः । कन्या । धनुषः पूर्व्वार्द्धम् । यथा, ज्योतिस्तत्त्वे ।
"मिथुनतुलाघटकन्याद्विपदाख्याश्चापपूर्व्वभागश्च ॥"
द्विपमदः, पुं, (द्विपस्य हस्तिनो मदः ।) हस्तिमदः । इति राजनिर्घण्टः ॥
द्विपर्णी, स्त्री, (द्वे द्वे पर्णे यस्याः । ङीप्) वनकोली । इति रत्नमाला । पर्णद्वययुक्ते, त्रि ॥
द्विपात्, [द्] त्रि, द्वौ पादौ यस्य सः । (पादस्य पाद्भावः ।) पादद्वययुक्तः । इति मुग्धबोधव्याकरणम् ॥
द्विपाद्यं, क्ली, (द्वौ पादौ परिमाणमस्य । "पथपादमाघश्रताद् यत् ।" ५।१। ३४ । इति यत् ।) द्विगुणदण्ड. । इत्यमरः । २ । ८ । २७ ॥
द्विपायी, [न्] पुं, (द्वाभ्यां मुखशुण्डाभ्यां पिबतीति । पा+णिनिः ।) हस्ती । इति हारावली । २४ ॥
द्विपृष्ठः, पुं, (द्वौ पृष्ठौ यस्य ।) राजभेदः । तत्पर्य्यायः । अजसम्भवः २ । इति हेमचन्द्रः । ३ । ३५६ ॥
द्विबिन्दुः, पुं, (द्वौ बिन्दू यत्र ।) विसर्गवर्णः । यथा, बिन्दुद्विबिन्दुमात्रौ वर्णौ क्रमात्पुरौ संज्ञौ स्तः । इति मुग्धबोधव्याकरणम् ॥ ग्रन्थद्वयञ्च ॥
द्विमातृजः, पुं, (द्वाभ्यां मातृभ्यां जायते इति । जन+डः ।) गणेशः । इति हेमचन्द्रः ।३।२१०॥
द्विमुखः, पुं, (द्वे मुखे यस्य ।) राजसर्पः । इति हलायुधः ॥ मुखद्वययुक्ते, त्रि ॥
द्विमुखा, स्त्री, (द्वे मुखे यस्याः ।) कर्करी । इति शब्दचन्द्रिका ॥ गाडु इति भाषा । चलौका ।

इति हलायुधः ॥ जोँक इति भाषा ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ५४ अध्याये ।
"चूरवो द्विमुखाश्चैव सम्प्रवेते पुरीषजाः ॥")

द्विमुखाहिः, पुं, (द्विमुखः चाहिः सर्पः ।) सर्पविशेषः । ग्वाँखिनी इति भाषा । तत्पर्य्यायः । अहीरलिः २ राजाहिः ३ राजसर्पः ४ द्विमुखः ५ सर्पभुक् ६ । इति हलायुधः ॥

द्विमुखोरगः, पुं, (द्विमुखः उरगः सर्पः ।) राजसर्पः । इति जटाधरः ॥

द्विमूर्द्धः, त्रि, (द्वौ मूर्द्धानौ यस्य । "द्वित्रिभ्यां ष मूर्द्धनः ।" ५ । ४ । ११५ । इति ष ।) मस्तकद्वययुक्तः । इति सुग्धबोधव्याकरणम् ॥ (यथा, भट्टिः । ४ । ४१ ।
"बहुमूर्द्धो द्विमूर्द्धोच त्रिमूर्द्धोबाहतां गधे ॥")

द्विरदः, पुं स्त्री, (द्वौ रदौ दन्तौ प्रधानतया यस्य । हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, महाभारते । ७ । २६ । २७ ।
"क्षोभयन्तं तथा सेनां द्विरदं नलिनीमिव ।
धनञ्जयं भूतगणाः साधु साध्वित्यपूजयन् ॥")

द्विरदान्तकः, पुं, (द्विरदानां हस्तिनां अन्तकः ।) सिंहः । इति राजनिर्घण्टः ॥

द्विरशनं, क्ली, (द्विर्वारमशनं भोजनम् ।) वारद्वयभोजनम् । यथा,—
"मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मलवासिनां नित्यम् ।
अहनि च तमस्विन्यां सार्द्धप्रहरयामान्तः ॥"
इति तिथ्यादितत्त्वम् ॥

द्विरसनः, पुं, (द्वे रसने जिह्वे यस्य ।) सर्पः । इति हारावली । १५ ॥

द्विरागमनं, क्ली, (द्विर्वारं विवाहात् परं आगमनं स्वामिगेहे इत्यर्थः ।) विवाहानन्तरं वध्वाः पितृगेहात् पतिगेहं पुनरागमनम् । यथा, नारदीयपद्धतौ ।
"इत्थं पाणिग्रहे गेहात् पितुः पतिगृहं प्रति ।
पुनरागमनं वध्वास्तद्विरागमनं विदुः ॥"
तस्य शुभकालदिनादि यथा । दीपिकायाम् ।
"खोमुक्ताक्षालिघटाजसंयुतरवौ कार्ये विशुद्धे भृगुं संत्यज्य प्रतिलोमगं शुभदिने याचाप्रवेशोचिते ।
लक्षाद्यस्तु निरंशुकं नववधूयाचाप्रवेशौ पतिः कुर्य्यादेकपुरादिषु प्रतिभगोर्नेच्छन्ति दोषं बुधाः ॥
पैचागारे कुचकुसुमयोः सम्भवो वा यदि स्यात् कालः शुद्धो न भवति यदा संशयो वापि शुक्रः ।
मेषे कुम्भेऽलिगे च न भवेत् भास्करश्चेत्तथापि स्वामी भद्रेऽहनि नवबधूं वेश्मयेन्मन्दिरं स्वम् ॥
भर्त्तर्गोचरशोभने दिनपतौ नाके गते भार्गवे सूर्य्ये कीटघटाजगे शुभदिने पक्षे च शुक्लेतरे ।
हित्वा च प्रतिलोमगौ बुधसितौ जीवस्य शुद्धौ तथा
पाणीता शुभशालिनी नववधूर्नित्योत्सवा मोदते ॥
एकयामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे ।
पतिना नीयमानायाः पुरः शुक्रो न दुष्यति ॥"

तथा,—
"काश्यपेषु वशिष्ठेषु भृग्वादित्याङ्गिरःसु च ।
भारद्वाजेषु वात्स्येषु प्रतिशुक्रो न दोषभाक् ॥"
श्रीपतिसंहितायां प्रचेताः ।
"पुष्यादित्यसमीरणादिति वसुम्बुत्तरारेवतीतारानायकरोहिणीषु शुभदे मेषालिकुम्भे रवौ ।
वारेष्विन्दुसितेन्द्रवित्तु शुभदे तारे प्रशस्ते विधौ कन्यामन्मथमीनतौजिनगृहे स्याद्वल्गनाद्यागमः ॥"
ज्योतिःसारसंग्रहे ।
"विवाहमासि प्रथमं वध्वा नागमनं यदि ।
तदा सर्व्वमिदं चिन्त्यं युग्माब्दं विचक्षणैः ॥"
ज्ञात्वचिन्तामणौ ।
"अब्दे इन्द्वब्धिमे वर्षे श्वशुरस्य दशान्दिके ।
सम्प्राप्ते द्वादशे वर्षे पतिं हन्ति द्विरागमे ॥"
मत्स्यसूक्ते ।
"शुक्रा पिठ्यगृहे कन्या भुङ्क्ते स्वामिगृहे यदि ।
दौर्भाग्यं जायते तस्याः शपन्ति कुलनायिकाः ॥"
इति ज्योतिस्तत्त्वम् ॥

निष्कर्षस्तु ।
"विवाहमासि प्रथममनागतायां वध्वा अष्टमदशमद्वादशेतरवर्षे कालशुद्धौ वैशाखमार्गशीर्षफाल्गुनान्यतममासे रविशुद्धौ सोमबुधगुरुशुक्रान्यतमवारे चन्द्रतारानुकूले रोहिणीपुनर्वसुश्रुत्तराग्निरःपुष्योत्तराचयहस्तस्वातीधनिष्ठारेवतीषु विदिभिन्नकरणेषु निधिरिक्तेतरयोगेषु कन्यामिथुनतुलामीनलग्नेषु द्विरागमनम् । कस्यचिन्मते बुधवारोऽपि निषिद्धः ।
दधिवदिड्सुखगमनं गमनमभिनवनारीणाम् ।
वयमपि धान्यादीनां न बुधो बुधवासरे कुर्य्यात् ॥"
इति सत्तत्त्वसुक्तावली ॥

द्विरापः, पुं, (द्विर्द्विवारं सुखमुखाभ्यामित्यर्थः । आ सम्यक् पिबतीति । पा + कः ।) क्षत्री । इति शब्दमाला ॥

द्विराषाढः, पुं, (द्विः आषाढः ।) मिथुनस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तमासद्वयम् । स च आषाढमलमासे भवति । यथा, ज्योतिषे ।
"मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
मिहिरश्च ।
"माधवादिषु षट्केषु मासि दर्शद्वयं यदा ।
द्विराषाढः स विज्ञेयः शेते तु श्रावणेऽच्युतः ॥"
इति मलमासतत्त्वम् ॥
अन्यच्च ।
"पौर्णमास्या द्वयं यत्र पूर्व्वाषाढाद्वयं भवेत् ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
इति गारुडे ६० अध्यायः ॥

द्विरुक्तः, त्रि, (द्विर्द्विवारं यथा तथा उक्तः ।) द्विवारकथितः । यथा । द्विरुक्तयश्चादौ द्विः । इति सुग्धबोधलक्षणम् ॥

द्विरुक्तिः, स्त्री, (वच् + क्तिन् । द्विर्द्विवारं उक्तिः ।) द्विवारकथनम् । इति संक्षिप्तसारः ॥

द्विरूढा, स्त्री, (उह्यते इति । वह + कर्म्मणि क्तः । द्विः ऊढा विवाहिता ।) द्विवारविवाहिता । तत्पर्य्यायः । दिधिषूः २ पुनर्भूः ३ । इति हेमचन्द्रः । ३ । १८६ ॥

द्विरूपः, पुं, (द्वौ रूपौ आकारौ यस्य ।) व्याकारशब्दादिः । यथा । द्विरूपकोषादिः । द्विवारयत्साहृत्तिः । यथा । द्विरूपपञ्चकादिपाठः । रूपद्वययुक्ते, त्रि ॥

द्विरेफः, पुं स्त्री, (द्वौ रेफौ रकारवर्णौ यस्य भ्रमरशब्दे ।) भ्रमरः । (यथा, कुमारे । ३ । २७ ।
"निवेशयामास मधुद्विरेफान्
नामाक्षराणीव मनोभवस्य ॥")
वर्ब्बरे, त्रि । इत्यमरः ॥

द्विवर्षा, स्त्री, (द्वौ वर्षौ वयःपरिमाणमस्याः । द्विवर्ष + आर्हीयष्ठक् तस्य लुक् च ।) द्विहायनी । द्विवर्षवयस्का गौः । इत्यमरः ।२।९।६८॥

द्विवर्षिका, स्त्री, (द्विवर्षैव । स्वार्थे कन् । टापि "प्रत्ययस्थादिति ।" ७ । ३ । ४४ । इति अत इत्वम् ।) द्विवर्षा गौः । इति हेमचन्द्रः ।४।३३८॥

द्विवर्षीयः, त्रि, (द्वौ वर्षौ वयःपरिमाणमस्य । द्विवर्ष + खः ।) द्विवार्षिकः । द्विवर्षवयस्कः । इति पाणिनीयव्याकरणम् ॥

द्विवार्षिकः, त्रि, (द्विवर्षे भवः । ठक् ।) द्विवर्षभवः । वत्सरद्वयजातः । इति व्याकरणम् ॥

द्विवाहिका, स्त्री, (द्वाभ्यां वाह्याभ्यां वाह्यतेति । वह + णिच् + खुल् । टापि अत इत्वम् ।) दोला । इति शब्दमाला ॥

द्विविदः, पुं, वानरविशेषः । इति हेमचन्द्रः ॥ (अयं हि नरकासुरस्य मित्रम् । यथा, विष्णुपुराणे । ५ । ३६ । २ ।
"नरकस्यासुरेन्द्रस्य देवपक्षविरोधिनः ।
सख्यभावमुपागौ द्विविदो नाम वानरः ॥"
स तु बलरामेण हतः । यथा, तत्रैव ।५।३६।२०।
"ततो बलेन कोपेन सुहृदि स्नेहदूषितः ।
पपात रुधिरोद्गारी द्विविदः स्रोत्रजीवितः ॥"
श्रीरामस्य सचिववानरराजमन्यतमः । यथा, महाभारते । ३ । २७६ । २३ ।
"मैन्दश्च द्विविदश्चैव हनूमांश्चानिलात्मजः ।
ऋक्षवानृक्षराजश्च सुग्रीवः सचिवाः स्मृताः ॥")
"समुद्रस्योत्तरे तीरे द्विविदो नाम वानरः ।
ऐकाहिकञ्चरं हन्ति तस्य वामानुकीर्त्तनात् ॥"
इति ज्योतिषम् ॥

द्विवेग्रा, स्त्री, (द्वौ वेग्रौ गमनावस्थारूपौ राति ददातीति । रा दाने + कः ।) लघुरथः । तत्पर्य्यायः । गन्त्री २ वधी ३ । इति हारावली । १६२ ॥

द्विशः, [स्] अ, (द्वि + "संख्यैकवचनाच्च वीप्सायाम् ।" ५ । ४ । ४३ । इति वीप्सायां शस् ।) द्वौ द्वौ । इति वीप्सार्थे चतुस्प्रत्ययः ॥ (यथा, सुश्रुते । १ । ४१ ।
"द्विशो वा बहुशो वापि शस्त्रं दोषेऽवचारयेत् ॥")

द्विग्रपः, पुं, (द्वौ द्वौ ग्रफौ यस्य ।) द्विखुरपशुः । यथा, श्रीभागवते । ३ । १० ।२२ ।
"गौरजो महिषः क्षत्त्राः शूकरो गवयो रुरुः । द्विग्रफाः पशवश्चेमे अदितिरुच्च सत्तमः ॥"

द्विष, ल ञ् व्यौ वैरे । इति कविकल्पद्रुमः । (अदां-उभं-सकं-अनिट् ।) ल ञ, द्वेष्टि दिष्टे । व्यौ, अद्विषत् । द्वियन्ति मन्दाश्चरितं महात्मनाम् । इति कुमारः । इति दुर्गादासः ॥

द्विषतीतापः, त्रि, (द्विषतीं तपति तापयतीति वा । द्विषती + तप + अण् । तप + णिच् + अच् वा ।) स्त्रीग्रन्थतापकः । इति संक्षिप्तसारव्याकरणम् ॥

द्वेषवन्, [त्] त्रि, (द्वेष्टीति । द्विष + "द्विषोऽमित्रे ।" ३ । २ । १३१ । इति शतृ ।) शत्रुः । इत्यमरः ।२।८।१० ॥ (यथा, माघे । २ । १ ।
"वियच्चमाखेनाहूतः पार्थेनाथ द्विषन् सुरम् ॥")

द्विषन्तपः, त्रि,(द्विषन्तं तापयतीति । तप + णिच् + "द्विषतृपरयोस्तापेः ।" ३ । २ । ३६ । इति खच् । "खचि ह्रस्वः ।" ६ । ४ । ६४ । इति ह्रस्वः । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ ।६७। इति मुम् । ततः संयोगान्ततकारलोपः ।) शत्रुन्तपः । शत्रुतापजनकः । इति संक्षिप्तसारव्याकरणम् ॥

द्विष्टं, क्ली, (द्विष + क्तः ।) ताम्रम् । ताम्रम् । इत्यमरटीकासारसुन्दरी ॥ ३ विषविषये, त्रि । (यथा, भाषापरिच्छेदे । १५१ ।
"निवृत्तिस्तु भवेद्वेषात् द्विष्टसाधनताधियः ॥"
तथाच ।
"अचोष्यं दुष्टसुच्छिष्टं पाषाणक्षतजोद्भवम् ।
द्विष्टं युषितमखाद्यं पूति चान्नं विवर्जयेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अः ॥

द्विष्ठः, त्रि, द्वयोस्तिष्ठति यः । (द्वि + स्था + कः ।) उभयस्थः । यथा । संयोगस्य द्विष्ठतयेति जगदीशः ॥

द्विसप्ततिः, स्त्री, (द्व्यधिका सप्ततिः । "विभाषा चत्वारिंशत्प्रभृतौ सर्व्वेषाम् ।" ६ । ३ । ४६ । इति षष्ठ्या न आत्वम् ।) द्व्यधिकसप्ततिः । इति ज्योतिषम् ॥ ७२ वाच्योत्तर इति भाषा ॥ (यथा, मनुसंहितायाम् । ७ । १५७ ।
"प्रत्येकं कथिता होताः संक्षेपेण द्विसप्ततिः ॥")

द्विसहस्राक्षः, पुं,(द्विसहस्रं अक्षीणि यस्य । बहु समासे ।) अग्निदेवः । इति हेमचन्द्रः ॥

द्विसीत्यं, त्रि, (द्वित्रं सीतया सहितम् । द्विसीता + "नौ वयोधर्म्मेति ।"४ । ४ ।६१ । इति यत् ।) द्वात्रिंशद्धस्तोच्चम् । दोचसा भूँइ इति भाषा । तत्पर्य्यायः । द्विगुणाक्षतम् २ द्वितीयाक्षतम् ३ ग्रन्थाक्षतम् ४ सन्धाक्षतम् ५ द्विहस्यम् ६ । इत्यमरभरतौ ॥

द्विसूक्ष्मान्नं, क्ली, (द्विसूक्ष्मं द्विःपक्वं अन्नं तण्डुलम् ।) द्विःसिद्धतण्डुलम् । यथा,—
"द्विसूक्ष्मान्नं पृथुकं शुष्कं देशविशेषके ।
नात्यन्तग्रुष्कं विप्राणां भक्षणे च निषेदुषे ॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ।
ताम्बूलञ्च यथा ब्रह्मन् ! तथैते वस्तुनी ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥

द्विहस्यं, त्रि, (द्विवारं हस्तेन क्षरम् । द्विहस्त + "मतजनहलादिति ।" ४ । ४ ।६७। इति यत् ।) द्विधाक्षरश्चेक्षुः । इत्यमरः । २ । ६ । ६ ॥

द्विहा, [न्] पुं, (द्वाभ्यां शुक्लदन्ताभ्यां हन्तीति । हन + क्विप् ।) हस्ती । इति शब्दरत्नावली ॥

द्विहायनी, स्त्री, (द्वौ हायनौ वत्सरौ वयःक्रमौ यस्याः । "दामहायनान्ताच्च ।" ४।१।२७ । इति ङीप् ।) द्विवर्षा गौः । इत्यमरः । २ । ६ । ६८ ॥ (द्विवर्षवयस्के,, त्रि । यथा, मनुः । ११।१३४ ।
"शुक्लं द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायणम्॥")

दौन्द्रियग्राह्यः, पुं, (द्वाभ्यामिन्द्रियाभ्यां ग्राह्यः ।) इन्द्रियद्वयग्रहणीययुग्यः । स तु संख्यादिसप्तद्रव्यलक्षणस्वरूपः । यथा,—
"संख्यादिपरत्वान्तो द्रव्यलक्षण एव च ।
एते तु दौन्द्रियग्राह्या अथ सप्तान्तशब्दकाः॥"
इति भाषापरिच्छेदः ॥

द्वीपं, क्ली, (द्वौ वर्णौ इयते इति । इ गतौ + बाहुलकात् पः ।) याज्ञचर्म्म । इति हेमचन्द्रटीकायां भरतः ॥

द्वीपः, पुं क्ली, (द्विर्गता द्वयोर्दिग्रोर्वा गता आपो यत्र । काकाक्षिगोलकन्यायेन द्वयोरित्युक्तेऽपि चतुर्दिक्षु इति सिद्धिः।"ऋक्पूरब्धूरिति ।"५।४। ७४ । इति यत् । "द्व्यन्तरुपसर्गेभ्योऽप ईत् ।" ६।३।६७ । इति ईत् ।) वारिमध्यतटम् । जलवेष्टितभूमिः । तत्पर्य्यायः । अन्तरीपम्२ । इत्यमरः ।१।१०।८॥ द्वीपोत्पत्तिर्यथा । सूर्य्यः सुमेरुं प्रदक्षिणीकुर्व्वन् अर्द्धां पृथ्वीं प्रकाशयति अर्द्धां तमसा आवृणोति । तदा भगवदुपासनोपचितातिक्रान्तपुरुषप्रभावः प्रियव्रतो राजा सूर्य्यरथसमवेगेन ज्योतिर्मयरथेन रजनीमपि दिनं करिष्यामीति प्रतिज्ञां कृत्वा सप्तवारं द्वितीयसूर्य्य इव सूर्य्यमनुपर्य्यक्रामत् । अस्य रथचरणनेमिपरिखाताः सप्तसिन्धव आसन् । तैरेव सिन्धुभिः पृथिव्याः सप्त द्वीपाः कृताः । ते जम्बु १ प्लक्ष २ शाल्मलि ३ कुश ४ क्रौञ्च ५ शाक ६ पुष्कर ७ संज्ञकाः । तेषां पूर्व्वस्य यद्विस्तारमानं उत्तरतस्ततो द्विगुणेन विस्तारमानेन परिमाणम् । ते सिन्धुभ्यो बहिःसमं रचिताः । यथा सिन्धुभ्यो बहिरेकैकशो द्वीपाः एवं द्वीपानामपि बहिःसिन्धवः । स प्रियव्रतः बर्हिष्मतीगर्भेणाननुगतानात्मजान् आग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञकान् यथासंख्येन एकैकस्मिन् द्वीपे एकैकमधिपतिं विदधे । इति श्रीभागवतीयपञ्चमस्कन्धात् संगृहीतम् ॥ * ॥
अपि च ।
"मनोः स्वायम्भुवस्यासन् दश्र पुत्रास्तु तत्समाः ।
तैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ॥
वसुन्धराकरवती प्रतिवर्षं निषेदुषी ।
सायम्भुवेऽन्तरे पूर्व्वमाद्ये त्रेतायुगे तदा ॥
प्रियव्रतस्य पुत्रैस्तैः पौत्रैः स्वायम्भुवस्य तु ।
प्रियव्रतात् प्रजावन्तो वीरात् काम्याभ्यजायत ॥
कन्या सा तु महाभागा कर्द्दमस्य प्रजापतेः ।
कन्ये द्वे दशपुत्राश्च सम्राट् कुक्षिश्च ते उभे ॥
मेधाग्निबाहुमित्रास्तु त्रयो योगपरायणाः ।
जातिस्मरा महाभागा न राज्याय मनो दधुः ॥
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान् ।
द्वीपेषु तेषु धर्म्मेण द्वीपांस्तांश्च निबोध मे ॥
जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता ।
प्लक्षद्वीपेश्वरञ्चापि तेन मेधातिथिः कृतः ॥
शाल्मले तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये ।
क्रौञ्चद्वीपे द्युतिमन्तं हव्यं शाकाह्वये सुतम् ॥
पुष्कराधिपतिञ्चैव सवनं कृतवान् सुतम् ॥"
इति मार्कण्डेयपुराणम् ॥
"भूमेरर्द्धं खारसिन्धोरुदक्स्थं
जम्बुद्वीपं प्राहुराचार्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपयटक्षस्य याम्ये
खारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलमत्र क्रौञ्चं
क्रौञ्चश्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकनेकं
वसुद्वयोर्द्वीपसदाहरन्ति ॥"
इति सिद्धान्तशिरोमणिः ॥

द्वीपकपूरजः, पुं, (द्वीपकर्पूरवत् जायते इति । जन + डः ।) चीनकर्पूरः । इति राजनिर्घण्टः ॥

द्वीपखर्ज्जूरं, क्ली, (द्वीपजातम् खर्ज्जूरम् ।) महापारेवतम् । इति राजनिर्घण्टः ॥

द्वीपजं, क्ली, (द्वीपात् जायते इति । जन + डः ।) महापारेवतम् । इति राजनिर्घण्टः ॥

द्वीपवती, स्त्री, (द्वीपः अस्त्यस्या इति । द्वीप + मतुप् मस्य वः । ङीप् ।) नदी । (यथा, महाभारते । १ । ७० । २८ ।
"अलङ्कृतं द्वीपवत्या मालिन्या रम्यतीरया ॥")
भूमिः । इति मेदिनी । ते, १६८ ॥

द्वीपवान्, [त्] पुं, (द्वीपोऽस्त्यस्य इति । द्वीप + मतुप् मस्य वः ।) सप्तसमुद्रः । वटः । इति मेदिनी । ते, १६८ ॥

द्वीपश्रुचुः, पुं, (द्वीपस्य द्वीपिनः श्रुचुः ।) श्रुतावरी । इति राजनिर्घण्टः ॥ (श्रुतमूलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

द्वीपिका, स्त्री, (द्वीपो द्वीपी वाऽत्यन्ततया अस्त्यस्या इति । द्वीप + ठन् ।) श्रुतावरी । इति राजनिर्घण्टः ॥

द्वीपिनखः, पुं,(द्वीपिनो व्याघ्रस्य नखः ।) बालनखः । इति राजनिर्घण्टः ॥ (स तु बालानां कण्ठभूषणविशेषः । यथा, अध्यात्मरामायणे १।३।४८ ।
"कण्ठे चाष्टसहस्रान्तमष्टद्वीपिनखार्चितम् ॥")

द्वीपिश्रुचुः, पुं, (द्वीपिनो व्याघ्रस्य श्रुचुः ।) श्रुतमूली । इति जटाधरः ॥

द्वीपी, [न्] पुं, (द्वीपं चर्म्म अस्त्यस्येति । द्वीप + "अत इति ठनौ ।" ५।२।११५ । इति ठन् ।)

पिञ्जकः। व्याघ्रः। इति राजनिर्घण्टः॥ (यथा, रामायणे। २।६४।७।
"नानाव्यालगजैर्द्वीपितरक्षुच्छगवैर्वृतः॥")
द्वैप्यः, त्रि, (द्वीपे भव इत्यर्थे ष्यञ्प्रत्ययः॥ ("तत्र भवः।" ४।३।५३। इति यत्।) द्वैप्यः। (यथा, वाजसनेयसंहितायाम्। १६।३१।
"नमो गादेयाय च द्वैप्याय च॥")
द्वृ, स्वगने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) वकारोपधः। द्वरति। स्वगनं संवरणम्। वरणे इति प्राचः। वरणं स्वीकारः स्वगनमेति गोविन्दभट्टः। इति दुर्गादासः॥
द्वेधा, व्य, (द्वि+"संख्याया विधार्थे धा।" ५।३।४२। इति धा। "एधाच।" ५।३।४५। इति तस्य एधाच्।) द्विप्रकारम्। इति व्याकरणम्॥
द्वेषः, पुं, (द्विष+भावे घञ्।) अप्रीतिः। तत्पर्य्यायः। वैरम् २ विरोधः ३ विद्वेषः ४ द्वेषणम् ५। इति शब्दरत्नावली॥ (यथा, मनुः। ४। १६३।
"नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम्। द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्জ্জयेत्॥")
अस्य कारणं द्विट्साधनताज्ञानम्। इति भाषापरिच्छेदः॥ स च आत्मनो विशेषगुणः। इति सिद्धान्तमुक्तावली॥ तदप्रवर्त्तित्वनिषेधो यथा, श्रीभगवद्गीतायाम्। ३। ३४।
"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ। तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ॥"
"इन्द्रियस्येन्द्रियेति वीप्सया सर्व्वेषामिन्द्रियाणां प्रत्येकमित्युक्तम्। अर्थे स्वस्वविषये अनुकूले रागः प्रतिकूले द्वेषः इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यम्भाविनौ।" इति तट्टीकायां श्रीधरस्वामी॥
द्वेषणं, क्ली, (द्विष+भावे ल्युट्।) द्वेषः। इति शब्दरत्नावली॥ (यथा, महाभारते। ५।६१।२७।
"अकस्मादेव पार्थानां द्वेषणं नोपपद्यते॥")
द्वेषणः, त्रि, (द्विष+"क्रुधमन्वार्थेभ्यश्च।" ३।२।१५१। इति युच्।) अप्रीतुः। इत्यमरः। २।८।९०॥ (यथा, महाभारते। १२।१६८।१५।
"मानपो द्वेषणः क्रोधी निर्घृणः परुषस्तथा॥")
द्वेष्टी, [न्] त्रि, (द्वेष्टि तच्छीलः। द्विष+"संज्ञायामनुरुधेति।" ३।२।१४२। इति घिनुण्।) अप्रीतुः। इति हेमचन्द्रः। ३।३६३॥ (यथा, रघुः। १७। ७३।
"तथापि वव्रुधे तस्य तत्कारिद्वेषिणो यशः॥")
द्वेष्टा, [ष्टृ] त्रि, (द्वेष्टीति। द्विष+ष्टृच्।) विद्वेषकर्त्ता। इति द्विषधातोस्तृनृप्रत्ययेन साध्यः॥ (यथा, महाभारते। १।४६।६।
"द्वेष्टारस्तस्य नैवासन् स च द्वेष्टि न कञ्चन॥")
द्वेष्यः, त्रि, (द्वेष्टुमर्हः। यत्।) द्वेषविषयः। विद्वेषार्हः। तत्पर्य्यायः। अधिगतः २। इत्यमरः। ३।१।४५॥ (यथा, महाभारते। ४।१६।१८।
"सुखं वा यदि वा दुःखं द्वेष्यं वा यदि वा प्रियम्।
यथावत् सर्व्वमाचष्व श्रुत्वा धास्याभि यत्समम्॥")
द्विष्यतेऽसाविति। द्विष+ण्यत्। अप्रीतुः। यथा, रघुः। १। २८।
"द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम्। त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता॥")
द्वैगुणिकः, त्रि, (द्विगुणार्थे दत्तं द्विगुणम्। तत्प्रयच्छति द्विगुणं गृहीतुमेकगुणं ददातीत्यर्थः। द्विगुण+"प्रयच्छति गर्ह्यम्।" ४।४।३०। इति ठक्।) वृद्धजीवः। इति हेमचन्द्रः। ३।५४४॥ द्विगुणं गृह्णाति यः इत्यर्थे ष्ठिकप्रत्ययः॥
द्वैतं, क्ली, (द्विधा इतं द्वीतम्। तस्य भावः। युवादित्वात् अण्। स्वार्थे अण् वा।) द्वयम्। इति हेमचन्द्रः। ६।६०॥ (यथा, भागवते। १०।१५।३०।
"विप्रोक्तो ब्रह्मसम्पत्त्या संछिन्नद्वैतसंशयः।
लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसम्भवः॥")
लोकादिरूपम्। एकायनोऽसाविति श्लोकव्याख्यायां श्रीधरस्वामी॥ (वनविशेषः॥ मेतद्विके, त्रि। यथा, किराते। १। १।
"सवर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः॥"
"द्वैतवने द्वैताख्ये तपोवने। यद्वा, द्वे इते गते यस्मात् तत् द्वीतम्। द्वीतमेव द्वैतं तच्च तद्वनमेति तस्मिन्। श्लोकमोहादिरहिते इत्यर्थः॥" इति तट्टीकायां मल्लिनाथः॥)
द्वैतवादी, [न्] त्रि, (द्वैतं जीव ईश्वरश्चेति द्वयं वदतीति। वद+णिनिः।) जीवेश्वरयोर्भेदवादी। ईश्वरातिरिक्तजीववक्ता। तस्य मतं यथा, परमात्मनो जीवात्मा पृथक् तत्रार्थे केषाञ्चिन्मते प्रकृतिरतिरिक्ता केषाञ्चिन्मते प्रकृतिरद्वैतमात्रे पर्य्यवसिता एवं जीवश्च पृथक्। अत्र प्रमाणम्।
जन्मकर्म्ममरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैव॥
इति साङ्ख्यमतम्॥
तत्रेश्वरः सर्व्वज्ञः परमात्मा एक एव। जीवः प्रतिशरीरं भिन्नः विभुर्नित्यश्च। इति गोतममतम्॥
इह ब्रह्मणो जीवेतरत्वप्रतिपादनात् तयोरद्वैतं नाभिमतम्। नेतरोऽनुपपत्तेर्भेदव्यपदेशाच्च सूत्रोऽप्यस्य व्यपदेशादाकाशोऽर्थान्तरत्वादिव्यपदेशाद्भोगमात्रसाम्यलिङ्गाच्चेति सूत्रैर्मोक्षेऽपि तयोर्द्वैतनिरूपणाच्च। इति गोविन्दभाष्यमतम्॥
यतो द्वैतमते युक्तिरेव प्रमाणं युक्त्या यत् फलति तदेव सर्व्वाध्यात्मविद्याप्रतिपादकश्रुतीनां तात्पर्य्यम्। इति रामानुजमतञ्च॥
द्वैतीयीक, त्रि, (द्वितीय+तीयादीकक्। स्वार्थे वा ईकक्।) द्वितीयः। यथा,—
"द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महाकाव्ये चारणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥"
इति नैषधम्। २।११०॥
द्वैधं, त्र, (द्वि+"संख्याया विधार्थे धा।" ५।३।४२। इति धा। "द्वित्रिभ्यां धमुञ्।" ५।३।४५। इति धा इत्यस्य धमुञ्।) द्विप्रकारम्। इति व्याकरणम्॥ (यथा, हरिवंशे। १।३०।
"तदक्षमकरोद्द्वैधं दिवं भुवमथापि च॥")
क्ली, "धमुञन्तात् स्वार्थे ऽदर्शनम्।" इति वार्त्तिकोक्त्या ऽः। राज्ञां षड्गुणानामन्यतमः। इत्यमरः। २।८।१८॥) एकेन सन्धिरपरेण विग्रहः इति द्वौ प्रकारौ द्वैधं निपातितम्। इत्यमरटीकायां भरतः॥ (तच्च द्विविधम्। यथा, मनुः। ७। १६७।
"बलस्य स्वामिनश्चैव स्थितिः कार्य्यार्थसिद्धये।
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः॥")
विवादः। इति त्रिकाण्डशेषः॥ (द्विप्रकारम्। यथा, मनुः। ८। ७३।
"बहुत्वं परिगृह्यीयात् साध्विद्वैधे नराधिपः।
समेषु तु गुणोत्कृष्टान् गुणद्वैधे द्विजोत्तमान्॥"
त्रि। यथा, "पथि द्वैधानि त्यजानि।" इति सिद्धान्तकौमुदी॥)
द्वैपः, पुं, (द्वीपिनो विकारः द्वैपम्। द्वीप+"प्राग्दीव्यतोऽण्।" ४।३।१५४। इति अण्। तेन परिवृतः। "द्वैपवैयाघ्राभ्यां।" ४।२।९२। इत्यण्।) द्वीपिचर्म्मावृतरथः। इत्यमरः। २।८।५३॥ द्वीपसम्बन्धिनि व्याघ्रचर्म्मसम्बन्धिनि च त्रि॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये।
"द्वैपं दग्धं चर्म्म मातङ्गजं वा
भिन्ने स्फोटे तैलयुक्तं प्रलेपः॥")
द्वैपायनः, पुं, (द्वीपे अयनं उत्पत्तिस्थानं यस्य। स एव। स्वार्थे प्रज्ञादित्वात् वा अण्।) व्यासः। इति हेमचन्द्रः। ३। ५११॥ (सनिरुक्तिरस्य जन्मकथा यथा महाभारते। १।६३।८३—८५।
"इति सत्यवती हृष्टा श्रुत्वा वरमनुत्तमम्।
पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा॥
जज्ञे च यमुनाद्वीपे पाराशर्य्यः स वीर्य्यवान्।
स मातरमनुज्ञाप्य तपस्येव मनो दधे॥
स्मृतोऽहं दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत्॥
एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात्।
व्यस्तो द्वीपे स यद्बालस्तस्माद्वैपायनः स्मृतः॥"
हृदविशेषः। अस्य दुर्य्योधनः पाण्डवभयात् आत्मानं स्तम्भयित्वा स्थितः। यथा, महाभारते। ६। ३१। २।
"व्यासाद्य च कुरुश्रेष्ठ! तदा द्वैपायनं ह्रदम्।
स्तम्भितं धार्त्तराष्ट्रेण दृष्ट्वा तं सलिलाशयम्।
वासुदेवमिदं वाक्यमब्रवीत् कुरुनन्दनः॥")
द्वैप्यं, त्रि, (द्वीपे भवम् द्वीपस्य इदम् वा। द्वीप+"द्वीपादनुसमुद्रं यञ्।" ४।३।१०। इति यञ्।) द्वीपसम्बन्धि। द्वीपशब्दात् इदमर्थे

ष्णप्रत्ययेन साध्यम्। इति व्याकरणम्॥ (यथा, माघे। ३। ७६।

"विक्रीय दिग्वासनि धनान्युरूणि
द्वैष्यानसावुत्तमलाभभाजः।
तरीषु तत्तत्समफलगुभाङ्गं
सांयात्रिकानावपतोऽभ्यनन्दत्॥")

दैमातुरः, पुं, (दयोर्मात्रोरपत्यम्। द्विमाद+ "मातुरुत्संख्यासंभद्रपूर्व्वायाः।" ४। १। ११५। इति अण् उत्त्वञ्च।) गणेशः। इत्यमरः। १। १। ४०॥ (अस्य द्विमातृत्वकथा स्कन्दपुराणे गणेशखण्डे उक्ता यथा,—

"आविर्भविष्ये सदने वरेण्यस्य महीपतेः।
त्रैलोक्यरक्षणार्थाय विघ्नस्यास्य प्रशान्तये।
पालनाय स्वभक्तानां साधुत्राणाय भूसुराः॥
शिव उवाच।
इत्युक्त्वा पुष्पकागर्भं प्रविवेश तदैव सः।
आगते नवमे मासि प्रासूत पुष्पका शिशुम्॥
चतुर्बाहुमिभास्यञ्च दनुरं सुन्दरेक्षणम्।
आयुधानि च चत्वारि बिभ्रतं तेजसान्वितम्॥
दृष्ट्वा सा क्रन्दनं चक्रेऽरिष्टमेतत् किमागतम्।
श्रुत्वा चाक्रन्दनं तस्या वरेण्यः सगणो ययौ॥
ददर्श बालकं सोऽपि विस्मितः सह तैर्गणैः।
उवाच सेवकान् राजा त्यजतैनं सरोवरे॥
शिशुमादाय ते याताः पार्श्वस्थैवाश्रमे शुभे।
कासारे तं शिशुं त्यक्त्वा ययुः सर्व्वे निजं पुरम्॥
अपरस्मिन् दिने पार्श्वमुनिः स्नानाय चागतः।
तदैव दृष्टो तेन बालकोऽद्भुतदर्शनः॥
आश्चर्यमदरोत्तत्र भयभीतस्तथाभवत्।
आश्रमे केन मे त्यक्तमरिष्टसुखदायिनीम्॥
तपसा तु फलं दातुमीदृशीं धृतवांस्तनुम्।
रक्षितुं सर्व्वलोकानां परमात्मा निजेच्छया॥
सुन्दरो बालकः केन त्यक्तोऽयमीदृशो वहिः।
नीत्वा स्वमाश्रमं चैनं पालयिष्ये प्रयत्नतः॥
इत्युक्त्वा जगृहे बालमालिलिङ्ग मुदा मुनिः।
तमानीतं मुनेः पत्नी ददर्श दीपवत्सला।
उवाच निजभर्त्तारं सुप्रसन्ननानाम्बुना॥
दीपवत्सलोवाच।
किमानीतं महत् स्वामिन्नश्रुमाश्चर्यकारकम्।
इदं वैनायकं रूपं समाभाति द्विजर्षभ!॥
इदमेव श्रियः स्थानं इदमेव तपःफलम्।
इदमेव परं ब्रह्म योगिध्येयं सनातनम्।
इदमेव परं तेज आदित्ये यदधिष्ठितम्।
इदमेव हि वेदान्ता नेति नेति प्रचक्षते॥
शिवऽवाच।
इत्युक्त्वा हर्षसम्पन्ना भर्तुरादाय बालकम्।
स्तनपानं ददौ तस्मै ततः सा दीपवत्सला।
द्वितीयाचन्द्रवद्बालो वृद्धिं यातो दिने दिने॥") जरासन्धः। इति मेदिनी। रे, २६८॥ (अस्य द्विमातृत्वकारणं जरासन्धशब्दे द्रष्टव्यम्॥) द्विमातृजे, त्रि। इति हेमचन्द्रः। ३। २१०॥ (यथा, राजतरङ्गिण्याम्। ४। ३५५।

"भिन्नशीला तयोर्भात्रोर्धीर्दैमातुरयोः पुनः॥")

II.

दैमातृकः, पुं, (द्वे मातृके इव यस्यासौ द्विमातृकः। स एव स्वार्थे अण्।) नदीदृष्टिजलोद्भूतधान्यभृतो देशः। इति राजनिर्घण्टः॥

दैवगौया, स्त्री, (दैवगं दैवमर्हतीति। छः।) नागवल्लीभेदः। इति राजनिर्घण्टः॥

द्व्यक्षरं, क्ली, (द्वयोरक्षरयोः समाहारः।) वर्णद्वयम्। द्वयोरक्षरम्। (द्वे अक्षरे यत्र।) अक्षरद्वययुक्तशब्दादौ, त्रि॥ (यथा, भागवते। २। ८। ६।

"स चिन्तयन् द्व्यक्षरमेकदाम्भ-
स्युपाशृणोत् द्विर्गदितं वचो विभुः॥")

द्व्यङ्गुलं, त्रि, (द्वे अङ्गुली प्रमाणमस्य। "तत्पुरुषस्याङ्गुलेरिति।" ५। ४। ८६। इति अच्।) अङ्गुलिद्वयपरिमितम्। यथा, ज्योतिषतत्त्वे।

"अर्काङ्गुलाथ सूच्यग्रा काष्ठी द्व्यङ्गुलमूलिका।
शङ्कुच्छाया भवेत्तत्र तच्छायां परिकल्पयेत्॥"

द्वयोरङ्गुल्योः समाहारः इति वाक्ये अङ्गुलिद्वयमात्रे, क्ली। इति सुग्धबोधम्॥ (द्वे अङ्गुली यस्य इति विग्रहे। "अङ्गुलेर्दारुणि।" ५। ४। ११४। इति यच्। द्व्यङ्गुलं दारु॥ इति व्याकरणम्॥)

द्व्यञ्जलं, त्रि, (द्वावञ्जली परिमाणमस्य ("द्वित्रिभ्यामञ्जले:।" ५। ४। १०२। इति टच्।) अञ्जलिद्वयपरिमितम्। द्वयोरञ्जल्योः समाहारः इति वाक्ये अञ्जलिद्वयमात्रे, क्ली। इति सुग्धबोधम्॥

द्व्यणुकं, क्ली, (द्वौ अणू कारणे यस्य। कप्।) परमाणुसमवेतद्रव्यम्। परमाणुद्वयात्मकम्। तच्च प्रत्यक्षादिविषयम्। यथा, भाषापरिच्छेदे। ३८।

"विषयो द्व्यणुकादिस्तु ब्रह्माद्यन्त उदाहृतः॥"

तस्य परिमाणमनित्यम्। यथा,—

"अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम्॥"

इति भाषापरिच्छेदे। १११॥

द्व्यन्यः, त्रि, द्वाभ्यामन्यः इति पञ्चमीतत्पुरुषे कृते। द्विभिन्नः॥ द्वे अन्ये यस्य। इति बहुव्रीहौ। द्विभिन्नकः। द्वयोरन्ययोः समाहारः। इति वाक्ये, क्ली॥

द्व्यर्थः, त्रि, (द्वौ अर्थौ यस्य।) अर्थद्वययुक्तशब्दादिः। अस्य प्रमाणं राघवपाण्डवीयादिग्रन्थे द्रष्टव्यम्॥

द्व्यष्टं, क्ली, (हैमरूप्ये द्वे अश्नुते इति। अश्+ गत्यर्थेति क्तः। इडभावः।) ताम्रम्। इत्यमरः। २। ६। ६७॥

द्व्यहः, पुं, अहर्द्वयम्। द्वे अहनी समाहृते। इति पुंलिङ्गसंग्रहे भरतः॥

द्व्यात्मकः, पुं, (द्वौ रूपौ आत्मानौ यस्य।) मिथुनकन्याधनुर्मीनराशयः। यथा, ज्योतिस्तत्त्वे।

"चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"

द्व्याहिकः, त्रि, (द्व्यहे भवः। ठञ्। वाहुलकात् न ऐच्।) दिनद्वयभवः। द्व्यहे भव इत्यर्थे ञिकप्रत्ययः॥

घ

घ, धकारः। स तवर्गचतुर्थो वर्णो व्यञ्जनोनविंशश्च। अस्योच्चारणस्थानं दन्तः। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७।

"दन्त्या ऋतुलसाः स्मृताः।" इति॥) अस्य स्वरूपं यथा,—

"धकारं परमेशानि! कुण्डली मोक्षरूपिणी।
आत्मादितत्त्वसंयुक्तं पञ्चदेवमयं सदा॥
पञ्चप्राणमयं देवि! चिच्छक्तिसहितं सदा।
त्रिबिन्दुसहितं वर्णं धकारं हृदि भावय॥
पीतविद्युल्लताकारं चतुर्व्वर्गप्रदायकम्॥"

इति कामधेनुतन्त्रम्॥

"त्रिकोणरूपरेखायां त्रयो देवा वसन्ति च।
विश्वेश्वरी विश्वमाता वामतः स्वन्यतः स्थिता॥"

इति वर्णोद्धारतन्त्रम्॥

अस्य ध्यानं यथा,—

"षड्भुजां मेघवर्णाञ्च रक्ताम्बरधरां पराम्।
वरदां शोभनां रम्यां चतुर्व्वर्गप्रदायिनीम्॥
एवं ध्यात्वा धकारन्तु तन्मन्त्रं दशधा जपेत्॥"

अस्य नामानि यथा—

"धीर्धनार्थी रुचिः स्याणुः सात्वतो योगिनीप्रियः।
मीनेशः शङ्खिनी तोयं नागेशो विश्वपावनी॥
धिषणा धरणा चिन्ता नेत्रयुग्मं प्रियो मतिः।
पीतवासा त्रिवर्णा च धाता धर्म्मश्चतुर्भुजः॥
सन्दर्शो मोहनो लज्जा वक्त्रतुण्डाधरं धरा।
वामपादाङ्गुलेर्मूलं ध्येष्ठा सुरपुरं भवः॥
सर्पात्मा दीर्घजङ्घश्च धनेशो धनसञ्चयः॥"

इति नानातन्त्रशास्त्रम्॥

धं, क्ली, (दधाति सुखमिति। धा+ डः।) धनम्। इति मेदिनी। धे, १॥

धः, पुं, (दधाति धरति विश्वमिति। धा+ डः।) ब्रह्मा। (दधाति निधिमिति।) कुबेरः। (दधाति जीवानां शुभाशुभमिति।) धर्म्मः। इति मेदिनी। धे, १॥

धक्क, क नाशने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) कोपधः। नाशनं नद्यीकरणम्। क, धक्कयति पापं गङ्गा। इति दुर्गादासः॥

धटः, पुं, (धं धनं अटति गच्छति प्राप्नोति तोल्यत्वेनेति। घ+ अट्+ अच्। पृषोदरादित्वात् साधुः।) तुला। इत्यमरः। ३। ५। १७॥ तराजु इति घाड़ा इति च भाषा। (अस्य निरुक्तिर्यथा,—

"धकाराद्धर्म्मसद्दिष्टं टकारात् कुटिलं नरम्।
धृतो धारयसे यस्माद्दटस्तेनाभिधीयते॥"

इति दियतत्त्वधृतवचनम्॥)

तुलाराशिः। यथा, ज्योतिस्तत्त्वे।

"सिंहो वृश्चश्च मेषश्च कन्या धन्वी घटो घटः।
चर्कादीनां त्रिकोणानि मूलानि राशयः
क्रमात्॥"

तुलापरीक्षा। इति परीक्षातत्त्वम्॥

अस्य विवरणं तुलाशब्दे द्रष्टव्यम् । (धर्म्मः । इति विष्णुनारदौ । यथा,—
"अर्च्चयेत्तु घटं पूर्व्वं ततः शिष्टांश्च पूजयेत् ।"
इति दिवतत्त्वधृतवचनम् ।)

घटकः, पुं, (घटेन तुलया कायतीति । कै + कः ।) चतुर्द्दशपलपरिमाणम् । इत्यमरटीकायां भरतः । इति लीलावती । नन्दिसूत्रः । तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"घनो घटो नन्दितरः स्थिरो गौरो धुरन्धरः ।"

घटपरीक्षा, स्त्री, (घटस्य तुलायाः परीक्षा ।) तुलापरीक्षा । तत्र घटोत्पत्तिविधिर्यथा । "पितामहः ।
'छित्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्व्वकम् ।
प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः ॥'
यूपवदिति यूपच्छेदनविहितसर्व्वैतिकर्त्तव्यतातिदेशः । सा च ॐ खधिते मैनं हिंसीरिति-च्छेदनमन्त्रविशेषादिरूपा इति व्यवहार-प्रदीपः ॥
'मन्त्रः सौम्यो वानस्पत्यच्छेदने अप्य एव च ।
चतुरस्रा तुला कार्य्या दृढा रज्ज्वी तथैव च ॥
कटकानि च देयानि त्रिषु स्थानेषु पार्थिवत् ॥'
कटकानि वलयानि ।
'चतुर्हस्ता तुला कार्य्या पादौ चोपरि तत्समौ ॥'
अत्र साधारणवचनेन प्रारदातिलकोक्तो हस्तो ग्राह्यः । यथा,—
'चतुर्विंशत्यङ्गुलाढ्यं हस्तं तत्त्वविदो विदुः ।
यवानामष्टभिः कृष्णं मानाङ्गुलमितीरितम् ॥'
यवानां तण्डुलीकृतानाम् ।
'यवानां तण्डुलैरेकमङ्गुलं चाष्टभिर्भवेत् ।
अष्टाधिकशतैर्हस्तश्चतुर्भिस्तदङ्गुलैः ॥'
इति कालिकापुराणात् ॥
प्रमाणन्तु पार्श्वेन यवानाम् । 'षड्यवाः पार्श्व-ङ्गुलिताः ।' इति कात्यायनवचनात् ॥ * ॥
अनयोर्व्यवस्थामाह कापिलपञ्चरात्रम् ।
'अष्टभिस्तैर्भवेज्ज्येष्ठं मध्यमं सप्तभिर्यवैः ।
कन्यसं षड्भिरित्येतन्मुनिश्रेष्ठम् ! ॥'
कन्यसं कनिष्ठम् । पादौ स्तम्भौ । उपरि वृत्ति-कोपरि । ततुल्यौ चतुर्हस्तावित्यर्थः । वस्तुतस्तु उपरितत्समौ उपरि ततुल्यं काष्ठान्तरं ययोः पादयोस्तौ ॥ * ॥ स्तम्भप्रमाणमाह व्यासः ।
'हस्तद्वयं निखेयन्तु प्रोक्तं तुलयोर्द्वयोः ।
षड्हस्तन्तु तयोः प्रोक्तं प्रमाणं परिमाणतः ॥'
तुलयोः स्तम्भयोः । षड्हस्तं निखातहस्त-द्वयेन धर्म्मं अर्थान्मृत्तिकोपरि हस्तचतुष्टय-मित्यर्थः ।
'अन्तरन्तु तयोर्ज्ञेयं भवेदध्यर्द्धमेव वा ।'
तयोः स्तम्भयोः । हस्तावन्तरं हस्तद्वयपरि-मितमध्यमित्यर्थः । अध्यर्द्धं सार्द्धहस्तद्वयम् । एतत्तु शाकटरथोक्त्या कार्य्या पञ्चहस्तायता तुला । इति विष्णुक्तपञ्चहस्तायततुलाविषयम् । व्यवहारदीपिकाप्येवम् । ० ॥
अथ घटारोपणविधिः । पितामहः ।
'हस्तद्वयं निखेयन्तु पादयोरुभयोरपि ।'
अत्र हस्तद्वयं मृत्तिकाभ्यन्तरे । हस्तचतुष्टयं मृत्तिकोपरि । तथा,—
'तोरणे च तथा कार्य्ये पार्श्वयोरुभयोरपि ॥
घटाद्धस्तरे स्थाता नित्यं दृग्भिरङ्गुलैः ।
अवलम्बौ च कर्त्तव्यौ तोरणाभ्यामधोमुखौ ॥
दृग्मयौ वृत्तसंस्थौ घटमस्तकसन्निभौ ।
प्राङ्मुखो निखनेत् कार्य्यः शुचौ देशे घटस्तथा ॥'
नारदः ।
'शिक्यद्वयं समासाद्य घटकण्टयोर्दृढम् ।
एकत्र शिक्ये पुरुषमन्यत्र तुलयेच्छिलाम् ॥'
पितामहः ।
'प्राङ्मुखान् कल्पयेत् दर्भान् शिक्ययोरुभयोरपि ।
पश्चिमे तोलयेत् कर्त्तुर्नन्यस्मिन् मृत्तिकां शुभाम् ॥
पिटकं पूरयेत्तस्मिन् इष्टकाग्रावपांसुभिः ॥'
अत्र मृत्तिकेष्टकाग्रावपांसूनां विकल्पः ।
'परीक्षका नियोक्तव्यास्तुलामानविशारदाः ।
वणिजो हैमकाराश्च कांस्यकारास्तथैव च ।
कार्य्याः परीक्षकैर्नित्यमवलम्बसमो घटः ॥
उदकञ्च प्रदातव्यं घटस्योपरि पण्डितैः ।
यस्मिन्न स्रवते तोयं स विज्ञेयः समो घटः ॥
तोलयित्वा नरं पूर्व्वं पश्चात्तमपतार्य्य तु ।
घटस्तु कारयेन्नित्यं पताकाध्वजशोभितम् ॥
तत आवाहयेद्देवान् विधिनानेन मन्त्रवित् ।
वादित्रतूर्य्यघोषेण गन्धमाल्यानुलेपनैः ॥
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥'
प्राड्विवाकसमाख्या तु पृच्छतीति प्राट् विवेचय-तीति विवाकः । इति व्यवहारमाला ॥ * ॥
तथा च बृहस्पतिः ।
'विवादे पृच्छति प्रश्नं प्रतिपन्नं तथैव च ।
प्रियपूर्व्वं प्रावदति प्राड्विवाकस्ततः स्मृतः ॥'
वस्तुतस्तु प्राड्विवाकसमाख्यामाह कात्यायनः ।
'व्यवहारार्थितं प्रश्नं पृच्छति प्राड्ति स्थितिः ।
विवेचयति यस्मिन्न प्राड्विवाक इति स्मृतः ॥'
अभिप्रायं पृच्छतीति प्राट् तदनुरूपं दिव्यं विविनक्ति इति विवाकः । प्राट् चासौ विवाक-श्चेति कर्म्मधारयः ॥ * ॥
अथ कात्यायनेन नवग्रहपूजामाह मत्स्यपुराणम् ।
'नवग्रहमखं कृत्वा ततः कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न कार्य्यं जायते क्वचित् ॥'
ततश्च प्राड्विवाकः पूर्व्वं कार्य्यं पृच्छेत् निर्देदि-तञ्च विवेचयेत् । ततोऽभियुक्तं तोलयित्वा अव-तार्य्य धर्म्मादाहरणादि कुर्य्यात् । पितामहः ।
'एह्येहि भगवन् धर्म्म दिव्ये त्वमस्मिन् समाविश ।
साक्षितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥
आवाह्य च घटे धर्म्मं पञ्चादङ्गानि विन्यसेत् ॥'
अङ्गानि परिवारदेवताः ।
'इन्द्रं पूर्व्वे तु सम्पाद्य प्रेतेशं दक्षिणे तथा ।
वरुणं पश्चिमे भागे कुबेरं उत्तरे तथा ॥
अन्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ॥'
इन्द्रः पीतो यमः श्यामो वरुणः स्फाटिकप्रभः ।
कुबेरश्च सुवर्णाभो वह्निश्चापि सुवर्णभः ॥
तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते ।
ईशानस्तु भवेत् शुक्ल अनन्तः शुक्ल एव च ॥
ब्रह्मा चैव भवेद्रक्त एवं ध्यायेत् क्रमादिमान् ॥
इन्द्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः ।
धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः ॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥ * ॥
देवेशेशानयोर्मध्ये आदित्यान् तथायनम् ।
धातार्य्यमा च मित्रश्च वरुणोऽंशुर्भगस्तथा ॥
इन्द्रो विवस्वान् पूषा च पर्ज्जन्यो दशमः स्मृतः ।
ततस्त्वष्टा ततो विष्णुरजघन्यो अघन्यजः ॥
इत्येते द्वादशादित्या मनुना परिकीर्त्तिताः ॥'
अजघन्यो अघन्यजः । इति विष्णोर्विशेषणम् ।*।
'अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ।
वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः ॥
अजैकपादहिब्रध्नः पिनाकी चापराजितः ।
भुवनाधीश्वरश्चैव कपाली च विशांपतिः ॥
स्थाणुर्भवश्च भगवान् रुद्राश्चैकादश स्मृताः ॥'
महायशाः विशांपतिर्भगवांश्चेति विशेषणानि ॥
'प्रेतेशस्यासोर्मध्ये मातृस्थानं प्रकल्पयेत् ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा गणसंयुता ॥'
गणसंयुतेति विशेषणम् ॥ * ॥
'निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः ।
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ॥
असनः सर्पनो वायुरनिलो मारुतस्तथा ।
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्त्तिताः ॥
घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः ।
एतासां देवतानाञ्च स्नानान्तं पूजनं विदुः ॥'
विशेषमाह ब्रह्मपुराणम् ।
'ओङ्कारादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥
अनेनैव विधानेन गन्धपुष्पे निवेदयेत् ।
एकैकस्य प्रकर्त्तव्यं यथोद्दिष्टं क्रमेण तु ॥'
मन्त्र इत्यभिधानादनेनैवेत्येवकारश्रुतेश्च इदं द्रव्यं ओमसुकाय नमः इति योज्यं न तु धर्म्मा-यार्घ्यं प्रकल्पयामि नमः इति पितामहोक्तम् । प्रमाणाभावादगत्यया च । पितामहः ।
'भूषावसानं सम्भार्य दत्त्वा चार्घ्यादिकं क्रमात् ।
अर्घ्यादि पञ्चादङ्गानां भूषान्तमुपकल्पयेत् ॥
गन्धादिकां नैवेद्यान्तां परिचर्य्यां प्रकल्पयेत् ।'
एतत् सर्व्वं प्राड्विवाकः कुर्य्यात् । यथा,—
'प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः ।
श्रुतव्रतोपपन्नश्च शान्तचित्तो विमत्सरः ॥
सत्यसन्धः शुचिर्दक्षः सर्व्वप्राणिहिते रतः ।
उपोषितः शुक्लवासाः शतदन्तादिधावनः ॥
सर्व्वासां देवतानाञ्च पूजां कुर्य्यादृषाविधिं ॥'
रक्तगन्धपुष्पादीनाह नारदः ।
'रक्तैर्गन्धैश्च माल्यैश्च धूपदीपाक्षतादिभिः ।
अर्च्चयेत्तु घटं पूर्व्वं ततः शिष्टांश्च पूजयेत् ॥'
घटं धर्म्मम् । तथा च विष्णुनारदौ ।
'धर्म्मपर्य्यायवचनं घट इत्यभिधीयते ।'
शिष्टानिन्द्रादीन् । अविशेषात् सर्व्वत्र रक्तो-

न्वयः । मिताक्षरायान्तु धर्म्मपूजन एव रक्तत्व-नियमः । तथा,—
'चतुर्हिस्तु ततो होमः कर्त्तव्यो वेदपारगैः ।
आज्येन हविषा चैव समिद्भिर्होमसाधनैः ॥
सावित्र्या प्रणवेनैव स्वाहान्तेनैव होमयेत् ॥'
सावित्र्या गायत्र्या । तेन प्रणवादिकां गायित्रीमुच्चार्य्य पुनः स्वाहाकारान्तं प्रणवमुच्चार्य्य समिदाज्यचरून् प्रत्येकमष्टोत्तरशतं जुहुयादिति मिताक्षरा । वस्तुतस्तु गायत्रीहोमे योगियाज्ञवल्क्याः ।
'प्रणवव्याहृतिभ्याञ्च स्वाहान्तं होमकर्म्मणि ।
तेन प्रणवादिकां सव्याहृतिकां गायत्रीमुच्चार्य्य स्वाहाकारान्तं पुनः प्रणवमुच्चार्य्य आज्य-पायससमिधो मिलित्वा अष्टोत्तरशतं जुहुयात् लाघवात् । अतएव देवतैक्ये हि दधिपयसो-स्तन्त्रेणानुष्ठानम् । ऐन्द्रं दध्नमावास्यायामैन्द्रं पयोऽमावास्यायामिति श्राद्धविवेकः ॥ * ॥
यत्तु पद्मलाङ्गलमहादाने ।
'पर्ज्जन्यादित्यरुद्रेभ्यः पायसं निर्व्वपेच्चरुम् ।
एकस्मिन्नेव कुम्भे च गुरवेऽसौ निवेदयेत् ॥
पलाशसमिधस्तद्वदाज्यं क्षौद्रतिलांस्तथा ॥'
इति मत्स्यपुराणात् ॥
चतुर्णां होतृणां मध्ये यस्मै गुरुः पर्ज्जन्यादिभ्यो होमं कुर्व्विति आज्ञां करोति स एव पर्ज्जन्याय आदित्याय रुद्रेभ्यश्चतुर्म्मन्त्रैः पायसं पलाश-समिदाज्यक्षौद्रतिलांश्च प्रत्येकं जुहुयादिति भूपालप्रभृतिभिरुक्तम् । तदयुक्तं तद्वदिति तथेत्याभ्यां प्रत्येकक्रियेव होमविधानात् । अत-एव रत्नाकरकृद्भिरुक्तं जुहुयादित्युक्ता तद्वदिति पलाशादि जुहुयादित्युक्तम् । अतएव हृषीत-सर्गे वाचस्पतिमिश्रप्रभृतिभिरप्याज्यादिहोमशेष-पायसपूपहोमशेषपिष्टकाभ्यां मिलिताभ्यां सकृत् स्विष्टकृद्धोमो विहितः । अशक्तौ तु ।
'होमो ग्रहादिपूजायां घृतमष्टाधिकं भवेत् ।
अष्टाविंशतिरष्टौ वा गृह्यपेक्ष्यमथापि वा ॥'
इति देवीपुराणीयादिपदर्शनात् अन्यथ्या सङ्ख्या ज्ञेया । एवं मत्स्यपुराणे ।
'शृणु राजन् महाबाहो तडागादिषु यो विधिः ।
वेद्यास्तु परितो गर्त्तारत्निमात्रास्त्रिमेखलाः ॥
नव सप्तथवा पञ्च योनिवक्त्रा नृपात्मज ।
इति नवादिकुण्डानुक्त्वा,—
'स्वल्पेऽप्येकाग्निमत्कार्य्यो वित्तशाठ्याद्बुधैर्नृभिः ॥'
इति दर्शनादत्रापि अग्नेकाग्निविधिरिति वदन्ति । अत्र प्राड्विवाकस्त्वेवं होमः ।
'दिवेषु सर्व्वकार्य्येषु प्राड्विवाकः समाचरेत् ।
अध्वर्य्युं यजमानमात्रम् । न चात्र भिन्नशाखिनाम्ट-त्विजां ऋत्विग्वरणप्रयुक्तिकल्पनेति वाच्यम् । ब्राह्मणमात्रस्य नानाशाखाध्यायेऽवधानेन कर्म्म-नानुपपत्तेः । तथा च मनुः ।
'वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ।
अविप्लुतब्रह्मचर्य्यो गृहस्थाश्रममाचरेत् ॥' इति ।
प्रायश्चित्तहोमस्तु सामगानां महाव्याहृतिभिः ।
'यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत् ।
ऋतस्तत्र कर्त्तव्याः स्त्रीपाणिग्रहणे यथा ॥
अपि वाज्ञातमिश्रेषा प्राजापत्यापि वाहुतिः ।
होतव्या त्रिर्विकल्पोऽयं प्रायश्चित्तविधिः स्मृतः ॥'
इति छन्दोगपरिशिष्टात् ॥
न तु ग्राह्यायनहोमो भवदेवभट्टोक्तः । त्रिर्वि-कल्प इत्यनेन तस्य निरासात् । भट्टनारायणा-दिभिरप्रमाणीकृतत्वाच्च ॥ * ॥ पितामहः ।
'तोलयित्वा नरं पूर्व्वं तस्मात्तमवतार्य्य च ।
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥
एह्येहि भगवन् धर्म्म ! दिवं त्वमिन् समाविश ।
सहितो लोकपालैस्त्वं दत्तादित्यमरुद्गणैः ॥
तत्पार्थमभियुक्तस्य लेखयित्वा तु पत्रके ।
मन्त्रेणानेन सहितं कुर्य्यात्तस्य शिरोगतम् ॥
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मोऽपि जानाति नरस्य वृत्तम् ॥
इमं मन्त्रविधिं कृत्स्नं सर्व्वदिव्येषु योजयेत् ।
आवाहनञ्च देवानां तथैव परिकल्पयेत् ॥ * ॥
घटमामन्त्रयेच्चैवं विधिनानेन मन्त्रवित् ।
त्वं घटो ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् ॥
धकारार्द्धस्मृतिर्दृष्टं टकारात् कुटिलं नरम् ।
धृतो धारयसे यस्माद्घटस्तेनाभिधीयते ॥
त्वं वेत्थ सर्व्वभूतानां पापानि सुकृतानि च ।
त्वमेव देव ! जानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्ब्रूह्यस्तत्सत्यतुमर्हसि ॥'* ॥
लेखनप्रकारमाह नन्दिपुराणम् ।
'शुभे नक्षत्रदिवसे शुभे राशिदिनग्रहे ।
लेखयेत् पूज्यदेवेभ्यान् ब्रह्मब्राह्मणनार्हतान् ॥
पूर्व्वदिग्वदनो भूत्वा लिपिज्ञो लेखकोत्तमः ।
निरोधो हस्तवाक्कोच मसीपत्रविधारणे ॥
मत्स्यपुराणच्च ॥
'ग्रीवोपेतान् सुसम्पन्नान् समश्रेणिगतान् समान् ।
अक्षरान् लेखयेद्यस्तु स नरो लेखकः स्मृतः ॥'
इति दानसागरः ॥
धारयसे इत्यत्र भावयसे इति पाठोऽनुपयुक्तः । तथा हि । कुटिलं पापिनं संशयोपपन्नं वा । आद्ये पापिनमित्येतावन्मात्राभिधानमनुपपन्नं छद्मगत्या शुद्धस्यापि ज्ञापनात् द्वितीये पूर्व्व-सिद्धत्वेन ज्ञापनानुपपत्तिः । तस्मात् कुटिलं व्यवहाराभिशस्तं धारयसे इत्येवार्थः । अतएव उपसंहारे संशयादस्मादित्युक्तम् । अतएव कालिकापुराणेऽपि । मानुषस्तोलते त्वयीत्युक्त-मिति ॥ * ॥ स्मृतिसमुच्चयव्यवहारदीपिकयो-र्विष्णुः । घटश्च समयेन ग्रहीयात् तुलाधारकश्च ।
'धर्म्मपर्य्यायवचनं घट इत्यभिधीयते ।
त्वमेव घट जानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्ब्रूह्यस्तत्सत्यतुमर्हसि ॥
ब्रह्मणा ये स्मृता लोका ये लोकाः कूटसाक्षिणः ।
तुलाधारस्य ते लोकास्तुलां धारयतो व्रज ॥'
समयेन त्वमेव घट इत्यादिनियमेन । घटं ग्रही-यात् योजयेत् । तुलाधारकश्च ब्रह्मणा ये इत्या-दिना नियमेनेत्यर्थः । अत्र नानासुनिप्रणीत-मन्त्राणाम् एकतरप्राप्यानां समानप्रयोजनानां यत्रैकोद्देशेनैकल्प इति ग्रन्थगौरवात्ते न लिखिताः । अभिशस्तप्राड्विवाकप्राप्यानान्तु इष्टार्थानां समुच्चयः । पितामहः ।
'नित्यं देयानि देयानि शुचये चार्द्रवाससे ।'
शुचये जननमरणाशौचरहिताय । यतिनं प्रति याज्ञवल्क्यादीनकलिकायां नारदः ।
'हस्तत्रयेषु सर्व्वेषु कुर्य्याद्दानपदानि च ।
तान्येव पुनरालक्ष्येद्दत्तो विन्दुर्विचिन्तितौ ॥'
इत्यग्निविधौ हस्तत्रयेषु हस्तत्रयमलक्षादिना चिह्नितं कृत्वा यतान्तरं ज्ञातं न वा इति ज्ञातव्यमिति सुतरां यतिनो दिप्याधिकारः ।
नारदः ।
'अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे ।
पूर्व्वाह्णे सर्व्वदिव्यानां प्रदानमनुकीर्त्तितम् ॥'* ॥
घटानुमन्त्रणात् प्रागपि पुनस्तोलनमाह कालिकापुराणम् ।
'उपोषितं तथा स्नातं वृत्तसमं प्रथमं तुलाम् ।
सन्तोल्य कारयेद्वेखामवतार्य्यानुमन्त्रयेत् ॥'
याज्ञवल्क्यः ।
'तुलाधारस्त्रिभिर्द्विज्ञैरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां लङ्घावतारितः ॥
त्वं तुले सत्यधामासि पुरा देवैर्विनिर्म्मिता ।
तत् सत्यं वद कल्याणि ! संशयान्मां विमोचय ॥
यद्यस्मिन् पापकृन्मासस्ततो मां त्वमधो नय ।
शुद्धश्चेत् समयोर्द्ध्वं मां तुलामित्यभिमन्त्रयेत् ॥'
तुलाधारणाभिज्ञैर्ब्राह्मणादिभिः पाषाणादि-प्रतिमानसमीकृतसुलाधिरूढः अभिशस्तो दिव्याधिकारी । येन सन्निवेशेन प्रतिमानसमी-करणदशायां यत्र पादादयो व्यवस्थिताः शिक्य-रज्वश्च तत्र पाण्डुलेखेनाङ्कयित्वा पिटकादव-तारितः त्वन्तुलेति मन्त्रेण तुलां प्रार्थयेत् । सत्यं सन्दिग्धार्थस्य स्वरूपं वद दर्शय । पापकृद-लत्ववादी शुद्धश्च सत्यवादी । मन्त्रश्चायं स्मार्त्तः पौराणिकत्वात् शूद्रेरपि प्राह्यः । वेदमन्त्रवर्ज्जं शूद्रस्येति छन्दोगाद्यधिकरणस्मृतौ वेदेति विशे-षणात् आहवनीयदेवादौ तु विशेषतो नमस्कार-मन्त्रविधानात् स्मार्त्तमन्त्रोऽपि निषिद्धः । प्रप-श्चस्तु तिथितत्त्वेऽनुसन्धेयः । स्त्रीपरीक्षायामपि अविकृत एव प्रयोज्यः । दिव्यानीह विशुद्धये इत्यनेन सन्दिग्धार्थसन्देहनिवृत्तिफलकतयाविशे-षेण स्त्रीपुंकर्तृकदिव्यविधानेन मानुषः शुद्धि-मिच्छतीत्यनेन च प्रकृतावृद्धायोगात् । अतएव पत्नीं यज्ञियां नो धेहीति मन्त्रे दिवकुचनीक-यजमानकर्तृकप्रयोगेऽपि न दिवकुचवचनोद्दृत्युक्तम् ॥ * ॥ पत्रस्यप्रतिज्ञेयार्थस्य शोधाय

तस्य स्वस्य बोधाय आवणमाह नारदः।
'असमर्थश्च पत्रस्थमभियुक्तं यथार्हतः।
संश्राव्य मूर्द्धि तस्यैव न्यस्य देयो यथाक्रमम्॥'
देयो दिव्यविशेषः प्राड्विवाकेनेति शेषः॥ * ॥
ततः शिरोऽवस्थितपत्रकं शोधं नरं घटे पुनरारोपयेत्। पुनरारोपयेत्तस्मिन् शिरोऽवस्थितपत्रकमिति स्मरणात्। तुलारोपितच्च नरं विनाड़ीपञ्चककालं धृतत्रयगुर्व्वक्षरोच्चारणयोग्यम्।
'मा कान्ते पत्रस्थान्ते पर्य्यंकाग्रे देशे स्वामीः।
कान्तं वक्त्रं दृष्टं पूर्णं चन्द्रं मत्वा रात्रौ चेत्।
क्षुत्क्षामः प्राटंस्तेतस्तेतो राहुः क्रूरः प्राप्यात्तस्माद्गान्ते हर्म्यस्थान्ते शय्यैकान्ते कर्णया॥'
इति श्लोकस्य पञ्चधा पाठयोग्यकालं पञ्चपलात्मकं यावत् तावत् स्थापयेत्॥ यथा, स्मृतिः।
'ज्योतिर्विद्ब्राह्मणः श्रेष्ठः कुर्य्यात् कालपरीक्षणम्।
विनाड्यः पञ्च विज्ञेयाः परीक्षाकालकोविदैः॥'
तत्कालञ्च ज्योतिषे।
'दशगुर्व्वक्षराः प्राणाः षट् प्राणाः स्याद्विनाड़िका।
तासां षष्ट्या घटी ज्ञेयाहोरात्रं घटिकाशतया॥'
तथा षष्ट्या॥ * ॥ पितामहः।
'साक्षिणो ब्राह्मणाः श्रेष्ठा यथादृष्टार्थवादिनः।
ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या नृपेण तु॥
शंसन्ति साक्षिणः सर्व्वे शुद्धाशुद्धौ नृपे तथा।
तुलितो यदि वर्द्धेत स शुद्धः स्यान्न संशयः॥
समो वा हीयमानो वा न विशुद्धो भवेन्नरः।
अल्पदोषः समो ज्ञेयो बहुदोषस्तु हीयते॥'
अल्पत्वं व्यभिचारे आलिङ्गनादिना। चौर्य्ये तद्देशगमनादिना॥ * ॥ तत्र पुनस्तोलनमाह हेमाद्रिः।
'घटेऽभियुक्तस्तुलितो हीनश्चेद्दानिमाप्नुयात्।
तत्समस्तु पुनस्तोल्यो वर्द्धितो विजयी भवेत्॥'
शोधः स्वल्पदोषाङ्गीकारेऽपि प्रधानदोषनिर्णयार्थं तत्रैव पुनस्तोलनीयः। अङ्गवैगुण्यसम्भावनायान्तु प्रयोगान्तरमिति। यदा चानुपलभ्यमानदष्टकारकत्वक एव कक्षादीनां छेदनादिस्तदाप्यशुद्धिः।
'कक्षच्छेदे तुलाभङ्गे घटकर्कटयोस्तथा।
रज्जुच्छेदेऽक्षभङ्गे च तथैवाशुद्धिमादिशेत्॥'
इति हेमाद्रितिवचनात्॥
कर्त्तं शिक्यतलम्। घटकर्कटौ तुलान्तयोः। शिक्याधारावीषद्वक्रावायसकीलकौ कर्कटस्थङ्गनिभौ। अक्षः पादः। स्तम्भयोरुपरिनिविष्टस्तुलाधारयष्टिरिति मिताक्षरा॥ दाष्टीप्रयोजकः कीलकः। इति हलायुधः॥ मध्यकटकमिति पारिजातः॥ यदा तु दह्यमानकारणक एवैषां भङ्गस्तदा पुनरारोपयेन्नरमिति स्मृतेः। तत्रैव।
'शतिकपुरोहिताचार्य्यान्तेवासिभिश्च तोषयेत्।
एवं कारयिता राजा शुद्धो भोगान् मनोरमान्।
महतीं कीर्त्तिमाप्नोति ब्रह्मभूयाय कल्पते॥ * ॥

तदयं सङ्क्षेपः। प्राड्विवाको लोकपालादिनमस्कारपूर्व्वकं यथोक्तलक्षणां तुलां कुर्य्यात्। ततः षड्हस्तौ सुदृढौ स्तम्भौ कृत्वा हस्तद्वयावधानेन दक्षिणोत्तरयोर्द्दिशोर्हस्तद्वयनिखननं कृत्वा पट्टधारकीलकाग्रस्तम्भयोरुपरि मध्ये पार्श्वद्वये च विहितच्छिद्रं मध्यच्छिद्रनिवेशितलोहाङ्कुशपट्टकं निधाय उपरि कीलकस्य ततपट्टकस्य मध्यस्थिताङ्कुशेन तुलामध्यवलयस्थलोहाङ्कुशं संयुञ्जात्। एवञ्च मध्ये स्तम्भयोरन्तरा तिर्य्यक् तुलादण्डस्तिष्ठति तुलाग्रस्थिताभ्यामायसकीलकाभ्यां शिक्याङ्कयरज्ज्वबन्धनं कुर्य्यात्। तुलायाः पार्श्वयोः प्राक्प्रत्यक्दिशोस्तोरणस्तम्भौ तुलातो दशाङ्गुलोच्छ्रायौ कार्य्यौ तोरणयोरुपरि सूत्रसम्बद्धौ दण्डप्रायावधोमुखौ घटमस्तकचुम्बितौ अवलम्बौ कार्य्यौ। यथावलम्बविश्लेषाभ्यां तुलायामवनतिरुन्नतिश्च ज्ञेया तथा जलद्वारापि।"
इति दिव्यतत्त्वम्॥ * ॥ अस्य प्रयोगस्तुलाशब्दे द्रष्टव्यः॥

घटी, स्त्री, (घन + अच्। निपातनात् नस्य टः। गौरादित्वात् ङीष्।) चौरवस्त्रम्। इति मेदिनी। टे, १६॥ कौपीनम्। इति त्रिकाण्डशेषः॥

घटीदानं, क्ली, (घट्या चौरवस्त्रस्य दानम्।) गर्भाधानानन्तरस्त्रीसम्प्रदानकचौरवस्त्रदानम्। यथा, ज्योतिःसारसंग्रहे।
"मूलश्रवणहस्तेषु पुष्यादित्युत्तरासु च।
नगपौष्णे घटी देया सौम्यवारे शुभे तिथौ॥"

घण, ध्वाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) घणति शब्दङ्गः। इति दुर्गादासः॥

घत्तूरः, पुं, (धयति पिबतीव प्रज्ञातिम्। धे + बाहुलकात् उरच्। एषोदरादित्वात् साधुः।) धुस्तूरः। इति हेमचन्द्रः। ३। २१७॥ (यथा, काश्मीरखण्डे। २६। ६३।
"धर्म्माधर्म्मैगुणक्षेत्री धत्तूरकुसुमप्रिया॥")

घन, रवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) घनति शब्दङ्गः। इति दुर्गादासः॥

घन, लिङ् र घान्ये। इति कविकल्पद्रुमः॥ (क्र्यां-परं-अकं-सेट्।) घान्यमिह धान्यक्रिया। र, वैदिकः। लि, दधन्ति भूमिर्धान्यसृत्पादयति इत्यर्थः। इति दुर्गादासः॥

घनं, क्ली, (घनति रौतीति। घन रवे + पचाद्यच्।) मेघपाचम्। इति शब्दरत्नावली॥ गोधनम्। इति मेदिनी। ने, १२॥ (यथा, हरिवंशे। ७३।३३।
"अनुजग्मुश्च गोपालाः कालयन्तो धनानि च॥")
जीवनोपायः। (दधन्ति धान्यादिकमुत्पादयन्तीति। धन + अच्। यद्वा, दधति सुखमिति। धा + "कृपृवृजिमन्दिनिधाञः क्युः।" उणा० २। ८१। इत्यत्र "बाहुलकात् केवलादपि क्युः।" इत्युज्ज्वलदत्तोक्तेः क्युः।) द्रविणम्। (यथा, उद्भटे।
"धनैर्निष्कुलीनाः कुलीना भवन्ति
धनैरापदं मानवा निस्तरन्ति।
धनेभ्यः परो नास्ति बन्धुर्हि लोके
धनान्यर्जयध्वं धनान्यर्जयध्वम्।")

तत्पर्य्यायः। द्रव्यम् २ वित्तम् ३ स्वापतेयम् ४ रिक्थम् ५ ऋक्थम् ६ वसु ७ हिरण्यम् ८ द्रविणम् ९ द्युम्नम् १० अर्थः ११ रा १२ विभवः १३। इत्यमरः। २। ९। ९०॥ काञ्चनम् १४ लक्ष्मीः १५ भोग्यम् १६ सम्पत् १७ ऋद्धिः १८ श्रीः १९ अवहार्य्यम् २०। इति राजनिर्घण्टः॥ रेः २१ भोगः २२। इति जटाधरः॥ स्वम् २३। इति शब्दरत्नावली॥ तस्य वैदिकपर्य्यायाः। मघम् १ रेक्णः २ रिक्थम् ३ वेदः ४ वरिवः ५ श्वात्रम् ६ रत्नम् ७ रयिः ८ चत्रम् ९ भगः १० मीलुम् ११ गयः १२ द्युम्नम् १३ इन्द्रियम् १४ वसु १५ रायः १६ राधः १७ भोजनम् १८ तना १९ तृमूणम् २० बन्धुः २१ मेधाः २२ यज्ञः २३ ब्रह्म २४ द्रविणम् २५ अवः २६ तृतम् २७ तृतम् २८। इत्यष्टाविंशतिरेव धननामानि। इति वेदनिघण्टौ २ अध्यायः॥ * ॥
तत्त्रिविधं यथा,—
"धनन्तु त्रिविधं ज्ञेयं शुक्लं शबलमेव च।
लक्षणञ्च तस्य विज्ञेयो विभागः सप्तधा पृथक्॥
क्रमायत्तं प्रीतिदायं प्राप्तञ्च सह भार्य्यया।
अविशेषेण सर्व्वेषां वर्णानां त्रिविधं धनम्॥
वैशेषिकं धनं दृष्टं ब्राह्मणस्य त्रिलक्षणम्।
याजनाध्यापने नित्यं विशुद्धाच्च प्रतिग्रहः॥
त्रिविधं क्षत्रियस्यापि प्राड्विवैशेषिकं धनम्।
युद्धार्जितञ्च करजं दण्डव्यवहारतः॥
वैशेषिकं धनं दृष्टं वैश्यस्यापि त्रिलक्षणम्।
कृषिगोरक्षवाणिज्यं शूद्रस्वेभ्यस्तु सङ्ग्रहात्॥
कुसीदकृषिवाणिज्यं प्रकुर्व्वीत स्वयं कृतम्।
आपत्काले स्वयं कुर्व्वन्नैनसा युज्यते द्विजः॥"
इति गारुड़े २१६ कुत्रचित् २१० अध्याये॥ *॥
धनभागिनो दायशब्दे द्रष्टव्याः। धनाभागिनो यथा,—
"कुब्जवामनखञ्जानां क्लीवानां व्याधितानामपि।
उन्मत्तानां तथान्धानां धनभागो न विद्यते॥
ग्रासाच्छादनमात्रञ्च तेषां दद्यात् सुजिह्मया।
एतावद्दीयते देव नार्थभागहरा हि ते॥"
इति वामनपुराणे ७५ अध्यायः॥ * ॥
अधना यथा,—
"त्रय एवाधना राजन्! भार्य्या दासस्तथा सुतः।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्॥"
इति मात्स्ये ३१ अध्यायः॥ * ॥
धनस्य प्राणतुल्यत्वसूक्तं यथा,—
"यदेतद्विविधं नाम प्राणा एते बहिश्चराः।
स तस्य हरते प्राणान् यो यस्य हरते धनम्॥"
इति कूर्म्मे २६ अध्यायः॥ * ॥
"अपराधाधमक्लेशं प्रयत्नेनार्जितं धनम्।
स्वल्पं वा बहुलं वापि देयमित्यभिधीयते॥"
अपराधः परपीड़ारहितम्। अक्लेशं पात्रक्लेशाजनकम्॥ * ॥ तामसधनं यथा,—
"पार्श्विकद्यूतचौर्य्यार्त्तिप्रतिरूपकसाहसैः।
आलेखोपार्जितं यत्तु तत् क्षणं वसुदाहृतम्॥"
पार्श्विकः पात्रतया योऽर्जयति। आर्त्तिः पर-

पीड़या । प्रतिरूपेण लक्षमिरत्नादिना । साहसेन सप्तदशगणिकारोहणादिना । आर्जवेन ब्राह्मणवैश्येन शूद्रादिना । लब्धं तामसम् ॥ * ॥ राजसधनं यथा,—

'कृषीदकृषिवाणिज्यशुल्कगानानुवृत्तिभिः ।
लतोपकारादाप्तञ्च राजसं सप्तदाहृतम् ॥'

अनुवृत्त्या सेवया ॥ * ॥ सात्त्विकधनं यथा,—

'श्रुतप्रौर्य्यतपःकन्याग्निष्यायाप्यान्वयागतम् ।
धनं सप्तविधं शुद्धं सुनिभिः सप्तदाहृतम् ।'

श्रुतेनाध्ययनेन । प्रौर्य्येण जयादिना । तपसा जपहोमदेवार्चादिना । कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धम् । अग्न्यागतं गुरुदक्षिणादिना । याज्यागतं आत्विज्यलब्धम् । अन्वयागतं दायादेर्यो लब्धम् । शुद्धं सात्त्विकम् ।"इति शुद्धितत्त्वे देवलनारदौ ॥ * ॥ धनप्रयोगनक्षत्राणि यथा,

अश्विनी । पुनर्व्वसुः । पुष्यः । उत्तरफल्गुनी । हस्ता । पूर्व्वाषाढ़ा । उत्तराषाढ़ा । श्रवणा । धनिष्ठा । शतभिषा । उत्तरभाद्रपत् । रोहिणी । इति ज्योतिषम् ॥ * ॥ धनप्रयोगनिषेधो यथा,

"आर्द्रं यमद्वन्द्वमहित्रयञ्च
ग्रनुद्वयं वातयुगं महेशः ।
कार्य्यो न चैतेषु धनप्रयोगो
ऋदौ गवे याञ्चलवं न देयम् ॥"

इति समयप्रदीपः ॥

अर्थप्रशंसा यथा,—

"अर्थेभ्योऽथ प्रवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः ।
क्रियाः सर्व्वाः प्रवर्त्तन्ते पर्व्वतेभ्य इवापगाः ॥
अर्थेन हि विमुक्तस्य पुरुषस्याल्पचेतसः ।
विप्रलीयन्ते क्रियाः सर्व्वा ग्रीष्मे कुसरितो यथा ॥
सोऽयमर्थं परित्यज्य सुखकामः सुखेधितः ।
पापमाचरते कर्त्तुं तदा दोषः प्रवर्त्तते ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः ॥
यस्यार्थाः स च विद्वान्तो यस्यार्थाः स च बुद्धिमान् ।
यस्यार्थाः स महाबाहुर्यस्यार्थाः स गुणाधिकः ॥
अर्थक्षेते परित्यागे दोषाः प्रत्यक्षता मया ।
राज्यसुतसुहृज्जनता घोर ! येन बुद्धिक्षया हता ॥
यस्यार्था धर्म्मकामार्थास्तस्य सर्व्वं प्रदक्षिणम् ।
अधनेनार्थकामेन नार्थः शक्यो विचिन्वता ॥
दर्पः कामश्च दर्पश्च धर्म्मः क्रोधः श्रमो दमः ।
अर्थादेतानि सर्व्वाणि प्रवर्त्तन्ते नराधिपे ॥
येषां गच्छत्यधं लोकश्चरतां धर्म्मचारिणाम् ।
तेऽर्थाक्षयि न दृश्यन्ते दृष्टिनेषु यथा यथाः ॥
इति रामायणे युद्धकाण्डे श्रीरामं प्रति श्रीलक्ष्मणवाक्यम् ॥ * ॥

अर्थनिन्दा यथा,—

"अर्थेभनर्थे भावय नित्यं
नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः
सर्व्वत्रैषा विहिता नीतिः ॥"

रत्नादि मोक्षसन्नरि द्रष्टव्यम् ॥ * ॥

अनुग्रहार्थं भगवता धनहरणम् । यथा,—

"राजन् यमनुगृह्णामि हरिष्ये तद्धनं शनैः ।
ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितम् ॥"

इति श्रीभागवतम् ।

धनकेलिः, पुं, (धनैः केलिः क्रीड़ा यस्य ।) कुबेरः । इति त्रिकाण्डशेषः ॥

धनक्षूः, स्त्री, (धनं क्षति गाहयतीति । क्षै + क्विप् । ततो नलोपः + वाहुलकात् कः ।) करेटुपत्नी । इति त्रिकाण्डशेषः ॥

धनक्षयः, पुं, (धनं क्षयति सम्पादयतीति । क्षि + क्षच् + सुम् । "धनमिच्छेत् हुताशनात् ।" इत्युक्तेरस्य तथात्वम् ।) अग्निः । त्रिकाण्डशेषः । इत्यमरः । १ । १ । ५६ ॥ (धनं क्षयति अरीन् निर्जित्य अर्ज्जयतीति । क्षि + क्षच् + सुम् च ।) अर्ज्जुनः । (अस्य निरुक्तिर्यथा, महाभारते । ४ । ४२ । १३ ।

"सर्व्वान् जनपदान् जित्वा वित्तमाश्रित्य केवलम् ।
मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनञ्जयम् ॥")

नागभेदः । स तु जलाशयाधिपतिः । (यथा, महाभारते । २ । ९ । ९ ।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ ।
मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ ॥")

देहमारुतः । स च शरीरवाह्यप्रचवायुर्नागतः । इति मेदिनी । ये, १२० ॥ ("धनञ्जयः पोषणकरः ।" इति वेदान्तसारः । ३३ ॥

"न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः ॥"

इति सुबोधिनी ॥)

"धनञ्जयस्तथा घोषे महारजतवर्णकः ।
जलाटे चोरसि स्कन्धे हृदि नाभौ त्वगस्थिषु ॥"

इति शारदातिलकटीकायां राघवभट्टः ॥ अर्ज्जुनवृक्षः । इति रत्नमाला । * ॥ (गोत्रविशेषः । तद्गोत्रीये, त्रि । यथा, महाभारते । २ । ३३ । ३४ ।)

"धनञ्जयानाञ्चयभः सुधामा सामगोऽभवत् ॥"

विष्णुः । यथा, महाभारते । १३ । १४८ । ८३ ।

"अजिह्मेऽग्नवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥"

"यतु दिग्विजये धनं प्रभूतं अनयत्तेन धनञ्जयः ।
'पाण्डवानां धनञ्जयः ।' इति भगवद्वचनात् ।"

इति शारीरभाष्यम् ॥ षोड़शग्रहापरस्य शनेः । यथा, देवीभागवते । १ । ३ । ३० ।

"अन्यारुणिः पञ्चदशे षोड़शे तु धनञ्जयः ॥")

धनदः, पुं, (धनं ददाति पालयतीति । दे + ड पालने + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) कुबेरः । इत्यमरः । १ । १ । ७२ ॥ (यथा, देवीभागवते । ९ । ३ । ४० ।

"त्रिविष्टपं यद्दास्यामि त्रिलोकेशं वरयं यमम् ।
धनदं पावकञ्चैव चन्द्रसूर्य्यौ विजित्य च ।"

ब्रह्मा अस्य तपसा सन्तुष्ट एनं धनेशं चकार । यथा, अध्यात्मरामायणे । ७ । १ । ३८ ।

"ददौ तपसा तुष्टो ब्रह्मा तस्मै वरं शुभम् ।
मनोऽभिलषितं तस्य धनैश्वर्यमखण्डितम् ॥")

हिञ्जलदेशः । इति राजनिर्घण्टः ॥ (धनदः आश्रयितेनास्त्यस्येति अच् । हिमवत एकदेशः । यथा, महाभारते । २३ । १६ । १६ ।

"धनदं समतिक्रम्य हिमवन्तञ्च पर्व्वतम् ॥"

धनं ददातीति । दा + कः ।) दातरि, त्रि । इति मेदिनी । दे, ३२ ॥ (यथा, कामन्दकीयनीतिसारे । ३ । २३ ।

"उद्वेजयति भूतानि क्रूरवाक् धनदोऽपि सन् ॥")

धनदाची, स्त्री, (धनदस्य कुबेरस्य अक्षि इव पिङ्गलं पुष्पं यस्याः । अच् समासे । स्त्रियां ङीप् ।) लताकरञ्जः । इति राजनिर्घण्टः ॥

धनदानुजः, पुं, (धनदस्य कुबेरस्य अनुजः कनिष्ठः ।) रावणः । इति शब्दरत्नावली ॥ (यथा, रघुः । १२ । ५३ ।

"नियतात् खसुराप्तानां वधाच्च धनदानुजः ।
रामेव निहितं मेने पदं दशसु मूर्द्धसु ॥")

धनदायी, [न्] पुं, (धनं ददाति उपासकायेति । दा + णिनिः । "धनमिच्छेत् हुताशनात् ।" इत्युक्तेरस्य तथात्वम् ।) अग्निः । इति शब्दरत्नावली ॥ धनदातरि, त्रि ॥

धनन्ददा, स्त्री, (येन धनेन भर्त्रा आनन्दं ददातीति । दा + कः ।) युद्धशक्तिभेदः । इति त्रिकाण्डशेषः ॥

धनपतिः, पुं, (धनानां पतिः ।) कुबेरः । इति धनञ्जयः ॥ (यथा, महाभारते । २ । १२ । ३ ।

"तथा धनपतेर्यज्ञा गुह्यका राज्यसाश्च ॥")

अस्य उत्पत्तिर्यथा,—

महादेव उवाच ।

"शृणु चार्य्यां वसुपतेरुत्पत्तिं पापनाशिनीम् ।
यथा वायुः शरीरस्थो धनदः सम्बभूव ह ॥
आद्यं शरीरं यत्तस्मिन् वायुरन्तस्थितोऽभवत् ।
प्रयोजनाभ्यां नित्यत्वादिश्वन् चैवदेवताः ॥
तत्राभूत्तस्य वायोस्तु उत्पत्तिः कीर्त्यते मया ।
तां शृणुष्व महाभाग ! कथ्यमानां मयानघ ! ॥
ब्रह्मणः सृजतः सृष्टिं सुखादायुर्विनिर्ययौ ।
प्रपञ्चशून्यैरावर्त्तं ब्रह्मा प्रत्यवैक्षयत् ॥
मूर्त्तो भवन् शान्तश्च तत्रोत्तो मूर्त्तिमान् भवन् ।
सर्व्वेषाञ्चैव देवानां यद्दत्तं फलमेव च ॥
तत् सर्व्वं याहि येनोक्तं तस्याद्धनपतिर्भवेत् ।
तस्य ब्रह्मा वरं तुष्टश्चिधिमेकाक्षयीं प्रभुः ॥
तस्यामनश्चिधाक्षौ यो भवेन्नियतः शुचिः ।
तस्यास्तु धनदो देवस्तुष्टः सर्व्वं प्रयच्छति ॥
इत्या धनपतेर्मूर्त्तिः सर्व्वकिल्बिषनाशिनी ।
य एतां श्रद्धयाश्रुत्वा पुटयः पठतेऽपि वा ॥
सर्व्वकाममवाप्नोति स्वर्गलोकञ्च गच्छति ॥"

इति वराहपुराणम् ॥

धनपिशाचिका, स्त्री, (धने पिशाचिकेव ।) धनाशा । तत्पर्य्यायः । लक्षा २ । इति शब्दरत्नावली । १२५ ॥

धनपिशाची, स्त्री, (धने पिशाचीव ।) लक्षा । धनलोभः । इति त्रिकाण्डशेषः ॥

धनप्रिया, स्त्री, (धनवत् प्रिया ।) लाक्षलता । इति राजनिर्घण्टः ॥

धनफलं, क्ली, (धनानां फलम् ।) दानभोगादि । यथा, अग्निरुवाच ।
"अग्निहोत्रफला वेदा दत्तमुक्तफलं धनम् ।
रतिपुत्रफला दाराः शीलवृत्तफलं श्रुतम् ॥"
इति वह्निपुराणे दानविधिनामाध्यायः ॥

धनवती, स्त्री, (धनमस्या अस्तीति । धन + मतुप् । मस्य वः । स्त्रियां ङीप् ।) धनिष्ठानक्षत्रम् । इति जटाधरः ॥

धनवान्, [त्] त्रि, (धनमस्यस्येति । धन + मतुप् । मस्य वः ।) धनविशिष्टः । धनी । इति हलायुधः ॥ (यथा, रामायणे । २ । ६७ । १८ ।
"गोराजके जनपदे धनवन्तः सुरक्षिताः ।
शेरते विवृतद्वाराः क्षत्रियोरक्षजीविनः ॥")

धनस्यकः, पुं, गोक्षुरः । इति शब्दचन्द्रिका ॥ (लालसया धनमिच्छतीति । धन + क्यच् । "सर्व्वप्रातिपदिकानां क्यचि लालसायां सुग्वक्तव्यः ।" ३ । १ । ५१ । इत्यस्य वार्त्तिकोक्त्या सुक् । ततो धनस्य इति नामधातुः + क्वुन् । लालसया धनेच्छौ, त्रि ॥)

धनहरी, स्त्री, (धनं हरतीति । हृ + "हरतेरनुद्यमनेऽच् ।" ३ । २ । ६ । इति अच् । गौरादित्वात् ङीष् ।) चोरनामगन्धद्रव्यम् । तत्पर्य्यायः । राक्षसी २ चक्रा ३ क्षेमः ४ दुष्पत्रः ५ गन्धहासकः ६ । इत्यमरः । २ । ४ । १२८ ॥ दुष्कुलीनः ७ विरोधः ८ क्रोधमूर्च्छितः ९ । इति शब्दरत्नावली ॥ क्षेमकः १० कितवः ११ कोरकः १२ । इति जटाधरः ॥ धनहारके रत्नम्, त्रि ॥

धनाधिपः, पुं, (धनानामधिपः ।) कुबेरः । इत्यमरः । १ । १ । ७२ ॥ (यथा, देवीभागवते । ५ । ७ । १८ ।
"सङ्करं सम्परित्यज्य गते शुक्रे शुचौ पतौ ।
यमो धनाधिपः पाशी जग्मुः सर्व्वे भयातुराः ॥")
अस्य ध्यानं यथा,—
"कुबेरञ्च प्रवक्ष्यामि कुङ्कुलाभ्यामलङ्कृतम् ।
हारकेयूररचितं सितामरधरं शुभम् ॥
गदाधरञ्च कर्त्तव्यं वरदं सुकुटान्वितम् ।
वरयुक्तविमानस्थं मेघस्थं वापि कारयेत् ॥
वर्णेन पीतवर्णेन शुक्लकैः परिवारितम् ।
महोदरं महाकायं नवाष्टकसमन्वितम् ॥
शुक्लकैर्बन्धुभिर्युक्तं धनधान्यकरेस्तथा ॥"
इति मत्स्यपुराणम् ॥

धनाध्यक्षः, पुं, (धनानामध्यक्षः ।) कुबेरः । इति हलायुधः ॥ (यथा, अध्यात्मरामायणे । ७ । २ । ४७ ।
"ततः क्रुद्धो दशग्रीवो जगाम धनदालयम् ।
विनिर्जित्य धनाध्यक्षं जहारोत्तममपुष्पकम् ॥")
धनाधिक्षतः । तद्विलद्वार इति खानाच्चि इति च भाषा । तस्य लक्षणं यथा,—
"लोहवस्त्राजिनादीनां रत्नानाञ्च विधानवित् ।
विज्ञाता फलगुसारायामनाहार्य्यः शुचिः सदा ।
निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः ॥
आयद्वारेषु सर्व्वेषु धनाध्यक्षसमा नराः ।
व्ययद्वारेषु च तथा कर्त्तव्याः पृथिवीक्षिता ॥"
इति मत्स्यपुराणे १८६ अः ॥

धनाशा, स्त्री, (धनानां आशा ।) धनलोभः । यथा, विष्णुपुराणे तथा हरिवंशे । ३० । ४६ ।
"जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः ।
धनाशा जीविताशा च जीर्य्यतोऽपि न जीर्य्यति ॥"

धनाश्रीः, स्त्री, रागिणीविशेषः । धानसी इति भाषा । हनूमन्मते श्रीरागस्य तृतीयभार्य्या । अस्या जातिः षाडवः । ग्रहांशस्वरः । गानसमयः हिमर्त्तौ द्वितीयप्रहरः कस्यचिन्मते दिवावसानम् । रागमालायामस्या रूपं वियोगिनी रमणी रक्तवसना विच्छेदवेदनया दुर्ब्बला क्षुण्णा च एकाकिनी वकुलवृक्षतलोपविष्टा वदन्ती । कल्लिनाथमते मेघरागस्य चतुर्थभार्य्या । भरतमते मालकोषपुत्रगान्धाररागस्य पत्नी । इति सङ्गीतशास्त्रम् ॥

धनिकः, पुं, (धनेन कायतीति । कै + कः ।) धन्याकम् । इति मेदिनी । के, १०६ । अस्मिन्नर्थे क्लीबमिति राजनिर्घण्टः ॥ (धनमस्यस्येति । ठन् ।) धवः । इति हेमचन्द्रः ॥

धनिकः, त्रि, (धनं अस्यस्येति । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) साधुः । धनी । इति मेदिनी । के, १०६ । (यथा, कलाविलासे । १ । १८ ।
"घूर्णंकरकङ्कणानां वारवधूचरणनूपुरमणीनाम् ।
धनिकग्रहोत्पन्नानां मुक्तिर्नास्त्येव सुग्धानाम् ॥"
उत्तमर्णः । यथा, मनुः । ८ । ४७ ।
"अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः ।
दापयेद्धनिकस्यार्थमधमर्णाभिभावितम् ॥")

धनिका, स्त्री, (धनिक + टाप् ।) साधुनारी । इति मेदिनी । के, १०६ । वधूः । इति हेमचन्द्रः ॥ युवती । इति शब्दरत्नावली ॥ प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥

धनिष्ठा, स्त्री, (अतिशयेन धनवती । धन + इष्ठन् + टाप् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतत्रयोविंशनक्षत्रम् । तत्पर्य्यायः । श्रविष्ठा २ । इत्यमरः । १ । ३ । २२ ॥ वसुदेवता ३ । इति ज्योतिषम् ॥ भूतिः ४ निधानम् ५ धनवती ६ । इति जटाधरः ॥ अस्याः स्वरूपं यथा,—
"मस्तकोपरि समागते धने
मङ्गलातिनि पञ्चतारके ।
यान्ति कान्तिमति मेघलग्नतः
सारसाश्चिरसखत्वलिप्रिकाः ॥"
इति कालिदासकृतराशिलग्नविरूपकम् ॥
तत्र जातस्य फलम् ।
"आचारजातादरचारुशीलो
धनाधिगामी बलवान् दयालुः ।
यस्य प्रकृतौ च भवेद्धनिष्ठा
महत्प्रतिष्ठासहितो नरः स्यात् ॥"
इति कोष्ठीप्रदीपः ॥

धनी, [न्] त्रि, (धनमस्यस्येति । धन + इनिः ।) धनवान् । (यथा, देवीभागवते । १ । १५ । १३ ।
"गत्वा च धनिनां कार्य्या स्तुतिः सर्व्वात्मना बुधैः ॥")
तत्पर्य्यायः । इभ्यः २ आढ्यः ३ । इत्यमरः । ३ । १ । १० ॥ यथा, कूर्म्मपुराणे १२० अः ।
"आढ्यो वा दीक्षितो नाम्ना यवीयानपि यो भवेत् ।
भो भवत्पूर्व्वकस्तेनमभिभाषेत धर्म्मवित् ॥"
"यद्धं शरीरं मानुष्यं गुणाढ्यो वाढ्य उच्यते ॥"
इति श्रीभागवतम् ॥
(उत्तमर्णः । यथा, मनुः । ८ । ६१ ।
"याढ्यैर्धनिभिः कार्य्या व्यवहारेषु साक्षिणः ।
ताढ्यांश्च सम्यग्वक्ष्यामि यथावाच्यमृतञ्च तैः ॥")

धनीका, स्त्री, युवती । इति शब्दरत्नावली ॥

धनीयकं, क्ली, (धनाय हितम् । धन + छः । संज्ञायां कन् ।) धन्याकम् । इति शब्दरत्नावली ॥

धनुः, पुं, (धनतीति । धन + "शन्धनिकमिकसिभ्यस्तुरिति ।" उणां । १ । ७ । इति उः ।) चापः । (यथा, हितोपदेशे ।
"धनुर्वंशगविशुद्धोऽपि निर्गुणः किं करिष्यति ॥")
राशिविशेषः । पियालवृक्षः । इति सिद्धान्तकौमुदीसुबादिवृत्तिः ॥

धनुः, [स्] पुं, (धन + "अर्त्तिपृधनीति ।" उणां २ । ११८ । इति उसिः स च नित् ।) पियालवृक्षः । धनुर्धरे, त्रि । इति मेदिनी । से, २६ ॥

धनुः, [स्] क्ली, (धनतीति । धन शब्दे + "अर्त्तिपृधनीति ।" उणां २ । ११८ । इनि उसिः स च नित् ।) शरनिःक्षेपयन्त्रम् । धनुक इति भाषा । तत्पर्य्यायः । चापः २ धन्व ३ शरासनम् ४ कोदण्डम् ५ कार्मुकम् ६ इष्वासः ७ । इत्यमरः । २ । ८ । ८१ ॥ स्थावरम् ८ शुल्बी ९ शरावापः १० ह्रस्वता ११ त्रिखता १२ । इति त्रिकाण्डशेषः । अक्षम् १३ धनूः १४ । इति जटाधरः ॥ तारकम् १५ काण्डम् १६ । इति शब्दरत्नावली ॥ तस्य लक्षणं यथा,—
"धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं बाह्यं तथैव च ।
कोमलं वर्ज्जदृढता तयोर्गुणमुदाहृतः ॥
सुखसम्पत्तिकरणं समसुश्लायतं धनुः ।
विपदो सृष्टिवैषम्ये तदङ्गे भङ्गमावहेत् ॥"
इति युक्तिकल्पतरुः ॥
धनुर्विद्यारम्भदिनं यथा,—
"शनिभौमबुधान्येषु वारेषु सितिथौ हरौ ।
प्रबुद्धे चापविद्याया आरम्भः शुभदो मतः ॥"
इति ज्योतिःसारसंग्रहः ॥
विद्यारम्भोक्तनक्षत्राण्यत्र तत्र शुभानि ॥
(एतदस्त्रविद्यां ब्रह्मा पृथुनाम्ने महीपतये प्रथमं दत्तवान् । असौ एव लोकेषु अस्याः प्रचारमकरोत् । यदुक्तम् वैशम्पायनेन ।
"असिः पूर्व्वं मया सृष्टो दुष्टनिग्रहकारणात् ।
भवाङ्गसमीपस्थो लोकान् रक्षन् चरत्यसौ ॥
धनुराद्यायुधयुक्तौ त्वमेवादिः सृतो मया ।

तस्मात् ग्रहाणि चाख्याणि दद्यानि तव पुत्रक ॥"
अस्य प्रमाणं यथा, हस्तिशास्त्रधरे ।
"चतुर्विंशाङ्गुलो हस्तश्चतुर्हस्तं धनुः स्मृतम् ।
तद्ज्ञैर्ज्ञानवत् चापं सर्व्वलक्षणसंयुतम् ॥"
तथा आग्नेयधनुर्व्वेदे ।
"चतुर्हस्तं धनुः श्रेष्ठं त्रिभिः सार्द्धैस्तु मध्यमम् ।
कनिष्ठन्तु त्रिभिः प्रोक्तं नित्यमेव पदातिनः ॥"
धनुस्तु ग्राङ्गवांग्रभेदेन द्विविधम् । यथा, युक्तिकल्पतरौ ।
"धनुस्तु द्विविधं प्रोक्तं ग्राङ्गं वांग्रं तथैव च ॥"
एतयोः प्रकारमाह धनुर्व्वेदे ।
"ग्राङ्गिकं त्रिगतं प्रोक्तं वैश्वं सर्व्वगामितम् ॥"
ग्राङ्गधनुषः प्रमाणमाह हस्तिशास्त्रधरे ।
"ग्राङ्गं पुनर्धनुर्दिव्यं तद्विज्ञैः परमायुधम् ॥
वितस्तिसप्तमं मानं निर्म्मितं विश्वकर्म्मणा ॥
न स्वर्गे न च पाताले न भूमौ कस्यचित् क्वचे ।
तद्धनुर्वंशमायाति त्वत्तोऽकं पुरुषोत्तम ॥
पौरुषेयन्तु यच्चाङ्गं बहुवंशसरग्रोभितम् ।
वितस्तिभिः सार्द्धषड्भिर्निर्म्मितं धनुषोऽधमम् ॥
प्रायो योध्यं धनुः ग्राङ्गं गजयोधाश्वसादिनाम् ।
रथिनाञ्च पदातीनां वांग्रं चापं प्रकीर्त्तितम् ॥"
वांग्रधनुषः प्रमाणमाह तत्रैव ।
"त्रिपर्व्वं पञ्चपर्व्वं वा सप्तपर्व्वं प्रकीर्त्तितम् ।
नवपर्व्वञ्च कोदण्डं चतुर्हस्तं शुभकारणम् ॥
चतुष्पर्व्वञ्च षट्पर्व्वं अष्टपर्व्वं विवर्ज्जयेत् ॥"
"अतिजीर्णमपक्वञ्च ग्रातिहृष्टं तथैव च ।
दग्धं छिन्नं न कर्त्तव्यं बाह्याभ्यन्तरदूषकम् ॥
गुणच्छेदं गुणाक्रान्तं वास्तुदोषसमन्वितम् ।
त्रणयन्थिगं कर्त्तव्या तलमध्ये तथैव च ॥"
"अपक्वं भङ्गमायाति अतिजीर्णन्तु कर्कशम् ।
ग्रातिहृष्टन्तु सोद्वेगं दग्धो बान्धवैः सह ॥
दग्धेन दह्यते वैरं छिन्नं युद्धविनाशनम् ।
बाह्यं तस्यं न लभ्येत तथैवाभ्यरेऽपि च ॥
हीने तु सन्धिते बाणे संग्रामे भङ्गकारकम् ।
आक्रान्ते च पुनः ग्रापि न लक्ष्यं प्राप्नुते दृढम् ॥"
"गजग्रन्थितलग्रन्थि धनुर्हानिकरं धनुः ।
एभिर्दोषैर्विनिर्म्मुक्तं सर्व्वकार्य्यकरं स्मृतम् ॥"
उपलक्षेपकधनुषः प्रकारमाह तत्रैव ।
"उपलक्षेपकं चापं वैश्वं तद्विरञ्जुकम् ।
त्रिहस्तोत्सेधसहितं ग्राङ्गुलीविस्तृतं तु तत् ॥"
आसनविशेषः । यथा, हठयोगप्रदीपिकायाम् । १ । २५ ।
"पादाङ्गुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि ।
धनुराकर्षणं कुर्य्यादेतद्धनुरासनमुच्यते ॥"*॥
चतुर्हस्तपरिमाणम् । काठा इति भाषा । यथा,
"चतुर्विंशाङ्गुलो हस्तश्चतुर्हस्तं धनुः स्मृतम् ॥"
इति जलाशयतत्त्वम् ॥
मेषादिद्वादशराशिस्थगैतनवमराशिः । तत्पर्य्यायः । तौक्षिकः २ । इति दीपिका । अस्य देवता पूर्व्वाषाढामनुष्याकारग्रेषार्द्धाश्वाकारधनुर्धारी पुरुषः । स मूलापूर्व्वाषाढासहोदयोत्तराषाढ़प्रथमपादेन भवति । स च ग्रीष्मोदयः पीतः स्वर्णवर्णो वा पर्व्वतचरः महाग्रहङ्करः पूर्व्वदिक्स्वामी ढक्षाङ्गः रूक्षः क्षत्रियवर्णः उग्रः पित्तप्रकृतिरित्यर्थः अल्पसन्तानः अल्पस्त्रीसङ्गः अग्निराशिः । * । एतद्राशिजातफलं यथा, "क्रोधी हुतवाक् पुण्यमतिः शुचिः प्राज्ञः सुखी सर्व्वलोकालापी च ॥" इति जातकचन्द्रिकादयः ॥ * ॥ अपि च ।
"बहुकलाकुशलः प्रबलो महान्
विमलताकलितः सरलोक्तिभाक् ।
ग्रग्रधरे हि धनुर्धरगे नरो
धनकरो न करोति धनव्ययम् ॥"
तत्फलमन्यत्रापि यथा,—
"धनुर्लग्ने सुतृप्तो नीतिमान् धनवान् सुखी ।
कुलमध्ये प्रधानश्च ग्राज्ञः सर्व्वस्य पोषकः ॥"
इति कोष्ठीप्रदीपः ॥
धनुःपटः, पुं, (धनुष इव पटो विस्तारो यस्य ।) प्रियालवृक्षः । इति ग्रब्दचन्द्रिका ॥ (पर्य्यायोऽस्य यथा,—
"प्रियालस्तु खरस्कन्धचारी बहुलवल्कलः ।
राजादनस्तापसेष्टः सन्नकद्रुर्धनुःपटः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
धनुःशाखा, स्त्री, (धनुरिव शाखा यस्याः ।) मूर्व्वा । इति ग्रब्दचन्द्रिका ॥
धनुःश्रेणी, स्त्री, (धनुष इव श्रेणीव ।) मूर्व्वा । महेन्द्रवारुणी । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्यायो वैद्यकरत्नमालायाम् ।
"तैक्ष्णी पिच्छिला देवा तिक्तवल्ली पृथक्पर्णी ।
धनुःश्रेणी मधुरसा मूर्व्वा निर्दहनीति च ॥")
धनुर्गुणा, स्त्री, (धनुषो गुणो यस्याः ।) मूर्व्वा । इति ग्रब्दचन्द्रिका ॥ (मूर्व्वाग्रब्देऽस्या गुणादयो ज्ञातव्याः ॥)
धनुर्द्रुमः, पुं, (धनुषो द्रुमः ।) वंग्रः । इति राजनिर्घण्टः ॥
धनुर्धरः, पुं, (धरतीति । धृ + अप् । धनुषो धरः ।) धनुर्धारी । तिरन्दाज इति भाषा । तत्पर्य्यायः । धन्वी २ धनुष्मान् ३ धानुष्कः ४ निषङ्गी ५ इषुधी ६ तूणी ७ धनुर्भृत् ८ । इति हेमचन्द्रः । २ । ४३५ ॥ (यथा, महाभारते । ९ । १२३ । २० ।
"प्रयतिष्ये तथा कर्त्तुं यथा नान्यो धनुर्धरः ।
तत्समो भविता लोके सत्यमेतत् ब्रवीमि ते ॥"
खगनामख्यातो धृतराष्ट्रस्य पुत्रविशेषः । यथा, महाभारते । १ । ११० । ११ ।
"कवची निषङ्गी कुण्डी च कुण्डधारी धनुर्धरः ॥")
धनुर्धारी, [न्] त्रि, (धनुर्धरतीति । धृ + णिनिः ।) धनुर्धरः । तस्य लक्षणं यथा,—
"शूरश्च बलयुक्तश्च गजाश्वरथकोविदः ।
धनुर्धारी भवेद्राजा सर्व्वशस्त्रसहः शुचिः ॥"
इति मत्स्यपुराणे १८६ अः ॥
धनुर्भृत्, पुं, (धनुर्बिभर्त्तीति । भृ + क्विप् ।) धनुर्धरः । इति हेमचन्द्रः । २ । ४३५ ॥ (यथा, रघुः । ६ । ११ ।
"अवनिमेकरथेन वरूथिना
जितवतः किल तस्य धनुर्भृतः ॥")
धनुर्मध्यं, क्ली, (धनुषो मध्यम् ।) चापमध्यभागः । तत्पर्य्यायः । लक्षकः २ । इत्यमरः । २ । ८ । ५५ ॥
धनुर्माला, स्त्री, (धनुषो माला श्रेणीव ।) मूर्व्वा । इति ग्रब्दचन्द्रिका ॥
धनुर्य्यासः, पुं, (धनुरिव यासः ।) धन्वयासः । दुरालभा । इत्यमरटीकायां रायमुकुटः ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"यासो यवासो दुस्पर्शो धनुर्य्यासो दुरालभा ॥")
धनुर्लता, स्त्री, (धनुषो लतेव ।) सोमवल्ली । इति राजनिर्घण्टः ॥
धनुर्वृक्षः, पुं, (धनुषो वृक्षः ।) धन्वनवृक्षः । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धन्वनः पिच्छिलत्वक् च धनुर्वृक्षश्च धन्वजः ॥")
वंग्रः । भल्लातकः । अश्वत्थः । इति राजनिर्घण्टः ॥
धनुर्व्वेदः, पुं, (धनूंषि उपलक्षयेण धनुराद्यस्त्राणि विद्यन्ते ज्ञायन्तेऽनेनेति । विद् + करणे घञ् ।) धनुर्विद्याबोधकग्रास्त्रम् । तत्तु यजुर्व्वेदस्योपवेदः । इति चरणव्यूहः ॥ (यथा, मधुसूदनसरस्वतीकृतप्रस्थानभेदे ।
"यजुर्व्वेदस्योपवेदो धनुर्व्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः । तत्र प्रथमो दीक्षापादः । द्वितीयः संग्रहपादः । तृतीयः सिद्धिपादः । चतुर्थः प्रयोगपादः । तत्र प्रथमे पादे धनुर्वेदस्याधिकारिनिरूपणञ्च कृतम् । तत्र धनुःग्रब्दस्यापे रूढ़ोऽपि चतुर्विधायुधवाचको वर्त्तते । तत्र चतुर्विधम् । मुक्तमसुक्तं मुक्तामुक्तं यन्मुक्तञ्च । तत्र मुक्तं चक्रादि । असुक्तं खड्गादि । मुक्तामुक्तं ग्रस्त्रास्त्रान्तरभेदादि । यन्मुक्तं ग्ररादि । तन्मुक्तमस्त्रमित्युच्यते । असुक्तं ग्रस्त्रमित्युच्यते । तदपि ब्राह्मवैष्णवपाशुपतप्राजापत्यादिभेदादनेकविधम् । एवं साधिदैवतेषु समग्रेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनाञ्च ते सर्व्वे चतुर्विधाः । पदातिरथगजतुरगारूढ़ाः । एवं दीक्षाभिषेकग्राकुनमङ्गलकरणादिकञ्च सर्व्वमपि प्रथमे पादे निरूपितम् । सर्व्वेषामस्त्रग्रस्त्रविद्यानां आचार्य्यस्य लक्षणपूर्व्वकं संग्रहणं संग्रहपादे द्वितीये दर्शितम् । गुरुसम्प्रदायसिद्धानां ग्राह्यविद्यानां पुनः पुनरभ्यासो मन्त्रदेवतासिद्धिकरणादिकं तृतीये पादे । एवं देवतार्च्चनाभ्यासादिभिः सिद्धानां अस्त्रग्रस्त्रविद्यानां प्रयोगश्चतुर्थे पादे निरूपितः ॥")
धनुष्करः, पुं, (धनुः करोतीति । धनुस् + क + "दिवाविभेति ।" ३ । २ । २१ । इति टः ।) धनुः करे यस्य इति बधिकरबबहुव्रीहिसमासो वा । धानुष्कः ॥
धनुष्पटः, पुं, (धनुष इव पटो विस्तारो यस्य ।) प्रियालवृक्षः । इत्यमरः । २ । ४ । ३५ ॥
धनुष्मान्, [त्] पुं. (धनुर्विद्यते यस्य । धनुस् + मतुप् ।) धनुर्धरः । इत्यमरः । २ । ८ । ६८ ॥

(यथा, रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
इयं: स राजन्यकमेकवीरः ॥")

धनूः, स्त्री, (धन धान्ये शब्दे वा + "छधिचमितनि-धनीति ।" उणां १ । ८२ । इति ऊः ।) धनुः । इति जटाधरः ॥ धान्यसञ्चये धनुषि च पुं । इति संक्षिप्तसारोद्धादिवृत्तिः ॥

धनेयकं, क्ली, धन्याकम् । इत्यमरटीकायां भरतः ॥

धनेश्वरः, पुं, (धनागामीश्वरः ।) कुबेरः । इति हेमचन्द्रः । २ । १०४ ॥ (यथा, महाभारते । १ । २२८ । ३२ ।
"जगदुः सर्व्वशस्त्राणि खानि खानि सुरास्तथा ।
कालदण्डं यमो राजन् ! गदाञ्चैव धनेश्वरः ॥"
विष्णुः । यथा, तत्रैव । १३ । १४६ । ६३ ।
"वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥"
सुश्रुतोषधप्रणेतुर्वोपदेवस्य गुरुः । यदुक्तम् ।
"विश्वन्तनेश्वरच्छात्रो भिषक्केशवनन्दनः ।
वोपदेवश्चकारेदं विप्रो वेदपदात्सदम् ॥")

धन्यः, पुं, (धनाय हितः । धन + यत् ।) अभ्रकवृक्षः । इति राजनिर्घण्टः ॥

धन्यः, त्रि, (धनाय हितः । धन + यत् ।) पुण्यवान् । सुकृती । इत्यमरः । ३ । १ । ३ ॥
"खनामा पुरुषो धन्यः पितृनामा च मध्यमः ।
अधमो मातृनामा च मातृनामाधमाधमः ॥"
इति गोपीचन्द्रधृतपद्यम् ॥

धन्यत्वकथनं यथा,—
सनत्कुमार उवाच ।
"विस्तीर्णवालुकामध्ये कच्छपः शतयोजनः ।
भीतश्च कम्पितश्चैव दृष्टो दुःखी च शुष्कितः ॥
निःसारितो राघवेण मौनेन च महात्मना ।
धन्योऽसीति मयोक्तश्च नाहं धन्य उवाच सः ॥
क्षीरोदसागरो धन्यो जन्तवो यत्र सङ्ख्यिताः ।
भवान् धन्योऽसि क्षीरोद ! तेनोक्तो नाहमेव च ॥
धन्या वसुन्धरा देवी यत्रैव सप्त सागराः ।
धन्यासि वसुधेत्युक्ता नाहमेवेत्युवाच सा ॥
धन्योऽनन्तो समाधारः क्षमाशीलो नागराड्विभुः ।
धन्योऽसीत्युक्तः परमो धन्यो नाहमुवाच सः ॥
धन्यश्च भगवान् ब्रह्मा विधाता जगतामपि ।
धन्योऽसि तत्र धाता च धन्यो नाहमुवाच सः ॥
धन्यो महेश्वरो देवो योगीन्द्राणां गुरोर्गुरुः ।
धन्योऽसीत्युक्तः शम्भुश्च धन्यो नाहमुवाच सः ॥
धन्यो गणेश्वरो देवो देवानां प्रवरः परः ।
दन्तेषु धन्यो मान्योऽसीत्युक्तो गजपतिर्मया ॥
नाहं धन्यो मुनिश्रेष्ठ ! सस्मितश्चेत्युवाच सः ।
धन्या वेदाश्च चत्वारः कर्म्माणि यदृच्छया ॥
तस्माद्धन्याश्च ते वेदा गच्छ तत्र मनीषिणः ।
यूयं धन्याश्च मान्याश्चेत्युक्ता वेदा मया ततः ॥
ऊचुस्ते न वयं धन्या यज्ञसंघश्च साम्प्रतम् ।
वयं यत्राकरोरो यज्ञौघः फलदः स्वयम् ।
तस्माद्धन्याः स एवापि गच्छ गच्छ महामुने ! ॥
धन्योऽसि यज्ञसंघोऽसीत्युक्तश्च मया विभो ! ।
ऊचुस्ते न वयं धन्या वन्यं कर्म्म शुभं मुने ! ॥
शुभकर्म्मासि धन्यं त्वं नाहं धन्यश्चुवाच तत् ।
श्रीकृष्णः परमात्मा च धन्यो मान्यश्च निश्चितम् ॥
धन्योऽसीति मयोक्तश्च दक्षिणाभिः सहेति च ।
इत्युक्तो भगवताप्यत्र कथितं सर्व्वकारणम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८७ अः ॥
(धनं लब्धा । धन + "धनगणं लब्धा ।" ४ । ४ । ८४ । इति यत् । धनलब्धा ॥ पुं, धनस्य निमित्तं संयोगो उत्पातो वा । "गोद्व्यचोऽसंख्या परिमाणाश्वादेर्यत् ।" ५ । १ । ३६ । इति यत् ॥)

धन्यव्रतं, क्ली, (धन्यं धनजनकं व्रतम् ।) धनजनकव्रतविशेषः । कुबेरः पूर्व्वं शूद्र आसीत् एतद्व्रतं कृत्वा धनपतिरभूत् । इति वराहपुराणम् ॥

धन्या, स्त्री, (धन्य + टाप् ।) आमलकी । इति मेदिनी । ये, ३३ ॥ धान्यकम् । इति हेमचन्द्रः । ३ । ८३ ॥ (मनोः कन्या । इयमेव ध्रुवस्य पत्नी । यथा, मत्स्यपुराणे । ४ । ३८ ।
"धन्या नाम मनोः कन्या ध्रुवाच्छिष्टमजीजनत् ॥")

धन्याकं, क्ली, (धन्यते भक्ष्यार्थैर्भिरिति । धन + "पिनाकादयश्च ।" उणां ४।१५। इत्याकप्रत्ययेन निपातनात् साधुः ।) धनिया इति ख्यातं शस्यम् । तत्पर्य्यायः । छत्रा २ वितुन्नकम् ३ कुस्तुम्बुरु ४ । इत्यमरः । २ । ६ । ३८ ॥ धान्यकम् ५ धन्यम् ६ धनिकम् ७ धनीयकम् ८ कुस्तुम्बुरी ९ धान्याकम् १० तुम्बुरु ११ धन्या १२ तुम्बुरी १३ धनेयकम् १४ । इति भरतधृतकोषान्तरम् ॥ धानकम् १५ धान्यम् १६ धानेयम् १७ धनिका १८ छत्राधान्यम् १९ सुगन्धि २० शाकयोग्यम् २१ क्षुद्रपत्रम् २२ जनप्रियम् २३ धान्यबीजम् २४ बीजधान्यम् २५ वेधकम् २६ । इति राजनिर्घण्टः ॥ कुलटी २७ धेनिका २८ धन्यकम् २९ धाना ३० धानेयकम् ३१ । इति भावप्रकाशः ॥ अस्य गुणाः । मधुरत्वम् । शीतत्वम् । कषायत्वम् । पित्तज्वरकासछर्द्दिकफनाशित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ स्निग्धत्वम् । दृढ्यत्वम् । सूक्ष्मत्वम् । लघुत्वम् । तिक्तत्वम् । कटुत्वम् । दौर्ग्यकारित्वम् । पाचनत्वम् । रोचनत्वम् । ग्राहित्वम् । स्वादुपाकित्वम् । त्रिदोषदाहश्वासार्शःक्षमिनाशित्वञ्च ॥
"आर्द्रन्तु तद्गुरु स्वादु विशेषात् पित्तनाशनम् ॥"
इति भावप्रकाशः ॥
"शिलायां साधु संपिष्टं धान्यकं वस्त्रगालितम् ।
शर्करोदकसंमिश्रं कर्पूरादिसुसंस्कृतम् ॥
नवीने ज्वरसये पाने स्थितं पित्तहरं परम् ॥"
राजनिर्घण्टः ॥

धन्व, [न्] क्ली, (धन्वाते गम्यते दुर्गमादिस्थलैरनेनेति । धन्व गतौ सौत्रो धातुः + कनिन् ।) धनुः । (धन्वाते गम्यतेऽत्र इति ।) स्थलम् । इति मेदिनी । ने, ७८ ॥ (यथा,—
"चरोरूपजलाकाशधन्वाद्यो भक्षसंविधिः ।
जलजानूपजाश्चैव जलानूपचराश्च ये ॥
गुरुभक्ष्याश्च ये सत्त्वाः सर्व्वे ते गुरवः स्मृताः ।
लघुभक्ष्यास्तु लघवो धन्वजा धन्वचारिणः ॥"
इति चरके सूत्रस्थाने २७ अः ॥)

धन्वं, क्ली, (धनतीति । धन शब्दे + "उखास्यदयश्च ।" उणां ४ । ६५ । इति वनप्रत्ययेन निपातनात् साधुः ।) धनुः । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ७ । २०० । ४३ ।
"धनुर्धराय देवाय प्रियधन्वाय धन्विने ।
धन्वन्तराय धनुषे धन्वाचार्य्याय ते नमः ॥")

धन्वङ्गः, पुं, (धनोर्धनुष इव अङ्गं यस्य ।) धन्वनवृक्षः । भामिनी इति हिन्दी भाषा । तत्पर्य्यायगुणाः ।
"धन्वङ्गस्तु धनुर्वृक्षो गोत्रवृक्षः सुतेजनः ।
धन्वङ्गः कफपित्तास्रकासक्षुत्तृड्वरो लघुः ।
दृंहणो बलशुद्धास्यसन्धिक्षतव्रणरोपणः ॥"
इति भावप्रकाशः ॥
पुस्तकान्तरे धन्वगोऽपि पाठः ॥

धन्वदुर्गं, क्ली, (धन्वना निर्जलस्थलेन वेष्टितं दुर्गम् ।) चतुर्द्दिग्वं मरुवेष्टितपञ्चयोजनपरिमितमनुदकस्थलम् । निर्जलदेशः । इति महाभारते राजधर्म्मः ॥ (यथा, मनुः । ७ । ७० ।
"धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम् ॥")

धन्वनः, पुं, (धन्वति दृढत्वं गच्छतीति । धन्व गतौ सौत्रधातुः + क्युः ।) वृक्षविशेषः । इति रत्नमाला ॥ धामनि इति भाषा । (यथा, रामायणे । २ । ६४ । ६ ।
"वदर्य्यामलकैर्नीपैर्वेतसैश्च धन्वनबीजकैः ॥")
तत्पर्य्यायः । रक्तकुसुमः २ धनुवृक्षः ३ महाबलः ४ रणप्रियः ५ पिच्छिलकः ६ रूक्षखादुफलः ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कषायत्वम् । कफनाशित्वम् । दाहशोषकरत्वम् । ग्राहित्वम् । कण्ठामयश्रमनुत्वञ्च । इति राजनिर्घण्टः ॥ (फले, क्ली । यथा, महाभारते । ३ । १९९ । १३ ।
"कक्षकाक्षीक्षुदधन्वनानि
पिण्याकानां कामकारं कुरुष्व ॥")

धन्वन्तरिः, पुं, (धनुरुपलक्षणत्वात् शल्यादिचिकित्साशास्त्रं तस्य अन्तं ऋच्छतीति । ऋ गतौ + "अन्येष्वपि दृश्यते ।" उणां ४ । १३८ । इति इः ।) देववैद्यः । स भगवदवतारः । यथा,—
"धन्वन्तरिश्च भगवान् स्वयमेव कीर्त्तिर्नाम्ना गृणां पुररुजां रुज आशु हन्ति ।
यज्ञे च भागमृततायुरवावरुन्ध
आयुष्यवेदमनुशास्त्यवतीर्य्य लोके ॥
स वै भगवतः साक्षात् विष्णोरंशांशसम्भवः ।
धन्वन्तरिरिति ख्यात आयुर्व्वेददृगिज्यभाक् ॥"
इति श्रीभागवतम् ॥ * ॥
"नारायणांशो भगवान् स्वयं धन्वन्तरिर्महान् ।
पुरा समुद्रमथने समुत्तस्थौ महोदधेः ॥
सर्व्ववेदेषु निष्णातो मन्त्रतन्त्रविशारदः ।
शिष्यो हि वैनतेयस्य शङ्करस्योपशिष्यकः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५१ अध्यायः ॥

अन्वच। "काश्यस्य काशिराजः तस्य दीर्घतमाः पुत्रोऽभूत्। धन्वन्तरिस्तु दीर्घतमसोऽभूत्। न हि संविद्वकार्य्यकारणः सकलसम्भूतिव्यापेक्षज्ञानवित्। भगवता नारायणेन चातीतसम्भवौ तस्मै वरो दत्तः। काशिराजगोत्रेऽवतीर्य्य त्वमष्टधा सम्भृतायुर्व्वेदं करिष्यसि। यज्ञभाक् त्वं भविष्यसीति। तस्य च धन्वन्तरेः पुत्रः केतुमान् केतुमतो भीमरथः। तस्यापि दिवोदासः।" इति विष्णुपुराणम् ।४।८।२-५॥*॥ अस्यार्थः। "संविद्वकार्य्यकारणः जरादिरहितदेहेन्द्रियः। संयतदेहेन्द्रिय इति वा। सकलसम्भूतिषु सर्व्वेष्वपि जन्मसु। अक्षेषज्ञानवित् सर्व्वज्ञावित्। अतीतसम्भवौ चीराब्धौ जन्मनि। अष्टधा अष्टाङ्गमायुर्व्वेदम् तदुक्तं लघुवाग्भटे। कायबालग्रहोर्द्धाङ्गशल्यदंष्ट्राजरावियम्। अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संस्थितेति।" इति तट्टीकायां स्वामी॥*॥ दिवोदासः। इति त्रिकाण्डशेषः॥ (धन्वन्तरिप्रादुर्भावो यथा, "एकदा देवराजस्य दृष्टिर्निपतिता भुवि। तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीडिताः॥ तान् दृष्ट्वा हृदयन्तस्य दयया परिपीडितम्। दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह॥ धन्वन्तरे! सुरश्रेष्ठ! भगवन्! किञ्चिदुच्यते। योग्यो भवसि भूतानामुपकारपरो भव॥ उपकाराय लोकानां केन किन्न कृतं पुरा। त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान्॥ तस्मात्वं पृथिवीं याहि काश्यीमध्ये नृपो भव। प्रतीकाराय रोगाणामायुर्व्वेदं प्रकाशय॥ इत्युक्ता सुरशार्दूलः सर्व्वभूतहितेच्छया। समस्तमायुषो वेदं धन्वन्तरिमुपादिशत्॥ अधीत्य चायुषो वेदमिन्द्रधन्वन्तरिः पुरा। आगत्य पृथिवीं काश्यामजातो वाहुजवेश्मनि। नाम्ना तु सोऽभवत् ख्यातो दिवोदास इति क्षितौ। बाल एव विरक्तोऽभूच्चचार सुमहत्तपः॥ यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम्। ततो धन्वन्तरिर्लोके काश्यीराजोऽभिधीयते॥ हिताय देहिनां क्षौणां संहिता विहितासुना। अयं विद्यार्थिनो लोकान् संहितामाम-पाठयत्॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) विक्रमादित्यराजस्य नवरत्नान्तर्गतरत्नविशेषः। यथा,—

"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"
इति नवरत्नम्॥

(धनोर्धनुर्व्वेदस्य अन्तन्द्यच्छतीति। महादेवः। यथा, महाभारते। १३। १७। १०३।

"धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा॥")

धन्वन्तरियक्षा, स्त्री, (धन्वन्तरिणा यक्षा।) कटुकी। इति ग्रन्दचन्द्रिका॥

धन्वयवासः, पुं, (धन्वदेशोद्भवो यवासः।) इरालभा। इत्यमरटीकायां भरतः॥ (दुरालभाशब्देऽस्य विवरणं ज्ञातव्यम्॥)

धन्वयवासकः, पुं, (धन्वयवास+स्वार्थे कन्।) दुरालभा। इति राजनिर्घण्टः॥

धन्वयासः, पुं, (धन्वदेशोद्भवो यासः यवासः।) दुरालभा। इत्यमरः। २। ४। ८१॥

धन्वा, [न्] पुं, (धन्वति जलाभावं गच्छतीति। धन्व+"कनिन् युवृषीति।" उणां १। १५५। इति कनिन्।) मरुदेशः। इत्यमरः। २। १। ५॥ (यथा, ऋग्वेदे। ६। ३४। ४।

"अजं न धन्वन्नभि सं यदापः सत्रा वाजमुषसं नवानि यन्नः॥"

अन्तरिक्षम्। अत्यत्यात् उदकमपि। यथा, ऋग्वेदे। १। १६८। ५।

"धन्वच्युत इवा न यामनि पुरुप्रेषा अहन्नेतशः॥"

"धन्वच्युतो न धन्वनशब्दोऽन्तरिक्षस्य वचनः तेन ततस्थमुदकं लक्षते उदकस्राविणो मेघा इव।" इति तद्भाष्ये सायणः॥)

धन्वी, [न्] त्रि, (धनुरस्यास्तीति। औणादित्वात् इनिः।) धनुर्धरः। इत्यमरः। २। ८। ६६॥ (यथा, कुमारे। ३। १०।

"कुर्य्यां हरस्यापि पिनाकपाणे-
र्धैर्य्यच्युतिं के मम धन्विनोऽन्ये॥")

विदग्धः। इति विश्वः॥

धन्वी, [न्] पुं, (धन्वमस्यास्तीति। धन्व+इनिः।) दुरालभा। अर्जुनतरुः। (अस्य पर्य्यायो यथा,—

"धन्वी धनञ्जयः पार्थो गदीजः कपिध्वजोऽर्জুनः।"
इति वैद्यकरत्नमालायाम्॥)

वज्रम्। इति राजनिर्घण्टः॥ पार्थः। इति त्रिकाण्डशेषः॥ (विष्णुः। यथा, महाभारते। १३। १४८। २२।

"दुःखदो विक्रमो धन्वी मेधावी विक्रमः क्रमः॥"
महादेवः। यथा, तत्रैव। १३। १७। ४२।

"कमण्डलुधरो धन्वी वाग्विदग्रः कषायवान्॥"
तामसमनोः पुत्रविशेषः। यथा, हरिवंशे। ७। २४।

"तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः।
तामसस्य मनोरेते दश पुत्रा महाबलाः॥")

धम, भाषे। ध्माने। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-सेट्।) धमति। सौत्रधातुरयम्। इति दुर्गादासः॥

धमः, त्रि, (धमतीति। धम+अच्।) अग्निसंयोगकर्त्ता। ग्रन्थकर्त्ता। इति धमधातोः पचाद्यजादनुप्रत्ययेन साध्यः॥

धमकः, पुं, (धमतीति। ध्मा ग्रन्थाग्निसंयोगयोः+"ध्मो धम च।" उणां २। ३५। इति कुन् धमादेशश्च।) कर्म्मकारः। इत्युणादिकोषः॥

धमनः, पुं, (ध्मायतेऽग्निनेनेति। धम+करणे ल्युट्।) नलः। इत्यमरः। २। ४। १६२॥ (अस्य पर्य्यायो यथा,—

"नलः पोटगलः शून्यमथश्च धमनस्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

धमतीति। धम+ल्युः।) भस्त्याधमके क्रूरे च त्रि। इति मेदिनी। ने, ७८॥

धमनिः, स्त्री, (धम्यते इति। धम+"अर्त्तिस्रुधृधमीति।" उणां २।१०३। इति अनिः।) धमनी। इति शब्दरत्नावली॥ (यथा, अथर्व्ववेदे। ६। ६०। २।

"यास्ते घृतं धमनयोऽङ्गान्यनु विसिताः॥"
ब्रह्मादभ्रातुर्ब्रह्मदक्ष पत्नी। सा तु वातापेरिक्ष्वलस्य च जननी। यथा, भागवते। ६। १८। १५।

"ब्रह्मदक्ष धमनिर्भार्य्यासूत वातापिरिक्ष्वलम्॥"
धमतिर्गतिकर्म्मा। गम्यर्थाः बुद्ध्यर्थाः। गम्यते ज्ञायतेऽर्थोऽनया। ज्ञायते वा विद्वद्भिः साध्वसाधुविभागेन। यद्वा, 'धमति' इति वधकर्म्मण्यपि प्रयुज्यते धमति हन्यतया ज्ञापाक्रोशादिरूपयेति। वाक्। शब्दः। इति निघण्टुः। १। ११॥ यथा, ऋग्वेदे। २। ११। ८।

"दूरे पारे वार्य्यं वर्धयन्त
इन्द्रेषितां धमनिं पप्रथन्नि॥")

धमनी, स्त्री, (धमनि+वा ङीप्।) नाड़ी। (यथा, महाभारते। १२। २१४। १०।

"दश विद्यात् धमन्योऽत्र पञ्चेन्द्रियगुणावहाः।
याभिः स्रष्टाः प्रजायन्ते धमन्योऽन्याः सहस्रशः॥"

यथा,—

"ओजोवहाः शरीरे वा विधन्यन्ते समन्ततः।
येनौजसा वर्त्तयन्ति प्रीणिताः सर्व्वदेहिनः॥
वहते सर्व्वभूतानां जीवितं यावतिष्ठते।
यतसारमादौ गर्भस्य यौ यौ गर्भरसाग्रसः॥
संवर्त्तमानं हृदयं समाविशति यत् पुरा।
तस्य नाड्याम नाड्योऽस्मिन् धारि यद्धृदयाश्रितम्॥
यच्छरीरवलं देहः प्राणा यत्र प्रतिष्ठिताः।
ततस्रजा विविधा वाताः वहन्तीति महाप्रजाः॥
ज्ञानाद्वहन्त्यः सवनात् स्रोतांसि सरणात् सिराः॥"

इति चरके सूत्रस्थाने त्रिंशेऽध्याये॥

"चतुर्विंशतिर्धमन्यो नाभिप्रभवा अभिहिताः।
तत्र केचिदाहुः सिरा धमनी स्रोतसामविभागः सिराविकारा एव धमन्यः स्रोतांसि चेति। तन्तु न सम्यक्। अन्या एव हि धमन्यः स्रोतांसि च सिराभ्यः कस्माद्व्यङ्गान्यत्वान्मूलसन्नियमात् कर्म्मवैशेष्यादागमाच्च केवलन्तु परस्परसन्निकर्षात् वहागमकर्म्मत्वात् सौक्ष्म्याच्च विभक्तकर्म्मसामान्यविभाग इव कर्म्मसु भवति॥

तासान्तु नाभिप्रभवानां धमनीनामाद्यंगा दश-दश चाधोगामिन्यश्चतस्रश्चोर्द्ध्वगाः। ऊर्द्ध्वगाः शब्दस्पर्शरूपरसगन्धप्रत्यवबोधोच्छ्वासनशुम्भितच्छर्द्दितक्षुधितरुदितादीन्विशेषानभिवहन्त्यः शरीरं धारयन्ति। तासु हृदयमभिप्रपन्नाश्चिधा

जायन्ते ताक्ष्यिंशत्। तासान्तु वातपित्तकफशोणितरसात् दे दे वहतस्रो दश शुक्रस्रोरसवाहिन्यौ। ताभ्यां भावते च ह्राभ्यां घोषं करोति ह्राभ्यां स्वपिति ह्राभ्यां प्रतिबुध्यते दे चाम्बुवाहिन्यौ। दे स्तन्यं क्षिपा वहतः स्तनसंश्रिते। ते एव शुक्रं नरस्य स्तनाभ्यामभिवहतः। तास्वेताक्ष्यिंशत् सविभागा यास्ताता एताभिरूर्द्धं गामेदरपार्श्वपृष्ठोरःस्कन्धग्रीवाबाहवो धार्य्यन्ते वाह्यन्ते च॥"

"अधोगमास्तु वातमूत्रपुरीषशुक्रार्त्तवादीन्यधो वहन्ति। तासु पित्ताशयमभिप्रतिपन्नास्तस्य मेवान्नपानरसं विपक्वमौष्ण्यादिवेपयन्त्योऽभिवहन्त्यः शरीरं तर्पयन्त्यर्पयन्ति चोर्द्धगतानां तिर्य्यग्गतानां रसस्थानान्यभिपूरयन्ति मूत्रपुरीषस्वेदांश्च विरेचयन्त्यामपक्वाशयान्तरे च त्रिधा जायन्ते ताक्ष्यिंशत्। तासान्तु वातपित्तकफशोणितरसात् द्वे द्वे वहतस्रो दश द्वे अन्नवाहिन्यावन्त्राश्रिते तोयवहे द्वे मूत्रवस्तिमभिप्रपन्ने मूत्रवहे द्वे शुक्रवहे द्वे शुक्रप्रादुर्भावाय द्वे विसर्गाय ते एव रक्तमभिवहतो नारीणामार्त्तवसंज्ञम्। द्वे चर्म्मो विरस्त्यौ स्तूनान्यभिप्रतिपद्ये। अष्टावन्त्राण्याश्रित्यान्नमलानां धमनीनां खेदमर्पयन्ति। तास्वेताक्ष्यिंशत् स विभागा यास्ताता एताभिरधोगामिः पञ्चाशद्वपाटीमूत्रपुरीषगुदवस्तिमेढ्रसक्थीन्यभि धार्य्यन्ते वाह्यन्ते च॥"

"तिर्य्यग्गासासु शतधा धमनीष्वासैकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यन्ते तास्तंख्यायास्ताभिरिदं शरीरं गवाक्षितं विवहमाततञ्च। तासां सुक्ष्माणि रोमकूपप्रतिवहानि यैः स्वेदमभिवहन्ति रसञ्चापि सन्तर्पयन्त्यन्तर्बहिश्च तैरेव चाभ्यङ्गपरिषेकावगाहोपनद्धोष्माक्षमः शरीरमभिप्रतिपद्यते लघि विपक्वानि तैरेव स्वर्गसुखमनुभवं वा यच्छति। तास्वेताततसो धमन्यः सर्व्वाङ्गगताः सविभागा यास्ताताः॥"

इति सुश्रुते शारीरस्थाने धमनीव्याख्ये ७॥)

हृदयिकाग्निजी। इत्यमरः॥ हरिद्रा। योवा। इति हेमचन्द्रः। २। २५५॥ पृथिवी। इति राजनिर्घण्टः॥ नदिका। इति भावप्रकाशः॥

धम्मिल्लः, पुं. (धमतीति। धम+किल्। मिलतीति। मिल+कः। पृषोदरादित्वात् साधुः। ततः कर्म्मधारयः।) संयताः कचाः। इत्यमरः। २।६।८७॥ खोपा इति भाषा। कुसुमगर्भो मौक्तिकपक्षरागखतिकादिका वद्धिःसंयतो बहुः वेशकलापः। इति भरतः॥ (यथा, गीतगोविन्दे। २। २९।

"बाकूतस्मितमाकुलाकुलमरुद्धम्मिल्लसुज्ञासित-
भ्रूवल्लीकमलीकदर्शितसुधावाचार्द्रहस्तस्तनम्॥")

धरः, पुं, (धरति पृथिवीमिति। धृ+अच्।) पर्व्वतः। (यथा, माघे। ४। ९८।

"उत्तर्कं धरं द्रष्टुमवेक्ष्य गौरिम्
उत्कन्धरंदाशरथञ्च दृष्ट्वा॥")

कार्पासतूलकः। कूर्म्मराजः। वसुभेदः। इति मेदिनी। रे, ४८॥ (यथा, हरिवंशे। ३। ३६।

"आपो ध्रुवश्च सोमश्च धरश्चैवानिलानलौ।
प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः॥"

महादेवः। यथा, महाभारते। १३।१७।१०३।

"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः॥"

विष्णुः। श्रीकृष्णः। यथा, तत्रैव। १।६३।३३।

"सर्व्वलोकमयो मित्रः स्रष्टा धाता धरो ध्रुवः॥"

धारके, त्रि॥ यथा, काकपक्षधरः॥)

धरकं, क्लो, (धरतीति। धृ+क्वुः।) मानभेदः। स तु चतुर्विंशतिरक्तिकारूपः। इति जीकावती॥ पलद्वयमानम्। इति वैद्यकम्॥ ("अथ मध्यमनिष्पावा वा एकोनविंशतिर्धरकम्॥"

इति सुश्रुते चिकित्सितस्थाने ३१ अः॥ धृ+क्वुट्।) धारकम्। इति मेदिनी। के, ५४॥ (यथा, कुमारे। १। १७।

"यज्ञाङ्गयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमञ्च॥")

धरकः, पुं, (धृ+क्वुः।) अद्रिपतिः। लोकः। स्तनः। धान्यम्। दिवाकरः। इति हेमचन्द्रः॥ सेतुः। इति शब्दरत्नावली॥ (वैद्यकमानविशेषः। यथा, पूर्व्वखण्डे प्रथमेऽध्याये ब्राह्मधरेऽवोक्तम्।

"माषैश्चतुर्भिः प्राणः स्याद्धरकः स निगद्यते॥")

धरणिः, स्त्री, (धरति जीवादीनिति। धृ+"अर्त्तिस्तुधृञीति।" उणा। २। १०३। इति अनिः।) पृथिवी। इत्यमरः। २। १। २॥ (यथा, महाभारते। १२। ३३९। ३।

"ज्योतिषरविवायुरहिते अग्नौ जलेकार्णवे लोके॥")

धरणिधरः, पुं, (धरतीति। धृ+अच्। धरणेः धरः।) विष्णुः। इति हलायुधः॥ (कच्छपः। पर्व्वतः। शेषः। इति युतपत्तिलक्ष्योऽर्थः॥)

धरणी, स्त्री, (धरति+ल्युट् ङीष्।) पृथिवी। इति मेदिनी। णे, ५४॥ (यथा, विष्णुपुराणे। १। ६। १४१।

"यदा तु भागवो रामस्तदाभूद्धरणीत्रयम्॥")

श्मश्रुविशेषः। इति शब्दचन्द्रिका॥ दाढ़ी। कन्दविशेषः। तत्पर्य्यायः। धारणी २ धरणी ३ सकन्दरः ४ कन्दालुः ५ वनकन्दः ६ कन्दाढ्यः ७ दक्षकन्दकः ८। अस्या गुणः। मधुरत्वम्। कफपित्तामयरक्तदोषकुष्ठकफकृतिनाशित्वञ्च। इति राजनिर्घण्टः॥

धरणीकन्दः, पुं, (धरण्यां एव कन्दः।) धरणीनामकन्दविशेषः। इति राजनिर्घण्टः॥

धरणीकीलकः, पुं, (धरण्याः पृथिव्याः कीलकः इव।) पर्व्वतः। इति शब्दरत्नावली॥

धरणीधरः, पुं, (धरण्या धरः।) विष्णुः। इति हेमचन्द्रः। २। १९१॥ (यथा, महाभारते। १३। १३६। ३८।

"अजः सर्व्वेश्वरो वह्निरनिलो धरणीधरः॥")

कच्छपः। इति राजनिर्घण्टः॥ पर्व्वतः। यथा, "यो जातो धरणीधरेन्द्रतनयायाताङ्घ्रिपाथोरुहासक्तः।" इत्यादिगोपीनाथतर्कालङ्कारः॥ (पृथिवीधारके, त्रि। यथा, हरिवंशे। ५३। ६८।

"देवानचोदयद् ब्रह्मा निग्रहार्थं सुरद्विषाम्।
नरसिंहं पुराणर्षिं ग्रीवच धरणीधरम्॥")

धरणीपूरः, पुं, (धरणीं पूरयति आवयतीति। पूर+अण्।) ससुद्रः। इति शब्दरत्नावली॥

धरणीभवः, पुं, (भू+भावे अप्। धरण्याः पृथिव्याः भवः आवो यस्मात्।) ससुद्रः। इति त्रिकाण्डशेषः॥

धरणीश्वरः, पुं, (धरण्या ईश्वरः।) शिवः। इति शब्दरत्नावली॥

धरणीसुता, स्त्री, (धरण्याः सुता।) सीता। इति हेमचन्द्रः। ३। ३६७॥ (एतदुत्पत्तिकथा यथा, कालिकापुराणे ३० अध्याये।

"नारदस्योपदेशेन यज्ञभूमिं ततो नृपः।
हलेन दारयामास यज्ञवाटावधि स्वयम्॥
तद्भूमिजातसीतायां शुभां कन्यां ससुत्थिताम्।
लेभे राजा सुदा युक्तः सर्व्वलक्षणसंयुताम्॥
तस्यास्तु जातमात्रायां पृथिव्यन्तर्हिता स्वयम्।
जगाद वचनञ्चेदं गौतमं नारदं नृपम्॥

पृथिव्युवाच।

एषा सुता मया दत्ता तव राजन्! मनोहरा।
एनां गृहाण सुभगां कुलद्वयशुभावहाम्॥")

धरा, स्त्री, (धरति जीवसंघानिति। धृ+अच्। यद्वा, त्रियते ग्रियेव इति। धृ+अप्। टाप्।) पृथिवी। इत्यमरः। २। १। २॥ (यथा, देवीभागवते। ३। २६। ८।

"धरश्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")

गर्भाशयः। मेदः। इति मेदिनी। रे, ३६॥ नाड़ी। इति राजनिर्घण्टः॥ महादेवविशेषः। तद्यथा,—

"अथातः संप्रवक्ष्यामि धरादानमनुत्तमम्।
पापक्षयकरं नृणामसमञ्जस्यविनाशनम्॥
कारयेत् पृथिवीं हैमीं जम्बुद्वीपानुकारिणीम्।
मर्य्यादापर्व्वतवतीं मध्ये मेरुसमन्विताम्॥
लोकपालाष्टकोपेतां नवखण्डसमाचिताम्।
नदीनदशतोपेतां सप्तसागरवेष्टिताम्॥
महारत्नसमाकीर्णां वसुधाद्रार्कसंयुताम्।
हैमैः पलसहस्रैश्च तदर्द्धेनाथ शक्तितः।
शतत्रयेण वा कुर्य्यात् द्विशतेन शतेन वा।
कुर्य्यात् पञ्चपलादूर्द्धमशक्तोऽपि विचक्षणः॥
तुलापुरुषवत् कुर्य्यालोकेशाद्यावाहनं सुधीः।
अतिशुक्लपलसंभारभूषणाच्छादनादिकम्॥
पद्मां शङ्खाजिनं छत्रं तिलद्रुपरि विन्यसेत्।
तथाष्टादशधान्यानि रत्नञ्च नवधान्यकम्॥
तथाष्टौ पूर्व्ववत्साम्यं धर्म्मतात् परिकल्पयेत्।
वितानकञ्च कौशेयं पञ्चानि विविधानि च॥
तथांशुकानि रत्नानि श्रीखण्डागुरुणानि च।
रत्नैर्वं रत्नविद्वान् तामधिवासनपूर्व्वकम्॥
शुक्लमाल्याम्बरधरः शुक्लाभरणभूषितः।
प्रदक्षिणं ततः कृत्वा गृहीतकुसुमाञ्जलिः॥
पुण्यं कालमथासाद्य मन्त्रान्ते तामुदीरयेत्।
नमस्ते सर्व्वदेवानां त्वमेव भवनं यतः॥
धात्री च सर्व्वभूतानामतः पाहि वसुन्धरे!॥

वसून् धारयसे यस्माद्वसुधात्वेन निर्म्मला ॥
वसुन्धरा ततो ज्ञाता तस्मात् पाहि भवार्णवात् ।
चतुर्मुखोऽपि नागच्छेत्तस्माद्दृश्य तवाच्युते ॥
अनन्तायै नमस्तस्मात् पाहि संसारकर्दमात् ।
त्वमेव लक्ष्मीर्गोविन्दे शिवे गौरीति संस्थिता ॥
गायत्री ब्रह्मणः पार्श्वे ज्योत्स्ना चन्द्रे रवौ प्रभा ।
बुद्धिर्बृहस्पतौ ख्याता मेधा सुनिशु संस्थिता ॥
विश्वं व्याप्य स्थिता यस्मात्ततो विश्वम्भरा स्थिता ।
धृतिः क्षमा स्थिरा क्षौणी पृथ्वी वसुमती रसा ॥
एताभिर्म्मूर्त्तिभिः पाहि देवि ! संसारकर्दमात् ।
एवमुच्चार्य्य तां देवीं ब्राह्मणेभ्यो निवेदयेत् ॥
धरार्द्धं वा चतुर्भागं गुरवे प्रतिपादयेत् ।
शेषस्त्वेवाथ ऋत्विग्भ्यः प्रणिपत्य विसर्জ্জयेत् ॥
अनेन विधिना यस्तु दद्याद्देवीं धरां बुधः ।
पुण्यकाले तु संप्राप्ते स पदं याति वैष्णवम् ॥
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
नारायणपुरं गत्वा कल्पत्रयमथो वसेत् ॥
पितृपुत्रप्रपौत्रांश्च तारयेदेकविंशतिम् ॥
इति पठति य इत्थं यः शृणोतीह नित्यं
गतकलुषविमानैर्मुक्तदेहः समन्तात् ।
दिवममरवधूभिर्याति संप्रार्थ्यमानः
पुरममरसहस्रैः सेवितं चन्द्रमौलेः ॥"

इति मत्स्यपुराणे २५८ अः ॥

धराकदम्बः, पुं, (धरायां वर्षाकाले जातः कदम्बः ।) धाराकदम्बवृक्षः । इति हारावली । १७७ ॥

धरात्मजः, पुं, (धरायाः आत्मजः ।) मङ्गलग्रहः । इति हेमचन्द्रः ॥ (नरकासुरः । इति कालिकापुराणे ३७ अध्यायः ॥ स्त्रियां टाप् । सीता ॥)

धराधरः, पुं, (धरायाः धरो धारकः ।) विष्णुः । (यथा, महाभारते । १३ । १४६ । ६३ ।
"सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥"
"अङ्गैरग्नेयैः शेषाद्यैरग्नेयां धरां धरतीति धराधरः ।" इति शाङ्करभाष्यम् ॥) पर्व्वतः । इति मेदिनी । रे, २६६ ॥ (यथा, हरिवंशे । २०४ । २१ ।
"चराचराश्च वसुधा धातारश्च धराधराः ॥"
धरायाः उद्धारकर्त्तरि, त्रि । यथा, भागवते । ४ । १७ । ३५ ।
"स वीरमूर्त्तिः समभूद्धराधरो
यो मां पयस्युग्रगुरो निषासधि ॥")

धरामरः, पुं, (धरायाः पृथिव्या अमरो देवः ।) ब्राह्मणः । यथा,—
"येन श्रुतं भागवतं पुराणं
नाराधितो यैः पुरुषः पुराणः ।
सुखे हुतं येन धरामरार्थां
तेषां वृथा जन्म नराधमानाम् ॥"

इति पौराणिकाः ॥

धरित्री, स्त्री, (धरति जीवजातमिति धियते शेषेण वा । धृ + "अग्रिचादिभ्य इत्रोत्रौ ।" उणां ४ । १७२ । इति इत्र । गौरादित्वात् ङीष् ।) पृथिवी । इत्यमरः । २ । ५ । २ । (यथा, रघुः । १४ । ५४ ।
"स्वमूर्त्तिनाभप्रभवं धरित्रीं
लतेव सीता सहसा जगाम ॥")

धरिमा, [न्] पुं, (धियते दृश्यैनेन्द्रियेणेति । धृ + "कृधृधृसृभ्य इमनिच् ।" उणां ४ । १४७ । इति इमनिच् ।) रूपम् । इत्यादिकोषः ॥ तुला । यथा, मनुः । ८ । ३२१ ।
"तथा धरिममेयानां ग्रहादभ्यधिके वधः ॥"

धरुणः, पुं, (धरतीति । धृ + वाहुलकात् उनन् । "धृञ् धारणे । हेतुमति च इति णिच् । धारेर्णिलुक् ल्युप्रत्ययः । धारयति जगत् ।" इति देवराजयज्वा । १ । १९२ । २४ ।) ब्रह्मा । स्वर्गः । गौरम् । (निघण्टुमते, क्लीं । यथा, ऋग्वेदे । १० । ५ । ६ ।
"पथा विसर्गो धरुणेषु तस्थौ ॥")
सम्मतम् । इति मेदिनी । णे, ५५ ॥ (अग्निः । यथा, वाजसनेयसंहितायाम् । ८ । ५१ । –
"उपश्रुतन्धरुणं मात्रे धरुणो मातरं धयन् ॥"
धारके, त्रि । यथा, ऋग्वेदे । १० । १११ । ४ ।
"दाधार यो धरुणं सत्यतातो ॥"
"सत्ये द्युलोके धरुणं धारकं बलं दाधार अधारयत् ।" इति तद्भाष्ये सायनः ॥)

धर्त्तव्य, त्रि, धृधातोः कर्म्मणि तव्यप्रत्ययेन साध्यम् । धारणीयम् । ख्यातव्यम् । पतनीयम् । भावे, क्लीं ॥

धर्त्र, क्लीं, (धरति म्रियते वा । धृ + "गृधृवीयचीति ।" उणां ४ । १६६ । इति त्रः ।) गृहम् । इत्यादिकोषः ॥ क्रतुः । धर्म्मः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (धारके, त्रि । यथा, वाजसनेयसंहितायाम् । १ । १८ ।
"धर्त्रमसिदिवं द्रंहस्वदितिरसि वसुधानी वसुधाय ।"
"हे कपाल ! त्वं धर्त्रं धारकमसि ।" इति वेददीपः ॥)

धर्म्मः, पुं क्लीं, (धरति लोकान् म्रियते पुण्यात्मभिरिति वा । धृ + "अर्त्तिस्तुहुसृधृति ।" उणां १ । १६६ । इति मन् ।) शुभादृष्टम् । (यथा, हितोपदेशे । १ । ५६ ।
"एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्व्वमन्यत्तु गच्छति ॥")
तत्पर्य्यायः । पुण्यम्२ श्रेयः३ सुकृतम्४ दृष्टः५ । इत्यमरः । १ । ४ । २४ ॥ न्यायः । स्वभावः । आचारः । उपमा । क्रतुः । (यथा, महाभारते । १४ । ८८ । २१ ।
"ज्ञात्वा प्रवर्त्तं धर्म्माणां यथावत् द्विजसत्तमाः ।
चक्रुस्ते विधिवद्राजंस्तथैवाभिषवं द्विजाः ॥")
अहिंसा । उपनिषत् । इति मेदिनी । से, १६ । दानादिके, क्लीं । इति हेमचन्द्रः ॥ (यथा, योगसारे ।
"प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा ।
सरश्चैव योगोऽस्मिन् पञ्च धर्म्माः प्रकीर्त्तिताः ॥")

धर्म्मः, पुं, (धृ + मन् ।) धनुः । यमः । सोमपः । इति मेदिनी । मे, १६ ॥ सत्यवक्तृः । अर्हन् । इति हेमचन्द्रः । ६ । १५ ॥ देवताविशेषः । स ब्रह्मणः दक्षियज्ञनाशात् । (यथा, मत्स्यपुराणे १३ । १० ।
"अक्रुद्दाक्षिण्याद्दक्षः प्रजापतिरजायत ।
धर्म्मस्तस्यान्वादभवत् हृदयात् कुसुमायुधः ॥")
तस्य भार्य्या दक्षस्य त्रयोदशकन्याः । तस्य चतुर्दशापत्यानि यथा । पत्न्यां श्रद्धायां सुतम् १ मैत्र्यां प्रसादः २ दयायां अभयम् ३ शान्त्यां सुखम् ४ तुष्ट्यां मुदं ५ पुष्ट्यां दर्पः ६ क्रियायां योगः ७ उन्नतौ दर्पः ८ बुद्ध्यां अर्थः ९ मेधायां स्मृतिः १० तितिक्षायां क्षेमम् ११ ह्रीसंज्ञायां प्रश्रयः १२ । इति श्रीभागवतम् ॥ * ॥ अपि च ।
"श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा तथा क्रिया ।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदशी ।
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ॥"
विष्णुपुराणमते सिद्धिस्थाने ऋद्धिरत्यत्र तुल्यम् ॥
तासामपत्यानि यथा,—
"श्रद्धा कामस्य श्रीर्दर्पस्य नियमं धृतिरात्मजम् ।
सन्तोषश्च तथा तुष्टेर्लोभं पुष्टिरसूयत ॥
मेधा श्रुतं क्रिया दण्डं नयं विनयमेव च ।
बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम् ।
व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत ।
सुखं सिद्धेर्यशः कीर्त्तिरित्येते धर्म्मसूनवः ॥
कामो नन्दी सुतं हर्षं धर्म्मपौत्रमसूयत ॥"* ॥
अधर्म्मवंशो यथा, मार्कण्डेयपुराणे ।
"हिंसा भार्य्या त्वधर्म्मस्य तस्यां जज्ञे तथानृतम् ।
कन्या च निर्ऋतिस्ताभ्यां सुतौ द्वौ नरकं भयम् ॥
माया च वेदना चैव मिथुनं द्वयमेतयोः ।
भयाज्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् ॥
वेदना त्वसुतापि दुःखं जज्ञेऽथ रौरवात् ।
मृत्योर्व्याधिजराशोकतृष्णाः क्रोधश्च जज्ञिरे ॥
दुःखोत्तराः स्मृता ह्येते सर्व्वे चाधर्म्मसंज्ञकाः ।
नैषां भार्य्यास्ति पुत्रो वा सर्व्वे ते ह्यूर्द्धरेतसः ॥"
धर्म्मोत्पत्तिर्यथा, वराहपुराणे ।
"अथोत्पत्तिं प्रवक्ष्यामि धर्म्मस्य महतो नृप ! ।
माहात्म्यञ्च तिथेश्चैव तन्निबोध नराधिप ! ।
सर्व्वे ब्रह्मात्मयः शुद्धपरादपरसंज्ञितः ।
स सिसृक्षुः प्रधानादौ प्राक्षनञ्च चिन्तयत् ॥
तस्य चिन्तयतस्तस्माद्दक्षिणाच्छ्रुतकुण्डलः ।
प्रादुर्बभूव पुरुषः श्वेतमाल्यानुलेपनः ।
तं दृष्ट्वोवाच भगवांश्चतुर्व्यात् स्वात् क्षते युगे ।
श्वेतायां त्रिपदश्चासौ द्विपदो द्वापरेऽभवत् ॥
कलावेकेन पादेन प्रथाः पालयते प्रभुः ।
वदनेभ्यो ब्राह्मणानां स त्रिधा सञ्जे सनातनः ॥
द्विधा त्रिधैकधा सृष्टे स्थितः सर्व्वगतः प्रभुः ।
गुणदक्षक्रियाजातिचतुष्यात् प्रकीर्त्तितः ।
त्रिशृङ्गोऽसौ स्मृतो वेदे सर्व्वसंहितपदक्रमः ।
तथा चात्मन ओङ्कारद्विशिराः सप्तहस्तवान् ॥
उदात्तादित्रिभिर्भेदैः एवं धर्म्मो व्यवस्थितः ॥

ब्रह्मोवाच ।

अद्यप्रभृति ते धर्म्म ! तिथिरेषु त्रयोदशी ॥
यस्मात्तामुपोष्य पुरुषो भवन्तं सप्तपार्श्वगेयं ।
लभा पापसमाचारं तस्मात्मुच्यति मानवः ॥"
तस्य पुत्रा यथा, वामनपुराणे ।

"धर्म्मस्य भार्य्या हिंसाख्या तस्यां पुत्रचतुष्टयम्।
सम्यक्तं सुनिशादूल! योगशास्त्रविचारकम्॥
जेष्ठः सनत्कुमारोऽभूद्द्वितीयश्च सनातनः।
तृतीयः सनको नाम चतुर्थश्च सनन्दनः॥
साङ्ख्यवेत्तारमपरं कपिलं योगमासुरिम्।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम्॥
ज्ञानयोगं न ते दद्युर्न्यायांशोऽपि कनीयसाम्॥"
(चतुर्दशप्रकारे वेदयजनाद्यमेव आस आसीत्।
यथा, देवीभागवते। १। ३। २८।
"त्रयोदशे चान्तरिणो धर्म्मस्यापि चतुर्दशे॥"
यथा, च ब्रह्मखण्डे। २० अध्याये।
"धर्म्मो नारायणो नाम वासस्तु भविता यदा।
तदाप्यहं भविष्यामि भविष्यामि महामुनिः॥
बालखिल्याश्रमे पुण्यपर्व्वते गन्धमादने।
तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः॥
सुधामा कथपश्चैव वसिष्ठो विरजास्तथा।
मम योगबलोपेता विमना ऊर्द्ध्वरेतसः॥
प्राप्य माहेश्वरं तेजो रुद्रलोकाय संस्थिताः॥"
क्वचित् युगस्य वैपरीत्यकथनन्तु कल्पभेदादविरुद्धमित्यधिगन्तव्यम्॥) धर्म्मलक्षणं यथा,—
"दाने दानं मतिः शास्त्रे मातापित्रोश्च पूजनम्।
श्रद्धा वसिष्ठवो वासः षड्विधं धर्म्मलक्षणम्॥"
इति पाद्मोत्तरखण्डम्॥ *॥
धर्म्माङ्गानि यथा, पाद्मभूमिखण्डे।
"ब्रह्मचर्य्येण सत्येन तपसा च प्रवर्त्तते।
दानेन नियमेनापि क्षमाशौचेन वल्लभ!॥
अहिंसया सुशान्त्या च अस्तेयेनापि वर्त्तते।
एतैर्द्वादशभिर्नित्यं धर्म्ममेव समाचरेत्॥"
धर्म्मलक्षणं यथा, मत्स्यपुराणे।
"अद्रोहश्चाप्यलोभश्च दमो भूतदयातपः।
ब्रह्मचर्य्यं ततः सत्यमक्रोधः क्षमा धृतिः।
सनातनस्य धर्म्मस्य मूलमेतदुदाहृतम्॥"
सर्व्वदेवप्रसङ्गवर्णने धर्म्मादयो हरेः पदं गमिष्यन्ति। यथा,—
"ब्रह्मलोको हरेर्मूर्त्तिर्जनलोकश्च भारतम्।
सर्व्वदेवप्रसङ्गान्ते ययौ ब्रह्मा हरेः पदम्॥
सत्यञ्च धर्म्मो यज्ञश्च वेदाश्च श्यामदेवताः।
इदं तपश्चानशनं यमुक्तैः साङ्गमेव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥
धर्म्माधारत्वादाधार यथा,—
"यत्र स्थानं तवाधारो वदामि भूवतां विभो!।
देवेषु च नरेषु च यतिषु ब्रह्मचारिषु।
पतिव्रतासु प्राज्ञेषु दानग्रहेषु भिक्षुषु।
कृषेषु धर्म्मशीलेषु सतृसंसर्गेषितेषु च।
द्विजसेविषु शूद्रेषु सतृसंसर्गेषितेषु च।
यद्यत्तं वर्त्तते पृथ्वी धर्म्मराज! विराजसे॥
युगे युगे तवाधारा एते पुण्यतमा जनाः॥"
अपि च।
"अश्वत्थवटविल्वेषु तुलसीचन्दनेषु च।
देवार्च्चेषु च पुण्येषु विद्यमानोऽपि शाश्वतः॥
देवालयेषु तीर्थेषु सतां ग्रन्थदृयेषु च।
वेदवेदाङ्गयज्ञेषु च सभासु च॥
श्रीकृष्णगुणनामोक्तश्रुतिगीतस्थलेषु च।
व्रतपूजातपोन्यायध्यायक्षेत्रेषु च॥
दीक्षापरीक्षाग्निमथगोष्ठगोब्जदभूमिषु।
गवां गृहेषु गोष्ठेषु विद्यमानो हि पक्षसि॥
क्षयता ते न भविता धर्म्मस्तेषु स्थलेषु च॥
धर्म्मागम्यस्थानानि यथा,—
"एतदन्येषु क्षयता गम्यश्च तत् ब्रह्म।
पुंश्चलीषु तदृणहेषु २ षु नरघातिनाम्॥
नरघातिषु गोघेषु मद्यैषु च खलेषु च।
देवतागुरुविप्रेषु पाखानां धनहारिषु।
असन्नरेषु धूर्त्तेषु चौरेषु रतिभूमिषु।
दुरोदरसुरापानकलहानां स्थलेषु च॥
ग्राम्यासासाधुतीर्थपुराणरहितेषु च।
दस्युयन्त्रेषु देवेषु तालच्छायासु गर्व्वितः॥
अविद्योविमसीलोविदेवलग्रामवासिषु।
दयाहस्वर्व्वकारुणीवहिंसोपजीविषु॥
भर्तृनिन्दितनारीषु स्त्रीजितेषु च पुंसु च।
दीक्षासन्धिविच्छुभक्तिविहीनेषु द्विजेषु च॥
खाङ्गकन्याविक्रयिषु स्वयोदिद्विक्रयिष्वच।
ग्राम्यग्रामसुरण्यभूमिविक्रयिषु प्रभो!॥
मित्रद्रोहिजनेषु सत्यविश्वासघातिषु।
पुरागतहीनेषु आमितत्रेषु तेषु च॥
ग्रन्थिन्योक्तिग्रीवेषु तथा सीमापहारिषु।
जामातृद्रोधात्तथा सोभाग्निन्यासाधिप्रवादिषु॥
पुण्यकर्म्मविहीनेषु पुण्यकर्म्मविरोधिषु।
स्थातुमेतेषु निन्द्येषु नाधिकारस्तव प्रभो!॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४२ अध्यायः॥
देवादीनां धर्म्मो यथा,—
सुकेशिरुवाच।
"क्षिप्रमन्यो मवेद्धर्म्मः क्षिमाचरणसंक्रियः।
प्रमाणिक्ष न सीदन्ति देवाद्यास्तु तदुच्यताम्॥
ऋषय ऊचुः।
देवानां परमो धर्म्मः सदा यज्ञादिकाः क्रियाः।
स्वाध्यायवेददेवार्त्तं विष्णुपूजारतिः स्मृतः॥
देवानां साधुशास्त्रिकं मातृवर्य्यं सुसंयतक्रियः।
विन्दनं नीतिशास्त्राणां हरभक्तिरुदाहृता॥
सिद्धानामुदितो धर्म्मो योगयुक्तिरनुत्तमा।
स्वाध्यायं ब्रह्मविज्ञानं भक्तिर्द्वाभ्यामपि स्थिरा॥
उत्तङ्कदोषसंत्यागं शैवं कृत्वावतेन वादिता।
वरस्त्रां स्थिरा भक्तिर्गान्धर्व्वो धर्म्म उच्यते॥
विद्याधरत्वमतुलं विज्ञानं पौरुषी मतिः।
विद्याधराणां धर्म्मोऽयं भवान्यां भक्तिरेव च॥
गान्धर्व्वविद्याविदितं भक्तिः स्वाङ्गे तथा स्थिरा।
कौशल्यं सर्व्वशिल्पेषु धर्म्मः केशुदयः स्मृतः॥
ब्रह्मचर्य्यसमाविष्टं योगाभ्यासरतिर्दृढा।
सर्व्वत्र कामचारित्वं धर्म्मोऽयं पैटजः स्मृतः॥
ब्रह्मचर्य्यं व्रताश्रित्वं सत्यज्ञानच राघव!।
नियमा धर्म्मवेदित्वमार्षं धर्म्मं प्रचक्षते॥
स्वाध्यायं ब्रह्मचर्य्यञ्च दानं यजनमेव च।
ऊर्द्ध्वरेतस्यमनायासं दयाविष्टः प्रभावः॥
जितेन्द्रियत्वं शौचञ्च माङ्गल्यं ब्रह्मचारिणः।
ब्रह्मरे भास्करे देवी धर्म्मोऽयं भागवः स्मृतः॥
धनाधिपत्यं भोगानि स्वाध्यायं ब्रह्मरार्धनम्।
अहङ्कारमशौचञ्च धर्म्मोऽयं गुह्यकेश्वरिति॥
परदाराभिमर्षित्वं परार्थेऽपि च लोलुपा।
स्वाध्यायस्यात्मके भक्तिर्धर्म्मोऽयं राक्षसः स्मृतः॥
अविवेकताथाज्ञानं शौचहानिरसत्यता।
पिशाचानामयं धर्म्मः सदा चामिषभक्षुताः॥
योनयस्तु द्वादशैताः सह धर्म्मैश्च राक्षस!।
ब्रह्मणा कथिताः पुण्या द्वादशैव गतिप्रदाः॥"
इति वामनपुराणे २१ अध्यायः॥
धर्म्माधर्म्मलक्षणम्। यथा,—
"अहिंसालक्षणो धर्म्मो हिंसा चाधर्म्मलक्षणा॥"
इति महाभारतम्॥
"वेदप्रविहितो धर्म्मो ह्यधर्म्मस्तद्विपर्य्ययः॥"
इति श्रीभागवतम्॥
"विहितक्रियया साध्यो धर्म्मः पुंसां शुभो मतः।
प्रतिषिद्धक्रियासाध्यः स शुभोऽधर्म्म उच्यते॥"
इति धर्म्मदीपिका॥
(इक्ष्वाकुवंशीयनृपविशेषः। यथा, भागवते। ९। २३। १४।
"इक्षोस्तु तनयो बभूः सेतुरुक्षास्तमजस्तः।
आरब्धस्तस्य गान्धारस्तस्य धर्म्मस्ततो धृतः॥")
धर्म्मकर्म्मन्, [न्] क्ली, (धर्म्माय धर्म्मस्य वा कर्म्म कार्य्यम्।) धर्म्मकार्य्यम्। शुभादृष्टप्रतिपादकक्रिया। यथा,—
"वेदप्रविहितं धर्म्मकर्म्म तन्मङ्गलं परम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥
धर्म्मकायः, पुं, (धर्म्माय कायो देहो यस्य।) बुद्धः। इति त्रिकाण्डशेषः॥
धर्म्मकीजः, पुं, (धर्म्मस्य कीज इव।) ब्राह्मणम्। राजब्राह्मणम्। इति पुरुषे त्रिकाण्डशेषः॥
धर्म्मकीजकः, पुं, (धर्म्मकीज+संज्ञायां कन्।) ब्रह्मब्राह्मणम्। इति पुरुषे शब्दरत्नावली॥
धर्म्मकेतुः, पुं, (अहिंसारूपो धर्म्मः केतुरिव यस्य।) बुद्धः। इति शब्दरत्नावली॥
धर्म्मक्षेत्रं, क्ली, (धर्म्मस्य क्षेत्रम्।) कुरुक्षेत्रम्। यथा,—
"ब्रह्मवेदिः कुरुक्षेत्रं मरुरामह्रदान्तरम्।
धर्म्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि॥"
इति हेमचन्द्रः॥
अपि च।
"तरन्तुकारन्तुकयोर्यदन्तरं
रामह्रदानाच्च मघन्तुकस्य च।
इदन्तु कुरुक्षेत्रसमन्तपञ्चकं
प्रजापतेरुत्तरवेदिरुच्यते॥"
इति भारतपाद्मे॥
धर्म्माधारे, त्रि॥
धर्म्मघटः, पुं, (धर्म्माय घटः सुगन्धोदकपरिपूर्णो-लक्षणः।) सौरवैष्णवे प्रतिष्ठादातव्यसुगन्धोदकपूरितकलसः। यथा, काशीखण्डे १२ अध्याये।
"इदुधर्म्मघटांश्चापि सुगन्धोदकपूरितान्॥"
तद्विधिर्यथा। अथ धर्म्मघटव्रतम्।
तत्र प्रथमं स्वस्तिवाचनं कृत्वा ॐ सोम इति प्रतिष्ठां सङ्कल्पं कुर्य्यात्। यथा,—

अद्येत्यादि वैशाखे मासि अमुकपक्षे अमुकतिथौ महाविषुवसंक्रान्त्यां अमुकगोत्रा श्रीअमुकी देवी यमालयगमननिवारणपूर्व्वकश्रीविष्णुप्रीतिकामा अद्यारभ्य वर्षचतुष्टयं यावत् प्रतिवर्षीयमेवस्थरवौ प्रत्यहं गन्धपत्रादिनागादेवतापूजापूर्व्वक-श्रीविष्णुपूजा-सभोज्यघटदान-कथाश्रवण-ब्राह्मणभोजनरूपधर्म्मघटव्रतमहं करिष्ये ॥ * ॥ वारान्तरे अद्येत्यादि महाविषुवसंक्रान्त्यां मत्संकल्पितधर्म्मघटव्रतकर्म्मणि यथाविधिकगन्धपत्रादिनानादेवतापूजापूर्व्वकं श्रीविष्णुपूजासभोज्यघटदानकथाश्रवणमहं करिष्ये। इति सङ्कल्प्य तत्सूत्रं पाठयेत्। ततो ब्राह्मण: प्रतिनिधीभूत: सामान्यार्घ्यासनशुद्धिभूतशुद्ध्यादिकं विधाय घ्राणयामादौ घटे वा गणेशादीन् नवग्रहान् दिक्पालांश्च संपूज्य वां हृदयाय नम: इत्याद्यङ्गन्यासकरन्यासौ कृत्वा ॐ ध्येय: सदा इत्यादिना विष्णुं ध्यात्वा खड्गिरसि पुष्पं दत्त्वा मानसोपचारै: संपूज्यार्घ्यं संस्थाप्य पुनर्ध्यात्वावाह्य षोड़शोपचारै: ॐ भगवते विष्णवे नम इति मन्त्रेण संपूज्य यथाशक्ति ॐ विष्णवे नम इति मन्त्रं जप्त्वा जपं समर्प्य ॐ नमो ब्रह्मण्यदेवायेत्यादिना प्रणम्य लक्ष्मीं सरस्वतीं आवरणदेवताश्च पूजयेत्। तत: एते गन्धपुष्पे ॐ सभोज्यवारिपूर्णघटाय नम:। इति चिरभ्यर्च्य—

"ॐ घट त्वं धर्म्मरूपोऽसि ब्रह्मणा निर्म्मित: पुरा।
त्वयि लिप्ते सन्तु लिप्ताश्चन्द्रे: सर्व्वदेवता: ॥"

इति चन्दनेनानुलिप्य अद्येत्यादि अमुकगोत्रा श्रीअमुकी देवी श्रीविष्णुप्रीतिकामा धर्म्मघटव्रतकर्म्मणि इमं सभोज्यवारिपूर्णघटमर्चितं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददे। इत्युत्सृज्य कृताञ्जलि: पठेत्।

"ॐ धर्म्म त्वं घटरूपेण ब्रह्मणा निर्म्मित: पुरा।
त्वयि दत्तेऽक्षया लोका मम सन्तु निरामया: ॥
यथा त्वं प्रीतलो नित्यं संपूर्ण: प्रीतवारिणा।
तथा मां सुरशार्दूल ! प्रीतं कुरु धर्म्मराट् ॥
एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मक:।
अस्य प्रदानात् सफला मम सन्तु मनोरथा: ॥
पानीयं प्राणिनां प्राणा: पानीयं पावनं महत्।
पानीयस्य प्रदानेन तृप्तिर्भवतु शाश्वती ॥"

इति पठित्वा दक्षिणां दत्त्वाच्छिद्रावधारणं कृत्वा कथां शृणुयात् ॥ * ॥

अथ कथा। श्रीकृष्ण उवाच।

"शृणु राजन्! प्रवक्ष्यामि व्रतानां व्रतमुत्तमम्।
चन्द्रकेतुरिति ख्यातो राजाधीद्धार्म्मिक: सुधी: ॥
सुशीला तस्य भार्य्यासीत् मालावत्यतिविश्रुता।
सा सर्व्वगुणसंयुक्ता साध्वीयं द्रौपदी यथा ॥
एकस्मिन् समये राजन्! लोमशस्य च सन्निधौ।
सैषा पुटाञ्जलिर्भूत्वा लोमशं परिपृच्छति ॥

मालावत्युवाच।

शृणु त्वं मुनिशार्दूल! सर्व्वधर्म्मपरायण!।
यमालयं न गच्छामि तदुपायं ब्रवीहि मे ॥
समाख्याहि व्रतं देव! सफलं मानवाश्रमम् ॥

लोमश उवाच।

शृणु राज्ञि! महाभागे! येन तत्र न गच्छति।
तदुपायं प्रवक्ष्यामि शृणु त्वं हि समाहिता ॥
जन्मजन्मकृतात् पापान्मुच्यते नात्र संशय:।
विष्णुरत्नमाप्नोति हन्ति पापं पुराकृतम् ॥
येन धर्म्मप्रसादेन तुष्टो देवो जनार्द्दन:।
पूजयेद्देवदेवेशं सर्व्वकामफलप्रदम् ॥
समारोप्य ततो देवं चन्दनेन विलेपितम्।
पूजयेत् परया भक्त्या गन्धपुष्पादिभिस्तथा ॥
अयने कोटिगुणितं लक्षं विष्णुपदीषु च।
षड़शीतिसहस्रन्तु षड़शीत्यासुदाहृतम् ॥
विषुवे शतसाहस्रं व्रतं तच्च समाचरेत् ॥

मालावत्युवाच।

ममैतत् कथितं सर्व्वं यद्व्रतञ्च त्वया प्रभो!।
किं विधानं फलं किं वा केन लोके कृतं पुरा ॥

लोमश उवाच।

शृणु देवि! महाभागे! पूर्व्वकालस्य या कथा।
विनिष्क्रान्ते ततश्चैत्रे यदा मेषगतो रवि: ॥
दोषादिरहिते काले चतुर्व्वर्षं समाचरेत्।
तत्र नित्यं घटं दद्यात् मासमेकं सभोज्यकम् ॥
चन्दनेन समालिप्तं दधिक्षीरादिभिरन्वितम्।
व्रतमेतत् समाकुर्य्यात् यावत् वर्षचतुष्टयम् ॥
अनेनैव विधानेन या व्रतञ्च समाचरेत्।
सर्व्वं कुलं समुद्धृत्य स्वर्गलोके महीयते ॥
द्रौपद्याचरितं यत्तत् शृणु त्वं ध्याननत्परा।
द्रौपद्या तदिदं पूर्व्वं न कृतं व्रतमुत्तमम् ॥
हृता गता च सा साध्वी न लभेत दिवं पुन:।
अथ शीघ्रं समागत्य तान्पुपोर्षमकिङ्करा: ॥
विषुवे च त्वया साध्वि! न कृतं तद्व्रतं किल।
ततो मरणकाले स्यात् स्वर्गद्वारं विरोधितम् ॥
यमदूतै: समाख्याय गले पाशो निवेशित: ॥

द्रौपद्युवाच।

के यूयमिति तद्ब्रूत कुत्र वा नीयतेऽधुना।
कथं पाशो गले दत्त: कथयस्व मम ध्रुवम् ॥

यमदूता ऊचु:।

मा भैषीर्नीयते देवि! धर्म्मराजस्य सन्निधौ।
पृथिव्यां यानि तीर्थानि व्रतानि विविधानि च ॥
यज्ञदानविधानञ्च त्वया सर्व्वं प्रतिष्ठितम्।
किन्त्वत्र न कृतं पूर्व्वं माधवे मासि सुव्रते!॥
व्रतं धर्म्मघटं वाम तेन यासि यमालयम्।

द्रौपद्युवाच।

यमदूता महाप्राज्ञा नयन्तु मां यमालयम्।
तत्प्रसादेन मे शीघ्रं गले पाशो विमुच्यतु ॥
ततो विधृत्य खट्वे समानीता यमान्तिकम्।

यम उवाच।

शृणु त्वं द्रौपदी साध्वि! सर्व्वं त्वया प्रतिष्ठितम्।
न कृतो देवदेवस्य व्रतं धर्म्मघटस्त्वया ॥
तथापि तुष्टो भद्रेऽहं वरं वृणु यथेप्सितम्॥

द्रौपद्युवाच।

वरं दद्यास्त्वमे नाथ! गच्छामि पुनरालयम्।
कृतेयं तद्विधानेन व्रतं तव प्रसादत: ॥

यम उवाच।

व्रतं धर्म्मघटं देवि! कुरु गत्वा निजालयम्।
नागन्तव्यं त्वया देवि! पुनर्म्मम पुरीं शुभे!॥
ततो गता च सा चैव तुष्टोऽभूदन्तकस्तदा।
भूयो भूमिगतं प्राप्य तदेव च तथा सती ॥
सा तत्र तद्व्रतचक्रे दानं होमं यथाविधि।
संपूर्णे तु व्रते तत्र प्रतिष्ठामाचरत् सती ॥
ददौ द्वादशविप्रेभ्यो दानानि द्वादशानि च।
चत्वारि जलपात्राणि वस्त्रेण सहितानि च ॥
दानानि च ततो दत्त्वा ततस्सङ्काघटांस्तथा।
आसनानि च चत्वारि पादुकाश्चसहितानि च ॥
दक्षिणान्तु ततो दत्त्वा वस्त्राणि विविधानि च।
तद्व्रतञ्च सुसम्पन्नं विष्णुरस्तेऽभवत्तत: ॥
एवं कृत्वा व्रतं साध्वी द्रौपदी सुसमाहिता।
अन्तकालं समासाद्य सा गता वैष्णवं पुरम् ॥
इत्युक्ता लोमशेनाथ कन्या मालावती तथा।
कृत्वा चैव व्रतं साध्वी देवाराधनपूर्व्वकम् ॥
सा नित्यं गर्गरीं दत्त्वा सभोज्यदधिसान्वितम्।
देवोद्देशेन विप्राय श्रद्धया प्रत्यपादयत् ॥
एवं या कुरुते नारी पुत्रपौत्रसमन्विता ॥

पुस्तकान्तरे।

'एवं करोति या नारी नरो वा व्रतसत्तमम्।'
इति वा पाठ:।
आयुरारोग्यमैश्वर्य्यं श्रियञ्च लभते सुखम्।
अन्ते याति परं स्थानं यत्र देवो निरञ्जन:॥"

इति भविष्यपुराणोक्ता धर्म्मघटव्रतकथा समाप्ता ॥

क्वचित् क्वचित् पद्धतौ विष्णुधर्म्मोत्तरयमपुराणोक्ता च लिखिता।

धर्म्मचक्र:, पुं, (धर्म्मस्य चक्रं समूहो यत्र।) बुद्ध:। इति शब्दरत्नावली (धर्म्मस्य चक्रं समूह:। धर्म्मसमूहे, क्ली। यथा, महाभारते। १। १०६। १४।

"भीष्मेण विहितं राज्ञे धर्म्मचक्रमवर्त्तत ॥"

अक्षविशेष:। यथा, हरिवंशे। २२६। ७।

"धर्म्मचक्रं महाचक्रमनितं नाम नामत: ॥")

धर्म्मचक्रवृत्, पुं, (धर्म्मचक्रं धर्म्मसङ्घं बिभर्त्तीति। भृ+क्विप्। तुगागमश्च।) जिन:। इति धरणि: ॥

धर्म्मचारिणी, स्त्री, (धर्म्मं चरतीति। चर+णिनि+ङीप्।) जाया। इति शब्दरत्नावली ॥

धर्म्मचिन्तनं, क्ली, (धर्म्मस्य चिन्तनं भावना।) धर्म्मचिन्ता। इति हेमचन्द्र:। ६। १७ ॥

धर्म्मचिन्ता, स्त्री, (धर्म्मस्य चिन्ता भावना।) पुण्यभावना। तत्पर्य्यायः। उपाधि: २। इत्यमर:। १। ७। २८ ॥

धर्म्मज्ञ:, त्रि, (धर्म्मं जानातीति। ज्ञा+क:।) धर्म्मज्ञानविशिष्ट:। यथा,—

"धर्म्मज्ञश्च कृतज्ञश्च दीर्घवैकी दृढ़व्रत:॥"

इति विराटपर्व्व ॥

धर्म्मज:, पुं, (धर्म्मेणैव धार्म्मिकत्वहेतुर्थ: जनयतीति। जन+अन्येभ्योपीति ड:।) युधिष्ठिर:।

धामिनिया इति भाषा। (यथास्य पर्य्यायः।
"धन्वनः पिच्छिलत्वकृच्च धनुर्वृक्षश्च धर्म्मजः॥"
इति वैद्यकरत्नमालायाम्॥)
सर्पविशेषः। इति मेदिनी। धे, ५३॥ टेमना।
इति भाषा॥

धर्म्मत्वं, क्ली, (धर्म्मस्य भावः। धर्म्म+त्व।) दृष्टिमत्त्वम्। आधेयत्वमिति यावत्। यथा, गगनादेर्वृत्तिमत्त्वलक्षणधर्म्मत्वाभावादिति जगदीशः॥

धर्म्मदानं, क्ली, (धर्म्माय दानम्।) प्रयोजनमनपेक्ष्य केवलधर्म्मबुद्ध्या पात्रेभ्यो दानम्। यथा, देवलः।
"पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्।
केवलं धर्म्मबुद्ध्या यत् धर्म्मदानं प्रचक्षते॥"
इति शुद्धितत्त्वम्॥

धर्म्मद्रवी, स्त्री, (धर्म्मजनको द्रवो वारिरूपो यस्याः। गौरादित्वात् ङीष्।) गङ्गा। इति त्रिकाण्डशेषः॥ (यदुक्तं गङ्गास्तोत्रे।
"विष्णुपादाब्जसम्भूते गङ्गे त्रिपथगामिनि!।
धर्म्मद्रवीति विख्याते पापं मे हर जाह्नवि!॥")

धर्म्मधातुः, पुं, (अहिंसारूपो धर्म्म एव धातुः प्रकृतिर्यस्य।) बुद्धः। इति त्रिकाण्डशेषः॥

धर्म्मध्वजी, [न्] त्रि, (धर्म्मो ध्वजश्चिह्नम्। स एवास्यास्तीति। धर्म्मध्वज+इनिः।) जीविकार्थजटादिधारी न तु परमार्थतो धर्म्मानुष्ठानकारी। तत्पर्य्यायः। लिङ्गवृत्तिः २। इत्यमरः। २। ७। ५४॥ (यथा, मनुः। ४। १६५।
"धर्म्मध्वजी सदालुब्धश्छाद्मिको लोकदम्भकः।
वैडालव्रतिको ज्ञेयो हिंस्रः सर्व्वाभिसन्धकः॥")

धर्म्मपत्तनं, क्ली, (धर्म्मपत्तने जातम्। "तत्र जातः।" ४। ३। २५। इत्यण्। संज्ञापूर्व्वकत्वात् न वृद्धिः।) मरिचम्। इत्यमरः। २। ६। ३६॥ (पर्य्यायोऽस्य यथा,—
"रेणुकं मरिचं कृष्णसुवर्णं धर्म्मपत्तनम्॥"
इति वैद्यकरत्नमालायाम्॥

धर्म्मस्य पत्तनम्।) धर्म्मपुरी। तत्पर्य्यायः। अवन्ती २। इति त्रिकाण्डशेषः॥

धर्म्मपत्रं, क्ली, (धर्म्माय यज्ञादिकार्य्यार्थं पत्रं यस्य।) यज्ञोडुम्बरः। इति शब्दचन्द्रिका॥

धर्म्मपुत्रः, पुं, (धर्म्मस्य पुत्रः।) युधिष्ठिरराजः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। २३५। १८।
"न पापकं धास्यति धर्म्मपुत्रो
धनञ्जयश्चाप्यनुवर्त्तते तम्॥")
नरनारायणावृषी। इति पुराणम्॥ (यथा, देवीभागवते। ४। ७। १६।
"तापसौ धर्म्मपुत्रौ द्वौ सुप्रशान्तमनसावुभौ॥")
धर्म्मतः कृतपुत्रः। धरमपुत्रो इति भाषा॥ यथा,—
"यावद्भुजेटिधर्म्मपुत्रपरश्वसुस्राखिलक्षत्रिय-
श्रेणीशोणितपिच्छिला वसुमती कोऽस्यामधास्यत् पदम्।

चैलोक्याभयदानदक्षिणभुजावष्टम्भदिग्जोदयो
देवोऽयं दिनकृत्कुलैकतिलको न प्राभविष्यद् यदि॥"
इति महाराटके। २। २५॥

धर्म्मवाणिजिकः, पुं, (धर्म्मे वाणिजिक इव। फलकामनया धर्म्माचरणादेवास्य तथात्वम्।) पुण्यकर्म्मफलकामी। यथा,—
"धर्म्मवाणिजिका मूढाः फलकामा नराधमाः।
अर्च्चयन्ति जगन्नाथं ते कामानाप्नुवन्तुत॥"
इति भक्तमालसत्कृतविष्णुधर्म्मोत्तरखण्डतीयकाक्षीयवचनम्॥

धर्म्मभाक्तकः, पुं, (धर्म्मार्थं भजतीति। भज+ण्वुल्।) भारतादिपाठकः। इति त्रिकाण्डशेषः॥

धर्म्ममूलं, क्ली, (धर्म्मस्य मूलम्।) शुभाचरकारणम्। पुण्यहेतुः। यथा,—
"इत्थं मूलं फलं प्राज्ञसदृपात्रं तपोधनाः।
दानं विभवतो दत्त्वा नराः स्वर्य्यान्ति धर्म्मिणः॥
एष धर्म्मो महाँस्त्यागो दानं भूतदया तथा।
ब्रह्मचर्य्यं सदा सत्यं अनृक्रोशो धृतिः क्षमा॥
सनातनस्य धर्म्मस्य मूलमेतत् समासतः॥"
इति वह्निपुराणे स्नानविधिनामाध्यायः॥
(यथा च मनुः। २। ६।
"वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥")

धर्म्मयुः, त्रि, (धर्म्मं याति गच्छतीति। या+कृगृदृक्षिदृशिभ्यः उः।) धर्म्मविशिष्टः। धार्म्मिकः। धर्म्मग्रन्थादस्त्यर्थे युग्प्रत्ययेन निष्पन्नः इति सुबोधः॥

धर्म्मयुक्, [ज्] त्रि, (धर्म्मं युनक्तीति। युज्+क्विप्।) धर्म्मयुक्तः। धार्म्मिकः। (यथाह देवलः।
"दाता प्रतिग्रहीता च श्रद्धादेयञ्च धर्म्मयुक्।
देशकालौ च दानानामङ्गान्येतानि बहुविदुः॥")

धर्म्मराजः, पुं, (धर्म्मेण राजते इति। राज+अच्।) यमः। इत्यमरः। १। ३। २१॥ (यथा, महाभारते। ३। २६६। ५४।
"धर्म्मराजः प्रकृष्टात्मा सावित्रीमिदमब्रवीत्॥")
नरपतिः। युधिष्ठिरः। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १६। ८।
"अपृच्छत् धर्म्मराजो हि शरतल्पगतं पुरा॥"
धर्म्मप्रधाने, त्रि। यथा, महाभारते। १। १५५। १९।
"धृत्या च ते प्रीतमनाः सदाहं
त्वं वा वरुणो धर्म्मराजो यमो वा॥")

धर्म्मराजपरीक्षा, स्त्री, (धर्म्मराजस्य परीक्षा।) धर्म्माधर्म्मपरीक्षणम्। यथा,
अथ धर्म्मराजविधिः। वक्ष्यतिः।
"पत्रद्वये लेखनीयौ धर्म्माधर्म्मौ सितासितौ।
जीवदानादिकैर्मन्त्रैर्गायत्र्याद्यैश्च सामभिः॥
आमन्त्र्य पूजयेत्तत्रैः कुसुमैश्च सितासितैः।
अभ्युक्ष्य पञ्चगव्येन घृतपिण्डान्तरितौ ततः॥
क्रमौ कृत्वा नवे कुम्भे स्थाप्यौ चानुपलक्षितौ।
ततः कुम्भात् पिण्डमेकं गृह्णीयादविलम्बितः॥
धर्म्मे गृहीते शुद्धः स्यात् संपूज्यश्च परीक्षकैः॥
जीवदानमन्त्रस्तु शारदायाम्।
'पाशाङ्कुशपुटा शक्तिर्नायुर्बिन्दुविभूषितः।
याद्याः सप्तसकारान्ता वोमसत्रेन्दुसंयुतम्॥
तदन्ते हंसमन्त्रः स्यात् ततोऽस्य पदं वदेत्।
प्राणा इति वदेत् पश्चादिह प्राणास्ततःपरम्॥
असुश्च जीव इह स्थितस्ततोऽस्य पदं वदेत्।
सर्व्वेन्द्रियाण्यसुश्चान्ते वाङ्मनश्चक्षुरन्ततः॥
श्रोत्रघ्राणपदे प्राणा इहागत्य सुखं चिरम्।
तिष्ठन्त्विति वधूरन्ते प्राणमन्त्रोऽयमीरितः॥
प्रत्यसुश्च पदात् पूर्व्वं प्राणाद्यानि प्रयोजयेत्।
प्रयोगेषु समाख्यातः प्राणमन्त्रो मनीषिभिः॥'
पाशाङ्कुशपुटा शक्तिरित्यनेन प्रथमं पाशबीजं आम्। ततः शक्तिबीजं ह्रीँ। ततोऽङ्कुशबीजं क्रोम्। वायुर्यकारो बिन्दुविभूषितः। तेन यं। याद्याः सप्तसकारान्ता उद्धृतयकारमादाय सप्त। अङ्कुशवायुनलावनी वरुणबीजानीत्यन्यत्रोक्तेः। अत्र वायोरेकस्य पूर्व्वं पृथगुपन्यासः सप्तानां सबिन्दुत्वार्थः। अतएवान्यत्र बीजानीत्युक्तम्। वोमसत्रेन्दुसंयुतम्। वोम हकारः। सत्रं ओकारः। इन्दुर्बिन्दुः। तेन हों। असुश्च इति षष्ठ्यन्तदेवतानामोपलक्षणम्।
'अदः पदं हि यद्रूपं यत्र सन्ते प्रदृश्यते।
साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत्॥'
इति नारायणीयात्। अग्निवधूः स्वाहा॥ * ॥
गायत्र्यादिसामान्याज्ञाने तु सप्तव्याहृतिं गायत्रीमात्रं पठितव्यम्। जपहोमादि यत्किञ्चित् कृतमुक्तं सम्भवेन्न येत् सर्व्वं व्याहृतिभिः कुर्य्यात् गायत्र्या प्रणवेन च॥ इति मिताक्षराधृतषट्त्रिंशन्मतवचनदर्शनात् अत्रापि तथा कल्प्यते॥ * ॥ पितामहः।
'अधुना संप्रवक्ष्यामि धर्म्माधर्म्मपरीक्षणम्।
हन्तॄणां याचमानानां प्रायश्चित्तार्थिनां नृणाम्।
राजतं कारयेद्धर्म्ममधर्म्मं सौसकायसम्।
लिखेद्धर्म्मे पटे वापि धर्म्माधर्म्मौ सितासितौ॥
अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत्।
सितपुष्पस्तु धर्म्मः स्यात् अधर्म्मोऽसितपुष्पकः॥
एवं विधायोपलिप्ते पिण्डयोस्तौ निधापयेत्।
गोमयेन स्रुवे वापि पिण्डौ कार्य्यौ समौ ततः॥
स्रुक्षाखेऽङ्गुष्ठपर्व्वे स्याप्यौ चानुपलक्षितौ।
उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ॥
आवाहयेत्ततो देवान् लोकपालांश्च पूर्व्ववत्।
धर्म्मावाहनपूर्व्वन्तु प्रतिज्ञापत्रकं लिखेत्॥
यदि पापविमुक्तोऽहं धर्म्मस्त्वायाच मे करम्।
अभियुक्तस्तयोश्चैकं प्रगृह्णीताविलम्बितः॥
धर्म्मे गृहीते शुद्धः स्यादधर्म्मे स तु हीयते।
एवं समासतः प्रोक्तं धर्म्माधर्म्मपरीक्षणम्॥'
हन्तॄणामिति साहसाभियोगेषु। याचमानानामिति अत्यन्तार्थाभियोगेषु। प्रायश्चित्तार्थिनामिति पातकाभियोगेषु॥ * ॥
तत्र प्रयोगः। पत्रद्वये शुक्लं धर्म्मं कृष्णमधर्म्मं पुत्तलकद्वयरूपं निधाय ओम् आं ह्रीं क्रों यं

रं लं वं शूं षं सं हौं हंसः धर्म्मस्य प्राणा इह प्राणाः। पुनः आमित्यादि धर्म्मस्य जीव इह स्थितः। पुनः आमित्यादि धर्म्मस्य सर्व्वेन्द्रियाणि। पुनः आमित्यादि धर्म्मस्य वाङ्मनश्चक्षुः-श्रोत्रघ्राणप्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। इत्यनेन जीवदानं धर्म्मप्रतिमायां एवमधर्म्मप्रतिमायां कृत्वा गायत्र्यादिसामञ्चाने तेनैव नो चेत् सप्तवणव्याहृतिगायत्रीं पठित्वा धर्म्मस्यावाहनादि कृत्वा यथाक्रमं शुक्लपक्षपुण्याभ्यां धर्म्माधर्म्मौ संपूज्य प्रणवेन पञ्चगव्यमुपादायाभ्युक्ष्य शुक्लपुण्ययुक्तं धर्म्मं कृष्णपुण्ययुक्तमधर्म्मं स्वदक्षिणहस्ते कृत्वा गवे कुम्भे स्थापयेत्। प्राङ्मुखोदङ्मुखो देवब्राह्मणसन्निधौ धर्म्मावाहनादिहवनान्तं कर्म्म कृत्वा दक्षिणां दत्त्वा समन्त्रकप्रतिज्ञापत्रं लिखित्वा ग्रीष्मशिरसि दद्यात्। ग्रीष्मस्थ ग्रीष्म यदि पापविमुक्तोऽहं धर्म्मस्यायाच मे करं दद्यादार्य कृष्णात्तयोरेकं यद्गीयात्। धर्म्मं यहीति मुहुः अन्यथा अन्यहः।" इति दिवतत्त्वम्॥

धर्म्मवान् [त्] त्रि, (धर्म्मोऽस्यस्येति। धर्म्म + मतुप्। मस्य वः।) धर्म्मविशिष्टः। पुण्यवान्। इति शब्दरत्नावली॥ (यथा, रामायणे। २। १०४। २६।

"जनेन धर्म्मज्ञतमेन धर्म्मवा-
नुपोपविष्टो भरतस्तदाग्रतम्॥")

धर्म्मवासरः, पुं, (धर्म्मस्य धर्म्माचरणस्य वासरः। पौर्ब्बमासी। इति चिकाण्डशेषः॥

धर्म्मवाहनः, पुं, (धर्म्मं वाहयतीति। वह + णिच् + ल्युः। यद्वा, धर्म्मो वृषो वाहनं यस्य। धर्म्मस्य वृषरूपत्वादेव तथात्वम्।) शिवः। इति त्रिकाण्डशेषः॥ धर्म्मस्य याने, क्ली॥

धर्म्मवैतंसिकः, पुं, (धर्म्मे वैतंसिक इव। आत्मनो धार्म्मिकत्वविज्ञापनाय पाखिकः कपटाचारी वैतंसिकः।) पापकर्म्मणा धनमासाद्यात्मनो धार्म्मिकत्वख्यापनाय दानकर्त्ता। तत्पापफलं यथा,—

"धर्म्मवैतंसिको यस्तु पापात्मा पुरुषस्तथा।
ददाति दानं विप्रेभ्यो लोकविश्वासकारणम्॥
पापेन कर्म्मणा विप्रो धनं लब्ध्वा निरङ्कुशः।
रागमोहान्वितोऽशान्तः कङ्कयोनिमाप्नुयात्॥"

इति वह्निपुराणे दानविधिनामाध्यायः॥

धर्म्मव्याधः, पुं, (धर्म्मप्रधानो व्याधः। व्याकरणार्थिवादिवत् मध्यपदलोपिसमासः।) पापपुरुषविशेषः। स तु काश्मीरदेशाधिपवसुनामनृपदेहनिर्गतव्याधरूपिब्रह्महत्यात्मकः। तस्य राज्ञो वरेण तस्य धर्म्मव्याध इति संज्ञाभूत्। यथा,—

"ततः पुत्रं विवस्वन्तं श्रेष्ठं भालग्रतस्य ह।
अभिषिच्य स्वके राज्ये तपोवनमुपागमत्॥
पुष्करं नाम तीर्थानां प्रवरं यत्र केशवः।
पुष्करीकाक्षनामा तु पूज्यते तत्परायणैः॥
तत्र गत्वा स राजर्षिः काश्मीराधिपतिर्म्महः।
अतितीव्रेण तपसा स्वशरीरमशोषयत्॥
पुष्करीकाक्षपारं तु सर्व्वं भक्त्या जपन् बुधः।
नमस्ते पुष्करीकाक्ष नमस्ते मधुसूदन!।
नमस्ते सर्व्वलोकेश! नमस्ते तिग्मचक्रिके॥"
इत्यादि।

"एवन्तु वदतस्तस्य मूर्त्तिमान् पुरुषः किल।
निर्मत्य देहान्नीलाभो घनचक्रो भयङ्करः॥
उवाच प्राञ्जलिर्भूत्वा किं करोमि नराधिप!॥

राजोवाच।

कोऽसि किं कार्य्यमिह ते कस्मादागतवानसि।
एतन्मे कथय व्याध! इतिच्छामि वेदितुम्॥

व्याध उवाच।

पूर्व्वं कलियुगे राजन्! राजा त्वं दक्षिणासुखे।
वरेण्यमागतो हन्तुं श्वापदानि विशेषतः॥
तत्र त्वयाग्यकामेन मृगवेश्मधरो मुनिः।
दक्षयज्ञेन दूरे तु पातितो धरणीतले॥
ततस्त्वया महाराज! यज्ञसंभारायकं प्रभुम्।
संचिन्त्य द्वादशी मुहा त्वया राजन्! उपोषिता॥
गौरैत्ता विधिना सद्यो ऋतोऽस्मुदरमूलतः।
अहञ्च तव देहस्थः सर्व्वं जानासि चाग्रयम्॥
स्वर्गस्थस्यापि राजेन्द्र! स्थितोऽहं स्वेन तेजसा।
इदानीमादिदेशौ तु ऋतौ वृषतिसत्तम!॥
सम्भृतस्त्वं महाराज! राज्ञः सुमनसो यष्टे।
इदानीं यत् त्वया स्तोत्रं पुष्करीकाक्षपारगम्॥
पठितं तत्प्रभावेण विहायाङ्गरुहाण्यहम्।
एकीभूतः पुनर्ज्जातो व्याधरूपो वृषोत्तम!॥
एतत् श्रुत्वा वचो राजा परं विस्मयमागतः।
वरेण च्छन्दयामास तं व्याधं राजसत्तमः॥

राजोवाच।

स्मारितोऽसि महाव्याध! त्वया जन्मान्तरं गतम्।
तथा त्वं मत्प्रसादेन धर्म्मव्याधो भविष्यसि॥"

इति वाराहे आदिष्टतदुत्तान्तनामाध्यायः॥ (अपरो धार्म्मिको व्याधविशेषः। अस्य विवरणन्तु महाभारते। ३। २०६ अध्यायमारभ्य विशेषतो द्रष्टव्यम्॥)

धर्म्मशास्त्रं, क्ली, (धर्म्मस्य धर्म्माय वा शास्त्रम्।) मन्वादिप्रणीतशास्त्रम्। तत्पर्य्यायः। स्मृतिः २ धर्म्मसंहिता ३। इति हेमचन्द्रः॥ धर्म्मशास्त्रप्रयोजका यथा, याज्ञवल्क्यः। १। ५-६।

"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥"

एते प्रधानानि अन्येऽपि सन्ति। रघुनन्दनधृतधर्म्मशास्त्राणि यथा,—

"मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये।
प्रायश्चित्ते विवादे च तिथौ जन्माष्टमीव्रते॥
दुर्गोत्सवे अवहृतावेकादश्यादिनिर्णये।
तट्टागभवनोत्सर्गे वृषोत्सर्गत्रये व्रते॥
प्रतिष्ठायां परीक्षायां ज्योतिषे वास्तुसंज्ञके।
दीक्षायामाह्निके श्राद्धे चैत्रे श्रीपुरुषोत्तमे॥
सामश्राद्धे यजुःश्राद्धे शूद्रकृत्यविचारणे।
इत्यष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः॥"

इति रघुनन्दनभट्टाचार्य्यः॥

धर्म्मशीलः, त्रि, (धर्म्मे धर्म्माचरणे शीलं स्वभावो यस्य।) धार्म्मिकः। यथा, विराटपर्व्वणि।

"धर्म्मशीलो वदान्यश्च दृढ़श्च सुमहाधनः॥"

धर्म्मसंहिता, स्त्री, (धर्म्मस्य संहिता।) स्मृतिशास्त्रम्। इत्यमरः। १। ६। ६॥

धर्म्मसावर्णिः, पुं, (धर्म्म एव सावर्णिः सूर्य्यपुत्रो मनुः।) एकादशो मनुः। अस्मिन्मन्वन्तरे धर्म्मसेतुरवतारः। वैधृत इन्द्रः। विहङ्गमकामगमाद्या देवाः। अग्नीध्रादयः सप्तर्षयः। सत्यधर्म्मादयो मनुपुत्रा भविष्यन्ति। इति श्रीभागवतम्॥ ॥

"भविष्यधर्म्मपुत्रस्य सावर्णस्यान्तरं शृणु।
विहङ्गमाः कामगमा निर्म्माणरतयस्तथा॥
त्रिप्रकारा भविष्यन्ति एकैकस्मिंश्चको गणः।
मासर्तुदिवसा ये तु निर्म्माणरतयस्तु ते॥
विहङ्गमा राजयोऽथ सुवर्त्ताः कामगो गणः।
इन्द्रो वृषाख्यो भविता तेषां प्रख्यातविक्रमः॥
हविष्मांश्च धनिष्ठश्च ऋषिरग्न्यस्तथाङ्गिराः॥
निर्म्मोहज्ञानवश्चैव वृष्टिमान्यो महामुनिः॥
सप्तर्षयोऽत्रैर तस्मिन्नमितेनाथ सप्तमः॥
सर्व्वागुगः सुधर्म्मा च देवानीकः पुरुद्वहः॥
देवश्रवा उदारुथश्च विभानुश्चेत्तुसुता नृपाः॥"

इति मार्कण्डेयपुराणम्॥

धर्म्मसारः, पुं, (धर्म्मस्य सारः।) श्रेष्ठपुण्यकर्म्म। यथा। ब्रह्मोवाच।

"धर्म्मसारमहं वक्ष्ये सङ्क्षेपान्मुनि शृणु।
मुक्तिमुक्तिप्रदं कृत्स्नं सर्व्वपापविनाशनम्॥
श्रुतं ब्रह्म बलं धैर्य्यं सुखमृत्युरुहमेव च।
श्लोको हरति वै मर्त्यां तस्माच्छ्लोकं परित्यजेत्॥
कर्म्मदेवाः कर्म्मलोकाः कर्म्मसम्भवबान्धवाः।
कर्म्मणामि प्रेरयन्तीह पुरुषं सुखदुःखयोः॥
दानमेव परो धर्म्मो दानात् सर्व्वमवाप्यते।
दानान्मुक्तिश्च राज्यञ्च स्वर्गाहानं ततो नरः॥
एकतः क्रतवः सर्व्वे समग्रवरदक्षिणाः।
एकतो भयभीतस्य प्राणिनः प्राणरक्षणम्॥
तपसा ब्रह्मचर्य्येण यज्ञेस्त्यागेन वा पुनः।
गतिन्तु लभते जन्तुर्यङ्गां संशेत यां लभेत्॥
अश्रद्धा परमं पापं श्रद्धा पापप्रणाशिनी।
जहाति पापं श्रद्धावान् जीर्णां त्वचमिवोरगः॥
न पुरावृत्तपुण्यानां नराणामिह दुर्ग्गहे।
जीर्य्यन्तेऽपि प्रयच्छन्ते श्रद्धादत्तयमर्थिनः॥
दूरादतिथयो यस्य गृहमायान्त्यवारिताः।
स यज्ञस्य इति प्रोक्तः प्रेषासु यदरक्षकाः॥
न चिन्तयन्ति ये विष्णुं नार्च्चयन्ति च ये नराः।
धर्म्मस्य नाशका ये च ते वै निरयगामिनः॥
ये च होमजपध्यानदेवतार्च्चनतत्पराः।
सत्यशौचदयायुक्तास्ते नराः स्वर्गगामिनः॥
न दाता सुखदुःखानां न च हर्त्तास्ति कश्चन।
स्वकृतान्येव भुज्यन्ते दुःखानि च सुखानि च॥
धर्म्मार्थं जीवितं येषां धर्म्मार्थञ्च मैथुनम्।

देवार्थं तर्पणं येषां दुर्गाद्यभितरन्ति ते ॥
सन्तुष्टः को न प्रयाति फलमूलैश्च जीवितुम् ।
सर्व्व एव हि सान्त्वेन प्रकृष्टान्यवगाहते ॥
लोभात् क्रोधः प्रभवति लोभाद्द्रोहः प्रवर्त्तते ।
लोभान्मोहश्च माया च मानो मत्सर एव च ॥
रागर्द्द्यावृतक्रोधलोभमोहमदोज्झितः ।
यः स शान्तः परं लोकं याति पापविवर्ज्जितः ॥
दैवता सनरो नागा गन्धर्व्वा गुह्यका नराः ।
धार्म्मिकं पूजयन्तीह न धनाढ्यं न कामिनम् ॥
न मन्त्रबलवीर्य्येण प्रज्ञया पौरुषेण वा ।
अलभ्यं लभते मर्त्यस्तत्र का परिदेवना ॥
यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।
आकाशे पक्षिभिर्न्नित्यं तथा सर्व्वत्र वित्तवान् ॥
सर्व्वसत्त्वदयायुक्तं सर्व्वेन्द्रियविनिग्रहः ।
सर्व्वत्यागनिवृत्तिश्च श्रेयः परमिदं स्मृतम् ॥
प्रज्ञाप्रदीपतो ज्ञात्वा यो धर्म्मं नाचरेन्नरः ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥
भ्रूणहा ब्रह्महा गोघ्नः पितृहा गुरुतल्पगः ।
भूमिं सर्व्वगुणोपेतां दत्त्वा पापैः प्रमुच्यते ॥
न गोदानात् परं दानं किञ्चिदस्तीति मे मतिः ।
सा गौर्य्यायाञ्चिता दत्त्वा कृत्स्नं तारयते कुलम् ॥
नास्ति दानात् परं दानं किञ्चिदस्ति दृवश्च ! ।
अन्नेन धार्य्यते सर्व्वं चराचरमिदं जगत् ॥
कन्यादानं हयातृप्तिं जपस्तौर्य्यं श्रुतं तथा ।
हस्त्यश्वरथदानानि मणिरत्नवसुन्धराः ॥
अन्नदानस्य सर्व्वाणि कलां नार्हन्ति षोड़शीम् ।
अन्नात् प्राणो बलं तेजश्चान्नादीर्य्यं इति स्मृतिः ॥
कूपवापीतड़ागादि आरामादि च कारयेत् ।
त्रिःसप्तकुलमुद्धृत्य विष्णुलोके महीयते ॥
साधूनां दर्शनं पुण्यं तीर्थादपि विशिष्यते ।
कालेन फलते तीर्थं सद्यः साधुसमागमः ॥
सत्यं दमस्तपः शौचं सन्तोषः क्षान्तिरार्জ্জवम् ।
ज्ञानं ध्रुवो दया दानमेष धर्म्मः सनातनः ॥"
इति गारुड़े २२५ अध्यायः ॥

धर्म्मसुतः, पुं, (धर्म्मस्य सुतः ।) युधिष्ठिरराजः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । २ । ७ । १६ ।
"एकान्ते विदुरेणोक्तो राजा धर्म्मसुतः शुचिः ॥"
नरनारायणमुनी । यथा, देवीभागवते । ४ । ७ । १२ ।
"इति सञ्चिन्तयन्तं तं भ्रातरं दीनमानसम् ।
उवाच वचनं तथ्यं नरो धर्म्मसुतोऽनुजः ॥")

धर्म्मस्थः, पुं, (धर्म्मे स्थित इति । स्था + किप् ।) धर्म्माटपक्षी । इति शब्दरत्नावली ॥ (धर्म्मप्रेरके, त्रि । यथा, तैत्तिरीयब्राह्मणे । १ । ७ । ८ । ३ ।
"सोमो राजा वरुणः । देवा धर्म्मसुवश्च ये ॥")

धर्म्मात्मा, [न्] पुं, (धर्म्मे आत्मा स्वभावो यस्य । कुमारपालः । स तु आर्हतविशेषः । इति हेमचन्द्रः । ३ । ३७७ ॥) त्रि, धर्म्मशीलः । यथा,—
"महर्षिर्भगवान् व्यासः कलेर्मां संहितां पुरा ।
श्रोतुमिच्छतिधर्म्मात्मा पुत्रमध्यापयत् शुकम् ॥"
इति महाभारतम् ॥

धर्म्माधर्म्मपरीक्षणं, क्ली, (धर्म्मश्च अधर्म्मश्च तयोः परीक्षणम् ।) परीक्षाविशेषः । यथा,—
"अधुना संप्रवक्ष्यामि धर्म्माधर्म्मपरीक्षणम् ।
हन्तुकामा याचमानानां प्रायश्चित्तार्थिनां नृणाम् ॥
राजतं कारयेत् धर्म्ममधर्म्मं सीसकायसम् ।
लिखेत् भूर्জে पटे वापि धर्म्माधर्म्मौ सितासितौ ॥
अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत् ।
सितपुष्पस्तु धर्म्मः स्यादधर्म्मोऽसितपुष्पकः ॥
एवं विधायोपलिप्ते पिण्डयोस्तौ निधापयेत् ।
गोमयेन दृढा वापि पिण्डौ कार्य्यौ समन्ततः ॥
ब्रह्माङ्कं उपहृते स्याप्यौ चानुपलक्षितौ ।
उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ ॥
आवाहयेत् ततो देवान् लोकपालांश्च पूर्व्ववत् ॥
धर्म्मावाहनपूर्व्वन्तु प्रतिज्ञापत्रकं लिखेत् ।
यदि पापविमुक्तोऽहं धर्म्मस्त्वायातु मे करे ॥
अशुद्धस्त्वेमम करे पापमायातु धर्म्मतः ।
अभियुक्तस्तयोश्चैकं प्रयच्छीतावलम्बितः ॥
धर्म्मे गृहीते शुद्धः स्याद्धर्म्मे तु स हीयते ।
एवं समासतः प्रोक्तं धर्म्माधर्म्मपरीक्षणम् ॥"
इति मिताक्षरा ॥

धर्म्माधिकरणं, क्ली, (अधिक्रियते अस्मिन्निति । अधि + कृ + अधिकरणे ल्युट् । धर्म्मस्य अधिकरणम् ।) राज्ञो विचारस्थानम् । यथा,—
"धर्म्मशास्त्रानुसारेण अर्थशास्त्रानिरूपणम् ।
यत्राधिक्रियते स्थाने धर्म्माधिकरणं हि तत् ॥"
इति वीरमित्रोदये कात्यायनवचनम् ॥*॥
"पुरुषान्तरतत्त्वज्ञाः प्राज्ञवत्साप्तलोलुपाः ।
धर्म्माधिकरणे कार्य्या जनाक्षानकरा नराः ॥"
इति मत्स्यपुराणे १८६ अध्यायः ॥

धर्म्माधिकरणः, पुं, (धर्म्माधिकरणं आश्रयत्वेनास्त्यस्येति । अच् ।) धर्म्माध्यक्षः । तस्य लक्षणम् । यथा, मत्स्यपुराणे १८६ अध्याये ।
"समः शत्रौ च मित्रे च सर्व्वशास्त्रविशारदः ।
विप्रसक्तः कुलीनश्च धर्म्माधिकरणो भवेत् ॥"

धर्म्माधिकरणी, [न्] पुं, (धर्म्माधिकरणं विचार्य्यस्थानत्वेनास्त्यस्येति । धर्म्माधिकरण + इनिः ।) धर्म्माधिकरणविशिष्टः । जज् इति इंराजी भाषा । तत्पर्य्यायः । धर्म्माध्यक्षः २ धार्म्मिकः ३ । इति हेमचन्द्रः । ३ । ३८६ ॥ प्राड्विवाकः ४ अक्षदर्शकः ५ । इत्यमरः । २ । ८ । ५ ॥

धर्म्माध्यक्षः, पुं, (धर्म्मे धर्म्माधिकरणे अध्यक्षः ।) धर्म्माधिकरणी । इति हेमचन्द्रः । ३ । ३८८ ॥
"कुलशीलगुणोपेतः सर्व्वधर्म्मपरायणः ।
प्रवीणः प्रेक्षणाध्यक्षो धर्म्माध्यक्षो विधीयते ॥"
इति चाणक्ये । १०२ ॥
(विष्णुः यथा, महाभारते । १३ । १४६ । २८ ।
"लोकाध्यक्षः सुराध्यक्षो धर्म्माध्यक्षः क्षमाक्षतः ॥"
"धर्म्माधर्म्मौ साक्षादीक्षते अनुरूपं फलं दातुम् ।
तस्माद्धर्म्माध्यक्षः ।" इति शाङ्करभाष्यम् ॥)

धर्म्मारण्यं, क्ली, (धर्म्माय धर्म्मस्य वा यदरण्यम् ।) पुण्यवनविशेषः । तस्य नामकारणं यथा,—
"स धर्म्मः पोड़ितः सर्व्वैः सोमेनाद्भुतकर्म्मणा ।
तारां जिघृक्षता पत्नीं भ्रातुराङ्गिरसस्य च ॥
सोऽप्यग्राह्यीभितप्तेन बलिना क्रूरकर्म्मणा ।
अरण्यं गहनं घोरं प्रविवेश तदा प्रभुः ॥
ब्रह्मोवाच ।
यच्चारण्यमिदं धर्म्म ! त्वया व्याप्तं चिरं विभो ! ।
नाम्ना भविष्यति क्षेत्रमिदं धर्म्मारण्यमिति प्रभो ! ॥"
इति वराहपुराणम् ॥
(गयास्थतीर्थविशेषः । यथा, वायुपुराणे गयामाहात्म्ये ।
"प्रथमेऽहि दिने प्रोक्तो द्वितीयदिवसे व्रजेत् ।
धर्म्मारण्यं तच्च धर्म्मो धर्म्मादृयमकारयत् ॥")

धर्म्मासनं, क्ली, (धर्म्माय व्यवहारकार्य्यसाधनाय यदासनम् ।) विचारासनम् । चेयर् इति इंराजीभाषा । यथा,—
"धर्म्मासनमधिष्ठाय संवीताङ्गः समाहितः ।
प्रज्ञप्य लोकपालेभ्यः कार्य्यदर्शनमारभेत् ॥"
इति मनुः । ८ । २३ ॥

धर्म्मिणी, स्त्री, (धर्म्मोऽस्या अस्तीति । इनिः । ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥

धर्म्मी, [न्] (त्रि, धर्म्मोऽस्यास्तीति । धर्म्म + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) धर्म्मवान् । पुण्यशीलः । इति शब्दरत्नावली ॥ (पुं, विष्णुः । यथा, महाभारते । १३ । १४६ । ६४ ।
"धर्म्मगुप् धर्म्मकृद्धर्म्मी सदसत्क्षरमक्षरम् ॥"
"धर्म्माधारतया धर्म्मी ।" इति शाङ्करभाष्यम् ॥)

धर्म्मोपदेशकः, पुं, (धर्म्मसुपदिशतीति । उप + दिश + ण्वुल् ।) गुरुः । इति हेमचन्द्रः । २ । ७७ ॥

धर्म्म्यः, त्रि, (धर्म्म + "धर्म्मपथ्यर्थन्यायादनपेते ।" ४ । ४ । ९२ । इति यत् ।) धर्म्मादनपेतः । धर्म्मयुक्तः । यथा, श्रीभगवद्गीतायाम् ।
"धर्म्माद्धि युद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥"
"न्यूनाधिकविभक्तानां धर्म्म्यः पिण्डकृतः स्मृतः ॥"
इति दायभागः ॥
(धर्म्मेण प्राप्यः । "नौवयोधर्म्मेति ।" ४ । ४ । ९२ । इति यत् धर्म्मलभ्यः । इति सिद्धान्तकौमुदी ॥)

धर्म्म्यविवाहः, पुं, (धर्म्म्यो धर्म्मार्हो विवाहः ।) विवाहविशेषः । स च पञ्चविधः । ब्राह्मदैवार्षगान्धर्व्वप्राजापत्यरूपः । अधर्म्म्यविवाहस्त्रिविधः । असुरराक्षसपैशाचरूपः । यथा,
"धर्म्म्येष्वेव विवाहेषु कालपरीक्षणं नाधर्म्म्येषु ।" इत्युद्वाहतत्त्वम् ॥ (यस्य वर्णस्य यो विवाहो धर्म्म्यः स उक्तो यथा, मनौ । ३ । २१—२६ ।
"ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गान्धर्व्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥
यो यस्य धर्म्म्यो वर्णस्य गुणदोषौ च यस्य यौ ।
तदः सर्व्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् ॥
षड़ानुपूर्व्व्या विप्रस्य क्षत्रस्य चतरोऽवरान् ।
विट्शूद्रयोस्तानेव विद्याद्धर्म्म्यान्न राक्षसान् ॥
चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः ।
राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः ॥
प्रशस्तान् त्रयो धर्म्म्या द्वावधर्म्म्यौ स्मृताविह ।

पेशाचराक्षसरक्षेव न कर्त्तव्यौ कदाचन ॥
पृथक् पृथक्त्वा मिश्रौ वा विवाहौ पूर्व्वचोदितौ ।
गान्धर्व्वो राक्षसश्चैव धर्म्म्यौ क्षत्रस्य तौ स्मृतौ॥")

धर्षः, पुं, (धर्षणमिति । धृष्+भावे घञ् ।) प्रागल्भ्यम् । (यथा, महाभारते १९।१८६।७। "यद्येव दर्पाद् धर्षाद्वाप्य ज्ञानाज्ञानपराद्वात् । प्रश्रितो धनुरायन्तु वार्य्यतां साधु मागमत् ॥") अमर्षः । शुक्लिवन्धनम् । संहतिः । हिंसा । इति धृषधातोर्भावेऽल्प्रत्ययेन साध्यः ॥

धर्षकः, पुं, (धृष्णोति प्रगल्भो भवतीति । धृष्+ण्वुल् ।) नटः । इति शब्दरत्नावली ॥ (अभिभवकर्त्तरि, त्रि । यथा, हरिवंशे । १५३।२४। "विधार्य्य सर्व्वे यत्नेन मर्षयेत यदधर्षकाः ॥")

धर्षकारिणी, स्त्री, (धर्षं कुलदूषणं करोतीति । कृ+णिनि+ङीप् ।) दूषिता कन्या । इति शब्दरत्नावली ॥

धर्षणं, क्ली, (धृष्+ल्युट् ।) परिभवः । (यथा, महाभारते । ९ । २१४ । १६ । "सर्व्वमन्यत् परिक्षन्तं धर्षणन्तु महीपतेः ॥") रतिः । इति मेदिनी । णे, ५४ ॥ धर्षशब्दार्थोऽप्यत्र ॥

धर्षणिः, स्त्री, (कर्षतीति । कृष+"कृषेरादेश्च धः ।" उणा । २ । १०५ । इति अनिः आदेश्च धः ।) वन्ध्यकी । वृषलः । इति संक्षिप्तसारोणादिवृत्तिः ॥

धर्षणी, स्त्री, (धर्षणि+ऋदिकारादिति वा ङीष ।) धर्षिणी । असती । इत्यमरटीकायां भरतः ॥

धर्षिणी, स्त्री, (धर्षति हिनस्ति कुलमिति । धृष+णिनि+ङीप् ।) पुंश्चली । इत्यमरः । २ । ६ । १० ॥

धर्षितं, क्ली, (धृष्यतेऽनेनेति । धृष+क्तः ।) रतिः । मैथुनम् । इति त्रिकाण्डशेषः ॥ (धृष+कर्म्मणि क्तः ।) क्षतधर्म्मके, त्रि ॥ (अभिभूतः । यथा, महाभारते । ३ । ५५ । १५ । "आसनेभ्यः समुत्पेतुस्तेजसा तस्य धर्षिताः ॥")

धर्षिता, स्त्री, (धृष्यतेऽसौ । धृष+क्तः । टाप् ।) असती । इति शब्दरत्नावली ॥

धलङ्कः, पुं, (दधातीति । धा+डः । धं धारकं लङ्कति उत्क्षिपतीति । लङ्क उत्क्षेपे+अच् । कर्णकान्तित्वादस्य तथात्वम् ।) डाहुकगुल्कवृक्षः । इति शब्दचन्द्रिका ॥ धलङ्गाँकड़ा इति भाषा ॥

धव, इ त्रजे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इ, धन्यते । त्रजो गतिः । इति दुर्गादासः ॥

धवः, पुं, (धुनोति धवतीति वा । धु धू वा+अच् ।) पतिः । (यथा, हरिवंशे भविष्यपर्व्वणि । १६ । ४५ ।
"मम विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान् ।
तस्माच्चाधवनामासि धवः स्वामीति शब्दितः ॥")
नरः । इत्यमरः । ३ । ३ । २०५ । (यथा,—पञ्चतन्त्रे । २ । १०६ ।
"श्रौचविग्निष्टयाप्यक्ति किंचित् कार्य्यं कचिन्मृता ।
निर्धनेन धवेनेह न तु किंचित् प्रयोजनम् ॥")
धूर्त्तः । इति मेदिनी । वे, १३ ॥ स्वनामख्यातवृक्षः । (यथा, महाभारते । १ । ६८ । १७ । "बिल्वार्कखदिराकीर्णं कपित्थधवसङ्कुलम् ॥") तत्पर्य्यायः । धुरन्धरः २ शाकटाख्यः ३ । इति रत्नमाला ॥ दृढतरः ४ गौरः ५ कषायः ६ मधुरस्कन्धः ७ शुष्कवृक्षः ८ पाण्डुतरः ९ धवलः १० पाण्डुरः ११ । अस्य गुणाः । कषायत्वम् । कटुत्वम् । कफानिलनाशित्वम् । पित्तप्रकोपकर्त्तृत्वम् । रुच्यत्वम् । दीपनत्वञ्च । अन्यच्च । शीतत्वम् । प्रमेहार्शःपाण्डुपित्तकफापहत्वम् । मधुरत्वम् । तुवरत्वम् । तिक्तत्वञ्च । तन्नामगुणाः ॥
"धवो घटो नन्दितरुः स्थिरो धौरो धुरन्धरः ।
धवः शीतप्रमेहार्शःपाण्डुपित्तकफापहः ॥
मधुरस्तुवरस्तस्य पत्रञ्च मधुरं मतम् ॥"
इति भावप्रकाशः ॥
तत्पत्रं ऐषन्मधुरम् । इति राजनिर्घण्टः ॥ (धु कम्पने+"ऋदोरप् ।" ३ । ३ । ५७ । इति भावे अप् । कर्म्मणि ।)

धवलः, पुं, (धावतीति । धाव गु जवगत्योः+"धावतेर्वाकुलकात् डवलच्च ।" १ । १०८ । इत्युज्ज्वलदत्तोक्त्या कलः डवलच्च ।) धवदृक्षः । चीनकर्पूरः । इति राजनिर्घण्टः ॥ रागविशेषः । भरतमते हिन्दोलरागस्याष्टमपुत्रः । इति सङ्गीतशास्त्रम् ॥ वृषश्रेष्ठः । शुक्लः । सुन्दरे, त्रि । इत्युणादिकोषः ॥ श्वेतगुणयुक्ते, त्रि । इत्यमरः । १ । ५ । १३ ॥ (यथा, आर्य्यासप्तशत्याम् । ३०६ । [पिहिताख्याः ॥")
"धवलनखलक्ष्म दुर्ब्बलमकलितनेपथ्यमलकश्वेतमरिष्टे, क्ली । इति राजनिर्घण्टः ॥

धवलपक्षः, पुं, (धवलौ शुक्लौ पक्षौ यस्य ।) हंसः । इति राजनिर्घण्टः ॥ (धवलः शुक्लः पक्षः ।) शुक्लपक्षश्च । (शुक्लपक्षविशिष्टे, त्रि । यथा, माघे ।
"धवलपक्षविहङ्गमकूजितैः ॥")

धवलपाटली, स्त्री, (धवला पाटली ।) श्वेतपाटलिका । इति राजनिर्घण्टः ॥

धवलवल्लिका, स्त्री, (धवला वल्लिका ।) खटिनी । इति राजनिर्घण्टः ॥

धवलयावनालः, पुं, (धवलो यावनालः ।) यावनालविशेषः । तत्पर्य्यायः । पाण्डरः २ तारतण्डुलः ३ नक्षत्रकान्तिविस्तारः ४ वृत्तः ५ मौक्तिकतण्डुलः ६ । अस्य गुणाः । गौल्यत्वम् । बल्यत्वम् । वृष्यत्वम् । रुच्यत्वम् । पथ्यत्वम् । त्रिदोषार्शोमुखव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

धवला, स्त्री, (धावतीति । धाव+कलः डवलच्च । अनुदात्तत्वाभावात् न ङीष् ।) शुक्ला गौः । इत्यमरः । २ । ९ । ९७ ॥

धवली, स्त्री, (धवल+गौरादित्वात् ङीष् ।) शुक्ला गौः ॥ इत्यमरः । २ । ९ । ९७ ॥

धवलोत्पलं, क्ली. (धवलमुत्पलम् ।) कुसुदम् । इति राजनिर्घण्टः ॥

धवाख्यकः, पुं, (धुनाति कम्पयति वृक्षादीनीति । धू+"आख्यको लघुधृनिभ्यधाभ्यः ।" उणा ३ । ८३ । इति आख्यकः ।) वायुः । इत्युणादिकोषः ॥

धवित्रं, क्ली, (धूयतेऽनेनेति । धू+"अर्त्तिलूधूसूखनसहचर इत्रः ।" ३ । २ । १८४ । इति इत्रः ।) नगचर्म्मरचितव्यजनम् । इत्यमरः । २ । ७ । २३ ॥

धा, डु धा लि धारणे । पुष्टौ । दाने । इति कविकल्पद्रुमः ॥ (जुहोत्यादिः-उभं-सकं-अनिट् ।) डु, दिग्निमम् । धा लि, दधाति धत्ते । धारणं धरणम् । दाने, दिवता विहितं त्वयायवेति किराते विहितं दत्तमित्यर्थः । इति दुर्गादासः ॥

धाः, पुं, (दधातीति । धा+क्विप् ।) ब्रह्मा । धारकः । इति मेदिनी । धे, १ ॥ हरहसतिः । इत्येकाक्षरकोषः ॥

धाकः, पुं, (दधातीति । धा+"कृदाधारार्च्चिकलिभ्यः कः ।" उणा ३ । ४० । इति कः ।) वृषः । आधारः । इत्युणादिकोषः ॥ अन्नम् । स्तम्भः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (आधारः । इत्युज्ज्वलदत्तः ॥)

धाटी, स्त्री, भृगुसम्मुखगमनम् । तत्पर्य्यायः । प्रपातः २ अभ्यवस्कन्दः ३ अभ्यासादनम् ४ । इति हेमचन्द्रः । ३ । ४६४ ॥

धाणकः, पुं, (दधातीति । धा+"आणको लघुधृनिधाभ्यः ।" उणा ३ । ८३ । इति आणकः ।) दीर्घभागः । इत्युणादिकोषः ॥

धातकी, स्त्री, (धातुं करोतीति । धा+तत्करोतीति णिच् । टिलोपः । ततः कुन् । ततः पिप्पलादित्वात् ङीष् ।) पुष्पविशेषः । धाइफुल इति भाषा । तत्पर्य्यायः । बह्विपुष्पी २ ताम्रपुष्पी ३ धावनी ४ अग्निज्वाला ५ सुभिक्षा ६ पार्व्वती ७ बहुपुष्पिका ८ कुसुदा ९ सौधुपुष्पी १० कुञ्जरा ११ मद्यवासिनी १२ गुच्छपुष्पी १३ संधपुष्पी १४ रोधपुष्पिणी १५ तीव्रज्वाला १६ वह्निशिखा १७ मद्यपुष्पा १८ । इति राजनिर्घण्टः ॥ धाडपुष्पी १९ धातुपुष्पी २० धाडपुष्पिका २१ धाची २२ धातुपुष्पिका २३ । इति शब्दरत्नावली ॥ अस्या गुणाः । कटुत्वम् । उष्णत्वम् । मदकारित्वम् । विषप्रवाहिकातिसारविसर्पव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥ शीतत्वम् । रक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥

धाता, [तृ] पुं, (दधातीति । धा+तृच् ।) ब्रह्मा । इत्यमरः । १ । १ । १७ ॥ (यथा, रघुः । १० । ४३ ।
"धातारं तपसा प्रीतं ययाचे स हि राक्षसः ।
दैवात् स्वर्गादवध्यत्वं मर्त्यात्त्वाख्यापराङ्मुखः ॥")

विष्णुः। इति हलायुधः॥ (यथा, महाभारते। १३। १४६। ११५।
"आधारनिलयो धाता पुष्पहासः प्रजागरः॥"
"संहारसमये सर्व्वाः प्रजा धयति पिबतीति वा धाता। धेट् पाने इति धातुः।" इति शाङ्करभाष्यम्॥ महादेवः। यथा, तत्रैव।३३।१०।१०३।
"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः॥")
भृगुमुनिपुत्रः। तस्य भार्य्या मेरुकन्या आयतिः। तस्य सुतः कण्डुः तस्य च मार्कण्डेयः। इति श्रीभागवतम्॥ जनपद्यां प्रदायुम्नगंतवायुविशेषः। यथा, वह्निपुराणे गजमेदनामाध्याये।
"धाता दुर्गो धितिर्गौमखभियुक्तस्त्रपातृयहः।
द्युतिर्वपुरनाथ्यिवास; कामो जयो विराट्॥
इत्येकोनाच मध्याग्रभरतः पूर्व्वसम्भवः॥"
(आदित्यविशेषः। यथा, महाभारते। १। ६५। १४-१५।
"अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः।
ये राजन्! नामतस्तांस्ते कीर्त्तयिष्यामि भारत!॥
धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च॥"
ब्रह्मणः पुत्रविशेषः। यथा, महाभारते। १। ६६। ५१।
"द्वौ पुत्रौ ब्रह्मणस्त्वन्यौ ययोस्तिष्ठति लक्षणम्।
लोके धाता विधाता च यौ स्थितौ मनुना वृतौ॥")
पालके, त्रि। इति मेदिनी। ते, २७॥ धारकः। इति धरणिः॥

धातुः, पुं, (धीयते सर्व्वमस्मिन्निति। धा + "सितनिगमीति।" उणा। १। ७०। इति तुन्।) शरीरधारकवस्तुनि। तद्यथा। कफः। वातः। पित्तम्।
"शरीरदूषणाद्दोषा मलिनीकरणान्मलाः।
धारणाद्धातवस्ते स्युर्वातपित्तकफाख्यः॥"
इति वैद्यकम्॥
("रसाद्रक्तं ततो मांसं मेदोऽस्थिमज्जशुक्राणि धातवः। सप्त दूष्याः मलास्त्वन्नमूत्रपुरीषादयोऽपि च॥"
इति वाभटे सूत्रस्थाने प्रथमेऽध्याये॥
धातुशब्देनात्र शुक्रार्त्तवे अभिधीयते तद् यथा।
"तथाहि पुष्पसंकुलस्त्री गन्धो न शुक्रमिहास्तीति वक्तुं नैव शक्यते यथावस्थि सतां भावानां अभिव्यक्तिरिति ज्ञात्वा केवलं सौष्म्यात्तत्राभिधीयते स एव गन्धो विकृतपक्वकेशरैः कालान्तरेणाभिव्यक्तिं गच्छत्यिवं बालानामपि वयः परिणामात् शुक्रप्रादुर्भावो भवति रोमराज्यादयोयौवनविशेषा नारीणां रजसि चोपचीयमाने शुक्रे; शुक्रे; स्तनगर्भाशययोश्चाभिवृद्धिर्भवति। स एवान्तरस्थो वृद्धानां जराग्रस्तशरीरत्वात् प्रीणनो भवति। त एते शरीरधारणाद्धातव उच्यन्ते॥" इति सुश्रुते सूत्रस्थाने १४ अध्यायः॥
अथ धातुशब्दस्य निरुक्तिमाह।
"एतं सप्त स्वयं स्थित्वा देहन्धारयति यद्गुणान्।
रसाद्रक्तं ततो मांसं मेदोऽस्थिमज्जशुक्राणि धातवः॥"
अथ धातूनां कर्म्माण्याह।
"प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे।
गर्भोत्पादश्च कर्म्माणि धातूनां कथितानि हि॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
रसः। रक्तम्। मांसम्। मेदः। अस्थि। मज्जा। शुक्रम्। महाभूतानि। तद्यथा। पृथिवी। जलम्। तेजः। वायुः। आकाशः। तद्गुणाः यथा। गन्धः। रसः। रूपम्। स्पर्शः। शब्दः। इन्द्रियाणि यथा। चक्षुः। श्रोत्रम्। घ्राणम्। जिह्वा। त्वक्॥ अक्षविक्षतिः। सा तु गैरिकमनःशिलादि। (यथा, कुमारे। १। ४।
"अकाण्डसन्ध्यामिव धातुमत्ताम्॥")
शब्दयोनिः। सा च धातुशब्दप्रकृतिः। भूपचपठप्रभृतिः। स्वर्णादिः। इत्यमरभरतौ॥ *॥ यथा, शब्दमालायाम्।
"सुवर्णरूप्यमाक्षिकहरितालमनःशिलाः।
गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः॥
नवकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः॥"
नव धातवो यथा, सुखबोधे।
"हेमतारारनागाश्च ताम्रवङ्गे च तीक्ष्णकम्।
कांस्यकं कान्तलौहञ्च धातवो नव कीर्त्तिताः॥"
अष्टधातवो यथा, दानसागरे।
"हिरण्यं रजतं कांस्यं ताम्रं सीसकमेव च।
रङ्गमायसरैत्यञ्च धातवोऽष्टौ प्रकीर्त्तिताः॥"
अपि च वैद्यके।
"सुवर्णं रजतं ताम्रं लौहं कृष्णञ्च पारदम्।
वङ्गञ्च सीसकञ्चैव इत्यष्टौ देवसम्भवाः॥"
सप्तधातवो यथा, भावप्रकाशे।
"स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यशोदमेव च।
सीसं लौहञ्च सप्तैते धातवो गिरिसम्भवाः॥"
ताम्रादुत्पत्तिर्यथा,—
"ब्रूहि तत्त्वेन मे भूमे! कथमम्रं मयागते!।
एकाग्रं चित्तमाधाय येन ताम्र मम प्रियम्॥
पूर्व्वं कमलपत्राक्षि! गुडाकेशो महासुरः।
ताम्ररूपं समादाय ममैवाराधने रतः॥
तच्च दृष्ट्वा मया प्रोक्तं प्रसन्नेनान्तरात्मना।
गुडाकेश! महाभाग ब्रूहि किं करवाणि ते॥
चक्रेण वधमिच्छामि त्वया सुरुचिरेण केशव!।
वैद्याख्यस्य तु मासस्य शुक्लपक्षे तु द्वादशीम्॥
मम तेजोमयं चक्रं बाधयिष्यत्यसंशयम्।
तदेव चक्रेण विपाटितोऽसौ
प्राणोऽपि मां भागवतप्रधानः॥
ताम्रन्तु तत्कांसमरक्तसुवर्ण-
मर्हाणि रूप्यं बहुधातवश्च।
रङ्गश्च सीसं त्रपुधातुसंज्ञं
कांस्यञ्च रीतिश्च मलस्तु तेषाम्॥
एतद्भागवतैः कार्य्यं मम प्रियकरैः सदा।
एवं ताम्रं समुत्पन्नमिति मे रोचते हि तत्॥"
इति वराहपुराणम्॥ *॥
"हरितालं हरेर्वीर्य्यं लक्ष्मीवीर्य्यं मनःशिला।
पारदं शिववीर्य्यं स्यात् गन्धकं पार्व्वतीरजः॥"
इति वैद्यकम्॥ *॥

सप्तोपधातवो यथा,—
"माक्षिकं तुत्थिकाभ्रे च नीलाञ्जनशिलालकाः।
रसकश्चेति विज्ञेया एते सप्तोपधातवः॥" *॥
शरीरस्थसप्तधातुभवसप्तोपधातवो यथा,—
"स्तन्यं रजश्च नारीणां काले भवति शुक्रवत्।
शुद्धमांसभवः स्नेहो यः सा संकीर्त्यते वसा॥
स्नेहो दन्तास्तथा केशाश्मश्रुणीत्योजश्च सप्तमम्।
इति धातुभवा ज्ञेया एते सप्तोपधातवः॥"
इति सुखबोधः॥
धातुकासीसं, क्ली, (धातुरूपं कासीसम्।) कासीसम्। इति हेमचन्द्रः। ४। २२२॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।
"कासीसं धातुकासीसं हरितं तच्च लोहितम्॥")
धातुघ्नं, क्ली, (धातुं स्वर्णादिकं हन्तीति। हन + टक्।) काञ्जिकम्। इति हेमचन्द्रः। ३। ८०॥
धातुनाशनं, क्ली, (धातुं स्वर्णादिकं नाशयतीति। नश् + णिच् + ल्युः।) काञ्जिकम्। इति त्रिकाण्डशेषः॥
धातुपः, पुं, (धातुं अस्थिमज्जामांसोत्पादकपदार्थविशेषं पाति रक्षतीति। पा + कः।) शरीरस्थप्रथमधातुः। रस इति ख्यातः। इति शब्दचन्द्रिका॥
धातुपुष्पिका, स्त्री, (धातुरिव पुष्पं यस्याः। जातौ ङीष्। स्वार्थे कन् पूर्व्वह्रस्वः। वहा कप्। टापि अत इत्वम्।) धाइपुषि। इति शब्दरत्नावली। धाइफुल् इति भाषा॥
धातुपुष्पी, स्त्री, (धातुरिव पुष्पमस्याः। जातित्वात् ङीष्।) धातकी। इति भावप्रकाशः॥
धातुभृत्, पुं, (धातुं गैरिकादिकं बिभर्त्तीति। भृ + क्विप्। तुगागमश्च।) पर्व्वतः। इति शब्दरत्नावली॥ धातुपोषके, त्रि॥
धातुमाक्षिकं, क्ली, (धातुरूपं माक्षिकम्।) माक्षिकम्। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।
"माक्षिकं धातुमाक्षिकं ताप्यं ताप्युत्थसंज्ञकम्॥")
धातुमारिणी, स्त्री, (धातुं सुवर्णादिकं मारयतीति। मृ + णिच् + णिनि + ङीप्।) सर्ज्जिका। इति शब्दचन्द्रिका। सोहागा इति भाषा॥
धातुराजकं, क्ली, (धातुषु राजते इति। राज + ण्वुल्। यद्वा, धातूनां राजा इति समासान्तः टच्। ततः स्वार्थे कन्।) रेतः। इति शब्दचन्द्रिका॥
धातुवल्लभं, क्ली, (धातुषु वल्लभम्।) टङ्कणम्। इति राजनिर्घण्टः॥ (टङ्कणशब्दोऽस्य गुणादिकं ज्ञेयम्॥)
धातुवादी, [न्] पुं, (धातुं वदति उपायान्तरेण कर्त्तुं कथयतीति। वद + णिनिः।) कारन्धमी। इति हारावली। १८६॥
धातुवैरी, [न्] पुं, (धातूनां वैरीव दूषकत्वात्।) गन्धकः। इति शब्दचन्द्रिका॥
धातुश्रेष्ठरं, क्ली, (धातूनामुपधातूनां श्रेष्ठरमिव श्रेष्ठत्वात्।) कासीसम्। इति हेमचन्द्रः। ४। १२२॥

धातूपलः, पुं, (धातुः उपधातुरूप उपलः पाषाणः।) कटिनिका। इति हारावली।२१२॥
धात्रपुत्रः, पुं, (धातुर्ब्रह्मणः पुत्रः।) सनत्कुमारः। इति शब्दरत्नावली॥ ब्रह्मजः सुतमात्रश्च॥
धात्रपुष्पिका, स्त्री, (धात्रपुष्पी। स्वार्थे कन् पूर्व्वह्रस्वः। यद्वा, कप्। टापि अत इत्वम्।) धातकी। इत्यमरः। २। ४। १२४॥
धात्रपुष्पी, स्त्री, (धात्र पुष्पिकर्त्तृ पुष्पमस्याः। ङीप्।) धातकी। इति शब्दरत्नावली॥
धात्रं, क्ली, (धीयते अन्नाद्यमत्रेति। धा+आधारे ष्ट्रन्।) भाजनम्। इति संक्षिप्तसारोणादिवृत्तिः॥
धात्रिका, स्त्री, (धात्री। स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च।) आमलकी। इति राजनिर्घण्टः॥
धात्री, स्त्री, (धीयते पीयते इति। धेट पाने+"सर्व्वधातुभ्यः ष्ट्रन्।" उणा० ४। १५८। इति कर्म्मणि ष्ट्रन्। ष्वित्वात् ङीष्। अस्या स्तनदुग्धपानात्तथात्वम्। यद्वा, दधाति धरतीति। धा+ष्ट्रन्+ङीप्।) माता। (यथा, याज्ञवल्क्यसंहितायाम्। ३। ८२।
"पुनर्धात्रीं पुनर्गर्भमोजस्तस्य प्रधावति।
अष्टमे मास्यतो गर्भो जातः प्राजैर्विमुच्यते॥") उपमाता। (यथा, रघुः। १०। ७८।
"कुमाराः क्षतसंस्कारास्ते धात्रीस्तनपायिनः।
आन्दनेनायजेनैव समं वव्रुधिरे पितुः॥"
(कुमाररक्षाकर्त्री। धाव इति भाषा॥ तस्या परीक्षा यथा,"अतो धात्रीपरीक्षामुपदेक्ष्यामः। अथ ब्रूयात् धात्रीमानयेति समानवर्णां यौवनस्थां निश्चितामनातुरामयङ्गामव्यङ्गनामविरूपामजुगुप्सितां देशजातीयामक्षुद्रां अक्षुद्रकर्म्मिणीं कुले जातां वत्सलां जीववत्सां पुंवत्सां दोग्ध्रीमप्रमत्तामप्रायिनीमनुचारप्रायिनीमनन्तावग्रायिनीं कुशलोपचारां शुचिमशुचिदेषिणीं स्तन्यसम्पदुपेतामिति।"
"धात्री तु यदा स्वादुबहुलशुद्धदुग्धा स्यात्तदा स्नातानुलिप्ता शुक्लवस्त्रं परिधायेन्द्रीं ब्राह्मीं ध्रुवधैर्य्यां सहस्रवीर्य्यां मोघामयर्थां शिवामरिष्टां वाग्यपुर्य्यां विष्वक्सेनकान्तामिति विमन्त्र्याधीः कुमारं प्राङ्मुखं प्रथमं दक्षिणं स्तनं पाययेदिति धात्रीकर्म्म।" इति चरके शारीरस्थानेऽष्टमेऽध्याये॥*॥ (दधाति धारयति सर्व्वमिति। धा+ष्ट्रन्+ङीप्।) क्षितिः। (गायत्रीस्वरूपिणी भगवती। यथा, देवीभागवते। १२। ६। ७८।
"धात्रीधनुर्धरा धेनुर्धारिणी धर्म्मचारिणी॥"
गङ्गा। यथा, काशीखण्डे। २६। ६२।
"धर्म्मोर्म्मिवाहिनी धुर्य्या धात्री धात्रीविभूषणम्॥")
आमलकीवृक्षः। इति मेदिनी। रे, ४६॥
(अस्याः पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"धात्री कर्षफला तिष्या वयस्यामलकी शिवा॥")

अथ धात्र्याद्युत्पत्तिकारणम्।

वृन्दामरवान्नुखस्य विष्णोर्मोहापनोदाय ब्रह्मवाक्यादाद्यां भक्तिं स्तुवतो देवान् प्रति सा आह।

"अहमेतन्निधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः।
गौरी लक्ष्मीः स्वधा चेति रजःसत्त्वतमोगुणैः॥
तत्र गत्वा तथा कार्य्यं विधास्यन्ते च ताः सुराः।
तास्तथा तान् सुरान् दृष्ट्वा प्रयतान् भक्तवत्सलाः॥
बीजानि प्रददुस्तेभ्यो वाञ्छानि जगदुत्सदा।
इमानि देवा बीजानि विष्णुर्यत्रावतिष्ठते॥
निर्वपध्वं ततः कार्य्यं भवतां सिद्धिमेष्यति।
त्रिभ्यश्चैव बीजेभ्यो वनस्पत्यः स्त्रियोऽभवन्॥
धात्री च मालती चैव तुलसी च नृपोत्तम!।
धान्यादुद्भवा स्मृता धात्री माधवा मालती स्मृता॥
गौरीभवा च तुलसी तमःसत्त्वरजोगुणाः।
स्त्रीरूपिण्यो वनस्पत्यो दृष्ट्वा विष्णुस्तदा नृप!॥
उत्तस्थौ सम्भ्रमादुत्थारूढप्रीतिप्रियविधमात्॥"
अस्या माहात्म्यं यथा,—
"शृणुष्व धात्रीमाहात्म्यं सर्व्वपापहरं शुभम्।
यत् पुरा हरिणा प्रोक्तं वह्निं प्रति नारद!॥
धात्री वत्स! शृणां धात्री मातृवत् कुरुते कृपाम्।
दद्यादायुः पयः पानं स्नानादे धर्म्मसञ्चयम्॥
अलक्ष्मीनाशनं सद्योऽप्यन्ते निर्व्वाणमेव च।
विघ्नानि नैव जायन्ते धात्रीस्नानेन वै नृणाम्॥
तस्मात् त्वं कुरु विप्रेन्द्र! धात्रीस्नानं हि यत्नतः।
प्रयास्यसि हरेर्धाम देवैरपि सुदुर्लभम्॥
यत्र यत्र मुनिश्रेष्ठ! धात्रीस्नानं समाचरेत्।
तीर्थे वापि गृहे वापि तत्र तत्र श्रियः स्थिताः॥
धात्रीस्नानानि दिवसे यस्यास्थीनि कलेवरे।
प्रक्षालितानि विप्रेन्द्र! न स स्याद्गर्भसम्भवः॥
धात्रीफलेन विप्रेन्द्र! येषां केशाश्च रञ्जिताः।
ते नराः केशवं यान्ति नाशयित्वा कलेर्मलम्॥
धात्रीफलं महापुण्यं स्नाने पुण्यतरं स्मृतम्।
पुण्यात् पुण्यतरं वत्स! भक्षणे मुनिपुङ्गव!॥
न गङ्गा न गया पुण्या न काशी न च पुष्करम्।
एकैव च यथा पुण्या धात्री माधववासरे॥
कार्त्तिके मासि विप्रेन्द्र! धात्रीस्नानं समाचरेत्।
यच्च तज्जन्मशतीयात् सोऽश्वमेधमवाप्नुयात्॥
धात्रीफलं स्मरेद्यस्तु सदैव मुनिसत्तम!।
प्राग्जन्मनि कृतात् पापात् मुच्यते नात्र संशयः।
संस्मरेद्यस्तु धात्रीं तामहन्यहनि मानवः।
मुच्यते पातकैः सर्व्वैर्मनोवाक्कायसम्भवैः॥
धात्रीफलान्यमावास्यामश्नीयान्नवमीषु च।
रविवारे च संक्रान्तौ संस्मरेन्मुनिपुङ्गव!॥
यस्य गेहे मुनिश्रेष्ठ! धात्री तिष्ठति सर्व्वदा।
तस्य गेहं न गच्छन्ति प्रेतकूष्माण्डराक्षसाः॥
धात्रीस्नाने हरेर्नाम्नि जागरे हरिवासरे।
जन्मबन्धो विनश्येत हयमेधायुतं फलम्॥
स्नायादामलकैर्यस्तु कार्त्तिके हरिवत्सल!।
परितोषं समायाति तस्य वै माधवः स्वयम्॥
धात्रीच्छायां समासाद्य कुर्य्यात् श्राद्धन्तु यो मुने!।
मुक्तिं प्रयान्ति पितरः प्रसादात्तस्य वै हरेः॥
भुक्तिं पाप्नोति सुखे कल्पे देहे च मुनिसत्तम!।
धत्ते धात्रीफलं यस्तु स महात्मा च पुण्यभाक्॥

धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषितः।
धात्रीफलकृताहारो नरो नारायणो भवेत्॥
यः कश्चिदेष्यतो लोके धत्ते धात्रीफलं सुने!।
प्रियो भवति विष्णोः स मनुष्याणाञ्च का कथा॥
धात्रीफलानि यो नित्यं वहते करसंपुटे।
तस्य नारायणो देवो वरमेकं प्रयच्छति॥
धात्रीफलं न मोक्तव्यं कदाचित् करसंपुटात्।
य इच्छेदिपुलान् भोगानन्ते यो मुक्तिमिच्छति॥
धात्रीफलकृतां मालां कण्ठस्थां यो वहेन्नरः।
स वैष्णवो न विज्ञेयो विष्णुभक्तिपरोऽपि च॥
न त्याज्या तुलसीमाला धात्रीमाला विशेषतः।
तथा रुद्राक्षमालापि धर्म्मकामार्थमिच्छता॥
यावच्छुष्यति कण्ठस्था धात्रीमाला नरस्य हि।
तावच्चसति कृत्स्नोऽपि सदा च्यवति केशवः॥
यावद्दिनानि वहते धात्रीमालां करे नरः।
तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत्॥
सर्व्वदेवमयी धात्री वासुदेवमनःप्रिया।
आरोपणीया सेव्या च सेचनीया सदा बुधैः॥
एतत्ते सर्व्वमाख्यातं धात्र्या माहात्म्यमुत्तमम्।
श्रोतव्यञ्च सदा सद्भिश्चतुर्व्वर्गफलप्रदम्॥"

इति प्राक्षोत्तरखण्डे १२७ अध्यायः॥

अपि च।

"तुलसीदृक्समाश्रित्य या यास्तिष्ठन्ति देवताः।
आमलक्या अपि प्राज्ञ! ताश्चा एव वसन्ति च॥
अशुभं वा शुभं वापि यत् कर्म्मामलकीतले।
क्रियते मानवैर्विप्र! भवेत्तत् सर्व्वमक्षयम्॥
पवित्रैर्नूतनैः पत्रैर्धात्र्या यः पूजयेद्धरिम्।
स मुक्तः पापजालेन सायुज्यं लभते हरेः॥
धात्री च तुलसी देवी न तिष्ठेद्यत्र जैमिने!।
स्थानं तदपवित्रं स्यान्न च पुण्यक्रिया फलेत्॥
धात्र्या हीनं तुलस्या च निलयं यस्य भूसुर!।
अलक्ष्मीः पातकं सर्व्वं कलिश्च तेन रोधितः॥
धात्रीकाष्ठस्य मालाञ्च यो वहेन्नतिमान्नरः।
तत् सर्व्वमक्षयं प्रोक्तं शुभं वाशुभमेव वा॥
यस्तु धात्रीफलं शुष्कं भक्षते मानवोऽखिलतत्त्ववित्।
तद्देहाभ्यन्तरस्थानि सर्व्वं पापं विनश्यति॥
धात्रीफलमयीं मालां वहते द्विजसत्तमः।
ब्रवीमि ब्रह्मणो माहात्म्यं सर्व्वपापहरं शुभम्॥
श्मशानेऽपि यदा स्पृत्युस्तस्य स्याद्वयोगतः।
गङ्गास्नानजं पुण्यं स प्राप्नोति न संशयः॥
नित्यं यश्चाति यो धात्रीतुलसीमूलकर्द्दमम्।
दिने दिने लभेत् पुण्यं सोऽश्वमेधशतोद्भवम्॥
धात्रीतरुञ्च यो हन्ति सर्व्वदेवगणाश्रयम्।
स ददाति हरेरङ्गे घातं नास्त्यत्र संशयः॥
सर्व्वदेवमयी धात्री विशेषात् केशवप्रिया।
सत्यवक्तुं गुणं तस्या ब्रह्मणापि न शक्यते॥"

इति क्रियायोगसारे २३ अध्यायः॥

यथा स्कान्दे।

"न धात्री सदृशा यत्र न विष्णोस्तुलसीदलम्।
तं देशं देवदेवं भागीरथि यत्र गायन्ति वैष्णवाः॥")

इत्येकादशीतत्त्वम्॥

अथ धात्रीसेचनफलम् ।
"पिता पितामहाश्चान्ये पुत्रा ये च गोत्रिणः।
कृमियोनिं गता ये च ये च कीटत्वमागताः ॥
रौरवे नरके ये च महारौरवसंज्ञके ।
विमोनिच गता ये च ये च ब्रह्माण्डमध्यगाः ॥
पिशाचत्वं गता ये च ये च प्रेतत्वमागताः ॥
ते पिबन्तु मया दत्तं धात्रीमूले सदा पयः ॥
ते सर्व्वे तृप्तिमायान्तु धात्रीमूलनिषेचनात् ॥
इति धात्रीं समभिषिच्य वारानष्टोत्तरं शतम् ।
तावच्च प्रदक्षिणीकृत्य कुर्य्याज्जागरणं व्रती ॥
जागरञ्चतु प्रकान्तव्रतविधयम् ।" इति श्रीहरिभक्तिविलासे १३ विलासः ॥

धात्रीपत्र, क्ली, (धात्रीपत्रमिव पत्रमस्य ।) तालीशपत्रम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"तालीशं सुस्निग्धवातं धात्रीपत्रञ्च तत् स्मृतम्॥"
धात्र्याः पत्रम् ।) आमलकीदलञ्च ॥

धात्रीपुत्रः, पुं, (धात्र्या उपमातुः पुत्रः ।) भटः । इति हेमचन्द्रः । २।२४२ । उपमातृसुतश्च ॥

धात्रीफलं, क्ली, (धात्र्या आमलक्याः फलम् ।) आमलकी । इति जटाधरः ॥ (विवरणमामलकीशब्दे ज्ञातव्यम् ॥)

धात्रेयिका, स्त्री, (धात्रेयी + स्वार्थे कन् टाप् । पूर्व्वह्रस्वश्च ।) धात्री । धाइ इति भाषा । यथा, तिथितत्त्वे चतुर्थीप्रकरणे ।
"पठेद्धात्रेयिकावाक्यं प्राज्ञको वाप्युदङ्मुखः॥"

धात्रेयी, स्त्री, धात्रीशब्दात् स्त्रियां (ढक्) ङीप्(ङीष्)-प्रत्ययेन निष्पन्ना ॥ धात्रेयिका । (यथा, देवीभागवते । २ । ६ । ३२ ।
"करे श्लाघ्ये धात्रेयी तावच्च सुलक्षितम्।
कां चिन्तां करभोरु ! त्वमाधत्सेऽस्य क्षितावग्रतः
स्थितम् ॥")

धानकं, क्ली, (धान्याकं पृषोदरादित्वात् साधुः ।) धान्याकम् । इति राजनिर्घण्टः ॥ (अस्य विषयो यथा, वाभटे चिकित्सास्थाने नवमेऽध्याये ।
"श्लेष्मातिसारवातोत्थं विशेषादामपाचनम् ।
कर्षेयमनुवन्यस्य पिबेत् पञ्चाग्निदीपनम् ॥
बिल्वकर्कटिकासुस्तप्राक्षादा बिल्वमेव वा ॥")

धाना, स्त्री, (धीयते इति । धा + "धापॄवस्यज्यतिभ्यो नः ।" उणा० । ३ । ६ । इति नः टाप् च ।) भृष्टयवः । धान्यकम् । (पर्य्यायो यथा,
"धान्यकं धानकं धान्यं धाना धानेयकन्तथा ।
कुनटी धेनुकाच्छत्रा कुसुम्भुरु वितुन्नकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) आनभवः । अङ्कुरः । भिन्नः । पूर्व्वसक्तवः । इति मेदिनीहेमचन्द्रौ ॥

धानाः, स्त्री, (धीयन्ते इति । धा + "धापॄवस्यज्यतिभ्यो नः ।" उणा० । ३ । ६ । इति नः टाप् च ।) भृष्टयवः । बहुवचनान्तोऽयं शब्दः । इत्यमरः । २ । ९ । ४० ॥ (यथा, ऋग्वेदे । ३ । ३५ । ३ ।
"यसेतामश्वा वि सुचेह शोणा दिवे दिवे ईड्यो
रहिर्धानाः ॥"
"तन्तु सद्यशीरेकरूपान् धाना भृष्टयवान् दिवे
दिवे प्रतिदिवसमहि भक्षय ।" इति तद्भाष्ये
सायणः ।)
"यवास्तु निस्तुषा भृष्टाः स्मृता धाना इति
स्त्रियाम् ।
धानाः खुर्ज्जरा रूक्षास्तृट्प्रदा गुरवश्च ताः ॥
तथा मेदःकफच्छर्द्दिनाशन्यः संप्रकीर्त्तिताः ॥"
इति राजनिर्घण्टः ॥
("धानासंज्ञास्तु मे भक्ष्याः प्रायस्ते लेखनात्मकाः।
शुष्कत्वात्तर्षणा चैव विष्टम्भिताश्च दुर्ज्जराः ॥
विरूढधानाः ग्रथ्नन्ति मधुक्रोड़ाः सपिच्छकाः ।
क्षपाः पूपलिकाद्याश्च गुरवः पैष्टिकाः परम् ॥"
"धाना पर्पटपूपाद्यास्तान् बुद्धा निर्द्दिशेत्तथा ॥"
इति चरके सूत्रस्थाने २७ अध्यायः ॥)

धानाकाः, स्त्री, (धाना + स्वार्थे कन् टाप् ।) धानाः । नित्यबहुवचनान्तोऽयं शब्दः । इति शब्दरत्नावली ॥

धानाचूर्णं, क्ली, (धानानां चूर्णम् ।) भृष्टयवचूर्णम् । सक्तवः । इति हेमचन्द्रः । २ । ६५ ॥

धानी, स्त्री, (धीयते धार्य्यतेऽत्र । धा + आधारे ल्युट् । टिलातुङीप् ।) आधारः । यथा, मत्स्यधानी राजधानी । इत्यादि भरतः ॥ पीलुवृक्षः । इति राजनिर्घण्टः ॥

धानुष्कः, त्रि, (धनुः प्रहरणमस्येति । धनुः + तदस्य इत्यधिकारे "प्रहरणम् ।" ४ । ४ । ५७ । इति ठक् । यद्वा, धनुषा जीवतीति । "वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठक् । "इसुसुक्तान्तात् कः ।" ७ । ३ । ५१ । इति ठस्य कः ।) धनुर्द्धरः । इत्यमरः । २ । ८ । ६६ ॥ (यथा, महाभारते । ६ । २० । १७ ।
"अन्येऽन्ये दश धानुष्का धानुष्के दश चक्षिणम् ।
एवं यूढान्यनीकानि भीष्मेण तव भारत ! ॥")

धानुष्का, स्त्री, (धनुरिव अवयवोऽस्या इति ठक् टाप् च ।) अपामार्गवृक्षः । इति शब्दचन्द्रिका । (अपामार्गशब्दे विवरणं ज्ञातव्यम् ॥)

धानुष्कः, पुं, (धनुषि साधुरिति । धनुष् + अण् ।) वंशः । इति राजनिर्घण्टः ॥

धानेयं, क्ली, (धाना एव । स्वार्थे ढक् ।) धान्यकम् । इति राजनिर्घण्टः ॥

धानेयकं, क्ली, (धानेय + स्वार्थे कन् ।) धान्यकम् । इति जटाधरः ॥

धान्या, स्त्री, एष्वीका । इति शब्दचन्द्रिका ॥ एलादृष इति भाषा ॥

धान्यं, क्ली, चतुस्तिलपरिमाणम् । इति शुभङ्करः । धान्यकम् । धनीया इति यस्य भाषा । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धान्यकं धान्यकं धान्यं कुसुम्भुरुधनीयकम् ।
धन्या कुसुम्भुरी चान्या वेधकोक्ता वितुन्नकम् ॥")
परिपेलम् । (धाने भवे साधु इति । धान + "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् । यद्वा, दधातीति । धा + "दधातेर्यन् डुट् च ।" उणा० । ५ । ४८ । इति यन् डुट् च ।) सस्यतण्डुलादि । धान इति भाषा । तत्पर्य्यायः । भोग्यम् २ भोगार्हम् ३ अन्नम् ४ अद्यम् ५ जीवसाधनम् ६ स्तम्भकरिः ७ श्रीहिः ८ । (यथा, ऋग्वेदे । ६ । १३ । ४ ।
"विश्वं स देव प्रति वारमर्ये धत्ते धान्यं पत्यते
वसवेः ॥")
तत्र मूकधान्यगुणः । त्रिदोषघ्नमनल्पम् । तेजोबलातिघ्नयवीर्य्यबृंहिदाहत्वच ॥ * ॥ शमीधान्यगुणाः । गुरुत्वम् । हिमत्वम् । विष्टम्भित्वञ्च ॥ * ॥ दग्धधान्यगुणः । वातातपकृतम् । श्लिग्धरूक्षत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ धान्यं त्रिविधम् । हैमन्तीकम् १ शालिः २ शीमुखः ३ षष्टिकः ४ प्रावृट् कालभव आशुः ५ । एतेषां गुणास्तत्तद्ग्रन्थे द्रष्टव्याः ॥ * ॥ वापितधान्यगुणः । गुरुत्वम् ॥ अवापितधान्यगुणः । वापितधान्यगुणात् किञ्चिद्धीनः ॥ * ॥ रोप्यातिरोप्यधान्यगुणाः । लघुत्वम् । ग्रीष्मपाकित्वम् । गुणोत्तरत्वम् । अदाहित्वम् । दोषहरत्वम् । बल्यत्वम् । मूत्रविबद्धनत्वञ्च ॥ * ॥ नवं धान्यं अभिष्यन्दि । संवत्सरोत्थितं धान्यं लघु । संवत्सरपरद्यार्द्धं धान्यं वातप्रकोपकं रूक्षं लघुतरं पुंस्त्वघातिं । मूकधान्यं शमीधान्यञ्च षण्मासपरं प्रशस्तम् । शमीधान्यं वर्षादतीतं वातलञ्च रूक्षम् । अभिनवं तत्प्रायेण गुरु । नवा यवगोधूममाषतिला हिताः । पुराणा विरसा रूक्षा न तथार्थकराः ॥ अनार्त्तवं आधिहतं अपर्य्यागतं अभूमिजं नवञ्च धान्यं न गुणवत् ॥ अकालजातं धान्यं विरसं सर्व्वधातुप्रदूषणञ्च । इति राजवल्लभः ॥ * ॥ व्रतादौ अन्नत्यागे वर्जनीयधान्यानि यथा,—
"एकादश्यां विशेषेण स्नानमात्रं परित्यजेत् ।
फलं मूलं जलादीनि किञ्चिद्भक्ष्यं प्रकल्पयेत् ॥
अन्नन्तु धान्यसम्भूतं गिरिजे यदि जायते ।
धान्यानि विविधान्यीह जगत्यां दृश्यु यत्नतः ॥
श्यामाश्यामकराज धान्यकोद्रवसर्षपाः ।
सुरको राजमाषाश्च तुसरी कुमरस्तथा ॥
यवगोधूमसस्याश्च तिलकङ्गुकुलत्थकाः ।
गवेधुकाश्च नीवारा आतकश्च कलायकाः ॥
माकुको वनकोरङ्गः कीचको वड़कस्तथा ।
तिलकाश्चणकाद्याश्च धान्यानि कथितानि वै ॥
वड़कान्यसमुद्भूतमन्नं भवति शोभने ! ।
अन्नत्यागे व्रते भक्ष्यमेतदेव विवर्ज्जयेत् ॥"
इति प्राग्ज्योतिषस्य ॥ * ॥
अथ धान्यच्छेदनदिनम् । तत्र तिथयः रिक्तातिरिक्ताः । वाराः रविशुक्रसोमबुधदृष्टहस्तीनाम् । नक्षत्राणि कृत्तिका भरणी अश्लेषा पूर्व्वभाद्रपत् धनिष्ठा पूर्व्वाषाढ़ा ज्येष्ठा चित्रा उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् एतानि । तत्र चन्द्रः शोभनः । लग्नानि वृषसिंहवृश्चिककुम्भमिथुनतुलाकन्याधनुःपूर्व्वार्द्ध-

स्वकीयजन्मलग्नमकरसंज्ञकानि ॥*॥ अथ धान्यस्थापनदिनम्। तत्र नक्षत्राणि। भरण्यश्लेषार्द्राज्ञत्तिकाविशाखापूर्ब्बफल्गुनीपूर्ब्बाषाढ़ापूर्ब्बभाद्रपद्भोष्ठाभाधाभिन्नानि। तत्र वाराः शुभग्रहाणाम्। लग्नादि मकरवृषसिंहवृश्चिककुम्भमिथुनकन्याधनुर्मीनसंज्ञकानि ॥*॥ अथ धान्यादिदक्षिणदिनम्। तत्र नक्षत्राणि श्रवणा धनिष्ठा शतभिषा विशाखा उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् रोहिणी रेवती पुनर्ब्बसुः पुष्यः अश्विनी ज्येष्ठा एतानि। वाराः बुधभिन्नाः। इति ज्योतिषम् ॥

धान्यकं, क्ली, (धान्यमिव प्रतिष्ठतिः। "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) धान्याकम्। इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये। "लङ्घनानन्तरं चान्नकाले धान्यकजीरकादिदीपनसिद्धान्यन्नानि ॥" अस्य गुणा यथा,—

"धान्यकञ्चाजगन्धा च सुसुखाचेति रोचनाः।
सुगन्धा नातिकटुका दोषानुत्क्लेशयन्ति तु ॥"

इति चरके सूत्रस्थाने सप्तविंशोऽध्याये ॥

धान्यमेव स्वार्थे कन्। धान्यम्। पुं, क्षत्रियवृषप्रतिविशेषः। यथा, राजतरङ्गिण्याम्। ८।९०५।

"राजन्यावित्थिटकुलोद्भूतावुदयधान्यकौ ॥")

धान्यकोष्ठकं, क्ली, (धान्याय धान्यरक्षणाय यत् कोष्ठकं गृहम्।) धान्यरक्षार्थगृहम्। इति हलायुधः ॥ गोला इति भाषा ॥

धान्यचमसः, पुं, (चम्यते भक्ष्यते इति। चम+असन्। धान्यं खिन्नधान्यमेव चमसः।) चिपिटकः। इति त्रिकाण्डशेषः ॥

धान्यधेनुः, स्त्री, (धान्यनिर्म्मिता धेनुः।) दानार्थधान्यनिर्म्मितधेनुः। यथा,—

"विष्णवे चायने वापि कार्त्तिक्यान्तु विशेषतः।
तदिदानीं प्रवक्ष्यामि धान्यधेनुविधिं परम् ॥
यां दत्वा सर्व्वपापेभ्यः मुच्यते नात्र संशयः ॥
दुग्धधेनुप्रदानेन यत् फलं राजसत्तम !।
तत् सर्व्वमेवमाप्नोति व्रीहिधेनुप्रदो नरः ॥
कृष्णाजिनं ततः कृत्वा प्राग्वदत् संस्थसेद्बुधः।
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान्।
पूजयेद्वेदिमध्ये तु वेदनिर्घोषमङ्गले ॥
उत्तमा धान्यधेनुः स्यादर्द्धभागाच्चापि चतुरथैः।
मध्यमा च तदर्द्धेन वित्तशाठ्यं न कारयेत् ॥
चतुर्थांशेन धेन्वा वै वत्सस्तु परिकल्पयेत्।
कर्णयोः रक्तगङ्गे तु राजतक्षुरसंयुता ॥
गोरूपः पूर्ब्ववद्वाल्यमगुरुचन्दनलक्षणा।
सुक्ताफलमया दन्ता घृतक्षौद्रमयं मुखम् ॥
प्रग्रस्तपत्रश्रवणा कांस्यदोहनकान्विता।
इक्षुयष्टिमयाः पादाः क्षौमपुच्छसमन्विता ॥
नानाफलसमोपेता रत्नगर्भसमन्विता।
पादुकोपानहौ कृत्वे भाजनं तर्पणं तथा ॥
इत्येवं रचयित्वा तां कृत्वा दीपार्चनादिकम्।
पुण्यकालञ्च संप्राप्य स्नातः शुक्लाम्बरो गृही।
त्रिः प्रदक्षिणमाकृत्य मन्त्रेणानेन कीर्त्तयेत् ॥
तव विप्र ! महाभाग ! वेदवेदाङ्गपारग !।
यामेतान्च मया दत्तां गृहीत्वा त्वं द्विजोत्तम !।
प्रीयतां मम देवेशो भगवान्मधुसूदनः ॥
त्वमेका लक्ष्मीर्गोविन्दे स्वाहा या च विभावसौ।
अर्क्के प्रभेति विख्याता मेधा मुनिषु सत्तम !॥
तस्मात् सर्व्वमयी देवी धान्यरूपेण संस्थिता।
एवमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥
दत्वा प्रदक्षिणं कृत्वा तं समाप्य द्विजोत्तमम्।
यावच्च पृथिवी सर्व्वा वसुरत्नानि भूपते !।
तावत् पुण्यं समाधिक्यं व्रीहिधेनोश्च तत् फलम् ॥
तस्मान्नरेन्द्र ! दातव्या मुक्तिमुक्तिफलप्रदा।
इह लोके च सौभाग्यमायुरारोग्यवर्द्धनम् ॥
विमानेनार्कवर्णेन किङ्किणीरत्नमालिना।
स्तूयमानोऽमरोभिश्च प्रयाति शिवमन्दिरम् ॥
यावच्च स्मरते जन्म तावत् स्वर्गे महीयते।
ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ॥
एवं हरेण चोद्गीर्णं श्रुत्वा वाक्यं नरोत्तम।
सर्व्वपापविशुद्धात्मा रुद्रलोके महीयते ॥"

इति वराहपुराणम् ॥

धान्यबीजं, क्ली, (धान्यस्य बीजमिव बीजं यस्य।) धन्याकम्। इति राजनिर्घण्टः ॥

धान्यमायः, पुं, (धान्यं मातीति। मा+"क्षायामच्च।" ३। २। २। इति अच्।) धान्यविक्रयी। इति संक्षिप्तसारव्याकरणम् ॥

धान्यराजः, पुं, (धान्यानां राजा। टच् समासे। यद्वा, धान्येषु राजते इति। राज दीप्तौ+अच्।) यवः। इति राजनिर्घण्टः ॥ (गुणादयोऽस्य यवशब्दे ज्ञातव्याः ॥)

धान्यवर्द्धनं, क्ली, (धान्यस्य वर्द्धनं वृद्धिर्यस्मात्।) वार्द्धुष्यम्। इति त्रिकाण्डशेषः ॥ धानेर वाड़ी इति भाषा ॥

धान्यवीरः, पुं, (धान्येषु वीर इव बलाधायकत्वात्।) माषः। इति राजनिर्घण्टः ॥

धान्यशीर्षकं, क्ली, (धान्यस्य शीर्षकं अग्रभागः।) धान्यमञ्जरी। इति जटाधरः ॥ धानेर शीष इति भाषा ॥

धान्याकं, क्ली, (धान्यमकति खादञ्चलेन प्राप्नोतीति। अक गतौ+अच्।) धन्याकम्। इति हेमचन्द्रः। २। ८३ ॥

धान्याचलः, पुं, (धान्यनिर्म्मितोऽचलः पर्व्वतः।) दानार्थधान्यनिर्म्मितपर्व्वतः। तस्य विधानं यथा,—

"प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः।
गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्व्वतः ॥
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्व्वतः।
सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ॥
राजतो नवमस्तद्वदृश्यः शर्करांचलः।
वक्ष्ये विधानमेतेषां यथावदनुपूर्ब्बशः ॥
अयने विषुवे पुण्ये चतौपाते दिनक्षये।
शुक्लपक्षे तृतीयायामुपरागे ग्रहिक्षये ॥
विवाहोत्सवसंयोगे द्वादश्यामथवा पुनः।
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः ॥
धान्यशैलादयो येऽपि देयाः शास्त्रं विजानता।
तीर्थे वायतने वापि गोष्ठे वा भवनाङ्गने ॥
मण्डपं कारयेद्रम्यं चतुरस्रसुदृश्यकम्।
प्रागुदक्प्रवणं तद्वत् प्राङ्मुखञ्च विधानतः ॥
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान्।
तन्मध्ये पर्व्वतं कुर्य्यादिष्कम्भपर्व्वतान्वितम् ॥
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः ॥
मेरुर्मन्दारो हिमयस्तु मध्ये
सुवर्णशृङ्गत्रयसंयुतः स्यात्।
पूर्ब्बेण मुक्ताफलवप्रयुक्तो
याम्ये च गोमेदकपुष्परागैः ॥
पश्चाच्च मारकतनीलरत्नैः
सौम्येन वैदूर्य्यसरोजरागैः।
श्रीखण्डखण्डैरभितः प्रवाल-
लतान्वितः शुक्तिशिलातलः स्यात् ॥
ब्रह्माथ विष्णुर्भगवान् पुरारि-
र्दिवाकरोऽप्यत्र हिरण्मयः स्यात्;
मूर्द्धावस्थागतमत्सरेण
कार्य्यार्थनैके च पुनर्हि लोभाः ॥
चत्वारि शृङ्गाणि च राजतानि
नितम्बभागेऽपि राजतः स्यात्।
तथेक्षुवंशाहृतकन्दरस्तु
हृतोदकप्रस्रवणश्च दिक्षु ॥
शुक्लाम्बरास्त्वमुधरावली स्यात्
पूर्ब्बेण नीलानि च दक्षिणेन।
वासांसि पश्चादथ कर्व्वुराणि
रक्तानि चैवोत्तरतो घनाली ॥
रौप्याभ्रहेन्द्रप्रसुखानथाद्रौ
संस्थाप्य लोकाधिपतीन् क्रमेण।
नानाफलाली च समन्ततः स्या
ज्जनोरमं माल्यविलेपनञ्च ॥
वितानकस्योपरि पञ्चवर्ण-
मक्षानपुष्पाभरणं सितञ्च।
दत्वं निवेश्यामरशैलमध्ये
मेरोस्तु विष्कम्भगिरीन् क्रमेण ॥
तुरीयभागेन चतुर्हिमघ्न
संस्थापयेत् पुण्यविलेपनाढ्यान् ॥
पूर्ब्बेण मन्दरमनेकफलावलीभि-
र्वैक्लं यवैः कनकभद्रकदम्बचिह्नैः।
कामेन काञ्चनमयेन विराजमान-
माकारयेत् कुसुमवस्त्रविलेपनाढ्यम् ॥
क्षीरार्णवोदसरसाथ वनेन चैव
रौप्येण शुक्तिघटितेन विराजमानम्।
याम्येन गन्धमदनञ्च निवेशनीयो
गोधूमसञ्चयमयः कलधौतजो वा ॥
हैमेन यच्चपतिनाहृतमासनेन
वक्ष्येण राजतवनेन च संयुतः स्यात् ॥
पश्चात्तिलाचलमनेकसुगन्धिपुष्पं
सौवर्णपिप्पलदिरण्मयहंसयुक्तम्।
आकारयेद्रजतपुष्पवनेन तद्व-
द्वस्त्रान्वितं दधिसितोदसरस्तथाग्ये ।

संस्थाप्य तं विपुलशैलमथोत्तरेण
शैलं सुपार्श्वमपि माषमयं सुवर्णम्
पूर्वेण देवमवटादपशैखरन्त-
माकारयेत् कनकधेनुविराजमानम् ॥
माध्वीकभद्रसरसा च वनेन तद-
द्वौघेण भास्वरवता च युतं विधाय ।
होमश्चतुर्भिरथ वेदपुराणविद्भि-
र्दान्तैरविन्द्यचरितार्कतिभिर्द्विजेन्द्रैः ॥
पूर्वेण हस्तमितमत्र विधाय कुण्डं
कार्यस्त्रिलैर्यवकृतेन समित्कुशैश्च ।
रात्रौ च जागरमनुद्धतगीततूर्य-
रावाहनञ्च कथयामि शिलोच्चयानाम् ॥
त्वं सर्व्वदेवगणधामनिधे! विरुद्ध-
मस्मद्गृहेष्वमरपर्व्वत नाशयाशु ।
क्षेमं विधत्स्व कुरु शान्तिमनुत्तमां नः
संपूजितः परमभक्तिमता मया हि ॥
त्वमेव भगवानग्नी ब्रह्मा विष्णुर्दिवाकरः ।
मूर्त्तामूर्त्तजगद्बीज ! त्वं नः पाहि सनातनः ॥
यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मन्दिरम् ।
रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे ॥
यस्मादभ्यमरैर्नारीभिश्च शिवस्तव ।
तस्माच्छान्तिप्रदो देव! सर्व्वसंसारसागरात् ॥
एवमभ्यर्च्य तं मेरुं मन्दरञ्चाभिपूजयेत् ।
यस्माच्चैत्ररथेन त्वं भद्राश्वेन विशीर्यतः ॥
शोभसे मन्दर ! शिवप्रमतस्तुष्टिकरो भव ॥
यस्माच्चूडामणिर्जम्बुद्वीपे त्वं गन्धमादन ! ।
गन्धर्व्ववनशोभावान्तः कीर्त्तिर्दृढ़ास्तु मे ॥
यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन वा ।
हिरण्मयाच्चत्यशिरस्तस्मात् पुष्टिर्भुवास्तु मे ॥
उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च ।
सुपार्श्व ! राजसे नित्यमतः श्रीरत्र्यास्तु मे ॥
एवमामन्त्र्य तान् सर्व्वान् प्रभाते विमले पुनः ।
स्नात्वाथ गुरवे दद्यान्मथमं पर्व्वतोत्तमम् ॥
विघ्नभूपर्व्वतान् दद्याद्दत्विग्भ्यः क्रमशो मुने!॥
गाञ्च दद्याच्चतुर्विंशद्गवा दश्च नारद ! ।
शक्तितः सप्त वाष्टौ वा पञ्च दद्यादशक्तिमान् ॥
एकापि गुरवे देया कपिलाथ पयस्विनी ।
पर्व्वतानामशेषाणामेष एव विधिः स्मृतः ॥
त एव पूजने मन्त्रास्त एवोपस्करा मताः ।
ग्रहाणां लोकपालानां ब्रह्मादीनाञ्च सर्व्वदा ॥
स्वमन्त्रैरेव सर्व्वेषु होमः शैलेषु पठ्यते ।
उपवासी भवेन्नित्यमग्रतो नक्तमिष्यते ।
विधानं सर्व्वशैलानां क्रमशः शृणु नारद ! ॥
दानकाले च ये मन्त्राः पर्व्वतेषु च यत्फलम् ।
अन्नं ब्रह्म यतः प्रोक्तमन्नं प्राणाः प्रकीर्त्तिताः ॥
अन्नाङ्गवन्ति भूतानि जगदन्नेन वर्त्तते ।
अन्नमेव ततो लक्ष्मीरन्नमेव जनार्द्दनः ॥
धान्यपर्व्वतरूपेण पाहि तस्मान्नगोत्तम ! ।
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ॥
मन्वन्तरशतं सार्द्धं देवलोके महीयते ।
अप्सरोगणगन्धर्व्वैराकीर्णेन विराजता ॥
विमानेन दिवः पृष्ठमायाति सुरसेवितः ।
ततः कर्म्मक्षये राज्यमाप्नोतीह न संशयः ॥"
इति मत्स्यपुराणम् ॥

धान्याम्लं, क्ली, (धान्यात् धान्यविकारात् जातं अम्लम् ।) काञ्जिकम् । इत्यमरः ।२।९। ३९ ॥
"धान्याम्लं ग्राहिचूर्णानां कोद्रवादिकृतं भवेत् ।
धान्याम्लं धान्ययोनित्वात् प्रीणनं लघु दीपनम् ॥
अरुचौ वातरोगेषु सर्व्वेष्वास्थापने हितम् ॥"
इति भावप्रकाशः ॥
("धान्याम्लं भेदि तीक्ष्णोष्णं पित्तकृत् स्पर्शशीतलम् ।
श्रमक्लमहरं रुच्यं दीपनं वस्तिशूलनुत् ।
शुक्तमास्थापने श्रेष्ठं लघुवातकफापहम् ॥"
इति वाभटे सूत्रस्थाने पञ्चमेऽध्याये ॥)

धान्यारिः, पुं, (धान्यस्य अरिः ।) मूषिकः । इति राजनिर्घण्टः ॥ त्रि, धान्यस्य शत्रुश्च ॥

धान्योत्तमः, पुं, (धान्येषु उत्तमः ।) शालिधान्यम् । इति राजनिर्घण्टः ॥

धाम, [न्] क्ली, (दधाति गृहस्थादिकं धीयते द्रव्यजातमस्मिन्निति वा । धा+"सर्व्वधातुभ्यो मनिन् ।" उणां ४ । १४४ । इति मनिन् ।) गृहम् । (यथा, मेघदूते । ३५ ।
"भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ॥")
देहः । त्विट् । प्रभावः । इत्यमरः । ३ । ३ । १२३ ॥ (यथा, किराते । २ । ४७ ।
"सहते न जनोऽप्यधःक्रियां
किमु लोकाधिकधाम राजकम् ॥")
रश्मिः । (यथा, माघे । १ । २ ।
"पतत्यधो धाम विसारि सर्व्वतः
किमेतदित्याकुलमीक्षितं जनैः ॥")
स्थानम् । (यथा, पञ्चदश्याम् । ७ । २१४ ।
"त्रिषु धामसु यज्ञोक्तं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥")
जन्म । इति मेदिनी । मे, ८० ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ३६ ।
"गुरुर्गुरुतरो धाम सत्यः सत्यपराक्रमः ॥"
"धाम ज्योतिः नारायणः परं ज्योतिरिति मन्त्रवर्णात्। सर्व्वलोकक्षमाश्रयत्वात् वा धाम । परं ब्रह्म परं धाम इति श्रुतेः ॥" इति तद्भाष्यम् ॥

धामकः, पुं, माषकपरिमाणम् । इति वैद्यकपरिभाषा ॥

धामनिधिः, पुं, (धामानि किरणानि निधीयन्ते ऽत्र । नि+धा+किः ।) सूर्य्यः । इति जटाधरः ॥

धामनी, स्त्री, (धमन्येव । धमनी+स्वार्थे अण् । ततो ङीष् ।) धमनी । इति शब्दचन्द्रिका ॥

धामार्गवः, पुं, (धान्यो मार्गे पन्थानं वातीति । वा गतौ+कः ।) अपामार्गः । इत्यमरः ।२।४।८८॥ (रक्तापामार्गोऽयम् । अस्य पर्य्यायो यथा,—
"रक्तोऽन्यो वसिरो दुष्टफलो धामार्गवोऽपि च ।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

धावकः । इति मेदिनी । वे, ५६ ॥ (अस्य पर्य्यायो यथा,—
"महाकोषातकी प्रोक्ता हस्तिघोषा महाफला ।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पीतघोषा । इति रत्नमाला ॥

धायः, त्रि, (दधाति धारयतीति । धा+"ग्रहाद्यधीति ।" ३ । १ । १४१ । इति गः ।) धारणकर्त्ता । इति सुग्धबोधव्याकरणम् ॥ (यथा, भट्टिः । ६ । ७६ ।
"दद्दे दुःखस्य माद्यद्भ्यो धायेरामोदसुत्तमम् ॥")

धायाः, [स्] त्रि, (दधातीति । धा+"वहिहाधाभ्यश्छन्दसि ।" उणां ४ । २२० । इत्यसुन् वाहुलकात् युक् ।) धारणकर्त्ता । पोषणकर्त्ता । यथा, वाजसनेयसंहितायाम् । १३ । १८ ।
"भूरसि भूमिरस्यदितिरसि विश्वस्य धायाः ॥"

धाय्यः, पुं, (धीयते आश्रियते मङ्गलार्थमिति । धा+कर्म्मणि ण्यत् ततो युक् ।) पुरोहितः । इति सुग्धबोधव्याकरणम् ॥

धाया, स्त्री, (धीयतेऽनया समित् । धा+करणे ण्यत् ।) अग्निसमिन्धनार्थं ऋक् । अग्निप्रक्षालनमन्त्रः । इत्यमरः । २ । ७ । २२ ॥

धारं, क्ली, (धारायाः इदम् । धारा+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वर्षोद्भवं जलम् । तद्विधम् । गाङ्गम् १ सामुद्रञ्च २ । यथा,—
"यदा स्यादाश्विने मासि सूर्य्यः स्वातीविशाखयोः ।
तदासु जलदैर्मुक्तं गाङ्गमुक्तं मनीषिभिः ॥
अन्यदा त्वगस्त्यर्क्षादिगत्वचेषु यदम्बुदैः ।
अभिवृष्टमिदं तोयं सामुद्रमिति संज्ञितम् ॥"
तयोर्गुणाः । यथा,—
"गाङ्गं जलं स्वादु सुशीतलञ्च
रुचिप्रदं पित्तकफापहञ्च ।
निर्दोषमिष्टं लघु तच्च नित्यं
गुणाधिकं स्रोत्रि गृहीतमाहुः ॥
सामुद्रसलिलं शीतं कफवातकरं गुरु ।
चित्रायामाश्विने तच्च गुणाढ्यं गाङ्गवद्भवेत् ॥
पतितं भुवि तत्तोयं गाङ्गं सामुद्रमेव वा ।
स्वस्राश्रयवशाद्भेदमन्यदन्यद्रसादिकम् ॥"
इति राजनिर्घण्टः ॥

धारः, पुं, (धार्य्यते इति । धृ+घञ्+घञ् ।) आवालतरम् । ऋणम् । इति मेदिनी । रे, ५१ ॥ जलधरासारवर्षणम् । इति हेमचन्द्रः ॥ प्राप्तः । गम्भीरः । इति शब्दरत्नावली ॥

धारकः, पुं, (धरति जलादिकमिति । धृ+ण्वुल् ।) कलसः । तस्योत्पत्त्यादि यथा,—
ब्रह्मोवाच ।
"उत्पत्तिं लक्षणं मानं कथयामि महासुने ! ।
धारकाः कलसाश्चैव येन लोके प्रकीर्त्तिताः ॥
मथ्यते मथ्यमाने तु सर्व्वदेवैः सदानवैः ।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥
उत्पन्नमन्दरं तत्र महावीर्य्यपराक्रमम् ।
तस्यायं धारणार्थाय कलसः परिकीर्त्तितः ॥

कलां कलां गृहीत्वा वै देवानां विश्वकर्म्मणा ।
निर्म्मितोऽयं सुरैर्यस्मात् कलसस्तेन उच्यते ॥
कलसस्य मुखे ब्रह्मा ग्रीवायान्तु महेश्वरः ।
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः ॥
ग्रीवास्तु देवताः सर्व्वा वेष्टयन्ति चतुर्दिशम् ।
कुक्षौ तु सागराः सप्त सप्त द्वीपास्तु संश्रिताः ॥
गन्धर्व्वाश्च ग्रहाः सर्व्वे तथैव कुलपर्व्वताः ।
हिमवान् हेमकूटश्च निषधो मेरुरेव च ॥
रोहितो मान्यवन्तश्च सूर्य्यकान्तिश्च पर्व्वताः ।
गङ्गा सरस्वती सिन्धुः सुभगा यमुना नदी ॥
ऐरावती शतद्रुश्च तथा वैतरणी नदी ।
गोदावरी नर्म्मदा च सही नाम महानदी ॥
कुरुक्षेत्रं प्रयागश्च एकदंसं पृथूदकम् ।
अमरेश्वरः पुष्करीकं गङ्गासागर एव च ॥
पृथिव्यां यानि तीर्थानि कलसे निवसन्ति ते ।
ऋचः शान्तिश्च पुष्टिश्च प्रीतिर्गायत्रिरेव च ॥
ऋग्वेदोऽथ यजुर्व्वेदः सामवेदस्तथैव च ।
अथर्व्ववेदसहिताः सर्व्वे कलससंस्थिताः ॥
नवैव कलसाः पुण्याः पृथ्वभ्रमृक्षिसमुद्भवाः ।
गोभ्योपगोभ्यो मरुतः खलदश्च तथा परः ॥
मनोहरः खलुभद्रः पञ्चमः परिकीर्त्तितः ।
विरजस्तनुदूषश्च षष्ठसप्तमकावुभौ ॥
अष्टमस्त्विन्द्रियोपेतो नवमो विजयः स्मृतः ।
नवैव कलसाः ख्याता अधिदेवं निबोधत ॥
शृणु वत्स ! यथा तेषां दिग्भ्यो न्यासो व्यवस्थितः ।
नवमो यः समाख्यातो विजयो नाम नामतः ॥
शिवस्तत्र स्थितः साक्षात् सर्व्वपापहरः शुभः ।
द्वितीयो ब्रह्मकलसो द्वितीयो जलसम्भवः ॥
तृतीयः पवनश्चैव चतुर्थस्तु हुताशनः ।
पञ्चमो यजमानस्तु षष्ठस्त्वाकाशसम्भवः ॥
सोमस्तु सप्तमः प्रोक्त आदित्यश्च तथाष्टमः ।
एते चोत्पादिता देव्या शिवेनाधिष्ठिताः पुरा ॥
इन्द्रस्य मूर्त्तयश्चाष्टौ सूर्य्यान्ता नवमः शिवः ।
द्वितीयः पूर्व्वतो न्यास्यः पश्चिमे जलसम्भवः ।
वायव्ये वायवो न्यास्य आग्नेये ह्यग्निसम्भवः ।
नैर्ऋते यजमानस्तु ऐशान्याकाशसम्भवः ॥
सौम्यमुत्तरतो योज्यं सौरं दक्षिणतो न्यसेत् ।
न्यस्येवं कलसानान्तु पूर्व्वरूपं विचिन्तयेत् ॥
कलसानां मुखे ब्रह्मा ग्रीवायां विष्णुरेव हि ।
मध्ये मातृगणाः सर्व्वे सेन्द्रा देवाश्च पन्नगाः ॥
कुक्षौ तु सागरास्तेषां सप्तद्वीपा च मेदिनी ।
ऋषयश्चैव तथोमा च गन्धर्व्वा ऋषयस्तथा ॥
पञ्चभूतास्तथा धारास्तेषामवस्थिताः स्थिताः ।
पूर्णाः पूतेन तोयेन सिद्धास्त्वेकान्ततो सुने ! ॥
सरित्सरःसखातेन तडागेन जलेन वा ।
वापीकूपोद्दिदीर्घेण सासुदेन सुखावहाः ॥
सर्व्वमङ्गलमाङ्गल्याः सर्व्वकिल्बिषनाशकाः ।
अभिषेके सदा ग्राह्याः कलसा ईडशाः शुभाः ॥
यात्राविवाहकाले वा प्रतिष्ठायज्ञकर्म्मणि ।
योजनीया दिशीषेण सर्व्वकामप्रसाधकाः ॥
यस्मान् धारयते यस्मात्तरा विविधास्तथा ।
दुरितांश्च महाघोरांस्तस्न ते धारकाः स्मृताः ॥

एकैकान्तु कलां मूर्त्तौ चित्यादीनां यथाक्रमम् ।
संहृत्य संस्थिता यस्मात्तेन ते कलसाः स्मृताः ॥
हेमराजततास्रा वा मृण्मया लक्षणान्विताः ।
पञ्चमाङ्गुलवैपुल्यसुत्सेधः षोड्शाङ्गुलः ॥
कलसानां प्रमाणन्तु सुखमष्टाङ्गुलं भवेत् ॥"
इति देवीपुराणम् ॥

धारयत्कर्म्मरि, त्रि ॥ (यथा, पञ्चतन्त्रे । २ । १७५ ।
"अप्रियाण्यपि पथ्यानि ये वदन्ति शृणोमिह ।
त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः ॥")

धारणं, क्ली, (धृ + णिच् + भावे ल्युट् ।) विधारणम् । इति मेदिनी । णे, ५६ । धरण इति भाषा ॥ (यथा, सुश्रुते । १ । ४६ ।
"तैक्ष्ण्याच्च निर्हरेदाशु कफं गण्डूषधारणात् ॥")

धारणं, क्ली, (धृ + णिच् + भावे ल्युट् ।) विधारणम् । इति मेदिनी । णे, ५६ । धरण इति भाषा ॥ (यथा, सुश्रुते । १ । ४६ ।
"तैक्ष्ण्याच्च निर्हरेदाशु कफं गण्डूषधारणात् ॥")

धारणः, पुं, (धृ + णिच् + ल्युः ।) धारके, त्रि । यथा, महाभारते । १२ । ३३५ । ५४ ।
"जन्मुर्यत्रेप्सितं देवं तपसे कृतनिश्चयाः ।
धारणाः सर्व्वलोकानां सर्व्वधर्म्मप्रदर्शकाः ॥")

धारणा, स्त्री, (धार्य्यते या सा । धृ + णिच् + युच् । टाप् ।) बुद्धिः । इति राजनिर्घण्टः ॥ (यथा, याज्ञवल्क्ये । ३ । ७३ ।
"इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः ।
धारणा प्रेरणं दुःखमिच्छाद्वार एव च ॥")
न्याय्यपथस्थितिः । तत्पर्य्यायः । संज्ञा २ मर्य्यादा ३ स्थितिः ४ । इत्यमरः । २ । ८ । २६ ॥ (यथा, मनुः । ४ । ३८ ।
"न लङ्घयेत् वत्सतन्त्रीं न प्रधावेच्च वर्षति ।
न चोदके निरीक्षेत स्वं रूपमिति धारणा ॥")
योगाङ्गविशेषः । इति मेदिनी । णे, ५६ ॥
"स तु अविहितीयवस्तुन्यन्तरेन्द्रियधारणम् ।" इति वेदान्तसारः ॥ ध्येये चित्तस्य स्थिरबन्धनम् ।
इति हेमचन्द्रः ॥
"तस्मात् समस्तवृत्तीनामाधारे तत्र चेतसः ।
कुर्व्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥"
इति विष्णुपुराणे । ६ । ७ । ७४ ॥
ब्रह्मणि मनोधारणम् । यथा,—
"ब्रह्मात्मचिन्ता ध्यानं स्यात् धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥"
इति गारुड़े ४६ अध्यायः ॥
अष्टादशप्राणायामादिरूपधारणा यथा,—
"प्राणायामा दशाष्टौ च धारणा साभिधीयते ।
हे धारणे स्मृते योगे मुनिभिस्तत्त्वदर्शिभिः ॥
प्राङ्नाभ्यां हृदये चाथ ललाटे च तथोरसि ।
कण्ठे मुखे नासिकायां नेत्रभ्रूमध्यमूर्द्धसु ।
किञ्चित्तस्मात् परस्मिंश्च धारणाः परमाः स्मृताः ।
दशैता धारणाः प्राप्य प्राप्नोत्यक्षरसाम्यताम् ॥"
इति गारुड़े २३० अध्यायः ॥
अपि च ।
"प्राणायामैर्दशभिर्यावत्कालो हृतो भवेत् ।
यस्तावत्कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ।
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादशधारणाः ॥
द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः ।
तुष्टे तु स यतो मुक्तः समाधिः सोऽभिधीयते ॥
ध्येयान्न चलते यस्य मनोऽभिध्यायतो भृशम् ।
प्राप्यावधि हृतं कालं यावत् सा धारणा स्मृता ॥"
इति च गारुड़े २४० अध्यायः ॥

धारणी, स्त्री, (धार्य्यते शरीरमनया । धृ + णिच् + ल्युट् । स्त्रियां ङीप् ।) गोड़िका । बुद्धोक्तमन्त्रभेदः । इति मेदिनी । णी, ५५ ॥ श्रेणी । इति हेमचन्द्रः ॥

धारणीया, स्त्री, (धार्य्यतेऽसाविति । धृ + णिच् + अनीयर् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥ धार्य्ये, त्रि ॥

धारयित्नी, स्त्री, (धारयति सर्व्वमिति । धृ + णिच् + ल्युच् । स्त्रियां ङीप् ।) पृथिवी । इति शब्दरत्नावली ॥ (धारके, त्रि । यथा, महाभारते । ५ । ६५ । ८ ।
"त्वं हि धारयिता श्रेष्ठः कुरूणां कुरुसत्तम ! ॥")

धारा, स्त्री, (धार्य्यन्ते अम्भो यया । धृ + णिच् + अड् । स्त्रियां टाप् ।) अम्भसां पञ्चधागतिः । तद्यथा । आस्कन्दितम् १ धौरितकम् २ रेचितम् ३ वलितम् ४ प्लुतम् ५ । इत्यमरः । २ । ८ । ४६ ॥ (यथा, माघे । ५ । ६० ।
"अथाकुलं प्रसृतसुत्तरधैयकर्म्म
धाराः प्रसाधयितुमथतिकीर्णरूपाः ।
सिद्धं सुखे नवसु वीथिषु कश्चिदस्य
वर्गाविभागकुशलो गमयाम्बभूव ॥"
"अथतिकीर्णरूपा असंकीर्णरूपा धारा गतिभेदाः ।
'अथानान्तु गतिर्धारा विभिन्ना सा च पञ्चधा ।
आस्कन्दितं धौरितकं रेचितं वलितं प्लुतम् ॥'
इति वैजयन्ती ॥
'जलयोरुभः पञ्च धाराः ।' इत्यमरश्च ॥ अन्यशास्त्रे तु संज्ञान्तरेणोक्ताः ।
'गतिः पुना चतुष्का च तद्भमर्थजवा परा ।
पूर्व्ववेगा तथा चान्या पञ्च धाराः प्रकीर्त्तिताः ॥
एकैका त्रिविधा धारा ह्ययमुक्तविधौ मता ।
ज्येष्ठी मध्या तथा हीना ज्ञात्वैता योजयेत् क्रमात् ॥'
तथा च पञ्चदशविभेदा भवन्ति । ताः पञ्च धाराः प्रसाधयितुं परिक्षेतुं नवसु वीथिषु सञ्चारस्थानेषु गमयाम्बभूव ॥" इति तट्टीकायां मल्लिनाथः ॥) सैन्यादिभस्कन्धः । घटादिच्छिद्रम् । सन्ततिः । (यथा, महाभारते । ६ । ११८ । २४ ।
"उत्पपात ततो धारा वारिणो विमला शुभा ॥")
जलस्य प्रपातः । (यथा, महाभारते । १ । २२४ । ५८ ।
"त्वया द्वादश वर्षाणि वसोर्द्धारा हुतं हविः ।
उपयुक्तं महाभाग ! तेन त्वां ग्लानिराविशत् ॥")
खड्गादेर्भ्रियतसुखम् । इति मेदिनी । रे, ५० ॥

(यथा, आकुन्तले १ अङ्के ।
"ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥")
उत्कर्षः । रथचक्रम् । इति हेमचन्द्रः ।३।४१६॥
(यथा, रघुः । १३ । १५ ।
"आभाति वेला लवणाम्बुराशे-
र्धारानिबद्धेव कलङ्करेखा ॥")
यशः । अतिवृष्टिः । (यथा, पञ्चतन्त्रे । २।६२ ।
"पर्जन्यस्य यथा धारा यथा च दिवि तारकाः।
सिकतारेणवो यद्वत् संख्या परिवर्जिताः।
गुणाः संख्यापरित्यक्तास्तद्वस्य महात्मनः ॥")
समूहः । इति शब्दरत्नावली ॥ घनासारवर्षणम् । वृष्टिः । इति विश्वः ॥ (प्रवाहः । यथा,
याज्ञवल्क्ये । १ । २८० ।
"सहस्रार्घं शतधारेण विधिः पावनं कृतम् ।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते ॥")
दक्षिणदेशस्थपुरीविशेषः । इति विक्रमचरितम् ॥ * ॥ (तीर्थविशेषः । यथा, महाभारते । १ । ८४ । २३ ।
"प्रदक्षिणमुपावृत्य गच्छेत भरतर्षभ ! ।
धारां नाम महाप्राज्ञ ! सर्वपापप्रमोचनीम् ।
तत्र स्नात्वा नरव्याघ्र ! न शोचति नराधिप ॥")
अथ ज्वरादिग्रन्थोक्तश्रीनरसिंहादिमन्त्रैर्जलधारापातनविधिः । यथा, नृसिंहपुराणे ।
"तथा महाज्वरग्रस्ते धारां देवस्य मन्त्रतः ।
सप्ततां नारसिंहस्य कुर्याद्वा कारयेत् द्विजैः ॥
होमश्च भोजनञ्चैव तस्य दोषः प्रशाम्यति ॥"
धाराकदम्बः, पुं, (धारा कालोपलक्षितः कदम्बः । वर्षाकाले जायमानत्वादस्य तथात्वम् ।) कदम्बवृक्षभेदः । केलिकदम् इति भाषा ॥ तत्पर्य्यायः । प्रावृष्यः २ पुलकी ३ भृङ्गवल्लभः ४ मेघाशः ५ प्रियकः ६ नीपः ७ प्रावृषेण्यः ८ कलम्बकः ९ । इति राजनिर्घण्टः ॥ धाराकदम्बकः १० । इति त्रिकाण्डशेषः ॥
धाराङ्कुरः, पुं, (धारायाः वृष्टेः अङ्कुर इव ।) शीकरः । घनोद्भवः । नाड्डोरः । इति मेदिनी । रे, २६६ ॥
धाराङ्गः, पुं, (धारा उत्कर्ष इव अङ्गं यस्य । श्रेष्ठत्वादस्य तथात्वम् ।) तौर्यम् । (धारान्वितमङ्गमस्य ।) खड्गः । इति हेमचन्द्रः ॥
धाराटः, पुं, (धारायै वृष्ट्यै अटतीति । अट + अच् ।) वासकः । (धारामटति वर्षर्तौ यत्नेन प्राप्नोतीति ।) मेघः । (धारां गतिं अटतीति ।) तुरङ्गः । मत्तहस्ती । इति शब्दरत्नावली ॥
धाराधरः, पुं, (धरतीति । धृ + अच् । धारायाः धरः ।) मेघः । (यथा, उत्तरचातकाष्टके । ४ ।
"रे धाराधर ! धीरनीरनिकरैरेषा रसा नीरसा
शेषा पूषकरोत्करैरतिखरैरापूरि भूरि त्वया ।
एकान्तेन भवन्मनोरथगतं स्वान्तेन सञ्चिन्तयन्
आश्चर्यं परिपीड़िलोऽभिरमते यच्चातकः स्तूयताम् ॥"
खड्गः । इति मेदिनी । रे, २६६ ॥
धाराफलः, पुं, (धारा फले यस्य ।) मदनवृक्षः । इति राजनिर्घण्टः ॥ (मदनशब्देऽस्य गुणपर्य्याया ज्ञातव्याः ॥)
धारावनिः, पुं, (धारायाः वृष्टेः अवनिः पृथ्वीव । अभिधानात् पुंस्त्वम् ।) वायुः । इति त्रिकाण्डशेषः ॥
धाराविषः, पुं, (धारा एव विषमिव यस्य प्राणनाशकत्वात् ।) खड्गः । इति त्रिकाण्डशेषः ॥
धारासम्पातः, पुं, (धाराणां सम्यक् पातो यत्र ।) महावृष्टिः । तत्पर्य्यायः । धारा १ सम्पातः २ आसारः ३ । यथा,—
"धारा सम्पात आसारस्त्वितयत्रापि कुत्रचित् ॥"
इति शब्दरत्नावली ॥
(यथा, प्रबोधचन्द्रोदये ५ अङ्के ।
"ततो देवि ! परस्परं करितुरगरथपदातीनां निरन्तर-शरनिकर-धारासम्पातोपदर्शितदुर्दिनानां तेषामस्त्राणां च योधानां तुमुलः सम्भारः प्रावर्त्तत ॥")
धाराक्षुद्री, स्त्री, (धारान्विता क्षुद्री ।) त्रिधारक्षुद्री । इति राजनिर्घण्टः ॥ तेकाँटासिज इति भाषा ॥
धारिणी, स्त्री (धरतीति । धृ + णिनिः + ङीप् ।) धरणी । इति शब्दरत्नावली ॥ श्यालमलिरुक्षः । इति शब्दचन्द्रिका ॥ चतुर्दशदेवयोषिद्भेदः । यथा,—
"शची वनस्पती गार्गी धूम्रोर्णा रुचिराकृतिः ।
सिनीवाली कुहू राका तथा चानुमतिः शुभा ॥
आयतिर्नियतिः प्रज्ञा सेला वेला च नामतः ।
एताश्चतुर्दश प्रोक्ता धारिण्यो देवयोषितः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
(धारणकर्त्री । यथा, विष्णुपुराणे । १।१३।८८।
"प्राणग्रहणात् च पृथुर्यस्मात् भूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥"
आधारस्वरूपा । यथा, तत्रैव । १ । १३ । ६१ ।
"सैषा धात्री विधात्री च धारिणी पोषणी तथा ।
सर्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥"
"धात्री माता विधात्री कर्त्री धारिणी आधारः पोषणी पोषयकर्त्री ।" इति तट्टीकायां श्रीधरस्वामी ॥)
धारी, [न्] पुं, (धरतीति । धृ + णिनिः ।) पीलुवृक्षः । इति जटाधरः ॥ त्रि, धारयितृकः ॥ (धारकः । यथा, महाभारते । ५ । ३१ । ११ ।
"तथैव विदुरं ब्रूयाः कुरूणां मन्त्रधारिणम् ॥"
यत्नवतात्पर्य्यवान् । यथा, मनुः । १२ । १०३ ।
"अङ्गेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः॥")
धारुः, त्रि, (धयति पिबतीति । धे ट पाने + "दाधेट्सिध्यदयदो रुः ।" ३ । २ । १५६ । इति रुः ।) पानकर्त्ता । इति जटाधरः ॥ (यथा, अथर्ववेदे । ३ । १८ । २ ।
"वत्सो धारुरिव मातरं तं प्रत्यृषयोऽस्राम् ॥")
धारोष्णं, क्ली, (धारायां दोहनप्रभृतौ उष्णम् ।) दोहनेनोष्णधारया पतितदुग्धम् । तस्य गुणाः ।
"धारोष्णमुल्लघुतरं पयो भ्रमहरं निशाकरं कान्तिदं
दृष्यं दृङ्नयमग्निवर्द्धनमतिस्वादु चिदोषापहम् ॥"
इति राजनिर्घण्टः ॥
("धारोष्णं गोपयो बल्यं लघु शीतं सुधासमम् ।
दीपनञ्च त्रिदोषघ्नं तद्धाराग्निगिरं त्यजेत् ॥
धारोष्णं शस्यते गव्यं धाराशीतन्तु माहिषम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
धार्त्तराष्ट्रः, पुं, (कृष्णवर्णचञ्चुचरणयुक्तहंसः । गेड़ि हाँस इति भाषा ॥ इत्यमरः । २ । ५ । २४ ॥
(यथा, वेणीसंहारे १ अङ्के सूत्रधारस्य प्रवेशनायाम् ।
"सत्पक्षा मधुरगिरः प्रसादिताग्र्या मदोद्धता रम्याः ।
निपतन्ति धार्त्तराष्ट्राः कालवशाच्चेदिनीपृष्ठे ॥")
सर्पविशेषः । धृतराष्ट्रपुत्रः । इति मेदिनी । रे, २७० ॥ (यथा, वेणीसंहारे १ अङ्के ।
"लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।
आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्ति मयि जीवति धार्त्तराष्ट्राः ॥")
धार्त्तराष्ट्रपदी, स्त्री, (धार्त्तराष्ट्रस्य पाद इव पादो मूलं यस्याः । ङीष् पक्षे वः ।) हंसपदी । इति राजनिर्घण्टः ॥ (विस्तृतविशेषो हंसपदीशब्दे ज्ञातव्यः ।)
धार्म्मिकः, त्रि, (धर्म्मं चरतीति । धर्म्म + "धर्म्मं चरति ।" ४ । ४ । ४१ । इति ठक् । यद्वा, धर्म्ममधीते वेद वा । "क्रतूक्थादिसूत्रान्ताट्ठक् ।" ४ । २ । ६० । इति ठक् ।) धर्म्मशीलः । तत्पर्य्यायः । देवयुः २ । इति जटाधरः ॥ (यथा, महाभारते । १ । १२२ । ४९ ।
"धार्म्मिकश्च कुरूणां स भविष्यति न संशयः ॥")
धार्य्यं, त्रि, (धियते इति । धृ + ण्यत् ।) धारणीयम् । यथा,—
"धातानुराधवसुपुष्यविशाखहस्ता-
श्चित्रोत्तराश्विपवनार्दितिरेवतीषु ।
ऋक्षार्क्षजीवबुधशुक्रदिनोत्तमादौ
धार्य्यं नवं वसनमीश्वरविप्रतुष्टौ ॥"
इति समयप्रदीपः ॥
(धियते परिधीयते इति । वस्त्रे, क्ली । यथा, भागवते । ६ । १८ । १४ ।
"वयं तत्रापि भगवः शिष्योऽस्या नः पितासुरः ।
असम्भाव्यं हतवती स्त्री वेदमिवासती ॥")
धाव, उ च गतौ । शुद्धौ । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-अकं-शुद्धौकरणे सकं-सेट् । उदित्वात् क्त्वेट् ।) उ, धावित्वा धौत्वा । अ, धावति धावते । अवः शीघ्रगतिः । प्राग्रपाभिः पुनस्तच्च यमदूतोऽपि धावतीति हलायुधः । स्नट् शुद्धिभावः शुद्धीकरणञ्च । धावति तान्त्रमन्त्रेण शुध्यतीत्यर्थः ।
'दधावङ्घ्रिस्तकच्छुः सुग्रीवस्य विभीषणः ।'
अस्य जवे निघाया अप्रयोगः । धौतं वासः ।
इति दुर्गादासः ॥

धावकः, त्रि, (धावति शीघ्रं गच्छतीति । धाव + ण्वुल् ।) धावनकर्त्ता । शीघ्रगमनकर्त्ता । घाउडिया इति भाषा । धावधातोर्णकप्रत्ययेन निष्पन्नः ॥ (यथा, गोः रामायणे ।२।३२।२२ ।
"संवाहकाः सलिलदाः पुरतो धावकाश्च ये ।
तेषां निष्कसहस्रं त्वं दत्त्वार्थमुपकल्पय ॥")

धावनं, क्लो, (धाव + भावे ल्युट् ।) गमनम् । (यथा, राजतरङ्गिण्याम् । १ । ११४ ।
"ग्रामे ग्रामे स्थितैरश्वैर्धावनं प्रतिषिद्धवान् ॥")
शुद्धिः । इति मेदिनी । ने, ७६ ॥ (यथा, सुश्रुते चिकित्सितस्थाने । २२ ।
"पटोलत्रिफलानिम्बकषायाच्चात्र धावने ॥"
"पाकं गते व्रणे वापि गम्भीरे सरुजेऽथवा ।
सरक्ते श्लेष्मणं कार्य्यं धावनन्तु भिषग्वरैः ॥"
इति हारीते चिकित्सितस्थाने ३५ अध्यायः ॥)

धावनिः, स्त्री, (धाव + बाहुलकात् अनिः ।) पृश्निपर्णी । इत्यमरः ।२।४।६३॥ (पर्य्यायोऽस्या यथा,
"पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यृषिपर्ण्यपि ।
क्रोष्टुविघ्ना सिंहपुच्छी कलशी धावनिर्गुहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
कण्टकारी । इति राजनिर्घण्टः ॥)

धावनिका, स्त्री, (धावनिरिव प्रतिभाति । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् । यद्वा, स्वार्थे कन् ।) कण्टकारिका । इति रत्नमाला ॥

धावनी, स्त्री, (धावनि + ङीदादिकारादिति वा ङीष् ।) पृश्निपर्णी । इति मेदिनी । ने, ७६ ॥ कण्टकारी । धातकी । इति राजनिर्घण्टः ॥

धावितः, त्रि, (धाव + क्तः ।) गतः । (यथा, कथासरित्सागरे । ३ । ५२ ।
"एवमस्त्विति तौ मूढौ धावितौ सोऽपि पाटुके ।
अध्यास्योदपतद्व्योम यष्टीत्वा यष्टिभाजने ॥")
मार्ज्जितः ॥

धासः, [स्] पुं, (दधाति पृथिवीमिति । धा + "वहिश्रिगाधान्हन्दसि ।" उणां । ४ । २२० । इति असुन् तस्य सुट् च ।) पर्व्वतः । इति वैदिकप्रयोगः ॥

धि, ग्र धृतौ । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-अनिट् ।) ग्र, धियति । इति दुर्गादासः ॥

धिक्, अ. निर्भर्त्सनम् । निन्दा । इत्यमरः । ३ । ३ । २३६ ॥ (यथा, विष्णुपुराणे । १ । १५।३५।
"धिङ्मां धिङ्मामतोवेत्थं निनिन्दात्मान-
मात्मना ॥")

धिक्कारः, पुं, (धिक् इत्यस्य कारः करणम् ।) धिक् । तत्पर्य्यायः । भर्त्सकारः २ अवहेलम् ३ अमाननम् ४ क्षेपः ५ निकारः ६ अनादरः ७। इति शब्दरत्नावली ॥ (यथा, भागवते ।४।१४।१३।
"लोकधिक्कारसन्दग्धं दहिष्यामः स्वतेजसा ॥")

धिक्कृतः, त्रि, (धिक् + कृ + कर्म्मणि क्तः ।) निर्भर्त्सितः । असत्कारणादिना धिगित्यस्य करणं धिक्कारो निन्दा धिगितः धिक्कृतः धिक् त्वां इति भर्त्सितो धिक्कृत इति यावत् । इति भरतः ॥ तत्पर्य्यायः । अपध्वस्तः २ । इति

धिषणा

प्राणिवर्गे अमरः । ३ । १ । ३६ ॥ (यथा, भागवते । ७ । ८ । ५३ ।
"वयं किम्पुरुषास्त्वन्तु महापुरुष ईश्वरः ।
अयं कुपुरुषो नष्टो धिक्कृतः साधुभिः सदा ॥")
निन्दितमात्रम् । कृतधिक्कारस्य प्राणिवर्गोक्तस्य पर्य्यायान्तरमिदम् अप्राणिविषयार्थम् । धिगस्तु त्वां इति कृतः ग्रन्थितो धिक्कृतः । इति भरतः ॥ तत्पर्य्यायः । अवरीणः २ । इति विश्वप्रकाशनिघण्टवर्गे अमरः । ३ । १ । ६४ ॥

धिक्क्रिया, स्त्री, (धिगित्यव्ययमेव क्रिया ।) निन्दा । इति हेमचन्द्रः । २ । १८५ ॥

धिष्ण्य, ङ सन्दीपे । क्लेशे । जीवे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) क्षतौयस्वरी । ङ, धिष्ण्यते वह्निः सन्दीप्यते इत्यर्थः । जनः क्लिश्यति जीवतीति वा अर्थः । इति दुर्गादासः ॥

धिग्वणः, पुं, वर्णसङ्करविशेषः । तस्य चर्म्मकार्य्यं वृत्तिः । स तु ब्राह्मणादायोगव्यां जातः । इति मनुः ॥

धियाम्पतिः, पुं, (धियां बुद्धीनां पतिः । अलुक् समासः ।) पूर्व्वाञ्जनविशेषः । मञ्झघोष इति ख्यातः । इति त्रिकाण्डशेषः । आत्मा । ध्यात एव धियाम्पतिरिति प्रयोगदर्शनात् ॥

धिव, इ न प्रीतौ । गतौ । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) प्रीतिरिह प्रीतीकरणम् । इ, धिन्वते । न, धिनोति हर्षेण हिरण्यरेतसमिति किराते । गतिः केचिन्न मन्यते । इति दुर्गादासः ॥

धिष, र लि रव । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-अकं-सेट् ।) र, वैदिकः । लि, दिधेष्टि । रवः शब्दः । इति दुर्गादासः ॥

धिषणः, पुं, (धृष्णोति प्रागल्भ्यं ददातीति । धृष् + "धृषेर्धिष च संज्ञायाम् ।" उणां २ । ८२ । इति क्युः ।) बृहस्पतिः । इत्यमरः । १ । ३ । २४ ॥

धिषणा, स्त्री, (धृष्णोत्यनयेति । धृष प्रागल्भ्ये + क्युः । धिषादेशश्च ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, ऋग्वेदे । १ । ३२ । १४ ।
"विवेष यन्मा धिषणा जजान स्वेः पुरा पार्या-
दिन्द्रमकूः ॥"
स्तुतिः । यथा, ऋग्वेदे । ८ । १५ । ७ ।
"तव त्वदिन्द्रियं बृहत्तव शुष्ममुत क्रतुम् ।
वज्रं शिशाति धिषणा वरेण्यम् ॥"
"धिषणा स्तुतिः ।" इति तद्भाष्ये सायनः ॥
वाक् । यथा, ऋग्वेदे । ३ । ४६ । ४ ।
"ऋषां वस्त्रा जनिता सूर्य्यस्य विभक्ता भागं
भागं धिषणेव वाजम् ॥"
"धिषणेव । यथाऽज्ञानां वाक् अस्येदमिति विभागं करोति तद्वत् ।" इति तद्भाष्ये सायनः ॥
प्रस्तरः । यथा, ऋग्वेदे । ६ । ५६ । २ ।
"पवस्व धिषणाभ्यः ।"
"किञ्च धिषणाभ्यो ग्रावभ्यः पवस्व क्षर ॥" इति तद्भाष्ये सायनः ॥

धिष्ण्य

धारयित्री । द्यावापृथिव्योः द्विवचनान्तः । यथा, ऋग्वेदे । ३ । ४६ । १ ।
"यं सुक्रतं धिषणे विश्वतष्टं धनं दृक्षाणां जन-
यन्त देवाः ॥"
"धिषणे देवमनुष्यादीनां धारयित्र्यौ । यद्वा प्रगल्भे समर्थे स्वाश्रितान् रक्षितुमिति धिषणे द्यावापृथिव्यौ ॥" इति तद्भाष्ये सायनः ॥*॥
हविर्द्धानस्य पत्नी । यथा, मात्स्ये । ४ । ४५ ।
"हविर्द्धानात् षडाग्नेयी धिषणा जनयत् सुतान् ।
प्राचीनबर्हिषं साङ्गं यमं शुक्रं बलं शुभम् ॥"
क्लो । स्थानम् । यथा, भागवते । ३ । १६ । ३२ ।
"तदा विकुण्ठधिषणात् तयोर्निपतमानयोः ।
हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ॥"
"विकुण्ठस्य धिषणात् स्थानात् ।" इति तट्टीकायां श्रीधरस्वामी ॥)

धिष्ण्यं, क्लो, (धिषणा + निपातनात् यस्य टः ।) स्थानम् । गृहम् । नक्षत्रम् । अग्निः । इत्यमरः । ३ । ३ । १५४ ॥ शक्तिः । इति मेदिनी ॥

धिष्ण्यः, पुं, (धृष्णोति प्रगल्भो भवतीति । धृष + ण्यः । निपातनात् साधुः ।) अग्निः । शुक्राचार्य्यः । इति पुंस्काण्डेऽमरदत्तः ॥

धिष्ण्यं, क्लो, (धृष्णोति प्रगल्भो भवतीति । धृष् + "सानसिवर्णसिपर्णसीति ।" उणां । ४ । १०७ । इति ण्यप्रत्ययः निपातनात् ऋकारस्य च इकारः । स्थानम् । (यथा, भागवते ।२।१।३० ।
"द्यौरक्षिणी चक्षुरभूत् पतङ्गः
पक्ष्माणि विष्णोरहनी उभे च ।
तदभ्रविभ्रमः परमेष्ठिधिष्ण्या-
मापोऽस्य तालू रस एव जिह्वा ॥"
"परमेष्ठिधिष्ण्यं ब्रह्मपदम् ॥" इति तट्टीकायां स्वामी ॥ गृहम् । (यथा, महाभारते ।१७।३।१०।
"स्वर्गे लोके न्यवसं नास्ति धिष्ण्या-
मिष्टापूर्त्तं क्रोधवशा हरन्ति ॥")
नक्षत्रम् । (यथा, सूर्य्यसिद्धान्ते । ११ । २१ ।
"सार्पेन्द्रपौष्णधिष्ण्यानामन्त्या: पादा: भस-
न्त्रयः ॥")
अग्निः । इत्यमरः । ३।३।१५४ ॥ (यथा अथर्ववेदे । २ । ३५ । १ ।
"ये भक्षयन्तो न वसून्यारुधुर्ध्यानमयो अन्वतप्यन्त
धिष्ण्याः ॥")
शक्तिः । इति मेदिनी । ये, ३४ ॥ (उल्कायाभेदः । यथा, बृहत्संहितायाम् । ३३ । १ ।
"दिविभुक्तशुभफलानां
पततां रूपाणि यानि तान्युल्काः ।
धिष्ण्योल्काग्निविद्युत्तारा
इति षड्धा भिन्नाः ॥"
प्राणाभिमानी देवः । यथा, ऋग्वेदे ।३।२२।३।
"अग्ने ! दिवो अर्णमच्छा जिगास्यच्छा देवाँ
ऊचिषे धिष्ण्या ये ॥"
"धियं बुद्ध्युपहितं देहं उच्चान्ति उच्चीकुर्वन्तीति धिष्ण्याः प्राणाभिमानिनो देवाः ।"
इति तद्भाष्ये सायनः ॥)

धी, ञी ङ य आराधे । नादरे । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-अनिट् ।) अनादर इति कालन्तादौ । ञी, धीनः । ङ य, धीयते त्वं लोकः । इति दुर्गादासः ॥

धीः, स्त्री, (धेंै चिन्तने + भावे क्विप् । सम्प्रसारणञ्च ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, मनौ । ६ । ९२ ।

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥")

धीतः, त्रि, पीतः । इति धेधातोः क्तप्रत्ययेन निष्पन्नः ॥

धीतिः, स्त्री, (धेट पाने + क्तिन् ।) पिपासा । इति हेमचन्द्रः । ३ । ५८ ॥

धीदा, स्त्री, (धियं ददातीति । दा + कः । स्त्रियां टाप् ।) कन्या । मनीषा । इति हेमचन्द्रः ॥

धीन्द्रियं, क्ली, (धीजनकमिन्द्रियम् ।) ज्ञानेन्द्रियम् । तद्यथा । मनः १ नेत्रम् २ श्रोत्रम् ३ त्वक् ४ रसना ५ घ्राणम् ६ । इत्यमरः । १ । ५ । ८ ॥

धीमान्, [त्] पुं, (धीरस्त्यस्मीति । धी + मतुप् ।) दृढस्मृतिः । पण्डिते, त्रि । इति मेदिनी । ते, ११५ ॥ (यथा, मनुः । १ । १०२ ।

"तस्य कर्म्मविवेकार्थं धीषाणामनुपूर्व्वशः ।
स्वायम्भुवो मनुर्धीमानिदं शास्त्रमकल्पयत् ॥"

वरपुत्रस्य विराजः पुत्रः ; यथा,—

"नरो गयस्य तनयः ततपुत्रोऽभूत् विराट् ततः ।
तस्य पुत्रो महावीर्य्यो धीमांस्तस्मादजायत ॥"

इति विष्णुपुराणे । २ । ३९ ।

पुरूरवसः उर्व्वशीगर्भजातः पुत्रविशेषः । यथा, महाभारते । १ । ७५ । २४ ।

"षट्सुता जज्ञिरेऽमेलादायुर्धीमानमावसुः ।
दृढायुश्च वनायुश्च शतायुश्चोर्व्वशीसुताः ॥")

धीमती, स्त्री, (धीमत् + स्त्रियां ङीप् ।) बुद्धिमती । इत्यमरः । २ । ६ । १२ ॥

धीरं, क्ली, (धियं रातीति । रा + कः ।) कुङ्कुमम् । इति मेदिनी । रे, ५१ ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"कुङ्कुमं रुधिरं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनन्त्वीरं वाह्लीकं शोणिताभिधम् ॥")

धीरः, पुं, (धियं राति ददाति यशातीति वा । रा + कः ।) ऋषभौषधिः । इति राजनिर्घण्टः ॥ बलिराजः । इति शब्दरत्नावली ॥

धीरः, त्रि, (धियं ईरयतीति । ईर + अच् । यद्वा, धियं रातीति । रा + कः ।) धैर्य्यान्वितः । स्थैर्यः । पण्डितः । इति मेदिनी । रे, ५९ ॥ (यथा, भागवते । ३ । ६ । ३५ ।

"तथापरं चात्मसमाधियोग-
बलेन जित्वा प्रकृतिं बलिष्ठाम् ।
त्वामेव धीराः पुरुषं विशन्ति
तेषां श्रमः स्यान्न तु सेवया ते ॥"

बलयुतः । इति शब्दरत्नावली ॥ मन्दः । इति त्रिकाण्डशेषः ॥ (यथा,—

"देहे समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥"

इति रसमञ्जर्य्याम् ।)

विनीतः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (गम्भीरः । यथा, रघुः । ३ । ४४ ।

"अवोचदेनं गगनस्पृशा रघुः
स्वरेण धीरेण निवर्त्तयन्निव ॥")

धीरत्वं, क्ली, (धीरस्य भावः । धीर + त्व ।) धीरता । यथा,—

"प्रागल्भ्यौदार्य्यमाधुर्य्यस्थैर्याधीरत्वकान्तयः ।
दीप्तिश्चायत्नजा भावहावहेलाः स्त्रियोऽङ्गजाः ॥"

इति हेमचन्द्रः । ३ । १७३ ॥

धीरपत्नी, स्त्री, (धीरं मनोहरं पत्त्रमस्याः । स्त्रियां ङीष् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥

धीरस्कन्धः, पुं, (धीरः अचञ्चलः भारसह इति यावत् स्कन्धो यस्य ।) महिषः । इति हेमचन्द्रः । ४ । ३१८ ॥

धीरा, स्त्री, (धीर + टाप् ।) काकोली । महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (गुडूची । अस्याः पर्य्यायाः यथा,—

"गुडूची मधुपर्णी स्यादमृतास्तन्तवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धीरा विश्वल्या च रसायनी ॥
चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) मानावस्थायां मध्याप्रगल्भानायिकाभेदः । अस्या लक्षणम् । यद्यत्कोपप्रकाशा धीरा । मध्याया धीरायाः कोपव्यञ्जिका गीः । प्रौढ़ाधीरायास्तु रतावौदास्यम् । सा द्विविधा ज्येष्ठा कनिष्ठा च । मध्या धीरा यथा,—

"लोलालिपुञ्जे व्रजतो निकुञ्जे
स्फारा बभूवुः श्रमवारिधारा ।
देहे समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥

प्रौढ़ा धीरा यथा,—

"नो तल्पं भजसे न जल्पसि सुधाधारानुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाशं क्षमात् ।
इत्थं केतकगर्भगौरि ! दयिते कोपस्य संगोपनं
किं स्यादेव न चेत् पुनः सहचरी कुर्व्वीत साचिस्मितम् ॥"

इति रसमञ्जरी ॥

धीराधीरा, स्त्री, (धीरा अधीरा च ।) मानावस्थायां मध्याप्रगल्भा नायिकाभेदः । अस्या लक्षणम् । यद्यदव्यक्तकोपप्रकाशा । मध्यायाः धीराधीरायाः कोपव्यञ्जिके वचनरीती । प्रौढ़ाधीराधीरायाः रतावौदास्यं तर्ज्जनताड़नादि च कोपस्य प्रकाशकम् । सा द्विविधा । ज्येष्ठा कनिष्ठा च । मध्याधीराधीरा यथा,—

"कान्तानुरागचतुरोऽसि मनोहरोऽसि
नाथोऽसि किञ्च नवयौवनभूषितोऽसि ।
इत्थं निगद्य मुदया वदने प्रियस्य
निःस्वस्य वासलुलिता निहिता दृगन्ता: ॥

प्रौढ़ाधीराधीरा यथा,—

"तल्पोपान्तमुपेयुषि प्रियतमे साचीकृतग्रीवया
काकुव्याकुलवाचिसाचिहसितस्फुर्जत्कपोलश्रिया ।
हस्तन्यस्तकरे पुनर्मृदुगिरा लाक्षारसञ्चालित-
प्रौष्ठी प्रेङ्खमयूखमांसलरुचो विस्फारिता दृश्यः ॥"

इति रसमञ्जरी ॥

धीलटिः, स्त्री, (धिया बुद्ध्या लटति बालोक्या मोहयतीति । लट् + "सर्व्वधातुभ्य इन् ।" उणा । ४ । ११७ । इति इन् ।) दुहिता । इति हारावली ॥ २१८ ॥

धीवा, [न्] पुं स्त्री, (ध्यायतीति । धै + "आध्यो: संप्रसारणञ्च ।" उणा । ४ । ११५ । इति कनिप् । संप्रसारणञ्च ।) धीवरः । यथा, बहुधीवरी बहुधीवा । इति मुग्धबोधम् ॥

धीवरः, पुं, (दधाति मत्स्यानिति । धा + "छित्वरच्छत्वरधीवरपीवरेति ।" उणा । ३ । १ । इति वरच् प्रत्ययेन निपातनात् साधुः ।) कैवर्त्तः । इत्यमरः । १ । १० । १५ ॥ (यथा, महाभारते । २ । २० । १७ ।

"यतो हि निम्नं भवति नयन्ति हि ततो जलम् ।
यतश्चिह्नं ततश्चापि गच्छन्ते धीवरा जलम् ॥")

धीवरी, स्त्री, (धीवर + ङीष् ।) धीवरपत्नी । कैवर्त्ती । इति मुग्धबोधम् ॥ मत्स्यवेधिनी । इत्यादिकोषः ॥

धीशक्तिः, स्त्री, (धियः शक्तिः ।) बुद्धिसामर्थ्यम् । तत्पर्य्यायः । निष्क्रमः २ । इत्यमरः । ३ । २ । २५ ॥ सा चाष्टधा यथा,—

"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा ।
ऊहापोहार्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः ॥"

इति भरतः ॥

धीसखः, पुं, (धियः सखा सहायः । "राजाहःसखिभ्यष्टच् । इति टच् ।) मन्त्री । इति हेमचन्द्रः । ३ । ३८३ ॥

धीसचिवः, पुं, (धियि बुद्धौ मन्त्र्यादौ सचिवः सहायः ।) मन्त्री । इत्यमरः । २ । ८ । ४ ॥

धु, ञ न कम्पे । इति कविकल्पद्रुमः ॥ (स्वां-उभं-सकं-अनिट् ।) ञ न, धुनोति धुनुते । कम्प इह आन्तस्य रूपम् । धुनोति चम्पकवनानि धुनोत्यशोकं वायुरिति रूपायुधः । इति दुर्गादासः ॥

धुः, स्त्री, (धवनमिति । धु कम्पने + भावे डुः ।) कम्पनम् । इत्येकाक्षरकोषः ॥

धुच्च, ड सन्दीपने । क्लेशे । जीवे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) पञ्चमस्वरी । ड, धुच्चते वह्निः सन्दीप्यते इत्यर्थः । धुच्चते जनः क्लिश्यति जीवति वेत्यर्थः । इति दुर्गादासः ॥

धुन्धुमा

धुतः, त्रि, (धु + क्तः।) त्यक्तः। विधूतः। इति मेदिनी। ते, २८॥ (यथा, रघुः। ११। १६।

"तीव्रवेगधुतमार्गदृष्टया
प्रेतचीवरवसा खनोग्रया।
अभ्यभावि भरताग्रजस्तया
वात्ययेव पिटकाननोत्यया॥")

धुनिः, स्त्री, (धुनोति वेतसादिनदीजातदृष्टानिति। धु कम्पने + बहुलवचनात् निः स च कित्।) नदी। इत्यमरटीकायां भरतः॥ (यथा, ऋग्वेदे। २। ३०। २।

"प्रथोदश्नीरनुजोषमस्मे
दिवे दिवे धुनयो यन्त्यर्थम्॥"

पुं, जलप्रतिरोधकोऽसुरविशेषः। यथा, तत्रैव। १। १७३। ६।

"त्वं धुनिरिन्द्रधुनिमतीर्ऋणोरपः सीरान-
स्वनयः॥"

"हे इन्द्र त्वं धुनिः कम्पयिता मेघानामसि अतो धुनिमतीः कम्पनोपेतस्तरङ्गवतीः अथवा धुनिनामजलप्रतिरोधकार्य्यं रः स एव प्रतिबन्धकतया यासां ताडग्रीरपः॥" इति तद्भाष्ये सायनः। धूनयति कम्पयति मेघानिति। मरुद्विशेषः। यथा, वाजसनेयसंहितायाम्। ३६। ७।

"उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च॥"

कम्पयितरि, त्रि। यथा, ऋग्वेदे। १। ७६। १।

"हिरण्यकेशो रजसोविसारेऽहिर्धुनिर्वात इव
ध्रजीमान्॥")

धुनी, स्त्री, (धुनि + ङादिकारादिति वा ङीष्।) नदी। इत्यमरः। १। १०। ३०॥ (यथा भागवते। ४। २६। ५५।

"सत्वं विचस्व क्षणमेहितमात्मनोऽन-
र्चित्तं नियच्छ हृदि कर्णधुनीच चित्ते॥")

धुनीनाथः, पुं, (धुनीनां नदीनां नाथः।) समुद्रः। इति राजनिर्घण्टः॥

धुन्धुमारः, पुं, (धुन्धुं तन्नामकं राक्षसं मारयतीति। मारि + अण्।) कुवलयाश्वराजः। स तु बृहदश्वपुत्रः। इति पद्मपुराणम्॥ (अस्य धुन्धुमारराजकथा यथा, हरिवंशे। ११। ३६—५५।

"स एवमुक्तो राजर्षिरुतङ्केन महात्मना।
कुवलाश्वं सुतं प्रादात् तस्मै धुन्धुनिवारणे॥
बृहदश्व उवाच।
भगवन्! न्यस्तशस्त्रोऽहमयन्तु तनयो मम।
भविष्यति द्विजश्रेष्ठ! धुन्धुमारो न संशयः॥
स तं आदिश्य तनयं राजर्षिर्धुन्धुमारणे।
जगाम पर्वतायैव तपसे संशितव्रतः॥
कुवलाश्वस्तु पुत्राणां शतेन सह पार्थिव!।
प्रायाद्उतङ्कसहितो धुन्धोस्तस्य परिग्रहे॥
तमाविशत्तदा विष्णुर्भगवांस्तेजसा विभुः।
उतङ्कस्य नियोगाद्वै लोकानां हितकाम्यया॥
तस्मिन् प्रयाते दुर्द्धर्षे दिवि शब्दो महानभूत्।
एष श्रीमान्नृपसुतो धुन्धुमारो भविष्यति॥
दिव्यैर्माल्यैश्च तं देवाः समन्तात् समवाकिरन्।
देवदुन्दुभयश्चापि प्रणेदुर्भरतर्षभ!॥

धुरन्ध

स गत्वा जयतां श्रेष्ठस्तनयैः सह वीर्य्यवान्।
समुद्रं खानयामास वालुकार्णवमव्ययम्॥
नारायणेन कौरव्य! तेजसाप्यायितः स वै।
बभूव सुमहातेजा भूयो बलसमन्वितः॥
तस्य पुत्रैः खनद्भिस्तु वालुकान्तर्हितस्तदा।
धुन्धुरासादितो राजन्! दिग्रमाश्रित्य पश्चिमाम्॥
मुखजेनाग्निना क्रोधात्लोकानुद्दहतीवच।
वारि सुस्राव वेगेन महोदधिरिवोदये॥
सोमस्य भरतश्रेष्ठ! धारोर्म्मिकलिलं महत्।
तस्य पुत्रशतं दग्धं त्रिभिरुज्झन्तु रक्षसा॥
ततः स राजा कौरव्य! राक्षसं तं महाबलम्।
आससाद महादेवा धुन्धुं धुन्धुनिवर्हणः॥
तस्य वारिमयं वेगमापीय स नराधिपः।
योगी योगेन वह्निञ्च शमयामास वारिणा॥
निहत्य तं महाकायं बलेनोदकराक्षसम्।
उतङ्कं दर्शयामास कृतकर्म्मा महायशाः॥
उतङ्कस्तु वरं प्रादात् तस्मै राज्ञे महात्मने।
अदद्राज्यं वित्तं शत्रुभिश्चापराजयम्॥
धर्म्मे रतिञ्च सततं स्वर्गे वासं तथाक्षयम्।
पुत्राणाञ्चाक्षयाल्लोकाँ कान् स्वर्गे ये राक्षसा
हताः॥"*॥)

धूम्रगोपः। धूमधूमः। पदातिकः। इति मेदिनी। रे, २७०॥

धुरन्धरः, पुं, धववृक्षः। इति रत्नमाला॥ (पर्य्यायोऽस्य यथा,—

"धवो धटो नन्दितरुः स्थिरो गौरो धुरन्धरः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

धुरं धरतीति। धृ + खच् + मुम्।) रथलाङ्गलादिभारवोढा। तत्पर्य्यायः। धुर्व्वहः २ धुर्य्यः ३ धौरेयः ४ धुरीणः ५। इत्यमरः। २। ६। ६५॥ यथा,—

"धुरन्धरो धुरीणश्च धौरेयधुर्य्यधुर्व्वहाः।
यत्र काम्यरथस्यापि लाङ्गलस्यापि वा धुरम्॥
वहत्येकधुरीणः स्यात्तथा चैकधुरोऽपि च।
स तु सर्व्वधुरीणः स्यात् सर्व्वा वहति यो धुरः॥"

इति शब्दरत्नावली॥

(आदित्यवृषस्य मन्त्री। स तु कौशलेन राजानं हत्वा स्वयमेव राज्यमकरोत्॥ यथा, राजावल्याम् २ परिच्छेदे।

"आदित्यस्य तदा मन्त्री अदूरान्वयसम्भवः।
धुरन्धराभिधो धीरो बलबुद्धिनिकेतनः॥
सेनापतीन् वशीचक्रे धनमानप्रदानतः।
एकदा स तमादित्यमादित्यसमवर्चसम्॥
एकान्ते नृपमासीनं हत्वा हृतमतिस्तदा।
तदासनं समारुह्य राज्यं प्राप्तादुधुरन्धरः॥
भूमिवेदमितान्वर्षान्भुक्त्वा भोगानयुक्तमान्।
सेनोद्धतं सुतं राज्ये स्थापयित्वा लयं गतः॥"

राक्षसविशेषः। स तु प्रहस्तस्य सचिवविशेषः। यथा, गोः रामायणे। ६। ३२। १५।

"एतस्मिन्नन्तरे शूराः प्रहस्तस्य वशानुगाः।
धुरन्धरः कुम्भहनुर्महानादः समुन्नदः।
एते प्रहस्तसचिवाः सर्व्वे जग्मुर्वनौकसः॥")

धुस्तुरः

धुर्व्वाष्टकमात्रे, त्रि॥ (यथा, महाभारते। ३। १८६। १०।

"अनड्वाहं सुव्रतं यो ददाति
हलस्य वोढारमनन्तवीर्य्यम्।
धुरन्धरं बलवन्तं युवानं
प्राप्नोति लोकान् दशधेनुदस्य॥"

श्रेष्ठः। यथा, तत्रैव। १३। १३७। ३१।

"दत्त्वा तु सततं तेषु कौरवाणां धुरन्धर!।
दानयज्ञक्रियायुक्ता बुद्धिर्धर्म्मोपचायिनी॥")

धुरा, स्त्री, (धुर् + पचे टाप्।) धूः। भारः। इत्यमरटीकायां भरतः॥

धुरीणः, त्रि, (धुरं वहतीति। "खः सर्व्वधुरात्।" ४। ४। ७८। इत्यत्र योगविभागवत् खः।) भारवाहः। इत्यमरः। २। ६। ६५॥ (श्रेष्ठः। यथा, पञ्चतन्त्रे। ३। २०७।

"हे ब्रह्मव्रतधराणां धुरीण! त्वयापि मय्युपेक्षितमित्यादुक्त्वा स्कन्धादुत्तार्य्य यत्र यत्र खजनग्रहद्वारादिषु बभ्राम॥")

धुरीयः, पुं, (धुरमर्हतीति। छः।) अनड्वान्। इति राजनिर्घण्टः॥ भारयोग्ये, त्रि॥

धुर्य्यः, त्रि, (धुरं वहतीति। धुर् + "धुरो यड्ढकौ।" ४। ४। ७७। इति यत्। "न भकुर्छुराम्।" ८। २। ७६। इति न दीर्घः।) धुरन्धरः। इत्यमरः। २। ६। ६५॥ (यथा, रघुः। ५। ६६।

"तामेकतस्तव बिभर्त्ति गुरुर्विनिद्र-
स्तस्या भवानपरधुर्य्यपदावलम्बी॥"

श्रेष्ठः। यथा, भागवते। ४। २२। ४६।

"वयन्तु धुर्य्यो महतां संस्थित्याध्यात्मशिक्षया॥"

ऋषभौषधौ अनड्वहि च पुं। इति राजनिर्घण्टः॥ (अश्वादिरपि। यथा, महाभारते। ३। १६७। १२। "पुनरपि चान्योऽप्यर्थी ब्राह्मण आगच्छत्। त्वरितोऽथ तस्मै अपनयन् वामं धुर्य्यमददत् अथ प्रायात्॥")

धुर्व, ई हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) स्त्री। धूः धुरौ धुरः। ई, धूर्णः। कितवे वाच्ये धूर्त्तः। इति मनीषादित्वान्निपात्यः। इति दुर्गादासः॥

धुवका, स्त्री, (धवति पुनः पुनरुच्चारणेन गीतं कम्पयतीवेति। धू कम्पने + "कृञ्श्रिच्छिसंज्ञयोरपूर्व्वस्यापि।" उणां २। ३२। इति कुन्। ततष्टाप्।) ध्रुवका। इत्युणादिकोषः॥ धूवा इति भाषा॥

धुवनः, पुं, (धवतीति। धू + "भूसूधूभ्यस्त्रिभ्यश्छन्दसि।" उणां २। ८०। इति क्युन्।) अग्निः। इति सिद्धान्तकौमुदी॥ (यथा, शतपथब्राह्मणे। १३। २। ८। ५।

"ये यज्ञे धुवनं तन्वते॥")

धुवित्रं, क्ली, (धूयतेऽनेनेति। धू + इत्र।) यज्ञाग्निज्वालनार्थमृगचर्म्मरचितव्यजनम्। इत्यमरः। २। ७। २३॥

धुस्तुरः, पुं, धुस्तूरः। इत्यमरटीकायां भरतः॥

धूस्तरः, पुं, (धूनोति कम्पयति चित्तं सेवनेन । धू कम्पने + "खर्जिपिञ्जादिभ्य उरोलचौ ।" उणां ४ । ६० । इति ऊरः । "धूनोतेः सुट् च ।" इत्यञ्चलदत्तोक्त्या सुट् ।) त्रुपविशेषः । धुतुरा । इति भाषा । तत्पर्य्यायः । उन्मत्तः २ कितवः ३ धूर्त्तः ४ कनकाह्वयः ५ मातुलः ६ मदनः ७ । इत्यमरः । २ । ४ । ७७ ॥ धत्तूरः ८ । इति हैमचन्द्रः ॥ प्रगटः ९ मातुलकः १० श्यामः ११ शिवशेखरः १२ खर्ज्जूरः १३ काहलापुष्पः १४ खलः १५ कण्टफलः १६ मोहनः १७ कलभः १८ मत्तः १९ शैवः २० । इति राजनिर्घण्टः ॥ देविका २१ तूरी २२ महामोही २३ शिवप्रियः २४ धुस्तूरः २५ धुस्तुरः २६ । इति शब्दरत्नावली ॥ अस्य गुणाः ॥ मद्यवर्णाग्निवातकारित्वम् । ज्वरकुष्ठयकालिखाक्रमश्लेष्मकण्डूकृमिविषनाशित्वम् । कषायत्वम् । मधुरत्वम् । तिक्तत्वम् । उष्णत्वम् । गुरुत्वञ्च । इति भावप्रकाशः ॥ कटुत्वम् । कान्तिकारित्वम् । त्वग्दोषखर्ज्जूभ्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥ मूर्च्छाकारित्वम् । वह्निपित्तनाशित्वञ्च । इति राजवल्लभः ॥ (उपविषविशेषोऽयम् । तद्यथा,—

"अर्कक्षीरं खुहीक्षीरं तथैव कालहारिका ।
करवीरकधुस्तूरौ पञ्च क्षीरविषाणि तत् ॥
अर्कक्षीरं खुहीक्षीरं लाङ्गलीकरवीरकम् ।
गुञ्जाहिफेनधुस्तूरौ सप्तोपविषजातयः ॥"

इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे विषाधिकारे ॥)

धू, ञ कम्पे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-वेट् ।) स चेहापि कम्पप्रेरणमेव । ञ, धवति धवते । धवति चन्दनमञ्जरीत्येति हलायुधः । इति दुर्गादासः ॥

धू, न ञ णि कम्पे । इति कविकल्पद्रुमः ॥ (स्वां-क्रां च-उभं-सकं-वेट् ।) स चेहापि कम्पप्रेरणम् । न ञ, धूनोति धूनुते । णि ञ, धुनाति धुनोति । धूनः धूनिः । धूनोति चम्पकवनानीति हलायुधः । धुनाति वायुरश्वत्थम् । धूनोते वल्गूकं तिलकुसुमनासा हि पवनः । इति दुर्गादासः ॥

धू, णि क कम्पे । इति कविकल्पद्रुमः ॥ (तुदां-चुरां-च-सकं-सेट् ।) कम्प इह भ्रान्तस्य रूपम् । णि, धूवति मारुतो मालतीलताम् । अधूवीत् । क, धावयति । वायुर्विधूनयति केशरपुष्परेणूनिति चुरादौ हलायुधः । प्रीधूनोर्नन् वा इत्यत्र धूग्रहणादस्य कथं नत्वमिति चेन्न । स्वार्थविहितस्य णेरेकारेण समत्वस्य वाच्यत्वात् । अन्यथा कम्पप्रेरणे धूनवति इत्यादिप्रयोगा न स्युः । धूनोतीत्वादीनां साध्वा इति चेत् स्वभावात् कम्पप्रेरणार्थानां तेषां नौ हृते कम्पप्रेरणस्य प्रेरणभेदार्थः स्यात् । किञ्च कम्पनार्थायां धूनयतीत्वादीनामावश्यकत्वात् ततूस्त्रे णकारः प्राचीनमतानुवादार्थ एव । इति दुर्गादासः ॥

धूः, [र्] स्त्री, (धुर्व्वतीति । धुर्व्व + क्विप् ।) यानसुखम् । रथादेरग्रभागः । इत्यमरः । २ । ८ । ५५ ॥ (यथा, महाभारते । १ । १३६ । २१ । "क्षणात् प्रांशुः क्षणाद्धस्वः क्षणाच्च रथधूर्गतः ॥") भारः । (यथा, रघुः । १० । ३४ । "तेन धूर्जगतो गुर्व्वी सचिवेषु निचिक्षिपे ॥") चिन्ता । इत्येकाक्षरकोषः ॥ (अग्रम् । यथा, रघुः । २ । २ ।

"अपांसुलानां धुरि कीर्त्तनीया ॥"

हिंसके, त्रि । यथा, ऋग्वेदे । १० । ६४ । ७ ।

"दशधुरो दशयुक्ता वहन्ति ॥"

"दशभिर्धुरो धूर्भिर्हिंसिकाभिः । तृतीयार्थे प्रथमा ।" इति तद्भाष्ये सायणः ॥)

धूकः, पुं, (धूनोति कम्पयतीति । धू + "अजिदृधूनीभ्यो दीर्घश्च ।" उणां ३ । ४७ । इति कन् ।) वायुः । इत्युणादिकोषः ॥ धूर्त्तः । काणः । इति संक्षिप्तसारोणादिवृत्तिः ॥

धूतः, त्रि, (धू + क्तः ।) कम्पितः । (यथा, मेघदूते । ३५ ।

"धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडाविरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥")

भर्त्सितः । इति मेदिनी । ते, २८ ॥ व्यक्तः । इत्यमरः । ३ । १ । १०७ ॥ तर्कितः । इति धरणिः ॥

धून्, त्रि, (धू + "क्वादिभ्यः ।" ८ । २ । ४४ । इति निष्ठातस्य नः ।) कम्पितः । धूधातोः क्तः खादित्वात्तस्य नादेशः । इति संक्षिप्तसाराकरणम् ॥

धूनकः, पुं, (धूनयति संधुक्षयति अग्निमिति । धू + णिच् + ण्वुल् ।) वह्निवल्लभः । इति त्रिकाण्डशेषः ॥ धूना इति भाषा ॥

धूनन न्, क्ली, (धू + णिच् + ल्युट् ।) कम्पनम् । काँपान । इति भाषा । इति भ्वन्तधूधातोरनटा साध्यम् ॥ (यथा, राजतरङ्गिण्याम् । ६ । १२ । "क्रूरात्मा भक्तिशीलश्रीनिषेधं सधूधूनने ॥")

धूनिः, स्त्री, कम्पनम् । धूधातोः क्निस्थाने खादित्वान्निः । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥

धूप, तापे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) षष्ठस्वरी । धूपायति धूपायते । आयन्तत्वादुभयपदमिति वोपदेवः । अरे तु आयस्याप्राप्तिपक्षे परस्मैपदमेव । अधूपीत् दुधूप इत्यादि । तापः सन्तापीकरणम् । इति दुर्गादासः ॥

धूप, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट ।) क, धूपयति । इति दुर्गादासः ॥

धूपः, पुं, (धूपयति सुगन्धेन प्रीणयित्वा दीप्यतीति । धूप + अच् ।) गन्धद्रव्यविशेषोत्थधूमस्तद्दर्शिच । तत्पर्य्यायः । गन्धनिर्य्यासिका २ । इति हैमचन्द्रः । ३ । ३१३ ॥ * ॥ यथा,—

"एवं वां कथितो दीपो धूपश्च शृणुतं सुतौ ।
नासाश्चिरन्तसुखदः सुगन्धोऽतिमनोहरः ॥
दह्यमानस्य काष्ठस्य प्रयतस्येतरस्य वा ।
परागस्याथवा धूमो निस्तापो यस्य जायते ॥
स धूप इति विज्ञेयो देवानां तुष्टिदायकः ।
राज्ञीतेनैव चेकत्र तैर्द्रव्यैः परिधूपयेत् ॥
ओषधिवत्तथा कृत्वा न तत्फलमवाप्नुयात् ।
श्रीचन्दनञ्च सरलः सालः कालागुरुस्तथा ॥
उदयः सुरथः कन्दो रक्तविद्रुम एव च ।
पीतसालः परिमली विमर्द्दोकासनस्तथा ॥
नमेरुर्देवदारुश्च विल्वसारोऽथ खादिरः ।
सन्तानः पारिजातश्च हरिचन्दनवल्लभौ ॥
एतेषु धूपाः सर्व्वेषां प्रीतिदाः परिकीर्त्तिताः ।
अरालः सह सल्लक्या श्रीवासः पटवासकः ॥
कर्पूरः श्रीकरश्चैव परागः श्रीहरामलौ ।
सर्व्वौषधिरजोजातो वाराहचूर्ण उत्कलः ॥
जातीकोषस्य चूर्णश्च गन्धः कस्तूरिका तथा ।
घोदे दत्ते च गादता धूपा एते उदाहृताः ॥
यश्चधूपो टकधूपः श्रीपिण्डोऽगुरुभर्करः ।
पत्रिवाहः पिण्डधूपः सुगोलः कण्ठ एव च ॥
अन्योन्ययोगनिर्य्यासा धूपा एते प्रकीर्त्तिताः ।
एतैर्विधूपयेद्देवान् धूमिभिः क्षणवर्त्मना ॥
येषां धूपोद्भवैर्धूमैस्तुष्टिं गच्छन्ति जन्तवः ।
निर्य्यासश्च परागश्च काष्ठं गन्धं तथैव च ॥
क्षत्रिमश्चेति पञ्चैते धूपाः प्रीतिकरा मताः ।
न यश्चधूमं वितरेत् माधवाय कदाचन ॥
न रक्तविद्रुमं मह्यं सुरथं स्कान्दनं तथा ।
यश्चधूपः पत्रिवाहः पिण्डधूपः सुगोलकः ॥
कृष्णागुरुः सकर्पूरो महामायाप्रियः स्मृतः ।
यश्चधूपेन वा देवीं महामायां प्रपूजयेत् ॥
यश्चधूपेनेत्यत्र टकधूपेनेति च पाठः ॥
मेदोमज्जासमायुक्तान् न धूपान् विनिवेदयेत् ।
परकीर्य्यांस्तथा भ्रातॄन् स्वेनीकृत्याभिमर्हितान् ॥
पुष्पं धूपञ्च गन्धञ्च उपचारांस्तथापरान् ।
भ्रातॄन्निवेद्य देवेभ्यो नरो नरकमाप्नुयात् ॥
न भूमौ वितरेत् धूपं नासने न घटे तथा ।
यथा तथाधारगतं कृत्वा तद्विनिवेदयेत् ॥
रक्तविद्रुमशालौ च सुरथः सरलस्तथा ।
सन्तानको नमेरुश्च कालागुरुसमन्वितः ॥
जातीकोषाद्यसंयुक्तो धूपः कामेश्वरीप्रियः ।
त्रिपुरायास्तथैवायं मातॄणामपि नित्यशः ॥
सर्व्वेषां पीठदेवानां कान्तादीनाञ्च पुत्रक ! ।
एष वां कथितो धूपः शृणु तं नेचरञ्जनम ॥"

इति कालिकापुराणे ६८ अध्यायः ॥

अपि च ।

"पुष्पाणि च सुगन्धीनि धूपश्च घृतसंयुतम् ।
गुग्गुलुं कुन्दुरुं चैव देवदारु तुरुष्ककम् ॥
सिल्हकं चन्दनं काष्ठं श्रीवासं चागुरुं तथा ।
सर्व्वरसं नखं चैव देवे पैत्रे च कर्म्मणि ॥"

इति वह्निपुराणे भोजनविधाननामाध्यायः ॥*॥

रोगनाशकधूपो यथा,—

"कुक्कुरमत्स्याखुमहिषगोऽहगालाश्ववानराः ।
विड़ालबर्हिकाकाश्च वराहोलूककुक्कुटाः ॥
हंस एषाश्च विण्मूत्रं मांसं वा रोम शोणितम् ।
धूपं दद्याज्ज्वरार्त्तस्य उन्मत्तेभ्यश्च शान्तये ॥

धूपः

एतान्योषधजातानि धूपितानि महेश्वर ! ।
निघ्नन्ति रोगजातानि दृष्टमिन्द्राग्निर्यथा ॥"
इति गारुडे १६६ अध्यायः ॥

(यथा,—
"पुरध्यामवचासर्ज्जनिम्बार्कागुरुदारुभिः ।
सर्व्वज्वरहरो धूपः कार्य्योऽयमपराजितः ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

षड़ङ्गधूपो यथा,—
"गुग्गुल्वगुरुउशीरशर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नीचैर्देवस्य देशिकः ॥"
अन्यच्च ।
"सिताज्यमधुसंमिश्रं गुग्गुल्वगुरुचन्दनम् ।
षड़ङ्गधूपमेतत्तु सर्व्वदेवप्रियं सदा ॥"

दशाङ्गो यथा,—
"रोमरोगकरीरोगदकेशाः
सुरतरञ्जतुलसुपत्रविशेषाः ।
वल्लविवर्ज्जितवारिजसुद्रा
धूपवर्त्तिरिह सुन्दरि ! भद्रा ॥"
अन्यच्च ।
"मधु सर्ज्जं घृतं गन्धो गुग्गुलागुरुशैलजम् ।
सरलं चिञ्चिड़ार्थे दशाङ्गो धूप उच्यते ॥"

षोड़शाङ्गो यथा,—
"गुग्गुलुं सरलं दारु पत्रं मलयसम्भवम् ।
ह्रीवेरमगुरुं कुष्ठं गुड़ं सर्ज्जरसं घनम् ॥
हरीतकीं नखीं लाक्षां जटामांसीञ्च शैलजम् ।
षोड़शाङ्गं विदुर्धूपं देवे पित्र्ये च कर्म्मणि ॥"
इति तन्त्रसारः ॥ * ॥

केशवार्य्यायां षोड़शाङ्गधूपो यथा,—
"सर्ज्जकं गुग्गुलुः कुष्ठं कर्पूरं मलयोद्भवम् ।
देवदारु जटामांसी जातीकोषञ्च वालकम् ॥
सरा मांसी त्वगुरुकं त्वगुशीरञ्च केशरम् ।
एला तथा तेजपत्रं सर्व्वमेतदृतात्तकम् ॥
धूपोऽयं षोड़शाङ्गः स्यादृगोविन्दप्रीतिकारकः ॥"

द्वादशाङ्गो यथा,—
"गुग्गुलुश्चन्दनं पत्रं कुष्ठञ्चागुरु कुङ्कुमम् ।
जातीकोषञ्च कर्पूरं जटामांसी च वालकम् ।
त्वगुशीरञ्च धूपोऽसौ द्वादशाङ्गः प्रकीर्त्तितः ॥"

दशाङ्गो यथा,—
"कर्पूरं कुष्ठमगुरु गुग्गुलुर्मलयोद्भवम् ।
केशरं वालकं पत्रं त्वगजातीकोषसुत्तमम् ॥
सर्व्वमेतदृतयुतं दशाङ्गो धूप ईरितः ॥"

अष्टाङ्गो यथा,—
"गुग्गुलागुरुकं तैलपर्णं मलयसम्भवम् ।
कर्पूरं वालकं कुष्ठं नूतनं कुङ्कुमं तथा ॥
अष्टाङ्गः कथितो धूपो गोविन्दप्रीतिदः शुभः ॥"

षड़ङ्गो यथा,—
"चन्दनं कुङ्कुमं नूत्नं कर्पूरं गुग्गुलोर्गुड़ ।
धूपोऽयं घृतसंयुक्तः षड़ङ्गः सर्व्वदाशुभः ॥"

सकुन्दधूपे वर्জ্জनीयद्रव्यम् । यथा,—
"ऐचवं ग्राजनिर्य्यासं पद्मकं धरलञ्च तु ।
वचा मधुरिका तैलं गन्धकाष्ठं वलामकम् ॥
गन्धकं टङ्कणं तालं हिङ्गुलञ्च मनःशिला ।

धूपाङ्गः

कक्कोलमुशीरं दार्व्वी गन्धमाद्री रसाञ्जनम् ॥
अगुरुर्वर्गः ग्रन्थी मेथी शिलाजित्रन्थचन्दनम् ।
कुन्दुरु रेणुकं राजाजमोदा घृतपुष्पिका ॥
हरिद्रा जीरकं दृष्टचोरच्च रक्तचन्दनम् ।
कर्पूरकं मरुवकं यवानी ग्रन्थिकन्तथा ॥
ग्रैलजं धातकीपुष्पं नखी भोचरसादिकम् ।
सकुन्दधूपे देवर्षे ! सर्व्वमेतदृविर्ज्जयेत् ॥"
इति पाद्मोत्तरखण्डम् ॥

धूपदानविधिर्यथा,—
"मध्यमानामिकाभ्यान्तु मध्यपर्व्वभि देशिकः ।
अङ्गुष्ठाग्रेण देवेशि ! धृत्वा धूपं निवेदयेत् ॥
धूपस्थानं समभ्यर्च्च तर्জ্জन्या वामयाभृशम् ।
धूपभाजनमस्त्रेण प्रोक्षाभ्यर्च्च हृदाद्यना
उत्तीर्य्य दक्षिणंपार्श्वन्तं घण्टां वामदिशि स्थिताम् ।
वादयन् वामहस्तेन दक्षहस्तेन चार्पयेत् ॥"
इति तन्त्रसारः ॥

गन्धमाल्यमदत्त्वा धूपदाने दोषो यथा,—
"अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति ।
कूष्मपो जायते भूमे यातुधानो न संशयः ॥
वर्षाणि चैकविंशानि अयस्कारनिवासकः ।
तिष्ठतेऽत्र महाभागे ! एवमेतन्न संशयः ॥"
इति वराहपुराणम् ॥ * ॥

विघ्नघ्नधूपो यथा,—
"सक्तुः सर्व्वरसोपेतः सर्व्वधा रुलवालुकैः ।
सुवर्णा तस्करतरोः कुसुमैरर्জ্জुनस्य तु ॥
धूपो वाचयदे हन्ति विषं स्थावरजङ्गमम् ।
न तत्र कीटा न विषं न दर्दुरसरीसृपाः ॥
न ज्ञाला कर्म्मणस्तत्र धूपोऽयं यत्र दृश्यते ॥"*॥

सर्व्वनिर्म्मोचधूपो यथा,—
"कार्पासास्थिरुजन्नस्य यथा निर्म्मोचनं भवेत् ।
सर्व्वनिर्म्मोचनो धूपः प्रशस्तः सततं गृहे ॥"
इति मत्स्यपुराणे १६२ अध्यायः ॥

धूपनः, पुं, (धूपयति संधूपयति वह्निमिति । धूप + ल्युः ।) ग्राजवृक्षनिर्य्यासः । धूना इति भाषा । तत्पर्य्यायः । ग्राजवेष्टः २ सर्ज्जरसः ३ वह्निवल्लभः ४ । इति शब्दमाला ॥ (यथा, भट्टः । ७ । २१६ ।
"परीक्षिताः स्त्रियश्चैव अजगोदधूपनैः ।
वेषाराभरणसंगुप्ता रक्षेयुः सुसमाहिताः ॥"
क्ली, धूप + ल्युट् । धूपादिना संशुद्धद्रव्यम् । यथा, महाभारते । १३ । ६६ । ७ ।
"समिदार्य्याणि समिधः कुशाः सुमनसस्तथा ।
वलयश्चाज्यजाताभिर्धूपनं दीपकर्म्म च ॥")

धूपवृक्षः, पुं, (धूपोत्पादको वृक्षः ।) सरलवृक्षः । इति त्रिकाण्डशेषः ॥ (सरलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

धूपवृक्षकः, पुं, (धूपवृक्ष + स्वार्थे कन् ।) सरल-वृक्षः । इति शब्दरत्नावली ॥

धूपागुरु, क्ली, (धूपाय संशुद्धाय यदगुरु ।) दशाङ्गागुरु । इति राजनिर्घण्टः ॥

धूपाङ्गः, पुं, (धूपसाधनमङ्गं यस्य ।) श्रीवेष्टः । इति राजनिर्घण्टः ॥

धूमः

धूपायितः, त्रि, (धूप्यते स्मेति । धूप सन्तापे + "आयादय आधातोर्वा ।" ३ । १ । २१ । इति आयः । ततः क्तः ।) सन्तप्तः । अभ्यादिना आक्तः । इत्यमरभरतौ ॥ दत्तधूपयुक्तादि । यथा, तत्रैव प्रमोदे ।
"प्रदीपमरिदीपिते विविधधूपधूपायिते ॥"

धूपार्हः, क्ली, (धूपाय अर्हति पूज्यते इति । अर्ह पूजायाम् + घञ् ।) ग्रजवृक्षगुरु । इति राज-निर्घण्टः ॥ धूपयोग्ये, त्रि ॥

धूपितः, त्रि, (धूपयते स्मेति । धूप + क्तः ।) सन्ता-पितः । (यथा, हरिभक्तिविलासे ।
"ततो गन्धप्रदिग्धञ्च गृहीत्वा धूपितं बुधः ।
भगवन्तं नमस्कृत्य भक्त्या संप्रार्थयेदिदम् ॥")
अभ्यादिना आक्तः । इत्यमरभरतौ ॥ दत्त-धूपः । यथा,—
"अभ्यादिना दोहदधूपितो द्रुमः ।"
इति हेमचन्द्रः ॥

धूमः, पुं, (धूनोति धूयते वा । धू + मक् कर्म्मणि + "इषि-युधीन्धीति ।" उणा १ । १४४ । इति मक् ।) आग्नेयजलभवः । धूँया इति भाषा । तत्-पर्य्यायः । भस्मः २ मरुद्वाहः ३ खतमालः ४ शिखिध्वजः ५ अग्निवाहः ६ तरी ७ । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । ७ । २६ ।
"हविःग्रमीपल्लवलाजगन्धी
पुरः ग्रभानोरुदियाय धूमः ॥")
अस्य गुणः । वातपित्तहरत्वम् । इति राजवल्लभः ॥ स च मेघाञ्जनयोर्जनकः ॥ (यथा, मेघदूते । ५ ।
"धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः ॥"
भौमादिवदुत्तरपदलोपे धूमकेतुः । यथा, मार्कण्डेये ।
"उल्कापाते च निर्दिघं धूमे पञ्चदिनानि च ॥"
उद्गारजलवायुविशेषः । चोँया ढेँकुर इति भाषा ॥ यथा, आह्निकतत्त्वधृतवचनम् ।
"धूमोद्गारे तथा वान्ते क्षुरकर्म्मणि मैथुने ॥"
चिकित्सावाविशेषः । यथा,—
"श्वेता श्रीतिग्मतो चैव हरितालं मनःग्रिला ।
गन्धाश्वागुरुपत्राद्या धूमो गर्ह्यविरेचनम् ॥
गौरवं ग्रिरसः शूलं पीनसार्द्धावभेदकौ ।
कर्णाक्षिशूलं कासश्च हिक्काश्वासौ गलग्रहः ॥
दन्तदौर्ब्बल्यमास्रावः सोत्क्लेशाक्षिविदोषकः ॥
पूतिघ्राणास्यगन्धत्वं दन्तशूलमरोचकः ॥
हनुमन्याग्रहः कण्डूः क्रिमयः पाण्डुता मुखे ।
ग्रेष्मप्रसेकौ वैस्वर्य्यं गलमुष्कुण्डिकाः ॥
स्खालित्यं पिञ्जरत्वञ्च केशानां पतनन्तथा ।
चक्षुषोऽतिसन्ध्या च वृद्धेर्मोहोऽतिनिद्रता ॥
धूमपानात् प्रशाम्यन्ति बलं भवति चाधिकम् ।
ग्रिरोरुहकषायाणामिन्द्रियाणां खरत्वञ्च ॥"
"स्नाता सुक्ता यशुद्धिस्थ क्षुत्वा दन्तान्
वधृप्य च ।
नावनाञ्जननिद्रान्ते वातघ्नान् धूमपो भवेत् ॥
तथा वातकफात्मानो न भवन्त्यरुजाः ।
रोगास्तस्य तु पेयाः सुरापायोसस्वरूपजः ॥

परं द्विकालपायी स्यादङ्गः कालेषु बुद्धिमान् ।
प्रयोगे स्नेहिके स्नेहं वैरेयं चिन्तयेत्पिबेत् ॥
सुतृप्तेन्द्रियसंशुद्धिर्बलं शिरसः शमः ।
यथेरितानां दोषाणां सम्यक् पीतस्य लक्षणम् ॥
आधिर्यमाद्यं सुकलं रक्तपित्तं शिरोऽक्षमम् ।
वमथुश्चातिपीतस्य धूमः कुर्यादुपद्रवान् ॥"
"न विरिक्तः पिबेद्धूमं न तृषितो बस्तिकर्म्मणि ।
न रूक्षो न विषेणार्त्तो न क्षीणो न च गर्भिणी ॥
न श्रमे न मदे न्यासे न पित्ते न प्रजागरे ।
न मूर्च्छा भ्रमतृष्णासु न क्षीणे नापि च क्षते ॥
न मद्यदुग्धे पीत्वा च न स्नेहं नस्य माचिकम् ।
धूमं न सुक्ष्मा दृश्या च न रूक्षः क्रुद्ध एव च ॥
न तालुशोषे तिमिरे शिरस्यभिहते न च ।
न ग्रहके न रोहिण्यां न मेहे न मदात्यये ॥
एषु धूमस्य कालेषु मोहात् पिबति यो नरः ।
रोगास्तस्य प्रवर्द्धन्ते दारुणा धूमविभ्रमात् ॥"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ॥
"धूमः पञ्चविधो भवति तद्यथा, प्रायोगिकः स्नेहनो वैरेचनः कासघ्नो वामनीयश्चेति । तत्रैलादिना कुष्ठतगरवर्गेण सूक्ष्मपिष्टेन द्वादशाङ्गुलं शलाकां श्लैष्मिकव्याधौ दशाङ्गुलं वैरेचनिकं वर्त्तिं प्रायोगिके । स्नेहपलसारमधूच्छिष्टसर्ज्जरसगुग्गुलुप्रभृतिभिः स्नेहमिश्रैः स्नेहने । शिरोविरेचनद्रव्यैर्वैरेचने । दृष्टतीक्ष्णकारिकाविकटुककासमर्दहिङ्गुहरीतक्यङ्गश्लेष्मघ्नप्रच्छर्दकवर्गप्रभृतिभिः कासहरेषु कासघ्ने । खायुचर्म्मखरदन्तकर्कटकास्थिगुप्फमनुष्यवक्त्ररक्तमिप्रभृतिभिर्वामनीयेषु वामनीये ॥"
"सुखेन तं पिबेत् पूर्व्वं नासिकाभ्यां ततः पिबेत् ।
सुखपीतं सुखेनैव वमेत् पीतञ्च नासया ॥
सुखेन धूममादाय नासिकाभ्यां न निर्हरेत् ।
तेन हि प्रतिलोमेन दृष्टिस्तत्र विहन्यते ॥"
"अकालपीतः कुरुते भ्रममूर्च्छाशिरोरुजः ।
ग्राम्यौचाग्निजिह्वानासुपघातञ्च दारुणम् ॥"
"तत्र स्नेहनो वातं शमयति स्नेहादुपवेशाच्च । वैरेचनः श्लैष्मिकसृङ्मेदोव्यापकर्षति रौक्ष्यात्तेषां दृष्टादौष्ण्याद्देशत्याच्च । प्रायोगिकः श्लैष्मिकसृङ्मेदोव्यत्यनिक्षिप्तं व्यापकर्षति साधारणत्वात् पूर्व्वेभ्यो मात्रा ॥"
नरो धूमोपयोगाच्च प्रसन्नेन्द्रियवाङ्मनाः ।
दृढकेशद्विजश्मश्रुसुगन्धिर्विग्रहानन ॥"
श्लैष्मिकं श्लैष्मोल्क्लेशानाहरति । अस्य प्रयोगः श्लोकत्रयं वेति ।
अहिकं यावदस्यप्रवृत्तिः वैरेचनिकमादोषदर्शनात् । तिलतण्डुलयवागूपीतेन पानयो वामनाद्यः यासान्तरेषु कासघ्न इति ।" इति सुश्रुते चिकित्सितस्थाने ४० अध्यायः ॥

धूमकेतनः, पुं, (धूमः केतनं ध्वजचिह्नं यस्य ।) अग्निः । (यथा, रघुः । ११ । ८२ ।
"निष्प्रभश्च रिपुराश भूपतिः
धूमशेष इव धूमकेतनः ।")
केतुग्रहः । इति मेदिनी । ने, २३८ ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ८२ ।
"हयग्रीवः शङ्करो नित्यं वर्च्चस्वी धूमकेतनः ॥")
धूमकेतुः, पुं, (धूमः केतुश्चिह्नं यस्य ।) अग्निः । (यथा, महाभारते । १ । १०३ । १७ ।
"प्रभां ससृजतुस्तेजोदर्को धूमकेतुसमौजसाम् ॥")
उत्पातविशेषः । स धूमाभा तारका । इत्यमरभरतौ ॥ (यथा, कुमारे । २ । ३२ ।
"भवत्प्रवरोदीर्णसंहारकाष्ठो महासुरः ।
उपप्लवाय लोकानां धूमकेतुरिवोत्थितः ॥")
ग्रहभेदः । इति विश्वः ॥ * ॥ केतवश्च शिखावन्ति ज्योतींषि स्थिराण्युत्पातरूपाणि । तदुदये कालाशुद्धिर्यथा,—
"धूमकेतौ समुत्पन्ने ग्रहयुद्धे चन्द्रसूर्ययोः ।
ग्रहणार्द्धास्तरे चैव न कुर्य्याच्छुभक्रियाम् ॥
उल्कापाते च विदिशं धूमे पश्च दिशामि च ।
वज्रपाते दिनत्रयैकं वर्ज्जयेत् सर्व्वकर्म्मसु ॥"
इति गर्गवचनम् ॥
भोजराजः ।
"अथ रवीन्दोर्ग्रहणप्रकल्पे
केतूद्गमोल्कापतनादिदोषे ।
इति दशाहानि वदन्ति तज्ज्ञा-
स्त्रयोदशाहानि वदन्ति केचित् ॥
वज्रकेतूद्गमोत्पाते ग्रहणे चन्द्रसूर्ययोः ।
प्रयाणञ्च न कुर्व्वीत सप्तरात्रमतःपरम् ॥
ब्राह्मणः क्षत्रियो वैश्यस्त्यजेत् कर्म्म चिराचरितम् ।
शूद्रस्त्यक्त्वा चैकरात्रं सर्व्वकर्म्म समाचरेत् ॥"
इति मलमासतत्त्वम् ॥
अथ केतूनां संस्थानम् ।
"शतमेकाधिकमेकं सहस्रमपरे वदन्ति केतूनाम् ।
बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम् ॥"
तथा च पराशरः । "शतमेकोत्तरं केतूनां भवन्ति तेषां षोडश ऋक्षमुनिभासजाः । द्वादशादित्यसम्भवाः । दश दनुसम्भवविलये रुद्राक्षोधजाः । सप्त पैतामहाः । पञ्चदश वर्षे वौद्धालिकस्य पुत्राः । सप्तदश मरीचिकाश्यपलोटजाः । पञ्च च प्राजापतिसहजाः । त्रयो विभावसुजाः । धूमोद्भवश्चैकः । चतुर्दश मध्यमानेऽन्हते सोमेन सह सम्भूताः । एकस्तु ब्रह्मकोपजः ।"* ॥ गर्गादयः सहस्रं वदन्ति । तथा च गर्गः ।
"अमित्रोदयचाराख्यमशुभानाञ्च दर्शनम् ।
आगन्तूनां सहस्रं स्याद्ग्रहाणां संनिबोध मे ॥"
नारदाख्यो मुनिरेकमेव केतुं बहुरूपं प्राह । यथा,—
"दिवाकरीयभौमस्य एकः केतुः प्रकीर्त्तितः ।
शुभाशुभफलं लोके ददात्यस्तमयोदये ॥
तत्र धूमकेतुलक्षणम् ।
"उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः ।
इत्यादिशास्त्रकारो विशेषतो दिविचूलो वा ॥"
"दृश्यतनुः प्रसन्न इत्यन्तादुक्तात् यो विपरीतो विशेषतः प्रकृत्यारूपकेतुरुत्पन्नः स धूमकेतुः

स च न शुभकरः पापं करोतीत्यर्थः । इन्द्रधनुःसदृशो न शुभकर एव तथा द्विशिखस्त्रिशिखश्च विशेषतः पापफलदः । तथा च समयसंहितायाम् । अपरस्त्रिसोऽतिदृश्यस्तमितः स्निग्धमूर्त्तिरुदगुदितः । दृश्यतनुः प्रसन्नः केतुर्लोकक्षयाभावाय न शुभो विपरीतो विशेषतः प्रकृत्यारूपसङ्काशः । द्विशिखस्त्रिशिखो वा दक्षिणसंस्थश्च दृश्यकरः ।" इति भट्टोत्पलकृतवराहसंहिताटीका ॥ (अन्यविशेषः । यथा, नकुलकृतान्यवैद्यके । ४ । २६ ।
"पुच्छदेशे यदावर्त्तो वाजिनः संप्रदृश्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो बुधैः ॥"
तथाच युक्तिकल्पतरौ ।
"पृष्ठवंशे यदावर्त्त एकः संपरिलक्ष्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो बुधैः ॥"
महादेवः । यथा, महाभारते । १३।१७।१०३।
"धन्वन्तरिर्धूमकेतुस्तन्वो वैश्रवणस्तथा ॥")
धूमगन्धिकं, क्ली, (धूमस्येव गन्धो यस्य । समासे इत् । ततः स्वार्थे कन् ।) रोहिषतृणम् । इति भावप्रकाशः ॥
धूमजाङ्गलं, क्ली, (धूमजस्य मेघस्य जाङ्गलम् धूमजाङ्गलं वर्षं तज्जायते इति । जन + डः ।) वज्रक्षारम् । इति राजनिर्घण्टः ॥
धूमध्वजः, पुं. (धूमः ध्वजचिह्नं यस्य ।) अग्निः । इति हेमचन्द्रः । ४ । १६३ ॥ (यथा, सर्व्वदर्शनसंग्रहे चार्व्वाकदर्शने ।
"कथमन्यथा धूमोपलम्भानन्तरं धूमध्वजे प्रेक्षावतां प्रवृत्तिरुपपद्येत ॥")
धूमप्रभा, स्त्री, (धूमस्य प्रभा इव प्रभा यस्याः ।) धूमान्धकारनरकः । इति हेमचन्द्रः । ५ । ३ ॥
धूममहिषी, स्त्री, (धूमस्य महिषीव ।) कृष्णझटी । इति चिकाण्डशेषः ॥
धूमयोनिः, पुं, (धूम एव योनिरुत्पत्तिकारणं यस्य ।) मेघः । (धूमविशेषोद्भवमेघफलं यथोक्तं चिन्तामणिधृतवचने ।
"यत्र धूमोद्भवं स्तम्भं द्विजानाञ्च हितं स्मृतम् ।
दावाग्निधूमसम्भूतमम्भं वनहितं स्मृतम् ॥
स्तब्धधूमोद्भवं स्तम्भमशुभाय भवेद्ध्रुवम् ।
अभिचाराग्निधूमोत्थं भूतनाशाय वै द्विजाः ॥")
सूत्रकः । इत्यमरः ॥
धूमलः, पुं, (धूमवद्वर्णं लाति । ला + कः ।) लालालोहितवर्णः । (यथा, नैषधे । १६ । ५ ।
"अपि मधुकरी कालिमन्या विराजति धूमल-
च्छविरिव रवेर्बालाश्वालच्छ्रियं करैरतिपातुकैः ॥")
तद्युक्ते, त्रि । इत्यमरः । १ । ५ । १६ ॥
धूमसंहतिः, स्त्री, (धूमस्य संहतिः समूहः ।) धूमसम्मूहः । इति हलायुधः ॥
धूमसी, स्त्री, रोटिकाविशेषः । यथा, भावप्रकाशे ।
"मायानां दलयुक्तोये स्थापितास्यक्लकचुका ।
भ्राते घोषिता पार्श्वे श्रिष्टास्ता धूमसी स्मृता ॥
धूमसी रुचिता सैव प्रोक्ता सुर्भुरिका बुधैः ।
सुर्भुरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ॥"

धूमाभः, पुं. (धूमस्य आभा इव आभा यस्य।) धूम्रवर्णः। इति शब्दमाला॥ तद्धति, त्रि॥

धूमावती, स्त्री, दशमहाविद्यान्तर्गतविद्याविशेषः। अस्या ध्यानं यथा,—

"विवर्णा चञ्चला दुष्टा दीर्घा च मलिनाम्बरा।
विमुक्तकुन्तला रूक्षा विधवा विरलद्विजा।
काकध्वजरथारूढ़ा विलम्बितपयोधरा॥
सूर्पहस्तातिरूक्षाक्षा धृतहस्तवराश्रिता।
प्रवृद्धघोणा तु भृशं कुटिला कुटिलेक्षणा॥
क्षुत्पिपासार्दिता नित्यं भयदा कलहासदा।
जपेत् सप्तशतीर्द्यां पुरश्चरणसिद्धये॥"

इति तन्त्रसारः॥

(अस्या मन्त्रो यथा, मन्त्रकोषे।

"दान्तावर्णोग्निविन्दन्तौ ततो धूमावताहिटः।
धूमावती मनुः प्रोक्तो वैरिनिग्रहकारकः॥"

धूँ धूँ धूमावती स्वाहा॥)

धूमिका, स्त्री, (धूम इव जलीयपदार्थोऽस्त्यस्या इति। धूम+ठन्। स्त्रियां टाप्।) कृष्णझटिका। इति त्रिकाण्डशेषः॥ (पक्षिविशेषः। जिङ्गा इति ख्याता। तद्यथा,—

"ग्रध्रश्येनी भासकुररगृध्रोलूककुलिङ्गिकाः।
धूमिका मधुहा चेति प्रसहा ग्रामपक्षिणः॥"

इति वामटे सूत्रस्थाने षष्ठेऽध्याये॥)

धूमोर्ण्मं, स्त्री, (धूमादुत्थितेति परम्परासम्बन्धेनेति। धूम+स्था+क्तः। धूमयोनिसम्भवोत्पन्नवस्त्रजातत्वाद् परम्परासम्बन्धत्वम्।) वस्त्रभारम्। इति राजनिर्घण्टः॥ (धूमोत्थितेति, त्रि॥)

धूमोर्णा, स्त्री, यमपत्नी। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। १३। १४५। ११।

"ग्रध्रः ग्रध्रीपतिर्देवो यमो धूमोर्णया सह।
वरुणः सह गौर्या च सहदेवेन धर्मेश्वरः॥")

धूमोर्णापतिः, पुं, (धूमोर्णायाः पतिः।) यमः। इति हारावली। ५०॥

धूम्या, स्त्री, (धूमानां समूहः इति। धूम+पाशादित्वात् यः।) धूमसमूहः। इत्यमरः। ३।३।४३॥

धूम्याटः, पुं, (धूम्या इव अटतीति। अट+अच्।) पक्षिविशेषः। जिङ्गा इति भाषा। तत्पर्य्यायः। कलिङ्गः २ भृङ्गः २। इत्यमरः। २। ५। १६॥

धूम्रः, पुं, (धूमं धूमवर्णं रातीति। रा+कः। पृषोदरादित्वात् साधुः।) श्यामरक्तमिश्रितवर्णः। तत्पर्य्यायः। धूमलः २ लाक्षारोहितः ३। तद्धति, त्रि। इत्यमरः। १। ५। १६॥ (यथा, रघौ। १५। १६।

"धूमधूम्रो ऽथागन्धो ज्वालावभ्रुगिरीरुहः।
अथाङ्गपरीवारश्चितामिरिव जङ्गमः॥")

तुरुष्कः। इति राजनिर्घण्टः॥ (असुरविशेषः। यथा हरिवंशे। २३२। ८।

"समुद्रो रभसश्चण्डो धूम्रश्चैव महासुरः॥"

स्कन्दस्य सैनिकविशेषः। यथा, महाभारते। ६। ४५। ६२।

"ग्रह्यु नामानि वाप्येवं अन्ये स्कन्दस्य सैनिकाः।"

"धूम्रः श्वेतकलिङ्गश्च सिद्धार्थो वरदस्तथा॥")

धूम्रकः, पुं, (धूम्रवर्णेन कायतीति। कै+कः।) उष्ट्रः। इति जटाधरः॥

धूम्रपत्रा, स्त्री, (धूम्रं धूम्रवर्णं पत्रं यस्याः। अजादेराकृतिगणत्वात् टाप्।) क्षुपविशेषः। तत्पर्य्यायः। धूम्राङ्गा २ सुलभा ३ खरमञ्जरी ४ गृध्रपत्रा ५ गृध्राली ६ क्षमिन्नी ७ श्रीमतापत्रा ८। अस्या गुणाः। रसे तिक्तत्वम्। श्लेष्मकफमिकासनाशित्वम्। उष्णत्वम्। रूक्षत्वम्। अग्निदीपनकारित्वञ्च। इति राजनिर्घण्टः॥

धूम्रमूलिका, स्त्री, (धूम्रं धूम्रमूलमस्याः। कप्। टापि अत इत्वम्।) मूलीशाकम्। इति राजनिर्घण्टः॥

धूम्रलोचनः, पुं, (धूम्रं लोचने यस्य) कपोतः। इति राजनिर्घण्टः॥ शुम्भासुरसेनापतिः। यथा, मार्कण्डेयपुराणे। ८६। ३।

"हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः।
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम्॥"

धूम्रवर्णः, पुं. (धूम्रं वर्णमस्य।) तुरुष्कः। इति राजनिर्घण्टः॥ (पर्व्वतविशेषः। यथा, हरिवंशे। २२८। ७३।

"हेमाद्रितुर्यसंस्थश्च तथा वै वालुको गिरिः।
क्रौञ्चः सप्तर्षिशृङ्गश्च धूम्रवर्णश्च पर्व्वतः॥")

धूम्रवर्णा, स्त्री, (धूम्रं वर्णमस्याः टाप्।) अग्नेः सप्तजिह्वान्तर्गतजिह्वाविशेषः। इति जटाधरः॥ (यदुक्तं सुकेशोपनिषदि। २। ४।

"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरूपी च देवी
लेलायमाना इति सप्त जिह्वाः॥")

धूम्रा, स्त्री, (धूम्र+टाप्।) ग्रन्थाकुली। इति राजनिर्घण्टः॥ (धरणामवसीमाता यथा, महाभारते। १। ६६। १६।

"धूम्रायासु धरः पुत्रो ब्रह्मविद्यो भुवस्तथा॥")

धूम्रिका, स्त्री, शिंशुपावृक्षः। इति राजनिर्घण्टः॥

धूर, ईं ङ ध वधे। गतौ। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-सेट्।) दीर्घौ। ईं, धूर्व्वः। ङ ध, धूर्य्यते। इति दुर्गादासः॥

धूर्जटिः, पुं, (धूर् भारभूता जटिर्यस्य। यद्वा, जट संघाते+इन्। धूर्जङ्गा जटिर्यस्येति। दुरन्तक्लेशोद्वेगचिन्तायां जटिः संघातो यस्य वा।) शिवः। इत्यमरः। १। १। ३५॥ (यथा, भागवते। ४। ५। २।

"क्रुद्धः सुदष्टौष्ठपुटः स धूर्जटि-
र्जटां तडिद्वह्निसटोग्ररोचिषम्॥")

धूर्त्त, त्रि, (धूर्व्वतीति। धूर्व्व+"इसिमसिकषिधूर्व्वीति।" उणा। ३। ८६। इति तन्।) द्यूतज्ञः। वञ्चकः। शैवस्य पर्य्यायः। मायी २। इति हेमचन्द्रः। ३। १६६॥ विटः ३। इति मेदिनी। ते, २८॥ (यथा, महाभारते। ३। ६। १२।

"प्रिया हि धूर्त्ता मम देविनः सदा
भवांश्च देवोपम! राज्यमर्हति॥"

यथा च प्रबोधचन्द्रे। १। ७३।

"नराणां नापितो धूर्त्तः पक्षिणां चैव वायसः।
दंशिनाञ्च शृगालश्च नैतेभिश्चुल्लपाञ्चकम्॥")

धूर्त्तकः, पुं, (धूर्त्त+कन् स्वार्थे।) शृगालः। इति शब्दरत्नावली॥ धूर्त्तश्च॥ (नागभेदः। यथा, महाभारते। १। ५७। १३।

"वासुकिः शङ्खपालश्च धृतराष्ट्रकलो।
कौरव्यकुलजाश्चैते प्रविष्टा ह्यश्वबालधम्॥")

धूर्त्तयतु, पुं, (धूर्त्त+आचारे तन्। धूर्त्तवं हिंसनं करोतीति। क+क्विप्। तुगागमश्च। धुस्तूरः। इति शब्दमाला॥ वञ्चकारके, त्रि॥

धूर्त्तवनुः, पुं, (धूर्त्तश्चासौ मनुश्चेति।) मानवः। इति शब्दचन्द्रिका॥

धूर्त्तमातुका, स्त्री, (धूर्त्तो हिंसितो मातुलोऽनयेति।) राका। इति शब्दचन्द्रिका॥

धूर्वरः, पुं, (धरतीति। धृ+अच्। धुरां धरः।) पृषोदरादित्वात् दीर्घः।) धुरन्धरः। इत्यमरटीकायां रमानाथः॥

धूर्व्वहः, त्रि, (वहतीति। वह+अच्। धुरां वहः। पृषोदरादित्वात् दीर्घः।) धुरन्धरः। इत्यमरः। २। ८। ६५॥

धूर्व्वी, स्त्री, (धुरं व्यञ्जतीति। व्यञ्ज+क्विप्। ततः व्यञ्जो वीभावः।) रथाक्षभागः। तत्पर्य्यायः। यानशीर्षम् २ वधूः ३। इति हेमचन्द्रः। ३। ४२१॥

धूलकं, क्ली, (धू+बाहुलकात् लकः।) विषम्। इति शब्दचन्द्रिका॥

धूलिः, स्त्री, (धुवति धूयते वेति। धू+बाहुलकात् लिः।) पार्थिवचूर्णम्। धूला इति भाषा॥ (यथा, भागवते। ३। १४। २७।

"ऊर्ध्वाग्रचण्डानिलधूलिधूम्र-
विकीर्णविद्योतजटाकलापः।
भस्मावगुण्ठासलदङ्गदेहो
देवस्त्रिभिः पश्यति देवरत्नैः॥")

तत्पर्य्यायः। रेणुः २ पांसुः ३ रजः ४। इत्यमरः। २। ८। ६८॥ धूली ५ पांसुः ६। इति भरतः॥ क्षितिकरः ७ क्षौद्रः ८ चूर्णम् ९ तूलम् १० मही ११ क्षत्रकेशुः १२ रुमः १३ केशुः १४ कथा १५ क्षितिरजाः १६। इति शब्दरत्नावली॥

दीप्रखड्गातनुच्छायाङ्गिन्नकेशनखादिकम् ।
अनमार्जारेरेवच हन्ति पुण्यं पुराकृतम् ॥"
इति कर्म्मलोचनः ॥
"अजरजः खररजस्तथा सम्मार्ज्जनीरजः ।
स्त्रियः पादरजो राजन् ! शक्रादपि हरेच्छ्रियम्॥"
इति लक्ष्मीचरित्रम् ॥

धूलिका, स्त्री, (धूलिरिव प्रतिभातिः । "इवे प्रतिकृतौ ।" ५।३।९६ । इति कन् । टाप् ।) कुब्जभटिका । इति शब्दरत्नावली ॥ (नीहारः । यथा, नीहारे वाणग्रन्थे चेति इत्यत्र नीहारे धूलिकायामिति मनुटीकायां कुल्लूकभट्टः ॥)

धूलिकेदारः, पुं, (धूलिप्रधानः केदारः । इति मध्यलोपिसमासः ।) वप्रः । क्षेत्रम् । इति त्रिकाण्डशेषः ॥

धूलिगुच्छकः, पुं, (धूलीनां गुच्छक इव । इवार्थे कन् ।) पटवासकः । फलगुचूर्णम् । इति त्रिकाण्डशेषः ॥

धूलिध्वजः, पुं, (धूलिरेव ध्वजो यस्य ।) पवनः । इति त्रिकाण्डशेषः ॥

धूलिपुष्पिका, स्त्री, (धूलिः परागस्तत्प्रचुरं पुष्पं यस्याः । कापि अत इत्वम् ।) केतकी । इति राजनिर्घण्टः ॥

धूलीकदम्बः, पुं, (धूलीनां कदम्बमिव ।) नीपः । सिनिप्रः । वरणवृक्षः । इति मेदिनी । बे, १७ ॥ (धूलिसमूहे, स्त्री ॥)

धूलीकदम्बकः, पुं, (धूलीकदम्ब + स्वार्थे कन् ।) नीपः । इति जटाधरः ॥

धूलीपटलः, पुं, (धूलीनां पटल यत्र ।) उड्डीयमानधूलीसमूहः । यथा, धूलीपटले धूमलभ्रमे तत्रासता धूमलेन । इत्यादि सामान्यलक्षणायां गिरीशमिश्रः ॥ (धूलीसमूहे, स्त्री ॥)

धूम्र, क कान्तिगतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) वल्लरी । कान्तिगतिः शोभितकरञ्जम् । चन्दनो धूम्रयत्यङ्गम् । इति दुर्गादासः ॥

धूम्र, क धूम्रे । इति कविकल्पद्रुमः ॥ (चुरां परं-सकं-सेट् ।) वल्लरी । धूम्रः कान्तिगतिः । चन्दनो धूम्रयत्यङ्गम् । इति दुर्गादासः ॥

धूष, क धूम्रे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) वल्लरी । धूम्रः कान्तिगतिः । क, धूसयत्यङ्गं चन्दनः । महिषधूसरितः सरितस्तटमिति भानकीहरणमकाव्यान्तर्गत एवायमिति रमानाथः । खमते तालयमर्द्धन्यान्तो ऽप्ययम् । इति दुर्गादासः ॥

धूसरः, पुं, (धुनातीति । धू + "कृधूमदिभ्यः कित् ।" उणां ३ । ७३ । इति सरन् । स च कित् ।) ईषत्पाण्डुवर्णः । तद्वति, त्रि । इत्यमरः । २ । ५ । १३ ॥ (यथा, रघौ । ११ । ६० ।
"श्लेषपक्षिपरिधूसरासका-
सान्ध्यमेघरुधिराईवाससः ॥")
उरः । मेषः । कपोतः । इति राजनिर्घण्टः ॥ तैलकारः । इति हेमचन्द्रः । ६ । २६ ॥ ❀ ॥

धूसरवस्तूनि यथा । धूलिः १ लता २ करभः ३ गृहगोधिका ४ कपोतः ५ धूधिकः ६ रङ्गम् ७ काककङ्कः ८ खरादिः ९ । इति कविकल्पलता ॥

धूसरच्छदा, स्त्री, (धूसर ईषत् पाण्डुवर्णश्छदो यस्याः ।) श्वेतवृक्षा । इति रत्नमाला ॥

धूसरपत्रिका, स्त्री, (धूसरं पत्रमस्याः । ङीप् । स्वार्थे कन् । टापि पूर्वह्रस्वः ।) हस्तिशुण्डीक्षुपः । इति राजनिर्घण्टः ॥

धूसरा, स्त्री, (धूसर + टाप् ।) पाण्डुरपलाशक्षुपः । इति राजनिर्घण्टः ॥

धूसरी, स्त्री, (धूसर + ङीप् ।) किन्नरीभेदः । इति मेदिनी । रे, १७० ॥

धूस्तूरः, पुं, (धूस् कान्तिवैरल्ये + भावे क्विप् । तं तूर्य्यते हिनस्तीति । तूर हिंसे + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) धूस्तूरवृक्षः । इत्यमरटीकायां भरतः ॥

धृ, क धृत्वाम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-अनिट् ।) क, धारयति । इति दुर्गादासः ॥

धृ, ड अवध्वंसे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-अनिट् ।) अवध्वंसः पतनम् । ड, धरते पत्रं वृक्षात् । गोविन्दभट्टस्तु अविध्वंसने इति पठित्वा विध्वंसनं ध्वंसनं तस्याभावोऽविध्वंसनं ध्रापनमिति व्याख्याति । इति दुर्गादासः ॥

धृ, ङ ध्र स्थितौ । धृतौ । इति कविकल्पद्रुमः ॥ (तुदां-आत्मं-स्थितौ अकं-धृतौ सकं-अनिट् ।) ङ ध्र, ध्रियते । इति दुर्गादासः ॥

धृ, च धृत्वाम् । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-अनिट् ।) च, धरति धरते । इति दुर्गादासः ॥

धृज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) धर्ज्जति । इति दुर्गादासः ॥

धृज, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । इदित् ।) सप्तमस्वरौ । ङ, धृज्जति । इति दुर्गादासः ॥

धृतः, त्रि, धृधातोः कर्म्मणि कर्त्तरि च क्तप्रत्ययेन निष्पन्नः ॥ धारकविशिष्टः । धरा इति भाषा । (यथा, महाभारते । १ । ७४ । १०३ ।
"अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥")
अवभ्रष्टः । पतित इति यावत् । स्थितः । (स्थिरीकृतः । निश्चितः । यथा, महाभारते । ७ । १६ । ६८ ।
"धृतां धनञ्जयवधे प्रतिज्ञामपि चक्रिरे ॥"
पुं, अयोदशमनोः रौच्यस्य पुत्रविशेषः । यथा, हरिवंशे । ७ । ८२ ।
"चित्रसेनो विचित्रश्च नयो धर्म्मधृतो धृतः ।
सुनेत्रः सप्तदृष्टिश्च सुतपा निर्भयो दृढः ।
रौच्यस्येते मनोः पुत्रा अमरे सु ? देवरे ॥"
द्रुसावर्णीयधर्म्मस्य सुमः । ब्रह्मा, भारवृते । ८ । २१ । १७ ।

"इक्ष्वाकुतनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ।
आरब्धस्तस्य गान्धारस्तस्य धर्म्मस्ततो धृतः ॥")
धृतराष्ट्रः, पुं, (धृतं राष्ट्रं येन ।) दुर्य्योधनपिता । स जन्मान्धः भ्रान्तदृष्टिः विचित्रवीर्य्यक्षेत्रे व्यासाज्जातः । इति महाभारते । १ । ६५ । ५५ ॥ (अयं हि गन्धर्व्वपतेर्हंसस्य अंशावतारः । यथा, महाभारते । १ । ६७ । ८४ ।
"अरिष्टायास्तु यः पुत्रो हंस इत्यभिविश्रुतः ।
स गन्धर्व्वपतिर्जज्ञे कुरुवंशविवर्द्धनः ॥")
सुराजा । नागभेदः । इति मेदिनी । रे, २७१ ॥ (यथा, महाभारते । २ । ६ । ६ ।
"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ ॥")
पक्षिभेदः । इति विश्वप्रकाशः ॥ (गन्धर्व्वविशेषः । यथा, विष्णुपुराणे । २ । १० । १५ ।
"ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रोऽथ सप्तमः ॥"
बलिराजस्य पुत्रविशेषः । यथा, हरिवंशे । ३ । ७४ ।
"बले: पुत्रशतस्यासाद्बाणज्येष्ठं नराधिप ! ।
धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः ॥"
जनमेजयस्य ज्येष्ठपुत्रः । यथा, महाभारते । १ । ६३ । ५३ ।
"जनमेजयस्य तनया श्रुत श्रुता महाबलाः ।
धृतराष्ट्रः प्रथमजः पाण्डुर्वाल्लीक एव च ॥")
धृतराष्ट्री, स्त्री, (धृतराष्ट्रस्य पत्नी । ङीप् ।) हंसपत्नी । इति मेदिनी । रे, २७२ ॥ (यथा, महाभारते । १ । ६६ । ५७, ५६ ।
"काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम् ।
ताम्रा तु सुषुवे देवी पक्षेता लोकविश्रुता: ॥"
"धृतराष्ट्री तु हंसांश्च कलहंसाञ्च सर्व्वशः ।
चक्रवाकांश्च भद्रं ते जनयामास सैव तु ॥"
हंसपदीलता । इति हेमचन्द्रः ॥)
धृतिः, पुं, (म्रियते इति । धृ + क्तिन् । अभिधानात् पुंस्त्वम् ।) दृष्टिः । इति मेदिनी । ते, २६ ॥ (विश्वेदेवविशेषः । यथा, महाभारते । १३ । ६१ । ६० ।
"बलं धृतिर्विभाषा च पुण्यश्लोक: पावनस्तथा ॥"
चन्द्रवंशीयनृपविशेषस्य विजयस्य पुत्रः । यथा, हरिवंशे । ३१ । ५५ ।
"विजयस्य धृतिः पुत्रस्तस्य पुत्रो धृतव्रतः ॥"
निमिवंशीयानामेकतमः । यथा, भागवते । ६ । १३ । २६ ।
"सुनक्षत्रसुतो यज्ञे वीतहव्यो धृतिस्ततः ॥"
यदुवंशीयवभ्रोः पुत्रः । इति विष्णुपुराणे । ४ । १२ । १५ । "रोमपादाद्बभ्रु: वभ्रोः पुत्रो धृतिः ॥")
धृतिः, स्त्री, (धृ + क्तिन् ।) तुष्टिः । (यथा, मनुः । ६ । ९२ ।
"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम् ॥")
गोत्रभेदः । वैराग्यम् । (यथा, राजसनेयसंहितायाम् । ३८ । १ ।

"यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ॥")
धारणम्। इति मेदिनी। ते, २६। सुखम्। इति हेमचन्द्रः। २। २२२॥ (क्रतुः। यथा, कात्यायनश्रौतसूत्रे। २०। २। ८।
"राजन्यो धृतिमु युङ्क्तपयुक्ताः॥")
षोड़शमाढकान्तर्गतचतुर्दशमाढकम्। इति भरतः॥ अष्टादशाक्षरापृक्तिच्छन्दोभाक्। इति छन्दोमञ्जरी॥ * ॥ धृतियोगजातफलं यथा,—
"धृतियोगसमुत्पन्नः प्राज्ञः संतुष्टमानसः।
वावदूकः सभायाञ्च सुशीलो विनयान्वितः॥"
इति कोष्ठीप्रदीपः॥
धारणा। सा त्रिधा। यथा,—
"धृत्वा यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी॥
यया तु धर्म्मकामार्थान् धृत्वा धारयतेऽर्জ্জুন!।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ! राजसी॥
यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्म्मेधा धृतिः सा तामसी मता॥"
इति श्रीभगवद्गीतायाम् १८।३३-३५॥
धृत्वरी, स्त्री, (धृत्वन्+"वनो रच।"४। १। ७७। इति ङीप् रच्चान्तादेशः।) भूमिः। इति संक्षिप्तसारोणादिवृत्तिः॥
धृत्वा, [न्] पुं, (धरतीति। धृ+"ग्रीड्कुधि-रुहिजिधीति।" उणा ४।१२३। इति क्वनिप्।) धर्म्मः। विप्रः। वसुदः। अन्तरीक्षम्। मेधावी। विष्णुः। इति संक्षिप्तसारोणादिवृत्तिः॥
धृष, आ कि अमर्षे। क्रोध इति यावत्। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) आ, धर्षितं धृष्टं तेन। कि, धर्षयति धर्षति। अमर्षं दृष्ट अभिभवः। इति भट्टमल्लः। न धर्षति निजाः प्रजाः। तमेव धर्षयत्येकं यस्तासु प्रतिकूलतीति हलायुधः। इति दुर्गादासः॥
धृष, उ संहतौ। हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-संहतौ अकं-हिंसे सकं-सेट्। उदित्वात् क्त्वेट्।) उ, धर्षित्वा धृष्ट्वा। संहतिः। समूहः। इति दुर्गादासः॥
धृष, क ड प्रागल्भ्ये। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) प्रागल्भ्यं प्रगल्भत्वम्। क ड, धर्षयते वह्निं पयः। इति दुर्गादासः॥
धृष, णि आ न प्रागल्भ्ये। इति कविकल्पद्रुमः॥ (स्वां-परं-अकं-सेट्।) णि, धृष्टोऽस्ति। आ, धर्षितं धृष्टं तेन। न, धृष्णोति गुरोरग्रे यः। इति हलायुधः। इति दुर्गादासः॥
धृष्णुः, पुं, (धृष्णोतीति। धृष्+"भृमिदिवधीति।" उणा १। २४। इति क्नुः।) दक्षः। इलुबादि-बोधः॥ संघातः। प्रगल्भः। इति संक्षिप्त-सारोणादिवृत्तिः॥
धृष्टः, त्रि, (धृष+क्तः।) प्रगल्भः। इति मुग्ध-बोधव्याकरणम्॥ (यथा, भागवते। ५। १२।७।
"जनस्य गोप्तासि विकत्थमानो न ग्रीभसे वृद्धसभासु धृष्टः॥")
निर्लज्जः। तत्पर्य्यायः। धृष्णुक् २ वियातः ३। इत्यमरः। ३। १। २५॥ धृष्णुः ४ दक्षुक् ५। इति त्रिकाण्डशेषः। धर्षितः ६। इति शब्द-रत्नावली॥ चतुर्विधप्रत्यन्तर्गतपतिविशेषे, पुं। तस्य लक्षणं यथा, "भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणः।" इति रसमञ्जरी॥ (चेदिवंशीयकुन्तेः पुत्रः। यथा, हरिवंशे। ३६। २४।
"कुन्तेर्धृष्टः सुतो जज्ञे रणधृष्टः प्रतापवान्॥")
सप्तममनोः पुत्रविशेषः। यथा, भागवते। ८। १३। २।
"मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः।
सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु॥
इक्ष्वाकुनृगशर्य्याति-दृष्ट-करूषादयो नृपाः।
पृषध्रो नाभगश्चेति दशपुत्राः प्रकीर्त्तिताः॥")
धृष्णुरिति कुत्रापि ढश्यते॥)
धृष्टा, स्त्री, (धृष्यते सेति। धृष् प्रागल्भ्ये+क्तः। टाप्।) असती। इति शब्दरत्नावली॥
धृष्णुक्, [ञ्] त्रि, (धृष्णोतीति। धृष प्रागल्भ्ये +"स्फिटितॊनेर्नुक्।" ३। २। १७२। इत्यत्र "धृषेश्च।" इति काशिकोक्तेर्नुक्।) निर्लज्जः। इत्यमरः। ३। १। २५॥
धृष्णुः, पुं, (धर्षति अभिभवति अन्धकारमिति। धृष् अमर्षे+बाहुलकात् नुः। स च कित्।) किरणः। इत्यमरः। १। ४। ३२॥
धृष्णुः, त्रि, (धृष्णोतीति। धृष्+"ऋषिवृषिधृषि-शिपे: क्नुः।" ३। २। १४०। इति क्नुः।) धृष्टः। इति त्रिकाण्डशेषः॥ (यथा, ऋग्वेदे। ६। २५। ५।
"न हि त्वा शूरो न तुरो न धृष्णु-र्न त्वा योधो मन्यमानो युयोध॥")
पुं, कश्यिका। इति शब्दचन्द्रिका॥ (वैवस्वत-मनुपुत्रः। यथा, हरिवंशे। १०। १।
"मनोर्वैवस्वतस्याथ पुत्रा वै नव तत्समाः।
इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्य्यातिरेव च॥"
सावर्णस्य मनोः पुत्रविशेषः। यथा, तत्रैव। ७। ६०।
"वरिष्ठुरार्ष्टो धृष्णुश्च राधः सुमतिरेव च।
सावर्णस्य मनोः पुत्रा भविष्या दश भारत!॥"
चन्द्रवंशोद्भववक्रकुरराजस्य सुतः। यथा, तत्रैव ३७। १८।
"क्रुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयस्तथा।
कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत्॥"
कवेः पुत्रविशेषः। यथा, महाभारते। १३। ८५। १३३।
"कविः काव्यश्च धृष्णुश्च बुद्धिमानुशनास्तथा।
भृगुश्च विरजाश्चैव काव्यौ योगश्च धर्म्मवित्॥
अष्टौ कविसुता ख्याते सर्व्वमेभिर्जगत्ततम्॥")
धे, ट पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) धयति। टः स्त्रियामीदर्थः। स्तन-त्यर्थौ। इति दुर्गादासः॥
धेनः, पुं, (धीयते इति धयत्यस्मादिति वा। धेट पाने+"धेट रच।" उणा ३। ११। इति न रचान्तादेशः।) समुद्रः। इति हेमचन्द्रः॥ नदः। इति मेदिनी॥
धेना, स्त्री, (धेन+टाप्।"टित्त्वेऽपि खर्श्वेवडीप्। इति हरदत्तोक्तेर्न ङीप्।" इति केचित्।) नदी। (दधातेर्लटः शानचि यत्वेन एत्वा-भ्यासलोपौ दधाना स्वमभिधेयं वर्षप्रदानेन लौकिकाय वा। यद्वा, धेट पाने 'धेट् रच' इति नप्रत्ययः एकारोचान्तादेशः गुणः। धयन्ति तामिति धेना। पानमत्र स्वीकारः। यद्वा, आस्वादः। धीयते पीयते आस्वाद्यते वानेन धयन्ति प्राणमिति धेना।" इति देवराजयज्वा। १। ११। ३६।) भारतीभेदः। इति हेमचन्द्रः॥ (यथा, ऋग्वेदे। ३। १। ६।
"यस्य धारा अक्षरन्हि धेनाः।"
"धेना माध्यमिका वाचश्च त्रिदशानाम्।" इति तद्भाष्ये सायणः॥)
धेनिका, स्त्री, (धेनो नदः। लक्षणया जलसमीप-स्थानम्। स उत्पत्तिस्थानत्वेनास्त्यस्या इति। धेन+ठन्। टाप्।) धन्याकम्। इति भाव-प्रकाशः॥
धेनुः, स्त्री, (धयति धेट्टि सुतान् धीयते वत्सैरिति वा। धेट पाने+"धेट रच।" उणा ३। ३४। इति नुः रचान्तादेशः।) नवप्रसूता गौः। तत्-पर्य्यायः। नवप्रसूतिका २। इत्यमरः। २। ६। ७१॥ नवप्रसूतिका ३। इति शब्दरत्नावली॥ दानीयदशधेनवो यथा,—
"यासु पापविनाशिन्यः पञ्चस्वं दशधेनवः।
तासां स्वरूपं वक्ष्यामि नामादि च धनाधिप!॥
प्रथमा गुड़धेनुः स्यादृतधेनुरथापि वा।
तिलधेनुस्तृतीया च चतुर्थी जलसंज्ञिका॥
क्षीरधेनुश्च विख्याता मधुधेनुरथापि वा।
सप्तमी शर्कराधेनुर्दधिधेनुरथाष्टमी॥
रसधेनुश्च नवमी दशमी स्यात् स्वरूपतः।
कुम्भाः स्युर्नवधेनूनामितरासान्तु राशयः॥
सुवर्णधेनुमप्यत्र केचिदिच्छन्ति मानवाः॥
नवनीतेन तैलेन तथान्ये तु महर्षयः।
एतदेव विधानं स्यात्त एवोपस्कराः स्मृताः॥
मन्त्रावाहनसंयुक्ताः सदा पर्व्वणि पर्व्वणि।
यथाशक्त्या प्रदातव्या मुक्तिमुक्तिफलप्रदाः॥
गुड़धेनुप्रसङ्गेन सर्व्वास्वेव मयोदिताः।
अशेषयज्ञफलदाः सर्व्वपापहराः शुभाः॥
व्रतानामुत्तमं यस्माद्विघ्नोत्कादशीव्रतम्।
तदङ्गत्वेन चैवात्र गुड़धेनुः प्रशस्यते॥
अयने विषुवे पुण्ये व्यतीपातेऽथवा पुनः।
गुड़धेन्वादयो देयास्तूपरागादिपर्व्वसु॥"
इति मत्स्यपुराणे ७६ अध्यायः॥
पूर्व्वोक्तधेनूनां दानविधयस्तत्तच्छब्दे द्रष्टव्याः॥
अथ कपिलाधेनुदानादिफलम्।
ईश्वर उवाच।
"अथातः संप्रवक्ष्यामि कपिलाधेनुमुत्तमाम्।

यत्प्रदानान्नरो याति विष्णुलोकमनुत्तमम् ॥
पूर्व्वोक्तेन विधानेन दद्याद्धेनुं सवत्सकाम् ।
सर्व्वालङ्कारसंयुक्तां सर्व्वरत्नसमन्विताम् ॥
कपिलायाः शिरोग्रीवे सर्व्वतीर्थानि भामिनि ! ।
पितामहनियोगाच्च निवसन्ति हि नित्यशः ॥
प्रातरुत्थाय यो मर्त्यः कपिलागलमस्तकात् ।
च्युतन्तु भक्षयेत् पानीयं शिरसा वन्दते शुचिः ॥
स तेन पुण्यतोयेन ततक्षणाद्दग्धकिल्बिषः ।
चिंशद्वर्षकृतं पापं दहत्यग्निरिवेन्धनम् ॥
कल्यमुत्थाय यो मर्त्यः कुर्य्यात्तासां प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन पृथिवी स्यात् वसुन्धरे ! ॥
प्रदक्षिणेन चैकेन श्रद्धायुक्तेन तत्क्षणात् ।
दग्धजन्मकृतं पापं तस्य नश्यत्यसंशयम् ॥
कपिलायास्तु रूपेण स्नात्वा चैव शुचिव्रतः ।
स गङ्गादिषु तीर्थेषु स्नातो भवति मानवः ॥
तेन स्नानेन चैकेन भावयुक्तेन वै नरः ।
यावज्जीवकृतात् पापात् मुच्यते नात्र संशयः ॥
गोसहस्रन्तु यो दद्यादेकाञ्च कपिलां नरः ।
समभेतत् पुरा प्राह ब्रह्मा लोकपितामहः ॥
गवामस्थि न लङ्घेत स्पृशेत गन्धं न दूषयेत् ।
यावच्चिष्ठति तं गन्धं तावत् पुण्येस्तु पूर्य्यते ॥
गवां कण्डूयनं श्रेष्ठं तथा च परिपालनम् ।
तुल्यं गोव्रतदानस्य भयरोगादिपालने ॥
दत्त्वोदकानि यो दद्यात् क्षुधितानां गवाह्निकम् ।
सोऽश्वमेधफलं दिव्यं लभते मानवोत्तमः ॥
विमानैर्विविधैर्दिव्यैः कन्याभिरभिरर्च्चितैः ।
सेव्यमानस्तु गन्धर्व्वैर्गीयमानो यथाक्रमः ॥" * ॥
एकादशप्रकारकपिलालक्षणं यथा,—
"सुवर्णकपिला पूर्व्वे द्वितीया गौरपिङ्गला ।
तृतीया चैव रक्ताक्षी चतुर्थी गुडपिङ्गला ॥
पञ्चमी बहुवर्णा स्यात् षष्ठी च श्वेतपिङ्गला ।
सप्तमी श्वेतपिङ्गाक्षी अष्टमी कृष्णपिङ्गला ॥
नवमी पाटला ज्ञेया दशमी पुच्छपिङ्गला ।
एकादशी खरश्वेता एतासां सर्व्वलक्षणा ॥
सर्व्वलक्षणसंयुक्ता सर्व्वालङ्कारसुन्दरी ।
ब्राह्मणाय च दातव्या सर्व्वमुक्तिप्रदायिनी ।
मुक्तिमुक्तिप्रदा तेषां विष्णुमार्गप्रदायिनी ॥"
इति कपिलामाहात्म्यम् ॥ * ॥
अथोभयमुखीधेनुदानादिविधानम् ।
होता उवाच ।
"अतःपरं महाराजोभयमुखाः समासतः ।
विधानं यद्वरारोहे ! धरण्याः कथितं पुरा ।
तदहं संप्रवक्ष्यामि तव पुण्यफलञ्च यत् ।
धरण्युवाच ।
यत्त्वया कपिला नाम पर्व्वमेतदुपादिता प्रभो ! ।
होमधेनुः सदा पुण्या सा ज्ञेया कपिलक्षणा ।
कियन्तः कपिलाः प्रोक्ताः स्वयमेव स्वयम्भुवा ॥
प्रस्रवमाणा दानेन किं पुण्यं स्यात्तु माधव ! ।
एतदिच्छाम्यहं श्रोतुं विस्तरेण जगद्गुरो ! ॥
श्रीभगवान् उवाच ।
शृणुष्व भद्रे ! तत्त्वेन पवित्रं पापनाशनम् ।
यं श्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥
कपिला अग्निहोत्रार्थे यज्ञार्थे च वरानने ! ।
उद्धृत्य सर्व्वतेजांसि ब्रह्मणा निर्म्मिता पुरा ॥
पवित्राणां पवित्रेषु मङ्गल्यानाञ्च मङ्गलम् ।
पुण्यानां परमं पुण्यं कपिला च वसुन्धरे ! ॥
तपसस्तप एवाग्र्यं व्रतानां व्रतमुत्तमम् ।
दानानामुत्तमं दानं निधीनां स्यात्तदक्षयम् ॥
पृथिव्यां यानि तीर्थानि गुह्यान्यायतनानि च ।
पवित्राणाञ्च पुण्यानि सर्व्वलोकेषु सुन्दरि ! ॥
हूयतेऽग्न्यग्निहोत्राणि सायं प्रातर्द्विजातिभिः ।
कपिलायाः पृतेनेह दध्ना क्षीरेण वा पुनः ॥
जुहुते ह्यग्निहोत्राणि मन्त्रैश्च विविधैः सदा ।
पूजयन्तितिथौ चैव परां भक्तिमुपागताः ॥
ते यान्त्यादित्यवर्णेन विमानेर्द्विजसत्तमाः ।
सूर्य्यमण्डलमध्ये च ब्रह्मणा निर्म्मिता पुरा ॥
कपिला या पितॄणाञ्च सर्व्वसौख्यप्रदायिनी ।
सिद्धिवृद्धिकरी देवी कपिलानन्तरूपिणी ॥
पूर्व्वोक्ता यासु कपिलाः सर्व्वलक्षणलक्षिताः ।
एतद्वराः समाख्याताः कपिलास्ते वरानने ! ॥
सर्व्वा ह्येता महाभागास्तारयन्ति न संशयः ।
सङ्गमेषु प्रशस्ता च सर्व्वपापप्रणाशिनी ॥
अग्निपुच्छा ग्राममुखा अग्निलोमानलप्रभा ।
तथाग्नेयी सदा देवी सुवर्णाख्या प्रवर्त्तते ॥"* ॥
शूद्रात् कपिलाप्रतिग्रहे दोषो यथा,—
"शूद्रीञ्चा कापिलां शूद्रात् कामतः सदृशो भवेत् ।
पतितः स द्विजातीनां चाण्डालसदृशो हि सः ॥
न तस्मात् प्रतिगृह्णीयात् शूद्रादिप्रः प्रतिग्रहम् ।
दूरात्ते प्रतिहर्त्तव्याः श्वभिर्मुक्ता इवाध्वरे ॥
सर्व्वकार्य्ये हि सर्व्वे वै वर्ज्जिताः पितृदेवतैः ।
असभाष्याप्रतिग्राह्याः शूद्रास्ते पापकर्म्मिणः ॥
पिबन्ति यावत् कपिलां तावत्तेषां पितामहाः ।
भूमेर्मलं समश्नन्ति जायन्ते विड्भुजश्चिरम् ॥"*
शूद्रस्य कपिलाक्षीरादिपाने दोषो यथा,—
"तासां क्षीरं घृतं वापि नवनीतमथापि वा ।
उपजीवन्ति ये शूद्रास्तेषां गतिमथो शृणु ॥
कपिलाजीविनः शूद्राः क्रूरा गच्छन्ति रौरवम् ।
रौरवे तु महारौद्रे वर्षकोटिशतं धरे ! ॥
ततोऽपि मुक्ताः काकेन श्वानयोन्यां व्रजन्ति ते ।
श्वानयोन्या विमुक्तस्तु विष्ठायां जायते क्रिमिः ॥
विष्ठास्थानेषु पापिष्ठा दुर्गन्धिषु च नित्यशः ।
भूयो भूयो जायमानास्तत्रोत्तारं न विन्दति ॥
ब्राह्मणश्चैव यो विद्वान् कुर्य्यात्तेषां प्रतिग्रहम् ।
ततःप्रभृतमेश्नान्तः पितरस्तस्य शेरते ॥
न तं विप्रन्तु सम्भाषेन्न चैवैकासनं विशेत् ।
स नित्यं वर्ज्जनीयो हि दूरात्तु ब्राह्मणोऽध्वरे ॥
यस्तेन सह संभाषेत्तथा चैकासनं व्रजेत् ।
प्राजापत्यं चरेत् कृच्छ्रं तेन शुध्यति स द्विजः ॥"
अथासन्नप्रसवकपिलादानफलादि ।
"एकस्य गोप्रदानस्य सहस्रन्तु पूर्य्यते ।
किमन्यैर्बहुभिर्दानैः कोटिसंख्यातविस्तरैः ।
श्रोत्रियाय दरिद्राय कृतघ्नायाहिताग्नये ॥
आसन्नप्रसवां धेनुं दातव्यां प्रतिपालयेत् ।
कपिलाञ्चैप्रसूता वै दातव्या च द्विजन्मने ॥
जायमानस्य वत्सस्य सुखं योन्या प्रदृश्यते ।
तावत् सा पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥
धेन्वा यावन्ति रोमाणि सवत्साया वसुन्धरे ! ॥
तावतो वर्षकोट्यस्तु ब्रह्मवादिभिरर्च्चिताः ।
वसन्ति ब्रह्मलोके वै ये च वै कपिलाप्रदाः ॥
सुवर्णशृङ्गीं यः कृत्वा रौप्यखुराञ्चतथा ।
ब्राह्मणस्य करे दत्त्वा सुवर्णं रौप्यमेव च ॥
कपिलायास्तदा पुच्छं ब्राह्मणस्य करे न्यसेत् ।
उदकञ्च करे दद्यादाचम्य शुद्धयादितः ॥
ससमुद्राटवी तेन सशैलवनकानना ।
रत्नपूर्णा भवेद्दत्ता पृथिवी नात्र संशयः ॥
पृथिवीदानतुल्येन दानेनेतेन वै नरः ।
नन्दितो याति मित्रैर्विष्णोश्च परमं पदम् ॥
ब्रह्मचारी गोव्रती च भुञ्जानो प्रापदेहकः ।
सदापातकयुक्तोऽपि वधको ब्रह्मदूषकः ॥
निन्दको ब्राह्मणानाञ्च तथा कर्म्मोपदूषकः ।
एतैः पातकयुक्तोऽपि गवां दानेन शुध्यति ॥
यश्चोभयमुखीं दद्यात् प्रभूतकनकान्विताम् ।
तद्दिनं पयसाहारः पायसेनापि वा भवेत् ॥
सुवर्णस्य सहस्रेण तदर्द्धेनापि भामिनि ! ।
तस्यार्द्धमूल्येनापि पश्चाच्च तदर्द्धकम् ॥
यथाशक्ति प्रदातव्या विप्रेभ्यो विवर्द्धयेत् ॥
इमां यज्ञोभयमुखीमुभयत्र शमोस्तु वै ।
मम वंशविवृद्ध्यर्थं सदा स्वस्तिकरी भव ॥"
गोशरीरे देवतानिवेशो यथा,—
"दन्तेषु मरुतो देवा जिह्वायान्तु सरस्वती ।
खुरमध्ये तु गन्धर्व्वाः खुराग्रेषु तु पन्नगाः ॥
सर्व्वसन्धिषु साध्याश्च चन्द्रादित्यौ तु लोचने ।
ककुदि सर्व्वनक्षत्रं लाङ्गूले धर्म्म आश्रितः ॥
अपाने सर्व्वतीर्थानि प्रस्रावे जाह्नवी नदी ।
नानाद्वीपसमाकीर्णाश्चत्वारः सागरास्तथा ॥
ऋषयो रोमकूपेषु गोमये पद्मधारिणी ।
रोमसु सन्ति विद्याश्च लक्ष्मीश्चैवयनद्वयम् ॥
धैर्य्यं धृतिश्च शान्तिश्च पुष्टिर्वृद्धिस्तथैव च ।
स्मृतिर्मेधा तथा लज्जा वपुः कीर्त्तिस्तथैव च ॥
विद्या भ्रान्तिर्मतिश्चैव सन्ततिः परमा तथा ।
गच्छन्तीमनुगच्छन्ति एता गां वै न संशयः ॥
यत्र गावो जगत्तत्र देवदेवपुरोगमाः ।
यत्र गावस्तत्र लक्ष्मीः सांख्यधर्म्मश्च शाश्वतः ॥
सर्व्वरूपेषु तां गावस्तिष्ठन्त्यभिमताः सदा ।
गावः पवित्रा मङ्गल्या देवानामपि देवताः ॥
यस्याः सुश्रूषते भक्त्या स पापेभ्यः प्रमुच्यते ॥"
इति वराहपुराणम् ॥

धेनुकः, पुं, (धेनुरिव प्रतिहन्तिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) असुरविशेषः । स बलरामेण हतः । इति श्रीभागवते १५ अध्यायः ॥ (अयन्तु गर्द्दभरूपी गोवर्द्धनस्योत्तरपार्श्वस्थतालवनवासी । यथा, हरिवंशे । ६६ । २—२३ ।
"आजग्मतुस्तौ सहितौ गोधनैः सहगामिनौ ।
गिरिं गोवर्द्धनं रम्यं वसुदेवसुतावुभौ ॥
गोवर्द्धनस्योत्तरतो यमुनातीरमाश्रितम् ।

दृष्ट्वातेऽथ तौ वीरौ रम्यं तालवनं महत् ॥
तौ तालपक्वप्रकरे रम्ये तालवने रतौ ।
चेरतुः परमप्रीतौ दृप्तपोताविवोन्नतौ ॥
स तु देशः समः स्निग्धः सुमहान् लक्षणान्वितः ।
दर्भप्रायस्थलीभूतो लोष्टपाषाणवर्जितः ॥
तालैस्तैर्निपुलस्कन्धैरुच्छ्रितैः श्यामपर्व्वभिः ।
फलाढ्यग्राखिभिर्भाति नागहस्तरिवोच्छ्रितैः ॥
तच्च दामोदरो वाक्यमुवाच वदतांवरः ।
अहो तालफलैः पक्वैर्व्वासितेयं वनस्थली ॥
स्वादून्यार्य्य ! सुगन्धीनि श्यामानि रसवन्ति च ।
पक्वतालानि सहितौ पातयामो लघुक्रमौ ॥
यद्येषामीदृशो गन्धो माधुर्य्यमाणतर्पणः ।
रसेनाऽनुत्तमकल्पेन भवितव्यञ्च मे मतिः ॥
दामोदरवचः श्रुत्वा रौहिणेयो हसन्निव ।
पातयन् पक्वतालानि चालयामास तांस्तरून् ॥
तत्तु तालवनं नाम्नासेयं दुरतिक्रमम् ।
निर्म्माणभूतमौरिभं पुरुषादानयोपमम् ॥
दारुणो धेनुको नाम दैत्यो गर्दभरूपधृक् ।
खरयूथेन महता वृतः समनुवर्त्तते ॥
स तत्तालवनं घोरं गर्दभः परिरक्षति ।
नृपशिश्वापदग्रासान्त्रासयन् सुदुर्म्मतिः ॥
तालशब्दं स तं श्रुत्वा संक्षुब्धं फलपातनात् ।
नामर्षयत संक्रुद्धस्तालस्वनमिव द्विपः ॥
शब्दानुसारी संक्रुद्धो दर्पाविष्टसटाननः ।
खञ्चाद्यो हेषितपटुः खुरैर्निर्द्दारयन्महीम् ॥
आविद्धपुच्छो दृप्तितो व्यात्तानन इवान्तकः ।
आपतन्नेव दृष्टो रौहिणेयमुपस्थितम् ॥
तालानां तमधो दृष्ट्वा सञ्चयाकारसंचयम् ।
रौहिणेयं खरो दृष्टः सोऽदृष्टद्यूनायुधः ॥
पङ्क्तानुभाभ्याञ्च पुनः पश्चिमार्द्धां पराङ्मुखः ।
अथानोरसि देवेन्द्रो रौहिणेयं निरायुधम् ॥
ताभ्यामेव स जग्राह पद्भ्यां तं दैत्यगर्दभम् ।
आवर्च्छितमुखस्कन्धं प्रेरयंस्तालमूर्द्धनि ॥
स भस्मोरुकटिग्रीवो भग्नदृष्टो दुरासदः ।
खरस्तालफलैः सार्द्धं पपात धरणीतले ॥
तं गतासुं गतश्रीकं पतितं वीक्ष्य गर्दभम् ।
ज्ञातीनां स्वधापरांस्तस्य बलराजनि सोऽक्षिपत् ॥
सा भूगर्द्दभदेहैश्च तालैः पक्वैश्च पातितैः ।
बभासे कृष्णजलदा द्यौरिवायुक्तशारदी ॥
तस्मिन् गर्दभदैत्ये तु सानुगे विनिपातिते ।
रम्यं तालवनं तद्धि भूयो रम्यतरं बभौ ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८४ । ८१—८३ ।
"ततो गच्छेत राजेन्द्र ! धेनुकं लोकविश्रुतम् ।
एकरात्रोषितो राजन् ! प्रयच्छेत्तिलधेनुकाम् ॥
सर्व्वपापविशुद्धात्मा सोमलोकं व्रजेद्ध्रुवम् ।
तत्र चित्रं महाराज ! अद्यापि हि न संशयः ।
कपिला सह दत्तसा वै पर्व्वते विचरत्युत ॥
सवत्साया पदान्यस्या दृश्यन्तेऽद्यापि भारत ! ।
तेषूपस्पृश्य राजेन्द्र ! पदेषु नृपसत्तम ! ।
यत् किञ्चिदशुभं पापं तत् प्रणश्यति भारत ॥")
धोड्ढरतिबन्धान्तर्गतद्वादशबन्धः । यथा,—

"सुप्तां स्त्रियं समालिङ्ग्य स्वयं सुप्तो रमेत् पुनः ।
लघुलिङ्गं चालयेद्यो बन्धोऽयं धेनुकः स्मृतः ॥"
इति रतिमञ्जरी ॥
(अपरविधलक्षणं यथा,—
"न्यस्तहस्तयुगला निजे पदे
योषितेति कटिरूढवल्लभा ।
अयतो यदि तैरधोमुखी
धेनुकं दृषवदुद्वहेत् प्रिये ! ॥")
धेनुकस्दनः, पुं, (धेनुकं गोवर्द्धनोत्तरपार्श्वस्थतालवनवासिनमसुरं निसूदयति बलरामद्वारेति । सूद + ल्यु ट् ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥ (बलरामः । इति पुराणम् ॥)
धेनुका, स्त्री, (धेनुरिव प्रतिकृतिः । धेनु + कन् । टाप् ।) इक्षुनली । (धेनुरेव । स्वार्थे कन् ।) गौः । इति मेदिनी । के, १७६ ॥ (यथा, महाभारते । ७ । ७६ । १८ ।
"इमां ते तरसौ भार्य्यां त्वदाधिभिरभिप्लुताम् ।
कथं सन्तारयिष्यामि विवत्सामिव धेनुकाम् ॥")
धेनुदुग्धं, क्ली, (धेनोर्दुग्धमिव शुभ्रं फलमस्य ।) चिर्भिटः । इति राजनिर्घण्टः ॥ (धेनोर्दुग्धम् ।) गोक्षीरम् ॥
धेनुदुग्धकरः, पुं, (करोति वर्द्धयतीति । कृ + अच् । धेनोर्दुग्धस्य करः । एतद्भक्षणेन धेनुदुग्धवर्द्धनादस्य तथात्वम् ।) गर्ज्जरः । इति राजनिर्घण्टः ॥
धेनुष्या, स्त्री, (धेनु + "संज्ञायां धेनुष्या ।" ४ । ४ । ८६ । इति ष्ठगागमो यत्प्रत्ययश्च निपात्यते ।) वन्ध्यकेऽपि स्थिता गौः । इत्यमरः । २ । ६ । ७२ ॥ यां वन्ध्यकेऽपि दत्त्वा अर्थं नीतवान् सा । गौर्म्मेहिषी वा या दुग्धवन्ध्यके स्थिता सा धेनुष्येति हलायुधः । इति भरतः ॥
धेनुकं, क्ली, (धेनूनां समूहः । "अचित्तहस्तिधेनोष्ठक् ।" ४ । २ । ४७ । इति ठक् ।) धेनुसमूहः । इत्यमरः । २ । ६ । ६० ॥ (स्त्रीणां करणभेदः । इति मेदिनी । के, १०६ ॥)
धैर्य्यं, क्ली, (धीरस्य भावः कर्म्म वा । धीर + ष्यञ् ।) धीरता । धीरस्य भाव इत्यर्थे ष्यञ्प्रत्ययः ॥ तस्य लक्षणं यथा,—
"स्थिरचित्तोन्नतिर्या तु तद्धैर्य्यमिति कीर्त्यते ॥"
इत्युज्ज्वलनीलमणिः ॥
(इदं नायकसत्त्वगुणानामन्यतमः । यथा, साहित्यदर्पणे । ३ । ५८ ।
"शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी ।
ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥"
तल्लक्षणं यथा, तत्रैव । ३ । ६३ ।
"यवसायादचलनं धैर्य्यं विघ्ने महत्यपि ॥"
उदाहरणं यथा,—
"श्रुताक्षरोगीतिरपि त्रयोऽस्त्रिज्ञ
हरः प्रसक्तप्रणयपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति ॥")

धैवतः, पुं, (धीमतामयम् । धीमत् + अण् । एषोदरादित्वात् मस्य वत्वम् ।) सप्तस्वरान्तर्गतषष्ठस्वरः । स तु नारदमते अष्टस्वरतुल्यः । (अष्टसु धैवतं रौतीति वचनात् ॥) तानसेनमते मेकस्वरतुल्यः । अस्योच्चारणस्थानं ललाटम् । याज्ञवल्क्यमते दन्ताः । अयं क्षत्रियवर्णः । अस्य जातिः षाड्वः । अस्य तानम् ७२० प्रत्येकतानम् ४८ समुदायेन ३४,५६० भवन्ति । इति संगीतशास्त्रम् ॥
"गत्वा नाभेरधोभागं वह्निं प्राप्योर्द्ध्वगः पुनः ।
धावन्निव च यो याति कण्ठदेशं स धैवतः ॥"
अस्य श्रुतयस्तिस्रः । इति संगीतदामोदरः ॥ (यथा च सङ्गीतदर्पणे । १ । ५१ ।
"मद्रन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः ॥"
अस्य ऋषिकुले उद्भवः । क्षत्रियो जातिः । पीतो वर्णः । श्वेतद्वीपे जन्म । ऋषिस्तुम्बुरुः । गणेशो देवता । उष्णिक् छन्दः । वीभत्सभयानकरसयोरुपयोगित्वम् । इति सङ्गीतदर्पणम् ॥)
धोड़ः, पुं, (धोरति चातुर्य्येण गच्छतीति । धोर गतिचातुर्य्ये + घञ् । रस्य लत्वम् ।) सर्पविशेषः । धोड़ा इति भाषा । तत्पर्य्यायः । राजिलः २ डुण्डुभः ३ दुण्डुभः ४ । इति शब्दरत्नावली ॥
धोर, ऋ गतिचातुर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ऋ, अदुधोरत् । गतौ चातुर्य्ये गतिचातुर्य्यम् । धोरन्त्या धोरणाक्रान्ता विनीता यस्य वारणाः । इति दुर्गादासः ॥
धोरणं, क्ली, (धोरति गच्छत्यनेनेति । धोर + करणे ल्युट् ।) सर्व्ववाहनम् । इत्यश्वरघदोलादि । इत्यमरः । २ । ८ । ५८ ॥ (धोर + भावे ल्युट् ।) अश्वप्रथमगतिः । तत्पर्य्यायः । धौरितकम् २ धौर्य्यम् ३ धोरितम् ४ । इति हेमचन्द्रः । ४ । ३१२ ॥
धोरणिः, स्त्री, (धोरति क्रमशः प्राप्नोतीति । धोर् + अनिः ।) परम्परा । इति जटाधरः ॥
धोरितं, क्ली, (धोर् + क्तः ।) धोरणम् । अश्वप्रथमगतिः । इति हेमचन्द्रः । ४ । ३१२ ॥
धोरितकं, क्ली, (धोरितमश्वप्रथमगतिस्तेन कायतीति । कै + कः ।) धौरितकम् । इत्यमरटीकायां रमानाथः ॥
धौतं, क्ली. (धाव्यते स्मेति । भाव + कर्म्मणि क्तः ।) मार्ज्जितम् । धोया इति भाषा । तत्पर्य्यायः । निर्णिक्तम् २ क्षौधितम् ३ स्नष्टम् ४ क्षालितम् ५ । इति हेमचन्द्रः । ६ । ७३ ॥ * ॥
"ध्मयद्धौतं स्त्रिया धौतं यद्धौतं रजकेन च ।
अधौतं तद्विजानीयाद्दृष्ट्वा दक्षिणपश्चिमे ॥"
इति कर्म्मलोचनम् ॥
धौतं, क्ली, (धाव + क्तः ।) रूप्यम् । इति राजनिर्घण्टः ॥
धौतकटः, पुं, (धौतः कटः । नित्यकर्म्मधारयः ।) सूत्ररचितभाण्डम् । धोकड़ा इति ख्यातः । तत्पर्य्यायः । खोनः २ स्यूतः ३ प्रसेवकः ४ । इति

जटाधरः ॥ सूनुः ५ स्नातः ६ । इति भरतधृतकोषान्तरम् ॥

धौतकोषजं, क्ली, (कोषाज्जायते इति । कोष+जन+डः । धौतं कोषजम् ।) पत्रोर्णम् । इति शब्दरत्नावली ॥

धौतकौषे(शे)यं, क्ली, (धौतं क्षालितं कौषेयम् ।) पत्रोर्णम् । इत्यमरः । २ । ६ । ११३ ॥ कौषेयमेव धौतं प्रक्षालितं पत्रोर्णाख्यं वटलकुचादिपत्रेषु क्रिमिभिरूर्णायाः क्षतत्वात् पत्रसम्बन्धिनी ऊर्णा जन्यते पत्रोर्णम् । इति भरतः ॥

धौतशिलं, क्ली, (धौतेव शिला यस्य ।) स्फाटिकम् । इति त्रिकाण्डशेषः ॥

धौमकः, पुं, (धूमे धूमप्रधानदेशे भवः । धूम+"धूमादिभ्यश्च ।" ६ । २ । १२० । इति वुञ् ।) देशविशेषः । इति केचित् ॥

धौरः, पुं, धवदृक्षः । इति भावप्रकाशः ॥

धौरितकं, क्ली, (धौरितक+प्रज्ञादित्वात् ।) अश्वानां पञ्चविधगत्यन्तर्गतगतिविशेषः । इत्यमरः । २ । ८ । ४८ ॥ तत्र वल्गक् गतिरास्कन्दितं गाम इति ख्यातं तल्लक्षणिका बहुदा गतिः । इति भरतः ॥

धौरेयः, त्रि, (धुरं वहतीति । "धुरो यड्ढकौ ।" ४ । ४ । ७७ । इति ढक् ।) रथशाङ्गादिभारवोढ़ा । इत्यमरः । २ । ८ । ६५ ॥ अगडुहि, पुं । इति राजनिर्घण्टः ॥

धौर्त्तिकं, त्रि, धूर्त्तस्येदम् । धूर्त्तस्य भावः । इति धूर्त्तशब्दात् ष्ठिकप्रत्ययेन निष्पन्नम् ॥

धौर्य्यं, क्ली, (धुर्यस्य कर्म्म । धुर्य+ष्यञ् ।) अश्वस्य प्रथमगतिः । इति हेमचन्द्रः । ३ । ३१२ ॥

धा, अग्नियुतौ । धावौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) युतिरिति वाहुलकान्न दीर्घः । अग्नियुतिरग्निसंयोगः । धनिः शब्दोत्पत्तिहेतुभावः । धमति सुवर्णं वणिक् अग्निसंयुक्तं करोतीत्यर्थः । धमति शब्दं जनः सम्पादयतीत्यर्थः । अग्निपृक्तत्वौ च । सुखेनैव धमेदग्निम् । इति दुर्गादासः ॥

धाकारः, पुं, (धा अग्निसंयोगकर्त्तारं करोतीति । कृ+अण् ।) लोहकारकः । इति हलायुधः ॥

धामा, [न्] पुं, (धा+"नामन्सीमन्निति ।" उणां ४ । १५० । इति मनिन्प्रत्ययेन निपातनात् साधुः । उज्ज्वलदत्तस्तु धायतेर्मनिन् इत्युक्त्वा धामन् इति शब्दमिच्छति ।) परिणामम् । आलोकः । ध्यानम् । इति सिद्धान्तकौमुदीव्याख्यायामुणादिवृत्तिः ॥

धामं, त्रि, (ध्यै चिन्तने+क्तः ।) चिन्तितम् । यथा, भागवते । ६ । [तम् ॥"

"ध्यातं वित्तमभूत्तिर्यङ्नृ च पुनर्विष्ठाः परं ग्राम्यधामं, क्ली, (ध्यै+भावे क्युट् ।) चिन्तनम् । (यथा, मनुः । १ । १२ ।

"तस्मिन्नर्के स भगवानुषित्वा परिवत्सरम् स्वमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा ॥")

धारणाविषये एकप्रत्ययसन्ततिः । इति हेमचन्द्रः । २ । २३४ ॥ अद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरेन्द्रियवृत्तिप्रवाहः । इति वेदान्तसारः ॥ * ॥ यथा, विष्णुपुराणे ।

"तद्रूपप्रत्ययैकसन्ततिश्चान्यनिस्पृहा ।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ! ॥"

अस्यार्थः । "तद्रूपस्य धारणासिद्धस्य वस्तुनः प्रत्यया यस्यां सन्ततौ सा एकावच्छिन्ना सन्ततिः । अन्यनिस्पृहा विषयान्तरेणाव्यवधीयमाना । विजातीयप्रत्ययान्तरितः सजातीयप्रत्ययप्रवाहो ध्यानमित्यर्थः । तच्च प्रथमैर्यमादिभिर्धारणान्तैः षड्भिरङ्गैर्निष्पाद्यते ।" इति तट्टीका ॥ * ॥

श्रीलक्ष्मा उवाच ।

"सर्व्वे देवाः प्राकृतिका यावन्तो मूर्त्तिधारिणः ।
अहमात्मा नित्यदेही भक्तध्यानानुरोधतः ॥"

इति ब्रह्मवैवर्त्ते ज़न्मखण्डम् ॥

ब्रह्मचिन्ता । यथा, गारुड़े ४६ अध्याये ।

"ब्रह्मालम्बिचिन्ता ध्यानं स्यात् धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥"

अपि च ।

"प्राणायामैर्द्वादशभिर्यावत्कालो हुतो भवेत् ।
यस्तावत्कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ।
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः ॥
द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः ।
तुरीये तु स यतो युक्तः समाधिः सोऽभिधीयते ॥
ध्येयान्न चलति यस्य मनोऽभिध्यायतो ध्रुवम् ।
प्राप्यावधिकृतं कालं यावत् सा धारणा स्मृता ॥
ध्येये सक्तं मनो यस्य ध्येयमेवानुपश्यति ।
नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्त्तितम् ॥
ध्येये मनोनिश्चलतां याति ध्येयं विचिन्तयन् ।
यत्तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥
ध्येयमेव हि सर्व्वत्र ध्याता तन्मयतां गतः ।
प्रशस्तं हेतुरहितं समाधिः सोऽभिधीयते ॥"

इति गारुड़े २७० अध्यायः ॥

ध्यानयोगः, पुं, (ध्यानमेव योगः ।) ध्यानरूपयोगः । यथा,—

"विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥"

इति श्रीभगवद्गीतायां १८ अध्यायः ॥

ध्यामं, क्ली, (ध्यायते पशुभिरिति । ध्यै चिन्तने+बाहुलकात् मक् ।) दमनकवृक्षः । गन्धलक्षम् । (यथा, सुश्रुते । १ । २८ ।

"ध्यामकुङ्कुमकट्फलवर्णाः पित्तकोपतः ॥")

श्यामले, त्रि । इति मेदिनी । मे, १७ ॥

ध्यामकं, क्ली, (ध्यामस्येव प्रतिकृतिः । ध्याम+"इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) रोहिषतृणम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । १ । ३८ ।

"गलातगरकुष्ठमांसीध्यामकालशपत्रनागपुष्पप्रियङ्गुरेणुका-त्वगेलनख-युक्तिपत्त्राख्यौशीरयक-श्रीवेष्टकचोचचोरकवालकगुग्गुलुसर्ज्जरसतुरुष्ककुन्दुरुकागुरुसृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरश्चेति ॥")

ध्यामा, [न्] पुं, (ध्यै+"नामन्सीमन्निति ।" उणां ४ । १५० । इति मनिन्प्रत्ययेन निपातनात् साधुः ।) परिणामः । चिन्तायाम्, क्ली । इत्युणादिकोषः ॥

ध्येयः, त्रि, (ध्यायते इति । ध्य+यत् ।) ध्यातव्यः । ध्यानीयः । चिन्तनीयः । यथा,—

"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ॥"

इति श्रीनारायणध्यानम् ॥

ध्यै, चिन्तने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-ऋनिट् ।) ध्यायति विष्णुं वैष्णवः । इति दुर्गादासः ॥

ध्रज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ध्रजति । इति दुर्गादासः ॥

ध्रज, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । इदित् ।) इ, ध्रञ्जति । इति दुर्गादासः ॥

ध्रज, भाने । इति कविकल्पद्रुमः । (भ्वां-परं-अकं-सेट् ।) ध्रजति ऋदङ्गः । इति दुर्गादासः ॥

ध्रस, क उत्क्षेपे । उत्क्षे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, ध्रासयति । इति दुर्गादासः ॥

ध्रस, ग उ उत्क्षे । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-सकं-सेट् । उदित्त्वात् क्रावेट् ।) ग, ध्रस्नाति ध्रस्नं दीर्घः । उ, ध्रसिता ध्रस्ता । इति दुर्गादासः ॥

ध्राक्ष, इ काङ्क्षे । घोरयते । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) रेफयुक्तः । घोरयतमिच्छतिरत्वामेव घोरशब्दः । इ, ध्राक्षति पक्षी । नमश्चपाठेनैवेदसिद्धे अस्य इदुपधस्यो वेदेषु धारणमेदार्थः । इति दुर्गादासः ॥

ध्राख, ऋ ओखार्थे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं सेट् ।) रेफयुक्तः । ऋ, अदध्राखत् । ओखार्थे शोषालमर्थयोः । इति दुर्गादासः ॥

ध्राघ, ङ ऋ गत्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ङ, ध्राघते । ऋ, अदध्राघत् । इति दुर्गादासः ॥

ध्राञ्जि:, स्त्री, (ध्राञ्जयतीति । ध्रञ्ज गतौ+क्विप् । इन् ।) वातालिः । इत्युणादिकोषः ॥ चूरण वातास इति भाषा ॥ (ध्राञ्जि+भावे इन् । गतिः । यथा, ऋग्वेदे । १० । १३६ । २ ।

"मुनयो वातरशनाः पिशङ्गा वसते मला ।
वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत ॥"

"वातस्य वायोर्ध्राजिं गतिमनुयन्ति अनुगच्छन्ति ॥" इति तद्भाष्ये सायणः ॥)

ध्राड, ऋ ङ ओर्द्धौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) रेफयुक्तः । ऋ, अदध्राङत् । ङ, ध्राङते । ओर्द्धिः विभेदः । इति दुर्गादासः ॥

ध्राड़िः, पुं, (धाड़ते ग्रीर्ष्मो भवतीति । धाड़+ "सर्व्वधातुभ्य इन् ।" उणा ।४।११८। इति इन् ।) पुण्यक्षयः। इत्युणादिकोषः ॥

ध्रिज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ध्रेजति । इति दुर्गादासः ॥

ध्रु, णि } स्थैर्य्ये । सर्पणे । इति कविकल्पद्रुमः ॥
ध्रु, ग्रि } (भ्वां-तुदां च-स्थैर्य्ये अकं-सर्पणे सकं-परं-अनिट् ।) द्वौ रेफयुक्तौ । आद्यो दीर्घान्त इति कश्चित् । णि, ध्रुतोऽस्ति । ग्रि, ध्रुवति अध्रुवीत् । ध्रुवति ग्रैल्यः। इति दुर्गादासः ॥

ध्रुवं, क्ली, (ध्रुवति स्थिरीभवतीति । ध्रु+"सुवः कः ।" उणा । २ । ६१ । इत्यच । "बाहुलकात् ध्रु स्थैर्य्ये अतोऽपि कः ।" इत्युज्ज्वलदत्तोक्त्या कः ।) निश्चितम् । (यथा, ग्राकुन्तले १ अङ्के ।

"ध्रुवं स नीलोत्पलपत्रधारया
ग्रमीलतां क्षेत्तुरुदर्य्यवस्यति ॥")

तर्कः । इति मेदिनी । वे, १३ ॥ आकाशम् । इति हेमचन्द्रः ॥

ध्रुवं, त्रि, (ध्रु गतिस्थैर्य्ये + बाहुलकात् कः ।) सन्ततम् । ग्राश्वतम् । इति मेदिनी । वे, १३ ॥ स्थिरम् । निश्चितम् । इति हेमचन्द्रः ।६।८६ ॥ (यथा, चाणक्यशतके । ६३ ।

"यो ध्रुवाणि परित्यज्य ग्रध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति ग्रध्रुवं नष्टमेव हि ॥")

ध्रुवः, पुं, (ध्रुवति स्थिरीभवतीति । ध्रु+बाहुलकात् कः ।) ग्रङ्कुः । हरः । (यथा, महाभारते । १३ । १७ । १०३ ।

"धाता ग्रङ्कश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥") विष्णुः । (यथा, महाभारते । १३ ।१४६।१६ ।

"विश्वकर्म्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥") वटः । उत्तानपादजः । (अस्य विवरणन्तु यथात्र द्रष्टव्यम् ।) वसुभेदः । (यथा, मात्स्ये । ५ । २१ ।

"ग्रापो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥") योगभेदः । इति मेदिनी । वे, १३ ॥ (यथा, ज्योतिषे ।

"गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ॥") स्थाणुः । इत्यमरः । २ । ४ । ८ ॥ मुरारिपत्नी । इति त्रिकाण्डशेषः ॥ ध्रुवकः । इति सङ्गीतदामोदरः ॥* (रोहिणीगर्भे वसुदेवाज्जातः पुत्रविशेषः । यथा, भागवते ।६।२४।४६।

"वलं गदं सारणञ्च दुर्म्मदं विपुलं ध्रुवम् ।
वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥"

पाञ्चवपक्षीयः कश्चित् क्षत्रियवीरः । इति महाभारते । ७ । १५६ । ३७ ॥ नहुषस्य पुत्रविशेषः । यथा, महाभारते । १ । ७५ । ३० ।

"यतिं ययातिं संयातिमायातिमयतिं ध्रुवम् ।
नहुषो जनयामास षट् सुतान् प्रियवाससि ॥"

पुरुवंशीयराजभेदस्य पुत्रविशेषः । यथा, भागवते । ९ । २० । ६ ।

"ऋतेयो रन्तिनावोऽभूत् त्रयस्तस्यात्मजा नृप ! ।
सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥"

रोमावर्त्तविशेषः । यथा, ग्रन्थार्थचिन्तामणौ ।

"ग्रावर्त्तसाम्यादावर्त्तो रोमसंस्थानमङ्गिनाम् ॥"

ते च दशधा यथा,—

"द्वावुरस्यौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोपरन्ध्रयोः ।
एको भाले ललाटे च दशावर्त्ता ध्रुवाः स्मृताः ॥"

यज्ञीयग्रहपात्रविशेषः । यथा, कात्यायनश्रौतसूत्रे । ६ । ५ । १७ ।

"यजमानस्ततो ग्रहमुद्गृह्णमा ध्रुवात् ॥")

नासाग्रम् । तच्च ग्रासन्नमुन्नतं पश्यति । यथा,

"ग्ररुन्धतीं ध्रुवञ्चैव विष्णोर्लोकेऽपि पश्यति च ।
ग्रासन्नमुन्नतं पश्येच्चतुर्थं मालमङ्गलम् ॥
ग्ररुन्धती भवेच्छिक्षा ध्रुवो नासाग्रसूचते ।
विष्णोः पदानि भ्रूमध्ये नेत्रयोर्मालमङ्गलम् ॥"

इति काश्मीरखण्डे । १२ । १३—१४ ॥

ध्रुवलोकोत्पत्तिर्यथा,—

"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु ।
द्वौ पुत्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव ॥
तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः ।
ग्रभीष्टायामभूद्वत्स ! ध्रुवस्त्वन्यवल्लभः ॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज ! ।
स नातिप्रीतिमांस्तस्यां तस्याचाभूद्ध्रुवः सुतः ॥
राजासनस्थितस्याङ्के पितुर्भ्रातरमाश्रितम् ।
दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथम् ॥
सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकम् ।
पुत्रं पितुस्तथाऽरूढुं सुरुचिर्वाक्यमब्रवीत् ॥
एतद्राजासनं सर्व्वभूभृतसंश्रयकेतनम् ।
योग्य ग्रमेव पुत्रस्य किमात्मा क्लिश्यते त्वया ॥
उत्तमञ्च पितुरं ग्रालक्षत्तं श्रुत्वा मातृभाषितम् ।
जगाम कुपितो मातुर्निजाया द्विज ! मन्दिरम् ॥
तं दृष्ट्वा कुपितं पुत्रमीषत्प्रस्फुरिताधरम् ।
सुनीतिरङ्कमारोप्य मैत्रेयेदमभाषत ॥
वेत्स ! कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति ।
कोऽवजानाति पितरं तव यस्तेऽपराध्यति ॥
इत्युक्तः सकलं मात्रे कथयामास तद्यथा ।
सुरुचिः प्राह भूपालप्रत्यक्षमतिगर्व्विता ॥

सुनीतिरुवाच ।

सुरुचिः सत्यमाहेदं खल्वभाग्योऽसि पुत्रक ! ।
न हि प्रत्यक्षतां वत्स ! सपत्नेरेवसुच्यते ॥
यदि चेद्दुःखमत्यर्थं सुरुच्या वचनात्तव ।
ततः पुण्योपचये यत्नं कुरु सर्व्वफलप्रदे ॥

पराशर उवाच ।

निर्जगाम गृहान्मातुरित्युक्त्वा मातरं ध्रुवः ।
पुराच्च निर्गम्य ततस्तद्वाक्योपवनं ययौ ॥
स ददर्श मुनींस्तत्र सप्त पूर्व्वागतान् ध्रुवः ।
निर्जगाम वनात्तस्मात् प्रणिपत्य स तान्मुनीन् ॥
मधुसंज्ञं महापुण्यं जगाम यमुनातटम् ।
यत्रैव देवदेवस्य सान्निध्यं हरिमेधसः ॥
सर्व्वपापहरे तस्मिन् तपस्तीर्थे चकार सः ।

पदाङ्गुष्ठेन संपीड्य यदा स्थ वसुधां स्थितः ।
तदा समस्तवसुधा चचाल सह पर्व्वतैः ॥
भगवानपि सर्व्वात्मा तन्मयत्वेन तोषितः ।
गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः ॥
ग्रौत्तानपादे भद्रन्ते तपसा परितोषितः ।
वरदोऽहमनुप्राप्तो वरं वरय सुव्रत ! ॥

ध्रुव उवाच ।

भगवन् सर्व्वभूतेश ! सर्व्वस्यास्ते भवान् हृदि ।
किमज्ञातं तव स्वामिन् ! मनसा यन्नयेच्चितम् ॥
नेतद्राजासनं योग्यमजातस्य ममेश्वरात् ।
इति गर्व्वादवोचन्मां सपत्नी मातुरन्तिके ॥
ग्राधारभूतं जगतः सर्व्वेषामसुरोत्तमम् ।
प्रार्थयामि प्रभो ! स्थानं त्वत्प्रसादादनीश्वरम् ॥

श्रीभगवानुवाच ।

त्रैलोक्यादधिके स्थाने ग्रवतारान्महाग्रयः ।
भविष्यति न सन्देहो मत्प्रसादाद्ध्रुवान् ध्रुव ! ॥
सूर्य्यात् सोमात् तथा भौमात् सोमपुत्राद्बृहस्पतेः ।
सितार्कतनयादीनां सर्व्वर्क्षाणां तथा ध्रुवम् ॥
सप्तर्षीणामशेषाणां ये च वैमानिकाः सुराः ।
सर्व्वेषामुपरि स्थानं तव दत्तं मया ध्रुव ! ॥"

इति विष्णुपुराणे १ ग्रंशे १२ ग्रध्यायः ॥*॥

ध्रुवयोगजातफलं यथा,—

"नरीनर्त्ति वाणी सदा वक्त्रपद्मे
चरीकर्त्ति कार्य्यं वरीभर्त्ति बन्धून् ।
ध्रुवाख्ये प्रसूतिर्ध्रुवं तस्य कीर्त्तिर्-
दिगन्ते नितान्तं भवेद्वारुमूर्त्तिः ॥"

इति क्रोष्टीप्रदीपः ॥ * ॥

ध्रुवगणो यथा । उत्तरफल्गुनी १ उत्तराषाढ़ा २ उत्तरभाद्रपद ३ रोहिणी ४ । इति ज्योतिषम् ॥ * ॥ तारावियोगः । यथा,—

"मेरोरुभयतो मध्ये ध्रुवतः पे नभःस्थिते ।
निरुद्यदेग्रसंस्थानासुभये ज्योतिराश्रिते ॥
भचक्रं ध्रुवयोर्वेद्ममाश्रित्य प्रवर्त्तते ।
पर्य्येत्यहर्निशं तत्रस्था ग्रहनक्षत्रा ये क्रमम् ॥"

इति सूर्य्यसिद्धान्ते १२ ग्रध्यायः ॥

ध्रुवकः, पुं, (ध्रुव+स्वार्थे कन् ।) स्थाणुः । इति हेमचन्द्रः । ३ । १८८ ॥ गीताङ्गविशेषः । धुवा इति भाषा । तस्य लक्षणं यथा,—

"उत्तमः षट्पदः प्रोक्तो मध्यमः पञ्चमः स्मृतः ।
कनिष्ठश्च चतुर्भिः स्याद्ध्रुवकोऽयं मयोदितः ॥
उक्तं द्विखण्डमुद्ग्राहे द्विखण्डं ध्रुवके मतम् ।
ततो द्विखण्डमाभोगे तालमानरसैः सह ॥
ग्राभोगे कविनाम स्यात्तथा नायकनाम च ।
उद्ग्राहं प्रथमं गीत्वा ध्रुवं गायेत्ततः परम् ॥
ततोऽन्तरा ध्रुवस्तस्मादाभोगध्रुवकौ ततः ।
उद्ग्राहः प्रथमः पादः कथितः पूर्व्वसूरिभिः ॥
गीत्वा पूर्व्वपदं न्यासो यत्र स ध्रुवको भवेत् ।
यत्रैव कविनाम स्यात् स आभोग इतीरितः ॥
ध्रुवकादिषु सर्व्वेषु भवेदेवंविधः क्रमः ॥"

स तु षोड़शविधः । यथा,—

"जयन्तः शेखरोत्साहो मधुरो निर्म्मलस्तथा ।

कुन्दलः कमलश्चैव सामन्दश्चन्द्रशेखरः ॥
सुखदः कुमुदो नागी कन्दर्पो जयमङ्गलः ।
तिलको ललितश्चेति ध्रुवकाः षोड़श स्मृताः ॥
एकादशाक्षरपदादेकैकाक्षरवर्द्धितैः ।
सप्तर्षयो ध्रुवाः षोड़श स्युः षड्विंशत्यक्षरावधि ॥
दिग्गजैरक्षरैरेव पदमेकमिहेष्यते ।
तदूर्द्धाष्टभुवकाभोगैरित्थं षट्पदनिर्णयः ॥
पञ्चपादे तु ध्रुवके पदैरेकेन तद्ध्रुवः ।
चतुष्पादे तु ध्रुवके पृथङ्नाख्यैव तद्ध्रुवः ॥"
इति सङ्गीतदामोदरः ॥

ध्रुवका, स्त्री, (ध्रुवक + टाप् ।) ध्रुवका । ध्रुया इति भाषा । संज्ञा । इत्युणादिकोषः ॥

ध्रुवा, स्त्री, (ध्रुवत्यनयेति । ध्रु स्थैर्य्ये + बाहुलकात् कः । ततष्टाप् ।) जुहूः । वटपलाशक्षतियज्ञपात्रम् । इत्यमरः । २।७।२५॥ स्रुवा । आढ़ी । ग्राम्यपर्य्यी । गीतभेदः । इति मेदिनी । वे, १४ ॥ ध्रुया इति भाषा ॥ साध्वी स्त्री । इति शब्दरत्नावली ॥

ध्रेक, ऋ ङ गतौ । उत्साहे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) रेफमध्यः । द्वावर्थौ । उत्साहो दृढ़तिरिति चन्द्रः । औत्सन्यमिति क्षीरस्वामी । ऋ, ध्रियेकत् । ङ, ध्रेकते लोकः शब्दायते उत्सहते वेत्यर्थः । खनेनोत्साहः खनोत्साहः । इति केचित् । तन्मते खनेनोत्सहते इत्यर्थः । इति दुर्गादासः ॥

ध्रै, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-अनिट् ।) रेफोपधः । ध्रायति लाभालोकः प्रीतः स्यादित्यर्थः । इति दुर्गादासः ॥

ध्वंसः, पुं, (ध्वन्स + भावे घञ् ।) नाशः । यथा,—
जन्माभावत्वं ध्वंसत्वमिति सिद्धान्तमुक्तावली ॥
(यथा, पञ्चतन्त्रे । १ । ११७ ।
"दर्शितभयेऽपि धातरि
धैर्य्यध्वंसो भवेन्न वीराणाम् ।
ग्रीवितसरसि निदाघे
नितरामेवोद्धतः सिन्धुः ॥")

ध्वंसनं, क्लीं, (ध्वंस + भावे ल्युट् ।) ध्वंसः । (यथा, भागवते । ५ । १ । २३ ।
"इति ह वाव स जगतीपतिरीश्वरेच्छयाधिनिवेशितकर्म्माधिकारोऽखिलजगद्ध्वंसनापराभावस्तं भगवतः इति ॥") गमनम् । अधःपतनम् । इति ध्वन्धातोर्भावेल्युट्प्रत्ययः ॥ (ध्वंसयतीति । ध्वंस + णिच् + ल्युः । ध्वंसके त्रि । यथा, महाभारते । ५ । १५६ । ३ ।
"प्रजापतिमिवादित्यं तेजसा भास्करोपमम् ।
महेन्द्रमिव शत्रूणां ध्वंसनं शरणं हिभिः ॥")

ध्वंसी, [न्] पुं, (ध्वंसते विनश्यतीति । ध्वन्स + णिनिः ।) पर्व्वतसम्भवपीलुवृक्षः । इति शब्दरत्नावली ॥ (ध्वंसोऽस्यास्तीति । ध्वंस + इनिः ।) वरवर्णिनि, त्रि ॥ यथा,—
ज्वालाकरालते ध्वंसिनि ध्वंसी विलोक्यते ।
नरेणस्य विघ्नेशविघ्नहा परमायुभिः ॥"
इति वैद्यकपरिभाषा ॥

ध्वज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) वकारयुक्तः । ध्वजति । इति दुर्गादासः ॥

ध्वज, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं सकं-सेट् । इदित् ।) वकारयुक्तः । इ, ध्वञ्जते । इति दुर्गादासः ॥

ध्वजः, पुं, (ध्वजोऽस्यस्येति । ध्वज + अर्शआदित्वादच् ।) गौल्किकः । इति मेदिनी । जे, १० ॥ (यथा, मनुः । ४ । ८५ ।
"दम्भनासमं चक्रं दम्भचक्रसमो ध्वजः ।
दम्भध्वजसमो वेषो दम्भवेषसमो नृपः ॥")

ध्वजः, पुं क्लीं, (ध्वजति उच्छ्रितो भवतीति । ध्वज + पचाद्यच् ।) पताका । (यथा, पद्मतन्त्रे ।१।३२ ।
"किं तेन जातु जातेन मातुर्यौवनहारिणा ।
आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा॥")
खड्गाङ्गम् । मेढ्रम् । (यथा, सुश्रुते चिकित्सितस्थाने १६ अध्याये ।
"विद्रधेषु सिराक्षायुस्नङ्मांसैः क्षीयते ध्वजः॥")
चिह्नम् । इति मेदिनी । जे, ११ ॥ (यथा, महाभारते । १ । ३३ । १७ ।
"तं वव्रे वाहनं विष्णुर्गरुडाङ्कं महाबलम् ।
ध्वजञ्च चक्रे भगवानुपरि स्थास्यतीति तम् ॥")
गर्व्वः । दर्पः । इति शब्दरत्नावली ॥ पूर्व्वदिग्रोगृहम् । इति हेमचन्द्रः ॥ पताकादण्डः । तत्पर्य्यायः । केतनम् २ । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ७ । २७ । ६ ।
"ततोऽर्জ্জुनः सुपुङ्खानां विद्धा सप्तभिरायुधैः ।
ध्वजं धनुश्चास्य तथा क्षुराभ्यां समक्षिणत् ॥")
ध्वजयुक्तिर्यथा,—
"सेनाचिह्नं स्थितीग्राणां दण्डो ध्वज इति स्मृतः ।
सपताको निष्पताकः स त्रेधा द्विविधे मुधे ॥
पताका सार्द्धदैर्घ्येण दण्डस्तु पृथिवीभुजाम् ।
सपताकध्वजस्याग्रे यदा दण्डं परित्यजेत् ॥
जयदण्डो ध्वजो नाम नैनं सामान्यमर्हति ।
वंशोऽथ वाकुशः शालः पालाशश्चाप्यकस्तथा ॥
नैपो नैम्बोऽथवा दण्डस्तथा वैराजवारजः ।
अवष्टब्धादिकसंज्ञानां वर्णरूपप्रकाशितः ॥
सर्व्वेषामेव वंशानां दण्डः सम्पत्तिकारकः ॥"
अ क च ट त प य ग्राः ॥
"प्रतापाय पताकासु अष्टावेव प्रकाशिताः ।
पञ्चहस्तायता हस्तपरिणाहा जयाभिधा ॥
जया च विजया भीमा चपला वैजयन्तिका ।
दीर्घा विशाला लोला च त्रेया हस्तैकविस्तृतः ॥
परिणाहे पादविस्तारश्च वर्णस्य निर्णयः ।
रक्तः श्वेतोऽरुणः पीतश्चित्रो नीलोऽथ कर्बुरः ॥
क्षणश्चेति पताकानां वर्णरूपप्रकाशितः ।
अवष्टब्धादिकसंज्ञानामष्टानामष्टकत्रयम् ॥
कलसो दर्पणश्चन्द्रः पद्मकोष्ठो यथाक्रमम् ।
ब्रह्मक्षत्रियविट्शूद्रजातीनां संप्रकाशितः ॥
गजादियुक्ता सा प्रोक्ता जयन्ती सर्व्वमङ्गला ।
गजः सिंहो हयो द्वीपी चतुर्थी पृथिवीभुजाम् ॥

हंसादियुक्ता विज्ञेया राज्ञां सेवाश्रमङ्गला ।
हंसः केकी शुकश्चासौ ब्रह्मादीनां यथाक्रमम् ॥
चामरादिसमायुक्ता सा ज्ञेया सर्व्वबुद्धिदा ।
चामरश्वासपक्षाणि चित्रवस्त्रं तथा सितम् ॥
चतुर्णां वेदनयनपक्षेभ्रगणितक्रमात् ।
तदर्थे यदि विश्रस्तं पताकाहितयं भवेत् ॥
इयं हि सर्व्वतो भद्रा पताका चक्रवर्त्तिनः ।
तद्वर्णः पूर्व्ववज्ज्ञेयः प्रमाणं विधिबोधितम् ॥
काञ्चनं राजतं ताम्रं नागधातुमयं क्रमात् ।
कुम्भादिकं प्रशंसन्ति पताकार्थे महीभुजाम् ।
तत्रापि रत्नविन्यासो विधेयो राजतक्रमः ।
चतुर्भिर्मकरास्याद्यैर्युक्ता चेत् सर्व्वसिद्धिदा ।
तदा श्रेयस्करी नाम सा पताका विजायते ॥
मकरोऽथ गजः सिंहो हयो वाजी शुकः शुकः ।
शुचिश्चेति समुद्दिष्टमादित्यादिदृशां सदा ॥
इति प्रोक्तः पताकानां निर्णयः पृथिवीभुजाम्॥"
अथ निष्पताकध्वजः ।
"पूर्व्ववद्दण्डनियमस्तत्र दैर्घ्ये विशेषणम् ।
दण्डः पञ्चादि पञ्चच्च कुम्भश्च विहगो मणिः ॥
निष्पताको ध्वजो राज्ञां षड्भिरेतैः समन्वितैः ।
जयः कपाली विजयः श्येनस्तत्र शिवः क्रमात् ॥
राज्ञः पुरुषमानेन दण्डमानं प्रकीर्त्तितम् ।
ऊर्द्धाधःक्रमयोगेन तद्दण्डादिकमुच्यते ॥
केकी चासौ मतस्यरङ्कस्त्रिविधानां महीभुजाम् ।
ध्वजाग्रेषु विधेयानि पञ्चादि श्रेयमिच्छताम् ॥
पद्मः कुम्भश्च विहगो मणिश्च यथाक्रमात् ।
उपर्य्युपरितो ध्येयो निष्पताके महीभुजाम् ॥
अष्ट षोड़श द्वात्रिंशच्चतुःषष्टिदलाम्बुजम् ।
दृष्टादृष्टिग्दर्शकाढ्यः कुम्भः सम्पत्तिकारकः ॥
हंसश्चासः शुकः केकी पक्षिणश्च यथाक्रमम् ।
वर्णश्च पद्मरागश्च नीलो वैदूर्य्यमेव च ॥
ब्रह्मक्षत्रियविट्शूद्रजातीनां स्यात् यथाक्रमम् ।
कनकं रजतं युग्मं त्रिविधानां महीभुजाम् ॥
निष्पताकध्वजाद्यादिनिर्म्माणे योग इष्यते ।
पताका यदिहास्त्येका सर्व्वाग्रे योग्यवर्णिनी ॥
अयं ध्वजो विघ्नालाख्यो विज्ञेयश्चक्रवर्त्तिनः ।
तत्रैव चामरे योग्ये विज्ञेयाः सर्व्वसम्पदः ॥
इति राज्ञां समुद्दिष्टमन्येषां ध्वज उच्यते ।
नीर्द्वे विंशतिहस्तेभ्यो न चार्व्वाक् दण्डहस्तकात्॥
हस्तहस्तैकसंवृद्धा ध्वजो दण्डविधो मतः ।
सहस्राधिपमारभ्य यावत् स्यादयुताधिपः ॥
न सहस्राधिपाद्न्यूनो ध्वजधारणमर्हति ।
अपि कोटिपतेर्ज्ञेयो ध्वजो विंशतिहस्तकः ॥
तत्रापि वस्त्रवर्णादिनिर्णयः पूर्व्ववन्मतः ।
स्थिरता चित्रता चेति निष्पताकध्वजे गुणौ ॥
यद्येतदुभयं चिह्नमुभयोः संप्रकाशितम् ।
तत्प्रमाणध्वजे ज्ञेयमप्रधाने न निर्णयः ॥
निष्पताकध्वजोद्देशः प्रोक्तोऽयं भोजभूभुजा ।
एतद्विदित्वा मतिमान् चिरं सुखमवाप्नुयात् ॥
यो दम्भादथवाज्ञानादविलङ्घयति मानवः ।
स विनीदति नश्येत तस्य कीर्त्तिः कुलं बलम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥

मातृके ।

"घण्टाविताननवरतोरणचित्रयुक्तं
नित्योत्सवप्रमुदितेन जनेन सार्द्धम् ।
यः कारयेत् सुरगृहं विधिवद्द्विजाग्र्यं
श्रीस्तं न मुञ्चति सदा दिवि पूज्यते च ॥"

ध्वजयष्ट्यादिमानमाह हयशीर्षपञ्चरात्रम् ।

"ध्वजदण्डः प्रकर्त्तव्यो निर्व्रणः सगुणो दृढः ।
तद्दृढं ताम्रजं चक्रं छत्त्रं कुर्य्यात्त्रिशोत्तम ! ॥
प्रासादस्य च विस्तारो मानं दण्डस्य कीर्त्तितम् ।
ध्वजयष्टिर्दैवगृहे ऐशान्यां दिशि देशिकैः ॥
स्थापनीयाथ वायव्ये साम्प्रतं ध्वजमुच्यते ।
पङ्क्तिकार्पासजौमाद्यैर्ध्वजं कुर्य्यात् सुशोभनम् ॥
एकवर्णं विचित्रं वा घण्टाचामरभूषितम् ।
किङ्किणीजालकोपेतं बर्हिपत्रविभूषितम् ।
शुक्लादिवर्णैर्विप्राद्यैः क्रमाद्वा कारयेत् ध्वजम् ॥
दण्डाद्वादशहस्तौ यावत् हस्तैकं विस्तरेण तु ।
महाध्वजन्तु विख्यातं सर्व्वकामप्रदं शुभम् ॥
ध्वजेन रहितो विप्र प्रासादस्तु वृथा भवेत् ।
पूजाहोमादिकं सर्व्वं जपाद्यं यत् कृतं नरैः ॥"

शिवसर्व्वस्वे ।

"देवेभ्यश्च गृहं दद्याद् वाहनैरुपशोभितम् ।
तुरङ्गमेध सदृशस्य हरस्य वृषचिह्नितम् ॥
विष्णवे गरुडाङ्कन्तु दुर्गायै सिंहचिह्नितम् ।
कार्य्यं ध्वजपताकाद्यमन्यथा न कथञ्चन ॥"

गरुडलक्षणमाह नारदपञ्चरात्रे ।

"उपेन्द्रस्याथतः पक्षी गुडाकेशः क्षताक्षतिः ।
सर्पनाशुगतो भूमौ सूर्य्यादौ मणिमण्डितः ॥
प्रक्षिप्तहो नराक्रिष्ट तुङ्गनासो नराङ्कः ।
द्विबाहुः पक्षयुक्तश्च कर्त्तव्यो विनतासुतः ॥"

विष्णुधर्म्मोत्तरे ।

"प्रतिपाद्य द्विजे दद्यात् ध्वजं विदग्धदेशगः ।
निर्दहत्याशु पापानि महापातकजान्यपि ॥"

इति प्रतिष्ठातत्त्वम् ॥ * ॥

अथ ध्वजविधिविधिः ।

"सिंहारूढा ध्वजे यस्य वृषस्थ रिपुहा उमा ।
दारिद्र्या पूज्यते वत्स ! न तस्य क्षिप्रं भयम ॥
कपिसंस्था महामाया सर्व्वशत्रुविनाशिनी ।
वृषे यथेप्सितं दद्यात् कलसे श्रेय उत्तमम् ॥
हंसे विद्यार्थकामन्तु वर्हिणे सुतमिच्छता ।
गरुत्मगा महामाया सर्व्वरोगविनाशिनी ॥
महिषस्था महामारी: शमयेत् ध्वजसंस्थिता ।
करिणा सर्व्वकार्य्येषु वृद्धैः कार्य्या विभूतिनी ॥
पद्मस्था चर्चिका रौद्रा धर्म्मकामार्थमोक्षदा ।
प्रेतस्था सर्व्वभयदा नित्यं पशुनिपातनात् ॥
पूजिता देवराजेन्द्रनीलोत्पलकरावरा ।
भवते सिद्धकामस्य चिह्नाग्रे संव्यवस्थिता ॥
गन्धपुष्पार्चितं कृत्वा वस्त्रहेमसुचर्चितम् ।
फलशालियवस्रक्चिवर्द्धमानविभूषितम् ॥
शोभने उच्छ्रयेद्यत्ने पताकां वा मनोरमाम् ।
चामरं कलसं छत्त्रमातपत्रं वितानकम् ॥
भवते सिद्धकामस्य वृषस्य फलदायकम् ॥
नमो विश्वेश्वरि दुर्गे ! त्रासुरुद्धे चण्डहारिणि ॥
ध्वजं ससुच्छ्रयिष्यामि वसोर्धारां सुखावहाम् ॥"

अथ ध्वजदानविधिः ।

विश्वेश्वर उवाच ।

"यद्येवं सा महाभागा ब्रह्मविष्णुपरापरा ।
तदहं श्रोतुमिच्छामि ध्वजदानं विधानतः ॥

अगस्त्य उवाच ।

यथा त्वं पृच्छसे वत्स ! तथा शुक्रेण ब्रह्मणि ।
पृष्टः पूर्व्वं तथा तेन गुह्यगीतं प्रकाशितम् ॥
शुक्रस्य भावयुक्तस्य तदहं ते महामुने ! ।
कथयामि यथान्यायं ध्वजदानं महाफलम् ॥

शुक्र उवाच ।

देवा ध्वजप्रमाणन्तु विधिदत्तस्य लाञ्छनम् ।
दीयते च यथा नाथ ! तद्देवं ब्रूहि नः ॥

ईश्वर उवाच ।

अखण्डं क्रमिकं वापि ध्वजं केशविवर्ज्जितम् ।
नवं समञ्च शुक्लञ्च प्रासादादण्डवर्द्धितम् ।
मर्म्म सूक्ष्मं लघुं शुभ्रं श्लेष्मलं वा धातुजं हि वा ॥
तस्मिन् पटे लिखेत् सिंहं सर्व्वलक्षणलक्षितम् ।
रोचनां सह चन्द्रेण हेमलेखाद्यदूर्व्वया ॥
प्रासादादीलमानन्तु चित्तं विस्तरतः करम् ।
ध्वजापादेन कर्त्तव्या दर्घ्यवेद्दिक्षु देवताः ॥
सर्व्वा वाहनलाञ्छेन लाञ्छिताः सहसेन च ।
किङ्किणीचामरोपेता घण्टादर्पणशोभिताः ॥
कुसुमोमो महाप्राज्ञः सङ्कारदलान्वितान् ।
महामङ्गलशब्देन देवाः कुम्भान् प्रपूजयेत् ॥
युगत्वपुण्यवेदाद्यथथाविभवविस्तरैः ।
कन्यका ब्राह्मणान् भोज्य दधिपायसशर्करैः ॥
भूतानान्तु बलिं दत्त्वा तथा तत्परोहयेत् ॥
सर्व्वकामानवाप्नोति विद्याधरपतिर्भवेत् ।
मोदते विधिधान् भोगान् सर्व्वविद्यार्थपारगः ॥
अथवा हेमं रौप्यं वा वार्षं पार्थिवशैलजम् ।
कारयेन्नृगराजन्तु महाकरिमदाप्लुतम् ॥
मघानक्षत्रकरोत्खातसुक्तापलपदप्लवम् ।
एवंविधं ततः कृत्वा नवभ्यां पूजयेच्छिवाम् ॥
सोपवासः शुचिर्दक्षः चर्म्मखड्गविवर्ज्जितः ।
कन्यकाः पूजयित्वा तु विप्रान् वेदविदस्तथा ॥
देवा भक्ताः सदाचारास्त्रिकालज्ञवने रताः ।
ते यथाशक्तितस्तोषा ज्ञात्वारोहयकर्म्मणि ॥
कन्या देवा स्वयं प्रोक्ताः कन्याऽन्या तु भूमिजा ।
यावदष्टसयोनिः स्यात्तावद्वै सुरारिहा ॥
द्विजो ब्रह्मा शिवो विष्णुः स्वकीयव्रतपारकः ।
पूजितैस्तैः सदा शुक्र सर्व्वदेवासु पूजिताः ॥
दीनान्धकृपणानान्तु अन्नं देयन्तु शक्तितः ।
यथा सर्व्वगता देवी तद्दृष्ट्याद्यं भवेत ॥
नानाभक्ष्यान्नतदधिदूर्व्वाततण्डिकान्वितम् ।
बलिं वै सर्व्वभूतेभ्यो दद्यादिक्षु निवेदयेत् ॥
यज्ञघोषा तथा जम्भा अष्टविघ्नाश्चरापि वा ।
सिंहं स्वर्भे समारोप्य सर्व्वमङ्गलशब्दितम् ॥
वेदध्वनिमहामन्त्रकालिकाचण्डिकापरम् ।
न्यस्य सिंहं परं ध्यात्वेदृयाद्यं पूर्व्वकथितम् ।
एवन्तु वस्त्रसंवीतं सर्व्वाभरणभूषितम् ।
देवा महाध्वजं न्यस्य ग्रैवायामपि विन्यसेत् ॥
ब्रह्मविष्णुरुद्रदाद्यां सोमसूर्य्यदिवौकसाम् ।
ध्वजदानं महादानं सर्व्वदानोत्तमं मतम् ॥
यावन्नो दीयते शुक्र ! ध्वजः प्रासादमूर्द्धनि ।
तावत्तु न भवेद्वत्स ! प्रासादो देवसञ्ज्ञितः ॥
शून्यभूतं सदा भूता नागगन्धर्व्वराक्षसाः ।
विघ्नयन्ति महात्मानो नानाबाधाश्च कुर्व्वते ॥
तस्माद्देवगृहद्वारपुरपर्व्वतपत्तने ।
उच्छ्रिताः शान्तिकामाय ध्वजाः शुक्र ! सदा हिताः ॥
न हि चान्यद्ध्वजदानादुत्तमं भारते क्वचित् ।
दानमिच्छ पुरुष देया दीयतथैव च ॥
अनेन विधिना यस्तु ध्वजं शुक्र ! निवेदयेत् ।
सर्व्वकामानवाप्नोति स नरः शिवतां व्रजेत् ॥
तस्य दर्शनसम्भाषादपि पापरता नराः ।
विमुक्ताः सर्व्वपापेभ्यो दिवं यान्ति न संशयः ॥
राज्ञा शासनेन विधिना देवीनाञ्चनराङ्कताम् ।
शुक्लचक्रवृषार्द्धाङ्कं सवर्हिध्वजवारणैः ।
साचारो भक्तिमास्थाय ध्वजयष्टिं समुच्छ्रयेत् ।
न तस्य सङ्गरे शुक्र ! बाधयो न च वैरिणः ।
नैव ग्रहव्रणपीड़ा भवेच्छां स समुच्छ्रयेत् ॥"

इति देवीपुराणम् ॥

ध्वजद्रुमः, पुं, (ध्वज इव उन्नतो द्रुमः । दीर्घत्वात् तथात्वम् ।) तालवृक्षः । माडवृक्षः । इति राजनिर्घण्टः ॥

ध्वजप्रहरः, पुं, (ध्वजं प्रहरति नाशयति भनक्तीति । प्र + हृ + क्विप् । ध्वजस्य प्रहरो वा ।) वायुः । इति शब्दरत्नावली ॥

ध्वजभङ्गः, पुं, (ध्वजस्य मेढ्रस्य भङ्गः ।) क्लीवत्वजनकरोगविशेषः । तस्य निदानं यथा,—

"अत्यम्ललवणक्षारविरुद्धाशनभोजनात् ।
तथाऽनुपानाद्विषमात् पिष्टान्नगुरुभोजनात् ॥
दधिक्षीरानूपमांससेवनाद्व्याधिकर्षणात् ।
कल्याणीगमनाच्चापि वियोनिगमनादपि ॥
दीर्घरोगी चिरोत्कण्ठां तथैव च रजस्वलाम् ।
दुर्गन्धां दुष्टयोनिञ्च तथैव च परिप्लुताम् ॥
ईदृशीं प्रमदां मोहात् यदि गच्छति मानवः ॥
ततः पदाभिगमनाच्छेफसश्चाभिघाततः ।
अधोवायोश्च मेढ्रस्य शुक्लदग्धनखक्षतात् ॥
कालप्रहारनिष्पेषमूत्राघात निषेवणात् ।
रेतसश्च प्रतीघातात् ध्वजभङ्गः प्रवर्त्तते ॥"

इति चरकः ॥ * ॥

तस्य चिह्नं यथा,—

"शुक्रे चिरात् प्रविशति शुक्रं श्लेष्मितमेव वा ।
तोदोऽत्यर्थं हृषस्योर्मेढ्रं धूपायतीव च ॥"

इति वाभटः ॥ * ॥

अपिच ।

"तेषैभावैरहृद्यैश्च रिरंसोर्मनसि क्षते ।
ध्वजः पतत्यतो नृणां क्लैब्यं सद्यः प्रजायते ॥
अश्वैरश्वोत्तमवजैरतिमात्रोपसेवितैः ।
सौम्यधातुक्षयाद्दृष्टेः क्लैब्यं तदपरं स्मृतम् ॥
अतिव्यवायशीलो यो न च याजिक्रियारतः ।
ध्वजभङ्गमवाप्नोति स शुक्रस्यप्रवेदकम् ॥

असाध्यं सहजं क्लेयं मर्म्मच्छेदोद्भवञ्च यत्।
असाध्यानां विशिष्टानां कार्य्यो वाजिकरो विधिः॥

तस्य चिकित्सा यथा, वैद्यके।

"सुवर्णासुवत्सासुभाधिदुधन्या-
ष्टतं योगयोगे प्रशस्तं सप्रस्थम्।
स्दौ वा दरात्मौ पचेत् पाकसूर-
स्तदा तेजपत्रं हरिद्रासुपिष्टम्॥
विधौ शुद्धिहेतौ ससुस्तं सुपिष्टं
विधेयं सुगन्धाय वृद्धोपदेशात्।
सम्लाम्बगन्धामप्रस्थं विचूर्ण्य
शुभं वारि दत्वा शुभं वेदशुक्तम्॥
यदा श्लेष्मभूतं तदा योगयोगे
पचेत् पाकविज्ञो भृशं दर्व्विचालात्।
पचेन्नाविदुग्धं घृतस्यापि तुल्यं
विदारीं सप्रस्थां तथा तैन वैद्यः॥
तथा शालमलीसोयदस्तं सप्रस्थं
वितार्य्यावतिंस्तेदृष्टतं योगराजः॥"

ध्वजवान्, [त्] त्रि, (ध्वजोऽस्यास्तीति। ध्वज+मतुप्। मस्य वः।) केतनयुक्तः। ब्राह्मणो ब्राह्मणं घातयित्वा तस्यैव शिरःकपालमादाय नीर्थान्यनुच्चरेत्। यथा,—

"शिरःकपाली ध्वजवान् भिक्षार्थी कर्म वेदयन्।
ब्रह्महा द्वादशान्दानि मितभुक् शुद्धिमाप्नुयात्॥
ध्वजवान् स्यात् शवशिरोध्वजमिति मनुस्मरणात् अन्यच्छिरःकपालस्कन्धाग्रसमारोपितध्वजशब्दवाच्यं ग्रहीयात्॥" इति मिताक्षरा॥
(ध्वजः शौल्किकविपणिपताका विद्यतेऽस्येति। शौल्किकः। यथा, मनुः। ४। ८४।

"न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः।
स्तनाचक्रध्वजवतां वेणेनैव च जीवताम्॥")

ध्वजिनी, स्त्री, (ध्वजोऽस्यस्याः। ध्वज+इनिः। ङीप्।) सेना। इत्यमरः। २। ८। ७८॥
(यथा, रघुः। ७। ४०।

"मत्स्यध्वजा वायुवशाद्विदीर्णै-
र्मुखैः प्रवृद्धध्वजिनीरजांसि।
बभुः पिबन्तः परमार्थमत्स्याः
पर्य्याविलानीव नवोदकानि॥")

ध्वजी, [न्] पुं, (ध्वजोऽस्यस्येति। ध्वज+"अत इनिठनौ।" ५।२।११५।। इति इनिः।) ब्राह्मणः। पर्व्वतः। रथः। सर्पः। घोटकः। इति मेदिनी। ने, ७७॥ मयूरः। इति राजनिर्घण्टः॥ शौल्किकः। इति हेमचन्द्रः॥ (यथा, याज्ञवल्क्ये। १।१४१।

"प्रतिग्रहे सूनिचक्रिध्वजिवेश्याजराधिपाः॥"

ध्वजविशिष्टे, त्रि। यथा, महाभारते। १। २२६। २८।

"क्षताक्षौ ध्वजसम्पन्नौ रथिनौ ध्वजिनावपि॥"

चिह्नयुक्ते च। यथा, मनुः। ११। ६३।

"सुरामांसापशुक्षीरं बालवासा जटी ध्वजी॥")

ध्वजोत्थानं, क्ली, (ध्वजस्य इन्द्रध्वजस्य उत्थानम्।) इन्द्रोत्सवः। इति त्रिकाण्डशेषः॥ एतत् भाद्रशुक्लाद्यां भवति। इति स्मृतिः॥

ध्वण, ध्वाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वकारयुक्तः। ध्वणति स्म दद्रङ्गः। इति दुर्गादासः॥

ध्वन, तृ क शब्दे। इति कविकल्पद्रुमः॥ (अदन्तुरां परं-अकं-सेट्।) दन्त्योपधः। भावकर्मादीनां प्रयोगादन्यत्र शब्दे ध्वनादित्यादि यत्र श्रूयते प्रायेण तत्रायत्नशब्दे इति बोध्यम्। ध्वनयति स्म दद्रङ्गः। इति दुर्गादासः॥

ध्वन, मि रवे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वकारयुक्तः। मि, ध्वनयति ध्वानयति स्म दद्रङ्गः। इति दुर्गादासः॥

ध्वनः, पुं, (ध्वन ध्वाने+भावे बाहुलकात् अप्।) शब्दः। इति भरतहिरूपकोषः॥

ध्वनमोदी, [न्] पुं, (ध्वनेन शब्देन मोदयतीति। मुद+णिनिः।) भ्रमरः। इति शब्दरत्नावली॥

ध्वनिः, पुं, (ध्वननमिति। ध्वन+"खनिकष्यञ्जसीति।" उणां ४।१३६। इति इः।) शब्दः। इत्यमरः। १। ७। २२॥ दद्रङ्गादिशब्दः। यथा,—

"शब्दो ध्वनिश्च वर्णश्च दद्रङ्गादिभवध्वनिः।
कण्ठसंयोगजस्थानो वर्णास्ते कादयो मताः॥"

इति भाषापरिच्छेदः॥
(ध्वन्यतेऽस्मिन्निति। ध्वन+अधिकरणे इः।) उत्तमकाव्यम्। यथा,—

"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः
कथितः॥"

इति काव्यप्रकाशः॥
(यथा च साहित्यदर्पणे। ४। २—३।

"वाच्यातिशयिनि व्यङ्ग्ये ध्वनिरुत्तम काव्यमुत्तमम्।
वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम्॥
भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ।
अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च॥
तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः।
लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधितस्वरूपम्। विवक्षितान्यपरवाच्यस्त्वभिधामूलः।
अतएवात्र वाच्यं विवक्षितम्। अन्यपरं व्यङ्ग्यनिष्ठम्। अत्र हि वाच्योऽर्थः स्वरूपं प्रकाश्यत्वेन व्यङ्ग्यार्थस्य प्रकाशकः। यथा प्रदीपो घटस्य।
अभिधामूलस्य बहुविधत्वेन पञ्चाभिर्भेदैः॥"
अस्य बहवो भेदाः सन्ति। ते तु तत्रैव चतुर्थपरिच्छेदे विस्तरशो द्रष्टव्याः॥)

ध्वनिग्रहः, पुं, (ग्रह+भावे अप्। ध्वनेः शब्दस्य ग्रहो ग्रहणं यस्मात्।) श्रोत्रम्। इति त्रिकाण्डशेषः॥ शब्दज्ञानञ्च॥

ध्वनितः, त्रि, (ध्वन्यते स्मेति। ध्वन+क्तः।) शब्दितः। (यथा खनन्दद्रङ्गादिः। इति भरतः॥ तत्पर्य्यायः। स्वनितः २। इत्यमरः। ३। १। ६४। (यथा राजतरङ्गिण्याम्। २। ८६।

"समीरणसमीकीर्णसुस्वरध्वानगर्भितैः।
ध्वनितैरनुयोक्तव्यमिवावस्थां तथाविधाम्॥")
ध्वनिकाव्ययुक्तवाद्यादिश्च॥

ध्वनिनाला, स्त्री, (ध्वन्युत्पादकं नालं यस्याः।) वीणा। वेणुः। काहलः। इति मेदिनी। ले, १५५॥

ध्वनिविकारः, पुं, (ध्वनेर्विकारः।) काकुः। शोकभयादिना शब्दविकृतिः। इति हेमचन्द्रः। ६। ४६॥

ध्वन्स, उ ल ड गतौ। भंशे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-गतौ सकं-भंशे अकं-सेट्। उदितात् क्त्वावेट्।) उ, ध्वंसित्वा ध्वस्त्वा। ल, अध्वसत्। ड, ध्वंसते। भंशः अधःपतनम्। इति दुर्गादासः॥

ध्वस्तं, त्रि, (ध्वस्यते स्मेति। ध्वन्स भंशे+क्तः।) च्युतम्। गलितम्। इत्यमरः। ३। १। १०४॥ (यथा, भागवते। ७। २। ३०।

"प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम्॥")
नष्टम्। (यथा, पद्मपुराणे। ७। १४१।

"क्षुधया प्रीष्यमाणोऽपि न विषं क्षातुमिच्छति।
निशान्नध्वस्तलज्जानान्नाभक्ष्यञ्चिन्तयत्यसौ॥")

ध्वा(भा)ङ्क्ष, इ काङ्क्षे। घोररुते। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकं-च सेट्।) घोररुतमिह तिरश्चामेव घोरशब्दः। इ, ध्वा(भा)ङ्क्षति काकः। नमध्यपाठेनैव विङ्क्षे अस्येदशुबन्धो वेदेऽप्यारम्भभेदार्थः। इति दुर्गादासः॥

ध्वा(भा)ङ्क्षः, पुं, (ध्वा(भा)ङ्क्षति उच्चैः रौतीति। ध्वा(भा)ङ्क्षि घोररुते+अच्।) काकः। (यथा, रुक्मकटिके ६ अङ्के।

"शुष्कवृक्षस्थितो ध्वा(भा)ङ्क्ष आदित्याभिमुखस्तथा।
मयि चोदयते वामं चक्षुर्घोरमशंशयम्॥")
मत्स्यभक्षकपक्षी। इत्यमरः। १। १। २१८॥ तस्करः। भिक्षुकः। इति मेदिनी। के, १६॥

ध्वाङ्क्षजङ्घा, स्त्री, (ध्वाङ्क्षस्य जङ्घेव आकृतिर्यस्याः।) काकजङ्घा। इति राजनिर्घण्टः॥

ध्वाङ्क्षजम्बूः, स्त्री, (ध्वाङ्क्षः काकस्तद्वत् लक्ष्यवर्णा जम्बूः। यद्वा, ध्वाङ्क्षप्रिया जम्बूः।) काकजम्बूः। इति राजनिर्घण्टः॥

ध्वाङ्क्षतुण्डी, स्त्री, (ध्वाङ्क्षस्य तुण्डमिवाकृतिः फलेऽस्यस्याः। ध्वाङ्क्षतुण्ड+अच्। ततो ङीष्।) काकनासालता। इति राजनिर्घण्टः॥

ध्वाङ्क्षदन्ती, स्त्री, (ध्वाङ्क्षस्य दन्त इवाकृतिरस्यस्याः। अच्। ङीष्।) काकतुण्डी। इति राजनिर्घण्टः॥

ध्वाङ्क्षनखी, स्त्री, (ध्वाङ्क्षस्य नखमिवाकृतिरस्यस्याः। अच्। ङीष्।) काकतुण्डी। इति राजनिर्घण्टः॥

ध्वाङ्क्षनाम्नी, स्त्री, (ध्वाङ्क्षस्य नाम नाम यस्याः।) काकोदुम्बरिका। इति राजनिर्घण्टः॥

ध्वाङ्क्षनाशिनी, स्त्री, (ध्वाङ्क्षं नाशयतीति। नश+णिनि। ङीप्।) हपुषा। इति भावप्रकाशः॥

ध्वाङ्क्षनासा, स्त्री, (ध्वाङ्क्षस्य नासा इव फलमस्याः।) काकनासालता। इति राजनिर्घण्टः॥

घाङ्गनासिका, स्त्री, (घाङ्गस्य नासिका इव फलमस्याः।) काकनासालता। इति राजनिर्घण्टः॥
घाङ्गपुष्टः, पुं, (घाङ्केन काकेन पुष्टः प्रतिपालितः।) कोकिलः। इति हारावली। ४३॥
घाङ्गमाची, स्त्री, (घाङ्गान् काकान् मञ्चते पूजयति फलदानेनेति। मच पूजायाम्+अण्। गौरादित्वात् ङीष्।) काकमाची। इति राजनिर्घण्टः॥
घाङ्गवल्ली, स्त्री, (घाङ्गवत् वल्ली लता।) काकनासा। इति राजनिर्घण्टः॥
घाङ्गादनी, स्त्री, (अद्यते भक्ष्यते या सा। अद+ल्युट्। स्त्रियां ङीप्। घाङ्गाणां काकानामदनी।) काकतुण्डी। इति राजनिर्घण्टः॥
घाङ्गारातिः, पुं, (घाङ्गाणामरातिः शत्रुः।) पेचकः। इति हलायुधः॥
घाङ्गी, स्त्री, (घाङ्गवदाकृतिरस्यस्याः। अच्। ङीष्।) ककोलिका। इति मेदिनी। षे, १६॥
घाङ्गोली, स्त्री, काकोली। इति राजनिर्घण्टः॥
घानः, पुं, (घन+भावे घञ्।) ग्रन्थः। इत्यमरः। २। ७। २२॥ (यथा, राजतरङ्गिण्याम्। ३। १८।
"ग्रघ्राणाक्रन्दितध्वानो न च चौरो बभावत॥")
घान्तं, क्ली, (घन+"शुभ्रखान्तध्वान्तेति।" ७। २। १८। इति क्तप्रत्ययेन निपातनात् साधुः।) अन्धकारः। इत्यमरः। १। ८। ३॥ (यथा, भागवते। ३। ८। २१।
"कथातपत्रायुतमर्हरत्न-
द्युभिर्हतध्वान्तयुगान्ततोये॥")
घान्तविन्तः, पुं, (घान्ते अन्धकारे वित्तः प्रथितः।) खद्योतः। इति ग्रन्थरत्नावली॥
घान्तघ्नाश्रवः, पुं, (घान्तस्य घ्नाश्रवः।) श्लेष्मातकवृक्षः। इति ग्रन्थचन्द्रिका॥ सूर्य्यचन्द्रमयश्च॥
घान्तारातिः, पुं, (घान्तस्य अरातिः।) सूर्य्यः। इति हेमचन्द्रः। २। १०॥ चन्द्रमाश्च॥
घान्तोन्मेषः, पुं, (घान्ते उन्मेषः प्रकाशो यस्य।) खद्योतः। इति त्रिकाण्डशेषः॥
घ्रुं, कौटिल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) वकारोपधः। कौटिल्यमिह कुटिलीकरणम्। घ्वरति लघं वायुः। इति दुर्गादासः॥

न

न, नकारः। तवर्गपञ्चमवर्णः। अञ्जनविंशवर्णश्च। अस्योच्चारणस्थानं दन्तः। इति शाकटायनम॥ (यथा, श्रिद्धायाम्। १७। "दन्त्या स्तुलसाः स्मृताः॥") तत्पर्य्यायः। नेषः २ दीर्घः ३ चौरः ४। इति जैनाभिधानम्। तत्स्वरूपम्। यथा,—
"नकारं ग्रस्य चाम्बङ्गि! कोटिविद्युल्लतारुचिम्।
पञ्चदेवमयं वर्णं स्वयं परमकुण्डली॥
पञ्चप्राणात्मकं वर्णं हृदि भावय पार्व्वति!॥"
इति कामधेनुतन्त्रम्॥
"वामतः कुण्डली रेखा ऊर्द्धाधःक्रमतः स्थिता।
चन्द्रसूर्य्याग्निरूपा सा मात्रा वाणी प्रकीर्त्तिता॥"
तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे।
"ध्यानमस्य नकारस्य वक्ष्यते ग्रत्र भाविनि!।
दलिताञ्जनवर्णाभं ललज्जिह्वां सुलोचनाम्॥
चतुर्भुजां कोटराक्षीं पारुचन्दनचर्चिताम्।
क्षौमाम्बरपरीधानामीषद्धास्यसुखीं सदा॥
एवं ध्यात्वा नकारन्तु तन्मन्त्रं दशधा जपेत्॥"
ग्रस्य नामानि यथा,—
"नो गर्ज्जिनी क्षमा सौरिर्व्वारुणी विश्वपावनी।
मेषश्च सविता नेत्रं दन्तुरो नारदोऽञ्जनः॥
ऊर्द्ध्वगामी हिरण्यञ्च वामपादाङ्गुलेर्मुखम्।
वैनतेयस्तुतिर्व्वर्णेश्वरग्निर्व्वालिरागमः॥
वामनो व्यालिनी दीर्घो निरीहः सुगतिर्व्विभुः।
ग्रन्दात्मा दीर्घघोणश्च हस्तिनापुरमेचकौ॥
गिरिनायकजीलौ च ग्रिवोऽनादिर्म्महामतिः॥"
इति नानातन्त्रग्राह्यम्॥
(ग्रव्ययविशेषः। यथा, कविकल्पद्रुमे।
"नः खादिः पो सुचादिः।" इति। कायादौ ग्रस्य प्रथमप्रयोगे पदं यथा, हरिहरटीकायाम्।
"दो धः सौख्यं सुदं नः सुखभयमरणक्लेशदुःखं पवर्गः॥")
न, ग्र, निषेधः। (यथा, मनुः। ६। ४७।
"ग्रतिवादांस्तितिक्षेत नावमन्येत कञ्चन।
नचेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित्॥")
उपमा। इति मेदिनी। ने, १॥ ग्राद्यस्य पर्य्यायः। नहि २ ग्र ३ नो ४ ग्रभावः ५। इत्यमरः। ३। ४। ११॥ ग्रना ६ ना ७। इति भरतः॥ नञर्थश्च॥
नंशुकः, त्रि, (नश्यतीति। नश+"पचिनशोर्ङुकनुकनुमौ च।" उणां २। ३०। इति शुकन् नुमागमश्च।) नाशकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तेः॥
नंष्टा, [ष्ट्र] त्रि, (नश+लृच्। "मसृजिनशोर्झलि।" ७। १। ६०। इति नुम्।) नाशकः। इति नशधातोरुणादिवृत्तौ नुमागमनिष्पन्नः॥
नः, पुं, (नमसीति। नम+ग्रन्येष्वपीति डः।) सुगतः। ब्रह्मा। हिरण्यः। सुतः। इति मेदिनी। ने १। रत्नम्। इत्येकाक्षरकोषः॥ द्वितीयाचतुर्थीषष्ठीबहुवचनान्तस्यास्मच्छब्दस्य सान्तरूपोऽयञ्च॥ (यथा, सुग्धबोधे।
"पुष्णातु वो नोऽपि हरिर्धनं वो
ददातु नो हस्तयुगानि वो नः॥")
नःचुद्रः, त्रि, (नसा नासिकया क्षुद्रः।) क्षुद्रनासिकः। इति हेमचन्द्रः। ३। ११५॥
नकुटं, क्ली, नासिका। इति ग्रन्थमाला॥
नकुलः, पुं, (नास्ति कुलं यस्य। "नञाद्यनपादिति।" ६। ३। ७५। इति नञो न लोपादि।)
जन्तुविशेषः। नेउल। इति वैद्यो इति च भाषा। तत्पर्य्यायः। पिङ्गलः २ सर्पहा ३ बभ्रुः ४। इति हेमचन्द्रः। ४। ३६८॥ कृष्णोदरः ५ सर्पारिः ६ लोहितानः ७। (यथा, महाभारते। १२। १५। २०।
"सत्त्वैः सत्त्वा हि जीवन्ति दुर्ब्बलैर्ब्बलवत्तराः।
नकुलो मूषिकानत्ति बिड़ालो नकुलन्तथा।
बिड़ालमत्ति श्वा राजन्! श्वानं व्याघ्रस्तथा॥")
तस्य मांसगुणाः। पिच्छिलत्वम्। वातनाशित्वम्। श्लेष्मपित्तकारित्वञ्च। इति राजनिर्घण्टः॥ पाण्डुराजस्य चतुर्थपुत्रः स माद्रीगर्भे ग्रश्विनीकुमाराभ्यां जातः। इति महाभारतम्॥ पुत्रः। इति ग्रन्थमाला॥ शिवः। यथा, विदग्धमुखमण्डने।
"युधिष्ठिरस्य या कन्या नकुलेन विवाहिता।
पूजिता सहदेवेन सा कन्या वरदा भवेत्॥"
कुलरहिते, त्रि॥
नकुलाह्वा, स्त्री, (नकुलेन नकुलगन्धेन ग्राह्वा प्रचुरा।) गन्धनाकुली। इति राजनिर्घण्टः॥
नकुली, स्त्री, (नकुल+ङीष्।) कुक्कुटी। मांसी। इति मेदिनी। ले, १००॥ ग्रन्थिनी। इति ग्ररिष्टः॥ कुङ्कुमम्। इति हेमचन्द्रः॥ हकारः। इति बीजाभिधानम्॥ नकुलस्य भार्य्या च॥
नकुलीग्रः, पुं, (नकुल्या ईग्रः।) भैरवविशेषः। यथा, पीठमालायाम्।
"नकुलीग्रः कालिपीठे दक्षपादाङ्गुली मम॥"
हकारः। यथा,—
"हकारो नकुलीग्रोऽपि हंसः प्राणोऽकुग्रः प्रिये!।
ग्रदेशो नकुली चैव वराहो गगनं रविः॥
लिङ्गं शून्यो महाशून्यः प्राणश्च परमेश्वरि!॥"
इति हकारपर्य्याये बीजाभिधानम्॥
नकुलेष्टा, स्त्री, (नकुलानामिष्टा प्रिया।) राखा। इत्यमरः। २। ४। १९५॥ भेदगाछ इति भाषा। एतत्पर्य्यायो यथा,—
"नाकुली सुरसा नागसुगन्धा गन्धनाकुली।
नकुलेष्टा भुजङ्गाक्षी सर्प क्ली विषनाशिनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
नक्, क नाशने। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट।) कोपधः। नाशनं नष्टीकरणम्। क, नकयति पापं गङ्गा। इति दुर्गादासः॥
नक्तं, [न्] ग्र, रजनौ। इत्यमरः। ३। ४। ६॥ (यथा, माघे। १। २१।
"रथाङ्गपाणेः पटलेन रोचिषा-
ग्रविच्छिदः संवलिता विरेजिरे।
चलत्पलाशान्तरगोचरास्तरो-
स्त्वषारमर्त्तेरिव नक्तमंशवः॥")
नक्तं, क्ली, (नञ+क्तः।) रात्रिः। लक्षणया नक्तव्रतम्। यथा,—
"उपवासात् परं भैक्षं भैक्षात् परमयाचितम्।

अयाचितात् परं नक्तं तस्मान्नक्तेन वर्त्तयेत् ॥
दैवैस्तु भुक्तं पूर्व्वाह्णे मध्याह्ने ऋषिभिस्तथा ।
अपराह्णे पितृभिर्भुक्तं सन्ध्यायां गुह्यकादिभिः ॥
सर्व्ववेलामतिक्रम्य नक्तं भुक्तममोजनम् ।
वामाचारो महादेवो नक्तेनैवोद्धरेन्नृणाम् ॥"
इति देवीपुराणम् ॥

व्रतविशेषः । यथा,—
"दशम्याञ्चैकभक्तन्तु शुद्धचित्तो दृढव्रतः ।
नक्तं वापि तथा कृत्वा दशम्यां नियतः सदा ॥
क्रियते चासमर्थेन नक्तमेकादशीदिने ।
नक्ते चापि विधिः प्रोक्तः फलाहारे तथैव च ॥
दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे ।
नक्तं तच्च विजानीयान्न नक्तं निशि भोजनम् ॥
नक्षत्रदर्शनान्नक्तं गृहस्थेन विधीयते ।
यतेर्दिनाष्टमे भागे रात्रौ तस्य निषेधनम् ॥"
इति मात्स्ये एकादशीमाहात्म्यम् ॥ * ॥

अथ नक्तव्रतम् ।

"तथा च स्कन्दपुराणे ।
'प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः ।
उदयात्तु सदा पूज्या हरेर्नक्तव्रते तिथिः ॥
नियमश्च सामान्यव्रतधर्म्मत्वेनोक्तः ।
'ब्रह्मचर्य्यं तथा शौचं सत्यमामिषवर्জ্জनम् ॥'
इत्यादिर्ग्राह्यः ॥
नक्तलक्षणञ्च भविष्यदेवीपुराणयोः ।
'हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्य्यमधःशय्या नक्तभोजी सदाचरेत् ॥'
एवं नक्तव्रतस्य गुरुत्वेन प्रागुक्तवायुपुराणवचने नक्तमिति हविष्यान्नादिभोजनस्य कालपरं न तु नक्तव्रतपरं तथात्वे उत्तरोत्तरगुरुव्रतोपदेशप्रस्तावे तदनन्तरं केवलं हविष्यान्नोपदेशानुपपत्तेः । स्मृतिः ।
'नक्तं निशायां कुर्व्वीत गृहस्थो विधिसंयुतः ।
यतिश्च विधवा चैव कुर्य्यात्तत् सदिवाकरम् ॥
सदिवाकरन्तु तत् प्रोक्तमन्तिमे घटिकाद्वये ।
निशानक्तन्तु विज्ञेयं यामार्द्धं प्रथमे सदा ॥'
मार्कण्डेयः ।
'एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन दानेन नैवाहादग्निको भवेत् ॥'
अत्र विष्णुपूजापारण्ययोरङ्गान्तरापेक्षया प्राधान्यमवगम्यते । आनुकल्पिकेऽपि आवश्यकत्वात् ।" इत्येकादशीतत्त्वम् ॥ * ॥ सौरनक्तकालो यथा,—
"कुशमूलं यवमाचं खच्छायादिगुणं शुचौ ।
भक्ष्यं मितौदनं नक्तं शुद्धोपवसनं तथा ॥"
इति विधानसप्तमीप्रकरणे तिथ्यादितत्त्वम् ॥
(महादेवः । यथा, महाभारते । १३ । १७ । ६३ ।
"नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥"
पुं, एथोः पुत्रः । यथा, ब्रह्माण्डे । ३६ ।
"एथोश्चापि सुतो नक्तो नक्तस्यापि गयः स्मृतः ॥")

नक्तकः, पुं, (नक्तमिव कायति मलिनतयेति । के + कः । यद्वा, नज + क्त । ततः स्वार्थे कन् ।) कर्पटः । इत्यमरटीकायां भरतः ॥ न्याकड़ा इति भाषा ॥

नक्तचारी, [न्] पुं, (नक्ते रात्रौ चरतीति । चर + णिनिः ।) विड़ालः । पेचकः । इति त्रिकाण्डशेषः ॥ राक्षसः ॥ रात्रिचरमात्रे, त्रि ॥

नक्तञ्चरः, पुं, (नक्तं चरतीति । चर + "चरेष्टः ।" ३ । २ । १६ । इति टः ।) राक्षसः । इति हलायुधः ॥ गुग्गुलुः । इति जटाधरः ॥ चौरः । पेचकः । (रात्रिचरमात्रे, त्रि । यथा, मार्कण्डेयपुराणे । २६ । २० ।
"नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाङ्क्षतो हरेत् ॥")

नक्तमालः, पुं, (नक्तं रात्रौ आ सम्यक्प्रकारेण अलति पर्य्याप्नोतीति । आ + अल + अच् ।) करञ्जवृक्षः । इत्यमरः । २ । ४ । ४७ ॥ (यथा, रघुः । ५ । ४२ ।
"स नर्म्मदारोधसि शीकराद्रै-
र्मरुद्विरानर्त्तितनक्तमाले ॥")

नक्तसुखा, स्त्री, (नक्तं नक्तव्रताङ्गं सुखं यस्याः ।) रात्रिः । इति हलायुधः ॥

नक्तव्रतं, क्ली, (नक्ते रात्रौ भोजनरूपं यद्व्रतम् ।) दिवाभोजनाभाववशिष्टरात्रिभोजनम् । यथा,
"हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्य्यमधःशय्या नक्तभोजी सदाचरेत् ॥"
इति भविष्यपुराणम् ॥

नक्ता, स्त्री, (अनिष्टकारित्वात् नक्तवत् मलिनत्वमस्त्यस्येति । अच् । टाप् ।) कलिकारी । इति राजनिर्घण्टः ॥ इंग्लाङ्गला इति भाषा ॥ (कलिकारीशब्देऽस्या विवरणं ज्ञातव्यम् ।)

नक्रं, क्ली, (नक्रवत् आकृतिरस्त्यस्येति । अच् ।) अयदारु । आजकाठ इति भाषा । नासिका । इति मेदिनी । रे, ५२ ॥

नक्रः, पुं, (न क्रामति दूरस्थजनमिति । क्रम + अन्येष्वपीति डः । नञ्वाड्डति नलोपो न ।) कुम्भीरः । इत्यमरः । १ । १० । २१ ॥ (यथा, पञ्चतन्त्रे । १ । ४३ ।
"नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानात् शुनापि परिभूयते ॥"
मकरः । यथा, कादम्बर्याम् । "तथा चैनाचरेयं नयेत नक्रकेतनः यथैनेकेनाकीर्त्तनीयां दशां जनं चैनम् ॥" व्याहः । यथा, रघुः । १६ । ५५ ।
"स तीरभूमौ विहितोपकार्या-
मानाभिमिक्तामपहृतनक्राम् ॥")

नक्रराजः, पुं, (नक्राणां कुम्भीरादीनां राजा श्रेष्ठत्वात् । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) जलजन्तुविशेषः । हाङ्गर इति भाषा । तत्पर्य्यायः । ग्राहः २ जलकिराटः ३ जलाटकः ४ । इति हारावली । ७७ ॥

नक्रा, स्त्री, (नक्रवदाकृतिरस्त्यस्या इति अच् । टाप् ।) नासिका । इति शब्दरत्नावली ॥

नक्षत्रं, क्ली, (नक्षति श्रीभां गच्छति स्थानात् स्थानान्तरं गच्छति वा । नक्ष गतौ + "अमि-नक्षियजिवधिपतिभ्योऽत्रन् ।" उणा । ३ । १०५ । इति अत्रन् ।) सूक्ता । इति राजनिर्घण्टः । तारा । तत्पर्य्यायः । ऋक्षभ् २ भम् ३ तारा ४ तारका ५ उडु ६ । इत्यमरः । १ । ३ । २१ । तारकम् ७ । इति शाश्वतः ॥ तारः ८ । इति वाडिः ॥ दाक्षायण्यः । तासु अश्विनी १ भरणी २ कृत्तिका ३ रोहिणी ४ मृगशिरः ५ आर्द्रा ६ पुनर्व्वसुः ७ पुष्यः ८ अश्लेषा ९ मघा १० पूर्ब्बफल्गुनी ११ उत्तरफल्गुनी १२ हस्ता १३ चित्रा १४ स्वातिः १५ विशाखा १६ अनुराधा १७ ज्येष्ठा १८ मूला १९ पूर्ब्बाषाढ़ा २० उत्तराषाढ़ा २१ श्रवणा २२ धनिष्ठा २३ शतभिषा २४ पूर्ब्बभाद्रपदा २५ उत्तरभाद्रपदा २६ रेवती २७ इत्यमरः ज्योतिषञ्च ॥ एता अभिजिता सह अष्टाविंशतिनक्षत्राणि भवन्ति ॥ * ॥ आसां क्रमेणाधिदेवता यथा । अश्वि-१ यम-२ दहन-३ कमलज-४ अग्नि-५ भूजश्रु-६ अदिति-७ जीव-८ फणि-९ पितरः-१० । भाग्य-११ र्य्यमन्-१२ दिनकृत्-१३ त्वष्टृ-१४ पवन-१५ इन्द्राग्नि-१६ मित्राख्य १७ इन्द्रो १८ निर्ऋति १९ वरुणम् २० विश्वविरिञ्चौ २१ हरि-२२ वसु-२३ वरुणः-२४ । अजपदो २५ ऽहिब्रध्नः २६ पूषा २७ चैतीश्वरा भानाम् ॥ * ॥ आसां गणा यथा ।
"उग्राः पूर्ब्बमघाश्लेषाः ११ । २० । २५ । १० । २ । ध्रुवगणस्त्रीण्युत्तराणि खभू-१२ । २१ । २६ । ४ । व्यातादित्यहरित्वयं चरगणः १५ । ७ । १२ । २३ । २४ । पुष्याग्निहस्ता ८ । १ । १३ । लघुः । चित्रामित्रमृगान्त्यभम् १४ । १७ । ५ । २९ । मृदुगणस्त्रीस्त्रीण्यहिर्बुध्न्ययुक् ६ । ६ । १८ । १६ । मिश्रोऽग्निः सविशाखभः । ३ । १६ । शुभसंज्ञाः सर्व्वे खलु ते गणाः ॥" * ॥
अधोमुखनक्षत्राणि यथा ।
"अश्लेष-९ वह्नि-३ यम-२ मित्र-१७ विशाख-१६ युक्तम्
पूर्ब्बात्रयम् ११ । २० । २५ शतभिषा २४ च नवाप्युडूनि ।
एतान्यधोमुखगणानि शिवानि नित्यं
विद्यार्थ्यधूमिखननेषु च भूषितानि ॥" * ॥
खनक्षत्रावधिनक्षत्राणां जन्मसम्पदादिकथनं यथा,—
"जन्म सम्पत्तिपत् क्षेमः प्रत्यरिः साधको वधः ।
मित्रं परममित्रञ्च जन्मभाच्च पुनः पुनः ॥
सर्व्वमङ्गलकार्य्याणि चित्र जन्मसु कारयेत् ।
विवादश्राद्धभैषज्ययात्राचौराणि वर्জ্জयेत् ॥
यात्रायां पथि वस्त्रान्नं क्षणि विधौ सर्व्वार्थनाशो भवेत्
भैषज्ये मरणं तथा सुनियतं दाहो गृहारम्भणे ।
चौरे रोगसमागमो बहुविधः श्राद्धेऽर्थनाशः स्मृता
वादे बुद्धिविनाशनन्त्वरिभयं प्राप्नोत्यसौ जन्मभे ॥

नक्षत्रोत्पन्नरोगेषु भोगादि यथा,—

"जन्माधाने निधनभे प्रत्यरौ च विपत्करे।
यदि व्याधिः समुत्पन्नः क्लेशाय मरणाय वा॥
क्षत्तिकासु यदा व्याधिर्नृणाञ्च प्रतिपद्यते।
नवरात्रं भवेत् पीड़ा चिरात्रं रोहिणीषु च॥
मृगशीर्षे पञ्चरात्रमार्द्रायां सप्तरात्रिभिः॥
पुनर्वसौ तथा पुष्ये सप्तरात्रं विधीयते।
नवरात्रं तथाश्लेषे मासमेकं मघासु च।
द्वौ मासौ पूर्व्वफल्गुन्यामुत्तरासु त्रिपञ्चकम्।
हस्तेषु सप्तमे मोक्षश्चित्रायामर्द्धमासकम्॥
मासद्वयं तथा स्वात्यां विशाखे दिनविंशतिम्।
मैत्रे चैव दशाहानि ज्येष्ठायामर्द्धमासकम्॥
मूले न जायते मोक्षः पूर्व्वाषाढ़े त्रिपञ्चकम्।
उत्तरा दिनविंशत्या अवशे द्वौ च मासकौ॥
धनिष्ठायामर्द्धमासं वारुण्याञ्च दशाहकम्।
न च भाद्रपदे मोक्ष उत्तरासु त्रिपञ्चकम्॥
रेवत्यां दिनविंशत्या चाहोरात्रं तथाश्विनी।
प्राणैर्विमुच्यते नित्यं मरणं नात्र संशयः॥
कौशिकेन सदादिष्टा नक्षत्रव्याधिसम्भवः।
नक्षत्रे प्रतिकर्त्तव्यं नक्षत्रपथजानता॥"

नक्षत्रचतुर्भागबोधकानि चत्वारि नामाद्यक्षराणि यथा। अ इ उ ए ३। ओ व वि वु ४। वे वो क कि ५। कु घ ङ छ ६। के को ह हि ७। हु हे हो ड ८। डि डु डे डो ९। म मि मु मे १०। मो ट टि टु ११। टे टो प पि १२। पु ष ण ठ १३। पे पो र रि १४। रु रे रो त १५। ति तु ते तो १६। न नि नु ने १७। नो य यि यु १८। ये यो भ भि १९। भु ध फ ढ २०। भे भो ज जि २१। खु जे जो ख २०। अभिजित्। खि खु खे खो २२। ग गि गु गे २३। गो ग्र शि शु २४। शे शो द दि २५। दु थ झ ञ २६। दे दो च चि २७। चु चे चो ल १। लि लु ले लो २। अ ल युक्ताकारयुक्तेन ज्ञेयः। ह्रस्वेन दीर्घो ज्ञेयः। तालव्यशकारेण दन्त्यसकारो ज्ञेयः।" इति ज्योतिस्तत्त्वम्॥

नक्षत्रकान्तिविस्तारः, पुं, (नक्षत्राणां कान्तिस्तस्या विस्तारो यत्र।) धवलयावनालः। इति राजनिर्घण्टः॥

नक्षत्रचक्रं, क्ली, (नक्षत्राणां चक्रं यत्र।) मन्त्रग्रहणोक्तषट्चक्रान्तर्गतचक्रविशेषः। तथा च हृदयस्फोक्रमे।

"उत्तराद्दक्षिणाग्रासु रेखां कुर्य्याच्चतुष्टयीम्।
दश रेखाः पश्चिमाग्राः कर्त्तव्या वीरवन्दिते!॥
अकारादिक्षकारान्तान् द्विचन्द्रवह्निवेदकान्।
भूमीन्द्वनेत्रचन्द्रांश्च न्यसेन्नाम्नां क्रमात् प्रिये!॥
द्विभूनेत्रनेत्रयुग्मांश्चेन्द्वनेत्राग्निचन्द्रकान्।
मघादिष्वेकपर्य्यन्तं द्वितीयं नवतारकम्॥
वह्निभूमीन्दुचन्द्रांश्च युगेन्द्वनेत्रवह्निकान्।
वेदेन भेदिता वर्णा रेवत्यन्तगताः क्रमात्॥"
निगमे।

"पूर्व्वोत्तराश्चयश्चैव भरण्यार्द्रा च रोहिणी।
इमान्येव मानुषाण्याहुर्नक्षत्राणि मनीषिणः॥
ज्येष्ठा शतभिषाश्लेषाधनिष्ठाश्चित्तिकाः।
चित्रास्वातिविशाखाः स्युस्तारा राक्षसदेवताः॥
अश्विनी रेवती पुष्यः स्वाती हस्तः पुनर्व्वसुः।
अनुराधा मृगशिरः श्रवणा देवतारकाः॥"
तथा।
"सजातौ परमा प्रीतिर्मैथ्यमा भिन्नजातिषु।
रक्षोमानुषयोर्नाशो वैरं दानवदेवयोः॥"
गणापवादमाह गर्गवाक्यतस्ते।
"प्रथवस्त्राचरी माया योमयापी षड़क्षरः।
प्रासादो बहुरूपी च सप्त साधारणाः स्मृताः॥"
शारदायाम्।
"जन्म सम्पत् विपत् क्षेमः प्रत्यरिः साधको वधः।
मित्रं परममित्रञ्च जन्मादीनि पुनः पुनः॥"
जन्मत्रिपञ्चसप्तानि वर्জ্জनीयानि नक्षत्राणि।
तथा च राघवभट्टः।
"रसाष्टनवभद्राणि युगयुग्मगतान्यपि।
इत्तराणि न भद्राणि नक्षत्राणि॥" स्वनक्षत्रादेवनक्षत्रं गणनीयम्। तदज्ञाने स्वनामाद्यक्षरसम्बन्धिनक्षत्राद्गणनीयम। तथा च।
"प्रादक्षिण्येन गणयेत् साधकात्तत्तरात् सुधीः॥"
इति तन्त्रसारः॥

नक्षत्रनेमिः, पुं, (नक्षत्रस्य नक्षत्रचक्रस्य नेमिरिव।) विष्णुः। (यथा, महाभारते। १३। १४६। ६०।
"नक्षत्रनेमिर्नक्षत्री क्षमः क्षाम समीहनः॥"
"नक्षत्रैस्तारकैः सार्द्धं चन्द्रसूर्य्यादयो ग्रहाः।
वायुराकाशमयैर्बद्धैर्निबद्धा ध्रुवसंश्रिते॥
स ज्योतिषां चक्रं भ्रामयंस्तारामयस्य शिशुमारस्य पुच्छदेशे ध्रुवस्य शिशुमारस्य हृदये ज्योतिश्चक्रस्य नेमिवत् प्रवर्त्तकः स्थितो विष्णुरिति नक्षत्रनेमिः शिशुमारवर्णने विष्णुहृदयमिति श्रुतेः॥" इति श्रीधरभाष्यम्॥) चन्द्रः। ध्रुवः। रेवत्यां स्त्री। इति मेदिनी। मे, ६३॥

नक्षत्रपः, पुं, उडुपः। चन्द्रः। नक्षत्रं पातीति युतुपत्ता। (नक्षत्र+पा+कः॥)

नक्षत्रपुरुषः, पुं, (नक्षत्रैः पुरुष इव।) व्रतविशेषः। यथा,—
"शृणुष्व कथयिष्यामि नक्षत्रपुरुषव्रतम्।
नक्षत्राङ्गानि देवस्य यानि यानीह नारद!॥
मूलञ्च चरणौ विष्णोर्जङ्घे रोहिणी स्थिता।
द्वे जानुनी तथाश्विन्यौ संश्रिते रूपधारिणः॥
आषाढ़े द्वे तथा चोरू गुह्यञ्च फल्गुनीद्वयम्।
कटिस्था कृत्तिकाश्चैव वासुदेवस्य संस्थिताः॥
श्रोणिपक्षद्वयं पार्श्वे कुक्षिस्था रेवती स्थिता।
उरःसंस्था त्वनुराधा श्रविष्ठा पृष्ठसंस्थिता॥
विशाखा भुजयोर्हस्तः करद्वयसुदाहृतम्।
पुनर्व्वसुरथाङ्गुल्यो नखाः सर्व्वे मयोदिते॥
ग्रीवास्थिता तथा ज्येष्ठा श्रवणः कर्णयोः स्थितः।
मुखसंस्थस्तथा पुष्यः स्वातिर्दन्ताः प्रकीर्त्तिताः॥
हनू द्वे वारुणश्चोष्ठौ नासा वैत्रासुदाहृतम्।
प्राजापत्यञ्च नेत्राभ्यां रूपधाम्नः प्रतिष्ठितम्॥
शिरो रौद्रस्तथा चैव नक्षत्राङ्गमिदं हरेः।
विधानं संप्रवक्ष्यामि यथायोगेन नारद!॥
संपूजितो हरिः कामान् विदधाति यथेप्सितान्।
चैत्रे मासि सिताष्टम्यां यदा मूलगतः शुभे॥
भगवन्तं सह लक्ष्म्या पूजयेच्च विधानतः।
नक्षत्रसन्निधौ दद्याद्विप्रेभ्यश्च भोजनम्॥
जानुनी चाश्विनीयोगे पूजयेदथ भक्तितः।
दोहदे च हविष्यान्नं पूर्व्ववद्द्विजभोजनम्॥
आषाढ़ाभ्यां तथा द्वाभ्यां द्वावूरू पूजयेद्बुधः।
सलिलं शिशिरं तत्र दोहदे च प्रकीर्त्तितम्॥
फल्गुनीदितये गुह्यं पूजनीयं विचक्षणः।
दोहदे च पयो गव्यं देयञ्च द्विजभोजनम्॥
कृत्तिकासु कटिः पूज्या सोपहारैर्व्वितेन्द्रियैः।
देयञ्च दोहदे विष्णोः सुगन्धिकुसुमोदकम्॥
पार्श्वे भाद्रपदायुग्मे पूजयित्वा विधानतः।
गुड़ं सघृतलिकं दद्याद्दोहदे देवप्रीतिदम्॥
कुक्षौ रेवतीयोगे दोहदे गुड़मोदकम्।
अनुराधासु जठरं कुलत्थांस्तत्र दोहदे॥
अश्विन्यां तथा पृष्ठं शालिभक्तञ्च दोहदे।
पुष्ये सुखं पूजयेत दोहदे घृतपायसम्॥
श्लेषायोगे च दशनान् दोहदे तिलशक्तुनी।
भुजयुग्मं विशाखासु दोहदे परमोदनम्॥
हस्ते हस्तौ तथा पूष्णौ यावकं दोहदे स्मृतम्॥
पुनर्व्वसावङ्गुलीश्च पटोलं तत्र दोहदे॥
दातव्यं केशवप्रीत्यै ब्राह्मणस्य च भोजनम्।
हनू शतभिषायां वै पूजयेत्तु प्रयत्नतः॥
प्रियङ्गुरक्तशाल्यन्नं दोहदञ्च मधुद्विषः।
मघासु नासिका पूज्या मधु दद्याच्च भोजनम्॥
मृगोत्तमाङ्गे नयने मृगमांसञ्च दोहदे।
चित्रायोगे ललाटञ्च दोहदे चारु भोजनम्॥
भरणीषु शिरः पूज्यं चारु भक्तञ्च दोहदे।
सम्पूजनीया विद्वद्भिरार्द्रायोगे शिरोरुहाः॥
विप्रांश्च भोजयेद्भक्त्या दोहदे च गुड़ान्नकम्।
नक्षत्रयोगेष्वेतेषु संपूज्य जगतः पतिम्॥
ततस्तु दक्षिणां दद्यात् स्त्रीपुंसोश्चारु वाससम्।
क्षीरोपानद्युगञ्चैव सप्त धान्यानि काञ्चनम्॥
घृतपात्रञ्च गां दोग्धीं ब्राह्मणाय निवेदयेत्।
प्रतिनक्षत्रयोगेन पूजनीया द्विजातयः॥
नक्षत्रज्ञाय विप्राय पृथग्दद्याच्च दक्षिणाम्।
नक्षत्रपुरुषाख्यं हि व्रतानां व्रतसुत्तमम्॥
एवं विधानतो ब्रह्मन्! नक्षत्राङ्गो जनार्द्दनः।
पूजितो रूपधारी वैस्तैः प्राप्ता च सुकामिता॥
एतत्तवोक्तं परमं पवित्रं
धन्यं यशस्यं शुभरूपदायि।
नक्षत्रपुंसः परमं विधानं
शृणुष्व प्रवक्ष्यामिह तीर्थयात्राम्॥"
इति वामनपुराणे ७७ अध्यायः॥

नक्षत्रमाला, स्त्री, (नक्षत्रसंख्यका माला।) सप्तविंशतिमौक्तिकस्रक्तद्धारः। इत्यमरः। २।६।१०६।
"सप्तविंशतिरुग्राढ्ये रूपके रूपरूपकौ।
वृत्ते नक्षत्रमाला स्यान्मुक्तावालिरवोज्ज्वला॥
इति सञ्जीवनीकोषः॥
(नक्षत्राणां माला सप्त इ.।) नक्षत्रश्रेणी

(यथा, बृहत्संहितायाम्। १०५। १३।
"यावन्नक्षत्रमाला विचरति गगने भूधयन्तीह भासा
तावन्नक्षत्रभूतो विचरति सह तैर्ब्रह्मणो ब्रह्मो-
द्यमेषम्॥")
नक्षत्रेशः, पुं, (नक्षत्राणामीशः।) चन्द्रः। (यथा, साहित्यदर्पणे। २। २०।
"नक्षत्रेशप्रतेजाश्च गिरिगुरोर्गाढ़ां रुचिं धारयन्
ग्रामाक्रम्य विभूतिभूषिततनू राजत्युमा-वल्लभः॥")
कर्पूरः। इत्यमरः। २। ६। १२०॥
नख, सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) प्रनखति। इति दुर्गादासः॥
नखं, क्ली, पुं, (नखते इव शरीरे। नह बन्धे+"नहेर्ह्रस्वोलोपश्च।" उणा ५। ९३। इति खः, ह्रस्वोलोपश्च।) अङ्गुलीकण्टकः। नह इति हिन्दी भाषा। तत्तु उपधातुविशेषः गर्भस्थबालकस्य षष्ठमासे भवति। इति सुखबोधः॥ तत्पर्य्यायः। पुनर्भवः २ करुहः ३ नखरः ४ इत्यमरः। २। ६। ८३॥ कामाङ्कुशः ५ करजः ६ पालिजः ७ अङ्गुलीसम्भूतः ८ पुनर्नवः ९। इति राजनिर्घण्टः॥ करायजः १० करकण्टकः ११ शराङ्कुशः १२ रतिरुहः १३ करचन्द्रः १४ कराङ्कुशः १५। इति शब्दरत्नावली॥ * ॥
रतिक्रीड़ायां नखाघातस्थानानि यथा,—
"नखाघातः प्रदातव्यो यथास्थानानि कर्म्मसु।
पार्श्वयोः स्तनयोश्चैव ऊरौ चैव नितम्बके॥
कक्षस्थले च कर्णान्ते कपोले बाहुमूलके।
ग्रीवायां कण्ठदेशे च नखाघातं समाचरेत्॥
तथा सर्व्वशरीरेषु नखं दद्यात् प्रगे: प्रगे:॥"
इति कामशास्त्रम्॥
"न नखैर्विलिखेद्भूमिं गात्रं सदेश्यवेन्नहि।
न खाङ्गे नखवाद्यं वै कुर्य्यान्नाञ्जलिना पिबेत्॥"
इति कूर्म्मे उपविभागे १५ अध्यायः॥
नखं, क्ली, स्त्री, (नखमिव आकृतिरस्यास्येति। अच्।) नखीनामगन्धद्रव्यम्। नखी इति ख्यातः। तत्पर्य्यायः। शुक्तिः २ शुक्लः ३ खुरः ४ कोलदलम् ५। इत्यमरः। २। ४। १३०॥ करजाख्यः ६ अश्वखुरः ७ नखः ८ शाबनखः ९ नखी १०।
"द्विधा शुक्लनखाख्योऽन्यः शुक्लाख्यो बदरीच्छदः।"
इति रत्नमालायाम्। १४४॥
करुहः ११ सिम्बी १२ शुक्लः १३ चलः १४ कोशी १५ करजः १६ हनुः १७ नागहनुः १८ पालिजः १९ बदरीपत्रः २० रूप्यः २१ वरुण्यविलासिनी २२ सन्धिनालः २३ पालिरुहः २४। इति राजनिर्घण्टः॥ बालायुधम् २५ चक्रकारकम् २६ शुक्लनखः २७ नखरी २८। इति शब्दरत्नावली॥ जाते च। अथ नखनखीगन्धद्रव्यम्।
"नखं बालनखं बालायुधं तच्चक्रकारकम्।
नखं खल्वं नखी प्रोक्ता हनुर्हनुविलासिनी॥
नखदयं शङ्खश्लेष्मवातासव्वरकुष्ठजित्।
लघूष्णं शुक्लं वर्ण्यं स्वादुव्रणविषापहम्॥
अलक्ष्मीसुखदौर्गन्ध्यं कृत्पाकरसयोः कटुः॥"
इति भावप्रकाशः॥
खल्वनखस्य पर्य्यायः। नखी १ हनुः २ हनुविलासिनी ३। तयोर्गुणाः। शङ्खश्लेष्मवातासव्वरकुष्ठनाशित्वम्। लघुत्वम्। उष्णत्वम्। शुक्लत्वम्। वर्ण्यत्वम्। स्वादुत्वम्। व्रणविषालक्ष्मीसुखदौर्गन्ध्यनाशित्वम्। पाकरसयोः कटुत्वञ्च। इति भावप्रकाशः॥ कक्षुभूतविनाशित्वम्। इति राजनिर्घण्टः॥ रक्षोघ्नत्वम्। इति राजवल्लभः॥ * ॥
"श्लेष्मरुहं बालनखं हनुर्हनुविलासिनी।
सुषिराङ्गनकेशी च कपोताङ्घ्रिर्नखी खुरः॥
स्वल्पपत्रस्त्री शुक्तिर्नखरी बदरीच्छदा।
महांस्त्वसौ शङ्खनखः शङ्खाख्यो गन्धसारकः॥"
इति भरतधृतवाचस्पतिः॥
नखः, पुं, (नखतेऽनेनेति। नह+खः। हस्य लोपः।) खड्गम्। इति हेमचन्द्रः। ३। २५८॥ (नखीनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥)
नखकृट्, पुं, (नखं कृन्तयति छिनत्तीति। कृत्+अण्।) नापितः। इति त्रिकाण्डशेषः॥
नखनिष्पावः, पुं, (नखं निष्पवते पलसाङ्गेण अनुकरोतीति। निर्+पू+अण्। यद्वा, नखवत् निष्पावः शिम्बी यस्य।) निष्पावीभेदः। तत्पर्य्यायः। अङ्गुलिफला २ वृत्तनिष्पाविका ३ श्यामा ४ नखशुक्लफला ५ श्यामजनिष्पावी ६ नखफलिनी ७। अस्या गुणाः। कषायत्वम्। मधुरत्वम्। कण्ठशुद्धिकरत्वम्। मेध्यत्वम्। दीपनत्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥
नखपर्ण्यौ, स्त्री, (नख इव पर्णमस्याः। ङीष्।) छत्रिकाभेदः। इति राजनिर्घण्टः॥
नखपुष्पी, स्त्री, (नख इव पुष्पमस्याः। ङीष्।) एला। इति राजनिर्घण्टः॥
नखमुखं, क्ली, (नखं मुखतीति। मुख+"कृकमिकंसकुम्भपात्रकुशाकर्णीषु।" ३। २। ५। इत्यस्य वार्त्तिकोक्त्या कः।) धनुः। इति संक्षिप्तसारव्याकरणम्॥ नखस्य मोचके, त्रि॥
नखरः, पुं, क्ली, (नखं रातीति। रा+कः।) नखः। इत्यमरः। २। ६। ८३॥ (यथा, साहित्यदर्पणे।
"किं पुनरद्भुतमेतत् सम्प्रति नखरक्षतैस्तस्याः।"
अन्यविशेषः। यथा, महाभारते। ७। २६। १७।
"सक्तमन्यैर्दिनकरा सुपक्वानि परश्वधाः॥"
तथा, तत्रैव। ६। १८। १७।
"पादाताड्यामनोऽगच्छन् धनुश्चर्म्मासिपाणयः।
अनेकशतसाहस्रा नखरप्रासयोधिनः॥")
नखरञ्जनी, स्त्री, (रज्यतेऽनयेति। रञ्ज+ल्युट्। ङीप्। नखस्य रञ्जनी।) नखच्छेदनास्त्रविशेषः। नरुण इति भाषा। यथा,—
"रत्नलाचरणोपान्तचारिणी मलहारिणी।
पुनर्भवच्छेदकरी शङ्खेव नखरञ्जनी॥"
इति द्व्यर्थोक्तिः॥
नखरायुधः, पुं, (नखरश्चेव आयुधं यस्य।) सिंहः। व्याघ्रः। कुक्कुटः। इति राजनिर्घण्टः॥
नखराङ्कः, पुं, (नखरं आकृष्यते लक्ष्यते इति। आ+कृष+कः।) करवीरवृक्षः। इति राजनिर्घण्टः॥
नखरी, स्त्री, (नखराः आकृतिरस्याङ्गस्यास्या इति। अच्। गौरादित्वात् ङीष्।) नखी। इति शब्दमाला॥ क्षुद्रनखी। इति काचिद्ग्रन्थमाला॥
नखरुचः, पुं, (नख सर्पणे+अच्। नखो हरुचः। इति नित्यकर्म्मधारयः।) नीलवृक्षः। इति राजनिर्घण्टः॥ (नीलवृक्षशब्दस्यास्य विवरणं ज्ञातव्यम्॥)
नखशुङ्गः, पुं, (नख इव शुङ्गः।) क्षुद्रशुङ्गः। इति शब्दरत्नावली॥
नखाङ्गं, क्ली, (नखमिव अङ्गं यस्य।) बालनखी। इति शब्दरत्नावली॥
नखाङ्गं, क्ली, (नखस्य अङ्गमिव अङ्गं यस्य।) नखी। इति काचिद्ग्रन्थमाला॥
नखायुधः, पुं, (नखमेव आयुधं यस्य।) व्याघ्रः। इति राजनिर्घण्टः॥ सिंहकुक्कुटौ च॥
नखालिः, पुं, (नखमिव अलतीति। अल पर्य्याप्तौ+इन्।) क्षुद्रशुङ्गः। इति शब्दचन्द्रिका॥ (नखस्य आलिः।) नखश्रेणी च॥
नखालुः, पुं, (नखतीति। नख सर्पणे+आलुच्।) नीलवृक्षः। इति राजनिर्घण्टः॥
नखाशी, [न्] पुं, (नखमश्नातीति। अश्न भोजने+णिनिः।) पेचकः। इति त्रिकाण्डशेषः॥ नखभक्षकमात्रे, त्रि॥
नखी, स्त्री, (नख+गौरादित्वात् ङीष्।) नखनामगन्धद्रव्यम्। इत्यमरः। २। ४। १३०॥ (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"करजाख्यश्चाश्वखुरो नखो बालनखो नखी॥")
नखी, [न्] पुं, (नखमस्त्यस्येति। नख+इनिः।) सिंहः। इति राजनिर्घण्टः॥ विदारयत्यश्मनखायुक्तपशुमात्रम्। यथा, चाणक्ये। २७।
"नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम्।
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च॥"
नगः, पुं, (न गच्छतीति। न+गम्+डः। यद्वा, दह्यते इति। दह+"दहेर्गो लोपो दश्च नः।" उणा। ५। ६१। इति गः। धातोरन्तलोपः। दस्य च नः।) पर्व्वतः। (यथा, कुमारे। ७। ७८।
"नवे दुकूले च नगोपनीतं
प्रत्यग्रहीत् सर्व्वमलङ्घनीयम्॥")
वृक्षः। इत्यमरः। ३। ३। १६॥ (यथा, महाभारते। १। १। ४३। ६।
"तं दृष्ट्वा स नगं नागः कश्यपं पुनरब्रवीत्।
कुरु यत्नं द्विजश्रेष्ठ! जीवयैनं वनस्पतिम्॥"
स्थावरमात्रम्। यथा, विष्णुपुराणे। १। ५। ६।
"सुखा नगा यतश्चोक्ता सुखसर्गस्ततस्त्वयम्।"
"नगाः स्थावराः।" इति तट्टीकायां स्वामी॥)

नगजः, पुं, (नगे पर्व्वते जायते इति। जन+ड:।) हस्ती। इत्यमरटीकायां भरतसुन्दरी। पर्व्वतजातवस्तुमात्रे, त्रि॥

नगजा, स्त्री, (नगे जायते या। जन+ड:। टाप्।) क्षुद्रपाषाणभेदा। इति राजनिर्घण्टः॥

नगडा, स्त्री, (नास्ति गर्डो यस्याः।) लताविशेषः। नयाफट्की इति भाषा। तत्पर्य्यायः। पारावतपदी २ पिण्या ३ स्फुटवल्लरी ४ ज्योतिष्मती ५ पूतितैला ६ दुर्ग्रहा ७। इति रत्नमाला॥

नगनन्दिनी, स्त्री, (नगस्य हिमालयस्य नन्दिनी। दुर्गा। इति शब्दरत्नावली॥

नगपतिः, पुं, (नगानां पतिः।) हिमालयपर्व्वतः। इति त्रिकाण्डशेषः॥ (नगानां ओषधीनां पतिः।) चन्द्रः॥

नगभित्, पुं, (नगं भिनत्तीति। भिद्+क्विप्।) पाषाणभेदनः। इति राजनिर्घण्टः॥ इन्द्रश्च॥

नगभू, पुं, (नगे भूरुत्पत्तिर्यस्य।) क्षुद्रपाषाणभेदा। इति राजनिर्घण्टः॥ पर्व्वतजाते, त्रि॥

नगरं, क्ली, नगा इव प्रासादादयः सन्ति यत्र। ("नगपांसुपाण्डुभ्यश्च।" ५।२।१०७। इत्यस्य वार्त्तिकोक्त्या रः।) बहुलोकवासस्थानम्। शहर इति भाषा। तत्पर्य्यायः। पूः २ पुरी ३ पुरिः ४ पुरम् ५ नगरी ६ पत्तनम् ७ पट्टनम् ८ पट्टनी ९ पुटभेदनम् १० पटभेदनम् ११ स्थानीयम् १२ निगमः १३ इत्यमरभरतौ। कटकम् १४ पट्टम् १५। इति शब्दरत्नावली॥ केचित्तु नगरपत्तनस्थानीयानां भेदमाहुः। तत्र पुरादित्रयं पुरे। पत्तनादित्रयं पत्तने। स्थानीयादित्रयं स्थानीये। इति मन्यन्ते। यत्राष्टशतयामीयशतबहारस्थानं मध्यवर्त्ति तत् नगरम्। यत्र राजा तत्परिचारकाश्च तिष्ठन्ति तत् पत्तनम्। प्राकारादिना दुर्गं योजनविस्तीर्णं नगरं स्थानीयम्। केचित्तु पुरनगरयोरपि भेदमाहुः। बहुयामीयशतबहारस्थानं पुरम्। तत्र प्रधानभूतं नगरम्। इति भरतः॥ *॥

अथ नगरनिर्म्माणकालः।

"क्षिरराशिगते भानौ चन्द्रे च क्षिरभोदये। शुद्धे काले दिने चैव नगरं कारयेन्नृपः।"*॥

तस्य लक्षणं भविष्योत्तरे।

"दीर्घं वा चतुरस्रं वा नगरं कारयेन्नृपः। तत्त्रास्रं वर्त्तुलं वापि कदाचिदपि कारयेत्॥ दीर्घं पादैकपञ्चरचतुरस्रं समोचितम्। त्रिभिः पादैः समं त्रास्रं वर्त्तुलं बलयाकृति॥ दीर्घं स्वादीर्घकालाय सुखसम्पत्तिहेतवे। चतुरस्रं चतुर्वर्ग्गफलाय पृथिवीभुजः॥ त्रास्रं त्रिशक्तिनाशाय वर्त्तुलं बहुरोगदम्। राज्ञः खड्गैर्दशभी राजहस्त उदाहृतः॥ राजहस्तैश्च दशभी राजदण्ड उदाहृतः। राजदण्डैश्च दशभी राजच्छत्रमुदाहृतम्॥ राजच्छत्रैश्च दशभी राजकाण्ड उदाहृतः। राजकाण्डैश्च दशभी राजपूरुष उच्यते॥ राजधानी तु कथिता दशभी राजपूरुषैः। राजधानी दशगुणा राजक्षेत्रमुदाहृतम्॥ वर्णैश्च परिमाणानि प्रोक्तानि पुरपत्तने। भयत्राभोगसम्पत्तिमर्य्यादाकीर्त्तिसुखार्थिनाम्। राजक्षेत्रेण नृपतिः पुरपत्तनमारभेत्॥ लक्ष्मीर्जयः क्षमा सौख्यं पक्षत्वं भङ्ग एकता। सम्बुद्धिवित्तं नाशश्च मङ्गलश्च बलं क्षयः॥ साम्राज्यं भोगसम्पत्तिरिति वीक्ष्य कीर्त्तिताः। यथार्थसंज्ञा नगरा मुनिना तत्त्वदर्शिना॥"

इति युक्तिकल्पतरुः॥ *॥

अपि च।

"नृपावासः पुरी प्रोक्ता विप्राम्पुरमधीयते। एकतो यत्र तु ग्रामो नगरञ्चैकतः स्थितम्॥ ग्रामस्तु सर्व्वतः प्राम्य ग्रहीगिरिसमाश्रयम्। विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति हि॥ स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च। पण्यक्रियादिविपुलैश्चातुर्वर्ण्यजनैर्युतम्॥ अनेकजातिसम्बन्धं नैकशिल्पसमाकुलम्। सर्व्वदेवतसम्बन्धं नगरन्त्वभिधीयते॥"

इति विष्णुपुराणटीकायां श्रीधरस्वामिधृतशङ्खवचनम्॥ *॥

अन्यच्च।

"नगरं सर्व्वतोभद्रं कर्त्तव्यं रोधकं हि वा। स्वस्तिकं मध्यगं कार्य्यं कुमारीपुरमेव वा॥ चतुष्यष्यचतुर्युक्तं सर्व्वकामसुखावहम्। छिन्नकर्त्रं विनाशञ्च दुःस्थितं क्षयदुर्व्वसम्॥ नगरं न प्रशंसन्ति गर्गनैर्ऋतं विभेदितम्। अग्नतः खल्वप्रासादं छिन्नाग्रं विदुर्बुधाः॥ छिन्नस्रं कर्त्रहीनन्तु क्षयमध्यं क्षयं विदुः। दुःस्थितं निश्चयाग्र्यन्तु नैर्ऋतं धनदुर्व्वसम्॥ सौम्यं सर्व्वसुखाढ्यादपूरितं वारुणं वपुः। याम्यमायुःप्रदं पूर्व्वनगरं प्रीतिवर्द्धनम्॥ ईशवासवसंपूर्णं सर्व्वारोग्यसुखप्रदम्। मध्यचतुष्यथोपेतं न च तं पीड़येत् क्वचित्॥ ब्रह्मस्थानं हि तं विप्र शिवस्तत्र सदा स्थितः। चतुर्भिंशतिनाथास्तु हस्तान्यष्टशतं परम्॥ तत्र मध्यं प्रशंसन्ति दुःखोत्तरविवर्ज्जितम्। अथ किञ्चुन्नतान्यष्टौ प्राङ्मुखं निवेशयेत्तम्॥ नगरार्द्धञ्च विष्कम्भं खेटं ग्रामं ततोऽर्द्धतः। नगरादर्द्धयोजनं खेटं खेटाद्ग्रामोऽर्द्धयोजनः॥ दिक्षोणं परमा सीमा क्षेत्रसीमा चतुर्धनुः। त्रिंशद्धनूंषि विस्तीर्णो देशो मार्गस्तु तैः कृतः॥ विंशद्धनुर्ग्रामसमो मार्गो सीमामार्गो दशैव तु। धनूंषि दश विस्तीर्णः श्रीमान्राजपथः स्मृतः॥ वृषाजिरथनागानामसम्बाधः सुखसरः। धनूंषि चैव चत्वारि प्राकारस्यास्तु निर्म्मिताः॥ त्रिकराधोपरिष्टास्तु द्विकराष्टपरिष्किता। अङ्गपथचतुष्यादस्त्रिपादस्य ग्रहान्तरम्॥ तृतीयादलहर्म्यादः प्राग्वंशप्रादकः स्मृतः॥"

इति देवीपुराणम्॥

नगरकीर्त्तनं, पुं, (नगरे कीर्त्तनं नगरपरिभ्रमणेन हरिनामसंघोषणम्।) नगरादिभ्रमणकरब्रह्महरिसङ्कीर्त्तनम्। यथा,—

"नाचारो नाधिकारो च न स्थाननियमस्तथा। ग्रामे वा नगरे साधुर्ब्रूयने वा कीर्त्तयेद्धरिम्॥"

इति हरिनाममाहात्म्यम्॥

नगरघातः, पुं, (नगरं हन्तीति। हन+अण्।) हस्ती। इति संक्षिप्तसारव्याकरणम्॥

नगरी, स्त्री स्त्री, (नगर+ङीष्।) नगरम्। इत्यमरः। २। १। १॥ (यथा, महाभारते। १२। ५। ६।

"प्रीत्या ददौ स कर्त्ताय मालिनीं नगरीमथ। अङ्गेषु नरशार्द्दूल! स राजासीत् सपत्नजित्॥")

नगरीवकः, पुं, (नगर्यां वक इव।) काकः। इति त्रिकाण्डशेषः॥

नगरोत्था, स्त्री, (नगरादुत्तिष्ठतीति। उत्+स्था+कः। टाप्।) नगरसुस्रा। इति राजनिर्घण्टः॥

नगरौषधिः, स्त्री, (नगरजाता ओषधिः मलयाकान्तत्वः।) कदली। इति शब्दचन्द्रिका॥

नगाटनः, पुं, (नगे वृक्षे अटति भ्रमतीति। अट+ल्युः।) वानरः। इति त्रिकाण्डशेषः॥ (पर्व्वतचारिणि, त्रि॥)

नगाधिपः, पुं, (नगानां पर्व्वतानामधिपः।) हिमालयपर्व्वतः। इति जटाधरः॥

नगाश्रयः, पुं, (नगः पर्व्वतः आश्रय उत्पत्तिस्थानं यस्य।) हस्तिकन्दः। इति राजनिर्घण्टः॥ नगाश्रयिणि, त्रि॥

नगौकाः, [स्] पुं, (नगो वृक्षः पर्व्वतो वा ओक आश्रयस्थानं यस्य।) पक्षी। इत्यमरः। २। ५। ३१॥ सरभः। सिंहः। इति मेदिनी। से, ५६॥ काकः। इति शब्दचन्द्रिका॥ नगरवासिनि, त्रि॥

नग्नः, त्रि, (नजते स्मेति। ञ्जो नज द्विषि+अकर्म्मकत्वात् कर्त्तरि क्तः। "ओदितश्च।" ८।२। ४५। इति निष्ठातस्य नः।) विवस्त्रः। नेंटो इति भाषा। तत्पर्य्यायः। अवासाः २ दिगम्बरः ३। इत्यमरः। ३। १। ९९॥ तथा च भागुरिः।

"विकच्चोऽनुत्तरीयश्च नग्नश्चावस्त्र एव वा। औतं स्मार्त्तं तथा कर्म्म न नग्नस्यन्तयेदपि॥ विकचः परिधानार्थवृतकच्छः। तथा च योगियाज्ञवल्क्यः।

"परिधानाद्बहिःकक्षा निबद्धा ह्यासुरी भवेत्॥" स्मृतिः।

"वामे पृष्ठे तथा नाभौ कक्षत्रयसमाकृतम्। एभिः कक्षैः परीवृत्तो यो विप्रः स शुचिः स्मृतः॥" बौधायनः।

"नाभौ धृतञ्च यद्वस्त्रमाच्छादयति नाङ्गनी। अन्तरीयं प्रशस्तं तदाच्छन्नमुभयोस्त्रयोः॥" आचारचन्द्रिकायाम्।

"द्विकच्छः कक्षदेशश्च तृतीयकक्षस्तथैव च। एकवासा अवासाश्च नग्नः पञ्चविधः स्मृतः॥"

इत्याह्निकतत्त्वम्॥

"न नग्नां स्त्रियमीक्षेत पुरुषं वा कदाचन। न च नग्नं पुरीषं वा न वै संस्कृतमैथुनम्॥

नोच्छिष्टः संविशेन्निद्रां न नग्नः स्नानमाचरेत् ।
न गच्छेन्न पठेच्चापि न चैव स्त्रग्धरः शुचेत् ॥"
इति कूर्म्मपुराणे उपरिभागे १५ अध्यायः ॥
पारिभाषिकनग्ना यथा,—
"वेदा कुले न वेदोऽस्ति न श्राद्धं नैव च व्रतम् ।
ते नग्नाः कीर्त्तिताः सद्भिस्तेषामन्नं विगर्हितम् ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥
"ऋग्यजुःसामसंज्ञेयं त्रयी वर्त्तातिहिंस च ।
एतामुज्झति यो मोहात् स नग्नः पातकी स्मृतः ॥
यस्तु संत्यज्य गार्हस्थ्यं वानप्रस्थो न जायते ।
परिव्राड्पि मैत्रेय ! स नग्नः पापसञ्चरः ॥"
इति विष्णुपुराणे १८ अध्यायः ॥

नग्नः, पुं, (नज्+क्तः । निष्ठातस्य नः ।) वन्दी । (यथा, नैषधे । १६ । २१ ।
"रतिरतिपतिहेतश्रीकौ ध्रुवं विभ्रमक्षरां
प्रियवचसि यन्नग्नाचार्य्या वदामतमां ततः ॥")
शुष्कवृक्षः । इति विश्वमेदिन्यौ ॥ शैवस्य पर्य्यायः ।
नग्नाटकः २ निर्ग्रन्थकः ३ भदन्तः ४ दिगम्बरकः ५ । इति हारावली । ११५ ॥

नग्नकः पुं, (नग्न एव । स्वार्थे कन् ।) नग्नः । नजते लज्जते इति नग्नकः । ओ नञ डो ह्रियि इत्यस्मात् क्तः सुखाद्योर्दिदिति नः मनीषादित्वात् अस्य गः स्वार्थे कः । इति व्याकरणम् ॥

नग्नजित्, पुं, राजविशेषः । स च श्रीकृष्णपत्न्या नाग्नजित्या जनकः । यथा, श्रीभागवते । १० । ५८ । २३ ।
"नग्नजिन्नाम कौशल्य आसीद्राजातिधार्म्मिकः ।
तस्य सत्याभवत् कन्या देवी नाग्नजिती नृप ! ॥"

नग्नहु, [क्] स्त्री, (नग्नं ह्वयति स्पर्द्धते अनेनेति । ह्वे + करणे क्विप् ।) नग्नहूः । इति भरतधृतामरमाला ॥ (बाहुलकात्कुप्रत्यये कृते पुंलिङ्गेऽपि ह्वयते । यथा, राजसनेयसंहितायाम् । १६ । १४ ।
"अतिथ्यरूपं मासरं महावीरस्य नग्नहुः ॥"
"सर्ज्जत्वक्चिपलामुस्ताधुनर्भवाचतुर्जातकपिप्पलीगजपिप्पलीवंशपत्रावकाष्टहच्छवाचित्रकेन्द्रवारुण्यश्यामन्यधान्यकयवानीवीरकदग्धहरिद्राद्वयविरूढ्यवक्षीरेण एकीकृता नग्नहुः ॥" इति । १६ । १ । मन्त्रटीकायां वेददीपः ॥)

नग्नहूः, पुं, (नग्नं ह्वयति स्पर्द्धते येनेति । ह्वे + क्विप् ।) नानाद्रव्यकृतसुराबीजम् । वाखर इति ख्यातम् । इति भरतः ॥ तत्पर्य्यायः । किण्वम् २ इत्यमरः । २ । १० । ४२ ॥ कण्वम् ३ नग्नहु ४ इति तट्टीका ॥

नग्ना, स्त्री, (नग्न + टाप् ।) विवस्त्रा नारी । तत्पर्य्यायः । कौडवी २ कोटवी ३ नग्निका ४ नग्नयोषित् ५ । इति शब्दरत्नावली ॥ (अनुद्भिन्नकुचा कन्या । यथा, पञ्चतन्त्रे । ३ । २१७ ।
"ऋतुमत्यान्तु तिष्ठन्त्यां स्वेच्छादानन्तु दीयते ।
तस्मादुद्वाहयेत् नग्नां मनुः स्वायम्भुवोऽब्रवीत् ॥")

नग्नाटः, पुं, (नग्नः सन् व्रजतीति । व्रज् + अच् ।) दिगम्बरः । इति हलायुधः ॥

नग्नाटकः, पुं, (नग्नाट एव । स्वार्थे कन् ।) दिगम्बरयोगी । इति हारावली । ११५ ॥

नग्निका, स्त्री, (नग्नैव । स्वार्थे कन् । टापि अत इत्वम् ।) विवस्त्रा । तत्पर्य्यायः । कौडवी २ कोटवी ३ कोटरी ४ । अप्राप्तरजस्का । तत्पर्य्यायः । गौरी २ अप्राप्तरजस्का ३ । इत्यमरटीकायां च । गौरिका ४ । इति शब्दरत्नावली ॥ (अप्राप्तकुचा कन्या । यथा, पञ्चतन्त्रे । ३ । २१३ ।
"अप्राप्तकुचा कन्या कुचहीना तु नग्निका ॥")

नङ्गः, पुं, (नं गतिं गच्छतीति । गम + डः । बाहुलकात् सुम् ।) जारः । इति जटाधरः ॥ नां इति भाषा ॥

नङ्ग, ओ ङ् ङ क्ङिति । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् । ङिदित्वात् निष्ठायामिट् ।) ओ ङ् नग्नः । ङ, नङ्गते । क्ङिति लङ्प्रायाम् । इति दुर्गादासः ॥

नञ्, अ, अभावसंज्ञकम् । समासे स्थितस्यास्य स्थाने स्वरे परेऽन् अञ्जने परे अकारो विकल्पेन भवति । यथा । अनग्नः नाग्नः । अच्युतः नच्युतः । अस्यार्थाः षट् । सादृश्यम् १ यथा अब्राह्मणः ॥ अभावः २ यथा अपापम् ॥ अन्यत्वम् ३ यथा अघटः पटः ॥ अल्पत्वम् ४ यथा अनुदरी कन्या ॥ अप्राशस्त्यम् ५ यथा अकेशी ॥ विरोधः ६ यथा असुरः । इति सुग्धबोधटीकायां दुर्गादासः ॥ यथा, मेदिनी ।
"नञभावे निषेधे च स्वरूपार्थेऽप्यतिक्रमे ।
ईषदर्थे च सादृश्ये तद्विरुद्धतदन्ययोः ॥"
नकारश्च ॥

नट, तृल्ये । हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-तृल्ये अकं-हिंसे सकं-सेट् ।) नटति । इति दुर्गादासः ॥

नट, क भंग्रे । त्विषि । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) भंग्रोऽधःपतनम् । स्यन्दनार्थोऽयमिति रामः । क, नाटयति । इति दुर्गादासः ॥

नट, म वृतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) म, प्रनटयति । इति दुर्गादासः ॥

नटः, पुं, (नमतीति । नम + "जनिदाच्युसिति ।" उणां ४ । १०४ । इति डटः ।) प्रयोगाकट्टच्चः । (नटति वृत्यतीति । नट + अच् । यदा, नमतीति । नम + डटः) नर्त्तकः । नेटुया इति भाषा । (यथा, देवीभागवते । १ । ७ । ४२ ।
"तं क्रीड़से निजविनिर्म्मितमोहजाले
नाट्यो यथा विदधती खलते नटो वै ॥")
तत्पर्य्यायः । शैलालो २ शैलूषः ३ आयाजीवः ४ कृशाश्वी ५ भरतः ६ । इत्यमरः । २ । १० । १२ ॥ सर्व्ववेत्ता ७ भरतपुत्रकः ८ धात्रीपुत्रः ९ रङ्गजीवः १० रङ्गावतारकः ११ । इति हेमचन्द्रः । २ । २४२ ॥ अशोकवृक्षः । इति मेदिनी । टे, २० ॥ किञ्चुपर्व्वा । इति जटाधरः ॥ नल इति भाषा ॥ (मदनफलम् । तत्पर्य्यायो यथा,—
"मदनश्चक्षुषः पिङ्गो नटः पिङ्गोनकस्तथा ।
करहाटो मरुवकः शुक्लको विषपुष्पकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अशोकः । अस्य पर्य्यायो यथा,—
"अशोको वेल्लपुष्पश्च वञ्जुलश्चाक्षपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥")
वर्णसङ्करजातिविशेषः । । यथा, पराशरपद्धतौ ।
"शौण्डिक्यां शौण्डिकाज्जातो नटो वरुड एव च ।"
ब्रात्यायां क्षत्रियाज्जातः । (यथा, मनुः । १० । २२ ।
"झल्लो मल्लश्च राजन्यात् ब्रात्यान्निच्छिविरेव च ।
नटश्च करणश्चैव खसो द्रविड़ एव च ॥")
हनूमन्मते दीपकरागस्य रागिणी । अस्या जातिः संपूर्णा । गेहं षड्जस्वरः । ग्रीष्मर्त्तौ दिवसान्तो गानसमयः । रागमालायामस्याः स्वरूपं रक्तवर्णा नारी नवयौवना सालङ्कृता अश्वारूढ़ा पुरुषवत् परिच्छिन्नवसना निष्कोषकरवालं धृत्वा शत्रुनाक्रममाणा । इति सङ्गीतशास्त्रम् ॥ नारदपुराणमते श्रीरागस्य पुत्रः ॥

नटनं, क्ली, (नट + भावे ल्युट् ।) वृत्तम् । इत्यमरः । १ । ७ । १० ॥ (यथा, पञ्चतन्त्रे । ३ । २३० ।
"किं गाण्डीवस्फुरगुरुचगास्फालगर्ज्जूरपाणिर्नासीन्नीलानटनविलसन्मेखली सव्यसाची ॥")

नटनारायणः, पुं, (नटानां नारायण इव ।) रागविशेषः । हनूमन्मते मेघरागस्य तृतीयपुत्रः । भरतमते दीपकरागस्य तृतीयपुत्रः । सोमेश्वरमते कल्लिनाथमते च षड़्रागानां शैवरागः । तस्य भार्य्याः षट् । यथा, त्रोटकी १ त्रिभङ्गी २ पूर्व्वी ३ गान्धारी ४ वराभा ५ विन्ध्यमञ्जारी ६ । सोमेश्वरमते तस्य रागिण्यो यथा । कामदा १ कल्याणी २ आभीरी ३ गाटकी ४ सारङ्गी ५ नटहमीरी ६ । रागिणीभिः सहास्य हिमर्त्तौ गानसमयः । इति सङ्गीतशास्त्रम् ॥

नटभूषणं, क्ली, (नटानां भूषणं मण्डनं यस्मात् ।) हरितालम् । इति रत्नमाला ॥

नटमण्डनं, क्ली, (नटानां मण्डनं यस्मात् ।) हरितालम् । इति हेमचन्द्रः । ४ । १२५ ॥

नटवरः, पुं, (नटेषु वरः श्रेष्ठः ।) नटश्रेष्ठः । यथा,
"वर्हापीड़ं नटवरवपुः कर्णयोः कर्णिकारम् ॥"
इति श्रीभागवतम् ॥

नटसंज्ञकः, पुं, (नटस्य संज्ञा संज्ञा यस्य । कप् ।) गोदन्तास्यहरितालम् । इति त्रिकाण्डशेषः ॥ (स्वार्थे कन्) नटस्य ॥

नटान्तिका, स्त्री, (अन्तयति नाशयतीति । अन्त + ण्वुल् + टापि अत इत्वम् । नटस्य नटकार्य्यस्य अन्तिका ।) लज्जा । इति हारावली । १५३ ॥

नटी, स्त्री, (नटति शोभते इति । नट् + अच् । ङीष् ।) नलीनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२६ ॥ (नटति वृत्यतीति । नट् + अच् । ङीष् ।) वेश्या । इति शब्दरत्नावली ॥ नटपत्नी च ॥ (यथा, भागवते । ८ । ८ । १२ ।

"जगुर्भद्राणि गन्धर्व्वा ननृतुश्चाप्सरोगणाः ॥"
इयं हि पञ्चमकारपूज्यकुलनायिकान्तर्गता। यथा, तन्त्रसारे।
"नटी कापालिनी वेश्या रजकी नापिताङ्गना।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका।
मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः॥")

नटेश्वरः, पुं, (नटानामीश्वरः। मयूरप्रियत्वात् तथात्वम्।) शिवः। इति हेमचन्द्रः।२।११२॥

नड, क भंग्रे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं सेट्।) क, नाडयति। भंग्रोध इत्यर्थः। इति दुर्गादासः॥

नड्वः, पुं, (नलतीति। नल+अच्। यद्वा नडलम्।) नलशब्दार्थम्। इत्यमरः। २। ४। १६५॥ (यथा, वेदे। ६। १३८। ५।
"यथा नड्वं कल्पिपुत्रे स्त्रियो भिन्दन्त्यञ्जसा॥")
जातिभेदः। इति पुंनपुंसकसंग्रहटीकायां मधुसूदनसरस्वतीधृतः॥

नड्वलीयः, त्रि, (नड्वाः सन्त्यत्र। नड्व+"नड्वादीनां कुक् च।" ४। २। ८१। इति छः कुगागमश्च।) नलसमूहदेशः। इति हेमचन्द्रः। ४। २०॥

नड्वप्रायः, त्रि, (नड्वः प्रायेण यत्र।) नलबहुलदेशः। तत्पर्य्यायः। नड्वलीयः २ नड्वान् ३ नड्वलः ४। इति हेमचन्द्रः। ४। २०॥

नड्वमीनः, पुं, (नलस्थितो मीनः। अस्य ह्रस्वम्।) चिलिचिमसमत्स्यः। नलमीन इत्यमरदुर्गादासौ ह्रस्वयोरेकम्॥

नड्वसंहतिः, स्त्री, (नड्वानां संहतिः समूहः।) नड्वसमूहः। तत्पर्य्यायः। गण्या २। इत्यमरः। २। ५। १६८॥ नड्वसञ्चयः ३। इति शब्दरत्नावली॥

नड्वलः, त्रि, (नड्वं अपरिष्कृतस्थानं हन्तीति। हन+कः।) कान्तः। ललितः। इति भूरिप्रयोगः॥

नड्वा, स्त्री, (नड्वानां समूहः। "भ्राष्ट्रादिभ्यो यः।" ४। २। ४६। इति यः।) नड्वसमूहः। इत्यमरः। २। ५। १६८॥

नड्वान्, त्रि, (नड्वाः सन्त्यत्र। नड्व+"कुसुदनड्वेतसेभ्यो डमतुप्।" ४। २। ८७। इति डमतुप्। डित्त्वात् टिलोपः। मस्य वः।) नलबहुलदेशः। इत्यमरः। २। १। ६॥

नड्वाभूः, स्त्री, कुड्मिः। इति भूरिप्रयोगः॥

नतं, स्त्री, (नम+क्तः।) तगरपादपः। तगरमूलम्। इति मेदिनी। तं, २६॥ (पर्य्यायोऽस्य यथा,—
"कालानुसारिवावक्रं तगरं कुटिलं शठम्।
महीरुहं नतं जिह्मं दीर्घं तगरपादपम्॥"
इति वैद्यकरत्नमालायाम्॥)

नतः, पुं, (नमति स्मेति। नम+क्तः।) जम्बनाड़िकाविशेषः। तद्यथा,—
"अक्षशक्तकर्म्मजा येन यान्ति दृक्तुल्यतां दिवि।
नतोन्नतौ ततः साध्यौ भावाः खेटवलानि षट्॥
दिनार्द्धान्तरिता जम्बनाड़िका नतनाड़िका।
पूर्व्वापरार्द्धे जातस्य प्राक्परार्द्धा दिने भवेत्॥
राशेर्गतघटीशेषघटीदिनार्द्धसंयुता।
परपूर्व्वाभिधा शेषा रात्र्यां नतनाड़िका॥"
इति कोष्ठीप्रदीपः॥

नतः, त्रि, (नम+क्तः।) कुटिलः। नम्रः। इति मेदिनी। ते, २६॥ (यथा, हरिवंशे। २०१। ३६।
"नतन्ति युगपत् सर्व्वे पादयोर्मूर्द्धभिर्नताः॥")

नतद्रुमः, पुं, (नतो द्रुमः।) बेतसवृक्षः। इति रत्नमाला॥

नतनासिकः, त्रि, (नता नासिका यस्य।) अल्पनासिकायुक्तः। खाँदा इति भाषा। तत्पर्य्यायः। अवटीटः २ अवनाटः ३ अवखटः४। इत्यमरः। २। ६। ४५॥

नताङ्गी, स्त्री, (नतमङ्गमस्याः। ङीष्।) नारी। इति राजनिर्घण्टः॥

नतिः, स्त्री, (नम+भावे क्तिन्।) नमस्कारः। नम्रता। यथा,—
"नौतिर्भूमिसुतां नतिर्गुरुवतां क्षीरङ्गनानां स्तुतिर्दैन्यार्त्तेः शिशुतो गुरुस्य कविता वृद्धेः प्रसादो गिराम्।
लावण्यं वपुषः क्षतिः सुमनसः भ्रान्तिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मज्जनम्॥"
इति नवरत्नम्॥
(नतिलक्षणादिकन्तु नमस्कारशब्दे द्रष्टव्यम्।)

नद, टु इ संहृधि। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) टु, नन्द्युः। इ, नन्दते। संहृधि आनन्दयुक्तभावे। नमन्दे पारिप्लवनेत्रया नृपः। नन्दते च कुलं पुंसाम्। इति गणरत्नावलित्वात्। इति दुर्गादासः॥

नदः, पुं, (नदति प्रवाहवेगेन शब्दायते इति। नद+अच्।) पुंवाचकाम्बुनिमग्नावच्छिन्नजलप्रवाहः। (यथा, मनुः। ६। ६०।
"यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम्।
तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिम्॥")
स च सिन्धुभेदयोगेऽष्टाविंशतिविधः। तत्पर्य्यायः। पुनर्भवः २ भिदः ३ उद्यः ४ सरस्वान् ५। इति हेमचन्द्रः। ४। १५६॥
"अष्टषष्टिस्तु तीर्थानि नदाश्च दश कोटयः॥"
इति पाद्मे भूखण्डे ८५ अध्यायः॥

नद्दुः, पुं, (नदतीति। नद+"व्यु नदेश्च।" उणां ३। ५२। इति अनुड्।) मेघः। इत्यु-

नदी
णादिकोषः॥ (यथा ऋग्वेदे। ८। २१। १४।
"यदा क्षोणीरुत नद्दुं सम्ग्रहस्रादित् पितेव हूयसे॥")
सिंहः। इति शब्दमाला॥ (नद+भावे अनुड्।
शब्दः। यथा, ऋग्वेदे। ६। १८। २।
"स युधः सत्वा खजकृत्समद्वा
तुविक्रत्वो नद्दुमाँ ऋजीषी॥")

नदी, स्त्री, (नदतीति। नद+अच्। पृषोदरादित्वात् टिड्ढेति ङीप्।) अष्टसहस्रधनुरन्यूनव्याप्तलोता। सा च गङ्गायमुनासरस्वतीकावेरीगोदावरीप्रभृतिः। तस्या लक्षणमाह छन्दोगपरिशिष्टम्।
"धनुःसहस्रव्ययौ च गतिर्यासां न विद्यते।
ता नदीशब्दवहा गर्गाद्याः परिकीर्त्तिताः॥"
इति तिथितत्त्वम्॥

तत्पर्य्यायः। सरित् २ तरङ्गिणी ३ श्रोतस्विनी४ तटिनी ५ ह्रदिनी ६ धुनी ७ स्रोतस्वती ८ द्वीपवती ९ सवन्ती १० निम्नगा११ आपगा१२। इत्यमरः।१ ।९०।३०॥ ह्रादिनी १३ ध्वनिः १४ स्रोतस्विनी१५ स्रोतोवहा१६ सागरगामिनी१७ अपगा १८। इति भरतः॥ निर्झरिणी १९ सरस्वती २० समुद्रगा २१ कूलङ्षमा २२ कूलवती २३ श्रोतस्विनी २४ सिन्धुः २५ समुद्रकान्ता २६ सागरगा २७ क्षमा २८ रोधोवती २९ वाहिनी ३०। तज्जलगुणाः। स्वच्छत्वम्। लघुत्वम्। दीपनत्वम्। प्राचनत्वम्। हृद्यत्वम्। हृद्यापथ्यत्वम्। पथ्यत्वम्। मधुरत्वम्। दोषहृत्त्वञ्च॥ ॥
"सर्व्वा गुर्व्वी प्राङ्मुखी वाहिनी स्यात्
क्षय्यी पश्चादाहिनी निम्नगेयम्।
देशे देशे तद्गुणा सा विशेषा-
त्तेषा धत्ते गौरवं लाघवञ्च॥
प्रायो नद्यश्चारु गुर्व्यो लघ्व्यः श्रोतस्वत्यः स्मृताः।
नद्यः पाश्चात्यशिखितावाहिन्यो विमलोदकाः॥
हिमवत्प्रभवा याश्च यत्र ताम्रस्तोपमम्॥
विन्ध्यात् प्राची प्राच्यवाची प्रतीची
या चोदीची स्यात्तदी सा क्रमेण।
शातारोध्वं क्षेत्रपित्तार्त्तिशोषं
पित्तोद्रेकं पथ्यपाकञ्च धत्ते॥
पारिपात्रभवा याश्च विन्ध्यास्यप्रभवाश्च याः।
श्रीरोहीरोगकुष्ठानां ता हेतुः क्षीपदस्य च॥"
इति राजनिर्घण्टः॥
(यथा च।
"तथा प्राच्यां गमाश्चाद्याः पश्चिमाद्युगमास्तथा।"
"सप्तैकता सप्तगङ्गा द्विविधा चानुगाहिनी।
एवं चतुर्व्विधा नद्यो वातपित्तकफापहाः॥
संदावहायास्खनवद्यसुखं
मरुत्कफानां शमनञ्च तस्याः।
नीरं वसन्ते हितकृद्विशेषात्
नदीभवं नैव हिमागमे च॥
घनविमलशिलानां स्खालनाच्चारुवेगं
बहुलसलिलवीचिच्छन्नसंक्षोभदक्षम्।

नतु लघु च सुशीतं नैव चोष्णं घनञ्च
हरति पवनपित्तं श्लेष्मरक्तादि सद्यक् ।
इति पाषाणनदीवारिगुणाः ॥ * ॥
सुघनविमलतोयं सैकतायाः प्रवाहं
न च भवति लघुत्वं श्लेष्मरक्तन्ति पित्तम् ।
भवति मधुरमेवं किञ्चिदुष्णं कषायं
भवति च सुखशीतच्छोषमूर्च्छा निहन्ति ॥
इति सवालुकानदीवारिगुणाः ॥*॥
हिमवत्प्रभवा नद्यः पुण्या देवर्षिसेविताः ।
घनपाषाण्यसिकतावाहिन्यो विमलोदकाः ॥
हन्ति वातकफं तोयं श्रमशोषविनाशनम् ।
किञ्चित् करोति वा पित्तं त्रिदोषघ्नमनञ्जलम् ॥
मलयप्रभवा नद्यः शीततोयाल्पतोपमाः ।
हन्ति वातञ्च पित्तञ्च श्रमशोषश्रमापहम् ॥
गङ्गा सरस्वती शोणं यमुना सरयूः सची ।
वेगा इरावती नीला उत्तरात् पूर्ववाहिनी ॥
हिमवत्प्रभवा ह्येता हिमसम्भवशीतलाः ।
समाः सर्वर्तुगैर्नद्यो वातश्लेष्महरा नृणाम् ॥
आसां नवशतैर्युक्ता गङ्गा पूर्वसमुद्रगा ।
तथा चर्मण्वती वेत्रवती पारावती तथा ॥
सिप्रा महाप्रदीप्ता च ऋषिकुल्या पयस्विनी ।
शोवन्ती शोवलिन्यश्च सिन्धुयुक्ताः ससप्तगाः ॥
वातपित्तहरं नीरं त्रिदोषघ्नमतःपरम् ।
श्रमस्खलिहरं हृद्यं उत्तरापथगामिनी ॥
इति नद्य उत्तरापथगाः ॥ * ॥
तापी तापा च गोलोमी गोमती शालिला मही ।
सरस्वतीयुता नद्यो नर्म्मदा पश्चिमापगाः ॥
आसां जलं घनं शीतं पित्तघ्नं कफवातघ्नम् ।
वातदोषहरं हृद्यं कफकुष्ठविनाशनम् ॥
पश्चिमाद्रिसमुद्भूता गौतमी पुण्यभावना ।
अस्याः शीतं जलं वापि कफवातविकारघ्नम् ॥
पित्तप्रशमनं वल्यं व्रणदोषविकारघ्नम् ।
पुण्या पयस्विनी वेता प्रशीता च वरांगना ॥
दोला गोवर्द्धनी चान्या गौतम्यानुगता इमाः ।
आसां जलं घनं नातिवातश्लेष्मविकारघ्नम् ॥
पूर्वसागरगाश्चैव नद्यो नवशतैर्युताः ।
कावेरी वीरकाम्पा च भौमा चैव पयोष्णिका ।
विभाण्डरी विशाला च गौरीदा मदनक्षमा ।
कर्म्बती चापरा नद्यो दक्षिणाद्रिगमा हिमाः ।
एतेषां न सेवेत युक्तायाञ्च पृथक् पृथक् ॥
शतासां परिसङ्ख्या च शतानाञ्चैकविंशतिः ।
क्रोशं क्रोशं भवेत् कुल्या योजने योजने नदी ॥
योजनद्वयतो ज्ञेया महानीरा बुधैर्नदी ॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये ॥
"पश्चिमोदधिगाः शीघ्रवहा याम्यामलोदकाः ।
यथाः समासाक्ता नद्यो विपरीताश्चतोऽन्यथा ।
उपलास्खालनाच्चैव विच्छेदैः खेदितोदकाः ॥
हिमवन्मलयोद्भूताः पथ्यास्ता एव च स्थिराः ।
कृमिश्लीपदकृत्कण्ठशिरोरोगान् प्रकुर्वते ॥
प्रथ्याकृत्या परान्योत्या इर्नामानिमतेन्द्रजाः ।
उक्तश्लीपदातङ्कान् सल्यवित्थोद्भवाः पुनः ॥
कुष्ठपाण्डुशिरोरोगान् दोषजाः पारिपात्रजाः ।
बलपौरुषकारिण्यः————————————॥"
इति वाग्भटे सूत्रस्थाने षष्ठेऽध्याये ॥
"तत्र नद्यः पश्चिमाभिमुखाः पथ्या लघूदकत्वात् ।
पूर्वाभिमुखास्तु न प्रशस्यन्ते गुरूदकत्वात् ।
दक्षिणाभिमुखा नातिदोषलाः साधारणत्वात् ।"
"प्रायेण नद्यो मरुषु सतिक्ता लवणान्विताः ।
ईषत्कषाया मधुरा लघुपाका बले हिताः ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥
"वसुधा कीटसर्पाखुमलसन्दूषितोदकाः ।
वर्षाजलवहा नद्यः सर्वदोषसमीरणाः ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)
भारतवर्षे नद्यो यथा । गङ्गा सिन्धुः सरस्वती शुतद्रुः वितस्ता विपाशा चन्द्रभागा सरयूः यमुना इरावती देविका कुहूः गोमती धूतपापा बाहुदा दृषद्वती कौशिकी निखीरा गण्डकी चक्षुमती लोहिता । इत्येता हिमवत्पादनिर्गताः ॥ वेदस्मृती वेदवती सिन्धुः अपर्णा चन्दना सदाचरा रोहिपारा चर्मखती विदिशा वेत्रवती वयस्था । इत्येताः पारिपात्रोद्भवाः ॥ शोणा ज्योतीरथा नर्म्मदा सुरसा मन्दाकिनी दशार्णा चित्रकूटा तमसा पिप्पला करतोया पिशाचिका चित्रोत्पला विशाला वङ्गुका वालुका वाहिनी शुक्तिमती विरजा पङ्किनी रिवी । इत्येता ऋक्षप्रसूताः ॥ मक्षिलाला शुभा तापी पयोष्णी शोणोदा वेत्रा पाशा वैतरणी वेदी पाला कुसुद्वती तोया दुर्गा अन्या गिरा । एता विन्ध्यपादोद्भवाः ॥ गोदावरी भीमरथी कृष्णा वेणा वञ्जुला तुङ्गभद्रा सुप्रयोगा ब्रह्मकावेरी शुतमाला ताम्रपर्णी पुष्पावती उत्पलावती । इत्येता मलयजाः ॥ त्रियामा ऋषिकुल्या इक्षुरा त्रिविदाला मूलिनी वंशधरा महेन्द्रतनया ऋषिका लघुवती मन्दगामिनी पलाशिनी । इत्येताः शुक्तिमत्प्रभवाः । एताः प्राधान्येन कुलपर्वतनद्यः । शेषाः क्षुद्रनद्यः । इति वराहपुराणम् ॥ * ॥
"कैलासपादसम्भूतं पुण्यं शीतजलं शुभम् ।
मन्दोदकं नाम सरः पयस्तु दधिसन्निभम् ॥
तस्मात् प्रभवते दिव्या नदी मन्दाकिनी शुभा ।
दिव्यञ्च चन्दनवनं तस्यास्तीरे महद्वनम् ॥
प्रागुत्तरेण कैलासात् दिव्यं सौगन्धिकं गिरिम् ।
सर्वधातुमयं दिव्यं शुवलं पर्वतं प्रति ॥
चक्रप्रभो नाम गिरिः शशुक्रो रत्नसन्निभः ।
ततश्चमीपे सरो दिव्यमक्षोदमाम विश्रुतम् ॥
तस्मात् प्रभवते दिव्या नदी ह्यक्षोदका शुभा ।
तस्यास्तीरे वनं दिव्यं महद्वैचरथं शुभम् ॥
तस्मिन् गिरौ निवसति मणिभद्रः सहानुगः ।
यक्षः सेनापतिः क्रूरैर्गुह्यकैः परिवारितः ॥
पुण्या मन्दाकिनी चैव नदी ह्यक्षोदका शुभा ।
महीमण्डलमध्ये तु प्रविष्टे ते महोदधिम् ॥
कैलासाद्दक्षिणप्राच्यां शिवं सर्वौषधिं गिरिम्
मनःशिलामयं दिव्यं शुवलं पर्वतं प्रति ॥
लोहितो हेमशृङ्गस्तु गिरिः सूर्यप्रभो महान् ।
तस्य पादे महद्दिव्यं लोहितं सुमहत् सरः ॥
तस्मात् प्रभवते पुण्यो लोहितश्च नदी महान् ।
देवारण्यं विशोकश्च तस्य तीरे महद्वनम् ॥
तस्मिन् गिरौ निवसति यक्षो मणिधरो बली ।
सौम्यैः सधार्मिकैश्चैव शुक्लकैः परिवारितः ॥
कैलासात् पश्चिमोदीच्यां ककुद्मानौषधीगिरिः ।
ककुद्मति च रुद्रस्य उत्पत्तिस्त्रिककुद्मतः ॥
तदङ्गनलकेककुदं शोणं त्रिककुदं प्रति ।
सर्वधातुमयश्चैव सुमहद्दीप्तितो गिरिः ॥
तस्य पादे महद्दिव्यं मानसं सिद्धसेवितम् ।
यस्मात् प्रभवते पुण्या सरयूर्लोकपावनी ॥
कैलासात् पश्चिमाभाग्यां दिशि सर्वौषधिर्गिरिः ।
अरुणः पर्वतश्रेष्ठो रुक्मधातुविभूषितः ॥
भवस्य दयितः श्रीमान् पर्वतो हेमसन्निभः ।
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ॥
तस्य पादात् प्रभवति शोणोदं नाम तत् सरः ।
तस्मात् प्रभवते पुण्या नदी शोणोदका शुभा ॥
सा वङ्क्षुशोतयोर्मध्ये प्रविष्टा पश्चिमोदधिम् ।
अभ्युत्तरेण कैलासं शिवं सर्वौषधिं गिरिम् ॥
गौरस्तु पर्वतश्रेष्ठं हरितालमयं प्रति ।
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः ॥
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ।
रम्यं विन्दुसरो नाम यत्र राजा भगीरथः ॥
गङ्गार्थे स तु राजर्षिरवाप बहुलाः समाः ।
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता ।
सोमपादात् प्रसृता सा सप्तधा प्रतिभण्यते ।
भवस्य मार्द्धे पतिता संरुद्धा योगमायया ॥
ततो विसर्ज्जयामास सप्त स्रोतांसि गङ्गया ।
त्रीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यथैव च ।
स्रोतांसि त्रिपथायास्तु प्रत्यपद्यन्त सप्तधा ।
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा ।
शीता वङ्क्षुश्च सिन्धुश्च तिसस्रा वै प्रतीच्यगा ।
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम् ॥
तस्माद्भागीरथी साथि प्रविष्टा दक्षिणोदधिम् ।
सप्तेताः स्रावयन्ति स्म वर्धन्तहिममाक्रयम् ॥
प्रसृताः सप्त नद्यस्तु शुभा विन्दुसरोद्भवाः ।
तान् देशान् स्रावयन्ति स्म म्लेच्छप्रायांश्च सर्वशः ॥
बलिनान् कुसुरांश्चीनान् बर्बरान् यवनान् खशान् ।
सनकुलांश्च कुलत्थांश्च अङ्गलौक्यावरांश्च यान् ॥
त्रिधा हित्वा हिमवन्तं प्रविष्टा दक्षिणोदधिम् ।
अथ चीनमरूंश्चैव कालकांश्चैव चूलकान् ॥
तुषारान् बर्बरान् कारान् पल्हवान् पारदान् शकान् ।
एतान् जनपदान् वङ्कुः स्रावयन्त्युदधिं गता ॥
वरदान् कूटलांश्चैव गान्धारानौरसान् कुरून् ।
शिबसौवीरनिन्दमरून् वसातीन् समतेयकान् ॥
सैन्धवारट्टकावेरान् कुपथान् भीमरौरुकान् ।
सुनासखांश्चोर्द्धमरून् सिन्धुरंतान्निषेवते ॥
गन्धर्वान् किन्नरान् यक्षान् रक्षोविद्याधरोरगान् ।
कलापग्रामकांश्चैव तथा किंपुरुषान्नरान् ॥

किरातांश्च पुलिन्दांश्च कुरून् वै भरतानपि ।
पाञ्चालकौशिकान् मत्स्यान्मागधाङ्गांस्तथैव च ॥
ब्रह्मोत्तरांश्च वङ्गांश्च तामलिप्तांस्तथैव च ।
एतान् जनपदान्पुण्यान् गङ्गा तारयते शुभा ॥
ततः प्रतिहता विन्ध्ये प्रविष्टा दक्षिणोदधिम् ।
ततस्तु ह्लादिनी पुण्या प्राचीमभिमुखा ययौ ॥
भावयन्त्यपरांश्चैव निषादानपि सर्व्वशः ।
धीवरान्नृषिकांश्चैव तथा लोमसुखानपि ॥
केकरानेकवर्णांश्च किरातानपि चैव हि ।
कालन्दरान् विवर्णांश्च कुशिकान् स्वर्गभूमिकान् ॥
सा मरुत्ते समुद्रस्य तिरोभूत्वा तु सर्व्वशः ।
ततस्तु पावनी चैव प्राचीमेव दिशं ययौ ॥
कुपथान् भावयन्ती सा इन्द्रद्युम्नसरांस्यपि ।
तथा खरपथान् देशान् वेत्रवत्कुपथानपि ॥
मध्ये चोल्लानकमरून् कुथप्रावरणानपि ।
इन्द्रद्वीपात् समुद्रं सा प्रविष्टा लवणोदधिम् ॥
ततस्तु पावनी प्रायात् प्राचीमाशां जवेन तु ।
तोमरान् भावयन्ती सा हंसमार्गान् सदृङ्कान् ॥
पूर्णान् दर्भांश्च सेवन्ती भित्त्वा सा बहुधा गिरिम् ।
कर्षप्रावरणान् प्राप्य गता साम्बसुखानपि ॥
सिकतापर्व्वतमरून् गत्वा विद्याधरान् ययौ ।
वामिमण्डलकोष्ठन्तु सा प्रविष्टा महत् सरः ॥
तासां नद्युपनद्यश्च शतशोऽथ सहस्रशः ।
उपगच्छन्ति तां नद्यो यतो वर्षति वासवः ॥
हेमकूटस्य पृष्ठे तु सर्पाणामुत्सवः स्मृतः ।
सरस्वती प्रभवति तस्मात् ज्योतिश्चती तु या ॥
अवगाहेतोभयतः समुद्रौ पूर्व्वपश्चिमौ ।
सरो विष्णुपदं नाम निषधे पर्व्वतोत्तमे ॥
तस्मात् ह्रदं प्रभवति गन्धर्व्वी नर्म्मदा च ते ।
मेरोः पार्श्वात् प्रभवति ह्रदश्चन्द्रप्रभो महान् ॥
जम्बुश्चैव नदी पुण्या यस्यां जाम्बुनदं स्मृतम् ।
पयोदस्तु ह्रदो नीलः स शुभः पुष्करीकवान् ॥
पुष्करीका पयोदा च तस्माद्वै संप्रसूयते ।
सरस्तु सरसश्चैव स्मृतमुत्तरमानसम् ॥
सृत्वा च शृङ्गकान्ता च तस्माद्वै संप्रसूयते ।
ह्रदाः कुरुषु विख्याताः पद्ममीनकुलाकुलाः ॥
नाम्ना ते विजया नाम द्वादशोदधिसन्निभाः ।
तेभ्यः श्रान्ता च माध्वी च द्वे नद्यौ संप्रसूयतः ॥"

इति मत्स्यपुराणे १०१ अध्यायः ॥ * ॥

अथ सिप्रादिसप्तनद्युत्पत्तिकारणम् ।
"एवं विवाह्य विधिवत् सौवर्ण्णे मानसाचले ।
अरुन्धती वशिष्ठस्तु मोदमाप तया सह ॥
तत्र यत् पतितं तोयं मानसाचलकन्दरे ।
विवाहावभृथार्थाय शान्त्यर्थं वसुधाकृतम् ॥
ब्रह्मविष्णुमहादेवप्रार्थिभिः समुदीरितम् ।
ततोयं सप्तधा भूत्वा पतितं मानसाचलात् ॥
हेमाद्रेः कन्दरे सानौ सरस्याश्च पृथक् पृथक् ।
ततोयं पतितं सिप्रे देवभोग्ये सरोवरे ॥
तेन सिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम् ।
महाकोपीप्रपाते च यद्वारि पतितन्तु तैः ॥
कौशिकी नाम सा जाता विश्वामित्रावतारिता ।
उमाक्षेत्रे यत् पतितं तोयं तेन महानदी ॥
कावेरी नाम सा जाता तदा कावेरसंस्थिता ।
महाकाले सरःश्रेष्ठे पतितं तज्जलं गिरेः ॥
हिमाद्रेः पार्श्वभागे तु दक्षिणे शुभ्रसन्निधौ ।
गोमन्ति नाम तेज्जाता नदी गोमत्युदीरिता ॥
मेनाको नाम यः पुत्रः शैलराजस्य च प्रियः ।
यस्तु तस्मिन् समुत्पन्नो मेनकोदरतः पुरा ॥
तत्तच्च पतितं तोयं तस्माज्जाता महानदी ।
देविकाख्या महादेवप्रेरिता सागरं प्रति ॥
तत्तोयं सङ्गतं कुर्य्याद्धंस वड़वसन्निधौ ।
तेनाभूत् सरयूर्न्नाम्ना नदी पुण्यतमा शुभा ॥
यान्यम्भांसि महापार्श्वे खाण्डवारण्यसन्निधौ ।
हिमवत्कन्दरे यानि इरावद्वदमन्यतः ।
इरावती नाम नदी तेषु जाता सरिद्वरा ॥
एताः सर्व्वाः स्नानपानात् स्मरणैर्व्वाङ्मयी यथा ।
फलं ददति मर्त्यानां दक्षिणोदधिगाः सदा ॥
धर्म्मार्थकाममोक्षाणां बीजभूताः सनातनाः ।
महानद्यस्तु सप्तैताः सर्व्वदा देवभोगदाः ॥
एवं नद्यः सप्त जाताः सदा पुण्यतमोदकाः ।
अरुन्धत्या वशिष्ठस्य विवाहे देवसन्निधौ ॥"

इति कालिकापुराणे २३ अध्यायः ॥ * ॥

नद्यादीनां रूपवर्णं यथा,—
"नद्यश्च पर्व्वताः सर्व्वे द्विरूपास्ते स्वभावतः ।
तोयं नदीनां रूपन्तु शरीरमपरन्तथा ॥
स्थावरं पर्व्वतानान्तु रूपं कायस्तथापरः ।
शुक्लीनामथ कर्म्मणां तथैवान्तर्गता तनूः ॥
बहिरस्थिस्वरूपन्तु सर्व्वदैव प्रवर्त्तते ।
एवं जलं स्थावरञ्च नदीपर्व्वतयोस्तथा ॥
अन्तर्व्वसति कायस्तु सततं नोपपद्यते ।
आप्यायते स्थावरेण शरीरं पर्व्वतस्य तु ॥
तथा नदीनां कायस्तु तोयेनाप्यायते सदा ।
नदीनां कामरूपित्वं पर्व्वतानान्तथैव च ।
जगत्स्थित्यै पुरा विष्णुः कल्पयामास यत्नतः ॥
तोयहानौ नदीदुःखं जायते सततं द्विजाः ।
विशीर्णे स्थावरे दुःखं जायते गिरिकायगम् ॥"

इति कालिकापुराणे २२ अध्यायः ॥

तस्या वैदिकपर्य्यायः । अवनयः १ यष्ट्या २ खाः ३ सीराः ४ सोत्याः ५ रन्ध्राः ६ धुनयः ७ रजाना: ८ वत्सला: ९ स्वादोरर्णाः १० रोधचक्राः ११ हरितः १२ सरितः १३ अयुवः १४ नभन्वः १५ वध्रः १६ हिरण्यवर्णाः १७ रोहितः १८ सुतः १९ अर्णाः २० सित्वः २१ कुल्याः २२ वर्त्याः २३ उर्व्याः २४ इरावत्यः २५ पार्वत्यः २६ सवन्त्यः २७ ऊर्ज्जस्वत्यः २८ पयस्वत्यः २९ सरस्वत्यः ३० तरस्वत्यः ३१ हरस्वत्यः ३२ रोधस्वत्यः ३३ भास्वत्यः ३४ अजिराः ३५ मातरः ३६ नद्यः ३७ । इति सप्तत्रिंशन्नदीनामानि । इति वैद्यनिघण्टौ । १ । १३ ॥ (चतुर्द्दशाक्षरवृत्तिविशेषः । तल्लक्षणं यथा,—
"नगतनगुरुगैः सप्तयतिर्नदी स्यात् ॥")

नदीकदम्बः, पुं, (नदीनां कदम्बं समूहो यत्र ।) महाश्रावणिका । इति राजनिर्घण्टः ॥ (नदीनां कदम्बम् ।) नदीसमूहे, क्ली ॥

नदीकान्तः, पुं, (नदीनां कान्तः पतिः ।) समुद्रः । (नदी कान्ता प्रिया यस्य ।) हिज्जलवृक्षः । सिन्धुवारकः । इति मेदिनी । ते, २०० ॥

नदीकान्ता, स्त्री, (नदी कान्ता यस्याः ।) जम्बुवृक्षः । काकजङ्घौषधिः । इति मेदिनी । ते, २०९ ॥ (अस्याः पर्य्यायो यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
लता । इति हेमचन्द्रः ॥

नदीकूलप्रियः, पुं, (नदीकूलं प्रियं यस्य । नदीकूलजातत्वादस्य तथात्वम् ।) जलवेतसः । इति जटाधरः ॥

नदीज, क्ली, (नद्या जायते इति । जन + डः ।) स्रोतोऽञ्जनम् । इति हेमचन्द्रः ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"स्रोतोऽञ्जनं नदीजञ्च ह्रीवासं स्रोतोजलाञ्जनम् ॥")

नदीजः, पुं, (नद्या जायते इति । जन + डः ।) अर्জ্জুनवृक्षः । इति रत्नमाला ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धन्वी धनञ्जयः पार्थो नदीजः ककुभोऽर्জ্জुनः ॥")
यावनालग्रहः । हिज्जलवृक्षः । इति राजनिर्घण्टः ॥ (विटमाक्षिकः । इति हेमचन्द्रः । ४ । १२१ ॥ यथा, सुश्रुते उत्तरतन्त्रे । ९० ।
"नदीजश्मिश्रीकटुकान्यथाञ्जनं
मनःशिला हे च निशे यकृद्रसे ॥"
नृपतिविशेषः । यथा, महाभारते । ५ । ४ । १६ ।
"सुरारिश्च नदीजश्च कर्णवेष्टश्च पार्थिवः ॥"
भीष्मः । गङ्गागर्भजातत्वात् तथात्वम् । यथा, तत्रैव । ५ । १४८ । ३२ ।
"अयन्तु धर्म्मसंज्ञतया महात्मा
न राज्यकामो वृणुते नदीजः ॥")

नदीजात, त्रि । (यथा, महाभारते । ७ । १०२ । ८ ।
"पार्व्वतीयैर्नदीजैश्च सैन्यवैश्च महाहयैः ॥")

नदीजा, स्त्री, (नद्या जायते या सा । जन + डः + टाप् ।) अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥

नदीतरस्थानं, क्ली, (नद्यास्तरस्थानमधतरस्थलम् ।) घट्टः । इति भूरिप्रयोगः ॥ (नद्या इतरस्थानम् ।) नदीभिन्नस्थानम् ॥

नदीनः, पुं, (नदीनां इनः पतिः ।) समुद्रः । इति त्रिकाण्डशेषः ॥ वरुणः । यथा । अयं नदीन इत्यादुत्तरनैषधः ॥ (अनेनोक्तयोर्यस्य सहदेवस्य पुत्रः । यथा, हरिवंशे । २६ । ४ ।
"सहदेवस्य धर्म्मात्मा नदीन इति विश्रुतः ।
नदीनस्य जयत्सेनो जयत्सेनस्य सत्कृतिः ॥"
न दीनः इति नञ्समासे दरिद्रभिन्ने, त्रि ॥)

नदीनिम्नावः, पुं, (नदीसम्मुखजातो निम्नावः ।) धान्यभेदः । तत्पर्य्यायः । कक्कटनिम्नावः २ कर्बुरः ३

नदीश: ४। अस्य गुणा:। तिक्तत्वम्। कटुत्वम्। व्रणप्रदत्वम्। गुरुत्वम्। वातलत्वम्। कफप्रदत्वम्। रूक्षत्वम्। कषायत्वम्। विषदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

नदीमातृक:, त्रि, (नदी मातेव पोषिका यस्य। कप्।) नद्यम्बुसम्पन्नव्रीहिपालितदेशः। इत्यमरः। २। १। १२॥

नदीवङ्क:, पुं, (नद्या वङ्कः।) वङ्कुरः। इति शब्दमाला॥ बाँक इति भाषा।

नदीवट:, पुं, (नदीसमीपजातो वटः।) वटीवृक्षः। इति राजनिर्घण्टः॥

नदीष्ण:, त्रि, (नद्यां स्नातीति। स्ना+"सुपि स्थः।"३।२।४। इति कः। "निनदीभ्यां स्नातेः कौशले।" ८। ३। ८६। इति षत्वम्।) नद्यवगाहनदक्षः। नदीस्नानकुशलः। इति भट्टिटीकायां भरतः॥ नदीशः। इति पुरुषोत्तमः॥ यथा,—

"ततो नदीष्णान् पथिकान् गिरिष्णान्।"

इति भट्टिः॥

नदीसर्ज्ज:, पुं, (नद्याः सर्ज्ज इव। नदीतीरजातत्वादस्य तथात्वम्।) अर्ज्जुनवृक्षः। इत्यमरः। २। ४। ४५॥ (पर्य्यायोऽस्य यथा,—

"ककुभोऽर्ज्जुननामाख्यो नदीसर्ज्जश्च कीर्त्तितः। इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नदेयी, स्त्री, (नद्यां भवा। "नद्यादिभ्यो ढक्।" ४।२।९०। इति ढक्। एयोरादित्वात् ङीष्।) नादेयी। भूमिशम्बुः। इति शब्दचन्द्रिका॥

नद्ध:, त्रि, (नह्यते स्मेति। नह+क्तः।) बद्धः। (यथा, हरिवंशे। २३२। १७।

"दिव्यैश्च कवचैर्नद्धा दिव्यैश्चैवोच्छ्रितैर्ध्वजैः॥")

उद्वृत्तः। इति मेदिनी। धे, ६॥

नद्धी, स्त्री, (नह्यतेऽनया। नह+दाम्नीति कृन्। ततो ङीप्।) चर्म्मरज्जुः। इत्यमरः। २।१०।१२॥ (यथा, प्रद्युम्नविजये चतुर्थाङ्के।

"अस्मापि धिग्जनुषि पुत्रकलत्रमित्र-नद्धावनद्धहृदयो न च तं स्मरामि॥")

नद्यात्र:, पुं, (नद्या आत्र इव।) समष्ठिलावृक्षः। इति राजनिर्घण्टः॥

नद्युत्तर:, त्रि, (नद्या उत्तरः।) नदीकर्त्तृकलब्धवस्तु। तट्पभृक्षब्दस्य परः इति षड़ा इति च भाषा॥ नद्युत्तरा भूमिषु यस्याधिकारे जाता तस्यैव भवति। यथा,—

"नद्युत्तरा राजदत्ता यस्य तस्यैव वा मही। अन्यथा न भवेल्लाभो नराणां राजदैविकः॥ क्षयोदयौ जीवनञ्च दैवराजवशाद्भवेताम्। तस्मात् सर्व्वेषु कार्य्येषु तत्तज्ज्ञं न विचालयेत्॥"

इति विवादचिन्तामणिविवादरत्नाकरवीरमित्रोदयप्रभृतिग्रन्थधृतवचनम्॥

ननन्दा, [ऋ] स्त्री, (न नन्दति तुष्यति सेवयापि। नन्द्+नन्द+"नन्दि च नन्देः।" उणा २। ८८। इति ऋन्। केषाञ्चिन्मतेन उड्डाभावः।) भर्तृभगिनी। ननद इति भाषा॥ तत्पर्य्यायः। ननान्दा २ नन्दिनी ३ नन्दा ४ पतिस्वसा ५। इति शब्दरत्नावली॥

ननान्दा, [ऋ] स्त्री, (न नन्दति सेवयापि। नन्द+"नन्दि च नन्देः।" उणा २। ८८। इति ऋन् उड्डाभश्च।) ननन्दा। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १०। ८५। ४६।

"सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव। ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु॥")

ननु, अ, (न नुदति प्रेरयतीति। नुद्+मितद्वादित्वात् डुः।) प्रश्नः। इच्छा। अवधारणम्। (यथा, रघुः। १। ६०।

"उपपन्नं ननु शिवं सगरस्यङ्गजेषु यस्य मे। देवीनां मानुषीणाञ्च प्रतिहर्त्ता त्वमापदाम्॥")

निश्चयः। (यथा, महाभारते। १३। ६। १६।

"लोको देवे समाजोक्ष उदासीनो भवेन्ननु॥")

अनुज्ञा। (यथा, शिशुपालवधे। ६। ६१।

"ननु सन्दिश्यते मुद्रयोद्यतया जपया न किञ्चन किलाभिदधे॥")

अनुमतिः। अनुनयः। सान्त्वनम्। आमन्त्रणम्। सम्बोधनम्। (यथा, कुमारे। ४। ३२।

"विधुरां त्वजनातिसर्ज्जनात् ननु मां प्रापय पत्युरन्तिकम्॥")

एवार्थसूचकाव्ययानि यथा,—

"प्रश्ने ननर्थेऽयमहे। अवधारणे ननु गच्छामः। अनुज्ञायां सर्व्वत्रैनं ज्ञायताम्। अनुनये ननु चक्षि! प्रसीद। आमन्त्रणे ननु त्वेव। विरोधोक्तिः। इत्यमरभरतौ॥ विनियोगः। अनुप्रश्नः। परजनितः। अधिकारः। सम्भ्रमः। इति मेदिनी। ने, ४४॥ आक्षेपः। प्रत्युक्तिः। वाक्यारम्भः। इति हेमचन्द्रः। ६। १०८॥ उत्प्रेक्षालङ्कारस्यञ्जकम्। यथा,—

"मन्ये ध्रुवं ध्रुवं नूनं किंवा प्रायोऽनुवेधि च। ननु नाम हि जानामि उत्प्रेक्षाव्यञ्जकानि च॥"

इति काव्यचन्द्रिका॥

ननुच, अ, विरोधोक्तिः। इत्यमरः। ३। ४। १४॥ ननुचेति पदमुद्दिश्य विरोधवचने ननुशब्दो विरोधोक्तौ चकारात् ननुचेति वा। इति भरतः॥

नन्द:, पुं, (नन्दतीति। नन्द+घञ्।) विष्णुः। यथा। "आनन्दो नन्दनो नन्दः।" इति महाभारते। १३। १४६। ६६॥ नरपतिभेदः। स तु महानन्दिसुतः क्षत्रियवंशजातः। (यथा, भागवते। १२। १। ७—११।

"महानन्दिसुतो राजन्! शूद्रागर्भोद्भवो बली। महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत्। ततो नृपा भविष्यन्ति शूद्रप्रायास्तदाधार्म्मिकाः॥ स एकच्छत्रां पृथिवीमनुल्लङ्घितशासनः। शासिष्यति महापद्मो द्वितीय इव भार्गवः॥ तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः। य इमां भोक्ष्यन्ति महीं राजानश्च शतं समाः॥ नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति। तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ॥")

आनन्दः। निधिविशेषः। इति पुराणशब्दरत्नावली॥ गोपभेदः। स च श्रीकृष्णपिता। नन्दः पुरा द्रोणनामा वसुरासीत्। यथा,—

"द्रोणो वसूनां प्रवरो धरया सह भार्य्यया। करिष्यमाण आदेशात् ब्रह्मणस्तमुवाच ह॥ जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ। भक्तिः स्यात् परमा लोको यथाञ्जो दुर्गतिन्तरेत्॥ स्वस्तीत्युक्तः स भगवान् व्रजे द्रोणो महायशाः। जज्ञे नन्द इति ख्यातो यशोदा सा धराभवत्॥"

इति श्रीभागवते। २०। ८। ४८—५०॥

देवविशेषः। यथा,—

"महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा। चत्वार उत्तमा वंश्या मातङ्गसुनिसम्मताः॥ दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः॥"

इति सङ्गीतदामोदरः॥

(रुद्रविशेषः। यथा, महाभारते। १७।२१।८५।

"रुद्रश्चैव विपुलो दिव्यो नन्दीश्वरस्तथा॥"

स्कन्दस्यानुचरविशेषः। इति महाभारते। ६। ४५। ६१॥ नागविशेषः। इति महाभारते। ५। १०१। १२॥ यक्षेश्वरस्यानुचरविशेषः। यथा, भागवते। ४। ७। २२।

"दृष्ट्वा गृहीतार्हणसादनोत्तमं यक्षेश्वरं विश्वसृजां परं गुरुम्। सुनन्दनन्दाद्यनुगैर्वृतं सदा एकन्तु प्रपेदे प्रयतः कृताञ्जलिः॥"

धृतराष्ट्रस्य पुत्राणामन्यतमः। इति महाभारतम्। १। ६७। ६६। मदिरागर्भजातो वसुदेवस्य पुत्रविशेषः। इति भागवतम्। ६। २४। ४८॥ क्रौञ्चद्वीपस्य वर्षपर्व्वतविशेषः। इति भागवतम्। ५। २०। २१॥ स्वनाम ख्यातो दत्तकमीमांसाग्रन्थप्रणेता। यथा,—

"अभिवन्द्य जगद्वन्द्यपदद्वन्द्वविनायकम्। पुत्रीकरणमीमांसां कुरुते नन्दपण्डितः॥")

नन्दकः, पुं, (नन्दयतीति। नन्द+ण्वुल्।) विष्णुखड्गः। इत्यमरः। १। १। ६०॥ (यथा, हरिवंशे। १२०। ४४।

"रथाङ्गेनाथ शार्ङ्गेण गदया नन्दकेन च। प्रहरावस्य गरुडं दृढ़ो भूत्वा जनार्द्दन!॥")

भेकः। इति त्रिकाण्डशेषः॥ हर्षके कुलपालके च त्रि। इति मेदिनी। के, १०६॥ ख्यापिता आनन्दः। आनन्दकारकश्च॥ (नागविशेषः इति महाभारतम्। ५। १०१। ११॥ स्कन्दस्यानुचरविशेषः। इति महाभारतम्। ६। ४५। ६६॥ धृतराष्ट्रस्य पुत्रविशेषः। इति महाभारतम्। १। १८७। ३॥)

नन्दकिः, स्त्री, पिप्पली। इति शब्दचन्द्रिका॥

नन्दकी, [न्] पुं, (नन्दक: खड्गोऽस्यास्तीति। नन्दक+इनिः।) विष्णुः। यथा,—

"शङ्खश्चक्रगदी चक्री शार्ङ्गधन्वा गदाधरः॥"

इति महाभारते शान्तिपर्व्वणि॥

नन्दगोपिता, स्त्री, (नन्दाय हर्षाय गोपिता रक्षिता।) राधा। इति शब्दचन्द्रिका॥

(नन्दगोपः अस्या जातः। तारकादित्वात् इतच्।) नन्दगोपजभूम्यादिः॥

नन्दथुः, पुं, (नन्दनमिति। नन्द+"हिलोऽथुच्।" ३।३।८८। इति अथुच्।) आनन्दः। इति शब्दरत्नावली॥

नन्दनं, क्ली, (नन्दयतीति। नन्द+"नन्दिग्रहि-पचादिभ्यो ल्यूण्यः।" ३।१।१३४। इति ल्युः।) इन्द्रवनम्। इत्यमरः। १।१।४८॥ (यथा, कुमारे। ९। ४१।

"अभिज्ञानप्रेदपालानां क्रियन्ते नन्दनद्रुमाः॥"

अष्टादशाक्षरवृत्तिविशेषः। अस्य विवरणन्तु छन्दःशब्दे द्रष्टव्यम्। आनन्दः। यथा, महाभारते। २। २५। ६।

"लब्धिवाशीर्तो विप्रान् प्रयाहि भरतर्षभ!। दुर्दमप्रहर्षाय सुहृदां नन्दनाय च॥")

हर्षके, त्रि। इति मेदिनी। ने, ८०॥ (यथा, महाभारते। ३। १४६। ५।

"पश्य दिष्ट्या सुचिरं भीम पुण्यमनुत्तमम्। गन्धसंस्थानसम्पन्नं मनसो मम नन्दनम्॥")

नन्दनः, पुं, (नन्दयतीति। नन्द+ल्युः।) पर्व्वत-भेदः। यथा, कालिकापुराणे ७५ अध्याये।

"तीरे तु चन्द्रकुल्यस्य नन्दनो नाम वै गिरिः। तस्मिन् वसति शुक्रस्तु कामाख्यासेवने रतः॥ मर्त्यभावं समासाद्य सर्व्वदेवेश्वरो हरिः। सेवितुं त्रिदशेशानीं सततं वर्त्तते नतः॥ चन्द्रकूटस्य तु गिरेर्नन्दनस्य तथा गिरेः। प्रदिदर्शे तथा चक्रं प्रदक्षिणयति त्रिधा॥ चन्द्रकुल्यजले स्नात्वा समारुह्य च नन्दनम्। आराध्य शुक्रं लोकेशं महापद्ममवाप्नुयात्॥"

(विभक्तिविशेषः। इति हैमचन्द्रः। ३। २६३॥ अन्यार्थे, पुं क्ली, इति वाचस्पतिः॥ यथा, सुश्रुते कल्पस्थाने २ अध्याये।

"अम्लपाचकवर्गीयसौरीयककरघाटकरम्भ-नन्दनवराटकादि सप्त लवणसारनिर्य्यासविवर्जि॥"

स्कन्दस्यानुचरविशेषः। यथा, महाभारते। ९। ४५। ३६।

"वर्द्धनं नन्दनञ्चैव सर्व्वविद्याविशारदौ। स्कन्दाय ददतुः प्रीतावश्विनौ भरतर्षभ!॥"

सिद्धपुरुषविशेषः। यथा, भागवते। ४।६।३२।

"स नन्दगादेभिहाभिर्द्वैः शान्तैः संशान्त-विग्रहम्। उपासमानं सखा च भर्त्ता गुरुकरचसाम्॥"

जिनवरविशेषः। इति हैमचन्द्रः। २।२६२॥ वत्स-सरविशेषः। यथा, बृहत्संहितायाम्। ८।३८।

"नन्दनोऽथ विजयो जयस्तथा मन्थनोऽथ परतश्च दुर्मुखः॥"

महादेवः। यथा, महाभारते। १३।१७।७५।

"नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्द्धनः॥")

विष्णुः। यथा, "आनन्दो नन्दनो नन्दः।" इति महाभारते। १३। १४९। ६९॥

नन्दनः, पुं, क्ली, (नन्दयतीति। नन्द+ल्युः।) सुतः। इति मेदिनी। ने, ८०॥ (यथा, रघुः। ३।४१।

"अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः॥")

मेरुः। इति शब्दरत्नावली॥

नन्दनजं, क्ली, (नन्दने जायते इति। जन+डः।) हरिचन्दनम्। इति राजनिर्घण्टः॥ (नन्दनात् आनन्दाज्जायते इति।) हर्षजाते, त्रि॥ (पौत्रश्च॥)

नन्दनन्दनः, पुं, (नन्दस्य नन्दनः सुतः आनन्द-जनको वा।) श्रीकृष्णः। इति शब्दरत्नावली॥ तस्य लीलाचरित्रान्तं तन्महिषीणां दस्यु-हस्तगतत्वकारणं यथा,—

व्यास उवाच।

"कः अद्यात् सगाङ्गेयान् हन्यात्सर्व्वकौर-वान्। त्वामीरेष्यत्व भवतः कः अद्यात् पराभवम्॥ पार्थैतत् सर्व्वभूतस्य हरेर्लीलाविचेष्टितम्। त्वया यत् कौरवा अस्त्रा यदाभीरैर्भवान् जितः॥ यद्गीता दस्युभिर्यांच भवता शोचिताः स्त्रियः। तदप्यहं यथावृत्तं कथयामि तवार्जुन!॥ अष्टावक्रः पुरा विप्रो जलवासरतोऽभवत्। बहून्नन्दगणान् पार्थ! गृहान् ब्रह्म सनातनम्॥ जितेष्वसुरसंघेषु मेरुपृष्ठे महोत्सवः। बभूव तत्र गच्छन्त्यो दृष्टमुक्तं वरस्त्रियः॥ रम्भातिलोत्तमाद्यास्तु घृताच्योऽथ सहस्रशः। तुष्टुवुस्तं महात्मानं प्रणम्यांश्च पाण्डव!॥ आकल्पमयं सलिले जटाभारधरं मुनिम्। विनयावनताश्चेनं प्रणेमुः स्तोत्रतत्पराः॥ यथा यथा प्रसन्नोऽसौ तुष्टुवुस्तं तथा तथा। सर्व्वास्ताः कौरवश्रेष्ठ! वरिष्ठं द्विजसत्तमम्॥

श्रीअष्टावक्र उवाच।

प्रसन्नोऽहं महाभागा भवतीनां यदीप्सते। मत्तस्तद्वियतां सर्व्वं प्रदास्याम्यतिदुर्लभम्॥

श्रीपराशर उवाच।

रम्भातिलोत्तमाद्यास्तं वैदिक्योऽप्सरसोऽब्रुवन्। प्रसन्ने त्वयसंप्राप्तं किमस्माकमिति द्विज!॥ ऊचुस्ताश्चाब्रुवन् विप्र! प्रसन्नो भगवान् यदि। तदिच्छामः पतिं प्राप्तुं विप्रेन्द्र! पुरुषोत्तमम्॥

श्रीव्यास उवाच।

एवं भविष्यतीत्युक्ता प्रोत्ततार जलान्मुनिः। ततस्तीर्त्वाच दृष्टमुर्विरूपं वक्त्रमद्भुतम्॥ तद्दृष्ट्वा गूहमानानां यासां हासः स्फुटोऽभवत्। ताः शशाप मुनिः कोपमवाप्य कुरुनन्दन!॥

श्रीअष्टावक्र उवाच।

यस्माद्विरूपरूपं मां मत्वा हासावमानवा। भवतीभिः कृता तस्मादेष शापं ददामि वः॥ मत्प्रसादेन भर्त्तारं लब्ध्वा तु पुरुषोत्तमम्। मच्छापोपहताः सर्व्वा दस्युहस्तं गमिष्यथ॥"

"एवमस्य सुतैः शापादष्टावक्रस्य कैशवम्। भर्त्तारं प्राप्य ता याता दस्युहस्तं वराङ्गनाः॥ तत्रया नाम कश्चित्स शोकोऽल्पोऽपि हि पाण्डव!। तेनैवाखिलनाथेन सर्व्वमेतदुपसंहृतम्॥"

इति विष्णुपुराणे। ५। ३८। ६८—८५॥

नन्दनन्दिनी, स्त्री, (नन्दस्य नन्दिनी कन्या।) "नन्दगोपगृहे जाता यशोदागर्भसम्भवा।" इति मार्कण्डेयपुराणोक्तदेवीवचनात् तथात्वम्। दुर्गा। इति शब्दरत्नावली॥

नन्दनमाला, स्त्री, (नन्दना आनन्दजनिका माला।) कृष्णप्रीतिजन्यालिकाविशेषः। यथा,

"भूय नन्दनमालान्तु कुरुते कृष्णवेश्मनि। देवदन्याहतेवर्षैः सेव्यते सुरनायकैः॥"

इति द्वारकामाहात्म्ये हरिभक्तिविलासधृत-विष्णुधर्म्मोत्तरम्॥

नन्दना, स्त्री, (नन्दयतीति। नन्दि+ल्युः। टाप्।) दुहिता। इति जटाधरः॥

नन्दनः, पुं, (नन्दत्यनेनेति। नन्द+"हृदिनन्दि-जीविप्राशिभ्यः विदाग्निभि।" उणां ३।१२७। इति भक्त् सच्च णित्।) पुत्रः। राजा। मित्रम्। इति संक्षिप्तसारोणादिवृत्तिः॥

नन्दपालः, पुं, (नन्दं आनन्दं निधिविशेषं वा पालयतीति। पालि+अच्।) वरुणः। इति शब्दरत्नावली॥

नन्दपुत्री, स्त्री, (नन्दस्य पुत्री।) दुर्गा। इति त्रिकाण्डशेषः॥

नन्दयन्तः, त्रि, (नन्दयतीति। नन्दि+"तृभू-वहीति।" उणां ३। १२८। इति झच् सच्च णित्।) आनन्दजनकः। इति सिद्धान्तकौमुदी-धातुपाठादिवृत्तिः॥

नन्दा, स्त्री, (नन्दयतीति। नन्दि+अच्+टाप्।) गौरी। अलिञ्जरः। नादा इति भाषा। तिथि-विशेषः। ताश्च उभयपक्षयोः प्रतिपत्षष्ठीका-दश्यः। इति मेदिनी। दे, ६॥ (यथा,—

"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्।"

इति ज्योतिषम्॥)

नगनन्दा। इति शब्दरत्नावली॥ सम्पत्। इति हैमचन्द्रः॥ * ॥ दुर्गायाः नन्दानामकारणं यथा,—

"एवमुक्ता भवं ब्रह्मा पुनर्देवीं स चाब्रवीत्। त्वया देवि! महत् कार्य्यं कर्त्तव्यञ्चात्मदक्षि नः॥ भविष्यं महिषाख्यस्य असुरस्य विनाशनम्। एवमुक्ता ततो ब्रह्मा सर्व्वे देवाश्च पार्थिव!॥ यथागतास्ततो जग्मुर्देवी स्थाप्य हिमे गिरौ। संस्थाप्य नन्दिता यस्मात्तस्मान्नन्दा तु सा भवेत्॥"

इति वराहपुराणम्॥ * ॥

अपि च।

"नन्दते सुरलोकेषु नन्दने वसतेऽथवा। हिमाचले महापुण्ये नन्दा देवी ततः स्मृता॥"

तस्या माहात्म्यादि यथा,—

"यथा गङ्गा नदीनान्तु उत्तमत्वे व्यवस्थिता। तद्वद्भगवती नन्दा उत्तमत्वेन संस्थिता॥ मासे भाद्रपदे देवि! शुक्लपक्षे व्रजेत् सदा। तस्येच्छा आषाढ़े अन्यथा न कदाचन॥ तेषाञ्च चन्द्रनागस्तु पीड़ां कुर्य्यात् सुलोचने। न गच्छन्ति सुराः सिद्धाः किं पुनर्मानुषादयः॥ विषवातहताः केचित् विषवातप्रपीड़िताः।

विमुक्तान्ते नरा देवि यान्ति देवाः प्रसादतः ॥"
इति देवीपुराणम् ॥
(कामधेनुविशेषः । यथा, वह्निपुराणे कामधेनु-
प्रदाननामाध्याये ।
"नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा ।
निर्मथ्यमाने ऽब्धौ उषःस्नानं शुभप्रदम् ॥"
अस्या दानविधिस्तु कामधेनुशब्दे द्रष्टव्यः ॥
धर्म्मपुत्रस्य हर्षस्य पत्नी । आनन्दस्वरूपतया
एवास्यास्तथात्वम् । यथा, महाभारते । १ ।
६६ । ३३ ।
"नन्दा तु भार्य्या हर्षस्य यासु लोकाः प्रति-
ष्ठिताः ॥"
शाकद्वीपान्तर्गतनदीविशेषः । यथा, मात्स्ये ।
१२१ । ३१ ।
"नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥"
"एताः सप्तमहाभागाः प्रतिवर्षं शिवोदकम् ।
भावयन्ति जनं सर्व्वं शाकद्वीपनिवासिनम् ॥"
हिमालयहृदविशेषः । यथा, विश्वकर्म्मप्रकाशे
२ अध्याये ।
"नन्दायां तद्धिमालय धनदं शोभनं स्नानम् ॥")
नन्दात्मजः, पुं, (नन्दस्य आत्मजः ।) श्रीकृष्णः ।
इति शब्दरत्नावली ॥ (यथा, पाद्मोत्तरखण्डे
१११ अध्याये ।
"पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः ॥")
दुर्गायाम्, स्त्री ॥
नन्दिः, पुं, स्त्री, (नन्दयतीति । नन्दि + "सर्व्व-
धातुभ्य इन् ।" उणा ४ । ११७ । इति इन् ।)
दूनाङ्गम् । (भावे इन् ।) आनन्दः । (यथा,
महाभारते । २ । १८ । ११ ।
"सोऽवर्द्धत महातेजा मगधाधिपतेः सुतः ।
मातापितोर्नन्दिकरः शुक्लपक्षे यथा शशी ॥"
एतदर्थे स्त्रीलिङ्गेऽपि दृश्यते । यथा, तत्रैव ।
५ । १३५ । २० ।
"अतो मे भूयसी नन्दिर्यदेवमनुपश्यसि ॥")
नन्दिकेश्वरे, पुं । इति मेदिनी । दे, ६ ॥ (यथा,
महाभारते । १३ । १४ । २०५ ।
"पुरस्ताच्चैव देवस्य नन्दिं पश्यान्ध्यवस्थितम् ।
शूलं विष्टभ्य तिष्ठन्तं द्वितीयमिव शूकरम् ॥")
विष्णुः । यथा, महाभारते । १३ । १४६ । ७६ ।
"स्वयं स्वङ्गः शुभाङ्गश्च नन्दिर्ज्योतिर्गणेश्वरः ॥"
(महादेवः । यथा, तत्रैव । १३ । १७ । ७१ ।
"निमित्तज्ञो निमित्तश्च नन्दिर्नन्दिकरो हरिः ॥")
नन्दिकः, पुं, (नन्द आनन्दः हेतुतयास्त्यस्येति ।
नन्द + ठन् ।) नन्दीवृक्षः । इति शब्दरत्ना-
वली ॥ (नन्दिरेव । स्वार्थे कन् ।) आनन्दः ॥
नन्दिका, स्त्री (नन्द आनन्दं अस्यस्यामिति ।
ठन् ।) इक्षुक्रीड़ास्थानम् । इति शब्दमाला ॥
(नन्दा + स्वार्थे कन् । टापि अत इत्वम् ।)
अलिक्षरः । इति शब्दरत्नावली ॥ षष्ठीतिथिः ।
यथा, तिथितत्त्वे ।
"कन्यासंस्थे रवौ शुक्ल शुक्लामारभ्य नन्दिकाम् ॥"
प्रतिपदेकादश्यौ च ॥
नन्दिकेश्वरः, पुं, (नन्दिक ईश्वरश्च ।) शिवद्वार-
पालः । तत्पर्य्यायः । नन्दी २ शालङ्कायनः ३
ताण्डवतालिकः ४ । इति त्रिकाण्डशेषः ॥ नन्दी-
श्वरः ५ तण्डुः ६ । इति हेमचन्द्रः ॥ (यथा,
हरिवंशे । १८२ । ८६ ।
"ततो नन्दिं महादेवः प्राह गम्भीरया गिरा ।
नन्दिकेश्वर ! संयाहि यतो वायो रथे स्थितः ॥")
उपपुराणविशेषश्च ॥
नन्दिघोषः, पुं, (नन्दिरानन्दजनको घोषो यस्य ।)
अर्জ্জुनस्य रथघोषः । वन्दिजनघोषः । इति
मेदिनी । षे, ५३ ॥ मङ्गलघोषश्च ॥ (हर्ष-
घोषयुक्ते, त्रि । यथा, महाभारते । १३ ।
१०७ । १०५—१०८ ।
"पञ्चविंशे तु दिवसे यः प्राप्तेदेकभोजनम् ।
सदा द्वादशमासांस्तु पुष्कलं यानमाप्नुयात् ॥
सिंहव्याघ्रप्रयुक्तेषु मेघनिस्वनवादितैः ।
स रथैर्नन्दिघोषैश्च हृष्टतोऽनुगम्यते ॥
देवकन्यासमारूढैः काञ्चनैर्विमलैः शुभैः ।
विमानसुतमं दिव्यमास्थाय सुमनोहरम् ॥
तत्र कल्पसहस्रं वै वसते स्त्रीशतावृते ।
सुधारसोपजीवन्नप्सरोपमसुतसमम् ॥")
नन्दितरः, पुं, (नन्दिरानन्दजनकस्तरः ।) ध्रुव-
वृक्षः । इति भावप्रकाशः ॥
नन्दिनी, स्त्री, (नन्दयतीति । नन्दि + णिनिः ।
ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥ (अस्य
पर्य्यायो यथा, भावप्रकाशे ।
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ॥"
जटामांसी । तत्पर्य्यायो यथा, वैद्यकरत्न-
मालायाम् ।
"नलदं नन्दिनी पेत्री मांसी लक्ष्मजटा जटी ।
किरातिनी च जटिला लोमशा तु तपस्विनी ॥")
उमा । गङ्गा । नगान्दा । वशिष्ठधेनुः । इति
मेदिनी । ने, ८१ ॥ सा च धेनुः सुरभिकन्या ।
यथा, दिलीपं प्रति वशिष्ठवाक्यम् ।
"पुरा शक्रमुपस्थाय तवोर्व्वीं प्रति यास्यतः ।
आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥
इमां देवीमनुव्रताां शुभ्रां सपदि सत्वरः ।
प्रदक्षिणक्रियार्थायां तस्यां त्वं साधुमाचरः ॥
अवज्ञानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥"
"इति वादिन एवास्य होतुराकृतिसाधनम् ।
अविघ्ना नन्दिनीं नाम धेनुरावर्त्तते वनात् ॥"
इति रघुः । १ । ७५-८२ ॥
इमामेवाराध्य लब्धवरो दिलीपो रघुनामानं
वंशतिलकं पुत्रं लब्धवान् ॥ * ॥
द्रोणनाम्नो वसोः पत्नीवाक्यात् इमां शुभ्रां वशिष्ठ-
शापतः पृथिव्यां भौमनाम्नो विख्यात आसीत् ।
एततत्कथा यथा, महाभारते । १।६६ ।११-३६।
"अथ तद्दनमाजग्मुः कदाचिद्भरतर्षभ ! ।
पृथ्वाद्या वसवः सर्व्वे देवा देवर्षिसेवितम् ॥
ते सदारा वनं तच्च सचरन्तः समन्ततः ।
रेमिरे रमणीयेषु पर्व्वतेषु वनेषु च ॥
तत्रैकस्याथ भार्य्यां तु वसोरार्षवविक्रम ! ।
सचरन्ती वने तस्मिन् गां ददर्श सुमध्यमा ॥
नन्दिनीं नाम राजेन्द्र ! सर्व्वकामदुघां शुभाम् ॥
सा विस्मयसमाविष्टा श्रीमद्वसिष्ठसम्पदा ।
द्यवे वै दर्शयामास तां गां गोवृषभेक्षणाम् ॥
स्वापीनाञ्च सुदोग्ध्रीञ्च सुवालधिधुरां शुभाम् ।
उपपन्नां गुणैः सर्व्वैः श्रीमद्गोजगतोत्तमैः च ॥
एवं गुणसमायुक्तां वसवे वसुनन्दिनी ।
दर्शयामास राजेन्द्र पुरा पौरवनन्दन ! ॥
द्यौस्तदा तां तु दृष्ट्वैव गां गजेन्द्रविक्रम ! ।
उवाच राजंस्तां देवीं तस्या रूपगुणान् वदन् ॥
एषा गौरुत्तमा देवी वारुणैरभिरक्षिता च ।
ऋषेस्तस्य वरारोहे ! यस्येदं वनमुत्तमम् ॥
अस्याः क्षीरं पिबेन्मर्त्यः स्वादु यो वै सुमध्यमे ! ।
दशवर्षसहस्राणि स जीवेत् स्थिरयौवनः ॥
एतत् श्रुत्वा तु सा देवी नृपोत्तम ! सुमध्यमा ।
तनुवाचानवद्याङ्गी भर्त्तारं दीप्ततेजसम् ॥
अस्ति मे मानुषे लोके नरदेवात्मजा सखी ।
नाम्ना जितवती नाम रूपयौवनशालिनी ॥
उशीनरस्य राजर्षेः सत्यसन्धस्य धीमतः ।
दुहिता प्रथिता लोके मानुषे रूपसम्पदा ॥
तस्या हेतोर्महाभाग ! सवत्सां गां ममेप्सिताम् ।
आनयस्वामरश्रेष्ठ ! स्मरितं गुरुवर्द्धन ! ॥
यावदस्याः पयः पीत्वा सा सखी मम मानद ! ।
मानुषेषु भवत्येका जरारोगविवर्জ্জिता ॥
एतन्मम महाभाग कर्त्तुमर्हस्यनिन्दित ।
प्रियं प्रियतरं श्रुत्वान्नास्ति मेऽन्यत् कथञ्चन ॥
एतत् श्रुत्वा वचस्तस्या देव्याः प्रियचिकीर्षया ।
एभ्राद्यैर्भ्रातृभिः सार्द्धं द्यौस्तदा तां जहार गाम् ॥
तथा कमलपत्राक्षो नियुक्तो द्यौस्तदा नृप ! ।
ऋषेस्तस्य तपस्तीव्रं न शशाक गिरीक्षितुम् ॥
हृता गौः सा तदा तेन प्रपातस्तु न तर्कितः ॥
अथाश्रमपदं प्राप्तः फलान्यादाय वारुणिः ।
न चापश्यत् स तां तत्र सवत्सां कामनोत्तमे ॥
ततः स ऋक्षयामास वने तस्मिंस्तपोधनः ।
नाथवच्चैव जगतां गां सुनिरुदारधीः ॥
ज्ञात्वा तथापनीतां तां वसुभिर्दिव्यदर्शनैः ।
ययौ क्रोधवशं सद्यः शशाप च वसूंस्तदा ॥
यस्मान्मे वसवो जह्रुर्गां वै दोग्ध्रीं सुवालधिम् ।
तस्मात् सर्व्वे जनिष्यन्ति मानुषेषु न संशयः ॥
एवं शशाप भगवान् वसूंस्तान् भरतर्षभ ! ।
यज्ञं क्रोधस्य संप्राप्य आपवो मुनिसत्तमः ॥
श्रुत्वा च तान् महाभागस्तपस्येव मनो दधे ।
एवं स शप्तवान् राजन् ! वसूनग्नौ तपोधनः ॥
महाप्रभावो ब्रह्मर्षिर्देवान् क्रोधसमन्वितः ॥
अथाश्रमपदं प्राप्तास्ते वै भूयो महात्मनः ।
शप्तः स इति जानन्त ऋषिं तमुपचक्रमुः ॥
प्रसादयामासुरृषिं वसवः पार्थिवर्षभ ! ।
तेभिरे न च तच्छापे प्रसादस्तस्य तत्तमात् ।
आपवात् पुरुषव्याघ्र ! सर्व्वधर्म्मविशारदात् ॥
उवाच च स धर्म्मात्मा शप्ता यूयं धरादयः ।
अनुसंवत्सरात् सर्व्वे शापमोक्षमवाप्स्यथ ॥

अयन्तु यत्कृते यूयं मया शप्ताः स वत्स्यति ।
दौस्तो मानुषे लोके दीर्घकालं स्वकर्म्मणा ॥
नाहृतं तद्विकौर्यामि युष्मान् क्रुद्धो यदब्रवम् ।
न प्रजास्यति चाप्येष मानुषेषु महामनाः ॥
भविष्यति च धर्म्मात्मा सर्व्वशास्त्रविशारदः ।
पितुः प्रियहिते युक्तः स्त्रीभोगान् वर्জ्जयिष्यति॥")

तस्याः प्रभावो यथा,—

"वशिष्ठस्याश्रमपदं ब्रह्मस्थानमनुत्तमम् ।
अपश्यज्जयतां श्रेष्ठो विश्वामित्रो महामनाः ॥
ततो वशिष्ठो भगवान् कथान्ते मुनिसत्तमः ।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥
आतिथ्यं कर्त्तुमिच्छामि बलस्यास्य महाबलः ।
तव चैवाप्रमेयस्य यथार्हं प्रतिगृह्यताम् ॥
बाढ़मित्येव गाधेयो वशिष्ठं प्रत्युवाच ह ।
एवमुक्तो महातेजा वशिष्ठो जपतां वरः ॥
आजुहाव ततः प्रीतः कल्माषीं धुतकल्मषाम् ।
भोजनेन महार्हेण सत्कारं तद्विधत्स्व मे ॥
एवमुक्ता वशिष्ठेन शबला शत्रुसूदन ! ।
विदधे विविधान् कामान् यस्य यस्य यथेप्सितान् ॥
सान्तःपुरजनो राजा सब्राह्मणपुरोहितः ।
युक्तः परमहर्षेण वशिष्ठमिदमब्रवीत् ॥
गवां शतसहस्रेण दीयतां शबला मम ।
एवमुक्तस्तु भगवान् वशिष्ठो मुनिसत्तमः ॥
विश्वामित्रेण धर्म्मात्मा प्रत्युवाच महीपतिम् ।
कारणैर्बहुभी राजन् दास्ये नन्दिनीं तव ॥
कामधेनुं वशिष्ठोऽसौ न तत्याज यदा मुनिः ।
ततोऽस्य शबलां राजा विश्वामित्रस्तदाहरत् ॥
तस्या हुम्भारवोत्पाताः काम्बोजा रविसन्निभाः ।
ऊधसश्चाभिसंजाताः पह्लवाः शस्त्रपाणयः ॥
योनिदेशाच्च यवनाः शकृद्देशाच्छकास्तथा ।
रोमकूपेषु च म्लेच्छास्तथा रामकिरातकाः ॥
तैस्तन्निसूदितं सैन्यं विश्वामित्रस्य तत्क्षणात् ।
सपदातिगजं सार्त्वं सरथं रघुनन्दन ! ॥"

इति रामायणे आदिकाण्डम् ॥

(एतद्विवरणं महाभारते । १ । १७७ । अध्याये च विस्तरशो द्रष्टव्यम् ॥ कन्या यथा, हरिवंशे । १७६ । ७ ।

"मेध्यां गोकुलसम्भूतां नन्दगोपस्य नन्दिनीम् ॥"

आनन्दजननात् पत्न्यपि । यथा, महाभारते । १ । ६६ । १६ ।

"एवं गुणसमायुक्तां वसदे वसुनन्दिनीं ।
दर्शयामास राजेन्द्र ! पुरा पौरवनन्दनः ॥"

"वसुनन्दिनी वसुप्रिया !" इति नीलकण्ठः ॥

स्कन्दानुचरमातृगणविशेषः । यथा, महाभारते । ६ । ४६ । ५ ।

"स्कन्द मातृगणान् राजन् ! कुमारानुचरानिमान् ॥"

"वसुदामा सुदामा च विशोका नन्दिनी तथा ॥"

तीर्थविशेषः । यथा, महाभारते । ३ । ८४ । १४५ ।

"नान्दन्याञ्च समासाद्य कूपं देवनिषेवितम् ।
नरमेधस्य यत् पुण्यं तदाप्नोति नराधिप । ॥"

याड़िमुनिमाता । इति हेमचन्द्रः । ३ । ५१६ ॥

चयोदशाक्षरवृत्तविशेषः । अस्य विवरणं छन्दः-शब्दे द्रष्टव्यम् । दुर्गा । इयन्तु देविकातटे पीठस्थाने विराजते । यथा, देवीभागवते । ७ । ३३ । ६६ ।

"शिवकुण्डे शुभा नन्दा नन्दिनी देविकातटे ॥")

नन्दिनीतनयः, पुं, (नन्दिन्यास्तनयः ।) याड़िमुनिः । स च अभिधानकारकः । इति हेमचन्द्रः । ३ । ५१६ ॥

नन्दिनीसुतः, पुं, (नन्दिन्याः सुतः ।) याड़िमुनिः । इति जटाधरः ॥

नन्दिवर्द्धनः, पुं, (नन्दिं वर्द्धयतीति । वृध् + णिच् + ल्युः ।) शिवः । (नन्दिं आनन्दं वर्द्धयतीति ।) पर्व्वतः । पुत्रः । इति मेदिनी । ने, २३८ ॥ (यथा, गोः रामायणे । २ । ६६ । १४ ।

"सुषुवे यममित्रघ्नं कौशल्या नन्दिवर्द्धनम् ॥")

मित्रम् । इति शब्दरत्नावली ॥ (विमानविशेषः । यथा, विश्वकर्म्मप्रकाशे । ६ अध्याये ।

"विमानं क्रन्दकं तद्वदनेकशिखरान्वितः ।
स चाष्टभूमिकस्तद्वत् सप्ततिर्नन्दिवर्द्धनः ॥"

निमिवंशीयविशेषः । इति भागवतम् । ६ । १३ । १४ ॥) आनन्दवर्द्धके, त्रि ॥ (यथा, हरिवंशे । ६८ । २६ ।

"कृष्ण कृष्ण महाबाहो गोपानां नन्दिवर्द्धन ! ।
दृश्यतामेष वै शिघ्रं सर्परूपो विषायुधः ॥")

नन्दिवृक्षः, पुं, (नन्दिरानन्दस्तज्जनको वृक्षः । यद्वा, नन्द + इन् । तस्याः वृक्षः ।) नन्दीवृक्षः । इति शब्दरत्नावली ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।

"नन्दिवृक्षो मेघपुष्पी तथा मेघविधानिका ।
चक्षुर्ब्रह्मनचक्षुश्च मेघपुष्पी यशोदया ॥")

नन्दी, स्त्री, दुर्गा । यथा, देवीपुराणे ।

"सुराः सुब्धिदृशा देवा नन्दिनी दुन्दुभिर्मता ।
तेषाञ्च वादिनी नन्दी ईश्वात्मा चिदग्नेश्वरी ॥"

नन्दी, [न्] पुं, (नन्द आनन्दोऽस्यास्तीति । इनिः ।) गर्दभाण्डवृक्षः । (यथा,—

"करीरं कुलकं नन्दी कुचेला शकुलादनी ।
कठिल्लं केसुकं प्रीतं सकोशातककर्कशम् ॥
तिक्तं पाके कटुग्राही वातलं कफपित्तजित् ॥"

इति वाभटे । १ । ६ अध्याये ॥)

वटवृक्षः । इति मेदिनी । नै, ८२ ॥ शिवगणविशेषः । स च त्रिविधः । यथा,—

"आद्यः कनकनन्दी च गिरिकाख्यो द्वितीयकः ।
सोमनन्दी तृतीयस्तु विज्ञेया नन्दिनस्त्रयः ॥"

इति वह्निपुराणे गणभेदनामाध्यायः ॥

शिवद्वारपालः । स शिवांशः शालङ्कायनमुनिपुत्रः । यथा,—

"अन्यच्च ते प्रवक्ष्यामि परं गुह्यं वसुन्धरे ! ।
तप्यतस्तस्य तु मुनेरीश्वरेण समं सुतम् ॥
तं प्राप्स्यामि परं भावं ज्ञात्वा देवो महेश्वरः ।
सुन्दरञ्चपरं रूपं दत्वा दृष्टिसुखावहम् ॥
शालङ्कायनपुत्रत्वं योगमायामुपाश्रितः ।
प्राप्नोति तं न जानाति दक्षिणं पार्श्वमाश्रितः॥
मायायोगबलोपेतस्त्राक्षो वै शूलपाणिधृक् ।
रूपवान् गुणवांश्चैव वपुषादित्यसन्निभः ॥
स तं न ज्ञायते जातं ममैवाराधने स्थितः ।
अथ नन्दी प्रहस्याह महादेवाश्रयं मुनिम् ॥
उत्तिष्ठ मुनिशार्दूल ! सफलस्ते मनोरथः ।
त्वदर्चनाद्भक्तोऽसि पुत्रस्ते भावि मां प्रभो ! ॥
त्वया तपः समारब्धमीश्वरेण समं सुतम् ।
प्राप्स्यामीति ततो मह्यं सदृशोऽन्यो न कश्चन ॥
विचार्य्येति तदाहं वै जातोऽस्मि स्वयमेव हि ॥"

इति वराहपुराणम् ॥

स एव कल्पान्तरे शिवांशजशिलादमुनेः पुत्रः । यथा,—

"जजाप रुद्रमग्निं यत्र नन्दी महागणः ।
प्रीतस्तस्य महादेवो देव्या सह पिनाकधृक् ॥
दृष्ट्वा चाग्निसमानत्वं स्तुवचनमेव च ।
अभूदृषिः स धर्म्मात्मा शिलादो नाम धर्म्मवित्॥
आराधयन् महादेवं पुत्रार्थं वृषभध्वजम् ।
तस्य वर्षसहस्रान्ते तप्यमानस्य विश्वकृत् ॥
मूर्ध्नः सोमौघविश्रुतो वरदोऽस्मीत्यभाषत ।
स वव्रे वरमीशानं वरेण्यं गिरिजापतिम् ॥
अयोनिजं मृत्युभीतं तया चैवोमया समम् ।
तथास्त्वित्याह भगवान् देव्या सह महेश्वरः ॥
पश्यतस्तस्य विप्रर्षेरन्तर्धानं गतो विभुः ।
ततो विधत्तुः स्वां भूमिं शिलादो धर्म्मवित्तमः॥
चकर्ष लाङ्गलेनोर्व्वीं भित्त्वाऽदृश्यत शोभनः ।
सवर्णैकानलप्रख्यः कुमारः प्रहसन्निव ॥
रूपलावण्यसम्पन्नस्तेजसा भासयन् दिशम् ।
कुमारतुल्योऽप्रतिमो मेघगम्भीरया गिरा ॥
शिलादं तात तातेति प्राह नन्दी पुनः पुनः ।
तं दृष्ट्वा नन्दिनं जातं शिलादः परिषस्वजे ॥
मुनिभ्यो दर्शयामास ये तदाश्रमवासिनः ॥"

इति कूर्म्मे ४० अध्यायः ॥

(द्विजप्रतिसाधर्म्मौलिककायस्थानामन्यतमः । यथा, घटककारिकायाम् ।

"गुहः कौशिर्यगुप्तः कुण्डुनन्दी शीलो धनुर्गुणः ॥")

नन्दीमुखी, स्त्री, (नन्दी मुखे यस्याः । ङीप् ।) तन्द्रा । इति हेमचन्द्रः । २ । २२७ ॥

नन्दीवृक्षः, पुं, (नन्दि + वा ङीष् । नन्द्याः वृक्षः । ~~नन्दीलताको वृक्षो वा ।~~)कोङ्कणदेशप्रसिद्धसुगन्धि वृक्षविशेषः । तत्पर्य्यायः । तूणीकः२ तूणिकः३ तूणी ४ पीतकः ५ कच्छपः ६ नन्दी ७ कुटेरकः ८ कान्तः ९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतत्वम् । पित्तरक्तदाहशिरोऽग्निस्वेदकुष्ठनाशित्वम् । सुगन्धित्वम् । पृथिवीपर्य्यायत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अश्वत्थाकारः क्षीरवान् स्वनामप्रसिद्धो वृक्षः । इति भरतः ॥ तुं इति ख्यातो वृक्ष इति केचित् ॥ तत्पर्य्यायः । तुन्नः २ कुवेरकः ३ कुशिः ४ कक्षः ५ कान्तलकः ६ । इत्यमरः । २ । ४ । १२८ ॥ तुशिः ७ । इति भरतः ॥ नन्दिवृक्षः ८ कुशिः ९ तुन्दः १०

नन्दिकः ११ नन्दिवृक्षकः १२। इति शब्दरत्नावली ॥* ॥ मेषशृङ्गीवृक्षः। इति रत्नमाला ॥ स्थालीवृक्षः। इति भावप्रकाशः ॥

नन्दीशः, पुं, (नन्दी ईशश्च।) नन्दी। इति हेमचन्द्रः। २।१२४॥ भरतोक्तलालप्रभेदः। यथा,—

"सिंहनन्दननन्दीशचन्द्रविम्बद्वितीयकाः ॥"

तस्य लक्षणं यथा,—

"गो लघुर्गौर्लघुः प्लुतस्त्रासे नन्दीश्वरे मताः।"

इति सङ्गीतदामोदरः ॥

(नन्दिनो नन्दिशब्दस्य ईशः। इति विग्रहे शिवः ॥)

नन्दीश्वरः, पुं, (नन्दिनो गणविशेषस्य ईश्वरः।) शिवः। इति शब्दरत्नावली ॥ नन्दीशतालः। इति सङ्गीतदामोदरः ॥ (नन्दी ईश्वरश्च।) शिवद्वारपालः। तस्य शिवपार्श्वदत्वकारणं यथा,—

"ततस्त्रेतायुगे काले नन्दी नाम महामुनिः।
आराधयिषुः शर्व्वं तपस्तेपे सुदारुणम् ॥
ततस्तु भगवान् प्रीतस्तस्मै विप्राय शङ्करः।
उवाच च वचः साक्षात्तच्छिवं वरदः प्रभुः ॥
वरान् वृणीष्व विप्रेन्द्र! यानिच्छसि महामुने!॥
तांस्ते सर्व्वान् प्रयच्छामि दुर्लभानपि मानिष ॥
इत्युक्तोऽसौ भगवता शर्व्वेण मुनिपुङ्गव।
प्रोवाच वरदं देवं प्रहृष्टेनान्तरात्मना ॥
यदि प्रीतोऽसि भगवन्! अशुक्रोऽयतया मम।
अमृत्युर्मो ह्यहं देव त्वयावश्यं सुराधिप!॥
यथा नान्यं भवेद्भक्तिस्त्वयि नित्यं महेश्वर!।
तथाहं भक्तिमिच्छामि सर्व्वभूताश्रये त्वयि ॥
एतत्तु वचनं श्रुत्वा नन्दिनः स महेश्वरः।
प्रहस्योवाच तं प्रीत्या ततो मधुरया गिरा ॥
मद्भक्तधारी मत्तोऽप्यात्मनः सर्व्वगुणोत्तमः।
भविष्यसि न सन्देहो देवदानवपूजितः ॥
अनेनैव शरीरेण अजरामरवच्छितः।
दुष्प्राप्यियमवाप्ता ते देवैर्गाणेश्वरी गतिः ॥
पार्श्वदानां वरिष्ठश्च मामकानां द्विजोत्तम!।
नन्दीश्वर इति ख्यातो भविष्यसि न संशयः ॥
अद्यप्रभृति देवाद्य! देवकार्य्येषु सर्व्वतः।
त्वं प्रभुर्भविता लोके मत्प्रसादान्मुनीश्वर!॥
त्वामेवाभ्यर्चयिष्यन्ति सर्व्वभूतानि सर्व्वतः।
मत्तः समभिवाञ्छन्नः प्रसादं पार्श्वदाधिप!॥
यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु।
नावयोरन्तरं किञ्चिदम्बरानिलयोरिव ॥
द्वारे तु दक्षिणे नित्यं त्वया स्थेयं गणाधिप!।
वामेन विष्णुना वापि महाकालेन सर्व्वदा ॥"

इति वराहपुराणम् ॥

नन्दीश्वरः, [स्] क्ली, (नन्द+इन्+वा ङीष्। नन्दये आनन्दार्थं यत् वरः।) रत्नपरीक्षकः। इति शब्दमाला ॥

नन्द्यावर्त्तः, पुं, (नन्दिजनक आवर्त्तो यत्र।) ईशचरसगणविशेषः। इत्यमरः। २।२।१०॥ तस्य लक्षणं यथा,—

"दक्षिणानुगतालिन्द्वत्रयं यत् पश्चिमासुखम्।
पूजनीयोत्तरच्छायं नन्द्यावर्त्तं वदन्ति तत् ॥"

इति भरतवृत्तसाङ्गः ॥

तगरद्रुमः। इति विश्वः ॥ मत्स्यभेदः। तस्य गुणः। संग्राहित्वम्। कफपित्तविनाशित्वञ्च। इति राजवल्लभः ॥

नपुंसकं, क्ली, (न स्त्री न पुमान्। "नभाऽनपादिति।" ६। ३। ७५। इति निपातनात् क्लीपुंसयोः पुंसक-आदेशः।) क्लीवम्। इत्यमरः। २। ६। ३६॥ हिजड़ा इति भाषा॥ तस्य कारणं यथा,—

"उभयोर्म्मौनसामान्ये जायते वै नपुंसकम् ॥"

इति सुश्रुतः ॥ * ॥

(नपुंसको भवेदिति भाष्यप्रयोगात् पुंलिङ्गोऽपि भवति। तथा, च पद्यतन्त्रे। १। ३६४।

"परदेशभयाद्भिक्षा बहुमाया नपुंसकाः।
स्वदेशे निधनं यान्ति काकाः कापुरुषा रणाः ॥")

नपुंसकगर्भस्य चिह्नं यथा,—

"नपुंसकं यदा गर्भो भवेन्नर्भोदुर्दाक्षति।
उन्नते भवतः पार्श्वे पुरस्तादुदरं महत् ॥"* ॥

नपुंसकविशेषानाह।

"व्यासेक्यच्च सुगन्धिच्च कुम्भीकस्त्रैर्यकस्तथा।
अमी सशुक्रा बोद्धव्या अशुक्रो भूणसंज्ञकः ॥"

तेषां लक्षणान्याह।

"पित्तोल्बणस्त्वल्पवीर्य्यत्वादासेक्यः पुरुषो भवेत्।
स शुक्रं प्राप्य लभते ध्वजोन्नतिमसंशयम् ॥
यः पूतियोनौ जायेत स हि सौगन्धिको भवेत्।
स्त्रैणे गुदेऽब्जवर्य्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते।
स कुम्भीक इति ज्ञेयो गुदयोनिषु स स्मृतः ॥
दृष्ट्वा यथायमर्थेषां यथावे यः प्रवर्त्तते।
ईर्षकः स तु विज्ञेयो दृष्टियोनिश्च स स्मृतः ॥
यो भार्य्यायाश्चरौ मोहादङ्गनेव प्रवर्त्तते।
तत्र स्त्रीचेष्टिताकारो जायते षण्ढसंज्ञकः ॥"

इति भावप्रकाशः ॥

(अस्य विवृतिर्यथा,—

"समयोर्म्मरजस्त्रेन नरः स्त्रीप्रकृतिर्भवेत्।
नपुंसकमिति ख्यातं न स्त्री न पुरुषो वदेत् ॥"
"समदोषबलेनापि प्रलक्ष्या विकृतेरपि।
समो भवेदरक् शुक्रो नपुंसकसमुद्भवः ॥"

इति हारीते शारीरस्थाने प्रथमेऽध्याये ॥)

नप्ता, [तृ] पुं, (न पतन्ति पितरो येनेति। पत+"नप्तृनेष्टृत्वष्टृति।" उणां २। ९६। इति तृच्प्रत्ययेन निपातनात् साधुः।) पुत्रकन्ययोः पुत्रः। नाति इति भाषा। तत्पर्य्यायः। पौत्रः २ सुतस्य सुतः ३। इति हेमचन्द्रः ॥ (यथा, महाभारते। १। ८५। २०।

"कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो!।
ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रदास्यति ॥")

नप्त्री, स्त्री, (नप्तृ+"ऋन्नेभ्यो ङीप्।" ४। १। ५। इति ङीप्।) पुत्रकन्ययोः पुत्री। नातिनी इति भाषा। तत्पर्य्यायः। पौत्री २ सुतात्मजा ३। इत्यमरः। २। ६। २६॥ नप्ता ४ पौत्रिका ५।

हरि रभसः ॥ सुतस्य सुतायाश्चात्मजायां नप्त्री पुत्रस्य पुत्र्याश्चापत्यं पौत्री अतएव पौत्रोऽपि नप्ता। इत्यमरटीकायां भरतः ॥

नभः, पुं, (नभति हिनस्ति कीटादीनिति। नभ हिंसायाम्+पचाद्यच्।) श्रावणमासः। इति शब्दरत्नावली ॥ (द्वितीयमनोः स्वारोचिषस्य पुत्रविशेषः। इति हरिवंशे। ७। १४॥ तृतीयमन्वन्तरदेवविशेषः। इति च तत्रैव। ७। १६॥ कुशप्रपौत्रतनयस्य पुत्रः। इति च हरिवंशे। १५। २७॥)

नभः, [स्] क्ली, (नह्यते मेघैरिति। नह बन्धने+"नहेर्दिवि भच्च।" उणां ४। २१०। इति असुन् भश्चान्तादेशः।) आकाशम्। इत्यमरः। १। २। १॥ (यथा, मनुः। ४। ३०।

"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥")

नभःक्रान्तः, [न्] पुं, (नभःक्रान्तं गगनाक्रमणमस्यास्तीति। इनिः।) सिंहः। इति शब्दमाला ॥

नभःप्राणः, पुं, (नभसः प्राण इव।) पवनः। इति त्रिकाण्डशेषः ॥

नभःसत्, [द्] पुं, (नभसि सीदतीति। सद्+क्विप्।) देवः। इति त्रिकाण्डशेषः ॥

नभःसरित्, स्त्री, (नभसः सरित् नदी।) स्वर्गङ्गा। इति त्रिकाण्डशेषः ॥

नभःस्थितः, पुं, (नभसि स्थितः।) नरकविशेषः। इति हेमचन्द्रः। ५।२ ॥ आकाशस्थिते, त्रि ॥

नभश्चक्षुः, पुं, (नभसश्चक्षुरिव।) सूर्य्यः। इति शब्दमाला ॥

नभश्चमसः, पुं, (नभश्चमस इव।) चन्द्रः। चित्रापुष्पः। इन्द्रजालम्। इति मेदिनी। से, ३८ ॥

नभश्चरः, पुं, (नभसि चरतीति। चर+टः।) पक्षी। विद्याधरः। (गन्धर्व्वादिः। यथा, रघुः। १८। ६।

"नभश्चरैर्गीतयशाः स लेभे
नभस्तलश्यामतनुं तनूजम् ॥")

मेघः। वायुः। इति मेदिनी। रे, २७२ ॥ (आकाशचारिणि, त्रि। यथा, कुमारे। ५। २१।

"निकामतप्ता विविधेन वह्निना
नभश्चरेणेव नवसम्भृतेन सा ॥")

नभसं, क्ली, (नभते व्याप्नोतीति। नभ+"अन्यविन्दमितमीति।" उणां। ३। ११७। इति असच्।) आकाशम्। यथा। नभसं खं मेघवर्त्म विहायसमिति निगमः ॥ (पुं, दशममन्वन्तरीयसप्तर्षीणामन्यतमः। यथा, हरिवंशे। ७। ६७।

"अङ्गिरा नभसः सत्यं सत्येव परमर्षयः ॥")

नभसङ्गमः, पुं, (नभसं गच्छतीति। गम+गमेः सुपीति खच्। ततो मुम्।) पक्षी। इत्यमरः। २। ४। ३४ ॥

नभस्तलं, पुं क्ली, (नभसस्तलम्।) गगनमण्डलम्। यथा, नैषधे। २। ६६।

"तद्दीधितिधारया रयाद्-
गतया लोकविलोकनामसौ।
छदहेमकयन्निवालसत्
कथपाषाणनिभे नभस्तले॥"

नभस्यः, पुं, (नभसे मेघाय साधुः। नभस्+"तत्र साधुः।" ४। ४। ६८। इति यत्।) भाद्रमासः। इत्यमरः। १। ४। १७॥ (यथा, हरिवंशे। १५२। १।

"नभो नभस्येऽथ निरीक्ष्य मासि
कामस्तदा तोयददुन्दुकीर्णम्॥")

नभस्वान्, [त्] पुं, (आकाशाद्वायुरिति श्रुतेः नभः उत्पत्तिकारणत्वेनास्यास्तीति। नभस्+मतुप् मस्य वः।) वायुः। इत्यमरः। १। १। ६६॥ (यथा, रघुः। ४। ८।

"स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः॥")

नभाः, [स्] पुं, (नभति हिनस्ति कीटादीनिति। नभ+"सर्व्वधातुभ्योऽसुन्।" उणा। ४। १८८। इति असुन्।) श्रावणमासः। (यथा, रघुः। १२। २६।

"स लङ्घयन् तयोर्मध्ये मैथिलीं लोकशोषणः।
नभोनभस्ययोर्वृष्टिसवग्रह इवान्तरे॥")

मेघः। आकाशम्। वर्षाः। विसतन्तुः। पतदृग्रहः। इति मेदिनी। से, २६॥ पलितशीर्षम्। इति धरणी॥

नभाकं, क्ली, (नभ्नाति आप्नोतीति। नभ+"पिनाकादयश्च।" उणा। ४। १५। इति आकः।) तमः। इत्युणादिकोषः॥

नभोगजः, पुं, (नभसि आकाशे गज इव।) मेघः। इति त्रिकाण्डशेषः॥

नभोगतिः, स्त्री, (नभसि गतिर्गमनम्।) आकाशगमनम्। यथा,—

"प्रडीनोड्डीनसञ्जीनडयनानि नभोगतौ॥"
इति हेमचन्द्रः। ४। ३८४॥

नभोदुहः, पुं, (नभसः दोग्धि प्रपूरयति नद्यादिकमिति। दुह प्रपूरणे+कः।) मेघः। इति शब्दमाला॥

नभोद्वीपः, पुं, (नभसि द्वीप इव।) मेघः। इति शब्दमाला॥

नभोधूमः, पुं, (नभसि धूम इव।) मेघः। इति शब्दमाला॥

नभोनदी, स्त्री, (नभसो नदी।) स्वर्गङ्गा। इति भूरिप्रयोगः॥

नभोमणिः, पुं, (नभसो मणिरिव।) सूर्य्यः। इति हेमचन्द्रः। २। ८॥

नभोमण्डलदीपः, पुं, (नभोमण्डले दीप इव।) चन्द्रः। यथा, तिथ्यादितत्त्वे।

"नभोमण्डलदीपाय शिरोरत्नाय धूर्ज्जटेः।
कलाभिर्व्वर्द्धमानाय नमश्चन्द्राय चारवे॥"

नभोऽम्बुपः, पुं, (नभसः अम्बु जलं पिबतीति। पा+कः।) चातकपक्षी। इति हेमचन्द्रः। ४। २६५॥

नभोरजः, [स्] क्ली, (नभसो रज इव।) अन्धकारः। इति शब्दमाला॥

नभोरेणुः, स्त्री, (नभसि रेणुरिव।) कृष्णभ्रटिका। इति त्रिकाण्डशेषः॥

नभोजयः, पुं, (नभसि लयो यस्य।) धूमः। इति शब्दरत्नावली॥

नभ्यं, त्रि, नभस्येदमित्यर्थे यञ्प्रत्ययः। नभसम्बन्धि। (नाभये हितम्। नाभि+"उगवादिभ्यो यत्।" ५। १। २। इति यत्। "नाभि नभश्च।" इति नभादेशः। रथाङ्गम्। "नभ्योऽग्रः। नभ्यमञ्जनम्। रथनाभावेवेदम्॥" इति सिद्धान्तकौमुदी॥)

नभ्राट्, [ज्] पुं, (न भ्राजते इति। भ्राज दीप्तौ+किप्।) मेघः। इति हेमचन्द्रः। २। ७८॥

नमः, [स्] अ, (नम शब्दनत्योः+भावे असुन्।) नतिः। इत्यमरः। ३। ४। १८॥ (यथा, मार्कण्डेये।

"नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥"

क्लीवलिङ्गेऽपि दृश्यते। यथा, भागवते। ३। १३। ४२।

"विधेम चास्यै नमसा सह त्वया
यस्यां स्वतेजोऽग्निमिवारणावधाः॥")

त्यागः। हतम्। इत्युणादिकोषः॥ (क्ली, अन्नम्। इति निघण्टुः। २। ७॥ वज्रम्। इति निघण्टुः। २। २०॥ स्तोत्रम्। यथा, ऋग्वेदे। ७। १६। १।

"एना वो अग्निं नमसोर्जो नपातमा हुवे॥")

नमतः, पुं, (नम्यते इति। नम+"शृण्टृग्निजीति।" उणा। ३। ११०। इति अतच्।) प्रसुः। धूमः। नटः। इत्युणादिकोषः॥

नमसः, पुं, (नमतीति। नम+"अत्यविचमितमीति।" उणा। ३। ११७। इति असच्।) अनुकूलः। इत्युणादिकोषः॥

नमसितः, त्रि, (नमः क्षतमिति। नमस्+"नमोवरिवः।" ३। १। १६। इति क्यच्। क्तः। "क्यस्य विभाषा।" ६। ४। ५०। इति वा यलोपः।) कृतनमस्कारः। पूजितः। तत्पर्य्यायः। नमस्यितः २ अर्हितः ३ अपचायितः ४ अर्च्चितः ५ अपचितः ६। इत्यमरः। ३। १। १०१॥

नमस्कारः, पुं, (नमः शब्दस्य कारः करणं यत्र।) विधभेदः। इति शब्दचन्द्रिका॥ (नमः करणम्। नमस्+कृ+घञ्।) नतिः। स च त्रिविधः। कायिकः वाचिकः मानसिकश्च। यथा,—

"कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः।
नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः॥"

कायिकादिरपि त्रिविधो यथा,—

"प्रणाम्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ।
जानुभ्यां धरणीं गत्वा शिरसा स्पृश्य मेदिनीम्॥
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः॥
जानुभ्याञ्च क्षितिं स्पृष्ट्वा शिरसा स्पृश्य मेदिनीम्।
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः॥
पुटीकृत्य करौ शीर्षे दीयते यदयत्नतः।
अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते॥
या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः।
क्रियते भक्तियुक्तैर्व्वा वाचिकस्तूत्तमः स्मृतः॥
पौराणिकैर्व्वैदिकैर्व्वा मन्त्रैर्यो क्रियते नतिः।
मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा॥
यत्तु मानुषवाक्येन नमनं क्रियते सदा।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ॥
इष्टमन्त्रनिरूपितैर्मनोभिश्चिन्तितं पुनः।
नमनं मानसं प्रोक्तमुत्तमाधममध्यमम्॥
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः।
कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः॥
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः।
प्रणाम इति विज्ञेयः स पूर्व्वप्रतिपादितः॥"

इति कालिकापुराणे ७० अध्यायः॥ * ॥

रात्रौ तन्निषेधो यथा,—

"रात्रौ नैव नमस्कुर्य्यात्तेनाग्नेरभिचारिका।
अतः प्रातःपदं दत्त्वा प्रयोक्तव्ये च ते उभे॥"

इति भट्टभारतमिति केचित्॥

नतिकरणम्। तच्च करशिरःसंयोगादि। स्वापकर्षबोधकव्यापारविशेषः। इति मुग्धबोधटीकायां दुर्गादासः॥

"सर्व्वे चापि नमस्कार्य्याः सर्व्वावस्थासु सर्व्वदा॥"

अभिवादयेदित्यनुवृत्तौ शूद्रः। गौप्रयतायाप्रयतश्च। इति शुद्धितत्त्वम्॥

"स्त्रियो नमस्या दृष्ट्वाऽन्य वयसा पत्युरेव ताः॥"

इति स्मृत्यर्थसारः॥ * ॥

"देवं विप्रं गुरुं दृष्ट्वा न नमेद्यस्तु सम्भ्रमात्।
स कालसूत्रं व्रजति यावच्चन्द्रदिवाकरौ॥
ब्राह्मणञ्च गुरुं दृष्ट्वा न नमेद्यो नराधमः।
यावज्जीवनपर्य्यन्तमशुचिर्य्यवनो भवेत्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥

"देवतायतनं दृष्ट्वा दृष्ट्वा तु दक्षिणन्तथा।
नमस्कारं न कुर्य्याद्यः प्रायश्चित्ती भवेन्नरः॥
सभायां यज्ञशालायां देवतायतनेषु च।
प्रत्येकन्तु नमस्कारो हन्ति पुण्यं पुराकृतम्॥
उपविश्य नमेत् शूद्रो दीर्घायुर्ब्राह्मणो वदेत्।
स शूद्रो नरकं याति ब्राह्मणो यात्यधोगतिम्॥
दूरस्थं जलमध्यस्थं धावन्तं मदगर्व्वितम्।
क्रोधवन्तं विजानीयात् नमस्कारञ्च वर्ज्जयेत्॥
पुष्पहस्तो वारिहस्तस्तैलाभ्यङ्गो जलस्थितः।
आशौचः कर्त्ता नमस्कर्त्ता उभयोर्नरकं भवेत्॥"

इति कर्म्मलोचनम्॥ * ॥

"मातुः पितुः कनीयांसं न नमेद्वयसाधिकः।
नमस्कुर्य्याद्गुरोः पत्नीं बालत्वायां विमातरम्॥"

यमः।

"अभिवादयतः पूर्व्वमाशिषं न प्रयच्छति।
यदुच्छ्वसति भवेत्तस्य तस्याङ्गाग्नं प्रपद्यते॥
स्वस्तीति ब्राह्मणो ब्रूयात् आयुष्मानिति राजनि।
वर्द्धतामिति वैश्येषु शूद्रे व्यारोग्यमेव च॥"

इति मलमासतत्त्वम्॥ * ॥

"गुरुपत्नीन्तु युवतीं नाभिवादयेत पादयोः।
कुर्वीत वन्दनं भूयो भगो वोऽहमिति ब्रुवन्॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्।
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन्॥
अभिवादनशीलः स्यादित्यं वृद्धेषु धर्मतः।
असावहमो नामेति सम्यक् प्रणतिपूर्वकम्॥
आयुरारोग्यविद्यार्थं तन्द्रादिपरिवर्जितः।
आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने॥
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः।
यो न वेत्त्यभिवादस्य द्विजः प्रत्यभिवादनम्।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः॥
सव्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः।
सव्येन सव्यः प्रष्टव्यो दक्षिणेन तु दक्षिणः॥
लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा।
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत्॥
ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु॥"*॥

अभिवादनीया गुरवो यथा,—

"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः।
मातुलः श्वशुरश्चाता मातामहपितामहौ।
बन्धुज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः॥
माता मातामही ज्यैष्ठी पितुर्मातुश्च सोदराः।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियाम्।
इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विजाः॥
अनुवर्त्तनमेतेषां मनोवाक्कायकर्म्मभिः।
गुरून् दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः॥"

इति कूर्म्मपुराणे ११ अध्यायः॥ *॥

अथ सप्रधा नतिलक्षणानि।

"त्रिकोणमथ षट्कोणमर्द्धचन्द्रं प्रदक्षिणम्।
दण्डमष्टाङ्गसञ्ज्ञञ्च सप्रधा नतिलक्षणम्॥
ऐशानी वाथ कौबेरी दिक् कामाख्याप्रपूजने।
प्रशस्ता स्खलितादौ च सर्व्वत्रैव सदा सदा॥
त्रिकोणादित्यवस्थाच्च यदि पूर्व्वसुखो यजेत्।
पश्चिमात् ग्राम्भवीं गत्वा वायव्यां निर्दिशेत्ततः॥
यदोत्तरासुखः कुर्य्यात् साधको देवपूजनम्।
तदा याम्यात्तु वायव्यां गत्वा कुर्य्यात्तु संस्थितिम्॥
दक्षिणाद्यायवीं गत्वा दिशं तस्माच्च ग्राम्भवीम्।
ततोऽपि दक्षिणं गत्वा नमस्कारस्त्रिकोणवत्।
त्रिकोणो यो नमस्कारस्त्रिपुराप्रीतिदायकः॥१॥
दक्षिणाद्यायवीं गत्वा वायव्यात् ग्राम्भवीं ततः।
ततोऽपि दक्षिणं गत्वा तां त्यक्त्वायौ प्रविश्य च॥
अग्नितो राक्षसीं गत्वा ततश्चाप्युत्तरां दिशम्।
उत्तराच्च तथामेयीं भ्रमणं द्विस्त्रिकोणवत्।
षट्कोणो यो नमस्कारः प्रीतिदः शिवदुर्गयोः॥२॥
दक्षिणाद्यायवीं गत्वा तस्माद्वायव्य दक्षिणम्।
गत्वा योऽसौ नमस्कारः सोऽर्द्धचन्द्रः प्रकीर्त्तितः॥३॥
सकृत् प्रदक्षिणं कृत्वा वक्षोलाङ्गतिसाधकः।
नमस्कारः कथ्यतेऽसौ प्रदक्षिण इति द्विजैः॥४॥
त्यक्त्वा स्वमानगन्धानं पश्चात्कृत्वा नमस्कृतिः।
प्रदक्षिणं विना या तु निपत्य भुवि दण्डवत्।
दण्ड इत्यच्यते देवैः सर्व्वदेवौघमोददः॥५॥

पूर्व्ववद्दण्डवद्भूमौ निपत्य हृदयेन तु।
चिबुकेन मुखेनाथ नासया ललिकेन च॥
ब्रह्मरन्ध्रेण कर्णाभ्यां यद्भूमिस्पर्शनं क्रमात्।
तदष्टाङ्ग इति प्रोक्तो नमस्कारो मनीषिभिः॥६॥
प्रदक्षिणत्रयं कृत्वा साधको वक्षोलाकृतिः।
ब्रह्मरन्ध्रेण संस्पर्शः चितेर्यः स्यान्नमस्कृतौ।
स उग्र इति देवीघैरुच्यते विष्णुदृष्टिदः॥७॥
नदानां सागरो यादृग्द्विपदां ब्राह्मणो यथा।
नदीनां जाह्नवी यादृग्देवानामिव चक्रधृक्।
नमस्कारेषु सर्व्वेषु तथैवोग्रः प्रशस्यते॥
त्रिकोणाद्यैर्नमस्कारैः कृतैरेव तु भक्तितः।
चतुर्वर्गं लभेद्भक्तो न चिरादेव साधकः॥
नमस्कारो महाघघ्नः प्रीतिदः सर्व्वतः सदा।
सर्व्वेषामपि देवानामन्येषामपि शैरव!॥
योऽसावुग्रो नमस्कारः प्रीतिदः सततं हरेः।
महामायाप्रीतिकरः स नमस्करणोत्तमः॥"

इति कालीपुराणम्॥

नमस्कारी, स्त्री, (नमस्कारस्तदञ्जलिरिव पत्रमस्त्रोचोऽस्यस्या इति। अच्। गौरादित्वात् ङीष्।) खदिरिकाशाकः। लाजालु इति ख्यात इति केचित्॥ किन्तु रभसेन वराहक्रान्ता लज्जालुः भमङ्गा जलकारिकेति खदिरिकायाम्। सङ्कोचपत्री लज्जालुरिति लज्जालुकायां पठितम्। अञ्जलिरूपपत्रत्वादञ्जलेर्नमस्कारस्यञ्जकत्वात् नमस्कारग्रीवेव नमस्कारी। इत्यमरटीकायां भरतः॥ (यथास्याः पर्य्यायो वैद्यकरत्नमालायाम्।

"गण्डकाली नमस्कारी समङ्गा खदिरी क्षितौ॥")

नमस्यः, त्रि, (नमस्य नामधातुः+कर्म्मणि यत्।) नमस्कारयोग्यः। यथा,—

"स्त्रियो नमस्या वृद्धाश्च वयसा पल्लवेव ताः॥"

इति मलमासतत्त्वम्॥

नमस्या, स्त्री, (नमस्य+भावे यः। स्त्रियां टाप्।) पूजा। इत्यमरः। २। ७। ३५॥

नमस्कृतः, त्रि, (नमःकृतमिति। नमस्+"नमोवरिवः इति।" ३। १। १६। इति क्यच्।) पूजितः। इत्यमरः। ३। १। १०१॥

नमितः, त्रि, (नमोऽस्य जात इतच्प्रत्ययनिष्पन्नः। जातनमस्कारः। नामितः। यथा,—

"अपः शालग्रामाम्लवनगरिमाङ्कारसरसाः
सुधीः को वा कौपीरपि नमितमूर्द्धा न पिबति॥"

इति विदग्धमाधवनाटकम्॥

नमुचिः, पुं, (न मुञ्चतीति। मुच+इन्। स च कित्।) कन्दर्पः। दैत्यभेदः। इति मेदिनी। चे, १४॥ यथा,—

"कश्यपस्य दनुर्नाम भार्य्यासीद्द्विजसत्तम!।
तस्यान्तु द्वौ सुतावास्तां सहस्राच्चाद्बलाधिकौ॥
ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः।
तृतीयो नमुचिर्नाम महाबलसमन्वितः॥"

इति वामने ५२ अध्यायः॥

(इन्द्र एनं निहतवान्। यथा, भारते। ९। ४३। ३३—३६।

"नमुचिर्वासवाज्ञीतः सूर्य्यरश्मिं समाविशत्।
तेनेन्द्रः सख्यमकरोत् समयश्चेदमब्रवीत्॥
न चार्द्रेण न शुष्केण न राज्ञौ नापि चाह्नि।
वधिष्यान्यसुरश्रेष्ठ! सखे! सत्येन ते शपे॥
एवं स समयं कृत्वा दृष्ट्वा नीहारमीश्वरः।
चिच्छेदास्य शिरो राजन्नपां फेनेन वासवः॥
तच्छिरो नमुचेश्छिन्नं दृष्टतः शक्रमन्वयात्।
भो मित्रघ्न! पापेति ब्रुवाणं शक्रमन्तिकात्॥")

नमुचिसूदनः, पुं, (नमुचिं दैत्यविशेषं सूदयतीति। सूदि+ल्युः।) इन्द्रः। इत्यमरः। १। १। ४६॥

नमेरुः, पुं, (नम्यते इति। नम+बाहुलकात् एरुः।) रुद्राक्षः। इति भूरिप्रयोगः॥ सुरपुन्नागः। इति राजनिर्घण्टः॥ (यथा, रघुः। ४। ७४।

"विष्वग्रमुनमेरूणां छायास्वध्यास्य सैनिकाः॥")

नमोगुरुः, पुं, (नमस्करणीयो गुरुः।) नमस्कारैर्गुरुः। ब्राह्मणः। इति काचित् शब्दरत्नावली॥

नम्र, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ओष्ठ्यवर्गीयोपधः। नम्रति। इति दुर्गादासः॥

नम्रः, त्रि, (नमतीति। नम+"नमिकम्पीति।" ३।२।१६७। इति रः।) नतः। इति हलायुधः॥ (यथा, पञ्चतन्त्रे। २। १८६।

"यन्नम्रं सरलञ्चापि तच्चापतरुषु न दृश्यते।
धनुर्भिर्न्नं फलञ्च दुर्लभं शुद्धवंशजम्॥")

नम्रकः, पुं, (नम्र इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) वेतसः। इति भावप्रकाशः॥ (नम्र एव। स्वार्थे कन्।) नते, त्रि॥)

नय, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, नयते। इति दुर्गादासः॥

नयः, पुं, (नीयतेऽनेनेति। नी+"अरच्।" ३।३। ५६। इत्यच्।) नीतिः। तत्पर्य्यायः। नायः २ इत्यमरः। १।२।८॥ (यथा, पञ्चतन्त्रे। १।३८५।

"कथञ्चिन्न विकल्प्यन्ते विद्वद्भिश्चिन्तिता नयाः॥")

द्यूतविशेषः। इति मेदिनी। ये, ३४॥ नैगमादेः। इति हेमचन्द्रः॥ न्याये नेतरि च त्रि। इति शब्दरत्नावली॥

नयनं, क्ली, (नीयते ऽहिविषयोऽनेनेति। नी+करणे ल्युट्।) चक्षुः। इत्यमरः। २। ६। ८३॥ (यथा, मार्कण्डेये। १८। ४०।

"नीलोत्पलाभनयनां पीनश्रोणिपयोधराम्॥")

नी च प्रापणे इत्यस्माद्भावे ल्युट्प्रत्ययः॥ प्रापणम्। (आनयनम्। यथा, हरिवंशे। १२७। ११।

"तत्त्वं हितञ्च देवेश! श्रूयतां वदतो मम।
नयनं पारिजातस्य द्वारकां मम रोचते॥")

नयनी, स्त्री, (नीयतेऽनयेति। नी+करणे ल्युट्+ङीप्।) कनीनी। इति शब्दचन्द्रिका॥

नयनोत्सवः, पुं, (नयनयोरुत्सवो यस्मात्।) प्रदीपः। इति शब्दरत्नावली॥ चक्षुरुत्सवश्च॥

नयनोपान्तः, पुं, (नयनयोरुपान्तः प्रान्तभागः।) अपाङ्गः। इति राजनिर्घण्टः॥

नयनौषधं, क्ली, (नयनयोरौषधम्।) पुष्पकासीसम्। इति हेमचन्द्रः। ४।१२३॥

नयपीठी, स्त्री, (नयस्य पीठीव।) अष्टकाङ्गम्। इति चिकाङ्कशेषः॥ ढक् इति भाषा॥

नयविशारदः, पुं, (नये नीतौ विशारदो विज्ञः।) नीतिशास्त्रज्ञः। यथा,—

"षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः।
सान्धिविग्रहिकः कार्य्यो राज्ञा नयविशारदः॥"

इति मात्स्ये ८६ अध्यायः॥

नरं, क्ली, (नृणाति प्रापयति आनन्दमिति। नृ प्रापणे+अच्।) रामकर्पूरलवणम्। इति मेदिनी। रे, ५२॥

नरः, पुं, (नृणातीति। नृ+अच्।) मनुष्यः। इत्यमरः। २।६।१॥ (यथा, मनुः।१।६६।

"बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः॥")

पुरुषः। इति राजनिर्घण्टः॥ (यथा, देवीभागवते।५।२।१४।

"यदा कदापि दैत्येन्द्र! नार्य्यास्ते मरणं ध्रुवम्।
न नरेभ्यो महाभाग! मृतिस्ते महिषासुर!॥")

विष्णुः। (महादेवः। यथा, महाभारते। १३।१७।११५।

"गान्धारश्च सुवासश्च तपःसक्तो रतिर्नरः॥")

अर्জ্জুनः। इति मेदिनी। रे, ५२॥ (नरसुनेरंशजातत्वादस्य तथात्वम्।) शुक्रः। इति लीलावती॥*॥ अथ नरजन्मकारणम्। "पितुः शुक्रोत्तरो नरः॥" अन्यच्च। सुखबोधे।

"विषमायां तिथौ क्षिप्रं कुर्य्याद्बीजन्तु कन्यकाम्।
समायां पुरुषं नूनं केचिदाहुर्मनीषिणः॥
चतुरश्रीकृतिस्थान्ते गोजन्मा तत्परं नरः।
ततस्तु ब्राह्मणश्च स्यादभयं नात्र संशयः॥"

इति पाद्मोत्तरखण्डे १५ अध्यायः॥

(स्वनामख्यातो हरेरंशभूतो धर्म्मपुत्रःऋषिः। यथा, देवीभागवते। ४।५।१५।

"हरेरंशौ स्थितौ तत्र नरनारायणावृषी।
पूर्णे वर्षसहस्रन्तु चक्राते तप उत्तमम्॥"

अस्य विवरणन्तु तत्रैव विशेषतो द्रष्टव्यम्॥*॥ देवयोनिविशेषः। यथा, विष्णुपुराणे।१।५।५८।

"नरकिन्नररक्षांसि वयःपशुमृगोरगान्॥")

नरकः, पुं, (नृणाति क्लेशं प्रापयतीति। नृ+"ऋणादिभ्यः संज्ञायां वुन्।" उणा०।५।३५। इति वुन्।) देवरातिप्रभेदः। इत्युणादिकोषः॥ (नरस्य मनुष्यस्य कं शिरो यत्र।) दैत्यविशेषः। स पृथिव्या गर्भे वराहदेवाज्जातः। यथा,—

"रसातलाया गोत्राया गर्भे वीर्य्येण पोषितः।
यतो जातस्ततो भूतो देवपुत्रोऽपि सोऽसुरः॥"

तस्य नामकारणं यथा,—

"मानुषस्य शिरस्तच्च पतितस्य प्राग्य बालकः।
स्वशिरस्तच्च विन्यस्य रुदंस्तस्थौ चयं तदा॥
नरस्य शीर्षे स्वशिरो निधाय स्थितवान् यतः।
तस्मात्तस्य मुनिश्रेष्ठो नरकं नाम वै ददात्॥"

तस्य राज्यं यथा,—

श्रीभगवानुवाच।

"करतोया सदागङ्गा पूर्व्वभागावधिश्रिता।
यावल्ललितकान्तास्ति तावद्देयं पुरं तदा॥
अत्र देवी महामाया योगनिद्रा जगत्प्रसूः।
कामाख्यारूपमादाय सदा तिष्ठति शोभना॥
अत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुतः।
अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः॥
अत्र स्वयं महादेवो ब्रह्मा चाहञ्च सर्व्वदा।
चन्द्रः सूर्य्यश्च सततं वसतेऽत्रैव पुत्रक!॥
सर्व्वे क्रीड़ार्थमायाता रहस्यं देशमुत्तमम्।
अत्र श्रीः सर्व्वतोभद्रा भोग्यमत्र सदा बहु॥
अत्रैव हि स्थितो ब्रह्मा प्राङ्मुखश्चैत्र संसर्ज्ज ह।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥
अत्र त्वं वस भद्रन्ते ह्यभिषिक्तो मया स्वयम्।
ह्यतदारः सहामात्यो राजा भूत्वा महाबल!॥"

तस्य महिषी माया यथा,—

"ततो विदर्भराजस्य पुत्रीं मायाख्यां हरिः।
पुत्रार्थे वरयामास नरकस्य समां गुणैः॥
तासुद्वाह्य स्वयीकैश्च सुतस्तिन् पुरवरे स्वयम्।
तया समं स्वतनयं राजत्वेनाभ्यषेचयत्॥"

तस्य पुत्रा यथा,—

"ऋतुमत्याञ्च जायायां कालेन नरकः क्रमात्।
भगदत्तं महाशीर्षं मदवन्तं सुमालिनम्॥
चतुरो जनयामास पुत्रांस्तांश्च क्षितेः सुतः।
महासत्त्वान् महावीर्य्यान् देवैरप्यर्दुरासदान्॥"

इति कालीपुराणे ३६ अध्यायः॥

पापिनां यातनास्थानम्। तत्सङ्ख्या यथा,—

"पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम्।
सुचिरं तानि कथ्यन्ते भुवनानि चतुर्दश॥
अष्टाविंशतिः विख्यातास्ततो नरककोटयः।
नरकाणामधस्तात्तु घूमः कालाग्निसम्भवः॥
तस्याधस्तादनन्ताख्यो रुद्रः सर्व्वमयो महान्।
तदधो धर्म्मचक्रन्तु येनेदं धार्य्यते जगत्॥"

इति वह्निपुराणे नरकभेदनामाध्यायः॥

तत्पर्य्यायः। गारकः २ निरयः ३ दुर्गतिः ४। इत्यमरः।१।६।१॥*॥ नरकसंख्या यथा,—

"उर्ध्वोर्द्ध नरकाः शक्र! कोट्यः पञ्चाशदायताः।
चत्वारिंशच्चिताः तेषां प्रधानं तन्निबोधत॥"
उर्ध्वोर्द्धे पातालेकालाग्निरुद्रस्य पुरोर्द्धे।
"अवीचिः कृमिभक्षश्च तथा वैतरणी महान्।
कूटशाल्मलिरुक्षासयुग्मपर्व्वतरौरवम्॥
निरुच्छ्वासः पूतिमांसस्तप्तलोहाग्निसंचितं जलम्।
क्रकच्छेदस्तथा पङ्कः कषायसमुतापिवम्॥
पूतिपूर्णस्तथा मेदस्तप्तश्च रुधिरं वसा।
तामिस्रस्तप्तदुष्टश्च तीक्ष्णासिश्च नपुंसकः।
लौहतप्तस्त्रियो भीमा अङ्गारराशिकोपरि।
कुम्भीपाकः क्षुरस्रोतः सञ्जीवनसुतापनम्॥
कालसूत्रं महापङ्कः शीतोष्णं क्षुरमेव च।
अम्बरीषं तथा घोरं महारौरवसंज्ञकः॥
सूचीमुखेक्षुयन्त्रञ्च तैलं तप्तञ्चपुस्तथा।
असिपत्रं तथा शाल्मं भूमिर्वागपहारिका॥"

इति देवीपुराणम्॥

नरकागामिनो यथा,—

यम उवाच।

"न गच्छन्ति नरा घोरान् बहवोऽधर्म्मनिर्म्मितान्।
वधांश्च सुबहूंश्चैव प्राप्नुवन्ति तपोधन!॥
विस्तरेण तु तत् सर्व्वं ब्रवीमि मुनिसत्तम!।
श्रूयतां तन्महाभाग! श्रुत्वा चैवोपधारय॥
नाग्निचित्तरकं याति न सत्पुत्री न भूमिदः।
शूरश्च श्रुतवर्ष्मा च वेदानाञ्चैव पारगः॥
पतिव्रता न गच्छन्ति सत्यवाक्याश्च ये नराः।
अजिताश्चाप्रहृष्टाश्चैव स्वामिभक्ताश्च ये नराः॥
तिलं गाञ्च हिरण्यञ्च पृथिवीञ्चापि शाश्वतीम्।
ब्राह्मणेभ्यः प्रयच्छन्ति न गच्छन्ति न संशयः॥
स्वदारनिरता दान्ताः परदारविवर्ज्जकाः।
सर्व्वभूतात्मभूताश्च सर्व्वभूतानुकम्पकाः॥
न गच्छन्ति तु तं देशं पापिष्ठं तमसावृतम्।
यातनास्थानसंपूर्णं हाहाप्रतिभयस्वनम्॥
ज्ञानवन्तो द्विजा ये च ये च विद्यापरं गताः।
उदासीना न गच्छन्ति स्वार्थे च हता नराः॥
न गच्छन्त्यत्र दातारः सर्व्वभूतहिते रताः।
शुश्रूषका मातृपित्रोर्न गच्छन्ति न संशयः॥
अहिंसका न गच्छन्ति ब्रह्मचर्य्यव्यवस्थिताः।
पतिव्रता दानवन्तो द्विजभक्ताश्च ये नराः॥
यथोक्तं यजमानाश्च सत्रयाजिन एव च।
चातुर्म्मास्यकरा ये च ये द्विजा आहिताग्नयः॥
गुरुचित्तानुपालाश्च क्षतिनो मौनयन्त्रिताः।
नित्यस्वाध्यायिनो दान्ताः सदा सभ्याश्च ये नराः॥
मानदान् पूजयन्तो वै आत्मभावेन भाविताः।
अपर्व्वमैथुना ये च न गच्छन्ति द्विजोत्तमाः॥
ब्राह्मणा अमरत्वञ्च प्राप्नुवन्ति न संशयः।
निराशाः सर्व्वकामेभ्यो निराशाः सुजितेन्द्रियाः।
न गच्छन्ति हि तं घोरं यत्र ते पापकर्म्मिणः॥"

इति वराहपुराणम्॥*॥

नरकगामिनो यथा,—

नारद उवाच।

"दुष्कर्म्माण्यपि वक्ष्यामि नरकं यैः प्रयान्ति हि।
सर्व्वेष्वेव तु कार्य्येषु देवपूर्व्वेषु भूमिप!॥
हन्ति पुत्रान् पशून् क्षत्रान् ब्राह्मणातिक्रमः कृतः।
गुर्व्वर्थं वा भयार्त्तो वा वर्ज्जयित्वा महीपते!॥
योऽनृतं कथयत्यत्र स ते वै निरयगामिनः।
प्रपाणाञ्च सभानाञ्च संक्रमाणाञ्च भारत!।
आगाराणाञ्च भेत्तारो नरा निरयगामिनः॥
ये परस्वापहर्त्तारः परस्वानाञ्च नाशकाः।
सूचकाश्च परेषां हि ते नरा नरकाशुगाः॥
सूचकाः सन्धिभेत्तारः परदत्तप्रणीविनः।

व्रतघ्नाश्च मित्राणां ते वै निरयगामिनः ॥
पाषण्डा दूषकाश्चैव समयानाञ्च दूषकाः ।
ये प्रत्यवस्थितास्चैव ते वै निरयगामिनः ॥
दृत्तिक्लेदं गृहक्लेदं दानक्लेदञ्च पार्थिव ! ।
मित्रक्लेदं तथाज्ञायाः कृत्वा नरकगामिनः ॥
विषमव्यवहाराश्च विषमाश्चैव वृद्धिषु ।
लाभेषु विषमाश्चैव नरा निरयगामिनः ॥
कृताग्रं कृतनिर्व्वेशं कृतभक्तं कृतश्रमम् ।
भृत्यैर्यै यवकर्षन्ति ते वै निरयगामिनः ॥
द्यूतसंव्यवहाराश्च निष्परीक्षाश्च मानवाः ।
प्राणिहिंसाप्रसक्ताश्च ते वै निरयगामिनः ॥
वेदविक्रयिणश्चैव वेदानाञ्चैव दूषकाः ।
वेदानां लेखकाश्चैव ते वै निरयगामिनः ॥
केशविक्रायकाः राजन् ! विषविक्रायकाश्च ये ।
क्षीरविक्रायकाश्चैव ते वै निरयगामिनः ॥
धातुराश्रम्यवाह्याश्च श्रुतिवाह्याश्च ये नराः ।
विकर्म्मभिश्च जीवन्ति ते वै निरयगामिनः ॥
ब्राह्मणानां गवाञ्चैव कन्यानाञ्च ग्रहामते ! ।
येऽन्तरं यान्ति कार्य्येषु ते वै निरयगामिनः ॥
ग्राम्यविक्रायकाश्चैव कर्त्तारश्च महीपते ! ।
शल्यानां धनुषाञ्चैव ते वै निरयगामिनः ॥
शिलाभिः शस्त्रभिर्व्वापि श्वभ्रैर्व्वा मनुजर्षभ ! ।
ये मार्गमनुरुन्धन्ति ते वै निरयगामिनः ॥
अगोप्तारश्च राजानो बलिषड्भागतस्कराः ।
समर्थाश्चाप्यदातारस्ते वै निरयगामिनः ॥
श्रान्तान् दान्तानथ प्रश्नान् दीर्घकालसहोषितान् ।
त्यजन्ति कृतलक्ष्या ये ते वै निरयगामिनः ॥
बालानामथ वृद्धानां दासानाञ्चैव ये नराः ।
अदत्त्वा भक्षयन्त्यग्रे ते वै निरयगामिनः ॥
इत्येतत् कथितं राजन् ! धर्म्माधर्म्मैविनिश्चयम् ।
विज्ञाय पुरुषः कर्म्म धर्म्ममेव समाचरेत् ॥"

इति पाद्मे स्वर्गखण्डे ३४ अध्यायः ॥

नरकविशेषगामिपापिनो यथा,—

"कूटसाक्षी तथा सम्यक् पक्षपातेन यो वदेत् ।
यश्चान्यदृतं वक्ति स नरो याति रौरवम् ॥
भ्रूणहा पुरुषज्ञश्च गोघ्नश्च सुनिश्चितम् ! ।
यान्ति ते नरके रोधे यश्चोच्छ्वासनिरोधकः ॥
सुरापो ब्रह्महा स्तेयी गुरुतल्पस्य च शूकरे ।
प्रयाति नरके यश्च तैः संसर्गमुपैति वै ॥
राजन्यवैश्यहा तालं तथैव गुरुतल्पगः ।
तप्तकुम्भे खड्गगामी हन्ति राजभटांश्च यः ॥
साध्वीविक्रयकृद्ध्यपाः केशरिविक्रयी ।
तप्तलौहे तु पच्यन्ते यश्च भक्तं परित्यजेत् ॥
'केशरी अश्वः ।'
क्रुद्धो सुताञ्चापि गत्वा महाज्वाले निपात्यते ।
अवमन्ता गुरूणां यो यश्चाक्रोशे नराधमः ॥
वेददूषयिता यश्च वेदविक्रायकश्च यः ।
अगम्यागामी यश्च स्यात्ते यान्ति रौरवं द्विज ! ॥
चौरो विमोदे पतति मर्य्यादादूषकस्तथा ।
देवद्विजपितॄन् द्वेष्टा रत्नदूषयिता च यः ॥
स याति क्षमिभक्षे वै क्षमीशे च दुरिष्टकृत् ॥
पिष्टदेवातिथीन् यस्तु पर्य्यश्नाति नराधमः ।
लाभाभक्षे स याम्यस्य प्रेरकर्त्ता च रोधके ॥"
'पर्य्यश्नाति परित्यज्य आदौ भुङ्क्ते ।'
करोति कर्णिनो यस्तु यस्तु खड्गादिलेखकः ॥
प्रयान्ति ते विशसने नरके भृशदारुणे ।
असत्प्रतिग्रहीतारो नरके यान्त्यधोमुखे ॥
अयाज्ययाजकश्चैव तथा नक्षत्रसूचकः ।
वेगी पूयवहश्चैको याति मिष्टान्नभुङ्नरः ॥
'वेगी साहसकारी । पुत्रादीन् वर्ज्जयित्वा एक एव मिष्टान्नभुक् ।'
लाक्षामांसरसानाञ्च तिलानां लवणस्य च ।
विक्रेता ब्राह्मणो याति तमेव नरकं द्विज ! ॥
माञ्जारकुक्कुटच्छागान् श्वराहविहङ्गमान् ।
पालयन्नरकं याति तमेव द्विजसत्तम ! ॥
रङ्गोपजीवी कैवर्त्तः कुक्कुटी गरदस्तथा ।
क्षत्री माहिषकश्चैव पर्व्वकारी च यो द्विजः ॥
'पल्वौ जीवति जाराज्ञातः कुक्कः तदन्नभोजी माहिषो महिषोपजीवी । यद्वा,—
महिषीयुध्यते भार्य्या भगिनीपार्ज्जितं धनम् ।
उपजीवति यस्तस्याः स वै माहिषकः स्मृतः ॥
इति स्मृतिः ॥
पर्व्वकारी धनादिलोभेनापर्व्वसु अमावास्यादिक्रियाप्रवर्त्तकः ।'
अगारदाही मित्रघ्नः ग्रामनिर्ग्रामयाजकः ।
रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये ॥
मधुहा ग्रामहन्ता च याति वैतरणीं नरः ।
रेतःपानादिकर्त्तारो मर्य्यादाभेदिनश्च ये ॥
ते क्षया यान्त्यशौचाश्च कुहकाजीविनश्च ये ।
असिपत्रवनं याति वनच्छेदी वृथैव यः ॥
औरभ्रिको ग्रामयाधी वह्निज्वाले पतन्ति वै ।
यान्त्येते द्विज ! तत्रैव यत्रापाकेषु वह्निदः ॥
व्रतेषु लोपको यश्च स्वाश्रमाद्विच्युतश्च यः ।
सन्दंशयातनामध्ये पततस्तावुभावपि ॥
दिवास्वप्नेषु स्वप्न्ति ये नरा ब्रह्मचारिणः ।
पुत्रैरध्यापिता ये च ते पतन्ति श्वभोजने ॥
एते चान्ये च नरकाः शतशोऽथ सहस्रशः ।
येषु दुष्कृतकर्म्माणः पच्यन्ते यातनागताः ॥
तत्रैव पापान्येतानि तथान्यानि सहस्रशः ।
भुज्यन्ते यानि पुरुषैर्नरकान्तरगोचरैः ॥
वर्णाश्रमविरुद्धञ्च कर्म्म कुर्व्वन्ति ये नराः ।
कर्म्मणा मनसा वाचा निरयेषु पतन्ति वै ॥
अधःशिरोभिर्द्रश्यन्ते नारकैर्हि दिवि देवताः ।
देवाश्चाधोमुखान् सर्व्वानधःपश्यन्ति नारकान् ॥
स्थावराः क्रमयोऽलाश्च पक्षिणः पशवो नराः ।
धार्म्मिकाश्चिदशास्तद्वन्मोचिताश्च यथाक्रमम् ॥
सहस्रभागाः प्रथमा द्वितीयाद्युक्रमास्तथा ।
सर्व्वे ह्येते महाभाग ! यावन्मुक्तिसमाश्रयाः ॥
यावन्तो जन्तवः स्वर्गे तावन्तो नरकौकसः ।
पापक्षयात् यान्ति नरकं प्रायश्चित्तपराङ्मुखः ॥"

इति विष्णुपुराणे । २ । ६ । ७—१२ ॥

अपि च ।

"कथयामि विचित्राणां कर्म्मणां विविधा गतीः ।
ता ग्रृणुष्व महाराज ! याः श्रुत्वा मोक्षमाप्नुयात् ॥
परवित्तं परापत्यं कलत्रं पारकञ्च यः ।
हरते बुद्धिमोहेन सोऽन्धे तमसि मज्जति ॥
कालपाशेन संबद्धो यमदूतैर्महाबलैः ।
तामिस्रे पात्यते तावत् यावद्वर्षसहस्रकम् ॥
तत्र ताड़नसम्भूताः कुर्व्वन्ति यमकिङ्कराः ।
पापभोगेन सम्भक्तस्ततो योनिन्तु शौकरीम् ॥
तत्र भुक्त्वा महादुःखं मानुषत्वं गमिष्यति ।
रोगादिचिह्नितं तत्र दुर्यशोग्राहकं सकम् ॥
भूतद्रोहं विधायैवं केवलं सकुटुम्बकम् ।
पुष्णाति पापनिरतः सोऽन्धतामिस्रके पतेत् ॥
ये नरा इह जन्तूनां वधं कुर्व्वन्ति वै मृषा ।
ते रौरवे निपात्यन्ते खाद्यन्ते रुरुभिर्भृशम् ॥
यः खादरार्थं भूतानां वधमाचरति स्फुटम् ।
महारौरवसंज्ञे तु पात्यते स यमाज्ञया ॥
यो वै निजन्तु जनकं ब्राह्मणं हन्ति पापकृत् ।
कालसूत्रे महादुष्टे योजनायतविस्तृते ॥
यावन्ति पशुरोमाणि गवां हिंसं करोति यः ।
तावद्वर्षसहस्राणि पच्यते यमकिङ्करैः ॥
यो भूमौ भूपतिर्भूत्वा दण्डायोग्यन्तु दण्डयेत् ।
करोति ब्राह्मणस्यापि देहदण्डं विलोलुपः ।
स शूकरमुखैर्दुष्टैः पीड्यते यमकिङ्करैः ॥
पश्चाद्दासु योनीषु जायते पापसञ्चये ।
ब्राह्मणानां गवां ये तु हृत्वं वित्तं तथाल्पकम् ॥
वृत्तिं वा हरते मोहाद्भ्रम्यन्ति खबलान्नराः ।
ते परान्नान्यकूपे च पात्यन्ते च महार्हिताः ॥
योऽर्थं स्वयमुपाहृत्य मधुरत्वात्ति लोलुपः ।
न देवाय न गुरुवे ददाति रसनातुरः ॥
स पतत्येव नरके क्षमिभोजनसंज्ञके ।
अनापदि नरो यस्तु हिरण्यादीनपाहरेत् ॥
ब्रह्मस्वं वा महादुष्टः स दंशे नरके पचेत् ।
यः स्वदेहं प्रपुष्णाति नान्यं जानाति मूढधीः ॥
मनसा कल्पितं द्रव्यं विदुषे यो ददाति न ।
स पुमान्नरकं याति यावदिन्द्राश्चतुर्दश ॥
पश्चाद्दासु योनीषु जायते वर्णसङ्करः ।
दानानि वाड़वे दत्त्वा पुनः शुद्धो भविष्यति ॥
वाचा दत्तं मनोदत्तमिति साधं वदेद्यदि ।
कल्पन्ते पितरस्तस्य नरकाय मृतसूकाः ॥
वाचा दत्तं मनोदत्तं दत्तं प्राणिकृशोदकम् ।
एतद्दत्तमदत्तं स्यात् जिह्वामृत्पाटयेद्यमः ॥
स याचते तैलतप्ते कुम्भीपाकेऽतिदारुणे ॥
यो गच्छेत् स्त्रियं मोहाद्योषिद्भावाच्च कामयेत् ।
तं तया किङ्करः मूर्च्छा परिवहन्च कुर्व्वते ॥
ये बलादेहमर्य्यादां लुम्पन्ति खबलोद्धताः ।
ते वैतरण्यां पतिता मांसशोणितभक्षकाः ॥
दुर्बलीं यः स्त्रियं कृत्वा तया गार्हस्थ्यमाचरेत् ।
पूयोदे निपतत्येव महादुःखसमन्वितः ॥
ये दम्भनाश्रयन्ते वै धूर्त्ता लोकस्य वञ्चने ।
वैशसे नरके मूढाः पतन्ति यमताड़िताः ॥
ये सवर्णां स्त्रियं मूढाः पाययन्ति स्वतेजसम् ।

रेतःकुल्यासु ते पाल्या रेतःपानेषु तत्पराः ॥
ये चौरा वह्निना दग्धा गरदा ग्रामलुण्ठकाः ।
सारमेयादने ते वै पात्यन्ते पातकान्विताः ॥
कूटसाक्ष्यं वदत्यद्धा पुरुषः पापसम्भृतः ।
पारकीयन्तु द्रव्यं यो रुचति प्रसभं बली ॥
स वीचिनरके पापे ह्यवाक्शृङ्गः पतत्यधः ।
तत्र दुःखं महद्भुङ्क्ते पापिष्ठां योनिमाव्रजेत् ॥
यो नरो रसनास्वादात् सुरां पिबति मूढधीः ।
तस्यायस्यति लोहस्य रसं धर्म्मस्य किङ्करः ॥
यो गुरूनवमन्येत स्वविद्याचारदर्पितः ।
स मृतः पात्यते घोरसंज्ञके ऽधोमुखः पुमान् ॥
विश्वासघातं कुर्व्वन्ति ये नरा धर्म्मनिष्कृताः ।
शूलप्रोते तु नरके पात्यन्ते बहुयातनाः ॥
येनैतं श्रुता रामकथा न परोपहृतिः कृता ।
तेषां सर्व्वाणि दुःखानि भवन्ति नरकान्तरे ॥
अत्र यस्य सुखं भूयस्तस्य स्वर्गं इतीर्य्यते ।
ये दुःखिनो रोगयुता नरकादागतास्तु ते ॥"

इति पाद्मे पातालखण्डे ४८ अध्यायः ॥

(अथ महारौरवादिनरकाख्यानम् । यथा, मार्कण्डेये । १२ । ३-३६ ।

पुत्र उवाच ।

"रौरवस्ते समाख्यातः प्रथमं नरको मया ।
महारौरवमज्ञन्तु शृणुष्व नरकं पितः ! ॥
योजनानां सहस्राणि सप्त पञ्च समन्ततः ।
तत्र ताम्रमयी भूमिरधस्तस्य हुताशनः ॥
तप्तायतप्ता सर्व्वाशा प्रोद्दिप्तसमप्रभा ।
विभात्यति महारौद्रा दर्शनस्पर्शनादिषु ॥
तस्यां वहः करास्याश्च पक्षाश्चैव यमानुगैः ।
क्षिप्यते पापसङ्घस्थो लुठमानः स गच्छति ॥
काकैर्व्वृकैर्व्वृकोलूकैर्व्वृश्चिकैर्म्मशकैस्तथा ।
भक्ष्यमाणस्तथा गृध्रैर्दुःखं मार्गे विलप्यते ॥
दह्यमानः पितर्मातर्भ्रातस्तातेति चाकुलः ।
वदत्यसकृदुद्विग्नो न शान्तिमधिगच्छति ॥
एवं तस्मान्नरे मोक्षो ह्यतिक्रान्तैरवाप्यते ।
वर्षायुतायुतैः पापं यैः कृतं दुरनुद्विभिः ॥
तथान्यस्तु तमो नाम सोऽतिशीतः स्वभावतः ।
महारौरववद्घोरस्तथा स तमसा वृतः ॥
शीतार्त्तांस्तत्र धावन्तो नरास्तमसि दारुणे ।
परस्परं समासाद्य परिरभ्याश्रयन्ति च ॥
दन्तास्तेषाञ्च भज्यन्ते शीतार्त्तिपरिकम्पिताः ।
क्षुत्तृष्णा प्रबला तत्र तथैवान्येष्युपद्रवाः ॥
हिमखण्डवहो वायुर्भिनत्त्यस्थीनि दारुणः ।
मज्जाहृग्गलितन्तस्मादश्नुवन्ति क्षुधान्विताः ॥
लेलिह्यमाना भाष्यन्ते परस्परसमागमे ।
एवं तत्रापि सुमहान् क्लेशस्तमसि मानवैः ॥
प्राप्यते ब्राह्मणश्रेष्ठ ! यावद्दुष्कृतसंक्षयः ॥
निष्क्रान्त इति ख्यातस्ततोऽन्यो नरकोत्तमः ।
तस्मिन् कुलालचक्राणि भ्राम्यन्त्यविरतं पितः ! ॥
तेष्वारोप्य निक्षिप्यन्ते कालसूत्रेण मानवाः ॥
यमानुगाङ्गुलिस्थेन व्यापादतलमस्तकम् ।
नचैषां जीवितभ्रंशो जायते द्विजसत्तम ! ॥
छिद्यन्ते तेषां शतशः खण्डान्येवं व्रजन्ति च ।
एवं वर्षसहस्राणि छिद्यन्ते पापकर्म्मिणः ॥
तावद्यावदशेषं वै तत्पापं हि क्षयं गतम् ।
अप्रतिष्ठश्च नरकं शृणुष्व गदतो मम ॥
यत्रस्थैर्नारकैर्दुःखमसह्यमनुभूयते ।
तान्येव तत्र चक्राणि घटीयन्त्राणि चान्यतः ॥
दुःखस्य हेतुभूतानि पापकर्म्मकृतां नृणाम् ।
चक्रेष्वारोपिताः केचिद्भ्राम्यन्ते तत्र मानवाः ॥
यावद्वर्षसहस्राणि न तेषां स्थितिरन्तरा ।
घटीयन्त्रेषु चैवान्यो वह्नस्तोये यथा घटी ॥
भ्राम्यन्ते मानवा रक्तसृक्किरन्तः पुनः पुनः ।
असेर्मुखविनिष्क्रान्तैर्नेत्रैश्चैरसुविलम्बिभिः ॥
दुःखानि ते प्राप्नुवन्ति यान्यसह्यानि जन्तुभिः ॥
व्यसिपत्रवनं नाम नरकं शृणु चापरम् ।
योजनानां सहस्रं यो ज्वलदग्न्यातपावनिः ॥
तप्ताः सूर्य्यकरैश्चण्डैर्यत्रातीव सुदारुणैः ।
प्रपतन्ति सदा तत्र प्राणिनो नरकौकसः ॥
तन्मध्ये च वनं रम्यं क्षिप्तपत्रं विभाव्यते ।
पत्राणि तत्र खड्गानां फलानि, द्विजसत्तम ! ॥
श्वानश्च तत्र सबलाः खगन्त्ययुतशोभिताः ।
महावक्त्रा महादंष्ट्रा व्याघ्रा इव भयानकाः ॥
ततस्तद्वनमालोक्य श्रिश्रिरक्षायमथतः ।
प्रयान्ति प्राणिनस्तत्र तीव्रदुःखपरिपीड़िताः ॥
हा मातर्हा तात ! इति क्रन्दन्तोऽतीव दुःखिताः ।
दह्यमानाङ्घ्रियुगला धरणीस्थेन वह्निना ॥
तेषां गतानां तत्रासिपत्रपातोसमीरणः ।
प्रवाति तेन पात्यन्ते तेषां खड्गान्यधोपरि ॥
ततः पतन्ति ते भूमौ ज्वलत्पावकसञ्चये ।
लेलिह्यमाने चान्यत्र व्याघ्राग्नेयमहौतसे ॥
सारमेयास्ततः शीघ्रं घातयन्ति शरीरतः ।
तेषामङ्गानि रक्तामनेकान्यतिभीषणाः ॥
असिपत्रवनं तात ! मयैतत् कीर्त्तितं तव ।
अतः परं भीमतरं तप्तकुम्भं निबोध मे ॥
समन्ततस्तप्तकुम्भा वह्निज्वालासमावृताः ।
ज्वलदग्निचयोद्दीप्ततेजायचूर्णपूरिताः ।
तेषु दुष्कृतकर्म्माणो यान्ति; क्षिप्ता ह्यधोमुखाः ॥
क्राथ्यन्ते विस्फुटद्गात्रगलच्चर्म्मजलाविलाः ।
स्फुटत्कपालनेत्रास्थिक्षिद्यमाना विभीषणैः ॥
यत्रैरुत्पाद्य सुथ्यन्ते पुनस्तेष्वेव वेगितैः ।
पुनः सिमसिमायन्ते तैलेनैवं व्रजन्ति च ॥
द्रवीभूतैः शिरोगात्रचक्षायुमांसत्वगस्थिभिः ।
ततो याम्यैर्नरैराशु दर्व्या घट्टनघट्टिताः ॥
क्षतावर्त्ते महातैले भक्ष्यन्ते पापकर्म्मिणः ।
एष ते विस्तरेणोक्तस्तप्तकुम्भो मया पितः ! ॥")

नरककुण्डं, क्ली, (नरकस्य कुण्डम् ।) यातनास्थानम् । तदुयथा, यम उवाच । "नरकाणाञ्च कुण्डानि सन्ति नानाविधानि च । नानापुराणभेदेन नामभेदानि तानि च ॥ विस्तृतानि गभीराणि क्लेशदानि च जीविनाम् । भयङ्कराणि घोराणि हे वत्से ! कुत्सितानि च ॥ षड्शीतिञ्च कुण्डानि संयमन्याञ्च सन्ति च । निबोध तेषां नामानि प्रसिद्धानि श्रुतौ सति ॥" इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । २७ । २८ अध्यायौ ॥

तत्र नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिनः	
वह्निकुण्डम्	१	कटुवाचा वान्धवदग्धकृत्	१
तप्तकुण्डम्	२	ब्राह्मणातिथिभोजनाप्रदः	२
क्षारकुण्डम्	३	निषिद्धदिने वस्त्रे क्षारसंयोजकः	३
विट्कुण्डम्	४	ब्रह्मदत्तापहारकः	४
मूत्रकुण्डम्	५	परतडागं खनित्वोत्सर्ज्जकः	५
श्लेष्मकुण्डम्	६	एकाकी मिष्टभोजी	६
गरकुण्डम्	७	पिष्टमाल्यगुरुभार्य्याद्यघोषकः	७
दूषिकाकुण्डम्	८	अतिथिं दृष्ट्वा वक्रचक्षुःकारी	८
वसाकुण्डम्	९	विप्राय दत्त्वा तद्द्रव्यमन्यस्मै दाता	९
शुक्रकुण्डम्	१०	परस्त्रीगामी परपुंगामिनी च	१०
असृक्कुण्डम्	११	गुर्व्वादिताड़कस्तद्रक्तपातकारकश्च	११
अश्रुकुण्डम्	१२	हरिसङ्गीतरुदन्नायन्नृदभक्तोपहासकृत्	१२
गात्रमलकुण्डम्	१३	शून्यदृग्दुष्टचित्तः खलताकारी च	१३
कर्णविट्कुण्डम्	१४	बधिरोपहासकृत्	१४
मज्जकुण्डम्	१५	लोभात् स्वभोजनार्थं जीवहन्ता	१५
मांसकुण्डम्	१६	अर्थलोभात् कन्याविक्रायकः	१६
नखकुण्डम्	१७	आह्नोपवासादिषु संयमत्यागी	१७
लोमकुण्डम्	१८		१८
केशकुण्डम्	१९	सकेशपार्थिवश्विवलिङ्गार्चकः	१९
अस्थिकुण्डम्	२०	विष्णुपदे पिण्डपिण्डादाता	२०
ताम्रकुण्डम्	२१	गुर्व्विणीगामी	२१
लौहकुण्डम्	२२	ऋतुस्नातावीरयोरन्नभुक्	२२
तीक्ष्णकण्टककुण्डम्	२३	कटुवाचा स्वामिताड़िका	२३
विषकुण्डम्	२४	विषेण जीवनहन्ता	२४
धर्म्मकुण्डम्	२५	सधर्म्महरणेन देवद्रव्यस्वर्णहृत्	२५
तप्तसुराकुण्डम्	२६	शूद्रानुज्ञातः शूद्रान्नभोजी	२६
प्रतप्ततैलकुण्डम्	२७	दर्शने द्यूतताड़कः	२७
कुन्तकुण्डम्	२८	कुन्तलौहवर्द्धिश्चौर्य्यहन्ता	२८
क्षमिकुण्डम्	२९	मत्स्यासृग्विप्रो दृथामांसासृक् हरिनैवेद्यासृक् च	२९

नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिनः
पूयकुण्डम्	३०	शूद्रयाजी तत्राद्धभुक् तच्छवदाही च ब्राह्मणः ३०
सर्पकुण्डम्	३१	श्रीकृष्णपदचिह्नमस्तकस्थ सर्पस्य हन्ता ३१
मग्नकुण्डम्	३२	विधिं दत्त्वा क्षुद्रजन्तुहन्ता ३२
दंशकुण्डम्	३३	विधिं दत्त्वा जीवहन्ता ३३
गरलकुण्डम्	३४	मक्षिकां हत्वा मधुग्राही ३४
वज्रदंष्ट्रकुण्डम्	३५	अदण्डविप्रयोर्हन्ता ३५
वृश्चिककुण्डम्	३६	अर्थलोभात् प्रजादण्डकृत् ३५
शूरकुण्डम्	३७	शूस्त्रधारी धावकः सन्ध्याहरिभक्तिहीनश्च ब्राह्मणः ३७
शूलकुण्डम्	३८	३८
खड्गकुण्डम्	३९	३९
गोलकुण्डम्	४०	अल्पदोषेण कारायां प्रजाबन्धनकृत् ४०
नक्रकुण्डम्	४१	जलादुत्थितनक्रादि हन्ता ४१
काकुण्डम्	४२	कामेन परस्त्रीवधः श्रोत्रियास्यहर्ता ४२
सन्धानकुण्डम्	४३	स्वर्णचौरः ४३
वालकुण्डम्	४४	ताम्रलौहचौरः ४४
वज्रकुण्डम्	४५	देव-देवद्रव्ययोश्चौरः ४५
तप्तपाषाणकुण्डम्	४६	देव-द्विजयो रौप्य-गो-वस्त्राणां चौरः ४६
तीक्ष्णपाषाणकुण्डम्	४७	देव-द्विजयोः पित्तल-कांस्यपात्रचौरः ४७
लालाकुण्डम्	४८	वेश्यान्नभुक् तद्वृत्तिजीवी च ४८
मसीकुण्डम्	४९	म्लेच्छसेवी मसीजीवी च ब्राह्मणः ४९
चूर्णकुण्डम्	५०	देव-द्विजयोः शूस्त्रताम्बूलासनचौरः ५०
चक्रकुण्डम्	५१	विप्रद्रव्यं हृत्वा चक्रकारी ५१
वक्रकुण्डम्	५२	विप्र-वान्धवयोर्वक्रताकारी ५२
कूर्मकुण्डम्	५३	हरिशयने कूर्ममांसभुक् ब्राह्मणः ५३
ज्वालाकुण्डम्	५४	देवद्विजयोर्घृततैलादिहृत् ५४
भस्मकुण्डम्	५५	५५
दग्धकुण्डम्	५६	देवद्विजयोर्ह्रीमन्यतैलद्रव्याणामपहर्त्ता ५६
तप्तशूर्म्मीकुण्डम्	५७	बलखलत्वादिना परभूमिहरः ५७
असिपत्रकुण्डम्	५८	अर्थलोभात् खड्गेन जीविच्छेदी नरघाती च ५८
क्षुरधारकुण्डम्	५९	ग्रामनगरादिदाहकृत् ५९

नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिनः
सूचीमुखकुण्डम्	६०	परकर्मे सुखं दत्त्वा परनिन्दकः परदोषग्राही वेदब्राह्मणनिन्दकश्च ६०
गोधामुखकुण्डम्	६१	गृहं भित्त्वा वस्तुगोच्छागमेषचौरः ६१
नक्रमुखकुण्डम्	६२	सामान्यद्रव्यचौरः ६२
गजदंशकुण्डम्	६३	गजतुरगनरचौरः ६३
गोमुखकुण्डम्	६४	जलपिबन्नीवारकः ६४
कुम्भीपाककुण्डम्	६५	गो-स्त्री-भिक्षु-भग्न-ब्रह्महा अगम्यागामी दीक्षासन्ध्याहीनस्तीर्थप्रतिग्राही ग्रामयाजी देवलः शूद्रसूपकारो वृषलीपतिश्च ६५
कालसूत्रकुण्डम्	६६	वेश्यान्नभुक् तत्संसर्गी च ६६
अवटोदकुण्डम्	६७	कुलटादिषड्वेश्यागामी द्विजः ६७
अरन्तुदकुण्डम्	६८	चन्द्रसूर्य्यग्रहणे निषिद्धकालभोजी ६८
पांशुभोजकुण्डम्	६९	एकस्मै वाक्प्रदत्तकन्याया अन्यस्मै दाता ६९
पाशवेष्टकुण्डम्	७०	दत्तापहारी ७०
शूलपोतकुण्डम्	७१	अभक्ष्य शिवलिङ्गपूजकः ७१
प्रकम्पनकुण्डम्	७२	विप्रदण्डकृत् तत्कम्पफलदायी च ७२
उल्कामुखकुण्डम्	७३	सकोपवदना स्वामिनि कटुवादिनी ७३
अकूपकुण्डम्	७४	शूद्रभोग्या ब्राह्मणी ७४
वेधनकुण्डम्	७५	वेश्या। सा च पञ्चघट्पुंगमनाङ्गवति ७५
दण्डताडनकुण्डम्	७६	युङ्गी। सा च सप्तपुंगमनाङ्गवति ७६
जालबद्धकुण्डम्	७७	महावेश्या। साचाष्टाधिकपुंगमनाङ्गवति ७७
देहचूर्णकुण्डम्	७८	कुलटा। सा च पुंद्वयगमनाङ्गवति ७८
दलनकुण्डम्	७९	स्वैरिणी। वृषली। सा चतुःपुंगमनाङ्गवति ७९
शोषणकुण्डम्	८०	धृष्टा। पुंश्चली। सा च त्रिपुंगमनाङ्गवति ८०
कथकुण्डम्	८१	सवर्णपरदारी ८१
सूर्पकुण्डम्	८२	ब्राह्मणीगामी क्षत्रियो वैश्यश्च ८२
ज्वालामुखकुण्डम्	८३	करे तुलसीगङ्गाजलदेवशिलाञ्च कृत्वा प्रतिज्ञाकृत्यदपालको मिथ्याशपथी मित्रद्रोही विश्वासघाती मिथ्यासाक्ष्यदश्च ८३
जिह्वकुण्डम	८४	नित्यक्रियाहीनो देववागगास्तिको मन्दोपहासी च ८४
धूमान्धकुण्डम्	८५	देवविप्रयोर्हन्तहारी ८५
नागवेष्टनकुण्डम्	८६	वेददेवव्रतिकारी ब्राह्मणोद्दयापारी रसादिविक्रयी च ब्राह्मणः ८६

नरकजित्, पुं, (नरकं तन्नाम्ना विख्यातमसुरं जयतीति। जि + क्विप्। तुक् च।) विष्णुः। इति त्रिकाण्डशेषः॥

नरकदेवता, स्त्री, (नरकस्य अधिष्ठात्री देवता।) निरयदेवी। तत्पर्य्यायः। अलक्ष्मीः२ निर्ऋतिः३ कालपर्णी४। इति शब्दरत्नावली॥

नरकमुक्तः, त्रि, (नरकात् मुक्तः।) नरकागतः। यथा,—

"नरकात् प्रतिमुक्तस्तु पापयोनिषु जायते।
प्रतिघातं प्रतिग्रह्य खरयोनिं व्रजेद्बुधः॥
नरकात् प्रतिमुक्तस्तु क्षत्रियो भवति पातकी।
उपाध्यायं बलीवर्दं हत्वा स्त्री भवति द्विजः॥
नक्षत्रायां मनसा वाऽऽक्रन्दद्रव्यं वाद्यसंयुतम्।
गर्दभो जायते जन्तुश्चित्रस्त्रैवापमानकृत्॥
शत्रोरिन्द्रमाकृत्य शारिका संप्रजायते।
पितरौ पीडयित्वा तु कच्छपत्वञ्च जायते॥
भर्तुः पिण्डसुपात्रस्थो हित्वान्यानि च सेवयेत्।
सोऽपि मोहसमापन्नो जायते वानरो ध्रुवः॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते क्षमिः।
अक्षयक्षय नरकान्मुक्तो भवति राक्षसः॥
विश्वासहर्त्ता च नरो मीनयोनौ प्रजायते।
यवधान्यानि हृत्वा तु जायते मूषिको ध्रुवः॥
परदाराभिमर्शेषु दृक्षो वोल्लोऽभिजायते।
भ्रातृभार्य्याप्रसङ्गेषु कोकिलो जायते नरः॥
गुर्वादिभार्य्यागमनाच्छूकरो जायते नरः।
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् क्षमिः॥
देवतापितृविप्राणामदत्वा योऽन्नमश्नुते।
प्रसक्तो नरकादापि वायसः स प्रजायते॥
म्लेच्छभाक्षवमानाच्च क्रौञ्चयोनौ प्रजायते।
शूद्रञ्च ब्राह्मणीं गत्वा क्षमियोनौ प्रजायते॥
तस्यामपत्यसुत्पाद्य काष्ठान्तःकीटको भवेत्।
क्षत्रान्नः क्षमिकः कीटः पतङ्गो वृश्चिकस्तथा॥
अशूद्रं पुरुषं हत्वा नरः संजायते खरः।
क्षमिः स्त्रीवधकर्त्ता च बालहन्तावजायते॥
भोजनं चोरयित्वा तु मक्षिका जायते नरः।
हृत्वान्नञ्चैव मार्ज्जारस्तिलहृच्चैव मूषिकः॥
घृतं हृत्वा च नकुलः काको मद्गुरमांसिघम्।
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिकः॥
अपो हृत्वा तु पापात्मा वायसः संप्रजायते।
क्षीरे कांस्ये च हारीतः कपोतो वा प्रजायते॥
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते।
कार्पासिके हृते क्रौञ्चो वह्निहर्त्ता बकस्तथा॥
मयूरो वर्णकं हृत्वा शाकं पत्रञ्च जायते।
जीवञ्जीवकतां याति रक्तवस्त्रापहृन्नरः॥
क्रुञ्चुन्दरिः शुभान् गन्धान् वंशं हृत्वा शुशो भवेत्।
बकः कलापहरश्चे काष्ठहृत् काष्ठकीटकः॥
पुष्पापहृद्धरिद्रस्तु पङ्गुर्यवापहृन्नरः।
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः॥
गृहक्षनरकान् गत्वा रौरवादीन् सुदारुणान्।
लगुडुल्लतावल्लीत्वक्षारतरुतां व्रजेत्॥

ग्य एव क्रमो दृष्टो गोसुवर्णादिहारिणाम्।
विद्यापहारी मूकश्च गत्वा च नरकान् बहून्॥
असमिद्धेऽग्नौ हुते च मन्दाग्निः संप्रजायते।
परनिन्दाकृतघ्नत्वं परमर्म्मावघातनम्।
नैष्ठुर्य्यं निर्घृणत्वञ्च परदारोपसेवनम्।
परस्वहरणाशौचं देवतानाञ्च कुत्सनम्॥
निश्चित्य वचनं नृणां कार्पण्यञ्च वृथा बुधः।
उपलक्षणादि जानीयात् सुक्ष्मान्नरकादशु॥"
प्रसङ्गात् स्वर्गागतलक्षणमप्याह।
"दया भूतेषु संवादः परलोकं प्रतिक्रिया।
सत्यं भूतहिता चोक्तिर्वेदप्रामाण्यदर्शनम्॥
गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः।
सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः॥
अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिकं लयम्॥"
इति गारुडे कर्म्मविपाकः २२६ अध्यायः॥

नरकस्था, स्त्री, (नरके तिष्ठतीति। स्था+"सुपि स्थः।"३।२।४। इति कः।) वैतरणी नदी। इति हेमचन्द्रः। ४। १५२॥ निरयस्थिते, त्रि। यथा,
"नरकस्थोऽपि देहं वै न पुनस्त्यक्तुमिच्छति॥"
इति श्रीभागवतम्॥

नरकान्तकः, पुं, (नरकस्य तन्नाम्नो ख्यातस्यासुरस्य अन्तकः।) विष्णुः। इति पुराणम्॥ (यथा, सङ्कल्पमालायाम्। ७।
"दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक! प्रकामम्।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि॥")

नरकामयः, पुं, (नरकः आमय इव यस्य।) प्रेतः। इति शब्दरत्नावली॥ (नरकरूप आमयः।) निरयरोगश्च॥

नरकीलकः, पुं, (नरेषु कीलक इव निश्चलत्वात्।) गुरुघ्नः। तत्पर्य्यायः। गुरुहा २। इति हेमचन्द्रः। ३। ५२२॥

नरगणः, पुं, (नरस्य गणो यस्मात्।) नवनक्षत्रविशेषः। तज्जातजनः। यथा,—
"हस्तास्वातिमृगाश्विनीहरिगुरुः पौष्णानुराधादितिश्चार्द्रा रोहिणि चोत्तराणि भरणी पूर्व्वाणि भानि त्रयम्।
श्रेष्ठाश्लेषविशाखकृत्तिकवरुणातक्षमित्रामघाः
कथ्यन्ते मनिभिर्यथाक्रमवशाद्देवा नरा राक्षसाः॥"
इति दीपिका॥
अस्य फलम्। यथा, कोष्ठीप्रदीपे।
"मानुष्ये सुदुष्कर्म्मसङ्गतमनाः स्त्रीलान्वितो धीयुतः॥"
(नराणां गणः।) नरसमूहः॥

नरङ्गः, पुं, (नृणाति प्रापयतीति। नृ+"प्रतादेरङ्गच्।" इति उणादिकोषटीकाधृतसूत्रात् अङ्गच्।) वरस्त्रकः। नाराङ्गा इति भाषा॥ (नृः पुरुषस्य अङ्गम्।) मेहने, क्ली। इत्युणादिकोषः॥

नरदेवः, पुं, (नरो देव इव।) राजा। इति शब्दरत्नावली॥ (यथा, हरिवंशे। ३२। १२।
"रेतोधाः पुत्र उन्नयति नरदेव! यमक्षयात्॥")

नरनारायणौ, पुं, (नरश्च नारायणश्च तौ।) ऋषिविशेषौ। तावेव श्रीकृष्णार्জ্জुनौ सम्भूतौ। इति महाभारतम्॥ (यथा. देवीभागवते। ४। ५। १३।
"नरनारायणौ चैव चैरतुस्तप उत्तमम्।
प्राप्तेयाद्रिं समागत्य तीर्थे बदरिकाश्रमे॥")
तयोरुत्पत्तिर्यथा,—
"अथ चित्तयतस्तस्य स्वाभं गत्वा जनार्दनः।
ततः सर्व्वं ज्ञापयामास वराहवपुषो हितम्॥
तस्मै देहपरित्यागं कर्त्तुं समभवद्यदा।
तदा दंष्ट्राघातेन नरसिंहं महाबलम्॥
सरभो भगवान् भर्गो द्विधा मध्ये चकार ह।
नरसिंहे द्विधाभूते नरभागेन तस्य तु॥
नर एव समुत्पन्नो दिव्यरूपो महातपाः।
तस्य पद्मास्यभागेन नारायण इति श्रुतः॥
अभवत् स महातेजा मुनिरूपो जनार्दनः।
नरो नारायणश्चोभौ दृष्टिहेतू महामती॥
ययोः प्रभावो दुर्द्धर्षः शास्त्रे वेदे तपःसु च॥"
इति कालिकापुराणे २६ अध्यायः॥
कल्पभेदे तौ धर्म्मपुत्रौ। यथा,—
"धर्म्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्ता
नारायणो नर इति सुतपःप्रभावः।
दृष्ट्वात्मनो भगवतो नियमावलोपं
देवस्त्रियः कृतनता घटितुं न शेकुः॥"
इति श्रीभागवते। २। ७। ६॥
(अनयोर्विशेषविवरणन्तु देवीभागवते ४ स्कन्धस्य ५ अध्यायमारभ्य द्रष्टव्यम्॥)

नरपतिः, पुं, (नरान् पातीति। पा+डतिः। नराणां पतिर्वा।) राजा। इति शब्दरत्नावली॥ (यथा, रघुः। २। ७५।
"नरपतिकुलभूत्यै गर्भमाधत्त राज्ञो
गुरुभिरभिनिविष्टं लोकपालानुभावैः॥")

नरप्रियः, पुं, (नराणां प्रियः।) नीलवृक्षः। इति राजनिर्घण्टः॥ नरस्य प्रियवस्तुनि, त्रि॥

नरभूः, स्त्री, (नराणां मनुष्याणां भूर्भूमिः।) भारतवर्षः। इति त्रिकाण्डशेषः॥ नरोत्पत्तिश्च॥

नरभूमिः, स्त्री, (नराणां मनुष्याणां भूमिः।) भारतवर्षः। इति शब्दरत्नावली॥

नरमानिनी, स्त्री, (नरं पुरुषमिव मन्यते इति। मन+णिनिः+ङीप्।) असमृद्धनारी। इति त्रिकाण्डशेषः॥

नरमानिका, स्त्री, (नरं मन्यते या। मन+ण्वुल्। टापि अत इत्वम्।) नरमानिनी। इति शब्दरत्नावली॥

नरमाला, स्त्री, (नराणां तन्मुण्डानां माला।) मनुष्यमुण्डमाला। यथा, मार्कण्डेये। ८०। ६।
"विचित्रखट्वाङ्गधरा नरमालाविभूषणा॥"

नरमालिनी, स्त्री, (नरस्येव माला केशसमूहो सुखेऽस्यस्या इति। इनिः+ङीप्। यद्वा,

नरमानिनी प्रयोगानुरोधात् निपातनेन नस्य लत्वम्।) असमृद्धनारी। इति हेमचन्द्रः। ३। १६५॥ (नरस्य तन्मुण्डस्य मालाऽस्यस्या इति।) नरमालायुक्ता॥

नरमेधः, पुं, (मिध हिंसायाम्+भावे घञ्। नराणां पुरुषाणां मेधो हिंसनं यत्र।) नरवधात्मकयज्ञविशेषः॥ (शुक्लयजुर्वेदसंहितायाम् ३०—३१ अध्यायवर्णितः। तत्र अधिकार्य्यादिकं ३० अध्याये वेददीपे उक्तम्। यथा,—
"ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषमेधसंज्ञको यज्ञो भवति। सर्व्वभूतान्यतिक्रम्य स्थानमतिष्ठा। चैत्रशुक्लदशम्यामारम्भः। अत्र चयोविंशतिर्दीक्षा भवन्ति द्वादशोपसदः पञ्च सुत्या इति चत्वारिंशद्दिनैः सिध्यति। अत्र यूपैकादशिनी भवति एकादशाग्निषोमीयाः पशवो भवन्ति तेषाञ्च प्रतियूपं मध्यमे वा यूपे यथेच्छं नियोजनम्। आज्येन सकृद्गृहीतेन देव सवितरिति प्रत्यृचं तिस्र आहुतीराहवनीये जुहोति॥") स तु कस्यां वर्ष्मनीयः। यथा,—
"यमुद्दयाचाखीकारः कमण्डलुविधारणम्।
द्विजानामसवर्णासु कन्याद्यपयमस्तथा॥
देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वधः।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा॥
दत्तायाश्चैव कन्याया: पुनर्दानं वरस्य च।
दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ॥
महाप्रस्थानगमनं गोमेधश्च तथा मखः।
इमान् धर्म्मान् कलियुगे वर्জ্জयानाहुर्मनीषिणः॥"
इत्युद्वाहतत्त्वे दृष्टव्यम्॥

नरवाहनः, पुं, (नरो वाहनं यस्य। "शुभ्रादिषु च।" ८। ३। ६८। इति न षत्वम्।) कुबेरः। इत्यमरः। १।१२।७२॥ (यथा, रघुः। ६। ११।
"विजयदुन्दुभिनां ययुरर्थवा
धनरवा नरवाहनसम्पदः॥")
नृपतिविशेषः। यथा, राजतरङ्गिण्याम्। ५। २१६।
"सोऽनुगैः सह निर्द्दोहं जघान द्रोहशङ्कया।
सूरं दार्व्वाभिसारेशं शूर्व्यो नरवाहनम्॥")
पुरुषयानविशिष्टे, त्रि॥ (यथा, महाभारते। ३। २८। ५।
"जग्मे धनपतिर्यत्र कुबेरो नरवाहनः॥")

नरविध्वंसः, पुं, (नरं विध्वंसयति भक्षयतीति। वि+ध्वंस+अच्।) राक्षसः। इति त्रिकाण्डशेषः॥

नरसारः, पुं, (नरवत् शुद्धः सारो यत्र।) वणिग्द्रव्यविशेषः। नौसादर इति निशादल इति च भाषा। तस्य पर्य्यायः। यथा. रत्नमालायाम्।
"दिदलो गोपकः पिण्डो वोलो गन्धरसो रसः॥"
तस्य शुद्धिर्यथा,—
"नरसारो भवेच्छुद्धश्चूर्णतोये विपाचितः।
दोलायन्त्रेण यत्नेन भिषग्भिर्योगसिद्धये॥"
इति सारचन्द्रिका॥

स तु द्रव्यान्तरयोगेन महाद्रावको भवति यथा,
"नरसारयवक्षारस्फटिकारित एव काचवकयवैः।
बहुशः पात्यं सत्त्वं तद्धि महाद्रावकं नाम॥"
इति रत्नावली॥
यथाच वैद्यकभैषज्यरत्नावल्यां यकृत्प्लीहाधिकारे।
"वृश्चिवित्रमपामार्गं पिष्ट्वा कृष्णाक्षनाडिकाः।
कुष्ठी तालस्य पुष्पाणि वर्षाभूर्वेतसस्तथा॥
एतेषां चारमाकृष्य लिम्पाक्षरसेन च।
क्षालयित्वा क्षारतोयं वस्त्रपूतञ्च कारयेत्।
चण्डातपेन संशोष्य ग्राह्यमर्द्धपलोचितम्।
एतस्य द्विपलं ग्राह्यं यवक्षारपलद्वयम्॥
स्फटिकारिपलञ्चैव नरसारपलस्तथा।
पलार्द्धं सैन्धवं ग्राह्यं टङ्कणं तोलकद्वयम्॥
कासीसं तोलकञ्चैव शुद्धाग्रञ्च तोलकम्।
दारुमोचं कर्षकञ्च तोलं सप्तदशैनकम्॥
सर्व्वमेकत्र सचूर्ण्य वकयन्त्रेण साधयेत्।
महाद्रावकमेतद्धि योज्यञ्च रसजारणे॥
हन्ति गुल्मादिकान् रोगान् यकृत्प्लीहोदराणि च॥")

नरसिंहः, पुं, (नर इव सिंह इव च आकृतिर्यस्य।) विष्णुः। इति शब्दरत्नावली॥ स तु हिरण्यकशिपुवधार्थं भगवद्भावतारान्तर्गतचतुर्थः पूर्ब्बावतारः। इति वराहपुराणम्॥ (नरेषु सिंहः। नरः सिंह इव इत्युपमितसमासो वा।) नरश्रेष्ठः। यदुक्तम्।
"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः॥"
इति विशेष्यनिघ्ने अमरः॥
(यथा, महाभारते। १०। १०। १६।
"कुरुणां नरसिंहस्य संग्रामेष्वपलायिनः।
ये वसञ्चन्ति कर्णस्य प्रमादात् ते हता॥")

नरहरिः, पुं, (नरः इव हरिः सिंह इव च आकृतिर्यस्य।) नृसिंहावतारः। यथा,—
"केशव धृतनरहरिरूप जय जगदीश हरे॥"
इति गीतगोविन्दे। १। ८॥

नराधिपः, पुं, (नराणामधिपः।) नराधिपतिः। राजा। यथा, "नराणाञ्च नराधिपः।" इति श्रीभगवद्गीता॥ (वृक्षविशेषः। यथा, सुश्रुते चिकित्सितस्थाने ३७ अध्याये।
"काकोलीक्षीरयष्ट्याह्वमेदायुग्मनराधिपैः॥")

नरान्तकः, पुं, (नराणां अन्तको नाशकः।) राक्षसविशेषः। स तु रावणपुत्रः। इति रामायणम्॥ (यथा, भागवते। ६। १०। १८।
"रक्षःपतिस्तदवलोक्य निकुम्भकुम्भ-
धूम्राक्षदुर्म्मुखसुरान्तनरान्तकादीन्॥")

नरायणः, पुं, (नराणां जीवानां अयनं आश्रयस्थानम्।) श्रीनारायणः। इति शब्दरत्नावली॥

नरी, स्त्री, (नरस्य पत्नी। ङीष्।) नारी। इति जटाधरः॥

नरेन्द्रः, पुं, (नर इन्द्र इव नराणामिन्द्रो वा।) राजा। (यथा, मनुः। ८। २५३।
"रत्नानाद्यं वृत्तानां कण्टकानाञ्च शोधनात्।
नरेन्द्राश्चिदिवं यान्ति प्रजापालनतत्परा॥")
विष्णुदेवः। इति मेदिनी। रे, १०१॥ (यथा, माघे। २। ८८।
"सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः॥")
वृक्षविशेषः। यथा, सुश्रुते चिकित्सितस्थाने। ६ अध्याये।
"पूतीकार्कसुमरेन्द्रदमार्गा
मूत्रैः पिष्टाः पल्लवाः सौमनाश्च॥"
एकविंशत्यक्षरवृत्तविशेषः। इति चिन्तामणिः॥ यथा,—
"चामररत्नरज्जुवरपरिगतविप्रगणाहितशोभः
पाणिविराजिपुण्ययुगविरचितकङ्कणसङ्गतगन्धः।
चारुसुवर्णकुण्डलयुगलक्षतरोचिरलङ्कृतवर्णः
पिङ्गलपक्षगेश इति निगदति राजति वृत्तनरेन्द्रः॥")

नर्कुटकं, क्ली, नासिका। इति हेमचन्द्रः॥

नर्त्तकः, पुं, (नृत्यतीति। नृत्+"शिल्पिनि ष्वुन्।" ३। १। १४५। इति ष्वुन्।) नटः। गोटगलः। चारणः। कैलकः। नटपर्य्यायः। सर्व्ववेशी २ लयालम्बः ३ तालरेचनकः। इति शब्दरत्नावली॥ द्विपः। इति हेमचन्द्रः॥ नृत्यकर्त्तुर्लक्षणं यथा,—
"यादृग्गं नृत्यपाठ्यं स्यान्नीतं योज्यञ्च तादृग्गम्।
नृत्यस्य धारणात् पाठ्यं नर्त्तकः परिकीर्त्तितः॥"
अपि च।
"असम्बद्धप्रलापी च सदा भ्रूकुटितत्परः।
हासप्रहासचतुरो वाचालो नृत्यकोविदः॥"
इति सङ्गीतदामोदरः॥
(नर्त्तयतीति। नृत्+णिच्+ण्वुल्। नृत्यकारके, त्रि। यथा, साहित्यदर्पणे ३ परिच्छेदे।
"तर्कौ विचारः सन्देहात् भूग्निरोऽङ्गलिः
नर्त्तकः॥")

नर्त्तकी, स्त्री, (नृत्यतीति। नृत्+ण्वुल्। वित्वात् ङीष्।) नृत्यकारिणी। वाइ इति भाषा॥ तत्पर्य्यायः। लासिका २। इत्यमरः। १। ७। ८॥ लयपुत्री ३ नटी ४ लस्या ५। इति शब्दरत्नावली॥ (यथा, रघुः। १६। १४।
"नर्त्तकीरभिनयातिलङ्घिनीः
पार्श्ववर्त्तिषु गुरुष्वलज्जयत्॥")
करेणुः। इति मेदिनी। के, १०८॥ नलिकानामसुगन्धिद्रव्यम्। इति राजनिर्घण्टः॥

नर्त्तनं, क्ली, (नृत्+भावे ल्युट्।) नृत्यम्। इत्यमरः। १। ७। १०॥ (यथा, मनुः। २।१७८।
"कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्॥"
नृत्यतीति। नृत्+ल्युः। नर्त्तके, त्रि। यथा, महाभारते। ४। ३५। २२।
"गायनो नर्त्तनो वापि वादनो वा पुनर्भव।
क्षिप्रं मे रथमास्थाय नियच्छैव हयोत्तमान्॥")

नर्द्द, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) नर्द्दति। इति दुर्गादासः॥

नर्द्द, गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्॥)

नर्द्दटकं, क्ली, छन्दोविशेषः। तस्य लक्षणं यथा,—
"यदि भवतो नजौ भजजला गुरुर्न्नर्द्दटकम्"
इति छन्दोमञ्जरी॥

नर्द्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वां परं-सकं-सेट्।) रेफोपधः। नर्द्बति। इति दुर्गादासः॥

नर्म्म, [न्] क्ली, (नृ नये+"सर्व्वधातुभ्यो मनिन्।" उणां ४। १४६। इति मनिन्।) परीहासः। इत्यमरः। १। ७। ३२॥ (यथा, महाभारते। १। ८२। १७।
"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि॥")

नर्म्मकीलः, पुं, (नर्म्मणः परीहासस्य कील इव।) पतिः। इति त्रिकाण्डशेषः॥

नर्म्मटः, पुं, (नर्म्मणेव अटति गच्छतीति। अट+अच्। पृषोदरादित्वात् साधुः।) खर्परः। खर्य्यः। इति हारावली॥ २५४॥

नर्म्मठः, पुं, (नर्म्मणि कुशलः। नर्म्म+अटच्।) चूचुकम्। विड्गः। परीहासरतः। इति शब्दरत्नावली॥

नर्म्मदः, पुं, (नर्म्म ददातीति। दा+कः।) केलिसचिवः। इति मेदिनी। दे, ३१॥

नर्म्मदा, स्त्री, (नर्म्म ददातीति। दा+कः। स्त्रियां टाप्।) पृक्का। इति हेमचन्द्रः। ४। १४६॥ नदीविशेषः। सा विन्ध्यपर्व्वतान्निःसृता पश्चिमे तमसानद्यां प्रविष्टा। तस्याः पर्य्यायः। रेवा २ मेकलकन्या ३ सोमसुता ४। अस्या जलगुणाः। लघुत्वम्। शीतलत्वम्। सुपथ्यत्वम्। दाहपित्तश्रमनत्वम्। वातदाहत्वञ्च। इति राजनिर्घण्टः॥* तस्या जलं दशभिर्म्मासैर्जीर्य्यति। यथा,—
"त्रिभिः सारस्वतं तोयं सप्तभिश्चैव यामुनम्।
नार्म्मदं दशभिर्म्मासैर्गाङ्गं वर्षेण जीर्य्यति॥"
इति प्रायश्चित्ततत्त्वम्॥
तस्या उत्पत्तिमाहात्म्यं यथा,—
"नर्म्मदा सरितां श्रेष्ठा रुद्रदेहादिनिःसृता।
तारयेत् सर्व्वभूतानि स्थावराणि चराणि च॥
सर्व्वपापहरा नित्यं सर्व्वदेवनमस्कृता।
संस्तुता देवगन्धर्व्वैरप्सरोभिस्तथैव च॥"*॥
तस्याः स्तवो यथा,—
"नमः पुण्यजले! आद्ये! नमः सागरगामिनि!
नमस्ते पापशमनि! नमो देवि! वरानने!॥
नमोऽस्तु ते ऋषिगणसंसेविते!
नमोऽस्तु ते शुक्लरदेहनिःसृते!।
नमोऽस्तु ते धर्म्मभृतां वरप्रदे!
नमोऽस्तु ते सर्व्वपवित्रपावने!॥
यस्त्विदं पठते स्तोत्रं नित्यं शुद्धमना नरः।
ब्राह्मणो वेदमाप्नोति क्षत्रियो विजयी भवेत्॥
वैश्यस्तु लभते लाभं शूद्रश्चैव शुभां गतिम्।
अन्नार्थी लभते ह्यन्नं स्मरणादेव निश्चयः॥
नर्म्मदां सेवते नित्यं स्वयं देवो महेश्वरः।

तेन पुण्या नदी सेया ब्रह्महत्यापहारिणी ॥
नर्म्मदाया जलं पीत्वा अर्च्चयित्वा वृषध्वजम् ।
दुर्गतिञ्च न पश्यन्ति तस्य तीर्थप्रभावतः ॥
एतत्तीर्थं समासाद्य यस्तु प्राणान् परित्यजेत् ।
सर्व्वपापविशुद्धात्मा व्रजते रुद्रमन्दिरम् ॥
जलप्रवेशं यः कुर्य्यात् तस्मिंस्तीर्थे नराधिप ! ।
हंसयुक्तेन यानेन रुद्रलोकं स गच्छति ॥
यावच्चन्द्रश्च सूर्य्यश्च हिमवांश्च महोदधिः ।
गङ्गाद्याः सरितो यावत्तावत् स्वर्गे महीयते ॥
अनशनन्तु यः कुर्य्यात्तस्मिंस्तीर्थे नराधिप ! ।
गर्भवासे तु राजेन्द्र ! न पुनर्जायते नरः ॥"

इति मात्स्ये १९५ । १९६ अध्यायौ ॥

सा च पुरुकुत्सभार्य्या । तस्याः स्मरणे विषनाशो भवति । यथा, "सकलपन्नगशतयज्ञ नर्म्मदायै वरं ददुः । यस्तेऽनुस्मरणसमवेतं नामयज्ञं करिष्यति न तस्य सर्पविषं भविष्यतीति । अत्र च ।

"नर्म्मदायै नमः प्रातर्नर्म्मदायै नमो निशि ।
नमोऽस्तु नर्म्मदे तुभ्यं त्राहि मां विषसर्पतः ॥"

इति विष्णुपुराणे । ४ । ३ । ६—१० ॥

नल, ञ बन्धे । इति नलग्रन्थस्य धातुपत्तौ भरतः ॥ (भ्वां-परं-सकं-सेट् ॥)

नलं, क्ली, (नलतीति । नल + अच् ।) पद्मम् । इति राजनिर्घण्टः ॥

नलः, पुं, (नल बन्धे + पचाद्यच् ।) तृणविशेषः । तत्पर्य्यायः । धमनः २ पोटगलः ३ । इत्यमरः । २ । ४ । १६२ ॥ नालः ४ नडः ५ कुचिरन्ध्रः ६ कौचकः ७ दीर्घवंशः ८ शून्यमध्यः ९ विभीषणः १० छिद्रान्तः ११ मृदुपत्रः १२ वंशपत्रः १३ मृदुच्छदः १४ नालवंशः १५ । अस्य गुणाः । शीतत्वम् । कषायत्वम् । मधुरत्वम् । रुचिकारित्वम् । रक्तपित्तप्रशमनत्वम् । दीपनत्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ तस्यामगुणाः ।

"नलः पोटगलः शून्यमध्यश्च धमनस्तथा ।
नलस्तु मधुरस्तिक्तः कषायः कफरक्तजित् ॥
उष्णो वृष्यस्तियोन्यर्शिदाहपित्तविषप्रणुत् ॥"

इति भावप्रकाशः ॥

सूर्य्यवंशीयनिषधराजपुत्रः । यथा,—

"अतिथिस्तु कुशाच्छ्रेष्ठे निषधस्तस्य चात्मजः ।
नलस्तु नैषधस्तस्मान्नभस्तस्मादजायत ॥"

वीरसेनराजपुत्रः । यथा, मात्स्ये १२ अध्याये ।

"नलो द्वावेव विख्यातौ वंशे कञ्जप्रसम्भवे ।
वीरसेनसुतस्तत्र नैषधश्च नराधिपः ॥"

(तथा, हरिवंशे । १५१ ३४ ।

"नलौ द्वावेव विख्यातौ पुराणे भरतर्षभ ! ।
वीरसेनात्मजश्चैव यश्चेक्ष्वाकुकुलोद्वहः ॥"

एतौ द्वावेव सूर्य्यवंशीयौ ॥) चन्द्रवंशीयनिषधराजपुत्रः । (अयन्तु दमयन्तीपतिः ।) यथा, दमयन्तीं प्रति नलवाक्यम् ।

"सुधांशुवंशस्य करीरमेव मां
निगूढ्य किन्नासि फलेग्रहि ग्रहा ॥"

इति नैषधः ॥

(यथा, भारते । ३ । ५३ । १ ।

"आसीद्राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टै रूपवान्नकोविदः ॥"

अयं वीरसेनस्तु सूर्य्यवंशीयवीरसेनाद्भिन्न एवेत्यवगन्तव्यम् ॥ * ॥

आसीत् पुरा निषधाधिपतिश्चन्द्रवंशीयो नलो नाम राजा । गच्छति काले स हि हंससुखात् विदर्भेश्वरभीमराजकन्यां दमयन्तीं त्रिभुवनैकसुन्दरीमाकर्ण्य हंससुखादेवावगतनलसौन्दर्य्यां तन्मनस्कां दमयन्तीं स्वयंवरविधिना इन्द्रादिदेवसन्निधावेव उपयेमे । अस्य इन्द्रसेननामा पुत्र आसीत् । दमयन्तीपरिणयकामुकः कलिस्तु दमयन्तीमलभमान एनं प्रति रुषः सञ्जातः । अथ कलिप्रविष्टशरीरोऽयं भ्राता पुष्करेण सह द्यूतक्रीडनात् सर्व्वस्वमहारयत् । ततः स राज्यच्युतो दमयन्त्या सह वनं गतवान् । कलिस्तु अस्य दमयन्तीसहवाससुखमसहिष्णुः दमयन्त्या सह एनं वियोजयितुमियेष । अथ कदाचित् कलाप्रेप्सितचित्तोऽयं नलः सुप्तां दमयन्तीं निष्ठुरवत् परित्यज्य पलायाञ्चक्रे । दमयन्ती तु प्रबुध्य बहु विलप्य च पथिकसार्थवाहेन सह माहिष्मतीमगच्छत् । नानाविधक्लेशात् क्षीणदेहा सा माहिष्मत्यापि अविज्ञाता तक्षवने तस्थौ । अथ दमयन्तीपिता भीमनृपतिर्दमयन्त्या अन्वेषणाय दूतान् नियोजयामास । दूतास्तु चिह्नविशेषैर्दमयन्तीं परिज्ञाय भीमाय न्यवेदयन् । भीमस्तु तां स्वगृहमानयत् । नलस्तु दमयन्तीं परित्यज्य गच्छन् दावानलमध्यगतं कर्कोटकनागं विपद उज्जहार । कर्कोटकस्तु नलस्य प्रत्युपकर्त्तुमिच्छन् शरीरस्थस्य कलिं दृष्ट्वा कलिमेव भृशं सन्तापयामास । नलस्तु केवलं रूपान्तरत्वमापन्नवान् । ततोऽसौ ऋतुपर्णस्य राज्ञः सारथ्ये नियुक्त आसीत् । अथ गच्छति काले दमयन्ती पितृगेहस्था नलान्वेषणाय ब्राह्मणान् संप्रेष्य कथञ्चित् ऋतुपर्णसारथिं नलत्वेनावगम्य पुनः स्वयंवरमिषेण ससारथिं ऋतुपर्णं पितृवेश्मनि आनयामास । दमयन्ती तु पाकादिकौशलेनान्यजनावेद्येन ऋतुपर्णसारथिं नलं विज्ञाय स्वसमीपमानयामास । अथ कलिपरित्यक्तेन नलेन स्वसौन्दर्य्ये गृहीते भैम्या सह मेलनं सञ्जातम् । भीमनृपतिस्तु एतत् सर्व्वमाकर्ण्यातिप्रियसन्तोषमवाप्तवान् प्रेषयामास च तं बहुसम्भारोहेण निषधदेशान् प्रति । ततोऽयं स्वदेशमागत्य भ्रातरं पुष्करं पुनर्द्यूताय आकूय पराजित्य च तं पुनर्लब्धराज्यो दमयन्त्या सह सुखमवास । एतद्विवरणविस्तृतिस्तु महाभारते वनपर्व्वणि ५३—७६ अध्यायेषु विशेषतो द्रष्टव्या ॥ * ॥)

वानरविशेषः । स तु ऋतध्वजसुनिष्पापात् वानररूपविश्वकर्म्मण औरसेन घृताच्यप्सरोगर्भे गोदावरीतीरे जातः । इति वामने ६२ अध्यायः ॥ (अयन्तु रामवाक्येन समुद्रमध्ये सेतुं बबन्ध । यथा, अध्यात्मरामायणे । ६ । ३ । ८४—८६ ।

"ततोऽब्रवीत् रघुश्रेष्ठं सागरो विनयान्वितः ।
नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्म्मजः ॥
सुतो धीमान् समर्थोऽस्मिन् कार्य्ये लब्धवरो हरिः ।
कीर्त्तिं जानन्तु ते लोकाः सर्व्वलोकमलापहाम् ।
इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम् ।
ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः ।
नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धने ॥")

पिप्पलदेवः । इति मेदिनी । ले, २७ ॥ दैत्यविशेषः । यथा,—

"दैत्यदानवसंयोगाज्ज्ञाताज्ञातैश्चपराक्रमाः ।
सैंहिकाया इति ख्याताश्चयोदश्च महाबलाः ॥
वंश्राः शुल्वश्च बलवान् नलश्चैव तथा बलः ।
वातापिर्नमुचिश्चैव इल्वलः खड्गमस्तथा ॥
अञ्जको नरकश्चैव कालनाभश्चथैव च ।
सवमानस्तथा चैव सुरकल्पश्च वीर्य्यवान् ॥"

इति ब्रह्मपुराणे २ अध्यायः ॥

नलकं, क्ली, (नल इव प्रतिभाति । "इवे प्रतिकृतौ ।"५ । ३ । ९६ । इति कन् ।) प्राखाख्यि । इति हेमचन्द्रः । ३ । २६१ ॥ (यथा, सुश्रुते निदानस्थाने १५ अध्याये ।

"तरुणास्थीनि नव्यन्ते भव्यन्ते नलकानि तु ॥")

नलकिनी, स्त्री, (नलकानि सन्त्यस्याः । नलक + इनिः । ङीप् ।) जङ्घा । इति हेमचन्द्रः । ३ । २७८ ॥

नलकीलः, पुं, (नलवत् कीलो यत्र ।) जानुः । इति हेमचन्द्रः । ३ । २७८ ॥

नलकूबरः, पुं, कुबेरपुत्रः । इत्यमरः । १ । १ । ७३ ॥ (यथा, राजेन्द्रकर्णपूरे । ६६ ।

"विलोकनकथापि मे न नलकूबरे न स्मरे
किमन्यदद्भुतद्युतेरपि न दर्शनं प्रार्थये ।
अयं नयनगोचरं व्रजति चेद्दृढग्रासतृष्णयः
समग्ररमणीमनो मधुपमाधवः माधवः ॥")

स भ्राता मणिग्रीवेण सह वारुणीं पीत्वा कैलासोपवने गङ्गायां स्त्रीजनैः क्रीडितवान् । व्यसंशृतवस्त्रौ तौ दृष्ट्वा नारदः शशाप । तच्छापेन तौ यमलार्জ्जुनौ भूत्वा श्रीवृन्दावने आसतुः । ततो दामोदरेण शापनिर्म्मुक्तौ तं स्तुत्वा स्वगृहं जग्मतुः । इति श्रीभागवतीयदशमस्कन्धः ॥

नलदं, क्ली, (नलं ददाति अवखण्डयतीति । दो + कः ।) पुष्परसः । उशीरम् । (यथा, किरातेः । ५ । २५ ।

"इह सिन्धवश्च वरणावरणाः
करिणां सुरे सनलदानलदाः ॥")

जटामांसी । इति मेदिनी । दे, ३१ ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"नलदं नन्दिनी पेवी मांसी लम्बजटा जटी ।
किरातिनी च जटिला लोमशा तु तपस्विनी ॥"

नलं ददातीति । दा + आतोऽनुपेति कः ।) नल दातरि, त्रि, ॥

नलदम्बुः, पुं, निम्बवृक्षः। इति भूरिप्रयोगः॥
नलदा, स्त्री, (नलद+टाप्।) जटामांसी। इति हेमचन्द्रः॥
नलपट्टिका, स्त्री, (नलनिर्म्मिता पट्टिका।) तलाशी। इति हारावली। १०७॥ एरमा इति भाषा॥
नलमोनः, पुं, (नलाश्रयो मोनः।) चिलिचिममत्स्यः। इत्यमरः। १। १०। १८॥ ("नलमोनः कफात्मकः।" इति हारीते प्रथमे स्थाने ११ अध्याये॥)
नलिका, स्त्री, (नल इव आकारोऽस्यस्या इति। नल+टन्।) नाड़ी। नली इति ख्यातः। सा च उत्तरापथे प्रसिद्धा सुगन्धा प्रवालालतिः प्रवालीति क्वचित् प्रसिद्धा। पँठारी इति क्वचित् प्रसिद्धा। तत्पर्य्यायः। विदमलतिका २ कपोतपाका ३ नलिनी ४ निर्म्मिथ्या ५ सुषिरा ६ व्याघ्रानी ७ स्तुत्या ८ रक्तदला ९ नर्म्मकी १० नटी ११। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। तीक्ष्णत्वम्। मधुरत्वम्। क्लमिवातोदरार्म्मगुल्मशूलनाशित्वम्। मलग्रोधनत्वञ्च। इति राजनिर्घण्टः॥ तन्नामगुणाः।
"नलिका विदमलता कपोतचरणा नटी।
भ्रमन्यङ्गनकेशी च निर्म्मिथ्या सुषिरा नली॥
नलिका पीतलता लघ्वी चक्षुष्या कफपित्तजित्।
क्रिमिकासश्वासतृष्णाकफकण्डूव्रणापहा॥"
इति भावप्रकाशः॥
(अस्यविशेषः। यथा, आर्य्यासप्तशत्याम्। ४३७।
"मधुमथनवदनविनिहितवंशीसुषिरानुसारिणो रागाः।
हन्त हरन्ति मनो मम नलिकाविश्रिया सरस्येव॥"
इयं हि आलातालकयादिना आधुनिकनलास्त्रः 'बन्दूक' इति ख्यातस्य साडश्यं गच्छति। यथा, वैद्यन्याथनीलकण्ठधनुर्व्वेदे।
"नलिका ऋजुदेहा स्यात्तन्वङ्गी मध्यरन्ध्रिका।
मर्म्मच्छेदकरी नीला————॥"
"गच्छन्तं भापनञ्चैव स्थूतयेति गतित्रयम्।
तामाश्रितं विदित्वा तु जेतासद्यान् रिपून् युधि॥"
अस्या विशेषविवरणन्तु नालिकाशब्दे द्रष्टव्यम्॥ कल्पितनलनिर्म्मितपथः। यथा, यन्त्रविधिधृतके १ अध्याये।
"वेदाङ्गुलं मस्तकोर्द्धं कार्य्यं तोयस्य धारणे।
समर्थो तत्र नलिकां कुर्य्यात्तोयविमोचनीम्॥")
नलितः, पुं, (नलयते इति। नल ज वन्धे+क्तः।) शाकविशेषः। नालिता इति भाषा॥ अस्य गुणाः। मधुरत्वम्। पित्तनाशित्वम्। शुक्रवर्द्धकत्वञ्च। इति द्रव्यगुणः॥
नलिनं, क्ली, (नल्यते इति। नल वन्धे+"वहुलमन्यत्रापि।" उणा। २। ४६। इति इनच्।) पद्मम्। इत्यमरः। १। १०। ३६॥ (यथा, भागवते। २। ६। २२।
"यदाख नाभ्याम्बलिनादहमासं महात्मनः।
नाविदं यज्ञसम्भारान् पुरुषावयवाऋते॥")
नीलिका। जलम्। इति हेमचन्द्रः। ४।२२६॥
नलिनः, पुं, (नल+इनच्।) सारसपक्षी। इत्यमरः। १। ९०। ४०॥ क्षुद्रपाकफलः। इति शब्दचन्द्रिका॥ पानीयामला इति भाषा॥
नलिनी, स्त्री, (नलानि पद्मानि सन्त्यत्र। नल+"पुष्करादिभ्यो देशे।" ५।२।१३५। इति इनिः। ङीप्।) पद्मयुक्तदेशः। (नलानां पद्मानां समूहः। "खलादिभ्यः इनिर्वक्तव्यः।" ४।२।५१। इत्यस्य वार्त्तिकोक्त्या इनिः।) पद्मसमूहः। पद्मलता। इति भरतः॥ (अस्याः पर्य्यायो यथा,—
"नलिनी स्यात् पङ्कजिनी विसिनी च सरोजिनी।
पद्मिनीति च पर्य्यायः पद्मषण्डे तदाकरे॥"
इति वैद्यकरत्नमालायाम्॥)
पद्ममात्रम्। इति रायमुकुटाख्यः॥ तत्पर्य्यायः। विसिनी २ पद्मिनी ३। इत्यमरः। १। १०। ३६॥ (यथा, मराठके। ८।
"राज्ञिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्मजालम्।
इत्यं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार॥")
व्योमनिम्नगा। (इयन्तु गङ्गायाः पूर्व्वदिग्गतप्राखायानामन्यतमा। यथा, मात्स्ये। १२०। ४०।
"त्रीणि प्राचीमभिसृतं प्रतीचीं त्रीण्यवैव च।
स्रोतांसि त्रिपथगायास्तु प्रत्यपद्यन्त सप्तधा॥
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा॥")
कमलाकरः। इति मेदिनी। ने, ८२॥ नलिका। इति राजनिर्घण्टः॥ नारिकेलसुरा। इति त्रिकाण्डशेषः॥ (यामनासिका। यथा, भागवते। ४। २५। ४८।
"नलिनी नालिनी च प्राग्द्वारावेकत्र निर्म्मिते॥"
"नलनालशब्दौ छिद्रवचनौ तद्वती नलिनी नालिनी च वामदक्षिणनासिके॥" इति तट्टीकायां स्वामी॥)
नलिनीरुहं, क्ली, (नलिन्यां रोहतीति। रुह+कः।) रक्तोत्पलम्। इति राजनिर्घण्टः॥ ब्रह्मणि, पुं॥
नलिनेशयः, पुं, (नलिने शेते इति। शी+अच्।) विष्णुः। इति त्रिकाण्डशेषः॥
नली, स्त्री, (नल+अच्। गौरादित्वात् ङीप्।) मनःशिला। इति विश्वः॥ नलिका। इति भावप्रकाशः॥ तत्पर्य्यायः। सुषिरा २ विदमलता ३ कपोतवङ्घिः ४ नटी ५। इत्यमरः। २। ४। १२६॥ (एतद्गुणा मनःशिलानलिकाशब्दयोः ज्ञातव्याः॥)
नलोत्तमः, पुं, (नलेषु उत्तमः।) देवनलः। इति राजनिर्घण्टः॥
नख्वः, पुं, (नल्यते इति। नल+उख्वादयश्चेति वः।) किष्कुचतुःशतम्। चतुःशतहस्तपरिमितदेशः। इत्यमरभरतौ॥ (यथा, हरिवंशे। २२४। १।
"तस्यां सभायां दैत्येन्द्रो हिरण्यकशिपुस्तदा।
आसीन आसने चित्रे नख्वमात्रे ममाज्ञया॥")
नख्ववर्त्मगा, स्त्री, (नख्वपरिमितं वर्त्म गच्छतीति। गम+डः।) काकाङ्गी। इति शब्दचन्द्रिका॥
नख्वपरिमितपथगामिनि, त्रि॥
नव, [न्] त्रि, (नूयते स्तूयते प्रधानसंख्यावाचकत्वेन। नु स्तवने+वाहुलकात् कथिन् गुणश्च। इत्युज्ज्वलदत्तः। १। १५६।) संख्याविशेषः। ९ नय इति भाषा। वहुवचनान्तोऽयम्। इति व्याकरणम्॥ (यथा, रघुः। ३।६८।
"इति चितीशो नवतिं नवाधिकां
महाक्रतूनां महनीयशासनः॥")
नववाचका यथा। अङ्कदारम् १ भूखण्डम् २ उत्तराधरमस्तकः ३ सुधाकुण्डम् ४ व्याघ्रीस्तनः ५ सेघधिः ६ चक्रम् ७ रसः ८ ग्रहः ९। इति कविकल्पलता॥ (वहति, त्रि। यथा, मनुः। १। २६६।
"यज्ञार्थात् पशवः सृष्टा इति वेदविदो विदुः।
अतोऽवेशस्य मांसेन नौरवेण नवेन तु॥")
नवः, पुं, (नु गि स्तवने+"ऋदोरप्।" ३।३।५७। इति भावे अप्।) स्तवः। इति मेदिनी। वे १५॥ रक्तपुनर्नवा। इति राजनिर्घण्टः॥
नवः, त्रि. (नूयते स्तूयते इति। नु स्तुतौ+"ऋदोरप्।" ३। ३। ५७। इति अप्।) नूतनः। इत्यमरः। ३।१।७७॥ (यथा, हितोपदेशे। १।२३४।
"न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम्॥")
अभिनवार्थबोधकानि शब्दस्तानि। यथा,—
"द्रव्याण्यभिनवान्येन प्रशस्तानि क्रियाविधौ।
ऋते घृतगुडक्षौद्रधान्यकृष्णाविडङ्गतः॥"
इति नारायणदासकृतवैद्यपरिभाषा॥
तद्वैशिष्ट्यपर्य्यायः। "नवम् १ नूतम् २ नूतनम् ३ नव्यम्४ इदाम् ५ इदानीम् ६। षट् नवनामानि।" इति वैद्यनिघण्टौ ३ अध्यायः॥
नवकारिका, स्त्री, (नवं करोतीति। कृ+ण्वुल्। टापि अत इत्वम्।) नवोढ़ा। इति शब्दमाला॥ नूतनः संक्षिप्तो विवरणश्लोकः। नवीनकर्त्री च॥
नवकालिका, स्त्री, (नवं कलति प्राप्नोतीति। कल+ण्वुल्। टाप्। अत इत्वम्।) नवीनः। इति हारावली। १०६॥
नवग्रहाः, पुं, (नव ग्रहाः।) सूर्य्यादयो नव। यथा, तिथितत्त्वे।
"नवग्रहमखं कृत्वा ततः कर्म्म समारभेत्।
अन्यथा फलदं पुंसां न कार्य्यं जायते क्वचित्॥"
(यथा च,—
"सूर्य्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः।
शुक्रः शनैश्चरो राहुः केतुश्चेति नवग्रहाः॥")
तेषां संस्थानम्। यथा,—
"भूमेर्योजनलक्षे तु सौरं मैत्रेय। मण्डलम्।
लक्षे दिवाकरस्यापि मण्डलं शशिनः स्मृतम्॥
पूर्णे शतसहस्रे तु योजनानां निशाकरात्।

नक्षत्रमण्डलं कृत्स्नमुपरिष्टात् प्रकाशते ॥
द्वितीये चोत्तरे वत्स ! बुधो नक्षत्रमण्डलात् ।
तावत्प्रमाणभागे तु बुधस्याप्युशना: स्थित: ॥
अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थित: ।
तृतीये तु भौमस्य स्थितो देवपुरोहित: ॥
सौरिर्बृहस्पतेश्चोर्द्ध द्वितीये समवस्थित: ॥"
इति विष्णुपुराणे । २ । ७ अध्याय: ॥

तेषां रथादि यथा,—
"योजनानां सहस्राणि भास्करस्य रथो नव ।
ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम ! ॥
सार्द्धकोटिस्तथा सप्तनियुतान्यधिकानि वै ।
योजनानान्तु तस्याक्षचक्रं यत्र प्रतिष्ठितम् ॥
चत्वारिंशत्सहस्राणि द्वितीयोऽक्षो व्यवस्थित: ।
प्रधान्यानि तु सार्द्धानि स्यन्दनस्य महामते ॥
अक्षप्रमाणसमयो: प्रमाणं तदृयुगार्द्धयो: ।
दक्षोऽक्षस्तदृयुगार्द्धेन ध्रुवाधारो रथस्य वै ।
द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले ॥
हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु ।
गायत्री च बृहत्युष्णिगनुजगती त्रिष्टुबेव च ॥
अनुष्टुप् पंक्तिरित्युक्ताश्छन्दांसि हरयो रवे: ।
स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसै: ॥
स्तुवन्ति सुनय: सूर्यं गन्धर्वैर्गीयते पुर: ।
वृत्यन्तेऽप्सरसो यान्ति सूर्यस्यानु निशाचरा: ॥
वहन्ति पन्नगा यत्ते: क्रियते भीषु संग्रह: ।
बालखिल्याख्यमैर्वेनं परिवार्य समासते ॥
सोऽयं सप्तगण: सूर्यमण्डले मुनिसत्तम ! ।
हिमोष्णवारिवृष्टीनां हेतुत्वं समुपागत: ॥
रथस्त्रिचक्र: सोमस्य कुन्दाभास्तस्य वाजिन: ।
वामदक्षिणतो युक्ता दश तेन चरत्यसौ ॥ * ॥
वायुवेगसमैर्युक्तो रथश्चन्द्रसुतस्य च ।
पिशङ्गैस्सुरगैर्युक्त: सोऽष्टाभिर्वायुवेगिभि: ॥*॥
सवरूथ: सानुकर्षो युक्तो भूसम्भवैर्हयै: ।
सोपासङ्गपताकस्तु शुक्रस्यापि रथो महान् ॥*॥
अष्टास्र: काञ्चन: श्रीमान् भौमस्यापि रथो महान् ।
पद्मरागमयैरश्वै: संयुक्तो वह्निसन्नयै: ॥ * ॥
अष्टाभि: पाण्डुरैर्युक्ते वाजिभि: काञ्चने रथे ।
तस्मिंस्तिष्ठति वर्षं वै राशौ राशौ बृहस्पति: ॥
आकाशसम्भवैरश्वै: ग्रथितै: स्यन्दनं युतम् ।
समारुह्य शनैर्याति मन्दगामी शनैश्चर: ॥ * ॥
सभ्राभोस्तुरगा ह्यष्टौ भङ्गाभा धूसरं रथम् ।
सकृदयुक्तास्तु मैत्रेय ! वहन्त्यनिरतं सदा ॥*॥
तथा केतुरथस्याश्वा अष्टौ ते वातरंहस: ।
धूलधूमवर्णाभा नानावारसनिभारुणा: ॥ * ॥
एते मया ग्रहाणां वै तवाख्याता रथा नव ।
सर्वे ध्रुवे महाभाग ! प्रबद्धा वायुरश्मिभि: ॥"
इति विष्णुपुराणे २ अंशे ८।१०।१२ अध्याय: ॥

ग्रहाणामशुभप्रतीकार: । राजमार्त्तण्डे ।
"दोषो न स्याद्ग्रहाणामग्निरविकरे ताम्रमिन्दौ च शृङ्गं पृथ्वीपुत्रे प्रवालं शशधरतनये स्रातकुम्भं भुजेन ।
देवाचार्ये च सूक्तां मणिमसुरगुरौ नीलकं सूर्यसूनौ राहौ लौहं त्वनिष्टे कमलजतनये राजपट्टं विभर्त्तु: ॥"
स्रातकुम्भं सुवर्णम् । राजपट्टं कर्पूराख्यीति ख्यातम् । अपि च । बुद्धिप्रकाशे ।
"त्रिभूलीं चौरिकामूलं गोजिह्वां हरदारकम् ।
ब्रह्मयष्टिं सिंहपुच्छीं वाराहं चन्दनं सितम् ।
अश्वगन्धां क्रमात् सूर्याद्यादीधोपशान्तये ॥"
इति ज्योतिषतत्त्वम् ॥

स्वजन्मराश्यवधिनवग्रहशुद्धिर्यथा,—
"केतूपप्लवभौममन्दगतय: षष्ठाष्टसंस्था: शुभा-
श्चन्द्रार्कावपि ते च तौ च दशमौ चन्द्र: पुन: सप्तम: ।
जीव: सप्तनवद्विपञ्चमगतो युग्मेषु सोमात्मज:
शुक्र: षड्दशसप्तवर्जमितरे सर्वेऽप्युदासे शुभा: ॥"
इति दीपिका ॥

रवि: ३।६।१०।११।राशय: । सोम: ३।६।७।१०।११ शुक्लपक्षे २।५।६ । जन्मार्क्षवर्ज्जितजन्मचन्द्र: शुभ: । मङ्गल: ३।६।१०।११ । बुध: २।४।६।८।१०।११।१२ । बृहस्पति: २।५।७।९।११ । शुक्र: १।२।३।४।५।८।९।११।१२ । शनि: ३।६।१०।११। राहु: ३।६।१०।११ । केतु: ३।६।१०।११राशय:॥
ग्रहाणां राशिभोगनिर्णय: । यथा,—
"रविर्मासं निशानाथ: सपादद्विसहयम् ।
पञ्चत्रयं भूमिपुत्रो बुधोऽष्टादशवासरान् ॥
वर्षमेकं सुराचार्य्यश्चाष्टाविंशदिनं भृगु: ।
शनि: सार्द्धदयं वर्षं स्वर्भानु: सार्द्धवत्सरम् ॥"
रवि: १ मास: । सोम: २।० दिनम् । कुज: ४५ दिनम् । बुध: १८ दिनम् । बृहस्पति: १ वत्सर: । शुक्र: २८ दिनम् । शनि: २।० वत्सर: । राहु: १।० वत्सर: । केतु: १।० वत्सर: । इति ज्योतिषम् ॥ * ॥ अथ चन्द्रादिषड्ग्रहाणामस्तोदयज्ञानम् । यथा,—
"अथोदयास्तमययो: परिज्ञानं प्रकीर्त्यते ।
दिवाकरकराक्रान्तमूर्त्तीनामस्यतेजसाम् ॥
सूर्य्यादयधिका: पश्चादस्तं जीवकुजार्कजा: ।
ऊना: प्रागुदयं यान्ति शुक्रज्ञौ वक्रिणौ तथा ॥
अल्पा विवस्वत: प्राच्यामस्तं चन्द्रसुभार्गवा: ।
त्रिजन्यधिका: पश्चादुदयं शीघ्रयायिन: ॥"*॥
एषां कालांशा यथा,—
"एकादशारेज्यस्य तिथिसंख्यार्कजस्य च ।
अस्तांशा भूमिपुत्रस्य दशसप्ताधिकास्तत: ॥
पञ्चादस्तमयोऽष्टाभिरुदय: प्राङ्महत्तया ।
प्रागस्त उदय: पश्चादस्तत्वाद्ग्रहभिर्भृगो: ॥
एवं बुधो द्वादशभिश्चतुर्दशभिरंशकै: ।
वक्रशीघ्रगती चार्कात् करोत्यस्तमयोदयौ ॥
एष्याधिकै: कालभागैर्दृश्या न्यूनैरदर्शना: ।
भवन्ति लोके खचरा भानुभाग्यस्तरश्मय: ॥"
इति सूर्य्यसिद्धान्त: ॥

तेषामस्तोदयदिनसंख्याज्ञानम् । यथा,—
"भुजाब्धिचन्द्रा-१२२ ब्धिदशाग्नि ३३ दस्रा ३२
वेदाचला ४० रामहते ४३ क्रमेण ।
भौमादिकस्यास्तदिनानि वक्रे
बुधस्य भूपा १६ दश भार्गवस्य ॥"
एषां एकसादस्तमयादुदयाद्वा अभ्युदयास्तज्ञानम् । यथा,—
"तथास्तवक्रात् कुजतोऽस्तवक्रे
जीव-२२ ब्धि-४ विश्वे-१३ हिंगि-१० नेत्र १२
मार्वै: ।
महास्तवक्रास्तविधौ सितस्य
क्रमेण वक्रस्तु नवेन्द्रमार्वै: १६ ॥"
गुरोरुदयस्य प्राक् पश्चात् शुक्रस्य तु उदयवक्रमहास्तानां प्राक् पश्चात् बालत्वदिनज्ञानम् । यथा,—
"दृङ्: पुरस्तादुदयस्य पश्चात्
बालश्च पक्षं १५ वचसां पति: स्यात् ।
एवं सित: पञ्चदिनानि दृश्यो
बालो भवेत्त्रीणि दिनानि वक्रे ॥
दृङ्स्तु पक्षं १५ भृगुजो महास्ते
बाल: पुरस्तञ्च दृगङ्गमेव ॥"
इति सिद्धान्तमञ्जरी ॥

अथ नवग्रहस्तोत्रम् ।
"जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम्
दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।
नमामि शशिनं भक्त्या शम्भोर्मुकुटभूषणम् ॥
धरणीगर्भसम्भूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहितार्द्धं नमाम्यहम्
प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सर्व्वगुणोपेतं नमामि शशिन: सुतम् ॥
देवतानामृषीणाञ्च गुरुं कनकसन्निभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥
हिमकुन्देन्दुवर्णाभं दैत्यानां परमं गुरुम् ।
सर्व्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥
नीलाञ्जनचयप्रख्यं रविपुत्रं महाग्रहम् ।
छायायां गर्भसम्भूतं वन्दे भक्त्या शनैश्चरम् ॥
अर्द्धकायं महाघोरं चन्द्रादित्यविमर्द्दकम् ।
सिंहिकायां सुतं रौद्रं तं राहुं प्रणमाम्यहम् ॥
पलाशधूमसङ्काशं ताराग्रहविमर्द्दकम् ।
रौद्रं रुद्रात्मजं क्रूरं तं केतुं प्रणमाम्यहम् ॥
व्यासेनोक्तमिदं स्तोत्रं य: पठेत् प्रयत: शुचि: ।
दिवा वा यदि वा रात्रौ शान्तिस्तस्य न संशय: ॥
ऐश्वर्य्यमतुलञ्चापि आरोग्यं पुष्टिवर्द्धनम् ।
नरनारीप्रियत्वञ्च नित्यं तस्योपजायते ॥
तत्तत्कोऽग्नियमो वायुर्यै चान्ये यक्षपीडका: ।
ते सर्व्वे प्रशमं यान्ति व्यासो ब्रूयान्न संशय: ॥"
इति श्रीव्यासभाषितं नवग्रहस्तोत्रं समाप्तम् ॥
(ग्रहाणामग्निवरुणौ ग्रहशब्दे द्रष्टव्यम् ॥*॥
नवं नूतनं ग्रहो ग्रहणं यस्येति विग्रहे नव वद्भे, त्रि । यथा, रामायणे । २ । ५८ । १ ।
"दृष्टं परमसम्मतं नवग्रहमिव द्विपम् ।")

नवच्छात्रः, पुं, (नवो नूतनश्छात्रः ।) प्रथममध्ययने प्रवृत्तः । नवीनविद्यार्थी । तत्पर्य्यायः । क्रियाकारः २ । इति त्रिकाण्डशेषः ॥

नवतः, पुं, (नूयते स्तूयते इति । नु + बाहुलकात् अतच् ।) ऋषिः । करिकलभः । इति हेमचन्द्रः । ३ । ६४४ ॥

नवतिः, स्त्री, (नव दशतः परिमाणमस्य । "षट्त्रिंविंशतित्रिंशद्दिति ।" ५ । १ । ५६ । इति निपातनात् साधुः ।) संख्याविशेषः । इति शब्दरत्नावली ॥ ६० नब्बर इति भाषा ॥ (यथा, रघुः । ३ । ६६ ।

"इति क्षितीशो नवतिं नवाधिकां
महाक्रतूनां महनीयशासनः ।
समारुरुक्षुर्दिवमायुषः क्षये
ततान सोपानपरम्परामिव ॥"

नवतिसंख्यान्विते च । यथा, मनुः । ३ । १७७ ।

"वीक्षान्नो नवतेः काणः षष्ठेः श्वित्री गृहस्य तु ।
पापरोगी सहस्रस्य दातुर्नाश्नाति फलम् ॥")

नवतिका, स्त्री, (नवं नूतनं तेकते करोतीति । तिक + कः । टाप् ।) तूलिका । इति हारावली । १३७ ॥ (नवतिरेव । स्वार्थे कः । तत्रापि । नवतिसंख्या ॥)

नवतिम्नः, [स्] त्र, बहुनवति । नवति नवतीति वीप्सायां घप्रत्ययः ॥

नवती, स्त्री, (नवतिः + ऋदिकारादिति वा ङीष् ।) नवतिः । इति शब्दरत्नावली ॥

नवदण्डं, क्ली, (नवो दण्डो नव दण्डा वा यत्र ।) राज्ञां क्षत्रविशेषः । यथा, युक्तिकल्पतरुः ।

"मनोहरं त्रिकनकदण्डञ्च नवदण्डकम् ।
छत्रञ्च विविधं श्रेयं विविधानां महीभुजाम् ॥"

अस्य विवरणं छत्रशब्दे द्रष्टव्यम् ॥

नवदलं, क्ली, (नवं दलमिति कर्म्मधारयः ।) पद्मस्य क्षीरसमीपस्थदलम् । पद्मादीनां जटिकाकारनवपत्रम् । तत्पर्य्यायः । संवर्त्तिका २ । इत्यमरः । २ । १० । ४३ ॥ संवर्त्तिः २ संवर्त्तौ ४ । इति भरतः ॥ सामान्यनूतनपत्रम् । इति हेमचन्द्रः ॥ दलमात्रम् । इति मेदिनी ॥

नवदीधितिः, पुं, (नव दीधितयः किरणाः यस्य ।) मङ्गलग्रहः । इति जटाधरः ॥

नवदुर्गा, स्त्री, (नवसंख्यान्विता दुर्गा ।) नवपत्रिका । (यदुक्तम् ।

"कदली दाड़िमी धान्यं हरिद्रा मानकं कचु ।
विल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका ॥")

यथा, वृहन्नन्दिकेश्वरपुराणे ।

"पत्रिके नवदुर्गे त्वं महादेवमनोरमे ।
पूजां समस्तां संयच्छ रक्ष मां विदशेश्वरि ! ॥"

कुमारिका १ त्रिमूर्त्तिः २ कल्याणी ३ रोहिणी ४ कालिका ५ चण्डिका ६ शाम्भवी ७ दुर्गा ८ भद्रा ९ इति नवनामिका कन्या । यथा,—

"यन्नाक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥"

इति निर्णयसिन्धुः ॥

नवदोला, स्त्री, (नवा नूतना दोला ।) नूतनप्रेङ्खा । अस्या विवरणं चतुर्दोलशब्दे द्रष्टव्यम् ॥ तदारोहणदिनं यथा,—

"उत्तरेन्द्रमूलाहिश्रिवासिवर्जे
शुक्लेन्दुतारातिथिलग्नयोगे ।
विष्टिव्यतीपातयमाहवर्जे
दोलादिकारोहणमाद्यमिष्टम् ॥"

इति समयप्रदीपः ॥

नवधा, य, (नव + प्रकारे धाच् ।) नवप्रकारः । यथा,—

"आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् ।
निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम् ॥"

नवनाड़ीचक्रं, क्ली, (नवनक्षत्रयुक्तं नाड़ीचक्रम् ।) राज्ञो नवनक्षत्रयुक्तवक्ररेखात्मकचक्रम् । यथा, ज्योतिषतत्त्वे ।

"जन्मादि कर्म्म ततोऽपि दशमं सांघातिकं
वोड्यभम् ।
सप्तदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम् ॥
त्राद्यः स्युः पञ्चविंशं मानसमेवं नरः षड्ऋक्षः
स्यात् ।
नवनक्षत्रो नृपतिः स्वजातिदेशाभिषेकर्क्षैः ॥"

नवनी, स्त्री, (नवं नीयते इति । नी + डः । गौरादित्वात् ङीष् ।) नवनीतम् । यथा,—

"अहो हैयङ्गवीनानां नवनीनां परं सदा ।
लड्डुकानां शर्करार्णां खल्लिकानाञ्च यत्नतः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४५ अध्यायः ॥

नवनीतं, क्ली, (नवं नीयतेऽनेनेति । नी + क्तः ।) गव्यविशेषः । माखन इति ननी इति च भाषा । तत्पर्य्यायः । नवोद्धृतम् २ । इत्यमरः । २ । ९ । ५२ ॥ सरजम् ३ मन्थजम् ४ हैयङ्गवीनम् ५ । इति रत्नमाला । दधिजम् ६ सारम् ७ हैयङ्गवीनकम् ८ । अस्य सामान्यगुणाः । शीतलम् । वर्ण्यबलावहत्वम् । सुमधुरत्वम् । वृष्यत्वम् । संग्राहकत्वम् । कफरुचिकारकत्वम् । वातसर्व्वाङ्गमूलकाशश्रमनाशित्वम् । सुखकरत्वम् । कान्तिपुष्टिप्रदत्वम् । चक्षुष्यत्वम् । सर्व्वदोषापहरत्वञ्च ॥ * ॥ नवोद्धृतगव्यमाहिषनवनीतगुणाः । बालवृद्धानां प्रशस्तत्वम् । बलकारित्वम् । वातवर्द्धनत्वञ्च ॥ * ॥ माहिषनवनीतगुणाः । कषायत्वम् । मधुरत्वम् । शीतलम् । वृष्यत्वम् । बल्यत्वम् । ग्राहित्वम् । पित्तघ्नत्वम् । सुस्निग्धत्वञ्च ॥ * ॥ छागनवनीतगुणाः । क्षयकासश्वेतामयकफनाशित्वम् । बल्यत्वम् । दीपनत्वञ्च ॥ * ॥ आविकनवनीतगुणाः । हिमत्वम् । लघुत्वम् । योनिमूले कफे वाते गुदमूले हितत्वञ्च ॥ * ॥ ऐड़कनवनीतगुणाः । क्लिन्नगन्धत्वम् । शीतलत्वम् । मेधानाशित्वम् । गुरुत्वम् । पुष्टिश्लोकारित्वम् । मन्दाग्निदीपनत्वञ्च ॥ * ॥ हस्तिनीनवनीतगुणाः । कषायत्वम् । शीतलत्वम् । लघुत्वम् । तिक्तत्वम् । विदग्धित्वम् । जन्तुपित्तकफकृमिनाशित्वञ्च ॥ * ॥ अश्वीनवनीतगुणाः । कषायत्वम् । कफवातनाशित्वम् । चक्षुष्यत्वम् । कटुत्वम् । उष्णत्वम् । दृग्दहातापहारकत्वञ्च ॥ गर्दभीनवनीतगुणाः । कषायत्वम् । कफवातनाशित्वम् । बल्यत्वम् । दीपनत्वम् । पाके लघुत्वम् । सूत्रदोषनाशित्वञ्च ॥ * ॥ औष्ट्रनवनीतगुणाः । पाके शीतलत्वम् । व्रणक्रिमिकफास्रवातनाशित्वञ्च ॥ * ॥ नारीनवनीतगुणाः । रुच्यत्वम् । पाके लघुत्वम् । चक्षुष्यत्वम् । दीपनत्वम् । सर्व्वरोगविषनाशित्वञ्च ॥ * ॥

अथ साधारणनवनीतगुणाः ।

"शीतं रुच्यनवोद्धृतं सुमधुरं वृष्यञ्च वातापहं
कासघ्नं क्रिमिनाशनं कफहरं संग्राहि शूलापहम् ।
बल्यं पुष्टिकरं क्षयार्त्तिशमनं सन्तापविच्छेदनं
चक्षुष्यं श्रमहारि तर्पणकरं दध्युद्भवं शस्यते ॥
एकाहाध्युषितं प्रोक्तमुत्तरोत्तरगन्धदम् ।
अरुच्यं सर्व्वरोगाढ्यं क्षीणानं सहितं स्मृतम् ॥"

इति राजनिर्घण्टः ॥

अपि च । गव्यनवनीतगुणाः ।

"नवनीतं हितं गव्यं वृष्यं वर्ण्यमलापहम् ।
संग्राहि वातपित्तास्रक् क्षयार्शोऽहितकासजित् ॥
तद्धितं बालके वृद्धे विशेषादग्नितं स्त्रियोः ॥"*॥

माहिषनवनीतगुणाः ।

"नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ।
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥"

अथ पयसो नवनीतस्य गुणाः ।

"दुग्धोत्थं नवनीतन्तु चक्षुष्यं रक्तपित्तनुत् ।
वृष्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलम् ॥"

अथ सद्यःसमुद्धृतनवनीतगुणाः ।

"नवनीतञ्च सद्यस्कं स्वादु ग्राहि हिमं लघु ।
मेध्यं किञ्चित् कषायाम्लमौषत्तक्रांशसंक्रमात् ॥"

अथ चिरन्तननवनीतगुणाः ।

"सञ्चारकटुकाम्लत्वाच्चर्ब्बरं क्षुरकारकम् ।
श्लेष्मलं गुरुभेदस्यं नवनीतं चिरन्तनम् ॥"

इति भावप्रकाशः ॥

"नवनीतं नवं वृष्यं ग्राहि वर्ण्यबलाप्रदम् ।
चक्षुष्यं दृंहणं स्निग्धं यद्दग्ध्यग्नेर्विकारनुत् ॥
क्षीरोत्थितं हिमं ग्राहि रक्तपित्तातिरोगनुत् ॥"

इति राजवल्लभः ॥

नवनीतकं, क्ली, (नवनीतात् कायति प्रकाशते इति । कै + कः ।) घृतम् । इति राजनिर्घण्टः ॥ (नवनीत + स्वार्थे कन् । नवनीतम् । यथा, हारीते त्रिकितृस्तिस्थाने १० अध्याये ।

"सर्पिः प्रयुक्तं नवनीतकञ्च ॥"

पर्य्यायोऽस्य यथा,—

"रुच्यं सरजं हैयङ्गवीनं नवनीतकम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

नवनीतधेनुः, स्त्री, (नवनीतेन कृता धेनुः । मध्यपदलोपिकर्म्मधारयः ।) दानार्थकृतनवनीतमयधेनुविशेषः । यथा,—

"नवनीतमयीं धेनुं कृत्वा राजन् ! प्रयत्नतः ।
यां श्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥
गोमयेनानुलिप्तायां भूमौ गोचर्म्ममात्रतः ।

कृष्णचर्म्मन्यगस्यैव तस्योपरि च धारयेत् ॥
कुम्भन्तु नवनीतस्य प्रस्थमात्रस्य धारयेत् ।
वस्त्रं चतुर्थभागस्य तस्या उत्तरतो न्यसेत् ॥
ह्रत्वा विधानेन च राजसिंह-
सुवर्णशृङ्गी सुसुखी च कार्य्या ।
नेत्रे च तस्या मणिमौक्तिकेन्तु
कृत्वा तथान्यच्च गुडेन जिह्वाम् ॥
ओष्ठौ च पुष्पैश्च फलैश्च दन्ता:
प्रकल्प्य सान्नाश्च सितैश्च सूत्रै: ॥
नवनीतस्थनीं राजन्निक्षुपादां प्रकल्पयेत् ।
ताम्रपृष्ठीं कांस्यदोहां दर्भरोमलतच्छवीम् ॥
स्वर्णशृङ्गीं रौप्यखुराम् पद्मरत्नसमन्विताम् ।
चतुर्भिस्तिलपात्रैस्तु संयुतां सर्व्वतो दिश: ॥
आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैरलङ्कृतम् ।
दिक्षु दीपांश्च प्रज्वाल्य ब्राह्मणाय निवेदयेत् ॥
वेदवेदाङ्गविदुषे आहिताग्निर्ज्जितात्मवान् ।
मन्त्रास्त्र एव जप्तव्या: सर्व्वधेनुषु ये स्मृता: ॥
पुरा देवासुरै: सर्व्वै: सागरस्य तु मन्थने
उत्पन्नं दिव्यमन्तं नवनीतमिदं शुभम् ॥
आप्यायनञ्च भूतानां नवनीत ! नमोऽस्तु ते ।
एवमुच्चार्य्य तां दद्यात् ब्राह्मणाय कुटुम्बिने ॥
धेनुञ्च दत्त्वा सुसुदां सोपधानां
नयेद्गृहं विप्रवर्य्यस्य भूय: ।
हविष्यमेव सरसञ्चोपभुक्ता
तिष्ठेद्दिनं धेनुदस्त्रीणि विप्र: ॥
य: प्रपश्यति तां धेनुं दीयमानां नरोत्तम ।
सर्व्वपापविनिर्म्मुक्त: शिवसायुज्यतां व्रजेत् ॥
पितृभि: पूर्व्वजै: सार्द्धं भविष्यञ्चिञ्च मानव: ।
विष्णुलोकं व्रजत्याशु यावदाकृतसंप्लवम् ॥
य इदं शृणुयाच्छ्रद्धा श्रावयेद्वापि मानव: ।
सर्व्वपापविशुद्धात्मा विष्णुलोके महीयते ॥"
इति वराहपुराणम् ॥

नवपाठक:, पुं, (नवो नूतन: पाठकोऽध्यापक:।) नूतनाध्यापक: । इति सिद्धान्तकौमुदी ॥

नवफलिका, स्त्री, (नवं फलं यस्या: । कापि अत इत्वम् ।) नवम् । नवजातरजोऽङ्गना । इति मेदिनी । के, २३० ॥

नवम:, त्रि, (नवन्+"तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् । ततो "नान्तादसंख्यादेर्म्मट् ।" ५ । २ । ४९ । इति डटो मट् ।) नवानां पूरण: । इति व्याकरणम् ॥ नयइ इत्यादि भाषा ॥

नवमल्लिका, स्त्री, (नवा नूतना स्तुत्या वा मल्लिका ।) नवमालिका । इति शब्दरत्नावली ॥ (यथा, प्रबोधचन्द्रोदये । १ । १२ ।
"रम्यं हर्म्यातलं नवा: सुनयना गुञ्जद्विरेफा लता: ।
प्रोन्मीलन्नवमल्लिका: सुरभयो वाता: सचन्द्रा निशा: ॥")

नवमालिका, स्त्री, (नवा नूतना मालिका मल्लिकापुष्पम् ।) नवमल्लिकापुष्पम् । वासन्ती नेवारी इति लोके । नेयालि इति नेओयार इति च भाषा । तत्पर्य्याय: । अतिमोदा २ ग्रेष्मी ३ ग्रीष्मोद्भवा ४ सप्तला ५ सुकुमारी ६ सुरभि: ७ शुचिमल्लिका ८ सुगन्धा ९ शिखरिणी १० नवाली ११। इति राजनिर्घण्ट: ॥ भद्रवर्म्मा १२ देवलता १३ । इति शब्दचन्द्रिका ॥ गन्धनिलया १४ मालिका १५ नवमल्लिका १६ । इति शब्दरत्नावली ॥ तस्या गुणा: । अतिश्लेष्मत्वम् । सुरभित्वम् । सर्व्वरोगहरत्वञ्च । इति राजनिर्घण्ट: ॥ तन्नामगुणा: ।
"नेपाली कथिता तज्ज्ञै: सप्तला नवमालिका ।
वासन्ती श्लीतला लघ्वी तिक्ता दोषत्रयाजित्॥"
इति भावप्रकाश: ॥

नवमी, स्त्री, (नवम+टित्त्वात् ङीप् ।) तिथिविशेष: । सा चन्द्रस्य नवमकलाक्रियारूपा । शुक्लपक्षे ९ कृष्णपक्षे २४ पञ्जिकाकारसङ्केतेन एतदङ्कबोधिता ॥ अथ नवमीव्रतम् । "सा चाष्टमीयुता ग्राह्या युग्मात् । भविष्ये ।
'मासैश्चतुर्भिर्यैत् पुण्यं विधिना पूज्य चण्डिकाम् ।
तत् फलं लभते वीर नवम्यां कार्त्तिकस्य च ॥'
तथा भविष्ये ।
'माघे मासि तु या शुक्ला नवमी लोकपूजिता ।
महानन्देति सा प्रोक्ता सदानन्दकरी नृणाम् ॥
स्नानं दानं जपो होमो देवार्च्चनमुपोषणम् ।
सर्व्वं तदक्षयं प्रोक्तं यत्स्यां क्रियते नरै: ॥'
तथा कालिकापुराणम् ।
'नवम्यां नववर्षाणि राजन् ! पिष्टाशनो भवेत् ।
तस्य तुष्टा भवेद्गौरी सर्व्वकामप्रदा शुभा ॥'
यदोत्यादि नवम्यान्तिथावारभ्य नव वर्षाणि यावत् प्रतिशुक्लनवम्यां पिष्टेतरभोजननिवृत्तिव्रतमिति सङ्कल्पे विशेष: । सर्व्वकामप्रदगौरीतोष: फलम् ।" इति तिथितत्त्वम् ॥ श्रीरामनवमीव्यवस्था तच्छब्दे द्रष्टव्या ॥* ॥ इयं दुर्गातिथि: । तत्र तस्या: पूजा कर्त्तव्या । यथा,—
ब्रह्मोवाच ।
"इयं देवी वरारोहा यातु शैलं हिमाचलम् ।
तत्र यूयं सुरा: सर्व्वे गत्वा नन्दत माचिरम् ॥
नवम्याञ्च सदा पूज्या इयं देवी समाधिना ।
वरदा सर्व्वलोकानां भविष्यति न संशय: ॥
नवम्यां यच्च पिष्टान्नं भविष्यति हि मानव: ।
नारी वा तस्य सम्पन्नं भविष्यति मनोगतम् ॥"
इति वराहपुराणम् ॥
कार्त्तिकशुक्लनवम्यां जगद्धात्रीपूजाप्रमाणानि यथा,—
"प्रपूजयेज्जगद्धात्रीं कार्त्तिके शुक्लपक्षके ।
दिनोदये च मध्याह्ने सायाह्ने नवमीदिने ॥"
इति मायातन्त्रे १७ पटल: ॥
"कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च ।
उपस्थाहोदितो भानुर्दुर्गामाराध्य यत्नवान् ॥
पुत्रारोग्यधनं लेभे लोकसाक्षित्वमेव च ।
तां तिथिं प्राप्य मनुज: श्रवणर्भोमदिने यदि ।
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम् ॥"
इति कात्यायनीतन्त्रे ७८ पटल: ॥

"कार्त्तिके शुक्लपक्षे तु त्रेतायां प्रथमेऽहनि ।
विसन्ध्यं पूजयेद्देवीं दुर्गां सम्यक्प्रहृष्टवे ॥"
इत्युत्तरकामाख्यातन्त्रे ११ पटल: ॥
अथ नवमीजातफलम् । यथा, कोष्ठीप्रदीपे ।
"विरोधकर्त्ता सुजनैरगम्य:
परापकारार्थमति: कुशील: ।
आचारहीन: कृपण: कठोर:
प्रसूतिकाले नवमी यदि स्यात् ॥"

नवयौवना, स्त्री, (नवं यौवनं यस्या: ।) युवती । तत्पर्य्याय: । किशोरी २ । इति हारावली । १५४ ॥ तारुणी ३ कुशेली ४ । इति शब्दमाला ॥

नवरङ्ग, क्ली, (नव रङ्गा यस्मात् ।) कायस्थसुखकुलीनानां षष्ठदानचतुर्थहस्यात्मककुलविशेष: । तद्यथा,—
"समाने प्रथमं दानं द्वितीयञ्च कनिष्ठके ।
षड्भ्रातरि तृतीयञ्च मध्यश्रेष्ठे चतुर्थकम् ॥
तैर्योजे पञ्चमं दानं कुर्य्यादेतद्विधानत: ।
यद्दानं जन्मनि समे कनिष्ठे च द्वितीयकम् ॥
तृतीयं जन्ममध्यांशे तैर्योजेऽपि चतुर्थकम् ।
नवरङ्गमिति प्रोक्तं सुखानां हि महागुणम् ॥"
इति कुलाचार्य्यकारिका ॥

नवरत्नं, क्ली, (नवानां रत्नानां समाहार: ।) नवप्रकारमणय: । तद्यथा,—
"मुक्तामाणिक्यवैदूर्य्यगोमेदान् वज्रविद्रुमौ ।
पद्मरागं मरकतं नीलञ्चेति यथाक्रमात् ॥"
इति तन्त्रसार: ॥
(यथा च,—
"वज्रञ्च मौक्तिकञ्चैव माणिक्यं नीलमेव च ।
तथा मरकतं ज्ञेयं महारत्नानि पञ्चधा ॥
गोमेद: पद्मरागश्च वैदूर्य्यञ्च प्रवालकम् ।
चत्वारि उपरत्नानि नवरत्नमिदं स्मृतम् ॥"
"रत्नं गारुत्मतं पुष्पं रागो माणिक्यमेव च ।
इन्द्रनीलञ्च गोमेदस्तथा वैदूर्य्यमित्यपि ॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव ॥
रत्नं हीरा । गारुत्मतं पान्না । माणिक्यं पद्मराग: । इन्द्रनील: नीला ।"इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) नवग्रहदोषशान्त्यै धार्य्याणि नव रत्नानि यथा,—
"वैदूर्य्यं धारयेत् सूर्य्ये नीलञ्च शनालाञ्छने ।
आवनेयेऽपि माणिक्यं पद्मरागं शशाङ्कजे ॥
गुरौ मुक्तां भृगौ वज्रं शनौ नीलं विदुर्बुधा: ।
राहौ गोमेदकं धार्य्यं केतौ मरकतन्तथा ॥"
इति दीपिका ॥
विक्रमादित्यराजसभास्थनवसंख्यकपण्डिता: । यथा,—
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासा: ।
ख्यातो वराहमिहिरो नृपते: सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥"
इति नवरत्नम् ॥

नव श्लोका: । यथा,—
"मित्रमर्थो तथा गोत्रिर्धर्म्मकार्य्यसहायका: ।

क्रौर्यां विद्वान् तथोत्खातान् नवरत्नमिदं क्रमात् ॥
मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं
कार्य्यैश्च द्विजमादरेण युवतीं प्रेम्णा समै-
र्बान्धवान् ।
अल्पं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं श्लोकेन कुर्य्याद्-
वशम् ॥ १ ॥
अर्थी लाघवमुच्छ्रितो निपतनं कामातुरो
लाञ्छनं
क्षुब्धोऽकीर्त्तिमसङ्करः परिभवं दुष्टोऽन्य दोषे
रतिम् ।
निःस्वो वञ्चनसज्ञना विकलतां शोकाकुलः
संशयं
दुर्भगप्रियतां दुरोदरवशः प्राप्नोति कष्टं
मुहुः ॥ २ ॥
नीतिर्भूमिभुजां नतिर्गुणवतां दीक्षागुणानां धृति-
र्दम्भस्य श्रियो गुरुस्य कविता बुद्धेः प्रसादो
गिराम् ।
लावण्यं वपुषः स्तुतिः सुमनसां भ्रान्तिर्द्विजस्य
क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां
मज्जनम् ॥ ३ ॥
धर्म्मः प्रागेव चिन्त्यः सचिवमतिगतिर्भावनीया
सदैव
श्रेयं लोकाद्वृत्तं वरचरनयनैर्मंङ्गलं वीक्ष-
णीयम् ।
प्रच्छाद्यौ रागरोषौ मृदुपरुषगुणौ योजनीयौ
च काले
आत्मा यत्नेन रक्ष्यो रंध्रशिरसि पुनः सोऽपि
नापेक्षणीयः ॥ ४ ॥
कार्पण्येन यशः क्षुधा गुणचयो दम्भेन सत्यं
मुषा
मर्य्यादा व्यसनैर्धनानि विपदा स्थैर्य्यं प्रमादे-
र्द्विजः ।
पैशुन्येन कुलं मदेन विनयो दुश्चेष्टया पौरुषं
दारिद्र्येण जनादरो ममतया चात्मप्रकाशो
हृतः ॥ ५ ॥
मूर्खो ग्राम्यसखी क्षितिपतिरलसो मत्सरी
धर्म्मशीलो
दुःस्थो मानी गृहस्थः प्रसरतिशयवान् शास्त्र-
विद्धर्म्महीनः ।
आज्ञाहीनो नरेन्द्रः शुचिरपि सततं यः परा-
न्नोपभोगी
वृद्धो रोगी दरिद्रः स च युवतिपतिर्धिग्विडम्ब-
प्रकारम् ॥ ६ ॥
क्लेशो यौवनमर्थिनामनुगमो राज्ञां प्रतापः
सतां
सत्यं स्वल्पधनस्य सञ्चितिरसद्वृत्तस्य वाग-
डम्बरः ।
आचारस्य मनोदमः परिणतेर्विद्या कुलस्यैकता
छलाया धनमुन्नतेर्गुणचयः भ्रान्तेर्विवेको
बलम् ॥ ७ ॥

विद्वान् संसदि प्राज्ञिकः परवशो मानी दरिद्रो
गृही
वित्ताढ्यः कृपणः सुखी परवशो वृद्धो न
तीर्थाश्रितः ।
राजा दुःसचिवः प्रियः कुलभवो सर्खः पुमा-
स्त्रीजितः
वेदान्ती हतसत्क्रियः किमपरं हास्यास्पदं
भूतले ॥ ८ ॥
उत्खातान् प्रतिरोपयन् कुसुमितांश्चिन्वन्
शिमून् वर्द्धयन्
प्रोत्तुङ्गान् नमयन् नतान् समुदयन् विश्लेषयन्
संहतान् ।
तोयान् कण्टकिनो बहिर्नियमयन् म्लानान्
मुहुः सेचयन्
मालाकार इव प्रयोगनिपुणो राजा चिरं
नन्दतु ॥ ९ ॥)

नवरात्रं, क्ली, (नवानां रात्रीणां समाहारः । तत् साधनत्वेनास्त्यस्येति अच् ।) आश्विनशुक्ल-प्रतिपदादिनवमीपर्य्यन्तनवदिनकर्त्तव्यदुर्गाव्रत-विशेषः । तस्यारम्भः । देवीपुराणे डामरतन्त्रे च देवीवचः ।
"अमायुक्ता न कर्त्तव्या प्रतिपत् पूजने मम ।
सुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्विता ॥"
मार्कण्डेयदेवीपुराणयोः ।
"पूर्व्वविद्धा तु या शुक्ला भवेत् प्रतिपदाश्विनी ।
नवरात्रव्रतं तस्यां न कार्य्यं शुभमिच्छता ॥"
अथोपवासादिकमुक्तं हेमाद्रौ भविष्ये ।
"एवञ्च विन्ध्यवासिन्यां नवरात्रोपवासतः ।
एकभक्तेन नक्तेन तथैवायाचितेन च ॥
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ।
स्नातैः समुदितैर्हृष्टैर्नारीभिः चित्रियैर्नृपैः ॥
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥"
मदनरत्ने देवीपुराणेऽपि ।
"कन्यासंस्थे रवौ शुक्ल ! शुक्लामारभ्य नन्दिकाम् ।
अपाप्नुयात् फलमेकाग्रो नक्ताशी वाथ वायुदः ॥
भूमौ शयीत चाम्लञ्च कुमारीर्भोजयेन्मुदा ।
वस्त्रालङ्कारदानैश्च सन्तोष्याः प्रतिवासरम् ॥
बलिञ्च प्रत्यहं दद्यादोदनं मांसमाषवत् ।
त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः ॥"
स्कान्दे ।
"मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः ।
संपूज्य नवदुर्गाञ्च नक्तं कुर्य्यात् समाहितः ॥
नवरात्राभिधं कर्म्म नक्तव्रतमिदं स्मृतम् ।
तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम् ॥
अष्टरात्रे न दोषोऽयं नवरात्रतिथिक्षयः ॥"*॥
तत्र पूजाविधिः । सा च जयन्त्यादिमन्त्रेण नवावरणेन वा कार्य्या । यथा । सङ्कल्पं विधाय घटं संस्थाप्य तत्र देवीमावाह्य षोडशोपचारैः पूजयित्वा मायबीजवलिं छागाद्यादिबलिं वा निवेदयेत् ॥ * ॥ ततः कुमारीपूजा । यदुक्तं हेमाद्रौ स्कान्दे ।
"एकैकां पूजयेत् कन्यामेकवृद्ध्या तथैव च ।
द्विगुणं त्रिगुणं वापि प्रत्येकं नवकन्तु वा ॥"
तथा,—
"नवभिर्लभते भूमिमैश्वर्य्यं द्विगुणेन तु ।
एकवृद्ध्या लभेत् क्षेममेकैकेन श्रियं लभेत् ॥"
अथ कुमारीनिर्णयः ।
"एकवर्षा तु या कन्या पूजार्थे तां विवर्ज्जयेत् ।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥"
तेन द्विवर्षमारभ्य दशवर्षपर्य्यन्तम् । कुमारिका १ त्रिमूर्त्तिः २ कल्याणी ३ रोहिणी ४ काली ५ चण्डिका ६ शाम्भवी ७ दुर्गा ८ सुभद्रा ९ इति नवनामभिस्ताः पूजनीयाः । आसामावाहन-मन्त्राः । यथा,—
"मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥
एवमभ्यर्च्चनं कुर्य्यात् कुमारीणां प्रयत्नतः ।
कच्चुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः ॥
नानाविधैर्भक्ष्यभोज्यैर्भोजयेत् पायसादिभिः ॥"
तासां वयोभेदमाह ।
"यन्थिस्फुटितशीर्षाङ्गीं रक्तपूयव्रणाङ्किताम् ।
जात्यन्धां केकरां काणीं कुरूपां तनुरोमशाम् ।
सन्त्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवाम् ॥"
तासां जातिविशेषे फलविशेषो यथा,—
"ब्राह्मणीं सर्व्वकार्य्येषु च जयार्थे नृपवंशजाम् ।
लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजाम् ॥
दारुणे चान्यजातानां पूजयेद्विधिना नरः ॥"
अत्र वेदचण्डीपाठ उक्तः । रुद्रयामले ।
"एवं चतुर्व्वेदविदो विप्रान् सर्व्वान् प्रसादयेत् ।
तेषाञ्च वरणं कार्य्यं वेदपारायणाय वै ॥"
तथा,—
"एकोत्तराभिवृद्ध्या तु नवमीं यावदेव हि ।
चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः ॥"*॥
अत्राश्वयुतोऽश्वपूजनमुक्तम् । मदनरत्ने देवी-पुराणे ।
"अश्वयुक्शुक्लप्रतिपत्स्नातियोगे शुभे दिने ।
पूर्व्वसूचेः अथवा नाम प्रथमं श्रियमाहरत् ॥
तस्मात् साश्वैर्नरैस्तत्र पूज्योऽसौ श्रद्धया सह ।
पूजनीयाश्च तुरगा नवमीं यावदेव हि ॥
शान्तिः स्वस्ययनं कार्य्यं तथा तैषां दिने दिने ।
धान्यं भक्तातकं कुल्थं वचा सिद्धार्थकास्तथा ॥
पञ्चवर्णेन सूत्रेण ग्रन्थिन्तेषान्तु बन्धयेत् ।
वायव्येवारुणैः सौरैः शाक्रैसैन्यैः सवैष्णवैः ॥
वैश्वदेवैस्तथाग्नेयैर्होमः कार्य्यो दिने दिने ॥"
तत्र गजपूजापि । कल्पतरौ ।
"ज्येष्ठायोगे पुरा तत्र गजाश्चाष्टौ महाबलाः ।
पृथिवीमवहन् पूर्व्वं सशैलवनकाननाम् ॥
कुमुदैरावतौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नीलस्तस्मात्तांस्तत्र पूजयेत् ॥"
अथ प्रतिपदादिषु विशेषो दुर्गाभक्तितरङ्गिण्यां भविष्ये ।
"केशसंस्कारदन्धावि प्रदद्यात् प्रतिपद्दिने ।
पक्वतैलं द्वितीयायां केशसंयमहेतवे ॥
दर्पणञ्च तृतीयायां सिन्दरालक्तकन्तथा ।

मधुपर्कं चतुर्थ्यासु तिलकं नेत्रमङ्गलम् ॥
पञ्चम्यामङ्गरागश्च शृङ्गालङ्करणानि च ।
षष्ठ्यां विल्वतरौ बोधं सायंसन्ध्यासु कारयेत् ॥
सप्तम्यां प्रातरानीय गृहमध्ये प्रवेशयेत् ।
उपोषणमथाष्टम्यामात्मशक्त्या तु पूजनम् ॥
नवम्यामुग्रचण्डायाः पूजां कुर्याद्बलिं तथा ।
संपूज्योपोषणं कुर्यात् दशम्यां शावरोत्सवैः ॥
अनेन विधिना यस्तु देवीं प्रीणयते नरः ।
स्कन्दवत् पालयेद्देवी तं पुत्रधनकीर्तिभिः ॥"
आश्विनशुक्लपक्षे मूलनक्षत्रे सरस्वतीस्थापनम् ।
यथोक्तं निर्णयामृते देवीपुराणे ।
"मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनम् ।
उत्तरासु बलिं दद्यात् श्रवणेन विसर्जयेत् ॥"
रुद्रयामलेऽपि ।
"मूलनक्षत्रे सुरार्चायां सरस्वतीम् ।
पूजयेत् प्रत्यहं देव यावद्देयाबन्धनकम् ॥
गाथापयेच्च लिखेन्नाधीयीत कदाचन ।
पुस्तके स्थापिते देवि! विद्याकामो द्विजोत्तमः ॥"
स्त्रीणाञ्च नवरात्रे ताम्बूलचर्वणादिकं न निषिद्धम् । तदुक्तं व्रतहेमाद्रौ गारुडे ।
"गन्धालङ्कारताम्बूलपुष्पमालानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥"
एतत् सभर्तृकोपवासविषयम् ॥ * ॥ हेमाद्रौ ।
आश्विनमाघचैत्रश्रावणमासचतुष्टये शुक्ला-ष्टम्यादिपक्षदयरात्रव्रतमभिधाय । अथवा नव-रात्रञ्च सप्तपक्षत्रिकं दिवा । इत्युक्तम् । देवी-पुराणे ।
"नवरात्रव्रतेऽप्यक्तक्षिरात्रैकरात्रकम् ।
व्रतचरति यो भक्त्या तस्मै दास्यामि वाञ्छितम्॥"*
(यथाच देवीभागवते । ३ । २६—२७ ।
"शृणु राजन् ! प्रवक्ष्यामि नवरात्रव्रतं शुभम् ।
शरत्काले विशेषेण कर्तव्यं विधिपूर्वकम् ॥
वसन्ते च प्रकर्तव्यं तथैव प्रेमपूर्वकम् ।
द्वाभ्यां यमदंष्ट्राभ्यां नृणां सर्वजनेषु वै ॥
शरद्वसन्तनामानौ दुर्गमौ प्राणिनामिह ।
तस्मादुभयकालेषु कार्यं सर्वत्र शुभमिच्छता ॥
द्वावेव सुमहाघोरौ तु रोगकरौ नृणाम् ।
वसन्तशरदावेव जगतामुग्रकारयुभौ ॥
तस्मात्तत्र प्रकर्तव्यं चण्डिकापूजनं बुधैः ।
चैत्राश्विने शुभे मासे भक्तिपूर्वं नराधिप ! ॥
अमावस्यां समासाद्य सम्भारं कल्पयेच्छुभम् ।
हविष्यान्नं कार्यमेकभक्तन्तु तद्दिने ॥
मण्डपस्तु प्रकर्तव्यः सप्ते देशे शुभे स्थले ।
हस्तषोड़शमानेन कुम्भध्वजसमन्वितः ॥
गोरुन्दृगोमयाभ्यां च लेपनं कारयेत्ततः ।
तन्मध्ये वेदिका शुभ्रा कर्तव्या च समा स्थिरा ॥
चतुर्हस्ता च हस्तोच्छ्रा पीठार्थं स्थानमुत्तमम् ।
तोरणानि विचित्राणि वितानञ्च प्रकल्पयेत् ॥
रात्रौ द्विजानयामास्त्रा देवीतन्त्रविशारदान् ।
आचारनिरतान् दान्तान् वेदवेदाङ्गपारगान् ॥
प्रतिपद्दिवसे कार्यं प्रातःस्नानं विधानतः ।
नद्यां नदे तड़ागे वा वाप्यां कूपे ह्रदेऽथ वा ॥
प्रातर्नित्यं पुरः कृत्वा द्विजानां वरणं ततः ।
अर्घ्यपाद्यादिकं सर्वं कर्तव्यं मधुपूर्वकम् ॥
वस्त्रालङ्करणादीनि देयानि च स्वशक्तितः ।
वित्तशाठ्यं न कर्तव्यं विभवे सति कर्हिचित् ॥
विप्रैः सन्तोषितैः कार्यं सम्पूर्णं सर्वथा भवेत् ।
नव पञ्च त्रयञ्चैको देयाः पाठे द्विजाः स्मृताः ॥
वरयेद्ब्राह्मणं प्राज्ञं पारायणकृते तदा ।
स्वस्तिवाचनकं कार्यं वेदमन्त्रविधानतः ॥
वेद्यां सिंहासनं स्थाप्य चौमवस्त्रसमन्वितम् ।
तत्र स्थाप्याम्बिका देवी चतुर्हस्तायुधान्विता ॥
रत्नभूषणसंयुक्ता मुक्ताहारविराजिता ।
दिव्याम्बरधरा सौम्या सर्वलक्षणसंयुता ॥
शङ्खचक्रगदापद्मधरा सिंहे स्थिता शिवा ।
अष्टादशभुजा वापि प्रतिष्ठाप्या सनातनी ॥
अर्चाभावे तथा यन्त्रं नवार्णमन्त्रसंयुतम् ।
स्थापयेत् पीठपूजार्थं कलसं तत्र पार्श्वतः ॥
पञ्चपल्लवसंयुक्तं वेदमन्त्रैः सुसंस्कृतम् ।
सतीर्थजलसम्पूर्णं हेमरत्नैः समन्वितम् ॥
पार्श्वे पूजार्थसम्भारान् परिकल्प्य समन्ततः ।
गीतवादित्रनिर्घोषान् कारयेन्मङ्गलाय वै ॥
तिथौ हस्तान्वितायाञ्च नन्दायां पूजनं वरम् ।
प्रथमे दिवसे राजन्! विधिवत् कामदं नृणाम् ॥
नियमं प्रथमं कृत्वा पश्चात् पूजां समाचरेत् ।
उपवासेन नक्तेन चैकभक्तेन वा पुनः ॥
करिष्यामि व्रतं मातर्नवरात्रमनुत्तमम् ।
साहाय्यं कुरु मे देवि! जगदम्ब! ममाखिलम्॥
यथाशक्ति प्रकर्तव्यो नियमो व्रतहेतवे ।
पश्चात् पूजा प्रकर्तव्या विधिवन्मन्त्रपूर्वकम् ॥
चन्दनागुरुकर्पूरैः कुसुमैश्च सुगन्धिभिः ।
मन्दारकरवीराग्र्यैश्चम्पकैः करवीरकैः ॥
मालतीव्रजकापुष्पैस्तथाविल्वदलैः शुभैः ।
पूजयेच्चण्डिकां धात्रीं धूपैर्दीपैर्विधानतः ॥
फलैर्नानाविधैर्घ्यं प्रदातव्यञ्च तत्र वै ।
नारिकेलैर्मातुलिङ्गैर्दाडिमीकदलीफलैः ॥
नारङ्गैः पनसैश्चैव तथा पूर्णफलैः शुभैः ।
अन्नदानं प्रकर्तव्यं भक्तिपूर्वं नराधिप ! ॥
नैवेद्यानि विचित्राणि सर्व्वान्नसंयुतानि च ।
ओदनं पायसञ्चैव पूपांश्च वटकांस्तथा ॥
मांसाग्रयं ये कुर्वन्ति तैः कार्यं पशुहिंसनम् ।
महिषाजवराहाणां बलिदानं विधीयते ॥
देवयज्ञे निहता यान्ति पशवः स्वर्गमक्षयम् ।
न हिंसा पशुजा तत्र निहता तत्कृतैश्च ! ॥
अहिंसा यागिकी प्रोक्ता सर्व्वाग्र्यविनियोगे ।
देवतार्थे विहन्तानां पशूनां स्वर्गतिर्ध्रुवा ॥
होमार्थञ्चैव कर्तव्यं कुण्डञ्चैव त्रिकोणकम् ।
खण्डितं वा प्रकर्तव्यं त्रिकोणं मानतः शुभम् ॥
त्रिकालं पूजनं नित्यं नानाद्रव्यैर्मनोहरैः ।
गीतवादित्रतूर्यैश्च कर्तव्यश्च महोत्सवः ॥
नित्यं भूमौ च शयनं कुमारीणाञ्च पूजनम् ।
वस्त्रालङ्करणैर्हृद्यैर्भोजनैश्च सुधामयैः ॥
एकैकां पूजयेन्नित्यमेकवृद्ध्या तथा पुनः ।
द्विगुणं त्रिगुणं वापि प्रत्येकं नवकञ्च वा ॥
विभवस्यानुसारेण कर्तव्यं पूजनं किल ।
वित्तशाठ्यं न कर्तव्यं राजन्भक्तिमखे सदा ॥
एकवर्षा न कर्तव्या कन्या पूजाविधौ नृप ! ।
परमज्ञा तु भोगानां गन्धादीनाञ्च कालिका ॥
कुमारिका तु सा प्रोक्ता द्विवर्षा या भवेदिह ।
त्रिमूर्तिश्च त्रिवर्षा च कल्याणी चतुरब्दिका ॥
रोहिणी पञ्चवर्षा च षड्वर्षा कालिका स्मृता ।
चण्डिका सप्तवर्षा स्यादष्टवर्षा च शाम्भवी ॥
नववर्षा भवेद्दुर्गा सुभद्रा दशवार्षिकी ।
अत ऊर्द्धं न कर्तव्या सर्वकार्यविगर्हिता ॥
एभिश्च नामभिः पूजा कर्तव्या विधिसंयुता ।
तासां मन्त्रान् वक्ष्यामि नवानां पूजने सदा ॥
कुमारीं पूजिता कुर्याद्दुःखदारिद्र्यनाशनम् ।
शत्रुक्षयं धनायुष्यबलवृद्धिं करोति वै ॥
त्रिमूर्तिपूजनादायुस्त्रिवर्गस्य फलं भवेत् ।
धनधान्यागमश्चैव पुत्रपौत्रादिवृद्धयः ॥
विद्यार्थी विजयार्थी च राज्यार्थी यश्च पार्थिवः ।
सुखार्थी पूजयेन्नूनं कल्याणीं सर्वकामदाम् ॥
रोहिणीं रोगनाशाय पूजयेद्भक्तिपूर्वकम् ॥
कालिकां शत्रुनाशार्थं पूजयेद्भक्तिपूर्वकम् ॥
ऐश्वर्यधनकामश्च चण्डिकां परिपूजयेत् ।
पूजयेच्छाम्भवीं नित्यं नृप ! संमोहनाय च ॥
दुःखदारिद्र्यनाशाय संग्रामे विजयाय च ।
क्रूरशत्रुविनाशार्थं तथोग्रकर्मसाधने ॥
दुर्गाञ्च पूजयेद्भक्त्या परलोकसुखाय च ।
वाञ्छितार्थस्य सिद्ध्यर्थं सुभद्रां पूजयेत् सदा ॥
श्रीरस्तिति च मन्त्रेण पूजयेद्भक्तितत्परः ।
श्रीयुक्तमन्त्रैरथवा बीजमन्त्रैरथापि वा ॥
कुमारस्य च तन्त्राणि या स्तवत्यपि लीलया ।
कादीनपि च देवांस्तां कुमारीं पूजयाम्यहम् ॥
सत्त्वादिभिस्त्रिमूर्त्तिर्या तैर्हि नानास्वरूपिणी ।
त्रिकालव्यापिनी शक्तिस्त्रिमूर्तिं पूजयाम्यहम् ॥
कल्याणकारिणी नित्यं भक्तानां पूजितानिशम् ।
पूजयामि च तां भक्त्या कल्याणीं सर्वकामदाम् ॥
रोहयन्ती च रोगाणि प्राग्जन्मसञ्चितानि वै ।
या देवी सर्वभूतानां रोहिणीं पूजयाम्यहम् ॥
कालो कालयते सर्वं ब्रह्माण्डं सचराचरम् ।
कल्पान्तसमये या तां कालिकां पूजयाम्यहम् ॥
चण्डिका चण्डरूपाच चण्डमुण्डविनाशिनीम् ।
तां चण्डपापहरिणीं चण्डिकां पूजयाम्यहम् ॥
अकारणात् समुत्पत्तिर्यस्याः परिकीर्तिता ।
यस्यास्तां सुखदां देवीं शाम्भवीं पूजयाम्यहम् ॥
दुर्गा नाशयति भक्तं या सदा दुर्गार्तिनाशिनी ।
दुर्ज्ञेया सर्वदेवानां तां दुर्गां पूजयाम्यहम् ॥
सुभद्राणि च भक्तानां कुरुते पूजिता सदा ।
अभद्रनाशनीं देवीं सुभद्रां पूजयाम्यहम ॥
एभिर्मन्त्रैः पूजनीया कन्यका सर्वदा बुधैः ।
वस्त्रालङ्करणैर्माल्यैर्गन्धैरुच्चावचैरपि ॥"
"हीनाङ्गीं वर्जयेत् कन्यां कुष्ठयुक्तां व्रणाङ्किताम् ।
गन्धस्फुरितहीनाङ्गीं विलासकुलसम्भवाम् ॥
स्वालज्यां कैकरां काणीं कुरूपां बहुरोमशाम् ।
श्वश्रूश्वशुरभोगिनीं कन्यां रक्तपुष्पादिनाङ्किताम् ॥

दासीगर्भसमुद्भूतां गोलकां कन्यकोद्भवाम् ।
वर्ज्जनीयाः सदा चैताः सर्व्वपूजादिकर्म्मसु ॥
अरोगिणीं सुरूपाङ्गीं सुन्दरीं वयवर्ज्जिताम् ।
एकवंश्यसमुद्भूतां कन्यां सम्यक् प्रपूजयेत् ॥
ब्राह्मणी सर्व्वकार्य्येषु जयार्थे नृपवंश्यजा ।
लाभार्थे वैश्यवंश्योत्था क्षेमे च शूद्रवंश्यजा ॥
ब्राह्मणैर्ब्राह्मणाः पूज्याः राजन्यैर्राजवंश्यजाः ।
वैश्यैश्चिवर्गजाः पूज्याश्चतस्रः पादसम्भवैः ॥
कौलिभिश्च यथोत्पत्या यथायोग्यं प्रपूजयेत् ।
नवरात्रविधानेन भक्तिपूर्व्वं सदैव हि ॥
अशक्तो नियतं पूजां कर्त्तुं चेन्नवरात्रके ।
अष्टम्यां च विशेषेण कर्त्तव्यं पूजनं सदा ॥
पुराष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥
अतोऽष्टम्यां विशेषेण कर्त्तव्यं पूजनं सदा ।
नानाविधोपहारैश्च गन्धमाल्यानुलेपनैः ॥
पायसैरामिषैर्होमैर्नानाशाकाद्यभोजनैः ।
फलपुष्पोपहारैश्च तोषयेच्छगदम्बिकाम् ॥
उपवासे त्वशक्तानां नवरात्रव्रते पुनः ।
उपोषणत्रयं प्रोक्तं यथोक्तं फलदं नृप ! ॥
सप्तम्यां च तथाष्टम्यां नवम्यां भक्तिभावतः ।
चिरात्रकरणात् सर्व्वं फलं भवति पूजनात् ॥
सम्पूर्णं तद्व्रतं प्रोक्तं विप्राणाञ्चैव भोजनैः ।
व्रतानि यानि चान्यानि दानानि विविधानि च ॥
नवरात्रव्रतस्यास्य नैव तुल्यानि भूतले ।
धनधान्यप्रदं नित्यं सुखसन्तानवृद्धिदम् ॥
आयुरारोग्यदञ्चैव स्वर्गदं मोक्षदं तथा ।
विद्यार्थी वा धनार्थी वा पुत्रार्थी वा भवेन्नरः ।
तेनेदं विधिवत् कार्य्यं व्रतं सौभाग्यदं शिवम् ॥
विद्यार्थी सर्व्वविद्यां वै प्राप्नोति व्रतसाधनात् ।
राज्यभ्रष्टो नृपो राज्यं समवाप्नोति सर्व्वथा ॥
पूर्व्वजन्मनि येनूनं न कृतं व्रतमुत्तमम् ।
ते व्याधिनो दरिद्राश्च भवन्ति पुत्रवर्জ्जिताः ॥
वन्ध्या च या भवेन्नारी विधवा धनवर्জ्जिता ।
अनुमा तत्र कर्त्तव्या नेयं कृतवती व्रतम् ॥
नवरात्रव्रतं प्रोक्तं न कृतं येन भूतले ।
स कथं विभवं प्राप्य मोदतेऽत्र तथा दिवि ॥
रक्तचन्दनसंमिश्रैः कोमलैर्विल्वपत्रकैः ।
भवानी पूजिता येन स भवेन्नृपतिः क्षितौ ॥"*॥)
अथ नवरात्रपारणानिर्णयः । सा च दशम्यां कार्य्या ॥ * ॥ दशम्यां विशेषस्तु भार्गवार्चनदीपिकायां भविष्ये ।
"ग्रभीयुक्तं जगन्नाथं भक्तानामभयङ्करम् ।
अर्चयित्वा ग्रभीदृग्भमर्चयेच्च ततः पुनः ॥"
ग्रभीमन्त्रः । स्कान्दे हेमाद्रौ गोपथब्राह्मणे ।
'अमङ्गलानां ग्रमनीं ग्रमनीं दुष्कृतस्य च ।
दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं ग्रभीं शुभाम् ॥"
तथा भविष्ये ।
"ग्रभी ग्रमयते पापं ग्रभी ग्रहविनाशिनी ।
अर्জ्जुनस्य धनुर्द्धारी रामस्य प्रियवादिनी ॥
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र विघ्नप्रकर्त्री त्वं भव श्रीरामपूजिते ॥"
अथ बलनीराजनम् । कक्षपरले । तत्र मन्त्रः ।
"चतुरङ्गं बलं मह्यं निरमित्रं प्रजायिह ।
सर्व्वत्र विजयो मेऽस्तु त्वत्प्रसादात् सुरेश्वरि ॥"
गौड़निबन्धे ज्योतिषे ।
"कृत्वा नीराजनं राजा बलस्यैव यथाक्रमम् ।
शोभनं खञ्जनं पश्येत् जलगोधस्य सन्निधौ ॥"
इति निर्णयसिन्धुः ॥
नवरात्रिकं, क्ली, (नवरात्रेण निर्वृत्तम् । नवरात्र + "तेन निर्वृत्तम् ।" ५ । १ । ७९ । इति ठक् ।) नवरात्रम् । यथा, भविष्योत्तरे ।
"आश्विने शुक्लपक्षे तु कर्त्तव्यं नवरात्रिकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥"
नववधूः, स्त्री, (नवा नूतना वधूः ।) नवोढ़ा । नवीना भार्य्या । यथा,—
"असम्भवद्वनरसा गृहालिगणसेविता ।
करं न सहते राजन् ! भूमिर्नववधूरिव ॥"
इति द्व्यर्थकाव्यम् ॥ * ॥
नववध्वागमनदिनं यथा । तत्र अष्टमदशमद्वादशषष्ठचतुर्थवर्षाणि निषिद्धानि । (यदुक्तं ज्योतिषे ।
"श्वशुं हन्त्यष्टमे वर्षे श्वशुरञ्च दशाब्दिके ।
संप्राप्ते द्वादशे वर्षे पतिं हन्ति द्विरागमे ॥
विवाहमासि प्रथमं वध्वा नागमनं यदि ।
तदा सर्व्वमिदं चिन्त्यं युग्माब्दादि विचक्षणैः ॥")
मासा मार्गफाल्गुनवैशाखा विहिताः । पक्षः शुक्लः । विहितनक्षत्राणि पुष्यस्वातीहस्ताश्विनीरोहिण्यः श्रवणा द्विरागमविधौ पुष्या धनिष्ठा तथा ।
भर्त्तुर्गोचरशोभने दिनपतौ लग्ने पुनः शोभने
कुम्भाजालिरवौ शुभे शुभतिथौ वारादियोगोदिते ॥
वैशाखे मार्गशीर्षे हि फाल्गुने हि शुभे रवौ ।
नववध्वागमं कुर्य्यादन्यमासे विवर्জ्जयेत् ॥"
इति मथुरेशचक्रवर्त्तिकृतसारसंग्रहः ॥
(अन्यद्विरागमनशब्दे द्रष्टव्यम् ॥)
नववध्वागमनं, क्ली, (नववध्वा आगमनम् ।) नवोढ़ायाः प्रथमपतिगृहगमनम् । तद्दिनं यथा,
"स्त्रीयुद्वाजघटालिसंयुतरथौ काले विशुद्धे भृगुं
सन्त्यज्य प्रतिलोमगं शुभदिने यात्राप्रवेशोचिते ।
लक्षाहस्तु निरंशकं नववधूयात्राप्रवेशौ पतिः
कुर्य्यादिकपुरादिषु प्रतिभृगोर्नेच्छन्ति दोषं बुधाः ॥
एकत्यागे चतुःप्राप्ते दुर्भिक्षे राष्ट्रविप्लवे ।
पतिना नोद्वहमानायाः पुरः शुक्रो न दुष्यति ॥"
इति दीपिका ॥
अन्यत् नववधूशब्दे द्रष्टव्यम् ॥
नववरिका, स्त्री, (नवो वरोऽस्यस्या इति । नववर + ठन् ।) नवोढ़ा । इति हारावली । १५४ ॥
नववल्लभं, क्ली, (नवानां नवीनानां वल्लभम् ।) दाड़िमगुड़ । इति राजनिर्घण्टः ॥ (नवो वल्लभो यस्य ।) नवीनप्रिये, त्रि ॥
नववस्त्रं, क्ली, (नवं वस्त्रम् ।) नवीनवसनम् । नूतन कापड़ इति भाषा ॥ तत्पर्य्यायः । अनाहतम् २ आहतम् ३ अहतम् ४ तन्त्रकम् ५ निष्प्रवाणि ६ । इति शब्दरत्नावली ॥ नवाम्बरम् ७ इत्यमरः । २ । ६ । ११२ ॥
अथ नववस्त्रपरिधानदिनम् ।
तत्र वाराः बुधेज्यसितशुक्राणाम् । नक्षत्राणि रोहिणीमृगशिरोमघानुराधाधनिष्ठापुष्यविशाखाहस्तात्रिचोत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदाश्विनीस्वातीपुनर्व्वसुरेवत्यः ॥
"धनिष्ठा रोहिणी हस्ता विशाखा चोत्तरासु च ।
ज्येष्ठा पुनर्व्वसुस्वाती चित्राश्विनी च रेवती ॥"
इति सारसंग्रहः ॥
अपि च ।
"धातागुराधवसुपुष्यविशाखहस्ता-
चित्रोत्तराश्विपवनादितिरेवतीषु ।
जन्मर्क्षजीववुधशुक्रदिनोत्सवादौ
धार्य्यं नवं वसनमीश्वरविप्रतुष्टौ ॥
श्रीर्य्ये रवौ सततमम्बुभिरार्द्रमिन्दौ
भौमे शुचं बुधदिने च भवेद्धनाय ।
ज्ञानाय मन्त्रिणि भृगौ प्रियसङ्गमाय
मन्दे मराय च नवाम्बरधारणं स्यात् ॥"
इति समयप्रदीपः ॥
नवग्रायकः, पुं, (नवविधः ग्रायक इव ।) नवधा गोपादिजातिविशेषः । नवग्राक इति भाषा ॥ यथा, पराशरसंहितायाम् ।
"गोपमाली तथा तैली तन्त्री मोदकवारुणी ।
कुलालः कर्म्मकारश्च नापितो नवग्रायकाः ॥"
नवसूतिका, स्त्री, (नवा सूतिः प्रसवो यस्याः । कप् ।) धेनुः । इत्यमरः । २ । ९ । ७१ ॥ नूतनप्रसवायाञ्च ॥
नवांग्रः, पुं, (नवमोंऽग्रः ।) मेषादिद्वादशलग्नानां नवभागः । यथा, दीपिकायाम् ।
"चराणां सचिकोणानां तच्चराद्या नवांग्रकाः ॥"
"मेषकेग्ररिधनुषां मेषाद्यास्तु नवांग्रकाः ।
वृषकन्याम्बुगाणाञ्च मकरादिर्नवांग्रकः ॥
तुलामिथुनकुम्भानां तूलाद्याः ससुदाहृताः ।
कर्किवृश्चिकमीनानां कर्कटाद्या नवांग्रकाः ॥
खनवांग्रस्तु राशीनां वर्गोत्तम इति स्मृतः ॥"
इति ज्योतिस्तत्त्वम् ॥
(नवभागमात्रम् ॥)
नवाङ्गा, स्त्री, (नवमिव अङ्गं यस्याः । टाप् ।) कर्कटशृङ्गी । इति राजनिर्घण्टः ॥ (नवविधेन द्रव्येण अङ्गं यस्येति विग्रहे ।) पाचनविशेषे, क्ली । यथा, वैद्यके ।
"विश्वाष्टताब्दभृद्भिस्तैः पञ्चमूलीसमन्वितैः ।
क्षतः कषाये हन्यादु वातपित्तोद्भवं ज्वरम् ॥"

नवान्नं, क्ली, (नवं नूतनं अन्नम् ।) नूतनान्नम् । तन्निमित्तश्राद्धम् । यथा,—

वराह उवाच ।

"अकृत्वा यो नवान्नानि मम कर्म्मपरायणः ।
भुञ्जन्ति ये नवान्नानि परैः भुक्तानि केन ह ॥
नाहं लोभेन चेच्छामि पुनर्भोगेन सुन्दरि ! ।
अवश्यमेव कर्त्तव्यं मम कर्म्मपरायणैः ॥
ततो भागवतो भूत्वा नवान्नं यो न कारयेत् ।
पितरस्तस्य नाश्नन्ति वर्षाणि दश पञ्च च ॥
अदत्त्वा यस्तु भुञ्जीत नवान्नानि कथञ्चन ।
न तस्य धर्म्मो विद्येत एवमेतन्न संशयः ॥
अन्यच्च ते प्रवक्ष्यामि येन तत्र प्रसक्ष्यते ।
प्रायश्चित्तं महाभागे ! मम भक्तसुखावहम् ॥
उपवासं चिरात्तन्तु तत एकेन वा पुनः ।
आकाशशयनं कृत्वा चतुर्थेऽहनि शुध्यति ॥
एवं तत्र विधिं कृत्वा उदिते च दिवाकरे ।
पञ्चगव्यं ततः पीत्वा शीघ्रं सुध्येत किल्बिषात् ॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
सर्व्वसङ्गान् परित्यज्य मम लोकाय गच्छति ॥"

इति नवान्नभोजनापराधप्रायश्चित्तम् ॥ इति वराहपुराणम् ॥*॥ तस्य निषिद्धदिनं यथा,—

"सूर्य्ये चैव विशाखर्क्षे स्मरतिथौ पापे त्रिजन्मान्विते
नन्दामन्दमहीजकाव्यदिवसे पौषे मधौ कार्त्तिके ।
मेषूयाहिघ्रियेषु विष्णुशयने कर्क्षे ग्रहिन्यष्टमे
श्राद्धं भोजनकं नवान्नविहितं पुत्रार्थनाशप्रदम् ॥"

सूर्य्ये चैव विशाखर्क्षे मार्गशीर्षस्य विंशतिदण्डाधिकप्रथमदिनत्रयावस्थिते सूर्य्ये । स्मरतिथौ त्रयोदश्याम् । पापे पञ्चमतारान्विते । उग्रः पूर्व्वात्रयमघाभरण्यः । अहिर्बुध्नः । घ्रिय आर्द्रा ।

"व्येष्ठाग्नेयार्द्रगे सूर्य्ये मृगनेत्रान्निशाल्लके ।
नवान्नेभोजनं श्राद्धं जन्मचन्द्रे तिथौ न च ॥
अन्नेवाक्तिक्तिकाव्यैष्ठामूलाजपदकेषु च ।
भृगुभौमदिने रिक्तातिथौ नाद्यान्नवौदनम् ॥"

तस्य विधिर्यथा,—

"प्राग्भीयाद्धिसंयुक्तं नवं विप्राभिमन्त्रितम् ॥"

दीपिकायाम् ।

"मेषूयाहिघ्रियान्त्येषु स्विभौमघ्रनिवासरे ।
अन्नप्राशनवत् कुर्य्यान्नव-अन्नस्य भक्षणम् ॥"

अधिकन्तु ।

"पुष्या स्वातिपुनर्व्वस्वृ मृगशिरःपुष्याश्विराधा तथा
मूलायां श्रवणे च रेवतिधने चित्रामघे वारुणे ।
ब्राह्मे शक्रविशाखयोश्च सुरगे सौम्येन्दुचौषाहके
चन्द्रे शोभनतारके च शुभदं श्राद्धं नवान्नैः कृतम् ॥"

भोजराजः ।

"ब्रह्मा विष्णुश्च रुद्रश्च सूर्य्यश्चैव महेश्वरो मार्त्तण्डश्चौषधीशादितौ
मैत्रे चैव विशाखवायुधनभे मूलाश्विवह्नौ तथा ।
शक्रे वारुण ऋक्षके शुभदिने श्राद्धं नवं शस्यते
नद्यम्भोगर्त्तभूमिशेषु न भवेच्छ्राद्धं नवान्नोद्भवम् ॥"

इति ज्योतिस्तत्त्वम् ॥

आश्विनाधिकारे ।

"शुक्लपक्षे नवं धान्यं ज्ञात्वा पक्वं सुशोभनम् ।
गच्छेत् क्षेत्री विधानेन गीतवाद्यपुरःसरः ॥"

इत्यादिना ब्रह्मपुराणेन श्राद्धविधानात् ॥

अपि च ।

"शरदन्तयोः केचिन्नवयज्ञं प्रचक्षते ।
धान्यपाकवशाद्यस्मिन् श्यामाको वर्णिनः स्मृतः ॥"

इति मलमासतत्त्वम् ॥

नवाम्बरं, क्ली, (नवं नूतनमम्बरं वस्त्रम् ।) नूतनवस्त्रम् । इत्यमरः । २ । ६ । ११९ ॥ (यथा, समयप्रदीपे ।

"ग्रीष्मे रवौ सततमम्बुभिराप्लवेभ्यो
भौमे शुचं बुधदिने च भवेद्भयाय ।
ज्ञानाय मन्त्रिणि भृगौ प्रियसङ्गमाय
मन्दे मराय च नवाम्बरधारणं स्यात् ॥")

नवार्चिः, [स्] पुं, (नव अर्चींषि यस्य ।) मङ्गलग्रहः । इति त्रिकाण्डशेषः ॥ (क्ली, नवं नूतनं अर्चिः ।) नवशिखा । (नव अर्चींषि इति विग्रहेऽपि तु नवसंख्याकिरणार्थे बहुवचनम् ।)

नवाह्नः, पुं, (नवं अह्नः । समासे टच् ।) नवदिनम् । प्रतिपत्तिथिः । इति त्रिकाण्डशेषः ॥

नवीका, स्त्री, (नवोऽस्त्यस्या इति । नव + ठन् + टाप् । नवं नवं भायति इति वा ।) नवशृङ्खला । इति स्त्रीप्रकरणे दुर्गादासः ॥

नवीन, त्रि, (नवमेव । नव + "नवस्य नादेशोऽप्तृतनप्लाश्च प्रत्यया वक्तव्याः ।" ५ । ३ । ७५ । इत्यस्य वार्त्तिकोक्त्या नः नादेशश्च ।) नूतनम् । इत्यमरः । ३ । १ । ७७ ॥ (यथाच गदाधरः । "गदाधरविनिर्म्मिता विविधदुर्गतर्काटवी नवीनपदवीसुदं विलसुरां सतां धीमताम् ॥")

नवोढ़ा, स्त्री, (नवा नूतना ऊढ़ा) नवविवाहिता । तत्पर्य्यायः । वधूः २ जनी ३ । इति जटाधरः ॥ नववरिका ४ दिक्करी ५ नवयौवना ६ । इति हारावली । २५४ ॥ सुग्धानायिकाभेदः । तस्या लक्षणं यथा । "लज्जाभयपराधीनरतिर्नवोढ़ा ॥" तस्या उदाहरणं यथा, रसमञ्जर्य्याम् ।

"बलान्नीता मार्गे सुखमसुखं नैव कुरुते
धुनानाम्रह्वाङ्गं क्षिपति वदनं घुम्मनविधौ ।
हृदि त्रस्तं हस्तं क्षिपति रमणारोपितमना
नवोढ़ा वोढ़ारं रमयति च सन्तापयति च ॥"

नवोदकं, क्ली, (नवमुदकम् ।) नूतनजलम् । यथा, मिताक्षरायां स्मृतिः ।

"काले नवोदकं शुद्धं न प्रातश्च तदुद्धृतम् ।
अकाले तु दृष्ट्वाकाशं पीत्वा नाद्यादहर्निशम् ॥"

इति शुद्धितत्त्वम् ॥

तन्निमित्तकं श्राद्धं कर्त्तव्यम् । यथा, ज्ञातातपः ।

"नवोदके नवान्ने च ग्रहप्रच्छादने तथा ।
पितरः सूदयन्त्यन्नमष्टकासु मघासु च ॥
तस्माद्दद्यात् सदा युक्तो विद्वत्सु ब्राह्मणेषु च ॥
नवोदके वर्षोपक्रमे । आर्द्रागते रवाविति यावत् ।
'आर्द्रादितो विशाखान्तं रविश्चरेच्च वर्षति ।'

इति तत्रवर्षमानदृष्टात् ॥

'प्राविट्काले समायाते रौद्रऋक्षगते रवौ ।
नाड़ीवेधसमायोगे जलयोगं वदाम्यहम् ॥'

इति रत्नमालाच्च ॥

रौद्रमार्द्रा ॥ * ॥ नवोदकश्राद्धस्य सावकाशत्वात् त्रयोदश्यादिकनिषेधमाह दीपिकायाम् ।

'त्रयोदश्यौ जन्मदिनञ्च नन्दा
जन्मर्क्षतारा सितवासरश्च ।
व्रता हरीन्दूत्करान्त्यमेच-
ध्रुवेषु च श्राद्धविधानमिष्टम् ॥'

सितवासरं शुक्रवारम् । ऋक्षं राशिः । ऋक्षादयः अवश्यपुष्यहस्ताश्विरोहिण्यारेवत्युत्तरोत्तराश्चितयरोहिण्यः । जन्मर्क्षे चेन्नवोदकश्राद्धाकरणदोषयोः श्राद्धयोरसम्भवात् विधिः ।" इति तिथ्यादितत्त्वम् ॥

नवोद्धृतं, क्ली, (नवमुद्धृतम् ।) नवनीतम् । इत्यमरः । २ । ९ । ५२ ॥ नूतनोत्थिते, त्रि ॥

नव्य, त्रि, (नूयते स्तूयते इति । नु स्तुतौ + "अचो यत् ।" ३ । १ । ९७ । इति यत् । यद्वा, नवमेव । "प्राग्वतीयो यत् ।" ५ । १ । १०१ । इति स्वार्थे यत् ।) नूतनम् । इत्यमरः । ३ । १ । ७७ ॥ (यथा, ऋग्वेदे । १ । ५५ । १६ ।

"नव्या नव्या सुयतवो भवन्तीर्महद्वयोवासस्तर-
समेभ्यम् ॥"

स्तुत्यम् । यथा, ऋग्वेदे । ५ । १९ । ३ ।

"कथा नो अस्य क्षुतयस्तुतेर्व
सुतो मघोना उचथस्य नव्यः ॥")

क्ली, स्तुतिः । नु + स्तुतौ भावे यत् नवशब्दात् स्वार्थे वा विध्यन्नः ॥

नश्यः, पुं, (नूयते इति । नु + यत् ।) रत्नपुनर्नवा । इति राजनिर्घण्टः ॥

नश्याकः, पुं, (नश्यतीति । नश्य वाप्ती + "आकः खनादेः स च कित् ।" २ । २ । ३ । इति उणादिकोषटीकाधृतसूत्रात् आकः ।) काकमेदः । इत्युणादिकोषः ॥

नश्यिता, [नश्] त्रि, वाप्तास्यः । इति नशधातोः कर्त्तरि तृच्प्रत्ययनिष्पन्नः ॥

नश्यत्प्रकृतिका, स्त्री, (नश्यन्ती प्रकृतिः सन्ततिर्यस्याः । कप् । ततष्टाप् ।) मृतवत्सा । तत्पर्य्यायः । नष्टः २ मृतपुत्रिका ३ । इति हेमचन्द्रः । ३ । १८५ ॥

नश्वरः, त्रि, (नश्यतीति । नश्य + "इगुपधज्ञाभ्रीकिरः कः ।" ३ । १ । १३५ । इति करप् ।) वाप्तप्रतियोगी । अनित्यार्थः । इति नशधातोः कर्त्तरि वरप्रत्ययनिष्पन्नः ॥ (यथा, भागवते । ५ । १८ । ४ ।

"वदन्ति विश्वं कवयः स नश्वरं
परन्ति चाध्यात्मविदो विपश्चितः।
तथापि सुस्थन्ति तवाज मायया
सुविस्मितं ह्यत्यमजं नतोऽस्मि तम्॥")

नष्टः, त्रि, (नश्+क्तः।) अदर्शनविशिष्टः। तत्पर्य्यायः। तिरोहितः २। इत्यमरः। २। ८। ११२॥ (यथा, पञ्चतन्त्रे। १। ३७८।
"नष्टं नष्टमतिक्रान्तं नानु शोचन्ति पण्डिताः।
पण्डितानाञ्च मूर्खाणां विशेषोऽयं यतः स्मृतः॥"
अधमः। यथा, चाणक्ये। ८०।
"असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः।
सलज्जा गणिका नष्टा निर्लज्जास्तु कुलस्त्रियः॥"
भ्रान्तः। यथा, हरिवंशे। १७४। १२३।
"ततीये तु मुहूर्त्ते सा नष्टा बालपुरात् तदा।
सखीप्रियं चिकीर्षन्ती पूजयन्ती तपोधनान्॥"
पलायितः। यथा, रत्नावल्याम्।
"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपाम्।"
विध्वस्तः। यथा, मनुः। ३। १८०।
"नष्टं देवलके दत्तं अप्रतिष्ठन्तु वाहुषौ॥")
नाशाश्रयः। यथा। "योगो नष्टः परन्तप॥"
इति श्रीभगवद्गीता॥ नाशे, क्ली॥

नष्टचन्द्रः, पुं, (नष्टो दुष्टश्चन्द्रः।) सौरभाद्रस्त्रीभयपक्षे चतुर्थ्यामुदितचन्द्रः। यथा,—
"नष्टचन्द्रो न द्रष्टव्यश्चाद्रे मासि सितासिते।
चतुर्थ्यामुदितोऽशुद्धः प्रतिषिद्धो मनीषिभिः॥
चन्द्रसारापहरणं कलङ्कमतिदुष्करम्।
तस्मै ददाति हे नन्द! कामतो यदि पश्यति॥
अकामतो नरो दृष्ट्वा मन्त्रपूतं जलं पिबेत्।
तदा शुद्धो भवेत् सद्यो निष्कलङ्की महीतले॥
'सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारक! मारोदीस्तव ह्येष स्यमन्तकः॥'
इति मन्त्रेण पूतञ्च जलं साधुः पिबेद्ध्रुवम्॥
पुरा तारा गुरोः पत्नी नवयौवनसंयुता।
रत्नभूषणभूषाढ्या रत्नकञ्चुकाम्बरा सती॥
सुश्रोणी सुस्मिता रम्या सुन्दरी सुमनोहरा।
अतीवकबरीरम्या मालतीमाल्यभूषिता॥
सिन्दूरविन्दुना सार्कं चारुचन्दनविन्दुभिः।
कस्तूरीविन्दुनाधश्च भालमध्यस्थलोज्ज्वला॥
रत्नेन्द्रसारनिर्म्माणकणञ्चत्काञ्चीररञ्जिता।
सुवक्त्रलोचना श्यामा सुचारुकज्जलोज्ज्वला॥
रुचारुचारुसुस्ताभदन्तपङ्क्तिमनोहरा।
रत्नकुण्डलयुग्मेन चारुगण्डस्थलोज्ज्वला॥
कामिनीष्वतुला बाला गजेन्द्रमन्दगामिनी।
सुकोमला चन्द्रसखी कामाधारा च कामुकी॥
स्वर्गमन्दाकिनीतीरे स्नाता स्निग्धाम्बरा वरा।
ध्यायन्ती गुरुपादं सा स्वगृहं गमनोन्मुखी॥
दृष्ट्वा तस्याश्च सर्व्वाङ्गमनङ्गबाणपीड़ितः।
भाद्रे चतुर्थ्यांचन्द्रश्च जहार चेतनं व्रज!॥
ज्ञानं क्षणेन संप्राप्य रथस्थो रसिकी बली।
रथमारोहयामास करे धृत्वा च तारकाम्॥
कामोन्मत्तः कामिनीन्तां समाश्लिष्य चुचुम्ब सः।
दृङ्कारं कर्त्तुमुद्यन्तं तमुवाच गुरुप्रिया॥

तारकोवाच।
त्यज मां त्यज मां चन्द्र! सुरेषु कुलपांसक!।
गुरुपत्नीं ब्राह्मणीञ्च पतिव्रतपरायणाम्॥
गुरुपत्नीसङ्गमने ब्रह्महत्याशतं लभेत्।
पुत्रस्त्वं तव माताहं धैर्य्यं कुरु सुरेश्वर!॥
धिक् तां श्रुत्वा सुरगुरुर्भस्मीभूतं करिष्यति।
गुरुपत्नी विप्रपत्नी यदि सा च पतिव्रता॥
ब्रह्महत्यासहस्रञ्च तस्याः सङ्गमने लभेत्।
पुत्राधिकञ्च शिष्यञ्च प्रियो मत्स्वामिनो भवान्॥
स्वधर्म्मं रक्ष पापिष्ठ! मामेव मातरं व्रज।
दास्यामि स्त्रीवधं तुभ्यं यदि मां संग्रहीष्यसि॥
विलक्ष्य तारावचनं तारञ्च सभीक्षुसुत्यतम्।
शशाप तारां कोपेन निष्कामा सा पतिव्रता॥
राहुग्रस्तो घनग्रस्तः पापयुक्तो भवान् भव।
कलङ्की यन्त्रणा ग्रस्तो भविष्यसि न संशयः॥
चन्द्रमेवं तदा तूर्णं कामदेवं शशाप सा।
तेजस्विना केनचित्त्वं भस्मीभूतो भविष्यसि॥
चन्द्रसारां गृहीत्वा च त्यक्त्वा च रमणं व्रज!।
क्रोड़े निधाय प्रययौ रुदन्तीं तां शुचिस्मिताम्॥
निर्जने निर्जने रम्ये शैले शैले मनोहरे।
तत्र दृष्ट्वासुरगुरुं बलिगेहात् समागतम्॥
प्रणम्य सर्व्वसक्त्या च चन्द्रस्त्रं शरणं ययौ।
शुक्रस्त्रं बोधयामास वचनं नीतियुक्तितः॥

शुक्र उवाच।
शृणु वत्स! प्रवक्ष्यामि गुरवे देहि तारकाम्।
गुरुपत्नीं मातृपरां त्यज महत्त्वनाशिनीं!॥
कुरु पापक्षयोपायं निवृत्तिस्तु महाफला।
सतीनां गुरुपत्नीनां ग्रहणेन बलेन च॥
ब्रह्महत्यासहस्राणां पातकं लभते जनः।
कुम्भीपाके पच्यते च यावद्वै ब्रह्मणः शतम्॥
दहिष्यतिञ्च तेजस्वी त्वां भस्मीकर्त्तुमीश्वरः।
न चकार कृपामुशनाश्चेत् प्रियशिष्यस्य हेतुना॥
उतथ्यपत्नीं दृष्ट्वा स पुरा रेमे सकामतः।
ततश्चपतेः शापतोऽस्यैव परग्रस्ता प्रिया सती॥"
"एतस्मिन्नन्तरे ब्रह्मा बोधयित्वा कविं विभुः।
समानीय निधानाय तारकासहितं व्रज!॥
शम्भोश्च चरणाम्भोजे चकार च समर्पणम्॥
शम्भुस्त्रं प्रीतियुक्तश्च वाससामास वक्षसि॥
दत्त्वा तस्मै पादरेणुं नित्यापञ्च चकार सः।
दत्त्वा तस्मस्त्रकं हस्तं कृपालुरभयं ददौ॥
क्षीरोदे स्थापयित्वा च प्रायश्चित्तेन शङ्करः।
चकार चन्द्रं निष्पापं ब्रह्मणा सहितः शुचिम्॥
योगेन चन्द्रं योगीन्द्रो द्विखण्डञ्च चकार सः।
ररक्षार्द्धं ललाटे च सोऽर्द्धं ब्रह्मणः पुरः॥
अतश्च महादेवो बभूव चन्द्रशेखरः।
स्नानाङ्गो लक्षितस्तत्र कलङ्की देवसंसदि॥
लब्ध्वा च स्वयोगेन देहत्यागञ्चकार सः।
तच्छरीरञ्च क्षीरोदे ब्रह्मणा च समर्पितम्॥
ररोदाचिच्च कृपया सुधा क्षीरोदशैलटे।
अनेत्रचन्द्रजलं तस्य पपात च जगे व्रज!॥
भस्माङ्गभूव चन्द्रश्च निष्पापो देवसंसदि।
ब्रह्मा च भगवान् शम्भुरभिषेकञ्चकार तम्

उवाच च महादेवो निर्भयं देवसंसदि॥
महादेव उवाच।
स्वस्थानं गच्छ पुत्र! त्वं कुरु स्वविषयं सुदा।
पश्चात् श्वशुरशापेन यक्ष्मग्रस्तो भविष्यसि॥
वर्षे पतिव्रताशापं कर्त्तुमीशश्च को भुवि।
ममाशिषा यक्ष्मणश्च प्रतिकारो भविष्यति॥
यक्ष्माक्रान्तचतुर्थ्यान्तु गुरुपत्नी व्रता कृता।
तस्मात्तस्मिन्दिने वत्स! पापदग्धो युगे युगे॥
मा शुक्लं क्षीयते कर्म्म कल्पकोटिशतैरपि।
अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम्॥
देहत्यागेन हे वत्स! कर्म्मभोगो न नश्यति।
प्रायश्चित्तान्न सन्देहो ह्यल्पमेव भविष्यति॥
तारापहरणं वत्स! कलङ्कश्चन्द्रमण्डले।
ह्यगाङ्कितं विलक्ष्यञ्च भविष्यति युगे युगे॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ८०-८१ अः॥

नष्टचेष्टता, स्त्री, (नष्टा चेष्टा यस्य। तस्य भावः। तल्।) प्रलयः। इत्यमरः। १। ७। ३३॥ शोकादिना परिस्पन्दनाशो नष्टचेष्टता तच्च प्रलयः प्रलीयतेऽनेन प्रलयः ली ड य ञो श्लिषि अल्। प्रलयः सात्त्विको भावः मूर्च्छेत्यर्थः। इति सर्व्वस्वम्॥ हर्षशोकादिभिरप्येषचेष्टानाशः प्रलय इत्यर्थः। इति भरतः॥ ईहाशून्यता च॥

नष्टाग्निः, पुं, (नष्टः प्रमादात् निर्व्वाणमाप्तः अग्निर्यस्य।) यस्याग्निहोत्रिणः प्रमादादिना कारणान्तरेण वा अग्निर्नष्टो निर्व्वाणः स्यात् सः। तत्पर्य्यायः। वीरहा २। इत्यमरः। २। ७। ५३॥

नष्टाग्निहोत्रं, क्ली, (नष्टस्य चौरेणापहृतस्य वस्तुन आप्तिः तस्याः स्वत्वमिव।) किञ्चित्प्राप्तचौरनीतद्रव्यम्। तत्पर्य्यायः। लोभ्नम् २। इति हारावली। १५८॥

नष्टेन्दुकला, स्त्री, (नष्टा इन्दुकला यस्याम्।) कुहूः। इत्यमरः। १। ४। ६॥

नसा, स्त्री, (नस्+वा टाप्। यद्वा, नसते कुटिलतां प्रकाशयतीति। नस कौटिल्ये+अच्। टाप्।) नासिका। इति त्रिकाण्डशेषः॥

नस्तः, पुं, (नसते कुटिलतां प्रकाशयत्यनेनेति। नस्+क्तः। बाहुलकात् दृड़भावः।) नासिका। इति शब्दमाला॥ (यथा, महाभारते। ५। १३१। १०।
"नेत्राभ्यां नस्ततश्चैव श्रोत्राभ्याञ्च समन्ततः।
प्रादुरासन् महारौद्राः सधूमाः पावकार्चिषः॥")
नस्ये, क्ली। इति रत्नमाला॥ पञ्चविधनस्यकर्म्माणि यथा,—
"प्रतिमर्शोऽवपीड़श्च नस्यं प्रधमनन्तथा।
शिरोविरेचनञ्चैव नस्यकर्म्म तु पञ्चधा॥
ईषदुष्णसनात् स्नेहो यावान् वक्त्रं प्रपद्यते।
नस्ये निषिक्तस्यं विद्यात् प्रतिमर्शं प्रमाणतः॥
प्रतिमर्शश्च नस्यार्थं करोति च न दोषभाक्।
शोधनः स्नेहनस्तु स्यादवपीड़ो द्विधा मतः॥
स्नेहपीथ दीयते यस्मादवपीड़स्ततः स्मृतः।

स्नेहार्थं शून्यशिरसां ग्रीवास्कन्धोरसां तथा ॥
बलार्थं दीयते स्नेहो नस्यशब्दोऽत्र वर्त्तते ।
नस्यस्य स्नेहिकस्यात्र देयास्त्रयो तु बिन्दवः ॥
प्रत्येकशो नस्यकयोर्नृणामिति विनिश्चयः ॥"
इति वैद्यकपरिभाषा ॥
"शुक्तिश्च पाणिशुक्तिश्च मात्रास्तिस्रः प्रकीर्त्तिताः ।
दार्विंशुद्विन्दवश्चात्र शुक्तिरित्यभिधीयते ॥
द्विशुक्ती पाणिशुक्तिश्च देयास्तु कुशलैर्नरैः ।
तैलं कफे च वाते च केवले पवने वसाम् ॥
दद्यान्नस्यं सदा पित्ते सर्पिर्मज्जानं समारुते ।
भोजनं रेचनं चूर्णं युञ्जात्तं सुखवायुना ॥
षड्ङ्गुलद्विसुखया नाड्या मेषशृङ्गया ।
स हि भूरितरं दोषं चूर्णत्वादपकर्षति ॥
शिरोविरेचनद्रव्यैः स्नेहैर्वातैः प्रसाधितैः ।
शिरोविरेचनं दद्यात् रोगेष्वेतेषु बुद्धिमान् ॥
गौरवे शिरसः शूले जाड्ये स्तब्धे गलामये ।
ग्रीवागलशिरिमग्रन्थिकुष्ठापस्मारपीनसे ॥
तोयमद्यगरस्नेहपीतानां पातुमिच्छताम् ।
भुक्तभक्तशिरः स्नातस्नातुकामसुतास्त्रजाम् ॥
नवपीनसरोगार्त्तसूतिकाश्वासकासिनाम् ।
क्षुद्वतां दत्तबस्तीनां तथा नार्त्तवदुर्दिने ॥
अन्यत्रात्ययिके व्याधौ नैषां नस्यं प्रयोजयेत् ।
न नस्यं न्यूनसप्ताब्दे नातीताशीतिवत्सरे ।
न चोनद्वादशे धूमः कवड़ो नीनपञ्चमे ॥
न क्षुद्विर्न्यूनवर्षे न चातिक्रान्तसप्ततौ ।
आजन्ममरणं शस्तं प्रतिमर्षन्तु वस्तिवत् ॥"
इति सारकौमुदी ॥

नस्ता, स्त्री, (नस्त + टाप् ।) नासाछिद्रम् । इति नस्तितशब्दटीकायां भरतः ॥
"नस्ताभेदनदाहाभ्यां कर्णदाहादिभेदनैः ।
अतिदाहातिवाहाभ्यां वधे चान्द्रायणञ्चरेत् ॥"
इति स्मृतिः ॥

नस्तितः, पुं, (नस्ता नासाच्छिद्रं जाता अस्य । तारकादित्वादितच् ।) नासानिहितरज्जुबलीवर्दादि । नाकफोँड़ा बलद इति भाषा । तत्पर्य्यायः । नस्योतः २ । इत्यमरः ।२ । ६ । ६३॥

नस्योतः, पुं, (ये च तन्तुसन्ताने + भावे क्तः । नस्ते नासिकायां ऊतं वयनं यस्य ।) नस्तितः । इत्यमरटीकायां रमानाथः ॥

नस्यं, क्ली, (नासिकायै हितम् । नासिका + यत् । नसादेशश्च ।) नासिकादेयचूर्णादि । तत्पर्य्यायः । नस्तम् २ लावणम् ३ । इति रत्नमाला ॥ यथा, वैद्यकपरिभाषायाम् ।
"वमनं रेचनं नस्यं निरूहश्चानुवासनम् ।
ज्ञेयं पञ्चविधं कर्म मात्रा तस्य प्रवक्ष्यते ॥"
नासाद्वारा देयौषधविशेषः । यथा,—
"प्रस्थे हे गव्यमाजानां क्षीरयेत् द्रोणसम्मिताम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ॥
काञ्जिकस्याढकं दत्त्वा पिष्टान्येतानि दापयेत् ।
पुनर्नवां गोक्षुरकं सैन्धवं चाग्रकं वचा ॥
सरलं सुरदारुञ्च दृढ़ती कण्टकारिका ।
नस्यप्रागाहरत्येव कर्णशूलं हनुग्रहम् ॥"
इति गारुड़े १६८ अध्यायः ॥
अपि च ।
"सिद्धार्थकवचाहिङ्गुकरञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बचिकट गोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादग्रहबालग्रहज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥"
इति गारुड़े १६६ अध्यायः ॥
(यथा च ।
"नस्यन्तत् कथ्यते धीरैर्नासायाञ्च तद्दीयते ।
नावनं नस्यकर्मेति तस्य नामद्वयं मतम् ॥
नस्यभेदो द्विधा प्रोक्तो रेचनं स्नेहनन्तथा ।
रेचनं कर्षणं प्रोक्तं स्नेहनं बृंहणं मतम् ॥
कफपित्तानिलध्वंसे पूर्व्वमध्यापराह्णके ।
दिनस्य गृह्यते नस्यं रात्रौ वाप्युत्कटे गदे ॥
नस्यं त्वजीर्णभोजनान्ते दुर्दिने चापि तर्पणे ।
तथा नवप्रतिश्यायी गर्भिणी गरदूषितः ॥
अजीर्णी दत्तवस्तिश्च पीतस्नेहोदकासवः ।
क्षुद्रः प्रोक्ताभिभूतश्च त्वत्यर्त्तो वृद्धबालकौ ॥
वेगावरोधी तापी च स्नातुकामश्च वर्ज्जयेत् ।
अष्टवर्षस्य बालस्य नस्यकर्म्म समाचरेत् ॥
अप्रीतिवर्षादूर्द्धञ्च नावनं नैव दीयते ।
अथ वैरेचनं नस्यं ग्राह्यं तैलैः सुतीक्ष्णकैः ॥
तीक्ष्णभेषजसिद्धैर्वा स्नेहैः क्वाथे रसैस्तथा ।
नासिकारन्ध्रयोरष्टौ षट् चत्वारश्च बिन्दवः ॥
प्रत्येकं रेचने योज्या सूक्ष्ममध्यान्तमात्रया ।
नस्यकर्म्मणि दातव्यं ग्राह्यैकं तीक्ष्णमौषधम् ॥
द्विधुः स्याद्दयवमात्रस्तु माषैकं सैन्धवं मतम् ।
क्षीरस्यैवाग्र्यमात्रं स्यात् पानीयस्य त्रिकार्षिकम् ॥
कार्षिकं मधुरं द्रव्यं नस्यकर्म्मणि योजयेत् ॥
अवपीड़ः प्रधमनं द्वौ भेदावपरौ स्मृतौ ।
शिरो विरेचनस्थाने तौ तु देयौ यथाक्रमम् ॥
कल्कौऽतादौषधाद्दयः पीड़ितो निःसृतो रसः ।
सोऽवपीतः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः ॥
षड्ङ्गुला द्विवक्त्राया नाड्याचूर्णन्तया धमेत् ।
तीक्ष्णक्षोलमितं वक्त्रवर्त्तेः प्रधमनं हितम् ॥
ऊर्द्धजत्रुगते रोगे कफजे स्वरसंक्षये ।
अरोचके प्रतिश्याये शिरःशूले च पीनसे ॥
ग्रीवाकपालसारकृच्छ्रेषु नस्यं वैरेचनं हितम् ।
भीरुक्षीणग्रबालानां नस्यं स्नेहेन शस्यते ॥
गलरोगे सन्निपाते निद्रायां विषमज्वरे ।
मनोविकारे क्रिमिषु शुष्यते चावपीड़नम् ॥
अत्यन्तोत्कटदोषेषु विसंज्ञेषु च दीयते ।
चूर्णं प्रधमनन्वीरैस्तद्धि तीक्ष्णतरं यतः ॥
नस्यं स्याद्गुड़शुण्ठीभ्याम्पिप्पल्या सैन्धवेन च ।
बलपिप्पलेन तैनाक्तिकर्णनासाशिरोगदाः ॥
हनुमन्यागलशोफ्नुता गच्छन्ति सुजष्टजाः ।
मधूकसारकृष्णाभ्यां वचा मरिचसैन्धवैः ॥
नस्यक्षोणजले पिष्टं दद्यात् संज्ञा प्रबोधनम् ॥
अपस्मारे तथोन्मादे सन्निपातेऽपतन्त्रके ॥"
इति मधुखण्डे विशेषोऽध्याये ग्राङ्गधरेणोक्तम् ॥
"नस्यकर्म्म यथाकालं यो यथोक्तं निषेवते ।
न तस्य चक्षुर्न घ्राणं न श्रोत्रमुपहन्यते ॥
न स्युः श्वेता न कपिलाः केशाः श्मश्रूणि वा पुनः ।
न च केशाः प्रलुप्यन्ते वर्द्धन्ते च विशेषतः ।
मन्यास्तम्भः शिरःशूलमर्द्दितं हनुसंग्रहः ॥
पीनसार्द्धावभेदौ च शिरःकम्पश्च शाम्यति ।
शिराः शिरःकपालानां सन्धयः स्नायुकण्डराः ॥
नावनप्रीणिताश्चास्य लभन्तेऽभ्यधिकं बलम् ॥
सुखं प्रसन्नोपचितं स्वरः स्निग्धः स्थिरो महान् ।
सर्व्वेन्द्रियाणां वैमल्यं बलं भवति चाधिकम् ॥
न चास्य रोगाः सहसा प्रभवन्त्यूर्द्धजत्रुजाः ।
जीर्य्यतश्चोत्तमाङ्गे च जरा न लभते बलम् ॥"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ॥
"औषधमौषधसिद्धो वा स्नेहो वा नासिकाभ्यां दीयत इति नस्यं तद्विविधं शिरोविरेचनं स्नेहनञ्च । तद्विविधमपि पञ्चधा । तद्यथा । नस्यं शिरोविरेचनं प्रतिमर्शोऽवपीड़ः प्रधमनञ्च । तेषु नस्यं प्रधानं शिरोविरेचनञ्च नस्यविकल्पः प्रतिमर्शः शिरोविरेचनविकल्पोऽवपीड़ः प्रधमनञ्च । ततो नस्यशब्दः पञ्चधा निपातितः । तत्र यः स्नेहनार्थं शून्यशिरसां ग्रीवास्कन्धोरसां बलजननार्थं इन्द्रियप्रसादजननार्थं वा स्नेहो विधीयते तस्मिन् वैशेषिको नस्यशब्दः । तत्तु नस्यं देयं वाताभिभूते शिरसि दन्तकेशग्रहसशूलप्रपातदारुणकर्णशूलकर्णक्ष्वेड़तिमिरस्वरोपघातनासारोगस्य ग्रीवाप्रवाहुकाकालजवलीपलितप्रादुर्भावदारुणप्रवाहेषु वातपैत्तिकेषु सुखरोगेष्वन्येषु च वातपित्तहरद्रव्यसिद्धेन स्नेहेनेति ॥"
"तच्चैतद्विविधमशुक्तवतोऽकाले पूर्व्वाह्णे श्लेष्मरोगिणां मध्याह्ने पित्तरोगिणामपराह्णे वातरोगिणाम् ॥"
इति सुश्रुते चिकित्सितस्थाने ४० अध्याये ॥)

नासाया हिते तत्सम्बन्धिनि च, त्रि । ग्रस्थे, पुं । इति संक्षिप्तसारव्याकरणम् ॥

नस्या, स्त्री, (नासिकायै हिता । नासिका + "शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् ततो नसादेशः ।) नासिका । यथा,—
"घ्राणं गन्धवहा नासा नसा नस्या च नासिका ॥"
इति भरतधृतसाहसाङ्कः ॥
(नासाछिद्रम् । इति कश्चित् ।)

नस्योतः, पुं, (नस्यया नासारज्ज्वा ऊतः ।) नस्तितः । इत्यमरः । २ । ६ । ६३ ॥ (यथा, महाभारते । ३ । ३० । २६ ।
"मणिः सूत्र इव प्रोतो नस्योत इव गोवृषः ।")

नहि, व्य, निषेधः । (यथा,—
"इयं सख्या दूरादुपगतो हन्त मलयात्
तदेकां त्वद्गेहे विनयवति ! नेष्यामि रजनीम् ।
समीरेणोक्तेवं नवकुसुमिता चूतलतिका
धुनाना मूर्द्धानं नहि नहि नहीत्येव कुरुते ॥"
इत्युद्भटः ॥)

अभावः। तत्पर्य्यायः। अ २ नो ३ न ४। इत्यमरः॥ अन ५ अना ६ ना ७। इति भरतः॥ (यथा, महाभारते। ३। २४। १३।
"नहि विघ्नो गतिं तेषां वासं हि नरसत्तम!॥")

नहुषः, पुं, (नह्यते इति। नह+"पृनहिकलिभ्य उषच्।" उणां। ४। ७५। इति कर्म्मणि कर्म्मणि वा उषच्।) नागभेदः। (यथा, महाभारते। १। ३५। ६।
"आप्तः करोटकश्चैव शङ्खो वालिखिलस्तथा।
निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा॥")
चन्द्रवंशीयराजभेदः। इति मेदिनी। षे, ३८॥ स च पुरूरवसो ज्येष्ठपुत्रस्यायुषः सुतः। इति पुराणम्॥ (अयं हि अगस्त्यशापात् अजागरत्वमापन्नो वनमध्ये बहुकालं स्थितवान् ततः कदाचित् भीमं प्रसह्य युधिष्ठिरात् मुक्तिमाप। इतिहासः यथा, महाभारते। ३। १८१। ३३+४५।
"अहं हि दिवि दिव्येन विमानेन चरन् पुरा।
अभिमानेन मत्तः सन् किञ्चिन्नान्यदचिन्तयम्॥
ब्रह्मर्षिदेवगन्धर्व्ययक्षराक्षसपन्नगाः
बराबलं प्रयच्छन्ति सर्व्वे चैवोच्चयोऽनघ॥
पश्चात्तु यं प्रपश्यामि प्राणिनं पृथिवीश्वर!।
तस्य तेजो हराम्याशु तद्धि दृष्टेर्बलं मम॥
ब्रह्मर्षीणां सहस्रं हि उवाह शिबिकां मम।
स मामपनयो राजन्! अंशयामास वै श्रियः॥
तत्र ह्यगस्त्यः प्रादेन वहन् स्पृष्टो मया मुनिः।
अगस्त्येन ततोऽस्मुक्तो ध्वंस सर्पेति वै रुषा॥
ततस्तस्मादिमानाप्तात् प्रच्युतश्च्युतभूषणः।
प्रपतन् वृत्रघेलानं वाजीभूतमधोमुखम्॥
अयाचन्तमहं विप्रं शापस्यान्तो भवेदिति।
प्रमादात् संप्रमूढस्य भगवन्! क्षन्तुमर्हसि॥
ततः स मामुवाचेदं प्रपतन्त कृपान्वितः।
युधिष्ठिरो धर्म्मराजः शापस्यान्तं मोक्षयिष्यति॥
अभिमानस्य घोरस्य पापस्य च नराधिप!।
पश्चे चीर्णे महाराज! फलं पुण्यमवाप्स्यसि॥
ततो मे विस्मयो जातस्तदृष्ट्वा तपसो बलम्।
ब्रह्म च ब्राह्मबलञ्च येन लाभमचूचुदम्॥
सत्यं दमस्तपो दानमहिंसा धर्म्मनित्यता।
साधकानि सदा पुंसां न जातिर्न कुलं नृप!॥
अरिष्ट एष ते भ्राता भीमसेनो महाबलः।
स्वस्ति तेऽस्तु महाराज! गमिष्यामि दिवं पुनः॥
वैशम्पायन उवाच।
इत्युक्त्वाजगरं देहं त्यक्त्वा स नहुषो नृपः।
दिव्यं वपुः समास्थाय गतस्त्रिदिवमेव हि॥"*॥
(नह्यति सर्व्वाणि भूतानि मायया इति। विष्णुः। यथा, महाभारते। १३। १४६। ४७।
"इष्टो विशिष्टैः शिष्टेश्च शिखण्डी नहुषो वृषः॥")

नहुषाख्यं, क्ली, (नहुष आख्या यस्य।) नगरपुष्पम्। इति राजनिर्घण्टः॥

नहुषात्मजः, पुं, (नहुषस्य आत्मजः।) ययातिराजा। इति पुराणम्॥ (वार्षणिक्षेऽपि दृश्यते। तथाहि महाभारते। १। ७८। १४।
"अथ तं देशमभ्यागादृषयातिर्नहुषात्मजः॥")

ना, य, (नह्यं बन्धे+बाहुलकात् डा।) नहि। अभावः। इत्यमरटीकायां भरतः॥

ना, [नृ] पुं, (नयति नीयते वा। नी प्रापणे+"नयतेर्डिच्च।" उणां २।१०१। इति नृ प्रत्ययः। स च डित्।) पुरुषः। इत्यमरः। २। ६। १॥ (यथा, माघः। २। ४२।
"विधाय वैरं सामर्षे नरोऽरौ य उदासते।
प्रविष्योदर्चिषं कक्षे शैरतें तेऽभिमारुतम्॥")

नाकः, पुं, (न कं सुखमिति अकं दुःखम्। तन्नास्त्यत्रेति।) स्वर्गः। इत्यमरः। १। १। ६॥ (यथा, भट्टिः। १। ४।
"सन्तर्पणो नाकसदां वरेण्यः॥")
नभः। इति निघण्टुः। १। ४॥ यथा, महाभारते। १। १७२। ६।
"य एष दिवि धिष्ण्येन नाकं धारयति तेजसा॥")
क्ली, अञ्जनातिविशेषः। यथा, महाभारते। ५। ६६। ४०।
"काकुदीकं सुवर्णं नाकमक्षिसञ्जनञ्च तथा।
सन्तानं वर्णकं घोरमाखुमोदकमक्षमम्॥
एतैर्विद्धाः सर्व्व एव मरणं यान्ति मानवाः॥")
क्षत्रियजातिविशेषः। यथा, वायुपुराणे।
"नव नागास्तु भोक्ष्यन्ति पुरीं चम्पावतीं नृपाः॥")

नाकनाथः, पुं, (नाकस्य स्वर्गस्य नाथः।) इन्द्रः। इति त्रिकाण्डशेषः॥

नाकनायकः, पुं, (नाकस्य नायकः।) इन्द्रः। यथा, नैषधे ५ सर्गः।
"स यत्तौल्य विवस्वन्तरगाधं
नाकनायकनिकेतनमाप॥"

नाकनायकपुरोहितः, पुं, (नाकनायकस्य इन्द्रस्य पुरोहितः।) बृहस्पतिः। यथा,—
"क्षीणधर्म्मेतनयद्युक्षितो
नाकनायकपुरोहितः शुभः॥"
इति ज्योतिषतत्त्वम्॥

नाकी, [न्] पुं, (नाकः स्वर्गो वासस्थानत्वेनास्त्यस्येति। नाक+इनिः।) देवता। इति हेमचन्द्रः॥ (यथा, राजेन्द्रकर्णपूरे। ६।
"देवाकार्य्यं नाकिनां पुरि वृथा लोके पुरे
भोगिनाम्॥")

नाकुः, पुं, (नश्यतेऽनेनेति। नश+"शलिपाटिनमिमनिजनां शुक्पटिगाकिधतक्ष।" उणां १। १६। इति उः धातोर्नाकिः। इकार उच्चारणार्थः।) वल्मीकः। इत्यमरः। २। १। १४॥ मुनिविशेषः। पर्व्वतः। इति मेदिनी कः, २७॥

नाकुलः, पुं, (नकुलस्य गोत्रापत्यम्। नकुल+"अत्यन्धकवृष्णिकुरुभ्यश्च।" ४। १। ११४। इत्यण्।) नकुलपुत्रः। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। ६। ४७। ५१।
"भ्रातरः कुरुराजाश्च वसुधाश्च सह नाकुलैः।
नकुलः सहदेवश्च वामं पार्श्वं समाश्रिताः॥")
तन्नक्षत्रविशेषे, क्ली। यथा, कूर्म्मपुराणे।
"एवं सम्बोधितो रुद्रो माधवेन मुरारिणा।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम्।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः॥"
नकुलस्येदम्। तस्येदमित्यण्।) नकुलसम्बन्धिनि, त्रि॥ (न आकुलः इति विग्रहे। अनाकुलञ्च॥)

नाकुली, स्त्री, (नकुलेन दृष्टा पीता वा। नकुल+अण्+ङीप्।) कुक्कुटीकन्दः। रास्ना। चविका। इति मेदिनी। ले, १०१॥ श्वेतकण्टकारी। कन्दविशेषः। गाद इति ख्याता॥ तत्पर्य्यायः। सर्पगन्धा २ सुगन्धा ३ रक्तपत्रिका ४ ईश्वरी ५ नागगन्धा ६ अहिभुक् ७ सरसा ८ सर्पादनी ९ नागगन्धा १०। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। त्रिदोषानेकविषनाशित्वञ्च। इति राजनिर्घण्टः॥

नाक्षत्रं, क्ली (नक्षत्रस्येदमिति। नक्षत्र+"तस्येदम्।" ४। ३। १२०। इति अण्।) नक्षत्रसम्बन्धि। (यथा, सूर्य्यसिद्धान्ते। १४। १५।
"भक्षक्षभक्तं नित्यं नाक्षत्रं दिनमुच्यते।
नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्व्वान्तयोगतः॥")
मासविशेषे, पुं। स च द्विविधः। सप्तविंशतिनक्षत्रात्मक एकः। यथा, विष्णुधर्म्मोत्तरे।
"नक्षत्रसञ्चारयनानि चेन्दो-
र्मानेन कुर्य्यादभगणात्मकेन।"
सप्तविंशतिनक्षत्रात्मकेन।
"सर्व्वर्क्षपरिवर्त्तेन नाक्षत्रं दह घोष्यते।'
सप्तविंशतिनक्षत्राधश्छिन्नो नाक्षत्रः। अस्य प्रयोजनं नक्षत्रसञ्चारः। जन्मनक्षत्रे शनिभौमवारयोगे मनोदुःखदाने च। यथा, दीपिकायाम्।
"जन्मनक्षर्क्षे यदि स्यातां वारौ भौमशनैश्चरौ।
स मासः कलहो नाम मनोदुःखप्रदायकः॥"
द्वितीयः ऋक्षरूपात्मकनक्षत्रभोगकालरूपदिनचिन्नदात्मकः। यथा, सूर्य्यसिद्धान्ते। १। १२।
"नाड़ीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा॥"
तृतीयस्य प्रयोजनं आयुर्गणनायाम्। यथा,
"आयुर्दाये स्मृतं प्राज्ञैर्नाक्षत्रं घटिकादिकम्॥"
इति लघुपाराशरतन्त्रम्॥

नाक्षत्रिकः, पुं, (नक्षत्रादागतः। नक्षत्र+ठञ्।) नाक्षत्रमासः। यथा, शब्दरत्नावल्याम्।
"नक्षत्रमण्डलेनैव नाक्षत्रिक उदाहृतः॥"

नाक्षत्रिकी, स्त्री, (नाक्षत्रिक+ङीष्।) नक्षत्रदशा। यथा।"कलौ नाक्षत्रिकी दशा।" इति ज्योतिषम्। अस्या विवरणं दशाशब्दे द्रष्टव्यम्॥

नाक्षत्रिकि, त्रि॥ (नक्षत्रसम्बन्धिनि, त्रि॥

नागं, क्ली, (नगे पर्व्वते भवम्। नग+अण्।) रङ्गम्। सीसकम्। (अस्य पर्य्यायो यथा,—
"नागं महाबलं चीनं त्रिपुं योगेऽसीसकम्॥"
इति वैद्यकरत्नमालायाम्॥)
करवविशेषः। इति मेदिनी। गे, ६॥ नागकरञ्जजातपलम्। तथा,—

"नागोद्भवो नागधनाभिलाषी
वक्रोक्तिशीलो नितरां कुशीलः।
क्रोधाग्निसन्तापितबन्धुवर्गो
भर्गोपमः स्यात् किल रङ्गभूमौ॥"
इति कौष्ठीप्रदीपः॥

रङ्गसीसकार्थे क्वचित् पुंलिङ्गोऽपि दृश्यते। पाकहीनयोस्तयोर्दोषो यथा,—
"पाकहीनौ नागवङ्गौ कुष्ठगुल्मकरौ क्रमात्।
मेहपाण्डुकरौ वातकफच्छर्दिकरौ पुनः॥"
तयोर्मारणं यथा,—
"अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत्।
मृतपात्रे विदहेत नागे लौहदर्वा च चालयेत्॥
यामैकेन भवेद्भस्म तत्सुखाद्य मनःशिलाम्।
काञ्जिकेन दृयं पिष्ट्वा पचेद्दृढ़पुटेन च॥
खाङ्गशीतं पुनः दृष्ट्वा शिलया काञ्जिकेन च॥
पुनः पुटेच्छरावाभ्यामेवं षड्भिः पुटैर्भवेत्॥"
नागः सिन्दूरवर्णाभो म्रियते सर्व्वकार्य्यकृत्।
सतिक्तमधुरो नागो मृतो भवति भस्मसात्॥
आयुःकीर्त्तिं वीर्य्यवृद्धिं करोति सेवनात् सदा।
रोगान् हन्ति मृतो नागो वङ्गवद्गुणकारकः॥"
इति सुखबोधः॥

नागः, पुं, (नगे भवः। नग+अण्। यद्वा, दहत्यस्मात् विषाग्निनेति। दह+"दहेर्गो लोपो दश्च नः।" उणा ५। ६१। गः। अन्तलोपः। दश्च नः। बाहुलकात् नकारस्य गः।) पन्नगः। (यथा, विष्णुपुराणे। १। ६। ६६।
"जघ्नुश्च विषं नागाः क्षीरोदाच्च समुत्थितम्॥")
हस्ती। (यथा, रघुः। ४। ८२।
"भेजे भिन्नकटैर्नागैरन्याक्षुण्णरोध यैः॥")
क्रूरचारी। मेघः। नागकेशरः। पुन्नागः। वागदन्तकः। मुस्तकः। देहानिलप्रभेदः।
"उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः॥"
इति शारदातिलकटीका॥
उत्तरपदस्थिते श्रेष्ठः। इति मेदिनी। गे, १०॥
(सौवर्णम्। अस्थीतृपत्तिर्नामानि गुणाश्च। यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु समोच यत्।
वीर्य्यं जातस्ततो नागः सर्व्वरोगापहो नृणाम्॥"
"नागस्तु नागग्रततुल्यबलं ददाति
व्याधिं विनाशयति जीवनमातनोति।
वह्निं प्रदीपयति कामबलं करोति
दृष्ट्वा च नाशयति सन्ततसेवितः सः॥
पाकेन हीनौ किलवङ्गनागौ
कुष्ठानि गुल्मांश्च तथातिकष्टान्।
कण्डूं प्रमेहानिलसादशोथः
भगन्दरादीन् कुरुतः प्रयुक्तौ॥")
ताम्बूली। देशभेदः। इति नानार्थटीकायां भरतः॥ पर्व्वतविशेषः। (यथा, विष्णुपुराणे। २। २। २८।
"शृङ्गकूटोथ कपिलो हंसो नागस्तथापरः।
कालञ्जराद्याश्च तथा उत्तरे केसराचलाः॥")
नगे गिरौ चन्दनादितरौ वा भवः। न गच्छतीति अगः न अगः नागः इति वा। तक्षककर्कोटप्रभृतिर्देववोनिर्मनुष्याकारः पन्नगाकृतियुक्तः। इति भरतः॥ तत्पर्य्यायः। काद्रवेयः। २। इत्यमरः। १।८।४॥ नागोत्पत्तिर्यथा,—
"ब्रह्मणा ब्रह्मणा दृष्टिं मरीचिः सृतिकारणम्।
प्रथमं मनसा ध्यातस्तस्य पुत्रस्तु कश्यपः॥
तस्य दाक्षायणी भार्य्या कद्रूर्नाम सुचिस्मिता।
मारीचो जनयामास तस्यां पुत्रान्महाबलान्॥
अनन्तं वासुकिञ्चैव कम्बलञ्च महाबलम्।
कर्कोटकञ्च राजेन्द्र! पद्मं चान्यं सरीसृपम्॥
महापद्मं तथा शङ्खं कुलिकञ्चापराजितम्।
एते कश्यपदायादाः प्रधानाः परिकीर्त्तिताः।
एतैर्व्याप्तं तु दृष्ट्वा जगत्॥
कुटिला क्षीणकर्म्माणस्तीक्ष्णास्तोत्यविषोल्बणाः।
दृष्ट्वा खंदंश मनुजान् भस्म कुर्य्युः सकृद्ध्रुवम्॥
भ्रूम्दगामी यथा सर्पो मनुष्याणां नराधिप!।
अहन्यहनि जायेत क्षयः परमदारुणः॥
आत्मनस्तु क्षयं दृष्ट्वा प्रजाः सर्व्वाः समन्ततः।
जग्मुः शरणं शरणं परन्तु परमेश्वरम्॥
इमं सेवार्थमुद्दिश्य प्रजाः सर्व्वा महीपते!।
ऊचुः कमलजं देवं पुराणं ब्रह्मसंज्ञितम्॥
देवा ऊचुः।
देव देवेश लोकानां प्रभवः परमेश्वर।
त्राहि नस्तीक्ष्णदंष्ट्रेभ्यो भुजङ्गानां महात्मनाम्॥
अहन्यहनि ये देव! पन्नगेयुरुरगा दृष्टा।
मनुष्यं जगद्यूयं वा तत् सर्व्वं भस्मसाद्भवेत्॥
त्वया सृष्टिः कृता देव नीयते सा भुजङ्गमैः।
एतन्मत्वा तु दुर्वृत्तं तत् कुरुष्व महामते॥
ब्रह्मोवाच।
अहं रक्षां विधास्यामि भवतीनां न संशयः।
व्रजध्वं स्वानि धिष्ण्यानि प्रजापालाः ससाध्वसाः॥
एवमुक्ताः प्रजास्तेन ब्रह्मणाव्यक्तजन्मना।
आगतासु प्रजास्वाद्यस्तानुवाच भुजङ्गमान्॥
शृणुध्वं परमक्रुद्धो वासुकिप्रमुखांस्तथा।
ब्रह्मोवाच।
यतो मत्प्रभवान्नित्यं यूयं नयत मानुषान्॥
भवान्तरे तथान्यस्मिन्मातुः शापात् सुदारुणात्।
भवितातिक्षयो घोरो नूनं स्वायम्भुवान्तरे॥
एवमुक्तास्तु वेपन्तो ब्रह्मणा भुजगोत्तमाः।
निपत्य पादयोस्तस्य इदमूचुर्व्यचक्षदा॥
नागा ऊचुः।
भगवन्! कुटिला जातिरस्माकं भवता कृता।
विषोल्बणत्वं क्रूरत्वं दृक्शूलत्वञ्च नस्तथा॥
सम्पादितं त्वया देव इदानीं शमयाच्युत!॥
ब्रह्मोवाच।
यदि नाम मया सृष्टा भवन्तः कुटिलाशयाः।
ततः किं मनुजान्नित्यं भक्षयध्वं गतव्यथाः॥
नागा ऊचुः।
मर्य्यादां कुरु देवेश! स्थानञ्चैव पृथक् पृथक्।
नागानां वचनं श्रुत्वा देवो वचनमब्रवीत्॥
अहं करोमि वो नागाः स्वस्थं मद्भक्ते सह।
तदेकमनसः सर्व्वे शृणुध्वं मम शासनम्॥
पातालं वितलञ्चैव सुतलाख्यं तृतीयकम्।
दत्तं वै वसुकामानां यूयं तत्र गमिष्यथ॥
तत्र भोगान् बहुविधान् भुञ्जध्वं मम शासनात्।
तिष्ठध्वं सप्तमं यावद्राजान्तन्ते पुनः पुनः॥
ततो वैवस्वतस्यादौ काश्यपेया भविष्यथ।
दायादाः सर्व्वदेवानां सपर्णस्य च धीमतः॥
तदा प्रभृतिवः सर्व्वा भोक्ष्यते चित्रभानुना।
भवतां नैव दोषोऽयं भविष्यति न संशयः॥
ये वै क्रूरा भोगिनो दुर्विनीता-
स्तेषामन्तो भविता नात्यथैतत्।
कालं प्राप्तं भक्षयध्वं दशध्वं
तथा परान् चापकृतो मनुष्यान्॥
मन्त्रौषधैर्गारुडमन्त्रतश्च
वह्नेर्भया मानवा ये चरन्ति।
तेषां भीतैर्वर्जितव्यं नचान्य-
च्चिन्त्यं कार्य्यं चान्यथा वो विनाशः॥
इतीरिते ब्रह्मणा ते भुजङ्गा
जग्मुः स्थानं ज्ञातलाख्यं हि सर्व्वे।
तस्यूर्भोगान् भुञ्जमानाः समग्रान्
रसातले लीलया संश्रितास्ते॥
एवं शापं ते तु लब्ध्वा प्रसादञ्च चतुर्मुखात्।
तस्युः पातालनिलये सृष्टितोन्नत्यात्मना॥
एतत् सर्व्वञ्च पप्रच्छ तेषां जातं महात्मनाम्।
अस्मिन्नियं तिथिर्धन्या सर्व्वपापहरा शुभा॥
एतस्यां संयतो यस्तु अन्नन्तु परिवर्ज्जयेत्।
चौरेण सार्द्धमेवागोऽस्य यास्यन्ति मित्रताम्॥"
इति वराहपुराणम्॥
एषां शिवभूषणप्रमाणं यथा,—
"वासुक्याद्याश्च ये सर्पा यथास्थानञ्च ते धृतम्।
भूषणाश्चक्रुरङ्गस्य शिरोबाहादिषु स्थितम्॥"
इति कालिकापुराणे शिवविवाहे १८ अः।
कम्बलाश्वतरनागयोः सरस्वत्या नागवरप्राप्तिविवरणं यथा,—
"एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती।
प्रत्युवाच महात्मानं नागमश्वतरं ततः॥
सरस्वत्युवाच।
वरन्ते कम्बलभ्रातः! प्रयच्छाम्युरगाधिप!।
तदुच्यतां प्रदास्यामि यत्ते मनसि वर्त्तते॥
अश्वतर उवाच।
सहायं देहि देवि! त्वं पूर्व्वं कम्बलमेव मे।
समक्षरसमङ्गसुभगोः संप्रयच्छ च॥
सरस्वत्युवाच।
सप्त खरा ग्रामरागाः सप्त पन्नगसत्तम!।
गीतकानि च सप्तैव तावत्यश्चापि मूर्च्छनाः॥
तानाश्चैकोनपञ्चाशत्तथा ग्रामत्रयञ्च यत्।
एतत् सर्व्वं भवान् गाता कम्बलश्चैव ते सखा॥
ज्ञास्यते मत्प्रसादेन भुजङ्गेन्द्र परन्तथा।
चतुर्विधं पदं तालं त्रिप्रकारं लयत्रयम्॥
यतिश्चय तथा तोद्यं मया दत्तं चतुर्विधम्॥
एतद्भवान् मत्प्रसादात् पन्नगेन्द्राश्च यद्
अस्यान्तर्गतमाप्नुहि स्वरयङ्गमयोश्च यत्॥
तदर्थेयं मया दत्तं भवतः कम्बलस्य च।

यथा नाम्नस्य भूर्लोके पाताले वापि पन्नग ! ॥
प्रेतेतारौ भवन्तौ च सर्व्वस्यास्य भविष्यतः ।
पाताले देवलोके च भूर्लोके चैव पन्नगौ ॥
इत्युक्ता सा तदा देवी सर्व्वज्ञिका सरस्वती ।
जगामादर्शनं सद्यो नागस्य कमलेक्षणा ॥"
इति मार्कण्डेयपुराणम् ॥

कालियर्वधप्रसङ्गे नागहनने दोषो यथा,—
"सर्पंश्चजातान् सर्पांश्च हन्ति यो मानवाधमः ।
ब्रह्महत्यासमं पापं भविता तस्य निश्चितम् ॥
मत्पादपद्मचिह्नं यः करोति दण्डताडनम् ।
द्विगुणं ब्रह्महत्याया भविता तस्य किल्बिषम् ॥
लक्ष्मीर्यास्यति तद्गेहात् शापं दत्वा सुदारुणम् ।
वंशायुर्यशसां हानिर्भविता तस्य निश्चितम् ॥
ध्रुवं वर्षशतं कालसूत्रं यास्यति मज्जिया ॥"
इति ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे १६ अः ॥

वास्तुनागस्थितिर्यथा,—
"वास्तुप्रमाणेन तु गात्रकेण
वामेन पीते खलु नित्यकालम् ।
त्रिभिस्तु मासैः परिवृत्य पार्श्वं
तं वास्तुनागं प्रवदन्ति विद्वांसः ॥
भाद्रादिके वासवदिक्त्रिरात्रं स्या-
न्नागार्गादिकेषु त्रिषु यान्यमूर्द्धा ।
प्रत्यक्त्रिरात्रं खलु फाल्गुनादौ
व्येष्टादिकौवेरत्रिरात्रं स भागः ॥
मूर्द्धि घाते भवेन्मृत्युः पृष्ठे स्यात् पुत्रभार्य्ययोः ।
जघने ऽर्थक्षयं विद्यात् सर्व्वसम्पत्तथोदरे ॥
एकं नागोडुसंयुक्तौ द्वे चेद्दक्षिणपश्चिमे ।
त्रिभागं पूर्व्वतो हीनं कुर्य्याद्वा सौम्यवर्जितम् ॥
केचिद्दक्षिणभागे तु वदन्त्येकं गृहं बुधाः ।
न कोणेषु गृहं कुर्य्यान्नाप्यन्त्ये नापि मध्यतः ॥
कोणे च धनहानिः स्यादन्ते रिपुभयं भवेत् ।
मध्ये च सर्व्वनाशः स्यात्तस्मादेतद्विवर्ज्जयेत् ॥"
इति ज्योतिस्तत्त्वम् ॥

नागकन्दः, पुं, (नाग इव कन्दं मूलं यस्य । इहा-मूलत्वादेव तथात्वम् ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥

नागकर्णः, पुं, (नागकर्ण इव आकृतिः पर्णेऽस्य-स्येति । अच् ।) रक्तैरण्डः । इति राजनिर्घण्टः ॥

नागकिञ्जल्कं, क्ली, (नागस्येव किञ्जल्को यस्य ।) नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥

नागकुमारिका, स्त्री, (नागस्य कुमारीव । कन् टाप् पूर्व्वह्रस्वश्च ।) गुडूची । मञ्जिष्ठा । इति राजनिर्घण्टः ॥

नागकेशरः, पुं, (नागस्येव केशरोऽस्य ।) नाग-केसरवृक्षः । इति भरतः ॥ (यथा, हारीते चिकित्सितस्थाने १० अध्याये ।
"नलमैरेयकं पृक्का पद्मकं नागकेशरम् ॥")

नागकेसरः, पुं, (नागस्येव केसरो यस्य ।) पुष्पवृक्ष-विशेषः । नागेश्वर इति भाषा ॥ तत्पर्य्यायः । नागपुष्पः २ केसरः ३ वारिजकिञ्जल्कः ४ । इत्यमरः । २।४।१५ ॥ केशरः ५ नागकेशरः ६ । इति भरतः ॥ किञ्जल्कः ७ नागकिञ्जल्कः ८ नागीयः ९ काञ्चनम् १० सुवर्णम् ११ हेमकिञ्जल्कः १२ रक्तम् १३ हेम १४ पिञ्जरः १५ फणिकेसरः १६ पन्नगकेसरः १७ । तत्पुष्पगुणाः । अस्योष्णत्वम् । लघुत्वम् । तिक्तत्वम् । कफवस्तिवातामय-कण्डूश्वीर्षरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ तन्नामगुणाः ।
"नागपुष्पः स्मृतो नागः केसरो नागकेसरः ।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ॥
नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम् ।
खुरकण्डूव्रणस्वेदच्छर्द्दिकृच्छ्रासनाशनम् ॥
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥"
त्रिजातकं नागकेशरसंयुक्तं चतुर्जातकं भवति यथा,—
"त्वगेलापत्रकेसुल्लेखिसुगन्धिकजातकम् ।
नागकेशरसंयुक्तं चतुर्जातकमुच्यते ॥
तद्धृद्यं रोचकं रूक्षं तीक्ष्णोष्णं सुखगन्धकृत् ।
लघु पित्तास्रिद्धृदयं कफवातविषापहम् ॥"
इति भावप्रकाशः ॥

नागगन्धा, स्त्री, (नागस्य गन्ध इव गन्धो यस्याः ।) नाकुलीकन्दः । इति राजनिर्घण्टः ॥ (नाकुली-शब्देऽस्या विशेषो ज्ञातव्यः ॥)

नागगर्भं, क्ली, (नागः सीसकं गर्भे उत्पत्ति-कारणं यस्य ।) सिन्दूरम् । इति राजनिर्घण्टः ॥

नागच्छत्रा, स्त्री, (नागस्य फणेव छत्रं छादनं पत्रे यस्याः ।) नागदन्ती । इति राजनिर्घण्टः ॥

नागजं, क्ली, (नागात् सीसकात् जायते इति । जन + डः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥ रङ्गम् । इति हेमचन्द्रः । ४ । १०८ ॥ नाग-जाते, त्रि ॥

नागजिह्वा, स्त्री, (नागस्य सर्पस्य जिह्वेव ।) प्रारिवा । अनन्तमूलम् । इति रत्नमाला ॥

नागजिह्विका, स्त्री, (नागस्य जिह्वेव रक्तता यस्याः । कप् । टापि अत इत्वम् ।) मनः-शिला । इत्यमरः । २ । ६ । १०८ ॥ (यथास्याः पर्य्यायः ।
"मनःशिला मनोगुप्ता मनोज्ञा नागजिह्विका ।
शैपाली कुनटी गोला शिला द्वियौषधिः स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नागजीवनं, क्ली, (नागः सीसकं जीवनं यस्य ।) वङ्गम् । इति हेमचन्द्रः । ४ । १०८ ॥

नागदन्तः, पुं, (नागस्य गजस्य दन्तः ।) हस्ति-दन्तः । (यथा, महाभारते । १२ । ६८ । १६ ।
"द्वीपिचर्म्मोपनद्धश्च नागदन्तकृतत्सरुः ॥"
नागदन्तः साधनत्वेनास्त्यस्येति अच् ।) गृहान्त-र्गतदारु । इति मेदिनी । ते, २०१ ॥ दाँतिया इति दाखा इति च भाषा ॥

नागदन्तकः, पुं, (नागदन्त + स्वार्थे कन् ।) नाग-दन्तः । (नागदन्तेन कायतीति । कै + कः ।) भित्तिदारुद्वयम् । तत्पर्य्यायः । निर्यूहः २ । इति जटाधरः ॥

नागदन्तिका, स्त्री, (नागस्य सर्पस्य दन्त इव पीड़ादायकं पत्रं यस्याः । कापि अत इत्वम् ।) वृश्चिकाली । इति रत्नमाला ॥ बिछूटी इति भाषा ॥

नागदन्ती, स्त्री, (नागस्य गजस्य दन्त इव फलाद्याकारे यस्याः । ङीष् ।) कुम्भा । श्रीह-स्तिनी । इति मेदिनी । ते, २०१ ॥ हाति शुण्डा इति भाषा ॥ अस्य पर्य्यायः । विशल्या २ पर्व्वपुष्पी ३ विषौषधी ४ शुक्लपुष्पा ५ इभ-दन्ताह्वा ६ काण्डेरी ७ कामदूतिका ८ । इति रत्नमाला ॥ श्वेतपुष्पा ९ मधुपुष्पा १० विशो-धिनी ११ नागस्फोता १२ विशल्याची १३ नागच्छत्रा १४ विचक्षणा १५ सर्पपुष्पी १६ शुक्लपुष्पी १७ खादुका १८ घृतदन्तिका १९ सितपुष्पी २० सर्पदन्ती २१ नागिनी २२ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । रूक्ष-त्वम् । वातकफगुल्मशूलोदरव्याधिकण्डूदोष-नाशित्वञ्च । इति राजनिर्घण्टः ॥

नागदमनी, स्त्री, (नागो दम्यतेऽनयेति । दम + ल्युट् + ङीप् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । जम्बूः २ जाम्बवती ३ दक्षा ४ रक्तपुष्पा ५ जाम्बवी ६ मलाली ७ दुर्द्धर्षा ८ दुःसहा ९ । अस्या गुणाः । तिक्तत्वम् । उष्णत्वम् । कटु-त्वम् । त्रिदोषोदराध्मानदीपनत्वम् । कोष्ठ-शोधनकारित्वञ्च । इति राजनिर्घण्टः ॥*॥ तन्नामगुणाः ।
"विज्ञेया नागदमनी बला मोटा विषापहा ।
नागपुष्पी नागपत्रा महायोगेश्वरीति च ॥
बला मोटा कटुस्तिक्ता लघुः पित्तकफापहा ।
मूत्रकृच्छ्रव्रणानाहो नाशयेच्चालगर्द्दभम् ॥
सर्व्वग्रहप्रशमनी निःशेषविषनाशिनी ।
जयं सर्व्वत्र कुरुते धनदा सुमतिप्रदा ॥"
इति भावप्रकाशः ॥

नागदलोपमं, क्ली, (नागदलस्य ताम्बूल्या उपमा यत्र ।) परूषफलम् । इति रत्नमाला ॥ (परूष-शब्देऽस्य गुणादयो ज्ञातव्याः ॥)

नागदुः, पुं, (नागप्रियो दुर्वृक्षः ।) सप्तपर्णवृक्षः । इति शब्दचन्द्रिका ॥ सिज इति भाषा ॥

नागनिर्य्यूहः, पुं, (नाग इव निर्य्यूहो नागदन्तः ।) नागदन्तकः । इति जटाधरः ॥

नागपञ्चमी, स्त्री, (नागप्रिया पञ्चमी । शाक-पार्थिवादित्वात् समासः ।) आषाढ़ी शुक्ला पञ्चमी । तत्र मनसापूजा कर्त्तव्या । यथा,—
"देवीपुराणे ।
'सुप्ते जनार्द्दने क्षीरे पञ्चम्यां भवनाङ्गने ।
पूजयेन्मनसादेवीं खुहीविटपसंस्थिताम् ।
पद्मनाभे गते मृत्यौ देवैः सर्व्वैरनन्तरम् ।
पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥'
मनसादेवीं विषहरीम् । खुही सिजवृक्षः । देवैरिति सहार्थे तृतीया ।
'देवीं सम्पूज्य नत्वा च न सर्पभयमाप्नुयात् ।
पञ्चम्यां पूजयेन्नागाननन्तादान् महोरगान् ॥

चीरं सर्पिस्तु नैवेद्यं देयं सर्पविषापहम् ॥'
मनसाध्यानम्। यथा, पद्मपुराणे।
'देवीमम्बामशेषाणां शृङ्गधरवदनां चारुकान्तिं
वदान्यां
हंसारूढासदारामरचितवसनां सर्व्वदा सर्व्व-
दैव।
क्षेत्राणां मस्तिताङ्गीं कनकमणिगणैर्नागरत्नै-
रनेकै-
र्वन्देऽहं वासुनागासुरकृतयुगलां भोगिनीं
कामरूपाम् ॥'
पुराणान्तरे।
'अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः।
कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः॥
शेषः पद्मो महापद्मः कुलिकः शङ्खपालकः।
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः॥
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ ॥'
गारुड़ेऽपि।
'अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च।
तथा कर्कोटकं नागं धृतराष्ट्रञ्च शङ्खकम्॥
कालीयं तक्षकञ्चापि पिङ्गलं मणिभद्रकम्।
यत्नेनानसितान्नागान् दृष्ट्वोत्तो दिवं व्रजेत्॥'
अन्यच्च।
'योऽसौ चानन्तरूपेण ब्रह्माण्डं सचराचरम्।
पुष्यवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः॥'
इत्यनेन प्रणवपूर्ब्बेण मत्स्यपुराणोक्तेनानन्तं पूज-
येत्॥ रत्नाकरे।
'पिप्पुमर्द्दस्य पत्राणि २ पयेद्भवनोदरे।
स्वयञ्चापि तदश्नीयात् ब्राह्मणांश्चैव भोजयेत्॥'
पिप्पुमर्द्दस्य मिश्रस्य॥" इति तिथ्यादितत्त्वम्॥

नागपत्रा, स्त्री, (नागदमनं पत्रं यस्याः। टाप्।) नागदमनी। इति भावप्रकाशः॥

नागपत्री, स्त्री, (नागवत् पत्रं यस्याः। ङीष्।) लक्ष्मणा। इति राजनिर्घण्टः॥

नागपदः, पुं, (नागवत् पदं स्थानं यस्य।) षोड़श-
रतिबन्धान्तर्गतद्वितीयबन्धः। तस्य लक्षणं
यथा,—
"पादौ स्कन्धे तथा हस्ते क्षिपेल्लिङ्गं भगे लघु।
कामयेत् कामुको नारीं बन्धो नागपदो मतः॥"
इति रतिमञ्जरी॥

नागपाशः, पुं, (नागपाश इव आकृतिरस्य-
स्येति। अच्।) स्त्रीणां करणम्। (नागः पाश
इव।) वरुणायुधः। इति मेदिनी। शे, ३५॥
"सार्द्धद्व्यावर्त्तनात्तु नागपाश इति स्मृतः।
ब्रह्मयन्त्रिमथो दद्यान्नागपाशमथापि वा॥"
इत्यागमः॥
"वेष्टितं नागपाशेन भृकुटीभीषणाननम्॥"
इति देवीपुराणीयदुर्गाध्यानम्॥

नागपाशकः, पुं, (नागपाश इव प्रतिकृतिः। "इवे
प्रतिकृतौ।" ५। ३। ९६। इति कन्। यद्वा,
नागपाश इव कायतीति। के+कः।) रति-
बन्धविशेषः। तस्य लक्षणं यथा,—
"स्वजङ्घाद्वयमध्यस्थां हस्ताभ्यां धारयेत् कुचौ।
रमेत्तिर्यग्भ्रुवि क्रामी बन्धोऽयं नागपाशकः॥"
इति रतिमञ्जरी॥

नागपुरं, क्ली, (नागनामकं पुरम्। शाकपार्थि-
वादित्वात् समासः।) देशविशेषः। तद्विवरणं
यथा,—
"जटाजूटात् पपातोर्द्धं मेरोरुत्तुङ्गशृङ्गतोऽगमत्।
देवैः परिवृता गङ्गा हेमकूटञ्च पर्व्वतम्॥
मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्व्वतम्।
तामायान्तीन्तु रोधाय खलीलो नाम दानवः॥
पार्व्वतं रूपमास्थाय वर्षाणान्तु शतैर्द्विजाः।
ततो भगीरथो राजाराधयामास कौशिकम्॥
स तुष्टः प्रददौ नागं वाहनं तं भगीरथः।
समारुह्यागमत्तत्र यत्र रुद्रा भगीरथी॥
तेन नागेन तं देशं संविदार्य्य स सङ्गतः।
शतधा तं समाधाय रुद्रैन्द्यैरावती गजः॥
महीतलं समापेदे स यावन्नागसाह्वयम्॥
तस्मात् खाघटनाद्विप्रा अभून्नागपुरं वरम्॥"
इति वह्निपुराणे गङ्गावतरणनामाध्यायः॥

नागपुष्पः, पुं, (नागस्य हस्तिनो मदगन्धयुक्तं
पुष्पं यस्य।) पुन्नागवृक्षः। नागकेशरः।
(यथा, महाभारते। १। २०८। ४०।
"पुन्नागैर्नागपुष्पैश्च नकुलैः पनसैस्तथा॥")
चम्पकः। इति मेदिनी। पे, २५॥ (पुन्नाग-
पुष्पे तु क्ली। तत्र गुणा यथा,—
"नागपुष्पं कषायोष्णं रुच्यं लघ्वामपाचनम्।
ज्वरकण्डूत्यखेदक्षर्द्दिच्छर्द्दिश्वासनाशनम्॥
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

नागपुष्पफलः, क्ली, (नागस्य नागकेशरस्येव पुष्प-
फले यस्याः।) कूष्माण्डी। इति राजनिर्घण्टः॥

नागपुष्पिका, स्त्री, (नागस्य पुष्पमिव पुष्पं
यस्याः। कप्। टापि अत इत्वम्।) खर-
यूथी। इति राजनिर्घण्टः॥

नागपुष्पी, स्त्री, (नागस्य नागकेशरस्य पुष्पमिव
पुष्पं यस्याः। ङीष्।) नागदमनी। इति भाव-
प्रकाशः॥ (पर्य्यायोऽस्या यथा, भावप्रकाशस्य
पूर्ब्बखण्डे प्रथमे भागे।
"नागपुष्पी श्वेतपुष्पा नागिनी रामदूतिका॥"
अस्या गुणा। यथा,—
"नागिनी रोचनी तिक्ता तीक्ष्णोष्णा कफपित्त-
हृत्॥")

नागफलः, पुं, (नागस्य पुन्नागस्येव फलं यस्य।)
पटोलः। इति राजनिर्घण्टः॥

नागबन्धुः, पुं, (नागानां हस्तिनां बन्धुरिव प्रिय-
त्वात्।) अश्वत्थवृक्षः। इति शब्दचन्द्रिका॥
नागानां बान्धवश्च॥

नागबलः, पुं, (नागानामिव बलं यस्य।) भीम-
सेनः। इति त्रिकाण्डशेषः॥ (अस्य नाग-
बलाग्निकथा। यथा, महाभारते। १। १२८।
६५—७०।
"एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत।
यदि नागेन्द्र! तुष्टोऽसि किमस्य धनसञ्चयैः॥
रसं पिबेत् कुमारोऽयं त्वयि प्रीते महाबलः।
बलं नागसहस्रस्य यस्मिन् कुक्षौ प्रतिष्ठितम्॥
यावत् पिबति बालोऽयं तावदस्मै प्रदीयताम्।
एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत॥
ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः।
प्राङ्मुखश्चोपविष्टः स रसं पिबति पाण्डवः॥
एकोच्छ्वासात्ततः कुक्षिं पिबति स्म महाबलः।
एवमष्टौ स कुक्षीनि ह्यपिबत् पाण्डुनन्दनः॥
ततस्तु शयने दिव्ये नागदत्ते महाभुजः।
अशेत भीमसेनस्तु यथासुखमरिन्दमः॥"
तथा च तत्रैव। १। १२६। १६—२१।
"ततोऽस्मै तु दिवसे प्रत्यबुध्यत पाण्डवः।
तस्मिंस्तदा रसे जीर्णे सोऽप्रमेयबलो बली॥
तं दृष्ट्वा प्रतिबुध्यन्तं पाण्डवं ते सुजङ्गमाः।
साधुयामासुरव्यग्रा वचनञ्चेदमब्रुवन्॥
यस्ते पीतो महाबाहो! रसोऽयं वीर्य्यसंभृतः।
तस्मान्नागायुतबलो रसोऽभ्यो भविष्यति॥")
हस्तितुल्यबलवति, त्रि॥

नागबला, (नागस्येव बलं यस्याः।) बलाप्रभेदः।
गोरक्षचाकुलिया इति गुलशकरी इति ककही
इति च भाषा॥ (यथा, गारुड़े १७६ अध्याये।
"लब्ध्वा नागबलां चूर्णं श्वासकासादिमुच्यते॥")
तत्पर्य्यायः। गाङ्गेरुकी २ भसा ३ इक्षुगवे-
धुका ४। इत्यमरः। २। ४। ११७॥ गाङ्गे-
रुकी ५ गोरक्षतण्डुला ६। इति भरतः॥ भद्रौ-
दनी ७ खरगन्धा ८ चतुःपत्रा ९ महौदया १०
महापत्रा ११ महाशाखा १२ महाफला १३
विश्वदेवा १४ अनिष्टा १५ देवदत्ता १६ मह-
गन्धा १७ घण्टा १८। अस्या गुणाः। मधु-
राम्लत्वम्। कषायत्वम्। उष्णत्वम्। गुरुत्वम्।
कण्डूतिकुष्ठवातव्रणपित्तनाशित्वञ्च। इति राज-
निर्घण्टः॥ स्निग्धत्वम्। आयुष्यत्वम्। हृद्य-
त्वम्। ग्राहित्वम्। लक्ष्मीक्षयरोगेषु हित-
त्वञ्च। इति राजवल्लभः॥

नागभृत्, पुं, (नागः क्रूरचारी वनु विभर्त्ति
आत्मानमिति। भृ+क्विप्।) कुक्कुरसर्पः। इति
त्रिकाण्डशेषः॥

नागमल्लः, पुं, (नागेषु हस्तिषु मल्लः।) ऐरावतः।
इति शब्दरत्नावली॥

नागमाता, [तृ] स्त्री, (नागानां हस्तिनां
मातेव भूयस्त्वात्।) मनःशिला। इति हेम-
चन्द्रः। ४। १२६॥ (नागानां सर्पाणां माता।)
मनसादेवी। इति शब्दरत्नावली॥ (यथा,
ब्रह्मवैवर्त्ते। २। १। ६७।
"नागेश्वरस्यानन्तस्य भगिनी नागपूजिता।
नागेश्वरी नागमाता सुन्दरी नागवाहिनी॥"
सुरसा। इयं हि सागरोल्लङ्घनसमये हनुमतः
परीक्षार्थं देवैरादिष्टा तस्य विघ्नमाचरितुं गता
तेन वञ्चिता च। यथा, रामायणे। ४।१।१६८।
"ततो देवाः सगन्धर्व्वाः सिद्धाश्च परमर्षयः।
अब्रुवन् सूर्य्यसङ्काशां सुरसां नागमातरम्॥"
यथा, च अध्यात्मरामायणे। ६। १।८—२३।

[d]ष्टानिलसुतं देवा गच्छन्तं वायुवेगतः।
परीक्षणार्थं सत्त्वस्य वानरस्येदमब्रुवन्॥
गच्छत्येष महासत्त्वो वानरो वायुविक्रमः।
लङ्कां प्रवेष्टुं शक्तो वा न वा जानीमहे बलम्॥
एवं विचार्य नागानां मातरं सुरसाभिधाम्।
अब्रवीद्देवताश्रेष्ठः कौतूहलसमन्वितः॥
गच्छ त्वं वानरेन्द्रस्य किंचिद्विघ्नं समाचर।
ज्ञात्वा तस्य बलं बुद्धिं पुनरेहि त्वरान्विता॥
इत्युक्ता सा ययौ शीघ्रं हनुमद्विघ्नकारणात्।
आरुह्य मार्गं पुरतः स्थित्वा वानरमब्रवीत्॥
एहि मे वदनं शीघ्रं प्रविश्यश्च महामते!।
देवैरेवं कल्पितो भक्षः क्षुधासम्मोहितात्मनः॥
तामाह हनुमान् मातरहं रामस्य शासनात्।
गच्छामि जानकीं द्रष्टुं पुनरागम्य सत्वरः॥
रामाय कुशलं तस्याः कथयित्वा तदाननम्।
निवेद्य देहि मे मार्गं सुरसाये नमोऽस्तु ते॥
इत्युक्ता पुनरेवाह सुरसा क्षुधितास्म्यहम्।
प्रविश्य गच्छ मे वक्त्रं नोचेत् त्वां भक्षयाम्यहम्॥
इत्युक्तो हनुमानाह मुखं शीघ्रं विदारय।
प्रविश्य वदनं तेऽद्य गच्छामि त्वरयान्वितः॥
इत्युक्ता योजनायामदेहो भूत्वा पुरः स्थितः।
दृष्ट्वा हनुमतो रूपं सुरसा पञ्चयोजनम्॥
मुखं चकार हनुमान् द्विगुणं रूपमादधत्॥
ततश्चकार सुरसा योजनानाञ्च विंशतिम्।
वक्त्रं चकार हनुमांस्त्रिंशद्योजनसम्मितम्॥
ततश्चकार सुरसा पञ्चाशद्योजनायतम्।
वक्त्रं तदा हनूमांस्तु बभूवाद्रिसन्निभः॥
प्रविश्य वदनं तस्याः पुनरेव पुरः स्थितः।
प्रविष्टो निर्गतोऽहं ते वदनं देवि! ते नमः॥
एवं वदन्तं दृष्ट्वा सा हनुमन्तमथाब्रवीत्।
गच्छ साधय रामस्य कार्यं बुद्धिमतां वर!॥
देवैः सम्भावितोऽहं ते बलं जिज्ञासुभिः कपे!।
दृष्ट्वा सीतां पुनर्गत्वा रामं द्रक्ष्यसि गच्छ भो॥"
कहः। इति महाभारतम्॥)

नागमारः, पुं, (नागं मारयतीति। मृ+णिच्+अण्।) केशराजः। इति त्रिकाण्डशेषः॥ हस्तिमारके सर्पमारके च त्रि॥

नागयष्टिः, स्त्री, (नागाधिष्ठिता यष्टिः।) पुष्करिण्यादिस्थितकाष्ठविशेषः। रङ्काट इति भाषा॥ तत्पर्य्यायः। नागाह्वया २। इति जटाधरः॥ (यथा, हयशीर्षे।
"वैभवं वारुणञ्चैव पुन्नागं नागकेशरम्।
वकुलं चम्पकञ्चैव विल्वञ्चैवाथ खादिरम्॥
एतेषामेव दारूणां नागयष्टिः प्रकीर्त्तिता।
सवल्ककोटरं त्यक्त्वा तस्मात् कुर्य्यात् यथेप्सितम्॥")

नागरं, क्ली, (नगरे भवम्। नगर+अण्।) शुण्ठी। इत्यमरः। २। ६। ९८॥ (अस्य गुणा यथा,—
"नागरं दीपनं रुच्यं याहि वर्च्यं विबन्धजुत्।
रुच्यं लघु स्वादुपाकं स्निग्धोष्णं कफवातजित्॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥

यथा च गारुडे। १८६ अध्याये।
"सुक्लीतकवचायुक्तं मरीचं नागरं तथा।
चर्व्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत्॥")
सुस्ता। इति मेदिनी। रे, १७२॥ रसवन्धः। इति विश्वः॥ (क्वचित् पुं।) नागरदेशीयाश्वश्च॥

नागरः, पुं, (नागरो विदग्धस्तद्भावोऽस्यास्तीति। अर्श आद्यच्।) देवरः। इति त्रिकाण्डशेषः॥ नागरङ्गः। इति शब्दरत्नावली॥ त्रि, (नगरे भवः।
"तत्र भवः।" ४।३।५३। इत्यण्।) विदग्धः। (यथा, आर्य्यासप्तशत्याम्। ३२३।
"नागर नीतिरिवासौ श्यामस्त्रियापि भूषिता सततम्।
कस्तूरी न मृगीदरवासवशाद्विसतामेति॥")
नगरोद्भवः। इति मेदिनी। रे, १७२॥ (यथा, देवीभागवते। २। ६। ६६।
"नागरा धृतराष्ट्रस्य सर्व्वे तत्र समाययुः॥")
नगरहितश्च। यथा, महाभारते। २।५।१२२।
"धनुर्व्वेदस्य सूत्रं वै यज्ञसूत्रञ्च नागरम्॥")

नागरकः, पुं, (नागर एव। स्वार्थे कन्। यद्वा, नागरेषु कायतीति। कै+कः।) रतिबन्धविशेषः। यथा,—
"ऊरुमूलोपरि स्थित्वा योषिदूरुद्वयं यदि।
शीर्षां धृत्वा कराभ्याञ्च बन्धो नागरको मतः॥"
इति रतिमञ्जरी॥

नागरक्तं, क्ली, (नागश्चतं रक्तम्।) सिन्दूरम्। इति हेमचन्द्रः। ४।१२७॥ नागस्य शोणितञ्च॥

नागरघनः, पुं, (नागर एव घनो मुस्ता।) नागरमुस्ता। इति राजनिर्घण्टः॥ (नागरमुस्ताशब्दे ऽस्य विवृतिर्ज्ञातव्या॥)

नागरङ्गः, पुं, (नागस्य नागसम्भूतस्य सिन्दूरस्येव रङ्गो यस्य।) वृक्षविशेषः। नारङ्गीलेबुर गाछ इति भाषा॥ इत्यमरः। २। ४। ९८॥ तत्पर्य्यायः। नारङ्गः २ नार्य्यङ्गः ३ नागरः ४ ऐरावतः ५ नागरुकः ६ चक्राधिवासी ७। इति शब्दरत्नावली॥ तत्फलगुणाः। सुरभित्वम्। विपाके गुरुत्वम्। दुर्जरत्वम्। अत्यम्लत्वम्। ईषन्मधुरत्वम्। वृष्यत्वम्। वातविनाशित्वञ्च। तत्केशरगुणः। रुच्यत्वम्। वातहरत्वञ्च। इति राजवल्लभः॥

नागरमुस्ता, स्त्री, (नागर इव मुस्ता।) मुस्ताप्रभेदः। नागरमुता इति भाषा॥ तत्पर्य्यायः। नागरोत्था २ नागरादिघनसंज्ञका ३ चक्राङ्गा४ नादेयी ५ चूड़ाला ६ पिण्डमुस्ता ७ शिखिशिरा८ वृषभाक्षी ९ कच्छुरुहा १० चारुकेसरा ११ उच्चटा १२ पूर्णकोशसंज्ञा १३ कलापिनी १४। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। कषायत्वम्। शीतलत्वम्। कफपित्तज्वरातिसाररुचिछर्द्यादाहभ्रमनाशित्वञ्च। इति राजनिर्घण्टः॥

नागराजः, पुं, (नागानां राजा। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्।) शेषः। अनन्तः। यथा, कविकल्पद्रुमे।
"पाताले नागराजं भुजगयुवतयो यस्य गायन्ति कीर्त्तिम्।"

नागराङ्गं, क्ली, (नागरमिति आङ्गा आख्या यस्य।) शुण्ठी। इति राजनिर्घण्टः॥ (विवृतिरस्या शुण्ठीशब्दे ज्ञातव्या॥)

नागरी, स्त्री, (नगरे भवा। नगर+अण्+ङीप्।) शुण्ठी। इति शब्दचन्द्रिका॥ विदग्धा नारी। यथा, उद्धवदूतः।
"हन्ताभीरीः स्मरतु स कथं संवृतो नागरीभिः॥"
नागरपत्नी। नगरभवे, त्रि॥

नागरुकः, पुं, (नागं रवते शब्दयेन प्राप्नोतीति। रु गतौ+बाहुलकात् कप्रत्ययेन साधुः।) नागरङ्गः। इति शब्दरत्नावली॥

नागरेयः, पुं, (नागस्य सीसकस्य रेयुः।) सिन्दूरम्। इति राजनिर्घण्टः॥

नागरेयकः, त्रि, (नगरे भवः नगरस्यायं वा।
"कत्त्राद्यर्थे ठकञ्।" ४।२।९५। इति ठकञ्।) नगरसम्बन्धी। नगरस्यायमिति स्त्रीप्रत्ययान्तात् स्वार्थे कः॥

नागलता, स्त्री, (नागः सर्पस्तद्वत् लता।) लिङ्गम्। इति त्रिकाण्डशेषः॥

नागलोकः, पुं, (नागानां लोकः।) पातालम्। इत्यमरः। १।८।१॥ (यथा, हरिवंशे। ८२। ८४।
"रसातले स दृष्ट्वा नागलोकमिमं यथा।")

नागवल्लरी, स्त्री, (नाग इव दीर्घा वल्लरी।) नागवल्ली। इति भावप्रकाशः॥

नागवल्लिका, स्त्री, (नागवल्लि+स्वार्थे कन्।) नागवल्ली। इति रत्नमाला॥

नागवल्ली, स्त्री, (नाग इव दीर्घा वल्ली लता।) ताम्बूली। इत्यमरः। २। ४। १२०॥ अस्याः पर्य्यायास्ताम्बूलवल्लीशब्दे गुणाश्च ताम्बूलशब्दे द्रष्टव्याः। सा च श्रीवाटाम्रवाटादिनानास्थानभेदादेव भिन्ना।
"एकाप्येषा देशभेदतृस्नाविशेषा-
न्नागाकारं याति काये गुणे च।
श्रीवाटी मधुरा तीक्ष्णा वातपित्तकफापहा।
रसाढ्या च रसा रुच्या विपाके स्निग्धिरा स्मृता॥
स्यादम्रवाटी कटुकाम्लतिक्ता
तीक्ष्णा-सतोक्ष्णा सुखपाककर्त्री।
विदाहपित्तासविकोपनी च
विदम्भदा वातनिवर्हणी च॥
सप्रभी मधुरा तीक्ष्णा कटुरुष्णा च वाप्यनी।
गुल्मोदरार्शोघ्नहरा रुचिकृद्दीपनी परा॥"
अन्यच्च।
"गुहागरे सप्तशिरा प्रसिद्धा
तत्पर्णचूर्णातिरसातिरुच्या।
सुगन्धितीक्ष्णा मधुरातिहृद्या
सन्दीपनी पुंस्त्वकरी च वल्ल्या॥
विरेचनी वक्त्रसुगन्धिकारिणी।
नाम्ना याम्बसरा सतीक्ष्णमधुरा रुच्या हिमा दाहजुत्
पित्तोद्रेककरा सुदीपनकरी वल्ल्या सुखामोदिनी।

स्त्रीसौभाग्यविवर्द्धिनी मदकरी ग्रेया सदा वल्लभा
गुल्माध्मानविबन्धनिघ्न कथिता सा मालवे तु
क्षिता ॥
अस्थिपुष्पिका नाम कषायोष्णा कटुस्तथा ।
मलापकर्षा कण्ठस्य पित्तकृद्दहातनाग्निनी ॥
देवघोषा कटुस्तीक्ष्णा हृद्या दीर्घदला च सा ।
कफवातहरा रुच्या कटुदीपनपाचनी ॥"
इति राजनिर्घण्टः ॥

नागवारिकः, पुं, (नागानां हस्तिनां वारो वारणम् । स कार्य्यत्वेनास्त्यस्येति । नागवार + ठन् ।) राजकुञ्जरः । हस्तिपः । गणस्यराजः । (नागानां सर्पाणां वारो वारणमस्त्यस्येति ।) गरुड़ः । मयूरः । इति मेदिनी । के, २३० ॥

नागवीटः, पुं, (नाग इव विशेषेण वेष्टति इतस्ततो भ्रमतीति । वि + इट गतौ + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) टङ्कारः । इति त्रिकाण्डशेषः ॥ आकरा इति ख्यातः ॥

नागवीथी, स्त्री, (नागस्येव वीथी पन्थाः ।) अश्विन्यादिनक्षत्रत्रयघटितग्रहस्थानत्रयान्तर्गतोत्तरस्थानस्थपथविशेषः । यथा,—
"सर्व्वग्रहाणां वीथ्येव स्थानानि द्विजसत्तमाः ।
स्थानं नागस्य मध्यं तथैरावतसुत्तरम् ।
वैश्वानरं दक्षिणतो निर्द्दिष्टमिह तत्त्वतः ॥
तदेव मध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते । तथाहि त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् । तथाचोक्तम् ।
अश्विनी हस्तिका याम्या नागवीथीति
ग्रन्थिता ॥"
इति विष्णुपुराणे । २ । ८ । ७६ श्लोकटीकायां श्रीधरस्वामी ॥ कश्यपापत्यविशेषः । यथा,—
"नागवीथी च यामिन्याम् ।" इति ब्रह्मपुराणे द्वितीयोऽध्यायः ॥ (धर्म्मस्य यामिपत्नीगर्भजाता कन्या । यथा, मत्स्यपुराणे । ५ । १८ ।
"लम्बायां घोषनामानो नागवीथी तु यामिजा ॥")

नागशुक्ती, स्त्री, (नागस्य शुक्तिवत् आकृतिरस्त्यस्येति । अच् । ततो गौरादित्वात् ङीष् ।) डङ्गरीफलम् । इति राजनिर्घण्टः ॥

नागसम्भवं, क्ली, (नागात् सीसकात् सम्भवो यस्य ।) सिन्दूरम् । इत्यमरः । २ । ६ । १०५ ॥

नागसुगन्धा, स्त्री, (नागस्येव सु शोभनो गन्धो यस्याः ।) शुणङ्गाची । सर्पसुगन्धा । इति भरतधृतधन्वन्तरिः ॥ (राजभेदः । तत्पर्य्यायो यथा,—
"नाकुली सरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा शुणङ्गाची सर्पाक्षी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

नागस्तोकं, क्ली, (नागस्य नागविषस्य स्तोकः स्वल्पता यत्र । कप् । स्थावरविषत्वादेवास्य तथात्वम् ।) वत्सनाभः । इति राजनिर्घण्टः ॥

नागस्फोता, स्त्री, (नाग इव स्फोता ।) दन्ती । नागदन्ती । इति राजनिर्घण्टः ॥

नागहनुः, पुं, (नागस्य हस्तिनो हनुरिव ।) नखनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

नागहन्त्री, स्त्री, (नागान् हन्तीति । हन + ट्रच् + ङीप् ।) वन्याकर्कोटकी । इति राजनिर्घण्टः ॥

नागाक्षः, पुं, (नाग एव आक्षो यस्य ।) नागकेशरः । इति त्रिकाण्डशेषः ॥

नागाक्षला, स्त्री, नागयष्टिः । इति जटाधरः ॥

नागाङ्गना, स्त्री, हस्तिनी । (नागस्येव अङ्गनं लक्षणवर्त्तनं यस्याः ।) नागयष्टिः । इति मेदिनी । ने, १८८ ॥

नागाधिपः, पुं, (नागानां अधिपः ।) अनन्तः । इति हेमचन्द्रः । ३ । ३०३ ॥

नागान्तकः, पुं, (नागानां अन्तको विनाशकः ।) गरुड़ः । इत्यमरः । १ । १ । ३१ ॥

नागारातिः, पुं, (नागानां अरातिः शत्रुः ।) वन्याकर्कोटकी । इति राजनिर्घण्टः ॥

नागालाबुः, स्त्री, (नाग इव अलाबुः ।) कुम्भतुम्बी । इति राजनिर्घण्टः ॥

नागाशनः, पुं, (अश्नातीति । अश + ल्युः । नागानां अशनो भक्षकः ।) गरुड़ः । इति हारावली ।१०॥

नागाह्वं, क्ली, (नागस्य आह्वा नाम आह्वा यस्य ।) हस्तिनागपुरम् । इति त्रिकाण्डशेषः ॥

नागाह्वा, स्त्री, (नागं नागकेशरं आह्वयते सङ्गच्छते इति । आ + ह्वे + अच् । टाप् ।) सह्यगाकन्दः । इति राजनिर्घण्टः ॥

नागी, स्त्री, (नागस्य स्त्री पत्नी । नाग + जानपदेति स्त्रीत्वार्थे ङीष् ।) नागपत्नी । इति सुग्धबोधम् ॥ (अस्याः दधिगुणा यथा,—
"बहु पाके बलासघ्नं वीर्य्योष्णं पक्तिनाशनम् ।
कषायानुरसं नाग्या दधि वर्च्चो विवर्द्धनम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

नागोदरं, क्ली, (नागवदुदरं यस्मात् । पृषोदरादित्वात् रलोपः ।) उदरत्राणम् । इति हेमचन्द्रः । ३ । ४३२ ॥

नागोदरं, क्ली, (नागवत् दृढदुदरं यस्मात् ।) उरस्त्राणम् । इति हारावली ।१६८॥ (गर्भिण्या गर्भोपद्रवविशेषः । यथा, सुश्रुते शारीरस्थाने । १० अध्याये ।
"शुक्रशोणितं वायुनाभिप्रपन्नमवक्रान्तजीवमाप्यायत्युदरं तत् कदाचित् यदृच्छया उपशान्तं नैगमेयापहृतमिति भाषन्ते । तमेव कदाचित् प्रलीयमानं नागोदरमित्याहुः । तत्रापि लीनवत् प्रतीकारः ॥")

नाचिकेतः, पुं, नचिकतसः । अग्निः । यथा,—
"स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो
प्रब्रूहि तं श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त
एतद्द्वितीयेन वृणे वरेण ॥
प्र ते ब्रवीमि तदु मे निबोध
स्वर्ग्यमग्निं नचिकेतः प्रजानन् ।
अनन्तलोकाप्तिमथो प्रतिष्ठां
विद्धि त्वमेनं निहितं गुहायाम् ॥
लोकादिमग्निं तमुवाच तस्मै
या इष्टका यावतीर्वा यथा वा ।
स चापि तत्प्रत्यवदद्यथोक्त-
मथास्य मृत्युः पुनराह तुष्टः ।
तमब्रवीत् प्रीयमाणो महात्मा
वरं तवेहाद्य ददामि भूयः ।
तवैव नाम्ना भवितायमग्निः
सृङ्कां चेमामनेकरूपां गृहाण ॥
त्रिभिर्त्रिकैस्त्वमभिरेत्य सन्धिं
त्रिकर्म्मकृत्तरति जन्ममृत्यू ।
ब्रह्मजज्ञं देवमीड्यं विदित्वा
निचाय्येमां शान्तिमत्यन्तमेति ॥
त्रिणाचिकेतस्त्रयमेतदिदित्वा
य एवं विद्वाँश्चिनुते नाचिकेतम् ।
स मृत्युपाशान् पुरतः प्रणोद्य
शोकातिगो मोदते स्वर्गलोके ॥"
इति कठोपनिषदि प्रथमा वल्ली । १२-१८ ॥
(ऋषिविशेषः । अस्य विवरणं यथा, महाभारते । १३ । ७६ । २—२१ ।
"अथाप्युदाहरन्तीममितिहासं पुरातनम् ।
ऋषेरुद्दालकेर्न्याय्यं नाचिकेतस्य शोभयोः ॥
ऋषिरुद्दालकिर्धीमानुपगम्य ततः सुतम् ।
तं मामुपचरस्वेति नाचिकेतमभाषत ॥
समाप्ते नियमे तस्मिन् महर्षिः पुत्रमब्रवीत् ।
उपस्कुर्य्याग्नयस्तस्य स्वाध्यायाभिरतस्य च ॥
इध्मा दर्भाः समनसः कलसञ्चातिभोजनम् ।
विस्मृतं मे तदादाय नदीतीरादिहाव्रज ॥
गत्वानवाप्य तत् सर्व्वं नदीवेगसमाप्लुतम् ।
न पश्यामि तदित्येव पितरं सोऽब्रवीन्मुनिः ॥
क्षुत्पिपासाश्रमाविष्ट ऋषिरुद्दालकिस्तदा ।
यमं पश्येति तं पुत्रमशपत स महातपाः ॥
तथा स पित्राभिहितो बाढमित्येव शताञ्जलिः ।
प्रसीदेति ब्रुवन्नेव गतसत्त्वोऽपतद्भुवि ॥
नाचिकेतं पिता दृष्ट्वा पतितं दुःखमूर्च्छितः ।
किं मया कृतमित्युक्त्वा निपपात महीतले ॥
तस्य दुःखपरीतस्य सं पुत्रमनुशोचतः ।
यतीतं तदहःशेषं सा रात्रिरगमत् परा ॥
पित्रेत्याशु प्रपातेन नाचिकेतः कुरूद्वह ।
प्राक्षुदच्छयने कौक्षे दृष्ट्वा शून्यमिवाद्भुतम् ॥
स पर्य्यपृच्छत्तं पुत्रं क्वायं पर्य्यागतं पुनः ।
दिष्ट्यैवं दृश्यसे पुत्र क्वायं स्वेन कर्म्मणा ।
दिष्ट्या चापि पुनः प्राप्तो नहि ते मानुषं
वपुः ॥
प्रत्यवदद्यथा सर्व्वस्य पित्रा दृष्टो महात्मना ।
स तां वार्त्तां पितुस्तथ्यं महर्षीणां न्यवेदयत् ॥
कुर्व्वन् भवच्छासनमास्थ यातो
ह्यहं विशालां रुचिरप्रभावाम् ।
वैवस्वतीं प्राप्य सभामपश्यं
सहस्रशो योजनहेमभासम् ॥
दृष्ट्वैव मामभिसुखमापतन्तं
देहीति स ह्यासनमादिदेश ।

वैवस्वतोऽर्घ्यादिभिरर्हणैश्च
भवत्सुते पूजयामास मां सः ।
ततस्त्वहं तं शुनकैरवोचं
दृतः सदस्यैरभिपूज्यमानः ।
प्राप्तोऽसि ते विषयं धर्मराज!
लोकानर्हंयानहं तान् विधत्स्व ।
यमोऽब्रवीन्मां न मतोऽसि सौम्य
यमं पश्येत्याह स त्वान्तपस्वी ।
पिता प्रदीप्ताग्निसमानतेजा
न तच्छक्यमनृत विपकर्त्तुम् ।
दृश्ये त्वहं प्रतिगच्छस्व तात
ब्रोचत्यसौ तव देहस्य कर्त्ता ।
ददानि किञ्चापि मनःप्रकीतं
प्रियातिथेरस्य कामान् दृशीष्व ।
तेनैवमुक्तस्समहं प्रत्यवोचं
प्राप्तोऽसि ते विषयं दुर्निवर्त्यम् ।
इच्छाम्यहं पुण्यकृतां सलोकान्
लोकान् द्रष्टुं यदि तेऽहं वराहः ।
यानं समारोप्य तु मां स देवो
वाहैर्युक्तं सुप्रभं भानुमत्तत् ।
सन्दर्शयामास ततस्सलोकान्
सर्वांस्तथा पुण्यकृतां दिवेन्द्र ! ।")

नाचिकेतुः, पुं, अग्निः । इति त्रिकाण्डशेषः ॥

नाटः, पुं, (नट + भावे घञ् ।) दृश्यम् । देशविशेषः । कर्णाटक इति ख्यातः । इति शब्दरत्नावली ॥ (तद्देशवासिनि, त्रि । यथा, राजतरङ्गिण्याम् । १ । ३०२ ।
"नाटश्च चोलकर्णाटगाटादींश्च नरेश्वरान् ॥")

नाटकं, क्ली, (नाटयतीति । नट + णिच् + ण्वुल् ।) गद्यपद्यप्राकृतभाषादिमयग्रन्थविशेषः । तत्पर्य्यायः । महारूपकम् २ । इति त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा,—
"नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।
विलासर्द्ध्यादिगुणवत् युक्तं नानाविभूतिभिः ॥
सुखदुःखसमुत्पत्तिनानारससमन्वितम् ।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवानायको मतः ॥
एक एव भवेदङ्गी अङ्गानि रस एव वा ।
अङ्गानि सर्वे रसाः सर्व्वे कार्य्यं निर्वहणेऽद्भुतम् ॥
चत्वारः पञ्च वा सुखाः कार्य्यावस्थापूर्वकाः ।
गोपुच्छाग्रसमाग्रन्तु वस्तु तस्य कीर्त्तितम् ॥"
इति तत्साहित्यदर्पणे । ६ । २७७ ।
अपि च ।
"नाटकं स्यात् प्रकरणं भाणोऽङ्कस्था डिमः ।
ईहामृगः प्रहसनं भाणः समरकारकः ॥
वीथीति भरतः प्राह नाट्यांशु दशरूपकम् ।
नाटिका त्रोटकञ्चैव गोष्ठी सट्टकं ग्राकटं तथा ।
गोष्ठीसंलापनाम्न्यानि भाणीहल्लीशरासकौ ।
उल्लाप्यकं श्रीगदितं प्रस्थानं नाट्यरासकम् ॥
दुर्म्मल्लिका लासिका च काव्यञ्चेत्युपरूपकम् ।
स्यात् सप्तदश संख्यानु लक्षणञ्चास्य कथ्यते ॥

प्रख्यातोत्तमनायकं रसमयं राजर्षिवंशोद्भवं
साङ्गं भङ्गिशतान्वितं नयमयं तत्तत्पुराद्याश्रयम् ।
भावैर्भावसुन्दरं प्रविलसन्नानाविलासं बलद्-
वृत्तिप्राप्तमुखादिसन्धिसहितं सप्ताङ्कवन्नाटकम् ॥"
अन्ये तु ।
"देवतानां मनुष्याणां राज्ञां लोके महात्मनाम् ।
पूर्व्ववृत्तानुचरितं प्रख्यातोदात्तनायकम् ॥
प्रवेशकविष्कम्भादिभिः सन्धिभिरन्वितम् ।
इतिहासकथोद्भूतं सुखदुःखोदयैर्युतम् ॥
षट्पञ्चदशसप्ताष्टनवाङ्कैरनुभूषितम् ।
नानाविलासललितैः सर्व्वसिद्धिभिरन्वितम् ॥
नानाभावरसैराढ्यं नाटकं सूरयो विदुः ।
किञ्चिदङ्गविहीनन्तु न ज्ञाप्यं नाटकं क्वचित् ॥
आरम्भश्च प्रयत्नश्च प्राप्तिः सम्भव एव च ।
नियता च फलप्राप्तिः फलयोगस्तथापरः ॥
इत्यवस्थापञ्चकं स्यात् नाटके कार्य्यवस्तुनः ।
संस्कृतं प्राकृतं भूतभाषाप्रश्रंशिका गिरः ।
नाटके नियताः प्रोक्ता एवा भाषा रसावहाः ॥
भाषाविभाषाभेदेन प्राकृतन्तु चतुर्दश ।
मागध्यावन्तिका प्राच्या शौरसेन्यर्द्धमागधी ।
बाल्हीका दाक्षिणात्याच्च भाषाः सप्त च प्राकृते ॥
शकाराभीरचाण्डालशबरद्रविडौड्रजाः ।
वनौकसौविचातीनां विभाषाः सप्त कीर्त्तिताः ॥
कैकेयी शौरसेनी च काञ्ची पाञ्चालमागधी ।
द्राविड्यौ पाण्डुदेशी च भूतभाषा प्रकीर्त्तिताः ॥
वैदर्भी मागधी नाटी काम्बोजी चोपनागरी ।
पाञ्चाली बर्ब्बरप्रभ्रंशभाषा स्युर्हीनभेदतः ॥
देवतादर्शनाप्तञ्च कर्त्तव्यं नाटकं बुधैः ।
राजर्षिदर्शनाप्तं या तेऽपि देवैः समा मताः ॥
उदाहरणम् । मुरारिकवेरनर्घराघवं भवभूति-
रुत्तररामचरितं कालिदासस्याभिज्ञानशकुन्तलञ्चेत्यादि । इति नाटकलक्षणम् ।" इति सङ्गीतदामोदरः ॥

नाटकः, पुं, (नट्यते दृश्यते देवयोनिभिरत्र । नट + घञ् । ततः स्वार्थे कन् । यद्वा, नाटयतीति नट + णिच् + ण्वुल् ।) कामाख्यास्थपर्व्वतभेदः । यथा,—
"ऐन्द्र्यां नाटके शैले शृङ्गरस्य महाश्रमम् ।
नित्यं वसति तत्रेशः शक्तिधीना तु पार्व्वती ॥"
इति कालिकापुराणम् ॥
(नाटकशब्दस्य । यथा, रामायणे । १ । ५ । १२ ।
"वधूनाटकसङ्घैश्च संयुक्तां सर्व्वतः पुरीम् ॥"
नटतीति । नट + ण्वुल् ।) नर्त्तके, त्रि । इति शब्दरत्नावली ॥

नाटाल्वः, पुं, तरुभेदः । तत्पर्य्यायः । चेलालः २ चित्रपत्रः ३ सुखाग्रः ४ राजतैमिषः ५ लतापत्रः ६ सेदुः ७ । इति त्रिकाण्डशेषः ॥

नाटारः, पुं (नट्या नटस्य वा अपत्यम् । "आरगुदीचाम् ।" ४ । १ । १३० । इति आरक् ।) नट्या अपत्यम् । इति सुग्धबोधव्याकरणम् ॥

नाटिका, स्त्री, (नाटक + टापि अत इत्वम् ।) नाटकविशेषः । यथा,—
"कैशिकीवृत्तिसंयुक्ता नारीपरिजनोज्ज्वला ।
चतुर्थसन्धिहीना च नाटिका नृपनायिका ॥
इयं शृङ्गारबहुला ततः स्यात् कैशिकीमयी ।
स्त्रीद्वीयं कैशिकीवृत्तिर्न स्यादन्यरसाश्रया ॥
न कुञ्जरकराघातमात्रं शुक्लीति कन्दली ।
साक्षां विटः पीठमर्द्दः सचयी वाद्यसञ्चयः ॥
अन्तःपुरचरो राज्ञ ईषद्विद्यो विदूषकः ।
अत्र भार्य्याजितो राजा निभृतः काममाचरेत् ॥
अन्तःपुरगतां कन्यां देवीगुप्तां नियासति ।
मन्त्रिणि न्यस्तराज्यस्तु सुखसंस्थापितः प्रभुः ॥
युवा भूमिपतिः प्रायो निभृतः काममाचरेत् ॥
कन्यामिह परिणयविधयां देवीगुप्तां मन्त्रिणीं
ज्ञानविरहेण ॥ एके तु ।
चतुर्भिरङ्कैरुपाद्यन्तिरभिर्नृपनायकम् ।
यत् कैशिकीरसप्रायं नाटकं सैव नाटिका ॥
पूर्व्वक्रमाभावाटकक्रमादत्रावली नाटिका ।
एवमन्यत्रेदोह्यः ।" इति सङ्गीतदामोदरः ॥
(अस्या लक्षणं यथा, साहित्यदर्पणे । ६।५३६ ।
"नाटिका कुलजवृत्ता स्यात् स्त्रीप्राया चतुररङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥
स्यादन्तःपुरसम्बन्धा सङ्गीतयाद्यतायवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा ॥
सम्पूर्व्वर्त्तत नेतास्यां देव्याख्यासेन गुम्फितः ।
देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ॥
पदे पदे मानवती तदग्रः सङ्गमो द्वयोः ।
वृत्तिः स्यात् कौशिकी सख्यविमर्शाः सन्धयः पुनः ॥")

नाटेयः, पुं, (नट्या अपत्यम् । नटी + ढक् ।) नटीसुतः । इति सुग्धबोधव्याकरणम् ॥

नाटेरः, पुं, (नट्या अपत्यमिति । नटी + ढक् ।) नटीसुतः । इति हेमचन्द्रः । ३ । २१२ ॥

नाट्यं, क्ली, (नटानां कार्य्यम् । नट + "छन्दोगौक्थिकयाज्ञिकबह्वृचनटात् ष्यञ् ।" ४ । ३ । १२६ । इति ष्यञ् ।) वृद्यगीतवाद्यम् । तत्पर्य्यायः । तौर्य्यत्रिकम् २ । इत्यमरः । १ । ७ । १० ॥
(यथा, देवीभागवते । १ । ७ । ३० ।
"नाट्यं तनोति सगुणा विविधप्रकारं
को वेत्ति कोऽपि तव लास्यविधानयोगम् ॥")
नटानां समूहः । इति शब्दरत्नावली ॥ नाट्याराम्भनक्षत्राणि यथा । अनुराधा १७ धनिष्ठा २३ पुष्यः ८ हस्ता १३ चित्रा १४ स्वाती १५ ज्येष्ठा १८ शतभिषा २४ रेवती २७ । इति ज्योतिषम् । ❀ । नाट्यफलं यथा,—
"देवर्षिचरितपालपूर्व्वचरितान्यालोक्य धर्म्मोदय-
स्तत्तत्स्थानाश्रितभूमिकाभिनयने स्यादर्थसिद्धिः परा ।
संगीतायुतचित्तवृत्तिभरजा यज्ञा भवन्त्यङ्गना
ज्ञान शृङ्गरसेवयेति कथितं नाट्यं चतुर्व्वर्ग-
दम् ॥
यो यस्य दयितो भावः स तं नाट्ये निरीक्षते ।
अतः सर्व्वमनोहारि नाट्यं कस्य न रञ्जकम् ॥"

नाट्योत्पत्तिर्यथा,—
"इहानुश्रूयते ब्रह्मा प्रकृष्टैरभ्यर्थितः पुरा।
चकारोद्धृत्य वेदेभ्यो नाट्यवेदन्तु पञ्चमम्॥
उपवेदोऽथ वेदाश्च चत्वारः कथिता स्मृतौ।
तत्रोपवेदो गान्धर्व्वः शिवेनोक्तः स्वयम्भुवे॥
तेनापि भरतायोक्तस्तेन मर्त्ये प्रचारितः।
शिवाज्ञयोनिभरतात्तस्मादस्य प्रयोजकाः॥"
इति सङ्गीतदामोदरः॥

नाट्यधर्म्मिका, स्त्री, (नाट्यधर्म्मोऽस्यस्याः क्रियाया इति ठन्।) दृश्यं नार्य्यश्राव्योक्तनाट्यम्। यथा, हेमचन्द्रः।
"गीतवाद्यवृत्तत्रयं नाट्यं तौर्य्यत्रिकञ्च तत्।
संगीतं प्रेक्षणार्थोऽस्मिन् श्राव्योक्ते नाट्यधर्म्मिका॥"

नाट्यप्रियः, पुं, (नाट्यं प्रियं यस्य।) शिवः। इति हेमचन्द्रः। २। ११२॥

नाट्यशाला, स्त्री, (नाट्यस्य वृत्यगीतादेः शाला गृहम्।) प्रासाददारसमीपगृहम्। नाटमन्दिर इति भाषा। यथा,—
"नाट्यशाला च कर्त्तव्या द्वारदेशसमाश्रया॥"
इति गरुड़पुराणम्॥

नाट्यालङ्कारः, पुं, (नाट्यस्य अलङ्कारः।) नाट्यभूषणहेतुः। स तु अष्टषष्टिप्रकारः। यथा,—
"सिद्धिर्लक्षणदोषाभावो निरुक्तिश्च विशेषणम्।
गुणाभिपात उद्दिष्टविचारप्राप्तिनीतयः॥
अभिप्रायः परीहारो गर्हणानुनयौ तथा।
अर्थापत्तिः प्रसिद्धिश्च दाक्षिण्यं प्रियभाषणम्॥
अभिमानाख्यानगर्व्वा हर्षबोधोद्यमाश्रयाः।
पश्चात्तापः सृहाक्रन्दौ कपटश्च प्रवर्त्तनम्॥
उत्तेजनश्च दृष्टान्तः स्रोभोदाहरणे अपि।
संग्रहोऽथरसंघातो विमर्शोक्तिः पदोच्चयः॥
परीवादोऽथुक्तसिद्धिरथमाध्यवसायकौ।
प्रीतुसाहनं तुल्यतर्कौ उपपत्त्यनुतर्कौ॥
निवेदनञ्च साहाय्यं याच्ञा पृच्छा विशोधनम्।
अभिज्ञानञ्च स्वारूप्यं गुणकीर्त्तनसंस्तवः॥
विपर्य्ययश्चातिग्रयो भूयोहेतुनिदर्शनम्।
मालाक्षेपश्च संक्षेपसमीहाशीर्विषर्षकाः॥
उल्लेख उपदिष्टौ चैतत्षष्टिमिता अमी।
अलङ्कारा मता नित्यं नाटकादिषु सूरिभिः॥"
इति सङ्गीतदामोदरः॥
(साहित्यदर्पणमते चयस्त्रिंशत् नाट्यालङ्काराः। यथा, तत्रैव। ६। २००—२३२।
"आक्रीराक्रन्दकपटाक्षमागर्वोद्यमाश्रयाः।
उत्प्रासनं सृहाक्रोधप्रज्ञाप्तापोपपत्तयः॥
आग्रहःसाध्यवसायौ च विमर्शोक्षेपसङ्गतौ।
उत्तेजनं परीवादो नीतिरर्थविशेषणम्॥
प्रीतुसाहनञ्च साहाय्यमभिमानोऽनुवर्त्तनम्।
उत्कीर्त्तनं तथा याच्ञा परीहारो निवेदनम्॥
प्रवर्त्तनाख्यानयुक्तिप्रहर्षाक्षोपदेशनम्।
इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः॥
आक्रीरिष्टजनाग्रहसाक्रन्दः प्रलपितं शुचा।
कपटं मायया यत्र रूपमन्यद्विभाव्यते॥
अक्षमा सा परिभवः खल्वोऽपि नाभिसह्यते।
गर्वोऽवज्ञेपनं वाक्यं कार्य्यसारम्भ उद्यमः॥
यद्दृश्यं गुरुवत्कार्य्यहेतोराश्रय उच्यते।
उत्प्रासनन्नूपहासो योऽसाधौ साधुमानिनि॥
आकाङ्क्षा रमणीयत्वादस्तुनो या सृहा तु सा।
अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु॥
मोहावधीरितार्थस्य पश्चात्तापः स एव तु।
उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये॥
आग्रहसनं स्यादाग्रंसा प्रतिज्ञाध्यवसायकः।
विसर्पो यत्नमारब्धं कर्म्मानिष्टफलप्रदम्॥
कार्य्यग्रहणसङ्क्लेश उत्तेजनमितीर्य्यते।
स्वकार्य्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक्॥
भर्त्सना तु परीवादो नीतिः शास्त्रेण वर्त्तनम्॥
उक्तस्यार्थस्य यत्तु स्यादुत्कीर्त्तनमनेकधा।
उपालम्भस्वरूपेण तत् स्यादर्थविशेषणम्॥
प्रीतुसाहनं स्यादुत्साहगिरा कस्यापि योजनम्।
साहाय्यं सङ्कटे यत् स्यात् साशुकूल्यं परस्य च॥
अभिमानः स एव स्यात् प्रश्रयादनुवर्त्तनम्।
अनुवृत्तिर्भूतकार्य्याख्यानमुत्कीर्त्तनं मतम्॥
याच्ञा तु कापि याच्ञायाः स्वयं दूतसुखेन वा।
परीहार इति प्रोक्तः कृतानुचितमार्ज्जनम्॥
अवधीरितकर्त्तव्यकथनन्तु निवेदनम्।
प्रवर्त्तनन्तु कार्य्यस्य यत् स्यात् साधुप्रवर्त्तनम्॥
आख्यानं पूर्ब्बवृत्तोक्तिः युक्तिरर्थावधारणम्।
प्रहर्षः प्रमदाधिक्यं श्लिष्टा स्यादुपदेशनम्॥"
एतेषामुदाहरणन्तु तत्रैव द्रष्टव्यम्॥)

नाट्योक्तिः, स्त्री, (नाट्ये वृत्यगीतादौ या उक्तिः।) नाटकविषयकवचः। नटानां कर्म्म नाट्यं तदुक्तिः नाट्योक्तिः। इति भरतः॥ तद्यथा। आर्य्येति ब्राह्मणम्। क्षत्रियं महाराजेति। सखीं हलेति। नीचं हञ्जे इति। चेटीं हञ्जे इति। स्वामिनमार्य्यपुत्रेति। राजश्यालं राज्ञिश्येति। समानं हंहो इति। राजानं देवेति। सार्व्वभौमं भट्टेति। भगिनीपतिमायुष्मतीति सम्बोधयेत्। इति सङ्गीतदामोदरः॥ गणिकायां अच्चुका। विदूषि भावः। जनके आवुकः। कुमारे युवराजभर्त्तृदारकौ। राज्ञि देवभट्टारकौ। राजसुतायां भर्त्तृदारिका। क्षत्राभिषेकायां राज्ञ्यां देवी। इतरासु राज्ञीषु भट्टिनी। अवध्योक्तौ अय्यहरूयम्। मातरि अम्बा। बालायां वाल्लः। आर्य्ये मारिषः। ज्येष्ठाभगिन्यां अन्तिका। निष्ठायां निर्ब्बहणम्। इत्यमरः। १।७।१९—१५॥ (यथाच साहित्यदर्पणे। ६। १५४—१६०।
"अश्राव्यं खलु यद्दृश्यं तदिह खगतं मतम्।
सर्व्वश्राव्यं प्रकाश्यं स्यात्तद्भवेदपवारितम्॥
रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते।
त्रिपताकाकरेणान्यानपवार्य्यान्तरा कथाम्॥
अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्।
किं ब्रवीषीति यत् नाट्ये विना पात्रं प्रयुज्यते॥
श्रुत्वैवाशुक्तमप्यर्थं तत् स्यादाकाशभाषितम्॥
दत्ता सिद्धाश्च सेनाश्च वेश्यानां नाम दर्शयेत्।
दत्तप्रायाश्च बलिना चेटचेट्योस्तथा पुनः॥
वसन्तादिषु वर्ण्यस्य वस्तुनो नाम यद्भवेत्॥
नाम कार्य्ये नाटकस्य गर्भितार्थप्रकाशकम्
नायिकानायकाख्यानां संज्ञाप्रकरणादिषु॥
नाटिकासट्टकादीनां नायिकाभिर्विशेषणम्।
प्रायेण दृश्यकः साधुर्गमैः स्थाने प्रयुज्यते॥
राजा स्वामीति देवेति भर्त्तेति चाधमैः।
राजर्षिभिर्वयस्येति तथा विदूषकेण च॥
राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च।
स्वेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः॥
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः।
वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम्॥
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः।
सूत्रधारो मारिषेति हञ्जे इत्यधमैः समाः॥
वयस्येत्युत्तमैर्हंहो मध्यैरार्य्येति चायजः।
भगवन्निति वक्तव्याः सर्व्वैर्देवर्षिलिङ्गिनः॥
वदेद्राज्ञीश्च चेटीश्च भवतीति विदूषकः।
आयुष्मन्नृषिणं स्तो इङ्ग तातेति चेतरैः॥
वत्स पुत्रक तातेति नाम्ना गोत्रेण वा सुतः।
शिष्योऽनुजश्च वक्तव्योऽमात्य आर्य्येति चाधमैः॥
विप्रैरयममात्येति सचिवेति च भण्यते।
साधो इति तपस्वी च प्रशान्तश्चोच्यते बुधैः॥
अगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते।
उपाध्यायेति चाचार्य्यो महाराजेति भूपतिः॥
स्वामीति युवराजस्तु कुमारो भर्त्तृदारकः।
सौम्य भद्रमुखेत्येवमधमैस्तु कुमारकः॥
वाच्या प्रकृतिभी राज्ञः कुमारी भर्त्तृदारिका॥
पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैस्त्रियः।
हलेति सख्यौ प्रेष्या हञ्जे वेश्याऽञ्जिका तथा॥
कुट्टिन्यम्बेत्यनुगतैः पूज्या च भरतीजनैः।
आमन्त्रणेषु पापण्डा वाच्याः स्वसमयागतैः॥
शुकादयश्च सम्भाव्या भद्रदत्तादिनामभिः।
यस्य यत् कर्म्म शिल्पं वा विद्या वा जातिरेव वा॥
तेनैव नाम्ना वाच्योऽसौ श्रेयाञ्चान्ये यथोचितम्॥")

नाड़िः, स्त्री, (नाड़यतीति। नड़ भंशे + क्विप् + इन्।) नाड़ी। इत्यमरटीकायां भरतः॥

नाड़िकं, क्ली, (नाड़िरिव प्रतिज्ञातिः। नाड़ि + "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) कालशाकम्। इति भावप्रकाशः॥

नाड़िका, स्त्री, (नाड़ी एव। स्वार्थे कन्।) घटीशब्दः। घड़ि इति भाषा। तत्पर्य्यायः। साधारिका २ घटिका १। इति हेमचन्द्रः। २।५२॥
घटिकाज्ञानोपायो यथा,—
"निमेषो मानुषो योऽयं मात्रामात्रप्रमाणकः।
तैः पञ्चदशभिः काष्ठा त्रिंशत् काष्ठास्तथा कला॥
नाड़िका तु प्रमाणेन कला दश च पञ्च च।
उन्मानेनाम्भसः सा तु पलान्यर्द्धचतुर्दश॥
हैममाषैः कृतच्छिद्रा चतुर्भिश्चतुरङ्गुलैः।
मागधेन प्रमाणेन यच्चप्रस्थस्तु संस्कृतः॥"
इति विष्णुपुराणम्॥

"नैमित्तिकलयं प्रपञ्चयिष्यन्निमेषादिक्रमेण प्रथमा-
प्रोक्तमेव कल्पप्रमाणमनुस्मारयति निमेष इति
सप्तभिः। मात्रैव मात्रं प्रमाणं यस्य। एक-
मात्रलघ्वक्षरोच्चारणकालसंमितो हि निमेषः।
निमेषकालतुल्या हि मात्रा लघ्वक्षरच यदिति
ब्रह्माण्डोक्तेः। नाड़िकाज्ञानोपायमाह।
उन्मानेनेति सार्द्धेन। अम्भस उन्मानेन उन्मी-
यते अनेनेत्युन्मानं पात्रम्। अर्द्धेन योगे त्रयो-
दशसार्द्धादशेत्यर्थः। उन्मानरूपेण घटितानि
सार्द्धद्वादशपलानि सा नाड़िका। सार्द्धदादश-
पलताम्रनिर्म्मितपात्रेण सा नाड़िका ज्ञातव्ये-
त्यर्थः। किं प्रमाणं तत् पात्रं कार्य्यं तदाह
मागधेन प्रमाणेन जलप्रस्थस्तु संस्कृत इति।
सार्द्धद्वादशपलजलेन हि मागधदेशप्रस्थः पूर्य्यते।
तत्प्रमाणं पात्रं कार्य्यमित्यर्थात् सिद्धम्। नन्
तथापि पात्रेण कथं नाड़िकाज्ञानं क्रियापरि-
च्छेद्यत्वात् कालस्येत्याशङ्क्य क्रियासिद्धये॥
प्रस्थादि विग्रहस्तु हेमेति। माषः पञ्चगुञ्जः।
हेम्नो माषेश्चतुर्भिश्चतुरङ्गुलेन शलाकारूपेण
रचितैः छतच्छिद्रा। एतदुक्तं भवति सार्द्ध-
द्वादशपलताम्रमयं मागधप्रस्थसंमितमर्द्धायतं
पात्रं चतुर्म्माषचतुरङ्गुलहेमशलाकया कृताध-
च्छिद्रं जले स्थापितं तेन छिद्रेण यावता कालेन
पूर्य्यते तावान् कालो नाड़िकेति। तथा च शुक्रः।
द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः।
स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतमिति॥")
इति तट्टीकायां श्रीधरस्वामी। (यथा, सूर्य्य-
सिद्धान्ते। १। १९।
"षड्भिः प्राणैर्विनाड़ी स्यात् तत् षष्ट्या नाड़िका
स्मृता॥"
"षड्भिरिति। षट्प्रमाणैरसुभिः प्राणीयपर्यं
भवति पलानां षष्ट्या घटिकोक्ता कालतत्त्वज्ञैः॥"
इति तट्टीका॥)
नाड़िकेलः, क्ली. (नारिकेलः। रस्य लत्वम्।)
नारिकेलः। इत्यमरटीकायां भरतः॥
नाड़िचीरं, क्ली, (नाड़िरिव चीरं यत्र।) निर्व्वे-
ष्टनम्। इति हारावली। २१४॥ नली इति
भाषा॥
नाड़िन्धमः, पुं, (नाड़ीं धमनीं धमतीति। धा
ग्रन्थाग्निसंयोगयोः+"नाड़ीसुरङ्गेभ्यः।" ३।
२। ३०। इति खप्। "पाघ्राधास्थेति।" ७।
३। ७८। इति धमादेशः। "खिद्यतयस्य।"
६। ३। ६६। इति पूर्व्वपदस्य ह्रस्वः।) स्वर्ण-
कारः। इत्यमरः। २। १०। ८॥ (उच्चनीचा-
धिरोहणात् सुदुर्मुहुर्निश्वासेनाड़ीं धमति उप-
तापयतीति। श्वासकारके, त्रि। यथा, भट्टिः।
६। ६४।
"सत्वमेवयसिंहाद्यान् क्षणव्ययसमत्विषौ।
कथं नाड़िन्धमान् मार्गागतो विषमो-
पलान्॥")
नाड़िन्धयः, त्रि, (नाड़ीं धयतीति। धेट पाने+
"नाड़ीसुरङ्गेभ्यः।" ३। २। ३०। इति खप्।
"खिद्यतयस्य।" ६। ३। ६६। इति ह्रस्वः।)
नाड़ीपानकर्त्ता। इति सुग्धबोधव्याकरणम्॥
नाड़िपत्रं, क्ली, (नाड़िरिव पत्रं यस्य।) नाड़ी-
पत्रम्। इति शब्दमाला॥
नाड़ी, स्त्री. (नाड़ि+"ङ्यादिकारादक्तिनः।"
इति वा ङीष्।) नालम्। प्रणालम्। (नाली
वा इति भाषा। यथा, सुश्रुते निदानस्थाने १०
अध्याये।
"तस्यातिमात्रगमनाद्गतिरित्यत्र च
नाड़ीव यदृजुरिति तेन मता तु नाड़ी॥"
दन्तमूलगता नाड्यो यथा, तत्रैव १६ अध्याये।
"नासानाड्यौ कपालस्तो विज्ञेयः सोऽधिमांसकः।
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः॥")
शिरा। गरुडपुराणं। कुहनचर्य्या। षट्त्रिंश-
त्कालः। इति मेदिनी। डे, १६॥ शिरार्थे
पर्य्यायः। धमनिः २ सिरा ३। इत्यमरः। २।
६। ६५॥ नाड़िः ४ नालिः ५ नाली ६ धमनी
७ शिरा ८। इति भरतः॥ धरणी ९ धरा १०
तनुजा ११ जीवितप्रिया १२ सिंहा १३। इति
राजनिर्घण्टः॥ *॥ कायनाड़ी त्रिविधा।
एका वायुवहा। अपरा सूत्रविड्शिरस-
वाहिनी। अपरा आहारवाहिनी। इति
भरतः॥ "सा तु गर्भस्थबालस्य सप्तभिर्मासैर्-
भवति।" इति सुश्रुतः॥ (यथा, तोड़लतन्त्रे
८ उल्लासे।
श्रीदेव्युवाच।
"सार्द्धत्रिकोटिनाड़ीनामालयश्च कलेवरम्।
क्रमेण श्रोतुमिच्छामि तद्दक्ष मयि प्रभो!॥
श्रीशिव उवाच।
जोन्धि कूपे सपादार्द्धकोटयश्चैव सुन्दरि!।
हस्तास्थि च तथा पादेऽखिलाश्च नाड़यः स्थिताः॥
उदरे च तथा पार्श्वे पञ्चसप्ताः प्रकीर्त्तिताः।
हृदादिसर्व्वगात्रेषु नवलक्षाः प्रकीर्त्तिताः॥
अथ पार्श्वे तथा चर्म्मे तथैव सर्व्वसन्धिषु।
ऊनाब्भूनं स्थितं लक्षं शरीरे नाड़यः प्रिये!॥
इड़ा च पिङ्गला चैव सुषुम्ना चित्रिणी तथा।
ब्रह्मनाड़ी च यन्मध्ये पञ्च नाड्यः प्रकीर्त्तिताः॥
कुहूश्च शङ्खिनी चैव गान्धारी हस्तिजिह्विका।
पूषा च पयस्विनी चैव शङ्खिनी तथा॥
अलम्बुषा च विश्वोदरी यशस्विनी तथा।
दशैताः प्रधानाः स्युः प्राणिनां देहधारिणाम्॥
एतासु दशनाड़ीषु दशवायुः प्रवर्त्तते।
प्राणोऽपानः समानश्च उदानो व्यान एव च॥
नागः कूर्म्मः कृकरश्च देवदत्तो धनञ्जयः।
दशवायुः स्थितो देहे प्राणादिरूपभेदतः॥
प्राणो वहति नासाग्रे हृदयं पायुमण्डलम्।
अपानो गुदमेढ्रान्तं समानो नाभिमण्डलम्॥
उदानः कण्ठदेशे च व्यानः सर्व्वशरीरगः।
नागो वहति वै वायुरूर्द्ध्वं चोद्गारकर्म्मणि॥
कूर्म्मो विलासकर्म्मा च कृकरः क्षुत्करो मतः।
देवदत्तो विजृम्भाख्यो धनञ्जयो न मुञ्चति॥
मृतमप्युदरे कृत्वा सर्व्वकर्म्मविनाशनः।
एते दशविधा वायुः प्रधानाः परिकीर्त्तिताः॥
प्राणाद्याः पञ्चवायवः।
प्राणो वहति नासाग्रे हृदयं पायुमण्डलम्।
अपानो गुदमेढ्रान्तं समानो नाभिमण्डलम्॥
उदानः कण्ठदेशे च व्यानः सर्व्वशरीरगः।
नागादयः पञ्चवायव

निषिद्धकालमाह ।
सद्यः स्नातस्य सुक्तस्य क्षुत्तृष्णातपसेविनः ।
व्यायामाक्रान्तदेहस्य सम्यङ्नाड़ी न बुध्यते ॥
तैलाभ्यङ्गे च सुप्ते च तथा च भोजनान्तरे ।
तथा न ज्ञायते नाड़ी यथा दुर्गतरा नदी ॥
सुप्ते निशाकाले भोजनान्तरे भोजनमध्ये भोजनावसानमात्रे च । वातमूर्च्छादिसन्निकरोगे नायं विधिः ॥ * ॥

अथ वातादिस्वभावक्रममाह ।
आदौ च वहते वातो मध्ये पित्तं तथैव च ।
अन्ते च वहते श्लेष्मा नाड़िकात्रयलक्षणम् ॥
आदाविति कपोलिपीड़ितहितीयत्रये । न तु तर्ज्जनीनिवेशस्थले स्थानभेदस्य कुत्राप्यवक्ष्यमाणत्वात् ॥ * ॥

सुस्थताज्ञानार्थमाह ।
भूलतागमनप्राया स्वच्छा स्वास्थ्यमयी शिरा ।
प्रायेति बाहुल्येन । स्वच्छा परितो बाह्यरहिता । स्वास्थ्यमयी सुस्थतायञ्जिका च । तथा ।
प्रातः श्लिग्धमयी नाड़ी मध्याह्ने चोष्णतान्विता ।
सायाह्ने धावमाना च चिरान्नीरविवर्जिता ॥
चिरादिति अतीतानागतयोर्द्वयोरप्युक्तिः पथ्याशितानामेव ॥ * ॥

वातादीनां क्रमेण गतिमाह ।
वाताङ्कगता नाड़ी चपला पित्तवाहिनी ।
स्थिरा श्लेष्मवती ज्ञेया मिश्रिते मिश्रिता भवेत् ॥
वक्रेति वायोस्तिर्य्यग्गमनात्तिरो वहन्तीति । एवं तत्प्रकोपादिना वार्त्तादिगतिरपि ज्ञातव्या । चपलेति वह्नेरहर्व्वल्लनादूर्द्ध्वचपला । स्थिरेति जलस्य नीचगमनादधोवाहा । मिश्रिते मिश्रचिह्ना भवति । तेन द्विदोषजे उभयचिह्ना । सर्व्वजे सर्व्वचिह्नेति । चपलता स्थिरतयोः समयभेदेनाविरोधः ॥ * ॥

उक्तवक्रादिसामान्यस्य क्रमेण विशेषमाह ।
सर्पजलौकादिगतिं वदन्ति विबुधाः प्रभञ्जनेन नाड़ीम् ।
पित्ते च काकलावकमेकादिगतिं विदुः सुधियः ॥
राजहंसमयूराणां पारावतकपोतयोः ।
कुक्कुटादिगतिं धत्ते धमनी कफसंवृता ॥
आदिना वाते वृश्चिकगतिर्दोलायिता । आदिग्रहणेन पित्ते कलिङ्गकलविङ्कादिगतिः । कफे गजवराङ्गनादिगतिः ॥ * ॥

द्वन्द्वस्यापि क्रमेणैव भेदानाह ।
सहुः सर्पगतिं नाड़ीं सहुर्भेकगतिं तथा ।
वातपित्तद्वयोद्भूतां प्रवदन्ति विचक्षणाः ॥
भुजगादिगतिश्चैव राजहंसगतिं धराम् ।
वातश्लेष्मसमुद्भूतां भाषन्ते तद्विदो जनाः ॥
मण्डूकादिगतिं नाड़ीं मयूरादिगतिं तथा ।
पित्तश्लेष्मसमुद्भूतां प्रवदन्ति महाधियः ॥
त्रिदोषजामप्याह ।
उरगादिजावकादिहंसादीनाञ्च बिभ्रती गमनम् ।
वातादीनाञ्च समं धमनीसम्बन्धमाधत्ते ॥
समसमिति न्यूनाधिकतानिरासः ॥ क्रमगत्या तु नासाध्यत्वम् । तथा,—
लावतित्तिरिवार्त्ताकगमनं सन्निपातजः ।
कदाचिन्मन्दगा नाड़ी कदाचिच्छीघ्रगा भवेत् ॥
त्रिदोषप्रभवे रोगे विज्ञेया हि भिषग्वरैः ।
पित्तक्रमतया क्षुद्रसाध्यत्वमसाध्यत्वञ्च ॥ * ॥

सामान्यतः सुखसाध्यत्वमाह ।
यदायं धातुमाप्नोति तदा नाड़ी तथा गतिः ।
तथाहि सुखसाध्यत्वं नाड़ीज्ञानेन बुध्यते ॥
अयमर्थः । अपराह्णादौ नाड़ी वातोल्बणा प्रथमं वातगत्यैव वहति ततो यथायथं पित्तादिगत्या न तु पित्तोल्बणत्वे वातादिगत्या तदा सुखसाध्यत्वं व्यतिरेकेण व्यतिरेकः । तदुक्तमन्यैः ।

नाड़ी यथाकालगतिस्त्रयाणां
प्रकोपशान्त्यादिभिरेव भूयः ॥ * ॥

तथासाध्यरूपमाह ।
मन्दं मन्दं शिथिलशिथिलं व्याकुलं व्याकुलं वा
स्खित्वा स्खित्वा वहति धमनी याति नाशञ्च
सद्मा ।
गत्वं स्थानात् स्खलति पुनरप्यङ्गुलिं संपृणेद्वा
भावैरेवं बहुविधविधैः सन्निपातादसाध्या ॥
मन्दं मन्दं सुदुरनुद्भटं अप्रखरमिति यावत् । शिथिलेति स्खलद्गतिरूपम् । व्याकुलेति त्रस्तवदितस्ततः । वाशब्दः समुच्चये । स्खित्वा स्खित्वेत्यादृत्या च तद्वदेव गतिः । नाशमदर्शनम् । गच्छति कदाचिन्नाड़ीस्पन्दोऽपि न सम्भाव्यते इत्यर्थः । सद्मेति यदि लभ्यते तदा तथैवानित्यं प्रायः स्थानमङ्गुष्ठमूलं तस्मात् स्खलति कदापि तत्र न स्पन्दत इत्यर्थः । तदुक्तम् । इन्ति च स्थानविच्युतेति किञ्चित् स्फुरती कुत्रापि । पुनरपीति कियद्विलम्बेन अङ्गुलीमङ्गुलीमूलमेवमित्यवंरूपैर्बहुभिर्भावैर्धर्म्मैः । उक्तञ्चान्यत्र ।
महातापेऽपि शीतत्वं शीतत्वे तापिता शिरा ।
नानाविधगतिर्यस्य तस्य ऋत्वर्णं संक्षयः ॥
महेत्यादि अत्यन्तरूढपित्तादिजततापनिरासः शीतत्व इत्यत्रापि महेति सम्बध्यते । तथा,—
त्रिदोषे स्पन्दते नाड़ी ऋत्वृकालेऽपि निश्चला ।
निश्चला स्पन्दसामान्याभाववती । अतीसारादौ हस्तपादादिखेदादिना स्पन्दोपलम्भात् । तथा ।
पूर्व्वं पित्तगतिं प्रभञ्जनगतिं श्लेष्माद्यमाविभ्रतीं
सन्तानभ्रमणं सुदुर्विदधतीं चक्राधिरूढामिव ।
तीव्रत्वं दधतीं कदापि गतिकां क्षुद्रत्वमात-
न्वतीं
नोऽसाध्यां धमनीं वदन्ति सुधियो नाड़ीगतिज्ञानिनः ॥
अयमर्थः । पूर्व्वमिति क्रमविपर्य्यये पित्तादिगतिमतीं वारं वारमेवं क्रमेण चक्रोपरिभ्राम्यमाणामिव । तथा तीव्रत्वमतिशयवेगं एवञ्च कदाचिन्मयूरवद्गमनाम् । तथोत्तरोत्तरं क्षुद्रतामापादयन्तीति विशिष्टो हेतुः । तथा चान्यत्र ।
"वातोल्बणा च शिरात्वङ्मा या चेयं मांसवाहिनी ।
या च क्षुद्मा च वक्रा च तामसाध्यां विदुर्बुधाः ॥
अत्युल्बणा सहजतोऽप्युल्बणतरा पृथग्विरोधिता वा कदाचिदिति शिरा प्रणिधानेनैव गम्यमानस्पन्दा च । मांसवाहिनी मांसाहार इव गतिमती लगुड़प्रायेति । तदुक्तं मांसेन लगुड़ाकृतिः । मांसेन समं वहतीति न युक्तं तद्रूपपरिज्ञापकप्रकारस्यानुक्तत्वात् । इयमपि विशिष्टबोधनाय । या च क्षुद्मा च वक्रा चेति पृथगिव वाक्यान्तरमिति ॥ * ॥

असाध्यत्वापवादमाह ।
भारप्रवाहमूर्च्छाभयशोकप्रसुप्तकारणान्नाड़ी ।
संमूर्च्छितापि गाढ़ं पुनरपि सा जीवितं धत्ते ॥
चिरतरवहुलभारोद्वहनेन वा विषवेगधारावाहिरुधिरदर्शनादिजनितमूर्च्छया वा राज्ञसादिसन्दर्शनादिभयेन वा पुत्रादिविरहजनितशोकातिरेकेण वा संमूर्च्छितापि अतिनिस्पन्दापि । गाढ़मिति सुतरां कार्य्यादियोगेऽपीत्यर्थः । पुनरिति साध्यतां यातीत्यर्थः । भावानां रत्यादीनां प्रवाह इति न युक्तं भयशोकयोः पृथग्विधानात् । प्रसुप्तेत्यनेन हेत्वन्तराभिधानम् । तदुक्तम् ।
पतितः सन्धितो भेदी नष्टशुक्रश्च यो नरः ।
म्रियते विषयस्तस्य न किञ्चिन्मृत्युकारणम् ॥
पतितः उच्चादितः सन्धितः अस्थ्यादिसन्धानेन संहितः भेदी अतीसारवान् नष्टशुक्रो यक्ष्मादिनातिरमणेन वा शुक्रक्षयवान् । विषयोऽसाध्यत्वानुमानं म्रियति नावतरति । कारणं प्राग्युक्तं तत्तदेव । अन्यत्रापि ।
तथा भूताभिषङ्गेऽपि त्रिदोषदुष्पक्षिता ।
समाङ्गा वहते नाड़ी तथा च न क्रमं गता ॥
अपगतक्षुद्र रोगाङ्गा नाड़ी तत्सन्निपातवत् ।
भूताभिषङ्गे तथा भूतसामान्याभिषङ्गे च देवासुराद्दी नाड़ी सन्निपातधर्म्मेणान्विनी उपस्थिता । आपाततः एव भवति न तु तत्फलप्रदा । भेदमाह । समेति वातपित्तकफस्वभावक्रमवती तथाक्रमं अतिक्रमं न गता । तस्मादेव अपगतक्षुद्रः अपगतो ऋत्वर्थस्या सा तथा । परमार्थतः सन्निपातवदपि सन्निपातजन्या न स्यात् इति । तदुक्तम् ।
स्वस्थानहीने श्लोके च हिमाक्रान्ते च निर्गदाः ।
भवन्ति निश्चला नाड्यो न किञ्चित्तत्र दूषणमिति ॥
स्वस्थानहीन उच्चादितः पतने । अङ्गुष्ठमूलतश्चरण इति तुल्यार्थः । निर्गदा ऋत्यसङ्गतिः निर्गदा अपि निश्चला भवन्ति । दूषणमसाध्यत्वभ्रमः । अन्यै लाङ्गुः ।
श्लोकं वातकफं दुष्टं पित्तं वहति दारुणम् ।
पित्तस्थानं विजानीयात् भेषजं तस्य कारयेदिति ॥
अयमर्थः । वातकफाभ्यां नाड़ी किञ्चिद्वहति दुष्टं स्त्रीत्वाधिक्याभ्यामपि विशेषादुक्तम्

पित्तं विषमवेगेन वहति तदा तत्प्रतिकारार्थं भेषजं कुर्यात्। असाध्यता न स्यादिति यावत्। अत्र कश्चित्।

स्वस्थानच्यवनं यावद्वह्मन्या नोपजायते।
तावच्चिकित्सासम्बन्धेऽपि नासाध्यत्वमिति स्थितिरिति।

तच्च प्रायिकं बहुधा व्यभिचारदर्शनात्। क्वचित्तु स्थानविच्युतेऽपि चकारस्यायोगव्यवच्छेदकत्वमित्यर्थः॥ * ॥ प्रसङ्गात् कालनिर्णयमाह।

भूलताभुजगाकारा नाड़ी देहस्य संक्रमात्।
विंशोर्ध्वा चीयतां याति मासान्ते मरणं भवेत्॥

कदाचित् मण्डूकवत् लङ्घा तन्तुवद्वहति। मण्डूकवक्रगमना च। कदाचित् सर्पवत् परिपुष्टा तन्तुवद्बलवत्तरवक्रगमना च इति वैद्यिरेतेन सुखदग्राह्यो भेदः। इत्यत्र कदाचिदलक्षतामतिलङ्घतां च यदा गच्छति। देहोऽतिदेहक्रममपेक्ष्य तेन देहोऽपि यदा स्थूलः स्रोथादिना कदाचिच्च लग्नः स्यात् तदा द्वितीये मासि म्रियत इति। तथा,—

चलाच्चलति वेगेन शान्ततां लभते चलात्।
सन्नाड्यान्मरणं तस्य यद्यङ्गे शोथवर्जितः॥

चलादिति हतं हतं न तु कदाचिदिति। शान्ततामनुपलभ्यमानत्वम्। शोथेति तन्मात्रसम्बन्धे तु नाचिरं मरणाय चिरमेवेत्यर्थः। तथा,—

हिमवद्विग्रहा नाड़ी ज्वरदाहेन तापिनाम्।
त्रिदोषलक्षणं भजते तदा ह्यहुर्दिनत्रयात्॥

यदा निरन्तरं ज्वरदाहतापौ श्लैष्मिकश्च नाड्याः। त्रिदोषेति। सन्निपातलक्षणसत्त्व एव भवति॥ तदा,—

निरीक्ष्या दक्षिणे पादे तदा चेष्टा विशेषतः।
सुखे नाड़ी वहेन्नित्यं ततस्तु दिवसैकम्॥
गतिस्तु भ्रमरस्येव वहेदेकदिनेन तु।
कण्ठेन स्पन्दते नित्यं पुनर्लंगति चाङ्गुलौ॥
मध्ये द्वादशयामानां ह्यहुर्भवति निश्चितम्।
दक्षिण इति पुंसः। स्त्रियास्तु वाम एव तथेति करस्येव विशेषतो विशेषज्ञानार्थम्। यदि नोभयनाड्यपि सुखे पुरोभागे नित्यं सदा वहति तदा दिनचतुष्टयं प्राप्य भ्रमरस्य परिभ्रमणरूपं गमनमिव सुख एव यदि वहति तदैकदिनेन। कण्ठे मूले स्पन्दस्थाने कदाचित् न स्पन्दते खल्वं स्पन्दत इति सम्भाव्यते। नित्यं प्रायः पुनश्चाङ्गुलौ तन्मूले कदापि लगति तदा तस्मादारभ्य द्वादशप्रहरमध्य एव ह्यहुरिति। तथा,—

स्थित्वा नाड़ी सुखे यस्य विद्युद्द्योतरिवेक्ष्यते।
दिनैकं जीवितं तस्य द्वितीये म्रियते ध्रुवम्॥
स्थित्वेत्यादित्तया स्थित्वा स्थाया विद्युत्स्फुरदभिव लक्ष्यते द्वितीय इत्यष्टप्रहरादूर्ध्वमित्यर्थः। तथा,—

स्वस्थानविच्युता नाड़ी यस्य वहति वा न वा।
ज्वाला च हृदये तीव्रा तदा ज्वालावधिः स्थितिः॥

न वेति स्थित्वा स्थित्वेत्यर्थः। इत्यत्र यदसाध्यलक्षणसूक्तमवस्थानादपवादविरहे सति तस्यार्द्धप्रवेशो यथायथमार्ग्यमतिभिरवगन्तव्य इति नेह प्रतन्यते ग्रन्थगौरवभयात्। मन्दं मन्दमिति अनेन न च भूलतागमनाकारेति विरुध्यते तस्य तात्कालिकमरणविषयत्वात्। सर्वमिदं सर्वरोग एव वेदितव्यं ज्वरमात्रे तु भ्रम एवेति।"

इति नाड़ीप्रकाशे द्वितीयोद्योतः॥ * ॥

अथ रोगेषु निरूपणीयेषु प्रधानतया प्रथमं ज्वरनिरूपणमाह। तत्र ज्वरपूर्वरूपे।

"अङ्गमर्दश्च नाड़ीनां भवन्ति मन्थराः ध्रुवाः।
ध्रुवः प्रबलतां याति ज्वरदाहोऽभिभूतये॥
सान्निपातिकरूपेषु भवन्ति सर्ववेदनाः॥

ज्वररूपमाह।

ज्वरकोपे च धमनी सोष्मा वेगवती भवेत्।
उष्मा पित्ताद्भते नास्ति ज्वरो नास्त्युष्मणा विना॥
उष्मा वेगधरा नाड़ी ज्वरकोपे प्रजायते॥

अन्यत्र च।

ज्वरे च वक्रा धावन्ती तथा च मरुतः ध्रुवे।
रसाग्नौ निघ्नि प्रातस्तप्ता दीपशिखा यथा॥

तत्रापि विशेषमाह।

सौम्या रूक्षा स्थिरा मन्दा नाड़ी सहजवातजा।
स्थूला च कठिना शीघ्रा स्पन्दते तीव्रमारुते॥
द्रुता च सरला शीघ्रा दीर्घा पित्तज्वरे भवेत्।
शीघ्रमाहननं नाड्याः काठिन्याच्च चला तथा॥
मलाजीर्णेगतितरां स्पन्दश्च प्रकीर्तितम्।
नाड़ी तन्तुसमा मन्दा शीतला श्लेष्मदोषजा॥

द्वन्द्वजमाह।

चपला तरला स्थूला कठिना वातपित्तजा।
ईषच्च दह्यते तूष्णा मन्दा स्यात् श्लेष्मवातजा॥
निरन्तरं खरं रूक्षं मन्दश्लेष्मातिवातजम्।
रूक्षवातभवे तस्य नाड़ी स्यात् पित्तसन्निभा॥
रूक्षा शीता स्थिरा नाड़ी पित्तश्लेष्मसमुद्भवा॥

प्रसङ्गादाह।

मध्ये करे वहेन्नाड़ी यदि सन्तापिता ध्रुवम्।
तदा नूनं मनुष्यस्य रुधिरापूरिता मलाः॥

आगन्तुकरूपभेदमाह।

भूतज्वरे सैक इवातिवेगा
धावन्ति नाड्यो हि यथाग्निगामाः।

तथा,—

ऐकाहिकेन क्वचन प्रदूरे
शान्तागमा विषमज्वरेण।
द्वितीयके वापि तृतीयतूर्ये
गच्छन्ति तप्ता भ्रमिवत् क्रमेण॥

अन्यत्रापि।

उष्मा वेगधरा नाड़ी ज्वरकोपे प्रजायते।
उद्वेगक्रोधकामेषु भयचिन्ताश्रमेषु च॥
भवेत् चीवगतिर्नाड़ी ज्ञातव्या वैद्यसत्तमैः॥

प्रसङ्गादाह।

व्यायामे भ्रमणे चैव चिन्तायां श्रमशोकतः।
नानाप्रभावगमना शिरा गच्छति विज्वरे॥

अजीर्णरूपमाह।

अजीर्णे तु भवेन्नाड़ी कठिना परितो जड़ा।
प्रसन्ना च हता शुद्धा त्वरिता च प्रवर्तते॥

तत्र विशेषमाह।

पक्वाजीर्णे पुष्टिहीना मन्दं मन्दं वहेज्जड़ा।
अष्टकपूर्णा भवेत् कोष्णा गुर्व्वी सामा गरीयसी॥

प्रसङ्गाद्गुरुज्ञानमाह।

पुष्टिस्तैलगुड़ाहारे मांसे च गुरुड़ाकृतिः।
क्षीरे च स्निग्धिता वेगा मधुरे भेकवद्गतिः॥
रम्भागुड़वटाहारे रूक्षशुष्कादिभोजने।
वातपित्तार्तिरूपेषु नाड़ी वहति निष्क्रमम्॥

अथ रसज्ञानम्।

मधुरे वर्हिगमना तिक्ते स्याद्भूलतागतिः।
अम्ले कोष्णा ध्रुवगतिः कटुके भृङ्गसन्निभा॥
कषाये कठिना ह्याना लवणे सरला द्रुता।
एवं द्विचित्रतुर्योगे नानाधर्मवती धरा॥

तथा,—

द्रवेऽतिकठिना नाड़ी कोमला कठिनाशने।
द्रवद्रव्यस्य काठिन्ये कोमला कठिनापि च॥

चौद्रे पृथग्ग्रन्थिलेव पिण्डे पुष्टेव जायते॥

अग्निमान्द्यधातुक्षयलक्षणमाह।

मन्दाग्नेः क्षीणधातोश्च नाड़ी मन्दतरा भवेत्॥

तदुक्तम्।

क्षीणधातौ च मन्दाग्नौ नाड़ी क्षीणतमा ध्रुवम्॥

तथा,—

मन्देऽग्नौ क्षीणतां याति नाड़ी हंसाकृतिस्त्वरेति॥

अन्ये तु।

आमाश्रये पुष्टिविवर्द्धनेन
भवन्ति नाड्योऽयमुजाभिवृत्ताः।
आहारमान्द्यादुपवासतो वा
तथैव नाड्यो भुजगायमानाः॥

प्रसङ्गाद्दीप्ताग्निज्ञानमाह।

लघ्वी भवति दीप्ताग्नेस्तथा वेगवती मता।

प्रसङ्गाद्व्यङ्गलीमध्याह।

पादे च हंसगमना करे मण्डूकसंभवा।
तस्याग्नेर्मन्दता देहे तथा व्यङ्गलीगदे॥

तथा,—

भेदेन शान्ता व्यङ्गलीगदेन
निर्वीर्यरूपा त्वसिसारभेदे।
विलम्बिकायां प्लवगा कदाचि-
दामातिसारे प्लुतगा जड़ा च॥ * ॥

अथ विसूचिकाज्ञानम्।

निरोधे मूत्रशकृतोर्विदग्धे विसरान्विताः।
विसूचिकाभिभूते च भवन्ति भेकवत् क्रमाः॥ *॥

प्रसङ्गादनाहमूत्रशक्कृज्ज्ञानमाह।

आनाहे मूत्रशक्कृते च भवेन्नाड़ी गरिष्ठता॥ *॥

मूलज्ञानमाह।

वातेन मूलेन मरुत्प्रवेन
सदैव वक्रा हि शिरा वहन्ती।
ज्वालामयी पित्तविचेष्टितेन
साध्या न मूले न च पुष्टरूपा॥ * ॥

अथ प्रमेहज्ञानम्।
प्रमेहे ग्रन्थिरूपा सा सुतप्ता लामदूषणे ॥*॥
विषविष्टम्भगुल्मज्ञानमाह।
उत्पित्तुरूपा विषरिष्टिकार्या
विष्टम्भगुल्मेन च वक्रूपा।
अत्यर्थवातेन अधः स्फुरन्ती
उत्तानभेदिन्यसमाग्निकावे ॥*॥
गुल्मे विशेषमाह कश्चित्।
गुल्मेन कस्योऽथ पराक्रमेण
पारावतस्येव गतिं करोति ॥*॥
अथ भगन्दरज्ञानम्।
त्रयार्धं कटिने देहे प्रयाति पैत्तिकं क्रमम्।
भगन्दरानुरूपेण नाड़ीव्रणनिवेदने।
प्रयाति वातिकं रूपं नाड़ी पावकरूपिणी ॥
अथ वान्तादिज्ञानम्।
वान्तस्य ग्लान्याभिहतस्य जन्तो-
र्वेगावरोधाकुलितस्य भूयः।
गतिं विधत्ते धमनी गजेन्द्र-
मरालमानेव कफोल्वणेन ॥
स्त्रोरोगादिकमपि रक्तादिज्ञानक्रमेण ज्ञातव्यम्।
क्वचित्प्रकरणोल्लेखात् क्वचिदौचित्यमाश्रितः।
क्वचिद्हेतुतः क्वचित् कालात् सङ्कीर्णगदनिर्णयः॥
नाड़ीपरिचयज्ञानं प्रायशो नैव दृश्यते।
तेन धात्र्या मयोक्तं यत्तत् समाधेयमुत्तमैः॥"
इति श्रीगुरुरसेनकविराजकृते नाड़ीप्रकाशे तृतीयोद्योतः॥
नाड़ीकः, पुं, (नाड़ीव कायतीति। कै+कः।) प्लाकविशेषः। पाट्प्लाक इति नालिताप्लाक इति च भाषा॥ तत्पर्य्यायः। पट्प्लाकः २ नाड़ीप्लाकः ३। अस्य गुणाः। रक्तपित्तनाशित्वम्। विष्टम्भित्वम्। वातकोपनत्वञ्च। इति भावप्रकाशः॥
नाड़ीकलापकः, पुं, (नाड़ीनां नाड़ीवन्नालानां कलापः समूहो यत्र। कप्।) सर्षपौ। इति भावप्रकाशः॥
नाड़ीकेलः, पुं, (नारिकेलः। पृषोदरादित्वात् साधुः।) नारिकेलः। इति शब्दरत्नावली॥
नाड़ीचः, पुं, (नाड्या चीयते इति। चि+वाहुलकात् डः।) प्लाकविशेषः। नालिता इति भाषा। तत्पर्य्यायः। केचुकम् २ पेचुली ३ पेचुः ४ विश्वरोचनः ५। इति त्रिकाण्डशेषः॥
"नाड़ीचप्लाकं द्विविधं तिक्तं मधुरमेव च।
रक्तपित्तहरं तिक्तं क्रिमिकुष्ठविनाशनम्।
मधुरं पित्तिकुलं शीतं विष्टम्भि कफवातजित्॥"
इति राजवल्लभः॥
नाड़ीचरणः, पुं, (नाड़ीवच्चरणौ यस्य।) पक्षी। इति त्रिकाण्डशेषः॥
नाड़ीजङ्घः, पुं, (नाड़ीवत् जङ्घा यस्य।) काकः। इति त्रिकाण्डशेषः॥ मुनिविशेषः। यथा।
"नाड़ीजङ्घः सुरगुरुसुनिर्व्वक्ति दृष्टेरकालौ
मासावेतौ न शुभफलदौ पौषमाघौ न शेषान्।"
इति मलमासतत्त्वम्॥

वक्रविशेषः। यथा, महाभारते। १२। १६८। १६—२०।
"ततोऽस्तं भास्करे याते सन्ध्याकाल उपस्थिते।
आजगाम स्वभवनं ब्रह्मलोकात् खगोत्तमः॥
नाड़ीजङ्घ इति ख्यातो दयितो ब्रह्मणः सखा।
वकराजो महाप्राज्ञः काश्यपस्यात्मसम्भवः॥"
नाड़ीतरङ्गः, पुं, (नाड्यां नालायां तरङ्गो यत्र।) काकोलः। हिञ्जकः। रतहिञ्जकः। इति मेदिनी। गे, ५६॥
नाड़ीतिक्तः, पुं, (नाड्या तिक्तः।) नेपालनिम्बः। इति राजनिर्घण्टः॥ (नेपालनिम्बशब्देऽस्य विशेषो ज्ञेयः॥)
नाड़ीदेहः, पुं, (नाड़ीसारो देहो यस्य। ह्रस्वत्वात् तथात्वम्।) भृङ्गी। इति त्रिकाण्डशेषः॥
नाड़ीनक्षत्रं, क्ली, (नाड़ीस्थितं नक्षत्रम्।) नरस्य जन्मदग्धमयोड्याष्टादग्धत्रयोविंशपञ्चविंशनक्षत्राणि। राज्ञः पूर्व्वोक्तानि जातिदेशाभिषेकनक्षत्राणि च। यथा,—
"जन्माद्यं कर्म्म ततोऽपि दग्धमं साङ्घातिकं
षोड़शभम्।
सप्तदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम्॥
आद्यात्तु पञ्चविंशं मानसमेवं नरः षड्भ्यः
स्यात्।
नवनक्षत्रो नृपतिः खजातिदेशाभिषेकर्क्षैः॥"*॥
जातृक्षन्तु।
"पूर्व्वात्रयं सागलमग्यजानां
राज्ञान्तु पौष्णेन सहोत्तराणि।
सपौष्णमित्रं पितृदैवतञ्च
प्रजापतेर्भञ्च क्षपीवलानाम्॥
आदित्यहस्ताभिजिदश्विभानि
तान्यन्त्यजाते: प्रभविष्णुतायाम्।
देशभं देशनामर्क्षम्। नाड़ीनक्षत्राणि॥*॥
ईहा देहार्थहानिः स्याच्चन्द्रर्क्षे उपतापिते।
कर्म्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे॥
मूर्त्तिद्रविणबन्धूनां हानिः साङ्घातिके तथा।
सन्तप्ते सासुदायिके मित्रभृत्यार्थसङ्क्षयः।
वैनाशिके विनाशः स्याद्हेहद्रविणसम्पदाम्॥
नाड़ीनक्षत्रफलम्॥*॥
जातिभे कुलनाशः स्यादन्त्यनक्षत्राभिषेकभे।
देशभे देशभङ्गः स्यात् क्रूरैरेवं शुभैः शुभम्॥
यस्मिन् राजाभिषेको भवति तदाभिषेचनिकभम्। अ इ उ ए क्षत्रिका। ओ व वि वु रोहिणीत्यादि देशभम्।
सर्व्वेषां पीड़ायां दिनमेवमुपोषितोऽगदं जुहुयात्।
सावित्र्या चीरतरोः समिद्भिरमरद्विजागुरतः॥"
इति ज्योतिस्तत्त्वम्॥
नाड़ीविग्रहः, पुं, (नाड़ीसारो विग्रहो यस्य। ह्रस्वत्वात् तथात्वम्।) भृङ्गी। इति हेमचन्द्रः। २। १२४॥

नाड़ीव्रणः, पुं, (नाड़ीसंलग्नो व्रणः।) सर्व्वदागलद्व्रणः। नाली घा इति भाषा। इत्यमरः। २। ६। ५४॥ तस्य निदानं यथा,—
"यः श्लेष्मामामिति पक्वमुपेक्षतेऽल्पो
यो वा व्रणं प्रचुरपूयमशोधयुक्तः।
अभ्यन्तरं प्रविशति प्रविदार्य्य तस्य
स्थानानि पूर्व्वविहितानि ततः सपूयः॥
तस्यातिमात्रगमनाद्गतिरिच्यते तु
नाड्येव यद्वहति तेन मता तु नाड़ी॥"*॥
वातादिदोषभेदेन तस्य रूपाणि यथा,—
"दोषैस्त्रिभिर्भवति सा पृथगेकशश्च
संसृष्टिभिश्च पि च शल्यनिमित्तजोऽन्या।
तत्रानिलात् परुषसूक्ष्मसुखी सफेना
फेनानुविद्धमधिकं स्रवति त्वपासु॥
पित्तात्तृषाज्वरकरी परिदाहयुक्ता
पीतं स्रवत्यधिकसूष्मगन्धसु चापि।
श्लेष्मा कषाद्बहुघनाञ्चिरपिच्छिलासा
स्निग्धा सकण्डुरुरुजा रजनीप्रवर्णा॥
दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा
यस्यां भवन्त्यभिहितानि च लक्षणानि।
तामादिशेत् पवनपित्तकफप्रकोपात्
घोरामसूच्यकरीमिव कालरात्रिम्॥
दोषद्वयाभिहतलक्षणदर्शनेन
तिस्रो गतीर्यतिकरप्रभवासु विद्यात्॥"
शल्यनिमित्तलक्षणं यथा,—
"नष्टं कथञ्चिदणुमार्गमुदीरितेषु
स्थानेषु शल्यमचिरेण गतिं करोति।
सा फेनिलं मथितमच्छमसृग्विमिश्र-
मुष्णं करोति सहसा स्रवञ्च नित्यम्॥"
असाध्यत्वञ्च साध्यत्वयोर्लक्षणं यथा,—
"नाड़ी त्रिदोषप्रभवा न सिध्येत्
श्लेष्मान्वितस्तु खलु यत्नसाध्यः॥"
इति माधवकरः॥*॥
"विडङ्गत्रिफला क्षाक्षीं लौहं समाक्षिकम्।
हन्ति कुष्ठं क्रमीन्मेहनाड़ीव्रणभगन्दरान्॥"
इति गरुड़पुराणम्॥
(अस्य चिकित्सान्तरं यथा,—
"नाड़ीनां गतिमन्विष्य शल्येनापास्य कर्म्मवित्।
सर्व्वव्रणक्रमं कुर्य्यात् शोधनं रोपणादिकम्॥
नाड़ीं वातहतां साधु पाटितां लेपयेद्घृतैः।
प्रत्यक् पुष्पीफलयुतैस्तिलैः प्रिष्टैः प्रलेपयेत्॥
पैत्तिकीं तिलमञ्जिष्ठानागदन्तीनिशायुतैः।
श्लैष्मिकीं तिलयष्ट्याह्वनिकुम्भारिष्टसैन्धवैः॥
शल्यजां तिलमध्याज्यैर्लेपयेच्छिन्नशोधिताम्।
आरग्वधनिशाकालाचूर्णाज्यक्षौद्रसंयुता।
क्षत्रवर्त्तिर्व्रणे योज्या शोधनी गतिनाशनी॥
घोण्टाफलत्वङ्मदनात् फलानि
पूगस्य च त्वक् लवणञ्च सूक्ष्मम्।
क्षुत्सर्षपैर्दुग्धेन सहैव कल्को
वर्त्तीकृतो हन्त्यचिरेण नाड़ीम्॥
वर्त्तीकृतं माक्षिकसंप्रयुक्तं
नाड़ीव्रणघ्नं लवणोत्तमं वा।

दुरन्ते यद्विहितञ्च तैलं
तत् सेव्यमानं गतिमाशु हन्ति ॥
जात्यर्कसम्याककरञ्जदग्धी-
सिन्धूत्थसौवर्चलयावशूकैः ।
वर्षिः क्षता हन्त्यचिरेण नाड़ीं
क्षुक्षीरपिष्टा सह चित्रकेण ॥
महिषदधिकोद्रवान्नमिश्रं हरति चिरविरूढ़ाम्।
मुक्तं कटुनिकामूलचूर्णमतिदारुणां हन्ति ॥
क्षुग्वुल्वलभीरुजां गतिर्मर्म्मास्थिता च या ।
क्षारसूत्रेण तां भिन्द्यान्न शस्त्रेण कदाचन ॥
व्रणस्य गतिमन्विष्य क्षारसूत्रानुसारिणीम् ।
सूचीं विदध्यात्तत्यन्ते चोन्नम्यासु च निर्हरेत् ॥
सूत्रस्थानं समानीय गाढ़बन्धनमाचरेत् ।
ततः क्षारबलं वीक्ष्य सूत्रमन्यत् प्रवेशयेत् ॥
क्षाराक्तं मतिमान् वैद्यो यावन्न च्छिद्यते गतिः ।
भगन्दरेऽप्येष विधिः कार्य्यो वैद्येन जानता ॥
गुग्गुलुच्छिन्नलाक्षाभैः समांशैरान्ययोजितः ।
नाड़ीदुरन्नयं मूल-भगन्दरविनाशनः ॥
इति सप्ताङ्गगुग्गुलुः ॥
खर्ज्जिका सिन्धुदन्त्यर्कचित्रकाक्षलनीलिका ।
खरमञ्जरीबीजैश्च तैलं गोमूत्रपाचितम् ॥
दुरन्नव्रणप्रशमनं कफनाडीव्रणापहम् ॥
इति खर्ज्जिकाद्यं तैलम् ॥
समूलपत्रां निर्गुण्डीं पीडयित्वा रसेन तु ।
तेन सिद्धं घृतं तैलं नाड़ीदुरन्नव्रणापहम् ॥
हितं वातामयार्त्तानां पानाभ्यञ्जननावनैः ।
विधिषु च क्षौद्रेण तथा सर्व्वव्रणेषु च ॥
इति निर्गुण्डीतैलम् ।
हंसपादीरिदण्डं जातीपत्रं ततो रसैः ।
ततकल्कैश्च पक्वैतैलं नाड़ीव्रणविशोधनम् ॥
इति हंसपादितैलम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे नाड़ीव्रणाधिकारः ॥)

नाड़ीग्राकः, पुं, (नाड़ीप्रधानः ग्राकः ।) नाड़ीकः ।
इति भावप्रकाशः ॥ पाट्ग्राक इति भाषा ॥

नाड़ीजङ्घः, पुं, (नाड्यामेव जङ्घो यस्य । नाड़ी-सारत्वादेवास्य तथात्वम् ।) भृङ्गी । इति शब्दरत्नावली ॥

नाड़ीहिङ्गु, क्ली, (नाड़ीप्रधानं हिङ्गु ।) हिङ्गु-भेदः । कल:पतिहिङ्गु इति हिन्दीभाषा । तत्-पर्य्यायः । शलाग्राचः २ जन्तुका ३ रामठी ४ वंशपत्री ५ पिण्डाङ्गा ६ सुवोर्य्या ७ हिङ्गु-नाड़िका ८ । (यथाच वैद्यकरत्नमालायाम् ।
"हिङ्गुपर्णी वेणुपत्री नाड़ीहिङ्गु शिवाटिका ॥")
अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफ-वातनिर्ग्घातकारित्वम् । विष्ठाविबन्धदोषा-नाहाश्मयनाशित्वञ्च । इति राजनिर्घण्टः ॥

नागकं, क्ली, (अगति ग्रन्थायते इति । अग ग्रन्थे + गुल् । न आगकम् ।) सुन्नाचिह्नित-निष्कादि । यथा,—
"तुलाशासनमानानां कूटकृन्नाणकस्य च ।
एभिश्च व्यवहर्त्ता यः स दाप्यो दण्डमुत्तमम् ॥"
इति मिताक्षरायां साहसप्रकरणीययाज्ञवल्क्य-वचनम् ॥

नाथ, क्ली, (नथ्यते आख्यायते प्रार्थ्यते सर्व्वै-रिति । नथ + घञ् । बाहुलकात् अन्तलोप आलच्च ।) विचित्रम् । प्रश्नः । शिवः । इति संक्षिप्तसारोणादिवृत्तिः ॥

नाथ, ऋ ङ आशिषि । ऐश्वर्य्ये । इति कवि-कल्पद्रुमः ॥ (भ्वां-परं-आत्मं च-सकं-ऐश्वे अकं-सेट् ।) दन्त्यादिरयम् । ऋ, अननाथत् । ङ, प्रनाथते प्रनाथते । दव उपतापः । आशीरिष्टार्थाशंसनम् । डित्त्वेऽपि प्रपथाग्रीर्गत्यनु-कारे इति नियमादाभ्यामाशिषोऽन्यत्र परस्मै-पदम् । नाथति शत्रुं बली उपतापयतीत्यर्थः । नाथते श्रियं लोकः आशंसते इत्यर्थः । नाथति धनी ईश्वरः स्यादित्यर्थः । नाथति भूपं भूमिं विप्रः प्रार्थयतीत्यर्थः । मार्गणेरथ तव प्रयो-जनं नाथसे किन्तु न भूभृतः प्रतिमिति भारवौ याचनमप्याशंसाविशेषः । आशिषि नित्य-मात्मनेपदमन्यत्र विभाषयेति केचित् । इति दुर्गादासः ॥

नाथः, पुं, (नाथति ईश्वरो भवतीति । नाथ ऐश्वे + अच् ।) ऐश्वर्य्ययुक्तः । तत्पर्य्यायः । अधिपः २ ईशः ३ नेता ४ परिवृढः ५ अधिभूः ६ पतिः ७ इन्द्रः ८ स्वामी ९ आर्य्यः १० प्रभुः ११ भर्त्ता १२ ईश्वरः १३ विभुः १४ ईशिता १५ इन्द्रः १६ नायकः १७ । इति हेमचन्द्रः ॥३।२३॥ (यथा, रामायणे । २ । ४८ । १७ ।
"स हि नाथो जनस्यास्य सगतिः स पराश्रयः ॥")

नाथवान्, [त्] त्रि, (नाथो विद्यतेऽस्येति । नाथ + मतुप् । मस्य वः ।) पराधीनः । इत्यमरः ।३। १ । १६ ॥ प्रभुविशिष्टः ॥ (ऋक्वान् । यथा, रामायणे । १ । ६२ । १२ ।
"नाथवांश्च मुनिश्रेष्ठो यत्नश्चाविफलो भवेत् ॥"
स्त्रियां ङीप् । यथा, रामायणे । २ । ६८ । १ ।
"तस्यां चीरं वसानायां नाथवत्यामनाथवत् ।
प्रचुक्रोश जनः सर्व्वो धिक् त्वां दशरथस्त्रियति ॥")

नाथहरिः, पुं, (नाथं हरति स्थानात् स्थानान्तरं नयतीति । नाथ + हृ + "हरतेर्द्दृतिनाथयोः पशौ ।" ३ । २ । ३५ । इति इन् ।) पशुः । इति सुग्धबोधव्याकरणम् ॥

नादः, पुं, (नद शब्दे + भावे घञ् ।) शब्दः । इत्यमरः । १ । ७ । २६ ॥ (यथा, हरिवंशे । २३५ । ५६ ।
"विभान्ति ते देववराः ससाध्याः
प्रभातशृङ्गस्तनसंहनादाः ॥")
अर्द्धचन्द्राकृतिवर्णः । स चाष्टस्वरदुरार्य्यः । यथा अर्द्धचन्द्रोऽनुस्वारः । इति भुवनेश्वरीमर्म्म-व्याख्यानन्दः ॥ तत्पर्य्यायः । अर्द्धेन्दुः २ अर्द्ध-मात्रा ३ कलाराधी ४ सदाशिवः ५ अनुचार्य्या ६ तुरीया ७ विश्वमातृकला ८ परा ९ । इति बीजवर्णाभिधानम् ॥ ब्रह्मस्वरूपघोषविशेषः । यथा,—
"सच्चिदानन्दविभवात् सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततो नादस्तस्माद्बिन्दुसमुद्भवः ॥
नादो बिन्दुस्य बीजञ्च स एव त्रिविधो मतः ।
भिद्यमानात् पराद्बिन्दोरुभयात्मा रवोऽभवत् ॥
स रवः श्रुतिसम्पन्नः शब्दो ब्रह्माभवत् परम् ॥
सकलादिति मूर्त्तात् । नादो घोषः । बिन्दुः प्रणवः स च बीजञ्च सर्व्ववर्णप्रभवत्वात् । तथा च ।
समाहितात्मनो ब्रह्मन् ! ब्रह्मणः परमेष्ठिनः ।
हृदाकाशादभून्नादो वृत्तिरोधादिभाव्यते ॥
ततोऽभूत्त्रिविधोङ्कारो योऽव्यक्तः प्रभवः स्वराट् ।
इत्यारभ्य ततोऽक्षरसमाम्नायमङ्गजगवानजः ॥
इति श्रीभागवतम् ॥"
इत्यलङ्कारकौस्तुभस्य द्वितीयस्तवकः ॥ * ॥
"नाभेरूर्द्धं हृदि स्थानान्मारुतः प्राणसंज्ञकः ।
नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्त्तितः ॥
अपि च ।
आकाशाग्नियुमरुज्जातो नाभेरूर्द्धं समुच्चरन् ।
सुखेऽतियक्तमायाति यः स नाद इतीरितः ॥
स च प्राणिभवोऽप्राणिभवश्चोभयसम्भवः ॥
आद्यः कायभवो वीणादिभवस्तु द्वितीयकः ।
तृतीयोऽपि च वंशादिभव इत्यं त्रिधा मतः ॥
यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रन्थिश्च यो मतः ।
तस्मादूर्द्धे संस्थितः प्राणः प्राणादग्निसमुद्भवः ।
वह्निमारुतसंयोगान्नादः समुपजायते ॥
न नादेन विना गीतं न नादेन विना स्वरः ।
न नादेन विना रागस्तस्मान्नादात्मकं जगत् ॥
न नादेन विना ज्ञानं न नादेन विना शिवः ।
नादरूपं परं ज्योतिर्नादरूपी परं हरिः ॥"
इति सङ्गीतदामोदरः ॥
(यथा च सङ्गीतदर्पणे ।
"गीतं नादात्मकं वाद्यं नादश्चक्रा प्रशस्यते ।
तद्द्वयानुगतं वृत्यं नादाधीनमतस्त्रयम् ॥
नादेन व्यज्यते वर्णः पदं वर्णात् पदादृचः ।
वचसो व्यवहारोऽयं नादाधीनमतो जगत् ॥
आहतोऽनाहतश्चेति द्विधा नादो निगद्यते ॥
सोऽयं प्रकाशते पिण्डे तस्मात् पिण्डोऽभिधीयते ॥
तचानाहतनादन्तु मुनयः समुपासते ।
गुरूपदिष्टमार्गेण मुक्तिदं न तु रञ्जकम् ॥
स नादस्त्वाहतो लोके रञ्जको भवभञ्जकः ।
शुत्यादिद्वारतस्तस्मात्तदुत्पत्तिर्निरूप्यते ॥"
किञ्च,—
"धर्म्मोऽर्थकाममोक्षाणामिदमेवैकसाधनम् ॥
नादविद्या परा लब्धा सरस्वत्याः प्रसादतः ।
कमलाभ्यतरी नाभौ भ्रमी: कुण्डलतां गतौ ॥
पशुः शिशुर्मृगो वापि नादेन परितुष्यति ।
अतो नादस्य माहात्म्यं व्याख्यातुं केन शक्यते ॥"
याज्ञवल्क्यः ।
"नादाख्येषु परं पारं न जानाति सरस्वती ।
अद्यापि मज्जनभयात्तुम्बं वहति वक्षसि ॥"
अथ नादोत्पत्तिप्रकारः ।
"आत्मना प्रेरितं चित्तं वह्निमाहन्ति देहजम् ।
ब्रह्मग्रन्थिस्थितं प्राणं स प्रेरयति पावकः ॥

पावकप्रेरितः सोऽथ क्रमादूर्ध्वपथे चरन्।
अतिसूक्ष्मध्वनिं नाभौ हृदि सूक्ष्मं गले पुनः॥
पृष्ठं ग्रीवे त्वपुष्टञ्च क्लृप्तिमं वदने तथा।
आविर्भावयतीत्येवं षड्धा कीर्त्यते बुधैः॥"
"नकारं प्राणनामानं दकारमनलं विदुः।
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते॥"
अयन्तु योगिसंवेद्य एव। अस्य अवस्थादिकं यदुक्तं हठयोगप्रदीपिकायाम्। ४। ६५-१०७।
"अथ्यक्तत्त्वबोधानां मूढानामपि संमतम्।
प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते॥
श्रीआदिनाथेन सपादकोटि-
लयप्रकाराः कथिता जयन्ति।
नादानुसन्धानकमेकमेव
मन्यामहे सुख्यतमं लयानाम्॥
सुक्तासने स्थितो योगी मुद्रां सन्धाय शाम्भवीम्।
शृणुयाद्दक्षिणे कर्णे नादमन्तःस्थमेकधीः॥
श्रवणपुटनयनयुगलघ्राणमुखानां निरोधनं
कार्य्यम्।
गुह्यसुसूक्ष्मासरणौ स्फुटममलः श्रूयते नादः॥
आरम्भश्च घटश्चैव तथा परिचयोऽपि च॥
निष्पत्तिः सर्व्वयोगेषु स्यादवस्याश्चतुष्टयम्।
अथारम्भावस्था।
ब्रह्मग्रन्थेर्भवेद्भेदो ज्ञानन्दः शून्यसम्भवः।
विचित्रः क्वणको देहेनाहतः श्रूयते ध्वनिः॥
दिव्यदेहश्च तेजस्वी दिव्यगन्धस्वरोगवान्।
संपूर्णहृदयः शून्य आरम्भो योगवान् भवेत्॥
अथ घटावस्था।
द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः।
दृढासनो भवेद्योगी ज्ञानी दैवसमस्सदा॥
विष्णुग्रन्थेस्ततो भेदात् परमानन्दलक्षकः।
अतिशून्ये विमर्दश्च भेरीशब्दस्तथा भवेत्॥
तृतीयायां तु विज्ञेयो विहायोमर्दलध्वनिः।
महाशून्यं तदा याति सर्व्वसिद्धिसमाश्रयम्॥
चित्तानन्दं तदा लिप्सा सहजानन्दसम्भवः।
दोषदुःखजराव्याधिक्षुधानिद्राविवर्ज्जितः॥
रुद्रग्रन्थिं यदा भित्त्वा शून्यपीठगतोऽनिलः।
निष्पत्तौ वैष्णवः शून्यः क्वणद्घोषाकरो भवेत्॥
एकीभूतं तदा चित्तं राजयोगाभिधानकम्।
सृष्टिसंहारकर्त्तासौ योगीश्वरसमो भवेत्॥
अस्तु वा मास्तु वा मुक्तिरत्रैवाखण्डितं सुखम्।
लयोद्भवमिदं सौख्यं राजयोगादवाप्यते॥
राजयोगमजानन्तः केवलं हठकर्म्मिणः।
एतानभ्यासिनो मन्ये प्रयासफलवर्ज्जितान्॥
उन्मन्युत्थाप्तये शीघ्रं भूयानं मम संमतम्।
राजयोगपदं प्राप्तं सुखोपायोऽल्पचेतसाम्॥
सद्यः प्रत्ययसन्धायी जायते नादजो लयः॥
नादानुसन्धानसमाधिभाजां
योगीश्वराणां हृदि वर्द्धमानम्।
आनन्दमेकं वचसामगम्यं
जानाति तं श्रीगुरुनाथ एकः॥
कर्णौ पिधाय हस्ताभ्यां यं शृणोति ध्वनिं मुनिः।
तत्र चित्तं स्थिरीकुर्य्यादावत्तस्थिरपदं व्रजेत्॥
अभ्यस्यमानो नादोऽयं बाह्यमावृणुते ध्वनिम्।
पक्षादित्रैयमखिलं जित्वा योगी सुखी भवेत्॥
श्रूयते प्रथमाभ्यासे नादो नानाविधो महान्।
ततोऽभ्यासे वर्द्धमाने श्रूयते सूक्ष्मसूक्ष्मकः॥
आदौ जलधिजीमूतमेरोर्झर्झरसम्भवः।
मध्ये मर्दलशङ्खोत्था घण्टाकाहलजास्तथा॥
अन्ते तु किङ्किणीवंशवीणाभ्रमरनिःस्वनाः।
इति नानाविधा नादाः श्रूयन्ते देहमध्यगाः॥
महति श्रूयमाणेऽपि मेघभेर्य्यादिके ध्वनौ।
तत्र सूक्ष्मात् सूक्ष्मतरं नादमेव परामृशेत्॥
घनसुतूर्य्ये वा सूक्ष्मे सूक्ष्मसुतूर्य्ये वा घने।
रममाणमपि क्षिप्रं मनो नान्यत्र चालयेत्॥
यत्र क्वचापि वा नादे लगति प्रथमं मनः।
तत्रैव सुस्थिरीभूय तेन सार्द्धं विलीयते॥
मकरन्दं पिबन् भृङ्गो गन्धं नापेक्षते यथा।
नादासक्तं तथा चित्तं विषयान्न हि काङ्क्षते॥
मनोमत्तगजेन्द्रस्य विषयोद्यानचारिणः।
नियमने समर्थोऽयं निनादनिशितांकुशः॥
बद्धं तु नादबन्धेन मनः संत्यक्तचापलम्।
प्रयाति सुतरां स्थैर्यं छिन्नपक्षः खगो यथा॥
सर्व्वचिन्तां परित्यज्य सावधानेन चेतसा।
नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता॥
नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते।
अन्तरङ्गकुरङ्गस्य वधे व्याधायतेऽपि च॥
अन्तरङ्गस्य यमिनो वारिणः परिधायते।
नादोपास्तिरतो नित्यमवधार्य्या हि योगिना॥
बद्धं विमुक्तचाञ्चल्यं नादगन्धकजारभात्।
मनः पारदमाप्नोति निरालम्बाख्यखेटनम्॥
नादश्रवणतः क्षिप्रमन्तरङ्गभुजङ्गमः।
विस्मृत्य सर्व्वमेकाग्र्यः कुत्रचिन्नहि धावति॥
काष्ठे प्रवर्त्तितो वह्निः काष्ठेन सह शाम्यति।
नादे प्रवर्त्तितं चित्तं नादेन सह लीयते॥
घण्टादिनादसक्तस्त्वन्तःकरणहरिणस्य।
प्रहरणमपि सुकरं शरसन्धानप्रवीणश्चेत्॥
अनाहतस्य शब्दस्य ध्वनिर्य उपलभ्यते।
ध्वनेरन्तर्गतं ज्ञेयं ज्ञेयस्यान्तर्गतं मनः॥
मनस्तत्र लयं याति तद्विष्णोः परमं पदम्॥
तावदाकाशसङ्कल्पो यावच्छब्दः प्रवर्त्तते।
निःशब्दं तत्परं ब्रह्म परमात्मेति गीयते॥
यत्किञ्चिन्नादरूपेण श्रूयते शक्तिरेव सा।
यस्तस्यान्तो निराकारः स एव परमेश्वरः॥
सर्व्वं हठबलयोपायो राजयोगस्य सिद्धये।
राजयोगसमारूढः पुरुषः कालवञ्चकः॥
तत्त्वं बीजं हठः क्षेत्रमौदासीन्यं जलं त्रिभिः।
उन्मनी कल्पलतिका सद्य एव प्रवर्त्तते॥
सदा नादानुसन्धानात् क्षीयन्ते पापसञ्चयाः।
निरञ्जने विलीयेते चित्तिश्चित्तमारुतौ॥
शृङ्गदुन्दुभिनादश्च न श्रोत्रे कदाचन।
काष्ठवच्चायते देह उन्मन्यावस्थया ध्रुवम्॥
सर्व्वावस्थाविनिर्मुक्तः सर्व्वचिन्ताविवर्ज्जितः।
मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः॥"*॥
स्वनामख्यातमुनिविशेषः। अयन्तु ईश्वरसुतः पुत्रः। आयतत्त्वयोगरहस्ययोः प्रणेता। अस्य वासस्थानं दाक्षिणात्यप्रदेशः॥)

नादेयं, क्ली, (नद्या नदस्य वा इदं तत्र भवं वा। नदी वा नद+ढक्।) सैन्धवलवणम्। इति रत्नमाला। सौवीराञ्जनम्। इति राजनिर्घण्टः॥ नदीनदसम्बन्धिजलादौ, त्रि। यथा,—
("नादेयं नादेयं शरदि वसन्ते च नादेयम्।
पानीयं पानीयं शरदि वसन्ते च पानीयम्॥"
इति वैद्यकराजवल्लभीयद्रव्यगुणे॥)
"नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम्॥"
अस्य गुणाः। यथा, भावप्रकाशे।
"नादेयमुष्णं रूक्षं वातलं लघु दीपनम्।
अग्निभिष्यन्दि विशदं कटुकं कफपित्तजुत्॥
(न आदेयमिति विग्रहे अण्यङ्गे, त्रि। यथा,—
"सौगन्ध्यहीनं नादेयं पुष्पं कालमपि क्वचित्॥")

नादेयः, पुं, (नद्यां भवः। नदी+ढक्।) काश्मलङ्गम्। वानीरवृक्षः। इति राजनिर्घण्टः॥

नादेयी, स्त्री, (नद्यां भवा। "नद्यादिभ्यो ढक्।" ४।२।९७। इति ढक् ततो ङीप्।) अम्बुवेतसः। भूमिजम्बुका। वैजयन्तिका। इत्यमरः। २। ४। ६५। नागरङ्गः। जवा। बहुदकः। इति मेदिनी। ये, ८६॥ अग्निमन्थः। (अस्याः पर्य्यायो यथा,
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका।
जवा जयन्ती तर्कारी नादेयी वैजयन्तिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
काकजम्बूः। इति राजनिर्घण्टः॥

नाध, ऋ उ ङ नाधे। इति कविकल्पद्रुमः॥ (भ्वां-आर्त्म-सर्व ऐश्वे अकं-सेट्।) ऋ, अवनाधत्। उ, नाधते। नाथो दवाग्नीरेत्रार्थानि। इति दुर्गादासः॥

नाना, य, (न+"विनञ्भ्यां नानाञौ न सह।" ५।३।२७। इति नाञ्प्रत्ययः।) अनेकार्थम्। (यथा, मनुः। ६। १४८।
"बहूंश्च व्यञ्जनातानां नानाक्षीरान् निबोधत॥")
उभयार्थम्। विनार्थम्। इति मेदिनी। ने, ४५॥
(यथा, सुश्रुते। [दरः॥")
"न नाना श्रद्धया रागात् वर्त्तेताधोऽञ्जो-

नानाकन्दः, पुं, (नाना बहवो कन्दा यस्य।) पिण्डालुः। इति राजनिर्घण्टः॥ बहुकन्दयुक्ते च॥ (बहुकन्दयुक्ते, त्रि॥)

नानाध्वनिः, पुं, (नाना ध्वनिर्यत्र। नानाविधो ध्वनिर्वा।) काहलावेणुवीणादिशब्दः। इति हारावली। २४६॥

नानारूपः, त्रि, (नाना रूपाणि यस्य।) अनेकप्रकारः। तत्पर्य्यायः। विविधः २ बहुविधः ३ पृथग्विधः ४। इत्यमरः। ३। १। ६६॥ (यथा मनुः। ६। ६८।
"भूमावप्येककेदारे कालोप्तानि कृषीवलैः।
नानारूपाणि जायन्ते बीजानीह स्वभावतः॥
नाना रूपाणि इति विग्रहे। बहुविधरूपे, क्ली। यथा, गोः रामायणे। ३। ९। २१।
"नानारूपैर्विरूपाक्षैः रूक्षैरशुभदर्शनैः॥")

नानावर्णः, पुं. (नानाविधो वर्णः ।) बहुविधशुक्लादिवर्णः । इति भरतः ॥ तत्पर्य्यायः । चित्रम् २ किर्म्मीरः ३ कल्माषः ४ शबलः ५ एतः ६ कर्व्वुरः ७ । इत्यमरः ।१।५।१७॥ विचित्रम् ८ शारङ्गम् ९ कम्बरः १० कर्म्मारः ११ चित्रलः १२ । इति शब्दरत्नावली ॥ ब्राह्मणक्षत्रियादिश्च ॥ (नानाविधो वर्णो यस्येति । विचित्रवर्णयुक्ते, त्रि । यथा, सुश्रुते । १ । ३८ । "नानावर्णा लघ्वञ्जवती प्रविरलाख्यपाण्डुश्चक्रधरोहाभिगुणभूयिष्ठा ॥")

नानाविधः, त्रि, (नाना विधाः प्रकारा यस्य ।) अनेकप्रकारः । विविधः । यथा,—

"तथा नानाविधैः पुष्पैर्द्रव्यैर्वीरक्रियाहृते: ॥"

इति हरिभक्तिविलासे १६ विलासः ॥

नानुष्ठेयं, त्रि, (न अनुष्ठेयम् ।) अननुष्ठेयम् । अकर्त्तव्यम् । इति व्याकरणम् ॥

नान्नं, क्ली, (नमत्वनेनेति । नम+"भसृञिमिनमिहनिविशिभ्यां ट्टिच ।" उणा । ४ । १५६ । इति ट्टन् ट्टिच ।) स्तोत्रम् । इत्युणादिकोषः ॥

नान्दिकरः, पुं, (करोतीति । क+अच् । नान्द्याः नान्दीश्लोकस्य करः पाठकः । "ड्याप्पोः संज्ञाछन्दसोर्बहुलम् ।" ६ । ३ । ६३ । इति ह्रस्वः ।) नान्दीकरः । इत्यमरटीकायां रमानाथः ॥

नान्दी, स्त्री, (नन्द्यन्यनयेति । नन्द+घञ् । निपातनात् दीर्घः । ततो ङीप् ।) नाटकादादौ मङ्गलार्था देवद्विजादीनामाशीः । यथा,—

"आशीर्व्वचनसंयुक्ता स्तुतिर्यस्मात् प्रवर्त्तते ।
देवद्विजनृपादीनां तस्मान्नान्दीति सा स्मृता ॥
केचित्तु । भेरीप्राया नान्दी ।" इत्यमरटीकायां भरतः ॥ * ॥ नाटके विघ्नविघातायादौ नान्दी कार्य्या । यदाह भरतः ।

"यद्यप्यङ्गानि भूयांसि पूर्व्वरङ्गस्य नाटके ।
तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नप्रशान्तये ॥
देवद्विजनृपादीनामाशीर्व्वादपरायणा ।
नन्दन्ति देवता यस्मात्तस्मान्नान्दी प्रकीर्त्तिता ॥"

अन्यच्च ।

"देवद्विजनृपादीनामाशीर्व्वन्दनपूर्व्विका ।
नान्दी कार्य्या बुधैर्यत्नान्नमस्कारेण संयुता ॥
गङ्गा नागपतिः सोमः सुधा नन्दा जयाग्निजः ।
अभिनामपदैः कार्य्या नान्दी धाराभिरङ्किता ॥
प्रश्नस्तपदविन्यासा चन्द्रसंकीर्त्तनान्विता ।
आशीर्व्वादपरा नान्दी योज्येयं मङ्गलात्मिका ॥
काचिद्गद्यपदा नान्दी काचिदुभयपदा तथा ।
सूत्रधारः पठेन्नान्दी मध्यमस्वरमाश्रितः ॥"

इति मालतीमाधवटीका ॥

सन्दृष्टिः । यथा । "नान्दी सन्दृष्टिरिति कथ्यते ।" इत्युदाहृतत्वे ब्रह्मपुराणम् ॥

नान्दीकः, पुं, (नान्दै नान्द्यर्थं कायतीति । कै+कः ।) तोरणस्तम्भः । इति त्रिकाण्डशेषः ॥

नान्दीकरः, त्रि, (नान्दीं करोतीति । क+"दिवाविभेति ।" ३ । २ । २१ । इति टः ।) नान्दीश्लोकपाठकारी । तत्पर्य्यायः । नान्दीवादी २ । इत्यमरः । ३ । १ । ३८ ॥ "केचित्तु भेरीप्राया नान्दी तद्वादनशीलः अत्र वदिष्ठनौ वादनार्थावित्याहुः ।" इति भरतः ॥

नान्दीपटः, पुं, (नान्दै इदमर्थं पटो यत्र ।) कूपादिसुखबन्धनम् । तत्पर्य्यायः । नान्दीसुखः २ वीनाहः ३ । इति हेमचन्द्रः । ३ । १५८ ॥

नान्दीसुखः, पुं, (नान्दै इदमर्थं सुखं यस्य ।) कूपादिसुखबन्धनम् । इति हेमचन्द्रः । ३।१५८॥ वृद्धिश्राद्धभुक् पितृगणः । यथा,—

"नान्दीसुखं पितृगणं पूजयेत् प्रयतो गृही ॥"

इति विष्णुपुराणम् ॥

स च पित्रादित्रिकं मातामहादित्रिकञ्च । इति गोभिलसूत्रम् ॥ (नान्द्या इदं नान्दं सुखम् ।) वृद्धिश्राद्धे, क्ली । यथा,—

"नान्दीसुखे विवाहे च प्रपितामहपूर्व्वकम् ।
अत्र नान्दीसुखपदस्य श्राद्धपरत्वे इत्युदाहृतत्वलेखनादन्यत्र श्राद्धपरत्वम् ।" तदितिकर्त्तव्यता यथा । "तत्र गोभिलः । अथाभ्युदयिकश्राद्धे युग्मानासादयेत् प्रदक्षिणमुपचारः ऋजवो दर्भाः यवैस्तिलार्थैः सम्पन्नमिति लब्धप्रक्षः दधिवदराक्षताभ्यमिश्राः पिण्डाः नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च प्रीयन्तामिति न स्वधाच्च प्रयुञ्जीतेति ॥ अपि च ।

स्वधेयेतिपदस्थाने पुण्याहशब्दं वदेद्गृहे ।
पितृनितिपदात् पूर्व्वं वदेन्नान्दीमुखानिति ॥
कर्म्मादिषु च सर्व्वेषु मातरः खगणाधिपाः ।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥
प्रतिमासु च मुख्यासु लिखिता वा पटादिषु ।
अपि वाचतपुष्पेषु नैवेद्यैश्च पृथग्विधैः ॥
कुशलव्यं वसोर्धारां सप्तवारान् घृतेन तु ।
कारयेत् पञ्च वारान् वा मातृणीर्वां न चोच्छ्रिताम् ॥
आयुष्यानि च शान्त्यर्थं जप्या तत्र समाहितः ।
षड्भ्यः पिण्डेभ्यस्तदनु श्राद्धदानमुपक्रमेत् ॥
वक्ष्यिष्टोक्तो विधिः कृत्स्नो ब्रह्मणोऽत्र निरामिषः ।
अतः परं प्रवक्ष्यामि विशेष इह यो भवेत् ॥
प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा ।
उपवेश्य कृशान् दद्याद्दक्षिणेव हि पाणिना ॥
विपत्तौ न हि सत्यस्य जातुषो विद्यते क्वचित् ।
सदा परिचरेद्भक्त्या पितृनप्यत्र देववत् ॥
पिण्डेभ्य इति दत्तेषु उपवेश्य कुशेषु तान् ।
गोत्रनामभिरामन्त्र्य पितृनर्घ्यं प्रदापयेत् ॥
नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते ।
पाद्यार्घ्यं पूरणादीनि दैवे नैव तु कारयेत् ॥
ज्येष्ठोत्तरकरान् युग्मान् कराग्राग्यपवित्रकान् ।
कृत्वार्घ्यं सम्प्रदातव्यं नैकैकस्मात्र दीयते ॥
मधु मध्वित्ति यस्तत्र विर्ज्जपोऽप्रितुमिच्छताम् ।
गायत्र्यानन्तरं सोऽत्र मधुमन्त्रविवर्जितः ॥
न चात्रतुस् जपेदत्र कदाचित् पिण्डसंहिताम् ।
अन्य एव जपः कार्य्यः सोमसामादिकः शुभः ॥
यस्तत्र प्रकरोन्मन्त्रं तिलवद्दृश्यवत्तथा ।
उच्छिष्टसन्निधौ सोऽत्र लुप्तेषु विपरीतकः ॥
सम्पन्नमिति लुप्ताः स्युः प्रश्नस्थाने विधीयते ।
सुसम्पन्नमिति प्रोक्ते प्रेषमन्त्रं निवेदयेत् ॥
प्रागग्रेष्वथ दर्भेषु आत्ममामन्त्र्य पूर्व्ववत् ।
अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति निक्षिताः ॥
द्वितीयश्च तृतीयश्च मध्यदेशाग्रदेशयोः ।
मातामहप्रभृतीस्तु एतेषामेव वामतः ॥
सर्व्वसादनसङ्कल्प यज्ञनैरूपविध्य च ।
संयोज्य यवकर्कन्धुदधिभिः प्राङ्मुखस्ततः ॥
अवनेजनवत् पिण्डान् दत्त्वा विश्वप्रमाद्यकान् ।
ततः पात्रक्षालनेनाथ पुनरप्यवनेजयेत् ॥
उत्तरोत्तरदानेन पित्रादामुत्तरोत्तरम् ।
भवेदक्षाक्षरत्वादधोऽधः श्राद्धकर्म्मसु ॥
तस्मात् श्राद्धेषु सर्व्वेषु वृद्धिमत्सु तरेषु च ।
मूलमध्याग्रदेशेषु ईषत्सक्तांश्च निर्व्वपेत् ॥
गन्धाद्यैर्न्निक्षिपेत्तूष्णीं ततः आचामयेत् द्विजान् ॥"

"अथाग्नभूमिमासिञ्चेत् सु सप्रोक्षितमक्षिति ।
ग्निवा आपः सन्त्विति च युग्मानेवोदकेन च ।
सौमनस्यमस्त्विति च पुष्पादानमनन्तरम् ॥
अक्षतश्चारिरक्षाक्षिद्रयक्षतानपि दापयेत् ।
अक्षय्योदकदानन्तु अर्घ्यदानवदिष्यते ॥
षष्ठेऽह्नि नित्यं तत् कुर्य्यान्न चतुर्थ्यां कदाचन ।
प्रार्थनासु प्रतिप्रोक्ते सर्व्वास्वेव द्विजोत्तमैः ॥
पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपाचलत्
युग्मानेव स्वस्तिवाच्यानङ्गुष्ठयङ्गं सदा ॥
लब्धा धूर्य्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः ॥"* ॥

तन्निमित्तानि यथा, विष्णुपुराणे ।

"कन्यापुत्रविवाहे च प्रवेशे नववेश्मनः ।
नामकर्म्मणि बालानां चूडाकर्म्मादिके तथा ॥
सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने ।
नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृही ॥"

मत्स्यपुराणे ।

"अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके ।
पुंसवने विवाहे च नववेश्मप्रवेशने ॥
देवतीर्थजलादीनां प्रतिष्ठायां विशेषतः ।
तीर्थयात्रादृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितम् ॥"

कूर्म्मपुराणे ।

"तीर्थयात्रासमारम्भे तीर्थप्रत्यागमेषु च ।
वृद्धिश्राद्धं प्रकुर्व्वीत बहुसर्पिःसमन्वितम् ॥"

इति श्राद्धतत्त्वम् ॥

नान्दीमुखी, स्त्री, (नान्दै वृद्ध्यर्थं मुखं यस्याः । ङीप् ।) सामगेतरवृद्धिश्राद्धभुङ्मात्रगणः । इति यजुर्व्वेदीयवृद्धिश्राद्धपद्धतिः ॥ (कुधान्यविशेषः । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"कोरदूषकश्यामाकनीवारश्यामाकतुवरकोद्दालकप्रियङ्गुमधुलिकानान्दीमुखीकुरविन्दशवेधुकवरकोदपर्णीसकुन्दकरेणुयवप्रभृतयः कुधान्यविशेषाः ॥" चतुर्दृश्याक्षरवृत्तिविशेषः । अस्य लक्षणादिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥* ॥ नान्दी-

सुखं करिष्यमाणत्वेनास्यस्येति। अच्। अभ्युदयप्रारम्भयुक्ते, त्रि। यथा, रामायणे। २। ८१। १।

"ततो नान्दीसुखीं रात्रिं भरतं सूतमागधाः। तुष्टुवुः सविशेषज्ञास्तवैर्मङ्गलसंस्तवैः॥")

नान्दीवादी, [न्] त्रि, (नान्दीं वदतीति। वद+णिनिः।) नान्दीश्लोकपाठकारी। नान्दीवदनशीलः। भेरीवादनशीलः। इत्यमरटीकायां भरतः॥

नापितः, पुं, (न आप्नोति सरलतामिति। न+आप्+"नञ्याप इट् च।" उणां ३। ८७। इति तन् इट् च।) वर्णसङ्करजातिविशेषः। स तु पट्टिकार्य्यां कुवेरिणो जातः। इति पराशरपद्धतिः॥ शूद्रायां क्षत्रियाज्जातः। इति विवादार्णवसेतुः॥ तस्य क्षौरं कर्म्म। तत्पर्य्यायः क्षुरी २ सुखी ३ दिवाकीर्त्तिः ४ अन्तावसायी ५। इत्यमरः। २।१०।१०॥ कृत्ती ६ वातृक्षीसुतः ७ नखकुट्टः ८ ग्रामणी ९। इति शब्दरत्नावली॥ चन्द्रिलः १० मुण्डः ११ भाण्डपुटः १२। इति जटाधरः॥ (यथा, पद्मतन्त्रे। ३। ७३।

"नराणां नापितो धूर्त्तः पक्षिणाञ्चैव वायसः। दंष्ट्रिणाञ्च शृगालस्तु श्वेताभिज्ञस्तपस्विनाम्॥")

नापितशालिका, स्त्री, (नापितस्य शालिका गृहम्।) नापितशाला॥ नापितगृहम्। तत्पर्य्यायः। खरकुटी २। इति त्रिकाण्डशेषः॥

नाभिः, पुं, (नह्यते बध्नाति विषयादौनिति। नह बन्धे+"नहो भश्च।" उणां ४। १२५। इति इण् भश्चान्तादेशः।) सुखमृगः। चक्रमध्यम्। (यथा, पद्मतन्त्रे। १। ६३।

"अरेः सन्तायते नाभिर्नाभौ चाराः प्रतिष्ठिताः। स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्त्तते॥")

क्षत्रियः। इति मेदिनी। भे, ५॥ प्रियव्रतराजपौत्रः। (अग्नीध्रस्य पुत्रः। यथा, ब्रह्माण्डे। ३५ अध्याये।

"तस्य पुत्रा बभूवुस्तु प्रजापतिसमा नव। ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोऽनुजः॥"

"नाभये दक्षिणं वर्षं हिमवन्तं पिता ददौ॥")

गोत्रम्। इति संक्षिप्तसारोणादिवृत्तिः॥ (प्रधानम्। इति विश्वः॥ यथा, रघुः। १८। २०।

"सुतोऽभवत् पद्मजनाभकल्पं
क्षतक्षयान्नाभिरमण्डलस्य॥"

महादेवः। यथा, महाभारते। १३। १७। ६२।

"नाभिर्नन्दिकरो भावः पुष्करः स्थपतिः स्थिरः॥")

नाभिः, पुं क्ली, (नह बन्धे+इण् भश्चान्तादेशः।) प्राणयज्ञम्। इति मेदिनी। भे, ६॥ नाइ इति भाषा। तत्पर्य्यायः। नाभी २ तुन्दकूपी ३। इति शब्दरत्नावली॥ उदरावर्त्तः ४। इति राजनिर्घण्टः॥ (यथा, पद्मदण्डाम्। ६। ११७।

"विष्णुर्नाभेः समुद्भूतो वेधाः कमलजन्मतः। विष्णुरेवेश इत्याकुलोके भागवता जगाः॥")

"स च गर्भस्यस्य सप्तभिर्मासैर्भवति।" इति सुश्रुतबोधः॥ ("तस्य चैतान्नाभिः पच्यते तां लोध्रमधुकप्रियङ्गुदारुहरिद्राकल्कसिद्धेन तैलेनाभ्यञ्जयेदेषामेवतैलौषधानां चूर्णैनावचूर्णयेदेषनाडीकल्पनविधिरुक्तः सम्यक्॥" इति चरके शारीरस्थाने अष्टमेऽध्याये॥) अस्मिन् स्थाने मणिपूरनामदशदलपद्मम्मस्ति। यथा,—

"तदूर्द्धे नाभिदेशे तु मणिपूरं महत्प्रभम्।
मेघाभं विद्युदाभञ्च वह्नितेजोमयं ततः॥
मणिवद्विलसं तत् पद्मं मणिपूरं तथोच्यते।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्।
ग्रन्थिनाधिष्ठितं पद्मं विश्वालोकनकारणम्॥"

इति तन्त्रम्॥

कस्तूरिकामदे, क्ली। इति मेदिनी। मे, ६॥

नाभिकण्टकः, पुं, (नाभेः कण्टक इव।) आवर्त्तः। इति शब्दरत्नावली॥ गोँड़ इति भाषा॥

नाभिका, स्त्री, (नाभिरिव कायतीति। कै+कः।) कटभीवृक्षः। इति राजनिर्घण्टः॥

नाभिगुड़कः, पुं, (नाभौ गुड़को गोल इव।) स्फीतनाभिः। गोँड़ इति भाषा। तत्पर्य्यायः। गर्भगण्डः २। इति त्रिकाण्डशेषः॥ नाभिकण्टकः ३ आवर्त्तः ४। इति शब्दरत्नावली। गोण्डः ५ नाभिगोलकः ६। इति जटाधरः॥

नाभिगोलकः, पुं, (नाभौ गोलकः।) नाभिगुड़कः। इति जटाधरः॥

नाभिजः, पुं, (नाभौ जायते इति। जन्+डः।) ब्रह्मा। इति धरणिः॥

नाभिजन्मा, [न्] पुं, (नाभौ जन्म यस्य।) ब्रह्मा। इति त्रिकाण्डशेषः॥

नाभिनाला, स्त्री, (नाभिस्थिता नाला नाड़ी।) नाभिसम्बन्धिनी नाड़ी। तत्पर्य्यायः। अमला २। इति त्रिकाण्डशेषः॥ (यथा, रघुः। १५। ७।

"तदङ्गमुद्यान्युतनाभिनाला
कचित् स्खलीनामनघा प्रसूतिः॥")

नाभिभूः, पुं, (नाभौ भूरुत्पत्तिर्यस्य।) ब्रह्मा। इति हेमचन्द्रः। १। १२७॥

नाभिवर्षः, पुं, (नाभेरग्नीध्रपुत्रस्य वर्षः।) भारतवर्षः। यथा, "योऽसौ मनुसुतः प्रियव्रतो नाम सम्राडीपाधिपतिर्बभूव तस्य चाग्नीध्रादयो दश पुत्रा बभूवुः तयः प्रव्रजिताः शिष्टानां सप्तानां सप्त द्वीपाः पित्रा दत्ताः। तत्र जम्बद्वीपाधिपतेराग्नीध्रस्य नव पुत्रा बभूवुः। नाभिः किंपुरुषश्चैव हरिवर्ष इलावृतः। रम्यो हिरण्मयश्चैव कुरुर्भद्राश्वकेतुमान्॥ नव वर्षाणि तेभ्यः पित्रा दत्तानि वर्षं प्रविभुता चाग्नीध्रेण। हिमालयस्याधिपतेर्नाभेर्ऋषभः पुत्रो बभूव ऋषभाद्भरतः भरतेन चिरकालं धर्म्मेण शासितत्वादिदं भारतं वर्षमभूत्।" इति नारसिंहे ३० अध्यायः॥

नाभी, स्त्री, (नाभि+वा ङीष्।) नाभिः। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ६०८।

"सनखपदमधिकगौरं नाभीमूलं निरंशुकं कृत्वा।
अनया सेवित पवनं त्वं किं क्षतमलयभृगुपातः॥")

नाभीलं, क्ली, (नाभौ लातीति। ला+कः।) नार्य्या वङ्क्षणः। क्षुक्षुम्। गर्भाण्डम्। इति मेदिनी। ले, १०१॥ नाभिगाम्भीर्य्यम्। इति हेमचन्द्रः॥

नाभ्यं, त्रि, (नाभेरिदमिति। नाभि+यत्।) नाभिसम्बन्धि। इति व्याकरणम्॥ (यथा, भागवते। २। ४। १६।

"पुरा मया प्रोक्तमजाय नाभ्ये
पद्मे निषण्णाय ममादिसर्गे॥"

नाभये हितम्। "शरीरावयवात् यत्।" ५। १। ६। इति यत्। "नाभि नभश्च।" ५। १। २। इत्यस्य वार्त्तिकोक्त्या भिन्नभादेशस्तु न भवति। अस्य गवादितया सां योगशिष्टत्वात् रथनाभावेव प्रवृत्तेः। नाँभिश्चेति च॥ महादेवे, पुं। यथा, महाभारते। १२। १८४। १६।

"नमो नाभाय नाभ्याय नमः कटकटाय च॥")

नाम, च्य, (नामयतीति नाम्यतेऽनेन वा। नम+णिच्+बाहुलकात् डः।) प्राकाश्यम्। सम्भावना। क्रोधः। उपगमः। कृत्सनम्। इत्यमरः। ३। ३। २५०॥ प्राकाश्ये यथा। हिमालयो नाम नगाधिराजः। हिमालयः प्राकाश्योऽतिप्रसिद्ध इत्यर्थः॥ सम्भाव्ये सम्भावनायाम् इह नाम सीता भविष्यति॥ क्रोधे ममापि नाम दशाननस्य परैरभिभवः॥ उपगमः साक्ष्योऽङ्गीकारः एवं नामाक्षु॥ कृत्सने को नामायं सचिवोदये स्वामभेवं विभक्ते॥ विस्मये च। अन्यो नाम गिरिमारोहति॥" इति तट्टीकायां भरतः॥ स्मरणम्। विकल्पः। इति मेदिनी। मे, ५३॥

नाम, [न्] क्ली, (नायते अभ्यस्यते यत् तत्। (ज्ञा अभ्यासे+"गामन् सोमन् व्योमन्निति।" उणां ४। १५०। इति मनिन्प्रत्ययेन निपातनात् साधुः।) संज्ञा। तत्पर्य्यायः। आख्या २ आह्वा २ अभिधानम् ४ नामधेयम् ५। इत्यमरः। १। ६। ८॥ आह्वानम् ६ लक्षणम् ७ व्यपदेशः ८ आख्यः ९ संज्ञा १० गोत्रम् ११ अभिख्या १२। इति शब्दरत्नावली॥ लिङ्गम्। तच्च स्यादिविभक्त्यन्तैः शब्दैः। तच्च पञ्चविधं यथा,—

"उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजम्।
शब्दानुकरणञ्चैव नाम पञ्चविधं स्मृतम्॥"

इति गोयीचन्द्रः॥

अवक्तव्यनामानि यथा,—

"आत्मनाम गुरोर्नाम नामानि क्षपयस्य च।
प्राणान्तेऽपि न वक्तव्यं श्रेष्ठपुत्रकलत्रयोः॥"

इति कर्म्मलोचनम्॥

नामकरणं, क्ली, (नाम्नः करणं यत्र।) संस्कारविशेषः। तत्रोक्तनक्षत्राणि यथा। अश्विनी १ रोहिणी ४ मृगशिराः ५ पुनर्व्वसुः ७ उत्तरफल्गुनी १२ स्वाती १५ अनुराधा १७ उत्तरा-

षाढ़ा२१ श्रवणा २२ धनिष्ठा २३ शतभिषा२४ उत्तरभाद्रपदा२५ रेवती २७ । तच्च लग्नं यथा। यल्लग्नस्थ प्रथमचतुर्थसप्तमदशमस्थाने शुभग्रहास्तिष्ठन्ति तल्लग्ने नामकरणं कार्य्यम् । तच्च दिननियमः । दश १० एकादश ११ द्वादश १२ शत १०० दिनानि । इति ज्योतिःसारसंग्रहः ॥ संवत्सरे वेति गोभिलः ॥ एतच्च प्रशस्ततरतमपरपरकालकर्म्मान्तरपरम् । एकादशाह इति सुखः कल्प इति रघुनन्दनमतम् ॥ * ॥ तदनुष्ठानं यथा । "जन्मगृहाभ्यन्तरे चन्द्रदर्शनात् प्राक् माता शुचिना वस्त्रेण कुमारमाच्छाद्य भर्त्तुर्दक्षिणतः स्थित्वा प्रयच्छत्युदक्शिरसं पश्चिमदेशं गत्वा उत्तरत उदग्ग्रेषु कुशेषु उपविशति अतः पितैवाधिकारी। अथ जुहोति प्रजापतये कुमारस्य तिथये नक्षत्राय । तिथिनक्षत्रयोर्देवताश्च ब्रह्मत्वष्टृविष्णुयमसोमकुमारसवितृरुद्रपित्र्याग्न्यधर्म्मरुद्रवायुमन्मथयक्षपितरः पौर्णमास्यां विश्वेदेवाः। एषां होमे विशेषमाह छन्दोगपरिशिष्टम् ।

'नामधेये सवितृसृष्टाचा बहुवत् सदा ।
यच्चाच पितरो देवा यथास्तिथिदेवताः ॥'

तेन सन्ध्यादयो बहुवचनान्ता होतव्याः । ग्रेवा एकवचनान्ता होतव्याः । नक्षत्राणि अश्विन्यादीनि । तद्देवताश्च ज्योतिषे । अश्वियमेत्यादयः । नक्षत्रहोमे छन्दोगपरिशिष्टम् ।

'आश्वेयादेऽथ सर्पादे विष्णाखादे तथैव च ।
आषाढ़ादे धनिष्ठादे अश्विन्यादे तथैव च ॥
इन्द्राग्न्यतानि बहुवदृचाणां जुहुयात् सदा ।
इन्द्रवयं द्विवच्छेषमवशिष्टान्यथैकवत् ॥'

तद्देवताहोमे विशेषः ।

'देवता अपि हूयन्ते बहुवत् सर्पवस्वपः ।
देवाश्च पितरश्चैव द्विवद्वाग्नेयौ तथा ॥'

देवाः विश्वेदेवाः । कवर्गादिपञ्चतीयादिवर्गान्यतमवर्गाद्यन्तरस्थं यरलवाद्यन्यतमवर्गमध्यं विन्दुभरादिवत् ह्रस्वं सम्बोधनान्तं दीर्घविसर्गान्तं च नाम कुर्य्यात् । एतच्च स्मृत्युक्तत्वात् प्रशस्तपरम् । कुलदेवतानक्षत्राभिसम्बन्धं च नाम कुर्य्यात् । तच्च ग्रन्थलिखितवच्चान्नामान्तरकरणव्यवहारः । अथ नक्षत्रसम्बन्धेन नामकरणं शतपदचक्रानुरोधात् स्वनक्षत्रपादानुसारेण । ततश्च कुमारस्य सुखभवान् प्राणनिर्गमोपायभूतान् छिद्रविशेषान् सप्त सुखमात्मनो नासिकं कर्णाविति अभिमुख्येन स्पृशन् कोऽसि कतमोऽसीति मन्त्रं जपेत् ॥ तच्च नाम शर्म्मवर्म्मान्तुपपदान्तत्वेन कर्त्तव्यम् । यथा,—

'ततस्तु नाम कुर्व्वीत पितैव दशमेऽहनि ।
देवपूर्व्वं नराख्यं हि शर्म्मवर्म्मादिसंयुतम् ॥
शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्रसंश्रयम् ।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥
वार्थहीनं न चाप्रश्नं नाप्रशब्दयुतं तथा ।
नामाक्रूरं जुगुप्सं वा नाम कुर्य्यात् समाचरम् ॥
गतिदीर्घं नातिह्रस्वं नातिगुर्व्वक्षरान्वितम् ।
सुखोच्चार्य्याक्षरं नाम कुर्य्याच्च प्रवणाक्षरम् ॥'

इति विष्णुपुराणे ३ अंशे १० अध्यायः ॥

प्रवणाक्षरं लघूत्तराक्षरम् । इति टीकाकारः॥ गोभिलः । 'अयुग्मकदान्तं तथा स्त्रीणाम् ।' अयुग्मकम् अयुगक्षरम् । दान्तं दकारान्तम् । यथा यशोदेत्यादि ॥ * ॥ तस्य श्रीपूर्व्वकत्वं यथा,—

'देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम् ।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्व्वं समुदीरयेत् ॥'

इति राघवभट्टधृतप्रयोगदर्शनात् स्वर्गकामित्वादिना सिद्धोऽधिकारो येषां नरानामित्यनेन जीवतां श्रीग्रन्थादित्यं नाम्नो न स्थानां तथेति शिष्टाचारः ॥ * ॥ गोभिलः । मात्रे क्षेत्रं प्रथमं नामधेयमाख्याय यथार्थमुदीच्यं वामदेयगानानां कुर्य्यात् गौर्दक्षिणा ।" इति संस्कारतत्त्वम् ॥

नामद्वादशी, स्त्री, (नाम्नः द्वादशी ।) व्रतविशेषः । यथा,—

"गौरी काली उमा भद्रा दुर्गा क्षान्तिः सरस्वती ।
मङ्गला वैष्णवी लक्ष्मीः शिवा नारायणी क्रमात् ।
मार्गशीर्षतृतीयामारभ्य पूर्व्वोक्तं लभते फलम् ॥
पूर्व्वोक्तं फलं मार्गादिद्वादशमासे क्षान्नाष्टमीव्रतफलम् ।
अर्द्धनारीश्वरं रुद्रमथवा उमशङ्करम् ॥
पूजयेद्विधिवन्नारी न वियोगमवाप्नुयात् ।
अथवा विष्णुरूपेण पूजयेच्छेश्वरं सदा ॥
शङ्करं वामभागस्थं सर्व्वकाममवाप्नुयात् ।
मार्गशीर्षादौ केशवनारायणमाधवान् पूजयेत् । धूपपुष्पदीपादीरुपोष्य संपूज्य दक्षिणाभिश्च नामभिः । अश्वमेधशतफलयावज्जीवपेयमतिराचनक्तमथाग्निहोमोपवासमेव । पुरुषमेवसौत्रामणिं पञ्चयज्ञहोमगोलक्षं सर्व्वमधाख्याप्यान्ते नित्यं स्मरणार्च्चनात्तन्नाम्ना । इत्याद्ये नामद्वादशी ।" इति देवीपुराणम् ॥

नामधेयं, क्ली, (नामैव । नाम+"भागरूपनामभ्यो धेयः ।" ५ । ४ । २५ । इत्यस्य वार्त्तिकोक्त्या धेयः ।) नाम । इत्यमरः ।१ । ६ । ८ ॥ (यथा, मनुः । २ । ३० ।

"नामधेयं दशम्यान्तु द्वादश्यां वास्य कारयेत् ।
पुण्ये तिथौ मुहूर्त्ते वा नक्षत्रे वा गुणान्विते ॥")

नामश्रेषः, पुं, (नाम्नः श्रेषो यस्य । नाम श्राखा एव श्रेषो यस्येति वा ।) रुतः । इति हेमचन्द्रः । ३ । ३८ ॥ मरणे, पुं ।

नामापराधः, पुं. (नाम्नि नामविषये अपराधः । नाम्नः सकाशात् अपराधो वा ।) साधुनिन्दादिरूपदुरदृष्टजनकव्यापारविशेषः । यथा,—

श्रीनारद उवाच ।

"के तेऽपराधा विप्रेन्द्र ! नाम्नो भगवतः स्मृताः ।
विविन्दन्ति नृणां क्षत्रं प्राक्तनं ब्रूनयन्ति च ॥
तत् कथ्यतां महाभागाऽपराधं नाम्नि केशवे ।
केन केन प्रकारेण भवेद्वै तज्जनादिषु ॥

सनत्कुमार उवाच ।

सतां निन्दा नाम्नः परममपराधं वितनुते
यतः ख्यातिं यातस्सुपहसते गर्हयति च ।
तथा विष्णोरिशं य इह गुणनामादि सकलं
धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः ॥
गुरोरवज्ञा श्रुतिशास्त्रनिन्दनं
तथार्थवादो हरिनाम्नि कल्पनम् ।
नाम्नो बलाद्यस्य हि पापबुद्धि-
र्न विद्यते तस्य यमैर्हि शुद्धिः ॥
द्विजोकसां गुरोः पित्रोर्भूसुराणाञ्च गर्हणम् ।
नामापराधं यत्तत् स्याद्वैष्णवानां तथा नृणाम् ॥
गोऽश्वत्थतुलसीधात्रीनृपाम्निन्दन्ति नारद ! ।
नामापराधी स भवेन्नाम गोविन्दवैष्णवान् ॥
सर्व्वतीर्थानि क्षेत्राणि धामन्यति निन्दति ।
गङ्गासरस्वतीयामौत्रापराधी भवेन्नरः ॥
श्रीमद्भागवतं महाभारतं ब्राह्मणान् गुरुम् ।
मन्त्रं महाप्रसादञ्च योऽवमन्यति नारदी ॥
अवतारान् हरेस्तत्तन्नामभक्तांश्च निन्दति ।
अवमन्यति देवर्षे नारदी स जनोऽधमः ॥
गोविन्दस्यार्च्चनं कुर्य्यादवमन्यति वैष्णवान् ।
निन्दतीह च नामानि स नाम्नोऽप्यपराधकृत् ॥
वर्णाश्रमाणामन्यांश्च जातिबुद्ध्यावमन्यति ।
वैष्णवान् कुरुते निन्दामपराधी नराधमः ॥
द्विजबन्धुं स्त्रियं शूद्रं जातिभेदेन वैष्णवम् ।
येऽवमन्यन्ति निन्दन्ति ते वै निरयगामिनः ॥
अर्च्चे विष्णौ शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिर्विष्णोर्वा वैष्णवानां कलिमलमथने पादतीर्थेऽम्बुबुद्धिः ।
विष्णोर्नाम्नोऽक्षरेऽर्थे सकलवदहनयोरन्यसामान्यबुद्धिर्विष्णौ सर्व्वेश्वरेशे तदितरसमधीर्यस्य वा नारकी सः ॥
पूज्यते देवसामान्यं ज्ञात्वा नारायणं नरः ।
नामापराधी स भवेद्वैष्णवान् यो न सेवते ॥

नारद उवाच ।

नामापराधा ह्यपराः कति सन्ति तपोधन ! ।
तत् कथ्यतां मे सकलं यदि योग्यो भवामि ते ॥

सनत्कुमार उवाच ।

वैष्णवे शूद्रतां विष्णौ गुरौ पित्रोश्च भूसुरे ।
निन्दां यः कुरुते मोहादपराधी स नारकी ॥"

इति पाद्मोत्तरखण्डे । १०२—१०३ अध्यायौ ॥

अपि च ।

"धर्म्मव्रतत्यागहुतादिसर्व्व-
शुभक्रियासाम्यमपि प्रमादः ।
अश्रद्दधाने विमुखेऽप्यशृण्वति
यश्चोपदेशः शिवनामापराधः ॥
श्रुत्वापि नाममाहात्म्यं यः प्रीतिरहितो नरः ।
अहं ममादि परमो नाम्नि सोऽप्यपराधकृत्

अपराधभञ्जनमाह ।

"जाते नामापराधेऽपि प्रमादेन कथञ्चन ।
सदा संकीर्त्तयेन्नाम तदेकशरणो भवेत् ॥

नायकः

नामापराधयुक्तानां नामान्येव हरन्त्यघम्।
अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि च॥
नामैकं यस्य वाचि स्मरणपथगतं श्रोत्रमूलं गतं वा
शुद्धं वाशुद्धवर्णं व्यवहितरहितं तारयत्येव सत्यम्।
तच्चेद्देहद्रविणजनतालोभपाषण्डमध्ये
निक्षिप्तं स्यान्न फलजनकं शीघ्रमेवात्र विप्र!॥"
इति श्रीहरिभक्तिविलासः॥

नामापराधी, [न्] त्रि, (नामापराधोऽस्यास्तीति। इनिः।) नामापराधकृत्। यथा,—
"नास्तो जनार्दनस्यापराधान् यः कुरुतेऽनिशम्।
नामापराधकङ्कोको याति सत्यमधोगतिम्॥
विनाशयति नामस्रोऽपराधं नामतो जनः।
नामापराधी ज्ञाणे स्यादात्मनश्चेति नारकी॥
यावन्तो दुर्ज्जनः पापी भवेन्नास्तो हरेः खलः।
नामापराधी मनुजो सुने! भवति नारकी॥
अपराधास्तुकुन्दस्य विदूरयति नामभिः।
नास्तीह लोके कुर्व्वंस्तान्महापाप्मधमाधमः॥"
इति पाद्मोत्तरखण्डे १०२ अध्यायः॥

नायः, पुं, (नीयतेऽनेनेति। नी+"अयनीभुवो ऽनुपसर्गे।" ३। ३। २४। इति करणे घञ्।) नयः। नीतिः। इत्यमरः। ३। २। ६॥ (यथा, भट्टिः। ७। ३६।
"यात यूयं यमस्यायं दिशं नायेन दक्षिणाम्॥"
नी+भावे घञ्।) प्रापणम्। इति नीधातुदर्शनात्॥ (नयति प्रापयतीति। नी+"दुञ्योरनुपसर्गे।" ३। १। १४२। इति णः। उपायः। यथा, भट्टिः। ६। ८२।
"नायः कोऽत्र स येन स्यां वताहं विगतज्वरः॥"
नेतरि, त्रि। यथा, ऋग्वेदे। ६। २४। १०।
"सचस्व नायमवसे अभीक इतो वा तमिन्द्र
प्राहि रिषः॥")

नायकः, पुं, (नयति प्रापयतीति। नी+ण्वुल्।) नेता। (यथा, गीतायाम्। १। ७।
"नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते॥")
श्रेष्ठः। (यथा, भागवते। ४। ७। १६।
"तमुपागतमालक्ष्य सर्व्वे सुरगणादयः।
प्रणेमुः सहसोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः॥")
हारमध्यमणिः। इति मेदिनी। के, ११०॥
अग्रे सरिकः। सेनापतिः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। २२२। ४।
"वध्यमानं बलं दृष्ट्वा वज्रशृङ्गे पुरन्दरः।
स्वसैन्यनायकार्थाय चिन्तामाप भृशं तदा॥")
शृङ्गारसाधकः। स च त्रिविधः। पतिरुपपतिर्वैशिकश्चेति। विधिवत् पाणिग्राहकः पतिः। अनुकूलदक्षिणधृष्टशठभेदात् पतिश्चतुर्द्धा। सार्व्वकालिकपराङ्गनापराङ्मुखत्वे सति सर्व्वकालमनुरक्तोऽनुकूलः। सकलनायिकाविषयसमसङ्गजानुरागो दक्षिणः। भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो धृष्टः। कामिनीविषयकपटपटुः शठः। आचारहानिहेतुः पतिरुपपतिः। बहुलवेश्याभोगोपरसिको वैशिकः। वैशिकस्तूत्तममध्यमाधमभेदात् त्रिविधः। दयिताश्रमप्रकोपेऽपि उपचारपरायण उत्तमः। प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गृह्णाति स मध्यमः। भयकृपालज्जाशून्यः कामक्रीड़ायामत्यन्तकृत्याकृत्यविचारोऽधमः॥*॥
मानी चतुरश्च शठ एवान्तर्भवति। वाक्चेष्टाबाह्यधर्मागमज्ञश्चतुरः। प्रोषितपतिरुपपतिर्वैशिकश्च भवति। अनभिज्ञनायको नायकाभास एव। तेषाञ्च नर्म्मसचिवपीठमर्द्दविटचेटकविदूषकभेदाच्चतुर्धा। कुपितस्त्रीप्रसादकः पीठमर्द्दः। नर्म्मसचिवोऽप्ययमेव। कामतन्त्रकलाकोविदो विटः। सन्धानचतुरश्चेटकः। अङ्गादिवेकृत्यैर्हासकारी विदूषकः॥*॥ तेषामष्टसात्त्विकगुणाः। यथा,—
"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका गुणाः॥"*॥
तेषां दशावस्था यथा,—
"अभिलाषस्तथा चिन्ता स्मृतिश्च गुणकीर्त्तनम्।
उद्वेगश्च प्रलापश्च उन्मादो व्याधिरेव च।
जड़ता निधनान्येव दशावस्थाः प्रकीर्त्तिताः॥"
इति रसमञ्जरी॥
(अस्य लक्षणभेदादिकं यथा, साहित्यदर्पणे।
३। ३३—३८।
"त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता॥
धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।
धीरप्रशान्त इत्यथसक्तः प्रथमश्चतुर्भेदः॥
अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थैर्य्यान् निगूढ़मानो धीरोदात्तो दृढ़व्रतः कथितः॥
मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः॥
निश्चिन्तो दृढ़रागिः कलापरो धीरललितः स्यात्।
सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात्॥"
एषाञ्च शृङ्गारिरूपत्वे भेदानाह तत्रैव। ३। ३६—४४।
"एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोड़शधा।
रघुत्वनेकमहिलासु समरागो दक्षिणः कथितः॥
कृतागा अपि निःशङ्कस्तर्জितोऽपि न लज्जितः।
दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः॥
अनुकूल एकनिरतः शठोऽयमेकत्र बद्धभावो यः।
दर्शितबहिरनुरागो विप्रियमन्यत्र गूढ़माचरति॥
एषाञ्च त्रैविध्यात् सर्व्वेषामुत्तममध्यमत्वेन।
उक्ता नायकभेदाश्चत्वारिंशत्तथाष्टौ च॥"
एषामुदाहरणादिकं तत्रैव द्रष्टव्यम्॥)

नायकाधिपः, पुं, (नायकानां नेतॄणां सेनापतीनां वा अधिपः।) नरेन्द्रः। राजा। इति शब्दरत्नावली॥

नायका

नायिका

नायिका, स्त्री, (नयति या। नी+ण्वुल्। टाप् अत इत्वञ्च।) दुर्गाशक्तिः। सा अष्टधा। यथा,—
"ततोऽष्टनायिका देया यत्नतः परिपूजयेत्॥
उग्रचण्डां प्रचण्डाञ्च चण्डोग्रां चण्डनायिकाम्।
अतिचण्डाञ्च चामुण्डां चण्डां चण्डवतीन्तथा॥
पद्मे चाष्टदले चेताः प्रागादिक्रमतस्तथा।
पद्मोपचारैः संपूज्य भैरवान्मध्यदेशतः॥"
इति प्रपञ्चितखण्डे ६१ अध्यायः॥
शृङ्गाररसालम्बनविभावरूपा नारी। सा च त्रिविधा। स्वीया परकीया सामान्यवनिता चेति। तत्र स्वामिन्येवानुरक्ता स्वीया। स्वीयापि त्रिविधा। मुग्धा मध्या प्रगल्भा च। तथा अङ्कुरितयौवना मुग्धा। सा च ज्ञातयौवना अज्ञातयौवना च। सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढ़ा। सैव क्रमशो ज्ञातप्रश्रया विश्रब्धनवोढ़ा। समानलज्जामदना मध्या। एवैव चातिप्रश्रयादतिविश्रब्धनवोढ़ा। पतिमात्रविषयकैलिकलाप्रकोविदा प्रगल्भा। मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे। धीरा अधीरा धीराधीरा चेति। अत्यल्पकोपप्रकाशा धीरा। अत्यल्पकोपप्रकाशा अधीरा। अत्यल्पात्यल्पकोपप्रकाशा धीराधीरा। एते धीराद्यास्त्रयो भेदा द्विधा भवन्ति। ज्येष्ठा कनिष्ठा च। परिणीतत्वे सति भर्त्तुरधिकस्नेहा ज्येष्ठा। परिणीतत्वे सति भर्त्तुर्न्यूनस्नेहा कनिष्ठा॥
अप्रकटपरपुरुषानुरागा परकीया। सा च द्विविधा। परोढ़ा कन्यका च। मुग्धा विदग्धा लक्षिता कुलटा अनुशयानासुदितास्वप्रभृतीनां परकीयायामेवान्तर्भावः। मुग्धा त्रिविधा। गुप्तसुरतगोपना च। वर्त्तिष्यमाणसुरतगोपना। वर्त्तमानसुरतगोपना च। विदग्धा द्विविधा। वाग्विदग्धा क्रियाविदग्धा चेति। अनुशयाना त्रिविधा। वर्त्तमानस्थानविघट्टनेन भाविस्थानाभावशङ्कया स्वानधिष्ठितसङ्केतस्थले भर्त्तुर्गमनानुमानेन॥*॥
वित्तमात्रोपाधिकसकलपुरुषाभिलाषा सामान्यवनिता। एता अन्यसम्भोगदुःखिता। वक्रोक्तिगर्व्विता मानवत्यश्च तिस्रो भवन्ति। वक्रोक्तिगर्व्विता द्विविधा। प्रेमगर्व्विता सौन्दर्य्यगर्व्विता च। मानवती यथा। प्रियापराधरुचिका चेष्टा मानः। स च लघुर्मध्यमो गुरुश्चेति। अस्थापनेयो लघुः। कथापनेयो मध्यमः। कथनमात्रापनेयो गुरुः॥*॥ एताः षोड़श अष्टाभिरवस्थाभिः प्रत्येकमष्टविधा। प्रोषितभर्त्तृका खण्डिता उत्कण्ठिता कलहान्तरिता विप्रलब्धा वासकसज्जा स्वाधीनपतिका अभिसारिका चेति गणनादष्टाविंशत्यधिकं शतं भेदा भवन्ति। तासासुत्तममध्याधमगणनया चतुरधिकाशीतिशतत्रयं भेदा भवन्ति। तत्रासां दिव्य-अदिव्य-दिव्यादिव्यभेदेन गणनया द्विषष्ट्यधिकशतत्रयसहस्रं भेदा भवन्ति। इति रसमञ्जरी॥*॥

(यथा च साहित्यदर्पणे । ३ । ६५—६३ ।
"अथ नायिका त्रिविधा स्वाऽन्या साधारणस्त्रीति।
नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता ॥
विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया।
सापि कथिता त्रिविधा मुग्धा मध्या प्रगल्भेति॥
प्रथमावतीर्णयौवनमदनविकारा रतौ वामा।
कथिता रूढ्या माने समधिकलज्जावती मुग्धा ॥
मध्या विचित्रसुरता प्ररूढ़स्मरयौवना।
ईषत्प्रगल्भवचना मध्यमव्रीड़िता मता ॥
स्मरान्धा गाढ़तारुण्या समस्तरतकोविदा।
भावोन्नता दरव्रीड़ा प्रगल्भाक्रान्तनायका ॥
ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे।
प्रियं सोत्प्रासवक्रोक्त्या मध्याधीरा दहेदिषा ॥
धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः।
प्रगल्भा यदि धीरा स्याच्छमकोपाकृतिस्तदा ॥
उदास्ते सुरते तत्र दर्शयन्त्यादरान् बहिः।
धीराधीरा तु सोल्लुण्ठभाषिते: खेदयेदसुम् ॥
तर्जयेत्ताड़येद्वाऽन्या प्रत्येकं ता अपि द्विधा।
कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति ॥
मध्याप्रगल्भयोर्भेदास्तस्माद् द्वादश कीर्तिताः।
मुग्धा लज्जैव तेन स्युः स्वीयाभेदास्त्रयोदश ॥
परकीया द्विधा प्रोक्ता परोढ़ा कन्यका तथा।
यात्रादिगिरतास्त्वन्योढ़ा कुलटा गलितत्रपा ॥
कन्या त्वजातोपयमा सलज्जा नवयौवना।
धीरा कलाप्रगल्भा स्यादेषा सामान्यनायिका ॥
निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि।
वित्तमात्रं समालोक्य सा रागं दर्शयेद् बहिः ॥
काममङ्गीकृतमपि परित्यजेदधनं नरम्।
मात्रा निष्क्रामयेद्देषा पुनः सन्धानकाङ्क्षया ॥
तस्कराः प्रच्छका मूर्खाः सुखप्राप्यधनास्त्रया।
लिङ्गिनश्छद्मकामाद्या आसां प्रायेण वल्लभाः ॥
एषापि मदनायत्ता क्वापि सत्यानुरागिणी।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम् ॥
अवस्याभिर्भवन्त्यष्टावेताः षोड़शभेदिताः।
स्वाधीनभर्तृका तद्वत् खण्डिताऽभिसारिका ॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा ॥
कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम्।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृका ॥
पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥
अभिसार्यां कान्तां या मन्मथवशंवदा।
स्वयं वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका ॥
संलीना स्वेषु गात्रेषु सूक्ष्मीकृतविभूषणा।
अवगुण्ठनसंवीता कुलजाऽभिसरेत् यदि ॥
विचित्रोज्ज्वलवेषा तु वलन्मृदुनिरीक्षणा।
प्रमोदभीरवचना स्याद् वेश्याऽभिसरेत् यदि ॥
मदस्खलितसंलापा विभ्रमत्पुङ्खलोचना।
व्याविद्धगतिसञ्चारा स्यात् प्रेष्याभिसरेद् यदि ॥*
प्रसङ्गादभिसारस्थानानि कथ्यन्ते।
क्षेत्रं वाटी भयदेवालयो दूतीगृहं वनम्।
मालयश्च श्मशानञ्च नद्यादीनां तटी तथा ॥
एवं कृताभिसाराणां पुंश्चलीनां विनोदने।
स्थानान्यष्टौ तथा ध्वान्तच्छन्नेषु क्वचिदाश्रयः ॥*॥
चाटुकारमपि प्राणनाथं रोषादपास्य या।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥
प्रियः कृत्वापि सङ्केतं यस्या नायाति सन्निधिम्।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता ॥
नानाकार्य्यव्यग्राद् यस्या दूरदेशं गतः पतिः।
सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्तृका ॥
कुरुते मण्डनं यस्याः सञ्जिते वासवेश्मनि।
सा तु वासकसज्जा स्याद्दिदृक्षप्रियसङ्गमा ॥
आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः।
तदनागमदुःखार्त्ता विरहोत्कण्ठिता तु सा ॥
इति साष्टाविंशतिप्रकृतसुत्तममध्यमाधमस्वरूपतः।
चतुरधिकाशीतियुतं शतत्रयं नायिकाभेदानां
स्यात् ॥

क्वचिदन्योन्यसाङ्कर्य्यमासां लक्ष्येषु दृश्यते।
इतरा अप्यसंख्यास्ता नोक्ता विस्तरभीरुया ॥"
एतासामुदाहरणानि तत्रैव विस्तरभीरुत्वान्नि।
अथासामलङ्काराः। यथा, तत्रैव । ३ । ६४ ।
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः।
अलङ्कारास्तत्र भावहावहेलास्त्वयोऽङ्गजाः ॥
शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता।
औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः ॥
लीलाविलासौ विच्छित्तिर्विब्बोकः किलकिञ्चितम्।
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ॥
विहृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम्।
हसितं चकितं केलिरित्यष्टादशसंख्यकाः।
स्वभावजाश्च भावाद्या दश पुंसां भवन्त्यपि ॥"
अथ मुग्धाकन्ययोरनुरागेङ्गितानि। यथा,
तत्रैव । ३ । १२३ ।
"हृदा दर्शयति व्रीड़ां सम्मुखं नैव पश्यति।
प्रच्छन्नं वा भ्रमन्तं वा तिर्यक् तं पश्यति प्रियम्॥
बहुधा पृच्छ्यमानापि मन्दमन्दमधोमुखी।
सगद्गदस्वरं किञ्चित् प्रियं प्रायेण भाषते ॥
अन्यैः प्रवर्त्तितां शृण्वत् सावधाना च तत्कथाम्।
ब्रूतोत्तरञ्च दत्ताक्षी प्रिये बालानुरागिणी ॥"
अथ सकलानामपि नायिकानामनुरागेङ्गितानि।
यथा, तत्रैव । ३ । १२४—१२५ ।
"चिराय सविधे स्थानं प्रियस्य बहु मन्यते।
विलोचनपथञ्चास्य न गच्छत्यनङ्गता ॥
कापि कुन्तलसंयानसंयमव्यपदेशतः।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥
आच्छादयति वागाद्यैः प्रियस्य परिचारकान्।
विश्वसितस्य भित्त्वेषु बहुमानं करोति च ॥
सखीमध्ये गुणान् ब्रूते स्वभर्तुं प्रददाति च।
सुप्ते स्वपिति दुःखस्य दुःखं धत्ते सुखे सुखम् ॥
स्थिता दृष्टिपथे शृण्वत् प्रिये पश्यति दूरतः।
आभाषते परिजनं सम्मुखे स्मरविक्रियम् ॥
यत् किञ्चिदपि संवीक्ष्य कुरुते हसितं मुधा।
कर्णकण्डूयनं तद्वत् कबरीमोक्षसंयमौ ॥
जृम्भते स्फोटयत्यङ्गं बालमाश्लिष्य चुम्बति।
भाषे तथा वयस्याया आरभेत् तिलकक्रियाम् ॥

अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते।
दशति स्वाधरं चापि ब्रूते प्रियमधोमुखी ॥
न सृशति च तं देशं नायको यत्र दृश्यते।
आगच्छति गृहं चास्य कार्य्यव्याजेन केनचित् ॥
दत्तं किमपि कान्तेन धृत्वाङ्गे सुचिरीक्षते।
नित्यं हृष्यति तद्योगे वियोगे मलिना कृशा ॥
मन्यते बहु तच्छीलं ततप्रियं मन्यते प्रियम्।
प्रार्थयतेऽल्पमूल्यानि सुप्ता न परिवर्त्तते ॥
विकारान् सात्त्विकानस्य सम्मुखी नाधिगच्छति।
भाषते सूनृतं स्निग्धमनुरक्ता नितम्बिनी ॥
एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रियाः।
मध्यव्रीड़ानि मध्यायाः संसमानत्रपाणि तु ॥
अन्यस्त्रियाः प्रगल्भायास्तथा सुवर्य्ययोषितः ॥
लेख्यप्रज्ञापने: स्निग्धैर्वीक्षितैर्मृदुभाषितैः।
दूतीसम्भाषणैर्नार्य्या भावाभिव्यक्तिरिष्यते ॥"*॥)
कस्तूरीविशेषः। यथा, राजनिर्घण्टे।
"चूर्णाकृतिस्तु खरिका तिलका तिलाभा
कौलत्यबीजसदृशी च कुलत्थिकाख्या।
स्थूला यतः क्रियदियं किल पिण्डिका स्या-
त्तस्माच्च किञ्चिदधिकापि च नायिकेषा ॥"

नारं, क्ली, (नराणां समूहः। नर+समूहे अण्।) नरसमूहः। इति व्याकरणम् ॥ (नरस्येदमिति। नर+"तस्येदम्।" ४ । ३ । १२० । इत्यण्।) नरसम्बन्धिनि, त्रि। यथा,—
"मलमूत्रपुरीषास्थिनिर्गतं त्वशुचि स्मृतम्।
नारं सृष्ट्वा तु सस्नेहं सचेलो जलमाविशेत् ॥"
इति सामान्यनिरूक्तौ जगदीशधृतस्मृतिवचनम्॥

नारः, पुं, (नरस्यायमिति। नर+अण्।) तर्णकः। जलम्। इति मेदिनी। रे, ५३ ॥

नारकः, पुं, (नरक एव। प्रज्ञाद्यण्।) नरकः। (नरके भवः। "तत्र भवः।" ४ । ३ । ५३ । इत्यण्।) नरकस्थप्राणिनि, त्रि। इत्यमरः। १ । ६ । १ ॥ (यथा, मार्कण्डेये । १५ । ७३ ।
"अनुकम्पामिमामद्य नारकेष्विह कुर्वतः।
तदेव धृतसाहस्रं संस्मासुपगतं तव ॥")

नारकी, [न्] त्रि, (नरको भोग्यतया अस्त्यस्येति। नरक+इनिः।) नरकस्थः। यथा,—
"परेण विहितं कर्म स्वकर्मेति वदेच्च यः।
स उच्यते ब्रह्मघाती महानारकिनारकी ॥"
इति हरिवंशपुराणे उत्तरखण्डे ७८ अध्यायः॥

नारकीटः, पुं, अग्निकीटः। (नारेषु नरसमूहेषु कीट इव दृष्टार्हत्वात्।) खद्योताग्निविहङ्गा। इति मेदिनी। टे, ६३ ॥

नारङ्गं, क्ली, (नृणातीति। नृ नये+बाहुलकात् अङ्गच् धातोर्द्वित्वञ्च। इदुज्ज्वलदत्तः। १।१२१।) गजेरभम्। इति राजनिर्घण्टः॥

नारङ्गः, पुं, (नृ नये+अङ्गच्। द्वित्वञ्च।) पिण्डखर्जूरसः। यमजप्राणी। विटः। इति मेदिनी। गे, ३६ ॥ फलवृक्षविशेषः। नारङ्गी इति भाषा। तत्पर्य्यायः। नागरङ्गः २ सुरङ्गः ३ त्वग्गन्धः ४ ऐरावतः ५ वक्त्रवासः ६ योगारङ्गः ७ योगरङ्गः ८ मरङ्गः ९ गन्धाढ्यः १० गन्धप्रियः ११

वरिष्ठः १२। अस्य गुणाः। मधुरत्वम्। अच्छत्वम्। गुरुत्वम्। उष्णत्वम्। रोचनत्वम्। वातानाहभिन्नमूलश्रमनाशित्वम्। बल्यत्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥ तत्कैशरगुणाः।

"अत्यन्तमीषन्मधुरं तृप्तं वातविनाशनम्।
रुच्यं वातहरञ्चैव नागरङ्गस्य केशरम्॥"

इति राजवल्लभः॥

नारदः, पुं, (नारं परमात्मविषयकं ज्ञानं ददातीति। दा+कः। यद्वा, नारं नरसमूहं त्रायति खण्डयति कलहेनेति। दो+कः। नारं जलं ददाति पिबद्भ्य इति वा। तदुक्तम्,—

"नारं पानीयमित्युक्तं तत् पिबद्भ्यः सदा भवान्।
ददाति तेन ते नाम नारदेति भविष्यति॥")

देवर्षिविशेषः। स तु भोगार्थी ब्रह्मशापादुपबर्हणनामा गन्धर्व्वो भूत्वा पुनर्ब्रह्मवीर्य्यात् शूद्रापत्न्यां जातः। यथा,—

शौनक उवाच।

"ब्रह्मवीर्य्यात्छूद्रपत्न्यां गन्धर्व्वश्चोपबर्हणः।
जातः केन प्रकारेण तद्भवान् वक्तुमर्हति॥

सौतिरुवाच।

कान्यकुब्जे च देशे च द्रमिलो गोपराजकः।
कलावती तस्य पत्नी वन्ध्या चापि पतिव्रता॥
स्वामिदोषेण सा वन्ध्या काले च भर्त्तुराज्ञया।
उपस्थितं वने घोरे नारदं काश्यपं मुनिम्॥
क्रोशमात्रञ्च श्रीकृष्णं ज्वलन्तं ब्रह्मवर्चसा।
तस्थौ सुवेषं कृत्वा सा ध्यानान्तञ्च मुनेः पुरः॥
उवाच विनयेनैव कृत्वा च श्रीहरिं हृदि।
गोपिकाहं द्विजश्रेष्ठ! द्रमिलस्य च कामिनी।
पुत्रार्थिनी चागताहं तन्मूलं भर्त्तुराज्ञया॥
वीर्य्याधानं कुरु मयि! स्त्री नोपेक्ष्या त्वयोचिता।
तेजीयसां न दोषाय वह्नेः सर्व्वभुजो यथा॥
वृषलीवचनं श्रुत्वा चुकोप मुनिपुङ्गवः।
वृषली तत्पुरस्तस्थौ शुष्ककण्ठौष्ठतालुका॥
एतस्मिन्नन्तरे तेन पथा यास्यति मेनका।
तस्या ऊरुस्थलं दृष्ट्वा मुनिवीर्य्यं पपात ह॥
ऋतुस्नाता च वृषली कृत्वा तद्भक्षणं मुदा।
सा विप्र! गेहे साध्वी च सुषुवे तनयं वरम्॥
तप्तकाञ्चनवर्णाभं ज्वलन्तं ब्रह्मतेजसा।
अनावृष्टावशेषे च काले बालो बभूव ह॥
नारं ददौ जन्मकाले तेनायं नारदाभिधः॥
ददाति नारं ज्ञानञ्च बालकेभ्यश्च बालकः।
जातिस्मरो महाज्ञानी तेनायं नारदाभिधः॥
वीर्य्येण नारदस्यैव बभूव बालको मुने!।
मुनीन्द्रस्य वरेणैव तेनायं नारदाभिधः॥
कल्पान्तरे ब्रह्मकण्ठाद्भूयुर्बहवो नराः।
नरान्ददौ ततः कण्ठञ्च तेन तस्मान्नरदः स्मृतः॥
ततो बभूव कालञ्च नारदात् कण्ठदेशतः।
ततो ब्रह्मा नाम चक्रे नारदश्चेति मङ्गलम्॥
एतस्मिन्नन्तरे विप्रा आययुर्विप्र मन्दिरम्।
शिशवः षष्टिवर्षीया महातेजस्विनो यथा॥
चतुर्व्वक्त्रो मुनिस्तस्मै ब्राह्मणाय कृपालवः।
ब्रह्मपुत्रं शिशुं कृत्वा विष्णुमन्त्रं ददौ मुदा॥
महाज्ञानी शिशुरूपी गङ्गातीरे मनोहरे।
तत्र स्नात्वा विप्रदत्तं विष्णुमन्त्रं जजाप सः॥
दिव्यं वर्षसहस्रञ्च निराहारः कृशोदरः।
ददर्श बालको ध्याने दिव्यं लोकञ्च बालकम्॥
द्विभुजं मुरलीहस्तचन्दनेन विचर्चितम्।
विरराम च शोकार्त्तो यदा यद्दृष्टमक्षमः॥
रुरोदाश्वत्थमूले च न दृष्ट्वा बालकं शिशुः।
बभूवाकाशवाणीति रुदन्तं बालकं प्रति॥
सत्यं दृष्टं शिशो रूपं तदेव नाधुना पुनः।
पुनर्द्रक्ष्यसि गोविन्दं जन्ममृत्युहरं हरिम्॥
इति श्रुत्वा बालकश्च विरराम सुदान्वितः।
काले तत्याज तीर्थे च तनुं कृष्णं हृदि स्मरन्॥
बभूव ग्रामसुक्तिश्च नारदस्य महासने!।
तनुं त्यक्त्वा स जीवश्च विलीनो ब्रह्मविग्रहे॥
कतिकल्पान्तरेऽतीते सृष्टुं सृष्टिविधौ पुनः।
मरीचिमिश्रैर्मुनिभिः सार्द्धं कण्ठाद्बभूव सः॥
नारदश्चेति विख्यातो मुनीन्द्रस्तेन हेतुना॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २१—२२ अध्यायौ॥

तस्य सर्व्वदा भ्रमणकारणं यथा,—

"तांश्चापि नष्टान् विज्ञाय पुत्रान् दक्षप्रजापतिः।
क्रोधञ्चक्रे महाभाग! नारदं स शशाप च॥"

नारदशापश्च श्रीभागवतोक्तः।

"तस्माल्लोकेषु ते मूढ़ न भवेद्भ्रमतः पदम्।"

इति विष्णुपुराणे १ अंशे १५ अध्यायस्य टीका च॥ (पञ्चविंशतिसहस्रश्लोकात्मक उपपुराणविशेषः। यथा, देवीभागवते। १। ३। ६।

"षोडशैव सहस्राणि पुराणञ्चामितं स्मृतम्।
पञ्चविंशतिसाहस्रं नारदं परमं मतम्॥"

आकरोपस्य पर्व्वतविशेषः। यथा, मात्स्ये। १२१। ११।

"नारदो नाम चैवोक्तो दुर्गशैलो महाश्चितः।
तत्राश्चर्ये समुत्पन्नौ पूर्व्वं नारदपर्व्वतौ॥"

विश्वामित्रपुत्रविशेषः। यथा, महाभारते। १३। ४। ५८।

"उर्व्वशीयोनिरुदपेचनी नारदश्च महाऋषिः।
विश्वामित्रात्मजाः सर्व्वे मुनयो ब्रह्मवादिनः॥")

नारा, स्त्री, (नरस्य सुनेरियम्। नर+"तस्येदम्।" ४। ३। १२०। इति अण्। ततष्टाप्।

"यद्यपि अणि कृते ङीप्प्रत्ययः प्राप्नुतथापि छान्दसत्वाच्चैरपि स्मृतिषु व्यवहारात् सर्व्वे विधयश्छन्दसि विकल्पन्ते इति पाक्षिको ङीप् प्रत्ययः। तस्याभावपक्षे सामान्यलक्षणप्राप्ते टापि कृते नारा इति रूपसिद्धिः।" इति मनुसंहिताटीकायां कुल्लूकभट्टः। १।१०।) जलम्। इति शब्दरत्नावली॥ (यथा, मनुः। १। १०।

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृतः॥")

नाराचः, पुं, (नारं नरसमूहं आचामतीति। चमु अदने+"अन्येष्वपि दृश्यते।" ३।२।१०१। इति डः।) समुदायलौहमयबाणः। तत्पर्य्यायः। प्रचुडनः २। इत्यमरः। २। ८। ८७॥ लोहनालः ३। इति शब्दरत्नावली॥ (यथा, हरिवंशे भविष्यपर्व्वणि १२६ अध्याये।

"सर्व्वलौहास्तु ये बाणा नाराचास्ते प्रकीर्त्तिताः।
पञ्चभिः पृथुलैः पर्व्वैर्युक्ताः सिध्यन्ति कस्यचित्॥")

दुर्दिनम्। इति शब्दमाला॥ (अष्टाक्षरछन्दोवृत्तविशेषः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥ वैद्यकोक्तौषधविशेषः। यथा, भावप्रकाशे उदररोगाधिकारे।

"शुक्तीरदन्तीत्रिफलाविडङ्ग-
सिंहीत्रिवृच्चित्रकसर्ज्यकल्कैः।
घृतं विपक्वं कुडवप्रमाणं
तोयेन तस्यात्तसमेन कर्षम्॥
पीतोष्णमम्भोऽनुपिबेद्विरेके
पेयं रसं वा प्रपिबेद्विधिज्ञः।
नाराचमेनं जठरामयानां
सूक्तं प्रयुक्तं प्रवदन्ति सन्तः॥"

इति नाराचघृतम्॥ *॥)

नाराचिका, स्त्री, (नाराचस्येदमाकारोऽस्यस्या इति। नाराच+ठन्। टाप्।) नाराची। इति शब्दरत्नावली॥ (अष्टाक्षरवृत्तविशेषः। तल्लक्षणं यथा,—

"नाराचिका तरौ लगौ॥")

नाराची, स्त्री, (नाराचवदाकृतिरस्यस्या इति। अच्। गौरादित्वात् ङीष्।) स्वर्णकारादीनां नाराचाकृतिलौहतुला। निक्ति इति भाषा। तत्पर्य्यायः। नाराचिका २ एषणिका ३ एषणी ४। इति शब्दरत्नावली॥

नारायणः, पुं, (नारा जलं अयनं स्थानं यस्य। अय गतौ+भावे ल्युट्। सर्व्वे गत्यर्थाः प्राप्त्यर्थाश्च इति नियमात् नारस्य ज्ञानस्य सूक्तेर्वा अयनं प्राप्तिर्यस्मात् इति वा। "नराणां समूहो नारं तत्रायनं स्थानं यस्य नारायणः रेफात् परनकारस्य बलविधानात् सर्व्वप्राणिबुद्धिगुहानिवासाच्छुद्धचैतन्यमित्यर्थः।" इति शब्दरत्नावलिः।) विष्णुः। तस्य चत्वारो व्यूहाः। वासुदेवसङ्कर्षणप्रद्युम्ननिरुद्धाख्याः। इति महाभारतम्॥ वेदान्तमते। शुद्धान्तर्यामिसूत्रविराड्राख्याः॥ तन्नामश्रुत्युत्पत्तिर्यथा,—

"सारूप्यमुक्तिवचनो नारेति च विदुर्बुधाः।
यो देवोऽप्ययनं तस्य स च नारायणः स्मृतः॥
नाराच्च कृतपापाच्चाप्ययनं गमनं स्मृतम्।
यतो हि गमनं तेषां सोऽयं नारायणः स्मृतः॥
नारस्य मोक्षणं पुण्यमयनं ज्ञानमीप्सितम्।
तयोर्ज्ञानं भवेद्यस्मात् सोऽयं नारायणः स्मृतः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २०६ अः॥

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
अयनं तस्य ताः पूर्व्वं तेन नारायणः स्मृतः॥"

इति विष्णुपुराणम्॥

यद्वा।

"नाराजातानि तत्त्वानि नारमीति विदुर्बुधाः।
तान्येव चायनं तस्य तेन नारायणः स्मृतः॥"

तथा ।
"यच्च किञ्चिज्जगत् सर्व्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत् सर्व्वं व्याप्य नारायणः
स्थितः ॥"
तथा ।
"प्रकृतेः परः एवात्मा स नरः परिकीर्त्तितः ।
तस्येमानि च भूतानि नाराणीति प्रचक्षते ।
तेषामप्ययनं यस्मात्तस्मान्नारायणः स्मृतः ॥"
अस्मिन्नन्तरे नरनामऋषेरपत्यतां गतः इति
नारायणः । इत्यमरटीकायां भरतः । * ।
("नराणामयनाच्चापि ततो नारायणः स्मृतः ॥"
इति महाभारते । ५ । ७० । १० ॥)
अस्य स्वरूपो यथा,—
"श्रीकृष्णश्च द्विधारूपो द्विभुजश्च चतुर्भुजः ।
चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः स्वयम् ॥
चतुर्भुजस्य पत्नी च महालक्ष्मीः सरस्वती ।
गङ्गा च तुलसी चैव देवी नारायणप्रिया ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६४ अध्यायः ॥
तस्य ध्यानं यथा,—
"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥"
इत्यादित्यहृदयम् ॥
अपि च ।
"शङ्खचक्रगदापद्मधरं कमललोचनम् ।
शुद्धस्फटिकसङ्काशं क्वचिन्नीलाम्बुजच्छविम् ॥
गरुडोपरिशुक्लाब्जपद्मासनगतं हरिम् ।
श्रीवत्सवक्षसं शान्तं वनमालाधरं परम् ॥
केयूरकुण्डलधरं किरीटमुकुटोज्ज्वलम् ।
निराकारं ज्ञानगम्यं साकारं देहधारिणम् ॥
चिदानन्दं निरानन्दं सूर्य्यमण्डलमध्यगम् ।
मन्त्रेणानेन देवेशं विष्णुं भज शुभानने ! ॥"
इति कालिकापुराणे २२ अध्यायः ॥
तन्नाममाहात्म्यं यथा,—
"नारायणाच्युतानन्तवासुदेवेति यो नरः ।
सततं कीर्त्तयेत् भूमे ! याति मद्भवनं प्रिये ! ॥"
इति वराहपुराणम् ॥
"सकृन्नारायणेत्युक्त्वा पुमान् कल्पशतत्रयम् ।
गङ्गादिसर्व्वतीर्थेषु स्नातो भवति निश्चितम् ॥"
इति श्रीकृष्णजन्मखण्डे १०८ अध्यायः ॥
"नारायणेति शब्दोऽस्ति वाचि वज्रनिभो नृणाम् ।
तथापि नरके मूढाः पतन्तीह किमद्भुतम् ॥"
इति महाभारतम् ॥
तस्य तुष्टिजनककर्म्माणि यथा,—
श्रीकृष्ण उवाच ।
"कर्म्मणा येन विप्रेन्द्र ! तुष्टिर्मे हृदि जायते ।
क्रोधश्च तन् समस्तं ते कथयामि समासतः ॥
यो दयालुर्द्विजश्रेष्ठ ! सर्व्वभूतेषु सर्व्वदा ।
सत्यहारेण हीनश्च तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्मणे कर्म्मणाम्नेऽर्थे यो धर्म्मे भक्तिसंयुतः ।
इति यत्नार्थं दृष्टस्तं तस्य तुष्टोऽस्म्यहं सदा ॥
मिष्टं वस्तु समासाद्य दत्त्वा मे योऽत्ति मानवः ।
मानापमानसङ्गस्तस्य तुष्टोऽस्म्यहं सदा ॥
सर्व्वभूतशरीरस्थं यो मां जानाति मानवः ।
परहिंसाविहीनो यस्तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्माणि कुरुते यस्तु सुविचार्य्य पुनः पुनः ।
गोब्राह्मणहितैषी च तस्य तुष्टोऽस्म्यहं सदा ॥
स्वयं निरुक्तं वचनं यत्नाद् यः परिपालयेत् ।
प्रपन्नं पाति यत्नाद्यस्तस्य तुष्टोऽस्म्यहं सदा ॥
दानान्यनुपकारिभ्यो यो ददाति द्विजोत्तम ! ।
मयि चित्तं सदा यस्य तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्मणा येन तुष्टोऽस्मि निरुक्तं तत् समासतः ॥"
तस्य रोषजनककर्म्माणि यथा,—
"रुष्टोऽस्मि कर्म्मणा येन विप्र ! वक्ष्यामि श्रवणय
तत् ॥
परहिंसारतो यस्तु निन्द्यः सर्व्वजनैस्तु ।
अहंयुः सर्व्वदा क्रुद्धः स मां नयति शत्रुताम् ॥
असत्यभाषी क्रूरश्च परनिन्दापरस्तु यः ।
परवर्त्मनविध्वंसी स मां नयति शत्रुताम् ॥
अदृष्टदोषौ पितरौ स्त्रीभ्रातृभगिनीस्तथा ।
मोहात्त्यजति मूढो यः स मां नयति शत्रुताम् ॥
पिष्टनिर्म्मितं सत्त्वं यस्तु कुरुते मूढधीर्नरः ।
गुर्व्वङ्गाश्च विप्रेन्द्र ! स मां नयति शत्रुताम् ॥
दम्भत्योर्भेदनं यस्तु हेतुमात्रेण केनचित् ।
कुरुते ब्राह्मणश्रेष्ठ ! स मां नयति शत्रुताम् ॥
विप्रस्वं देवताद्रव्यं परद्रव्यञ्च मानवः ।
हरते यस्तु विप्रेन्द्र ! स मां नयति शत्रुताम् ।
आरामक्षेत्रिणो ये च जलाशयविलोपिनः ।
ग्रामनाशकरा ये च तेषां रुष्टोऽस्म्यहं सदा ॥
परस्त्रियं समालोक्य विषादं यान्ति ये जनाः ।
हृष्यन्ति पापचर्च्चां ये तेषां रुष्टोऽस्म्यहं सदा ॥
द्विपन्त्यनाथं ये मूढा अनाथस्त्रं हरन्ति ये ।
विश्वासघातिनो ये च तेषां रुष्टोऽस्म्यहं सदा ॥
ये च गोवीरहन्तारो वृषलीपतयश्च ये ।
अश्वत्थघातिनो ये च तेषां रुष्टोऽस्म्यहं सदा ॥
ब्रह्मविष्णुमहेशानां मध्ये ये भेदकारिणः ।
वेदनिन्दाकरा ये च तेषां रुष्टोऽस्म्यहं सदा ॥
एकादश्यां भुञ्जते ये मोहात् पापधियो नराः ।
परदाराहृतरक्ता ये तेषां रुष्टोऽस्म्यहं सदा ॥
पापबुद्धिप्रदा ये च ये च मिथ्याहृतो द्विज ! ।
धात्रीतरुञ्च ये घ्नन्ति तेषां रुष्टोऽस्म्यहं सदा ॥
दिवसे मैथुनं ये च कुर्व्वते काममोहिताः ।
रजस्वलां स्त्रियं यान्ति तेषां रुष्टोऽस्म्यहं सदा ॥
ये च दुष्टासुरां नारीं मोहान्मन्यन्ति सत्तम ! ।
व्रतस्थाश्च सदा ते मां नयन्ति शत्रुतां भुवि ॥
अमावास्यातिथौ ये च कुर्व्वते निशिभोजनम् ।
भोजनद्वयमेकार्के तेषां रुष्टोऽस्म्यहं सदा ॥
आमिषं मैथुनं तैलममावास्यादिने द्विजाः ।
न ये त्यजन्ति विप्रेन्द्र ! तेषां रुष्टोऽस्म्यहं सदा ॥
बहुनात्र किमुक्तेन संक्षेपात्तं वदाम्यहम् ।
निन्दन्ति वैष्णवान् ये च तेषां रुष्टोऽस्म्यहं
सदा ॥"
इति क्रियायोगसारे २८ अध्यायः ॥
अजामिलपुत्रः । यथा,—
"कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ।
नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः ॥
तस्य प्रवयसः पुत्रा दश तेषान्तु योऽवमः ।
बालो नारायणो नाम्ना प्रियोऽभूच्च दयितो भृशम् ॥
दूरे क्रीड़नकासक्तं पुत्रं नारायणाह्वयम् ।
प्राविशेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः ॥
म्रियमाणस्य सुबहो हरिकीर्त्तनम् ।
भर्त्तुर्नाम महाराज ! पार्श्वदाः सहसापतन् ॥
विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलम् ।
यमप्रेष्यान् विष्णुदूता वारयामासुरोजसा ॥"
इति श्रीभागवते षष्ठस्कन्धे प्रथमाध्यायः ॥
सैन्यविशेषः । यथा,—
"मत्तसंहननतुल्यानां गोपानामर्ब्बुदं महत् ।
नारायणा इति ख्याताः सर्व्वे संग्रामयोधिनः ॥"
"दुर्य्योधनश्च तत् सैन्यं सर्व्वमावारयत्ततः ।
सहस्राणां सहस्रञ्च योधानां प्राप्य भारत ! ॥"
इति महाभारते । ५ । ७ अध्यायः ॥
धर्म्मपुत्रर्षिविशेषः । यथा,—
"धर्म्मस्य दक्षदुहितर्यजनिष्ट मूर्त्त्यां
नारायणो नर इति स्वतपःप्रभावः ॥"
इति श्रीभागवते । २ । ७ । ६ ॥
"दक्षयज्ञक्षमाक्षेत्रे नरो नारायणो भवेत् ॥"
इति यतिधर्म्मः ॥
(ऋग्यजुर्व्वेदान्तर्गतोपनिषद्विशेषः । यथा.
मुक्तिकोपनिषदि ।
"गर्भो-नारायणो हंसो विष्णुर्नादशिरःशिखा ॥"
चूर्णौषधिविशेषः । यथा, भावप्रकाशे उदररोगाधिकारे ।
"यवानी हपुषा धान्यं चित्रका चोपकुञ्चिका ।
कारवी पिप्पलीमूलमजगन्धा वचा ॥
घृताक्षा जीरको बोधं सर्ज्जक्षारो यवक्षकम् ।
द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम् ॥
विडङ्गञ्च समांशानि दत्त्वा भागत्रयं भवेत् ।
चित्रद्विगुणे द्विगुणे सप्तला स्याच्चतुर्गुणा ॥
एष नारायणो नाम्ना चूर्णो रोग गणापहः ।
एवं प्राप्य निवर्त्तन्ते रोगा विष्णुमिवासुराः ॥
तर्कैर्गोदरभिः पेयो गुल्मिभिर्व्वादराम्बुना ।
आनद्धवाते सुरया वातरोगे प्रसन्नया ॥
दधिमण्डेन विड्बन्धे दाड़िमाम्बुभिरर्शसि ।
परिकर्त्तिषु दृष्टाम्बैरजाम्बुभिरजीर्णके ॥
भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे ।
छर्द्दीरोगे वह्निरोगे कुष्ठे मन्देऽनले ज्वरे ॥
इंद्राविषे मूलविषे सगरे क्षत्रिमे विषे ।
यथार्हं स्निग्धकोष्णेन पेयमेतद्विरेचनम् ॥")
नारायणक्षेत्रं, क्ली, (नारायणस्य क्षेत्रं स्थानम् ।
गङ्गाप्रवाहावधिहरक्षत्रचतुष्टयमितनारायणस्वामिकस्थानम् । यथा, ब्रह्मपुराणे ।
"प्रवाहमवधिं कृत्वा यावद्धरक्षत्रचतुष्टयम् ।
अत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥"
"अत्र किञ्चिन्न दत्तञ्च साक्षात् पात्राय पुण्यवान् ।

अत्र प्रतिग्रहे राजन्! विक्रीता जाङ्घली भवेत्॥
विक्रीतायाच्च जाङ्घल्यां विक्रीतोऽभूज्जनार्दनः।
जनार्दने च विक्रीते विक्रीतं भुवनत्रयम्॥
कोऽपि न त्राणकर्त्तास्य निःसम्बन्धप्रसङ्गतः॥"
तत्र कर्त्तव्यानि यथा,—
"दीक्षाच्च देवपूजाच्च जपं गङ्गातटे चरेत्।
शुष्कवासः पिधायापि सावित्रीजपमाचरेत्॥
आद्यच्च तर्पणञ्चैव परोपकारकर्म्म च।
परोद्वेगश्च मनसा व्यक्तव्यस्य दापने।
स्तवपाठश्च मौनञ्च नीचालापविवर्জ্জनम्॥
केवलं वारिपानञ्च कर्त्तव्यं ब्रह्मभावतः।
एतानि किल कर्म्माणि चैत्रे नारायणे चरेत्॥"

इति हरिहरर्म्मपुराणे ४५ अध्यायः॥

अवशिष्टं गङ्गाशब्दे द्रष्टव्यम्॥

नारायणतैलं, क्ली, (नारायणाख्यं तैलम्।) औषधपक्वतैलप्रभेदः। तत्तद्विधम्। स्वल्पं हरितं महच्च। यथा,—
"विल्वाग्निमन्थश्योनाकपाटलापारिभद्रकाः।
प्रसारण्यश्वगन्धा च हरितो कण्टकारिका॥
बला चातिबला चैव स्वदंष्ट्रा सपुनर्नवा।
एषां दशपलान् भागान् चतुर्द्रोणेऽम्भसः पचेत्॥
पादशेषं परिस्राव्य तैलप्रस्थं प्रदापयेत्।
घृतपुष्पा देवदारु मांसी श्रेयसी वचा॥
चन्दनं तगरं कुष्ठं एलापर्णी चतुष्टयम्।
रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम्॥
एषां द्विपलिकान् भागान् पेषयित्वा विनिःक्षिपेत्।
घृतावरी रसञ्चैव तैलतुल्यं प्रदापयेत्॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम्॥
पाने वस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते।
अश्वो वा वातसंभग्नो गजो वा यदि वा नरः॥
पङ्गुलः पीठसर्पी च तैलेनानेन सिध्यति।
अधोभागे च ये वाताः शिरोमध्यगताश्च ये।
दन्तमूले हनुस्तम्भे मन्यास्तम्भे गलग्रहे॥
यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला।
क्षीणेन्द्रिया नष्टयुक्ता ज्वरक्षीणाश्च ये नराः॥
बधिरा लक्षजिह्काश्च मन्दमेधस एव च।
अल्पप्रजा च या नारी या च गर्भं न विन्दति॥
वातार्त्ता वृषणौ येषामन्नद्रुह्यश्च दारुणाः।
एतत्तैलवरं तेषां ज्ञात्वा नारायणं स्मृतम्॥"

इति स्वल्पनारायणतैलम्॥ १॥ *॥

"घृतावरी चांशुमती वृश्चिपर्णी शटी बला।
एरण्डस्य च मूलानि हरितस्य च पूतिकस्य च॥
गवेधुकस्य मूलानि तथा सहचरस्य च।
एषां दशपलान् भागान् जलद्रोणे विपाचयेत्॥
पादशेषे रसे पूते गर्भे चैनं समावपेत्।
पुनर्नवा वचा दारु घृताक्ता नन्दनागुरु॥
श्रेयसी तगरं कुष्ठं एला मांसी स्थिरा बला।
अश्वाक्ता सैन्धवं रास्ना पलार्द्धानि च पेषयेत्॥
गव्याजपयसः प्रस्थौ द्वौ द्वावत्र प्रदापयेत्॥
घृतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत्।
अस्य तैलस्य सिद्धस्य प्रयुञ्जीत वीर्य्यमतःपरम्॥
अश्वानां वातभग्नानां कुञ्जराणां तथा नृणाम्।
तैलमेतत् प्रयोक्तव्यं सर्ब्बवातनिवारणम्॥
आयुष्मांश्च नरः पीत्वा निश्चयेन दृढो भवेत्।
गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी तथा॥
हृच्छूलं पार्श्वशूलञ्च तथैवार्द्धावभेदकम्।
अपर्ची गण्डमालाञ्च वातरक्तं हनुग्रहम्॥
कामलां पाण्डुरोगञ्च अश्मरीञ्चापि नाशयेत्।
तैलमेतद्भगवता विष्णुना परिकीर्त्तितम्।
नारायणमिति ख्यातं वातान्तकरणं शुभम्॥"

इति हरिहरनारायणतैलम्॥ २॥ *॥

"विल्वाग्निमन्थश्योनाकपाटलापारिभद्रकाः।
प्रसारण्यश्वगन्धा च हरितो कण्टकारिका॥
बला चातिबला चैव स्वदंष्ट्रा सपुनर्नवा।
एषां दशपलान् भागान् चतुर्द्रोणेऽम्भसः पचेत्॥
पादशेषं परिस्राव्य तैलप्रस्थं प्रदापयेत्।
घृतपुष्पा देवदारु मांसी श्रेयसकं

दग्निप्रज्ञानं कृत्वोल्लेखनादि कृत्वान्नग्रहेण ब्रह्मणे विष्णवे शिवाय यमाय सपरिवाराय चतुरः पिण्डान् दत्त्वा प्रेतनामगोत्रे स्मृत्वा विष्णुनाम्ना पञ्चमं दत्त्वाभ्यर्चनान्तेभ्यो दक्षिणां दत्त्वैकं प्रेतं स्मृत्वा विप्रेभ्यः संतोष्य विप्रैः प्रेतायेदं तिलोदकसुपतिष्ठतामिति सतिलमुदकं दापयित्वा भुञ्जीतेति। अत्र विशेषान्तरं भट्टकृतान्येष्विपद्रष्टव्यं ज्ञेयम्। * ॥ सर्पदष्टे तु वर्षपर्यन्तं पूर्वं श्लोकभक्तपूर्वं शुक्लपञ्चम्यामुपवासं नक्तं वा कृत्वा पिष्टमयं नागमनन्तवासुकिशङ्खपद्मकम्बलकर्कोटकाश्वतरधृतराष्ट्रशङ्खपालकालियतक्षककपिलेति नामभिः प्रतिमासं संपूज्य पायसेन विप्रान् संभोज्य वत्सरान्ते हैमं नागं गाञ्च प्रत्यब्दञ्च दत्त्वा नारायणबलिं कुर्य्यात्। मूलन्तु हेमाद्रौ ज्ञेयम्। * ॥ बौधायनसूत्रे सर्पेभ्यस्तानां नमोऽस्तु सर्पेभ्य इति तिस्र आहुतीर्हुत्वोदके स्नानां समुदाय वरुणाय हुतेति क्रियां कुर्य्यादिति शेषः। व्यासः।

सौवर्णभारनिष्पन्नं नागं कृत्वा तथैव गाम्।
शस्त्राय दत्त्वा विधिवत् पितुरानृण्यमाप्नुयात्॥'
हेमाद्रौ भविष्ये।

'प्रसन्नां पद्मगं हेमं स्वर्णेनैकेन कारयेत्।
क्षीरान्यपात्रमध्यस्थं पूज्यविप्राय दापयेत्॥
प्रायश्चित्तमिदं प्रोक्तं नागदष्टस्य शूलिनेति॥'
अपरार्कस्मृत्यन्तरे।

तदेव शुध्यति प्रेतो नारायणबली कृते।
यो ददाति क्रियापिण्डं तस्मै प्रेताय वै सुतः।
तस्यैवाप्यौर्ध्वदैहिकं चाहमेव न संशयः॥
विष्णुश्राद्धसमाप्तौ तु त्रयोदश्यां दिनत्रयम्।
अशौचं पिण्डदः कुर्य्यान्न तदूर्ध्वमुशोचजाः॥
यस्य वै मृत्युकाले तु युच्छिन्ना सन्ततिर्भवेत्।
स वसेन्नरके नित्यं पञ्चमन्वः करो यथा॥'
इत्युपक्रम्य,—
'बलिं नारायणं कुर्य्यात्तस्योद्देशेन भक्तिमान्॥'
इति गारुडोक्तेरपुत्रस्यापि पत्न्यादेः कार्य्यमित्युक्तं देवयाज्ञिकेन।" इति निर्णयसिन्धौ ५ परिच्छेदः॥

नारायणास्त्र, क्ली, (नारायणस्यास्त्रम्।) विष्णोरस्त्रभेदः। तत्स्वरूपं यथा, देवीपुराणे।
"तदा दानवनाथेन युक्तं नारायणं प्रभम्।
शङ्खचक्रगदाहस्तं खड्गशृङ्गधनुस्थितम्॥"
अपि च।
"ततो हरिहरं युद्धमभवद्रोमहर्षणम्।
रुद्रः पाशुपतास्त्रेण विव्याध हरिमोजसा॥
हरिर्नारायणास्त्रेण रुद्रं विव्याध कोपवान्।
नारायणं पाशुपतसुभेऽस्त्रे रोचिषि रोचिते॥
युयुधाते भृशं दिव्यं परस्परनिषूदया।
दिव्यं वर्षसहस्रन्तु तयोर्युद्धमभूत्तदा॥
तत्रैकं शृङ्गटोद्भूतं सङ्ख्यज्वटजालकम्।
एकं प्रभापयच्छस्त्रमन्यं डमरुकं शुभम्॥
एकं खड्गधरं तत्र तथान्यं दण्डधारिणम्।
एकं कौस्तुभभीमाङ्गमन्यं मूर्तिविभूतिकम्॥

एकं गदां भामयन्तं द्वितीयं दण्डमेव च।
एकः क्षोभति कण्ठस्थैर्मणिभिस्त्रिभिः परः।
एकं पीताम्बरं तत्र द्वितीयं सर्पमेखलम्॥
एवन्तौ सङ्गिनावस्त्रौ रुद्रनारायणात्मकौ।
अथोत्पातिशयोपेतौ तदा लोकपितामहः॥
उवाच शाम्यतामस्त्रे स्वस्वभावेन सुव्रते।
एवन्ते ब्रह्मणा चोक्ते शान्तभावं प्रजग्मतुः॥
तथा विष्णुहरौ ब्रह्मा वाक्यमेतदुवाच ह।
उभौ हरिहरौ देवौ लोके ख्यातिं गमिष्यतः॥"
इति वराहपुराणम्॥

नारायणी, स्त्री, (नारायणस्येयमिति। नारायण+अण्+ङीप्।) दुर्गा। (यथा, मार्कण्डेये। ६१। ६।
"सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि! नमोऽस्तु ते॥"
इयं सुपार्श्वस्थपीठस्थाने एतन्मूर्त्या विराजते। यथा, देवीभागवते। ७। ३०। ६६।
"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥")
लक्ष्मीः। घृतावरी। इति हेमचन्द्रः॥ * ॥
तस्या निरुक्तिर्यथा,—
"यशसा तेजसा रूपैर्नारायणसमा गुणैः।
शक्तिर्नारायणस्येयं तेन नारायणी स्मृता॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४५ अध्यायः॥
अपि च।
"नारायणार्द्धाङ्गभूता तेन तुल्या च तेजसा।
तदा तस्य शरीरस्था तेन नारायणी स्मृता॥"
इति तत्रैव श्रीकृष्णजन्मखण्डे २७ अध्यायः॥*॥
गङ्गा। यथा, तत्रैव।
"गङ्गायै विश्वसुखायै शिवायै तापहारिण्यै नारायणायै नमः॥"
(यथा च काशीखण्डे। २६। ६७।
"नभोऽङ्गनचरी नृतिर्नेत्या नारायणी स्मृता॥")
सुफलतुलसिपत्रा। इति पुराणम्॥ (स्वनामख्याता श्रीकृष्णसम्बन्धिनी सेना। इयं हि भारतयुद्धे दुर्य्योधनपक्षमाश्रितवती॥)

नारिकेरः, पुं, (नारिकेलः+लस्य रः।) नारिकेलः। इति शब्दरत्नावली॥

नारिकेलः, पुं, (किल स्वैर्ये क्रीड़ने च+भावे घञ्। नार्य्या रमण्याः केल इव सुखदायी केलो यस्य। पृषोदरादित्वात् डस्य लः।) स्वनामप्रसिद्धफलवृक्षविशेषः। तत्पर्य्यायः। लाङ्गली२। इत्यमरः।२। ४। १६८॥ नारिकेरः३ नाड़िकेलः४ नारीकेलः५ नारीकेली६ नारिकेरी७। इत्यादि भरतः। नारिकेलिः८ सदापुष्पः९ शिरःफलः१०। इति शब्दमाला॥ नालिकेरः११ रसफलः१२ सुतुङ्गः१३ कूर्चशेखरः१४ दृढ़नीलः१५ नीलतरुः१६ मङ्गल्यः१७ उच्चतरुः१८ लवराजः१९ स्कन्धतरुः२० दालिशाल्यः२१ दुरारुहः२२ स्रोम्बकफलः२३ दृढ़फलः२४। इति राजनिर्घण्टः॥ कूर्चशेखरः२५ तुङ्गः२६ स्कन्धफलः२७ उच्चः२८ सदाफलः२९। इति भावप्रकाशः॥ शिराफलः३० करकाभाः३१ पयोधरः३२ मत्कुणः३३ कौधिकफलः३४ फलशुष्कः३५ घटाफलः३६ शुष्कफलः३७ विश्वामित्रप्रियः३८। इति शब्दरत्नावली॥ नारकेरः३९ सुभङ्गः४० फलकेसरः४१। इति जटाधरः॥ अस्य गुणाः। गुरुत्वम्। स्निग्धत्वम्। शीतत्वम्। पित्तनाशित्वञ्च॥ * ॥ अर्द्धपक्वस्य तस्य गुणाः। लघ्वग्नीषशमनत्वम्। दुर्जरत्वञ्च॥ * ॥ बालनारिकेलजलगुणाः। लघुत्वम्। शीतलत्वम्। रसपाके मधुरत्वम्। पित्तपीनसतृष्णास्रविदाहभ्रान्तिशोषशमनत्वम्। सुखदायित्वञ्च॥ * ॥ पक्वनारिकेलजलगुणाः। किञ्चित्पित्तकारित्वम्। रुचिदत्वम्। मधुरत्वम्। दीपनत्वम्। बलकरत्वम्। गुरुत्वम्। वृष्यत्वम्। वीर्य्यवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ * ॥
"नारिकेलफलं शीतं दुर्जरं वस्तिशोधनम्।
विदध्यि वृंहणं बल्यं वातपित्तास्रदाहजुत्॥
विशेषतः कोमलनारिकेलं
निहन्ति पित्तोल्वरमम्लदोषान्।
तदेव जीर्णं गुरु पित्तकारि
विदाहि विष्टम्भि मतं भिषग्भिः॥
तस्याम्भः शीतलं वृष्यं दीपनं शुक्रलं लघु।
पिपासापित्तजित् स्वादु वस्तिशुद्धिकरं परम्॥"
तस्य मस्तिष्कगुणाः।
"नारिकेलस्य तालस्य खर्जूरस्य शिरांसि तु।
कषायस्निग्धमधुरं हृद्यानि गुरूणि च॥"
इति भावप्रकाशः॥ * ॥
"बालस्य नारिकेलस्य जलं प्रायो विरेचनम्॥"
इति राजवल्लभः॥ * ॥
कांस्यपात्रे तज्जलं मद्यतुल्यम्। यथा,—
"नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु।
गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना॥"
इति कर्म्मलोचनम्॥

नारिकेलक्षीरी, स्त्री, (नारिकेलोद्भवा क्षीरी।) सिताशर्कराव्यंसंयुक्तगोदुग्धपक्वक्षीरितनारिकेलखण्डम्। यथा,—
"नारिकेलं तनूकृत्य छिद्रं पयसि गोः क्षिपेत्।
सिताशर्कराव्यंसयुक्तं तत्पक्वेक्षुरसेन वा॥"
तस्या गुणाः।
"नारिकेलोद्भवा क्षीरी स्निग्धा शीतातिपुष्टिदा।
गुर्व्वी सुमधुरा हृद्या रक्तपित्तानिलापहा॥"
इति भावप्रकाशः॥

नारी, स्त्री, (नृनरस्य वा धर्म्मा। नृ+"ऋतोऽङ्।" ४।४।६६। इति अञ्। नर+"नराच्चेति वक्तव्यम्।" इति वार्त्तिकोक्त्या अञ्। "प्राङ्नरवाद्यो ङीन्।" ४। १। ७३। इति ङीन्।) नृनरस्य वा धर्म्माचारोऽस्याम्। नृनरस्य वेयम्। नरधर्म्माचारयुक्ता। तत्पर्य्यायः॥ स्त्री २. योषित् ३ अबला ४ योषा ५ सीमन्तिनी ६ वधूः ७ प्रतीपदर्शिनी ८ वामा ९ वनिता १० महिला ११। इत्यमरः। २। ६। २॥ प्रिया १२ रामा १३ अनिः १४ अनी १५

योषिता १६ जोषित् १७ जोषा १८ जोषिता १९ धनिका २० महैलिका २१ महेला २२। इति शब्दरत्नावली॥ शूर्ब्बरी २३ योषीत् २४ सिन्दूरतिलका २५ सुभ्रू: २६। इति जटाधर:॥

अस्या उत्पत्तिकारणं यथा,—

"माल्यरक्तोत्तरा नारी।" अन्यच्च।

"विषमायां तिथौ चित्रं कुर्य्याद्वीजन्तु कन्यकाम्॥"

इति सुखबोध:॥

तस्याश्चतस्रो जातय:। यथा,—

"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा।
चतस्रो जातयो नार्य्या रतौ ज्ञेया विशेषत:॥"

इति रसमञ्जरी॥

(आसां लक्षणादिकं यद्उक्तं रतिमञ्जर्य्याम्। ३—१३।

"भवति कमलनेत्रा नासिका चुरचन्द्रा
अविरलकुचयुग्मा चारुकेशी केशाङ्गी।
मृदुवचनसुशीला गीतवाद्यानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा॥
भवति रतिरसज्ञा नातिखर्व्वा न दीर्घा
तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी।
घनकठिनकुचाढ्या सुन्दरी बह्वशीला
सकलगुणसमेता चित्रिणी चित्रवक्त्रा॥
दीर्घातिदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता।
रेखात्रयेण च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा॥
स्थूलाधरा स्थूलनितम्बभागा
स्थूलाङ्गुली स्थूलकुचा सुशीला।
कामोत्सुका गाढ़रतिप्रिया या
नितान्तभोक्त्री करिणी मता सा॥

शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम्।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम्॥
पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी।
शङ्खिनी चारगन्धा च मृगगन्धा च हस्तिनी॥
बाला च तरुणी प्रौढ़ा वृद्धा भवति नायिका।
गुणयोगेन रन्तव्या नारी वश्या भवेत्तदा॥
आ षोड़शाद् भवेद्बाला तरुणी चित्रका मता।
पञ्चपञ्चाशका प्रौढ़ा भवेद्वृद्धा तत: परम्॥
फलमूलादिभिर्बाला तरुणी रतियोगत:।
प्रेमदानादिभि: प्रौढ़ा वृद्धा च ढङ्कताड़नात्॥
बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत्॥") सा त्रिविधा यथा,—

"योषितस्त्रिविधा ब्रह्मन्! गृहिणां सुखचेतसाम्।
साध्वी भोग्या च कुलटा ता: सर्व्वा: स्वार्थतत्पराः।
परलोकभयात् साध्वी तथेह यशसात्मन:।
कामसिद्ध्यर्थमेव स्याद्भर्तु: सेवा च सन्ततम्॥
भोग्या भोग्यार्थिनी शश्वत् कामसिद्ध्यै च केवलम्।
करुते पतिसेवाञ्च न च भोग्या दृढ़व्रतम्॥
वस्त्रालङ्कारसम्भोगं सस्निग्धाहारसुत्तमम्।
यावत् प्राप्नोति सा भोग्या तावच्च वशगा प्रिया॥२॥
कुलाङ्गारसमा नारी कुलटा कुलकामिनी।
कपटात् कुरुते सेवां स्वामिनो न च भक्तित:॥
सदा पुंयोगमाशंसुर्मनसा मदनातुरा।
आहारादधिकं जारं प्रार्थयन्ती नवं नवम्॥
जारार्थे स्वपतिं तात! हन्तुमिच्छति पुंश्चली।
तस्यां यो विश्वसेन्मूढ़ो जीवन्नस्य निष्फलम्॥
कथिता योषित: सर्व्वा उत्तमाधममध्यमा:।
स्वात्मारामा विजानन्ति मनसा तां न पण्डिता:॥"३॥

तस्या: स्वभावो यथा,—

"हृदयं क्षुरधाराभं शरत्पद्मोत्पलं सुखम्।
सुधोपमं सुमधुरं वचनं स्वार्थसिद्धये॥
प्रकोपे विषतुल्यं तदनूहं शीलकुत्सितम्।
दुर्ज्ञेयं तदभिप्रायं निगूढं कर्म्म केवलम्॥
तंदा तासामविनयं प्रबलं साहसं परम्।
दद्यौ कार्य्यच्छलात् कार्य्यं शश्वन्माया दूरत्यया॥
पुंसश्चाष्टगुण: काम: शश्वत्कामो जगद्गुरो!।
आहारो द्विगुणो नित्यं नैर्घृण्यञ्च चतुर्गुणम्॥
कोप: पुंस: षड्गुणश्च अध्यवसायश्च निश्चितम्।
यत्रैते दोषनिवहा: कास्था तत्र पितामह!।
का क्रीड़ा किं सुखं पुंसो विश्वस्त्राश्रयवेश्मनि॥
तेज: प्रनष्टं सम्भोगे दिवालापे यश:क्षय:।
धनक्षयस्तिप्रीतौ रत्यासक्तौ वपु:क्षय:॥
साहित्यं पौरुषं नष्टं कलहे माननाशनम्।
सर्व्वनाशश्च विश्वासे ब्रह्मन्नारीषु किं सुखम्॥
यावद्धनी च तेजस्वी सश्रीको योग्यतापर:।
पुमान्नारीं वशीकर्त्तुं समर्थस्तावदेव हि॥
रोगिणं निर्गुणं वृद्धं योषिन्नापेक्षते प्रियम्।
लोकाचारतया तस्मै ददात्याहारमल्पकम्॥"

इति ब्रह्मवैवर्त्तपुराणे ब्रह्मखण्डे २३ अध्याय:॥

(नारीचरित्रदूषणकारणानि यथा, हितोपदेशे। १। १३१—१३२।

"स्नातव्यं पितृमन्दिरे निवसतिर्यात्रोत्सवे सङ्गति:
गोष्ठी पूरुषसन्निधावनियमो वासो विदेशे तथा।
संसर्ग: सह पुंश्चलीभिरसकृत् तृप्तेर्निजाया: क्षति:
पत्युर्वार्द्धकमीर्षितं प्रवसनं नाशस्य हेतु: स्त्रिया:॥"

अपरञ्च,—

"पानं दुर्ज्जनसंसर्ग: पत्या च विरहोऽटनम्।
स्वप्नोऽन्यगेहे वासो नारीणां दूषणानि षट्॥"

इयन्तु यथानियमं प्रतिपालिता कल्याणकरी श्रीवृद्धिकारिणी च। यदुक्तं मनौ।३।५५—६०।

"पितृभिर्भ्रातृभिश्चैता: पतिभिर्देवरैस्तथा।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभि:॥
यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवता:।
यत्रैतास्तु न पूज्यन्ते सर्व्वास्तत्राफला: क्रिया:॥
शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम्।
न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्व्वदा॥
जामयो यानि गेहानि शपन्त्यप्रतिपूजिता:।
तानि कृत्याहतानीव विनश्यन्ति समन्तत:॥
तस्मादेता: सदा पूज्या भूषणाच्छादनाशनै:।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च।
सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥")

अगम्या नार्य्यो यथा,—

"माता माल्यस्वसा श्वश्रूर्मातुलानी पितृस्वसा।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी तथा॥
भागिनेयी तथा चैव राजपत्नी तथैव च।
तथा प्रव्रजिता नारी वर्णोत्कृष्टा तथैव च॥
इत्यगम्यासु निर्दिष्टासासासु गमने नर:।
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वधमर्हति॥"

इति मत्स्यपुराणे २०१ अध्याय:॥

तस्या: शुभलक्षणं यथा,—

"निगूढ़गुल्फौ पतितौ पद्मकान्तितलौ शुभौ।
अस्वेदिनौ मृदुतलौ मत्स्याङ्कुशकरान्वितौ॥
वज्रालङ्कलक्षिह्नौ च दास्या: पादौ ततोऽन्यथा।
जङ्घे च रोमरहिते सुवृत्ते विभ्रिते शुभे॥
अनुल्बणं सन्धिदेशं समं जानुद्वयं शुभम्।
ऊरू करिकराकारावरोमौ च समौ शुभौ॥
अश्वत्थपत्रसदृशं विपुलं गुह्यमुत्तमम्।
श्रोणीललाटकं स्त्रीणामुन्नतं शुभम्॥
गूढ़ो मणिश्च शुभदा नितम्बश्च गुरु: शुभ:।
विस्तीर्णमांसोपचिता गम्भीरा विपुला शुभा॥
नाभि: प्रदक्षिणावर्त्ता मध्यं त्रिवलिशोभनम्।
अरोमशौ स्तनौ पीनौ घनाविषमौ शुभौ॥
कठिनारोम उरो वृत्तग्रीवा च कम्बुता।
आरक्तावधरौ श्रेष्ठौ मांसलं वर्त्तुलं सुखम्॥
कुन्दपुष्पसमा दन्ता भाषितं कोकिलासमम्।
दाक्षिण्ययुक्तमशठं हंसशब्दसुखावहम्॥
नासा समा समपुटा स्त्रीणान्तु रुचिरा शुभा।
नीलोत्पलनिभं चक्षुर्नासंलग्नौ न लम्बकौ॥
न पृथू बालेन्दुनिभे भ्रुवौ चाथ ललाटकम्।
शुभमर्द्धेन्दुसंस्थानमतुङ्गं स्यादलोमशम्॥
अमांसलं कर्णयुगं समं मृदु समाहितम्।
स्निग्धा नीलाश्च मृदवो मृद्वीजा: कुञ्चितेक्षणा:॥
स्त्रीणां समं शिर: श्रेष्ठं पादे पाणितले तथा।
वाजिकुञ्जरश्रीवृक्षयूपेषु यवतोमरै:॥
ध्वजचामरमालाभि: शैलकुण्डलवेदिभि:।
शङ्खातपत्रपद्मैश्च मत्स्यस्वस्तिकसद्मभि:॥
लक्षणैरङ्कुशाद्यैश्च स्त्रिय: स्यू राजवल्लभा:॥
निगूढ़मणिबन्धौ च पद्मगर्भोपमौ करौ।
न निम्नं नोन्नतं स्त्रीणां भवेत् करतलं शुभम्॥
रेखान्विता: शुभविधात्र्यं कुर्य्यात् सम्भोगिनीं स्त्रियम्।
रेखा या मणिबन्धोत्था गता मध्याङ्गुलीं करे॥
गता पाणितले या च योद्धा पादतले स्थिता।
स्त्रीणां पुंसां तथा सा स्याद्राज्याय च सुखाय च॥
कनिष्ठिका मूलरेखा कुर्य्याच्चैव भ्रातायुषम्।
प्रदेशिनीमध्यमाभ्यामन्तरालगता सती॥
ऊना ऊनायुषं कुर्य्यादेखा चाङ्गुष्ठमूलगा।

दृष्टाः पुत्रान्वयास्तु प्रमदाः परिकीर्त्तिताः ॥
अल्पायुषि लघु छिन्ना दीर्घा छिन्ना महायुषि ।
शुभन्तु लक्षणं स्त्रीणां प्रोक्तं वसुभमन्यथा ।"॥
तस्या अशुभलक्षणं यथा,—
"कनिष्ठिकानामिका वा यस्या न स्पृशते महीम् ।
अङ्गुष्ठं वा गतौ यस्यास्तर्ज्जनी कुलटा च सा ॥
जङ्घाभ्यां पिण्डिकाभ्यां जङ्घे चातिगिरालके ।
रोमशे चातिमांसे च कुभाकारं तथोदरम् ॥
वामावर्त्ते निम्नमध्यं दुःखितानाञ्च गुह्यकम् ।
ओष्ठया ह्रस्वा निम्ना दीर्घया च कुलक्षयः ॥
एथुलया प्रचण्डाश्च स्त्रियः स्युर्नात्र संशयः ।
केकरे पिङ्गले नेत्रे श्यावे लोलेक्षणासती ॥
सिते कूपे गण्डयोश्च सा ध्रुवं व्यभिचारिणी ।
प्रलम्बिनि ललाटे च देवरं हन्ति चाङ्गना ॥
उदरे श्वशुरं हन्ति पतिं हन्ति स्फिचोर्द्वयोः ।
या तु रोमोत्तरौष्ठी स्यान्न शुभा भर्त्तुरेव हि ॥
स्तनौ सरोमावशुभौ कर्णौ च विषमौ तथा ।
करालविषमा दन्ताः क्लेशाय च भयाय च ॥
पौर्य्याय कृष्णमांसाश्च दीर्घा भर्त्तुश्च मृत्यवे ।
क्रथादरूपैर्दन्तैश्च टककाकादिसन्निभैः ॥
सिरालैर्विषमैः शुष्कैर्वित्तहीना भवन्ति हि ।
समुन्नतोत्तरोष्ठी या कलहे रूक्षकेशिनी ॥
स्त्रीषु दोषा विरूपाश्च यत्राकारो गुणस्ततः ।"
इति गरुड़पुराणम् ॥
(व्याचरत्तिविशेषः । इति छन्दोमञ्जरी ॥)

नारीकवचः, पुं, (नार्य्याः कवचः सन्नाह इव यस्य ।) सूर्य्यवंशीयमूलकराजः । स च अम्बरीषपुत्रः । सौदासपौत्रश्च । "योऽसौ निःक्षत्रे प्रातर्ब्राह्मणेऽस्मिन् क्रियमाणे स्त्रीभिर्विवस्त्राभिः परिवार्य्य रक्षितः । ततस्तं नारीकवचमुदाहरन्ति ।" इति विष्णुपुराणे । ४ । ४ । ३८ ॥

नारीकेलः, पुं, (किल क्रीड़ने + भावे घञ् । नार्य्या केल इव केलो सम्मोदो यत्र ।) नारिकेलः । इति शब्दरत्नावली ॥

नारीकेली, स्त्री, (नारीकेल + गौरादित्वात् ङीष् ।) नारिकेलः । इति शब्दरत्नावली ॥

नारीघं, क्ली, (नाड़ीघ + ह्रस्व रत्वम् ।) शाकविशेषः । नालिता इति भाषा ॥ तद्विविधं तिक्तं मधुरञ्च । तिक्तस्य गुणः । रक्तपित्तहरत्वम् । कृमिकुष्ठविनाशित्वञ्च । मधुरस्य गुणाः । पिच्छिलत्वम् । शीतत्वम् । विष्टम्भिकफवातकारित्वञ्च । इति राजवल्लभः ॥

नारीतरङ्गकः, पुं, (नारीं तरङ्गयति चञ्चलचित्तां करोतीति । तरङ्ग + कर्त्तरि णिच् + ण्वुल् ।) विड्गः । इति शब्दमाला ॥

नारीदूषणं, क्ली, (नारीणां दूषणम् ।) स्त्रीणां दोषः । स च षड्विधः । यथा,—
"पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट् ॥"
इति मनुः ॥

नारीष्टा, स्त्री, (नारीणां इष्टा प्रिया ।) मल्लिका । इति राजनिर्घण्टः ॥

नार्य्यङ्गः, पुं, (नारीणामङ्गमिव शोभनं अङ्गं यस्य ।) नागरङ्गः । इति शब्दरत्नावली ॥ (नार्य्या अङ्गे, क्ली ॥)

नालं, क्ली, (नलतीति । नल बन्धे + "क्वलितिकसन्तेभ्यो वा ।" ३ । १ । १४० । इति णः ।) उत्पलादिदण्डः । तत्पर्य्यायः । नाला २ । इत्यमरः । २ । ६ । २२ ॥ नाली ३ नालिका ४ । इति भरतः ॥ (यथा, रघुः । ६ । १३ ।
"कञ्चित् कराभ्यामुपगूहनाल-
मालोलपत्त्राभिहतद्विरेफम् ।
रजोभिरन्तःपरिवेषबन्धि
लीलारविन्दं भ्रमयाञ्चकार ॥"
अर्द्धर्चादित्वात् पुंलिङ्गोऽपि ॥) हरितालम् । इति स्वामी ॥ नले, पुं । इति राजनिर्घण्टः ॥

नालवंशः, पुं, (नालो वंश इव ।) नलः । इति राजनिर्घण्टः ॥

नाला, स्त्री, (नल बन्धे + णः । ततष्टाप् ।) नालम् । इत्यमरभरतौ ॥ डाँटा इति नाड़ा इति च भाषा । (नलति जलादिर्निर्गच्छत्यनयेति । नल + करणे घञ् । जलनिर्गममार्गः । यथा, मार्कण्डेये । ३ । ४३ ।
"यथा तोयार्थिनस्तोयं यन्त्रनालादिभिः शनैः ।
आपिबेयुस्तथा वायुं पिबेद्योगी जितश्रमः ॥")

नालिः, स्त्री, (नालयतीति । नल + णिच् + इन् ।) नाड़ी । सिरा । इति द्विरूपकोषः ॥

नालिकः, पुं, (नल एव नालस्तृणविशेषः । स भोक्तव्यत्वेनास्त्यस्येति ठन् ।) महिषः । इति त्रिकाण्डशेषः ॥ क्ली, (नालमस्त्यस्येति ।) पद्मम् । इति शब्दरत्नावली ॥ (नालः कार्य्यसाधनत्वेनास्त्यस्येति । नाल + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् । अस्त्रविशेषः । तन्तु आकृतिकार्य्यादिना अधुनातनस्य 'बन्दूक' इति ख्यातस्यास्त्रस्य सादृश्यं लभते । अस्य आकृत्यादिकन्तु शुक्रनीतौ उक्तम् । तद्यथा,—
"अस्त्रन्तु द्विविधं ज्ञेयं नालिकं मान्त्रिकं तथा ।
यदा तु मान्त्रिकं नास्ति नालिकं तत्र धारयेत् ॥
नालिकं द्विविधं ज्ञेयं दृहत्क्षुद्रप्रभेदतः ।
तिर्य्यग्दृङ्निच्छिद्रमूलं नालं पञ्चवितस्तिकम् ॥
मूलाग्रयोर्लक्ष्यभेदि तिलबिन्दुयुतं सदा ।
यन्त्राघातासहत्वं स्यादचूर्णध्नं कर्णमूलकम् ॥
सुकाष्ठोपाङ्गयुग्मञ्च मध्याङ्गुलविलान्तरम् ।
खाग्नेयिचूर्णसन्धात्र गोलाकारसंयुतं दृढम् ॥
लघुनालिकमध्येतत् प्रधार्य्यं पत्तिसादिभिः ।
यथा यथा तु त्वक्सारं यथा स्थूलविलान्तरम् ॥
यथा दीर्घं दृढत् गोलं दूरभेदि तथा तथा ।
स्थूलकीलभ्रमात् लक्ष्यसमसन्धानभाजि यत् ॥
दृढन्नालिकसंज्ञन्तत् काष्ठवृन्नविवर्जितम् ।
प्रयात्यं शकटाद्येषु सुयुक्तं विजयप्रदम् ॥"
अस्य कार्य्यं यथा,—
"नालास्त्रं शोधयेदादौ दद्यात्तत्राग्निचूर्णकम् ।
निवेशयेत्तु दण्डेन नालमूले यथादृढम् ॥
ततः सुगोलकं दद्यात् ततः कर्णेऽग्निचूर्णकम् ।

यन्त्रचूर्णमिदानेन गोलं लक्ष्ये निपातयेत् ॥
लक्ष्यभेदो यथा बाणो धनुर्ज्याविनियोगतः ।
भवेत्तथा तु सन्धाय————————")

नालिका, स्त्री, (नाला एव । स्वार्थे कन् । टापि अत इत्वम् ।) नाला । इति शब्दरत्नावली ॥ नालिताशाकः । इति शब्दमाला ॥ (यथा, सुश्रुते । १ । ४६ ।
"वातलं नालिकाशाकं पित्तघ्नं मधुरञ्च तत् ॥")
चर्म्मकषा । इति जटाधरः ॥ हस्तिकर्णवेधनिका । इति हारावली । ३० ॥ (यथा, माघे । १७।३५।
"गजाः सहस्रत्करतललोलनालिका
हता मुहुः प्रणदितघण्टमाययुः ॥")

नालिकेरः, पुं, (नारिकेलः । रलयोरैक्यात् रस्य लः । लस्य रश्च ।) नारिकेलः । इत्यमरटीकायां रमानाथः ॥ (क्वचित् क्लीवेऽपि दृश्यते । यथास्य गुणाः ।
"नालिकेरं सुमधुरं गुरुशीतञ्च शीतलम् ।
वृष्यं संदंहणं वस्तिशोधनं रक्तपित्तनुत् ॥
विष्टम्भि पक्वं मतिमन्नपक्वं कफवातलम् ।
दंहणं शीतलं वृष्यं नालिकेरफलं विदुः ॥"
इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥
अस्य तोयगुणा यथा,—
"नालिकेरोदकं स्निग्धं स्वादु वृष्यं हिमं लघु ।
दाहापित्तानिलहरं दीपनं वस्तिशोधनम् ॥"
इति वाभटे शशस्थाने षष्ठेऽध्याये ॥)

नालिकङ्कः, पुं, (रोगकारकः । इति हारावली । ८४ ॥

नालिता, स्त्री, (नालमिता प्राप्ता ।) खनामख्यातशाकः । यथा,—
"नालिता षट्शाकश्च मिश्रपत्रे तु नालिका ॥"
इति शब्दमाला ॥
अस्य गुणाः नारीचशब्दे द्रष्टव्याः ॥

नाली, स्त्री, (नालि + वा ङीष् ।) शाककड़म्बकः । डाँटा इति भाषा । इति मेदिनी । ले, २८ ॥ हस्तिकर्णवेधनी । घटी । इति त्रिकाण्डशेषः ॥ नाड़ी । इत्यमरटीकायां भरतः ॥ (यथा,—
"रसवाहिनीश्च नालीर्जिह्वामूलगलतालुओष्ठ्यः ।
संशोष्य तृषां देहे कुरुतस्तृषां महावलावेतौ ।
पीतं पीतं हि जलं शोधयतस्तमतो न याति
शमम् ॥"
इति चरके चिकित्सास्थाने चतुर्विंशेऽध्याये ॥)
पद्मम् । इति शब्दरत्नावली ॥

नालीकः, पुं, (नाल्या नलयन्त्रात् कायति शब्दायते इति । के + कः । घोरशब्देन निर्गमनादेवास्य तथात्वम् ।) शरः । (यथा, महाभारते । ३ । ३१०५ । १७ ।
"कर्णिनालीकनाराचानुत्सृजन्तो महारथाः ।
नाविध्यन् पाण्डवास्तत्र पश्यन्तो जगमन्ति-
कात् ॥"
तथा च शार्ङ्गधरसंगृहीतधनुर्व्वेदे ।
"नालीका लघवो बाणा नलयन्त्रेण नोदिताः ।
अल्पच्छदरपातेषु दुर्गयुद्धेषु ते मताः ॥")

प्रत्यङ्गम्। चक्षुरवयवे, क्ली। इति मेदिनी। के, १२०॥ (न श्लोकमिति। सत्यम्। यथा, वक्रोक्तिपञ्चाशिकायाम्। ४२।
"नालीकाश्रयमेतदश्च वचनं वाणाश्रयं किं वचः॥")
नालीकिनी, स्त्री, (नालीकमस्त्यस्या इति। नालीक+इनिः। ङीप्।) पद्मसमूहः। इति शब्दरत्नावली॥
नालीव्रजः, पुं, (नालीगतो व्रजः।) नाड़ीव्रणः। इति शब्दरत्नावली॥
नाविकः, पुं, (नावा तरतीति। नौ+"नौद्यच-ष्ठन्।" ४। ४। ७। इति ठन्। नौरस्यास्येति। "व्रीह्यादिभ्यश्च।" ५। २। ११६। इति ठन् वा।) कर्णधारः। इत्यमरः। २। १०। १२॥ (यथा, महाभारते। ८। ७७। ७५।
"भिन्ननौका यथा राजन्! द्वीपमासाद्य निर्वृताः। भजन्ति पुरुषव्याघ्र! नाविकाः कालपर्य्यये॥")
नाव्यं, त्रि, (नावा तार्य्यम्। नौ+"नौवयो-धर्म्मेति।" ४। ४। ६१। इति यत्।) नौकागम्यदेशादि। इत्यमरः। २। १०। १०॥ (यथा, रघुः। ४। ३१।
"मरुपृष्ठान्युदग्राणि नाव्याः सुप्रतरा नदीः। विपिनानि प्रकाशानि प्रक्षिप्तस्त्वाचकार सः॥")
नवस्य भावः। नव+ष्यञ्।) नवत्वञ्च॥
नाशः, पुं, (नश+भावे घञ्।) पलायनम्। निधनम्। (यथा, महाभारते। १। १२०। १६।
"पित्राद्यादनिर्मुक्तस्तेन तप्ये तपोधनाः। देहनाशे ध्रुवो नाशः पितुर्नाशेन निश्चयः॥")
अदर्शनम्। इति मेदिनी। शे, ६॥ परिध्वंसः। इति हेमचन्द्रः। २। २३८॥
जीवानां नाशहेतुर्यथा,—
"सङ्गात् संजायते कामः कामात् क्रोधोऽभि-जायते।
क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः॥
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति॥"
इति श्रीभगवद्गीता॥
कुलनाशकारणं यथा,—
"अनृतात् पारदार्य्याच्च तथाभक्ष्यस्य भक्षणात्। अशौचधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम्॥
अश्रोत्रिये वेददानात् द्रव्येषु तथैव च। विहिताचारहीनेषु क्षिप्रं नश्यति वै कुलम्॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥
नश्यतां पूर्व्वरूपाणि यथा,—
अत्रिरुवाच।
"नश्यतां पूर्व्वरूपाणि जनानां कथयस्व मे। नगराणां तथा राज्ञां त्वं हि सर्व्वं वदिष्यसि॥
गर्ग उवाच।
पुरुषाचारनियमात् परित्यजति देवता। ततोऽपराधादेवानामुपसर्गः प्रवर्त्तते॥
दिव्यान्तरीक्षं भौमञ्च विविधं परिकीर्त्तितम्। यद्दृश्यतेऽतं दिव्यमन्तरीक्षं निबोध मे॥
उल्कापातो दिशां दाहः परिवेषस्तथैव च। गन्धर्व्वनगरञ्चैव दृष्टिश्च विकृता च या। एवमादीनि लोकेऽस्मिन् नाशेष्वानां विनिर्द्दिशेत्॥
चरः स्थिरस्तु भूमौ च भूकम्पश्चापि भूमिजः। जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितम्॥"
इति मात्स्ये २०३ अध्यायः॥
नाशी, [न्] त्रि, (नाशोऽस्यस्येति। नाश+इनिः।) नाशविशिष्टः। नाशशब्दादस्त्यर्थे इनुप्रत्ययनिष्पन्नः॥
नासत्यौ, पुं, (नास्ति असत्यं ययोर्यौ। "नभाव्-नपादिति।" ६। ३। ७५। इति नञः प्रकृति-भावः।) अश्विनीकुमारौ। नित्यद्विवचनान्तो-ऽयम्। इत्यमरः। १।१।५४॥ एतौ सूनौ। यथा,
"आदित्याः क्षत्रियास्तेषां विप्रश्च मरुतस्तथा। अश्विनौ च स्मृतौ सूनौ तपस्युग्रे समास्थितौ॥
स्मृताश्चाङ्गिरसा देवा ब्राह्मणा इति निश्चयः॥"
इति महाभारते मोक्षधर्म्मः॥
("सन्दृश्य दक्षयोरिन्द्रः कर्म्मारभ्येतानि यत्नवान्। आयुर्व्वेदं निरुद्देशं तौ ययाचे शचीपतिः॥
नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ। आयुर्व्वेदं यथाधीतं ददतुः घृतमन्थवे॥
नासत्याभ्यामधीत्यैव आयुर्व्वेदं घृतव्रतुः। अध्यापयामास बहून्नानाव्याधप्रशान्तान् मुनीन्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
नासा, स्त्री, (नासते शब्दायते इति। नास शब्दे+"गुरोश्च हलः।" ३। ३। १०३। इति अः। ततष्टाप्। नासतेऽनयेति। नास+करणे घञ् वा।) नासिका। नाक् इति भाषा। सा च गर्भस्थबालकस्य पञ्चभिर्मासैर्भवति। इति सुश्रुतबोधः॥ तस्याः शुभाशुभलक्षणं यथा,—
"शुकनासः सुखी स्याच्च शुष्कनासोऽतिजीवनम्। छिन्नाग्ररूपनासः स्यादग्न्यागमने रतः॥
दीर्घनासे च सौभाग्यं चौरे चाकुञ्चितेन्द्रियः। स्थूलनासिपिटनासे ऋजुभाग्यवती भवेत्॥
अल्पच्छिद्रा सुपुटा च अवक्रा च नृपेश्वरे। क्रूरे दक्षिणवक्रा स्यादृजुनिश्च स्रुतं सदृक्॥"
इति गरुड़पुराणम्॥
दारोपरिस्थितदारु। काठ् काठ इति कपालि इति च भाषा। इत्यमरः। २। २।१३॥ वासक-वृक्षः। इति राजनिर्घण्टः॥
नासाच्छिन्नी, स्त्री, (छिद+भावे क्तः। नासायां छिन्नं छेदो यस्याः। ङीप्।) पूर्व्विकापत्नी। इति त्रिकाण्डशेषः॥
नासादारु, क्ली, (नासायै यद्दारु। नासैव दारु इति वा।) दारोर्द्दारुस्थितकाष्ठम्। इत्यमर-टीकायां स्वामी॥ कपालि इति भाषा॥
नासारोगः, पुं, (नासाया रोगः।) नासिका-व्याधिः। "अथ नासारोगाधिकारः। तत्र नासा-रोगाणां नामानि संख्यामाह।
आदौ च पीनसः प्रोक्तः पूतिनस्यस्ततः परम्। नासापाकोऽत्र गणितः पूयशोणितमेव च॥
क्षवथुर्भेदशुष्कौ द्वौ प्रतीनाहः परिस्रवः। नासाशोषः प्रतिश्यायः पञ्च सङ्घ्यानि च॥
चत्वार्यर्शांसि चत्वारः शोथाश्चत्वारितानि च। रक्तपित्तानि नासायां चतुस्त्रिंशद्गदाः स्मृताः॥
तेषु पीनसस्य लक्षणमाह।
आनह्यते शुष्यति यस्य नासा प्रक्लेदमायाति च धूप्यते च। न वेत्ति यो गन्धरसांश्च जन्तु-र्ज्ञेयः क्षवस्तेन्द्रिय पीनसेन॥
आनह्यते श्वासशोषितकफेनावष्टभ्यते अवरुद्ध इति यावत्। प्रक्लेदं आर्द्रताम्। धूप्यते सन्ता-प्यते। गन्धरसान् गन्धान् सुरभीनसुरभींश्च न वेत्ति। नासाया आनह्यत्वं तत्र हेतुः। तथा रसान् मधुरादींश्च न वेत्ति। नासारोगा-रम्भकदोषैश्च रसनाया अपि दुष्टेः। क्षवस्तेन्द्रं जानीयात्। अपीनसपीनसौ द्वावपि ग्रन्थौ स्तः॥ * ॥ अथ पूतिनस्यमाह।
तत्राभिनिष्ठेष्मभयं विकारं ब्रूयात् प्रतिश्यायसमानलिङ्गम्।
तं विकारं पीनसं प्रतिश्यायसमानलिङ्गं वात-श्लेष्मकप्रतिश्यायतुल्यलक्षणम्॥
पूतिनस्यमाह।
दोषैर्विदग्धैर्गलतालुमूले सन्दूषितो यस्य समीरणस्तु। निरेति पूतिर्मुखनासिकाभ्यां तं पूतिनस्यं प्रवदन्ति रोगम्॥
दोषैः पित्तकफरक्तैः। अत्र रक्तस्यापि दोषत्व दोषसाहचर्य्यात्। विदग्धैर्दुष्टैः। संदूषितः पूतिभावं नीतः। पूतिनस्यं नासायां भवो नस्यो वायुः पूतिर्नस्यो यत्र स पूतिनस्यस्तम्॥ * ॥
नासापाकमाह।
घ्राणाश्रितं पित्तमरूंषि कुर्य्यात् यस्मिन् विकारे बलवांश्च पाकः। तं नासिकापाकमिति क्षवस्तेन् विद्रधेदकोथावथवापि यत्र॥
विद्रधेः आर्द्रता। कोथः पूतिभावः॥ * ॥
पूयरक्तमाह।
दोषैर्विदग्धैरथवापि जन्तो-र्ललाटदेशेऽभिहतस्य तैस्तैः। नासा स्रवेत् पूयमसृग्विमिश्रं तं पूयरक्तं प्रवदन्ति रोगम्॥
क्षवथुमाह।
घ्राणाश्रिते मर्म्मणि संप्रदुष्टो यस्यानिलो नासिकया निरेति। कफानुगामी बहुशोऽतिशब्द-स्तं रोगमाहुः क्षवथुं गदज्ञाः॥
घ्राणाश्रिते मर्म्मणि शृङ्गाटके॥ * ॥
दोषं क्षवथुमभिधायागन्तुं क्षवथुमाह।
तीक्ष्णोपयोगादतिजिघ्रतो वा भावान् कटूनकंनिरीक्षणाद्वा। क्षुत्रादिभिर्वा तरुणास्थिमर्म-ण्युद्बर्हितेत्यः क्षवथुर्निरेति॥
तीक्ष्णोपयोगात् राजिकादिभक्षणात्। अर्क-निरीक्षणात् सूर्य्यदर्शनात् तेन कफविशेषणात्।

तरुणास्थि नासावंशास्थि। मर्म्मस्थि ग्रङ्गाटके। द्वन्द्वैकत्वम्। अन्यः आगन्तुजः। * ॥

भंग्रथुमाह।

प्रभंग्रते नासिकया तु यस्य
सान्द्रो विदग्धो लवणः कफस्तु।
प्राक् सञ्चितो मूर्द्धनि पित्तसंज्ञे
तं भंग्रथुं व्याधिसुदाहरन्ति॥

दीप्तिमाह।

घ्राणे भृशं दाहसमन्विते तु
विनिःसरेत् धूम इवेह वायुः।
नासाप्रदीप्तेव च यस्य जन्तो-
र्व्याधिस्तु दीप्तिं तमुदाहरन्ति॥

प्रदीप्तेव प्रज्वलितेव॥ * ॥

प्रतीनाहमाह।

उच्छ्वासमार्गन्तु कफः सवातो
रुन्ध्यात् प्रतीनाहमुदाहरेत्तम्॥

स्रावमाह।

घ्राणाद्दनः पीतसितस्तनुर्वा
दोषः स्रवेत् स्रावमुदाहरेत्तम्॥

नासाशोषमाह।

घ्राणाश्रिते श्लेष्मणि मारुतेन
पित्तेन गाढं परिशोषिते च।
क्षुच्छ्वाक्षुसिद्ध्यूहमधश्च जन्तु-
र्यस्मिन् स नासापरिशोष उक्तः॥

प्रतिश्यायमाह। तस्य निदानं द्विविधम्। एकं सद्योजनकं तद्वल वत्त्वेन चयं नापेक्षते। यत उक्तम्।

न केवलं चयं प्राप्य दोषाः कुप्यन्ति देहिनाम्।
अन्यदापि हि कुप्यन्ति हेतुबाहुल्यतोरणात्॥

हेतूनां बाहुल्येन त्वराकरत्वात्। अपरं चयादिक्रमेण जनकम्। चयादिक्रमो यथा। निदानात् सञ्चयः सञ्चयात् प्रकोपः प्रकोपात् प्रसरः प्रसरात् स्थानसंश्रयः। ततो व्यक्तिः। ततो भेद इति॥ * ॥ तत्र प्रतिश्यायस्य सद्योजनकनिदानपूर्व्विकां संप्राप्तिमाह।

संधारणा जीर्णरजोऽति भावात्
क्रोधस्तवैषम्यशिरोऽभितापैः।
संजागरातिस्वपनाम्बुशीता-
वश्यायकैर्मैथुनवाक्षसंकैः॥
संस्थानदोषैः शिरसि प्रदुष्टो
वायुः प्रतिश्यायमुदीरयेत्तु।

सन्धारणा मूत्रपुरीषधारणा। रजो धूलिः। तत्र नासाप्रविष्टं हेतुः। ऋतुवैषम्यं ऋतुचर्य्याविपरीताचरणम्। शिरोऽभितापः शिरसोऽभितापो येन धूमादिना सः। व्यवश्यायस्तुषारः। वाक्षसंकः रोदनम्। संस्थानदोषैः शिरसि संदूषकैः॥ * ॥ चयादिक्रमजनकनिदानपूर्व्विकां संप्राप्तिमाह।

चयं गता मूर्द्धनि मारुतादयः
पृथक् समस्ताश्च तथैव श्लेष्मणम्।
प्रकोप्यमाणा विविधैः प्रकोपणै-
स्ततः प्रतिश्यायकरा भवन्ति हि॥

पूर्व्वरूपमाह।

च्यवप्रवृत्तिः शिरसोऽभिपूर्णता
स्वरोऽङ्गमर्दः परिदूषरोमता।
क्षुपद्रवाश्चाप्यपरे पृथग्विधा
दृशां प्रतिश्यायपुरःसरा स्मृताः॥

शिरसोऽभिपूर्णता शिरसो भारेणेव व्याप्तिः। अपरे पृथग्विधाः घ्राणधूमायनतानुविदारणनासासुखस्वादयो विदेहोक्ता बोद्धव्याः॥ * ॥

वातिकस्य प्रतिश्यायस्य लक्षणमाह।

आनद्धापिहिता नासा तनुस्रावप्रसेकिनी।
गलताल्वोष्ठशीर्षञ्च निस्तोदः शुष्कयोस्तथा॥
च्यवप्रवृत्तिरत्यर्थं वक्त्रवैरस्यमेव च।
भवेत् स्वरोपघातश्च प्रतिश्यायेऽनिलात्मके॥

आनद्धास्रस्रा। अपिहिता न पिहिता। अतएव तनुस्रावप्रसेकिनी॥ * ॥

पैत्तिकमाह।

उष्णः सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके।
ताम्रोऽतिपाकुः सन्तप्तो भवेदुष्माभिपीड़ितः।
नासया तु सधूमाग्निं वमतीव स मानवः॥
सपीतकः ईषत्पीतकः॥ * ॥

श्लैष्मिकमाह॥

घ्राणात् कफः स्रवते श्वेतः कफः शीतः सवेदबहुः।
सुक्लावभासः स्तब्धाङ्गो भवेदुरुशिरा नरः॥
गलताल्वोष्ठशिरसां कण्डूभिरतिपीड़ितः॥ * ॥

सान्निपातिकमाह॥

भूत्वा भूत्वा प्रतिश्यायो योऽकस्मात् सन्निवर्त्तते।
संपक्को वाप्यपक्को वा स सर्व्वप्रभवः स्मृतः॥

अत्र यद्यपि दोषत्रयलिङ्गानि नोक्तानि तथापि तानि श्रेयानि त्रिदोषजत्वात्। अयमसाध्यः। अतएवाह।

दृशां दुष्टः प्रतिश्यायः सर्व्वजश्च न सिध्यति॥

दुष्टप्रतिश्यायलिङ्गमाह।

प्रक्लिद्यति सुदुर्नासा पुनश्च परिसुष्यति।
पुनरायम्यते वापि पुनर्विस्रियते तथा॥
निःश्वासो वाति दुर्गन्धो नरो गन्धान् न वेत्ति च।
एवं दुष्टं प्रतिश्यायं जानीयात् क्षुच्छ्वसाधनम्॥

आयम्यते विवद्धा भवति। विस्रियते अविवद्धा स्यात्। क्षेदश्लोषविवद्धा नैककालं भवन्ति किन्तु यदा यदा यद्यत् दोषाधिक्यं भवति तदा तदा तत्तद्दोषजतः स स दोषजः इति न विरोधः। क्षुच्छ्वसाधनं असाधनं कष्टसाधनञ्च॥ * ॥

रक्तजमाह।

रक्तजे तु प्रतिश्याये रक्तस्रावः प्रवर्त्तते।
पित्तप्रतिश्यायकृतैर्लिङ्गैश्चापि समन्वितः॥
ताम्राक्षश्च भवेत् जन्तुररोचातप्रपीड़ितः।
दुर्गन्धोच्छ्वासवक्त्रश्च गन्धानपि न वेत्ति सः॥
ऊरोघातप्रपीड़ितः ऊरोघातेनेव प्रपीड़ितः॥

अप्रतीकारेण कालान्तरे सर्व्व एव प्रतिश्याया असाध्या भवन्तीत्याह।

सर्व्व एव प्रतिश्याया नरस्याप्रतिकारिणः।
दुष्टतां यान्ति कालेन तदासाध्या भवन्ति हि॥

प्रतिश्यायेषु क्रमयोऽपि भवन्तीत्याह।

मूर्च्छन्ति क्रमयश्चात्र श्वेताः स्निग्धास्तथाण्वयः।
क्रमितो यः शिरोरोगस्तुल्यं तेनात्र लक्षणम्॥

अत्र एषु प्रतिश्यायेषु कफस्य प्राधान्यात् सर्व्वेषु प्रतिश्यायेषु कफजा एव क्रमयो भवन्तीति॥ * ॥ श्वेताः स्निग्धाश्च दृढाः प्रतिश्याया अपरानपि विकारान् कुर्व्वन्ति तानाह।

व्याधिर्य्यमान्थ्यमव्रत्वं घोरांश्च नयनामयान्।
श्लोषाग्निमान्द्यकासांश्च दृढाः कुर्व्वन्ति पीनसम्॥

घोरांश्च नयनामयान् इति वचनेऽप्यान्ध्यग्रहणं विशेषार्थम्। अव्रत्वं न जिघ्रतीत्यघ्रस्य भावः अघ्रत्वम्॥ * ॥ चतुस्त्रिंशद्गतसंख्यापूरणायाह।

अर्व्बुदं सप्तधा श्लोषाश्चत्वारोऽर्शांसि चतुर्व्विधम्।
चतुर्व्विधं रक्तपित्तमुक्तं घ्राणेऽपि तद्विदुः॥

अर्व्बुदानि सप्त वातपित्तकफसन्निपातरक्तमांसमेदोजानि। श्लोषाश्चत्वारो वातपित्तश्लेष्मसन्निपातजाः। अर्शांसि चत्वारि वातपित्तश्लेष्मसन्निपातजानि। रक्तपित्तानि चत्वारि वातपित्तश्लेष्मसन्निपातजानि। एतानि यथोक्तलिङ्गानि घ्राणेऽपि सम्भवन्ति॥ * ॥ चिकित्सामेदात् पीनसंस्थामस्य लक्षणमाह।

शिरोगुरुत्वमरुचिर्नासास्रावस्तनुस्वरः।
श्यामः स्रोतति चाभीक्ष्णमामपीनसलक्षणम्॥

नासास्रावस्तनुस्वरः श्याम इत्यन्वयः॥ * ॥

अथ पक्वस्य पीनसस्य लक्षणमाह।

आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति।
स्वरवर्णविशुद्धिश्च पक्वपीनसलक्षणम्॥

आमलिङ्गान्वितः श्लेष्मा आमलिङ्गैः शिरोगुरुत्वादिभिर्युक्तः पश्चात् घनः निविड़ः अथश्च खेषु नासारन्ध्रेषु निमज्जति सक्तो भवति। वर्णविशुद्धिः श्लेष्मणः प्रकृतिवर्णता॥ * ॥

अथ नासारोगाणां चिकित्सा।

सर्व्वेषु सर्व्वकालं पीनसरोगेषु जातमात्रेषु।
मरिचं गुड़ेन दत्त्वा भुञ्जीत नरः सुखं लभते॥१॥
कट्फलं पौष्करं शृङ्गी शोभं वासञ्च कारवीं।
एषां चूर्णं कषायं वा दद्यादार्द्रकजे रसे॥
पीनसे स्वरभेदे च नासास्रावे शिरोमले।
सन्निपाते कफे वाते कासे श्वासे च शस्यते॥२॥
कलिङ्गदिङ्गुमरिचलाक्षास्वरसकट्फलैः।
कुष्ठोग्राग्नियुजन्तुघ्नैरवपीड़ः प्रशस्यते॥
पीनसादिषु॥ ३॥
शोषचित्रकतालीशगुडत्रिकाम्बुवेतसम्।
सक्षयाजाजितुल्यांशमेलात्वक्पत्रपादिकम्॥
शोषादिकमिदं चूर्णं पुराणगुड़मिश्रितम्।
पीनस्वासकासघ्नं रुचिस्वरकरं परम्॥

इति शोषादिवटी॥ ४॥

व्याघ्रीदन्तीवचाग्निसुरसाशोऽसिन्धुजैः।
सिद्धं तैलं नसि क्षिप्तं पूतिनस्यगदापहम्॥

इति व्याघ्रीतैलम्॥ ५॥

शिग्रुसिंहीनिकुम्भानां बीजैः सशोधसैन्धवैः।
विल्वपत्ररसैः सिद्धं तैलं स्यात् पूतिनस्यजुत्॥

निकुम्भा दन्ती। पूतिनस्यजुत् नस्यात्। इति शिग्रुतैलम्॥ ६॥

हृतगुग्गुलुमिश्रस्य सिक्थकस्य प्रयत्नतः ।
धूमं क्षवथुरोगघ्नं भक्षयेन्नश्च निर्दिशेत् ॥ ७ ॥
मुष्टीकुष्ठकणाविल्वद्राक्षाचाकल्ककषायवत् ।
तैलं पक्वमथाज्यं वा नस्यात् क्षवथुनाशनम् ॥८॥
नस्यं हितं निम्बरसाङ्गनाभ्यां
दीप्ते शिरःस्वेदनमल्पशस्तु ।
नस्ये कृते चौरजलावसेकान्
प्रशंसन्ति भुञ्जीत च सुहृद्यवैः ॥ * ॥
नासास्रावे घ्राणयोश्चूर्णमुक्तं
नाड्या देयं ये च पीड़ाश्च पथ्याः ।
तीक्ष्णा धूमा देवदार्व्यम्बिकाभ्यां
मांसं त्याज्यं पथ्यमन्नादिशन्ति ॥ १० ॥
प्रतिश्यायेषु सर्व्वेषु गृहं वातविवर्जितम् ।
वस्त्रेण वारुणात्येन शिरसो वेष्टनं हितम् ॥११॥
विड्ङ्गं सैन्धवं हिङ्गुगुग्गुलुः समनःशिलाः ।
वचेतचूर्णमाघ्रातं प्रतिश्यायं विनाशयेत् ॥१२॥
घृततैलसमायुक्तं शस्तधूमं पिबेन्नरः ।
मधूमः स्यात्प्रतिश्यायकासहिक्काहरः परः॥१३॥
प्रतिश्यायेषु सर्व्वेषु घृतलं परमौषधम् ।
प्रतिश्याये पिबेद्धूमं सर्व्वगन्धसमायुतम् ॥ १४॥
चातुर्यातकचूर्णं वा क्षेयं वा कृष्णजीरकम् ।
कृष्णजीरकमत्र कलौजी ॥ १५ ॥
पुटपक्वं जयापत्रं तैलसैन्धवसंयुतम् ।
प्रतिश्यायेषु सर्व्वेषु घृतलितं परमौषधम् ॥
जयाच्च विजया भङ्गेति यावत् । घृतलितं भुक्तम् ॥ १६ ॥
पिप्पल्याः शिग्रुबीजानि विड्ङ्गमरिचानि च ।
अवपीड़ः प्रशस्तोऽयं प्रतिश्यायनिवारणे ॥१७॥
शिरसोऽभ्यञ्जनैः स्वेदैर्नस्यैर्मन्दोष्णभोजनैः ।
वमनैर्धूतपानैश्च नान्यथा समुपाचरेत् ॥१८॥
कृमिघ्ना ये क्रमाः प्रोक्तास्तान् वै कृमिषु योजयेत् ।
लावणानि कृमिघ्नानि भेषजानि च बुद्धिमान्॥१९॥
रक्तपित्तानि घ्नोयाच्च तथार्शांस्यर्बुदानि च ।
नासिकायां स्युरेतेषां स्वं स्वं कुर्य्यात् चिकित्सितम् ॥
शुष्कधूमकणादारुचीरनक्ताक्षसैन्धवैः ।
सिद्धं शिखरिबीजेश्च तैलं नास्यार्शसां हितम् ॥"

इति भावप्रकाशे मध्यखण्डे चतुर्थभागः ॥

(अथातो नासारोगविज्ञानीयमध्यायं व्याख्यास्यामः ।
"अवश्यायानिलरजो भाष्यातिस्वप्नजागरैः ।
शीतोष्णोपघातेन पीतेनान्येन वारिणा ॥
अत्यम्बुपानरमणच्छर्दिव्याय्यशादिभिः ।
क्रुद्धा वातोल्बणा दोषा नासायां स्थानतां गताः ॥
जनयन्ति प्रतिश्यायं वर्द्धमानं क्षयप्रदम् ।
तत्र वातात् प्रतिश्याये सुखस्रोधो भृशं क्षवः ॥
घ्राणोपरोधनिस्तोदस्तब्धशिरोव्यथाः ।
कोटका इव सर्पन्ति मन्यते परितो भ्रुवौ ॥
स्वरसादक्षिरात् पाकः शिग्रिराच्छकफस्रुतिः ।
पित्तात्तृष्णाज्वरघ्राणपिटिकासम्भवभ्रमाः ॥
नासाग्यपाको रुष्णोष्णस्ताम्रपीतकफस्रुतिः ।
कफात् कासोऽरुचिः श्वासो वमथुर्गात्रगौरवम् ॥
माधुर्य्यं वदने कण्डूः स्निग्धशुक्लघना स्रुतिः ।
सर्व्वजो लक्षणैः सर्व्वैरकस्माद्दृष्ट्विघ्नान्तिमान् ॥
दुष्टं नासा शिराः प्राप्य प्रतिश्यायं करोत्यष्टौ ।
उरसः सुप्तता ताम्रनेत्रत्वं श्वासपूतिता ॥
कण्डूः श्लेष्मादिनासासु पित्तोक्तश्चाच लक्षणम् ।
सर्व्व एव प्रतिश्याया दुस्तरा यान्त्युपेक्षिताः ॥
यथोक्तोपद्रवाधिक्यात् सर्व्वेन्द्रियतापनः ।
सान्निपातज्वरश्वासकासोरःपार्श्ववेदनः ॥
कृच्छ्रात्यकस्माद्दुश्छो सुखदौर्गन्ध्यशोफकृत् ।
नासिकालेदसंशोषशुष्किरोधकरो गुरुः ॥
पूयोपमा सितारक्तग्रथिता श्लेष्मसंस्रुतिः ।
मूर्च्छन्ति चाच क्रमयो दीर्घस्निग्धसिताणवः ॥
पक्वलिङ्गानि तेष्वङ्गलाघवं क्षवथोः भ्रमः ।
श्लेष्मा सचिक्कणः पीतो घ्राणाच्च रसगन्धयोः ॥
तीक्ष्णधूमोपयोगार्करश्मिसूचत्रणादिभिः ।
वातकोपिभिरन्यैर्वा नासिका तरुणास्थनि ॥
विघट्टितेऽनिलः कुद्धो रुद्धः शङ्खाटकं व्रजेत् ।
निवृत्तः कुरुतेऽत्यर्थं क्षवथुं स भृशं क्षवः ॥
स्रोतोद्वयन्नासिकासोतः कफश्च कुरुतेऽनिलः ।
शूकपूर्णाभनासान्तं क्षुच्छादुच्छ्वसनन्ततः ॥
स्रुतेऽसौ नासिकाघ्रोधो नासानाहे तु जायते ।
नद्धत्वमिव नासायाः श्लेष्मरुद्धेन वायुना ॥
निःश्वासोच्छ्वाससंरोधात् स्रोतसी संवृते इव ।
पचेन्नासापुटे पित्तं लब्धांसं दाहशूलवत् ॥
सघ्राणघ्राकः सावस्तु ततसंघ्रः श्लेष्मसम्भवः ।
अच्छोजलोपमोऽजस्रं विशेषान्निशि जायते ॥
कफः प्रद्रुतो नासायाः रुद्धा स्रोतांस्यपीनसम् ।
कुर्य्यात् सघुर्घुरं श्वासं पीनसाधिकवेदनम् ॥
अवेरिव सवत्सस्य प्रक्रिया तेन नासिका ।
अजस्रं पिच्छिलं पीतं पक्वं सिङ्घाणकं घनम् ॥
रक्तेन नासादग्धेन वाह्यान्तःस्वर्घ्नासहा ।
भवेद्धूमोपमोच्छ्वासा सा दीप्तिर्हृतेव च ॥
तालुमूले मलैर्दुष्टैर्मारुतो मुखनासिकात् ।
श्लेष्मा च पूतिर्निर्गच्छेत् पूतिनासं वदन्ति तम् ॥
निचयादभिघाताद्वा पूयास्रङ्नासिका स्रवेत् ।
तत् पूयरक्तमाख्यातं शिरोदाहरुजाकरम् ॥
पित्तश्लेष्मावरुद्धोऽन्तर्नासायां घ्रोथवेष्टरुत् ।
कफं स शुष्कपुटतां प्राप्नोति पुटकन्तु तत् ॥
अर्शोऽर्बुदानि विभजेत् दोषलिङ्गैर्यथायथम् ।
सर्व्वेषु क्षुच्छ्वासनं पीनसः प्रततं क्षवः ॥
साधुनासिकवादित्वं पूतिनासः शिरोव्यथा ।
अरुदघ्राणामित्येषां यापयेदुद्भवपीनसम् ॥"
इत्युत्तरस्थाने एकोनविंशेऽध्याये वाभटेनोक्तम् ॥
"शुद्धस्तं समादाय गन्धभागद्वयं ततः ।
त्रिभागं टङ्कणक्षारापि विधभागचतुष्टयम् ॥
पञ्चभागं यथा देयं मरिचस्य प्रयत्नतः ।
श्लक्ष्णैररसैः पिष्ट्वा गुटिका पञ्चरक्तिका ॥
अनुपानं हितं योज्यं सर्व्वरोगप्रशान्तये ।
जलदोषोद्भवे रोगे महत्युग्रे जलोदरे ॥
सन्निपातेषु रोगेषु नासाधाधौ सपीनसे ।
व्रणशोथे व्रणे चैव उपदंशे भगन्दरे ॥
नीढ़ोव्रणे ज्वरे चैव नखदन्तविघातके ।
पश्चात्तरसो योज्यः सर्व्वरोगप्रशान्तये ॥
इति पश्चात्तो रसः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे नासारोगाधिकारः ॥)

नासालुः, पुं, (नासायै अलतीति । अल + उण् ।) कटफलवृक्षः । इति शब्दचन्द्रिका ॥ (कटफलशब्दे विवरणमस्य ज्ञातव्यम् ॥)

नासासंवेदनः, पुं, (संविद्यतेऽनेनेति । सं + विद् + ल्युट् । नासायाः संवेदनः पीड़ादायकः ।) काष्ठीरलता । इति राजनिर्घण्टः ॥

नासिकन्धमः, त्रि, (नासिकां धमति शब्दायमानां करोतीति । नासिका + धमा + "नासिकास्तनयोर्धमेटोः ।" ३ । २ । २६ । इति खश् । "खित्यनव्ययस्य ।" ६ । ३ । ६६ । इति पूर्व्वपदस्य ह्रस्वः । ततो मुम् ।) नासिकां शब्दायमानां करोति यः । नासिकया शब्दकर्त्ता च । नासिकोपपदात् धमधातोः खश्प्रत्ययेन धमादेशेनिष्पन्नः । इति व्याकरणम् ॥

नासिकन्धयः, त्रि, (नासिकां नासास्रावजलं धयति पिबतीति । नासिका + धे ट पाने + "नासिकास्तनयोर्धमेटोः ।" ३ । २ । २६ । इति खश् । ततो पूर्व्वपदस्य ह्रस्वत्वं च ।) नासिकया पिबति यः । नासिकया पानकर्त्ता । नासिकोपपदाद्धेटधातोः खश्प्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

नासिका, स्त्री, (नासते शब्दायते इति । नास शब्दे + "खुलृचौ ।" ३ । १ । १३३ । इति खुल् । टापि अत इत्वम् ।) घ्राणेन्द्रियम् । नाक् इति भाषा । तत्पर्य्यायः । घ्राणम् २ गन्धवहा ३ घोणा ४ नासा ५ । इत्यमरः । २ । ६ । ८६ ॥ शिङ्घिणी ६ । इति राजनिर्घण्टः ॥ नासिकम् ७ नस्या ८ गन्धनाली ९ गन्धवन्या १० नक्रा ११ । इति शब्दरत्नावली ॥ (यथा, मनुः । २ । ६० ।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ॥")
तस्याः शब्दो द्योतकारः । यथा,—
"शुचार्त्तं रावणं दृष्ट्वा तत्पत्नीं मन्दरां वानरः ।
नासायूथैस्तु द्योतकारैर्विशुद्धिर्वायुसेवकैः ॥"
इति नारसिंहे ४५ अध्यायः ॥

नासिकामलं, क्ली, (नासिकाया मलम् ।) नासास्थितमलम् । शिङ्घाणकम् इति भाषा । तत्पर्य्यायः । शिङ्घाणकम् २ शिङ्घाणम् ३ शिङ्कम् ४ । इति शब्दरत्नावली ॥ सिंहानम् ५ । इति भरतः ॥

नासिक्यं, क्ली, (नासिका एव । नासिका + स्वार्थे ष्यञ् ।) नासिका । इति त्रिकाण्डशेषः ॥ (त्रि. नासिका + "वृन्दारकेति ।" ४ । २ । ८० । इति संज्ञायामादित्वात् ष्यञ् । नासिकानिवृत्तादौ ॥ नासिकायां भवम् । "शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् । नासाभवे च ॥)

नासिक्यकं, क्ली, (नासिक्यमेव। नासिक्य + स्वार्थे कन्।) नासिका। इति शब्दमाला॥

नासिक्यौ, पुं, (नासिकायां भवौ। नासिका + "शरीरावयवात् यत्।"५। १। ६। इति यत्।) अश्विनीकुमारौ। द्विवचनान्तोऽयम्। इति हेमचन्द्रः। २। ६६॥

नासीरं, क्ली, (नास् शब्दे + भावे क्विप्। नासा शब्देन ईर्त्ते गच्छतीति। ईर गतौ + कः। जयशब्दानुचारणेन गमनादेवास्य तथात्वम्।) नायकस्यायेसारिका सेना। (यथा, श्रीकण्ठचरिते। २१। ४४।

"नासीरपार्श्वदभटेषु ततः प्रतोली
लोलीकृतासिषु हठादधिरूढवत्सु।
वामभ्रुवः पुरपुरेष्वभवन्नकाण्डे
मया भियेव निजवाष्पजलद्रवेषु॥

तथा च, राजेन्द्रकर्णपूरे। ३६।

"नासीरप्रसरन्ति दिक्परिसरे भूमण्डले मौक्तिक-
प्रस्तारन्ति सुधाकरन्ति गगनोत्सङ्गे भवत्कीर्तयः॥")

अग्रसरे, पुं। इति शब्दरत्नावली॥

नास्ति, व, अस्तित्वाभाववत्। अविद्यमानता। इति नास्तिकताशब्दटीकायां भरतः॥ नाइ इतिभाषा। यथा, चाणक्ये।

"अतिथिर्बालकश्चैव राजा भार्य्या तथैव च।
अस्ति नास्ति न जानन्ति देहि देहि पुनः पुनः॥"

नास्तिकः, पुं, (नास्ति परलोक ईश्वरो वेति मतिर्यस्य। "अस्तिनास्तिदिष्टं मतिः।" ४।४।६०। इति ठक्। यद्वा, नास्ति परलोको यज्ञादिफलं ईश्वरो वेत्यादिवाक्येन कायति शब्दायते इति। कै शब्दे + कः।) पाषण्डः। ईश्वरनास्तित्ववादी। वेदाप्रामाण्यवादी। (यथा, मनुः। २। ११।

"योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः।
स साधुभिर्बहिष्कार्य्यो नास्तिको वेदनिन्दकः॥"

तथा च तत्रैव। ३। १५०।

"ये स्त्रैणपतितक्लीबा ये च नास्तिकवृत्तयः।
तान् ह्यथक्वयोर्विप्राणनर्हाञ्मनुरब्रवीत्॥"

तथाच तत्रैव। ८। २२, ६०६।

"यद्राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रान्तमद्विजम्।
विनश्यत्याशु तत् क्षुत्तं दुर्भिक्षव्याधिपीडितम्॥"

"अनपेक्षितमर्य्यादं नास्तिकं विप्रलुम्पकम्।
अरक्षितारमत्तारं नृपं विद्यादधोगतिम्॥")

तत्पर्य्यायः। वार्हस्पत्यः २ चार्व्वाकः ३ लौकायतिकः ४। इति हेमचन्द्रः। ३। ५२६॥ स च षड्विधः। माध्यमिकः १ योगाचारः २ सौत्रान्तिकः ३ वैभाषिकः ४ चार्व्वाकः ५ दिगम्बरः ६॥

नास्तिकता, स्त्री, (नास्तिकस्य भावः। नास्तिक + तल्।) कर्म्मफलापवादकज्ञानम्। तत्पर्य्यायः। मिथ्यादृष्टिः २। इत्यमरः। १। ५। ४॥ "नास्ति यज्ञफलं नास्ति परलोक इत्यादिकं कायति नास्तिकः। सदसत्त्वे अस्ति नास्तीत्यव्ययं के शब्दे डः। नास्तीति मन्यते इति ण्विको वा तस्य भावो नास्तिकता त्वतौ भावे इति तः। नास्ति सुकृतं नास्ति परलोक इति बुद्धिर्नास्तिकता।" इति भरतः॥ (यथा, महाभारते। १२। १२३। १५।

"प्रज्ञानाज्ञात्मको मोहस्तथा धर्म्मार्थनाशकः।
तस्मान्नास्तिकता चैव दुराचारश्च जायते॥")

नास्तिदः, पुं, आत्मघातः। इति शब्दचन्द्रिका॥

नास्यं, क्ली, नासायां भवम्। (नासा + "शरीरावयवात् यत्।"५। १। ६। इति यत्।) नासाभवम्। यथा, मनुः। ८। २८१।

"छिन्ननासे भिन्नयुगे तिर्य्यक्प्रतिमुखागते।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च॥"

नाहः, पुं, (नह बन्धने + भावे घञ्।) बन्धनम्। कूटम्। इति मेदिनी। हे, ५॥

नाहुषः, पुं, (नहुषस्य अपत्यं पुमानिति। नहुष + "अत इञ्।" ४। १। ६५। इति इञ्।) ययातिराजः। इति भूरिप्रयोगः॥

नि, व, उपसर्गविशेषः। अस्यार्था यथा। निषेधः। निश्चयः। इति सुग्धबोधटीकायां दुर्गादासः॥ निषेधः। भृशार्थः। नित्यार्थः। संशयः। क्षेपः। कौशलम्। उपरमः। सामीप्यम्। आश्रयः। दानम्। मोक्षः। अन्तर्भावः। बन्धनम्। राजधीभावः। विन्यासः। इति मेदिनी। ने, ४०॥

निः, [र्] व, (नृणातीति। नॄ नये + क्विप्। "ऋत इद्धातोः।" ७। १। १००। इति धातोरृकारस्य इत्।) निर्णयः। निषेधः। इति मेदिनी। रे, ६६॥ (अभावः। यथा, हरिवंशे। भविष्यपर्व्वणि। ८। ८७।

"नासिकाग्रं समालोक्य पठन् ब्रह्म सनातनम्।
निर्व्वातस्थो यथा दीपः प्रोच्चरेत् प्रणवं सदा॥")

निः, [स्] व, निश्चयः। निषेधः। साकल्यम्। अतीतम्। इति मेदिनी। से, ८०॥

निःकासितः, त्रि, (निर् वा निस् + कस् + णिच् + क्तः।) निष्कासितः। बहिष्कृतः। से तु कखपफे वेति विभाषया विसर्गस्य सकाराभावः। इति व्याकरणम्॥

निःक्रामितः, त्रि, (निर् वा निस् + क्रम + णिच् + क्तः।) निष्क्रामितः। इत्यमरटीकायां भरतसुन्दरी॥

निःक्षत्रः, त्रि, (निर्गतं क्षत्रः क्षत्रियो यत्र।) क्षत्रियशून्यदेशादि। यथा,—

"अवतारे षोड़शमे पश्यन् ब्रह्मद्रुहो नृपान्।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम्॥"

इति श्रीभागवतप्रथमस्कन्धः॥

निःप्रभः, त्रि, निष्प्रभः। निर्गतो प्रभा यस्येति समासे से तु कखपफे वेति विभाषया विसर्गस्य सकाराभावः। इति व्याकरणम्॥

निःशब्दः, त्रि (निर्गतः शब्दो यस्मात्।) शब्दरहितः। चुप् इति भाषा॥ यथा, मार्कण्डेयपुराणे।

"निःशब्दं कारयित्वा तत्सदः प्राह महासुनेः॥"

(यथा च हठयोगप्रदीपिकायाम्। ४। १०१।

"तावदाकाशसंकल्पो यावच्छब्दः प्रवर्त्तते।
निःशब्दं तत् परं ब्रह्म परमात्मेति गीयते॥")

निःशलाकः, त्रि, (निर्गता शलाका यस्मात् शलाकाया निर्गतो वा।) रहः। निर्ज्जनम्। इत्यमरः। २। ८। २२॥

निःशल्या, स्त्री, (निर्गतं शल्यं यस्याः।) दर्भीवृक्षः। इति राजनिर्घण्टः॥

निःशूकः, पुं, (निर्गतं शूकं यस्य।) शुष्कधान्यालिः। इति राजनिर्घण्टः॥

निःशेषं, त्रि, (निर्गतः शेषो यस्मात्।) समस्तम्। सम्पूर्णम्। इत्यमरः। ३। १। ६५॥ (यथा, हठयोगप्रदीपिकायाम्। ४। ३२।

"उच्छिन्नसर्व्वसङ्कल्पो निःशेषाशेषचेष्टितः।
स्वावगम्यो लयः कोऽपि जायते वाङ्मनोचरः॥")

शेषरहितश्च॥

निःशोधं, त्रि, (निर्गतं शोधं यस्मात्। शोध्यान्निर्गतमिति वा। निरादय इति समासः।) शोधितम्। शुद्धम्। इत्यमरः। ३। १। ५६॥

निःश्रयणी, स्त्री, (निर्निश्चितं श्रीयते आश्रीयतेऽनयेति। श्रि + करणे ल्युट्। टित्त्वात् ङीप्।) काष्ठघटितसोपानम्। काठेर सिड़ी इति भाषा। तत्पर्य्यायः। निःश्रेणिः २ अधिरोहिणी ३ निःश्रेणी ४ निःश्रयिणी ५। इति शब्दरत्नावली॥

निःश्रयिणी, स्त्री, (निःश्रयति आश्रयति प्राङ्नादिस्थानमिति। श्रि + णिनि + ङीप्।) निःश्रयणी। इति शब्दरत्नावली॥

निःश्रेणिः, स्त्री, (निर्निश्चिता श्रेणिः सोपानपङ्क्तिः यत्र।) अधिरोहिणी। (यथा, रघुः। १५। १००।

"चक्रे त्रिदिवनिःश्रेणिः सरयूरनुयायिनाम्॥")

खर्ज्जूरीवृक्षः। इति मेदिनी। णे, ५७॥ (पुं, घोटकविशेषः। यथा, नकुलकृताश्वचिकित्सिते ४ अध्याये।

"उपर्य्युपरि यस्य स्युरावर्त्ता अलिके त्रयः।
निःश्रेणिः स तु विज्ञेयो राष्ट्रवृद्धिकरः परः॥")

निःश्रेणिका, स्त्री, (निःश्रेणिरिव कायतीति। कै + कः। टाप्।) तृणविशेषः। निःश्रेणी इति कोकणे प्रसिद्धा। तत्पर्य्यायः। श्रेणिबला २ निरसा ३ वनवल्लरी ४। अस्या गुणाः। नीरसत्वम्। उष्णत्वम्। पशुनामबलप्रदत्वञ्च। इति राजनिर्घण्टः॥ (निःश्रेणिरेव। स्वार्थे कन्। अधिरोहिणी। यथा, देवीभागवते। ४। १३। ४०।

"मानुष्यं दुर्लभं प्राप्य सेविता न महेश्वरी।
निःश्रेणिकाप्यात् पतिता अध एव विशेत्॥")

निःश्रेणी, स्त्री, (निःश्रेणि + स्वार्थिकारादिति वा ङीष्।) निःश्रयणी। इति शब्दरत्नावली॥

निःश्रेयसं, क्ली, (निर्निश्चितं श्रेयः । "अचतुरविचतुरेति ।" ५ । ४ । ७७ । इति निपातनात् साधुः ।) शुभम् । (यथा, भागवते । १।३।४० । "इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् । उत्तमःश्लोकचरितं चकार भगवानृषिः । निःश्रेयसाय लोकस्य धन्यं स्वस्ययनं परम् ॥") मोक्षः । (यथा, मनुः । १२ । ८३ । "वेदाभ्यासस्तपोज्ञानमिन्द्रियाणाञ्च संयमः । अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ॥") विद्या । अनुभावः । भक्तिः । इति शब्दरत्नावली ॥

निःश्रेयसः, पुं, (निर्निश्चितं श्रेयो मङ्गलं यस्मात् ।) शङ्करः । इति मेदिनी । से, ५६ ॥

निःषमं, श, (निर्गतं समं यत्र । "तिष्ठद्गुप्रभृतीनि च ।" २ । १ । १७ । इत्यव्ययीभावत्वम् । सुविनिर्दुर्भ्यः इति षत्वम् ।) निन्दा । तत्पर्य्यायः । गर्ह्यम् । दुःषमम् ३ । इत्यमरः । ३ । ४ । १४ ॥ श्लोकः । इति शब्दरत्नावली ॥

निःसङ्गः, त्रि, (निर्गतः सङ्गो यत्र ।) मैथुनरहितः । यथा, विष्णुपुराणे । ४ । २ । ५१ ।

"मत्स्यस्य सङ्गादभवच्च यो मे
सुतादिरोगो सुमितोऽस्मि तेन ।
निःसङ्गता मुक्तिपदं यतीनां
सङ्गादशेषाः प्रभवन्ति दोषाः ॥"

फलानभिनिवेशवान् । यथा,—

"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे ।
नैष्कर्म्यसिद्धिं लभते रोचनार्था फलश्रुतिः ॥"

इति मलमासतत्त्वे श्रीभागवतैकादशस्कन्धवचनम् ॥

निःसन्धिः, त्रि, (निर्गतः सन्धिर्यत्र ।) दृढः । इति त्रिकाण्डशेषः ॥ सन्धिरहितश्च ॥

निःसम्पातः, पुं, (निर्गतः सम्पातो गमनागमनं यत्र ।) निर्द्वीपः । इति त्रिकाण्डशेषः ॥ (गमनागमनपरिशून्ये, त्रि । यथा, हरिवंशे । ८० । १३—१४ ।

"तेन दुष्प्रचारेण दूषितं तद्वनं महत् ।
न वृभिर्गोधनैर्वापि सेव्यते वनवृत्तिभिः ।
निःसम्पातं कृतः पन्थास्तेन तद्विषयाश्रयः ॥")

निःसरणं, क्ली, (निर्+सृ+ल्युट् ।) मरणम् । उपायः । गेहादिसुखम् । निर्व्वाणम् । निर्गमः । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । ४ । २ । २८ ।

"गर्भवासे महद्दुःखं दशमासनिवासनम् ।
तथा निःसरणे दुःखं योनियन्त्रेऽतिदारुणे ॥")

निःसारः, पुं, (निर्गतः सारो यस्मात् ।) श्लाखोटवृक्षः । इति शब्दचन्द्रिका ॥ श्लोनाकप्रभेदः । इति राजनिर्घण्टः ॥ साररहिते, त्रि । यथा,—

"मानुष्ये कदलीस्तम्बनिःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥"

इति सुहितत्त्वम् ॥

"जगत् सर्व्वन्तु निःसारमनित्यं दुःखभाजनम् ।
उत्पद्यते क्षणादेतत् क्षणादेतद्विपद्यते ॥
यथैवोत्पद्यते सारान्निःसारं जगदङ्गसा ।
पुनस्तस्मिन् विलीयन्ते महाप्रलयसङ्गमे ॥
उत्पत्तिप्रलयाभ्यान्तु जगन्निःसारतां हरिः ।
शम्भवे दर्शयामास भावेन जगतां पतिः ॥"

इति कालिकापुराणे २७ अध्यायः ॥

निःसारणं, क्ली, (निर्+सृ+णिच्+भावे ल्युट् ।) निःसरणम् । (निःसार्य्यतेऽनेनेति । निर्+सृ+णिच्+करणे ल्युट् ।) गृहादीनां प्रवेशनिर्गमादिपथः । इति शब्दरत्नावली ॥

निःसारा, स्त्री, (निर्गतः सारो यस्याः ।) कदलीवृक्षः । इति राजनिर्घण्टः ॥

निःसारितः, त्रि, (निर्+सृ+णिच्+कर्म्मणि क्तः ।) बहिष्कृतः । तत्पर्य्यायः । अवक्षुतः २ निष्कासितः ३ । इति जटाधरः ॥ सारताभावविशिष्टश्च ॥

निःस्नेहः, त्रि, (निर्गतः स्नेहो यस्य ।) स्नेहशून्यः । यथा । निःस्नेहं कीटदूषितमित्यादि स्मृतिः ॥ (यथा, रामायणे । २ । ४६ । ७ ।

"अहो दशरथो राजा निःस्नेहः सुतं प्रति॥"

रसहीनः । यथा, मनुः । ५ । ८७ ।

"मांसं सुरां शाकमथो मधूच्छिष्टं च हिंस्तं लवणं च वर्ज्यम् ।
आत्मन्यथ तु निःस्नेहं गोमांसभक्षणं न हि ॥"

तैलविहीनः । यथा, पञ्चतन्त्रे । १ । ६१ ।

"शिरसा विधृता नित्यं स्नेहेन परिपालिताः ।
कैश्चा अपि विरज्यन्ते निःस्नेहाः किं न सेवकाः ॥")

निःस्नेहा, स्त्री, (निर्गतः स्नेहः रसो यस्याः ।) अतसी । इति त्रिकाण्डशेषः ॥ (अनुरागरहिते, त्रि । यथा, पञ्चतन्त्रे । ४ । ४७ ।

"यदर्थे स्वकुलं त्यक्तं जीवितार्द्धञ्च हारितम् ।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥")

निःस्रावः, पुं, (निःस्रवतीति । निर्+स्रु+घञ् ।) भक्तरसः । भक्तसंसृज्यमण्डः । माड् इति फेन् इति च भाषा ॥ तत्पर्य्यायः । आयामः २ मासरः ३ । इत्यमरहेमचन्द्रौ ॥

निःस्वः, त्रि, (निर्गतं स्वं धनं यस्य ।) दरिद्रः । इत्यमरः । ३ । १ । ४६ ॥ तस्य लक्षणं यथा,—

"छर्पाकारौ विरूक्षौ च वक्रौ पादौ शिरालकौ ।
संशुष्कौ पाकरनखौ निःस्वस्य विरलाङ्गुली ॥"

इति गारुडे सामुद्रिकम् ॥

ज्ञातिरहितश्च ॥

निकटं, त्रि, (नि समीपे कटतीति । नि+कट+अच् ।) अदूरम् । तत्पर्य्यायः । समीपम् २ आसन्नम् ३ सन्निकृष्टम् ४ सनीडम् ५ । इत्यमरः । ३ । १ । ६६ ॥ अभ्यासः ६ सवेशः ७ अन्तः ८ अन्तिकः ९ समर्य्यादः १० सदेशः ११ अभ्यसः १२ अभ्यर्णः १३ सविधा १४ उपकक्षः १५ अभितः १६ । इति शब्दरत्नावली ॥ (यथा, भाग्निपुराणे । ३ । २ ।

"दिवसरजनीकूलच्छेदैः पतद्भिरहर्गतं
वहति निकटे कालः स्रोतःसमर यथावहम् ।
इह हि पतितां नास्त्यालम्बो न चापि निवर्त्तनं
तदिह महतां कोयं मोहो यदेष मदाविलः ॥"

तद्देहिकपर्य्यायः । तलिन् १ आसान् २ अम्बरम् ३ व्योर्व्वसे ४ अन्तमीकेऽ५ आकेह् उपाके ७ अञ्जाके ८ अन्तमागाम् ९ अवमे १० उपमे११ । इत्येकादशभ्रान्तिकनामानि । इति वैद्यनिघण्टौ २ अध्यायः ॥

निकरः, पुं, (निकरोति व्याप्नोतीति । नि+कृ+अच् ।) समूहः । इत्यमरः ।२ । ५ । ३६ ॥ (यथा, कलाविलासे । २ । १६ ।

"इत्यादिसुग्धबुद्धेरसमञ्जसवर्णनं रहः श्रुत्वा ।
यज्ञाति कनकनिकरं वृत्तं स्तत्त्वज्ञगोरयेः पापः ॥")

सारः । न्यायदेयधनम् । निधिः । इति मेदिनी । रे, १७२ ॥

निकर्षणं, क्ली, (निर्गतं कर्षणं यत्र ।) सन्निवेशः । इत्यमरः । २ । ३ । १६ ॥ पत्तनादिषु दिगादिपरिच्छिन्नप्रदेशः । इति भरतः ॥ पूर्व्वदिगाद्यवच्छिन्नग्रहाणामपीति कलिङ्गः ॥ पुराद्यैर्बहिर्निहरणभूमिः । इति स्वाम्यादयः ॥ प्राङ्गणादिसन्निवेशः । इति सारसुन्दरी ॥

निकषः, पुं, (निकषति घिनष्टि स्वर्णादिकं यत्रेति । नि+कष+"गोचरसञ्चरेति ।" ३ । ३ ।१।१६ । इति चकारात् घः ।) ग्रावा । इत्यमरः । २ । १० । ३२ ॥ कष्टिपातर इति भाषा) (यथा, रघुः । १७ । ४६ ।

"निकषे हेमरेखेव श्रीरासीदनपायिनी ॥") ।

निकषा, स्त्री,(निकषति घिनष्टीति । कष हिंसे+पदाद्यच् । ततष्टाप् ।) राक्षसमाता । इत्यमरः ॥ सा सुमालिकन्या विश्रवसो भार्य्या च । इति रामायणम् ॥

निकषा, अ, (नि+कष गतौ+"आः समिनिकषिभ्याम् ।" उणा । ४ । १७४ । इति आः ।) निकटम् । इत्यमरः । ३ । ४ । १६ ॥ (यथा, माघे । १ । ६८ ।

"पयोधिमावद्धजलज्वलाविलां
विलङ्घ्य लङ्कां निकषा हनिष्यति ॥")

मध्यम् । इति मेदिनी । षे, ७६ ॥

निकषात्मजः, पुं, (निकषाया आत्मजः ।) राक्षसः । इत्यमरः । १ । १ । ६३ ॥

निकषः, पुं, (निकषति घिनष्टि स्वर्णादिकं यत्र । नि+कस+घः ।) निकषः । इत्यमरटीकायां भरतः ॥

निकामं, क्ली, (नि+कम इच्छायाम्+घञ् ।) इष्टम् । यथेप्सितम् । इत्यमरः । २ । ६ । ५७ ॥ (यथा, देवीभागवते । १ । ७ । ४० ।

"कुर्व्वन्ति देवि ! भजनं सकलं निकाम
मालो समस्तजननीं किल कामधेनुम् ॥")

निकायः, पुं, (निचीयते इति । नि+चि+"सहे वाननौत्तराधर्य्ये ।" ३ । ३ । ४२ । इति घञ् । आदेश्च कः ।) लक्ष्यम् । सधर्म्मिप्राणिसंघातः । (यथा, महाभारते । १ । १२३ । ४५ ।

"तथा देवनिकायानां सेन्द्राणाञ्च दिवौकसाम्॥")

संहतानां समुच्चयः। (यथा, श्रीकण्ठचरिते। ६। १८।
"नीरन्ध्रनिर्यत्सुमनोनिकाय-
कायापपट्टप्रणयादशोकः॥")
निलयः। (यथा, मनुः। १। ३६।
"एते मनूंस्तु सप्तान्यानसृजन् भूरितेजसः।
देवान् देवनिकायांश्च महर्षींश्चामितौजसः॥")
परमात्मा। इति मेदिनी। ये, ८७॥
निकाय्यः, पुं, (निचीयतेऽस्मिन् धान्यादिकमिति। नि+चि+"पाय्यसांनाय्यनिकाय्येति।" ३। १। १२६। इति ण्यत्प्रत्ययेन निपातनात् साधुः।) गृहम्। इत्यमरः। २। २। ५॥ (यथा, भट्टिः। ६। ६६।
"न प्रणाश्यो जनः कश्चिन्निकाय्यं तेऽधितिष्ठति।
देवकार्यविघाताय धर्म्मद्रोही महोदये॥")
निकारः, पुं, (नि+कृ+घञ्।) विप्रकारः। अपकारः। उत्कारः। धान्यस्योर्द्ध्वेषणम्। इत्यमरभरतौ॥ खलीकारः। इति स्वामी॥ धिक्कारः। इति शब्दमाला॥
निकारणं, क्ली, (निकारयति क्षिप्रमनेनेति। नि+कृ+णिच्+ल्युट्।) मारणम्। वधः। इत्यमरः। २। ८। ११२॥
निकाषः, त्रि, (निकाषते शोभतेऽनेन इति। काष दीप्तौ+करणे घञ्।) नीकाशः। इत्यमरटीका॥ (तालव्यशकारान्तोऽपि दृश्यते॥)
निकुञ्चकः, पुं, (निकुञ्चतीति। नि+कुञ्च कौटिल्ये+ण्वुल्।) परिमाणविशेषः। कुडवपादः। स च प्रस्थत इति ख्यातः। इति भरतधृतसर्व्वस्वम्॥ वानीरवृक्षः। इति भावप्रकाशः॥ (जलवेतसः। तत्पर्य्यायो यथा,—
"निकुञ्चकः परिव्याधो नादेयो जलवेतसः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
निकुञ्चितं, क्ली, (नि+कुञ्च+क्तः।) अङ्गहारान्तर्गतशिरोविशेषः। यथा,—
"आकम्पितं कम्पितञ्च धुतं विधुतमेव च।
परिवाहितमाधूतमवधूतं तथाञ्चितम्॥
आकुञ्चितं परावृत्तसृतविप्रकीर्णाधोगतम्।
लोलितं प्रलतञ्चेति चतुर्दशविधं शिरः॥"
इति सङ्गीतदामोदरः॥
निकुञ्ज, पुं क्ली, (नितरां कौ पृथिव्यां जायते इति। जन्+डः। पृषोदरादित्वात् समासमे साधुः।) कुड्मम्। इत्यमरः। २। ३। ८॥ (यथा, आर्य्यासप्तशत्याम्। ४६३।
"रचिते निकुञ्जपत्रैर्भिक्षुकपात्रे ददाति साधवम्।
पर्य्युषितमपि सुलीक्ष्णशाकदुग्धं वधूरन्नम्॥")
निकुञ्जिकाम्बा, स्त्री, (निकुञ्जिका कुञ्जोद्भवा अम्बा।) कुञ्जिकावृक्षभेदः। तत्पर्य्यायः। कुञ्जिका २ कुञ्जवल्लरी ३ इयं गुणैः श्रीवल्लीसदृशी। इति राजनिर्घण्टः॥
निकुम्भः, पुं, कुम्भकर्णपुत्रः। (यथा, रामायणे। ६। ७५। ४६।
"स कुम्भश्च निकुम्भश्च कुम्भकर्णात्मजावुभौ।
प्रेषयामास संक्रुद्धो राक्षसैर्बहुभिः सह॥")
दन्तिकावृक्षः। इति मेदिनी। मे, १७॥
(अस्य पर्य्यायो यथा,—
"चित्रादन्ती निकुम्भः स्यादुपचित्रा सुकूलकः।
दाक्षायणी विशल्या च तथोडुम्बरपर्ण्यपि॥"
इति वैद्यकरत्नमालायाम्॥)
(प्रह्लादस्य पुत्रविशेषः। यथा, महाभारते। १। ६५। १६।
"प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत!।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत!॥"
दनोः पुत्राणामन्यतमः। यथा, तत्रैव। १। ६५। २५।
"गिरिचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा।
शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा।
एते ख्याता दनोर्व्वंशे दानवाः परिकीर्त्तिताः॥"
खनामख्यातः क्षत्रियविशेषः। इति सह्याद्रिखण्डे। ३४। ४४॥ महादेवस्य पार्श्वानुचरविशेषः। यथा, हरिवंशे। २६। ४५।
"पार्श्वे तिष्ठन्तमासाद्य निकुम्भमिदमब्रवीत्।
गणेश्वरपुरीं गत्वा शून्यां वाराणसीं कुरु॥"
तथा च रघुः। २। ३५।
"त्वमेहि मां किङ्करमभ्युपैतुः
कुम्भोदरं नाम निकुम्भमित्रम्॥"
स्कन्दस्य सैनिकविशेषः। यथा, महाभारते। ६। ४५। ५३।
"इमानि नामानि चाप्येषां येऽन्ये स्कन्दस्य सैनिकाः।
विविधायुधसम्पन्नाश्चित्राभरणवर्म्मिणः।
शङ्ककर्णो निकुम्भश्च पद्मः कुमुद एव च॥"
हर्य्यश्वपुत्रविशेषः। यथा, हरिवंशे। १२। २।
"धौम्रसारिर्दृढाश्वस्तु हर्य्यश्वस्य चात्मजः।
हर्य्यश्वस्य निकुम्भोऽभूत् सत्यधर्म्मरतः सदा॥")
निकुम्भाख्यबीजं, क्ली, (निकुम्भाख्यस्य दन्तिकावृक्षस्य बीजवत् बीजं यस्य।) जयपालः। इति राजनिर्घण्टः॥ (जयपालशब्दोक्तस्य गुणादिकं ज्ञेयम्॥)
निकुम्भितं, क्ली, वृत्यविषयकाधोत्तरशृतकरणान्तर्गतकरणविशेषः। यथा, सङ्गीतदामोदरे।
"करणानान्तु सर्व्वेषां सामान्यं लक्षणञ्चिदम्।
प्रायो वामकरो यत्नःस्थितोऽन्यः पुरतोऽनुगः॥
पादाभ्यां करणं ज्ञेयं तदिहाधोत्तरं शृतम्।
निकुम्भितं पार्श्वक्रान्तमतिक्रान्तं विवर्त्तकम्॥
विद्युद्भ्रान्तं गजक्रीड़ं क्रान्तञ्च गरुड़प्लुतम्॥"
निकुम्भी, स्त्री, (निकुम्भ+गौरादित्वात् ङीष्।) दन्तीवृक्षः। इति राजनिर्घण्टः॥
निकुरम्बं, क्ली, (निकुरतीति। नि+कुर+बाहुलकात् अम्बच्।) समूहः। इत्यमरः। २। ५। ४०॥ (पुंलिङ्गेऽपि दृश्यते। यथा, श्रीकण्ठचरिते। १८। ४०।
"आरक्तगण्डरुचिविद्रुमदण्डभाजो
यस्याक्षि पेतनिकुरम्ब इवाट्टहासः॥")
निकृतः, त्रि, (नि+कृ+क्तः।) प्रत्याख्यातः। भ्रष्टः। इत्यमरः। ३। १। ४६॥ वञ्चितः। नीचः। इति मेदिनी। ते, ११६॥
निकृतिः, स्त्री, (नि+कृ+क्तिन्।) भर्त्सनम्। क्षेपः। भ्रष्टः। प्राप्यम्। इति मेदिनी। ते, ११६॥ (यथा, किराते। १। ४५।
"न समयपरिरक्षणं क्षमन्ते
निकृतिपरेषु परेषु भूरिधाम्नः॥")
दैन्यम्। इति शब्दरत्नावली॥
निकृष्टः, त्रि, (नि+कृष+क्तः।) अधमः। इत्यमरः। ३। १। ५४॥ जात्याचारादिनिन्दितः। इति भरतः॥
निकेतः, पुं, (निकेतति निवसत्यस्मिन्निति। नि+कित निवासे+अधिकरणे घञ्।) निकेतनम्। इत्यमरटीकायां भरतः॥ (यथा, देवीभागवते। ४। ११। १२।
"तदस्य विनयं कृत्वा सामपूर्व्वं कृतेन वै।
तिष्ठध्वं स्वनिकेतेषु मदागमनकाङ्क्षया॥")
निकेतनं, क्ली, (निकेतति निवसत्यस्मिन्निति। नि+कित+अधिकरणे ल्युट्।) गृहम्। इत्यमरः। २। २। ४॥ (यथा, देवीभागवते। १। २०। ४२।
"विसर्ज्जितश्च सा तेन गता श्वाश्रूनिकेतनम्।
उवाच तं वरारोहा राजानं मनसेप्सितम्॥")
पलाशवृक्षः, पुं। इति शब्दचन्द्रिका॥
निकोचकः, पुं, (निकोचति शब्दायते। नि+कुच शब्दे+ण्वुल्।) अङ्कोठवृक्षः। इत्यमरः। २। ४। २६॥ (यथा, सुश्रुते। १। ४६।
"वातामाषोड़ाभिषुकनिषुलपिचुनिकोचकोरुमाणप्रभृतीनि॥" क्वचित् क्लीवलिङ्गेऽपि दृश्यते। यथा,—
"वातामाषोड़ाभिषुकं सकुलकनिकोचकम्।
उरुमाणं प्रियालञ्च दृढ़ञ्च गुरुशीतलम्॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)
निकोठकः, पुं, (निकोचकः+पृषोदरादित्वात् चस्य ठः।) निकोचकः। इत्यमरटीकायां भरतः॥ (यथा,—
"तिलः प्रियालाभिषुकौ विभीतकाश्चित्राभयेरण्डमधूकसर्षपाः।
कुसुम्भविल्वारुकमूलकातसी-
निकोठकाचोड़करञ्जिगुञ्जाः॥
क्षेड़ाग्नयाख्यावरसंज्ञितास्तथा-
स्युर्ब्भङ्गमा मत्स्यखगाः सपक्षिणः॥"
इति चरके सूत्रस्थाने त्रयोदशेऽध्याये॥)
निक्कणः, पुं, (नि+क्कण शब्दे+"क्कणो वीणायाञ्च।" ३। ३। ६५। इति अप्।) वीणाया अन्यस्य च किन्नरादेः शब्दः। तत्पर्य्यायः। निक्काणः २ क्काणः ३ क्कणः ४ क्कणनम् ५। इत्यमरः। १। ७। २४॥ प्रादेरप्युपसर्गादुत्तरस्य क्कणधातोः प्रक्काणः ६ प्रक्कणः ७ इत्यादयः प्रयोगा भवन्ति। आदिना सुक्काणः सुक्कणः उपक्काणः उपक्कणः इत्यादयः। इति भरतः॥

निकाशः, पुं, (नि+कश ग्रन्थे+पचि घञ्।) निकषः। इत्यमरः। १। ७। २४॥

निखर्ब्ब, क्ली, (निखर्ब्बति बहुलसंख्यां गच्छतीति। नि+खर्ब्ब गतौ+पचाद्यच्।) दशखर्ब्बसंख्या। दशसहस्रकोटयः। इति लीलावती हेमचन्द्रश्च। (यथा, महाभारते। २। ६१। ३।

"शङ्खश्चैव महापद्मो निखर्ब्बः कोटिरेव च॥")

पुंलिङ्गोऽप्ययम्। यथा। वृन्दः खर्ब्बो निखर्ब्बश्चेत्यादि॥

निखर्ब्बः, त्रि, (निगतो खर्ब्बः।) वामनः। इति हेमचन्द्रः। ३। ११८॥

निखिलं, त्रि, (निष्टत्तं खिलं शैथिल्यं यस्मात्।) समस्तम्। इत्यमरः। ३। १। ६५॥ (यथा, देवीभागवते। १। २। ४०।

"निखिलमलगणानां नाशकृत् कामकन्दं प्रकटय भगवत्या नामयुक्तं पुराणम्॥")

निगड़ः, पुं क्ली, (निगलति बध्नातीति। नि+गल+अच्। लस्य ड़त्वम्।) हस्तिनां लोहमयपादबन्धोपकरणम्। इति भरतः॥ आँडु इति दाँडुका इति च ख्यातः॥ तत्पर्य्यायः। शृङ्खलः २ अन्दुकः ३। इत्यमरः। २। ८। ४१॥ हिक्कीरः ४ अन्दुः ५। इति शब्दरत्नावली॥ (यथा, माघे। ५। ४८।

"बद्धापराधि परितो निगड़ान्यलावीत् स्वातन्त्र्यमुज्ज्वलमवाप करेणुराजः॥")

निगड़ितः, त्रि, (नि+गल+क्तः। लस्य ड़त्वम्। यद्वा, निगड़ो जातोऽस्येति। तारकादित्वात् इतच्।) बद्धः। इति हेमचन्द्रः। ३। १०३॥

निगमः, पुं, होमधूमः। इति त्रिकाण्डशेषः॥

निगदः, पुं, (नि+गद भाषे+"नौ गदनदपठस्वनः।" ३। ३। ६४। इति अप्।) भाषणम्। कथनम्। तत्पर्य्यायः। निगादः २। इत्यमरः। ३। २। १९॥ (यथा, भागवते। ५। ३। १६।

"इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह॥") उच्चैर्जपः। यथा। निगदस्तु जनैर्वेद्य इत्यागमः॥

निगमः, पुं, (निगमे पुर्य्यां भवः। निगम+"तत्र भवः।" ४। ३। ५३। इत्यण्। संज्ञापूर्व्वकत्वात् वृद्धयभावः।) वाणिजः। (निगम्यतेऽत्रेति। नि+गम+"गोचरसञ्चरेति।" ३। ३। ११८। इति घप्रत्ययेन साधुः।) पुरी। कटः। (निगम्यते ज्ञायतेऽनेनेति।) वेदः। (यथा, देवीभागवते। १। ५। ६१।

"कथङ्कारं वाच्यः सकलनिगमागोचरगुणप्रभावः स्वं यस्मात् स्वयमपि न जानाति परमम्॥")

वणिक्पथः। हट्ट इति यावत्। इति मेदिनी। मे, ४५॥ निश्चयः। (यथा, "तस्या एव प्रतिज्ञाया हेतुभिर्दृष्टान्तोपनयनिगमैः स्थापना॥" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)

II

अध्वा। इति हेमचन्द्रः। ४। ३८॥ (उपदेशः। यथा, भागवते। १। ५। ३६।

"इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम्। अदान्मे ज्ञानमैश्वर्य्यं स्वस्मिन् भावञ्च केशवः॥")

निगरः, पुं, (नि+गृ+"ऋदोरप्।" ३। ३। ५७। इति भावे अप्।) भोजनम्। इति राजनिर्घण्टः॥

निगरणं, क्ली, (नि+गृ भक्षणे+भावे ल्युट्।) भक्षणम्। इति मेदिनी। णे, ६८॥

निगरणः, पुं, (निगीर्य्यते भक्ष्यतेऽनेनेति। नि+ग+करणे ल्युट्।) गलः। इति मेदिनी। णे, ६८॥ होमधूमः। इति शब्दरत्नावली॥

निगादः, पुं, (नि+गद भाषे+घञ्।) कथनम्। इत्यमरः। ३। २। १२॥

निगारः, पुं, (नि+गृ भक्षणे+भावे घञ्।) निगरणम्। भक्षणम्। इत्यमरः। ३। २। ३७॥

निगालः, पुं, (निगलति भक्षयत्यनेनेति। नि+गल भक्षणे+करणे घञ्।) अश्वगलोद्देशः। इत्यमरः। २। ८। ४८॥ (यथा, अश्ववैद्यके। २। १४।

"घण्टाबन्धसमीपस्थो निगालः परिकीर्त्तितः। अधस्ताच्च निगालस्य गलमाहुर्मनीषिणः॥")

निगालवान्, पुं, (निगालोऽस्यास्तेति। निगाल+मतुप् मस्य वः।) अश्वः। इति शब्दचन्द्रिका॥

निगुः, पुं, (निगम्यते विद्यतेऽनेनेति। नि+गम+बाहुलकात् डुः।) मनः। इति त्रिकाण्डशेषः॥ मलम्। मूलम्। मनोज्ञम्। चित्रकर्म्म। इति संक्षिप्तसारोणादिवृत्तिः॥

निगूढः, पुं, (निगुह्यते संव्रियते इति। नि+गुह+क्तः। "यस्य विभाषा।" ७। २। १५। इति। नेट्।) वनसूरणः। इति हेमचन्द्रः। ४। २३६॥ गुप्ते, त्रि। यथा,—

"आस्ते विभुः परमनिर्वृत एव सौम्यो ग्रस्योरिति त्रिजगतीजनचित्तवृत्तिः। अन्तर्निगूढनयनानलदाहदुःखं जानाति कः खयमते वत प्रीतरश्मेः॥"

इत्युद्भटः॥

निग्रहः, पुं, (नियमेन ग्रहणमिति। नि+ग्रह+"ग्रहवृदृनिश्चि।" ३। ३। ५८। इति अप्।) अनुग्रहाभावः। इत्यमरः। ३। २। ३१॥ (यथा, मनुः। ७। १७५।

"नियतं प्रकृतीनाञ्च कुर्य्याद् योऽरिबलस्य च। उपसेवेत तं नित्यं सर्व्वयत्नैर्गुरुं यथा॥") बन्धनम्। (यथा, महाभारते। १। १।९७४।

"यदाग्नौत्रं कर्णदुर्य्योधनाभ्यां बुद्धिं कृतां नियच्छे केशवस्य॥")

भर्त्सनम्। सीमा। इति मेदिनीकरहेमचन्द्रौ॥ (निराकरणम्। यथा, रघुः। ८। २५।

"दिनक्षयान्ते रविर्द्विमनिग्रहे- र्व्विमलयन् मलयद्रुमलज्जतः॥")

दण्डः। यथा, रघुः। ११। ५५।

"ते चतुर्थसहिताखयो वसुः सूनवो नववधूपरिग्रहात्।

सामदानविधिभेदनिग्रहाः षड्विधस्य इव तस्य भूपतेः॥")

चिकित्सा। इति राजनिर्घण्टः॥ विष्णुः। यथा, महाभारते। १३। १४६। ६४।

"प्रग्रहो निग्रहो व्यायो नैकश्रृङ्गो गदाग्रजः॥" ("सर्व्वं प्रलये निगृह्णातीति निग्रहः।" इति शाङ्करभाष्यम्॥ महादेवः। इति महाभारतम्। १३। १७। ६४॥)

निग्राह्यः, पुं, (नि+ग्रह+"आक्रोशेऽवन्योर्ग्रहः।" ३। ३। ४५। इति घञ्।) निग्रहः। आक्रोशः। यथा। निग्राह्यस्ते भूयात्। इति संक्षिप्तसारव्याकरणम्॥ (यथा च भट्टिः। ७। ४३।

"संदृशायान्तु वैदेह्यां निग्राह्यो वोऽर्थवानरैः॥")

निघः, पुं, (नियमितं निर्व्विशेषेण वा हन्यते ज्ञायते इति। नि+हन+"निघो निमितम्।" ३। ३। ८७। निपातनात् साधुः।) विश्वकर्म्मा। समन्तात् तुल्यारोहपरिणाहः। इत्यमरभरतौ॥

निघण्टिका, स्त्री, गुलञ्चकन्दः। इति राजनिर्घण्टः॥

निघण्टुः, पुं, (निघण्टति शोभते इति। घण्टृ दीप्तौ+"सृगयादयश्च।" उणा०। १। ३८। इति कुप्रत्ययेन साधुः।) नामसंग्रहः। इति हेमचन्द्रः। २। १७२॥

निघसः, पुं, (अदनमिति। नि+अद भक्षणे+"नौ ज च।" ३। ३। ६०। इति अप्। "घञपोश्च।" २। ४। ३८। इति घसृलादेशः।) आहारः। इत्यमरः। २। ६। ५६॥

निघातिः, स्त्री, (निहन्यतेऽनयेति। नि+"वसिवपियजीति।" उणा०। ४। १२४। इति इञ्, ततः कुत्वम्।) लोहधानी। लौहमयदण्डः। इत्युणादिकोषः॥

निघुष्टं, क्ली, (निघुष्यते स्मेति। नि+घुष्+भावे क्तः।) घुष्टम्। घोषणम्। इति शब्दरत्नावली॥

निघृष्वः, पुं, (नि+घृषु संघर्षे+"सर्व्वनिघृष्वरिष्वेति।" उणा०। १। १५३। इति वनुप्रत्ययेन निपातनात् साधुः।) खरः। इत्युणादिकोषः॥ वायुः। खरः। मार्गः। वराहः। इति संक्षिप्तसारोणादिवृत्तिः॥ (दृश्यः। इति निघण्टुः। ३। २॥)

निघ्नः, त्रि, (निहन्यते नियम्यते इति। नि+हन+घञर्थे कः। नियम्यत्वादेवास्य तथात्वम्।) अधीनः। इत्यमरः। ३। १। १६॥ (यथा, रघुवंशे। १४। ५८।

"आश्वास्य रामावरजः सतीं तामाख्यातवाल्मीकिनिकेतमार्गः। निघ्नस्य मे भर्त्तृनिदेशरौक्ष्यं देवि! क्षमस्वेति बभूव नम्रः॥")

अङ्गपूरणम्। इति लीलावती॥ (यथा, सूर्य्यसिद्धान्ते। ३। २६।

"पुनर्ह्रादघ्ननिघ्नाच्च लभ्यते यत फलं बुधैः।"

पुं। सूर्य्यवंशीयनृपभेदः। यथा, हरिवंशे। १५। २२।
"अनरण्यसुतो निम्नो निम्नपुत्रौ बभूवतुः॥")

निचयः पुं. (नि+चि+"एरच्।" ३। ३। ५६। इत्यच्।) समूहः। (यथा, महाभारते।४।२।३।
"आहरिष्यामि दारूणां निचयान् महतो-
ऽपि च॥")

निश्चयः। इति शब्दरत्नावली॥

निचिकी, स्त्री, (निचिना कायति शोभते इति। कै+क। गौरादित्वात् ङीष्।) नेचिकी। उत्तमा गौः। इत्यमरटीकायां भरतः॥

निचितं, त्रि, (निचीयते स्मेति। नि+चि+क्त।) पूरितम्। व्याप्तम्। इति हेमचन्द्रः। ६। १०६॥ (यथा, महाभारते।३।१२६।४।
"पश्य नानाविधाकारैरग्निभिर्निचितां महीम्॥"
सञ्चितम्। यथा, भावप्रकाशे अतिसाराधिकारे।
"वायुः प्रवृद्धो निचितं बलाग्नं
गुदत्वगस्थादहिताशनस्य॥"
नदीभेदे, स्त्री। यथा, महाभारते।६।६।१८।
"कौशिकीं त्रिदिवां लोलां निचितां रोहिता-
रणीम्॥")

निचुलः, पुं, (निचोलति समुच्छ्रयतीति। नि+चुल+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) इज्जलवृक्षः। इत्यमरः। २। ४। ६१॥ (पर्य्यायोऽस्य यथा,—
"इज्जलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वेतसवृक्षः। इति राजनिर्घण्टः॥ निचोलः। इति हेमचन्द्रः।४। २११॥

निचुलकं, क्ली, (निचुल इव प्रतिभाति। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्।) निचोलकम्। इति हारावली। १६२॥

निचोलः, पुं, (निचोल्यत इति। नि+चुल+घञ्।) येन स्यूतेनास्यूतेन वा वस्त्रान्तरमाच्छाद्यते। इत्यमरभरतौ॥ पाछुड़ि इति ख्यातः। तत्पर्य्यायः। निचुलः २। उत्तरच्छदः ३ प्रच्छदपटः ४॥ इति हेमचन्द्रः। ३। ३४०॥ (यथा, राजतरङ्गिण्याम्। ३। १५६।
"सन्ततध्वान्तमिषतस्त्रीप्रयोनवशीकृताः।
आशाशंकाग्निरे नीलनिचोलाच्छादिता इव॥")

निचोलकः, पुं, (निचोल इव कायतीति। कै+क।) भटादेशोलाकृतिवस्त्रादिः। तत्पर्य्यायः। कूर्पासः २ वारवाणः ३ कञ्चुकः ४। इति हेमचन्द्रः। ३। ४३१॥

निच्छविः, स्त्री, (निष्क्रान्ता छविः सादृश्यं यस्य।) तीरभुक्तिदेशः। इति त्रिकाण्डशेषः॥ तिरहुत इति भाषा॥

निच्छविः, पुं, वर्णसङ्करजातिभेदः। इति शब्दरत्नावली॥ यथा,—
"स्त्रियो मद्यञ्च राजन्याद्वैश्यात् निच्छिविरेव च।
नटश्च करणश्चैव खसो द्रविड़ एव च॥"
इति मनुः। १०। २२॥

निजं, त्रि, (निजयेन जायत इति। नि+जन+डः।) स्वकीयम्। (यथा, हितोपदेशे।
"अयं निजः परो वेति गणना लघुचेतसाम्॥")
नित्यम्। इत्यमरः। ३। ३। ३२॥

निट्, [ट्] स्त्री, (नितरां ग्यति तनूकरोतीति व्यापारानिति। ग्रो+कः। पृषोदरादित्वात् साधुः।) निद्रा। यथा,—
"वास्तवोषा निड्नाख्या च वासतेयी तमा-
निद्रौ॥"
इति राजपर्य्याये त्रिकाण्डशेषः॥
(यथा, मनुः। ६। ६०।
"विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि।
एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन॥")

निडीनं, क्ली, (नीचैर्डीनं यतनमस्यस्मिन्।) पक्षिगतिविशेषः। (यथा, महाभारते।८।४१।२६।
"निडीनमथ संडीनं तिर्य्यग्डीनगतानि च॥")
श्येनैर्यानम्। इति जटाधरः॥

निष्किका, स्त्री, कलायविशेषः। तेओड़ा इति भाषा॥ तत्पर्य्यायः। सतीला २ तिक्ता ३। इति शब्दचन्द्रिका॥

नितम्बः, पुं, (निभृतं तम्यते आकाङ्क्ष्यते कामुकैरिति। तमु आकाङ्क्षायाम्+उच्चादयश्चेति साधुः। यद्वा, नितम्बति पीड़यति नायकचित्तमिति। नि+तम्ब हिंसायाम्+अच्।) स्त्रीकट्याः पश्चाद्भागः। इत्यमरः।२।६।७४॥ पाछा इति भाषा॥ (यथा, माघे। ११। ५।
"विपुलतरनितम्बाभोगरूढे रमण्याः
शयितुमनधिगच्छन् जीवितेशोऽवकाशम्॥")
स्कन्धः। रोधः। कटकः। (यथा, भट्टिकाव्ये। २। ८।
"गिरेर्नितम्बे मरुता विभिन्नं
तोयावगूढेषु हिमाभमम्भः॥")
कटिमात्रम्। इति मेदिनी। बे, १२॥ (यथा, विदग्धमुखमण्डने।
"तरुण्यालिङ्गितः कण्ठे नितम्बस्थानमाश्रितः।
गुरूणां सन्निधानेऽपि कः कूजति सुहुर्मुहुः॥")

नितम्बिनी, स्त्री, (प्रशस्तो नितम्बोऽस्त्यस्या इति। नितम्ब+"अत इनिठनौ।" ५।२।११५। इति इनिः स्त्रियां ङीप्।) प्रशस्तनितम्बविशिष्टा। इत्यमरः।२।६।३॥ (यथा, आर्य्यासप्तशत्याम्। ५५४।
"वेणुरणेऽपि महता विनिर्मितं भवति कर्म्म
शोभायै।
दुर्वहनितम्बमन्थरमपि हरति नितम्बिनी-
गृत्यम्॥")
स्त्रीमात्रम्। इति राजनिर्घण्टः॥ (यथा, कुमारसम्भवे। ३। ७।
"नितम्बिनीमिच्छसि मुक्तलज्जां
कण्ठे स्वयं ग्राहयितुं भुजाभ्याम्॥")
नितम्बविशिष्टे, त्रि। यथा, रघुः।१६।२६।
"लोभ्यमाननयनः सुधांशुकै-
र्मेखलागुणपदैर्नितम्बिभिः॥")

नितरां, [म्] अ, (नि+तरप्+"किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे।" ५।४।११। अमुप्रत्ययः।) सुतराम्। यथा,—
"नागोद्भवो नागधनाभिलाषी
वक्रोक्तिजालो नितरां कुशीलः॥"
इति कौटीप्रदीपः॥

नितलं, क्ली, (नितरां तलमधोभागो यस्मिन्।) सप्तपातालान्तर्गतपातालविशेषः। इति शब्दरत्नावली॥

नितान्तं, क्ली, (नितान्यतीति। तम+कर्त्तरि क्तः। "अनुनासिकस्येति।" ६।४।१५। इति दीर्घः।) अतिशयः। (यथा, कुमारसम्भवे। ३। ४।
"केनाभ्यसूया पदकाङ्क्षिणा ते
नितान्तदीर्घैर्ज्वलिता तपोभिः॥")
तद्वति, त्रि। इत्यमरः। १। १। ७०॥

नित्यं, क्ली, (नियमेन भवम्। नि+"अव्ययात् त्यप्।" ४।२।१०४। इति त्यप्।) निरन्तरक्रियावचनम्। तत्पर्य्यायः। सततम् २ अनारतम् ३ अश्रान्तम् ४ सन्ततम् ५ अविरतम् ६ अनिशम् ७ अनवरतम् ८ अजस्रम् ९। इत्यमरः। १। १। ६९॥ प्रसक्तम् १० आसक्तम् ११ अलब्धम् १२। इति जटाधरः॥ तद्वति, त्रि। इत्यमरः॥ प्रत्यवायजनकीभूताभावप्रतियोगि। यथा एकादश्यामुपोषणं नित्यम्। ध्वंसप्रागभावाप्रतियोगि। यथा, गगनं नित्यम्। अहरहर्ज्ज्यायमानम्। यथा, नित्यं क्रीड़न्ति कुमाराः। अहरहःक्रियमाणत्वेन विधिबोधितम्। यथा, स्नानतर्पणादिकं नित्यम्। अनवच्छिन्नपरम्पराकः। यथा, वर्षा नित्याः॥

नित्यः, त्रि, (नियमेन भवः। नि+"अव्ययात् त्यप्।" ४। २। १०४। इत्यत्र "त्यप् नेर्ध्रुव इति वक्तव्यम्।" इति वार्त्तिकोक्त्या त्यप्।) कालत्रयस्थायी। तत्पर्य्यायः। शाश्वतः २ ध्रुवः ३ सदातनः ४ सनातनः ५। इत्यमरः। ३।१।७२॥ (यथा, महाभारते। १। १००। २।
"दमो दानं क्षमा बुद्धिर्ह्रीर्धृतिस्तेज उत्तमम्।
नित्याध्यासन् महासत्त्वे शान्तनौ पुरुषर्षभे॥")
समुद्रे, पुं। इति राजनिर्घण्टः॥

नित्यकर्म्म, [न्] क्ली, (नित्यं कर्म्म।) प्रत्यवायजनकाभावप्रतियोगिकार्य्यम्। इति स्मृतिः॥ तद्यथा,—
"नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा।
गृह्यस्यस्य विधा कर्म्म तन्निबोधाम्यथ पुत्रक!॥
प्रत्यवायाश्रितं नित्यं यदेतत् कथितं तव।
नैमित्तिकं तथा चान्यत् पुत्रजन्मक्रियादिकम्॥
नित्यनैमित्तिकं ज्ञेयं पर्व्वश्राद्धादि पण्डितैः॥"
इति मार्कण्डेयपुराणम्॥ * ॥
तत्त्यागे दोषो यथा,—
"नित्यानां कर्म्मणां विप्र! तस्य हानिरहर्निशम्।
अकुर्व्वन् विहितं कर्म्म प्रक्तः पतति तद्दिने॥
प्रायश्चित्तेन महता शुद्धिमाप्नोत्यनापदि।
पक्षं नित्यक्रियाहानेः कर्त्ता मैत्रेय! मानवः॥

संवत्सरं क्रियाहानिर्यस्य पुंसोऽभिजायते ।
तस्यावलोकनात् सूर्य्यो निरीक्ष्यः साधुभिः सदा॥
सूतके स्नानं सचेलस्य शुद्धिहेतुर्मैथुनेऽपि ।।
पुंसो भवति तस्योक्ता न शुद्धिः पापकर्म्मणः ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥ * ॥

सूतादौ नित्यकर्म्मकरणनिषेधो यथा,—
"जातूर्द्धं सूतके जाते नित्यकर्म्म न चाचरेत् ।
नैमित्तिकञ्च तदधःस्ववक्त्रो न चाचरेत् ॥
सूतके च समुत्पन्ने क्षुरकर्म्मणि मैथुने ।
धूमोद्गारे तथा वान्तौ नित्यकर्म्माणि संत्यजेत् ॥
क्रये भुक्ते त्वजीर्णे च नैव भुक्ता च किञ्चन ।
कर्म्म कुर्य्यान्नरो नित्यं सूतके मृतके तथा ॥
पत्रं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम् ।
कषायादिपिण्यल्यन्तञ्च फलं भुक्ता न चाचरेत् ॥
जलस्यापि नरश्रेष्ठ ! भोजनाद्वेधजादृते ।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा ॥
जलौकां गूढ़पादञ्च लमिगखड्गपदादिकम् ।
कामाद्भेन संस्पृश्य नित्यकर्म्माणि संत्यजेत् ॥
विप्रेषतः शिवापूजां प्रमीतपितृको द्विजः ।
यावद्वत्सरपर्य्यन्तं मनसापि न चाचरेत् ॥
महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत् ।
आर्षिक्यं ब्रह्मयज्ञञ्च श्राद्धं देवव्रतञ्च यत् ॥
गुरुमाचम्य विप्रञ्च प्रकृत्यैव च याचिना ।
न कुर्य्यान्नित्यकर्म्माणि रेतःपाते च भैरव ! ॥"
इति कालिकापुराणे ५४ अध्यायः ॥

नित्यचौरं, क्ली, (नित्यं कालाकालाभावतो रागप्राप्तत्वात् सदातनं चौरम् ।) वैधेतरचौरम् । रागप्राप्तकैशच्छेदनम् । यथा.—
"चूड़ोदिते तिथावृक्षे बुधेन्द्रोर्हवसे नरः ।
नित्यचौरं प्रकुर्व्वीत जन्ममासे न तु क्वचित् ॥"
इति ज्योतिःसागरसारः ॥ * ॥

राजमार्त्तण्डे तु ।
"न स्नानमात्रगमनोत्सुकभूमितागा-
मभ्यक्तशुक्लरजकालनिवासनानाम् ;
सन्ध्या निशाग्निकुजार्कदिनेषु रिक्ते
चौरं हितं प्रतिपदद्वि न चापि विद्याम् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥

तत्र मासाः सौराः भाद्रपौषचैत्रा निषिद्धाः जन्ममासोऽपि निषिद्धः तदितरे विहिताः । वारस्तु बुधसोमयोर्विहितः। सामगानां मङ्गलवारोऽपि। तिथयस्तु नन्दारिक्तापूर्णिमामावास्याष्टमीभिन्ना विहिताः। नक्षत्राणि रेवत्यश्विनी पुष्यः धनिष्ठा श्लेषा श्रवणा स्वाती हस्ता मृगशिरः मूलभिधा पुनर्व्वसुः चित्रा। राजादेशे द्विजादेशे विवाहे मृतसूतकाशौचे बन्धमोक्षे यज्ञकर्म्मणि परीक्षायां निषिद्धमासादिष्वपि कार्य्यम्। अप्राप्तचैषिविद्धेऽपि दिने ।
"केशवमानर्त्तपुरं पाटलिपुत्रं पुरीमहीच्छत्रम् ।
दितिमदितिञ्च स्मरतां चौरविधौ भवति कल्याणम् ॥"
इत्युक्तार्थं कार्य्यम् । इति ज्योतिषम् ॥

नित्यगतिः, पुं, (नित्यं गतिरस्येति ।) वायुः । इति हेमचन्द्रः । ४ । १७२ ॥ (यथा, महाभारते । ७ । ४५ । २२ ।
"यथा वायुर्नित्यगतिर्जलदान् धृतशोऽम्बरे ॥")

नित्यदा, व्य, (नित्य+दाच् ।) सर्व्वदा। यथा,—
"पुण्यं मधुवनं तत्र सान्निध्यं नित्यदा हरेः ॥"
इति श्रीभागवते ४ स्कन्धः ॥

नित्यदानं, क्ली, (नित्यं दैवनैन्दिनं दानम् ।) प्रतिदिनकर्त्तव्यदानम् । यथा, गरुड़पुराणे ।
"नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम् ।
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ॥
अनुद्दिश्य फलं तत् स्यादब्राह्मणाय तु नित्यकर्म्म ॥"

नित्यप्रलयः, पुं, (नित्यः प्रलयः ।) चतुर्व्विधप्रलयान्तर्गतप्रलयविशेषः । यथा,—
"नित्यः सदैव जातानां यो विनाशो दिवानिशम्॥"
इति विष्णुपुराणे १ अंशे ७ अध्यायः ॥
"सदैव दीपज्वालावत् सातत्येन जातानां दिवानिशं यो विनाशः स नित्यः ॥" इति तट्टीकायां स्वामी ॥

नित्ययौवना, स्त्री, (नित्यं स्थिरं यौवनं यस्याः ।) द्रौपदी । इति हेमचन्द्रः । ३ । ३७४ ॥ (नित्यं यौवनं यस्येति ।) स्थिरयौवने, त्रि ॥

नित्यवैकुण्ठः, पुं, (नित्यः सनातनो वैकुण्ठः ।) विष्णोः स्थानविशेषः । यथा,—
"ऊर्द्धं नभसि संविष्टो नित्यवैकुण्ठ एव च ।
आत्माकाशसमो नित्यो विस्तृतश्चन्द्रविम्बवत् ॥
ईश्वरेच्छासमुद्भूतो निलयश्च निराश्रयः ।
आकाशवत् सुविस्तारश्चामूल्यरत्ननिर्म्मितः ॥
तत्र नारायणः श्रीमान् वनमाली चतुर्भुजः ।
लक्ष्मीसरस्वतीगङ्गातुलसीपतिरीश्वरः ॥
सुनन्दनन्दकुमुदपार्श्वादिभिरन्वितः ।
सर्व्वैश्वर्य्यसर्व्वसिद्धेशो भक्तानुग्रहकारकः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १५ अध्यायः ॥

नित्या, स्त्री, (नित्य+टाप् ।) पार्व्वती (यथा, मार्कण्डेये । ८५ । ८ ।
"रौद्राये नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः॥")
मनसा देवी । इति शब्दरत्नावली ॥ शक्तिविशेषः । अस्या मन्त्रो यथा,—
"वाग्भवं कामबीजञ्च नित्यक्लिन्ने मदद्रवे ।
द्वये वह्निवधूमन्त्रो द्वादशार्णोऽयमीरितः ॥"
ध्यानं यथा,—
"अर्द्धेन्दुमौलिमरुणाममराभिवन्द्या-
मम्भोजपाशगृणिपूर्णकपालहस्ताम् ।
रक्ताङ्गरागरसनाभरणां त्रिनेत्रां
ध्यायेच्छिवस्य वनितां मदविह्वलाङ्गीम् ॥"
इति तन्त्रसारः ॥
(तन्त्रविशेषः । यथा, महासिद्धसारस्वते ।
"गणेशगुरुविघ्नेशीतन्त्रं नित्यातन्त्रं शिवागमम्॥")

नित्यानध्यायः, पुं, (नित्यं सर्व्वथा यथा तथा अनध्यायः अध्ययनाभावः ।) सर्व्वथा वर्জ্জनीयवेदपाठकालादिः । यथा.—
"इमान्नित्यमनध्यायानधीयानो विवर्জ্জयेत् ।
अध्यापनञ्च कुर्ब्वाणः शिष्याणां विधिपूर्ब्वकम् ॥
कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥
विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥
एतांल्लक्ष्युत्पितान् विद्यात् यदा प्रादुष्कृताग्निषु ।
तदा विद्यादनध्यायमृतौ चाभ्रदर्शने ॥
निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्জ্জने ।
एतानाकालिकान् विद्यादनध्यायानृतावपि ॥
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने ।
सन्ध्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा ॥
नित्यानध्याय एव स्यादृग्रामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा ॥
अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ ।
अनध्यायो रुद्यमाने समवाये जनस्य च ॥
उदके मध्यरात्रे च विण्मूत्रस्य विसर्জ্জने ।
उच्छिष्टः श्राद्धसुक् चैव मनसापि न चिन्तयेत्॥
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।
त्राहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥
यावदेकानुद्दिष्टस्य गन्धो लेपश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत् ॥
ग्रयाणः प्रौढ़पादश्च स्नात्वा चैवावसक्थिकाम् ।
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥
नीहारे बाणशब्दे च सन्ध्ययोरेव चोभयोः ।
अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च ॥
अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी ।
ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्জ্জयेत् ॥
पांशुवर्षे दिशां दाहे गोमायुविरुते तथा ।
श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद्द्विजः ॥
नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा ।
वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥
प्राणि वा यदि वाप्राणि यत् किञ्चित् श्राद्धिकं भवेत् ।
तदालभ्याप्यनध्यायः प्राण्यास्यो हि द्विजः स्मृतः ॥
चौरैरुपद्रुते ग्रामे सम्भ्रमे चाग्निकारिते ।
आकालिकमनध्यायं विद्यात् सर्व्वासुतेषु च ॥
उपाकर्म्मणि चोत्सर्गे चिरात्तं शेषणं स्मृतम् ।
अष्टकासु त्रिहोरात्रमृतुसन्धासु च रात्रिषु ॥
नाधीयीताश्वमारूढ़ो न वृक्षं न च हस्तिनम् ।
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः ॥
न विवादे न कलहे न सेनायां न सङ्गरे ।
न शुक्लमाल्ये नाजीर्णे न वमित्वा न सूतके ॥
अतिथिश्चानुगुप्ताय मारुते वाति वा रजः ।
रुधिरे च सुते गात्राच्छस्त्रेण च परिप्लुते ॥
सामध्वनावृग्यजुषी नाधीयीत कदाचन ।
वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च ॥
ऋग्वेदः देवदैवत्यो यजुर्व्वेदस्तु मानुषः ।
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः ॥
एतद्विद्वान् विद्वांसमयोनिर्ऋषिमन्वहम् ।
क्रमतः पूर्व्वमभ्यस्य पश्चाद्वेदमधीयते ॥

प्रयुमङ्कमार्ज्जारश्वसर्पनकुलाखुभिः।
अन्तरागमने विद्यादनध्यायमहर्निशम्॥
दावेव वर्ज्जयेन्नित्यमनध्यायौ प्रयत्नतः।
स्वाध्यायभूमिमात्मानमशुचिं द्विजः॥"
इति मानवे। ४। १०१—१२७॥

नित्यानित्यवस्तुविवेकः, पुं, (नित्यानित्ये वस्तुनी तयोर्विवेकः विवेचनम्।) ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम्। इति वेदान्तसारः॥

नित्याभैरवी, स्त्री, (नित्या तदाख्या प्रसिद्धा भैरवी।) भैरवीविशेषः। अस्या ध्यानादिकं षट्कूटाभैरवीध्यानादिवत्॥ ध्यानं यथा,—
"बालसूर्य्यप्रभां देवीं जवाकुसुमसन्निभाम्।
मुण्डमालावलीरम्यां बालसूर्य्यसमांशुकाम्॥
सुवर्णकलसाकारपीनोन्नतपयोधराम्।
पाशाङ्कुशौ पुस्तकञ्च तथा च जपमालिकाम्॥"
दधतीमिति ध्येयः। इति तन्त्रसारः॥ (अस्या बीजं यथा, 'हसकलरङे' 'हसकलरङी' 'हसकलरङौं'॥)

निर्दं, क्ली, (नेदतीति। निद कुत्सायाम्+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) विषम्। इति शब्दचन्द्रिका॥

निर्दहः, पुं, (निदात् विघात् द्राति पलायते इति। द्रा+ष्टगयादित्वात् कुप्रत्ययेन साधुः।) मनुष्यः। इति शब्दचान्द्रिका॥ (निर्नास्ति दहुर्यस्येति विग्रहे। दहरोगरहिते, त्रि॥)

निदर्शनं, क्ली, (निदृश्यतेऽनेनेति। नि+दृश्+ल्युट्।) दृष्टान्तः। उदाहरणम्। यथा,—
"यक्तः प्राज्ञेऽपि दृष्टान्तावुभे ग्राह्यनिदर्शने॥"
इति नागार्थटीकायां भरतः॥
("दृष्टान्तेनार्थः प्रसाध्यते यत्र तन्निदर्शनम्॥ यथाग्निर्वायुना सहितः कोष्ठे वृद्धिङ्गच्छति तथा वातपित्तकफदुष्टो व्रण इति॥" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

निदर्शना, स्त्री, (निदर्श्यतीति। नि+दृश्+णिच्+ल्युः। टाप्।) काव्यालङ्कारविशेषः। तस्य लक्षणम्।
"अर्थान्तरप्रवृत्तेन किञ्चित्तत्सदृशं फलम्।
यत्रमत्त्वान्निदर्श्येत यदि सा स्यान्निदर्शना॥"
उदाहरणं यथा, दण्डी।
"उदयन्नेव सविता पद्मेष्वर्पयति श्रियम्।
विभावयिष्यतुच्छानां फलं सुचरितैरहम्॥"
(यथा च साहित्यदर्पणे। १०। ७०।
"सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्।
यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना॥
अत्र सम्भवद्वस्तुसम्बन्धनिदर्शना। यथा,—
'कोऽयं भूमिवलये जनान् मुधा
तापयन् सुचिरमेति सम्पदम्।
वेदयिष्यति दिनेन भानुमा-
नस्माद् चरमाचलं ततः॥'
अत्र रवेरीदृशार्थवेदनक्रियायां कर्तृत्वेनान्वयः सम्भवत्येव ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्तिरूपधर्म्मवत्त्वात्। स च रवेरस्ताचलगमनस्य प्रस्तापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति। असम्भवद्वस्तुसम्बन्धनिदर्शना त्वेकवाक्यानेकवाक्यगतत्वेन द्विविधा। तत्रैकवाक्यगा यथा,—
'कलयति कुवलयमाला-
ललितं कुटिलः कटाक्षविक्षेपः।
अधरः किसलयलीला-
माननमस्याः कलानिधेर्विलासम्॥'
अत्रान्यस्य धर्म्मं कथमन्यो वहतीति कटाक्षविक्षेपादीनां कुवलयमालादिगतललितादीनां कलनमसम्भवत् तल्ललितादिसदृशं ललितादिकमवगमयत् कटाक्षविक्षेपादेः कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति। यथा वा।
'प्रयाणे तव राजेन्द्र! सुक्ता वैरीष्टगोदयाम्।
राजहंसगतिः पद्मामाननेन ग्रहिष्यति॥'
अत्र पादाभ्यामसम्बद्धराजहंसगतेस्त्यागोऽनुपपन्न इति तयोस्तत्सम्बन्धः कल्प्यते। स चासम्भवन् राजहंसगतिमिव गतिं बोधयति। अनेकवाक्यगा यथा,—
'इदं किलाव्याजमनोहरं वपुः
तपः क्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति॥'
अत्र यत्तच्छब्दनिर्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृग्वपुष्त्वतपः क्षमत्वसाधनेच्छा नीलोत्पलपत्रधारया शमीलताछेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्य्यवस्यति। यथा वा।
'जन्मेदं बन्धतां नीतं भवभोगोपलिप्सया।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया॥'
अत्र भवभोगलोभेन जन्मनो व्यर्थतानयनं काचमूल्येन चिन्तामणिविक्रय इवेति पर्य्यवसानम्। एवम्।
'क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥'
अत्र मन्मत्या सूर्य्यवंशवर्णनमुडुपेन सागरतरणमिवेति पर्य्यवसानम्। इयं क्वचिदुपमेयवृत्तस्योपमानेऽसम्भवेऽपि भवति। यथा,—
'योऽनुभूतः कुरङ्गाक्ष्यास्तस्या मधुरिमाधरे।
समास्वादि स एवेक्षुकारसे रसविशारदैः॥'
अत्र प्रस्तुतस्याधरस्य मधुरिमधर्म्मस्य द्राक्षारसेऽसम्भवात्। पूर्ब्बवत् साम्ये पर्य्यवसानम्। मालारूपापि यथा मम।
'शिरसि मुक्तं तृणदंशकवदने
स्तनमर्पयसि स्तनादनरदने।
वितरसि तुरगं महिषविषाणे
निदधसेसो भोगविलासे॥'
इह बिम्बप्रतिबिम्बताबोधं विना वाक्यार्थापर्य्यवसानम्। दृष्टान्ते तु पर्य्यवसितेन वाक्यार्थेन सामर्थ्यादिम्बप्रतिबिम्बताप्रत्यायनम्। नापीयमर्थापत्तिस्तत्र 'हारोऽयं हरिणाक्षीणाम्।' इत्यादौ सादृश्यपर्य्यवसानाभावात्॥)

निदाघः, पुं, (नितरां दह्यतेऽत्र अनेन वा। नि+दह+घञ्। न्यङ्वादित्वात् कुत्वम्।) ग्रीष्मकालः। (यथा, रघुः। १०। ८३।
"ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च।
मनो जहुर्निदाघान्ते श्यामाभ्रा दिवसा इव॥")
उष्णः। घर्म्मः। इत्यमरमेदिनीकरौ॥ (यथा, रघुः। १२। ३२।
"रावणावरजा तत्र राघवं मदनातुरा।
अभिपेदे निदाघार्त्ता आलीव मलयद्रुमम्॥")
निदाघे वर्ज्जनीयानि यथा। पाटलपुष्पम् १ मल्लिकापुष्पम् २ तापः ३ सरः ४ पथिकश्रोत्रः ५ वायुः ६ सेकः ७ शुक्लः ८ प्रपा ९ स्त्री १० स्नगल्पा ११ आम्रादिफलपाकः १२। इति कविकल्पलता॥
("ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्व्यो भवन्त्यापश्च ता उपयुज्यमानाः सूर्य्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्यात्लघुत्वाद्दौर्ब्बल्याच्च वायोः सञ्चयमापादयन्ति स सञ्चयः प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां श्लीपवातवर्षैरतो वातिकान् व्याधीन् जनयति॥" इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥
"निदाघोपचितस्त्वेव प्रकुप्यन्तं समीरणम्।
निहन्यादनिलघ्नेन विधिना विधिकोविदः।
नदीजलं रूक्षमुष्णसुदमन्थं तथातपम्॥
व्यायामञ्च दिवास्वप्नं व्यवायञ्च वर्ज्जयेत्॥"
इति श्रीउत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

निदाघकरः, पुं, (निदाघा उष्णाः करा किरणानि यस्य। निदाघस्य उष्णस्य करो वा।) सूर्य्यः। इति हारावली। ११॥

निदाघकालः, पुं, (निदाघ एव कालः। निदाघस्य कालो वा।) ग्रीष्मर्त्तुः। स तु ज्येष्ठाषाढ़मासौ। यथा,—
"प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसञ्चयः।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये!॥"
इति ऋतुसंहारे। १। १॥

निदानं, क्ली, (नि निश्चयं दीयतेऽनेनेति। नि+दा+करणे ल्युट्।) आदिकारणम्। इत्यमरः। १। ४। २८॥ (यथा, रघुः। ३। १।
"निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दोर्द्दलनक्षमं दधौ॥")
कारणम्। वनस्पतादामादि। (यथा, ऋग्वेदे। ६। ३२। २।
"उदुश्रियाणामरजन्निदानम्॥"
नि+दो छेदे+भावे ल्युट्।) कारणक्षयः। इति मेदिनी। ने, ८३॥ (नि+दै पं शोधने+भावे ल्युट्।) शुद्धिः। तपःफलयाचनम्। अवसानम्। इति हेमचन्द्रः। ६। १५०॥ रोगनिर्णयः। इति विश्वः॥ तत्पर्य्यायः। रोगः

लक्षणम् २ आदानम् ३ रोगहेतुः ४। इति राजनिर्घण्टः॥ * ॥

"निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा।
सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम्॥
निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः।
निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते॥"

इति माधवकरः॥

("सेति कर्त्तव्यताको रोगोत्पादकहेतुर्निदानम्।"

इति रुग्विनिश्चयव्याख्याने विजयेनोक्तम्॥

"इह खलु हेतुर्निमित्तमायतनं कर्त्ता कारणं प्रत्ययः सङ्घात्मानं निदानमित्यनर्थान्तरम्। तच्चिविधं असात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चेत्यतस्त्रिविधविकल्पा व्याधयः प्रादुर्भवन्त्यग्नेयसौम्यवायव्याः।" इति निदानस्थाने प्रथमेऽध्याये चरकेणोक्तम्॥ पैलसुनिकृतचिकित्साग्रन्थविशेषः। यथा, ब्रह्मवैवर्त्ते। ६। १६। २१।

"पैलो निदानं करयस्तन्त्रं सर्व्वधरं परम्।
देधनिर्गयतन्त्रञ्च चकार कुम्भसम्भवः॥")

निदिग्धं, त्रि, (निदिह्यते स्मेति। दिह उपचये+क्तः।) लेपादिना वर्द्धितम्। तत्पर्य्यायः। उपचितम् २। इत्यमरः। ३। १। ८६॥

निदिग्धा, स्त्री, (निदिग्ध+टाप्।) एला। इति शब्दचन्द्रिका॥ (विष्टतिरस्या एलाशब्दे ज्ञातव्या॥)

निदिग्धिका, स्त्री, (निदिग्धा+स्वार्थे संज्ञायां वा कन्। कापि अत इत्वम्।) एला। इति शब्दचन्द्रिका॥ (यथा, सुश्रुते। ३। १७।

"कपित्थदृहतीविल्वपटोलेषु निदिग्धिकाः॥")

कण्टकारिका। इत्यमरः। २। ४। ६३॥

(अस्याः पर्य्यायो यथा,—

"व्याघ्रीक्रान्ता स्मृहो व्याघ्री भण्टाकी च निदिग्धिका।
सिंही धामनिका क्षुद्रा दृहती कण्टकारिका॥"

इति वैद्यकरत्नमालायाम्॥)

निदिध्यासनं, क्ली, (पुनः पुनरतिशयेन वा निध्यायतीति। नि+ध्यै+सन्। ततो भावे ल्युट्।) पुनःपुनःस्मरणम्॥ अद्वितीयवस्तुनि तदाकाराकारितायाः वृत्तेः स्वजातीयप्रवाहः। इति वेदान्तसारः॥

निदेशः, पुं, (नि+दिश+घञ्।) आज्ञा। इत्यमरः। २। ८। २५॥ (यथा, देवीभागवते। २। १०। ४६।

"प्रत्यूषस्यान् द्विजान् मत्वा निदेशं भूपतेर्य्यथा॥")

कथनम्। उपालम्भः। इति मेदिनी। शे, २३॥ (यथा, मनुः। २। १६७।

"पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम्।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः॥")

भाजनम्। इति धरणिः॥

निदेशिनी, स्त्री, (निदिशतीति। नि+दिश+णिनि ङीप्।) दिक्। इति राजनिर्घण्टः॥

निदेष्टा, [ष्टृ] त्रि, (निदिशतीति। नि+दिश+तृच्।) निदेशकर्त्ता। निदिशति इति व्युत्पत्त्या तृजन्तो नित्यम्। इति सुग्धबोधमतम्॥

निद्रा, स्त्री, (निन्द्यते इति। निदि कुत्सायाम्+"निन्देर्नलोपश्च।" उणां। २। १७। इति रक् नलोपश्च।) मेधामनःसंयोगः। इति जटाधरः॥ सुप्तप्रबुद्धावस्थान्यावस्था। इति चक्रपाणिटीकायां नागभट्टः॥ घुम इति भाषा॥ तत्पर्य्यायः। शयनम् २ स्वापः३ स्वप्नः४ संवेशः५। इत्यमरः। २। ७। ३६॥ सुप्तिः ६ स्वपनम् ७। इति शब्दरत्नावली॥ यथाकाले सेवितनिद्रागुणाः। धातुसाम्यत्वम्। अतन्द्रितत्वम्। पुष्टिवर्णबलोत्साहाग्निदीप्तिकारित्वञ्च॥ * ॥ दिवास्वप्नगुणः। स्निग्धत्वम्। श्लेष्मलत्वम्। कटूष्णरूक्षकाञ्जीर्णातिसारिणां हितत्वञ्च॥ * ॥ आसीनप्रचलायितस्य उपविश्य निद्रावग्राहोलायमानस्य गुणः। अरूक्षत्वम्। अनभिष्यन्दित्वञ्च॥ * ॥ निद्रासात्म्यीकृतानां दिवा रात्रौ च स्वपतां जाग्रतां वा दोषो न भवति। इति राजवल्लभः॥ * ॥ निद्रारहिता यथा,—

"कुतो निद्रा दरिद्रस्य परप्रेष्यकरस्य च।
परनारीप्रसक्तस्य परद्रव्यहरस्य च॥" * ॥

सुखसुप्ता यथा,—

"सुखं स्वपित्यदृष्टवान् व्याधिसुक्तश्च यो नरः।
सावकाशस्तु यो भुङ्क्ते यस्तु दारैर्न शङ्कितः॥"

इति गारुडे नीतिसारः॥

("सत्त्वाच्च तम एव स्यात् जायते स्वपते प्रभुः।
तमसा प्रावृतो देही बोधा च शून्यताङ्गतः॥
देहं विश्रमते यस्मात्तस्मान्निद्रा प्रकीर्त्तिता।
नासार्द्धे च भ्रुवोर्म्मध्ये लीयते चान्तरात्मना॥
तस्मात्सेतो भवेत्तत्र निद्रायालीयते नृणाम्॥"

इति शारीरस्थाने प्रथमेऽध्याये हारीतेनोक्तम्॥

"निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम्।
वृषता क्लीवता ज्ञानमज्ञानं जीवितं न च॥
अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता।
सुखायुषी परा कुर्य्यात् कालरात्रिरिवापरा॥"

इति वाभटे उत्तरस्थाने सप्तमेऽध्याये॥

"पुष्करीकेव सदृशं हृदयं स्यादधोमुखम्।
जायतस्तद्विकसति स्वपतश्च निमीलति॥
निद्रान्तु वैष्णवीं प्राभानसुपदिशन्ति सा स्वभावत एव सर्व्वप्राणिनोऽभिसृजति॥ तत्र यदा संज्ञावहानि स्रोतांसि तमो भूयिष्ठः श्लेष्मा प्रतिपद्यते तदा तामसी नाम निद्रा सम्भवत्यनवबोधिनी सा प्रलयकाले। तमोभूयिष्ठानामहःसु निष्क्रासु च भवति। रजो भूयिष्ठानामनिमित्तम्। सत्त्वभूयिष्ठानामर्द्धरात्रे। शीतश्लेष्मणामनिलबहुलानां मनःशरीराभितापवतान्च नैव सा वैकारिकी भवति॥

हृदयचेतनास्थानसुक्तं सुश्रुत! देहिनाम्।
तस्मोऽभिभूते तस्मिंस्तु निद्रा विशति देहिनाम्॥
निद्राहेतुस्तमः सत्त्वं बोधने हेतुरुच्यते।
स्वभाव एव वा हेतुर्गरीयान् परिकीर्त्यते॥

पूर्व्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः।
रजोयुक्तेन मनसा यश्चात्यर्थान् शुभाशुभान्॥
करणानान्तु वैकल्ये तमसाभिप्रवर्द्धिते।
अस्वपन्नपि भूतात्मा प्रसुप्त इव चोच्यते॥
सर्व्वसुप्तेषु दिवास्वापः प्रतिषिद्धोऽन्यत्र शीतात्॥"

इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥)

निद्राणः, त्रि, (नि+द्रा+क्तः। "संयोगादेरातो धातोर्यण्वतः।" ८। २। ४३। इति तस्य नः।) निद्रागतः। तत्पर्य्यायः। शयितः २। इत्यमरः। ३। १। ३३॥ (यथा, आर्य्यासप्तशत्याम्। ५२६।

"विहितविविधानुवन्धो मानोन्नतयावधीरितो मानी।
लभते कुतः प्रबोधं स जागरित्वेव निद्राणः॥")

निद्रालुः, त्रि, (निद्रातीति। नि+द्रा+"सृदृशिगृहीति।" ३। २। १५८। इति आलुच्।) निद्राशीलः। निद्रा विद्यते अस्य गोऽश्वेत्यादिना आलुः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। स्वप्नक् २ शयालुः ३। इत्यमरः। ३। १। ३३॥ तन्द्रालुः ४। इति जटाधरः॥ (यथा, पञ्चतन्त्रे। ५। ४१।

"काशी विवर्ज्जयेद्वार्य्यं निद्रालुश्चर्म्मचौरिकाम्।
निष्कालौल्यञ्च रोगाढ्यो जीवितं योऽच वाञ्छति॥")

निद्रालुः, स्त्री, (निद्रा दैर्घ्यत्वेनास्त्यस्या इति। निद्रा+बाहुलकात् आलुः।) वार्त्ताकी। वनवर्व्वरिका। इति राजनिर्घण्टः॥ नलीनामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

निद्रान्धः, पुं, (निद्राया इव इव।) अन्धकारः। इति शब्दमाला॥

निद्रासंजननं, क्ली, (निद्रां संजनयतीति। सं+जन+णिच्+ल्युः।) श्लेष्मा। इति शब्दमाला॥

निधनं, क्ली, (नि+धा+"ह्रस्वादङ्गात्।" उणां। २। ८२। इति क्युः।) नाशः। तत्तु तु अदर्शनं मरणञ्च। (यथा, विष्णुपुराणे। १। १३। ७३।

"एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः॥")

कुलम्। तत्तु कुलस्थानं कुलसुखञ्च। इत्यमरभरतौ॥

निधनः, पुं क्ली, (नि+धा+क्युः।) मरणम्। इत्यमरः। २। ८। १६॥ वधतारा। सा तु जन्मनक्षत्रतात् सप्तमी तारा। यथा, जन्मसम्पदिपत् क्षेमः प्रत्यरिः साधको वध इत्यादि। प्रत्यरौ लवणं दत्वाग्निधने तिलकाष्ठनम्। इति ज्योतिस्तत्त्वम्॥ (निहतं धनं यस्य।) धनहीने, त्रि॥

निधानं, क्ली, (निधीयतेऽत्रेति। नि+धा+आधारे ल्युट्।) निधिः। इति हेमचन्द्रः। २। १०६॥ (यथा, पञ्चतन्त्रे। २। १६४।

"कन्दैः फलैर्मुनिवरा गमयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम्॥")

आधारः। यथा,—

"निधानभगतं सद्यः सर्व्वं समधिगच्छति ।"
इत्यागमः ॥
(यथा, देवीभागवते । १ । २६ । ३४ ।
"ब्रह्मविद्यानिधानन्तु संसारार्णवतारकम् ॥")
कार्य्यावसाने प्रवेशस्थानम् । यथा,—
"एतन्नागावतारार्थां निधानं बीजमव्ययम् ॥"
इति श्रीभागवतम् ॥

निधिः, पुं, (निधीयतेऽत्रेति । नि + धा + किः ।)
नलिकानामगन्धद्रव्यम् । सुश्रुतः । इति राजनिर्घण्टः ॥ (यथा, देवीभागवते । ३ । २२ । १० ।
"कन्यां सुकेशीं निधिकन्यकासमां
मेने तदात्मानमनुत्तमञ्च ॥")
जीवकौषधिः । इति शब्दचन्द्रिका ॥ आधारः । यथा । गुणनिधिः । जलनिधिः । इत्यादयः ॥ चिरप्रनष्टस्वामिकभूजातधनविशेषः । इति प्राचः ॥ अज्ञातस्वामिकचिरनिखातस्वर्णादि । यथा । अधुना भूमौ चिरनिखातस्य सुवर्णादेर्निधिग्रन्थवाच्यस्याधिगमे विधिमाह ।
"राजा लब्धा निधिं दद्यात् द्विजेभ्योऽर्द्धं द्विजः पुनः ।
विद्वानशेषमादद्यात् सर्व्वस्यासौ प्रभुर्यतः ॥
इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् ।
अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च ॥"
"उत्तमर्णं निधिं राजा लब्धार्हं ब्राह्मणेभ्यो दत्त्वा शेषं कोषे निवेशयेत् । ब्राह्मणस्तु विद्वान् श्रुताध्ययनसम्पन्नः सदाचारो यदि निधिं लभेत तदा सर्व्वमेव गृह्णीयात् । यस्मादसौ सर्व्वस्य जगतः प्रभुः । । इतरेण तु, राजविद्वद्ब्राह्मणव्यतिरिक्तेनाविद्वद्ब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठांशमधिगन्तुं दत्त्वा शेषं निधिं स्वयमाहरेत् । यथाह वशिष्ठः । अप्रज्ञायमानं वित्तं योऽधिगच्छेत् राजा तद्धरेदधिगन्तुं षष्ठमांशं प्रदद्यात् इति । गौतमोऽपि निधेरधिगमी राजधनं न ब्राह्मणस्याभिरूपस्याव्रजतोऽप्याख्याता षष्ठं अंशं लभेतेत्येक इति । अनिवेदित इति कर्त्तरि निष्ठा । अनिवेदितज्ञातो विज्ञातश्च राजा इत्यनिवेदितविज्ञातः । यः कश्चिन्निधिं लब्धा राज्ञे न निवेदितवान् विज्ञातश्च राजा स सर्व्वं निधिं दाप्यो दण्डञ्च गुरुतरपेक्षया। अथ निधेरपि स्वाम्यागत्यरूपसङ्ग्रादिभिः स्वत्वं भावयति तदा तस्मै राजा निधिं दत्त्वा षष्ठं द्वादशं वांशं स्वयमाहरेत् । यथाह मनुः ।
"ममायमिति यो ब्रूयान्निधिं सत्येन मानवः ।
तस्याददीत षड्भागं राजा द्वादशमेव वेति ॥
अंशवित्कल्पयेत्तत्र वर्णक्रमविशेषतः ।"
इति मिताक्षरायां व्यवहाराध्यायः ॥
कुबेरस्य नवधा रत्नविशेषः । तत्पर्य्यायः । शेवधिः २ । इत्यमरः । १ । १ । ७४ ॥ सेवधिः ३ । इति भरतः ॥ तद्भेदा यथा,—
"पद्मोऽस्त्रियां महापद्मः शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च वर्च्चोऽपि निधयो नव ॥"
इति हारावली ॥

मार्कण्डेयपुराणे तु वर्च इति हित्वा अष्टावेव उक्ताः । इति भरतः ॥ * ॥ तल्लक्षणं यथा,—
"पद्मिनी नाम या विद्या लक्ष्मीस्तस्याधिदेवता ।
तदाधाराश्च निधयस्तास्ते निगदतः शृणु ॥
तत्र पद्ममहापद्मौ तथा मकरकच्छपौ ।
मुकुन्दनीलौ नन्दश्च शङ्खश्चैवाष्टमो निधिः ॥
सत्त्वाद्यैर्द्रव्यां भवन्त्येते सङ्गिः सह भवन्त्यमी ।
एते शृणौ समाख्याता निधयस्तव क्रोष्टके ! ॥
एभिरालोकितं चित्तं मनुष्यस्य महामते ! ।
यादृक् स्वरूपं भवति तन्मे निगदतः शृणु ॥
पद्मो नाम निधिः पूर्व्वः स यस्य भवति द्विज ! ।
स तस्य तत्सुतानाञ्च तत्पौत्राणाञ्च नाम्यगः ॥
दाक्षिण्यसारः पुरुषस्तेन चाधिष्ठितो भवेत् ।
सत्त्वाधारो महाभागो यतोऽसौ सात्त्विको निधिः ॥
सुवर्णरौप्यताम्रादिधातूनाञ्च परिग्रहम् ।
करोत्यतितरां सोऽथ तेषाञ्च क्रयविक्रयम् ॥
करोति च यथा यज्ञान् यज्विनाञ्च प्रयच्छति ।
सम्पादयति कामांश्च सर्व्वानेव यथाक्रमम् ॥
सभादेवनिकेतांश्च स कारयति तज्जनाः । ।*।
सत्त्वाधारो निधिश्चान्यो महापद्म इति श्रुतः ॥
सत्त्वप्रधानो भवति तेन चाधिष्ठितो नरः ।
करोति पद्मरागादिरत्नानाञ्च परिग्रहम् ॥
समौक्तिकप्रवालानां तेषाञ्च क्रयविक्रयम् ।
ददाति योगशीलेभ्यस्तेषामावसथांस्तथा ॥
स कारयति तच्छीलः स्वयमेव च जायते ।
तत्प्रसक्तास्तथाशीलाः पुत्रपौत्रक्रमेण च ॥
पूर्व्वद्विर्मात्रः सम्पन्नो पुरुषांश्च न मुञ्चति ।
महापद्मस्तु विप्राणां यज्ञे समुपजायते ॥ * ॥
तामसो मकरो नाम निधिस्तेनावलोकितः ।
पुरुषोऽथ तमःप्रायः सुशीलोऽपि हि जायते ॥
बाणखड्गर्ष्टिधनुषां चर्म्मणाञ्च परिग्रहम् ।
दंशनानाञ्च कुरुते याति मैत्रीञ्च राजभिः ॥
ददाति शौर्य्यवृत्तीनां भूभुजां ये च तत्प्रियाः ।
क्रयविक्रयञ्च शस्त्राणां नान्यत्र प्रीतिमेति च ॥
एकस्त्रैव भवत्येष नरस्य न सुतानुगः ।
द्रव्यार्थं दस्युतो नाशं संग्रामे वापि संव्रजेत् ॥*॥
कच्छपाख्यो निधिर्योऽन्यो नरस्तेनाभिवीक्षितः ।
तमःप्रधानो भवति यतोऽसौ तामसो निधिः ॥
व्यवहारा न शिष्टेषु पण्यजातं करोति च ।
कर्म्मान्तानखिलांश्चैव न विश्वसिति कस्यचित् ॥
पञ्चस्थानि यथाङ्गानि निगृह्यन्ते हि कच्छपः ।
तथावश्यं रत्नानि तिष्ठत्याकुलमानसः ॥
न ददाति न वा भुङ्क्ते तद्दिनाशभयाकुलः ।
निधानमुर्व्यां कुरुते निधिः सोऽप्येकपुरुषः ॥*॥
रजोगुणमयश्चान्यो मुकुन्दो नाम यो निधिः ।
नरोऽवलोकितस्तेन तद्गुणो भवति द्विज ! ॥
वीणावेणुमृदङ्गादिगीतवाद्यपरिग्रहम् ।
करोति वाद्यतां वित्तं नृत्यताञ्च प्रयच्छति ॥
वन्दिमागधसूतानां विटानां लास्यपाठिनाम् ।
ददात्यहर्निशं भोगान् भुङ्क्ते तैस्तु समं द्विज ! ॥
कुलटासु रतिश्चास्य भवत्यन्येषु तद्विधैः ।
प्रयाति सङ्गमेकस्य स निधिर्भजते नरम् ॥ * ॥
रजःसत्त्वमयश्चान्यो नन्दो नाम महानिधिः ।
उपैति सम्भ्रमधिकं नरस्तेनावलोकितः ॥
समस्तधातुरत्नानां पण्यवाद्यादिकस्य च ।
प्रतिग्रहं करोत्येष तथैव क्रयविक्रयम् ॥
आधारः स्वजनानाञ्च आगताभ्यागतस्य च ।
सहते नावमानोक्तिं स्वल्पामपि महामुने ! ॥
स्तूयमानश्च महतीं प्रीतिं वध्नाति यच्छति ।
यं यमिच्छति वै कामं नन्दुलसुपयाति च ॥
वश्या भार्य्या भवत्यस्य सुतिमत्योऽतिशोभनाः ।
सन्ततौ सप्त च नरान्निधिर्नन्दोऽनुवर्त्तते ॥
प्रवर्द्धमानोऽनु नरमष्टभागेन सत्तम ! ।
दीर्घायुष्यञ्च सर्व्वेषां पुरुषाणां प्रयच्छति ॥
बन्धूनामेव भ्रमणं ये च दूरादुपागताः ।
तेषां करोति व नन्दः परलोके न चाहतः ॥*॥
भवत्यस्य न च स्नेहः सहवासिषु जायते ।
पूर्व्वमित्रेषु शैथिल्यं प्रीतिमन्यैः करोति च ॥
तथैव सत्त्वरजसी यो बिभर्त्ति महानिधिः ।
स नीलसंज्ञस्तत्सङ्गी नरस्तच्छीलभाग्भवेत् ॥
वस्त्रकार्पासधान्यादिफलपुष्पपरिग्रहम् ।
सुक्ताविद्रुमशङ्खानां शुक्त्यादीनां महामुने ! ॥
काष्ठादीनां करोत्येष यत्रान्यच्चलसम्भवम् ।
क्रयविक्रयमर्थेषां नान्यत्र रमते मनः ॥
तड़ागान् पुष्करिण्यश्च तथारामान् करोति च ।
वन्यश्च सरितां वृक्षांस्तथा रोपयते नरः ॥
अनुलेपनपुष्पादिभोगसुक् वापि जायते ।
त्रिपौरुषश्चापि निधिर्नीलो नामेति विश्रुतः ॥
रजस्तमोमयश्चान्यः शङ्खसंज्ञो हि यो निधिः ।
तेनापि नीयते विप्र ! तद्गुणत्वं निधीश्वरः ॥
एकस्त्रैव भवत्येष नरं नान्यसुपैति च ।
यस्य शङ्खो निधिरसौ स्वरूपं क्रोष्टुके ! शृणु ॥
एक एवाशना ह्येनमन्नं भुङ्क्ते तथाम्बरम् ।
कदन्नसक् परिजनो न च शोभनवस्त्रभृत् ॥
न ददाति सुहृद्भार्य्यासुतपौत्रक्षुधादिषु ।
स्वपोषणपरः शङ्खी नरो भवति सर्व्वदा ॥
इत्येते निधयः ख्याता नराणामर्थदेवताः ॥
मिश्रावलोकिनो मिश्रस्वभावफलदायिनः ।
यथाख्यातः स्वभावस्तु भवत्येषां विलोकनात् ।
सर्व्वेषामाधिपत्यं च श्रीरेषां द्विज पद्मिनी ॥"
इति मार्कण्डेयपुराणे ६८ अध्याये निधिलक्षणम् ॥
(पौरववंशीयनृपविशेषः । अयं हि दक्षपाणेः पुत्रः । मत्स्यपुराणादिमते निरामित्रनाम्ना विख्यातः । ५० । ८७ ॥ यथा, राजावल्यां प्रथमपरिच्छेदे ।
"बुभुजे पृथिवीमेनां दक्षपाणिमहाबलः ।
राजासने ततः सोऽपि स्थापयित्वा निधिं सुतम् ॥
स्मरन्नारायणं देवं तपसे स वनं ययौ ।
निधिस्तु विधिवद्राज्यं चकार नीतिपण्डितः ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । १७ ।
"सर्व्वः शर्व्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ॥"
"प्रलयकालेऽस्मिन् सर्व्वं निधीयते इति निधिः ।"
इति तद्भाष्ये शङ्करः ॥

महादेवः। यथा, महाभारते। १३। १७।४३।
"सुवक्त्रः सुरूपश्च तेजस्वेजस्करो निधिः॥")
निधिनाथः, पुं, (निधीनां नाथः।) कुबेरः। इति त्रिकाण्डशेषः॥ निधीशः। निधीश्वरः। निधिप्रभुः। इत्यादयः॥
निधुवनं, क्ली, (नितरां धुवनं क्षरणपदादिकम्यनं यत्र।) मैथुनम्। इत्यमरः। २। ७। ५७॥ (यथा, शिशुपालवधे। ११। १८।
"अनिमिषमविरामारागिणां सर्व्वरात्रं
नवनिधुवनलीलाः कौतुकेनातिवीक्ष्य।
इदमुदवसितानामस्फुटालोकसन्पत्
नयनमिव सनिद्रं धूर्व्वते दीपमर्चिः॥")
नर्म्म। केलिः। इति शब्दरत्नावली॥ (नितरां धुवनं कम्पनम्।) कम्यः। इति मेदिनी। ने, १८८॥
निध्यानं, क्ली, (नि+ध्ये+ल्युट्।) दर्शनम्। इत्यमरः। ३। २। ३१॥
निध्यानः, पुं, (नि+ध्यन शब्दे+घञ्।) शब्दः। इति शब्दरत्नावली॥
निनदः, पुं, (नि+नद+"नौ गदनदपठस्वनः।" ३। ३। ६४। इति अप्।) शब्दः। इत्यमरः। १।६।२२॥ (यथा, देवीभागवते। ३।२२।३०।
"ह्रक्षन्तु तूर्य्यनिनदान् किल वाद्यमानान्॥")
निनादः, पुं, (नि+नद+पचे घञ्।) शब्दः। इत्यमरः।१।६।२२॥(यथा, रामायणे।२।३४।१६।
"स्त्रीसहस्रनिनादश्च संजज्ञे राजवेश्मनि॥")
निन्दकः, त्रि, (निन्दति तच्छीलः। निदि कुत्सायाम्+"निदिहिंसेति।" ३। २। १३६। इति ण्वुल्।) निन्दाकारकः। यथा,—
"न भाराः पर्व्वता भारा न भाराः सप्तसागराः।
निन्दका हि महाभारा भारा विश्वासघातकाः॥"
इति कर्म्मलोचनम्॥
निन्दतलः, त्रि, (निन्द्यं निन्दार्हं तलं हस्ततलं यस्य।) निन्दितहस्तः। इति शब्दरत्नावली॥
निन्दनं, क्ली, (निदि कुत्सायाम्+भावे ल्युट्।) निन्दा। इति शब्दरत्नावली॥
निन्दा, स्त्री, (निन्दनमिति। निदि+"गुरोश्च हलः।" ३। ३। १०३। इति स्त्रियां अः।) अपवादः। दुष्कृतिः। इति शब्दरत्नावली॥ निन्दनम्। तत्पर्य्यायः। अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ अपवादः ६ उपक्रोशः ७ जुगुप्सा ८ कुत्सा ९ गर्हणम् १० इत्यमरः॥ गर्हा ११ कुत्सनम् १२ परिवादः १३ जुगुप्सनम् १४ अपक्रोशः १५ भर्त्सनम् १६ अवक्षेपः १७। इति शब्दरत्नावली॥ गर्हणा १८ धिक्क्रिया १९। इति हेमचन्द्रः॥ (यथा, मनुः। २। २००।
"गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥")
हरकेशवभक्तादिनिन्दायां दोषो यथा,—
"हरकेशवयोर्भक्तं ये च निन्दन्ति पापिनः।
भूदेवान् ब्राह्मणांश्चैव स्वगुरूंश्च पतिव्रताः॥
यतिभिक्षुकब्रह्मचारिद्विजीवान् सुरांस्तथा।
पश्यन्ते कालसूत्रे ते यावच्चन्द्रदिवाकरौ॥
वैश्वानरपुरीषेषु घोरन्ते ते दिवानिशम्।
भक्षिताः कीटनिकरैः शूलं कुर्व्वन्ति कातराः॥
ये निन्दन्ति च ब्रह्माणं शङ्करं जगतां गुरुम्।
शिवं सुराणां प्रवरं दुर्गां लक्ष्मीं सरस्वतीम्॥
सीतां च तुलसीं गङ्गां वेदांश्च वेदमातरम्।
व्रतं तपस्यां पूजां च मन्त्रं मन्त्रप्रदं गुरुम्॥
ते पश्यन्त्यन्धकूपे वै चायुषोऽन्ते विधेरहो!
भक्षिताः सर्पसंघैश्च शूलं कुर्व्वन्ति सन्ततम्॥
यो निन्दति कृधीकेशं देवसाम्यं विधाय च।
विष्णुभक्तिप्रदश्चैव पुराणश्च श्रुतेः परम्॥
राधां सदङ्गनां गोपीर्ब्राह्मणांश्च सदार्चितान्।
ते पश्यन्त्यन्धकूपे देव! विधातुरायुषः समम्॥
अधोमुखा ऊर्द्धपादा सर्पसंघैश्च वेष्टिताः।
भक्षिता विकृताकारैः कीटैः सर्पैः समाकुलैः॥
अतीवकातरा भीताः शूलं कुर्व्वन्ति सन्ततम्।
वैश्वानरपुरीषाणि ध्रुवं भक्षन्ति लोभिताः॥
उल्कां ददति यत्राश्च तन्मुखे यमकिङ्कराः।
विसन्धं तर्जनं त्रासं कुर्व्वन्ति दण्डताडनम्॥
कुर्व्वन्ति शस्त्रपातञ्च प्रहारैर्जर्जरिता भिया।
तदा कल्पान्तरे सृष्टे स्रष्टुश्च प्रथमे पुनः॥
तेषां भवेत् प्रतीकार इत्याह कमलोद्भवः।
परनिन्दा विनाशाय स्वनिन्दा यशसे परम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।४०।४१ अः॥
"वेदनिन्दारतान् मर्त्यान् देवनिन्दारतांस्तथा।
द्विजनिन्दारतांश्चैव मनसापि न चिन्तयेत्॥
न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्জ्जयेत्।
वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्জ्जयेत्॥
यस्तु देवार्षीश्चैव वेदं वा निन्दति द्विजः।
न तस्य निष्कृतिर्दृष्टा शास्त्रेष्विह सुनीश्वरैः॥
निन्दयेद्वे गुरुं देवं वेदं वा सोपहंहणम्।
कल्पकोटिशतं सार्द्धं रौरवे पच्यते नरः॥
तूष्णीमासीत निन्दायां न ब्रूयात् किञ्चिदुत्तरम्।
कर्णौ पिधाय गन्तव्यं न चैनामवलोकयेत्॥
वर्জ्जयेद्वे परेषान्तु यत्रेषु गर्हणां बुधः।
न निन्देदृषियोगिनः सिद्धान् व्रतिनो वा यतींस्तथा॥
देवतायतनं प्राज्ञो देवानामालयं तथा॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥
निन्दास्तुतिः, स्त्री, (निन्दया स्तुतिः।) आक्षस्तुतिः। यथा,—
"निन्दास्तुतिभ्यां वाक्याभ्यां गम्यते स्तुतिर्निन्दयो।"
निन्दया स्तुतिर्गम्यते आक्षेप स्तुतिरिति च युतुपत्ता आक्षस्तुतिः। इति साहित्यदर्पणः।
अपि च।
"यदि निन्दन्निव स्तौति आक्षस्तुतिरसौ मता।
उदाहरणम्।
"तापसेनापि रामेण जितेयं भूतधारिणी।
त्वया राज्ञापि सैवेयं जिता मा भूदहङ्कृथाः॥"
इति दण्डी॥

"कथमवनिप! दर्पो यन्निशातासिधारादलनगलितमूर्द्धां विद्विषां क्षोणितश्रीः।
नयु तव निहतारेरप्यसौ किन्न नीता चिदिवमपगताङ्गैर्वल्लभा कीर्त्तिरेभिः॥
इत्यादौ निन्दास्तुतिवपुषा स्वरूपस्य।" इति काव्यप्रकाशः॥
निन्दितः, त्रि, (निन्दास्य जातेति। निन्दा+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ६। इति इतच्।) निन्दायुक्तः। तत्पर्य्यायः। धिक्कृतः २ अपध्वस्तः ३ निर्भर्त्सितः ४। इति जटाधरः॥ (यथा, देवीभागवते। ४। ७। ४६।
"मनु पश्यति यद्यात्मा प्रपातं नैव पश्यति।
करोति निन्दितं कर्म्म नरकान्न बिभेति च॥")
निन्दुः, स्त्री, निन्दतेऽन्यस्यैनामसौ। निदि कुत्सायामित्यादौ औणादिक उप्रत्ययः। ङतवतुसा। इति हेमचन्द्रः। ३। १६५॥
निपः, पुं क्ली, (नियतं पिबत्यनेनेति। नि+पा+घञर्थे कः।) कलसः। इत्यमरः। २। ६। ३२॥ कदम्बवृक्षे, पुं। इति शब्दचन्द्रिका॥
निपठः, पुं, (निपठनमिति। नि+पठ+"नौ गदनदपठस्वनः।" ३। ३। ६४। इति अप्।) पाठः। इत्यमरः। ३। २। २६॥
निपत्या, स्त्री, (निपतत्यस्यामिति। नि+पत+"संज्ञायां समजनिषदनिपतेति।" ३। ३। ६६। इति क्यप्। ततष्टाप्।) युद्धभूमिः। इति मुग्धबोधटीकायां दुर्गादासः॥ (पिच्छिला भूमिः। इति सिद्धान्तकौमुदी॥)
निपाकः, पुं, (नियमेन पचनमिति। नि+पच+घञ्।) पाकः। इति शब्दरत्नावली॥
निपाठः, पुं, (नि+पठ+पचे घञ्।) पठनम्। इत्यमरः। ३। २। २६॥
निपातः, पुं, (नितरां पतनमिति। नि+पत+घञ्।) क्षयः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ५। १२२। ६।
"सङ्गरेषु निपातेषु तथापद्व्यसनेषु च॥")
पतनम्। यथा, आनन्दलहर्य्याम्। ५७।
"घने वा हर्म्ये वा समकरनिपातो हिमकरः॥"
निपातनं, क्ली, (निपात्यतेऽनेनेति। नि+पत+णिच्+करणे ल्युट्।) स्वीकारः। इति भरतः॥ अधोनयनम्। इति सर्व्वस्वम्। तत्पर्य्यायः। अवनायः। इत्यमरः। ३। २। २६॥ निपातनम् ३। इति भरतानन्दः॥ व्याकरणलक्षणानुत्पन्नपदसाधनम्। यथा, निपातनादिसिद्धिः। यङ्लुगन्तेनानुत्पन्नं ततः सर्व्वं निपातनात् सिद्धमिति भाष्यम्॥ निपातनलक्षणं यथा,
"वर्णागमो वर्णविपर्य्ययश्च
द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योग-
स्तदुच्यते पञ्चविधं निरुक्तम्॥
इति प्राचः।" इति दुर्गादासः॥ तद्यथा,—
"वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्य्ययः।

षोढ़ग्रादौ विकारः स्यात् वर्णनाशः पृषोदरे ॥"
इति कलापपञ्जी ॥

निपानं, क्ली, (निपीयते अस्मिन्निति। नि+पा+ आधारे ल्युट्।) कूपसमीपस्थिलादिनिबद्धपशु-पानार्थकृतकूपोद्धृताम्बुस्थानम्। इति भरतः। तत्पर्य्यायः। आहावः। इत्यमरः। २।१०।२६॥ निपानकम् ३। इति शब्दरत्नावली॥ गोदोहन-मात्रम्। इति त्रिकाण्डशेषः॥ (जलाशय-मात्रम्। यथा, विष्णुसंहितायाम्। ६४। १। "परनिपानेषु न स्नानमाचरेत्॥")

निपुणः, त्रि, (नि+पुण राशीकरणे+क।) कार्य्य-क्षमः। (यथा, नागानन्दे सूत्रधारोक्तिः। "श्रीहर्षो निपुणः कविः परिषदप्येषा गुण-ग्राहिणी॥" अन्यच्च, देवीभागवते। १। ५। ५६। "न ते रूपं वेत्तुं सकलभुवने कोऽपि निपुणो न नाम्नां संख्यां ते कथितुमिह योग्योऽस्ति पुरुषः॥") तत्पर्य्यायः। प्रवीणः २ अभिज्ञः ३ विज्ञः ४ निष्णातः ५ शिक्षितः ६ वैज्ञानिकः ७ कृत-मुखः ८ कृती ९ कुशलः १०। इत्यमरः। ३।१।४॥ संख्यावान् ११ मतिमान् १२ कुशाग्रीयमतिः १३ ऋष्टिः १४ विदुरः १५ बुधः १६ दक्षः १७ नेदिष्ठः १८ कृतधीः १९ सुधीः २० विद्वान् २१ कृतकर्म्मा २२ विचक्षणः २३ विदग्धः २४ चतुरः २५ प्रौढ़ः २६ बोद्धा २७ विशारदः २८ सुमेधाः २९ सुमतिः ३० तीक्ष्णः ३१ प्रेक्षावान् ३२ विबुधः ३३ विदन् ३४। इति राजनिर्घण्टः॥ विज्ञानिकः ३५ कुशली ३६। इति शब्द-रत्नावली॥

निफला, स्त्री, (निष्टप्तं फलं यस्याः।) ज्योति-ष्मती। इति भावप्रकाशः॥ (ज्योतिष्मतीशब्दे-ऽस्या गुणादयो व्याख्याताः॥)

निर्फेनं, क्ली, (निष्टप्तः फेनो यस्मादिति।) अफेनम्। इति राजनिर्घण्टः॥

निबन्धं, क्ली, (नितरां बन्धः तानलयादिसहित-बन्धनं यत्र।) गीतम्। इति शब्दरत्ना-वली॥

निबन्धः, पुं, (निबध्नातीति। नि+बन्ध घञ्।) आमाहरोगः। ग्रन्थस्य वृत्तिः। इति हेम-चन्द्रः॥ निबन्धः। इति जटाधरः॥ बन्धनम्। यथा,—
"देवी सम्यग्विमोक्षाय निबन्धायासुरी मता॥"
इति श्रीभगवद्गीता॥
(यथा, भागवते। ६। २। ४६।
"नातःपरं कर्म्मनिबन्धकृन्तनं
मुमुक्षतां तीर्थपदानुकीर्त्तनात्॥")

निबन्धनं, क्ली, (निबध्यतेऽनेनास्मिन् वा। नि+बन्ध ल्युट्।) हेतुः। इति हेमचन्द्रः॥ उपनाहः। स तु वीणातन्त्रीनिबन्धनोर्द्धभागः। इत्यमरः। २। ७। ७॥ (नि+बन्ध+भावे ल्युट्।) बन्धनञ्च॥

निबन्धा, [ऋ] पुं, निबन्धकर्त्ता। ग्रन्थकर्त्ता। इति व्याकरणम्॥

निबन्धितः, त्रि, बद्धः। निबन्धोऽस्य जातः इत्यर्थे इतच्प्रत्ययनिष्पन्नः॥

निबर्हणं, क्ली, (निबर्हते इति। नि+बर्ह+ ल्युट्।) मारणम्। इत्यमरः। २। ८। ११२॥ (यथा, मार्कण्डेयपुराणे। ६२। २२। "युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम्॥")

निभः, त्रि, (नियतं भातीति। नि+भा+क।) सदृशः। इत्यमरः। २। १०। ३८॥ (यथा, रघुवंशे। १०। ६। "प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्। दिवसं प्रारदमिव प्रारम्भसुखदर्शनम्॥") प्रकाशः। त्याज्ये, पुं। इति शब्दरत्नावली॥

निभालनं, क्ली, (नि+भल+णिच्+भावे ल्युट्।) दर्शनम्। इति त्रिकाण्डशेषः॥

निभृतं, त्रि, (नि+भृ+क्त।) अतीतम्। भूत-कालः। इति राजनिर्घण्टः॥

निभृतः, त्रि, (नि+भृ+क्त।) विनीतः। निर्जनः। यथा,—
"निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम्।"
इति श्रीजयदेवः। २। ११॥
(अस्तमयासन्नः। यथा, रघुवंशे। ८। १५। "नभसा निभृतेन्दुना तुला-मुदितार्केण समारुरोह तत्॥")

निमज्ज्युः, पुं, (नि+मस्ज्+अथुच्।) ग्रथनम्। यथा, भट्टिः। "तल्पे कान्तान्तरैः सार्द्धं मन्येऽहं धिङ्निमज्ज्युम्॥"

निमज्जनं, क्ली, (निमज्ज्यतेऽनेनेति। नि+मस्ज् +भावे ल्युट्।) स्नानम्। अवगाहनम्। यथा,
"नास्ति जन्यजनकव्यतिभेदः
सत्यमप्यजनितो जनदेहः।
वीक्ष्य वः खलु तनुमज्जतादां
ह्रदिमज्जनमवैमि सुधायाम्॥"
इति नैषधे पञ्चमसर्गः॥

निमन्त्रणं, क्ली, (निमन्त्र्यते इति। नि+मन्त्र+ ल्युट्।) नियोजनविशेषः। "अत्र यस्याकरणे प्रत्यवायस्तन्निमन्त्रणम्। यथा, इह भुञ्जीत भवान्। यस्याकरणे प्रत्यवायो न स्यात् तदा-मन्त्रणम्। यथा, इह भुञ्जीत भवान्। इति निमन्त्रणामन्त्रणयोर्भेदः।" इति सुग्धबोध-टीकायां दुर्गादासः॥

निमयः, पुं, (निमीयतेऽनेनेति। नि+मि+ "इरच्।" ३। ३। ५६। इत्यच्।) विनिमयः। इत्यमरः। २। १। ६०॥ (यथा, महाभारते। १२। ७८। ७। "एकेनामस्य निमयं न प्रशंसन्ति साधवः। निमयेत् पक्कमामेन भोजनार्थाय भारत!॥")

निमिः, पुं, इक्ष्वाकुराजपुत्रः। तस्य निमेषे स्थिति-कारणं यथा,—
"निमिर्नाम नृपः स्त्रीभिः पुरा द्यूतमदीव्यत। तत्रान्तरेऽभ्याजगाम वशिष्ठो ब्रह्मसम्भवः॥ तस्य पूजामकुर्व्वन्तं शशाप स मुनिर्नृपम्। विदेहाख्यं भवस्वेति शशस्तेनाथासौ पुनः॥ अन्योन्यशापाच्च तयोर्विशरीरे विचेतसी। जग्मतुः शापनाशाय ब्रह्माणं जगतः पतिम्॥ अथ ब्रह्मण आदेशाल्लोचनेषु वसन्निमिः। निमेषाः स्युश्च लोकानां तन्निद्राय नारद॥"
इति मत्स्यपुराणे ५५ अध्यायः॥ * ॥

मतान्तरं यथा,—
"निमिः सहस्रसंवत्सरं सत्रमारेभे। वशिष्ठञ्च होतारं वरयामास। तमाह वशिष्ठः। अह-मिन्द्रेण पञ्चवर्षशतं यागार्थं प्रथमतरं वृतः। आगतस्तावपि ऋत्विग् भविष्यामीत्युक्ते सोऽपि तत्कालमेवान्यैर्गौतमादिभिर्यागमकरोत्। समाप्ते चामरपतियागे त्वरायान् वशिष्ठ आजगाम। तत्कर्म्मकर्तृत्वं गौतमस्य दृष्ट्वा अयं विदेहो भविष्यतीति शापं ददौ। निमेः शरीरं सद्यो म्रतमिव तस्थौ। यज्ञसमाप्तौ भागग्रहणाया-गतान् देवान् ऋत्विज ऊचुः। यजमानाय वरो दीयतामिति। देवेश क्षुन्दितो निमिराह। नश्येतावति जगत्यन्यदुःखमस्ति यच्छरीरात्मनो-र्वियोगे भवति। तदहमिच्छामि सकललोचनेषु वस्तुम्। न पुनः शरीरग्रहणं कर्त्तुमित्येवमुक्ते देवैरसावग्रेषभूतानां नेत्रेष्वासां कारितः। ततो भूतान्युन्मेषनिमेषं चक्रुः।" इति विष्णुपुराणे ४ अंशे ५ अध्यायः॥

निमित्तं, क्ली, (नि+मिद्+क्त। संज्ञापूर्व्वकत्वान्न नत्वम्।) हेतुः। (यथा, देवीभागवते। १।१८।५। "किं निमित्तं महाभाग! निःसृतस्य च मां प्रति। जातं त्वागमनं ब्रूहि कार्य्यं तन्मुनिसत्तम!॥") चिह्नम्। इत्यमरः। ३।३।७६॥ शकुनः। यथा, "निमित्तानि च पश्यामि विपरीतानि केशव!॥"
इति श्रीभगवद्गीता॥

निमित्तकं, क्ली, (निमित्त+संज्ञायां कन्।) निमित्तनिश्चयादागतम्। शुभनम्। इति शब्द-माला॥ निमित्तच॥

निमित्तकारणं, क्ली, (निमित्तं कारणम्।) समवायिकारणासमवायिकारणाभ्यां भिन्नम्। तृतीयकारणम्। यथा। घटं प्रति कुलाल-दण्डचक्रसलिलसूत्रादि। इति भाषापरिच्छेद-सिद्धान्तमुक्तावल्याम्॥

निमित्तज्ञः, पुं, (निमित्तं स्वरतेन शुभाशुभशकुनं करोतीति। ज्ञ+क्विप्।) काकः। इति राज-निर्घण्टः॥

निमित्तवित्, [द्] पुं, (निमित्तं शुभाशुभलक्षणं वेत्तीति। विद्+क्विप्।) दैवज्ञः। गणकः। इति हेमचन्द्रः। ३। १४६॥

निमिषः, पुं, विष्णुः। यथा, महाभारते। १। १४६। ३६।
"निमिषो?निमिषः श्वभ्री वाचस्पतिरुदारधीः॥"
(निमिषतीति। नि+मिष+"इगुपधेति।"

३।१।१३५। इति कः।) कालविशेषः। चक्षुर्निमीलनम्। इति मेदिनी। षे, ३६॥ (यथा, महाभारते। १। १८६। १६।

"सन्यञ्च चक्रे निमिषान्तरेण
शरांश्च जग्राह दशार्द्धसंख्यान्॥"

वर्त्मगतरोगविशेषः। यथा, सुश्रुते उत्तरतन्त्रे ३ अध्याये।

"निमेषणीः सिरा वायुः प्रविष्टो वर्त्मसंश्रयाः। चालयेदतिवर्त्मानि निमिषः स गदो मतः॥")

निमीलनं, क्ली, (निमीलत्यनेनेति। नि+मील+करणे ल्युट्।) मरणम्। (नि+मील+भावे ल्युट्।) निमेषः। इति हेमचन्द्रः। ३। २४२॥ (यथा, कलाविलासे। १। ४७।

"नयननिमीलनमूलः सुचिरं स्नानार्द्रचूलजलसिक्तः।
दम्भतरुः सुचिकुसुमः सुखप्रतप्राखाग्रतेः फलितः॥"

कालविशेषः। यथा, सूर्य्यसिद्धान्ते। ४। १७।

"तदेव विमर्दार्द्धनाड़िकाहीनसंयुते।
निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे॥")

निमीलिका, स्त्री, (निमीलयतीति। नि+मील+णिच्+ण्वुल्। टापि अत इत्वम्।) व्याजः। इति शब्दरत्नावली॥ (यथा, राजतरङ्गिण्याम्। ६। ७३।

"नीतश्च मण्डलेशत्वं वेलावित्तस्य भूभुजा।
देवीः कामयमानस्य चक्रे गजनिमीलिका॥")

निमीलनञ्च॥

निमेयः, पुं, (निमीयते परिमीयते इति। नि+मा माने+"अचो यत्।" ३। १। ९७। इति यत्। "ईद्यति।" ६। ४। ६५। इति ईत्।) नेमेयः। परीवर्त्तः। इत्यमरटीकायां भरतः॥ (परिवर्त्तनीये, त्रि। यथा, महाभारते। १३। ५१। ६।

"नाहं शतसहस्रेण निमेयः पार्थिवर्षभ!।
दीयतां सदृशं मह्यममात्यैः सह चिन्तय॥")

निमेषः, पुं, (नि+मिष+भावे घञ्।) पक्ष्मस्पन्दनकालः। पलक् इति भाषा॥ तत्पर्य्यायः। निमिषः २ दृष्टिनिमीलनम् ३। इति शब्दरत्नावली॥ पुंसो यावत्कालमक्षत्रिमनेत्रविकाशाग्रानन्तरं पक्ष्माकुञ्चनं जायते स निमेषः। इत्यमरटीकायां भरतः॥ *॥

"अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्त्तितः।
द्वौ निमेषौ त्रुटिर्नाम ते द्वे पुटी तु लवः स्मृतः॥"

इत्यग्निपुराणम्॥

(पक्ष्मस्पन्दनम्। यथा, रघुः। २। १६।

"ययौ निमेषालसपक्ष्मपङ्क्ति-
रूपोषिताभ्यामिव लोचनाभ्याम्॥"

रोगविशेषः। यथा, सुश्रुते चिकित्सितस्थाने। २६ अध्याये।

"नेत्रस्तम्भं निमेषं वा क्षयां कासं प्रजागरम्।
लभते दन्तचालञ्च तांस्तांश्चाप्यनुपद्रवान्॥"

खनामख्यातयक्षविशेषः। इति नीलकण्ठः॥

यथा, महाभारते। १। ३२। १६।

"उलूकश्वसनाभ्याञ्च निमेषेण च पक्षिराट्।
प्ररुजेन च संग्रामं चकार पुलिनेन च॥")

निमेषकृत्, स्त्री, (निमेषं करोतीति। कृ+क्विप्। यद्वा, कृ+भावे क्विप्। निमेषे निमेषमात्रकाले कृत् स्फुरणकार्य्यं यस्याः।) विद्युत्। इति शब्दमाला॥

निमेषरुक्, [च्] पुं, (निमेषेण निमेषकालं याप्यैर्व्यर्थः रोचते दीप्यते इति। रुच् दीप्तौ+क्विप्।) खद्योतः। इति त्रिकाण्डशेषः॥

निम्नं, त्रि, निकृष्टा म्ना अभ्यासः श्लीलमत्र। (यद्वा, निकृष्टं म्नाप्नोति। म्ना+कः।) नीचम्। निचु इति नावाल इति च भाषा॥ तत्पर्य्यायः। गभीरम् २ गम्भीरम् ३। इत्यमरः। १। १०। १५॥ गभीरकम् ४। इति शब्दरत्नावली॥ (यथा, कुमारे। ५। ५।

"क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्॥"

पुं, अनमित्रपुत्रः। स तु सत्राजितप्रसेनयोः पिता। यथा, भागवते। ६। २४। १२।

"ग्निनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः।
सत्राजितः प्रसेनश्च निम्नस्याथासतुः सुतौ॥")

निम्नगा, स्त्री, (निम्नं गच्छतीति। गम+ड। टाप्।) नदी। इत्यमरः। १। १०। ३०॥ (यथा, मनुः। ६। २२।

"याडगगुणेन भर्त्रा स्त्री संयुज्येत यथाविधि।
ताडगगुणा सा भवति समुद्रेणेव निम्नगा॥")

नीचगामिनि, त्रि॥

निम्बः, पुं, (निम्बति खाद्यं ददातीति। निम्ब+अच्।) वृक्षविशेषः। निम् इति भाषा। तत्पर्य्यायः। अरिष्टः २ सर्व्वतोभद्रः ३ हिङ्गुनिर्य्यासः ४ मालकः ५ पिचुमर्दः ६। इत्यमरः। २। ४। ६२॥ अर्कपादपः ७। इति हेमचन्द्रः॥ कैटर्य्यः ८ वरतरुः ९ कृष्णिः १०। इति रत्नमाला॥ प्रभद्रः ११ पारिभद्रकः १२ काकफलः १३ कौरेष्टः १४ नेता १५ सुमनाः १६ विशीर्णपर्णः १७ यवनेष्टः १८ पीतसारकः १९ शीतः २०। इति राजनिर्घण्टः॥ पिचुमन्दः २१ तिक्तकः २२। इति भावप्रकाशः॥ कीकटः २३ भूकमालकः २४। इति जटाधरः॥ अस्य गुणाः। शीतत्वम्। तिक्तत्वम्। कफव्रणकृमिवमिशोफप्रशान्तिकारित्वम्। बलासबहुविधपित्तदोषहृद्रयविदाहनाशित्वञ्च। इति राजनिर्घण्टः॥ लघुत्वम्। शीतत्वम्। कटुपाकित्वम्। अग्निवातकारित्वम्। अरुच्यत्वम्। भ्रमछर्दिकासज्वरारुचिच्छर्दिकुष्ठकृच्छ्रासमेहनाशित्वञ्च। तत्पत्रगुणाः। नेत्रहितकारित्वम्। कृमिपित्तविषसर्व्वारोचककुष्ठनाशित्वम्। वातलत्वम्। कटुपाकित्वञ्च। तत्फलगुणाः। रसे तिक्तत्वम्। पाके कटुत्वम्। भेदनत्वम्। स्निग्धत्वम्। लघुत्वम्। उष्णत्वम्। कुष्ठगुल्मार्शःकृमिमेहनाशित्वञ्च।

"निम्बः शीतो लघुर्ग्राही कटुपाकोऽग्निवातजित्।
अरुच्यः भ्रमछर्दिकासज्वरारुचिकृमिप्रणुत्॥
व्रणपित्तकफच्छर्दिकुष्ठकृच्छ्रासमेहजित्।
निम्बपत्रं स्मृतं नेत्र्यं कृमिपित्तविषप्रणुत्॥
वातलं कटुपाकञ्च सर्व्वारोचककुष्ठजित्।
नेत्र्यं पत्रं रसे तिक्तं पाके तु कटु भेदनम्॥
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःकृमिमेहजित्॥"

इति भावप्रकाशः॥*॥

तत्तैलगुणाः। नाड़ीव्रणत्वम्। कृमिकुष्ठकफव्रणदोषव्रणक्लेदप्रशोषहारित्वम्। पित्तजत्वञ्च। इति राजनिर्घण्टः॥ *॥

"निम्बं पित्तकफच्छर्दिव्रणकृमिकासकुष्ठजित्।"

निम्बपत्रं इति वा पाठः॥ *॥

"करञ्जनिम्बजपलं कृमिकुष्ठप्रमेहजित्।
निम्बतैलन्तु कुष्ठघ्नं तिक्तं कृमिहरं परम्॥"

इति राजवल्लभः॥

अथ महानिम्बः। वकाईन इति हिन्दीभाषा॥ तत्पर्य्यायगुणाः। यथा, भावप्रकाशे।

"महानिम्बः स्मृतो रेका रम्यको विषसूदिकः।
केशसूदिर्निम्बरकः कासघ्नः शीत इत्यपि॥
महानिम्बो हिमो रूक्षश्चक्षुष्यो ग्राही कषायकः।
कफपित्तकृमिच्छर्दिकुष्ठकृच्छ्रासरक्तजित्॥
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः॥"

(षष्ठ्यां तिथौ तद्व्रतके तिर्य्यग्योनित्वं स्यात्। इति तिथितत्त्वम्॥)

निम्बकः, पुं, (निम्ब एव। स्वार्थे कन्।) निम्बवृक्षः। इति भूरिप्रयोगः॥ (षष्ठ्यां तद्व्रतकर्त्तव्यविशेषो यथा, तिथितत्त्वे।

"कलङ्की जायते विप्रे तिर्य्यग्योनिञ्च निम्बके॥")

निम्बतरुः, पुं, (निम्ब एव तरुर्यत्रः।) मन्दारवृक्षः। इत्यमरः। २। ४। २६॥

निम्बबीजः, पुं, (निम्बस्य बीजमिव बीजं यस्य।) राजादनीवृक्षः। इति राजनिर्घण्टः॥

नि(नु)म्बूकं, क्ली, (निम्बति सिञ्चतीव रसेनेति। निम्ब सेचने+बाहुलकादूकञ्। प्राधिको ह्रस्वश्च। ततः कन्।) वृक्षविशेषः। आम्बी बेड़ु इति भाषा॥ तत्पर्य्यायः। अम्लाम्लवीरः २ वह्निः ३ दीप्तः ४ वह्निबीजः ५ अम्लसारः ६ दन्तशातः ७ शोधनः ८ अम्लुधारी ९ निम्बूः १० रोचनः ११। (यथा, भावप्रकाशे पूर्व्वखण्डे १ भागे।

"निम्बूः स्त्री निम्बुकं क्लीबे निम्बूकमपि कीर्त्तितम्॥")

तत्फलगुणाः। अम्लरसत्वम्। कटुत्वम्। उष्णत्वम्। गुल्मानिलातकासकफार्शिःकृच्छ्रविच्छर्दिहरत्वम्। अग्निदीप्तिकारित्वम्। चक्षुष्यत्वम्। परिपक्वे अतीव रूक्षत्वञ्च। इति राजनिर्घण्टः॥ पाचनत्वम्। लघुत्वम्। कृमिसमूहोदरग्रहनाशित्वम्। तीक्ष्णत्वम्। वातपित्तकफमूलिनो हितत्वम्। कण्डूरुधिरोचनत्वम्। त्रिदोषवह्निक्षयवातरोगनिपीड़ितानां विषविकलानां मनुष्यहे बहुशो विशुचिकायाञ्च प्रदेयम्। इति भावप्रकाशः॥ *॥

"भागैकं निम्बुजं तोयं षड्भागं शर्करोदकम्।
लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम्॥
निम्बूफलभवं पानमत्यन्तं वातनाशनम्।
वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम्॥"
इति राजनिर्घण्टः॥

नियतः, त्रि, (नि+यम+क्तः।) संयतः। यथा,
"कार्त्तिके शुक्लपक्षस्य द्वितीयायां नराधिप!।
पुण्याहारो वर्षमेकं तत्रैव नियतात्मवान्॥"
इति भविष्यपुराणे द्वितीयकल्पः॥
(सेवापरः। यथा, रामायणे। १। २। ७।
"प्रायश्चित्तं सुनेस्तस्य वल्कलं नियतो गुरोः॥")
नित्यः। यथा,—
"अन्यथासिद्धिशून्यस्य नियता पूर्ववर्त्तिता।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्त्तितम्॥"
इति भाषापरिच्छेदे। १६॥
(यथा च क्वचित्।
"चन्द्रे लक्ष्मीः प्रभा सूर्ये गतिर्वायौ भुवि क्षमा।
एतत्तु नियतं सर्व्वं त्वयि चानुत्तमं यशः॥"
निपूर्ब्बयमधातोर्बद्धार्थकत्वात् बद्धोऽपि। यथा,
नियताञ्जलिः॥ संयुक्तः। आसक्तः। यथा,
महाभारते। १। १३४। ५६।
"प्रतिज्ञामात्मनो रक्षन् सत्ये च नियतः सदा॥")
नियतिः, स्त्री, (नियम्यते आत्मा अनयेति। नि+यम+करणे क्तिन्।) भाग्यम्। दैवम्। इत्यमरः। १।४।२८॥ (यथा, माघे। ४। ३४।
"आसादितस्य तमसा नियतेर्नियोगा-
दाकाङ्क्षतः पुनरपक्रमणेन कालम्॥")
नियमः। इति मेदिनी। ते, १२०॥ (चतुर्दशधारिणीदेवीयोविघ्नगणानामन्यतमा। इति वह्निपुराणे गणमेदनामाध्यायः॥)
नियती, स्त्री, (नियम्यते कालो यया। नि+यम+क्तिच्। वा ङीष्।) दुर्गा। यथा,—
"स्मृतिः संसारबाहूनां नियती च नियामता॥"
इति देवीपुराणे निरुक्ताध्यायः॥
नियतेन्द्रियः, त्रि, (नियतानि संयतानि इन्द्रियाणि येन।) संयतेन्द्रियः। इन्द्रियदमनशीलः। यथा, मार्कण्डेये। ८४। ८।
"अभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः॥"
नियन्ता, [तृ] पुं, (नियच्छति अश्वादीनिति। नि+यम+तृच्।) सारथिः। इत्यमरः। २। ८। ५८॥ (यथा, महाभारते। ७। १३। २२।
"स नियन्तृध्वजरथं विधाय निशितैः शरैः॥"
विष्णुः। यथा, महाभारते। १३। १४८। १०५।
"अपराजितः सर्व्वसहो नियन्ता नियमो यमः॥")
त्रि, शास्ता। यथा, रघुः। १। १७।
"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः॥"
नियन्त्रितः, त्रि, (नि+यन्त्रि+क्तः।) व्यवरुद्धः। व्यवरुद्धः। इति हेमचन्द्रः॥ (यथा, देवीभागवते। २। ६। ५२।
"आगच्छेत् सर्व्वथा सोऽपि मम पार्श्वे नियन्त्रितः॥")

नियमः, पुं, (नियमनमिति। नि+यम+"यमः समुपनिविषु च।" ३। ३। ९३। इति अप्।) शौचं सन्तोषः तपः स्वाध्यायः ईश्वरप्रणिधानञ्च। इति वेदान्तसारः॥ प्रतिज्ञा। अङ्गीकार इति यावत्। व्रतम्। तच्चोपवासादि। अनित्यमागन्तुसाधनं कर्म्म। इत्यमरः। २। ७। ३८॥ (सङ्कल्पः। यथा, देवीभागवते। ३। २६। २५।
"नियमं प्रथमं कृत्वा पश्चात् पूजां समाचरेत्॥"
बन्धनम्। यथा, मनुः। ८। १२२।
"धर्म्मस्यार्थविचारार्थमधर्म्मनियमाय च॥")
मन्त्रणा। निश्चयः। इति मेदिनी। मे, ४६॥
"नियमाः पञ्च सत्याद्या बाह्यमाभ्यन्तरं द्विधा।
शौचं तुष्टिश्च सन्तोषस्तपश्चेन्द्रियनिग्रहः॥
स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहः।
तपः क्रोधो गुरौ भक्तिः शौचञ्च नियमाः स्मृताः॥
यमाः पञ्चाथ नियमाः शौचं द्विविधमीरितम्।
सन्तोषस्तपसां जप्यं वासुदेवार्च्चनं दमः॥"
इति गरुड़पुराणम्॥
"ब्रह्मचर्य्यमहिंसाञ्च सत्यास्तेयापरिग्रहान्।
सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन्॥
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान्।
कुर्व्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः।
एते यमाः सनियमाः पञ्च पञ्च प्रकीर्त्तिताः॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः॥ *॥
"तपः सन्तोष आस्तिक्यं दानं देवस्य पूजनम्।
सिद्धान्तश्रवणञ्चैव ह्रीर्म्मतिश्च जपो हुतम्।
दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः॥"
इति तन्त्रसारे (हठयोगप्रदीपिकायाञ्च। १। १७॥ कवितानियमाः। यथा,—
"वर्णयेन्न सदप्येतन्नियमोऽथ प्रदर्श्यते।
भूर्ज्जत्वगधिमषीत्वेव मलये श्लेव चन्दनम्॥
सामान्यवर्णने श्रौक्ष्ण्यं क्षुत्राभःपुष्पवाससाम्।
लघुत्वं केशकाकाक्षिपयोनिधिपयोसुचाम्॥
रक्तत्वं रत्नबन्धूकविद्याम्भोजविवस्वताम्।
तथा वसन्त एवान्यपुष्टानां कलकूजितम्॥
वर्षास्वेव मयूराणां रुतं गृध्यञ्च वर्ण्यते।
नियमस्य विशेषोऽथ पुनः क्वचित् प्रकाश्यते॥
कमलासम्पदोः क्षण्यहरितोर्नागसर्षयोः।
पीतलोहितयोः स्वर्णपरागाग्निशिखादिषु॥
चन्द्रेशशूलेयोः कामध्वजे मकरमत्स्ययोः।
दानवासुरदत्यानामैक्यमेवाभिसम्मतम्॥
बहुकालजन्मनोऽपि शिवचन्द्रस्य बालता।
मानवा मौलितो वर्ण्या देवाश्चरणतः पुनः॥"
इति कविकल्पलतायाम् १ स्तवके वर्ण्यस्थितिर्नाम ततीयं कुसुमम्॥ (विष्णुः। यथा, महाभारते। १३। १४६। ३०।
"व्रतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः॥"
महादेवः। यथा, तत्रैव तस्य सहस्रनामकीर्त्तने। १३। १७। ३५।
"पवित्रञ्च महांश्चैव नियमो नियमाश्रितः॥")
नियमनं, क्ली, (नि+यम+भावे ल्युट्।) नियमः। यथा। "न तत्राभिधानियमनात्तस्याः।" इति काव्यप्रकाशे द्वितीयोल्लासः॥ बन्धनम्। यथा। बलेर्न्नियमनमित्युद्भटः॥ (नियहः। यथा, रघुः। ८। ६।
"समतया वसुधाविभजन्नि-
र्नियमनादसतश्च नराधिपः॥"
नियच्छतीति। नि+यम+ल्युः। नियामके, त्रि। यथा, हरिवंशे। १८१। ५३।
"दक्षयज्ञविनाशाय बलेर्न्नियमनाय च॥")
नियमसेवा, स्त्री, (नियमेन भगवतः सेवा।) कार्त्तिकमासे नियमपूर्ब्बकभगवदाराधना। यथा,
"अकृत्वा नियमं विष्णोः कार्त्तिकं यः शिवेतरः।
जन्मार्ज्जितस्य पुण्यस्य फलं नाप्नोति नारद!॥"
किञ्च।
"नियमेन विना चैव यो नयेत् कार्त्तिकं सुने!।
चातुर्म्मास्यं तथा चैव ब्रह्महा स कुलाधमः॥"
तत्रोपक्रमकालश्लोकः श्रीहयशीर्षपञ्चरात्रीय-कार्त्तिकमाहात्म्ये।
"आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत्।
कार्त्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः॥"
इति श्रीहरिभक्तिविलासे १६ विलासः॥ अन्यत् कार्त्तिकशब्दे द्रष्टव्यम्॥
नियमितः, त्रि, (नि+यम+णिच्+क्तः।) कृतनियमः। यथा,—
"क्षुद्राः सन्त्रासमेते विजहतु हरयः क्षुण्णशूकैभकुम्भा
युग्मद्देहेषु लब्धां दधति परममी ग्रायका निष्यतप्ताः।
सौमित्रे! तिष्ठ पात्रं त्वमपि न हि वृथा नन्वहं शेषनादः
किञ्चिद्भूभङ्गलीलानिवमितजलधिं राममन्वेषयामि॥"
इति महानाटकम्॥
नियातनं, क्ली, (नि+यत+णिच्+ल्युट्।) निपातनम्। इत्यमरटीकायां नयनानन्दः॥
नियामः, पुं, (नि+यम+घञ्।) नियमः। इति शब्दरत्नावली॥
नियामकः, पुं, (नियामयतीति। नि+यम+णिच्+ण्वुल्।) पोतवाहः। इत्यमरः। १। १०। १२॥
त्रि,। नियन्ता। इति मेदिनी। के, १६४॥
(यथा, महाभारते। ३। २७१। ३७।
"ततोऽभिं नाशयामासुः सर्व्वसामुद्रियानकाः॥")
नियुक्तः, त्रि, (नि+युज+क्तः।) नियोगदिष्टः। (यथा, मनुः। ६। ६०।
"विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि।
एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन॥")
अवधारितः। आसक्तः। यथा,—
"जानामि धर्म्मं न च मे प्रवृत्ति-
र्जानाम्यधर्म्मं न च मे निवृत्तिः।
त्वया हृषीकेश! हृदिस्थितेन
यथा नियुक्तोऽस्मि तथा करोमि॥"
इत्याह्निकतत्त्वम्॥

नियुतं, क्ली, (नियूयते बहुसंख्या प्राप्यतेऽनेनेति। नि+यु+क्त।) लक्षम्। इत्यमरः। ३। ५।२४॥ यथा।"धेनूनां नियुते प्रादादिति नियुते लक्षे।" इति श्रीधरस्वामी॥

"अयुतं सहस्रमयुतं नियुतं प्रयुतं मतम्।
क्ली कोटिरर्बुदमिति क्रमादग्रयुणोत्तरम्॥
इति रत्नकोषः।" इति भरतः॥ दशलक्षम्। यथा,—

"एकं दश शतञ्चैव सहस्रमयुतन्तथा।
लक्षञ्च नियुतञ्चैव कोटिरर्बुद एव च॥
वृन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः।
अन्त्यं मध्यं परार्द्धञ्च दशघ्नाद्या यथोत्तरम्॥"
इति पुराणम्॥

नियुद्धं, क्ली, (नि+युध्+क्त।) बाहुयुद्धम्। इत्यमरः। २। ८। १०६॥ (यथा, हरिवंशे। १४२। ७१।

"नियुद्धकुशलान् मल्लान् देवो मल्लप्रियस्तदा।
योधयित्वा ददौ भूरि वित्तं वस्त्राणि चात्मवान्॥")

नियोगः, पुं, (नि+युज्+घञ्।) अवधारणम्। इति दुर्गादासः॥ (निश्चयः। यथा, रघुः। १७। ४६।

"तत् सिषेवे नियोगेन स विकल्पपराङ्मुखः॥")

आज्ञा। इति हेमचन्द्रः। २। १८०॥ (यथा, रामायणे। २। २१। ४६।

"त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया।
पितुर्नियोगे स्थातव्यमेष धर्म्मः सनातनः॥"

अपुत्रभ्रातृपत्नीपुत्रार्थे नियोजनम्। यथा, मनुः। ९। ६२।

"विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि।
गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम्॥")

नियोगी, [न्] त्रि, (नियोगोऽस्यास्तीति। नियोग+इनिः।) नियोगविशिष्टः। नियुक्तः। तत्पर्य्यायः। कर्म्मसचिवः २ आयुक्तः ३ व्याप्तृतः४। इति हेमचन्द्रः। ३। ३८३॥ (यथा, राजतरङ्गिण्याम्। ६। ८।

"क्षध्यश्चलसुतस्यैव क्षत्रं नाम्नियोगिनाम्॥")

नियोज्यः, त्रि, (नियोक्तुमर्हः। नि+युज+ण्यत्।) नियोगार्हः। प्रभुः। इति मुग्धबोधव्याकरणम्॥ (यथा, प्रद्युम्नविजये। ५ अङ्के।

"एते वयं नियोज्या नियोजयतु नियोग्यः॥")

नियोजनं, क्ली, (नि+युज+ल्युट्।) नियोगः। (यथा, महाभारते। १२। ३६४। २।

"स्मरणीयोऽस्मि भवता संप्रेषणनियोजनैः॥")

प्रेरणम्। यथा। त्वयैतत् क्रियतामिति क्रियासु नियोजनं प्रेरणम्। इति दुर्गादासः॥

नियोज्यः, त्रि, (नियोक्तुं शक्यः। नि+युज+"शकि लिङ्शीर्षु।" ३। ३। १७८। इति ण्यत्प्रत्ययेन निपातनात् साधुः।) प्रेष्यः। किङ्करः। इत्यमरः। २। ९०। १७॥ (यथा, भागवते। ४। १२। २८।

"निग्रह्य वेधुरुद्यच्छन्नियोज्यमुखयोर्मधुच्युतं वाचमुरुक्रमप्रियः॥"

नियोजनीये, त्रि। यथा, महाभारते। १२। ३२७। ४६।

"न नियोज्याश्च वः स्त्रिया अनियोगे महाभये॥")

नियोद्धा, [द्धृ] पुं, (नियुध्यते इति। नि+युध+तृच्।) कुक्कुटः। इति राजनिर्घण्टः॥ बाहुयुद्धकारी च॥

निरक्षदेशः, पुं, (निरक्षो देशः।) यत्रदेशः। पलभाशून्यस्थानम्। स तु पूर्व्वे भद्राश्ववर्षे यमकोटिः। दक्षिणे भारतवर्षे लङ्का। पश्चिमे केतुमालवर्षे रोमकः। उत्तरे कुरुवर्षे सिद्धपुरी। एताः भूवृत्तपादविवराः अन्योऽन्यं प्रतिष्ठिताः। तासासुपरितो विषुवस्थो दिवाकरो याति। तासु विषुवच्छाया ध्रुवस्योन्नतिश्च न दृश्यते। तत्र दिवामानं रात्रिमानञ्च चिंशद्घटिकाः। इति सूर्य्यसिद्धान्तमतम्॥ (यथा, सिद्धान्तशिरोमणौ गोलाध्याये। १५।

"निरक्षदेशात् क्षितिषोड़शांशे
भवेदवन्ती गणितेन यस्मात्॥")

निरङ्कुशः, त्रि, (निर्गतोऽङ्कुश इव प्रतिबन्धको यस्य।) अनिवार्य्यः। बाधाशून्यः। इति जटाधरः॥ (यथा, भागवते। १। १७। १५।

"अनागःस्वि भूतेषु य आगस्कृन्निरङ्कुशः।
आहर्त्तास्मि भुजं साक्षादमर्त्यस्यापि साङ्गदम्॥")

निरञ्जना, स्त्री, (निर्गतोऽञ्जनमिव अन्धकारो यत्र।) पूर्णिमा। इति शब्दमाला॥ (निर्गतोऽञ्जनं यत्र।) अञ्जनशून्ये, त्रि॥ (निर्गतमञ्जनमिवाज्ञानं यत्र। अज्ञानरहिते च। यथा, देवीभागवते। १। १८। ३६।

"स कथं बध्यते ब्रह्मन्निर्विकारो निरञ्जनः॥"

पुं, योगिविशेषः। यथा, हठयोगप्रदीपिकायाम्। ७।

"कानेरी पूज्यपादश्च नित्यनाथो निरञ्जनः॥"

महादेवः। यथा, हरिवंशे भविष्यपर्व्वणि। १४। २।

"दीर्घरोमा दीर्घभुजो दीर्घबाहुर्निरञ्जनः॥")

निरतं, त्रि, (नि+रम+क्तः।) नियुक्तम्। यथा। दानरत्नाकरे देवलः।

"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च।
षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित्॥"
इति श्रवहारतत्त्वम्॥

निरन्तरं, त्रि, (निर्गतमन्तरं यस्मिन् यस्माद्वा।) निबिड़म्। घनम्। इत्यमरः। ३। १। ६६॥ अनवकाशः। (यथा, आर्य्यासप्तशत्याम्। ४३८।

"सज्जनयोः स्तनयोरिव निरन्तरं सङ्गतं भवति॥")

अनवधिः। अपरिधानम्। अनन्तर्धानम्। अभेदः। अतादर्थ्यम्। अच्छिद्रम्। (यथा,कुमारसम्भवे। ५। २५।

"शिलाग्रयात्मनिकेतवासिनीं
निरन्तराखन्तरवातदर्शिनीं॥")

अविना। अवहिः। अनात्मीयम्। अनवसरः। अमध्यम्। अनन्तरात्मा। एते निरूपसर्गपूर्व्वकान्तरशब्दार्थाः॥

निरन्तराभ्यासः, पुं, (निरन्तरः सततोऽभ्यासो यत्र।) स्वाध्यायः। इति त्रिकाण्डशेषः। सततादृत्तिश्च॥

निरपत्रपः, त्रि, (निर्गता अपत्रपा लज्जा यस्येति।) धृष्टः। निर्लज्जः। इति जटाधरः॥ (यथा, भागवते। ३। २०। २४।

"ततो हसन् स भगवानसुरैर्निरपत्रपैः।
अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत्॥")

निरपेक्षः त्रि, (निर्गता अपेक्षा यस्य।) अनपेक्षः। यथा, मलमासतत्त्वे।

"अभिधातुं पदैरन्यैस्त्रिभिर्निरपेक्षरसा श्रुतिः॥"
(यथा, रामायणे। ६। ६६। ४२।

"कालज्ञनिरपेक्षेण पैष्टितेरस्य दारुणैः॥")

निरयः, पुं, (निर्गतः अयो गमनं यत्र।) नरकः। इत्यमरः। १।८।१॥ (यथा, हरिवंशे।१६। १६।

"कथञ्च शक्तास्ते स्तातुं निरयस्थाः सुतं मुनः॥")

निरर्गलः, त्रि, (निर्गतोऽर्गलमिव प्रतिबन्धको यत्र।) अनर्गलः। अबाधः। इत्यमरः। ३। १। ८३॥ (यथा, महाभारते। ७। ६। ६२।

"इदमाश्वमेधानाञ्च स्वप्नयागादधिकतम्।
निरर्गलान् सर्व्वमेधान् पुत्रवत् पालयन् प्रजाः॥")

निरर्थकं, त्रि, (निर्गतोऽर्थो यस्मात्। कप्।) निष्फलम्। तत्पर्य्यायः। मोघम् २। इत्यमरः। ३। १। ८१॥ विफलम् ३। इति जटाधरः॥ (यथा, भागवते। ४। १६। १६।

"अयन्तु साक्षाद्भगवांल्लाधीशः
कूटस्थ आत्मा कलयावतीर्णः।
यस्मिन्नविद्यारचितं निरर्थकं
पश्यन्ति नानात्वमपि प्रतीतम्॥")

निरवः, पुं, (नि+रु+"ऋदोरप्।" ३।३।५७। इति भावे अप्।) नीरवः। रवाभावः। इति निपूर्ब्बरुधातोरलि निष्पन्नः। अपालनञ्च॥ (निर्गतरवकः। यथा, ऋक्संहितायाम्। १। १२२। ११।

"नभो न्वो वसिरवस्य राधः।"

"निरवस्य निर्गतरवकस्य।" इति तद्भाष्ये सायणः॥)

निरवग्रहः, पुं, (निर्गतोऽवग्रहः प्रतिबन्धो यस्मात्।) स्वतन्त्रः। इत्यमरः। ३। १। १५। (यथा, हरिवंशे। ८०। ६।

"दुर्दमः कामचारी च स कैशी निरवग्रहः॥")

दृष्टिप्रतिबन्धाभावश्च॥ (महादेवः। यथा, महाभारते। १३। १७। ८२।

"नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः॥")

निरवहालिका, स्त्री, (निर्+अव+हल+ण्वुल्। टापि अत इत्वम्।) प्राचीरम्। इति शब्दमाला॥

निरशनं, क्ली, (निर्+अश+ल्युट्।) भोजनाभावः। अनशनम्। (निर्गतं अशनं भोजनादिकं यस्मात्। भोजनरहिते. त्रि॥)

निरसः, त्रि, (निष्टो रसो यस्मात्।) नीरसः। पुं, रसाभावः। रसस्य अभावः इति तत्पुरुषसमासनिष्पन्नः॥

निरसनं, क्ली, (निरस्यते क्षिप्यते इति। निर्+अस+ल्युट्।) प्रत्याख्यानम्। इत्यमरः। ३।२। ३१॥ (यथा, महाभारते। १४। ४। १०।

"स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनञ्च तत्। नियतो वर्षयामास प्रजाहितचिकीर्षया॥")

वधः। निष्ठीवनम्। इति मेदिनी। ने, १६१॥

निरसा, स्त्री, (निष्टो रसो यस्याः।) निःश्रेणिकालक्ष्म। इति राजनिर्घण्टः॥

निरस्तः, त्रि, (निर्+अस्+क्तः।) प्रहितवाक्यः। त्यक्तशरः। त्वरितोदितम्। प्रौढ़ोच्चारितवचः। निराकरणविशिष्टः। तत्पर्य्यायः। प्रत्यादिष्टः २ प्रत्याख्यातः ३ निराकृतः ४ निक्षिप्तः ५ विप्रक्षप्तः ६। इत्यमरः। ३।१।४०॥ प्रतिक्षिप्तम् ७ अपविद्धम् ८। इति हेमचन्द्रः॥ निष्क्रान्तः। प्रेषितः। संत्यक्तः। प्रतिहतः। इति मेदिनी। ते, ११७॥ (यथा, हितोपदेशे। १। ४८।

"यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि। निरस्तपादपे देशे एरण्डोऽपि द्रुमायते॥"

यथाच मार्कण्डेयपुराणे। ८६। २३।

"आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया॥")

निराकरणं, क्ली, (निर्+आ+कृ+ल्युट्।) निवारणम्। निरसनम्। इति निराकरिष्णुशब्दटीकायां भरतः॥

निराकरिष्णुः, त्रि, (निराकरोति तच्छीलः। निर्+आ+कृ+"अलंखल्वोर्णमुलाः।" ३। २। १३६। इति ष्णुच्।) निराकरणशीलः। तत्पर्य्यायः। चिक्षुः २। इत्यमरः। ३। १। ३०॥ (यथा, भट्टिकाव्ये। ५। १।

"निराकरिष्णुर्वसनेष्वुदर्हिषु: परितो रथम्॥")

निराकारः, पुं, (निर्गत आकारो देहादिरूपस्वरूपं यस्मादिति। निरादय इति समासः।) परमेश्वरः। ब्रह्म। यथा,—

"साकारञ्च निराकारं सगुणं निर्गुणं प्रभुम्। सर्व्वाधारञ्च सर्व्वञ्च स्वेच्छारूपं नमाम्यहम्॥"

अपि च।

"तेजःस्वरूपो भगवान् निराकारो निराश्रयः। निर्लिप्तो निर्गुणः साक्षी स्वात्मारामः परात्परः॥ ध्यायन्ति योगिनस्तेजस्त्वदीयमघरौरिणम्। वेदवाक्येष साकारं कमनीयं मनोहरम्॥ केचित्चतुर्भुजं शान्तं लक्ष्मीकान्तं मनोहरम्। शङ्खचक्रगदापद्मधरं पीताम्बरं परम्॥ द्विभुजं कमनीयञ्च किशोरं श्यामसुन्दरम्। शान्तं गोपाङ्गनाकान्तं रत्नभूषणभूषितम्॥ एवं तेजस्विनं भक्ता सेवन्ते सततं मुदा। ध्यायन्ति योगिनो यन्तु कृतस्तेजस्विनं विना॥"

अपि च।

"यो निर्गुणः स निर्लिप्तः शक्तिभ्यो नहि संयुतः। सिस्रक्षुराश्रितः शक्तौ निर्गुणः सगुणो भवेत्॥ यावन्ति च शरीराणि भोगार्हाणि महामुने!। शान्तानि च सर्व्वाणि श्रीकृष्णविग्रहं विना॥ ध्यायन्ति योगिनस्तच्च शुद्धं ज्योतिःस्वरूपिणम्। हस्तपादादिरहितं निर्गुणं प्रकृतेः परम्॥ वेदवाक्यं न मन्यन्ते तर्कज्ञाः सूक्ष्मदर्शिनः। कृतो बभूव तज्ज्योतिरहो तेजस्विनं विना॥ ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम्। अतीवाश्चर्य्यसदृशभूषणेन विभूषितम्॥ एवं भक्ताश्च ध्यायन्ति शङ्खचक्रगदासेविनः। योगिनो योगरूपञ्च काले भक्तिविपाकतः॥ ज्योतिरभ्यन्तरे मूर्त्तिं पश्यन्ति कृपया प्रभोः॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ३२।७।४२ अः॥

तस्य द्विचत्वारिंशन्नामानि यथा,—

"जगद्योनिरयोनिश्चमनन्तोऽव्यय एव च। ज्योतिःस्वरूपो ह्यनघः सगुणो निर्गुणो महान्॥ भक्तानुरोधात् साकारो निराकारो निरङ्कुशः। निर्मूलो निखिलाधारो निःशङ्को निरुपद्रवः॥ निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः। स्वात्मारामः पूर्णकामोऽनिमेषो नित्य एव च॥ सुभगो दुर्भगो वाग्मी दुराराध्यो दुरत्ययः। वेदहेतुश्च वेदाश्च वेदाङ्गो वेदविद्विभुः॥ द्विचत्वारिंशन्नामानि प्रातरुत्थाय यः पठेत्। दृढ़ां भक्तिं हरेर्दास्ये लभते वाञ्छितञ्च यत्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः॥

आकारशून्ये, त्रि।

निराकृतः, त्रि, (निर्+आ+कृ+क्तः।) प्रत्याख्यातः। निरस्तः। इत्यमरः। ३। १। ४०॥

निराकृतिः, स्त्री, (निर्+आ+कृ+क्तिन्।) निरसनम्। निराकरणम्। इत्यमरः। ३। २। ३१॥ (निर्गता आकृतिर्यस्मादिति।) अनाकारे असाध्वाये ५ त्रि। इति मेदिनी। ते, २०३॥ (पुं, पञ्चमहायज्ञानुष्ठानरहितः। यथा, मनुः। ३। १५४।

"यज्ञो च पशुपालश्च परिवेत्ता निराकृतिः॥"

"निराकृतिः पञ्चमहायज्ञानुष्ठानरहितः। तथा च छन्दोगपरिशिष्टम्।

निराकर्त्तामरादीनां स विज्ञेयो निराकृतिः॥"

इति कुल्लूकभट्टः॥

"निराकृतिः सत्यधिकारे महायज्ञानुष्ठानरहितः। अनङ्गा निराकृतिरुच्यते। एवं हि श्रुतपथे। यो न देवानर्चति न पितॄन् न मनुष्यानिति। यस्तु पठ्यते असाध्वायश्रुतधनैर्निराकृतिरुदाहृतः।" इति मेधातिथिः॥ * ॥ रोहितमनुपुत्रः। यथा, हरिवंशे। ७। ६३।

"दत्तपुत्रस्य पुत्रास्ते रोहितस्य प्रजापतेः। मनोः पुत्रो धृष्टकेतुः पञ्चहोत्रो निराकृतिः॥")

निराचारः, त्रि, निर्गं विद्यते आचारो यस्य सः। अनाचारः। आचारशून्यः॥

निरातपा, स्त्री, (निर्गतं आतपो यस्याः।) रात्रिः। इति शब्दचन्द्रिका॥ आतपशून्ये, त्रि॥

निराबाधः, त्रि, (निर्गता आबाधा प्रतिबन्धो यस्मात्।) पक्षाभासविशेषः। यथा,—

"अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्॥ निराबाधं असदृग्दृष्टप्रदीपप्रकाशेनायं शब्दे अवहरति।" इति मिताक्षरा॥

निरामयः, त्रि, (निर्गत आमयो व्याधिर्यस्मात्।) रोगरहितः। तत्पर्य्यायः। वार्क्षः २ कल्यः ३। इत्यमरः। २। ६। ५७॥ नीरुजः ४ पटुः ५ उल्लाघः ६ लघुः ७ अगदः ८ निरातङ्कः ९। अनातङ्कोऽपि पाठः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ४६।

"निरामयार्थां चिन्तन्तु भक्तमध्ये प्रकीर्त्तितम्॥"

उपद्रवादिशून्यः। यथा, महाभारते। १। १५७। ११।

"इदं नगरमभ्यासे रमणीयं निरामयम्। वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः॥"

रोगनाशकः। यथा, मुकुन्दमालायाम्। २१।

"किमौषधैः क्षिप्यसि मूढ़ दुर्म्मते! निरामयं क्षीरसायनं पिब॥")

निरामयः, पुं, (निर्गतः आमयो यस्मात्।) इङ्गिकः। वनच्छगलः। इति मेदिनी। ये, १२१॥ शूकरः। इति शब्दमाला॥ (नृपविशेषः। यथा, महाभारते। १। १। २३४।

"धृष्टकेतुर्बृहत्केतुर्दीप्तकेतुर्निरामयः॥"

महादेवः। इति महाभारतम्। १३।१७।१४८॥ क्ली, कुङ्कुमम्। यथा, तत्रैव। ५। ७८। ८।

"कुङ्कुमं पाण्डवानाञ्च प्रतिपत्तस्य निरामयम्॥")

निरामातुः, पुं, (नितरां रमतेऽनेनेति। नि+रम+बाहुलकात् आतुः दीर्घश्च।) कपित्थः। इति शब्दचन्द्रिका॥ (विवरणमस्य कपित्थशब्दे ज्ञातव्यम्॥)

निरालम्बा, स्त्री, (निर्गतं आलम्बो यस्याः।) आकाशमांसी। इति राजनिर्घण्टः॥ (शुक्लयजुर्व्वेदान्तर्गतोपनिषद्विशेषः। इति मुक्तिकोपनिषत्॥ अवलम्बनशून्ये, त्रि। यथा, हठयोगप्रदीपिकायाम्। ३। ५४।

"एको देवो निरालम्ब एकावस्था मनोन्मनी॥")

निराशः, त्रि, (निर्गता आशा यस्मादिति।) आशाशून्यः। यथा, तिथितत्त्वे।

"भूताहे ये प्रकुर्व्वन्ति उल्काग्रहमचेतनः। निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम्॥"

निरासनं, क्ली, (निर्+आस+ल्युट्।) निरसनम्। (निर्गतं आसनं यस्मात्।) आसनाभावविशिष्टे, त्रि॥

निराहारः, त्रि, (निर्गत आहारो यस्य।) आहाररहितः। यथा,—

"निराहाराश्च ये जीवाः पापे धर्म्मे रताश्च ये।" इति तर्पणप्रकरणीयाह्निकाचारधृतवचनम्॥

निरिङ्गिणी, स्त्री, (निर्निर्भतं अनं इङ्गति प्राप्नोतीति। निर्+इङ्ग+णिनिः ततो ङीप्।) तिरश्चरिणी। तत्पर्य्यायः। अयशुखिका २ पटी ३ यवनिका ४। इति त्रिकाण्डशेषः॥

निरिन्द्रियः, त्रि, (निर्गतानि इन्द्रियाणि यस्मात्।) इन्द्रियशून्यः। यथा, मनुः। ६। २०१।

"अनग्नौ स्त्रीवपतितौ ज्ञात्यन्वधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥"

निरीक्षणं, क्ली, (निर्+ईक्ष+भावे ल्युट्।) दर्शनम्। यथा,—

"प्रवातशय्यान्निग्धि सेवितानि
विण्मूत्रघातक्रमनिग्रहाच।
वास्यग्रहात् सूर्य्यनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषाः॥"

इति माधवकरः॥

(निरीक्षते इति। निर्+ईक्ष+ल्युः। दर्शके, त्रि। यथा, भागवते। ७। १५। ३२।

"प्राणापानौ संनिरुन्ध्यात् पूरकुम्भकरेचकैः।
यावत् मनस्त्यजेत् कामान् खनासाग्यनिरीक्षणः॥")

निरीक्षितं, त्रि, (निर्+ईक्ष+क्तः।) अवलोकितम्। यथा,—

"निरीक्षितं चाङ्गमवीक्षितञ्च
दृग्भा पिबन्ती रभसेन तस्य।
समानमागन्दमियं दधाना
विवेद भेदं न विदर्भसुभूः॥"

इति नैषधः॥

निरीर्ष्यं, क्ली, (निर्गता ईर्ष्या यस्मात्।) फालः। इत्यमरः। २। ६। १३॥ (निर्नास्ति ईर्ष्य ईश्वरो यस्य।) ईर्ष्यशून्ये नास्तिके च त्रि॥

निरीर्ष्यं, क्ली, (निर्गता ईर्षा यस्मात्। निरादय इति समासः।) निरीर्ष्यम्। इत्यमरटीकायां भरतः॥

निरीहः, पुं, (निर्गता ईहा चेष्टा यस्मात्।) विष्णुः। यथा,—

"निरुपाधिश्च निर्लिप्तो निरीहो निष्कलात्मकः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे चत्वारिंशत्तमाध्याये ७ अध्यायः॥ ईहाशून्ये, त्रि॥ (यथा, देवीभागवते। ४। १०। ११।

"निरीहः पुरुषः कस्मात् प्रकुर्य्याद् युद्धमीदृशम्॥")

निरुक्तं, क्ली, (निर्निश्चयेन उक्तम्।) वेदवेदाङ्गशास्त्रविशेषः। यथा,—

"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषन्तथा।
छन्दश्चेति षडङ्गानि वेदानां वैदिका विदुः॥"

इति शब्दरत्नावली॥

(तथाहि,—

"वर्णागमो वर्णविपर्य्ययश्च
द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योग-
स्तदुच्यते पञ्चविधं निरुक्तम्॥"

यदुक्तं देवराजयज्वना निर्व्वचने, तद्यथा,—

"अत उक्ताध्ययनविधेरुक्तच्छन्दःप्रविभागस्योक्तविनियोगस्योपलक्षितकर्म्माङ्गभूतकालस्योपदर्शितलक्षणस्येतरैर्वेदस्यार्थपरिज्ञानविषये निरुक्तं नामेदमङ्गमारभ्यते। प्रधानस्येदमितरेभ्योऽङ्गेभ्यः सर्व्वशास्त्रेभ्यश्चार्थपरिज्ञानाभिनिवेशात्। अर्थो हि प्रधानम्। तदधीनाः शब्दाः। स चेतरेषु व्याकरणादिषु चिन्त्यते। कर्म्मणि खल्वपि विनियोगश्चिन्त्यते। स च पुनरर्थाभिधानद्वारेण मन्त्राणाम्। यो यमर्थमभिधानेन संस्कर्त्तुं समर्थो मन्त्रः स तत्र विनियुज्यते। तदुक्तं अर्थाभिधानसंयोगात्तस्येषु श्रेषभावः स्यात् इति। न च निरुक्ताद्ते ऽन्यदङ्गमन्यद्वा वाक्यं शास्त्रमस्ति तात्पर्य्येण यदर्थेषान् शब्दान् निर्ब्रूयात्। यद्यपि च क्वचित् क्वचिदन्यशास्त्रे शब्दनिर्व्वचनम्। अतएव तद्विप्रलक्ष्यम्। यथा शब्दलक्षणपरिज्ञानं सर्व्वशास्त्रेषु व्याकरणात् एवं शब्दार्थनिर्व्वचनपरिज्ञानं निरुक्तात्। वस्तुमात्रमेव हि इतरेषु शास्त्रेषु स्वाभिमततत्त्वविषयमेव किञ्चिच्चिन्त्यते ब्राह्मणमपि च विध्यर्थवादरूपमर्थैकमन्त्रार्थश्रेषभूतमेव। मन्त्रब्राह्मणार्थपरिज्ञानबहुत्वाध्यात्माधिदैवाधिभूतपरिज्ञानद्वारेण धर्म्मार्थकाममोक्षाख्योऽखिलपुरुषार्थः। न चानिरुक्तो मन्त्रार्थो व्याख्यातव्य इति। तस्मादर्थपरिज्ञानाभिनिवेशादिदमेव प्रधानमित्युपपन्नम्। अथास्येवमखिलपुरुषार्थोपकारकत्वसमर्थस्य संग्रहः। तद्यथा,—

नामाख्यातोपसर्गनिपातलक्षणम्। भावविकारलक्षणम्। नामान्याख्यातजानि सर्व्वाणि च यथोपन्यस्य पञ्चप्रतिपत्तौ विचार्य्यावधारणम्। सर्व्वाण्याख्यातजानि कानिचिदेवानेक-धातुजान्यपीति मन्त्राणामर्थवत्त्वानर्थवत्त्वे विचार्य्य शास्त्रारम्भप्रयोजनद्वारेणार्थवत्त्वावधारणम्। पदविभागपरिज्ञानप्रतिज्ञानबोधावलम्बिप्रदर्शनाय आदिमध्यान्तानेकदेवतलिङ्गसङ्कटेषु मन्त्रेषु याज्ञिकपरिज्ञानद्वारेण देवतापरिज्ञानप्रतिज्ञा। अर्थप्रप्रशंसा। अनर्थकत्वावधारणम्। वेदवेदाङ्गव्यूहः। सप्रयोजननिघण्टुसमाम्नायविरचनम्। प्रकरणत्रयविभागेन नैघण्टुकप्रधानदेवताभिधानप्रविभागलक्षणम्। निर्व्वचनलक्षणद्वारेण शब्दवृत्तिविषयोपदेशः। अर्थप्राधान्यात् लोपोपधाविकारवर्णलोपविपर्य्ययोपदेशेन सामर्थ्योपप्रदर्शनायादिमध्यान्तलोपोपधाविकारवर्णलोपविपर्य्ययाद्यन्तवर्णद्यापत्तिवर्णोपजनोदाहरणचिन्ता। अन्तस्थान्तर्द्धातुनिमित्तेन सम्यसार्य्यासम्यसार्य्योभयप्रकृतिधातुनिर्व्वचनोपदेशः। भाषिकप्रायोवृत्तिभ्यो नैगमशब्दार्थप्रसिद्धिः। नैगमप्रायोवृत्तिभ्यो भाषिकशब्दार्थप्रसिद्धिः। देशान्तरस्थया शब्दरूपव्यपदेशः। तद्धितसमासनामनिर्व्वचनलक्षणम्। शिष्यलक्षणम्। विशेषेण व्याख्यया तत्त्वपर्य्यायभेदसङ्ग्रासन्दिग्धोदाहरणानिर्व्वचनव्यवस्थया नामाख्यातोपसर्गनिपातानां विभागेन नैघण्टुकप्रकरणानुक्रमणम्। अनेकार्थानवगतसंस्कारानुक्रमणम्। परोक्षकृताध्यात्मिकमन्त्रलक्षणम्। स्तुत्याशीःप्रयथाभिप्रायाभिख्यापरिदेवनानिन्दाप्रशंसादिभिर्मन्त्राभिव्यक्तिहेतूपदेशः। निदानपरिज्ञानव्याख्यानायानादिष्टदेवतोपपरीक्षणायाध्यात्मोपदेशप्रक्रान्तिभूमत्वम्। इतरेतरजन्मत्वम्। स्थानत्रयभेदतः तिस्रोग्नेकैकस्या माहाभाग्यक्रमतोऽनेकनामधेयप्रतिलम्भः। पृथगभिधानन्तूत्पत्तिसम्बन्धात्। देवतानामाकारचिन्तनम्। भक्तिसाहचर्य्यसंस्तवकर्म्मसङ्कल्पभाक्त्वहविर्भाक्त्वयज्ञभाक्त्वानि। पृथिवस्थानदेवतानामभिधेयाभिधानव्युत्पत्तिप्राधान्यशब्युदाहरणम्। तन्निर्व्वचनविचारोपपत्त्यवधारणानुक्रमेण व्याख्याय देवतप्रकरणनिर्णयः। विद्यापारम्प्रायोपदेशः। मन्त्रार्थनिर्व्वचनद्वारेण देवताभिधाननिर्व्वचनफलं देवतातात्पर्य्यम्। इत्येष समासतो निरुक्तशास्त्रचिन्ताविषयः॥"*॥

"वर्णागमो वर्णविपर्य्ययश्च इत्यादिना निश्चयेनोक्तं निरुक्तम्।" इत्यमरटीकायां भरतः॥

पदभञ्जनम्। यथा,—

"प्रक्रियावस्तु प्रकरणं निरुक्तं पदभञ्जनम्॥"

इति हेमचन्द्रः॥

कथिते, त्रि। यथा। "निरुक्ता प्रकृतिर्द्वेधा।" इति जगदीशः॥

निरुद्धः, त्रि, (नि+रुध+क्तः।) संरुद्धः। रोधविशिष्टः। इति अमरभरतशब्दटीकायां भरतः॥ (यथा, देवीभागवते। ३। २६। १५।

"मया निरुद्धः पापात्मा पतितोऽहं रुधे पुनः॥")

निरुद्धप्रक(का)शः, पुं, मेढ्रजातक्षुद्ररोगविशेषः। तल्लक्षणमाह।

"वातोपसृष्टे मेढ्रे तु चर्म्म संश्रयते मणिम्।
मणिस्तस्मोपनद्धञ्च मूत्रस्रोतो रुणद्धि च॥
निरुद्धप्रकशे तस्मिन्नन्धकारमवेदनम्।
मूत्रं प्रवर्त्तते अल्पोऽम्भिस्निग्धोऽतते न च॥
निरुद्धप्रकशं विन्द्यात् सरुजं वातसम्भवम्।
निरुद्धप्रकाश इत्यस्य स्थाने निरुद्धप्रकशपदमार्षत्वात्॥*॥

अथ तस्य चिकित्सा।

"निरुद्धप्रकशे नाड्यौ कौक्षीसुभयतोसृजौ।
दारवीं वा जतुकृतां घृताक्तां संप्रवेशयेत्॥
परिविच्छेदसां मध्ये शिशुमारवराहयोः।
चक्रतैलं तथा योज्यं वातघ्नद्रव्यसंयुतम्॥
आहरेत् स्थूलतरां सम्यक् नाडीं गर्भे प्रवेशयेत्।
स्रोतो विवर्द्धयेदेव स्निग्धमन्नञ्च भोजयेत्॥
भिक्षा वा सेवनीं शुक्ता सद्यः क्षतवदाचरेत्॥"

इति भावप्रकाशः॥

निरुद्योगः, त्रि, (निर्नास्ति उद्योगो यस्य।) निरुद्यमः। उद्योगाभावविशिष्टः। (यथा, भागवते। ८। ८। २.

"निःसत्त्वा लोलुपा राजन्! निरुद्योगागतत्रपाः।
यदा चोपेक्षिता लक्ष्मीर्बभूवुर्दैत्यदानवाः॥")

निरुपद्रवः, त्रि, (निर्गत उपद्रवो यस्मादिति।) उत्पातरहितः। यथा,—
"जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम्।
सौम्यदृष्टिर्भवेद्राजा विकले च शुभं वदेत्॥"
इति ज्योतिस्तत्त्वम्॥

निरुपमः, त्रि, (निर्गता उपमा सादृश्यं यस्मात्।) उपमारहितः। अनुपमः। यथा,—
"गौड़ं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी।"
इति प्रतीधचन्द्रोदयः॥

निरुपेक्षः, त्रि, (निर्गता उपेक्षा यस्मात्।) यद्वा निर्नास्ति उपेक्षा यस्य सः। अनुपेक्षः। उपेक्षाशून्यः॥

निरूढ़ः, पुं, (नि+रुह+क्तः।) निरूढ़लक्षणाकः शब्दः। यथा,—"पूर्व्वस्मिन्सम्बन्धाधीनं तत्स्वाम्युपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढ़ो दायशब्दः।" इति दायभागः॥

निरूढ़लक्षणा, स्त्री, (निरूढ़ा लक्षणा।) शक्तितुल्यलक्षणा। यथा,
"निरूढ़लक्षणाःकाश्चित् काश्चिन्नैव लशक्तितः।"
इति काव्यप्रकाशटीकायां महेश्वरः॥

निरूढ़ा, स्त्री, (निरूढ़+स्त्रियां टाप्।) लक्षणाविशेषः। यथा। "काश्चित् लक्षणावच्छेदकीभूततत्तद्रूपेण पूर्व्वपूर्व्वं प्रत्यायकत्वात् निरूढ़ा। यथा आरुण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरुणादिपदस्य।" इति शब्दशक्तिप्रकाशिका॥

निरूपणं, क्ली, (नि+रूप+णिच्+ल्युट्।) आलोकः। विचारः। निदर्शनम्। इति मेदिनी। णे, ६६॥ (यथा, महाभारते। ३। ७१।३१।
"प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम्।
दैवेन विधिना युक्ताः शास्त्रोक्तेन निरूपणैः॥"
निरूपयतीति। नि+रूप+णिच्+ल्युः। निरूपके, त्रि। यथा, मार्कण्डेये। १६। ६६।
"एते देवा महेन्द्रेण मामुपागम्य दुःखिताः।
तद्वाक्यापाशसंयुक्तमेदिनक्तं निरूपणाः॥
याचन्तेऽहर्निशं संख्यां यथावद्विस्खलिताम्॥")

निरूपितः, त्रि, (नि+रूप्+णिच्+क्तः।) कृतनिरूपणः। नियुक्तः। इति श्रीधरस्वामी॥ यथा, श्रीभागवते। १। ५। २१।
"निरूपितो बालक एव योगिनां
सुश्रूषणे प्राह्यधि निर्विविक्षताम्॥"

निरूहः, पुं, (निर्+ऊह मूर्त्ये+घञ्।) वस्तिभेदः। यथा,—
"वस्तिर्द्विधानुवासाख्यो निरूहश्चेतिसंज्ञितः।
यः स्नेहैर्दीयते स स्यादनुवासननामकः।
क्वाथक्षीरतैलैर्यो निरूहः स निगद्यते॥"
इति सारकौमुदी॥

अथ निरूहवस्तिकर्म्मविधिः।
आत्रेय उवाच।
"चतुरङ्गुलां वेणुमयीं नाड़ीं प्रतिलक्षणं कृत्वा तया वस्तिप्रतिकर्म्म कुर्य्यात्।
नातिचोष्णे च काले च न भुक्ते नच भोजिते।
न निद्रादौ न मूत्रार्त्ते विष्टार्त्ते नच वेदभाक्॥
वस्तिकर्म्मनिरूहश्च कारयेत्तं निरस्य च।
आदौ मूत्रविशोत्सर्गं कृत्वा गुदं प्रक्षाल्य नातिस्निग्धस्रग्व्यायां शाययित्वा वामाङ्गे वामपादं दक्षिणाङ्गे दक्षिणपादञ्च सङ्कोच्य जङ्घोपरि संस्थाप्य गुदाभ्यन्तरे द्व्यङ्गुलमात्रां नाड़ीं सुधीः सञ्चारयेत्। ततः शनैः शनैः वस्तिं निष्पीड्य द्विपलपरिमिततैलेन निरूहं कुर्य्यात्। निरूहानन्तरं शनैः शनैरुत्तानं शाययित्वोर्द्धीकृत्य च पश्चात् सङ्कोच्य पाणिभिः पञ्चवारान् स्फिक्पिण्डान् त्रोटयेत्। ततः स्वस्थं कृत्वा शयनाभ्यामाशयं मलस्थानं बोधयति। वस्तुदरवातान् दोषान् निवारयति। पण्डितास्तं वस्तिनिरूहं तद्वस्तिकर्म्म च विदुः।" इति हारीतोत्तरे स्थानस्थाने तृतीयोऽध्यायः।
"नरो विरिक्तस्तु निरूहदानं
विवर्ज्जयेत् सप्तदिनान्यवश्यम्।
शुद्धो विरेकेण निरूहदानं
तद्वास्य मूत्रं विषवेच्छरीरम्॥"
"विश्वक्स्थितं दोषचयं निरस्य
सर्व्वान् विकारान् शमयेन्निरूहः।
देहे निरूहेण विशुद्धमार्गे
सञ्चेहनं वर्णबलप्रदञ्च॥"
इति सिद्धिस्थाने प्रथमेऽध्याये॥
"ससैन्धवश्चौद्रयुतः सतैलो
देयो निरूहो बलवर्णकारी।
आनाहपार्श्वामयगोनिदोषान्
गुल्माशुदावर्त्तरुजश्च हन्यात्॥
यष्ट्याह्वमूलाष्टपलेन सिद्धं
पयः घृताक्षाफलपिण्डलीभिः।
युक्तं ससर्पिर्मधुवातरक्तः
वैस्वर्य्यवीसर्पहितो निरूहः॥"
इति सिद्धिस्थाने तृतीयेऽध्याये चरकेणोक्तम्॥)
ऊहशून्यः। निश्चितम्। इति मेदिनी। हे, १८॥ नियहः। तर्कः। इति हेमचन्द्रः॥

निर्ऋतिः, स्त्री, (निर्नियता ऋतिर्वृद्धा अशुभं वा यत्र।) अलक्ष्मीः। इत्यमरः। १। ८। २॥ (यथा, महाभारते। १। ८७। ६।
"अरुन्तुदं परुषं तीक्ष्णवाचं
वाक्कण्टकैर्वितुदन्तं मनुष्यान्।
विद्यादलक्ष्मीकतमं जनानां
मुखे निबद्धां निर्ऋतिं वहन्तम्॥")
अस्या उपाख्यानं यथा,—
"समुद्रमथनादूर्द्धं रत्नान्यापुः सुरोत्तमाः।
श्रेष्ठश्च कौस्तुभं तेषु विष्णवे प्रददुः सुराः॥
यावदक्ष्णीचकारासौ लक्ष्मीं भार्य्यार्थमात्मनः।
तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनम्॥
लक्ष्मीरुवाच।
असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते।
तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन!॥
विवाह्योऽहं मां पश्चादेष धर्म्मः सनातनः।
तस्माद्धर्म्मव्यतिक्रामं न कुर्य्या मधुसूदन!॥
सूत उवाच।
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः।
उद्दालकाय मुनये सुदीर्घतपसे तदा।
आम्नवाक्यानुरोधेन तामलक्ष्मीं ददौ किल॥
स्थूलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम्।
सवदारक्तनयनां रूक्षपिङ्गशिरोरुहाम्॥
स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य क्षमाश्रमम्।
वेदध्वनिसमायुक्तमानयामास धर्म्मवित्॥
होमधूपसुगन्धाढ्यं वेदघोषैश्च नादितम्।
आश्रमं तं विलोक्याथ यथिता साब्रवीदिदम्॥
ज्येष्ठोवाच।
नहि वासानुरूपोऽयं वेदध्वनियुतो मम।
नात्रागमिष्ये भो ब्रह्मन्! नयस्वान्यत्र मां ध्रुवम्॥
उद्दालक उवाच।
कथं नायासि किंवात्र वर्त्तते स्वमतं तव।
तव योग्या च वसतिः का भवेत् तद्वदस्व माम्॥
ज्येष्ठोवाच।
वेदध्वनिर्भवेद्यस्मिन्नतिथीनाञ्च पूजनम्।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहम्॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहम्॥
दानशौचे न विद्येते परद्रव्यापहारिणः।
परदाररता यत्र तत्र स्थाने रतिर्मम॥
वृद्धसज्जनविप्राणां यत्र स्यादपमानणम्।
निष्ठुरं भाषणं यत्र तत्र सम्वसाम्यहम्॥
सूत उवाच।
इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत्।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह॥
उद्दालक उवाच।
अश्वत्थवृक्षमूलेऽस्मिन्नलक्ष्मि! स्थीयतां क्षणम्।
आश्रमस्थानमालोक्य यावदायाम्यहं पुनः॥
सूत उवाच।
इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः।
प्रतीक्षन्ती चिरं तत्र यदा तं न ददर्श सा॥
तदा रुरोद करुणं भर्त्तुस्त्यागेन दुःखिता।
तत्स्त्राः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत्॥
तदा विज्ञापयामास विष्णुमुद्विग्नमानसा॥
लक्ष्मीरुवाच।
स्वामिन्नङ्गिनी ज्येष्ठा स्वामित्यागेन दुःखिता।
तामाश्वासयितुं याहि कृपालो! यदहं प्रिया॥
सूत उवाच।
लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्॥
विष्णुरुवाच।
अश्वत्थवृक्षमासाद्य सदालक्ष्मीः स्थिरा भव।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति।
असृग्ग्रोऽसौ भवेत्तस्मान्मन्दवारं विना किल॥
प्रत्यब्दमर्च्चयिष्यन्ति तां ज्येष्ठां ये ह्यधर्म्मिणः।
तेष्वियं श्रीः कनिष्ठा ते सदा तिष्ठत्वनामया॥"
इति पाद्मोत्तरखण्डे १९१ अध्यायः॥

(पापदेवता। यथा, ऋग्वेदे। १०। १६५। १।
"दूतो निर्ऋत्या इदमागमम्।"
"निर्ऋत्याः पापदेवताया दूतोऽगुचरः।" इति तद्भाष्ये सायनः॥)
निर्ऋतिः, स्त्री, (निर्गता ऋतिरशुभं यस्मात्।) निरुपद्रवः। इति धरणिः॥ दिक्पालविशेषे, पुं। इति मेदिनी। ते, ११६॥ स तु नैर्ऋत-कोणाधिपतिः। तस्य विवरणं यथा,—
"पूर्व्वस्यान्तु सुकान्तस्य रक्तकूटाख्यो गिरिः।
यत्रास्ते सततं देवो निर्ऋतो राक्षसेश्वरः॥
खड्गहस्तो महाकायो वामे चर्म्मधरस्तथा।
जटाजूटसमायुक्तः प्रांशुरुग्णाम्बुदोपमः॥
द्विभुजः शववक्त्रस्तु गर्द्दभोपरिसंस्थितः।
प्रान्तोपान्तौ विन्दुसर्गसहितौ वादिरेव च॥
नैर्ऋतं कथितं बीजं तेन तं परिपूजयेत्।
रक्तकूटं समारुह्य निर्ऋतिं राक्षसेश्वरम्॥
यः पूजयेद्विधानेन चण्डिकां राक्षसेश्वरीम्।
न तस्य राक्षसेभ्योऽस्ति भयं वापि कदाचन॥
राक्षसाश्च पिशाचाश्च वेताला गणनायकाः।
तं दृष्ट्वा पुरुषं राजन्! सर्व्वदैव प्रविभ्यति॥"
इति कालिकापुराणे ८१ अध्यायः॥
(राक्षसः। यथा, ऋग्वेदे। ८। २४। २४।
"वेत्था हि निर्ऋतीनां वज्रहस्तपरिष्टनम्॥"
ष्टनुः। यथा, भागवते। १। १६। ४।
"स चिन्तयन्नित्यमथाश्रृणोद्यथा
मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः॥")
निर्ऋथः, पुं, (निरन्तरं ऋच्छतीति। निर्+ऋ गतौ+"अर्त्तेर्निरि।" उणा २। ८। इति थक्।) सामवेदः। इत्युणादिकोषः। २। १०८॥ (हिंसा। यथा, ऋग्वेदे। ७। १०४। १४।
"किमस्मभ्यं जातवेदो दुधीये
द्रोघवाचेऽसुरे निर्ऋथं सचन्ताम्।"
"द्रोघवाचोऽद्रुग्वाचो राक्षसास्ते तव निर्ऋथम्। निःपूर्व्वोऽर्त्तिर्हिंसायां वर्त्तते। निर्ऋथं निःशेषेणास्मिं हिंसां सचन्तां सेवन्ताम्।" इति तद्भाष्ये सायनः॥)
निरोढव्यं, त्रि, (नि+रुध+तव्य।) रुद्धव्यम्। (यथा, महाभारते। १२। ८६। १५।
"आग्रयाणोपदानाच्च प्रभूतसलिलाकराः।
निरोढव्याः सदा राज्ञा चौरिव्याच्च महीरुहाः॥")
निरोधः, पुं, (नि+रुध+घञ्।) नाशः। (यथा, हरिवंशे। २। ५४।
"उत्पत्तिश्च निरोधश्च नित्यं भूतेषु पार्थिव!।
ऋषयोऽत्र न मुह्यन्ति विद्वांसश्चैव ये नराः॥")
रोधः। इति मेदिनी। धे, ३२॥ (यथा, पञ्चतन्त्रे। २। १६७।
"निरोधाच्चेतसोऽप्यासि निरुद्धान्यखिलान्यपि।
आच्छादिते वरौ मेघैराच्छन्नाः स्युर्गभस्तयः॥")
निग्रहः। इति हेमचन्द्रः। ६। १४४॥ (यथा, मनुः। ६। ६०।
"इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च।
अहिंसया च भूतानाममृतत्वाय कल्पते॥")

निर्गः, पुं, (निरन्तरं गच्छत्यत्रेति। निर्+गम+"अन्यत्रापि दृश्यते इति वक्तव्यम्।" इति डः।) देशः। इति हेमचन्द्रः। ४। १३॥
निर्गतः, त्रि, निःशेषेण गतः। बहिःप्राप्तः। यथा, मार्कण्डेये। ८२। १०।
"निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत॥"
निर्गन्धं, त्रि, (निर्गतो गन्धो यत्र।) गन्धशून्यम्। यथा, चाणक्ये। ७।
"रूपयौवनसम्पन्ना विशालकुलसम्भवाः।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः॥"
निर्गन्धनं, क्ली, (निर्+गन्ध अर्दने+भावे ल्युट्।) निर्ग्रन्थनम्। मारणम्। इत्यमरटीकायां स्वामी।
निर्गन्धपुष्पी, स्त्री, (निर्गतं गन्धशून्यं पुष्पं यस्याः। ङीष्।) शालञ्जिवृक्षः। इति शब्दचन्द्रिका॥ (शालञ्जिशब्देऽस्या विवृतिर्ज्ञातव्या॥)
निर्गुणः, पुं, (निर्गता गुणा यस्मात्।) सत्त्वरजस्तमोगुणातीतः। परमेश्वरः। यथा,—
"साकारञ्च निराकारं सगुणं निर्गुणं प्रभुम्।
सर्व्वाधारञ्च सर्व्वञ्च खेच्छारूपं नमाम्यहम्॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे १३ अध्यायः॥
"गुणभृन्निर्गुणो महान्।" इति महाभारते। १३। १४६। १०३॥ विद्यादिशून्ये, त्रि। यथा,—
"सगुणो निर्गुणो वापि सहायो बलवत्तरः।
तुषेणापि परिभ्रष्टस्तण्डुलो नाङ्कुरायते॥"
इत्युद्भटः॥
(व्यारहिते। यथा, निर्गुणं धनुः॥)
निर्गुण्डी, स्त्री, (निर्गता गुण्डात् गुण्डनात्। गौरादित्वात् ङीष्।) निर्गुण्डी। इत्यमरटीकायां मधुः। २। ४। ६८॥
निर्गुण्डी, स्त्री, (निर्गतं गुण्डं वेष्टनं यस्याः। ङीष्।) नीलझिण्टिकालिका। तत्पर्य्यायः। झिण्टिकालिका २ झिण्टिकाली ३ नीलिका ४ मल्लिका ५ सुवहा ६ रजनीहासा ७ निशिपुष्पिका ८। इति शब्दरत्नावली॥ वृक्षविशेषः। निसिन्दा इति भाषा॥ तत्पर्य्यायः। सिन्धुकः २ सिन्धुवारः ३ इन्द्रसुरभिः ४ इन्द्राणिका ५। इत्यमरः। २। ४। ६८॥ सिन्धुकः ६ सिन्धुवारः ७ इन्द्रसुरसः ८ निर्गुण्डी ९। इति भरतः॥ इन्द्राणी १०। इति शब्दः॥ पौलोमी ११ शक्राणी १२ कासमर्द्दिनी १३। इति रत्नकोषः॥ विसुन्धकः १४ सिन्धुकम् १५ सुरसः १६ सिन्धुवारितः १७ सुरसा १८ सिन्धुवारकः १९। इति च शब्दरत्नावली॥ करहाटः। इति विश्वः। ङ, ३६॥
निर्गूढः, पुं, (निर्निश्चयेन गुह्यते संव्रियते आत्मा अत्रेति। निर्+गुह+अधिकरणे क्तः।) वृक्षकोटरम्। इति शब्दरत्नावली॥ (संवृते, त्रि॥)
निर्ग्रन्थः, पुं, (अन्येभ्यः श्रुत्यादिनियमेभ्यो निर्गतः।) नग्नकः। निघ्नः। बालिशः। इति मेदिनी। थे, २०॥ मुनिः। इति हेमचन्द्रः॥ १। ७६॥ द्यूतकारः। इति जटाधरः॥ त्रि, ग्रन्थेभ्यो निर्गतः। निवृत्तहृदयग्रन्थिः। यथा, भागवते। १। ७। १०।
"आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे॥"
("निर्ग्रन्थाः ग्रन्थेभ्यो निर्गताः। सदुक्तं गीतासु।
'यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च॥'
इति। "यदा, ग्रन्थिरेव ग्रन्थः निवृत्तः क्रोधाहङ्काररूपो ग्रन्थिर्येषां ते निवृत्तहृदयग्रन्थय इत्यर्थः।" इति तट्टीकायां स्वामी॥)
निर्ग्रन्थकः, पुं, (निर्ग्रन्थ एव। स्वार्थे कन्।) क्षपणकः। निष्फलः। अपरिच्छदः। इति मेदिनी॥ के, १८५॥
निर्ग्रन्थनं, क्ली, (निर्+ग्रथि कौटिल्ये+भावे ल्युट्।) मारणम्। इत्यमरः। २। ८। ११३॥
निर्ग्रन्थिकः, पुं, (निर्गतो ग्रन्थिर्हृदयग्रन्थिर्यस्य। कप्।) क्षपणकः। निपुणे हीने च त्रि। इति शब्दरत्नावली॥
निर्घटं, क्ली, बहुमाधुर्यसङ्कीर्णं हट्टम्। इति हारावली। ७०॥ करशून्यहट्टम्। इति शब्दरत्नावली॥ घटशून्यञ्च॥ (निर्गतो घटो यस्मादिति विग्रहे। घटशून्यदेशादौ, त्रि॥)
निर्घर्षटः, पुं, (निर्+घर्ष दीप्तौ+घञ्।) निर्घर्षणम्। निघर्षटुः। ग्रन्थसंग्रहः। ग्रन्थानां सूचीति ख्यातः। यथा,—
"धन्वन्तरीयमदनादिहलायुधादीन्
विश्वप्रकाशममरकोषमशेषराजान्।
आलोक्य लोकविदितांश्च विचिन्त्य ग्रन्थान्
द्रव्याभिधानगजसंग्रह एष हृष्टः॥
निर्घर्षणक्षणपरीक्षणनिर्णयेन
नानाविधौषधविचारपरायणो यः।
सोऽधीत्य यत् सकलमेनमवेति सर्व्वं
तस्मादयं जगति भाति निघण्टुराजः॥"
इति राजनिर्घण्टः॥
निर्घातः, पुं, (निर्+हन+घञ्।) वायुभिहतवायुप्रपतनजन्यशब्दविशेषः। यथा,—
"वायुनाभिहते वायौ गगनाच्च पतत्यधः।
प्रचण्डघोरनिर्घोषो निर्घात इति कथ्यते॥"
इति शब्दमाला॥
अपि च।
"यदान्तरीक्षे बलवान् मारुतो मरुताहतः।
पतत्यधः स निर्घातो जायते वायुसम्भवः॥"
इति ज्योतिषम्॥
(एतस्य लक्षणादिकं यथा, बृहत्संहितायां ३६ अध्याये।
"पवनः पवनाभिहतो गगनादवनौ यदा समापतति।
भवति तदा निर्घातः स च पापो दीप्तविहगरुतः॥
अर्कोदयेऽधिकरणिकनृपधनियोधाङ्गनाबणिग्वेश्याः।
आम्रहरांशेऽजाविकसुहृच्चाक्रूरौरभ्राः॥
आमध्याह्नाद्राजोपसेविनो ब्राह्मणाश्च पीड्यन्ते।
वैश्यजलदांशुतीये चौरान् प्रहरे चतुर्थे च॥

अस्तं याते नीचान् प्रथमे यामे निहन्ति श्रुत्यानि ।
रात्रौ द्वितीययामे पिशाचसङ्घानिपीड़यति ॥
तुरगकरिरक्षतृतीये विनिहन्याद्यायिनश्चतुर्थे च ।
भैरवजम्बरशब्दे याति यतस्तां दिशं हन्ति ॥")

निर्घोषः, पुं, (निर् + घुष शब्दे + घञ् ।) शब्दमात्रम् । इत्यमरः । १ । ६ । २३ ॥ (यथा, रघुः । १ । ३६ ।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ॥"
निर्गोप्ति घोषो यत्रेति । शब्दभूम्नि, त्रि । यथा, महाभारते । १४ । १६ । ३६ ।
"संनियम्येन्द्रियग्रामं निर्घोषे निर्जने वने ।
कायमभ्यन्तरं कृत्स्नमेवाग्रः परिचिन्तयेत् ॥")

निर्जनः, त्रि. (निर्गतो जनो यस्मात् ।) जनशून्यस्थानादिः । विजनः । इति विविक्तादिशब्दटीकायां भारतसुन्दरी ॥ (यथा, देवीभागवते । २ । ६ । ५६ ।
"एकस्मिन् समये पाण्डुर्मार्द्रीं दृष्ट्वाथ निर्जने ।
आश्रमे चातिकामार्त्तो जग्राहागतवेग्रसः ॥")

निर्जरः, पुं, (जराया निष्क्रान्तः । निरादयः क्रान्ताद्यर्थे पञ्चम्या इति समासः ।) देवः । इत्यमरः । १ । १ । ७ ॥ (यथा, देवीभागवते । ५ । ८ । १८ ।
"विघ्नन्तु निर्जराः सर्व्वे कुशलं कथयन्तु वः ॥")
जरारहिते, त्रि । इति मेदिनी । रे, १७३ ॥
सुधायाम्, क्ली । इति शब्दरत्नावली ॥

निर्जरसर्षपः, पुं, (निर्जरप्रियः सर्षपः । शाकपार्थिववत् समासः ।) देवसर्षपशब्दः । इति राजनिर्घण्टः ॥

निर्जरा, स्त्री, (निर्जर + टाप् ।) गुडूची । तालपर्णी । इति मेदिनी । रे, १७२ ॥

निर्जलः, त्रि, (निर्गतं जलं यस्मात् ।) जलशून्यदेशादिः । इति भरतशब्दटीकायां भरतः । २ । १ । ५ ॥ यदुक्तम् ।
"सम्याप्ता दशमध्वजाद्यगतिना संमूर्च्छिता निर्जले
तुर्य्यद्वादशवद्द्वितीयमतिमन्नेकादशाभक्तनी ।
सा षष्ठी नृपपक्षमस्य नवमभूः सप्तमीवर्जिता
प्राप्नोत्यष्टमवेदनां प्रथम हे तस्यास्तृतीयो भव ॥"
इति वल्लालसेनः ॥

निर्जलैकादशी, स्त्री, (निर्जला एकादशी ।) ज्येष्ठमासीयशुक्लैकादशी । यथा, पाद्मे ।
श्रीभीमसेन उवाच ।
"पितामह ! त्वयोक्तोऽहमुपवासे करोमि किम् ।
अतो बहुफलं ब्रूहि व्रतमेकमपि प्रभो ! ॥
श्रीव्यास उवाच ।
वृषस्थे मिथुनस्थेऽर्के शुक्ला ज्येकादशी हि या ।
ज्येष्ठे मासि प्रयत्नेन सोपोष्या जलवर्ज्जिता ॥
स्नाने चाचमने चैव वर्ज्जयित्वोदकं बुधः ।
उपयुञ्जीत नैवान्यद्व्रतभङ्गोऽन्यथा भवेत् ॥
उदयादुदयं यावदर्ज्जयित्वा जलं बुधः ।
अप्रयत्नाद्वाप्नोति द्वादशद्वादशीफलम् ॥
ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत् ।
जलं सुवर्णं दत्त्वा तु द्विजातिभ्यो यथाविधि ॥
भुञ्जीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी ।
एवं कृते तु यत् पुण्यं भीमसेन ! प्रजायते तत् ॥
संवत्सरस्य या मध्ये एकादश्यो भवन्ति हि ।
तासां फलमवाप्नोति पुत्र ! मे नात्र संशयः ॥
इति मां केशवः प्राह शङ्खचक्रगदाधरः ॥"
किञ्च ।
"धनधान्यवहा पुण्या पुत्रभाग्यसुखप्रदा ।
उपोषिता नरव्याघ्र ! इति सत्यं ब्रवीमि ते ॥
यमदूता महाकायाः कराला कालरूपिणः ।
दण्डपाशधरा रौद्रा नोपसर्पन्ति तं नरम् ॥
पीताम्बरधराः शुद्धचक्रहस्ता मनोजवाः ।
अन्तकाले नयन्त्येनं वैष्णवा वैष्णवीं पुरीम् ॥"
किञ्च ।
"तोयस्य नियमं यस्तु कुरुते वैष्णवोत्तमः ।
पलकोटिसुवर्णस्य याम्ये यामे स पुण्यभाक् ॥
स्नानं दानं जपं होमं यदस्यां कुरुते नरः ।
तत् सर्व्वाक्षयं प्राप्नमेतत् कृष्णस्य भाषितम् ॥
किंवापरेण धर्म्मेण निर्ज्जलैकादशीं नृप ! ।
उपोष्य सम्यग्विधिना वैष्णवं पदमाप्नुयात् ॥"
किञ्च ।
"यैः कृता भीमसेनेयं निर्ज्जलैकादशी शुभा ।
स्वकुलं तारितं सर्व्वं कुलातीतं तथा शतम् ॥
आत्मना सह तैर्नीतं वासुदेवस्य मन्दिरे ॥"
किञ्च ।
"आत्मद्रोहः कृतस्तेन येरेषा नोपोषिता ।
पापात्मानो दुराचारा दुष्टास्ते नात्र संशयः ॥"
किञ्च ।
"यश्चेमां शृणुयाद्भक्त्या यश्चापि परिकीर्त्तयेत् ।
उभौ तौ स्वर्गमाप्नौ हि नात्र कार्य्या विचारणा ॥"
अथ निर्ज्जलव्रतविधिः । यथा,—
"यथाप्राङ्निखितं कृत्वा मङ्गल्यनियमं व्रती ।
जलमादाय शक्तीयान्नक्तेनान्नेन वैष्णवः ॥
एकादश्यां निराहारो वर्ज्जयिष्यामि वै जलम् ।
केशवप्रीणनार्थाय अत्यन्तदमनेन च ॥" इति ॥
"वर्ज्जयेच्चाम्बुहोराद्यं विना चाचमनार्थकम् ।
विना च प्राशनं पादोदकस्यात्यन्तपावनम् ॥
एकादश्यां निशायान्तु नित्यपूजां विधाय हि ।
हैमीं वैविक्रमीं मूर्त्तिं स्थापयेत् पयआदिभिः ॥
वस्त्रादिकं समभ्यर्च्याथाभ्यर्च्य गन्धादिभिश्च ताम् ।
प्रणम्य जागरं कुर्य्यात् तदग्रे गर्ग्गनादिना ॥
प्रातःस्नानादि निर्व्वर्त्य तं त्रिविक्रममर्च्चयेत् ।
शक्त्याम्बुकुम्भान् विप्रेभ्यो दद्यात् गन्धाद्यलङ्कृतान् ॥"
तत्र मन्त्रः ।
"देवदेव हृषीकेश संसारार्णवतारक ! ।
जलकुम्भप्रदानेन यास्यामि परमां गतिमिति ॥
दद्याच्च कनकं छत्रं वस्त्रयुग्मसुपानहौ ।
जलपात्राणि दिव्यानि विभवे सति वैष्णवः ॥
शक्त्या विप्रान् भोजयित्वा पीत्वा क्षीरकराञ्जलम् ।
स्वयं वानीय मौनी सन् भुञ्जीत सह बन्धुभिः ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

निर्जितः, त्रि, (निर् + जि जये + क्तः ।) प्राप्तपराजयः । तत्पर्य्यायः । पराजितः २ पराभूतः ३ विजितः ४ जितः ५ । इति शब्दरत्नावली ॥ वशीकृतः । यथा,—
"ध्यायतस्वरणाम्भोजं भावनिर्जितचेतसा ।"
इति श्रीभागवते । १ । ६ । अध्यायटीकायां स्वामी ॥

निर्जितेन्द्रियग्रामः, त्रि, (निर्जितः पराजित इन्द्रियग्राम इन्द्रियसमूहो येन ।) यतिः । इत्यमरः । २ । ७ । ४४ ॥

निर्जीवः, त्रि, (निर्गतो जीवो जीवात्मा यस्मात् ।) जीवात्मरहितः । प्राणिशून्यः । यथा,—
"चिता चिन्ता द्वयोर्मध्ये चिन्ता एव गरीयसी ।
चिता दहति निर्जीवं चिन्ता दहति जीवितम् ॥"
इति प्राहुः ॥

निर्झरः, पुं, (निर्झरणाति क्षीर्णीभवति उच्चस्थानपतनादिति । निर् + झृ + अच् ।) पर्व्वतावतीर्णजलप्रवाहः । इति भरतः ॥ सुवा अन्यथा वा गिरौ जलप्रवाहः । इति मधुः ॥ पर्व्वताद्देशेन पतज्जलं झोरा इति ख्यातम् । इति कोकटः ॥ तत्पर्य्यायः । झरः २ । इत्यमरः । २ । ३ । १५ ॥ निर्झरी ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । ६४ । ८ ।
"सरितो निर्झरांश्चैव दर्शयांश्चतदर्शनान् ॥")
तज्जलगुणाः । लघुत्वम् । पथ्यत्वम् । दीपनत्वम् । कफनाशित्वञ्च । राजवल्लभः ॥
(यथा च ।
"शैलसानुसवहारि प्रवाहे निर्झरो झरः ।
स तु प्रस्रवणस्यापि तत्त्वं नैर्झरं जलम् ॥
नैर्झरं रुचिकृन्नीरं कफघ्नं दीपनं लघु ।
मधुरं कटुपाकञ्च वातं स्यादतिपित्तलम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
सूर्य्यघोटकः । तुषानलः । इति मेदिनी । रे, १७ ॥

निर्झरी, स्त्री, (निर्झरणादि उच्चस्थानपातात् क्षीर्णीभवतीति । निर् + झृ + अच् । गौरादित्वात् ङीष् ।) निर्झरः । इति शब्दरत्नावली ॥ (निर्झर उत्पत्तिकारणत्वेनास्त्यस्या इति । अच् । ङीष् ।) नदी । यथा,—
"जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्द्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥"
इति रावणकृतशिवस्तोत्रम् ॥

निर्झरी, [न्] पुं. (निर्झरोऽस्त्यस्येति । निर्झर + इनिः ।) पर्व्वतः । इति त्रिकाण्डशेषः ॥

निर्झरिणी, स्त्री, (निर्झर उत्पत्तिकारणत्वेनास्त्यस्या इति । इनिः । ङीष् ।) नदी । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । १७ । ७ ।

"सोऽपि तां वीक्ष्य लावण्यरसनिर्भरिखीं नृपः।
यत्र प्राप परिष्वङ्गं तयाक्रान्तो सुमूर्च्छ तत्॥")
निर्णयः, पुं, (निर्णयनमिति। निर् + नी + "अरच्।" ३। ३। ५६। इति भावे अच्।) अवधारणम्। तत्पर्य्यायः। निश्चयः २। इत्यमरः। १। ५। ३॥ निर्णयनम् ३ निश्चयः ४। इति शब्दरत्नावली॥ (यथा, मनुः। १२। २।
"स तानुवाच धर्म्मात्मा महर्षीन् मानवो भृगुः।
अस्य सर्व्वस्य शृणुत कर्म्मयोगस्य निर्णयम्॥")
विचारः। तत्पर्य्यायः। तर्कः २ युक्तिः ३ चर्चा ४। इति त्रिकाण्डशेषः॥ विरोधपरिहारः। इति मिताक्षरा॥ चतुर्व्यादव्यवहारान्तर्गतशेषपादः। क्षयसला इति आरबीयभाषा॥ डिक्री इति इङ्गरेजीयभाषा॥ तद्विवरणं यथा। "अथ निर्णयः। तत्र नारदः।

यस्योभुः साक्षिणः सन्ति प्रतिज्ञा च जयी भवेत्।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः॥
स्वयमभ्युपपन्नोऽपि स्वकर्य्यावसितोऽपि सन्।
क्रियावसन्नोऽर्हेत परं सभ्यावधारणम्॥
सभ्यैरवधृतः पश्चात् राज्ञा ग्राह्यः स ग्राह्यते॥'
यस्य वादिनः प्रतिवादिनो वा साक्षिणः इत्युपलक्षणम्। साक्षिलिखितमुक्तिग्रन्थानां मध्येऽन्यतमप्रमाणं यस्य प्रतिज्ञायाः सत्यत्वप्रतिपादकं स एव जयी अन्यथा पराजित इति प्रतीतत्वम्। स्वयमभ्युपपन्नः आत्मनैवाङ्गीकृतस्वपराजयः। स्वकर्य्यावसितः कन्यखेदवैवर्ण्यादिना पराजितत्वेनावधृतः। क्रियावसन्नः साक्षादिना प्राप्तपराजयः। परमनन्तरम्। सभ्यावधारणं सभासदां मिलितानामयं पराजितः इति निर्णयं अर्हेत। स ग्राह्यविधिना ग्राह्यः॥ * ॥ निर्णयस्य फलमाह बृहस्पतिः।
'प्रतिज्ञाभावनाद्यादौ प्राड्विवाकादिपूजनात्।
जयपत्रस्य दानात् जयी लोके निगद्यते॥'
जयपत्रस्य लेखनप्रकारमाह स एव।
'यदुक्तं व्यवहारेषु पूर्व्वपक्षोत्तरादिकम्।
क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत्॥
पूर्व्वोत्तरक्रियायुक्तं निर्णयान्तं यदा नृपः।
प्रदद्याज्जयिने पत्रं जयपत्रं तदुच्यते॥'
कात्यायनः।
'अर्थिप्रत्यर्थिवाक्यानि प्रतिसाक्षिवचस्तथा।
निर्णयश्च तथा तस्य यथा व्यवहृतं स्वयम्॥
एतद्यथाधरं लेख्यं यथापूर्व्वं निवेशयेत्।
सभासद्यश्च ये तत्र धर्म्मशास्त्रविदस्तथा॥'

ततश्च भाषोत्तरे क्रिया च पत्रसाक्ष्यादिकं निर्णयो जयपराजयावधारणं निर्णयकालावस्थितमध्यस्थाश्च इत्यादिकं सर्व्वं लेखनीयं निरूपणस्य सम्यक्प्रदर्शनार्थम्। तथाहि भाषोत्तरलेखनं हेत्वन्तरेण पुनर्व्यवहारप्रत्यवस्थाननिषेधार्थम्। नहि न गृहीतमिति मिथ्योत्तरेण पराजितस्य पुनः परिशोधितं मयेति प्रत्यवस्थानं सम्भवति। प्रमाणलेखनन्तु पुनः प्रमाणान्तरोपन्यासनिरासार्थम्। तदाह कात्यायनः।
'क्रियां बलवतीं लब्ध्वा दुर्ब्बलां योऽवलम्बते।
स जयेऽवधृते सभ्यैः पुनर्न्ना नाप्नुयात् क्रियाम्॥
निर्णीते व्यवहारे तु प्रमाणमफलं भवेत्।
लिखितं साक्षिणो वापि पूर्व्वमावेदितं न चेत्॥
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः।
निर्णीतव्यवहारायां प्रमाणमफलन्तथा॥'
निर्णयोत्तरत्वमाह मनुः।
'अर्थे लक्षण्यमानन्तु कारणेन विभावितम्।
दापयेद्वनिकस्यार्थं दण्डलेशञ्च शक्तितः॥'
अलक्ष्यमानं अपलप्यमानम्। कारणेन साक्ष्यादिप्रमाणेन। याज्ञवल्क्यः।
'ज्ञात्वापराधं देशञ्च कालं बलमथापि वा।
वयः कर्म्म च वित्तञ्च दण्डं दण्ड्येषु दापयेत्॥'*।
मनुः।
'तीरितं चानुशिष्टञ्च यत्र क्वचन सम्भवेत्।
कृतं तद्धर्म्मतो विद्यात् न तद्भूयो निवर्त्तयेत्॥'
अनुशिष्टं साक्ष्यादिनिर्णीतम्। अतएव तीरितं प्राड्विवाकादिभिः समापितम्। तद्विवादपदं पुनर्न निवर्त्तयेदित्यर्थः॥ यत्र तु तीरितानुशिष्टयोरप्यधर्म्मकृतत्वमत्वा पराजयी पुनर्दिगुणदण्डमङ्गीकृत्य प्रत्यवतिष्ठते तत्र पुनर्न्यायदर्शनमाह नारदः।
'तीरितं चानुशिष्टञ्च यो मन्येत विधर्म्मतः।
द्विगुणं दण्डमादाय तत् कार्य्यं पुनरुद्धरेत्॥'
असद्विचारे तु विचारान्तरमाह स एव।
'असाक्षिकन्तु यद्दृष्टं विमार्गेण च तीरितम्।
असम्मतमतेर्दृष्टं पुनर्दर्शनमर्हति॥'
असाक्षिकमित्यप्रमाणोपलक्षणम्॥ * ॥
याज्ञवल्क्यः।
'दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान् नृपेण तु।
सभ्याः सचिवनो दण्ड्या विवादाद्दिगुणं दमम्॥
साक्षिसभ्यावसन्नानां दूषणे दर्शनं पुनः।
स्वकर्य्यावसितानान्तु नास्ति पौनर्भवो विधिः॥'
साक्षिवचनेन सभ्यावधारितेन च प्राप्तावसादानां दोषदर्शने पुनर्न्यायदर्शनम्। स्वव्यापारेण विरुद्धभावादिना प्राप्तावसादानान्तु नास्ति पुनर्न्यायः॥
बृहस्पतिरपि।
'पक्षायनानुत्तरत्वादन्यपक्षाश्रयेण च।
हीनस्य दण्डते वादी न स्वदावञ्चितस्य च॥'
मनुः।
'बलाद्दत्तं बलाद्भुक्तं बलादा लिखितञ्च यत्।
सर्व्वान् बलकृतानर्थान्नृपतिर्म्मनुरब्रवीत्॥'
याज्ञवल्क्यः।
'बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्त्तयेत्।
स्त्रीबालमन्त्रदारागारवह्न्यर्म्मलतांक्षया॥
मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः।
असम्बन्धकृतश्चैव व्यवहारो न सिध्यति॥'
उपाधिरङ्गलमिति मूलपाठः। उपाधिर्भङ्ग इति विज्ञानेश्वरः। तन्मते भीतादियोजितः इत्युक्तवचनेन पौनरुक्त्यम्। बह्न्यर्म्मः बह्निर्द्दग्धः। मत्तो मदादिना। उन्मत्तो वातादिना। व्यसनी द्यूतादासक्तः। असम्बन्धो वादिसन्नियुक्तव्यतिरिक्त उदासीनः। आदिपदाद्दासदासीपुत्रादेर्ग्रहणम्। तथा च नारदः।
'स्वतन्त्रोऽपि हि यत्कार्य्यं कुर्य्याच्चाप्रकृतिं गतः।
तदप्यकृतमेवाहुरस्वातन्त्र्यस्य हेतुतः॥
कामक्रोधाभिभूता ये व्यसनासक्तपीड़िताः।
रागद्वेषपरीताश्च क्रियास्वप्रकृतिं गताः॥
तथा दासकृतं कार्य्यमकृतं परिचक्षते।
अन्यत्र स्वामिसन्देशान्न दासः प्रभुरात्मनः॥
पुत्रेण च कृतं कार्य्यं यत् स्यादज्ञस्य तः पितुः।
तदप्यकृतमेवाहुर्दासपुत्रौ च तौ समौ॥'
एतच्च कुटुम्बभरव्यतिरिक्तविषयम्।
'कुटुम्बार्थेऽधीनोऽपि व्यवहारं समाचरेत्॥
स्वदेशे वा विदेशे वा तं न्यायान्न विचालयेत्॥'
इति मनुवचनात्।
कुटुम्बमवश्यं भरणीयम्। अधीनः परतन्त्रः पुत्रदासादिः। व्यवहारस्त्रादिकम्। न्यायान्न्यायतः। न विचालयेत् अशुभन्मन्येतेत्यर्थः। तथा च नारदः।
'स्वातन्त्र्यन्तु कृतं ज्ञेयं ज्ञेयं गुरुवयःकृतम्।
अकृतन्ना प्रजाः सर्व्वाः स्वतन्त्रः पृथिवीपतिः॥
अकृतन्नः स्मृतः शिष्य आचार्य्यस्य स्वतन्त्रता।
अकृतन्ना स्त्रियः सर्व्वाः पुत्रा दासाः परिग्रहाः॥
स्वतन्त्रस्तत्र तु ग्रही यस्य तत् स्यात् क्रमागतम्।
गर्भस्थैः सदृशो ज्ञेयः अरुमाद्वृत्तसरोच्छ्रयैः॥
बाल आमोऽप्राद्वर्षात् पौगण्डोऽपि निगद्यते।
परतो व्यवहारज्ञः स्वतन्त्र पितराहृते॥
जीवतोर्न स्वतन्त्रः स्याज्जरयापि समन्वितः।
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात्॥
अभावे बीजिनो माता तदभावे च पूर्व्वजः।'
परिग्रहाः अनुजीविप्रभृतयः। तथा च बृहस्पतिः।
'पितृव्यभ्रातृपुत्रस्त्रीदासशिष्यानुजीविभिः।
यदृणं गृहीतं कुटुम्बार्थे तदृणी दातुमर्हति॥'
कात्यायनः।
'कुटुम्बार्थमशक्तौ तु गृहीतं व्याधितेऽथवा।
उपप्लवनिमित्तञ्च विद्यादापत्कृतन्तु तत्॥
कन्यावैवाहिकञ्चैव प्रेतकार्य्ये च यत् कृतम्।
एतत् सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः॥'
प्रभोरिति कर्त्तरि षष्ठी तेन प्रभुणा दातव्यमिति रत्नाकरः। बृहस्पतिः।
'यः स्वामिना नियुक्तोऽपि धनाय व्ययकर्म्मणे।
कुर्य्यादकृतविद्याकिर्ज्ये निरूपार्थेषु सम्मतः॥
प्रमाणं तत्कृतं सर्व्वं लाभालाभव्ययोदयम्।
स्वदेशे वा विदेशे वा स्वामी तत्र विचालयेत्॥'
सम्मतस्तस्य स्वामिन इत्यर्थः।" इति व्यवहारतत्त्वम्। अधिकरणविशेषः। यथा,—
"विवादो विषयश्चैव पूर्व्वपक्षस्तथोत्तरम्।
निर्णयश्चेति पञ्चाङ्गं ग्राह्येऽधिकरणं स्मृतम्॥"
इति स्मृतिमीमांसा॥
न्यायमते तदभावाप्रकारकत्वे सति तत्प्रकारक-

ज्ञानम्। यथा। वह्निमान् पर्व्वत इत्यादि-बोधः। इति भाषापरिच्छेदः॥ तद्धर्म्मावच्छिन्न प्रकारत्वान्यप्रकारत्वानिरूपितपक्षतावच्छेदका-वच्छिन्नविशेष्यतात्वज्ञानम्। इति जग-दीशः॥

निर्णयनं, क्ली, (निर्+नी+भावे ल्युट्।) निर्णयः। इति शब्दरत्नावली॥

निर्णयपादः, पुं, (निर्णयात्मकः पादो भागविशेषः।) चतुष्पादव्यवहारान्तर्गतव्यवहारविशेषः। तस्य रूपम्। मिलितानां सभासदां पराजितोऽय-मित्यवधारणम्। इति व्यवहारतत्त्वम्॥

निर्णायनं, क्ली, (निर्+नी+णिच्+ल्युट्।) मातङ्गापाङ्गदेशः। तत्पर्य्यायः। निर्याणम् २। इति शब्दरत्नावली॥

निर्णिक्तं, त्रि, (निर्णिज्यते स्मेति। निर्+णिज्+क्तः।) अपनीतमलम्। शोधितम्। इत्यमरः। ३। १। ५६॥ (यथा, चिन्तामणि-धृतस्मृतिवचनम्।

"बलदेवव्रतश्चैव स्नानं गोद्विजालयम्।
निर्णिक्तपादः प्रविशेन्नानिर्णिक्तः कदाचन॥")

निर्णीतं, त्रि, (निर्+नी+क्तः।) ज्ञातनिर्णयः। निश्चयीकृतः। यथा,—

"निर्णीते व्यवहारे तु प्रमाणमपलं भवेत्।
लिखितं साक्षिणो वापि पूर्व्वमावेदितं न चेत्॥
यथा पक्वेषु धान्येषु निष्फलाः प्राकृतो गुणाः।
निर्णीतव्यवहाराणां प्रमाणमपलं तथा॥"

इति व्यवहारतत्त्वम्॥

तद्वैदिकपर्य्यायः। "निश्चयम् १ सत्यः २ सनुतः ३ हिरक् ४ प्रतीच्यम् ५ अपीच्यम् ६। इति यनिर्णीतान्तर्हितनामधेयानि।" इति वैजय-न्तिघण्टौ। ३। २५॥

निर्णेजकः, पुं, (निर्णेनेक्ति निर्म्मलीकरोति वस्त्र-मिति। निर्+णिज शौचे+ण्वुल्।) रजकः। इत्यमरः। २। १०। १०॥ (यथा, मनुः। ४। २१६।

"कारुकान्नं प्रजां हन्ति वलं निर्णेजकस्य च।
गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति॥")

निर्दृष्टः, त्रि, परापवादरक्तः। दयाशून्यः। क्रौरः। भग्नः। नियतयोजनः। इति शब्दरत्नावली॥

निर्दयः, त्रि, (निर्गता दया यस्मात्।) दयाशून्यः। इति जटाधरः॥ (यथा, रघुः। ११। ८४।

"न प्रहर्त्तुमलमसि निर्दयं
विप्र इत्यभिभवत्यपि त्वयि॥"

निर्गता दया यस्मिं यमुद्दिश्य दया तिरोहिता इत्यर्थः। अदयार्हः। यथा, मनुः। ६। २३६।

"ज्ञातिसम्बन्धिभिर्क्षिप्ते त्यक्तया क्षतज चया।
निर्दया निर्नमस्कारास्तन्मनोरनुशासनम्॥")

निर्दरं, क्ली. (निर्+दृ+अप्।) निर्भरम्। (निर्गतो दरश्चित्तं यस्मात्।) सारम्। त्रि, कठि-नम्। (यथा, रामायणे। २। ८५। १६।

"ध्याननिर्दग्धपापेन विनिःश्वसितधातुना॥")

अपचये च त्रि। इति मेदिनी। रे, १७५॥

(निर्दीर्य्यते विदीर्य्यते पतनस्थलमिति। निर्+दृ विदारे+अप्। निर्भरः। इति कश्चित्॥ निर्गाक्षि दरो भयो यस्येति निर्भये, त्रि॥)

निर्दहनः, पुं, (नितरां दहतीति। निर्+दह+ल्युः।) भल्लातकः। इति राजनिर्घण्टः॥ (भल्लातकशब्देऽस्य गुणादिकं ज्ञातव्यम्॥ निर्गाक्षि दहनो वह्निर्यत्र।) अग्निभूयञ्च॥

निर्दहनी, स्त्री, (निर्गतं दहनं यस्याः। स्त्रियां ङीप्।) मूर्व्वालता। इति रत्नमाला॥ (यथा,

"सूक्ष्मं वचा तिक्तकरोहिणीञ्च
तथाभया निर्दहनीञ्च तुल्याम्।
पिबेच्च गोमूत्रयुतां कफार्त्ति
मूले तथास्य च पाचनार्थम्॥"

इति वैद्यकचक्रपाणिसंग्रहे मूलाधिकारे॥)

निर्दिग्धः, त्रि, (निर्+दिह+क्तः।) बली। मांसलः। इति हेमचन्द्रः। ३। ११३॥

निर्दिष्टः, त्रि, (निर्+दिश+क्तः।) निश्चितः। यथा,—

"निर्दिष्टविषयं किञ्चिदुपात्तविषयन्तथा।
अपेक्षितक्रियञ्चैव त्रिधापादानमिष्यते॥"

इति रामतर्कवागीशः॥

(आदिष्टः। यथा, रघुः। १। ६५।

"निर्दिष्टां कुलपतिना स पर्य्यङ्काम-
मध्यास्य प्रयतपरिग्रहद्वितीयः॥")

निर्देशः, पुं, (निर्+दिश+भावे घञ्।) आज्ञा। इत्यमरः। २। ८। १५॥ (यथा, भागवते। ६। १। ३८॥

"यूयं वै धर्म्मराजस्य यदि निर्देशकारिणः।
ब्रूत धर्म्मस्य नस्तत्त्वं यच्च धर्म्मस्य लक्षणम्॥")

कथनम्। (यथा, गीतायाम्। १७। २३।

"ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः॥")

उपान्तः। इति मेदिनी। शे, २३॥

निर्देष्टा, [ष्टृ] त्रि, (निर्दिशतीति। निर्+दिश+तृच्।) निर्देशकर्त्ता। यथा, "तथाहि अर्थो नाम साध्यस्य अर्थस्य निर्देष्टा तत्प्रतिपक्ष-स्तदभाववादी प्रत्यर्थी।" इति मिताक्षरायां व्यवहाराध्याये साक्षीप्रकरणम्॥

निर्दोषः, त्रि, (निर्गतो दोषो यस्मात्।) दोष-रहितः। यथा,—

"निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति।
स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव तु॥"

इति मिताक्षरा॥

निर्धनः, पुं, (निर्गतं धनं यस्मात्।) जरठवः। इति शब्दचन्द्रिका॥ धनशून्ये, त्रि। यथा,—

"ब्रह्मबन्धुरपि नरः पूज्यो यस्यास्ति विपुलं धनम्।
अग्निसदृत्यवंशोऽपि निर्धनः परिभूयते॥"

इति चाणक्ये। ८२॥

निर्धर्म्मः, त्रि, (निर्गतो धर्म्मो यस्मात्।) धर्म्म-रहितः। यथा,—

"महापराधे निर्धर्म्मे क्षतघ्ने क्लीवकुत्सिते।
नास्तिकब्राह्मदासेषु कोपप्रायं विवर्ज्जयेत्॥"

इति मिताक्षरा॥

निर्धारः, पुं, (निश्चियतेऽनेनेति। निर्+धृ+घञ्।) निश्चयः। "जातिगुणक्रियाणां उत्कर्ष-ापकर्षयोर्व्व यत्र जातीयात् पृथक्करणम्। यथा। मनुष्याणां ब्राह्मणः श्रेष्ठः। गवां क्षया बहुक्षीरा। अश्वगानां धावन्तः शीघ्रतमाः।" इति दुर्गादासः॥ धारारहितञ्च॥

निर्धारणं, क्ली, (निर्धार्य्यते इति। निर्+धृ+णिच्+भावे ल्युट्।) निश्चयः। निर्धारः। यथा, निर्द्धारणे षष्ठ्याः समासो न स्यादिति दुर्गा-दासः॥

निर्धारितं, त्रि, (निर्धार्य्यते स्मेरीक्रियते इति। निर्+धृ+णिच्+कर्म्मणि क्तः।) ज्ञात-निश्चयः। यथा। "किन्त्वनिर्धारितैकत्वानेकत्व-विशेषस्य।" इति विजयरक्षितः॥

निर्धार्य्यं, त्रि, (निर्धार्य्यते इति। निर्+धृ+"ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्। धारि+ण्यत् वा।) निर्धारणीयम्। निर्धारि-तव्यम्। निर्णयकर्म्मकर्त्ता। इति विशेषनिघ्ने निर्वाग्यशब्दटीकायां रमानाथः॥

निर्धूतं, त्रि, (निर्+धू+क्तः।) क्षिप्तम्। (यथा, मार्कण्डेये। ८५। ७४।

"केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि॥")

परित्यक्तम्। यथा, ज्योतिषतत्त्वे।

"नित्यं निर्धूतनिद्रं प्रबलरिपुभयं विघ्ननाशञ्च जीवः॥"

(निरस्तम्। यथा, अध्यात्मरामायणे। १। ३।

"पठन्ति ये नित्यमनन्यचेतसः
शृण्वन्ति चाध्यात्मकसंज्ञितं शुभम्।
रामायणं सर्व्वपुराणसम्मतं
निर्धूतपापा हरिमेव यान्ति ते॥")

भर्त्सितम्। यथा, रामायणे। ४। ८। ३२।

"पुराहं वालिना राम! राज्यात् स्वाद्-
वरोपितः।
परुषाणि च संश्राव्य निर्धूतोऽस्मि बलीयसा॥")

निर्धौतं, त्रि, (निर्+धाव+कर्म्मणि क्तः। "क्ष्वोः शूड्दुनासिके च।" ६। ४। १९। इति वकारस्योठादेशः। "रल्वेधव्यूट्सु।" ६।१।८६। इति वृद्धिः।) प्रक्षालितम्। यथा,—

"तस्याः पाटलपाणिजाङ्कितसुरोनिद्राकषाये दृशौ
निर्धौतोऽधरशोभिमा विलुलितस्रस्तस्रजो मूर्द्धजाः॥"

इति श्रीजयदेवः॥

निर्बन्धः, पुं, (निर्+बन्ध+भावे घञ्।) अभि-निवेशः। निबन्धोऽपि पाठः। इति हेमचन्द्रः। ६। १३६॥ (यथा, भागवते। ३। १४। २६।

"स विदित्वाथ भार्य्यायाः निर्बन्धं विकर्म्मभिः।
नत्वा दिष्टाय रहसि तयाथोपविवेश ह॥")

अभिलषितप्राप्तौ भूयो यत्नः। (यथा, च कुमारसम्भवे। ५। ६६।

"अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमासुक्तविवाहकौतुकः॥")

यथा शिवपुराणे। शिवपूजां खेच्छाविशेषैः। आखटि इति ख्यातः। इति केचित्। इति शब्दशब्दटीकायां भरतः॥

निर्म्मर्ज्जनं, क्ली, (निर्+मर्ज्ज+भावे ल्युट्।) निमर्ज्जनम्। मारणम्। इत्यमरटीकायां नीलकण्ठः॥

निर्म्भटः, त्रि, (निर्+भट्+अच्।) दृढ़ः। इति त्रिकाण्डशेषः॥

निर्म्भयः, त्रि, (निर्गतं भयं यस्य यस्माद्वा।) भयरहितः। तत्पर्य्यायः। अजानेयः २। इति त्रिकाण्डशेषः॥ (यथा, हरिवंशे। ८३। ११।

"रजकः स तु तौ प्राह युवां कस्य वनेचरौ।
राज्ञो वासांसि यौ मौढ्यादुपायेते निर्भयावुभौ॥"

पुं, रौच्यमनुपुत्रे। यथा, हरिवंशे। ७। ८३।

"सुनेत्रः चित्रसेनश्च सुतपा निर्भयो दृढ़ः।
रौच्यस्येते मनोः पुत्रा अन्तरे तु त्रयोदशे॥")

निर्भरं, क्ली, (निःशेषेण भरो भरणं यत्र।) अतिशयः। (यथा, गीतगोविन्दे। १। ३६।

"रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा-
मभ्यर्णे परिरभ्य निर्भरसुरः प्रेमान्धया राधया।
साधु तद्वदनं सुधामयमिति व्याहृत्य गीतस्तुतिः
प्रीतः पीतदुकूलचुम्बितः स्मितमनोहारी हरिः
पातु वः॥")

तद्वति, त्रि। इत्यमरः। ३। ४। २॥ (यथा, भागवते। ६। १८। २०।

"तं वीरमाहौशनसी प्रेमनिर्भरया गिरा॥")

निर्भर्त्सनं, क्ली, (नितरां भर्त्सनम्। निर्+भर्त्स+ल्युट्।) खलीकारः। अवलक्तकम्। इति मेदिनी। ने, १८६॥ भर्त्सनञ्च॥ (यथा, महाभारते। ३। ३०४। ५।

"निर्भर्त्सनापवादैश्च तथैवाप्रियया गिरा।
ब्राह्मणस्य पृथा राजन्! न चकारा प्रियन्तदा॥")

निर्भर्त्सितं, त्रि, (निर्+भर्त्स+क्त।) कृतनिर्भर्त्सनः। तत्पर्य्यायः। निन्दितः २ धिक्कृतः ३ अपध्वस्तः ४। इति जटाधरः॥ (यथा, कुमारसम्भवे। ३। ५३।

"अथोरुनिर्भर्त्सितपद्मरागम्॥")

निर्भाग्यः, त्रि, (निकृष्टं भाग्यं यस्य।) भाग्यरहितः। यथा, "मूढ़ाल्पापटुनिर्भाग्या मन्दाः स्युः।" इत्यमरः। ३। ३। १४॥

निर्म्मदः, पुं, (निर्गतो मदो दानवारि गर्व्वो वा यस्मात्।) कालवशान्निर्गलितमदहस्ती। तत्पर्य्यायः। उद्दान्तः २। इत्यमरः। २। ८। ३६॥ मदशून्ये, त्रि॥ (यथा, महाभारते। ३। ६६। ६६।

"ततः संवत्सरेऽतीते कृतौजसमवस्थितम्।
निर्म्मदं दुःखितं दृष्ट्वा पितरो राममब्रुवन्॥")

निर्म्मध्या, स्त्री, (निर्गतं मध्यं यस्याः। शून्यमध्यत्वादेवास्यास्तथात्वम्।) नलिका। इति भावप्रकाशः॥ (नलिकाशब्दे ऽस्या विवृतिविशेषो ज्ञातव्यः॥)

निर्म्मन्थ्यदारु, क्ली, (निर्म्मन्थ्यं यज्ञार्थं घर्षणीयं दारु।) अरणिः। यज्ञे अग्न्युत्पादनार्थं घर्षणीयकाष्ठम्। इत्यमरः। २। ७। १६॥

निर्म्मलं, क्ली, (निर्गतं मलमस्मात्।) निर्म्माल्यम्। अभ्रकम्। त्रि, मलहीने। इति मेदिनी। ले, १०२॥ (यथा, महाभारते। ३। ६५। ४।

"निर्म्मलस्वादुसलिलं मनोहारि सुशीतलम्॥"

निष्पापे। यथा, मनुः। ८। ३१८।

"राजनिर्द्धूतदण्डास्तु कृत्वा पापानि मानवाः।
निर्म्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा॥"

यथा, देवीभागवते। १। १८। ३७।

"मनस्तु सुखदुःखानां महतां कारणं द्विज!।
जाते तु निर्म्मले ह्यस्मिन् सर्व्वं भवति निर्म्मलम्॥")

निर्म्मलोपलः, पुं, (निर्म्मलः विशुद्धः उपलः।) स्फटिकः। इति राजनिर्घण्टः॥

निर्म्माणं, क्ली, (निर्म्मीयते इति। निर्+मा ल्युट्।) निर्म्मितिः। (यथा, भागवते। २। ५। ३२।

"यदेतेऽसङ्गता भावा भूतेन्द्रियमनोगुणाः।
यदायतननिर्म्माणे न शेकुर्ब्रह्मवित्तम!॥")

सारः। समञ्जसम्। इति मेदिनी। णे, ५८॥

निर्म्माल्यं, क्ली, (निर्+मल+ण्यत्।) देवोच्छिष्टद्रव्यम्। देवस्वत्वनिवृत्तिविशिष्टं देवदत्तं वस्तु। यथा,—

"अर्व्वाक् विसर्ज्जनाद्द्रव्यं नैवेद्यं सर्व्वमुच्यते।
विसर्ज्जिते जगन्नाथे निर्म्माल्यं भवति ध्रुवात्॥"

इति गरुड़पुराणम्॥*॥

तस्य स्थापनं शेषणञ्च यथा। "ऐशान्यां मण्डलं कृत्वा निर्म्माल्यग्रहणं दद्यादिति। वैष्णवे तु ॐ विष्वक्सेनाय नमः। शैवे तु ॐशिवायै नमः। शिवे ॐचण्डेश्वराय नमः। सूर्य्ये ॐ तेजश्चण्डाय नमः। गणेशे ॐउच्छिष्टगणेशाय नमः। कालिकादौ ॐउच्छिष्टचाण्डालिन्यै नमः। तथा च विद्यानन्दनिबन्धे।

'सूर्य्ये गणपतौ दुर्गे शैवे शैवे च वैष्णवे।
तेजश्चण्डमथोच्छिष्टसोजसमुच्छिष्टपूर्ब्बिकाम्॥
चाण्डालीं शैवि(वै)कां चण्डं विष्वक्सेनं क्रमाद्-
यजेत्॥'

सोजो गणेशः।

'हृदये च बहिर्देवीं समर्च्य विधिवत्ततः।
निर्म्माल्यञ्च शुचौ देशे नैवेद्यं भक्षयेत् सुधीः॥'

तन्त्रान्तरे।

निर्म्माल्यं शिरसा धार्य्यं सर्व्वाङ्गे चानुलेपनम्।
नैवेद्यञ्चोपभुञ्जीत दत्त्वा तद्वस्त्रमालिने॥"

इति तन्त्रसारः॥*॥

"उदके तरुमूले वा निर्म्माल्यं तत्र संत्यजेत्॥"

इति कालिकापुराणे ५५ अध्यायः॥

निर्म्माल्यकालो यथा,—

"मणिमुक्तासुवर्णानां देवदत्तानि यानि च।
न निर्म्माल्यं द्वादशाब्दं ताम्रपात्रं तथैव च॥
प्रटी शराटी च षण्मासं नैवेद्यं दत्तमात्रतः।
मोदकं क्षीरखण्डञ्च यामार्द्धेन महेश्वरि!॥
पट्टवस्त्रं त्रिमासञ्च यज्ञसूत्रन्त्वहः स्मृतम्
यावदङ्गं भवेद्दृष्ट्या परमान्नन्तथैव च॥"

इत्येकादशीतत्त्वे योगिनीतन्त्रम्॥

शिवनिर्म्माल्ये विशेषो यथा, स्कान्दे।

"निर्म्माल्यं यो हि मे भक्त्या शिरसा धारयिष्यति।
अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः।
नरके पच्यते घोरे तिर्य्यग्योनौ च जायते॥
ब्रह्महापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत्।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते!॥
शुचिः स्नानादिनेति शेषः। एवञ्च स्कन्दे रुद्रस्य निर्म्माल्यं सवासा आप्लुतः शुचिरिति कालिकापुराणं अशुचिविषयम्॥ अनुपनीतविषयमिति श्रीदत्तः। वस्त्रयज्ञोपवीतम्। अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्। शालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम्॥"

इति तिथितत्त्वम्॥

तस्य उत्तारणकालो यथा,—

अथ निर्म्माल्योत्तारणम्। अत्रिस्मृतौ।

"प्रातःकाले सदा कुर्य्यान्निर्म्माल्योत्तारणं बुधः।
दूषिताः पशवो वह्नाः कन्यका च रजस्वला॥
देवता च सनिर्म्माल्या हन्ति पुण्यं पुराकृतम्॥
नारसिंहे श्रीयमोक्तौ।
देवमाल्यापनयनं देवागारे समूहनम्।
स्नापनं सर्व्वदेवानां गोप्रदानसमं स्मृतम्॥
नारदपञ्चरात्रे।

यः प्रातरुत्थाय विधाय नित्यं
निर्म्माल्यमीशस्य निराकरोति।
न तस्य दुःखं न दरिद्रता च
नाकालमृत्युर्न च रोगमात्रम्॥

अरुणोदयवेलायां निर्म्माल्यं ग्रहणं व्रजेत्।
प्रातस्तु स्नाग्रहाग्र्यं घटिकामात्रयोगतः॥
अतिशुद्धं विजानीयात्ततो वज्रप्रहारवत्।
अरुणोदयवेलायां ग्रह्यं तत् क्षमते हरिः॥
घटिकायामतिक्रान्तौ क्षुद्रं पातकमावहेत्।
सुहूर्त्ते समतिक्रान्ते पूर्व्वं पातकमुच्यते॥
अतिपातकमेव स्यात् घटिकानां चतुष्टये।
सुहूर्त्तेऽतिते पूर्व्वे महापातकमुच्यते॥
ततः परं ब्रह्मवधो महापातकपञ्चकम्।
प्रहरे पूर्णतां याते प्रायश्चित्तं ततो न हि॥
निर्म्माल्यस्य विलम्बे तु प्रायश्चित्तमथोच्यते।
अतिक्रान्ते सुहूर्त्तार्द्धे सहस्रं जपमाचरेत्॥
पूर्णे सुहूर्त्ते सञ्जाते सहस्रं सार्द्धमुच्यते॥
सहस्रद्वितयं कुर्य्यात् घटिकानां चतुष्टये।
सुहूर्त्तेऽतिते तीते अयुतं जपमाचरेत्॥
प्रहरे पूर्णतां याते पुरश्चरणमुच्यते।
प्रहरे समतिक्रान्ते प्रायश्चित्तं न विद्यते॥"

इति श्रीहरिभक्तिविलासे ३ विलासः॥

निर्म्माल्या, स्त्री, (निर्म्माल्यते इति। निर्+मल+ण्यत्। ततष्टाप्।) एकका। इति शब्दरत्नावली॥

निर्म्मितं, त्रि, (निर्+मा+क्तः।) कृतनिर्म्माणम्। गठितम्। रचितम्। यथा, सिद्धान्तमुक्तावल्याम्।

"निजनिर्म्मितकारिकावलीमतिसंक्षिप्तरुचिरं
ब्रुवतोक्तिभिः।
विशदीकरवाणि कौतुकात् तनु राजीवदया-
वशंवदः॥"

निर्म्मितिः, स्त्री, (निर्+मा+क्तिन्।) निर्म्माणम्। गठनम्। रचनम्। यथा,—

"नियतिक्षतनियमरहितां ह्लादैकमयीमनन्य-
परतन्त्राम्।
नवरसरुचिरां निर्म्मितिमादधती भारती कवेर्
जयति॥"

इति काव्यप्रकाशः॥

निर्म्मुक्तः, पुं, (निर्+मुच्+क्तः।) सत्कञ्चुकः। अहिरात्मत्यक्तत्वक् सर्पः। इत्यमरः।१।८।६॥ त्यक्तसंयोगे, त्रि। इति मेदिनी। ते, ११७॥ (यथा, देवीभागवते। ३। ८। २०।

"रागद्वेषान्न निर्म्मुक्तः कामक्रोधवशमाश्रितः।
पुनरेव गृहं प्राप्तो यथा पूर्व्वं तथा स्थितः॥")

निर्म्मुटं, क्ली, (निर्म्मुटति आच्छिपतीति। निर्+मुट आच्छेपे+कः।) करभूत्यवहृतः। तत्पर्य्यायः। पण्याग्रिरम् २ कचङ्गनम् ३। इति शब्दरत्नावलीत्रिकाण्डशेषौ॥

निर्म्मुटः, पुं, (निर्+मुट+"इगुपधेति।" ३। १। १३५। इति कः।) वनस्पतिः। अपुष्पवृक्षः। इति त्रिकाण्डशेषः॥ सूर्य्यः। खर्परः। इति हारावली। २५५॥

निर्म्मोकः, पुं, (नितरां मुच्यते इति। निर्+मुच्+घञ्।) सर्पत्वक्। तत्पर्य्यायः। अहिकोषः २ निर्ल्वयनी ३ कञ्चुकः ४। इति हेमचन्द्रः। ४। ३८१॥ (यथा, आर्य्यासप्तशत्याम्। ३२८।

"निजगात्रनिर्व्विशेषस्थापितमपि सारमखिल-
माहाय।
निर्म्मोकश्च भुजङ्गो मुञ्चति पुरुषश्च वारवधूः॥"

त्वक्मात्रम्। यथा, महाभारते। १३। १४९। १०१।

"त्यजनिर्म्मोकवसनाश्चीरवल्कलवाससः।
निर्द्दम्भाः सत्पथं प्राप्ता वालिखिल्याश्चपोधनाः॥"

भावे घञ्।) मोचनम्। आकाशः। सन्नाहः। इति मेदिनी। के, १९१॥ (सावर्णिमनोः पुत्रविशेषः। यथा, भागवते। ८। १३। ११।

"अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः।
निर्म्मोकविरजस्काद्याः सावर्णितनया नृप॥")

निर्म्मोचः, पुं, (नितरां मोचः।) त्यागः। इति नानार्थसर्गशब्दार्थे अमरः॥ (यथा, रघुः। १०। २।

"न चोपलेभे पूर्व्वेषामन्यनिर्म्मोचसाधनम्।
सुताभिधानं स ज्योतिः सद्यः शोकतमोऽपहम्॥")

निर्यन्त्रणं, त्रि, (निर्+यन्त्र+ल्युट्।) अबाधम्। निर्गोलम्। उच्छृङ्खलम्। इति जटाधरः॥ (यन्त्रणाशून्यम्। यथा, सुश्रुते। १। ३४।

"ततः खादेदुशतीयवेवी निर्यन्त्रणाखिमे॥")

निर्यातं, क्ली, (निर्यांति निर्गच्छति मदोऽनेनेति।) निर्+या+करणे क्तः।) गजानामङ्गदेशः। (यथा, माघे। ५। ४१।

"प्रलयद्यदन्तिनिश्चिताङ्कुशदूरभिन्न-
निर्य्यातनिर्यदसृक्चलितं निषादी॥")

मोक्षः। अध्वनिर्गमः। इति मेदिनी। ते, ५७॥ (यथा, महाभारते। १३। ५५। ६।

"निर्य्यातञ्च रथेनाशु सहसा यत् कृतं त्वया॥"

पशुपादबन्धनरज्जुः। इति वैजयन्ती॥ यथा, माघे। १२। ४१।

"निर्य्यातदृक्षस्य पुरो दुधुक्षतः॥")

निर्यातनं, क्ली, (निर्+यत+णिच्+ल्युट्।) वैरशुद्धिः। प्रत्युपकारः। (यथा, हरिवंशे। १७७। ४७।

"तत्रानिरुद्धहरणं कृतं भवता स्वयम्।
न ह्यन्यस्य भवेच्छक्तिर्व्वैरनिर्यातनं प्रति॥")

दानम्। त्यागः। न्यासार्पणम्। न्यस्तद्रव्यस्य समर्पणम्। इत्यमरः। ३। ३। २१६॥ ऋणादिशुद्धिः। इति भरतः॥ भारणम्। इति हेमचन्द्रः। ३। ४६८॥

निर्यामः, पुं, (निर्यन्यतेऽनेनेति। निर्+यम+घञ्।) पोतवाहः। इति हेमचन्द्रः। ३।५४०॥

निर्याषः, पुं, (निर्+यस+घञ्।) कषायः। क्वाथः। इति शब्दमाला॥ दुग्धादिक्षीरम्। आटा इति भाषा॥ तत्पर्य्यायः। क्षेरकः २। इति रत्नमाला॥ (यथा, मनुः। ५। ६।

"लोहितान् वृक्षनिर्य्यासान् व्रश्चनप्रभवांस्तथा।
शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत्॥"

अर्शआदित्वात् क्लीवेऽपि दृश्यते॥ *॥ क्वचित् ह्रस्वोऽपि वाच्यः। यथा, वैद्यकचिकित्सासंग्रहे दलीकन्दधृते।

"कदलीकन्दनिर्यासे तत्प्रस्थतुलां पचेत्।
चतुर्भागावशेषेऽस्मिन् घृतप्रस्थं विपाचयेत्॥")

निर्युक्तिकं, त्रि, (निर्गता युक्तिर्यस्मात्। कप्।) युक्तिरहितम्। यथा। "नहि क्रियारहितं वाक्यमस्तीति प्राचां प्रवादो निर्युक्तिकत्वादश्रद्धेयः।" इति शब्दशक्तिप्रकाशिका॥

निर्यूषः, पुं, (नितरां यूषः।) निर्यासः। इति शब्दमाला॥

निर्यूहः, पुं, (निर्+यूह+घञ्।) शेखरम्। आपीड़म्। हारम्। निर्यासः। क्वाथरसः। (यथास्य पर्य्यायो वैद्यकरत्नमालायाम्। "क्वाथः कषायो निर्यूहः॥") नागदन्तः। अवलम्बनार्थं गेहादिभित्तिनिर्गतं काष्ठद्वयम्। इत्यमरमेदिनीकरौ॥

निर्लक्षणः, त्रि, (निर्गतं लक्षणं यस्मात्।) लक्षणहीनः। तत्पर्य्यायः। पाकुरपृष्ठः २। इति हेमचन्द्रः। ३। १०१॥ (यथा, गोः रामायणे। २। ११८। ५।

"निर्लक्षणो लक्षणवान् दुःग्रीवः ग्रीवतोऽपि॥")

निर्लिप्तः, पुं, (निर्+लिप+क्तः।) श्रीकृष्णः। यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्याये।

"निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः॥"

लेपरहिते, त्रि॥ (यथा, ब्रह्मवैवर्त्ते। २। १। ४६।

"निर्गुणा च निराकारा निर्लिप्तालक्षरूपिणी॥")

निर्लेपः, त्रि, (निर्गतो लेपो यस्मात्।) लेपशून्यः। आसङ्गरहितः। यथा,—

"निर्लेपः कृष्णमङ्गलो नगद्वग्रां हारावली
निर्गुणा
नेत्राम्भोरुहमञ्जनेन रहितं नीरागमोष्ठाधरम्॥"

इत्यागन्दचम्पूग्रन्थे विंशतिस्तवकः॥ पापशून्यः। यथा, "लोकवेदविरुद्धैरपि निर्लेपः खतन्त्रश्चेति महापातकिता।" इति कुसुमाञ्जलिः॥

निर्ल्वयनी, स्त्री, (नितरां लीयते संलीनो भवति अहिरस्यामिति। निर्+ली+ल्युट्। पृषोदरादित्वात् वागमः।) कञ्चुकः। सर्पत्वक्। इति हेमचन्द्रः। ४। ३८१॥

निर्व्वचनं, क्ली, (निर्+वच+भावे ल्युट्।) निरुक्तिः। निश्चयकथनम्। यथा, श्रीभागवते। ६। २०। ३७।

"नामनिर्व्वचनं तस्य श्लोकमेकं सुरा जगुः॥"

(प्रशंसा। यथा, महाभारते। १। १०६। २३।

"प्रनष्टं शान्तनोर्वंशं समीक्ष्य पुनरुद्भवम्।
ततो निर्व्वचनं लोके सर्व्वराष्ट्रेष्ववर्त्तत॥"

निर्गतं वचनं यत्र। तूष्णीम्। यथा, कुमारे। ७। १६।

"पत्युः शिरश्चन्द्रकलामनेन
स्पृशेति सख्या परिहासपूर्व्वम्।
सा रज्जयित्वा चरणौ कृताग्नी-
मालिख्य तां निर्व्वचनं जघान॥"

वाक्यातीते, त्रि। यथा, महाभारते। ३। १६६। ३६।

"येषां तड़ागानि महोदकानि
वाप्यश्च कूप्याश्च प्रतिश्रयाश्च।
अन्नस्य दानं मधुरा च वाणी
यमस्य ते निर्व्वचना भवन्ति॥")

निर्व्वपणं, क्ली, (निर्+वप+भावे ल्युट्।) दानम्। इत्यमरः। २। ७। ३०॥ (यथा, मनुः। ३। २४८।

"अनर्चयित्वा तु कार्य्यं पित्र्यनिर्व्वपणं सुतैः॥"

पिण्डदानम्। यथा, तत्रैव। ३। २६०।

"एवं निर्व्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम्।
गां विप्रमजमग्निं वा प्राश्नयेदप्सु वा क्षिपेत्॥"

यथा च गोः रामायणे। ६। १०८। ३२।

"एषा मन्दाकिनी पुण्या नदी सुविमलोदका।
पितुर्निर्व्वपणं यत्र मया स्थलजले: कृतम्॥"

पिण्डः। यथा, महाभारते। १३। ८३। १४।

"तत् समाप्य यथोद्दिष्टं पूर्व्वकर्म समाहितः।
दातुं निर्व्वपणं सम्यक् यथावदुपचक्रमे॥"

श्राद्धादिसंविभागः। इति श्रीधरस्वामी॥ यथा, भागवते। ५। १२। १२।

"रङ्गवैततं तपसा न याति
न चेज्यया निर्व्वपणाद् गृहाद् वा॥")

निर्व्वर्णनं क्ली, (निर्+वर्ण+"सत्यापपाशेति।" ३।१।२५। इति णिच्+भावे ल्युट्।) दर्शनम्। इत्यमरः। ३।२।३१॥

निर्व्वहः, क्ली क्लौ, (निर्+वह+भावे क्विप्।) निष्ठा। इत्यमरः। १।७।१५॥ तत्तु प्रक्रान्ताभिनयनिर्व्वाहः। किंवा नाटके पञ्च सन्धयो भवन्ति। यथा,—

"मुखं प्रतिमुखञ्चैव गर्भो विमर्ष एव च।
तथा निर्व्वहणञ्चेति नाटके पञ्च सन्धयः॥"

तत्र पञ्चमस्य सन्धेः संज्ञाद्वयमिदम्। इति भरतः॥ सुकुटञ्चाह हे पञ्चमसन्धिसमाप्तौ। प्रस्तुतकथासमाप्ताविति यावत्। यद्येतदनुक्तौ ग्रन्थार्थवः। निर्व्वहणन्तु निष्ठा क्ली संहारश्च समापने। प्रक्रान्तकथानिर्व्वाहः। इति मधुमाधवादयः॥

निर्व्वार्य्य, क्ली, (निर्+वा गमने+क्तः। तस्य नः।) व्यक्तगमनम्। निर्वृतिः। गजमज्जनम्। (यथा, रघुः। १।७१।

"असह्यपीड़ं भगवन्नगमन्त्यमवेहि मे।
अरन्तुदमिवालानमनिर्व्वाणस्य दन्तिनः॥")

सङ्गमः। अपवर्गः। इति मेदिनी। णे, ५८॥ (यथा, भागवते। ३।२८।३५।

"सुलाभ्यं यर्हि निर्व्विषयं विरक्तं
निर्व्वाणमृच्छति मनः सहसा यथार्चिः॥")

विश्रान्तिः। इति हेमचन्द्रः॥ (समाप्तिः। यथा, भागवते। १।६।२६।

"आरब्धकर्म्मनिर्व्वाणो न्यपतत् पाञ्चभौतिकः॥")

निश्चलम्। शून्यम्। विद्योपदेशग्रन्थम्। इति शब्दरत्नावली॥ नाभिदेशे जप्यप्रणवपुटितमाल्कापुटितमूलमन्त्रम्। यथा,—

"कुलुकां मूर्द्धि संजप्य हृदि सेतुं विचिन्तयेत्।
महासेतुं विशुद्धे तु षोड़शारे समुद्धरेत्॥
मणिपूरे तु निर्व्वाणं महाकुण्डलिनीमयः।
स्वाधिष्ठाने कामबीजं राकिणी मूर्द्धि संस्थितम्।
विचिन्त्य विधिवद्देवि! मूलाधारान्तिकाच्छिवे!॥
विशुद्धान्तं स्मरेद्देवि! विद्युत्तन्तुतनीयसीम्।
देवीस्थानं द्विजिह्वान्तं मन्त्रमूलाद्वतं सुधुः॥"

निर्व्वाणं यथा,—

"अथ वक्ष्यामि निर्व्वाणं शृणु सावहितानघे!।
प्रथमं पूर्व्वसुश्चार्य्य माल्काञ्च सहस्रधा॥
माल्कार्णां समस्तानां पुनः प्रथमसुच्चरेत्।
एवं पुटितमूलन्तु प्रजपेन्मन्त्रिपुङ्गवः॥
एवं निर्व्वाणमीशानि! यो न जानाति पामरः।
कल्पकोटिसहस्रेषु तस्य सिद्धिर्न जायते॥"

इत्यागमतत्त्वविलासः॥ (विष्णुः। यथा, महाभारते। १३।१४६।७५

"त्रिसामा सामगः साम निर्व्वाणं भेषजं भिषक्॥")

निर्व्वायः, त्रि, (निर्+वा+क्तः। "निर्व्वाणोऽवाते।" ८।२।५०। इति निष्ठातस्य नः।) मुक्तः। यथा। निर्व्वाणो मुनिः। नष्टः। यथा। निर्व्वाणो वह्निः। (यथा, कुमारे। ३।५२।

"निर्व्वाणभूयिष्ठमथास्य वीर्य्यं
सन्धुक्षयन्तीव वपुर्गुणेन॥")

निमग्नः। यथा। निर्व्वाणो हस्ती। इति विश्वप्रकाशे अमरः। ३।१।६६॥ वाक्यशून्यञ्च॥

निर्व्वातः, त्रि, (निर्गतो वातो वायुर्यस्मात्।) वायुरहितः। इत्यमरः। ३।१।६६। (यथा, महाभारते। २।३६।२८।

"असूर्य्यमिव सूर्य्येण निर्व्वातमिव वायुना।
भासितं क्रादितञ्चैव ज्ञातेनेदं सदो हि नः॥"

निर्व्वाति स्त्रीति। निर्+वा+गत्यर्थेति क्तः। "निर्व्वाणोऽवाते।" ८।२।५०। इति निष्ठातस्य नः।) गते वायौ, पुं॥

निर्व्वादः, पुं, (निर्व्वदनमिति। निर्+वद्+भावे घञ्।) परीवादः। जनवादः। इत्यमरः। ३।३।८६॥ (यथा, रघुः। १४।६७।

"किमात्मनिर्व्वादकथासुपेक्षे
जायामदोषामसुत सन्त्यजामि॥")

अवज्ञा। (निर्निश्चितं वादः कथनम्।) निश्चितवादः। वादाभावः। इति भरतः॥

निर्व्वापः, पुं, (निर्व्वपणमिति। निर्+वप+घञ्।) निवापः। प्रेतभिन्नस्तपित्रुद्देश्यकदानम्। इत्यमरटीकायां तर्कवागीशः॥ (यथा, देवीभागवते। २।७।५६।

"पुत्रेभ्योऽहं ददाम्यद्य निर्व्वापं विधिपूर्व्वकम्॥"

भिक्षार्थदानम्। यथा, पञ्चतन्त्रे। ५।२०।

"एतस्मिन्नवसरे ब्राह्मणोऽपि कुतश्चित् गृहीतनिर्व्वापः परिभ्रम्य यावदागतः पश्यति तावत् पुत्रशोकाभिभूता ब्राह्मणी विलपति॥" भक्षणम्। इति रामानुजः॥ यथा, रामायणे। २।६१।८०।

नीलवैदूर्य्यवर्णोच्च मृदून् यवससञ्चयान्।
निर्व्वापार्थं पशूनां ते दृढमुक्तञ्च सर्व्वशः॥")

निर्व्वापणं, क्ली, (निर्+वप+णिच्+ल्युट्।) दर्भः। इत्यमरः। २।८।११४॥ दानम्। इति हलायुधः। २।४२३॥ (निर्व्वापयतासम्पादनम्। निवाण इति भाषा॥ यथा, तिथितत्त्वे।

"दीपनिर्व्वापणात् पुंसः कुलाच्छेदनात् स्त्रियः॥"

स्वार्थे णिच्। वपनम्। यथा, पञ्चतन्त्रे। १।४०५। "मया तावन्नीतिबीजनिर्व्वापणं कृतम्। परतन्त्रदैवपर्य्यायायत्तम्॥")

निर्व्वार्य्यः, त्रि, (निश्चयेन व्रियते इति। निर्+वृ+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) सत्यतन्मदा सम्यतन कार्य्यकर्त्ता। इत्यमः। ३।१।१३॥ "भयविक्रमयत्नसमाप्तदवादौ निजकार्य्यं मम सर्व्वं तत्सम्यदा सम्यतन् उद्यमं कुर्व्वन् यो नि एको भूत्वा कर्म्म कुरुते स निर्व्वार्य्य उच्यते।" इति भरतः॥ अवारणीयश्च॥

निर्व्वासनं, क्ली, (निर्+वस+णिच+ल्युट्।) वधः। इत्यमरः। २।८।११३॥ नगरादेर्व्वहिष्करणम्। इति मेदिनी। ने, १८६॥ (यथा, महाभारते। ५।६०।५८।

"निर्व्वासनञ्च नगरात्, प्रव्रज्या च परन्तप!।
नानाविधानां दुःखानामभिघातस्तथा जनार्द्दन॥")

निर्व्वाहः, पुं, (निर्+वह+घञ्।) निष्पत्तिः। समाप्तिः। यथा। "खलिक्या कर्म्मनिर्व्वाहे सहायभावेनान्यतिथ्यनुप्रवेशाद्दुपवासाद्याचरणञ्च।" इति तिथितत्त्वम्॥ अपि च।

"यावता स्यात् स्वनिर्व्वाहः स्वीकुर्य्यात्तावदर्थवित्।
आधिक्ये न्यूनतायाञ्च श्वयते परमार्थतः॥"

इति भक्तिरसामृतसिन्धौ नारदीयपुराणम्॥

निर्व्वाहणं, क्ली, (निर्+वह+स्वार्थे णिच्+ल्युट्।) निर्व्वहणम्। नाट्योक्तौ प्रस्तुतकथासमाप्तिः इत्यमरटीकायां भरतः॥

निर्व्विकल्पकं, क्ली, (निर्गतो विकल्पो नानाविधकल्पना यस्मात्। कप्।) प्रकारतादिविशेष्यतानामप्रसम्बन्धानवगाह्यतीन्द्रियज्ञानम्। यथा,—

"तत्प्रमाणाप्रमाणापि ज्ञानं यन्निर्व्विकल्पकम्।
प्रकारतादिशून्यं हि सम्बन्धानवगाहि यत्॥"
"ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते॥"

इति च भाषापरिच्छेदः॥

निर्व्विकल्पसमाधिः, पुं, (निर्व्विकल्पः समाधिः।) ग्राह्यग्राहादिभेदलये अद्वितीयवस्तुनि तदाकाराकारितायाः बुद्धिवृत्तेरतितरामेकीभावेनावस्थानम्। इति वेदान्तसारः॥

निर्व्विकारः, त्रि, (निर्गतो विकारो विक्रतिर्यस्मात्।) विकारशून्यः। यथा,—

"रामं विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम्।
आनन्दं निर्म्मलं शान्तं निर्व्विकारं निरञ्जनम्॥"

इत्यध्यात्मरामायणम्॥

निर्व्विद्यः, त्रि, (निर्+विद+क्तः। निर्व्विण्णस्योपसंख्यानात् परस्य वत्वम् पूर्व्वस्य धुत्वम्।) निर्व्वित्तिविशिष्टः। निर्व्वेदयुक्तः। यथा,—

"यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः॥"

इति भक्तिरसामृतसिन्धुः॥

निर्व्विन्ध्या, स्त्री, (निर्गता विन्ध्यादिति निर्व्विन्ध्यतत्पुरुषः।) विन्ध्यपर्व्वतनिःसृतनदीविशेषः। इति श्रीभागवते। ५।१६।७ अः॥ (यथा, मेघदूते। ३०।

"निर्व्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य॥")

निर्व्विषा स्त्री, (निर्गतं विषं यस्याः।) क्षुद्रविशेषः। निर्व्विषी इति भाषा। तत्पर्य्यायः। अपविषा २ निर्व्विषी ३ विषघ्ना ४ विषापहा ५ विषघ्नी ६ विषाभावा ७ अविषा ८ विषवैरिणी ९। अस्या गुणाः। कटुत्वम्। शीतत्वम्। कफवातासदोषनाशित्वम्। अनेकविषघ्नत्वम्। व्रणनिर्म्मूलकारित्वञ्च। इति राजनिर्घण्टः॥

निर्व्विश, त्रि, (निर्+विश+क्तः।) क्षतनिर्व्वेशः। प्राप्तः। यथा, श्रीभागवते।

"यत्र निर्व्विश्यमरं क्षतात्मो नाभिमन्यते।"

स्थितः। यथा, भागवते। १। २। ३३।
"खनिर्म्मितेषु निर्व्विण्णो भुङ्क्ते भूतेषु तद्-
गुणान्।"
विवाहितः। ज्ञातायिहोत्रः। यथा। "ज्येष्ठे-
निर्व्विण्णे कनीयान् निर्व्विण्णः परिवेत्ता भवति।"
इत्युदाहृतत्वम्॥
निर्व्वीजा, स्त्री, (निर्गतं बीजं यस्याः।) काकली-
द्राक्षा। इति राजनिर्घण्टः॥
निर्व्वीरं, त्रि, (निर्गतो वीरो यस्मात्।) वीर-
शून्यम्। यथा,—
"नाक्षतं न च टङ्कितं न गमितं नीत्यापितं
स्थानतः
केनापीदमहो महद्धनुरतो निर्व्वीरसर्व्वौ-
तलम्॥"
इति महानाटकम्॥
निर्व्वीरा, स्त्री, (निर्गतो वीरवत् पतिः पुत्रो वा
यस्याः।) अवीरा। पतिपुत्रविहीना। इति
हेमचन्द्रः। ३। १८४॥
निर्व्वृतिः, स्त्री, (निर्+वृ+क्तिन्।) सुस्थितिः।
अस्वङ्गमनम्। सुखम्। इति मेदिनी। ते,
१२०॥ (यथा, देवीभागवते। १। १८। ३८।
"जनकस्य दृशां दृष्ट्वा राज्यस्थस्य महात्मनः।
स निर्व्वृतिं परां प्राप्य पितुराश्रमसंस्थितः॥")
मोक्षः। ऋलृः। इति हेमचन्द्रः। १। ७५॥
(शान्तिः। यथा, सुश्रुते। १। ४१।
"भूतैर्जोवारिवैर्व्वैः शमं याति समीरणः।
भूम्यम्बुवायुजैः पित्तं क्षिप्रमाप्नोति निर्व्वृतिम्॥"
विदर्भवंशीयराजः पुत्रे, पुं। यथा, भागवते।
९। २४। ३।
"क्रथस्य कुन्तिः पुत्रोऽभूत् तस्मिंस्तस्याथ
निर्व्वृतिः॥")
निर्व्वृत्तः, त्रि, (निर्+वृत्+क्तः।) निष्पन्नः। इत्य-
मरः। ३। १। १००॥ (यथा, रघुः। १७। ९८।
"सा तस्य कर्म्मनिर्व्वृत्तेर्दूरं पश्चात् ज्ञता पत्युः॥")
निर्व्वृत्तिः, स्त्री, (निर्+वृत्+क्तिन्।) निष्पादः।
तथा च।
"यथा दृष्टेन दोषेण यथा चानुविसर्पता।
निर्व्वृत्तिरामयस्यासौ संप्राप्तिर्ज्ञातिरागतिः॥"
इति माधवकरः॥
(निर्गता वृत्तिर्यस्मादिति।) वृत्तिरहिते, त्रि॥
निर्व्वेदः, पुं, (निर्+विद्+घञ्।) स्वावमान-
नम्। इति हेमचन्द्रः॥ (यथा, देवीभागवते।
४। १०। ३७।
"दैवेर्युद्धं ज्ञतं चोयं प्रह्लादस्तु पराजितः।
निर्व्वेदं परमं प्राप्तो ज्ञात्वा धर्म्मं सनातनम्॥")
स तु त्रयस्त्रिंशद्व्यभिचारिभावानामादिमः।
ग्लानेरस्य स्थायिभावश्च। यथा,—
"निर्व्वेदःस्थायिभावोऽस्ति ग्लानोऽपि नवमो
रसः॥"
इति काव्यप्रकाशः॥
तस्य लक्षणं यथा,—
"तत्त्वज्ञागाधदीर्घादेर्निर्व्वेदः स्वावमाननम्॥"
तदुदाहरणम्। यथा,—
"मृत्पिण्डबालुकारन्ध्रविधानरचनार्थिना।
दक्षिणावर्त्तगूढोऽयं हन्त चूर्णीकृतो मया॥"
इति साहित्यदर्पणम्॥
परवैराग्यम्। यथा,—
"ततः कदाचिन्निर्व्वेदान्निराकाराश्रितेन च।
लोकतन्त्रं परित्यक्तं दुःखार्त्तेन भृशं मया॥"
इति मोक्षधर्म्मः॥
वैराग्यम्। यथा, श्रीभगवद्गीतायाम्।
"तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च॥"
(निर्गतो वेदो यस्मादिति।) वेदरहिते, त्रि॥
निर्व्वेशः, पुं, (निर्+विश्+भावे घञ्।) भृतिः। भोगः। इत्यमरः। ३। ३। २१४॥
"भृतिर्व्वेतनं भोगः सुखं पालनमभ्यवहारो वा।"
इति भरतः॥ (यथा, भागवते। ६। २। ७।
"अयं हि ज्ञतनिर्व्वेशो जन्मकोट्यंहसामपि।
यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः॥")
मूर्च्छनम्। इति मेदिनी। शे, २२॥ विवाहः।
निर्पूर्व्वविश्धातुर्व्विवाहार्थः। इति स्मृतिः॥
निर्व्वेष्टनं, क्ली, (नितरां वेष्टनमत्र।) गाढ़ि-
चीरम्। इति हारावली। २१४॥ (निर्गतं
वेष्टनं यस्मात्।) वेष्टनरहिते, त्रि॥
निर्व्यथनं, क्ली, (निर्+व्यथ+भावे ल्युट्।)
क्षिप्रम्। इत्यमरः। १। ८। २॥ व्यथाभावः।
निश्चयेन व्यथनञ्च॥
निर्व्यूढं, त्रि, (निर्+वि+वह+क्तः।) व्यक्तम्।
इति त्रिकाण्डशेषः॥ समाप्तम्। यथा,—
"अवदातन्तु यत् कर्म्म निर्व्यूढमतिशोभनम्॥"
इति जटाधरः॥
(स्थिरम्। यथा, "स्त्रीणां पतिपुत्रादिधने न
निर्व्यूढं स्वत्वं पुंसान्तु तन्निर्व्यूढं अप्रतिबन्धकतया
यथेष्टविनियोगार्हत्वात्॥" तथा च राज-
तरङ्गिण्याम्। ३। ४७२।
"स एव भूपतिर्भूत्वा सप्तवर्षशतत्रयम्।
निर्व्याजश्राद्धनिर्व्यूढपातालेश्वरमासदत्॥")
निर्हरणं, क्ली, (निश्चयेन हरणम्। निर्+हृ+
ल्युट्।) शवदाहः। यथा, शुद्धितत्त्वे।
"तस्य निर्हरणादीनि सम्यरेतस्य भार्गव!।
युधिष्ठिरः कारयित्वा सुकृत्स्नं दुःखितोऽभवत्॥"
(दहनम्। यथा, भागवते। ७। ७। २८।
"बीजनिर्हरणं योगः प्रवाहोपरमो धियः॥")
निःश्रेयसञ्च हरणञ्च॥
निर्हारः, पुं, (निर्+हृ+घञ्।) प्रक्षादेरुत्-
पाटनम्। इति भरतः॥ तत्पर्य्यायः। अभ्यव-
कर्षणम् २। इत्यमरः। ३। २। १७॥ मल-
मूत्रादित्यागः। यथा, आह्निकतत्त्वे।
"आहारनिर्हारविहारयोगाः
सुखंवृता धर्म्मविदा तु कार्य्या॥"
दाहः। इति स्मृतिः॥ (दाहार्थं नयनम्। इति
स्वामी॥ यथा, भागवते। ७। २। ३५।
"एवं विलपतीनां वै परिदृश्य ज्ञतं पतिम्।
व्यनिच्छतीनां निर्हारमर्कोऽस्तं सन्यवर्त्तत॥")
यथेष्टविनियोगः। यथा,—
"न निर्हारं स्त्रियः कुर्य्युः कुटुम्बा बहुमध्यगात्।
स्वकादपि च वित्ताद्धि स्वस्य भर्त्तुरनाज्ञया॥"
इति मनुः॥
निर्हारी, [न्] त्रि, (निःश्रेयेण हरति दूरं गच्छ-
तीति। निर्+हृ+णिनि।) दूरगामिगन्धः।
इत्यमरः। १। ५। ११॥ (यथा, महाभारते।
१२। १८४। २८।
"इष्टान्निष्टगन्धश्च मधुरः कटुरेव च।
निर्हारी संहतः स्निग्धो रूक्षो विषद एव वा॥")
निर्ह्रादः, पुं, (निर्+ह्राद अव्यक्तशब्दे+घञ्।)
ध्वनिः। इत्यमरः। १। ३। २३॥ (यथा,
रघुवंशे। १। ४१।
"श्रेणीबन्धादितन्वद्भिः अस्तम्भां तोरणस्रजम्।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननैः॥")
निलयः, पुं, (निलीयते अस्मिन्निति। नि+ली+
"ऋरच्।" ३।३।९९। इति अधिकरणे अच्।)
गृहम्। इत्यमरः। २। २। ५॥ (यथा, रघु-
वंशे। २। १५।
"सञ्चारपूतानि दिगन्तराणि
कृत्वा दिनान्ते निलयाय गन्तुम्॥"
आश्रयस्थानम्। यथा, भागवते। ८। १। ११।
"तं भूतनिलयं देवं सुपर्णभुजपावत॥")
निलिम्पः, पुं, (निलिम्पन्तीति। नि+लिप्+"नौ
लिम्पेर्वाच्यः।" ३।१।१३८। इत्यस्य वार्त्तिकोक्त्या
ग्रः। सुधादित्वान्नुम्।) देवः। इति त्रिकाण्ड-
शेषः॥
निलिम्पनिर्झरी, स्त्री, (निलिम्पानां देवानां निर्झरी
नदी।) गङ्गा। यथा,—
"जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी॥"
इत्यादिरावणकृतशिवस्तोत्रम्॥
निलिम्पा, स्त्री, (नि+लिप+ग्र। सुधादित्वा-
न्नुम्। स्त्रियां टाप्।) स्त्रीगवी। इति त्रिकाण्डशेषः॥
निलिम्पिका, स्त्री, (निलिम्पा एव। स्वार्थे कन्
टापि अत इत्वम्।) सौरभेयी। इति हेम-
चन्द्रः। ४। ३३२॥
निलीनं, त्रि, (निःश्रेयेण लीनं संलग्नम्। नि+
ली+क्तः।) निःश्रेयेण लीनम्। संलग्नम्।
(यथा, भट्टिः। २। ५।
"वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः।
परस्परं विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण॥"
निवपनं, क्ली, (नि+वप+भावे ल्युट्।) पित्रु-
देशकदानम्। इति श्राद्धरत्नावली॥ (यथा,
महाभारते। १३। ८२। २।
"ऋषयो धर्म्मनित्यास्तु ज्ञात्वा निवपनान्युत।
तपैवाप्याकुर्व्वन्त तीर्थाम्भोभिर्यतव्रताः॥")
निवरा, स्त्री, (नितरां व्रियत इति। नि+वृ+
"ग्रहवृदृनिश्चिगमश्च।" ३।३।५८। इति कर्म्मणि
यप्। ततष्टाप्।) कुमारी। अविवाहिता।
इति मिताक्षरा॥

निवसतिः, स्त्री, (निवसत्यत्रेति। नि+वस्+"वहिवस्यर्त्तिभ्यश्चित्।" उणा ४। ६०। इति अतिच्।) गृहम्। इति शब्दरत्नावली॥

निवसथः, पुं, (निवसत्यत्रेति। नि+वस् आधारे अथच्।) ग्रामः। इति हेमचन्द्रः। ४। २३॥

निवसनं, क्ली, (न्युप्यतेऽत्र। नि+वस्+आधारे ल्युट्।) गृहम्। इति शब्दरत्नावली॥ वस्त्रम्। इति हलायुधः॥ (यथा, गोः रामायणे।२।३०।
"द्वितीयं च परीदधौ चीरमादाय मैथिली।
चीरस्याकुशला देवी सम्यङ्निवसने शुभा॥")

निवहः, पुं, (नितरासुह्यते इति। नि+वह+पुंसीति घः।) समूहः। इत्यमरः। २। ५। ३८॥ (यथा, पञ्चतन्त्रे। ५। ८।
"सुकृतं कुशलं सृजनं
विहाय कुलकुशलशीलविकलेऽपि।
आटो कल्पतरावि
नित्यं रज्यन्ति जननिवहाः॥"
नितरां वहतीति। नि+वह+पचाद्यच्।) सप्तवायून्तर्गतवायुविशेषः। यथा,—
"निवहो यत्र वातेशः केषाञ्चिन्न सुखप्रदः।
न प्रचण्डो न च रुद्रः प्रमादी च प्रभञ्जनः॥"
इति ज्योतिषम्॥

निवातः, त्रि, (नितरां वाति गच्छत्यत्र। नि+वा+अधिकरणे क्तः।) आश्रयः। निवासः। (निष्क्रान्तो वातो यस्मिन्।) अवातः। वातशून्यः। (यथा, रघुवंशे। ३। १७।
"निवातपद्मस्तिमितेन चक्षुषा
नृपस्य कान्तं पिबतः सुताननम्।
महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि॥")

ग्रस्त्राभेद्यं वर्म्म। ग्रस्त्रेण न भिद्यते यत् वर्म्म कवचम्। इत्यमरभरतौ। ३। ३। ८४॥

निवातकवचः, पुं, दैत्यविशेषः। स तु हिरण्यकशिपोः पौत्रः संह्लादपुत्रः। इत्यग्निपुराणम्॥ (निवातं ग्रस्त्राभेद्यं कवचं येषामिति। दानवविशेषे, पुंस्त्रीत्वे बहुवचनान्तः। ते तु इन्द्रादिष्टेनार्জ্জুनेन निहताः। यथा, महाभारते। ३। १६८। ७०—७२।
"ततो मामब्रवीद्राजन्! प्रहस्य वज्रहस्तवान्।
नाविषह्यस्त्वया शक्तिः क्रियतु लोकेषु किञ्चन॥
निवातकवचा नाम दानवा देवशत्रवः।
समुद्रकुक्षिमाश्रित्य दुर्गे प्रतिवसन्ति नः॥
तिस्रः कोट्यः समाख्याता स्तुल्यरूपबलप्रभाः।
तांस्त्वं जहि कौन्तेय! गुर्ব্বर्थस्ते भविष्यति॥"
एतद्विवरणविस्तृतिस्तु तत्रैव विशेषतो द्रष्टव्या॥)

निवापः, पुं, (नितरासुप्यते इति। नि+वप+घञ्।) म्लतोदेश्यकदानम्। तत्पर्य्यायः। पिण्डदानम्२। इत्यमरः।२।७।३१॥ पिण्डतर्पणम्३। इति हेमचन्द्रः।३। ४०॥ निवपनम्४ पिण्डदानकम्५। इति शब्दरत्नावली॥ (यथा, रघुवंशे।८। ८६।
"अपश्चोकमनाः कृच्छ्रान्निर्गां
अनुयक्षीव्य निवापदक्षिभिः॥")
दानमात्रम्। यथा। "येभ्यो निवापाञ्जलयः पितॄणाम्।" इति भरतः॥ (न्युप्यते बीजमस्मिन्निति। क्षेत्रम्। इति शब्दरत्नावली॥ यथा, महाभारते। ३। १०६। ६।
"अवनिं प्रमदा गाञ्च निवापं बहुवार्षिकम्।
तस्ते विप्र! प्रदास्यामि न तु धर्म्मं सकुञ्जलम्॥")

निवारः, पुं, निवारणम्। इति निपूर्ब्बवृधातोर्भावे घञ्प्रत्ययनिष्पन्नः॥

निवारणं, क्ली, (नि+वृ+णिच्+करणे ल्युट्।) निश्चयेन वारणम्। निराकरणम्। यथा,—
"यदाक्षतो धर्म्मे इतीतरस्थितो
न मन्यते तस्य निवारणं जनः॥"
इति श्रीभागवते प्रथमस्कन्धः॥

निवारितः, त्रि, (नि+वृ+णिच्+क्तः।) क्षतनिवारकः। यथा,—
"निवारितास्तेन महीतलेऽखिले
निरीतिभावं गमितेऽतिहृष्यः॥"
इति नैषधे। १। ११॥

निवास, तृ क क्षुत्याम्। इति कविकल्पद्रुमः॥ (अदन्त पुरां-पुरं-सर्क-सेट्।) अनिनिवासतुः। क्षुतिराच्छादनम्। निवासयति यच्चित्रं चीनांशुकमिति हलायुधः। इति दुर्गादासः॥

निवासः, पुं, (निवसति अस्मिन्। नि+वस्+अधिकरणे घञ्।) गृहम्। इति हेमचन्द्रः। ४। ५७॥ (यथा, विष्णुपुराणे।१।१३।८४।
"तत्र तत्र प्रजानां हि निवासं समरोचयत्॥"
आश्रयस्थानम्। यथा, भागवते। ९। ११। २७।
"श्रियो निवासो यस्योरः पानपात्रं मुखं द्वयम्।
बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम्॥"
वस्त्रम्। यथा, हरिवंशे। १८१। ३८।
"नमस्तस्मैनिवासाय नमस्ते पीतवाससे॥"
भावे घञ्। वासः। यथा, महाभारते। १। १८६। ६।
"कुम्भकारस्य शालायां निवासं चक्रिरे तदा॥")

निवासी, [न्] त्रि, (निवसतीति। नि+वस्+णिनि।) निवासविशिष्टः। निवासकर्त्ता। यथा,—
"ते तु कावेरमन्ति देवेः प्रतिकृतकर्त्तः।
धन्याः कालीदहतीरे कान्यकुब्जनिवासिनः॥"
इति काव्योदयः॥

निविड़, त्रि, (नितरां विड़तीति। नि+विड़ आक्रोशे+कः।) निरवकाशम्। तत्पर्य्यायः। निरन्तरम्२ निविरीषम्३ घनम्४। सान्द्रम्५ गौरवम्६ बहुलम्७ दृढम्८ गाढम्९ अविरलम्१०। इति हेमचन्द्रः।६। ८२॥ (यथा, आर्य्यासप्तशत्याम्। ३२०।
"निविड़घटितोरुयुगलां श्यामोत्तप्तस्तनार्पित-
वदनाम्॥"
यथा, च रघुवंशे। ६। ५८।
"तस्यापरेष्वपि न्यगेषु गुरान् सुसन्धोः
कर्णान्तमेत्य विभिदे निविड़ोऽपि सद्यः॥"
नासिकायाः नतम्। नि+"नेर्विड़चविरीसचौ।" ५। २। ३९। इति विड़च्। अवटीटम्। "तदयोगात् नासिका निविड़ा।" इति सिद्धान्तकौमुदी॥)

निविरीसं, त्रि, (नि गता नासिका यस्य। "नेर्विड़चविरीसचौ।" ५। २। ३९। इति विरीसच्। अवटीटः। इति शाकरणम्॥) निविड़म्। इति जटाधरः॥ (यथा, माघे।७।२०।
"उरुनिविरीषनितम्बभारखेदि॥")

निविष्टं, त्रि, (नि+विश्+क्तः।) निवेशयुक्तम्। (यथा, कुमारसम्भवे। ५। ३१।
"भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वितरे गौरवाः क्रियाः॥")
आविष्टम्। प्रविष्टम्। यथा,—
"उडुगणपरिवारो नायकोऽप्योषधीना-
मस्तमयशरीरः क्षान्तियुक्तोऽपि चन्द्रः।
भवति विकलमूर्त्तिर्मङ्कलं प्राप्य भानोः
परमदनिविष्टः को लघुत्वं न याति॥"
इलुब्धः॥
(आवृतम्। यथा, देवीभागवते।९। १५। ४५।
"यद्वोऽहमिति मे बुद्धिर्नापसर्पति चित्ततः।
संसारवासनाजाले निविष्टा दृढगामिनी॥"
स्थितम्। यथा, रामायणे। १। ५। ५।
"कोशलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्॥")

निवीतं, त्रि, (निवीयते स्मेति। नि+वे आच्छादने+क्तः। सम्प्रसारणम्।) आच्छादनवस्त्रम्। उड़नी इति भाषा॥ तत्पर्य्यायः। प्रावृतम्२। कण्ठलम्बितयज्ञसूत्रे, क्ली। इत्यमरः। २। ७। ५०॥ यथा,—
"उपवीतं भवेन्नित्यं निवीतं कण्ठसज्जनम्॥"
इति कूर्म्मपुराणम्॥

निवीती, [न्] पुं, (निवीतमस्यास्तीति।) निवीतयुक्तः। कण्ठलम्बितयज्ञसूत्रविशिष्टः। यथा,—
"कृतोपवीती देवेभ्यो निवीती च भवेत्ततः।
मनुष्यांस्तर्पयेच्चैव ऋषिपुत्रान्सुरीस्तथा॥"
इत्याह्निकतत्त्वम्॥

निवृतं, त्रि, (निव्रियते आच्छाद्यते स्मेति। नि+वृ+क्तः।) निवीतम्। उड़नी इति भाषा॥ इत्यमरटीकायां स्वामी॥ परिवेष्टितम्। इति हेमचन्द्रः॥

निवृत्तः, त्रि, (नि+वृत्+क्तः।) निवृत्तिविशिष्टः। विरतः। यथा, श्रीभागवते।१०।१।४।
"निवृत्ततर्षैरुपगीयमाना-
दनौषधाच्छ्रोत्रमनोऽभिरामात्।
क उत्तमश्लोकगुणानुवादात्
पुमान् विरज्येत विना पशुघ्नात्॥"

निवृत्तात्मा, [न्] पुं, (शरीरबन्धनात् निवृत्त आत्मा स्वरूपं यस्येति।) विष्णुः। (यथा, महाभारते। १३। १४६। १८।
"आवर्त्तनो निवृत्तात्मा संवृतः संप्रमर्द्दनः॥")

निवृत्तिः, स्त्री, (नि+वृत्+क्तिन्।) निर्वृत्तिः। अप्रवृत्तिः। तत्पर्य्यायः। उपरमः२ विरतिः३

अपरतिः ४ उपरतिः ५ आरतिः ६। इति हेमचन्द्रः॥ (यथा, गरुडपुराणे १६६ अध्याये।
"वास्तोष्पतेश्च समधु पीतमन्नमतस्य वै।
पापरोगस्य सन्तापनिवृत्तिं कुरुते ध्रुवः॥")
प्रवृत्तिप्रागभावः। यथा, "प्रवृत्त्युपाधिना विनाश्यं प्राग्भाव्यं प्रागभाव एव स्वनिवृत्तिनिराकरणात् साध्यमानो निवृत्तिरुच्यते।" इत्येकादशीतत्त्वे फलाधिकरणविचारः॥

निवेदनं, क्ली, (निविद्यते विज्ञाप्यतेऽनेनेति। नि+विद्+ल्युट्।) आवेदनम्। विज्ञापनम्। समर्पणम्। यथा,—
"श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा॥"
इति श्रीभागवतम्। ७। ५। २३॥

निवेदितं, त्रि, (नि+विद्+कर्म्मणि क्तः।) ज्ञातनिवेदनम्। यथा, नन्दिकेश्वरपुराणे।
"मया निवेदितं भक्त्या गृहाण परमेश्वरि!॥"

निवेशः, पुं, (नि+विश्+घञ्।) विन्यासः। (निविश्यतेऽस्मिन्निति। अधिकरणे घञ्।) शिविरम्। (यथा, महाभारते। ५। ८। २।
"तस्य सेनानिवेशोऽभूदध्यर्द्धमिव योजनम्॥")
उदाहः। इति मेदिनी। शे, २१॥ (यथा, महाभारते। १। १४। १।
"ततो निवेशाय तदा स विप्रः संप्रस्थितव्रतः।
महीमचार दारार्थी न च दारानविन्दत॥")
निवेशनम्। इति शब्दरत्नावली॥ (यथा, देवीभागवते। ३। १६। ४४।
"निवेशार्थं गृहं दत्तमन्नयानादिकं तथा।
सेवकं समनुज्ञाप्य परित्यज्यार्थमेव च॥")

निवेशनं, क्ली, (निविश्यतेऽस्मिन्निति। नि+विश्+अधिकरणे ल्युट्।) गृहम्। इति जटाधरः॥ (यथा, देवीभागवते। ३। २४। ४६।
"स्त्रियोपसंयुतः सोऽथ प्राप्यायोध्यां सुदर्शनः।
सभाप्य सर्व्वलोकांश्च ययौ राजा निवेशनम्॥")
नगरम्। इति हेमचन्द्रः॥ (यथा, रामायणे। ७। ७५। १८।
"यो हि वंशं समुत्पाद्य पार्थिवस्य निवेशने।
न विधत्ते नृपं तत्र नरकं स हि गच्छति॥")
प्रवेशः। निवेशनमस्य व्याकृतिभिर्हुत्वेति स्मृतिः॥ (नि+विश्+णिच्+भावे ल्युट्। स्थापनम्। यथा रामायणे। ७। ७५। १७।
"निवेशय महाबाहो भरतं यद्यपेक्षसे।
शूरस्य कृतविद्यस्य समर्थस्य निवेशने॥")
प्रवेशके, त्रि॥ यथा, हरिवंशे भविष्यपर्व्वणि। १८। १३।
"व्याकाशैरवसितः शब्दः सर्व्वतोनिवेशनः।
नमस्ते भगवन्! विष्णो तुभ्यं शब्दात्मने नमः॥")

निवेश्यनीयः, त्रि, (नि+विश्+अनीयर्।) निवेशनार्हः यथा। तत्पुरुषाद्यत्नाद्वारणात्परे निवेश्यनीय इति मार्गे पोषः। इति सभाभास्करे गदाधरः॥

निवेश्यः, त्रि, (नि+विश्+ण्यत्।) निवेशनीयः। यथा, वाघटीकायां गदाधरः। प्रतिबन्धकतायां निवेश्यत्वादिति ग्रन्थे॥ (यथा, हरिवंशे। ११५। २८।
"तदियं पूः प्रकाशार्थं निवेश्या मयि सुव्रते!॥")
शोधनीयः। यथा, महाभारते। ३। ३६। १६।
"अवश्यं राजपिण्डस्तैर्निवेश्य इति मे मतिः॥"
"निवेश्यः आवृण्वार्थं शोधनीयः।" इति तट्टीकायां नीलकण्ठः॥ विवाह्यः। यथा, महाभारते। १। १६२। ६।
"भवान्निवेश्यः प्रथमं ततोऽयं
भौमो महाबाहुरचिन्त्यकर्म्मा॥"
"निवेश्यः विवाह्यः।" इति तत्र नीलकण्ठः॥)

निशठः, पुं, बलदेवपुत्रः। यथा, "बलदेवोऽपि रेवत्यां निशठोल्मुकौ पुत्रावजनयत्।" इति विष्णुपुराणे। ४ अंशे १५ अध्यायः॥

निशमनं, क्ली, (नि+शम+णिच्+ल्युट्।) दर्शनम्। अवलम्। इति मेदिनी। ने, १६०॥

निशा, स्त्री, (नितरां शाम्यति तनूकरोति श्रमादिति। नि+शो+कः। टाप्।) रात्रिः। तत्पर्य्यायः। रात्री २ रथोजननी ३ शर्वरी ४ चक्रभेदिनी ५ घोरा ६ श्यामा ७ याम्या ८ दोषा ९ तुङ्गी १० भौती ११ प्रताची १२ वास्तवा १३ उषा १४ वासतेयी १५ तमा १६ निट् १७। इति त्रिकाण्डशेषः॥ अवश्यं रात्रिशब्दे द्रष्टव्यः॥ (यथा, ऋतुसंहारे। १। ६।
"सितेषु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि सुवक्त्रचन्द्रमाः।
विलोक्य निर्य्यन्नवसूत्रमुत्तरं
निशात्यये याति द्विषेव पाण्डुताम्॥")
हरिद्रा। दारुहरिद्रा। इति मेदिनी। शे, ६॥ (अस्याः पर्य्यायो यथा,—
"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा।
मेहघ्नी रङ्गिणी पीता वर्ण्यिनी रात्रिनामिका॥"
इति वैद्यकरत्नमालायाम्॥)
मेघडम्बरमधुनकर्कटघनुर्मकरलग्नानि। यथा,—
"अजगोपतियुग्मञ्च कर्किधन्विन्मृगास्तथा।
निशासंज्ञाः स्मृताश्चैते ग्रीष्माद्यान्ये दिनात्मकाः॥"
इति ज्योतिस्तत्त्वम्॥

निशाकरः, पुं, (निशां करोतीति। निशा+कृ+"दिवाविभानिशेति।" ३। २। २१। इति टः।) चन्द्रः। इत्यमरटीका॥ (यथा, पद्मतन्त्रे। २। २०।
"रविनिशाकरयोर्ग्रहपीडनं
गजभुजङ्गविहङ्गमबन्धनम्।
मतिमतां च निरीक्ष्य दरिद्रतां
विधिरहो बलवानिति मे मतिः॥")
कुङ्कुमं। इति शब्दरत्नावली॥ (विशाकरचन्द्रः शिरोदेशेऽस्यस्येति। अच्। महादेवः। यथा, महाभारते। १३। १७। ७७।
"रात्रिहासः सकल्पश्च गौतमोऽथ निशाकरः॥")

निशागमः, पुं, (निशायाः रात्रेर्गमः।) रात्रिसमूहः। तत्पर्य्यायः। गमरात्रम् २। इति हेमचन्द्रः॥

निशाचरः, पुं, (निशायां रात्रौ चरतीति। निशा+चर+"चरेष्टः।" ३। २। १६। इति टः।) राक्षसः। (यथा, रघुः। १०। ४५।
"अचिरात् यज्ञभिर्भागं कल्पितं विधिवत् पुनः।
मायाविभिरनालीढमादास्यध्वे निशाचरैः॥")
शृगालः। पेचकः। सर्पः। इति मेदिनी। रे, २७२॥ चक्रवाकः। इति शब्दरत्नावली॥ भूतः। इति धरणिः॥ चोरकः। इति राजनिर्घण्टः॥ (अयन्तु यत्रिपर्य्यस्य भेदः। भटेउर इति नेपालदेशे भवति।
"निशाचरो धनहरः क्षितवो गणहासकः।
रोचको मधुरस्निग्धः कटुपाके कटुर्लघुः॥
तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफान्
निलान्।
रक्तश्रीखेदमेदोऽक्षव्रणान्विषव्रणान्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
महादेवः। यथा, महाभारते। १३। १७। ६७।
"वसुवेगो महावेगो मनोवेगो निशाचरः॥")
रात्रिचरमात्रे, त्रि॥

निशाचरी, स्त्री, (निशायां चरतीति। चर+टः। स्त्रियां ङीप्।) कुलटा। इति मेदिनी। रे, २७३॥ केशिनीनामगन्धद्रव्यम्। इति जटाधरः॥ राक्षसी। यथा,—
"अनिवृत्तनिशाचरी मम गृहान्तराले स्थिता
निहन्ति निगमागमस्मृतिपुराणशास्त्रोदिताम्।
क्रियां तदनुगा सखी हृदय एव चिन्ताविशत्
तथोर्द्दमनकारणं तमसि केवलं भूपते॥"
इत्युद्भटः॥
(यथा च रघुः। ११। २०।
"रामस्यथधुरश्च ताडिता
दुःसहेन हृदये निशाचरी।
गन्धवद्वधिरचन्दनोचिता
नीतिमेव सतिं जगाम सा॥"
"अत्र ताडकायाः अभिसारिकया समाधिरभिधीयते रामेति। निशासु चरतीति निशाचरी राक्षसी अभिसारिका च।" इति तत्र मल्लिनाथः॥)

निशाचर्म्म, [न्] क्ली, (निशायाश्चर्म्मेव आवरकत्वात्।) अन्धकारः। इति त्रिकाण्डशेषः॥

निशाजलं, क्ली, (निशोद्भवं जलम्। मध्यपदलोपिसमासः।) हिमम्। इति त्रिकाण्डशेषः॥

निशाटः, पुं, (निशायां रात्रौ अटतीति। अट+अच्।) पेचकः। इति हेमचन्द्रः। ४। ६६०॥

निशाचरे, त्रि॥

निशाटकः, पुं, (निशायां अटति निशावत् कृष्णत्वं अटतीति वा। अट+खुल्।) गुगुगुसुः। इति राजनिर्घण्टः॥ (राक्षसे, त्रि॥)

निशाटनः, पुं, (निशायां अटतीति। अट गतौ+ल्युः।) पेचकः। इति हलायुधः॥ निशाचरे, त्रि॥

निशातः, त्रि, (नि+शो निशाने+क्तः। "शाच्छोरन्यतरस्याम्।" ७। ४। ४१। इति पक्षे इत्वाभावः।) शाणितः। इति हेमचन्द्रः॥

निशादः, पुं, (निशायां अत्तिभक्षयतीति। अद्+अच्।) निषादः। इत्यमरटीकायां रमानाथः॥ स्त्रि, निशाशक॥

निशादिः, स्त्री, (निशाया आदिर्यत्र।) सन्ध्या। इति राजनिर्घण्टः॥

निशान्तं, क्ली, (निशन्यते विश्रम्यतेऽस्मिन्निति। नि+शम+अधिकरणे क्तः।) गृहम्। इत्यमरः। २। २। ५॥ (यथा, रघुः। १६। ४०।

"तस्याः स राजोपपदं निशान्तं
कामीव कान्तान्तहृदयं प्रविश्य॥"

निशाया अन्तो यत्र।) उषा। (यथा, मनुः। ४। ६६।

"न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः
स्वपेत्॥")

शान्ते, त्रि। इति मेदिनी। ते, ११६॥

निशान्धा, स्त्री, (निशायां अन्धयति उपसंहरति आत्मानमिति। अन्ध उपसंहारे+अच्+टाप्।) जतुकाजता। इति राजनिर्घण्टः॥ (निशायां अन्धः।) रात्र्यन्धे, त्रि॥

निशापतिः, पुं, (निशायाः पतिः।) चन्द्रः। (यथा, सूर्यसिद्धान्ते। २। ४७।

"खमन्दभुक्तिसंयुक्ता मध्यभुक्तिर्निशापतेः।
दोर्ज्यान्तरादिकं ज्ञात्वा भुक्ताद्यक्षधनं भवेत्॥")

कर्पूरः। इत्यमरः॥ (निशायामेव पतिरिति विग्रहे क्वचित् यज्ञनाशाद्या उपपतिरपि। यथा, आर्य्यासप्तशत्याम्। ३५२।

"प्राङ्मयकोऽपि निशापतिः स तापं सुधामयो हरति।
यदि मां रजनिञ्चर इव सखि! स न निरुणद्धि गेहपतिः॥")

निशापुष्पं, क्ली, (निशायां रात्रौ पुष्पमिति विकसतीति। पुष्प विकासे+अच्।) उत्पलम्। इति राजनिर्घण्टः॥

निशाबलः, पुं, (निशायां रात्रौ बलं यस्य।) श्येनश्वमिथुनकर्कटधुर्मकरराशयः। इति ज्योतिषम्॥

निशाभङ्गा, स्त्री, (निशा हरिद्रा तद्वत् भङ्गो यस्याः।) दुग्धपुच्ची। इति शब्दचन्द्रिका॥ दुग्धपेया इति भाषा॥

निशामणिः, पुं, (निशाया मणिरिव।) चन्द्रः। इति त्रिकाण्डशेषः॥

निशामनं, क्ली, (नि+शम+णिच्+ल्युट्।) दर्शनम्। आलोचनम्। इति मेदिनी। ने, १६०॥ श्रवणम्। इति हेमचन्द्रः। ३। २७०॥

निशाम्बरः, पुं, (निशाचरो नक्तः पशुः।) शृगालः। इति शब्दरत्नावली॥

निशारणं, क्ली, (नि+शॄ गि हिंसे+णिच्+ल्युट्।) मारणम्। इत्यमरः। २। ८। ११२॥ (निशाया रणम्।) रात्रियुद्धम्॥ (निशाया रवः शब्दः।) रात्रिशब्दे, पुं॥

निशारत्नं, क्ली, (निशाया निशायां वा रत्नमिव।) चन्द्रः। इति हेमचन्द्रः। ३। २६॥

निशारूकः, पुं, रूपकभेदः। यथा,—

"द्रुतः प्रौढोऽथ खचरो विभवश्चतुरक्रमः।
निशारूकः प्रतितालः कथिताः सप्त रूपकाः॥"

तस्य लक्षणं यथा,—

"लघुर्द्विन्द्वं गुरुर्द्विन्द्वं तत्त्रासतालकः स्मृतः।
चतुर्विंशतिवर्णेषु रसे हास्ये निशारूकः॥"

तालविशेषः। यथा,—

"प्रविश्य नर्त्तको रङ्गं विकीर्य्य कुसुमादिकम्।
निशारूकेण तालेन कोमलं वृत्तमाचरेत्॥"

इति सङ्गीतदामोदरः॥

निशावनः, पुं, (निशावत् अन्धकारजनकं वनं यत्र।) शूद्रः। इति राजनिर्घण्टः॥

निशाशृङ्गं, क्ली, (निशानां शृङ्गं समूहः।) रात्रिसमूहः। बहुनिशाः। इति शब्दरत्नावली॥

निशावेदी, [न्] पुं, (निशां निशापरिमाणं वेत्ति वेदयति वा। विद् वा वेदि+णिनिः।) कुक्कुटः। इति हेमचन्द्रः। ४। ३६०॥

निशाहसः, पुं, (निशायां रात्रौ हसो हासो विकासो यस्य।) कुसुदम्। इति त्रिकाण्डशेषः।

निशाह्वा, स्त्री, (निशाया आह्वा आख्या आह्वा यस्याः।) हरिद्रा। इत्यमरः। २। ६। ४१॥

निश्चितं, क्ली, (नि+श्चो+क्तः। "शाच्छोरन्यतरस्याम्।" ७। ४। ४१। इति इत्वम्।) लौहम्। इति राजनिर्घण्टः॥

निश्चितः, त्रि, (नि+श्चो+क्तः।) शाणितः। इत्यमरः। ३। २। ६१॥ (यथा, महाभारते। १। १२४। ६५।

"तङ्गालसमकालन्तु वीभत्सुर्निश्चितैः शरैः।
अवार्ण्यैः पञ्चभिर्व्याहं मयमभ्यस्यताड्यत॥")

निश्चिपुष्पा, स्त्री, (निशि पुष्पाति विकाशते इति। पुष्प+अच्। टाप्।) श्वेतकालिका। इति त्रिकाण्डशेषः॥

निश्चिपुष्पिका, स्त्री, (निशिपुष्पा+स्वार्थे कन्।) श्वेतकालिका। इति शब्दरत्नावली॥

निशिपुष्पी, स्त्री, श्वेतकालिका। निशि रात्रौ विकशितं पुष्पमस्या इति व्युत्पत्त्या मध्यपदलोपेः सप्तम्या अलुक् च ततो जातेरत इति ङीप्॥

निशीथः, (नितरां श्वेतेऽत्रेति। नि+श्वी+"निशीथगोपीथावगथाः।" उणा। २। ६। इति थक्प्रत्ययेन निपातनात् साधुः।) अर्द्धरात्रः। इत्यमरः। १। ४। ६॥ (यथा, रघुः। ३। १५।

"निशीथदीपाः सहसा हतत्विषो
बभूवुरावेद्यसमर्पिता इव॥")

रात्रिमात्रम्। इति मेदिनी। थे, २०॥ (यथा, ऋतुसंहारे। १। ३।

"सुतनु! श्रोतं भवतस्य धैर्यं
सुखौ निशीथेऽनुभवन्ति कामिनः॥")

निशीथिनी, स्त्री, (निशीथोऽस्त्यस्या इति। इनिः। ङीप्।) रात्रिः। इत्यमरः। १। ३। ४॥

निशीथिनीनाथः, पुं, (निशीथिन्या नाथः।) चन्द्रः। इति हलायुधः॥

निशीथ्या, स्त्री, रात्रिः। इति भूरिप्रयोगः॥

निशुम्भः, पुं, (नि+शुम्भ हिंसायाम्+भावे घञ्।) वधः। इति हेमचन्द्रः। ३। ३६३॥ दानवविशेषः। यथा,—

"कश्यपस्य दनुर्नाम भार्य्यासीद्दिव्यसत्तम!।
तस्यास्तु द्वौ सुतावास्तां महावाहुबलाधिकौ॥
ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरासुरः।
ततोयौ नमुचिर्नाम महाबलसमन्वितः॥"

इति वामनपुराणे ५२ अध्यायः॥ (अयं हि भगवता निहतः। इति मार्कण्डेयपुराणम्॥ अपरोऽसुरविशेषः। यदुक्तं मार्कण्डेये। ६१। ३६—४०।

"वैवस्वतेऽन्तरे प्राप्ते ऽष्टाविंशतिमे युगे।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ॥
नन्दगोपगृहे जाता यशोदागर्भसम्भवा।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी॥")

निशुम्भनं, क्ली, (नि+शुम्भ हिंसायाम्+भावे ल्युट्।) मारणम्। इति हलायुधः॥

निशुम्भमर्द्दिनी, स्त्री, (निशुम्भं मर्द्दयतीति। मृद्+णिनिः। ङीप्।) दुर्गा। इति हेमचन्द्रः॥

निशुम्भशुम्भमथनी, स्त्री, (निशुम्भं शुम्भञ्च मथ्नातीति। मन्थ विलोड़ने+ल्युः। नलोपः। ततो ङीप्।) दुर्गा। यथा, देवीपुराणे।

"निशुम्भशुम्भमथनी देवी देवैः सु गीयते॥"

निशुम्भी, [न्] पुं, (निशुम्भो मोहनाद्योऽस्त्यस्येति। इनिः।) वृहद्विशेषः। तत्पर्य्यायः। हैरम्बः २ हेरकः ३ चक्रसम्बरः ४ हेवः ५ वज्रकपाली ६ ग्रन्थिश्रेष्ठेश्वरः ७ वज्रटोकः ८। इति त्रिकाण्डशेषः॥

निश्चेतः, पुं, (निशायामपि एतं चेष्टदृगमनं यस्य।) वकः। इति त्रिकाण्डशेषः॥

निश्चयः, पुं, (निश्चीयतेऽनेनेति। निर्+चि+"अकर्त्तरि च कारके संज्ञायाम्।" ३। ३। १९८। इति अप्।) निःसंशयज्ञानम्। तत्पर्य्यायः। निश्चयः २। इत्यमरः। १। ५। ३॥ निर्णयनम् निश्चयः ४। इति शब्दरत्नावली॥ (यथा, देवीभागवते। १। १६। ३५।

"देहोऽयं मम बन्धोऽयं न ममेति च सुस्थता।
तथा धनं गृहं राज्यं न ममेति च निश्चयः॥")

"तद्भावाप्रकारो धीस्तत्प्रकारा तु निश्चयः॥"

इति भाषापरिच्छेदः॥

(अर्थालङ्कारविशेषः। तल्लक्षणादिकं यथा, साहित्यदर्पणे। १०। ५६।

"अन्यन्निषिध्य प्रस्तुतस्थापनं निश्चयः पुनः॥"

उदाहरणं यथा,—

"इदमिदं न सरोजं नयने नेन्दीवरे इते।
इह सविधे सुग्धमुखी मधुकर! न सुधा परिभाव्य॥")

निश्चला, स्त्री, (निश्चलतीति। निर्+चल+अच्। टाप्।) शालपर्णी। इति राजनिर्घण्टः॥

पृथिवी ॥ (नदीविशेषः । यथा, मातृखे । ११६ । २२ ।
"कौशिकी तु तृतीया च निश्चला गण्डकी तथा।
इत्युक्तौहितमित्येता हिमवत्पार्श्वनिःसृताः ॥")
अचले, त्रि । यथा,—
"निवसतु तव गेहे निश्चला सिन्धुपुत्री ।"
इत्यादुज्जटः ॥
निश्चलाङ्गः, पुं, (निश्चलवत् अङ्गं यस्य ।) बकः । इति राजनिर्घण्टः ॥ पर्व्वतादिः । स्तब्धरहिते, त्रि ॥
निश्चायकः, त्रि, (निश्चिनोतीति । निर् + चि + ण्वुल् ।) निश्चयकर्त्ता । निर्णायकः । यथा, अद्भुतोधिनिश्चायकदर्शनत्वं न हेतुत्वमिति वाग्विग्रहमाथुरी ॥
निश्चारकः, पुं, (निश्चरतीति । निर् + चर + ण्वुल् ।) पुरीषत्यागः । वायुः । स्वच्छन्दम् । इति मेदिनी । के, १६५ ॥
निश्चिन्तः, त्रि, (निर्गता चिन्ता यस्मात् ।) चिन्तारहितः । यथाह कश्चित् ।
"मूर्खत्वं सुलभं भजस्व सुमते ! मूर्खस्य नाष्टौ गुणा
निश्चिन्तो बहुभोजकोऽतिसुखरो रात्रिन्दिवा स्वप्नभाक् ।
कार्य्याकार्य्यविचारणादिरहितो मानापमाने समे
दत्ता सर्व्वजनस्य मर्द्दनपरो मूर्खश्चिरं जीवतु ॥"
निश्चीयमानः, त्रि, (निर् + चि + कर्म्मणि यङानश् ।) निश्चयविषयः । यथा । ननु तथापि एवकारस्य निश्चीयमानस्यैव सार्थकत्वाभावात् कुतः प्रज्ञप्तित्वमिति ग्रन्थयुक्तिप्रकाशिकाटीकायां रामभद्रः ॥
निश्चुक्यं, क्ली, (निःशेषेण चुक्यम् ।) दन्तशाकम् । इति त्रिकाण्डशेषः । मिसी इति भाषा ॥
निश्चेष्टः, त्रि, (निर्गता चेष्टा यस्मात् ।) चेष्टारहितः । निश्चेष्टितः । यथा,—
"मलयद्रुमनिश्चेष्टो देव्या निर्गतलोचनः ।
अवतारावो न्यपतत् सङ्घवालो वसुन्धरे ॥"
इति श्रीभागवते दशमः ॥
निश्वासः, पुं, (नि + श्वस + भावे घञ् ।) बहिर्मुखश्वासः । तत्पर्य्यायः । प्राणः २ असनः ३ । इति हेमचन्द्रः ॥ (यथा, ब्रह्मवैवर्त्ते । २।१।८६ ।
"संहर्त्तुं सर्व्वब्रह्माण्डं ग्रस्ता निःश्वासमात्रतः ॥")
निश्वासर्षिसंहिता, स्त्री, (निश्वासाख्या संहिता ।) शिवप्रणीतशास्त्रविशेषः । यथा,—
"एवमभ्यर्थितस्तेषु पुराणं द्विजसत्तमाः ।
वेदनिश्वासमायुक्तां ससर्जाशु संहिताम् ॥
निश्वासाख्यां ततस्तस्यां लीना वाङ्मयशाखिकाः ।
निश्वासर्षिसंहितायां हि लक्षमात्रप्रमाणतः ॥
सैव पाशुपती दीक्षा योगः पाशुपतस्य हि ।
इतस्तादेदमार्गाद्धि यदन्यदिह जायते ॥
तत् क्षुद्रकर्म्म विज्ञेयं रौद्रं शौचविवर्जितम् ॥"
इति वराहपुराणम् ॥

निषङ्गः, पुं, (नितरां सज्जन्ति शरा यत्र । नि + सञ्ज + अधिकरणे घञ् ।) तूणीरः । इत्यमरः । २ । ८ । ८८ ॥ (यथा, रघुः । २ । ३० ।
"ततो नगेन्द्रस्य नगेन्द्रगामी
वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गा-
दुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः ॥")
सङ्गः । इति मेदिनी । गे, ४० ॥
निषङ्गधिः, पुं, (नि + सञ्ज + "नौ यत्सञ्जेर्धेथिन् ।" उणा० । ४ । ८७ । इति भावे धेथिन् । धित्वात् कुत्वम् । ततः षत्वम् ।) समालिङ्गनम् । आलिङ्गनम् । इत्युणादिकोषः । १ । १६९ ॥ धन्वी । रथः । स्कन्धः । ढक्कम् । सारथिः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (आलिङ्गके, त्रि । इत्युज्ज्वलदत्तः ॥)
निषङ्गी, [न्] पुं स्त्री, (निषङ्गोऽस्यास्तीति । निषङ्ग + इनिः ।) धनुर्द्धरः । इत्यमरः । २ । ८ । ६६ ॥ (यथा, रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
इमः स राजन्यकमेकवीरः ॥"
खनामख्यातो धृतराष्ट्रपुत्रः । इति महाभारतम् । १ । ११७ । ११ ॥)
निषण्णः, त्रि, (निषीदति स्मेति । नि + सद् + क्तार्थे क्तः । "रदाभ्यां निष्ठातो नः पूर्व्वस्य च दः ।" ८ । २ । ४२ । इति निष्ठातस्य धातोर्दकारस्य च नः ।) उपविष्टः । यथा,—
"पादावसुचयन्ती श्रीर्देवक्याश्चरणान्तिके ।
निषण्णा पङ्कजे पूज्या नमो देव्यै श्रिया इति ॥"
इति तिथ्यादितत्त्वम् ॥
निषण्णकं, क्ली, (निषण्ण + संज्ञायां कन् ।) सुनिषण्णकम् । इति शब्दरत्नावली ॥
निषदः, पुं, (निषीदन्ति बहवोऽत्र शरा यत्र । नि + सद् + बाहुलकात् अप् ।) निषादस्वरः । इत्यमरटीकायां स्वामी ॥ (खनामख्यातनृपविशेषः । यथा, महाभारते । २ । ६ । १५ ।
"भङ्गासुरिः सुनीथश्च निषदोऽथ वहीनरः ॥")
निषद्या, स्त्री, (निषीदत्यस्यामिति । नि + सद् + "संज्ञायां समजनिषदेति ।" ३ । ३ । ६६ । इति अधिकरणे यप् ।) पण्यविक्रयशाला । इत्यमरः । २ । २ । २ । हट्टः । इत्यन्ये । इति भरतः । क्षुद्रखट्टा । इति त्रिकाण्डशेषः ॥
निषदरः, पुं, (निषीदन्ति विषण्णा भवन्ति जना अत्रेति । नि + सद विषादे गतौ + "नौ सदेः ।" उणा० । २ । १२४ । इति अरच् । "सदिरप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) कर्दमः । इत्यमरः । १ । १० । ६ ॥
निषदरी, स्त्री, (नि + सद विषादे + अधिकरणे अरच् । धित्वात् ङीप् ।) रात्रिः । इति मेदिनी । रे, २७३ ॥
निषधः, पुं, पर्व्वतविशेषः । इत्यमरः । २ । ३ । ३ ॥ स तु इलावृतस्य दक्षिणे हरिवर्षस्य सीमापर्व्वतः । प्रागायतः अयुतयोजनोत्सेधः । द्विसहस्रयोजनविस्तीर्णः । इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥ कठिनम् । देशविशेषः । (यथा, महाभारते । ३ । ५३ । ३ ।
"ब्रह्मण्यो वेदवित् शूरो निषधेषु महीपतिः ॥")
तद्देशीयराजः । इति मेदिनी । धे, ३३ ॥ निषादस्वरः । इति हेमचन्द्रः । ६ । ३७ ॥ (रामप्रपौत्रे कुशवंशीयनृपभेदे । यथा, हरिवंशे । १५ । २६ ।
"रामस्य तनयो जज्ञे कुश इत्यभिविश्रुतः ।
अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः ॥")
निषादः, पुं, (निषीदते ग्रामेऽस्मिन्नायाम् । यद्वा, निषीदन्ति पापमत्र । नि + सद् + कर्म्मणि अधिकरणे वा घञ् ।) चण्डालः । इत्यमरः । २ । १० । २० ॥ वेणुशरीरोद्भवजातिविशेषः । यथा, अग्निपुराणे ।
"मथ्यमाने ततो राज्ञस्तस्मिन्नूरौ प्रजाक्षयात् ।
दुःखोऽतिपरुषः क्षत्रक्षत्रियात् प्राञ्जलिः क्षितेः ॥
ते मन्त्रैर्विकलं दृष्ट्वा निषीदेत्यब्रुवंस्तदा ।
निषादवंशकर्त्ता स बभूव सुनिसत्तमाः ! ॥
धीवरान्धकजान् वापि वेणुकल्मषसम्भवान् ।
ये चान्ये विन्ध्यनिलयाः शूरवर जाङ्गलादयः ॥
अधर्म्मरुचयो ये च वित्तैषान् वन्यसम्भवान् ॥"
पारिभाषिकचण्डाली यथा, मार्कण्डेयपुराणे ।
"आघ्राणार्त्तुं वदान्नं च दातुश्च प्रतिषेधकः ।
शरणागतं यस्त्यजति स चण्डालोऽधमो नरः ॥"
धीवरविशेषः । इति मेदिनी । दे, ३४ ॥ (निषीदन्ति बहवोऽत्र शरा यत्र । नि + सद् + घञ् ।) सप्तस्वरान्तर्गतग्रामस्वरः । स तु नारदमते दक्षिणस्वरतुल्यस्वरः । अस्योच्चारणस्थानं ललाटम् । जातिरत्नमते दन्तः । अयं वैश्यवर्णः । सप्तस्वराणां मध्ये उत्तरः । अस्य जातिः सम्पूर्णा । अस्य मूर्च्छनाः ५०४० । प्रत्येकतानम् ५६ समुदायेन २८२२४० भवन्ति । अस्य स्वरूपः गवेधुतुल्यः । ज्ञात्यन्तरवर्णः । स्थानं पुष्करद्वीपः । देवता सूर्य्यः । वारः शनिः । समयः निशान्ते ८ दण्ड—२४ पलानि । अस्य श्रुतिः उग्रा ग्रीभिणी च । मूर्च्छना मन्दरस्थाने सप्ता । मध्यस्थाने अष्टधृता । तारस्थाने लोचना च । निषादवर्ज्जिता रागिणी आसावरी मल्लारी च । नादपुराणमते । निःसन्तानोऽयम् । वीणायां धैवतावधिषड्जस्थानपर्य्यन्तं प्रथमं सप्तकद्वितीयांशस्य शैवसमुदायवीणातन्त्रीनिषादस्थानं भवति । इति सङ्गीतग्रन्थम् । * ॥
"षड्जादयः षड्जेऽत्र स्वराः सर्व्वे मनोहराः
निषीदन्ति यतो लोके निषादस्तेन कथ्यते ॥
ततश्च पञ्चमे षड्जे मध्यमे श्रुतयो मताः ।
अथमे धैवते तिस्रो द्वे गान्धारनिषादके ॥"
इति सङ्गीतदामोदरः ॥
(अस्य असुरवंशे उत्पत्तिः । वैश्यो जातिः । विचित्रो वर्णः । पुष्करद्वीपे जन्म । ऋषिः सुमुखः । सूर्य्यो देवता । जगती छन्दः । करणे उपयोगित्वम् । इति सङ्गीतदर्पणम् ।)

निषादौ, [न्] पुं, (निषीदत्यवरुह्यमिति । नि+सद्+आवश्यके घञि ।) हस्थारोहः । इत्यमरः । २ । ८ । ५१ ॥ माहुत इति ख्यातः ॥ (यथा, माघे । ५ । ४१ ।

"प्रत्यग्रदन्तिनिगृहीतकुम्भदूरभिन्न-
निर्य्याणनिर्य्यदसृजं चलितं निषादी ॥"

उपविष्टे, त्रि । यथा, रघुः । १ । ५२ ।

"आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।
न्यग्रोधसितरोमन्थसुप्तहारीतबर्हिषु ॥")

निषिद्धं, त्रि, (निषिध्यते स्मेति । नि+सिध+क्तः ।) निषेधविषयम् । यथा,—

"तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्य्यात्तर्पणं तिलमिश्रितम् ॥"

इति तिथितत्त्वम् ॥

निषिद्धकर्म्माणि यथा,—

मान्धातोवाच ।

"ब्रूहि कर्म्माण्यशेषाणि मद्विधानां सुखावहान् ।
निषिद्धमपि यत्तेषां तदेव प्रथमं वद ॥

नारद उवाच ।

व्याकर्षणं ग्रन्थिविवर्द्धनञ्च
क्षत्रिय्यविश्यां पशुपालनञ्च ।
शुश्रूषणञ्चापि तथार्थहेतो-
रकार्य्यमेतत् परमं ब्राह्मणस्य ॥

राजप्रेष्यं क्षत्रियस्य जीवनञ्च वणिज्यया ।
कौटिल्यं कौलटेयञ्च कृषेश्च विवर्ज्जयेत् ॥
शूद्रो राजन्! स भवति धर्म्मापेतो दुराचरः ।
दृषलीं रमते यस्तु पितृनो नर्त्तनस्तथा ॥
ग्रामप्रेष्यो विकर्म्मा च यो द्विजश्चरिताद्व्रतः ।
वेदानपि जपन् शूद्रैः समः स परिकीर्त्तितः ।
क्षत्रेषु वर्ज्जनीयोऽसौ वैदिके तान्त्रिकेऽपि च ॥
निर्म्मर्य्यादे चाशुचौ क्रूरवृत्ते
हिंसात्मके तत्त्वधर्म्मे च वृत्ते ।
हव्यञ्च कव्यञ्च न देयमेव
दानञ्च दत्तं विफलं नरेन्द्र! ॥
राजन्यानां करादानं विना वैवाहिकञ्च यः ।
प्रतिग्रहः स निन्द्योऽत्र परत्र चासुखप्रदः ॥
युद्धे पलायनञ्चैव तथा कातरतार्थिषु ।
अपालनं प्रजानाञ्च दाने धर्म्मे विरक्तता ॥
अनवेक्षा खराद्यस्य ब्राह्मणागमनादरः ।
असत्यागमसम्मानं तेषां कर्म्मानवेक्षणम् ॥
श्रुत्यागाच्च परीहासो निषिद्धः क्षत्रजन्मनाम् ॥
वैश्यानां धनलोभेन मिथ्यामूल्यप्रकाशनम् ।
अपालनं पशूनाञ्च अनिच्छा विभवे सति ॥
शूद्राद्याच्च महाराज! वृथैव धनसञ्चयः ।
शुश्रूषोः श्रुतकार्य्यस्य श्रुतसम्भावकर्म्मणः ॥
अन्यानुज्ञातराज्यस्य शूद्रस्य जगतीपते! ।
अल्पान्तरगतस्यापि दग्धधर्म्मगतस्य च ॥
आश्रमा विहिताः सर्व्व वर्ज्जयित्वा गिरा-
ग्रियम् ॥"

इति पाद्मे स्वर्गखण्डे २० अध्यायः ॥

अपि च ।

"यस्तु भागवतान् दृष्ट्वा भूत्वा भागवतः शुचिः ।
अभ्युत्थानं न कुर्व्वीत अहं तेनापि हिंसितः ॥
यश्च कन्यां पिता दत्त्वा न प्रयच्छति तां पुनः ।
अष्टौ पितृगवास्तेन हिंसिता नात्र संशयः ॥
भार्य्यां प्रियसखीं ये तु साध्वीं हिंसन्ति निर्घृणाः ।
न ते वृत्तां प्राप्नुवन्ति हिंसका दृढयोनिजाः ॥
ब्रह्मघ्नश्च क्षतघ्नश्च गोघ्नश्च क्षतपापकाः ।
एतान् ग्रिध्यान् विवर्ज्जेत उक्ता ये चान्य-
पातकाः ॥
श्राद्धपक्षे न भोक्तव्यं न क्षेत्तव्यं कदाचन ।
अश्वत्थो वटवृक्षश्च न क्षेत्तव्यौ कदाचन ॥
न क्षेत्तव्यो विल्ववृक्ष उदुम्बरश्च कदाचन ।
कर्म्मण्यास्वेव ये वृक्षा न क्षेत्तव्याः कदाचन ॥
यदीच्छेत् परमां सिद्धिं मोक्षधर्म्मं सनातनम् ।
भक्ष्याभक्ष्यञ्च ते ग्रिध्य वेदितव्यं तदन्तरे ॥
करीरस्य वधः श्रुतः पलाण्डूदुम्बरस्य च ।
सद्योभक्षी भवेत्तेन अभक्ष्याः पूतिवासिकाः ॥
न भक्षयीयं वाराहं मांसं मत्स्यस्य सर्व्वशः ।
अभक्ष्या ब्राह्मणैर्ह्येते दीक्षितैर्हि न संशयः ॥
परिवादं न कुर्व्वीत न हिंसां वा कदाचन ।
पैशुन्यञ्च न कर्त्तव्यं स्तेयं वापि कदाचन ॥
अतिथिश्चागतं दृष्ट्वा दूराध्वागागमं क्वचित् ।
संविभागस्तु कर्त्तव्यो येन केनापि पुत्रक! ॥
गुरुपत्नी राजपत्नी ब्राह्मणी वा कदाचन ।
मनसापि न गन्तव्या एतं विष्णुः प्रभाषते ॥
कनकादीनि रत्नानि यौवनस्था च कामिनी ।
तत्र चित्तं न कर्त्तव्यमेवं विष्णुः प्रभाषते ॥
दृष्ट्वा परस्य भाग्यानि आत्मनो व्यसनन्तथा ।
तत्र मन्युर्न कर्त्तव्य एवं धर्म्मः सनातनः ॥"

इति वराहपुराणम् ॥

(निषारितम् । यथा, देवीभागवते । २ । ६ । ६० ।

"मां भां मां मेति बहुधानिषिद्धोऽपि तथाऽष्टमम्।
आलिलिङ्ग प्रियां देवात् पपात धरणीतले ॥")

निषेकः, पुं, (निषिच्यते प्रक्षिप्यत इति । नि+सिच्+घञ् ।) गर्भाधानम् । इति निषेकादि-शब्दतत्त्वटीकायां भरतः ॥ * ॥

"निषेकाद्भवते पत्नी गुरुर्भर्त्ता शुभाशुभम् ।
मन्त्रग्रिक्ष्यसमत्वञ्च सर्व्वमेतत्र संशयः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३३ अध्यायः ॥ (यथा, मनुः । २ । १६ ।

"निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः ।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्य-
चित् ॥"

क्लीबे, रेतः । यथा, मनुः । ३ । १५१ ।

"दूरादावसथान्मूत्रं दूरात् पादावसेचनम् ।
उच्छिष्टान्नं निषेकञ्च दूरादेव समाचरेत् ॥"

"निषिच्यत इति निषेकं रेतश्चोत्सृजेत् ।"

इति तट्टीकायां कुल्लूकभट्टः ॥ (अरण्यम् । यथा, रघुः । ८ । ६८ ।

"नन्वेतेनविकेविन्ध्या
सह दीपाधिरुपेति मेदिनीम् ।")

निषेकादिकृत्, पुं, (निषेकादिं गर्भाधानादिकं करोतीति । निषेकादि+कृ+क्विप् ।) गर्भाधानादिकर्त्ता । आदिना सीमन्तोन्नयनादेर्मन्त्र-विद्यादानादेश्च ग्रहणं तत्कर्त्ता पित्रादिर्गुरुः स्यात् । इत्यमरभरतौ ॥

निषेधः, पुं, (नि+सिध+घञ् ।) प्रतिषेधः । निवृत्तिः । विधिविपरीतः । यथा,—

"तिथीनां पूर्व्वता नाम कर्म्मानुष्ठानतो मता ।
निषेधस्तु निवृत्तात्मा कालमात्रमपेक्षते ॥"

इति तिथितत्त्वम् ॥

निषेवणं, क्लीबे, (नि+सेव+भावे ल्युट ।) सेवा । यथा, भागवते । १ । २ । २६ ।

"शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ।
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥"

निषेव्यः, त्रि, (नि+सेव+भावे ण्यत् ।) सेवनीयः । यथा, भागवते । १ । १२ । २२ ।

"नगेन्द्र इव विक्रान्तो निषेव्यो द्विपवानिव ॥"

निष्क, क ङ मार्गे । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) म्लेच्छन्यायमार्गः । क ङ, निष्कयते स्वर्गं वणिक् । इति दुर्गादासः ॥

निष्कः, पुं क्लीबे, (निष्कयेण क्रयति क्रीणाति इति । निस्+कै+आतश्चेति कः ।) चत्वारः सुवर्णाः । चारि मोहर इति भाषा ॥ यथा, मनुः । ८ । १३७ ।

"धरणानि दश ज्ञेयः शतमानन्तु राजतः ।
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ॥"

साष्टशतसुवर्णः । हेम । उरोभूषणम् । (यथा, रामायणे । १ । ६ । ११ ।

"नाम्नष्टभोजी नादाता नाप्यनङ्गदनिष्कधृक् ॥")

पलम् । दीनारः । इत्यमरः । ३ । ३ । १४४ ॥ अस्य टीका यथा । "ग्राह्यीयषोडशमाषकपरिमितं स्वर्णं सुवर्णं तेषां सुवर्णानां अष्टाधिकशतम् । हेम स्वर्णमात्रम् । उरोभूषणं वक्षोऽलङ्कारः । पलं ग्राह्यीयमानविशेषः । उरोभूषणं पलञ्च हेम एवेति केचित् । दीनारः सम्भवव्यवहारार्थं मागधस्तु एतु निष्कः । केचित्तु दीनार इति पल इत्यस्य विशेषणम् । दीनारे पले लौकिक-पले न तु ग्राह्यीये इत्याहुः । स्वार्त्तास्तु द्वात्रिंशद्रक्तिकापरिमितं काञ्चनं दीनारः । तथाहि ।

'दीनारो रोपकैरष्टाविंशत्या परिकीर्त्तितः ।
सुवर्णसप्ततितमो भागो रोपक उच्यते ॥'

इति विष्णुगुप्तः ॥

सुवर्णोऽशीतिरक्तिकापरिमितं काञ्चनं तस्य सप्ततितमो भागः सप्तमांशाधिकद्वेमरक्तिकायां रोपकः तदष्टाविंशत्या द्वात्रिंशद्रक्तिकापरिमितं हेम दीनार इति पर्य्यवस्यतीत्याहुः ।" इति भरतः ॥ * ॥ स्वर्णकर्षः । स्वर्णपलम् । इति हेमचन्द्रः ॥ कच्छभूवा । इति जटाधरः ॥ माषकचतुष्टयम् । इति वैद्यकपरिभाषा ॥ (यथा, "स्याच्चतुर्माषकैः ग्राह्य स निष्कश्च एव च ॥" इति पूर्व्वखण्डे प्रथमेऽध्याये ग्राह्यधरेयोक्तम् ॥)

षोढ़ग्रन्थः। षोल काहन इति भाषा॥ (यथा, लीलावत्याम्। २।
"वराटकानां दशकद्वयं यत्
सा काकिनी ताच्च पञ्चतस्तः।
ते षोढ़ग्रन्थ इहावगम्यो
ग्रन्थेस्तथा षोढ़ग्रभिच्च निष्कः॥")

निष्कण्ठः, पुं, (निर्गतः कण्ठः स्कन्धो यस्य।) वरण्डवृक्षः। इति ग्रन्थचन्द्रिका॥

निष्कर्षः, पुं, (निर् वा निस्+कृष्+भावे घञ्।) निश्चयः। यथा, अन्नायं निष्कर्षः इत्याद्यापरार्द्धिकश्राद्धादिव्यवस्थायां स्मृतिः॥ (कराधें प्रजापीड़नम्। इति गौलकण्डः॥ यथा, महाभारते। २। १३। १३।
"अनुकर्षच्च निष्कर्षं व्याधिपावकमूर्च्छनम्।
सर्व्वमेव न तत्राधीहमौनिन्ये युधिष्ठिरे॥")

निष्कलं, त्रि, (निर्गता कला यस्मात्।) कलाशून्यम्। (यथा, महाभारते। ३। २०८। ६।
"संयताश्चापि दक्षाश्च मतिमन्तश्च मानवाः।
दृश्यन्ते निष्कलाः सप्त प्रहीणाः स्वकर्म्मभिः॥")
नपुंसकम्। इति मेदिनी। ले, १०२॥ ब्रह्म। यथा,—
"चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः।
उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना॥"
इत्येकादशीतत्त्वे नामस्यावचनम्। आधारे, पुं। इति ग्रन्थचन्द्रिका॥

निष्कला, स्त्री, (निर्गता कला यस्याः।) विगतार्त्तवा। इति ग्रन्थरत्नावली॥ दक्षा। इति राजनिर्घण्टः॥

निष्कली, स्त्री, (निष्कल+ङीष्।) ऋतुहीना। निकृष्टरजस्का। इति ग्रन्थरत्नावली॥

निष्कालकः, पुं, (निष्कालयतीति। निर्+कालि+ण्वुल्।) सुस्थितलोमा हुताभ्यक्तः प्रायश्चित्तार्हः। यथा। सुस्थितलोमकेशेन हुताभ्यक्तेन च कर्त्तव्यम्। निष्कालको हुताभ्यक्तस्नातो मूर्द्धां परिध्याय मरुद्भातः पूतो भवतीति विज्ञायते। इति वशिष्ठस्मरणात्। इति मिताक्षरा॥

निष्काश्यः, पुं, (नितरां काश्यते श्लाघ्यते प्रासादादाविति। निर्+काश+ण्यत्।) प्रासादाद्युपस्थानम्। इति महाभारते राजधर्म्मः॥ खाजा इति वाराङ्गा इति च भाषा॥

निष्काशितः, त्रि, (निर् वा निस्+काश+क्तः।) निष्कासितः। इत्यमरटीकायां भरतः॥

निष्कासनः, त्रि, (निस्+कस+णिच्+ल्युः।) बहिष्कृतः। दूरीकृतः। तत्पर्य्यायः। अवसृतः २। इत्यमरः। ३। १। ३६॥ निःसारितः ३। डाँग जटाधरः॥ निर्गमितः। आशितः। अधिक्षिप्तः। इति मेदिनी। ते, २०२॥

निष्कुटः, पुं, (कुटात् गृहात् निष्क्रान्तः।) गृहसमीपोपवनम्। इत्यमरः। २। ३। २९॥ (क्वचित् क्लोवेऽपि दृश्यते। यथा, महाभारते। १२। ६८। १५।
"परिखाश्चैव कौरव्य! प्रतोलीर्निष्कुटानि च।
नगास्तत्र प्रपद्यन्ते गुल्मेतदयुधिष्ठिर!॥")
क्षेत्रम्। (यथा, महाभारते। २। ५०। ६।
"इक्षुक्षेत्रैर्वनैर्यत्ति धान्यैर्यै च नदीसुखैः।
समुद्रनिष्कुटे जाताः पारेसिन्धु च मानवाः॥")
कपाटः। इति मेदिनी। टे, ४८॥ पलाण्डुः। इति हारावली॥ जागानामहल इति भाषा॥

निष्कुटिः, स्त्री, (कुट कौटिल्ये+"इगुपधात् कित्।" उणां ४। ११६। इति इन्। निर्गता कुटिः कौटिल्यं यस्याः।) एला। इत्यमरः। २। ४। १२५॥ (पर्य्यायोऽस्या यथा,—
"एला स्थूला च बहुला पृथ्वीका चिपुटापि च।
भद्रैला हृद्यदेला च चन्द्रबाला च निष्कुटिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

निष्कुटी, स्त्री, (निष्कुटि+ऋदिकारादिति वा ङीष्।) निष्कुटिः। इत्यमरटीकायां भरतः। २। ४। १२५॥

निष्कुम्भः, पुं, (निस्+कुम्भ+अच्।) दग्धीष्टकः। इत्यमरटीकायां रायमुकुटः॥ (निर्गतः कुम्भो यस्मात्।) कुम्भशून्ये, त्रि॥

निष्कुञ्चितः, त्रि, (निस्+कुञ्च+क्तः।) निष्कासितः। यथा,—
"काकैर्निष्कुञ्चितं नभः क्वचलितं वीचीभिरान्दोलितम्॥"
इत्यादि वाल्मीकिकृतगङ्गास्तोत्रम्॥

निष्कुष, पुं, (नितरां कुष्यते इति। कुष विस्रापणे+घञर्थे क।) दृषत्कोटरम्। इत्यमरः। २। ४। १३॥

निष्कृतिः, स्त्री, (निर्+कृ+क्तिन्।) निर्मुक्तिः। निस्तारः। यथा,—
"ब्रह्मघ्ने चैव मित्रघ्ने सुरापे गुरुतल्पगे।
सर्व्वत्र विहिता दृष्टैः कृतघ्ने नास्ति निष्कृतिः॥"
इति प्रायश्चित्ततत्त्वम्॥
(अग्निविशेषे, पुं। यथा, महाभारते। ३। २१८। १४।
"आक्रोशतान्तु भूतानां यः करोतीह निष्कृतिम्।
अग्निः स निष्कृतिर्नाम क्षोभयत्यभिवेक्षितः॥")

निष्क्रमः, पुं, (निष्क्रम्यतेऽनेनेति। निस्+क्रम+घञ्। "गोदाक्षोपदेशग्रस्येति।" ७। ३। ३४। इति न वृद्धिः।) धीशक्तिः। इत्यमरः। ३। २। २५॥ निर्गमः। (यथा, कथासरित्सागरे। २५। ४३।
"कञ्चित् कालं प्रतीक्ष्यैव प्राणायामस्य निष्क्रमम्।
तृतीयेऽह्नि गतेऽप्याद्य यास्यतेऽस्य हि नासवः॥")
दुष्कुलः। इति मेदिनी। मे, ४५॥ निष्क्रमणसंस्कारः।
"अष्टमेकादशे मासि चतुर्थे मासि निष्क्रमः॥"
इति याज्ञवल्क्यः। १। १२॥

(क्रमरहिते, त्रि। यथा, पद्मपुराणे पातालखण्डे।
"निष्कलं निष्क्रमं शान्तं सच्चिदानन्दविग्रहम्॥")

निष्क्रमणं, क्ली, (निस्+क्रम+भावे ल्युट्।) दृश्यसंस्कारान्तर्गतसंस्कारविशेषः। तदनुष्ठानं यथा, जाते कुमारे जन्मवासरादृक्षतृतीयः शुक्लपक्षस्थस्य तृतीयायां तिथौ प्रातः कुमारं स्नापयित्वा सायं सन्ध्यायामतीतायां चन्द्राभिमुखः कृताञ्जलिः पिता तिष्ठेत्। अथ माता शुचिर्गा वस्त्रेण कुमारमाच्छाद्य दक्षिणस्यां दिशि भर्त्तुर्वामपार्श्वे पश्चिमाभिमुखीभूय उत्तराग्रिरसं कुमारं पित्रे समर्पयति। ततो माता भर्त्तुः पृष्ठदेशेन उत्तरस्यां दिशि गत्वा चन्द्राभिमुखीभूय भर्त्तुर्दक्षिणपार्श्वे तिष्ठति। अथ पिता जपति प्रजापतिर्ऋषिरनुष्टुप् छन्दश्चन्द्रो देवता कुमारस्य चन्द्रदर्शने विनियोगः। ॐ यत्ते सुसीमे हृदयं हितमन्तः प्रजापतौ वेदाहं मन्ये तद्वत्समाहं पौत्रमघं रुदम्। ततः प्रजापतिर्ऋषिरनुष्टुप् छन्दश्चन्द्रो देवता कुमारस्य चन्द्रदर्शने विनियोगः। ॐ यत् पृथिव्या अणावतं दिवि चन्द्रमसि श्रितं वेदन्तत्सस्याहं नाममाहं पौत्रमघं रुदम्। ततः प्रजापतिर्ऋषिरनुष्टुप् छन्दः इन्द्राग्नी देवते कुमारस्य चन्द्रदर्शने विनियोगः। ॐ इन्द्राग्नी अग्नी यच्छतं प्रजायै मे प्रजापतौ यथायं न प्रमीयेत पुत्रो जनित्र्या अधि। इति मन्त्रत्रयं जप्त्वा कुमारं चन्द्रं दर्शयति। पिता चन्द्राय अर्घ्यं ददाति च। ततः पिता तथाभूतमेव कुमारमुत्तराग्रिरसं मात्रे दत्त्वा वामदेवगानानां कर्म्म कृत्वाच्छिद्रमवधार्य्य गृहं प्रविशेदिति। अत ऊर्द्धमपरशुक्लपञ्चम्यादिषु तृतीयस्यां तिथौ सायंसन्ध्यामतिक्रम्य चन्द्राभिमुखः पिता कृताञ्जलिं गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप्छन्दश्चन्द्रो देवता कुमारस्य चन्द्रदर्शने विनियोगः। ॐ यदद्यचन्द्रमसि कृत्वं पृथिव्या हृदयं श्रितं तदहं विद्वांस्तत् पश्यन्नाहं पौत्रमघं रुदमिति पठित्वा जलाञ्जलिं त्यजेत्। वाग्यतं तूष्णीम्। ततो वामदेयं गीत्वाच्छिद्रमवधार्य्य गृहं प्रविशेदिति। एतच्च निष्क्रमणकर्म्माङ्गभूतसुदीर्घं कर्म्म यत्नो पुत्रोपादानविरहात् प्रवासिनापि कर्त्तव्यमेव। इति निष्क्रमणम्॥ इति भवदेवभट्टः॥*॥ तत्र विहितदिनं यथा। रिक्तातिरिक्तास्त्रियुताः। शूलिमङ्गलवासरेतरे वाराः। आर्द्राश्लेषाहस्तित्रिकाभरणीमघाविशाखापूर्व्वफल्गुनीपूर्व्वाषाढ़ापूर्व्वभाद्रपदशतभिषाभिन्नानि नक्षत्राणि। कन्यातुलाकुम्भसिंहसंज्ञकानि लग्नानि। बालकस्य चतुर्थे मासि तृतीये वा चन्द्रादिशोभने कर्त्तव्यम्। इति ज्योतिषम्॥

निष्क्रयः, पुं, (निष्क्रीयते विनिमीयतेऽनेनेति। निर्+क्री+"एरच्।" ३। ३। ५६। इति करणे अच्।) भृतिः। वेतनम्। इति हेमचन्द्रः। ६। २६॥

बुद्धियोगः। सामर्थ्यम्। निर्गतिः। इति माधवीकाश्रुतबोधयन्तौ॥ प्रत्युपकारः। विनिमयः। यथा, माघे। १। ५०।

"वसुतृप्तिपन् यः पृथिवीभृतामरं
वरप्रदानस्य चकार मूलिनः।
वसुप्रयाराद्रिसुतासखस्मय-
स्वयंग्रहश्लेषसुखेन निश्चयम्॥"

(विक्रयः। यथा, मनुः। ८। ४६।

"न निश्चयविसर्गाभ्यां भर्त्तुर्भार्या विमुच्यते॥")

निष्क्रान्तः, त्रि, (निर्+क्रम+क्तः।) निर्गतः। यथा, मार्कण्डेये। ८७। ५।

"भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम्।
कालीकरालवदना विनिष्क्रान्तासिपाशिनी॥"

(यथाच, महाभारते। १६। २। ४५।

"निष्क्रान्ते मयि कल्याणि तथा सन्निहितेऽनघे।
नातिविस्रोऽवमन्तव्यः प्रमादं यदहं तव॥")

निष्क्रियं, क्ली, (निर्गता क्रिया यस्य।) ब्रह्म। यथा, वेदान्तसूत्रभाष्यम्।

"निष्क्रियं निर्गुणं शान्तं निरपेक्षं निरञ्जनम्॥"

क्रियाशून्ये, त्रि। यथाह कश्चित्।

"बन्धनानि यदि सन्ति बहूनि
प्रेमरज्जुदृढबन्धनमन्यत्।
दारुभेदनिपुणोऽपि षडङ्घ्रि-
र्निष्क्रियो भवति पङ्कजबद्धः॥"

निष्क्वाथः, पुं, (निःशेषतः क्वाथो यत्र।) मांसादिक्वाथः। झोल इति भाषा। तत्पर्य्यायः। रसकः २। इति हेमचन्द्रः। ३। ७०॥

निष्टाः, पुं, (वर्णाश्रमादिभ्यो निर्गतः। निस्+"अयथातु त्यप्।" ४। २। १०४। इत्यस्य "निसो गते।" इति वार्त्तिकोक्त्या त्यप्। "इकस्तादौ तद्धिते।" ८। ३। ६०१। इति वत्वम्।) म्लेच्छजातिविशेषः। इति हेमचन्द्रः। ५। ५६८॥ (पुन्नादिः। इति महीधरः। यथा, वाजसनेयसंहितायाम्। ५। २३।

"यं मे निष्टो वर्णमाभो निचख्वान॥"

"ष्ठा ष्ठ्वे शब्दसंघातयोः। नितरां ष्ठ्वायति संघातरूपेण वर्त्तते इति निष्टाः। यद्वा, निर्गतेन श्वरीरात् ष्ठ्वायति विस्रोर्खो भवतीति निष्टाः पुन्नादिः। यद्वा, निर्गतो वर्णाश्रमेभ्यो निष्टाश्चण्डालादिः। निसो गते इति वार्त्तिकेन निस उपसर्गाद्गतार्थे त्यप् इति काशिकायाम्।" इति तत्र वेददीपः॥)

निष्ठः, त्रि, (नितरां तिष्ठतीति। नि+स्था+कः।) स्थितः। नितिष्ठतीति स्थावातोर्डप्रत्ययनिष्पन्नः॥

निष्ठा, स्त्री, (नितरां तिष्ठतीति। नि+स्था+"आतश्चोपसर्गे।" ३। १। १३५। इति कः। "उपसर्गादिति।" ८। ३। ६५। इति षत्वम् ततष्टाप्।) निष्पत्तिः। नाशः। (यथा, भागवते। ५। १२। ८।

"यदा चितावेव चराचरस्य
विदाम निष्ठां प्रभवञ्च नित्यम्॥")

अन्तः। निर्वहणम्। इत्यमरः। ३। ६। ४०॥ याच्ञा। इति मेदिनी। ठे, ६॥ क्तक्तवतू प्रत्ययौ। इति कविकल्पद्रुमटीकायां दुर्गादासः॥ (यथा, "क्तक्तवतू निष्ठा। १। १। २६। एतौ निष्ठासंज्ञौ स्तः।" इति सिद्धान्तकौमुदी।) धर्म्मादौ श्रद्धा। यथा,—

"निष्ठया हि प्रतिष्ठा स्यादनिष्ठस्य कुतः कुलम्।
ग्रसते नैष्ठिकः स्वीयं धर्म्मं त्रातुं न चेतरः॥
एकस्य देवस्य विहाय भक्त-
मेकं परश्वेड्जनतेऽपि तस्य।
तदा भवेन्नष्टयुरनैष्ठिकात्मा-
निष्ठाविहीनस्य न कापि सिद्धिः॥"

इति वैद्यकुलतत्त्वे भरतमल्लिकः॥

प्राप्यम्। यथा,—

"भगवन्तं हरिं प्रायो न भजन्त्यात्मवित्तमाः।
तेषामश्रान्तकामानां का निष्ठा विजितात्मनाम्॥")

इति श्रीभागवतैकादशस्कन्धपञ्चमाध्यायश्लोकटीकायामाख्यायां श्रीधरस्वामी॥ (नि+स्था+क्विप्। स्थितिः। यथा, ऋग्वेदे। १। ३१। १०।

"जाते निष्ठामदधुर्गोषु वीराम्॥"

"निष्ठां पूर्व्वं यथास्थितम्।" इति सायणः॥)

निष्ठानं, क्ली, (नि+स्था+करणे ल्युट्।) भक्षणम्। इत्यमरः। ३। ३। ११५॥ (यथा, रामायणे। २। ६१। ६७।

"आजेयापि च वाराहैर्निष्ठानवरसञ्चयैः।
पललैर्भक्ष्यसंसिद्धैः सूपैर्गन्धरसान्वितैः॥")

निष्ठितं, त्रि, (नि+स्था+क्तः।) नितरां स्थितम्। यथा, भागवते। २। ७। ३६।

"देवर्षिभूतनृपितृनृणां निष्ठितानां
पूर्व्वेमयेन विधिताभिरडञ्जसूर्भिः।
लोकान् व्रतां मतिविभोहमतिप्रजोभं
वेश्यं विधाय बहुभाव्यत औपधर्म्मम्॥"

"देवर्षिभूतनृपितृनृणां निष्ठितानां नितरां स्थितानाम्।" इति श्रीधरस्वामी॥ (निष्ठा ज्ञाताऽस्येति। तारकादित्वादितच्।) निष्ठाविशिष्टः। निश्चयेन स्थितश्च॥ (सम्यक्ज्ञाता। यथा, रामायणे। १। १। १४।

"रचिता स्वस्य धर्म्मस्य स्वजनस्य च रक्षिता।
वेदवेदाङ्गतत्त्वज्ञो धनुर्व्वेदे च निष्ठितः॥")

निष्ठीवः, पुं, (नि+ष्ठिव+भावे घञ्। एधोदरादित्वात् दीर्घः।) निष्ठीवनम्। इति हिरूपकोषः॥ (यथाह वाभटः।

"निष्ठीवः पार्श्वतो यायादेकस्मात्पञ्च निर्मोक्षणम्॥")

निष्ठीवनं, क्ली, (नि+ष्ठिव+भावे ल्युट्। ष्ठिवुसिध्योर्ल्युटि दीर्घो वेति स्वामी। एधोदरादित्वादिति सुबुटः।) श्लेष्मादीनां मुखेन वमनम्। छेप इति थुथु इति च भाषा॥ तत्पर्य्यायः। निष्ठेवः २ निष्ठूतिः ३ निष्ठेवणम् ४। इत्यमरः। ३। २। ६८॥ निष्ठेवा ५। निष्ठेवम् ६। इति तट्टीका॥ (यथा, मार्कण्डेयपुराणे। ३४। ७०।

"क्षुतेऽवलीढे वान्ते च तथा निष्ठीवनादिषु।
कृत्वादावचमनं सूर्य्यं गोएडस्यार्कदर्शनम्॥")

निष्ठुरं, त्रि, (नि+स्था+महुरादयश्चेति उरच्।) परुषम्। कठिनम्। इत्यमरः। ३। १। ७६॥ (यथा, माघे। ५। ४६।

"अग्रे जनैर्मुकुलिताचमनादराने
संरम्भहस्तिपकनिष्ठुरचोदनाभिः॥")

निष्ठूतं, त्रि, (नि+ष्ठिव्+क्तः। "ष्ठ्वोः श्वूठिति।" ६। ४। १६। इत्यूठ्।) क्षिप्तम्। इत्यमरः। ३। १। ८७॥

निष्ठूतिः, स्त्री, (नि+ष्ठिव्+क्तिन्। "ष्ठ्वोः श्वूठिति।" ६। ४। १६। इत्यूठ्।) निष्ठीवनम्। इत्यमरः। ३। २। ६८॥

निष्ठेवः, त्रि, (नि+ष्ठिव्+घञ्।) निष्ठीवनम्। इत्यमरः। ३। २। ६८॥

निष्ठेवणं, क्ली, (नि+ष्ठिव्+भावे ल्युट्।) निष्ठीवनम्। इत्यमरः। ३। २। ६८॥

निष्ठ्यातः, त्रि, (नितरां ख्यातिः ख्यातं। नि+ख्या+क्तः। "निनदीभ्यां ख्यातेः कौशले।" ८। ३। ८६। इति षत्वम्।) विज्ञः। निपुणः। इत्यमरः। ३। १। ४॥ (यथा, सुश्रुते सूत्रस्थाने द्वितीयेऽध्याये।

"वस्तु कर्म्मसु निष्ठ्यातो धात्र्यांश्चाप्यवचिक्षणः।
स वस्तुषु पूजां नाप्नोति वधमर्हति राजतः॥")

पारं गतः। यथा, भागवते। १। ४। २१।

"वैयास्यायन एवैको निष्ठ्यातो यदुशासत॥"

निष्पक्वं, त्रि, (नितरां पक्वम्।) अतिपक्वयज्ञनदुम्बरादि। इति भरतः॥ तत्पर्य्यायः। क्वथितम् २। इत्यमरः। ३। १। ६५॥ पक्वतासूचकश्च॥

निष्पताकध्वजः, पुं स्त्री, राज्ञां पताकासूचकदण्डविशेषः। इति युक्तिकल्पतरुः॥ तद्विवरणं ध्वजशब्दे द्रष्टव्यम्॥

निष्पत्तिः, स्त्री, (निर्+पद+क्तिन्।) समाप्तिः। सिद्धिः। यथा,—

"क्रियायाः परिनिष्पत्तिर्विद्यायाः परिदर्शनम्।
विवक्षते यदा तत्र करणं तदा स्मृतम्॥"

इति रामतर्कवागीशगृधृतकारिका॥

(नाट्यालङ्कारविशेषः। यथा, हठयोगप्रदीपिकायाम्। ४। ६६।

"आरम्भश्च घटश्चैव तथा परिचयोऽपि च।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम्॥"

तथा, तत्रैव। ४। ७६।

"यदयत्नं यदा भित्त्वा सर्व्वपीठगतोऽनिलः।
निष्पत्तौ वैखरी शब्दः क्षयहीनाक्षरो भवेत्॥")

निष्पत्राक्षतिः, स्त्री, (निष्पत्र+क्ष+भावे क्तिन्+टाप्।) सपत्राक्षतिः। अत्यन्तपीड़ा। इति हेमचन्द्रः। ६। ८॥

निष्पत्रिका, स्त्री, (निष्पत्रमस्या अस्तीति। ठन्।) करीरवृक्षः। इति राजनिघण्टः॥

निष्पदयानं, क्ली, (निष्पदं पदरहितं यानम्।) पदरहितवाहनम्। तच्च नौकादिकम्। इति

युक्तिकल्पतरुः ॥ तल्लक्षणादि नौकाशब्दे द्रष्टव्यम् ॥

निष्पन्नः, त्रि, (निर्+पद्+क्तः।) निष्पत्तियुक्तः। सम्पन्नः। तत्पर्य्यायः। सिद्धः २ निर्वृत्तः ३। इत्यमरः। ३। १। १०० ॥ (यथा, देवीभागवते। ३। ८। २२।

"निष्पावपत्रं फलं विद्धि तीर्थस्य सुनिश्चितम्॥
स्त्रीः फलं यथा लोके निष्पन्नान्नस्य भक्षणम्॥")

निष्पादनं, क्ली, (निर्+पद्+णिच्+ल्युट्।) निष्पत्तिः। निष्पत्तिनिमित्तम्। यथा, धात्वर्थतावच्छेदकफलनिष्पादकतया दर्शयितुमुपक्रान्तत्वेन कर्तृव्यापारासमुत्पाद्य फलनिष्पादनेन यैति कारकचक्रे भवानन्दसिद्धान्तवागीशः॥

निष्पादना, स्त्री, (निर्+पद्+णिच्+युच्। स्त्रियां टाप्।) निष्पत्तिप्रेरणम्। यथा,—

"यदा निष्पादनार्थस्तदा क्रियेत्र कर्त्रा करोतिः। यदा निष्पत्त्यर्थस्तदा क्रियते कटः स्वयमेवेति।"

इति रामतर्कवागीशः॥

निष्पादितं, त्रि, (निर्+पद्+णिच्+क्तः।) ज्ञातनिष्पादनम्। यथा,—

"निष्पादितं देवकुलमसंख्येयं प्रतीयते॥"

इति भारते। १। १३। ५०॥

निष्पाद्यं, त्रि, (निर् निश्चयेन पाद्यते समाप्यते इति। निर्+पद्+णिच्+यत्।) निष्पादनीयम्। (यथा, राजतरङ्गिण्याम्। २। १५८।

"हन्त बहूनि निष्पाद्ये प्रमातुं कौशीद्यमाश्रयत्।
प्रारब्धोवाध्वगो दिष्ट्या मोहितोऽसि न निद्रया॥")

साध्यम्। यथा, चेत्राद्यापारेण क्षेदनादेर्निष्पाद्यत्वात् साधनत्वमिति रामतर्कवागीशः॥

निष्पावः, पुं, (निष्पूयते सुखात्पवनयनेन शोध्यते इति। निर्+पू+णिच्+घञ्।) धान्यादीनां निस्तुषीकरणम्। बहुलीकरणम्। तत्पर्य्यायः। पवनम् २ पवः ३। इत्यमरः। ३। ८। २४॥ पूतीकरणम् ४। यथा,—

"धान्यादिनिस्तुषीकार्य्यबहुलीकरणादिषु।
तथा च पूतीकरणे निष्पावः पवनं पवः॥"

इति शब्दरत्नावली॥

राजगिम्बीबीजम्। भटवान्न इति भटयांस इति वा हिन्दीभाषा॥ तत्पर्य्यायगुणाः।

"निष्पावो राजगिम्बी स्याद्वल्लकः श्वेतगिम्बिकः।
निष्पावो मधुरो रूक्षो विषाकेऽम्लो गुरुः सरः॥
कषायस्तन्यपित्तास्रशुक्रवातविबन्धजित्।
विदाह्यल्पो विषश्लेष्मशोथकृच्छ्रकफाश्मनः॥"

इति भावप्रकाशः॥

(निष्पूयतेऽनेनेति। करणे घञ्।) सूर्पवायुः। राजमाषः। (यथा, मार्कण्डेयपुराणे। ९५। २४।

"मधु कृत्वा नरो दंशः पूपं कृत्वा पिपीलिकः।
घोरयित्वा तु निष्पावान् जायते मङ्गोलकः॥")

कङ्कुष्टः। वंशीरवः। झिल्लिका। निर्झिल्लिकायां, त्रि। इति मेदिनी। षे, ३८॥ श्वेतगिम्बी। इति रत्नमाला॥ (यथा,—

"चारातितीक्ष्णोग्रविदाहितैल-
निष्पावपिण्याककुलत्थयूषैः॥"

इति माधवकरनिदाने मूलाधिकारे॥)

निष्पावकः, पुं, (निष्पाव एव। स्वार्थे कन्।) श्वेतगिम्बी। अस्य भक्ष्यफलगुणः। मलवर्द्धकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः॥ (अस्य गुणा यथा,—

"निष्पावको वैश्वबलासशोफ-
मुक्तान्तको रूक्षगुणो विदाही।
कषायकः स्यान्मधुरो गुरुश्च
स्तन्यासृपित्तञ्च करोति वातम्॥"

इति हारीते प्रथमस्थाने दशमेऽध्याये॥)

निष्पावी, स्त्री, (निष्पाव+स्त्रियां ङीष्।) गिम्बीविशेषः। वोड़ा इति भाषा॥ सा द्विधा। तत्र हरिद्वर्णायाः पर्य्यायः। श्यामला २ फलिनी ३ नखपूर्ब्बिका ४ मक्षपी ५ फलिका ६ गिम्बी ७ गुच्छफला ८ विप्रालब्धफलिका ९ निष्पावि १० चिपिटा ११॥ शुभ्रायाः पर्य्यायः। अङ्गुलिफला १ नखनिष्पाविका २ वृन्तनिष्पाविका ३ श्यामा ४ नखपुङ्खफला ५ अग्रफला ६। एतयोर्गुणाः। कषायत्वम्। मधुररसत्वम्। कफशुद्धिकरत्वम्। मेध्यत्वम्। दीपनत्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥

निष्प्रतिभः, त्रि, (निर्गतास्ति प्रतिभा बुद्धिर्यस्य।) अज्ञः। जड़ः। इति जटाधरः॥ (निर्गता प्रतिभा दीप्तिरस्येति। दीप्तिशून्यः। यथा, हरिवंशे। ८२। ३४।

"क्षीणाकाराश्च ताराश्च सूर्य्यनिष्प्रतिभाश्च ह।
नेत्रमन्तर्दधे रूपसृष्टगन्धर्द्धिवाकरः॥")

निष्प्लवः, त्रि, (निर्गतः प्लवो यस्मात्।) निर्विघ्नः। यथा,—

"निष्प्लवः सुपारम्भे भगवतः कौमोदकीवज्रवत्॥"

इति सुरारिः॥

(क्ली, गङ्गा। यथा, काशीखण्डे। २६। १०३।

"निष्प्लवा गाकनदी निरयार्णवदीर्घनौः॥")

निष्प्रभः, त्रि, (निर्गता प्रभा अस्येति।) प्रभाशून्यः। दीप्तिरहितः। तत्पर्य्यायः। विगतः २ अरोचः ३। इत्यमरः। ३। १। १०० ॥ (यथा, रघुवंशे। ११। ८१।

"निष्प्रभश्च रिपुरास भूभृतां
धूमशेष इव धूमकेतनः॥")

निष्प्रयोजनं, त्रि, (निर्गतं प्रयोजनं यस्मिन्निति।) प्रयोजनरहितम्।

"अन्यथा हि महावाहो जघन्यासूपदेशतः।
गुरुण्यासूपदेशो हि निष्प्रयोजनतां व्रजेत्॥"

इति प्रायश्चित्ततत्त्वम्॥

(यथा, हरिवंशे। ६१। १५।

"निरानन्दं निराखादं निष्प्रयोजनमास्तम्॥")

निष्प्रवाणं, त्रि, (नितरां प्रकर्षेण क्रयते इति। निर्+प्र+पे+करणे ल्युट्।) तक्रविशुक्रवारः। नूतनवस्त्रम्। इति हारावली। ६६॥

निष्प्रवाणि, त्रि, (निर्गता प्रवाणी तन्तुवायशलाका यस्मादस्य वा। "निष्प्रवाणिश्च।" ५। ४। १६०। इति कप्रत्ययो निपात्यते।) नूतनवस्त्रम्। तत्पर्य्यायः। अनाहतम् २ तन्त्रकम् ३ नवाम्बरम् ४। इत्यमरः। २। ६। ११२॥ आहतम् ५ अहतम् ६ नववस्त्रम् ७। इति शब्दरत्नावली॥

निष्फलः, त्रि, (निर्गतं फलं यस्मात्।) फलशून्यः। यथा, "फलालोऽस्त्री स निष्फलः।" इत्यमरः। २। ४। २२॥ (यथा, देवीभागवते। ३। ८। २५

"क्षेत्रे तीर्थे यदेतानि देहान्न निर्गतानि वै।
निष्फलः श्रम एवैकः कर्षकस्य यथा तथा॥")

निष्फला, स्त्री, (निष्टृत्तं फलं यस्या इति।) पञ्चपञ्चाशद्रन्थेषु क्वचिद् गतरजस्का। इत्यमरः॥ तत्पर्य्यायः। निष्फली २ निष्फली ३ निष्फलाङ्गा ४ विफली ५ विफला ६ ऋतुहीना ७। इति शब्दरत्नावली॥ विरजाः ८ विगतार्त्तवा ९। इति जटाधरः॥

निष्फली, स्त्री, (निष्टृत्तं फलं यस्याः। ङीष्।) निष्फला। इति शब्दरत्नावली॥

निसम्पातः, पुं, (निष्टृतः सम्पातो यत्र।) निष्पीठः। निःसम्पातः। इति शब्दरत्नावली॥

निसर्गः, पुं, (नि+सृज्+घञ्।) स्वभावः। इत्यमरः। १। ७। ३८॥ (यथा, किरातार्জ্জুनीये। १। ६।

"निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनाचरितं क्व जन्तवः॥")

रूपम्। सर्गः। इति मेदिनी। गे, ४०॥ (यथा, महाभारते। १३। ८५। १२३।

"निसर्गादुत्क्रमणञ्चापि वरुणो यादसां पतिः॥"

दानम्॥ यथा, मनुः। ८। १४३।

"न त्वेवाधौ सोपकारे कौशीदीं वृद्धिमाप्नुयात्।
न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः॥")

निसिन्धुः, पुं, वृक्षविशेषः। निसिन्धा इति भाषा। तत्पर्य्यायः। सिन्धुकः २ सिन्धुः ३ तापिञ्जः ४ सुकृष्टकः ५ सिन्धुवारः ६ इक्ष्वसुरिषः ७ निर्गुण्डी ८ इक्ष्वाकिका ९। इति शब्दचन्द्रिका॥

निसूदनं, क्ली, (नि+सूद्+भावे ल्युट्।) निर्हिंसनम्। वधः। इत्यमरः। २। ८। ११३॥ (यथा, "प्रवासनं निसूदनं निर्हिंसनमिति वधपर्य्यायं प्रवासनशब्दं पठन्त्याभिधानिकाः।" इति। ९। २४२ मनुश्लोकटीकायां कुल्लूकभट्टः॥ त्रि, नि+सूद्+ल्युः। विनाशकः। यथा, रघुवंशे। ९। ३।

"उभयमेव वदन्ति मनीषिणः
समयवर्षितया सुतकर्मणाम्।
बलनिसूदनमर्थपतिञ्च तं
श्रमसुदं मनुदण्डधरान्वयम्॥")

निसृता, स्त्री, (नितरां सृता। नि+सृ+क्तः।) त्रिसृता। इति रत्नमाला॥ तेउड़ि इति भाषा॥ (त्रिसृताशब्देऽस्या गुणादयो ज्ञातव्याः॥)

निसृष्टं, त्रि, (नि+सृज्+क्तः।) त्यक्तम्। इत्यमरः। ३। १। ८८॥ (यथा, मनुः। ८। ४९।

निस्तार

"न स्वामिना निसृष्टोऽपि मृतो दास्यादिमुच्यते ।
निसर्गजं हि तत्तस्य कस्तत्तादपोहति ॥")
मध्यस्थम् । इति त्रिकाण्डशेषः ॥

निसृष्टार्थः, पुं, (निसृष्टो न्यस्तोऽर्थः प्रयोजनं यस्मिन्निति ।) दूतविशेषः । यथा,—
"निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः ।
कार्य्यप्रेष्यस्त्रिधा दूतो दूत्यकापि तथा त्रिधा ॥"
तल्लक्षणं यथा,—
"उभयोर्भाषमाणयोः स्वयं वदति चोत्तरम् ।
सुस्थिरं कुरुते कर्म्म निसृष्टार्थस्तु स स्मृतः ॥"
इति साहित्यदर्पणे ३ परिच्छेदः ॥
धनायव्ययशासनकर्त्री नियुक्तः । यथा हर्षचरितेः ।
"यः स्वामिना नियुक्तोऽपि धनायव्ययपालने ।
कुरुतेऽनधिकारज्ञो निसृष्टार्थस्तु स स्मृतः ॥"
इति व्यवहारतत्त्वम् ॥
पुरुषविशेषः । तस्य लक्षणं यथा,—
"धीरः स्थिरमतिः शूरः स्वामिकार्य्यविधायकः ।
प्रभौरुषप्रकाशी च निसृष्टार्थः स उच्यते ॥"
इति सङ्गीतदामोदरः ॥

निसनी, स्त्री, (निसतां स्तनवदाकारोऽस्यस्या इति । अच् । गौरादित्वात् ङीष् ।) वटिका । इति शब्दचन्द्रिका ॥ बड़ि इति भाषा ॥ (निर्गतौ स्तनौ यस्या इति ।) स्तनहीना च ॥

निस्तरणं, क्ली, (निस्तीर्य्यतेऽनेनेति । निर् + तॄ + करणे ल्युट् ।) उपायः । निस्तारः । तरणम् । इति मेदिनी । ने, ६६ ॥ निर्गमः । इति विश्वः ॥

निस्तर्हणं, क्ली, (निर् + तृह् हिंसायाम् + भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११४ ॥

निस्तलं, त्रि, (निरस्तं तलं स्वरूपमस्येति ।) वर्त्तुलम् । इत्यमरः । ३ । १ । ६६ ॥ (यथा, कुमारसम्भवे । १ । ३२ ।
"कक्षस्य तस्याः स्तनबद्धुरस्य
सूक्ष्मांकलापस्य च निस्तलस्य ॥")
तलम् । इति मेदिनी । ले, १०१ । (नितरां तलम् ।) तलम् । इति हेमचन्द्रः ॥

निस्तारः, पुं, (निर् + तॄ + घञ् ।) निस्तरणम् । उद्धारः । (यथा, भृङ्गारशतके । ७१ ।
"संसार तव निस्तारपदवी न पदीयसी ।
अन्तरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥")

निस्तारबीजं, क्ली, (निस्तारस्य संसारसमुद्रोत्तरणस्य बीजम् ।) संसारसरणकारणम् । तद्यथा,—
"स्मरणं कीर्त्तनं विष्णोर्वन्दनं पादसेवनम् ।
चन्दनं स्तवनं नित्यं भक्त्या नैवेद्यभक्षणम् ॥
चरणोदकपानञ्च तन्नामजपनं तथा ।
इदं निस्तारबीजञ्च सर्व्वेषामीप्सितं भवेत् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३३ अध्यायः ॥
(अपि च । महानिर्व्वाणतन्त्रे ।
"कलौ पापयुगे घोरे तपोहीनेऽति दुस्तरे ।
निस्तारबीजमेतावद् ब्रह्ममन्त्रस्य साधनम् ॥
साधनानि बहूक्तानि रागासत्त्वागमादिषु ।
कलौ दुर्ब्बलजीवानामसाध्यानि महेश्वरि ! ॥"

निस्तेज

उद्धारकारणमात्रम् । यथा,—
"जीर्णा तरिः सरिदतीवगभीरनीरा
वाता वयं सकलमित्यमनर्थहेतुः ।
निस्तारबीजमिदमेव जगोदरीणां
यन्माधव त्वयि सम्मुति कर्णधारः ॥"
इत्युणादिकोषः ॥)

निस्तितीर्षत्, त्रि, (निर् + तॄ + सन् + शृङ्ग ।) निस्तरितुमिच्छत् । यथा,—
"तत्रः सन्दर्शितो धात्रा दुस्तरं निस्तितीर्षताम् ॥"
इति श्रीभागवते । १ । १ । २२ ॥

निस्तुषक्षीरः, पुं, (निस्तुषं परिष्कृतं क्षीरं यस्येति ।) गोधूमः । इति राजनिर्घण्टः ॥

निस्तुषरत्नं, क्ली, (निस्तुषं निर्म्मलं रत्नम् ।) स्फटिकः । इति राजनिर्घण्टः ॥

निस्तुषित, त्रि, (निस्तुष + इतौ णिच् + क्तः ।) लक्षितहीनम् । त्यक्तम् । सञ्चूर्णितम् । इति मेदिनी । ते, २०२ ॥

निस्तेजाः, [स्] त्रि, (निर्गतं तेजो यस्मादिति ।) तेजोरहितः । यथा,—
"इदं कवचमज्ञात्वा कवचार्द्धं पठेत्तु यः ।
सर्व्वं तस्य वृथा देवि ! निस्तेजो न च सिद्धिदम् ॥'
इति ब्रह्मनामलीयगायत्रीकवचभाषितम् ॥
(यथा च देवीभागवते । २ । ८ । ११ ।
"ब्रह्मपत्नास्तदा मार्गे चौराभीरैश्च लुण्ठिताः ।
धनं सर्व्वं गृहीतञ्च निस्तेजाश्चार्च्चुनोऽभवत् ॥")

निस्त्रिंशः, पुं, (निर्गतस्त्रिंशद्भ्योऽङ्गुलिभ्य इति । निरादय इति समासः । "संख्यायास्तावतुरुषस्य ह्यच्वाधः ।" ५ । ४ । १५३ । इत्यस्य वार्त्तिकोक्त्या ह्यच् ।) खड्गः । इत्यमरः । २ । ८ । ८६ ॥ (यथा, महाभारते । ४ । ४१ । २४ ।
"वक्त्रलक्ष्येव निस्त्रिंशो गुरुभारसहो दृढः ॥")
निर्दये, त्रि । इति मेदिनी । शे, २१ । (यथा, अमरुशतके । ५ ।
"दृष्टोऽसि प्रणयस्खलेन भवता सैवं गिरं लालिस
दैवादद्य किलत्वमेव सुतरामस्मासु सर्वं विप्रियम् ।
मन्युर्दुःसह एव वाञ्छपथमं मौ ग्राम्यशब्दैः स्फुटम् ।
हे निस्त्रिंश ! विमुक्तकण्ठकरणं तावत् सखी रोदितु ॥")
त्रिंशत्तमूरणः । इति भरतः ॥

निस्त्रिंशधारी, [न्] त्रि, (निस्त्रिंशं धरतीति । निस्त्रिंश + धृ + णिनि ।) खड्गधारी । तल्लक्षणं यथा, मात्स्ये २८६ अध्यायः ।
"सूक्ष्मपरशुकः प्रांशुर्दृढभक्तिः कुलोचितः ।
शूरः क्लेशसहश्चैव खड्गधारी प्रकीर्त्तितः ॥"

निस्त्रिंशपत्रिका, स्त्री, (निस्त्रिंशः खड्ग इव पत्रमस्या अस्तीति । ठन् ।) कुशीलवः । इति राजनिर्घण्टः ॥

निस्त्रैंशपत्रिकः, पुं, शस्त्रधारकः । इति राजनिर्घण्टः ॥

निस्राव

निस्नेहफला, स्त्री, (निस्नेहं तैलविहीनं फलं यस्याः ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

निस्पन्दः, पुं, (नि + स्पन्द + भावे घञ् ।) स्पन्दनम् । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १२ । ३३५ । ६ ।
"मेरोः सहस्रैः सं हि योजनानां
द्वात्रिंशतोर्द्धं कविभिर्निरुक्तः ।
अनिन्द्रियाश्चानगमाश्च तत्र
निस्पन्दहीनाः सुसुगन्धिनस्ते ॥")

निस्पन्दः, त्रि, (निर्गतः स्पन्दश्चक्षुष्पक्ष्मादिस्पन्दनं यस्मात् ।) स्पन्दरहितः । ईषत्तुल्यशून्यः । यथा,
"कावेरीनीरभूमीरुहसुभगवधूशुक्लसुस्रावशिष्टः
कार्ष्णाटीचीनपीनस्तनवसनदशाश्लीलनिस्पन्दभग्नः ॥"
इति विक्रमादित्यराजसभायां रत्नदर्पणम् ॥

निस्पन्दतरं, त्रि, (निस्पन्द + तरप् ।) एकान्तस्पन्दरहितम् । यथा, नैषधे । ८ । ११ ।
"कच्छे वने नैषधकेशपाशे
निपत्य निस्पन्दतरी भवङ्गाम् ।
तस्याश्चुचुम्बं न विमोच्य गन्तु-
मपारि तल्लोचनखञ्जनाभ्याम् ॥"

निसृष्टः, त्रि, (निर्गता सृष्टा इष्टाऽनिष्टविषयवासना यस्येति ।) सृष्टामृत्यः । यथा,—
"निसृष्टः सर्व्वकामेभ्यो युक्त इत्युच्यते तदा ॥"
इति श्रीभगवद्गीतायाम् । ६ । १८ ॥

निसृष्टा, स्त्री, अनिच्छिस्त्रीदासः । यथा,—
"अगम्या निसृष्टा चापि मालिनी विष्णुवल्लभा ॥"
इति शब्दचन्द्रिका ॥
सृष्टाया अभावः । (अभावेऽव्ययीभावः ।)

निस्र(स्य)न्दः, पुं, (नि + स्यन्दू + चरणे + भावे घञ् । "अनुविपर्य्यभिनिभ्यः स्यन्देरप्राणिषु ।" ८ । ३ । ७२ । इति वा सत्वम् ।) स्यन्दनम् । क्षरणम् । यथा,—
"भाकन्दरसनिस्यन्दसुन्दरोदारकारिणौ ।
अवष्टब्धबलिग्रावेतौ बल्हिनाविव राजतः ॥"
इति प्रसन्नराघवनाटके पञ्चाक्षरमिश्रः ॥
(यथा च रामायणे । २ । ८१ । १३ ।
"जलप्रपातैरुद्भेदैर्निस्यन्दैश्च क्वचित् क्वचित् ।
अवङ्गिर्भात्यसौ शैलः स्रवन्मद इव द्विपः ॥"
निस्यन्दते इति कर्त्तरि अच् । स्यन्दशीले, त्रि । यथा, रघुः । ३ । ४१ ।
"तदङ्गनिस्यन्दजलेन यौवने
प्रलम्ब्य पुंस्त्वेन पुरस्कृतः सताम् ।
अतीन्द्रियैश्यैप्सुपपन्नदर्शनो
बभूव भावेषु दिशीपनन्दनः ॥")

निस्रावः, पुं, (निस्रावयते इति । नि + स्रु + णिच् + घञ् ।) भक्तसमुद्भवमलम् । फेन इति भाषा । तत्पर्य्यायः । मासरः २ आयामः ३ । इत्यमरः । २ । ६ । ६८ । (नि + स्रु + घञ् । स्रवः । यथा, हरिवंशे । ८६ । ६ ।
"धातुनिस्रावदिग्धाङ्गं धातुप्रसवभूषितम् ॥")

निखनः, पुं, (नि+खन+"नौ गदनदपठखनः।" ३।३।६७। इति अप्।) शब्दः। इत्यमरः। २।६।२३॥ (यथा, महाभारते। ७। २६। ३।
"यथा प्राग्ज्योतिषो राजा भगेन मधुसूदन।
त्वत्माशोऽभिनिष्क्रान्तो ध्रुवं तस्येव निखनः॥")
निखानः, पुं, (नि+खन+घञि घञ्।) शब्दः। इत्यमरः। १। ६। २३॥
निहननं, क्ली, (नि+हन+ल्युट्।) मारणम्। वधः। इत्यमरः। २। ८। ११॥
निहन्ता, [तृ] त्रि, (नि+हन+तृच्।) हननकर्त्ता। यथा, भट्टिः।
"निहन्ता वैरकारायां सतां बहुकरः सदा।
पारम्पर्यधिकारस्य शत्रुरेतत्करो रवेः॥"
(महादेवे, पुं। यथा, महाभारते। १३। १७। ७५ [महः॥")
"भगहारी निहन्ता च कालो ब्रह्मा पिता-
निहाका, स्त्री, (नियतं जहाति सुखमिति। नि+हा त्यागे+"नौ हः।" उणा ३। ४४। इति कन्।) गोधिका। इत्यमरः।१।१०।२२॥ (यथा, ऋग्वेदे। १०। ६७। १३।
"सार्कं वातस्य ध्राज्या सार्कं नक्षत्र निहाकया॥")
निहारः, पुं, (नितरां हियन्ते पदार्था येन। नि+हृ+घञ्।) नीहारः। इति शब्दरत्नावली॥
निहितं, त्रि, (नि+धा+क्त। "दधातेर्हिः।" ७। ४। ४२। इति हिः।) स्थापितम्। इति हलायुधः॥ यथा, महाभारते।३।३१२।११२।
"धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः॥"
निहिंसनं, क्ली, (नि+हिंस+भावे ल्युट्।) मारणम्। इत्यमरः। २। ८। ११३॥
निहीनः, त्रि, (नितरां हीनः। कुगतीति समासः।) नीचः। पामरः। इत्यमरः।२।९०।१६॥ (यथा, महाभारते। ३। १२। ११८।
"त इमे सिंहविक्रान्ता वीर्येणाभ्यधिकाः परैः।
निहीनैः परिक्लिश्यन्तीं वसुपेक्षन्ति मां कथम्॥")
निह्नवः, पुं, (निह्नूयते सत्यवाक्यमनेनेति। नि+ह्नु+"ऋदोरप्।" ३। ३।५७। इति अप्।) अपलापः। येन वचनं निह्नूयते सः। यथा, धारयन्नेव न धारयामीति। इत्यमरभरतौ॥ तत्पर्य्यायः। निह्नुतिः २ अपह्नुतिः ३ अपह्नवः४। इति शब्दरत्नावली॥ (यथा, याज्ञवल्क्ये।२।११।
"निह्नवे भाषितो दण्डाद्दमं राज्ञे च तत्समम्॥")
निह्नुतिः। अविश्वासः। इति मेदिनी। वे, ३८॥ (यथा, महाभारते। ५। ३०। ३०।
"न निह्नवं मन्त्रमतस्य गच्छेत्
संरक्षमाणस्य कुसङ्गतस्य॥")
शुभ्रः। इति शब्दरत्नावली॥ (मुह्निः। यथा, मनुः। ८। २१।
"ध्यायन्त्यनिष्टं यत् किञ्चित् प्राप्तिष्यामस्य चेतसा।
तस्येव चभिचारस्य निह्नवः सम्प्रयुज्यते॥")
निह्नुतिः, स्त्री, (नि+ह्नु+क्तिन्।) निह्नवः। इति शब्दरत्नावली॥
निह्लादः, पुं, (नि+ह्लाद अव्यक्तशब्दे+घञ्।) शब्दः। इत्यमरः।१।६।२३॥ (यथा, रघुः।१।४१।
"सारसैः कलनिह्लादैः क्वचिदुन्नमिताननौ॥")
निचुकं, क्ली, (निच चुम्बने+भावे क्युट्।) चुम्बनम्॥
निचा, स्त्री, (निचीयते चुम्बतीव मस्तकमिति। निच+अच्+टाप्।) लिक्षा। यूकः। हलायुधादिकोषः॥ निकी इति भाषा॥
निचिप्तं, त्रि, (निचिप्यते स्मेति। नि+क्षिप+क्तः।) न्यस्तम्। तत्पर्य्यायः। परिक्षिप्तम् २ निहितम् ३ परीतम् ४ परिवेष्टितम् ५ न्यस्तम् ६ निहस्तम् ७। इति जटाधरः॥ स्थापितधनादि। यथा,—
"निक्षिप्तस्य धनस्यैवं प्रीत्योपनिहितस्य च।
राजा विनिर्णयं कुर्य्यादक्षिपस्यासधारिणम्॥"
इति मनुः। ८। १६६॥
निक्षेपः, पुं, (नि+क्षिप्+घञ्।) न्यासः। लागः। समर्पितवस्तु। गच्छितद्रव्य इति भाषा। तत्पर्य्यायः। उपनिधिः २ न्यासः ३। इति हेमचन्द्रः॥ यथा,—
"स्वदर्थं यत्र विश्रम्भान्निक्षिपत्यविशङ्कितः।
निक्षेपो नाम तत् प्रोक्तं व्यवहारपदं बुधैः॥
असंख्यातमविज्ञातं समुद्रं यन्निधीयते।
तज्ज्ञानीयादुपनिधिं निक्षेपं गणितं विदुः॥
निक्षेपं दुर्हिरण्येषु क्रयं विक्रयमेव च।
याच्यमागो न चेद्दद्याद्दण्ड्यं पञ्चकं शतम्॥"
इति मिताक्षरायां नारदः॥ ॥
"कुलजे वृत्तसम्पन्ने धर्म्मज्ञे सत्यवादिनि।
महापक्षे धनिन्यार्य्ये निक्षेपं निक्षिपेद्बुधः॥
आधिः सीमा बालधनं निक्षेपोपनिधी स्त्रियः।
राजस्वं श्रोत्रियस्वञ्च न भोगेन प्रणश्यति॥
स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे।
न स राज्ञाभियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः॥
यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते।
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम्॥"
इति मनुः। ८ अध्याये॥
नीकः, पुं, (नीयते इति। नी प्रापणे+"अजिशुधूनीभ्यो दीर्घश्च।" उणा ३। ४०। इति कन्।) वृक्षविशेषः। इत्यादिकोषः॥
नीकारः, पुं, (नि+कृ+घञ्। "उपसर्गस्य बह्वलमन्यर्थे बहुलम्।" ६। ३। १२२। इति उपसर्गस्य दीर्घः।) न्यक्कारः। इति शब्दरत्नावली॥
नीकाशः, त्रि, (नितरां काशते इति। नि+काश+अच्। "एकः काशे।" ६। ३। १२३। इति उपसर्गस्य दीर्घः।) तुल्यः। उपमा। इत्यमरः।२। १०। ३५॥ (यथा, महाभारते। १। १८२। १३।
"आकाशनीकाशतटां तीरवानीरसङ्कुलाम्।
बभूव चरतां तत्र पुण्यतीर्थां सरस्वतीम्॥")
निश्चये, पुं। इति मेदिनी। शे, २३॥
नीचः, त्रि, (निकृष्टामीं वर्णीं श्रोभां चिनोतीति। चि+"अन्येभ्योऽपि दृश्यते।"इति डः।) हीनजातिकर्म्मा। वर्व्वरः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। विवर्णः २ पामरः ३ प्राकृतः ४ पृथग्जनः ५ निहीनः ६ अपसदः ७ जाल्मः ८ खुल्लकः ९ इतरः १०। इत्यमरः। २।१०।१६॥ अपशदः ११ खुल्लकः १२। इति भरतः॥ हीनः १३ क्षुद्रः १४ क्षुद्रः १५ वेतसः १६। इति शब्दरत्नावली॥ नीचसङ्गदोषो यथा,—
"न प्राप्नोति सुखं किञ्चिन्नीचसङ्गान्महानपि।
प्रेतसङ्गान्महादेवो नग्नो भस्मविभूषितः॥
प्रविश्य निलयं नीचः क्षीणनादिकमिच्छते।
स्वयं नेतुं न शक्नोति तदा नाशयति ध्रुवम्॥
स्थिते गुणेऽपि नीचस्तु यत्नादोषं प्रपद्यते।
किञ्चित्तु सङ्गमासाद्य तदुक्तं स्यात् सनातनम्॥
सतां श्रुत्वा गुणं नीचः श्रोतुमायाति बन्धुवत्।
ततः समयमासाद्य प्रकाशयति तद्वसु॥
मनस्येकं वचस्येकं कर्म्मण्येकं महात्मनाम्।
मनस्यन्यद्वचस्यन्यत् कर्म्मण्यन्यद्दुरात्मनाम्॥"
इति पाद्मे क्रियायोगसारे ५ अध्यायः॥
अपि च।
"बुद्धिश्च क्षीयते पुंसां नीचैः सह समागमात्।
मध्यमे मध्यतां याति श्रेष्ठतां याति चोत्तमे॥"
इति भ्रान्तिपर्व्व। ॥
अनुजः। तत्पर्य्यायः। वामनः २ व्यङ्ग ३ खर्व्वः ४ ह्रस्वः ५। इत्यमरः।३।१।७०॥ (यथा,—
"नीचरोमनखश्मश्रुर्निर्मलाङ्गमलायनः।
स्नानशीलः सुसुरभिः सुवेषोऽनुद्धतोज्ज्वलः।
धारयेत् सततं रत्नसिद्धमन्त्रमहौषधीः॥"
इति वाभटे शल्यस्थाने द्वितीयोऽध्यायः॥)
निम्नः। यथा,—
"श्लैष्यं नाम गुणस्तवेव सहजः स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवन्ति शुचयः सर्गेण यस्यापरे।
किन्वान्यत् कथयामि ते स्तुतिपदं त्वं जीवितं जीवनं
त्वच्चेन्नीचपथेन गच्छसि पयः कस्त्वां निषेद्धुं क्षमः॥"
इति शब्दचन्द्रिकः॥ ॥
चोरकर्म्मागन्तव्ये, पुं। इति राजनिर्घण्टः॥
नीचकः, त्रि, (नीच एव। नीच+स्वार्थे कन्।) वामनः। खर्व्वः। इति शब्दरत्नावली॥
नीचका, स्त्री, (निकृष्टामीं श्रोभां चकति प्रतिहन्तीति। चक प्रतिघाते+अच्। टाप्।) नैचिकी। उत्तमगवी। इत्यमरटीकायां भरतः॥
नीचकी, [न्] पुं, उच्चः। उपरिभागः। इति हलायुधः॥ उत्तमगवीमांच॥
नीचकैः, [स्] अ, (नीचैस्+"अव्ययसर्व्वनाम्नामकच् प्राक् टेः।" ५। ३। ७१। इति टेः प्रागकच्।) नीचैः। नीचैः शब्दस्य टेः पूर्व्वमकतेनाकार निष्पन्नः। यथा, उच्चकैरित्यादि॥
नीचगं, क्ली, (नीचं निम्नदेशं गच्छतीति। गम+डः।) जलम्। इति कोषान्तरम्॥ पामरे, त्रि॥

यथा, भूतडामरतन्त्रे ।
"नीचगामङ्गनां प्राप्य चन्दनेमर्कलं लिखेत् ॥"
(निम्नगे च । यथा, दृहत्संहितायाम् ।१६।२२।
"अक्षुरपटुमयूखो नीचगोऽन्येर्जितो वा
न सकलफलदाता पुष्टिदोऽतोऽन्यथा यः ॥")
नीचगा, स्त्री, (नीचं निम्नं गच्छतीति । गम+ड । टाप् ।) निम्नगा । नदी । यथा,—
"नीचगा तु नदी नीचो नीचगो नीचगं जले ।"
इति कोषः ॥
अपि च ।
"सङ्गमयति विद्वेष नीचगापि नरं सरित् ।
समुद्रमिव दुर्द्धर्षं नृपं भाग्यमतः परम् ॥"
इति हितोपदेशः ॥
नीचभोज्यः, पुं, (नीचैर्यवनादिभिर्भोज्यः ।) पलाण्डुः । इति शब्दचन्द्रिका ॥ पामरभक्ष्ये, त्रि ॥
नीचवर्त्म, क्ली, (नीचमनुत्कृष्टं वर्त्म ।) वेक्रान्तमणिः । इति राजनिर्घण्टः ॥
नीचिकी, स्त्री, नेचिकी । इत्यमरटीकायां भरतः ॥
नीचैः, [स्] व, (नि+चि+"नौ दीर्घश्च ।" उणा० ५ । १३ । इति डैसिः निगुश्चस्य दीर्घश्च ।) अल्पम् । अनुच्चम् । इत्यमरः ॥ (यथा, मेघदूते । १०८ ।
"नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥")
नीड़ः, पुं क्ली, (नितरां ईड्यते स्तूयते सुहृद्भिरलादिति । नि+ईड़ स्तुतौ+घञ् ।) पक्षिवासस्थानम् । पाखीरवासा इति भाषा ॥ तत्पर्य्यायः । कुलायः २ । इत्यमरः । २ । ५ । ३७ ॥ (यथा, भागवते । ३ । ५ । ३६ ।
"मार्गन्ति यत्ते मुखपद्मनीड़ै-
श्छन्दःसुपर्णैर्ऋषयो विविक्ते ॥")
स्थानम् । इति मेदिनी । डे, १७ ॥ (रथाधिष्ठानस्थानम् । यथा, रामायणे ।५ । ४८ । १२ ।
"स भग्ननीड़ः परिदृत्तकूबरः
पपात भूमौ हतवाजिसारथिः ॥")
नीड़जः, पुं, (नीड़े जायते इति । जन+डः ।) पक्षी । इति हेमचन्द्रः । ४ । ३८३ ॥
नीड़जेन्द्रः, पुं, (नीड़जानां पक्षिणामिन्द्रः ।) गरुड़ः । यथा,—
"अनडुहि जिघ्रनीड़जेन्द्रवेगे
क्षतनिविड़ासनसुप्तताधपीड़े ।
स्मरश्रमनुदकृतकुड़ारडिंडं
कडसुकुड़राड़िव श्रोभिचूड़मीड़े ॥"
इति प्राचीनग्रन्थस्तुतिः ॥
नीड़ोद्भवः, पुं, (नीड़े कुलाये उद्भव उत्पत्तिर्यस्य ।) पक्षी । इत्यमरः । २ । ५ । ३४ ॥
नीतं, त्रि, (नी+क्तः ।) प्राप्तम् । नेओया इति भाषा । यथा,—
"नीतं यदि नवनीतं नीतं नीतं किमेतेन ।
आतपतापितभूमौ माधव! मा धाव मा धाव ॥"
इत्युद्भटः ॥
नीतिः, स्त्री, (नीयन्ते संलभ्यन्ते उपायादय ऐहिकामुष्मिकार्था अस्यामनया वा । नी+अधिकरणे करणे वा क्तिन् ।) नयः । (नी+भावे क्तिन् ।) प्रापणम् । इति मेदिनी । ते, ३० ॥ अथ नीतिग्राह्यं लिख्यते ।
"नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः ।
विनयो ह्यौन्द्रियजयस्तद्युक्तशास्त्रमिच्छति ॥
आत्मानं प्रथमं राजा विनयेनोपपादयेत् ।
ततोऽमात्यान् ततो भृत्यांस्ततः पुत्रांस्ततः प्रजाः ॥
सदानुरक्तप्रकृतिः प्रजापालनतत्परः ।
विनीतात्मा हि नृपतिर्भूयसीं श्रियमश्नुते ॥
एवंकरणसामर्थ्यात् संयम्यात्मानमात्मना ।
नयानयनविद्वाना कुर्व्वीत हितमात्मनः ॥
जितेन्द्रियस्य नृपतेर्नीतिशास्त्रानुसारिणः ।
भवन्त्युज्ज्वलिता लक्ष्मीः कौत्तेयस्य नभस्वतः ॥"
इति नीतिमयूखद्वितीयप्रयोगः ॥
सगर उवाच ।
"यया नीत्या प्रयोक्तव्यः सुत आत्मा प्रिया तथा ।
तेषां विशेषैः सहितं सदाचारं वदस्व मे ॥"
और्व्व उवाच ।
क्रमेण शृणु राजेन्द्र ! यया नीत्या नियुज्यते ।
आत्मा सुतो वा भार्य्या वा तद्विशेषं शृणुष्व मे ॥
शास्त्रदृष्टांस्तपोदृष्टान् वयोवृद्धान् सुदर्शितान् ।
सेवेत प्रथमं विप्रानसूयापरिवर्ज्जितान् ॥
तेभ्यश्च शृणुयान्नित्यं वेदशास्त्रविनिर्णयम् ।
यदनुक्तं च तत् कार्य्यं प्राज्ञैश्चेतसृपचरेत् ॥
पञ्चेन्द्रियाणि पञ्चाश्वाः शरीरं रथ उच्यते ।
आत्मा रथी कशा ज्ञानं सारथिर्म्मन उच्यते ॥
अश्वान् सुदान्तान् कुर्व्वीत सारथिं चात्मनो वशम् ।
कशा भूप! दृढ़ा कार्य्या शरीरस्थिरता तथा ॥
अदान्तांस्तु समारुह्य सैन्धवान् स्यन्दनो यथा ।
अश्वानामिच्छया गच्छन्नुत्पथं प्रतिपद्यते ॥
यत्नावग्रः सारथिस्तु स्वेच्छया प्रेरयन् हयान् ।
नयेत् परवशं सम्यक् प्रथितं वीरमश्नुते ॥
यथेन्द्रियाणि नृपतिर्विषयार्थां परित्यजेत् ।
स्ववशानि प्रकुर्व्वीत मनोज्ञानं दृढं तथा ॥
ज्ञाने दृढे कशायां वा दृढायां नृपसत्तम ! ।
सारथिः स्ववशो दान्तोऽनीशः प्रेरयितुं हयान् ॥
अतो नृपः स्वेन्द्रियाणि वशे कृत्वा मनस्तथा ।
ज्ञानमार्गमधिष्ठाय प्रकुर्व्वीतात्मनो हितम् ॥
भोक्तव्यं स्वेच्छया भूपो न कुर्य्यादुत्पथे रतिम् ।
द्रष्टव्यमिति द्रष्टव्यं न द्रष्टव्यञ्च स्वेच्छया ॥
श्रोतव्यमिति श्रोतव्यं नाधिकं श्रवणे चरेत् ।
घ्राष्टव्यतत्त्वन्ते धीरः स्मृतिवश्यो भवेन्नहि ॥
एवं घ्राणं त्वचं वापि वशीकृत्वेच्छया नृपः ।
स्वेच्छयैवोपसृजीत गोहामं विषयं व्रजेत् ॥
एवं यदि भवेद्राजा तदा स स्याज्जितेन्द्रियः ।
जितेन्द्रियत्वे हेतुश्च शास्त्रदृष्टोपसेवनम् ॥
अदृष्टसेवशास्त्रज्ञो नृपः शत्रुवशो भवेत् ।
तस्माच्छास्त्रमधिष्ठाय भवेद्राजा जितेन्द्रियः ॥
धृतिः प्रागल्भ्यसुतृष्णा वाक्पटुत्वं विवेचनम् ।
दक्षत्वं धारयिष्णुत्वं दानं मैत्री क्षतज्ञता ॥
दृढ़शासनता सत्यं शौचं मतिविनिश्चयः ।
पराभिप्रायवेदित्वं चारित्रं धैर्य्यमापदि ॥
लोकधार्य्यगुप्तिश्च गुरुदेवद्विजार्च्चनम् ।
अनलस्या ह्यकोपित्वं गुणानेतान्नृपोऽभ्यसेत् ॥
कार्य्याकार्य्यविभागश्च धर्म्मार्थौ काममेव च ।
दानस्य विषये सामयोगमेवोपलक्षयते ॥
सततं प्रतिबुध्येत कुर्य्यादवसरेऽपि तत् ।
साम दानञ्च भेदश्च दण्डश्चेति चतुष्टयम् ॥
शास्त्रोपायांस्तु तत्स्थाने तानुपायान् प्रयोजयेत् ।
साम्नस्तु विषये भेदो मध्यमः परिकीर्त्तितः ॥
दानस्य विषये दण्डो ह्यधमः परिकीर्त्तितः ।
दण्डस्य विषये दानं तदप्यधममुच्यते ॥
साम्नस्तु गोचरे दण्डो ह्यधमाद्यधमः स्मृतः ।
सौजन्यं सततं ज्ञेयं भूभृतो भेददण्डयोः ॥
साम्नो दानस्य च तथा सौजन्यं याति गोचरे ।
कामः क्रोधश्च लोभश्च हर्षो मानमदौ तथा ॥
एतानरिषड्वर्गान् शत्रूनिव विशातयेत् ।
सेवाः कार्य्येषु युञ्जीत लोभगर्व्वौ विवर्ज्जयेत् ।
तेज एव नृपाणान्तु तीव्रं क्रूरस्य दैवतम् ॥
तत्र गर्व्वं रोगयुक्तकायवत्तन्तु संत्यजेत् ।
आखेटकाक्षौ स्त्रीसेवा पानञ्चैवात्मदूषणम् ॥
वाग्दण्डयोश्च पारुष्यं सप्तैतानि विवर्ज्जयेत् ।
परस्त्रीषु विरक्तासु सेवामेकान्ततश्चरेत् ॥
सतीषु निजनारीषु प्रेम्णा कुर्य्याच्च सेवनम् ।
रतिपुत्रफला दारास्तांस्तु नैकान्ततश्चरेत् ॥
तयोः सिद्धेऽपि स्त्रियः सेवा वर्ज्जयित्वातिसक्तताम् ।
ह्यगयाक्षं प्रमादार्त्तां स्थानं नित्यं विवर्ज्जयेत् ॥
अर्च्चांस्तथा न कुर्व्वीत सतकार्य्यांश्चक्तिनाशनान् ।
अन्धैः सतं कदाचित्तु सेवेत नात्मनाचरेत् ॥
अकार्य्यकरणे बीजं हत्वागाच्च विवर्ज्जनम् ।
वर्जयेत् सततं पानं शौचमाङ्गल्यनाशनम् ॥
अर्थक्षयकरं नित्यं त्यजेच्चैवात्मदूषणम् ।
अभिग्रस्तेषु चौरैश्च घातकैश्चाततायिषु ।
सततं पृथिवीपालो दण्डपारुष्यमाचरेत् ॥
नान्यत्र दण्डपारुष्यं कुर्य्यान्नृपतिसत्तमः ।
वाक्पारुष्यन्तु सर्व्वत्र नैव कुर्य्यात् कदाचन ॥
रक्षणीयं सदा सत्यं सत्यमेकं परायणम् ।
क्षमां तेजस्विताञ्चैव प्रज्ञावानृप आचरेत् ॥
यानासनाश्रयद्वैधसन्धयो विंशदीरिताः ।
अभ्यसेत् षड्गुणानेतान् तेषां ज्ञानञ्च शाश्वतम् ॥
यः प्रमादं न जानाति स्वामे दृष्टौ तथा व्यये ।
कोषे जनपदे दण्डे न च राष्ट्रेऽवतिष्ठते ॥
कोषे जनपदे दण्डे चैकैकञ्च त्रयं त्रयम् ।
प्रज्ञावादिनिगृह्णीत रक्षेन्नैकान्ततश्चिरम् ॥
मित्रे शत्रावदासीने प्रभावं विप्रपीड़येत् ।
उत्पन्नो विजिगीषायां धर्म्मस्तत्रोदवर्त्तके ॥
शरीरयात्रानिर्व्वाहे क्रियेत सततं नृपैः ।
मन्त्रनिश्चयसम्भूतां बुद्धिं सर्व्वत्र योजयेत् ॥
अमात्ये शाश्वते राज्ये पुत्रेष्वन्यपुरेषु च ।
ह्यदिदर्शनेच भाविष्यं स्वस्यानां तरसाधनम् ॥
आदानं सैन्यकरयोर्व्वस्तनं गजवाजिनोः ।
मूल्यसञ्चयसञ्जातान्च योगं सततं व्रजेः ।
प्रपाचागारसेतूनां रक्षणञ्चेति चरमम् ॥

एतदर्थासु वर्गेषु चारान् सम्यक् प्रयोजयेत् ॥
कार्य्याकार्य्यविभागाय चारवर्गाधिकारिणाम् ।
अष्टौ चारान्नियुञ्जीयादष्टवर्गेषु पार्थिवः ॥
दशसन्धेषु युञ्जीत क्रमतः शृणु तानि मे ।
स्वामिसचिवराष्ट्राणि मित्रं कोषो बलन्तथा ॥
दुर्गन्तु सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितम् ।
दुर्गयुक्तस्वाष्टवर्गे चारं नाम्नि योजयेत् ॥
तस्मादिमानि ज्ञेयानि पञ्च चारपदानि तु ।
शुद्धान्तेष्वेव पुत्रेषु सक्तूपादौ महानसे ॥
अग्र्यदासीनयोधेषु बलावलविनिश्चये ।
आदौ दशसु चैतेषु चाराञ्ज्ञात्वा प्रयोजयेत् ॥
न यत् प्रकाशं जानीयात् तत्तु चारैर्निरूपयेत् ।
निरूप्य तत्प्रतीकारमवश्यं क्षिप्रतश्चरेत् ॥
यथा नियोगसेतेषां यो यो यत्राप्यधाश्चरेत् ।
ज्ञात्वा तत्र नृपश्चारैर्दण्डयेद्वा नियोजयेत् ॥
चारांस्तु मन्त्रिणा सार्द्धं रहस्ये संस्थितो नृपः ।
प्रदोषसमये एकैकान्तदानीमेव साधयेत् ॥
स्वपुत्रे चाथ शुद्धान्ते ये तु चारा महानसे ।
निगूढास्तान् मध्यरात्रौ एकैकेनापि मन्त्रिणि ॥
एतान् चारान् स्वयं पश्येन्नृपतिर्मन्त्रिणा विना ।
अन्यांश्च मन्त्रिणा सार्द्धं निरूप्य प्रदिशेत् फलम् ॥
नैकवेषधरश्चारो नैको गीतसाहवर्जितः ।
संस्तुतो नहि सर्व्वत्र नातिदीर्घो न वामनः ॥
सततं न दिवाचारी न रोगी नाप्यबुद्धिमान् ।
न वित्तविभवैर्हीनो न भार्य्यापुत्रवर्जितः ॥
कार्य्यचारो नृपतिना शुद्धतत्त्वविनिर्णये ।
अनेकवेषग्रहणक्षमं भार्य्यासुतैर्युतम् ॥
बहुदेशज्ञबोधिज्ञं पराभिप्रायवेदकम् ।
दृढभक्तं प्रकुर्व्वीत चारं शस्त्रमयाभयम् ॥
अधितिष्ठेत् स्वयं राजा कृषिमात्मसमैक्षया ।
वणिक्पथे च दुर्गादौ तैस्तैश्चारैर्योजयेत् ॥
अन्तःपुरे पितृसुल्यान् श्रोत्रान् दक्षान्नियोजयेत् ।
वक्तान् प्रकाशया दक्षान् स्त्रियो या बुद्धितत्-
पराः ॥ * ॥
शुद्धान्तचारि युञ्जीयात् स्त्रियो दक्षा मनीषिणीः ।
नैकः स्पृशेत् कदाचित्तु नैको भुञ्जीत पार्थिवः ॥
नैकाकिनीन्तु महिषीं प्रवेष्टेच्चाय नैकवः ।
अमात्यानुपधाशुद्धान् भार्य्याः पुत्रांस्तथैव च ॥
प्रकुर्य्यात् सततं भूपः स्वप्रसादं समाचरन् ।
धर्म्मार्थैकाममोक्षेषु प्रत्येकपरिशोधनैः ॥
उपेत्य क्षीयते यस्मादुपधा परिकीर्त्तिता ।
अथ कामोपधाभ्यस्तु भार्य्याः पुत्रांस्तु शोधयेत् ॥
धर्म्मार्थाभिर्विशुद्धांस्तु सर्व्वाभिः सत्यवान् पुनः ।
एभिर्थैस्तैस्तथा दानैरिङ्गितैश्च नृपता भवेत् ॥ * ॥
तस्मात्सर्वासु राज्यार्थी धर्म्ममेवं समाचरेत् ।
अग्नेर्वाभिचारेण यत्नेनो पार्थिवो क्षयम् ॥
प्राप्नोत्यचिरात् राजा तं भविष्यसि न संशयः ॥
इति धर्म्मो नृपस्यैव अश्वमेधादिकञ्च यत् ।
स्वर्गं न कुरुते भूयस्तस्मात्तं कुरु सत्तम ! ॥
एवं मन्त्रैर्नयन्नीत्या नृपः कार्य्यालिकान् दिशान् ।
तैरज्ञातान् स्वयं ज्ञात्वा शक्नोयात्तस्य तेजसः ॥
यदि राज्याभिलाषेण सचिवो धर्म्ममाचरेत् ।
नृपतौ वाधिकं कुर्य्याद्धर्म्मे तं हीनतां नयेत् ॥
आभिचारिकमत्यर्थं कुर्व्वाणन्तु विघातयेत् ।
प्रवासयेद्ब्राह्मणन्तु पार्थिवो ह्याभिचारिकम् ॥
एषा धर्म्मोपधा ज्ञेया तैरमात्यान् सदा चरेत् ।
एताङ्गौ तथैवान्यासुपधा धर्म्मतश्चरेत् ॥ * ॥
कोषाध्यक्षान् समामन्त्र्य राजामात्यान् प्रती-
क्षयेत् ।
पुत्रानन्यान् प्रति तथामन्त्र्य संवरवत्तमान् ॥
अयं हि प्रचुरः कोषो सदायत्तो नरोत्तम ।
आनये तव सम्मत्या तदयं त्वं प्रतीच्छसि ॥
तवाप्यलब्धदक्षाकं जीवनञ्च भविष्यति ।
त्वत्तापि प्रचुरैः कोषैः किं किं नो वा करिष्यसि ।
एवमन्यैः कोषगतैरुपायैरुपसत्तम ॥
पुत्रामात्यादिकान् सर्व्वान् सततं परिशोधयेत् ।
कोषदोषकरान् हन्याद्दुर्गमित्यूचिवारयेत् ॥
देशचित्तान् विमन्येत कुर्य्याद्धे कोषरक्षणम् ॥ * ॥
दासीञ्च शिल्पिनीवृंद्वा मेधाधृतिमतीः स्त्रियः ।
अन्तर्ब्बहिश्च या यान्ति विदिता सचिवादिभिः ।
ता राजा रहसि स्थित्वा भार्य्यादिभिरलक्षितः ॥
अभिमन्त्र्याथ संमन्त्र्य प्रेरयेत् सचिवान् प्रति ।
ता गत्वा हृदयं बुद्ध्वा स्त्रियो वै ज्ञाततत्परा ॥
महिषीप्रमुखा राज्ञस्तं वै कामयते शुभाः ।
तवाहं योनयिष्यामि यदि ते वर्त्तते स्पृहा ।
सचिवस्त्वां कामयते तदयोग्यो वरवर्णिनि ! ।
तं सङ्गमयितुं शक्ता यदि श्रद्धा तवास्त्यहम् ॥
इत्यनेन प्रकारेण नानोपायैस्तथेतरैः ।
भार्य्याः पुत्रीर्दुहितृश्च स्वसृश्च प्रमुखास्तथा ॥
शोधयेत् सचिवान् पुत्रान् पौत्रादीन् सेवकां-
स्तथा ।
कामोपधाविशुद्धासु ज्ञातयेदविचारयन् ॥
स्त्रियश्च दक्षा योग्येन ज्ञापकासु प्रवासयेत् ।
मोक्षमार्गावसक्तासु हिंसापैशुन्यवर्जितम् ।
धर्म्मैकसारं नृपतिः सचिवं परिवर्ज्जयेत् ॥
मोक्षमार्गावसक्तासु दक्षाश्चापि न दक्षयेत् ।
अस्वदुष्टासु सर्व्वत्र तस्मात्तं परिवर्ज्जयेत् ॥ * ॥
इति ऊनं मयोपधानामुपधां बहुधा पुनः ।
विवेचिता शोधनस्य तच्छास्त्रे तत्र बोधयेत् ॥
विग्रहं सततं राजा परैर्न सम्यगाचरेत् ।
भूवित्तमित्रलाभेषु निश्चितेष्वेव विग्रहः ॥
सप्ताङ्गेष्वप्रमादश्च सदा कार्य्यो नृपोत्तमैः ।
कोषस्य सञ्चयं रक्षां सततं सम्यगाचरेत् ॥ ॥
मन्त्रिणस्तु नृपः कुर्य्याद्विप्रान् विद्याविशारदान् ।
विषयज्ञान् कुलीनांश्च धर्म्मार्थकुशलाञ्शुचीन् ॥
मन्त्रयेत्तैः सभं काले नात्यर्थं बहुभिश्चरेत् ।
एकैकेनैव कर्त्तव्यं मन्त्रस्य तु विनिश्चयम् ॥
मन्त्रेष्वेव समस्तेषु धान्यस्य त्वपदेशतः ।
मन्त्रभूतं मन्त्रयेत् स्वतन्त्रस्य मन्त्रयेत् ॥
अरण्ये गिरिशृङ्गे वा न यामिन्यां कदाचन ।
शिशून् शास्त्रज्ञशून् मन्त्रान् शुकान् वै शारि-
कास्तथा ॥
गर्ब्भेष्वन्तर्गतेषु मनुष्यानुद्धतांस्तथा ।
दूरस्थं मन्त्रभेदेन नृपाणां यत्र जायते ॥
न तच्छक्यं समाधातुं दक्षैर्नृपशतैरपि ।
दक्षांस्तु दक्षयेद्दक्षैरदक्षान् दक्षयेन्नहि ॥
अदक्षयन्नृपो दक्षानदक्षांश्चापि दक्षयन् ।
नृपतिर्याचितां प्राप्य चौरकिल्बिषमाप्नुयात् ॥ *॥
दुर्गन्तु सततं कुर्य्यात् प्राकारापूर्णतोरणैः ।
दूषिताम्बुगराद्राणा दूरे दुर्गाश्रयं चरेत् ॥
दुर्गे बलं नृपाणान्तु नित्यं दुर्गे प्रशस्यते ।
शतमेको योधयति दुर्गस्थो यो धनुर्धरः ॥
शतं दशसहस्राणि तस्माद्दुर्गं प्रशस्यते ॥
जलदुर्गं भूमिदुर्गं वृक्षदुर्गं तथैव च ।
अरण्यवनदुर्गञ्च ज्ञेयं परिखोद्भवम् ।
दुर्गं कार्य्यं नृपतिना यथायोग्यं स्वदेशतः ॥
दुर्गेष्वेव पुरस्कुर्य्यात्रिकोणं धनुराकृति ।
वर्त्तुलं वा चतुष्कोणं नान्यथा नगरं चरेत् ॥
अदङ्गाकृतिदुर्गञ्च सततं कुलगाश्रयम् ।
यथा राक्षसराजस्य लङ्का दुर्गा छिता पुरा ॥
यथैः पुरं श्रोत्रियाख्यं तेजो दुर्गे प्रतिष्ठितम् ।
यत्तदाजनकाकारमतो भद्रः श्रिया वृतः ॥
सौभाख्यं शाल्वराजस्य नगरं पञ्चकोद्यकम् ।
दिवि यद्वर्त्तते राज्यंस्तच्च भद्रं भविष्यति ॥
दधायोध्याश्रयं भूप ! पुरमिक्ष्वाकुभूभुजाम् ।
धनुराकृति तत्रापि ततो भूरिजयप्रदम् ॥
दुर्गभूमौ यतेद्दुर्गा दिक्पालांश्चैव द्वारतः ।
पूजयित्वा विधानेन जयं भूपः समाप्नुयात् ।
ततो दुर्गं नृपः कुर्य्यात् सततं जयवृद्धये ॥ * ॥
न ब्राह्मणान् सदा राजा कदाचिदवमन्यते ।
अवमत्य नृपो विप्रान् प्रेत्येह दुःखभाग्भवेत् ॥
न विरोधस्तु तैः कार्य्यः स्वानि तेषां न चादिशेत् ।
ज्ञात्वाकालेषु सततं तानेव परिपूजयेत् ।
तेषां निन्दां प्रकुर्व्वीत नाभ्यसूयां तथाचरेत् ॥
एवं नृपो महाबुद्धिस्सङ्गमङ्गलसंयतः ।
अष्टमादौ चारचक्षुर्गुणवान् सुधिषंवदः ॥
प्रेत्येह महतीं सिद्धिं प्राप्नोति सुखभोगवान् ।
यैर्गुणैर्योधितश्चात्मा तैः पुत्रानपि योजयेत् ॥
नृपस्य च सतत्त्वज्ञं सततं स्वं विनाशयेत् ।
सतन्त्रो भूपतनयो विकारं याति विश्वयम् ॥
निर्व्विकाराय सततं तत्त्वज्ञैः परिपूजयेत् ।
भोजने शयने याने पुत्रवामाश्च वीक्षणे ॥
नियोजयेत् सदाचारान् भूपः कामविचेष्टने ।
असतन्त्राः स्त्रियो नित्यं ज्ञानये संभवन्ति हि ॥
तस्मात् कुमारं महिषीसुपधाभिर्नियोधरैः ॥
शोधयित्वा नियुञ्जीत यौवराज्यावरोधयोः ।
अन्तःपुरपरीवेषे तु सतन्त्रं निषेधयेत् ॥
भूपपुत्रस्य भार्य्याया बहिःसारे तथैव च ।
अयं विशेषः संक्षेपान्नृपधर्म्मो मयोदितः ॥
पुत्राणां शुश्रूषायां भार्य्यानामपि भूपते ।
उग्रा राजनीतीनां तत्राणि च वदिष्यति ॥
चकारान्यान् विशेषांस्तु तयोक्तत्वेन शोधयेत् ।
एवं राजा महाभागो राजनीतौ विशेषताम् ।
कुर्व्वन्न सीदति सदा भूयश्चीं श्रियमश्नुते ॥"
इति कालिकापुराणे राजनीतिविशेषे ८५
अध्यायः ॥ * ॥

अन्यत्तु औशनसस्मृत्यङ्गिरःकामन्दकपञ्चतन्त्रनीतिमयूखहितोपदेशग्रन्थावलम्बभारतीय-राजधर्म्मादौ द्रष्टव्यम् ॥

नीतिघोषः, पुं, (नीतिरेव नीत्यात्मको वा घोषो रवो यस्येति ।) दृढस्फोटकः । इति चिकित्सा-शेषः ॥ (नीतेर्नयस्य घोषः ।) नयध्वनिश्च ॥

नीतिसारः, पुं, (नीतिरेव सारो यस्येति ।) इन्द्रं प्रति दृढस्फोटकमुक्तनीतिग्राह्यविशेषः । अयं चाणक्यसंग्रहश्लोकः । गरुड़पुराणे अष्टाध्यायेष्वस्ति । बाहुल्यभिया तत् सम्प्रदायं न लिखित्वा अष्टानामध्यायानां प्राथमिकाष्टश्लोका लिख्यन्ते । यथा,—

"सङ्गिः सङ्गं प्रकुर्व्वीत सिद्धिकामः सदा नरः ।
नासङ्गिरिह लोकाय परलोकाय वा हितम् ॥१॥
आपदर्थं धनं रक्षेदारान्रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेदारैरपि धनैरपि ॥ २ ॥
यो ध्रुवाणि परित्यज्य अध्रुवाणि च सेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥ ३ ॥
राज्यं पालयते नित्यं सत्यधर्म्मपरायणः ।
निर्ज्जित्य परसैन्यानि क्षितिं धर्म्मेण पालयेत् ॥४॥
भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ।
नियोक्तव्या यथार्हेषु त्रिविधेष्वेव कर्म्मसु ॥ ५ ॥
गुणवन्तं नियुञ्जीत गुणहीनं विवर्ज्जयेत् ।
पण्डिते च गुणाः सर्व्वे सर्व्वे दोषाश्च केवलम् ॥६॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥७॥
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम् ।
कुवस्तुञ्च कुदेशञ्च दूरतः परिवर्ज्जयेत् ॥"८॥

इति गारुड़े ॥

नीयः, पुं, (नयति प्रापयतीति । नी + "हनि-कुषिनीरमिकाशिभ्यः क्थन् ।" उणा २ । २ । इति क्थन् ।) नियन्ता । प्रापयिता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (नी + भावे क्थन् । नयनम् । इति उज्ज्वलदत्तः ॥ यथा, ऋग्वेदे । १ । १०० । १२ ।

"सहस्रचेताः घृतनीथ ऋभ्वा ॥"

क्लीबम् । यथा, ऋग्वेदे । ३ । १२ । ५ ।

"नीथाविदो ऽरितारः ॥"

"नीथाविदस्तोत्राभिज्ञाः ।" इति तद्भाष्ये सायनः ॥)

जले, क्ली । इति संक्षिप्तसारोणादिवृत्तिः ॥ (नीयतेऽनेनेति । करणे + क्थन् । प्रापणहेतु-भूते, त्रि । यथा, ऋग्वेदे । १ । १०४ । ५ ।

"प्रत्न यत्स्था नीथादर्शि ॥"

"यद्यदा नीथा नयनहेतुभूता स्था सा पदवी प्रत्यदर्शि ।" इति तद्भाष्ये सायनः ॥)

नीर्म्म, क्ली, (नितरां म्रियत इति । नि + मृ + मूल-विभुजादित्वात् कः ।) वल्मीकम् । वनम् । नेमिः । चन्द्रः । रेवतीनक्षत्रम् । इति हेम-चन्द्रः ॥ नीव्रमपि पाठः ॥

नीपः, पुं, (नी + "पानीवेविभ्यः रः ।" उणा ३ । २१ । इति रः । बाहुलकात् गुणाभावः ।) कदम्बवृक्षः । इत्यमरः । २ । ४ । ४२ ॥ (यथा, ऋतुसंहारे । ३ । २१ ।

"त्यक्ता कदम्बकुटजार्জ্জुनसर्জ্জनीपान्
सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥"

क्वचित् क्ली । यथा,—

"नीपं सभार्गकं पीलु क्षवशूल्यं विकङ्कतम् ।
प्राचीनामलकञ्चैव दोषघ्नञ्चरहारि च ॥"

इति चरके सूत्रस्थाने सप्तविंशोऽध्याये ॥

"गरदोषहरं नीपं प्राचीनामलकन्तथा ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

धाराकदम्बः । इति राजनिर्घण्टः ॥ वन्यकृ-त्यः । नीलाशोकवृक्षः । इति मेदिनी । पे, ८ ॥

नीयमानं, त्रि, (नीयते इति । नी + कर्म्मणि यानच् ।) प्राप्यमाणम् । यथा, कालिकापुराणे ।

"नीयमानो न गच्छेच्चेन्महिषीमरणं तदा ॥"

नीरं, क्ली, (नयति प्रापयति स्थानात् स्थानान्तर-मिति । नी प्रापणे + "स्फायितञ्चीति ।" उणा २ । १३ । इति रक् । यद्वा, "अयेरापः ।" इति श्रुतेः निर्गतं रादस्येरिति, "अङ्गोऽधि-र्नेत्रजलः क्षरणम् ।" इति स्मृतेः निर्गतो रोऽधि-र्यस्मादिति वा । "दूरोपे पूर्व्वस्य दीर्घोऽयः ।" ६ । ३ । २२ । इति रूपोपे पूर्व्वदीर्घः ।) जलम् । इत्यमरः । १ । १० । ४ ॥ (यथा, गीतगोविन्दे । १ । ८ ।

"क्षयसि विक्रमसे वलिमद्भुतवामन
पदनखनीरजनितजनपावन ।
केशव धृतवामनरूप
जय जगदीश हरे ॥")

रसः । इत्युणादिकोषः ॥ नीरे अन्नेप्रशस्यानि यथा, गरुड़पुराणे ।

"निष्ठीवाद्यक्तमूत्रास्थिविवाग्यश्रु न संक्षिपेत् ॥"

(अस्य पानविधेयता विधीयते यथा,—

"वाप्युद्भवन्तत् प्रवदन्ति धीरा
नीरं समासेन निगद्यतेऽत्र ।
यत् श्रीमतार्च्चैव महायतीनां
बलप्रदं पथ्यतरं प्रदिष्टम् ॥"

"विप्लुत्रे क्षवशैलिका विषयुतं तप्तं घनं पैत्तिकं दन्तघ्नाश्रमनार्त्तवं हि सलिलं दुर्गन्धि वै गर्हितम् ।
नागाजीवदिमिश्रितं गुरुतरं पर्य्यायपङ्कावित-श्चन्द्रार्कांशुसुगोपितं न च पिबेन्नीरं सदोषा-न्वितम् ॥"

इति हारीते प्रथमस्थाने सप्तमेऽध्याये ॥)

नीरजं, क्ली, (नीरे जले जायते इति । जन + ड: ।) कुठौषधिः । (यथा, सुश्रुते चिकित्सित-स्थाने । २५ ।

"पद्मोत्पलं लौहरजोऽञ्जनञ्च
यष्ट्याह्वयं नीरजसारिवे च ॥")

पद्मम् । इति मेदिनी । जे, २४ ॥ (यथा, भ्रम-राष्टके । ४ ।

"नीतं यत्र नवीननीरजवने पीतं मधु स्वेच्छया ॥")

सुक्ता । इति राजनिर्घण्टः ॥ जलजाते, त्रि ॥

नीरजः, पुं, (नीरे जायते इति । जन + ड: ।) उदञ्जनुः । इति शब्दरत्नावली ॥ उशीरी । इति राजनिर्घण्टः ॥ (महादेवः । यथा, महा-भारते । १३ । १७ । ९४६ ।

"उद्भिज्जिविक्रमो वैद्यो विरजो नीरजोऽमरः ॥")

नीरजः, [स्] त्रि, (निर्गतो रजो धूलिः कुसुमपरागादिर्वा यस्य ।) निर्मलिदेशपुष्पादि । (यथा, महाभारते । १३ । ८१ । २० ।

"सर्व्वा मणिमयी भूमिः सर्व्वकाञ्चनवालुका ।
सर्व्वर्त्तुसुखसंस्पर्शा निष्पङ्का नीरजाः शुभाः ॥")

अरजस्कायाम् स्त्री ॥

नीरतः, त्रि, (निर्गतं रतं रमणं यस्मात् ।) विरतः । रमणाभाववान् । यथा,—

"दिशि दिशि नीरतरङ्गो नीरतरङ्गो ममापि हृदयेशः ।
आकाताः खलु वर्षा वर्षादपि यासु बाबरो दीर्घः ॥"

इत्युद्भटश्रीधरदत्तम् ॥

नीरदः, पुं, (नीरं जलं ददातीति । नीर + दा + कः ।) मेघः । यथाह चटकपरः ।

"निश्चितं खलुपेत्य नीरदैः प्रियशीला हृदयावनीरदैः ।"

सुस्थकम् । इति राजनिर्घण्टः ॥ (निर्गतो रदो दन्तो यस्य ।) रदशून्ये, त्रि ॥ यथा,—

"आस्वाद्य निरवधेयं विरहिवधूनां हृदूनि मांसानि ।
करकामिषेण मन्ये निर्हीवति नीरदोऽस्थीनि ॥"

इत्युद्भटः ॥

नीरधिः, पुं, (नीराणि धीयन्तेऽस्मिन्निति । नीर + धा + "कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः ।) समुद्रः । इति शब्दरत्नावली ॥

नीरनिधिः, पुं, (नीराणि निधीयन्तेऽत्रेति । नीर + नि + धा + किः ।) समुद्रः । इति शब्द-रत्नावली ॥ (यथा, माघे । ३ । ७० ।

"पारे जलं नीरनिधेरपश्य-
न्नुरारिरारोलपलाशराशीः ॥")

नीरन्ध्रं, त्रि, (निर्गतं रन्ध्रं छिद्रं यस्मिन् ।) घनम् । इति हेमचन्द्रः । ६ । ८३ ॥ (यथा, माघे । ८ । ३ ।

"नीरन्ध्रमग्निश्रियां भुवं व्रजन्तीः
साशङ्कं सुहुरिव कौतुकात् करेणाः ।
पश्यन्तीः चलमलिनाकुलीलतानां
शाखानामतुहिनरश्मिरन्तराले: ॥")

छिद्ररहितम् । यथा,—

"श्रीमन्नाथ तवार्जितोर्জितयशः संग्रहसुक्तावली-मादायैव विधिर्विधित्सुरमलं हारं त्वदीये-र्गुणैः ।
नीरन्ध्रामवलोक्य तामपि ततो नान्तं गुणानामहो
उत्पित्सुर्मुमुचे गलान्तरे सकिरन्ताक्षाक्षत-श्चारुकाः ॥"

इति काश्मीरदासः ॥

नीरसः, पुं, (नितरां रसो यत्र।) दाडिमः। इति हारावली। (निर्गतो रसो यत्र।) रसशून्ये, त्रि। यथा,—
"अङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्।
स एव चेदङ्गारी नीरसं सर्व्वमेव तत्॥"
इति प्राचः॥

नीराजुः, पुं, (नीरस्य आजुः।) उष्ट्रः। उट्टिकाल इति भाषा। तत्पर्य्यायः। जलनकुलः २ जलविड्वालः ३ जलश्वः ४। इति हारावली। ५। उष्ट्रः ५ जलाखुः ६ नीरजः ७ नकुलः ८। इति शब्दरत्नावली॥

नीराजनं, क्ली, } (राज दीप्तौ+ल्युट्।
नीराजना, स्त्री, } नितरां राजनं यत्र। निर्+राज्+णिच्+"शासवसघञो युच्।"३। ३। १०७। इति भावे युच्।) वाहनायुधादेर्निःशेषेण राजनं यत्र सा नीराजना। नीरस्य शान्त्युदकस्य जनं क्षेपो यत्र सा नीराजना वा। इत्यमरटीकायां भरतः॥ *॥
तद्विधानं यथा,—
"शरत्काले महारम्भां दुर्गायाः परिपूजनम्।
नीराजनं दशम्यान्तु कुर्य्याद्वै वलवृद्धये॥
विधिं नीराजनस्य त्वं शृणु पार्थिवसत्तम!।
कृतेन येन चाश्वानां गजानामपि चेष्टनम्॥
आश्विने शुक्लपक्षे या तृतीया स्वातियोगिनी।
ऐशान्यां खपुरस्यैव यात्रीयात् स्थानमुत्तमम्॥
नीराजनं ततः कुर्य्यात् संप्राप्ते दिवसेऽमले।
नीराजनस्य कालस्तु पूर्व्वसूक्तस्तु ते मया॥
विधानमत्र शृणु मे कृतज्ञो भविष्यसि।
एवं हयं महाखड्गं सुमनोहरमेव वा॥
पूजयेत् सप्तदिवसान् गन्धपुष्पादिकांशुभिः।
कृतौयादौ पूजयित्वा नयेत्तं यज्ञमण्डपम्॥
चेष्टां विरूपयत्नस्य जानीयाच्च शुभाशुभम्।
परराष्ट्रविमर्दः स्याद्यदि पलायते॥
म्रियते राजपुत्रस्तु यदि चाश्वश्च सुप्यति।
नीयमानो न गच्छेच्चेन्महिषीमरणं तदा॥
तथैव सुखनाशाधिशृङ्गं कुर्य्याद्यदि यदि।
वसुवाहाभिमुखः कुर्य्यात्तत्काल्यां जयेद्रिपून्॥
उत्तीर्य्य दक्षिणाग्रन्तु पदमात्रं भवेत् पुरा।
तदा जयेत् समस्तांश्च नृपतिर्विजयेद्रिपून्॥
प्रातर्नीराजनं कुर्य्याद्दशम्यां नृपसत्तम!।
तदग्नौ तु दहेद्यत्नात् तस्यामेव समाचरेत्॥
कार्त्तिके पञ्चदश्यां वा तत्राभावे तु पार्थिवः।
ऐशान्यां खपुरस्योर्द्धसमाने शोभने॥
दशहस्तन्तु विपुलं कुर्य्याद्वै तत्र तोरणम्।
दार्व्विग्रहसमायुक्तं हस्तयोड्शविस्तृतम्॥
यत्नार्थं मण्डपं कुर्य्यात् मध्ये वेदिं विनिर्म्मयेत्।
वेद्याश्चोत्तरतश्चाश्ववेदिं कुर्य्यादनुत्तमाम्॥
तत्र संस्थाप्य चाश्वञ्च पूजितव्यः पुरोहितैः।
सर्व्वौषधरशाखानामर्च्चनस्यार्थवा नृपः॥
मन्त्रसंग्राहितैश्चक्रैर्भेषजैरपि विभूषयेत्।
तोरणं कदलैः रत्नैस्तथा नानाविधैर्म्मतैः॥
भल्लातकं प्राणिकुलं सिद्धार्थं सैन्धवस्य तु।
कण्डरेणे निवधीयात् पुष्टिग्रान्यर्थमेव च॥
वैद्यवं मण्डलं कृत्वा दिक्पालांश्च नवग्रहान्।
विश्वेदेवांस्तु मन्त्रेण विष्णुमुख्यान् प्रपूजयेत्॥
आग्नेयस्त्रिलेच पुण्यैश्च मिश्रीकृत्य पुरोहितः।
रवेस्तु वरुणस्यैव प्रजेशस्य तथैव च॥
पुण्यकृतस्य विष्णोश्च होमं सप्ताहमाचरेत्।
एकैकस्य सहस्रं वा अष्टोत्तरशतञ्च वा॥
कुर्य्यात्तु प्रत्यहं होमं चतुर्व्वर्गस्य सिद्धये।
समिधश्चापि होतव्याः पलाशं खदिरं तथा॥
औदुम्बरञ्च काश्मर्य्यमश्वत्थञ्च पुरोहितः।
सौवर्य्यान् राजतान् वापि मार्त्तिकान् वा यथेच्छया॥
कुर्य्यात्तु कलसानष्टौ फलपल्लवयोजितान्।
क्षिपेत्तेषु घटेष्वेव समङ्गां हरितालकम्॥
चन्दनञ्च तथा कुष्ठं प्रियङ्गुञ्च मनःशिलाम्।
अञ्जनञ्च हरिद्राञ्च श्वेतां दन्तीं तथैव च॥
भल्लातकं पूर्व्वकोषं सहदेवां शतावरीम्।
वर्षां सनागकुसुमां सोमराजीं खगन्धिकाम्॥
तुलस्यश्च करवीरञ्च तुलसीदलमेव च।
एतानि निःक्षिपेन्मध्ये कलसानां पुरोहितः॥
कनकैरसुजैर्यैश्च दलाभिः सुकसुवौ तथा।
कर्त्तव्यौ भ्रान्तिकामेन नीराजनविधौ नृप!॥
एवं सप्ताहपर्य्यन्तं पूजाभिर्हवनेन च।
पूर्व्वोक्तान् पूजयित्वा तु नृपः सप्ताहमाचरेत्॥
यावन्नीराजनं कुर्य्यात्तावद्राजा वसेद्गृहे।
रात्रौ न यज्ञभूमौ तु निवसेच्छान्तिमिच्छुकः॥
नारोहयेत्तु तुरगं गजं वा तत्र पार्थिवः।
यावत् सप्ताहपर्य्यन्तं यानेनान्येन वै व्रजेत्॥
भक्ष्यैर्नानाविधैश्चैव मधुपायसयावकैः।
मोदकैर्व्वा वलिं कुर्य्याच्चान्नयञ्जनसम्भवैः॥
पूर्व्वोक्तानान्तु देवानां सप्ताहं यावदुत्तमम्।
सप्तमेऽह्नि तु रेमन्तं पूजयेत्तोरणान्तरे॥
सूर्य्यपुत्रं महाबाहुं दिक्षुजं कवचोज्ज्वलम्।
ज्वलन्तं शुक्लवस्त्रेण केशाशुदृश्य वाससा॥
कन्यां वामकरे बिम्बदक्षिणन्तु करं पुनः।
खड्गं चर्म्म वलगायां सितसैन्धवसंस्थितम्॥
एवंविधन्तु रेमन्तं प्रतिमायां घटेऽपि वा।
सूर्य्यपूजाविधानेन पूजयेत्तोरणान्तरे॥ *॥
पूजयित्वा तु रेमन्तं दिरदं तुरगन्तथा।
आहताम्बरसंवीतं सक्तचन्दनसन्निभम्॥
सुवर्णाबद्धनिस्त्रिंशं विचित्रकवचादिभिः।
युक्तन्तु होमकुण्डस्य ऐशान्यामश्ववेदिकाम्॥
पूर्व्वं स्नाता नयेदश्वगजपालः पृथक् पृथक्।
नीयमाने गजे चाश्वे पूर्व्वोक्तञ्च निमित्तकम्॥
यत्नादीक्षेत नृपतिः फलं चैवावधारयेत्।
होमकुण्डस्योत्तरस्यां वेद्यान्ते चर्म्मणि स्थितः॥
दैवविदा चाश्वविदा सहितो वीक्ष्य सैन्धवम्।
नीताय तुरगायाशु भक्तपिण्डौ सुगन्धिनौ॥
दद्यात् पुरोहितस्तत्र संमन्त्र्य भ्रान्तिमन्त्रकैः।
ततश्चाद्यदि निर्गेत्तदीयाद्वा हयः स च॥
तदा स्यात् सर्व्वकल्याणं विपरीतमतोऽन्यथा।
शाखामौदुम्बरीमाद्यां सकुशाञ्च घटोदके।
आज्ञायाज्ञाय तुरगान् गजान् भूपश्च सैनिकान्।
रथांश्च संसृशेन्मन्त्रैः भ्रान्तिकैः पौष्टिकैस्तथा॥
सेचयन् सहितैर्विप्रैश्चतुरङ्गं पुरोहितः।
दिक्पालानां यथास्थाच्च मन्त्रेणैव सवैष्णवैः॥
बहुधा चाभिषिच्याथ ततः सौवर्णदर्पणम्।
वीक्षयित्वा नृपश्चर्त्विक् ततो मन्त्रिणमेव च॥
राजपुत्रांस्तथामात्यानन्यानपि च गौरवान्।
कल्पयन् द्विजशार्दूलः सर्व्वानेव तु दर्शयेत्॥*॥
चतुरङ्गबलस्यापि कृत्वैवं भ्रान्तिपौष्टिके।
दृष्ट्वायं भ्राववं कृत्वा भिचारकमन्त्रकैः॥
छिन्द्यात् मूलेन विद्वांसं शिरः खड्गेन छेदयेत्।
आचार्य्यः कविकां पश्चादभिमन्त्र्य हयाय वै॥
ऐन्द्रैः प्राभाकरैर्मन्त्रैर्दद्याद्दक्षे स्वयं पुनः।
तमनेन तु मन्त्रेण समारुह्य नृपस्तदा॥
गच्छेदुत्तरपूर्व्वांशु दिशं सर्व्वबलैर्युतः।
ऋत्विक्पुरोहिताचार्य्याः सर्व्व एव नृपस्तथा॥
अनुगच्छेयुरव्यग्रा निमित्तानि बलोकयन्।
वादित्रघोषैस्तुमुलैरातपत्रैश्च तत्क्षणात्॥
गच्छेन्नीराजने राजा दारवन्निव मेदिनीम्।
मन्त्रविद्भिसमुत्साद्यखर्व्वरक्षोरकृतः।
क्रोशमात्रं ततो गत्वा पूर्व्वद्वारेण पार्थिवः॥
खपुरं प्रविशेद्विप्रैर्यज्ञं यायात् पुरोहितः।
तत्र गत्वा दक्षिणाशु हिरण्यं गां तथा तिलम्।
दत्वा पञ्चाद्दिजेभ्यस्तु दद्याद्दानानि शक्तितः॥
एवं नीराजनं कृत्वा बलानाञ्च महीपतिः।
प्रवेशेद्वै च स्थितां कक्षीं नृपतिः प्राप्नुयात्तथा॥
क्षमश्चाक्षतसंजात सागरोद्भव सैन्धव।
येन सत्येन वहसे शुक्रं तेनेह मां वह॥
येन सत्येन रेमन्तं येन सत्येन भास्करम्।
वहसे तेन सत्येन विजयाय वहस्व माम्॥
आश्वाशु नृपमन्त्राभ्यामश्वारोहणमाचरेत्।
आरुह्याग्रे महिष्यास्तु शुद्धान्तं प्रविशेत्ततः॥
महिषीं च ततो भूपं पर्य्यङ्कोपरिसंस्थितम्।
दूर्व्वाक्षतैः सचिह्नार्घैः स्त्रीभिः सह समर्चयेत्॥
क्षते तु भूमियज्ञे तृतीयायां नीराजने।
मृतकं यदि जायेत तन्न दुष्यति केवलम्॥
मृतके मृतके वापि पार्थिवस्तु यथा तथा।
कृत्वा नीराजनं कुर्य्यात्तन्मात्रञ्च विशेषतः॥
सद्यःशौचं भवेत्राज्ञां व्यवहारविलोकने।
तथा विवासिते यज्ञे परराष्ट्रविमर्द्दने॥
जयन्ते कथितो राज्ञां नीराजनक्रमो मया।"
इति कालिकापुराणे ८६ अध्यायः॥*॥
(निर्+राज+भावे ल्युट्।) निर्मञ्छनम्। आरति इति भाषा। तत्र पञ्चनीराजनं यथा.
"पञ्चनीराजनं कुर्य्यात् प्रथमं दीपमालया।
द्वितीयं सोदकाक्षेण तृतीयं धौतवाससा॥
घृतान्नत्वादिपचेन चतुर्थं परिकीर्त्तितम्।
पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधि॥"
इति कालोत्तरतन्त्रम्॥
तस्य वर्त्तिकादिप्रमाणं यथा,—
"कुङ्कुमागुरुकर्पूरघृतचन्दननिर्म्मिताः।
वर्त्तिकाः सप्त वा पञ्च कृत्वा वन्दापनीयकम्॥

कुर्य्यात् सप्तप्रदीपेन शङ्खघण्टादिवाद्यकैः।
हरेः पञ्चप्रदीपेन बहुभी भक्तितत्परः॥"
इति पाद्मोत्तरखण्डे १०७ अध्यायः॥*॥

अथ नीराजनमाहात्म्यम्।

स्कान्दे ब्रह्मनारदसंवादे।
"बहुवर्त्तिसमायुक्तं ज्वलन्तं केशवोपरि।
कुर्य्यादाराचिकं यस्तु कल्पकोटिं वसेद्दिवि॥
कर्पूरेण तु यः कुर्य्यान्नक्षत्रा केशवस्य तु।
आराचिकं मुनिश्रेष्ठ! प्रविशेद्विष्णुमव्ययम्॥"
तदेवान्यत्र।
"दीप्तिमन्तं शकर्पूरं करोत्याराचिकं नृप!।
क्षणस्थं वसते लोके सप्तकल्पानि मानवः॥"
तत्रैव शिवोमासंवादे।
"मन्त्रहीनं क्रियाहीनं यत् कृतं पूजनं हरेः।
सर्वं सम्पूर्णतामेति कृते नीराजने शिवे!॥"
हरिभक्तिसुधोदये।
"कृत्वा नीराजनं विष्णोर्दीपावल्या सुभक्तया।
तमोविकारं जयति जिते तस्मिंश्च को भयः॥"
अन्यत्र च।
"कोटयो ब्रह्महत्यानामगम्यागमकोटयः।
दृष्ट्वालोकमात्रेण विष्णोः साराचिकं सुखम्॥
यच्च दीपस्य माहात्म्यं पूर्व्वं लिखितमस्ति तत्।
द्रष्टव्यं सर्व्वमत्रापि प्रायेणाभेदतोऽनयोः॥
अतः सादरमुत्थाय महानीराजनञ्चेदम्।
द्रष्टव्यं दीपवत् सर्व्वैर्बन्धमाराचिकञ्च यत्॥"
तदुक्तं श्रीपुलस्त्येन विष्णुधर्म्मे।
"धूपं चाराचिकं पश्येत् करान्याञ्च प्रवन्दते।
कुलकोटिं समुद्धृत्य याति विष्णोः परं पदम्॥"
मूलागमे च।
"नीराजनञ्च यः पश्येत् देवदेवस्य चक्रिणः।
सप्तजन्मनि विप्रः स्यादन्ते च परमं पदम्॥"
इति हरिभक्तिविलासः॥
अवश्यिष्टं आराचिकशब्दे द्रष्टव्यम्॥

नीरिङ्गः, पुं, (नि+ईर् कम्पने+भावे घञ्। नीरा नितरां कम्पनेन इन्द्यते सुभगेन शोभते इति। इदि परमैश्वर्य्ये+उन्।) अश्वगन्धाख्योट-वृक्षः। इति शब्दचन्द्रिका॥ आन्ध्रभाषा इति भाषा॥

नीरुक्, [ज्] पुं स्त्री, (निर्+रुज+भावे क्विप्।) रोगाभावः। तत्पर्य्यायः। स्वास्थ्यम् २ वार्त्तम् ३ अगदमयम् ४ आरोग्यम् ५। (रुज+भावे क्विप्। निर्गतो रुक् रोगो यस्य।) रोगघ्ने, त्रि। तत्पर्य्यायः। पटुः २ उन्नादः ३ वार्त्तः ४ कल्यः ५। इति हेमचन्द्रः।२।१३८॥ (यथा, सुश्रुते चिकित्सितस्थाने २५ अध्याये।
"एतेन पाल्यो बहुभी नीरुजो निरुपद्रवाः॥")

नीरुजं, क्ली, (निर्गता रुजा रोगो यस्मात्।) कुष्ठौषधिः। इति शब्दरत्नावली॥

नीरुजः,, त्रि, (निर्गता रुजा रोगो यस्य।) रोगाभाववान्। यथा, भागवते।
"श्वाद्योऽपि सद्यः सवनाय कल्पते
कुतः पुनस्ते भगवन्नु दर्शनात्।
तद्धूतात्मा नीरुजः श्रीमांस्तस्मात्तोगादृषिसत्तमवान्॥"

नीरूपं, त्रि, (निर्गतं रूपमस्येति।) रूपा-भावविशिष्टम्। यथा। नीरूपस्यापि कालस्य इन्द्रियवेद्यत्वाभ्युपगमेनेति वेदान्तपरिभाषा॥

नीरेणुकः, त्रि, (निर्गतो रेणुः पांशुर्यस्मात्। कप्।) धूलिशून्यभूम्यादिः। यथा। नीरेणुक-भूरभूदिति सतपथब्राह्मणे॥

नीलं, क्ली, (नीलतीति। नील+अच्।) नीली। इति मेदिनी। ले, ३३॥ काचलवणम्। तालीश-पत्रम्। विषम्। सौवीराञ्जनम्। (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।
"सुवीरकं पार्व्वतेयं सौवीरं नीलमञ्जनम्॥")
तुत्थम्। इति राजनिर्घण्टः॥ मृत्याङ्गाङ्गोत्तर-घृतकरणान्तर्गतकरणविशेषः। इति सङ्गीत-दामोदरः॥

नीलः, पुं, पर्व्वतविशेषः। स तु इलावृतस्योत्तरतो रम्यकवर्षस्य सीमापर्व्वतः। प्राचीतः उभयतः क्षीरोदावधि द्विसहस्रयोजनपृथुः। अयुत-योजनोत्सेधः। इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥ (तथाच विष्णुपुराणे।२।२।१०।
"नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्व्वताः।
तत्प्रमाणौ द्वौ मध्यौ दशहीनास्तथापरे॥"
"तत्प्रमाणौ द्वौ प्राक्पश्चिमतो दैर्घ्येण निषध-नीलौ। यद्यपि जम्बुद्वीपस्य मण्डलाकारस्य लक्षयोजनप्रमाणत्वात् तन्मध्ये रेखायामेव सुख-लक्षप्रमाणत्वं निषधनीलौ तु तन्मध्यरेखातो दक्षिणोत्तरञ्च सलक्षयोजनसहस्रान्तरित-त्वादीषन्न्यूनौ तथापि स्थूलदृष्ट्या लक्षप्रमाणावि-त्युक्तम्॥" इति तट्टीकायां स्वामी॥*॥
(नीलायतनदृश्यः। तत्पर्य्यायो यथा,—
"नीलः स्यान्नीलपत्रिका॥"
इति वैद्यकरत्नमालायाम्॥)
मणिविशेषः। नीलम् इति पारस्यभाषा॥
अस्याधिष्ठातृदेवता शनिः। यथा,—
"भाविकसुलाभफलविहसाखि
गारुत्मतं पुष्यकवज्रनीलम्।
गोमेदवैदूर्य्यकमर्कतः स्यू
रत्नान्यथोऽस्य सुदे सुवर्णम्॥"
इति शुक्रसंचिन्तामणिः॥

तत्पर्य्यायः। सौरिरत्नम्२ नीलाश्मा३ नीलोत्-पलः ४ इन्द्रमणिः ५ महानीलः ६ सुनी-लकः७। अस्य गुणाः। तिक्तत्वम्। उष्ण-त्वम्। कफपित्तागमेऽपहत्वम्। शरीरे धृते सौरिमङ्गलदो भवति। इति राजनिर्घण्टः॥*
अथ इन्द्रनीलमणेरुत्पत्तिपरीक्षादि यथा,—
"तत्रैव सिंहलवधूकरपल्लवाग्र-
व्यालम्बबालनवनीलकुसुमप्रवाले।
दैत्यैः प्रपात दितिजस्य सितान्तकान्तं
प्रोत्फुल्लनीरजसमद्युतिनेत्रयुग्मम्॥
तत्प्रत्ययाद्भुभयशोभनवीक्षिभाषा
विस्तारिणी जलनिधेरुपकण्ठभूमिः।
प्रोद्भिन्नकेतकवनप्रतिबद्धलेखा
सान्द्रेन्द्रनीलमणिरत्नवती विभाति॥

सत्रासितालदृषभद्रसनासिभङ्ग-
प्राग्भारयुधाभहरकण्ठकलायपुष्पैः।
सुकैतरैश्च कुसुमैर्गिरिकर्णिकाया-
स्तस्मिन् भवन्ति मणयः सदृशावभासाः॥
अन्ये प्रसन्नपयसः पयसां निधातु-
रस्तुल्यः शिखिगलप्रतिमास्तथान्ये।
नीलीरसप्रभवबुद्बुदभाश्च केचित्
केचित्तथा समदकोकिलकण्ठभासः॥
एकप्रकारा विसदृशवर्णश्चोभावभासिनः।
जायन्ते मणयस्तस्मिन् इन्द्रनीला महागुणाः॥
स्तनपायाग्निशिखावधूकवर्कराभासंयुताः।
अभ्रिकापटलच्छायावर्णश्चैवेह दूषिताः॥
तत एव हि जायन्ते मणयस्तत्र भूरयः।
शास्त्रसंबोधितधियस्तान् प्रशंसन्ति सूरयः॥
धार्य्यमाणस्य ये इष्टाः पद्मरागमणेर्गुणाः।
धारयादिन्द्रनीलस्य तानेवाप्नोति मानवः॥
यथा च पद्मरागाणां जातुकर्षभयं भवेत्।
इन्द्रनीलेष्वपि तथा द्रष्टव्यमविशेषतः॥
परीक्षाप्रत्ययैर्यैश्च पद्मरागः परीक्ष्यते।
त एव प्रत्यया इष्टा इन्द्रनीलमणेरपि॥
यावन्तश्च क्रमेदर्शि पद्मरागः प्रयोगतः।
इन्द्रनीलमणिस्तस्मात् क्रमेत सुमहत्तरम्॥
तथापि न परीक्षार्थं गुणानामतिदृष्टये।
मणिरयौ समाधेयः कथञ्चिदपि कश्चन॥
अग्निमात्रापरिज्ञाने दाहदोषेण दूषितः।
सोऽनर्थाय भवेद्भर्तुः कर्त्तुः कारयितुस्तथा॥
काचोत्पलकरवीरस्फटिकाद्या इह बुधैः सर्वे-
दूष्याः।
कथिता विजातय इमे सदृशा मणिनेन्द्रनीलेन॥
गुरुभावकठिनभावावेतेषां नित्यमेव विज्ञेयौ।
काचाद्यथावदुत्तरविवर्द्धमानौ विशेषेण॥
इन्द्रनीलो यदा कश्चित् विभर्त्तृगात्रवर्णताम्।
रक्तयौ तथा ताम्रौ करवीरोत्पलाभौ॥
यस्य मध्यगता भाति नीलस्निग्धायुधप्रभा॥
तदिन्द्रनीलमित्याहुर्मणेरार्षं सुवि दुर्लभम्॥
यत्तु वर्णस्य भूयस्त्वात् क्षौरे शस्तगुणे स्थितः।
नीलतां तन्नयेत् सर्व्वं महानीलः स उच्यते॥
यत् पद्मरागस्य महागुणस्य
रूक्षं भवेन्नाससमुत्थितस्य।
तदिन्द्रनीलस्य महागुणस्य
सवर्णसंख्यासुलितस्य रूक्षम्॥"
इति गरुडपुराणे इन्द्रनीलपरीक्षा॥*॥
वाणरान्तरः। इति मेदिनी। ले, २६॥ नीलवर्णः। नीलौषधिः। निधिविशेषः। लाञ्छनम्। इति हेमचन्द्रः॥ मञ्जुघोषः। इति त्रिकाण्ड-शेषः॥ वटवृक्षः। इति राजनिर्घण्टः॥ नील-वर्णयुक्ते, त्रि। इत्यमरः॥ (यथा, देवीभाग-वते।५।८।३८।
"नीलं सत्त्वगुणोपेतं प्रादुरास महद्युति॥")
नीलवर्णवस्तूनि यथा। शुकः१ शैवालम्२ दूर्व्वा३ बालत्रयम्४ बुधः५ वंशाङ्कुरः६ मरकतः७ इन्द्रनीलमणिः८ सूर्य्यकान्तादीनि९

इति कविकल्पलता ॥ अजमीढस्य राज्ञः नीलिन्यां पत्न्यां जातः पुत्रः । यथा । "अजमीढस्य नीलिनी नाम पत्नी तस्यां नीलसंज्ञः पुत्रोऽभवत् ।" इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (माहिष्मतीवासी नृपतिविशेषः । अग्निस्तु अस्य दुहितरमुपसंयम्य वरेणेनं छन्दयामास परनृपादभयञ्चास्मै ददतवान् । गच्छति काले पाण्डवः सहदेवस्तु दिग्विजयक्रमेण अस्य नगरमवरोध्य वैश्वानरात् महद्भयमवाप्तवान् । ततो हयवाहनं स्तुत्वा शान्तिमलभत । एतद्विवरणं महाभारते । २ । ३१ । अध्याये विस्तरतो द्रष्टव्यम् ॥ * ॥ नागविशेषः । यथा, महाभारते । १ । ३५ । ७ ।

"नीलानीलौ तथा नागौ कल्माषशबलौ तथा॥"

नीलकं, क्ली, (नीलमेव । स्वार्थे कन् ।) काचलवणम् । वर्णलोहम् । असनवृक्षे, पुं । इति राजनिर्घण्टः ॥

नीलकण्ठः, पुं, (नीलः नीलवर्णः कण्ठो यस्य ।) शिवः । (यथा, महाभारते । १।१८।४३—४४।

"त्रैलोक्यं मोहितं यस्य गन्धमाघ्राय तद्विषम् ।
प्राणसङ्कोचकार्यार्थं ब्रह्मणो वचनाच्छिवः ॥
दधार भगवान् कण्ठे मन्त्रमूर्त्तिर्महेश्वरः ।
तदा प्रभृति देवस्तु नीलकण्ठ इति स्मृतः ॥")

मयूरः । इत्यमरः । ३ । ३ । ३६ ॥ (यथा, मेघदूते । ७६ ।

"यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥")

पीतसारः । दात्यूहः । श्यामचटकः । खञ्जरीटः । इति हैमचन्द्रः ॥ मूलके, क्ली । इति राजनिर्घण्टः ॥ * ॥ विजयदशम्यां नीलकण्ठदर्शनविधिर्यथा,—

"कृत्वा नीराजनं राजा बलवृद्धौ यथाबलम् ।
शोभनं खञ्जनं पश्येत् जलगोगोष्ठसन्निधौ ॥"

दर्शनानन्तरं नमस्कारमन्त्रो यथा,—

"नीलग्रीव शुभग्रीव सर्व्वकामफलप्रद ।
पृथिव्यामवतीर्णोऽसि खञ्जरीट ! नमोऽस्तु ते ॥
त्वं योगयुक्तो मुनिपुङ्गवस्य-
मद्यक्षतामेषि शिखोऽग्रभेग ।
त्वं दृश्यसे प्रावृषि निर्गतायां
त्वं खञ्जनाख्यमयो नमस्ते ॥"

दर्शनविशेषोपरिस्थितस्य तस्य दर्शनफलं यथा,—

"अन्नेषु गोषु गजवाजिमहीरगेषु
राज्यप्रदः कुशलदः शुचिभाद्रलेषु ।
भस्माक्षिकेशनखलोमतुषेषु दृष्टो
दुःखं ददाति बहुशः खलु खञ्जरीटः ॥"

दिग्विजये फलं यथा,—

"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला अग्नौ हुताशे भयं
याम्यामग्निभयं सुरद्विषि कलिर्लाभः ससुद्राजये ।
वायव्यां वरवल्कलान्वसलिलं दिग्वाङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने ॥"

अशुभखञ्जनदर्शनप्रायश्चित्तं यथा,—

"अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनम् ।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः ॥"

इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम् ॥

(पीतशालवृक्षः । अस्य पर्य्यायो यथा,—

"नीलकण्ठः पीतशालः पीतकः प्रियकोऽसनः॥"

इति वैद्यकरत्नमालायाम् ॥)

नीलकण्ठाक्षं, क्ली, (नीलकण्ठो महादेवस्तत्प्रियोऽक्षो यत्र ।) रुद्राक्षम् । इति राजनिर्घण्टः ॥ (नीलकण्ठः खञ्जनस्तस्य अक्षिणीव अक्षिणी यस्य । बहु समासे ।) खञ्जनाक्षे, त्रि ॥

नीलकन्दः, पुं, (नीलः कन्दो मूलं यस्य ।) महिषकन्दभेदः । तत्पर्य्यायः । सर्पाक्षः२ वनवासी ३ विषकन्दः ४ महिषीकन्दः ५ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयसुखजाठराग्नित्वम् । रुच्यत्वम् । सितस्य तस्य महासिद्धिकरत्वञ्च । इति राजनिर्घण्टः ॥ नीलवर्णमूलञ्च ॥

नीलकमलं, क्ली, (नीलं कमलं पद्मम् ।) नीलवर्णपद्मम् । तत्पर्य्यायः । उत्पलम् २ नीलपङ्कजम् ३ नीलपद्मम् ४ नीलाब्जम् ५ । अस्य गुणाः । शीतलत्वम् । स्वादुत्वम् । सुगन्धित्वम् । पित्तनाशित्वम् । रुच्यत्वम् । रसायने श्रेष्ठत्वम् । देहदार्ढ्यकेश्यदत्त्वञ्च । इति राजनिर्घण्टः ॥ नीलवर्णजलञ्च ॥

नीलकुन्तला, स्त्री, (नीला नीलवर्णाः कुन्तला यस्याः ।) गौर्य्याः सखीविशेषः । यथा,—

"सखी रत्नसखी नाम जगदेवं सुचिस्मिता ।
तां निवार्य्यापरा प्राह सखी सा नीलकुन्तला ॥"

इति दुर्गाभक्तितरङ्गिण्यां ३४ अध्यायः ॥

नीलकुरण्टकः, पुं, (नीलः कुरण्टकः ।) नीलझिण्टी । इति रत्नमाला । (विस्तृतिरस्य नीलझिण्टीशब्दे ज्ञातव्या ॥)

नीलक्रान्ता, स्त्री, (नीलेन नीलवर्णेन क्रान्ता ।) विष्णुक्रान्ता । इति राजनिर्घण्टः ॥

नीलक्रौञ्चः, पुं, (नीलः क्रौञ्चः ।) नीलबकः । तत्पर्य्यायः । नीलाङ्गः २ दीर्घग्रीवः ३ अतिजागरः ४ । इति राजनिर्घण्टः ॥

नीलगर्गेशः, पुं, (नीलो नीलवर्णो गर्गेशः ।) नीलवर्णगर्गपतिः । इति भूतडामरः ॥ अपिच ।

"लीलागलत्कुलक्षोलकालव्यालविलासिने ।
गर्गेशाय नमो नीलकमलामलकान्तये ॥"

इति लीलावती ॥

नीलग्रीवः, पुं, (नीला नीलवर्णा ग्रीवा यस्य ।) महादेवः । इति हलायुधः ॥ (यथा, महाभारते । ३ । ३६ । ७४ ।

"देवदेव महादेव नीलग्रीव जटाधर ॥")

नीलवर्णग्रीवायुक्ते, त्रि ॥

नीलङ्गुः, पुं, (निलङ्गति गच्छतीति । नि+लगि गतौ + "खरुग्रङ्कुपीयुनीलङ्गुलिगु ।" उणा० । २ । ३० । इति कुप्रत्ययेन निपातनात् पूर्व्वदीर्घे साधुः ।) अतिक्षुद्रजन्तुमात्रम् । इत्यमरटीकायां भरतः ॥ क्रिमिभेदः । शृगालः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (भ्रमरावली । प्रस्तुतम् । इति विश्वः । गे, ५० ॥)

नीलचर्म्म, [न्] क्ली, (नीलं चर्म्म फलत्वग् यस्य ।) परूषकम् । इति राजनिर्घण्टः ॥ (नीलञ्च तत् चर्म्म चेति ।) नीलवर्णाजिनञ्च ॥ (नीलचर्म्मविशिष्टे, त्रि ॥)

नीलजं, क्ली, (नीलात् जायते इति । जन+डः ।) वर्णलोहम् । इति राजनिर्घण्टः ॥ नीलजाते, त्रि । (स्त्री, नीलात् नीलपर्व्वतात् जायते इति । वितस्ता नदी । यथा, राजतरङ्गिण्याम् । ५ । ६६ ।

"पाषाणसेतुबन्धेन सुर्य्येणाद्भुतकर्म्मणा ।
सम्प्राप्तमभवद्ब्रह्म निखिला नीलजा सरित् ॥")

नीलझिण्टी, स्त्री, (नीला नीलवर्णा झिण्टी ।) नीलवर्णझिण्टीपुष्पवृक्षः । तत्पर्य्यायः । नीलकुरण्टः २ नीलकुसुमा ३ बाला ८ वाणा ५ दासी ६ करण्टार्द्धगला ७ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । दन्तामयमूलवातकफकामत्वग्दोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलतरुः, पुं, (नीलश्चासौ तरुः ।) नारिकेलः । इति राजनिर्घण्टः ॥

नीलताल, पुं, (नीलश्चासौ तालः ।) हिन्तालः । तमालः । इति राजनिर्घण्टः ॥

नीलदूर्व्वा, स्त्री, (नीला दूर्व्वा ।) हरितदूर्व्वा । तत्पर्य्यायः । हरिता २ शाम्भवी ३ श्यामा ४ प्रीता ५ शतपर्व्विका ६ अग्रता ७ पूता ८ शतग्रन्थिः ९ अनुग्रन्थविका १० शिवा ११ शिवेष्टा १२ मङ्गला १३ जया १४ सुभगा १५ भूतघ्नी १६ शतमूला १७ महौषधी १८ विजया १९ गौरी २० शान्ता २१ ॥ (यथा निघण्टौ धन्वन्तरिः ।

"नीलदूर्व्वा स्मृता श्यामा शाद्वलं हरितं तथा ।
शतपर्व्वा प्रीतकुम्भी प्रीतला वामनी तथा ॥")

तस्या गुणाः । हिमत्वम् । तिक्तत्वम् । मधुरत्वम् । तुवरत्वम् । लघुत्वम् । रक्तपित्तातिसारकफवान्तिज्वरनाशित्वञ्च । पुस्तकान्तरे रोचनत्वम् । वातापहत्वञ्च । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायान्तरं गुणान्तरञ्च यथा,—

"नीलदूर्व्वारुहानन्ता भार्गवी शतपर्व्विका ।
श्यामा सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता ॥
नीलदूर्व्वा हिमा तिक्ता मधुरा तुवरा हरेत् ।
कफपित्तासवीसर्पश्लेष्मादाहश्रमान्वयान् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नीलध्वजः, पुं, (नीलः नीलवर्णः ध्वज इव ।) तमालवृक्षः । इति राजनिर्घण्टः ॥ (नीलो ध्वजो यस्य ।) राजविशेषः । अस्य पुरी माहिष्मती । भार्य्याज्वाला । कन्या स्वाहा लक्ष्मीप्रापाप्ता ।

"अर्ज्जुनस्य हयो राजन् ! पुरीं माहिष्मतीं ययौ ।
नीलध्वजेन वीरेण रक्षितां दुर्गमश्मिताम् ॥
नीलध्वजस्य महिषी ज्वालानाम्नी सुमध्यमा ।
स्वाहां कन्यां प्रसूता सा सुन्दरीं धर्म्मतत्परा ॥"

इति जैमिनिभारते आश्वमेधिके पर्व्वणि १५ अध्यायः ॥ नीलध्वजाविशिष्टे, त्रि ॥

नीलनिर्गुण्डी, स्त्री, (नीला निर्गुण्डी ।) नीलसिन्धुवारः । इति राजनिर्घण्टः ॥

नीलनिर्य्यासकः, पुं, (नीलः निर्य्यासो यस्य । कप् ।) नीलासनवृक्षः । इति राजनिर्घण्टः ॥ कृष्णवर्णनिर्य्यासश्च ॥

नीलपङ्कं, क्ली, (नीलं पङ्कमिव ।) अन्धकारः । इति त्रिकाण्डशेषः ॥ कृष्णवर्णकर्दमश्च ॥

नीलपत्रं, क्ली, (नीलं पत्रं पुष्पदलं यस्य ।) इन्दीवरम् । इति शब्दचन्द्रिका ॥ नीलवर्णपत्रयुक्ते, त्रि ॥

नीलपत्रः, पुं, (नीलानि पत्राणि यस्य ।) गुग्गुलवृक्षम् । अश्वत्थवृक्षः । नीलासनवृक्षः । दाड़िमः । इति राजनिर्घण्टः ॥

नीलपद्मं, क्ली, (नीलं पद्मम् ।) नीलकमलम् । इति शब्दचन्द्रिका ॥ (नीलकमलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

नीलपिङ्गला, स्त्री, (नीला पिङ्गला चेति कर्म्मधारयः ।) गोजातिविशेषः । यथा,—

"शर्वां जातिन्तु वक्ष्यामि शृणुष्वैकमना द्विज ! ।
प्रथमा गौरकपिला द्वितीया गौरपिङ्गला ॥
तृतीया रक्तकपिला चतुर्थी नीलपिङ्गला ।
पञ्चमी शुक्लपिङ्गाची षष्ठी तु शुक्लपिङ्गला ॥
सप्तमी चित्रपिङ्गाची अष्टमी वभ्रुरोहिणी ।
नवमी श्वेतपिङ्गाची दशमी श्वेतपिङ्गला ॥
ताडग्रास्तेऽप्यनड्वाहः कपिलास्तु प्रकीर्त्तिताः ॥"

इति बृहद्धर्म्मपुराणे उत्तरखण्डे १५ अध्यायः ॥

नीलपिच्छः, पुं, (नीलं पिच्छं यस्य ।) श्येनपक्षी । इति राजनिर्घण्टः ॥

नीलपुनर्नवा, स्त्री, (नीला पुनर्नवा ।) कृष्णवर्णपुनर्नवाप्रभेदः । नीलगदपड़ोया इति हिन्दी भाषा ॥ तत्पर्य्यायः । नीलार २ श्यामा ३ कृष्णाख्या ४ नीलवर्षाभूः ५ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । रसायनत्वम् । व्रणरोगपाण्डुश्वयथुश्वासवातकफनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलपुष्पं, क्ली, (नीलं पुष्पमस्य ।) ग्रन्थिपर्णम् । इति भावप्रकाशः ॥ (नीलञ्च तत् पुष्पञ्चेति ।) नीलवर्णकुसुमञ्च ॥

नीलपुष्पः, पुं, (नीलं पुष्पं यस्य ।) नीलभृङ्गराजः । नीलाम्बानः । इति राजनिर्घण्टः ॥

नीलपुष्पा, स्त्री, (नीलं पुष्पं यस्याः ।) विष्णुक्रान्ता । इति राजनिर्घण्टः ॥

नीलपुष्पिका, स्त्री, (नीलं पुष्पं यस्याः । कप् । काप्यत इत्वम् ।) असती । इति राजनिर्घण्टः ॥ नीली । इति रत्नमाला ॥

नीलपुष्पी, स्त्री, (नीलं पुष्पं यस्याः । ङीष् ।) नीलवृक्षा । इति रत्नमाला ॥ (श्लेष्मातकिका । तत्पर्य्यायो यथा,—

"नीलपुष्पी तु निर्गुण्डी श्लेष्मातकी सुवहा च सा ॥"

अतसी । तस्याः पर्य्यायो यथा,—

"अतसी नीलपुष्पी च पार्व्वती स्यादुमाक्षमा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नीलफला, स्त्री, (नीलं फलं यस्याः ।) जम्बूः । इति राजनिर्घण्टः ॥

नीलभृङ्गराजः, पुं, (नीलो भृङ्गराजः ।) नीलवर्णभृङ्गराजः । नीलकेशूरिया इति नीलभेंगरिया इति च भाषा । तत्पर्य्यायः । महाभृङ्गः २ महानीलः ३ सुनीलकः ४ नीलपुष्पः ५ श्यामलः ६ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । चक्षुष्यत्वम् । केशरञ्जनत्वम् । कफामग्रोफश्चित्रनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

नीलमणिः, पुं, (नीलो मणिः ।) स्वनामख्यातमणिः । तत्पर्य्यायः । मसारः २ । इति हारावली ।१४५॥ अस्य विवरणं नीलशब्दे द्रष्टव्यम् ॥

नीलमाधवः, पुं, (नीलो नीलवर्णो माधवः । नीलपर्व्वतस्थो माधवो वा ।) विष्णुः । जगन्नाथः । यथा,—

"प्रेषितोऽहं हरिं द्रष्टुमत्रस्थं नीलमाधवम् ।
दृष्ट्वा यावत् सुपतितं वार्त्तां नेष्यामि सोऽप्यहम् ॥"

इत्युत्कलखण्डे ७ अध्यायः ॥

नीलमाषः, पुं, (नीलो नीलवर्णो माषः ।) राजमाषः । इति राजनिर्घण्टः ॥

नीलमौलिकः, पुं, (नीलमौलं नीलवर्णमिमौलनमस्यस्येति । नीलमौल + ठन् ।) खद्योतः । इति शब्दमाला ॥

नीलयष्टिका, स्त्री, (नीला नीलवर्णा यष्टिकेव ।) पुष्पकासीसम् । इति राजनिर्घण्टः ॥ कृष्णवर्णश्च ॥

नीललोहं, क्ली, (नीलं नीलवर्णं लोहम् ।) वर्त्तलोहम् ।) इति राजनिर्घण्टः ॥

नीललोहितः, पुं, (नीलश्चासौ लोहितश्चेति । "वर्णो वर्णेन ।" २ । १ । ६८ । इति समासः । नीलः कण्ठे लोहितस्य यस्येति स्वामी ।) शिवः । इत्यमरः । १ । १ । ३५ ॥ (यथा, कुमारे । २ । ५७ ।

"संयुगे सांयुगीनं तमुद्यन्तं प्रसहेत कः ।
अंशुहस्ते निधिक्तस्य नीललोहितरेतसः ॥")

चैत्रे माघि तस्य व्रतविधानं यथा,—

"चैत्रे शिवोत्सवं कुर्य्यान्नृत्यगीतमहोत्सवैः ।
स्नात्वा दिनत्रयं रात्रौ च हविष्याशी जितेन्द्रियः ॥
किमत्रभ्यं भगवति प्रसन्ने नीललोहिते ।
उपोष्य हुत्वा संक्रान्त्यां व्रतमेतत् समर्पयेत् ॥"

इति माघकृत्ये बृहद्धर्म्मपुराणम् ॥ कल्पविशेषः । इति महाभारतम् ॥ अस्य विवरणं कल्पशब्दे द्रष्टव्यम् ॥) नीलरक्तमिश्रितवर्णश्च ॥

नीललोहिता, स्त्री, (नीला लोहिता च ।) भूमिजम्बुः । इति शब्दचन्द्रिका । शिवा च ॥

नीलवर्षाभूः, स्त्री, (नीला नीलवर्णा वर्षाभूः ।) नीलपुनर्नवा । इति राजनिर्घण्टः ॥ कृष्णमेके, पुं ॥

नीलवल्ली, स्त्री, (नीला नीलवर्णा वल्ली ।) वन्दाकम् । इति रत्नमाला ॥

नीलवसनः, पुं, (नीलं वसनं वस्त्रं यस्य ।) अग्निः । ईश्वरः । इति हारावली । १२ ॥ (बलरामः । परिधेयनीलवस्त्रत्वादस्य तथात्वम् ॥) नीलवस्त्रयुक्ते, त्रि ॥

नीलवस्त्रः, पुं, (नीलं वस्त्रं यस्य ।) बलरामः । इति हेमचन्द्रः । २ । १३६ ॥ (नीलं वस्त्रम् ।) नीलवर्णवसने, क्ली । यथा,—

"स्त्रीक्रीड़ाश्रयनीयादौ नीलवस्त्रं न दुष्यति ।
नीलीवस्त्रं न सृग्वेच नीलीमनिरयं व्रजेत् ॥"

इति गारुड़े प्रायश्चित्ताध्यायः ॥

तस्य धारणप्रायश्चित्तादि यथा । यच्च भविष्यपुराणम् ।

"शृणुष्वेति महाबाहो ! नीलीरक्तस्य धारणात् ।
वाससो गणश्रार्दूल ! गदतो मम कृतुक्षणः ॥
पालनाद्विक्रयाच्चैव उद्दृत्तेरुपजीवनात् ।
पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति ॥
नीलीरक्तेन वस्त्रेण यत् कर्म्म कुरुते द्विजः ।
स्नानं दानं तपो होमः स्वाध्यायः पितृतर्पणम् ॥
वृथा तस्य भवेद्यज्ञो नीलीवस्त्रस्य धारणात् ।
नीलीरक्तं यदा वस्त्रं कदाचिदपि धारयेत् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥
इदमज्ञाने । ज्ञाने तु द्वैगुण्यम् । अत्रापवादः ।
नीलीत्यक्तोदृत्तावापरक्तम्बः ।
स्त्रीणां क्रीड़ार्थसंयोगे शयनीये न दुष्यति ॥

इति प्रायश्चित्तविवेकः ॥

नीलवासाः, पुं, (नीलं वासो वस्त्रं यस्य ।) अग्निग्रहः । इति त्रिकाण्डशेषः ॥ (नीलवस्त्रयुक्ते त्रि । यथा, हरिवंशे । ८२ । ४३ ।

"श्रीमत्खलिकृष्णाङ्गं प्रणमिष्यामि भोगिनम् ।
सहस्रशिरसं देवमनन्तं नीलवाससम् ॥")

नीलवृक्षा, स्त्री, (नीला नीलवर्णा वृक्षा ।) नीलवृक्षा । नीलवर्णवोना इति भाषा ॥ तत्पर्य्यायः । अजगन्धी २ नीलपुष्पी ३ अतिलोमशा ४ । इति रत्नमाला ॥ (यथा,—

"नीलवृक्षारसक्षेलसिन्धुकाङ्किकसंयुतः ।
कटुतैलं पूरयात् कर्णे निःशेषक्रिमिपातनः ॥"

इति वैद्यकचक्रपाणिसंग्रहे कर्णरोगाधिकारे ॥)

नीलवृक्षः, पुं, (नीलो वृक्षः ।) वृक्षभेदः । तत्पर्य्यायः । नीलः २ वातारिः ३ श्लेष्मनाशनः ४ नरनामा ५ नखवृक्षः ६ नखालुः ७ नरप्रियः ८ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । लघुत्वम् । वातामयनाशित्वयुग्नाग्नित्वञ्च । इति राजनिर्घण्टः ॥

नीलवृन्तकं, क्ली, (नीलवर्णं वृन्तं यस्य । कप् ।) तूलम् । इति राजनिर्घण्टः ॥

नीलवृषः, पुं, कृष्णवर्णवृषः । वृषविशेषः । तस्य लक्षणं यथा,—

"लोहितो यस्य वर्णेन मुखे पुच्छे च पाण्डरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥"

इति शुद्धितत्त्वम् ॥

अपि च।
"लोहितो यस्तु वर्णेन गुञ्जवर्णः खरो दृषः।
लाङ्गूलग्निरसोक्षेव स वै नीलदृषः स्मृतः॥"
तस्योत्पत्तिर्यथा गयाश्राद्धादितुल्यफलं यथा,—
"जायेरन् बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेद्वा अश्वमेधेन नीलं वा दृषमुत्सृजेत्॥"
इति देवीपुराणम्॥

नीलवृषा, स्त्री, (नीलं नीलवर्णं पुष्पफलादिकं वर्षति प्रसूते इति। दृष+इगुपधेति कः। ततष्टाप्।) वार्षाकी। इति राजनिर्घण्टः॥ (वार्षाकीशब्देऽस्या गुणाः पर्य्यायाश्च ज्ञेयाः॥)

नीलव्रतं, क्ली, व्रतविशेषः। यथा,—
"यस्तु नीलोत्पलं हैमं शर्करापात्रसंयुतम्।
एकान्तरितनक्ताशी समान्ते वृषभं युतम्।
वैष्णवं स परं याति नीलव्रतमिदं स्मृतम्॥"
इति मात्स्ये ८३ अध्यायः॥
नीललोहितव्रतञ्च॥

नीलशिखण्डः, पुं, (नीलः शिखण्डः।) शोभाञ्जनः। इति राजनिर्घण्टः॥

नीलसारः, पुं, (नीलः सारो ऽस्य।) तिन्दुकवृक्षः। इति राजनिर्घण्टः॥

नीलसिन्धुवारः, पुं, (नीलः सिन्धुवारः।) श्वेतवर्णसिन्धुवारवृक्षः। नीलसिन्धुयार इति भाषा। तत्पर्य्यायः। श्रीतसहा २ निर्गुण्डी ३ नीलसिन्धुकः ४ सिन्धुकः ५ कपिका ६ भूतकेशी ७ इन्द्राणी ८ नीलिका ९ नीलनिर्गुण्डी १०। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। तिक्तत्वम्। रूक्षत्वम्। कासश्लेष्मशोफसमीरवार्त्तिप्रदराध्मानवातिकासामयनाशित्वञ्च। इति राजनिर्घण्टः॥

नीला, स्त्री,(नीलो नीलवर्णोऽस्त्यस्या इति। अच्। ततष्टाप्।) नीलवर्णमक्षिका। इत्यमरः। २। ५। २६॥ नीलपुनर्नवा। नीली। इति राजनिर्घण्टः॥ (कुलकः। तत्पर्य्यायो यथा,—
"कुलको भद्रतरश्चिर्टङ्कतपुष्पोऽतिकेसरः।
महासहा कण्टकाख्या नीलालिकुलसङ्कुला॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"नीलानामौषधिस्तु नीलचीरा नीलपुष्पीलता प्रतानवल्लिका।" इति चरके चिकित्सितस्थाने। १ अध्यायः॥ नदीविशेषः। यथा,—
"वेणा इरावती नीला उत्तरात् पूर्ब्ववाहिनी॥"
इति हारीते प्रथमस्थाने सप्तमेऽध्याये॥
यथा च महाभारते। ६। ९। ३९।
"नीलां पृथिकरीञ्चैव पर्णाशाञ्च महानदीम्॥")
मल्लाररागस्य स्त्री। इति दत्तिलसंगीतरागे ४४ अः॥

नीलाङ्गः, पुं, (नीलमङ्गं यस्य।) सारसपक्षी। चासपक्षी। इति राजनिर्घण्टः॥

नीलाङ्गुः, पुं, (नितरां लिङ्गतीति। नि+लिगि गतौ+कुः। केचित् धातूपसर्गयोर्दीर्घमाहुः। इत्युज्ज्वलदत्तोक्त्या धातूपसर्गयोर्दीर्घत्वम्।) कृमिः। इत्यमरः। २। ५। १३॥ भ्रमराख्यो स्त्री। इति मेदिनी। गे, ४०॥ शुधिरम्। इति विश्वः॥

नीलाञ्जनं, क्ली, (नीलमञ्जनम्।) सौवीराञ्जनम्। (यथा, गरुडपुराणे ब्रह्मेश्वरप्रणाममन्त्रम्।
"नीलाञ्जनचयप्रख्यं रविसूनुं महाग्रहम्।
छायाया गर्भसम्भूतं वन्दे भक्त्या ग्रहेश्वरम्॥")
तस्य उपधातुविशेषः। तस्य गुणाः। कटुत्वम्। श्लेष्मसुखरोगनेत्ररोगव्रणदाहनाशित्वम्। उष्णत्वम्। रसायनत्वम्। तिक्तत्वम्। भेदकत्वञ्च। इति राजवल्लभः॥ (अस्य शोधनविधिर्यथा,—
"नीलाञ्जनं चूर्णयित्वा जम्बीरद्रवभावितम्।
दिनैकमातपे शुष्कं भवेत् कार्य्येषु योजयेत्॥"
इति वैद्यकरत्नसारसंग्रहे नारसमारणाधिकारे॥) तुत्थम्। इति राजनिर्घण्टः॥

नीलाञ्जना, स्त्री, (नीलं मेघं अञ्जयतीति। अञ्ज+णिच्+ल्युः।) विद्युत्। इति जटाधरः॥

नीलाञ्जनी, स्त्री, (नीलवत् अञ्जयतीत्यनयेति। अञ्ज+करणे ल्युट्। ततो ङीष्।) कालाञ्जनीक्षुपः। इति राजनिर्घण्टः॥

नीलाञ्जसा, स्त्री, अप्सरोभेदः। नदीविशेषः। विद्युत्। इति मेदिनी। से, ५७॥

नीलापराजिता, स्त्री, (नीला अपराजिता।) नीलवर्णापराजितालता। तत्पर्य्यायः। नीलपुष्पी २ महानीली ३ नीलगिरिकर्णिका ४ शवादनी ५ वक्तगन्धा ६ नीलसन्ध्या ७ नीलाद्रिकर्णी ८। अस्या गुणाः। शीतित्वम्। तिक्तत्वम्। रक्तातिसारज्वरदाहच्छर्द्युन्मादमदश्रमार्त्तिश्वासातिकासामयनाशित्वञ्च। इति राजनिर्घण्टः॥

नीलाब्जं, क्ली, (नीलमब्जमिति कर्म्मधारयः।) नीलोत्पलम्। इति रत्नमाला॥ (नीलोत्पलशब्देऽस्य विशेषो ज्ञेयः॥)

नीलाम्बरं, क्ली, (नीलमम्बरमिव। नीलमम्बतीति वा। अबि+अरच्।) तालीशपत्रम्। इति राजनिर्घण्टः॥ (नीलश्च तदम्बरञ्चेति। नीलवस्त्रञ्च॥)

नीलाम्बरः, पुं, (नीलमम्बरं यस्येति।) बलदेवः। राक्षसः। ग्रहेश्वरः। इति मेदिनी। रे, २७४॥ नीलवस्त्रयुक्ते, त्रि॥

नीलाम्बुजन्मन्, [न्] क्ली, (अम्बुनि जन्मास्य। ततः नीलवर्णं अम्बुजमिति।) नीलोत्पलम्। इत्यमरः। १। १०। ३७॥

नीलाम्भानः, पुं, (आम्भायति यथाकालमिति। आ+म्भा+ल्युः। नीलो नीलवर्णं आम्भानः।) पुष्पवृक्षभेदः। काला कोराटा इति हिन्दी भाषा॥ तत्पर्य्यायः। दासी २ क्षुद्रनः ३ बाला ४ आर्त्तगला ५ नीलपुष्पः ६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कफभारुतमूलकृच्छ्रकुष्ठव्रणग्रहोपत्वगदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

नीलाम्बी, स्त्री, (नीला अम्बी।) क्षुपभेदः। नल्लबुलगुड़ इति हिन्दी भाषा॥ तत्पर्य्यायः। नीलपिण्डी २ श्यामाम्बी ३ दीर्घग्राखिका ४। अस्या गुणाः। मधुरत्वम्। रूक्षत्वम्। कफवातहरत्वञ्च। इति राजनिर्घण्टः॥

नीलालुः, पुं, (नीलवर्णं आलुरिति कर्म्मधारयः।) कन्दभेदः। तत्पर्य्यायः। असितालुः २ श्यामालुकः ३। अस्य गुणाः। मधुरत्वम्। शीतत्वम् पित्तदाहश्रमनाशित्वञ्च। इति राजनिर्घण्टः॥

नीलाश्मा, [न्] पुं, (नीलवर्णः अश्मा प्रस्तरभेदः।) नीलमणिः। इति राजनिर्घण्टः॥

नीलासनः, पुं, (नीलवर्णः असनो वृक्षभेदः।) असनवृक्षविशेषः। पियाशालप्रभेदः। तत्पर्य्यायः। नीलबीजः २ नीलपत्रः ३ सुनीलकः ४ नीलदुमः ५ नीलसारः ६ नीलनिर्य्यासकः ७। अस्य गुणाः। कटुत्वम्। शीतत्वम्। कषायत्वम्। कुष्ठकण्डूदहनाशित्वम्। सारकत्वम्। तत्र सितस्य श्रेष्ठत्वञ्च। इति राजनिर्घण्टः॥ रतिबन्धविशेषः। यथा,—
"लिङ्गोपरिस्थिता नारी ग्रथ्यां कृत्वा पदद्वयम्।
हृदये दत्तहस्ता च बन्धो नीलासनो मतः॥"
इति सारदीपिका॥

नीलिका, स्त्री, (नीलक+टाप्। कापि अत इत्वम्। नीलीव इवार्थे कन् टाप् पूर्ब्बह्रस्वः। इति केचित्।) नीलसिन्धुवारः। इति राजनिर्घण्टः॥ नीलिनी। (पर्य्यायोऽस्या यथा,—
"नीली तु नीलिनी तूली कालदोला च नीलिका।
रञ्जनी श्रीफली तुच्छा श्यामीया मधुपर्णिका॥
क्षीतका कालकेशी च नीलपुष्पा च सा स्मृता॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
श्वेफालिका। इति मेदिनी। के, १११॥ नेत्ररोगविशेषः। यथा,—
"दोषे दृष्ट्याश्रिते तिर्य्यगेकं वै मन्यते द्विधा।
तिमिराख्यः स वै दोषश्चतुर्थपटलं गतः॥
यद्यद्धि सर्व्वतो दृष्टिं लिङ्गनाशमतः परम्।
अस्मिन्नपि तमोभूते नातिरूढ़े महागदे॥
चन्द्रादित्यौ सनक्षत्रावम्बरीक्षे च विद्युतः।
निर्म्मलानि च तेजांसि भास्वितानि च पश्यति।
स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः॥"
क्षुद्ररोगभेदः। यथा,—
"क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः।
सुखमागत्य सहसा मण्डलं विवृणोत्यतः॥
नीरुजं तनुकं श्यावं तं यत्नमिति निर्दिशेत्।
लक्ष्यमेवं गुरुं गात्रे सुखे वा नीलिकां विदुः॥"
इति माधवकरः॥
जलस्य ज्वरः। यथा, "भूमेरूषरा वृक्षस्य कोटरः जलस्य नीलिका इत्यादि।"
इति ज्वरप्रकरणे विजयरक्षितः॥
क्षुद्ररोगविशेषः। तल्लक्षणं यथा,—
"लक्ष्यमेवं गुरुं वक्षे गात्रे वा नीलिकां विदुः।"
एवं गुरुं नीरुजं तनुकं मण्डलम्॥
तच्चिकित्सा यथा,—
"शिरावेधैः प्रलेपैश्च तथान्यैरुपाचरेत्।
यत्नेन नीलिकां वापि न्यच्छेच्च तिलकालकम्॥
वटाङ्कुरा मधुराश्च प्रलेपादक्षनाशनाः।
यत्नेन मक्षिकया लेपः प्रशस्तो मधुयुक्तया॥

अथवा लेपनं शस्तं शशस्य रुधिरेण च ।
यङ्गकुङ्कुमचन्दनक् स्यादनामूलेन पेषिता ॥
जातीपलस्य लेपस्तु हरेद्व्यङ्गच नीलिकाम् ।
अर्कक्षीरहरिद्राभ्यां मर्दयित्वा प्रलेपनात् ॥
सुखकार्य्यंत्र समं याति चिरकालोद्भवं द्रुतम् ।
मक्षरैः क्षीरसंपिष्टैर्लिम्रमाक्षं हृताम्बितैः ॥
सप्तरात्रात् भवेत् सत्यं पुष्करीकदलोपमम् ।
वटस्य पाकुपत्राणि मालती रक्तचन्दनम् ॥
कुष्ठं कालीयकं लोध्रमेभिर्लेपं प्रयोजयेत् ॥
युवानपिड़कानाशु व्यङ्गानाच विनाशनम् ।
स्यादेतेन सुखचापि वर्जितं नीलिकादिभिः ॥
कालीयकं कलम्बक इति लोके । युवानपिड़का युवानन्तत्र पिड़का एवोदरादिलाक्षणकारणोपः।
कुङ्कुमं चन्दनं लोध्रं पद्मकं रक्तचन्दनम् ।
कालीयकसुगीरच मञ्जिष्ठा मधुयष्टिका ॥
पद्मकं पद्मकं कुष्ठं पद्मं गोरोचना सिक्था ।
लाक्षा दारुहरिद्रा च गैरिकं नागकेशरम् ॥
पलाशकुसुमचापि प्रियङ्गुच वटाङ्कुराः ।
मालती च मधूच्छिष्टं सर्षपाः सुरभिर्व्यंचा ॥
चतुर्गुणपयःपिष्टैरेतैरुक्तमितैः पृथक् ।
प्रलेपन्नाशिना वैद्यस्तेलं प्रस्थद्वयोन्मितम् ॥
वदनाभ्यङ्गनादेतद्व्यङ्गं नीलिकया सह ।
तिलकं मार्षकं व्यङ्गं नाशयेन्नुखदूषिकाम् ॥
पद्मिनीकण्टकं वापि हरेच्छतमथं तथा ।
विदधाद्वदनं पूर्णचन्द्रमण्डलसुन्दरम् ॥
पत्तङ्गं वकम् इति लोके। कालीयकं कलम्ब इति लोके। सुरभिर्व्यंचा महाभरी इति लोके।
कुङ्कुमाद्यं तैलम् ।" इति भावप्रकाशः ॥

नीलिनी, स्त्री, (नील: प्रशस्तत्वादस्त्या इति। इनिः। ततो ङीप् ।) नीलीवृक्षः। इत्यमरः। २ । ४ । ६५ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।
"नीलिनीवृक्षगलाम्बी स्यादन्तःकोटरपुष्पापि ।
अजाजी नीलपुष्पा स्यान्नीलपुष्पातिलोमशा ॥"
यथा च ।
"नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी श्रीफली तुत्था श्यामीश्या मधुपर्णिका ॥
स्फोतका कालकेशी च नीलपुष्पा च सा स्मृता ।
नीलिनी रेचनी तिक्ता केश्या मोहन्यमापहा ॥
उष्णा हन्त्युदरश्लीपवातरक्तकफानिलान् ।
आमवातसदावर्त्तं मन्दञ्च विषमुच्छ्रितम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
श्यामशिपुटा। इति शब्दरत्नावली ॥
अजमीढस्य पत्नी। इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (तथा च हरिवंशे। १२ । ४५ ।
"अजमीढस्य पत्नास्तु तिस्रो रूपसमन्विताः ।
नलिनी केशिनी चैव धूमनी च वराङ्गना ॥")

नीली, स्त्री, (नीली निष्पाद्यत्वेनाऽस्त्यस्या: इति। नील+अच् ततो ङीष् ।) वृक्षभेदः। नीलेर गाछ इति भाषा ॥ तत्पर्य्यायः। काजा २ स्फोतकिका ३ श्यामीश्या ४ मधुपर्णिका ५ रञ्जनी ६ श्रीफली ७ तुत्था ८ तूली ९ दोला १० नीलिनी ११ । इत्यमरः। २ । ४ । ६४ ॥ नीला १२ तूली १३ द्रोली १४ मेला १५ । इति भरतः ॥ नीलपत्री १६ राज्ञी १७ नीलिका १८ नीलपुष्पी १९ काली २० श्यामा २१ शोधनी २२ श्रीफला २३ श्याम्या २४ भद्रा २५ भारद्वाजी २६ मोचा २७ लक्ष्मा २८ अञ्जनकेशी २९ महाफला ३० असिता ३१ स्फोतनी ३२ केशी ३३ चारटिका ३४ गन्धपुष्पा ३५ श्यामलिका ३६ रञ्जपत्री ३७ महाबला ३८ स्थिररञ्जा ३९ रञ्जपुष्पी ४० तूली ४१ तूलिका ४२ द्रोणिका ४३। इति शब्दरत्नावली ॥ अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। केश्यत्वम्। कासकफमरुद्विषोदरव्याधिगुल्मानुव्रणाग्निजित्व च। इति राजनिर्घण्टः ॥ नीलिकारोगः। इति मेदिनी। ले, २९ ॥

नीलीराग:, पुं, स्थिरप्रेमपुरुषः। तत्पर्य्यायः। स्थिरसौहृदः २। इति हेमचन्द्रः। १ । १४० ॥ (नीलीसङ्घातो रागः।) नीलवर्णः। इति नीलशब्दस्य नानार्थे शब्दरत्नावली ॥ नायकनायिकयोः पूर्व्वरागविशेषः। यथा,—
"नीलीकुसुम्भमञ्जिष्ठा: पूर्व्वरागोऽपि च त्रिधा ।"
तल्लक्षणोदाहरणे ।
"न चातिश्लेषमेति यन्नापैति प्रेम मनोगतम् ।
नीलीरागः स विज्ञेयो यथा श्रीरामसीतयोः ॥"
इति साहित्यदर्पणम् ॥

नीलोत्पलं क्ली, (नीलं नीलवर्णमुत्पलमिति ।) नीलवर्णोत्पलम्। नीलशापला इति भाषा। तत्पर्य्यायः। उत्पलकम् २ कुवलयम् ३ इन्दीवरम् ४ कन्दोट्यम् ५ सौगन्धिकम् ६ सुगन्धम् ७ कुड्मलकम् ८ असितोत्पलम् ९ ॥ (यथा, भागवते । ५ । २४ । १० ।
"भ्रमत्कुलेलङ्घनशङ्कितैरगैरवकुसदङ्गवलयकञ्जारनीलोत्पललोहितप्रतपत्रादिवनेषु ॥")
अस्य गुणाः। अतिस्वादुत्वम्। शीतत्वम्। सुरभित्वम्। सौस्निकारित्वम्। पाके अत्यन्ततिक्तत्वम्। रक्तपित्तहरत्वच्च। इति राजनिर्घण्टः ॥

नीलोत्पली, [न्] पुं, (नीलोत्पलं नीलोत्पलवर्णं मनोहरत्वेनास्त्यस्य इति इनिः।) मद्गुवीषः। इति त्रिकाण्डशेषः ॥

नीवरः, पुं, (नयत्यात्मानं यत्र कुत्रचित् देहयात्रानिर्व्वाहणायेति। नी+"शिल्पिनि वरच्छलरेति ।" उणा ३ । १ । इति वरच् प्रत्ययेन निपातनात् गुणाभावात् साधुः।) भिक्षुः। इत्युणादिकोषः ॥ वणिजकम्। वास्तुत्वम्। इति मेदिनी। रे, १७५ ॥ परिव्राट्। पङ्कः। जले, क्ली। इति संक्षिप्तसारोणादिवृत्तिः ॥

नीवाकः, पुं, (निरन्तरं नियतं वा उप्यते इति। नि+वप्+घञ् कुत्वं उपसर्गस्य दीर्घत्वं च।) महार्घहेतोर्धान्यादिषु जनानामादरातिशयः। तुलाधरत्वाधिक्यम्। क्रमाक्रमादरः। मूल्याधिक्यहेतोर्निश्चयेन परिच्छेदनम्। इति भरतः ॥ तत्पर्य्यायः। प्रयामः २। इत्यमरः। ३ । २ । २३ ॥

नीवारः, पुं, (नि+वृ+घञ् उपसर्गस्य दीर्घत्वं च।) व्रीहिधान्यभेदः। इत्यमरः। २ । ६ । २५ ॥ उड़ीधान इति वङ्गभाषा। तीनी इति हिन्दीभाषा। तत्पर्य्यायः। अकृष्यधान्यम् २ मुनिधान्यम् ३ हस्तोद्भवम् ४ अरण्यव्रीहिः ५ । (यथा, शाकुन्तले । १ अङ्के ।
"नीवाराः शुकगोटरार्भकसुखभ्रष्टास्तरूणामधः ॥")
अस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। पथ्यत्वम्। पक्वत्वम्। लघुत्वच्च। इति राजनिर्घण्टः ॥ तन्नामगुणाः।
"प्रसाधिका तु नीवारस्तृणान्तमिति च स्मृतम्।
नीवारः शीतलो ग्राही पित्तघ्नः कफवातहृत् ॥"
इति भावप्रकाशः ॥

नीविः,) स्त्री, (निबध्यते निवीयते वा । नि+
नीवी,) वेञ्+"नौ वो यलोपः पूर्व्वस्य च दीर्घः।" उणा । ४ । १३५ । इति इन् यलोपः निग्रन्थस्य दीर्घत्वच्च। ततः स्त्रियां ङीष्।) परिधेयम्। वस्त्रिका ग्रन्थनम्। राजपुत्रादेर्वस्त्रकः। इति सुभूतिः ॥ स्त्रीकटीवस्त्रबन्धः। कोँचड़ी इति भाषा। (यथा, महाभारते । २ । ६३ । १८ ।
"एकवस्त्रा त्वधोनीवी रोदमाना रजस्वला ॥")
स्त्रीलुपलक्षणं पुंस्कटीवस्त्रबन्धेऽपि। इत्यमरटीकायां भरतः। तथा च। "नीवीं विस्रंस्य परिहितवस्त्रस्य वामाङ्गन्यस्तिं मोचयित्वा आचमनमाह गौधायनः।" इति यजुर्व्वेदिभाष्यभरतम् ॥ मूत्रस्य पिचादिभाण्डे मोटकबन्धनम्। इति मधुरेशः ॥

नीवृत्, पुं, (नियतं वर्त्तते वसत्यत्र जनसमूह इति। नि+वृत्+अधिकरणे क्विप्। "वहिवृतिविधिषधिरुचिसहितनिधु क्वौ।" ६ । ३ । ११६ । इति पूर्व्वपदस्य दीर्घः।) जनपदः। इत्यमरः। २ । १ । ८ ॥ "ये अङ्गवङ्गकलिङ्गपञ्चालमगधकोशलादौ मङ्गल्येन ख्याते ग्रामसमूहे।" इति भरतः ॥

नीव्रं, क्ली, (नितरां व्रियते इति। नि+वृ+बाहुलकात् कप्रत्ययेन साधुः।) हृदिप्रान्तभागः। छाँचि इति भाषा। तत्पर्य्यायः। वलीकम् २ पटलप्रान्तम् ३। इत्यमरः ॥ नीव्रम्। इति भरतः। नेमिः। चक्रः। रेवतीनक्षत्रम्। वनम्। इति मेदिनी। रे, ५३ ॥

नीशारः, पुं, (निःशेषेण नितरां वा शीर्य्यन्ते हिमवायुदशोनेन अस्मादस्त्र वा। शृ+घञ्। उपसर्गस्य दीर्घत्वच्च।) हिमानिलनिवारकप्रावरणम्। इत्यमरः। २ । ६ । ११८ ॥ हिमानिलप्रावरणं वनं मशहरुक्तम्। इति रमानाथः ॥ काञ्जारः। इति नयशब्दः ॥ मशारि इति क्वचित्। काञ्जपटः। कानात् इति क्वचित्। इति भरतः ॥ (यथा,—
"गौरिवाञ्छतनीशारः प्रायेण शिशिरे ऊषः ॥"
इति सिद्धान्तकौमुद्याम् । १ । १ । २१ । इत्यस्य वृत्तौ ॥)

नीहारः, पुं, (निर्हियते इति। निर्+हृ+घञ्। उपसर्गस्य घञीति दीर्घत्वम्।) घनीभूतग्निग्धिरम्। तत्पर्य्यायः। अवश्यायः २ तुषारः ३ तुहिनम् ४ हिमम् ५ प्रालेयम् ६ महिका ७। इत्यमरः। १। ३। १८॥ खजलम् ८ निग्धाजलम् ९। इति त्रिकाण्डशेषः॥ निहारः १० मिहिका ११। इति शब्दरत्नावली॥ (यथा, महाभारते। १। २२८। २।

"खाण्डवञ्च वनं सर्व्वं पाण्डवो बहुभिः शरैः।
प्राच्छादयदमेयात्मा नीहारेणेव चन्द्रमाः॥")

अस्य गुणः। कषवायुवर्द्धकत्वम्। इति राजवल्लभः॥

नु, अ, (नौति स्तुदति वा। णु स्तुद वा+यथायथं कर्त्तर्य्यादिञ् मितद्वादित्वात् डुः।) वितर्कः। (यथा, शाकुन्तले। १।

"निष्क्रम्यचामरशिखाच्युतकर्णभङ्गाः
शावल्लि वर्त्मनि तरन्ति नु वाजिनस्ते॥")

अपमानः। विकल्पः। (यथा, महाभारते। ५। १०५। ३।

"किं नु गर्हाव्यथात्मानमथ भीष्मं दुरासदम्॥")

अनुनयः। अतीतः। प्रश्नः। (यथा, महाभारते। ३। ६३। १२।

"कथं नु राजसूतेन क्षुधितः श्रमकर्षितः॥")

हेतुः। अपदेशः। इति मेदिनी। अवधे, ४१॥

नुः, पुं, अनुकारः। इति दीपदेवः। यथा,—

"नुवौ पूर्व्वेण सम्बन्धौ सन्धौ तु परगामिनौ।"

इति दुर्गादासः॥

नुद, णि वधे। इति कविकल्पद्रुमः॥ (तुदां-क्रुटां-परं-सकं-सेट्।) णि, नुदति अनुनौत् नुनोद। इति दुर्गादासः॥

नुतं, त्रि, (नु+क्तः।) स्तुतम्। यथा,—

"तं वेदशास्त्रपरिनिष्ठितबुद्धिबुद्धिं
धर्म्माम्बरं सुरसुनीन्द्रनुतं कवीन्द्रम्।
लक्ष्मीसखं कवकपिञ्जलटाकलापं
वासं नमामि शिरसा तिलकं मुनीनाम्॥"

इति पुराणम्॥

नुतिः, स्त्री, (नु+भावे क्तिन्।) स्तुतिः। इत्यमरः। १। ६। ११॥ (यथा, भर्त्तृहरिः।

"परगुणनुतिभिः स्वान् गुणान् ख्यापयन्तः॥")

पूजा। इति शब्दरत्नावली॥

नुन्नः, त्रि, (नुद्+क्तः। "नुदविदेति।" ८। २। ५६। इति प्राप्तिको नत्वाभावः।) क्षिप्तः। प्रेरितः। इत्यमरः। ३। १। ८७॥

नुन्नः, त्रि, (नुद+क्तः। निष्ठातस्य पूर्व्वदेश्च नत्वम्।) नुत्तः। इत्यमरः। ३। १। ८७॥ (यथा, माघे। १। २७।

"प्रसह्य तेजोभिरसङ्ख्यातां गते-
रदक्षया नुन्नमनुत्तमं तमः॥")

नृतः, त्रि, नृ गि स्तवने+कर्म्मणि क्तप्रत्ययः। स्तुतः। इति व्याकरणम्॥

नूतनः, त्रि, (नव एव। "भवश्च नूरादेशो वक्तव्यः। नवस्य नूरादेशश्च वार्त्तिकोक्त्या तनप् नवस्य नूरादेशश्च।) अपुरातनम्। तत्पर्य्यायः। प्रत्यग्रः २ अभिनवः ३ नव्यः ४ नवीनः ५ नवः ६ नूतनः ७। इत्यमरः। ३। १। ७७॥ सद्यस्कः ८ अनीर्णः ९। इति हेमचन्द्रः। ३।८४॥ अभ्यग्रः १० प्रतिनवः ११। इति जटाधरः॥ (यथा, रघौ। ८। १५।

"प्रश्रमस्मितपूर्व्वमपार्थिवं
कुलमभ्युदयनूतनेश्वरम्॥")

नूतनः, त्रि, (नव एव। नव+क्तप् नूरादेशश्च।) नूतनः। इत्यमरः। ३। १। ७८॥ (यथा, ऋग्वेदे। ७। १८। २०।

"न त इन्द्र सुमतयो न रायः
संचक्षे पूर्व्वा उषसो न नूनाः॥"

"न नूना नूतनाश्च।" इति सायनभाष्यम्॥")

नूदः, पुं, (नुदति रोगाद्यनिष्टमिति। नुद+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः। पृषोदरादीर्घः।) ब्रह्मदारुवृक्षः। इत्यमरः। २। ४। ४२॥ (ब्रह्मदारुशब्दे ऽविशेषोऽस्य ज्ञातव्यः॥)

नूनं, अ, (नु ऊनयतीति। ऊन परिहाणे+अम्।) तर्कः। ऊहः। यथा, ओजसापि स्वयं नूनमनूनम्। अर्थनिश्चयः। (यथा, देवीभागवते। १। १०। ३६।

"स्वर्गदञ्च तथा प्रोक्तं प्राणिनां मोक्षदं तथा।
न भविष्यति तन्नूनमनया देवकन्यया॥")

अवधारणम्। यथा, नूनं हन्ति स रावणम्। इत्यमरभरतौ॥ सत्यम्। वाक्यपूरणम्। इति मेदिनी॥

नूपुरं, पुं, क्ली, (नू+क्विप्। नुवि पुरति इति। पुर अग्रगमने+"इगुपधेति।" ३। १। १३५। इति कः।) स्वनामख्यातपादभूषणम्। नेपुर इति भाषा। तत्पर्य्यायः। पादाङ्गदम् २ तुलाकोटिः ३ मञ्जीरः ४ हंसकः ५ पादकटकः ६। इत्यमरः॥ पदाङ्गदम् ७। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। ८२। २५।

"नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमम्॥"

"गुरुवारापि मौक्तिकार्य्यात् पादे लुठति नूपुरः।
हारस्तु सकृदावेश कण्ठवक्षसतां गतः॥"

इत्युक्तटः॥)

नृकेशरी, [न्] पुं, (केशरः प्राचुर्य्येणास्त्यस्येति इनिः। गौरादित्वात् ङीषि केशरी चैतिः।) नरसिंहावतारः। इति पुराणम्॥ (गौ केशरोवेति उपमितिसमासे तु "सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः।" इत्यमरोक्तेः। पुरुषश्रेष्ठः।)

नृगः, पुं, राजविशेषः। यथा, श्रीभागवते।

"नृगो नाम नरेन्द्रोऽहमिक्ष्वाकुतनयः प्रभो॥"

(अस्य राजप्रवरस्य कदाचिद् गोदानप्रमादजनितपापात् सकलाखलप्राप्तिर्वृत्तिकुमारगवानुरुद्धेन पुत्रभंगवता वासुदेवेनोद्धारादिकथा च महाभारते। १३। ६०। अध्यायस्य प्रथमश्लोकादासमाप्तेर्द्रष्टव्या॥ नृन् जीवान् गच्छति प्राप्नोति जानाति वेति युत्पत्त्या परमात्मा॥)

नृचक्षाः, [स्] पुं, (नृन् पश्यति मत्स्यत्वेन प्रश्नतीति। चक्ष दृ दर्शने+"सर्व्वधातुभ्योऽसुन्" उणां ४। १८८। इत्यसुन्। यद्वा, "चक्षेर्ब्हुलं शिच्च।" उणां। ४। २१२। इत्यसिः। असनयोरिति न खनादेशः।) राक्षसः। इति हेमचन्द्रः। २। १०१॥ (नृन् पश्यति प्रश्नतीति नृन् शुभाशुभकर्म्मणः पश्यति जानातीत्यर्थः। देवः। यथा, ऋग्वेदे। १०। १०७। ३।

"घृतधारं वायुमर्कं स्वर्विदं
वृषचक्षसः नृणां द्रप्सनन्यानिन्द्रादीन देवांश्च।"

इति भाष्यञ्चतुर्थाश्रयेन॥ नृणां कर्म्मणेतृणामध्वर्य्वादीनासुपद्रष्टा। यथा, ऋग्वेदे। ३। ५३। ६।

"अस्तभ्नात् सिन्धुमर्णवं वृषचक्षाः॥")

वृषचक्षुः, [स्] पुं, (नृणां प्रजानामानां चक्षुरिव।) सुनीथराजपुत्रः। इति महाभारतम्॥ (यथा, भागवते। ६। ९२। ४१।

"सुनीथस्तस्य भविता वृषचक्षुर्यतः सुखोनलः॥"

विष्णुपुराणे तु। ४। २१। ३।

"तस्मादपि सुनीथः सुनीथाद्धः ततो वृषचक्षुः॥")

नृत, य नर्त्तने। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्।) य, नृत्यति नर्त्तकः। इति दुर्गादासः॥

नृतिः, स्त्री, (नृत नर्त्तने+"इगुपधात् कित्।" उणां ४। ११६। इति इन् स च कित्।) नर्त्तनम्। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १०। १८। ३।

"प्राच्यो अगाय नृतये हसाय
द्राघीय आयुः प्रतरं दधानाः॥")

नृतुः, पुं, (नृत्यतीति। नृत+बाहुलकात् कुः।) नर्त्तकः। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। ८। २४। ६।

"इन्द्र यथा ह्यसि तेऽपरीतं नृतो शवः॥"

नृत्यत्यनेति। अधिकरणे कुः।) भूमिः। दीर्घः। क्रिमिः। इति संक्षिप्तसारोणादिवृत्तिः॥

नृत्तं, क्ली, (नृत+भावे क्तः।) नृत्यम्। इत्यमरटीकायां भरतः॥ (यथा, हरिवंशे भविष्यपर्व्वणि। ५। ७३।

"नृत्तज्ञनृत्तप्रवराङ्गनानां
धनुष्करत्नतपस्विनाञ्च॥")

नृत्यं, क्ली, (नृत+"ऋदुपधाच्चाकृल्पिजिनिभ्यः।" ३। १। ११०। इति क्यप्।) तालमानरसाश्रयविलासाङ्गविक्षेपः। नाच इति भाषा। तत्पर्य्यायः। ताण्डवम् २ नटनम् ३ नाट्यम् ४ लास्यम् ५ नर्त्तनम् ६। इत्यमरः। ४। ७। १०॥ नृत्तम् ७। उद्धतं नृत्यं ताण्डवम्। सुकुमारन्तु लास्यम्। भावाश्रयं नृत्तम्। ताललयाश्रयं नृत्यमिति भेदोऽत्र नाटतः। इति भरतः॥ नाटः ८ लास्यः ९ लास्यकम् १० नृतिः ११ इति शब्दरत्नावली॥ * ॥ तस्य लक्षणादि यथा,—

"दैवरुच्या प्रतीतो यस्तालमानरसाश्रयः।
सविलासोऽङ्गविक्षेपो नृत्यमित्युच्यते बुधैः॥ * ॥

ताण्डवञ्च तथा लास्यं द्विविधं नृत्यमुच्यते ।
पेवलिर्वैकुरुपश्च ताण्डवं द्विविधं मतम् ॥
अङ्गविक्षेपबाहुल्यं तथाभिनयसूचना ।
यत्र सा पेवलिस्तस्याः सङ्गादेषेति लोकतः ॥
छेदनं भेदनं यत्र बहुरूपा सुखावली ।
ताण्डवं बहुरूपस्तद्धारणागलसम्भवम् ॥ * ॥
हरिसं यौवतत्वेति लास्यं द्विविधमुच्यते ।
यत्राभिनयतोभावे रसेराश्लेषसुभगे ॥
नायिकानायकौ रङ्गं नृत्यतस्फुरितं हि तत् ॥
मधुरं बहुलीलाभिर्नटीभिर्यत्र नृत्यते ।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम् ॥ * ॥
गेयादुत्तिष्ठते वाद्यं वाद्यादुत्तिष्ठते लयः ।
लयतालसमारब्धं ततो नृत्यं प्रवर्त्तते ॥"
इति सङ्गीतदामोदरः ॥

अरूपस्य नृत्यं वर्त्तम् । यथा,—
"नृत्येनालमरूपेण सिद्धिर्नास्यरूपतः ।
चार्व्वधिष्ठानवन्नृत्यं नृत्यमन्यद्विडम्बना ॥"
इति मार्कण्डेयपुराणम् ॥

विष्णुगृहे नृत्यफलं यथा,—
"नृत्यमानस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ! ।
मनुजा येन गच्छन्ति क्षिप्रा संसारसागरम् ॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
पुष्करद्वीपमासाद्य मोदते वै यदृच्छया ॥
पुष्कराच्च परिभ्रष्टः स्वच्छन्दगमनालयः ।
फलं प्राप्नोति सुश्रोणि ! मम कर्म्मपरायणः ॥
रूपवान् गुणवान् शूरः श्रीलवान् सुपथे स्थितः ।
मद्भक्तश्चैव जायेत संसारपरिमोचितः ॥"
इति वाराहे श्रीकरमाहात्म्यम् ॥

"दृष्ट्वा संपूजितं देवं नृत्यमानोऽनुमोदयेत् ।
अयंशूयमतिः शुद्धः परं ब्रह्म च गच्छति ॥"
इत्यग्निपुराणम् ॥

अपि च । द्वारकामाहात्म्ये श्रीभागवते ।
"यो नृत्यति प्रहृष्टात्मा भावैर्बहुसुभक्तितः ।
स निर्हरति पापानि जन्मान्तरशतैरपि ॥"
हरिभक्तिसुधोदये ।
"बहुधोत्साह्यते हर्षाद्विष्णुभक्तस्य नृत्यतः ।
पद्भ्यां भूमेर्दिशोऽष्टभ्यां दोर्भ्यां खामङ्गलं दिवः ॥"
विष्णुधर्म्मोत्तरे ।
"नृत्यं दत्त्वा तथाप्नोति ब्रह्मलोकमसंशयम् ।
स्वयं नृत्येन संपूज्य तत्रैवानुचरो भवेत् ॥"
अन्यत्र च नारदोक्तौ ।
"नृत्यतां श्रीपतेरग्रे तालिकावादनैर्भृशम् ।
उद्धरन्ति प्रहरिणाः सर्व्वे पातकपञ्जरम् ॥"
इति हरिभक्तिविलासः ॥

नृदेवः, पुं, (नृषु नरेषु मध्ये देवः । वा देव इव इत्युपमितसमासो वा ।) राजा । यथा, नैषधे । ९० । ३३ ।
"अज्ञानमालाविपुलातपत्रै-
र्देवा नृदेवाश्च भिदां न मेतुः ॥"

नृधर्म्मा, [न्] पुं, (नृणरस्य इव धर्म्मो यस्य । "धर्म्मादनिच् केवलात् ।" ५ । ४ । १२४ । इति अनिच् ।) कुबेरः । इति हेमचन्द्रः । २ । १०२ ॥ नरधर्म्मयुक्ते, त्रि ॥

नृपः, पुं, (नॄन् नरान् पाति रक्षतीति । नृ + पा रक्षणे + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) नरपतिः । इत्यमरः । २ । ८ । १ । तस्य लक्षणं यथा,—
"चतुर्योजनपर्य्यन्तमधिकारी नृपस्य च ।
यो राजा तच्चतुर्गुणः स एव मण्डलेश्वरः ।
तत्तद्गुणयुतो राजा राजेन्द्रः परिकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अः ॥

तत्प्रभावं यथा,—
"अपुत्रस्य नृपः पुत्रो निर्धनस्य धनं नृपः ।
अमातृजननी राजा अतातस्य पिता नृपः ॥
अनाथस्य नृपो नाथो क्षमर्त्तुः पार्थिवः पतिः ।
अभृत्यस्य नृपो भर्त्ता नृप एव नृणां सखा ॥
सर्व्वदेवमयो राजा तस्मात्त्वामर्च्चये नृप ! ॥"
इति कालिकापुराणे ५० अध्यायः ॥

नृपदर्शनदिनं यथा । तत्र तिथयः शुभाः । वाराः शनिमङ्गलभिन्नाः । नक्षत्राणि उत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदारोहिणीपुष्याश्विनीहस्तात्रिचानुराधाश्वन्यग्निरोदेवतीर्थेष्वाश्रवणाः । लग्नानि मिथुनकन्याधनुर्मीनवृषभसिंहसंज्ञकानि । तत्र चन्द्रः शोभनः । इति ज्योतिषम् ॥

नृपकन्दः, पुं, (नृपप्रियः कन्दः । कन्दानां नृपः श्रेष्ठो वा । राजदन्तादिवत् समासः ।) राजपलाण्डुः । इति राजनिर्घण्टः ॥

नृपतिः, पुं, (नॄन् पातीति । पा रक्षणे + डतिः । यद्वा, नृणां पतिः ।) राजा । (यथा, मनुः । ७ । ३४ ।
"यत्तस्तु विपरीतञ्च नृपतेरजितात्मनः ।
संचिन्वते यशो लोके घृतबिन्दुरिवाम्भसि ॥")
कुबेरः । इति शब्दरत्नावली ॥

नृपतिवल्लभः, पुं, (नृपतीनां वल्लभः प्रियः ।) औषधविशेषः । नृपवल्लभ इति ख्यातः । यथा,
"जातीफलं लवङ्गाब्दलगेलाटङ्गरामठम् ।
जीरकञ्च यमानी च विश्वसैन्धवपञ्चकम् ॥
लौहमभ्रं रसं गन्धं ताम्रं प्रत्येकशः पलम् ।
मरिचं त्रिपलं दत्त्वा छागीदुग्धेन पेषयेत् ॥
धात्रीरसेन वा पिष्ट्वा वटिकां कुरु यत्नतः ।
श्रीमद्भृङ्गनाथेन विचिन्त्य परिनिर्म्मितः ॥
सूर्य्यवत्तेजसा चायं रसो नृपतिवल्लभः ।
अष्टाङ्गग्रहणीं हन्ति पवित्रः सूर्य्यदर्शकः ॥
हन्ति मन्दानलं सर्व्वमामदोषं विरूचिकाम् ।
प्लीहगुल्मोदरार्शोनाशक्षतपाण्डुहलीमकम् ॥
क्षुतशूलं कण्ठशूलञ्च चक्षुःशूलञ्च कामलाम् ।
शिरःशूलं कटीशूलमानाहमोक्षशूलकम् ॥
कासश्वासमवातञ्च श्लीपदं श्लोथमर्ब्बुदम् ।
गलगण्डं गण्डमालामम्लपित्तञ्च गर्हणीम् ॥
क्रिमिकुष्ठानि दद्रूणि वातरक्तं भगन्दरम् ।
उपदंशमशौसारं यक्ष्मणश्चाप्रमेहकम् ॥
अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातमधोगुदम् ।
ज्वरं जीर्णज्वरं कण्डूं तन्द्रालस्यं वमिं भ्रमिम् ॥
दाहविद्रधिहिक्काञ्च जठराद्दरमूरुताः ।
वाधिर्य्यं स्वरभेदञ्च दुष्टद्विव्रणपर्व्वकान् ॥
ऊरुस्तम्भं रक्तपित्तं गुदभ्रंशारुचिं क्षयम् ।
कर्णनासाक्षिरोगांश्च दन्तरोगञ्च पीनसम् ॥
स्त्रौल्यञ्च शीतपित्तञ्च स्थावराणि विषाणि च ।
वातपित्तकफोत्थांश्च दन्दजान् सान्निपातिकान् ॥
सर्व्वरोगघ्नयान् हन्ति चक्रांशुरिव यादृहा ।
बलवर्णकरो ह्येष आयुष्यो वीर्य्यवर्द्धनः ॥
परं वाजीकरः श्रेष्ठः पटुतामलचिह्निरः ।
अरोगीदीर्घजीवी स्यात् रोगी रोगं विमुञ्चति ।
रसस्यास्य प्रसादेन सुदृष्टिर्जायते नरः ॥"
इति रत्नावली ॥

नृपद्रुमः, पुं, (नृपप्रियो द्रुमो वृक्षः ।) आरग्वधः । राजादनीवृक्षः । इति राजनिर्घण्टः ॥

नृपप्रियः, पुं, (नृपाणां प्रियः ।) वेतसवृक्षः । इति शब्दचन्द्रिका । वेड़ बाँश इति भाषा । राजपलाण्डुः । रामशरः । शालिधान्यम् । आम्रम् । इति राजनिर्घण्टः ॥

नृपप्रियफला, स्त्री, (नृपप्रियं फलं यस्याः ।) वार्त्ताकी । इति राजनिर्घण्टः ॥

नृपप्रिया, स्त्री, (नृपाणां प्रिया ।) केतकी । राजखर्জ্জूरी । इति राजनिर्घण्टः ॥

नृपबदरः, पुं, (नृपप्रियो बदरः ।) राजबदरवृक्षः । तत्फले, क्ली । इति राजनिर्घण्टः ॥

नृपमन्दिरं, क्ली, (नृपस्य मन्दिरम् ।) राजसदनम् । तत्पर्य्यायः । सौधम् २ । इति हेमचन्द्रः । ४ । ५२ ॥

नृपमाङ्गल्यकं, क्ली, (नृपस्य माङ्गल्यं मङ्गलं यस्मादिति । कप् ।) आडुम्बरवृक्षः । इति राजनिर्घण्टः ॥

नृपलक्ष्म, [न्] क्ली, (नृपस्य लक्ष्म चिह्नम् ।) राजचिह्नम् । इत्यमरः । २ । ८ । १२ । राजचिह्नञ्च ॥

नृपलिङ्गधरः, पुं, (धरतीति । धृ + अच् । नृपलिङ्गस्य धरः ।) राजवेषधारी । यथा,—
"निजबाहुबलेन वीरः कलिं दिग्विजये क्वचित् ।
नृपलिङ्गधरं शूद्रं हन्तं गोमिथुनं पदा ॥"
इति श्रीभागवते । १ । १५ ॥

नृपवल्लभः, पुं, (नृपाणां वल्लभः प्रियः ।) राजान्नः । इति राजनिर्घण्टः ॥ राजप्रिये, त्रि ॥

नृपवल्लभा, स्त्री, (नृपस्य वल्लभा ।) केविकापुष्पम् । इति राजनिर्घण्टः ॥ राजमहिषी च ॥

नृपसभं, क्ली, (नृपाणां सभा । "सभा राजामनुष्यपूर्व्वा ।" २ । ४ । २३ । इति क्लीवत्वम् ।) नृपाणां राज्ञां संहतिर्व्वा । इत्यमरभरतौ ॥

नृपात्मजा, स्त्री, (नृपस्य आत्मजेव । सुदृश्यत्वात् तथात्वम् ।) कटुतुम्बी । इति रत्नमाला ॥ (नृपस्य आत्मजा कन्या ।) राजकन्या । यथा,
"स्वयम्बरं भीमनृपात्मजाया
दिग्भ्यः पतिं प्रविवेश्य शेषः ॥"
इति नैषधे १० सर्गः ॥

नृपाम्बरः, पुं, (नृपाणामम्बरो यज्ञः।) राजसूययज्ञः। इति त्रिकाण्डशेषः॥

नृपान्नं, क्ली, (नृपप्रियं अन्नम्।) राजान्ननामधान्यम्। इति राजनिर्घण्टः॥ राज्ञ ओदनश्च॥

नृपाभीरं, क्ली, (अभीरयति क्षपयति भोजनकालमिति। अभि+ईर्+क।) नृपस्य अभीरं भोजनकालक्षपकवाद्यविशेषः।) भक्ततूर्यम्। राजभोजनकालीनवाद्यविशेषः। इति त्रिकाण्डशेषः॥

नृपामयः, पुं, (आमयानां नृपः। राजदन्तादित्वात् पूर्वनिपातः।) राजयक्ष्मा। क्षयरोगः। इति राजनिर्घण्टः॥ (नृपस्य आमयो व्याधिः।) राज्ञो रोगश्च॥

नृपावर्त्तं, क्ली, (नृप इव आवर्त्तते इति। आ+वृत्+अच्।) राजावर्त्तरत्नम्। इति राजनिर्घण्टः॥

नृपासनं, क्ली, (नृपस्य आसनम्।) राजासनम्। तत्पर्य्यायः। भद्रासनम् २ सिंहासनम् ३। इत्यमरः। २। ८। ३१॥ (यथा, भागवते। ३। १। २८।

"यमभ्यषिञ्चच्छतपत्रनेत्रो
नृपासनाशां परिहृत्य दूरात्॥")

नृपाह्वयः, पुं, (नृपं आह्वयते गर्व्वेणेति। आ+ह्वे+अच्।) राजपलाण्डुः। इति राजनिर्घण्टः॥ नृपनामा च॥

नृपोचितः, पुं, (नृपाणामुचितो योग्यः।) राजभावः। इति राजनिर्घण्टः। राजयोग्ये, त्रि॥

नृयज्ञः, पुं, (ना मनुष्यसमूहो यो यज्ञः।) अतिथिसेवा। यथा, मनुः। ७। ७०।

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥"

नृवराहः, पुं, (ना चासौ वराहश्चेति।) वराहरूपधृग्भगवदवतारः। यथा,—

"नृवराहस्य वसतिर्मेरुशृङ्गेऽति प्रतिष्ठिता।
नृसिंहस्य तथा प्रोक्ता जनलोके महात्मनः॥"

स एव वसेर्द्वादौ। यथा,—

"शौकरं रूपमास्थाय हार्म्यक्ष च पुरातनः।
अविष्यामि न सन्देहो ब्रह्म ब्रह्म! त्वरान्वितः॥"

इति पाद्मे क्रियाखण्डे २८ अध्यायः॥

अपि च।

"देवक्षतोऽसौ नृवराहमास्थिते
विपातयामास कथा त्वलन्तीम्।
शक्तिं यथा विद्युतमाशु कुक्षे
प्रवर्षमाणोऽपि गिरिं सुमेरुः॥
स हन्यमानो गदयाप्रमेयः
प्रोवाच दैत्यं नृवराहमूर्त्तिः।
प्रजापतेः सेतुमिमं निहत्य
त्रैलोक्य कः क्षेमि यथासुरेन्द्र॥"

इत्यग्निपुराणम्॥

नृशंसः, त्रि, (नृन् नरान् शंसति हिनस्तीति। नृ+शंस हिंसायाम्+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) क्रूरः। परद्रोही। इत्यमरः। १। ६०॥ (यथा, पञ्चतन्त्रे। १। १४२।

"ये नृशंसा दुरात्मानः प्राणिनां प्राणनाशकाः।
उद्वेजनीया भूतानां व्याला इव भवन्ति ते॥")

नृसिंहः, पुं, (ना चासौ सिंहश्चेति। नरसिंहनृसिंहधरत्वादेवास्य तथात्वम्।) विष्णुः। इति त्रिकाण्डशेषः॥ विष्णोर्दशावतारान्तर्गते चतुर्थे पूर्व्वावतारः। तस्य रूपं यथा,—

"सिंहस्य हत्वा वदनं मुरारिः
सदा करालञ्च सुरक्तनेत्रम्।
अर्द्धं वपुर्म्मे मनुजस्य हत्वा
ययौ सभां दैत्यपतेः पुरस्तात्॥"

इत्यग्निपुराणम्॥

महाविष्णुः। तन्मन्त्रादि यथा,—

अथ नृसिंहमन्त्राः। विरञ्चिः।

"उग्रं वीरं वदेत् पूर्व्वं महाविष्णुमनन्तरम्।
ज्वलन्तं पदमाभाष्य सर्व्वतोमुखमीरयेत्॥
नृसिंहं भीषयं भद्रं मृत्युमृत्युं वदेत्ततः।
नमान्यहमिति प्रोक्तो मन्त्रराजसुरद्रुमः॥
अयं मन्त्रो मायापुटितोऽपि भवति तदा सर्व्वफलप्रदः। तथा च विरञ्चिः

"कृत्तेखापुटितश्चेत् स्यात् सर्व्वकामफलप्रदः।"

अस्य पूजा प्रातःस्नात्वादिदेवाद्यर्चोक्तपीठमन्त्रान्तं विधाय ऋष्यादिन्यासं कुर्य्यात्। शिरसि ब्रह्मणे ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदि नृसिंहाय देवतायै नमः। ततः करान्यासौ। ज्रां अङ्गुष्ठाभ्यां नमः। ह्रीं तर्ज्जनीभ्यां स्वाहा। क्ष्रौं मध्यमाभ्यां वषट्। क्रों अनामिकाभ्यां हूम्। क्षूं कनिष्ठाभ्यां वौषट्। फट् करतलपृष्ठाभ्यां फट्। एवं हृदयादिन्यासः। ततो ध्यानम्।

"कोपादाकोलजिह्वं विततविषहसत्सोमसूर्य्याग्निनेत्रं
पादाघातैरधस्तात्प्रभसपरिचितं भिन्नदैत्येन्द्रगात्रम्।
शङ्खं चक्रासिपाशाङ्कुशगदशरखान्युद्वहन्तं
भीमं तीक्ष्णोग्रदंष्ट्रं भविमयविविधाकल्पमीड़े नृसिंहम्॥"

एवं ध्यात्वा मानसैः संपूज्य गुरुस्थापनं कृत्वा वैष्णवोक्तपीठपूजां कृत्वा पुनर्धात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत। केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च क्रां हृदयाय नमः। इत्यादिना षडङ्गानि पूजयेत्। ततः पत्रेषु पूर्व्वादिषु शङ्खं चक्रं पाशं अङ्कुशं वज्रं गदां खड्गं खेटकञ्च प्रणवादिनमोऽन्तेन पूजयेत्। तथा च विरञ्चिः।

"अङ्गान्यनेनैव शङ्खं चक्रं पाशाङ्कुशौ पुनः।
वज्रं सौनोदकीं खड्गखेटौ पत्रेषु पूजयेत्॥"

तत इन्द्रादीन् वज्रादींश्च सम्पूज्य धूपादिविसर्জ্জनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं षड्लक्षजपः। तथा च।

"अयुतञ्च जपेन्मन्त्रं घृतेन जुहुयात्ततः।
ततःसहस्रं समिधो तोषयेद्हुता गुरुम्॥"

मन्त्रान्तरं यथा,—

"चकारो वह्निमारूढो मनुविन्दुसमन्वितः।
एकाक्षरो मनुः प्रोक्तः सर्व्वकामफलप्रदः॥"

अस्य पूजा प्रातःस्नात्वादिदेवार्च्चनोक्तध्यानार्घ्यादिकं सर्व्वं मन्त्रराजवत्। विशेषस्तु ऋषिरत्रिर्गायत्री छन्दो नृसिंहो देवता चकारो बीजं औकारः शक्तिः षड्दीर्घभाजा बीजेनाङ्गकल्पना। अस्य पुरश्चरणमयुतजपः। तथा च। अयुतञ्च जपेन्मन्त्रमित्यादि॥ * ॥

मन्त्रान्तरं यथा। कण्वे।

"जयद्वयं समुच्चार्य्य श्रीपूर्व्वो नृसिंहेऽपि।
अष्टाक्षरो मनुः प्रोक्तो भजतां कामदो नृणाम्॥"

अस्य ब्रह्मा ऋषिर्गायत्री छन्दो नृसिंहो देवता षड्दीर्घयुक्तबीजेनाङ्गकल्पना। ध्यानार्घ्यं मन्त्रराजवत्। अस्य पुरश्चरणमयुतजपः।

वसुलक्षं जपेन्मन्त्रमित्यादिवचनात् ।"इति तन्त्रसारः ॥ * ॥ षोढ़ग्ररतिवन्ध्यान्तर्गततनवमबन्धः । तस्य लक्षणं यथा, रतिमञ्जर्याम् ।
"पादौ संपीड्य योनौ च हठाल्लिङ्गप्रवेशनम् ।
हस्तयोर्वेष्टयेद्ग्रीवां बन्धो नृसिंहसंज्ञकः ॥"
(खनामख्यातनृपविशेषः । यथा, सह्याद्रिखण्डे । ३१ । ४० ।
"नागात् नृसिंहभूपालस्तत्सुतो गाढ़भाषणः ॥"
ना सिंह इव इत्युपमितसमासः ।) नरश्रेष्ठः ॥ (यथा, महाभारते । ६ । ५३ । २४ ।
"इष्ट्वा महार्हैः क्रतुभिर्नृसिंहाः
सन्त्यज्य देहान् सुगतिं प्रपन्नाः ॥")

नृसिंहचतुर्दशी, स्त्री, (नृसिंहप्रिया नृसिंहव्रतोपलक्षिता वा चतुर्दशी ।) वैशाखशुक्लचतुर्दशी । तत्र व्रतविधिर्यथा,—
"वैशाखस्य चतुर्दश्यां शुक्लायां श्रीनृकेशरी ।
जातस्तदह्नि तत्पूजोत्सवं कुर्वीत सव्रतम् ॥"
अथ श्रीनृसिंहचतुर्दशीव्रतनित्यता । दक्षनारसिंहपुराणे श्रीभगवन्नृसिंहप्रह्लादसंवादे व्रतविधिकथने ।
"वर्षे वर्षे तु कर्त्तव्यं मम सन्तुष्टिकारकम् ।
महागुह्यमिदं श्रेष्ठं मानवैर्भवभीरुभिः ॥"
किञ्च ।
"विज्ञाय महिमं यस्तु लङ्घयेत् स तु पापभाक् ।
एवं ज्ञात्वा प्रकर्त्तव्यं महिने व्रतसत्तमम् ।
अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ ॥"*॥
तत्राधिकारिनिर्णयः । तत्रैव ।
"सर्वेषामेव लोकानामधिकारोऽस्ति मद्व्रते ।
मद्भक्तेषु विशेषेण ज्ञेयं मत्परायणैः ॥" * ॥
अथ तन्माहात्म्यम् । तत्रैव ।
श्रीप्रह्लाद उवाच ।
"नमस्ते भगवन् विष्णो नृसिंहवपुषे नमः ।
लङ्घनोऽहं सुरश्रेष्ठं त्वां पृच्छामि च तत्त्वतः ॥
स्वामिंस्त्वयि समीभूता भक्तिर्नवविधा कथम् ।
कथं ते सुप्रियो जातः कारणं वद मे प्रभो ! ॥
श्रीनृसिंह उवाच ।
कथयामि महाप्राज्ञ शृणुष्वैकाग्रमानसः ।
भक्तैर्यैतु कारणं वत्स ! प्रियत्वस्य च तत् पुनः ॥
पुराकल्पे त्वभूद्विप्रः किञ्चिन्नं नाप्यधीतवान् ।
गत्वा च वसुदेवो हि वेश्यायां तत्परो ह्यभूः ॥
तस्मिन् जन्मनि नैव त्वं चकर्थ सुव्रतं कियत् ।
श्रुत्वा तु मद्व्रतं चैकं वेश्यासङ्गतिलालसः ॥
मद्व्रतस्य प्रभावेण भक्तिर्ज्ञाता तवेदृशी ।
श्रीप्रह्लाद उवाच ।
श्रीनृसिंहाच्युत स्वामिन् कस्य पुंसैव किं कृतम् ।
वेश्यायां वर्त्तमानेन कथं तद्धि कृतं मया ॥
आख्यानं विस्तरेणैतं वक्तुमर्हसि साम्प्रतम् ।
श्रीनृसिंह उवाच ।
पुरावन्तीपुरे ह्यासीद्द्विजाग्र्यो वेदपारगः ।
तन्नाम वसुधर्मेति सर्व्वलोकेषु विश्रुतम् ॥
नित्यं होमक्रियामेव करोति द्विजसत्तमः ।
ब्रह्मक्रियासु सततं सर्व्वासु किल तत्परः ॥
अग्निहोमादिभिर्यज्ञैरिष्टाः सर्व्वे सुरोत्तमाः ।
तेनापि विद्यमानेन न ज्ञातं दुष्कृतं कियत् ॥
तस्य भार्य्या सुशीलाभूद्विख्याता भुवनत्रये ।
पतिव्रता सदाचारा पतिभक्तिपरायणा ॥
जज्ञिरे च सुताः पञ्च तस्यां द्विजवरात्ततः ।
सदाचाराः सुविद्वांसः पितृभक्तिपरायणाः ॥
तेषां मध्ये कनिष्ठस्तं वेश्यायां तत्परः सदा ।
तां सन्निवेशमानेन सुरापानं कृतं त्वया ॥
सदा पापरतस्त्वं हि नाज्ञताध्ययनं क्वचित् ।
विलासिनीगृहे नित्यं वसतिर्ह्यभवत्तव ॥
एकदा तदृक्षे ह्यासीत्तया सह महान् कलिः ।
ततः कलहभावेन भोजनं न कृतं त्वया ॥
अभ्राम्यन्मद्व्रतं चक्रे व्रतानामुत्तमं व्रतम् ।
तया सह विवादेन रात्रौ जागरणं कृतम् ॥
वेश्याया अपि तत् सर्व्वं प्रज्ञातं तु त्वया समम् ।
रात्रौ जागरणे तस्याः सङ्गतं कायशोधनम् ॥
युवयोर्मद्व्रतं ज्ञातमज्ञानाद्बहुपुण्यदम् ।
येन चौर्जव्रतैनाद्य मोदन्ते दिवि देवताः ॥
तदार्थंस्तु ततो ब्रह्मा चक्रे मद्व्रतसुत्तमम् ।
मद्व्रतस्य प्रभावेण निर्म्मितं सचराचरम् ॥
ईश्वरेणापि तत्रैव वधार्थं त्रिपुरस्य च ।
महिम्नैव व्रतस्यास्य त्रिपुरं संनिपातितम् ॥
अन्यैश्च बहुभिर्देवैर्ऋषिभिश्च पुरातनैः ।
राजभिश्च महाप्राज्ञैर्विहितं व्रतसुत्तमम् ॥
एतद्व्रतप्रभावेण सर्व्वे सिद्धिमुपागताः ॥
वेश्यापि मत्प्रिया ज्ञाता त्रैलोक्ये सुखचारिणी ।
ईदृग्यं मद्व्रतं वत्स ! त्रैलोक्ये चैव विश्रुतम् ॥
धूर्त्तायाश्च विलासिन्या व्रतमेतदुपस्थितम् ।
प्रह्लाद ! तेन ते भक्तिर्ज्ञाता ह्युत्तमा ।
सा वेश्या त्वत्वरा जाता दिवि भोगानवाप्नुयात् ।
शुक्ला कामं विलीना तु त्वं प्रह्लाद विविक्त माम् ॥
कार्य्यार्थमवतारस्ते मच्छरीरात् पृथक् त्वसौ ।
विधाय सर्व्वकार्य्याणि शीघ्रं मयि गमिष्यसि ॥
य इदं व्रतमद्यानु प्रविधास्यन्ति मानवाः ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
अपुत्रो लभते पुत्रान्सङ्कल्पांश्च सुवर्चसः ।
दरिद्रो लभते लक्ष्मीं धनदस्य च यादृशीं ॥
तेजस्कामो लभेत्तेजो राज्येप्सुः राज्यसुत्तमम् ।
आयुष्कामो लभेत्तायुर्यांछत्यग्र्यं श्रियस्य च ॥
स्त्रीणां व्रतमिदं साधु पुत्रदं भाग्यदं तथा ।
अवैधव्यकरं तासां पुत्रशोकविनाशनम् ॥
धनधान्यफलञ्चैव पतिप्रियकरं सुखम् ।
सार्व्वभौमसुखं तासां दिव्यसौख्यं भवेत्ततः ॥
स्त्रियो वा पुरुषा वापि कुर्व्वन्ति व्रतसुत्तमम् ।
तेभ्यो ददाम्यहं सौख्यं मुक्तिमुक्तिफलं तथा ॥
बहुनोक्तेन किं वत्स ! व्रतस्यास्य फलस्य हि ।
यद्व्रतस्य फलं वक्तुं नाहं शक्तो न शङ्करः ।
ब्रह्मा चतुर्भिर्व्वक्त्रैश्च फलं स्वाप्नोवितावधि ॥"
किञ्च तत्रैव व्रतविधिकथने ।
"यथा यथा प्रवृत्तिः स्यात् पातकस्य कलौ युगे ।
तथा तथा विधास्यन्ति मद्व्रतं विरलं जनाः ॥
मद्व्रतस्य विधाने च मतिर्नं स्यात् दुरात्मनाम् ।
सदा पापरतानान्तु पुरुषाणां विकर्म्मणि ॥
विचार्य्यैवं प्रकर्त्तव्यं माधवे मासि मद्व्रतम् ।
प्राप्ते भूतदिने वत्स ! सर्व्वकल्मषनाशनम् ॥
येनैव क्रियमाणेन सहस्रादश्वमेधजम् ।
जायते नात्र वक्तव्यं मानुषाणां महात्मनाम् ॥"
तदङ्गे च ।
"य इदं शृणुयान्नित्यं व्रतं पापप्रणाशनम् ।
तस्य श्रवणमात्रेण ब्रह्महत्या व्यपोहति ॥
पवित्रं परमं गुह्यं कीर्त्तयेत् यस्तु मानवः ।
सर्व्वान् कामानवाप्नोति व्रतस्यास्य फलं लभेत् ॥"
अथ तद्व्रतदिननिर्णयः । आगमे ।
"वैशाखे शुक्लपक्षे च चतुर्दश्यां महातिथौ ।
सायं प्रह्लादधिकारमसह्यिष्णुः परो हरिः ॥
सद्यः कटकटाशब्दविस्फारितसभाजनः ।
लीलया स्तम्भगर्भात्तादुद्भूतः शब्दभीषणः ॥
दृष्टरेवतारार्त्तां यक्षतः समुपीडयेत् ।
महापुण्यतमायाञ्च सायं विप्रं प्रपूजयेत् ॥"
दक्षनारसिंहे ।
"वैशाखशुक्लपक्षस्य चतुर्दश्यां समाचरेत् ।
मध्याह्नसमये पुण्यं व्रतं पापप्रणाशनम् ॥"
किञ्च ।
"स्वातीनक्षत्रयोगे तु शनिवारे हि मद्व्रतम् ।
सिद्धियोगस्य योगे च लभ्यते दैवयोगतः ॥
सर्व्वैरेतैस्तु संयुक्तैर्लक्षकोटिविनाशनम् ।
केवलञ्च प्रकर्त्तव्यं महिनं फलकाङ्क्षिभिः ।
वैष्णवैर्न तु कर्त्तव्या स्मरविद्धा चतुर्दशी ॥"
अथ तद्व्रतविधिः । तत्रैव ।
"प्रातरुत्थाय कुर्व्वीत नियमं मनसा स्मरन् ।
मामेव महिने वत्स ! दन्तधावनपूर्व्वकम् ॥"
नियममन्त्रम् ।
"श्रीनृसिंह महोग्रस्त्वं दयां कुरु ममोपरि ।
अद्याहं ते विधास्यामि व्रतं निर्व्विघ्नतां नयेति ॥
व्रतस्थेन न वक्तव्यं महिने पापिभिः सह ।
मिथ्यालापो न कर्त्तव्यः समयफलकाङ्क्षिभिः ॥
स्त्रियं दूतं विहायोग्रैर्व्रतस्थेन महात्मना ।
स्नानं मम रूपञ्च महिने सकले शुभे ॥
ततो मध्याह्नवेलायां नद्यादौ विमले जले ।
गृहे वा देवखाते वा तड़ागे वातिशोभने ॥
वैदिकेन च मन्त्रेण स्नानं कुर्य्यादिचक्षणः ।
मृत्तिकागोमयेनैव तथा धात्रीफलेन वा ॥
तिलैर्वा सर्व्वमापन्नैः स्नानं कृत्वा महात्मभिः ।
परिधाय शुचिर्व्वस्त्रे नित्यकर्म्म समाचरेत् ॥
ततो गृहं समागत्य स्मरन् मां भक्तियोगतः ।
गोमयेन विलिप्याथ कुर्य्यादष्टदलाम्बुजम् ॥
कलसं तत्र संस्थाप्य ताम्ररत्नसमन्वितम् ।
तस्योपरि न्यसेत् पात्रं तण्डुलैः परिपूरितम् ॥
हैमी मूर्त्तिस्तु तत्रैव स्थाप्या लक्ष्मीस्तथैव च ।
पलेन च तदर्द्धेन तदर्द्धेन वा पुनः ॥
यथाशक्ति तथा कार्य्ये वित्तशाठ्यविवर्जितैः ।
पश्चात्तेन ते स्थाप्य पूजनन्तु समाचरेत् ॥
ततो ब्राह्मणमाकृष्य तमाचार्य्यमनोपमम् ।
कुर्य्याच्छास्त्रसमायुक्तं शान्तं दान्तं जितेन्द्रियम् ।

तेनैव कारयेत् पूजां दत्त्वा ग्राह्यानुसारतः ।
आचार्यवचनाद्धोमान् पूजां कुर्याच्चरन् व्रतम्॥"
तत्रार्घे प्रह्लादः पूजनीयः । तथा चाग्नेये-
"प्रह्लादश्चैव गणपो या हि पुण्या चतुर्दशी ।
पूजयेत्तत्र यत्नेन हरेः प्रह्लादमव्ययः ॥"
इति द्वारसिंहे ।
"मण्डपं कारयेत्तत्र पुण्यस्तवकशोभितम् ।
ऋतुकालोद्भवैः पुष्पैः पूजयेच्च यथाविधि ॥
उपचारैः षोड़शभिर्मन्त्रेणानेन मन्त्रिभिस्तथा ।
ततः पौराणिकैर्मन्त्रैः पूजनीयो विशेषतः ॥"
तत्र चन्दनमन्त्रः ।
"चन्दनं शीतलं दिव्यं चन्द्रकुङ्कुमसंश्रितम् ।
ददामि ते प्रसीदार्थं नृसिंह परमेश्वरेति ॥"
पुष्पमन्त्रः ।
"कालोद्भवानि पुष्पाणि तुलस्यादीनि वै प्रभो!।
पूजयामि नृसिंहेश! लक्ष्म्या सह नमोऽस्तु ते॥"
धूपमन्त्रः ।
"कालागुरुमयं धूपं सर्व्वदेवसुवल्लभम् ।
करोमि ते महाविष्णो! सर्व्वकामसमृद्धये ॥"
दीपमन्त्रः ।
"दीपः पापहरः प्रोक्तस्तमसां राशिनाशनः ।
दीपेन लभते तेजस्त्वमतो दीपं ददामि ते ॥"
नैवेद्यमन्त्रः ।
"नैवेद्यं सौख्यदं वस्तु भक्ष्यभोज्यसमन्वितम् ।
ददामि ते रमाकान्त सर्व्वपापक्षयं कुरु ॥"
अर्घमन्त्रः ।
"नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्घ्यप्रदानेन सफलाः सन्तु मनोरथाः ॥"
पूजामन्त्रः ।
"पीताम्बर महाविष्णो प्रह्लादभयनाशन ।
यथा भूतार्चने नाथ यथोक्तफलदो भवेति ॥
रात्रौ जागरणं कुर्यात् गीतवाद्यिजनैर्नरैः ।
पुराणपठनं वृत्तं श्रोतव्यं भक्तयानकम् ॥
ततः प्रभातसमये स्नानं कृत्वा कृतन्द्रितः ।
पूर्व्वोक्तेन विधानेन पूजयेच्च प्रयत्नतः ॥"
किञ्च ।
"अदीक्षे ये नरा जाताः ये चानिच्छन्ति मत्पुरः ।
तांश्चक्षुर्हर देवेश! दुःखहात् भवसागरात् ॥
पातकार्त्तवमग्नस्य व्याधिदुःखासुराग्निभिः ।
तीव्रैस्तु परिभूतस्य महादुःखगतस्य मे ॥
करावलम्बनं देहि शेषशायिन् जगत्पते ।
श्रीनृसिंह रमाकान्त भक्तानां भयनाशन ॥
क्षीराम्बुधिनिवास त्वं प्रीयमाणो जनार्द्दन ।
व्रतेनानेन मे देव मुक्तिमुक्तिप्रदो भव ॥
एवं प्रार्थ्य ततो देवं विसर्ज्जय च यथाविधि ।
उपहारादिकं सर्व्वमाचार्य्याय निवेदयेत् ॥
दक्षिणाभिः सुसन्तोष्य ब्राह्मणांश्च विसर्ज्जयेत् ।
समध्यानसमायुक्तो सुबन्धुभिरिति ॥"
इति श्रीहरिभक्तिविलासे १३ विलासः ॥

नृसेनं, क्ली स्त्री, (नृणां सेना । "विभाषा सेनेति ।" २ । ४ । २५ । इति प्राप्तिकं क्लीवत्वम् ।) नृणां सेना । इत्यमरः । २ । ५ । ४० ॥

नृसोमः, पुं, (ना सोमश्चन्द्र इव । इत्युपमितिसमासः ।) नरश्रेष्ठः । यथा, रघौ । ५ । ५६ ।
"तथेत्युपस्पृश्य पयः पवित्रं
सोमोद्भवायाः सहितो नृसोमः ।
उदङ्मुखः सोऽग्निपरिग्रहीतुमगात्
जगाह तस्मान्नियमग्रहीतुमगात् ॥"
नृहरिः, पुं, (ना चासौ हरिश्चेति ।) नृसिंहावतारः । यथाह गोपदेवः ।
"श्रीते स चित्तग्रथने मम मीनकूर्म्म-
कोलोऽभवन्नृहरिवामनयामदग्न्याः ।
योऽभूद्भूभूव भरताग्रजजह्नुजन्मा
कल्की मताश्च भविता ग्रहरिष्यतेऽरीन् ॥"
(यथा च भागवते । ७ । ८ । २७ ।
"तं मन्यमानो निजवीर्य्यशङ्कितं
यद्रक्षमुक्तो नृहरिं महासुरः ॥")
नृ, गि नीतौ । कविकल्पद्रुमः ॥ (क्र्यां-पुं-गर्-सर्व्व-सेट् ।) गि, नृणाति नीर्णः । नीतिः प्रापणा । इति दुर्गादासः ॥
नृ, म नीतौ । इति कविकल्पद्रुमः ॥ (स्वां-लिखि चटां-सर्व्व-सेट् ।) म, नरयति । नीतिः प्रापणा । इति दुर्गादासः ॥
नेचक, पुं, (निज शुद्धौ + ण्वुल् ।) निर्म्मलकः । रचकः । (यथा, मनौ । ८ । ३६६ ।
"शाल्मले फलके श्लक्ष्णे नेनिज्यात्तेचकः शनैः ।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥"
(प्रौधके, त्रि ॥)
नेता, [तृ] पुं, (नयतीति । नी + तृच् ।) प्रभुः । इत्यमरः । ३ । १ । ११ ॥ (यथा, रघौ । १ । ७५ ।
"व्यासङ्गोपधयो नेतुर्नेक्षुसङ्गेक्षुदीपिकाः ॥")
निम्बवृक्षः । इति राजनिर्घण्टः ॥ प्रापके, त्रि । (यथा, महाभारते । २ । ६६ । ६ ।
"तिल त्वं स्थावर इव यावदेव बलः क्वचित् ।
इतो नेता हि तत्र त्वं ज्ञास्यसे यत्-
कृतात् ॥")
नेत्रं, क्ली, (नीयते नयति वानेनेति । "दाम्नीशसीति ।" ३ । २ । १८२ । इति करणे ष्ट्रन् ।) चक्षुः । (यथा, मनुः । ३ । ३३ ।
"नाश्नन्त्यूर्द्धं खके नेत्रे नाभ्यक्तमनाहृताम् ।
न पश्येत् प्रसवन्तीञ्च तेजस्कामो द्विजोत्तमः ॥")
वटः । अंशुकम् । इत्यमरः । २ । ६ । ६३, ३१३ । ७८ ॥ मन्त्रगुप्तः । (यथा, महाभारते । ६ । १८ । १३ ।
"मन्त्रार्थं मन्त्रयं कृत्वा तथा नेत्रञ्च वासुकिम् ।
देवा मथितुमारब्धाः क्षुब्धं निधिमम्भ-
सामृ ॥")
वृत्तबलम् । रथः । नेतरि, त्रि । इति मेदिनी । रे, ५४ ॥ (यथा, महाभारते । २ । ६० । ४ ।
"नावं समुद्र इव वातनेत्रा-
मारुह्य घोरे वसने निमज्जेत् ॥")
नाड़ी । इति विश्वः ॥ वक्षिणशलाका । इति राजनिर्घण्टः ॥

नेत्रकरः, पुं, (नेत्रे क्षालयतेऽनेनेति । कृ + णिच् + कः । ततो ह्रस्वः ।) नेत्रनिधायकचर्म्मपुटः । चक्षुर पाता इति भाषा । इति वर्ल्लशब्दस्य नानार्थे अमरः । ३ । ३ । १२१ ॥
नेत्रपर्य्यन्तः, पुं, (नेत्रयोः पर्य्यन्तः अन्तः ।) व्यपाङ्गः । इति राजनिर्घण्टः ॥ नयनावधिके, त्रि ॥
नेत्रपिण्डः, पुं, (नेत्रे नेत्रं वा पिण्ड इवास्य इति ।) विड़ालः । इति हारावली । ८३ ॥ चक्षुर्गोलकश्च ॥
नेत्रपुष्करा, स्त्री, (नेत्रयोः पुष्करं जलं यस्याः यत् सेवनादित्यर्थः ।) रक्तजटा । इति राजनिर्घण्टः ॥
नेत्रमीलना, स्त्री, (नेत्रयोर्म्मिलनं मेलनं सुद्रव्यं यस्याः । ततः पृषोदरादित्वात् लस्य नत्वम् । क्वचित् नेत्रमिला इति वा पाठः ।) यवतिक्तालता । इति राजनिर्घण्टः ॥
नेत्रयोनिः, पुं (नेत्राणि योनिभिर्ज्ञातानि यस्य । सहस्रयोनय एव सहस्रनेत्राणि जातानि अतस्तन्नाम्ना विश्रुतः । नेत्राणि योनय इवास्येति वा ।) इन्द्रः । इति शब्दमाला । (नेत्रं अक्षिगोलकं योनिरुत्पतिकारणं यस्य ।) अक्षिनेत्रोद्भवत्वात् चन्द्रः ॥
नेत्ररञ्जनं, क्ली, (रज्यतेऽनेनेति । रञ्ज + करणे ल्युट् । नेत्रस्य रञ्जनम् ।) कज्जलम् । यथा,—
"एष वो कथितो धूपः श्रेयुतां नेत्ररञ्जनम् ।
येन तुष्यति कामाख्या त्रिपुरा वैष्णवी तथा ॥
सौवीरं जाम्बलं तुत्थं मयूरशीकरं तथा ।
दर्व्विका मेचनीलञ्च अञ्जनानि भवन्ति षट् ॥
सर्व्वेऽप्येते सौवीरं जाम्बलं प्रस्तरस्तथा ।
मयूरशीकरं रत्नं मेचनीलन्तु तैजसम् ॥
दृष्ट्वा निगाद्य चैतानि शिलायां तेजसोऽथना ।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पुत्रक ॥
घृततैलादियोगेन ताम्रादौ दीपवह्निना ।
यद्रञ्जनं जायते तु दर्व्विका परिकीर्त्तिता ॥
सर्व्वाभावे तु तद्दाद्देवीभ्यो दर्व्विकाञ्जनम् ।
महामाया जगद्धात्री कामाख्या त्रिपुरा तथा ॥
आप्नुवन्ति महासौख्यं षड्भिरेभिः सदाञ्जनैः ।
विधवा नाञ्जनं कुर्य्यान्महामायार्थसुत्तमम् ॥
नाहते रञ्जनं देवी वैष्णवी विधवाञ्जनम् ।
न ऋतुस्नाने योजयेत्तु साधको नेत्ररञ्जनम् ॥
न पूजाफलमाप्नोति ऋतुस्नानविहिताञ्जनैः ॥
चतुर्व्वर्गप्रदो धूपः कामदं नेत्ररञ्जनम् ।
तस्मादुभयमिदं दद्याद्देवेभ्यो भक्तितो नरः ॥
इति वो कथितो धूपस्तथोक्तं नेत्ररञ्जनम् ॥"
इति कालिकापुराणे ६८ अध्यायः ॥
नेत्ररोगः, पुं, (नेत्रस्य चक्षुषो रोगः ।) चक्षुरोगः । तस्य निदानं यथा,—
"उष्णाभितप्तस्य जलप्रवेशाद्-
दूरेक्षणात् खप्नविपर्य्ययाच्च ।
खेदाद्रजोधूमनिषेवणाच्च
क्षुद्भिर्व्विघाताद्मनातियोगात् ॥
प्रवातशय्याग्निसि सेविताच्च
विण्मूत्रवातक्रमनिग्रहाच्च ।

प्रसक्तसंरोदनशोककोपा-
च्छिरोऽभिघातादतिमद्यपानात् ॥
तथा ऋतूनाञ्च विपर्ययेण
नेत्राभिघातादतिमैथुनाच्च।
वाय्वग्नितः सूक्ष्मनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषाः ॥
वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥"
तस्य सम्प्राप्तिर्यथा,—
"निस्तोदनस्तम्भनरोमहर्ष-
संघर्षपारुष्यगुरुशोभितापाः।
विमुष्कभावः शिशिराभुता च
वाताभिपन्ने नयने भवन्ति ॥
दाहप्रपाकौ शिशिराभिनन्दा
धूमायनं वाष्पसमुच्छ्रयश्च।
उष्णाभुता पीतकनेत्रता च
पित्ताभिपन्ने नयने भवन्ति ॥
उष्णाभिनन्दा गुरुताशिशोथः
कण्डूपदेहाश्चनितीतता च।
स्रावो बहुः पिच्छिल एव चापि
कफाभिपन्ने नयने भवन्ति ॥
ताम्राभुता लोहितनेत्रता च
वाह्यः समन्तादतिलोहितश्च।
पित्तस्य लिङ्गानि च यानि तानि
रक्ताभिपन्ने नयने भवन्ति ॥"
इति माधवकरः ॥
(अस्य निदानादिपूर्व्वकं लक्षणं चिकित्सा च यथा,—
"उष्णातितीक्ष्णकटुकैरभिघातेन वा पुनः।
सूक्ष्मावलोकयोगेनापि दोषाः कुप्यन्ति नेत्रजाः ॥
सहजा ये परा नेत्रे वक्ष्यामि प्रथमं तु तान्।
रूक्षः कण्डूल लोदश्च मुष्कशीतासनन्ततिः।
वातिकं तं विजानीयात् पैत्तिकं शृणुत परम् ॥
सरक्तदाहे नेत्रे च उष्णस्रावश्च पैत्तिके।
श्लेष्मकण्डूः सन्निपाते शीतजाड्ये कफात्मके ॥
सहजो मिश्रलिङ्गैश्च सर्व्वैस्तैः सान्निपातिकः।
एतद्धि लक्षणं ज्ञात्वा चोपचारं प्रशस्यते ॥
मुष्कौ सुराक्षसरसाः सह काञ्जिकेन
चोष्णेन धावनमिदं सहपैत्तिके च।
श्लेष्मोद्भवे त्रिफलकल्कमिदं सभृङ्ग-
मध्वैस्तथा कथितमत्रभिषग्वरैस्तत् ॥
मुष्कौ शटी च रजनी त्रिफला सनिम्बा
पद्मानि सैन्धवयुतानि तुषाम्बुकेन।
शस्तं वदन्ति नयने च सवातिपाते
रक्तोद्भवे च सरजे च तथा प्रशस्तम् ॥
फलत्रिकं दारु निशासु धूमो
वचासु पर्व्वाभवसैन्धवेन।
प्रलेपनं श्लेष्मभवे विकारे
सवातिके वा हितमेव शस्तम् ॥
मुष्कौ सैन्धवतक्रेण तालभाङ्गे विपर्यितम्।
अपामार्गस्य मूलं वा मूलं धूसूरकस्य वा ॥
अञ्जनञ्च हितं तेषां वातनेत्रामयापहम् ॥
दुग्धोत्पन्नं नवनीतं यष्टीनिम्बसिताक्ष
संयोज्याः।
त्रिफला गुडसंयुक्ता लेपनं कफनेत्ररोगघ्नम् ॥
मुष्कौ सैन्धवतुल्यं मागधिका ताम्रभाजने घृष्टम्।
दध्ना घृतेनाञ्जनकं निहन्ति सर्व्वांश्च नेत्ररोगान् ॥
वातपित्तकफदोषसम्भवान्
नेत्रयोर्बहुपीड़नं भृशात्।
एक एव हरति प्रयोजितः
शिग्रुपल्लवरसः समाक्षिकः ॥"
इति हारीते चिकित्सितस्थाने ४४ अध्यायः ॥)
नेत्ररोगहा, [न्] पुं, (नेत्ररोगं हन्तीति। हन् + क्विप्।) दृष्टिकाकोदुम्बरः। इति राजनिर्घण्टः ॥
चक्षूरोगनाशके, त्रि ॥
नेत्रामयः, पुं, (नेत्रस्य आमयो रोगः।) चक्षू-रोगः। तस्य निदानं यथा,—
"वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥"
इति माधवकरः ॥
(अस्य लक्षणं यथा.—
"अल्पासुरागोऽल्पदेहता च
प्रस्यन्दलोदातिरुजश्च वातात्।
पित्तात्तु दाहार्त्ति रुजोऽतिरागः
पीतोऽतिदेहः सुभृशोष्णमस्रु ॥
मुक्तोपदेहो बहुपिच्छिलास्रु
नेत्रं कफात् स्यात् गुरुता सकण्डूः।
सर्व्वाणि रूपाणि तु सन्निपाता
नेत्रामयाः षण्णवतिस्तु भेदात् ॥
तेषामभिव्यक्तिरभिप्रदिष्टा
ग्रालाक्यतन्त्रेषु चिकित्सितञ्च।
पराधिकारे तु न विस्तरोक्तिः
शस्तेति तेभ्यश्च न नः प्रयासः ॥"
इति चिकित्सितस्थाने षड्विंशतितमेऽध्याये चरकेणोक्तम् ॥)
नेत्रास्रु, क्ली, (नेत्रस्य अस्रु अश्रु।) अश्रु। इत्यमरः। २। ६। ८३ ॥
नेत्रारिः, पुं, (नेत्रस्य अरिः शत्रुः।) सेदुकवृक्षः। इति राजनिर्घण्टः ॥
नेत्री, स्त्री, (नीयतेऽनयेति। नी + "दात्रीनेत्रीति।" ३। २। १८२। इति करणे ष्ट्रन्। स्त्रियां ङीष्।) लक्ष्मीः। गाड़ी। इति शब्द-रत्नावली ॥ नदी। इति मेदिनी। त्रे, ५४ ॥ (नयतीति। नी + ष्ट्रच् + ङीप्।) प्रापण-कर्त्री ॥ (शिष्यधिनी। इति नीलकण्ठः ॥ यथा, महाभारते। ५। १३६। १३।
"यस्य मे भवती नेत्री भविष्यद्भूतिदर्शिनी।")
नेत्रोपमफलः, पुं, (नेत्रोपमं नयनतुल्यं फलं यस्य।) वादामः। इति भावप्रकाशः ॥ बादाम इति भाषा ॥
नेत्रौषधं, क्ली, (नेत्रस्य औषधम्।) पुष्पकाशीसम्। इति राजनिर्घण्टः ॥ चक्षुरोगौषधमात्रञ्च ॥
नेत्रौषधी, स्त्री, (नेत्रस्य औषधी।) अजशृङ्गी। इति रत्नमाला ॥ कोंआ इति भाषा ॥
नेदिष्ठं, त्रि, (अयमेषामतिशयेनान्तिकः। अन्तिक + "अतिशायने तमबिष्ठनौ।" ५। ३। ५५। इति इष्ठन्। "अन्तिकबाढ़योर्नेदसाधौ।" ५। ४। ६३। इति नेदादेशः।) अन्तिकतमम्। अतिनिकटम्। इत्यमरः। ३। १। ६८॥ (यथा, ऋग्वेदे। ४। १। ५।
"स त्वं नो अग्नेऽवमो भवोती नेदेदो अस्या
उषसो व्युष्टौ ॥"
यथाच, उद्भवसन्देशे। १।
"सोत्कण्ठोऽभूदभिमतकथां संश्रितुं कंसमेदी
नेदिष्ठाय प्रणयसहरी बद्धवाग्डम्बराय ॥")
निपुणम्। इति राजनिर्घण्टः ॥ अङ्गीकर्त्तरि, पुं। इति जटाधरः ॥
नेदीयान्, [स्] त्रि, (अयमनयोरतिशयेनान्तिकः। अन्तिक + इयसुन्। नेदादेशः।) नेदिष्ठः। अत्यन्तसमीपः। इति जटाधरः ॥ (यथा, सर्व-दर्शनसंग्रहे आर्हतदर्शने।
"न चेदमिदापादनमेवं दवीयान् महीधरो नेदीयान् दीर्घो वाहुरिति व्यवहारस्य निरा-बाधं आगरुकत्वात् ॥")
नेपः, पुं, (नयति प्रापयति शुभमिति। नी + "पानीविभिभ्यः पः।" उणा। ३। २३। इति पः।) पुरोहितः। उदकम्। इति संक्षिप्त-सारोणादिवृत्तिः ॥
नेपथ्यं, क्ली, (नी + क्विप् + शुक्। नेः नेता तस्य पथ्यम्।) वेषः। इत्यमरः। २। ६। ६६ ॥ (यथा, रघुः। १४। ६।
"राजेन्द्रनेपथ्यविधानशोभा
तस्योदितावोत् पुनरुक्तदोषा ॥")
अलङ्कारः। रङ्गभूमिः। इति मेदिनी। थे, ८८। (यथाह भरतः।
"वाक्यस्यार्थतया यत्र पात्रं नैव प्रवेक्ष्यते।
नेपथ्यमिति प्राकाश्ये प्रयोज्यं तत्र नाटके ॥")
नेपालः, पुं, स्वनामप्रसिद्धदेशः। इति जटाधरः ॥ (यथा, शक्तिसङ्गमतन्त्रे।
"जटेश्वरं समाराध्य योगेशाख्यं महेश्वरि!।
नेपालदेशो देवेशि! साधकानां सुसिद्धिदः ॥")
नेपालनिम्बः, पुं, (नेपालोद्भवो निम्बः।) नेपाल-देशोद्भवनिम्बः। तत्पर्य्यायः। नेपालः २ ज्वर-निम्बः ३ ज्वरान्तकः ४ गाढ़ीतिक्तः ५ निम्बारिः ६ सन्निपातरिपुः ७। अस्य गुणाः। शीतत्वम्। उष्णत्वम्। योगवाहित्वम्। लघुत्वम्। तिक्त-त्वम्। अतिकफपित्तासृग्दोषकुष्ठाज्वरापहत्वञ्च। इति राजनिर्घण्टः ॥
नेपालिका, स्त्री, (नेपाल; उत्पत्तिस्थानत्वेना-स्यास्या इति। नेपाल + अण् + टाप्।) मनः-शिला। इति राजनिर्घण्टः ॥
नेमः, पुं, (नयतीति। नी + "अर्त्तिस्तुसुहीति।" उणा। १। १४८। इति मन्।) कालः। अवधिः। खण्डम्। प्राकारः। केतवम्। इति मेदिनी। मे, ९८ ॥ अर्द्धम्। भागः। इति हेम-चन्द्रः। ६। ७० ॥ नाभ्यादिः। अन्यः। इति

शब्दरत्नावली । सायंकालः । ऋक्षम् । अहर्मुखम् । इति संक्षिप्तसारोद्धारादिवृत्तिः ॥

नेमिः, स्त्री, (नयति चक्रमिति । नी + "नियो मिः ।" उणा० । ४ । ४३ । इति मिः ।) चक्रपरिधिः । रथचक्रस्य भूमिसंस्पृशिभागः । तत्पर्य्यायः । प्रधिः २ । इत्यमरः । २ । ८ । ५६ ॥ नेमी १ । इति भरतः ॥ (यथा, रघुः । १ । ३६ ।

"मनोऽभिरामाः क्षणतो रथनेमिस्वनोन्मुखैः ।
बहूनसंवादिनीः केका दिधा भिन्नाः शिखण्डिभिः ॥")

कूपोपरिस्थयष्टिप्रान्तभागः । इति भरतः । (प्रान्तभागः । यथा, रघुः । ६ । १० ।

"अजयद्धेकरथेन स मेदिनी-
मुदधिनेमिमधिज्यशरासनः ॥")

भूमिस्थकूपपट्टः । इत्यन्ये । कूपस्य समीपे रज्जुधारणार्थं चिरादारुयन्त्रम् । इति स्वामी ॥ तत्पर्य्यायः । त्रिका २ । इत्यमरः । १ । १० । २० ॥ कूपनिकटसमानस्थानम् । यथा,—

"नेमिर्नेमीतिका चैव स्यात् कूपान्तिकसमस्थले ॥"

इति शब्दरत्नावली ॥

नेमिः, पुं, जिनविशेषः । इति हेमचन्द्रः । १ । २८ ॥ तिनिशवृक्षः । इत्यमरः । २ । ४ । २६ ॥ मथुरादौ तिनाश इति ख्यातः ॥ (दैत्यविशेषः । यथा, भागवते । ८ । २१ । १६ ।

"हे विप्रचित्ते हे राहो हे नेमे शृणुतां वचः ।
मा युध्यत निबर्त्तध्वं नः कालोऽयमर्थसाधनः ॥"

नयति शत्रून् विनाशमिति । नी + "नियो मिः ।" उणा० ४ । ४३ । इति मिः । चक्रः । इति निघण्टुः । २ । २० ॥)

नेमिचक्रः, पुं, परीक्षिद्वंशजः अखीमकृष्णस्य पुत्रः । स हस्तिनागरे गङ्गा क्षते कौशाम्ब्यां पुर्य्यां राजासीत् । इति श्रीभागवते । ६ । २२ । ३६ ॥ (अस्यैव राज्यशासनसमयनिर्णयो यथा, राजावल्याम् १ परिच्छेदे ।

"गजाह्वये क्षते गङ्गा कौशाम्ब्यां निवसन् सुदा ।
षट्सप्ततिमितान् वर्षान् तथा मासत्रयाधिकान् ।
सुखं भोगान् गतः स्वर्गं सुतं राज्येऽभिषिच्य च ॥")

नेमी, [न्] पुं, (नेम अर्हमस्यास्तीति । नेम + इनिः ।) तिनिशवृक्षः । इत्यमरटीकायां भरतः ॥

नेमी, स्त्री, (नेमि + वा ङीष् ।) नेमिः । इत्यमरटीकायां भरतः ॥ (तिनिशवृक्षः । पर्य्यायोऽस्या यथा,—

"स्यन्दनक्षितिशो नेमौ ————— ॥"

इति वैद्यकरत्नमालायाम् ॥)

नेष्टा, [ष्टृ] पुं, (नयति शुभमिति । नी + "नप्तृनेष्टृत्वष्टृ" इति । उणा० २ । ६६ । इति तृन् प्रत्ययेन साधुः ।) ऋत्विक् । इति संक्षिप्तसारोद्धारादिवृत्तिभरतप्रयोगश्च ॥ (तृदेवः । इति यास्कः ॥ यथा ऋग्वेदे । १ । १५ । ३ ।

"अभित्यं यज्ञं नेष्टरि पिबा सुतमृतुना ॥"

नैकटिकः, त्रि, (निकट + "निकटे वसति ।" ४ । ४ । ७१ । इति ठक् ।) निकटवर्त्ती । यथा,—

"प्रातीतयालदीप्राख्यः सुजनः परिपूजयन् ।
पर्यटन्नाम्नहात्रेऽराटनैकटिकाश्रमान् ॥"

इति भट्टिः । ४ । १२ ॥

नैकट्यं, क्ली, निकटस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । निकटत्वम् ॥ (यथा, कथासरित्सागरे । १५ । १२५ ।

"बाधते तत्र नैकट्यात् सर्व्वं स मगधेश्वरः ।
तत्तत्र रक्षाहेतोश्च विनोदाय च गम्यताम् ॥")

निकटभवे, त्रि ॥

नैकभेदः, त्रि, (न एको भेदोऽत्रेति ।) उक्तावयवम् । अनेकप्रकारः । इत्यमरः । ३ । १ । ८३ ॥

नैकषेयः, पुं, (निकषायाः अपत्यमिति । निकषा + ढक् ।) निकषापुत्रः । राक्षसः । इति हलायुधः ॥

नैगमः, पुं, (निगम एव । स्वार्थे अण् ।) उपनिषत् । वणिक् । (यथा, रामायणे । १ । ७७ । २३ ।

"एवं दशरथः प्रीतो ब्राह्मणा नैगमास्तथा ॥"

"नैगमा वणिजः ।" इति तट्टीकायां रामानुजः ॥) नागरः । इति मेदिनीशब्दरत्नावल्यौ ॥ नयः । (यथा, महाभारते । १२ । १०० । ४ ।

"तेषां प्रतिविधानार्थं प्रवक्ष्याम्यथ नैगमम् ॥")

ऋतिः । इति हेमचन्द्रः । ३ । ५३१ ॥ त्रि निगमसम्बन्धिनि, ॥ (निगमशास्त्रवेत्तरि । यथा, महाभारते । १३ । १६० । ४ ।

"द्विजेभ्यो बलमुख्येभ्यो नैगमेभ्यश्च नित्यशः ॥")

नैचिकं, क्ली, (नीच + ठक् ।) गोः शिरोदेशः । इति हेमचन्द्रः । ४ । ३३६ ॥

नैचिकी, स्त्री, (नीचैश्चरतीति ठक् । यद्वा निचिः कर्कशिरोदेशः । ततः स्वार्थे कन् । प्रशस्तं निचिकमस्याः । ततो ज्योत्स्नादित्व इत्यण् ततो ङीप् ।) उत्तमा गौः । इत्यमरः । २ । ६ । १६ ॥

नैजं, त्रि, (निजस्येदमिति । निज + अण् ।) निजसम्बन्धि । स्वीयम् । यथा,—

"ब्रह्मक्षत्रस्य च ब्रह्मार्क्षं वायव्यस्य च पार्व्वतम् ।
आग्नेयस्य च पार्व्वण्यं नैजं प्राजापतस्य च ॥"

इति श्रीभागवते १० स्कन्धे वाणयुद्धे ॥

(यथा च हरिवंशे भविष्ये । ३३ । ६ ।

"स दृष्ट्वा दर्शनं नैजं व्याघ्रचर्म्माम्बरो हरः ॥")

नैत्यं, क्ली, नित्यत्वम् । नित्यस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥ (नित्यसम्बन्धि । नित्यकरणीयं वा ॥)

नैपालः, पुं, (नेपाले नेपालाख्यदेशे भवः अण् ।) नेपालनिम्बः । इति राजनिर्घण्टः ॥ नेपालदेशसम्बन्धिनि, त्रि ॥ (भूनिम्बविशेषः । यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ।

"किरातकोऽन्यो नैपालः सोऽर्हतिक्तो ज्वरान्तकः ॥"

इक्षुजातिभेदः । यथा तत्रैव २ भागे । अथ स्वादुपत्रवैपालीदीर्घपत्रनीलपोरकाणां गुणाः ॥

"स्वादुपत्री नीलपोरो नैपाली दीर्घपत्रकः ।
वातघ्नाः कफपित्तघ्नाः सकषाया विदाहिनः ॥")

नैपालिकं, क्ली, (नेपाले नेपालाख्यदेशे भवम् । इति ठक् ।) ताम्रम् । इति राजनिर्घण्टः ॥ (ताम्रशब्दस्यास्य गुणादिकं आख्यातम् ॥)

नैपाली, स्त्री, (नेपाले भवा इत्यण् ङीप् च ।) नवमल्लिका । (नेवारि इति लोके । यथास्याः पर्य्यायः ।

"नैपाली कथिता तत्रैः सप्रला नवमल्लिका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मनःशिला । (अस्याः पर्य्यायो यथा,—

"मनःशिला मनोगुप्ता मनोज्ञा नागजिह्विका ।
नैपाली कुनटी गोजा शिलादिव्यौषधिः स्मृता ॥"

इति भाप्रकाशः । १ । ६ ॥)

शैवालिका । इति मेदिनी । ले, १०४ ॥ नीली । इति शब्दरत्नावली ॥

नैपुणं, क्ली, (निपुणस्य भावः कर्म्म वा इति । "हायनान्तयुवादिभ्योऽण् ।" ५ । १ । ३० । इत्यण् ।) नैपुण्यम् । यथा, माघे । १६ सर्गः ।

"प्रकटान्यपि नैपुणं महत्
परवाच्यानि चिराय गोपितुम् ।
विपरीतमथात्मनो गुणान्
शृणमाकौशलमार्य्यचेतसा ॥"

(यथा, महाभारते । १३ । १८ । ८१ ।

"वैश्यो लाभं प्राप्नुयान्नैपुणञ्च
शूद्रो गतिं प्रेत्य तथा सुखञ्च ॥")

नैपुण्यं, क्ली, (निपुणस्य भावः कर्म्म वा । "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ।" ५ । १ । १२४ । इति ष्यञ् ।) निपुणता । निपुणस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । यथा,—

"अशक्यः सहसा राजन् भावो बोद्धुं परस्य वै ।
ऋते स्वभावेङ्गितैस्तैर्नैपुण्यं यत्नतः शृणु ॥"

इति रामायणे लङ्काकाण्डे १७ सर्गः ॥

नैमित्तिकं, त्रि, (निमित्तादागतं निमित्तभवं वा । इति ठक् ।) निमित्तजन्यम् । यथा,—

"नैमित्तिकानि कार्य्याणि निपतन्ति यथा यथा ।
तथा तथैव कार्य्याणि नात्र कालं विचारयेत् ॥"

इति यद्दृष्टयागतत्त्वम् ॥

माससंवत्सरादिविशेषेण नियम-मूल्यावश्यकर्मजन्यकादाचित्ककनिमित्तोत्पन्नं पुत्रजन्मादिनिमित्तकश्राद्धादि । यथा,—

"नित्यनैमित्तिके कुर्य्यात् प्रयतः सन् मलिम्लुचे ।
तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च ॥"

इति मलमासतत्त्वम् ॥

(निमित्तं वेत्ति निमित्तबोधकग्रन्थमधीते वा इति ठक् । निमित्तग्राह्याभिज्ञे तदध्ययनकर्त्तरि च ॥)

नैमित्तिकक्रिया, स्त्री, (नैमित्तिकी चासौ क्रियेति निमित्तजन्या क्रियेत्यर्थः ।) निमित्तनिश्चयवदधिकारिकर्त्तृकर्म्म । यथा,—

"नित्यां नैमित्तिकीं काम्यां क्रियां पुंसामशेषतः ।
समाख्याहि द्विजश्रेष्ठ सर्व्वज्ञो ह्यसि मे मतः ॥

ऊर्व्व उवाच ।

यदेतदुक्तं भवता नित्यनैमित्तिकाश्रितम् ।
तदहं कथयिष्यामि शृणुष्वैकमना मम ॥

जातस्य जातकर्म्मादि क्रियाकाण्डमशेषतः ।
पुत्रस्य कुर्व्वीत पिता श्राद्धाभ्युदयात्मकम् ॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः ॥
(यथा, मार्कण्डेये । ३० । १ ।
"नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा ।
गृहस्थस्य तु यत् कर्म्म तन्निष्ठामय पुत्रक ! ॥")

नैमित्तिकदानं, क्ली, (निमित्तमाश्रित्य दीयते इति दा + भावे ल्युट् । अस्य निरुक्तिर्यथा ।) निमित्तनिश्चयवदधिकारिकर्म्मेयदानम् । यथा,—
"यत्तु पापोपशान्त्यर्थं दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥"
इति गरुड़पुराणम् ॥

नैमित्तिकलयः, पुं, (नैमित्तिकः ब्रह्मणो दिवावसाननिमित्तवशात् यो लयः ।) प्रलयविशेषः । यथा,—
"चतुर्युगसहस्रान्ते ब्राह्मो नैमित्तिको लयः ।
अगाधदलिले कल्पान्ते जायते शतवार्षिकी ॥
उत्तिष्ठन्ति तदा रौद्रा दिवि सप्त दिवाकराः ।
ते तु पीत्वा जलं सर्व्वं शोषयन्ति जगत्त्रयम् ॥
भूर्भुवःस्वर्म्महर्लोकसंस्था यान्ति जनं जनाः ।
रुद्रो भूत्वा स्वयं विष्णुः पातालानि दहत्यधः ॥
विष्वग्दहेत्त्रिलोकञ्च सुखाम्भोधान् स्रवज्जलम् ।
वर्षन्ति च वर्षशतं नानावर्णा महाघनाः ॥
विष्णुस्रवः शतं वाति वर्षाणां वायुरूर्ज्जितः ।
विष्णुरेकार्णवे पीत्वा सर्व्वं ब्रह्मस्वरूपधृक् ।
शेतेऽनन्तासने विष्णुर्नष्टे स्थावरजङ्गमे ।
सुप्त्वा युगसहस्रं स जगदुद्भूयोऽवजङ्गमः ॥"
इति गरुड़पुराणम् ॥
(तथा च भागवते । ८ । २४ । ७ ।
"आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः ॥")

नैमित्तिकस्नानं, क्ली, (नैमित्तिकञ्च तत् स्नानञ्चेति । निमित्तवशात् निमित्तमाश्रित्य विधेयं स्नानमित्येके ।) निमित्तनिश्चयवदधिकारिकर्म्मेयस्नानम् । यथा,—
"चाण्डालश्वपचूपादि स्पृष्ट्वा स्नातो रजस्वलाम् ।
स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तत् ॥"
इति गरुड़पुराणम् ॥

नैमिषारण्यं, क्ली, (निमिषान्तरमात्रेण निहतं दानवं बलं यत्र ततस्तत् नैमिषं अरण्यमिति ।) अरण्यविशेषः । तस्योत्पत्तिर्यथा,—
"तेन चक्रेण तत्सैन्यमासुरं दीप्यतेजसा ।
निमिषान्तरमात्रेण भस्मसद्भूधा कृतम् ॥
एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा ।
उवाच निमिषेणेदं निहतं दानवं बलम् ॥
अरण्येऽस्मिंस्ततस्त्वेदन्नैमिषारण्यसंज्ञकम् ।
भविष्यति यथार्थं वै ब्राह्मणानां विशेषतः ॥"
इति वराहपुराणे गौरमुखं प्रति भगवद्वाक्यम् ॥ अपि च ।
"देशं वः संप्रवक्ष्यामि यस्मिन्देशे चरिष्यथ ।
उद्धृत्य मनोमयं चक्रं स क्षिप्त्वा तानुवाच ह ॥
क्षिप्तमेतन्मया चक्रमनुव्रजत माचिरम् ।
यत्रास्य नेमिः शीर्य्येत स देशः पुण्यवर्द्धनः ॥
ततो मुमोच तच्चक्रं ते च तत् समनुव्रजन् ।
तस्य वै व्रजतः क्षिप्रं यत्र नेमिरशीर्य्यत ॥
नैमिषं तत् स्मृतं नाम्ना पुण्यं सर्व्वत्र पूजितम् ।
सिद्धचारणसङ्कीर्णं यज्ञमन्त्रैरलंकृतम् ॥
स्थानं भगवतः प्रभोरेतन्नैमिषमुत्तमम् ।
यत्र देवाः सगन्धर्व्वाः सयक्षोरगराक्षसाः ।
तपस्तप्त्वा पुरा देवा लेभिरे प्रचुरान् भगान् ॥"
इति कौर्म्मे ४० अध्याये षट्कुलीयान् प्रति ब्राह्मवाक्यम् ॥ (ऋचि शालयग्रामोऽपि पाठो दृश्यते तत्र तु ब्रह्मणा विसृष्टस्य मनोमयचक्रस्य नेमिः शीर्य्यते यत्रेति युत्पत्त्या नैमिशं नैमिशमेव नैमिषं तदाख्यमरण्यमिति बोध्यम् । तथा च वायवीये ।
"एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते ।
यत्रास्य शीर्य्यते नेमिः स देशः तपसः शुभः ॥
इत्युक्त्वा सृज्यसङ्घातं चक्रं सृष्ट्वा मनोमयम् ।
प्रणिपत्य महादेवं विससर्ज्ज पितामहः ॥
तेऽपि कृष्टतमा विप्राः प्रणम्य जगतां प्रभुम् ।
प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्य्यत ॥
तद्वनं तेन विख्यातं नैमिशं मुनिपूजितम् ॥"
तथा च देवीभागवते । १ । २ । २८-३२ ।
"कलिकालविभीताः स्मो नैमिशारण्यवासिनः ।
ब्रह्मणाच्च समादिष्टाच्चक्रं दत्त्वा मनोमयम् ॥
कथितं तेन नः सर्व्वान् गच्छन्त्येतस्य पृष्ठतः ।
नेमिः संशीर्य्यते यत्र स देशः पावनः स्मृतः ॥
कलेस्तत्र प्रवेशो न कदाचित् संभविष्यति ।
तावत् तिष्ठन्तु तत्रैव यावत् सत्ययुगं पुनः ॥
तच्छ्रुत्वा वचनं तस्य गृहीत्वा तत्कथानकम् ।
चालयन्निर्गतास्तूर्णं सर्व्वदेशादिदृक्षया ॥
प्रेक्षाञ्च चालयच्चक्रं नेमिः शीर्य्यो न पश्यतः ।
तेनेदं नैमिशं प्रोक्तं क्षेत्रं परमपावनम् ॥")

नैमेयः, पुं, (नि + मेङ् प्रणिदाने + अचो यत् इति यत् । ततः स्वार्थे प्रज्ञादयः । मिधातुना निष्पन्नमिति केचित् ।) परिवर्त्तः । दिनिमयः । इत्यमरः । २ । ६ । ८० ॥

नैयग्रोधं, क्ली, (न्यग्रोधस्य विकारः ततः अश्वादिभ्योऽञ् ।" ४ । ३ । १६४ । इत्यञ् । तस्य विधानसामर्थ्यात् फले न लुक् । "न्यग्रोधस्य च केवलस्य ।" ७ । ३ । ५ । इति न वृद्धिरागमश्च ।) न्यग्रोधफलम् । इत्यमरः । २ । ४ । १८० ॥ न्यग्रोधजातवस्त्वादौ । इति बोपदेवरामतर्कवागीशौ ॥

नैयङ्गवं, त्रि, (न्यङ्गोर्व्विकार इति । "प्राग्धितादिभ्योऽञ् ।" ४ । ३ । १५४ । इति विकारेऽञ् ।) न्यङ्गुरजातवस्त्वादौ । इति बोपदेवरामतर्कवागीशौ ॥

नैयत्यं, क्ली, (नियतस्येदं इति । नियत + ष्यञ् ।) नियतत्वम् । नियतस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥

नैयायिकः, पुं, (न्यायं गोतमादिप्रणीतं तर्कशास्त्रविशेषं अधीते वेत्ति वा । न्याय + "ऋतूक्थादिसूत्राट्ठक् ।" ४ । २ । ६० । इति ठक् ।) न्यायवेत्ता । न्यायाधीता । तत्पर्य्यायः । स्वाक्षपादः २ साङ्गादिकः २ आन्वीक्षः ३ । इति जटाधरः ॥
(यथा, महाभारते । १ । २ । १६६ ।
"नैयायिकानां सुखेन वरञ्चात्मजेन च ।
पराजितो यत्र वन्दी विवादेन महात्मना ॥")

नैरन्तर्य्यं, क्ली, (निरन्तरस्य भाव इति । निरन्तर + ष्यञ् ।) निरन्तरत्वम् । निरन्तरस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥ (यथा मनौ । ६ । २७१ श्लोकस्य टीकायां कुल्लूकभट्टः ।
"ये च ददति तानपि नैरन्तर्य्याद्यपराधगोचरा पेक्षया घातयेत् ॥")

नैराश्यं, क्ली, (निराशस्य निरभिलाषस्य भावः इति । निराश + ष्यञ् ।) आशायाः अभावः । यथा,—
"आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
आशया पिङ्गला वेश्या त्यक्त्वा जज्ञे निरर्थकम् ॥"
इति ब्रह्मवैवर्त्तीयश्रीकृष्णजन्मखण्डे ६७ अः ।
(यथा, महाभारते । १ । २२५ । १ ।
"स तु नैराश्यमापन्नः सदा ग्लानिसमन्वितः ।
पितामहमुपागच्छत् संक्रुद्धो हयवाहनः ॥")

नैरुक्तं, त्रि, (निरुक्तस्येदं निरुक्तो भवं वा । "अवृद्धाद्गयनादिभ्यः ।" ४ । ३ । ७३ । इति अञ् ।) निरुक्तसम्बन्धि । यथा, "वर्हेत्यत्र वृहिभ्रस्जेति यस्य ढः न डः इति नैरुक्तम् ।" इति रामतर्कवागीशः ॥
(निरुक्तं यत्यविशेषं वेत्ति अधीते वा । निरुक्तवेत्ता । यथा, मनुः । १२ । १११ ।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ॥")

नैर्ऋतः, पुं, (निर्ऋतेरपत्यम् । इत्यण् ।) राक्षसः । (यथा, महाभारते । १ । ६६ । ५५ ।
"तस्यापि निर्ऋतिर्भार्य्या नैर्ऋता येन राक्षसाः ॥")
पश्चिमदिग्धिपकोबाधिपतिः । इत्यमरः । १ । १ । ६३, १ । ३ । २ ॥ ज्योतिषमते तत्कोणाधिपतौ राहुः । यथा,—
"सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी ।
सौम्यश्चेदग्रमन्त्री च प्रागादिदिगधीश्वराः ॥"
इति ज्योतिस्तत्त्वम् ॥

नैर्ऋती, स्त्री, (निर्ऋतेरियमिति । निर्ऋतेरधिष्ठाता यस्यां वा । अण् ङीप् च ।) अवाचीप्रतीच्योर्मध्या दिक् । नैर्ऋतकोणः । इति राजनिर्घण्टः जटाधरश्च ॥ (यथा, मनुः । ११ । १०५ ।
"स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ ।
नैर्ऋतीं दिशमातिष्ठेदनिपाताद्विशङ्कया ॥")

नैर्गुण्यं, क्ली, (निर्गुणस्य भावः कर्म्म वा । निर्गुण + ष्यञ् ।) निर्गुणत्वम् । यथा, श्रीभागवते । २ । १ । ६ ।
"परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया ।
गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥"
(यथा, महाभारते । २ । १६ । २५ ।

"गुणात्तिः संग्रयाद्राजन् नैर्गुण्यं मन्यसे कथम्।
न ह्यन्ति प्रकृतेः सत्त्वादि गुणा यत्र ह्यात्मयोगे।
तत्त्वज्ञानयोगः। यथा, भागवते। ३। ३२।३२।
"ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः।")

नैर्मल्यं, क्ली, (निर्मलस्य भावः। इति ष्यञ्।) निर्मलत्वम्। (तथा च हारीतेनोक्तम्।
"जिह्वाग्रेहं जनयति तथा नेत्रनैर्मल्यकारी।")
विषयवैराग्यम्। यथा,—
"विषयेष्वतिसंरागो मानसो मल उच्यते।
तस्मिन्नेव हि विरागस्तु नैर्मल्यं वसुदाहृतम्।"
इति प्रायश्चित्ततत्त्वम्।

नैर्ऋत, क्ली, (नीलस्य भावः। ष्यञ्।) नीलिमा।
इति सुग्धबोधटीकायां दामतर्कवागीशः॥

नैविद्य, क्ली, वंशपुत्तुकारगुणविशेषः। यथा,—
"वैविद्यं प्रौढ़ता चापि सुस्वरत्वञ्च श्लक्ष्णता।
माधुर्य्यमिति पञ्चाभी पुत्तुकैस्तु गुणाः स्मृताः।"
इति सङ्गीतदामोदरः॥
(निविड़स्य भावः। निविड़+ष्यञ्।) निविड़ता च।

नैवेद्य, क्ली, (निवेदं निवेदनमर्हतीति। निवेद+ष्यञ्।) देवाय निवेदनीयद्रव्यम्। तस्य विवृत्तिर्यथा,—
"चतुर्विधं कुलेशानि द्रव्यं ते षड्रसान्वितम्।
निवेदनात् भवेत्तस्मिन्नैवेद्यं तदुदाहृतम्।"
इति कुलार्णवे १७ उल्लासः॥

तदुद्यमादि यथा,—
"सर्पिषेन सुसूक्ष्मेण पायसेन ससर्पिषा।
सितोदनं सकदलिदध्याद्यैश्च निवेदयेत्॥"
इति प्रपञ्चसारः॥

तत् पञ्चविधम्। यथा,—
"निवेदनीयं यद्द्रव्यं प्रशस्तं प्रयतं तथा।
तद्भक्ष्यार्हं पञ्चविधं नैवेद्यमिति कथ्यते॥
भक्ष्यं भोज्यञ्च लेह्यञ्च पेयं चूष्यञ्च पञ्चमम्।
सर्व्वत्र चैतन्नैवेद्यमाराध्यार्हे निवेदयेत्॥" *॥
तत् पात्रं यथा,—
"तैजसेषु च पात्रेषु सौवर्णे राजते तथा।
ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथवा पुनः॥
यद्वदासमये वापि नैवेद्यं स्थापयेद्बुधः।
सर्व्वाभावे च माड़िये खड़्गखटिते यदि॥"
इति तन्त्रसारः॥ * ॥

तद्दानफलं यथा,—
"नैवेद्येन भवेत् स्वर्गो नैवेद्येनाक्षयं भवेत्।
धर्म्मार्थकाममोक्षाश्च नैवेद्येषु प्रतिष्ठिताः॥
सर्व्वयज्ञफलं नित्यं नैवेद्यं सर्व्वतुष्टिदम्।
ज्ञानदं मानदं पुण्यं सर्व्वभोग्यमयं तथा॥
मनसापि महादेवे नैवेद्यं दातुमिच्छति।
यो नरो भक्तियुक्तः सन् दीर्घायुः स सुखी भवेत्॥
महामायां कदा देवीमर्चयिष्यामि भक्तितः।
नानाविधैस्तु नैवेद्यैरिति चिन्ताकुलस्तु यः।
स सर्व्वकामान् संप्राप्य मम लोके महीयते॥"
इति कालिकापुराणे। १६८।१७०। अध्यायः॥
तत्कालो यथा,—
"अर्व्वाक् विसर्ज्जनादूर्द्ध्वं नैवेद्यं सर्व्वसुच्यते।
विसर्ज्जिते जगन्नाथे निर्म्माल्यं भवति ध्रुवात्॥
पञ्चरात्रविदो मुख्या नैवेद्यं भुञ्जते सुखम्॥"
इति गरुड़पुराणम्॥

तस्य स्थापनक्रमो यथा,—गौतमीये।
"नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः॥
दक्षिणभागस्तु देवताया एव न तु साधकस्य।
पक्वञ्च देवतावामे आमान्नञ्चैव दक्षिणे॥
पुरश्चरणचन्द्रिकायाम्।
दक्षिणन्तु परित्यज्य वामे चैव निधापयेत्।
अभोज्यं तद्भवेदन्नं प्राणीवच्च सुरोपमम्॥"
इति तन्त्रसारः॥

तन्मुद्रा यथा,—
"नैवेद्यमुद्रामङ्गुष्ठकनिष्ठार्थां प्रदर्शयेत्।
कनिष्ठानामिकाङ्गुष्ठैर्मुद्रा प्राणस्य कीर्त्तिता॥
तर्ज्जनीमध्यमाङ्गुष्ठैरपानस्य तु मुद्रिका।
अनामामध्यमाङ्गुष्ठैरुदानस्य तु सा स्मृता॥
तर्ज्जन्यनामामध्याभिः साङ्गुष्ठाभिश्चतुर्थिका।
सर्व्वाभिः सा समानस्य प्राणाद्यन्नेषु योजिता॥
तारपूर्व्वां जपेन्मुद्रां प्राणादीनां प्रदर्शयेत्॥"
इति यामलः॥

ब्राह्मणाय तत्समर्पणं यथा,—
"साक्षात् खादति नैवेद्यं विप्ररूपी जनार्द्दनः।
ब्राह्मणे परितुष्टे च सन्तुष्टाः सर्व्वदेवताः॥
देवाय दत्त्वा नैवेद्यं द्विजाय न प्रयच्छति।
भक्षीभूतञ्च नैवेद्यं पूजनं निष्फलं भवेत्॥
देवदत्तं न भोक्तव्यं नैवेद्यञ्च विना हरेः।
प्रशस्तं सर्व्वदेवेषु विष्णोर्नैवेद्यभोजनम्॥"
शूद्रस्य तद्भक्षणविधिर्यथा,—
"शूद्रश्चेद्धरिभक्तश्च नैवेद्यभोजनोत्सुकः।
आमान्नं हरये दत्त्वा पाकं कृत्वा च खादति॥"
इति श्रीकृष्णजन्मखण्डे २१ अध्यायः॥ * ॥
विष्णुनैवेद्यभोजनफलादि स्कान्दे।
"कृत्वा चैवोपवासन्तु भोक्तव्यं द्वादशीदिने।
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम्॥
पाद्मे।
हृदि रूपं मुखे नाम नैवेद्यसुदरे हरेः।
पादोदकञ्च निर्म्माल्यं मस्तके यस्य सोऽच्युतः॥
स्कान्दे।
अग्निष्टोमसहस्रेण वाजपेयशतेन तथा।
तुल्यं फलं भवेद्देवि! विष्णोर्नैवेद्यभक्षणात्॥
पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषतः।
महाप्रसाद इत्युक्ता याता विष्णोः प्रयत्नतः॥
वृहत्पद्मपरिशिष्टे।
पवित्रं विष्णुनैवेद्यं सुरसिद्धर्षिभिः स्मृतम्।
अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणञ्चरेत्॥
स्कन्दपुराणे ब्रह्मचारिण्यधर्म्मेण वनस्थयतिभिक्षुणां।
भोक्तव्यं विष्णुनैवेद्यं नात्र कार्य्या विचारणा।"
इत्येकादशीतत्त्वम्॥

अपि च।
"विष्णोर्निवेदितं पुण्यं नैवेद्यं वा फलं जलम्।
प्राप्तिमात्रेण भोक्तव्यं त्यागेन ब्रह्महा भवेत्॥
भक्तश्रीर्भक्तदुहितृ भक्तभ्राता भवेन्नरः।
यस्यनैद्यिणुनैवेद्यं भाग्येनोपस्थितं शुभम्॥
प्राप्तिमात्रेण यो भुङ्क्ते भक्त्या विष्णुनिवेदितम्।
पुंसां शतं समुद्धृत्य जीवन्मुक्तः स्वयं भवेत्॥
विष्णुनैवेद्यभोजी यो नित्यं वा प्रत्यहं हरिम्।
पूजयेत् स्तौति वा भक्त्या स विष्णुसदृशो भवेत्॥
पुंश्चल्यन्नभवीरान्नं शूद्रश्राद्धान्नमेव च।
यद्धरेरनिवेद्यञ्च दृष्यांसमभक्ष्यम्॥
शिवलिङ्गप्रदत्तान्नं यदन्नं शूद्रयाजिनाम्।
चिकित्सकद्विजान्नञ्च देवलान्नं तथैव च॥
कन्याविक्रयिणामन्नं यदन्नं योनिजीविनाम्।
अशुद्धान्नं पर्य्युषितं सर्व्वमभ्यावहीवकम्॥
शूद्रापतिद्विजान्नञ्च शवदाहद्विजान्नकम्।
अदीक्षितद्विजान्नञ्च यदन्नं शवदाहिनाम्॥
अगम्यागामिनाञ्चैव द्विजानामन्नमेव च।
मिथ्यादृशां क्षतघ्नानामन्नं विश्वासघातिनाम्॥
मिथ्यासाक्ष्यप्रदानाच्च ब्राह्मणानान्तथैव च।
एतत् सर्व्वं विशुध्येत विष्णोर्नैवेद्यभक्षणात्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३० अध्यायः॥ * ॥
"विष्णोर्निवेदितान्नेन यष्टव्याः सर्व्वदेवताः।
पितरोऽतिथयश्चैवमिति वेदेषु विश्रुतम्॥
अन्नं सर्व्ववसूनां हि सारं सुदुर्लभम्।
विष्णोर्निवेदितान्नस्य कलां नार्हन्ति षोड़शीम्॥
यदृच्छया तन्नैवेद्यं यो भुङ्क्ते साधुसङ्गतः।
यद्दिवर्षसहस्राणां प्राप्नोति तपसा फलम्॥
यो निवेद्य हरिं भुङ्क्ते भक्त्या भुक्तञ्च नित्यशः।
किं वा तपस्या सुतरां स हरेस्तेजसा समः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६० अध्यायः॥
शिवनैवेद्ये विशेषो यथा, वहृच्चयज्ञपरिशिष्टे।
"अयाद्यं शिवनैवेद्यं पक्वं पुष्पं फलं जलम्।
शालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम्॥
शालग्रामशिलायां शिवपूजने तदग्राह्यम्
इत्याह्निकतत्त्वम्॥" कालिकापुराणे।
"यो यद्देवार्चनरतः स तन्नैवेद्यभक्षकः।
केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत्॥"
वैष्णवपदमञ्जर्य्यामुपासकपरम्।
'समानन्यन्यनैवेद्यं भक्षयेदन्यदेवतः।'
एतदग्नीतुखण्डपरम्। नन्दिकेश्वरपुराणे।
'दत्त्वा नैवेद्यवस्त्रादि नादद्यात् क्रयक्रयम्।
अन्नं शिवसुहृद्भिश्च तदादाने न तत्फलम्॥'
इति शिवदत्ते विशेषः।" इत्येकादशीतत्त्वम्॥
खदत्तशिवनैवेद्यस्यापि भक्त्या भक्षणसूक्तं यथा,
"रोगं हरति निर्म्माल्यं शोकन्तु चरणोदकम्।
अशेषं पातकं हन्ति शम्भोर्नैवेद्यभक्षणम्॥"
इति श्राद्धज्ञानतत्त्वरङ्गिणी॥

शिवनैवेद्यस्याग्राह्यत्वकारणं यथा,—
राधिकोवाच।
"एवम्भूतस्य च विभो! सर्व्वेशस्य महात्मनः।
न ग्राह्यं कथमुच्छिष्टं ब्रूहि सर्व्वेहभञ्जन!॥
श्रीकृष्ण उवाच।
शृणु देवि! प्रवक्ष्येऽहमितिहासं पुरातनम्।

पापेन्धनानां दहने ज्वलदग्निस्वरूपम् ॥
सनत्कुमारो वैकुण्ठमेकदा च जगाम ह ।
ददर्श शुक्लवस्त्रञ्च नाथं नारायणं हरिम् ॥
तुष्टाव गूढैः स्तोत्रैश्च प्रणम्य भक्तितो मुदा ।
अवरोधं ददौ तस्मै सन्तुष्टो भक्तवत्सलः ॥
प्राप्तमात्रेण तत्रैव शुक्लं तेनैव किञ्चन ।
किञ्चिदन्यच्च वस्तूनां भक्षणाय च दुर्लभम् ॥
सिद्धाश्रमे च तद्दत्तं गुरवे शूलपाणिने ।
भक्षणादेकाक्षं तत् सर्व्वं शुक्लञ्च प्राप्तिमात्रतः ॥
शुक्ला सुदुर्लभं वस्तु नत्वा तस्मै प्रेमविह्वलः ।
पुलकाञ्चितसर्व्वाङ्गः साश्रुनेत्रो मुदान्वितः ॥
गायन्नाम गुरोर्भक्त्या सकण्ठः पञ्चवक्त्रतः ।
रागभेदैकतानेन तालमानेन सुन्दरम् ॥
पपात हरमूर्द्धस्तात् शूलञ्च व्याघ्रचर्म्म च ।
स्वयं निपत्य पश्चाच्च रुदन्मूर्च्छामवाप च ॥
अतीवकमनीयैतद्रूपध्यानैकमानसः ।
सहस्रदलमध्यस्थं मां पश्यन् क्षुत्तरोरुचे ॥
एतस्मिन्नन्तरे देवी दुर्गा दुर्गतिनाशिनी ।
मुदा जगाम शीघ्रं तत् प्रसन्नवदनेक्षणा ॥
रुदन्तं मूर्च्छितं दृष्ट्वा निपतन्तञ्च भक्तितः ।
प्रहस्य वार्त्तां पप्रच्छ कुमारं शूलपाणिनः ॥
सर्व्वं तां कथयामास कुमारः संपुटाञ्जलिः ।
श्रुत्वा चुकोप सा देवी शिवं प्रस्फुरिताधरा ॥
तां शशुतुष्टतां देवीस्तुत्याय च त्रिलोचनः ।
बोधयामास विविधं तुष्टाव संपुटाञ्जलिः ॥
श्रुत्वा मनोहरं स्तोत्रं न शशाप शिवं शिवा ।
दुरुक्तञ्च तदुच्छिष्टभक्ष्यं विदुषामपि ॥

पार्व्वत्युवाच ।

सुचिरञ्च तपस्तप्त्वा मया लब्धस्त्वमीश्वरः ।
त्वया विष्णोः प्रसादेन वञ्चितास्मि कथं विभो ॥
यतो न दत्तनैवेद्यं विष्णोर्मह्यं त्वयाधुना ।
अतो मत्तो गृहाणैतत् फलमेव महेश्वर !
अद्यप्रभृति ये लोका नैवेद्यं भुञ्जते तव ।
ते जन्मैकं सारमेया भविष्यन्त्येव भारते ॥
इत्युक्त्वा पार्व्वती मानाद्रुरोद पुरतो विभोः ।
दृष्टिः पपात तत्कण्ठे नीलकण्ठो बभूव सः ॥
सदा शिवः शिवां भक्त्या स्तुत्वा वक्षसि सादरम् ।
तत्स्तवभङ्गं स्तोत्रेण विनयेन चकार ह ॥
करेण चक्षुषोर्नीरं संगृह्य च पुनः पुनः ।
बोधयामास विविधैर्नीतिवाक्यैर्मनोहरैः ॥
परितुष्टा च सा देवी भर्त्तारं ससुवाच ह ।
कलेवरञ्च त्यक्ष्यामि नैवेद्येन विना हरेः ॥
बिभर्म्मि देहं सततं तव सौभाग्यवर्द्धितम् ।
कथं वहामि सौभाग्यरहितञ्च कलेवरम् ॥
अपूर्व्वं तव नैवेद्यं जन्मजन्मजराहरम् ।
क्षतं दुष्टं यतस्तस्मात् पश्य देहं त्यजामि च ॥
लिङ्गोपरि च यद्दत्तं तदेवाग्र्यमहेश्वर ! ।
सुपवित्रं भवेत्तत्र विष्णोर्नैवेद्यमिश्रितम् ॥
इत्येवमुक्त्वा सा देवी देहं त्यक्तुं समुद्यता ।
चस्खलो हरस्तत्पुरतः स्तुत्वा च स्तोत्रकार ह ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३० अः ॥

तत्कारणान्तरं यथा,—

श्रीदेव्युवाच ।

"दुर्लभं तव निर्म्माल्यं ब्रह्मादीनां कृपानिधे ! ।
तत् कथं परमेशान ! निर्म्माल्यं तव दूषितम् ॥

ईश्वर उवाच ।

माभैर्माभैर्महादेवि ! ज्ञानसारं शृणु प्रिये ।
एतज्ज्ञानं महादेवि ! सारात्सारं परात्परम् ॥
पञ्चभूतात्मकं देवि सुखं मे परिकीर्त्तितम् ।
मध्यस्थानं स्थितं तत्तु तत्सुखं परमेश्वरि ! ॥
श्यामलं तत्तु ईशानं सदा ऊर्द्धं सुचिस्मिते ! ।
कालाग्निरूपिणं तत्तु सर्व्वशक्तिमयं सदा ।
तेजोमयं महेशानि सुखमूर्द्धं वरानने ! ॥
क्षीरोदमन्थने देवि उत्थितं गरलं विषम् ।
उत्थितं गरलं यत्तु ब्रह्माण्डनाशकारकम् ॥
तदेव गरलं देवि हस्ते कृत्वा तु तद्विषम् ।
कृष्णाञ्जननिभं दिव्यं गरलं जलवत्तदा ॥
मम हस्ते महेशानि आविरासीत् सुचिस्मिते ।
ततः करतलीकृत्य तद्विषं परमेश्वरि ॥
निपीय तद्विषं रूक्षं तीक्ष्णं ब्रह्माण्डनाशकम् ।
ततः श्यामसुखे देवि न पीत्वा तद्विषं प्रिये ॥
तद्विषं कण्ठदेशे तु स्थितं हि सर्व्वदा मम ।
ततःप्रभृति देवेशि सुखं व्याजायते सदा ॥
कण्ठे तु कृष्णं भूत्वा सदा तिष्ठति कामिनि ।
ततःप्रभृति देवेशि नीलकण्ठत्वमाप्नुयाम् ॥
ईशानं मनुसुखं देवि परं ब्रह्म वरानने ।
प्रत्यङ्गिरामयं देवि मनुसुखं कमलानने ॥
साक्षात् ज्योतिर्मयी देवी सदा मे सुखसंस्थिता ।
पत्रं वा यदि वा पुष्पं जलं वा वरवर्णिनि ॥
अन्यं हि परमेशानि उपचारं मनोहरम् ।
यो दद्यात् परमेशानि मनुसुखोपरि पार्व्वति ॥
अग्राह्यं तत्तु निर्म्माल्यं साक्षाद्ब्रह्ममयं ततः ।
एतत्तु परमेशानि निर्म्माल्यं यस्तु धारयेत् ॥
स भ्रष्टो जायते देवि निष्कृतिर्नास्ति तस्य वै ।
अग्राह्यं मम निर्म्माल्यं अतएव वरानने ॥
यद्दत्तं मनुसुखे देवि पुष्पं वा पत्रमुत्तमम् ।
तन्निर्म्माल्यं महेशानि ! गृह्णीयात् शिरसा सदा ॥
स ब्रह्मतेजसा तस्य समतां याति सुन्दरि ! ।
न दद्यादृषये देवेशि ! उपचारं सुचिस्मिते ! ॥
लिङ्गोपरि वरारोहे ! यच्च तस्य सुचिस्मिते ।
निगदामि शृणु प्रौढ़े वचनं मम कामिनि ॥
स एव नारकी भूत्वा नरकं सर्व्वदाप्नुयात् ।
अग्नेयनरकं शुक्ला अग्नेयधोनिमाव्रजेत् ॥
अग्नेयस्यावरं देवि चङ्गमत्र तथा प्रिये ।
शुक्ला तु सर्व्वपापान् स अग्नेयक्रिमितां व्रजेत् ॥
शृणु देवि प्रवक्ष्यामि उच्छिष्टं मम पार्व्वति ।
उपचारं स्थापयित्वा पूतं पात्रान्तरे प्रिये ॥
क्षतं तु मन्त्रपूतं हि उपचारं निवेदयेत् ।
वामदेवादि देवेशि सुखेषु वरवर्णिनि ॥
भक्ष्यं मम देवेशि ब्रह्माण्डसृष्टिकारकम् ।
एतद्धि परमेशानि ! ब्रह्मादीनां सुदुर्लभम् ॥
अशुचिर्व्वा शुचिर्व्वापि उच्छिष्टं भक्षयेद्यदि ।
स एव परमाराध्यः साक्षाद्ब्रह्म शुचिस्मिते ॥
उच्छिष्टभक्षणे कामी च एव श्रीसदाशिवः ।

निर्म्माल्यं दृढभक्तित्वादृषयोऽपि यजन्ति ॥
प्रथमं विष्णवे दत्त्वा विष्णुमन्त्रेण सुन्दरि ।
निर्म्माल्यं मम देवेशि विष्णोर्ग्राह्यं वरानने ॥
देवासुरमनुष्याश्च गन्धर्व्वाः किन्नरादयः ।
ते सर्व्वे परमेशानि वराकाः क्षुद्रबुद्धयः ॥
निर्म्माल्येषु च देवेशि ! अधिकारी कथं भवेत् ॥"

इति शिवार्च्चनतन्त्रे । १३ । १४ । पटलः ॥

नैवेद्यिकं, क्ली, (निवेद्याय गार्हस्थ्याय हितम् । निवेद्य + ठक् ।) निवेद्यनार्थे गार्हस्थ्याय यत् कन्या दीयते तत् । इति मिताक्षरा ॥ यथा, याज्ञवल्क्यः । १ । २१० ।

"भूदीपांश्चान्नवस्त्राभ्यलिखसर्पिःप्रतिग्रहान् ।
नैवेद्यिकं स्वबन्धुभ्यो दत्त्वा स्वर्गे महीयते ।

निवेद्यसम्बन्धिनि, त्रि ॥

नैष्यं, त्रि, (निशायाः इदम् । निशा + "तस्येदम् ।" ४ । ३ । १२० । इति अञ् ।) निशासम्बन्धि । (यथा, हरिवंशे भविष्यपर्व्वणि । ४ । २ ।

"सलिलमये ग्रहगणि रवेर्दीधितयो मूर्च्छिता-
स्तमो नैष्यम् ।
उपयन्ति दर्पणोदरनिहिता इव मन्दिर-
स्थाताः ॥" * ॥

निशायां भवम् । निशा + "निशाप्रदोषाभ्याच्च ।" ४ । ३ । १४ । इति छप्रत्ययेन अञ् ।) निशाभवम् । इति सिद्धान्तकौमुदी ॥ (यथा, मनुः । ६ । १०२ ।

"पूर्व्वां सन्ध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति ।
पश्चिमान्तु समासीनो मलं हन्ति दिवाकृतम् ॥")

नैशिकं, त्रि, (निशायां भवम् । निशा + "निशाप्रदोषाभ्याच्च ।" ४ । ३ । १४ । इति ठञ् ।) निशाभवम् । इति सिद्धान्तकौमुदी ॥ (निशाव्यापकम् ॥ स्त्रियां ङीप् । यथा, मनुः । ५ । ६७ ।

"नृणामक्षतचूड़ानां विशुद्धिर्नैशिकी स्मृता ॥")

नैश्चित्यं, त्रि, निश्चितस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥

नैषधः, पुं, (निषधानां राजा । निषध + अण् ।) नलराजा । इति त्रिकाण्डशेषः ॥ (यथा महाभारते । ३ । ५६ । १६ ।

"तस्याः समीपे तु नलं प्रशशंसुः कुतूहलात् ।
नैषधस्य समीपे तु दमयन्ती पुनः पुनः ॥"

निषधदेशाधिपतिः । यथा, रघुः । १८ । १ ।

"स नैषधस्यार्थपतेः सुतायां
सुतामुपादयामास निषिक्तयज्ञः ॥"

वर्षविशेषः । जम्बुद्वीपेश्वरोऽग्नीध्रस्तु स्वपुत्राय हरिवर्षाय वर्षमेतदृत्तवान् । यथा, विष्णुपुराणे । २ । ४ । २० ।

"तृतीयं नैषधं वर्षं हरिवर्षाय दत्तवान् ॥"

नैषधं नलमधिकृत्य कृतो ग्रन्थः । नैषध + अण् स्वनामख्यातो हर्षदेवविरचितो द्वाविंशसर्गात्मकः काव्यग्रन्थविशेषः । यथा,—

"उदिते नैषधे काव्ये क्व माघः क्व च भारविः ॥" *॥

निषधानामयमिति । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) निषधसम्बन्धिनि, त्रि ॥

नैष्किकः, पुं, (निष्के सर्व्वे दीनारे तदाकारे वा नियुक्तः । निष्क + "तत्र नियुक्तः ।" ४ । ४ । ६९ । इति ठक् ।) रूप्याध्यक्षः । इत्यमरः । २ । ८ । ७ ॥ टङ्कपतिः । पुरुषाश्वादिरूपं घटितं रजतं रूप्यं तस्याध्यक्षः । इति भरतः ॥ (त्रि, निष्केण क्रीतं निष्कस्य विकारो वा । "क्रीतवत् परिमाणात् ।" ४ । ३ । १५६ । इत्यनेन "असमासे निष्कादिभ्यः ।" ५ । १ । २० । इति ठक् । निष्कक्रीते । निष्कविकारे ॥)

नैष्ठिकः, त्रि, (निष्ठा विद्यतेऽस्येति । निष्ठा + मत्वर्थीयठक् ।) ब्रह्मचर्य्यं कृत्वा यावज्जीवं "गुरुकुले यो वसति सः । यथा,—

नैष्ठिको ब्रह्मचारी च वसेदाचार्य्यसन्निधौ ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥
अनेन विधिना देहं साधयेद्विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥"

इति गरुडपुराणम् ॥

(यथा, महाभारते । ३ । २८२ । २७ ।

"शतयोजनविस्तारं न शक्ताः सर्व्ववानराः ।
क्रान्तुं तोयनिधिं वीरा नैष्ठा वो नैष्ठिकी मतिः ॥")

नैसर्गिकः, त्रि, (निसर्गादागतः । निसर्ग + ठक् ।) स्वाभाविकः । (यथा, रघुः । ५ । ३० ।

"रूपं तदोजस्वि तदेव वीर्य्यं
तदेव नैसर्गिकसुन्नतत्वम् ॥")

यथाच कल्किपुराणे २६ अध्याये ।

"पृच्छामस्त्वामियं भक्तिः क लभ्या परमात्मनः ।
कस्य वा शिक्षिता राजन् किंवा नैसर्गिकी तव ॥"

नैस्त्रिंशिकः, त्रि, (निस्त्रिंशः खड्गः प्रहरणमस्य । निस्त्रिंश + "प्रहरणम् ।" ४ । ४ । ५७ । इति ठक् ।) खड्गधारी । निस्त्रिंशेन प्रहरति यः । तत्पर्य्यायः । असिधेनुकः २ । इत्यमरः । २ । ८ । ७० ॥ असिधेनुकः ३ । इति शब्दरत्नावली ॥

नो, व्य, (नञ् + ङो ।) नहि । अभावः । इत्यमरः । ३ । ४ । ११ ॥ (यथा, अपराधभञ्जनस्तोत्रे । ७ ।

"नो शक्यं स्मार्त्तकर्म्म प्रतिदिनगहनं प्रत्यवायाकुलाख्यम् ॥")

नोधाः, [स्] पुं, (नूयते स्तूयते इति । नु + "नुवो धुट् च ।" उणां ४ । २२५ । इति असिः धुट् च । यद्वा, नवं दधातीति । नव + धा + असुन् । नवशब्दस्य नोभावश्च । इति यास्कः ।) ऋषिभेदः । इलूषादिकोषः ॥ (यथा, ऋग्वेदे । १ । ६१ । १४ ।

"उपो वेनस्य जोगुवान ओर्णिं
सद्यो भुवदीर्याय नोधाः ॥")

नोपस्थाता, [ऋ] त्रि, (न उप समीपे तिष्ठतीति । स्था + ल्युच् ।) दूरस्थः । न उप समीपे तिष्ठति यः सः ॥ हीनाधिविशेषः । यथा,—

"अन्यवादी क्रियाहीनो नोपस्थाता निरुत्तरः ।
आकृतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥"

इति मिताक्षरायां व्यवहारमातृकायाम् ॥

नौः, स्त्री, (वुद्यतेऽनयेति । वुद प्रेरणे + "स्फायितञ्चिवञ्चिलूधूसूखनसहचरिभ्यो डौः ।" उणां २ । ६४ । इति डौः ।) नौका । इत्यमरः । १ । १० । १० ॥ यथा, महाभारते । १ । १५० । ४—५ ।

"ततः स प्रेषितो विद्वान् विदुरेण नरस्तदा ।
पार्थानां दर्शयामास मनोमारुतगामिनीम् ॥
सर्व्ववातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
ग्रिवे भागीरथीतीरे नरैर्विश्रम्भिभिः कृताम् ॥"

एतेन यन्त्रवाहिता नौका प्रतीयते । कक्षेर नौका इति हस्तिमोट् इति च यस्याः प्रसिद्धिः ॥

नौका, स्त्री, (नौरेव । नौ + स्वार्थे कन् ।) नद्यादिसन्तरणार्थकाष्ठादिनिर्म्मितयानविशेषः । वारिरथः । इति त्रिकाण्डशेषः । तत्पर्य्यायः । भौः २ तरिका ३ तरणिः ४ तरणी ५ तरिः ६ तरी ७ तरण्डी ८ तरण्डः ९ पादालिन्दा १० उत्प्लवा ११ होड़ः १२ वाधूः १३ वार्ब्बटः १४ वह्नित्रम् १५ पोतः १६ । इति शब्दरत्नावली ॥ वहनम् १७ । इति जटाधरः ॥ * ॥

अथ निष्पदयानोद्देशः ।

"नौकाद्यं निष्पदं यानं तस्य लक्षणमुच्यते ।
अश्वादिकन्तु यद्यानं स्थले सर्व्वं प्रतिष्ठितम् ॥
जले नौकैव यानं स्यादतस्तां यत्नतो वहेत् ॥"

अथ कालः ।

"सुवारदेलातिथिचन्द्रयोगे
चरे विलग्ने मकरादिषट्के ।
ऋक्षेऽम्बुसम्भवतिरेकतोऽन्ये
वदन्ति नौकाघटनादि कर्म्म ॥ * ॥
अश्विखरांशुसुधानिधिपूर्व्वा-
मित्रधनाच्युतभे शुभलग्ने ।
तारकयोगतिथीन्दुविशुद्धौ
नौगमनं शुभदं शुभवारे ॥" *॥

"वृक्षायुर्व्वेदगदिता वृक्षजातिश्चतुर्व्विधा ।
समासेनैव गदितं तेषां काष्ठं चतुर्व्विधम् ॥"

तद्यथा,—

"लघु यत् कोमलं काष्ठं सुघटं ब्रह्मजाति तत् ।
दृढ़ाङ्गं लघु यत् काष्ठमघटं चक्रजाति तत् ॥
कोमलं गुरु यत् काष्ठं वैश्यजाति तदुच्यते ।
दृढ़ाङ्गं गुरु यत् काष्ठं शूद्रजाति तदुच्यते ॥
लक्षणद्वययोगेन द्विजातिः काष्ठसंग्रहः ॥
क्षत्रियकाष्ठैर्घटिता भोजमते सुखसम्पदं नौका
अन्ये लघुभिः सुदृढ़ैर्विदधति जलदुर्व्यदे
नौकाम् ॥

विभिन्नजातिद्वयकाष्ठजाता
न श्रेयसे नापि सुखाय नौका ।
नैषा चिरं तिष्ठति पच्यते च
विभिद्यते वारिणि मज्जते च ॥
न सिन्धुगाद्यार्हति लौहबन्धं
तल्लोहकान्तैर्घ्रियते हि लौहम् ।
विपद्यते तेन जलेषु नौका
गुणेन बन्धं विलगाद भोजः ॥"

अथ लक्षणानि ।

"सामान्यञ्च विशेषश्च नौकाया लक्षणद्वयम् ॥"

अत्र सामान्यम् ।

"राजहस्तमितायामा तत्पादपरिवाहिनी ।
तावदेवोन्नता नौका क्षुद्रेति गदिता बुधैः ॥
अतः सार्द्धमितायामा तद्दैर्घ्यपरिवाहिनी ।
त्रिभागैकोच्छ्रिता नौका मध्यमेति प्रचक्षते ॥
क्षुद्राथ मध्यमा भीमा चपला पटलाभया ।
दीर्घा पत्रपुटा चैव गर्भरा मन्थरा तथा ॥
नौकादशकमित्युक्तं राजहस्तैरनुक्रमम् ।
एकैकहस्तैः सार्द्धैश्च विज्ञानीयात् त्रयं त्रयम् ॥
उन्नतिश्च प्रवीणा च हस्तादर्द्धांशसम्मिता ।
अत्र भीमाभया चैव गर्भरा शास्त्रशुभप्रदा ॥
मन्थरापरतो यास्तु तासामेवाम्बुधौ गतिः ।
तासां गुणस्तु संक्षेपात् दृढ़ता च प्रकीर्त्तिता ॥"

अथ विशेषः ।

"दीर्घा चैवोन्नता चेति विशेषे द्विविधा भिदा ॥"

तत्र दीर्घा यथा,—

"राजहस्तत्रयायामा अर्द्धांशपरिवाहिनी ।
नौकेयं दीर्घिका नाम दशाङ्गैर्नोन्नतापि च ॥
दीर्घिका तरणिर्लोला गह्वरा गामिनी तरिः ।
जङ्घाला प्लाविनी चैव धारिणी वेगिनी तथा ॥
राजहस्तैकैकवृद्ध्या नौकानामानि वै दश ।
उन्नतिः परिवाहश्च दशार्द्धांशमितौ क्रमात् ॥
अत्र लोला गामिनी च प्लाविनी दुःखदा भवेत् ।
लोलाया मानमारभ्य यावद्भवति गह्वरा ॥
लोलायाः फलमाधत्ते एवं सर्व्वासु निर्णयः ।
वेगिन्याः परतो या तु सा ग्रिवायोत्तरा यथा ॥"

भोजोऽपि ।

"नौकादीर्घं यथेच्छं स्वात्तत्रतानि विवर्ज्जयेत् ।
हस्तसंख्या परित्याज्या षड्वेदेभ्यश्चोत्तरे ॥
षट्त्रयोत्तरमिता नौका कुर्य्यात् हस्तैः शतं धनम् ।
नवतेरुत्तरे यापि या चत्वारिंशतेः परा ।
एतेन चत्वारिंशतिनवतिसंख्या तत्परतोऽपि ।
यावदपरदशकं तावदेव तत्फलमिति ।"

इति दीर्घा ।

अथोन्नता ।

"राजहस्तद्वयमिता तावत् प्रवरोन्नता ।
द्वयब्धिभिधा नौका क्षेमाय पृथिवीभुजाम् ॥
जङ्घानूर्द्धा सर्व्वसुखी गर्भिणी मन्थरा तथा ।
राजहस्तैकैकवृद्ध्या नाम पञ्चत्रयं भवेत् ॥
अत्रानूर्द्धा गर्भिणी च निन्दितं गात्रयुग्मकम् ।
मन्थरायाः परा यास्तु ताः शुभाय यथोद्भवम् ॥"

भोजोऽपि ।

"बाह्यात्युत्तरतो मानं नौकानामशुभं वहेत् ।
पञ्चाग्रदूर्द्धादुल्लासं धनगाद्यं त्रयोर्द्धतः ॥"

इत्युन्नता ॥ * ॥

"धात्वादीनामतो वक्ष्ये निर्णयं तरिसंश्रयम् ।
कनकं रजतं ताम्रं चितयं वा यथाक्रमम् ॥
ब्रह्मादिभिः परित्यक्ष्य नौकाचित्रणकर्म्मणि ।
चतुःश्रृङ्गा त्रिशृङ्गाभा द्विशृङ्गा चैकशृङ्गिणी ॥
सितरक्तापीतनीलवर्णान्दद्याद्यथाक्रमम् ।
केशरी महिषो नागो द्विरदो वाज्य एव च ॥

पक्षी भेकी मनुष्यश्च एतेषां वदनाश्रकम् ।
नावां मुखे परिन्यस्य आदित्यादिदृशा भुवाम् ॥
कलसो दर्पणश्चन्द्रस्वेदृशानां महीभुजाम् ।
हंसः केकी शुकः सिंही गजोऽहिर्व्याघ्रघट-
पदौ ॥
आदित्यादिदृशाजातनौकोपरि परिन्यसेत् ॥*॥
नौकासु मणिविन्यासो विज्ञेयो नवदण्डवत् ।
सुस्नात्सवकैर्युक्ता नौका स्यात् सर्व्वतो भद्रा ।
तत्संख्या वेदश्च रसवेदद्वयसम्मिता क्रमशः ॥
कनकादीनां माला जयमालेति गद्यते सद्भिः ।
ब्रह्मचक्रे द्वितये एकैके वैश्यशूद्रयोनी ॥ * ॥
निर्गुणं सगुणं वाथ तत् सर्व्वं द्विविधं भवेत् ।
निर्गुणं पूर्व्वसुदिष्टं सगुणानि यथा शृणु ॥
सगुणा त्रिविधा प्रोक्ता सर्व्वमध्याग्रमन्दिरा ।
सर्व्वतो मन्दिरं यत्र सा ज्ञेया सर्व्वमन्दिरा ॥
राज्ञां कोष्ठागारिणां यानमत्र प्रशस्यते ।
मध्यतो मन्दिरं यत्र सा ज्ञेया मध्यमन्दिरा ॥
राज्ञां विलासयात्रादि वर्षासु च प्रशस्यते ।
अग्रतो मन्दिरं यत्र सा ज्ञेया अग्रमन्दिरा ॥
चिरप्रवासयात्रायां रणे काले घनाद्यये ॥
मन्दिरमानं नौकाप्रसरत एवार्द्धभागतो न्यूनम् ।
भोजस्तु ।
दीर्घोत्तवसुषट्दिवाकरा-
नेकदिङ्मिता यथाक्रमम् ।
राजपञ्चभुजसम्मितोन्नति-
र्मन्दिरे तरिगते महीभुजाम् ॥
भास्करादिकदृशा भुवां पुनर्धातुनिर्म्मयनमत्र नवदण्डवत् ॥
काष्ठजं धातुजश्चेति मन्दिरं द्विविधं भवेत् ।
काष्ठजं सुखसम्यक्त्वे विलासे धातुजं मतम् ॥
अत्र गृह्यासनादीनां मन्त्ररोल्लोचयोरपि ।
अन्येषाञ्चैव सुनिभिर्निर्णयः पूर्व्ववन्मतः ॥
दिङ्मात्रमिदमुद्दिष्टं नौकालक्षणमग्रजम् ।
प्रधानेष्वेव नियमः अप्रधाने न निर्णयः ॥
लघुता दृढ़ता चैव गामितारुद्रता तथा ।
समतेति गुणोद्देशो नौकानां संप्रकाशितः ॥
एवं विचिन्त्य यो राजा नौकायानं करोति च ।
स चिरं सुखमाप्नोति विजयं समरे श्रियम् ॥
योऽज्ञानादन्यथा यानं नौकानां कुरुते नृपः ।
तस्यतानि विनश्यन्ति यशो वीर्य्यं बलं धनम् ॥"
इति निष्पदयानोद्देशे नौकायानम् ॥ * ॥

जघन्यजलयानानि यथा,—
"नौकान्यतो जले यानं जघन्यमिति गद्यते ।
तद्देहा बहवस्ते तु पाश्चात्यानां प्रकीर्त्तिताः ॥
द्रोणीरूपन्तु यद्यानं द्रोणीयानमन्तदुच्यते ।
घटीभिर्घटितं यानं घटीनौकेति गद्यते ॥
तुम्बाद्यैस्तु फलैर्यानं फलयानं प्रचक्षते ।
चर्म्मभिस्तूलपूर्णैश्चर्म्मयानं तदुच्यते ॥
यानं यल्लघुभिर्वृक्षैर्वृक्षयानमुदाहृतम् ।
जन्तुभिः सलिले यानं जन्तुयानं प्रचक्षते ॥
बाहुभ्यां सन्तरेद्वारि जघन्येषु न निर्णयः ॥"
इति युक्तिकल्पतरौ निष्पदयानोद्देशः ॥

नौकादण्डः, पुं, (नौकायाः परिचालनार्थं यो दण्डः ।) क्षेपणी । इत्यमरः ।२।१०।१३॥ चाइड़ इति भाषा ॥
नौतार्य्यं, त्रि, (नावा नौकया तार्य्यं तरणीयम् ।) नाथ्यम् । नौकागम्यदेशादि । इत्यमरः ।२।१०।१०।
न्यकारका, स्त्री, (न्यक् क्रियतेऽसौ पृषोदरात् कलोपे साधुः ।) शूकशुकीटः । विष्ठाकृमिः । इति हारावली । १६३ ॥ (क्वचित् अन्यकारका इति पाठः ॥)
न्यकारः, पुं, (न्यक् क्रियते इति । कृ + घञ् ।) न्यक्करणम् । तत्पर्य्यायः । अवज्ञा २ परीहारः ३ परिहारः ४ पराभवः ५ अपमानम् ६ परिभवः ७ तिरस्कारः ८ तिरस्क्रिया ९ अवहेला १० हेला ११ अवहेलनम् १२ हेलनम् १३ अनादरः १४ अभिभवः १५ सूचर्यं १६ सूर्च्छनम् १७ रीढ़ा १८ अभिभूतिः १९ निक्षतिः २० असूचनम् २१ असूर्च्छनम् २२ नीकारः २३ अवहेलम् २४ अमाननम् २५ क्षेपः २६ निकारः २७ धिक्कारः २८। इति शब्दरत्नावली ॥ विमाननं । इति कालिदासः ॥ (यथा, महानाटके । ६ । १४ ।
"न्यकारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो
रावणः ॥")
न्यक्षं, क्ली, कार्त्तस्वरम् । हेमम् । निकृष्टे, त्रि । इति मेदिनी । धे, १६ ॥
न्यक्षः, पुं, (नीयते अक्षिणी यस्य । षच् समासे ।) महिषः । इति मेदिनी । धे, १६ । जामदग्न्यः ॥ इति हैमचन्द्रः ॥
न्यग्रोधः, पुं, (न्यक् रुणद्धि इति । रुध + अच् ।) वटवृक्षः । (यथा, भागवते । ४ । ६ । १६ ।
"धनसोऽम्बरात्यत्नक्षत्न्यग्रोधहिङ्गुभिः ॥")
श्यामपरिमाणम् । इत्यमरः । २ । ४ । ३२, ३।३।६५ ॥ शमीवृक्षः । इति मेदिनी । धे, ३२ ॥ विषपर्णी । मोहनाख्यौषधिः । इति विश्वः ॥ (उग्रसेनन्नृपपुत्राणामन्यतमः । यथा, हरिवंशे । ३० । ३० ।
"नग्रोधसेनस्य सुतास्त्वेषां कंसस्तु पूर्व्वजः ।
न्यग्रोधश्च सुनामा च कङ्कः शङ्कः सुभूनिपः ॥")
न्यग्रोधपरिमण्डलः, पुं, (न्यग्रोधः श्यामः परिमण्डलं परिणाहो यस्य ।) श्यामपरिमितोच्चयपरीणाहः पुरुषः । एतादृशाः पुरुषास्त्रेतायुगे चक्रवर्त्तिन आसन् । यथा, मात्स्ये ११८ अः ।
"महाधनुर्धराश्चैव त्रेतायां चक्रवर्त्तिनः ।
सर्व्वलक्षणसम्पन्ना न्यग्रोधपरिमण्डलाः ॥
न्यग्रोधौ तु स्तनौ बाहू श्यामो न्यग्रोध उच्यते ।
श्यामेन उच्चयो यस्य अध ऊर्द्ध्वञ्च देहिनः ।
समोच्चयपरीणाहो न्यग्रोधपरिमण्डलः ॥"
(अपिच । भट्टिकाव्ये भरतमल्लिकश्लोकव्याख्यायां पुराणवचनम् ।
"प्रसारितभुजस्येह मध्यभागदयान्तरम् ।
उच्छ्रायेण समं यस्य न्यग्रोधपरिमण्डलः ॥")

न्यग्रोधपरिमण्डला, स्त्री, (न्यक्रुणद्धि इति न्यग्रोधं अधःप्रसृतं परितो मण्डलं नितम्बमण्डलरूपं यस्याः । यद्वा न्यग्रोधस्य वटस्य इव परिमण्डलं परिणाहो नितम्बभागे यस्याः ।) अङ्गनाविशेषः । यथा,—
"स्तनौ सुकठिनौ यस्या नितम्बे च विशालता ।
मध्ये क्षीणा भवेद्या सा न्यग्रोधपरिमण्डला ॥"
इति शब्दमाला ॥
(तथाच भट्टिः । ६ । १८ ।
"योषिद्वृन्दारिका तस्य दयिता हंसनादिनी ।
दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ॥")
न्यग्रोधा, स्त्री, (न्यक्रुणद्धीति । रुध + अच् । टाप् ।) न्यग्रोधी । इति शब्दरत्नावली ॥ (पर्य्यायोऽस्या यथा,—
"हस्त्युदुम्बरपर्णी स्यान्निकुम्भोऽथ सकुलकः ।
हवनी नामतश्चित्रा न्यग्रोधा सप्तिकाह्वया ॥"
इति चरके कल्पस्थाने द्वादशोऽध्याये ॥)
न्यग्रोधी, स्त्री, (न्यक् रुणद्धीति । रुध + अच् । गौरादित्वात् ङीष् इति प्राचः ।) उपचित्रा । इत्यमरभरतौ । रुरकानी इति भाषा । धुलकुँड़ी इति केचित् ।
न्यङ्, [च्] त्रि, (नितरामञ्चतीति । अञ्चु + क्विप् ।) नीचः । खर्व्वः इत्यमरः । ३ । १ । १० ॥ निम्नः । इति मेदिनी । चे, ५६ ॥ कार्त्तस्वरम् । इति विश्वः ॥
न्यङ्कुः, पुं, (नितरां अञ्चति गच्छतीति । अञ्चु + "नावञ्चेः ।" उणा । १ । १८ । इति उः । "अङ्कोधीनाच्च ।" ७ । ३ । ५३ । इति कुत्वम् ।) मृगभेदः । इत्यमरः । २ । ५ । १० ॥ (यथा, हरिवंशे । १२१ । ४९ ।
"न्यङ्कुभिश्च वराहैश्च रुरुभिश्च निषेवितम् ॥")
मुनिविशेषः । इति मेदिनी । के, २७ ॥
न्यङ्कुवृक्षः, पुं, (न्यङ्कुरिव भूरुहः ।) श्लोमकवृक्षः । इति त्रिकाण्डशेषः ॥ (श्लोमकशब्दोऽस्य विवरणं ज्ञातव्यम् ॥)
न्यच्छं, क्ली, (नितरामञ्छम् ।) क्षुद्ररोगविशेषः । मेचेता इति भाषा ॥ तल्लक्षणं यथा,—
"मण्डलं महदल्पं वा श्यावं वा यदि वा सितम् ।
सहजं नीरुजं गात्रे न्यच्छं तदभिधीयते ॥"
तच्चिकित्सा यथा,—
"शिरावेधैः प्रलेपैश्च तथाभ्यङ्गैरुपाचरेत् ।
न्यच्छं लिम्पेत् पयःपिष्टैः कल्कैः क्षीरितरूद्भवैः ॥
त्रिभुवनविजयापत्रं मूलं स्थविरस्य शिंशपा
त्वेभिः ।
उद्भूतेन विरचितं न्यच्छयच्छापहं सिद्धम् ॥
स्थविरस्य वृद्धदारोः ।" इति भावप्रकाशः ॥
न्यञ्चितं, त्रि, (नि + अञ्च + णिच् + क्तः ।) अधःक्षिप्तम् । इति जटाधरः ॥
न्यञ्चः, पुं, (नि + इ + "इरच् ।" ३ । ३ । ५६ इत्यच् ।) अपचयः । इति केचित् ॥
न्यस्तं, त्रि, (नि + अस + क्तः ।) निहितम् । स्थापितम् । तत्पर्य्यायः । निहतम् २ । इत्य

मरः। ३। १। ८८॥ अस्य प्रपौत्रायान्तरं निचिघण्टे द्रष्टव्यम्॥

न्यस्तशस्त्रः, पुं, (न्यस्तं शस्त्रं येन। युद्धादिविरतत्वात् तथात्वम्।) पितृलोकः। इति त्रिकाण्डशेषः॥ (यथा, मनुः। ३। १९२।

"अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः।
न्यस्तशस्त्रा महाभागाः पितरः पूर्व्वदेवताः॥")

न्यस्तशस्त्रे, त्रि। यथा,—

"न्यस्तशस्त्रं दिलीपञ्च तञ्च शुश्रुवुषां प्रभुम्।
राज्ञासुहृत्तनयाराधे हृदि शल्यमिवार्पितम्॥"

इति रघुः॥

न्याक्यं, क्ली, (नितरामक्यते इति। नि+अक+ण्यत्।) भक्तकुलम्। सुड़ी इति भाषा॥ तत्पर्य्यायः। भक्तात्रम् २ कुल्वम् ३। इति शब्दचन्द्रिका॥

न्याद्यः, पुं, (न्यदनमिति। नि+अद भक्षणे+"नौ गद च।" ३। ३। ९०। इति यः।) आहारः। इत्यमरः। २। ९। ५६॥

न्यायः, पुं, विष्णुः। यथा,

"न्यग्रोधोऽणीयसामणीः श्रीमान्न्यायो नेता समीरणः।"

इति तस्य सहस्रनामसु गणितः॥ * ॥

(नियमेन ईयते इति। नि+इण्+"परिन्योर्नीणोर्द्यूताभ्रेषयोः।" ३। ३। ३७। इति घञ्।) उचितः। तत्पर्य्यायः। अभ्रेषः २ कल्यः ३ देशरूपम् ४ समञ्जसम् ५। इत्यमरः। २।८।२४॥ * ॥ (नीयन्ते प्राप्यन्ते विवक्षितार्था येनेति। नी+"अध्यायन्यायोद्यावसंहाराच्च।" ३। ३। १२२। इति घञ्प्रत्ययेन निपातनात् साधुः। नीतिः। जयोपायः। भोगः। युक्तिः। इति चिन्तामणिः॥) प्रतिज्ञादेतूदाहरणोपनयनिगमनात्मकपञ्चावयववाक्यम्। तल्लक्षणं यथा। अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकज्ञान्दज्ञानजनकवाक्यत्वम्। इति चिन्तामणिः॥ उचितानुपूर्व्विकप्रतिज्ञादिपञ्चकसमुदायत्वम्। इति शिरोमणिः॥ तल्लक्षं यथा। पर्व्वतो वह्निमान् धूमात् यो यो धूमवान् स वह्निमान् यथा महानसं वह्नियाप्यधूमवांश्चायं तस्माद्वह्निमान्। इति जगदीशः॥ * ॥

(पञ्चाङ्गमधिकरणम्। यथा, महाभारते। २। ५। ३।

"न्यायविन्मैत्तसङ्घः षड्ङ्गविदुत्तमः।"

"न्यायः पञ्चाङ्गमधिकरणम्। यथा,—

'विषयो विषयश्चैव पूर्व्वपक्षस्तथोत्तरः।
पञ्चावयवयोगश्च प्राज्ञैरधिकरणं विदुः॥'

अत्र, यूपस्य स्वरं करोति इति वाक्यं विषयः। तत्र वही यूपसम्बन्धिकर्म्मयोग्यता लक्षणार्था उत यूपावयवलक्षणार्था इति सन्देहो विषयः। एतावेव पूर्व्वोत्तरपक्षौ ज्ञेयौ। कल्पना लाघवानुग्रहादुत्तरः पक्षः सिद्धान्तः। फलं अनुष्ठानभेदः। पूर्व्वपक्षे तक्षणादासौ करणादिना काष्ठान्तरं यूपसदृशं निर्म्मातव्यम्। सिद्धान्ते एकदेशस्य पृथक् करणमात्रमिति। इदमेव पञ्चकं मीमांसाधर्म्मेषूक्तम्।

'सूत्रं सांख्यक्रमौ चोभौ निर्णयः सप्रयोजनः।
पक्षैतान्यनुमानीहि वाक्यमित्युच्यते बुधैः॥"

सूत्रं गहनार्थत्वाद्विषयः। सांख्यः एवमेवं वेति विचारः। क्रमः अधिक्रमः सिद्धान्तस्य पूर्व्वः पक्ष इत्यर्थः। निर्णयः सिद्धान्तः। प्रयोजनं फलम्। इति वाक्यं वाक्यार्थनिर्णयोपायः एवं पूर्व्वोत्तरमीमांसाधिकरणानि न्यायसंज्ञितु॥" इति तट्टीकायां नीलकण्ठः॥ * ॥)

षड्दर्शनान्तर्गतदर्शनविशेषः। तत्पर्य्यायः। तर्कविद्या २ आन्वीक्षिकी ३। इत्यमरभरतौ॥ एतद्दर्शनमते नित्येच्छाकृतिमतिसहितः परमात्मा ईश्वरः स तु ब्रह्मपदार्थो जीवातिरिक्तः। एतच्छास्त्रप्रयोजकं चार्व्वाकादिमतनिराकरणपूर्व्वकं जगत्कारणतया ईश्वरसंस्थापनं संभ्रमादिनिरूपणेन वेदार्थनिर्णयश्च। न्यायदर्शनकारो गौतमः। तत्तुल्ये प्रमाणादिषोड़शपदार्थनिरूपणम्। तेषां तत्त्वज्ञानान्निःश्रेयसम्। तस्य भाष्यकारो वात्स्यायनः। तद्वार्त्तिककारः काल्यायनः। तट्टीकाकारो वाचस्पतिमिश्रः। तच्छात्र उदयनाचार्य्यःकुसुमाञ्जलिप्रबन्धादिग्रन्थकारः। कुसुमाञ्जलिटीकाकारौ हरिदासरामभद्रौ। गङ्गेशोपाध्यायः प्रत्यक्षानुमानोपमानशब्दाख्यखण्डचतुष्टयात्मकचिन्तामणिकारः। तत्सुतो वर्द्धमानोपाध्यायस्तयोश्छात्रौ मणिमिश्रयज्ञपत्युपाध्यायौ मणिप्रभाकरौ। यज्ञपत्युपाध्यायच्छात्रः पक्षधरमिश्रश्चिन्तामणीदालोककारः। पक्षधरमिश्रच्छात्रो रघुनाथशिरोमणिश्चिन्तामणिदीधितिकारः। तच्छात्रो मथुरानाथतर्कवागीशश्चिन्तामणिदीधितिटीकाकारः। तच्छात्रो भवानन्दसिद्धान्तवागीशो दीधितिटीकाकारः। तच्छात्रौ जगदीशतर्कालङ्कारगदाधरभट्टाचार्य्यौ दीधितिटीकाकारौ। एतदतिरिक्ता वादार्थकारा बहवः पण्डिता आसन्॥ तर्कग्रन्थम्। यथा, ग्रन्थरत्नावल्याम्।

"न्यायवैशेषिकादिः स्यात् तर्कविद्या प्रतिष्ठिता।
तस्यामान्वीक्षिकी ज्ञेया तत्रात्मज्ञानमुच्यते॥"

अथ न्यायप्रथमसूत्रं लिख्यते प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। एषां लक्षणानि यथा। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।१। आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्।२। समानानेकधर्म्मोपपत्तेर्व्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः।३। यमर्थमधिकृत्य प्रवर्त्तते तत् प्रयोजनम्। ४। लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः।५। तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः। ६। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः। ७। अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः।८। विमृश्यपक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः। ९। प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः। १०। यथोपपन्नच्छलजातिनिग्रहस्थानोपालम्भो जल्पः ११। सतुप्रतिपक्षस्थापनाहीनो वितण्डा। १२। सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालात्ययापदिष्टा हेत्वाभासाः। १३। वचनविघातोऽर्थविकल्पोपपत्त्या छलम्। १४। साधर्म्म्यवैधर्म्म्याभ्यां प्रत्यवस्थानं जातिः। १५। विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्। १६। इति गौतमसूत्रम्॥ * ॥ न्यायग्रन्थश्च पञ्चाध्यायात्मकम्। तत्र प्रत्यध्यायस्याह्निकद्वयम्। तत्र प्रथमाध्यायस्य प्रथमाह्निके भगवता गौतमेन प्रमाणादिपदार्थानवकलक्षणनिरूपणं विधाय द्वितीये वादादिसप्तपदार्थलक्षणनिरूपणम्। १। द्वितीयस्य तु प्रथमे संशयपरीक्षणं प्रमाणचतुष्टयाप्रामाण्यशङ्कानिराकरणञ्च। द्वितीये अर्थापत्त्यादेरन्तर्भावनिरूपणम्। २। तृतीयस्य प्रथमे आत्मशरीरेन्द्रियार्थपरीक्षणम्। द्वितीये बुद्धिमनःपरीक्षणम्। ३। चतुर्थस्य प्रथमे प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गपरीक्षणम्। द्वितीये दोषनिमित्तत्वनिरूपणं अवयवादिनिरूपणञ्च। ४। पञ्चमस्य प्रथमे जातिभेदनिरूपणम्। द्वितीये निग्रहस्थानभेदनिरूपणम्। ५। इति सर्व्वदर्शनसंग्रहः॥ * ॥ युक्तिमूलकदृष्टान्तविशेषः। स च बहुविधः। तेषां मध्ये प्रसिद्धानां नामलक्षणप्रमाणानि लिख्यन्ते॥

न्यायनामानि	लक्षणानि	तत्प्रमाणानि
अन्धगोलाङ्गुलन्यायः १।	कश्चिद्दुरात्मा महारण्यमार्गे पतितमन्धं स्वबन्धुनगरं जिगमिषुं बभाषे किमचायुष्मता दुःखितेन स्थीयत इति स चान्धः सुखवार्त्तामाकर्ण्य तमाप्तं मत्वोवाच अहो महाभागधेयं यदत्तभवान् दीनं मां स्वाभीष्टनगरं प्राप्तुमसमर्थं भाषत ते स च विप्रलिप्सुर्दुष्टो गोयुवानमानीय तदीय	हेत्वाभासमथुरानाथटीकादयः १।

न्यायनामानि	लक्षणानि	तत्प्रमाणानि
	लाङ्गूलमस्यं ग्राहयामास उपदिदेश चैनमन्यमेव गोयुवा त्वां नगरं नेष्यति मा त्यज लाङ्गूलमिति स चान्यः अज्ञानुतया तदत्यजन् स्वाभीष्टमप्राप्यानर्थपरम्पराम्याप्तः । १ ।	
अन्धपङ्गुन्यायः २ ।	अन्धस्कन्धारूढः पङ्गुर्यथा अन्धस्य पद्भ्यां अप्रातिक्रमसमर्थस्तथा स चान्धः पङ्गोर्दृग्भ्यां चक्षुष्मानिव भवति । २ ।	काव्यप्रकाशे चण्डीदासटीका २ ।
अन्धहस्तिन्यायः ३ ।	बहवोऽन्धा हस्तिनिरूपणार्थं प्रवृत्ताः केनचित् तरसं स्पृष्ट्वा स्तम्भाकारत्वेन कैनापि लाङ्गूलं स्पृष्ट्वा रज्ज्वाकारत्वेन परेण श्रोत्रं स्पृष्ट्वा सूर्पाकारत्वेनापरेण मुखं स्पृष्ट्वा सर्पाकारत्वेन गजो निर्णीतः । ३ ।	भागवतादयः
अशोकवनिकान्यायः ४ ।	तुल्यगुणादिशालिनामशोकादिनानावनानामशोकवनगमने सत्यप्यवनगमनापेक्षा न । अपि च । तुल्यगुणशालिनि वने सत्यपि रावणेनाशोकवने सीता स्थापिता तत्र वनान्तरे स्थापनानपेक्षा । ४ ।	भाष्यसप्तमसूत्रव्याख्या ४ ।
उदूखलकण्टकभोजनन्यायः ५ ।	उदूखल श्रमीकण्टकक्षतजन्यबहुदुःखसहनपूर्वकं किञ्चित्सुखजनकसपत्नश्रमीकण्टकभक्षणम् । ५ ।	वेदान्तग्रन्थरभाष्यटीका ५ ।
कदम्बगोलकन्यायः ६ ।	कदम्बगोलकस्य सर्वावयवेषु युगपदेव पुष्पागासुत्पत्तिः । ६ ।	भाषापरिच्छेदादयः ६ ।
करकङ्कणन्यायः ७ ।	कङ्कणशब्देनैव करभूषणविशेषबोधसम्भवेऽपि करशब्दपूर्वककङ्कणशब्दः करसंलग्नकङ्कणबोधार्थकः । ७ ।	काव्यप्रकाशटीकादयः ७ ।
काकाक्षिगोलकन्यायः ८ ।	एकमेव चक्षुर्गोलकमुभयचक्षुःसम्बन्धिसदुभयचक्षुःकार्यकारकम् । ८ ।	अमरकोषटीकादयः ८ ।
कूर्माङ्गन्यायः ९ ।	कूर्मः स्वेच्छया अङ्गानि प्रसारयति संकोचयति तद्वत् । ९ ।	पञ्चदशीटीका ९ ।
कैसुतिकन्यायः १० ।	यद्वारवहनं दुर्बलस्यापि साध्यं तद्वारवहनं सुतरां सबलस्य साध्यम् । १० ।	अधिकरणधर्मावच्छिन्नाभावजगदीशटीका १० ।
खलेकपोतन्यायः ११ ।	दृढा युवानः श्लिष्टवः कपोताः खले यथामी युगपत् पतन्ति । तथैव सर्वे युगपत् पदार्थाः परस्परैकान्वयिनो भवन्ति । ११ ।	सामान्यलक्षणाजगदीशटीका ११।
गुडजिह्विकान्यायः १२ ।	गुडजिह्विकासम्बन्धे रसास्वादनमेव फलम् । १२ ।	भाष्यरत्नप्रभा १२ ।
गोबलीवर्दन्यायः १३ ।	बलीवर्दशब्देन महोक्षबोधसम्भवेऽपि गोशब्दपूर्वकबलीवर्दशब्दो भटिति बोधार्थकः । १३ ।	साहित्यदर्पणादयः १३ ।
चालनीन्यायः १४ ।	चालनीभ्रामणेन तण्डुलादेः स्थानान्तरपतनं तद्वत् । १४ ।	व्याप्तिपञ्चके जगदीशः १४ ।
टङ्कारणिमणिन्यायः १५ ।	टङ्कारणिमणीनामेकमाचजन्यवह्नौ अभिचारभिया नैकधर्मावच्छिन्नं प्रति कारणत्वं किन्तु वह्निनिष्ठकार्यतावच्छेदकद्वयमवलम्ब्य कार्यकारणभावद्वयम् । १५ ।	बाधग्रन्थटीका १५ ।
दग्धपचन्यायः १६ ।	पक्वायां दग्धानामपि पूर्वाकारेणावस्थानज्ञानमात्रं न तु वस्तुतः पक्वत्वम् । १६ ।	वेदान्तभाष्यटीका १६ ।
दण्डचक्रादिन्यायः १७ ।	घटत्वादिकधर्मावच्छिन्नं प्रति दण्डचक्रादीनां कारणत्वम् । १७ ।	परामर्शमथुरानाथटीका १७ ।
दध्नापूपन्यायः १८ ।	आखण्डचिते कदेशं दग्धं पश्यतस्तदेकदेशसंलग्नपिण्डभक्षणबुद्धिः । १८ ।	दायभागादयः १८ ।
पङ्कप्रक्षालनन्यायः १९ ।	पङ्कलेपनपूर्वकक्षालनमपेक्ष्य पङ्कस्यालेपनं श्रेयः । १९ ।	अवयवस्य गादाधरी टीका १९ ।
मणिमन्त्रादिन्यायः २० ।	दाहं प्रति जलस्य प्रतिबन्धकत्वं वह्निनाग्रकतया यौक्तिकं मणिमन्त्रादीनान्तु तद्विलक्षणप्रतिबन्धकत्वं स्वातन्त्र्येण । २० ।	पञ्चताजगदीशटीका २० ।
राजपुरप्रवेशन्यायः २१ ।	विशङ्कलगमनसहिष्णुरक्षकसङ्कुले राजपुरे जनानां श्रेणीरूपेण प्रवेशः । २१ ।	न्यायग्रन्थखण्डमथुरानाथटीका२१
लूतातन्तुन्यायः २२ ।	लूता स्वत्रसुत्पाद्य जालं रचयति संहरति च तद्वत् । २२ ।	वेदान्तसारटीका २२ ।
विशेष्यविशेषणन्यायः २३ ।	भूतले आदौ केवलघटो विशेष्यं ततस्तत्र घटे जलं विशेषणं न तु जलद्विशिष्टघट एवादौ विशेषणम् । २३ ।	सामान्यलक्षणामथुरानाथटीका २३ ।
वीचीतरङ्गन्यायः २४ ।	वीचीजनितस्तरङ्गस्तज्जनितोऽपि तरङ्ग इति क्रमेण तरङ्गोत्पत्तिः । २४।	भाषापरिच्छेदः २४ ।
बीजाङ्कुरन्यायः २५ ।	आदौ बीजं ततोऽङ्कुरः किमादावङ्कुरस्ततो बीजमित्यनिर्णयेन बीजाङ्कुरप्रवाहोऽनादिः । २५ ।	कुसुमाञ्जलिटीकादयः २५ ।
शुक्लवेलान्यायः २६ ।	कस्यचित् शुक्लशब्देनैव वेलाविशेषनिर्णयः । २६ ।	मलमासतत्त्वादयः २६ ।
घृतपचभेदन्यायः २७ ।	उपर्युपरिस्थितघृतसंख्यकपचार्यां स्थाल्यां युगपद्वेदभ्रमविषयाणामपि वस्तुत एकभेदानन्तरभ्रमभेदः । २७ ।	प्रत्यक्षखण्डमथुरानाथटीका २७ ।
शङ्कग्राहितान्यायः २८ ।	दुर्वृत्तदृषभादेः प्रथमतः कौशलेनैकशृङ्गग्रहणं पश्चादपरशृङ्गग्रहणम् । २८ ।	अवच्छेदकत्वनिरुक्तेर्जागदीशी टीका २८ ।

न्यायनामानि	तल्लक्षणानि	तत्प्रमाणानि
सन्दंशप्रापितन्यायः २८।	सन्दंशः सँड़ाशी यस्य प्रसिद्धिः। यथा तेनोभयपार्श्वधारणेन वस्तुप्राप्तिस्तथा। तथा हि। अयोध्या मथुरा माया काशी काञ्ची अवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः॥ इत्यत्र काश्याः पुरत्रयपाठानन्तरं पुरत्रयपाठपूर्वकत्वेन पठितत्वेन तदितरषट्पुराणि काशीप्रापकाणि। २८।	काशीखण्डटीका २८।
सर्वापेक्षान्यायः ३०।	बहुषु निमन्त्रितेषु एकस्मिन्नागतेऽपि भोज्यं न दीयते सर्वानपेक्षते तद्वत्। ३०।	भाष्यरत्नप्रभा ३०।
खचीकटाहन्यायः ३१।	खल्वश्मसाध्यखचीनिर्माणानन्तरं बहूश्मसाध्यकटाहनिर्माणम्। ३१।	कलापव्याकरणानन्दलहरीटीकान्यायः ३१।
खविरलगुड़न्यायः। ३२।	द्रवद्रव्यस्यधिः सहसा लक्ष्यस्थाने क्वचित् पतति क्वचिन्न पतति तद्वत्। ३२।	कलापटीका। ३२।

(यदि च न्यायवैशेषिकसाङ्ख्यपातञ्जलप्रभृत्यास्तिकदर्शनानां साक्षात्पारम्पर्येणैकमात्रानन्तविश्वब्रह्माण्डस्रोदयस्थितिलयकारणं एकोऽद्वितीयः सर्वपुरुषार्थस्वरूपः सनातनपुरुषः सर्वशक्तिमान् परमेश्वरः परमात्मैव प्रतिपाद्यः तत्रापि चार्वाकादिविप्रतिपन्नमतनिराकरणेन जगत्कारणत्वेश्वरस्य संस्थापनात् न्यायदर्शनस्यैव सर्वप्राधान्यसिद्धिः। आत्मतत्त्वज्ञानोत्पादनाय साक्षादुपयोगितया समस्तश्रुतिमीमांसितत्वेन च पुराणादिशास्त्रेषु वेदान्तस्य भूयसीप्रशंसादर्शनाच्च तस्यैव दर्शनस्य मुख्यत्वमायाति चेत् न अतीवसूक्ष्मतमब्रह्मतत्त्वनिरूपकजगत्पूज्यवेदान्तशास्त्रे कदापि कस्यापि विषयभोगकलुषितबुद्धिपरिमार्जकन्यायदर्शनबोधादते प्रवेशानधिकारात्। अतो नितरामेव सर्वेभ्योऽस्यैव गौरवमभ्युपगच्छन्ति तार्किकाः। वस्तुतस्तु सर्वेष्वास्तिकदर्शनेषु न्यायदर्शनमेव सर्वोच्चसिंहासनमारोढुमर्हतीति सर्वेषां प्रेक्षावतां परामर्शः। विशेषतः चार्वाकादिदुष्टमतखण्डनपूर्वकं मोक्षस्वरूपस्थापनायेश्वरसत्तासंस्थापनाय चैकमात्रन्यायदर्शनमेवास्तं नत्वन्यत्। एतच्च सत्यं नवेति प्रतिपादनाय श्रीमन्माधवाचार्यसङ्कलितं सर्वदर्शनसारसंग्रहग्रन्थान्तर्गतान्यादर्शनग्रन्थादेव समुद्धृत्य दर्शयिष्यामः। तत्र प्रथमतः ईश्वरसंस्थापनं यथा,—

"नन्वीश्वरसद्भावे किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावच्च प्रत्यक्षं क्रमते रूपादिरहितत्वेनातीन्द्रियत्वात् नाप्यनुमानं तद्ग्राहिलिङ्गाभावात् नागमः विकल्पासहत्वात् किं नित्योऽवगमयत्यनित्यो वा। आद्ये अप्रसिद्धान्तापातः द्वितीये परस्पराश्रयापातः। उपमानादिकमप्यक्ष्यग्रहं नियतविषयत्वात्। तस्मादीश्वरः शशविषाणायते इति चेत्तदेतन्न चतुरचेतसां चेतसि चमत्कारमाविष्करोति। विवादास्पदं नगसागरादिकं सकर्तृकं कार्यत्वात् कुम्भवत्। न चायमसिद्धो हेतुः सावयवत्वेन तस्य सुसाधनत्वात्। ननु किमिदं सावयवत्वं अवयवसंयोगित्वं अवयवसमवायित्वं वा नाद्यः गगनादौ व्यभिचारात् न द्वितीयः तन्तुत्वादावनैकान्त्यात्। तस्मादनुपपन्नमिति चेन्मैवं वादीः समवेतद्रव्यत्वं सावयवत्वमिति निरुक्तेर्वक्तुं शक्यत्वात्। अवान्तरमहत्त्वेन वा कार्यत्वानुमानस्य सुकरत्वात्। नापि विरुद्धो हेतुः साध्यविपर्ययव्याप्तेरभावात् नाप्यनैकान्तिकः पक्षादन्यत्र वृत्तेरदर्शनात् नापि कालात्ययापदिष्टः बाधकानुपलम्भात् नापि सत्प्रतिपक्षः प्रतिभटादर्शनात्। ननु नगादिकमकर्तृकं शरीराजन्यत्वात् गगनवदिति चेन्नैतत् परीक्षाक्षममीक्ष्यते नहि कठोरकठीरवस्य कुरङ्गप्रायः प्रतिभटो भवति व्रजन्यत्वस्यैव समर्थतया शरीरविशेषगत्वेयर्थ्यात्। तर्हि जन्यत्वमेव साधनमिति चेन्नासिद्धेः नापि सोपाधिकत्वशङ्काकलङ्काङ्कुरः सम्भवो अनुकूलतर्कसम्भवात् यद्ययमकर्तृकः स्यात् कार्यमपि न स्यादिह जगति नास्त्येव तत्कार्यं नाम यत्कारकचक्रमवधीर्य्यात्मानमासादयेदित्यादि तदविवादम्। तत्र सर्वं कर्तृविशेषोपहितमर्थ्यादं कर्तृत्वं चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानचिकीर्षाप्रयत्नाधारत्वम्। एवञ्च कर्तृत्वाद्यसिद्धेस्तदुपहितसमस्तकारकव्यापारकारकत्वकार्य्योत्पादप्रसङ्ग इति स्थूलः प्रमादः। तथा निरटङ्कि शङ्करकिङ्करेण।

"अनुकूलेन तर्केण सनाथे सति साधने।
साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भव"इति।
यदीश्वरः कर्त्ता स्यात्तर्हि शरीरी स्यादित्यादिप्रतिकूलतर्कज्ञानं जागर्त्तीति चेदीश्वरसिद्ध्यसिद्धिभ्यां व्याघातात्। तदुदितमुदयनेन।

"आगमादेः प्रमाणत्वे बाधनादनिषेधनम्।
अभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धतेति॥"

न च विशेषविरोधः शक्यशङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतः स्यात्। तदेतत् परमेश्वरस्य जगन्निर्म्माणे प्रवृत्तिः किमर्था स्वार्था परार्था वा आद्येऽपीष्टप्राप्त्यर्था अनिष्टपरिहारार्था वा नाद्यः अवाप्तसकलकामस्य तदनुपपत्तेः अतएव न द्वितीयः। द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु परार्थं प्रवर्त्तमानं प्रेक्षावानित्याचक्षीत। अथ करुणया प्रवृत्तेरुपपत्तिरित्याचक्षीत कस्यचित् प्रत्याचक्षीत तर्हि सर्वान् प्राणिनः सुखिन एव सृजेदीश्वरः न दुःखप्रवलान् करुणाविरोधात् स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा हि कारुण्यं तस्मादीश्वरस्य जगत्सर्जनं न युज्यते। तदुक्तं भट्टाचार्यैः—

"प्रयोजनमनुद्दिश्य न मन्दो हि प्रवर्त्तते।
जगद्वाञ्छतस्तस्य किं नाम न कृतं भवेदिति।"

नास्तिकशिरोमणे! तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभावयतु भवान् करुणयाप्रवृत्तिरस्येव न च निसर्गतः सुखमयसर्गप्रसङ्गः दृष्टप्राक्तनसुकृतदुष्कृतपरिपाकविशेषाद्वैषम्योपपत्तेः न च स्वातन्त्र्यभङ्गः शक्यनीयः स्वार्द्धं स्वयवधायकं न भवतीति न्यायेन प्रत्युत तन्निर्व्याहात् एक एव रुद्रो न द्वितीयाय तस्थे इत्यादिरागमश्च प्रमाणम्। यद्येवं तर्हि परस्पराश्रयव्याघ्यादि समाधत्स्वेति चेत् तस्यानुत्थानात् किन्तूत्पत्तौ परस्पराश्रयः शङ्क्यते ज्ञप्तौ वा। नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वेऽपि परमेश्वरस्य नित्यत्वेनोत्पत्तेरनुपपत्तेः नापि ज्ञप्तौ परमेश्वरस्य आगमाधीनज्ञप्तिकत्वेऽपि तस्यान्यतोऽनवगमात् नापि तदनित्यत्वज्ञप्तौ आगमानित्यत्वस्य तीव्राद्यधर्म्मोपेतत्वादिना सुगमत्वात्।"

द्वितीये मोक्षस्वरूपसंस्थापनं यथा,—

"ननु दुःखात्यन्तोच्छेदोऽपवर्ग इत्येतदप्यापकपोलगुड़ायितं वर्त्तते तत्कथं सिद्धवत्कृत्य व्यवहियत इति चेन्मैवं सर्वेषां मोक्षवादिनामपवर्गदशायामात्यन्तिकी दुःखनिवृत्तिरस्तीत्यस्यार्थस्य सर्वतन्त्रसिद्धान्तसिद्धतया घण्टापथत्वात् नह्यप्रवृत्तस्य दुःखं प्रत्यापद्यते इति कश्चित् प्रपद्यते तथा हि आत्यन्तिको मोक्ष इति माध्यमिकमते दुःखोच्छेदोऽस्तीत्यावकवदविवा-

दम्। अथ मन्येथाः शरीरादिव्यतिरिक्तोऽपि दुःखहेतुत्वादुच्छेद्य इति तन्न सङ्गच्छते विकल्पानुपपत्तेः किमात्मा ज्ञानसन्तानो विवक्षितः तद्व्यतिरिक्तो वा प्रथमे न विप्रतिपत्तिः कः खल्वनुकूलमाचरति प्रतिकूलमाचरेत् इतीये तस्य नित्यत्वे निवृत्तिरप्यक्षयविधानेन प्रवृत्त्यनुपपत्तिश्चाधिकं दूषणं न खलु कश्चित् प्रेक्षावानात्मनस्तु कामाय सर्वं प्रियं भवतीति सर्वतः प्रियतमस्यात्मनः समुच्छेदाय प्रयतते सर्वो हि प्राणी मुक्त इति व्यवहरति। ननु धर्मिनिवृत्तौ निर्मलज्ञानोदयो महोदय इति विज्ञानवादिवादे सामग्र्यभावः सामानाधिकरण्यानुपपत्तिश्च भावनाचतुष्टयं हि तस्य कारणमभीष्टं तच्च क्षणभङ्गपक्षे स्थिरैकाधाराभावात् लक्षणाभ्यासादिवदनासादितप्रकर्षं न स्फटमभिज्ञानमभिजनयितुं प्रभवति सोपप्लवस्य ज्ञानसन्तानस्य बद्धत्वे निरुपप्लवस्य च मुक्तत्वे यो बद्धः स एव मुक्त इति सामानाधिकरण्यं न सङ्गच्छते। आवरणमुक्तिर्मुक्तिरिति जैनजनाभिमतोऽपि मार्गो न निर्गतो निरर्गलः अङ्ग भवान् दृष्टो वाचटः किमावरणं धर्माधर्मौ मन्यन्त इति चेत् इदमेव। अथ देहमेवावरणं तथाच तन्निवृत्तौ पञ्जराभ्युक्तस्य शुकस्येवात्मनः सततोर्ध्वगमनं मुक्तिरिति चेत्तदा वक्तव्यं किमयमात्मा मूर्तोऽमूर्तो वा। प्रथमे निरवयवः सावयवो वा निरवयवत्वे निरवयवो मूर्तः परमाणुरिति परमाणुलक्षणापत्त्या परमाणुधर्मत्वादात्मधर्माणामतीन्द्रियत्वं प्रसजेत्। सावयवत्वे यत् सावयवं तदनित्यमिति प्रतिबन्धबलेनानित्यत्वापत्तौ कृतप्रणाशाकृताभ्यागमौ निष्प्रतिबन्धौ प्रसरेताम्। अमूर्तत्वे गमनमनुपपन्नमेव चलनात्मिकायाः क्रियायाः मूर्तप्रतिबन्धात् पारतन्त्र्यं बन्धः स्वातन्त्र्यं मोक्ष इति चार्वाकपक्षेऽपि स्वातन्त्र्यं दुःखनिवृत्तिश्चेद्विवादः ऐश्वर्यं चेत् सातिशयतया सदृक्षतया च प्रेक्षावतां नाभिमतम्। प्रकृतिपुरुषान्यत्वख्यातौ प्रकृत्युपरमे पुरुषस्य स्वरूपेणावस्थानं मुक्तिरिति साङ्ख्याख्यातेऽपि पक्षे दुःखोच्छेदोऽभ्युपेयते विवेकज्ञानं पुरुषाश्रयं वेति एतावद्वक्तव्यं तच्च पुरुषाश्रयमिति न शिष्यते पुरुषस्य कौटस्थ्यात् स्थाननिरोधापातात्तापि प्रकृत्याश्रयः अचेतनत्वात् तस्याः। किञ्च प्रकृतिः प्रवृत्तिस्वभावा निवृत्तिस्वभावा वाद्ये अनिर्मोक्षः स्वभावत्यागापायात् द्वितीये सम्पूर्ति संसारोऽस्तमियात्। नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति भट्टसर्वज्ञाद्यभिमतेऽपि दुःखनिवृत्तिरभिमतैव परन्तु नित्यसुखं न प्रमाणपदवीमध्यास्ते। श्रुतिश्च प्रमाणमिति चेन्न योग्यानुपलब्धिबाधिते तदनवकाशात् अवकाशे वा यावन्नावेपि तथा भावप्रसङ्गात्। ननु सुखाभिव्यक्तिर्मुक्तिरिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारः क्षीरं विहायारोचकग्रस्तस्य सौवीररुचिमनुभवतीति चेत्तदेतन्नाटकपक्षपतितं त्वदुक्तं इत्युपेक्ष्यते। सुखस्य सातिशयतया प्रत्यक्षतया बहुप्रत्यनीकाक्रान्ततया साधनप्रार्थनापरिक्लिष्टतया च दुःखाविनाभूतत्वेन विधानुषक्तमधुवत् दुःखपक्षनिक्षेपात्। नन्वेकमनुसन्धित्सतोऽपरं प्रधावते इति न्यायेन दुःखवत् सुखमित्युच्छिद्यत इति अकाम्योऽयं पक्ष इति चेन्मैवं मंस्थाः सुखसम्पादने दुःखसाधनबाहुल्यानुषङ्गिनियमेन तप्तायःपिण्डे तपनीयबुद्ध्या प्रवर्तमानेन सान्यापातात् तथा हि न्यायोपार्ज्जितेषु विषयेषु कियन्तः सुखखद्योताः कियन्ति दुःखदुर्दिनानि अन्यायोपार्ज्जितेषु तु यद्भविष्यति तन्मनसापि चिन्तयितुं न शक्यमित्येतत् स्वानुभवमप्रच्छादयन्तः सन्तो विदाङ्कुर्वन्तु विदांवरा भवन्तः। तस्मात् परिशेषात् परमेश्वरानुग्रहवशाच्छ्रवणादिक्रमेणात्मतत्त्वसाक्षात्कारवतः पुरुषधौरेयस्य दुःखनिवृत्तिरात्यन्तिकी निश्रेयसमिति निरवद्यमिति ॥ * ॥

न्यायदर्शनन्तु पूर्वोत्तरविभागभेदेन द्विविधम्। पूर्वभागो भगवता महर्षिगोतमेन प्रणीतः उत्तरभागस्तु भगवता महर्षिकणभुजैव प्रणीतः पूर्वभागे भगवान् गोतमः जीवनिश्रेयसाधिगमाय षोड़शपदार्थान् निरूपितवान् तेषां षोड़शपदार्थानां तत्त्वज्ञानादेव निःश्रेयसाधिगम इत्युपदिदेशेति। परभागे तु भगवान् कणादः द्रव्यादिषण्णां पदार्थानां तत्त्वज्ञानादेव निःश्रेयसं स्यादित्युपदिष्टवान्। तदृयथा,—"धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसमिति।" परं एवैव षट्पदार्थेषु भगवता गोतमेनोपदिष्टाः षोड़शपदार्थाः सर्वे एवार्थेनिवेशिता भगवता कणभुजा। इह पुनर्विशेषपदार्थस्वीकरणात् लोके वैशेषिकमित्याख्यान्तरेणैव प्रसिद्धमेतद्दर्शनमिति बोधम्॥

अतिरिक्तन्यायनामानि यथा,—

१ अम्रातपनन्यायः। २ अजाकृपाणीयन्यायः। ३ अजातपुत्रनामकरणन्यायः। ४ अण्डकुक्कुटीन्यायः। ५ अत्यन्तं बलवन्तोऽपि पौरजानपदा जना इतिन्यायः। ६ अदग्धदहनन्यायः। ७ अधारोपापवादन्यायः। ८ अनधीते महाभाष्ये इतिन्यायः। ९ अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेतिन्यायः। १० अन्ते या मतिः सा गतिरितिन्यायः। ११ अन्तेरण्डाविवाहश्चेदादावेव कुतो न स इतिन्यायः। १२ अन्धगजन्यायः। १३ अन्धचटकन्यायः। १४ अन्धदर्पणन्यायः। १५ अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे इतिन्यायः। १६ अन्धभुक्तन्यायः। १७ अपराह्णच्छायान्यायः। १८ अपसारिताग्निभूतलन्यायः। १९ अपस्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति इतिन्यायः। २० अब्भक्षकन्यायः। २१ अभाखलाभन्यायः। २२ अरण्यरोदनन्यायः। २३ अर्कं चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदितिन्यायः। २४ अर्हन्नरतीन्यायः। २५ अर्हन्नयति पण्डितन्यायः। २६ अर्हन्वेषसन्यायः। २७ अवश्यापेक्षितानपेक्षितयोरितिन्यायः। २८ अश्मलोष्टन्यायः। २९ अश्वतरीगर्भन्यायः। ३० अश्वभक्तन्यायः। ३१ अश्वेक्षादीपन्यायः। ३२ अहिकुण्डलन्यायः। ३३ अहिचित्रपुत्र इतिन्यायः। ३४ अहिनकुलन्यायः। ३५ अहिसकौवर्णन्यायः। ३६ आकाशापरिच्छन्नत्वन्यायः। ३७ आदावन्ते वेतिन्यायः। ३८ आभाण्डकन्यायः। ३९ आयुर्घृतमितिन्यायः ४० आषाढ़वातन्यायः। ४१ इक्षुरसन्यायः। ४२ इक्षुविकारन्यायः। ४३ इक्ष्यमाणयोः समभिव्याहारे इयमाणस्यैव प्राधान्यमितिन्यायः। ४४ इषुवेगक्षयन्यायः। ४५ उत्पाटितदन्तनागन्यायः। ४६ उदकनिमज्जनन्यायः। ४७ उपजनिष्यमाणनिमित्तोऽप्यपवादो जातनिमित्तमप्युत्सर्गं बाधते इतिन्यायः। ४८ उपजीव्योपजीवकन्यायः। ४९ उपपन्नधर्म्मा विकरोति हि धर्म्मेणमितिन्यायः। ५० उपवासादरं भिक्षेतिन्यायः। ५१ उभयतः पाशरज्जुन्यायः। ५२ उषरवृष्टिन्यायः। ५३ उष्ट्रलगुड़न्यायः। ५४ ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोग इतिन्यायः। ५५ एकत्र निर्णीतः ग्राम्यार्थः अन्यत्रापि तथेतिन्यायः। ५६ एकदेशविकृतमनन्यवदितिन्यायः। ५७ एकसन्धित्सतोऽपरं प्रधावते इतिन्यायः। ५८ एकाकिनी प्रतिज्ञेतिन्यायः। ५९ एकामसिद्धिं परिहरतो द्वितीया आपद्यते इतिन्यायः। ६० कण्टकन्यायः। ६१ कण्डचामीकरन्यायः। ६२ कदम्बकुसुमन्यायः। ६३ करस्थविल्वन्यायः। ६४ करिदंहितन्यायः। ६५ कांस्यभोजिन्यायः। ६६ काकतालीयन्यायः। ६७ काकदधिघातकन्यायः। ६८ काकदन्तपरीक्षान्यायः। ६९ काकाक्षिन्यायः। ७० कामचारगोचरत्वेन शब्दबोध एव शब्दसाधनतान्वय इतिन्यायः। ७१ कारणगुणक्रमन्यायः। ७२ कार्य्येण कारणसंप्रत्ययः इतिन्यायः। ७३ कालनाशे कार्य्यनाशन्यायः। ७४ किमज्ञानस्य दुष्करमितिन्यायः। ७५ कौटभङ्गन्यायः। ७६ कुक्कुटध्वनिन्यायः। ७७ कुम्भीधान्यन्यायः। ७८ कुग्रकाष्ठावलम्बनन्यायः। ७९ कूपखानकन्यायः। ८० कूपन्यायः। ८१ कूपमण्डूकन्यायः। ८२ कृताकृतप्रसङ्गी यो विधिः स नित्य इतिन्यायः। ८३ कृते कार्य्ये किं सुदूर्नप्रश्नेन इतिन्यायः। ८४ कृदभिहितो भावो द्रव्यवत् प्रकाशते इतिन्यायः। ८५ कोषथालन्यायः। ८६ कौण्डिन्यन्यायः। ८७ कौन्तेयराद्धेयन्यायः। ८८ क्रिया हि विकल्प्यते न वस्त्विति न्यायः। ८९ खलमेचीन्यायः। ९० खादकघातकन्यायः। ९१ गजघटान्यायः। ९२ गजभुक्तकपित्थन्यायः। ९३ गड्डलिकाप्रवाहन्यायः। ९४ गणपतिन्यायः। ९५ गर्दभारामगणनान्यायः। ९६ गले पादुकान्यायः।

९७ गुडोपसंहारन्यायः। ९८ गोक्षीरं खादन्ते-र्घृनमितिन्यायः। ९९ गोबलीवर्दन्यायः। १०० गोमयपायसन्यायः। १०१ गोमहिषादिन्यायः। १०२ घटकुटीप्रपातन्यायः। १०३ घटप्रदीपन्यायः। १०४ घुणाक्षरन्यायः। १०५ चक्रभ्रमन्यायः। १०६ चतुर्वेदविन्न्यायः। १०७ चम्पकपटवासन्यायः। १०८ चर्म्मतन्त्रौ महिषौ हन्तीतिन्यायः। १०९ चिताम्बतन्यायः। ११० चित्रपटन्यायः। १११ चित्राङ्गनान्यायः। ११२ चित्रानलन्यायः। ११३ चिन्तामणिं परित्यज्य काचमणियहणन्यायः। ११४ चौरापराधात् माण्डव्यनिग्रहन्यायः। ११५ जलतुम्बिकान्यायः। ११६ जलमन्थनन्यायः। ११७ जलानयनन्यायः। ११८ जलौकान्यायः। ११९ जामात्रर्थं क्लिप्तस्य रूपादेरतिथ्युपकारकत्वमिति न्यायः। १२० ज्ञानधर्म्मिण्यभ्रान्तप्रकारे तु विपर्य्यय इति न्यायः। १२१ ज्ञानादेर्निष्कर्षवदुत्कर्षोऽप्यङ्गीकार्य्य इतिन्यायः। १२२ ज्योतिर्न्यायः। १२३ तण्डुलन्यायः। १२४ तत्ताद्दगवगम्यते इतिन्यायः। १२५ तदभिन्नत्वमितिन्यायः। १२६ तदागमेऽपि दृश्यते इतिन्यायः। १२७ तप्तमाषकोद्धरणन्यायः। १२८ तमःप्रकाशन्यायः। १२९ तरतमभावापन्नमितिन्यायः। १३० तामसं परिवर्ज्जयेदितिन्यायः। १३१ तालसर्षपन्यायः। १३२ तिर्य्यगधिकरणन्यायः। १३३ तुलोन्नमनन्यायः। १३४ तुष्यतु दुर्ज्जन इतिन्यायः। १३५ त्यजेदेकं कुलस्यार्थे इतिन्यायः। १३६ त्यज्या दुस्तटिनीतिन्यायः। १३७ दग्धरसनान्यायः। १३८ दग्धेन्धनवह्निन्यायः। १३९ दष्टसर्पमारणन्यायः। १४० दधिपयसि प्रत्यूषो ज्वर इतिन्यायः। १४१ दन्तपरीक्षान्यायः। १४२ दानखालकटन्यायः। १४३ दाहकदाह्यन्यायः। १४४ दुर्ब्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैरितिन्यायः। १४५ देवताधिकरणन्यायः। १४६ देवदत्तहन्तृहतन्यायः। १४७ देवदत्तापुत्रन्यायः। १४८ देहलीदीपन्यायः। १४९ देहाधीसुखत्वन्यायः। १५० घटारोहणन्यायः। १५१ धर्म्मैकत्वनान्यायः। १५२ धर्म्माधर्म्मन्यायः। १५३ धर्म्मिकल्पनान्यायः। १५४ धान्यपलन्यायः। १५५ नक्षत्रदर्शनरथन्यायः। १५६ न हि करकङ्कणदर्शनाय आदर्शापेक्षेतिन्यायः। १५७ न हि दुष्टे अनुपपन्नं नामेतिन्यायः। १५८ न हि निन्दा निन्दितुं प्रवर्त्तते अपि तु विधेयं स्तोतुमितिन्यायः। १५९ न हि प्रत्यभिज्ञामात्रेण अर्थसिद्धिरितिन्यायः। १६० न हि भिक्षुको भिक्षुकमितिन्यायः। १६१ न हि विवाहानन्तरं वरपरीक्षा क्रियते इतिन्यायः। १६२ न हि शब्दमशब्दे नान्वेतीतिन्यायः। १६३ न हि सतीरुक्षाण्यधिधारा स्वयमेव क्षेतुमाहितव्यापारा भवतीतिन्यायः। १६४ नागोद्वपतिन्यायः। १६५ नाज्ञातविशेषणा विशिष्टबुद्धिः विशेष्यं संक्रामतीतिन्यायः। १६६ नारिकेलफलाम्बुन्यायः। १६७ निम्नगाप्रवाहन्यायः। १६८ नीरक्षीरन्यायः। १६९ नीलेन्दीवरन्यायः। १७० नृपनापितपुत्रन्यायः। १७१ नौनाविकन्यायः। १७२ पञ्जरचालनन्यायः। १७३ पटन्यायः। १७४ पटे पक्षिन्यायः। १७५ पतन्मनुधावतो बद्धोऽपि गत इतिन्यायः। १७६ पदमप्यधिकाभावात् स्मारकात् न निष्पिष्यत इतिन्यायः। १७७ परशुग्रहणन्यायः। १७८ परिघन्यायः। १७९ पर्व्वताधित्यकान्यायः। १८० पर्व्वतोपत्यकान्यायः। १८१ पाषाणेष्टिकान्यायः। १८२ पिङ्गरसुक्तपक्षिन्यायः। १८३ पिण्डं हित्वा करं लेढीतिन्यायः। १८४ पिष्टपेषणन्यायः। १८५ पुत्रलिप्सया दैवं भजन्त्या भर्त्तारोऽपि नष्ट इतिन्यायः। १८६ पुरस्तादपवादा अनन्तरान् विधीन् बाधते नेतरानितिन्यायः। १८७ पुष्टलगुडन्यायः। १८८ पूर्व्वमपवादा निविशन्ते पश्चादुत्सर्गा इतिन्यायः। १८९ पूर्व्वात् परबलीयस्त्वन्यायः। १९० प्रकल्प्यापवादविषयं पश्चादुत्सर्गोऽभिनिविशते इतिन्यायः। १९१ प्रकाशाश्रयन्यायः। १९२ प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमितिन्यायः। १९३ प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनमितिन्यायः। १९४ प्रदीपन्यायः। १९५ प्रधानमल्लनिबर्हणन्यायः। १९६ प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपीतिन्यायः। १९७ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते इतिन्यायः। १९८ प्रसङ्गपतितन्यायः। १९९ प्रासादवासिन्यायः। २०० फलवतसहकारन्यायः। २०१ बध्यघातकन्यायः। २०२ बहुच्छिद्रघटप्रदीपन्यायः। २०३ बहुदुकाक्षतन्यायः। २०४ बहुराजकपुरन्यायः। २०५ बहूनामप्यसाधो न्याय्य इतिन्यायः। २०६ ब्राह्मणपरिव्राजकन्यायः। २०७ ब्राह्मणवसिष्ठन्यायः। २०८ ब्राह्मणश्रमणन्यायः। २०९ भक्षितेऽपि लशुने न ग्लानो व्याधिरितिन्यायः। २१० भक्षुन्यायः। २११ भामतीन्यायः। २१२ भावप्रधानमाख्यातमितिन्यायः। २१३ भादित्यन्यायः। २१४ भिक्षुपादप्रसारणन्यायः। २१५ भूलिङ्गपक्षिन्यायः। २१६ भूम्नेत्योक्षन्यायः। २१७ भैरवन्यायः। २१८ भ्रमरन्यायः। २१९ मक्षिकान्यायः। २२० मज्जनोन्मज्जनन्यायः। २२१ मद्गूकप्लुतिन्यायः। २२२ मतुस्यकण्टकन्यायः। २२३ मरणाङ्करो व्याधिरितिन्यायः। २२४ मल्लन्यायः। २२५ महिषीप्रसवोन्मुखीतिन्यायः। २२६ मातृस्यन्यायः। २२७ मुक्ताद्यिधिकान्यायः। २२८ मूकभयेन कथात्यागन्यायः। २२९ मूर्खसेवनन्यायः। २३० मृषासिक्तताम्रन्यायः। २३१ म्लेच्छभयेन ग्रस्यानाश्रयणन्यायः। २३२ म्लेच्छगवुरान्यायः। २३३ म्लेतमारणन्यायः। २३४ यः कारयति स करोत्येवेतिन्यायः। २३५ यः कुरुते स भुङ्क्ते इतिन्यायः। २३६ यत् कृतकं तदनित्यमितिन्यायः। २३७ यतुपरः शब्दः स शब्दार्थं इतिन्यायः। २३८ यत्प्रायः श्रूयते यादृक् तत्तादृगवगम्यते इतिन्यायः। २३९ यत्रोभयोः समो दोष इतिन्यायः। २४० यथासंख्यन्यायः। २४१ यदर्थो प्रवृत्तिः तदर्थः। प्रतिषेध इतिन्यायः। २४२ यदिवाहगीतगानमितिन्यायः। २४३ यादृग्यं सुखं तादृग्यं चपेटमितिन्यायः। २४४ यादृशो यज्ञस्तादृशो बलिरितिन्यायः। २४५ यस्यात्मानं भ्रमस्तस्य भ्रान्तः सन्यक् च वेद स इतिन्यायः। २४६ यावच्छिरस्तावच्छिरोव्यथेतिन्यायः। २४७ येन उत्क्रम्यते येन च उपसंहियते स वाक्यार्थ इतिन्यायः। २४८ येन चाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति इतिन्यायः। २४९ योजनप्राप्यायां कावेर्य्यां मल्लबन्धनन्यायः। २५० रक्तपटन्यायः। २५१ रज्जुसर्पन्यायः। २५२ रथवर्त्मन्यायः। २५३ रश्मिलगादिन्यायः। २५४ राजपुत्रव्याधन्यायः। २५५ राजसं तामसञ्चेतिन्यायः। २५६ रासभरटितन्यायः। २५७ रूढ्यर्थोगमपहरतीतिन्यायः। २५८ रेखागवयन्यायः। २५९ रोगिन्यायः। २६० लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरितिन्यायः। २६१ लाङ्गलजीवनमितिन्यायः। २६२ लोहपुम्बकन्यायः। २६३ लौहायिन्यायः। २६४ वकबन्धनन्यायः। २६५ वरगोष्ठीन्यायः। २६६ वरघाताय कन्यावरणमितिन्यायः। २६७ वस्तूनि मानान्यपेक्ष्य प्रयोजनानीतिन्यायः। २६८ वह्निधूमन्यायः। २६९ वह्निन्यायः। २७० वाजिमन्दुरान्यायः। २७१ वातादिन्यायः। २७२ वायुभक्षकन्यायः। २७३ वायुग्रैवेयोष्ण्यन्यायः। २७४ विधिनिषेधौ सति विशेषणाधे विशेषणसुपसंक्रामेत इतिन्यायः। २७५ विधेयं हि स्तूयते वस्त्विति न्यायः। २७६ विपरीतं बलाबलमितिन्यायः। २७७ विस्वस्खलाटन्यायः। २७८ विवाह प्रकृत्तभक्षन्यायः। २७९ विशिष्टवृत्तेरितिन्यायः। २८० विशिष्टस्य वैशिष्ट्यामितिन्यायः। २८१ विषं हन्तुरितिन्यायः। २८२ विषभक्षन्यायः। २८३ विषवृक्षोऽपि संवर्द्ध स्वयं छेत्तुमसाम्प्रतमितिन्यायः। २८४ वृक्षप्रकम्पन्यायः। २८५ वृद्धकुमारीवाक्यन्यायः। २८६ वृद्धिमिच्छतो मूलं विनष्टमितिन्यायः। २८७ वृश्चिकीगर्भन्यायः। २८८ वैग्रैव्यात्तु तथाद इतिन्यायः। २८९ व्यञ्जकुव्यङ्ग्यन्यायः। २९० व्याघीचीरन्यायः। २९१ व्रणग्रोधनाय ग्रस्यग्रहणमितिन्यायः। २९२ व्रीहिवीजन्यायः। २९३ शक्तिः सहकारिणीतिन्यायः। २९४ शृङ्गोद्वर्त्तनन्यायः। २९५ शाखाचन्द्रन्यायः। २९६ शालिसन्दहो कोद्रवनाशनन्यायः। २९७ शाल्मली स्थाकाङ्क्षा शब्देनैव पूरणीयेतिन्यायः। २९८ शिरोवेष्टनेन नासिकास्पर्शं इतिन्यायः। २९९ शैलुषीन्यायः। ३०० शालशुनकन्यायः। ३०१ श्वः कर्त्तव्यमद्य कुर्व्वितिन्यायः। ३०२ श्वपुच्छोन्नामनन्यायः। ३०३ सच्छिद्रघटाम्बुन्यायः। ३०४ सति बोधे न जानातीतिन्यायः। ३०५ सन्दिग्धस्य सन्दिग्धं स

प्रयोजनं चेत् विचारमर्हतीतिन्यायः। ३०६ समुद्रदृष्टिन्यायः। ३०७ सम्भवत्येकवाक्यत्वे वाक्यभेदो न चेष्यते इतिन्यायः। ३०८ सर्व्वं वाक्यं साधारणमितिन्यायः। ३०९ सर्व्वं कार्य्यं सकारणकमितिन्यायः। ३१० सर्व्वविशेषणं साधारणमितिन्यायः। ३११ सर्व्वशास्त्राप्रत्ययमेकं कर्म्मेतिन्यायः। ३१२ साक्षात्प्रकृतमितिन्यायः। ३१३ साधुमैत्रीन्यायः। ३१४ सार्व्वजनीनतुल्यायव्ययन्यायः। ३१५ सावकाशनिरवकाशयोर्निरवकाशो बलीयानितिन्यायः।३१६ सिंहन्दग्न्यायः। ३१७ सिंहावलोकन्यायः। ३१८ सुतजनिन्दतिन्यायः। ११६ सुभगाभिक्षुकन्यायः। ३२० सुन्दोपसुन्दन्यायः। ३२१ सूचसाटिकान्यायः। ३२२ सोपानारोहणन्यायः। ३२३ स्तनन्धयन्यायः। ३२४ स्थालीपुलाकन्यायः। ३२५ स्थावरजङ्गमविषन्यायः। ३२६ स्थूणानिखनन्यायः। ३२७ शूलारुन्धतीन्यायः। ३२८ स्फटिकलौहित्यन्यायः। ३२९ स्वकरकुचन्यायः। ३३० स्वपक्षहानिकर्त्तृत्वात् सकुलाङ्गारतां गत इतिन्यायः। ३३१ स्वप्नान्नन्यायः। ३३२ स्वग्निगुमपि पुच्छन्तमिति न्यायः। ३३३ स्वामिभृत्यन्यायः। ३३४ हस्तामलकन्यायः। इति श्रीरामदयालुशिष्यरघुनाथेन विरचितो लौकिकन्यायसंग्रहः॥)

न्यायसारिणी, स्त्री, (न्यायं सरतीति। इ+णिनि+ङीप्।) युक्तिपूर्ब्बककर्म्मकारिणी तत्पर्य्यायः। लुक्ची २। इति त्रिकाण्डशेषः॥

न्यायी, [न्] त्रि, (न्यायोऽस्यास्तीति। न्याय+इनिः।) न्यायवान्। न्यायोऽस्यास्तीत्यर्थे इनुप्रत्ययनिष्पन्नः॥

न्याय्यं, त्रि, (न्यायादनपेतम्। न्याय+"धर्म्मपथ्यर्थन्यायादनपेते।" ४। ४। ९२। इति यत्।) न्यायादनपेतम्। (न्याये भवः। न्यायादागतो वा। "दिगादिभ्यो यत्।" ४। ३। ५४। इति यत्।) न्यायागतधनादिः। इति भरतः॥ तत्पर्य्यायः। युक्तम् २ औपयिकम् ३ लभ्यम् ४ भजमानम् ५ अभिनीतम् ६। इत्यमरः। २। ८। २५॥ क्रमोचितम् ७। इति शब्दरत्नावली॥ (यथा, मनुः। २। १५२।

"देवाञ्चैतान् समेत्योचुर्नार्य्यं वः शिशुरुक्तवान्॥")

न्यासः, पुं, (न्यस्यत इति। नि+अस+घञ्।) उपनिधिः। स्याच्यद्वयम्। इत्यमरः। २। ९। ८९॥ अस्य विवरणं निक्षेपशब्दे द्रष्टव्यम्॥*॥

विन्यासः। अर्पणम्। यदाह कालिदासः।

"पदन्यासैरासीत् कमलपरिपूर्णा वसुमती
दृगान्दोलैरिन्दीवरमयमभूदम्बरतलम्।
इदं याचे किञ्चिद्विरचय वचः क्षीरमधुरं
धरायामप्यास्तां विधुमुखि! सुधायाः परिचयः॥"

त्यागः। यथा, श्रीभगवद्गीतायां १८ अध्याये।

"काम्यानां कर्म्मणां न्यासं सन्न्यासं कवयो विदुः।
सर्व्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥"

काम्यिकाख्यपाणिनिसूत्रव्याख्यानग्रन्थविशेषः। यथा, माघे। २। ११२।

"अनुनृत्तपदन्यासा सदृत्तिः सन्निबन्धना।
ग्रन्थविन्येव नो भाति राजनीतिरपस्मृता॥"

सन्न्यासः। यथा,—

"वक्ष्ये विविदिषान्यासं विद्वन्न्यासस्य भेदतः।
हेतुं विदेहमुक्तेश्च जीवन्मुक्तेश्च तौ क्रमात्॥"

इति जीवन्मुक्तिप्रथमविवेकः॥*॥

पूजाजपादेः प्राक्विघ्ननाशमन्त्रसिद्ध्यार्थं देहान्तर्बहिर्व्वर्णादिविन्यासः। तत्र न्यासकालो यथा,

"प्रातःकालेऽथवा पूजासमये होमकर्म्मणि।
जपकालेऽपि वा तेषां विनियोगः पृथक् पृथक्।
पूजाकाले समस्तं वा कुर्य्यात् साधकसत्तमः॥"

इति योगिनीहृदयम्॥*॥

अथ मातृकान्यासः। अस्य मातृकामन्त्रस्य ब्रह्मऋषिर्गायत्री छन्दो मातृकासरस्वती देवता हलो बीजानि स्वराः शक्तयो लिपिन्यासे विनियोगः। शिरसि ॐ ब्रह्मणे ऋषये नमः। मुखे ॐ गायत्रीछन्दसे नमः। हृदि ॐ मातृकासरस्वत्यै देवतायै नमः। गुह्ये ॐ यज्ञनेभ्यो बीजेभ्यो नमः। पादयोः स्वरेभ्यः शक्तिभ्यो नमः। तथा च ज्ञानार्णवे।

मातृकां शृणु देवेशि! न्यसेत् यापनिक्षत्तनीम्।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते॥
देवता मातृकादेवी बीजं व्यञ्जनसञ्चयम्।
शक्तयस्तु स्वरा देवि! षड़ङ्गन्यासमाचरेत्॥

ततः षड़ङ्गन्यासौ।

अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः।
इं चं छं जं झं ञं ईं तर्ज्जनीभ्यां स्वाहा।
उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट्।
एं तं थं दं धं नं ऐं अनामिकाभ्यां हुम्।
ओं पं फं बं भं मं औं कनिष्ठाभ्यां वौषट्।
अं यं रं लं वं शं षं सं हं लं क्षं अः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। अं कं खं गं घं ङं आं हृदयाय नमः। इत्यादि।

तथा च ज्ञानार्णवे।

अं आं मध्ये कवर्गन्तु इं ईं मध्ये चवर्गकम्।
उं ऊं मध्ये टवर्गन्तु एं ऐं मध्ये तवर्गकम्॥
ओं औं मध्ये पवर्गन्तु बिन्दुयुक्तं न्यसेत् प्रिये।
अनुस्वारविसर्गान्तर्यग्वर्गौ सलक्षकौ॥
हृदयन्तु शिरो देवि! शिखा कवचकं तथा।
नेत्रमस्त्रं न्यसेत् ङेऽन्तं नमःस्वाहा क्रमेण तु॥
वषट् हुं वौषड़न्तश्च फड़न्तं योजयेत् प्रिये!।
षड़ङ्गोऽयं मातृकाया सर्व्वपापहरः स्मृतः॥

अथान्तर्मातृकान्यासः।

अकारादिषोड़शस्वरान् सबिन्दून् षोड़शदलकमले कण्ठमूले न्यसेत्। ककारादिहादशवर्णान् सबिन्दून् हादशदलकमले हृदये न्यसेत्। डकारादिदशवर्णान् सबिन्दून् दशदलकमले नाभौ न्यसेत्। वकारादिषड़ वर्णान् सबिन्दून् षड़्दलकमले लिङ्गमूले न्यसेत्। वकारादिचतुरो वर्णान् सबिन्दून् चतुर्दलकमले मूलाधारे न्यसेत्। हृत्पद्मवर्णद्वयं सबिन्दुं द्विदलकमले भ्रूमध्ये न्यसेत्। तथा च ज्ञानार्णवे।

"द्वात्रिंशत्पद्मसुजे कण्ठे स्वरान् षोड़शं विन्यसेत्।
हादशच्छदहृत्पद्मे कादीन् हादशं विन्यसेत्॥
दशपत्राम्बुजे नाभौ डकारादीन्यसेद्दश।
षट्पत्रमध्ये लिङ्गस्थे वकारादीन्यसेच्च षट्॥
आधारे चतुरो वर्णान् न्यसेदादीन् चतुर्दले।
द्वयौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये॥"

अगस्त्यसंहितायाम्।

"एकैकवर्णमेकैकपत्रान्ते विन्यसेत् प्रिये।
एवमन्तः प्रविन्यस्य मनसाती बहिर्न्यसेत्॥"

वैष्णवे तु।

"एकैकवर्णसुद्यार्य्य मूलाधाराच्छिरोऽन्तकम्।
नमोऽन्तमिति विन्यास आन्तरः परिकीर्त्तितः॥

अथान्तर्मातृकान्यासो मूलाधारे चतुर्दले।
सुवर्णाभे वह्निसंस्थे चतुर्व्वर्णविभूषिते॥
षड़्दले वैद्युतनिभे स्वाधिष्ठानेऽमलत्विषि।
बभमेर्यवलैर्युक्ते वर्णैः षड़्भिश्च सुव्रते।
मणिपूरे दशदले नीलजीमूतसन्निभे।
डादिफान्तदलैर्युक्ते विन्यसेदायितमस्तके॥
अनाहते हादशारे प्रवालरुचिसन्निभे।
कादिठान्तदलैर्युक्ते योगिनां हृदयङ्गमे॥
विशुद्धे षोड़शदले धूम्राभे स्वरभूषिते।
आज्ञाचक्रे तु चन्द्राभे द्विदले हक्षलाञ्छिते॥
सहस्रारे हिमनिभे सर्व्ववर्णविभूषिते।
अकथादिचिरेखात्मदलसञ्चयभूषिते॥
तन्मध्ये परविन्दुञ्च स्थिस्थितिलयात्मकम्।
एवं समाहितमना ध्यायेन्मासोऽयमान्तरः॥"*॥

अथ बाह्यमातृकान्यासः।

अस्या ध्यानं यथा,—

"पद्मासनस्थिपिभिर्विभक्तसुखदोःपद्मध्यवक्षःस्थलां
भास्वन्मौलिनिबद्धचन्द्रसकलामापीनतुङ्गस्तनीम्।
मुद्रामक्षगुणं सुधाढ्यकलसं विद्याञ्च हस्ताम्बुजैर्
बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये॥"

एवं ध्यात्वा न्यसेत्। तत्राङ्गुलिन्यासस्तत्रैव।

"ललाटे नासिकामध्ये विन्यसेन्मुखपङ्कजे।
तर्ज्जनी मध्यमागामा दृङ्नामे च नेत्रयोः॥
अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः।
मध्यास्तिस्रो गण्डयोश्च मध्यमाष्ठोष्ठयोर्न्यसेत्॥
अनामां दन्तयोर्न्यस्य मध्यमासुत्तमाङ्गके।
मुखेऽनामां मध्यमाश्च हस्तपादेषु पार्श्वयोः॥
कनिष्ठानामिकामध्यास्तासु एष्ठे च विन्यसेत्।
ताः साङ्गुष्ठा नाभिदेशे सर्व्वाः कुक्षौ च विन्यसेत्॥
हृदये च तलं सर्व्वमंसयोश्च ककुत्स्थले।
हृत्पूर्व्वं हस्तपतृकुक्षिसुखेषु तलमेव च॥
एतासु मातृकास्तद्वः क्रमेण परिकीर्त्तिताः।
अज्ञात्वा विन्यसेदयस्तु न्यासः स्यात्तस्य निष्फलः॥"

गौतमीये।

"ललाटमुखदृत्तास्यश्रुतिघ्राणेषु गण्डयोः।
ओष्ठदन्तोत्तमाङ्गास्यदोःपतृसन्ध्यग्रकेषु च॥

पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेऽग्रके ।
ककुद्यंसे च हृत्पूर्व्वं पाणिपादयुगे तथा ॥
जठरानननयोर्न्यस्येन्मालकार्णान् यथाक्रमात् ॥"
तद्यथा । अं नमो ललाटे । आं नमो मुखे । इं ईं चक्षुषोः । उं ऊं कर्णयोः । ऋं ॠं नसोः । ऌं ॡं गण्डयोः । एं ओष्ठे । ऐं अधरे । ओं औं दन्तोर्ध्वे । अं अधोदन्ते । अः ब्रह्मरन्ध्रे । कं दक्षबाहुमूले । खं कूर्परे । गं मणिबन्धे । घं अङ्गुलिमूले । ङं अङ्गुल्यग्रे । एवं चं५ वामबाहुमूलसन्ध्यग्रकेषु । एवं टं५ दक्षिणपादमूलसन्ध्यग्रकेषु । एवं तं५ वामपादमूलसन्ध्यग्रकेषु । पं दक्षिणपार्श्वे । फं वामपार्श्वे । बं पृष्ठे । भं नाभौ । मं उदरे । यं हृदि । रं दक्षबाहुमूले । लं ककुदि । वं वामबाहुमूले । शं हृदादिदक्षहस्ते । षं हृदादिवामहस्ते । सं हृदादिदक्षपादे । हं हृदादिवामपादे । लं हृदादुदरे । क्षं हृदादिमुखे । सर्व्वत्र नमोऽन्तेन न्यसेत् । तथा च ।
"ओमाद्यन्तो नमोऽन्तो वा सविन्दुर्विन्दुवर्ज्जितः ।
पञ्चाग्रहृर्य्यविन्यासः क्रमादुक्तो मनीषिभिः ॥"
इति भट्टः ॥

अथ संहारमालकान्यासः ।

तस्या ध्यानं यथा,—
"अक्षस्रजं हरिणपोतसृणिं कपालं
विद्याः करैरविरतं दधतीं त्रिनेत्राम् ।
अर्द्धेन्दुमौलिमरुणामरविन्दरागां
वर्णेश्वरीं प्रणमतस्तनभारनम्राम् ॥"
न्यासस्तु चकारात्यकारान्तः । यथा । चं नमो हृदादिमुखे इत्यादि ॥ * ॥
अपरञ्च ।
"चतुर्धा मालका प्रोक्ता केवला विन्दुसंयुता ।
सविसर्गा सोभया च रहस्यं शृणु कथ्यते ॥
विद्याकरी केवला च सोभया मुक्तिदायिनी ।
पुत्रदा सविसर्गा तु सविन्दुर्वित्तदायिनी ॥"
विश्वेश्वरे ।
"वाग्भवाद्या च वाक्सिद्धेः रमाद्या श्रीप्रदद्वये ।
क्लेखाद्या सर्व्वसिद्धेः कामाद्या लोकवश्यदा ॥
श्रीकण्ठाद्यानिमान् न्यस्येत् सर्व्वमन्त्रः प्रसीदति ॥"
श्रीविद्याविषये नवरत्नेश्वरे ।
"वाग्भवाद्या नमोऽन्ताश्च न्यस्तया मालकाक्षराः ।
श्रीविद्याविषये मन्त्री वाग्भवाद्यष्टसिद्धये ॥"
यामले ।
"भूतशुद्धिलिपिन्यासौ विना वस्तु प्रपूजयेत् ।
विपरीतफलं दद्याद्भक्त्या पूजनं यथा ॥"
सामान्यन्यासे अङ्गुलिनियमो गौतमीये ।
"मनसा विन्यसेन्न्यासान् पुष्पैर्नैवाथवा सुने ।
अङ्गुष्ठानामिकाभ्यां दानान्यथा विफलं भवेत् ॥"
विष्णुपन्यासे तु नायं नियमः ॥ * ॥

अथ पीठन्यासः ।

ॐ आधारशक्तये नमः ॐ प्रकृतये नमः ॐ कूर्म्माय नमः ॐ अनन्ताय नमः ॐ पृथिव्यै नमः ॐ क्षीरसमुद्राय नमः ॐ श्वेतद्वीपाय नमः एवं मणिमण्डपाय कल्पवृक्षाय मणिवेदिकायै रत्नसिंहासनाय एतत् सर्व्वन्तु हृदि । ततो दक्षिणस्कन्धे ॐ धर्म्माय नमः । वामस्कन्धे ॐ ज्ञानाय नमः । एवं वामोरौ वैराग्याय । दक्षिणोरौ ऐश्वर्य्याय । मुखे अधर्म्माय । वामपार्श्वे अज्ञानाय । नाभौ अवैराग्याय । दक्षिणपार्श्वे अनैश्वर्य्याय । सर्व्वत्र प्रणवादिनमोऽन्तेन न्यसेत् । तथा च शारदायाम् ।
"अंसोरुयुग्मयोर्विद्वान् प्रादक्षिण्येन साधकः ।
धर्म्मं ज्ञानञ्च वैराग्यमैश्वर्य्यं क्रमशः सुधीः ॥
सुखपार्श्वनाभिपार्श्वेष्वधर्म्मादीन् प्रकल्पयेत् ॥"
पुनर्हृदि । ॐ अनन्ताय नमः । एवं पद्माय नमः । अं सूर्य्यमण्डलाय द्वादशकलात्मने नमः । उं सोममण्डलाय षोड़शकलात्मने नमः । मं वह्निमण्डलाय दशकलात्मने नमः । सं सत्त्वाय नमः । रं रजसे नमः । तं तमसे नमः । आं आत्मने नमः । अं अन्तरात्मने नमः । पं परमात्मने नमः । ह्रीं ज्ञानात्मने नमः । इत्यन्तं विन्यस्य हृत्पद्मस्य पूर्व्वादिकेसरेषु तत्तत्कल्पोक्तपीठशक्तीर्मध्ये पीठमनुञ्च न्यसेत् । यथा शारदायाम् ।
"अनन्तं हृदये पद्मं तस्मिन् सूर्य्येन्दुपावकान् ।
एषु स्वस्वकलां न्यस्य नामाद्यक्षरपूर्व्वतः ॥
सत्त्वादीन् त्रिगुणान् न्यस्य तथैवात्र गुरूत्तमः ।
"आत्मानमन्तरात्मानं परमात्मानमेव च ।
ज्ञानात्मानं प्रविन्यस्य न्यसेत् पीठमनुं ततः ॥"

अथ ऋष्यादिन्यासः ।

ऋषिस्तु ।
"महेश्वरमुखाज्ज्ञात्वा यः साक्षात्तपसा मनुम् ।
संसाधयति मुद्वात्मा स तस्य ऋषिरीरितः ॥
गुरुत्वान्मस्तके चास्य न्यासस्तु परिकीर्त्तितः ।
सर्व्वेषां मन्त्रतत्त्वानां छादनाच्छन्द उच्यते ॥
अक्षरत्वात् पदत्वाच्च मुखे छन्दः समीरितम् ।
सर्व्वेषामेव जन्तूनां भाषणात् प्रेरणात्तथा ॥
हृदयाम्भोजमध्यस्था देवता तत्र तां न्यसेत् ।
ऋषिच्छन्दोऽपरिज्ञानान्न मन्त्रफलभागभवेत् ॥
दौर्ब्बल्यं याति मन्त्राणां विनियोगमजानताम् ॥"
तन्त्रान्तरे ।
"ऋषिं न्यसेन्मूर्द्ध्नि देशे छन्दस्तु मुखपङ्कजे ।
देवतां हृदये चैव बीजन्तु गुह्यदेशके ॥
शक्तिञ्च पादयोश्चैव सर्व्वाङ्गे कीलकं न्यसेत् ॥"

अथाङ्गन्यासः । तत्राङ्गुलिनियमः ।

त्रिद्व्येकदशकद्वित्रिसंख्यया शैलसम्भवे ।
अङ्गुलीनामिति वचनादिति सर्व्वसाधारणम् ॥
यामले ।
"हृदयं मध्यमानाम्यतर्ज्जनीभिः स्मृतं शिरः ।
मध्यमातर्ज्जनीभ्यां स्यादङ्गुष्ठेन शिखा स्मृता ॥
दृग्भिः कवचं प्रोक्तं तिसृभिर्नेत्रमीरितम् ।
प्रोक्ताङ्गुलीभ्यामस्त्रं स्यादङ्गकल्पनिरियं मता ॥
तिसृभिस्तर्ज्जनीमध्यमानाभिः ॥
तर्ज्जनीमध्यमानामा प्रोक्ता नेत्रत्रये क्रमात् ।
यदि नेत्रद्वयं प्रोक्तं तदा तर्ज्जनिमध्यमे ॥"
इति भट्टधृतवचनात् ॥
"हृदयादिषु विन्यस्येदङ्गमन्त्रांस्ततः सुधीः ।
हृदयाय नमः पूर्व्वं शिरसे वह्निवल्लभा ॥
शिखायै वषड्डिल्युक्तं कवचाय हुमीरितम् ।
नेत्रत्रयाय वौषट् स्यादस्त्राय फड्डितिक्रमात् ॥
षड़ङ्गमन्त्रानित्युक्तान् षड़ङ्गेषु नियोजयेत् ।
पञ्चाङ्गानि मनोर्यत्र तत्र नेत्रमनुं त्यजेत् ॥"
इति शारदावचनम् ॥
वैष्णवे तु ।
"अनङ्गुष्ठा ऋजवो हस्तशाखा
भवेन्मुद्रा हृदये प्रीणके च ।
अधोऽङ्गुष्ठा खलु सृष्टिः शिखायां
करद्वन्द्वाङ्गुलयो वर्म्मणि स्युः ॥
नाराचसङ्कुचितबाहुयुग्म-
काङ्गुष्ठतर्ज्जन्युदितो ध्वनिस्तु ।
विश्वग्विसृष्टा कथिताऽस्त्रमुद्रा
यत्राग्निवी तर्ज्जनिमध्यमे च ॥"
शारदायाम् ।
"न्यासक्रमेण देहेषु धर्म्मादीन् पूजयेत्ततः ।
पुष्पाद्यैः पीठमन्त्रान्तं तस्मिंश्च परदेवताम् ॥"
इति दर्शनात् शरीरे पीठपूजा ।
"यङ्गहीनस्य मन्त्रस्य स्वनेवाङ्गानि कल्पयेत् ॥"
तथा ब्रह्मयामले ।
"स्वनामाद्यक्षरं बीजं सर्व्वेषामभिधीयते ॥"

अथ व्यापकन्यासः ।

नवधा सप्तधा वापि मूलेन पञ्चधा त्रिधेति भैरवतन्त्रवचनात् । नवधाकरणे शिरस्तः पादान्तं पादतः शिरोऽन्तम् । एवं चतुर्धा । सप्तधाकरणे तादृशं त्रिधा । पञ्चधाकरणे तादृशं द्विधा । त्रिधाकरणेऽपि तादृशमेकधा । हृदादिमुखान्तन्तु पक्षे एकधा सर्व्वत्रैव । शूलधाकरणे तु तादृशं पञ्चाङ्गहारं हृदादि मुखान्तं नास्तीति व्यापकन्यासः । इत्यागमतत्त्वविलासः ॥ * ॥ नित्यं न्यासकरणफलं यथा,—
"आगमोक्तेन विधिना नित्यं न्यासं करोति यः ।
देवताभावमाप्नोति मन्त्रसिद्धिः प्रजायते ॥
यो न्यासकवचच्छन्दो मन्त्रं जपति तं प्रिये ।
विघ्ना दृष्ट्वा पलायन्ते सिंहं दृष्ट्वा यथा गजाः ॥"
न्यासाकरणे दोषो यथा,—
"अकृत्वा न्यासजालं यो मूढ़त्वात् प्रजपेन्मनुम् ।
सर्व्वविघ्नैः स बाधः स्यादाधैर्मृगमिवाग्निभुर्यथा ॥"
इति तन्त्रसारः ॥ * ॥

एते न्यासाः सामान्यपूजाप्रकरणोक्ताः ।
अन्ये च देवताविशेषे बहवः सन्ति बाहुल्यभिया तेषां प्रमाणादिकमलिखित्वा केवलं तत्र विष्णुविषये केशवकौस्तुभादि १ मूर्त्तिपञ्जर२ तत्त्व ३ भूतिपञ्जर ४ दृग्बन्ध ५ पञ्चाङ्ग ६ न्यासाः । शिवविषये श्रीकण्ठादि १ ईशानादिपञ्चमूर्त्ति २ मन्त्र ३ मूर्त्ति ४ गोलक ५ शुभगादि ६ भूषण ७ न्यासाः । अन्नपूर्णाविषये

पदन्यासः १। श्रीविद्याविषये वह्निन्यादि १ नवयोन्यात्मक २ पीठ ३ तत्त्व ४ पञ्चदशी ५ षोड़शी ६ संहार ७ स्थिति ८ सृष्टि ९ वाद १० षोढ़ा ११ गणेश १२ ग्रह १३ नक्षत्र १४ योगिनी १५ राशि १६ त्रिपुरा १७ षोड़शन्यासित्वा १८ कामरति १९ सृष्टिस्थिति २० प्रकटयोगिनी २१ आयुध २२ न्यासाः। तारा-विषये रुद्र १ ग्रह २ लोकपाल ३ न्यासाः। एतेषां प्रमाणानि तन्त्रसारादौ द्रष्टव्यानि॥

न्युङ्खः, पुं, (न्युङ्खते इति। नि+उङ्ख गतौ+घञ्।) सामवेदे नियतप्रगवषट्कम्। दीर्घवानयमिति नयनानन्दः। इत्यमरभरतौ॥ सम्यक्। मनोज्ञः। इति मेदिनी। खे, २॥

न्युञ्चं, क्ली, (न्युञ्चति अधोमुखीभवतीति। नि+उञ्च+अच्।) कर्म्मरङ्गफलम्। इति मेदिनी। ञे, १२॥ आद्यादिपात्रभेदः। इति शब्दरत्नावली॥ तथा च गोभिलः। प्रथमे पात्रे संस्रवान् समवनीय पात्रं न्युञ्चं कुर्य्यात् पितृभ्यः स्थानमसीति। प्रथमे पात्रे पितृपात्रे। संस्रवान् पितामहादिपक्षार्घपात्रस्थश्राद्धजलानि। समवनीय क्रमेण स्थापयित्वा ततृपात्रस्य प्रपितामहपात्रेणाच्छादनमाह श्रौनकः। प्रपितामहपात्रेण पिधाय प्रतिष्ठापयतीति। याज्ञवल्क्योनापि ततृपात्रस्याधःस्थत्वाभिधानात् पात्रान्तरेण पिधानमाचिप्रम्। तथा च याज्ञवल्क्यः।

"दत्त्वार्घं संस्रवांस्तेषां पात्रे कृत्वा विधानतः।
पितृभ्यः स्थानमसीति न्युञ्चं पात्रं करोत्यधः॥"

विधानतः यथापूर्व्वं स्थापितं क्रमेण। तेन प्रपितामहपात्रेणाधःकृतं पितृपात्रं ऊर्द्धसुखमवस्थितं न्युञ्चं करोति। तत्श्राद्धञ्च। पितृपात्रे निधायाथ न्युञ्चमुत्तरतो न्यसेत्। इति मत्स्यपुराणवचने न्यसेदित्यनाख्यातोपस्थापितकर्त्तव्यांशपार्श्वे कर्त्तव्यः। इति श्राद्धतत्त्वम्॥

न्युञ्जः, पुं, (नि+उञ्ज+अच्।) दर्भमयसुक्। इति मेदिनी। ञे, ११॥ (यथा,—

"शूयनामनयानानामुत्तानानान्तु दर्शनम्।
न्युञ्जानामितरेषाञ्च पात्रादीनामधोभनम्॥"

इति वामटे शारीरस्थाने। ६। २३॥)

कुशः। सुक्। इति हेमचन्द्रः॥

न्युञ्जः, त्रि, (न्युञ्जति अधोमुखीभवतीति। नि+उञ्ज+अच्।) कुञ्जः। अधोमुखः। इति मेदिनी। ञे, १२॥ (यथा, हरिवंशे। ६१। ६।

"स तत्रैकेन पादेन शकटं पर्य्यवर्त्तयत्।
न्युञ्जं पयोधराकाङ्क्षी चकार च रुरोद च॥")

रुजा युक्तः। इत्यमरः। २। ६। ६१॥

रोगेण वक्रीकृतदृष्ट्याधोमुखपुरुषादिः। इति भरतः॥

न्युञ्जखड्गः, पुं, (न्युञ्जः खड्गः।) कुञ्जखड्गः। बाँका तरवार इति भाषा॥ ततृपर्य्यायः। कटीतलः २। इति त्रिकाण्डशेषः॥

न्यून, त्रि, (न्यूनयति। नि+ऊन परिहाणे+अच्।) गन्तव्यम्। (यथा, महाभारते। १३। १४३। ४६।

"एतैः कर्म्मफलैर्देवि! न्यूनजातिकुलोद्भवः।
शूद्रोऽप्यागमसम्पन्नो द्विजो भवति संस्कृतः॥")

ऊनम्। इत्यमरः। ३। ३। १२७॥ (यथा, मनुः। ८। २०३।

"नान्यदन्येन संसृष्टरूपं विक्रयमर्हति।
न चासारं न च न्यूनं न दूरे न तिरोहितम्॥")

न्यूनपञ्चाशद्भावः, पुं, (न्यूनपञ्चाशतः ऊनपञ्चाशद्भावयूनां भावो यत्र।) ऊनपञ्चाशद्भावः। पागल इत्यर्थः। यथा,—

"उदीरितेन्द्रियो धाता वीचाश्चक्रे यदात्मजाम्।
तदैव न्यूनपञ्चाशद्भावा जाताः शरीरतः॥"

इति कालिकापुराणे द्वितीयोऽध्यायः॥

नृस्थिमाली, [न्] पुं, (नृणामस्थिमाला नृस्थिमाला सा अस्त्यस्येति। इनिः।) शिवः। इति त्रिकाण्डशेषः॥ नरास्थिमालाविशिष्टे, त्रि॥

Reprinted by
Skylark Printers (photo-Offset), Delhi-6 (Phone : 266595)

PK
925
D47
1967
v.2

Deva, (Sir) Radhakanta
Sabdakalpadrumah

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

॥ श्रीः ॥

शब्दकल्पद्रुमः

तृतीयो भागः



UNIVERSITY OF TORONTO
LIBRARY

WILLIAM H. DONNER
COLLECTION

purchased from
a gift by

THE DONNER CANADIAN
FOUNDATION

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९३



शब्दकल्पद्रुमः

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः ।

तृतीयो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : तृतीय, सं० २०२४ वि०
मूल्य : सम्पूर्ण ग्रन्थ १–५ भाग रु० १५०–००



PK
925
D47
1967
V.3

©
चौखम्बा संस्कृत सीरीज आफिस
पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी–१ (उ० प्र०)
भारतवर्ष
फोन नं० ३१४५

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 93

SHABDA-KALPADRUM

OR

AN ENCYCLOPÆDIC DICTIONARY OF SANSKRIT WORDS ARRANGED IN ALPHABETICAL ORDER GIVING THE ETYMOLOGICAL ORIGIN OF THE WORDS ACCORDING TO PANINI, THEIR GENDER, VARIOUS MEANINGS AND SYNONYMS, AND ILLUSTRATING THEIR SYNTACTICAL USAGE AND CONNOTATION WITH QUOTATIONS DRAWN FROM VARIOUS AUTHORITATIVE SOURCES SUCH AS VEDAS, VEDANTA, NYAYA, OTHER DARSHANAS, PURANETIHAS, MUSIC, ART, ASTRONOMY, TANTRA, RHETORICS AND PROSODY AND MEDICINE ETC.

BY
RAJA RADHA KANTA DEVA

PART THREE

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1

Publisher : The Chowkhamba Sanskrit Series Office, Varanasi.
Printer : Vidya Vilas Press, Varanasi
Edition : Third, 1967
Price : 1–5 Vols. Complete Rs. 150–00

© The Chowkhamba Sanskrit Series Office
Oriental and Foreign Book-Sellers and Publishers
P. O. Chowkhamba, Post Box 8,
Varanasi–1 (India)
1967
Phone : 3145



शब्दकल्पद्रुमः।

तृतीयकाण्डम्।

प, पकारः। स तु पञ्चमवर्गस्य प्रथमो व्यञ्जनस्यैकविंशतितमो वर्णः। अस्योच्चारणस्थानं ओष्ठः। इति व्याकरणम्॥ (तथा च श्रुतायाम्। "कण्ठ्यावहाविचुयशास्तालव्या ओष्ठ्यावुपू"॥ अस्योच्चारणे आभ्यन्तरप्रयत्नः। ओष्ठेन सह जिह्वायस्य सार्द्धः॥) तत्पर्य्यायः। लोहितः २ पार्श्वः ३ भूरः ४। इति रुद्रयामले वर्णाभिधानम्॥ अस्य तत्त्वं यथा,—

"अतः परं प्रवक्ष्यामि पकाराक्षरमव्ययम्।
चतुर्व्वर्गप्रदं वर्णं शरच्चन्द्रसमप्रभम्॥
पञ्चदेवमयं वर्णं स्वयं परमकुण्डली।
पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं सदा॥
त्रिगुणावहितं वर्णमात्मादितत्त्वसंयुतम्।
महामोक्षप्रदं वर्णं हृदि भावय पार्व्वति!"॥

इति कामधेनुतन्त्रे ५ पटलः॥

(वङ्गभाषायां) अस्य लेखनक्रमो यथा,—

"कुञ्चिता वामरेखायाः कोणाद्विच्यवतोऽपरा।
कुञ्चिता सापि विज्ञेया मात्रा वामोन्नता तथा॥
ऊर्ध्वमुन्नम्रा भगवती क्रमशस्तासु तिष्ठति"॥

इति वर्णोद्धारतन्त्रम्॥

अस्योत्पत्तिप्रकारो यथा,—

"ऋटुरेषकारश्च मूर्द्धगो दन्तगस्तथा।
ऌतवर्णलसानोष्ठ्यानुपूपध्मानसंज्ञकान्"॥

इति प्रपञ्चसारः॥ तस्य ध्यानं यथा,—

"विचित्रवसनां देवीं द्विभुजां पङ्कजेक्षणाम्।
रक्तचन्दनलिप्ताङ्गीं पद्ममालाविभूषिताम्॥
मणिरत्नादिकेयूरहारभूषितविग्रहाम्।
चतुर्व्वर्गप्रदां नित्यां नित्यानन्दमयीं पराम्॥
एवं ध्यात्वा पकारन्तु तन्मन्त्रं दशधा जपेत्"॥

इति वर्णोद्धारतन्त्रम्॥*॥ तस्य नामानि यथा।

"पः पूरप्रियता तोच्छ्या लोहितः पञ्चमो रमा।
गुह्यकर्त्ता निधिः शेषः कालरात्रिः सुवाहिता॥
तपनः पालनः पाता पञ्चरेणुर्निरञ्जनः।
सावित्री पातिनी पानं वीरतत्त्वो धनुर्द्धरः॥
दक्षपार्श्वश्च सेनानी मरीचिः पवनः शनिः।
उड्डीशं जयिनी क्रमोऽलसं रेखा च मोहकः॥

मूला द्वितीयमिन्द्राणी लोकाद्यौ मन आत्मनः"॥

इति नागातन्त्रशास्त्रम्॥

(अनुबन्धविशेषः। यथा कविकल्पद्रुमे।

'नः स्वादिः पो सुचादिर्भः शमादिर्म्मो ञिचीस्मोः'।
तेन सुच स्तु शु प औ मोच इत्यस्य लटि सुश्चति॥)

पः, पुं, (पातयति वेगेन वृक्षादीन्। पत्+कर्त्तरि डः। अन्तर्णिच्।) पवनः। (पतति वृक्षात्। पत्+कर्त्तरि डः।) पर्णम्। (पीयते इति।) पानम। पाता। इत्येकाक्षरकोषः॥

(यथा, मनुः। २। १३६।

"राजज्ञातकयोश्चैव स्नातको वृषमानभाक्"॥)

पक्कयः, पुं क्लीं, (पचति स्वादिनिक्षिप्तमांसमिति। पच्+क्विप्। पक्व् धुवरः तस्य कयः कलहशब्दः कोलाहलशब्दो वा यत्र।) ध्वराक्षयः। इत्यमरः॥ २। २। २०॥ (यदुक्तम्।

"मधुवित्यटवि पुरा पक्वक्षयजनाश्रयणीः।
पक्षीपतिरभूदुग्रः पिङ्गाक्ष इति विश्रुतः"॥)

पक्वपौड़ः, पुं, (वृक्षविशेषः। पक्वौड़ा इति हिन्दी भाषा। तत्पर्य्यायः। पक्षतालः २ वर्द्धनः ३ पञ्चरक्तकः ४। अस्य गुणाः। दद्रुकण्डूविषौ शस्तत्वम्। कटुत्वम्। जीर्णज्वरापहत्वञ्च। इति राजनिर्घण्टः॥

पक्ता, [क्तृ] त्रि, (पचतीति। पच पाके+"खुलृचौ"। ३। १। १३३। इति ल्वच्।) पाककर्त्ता।

(यथा ऋग्वेदे। १०। ६। ७।

"ये ते देवि! शमितारः पक्तारो ये च ते जनाः"॥)

अयौ पुं। यथा। आग्नेये २ अध्यायः॥

"अन्नसदा च पक्ता च पचभोक्ता पचे नमः"॥

पक्तिः, स्त्री, (पच्यते परिणम्यते इति। भावे क्तिन्।) गौरवम्। पाकः। इति मेदिनी॥

(यथा, मनुः। ३। ६७।

"दैवाहिकेऽह्यौ कुर्व्वीत श्रद्धं कर्म्म यथाविधि।
पञ्चयज्ञविधानञ्च पक्तिशान्वाहिकी गृही"॥)

पक्तिशूलं, क्लीं, (पक्तौ शुक्तस्यान्नादिकस्य परिणामे जायते यत् शूलं रोगविशेषः।) परिणामशूलम्। तत्पर्य्यायः। पाकजम् २ परिणामजम् ३। इति राजनिर्घण्टः॥

पक्वं, क्लीं, (पच्यतेऽग्निना। पच् "शृधृवीपचिवचीति"। ऊर्णा ४। १६६। इति क्वः।) गार्हपत्याग्निः। इत्युणादिकोषः॥

पक्किमं, त्रि, (पाकेन निर्वृत्तम्। डु पच पाके+"तृतः क्तिः"। ३। ३। ८८। इति क्तिः। "क्तेर्मम् नित्यम्"। इति मम्।) पाकिमम्। पाकाज्जातम्। इति त्रिकाण्डशेषः॥

पक्वं, क्लीं, (पच्यते स्म। पच+क्त। "पचो वः"। ८। २। ५२। इति निष्ठातस्य वः।) खिन्नतण्डुलादि। तत्र पाकस्य विधिनिषेधादिर्यथा,—

"पूर्व्वाह्णाभिमुखो भूत्वा उत्तराह्णामुखेन वा।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्ज्जयेत्॥
अभ्याह्णाभिमुखे पक्वा आयुस्तानं नियोध च।
पूर्व्वमुखो धर्म्मकामः श्रीकामश्चोत्तरमुखो पतिकामश्च पश्चिमे।
ऐशान्याभिमुखे पक्वा दरिद्रो जायते नरः"॥*॥
"यदा तु आयसे पात्रे पक्वमन्नाति वै द्विजः।
स पापिष्ठोऽपि सुकृतैरन्नं रौरवे परिपच्यते॥
ताम्रे पक्वा चक्षुर्ज्ञानिभौमौ भवति वै त्वयम्।
स्वर्णपात्रे तु यत् पक्वं अन्नतं तदपि सृतम्"॥*॥
"पित्तलस्यां पक्वमन्नञ्च पित्तरोगं यशस्विनि!।
पुष्करीकस्य यज्ञस्य लभते फलमीप्सितम्॥
वातुलेन तु यत् पक्वं भगिन्या च कनिष्ठया।
असगोत्रेण यत पक्वं श्रोत्रियं तदपि सृतम्॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वं तथैव च।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत्"॥*॥
"उडुम्बरेण कालेन कदम्बस्य दलेन च।
शालेन करमर्दैन उदरावर्त्तकेन च॥
पक्वान्नं नैव भुञ्जीत भुक्ता राजिसुपावसेत्।
गर्हितान्नमवीरान्नं भुक्ता कृच्छ्रं समाचरेत्॥
अप्रजा यातु वनिता नान्त्रीयादेव तद्गृहे"॥
"शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि।
कलिचखातकस्यैव वध्यावाघण्टकस्य च।
भैरण्डशाल्मलैर्व्वापि पक्वान्नं गर्हितं सृतम्॥*॥"

"यदा स्यादक्षयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथार्द्धे च तत् पात्रं विसृजेद्गृही"॥*
"धनुःपाके तथा सिंहे मिथुने वा वरानने ।
यः कुर्य्यादोजनं देवि! कल्पकोटिं विशुध्यति" ॥*॥
"एकदा तु जलं दद्यात् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पक्वान्तोयं न दापयेत्" ॥
इति ॥ * ॥
"मोदकं कन्दुपक्वञ्च गव्याढ्यं घृतसंयुतम् ।
पुनः पुनर्भोजने च पुनरन्नं न इष्यति" ॥
इति च मत्स्यसूक्ते महातन्त्रे ४२ पटलः ॥

पक्वं, त्रि, (पच्यते स्म यत् इति । पच + कर्म्मणि क्तः । "पचो वः" । ८ । २ । ५२ । इति निष्ठातस्य वः ।) परिणतम् । पाका इति भाषा ॥ (यथा, मनुः । ६ । १७ ।
"अग्निपक्वाशनो वा स्यात् कालपक्वभुगेव वा"॥)
निष्ठा प्राप्तम् । सुदृढ़मिति यावत् । यथा परिणता बुद्धिः । विनाग्नोष्णम् । प्रत्यासन्नविनाशम् । अतिपक्वयज्ञनदशूलादौ निष्पक्वं कथितञ्च । क्षीराज्यपयसां पाके घृतम् । इवत्पक्वे आपक्वम् । इत्यमरभरतौ ॥ (भावे क्तः । पाकः । परिणामः ॥)

पक्वकृत्, पुं, (पक्वं करोति वेदनान्वितस्थलं परिणामयति निष्पिण्डपत्वलगादिभिरिति । कृ + क्विप् ततस्तुक् ।) निम्बवृक्षः । इति शब्दचन्द्रिका ॥ (पक्वं करोति पचत्वन्नादिकमित्यर्थः ।) पाककर्त्तरि त्रि ॥

पक्वरसः, पुं, (पक्वस्य गुड़ान्नादेः रसः ।) मद्यम् । इति शब्दरत्नावली ॥

पक्ववारि, क्ली, (पक्वस्यान्नादेर्वारि यद्वा, पक्वं वारि स्विन्नसलिलमिति यावत् ।) काञ्जिकम् । इति शब्दचन्द्रिका ॥ पङ्क्वारि इत्यपि पाठः। पक्वजलञ्च॥

पक्वान्नं, त्रि, (पक्वमन्नम् ।) क्षतपाकतण्डुलादि । यथा,
"आमं शूद्रस्य पक्वान्नं पक्वमुत्सृष्टमुच्यते" ।
इति तिथितत्त्वम् ॥
("यतौ च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ" ।
इति सदाचारः ॥)

पक्वाशयः, पुं, (पक्वस्य आमादेराशयः आधानम् । यद्वा पक्वं आमादिकं आशेतेऽत्र । पक्व + आ + शीङ् + आधारे + अप् ।) नाभ्यधोभागः । इति राजनिर्घण्टः ॥
"पक्वाशयस्याधो नाभेरूर्द्धमामाशयः स्मृतः" ।
इति वैद्यकम् ॥

पक्ष, क परिग्रहे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पक्षयति । इति दुर्गादासः ॥

पक्ष, त् क परिग्रहे । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-परं-सकं-सेट् ।) पक्षयति पक्षापयति । इति दुर्गादासः ॥

पक्षः, पुं, (पक्ष्यते परिगृह्यते देवपिण्डकार्य्याय यः । यद्वा, पक्ष्यते चन्द्रस्य पक्षदशानां कलानामापूरणं क्षयो वा येन । पक्ष + घञ् । यद्वा, पक्षते इति । पक्ष क्षुत्वादौ "अधिपर्य्योर्दैकौच" । उणां ३ । ६६ । इति सः कक्षान्तादेशः ।) पक्षदशाहोरात्राः । स च द्विविधः । शुक्लपक्षः पूर्व्वसंज्ञः कृष्णपक्षोऽपरसंज्ञः । तद्भेदेन व्यवस्था यथा ।
"शुक्लपक्षे तिथिर्यस्यां यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्यस्यां यस्यामस्तमितो रविः" ॥
अत्रामावास्यावर्त्तितिथिक्षयवृद्धिभ्यां न व्यवस्था किन्तु रवेरुदयास्तमयसम्बन्धाच्छुक्लकृष्णपक्षाभ्यां व्यवस्था सा च युग्माद्यनाद्यतिथिकर्म्मपरा सामान्यविशेषन्यायात्" । इति तिथ्यादितत्त्वम् ॥ पक्षियामवयवविशेषः । पाखा इति भाषा । तत्पर्य्यायः । गरुत् २ छदः ३ पत्त्रम् ४ पतत्त्रम् ५ तनूरुहम् ६ ॥ शरपक्षः । तीरेर पाखा इति भाषा । तत्पर्य्यायः । वाजः २ । सहायः । कक्षात् परे सम्भ्रार्थः । यथा केशपक्षः । इत्यमरः ॥ (महाकालः शिवः । कालोपाधिभेदात् पक्षस्य तथात्वम् । यथा महाभारते ।
१३ । शिवसहस्रनामकीर्त्तने । १७ । १३६ ।
"ऋतुः संवत्सरो मासः पक्षः संख्या समापनः"॥)
पार्श्वः । गृहम् । साध्यम् । (सन्दिग्धसाध्यवान् पदार्थः । यथा, भाषापरिच्छेदे । ७० । ७१ ।
"सिद्धाधियेया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्" ॥)
विरोधः । बलम् । (यथा, पक्षतन्त्रे । ३ । ६६ ।
"यस्तीर्थानि निजे पक्षे परपक्षे विशेषतः ।
गुणैरेतैर्युतो वेत्ति न स दुर्गतिमाप्नुयात्" ॥)
सखा । चुल्लीरत्नम् । राजकुञ्जरः । इति मेदिनी ॥ विहगः । वलयम् । शुद्धः । इति शब्दरत्नावली ॥ वर्गः । (सजातीयवृन्दम् । यथा, गोः रामायणे । २ । १८ । १३
"भरतस्यापि वा पक्षं यो गृहीयादचेतनः ।
तं पापमहमद्यैव प्रेषयामि यमक्षयम्" ॥)
पिच्छम् । देहाङ्गम् । इति हेमचन्द्रः ॥

पक्षः, [स्] क्ली, (पक्ष्यतीति । "पक्षिवक्षिभ्यां सुट् च" । उणां । ४ । २१६ । इति असुन् सुट् च ।) गरुत् । यथा । पक्षसी च स्मृतौ पक्षौ । इति भरतधृतशब्दभाङ्गः ॥

पक्षकः, पुं, (पक्ष इव प्रतिज्ञातिः । "इवे प्रतिकृतौ" । ५ । ३ । ९६ । इति कन् ।) पक्षद्वारम् । पार्श्वद्वारम् । इत्यमरः । २ । २ । १४ ॥ खड़कीदार इति भाषा । पार्श्वमात्रम् । इति मेदिनी ॥ सहायः । इति शब्दरत्नावली ॥

पक्षघातः, पुं, (पक्षस्य देहार्द्धस्य घातं विनाशं यस्मात् यत्र वा ।) स्वनामख्यातवातरोगविशेषः । तल्लक्षणादि यथा,—
"गृहीत्वार्द्धं ततो वायुः शिराकायू विशोष्य च ।
पक्षमन्यतमं हन्ति सन्धिबन्धान् विमोचयन् ॥
क्षतक्षोऽर्द्धकायस्तस्य स्यादकर्म्मण्यो विचेतनः ।
एकाङ्गवातं तं केचिदन्ये पक्षवधं विदुः" ॥
अर्द्धं अर्द्धनारीश्वरवत् । पक्षं बाहुपार्श्वोरुजङ्घादिभागम् । अन्यतमं वामं दक्षिणं वा । विमोचयन् शिथिलीकुर्व्वन् । अकर्म्मण्यः कर्म्मासमर्थः । विचेतनः ईषत्संज्ञादिज्ञानयुक्तः ॥*॥
अस्य साध्यासाध्यज्ञानार्थमाह ।
"दाहसन्तापमूर्च्छाः स्युर्व्वायौ पित्तसमन्वित ।
श्लैष्मश्लेष्मगुरुत्वानि तस्मिन्नेव कफावृते" ॥
दाहो बाह्यः । सन्तापः आभ्यन्तरः । एतच्च लक्षणमन्यत्रापि वातव्याधौ बोद्धव्यम् । सामान्यतो वायाविति निर्द्देशत्वात् ॥ * ॥
पक्षाघातस्य साध्यत्वादिकमाह ।
"शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ।
साध्यमन्येन संयुक्तमसाध्यं क्षयहेतुकम्" ॥
शुद्धः केवलः । अन्येन पित्तेन कफेन वा । क्षयहेतुकं क्षयो धातुक्षयः । तत्कुपितं वातनिमित्तकम् ॥ * ॥ अपरमसाध्यलक्षणमाह ।
"गर्भिणीसूतिकाबालवृद्धक्षीणेष्वसृक्क्षये ।
पक्षाघातं परिहरेत् वेदनारहितो यदि" ॥
वेदनारहितो यदीति भिन्नमसाध्यलक्षणम् ॥*॥

अथ तस्य चिकित्सा ।

"माषात्मगुप्तावातारिबालकजटाशतम् ।
हिङ्गुसैन्धवसंयुक्तं पक्षाघातं विनाशयेत् ।
माषिके हिङ्गुसिन्धूत्थे जरत्याद्यास्तु शाणिकाः" ॥
इति माषादिकाथः ॥ १ ॥
"ग्रन्थिकाग्निकगोशुण्ठीरास्नासैन्धवकल्कितम् ।
माषकाथयुतं तैलं पक्षाघातं व्यपोहति" ॥
इति ग्रन्थिकादितैलम् ॥ २ ॥
"माषात्मगुप्तातिविषारवृक-
रास्नाशताह्वालवणैः सुपिष्टैः ।
चतुर्गुणे माषबलाकषाये
तैलं घृतं हन्ति हि पक्षघातम्" ॥
इति माषादितैलम् ॥३॥ इति भावप्रकाशः ॥*॥
पक्षाघातस्तु जन्मान्तरीयमहापातकशेषापचिह्नविशेषः । यथा,—
"पूर्व्वजन्मकृतं पापं नरकस्य परिक्षये ।
बाधते व्याधिरूपेण तस्य लक्ष्मादिभिः क्रमः ॥
कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
मूत्रकृच्छ्राश्मरीकाशा अतिसारभगन्दरौ ॥
दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् ।
इत्येवमादयो रोगा महापापोद्भवा गदाः" ॥*॥
तत्प्रायश्चित्तं यथा,—
"लक्षसुवाचं पुण्यं प्रदद्यात् केशवार्च्चने ।
दद्यात् द्विजसहस्राय मिष्टान्नं द्विजभोजने" ॥
इति मलमासतत्त्वम् ॥ किञ्च ।
"कृतघ्नो ग्रावदन्तस्य द्वादशरात्रं लक्ष्मं चरित्वा उद्धरेयातां तद्दन्तशलाविति । अत्र द्वादशरात्रं परार्द्धरूपम् । तत्र पक्षे धेनवः । न तु प्राजापत्यं तद्दाहकर्त्तुर्यतिचान्द्रायणेन विषमग्निरित्वात् । अत्र बहूनामेकधर्म्माणामिति वचनादाकाङ्क्षितत्वात् कुष्ठादीनामपि प्रायश्चित्तम् । अतएव प्रायश्चित्तविवेकेऽप्युक्तम् । एवं दुष्कर्म्मादिष्वप्यूह्यम्" । इति शुद्धितत्त्वम् ॥

पक्षचरः, पुं, (पक्षे शुक्लपक्षे चरतीति । चर + टः ।) चन्द्रः । पृथक्चारिगणः । इति मेदिनी ॥

पक्षजः, पुं, (पक्षे शुक्लपक्षे जायते इति । पक्ष + जन् + ड ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

पक्षजन्मा, [न्] पुं, (पक्षे शुक्लपक्षे जन्म उत्पत्ति-

र्यस्य ।) चन्द्रः । इति शब्दरत्नावली ॥ पक्ष-जाते त्रि ॥

पक्षता, स्त्री, (पक्षस्य भावः ।) अनुमित्साविरहविशिष्टसिद्धाभावः । इयमनुमितिकारणम् । तच्च पर्व्वते वह्न्यनुमितौ अनुमित्साविरहविशिष्ट-पर्व्वतधर्म्मिकवह्निनिश्चयाभावः । यथा,—

"सिसाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्" ॥

इति भाषापरिच्छेदे । ७१ ॥

पक्षतिः, स्त्री, (पक्षस्य मूलम् । "पक्षात्तिः" । ५।२।२५ । इति तिः ।) प्रतिपत्तिथिः । (यदुक्तं तिथितत्त्वे ।

"पक्षत्याद्यासु तिथयः क्रमात्पञ्चदश स्मृताः"॥)

पक्षमूलम् । इत्यमरः । ३ । ३ । ७२ ॥ डानक् इति भाषा ॥

पक्षद्वारं, क्ली, (पक्षे पार्श्वे स्थितं द्वारम् ।) पार्श्व-द्वारम् । इत्यमरः । २ । २ । १४ ॥ खड़कीद्वार इति भाषा ॥

पक्षधरः, पुं, (पक्षं धरति धारयतीति वा । धृ + अच् ।) चन्द्रः । इति जटाधरः ॥ पक्षधारण-कर्त्तरि, त्रि ॥

पक्षपातः, पुं, (पक्षे अन्यायसाहाय्ये पातः अभि-निवेशः । स्नेहसम्बन्धाद्यनुरोधत एकस्मिन्नेव वर्गे आनुकूल्यप्रयोगनिष्कीर्षेतिभावः ।) अन्याय-साहाय्यकरणम् । (यथा गोः रामायणे २ । १०६ । ५७ ।

"क्वचिद्विवदतोऽर्थेषु बलिनो दुर्ब्बलस्य च ।
अपक्षपातात् पश्यन्ति कार्य्येष्वधिकृता नराः" ॥)

गच्छताकरणम् । यथा । "ईश्वरत्वविषये विप-क्षितां पक्षपातकरणे न कारणम्" । इत्युत्तर-मीमांसायां संक्षेपशारीरम् । (पक्षार्थां गरुतां पातः पतनं यत्र ।) पक्षिणां ज्वरः । यदुक्तं "पक्षपातः पतङ्गानाम्" । इति विश्वप्रकाशः ॥

पक्षपातिता, स्त्री, (पक्षपातिनः साहाय्यकारिणो भावः । पक्षपातिन् + तल् ।) सहायता । यथा,—

"न सुवर्णमयी तनुः परं
ननु किं वाग्पि तावकी तथा ।
न परं पथि पक्षपातिता
ऽनवलम्बे किमु माद्दशेऽपि सा" ॥

इति नैषधे । २ । ५२ ॥ (पक्षयोः पातो विद्यतेऽस्य इति पक्षपाती खगस्यस्य भावः । पक्षपातनञ्च ॥)

पक्षपालिः, पुं, (पक्षस्य गृहस्य पालिरिव ।) खड़-किका । इति शब्दरत्नावली । खड़कीद्वार इति भाषा ॥

पक्षभागः, पुं, (पक्षस्य पार्श्वस्य पक्ष एव वा भागः ।) हस्तिपार्श्वभागः । इत्यमरः । २ । ८ । ४० ॥

पक्षमूलं, क्ली, (पक्षस्य मूलम् ।) पक्षतिः । इत्य-मरः । २ । ५ । ३६ । डानक् इति भाषा ॥

पक्षवाहनः, पुं, (पक्षौ वाहनमिव यस्य ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षसुन्दरः, पुं. (पक्षे देहाङ्गे कुसुमे सुन्दरः ।) लोध्रः । इति हारावली ॥

पक्षान्तः, पुं, (पक्षस्य अन्तो यत्र काले ।) अमा-वस्या । पूर्णिमा । तत्पर्य्यायः । पक्षदशी २ । इत्यमरः । १ । ४ । ७ ॥ अर्केन्दुविशेषः ३ पर्व्व ४ । इति राजनिर्घण्टः ॥ पक्षावसरः ५ । इति शब्दरत्नावली ॥ (अस्मिन् यात्रा निष्फला भवति । यदुक्तं ज्योतिस्तत्त्वे ।

'पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवम्' ॥)

पक्षालुः, पुं, (पक्षौ विद्येते यस्य । पक्ष + अस्त्यर्थे आलुच् ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षावसरः, पुं, (पक्षस्यावसरोऽपसरणं यत्र काले ।) पूर्णिमा । अमावस्या । इति शब्द-रत्नावली ॥

पक्षिणी, स्त्री, (पक्षौ इव पूर्व्वापरदिने विद्येते यस्याः । पक्ष + इनि ङीप् च ।) आगामिवर्त्त-मानाहर्युक्ता रात्रिः । इत्यमरः । १ । ४ । ५ ॥ यथा, शुद्धितत्त्वे ।

"द्वावङ्कावेकरात्रिञ्च पक्षिणीत्यभिधीयते" ॥

पूर्णिमा ॥ (पक्षौ विद्येते यस्याः । इनि ङीप् ।) विहगी । ग्राकिनीभेदः । इति मेदिनी ॥

पक्षिपानीयशालिका, स्त्री, (पक्षिणां पानीयस्य पानार्थजलस्य शालिका शाला ।) चुल्लीउदता-वालम् । पक्षिजलपानस्थानम् । इति भूरि-प्रयोगः ॥

पक्षिलः, पुं, (पक्षयति तत्त्वज्ञानं परित्यजतीति । पक्ष + वाहुलकादिलच् ।) वात्स्यायनमुनिः । इति त्रिकाण्डशेषः ॥ (अयं हि गौतमसूत्रभाष्यं कृत-वान् ॥)

पक्षिशाला, स्त्री, (पक्षिणां शाला गृहम् ।) नीड़म् । तत्पर्य्यायः । कुलायिका २ । इति त्रिकाण्डशेषः ॥

पक्षिसिंहः, पुं, (पक्षी सिंह इव । उपमितसमासः । यद्वा, पक्षिषु सिंहः श्रेष्ठः । "सिंहशार्दूल-नागाद्याः पुंसि श्रेष्ठार्थवाचकाः" । इत्यमरोक्ते-स्तथात्वम् ।) गरुड़ः । इति त्रिकाण्डशेषः ॥

पक्षिस्वामी, [न्] पुं, (पक्षिणां स्वामी प्रभुः ।) गरुड़ः । इति हेमचन्द्रः ॥

पक्षी, [न्] पुं, (पक्षाः कक्षादीनां पक्षाणि सन्त्यस्य । "अत इनिठनौ" । ५ । २ । ११५ । इति इनिः ।) वायुः । इति धरणिः ॥

पक्षी, [न्] पुं क्ली, पक्षौ विद्येते यस्य । (पक्ष + इनिः ।) विहङ्गम, ॥ पाखी इति चिड़िया इति च भाषा ॥ तत्पर्य्यायः । खगः २ विहङ्गः ३ विहगः ४ विहङ्गमः ५ विहायाः ६ शकुन्तिः ७ शकुनिः ८ शकुन्तः ९ शकुनः १० द्विजः ११ पतत्री १२ पत्री १३ पतगः १४ पतन् १५ पत-रथः १६ अण्डजः १७ नगौकाः १८ वाजी १९ विकिरः २० विः २१ विष्किरः २२ पतत्रः २३ नीड़ौकसः २४ गरुत्मान् २५ पिच्छिन् २६ नभ-सङ्गमः २७ । इत्यमरः । २ । ५ । २४ ॥ नाड़ीपरगः २८ कक्षाग्निः २९ पतङ्गः ३० अगौकाः ३१ चक्षु-श्चत् ३२ क्षुरक्षः ३३ सरक्षः ३४ । इति शब्द-रत्नावली ॥ पिपतिषुः ३५ पत्रवाहः ३६ द्युगः ३७ । इति राजनिर्घण्टः ॥* ॥ गुरुभच्चबहुभच-

स्थूलकायपक्षिणां पूर्व्वार्द्धस्य श्रेष्ठत्वं यथा,—

"गुरुभच्चा बहुभुजो ये चोपचितमेदसः ।
एकदेहेऽपि पूर्व्वार्द्धं नृणां पक्षिणां परम्" ॥*॥

पक्षिणामङ्गादीनामुत्तरोत्तरं गुरुत्वं यथा,—

"सर्व्वेषाञ्च शिरःस्कन्धग्रीहचर्म्मयकृद्गुदम् ।
पादपुच्छान्त्रमस्थिष्कशुष्ककक्षाः समेहनाः ।
धातवः श्रोणिताद्याश्च गुरवःस्युः परस्परम्" ॥

अस्याङ्गगुणाः ।

"मत्स्यकूर्म्मखगाङ्गानि स्वादूवालीकराणि च ।
कटुपाकानि रुच्यानि वातश्लेष्महराणि च" ॥

इति राजवल्लभः ॥ * ॥ तेषामुत्पत्तिर्यथा,—

"अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ ।
सम्पातिश्च जटायुश्च प्रख्यातौ पक्षिसत्तमौ ॥
सम्पातिर्जनयन् पुत्रान् काकाः पुत्रा जटायुषः ।
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी ।
धृतराष्ट्री गरुत्मांसु शुच्यां जज्ञे च षट् सुतान् ।
चिग्रिखश्च शुनेत्रश्च सुमुखं सुनसन्तथा ॥
सुरूपन्तु सुपर्व्वाणं तेषां पुत्रा अनन्तकाः ।
चतुर्दशसहस्राणि क्रूराणां पन्नगाशिनाम् ॥
सप्तद्वीपेष्विमे सन्ति गारुड़ास्ते महाबलाः ।
भासीपुत्रास्तथा भासा उलूकाः काककुक्कुटाः ॥
मयूराः कलविङ्काश्च कपोती चैव तित्तिरी ।
क्रौञ्चां वाग्रीशसा आसन् कुररा: सारसा बकाः ॥
धृतराष्ट्री कलहंसान् धार्त्तराष्ट्रांश्च भामिनी ।
चक्रवाकाश्च विहगान् सश्येनानौदकान् द्विजान् ॥
अन्यानपि द्विजान् जज्ञे पुत्रपौत्राननन्तकान्" ॥

इत्यग्निपुराणे काश्यपीयवंशः ॥ (महादेवः । यथा, महाभारते १३ । शिवनामकीर्त्तने । १७।६६ ।

"पक्षी च पक्षरूपश्च अतिदीप्तो विराम्पतिः" ॥)

पक्ष्णुः, त्रि, पाककर्त्ता । पच् + "स्नात्व्याख्यादि-पचपरिव्रजः क्नुः" । इति क्नुप्रत्ययनिष्पन्नः । इति सुग्धबोधव्याकरणम् ॥

पक्ष्म, [न्] क्ली, (पक्ष्यते परिरक्ष्यते आतपतापा-दिकमनेन । पच् + करणे मनिन् ।) अक्षिलोम । नेत्रच्छदरोम । (यथा, भागवते । ३ । १ । ३६ ।

"यमायुतस्त्रित् तनयौ पृथायाः
पार्थैर्वृतौ पक्ष्मभिरच्चिणीव" ॥)

किञ्जल्कः । केशरः । तन्त्वादेरणीयान् । सूचादे-रल्पभागः । इत्यमरभरतौ ॥ गरुत् । पक्षः । इत्यमरमाला ॥

पङ्कः, पुं, क्ली, (पच्यते व्याप्यते क्लिद्यते वानेन । पच् + घञ् कुत्वं च ।) कर्द्दमः । पाँक् इति भाषा । (यथा, हितोपदेशे । १ । ६२ ।

"कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।
दृढबाणेन संग्राप्तः पथिकः संस्तुतो यथा" ॥

पच्यते व्याप्तीक्रियते दुःखमनेन । पचि विस्तारे व्याप्तीकरणे च । पचधातोरिदित्वात् नुम् । "दल-क्षेति" । ३ । ३ । १२१ । करणे घञ् तसो दित्वात् चस्य कुत्वम् ।) पापम् । इत्यमरः । १ । ४ । २३ ॥ (यथा, अमरुके । ६ । "व्यङ्गा-करे वपुषि कङ्कादिरूपुषि कङ्कादिपक्षिविषये त्वं कामगामयसि किं कारणं हृदय ! पङ्कारि-

नेहि गिरिजाम्।") पूर्व्वस्य गुणाः। पित्तास्रदाहनाशित्वम्। भग्नक्षयहितत्वम्। हिमत्वञ्च। इति राजवल्लभः॥ श्लेष्मलत्वम्। सरत्वञ्च। इति भावप्रकाशः॥

पङ्कर्व्वटः, पुं. (पङ्केषु कर्व्वटो मनोहरः।) जलशुक्तपद्मम्। यथा,—

"चुलुको घनजम्बाले दलाटो पङ्कर्व्वटः"।
इति त्रिकाण्डशेषः॥

पङ्कीरः, पुं, (पङ्कप्रियः कीरः पक्षिविशेषः।) कीर्याख्यपक्षी। इति त्रिकाण्डशेषः॥ (कादाखोंचा इति भाषा॥)

पङ्कक्रीड़ः, पुं, (पङ्के पङ्केन वा क्रीड़ति यः। पङ्क+क्रीड़+अच्।) शूकरः। इति कश्चित्। कर्द्दमखेलके, त्रि॥

पङ्कगड़कः, पुं, (पङ्के स्थितो गड़कः।) मत्स्यविशेषः। पाँकाल इति भाषा। तत्पर्य्यायः। वल्ली २। इति त्रिकाण्डशेषः॥

पङ्कगतिः, स्त्री, (पङ्के गतिरस्य।) पङ्कगड़कमत्स्यः। इति शब्दमाला॥

पङ्कग्राहः, पुं, (पङ्केस्थितो ग्राहः जलजन्तुभेदः।) मकरः। इति हारावली॥

पङ्कज, क्ली. (पङ्के पङ्कात् वा जायते इति। पङ्क+जन+कर्त्तरि+डः।) पद्मम्। इति राजनिर्घण्टः॥ (यथा रघुः। ३। ८।

"तिरस्कार भ्रमराभिलीनयोः
सुजातयोः पङ्कजकोषयोः श्रियम्"॥

अयं हि योगरूढ़शब्दः। यदुक्तम्।

"रूढ़ा गवादयः प्रोक्ता यौगिकाः पाचकादयः।
योगरूढ़ास्तु विज्ञेयाः पङ्कजाद्या मनीषिभिः"॥)

पङ्कजन्मन्, [न्] क्ली. (पङ्के जन्म यस्य।) पद्मम्। इति त्रिकाण्डशेषः॥

पङ्कजिनी, स्त्री, (पङ्कजानि सन्त्यस्याम्। "पुष्करादिभ्यो देशे"। ५। २। १३५। इति इनिः।) पद्माकरः।

(यथा, मार्कण्डेये। ७५। २४।

"तस्यर्त्तस्य तु या कान्तिर्जाता पङ्कजिनीसरः"॥)

पद्मसमूहः। इति रत्नमाला हेमचन्द्रश्च॥

पङ्कयः, पुं, (पङ्के मांसादिनिमित्तके पापाचारकर्म्मणि कयः कलहो यस्य सः। पृषोदरादित्वात् साधुः।) पक्षयः। शूकरादयः। इति शब्दरत्नावली॥

पङ्कप्रभा, स्त्री, (पङ्कस्य प्रभा प्रकाशो यस्याम्।) कर्द्दमयुक्तनरकविशेषः। इति हेमचन्द्रः॥

पङ्कमण्डूकः, पुं, (पङ्के मण्डूक इव) शम्बूकः। इति हारावली॥

पङ्करुट्, [ह्] क्ली, (पङ्के रोहतीति। पङ्क+रुह+क्विप्।) पद्मम्। इति राजनिर्घण्टः॥

पङ्करुहं, क्ली. (पङ्के रोहतीति। पङ्क+रुह+"इगुपधज्ञाप्रीकिरः कः"। ३। १। १३५। इति कः।) पद्मम्। इति राजनिर्घण्टः॥

पङ्कवासः, पुं, (पङ्के वासो यस्य सः।) कर्कटः। इति राजनिर्घण्टः॥ (मत्स्यादयोऽप्यत्र॥)

पङ्क्तिः, स्त्री, (पङ्क्तौ क्षिप्ता या शुक्तिः।) दुर्नामा। इति हारावली॥ झिनुक् इति भाषा॥

पङ्क्तिशूरः, पुं, (पङ्क्तौ शूरश्च इव।) शृगालकः। इति त्रिकाण्डशेषः॥

पङ्क्तिरः, पुं, (पङ्क्तिमृच्छति पङ्क्तिं प्राप्य वर्द्धते इति यावत्। पङ्क्ति+ऋह+उपपदे "कर्म्मण्यण्"। ३। २। १। इति अण्।) शैवलः। सेतुः। सोपानम्। जलकुक्कुरः। इति मेदिनी॥

पङ्क्तिलः, त्रि, (पङ्क्तोऽस्यस्मिन्। "लोमादिपामादिपिच्छादिभ्यः शनेलचः"। ५। २। १००। इति इलच्।) सकर्द्दमः। तत्पर्य्यायः। सजम्बालः २। इत्यमरः। २। १। १०॥ पङ्क्तियुक्तः ३। इति शब्दरत्नावली॥ कर्द्दमान्वितः ४। इति जटाधरः॥ (लक्षणया व्याप्त्यर्थेऽपि। यथा महाभारते ८ पर्व्वणि। "मांसमज्जास्थिपङ्क्तिला मही"॥)

पङ्क्तेज, क्ली, (पङ्क्तौ जायते इति। "सप्तम्या जनेर्डः"। ३। २। ९७। इति डः। "तत्पुरुषे कृतीति"। ६। ३। १४। इति सप्तम्या अलुक्।) पद्मम्। इति त्रिकाण्डशेषः॥

पङ्क्तेरुहं, क्ली, (पङ्क्तेरोहतीति। पङ्क्ति+रुह+"इगुपधेति"। ३। १। १३५। इति कः। "तत्पुरुषे कृति बहुलम्"। ६। ३। १४। इति सप्तम्या अलुक्।) पद्मम्। इत्यमरः॥ १। १०। ४०॥ (यथा, भागवते। ७। १५। ६८।

"यत्पादपङ्कजरुहसेवया भवानहारयीन्निर्जितदिग्गजः क्रतून्"॥) सारसपक्षिणि, पुं॥

पङ्क्तिः, स्त्री, (पठ्यते यत्क्रीक्रियते श्रेणीविशेषेर्ज्जेति यावत्। पचि+क्तक्तीकरणे+भावे+क्तिन्। इदित्वान्नुम्। यद्वा, पञ्चयति विस्तारयति जातिसंस्थानविशेषमिति। पचि+विस्तारे+कर्त्तरि+क्तिच्।) सजातीयसंस्थानविशेषः, शारि इति पाँति इति च भाषा। तत्पर्य्यायः। वीथी २ आलिः ३ आवलिः ४ श्रेणी ५। इत्यमरः। २। ४। ४॥ वीथिः ६ आली ७ आवली ८ पङ्क्तौ ९ श्रेणिः १०। इति भरतः॥ शरणिः ११ सन्ततिः १२। इति जटाधरः॥ विश्लोकी १३ पालिः १४ पाली १५ वीथिका १६। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। ४३। ३६।

'विलोक्या विशदा चैषा फलपङ्क्तिः सुभीषणा'॥)

पङ्क्तिचरपादच्छन्दोविशेषः। तस्य लक्षणं यथा।

"भ्गौगिति पङ्क्तिः"॥१॥ उदाहरणं यथा,—

"कृष्णसनाथा तर्णकपङ्क्तिः।
यासुनकच्छे चारु चचार"॥

इति छन्दोमञ्जरी॥ (पङ्क्तिच्छन्दस उत्पत्तिस्थानं यथा, भागवते। ३। १२। ४६।

"मच्छाया पङ्क्तिरुत्पन्ना दृष्टतो प्राग्यतोऽभवत्"॥

पञ्चकद्वयं परिमाणमस्य इति। "पङ्क्तिविंशतित्रिंशदिति"। ५। १। ५६। निपातनात् प्रकृतेः पङ्क्तिशब्दस्य टिलोपः तिप्रत्ययश्च।) दशाक्षरपादच्छन्दः। दशसंख्या। इति मेदिनी॥ (यथा, रघुः। १२। ६६।

"तेन मन्त्रप्रयुक्तेन निमेषार्द्धादपातयत्।
स रावणशिरःपङ्क्तिमज्ञातव्रणवेदनाम्"॥)

पृथिवी। इति शब्दमाला॥ गौरवम्। पाकः इति हेमचन्द्रः॥ *॥

अथ पङ्क्तिसाङ्कर्य्यदोषाः यथा,—

"न संवसेच्च पतितैर्न चाण्डालैर्न पुक्कसैः।
न म्लेच्छैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः॥
एकश्राद्धाशनं पङ्क्तिभोजनप्रान्नमिश्रणम्।
याजनाध्यापने योनिस्तथैव सह भोजनम्॥
सहाध्यायस्तु दशमः सहयाजनमेव च।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसञ्ज्ञिताः॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणां।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यपरिवर्ज्जयेत्"॥*॥

पङ्क्तिसाङ्कर्य्यदोषनिवारणोपाया यथा,—

"एकपङ्क्त्युपविष्टा ये न स्पृशन्ति परस्परम्।
भस्मना क्रममर्य्यादा न तेषां सङ्करो भवेत्॥
अग्निना भस्मना चैव षड्भिः पङ्क्तिर्विभिद्यते"॥

इति कूर्म्मे १५ अध्यायः॥

पङ्क्तिग्रीवः, पुं, (पङ्क्तिः दशषड्रेखिका ग्रीवा यस्य।) रावणः। इति शब्दरत्नावली॥

पङ्क्तिचरः, पुं, (पङ्क्त्या श्रेणीबद्धः सन् चरतीति। पङ्क्ति+चर+टः।) कुररपक्षी। इति राजनिर्घण्टः॥

पङ्क्तिदूषकः, पुं. (श्राद्धकाले भोजनार्थमुपविष्टानां व्रतस्नातानां ब्राह्मणानां पङ्क्तिं श्रेणीं दूषयति यः। पङ्क्ति+दूष+कर्त्तरि ण्वुल्।) अपाङ्क्तेयः। श्राद्धभोजनानर्हब्राह्मणः। यथा,—

"अपाङ्क्तेयास्तु ये राजन्! कीर्त्तयिष्यामि तान् शृणु।
कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः॥
ग्रामप्रेष्यो वार्द्धुषिको गायनः सर्व्वविक्रयी।
अगारदाही गरदः कुण्डाशी सोमविक्रयी॥
सामुद्रिको राजदूतस्तैलिकः कूटकारकः।
पित्रा विवदमानश्च यश्च चोपपतिर्गृहे॥
अभिशस्तस्तथा स्तेनः क्लिष्यं यश्चोपजीवति।
पर्व्वकारश्च सूची च मित्रध्रुक् पारदारिकः॥
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च।
अभिक्ष्णं यः परिक्रामेत् यः शुना दष्ट एव च॥
परिवित्तिस्तु यश्च स्याद्दुर्म्मा गुरुतल्पगः।
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति॥
ईदृशा ब्राह्मणा ये च अपाङ्क्तेयास्तु ते मताः।
रक्षांसि गच्छते हव्यं यदेषान्तु प्रदीयते"॥ *॥

"श्राद्धे भुक्ता महाराज! दुश्चर्म्मा गुरुतल्पगः।
श्राद्धं नाश्नाति तस्य पितरोऽपि न भुञ्जते॥
सोमविक्रयिणे दत्तं विड्भातुल्यं भवेन्नृप!
भिषजे श्लेष्मितसमं नष्टं देवलके तथा॥
अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम्।
बहुवाशिजके दत्तं नेह नामुत्र तद्भवेत्॥
भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे।
ये तु धर्म्मैरपेतेषु चरित्रापगतेषु च॥
हव्यं कव्यं प्रयच्छन्ति तेषां तत् परिनश्यति।
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः॥
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम्।

एतान्विद्धि महाबाहो अपाङ्क्तेयान् द्विजाधमान्।
शूद्राणामुपदेशस्तु ये कुर्व्वन्त्यल्पबुद्धयः॥
वर्षं काणः शतं खञ्जः स्त्री यावत् प्रपश्यति।
पङ्क्त्यां समुपविशायां तावद्वयते नृप!॥
यदेहितश्चिरा शुङ्क्ते यङ्क्ते दक्षिणामुखः।
सोपानत्कश्च यङ्क्ते सर्व्वं विद्यात्तदासुरम्॥
अश्नुयते च यद्दत्तं यच्च श्रद्धादिवर्ज्जितम्।
सर्व्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत्॥
यानश्च पङ्क्तिदूषास्तानावेदेरन् कथञ्चन॥"*॥
"तस्मात् परिहृते दद्यात्तिलांश्चाग्नौ विकीरयेत्।
तिलैर्विरहितं श्राद्धं कृतं क्रोधवशेन च॥
यत्तुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः।
अपाङ्क्तेयानतः पङ्क्त्यां भुञ्जानो नानु पश्यति।
तावत् फलाद्भ्रंशयति दातारं तस्य वानिशम्॥"
इति पाद्मे स्वर्गखण्डे ३५ अध्यायः॥

पङ्क्तिपावनः, पुं, (पङ्क्तिं श्राद्धोपलक्षितं भोजनायोपविष्टानां वेदविद्याविशारदानां ब्राह्मणानां श्रेणीं पुनाति पावयति वा खोपवेशनेनेति। पङ्क्ति+पावि+ल्युः।) श्रेणिप्रविचकर्त्ता। श्राद्धभोजनार्हब्राह्मणः। यथा,—
"इमे हि मनुजश्रेष्ठ! विज्ञेयाः पङ्क्तिपावनाः।
विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व्व एव हि॥
सदाचारपराश्चैव विज्ञेयाः पङ्क्तिपावनाः।
मातापित्रोर्यश्च वश्यः श्रोत्रियो दश पूरुषः॥
ऋतुकालाभिगामी च धर्म्मपत्नीषु यः सदा।
वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत॥
अथर्व्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः।
सत्यवादी धर्म्मशीलः स्वकर्म्मनिरतश्च यः॥
ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः।
मखेषु च सभस्तेषु भवन्त्यवभृथप्लुताः॥
अक्रोधना ह्यचपलाः शान्ता दान्ता जितेन्द्रियाः।
सर्व्वभूतहिता ये च श्राद्धेष्वेतान् निमन्त्रयेत्॥
एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः।
यतयो मोक्षधर्म्मज्ञा योगाः सुचरितव्रताः॥
ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान्।
ये च भाष्यविदः केचिद्ये च व्याकरणे रताः॥
अधीयते पुराणं ये धर्म्मशास्त्राणि चाप्युत।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः॥
उपपन्नो गुरुकुले सत्यवादी सहस्रदः।
ऋग्यजुः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च॥
यावदेते प्रपश्यन्ति पङ्क्त्यां तावत् पुनन्ति च।
ततो हि पावनात् पङ्क्त्या उच्यन्ते पङ्क्तिपावनाः॥
अनृत्विगनुपाध्यायः स चेदध्यासनं व्रजेत्।
ऋत्विगभिरनुज्ञातः पङ्क्त्या हरति दुष्कृतम्॥
अथ चेद्वेदवित् सर्व्वैः पङ्क्तिदोषैर्व्विवर्ज्जितः।
न च स्यात् पतितो राजन्! पङ्क्तिपावन उच्यते॥"
इति पाद्मे स्वर्गखण्डे ३५ अध्यायः॥
(पङ्क्त्यर्थं हस्यः। यथाह हारीतः।
"पवनः पावनस्तेषां यस्य पञ्चाग्नयो गृहे।
सायं प्रातः प्रदीप्यन्ते स विप्रः पङ्क्तिपावनः॥")

पङ्क्तिरथः, पुं, (पङ्क्तिषु दशसु दिक्षु गतो रथो यस्य।) दशरथराजः। इति शब्दरत्नावली॥

तथा च।
"अयोध्यायां महाराजः पुरा पङ्क्तिरथो बली।
तस्यात्मजो रामचन्द्रः सर्व्वशूरशिरोमणिः॥"
इति पाद्मे पातालखण्डम्॥ (तथा, रघुः।६।७४।
"नृपतेः प्रतिबिम्बमेव तत्
कृतवान् पङ्क्तिरथो विलक्ष्य यत्॥")

पङ्क्तिबीजः, पुं, (पङ्क्तिभूतानि बीजानि यस्य सः।) वर्ब्बरवृक्षः। इति राजनिर्घण्टः॥

पङ्गुः, पुं, (खञ्जति गतिवैकल्यं प्राप्नोतीति। खञ्जि गतिवैकल्ये। "बाहुलकात् कुः। खञ्जयोः पगौ नुमागमश्च।" उणा। १।३७। इति पगौ नुमागमश्च। अस्य कक्षाया अत्युच्चतया बहुकालेन राशिभागादिभोगात् मन्दगतित्वादस्य तथात्वम्।) शनैश्चरः। इति शब्दमाला॥ (परिव्राट्। यथोक्तं चिन्तामणौ।
"भिक्षार्थं गमनं यस्य विघ्नसूचकरणाय च।
योजनान्न परं याति सर्व्वथा पङ्गुरेव सः॥")

पङ्गुः, त्रि, (खञ्जि गतिवैकल्ये। बाहुलकात् कुः। खस्य पत्वे जसा गादेशः नुम् च। उणा १।३७।) जङ्घावैकल्येन चलनाक्षमः। तत्पर्य्यायः। श्रोणः २। इत्यमरः।२।६।४८॥ जङ्घाहीनः३। इति शब्दरत्नावली॥ (यथा, महाभारते २।५।१२५।
"कचिदन्धांश्च मूकांश्च पङ्गून् व्यङ्गानबान्धवान्।
पितेव पासि धर्म्मज्ञ! तथा प्रव्रजितानपि॥"
यानहरणेनैव लोकः पङ्गुर्भवति। यथा, मार्कण्डेये। १५।३१।
"पुण्यापचृद्दरिद्रस्य पङ्गुर्यानापचृन्नरः॥")
अस्य लक्षणं खञ्जशब्दे द्रष्टव्यम्॥

पङ्गुलः, पुं, सितकाचाभघोटकः। इति हेमचन्द्रः॥

पङ्गुल्यहारिणी, स्त्री, (सेवनेन पङ्गुत्वं पङ्गुत्वं हरति या। पङ्गुल्य+हृ+णिनि+ङीप्।) शिग्रुवृक्षः। इति राजनिर्घण्टः॥

पच, इ क ततौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्। इदित्।) ततिरिह विस्तारवचनम्। इ क, पक्ष्यति धीरो यत्स्यार्थम्। इति दुर्गादासः॥ (यथा, गीतगोविन्दे। १०। १३।
"वपयति वृथा मौनं तन्वि! प्रपञ्चय पञ्चमम्।
तरुणि! मधुरालापैस्तापं विनोदय दृष्टिभिः॥")

पच, इ ड वक्तीकारे। (भ्वां-आत्मं-सकं-सेट्।) इ, कर्म्मणि पच्यते। ड, पचते स्वगुणं भिक्षुकः। इति दुर्गादासः॥

पच, ड औ वक्तीकारे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-अनिट्।) औ, पक्ता। ड, पचते स्वगुणं भिक्षुकः। इति दुर्गादासः॥

पच, डु ञ औ घ पाके। इति कविकल्पद्रुमः॥ (भ्वां-उभं-द्विकं-अनिट्।) पाको विक्लित्यनुकूलव्यापारः। डु, पक्तिमम्। ञ, पचति पचते तण्डुलानोदनं लोकः। औ, पक्ता। घ, पच्या। इति दुर्गादासः॥

पचः, त्रि, पचति यः। (पच्+"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।"३।१।१३४। इति अच्।) पाककर्त्ता। इति व्याकरणम्॥ स्वार्थे कनि पचकश्च॥

पचतः, पुं, (पचतीति। "भृञ्जिधारिसहितपिदम्बिभ्यस्तच्।" उणा।३।११०। इति अतच्।) सूर्य्यः। अग्निः। इन्द्रः। इत्युणादिकोषः॥ (परिपक्वे, त्रि। यथा, ऋग्वेदे। १।६१।७। "पचतं सहीयान् विध्यइराहं तिरो अद्रिमस्ता॥")

पचतिकल्पं क्ली, (ईषदूनं पचतीति तिङन्तात् कल्पप्।) ईषदूनस्य पाकस्य कर्त्ता। इति व्याकरणम्॥

पचत्पुटः, पुं, (पचत् पुटमस्य।) सूर्य्यमणिवृक्षः। इति शब्दचन्द्रिका॥

पचन्, [त्] त्रि, (पचति यः। "लटः शतृशानचौ।" २।२।१२४। इति शतृप्रत्ययः।) पाककर्त्ता। इति व्याकरणम्॥

पचनं, क्ली, (पच्यते इति। पच्+भावे ल्युट्।) पाकः। (यथा, भागवते। ३।२६।४०।
"द्योतनं पचनं पानमदनं हिममर्द्दनम्॥"
पच्यतेऽनेन इति पचेः करणे ल्युट्। पाकसाधनम्। यथा, ऋग्वेदे। १।१६२।६। "ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु॥")

पचनः, पुं, (पचत्यसौ इति। पच्+कर्त्तरि ल्युः।) अग्निः। इति शब्दचन्द्रिका॥ पाककर्त्तरि, त्रि॥

पचनी, स्त्री, (शुक्लमजीर्णादिकं पच्यतेऽनया। पच्+करणे ल्युट् स्त्रियां ङीप्।) वनवीजपूरकः। इति राजनिर्घण्टः॥

पचन्ती, स्त्री, (ओदनादीन् पचति या। पच्+शतृ+स्त्रियां ङीप्।) पाककर्त्री। इति व्याकरणम्॥

पचमानः, त्रि, (पचतेऽसौ इति। "लटः शतृशानचौ"। २।२।१२४। इति शानच्।) पाककर्त्ता। इति व्याकरणम्॥ (पुं, वह्निः॥)

पचम्पचा, स्त्री, (पचं पचं पचति। पचेः खश् ततो मुम्। स्त्रियां टाप्।) दारुहरिद्रा। इत्यमरः।२।४।१०२॥

पचा, स्त्री, (पच्यते इति पचेः क्विबादड् ततष्टाप्।) पाकः। इत्यमरः।३।२।८॥ (पचत्यसौ इति पचाद्यच् स्त्रियां टाप्। पाककर्त्री॥)

पचिः, पुं, (पचतीति। पच्+"सर्व्वधातुभ्यः इन्।" उणा। ४।११७। इति इन्।) अग्निः। इति त्रिकाण्डशेषः॥ पचनम्। इति संक्षिप्तसारव्याकरणम्॥

पचेलिमः, पुं, (पचत्यसौ इति। "पच एलिमच्।" उणा। ४।३७। इति एलिमच्।) सूर्य्यः। अग्निः। इत्युणादिकोषः॥ कर्त्तुरनायासेन स्वयं पक्वे, त्रि। (स्वयमेव पच्यते पचेः कर्म्मकर्त्तरि केलिमप्रत्ययः।) यथा, पचेलिमा, स्तण्डुलाः। इति सुग्धबोधव्याकरणम्॥ (यथा च

मनौ। ४।१७२। श्लोकस्य टीकायां कुल्लूकभट्टः। "यथा भूमिरप्रबीजमाचा तदेव प्रचुरपर्णेलिमफलबीहिस्तवकसम्बलिता न भवति॥")

पञ्चलुकः, पुं, (पञ्चत्योदनादीन्। पचो वाहुलकादेलुकः।) सूदः। पाचकः। इति त्रिकाण्डशेषः॥

पञ्चः, [स्] य, (वीप्सार्थे पादं पादमिति पद्भावः ततः शस्।) पादं पादम्। इति संक्षिप्तसारव्याकरणम्॥

पञ्चमानः, त्रि, (पञ्चत्यसौ इति। पच्+कर्म्मणि शानच्।) वर्त्तमानपचनकर्म्मताश्रयः। वर्त्तमानपाकविशिष्टतण्डुलादि। इति व्याकरणम्॥

पञ्ज, र रोधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्।) रोध आवरणम्। पञ्जरः। सौत्रधातुरयम्। इति दुर्गादासः॥

पञ्चः, पुं, (पद्भ्यां जातः। पद्+जन्+कर्त्तरि डः।) शूद्रः। इति हेमचन्द्रः॥ (शूद्रस्य पद्जातत्वसूक्तं श्रुतौ यथा,—

"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। उरू तदस्य यत् वैश्यः पद्भ्यां शूद्रो अजायत॥")

पञ्झटिका, स्त्री, छन्दोविशेषः। तल्लक्षणं यथा,

"प्रतिपदयमकितषोड़शमात्रा
नवमगुरुत्वविभूषितगात्रा।
पञ्झटिका पुनरत्र विवेकः
क्वापि न मध्यगुरुर्गण एकः॥"

उदाहरणं यथा,—

"तरलवतंसाश्लिष्टस्कन्ध-
स्खलतरपञ्झटिकाकटिबन्धः।
मौलिचपलशिखिचन्द्रकवृन्दः
कालियशिरसि ननर्त्त मुकुन्दः॥"

इति छन्दोमञ्जर्यां मात्रावृत्ताख्यः ५ स्तवकः॥
(तथा च भगवच्छङ्कराचार्य्यकृतमोहमुद्गरे ४।

"मा कुरु धनजनयौवनगर्व्वम्
हरति निमेषात् कालः सर्व्वम्।
मायामयमिदमखिलं हित्वा
ब्रह्मपदं प्रविशाशु विदित्वा॥"*॥)

क्षुद्रषट्पदिका। इति छन्दोमञ्जरीटीका॥

पञ्च, [न्] त्रि, संख्याविशेषः। पाँच इति भाषा। बहुवचनान्तोऽयम्। इत्युणादिकोषः॥ (यथा, मनुः। ११।१६५।

"पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम्॥")

तद्वाचकानि यथा। पाण्डवः १ शिवास्त्रम् २ इन्द्रियम् ३ स्वर्गः ४ व्रतानि ५ महापापम् ६ महाभूतम् ७ महाकायम् ८ महामखः ९ पुराणलक्षणम् १० अङ्गम् ११ प्राणाः १२ वर्गः १३ इन्द्रियार्थः १४ वाणः १५। इति कविकल्पलता॥ पञ्चसंख्याविशिष्टे, त्रि। यदुक्तम्। "संख्यासंख्ये ह्यादयश्च त्रिषु।" इत्यमरः। २।६।८३॥

पञ्चकं, त्रि, (पञ्चैव इति स्वार्थे कन्।) पञ्च। यथा, भाषापरिच्छेदे। ३३। "संख्यादिपञ्चकं कालदिग्भ्यः शब्दस्य ते च खे।" इति॥ (पञ्च संख्यापरिमाणमस्य। "तदस्य परिमाणम्।" ५।१।५७। इत्युणादौ "संख्यायाः संज्ञा संघसूत्राध्ययनेषु।" ५।१।५८। इति पञ्चसङ्ख्यापरिमिति संघार्थे कन् प्रत्ययः। धनिष्ठादि पञ्चनक्षत्रम्। यथाह चिन्तामणिः।

"अग्निचौरभयं रोगो राजपीड़ा धनक्षतिः।
संग्रहे लग्नकाष्ठानां क्षते वस्वादिपञ्चके॥"

पञ्चभिः क्रीतम्। "संख्याया अतिशदन्तायाः कन्।" ५।१।१२। इति कन्। पञ्चभिः क्रीते द्रव्यविशेषे॥)

पञ्चकपालः, पुं, पञ्चसु कपालेषु संस्कृतः पुरोडाशः। ("संस्कृतं भक्षाः।" ४।२।१६। इत्यण् ततो "द्विगोर्लुगनपत्ये।" ४।१।८८। इत्यणो लुक्।) स तु यज्ञविशेषः। यथा। "परा वा एष यज्ञं पशून् वपति योऽग्निमुद्वासयते पञ्चकपालः पुरोडाशो भवति।" इत्यादि यजुर्व्वेदीयश्रुतिः॥ (पञ्चानां कपालानां समाहारः। परनिपातः।) कपालपञ्चके, क्ली॥

पञ्चकर्म्म, [न्] क्ली, (पञ्चानां कर्म्मणां समाहारः।) पञ्चप्रकारशारीरिकचिकित्साविशेषः। यथा,—

"वमनं रेचनं नस्यं निरूहश्चानुवासनम्।
पञ्चकर्म्मेदमन्यच्च कर उत्क्षेपणादिकम्॥"

इति शब्दचन्द्रिका॥ (भाषापरिच्छेदोक्तानि पञ्चकर्म्माणि। यथा, तत्रैव ६।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च॥")

पञ्चकषायः, पुं, (पञ्चविधः कषायः। अथवा पञ्चानां वृक्षाणां कषायः वल्कलरसः। क्वचित्त्वयं बहुवचनान्तोऽपि दृश्यते। तत्र तु पञ्च च ते कषायाश्चेति एवमेव।) महाकल्याणीयपञ्चप्रकारकषायद्रव्यम्। यथा,—

"जम्ब्वाम्रपल्लिवाशोकं वकुलं वदरं तथा।
कषायाः पञ्च विज्ञेया देवाः प्रीतिकराः शुभाः॥"

इति दुर्गोत्सवपद्धतिः॥

पञ्चक्षत्यः, पुं, (पञ्चं विस्तृतं क्षत्यं शाखापल्लवादिकं यत्र।) पक्वपौड़वृक्षः। इति राजनिर्घण्टः॥ (क्ली, पञ्चं प्रपञ्चितं क्षत्यं कार्य्यं सृष्ट्यादिकम्। सृष्टिस्थितिध्वंसविधानानुग्रहात्मकं कार्य्यम् इति भावः। यथाह चिन्तामणिः।

"यस्मिन् सृष्टिस्थितिध्वंसविधानानुग्रहात्मकम्।
क्षत्यं पञ्चविधं शश्वद्वासते तं नुमः शिवम्॥")

पञ्चकोलं, क्ली, पाचनविशेषः। यथा,—

"पञ्चकोलं कणामूलं क्षणाचव्यामिनागरैः।"

इति शब्दचन्द्रिका॥ अस्य गुणाः।

"पञ्चकोलं रसे पाके कटुकं रुचिकृन्मतम्।
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत्।
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम्॥"

इति भावप्रकाशः॥ अपि च।

"पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम्।
दीपनीयः स्मृतो वर्गः कफानिलगदापहः॥"

इति चक्रपाणिदत्तः॥ (पञ्चकोलघृतसूक्तं चरके चिकित्सितस्थाने १८ अध्याये।

"पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः।
सक्षारैरर्द्धपलिकैर्घृतं सर्पिषः पचेत्॥
कल्कैर्द्विपञ्चमूलस्य सुलार्द्धस्य रसेन च।
दधिमण्डातकोपेतं तत्सर्पिर्जठरापहम्।
श्वयथुं वातविष्टम्भं गुल्मार्शांसि च नाशयेत्॥")

पञ्चकोषाः, पुं, (पञ्च च ते कोषाश्चेति।) कोषा इवात्माच्छादकत्वेन कोषाः। ते च पञ्चविधाः। यथा। अन्नविकारत्वात् स्थूलशरीरं अन्नमयकोषः १॥ पञ्चकर्म्मेन्द्रियसहितप्राणपञ्चकं प्राणमयकोषः २॥ पञ्चज्ञानेन्द्रियसहितं मनः मनोमयकोषः ३॥ पञ्चज्ञानेन्द्रियसहिता बुद्धिः विज्ञानमयकोषः ४॥ अहङ्कारात्मकोऽविद्यात्मको वा आनन्दमयकोषः ५॥ इति शिवगीतासु॥ * ॥ अपि च।

"पित्रसुक्तान्नजाद्यैर्य्याज्ञातोऽन्नेनैव वर्द्धते।
देहः सोऽन्नमयो नात्मा प्राक् चोर्द्ध्वं तदभावतः॥"

इत्यन्नमयकोषः १॥

"पूर्णो देहे बलं यच्चान्नाद्यानां यः प्रवर्त्तकः।
वायुः प्राणमयो नासावात्मा चैतन्यवर्জ্জनात्॥"

इति प्राणमयकोषः २॥

"अहन्तां ममतां देहे गृहादौ च करोति यः।
कामाद्यवस्थया भ्रान्तो नासावात्मा मनोमयः॥"

इति मनोमयकोषः ३॥

"लीना सुप्तौ वपुर्बोधे बाह्यार्थादानखायगा।
चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक्॥"

इति विज्ञानमयकोषः ४॥

"काचिदन्तर्मुखाकृत्तिरानन्दप्रतिबिम्बभाक्।
पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते॥
कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽप्ययम्॥"

इत्यानन्दमयकोषः ५॥ इति पञ्चदशी॥

पञ्चक्षारगणः, पुं, (पञ्चानां क्षाराणां गणः।) क्षारपञ्चकम्। पञ्चलवणम्। यथा,—

"क्षारैस्तु पञ्चभिः प्रोक्तः पञ्चक्षाराभिधो गणः।
काचसैन्धवसाम्बुद्रविट्सौवर्चलैः समैः॥
स्यात् पञ्चलवणं तच्च श्लेष्मोपेतं षड़ाङ्गयम्॥"

इति राजनिर्घण्टः॥

पञ्चखट्वं, क्ली स्त्री, (पञ्चानां खट्वानां समाहारः।) पञ्चखट्वाः समाहृताः। इति व्याकरणम्॥

पञ्चगव्ययोगः, पुं, (पञ्चानां गव्यो यत्र स एव योगः।) विदारी गन्धा वृहती वृश्चिकाली निदिग्धिका स्वदंष्ट्रा एता मिलिताः। इति राजनिर्घण्टः॥

पञ्चगवं, क्ली स्त्री, पञ्चानां गवां समाहारः॥ (समासे टच्।) पञ्चगावः समाहृताः। इति व्याकरणम्॥

पञ्चगवधनः, त्रि, पञ्च गावो धनं यस्य। इति सुग्धबोधव्याकरणम्॥

पञ्चगव्यं, क्ली, (गोर्विकारः गव्यम्। पञ्चगुणितं गव्यम्।) गोसम्बन्धिपञ्चप्रकारद्रव्यम्। (यथा, मनुः। ११।१६५।

"भक्ष्यभोज्यापहरणे यानशय्यासनस्य च।
पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम्॥")

पञ्चचू

तत्तु गोमयगोमूत्रदुग्धदधिघृतरूपम् । यथा,—
"पञ्चगव्यं दधिक्षीरघृतगोमूत्रगोमयैः ।" इति शब्दचन्द्रिका ॥ * ॥ तत्परिमाणं यथा,—
"पलमात्रं दुग्धभागं गोमूत्रं तावदिष्यते ।
घृतञ्च पलमात्रं स्यात् गोमयं तोलकत्रयम् ॥
दधि प्रस्तमात्रं स्यात् पञ्चगव्यमिदं स्मृतम् ।
अथवा पञ्चगव्यानां समानो भाग इष्यते ॥"
इति गौतमीयतन्त्रम् ॥ * ॥ अपि च ।
"गोशृङ्गद्विगुणं मूत्रं पयः स्यात्तच्चतुर्गुणम् ।
घृतं तद्द्विगुणं प्रोक्तं पञ्चगव्ये तथा दधि ॥" * ॥
तस्य पानफलं यथा,—
"पञ्चगव्येन पूतस्तु वाजिमेधफलं लभेत् ।
गव्यन्तु परमं मेध्यं गव्यादन्यन्न विद्यते ॥
सौम्ये मुहूर्त्ते संयुक्ते पञ्चगव्यन्तु यः पिबेत् ।
यावज्जीवकृतात् पापात् तत्क्षणादेव मुच्यते ॥"
गव्यानां देवप्रीतिकरत्वं यथा,—
"दधा हि विदधाः सर्व्वे क्षीरेण च महेश्वरः ।
घृतेन पावको नित्यं पायसेन पितामहः ॥
सकृद्दत्तेन प्रीयन्ते वर्षाणाञ्च त्रयोदश ।
नां दत्त्वा चैव प्रीत्वा च प्रेतो मेध्यस्तु जायते ॥"
इति वराहपुराणम् ॥ * ॥
तस्य विशेषो यथा,—
"पयः काञ्चनवर्णाया श्वेतवर्णोत्थगोमयम् ।
गोमूत्रं ताम्रवर्णाया नीलवर्णाभवं घृतम् ॥
दधि स्यात् कृष्णवर्णाया दर्भैौदकसमायुतम् ।
गोमूत्रमाषकाण्यष्टौ गोमयस्य चतुष्टयम् ॥
क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश उच्यते ।
घृतस्य माषकाः पञ्च पञ्चगव्यं मलापहम् ॥"
इति गारुड़े प्रायश्चित्तप्रकरणम् ॥
पञ्चगुः, त्रि, पञ्चभिर्गोभिः क्रीतः । इति सुग्धबोधव्याकरणे द्विगुसमासः ॥
पञ्चगुप्तः, पुं, (पञ्चानामिन्द्रियाणां चापल्यं गुप्तं यत्र । यद्वा पञ्चानां पदार्थानां गुप्तः गोपनं यत्र ।) चार्व्वाकदर्शनम् । (करौ चरणौ शिरश्चेति पञ्चाङ्गानि गुप्तानि अस्य ।) कच्छपः । इति मेदिनी ॥
पञ्चगुप्तिरसा, स्त्री, (पञ्चधा गुप्तौ रसोऽस्याः ।) सृक्का । इति राजनिर्घण्टः ॥
पञ्चचामरं, क्ली, षोड़शाक्षरपादच्छन्दोविशेषः । यथा,—
"प्रमाणिकापदद्वयं वदन्ति पञ्चचामरम् ॥"
इति छन्दोमञ्जरी ॥४॥(अस्योदाहरणमाह तत्रैव।
"सुरद्रुमूलमण्डपे विचित्ररत्ननिर्म्मिते
लसद्वितानभूषिते सलीलविभ्रमालसम् ॥
सुराङ्गनाभवल्लवीकरप्रपञ्चचामर-
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥")
पञ्चचीरः, पुं, (पञ्च चीराण्यस्य । बौद्धधर्म्मावलम्बि-जिनभेदः। पञ्च चीराणि स्वरभेदा अस्य।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥
पञ्चचूड़ा, स्त्री, (पञ्चसङ्काः चूड़ाः शिरोरत्नानि यस्याः ।) अप्सरोविशेषः । इति पुराणम् ॥ (यथा, रामायणे । ६ । ६२ । ७१ ।

पञ्चत

"उर्व्वशी मेनका रम्भा पञ्चचूड़ा तिलोत्तमा ।
उपानृत्यंस्तु काकुत्स्थं प्रहृष्टा रक्षसो वधात् ॥")
पञ्चजनः, पुं, (पञ्चभिर्भूतैर्जन्यतेऽसौ । पञ्च + जन् + कर्म्मणि घञ् । "जनिवध्योश्च" ।७।३।३५। इति न वृद्धिः ।) पुरुषः । इत्यमरः । २ । ६ । १ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ३५५ ।
"सङ्गावश्राद्धिका देवस्तेन श्रीगुन्दलाञ्छिताः ।
पञ्च पञ्चजनेन्द्रेण पुरे तस्मिन् निवेशिताः ॥")
दैत्यविशेषः । स च संह्लादस्य कृतौ पत्न्यां जातः । (यथा, श्रीभागवते । ६ । १८ । १४ ।
"संह्लादस्य कृतिर्भार्य्याऽसूत पञ्चजनं ततः ॥"
अपरो दैत्यभेदः । श्रीकृष्णः एनं हत्वा सान्दीपनिसुतये अस्य मृतं पुत्रं गुरुदक्षिणास्वरूपं ददौ । यथा, भागवते । ३ । ३ । २ ।
"सान्दीपनेः सकृत् प्रोक्तं ब्रह्माधीत्य सविस्तरम् ।
तस्मै प्रादात् वरं पुत्रं मृतं पञ्चजनोदरात् ॥")
अस्यास्या पाञ्चजन्यनामा शङ्खो जातः । स च श्रीकृष्णस्य । यथा,—
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ॥"
इत्यादि श्रीभगवद्गीतायाम् । १ । १५ ॥ (प्रजापतिः । यथा, भागवते । ६ । ४ । ५१ ।
"एषा पञ्चजनस्याङ्ग ! दुहिता वै प्रजापतेः ।
असिक्नी नाम पत्नीत्वे प्रजेश ! प्रतिगृह्यताम् ॥"
सगरराजपुत्रः । यथा, हरिवंशे । १५ । ६ ।
"केशिन्यभूत सगरादसमञ्जसमात्मजम् ।
राजा पञ्चजनो नाम बभूव स महाबलः ॥"
गन्धर्व्वाः पितरो देवा असुरा रक्षांसि पञ्चजनपदवाच्यानि भवन्ति । इति चिन्तामणिः ॥)
पञ्चजनी, स्त्री, पञ्चानां जनानां समाहारः ततो ङीप् । इति व्याकरणम् ॥ (विश्वरूपकन्या । यथा, भागवते । ५ । ७ । १ । "तदनुग्रासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥")
पञ्चजनीनः, पुं, (पञ्चसु जनेषु आप्तः । दिक्संख्ये संज्ञायामिति समासः । पञ्चजने हितम् । पञ्चजनाट्टसञ्ज्ञानमिति खः। पा । ५ । १ । ६। वार्त्तिके ।) भक्तः । इति हलायुधः ॥ पञ्चजनसम्बन्धिनि पञ्चजन्याः प्रभौ च त्रि ॥
पञ्चज्ञानः, पुं, (पञ्चानां पदार्थानां ज्ञानमस्य ।) बुद्धः । इति हेमचन्द्रः ॥
पञ्चतत्त्वं, क्ली स्त्री, पञ्चानां तत्त्वानां समाहारः । इति व्याकरणम् ॥
पञ्चतत्त्वं, क्ली, (पञ्चानां तत्त्वानां समाहारः ।) पञ्चभूतम् । इति स्वरोदयः ॥ पञ्चमकारः । मद्यमांसमत्स्यमुद्रामैथुनरूपम् । यथा,—
"मद्यं मांसं तथा मत्स्यं मुद्रां मैथुनमेव च ।
पञ्चतत्त्वमिदं देवि ! निर्व्वाणमुक्तिहेतवे ॥
मकारपञ्चकं देवि ! देवानामपि दुर्लभम् ॥"
इति कैवल्यतन्त्रे प्रथमपटलः ॥ वैष्णवानां यथा,—
"तत्त्वज्ञानमिदं प्रोक्तं वैष्णवे शृणु यत्नतः ।
गुरुतत्त्वं मन्त्रतत्त्वं मनस्तत्त्वं सुरेश्वरि ! ॥
देवतत्त्वं ध्यानतत्त्वं पञ्चतत्त्वं वरानने ! ।
तत्रादौ श्रीगुरोस्तत्त्वं स्नेहाद्वक्ष्यामि पार्व्वति ! ॥

पञ्चती

सतैलं वर्त्तिकायुक्तं देहस्थं ब्रह्मतेजसम् ।
गुरुणा मन्त्रदानेन तत्स्वरूपं दीपितं भवेत् ॥
देवताया शरीरं हि मन्त्रादुत्पद्यते ध्रुवम् ।
अत एव हि तस्यात्मा देवरूपो न संशयः ॥
ईश्वरस्य तु यद्वीर्य्यं तदेव अक्षयात्मकम् ।
तेन वर्णात्मकं देहं जन्तोरेव न संशयः ॥
मन्त्रवर्णे सर्व्ववर्णमयास्ते परमेश्वरि ! ।
वर्णतत्त्वमिदं देवि ! सर्व्वस्वं मम यद्भवेत् ॥
स्वयं देवो न चान्योऽस्मि निर्म्मलो देवरूपकः ।
सर्व्वत्र देवतां ध्यायेत् तृणगुल्मलतादिषु ॥
ध्यानेन लभते सर्व्वं ध्यानेन विष्णुरूपकः ।
ध्यानेन सिद्धिमाप्नोति विना ध्यानं न सिध्यति ॥
इति ते कथितं तत्त्वं वैष्णवस्य सुरेश्वरि ! ।
यज्ज्ञानादमरत्वञ्च विष्णुरूपो भवेन्नरः ॥
ते नरा नहि गच्छन्ति कदाचिद्यममन्दिरम् ॥"
इति निर्व्वाणतन्त्रे १२ पटलः ॥
पञ्चतपाः, [स्] त्रि, (अग्न्यादिभिः पञ्चभिस्तेजःपदार्थैस्तपति यः । पञ्च + तप् + असुन् ।) अग्निचतुष्टयसूर्य्यपञ्चकसाध्यतपोविशिष्टः । यथा,
"तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ।
पञ्चमः पञ्चतपसस्तपनो जातवेदसाम् ॥"
इति माघे । २ । ५१ ॥
पञ्चतयं, त्रि, (पञ्च अवयवा यस्य । अवयवे तयप् ।) पञ्चावयवम् । इति व्याकरणम् ॥
पञ्चतन्मात्रं, क्ली, (पञ्चगुणितं शब्दादिभूतसूक्ष्मात्मकं तन्मात्रम् ।) तामसाहङ्कारोत्पन्नमहाभूतोपादानकारणशब्दस्पर्शरूपरसगन्धाः। तदाश्रयद्रव्याणि च । इति सांख्यभाष्यम् ॥
पञ्चता, स्त्री, (पञ्चानां भूतानां भावः। पाञ्चभौतिकस्य शरीरस्य पञ्चधाभावे आरम्भकाणां भूतानां तद्भावापत्तौ सत्यां औपचारिकत्वात् ।) मृत्युः । इत्यमरः । २ । ८ । ११६ ॥ (यथा, भागवते । ७ । ८ । ५२ ।
"स तु जनपरितापं ततक्षतं जानता ते ! ।
नरहर उपनीतः पञ्चतां पञ्चविंश ॥")
देहारम्भकाणां पृथिव्यादिपञ्चमहाभूतानां स्वांशसंक्रमणात् पृथक्त्वम् । इति भरतः ॥ पञ्चभावः । इति मेदिनी ॥ (यथा, मनुः । ८ । १५१ ।
"धान्यं सदेवं वाह्यं नातिक्रामति पञ्चताम् ॥")
पञ्चतिक्तं, क्ली, (पञ्चगुणितं तिक्तम् ।) तिक्तद्रव्यपञ्चकम् । यथा । निम्बाम्बताम्बपटोलनिदिग्धिकाः । इत्यादि चक्रपाणिदत्तः ॥
पञ्चतीर्थी, स्त्री, (पञ्चानां तीर्थानां समाहारः । ङीप् ।) तीर्थपञ्चकम् । यथा । "विधुवद्दिवसे प्राप्ते पञ्चतीर्थीविधानतः ।" इति तिथितत्त्वम् । पञ्चतीर्थान्याह । (तानि च भिन्नदेशे भिन्नरूपाणि, तत्र काशीस्थानि । यथा, काशीखण्डे । १०० । ३६—४० ।
"ज्ञानवापीसुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं ततोऽभ्यर्च्य मङ्गलेशं ततः ॥
ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ॥")

पुरुषोत्तमस्थानि यथा,—
"मार्कण्डेये वटे कृष्णे रौहिणेये महोदधौ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते॥"
इति तीर्थतत्त्वम्॥*॥ अपि च। नाना-स्थानस्थानि यथा,—
"पृथिव्यां यानि तीर्थानि सर्व्वारण्येवाभिषेचनात्।
तत्पञ्चतीर्थस्नानेन समं नास्त्यत्र संशयः॥
एकादश्याञ्च विश्रान्तौ द्वादश्यां शौकरे तथा।
त्रयोदश्यां नैमिषे च प्रयागे च चतुर्दशी॥
कार्त्तिक्यां पुष्करे चैव कार्त्तिकस्य सितासिते।
कालेष्वेषु नरः स्नात्वा सर्व्वं पापं व्यपोहति॥"
इति वराहपुराणम्॥

पञ्चत्वं, क्ली, (पञ्चानां त्वित्यादिभूतानां भावः।) मरणम्। पञ्चानां भावः। इति हेमचन्द्रः॥ ("पञ्चधासम्भृतः कायो यदि पञ्चत्वमागतः।
पञ्चभिः स्वशरीरोत्थैस्तत्र का परिवेदना"॥
तथा, भागवते। १।१५।४१।
"स्त्यावपानं सोत्सर्गं तं पञ्चत्वे ह्यजोहवीत्॥")

पञ्चदश्यः, त्रि, पञ्चदशानां पूरणः। (पूरणे डट्। पञ्चाधिका दश यत्र वा।) पोनेर इत्यादि भाषा। तत्संख्यामात्रवाचिषु नान्तबहुवचनान्तोऽयम्। इति व्याकरणम्॥ तद्वाचकशब्दः। (यथा, अथर्ववेदे। ११।१।१६। "पितामहाः पितरः प्रजोपजाहं पक्वा पञ्चदश्यस्ते असि॥")
तिथिः। इति कविकल्पलता॥

पञ्चदशी, स्त्री, (पञ्चदशानां पूरणी। ङीप्।) पूर्णिमा। अमावास्या। इति मेदिनी॥ (यथाह याज्ञवल्क्यः। १।१४६।
"पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके।
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च॥"
(पञ्चदशप्रकरणानि सन्त्यस्याम्।) श्रीमद्भारती-तीर्थविद्यारण्यमुनीश्वरकृतो वेदान्तग्रन्थविशेषः॥

पञ्चदीर्घं, क्ली, (शरीरस्य स्तुतिशास्त्रोक्तलक्षणकपञ्चस्थानं दीर्घं पञ्चसु अवयवेषु दीर्घलक्षणकमित्यर्थः।) शरीरपञ्चावयवलक्षणविशेषः। यथा,—
"बाहू नेत्रद्वयं कुक्षिर्हनू नासे तथैव च।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते॥"
इति सामुद्रकम्॥

पञ्चधा, अ, (पञ्चन्+ "संख्याया विधार्थे धा।" ५।३।४२। इति धा।) पञ्चप्रकारम्। इति व्याकरणम्॥ (यथा, भागवते। ८।१६।३७।
"धर्म्माय यशसेऽर्थाय कामाय स्वजनाय च।
पञ्चधा विभजन् वित्तमिहामुत्र च मोदते॥")

पञ्चनखः, पुं, (पञ्च नखा यस्य।) हस्ती। कूर्म्मः। इति हेमचन्द्रः॥ व्याघ्रः। इति राजनिर्घण्टः॥*॥ भक्षणीयपञ्चनखा यथा,—
"गृध्रकः शल्लकी गोधा खड्गी कूर्म्मश्च पञ्चमः॥"
इति स्मृतिः॥
(तथाच याज्ञवल्क्यः। १।१७७।
"भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्लकाः।
गृध्रञ्च मत्स्येष्वपि हि सिंहतुण्डकरोहितः॥")

"पञ्च पञ्चनखा भक्ष्या ये प्रोक्ताः ऋतजैर्द्विजैः।
कौशल्याज! गृध्रादीनां तेषां नैकोऽप्यहं कपिः॥"
इति भट्टिः। ६।१३१॥

पञ्चनदः, पुं, (पञ्च पञ्चसङ्ख्याकाः नद्यः सन्त्यत्र। समासे टच्।) पञ्चनदीयुक्तदेशविशेषः। पञ्जाब इति पारस्यभाषा। तस्य नामान्तरम्। वाक्लोकः मद्रदेशश्च। ता नद्यो यथा। शतद्रुः १ विपाशा २ इरावती ३ चन्द्रभागा ४ वितस्ता ५। इति पुराणम्॥
(यथा, राजतरङ्गिण्याम्। ४, २४८।
"रुद्धः पञ्चनदे जातु दुस्तरैः सिन्धुसङ्गमैः॥")
पञ्चानां नदीनां समाहारे क्लीं॥ (यथा, रामायणे। ३।४३।२१।
"ततः पञ्चनदं क्षत्तुर्ब्बिचेतव्यं समन्ततः॥"
तच्च काश्मीरस्थनदीपञ्चकरूपं तीर्थम्। यथा, काश्मीरखण्डे। ५६।११३—११६।
"किरणाधूतपापे च तस्मिन् धर्म्मनदे शुभे।
स्रवन्त्यौ पापसंहर्त्र्यौ वाराणस्यां शुभद्रवे॥
ततो भागीरथी प्राप्ता तेन हैलीपिना सह।
भागीरथी समायाता यमुना च सरस्वती॥
किरणाधूतपापा च पुण्यतोया सरस्वती।
गङ्गा च यमुना चैव पञ्चनद्योऽत्र कीर्त्तिताः।
अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम्॥"
तीर्थविशेषः। यथा, महाभारते। ३।८२।७६।
"अथ पञ्चनदं गत्वा नियतो नियताशनः।
पञ्चयज्ञानवाप्नोति क्रमशो येऽनुकीर्त्तिताः॥"
असुरभेदः। यथा, हरिवंशे। १२०।८८।
"हत्वा पञ्चनदं नाम नरकस्य महासुरम्॥")

पञ्चनिम्बं, क्ली, (पञ्चानां स्वीयपुष्पमूलादि-रूपाणां निम्बानां समाहारः।) निम्बवृक्षस्य-पत्रत्वक्पुष्पफलमूलानि। इति राजनिर्घण्टः॥
"पञ्चनिम्बस्तु तत्पुष्पमूलवल्कफलच्छदैः॥"
इति शब्दचन्द्रिका॥

पञ्चनी, स्त्री, (पञ्चते प्रपञ्चते पाशक्रीड़ा-नियमो यत्र। पचि विस्तारे+ल्युट् स्त्रियां ङीप्।) शारिफलकला। इति शब्दरत्नावली॥ (पाशार छक् इति भाषा॥)

पञ्चनीराजनं, क्ली, पञ्चानां नीराजनानां समाहारः। पञ्चप्रकाराराात्रिकम्। इति कालोत्तर-तन्त्रम्॥ अस्य विवरणं नीराजनशब्दे द्रष्टव्यम्॥

पञ्चपक्षी, [न्] पुं, (अकारादि-ओकारान्ताः अइउएओरूपाः पञ्चस्वराः पक्षिणः पक्षि-स्वरूपा यत्र।) पारिभाषिकपक्षिपञ्चकद्वारा त्रिकालबोधकप्रन्थग्रन्थः। यथा,—
"प्रणम्य श्रीमहादेवं सर्व्वशास्त्रविशारदम्।
भविष्यदर्थबोधाय पप्रच्छुर्मुनयो मुदा॥
तेषां वचनमाकर्ण्य निजगाद महेश्वरः।
त्रिकालज्ञानबोधार्थं पञ्चपक्षी प्रदर्श्यते॥
अनेन शास्त्रसारेण लोकैः कालत्रयं प्रति।
बलाबलानि दृश्यन्ते सर्व्वकार्य्येषु निश्चितः॥
आगतं प्रच्छकं दृष्ट्वा देवज्ञः सावधानतः।
यद्यत् करोति कर्म्माणि तस्मात सर्व्वं विचारयेत्॥

ऊर्द्धावलोकने जीवस्त्वधोदृष्टौ तु मूलकम्।
समदृष्टौ भवेद्धातुरेतास्विन्ताप्रभेदतः॥"
तत्र।
"ललाटे पुत्रचिन्ता स्यात् कामचिन्ता च कण्ठके।
बाहुभ्यां वस्तुचिन्ता च व्याधिचिन्ता तथोदरे॥
कटौ विच्छेदचिन्ता च शत्रुचिन्ता च गुह्यके।
दुःखचिन्ता भवेत् पादे एते चिन्ताप्रभेदकाः॥"*॥
अपरञ्च।
"अक्षरं पक्षिशुक्लञ्च दिग्देवतदिनानि च।
कालं वर्णं बलं मित्रं धातुमूलादिकं क्रमात्॥
आरूढ़प्रश्नलग्नेभ्यः प्रथमाक्षरतोऽपि वा।
प्रच्छकस्य वचः श्रुत्वा यान्ती वर्णः स्वरस्तथा॥*॥
स्वरेण कल्पयेद्वारं वारात् पक्षी प्रजायते।
पक्षिणो जायते वाक्यं वाक्याच्च फलसम्भवः॥"*॥
"अकारादिओकारान्ताः स्वराः पञ्च प्रकीर्त्तिताः।
शुक्लार्थे कल्पयेद्रूपं स्वरास्ते पक्षिरूपिणः॥
अकारः श्येन आख्यातः इकारः पिङ्गलस्तथा।
उकारो वायसश्चैव एकारस्तामश्येश्वरः।
ओकारो नीलकण्ठश्च स्वरास्ते पक्षिसंज्ञकाः॥
अकारः पूर्व्वदिग्भागे इकारश्चैव दक्षिणे।
उकारः पश्चिमे ज्ञेय एकारश्चोत्तरे तथा॥
श्येनस्थानेषु सर्व्वेषु ओकारस्तु प्रकीर्त्तितः।
शुक्लानां क्रियागत्या द्यूते युद्धे जयाजयौ॥
प्राक्श्येनः पिङ्गलो याम्ये पश्चिमे काक उच्यते।
उत्तरे ताम्रचूड़श्च कलापी मध्यगः स्मृतः॥
ऽअंगणाक्षरकैर्हीनान् ककारादींस्तु विन्यसेत्।
अकारादिषु हान्तांस्तानेकैकं षट् परिक्रमात्॥
अक्षरे कक्षडा वर्णा धभवाश्च भवन्ति हि।
खजघा नमशा वर्णा इकारे परिकीर्त्तिताः।
गझता पयषा वर्णा उस्वरे स्युर्यथाक्रमम्॥
घटथा फरसा एते वर्णा एकस्वरात्मगाः।
चछदा वलहा वर्णा ओस्वरे परिकीर्त्तिताः॥*॥
प्रथमे रविभौमौ च द्वितीये चन्द्रचन्द्रजौ।
तृतीये जीववारश्च चतुर्थे भृगुवासरः॥
पञ्चमे मन्दवारश्च पक्षिणां क्रमशो लिखेत्।
नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात्॥
अकारे मेषसिंहालिः इः कन्यायुग्मकर्कटाः।
उकारे चापमीनौ च एकारे च तुलाघटौ॥
ओकारे मृगकुम्भौ च एवं राशिश्च संलिखेत्।
स्वराधः स्थापयेत् खेटान् राशिर्यो यस्य नायकः॥
अकारे सप्त ऋक्षाणि रेवत्यादिक्रमेण च।
पञ्च पञ्च इकारादावेवमन्तं स्वरोदये॥*॥
प्रथमे चाश्विनी पूर्व्वं पञ्चनक्षत्रमुच्यते।
अतः क्रमात् द्विघट्चैव पञ्च पञ्च च तारकाः॥*
स्वराणाञ्च क्रमेणैव देवताः परिकीर्त्तिताः।
ईश्वरः पवनश्चैव इन्द्राकाग्नः सदाशिवः॥*॥
प्राच्यां पृथ्वी गुरुश्चैव याम्यां शुक्रो जलं तथा।
अङ्गारकः पश्चिमेऽग्निर्बुधो वायुस्तथोत्तरे॥
सूर्य्यपुत्रस्तथाकाशे ऊर्द्धमेवं लिखेत्ततः।
क्षितौ ब्रह्मा जले विष्णुस्तथा रुद्रो हुताशने॥
ईश्वरः पवने चैव तथाकाशे सदाशिवः।
भूतो मयूरः कुलश्च कुक्कुटो वर्त्तमानकः॥

बलिभुक्श्येनकौ ख्यातौ भविष्यन्तौ सुनिश्चितम् ।
श्येनो हरिद्रयवर्णश्च पिङ्गलः शुक्लवर्णकः ॥
काको रक्तोऽसितश्चित्रः कुक्कुटः श्यामलः शिखी ।
काको बलीयान् सर्व्वेभ्यस्तस्मात् श्येनो हि
दुर्ब्बलः ॥
कुक्कुटो दुर्ब्बलस्ताभ्यां पिङ्गलस्तेभ्य ऊनकः ।
सर्व्वेभ्यो दुर्ब्बलः पक्षी नीलकण्ठो न संशयः ॥
बली मयूरात् कुञ्जस्तु ताम्रचूड़स्तयोर्ब्बली ।
एतेभ्यो बलवान् श्येनश्चतुर्णां वायसो बली ॥*॥
मित्रं मयूरः श्येनस्य मयूरस्य च पिङ्गलः ।
ताम्रचूड़स्य सुहृदौ मयूरपिङ्गलौ तथा ॥
वायसस्यापि मित्रं स्यात् शिखी भवति सर्व्वदा ।
सुहृदौ पिङ्गलश्येनौ मयूरारुणशेखरौ ॥ * ॥
काककुक्कुटश्येनाश्च पिङ्गलस्य च विद्विषः ।
मयूरस्य रिपू नित्यं सर्व्वदा श्येनवायसौ ॥
भवतः श्येनकाकौ द्वौ ताम्रचूड़स्य विद्विषौ ।
काकस्य गृध्रवो नित्यं पिङ्गलश्येनकुक्कुटाः ॥*॥
ऊर्द्धदृष्टिर्भवेद्वृद्धो जीवो ह्यधोदृष्टिस्तु मूलकम् ।
समदृष्टिर्भवेद्वातुरेते चिन्ताप्रभेदकाः ॥ * ॥
श्येनो मूलं तथा कुक्को जीवो धातुश्च वायसः ।
कुक्कुटो मूलजीवौ च मूलधातू शिखण्डपि ॥*॥
श्येनो नरो वधूः कुक्कः पुरुषो वायसस्तथा ।
कुक्कुटः स्त्री पुमांश्चैव शिखी नपुंसकस्तथा ॥*॥
श्येनकुक्कौ द्विजश्रेष्ठो महीपालस्तु वायसः ।
ताम्रचूड़ो वणिक् शूद्रो नीलकण्ठस्तथान्यजः ॥*॥
चतुष्पात् पिङ्गलो श्येनो द्विपदौ श्येनवायसौ ।
ताम्रचूड़ो नखी पक्षी शिखण्डी पक्षिजीवकः ॥*॥
श्येनो सुखं कण्ठबाहू कुक्को वक्षस्तु वायसः ।
कुक्कुटः पृष्ठभागः स्यात् शिखी पादयुगं क्रमात् ॥*
श्येनो भूम्यां धनं ज्ञेयं पिङ्गलो जलपङ्कयुक् ।
वायसस्तृणसङ्घाते कुक्कुटो भस्मनाश्रितम् ॥
श्येनः शिखी गृहार्थं वन्यस्थानेषु निश्चितम् ।
खग्रामे श्येनकुक्कौ तु वायसो वन्यमाप्नुयात् ॥
कुक्कुटः परदेशे च परग्रामे तथा शिखी ।
कुञ्जस्तु दशहस्ते च त्वर्द्धक्रोशे तु कुक्कुटः ॥
द्विक्रोशे तु तथा काकः श्येनः क्रोशे तु पूर्व्वतः ।
मयूरो योजने चेति तथैव दूरनिश्चयः ॥ * ॥
शुक्लौ च मासौ गमने च पक्षौ
राज्ये दिनानि त्वयनन्तु सप्त ।
वृत्ते च वर्षे शकुनस्य चर्य्या
कालप्रमाणं मुनयो वदन्ति ॥
शुक्रे चन्द्रे गुरुभवज्ञौ लताकन्दौ बुधे तथा ।
पत्रं गुरौ फलं सूर्य्ये मूलञ्च रविजे कुजे ॥ * ॥
शुक्रे चन्द्रे भवेद्दौर्य्यं बुधे सर्व्वसदाहृतम् ।
गुरौ रत्नयुतं हेम सूर्य्ये मौक्तिकमेव च ॥
भौमे ताम्रं शनौ लौहं राहावश्मोनि कीर्त्तयेत् ।
एतेषां धातुभेदश्च वाराणामुदयक्रमात् ॥ * ॥
शुक्रे चन्द्रे जलाधारो देवतावसतिर्गुरौ ।
रवौ चतुष्पदस्थानमिष्टकानिलयो बुधे ॥
दग्धस्थानं कुजे प्रोक्तं शनौ राहौ च वाह्यभूः ।
अमीभिर्हि वुके स्थाने नष्टभूमिं विलोकयेत् ॥*॥
रवौ भौमे च भैरुण्डो मयूरो वायसः शनौ ।
पादायुधः शिखी शुक्रे काककुञ्जौ गुरौ तथा ॥
कुञ्जकुक्कुटाविन्दुजौ क्रमोऽयं शुक्लकृष्णयोः ।
यस्य वारस्य यः पक्षी तदादिं गणयेद्बुधः ॥
दिनपक्षी कार्य्यरूपी प्रश्नपक्षी फलप्रदः ।
दिनेषु शुक्लपक्षे यत् कृष्णे रात्रिषु तत्तथा ॥
कृष्णे दिनेषु यद्यत्तत् शुक्ले रात्रिषु योजयेत् ।
बालः कुमारस्तरुणो वृद्धो मृत इति क्रमात् ॥
घटिका षट् घड़ैवं हि फलमेषामुदीरितम् ।
किञ्चिल्लाभकरो बालः कुमारस्त्वर्द्धलाभदः ॥
तरुणो राज्यदो वृद्धो हानिदो मृत्युदो मृतः ।
भोजनं गमनं राज्यं निद्रा मरणमेव च ॥
एकान्तरे भवेत् कृष्णे शुक्ले स्यात् क्रमशो विदुः ।
पक्षिणां क्रमशो ज्ञात्वा फलं ब्रूयात् यथा तथा ॥
गणयेत् पक्षपक्षादौ जातभूतगणाद्यपि ॥"

शुक्लपक्षे ॥ * ॥ ततः कृष्णपक्षे ।

"भोजनं मरणञ्चैव निद्रा राज्यं तथैव च ।
गमनं पक्षपक्षाणां कृष्णपक्षे क्रमो दिवा ॥ * ॥
राज्यं सुभिक्षमत्यौभं नष्टलाभं सदा जयम् ।
रोगमुक्तं महालाभं पक्षिणां मुक्तिलक्षणम् ॥*॥
अनायासेन दृष्टिः स्याद्दृष्टधनसञ्चयः ।
भूलाभो रोगनाशश्च यात्रासिद्धो रणे जयः ॥
दूरादागमनं योगः प्रयाणे पक्षिलक्षणम् ।
राज्योदये यदि प्रश्नो लाभार्थं स्वल्पलाभदः ॥
राजानां चिररोगः स्यात् याने हानिः क्षयो रणे ।
पुरग्रामप्रवेशश्च गमनं कलहं तथा ।
मनश्चञ्चलमारोग्यं गमनेषु विचारयेत् ॥ * ।
राज्यलाभो जयं सौख्यमत्यौभं रोगनाशनम् ।
सुभिक्षं बहुदृष्टिश्च पक्षिणां राज्यलक्षणम् ॥*॥
यात्राहानिरनादृष्टिः कार्य्यहानिरदर्शनम् ।
व्याधिश्च दीर्घरोगश्च पक्षिणां सुप्तिलक्षणम् ॥
अपमृत्युभयञ्चैव सर्व्वकार्य्यविनाशनम् ।
एतदेव फलं ब्रूयात् पक्षिणां मृत्युलक्षणम् ॥*॥
श्येने भोक्तरि काकस्तु पान्थो राजा शुकङ्कुकः ।
खग्रावस्थां गतः कुञ्जः परासुस्ताम्रशेखरः ॥ * ॥
काके भोक्तरि केकी तु पान्थः स्यात् पिङ्गलो नृपः ।
ताम्रचूड़स्तथा खापी श्येनः कालवशं गतः ॥*॥
मयूरे भोक्तरि तथा कुक्को याचावशं गतः ।
महीपः कुक्कुटः श्येनः खापी काको वशं गतः ॥
कुञ्जे भोक्तरि पान्थस्तु कुक्कुटः श्येनको नृपः ।
काको निद्रावशं यातो मयूरो मरणं गतः ॥*॥
कुक्कुटे भोक्तरि श्येनः पान्थो राजा तु वायसः ।
शिखी निद्रावशं यातः पिङ्गलः कालमाप्नुयात् ॥"
इति कृष्णपक्षस्य दिवाक्रमः शुक्लपक्षस्य रात्रिक्रमश्च ॥ खरोऽपि यथा । अमुमोहिते । उन्मोदितेन ।
ओमित्येवायुः । इत्येव जुहो । एवमुक्तोऽसि ॥*॥
"श्येने भोक्तरि कुञ्जः स्यात् पान्थः काको महीपतिः ।
ताम्रचूड़ो निद्रितस्तु शिखी कालवशं गतः ॥ * ॥
मयूरे भोक्तरि श्येनः पान्थः कुक्को महीपतिः ।
खग्रावस्थां गतः काकस्ताम्रचूड़ो मृतस्तथा ॥*॥
कुक्कुटे भोक्तरि शिखी सदा गमनमाप्नुयात् ।
श्येनो महीपतिः कुञ्जः खापी काको मृतिं गतः ॥*॥
काके भोक्तरि याचायां ताम्रचूड़ः शिखी नृपः ।
निद्रायां रमते श्येनः कुञ्जः कालवशं गतः ॥ * ॥
कुञ्जे भोक्तरि याचायां वायसः कुक्कुटो नृपः ।
नीलकण्ठस्तथा खापी श्येनो मृत्युवशं गतः ॥"
इति शुक्लपक्षस्य दिवाक्रमः कृष्णपक्षस्य रात्रिक्रमश्च ॥ * ॥ खरोऽपि यथा । अहिपुरेभोः । गोकरिपुरे । एकोनरिपुः । उपेन्द्रो हरिः । विष्णुस्ते लोकः ॥ * ॥
"इत्युक्तं पक्षिणां कार्य्यं लाभालाभं शुभाशुभम् ।
येन विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः ॥
तावन्नर्त्तन्ति शास्त्राणि शकुनानामनेकशः ।
यावन्न श्रूयते पक्षिशकुनं शङ्करोदितम् ॥"
इति श्रीमहादेवविरचितं पञ्चपक्षिशाकुनं समाप्तम् ॥

पञ्चपर्णिका, स्त्री. (पञ्च पञ्च पर्णान्यस्याः । ततः कप् कापि अतः इत्वम् ।) गोरक्षीचुपः । इति राजनिर्घण्टः ॥

पञ्चपल्लवं, क्ली, (पञ्चानां पल्लवानां समाहारः ।) आम्रादिपञ्चपल्लवकम् । यथा,—
"आम्रजम्बूकपित्थानां बीजपूरकविल्वयोः ।
गन्धकर्म्मणि सर्व्वत्र पत्राणि पञ्चपल्लवम् ॥"
इति शब्दचन्द्रिका ॥
वैदिककर्म्मणि घटोपरिदेयपञ्चपल्लवं यथा,—
आम्राश्वत्थवटपर्कटीयग्रोडुम्बराणि । तान्त्रिक-कर्म्मणि पञ्चपल्लवं यथा,—
"धनसाम्रं तथाश्वत्थं वटं वकुलमेव च ।
पञ्चपल्लवमुक्तञ्च मुनिभिस्तन्त्रवेदिभिः ॥"
इति तन्त्रसारः ॥

पञ्चपात्रं, क्ली, पञ्चानां पात्राणां समाहारः । इति व्याकरणम् ॥ पञ्चपात्रकरणकपार्व्वणविधिकश्राद्धम् । तत्तु अन्वष्टकाश्राद्धम् । अमावस्यान्तप्रेतपक्षान्तसामत्सरिकं सपिण्डीकरणञ्च । इति लोकप्रसिद्धम् ॥

पञ्चपित्तं, क्ली, (पञ्चविधं पित्तम् ।) पित्तपञ्चकम् । यथा,—
"वराहच्छागमहिषमत्स्यमायूरपित्तकम् ।
पञ्चपित्तमिति ख्यातं सर्व्वत्रैव हि कर्म्मसु ॥"
इति वैद्यकम् ॥

पञ्चप्रदीपः, पुं, (पञ्चसंख्याकाः प्रदीपा यत्र ।) पञ्चदीपयुक्तारात्रिकम् । यथा,—
"कुर्य्यात् सप्तप्रदीपेन शङ्खघण्टादिवाद्यकैः ।
हरेः पञ्चप्रदीपेन बहुधा भक्तितत्परः ॥"
इति पाद्मोत्तरखण्डे १०७ अध्यायः ॥

पञ्चप्रासादः, पुं, (प्रसीदन्ति मनांसि अत्र । प्र+सद्+अधिकरणे घञ् । "उपसर्गस्य दीर्घत्वं क्विप्घञादौ क्वचिद्भवेत् ।" इति वचनात् दीर्घः । पञ्चचूड़ान्वितः प्रासादः । मध्यपदलोपिकर्म्मधारयः ।) देवगृहविशेषः । पञ्चरत्न इति ख्यातः । यथा,—
"पञ्चैकचित्तं रम्यं पञ्चप्रासादसंयुतम् ।
कारयित्वा हरेर्धाम धूतपापो व्रजेद्दिवम् ॥"
इत्यग्निपुराणम् ॥

पञ्चवन्यः, पुं. (पञ्चमः वन्यः भागो यत्र।) नष्टद्रव्यस्य पञ्चमांशदण्डः। यथा,—
"आगमेनोपभोगेन नष्टं भाग्यमतोऽन्यथा।
पञ्चवन्यो दमस्तस्य राज्ञे तेनाविभाविते॥"
आगमेन क्रिक्थक्रयादिना। उपभोगेन च मदीयमिदं द्रव्यं तच्चैवं नष्टमपहृतं वेत्यपि। भाग्यं साधनीयं तत् स्वामिना। अतोऽन्यथा तेन स्वामिना अविभाविते। पञ्चवन्यो नष्टद्रव्यस्य पञ्चमांशो दमो नाष्टिकेन राज्ञ देयः। इति मिताक्षरा॥

पञ्चभद्रः, पुं. (पञ्चसु अङ्गभेदेषु भद्रः शुभः पुष्यितत्वात्।) पञ्चस्थानेषु पुष्यितोऽश्वविशेषः। यथा,—
"पञ्चभद्रस्तु हृत्पृष्ठसुखपार्श्वेषु पुष्यितः॥"
इति हेमचन्द्रः॥ पाचनविशेषः। यथा,—
"क्विन्नोद्भवापर्पटवारिवाह-
भूनिम्बगुरुडोजनितः कषायः।
समीरपित्तज्वरजर्जराणां
करोति भद्रं खलु पञ्चभद्रः॥"
इति शार्ङ्गधरः॥

पञ्चभूतं, क्ली, पञ्चानां भूतानां चित्यपदेनैकत्वं समाहारः। (केचित्तु संज्ञाप्रयुक्तत्वात् पञ्च च तानि भूतानि चेति कर्म्मधारयसमासमाहुस्तच्च तु एकवचनचिन्तनीयम्।)
अस्योत्पत्तिर्यथा।
"अभूत्तस्मादहङ्कारस्त्रिविधः सृष्टिभेदतः।
वैकारिकादहङ्कारादेवा वैकारिका दश॥
दिक्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः।
तैजसादिन्द्रियाण्यासंस्तन्मात्रा क्रमयोगतः।
भूतादिकादहङ्कारात् पञ्चभूतानि जज्ञिरे॥"
इति शारदायां प्रथमपटलः॥ * ॥
"सोऽहङ्कारस्त्रिभेदः स्यात् सत्त्वादिगुणयोगतः।
वैकारः सात्त्विको नाम तैजसो राजसः स्मृतः॥
भूतादिस्तामसस्तत्र पृथक्तत्त्वाद्यवाच्यजन्।
वैकारिकाद्दिगाद्याश्च चन्द्रशैकादश स्मृताः॥
इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिताः।
यच्चापरं मनस्तत्त्वं ससङ्कल्पविकल्पकम्॥
तैजसादेव तज्ज्ञातमिन्द्रियाणि तथा दश।
भूतादेः पञ्चतन्मात्राण्यासन् भूततः परम्॥"
इति राघवभट्टधृतम्॥ * ॥
"शब्दादेर्गामस्पर्शतस्तेन वायु-
स्ताभ्यां रूपाद्धिरेते रसाच्च।
अम्भांस्येतैर्गन्धतो भूर्धरात्मा
भूताः पञ्च स्वगुणोना क्रमेण॥"
इति प्रपञ्चसारे प्रथमपटलः॥ * ॥
"आकाशाज्जायते वायुर्वायोरग्निरुत्पद्यते रविः।
रवेरुत्पद्यते तोयं तोयादुत्पद्यते मही॥"
(तथा च श्रुतिः।
"तस्माद्वा एतस्मादात्मनः सम्भूतः। आकाशाद्वायुः वायोरग्निरग्नेरापोऽद्भ्यः पृथ्वी समजायत॥"
एतच्छ्रुत्यवलम्बनेन मनुनाप्युक्तम्। १। २०। यथा,—
"आद्याद्यस्य गुणन्त्वेषामवाप्नोति परःपरः।
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः॥"
अत्र कुल्लूकभट्टः।
"आद्याद्यस्याकाशादेर्गुणं शब्दादिकं वायुादिः परः परः प्राप्नोति। एतदेव स्पष्टयति यो यः इति येषां मध्ये यो यो यावतां पूरणो यावतिथः यतेरिथुक् स स द्वितीयादिः द्वितीयो द्विगुणः तृतीयस्त्रिगुणः इत्येवमादिर्मन्वादिभिः स्मृतः। एतेनेतदुक्तं भवति। आकाशस्य शब्दो गुणः वायोः शब्दस्पर्शौ तेजसः शब्दस्पर्शरूपाणि अपां शब्दस्पर्शरूपरसाः भूमेः शब्दस्पर्शरूपरसगन्धा इति॥)
तस्य लयप्रकारो यथा,—
"मही संलीयते तोये तोयं संलीयते रवौ।
रविः संलीयते वायौ वायुर्नभसि लीयते।
पञ्चतत्त्वाद्भवेत् सृष्टिस्तत्त्वं तत्त्वं विलीयते॥"
इति ब्रह्मज्ञानतन्त्रनिर्व्वाणतन्त्रे॥ * ॥
तद्भवास्थ्यादि यथा,—
"अस्थिमांसनखास्थैव नाड़ी त्वक् चेति पञ्चमः।
पृथ्व्यापश्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥
मलं मूत्रं तथा शुक्रं श्लेष्मा शोणितमेव च।
तोयपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥
क्षुधा तृष्णा तथा निद्रा क्षुधा चैव भ्रान्तिरालस्यमेव च।
तेजःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥
धारणं चालनं चेष्टा सङ्कोचः प्रसरस्तथा।
वायुपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥
कामक्रोधस्तथा लोभस्तथा मोहश्च पञ्चमः।
नभःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥"
इति ब्रह्मज्ञानतन्त्रे प्रथमपटलः॥ * ॥
पञ्चभूतनक्षत्राणि यथा,—
"धनिष्ठा रेवती ज्येष्ठानुराधा श्रवणा तथा।
अभिजिच्चोत्तराषाढा पृथ्वीतत्त्वमुदाहृतम्॥
पूर्व्वाषाढा तथाश्लेषा मूलार्द्रा चैव रोहिणी।
उत्तरभाद्रपदा तोयं आपस्तत्त्वन्त्वभीप्सितम्॥
भरणी कृत्तिका पुष्या मघा पूर्व्वा च फल्गुनी।
पूर्व्वभाद्रपदा स्वाती तेजस्तत्त्वमिति प्रिये॥
विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्व्वसुः।
अश्विनी मृगशीर्षा च वायुस्तत्त्वमुदाहृतम्॥"
इति रुद्रयामलतन्त्रोदयः॥

पञ्चमं, क्ली, मैथुनम्। यथा,—
"भगलिङ्गस्य योगेन मैथुनं यद्भवेत् प्रिये।
तस्य नाम भवेद्देवि पञ्चमं परिकीर्त्तितम्॥"
इति समायाचारतन्त्रे द्वितीयपटलः॥

पञ्चमः, त्रि, पञ्चानां पूरणः। (पूरणे डट् ततः मान्तादिति मट्।) पाँच इत्यादि भाषा। इति मेदिनी॥ (यथा, मनुः। ८। १२५।
"उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च॥")
रुचिरः। दक्षः। इति हेमचन्द्रः॥

पञ्चमः, पुं. पञ्चानां स्वराणां पूरणः। तन्त्रीकण्ठोत्थितस्वरविशेषः। इत्यमरः॥ स तु षड्जादिसप्तस्वराणां पञ्चमः स्वरः। तस्योत्पत्तिर्यथा,—
"वायुः समुद्गतो नाभेरुरोहृत्कण्ठमूर्द्धसु।
विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते॥"
इति तट्टीकायां भरतः॥ अपि च।
"प्राणोदानः समानश्च उदानो व्यान एव च।
एतेषां समवायेन जायते पञ्चमः स्वरः॥"
इति सङ्गीतदामोदरः॥ अस्य जातिः औडवः। पञ्चस्वरमिलित इति यावत्। अस्य कूटतानाः विंशत्यधिकशतम् १२० प्रत्येकताने चत्वारिंशत् ४०। समुदायेन चतुःसहस्राष्टशतानि ४८०० तानाः भवन्ति। अस्योच्चारणजातिः पिकः। उच्चारणस्थानं उरः गलः शिरश्च। व्याकरणमते अधरः। अयं विप्रवर्णः। इति शुद्धतानविवेकलक्षणम्॥ अस्य रूपं इन्द्ररूपतुल्यम्। वर्णः श्यामः। स्थानं क्रौञ्चद्वीपम्। देवता महादेवः। वारो बृहस्पतेः। समयस्तुर्य्यांशघटिकाद्वयाधिकाष्टौ घटिकाः। श्रुतयश्चत्वारः चितिः रक्ता सन्दीपनी आलापिनी च। मूर्च्छनास्तिस्रः यमली निर्म्मली कोमली च। इति नादपुराणम्॥ * ॥ रागभेदः। इति मेदिनी॥ अयं कल्लिनाथमते सोमेश्वरमते च षड्रागाणां मध्ये तृतीयरागः। सोमेश्वरमते अस्य गानसमयः प्रहरद्वयं प्रातःकालश्च। कल्लिनाथमते अस्य रागिण्यः षट्। यथा, त्रिवेणी १ रम्भातीर्था २ आभीरी ३ कुकुभ् ४ वरारी ५ सावीरी ६। सोमेश्वरमते तु विभासा १ भूपाली २ कार्णाटी ३ वड़हंसिका ४ मालश्रीः ५ पटमञ्जरी ६। अस्मिन्नागे गान्धारस्वरस्त्रीव्रः। ऋषभपञ्चमौ स्वरौ लुप्तौ। षड्जस्वरः ग्रहांशन्यासः। स च हनूमन्मते भरतमते च भैरवरागस्याष्टमपुत्रः। इति सङ्गीतशास्त्रम्॥

पञ्चमकारं, क्ली, (पञ्चसंख्यकं मकारं तत्त्वं यत्र। मद्यं मांसमित्यादिषु आदौ मकारस्थितेस्तथात्वम्।) मकारपञ्चकम्। पञ्चतत्त्वम्। तत्तु सुद्रामैथुनमद्यमांसमत्स्यरूपम्। यथा,—
"मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च।
पञ्चतत्त्वमिदं देवि! निर्व्वाणमुक्तिहेतवे।
मकारपञ्चकं देवि! देवानामपि दुर्लभम्॥"
इति गुप्तसाधनतन्त्रे ७ पटलः॥ * ॥
"मद्यैर्मांसैस्तथा मत्स्यैर्मुद्राभिर्मैथुनैरपि।
स्त्रीभिः सार्द्धं महासाधुरर्चयेद्जगदम्बिकाम्॥
अन्यथा च महानिन्दा गीयते पण्डितैः सुरैः।
कायेन मनसा वाचा तस्मात्तत्त्वपरो भवेत्॥"
इति कामाख्यातन्त्रे ५ पटलः॥ * ॥
"या सुरा सर्व्वकार्य्येषु कथिता भुवि सुक्तिदा।
तस्या नाम भवेद्देवि! तीर्थं पानं सुदुर्लभम्॥
शूद्राणां भक्ष्ययोग्यानां यन्मांसं देवनिर्म्मितम्।
वेदमन्त्रेण विधिवत् प्रोक्षा सा शुद्धिरुत्तमा॥
भक्ष्ययोग्याश्च कथिता ये ये मत्स्या वरानने!।
ते रहस्ये मया प्रोक्ता मीनाः सिद्धिप्रदायकाः॥

पृथुकास्तण्डुला भृष्टा गोधूमचणकादयः ।
तस्य नाम भवेद्देवि ! सुधा मुक्तिप्रदायिनी ॥
भगलिङ्गस्य योगेन मैथुनं यद्भवेत् प्रिये ! ।
तस्य नाम भवेद्देवि ! पञ्चमं परिकीर्त्तितम् ॥
प्रथमन्तु भवेन्मद्यं मांसञ्चैव द्वितीयकम् ।
मत्स्यञ्चैव तृतीयं स्यान्मुद्रा चैव चतुर्थिका ॥
पञ्चमं पञ्चमं विद्यात् पञ्च ते नामतः स्मृताः ॥"

इति समयाचारतन्त्रे २ पटलः ॥ * ॥

अथ मत्स्यादिद्युत्पत्तिः ।

"मायामलादिशमनान्मोक्षमार्गनिरूपणात् ।
अष्टदुःखादिविरहान्मत्स्येति परिकीर्त्तितः ॥
माङ्गल्यजननाद्देवि ! सच्चिदानन्ददानतः ।
सर्व्वदेवप्रियत्वाच्च मांस इत्यभिधीयते ॥
पञ्चमं देवि ! सर्व्वेषु मम प्राणप्रियं भवेत् ।
पञ्चमेन विना देवि ! चण्डीमन्त्रं कथं जपेत् ॥
यदि पञ्चमकारेषु भ्रान्तिश्चेत् कुरुते प्रिये ! ।
तस्य सिद्धिः कथं देवि ! चण्डीमन्त्रं कथं जपेत् ॥
आनन्दं परमं ब्रह्म मकारास्तस्य वाचकाः ॥"

इति कुलार्णवतन्त्रे पञ्चमखण्डे १७ उल्लासः ॥*॥

तेषां प्रोक्षणादिकं बाहुल्यभिया लोकमोह-भयाच्च नोक्तम् ॥

पञ्चमहायज्ञाः, पुं, (पञ्चविधा महायज्ञाः ।) गृहस्थकर्त्तव्यपञ्चप्रकारनित्यकर्म्माणि । यथा,—

"पाठो होमस्वातिथीनां सपर्य्या तर्पणं बलिः ।
एतैः पञ्च महायज्ञा ब्रह्मयज्ञादिनामकैः ॥"

इत्यमरः । २ । ७ । १४ ॥

(तथा च मनुः । ३ । ६८-७० ।

"पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥
तासां क्रमेण सर्व्वासां निष्कृत्यर्थं महात्मभिः ।
पञ्चक्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥")

पञ्चमारः, पुं, (पञ्चसु इन्द्रियेषु म्रियते आसक्तो भवतीति । पञ्च + ङि + कर्त्तरि घञ् ।) बलदेवपुत्रः । इति शब्दमाला ॥

पञ्चमास्यः, पुं, (पञ्चमो रागः स्वरो वा आस्ये यस्य । "कोकिलो पञ्चमं वदेत् ।" इत्युक्तेरस्य तथात्वम् ।) कोकिलः । इति शब्दरत्नावली ॥

पञ्चमी, स्त्री, (पञ्चानां पाण्डवानां इयम् । अथवा पञ्च पतीन् मिनोति सेवाऽर्चनादिभिर्बध्नाति या । पञ्च + मी + क्विप् । मीधातुरत्र बन्धार्थः ।) पाण्डवपत्नी । द्रौपदी । इति मेदिनी ॥ (पञ्चानां पूरणी ङट् ततो मट् स्त्रियां ङीप् ।) शारिङ्गला । पाञ्चार कुक् इति भाषा । इति भूरिप्रयोगः ॥ * ॥ तिथिविशेषः । सा च चन्द्रस्य पञ्चमकलाक्रियारूपा तदुपलक्षितकालश्च । पञ्जिकाकारसङ्केतेन शुक्लपक्षे ५ कृष्णपक्षे २० एतदङ्कबोधिता ॥ * ॥ अथ पञ्चमीव्यवस्था । सा च चतुर्थीयुता ग्राह्या युग्मात् ।

"पञ्चमी च प्रकर्त्तव्या चतुर्थ्यासहिता विभो ! ॥"

इति स्कन्दपुराणाच्च ॥ * ॥

अथ नागपञ्चमी । यथा,—देवीपुराणे ।

"सुमे जनार्द्दने कृष्णे पञ्चम्यां भवनाङ्गने ।
पूजयेन्मनसादेवीं खट्टीविटपसंस्थिताम् ॥
पद्मनाभे गते मूर्य्यां देवैः सर्व्वैरनन्तरम् ।
पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥"

देवैरिति सहार्थे तृतीया । तथा,—

"देवीं संपूज्य नत्वा च न सर्पभयमाप्नुयात् ।
पञ्चम्यामूजयेन्नागाननन्ताद्यान्महोरगान् ।
क्षीरं सर्पिस्तु नैवेद्यं देयं सर्व्वविषापहम् ॥"

एवं गारुडे तथैव नागानाह ।

"अनन्तं वासुकिं पद्मं महापद्मं कम्बलमेव च ।
तथा कर्कोटकं नागं धृतराष्ट्रञ्च पूजकम् ॥
कालीयं तक्षकञ्चैव पिङ्गलं मासि मासि च ।
यजेत्तानसिते नागान् दशम्यां दिवं व्रजेत् ॥"

पुराणान्तरेऽपि ।

"अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः ।
कुलिकः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः ॥"

पुराणान्तरेऽपि ।

"शेषः पद्मो महापद्मः कुलीरः पृथुरूपालकः ।
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः ।
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ ॥"

अत्र च ।

"योऽसौ चानन्तरूपेण ब्रह्माण्डं सचराचरम् ।
पुष्यवद्धारयेन्मूर्द्ध्नि तस्मै नित्यं नमो नमः ॥"

इत्यनेन ओंकारपूर्ब्बेण मत्स्यपुराणोक्तेनानन्तं पूजयेत् । रत्नाकरे ।

"पिचुमर्दस्य पत्राणि स्थापयेद्भवनोदरे ।
स्वयञ्चापि तदश्नीयाद्ब्राह्मणांश्चैव भोजयेत् ॥"*॥

अथ श्रीपञ्चमी । भविष्योत्तरे । माघशुक्लपञ्चमधिकृत्य,—

"चतुर्थी वरदा नाम तस्यां गौरी प्रपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥"

सम्वत्सरप्रदीपे ।

"पञ्चम्यां पूजयेल्लक्ष्मीं पुष्पधूपान्नवारिभिः ।
मस्याधारं लेखनीञ्च पूजयेन्न लिखेत्ततः ॥
माघे मासि सिते पक्षे पञ्चमी या श्रियः प्रिया ।
तस्याः पूर्व्वाह्ण एवेह कार्य्यः सारस्वतोत्सवः ॥"

इत्युपादानात् श्रियः स्वरसत्वाः । तथा च याज्ञिकः ।

"लक्ष्मीसरस्वतीधीवित्तिवर्गसम्यद्विभूतिशोभासु ।
उपकरणवेषरचनाविधासु च श्रीरिति प्रथिता ॥"

ध्यानं यथा,—

"तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे ।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वाग्देवता नः ॥"

इति शारदोक्तं ध्यायेत् । पाद्यादिभिः पूजयित्वा ।

"भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च ॥"

स्वाहेति ब्रह्मपुराणीयेन त्रिः पूजयेत् । मत्स्यसूक्ते । वस्त्रजीवञ्च द्रोणञ्च सरस्वत्यै न दापयेत् ।

सरस्वतीं संपूज्य,—

"यथा न देवो भगवान् ब्रह्मा लोकपितामहः ।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा ॥
वेदाः शास्त्राणि सर्व्वाणि वृत्तगीतादिकञ्च यत् ।
न विद्दीनं त्वया देवि ! तथा मे सन्तु सिद्धयः ॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः ।
एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति ! ॥"

इति मत्स्यपुराणीयैः प्रार्थयेत् ॥ * ॥

अथ पञ्चमीव्रतम् ।

तच्च शुक्लकाले माघशुक्लपञ्चम्यामारभ्य षड्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां कार्य्यम् । यथा,—

"क्षीरोदे च पुरा सुप्तं लक्ष्मीसमन्वितं हरिम् ।
प्रणम्य परिपप्रच्छ नारदो मुनिसत्तमः ॥

नारद उवाच ।

केनोपायेन देवेश ! नारीणाञ्च सुखं भवेत् ।
सौभाग्यमतुलं याति तन्मे त्वं वक्तुमर्हसि ॥
श्रुत्वा तद्वचनं देवो नारदस्य महात्मनः ।
संप्रेक्ष्य कमलां सद्यो ब्रूहि देवि शुभाननं ! ॥
इङ्गितं पतिरालोक्य पद्मपत्राच्चवल्लभा ।
वल्लभं तं पुरस्कृत्य प्रीत्या व्रतमुवाच ह ॥

देव्युवाच ।

अस्ति श्रीपञ्चमीनाम व्रतं परमदुर्लभम् ।
यत् कृत्वा प्राप्यते लोकैः सुखं सौभाग्यमुत्तमम् ॥
तत्र मां पूजयेद्भक्त्या माधवञ्च प्रयत्नतः ।
गन्धैः पुष्पैश्च वस्त्रैश्च धूपैर्नानाविधैः फलैः ॥
अद्भया पूजयेद्भक्त्या माघादौ पञ्चमीदिने ।
इमां ब्रह्मपुराणोक्तां यो करोति च पञ्चमीम् ॥
लक्ष्मीसमा भवेन्नारी इह लोके परत्र च ।
विधानं शृणु धर्म्मज्ञ ! यादृशी पञ्चमी मम ॥
वर्षाणि षट् प्रकर्त्तव्या परमप्रीतिमानसा ।
शुक्लकाले तु संप्राप्ते पञ्चमी या शुभा भवेत् ॥
तस्यामारभ्य कर्त्तव्यं व्रतं पापप्रणाशनम् ।
स्वयं यतात्मा भूत्वा च आरभेद्व्रतमुत्तमम् ॥
आढ्यैश्चमलवर्णेन हविष्येण हृयं तथा ।
फलेनैकन्तु कर्त्तव्यमुपवासे प्रतिष्ठयेत् ॥
प्रतिष्ठाया विधिरयं काञ्चनस्य श्रियं हरिम् ।
ब्राह्मणञ्च सपत्नीकं पूर्व्वेद्युरधिवासयेत् ॥
पञ्चम्याश्चर्त्विजं विप्रमाचार्य्यञ्च द्विजोत्तमम् ।
पूजा च विविधा कार्य्या मूलमन्त्रेण भक्तितः ॥
होमश्च तिललाजानां घृतं कुर्य्यात् पृथक् पृथक् ।
नैवेद्यं विविधं कुर्य्यात् लड्डुकं पूपसुत्तमम् ॥
आसनं पाद्यमर्घ्यञ्च तथाचमनीयकम् ।
वासो यज्ञोपवीतञ्च गन्धपुष्पफलं तथा ॥
कृत्वं धूपः प्रदीपश्च ताम्बूलं फलमेव च ।
गौः शय्या कम्बलश्चैव हिरण्यं रजतं तथा ॥
ब्राह्मणेभ्यः प्रदेयानि दक्षिणासंयुतानि च ।
यथोक्तेन विधानेन यो कुर्य्यात् पञ्चमीव्रतम् ॥
आसप्तकुलमुद्धृत्य विष्णुलोकमवाप्नुयात् ।
शचीव पुरुहूतस्य रतीव मदनस्य च ॥
शङ्करस्य यथा गौरी तथा भवति सा शुभा ।
मासि मासि सिते पक्षे पञ्चमी या प्रकीर्त्तिता ।
तस्यां पूज्या सदा देवी भक्तितः कमलोद्भवा ।
लक्ष्मीसमा भवेन्नारी षट्पञ्चमीव्रतेन वै ॥

श्रीपञ्चमीव्रतं रम्यं या करोति पतिव्रता ।
तस्याहं स्थिरतां यामि यथा नारायणे स्थिरा ॥
मत्प्रसादान्मुनिश्रेष्ठ ! सर्व्वसौभाग्यमाप्नुयात् ॥"
इति ब्रह्मपुराणोक्तषट्पञ्चमीव्रतकथा समाप्ता ॥

अथ पञ्चमीजातफलं यथा ।

"भूपालमान्यो मनुजः सुगात्रः
क्षपासमेतो विदुषां वरेण्यः ।
वाग्मी गुणी बन्धुजनैकमान्यः
प्रसूतिकाले यदि पञ्चमी स्यात् ॥"

इति कोष्ठीप्रदीपः ॥

विद्याविशेषः । तद्विवरणं यथा,—

"कामं विष्णुयुतं देवि ! शक्तिमायेन्द्रमेव च ।
महामायां ततः पश्चात् वाग्भवं बीजमुद्धरेत् ॥"

विष्णुयुतं अकारयुक्तमित्यर्थः । शक्तिरेकारः । माया ईकारः ।

"वियद्वह्निस्ततः पश्चात् कलौ नकुलिरेव च ।
मायाक्षरेण संयुक्तं नादबिन्दुकलान्वितम् ॥
प्रथमं कामराजस्य बीजं परमदुर्लभम् ।
वियद्विष्णुयुतं कामो हंसः शक्रस्ततः परम् ॥
महामाया ततः पश्चात् खप्रावतीति कथ्यते ॥"

हंसो हकारः । एतद्वितीयं कामकूटम् ॥ * ॥

"मादनं शिवबीजञ्च वायुबीजं ततः परम् ।
इन्द्रबीजं ततः पश्चात् महामायां समुद्धरेत् ॥"

इति तृतीयम् । इयं मधुमती ॥ * ॥

"शिवबीजं तथा कामं इन्द्रं देवीं नियोजयेत् ।
महामायां ततः पश्चात् शक्तिकूटं समुद्धरेत् ॥"

देवीं सकारम् ।

"वाग्भवं प्रथमं कूटं शक्तिकूटन्तु पञ्चमम् ।
मध्यकूटत्रयं देवि ! कामराजं मनोहरम् ।
कथिता पञ्चमी विद्या त्रैलोक्यसुभगोदया ॥"*॥

ईश्वर उवाच ।

"शृणु देवि ! महाभागे शक्तिकूटं सुदुर्लभम् ।
वाग्भवं प्रथमं कूटं कामराजं त्रिकूटकम् ॥
शक्तिकूटं प्रवक्ष्यामि तव स्नेहात् विशेषतः ।
जीवप्राणौ महादेवि ! मादनं तदनन्तरम् ॥
इन्द्रबीजं ततः पश्चात् भुवनेशी तु पञ्चमम् ॥"

जीवः सकारः । प्राणो हकारः । इति वा शक्तिकूटम् ॥ * ॥

"अथवा देवदेवेशि ! सौभाग्यायाश्च वाग्भवम् ।
कूटत्रयं कामराजं शक्तिबीजञ्च पूर्व्ववत् ।
एषा प्रोक्ता महादेवि ! पञ्चमी परमेश्वरी ॥"

अस्या वाग्भवं कूटं हित्वा सौभाग्यायाः प्रथमकूटं वाग्भवं कूटमित्यर्थः । कामराजकूटत्रयं पञ्चम्या एव ।

"श्यामनेत्रादिकूटं वा भगादिकूटमेव वा ।
अरिष्टा सिद्धिदा विद्या सर्व्वदोषविवर्ज्जिता ॥"

भग एकारः । एतेनाष्टधा पञ्चमी वाग्भवशक्तिकूटभेदेन ॥ * ॥ यामले ।

"द्विविधा पञ्चमी विद्या पञ्चपञ्चाक्षरी परा ।
मध्ये षडक्षरी चैव शक्तिश्च चतुरक्षरी ॥"

षड़िति कामराजविद्याया मध्यकूटमित्यर्थः । शक्तिरिति कामराजस्य शक्तिकूटमित्यर्थः ।

एषा चतुर्द्धा वाग्भवकूटभेदात् । एतयोः कामराजस्य तृतीयकूटन्तु तत्रैव ॥ * ॥

"कामबीजं महेशानि ! शिवबीजं ततः परम् ।
तदधश्चन्द्रबीजन्तु पृथ्वीबीजं ततो लिखेत् ।
तदन्ते च महामाया कूटं परमदुर्लभम् ॥"

एषा पूर्व्ववदुक्ता । अन्या चतुर्द्धा । तेन षट्चिंशद्रूपिणी पञ्चमी ॥ * ॥ हंसमाहेश्वरे ।

"वामकेश्वरविद्यायाः कूटं वाग्भवसुत्तमम् ।
एकारादि वाग्भवन्तु कूटं वाग्भवसुत्तमम् ॥
एकारादि वाग्भवन्तु सौभाग्यायाश्च वाग्भवम् ।
एषा च पञ्चमी विद्या त्रैलोक्यवशकारिणी॥"*॥

श्रीक्रमे ।

"एतासां चैव विद्यानां प्राणं शृणु वरानने ! ।
रमां मायां हंसबीजं वाग्भवाद्यं नियोजयेत् ॥
शक्त्यन्ते तु महादेवि ! हंसं मायां रमां तथा ।
एभिर्युक्तेन देवेशि ! विद्याजपनमाचरेत् ॥"

जपश्च सप्तवारमेव दीपन्यां तथा दर्शनात् ।

एतासां पूर्व्वोक्तश्रीक्रमोक्तविद्यानाम् ॥ * ॥

पञ्चम्यान्तु विशेषो यथा ।

"रमां मायां हंसबीजं वाग्भवाद्यं नियोजयेत् ।
शक्त्यन्ते तु महेशानि ! हंसं मायां रमां तथा ॥
कामराजत्रये देवि ! ककारं शक्तिसंयुतम् ।
मायाबिन्दीश्वरयुतं सूर्य्यकोटिसमप्रभम् ॥
प्रथमं कामकूटस्य चाद्ये नियोजयेदिदम् ॥
वान्तं वह्निसमायुक्तं वामनेत्रविभूषितम् ॥
नादबिन्दुसमायुक्तं श्रियो बीजमुदाहृतम् ।
द्वितीयं कामबीजन्तु जपेदुक्ता च सुन्दरि ! ॥
गगनं वह्निसंयुक्तं वामनेत्रविभूषितम् ।
नादबिन्दुसमायुक्तं मायाबीजं प्रकीर्त्तितम् ॥
मधुमतीं जपेच्चापि सर्व्वकामफलप्रदाम् ॥"

इति तन्त्रसारः ॥ * ॥ * ॥ रागिणीविशेषः । सा च वसन्तरागस्य प्रिया । यथा,—

"वसन्ती पञ्चमी दौली वहारी रूपमञ्जरी ।
रागिण्य ऋतुराजस्य वसन्तस्य प्रिया इमाः ॥"

अस्या ध्यानं यथा,—

"सङ्गीतगोष्ठीषु गरिष्ठभावं
समाश्रिता गायनसम्प्रदायैः ।
खर्व्वाङ्गिणी नूपुरपादपद्मा
सा पञ्चमी पञ्चमवेदवेद्या ॥"

इति सङ्गीतदर्पणः ॥

(नदीविशेषः । यथा, महाभारते ।६।९।२६।

"वरां वीरकराञ्चापि पञ्चमीञ्च महानदीम् ॥")

पञ्चमीव्रतं, क्ली, (पञ्चम्यां माघशुक्लपञ्चमीमारभ्य षड़र्षं यावत् प्रतिमासीयशुक्लपञ्चम्यां स्त्रिया कर्त्तव्यं व्रतम् नियमविशेषः ।) माघशुक्लपञ्चमीमारभ्य षड़्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां स्त्रीकर्त्तव्यनियमविशेषः । तत्प्रयोगो यथा, तत्रादौ कृतनित्यक्रिया यजमाना कृच्छ्रस्नाद्यन्यं स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात् । विष्णुर्नमोऽद्य माघे मासि शुक्ले पक्षे पञ्चम्यां तिथौ अमुकगोत्रा श्रीअमुकी पुत्रपौत्राद्यनवच्छिन्नसन्ततिमहदैश्वर्य्यसौभाग्यारोग्यसौन्दर्य्यावैधव्यप्राप्तिपूर्व्वकविष्णुलोकप्राप्तिकामा अद्यारभ्य षड़्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां गणपत्यादिनानादेवतासलक्ष्मीकवासुदेवपूजापूर्व्वकमविघ्नपुराणोक्तकथाश्रवणरूपषट्पञ्चमीव्रतमहं करिष्ये । इति सङ्कल्प्य सूक्तं पाठयेत् । ततः सामान्यार्घ्यादि आसनशुद्धिभूतशुद्धिमातृकान्यासकराङ्गन्यासान्तं कृत्वा गणेशादीन् संपूज्य लक्ष्मीं नारायणञ्च यथाशक्ति पूजयेत् । ततो भोज्योत्सर्गं कृत्वा प्रणमेत् ॥ * ॥

अथ कथा ।

"शेषशय्यासमासीनं लक्ष्मीधृतपदाम्बुजम् ।
योगनिद्रान्वितं शान्तं नारदः परिपृच्छति ॥
केनोपायेन भगवन्नारी दुःखं न विन्दति ।
सौभाग्यारोग्यसौन्दर्य्यपुत्रपौत्रादिकं लभेत् ॥
इत्युक्तो माधवश्चक्रे लक्ष्मीसुखनिरीक्षणम् ।
इङ्गिताकारतत्त्वज्ञा पद्मा पद्मात्मवल्लभा ।
वल्लभाञ्च पुरस्कृत्य प्रीता वचनमब्रवीत् ॥

श्रीरुवाच ।

षट्पञ्चमीव्रतं सम्यक् श्रूयतां पापनाशनम् ।
सौभाग्यारोग्यसौन्दर्य्यपुत्रपौत्रधनप्रदम् ॥
माघे मासि सिते पक्षे पञ्चमी या शुभा भवेत् ।
तस्यामारभ्य कर्त्तव्यं षड़ब्दं व्रतमुत्तमम् ॥
प्रतिमासि च पञ्चम्यां लक्ष्मीं संपूज्य केशवम् ।
पूजयेन्नवपुष्पाद्यैर्नैवेद्यैश्च पृथग्विधैः ॥
कुर्य्याद्धोमञ्च विधिवत् गणेशस्य ग्रहस्य च ।
विष्णोर्लक्ष्म्याश्च वाग्देव्या दुर्गाया विभवक्रमात् ॥
अन्येषाञ्च यथाशक्ति तिलाज्ययवधान्यकैः ।
ततोऽश्वीयादलवणमादौ संवत्सरद्वयम् ॥
तृतीये च चतुर्थे च हविष्यान्नञ्च भोजयेत् ।
पञ्चमे फलमश्नीयात् षष्ठे कुर्य्यादुपोषणम् ।
षष्ठे प्रतिष्ठा कर्त्तव्या भोजयेद्वादश द्विजान् ॥
तत्र षोड़शदानानि हेमशङ्खीमलङ्कृताम् ।
दक्षिणासहितां दद्यादाचार्य्याय सुनीश्वर ॥
ततः षड्वलकं दद्यात् सर्व्वालङ्कारभूषितम् ।
काञ्चनप्रतिमायुग्मलक्ष्मीनारायणान्वितम् ॥
विधिनानेन या कुर्य्यात् पञ्चमीव्रतमुत्तमम् ।
स्वर्गांस्तु समुद्धृत्य विष्णुलोकमवाप्नुयात् ॥
एतत्ते कथितं विप्र ! मर्त्यलोके प्रकाशितम् ।
शोकसन्तापहानिस्तु दूरादुःखं न जायते ॥
धर्म्मं यशस्यमायुष्यमैश्वर्य्यमपि वर्द्धयेत् ।
याश्च कुर्व्वन्ति भूलोके तासां सर्व्वं सुखावहम् ॥

श्रीरुवाच ।

शृणु सत्यं मुनिश्रेष्ठ ! देव्या यत् कथितं मयि ।
तदनुष्ठानसर्व्वन्तु प्रतिष्ठाञ्च द्विजोत्तम ! ॥
या करोति व्रतं साध्वी सर्व्वकामफलं लभेत् ।

तस्याः श्रीर्निश्चला गेहे सत्यं सत्यं हि नारद ! ॥
यथेन्द्राणी महेन्द्रस्य लक्ष्मीर्लक्ष्मीपतेर्यथा ।
शङ्करस्य यथा गौरी सापि भर्तुर्भवेत्तथा ॥
या पञ्चमीव्रतं कुर्यात् सा भवेच्च पतिव्रता ।
यथोक्तविधिना या तु कुर्व्वीत व्रतमुत्तमम् ॥
पुत्रपौत्रधनैश्वर्य्यं पञ्चमीकरणादपि ।
एतत्ते कथितं सर्व्वं तत्त्वं कमललोचन ! ॥

नारद उवाच ।

केनापि कथितं पूर्व्वं कृतं केनापि वा पुनः ।
प्राप्तं कुत्र त्वया देवि ! श्रोतुमिच्छामि तद्वद ॥

श्रीरुवाच ।

माघे मासि सिते पक्षे पञ्चम्याञ्च महामुने ! ।
निशावसानसमये चन्द्रभागां महानदीम् ॥
हंससङ्घैः समाकीर्णां नलिनीपुलिनोज्ज्वलाम् ।
तत्र गौरी शची मेधा सावित्री चोर्व्वशी परा ॥
नारायणं समाराध्य कुर्व्वन्ति व्रतमुत्तमम् ।
काम्यव्रतमिदं पद्मे ! लभते फलमुत्तमम् ॥
हर्षवतीञ्च तां वीक्ष्य प्रोवाच कमलालया ।
पुण्यञ्च देहि मे धूपं दीपं नैवेद्यडल्लकम् ॥
मया तव प्रसादेन क्रियते व्रतमुत्तमम् ।
ततस्तासां फलैः पुण्यैर्नैवेद्यैश्च व्रतं कृतम् ॥
ततस्तासां प्रसादेन वज्रभाहं जनार्द्दन ! ।
त्वयि देव जगन्नाथ ! नरनारीगणेन च ॥
भक्त्या मया ते कथितं मर्त्यलोके प्रकाशितम् ।
या करोति व्रतं ह्येतत् यथाविधिविधानतः ॥
इह लोके सुखं भुक्त्वा नारायणपुरं व्रजेत् ।
श्रुत्वा व्रतस्य माहात्म्यं व्रतमेतत् चरन्ति याः ॥
न किञ्चिदुष्कृतं लोके तासां सत्यं वदाम्यहम् ।
हरन्ति तासां पापानि यास्च शृण्वन्त्यहर्निशम् ॥
नारायणं नमस्कृत्य प्रपूज्य च विसर्ज्जयेत् ॥"

इति भविष्यपुराणोक्ता षट्पञ्चमीव्रतकथा समाप्ता ॥

पञ्चमुखः, पुं. (पञ्च विस्तृतं मुखं यस्य सः ।) सिंहः । इति राजनिर्घण्टः ॥ (पञ्च मुखानि यस्य सः ।) शिवः । इति हेमचन्द्रः ॥ तस्य नामवर्णादि यथा, देवीपुराणे ।
"शिवस्तत्र स्थितः साक्षात् सर्व्वपापहरः शुभः ।
स तु पञ्चमुखः ख्यातो लोके सर्व्वार्थसाधकः ।
पञ्चब्रह्मात्मको यस्मात्तेन पञ्चमुखः स्मृतः ॥
पश्चिमे तु मुखे सद्यो वामदेवस्तथोत्तरे ।
पूर्व्वे तत्पुरुषं विद्यादघोरञ्चापि दक्षिणे ॥
ईशानः पञ्चमो मध्ये सर्व्वेषामुपरि स्थितः ।
एते पञ्च सुखा वत्स ! पापघ्ना गदनाशनाः ॥
सद्योजातं भवेच्छुक्लं वामदेवन्तु पीतकम् ।
रक्तस्तत्पुरुषो ज्ञेयोऽघोरः कृष्णः स एव च ॥
ईशानः पश्चिमस्तेषां सर्व्ववर्णसमन्वितः ।
कामदः कामरूपी स्यात् ज्ञानाधारः शिवात्मकः ॥
(रुद्राक्षविशेषः । अस्य धारणतः शुभं भवति ॥ यच्च सुखानि यस्य इति विग्रहे वाच्यलिङ्गत्वम् । यथा, रामायणे ।५।३१।२३। [ततः ।
"तस्य पञ्चायसांस्तीक्ष्णान् शितान् पञ्चमुखान् शिरस्युत्तमपत्राभान् दुर्धर्षः संन्यवेशयत् ॥")

पञ्चमुखी, स्त्री, (पञ्चमुखानीव सन्त्यस्याः ।) वासकः । इति राजनिर्घण्टः ॥ जवापुष्पविशेषश्च ॥ (पञ्च विस्तृतं मुखमस्याः । सिंहस्त्री ॥ रुद्रिकाले पञ्चमहाभूतान्येव पञ्चमुखानीव यस्याः प्रकृतेरित्यर्थः । शिवपत्नी । इति शब्दरत्नावलिः ॥)

पञ्चमुद्रा, स्त्री, (पञ्चविधा मुद्रा ।) पूजायां कर्त्तव्या पञ्चप्रकारमुद्रा । तस्या अनुष्ठानं यथा,—
"सम्यक् प्रपूरितः पुष्पैः कराभ्यां कल्पितोऽञ्जलिः ।
आवाहनी समाख्याता मुद्रा देशिकसत्तमैः ॥१॥
अधोमुखी त्रियश्चेत् स्यात् स्थापनी मुद्रिका भवेत् ।२।
उच्छ्रिताङ्गुष्ठमुष्टी स्तु संयोगात् सन्निधापनी ॥३॥
अन्तःप्रवेशिताङ्गुष्ठा सैव सम्बोधनी मता । ४ ।
उत्तानमुष्टियुगला संमुखी करणी मता ॥"५॥

इति पूजाप्रदीपः ॥

पञ्चमूत्रं, क्ली, (पञ्चविधं मूत्रम् ।) गवाजामेषीमहिषीगर्दभीमूत्रम् । इति राजनिर्घण्टः ॥

पञ्चमूलं, क्ली. (पञ्चप्रकारं पञ्चगुणितं वा मूलम् ।) स्वनामख्यातपाचनम् । तत् त्रिविधं बृहत् स्वल्पं लघ्वाख्यञ्च । आद्यं यथा,—
"विल्वग्निमन्थश्योनाककाश्मर्य्यः पाटला तथा ।
ज्ञेयं बृहत् पञ्चमूलं पञ्चमूलमिति स्मृतम् ॥
शरेक्षुदर्भकाशानां नलस्य मूलमेव च ।
सौश्रुतस्वारकञ्चैव लघ्वाख्यं पञ्चमूलकम् ॥"

इति शब्दचन्द्रिका ॥

(पञ्चानां मूलानां समाहारः । इति विग्रहे मूलपञ्चकम् ॥)

पञ्चमूली, स्त्री, (पञ्चानां मूलानां समाहारः । "द्विगोः ।" ४ । १ । २१ । इति ङीप् ।) स्वल्पपञ्चमूलपाचनम् । यथा,—
"शालपर्णी पृश्निपर्णी बृहती कण्टकारिका ।
तथा गोक्षुरकश्चैव पञ्चमूली कनीयसी ॥"

इति शब्दचन्द्रिका ॥

पञ्चयज्ञाः, पुं, (पञ्चविधा यज्ञाः ।) गृहस्थकर्त्तव्यपञ्चप्रकारयज्ञविशेषाः । यथा,—
"ब्रह्मयज्ञो नृयज्ञश्च दैवयज्ञश्च सत्तम ! ।
पितृयज्ञो भूतयज्ञः पञ्चयज्ञाः प्रकीर्त्तिताः ॥"

इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥

शूद्रमधिकृत्य,—
"नमस्कारेण मन्त्रेण पञ्चयज्ञान् वापयेत् ।"

इति तिथ्यादितत्त्वम् ॥

अस्य विवरणं पञ्चमहायज्ञशब्दे द्रष्टव्यम् ॥

पञ्चरत्नकः, पुं, (पञ्चगुणितानि रत्नका इव कण्टकानि यस्मिन् ।) पक्वपौड्रेक्षुः । इति राजनिर्घण्टः ॥

पञ्चरत्नं, क्ली. पञ्चानां रत्नानां समाहारः । (यद्वा पञ्चविधं पञ्चगुणितं वा रत्नम् ।) तद्यथा. कनकम् १ हीरकम् २ नीलमणिः ३ पद्मरागः ४ मुक्ता ५ । यथा,—
"कनकं हीरकं नीलं पद्मरागश्च मौक्तिकम् ।
पञ्चरत्नमिदं प्रोक्तन्दधिभिः पूर्व्वदर्शिभिः ॥
रत्नानाप्याप्यभावे तु स्वर्णं कर्षार्द्धमेव वा ।
सुवर्णस्याप्यभावे तु आज्यं ज्ञेयं विचक्षणैः ॥"

इति हेमाद्रिः ॥

कनकरजतप्रवालमौक्तिकराजपट्टात्मकमिति गौड़ाः ॥

पञ्चरसा. स्त्री, (पञ्चः विस्तीर्णो रसोऽस्याम् ।) आमलकी । इति हारावली शब्दमाला च ॥

पञ्चरात्रं, क्ली, (पञ्चविधानि रात्राणि ज्ञानानि यत्र । समासे अच् ।) ग्रन्थविशेषः । यथा,—
"रात्रञ्च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।
तेनेदं पञ्चरात्रञ्च प्रवदन्ति मनीषिणः ॥
प्रथमं सात्विकं ज्ञानं द्वितीयन्तु तदेव च ।
नैर्गुण्यञ्च तृतीयञ्च ज्ञानञ्च सर्व्वतः परम् ॥
चतुर्थञ्च राजसिकं भक्तस्तन्नाभिवाञ्छति ।
पञ्चमं तामसं ज्ञानं विद्वांस्तन्नाभिवाञ्छति ॥
ज्ञानं पञ्चविधं प्रोक्तं पञ्चरात्रं विदुर्बुधाः ॥"
तत् सप्तविधं यथा,—
"पञ्चरात्रं सप्तविधं ज्ञानिनां ज्ञानदं परम् ।
आद्यं शैवञ्च कौमारं वाशिष्ठं कापिलं परम् ॥
गौतमीयं नारदीयमिदं सप्तविधं स्मृतम् ॥"

इति नारदपञ्चरात्रे प्रथमरात्रम् ॥

अपि च ।
"पञ्चकं पञ्चरात्राणां कृष्णमाहात्म्यपूर्व्वकम् ।
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम् ।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अध्यायः ॥
एतदतिरिक्तानि हयशीर्षेष्टयुधुवादिपञ्चरात्राणि सन्ति ॥ (पञ्चानां रात्रीणां समाहारः ।) पञ्च निशाः । यथाह चक्रपाणिदत्तः ।
"त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा ।
लङ्घनं सन्निपातेषु कुर्य्यादारोग्यदर्शनात् ॥"

पञ्चलक्षणं, क्ली, (सर्गादि पञ्चविधानि लक्षणानि यत्र ।) पुराणम् । यथा,—
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥"

इत्यमरभरतौ ॥

(पञ्चानां लक्षणानां समाहारः । इति विग्रहे पञ्चलक्षणानि ॥)

पञ्चलवणं, क्ली, पञ्चानां लवणानां समाहारः । (पञ्चगुणितं लवणमिति केचित् ।) तद्यथा,—
काचम् । सैन्धवम् । साम्बुद्रम् । विड्म् । सौवर्च्चलम् । इति राजनिर्घण्टः ॥

पञ्चलाङ्गलकं, क्ली, (शक्तादिविभूषितदण्डव-

युक्तानि सारदारुनिर्म्मितानि पञ्च लाङ्गलकानि यस्मिन्।) महादानभेदः। यथा,—
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम्।
पञ्चलाङ्गलकं नाम महापातकनाशनम्॥
पुण्यां तिथिं समासाद्य युगादिग्रहणादिकम्।
भूमिदानं ततो दद्यात् पञ्चलाङ्गलकान्वितम्॥
कर्ब्बटं खेटकञ्चापि यानं वा ग्रस्यग्रालिनम्।
निवर्त्तनशतं वापि तदर्द्धं वापि शक्तितः॥
सारदारुमयान् कृत्वा हलान् पञ्च विचक्षणः।
सर्व्वोपकरणैर्युक्तानन्यान् पञ्च च काञ्चनान्॥
वृषलक्षयसंयुक्तान् दद्यैव तु धुरन्धरान्।
सुवर्णशृङ्गाभरणान् सुकालाङ्गूलभूषितान्॥
रौप्यपादाग्रतिलकान्नक्तकौशेयभूषणान्।
सगदामचन्दनयुतान् ग्रालायामधिवासयेत्॥
पर्ज्जन्यादित्यरुद्रेभ्यः पायसं निर्व्वपेत् चरुम्।
एकस्मिन्नेव कुण्डे तु गुरुर्यस्मिन्निवेदयेत्॥
पालाशाः समिधस्तद्वदाज्यं क्षयतिलांस्तथा।
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनं बुधः॥
ततो मङ्गलशब्देन युक्तमाख्याम्बरो बुधः।
आहूय द्विजदान्यत्यं हेमरत्नाङ्गशैयकैः॥
कौशेयवस्त्रकटकैर्मणिभिश्चापि पूजयेत्।
ग्रस्यां सोपस्करां तद्वद्धेनुमेकां पयस्विनीम्॥
तथाष्टादश धान्यानि समन्तादधिवासयेत्।
ततः प्रदक्षिणं कृत्वा गृहीतकुसुमाञ्जलिः॥
रमस्वाराध्येत्यन्तमथ सर्व्वं निवेदयेत्।
यस्माद्विश्वगाः सर्व्वे स्थावराणि चराणि च॥
धुरन्धराङ्गे तिष्ठन्ति तस्माद्भक्तिः शिवेऽस्तु मे।
यस्माच्च भूमिदानस्य कलां नार्हन्ति षोड़शीम्॥
दानान्यन्यानि मे भक्तिर्धर्म्मे एव दृढ़ा भवेत्।
दक्षेण सप्तहस्तेन त्रिंशद्दण्डान्निवर्त्तनम्॥
त्रिभागहीनं गोचर्म्ममानमाह प्रजापतिः।
मानेनानेन यो दद्यात् निवर्त्तनशतं बुधः॥
विधिनानेन तस्यापि क्षीयते पापसंहतिः।
तदर्द्धमथवा दद्यादपि गोचर्म्ममात्रकम्।
भवनस्थानमात्रं वा सोऽपि पापैः प्रमुच्यते॥
यावन्ति लाङ्गलकमार्गसुखानि भूमे-
स्तासां पतिर्दुहितुरङ्गजरोमकाणि।
तावन्ति ग्रहरपुरे वर्षाणि तिष्ठे-
द्भूमिप्रदानमथ यः कुरुते मनुष्यः॥
गन्धर्व्वकिन्नरसुरासुरसिद्धसंघै-
राधूतचामरसुपेत्य महाद्रिमानम्।
सम्पूज्यते पितृपितामहबन्धुयुक्तः
ग्रस्यः पुरं व्रजति चामरनायकः सन्॥
इन्द्रत्वमप्यधिगतं क्षयमभ्युपेति
गोभूमिलाङ्गलधुरन्धरसंप्रदानात्।
तस्मादघौघपटलक्षयकारिभूमे-
र्दानं विधेयमिति भूतिभवाभवाय॥"
इति मात्स्ये २५७ अध्यायः॥

पञ्चलोहं, क्ली, (पञ्च विस्तीर्णं लोहम्।) सौराष्ट्कलोहम्। इति हेमचन्द्रः॥ (पञ्चधातवः लोहम्। सुवर्णरजततात्रसीसकरङ्गाणि॥)

पञ्चलोहकं, क्ली, पञ्चानां लोहकानां धातूनां समाहारः। तद्यथा। सुवर्णरजतताम्ररङ्गनागानि। इति राजनिर्घण्टः॥

पञ्चवक्त्रः, पुं, (पञ्च वक्त्राणि यस्य।) शिवः। ("विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥" इति शिवध्यानम्॥)
अस्य मन्त्रा यथा,—
"समस्तानां स्वराणान्तु दीर्घाः श्रेष्ठाः सबिन्दुकाः।
ऋदृक्कमूष्माः सार्द्धचन्द्रा उपान्ते नादसंहिताः॥
एभिः पञ्चाक्षरैर्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम्।
क्रमात् सम्मदसन्दोहमादगौरवसंज्ञकाः॥
प्रासादन्तु भवेत् श्रेष्ठं पञ्चमन्त्राः प्रकीर्त्तिताः।
एकैकेन तथैवैकं वक्त्रं मन्त्रेण पूजयेत्॥
एकं समुदितं कृत्वा पञ्चभिर्व्वा प्रपूजयेत्।
प्रासादेनाथवा पञ्चवक्त्रं देवं प्रपूजयेत्॥
सम्मदादिषु मन्त्रेषु प्रासादन्तु प्रशस्यते।
ग्रस्यः प्रसादनेनैव यस्मादुक्तस्तु मन्त्रकः॥
तेन प्रासादसंज्ञोऽयं कथ्यते मुनिपुङ्गवैः।
तस्मात् सर्व्वेषु मन्त्रेषु प्रासादः प्रीतिदः प्रभोः॥
आमोदकारकः ग्रस्यो मन्त्रः सम्मद उच्यते।
मनःप्रपूरकश्चापि सन्दोहः परिकीर्त्तितः॥
आकर्षको भवेन्मादो गुरुत्वाद्गौरवाह्वयः।
एतद्वर्णं समस्तञ्च मन्त्रं ग्रस्यः प्रकीर्त्तितम्॥
पञ्चाक्षरञ्च यन्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम्।
स्वयम्भुनैव मन्त्रेण आराधयतमीश्वरम्॥ *॥
ध्यानञ्च शृणु वक्ष्यामि सम्यग्वेतालभरवौ।
पञ्चवक्त्रं महाकायं जटाजूटविभूषितम्॥
बालचन्द्रकलायुक्तं मुण्डैर्मालाविलम्बितम्।
बाहुभिर्दशभिर्युक्तं व्याघ्रचर्म्माम्बरावृतम्॥
कालकूटधरं कण्ठे नागहारोपशोभितम्।
कोटीरकुण्डलं बाहुभूषणञ्च भुजङ्गमाः॥
विभूतिं सर्व्वगात्रेषु ज्योत्स्नार्पितखरोचिषम्।
भूतिसंलिप्तसर्व्वाङ्गमेकैकञ्च त्रिभिस्त्रिभिः॥
नेत्रैस्तु पञ्चदशभिर्ज्योतिश्चक्रैर्विभूषितम्।
वृषभोपरि संस्थन्तु गजचर्म्मपरिच्छदम्॥
सद्योजातं वामदेवमघोरञ्च ततः परम्।
तत्पुरुषं यथेशानं पञ्चवक्त्रं प्रकीर्त्तितम्॥
सद्योजातं भवेद्वक्त्रं शुद्धस्फटिकसन्निभम्।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम्॥
नीलवर्णमघोरन्तु दंष्ट्राभीतिविवर्द्धनम्।
रक्तं तत्पुरुषं देवं दिव्यमूर्त्तिं मनोहरम्॥
श्यामलञ्च तथेशानं सर्व्वदेव शिवात्मकम्।
चिन्तयेत् पश्चिमे त्वाद्यं द्वितीयञ्च तथोत्तरे॥
अघोरं दक्षिणे देवं पूर्व्वे तत्पुरुषन्तथा।
ईशानं मध्यतो ध्येयं चिन्तयेदुक्तितत्परः॥
शक्तित्रिशूलखट्वाङ्गवरदाभयदं शिवम्।
दक्षिणेष्वथ हस्तेषु वामेष्वपि ततः शृणु॥
अक्षस्रक्त्रं बीजपूरं सृणिं डमरूत्पलम्।
अष्टैश्वर्य्यसमायुक्तं ध्यायेत्तु हृदयं शिवम्॥"
इति कालिकापुराणे ५० अध्यायः॥ *॥

पञ्चसुखरुद्राक्षः। यथा स्कान्दे,—
"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम वामतः।
अमन्त्रागमनाच्चैव अभक्षस्य च भक्षणात्।
सूचते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात्॥"
इति तिथितत्त्वम्॥
(पञ्चं विस्तृतं वक्त्रं वदनं यस्य। इति विग्रहे। सिंहः॥)

पञ्चवटः, पुं, (पञ्चो विस्तीर्णो वटः।) उरुस्कटः। तत्पर्य्यायः। जोटिङ्गः २ महाव्रती ३ बालयज्ञोपवीतकम् ४। इति त्रिकाण्डशेषः॥ (पञ्चसंख्यका वटा अश्वत्थविल्ववटधात्र्यशोकरूपा वृक्षा यस्मिन्। पञ्चवटीवनम्। यथा रामायणे। १। ३। १३।
"समागमं विराधेन वासं पञ्चवटे तथा॥")

पञ्चवटी, स्त्री, (पञ्चानां वटानां समाहारः। तद्धितार्थेति तत्पुरुषः संख्यापूर्व्वोद्विगुरिति द्विगुसंज्ञायां "द्विगोः" ।४।१।२१। इति ङीप्। द्विगुरेकवचनमिति एकवचनम्।) पञ्चप्रकारवृक्षविशेषः। यथा,—
"अश्वत्थविल्ववृक्षञ्च वटधात्रीशशोककम्।
वटीपञ्चकमित्युक्तं स्थापयेत् पञ्चदिक्षु च॥
अश्वत्थं स्थापयेत् प्राचि विल्वमुत्तरभागतः।
वटं पश्चिमभागे तु धात्रीं दक्षिणतस्तथा॥
अशोकं वह्निदिक्स्थाप्यं तपस्यार्थं सुरेश्वरि।
मध्ये वेदीं चतुर्हस्तां सुन्दरीं सुमनोहराम्॥
प्रतिष्ठां कारयेत्तस्याः पञ्चवर्णोत्तरं शिवे!।
अनन्तफलदात्री सा तपस्याफलदायिनी॥ *॥
इयं पञ्चवटी प्रोक्ता दृष्टदुष्टवटी शृणु।
विल्ववृक्षं मध्यभागे चतुर्दिक्षु चतुष्टयम्॥
वटवृक्षं चतुष्कोणे वेदसंख्यं प्ररोपयेत्।
अशोकं वर्त्तुलाकारं पञ्चविंशतिसम्मितम्॥
दिग्विदिक्षूत्तमलक्षैव एकैकं परमेश्वरि।
अश्वत्थञ्च चतुर्दिक्षु दृष्टदुष्टवटी भवेत्॥
यः करोति महेशानि! साक्षादिन्द्रसमो भवेत्।
इह लोके मनुष्यस्तु परे च परमा गतिः॥"
इति हेमाद्रीयव्रतखण्डधृतस्कन्दपुराणवचनानि॥
(स्थानमाख्यातः प्रदेशविशेषः। यथा, रामायणे। १। १। ४५।
"देशः पञ्चवटीनाम तत्र वासं स कल्पयत्॥")

पञ्चवल्कलं, क्ली, (पञ्चानां वल्कलानां समाहारः।) वल्कलपञ्चकम्। यथा,—
"न्यग्रोधोडुम्बराश्वत्थप्लक्षवेतसवल्कलैः।
सर्व्वैरेकत्र संयुक्तैः पञ्चवल्कलमुच्यते॥"
अपि च।
"न्यग्रोधोडुम्बराश्वत्थप्लक्षपिप्पलपीतनाः।
क्षीरिवृक्षाश्च पञ्चैषां वल्कलं पञ्चवल्कलम्॥"
इति शब्दचन्द्रिका॥
अस्य गुणाः।
"पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम्।
त्वक्पञ्चकं हिमं याहि व्रणशोथविसर्पजित्॥"
इति राजनिर्घण्टः॥

पञ्चवाणः, पुं, (पञ्च वाणाः शरा यस्य सः।) कामदेवः। इति हेमचन्द्रः॥ पञ्चानां वाणानां समाहारे क्ली। (कामस्य पञ्च वाणा यथा,—
"द्रवं शोषं वाणं तापनं मोहनाभिधम्।

उन्मादनश्च कामस्य बाणाः पञ्च प्रकीर्त्तिताः ॥"
पञ्चपुष्पबाणा यथा,—
"अरविन्दमशोकञ्च चूतञ्च नवमल्लिका ।
नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः ॥")
पञ्चबाणविशिष्टे त्रि ॥

पञ्चशरः, पुं, (पञ्च शरा यस्य सः ।) कन्दर्पः । इत्यमरः । १ । १ । २६ ॥ अस्य पञ्च शराणि यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३२ अध्याये ।
"सम्मोहनं समुद्दीपबीजं स्तम्भनकारकम् ।
उन्मत्तबीजं ज्वलनं शुष्कचेतनहारकम् ॥"
अपि च ।
"सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा ।
स्तम्भनश्चेति कामस्य पञ्च बाणाः प्रकीर्त्तिताः ॥"
पञ्च इन्द्रियार्थाः शरा अस्येत्यन्ये । इति भरतः ॥
(यथा, कुमारे । ७ । ६२ ।
"ग्लापावसाने प्रतिपन्नमूर्त्ते-
र्यथाचिरे पञ्चशरस्य सेवाम् ॥")

पञ्चशस्यं, क्ली, (पञ्चानां शस्यानां समाहारः ।) शस्यपञ्चकम् । तत्तु धान्यसुद्गतिलयवश्चेतसर्षपरूपम् । सर्षपस्थाने माषोऽपि । इति दुर्गोत्सवपद्धतिः ॥

पञ्चशाखः, पुं, (पञ्च शाखा इवाङ्गुलयो यस्य ।) हस्तः । इत्यमरः । २ । ६ । ८१ ॥ पञ्चानां शाखानां समाहारे क्ली । पञ्चशाखाविशिष्टे त्रि ॥

पञ्चशिखः, पुं, (पञ्चा विस्तीर्णा शिखा केशरादिर्यस्य ।) सिंहः । इति हेमचन्द्रः ॥ धर्म्मस्य हिंसाभार्य्यायां जातो मुनिविशेषः । यथा,—
"धर्म्मस्य भार्य्या हिंसाख्या तस्यां पुत्रचतुष्टयम् ।
सन्त्यागं मुनिशार्दूल ! योगशास्त्रविचारकम् ॥
ज्येष्ठः सनत्कुमारोऽभूद्द्वितीयश्च सनातनः ।
तृतीयः सनको नाम चतुर्थश्च सनन्दनः ॥
सांख्यवेत्तारमपरं कपिलं वीढुमासुरिम् ।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम् ॥
ज्ञानयोगं न ते दृष्ट्वायांसोऽपि कनीयसाम् ॥"
इति वामने ५० अध्यायः ॥
(अस्य अन्यप्रकारोत्पत्तिर्नामनिरुक्तिश्च उक्ता महाभारते । १२ । २१८ । ६—१६ ।
"तत्र पञ्चशिखो नाम कापिलेयो महामुनिः ।
परिधावन् महीं कृत्स्नां जगाम मिथिलामथ ॥
सर्व्वसंन्यासधर्म्मज्ञां तत्त्वज्ञानविनिश्चये ।
सुपर्य्यवसितार्थञ्च निर्द्वन्द्वो गतसंशयः ॥
ऋषीणामाहुरेकं यं कामादवसितं नृषु ।
शाश्वतं सुखमत्यन्तमन्विच्छन्तं सुदुर्लभम् ॥
यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिम् ।
स मन्ये तेन रूपेण विस्तारयति हि स्वयम् ॥
आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम् ।
पञ्चस्रोतसि यः सत्त्रमास्ते वर्षसहस्रिकम् ॥
यत्र चासीनमागम्य कापिलं मण्डलं महत् ।
पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत् ॥
दृष्टसत्त्रेण संपृष्टो भूयश्च तपसासुरिः ।
चैवचैत्रयोर्व्यक्तिं बुबुधे देवदर्शनः ॥

यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते ।
आसुरिर्म्मण्डले तस्मिन् प्रतिपेदे तदव्ययम् ॥
तस्य पञ्चशिखः शिष्यो मानुष्या पयसा भृतः ॥
ब्राह्मणी कपिला नाम काचिदासीत् कुटुम्बिनी ।
तस्याः पुत्रत्वमागम्य स्त्रियाः स पिबति स्तनौ ॥
ततः स कापिलेयत्वं लेभे बुद्धिञ्च नैष्ठिकीम् ।
ऋतन्ते भगवानाह कापिलेयस्य सम्भवम् ॥
तस्य तत् कापिलेयत्वं सर्व्वविज्ञानमुत्तमम् ।
सामान्यं जनकं ज्ञात्वा धर्म्मज्ञो ज्ञानमुत्तमम् ।
उपेत्य मृतमाचार्य्यान्मोहयामास हेतुभिः ॥
जनकस्त्वभिसंरक्तः कापिलेयानुदर्शनात् ।
उत्सृज्य मृतमाचार्य्यान् दृष्टतोऽनुजगाम तम् ॥
पञ्चस्रोतसि निष्णातः पञ्चरात्रविशारदः ।
पञ्चघ्नः पञ्चकृत् पञ्चगुणः पञ्चशिखः स्मृतः ॥"
गायत्रीस्वरूपायां शक्तौ स्त्री । यथा, देवीभागवते । १२ । ६ । १०५ ।
"पानप्रिया पञ्चशिखा पन्नगोपरिशायिनी ॥")

पञ्चशूरः, पुं, (पञ्च शूरा यत्र ।) पञ्चप्रकारशूरः । तद्यथा । अत्यन्तपर्णी काश्मीरः मालाकन्दः शूरः । श्वेतशूरश्च । तथाहि ।
"अत्यन्तपर्णीकाश्मीरमालाकन्दद्विशूरकैः ।
कथितो भवति योगोऽयं पञ्चशूरवसंज्ञकः ॥"
इति राजनिर्घण्टः ॥

पञ्चशैरीषकं, क्ली, (शिरीषवृक्षस्य इदम् शैरीषकम् । पञ्चसंख्यकं शैरीषकम् ।) शिरीषवृक्षस्य कुसुममूलफलपत्रत्वचः । इति राजनिर्घण्टः ॥

पञ्चशः, त्रि, पञ्च वा बहु परिमाणं येषां ते । बहुवचनान्तोऽयं शब्दः । इति मुग्धबोधव्याकरणम् ॥

पञ्चसिद्धौषधिः, पुं, (पञ्च सिद्धा औषधयो यस्मिन् ।) पञ्चप्रकारौषधिविशेषः । यथा,—
"तैलकन्दसुधाकन्दक्रोडकन्दरुदन्तिकाः ।
सर्पनेत्रयुताः पञ्चसिद्धौषधिकसंज्ञकः ॥"
इति राजनिर्घण्टः ॥

पञ्चसुगन्धकं, क्ली, (पञ्च सुगन्धा यत्र । ततः कन् ।) पञ्चप्रकारसुगन्धिद्रव्यम् । यथा,—
"कुसुमानि लवङ्गस्य तथा कक्कोलकाख्यौ ।
जातीफलानि कर्पूरमेतत् पञ्चसुगन्धकम् ॥"
इति शब्दचन्द्रिका ॥
अपि च ।
"कर्पूरककोललवङ्गपुष्प-
गुवाकजातीफलपञ्चकेन ।
समांशभागेन च योजितेन
मनोहरं पञ्चसुगन्धकं स्यात् ॥"
इति राजनिर्घण्टः ॥

पञ्चसूना, स्त्री, (पञ्चसूचिता सूना प्राणिवधस्थानम् ।) पञ्चप्रकारप्राणिवधस्थानम् । यथा,—
"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च वध्यते याश्च वाहयन् ॥"
इति शुद्धितत्त्वम् ॥
तज्जन्यपापं गृहस्थस्य प्रतिदिनं भवति तस्य

प्रायश्चित्तं वैश्वदेवः । यथा,—
"लौकिके वैदिके वापि तृतीयेऽहनि जन्मनि ।
वैश्वदेवन्तु कुर्व्वीत पञ्चसूनापनुत्तये ॥"
इति आह्निकतत्त्वधृतशातातपवचनम् ॥
अशौचकालोत्पन्नपञ्चसूनादिजन्यपापस्य दानादिनाशत्वं यथा,—
"दशाहादनुपरं सम्यक् विप्रोऽधीयीत धर्म्मवित् ।
दानञ्च विधिना देयमशुभान्तारकं हि तत् ॥"
इति शुद्धितत्त्वधृतसर्व्वसंग्रहवचनम् ॥

पञ्चस्वरा, स्त्री, (पञ्च स्वरा यत्र ।) प्रजापतिदासवैद्यजतश्रिशुरिहमाहरिहपिलरिहस्त्रीपुंनपुंसकज्ञानसुखदुःखरिष्टच्छेदादियोगग्रन्थज्ञाननिर्णय इति सन्नाध्यायात्मकज्योतिर्यन्थविशेषः । यथा । तत्रैव ।
"पञ्चस्वराभिधानञ्च ग्रन्थं निदानसम्मतम् ।
किञ्चिद्दृष्ट्वागमञ्च स्वयं वक्ष्यामि शाश्वतम् ॥"

पञ्चस्वरोदयः, पुं, (पञ्चानां स्वराणामुदयो यत्र ।) ज्योतिःशास्त्रविशेषः । यथा,—
"कालं वक्ष्यामि संक्षिप्तं यत्र पञ्चस्वरोदयात् ।
राजा माता उदासा च पीड़ा मृत्युस्तथैव च ॥
आ इ ऊ ऐ औ स्वराश्च लिखेत् पञ्चात्मिकोष्ठके ।
ऊर्द्धतिर्य्यग्गतैरेखैः षड्वह्निक्रमसंगतैः ॥
तिथौ एकात्मिकोष्ठे तु जयो राजाय माजया ।
उदासा पीड़ा मृत्युश्च कुजः सोमसुतः क्रमात् ॥
गुरुशुक्रशनैश्चररविचन्द्रा यथोदितम् ।
रेवत्यादिश्विवाताश्च मघाश्च प्रथमाः कलाः ॥
पञ्चपञ्चाश्च भानि स्युरेवाद्य उदयस्तथा ।
द्वादशाद्या हयो मासो गाव आद्यचरं तथा ॥
कला लिङ्गञ्च या तिष्ठेत् पञ्चमस्तस्य वै ऋतिः ।
लका तिथिस्तथा वारनक्षत्रं मासमेव च ॥
नामोदयस्य पूर्व्वञ्च तथा भवति नान्यथा ॥"
इति गरुड़पुराणम् ॥

पञ्चाग्नि, क्ली, पञ्चानामग्नीनां समाहारः । अस्य विवरणं पञ्चातपशब्दे द्रष्टव्यम् । शरीरस्थपञ्चाग्नयो यथा,—
"उदरे गार्हपत्याग्निर्मध्यदेशे तु दक्षिणः ।
आस्ये आहवनीयश्च सदः पर्व्वा च मूर्द्धनि ।
यः पञ्चाग्नीनिमान् वेद आहिताग्निः स उच्यते ॥"
इति गरुड़पुराणम् ॥
(पञ्चाग्नयो यत्र यस्य । इति विग्रहे वाच्यलिङ्गत्वम् । यथा मनुः । ३ । १८५ ।
"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्ण्यषड़ङ्गवित् ॥")

पञ्चाङ्गं, क्ली, पञ्चानां अङ्गानां एकत्वस्य तत्त्वम् । त्वक्पत्रपुष्पमूलफलानां समाहारः । यथा,—
"त्वक्पत्रकुसुमं मूलं फलमेकस्य शाखिनः ।
एकत्र मिलितञ्चैतत् पञ्चाङ्गमिति संज्ञितम् ॥"
इति राजनिर्घण्टः ॥
पुरश्चरणविशेषः । यथा,—
"जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् ।
पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते ॥"
इति तन्त्रसारः ॥
वारतिथिनक्षत्रयोगकरणात्मकपञ्जिका । यथा,

"तिथिर्वारस्य नक्षत्रं योगः करणमेव च ।
पञ्चाङ्गस्य फलं श्रुत्वा गङ्गास्नानफलं लभेत्" ॥
इति ज्योतिषम् ॥

पञ्चाङ्गः, पुं, (पञ्चाङ्गानि यस्य ।) कमठः । इति शब्दमाला ॥ अश्वविशेषः । तत्पर्य्यायः । पञ्चभद्रः२ पुष्टिततुरङ्गमः३ । इति शब्दरत्नावली ॥ प्रणामविशेषः । यथा,—
"बाहुभ्यामेव जानुभ्यां शिरसा वचसा दृशा ।
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवराविमौ ॥"
इति तन्त्रसारः ॥

(राजनयः । यदुक्तम् ।
"सहायाः साधनोपायाः विभागो देशकालयोः ।
विनिपातप्रतीकारः सिद्धिः पञ्चाङ्ग इष्यते ॥")

पञ्चाङ्गगुग्गुलः, पुं, (पञ्चसंख्यकानि अङ्गानि गुग्गुलानि यस्य ।) कच्छपः । इति त्रिकाण्डशेषः ॥

पञ्चाङ्गुलः, पुं, (पञ्च अङ्गुलय इव पत्राणि यस्य ।) एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ । पञ्चाङ्गुलपरिमाणयुक्ते त्रि ॥

पञ्चाङ्गुलिः, त्रि, पञ्चाङ्गुलयो यस्य सः । इति आकरग्रन्थम् ॥

पञ्चाङ्गुली, स्त्री, तक्राकान्तुपः । इति राजनिर्घण्टः ॥

पञ्चातपा, स्त्री, (पञ्चभिरग्निसूर्य्यैरातप्यते इति । आङ् + तप् + अच् । ततः टाप् ।) तपस्याविशेषः । यथा,—
"तस्यां पञ्चातपाचिन्ता शाम्भवी शाम्भवो जपः ।
यत्रियेर्दारुभिः शुष्कैश्चतुर्दिक्षु चतुष्कृतम् ॥
वह्निसंस्थापनं पश्चौ तीव्रांशुस्तत्र पञ्चमः ।
हस्तान्तरे चतुर्व्वह्नीन् कृत्वा वेश्मानरेधिना ॥
तन्मध्यस्था सूर्य्यबिम्बं वीक्षन्ती बहुलांशुका ।"
इति कालिकापुराणे ४२ अध्यायः ॥

पञ्चाननः, पुं, (पञ्च आननानि यस्य ।) शिवः । (पञ्च विस्तृतं आननं यस्य ।) सिंहः । इति मेदिनी ॥ अग्नयः । इति शब्दरत्नावली ॥ (ज्योतिषोक्तसिंहराशिः । यथाह स्मृतिः ।
"पञ्चाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नैक्षितव्यः कदाचन ॥"
कदाक्षविशेषः । तद्दारणे महच्छुभं भवति ॥)

पञ्चामराः, स्त्री, (पञ्च अमराः । संज्ञात्वात्कर्म्मधारयः ।) पञ्चप्रकारामरलतादि । यथा,—
"एका तु अमरा दूर्व्वा तस्या यत्रिं समानयेत् ।
अन्या तु विजया देवी सिद्धिरूपा सरस्वती ॥
अन्या तु विल्वपत्रस्था शिवसन्तोषकारिणी ।
अन्या तु योगसिद्ध्यर्थं निर्गुण्डी चामरा लता ॥
अन्या तु कालतुलसी श्रीविष्णोः प्रियतोषिणी ।
एताः पञ्चामरा ज्ञेया योगसाधनकर्म्मणि ॥"
इति रुद्रयामलोत्तरखण्डे ३६ पटलः ॥

पञ्चाम्लतं, क्ली, (पञ्चानामम्लतानां समाहारः । शर्करादुग्धघृतदधिमधुघटितम् । यथा,—
"दुग्धं शर्करया चैव घृतं दधि तथा मधु ।
पञ्चाम्लतामिदं प्रोक्तं विधेयं सर्व्वकर्म्मसु ॥"
गर्भवतीभक्षणस्य दिनं यथा,—
"रेवत्यश्विपुनर्व्वसुद्वयमरुन्मूलानुराधामघा-
हस्तास्तत्तरफल्गुनीषु भृगुजे जीवार्कवारे तथा ।
लग्नेचोडुपशोभनेषु नियतं सन्तक्ष्य रिक्तां तिथिं
देयं मासि च पञ्चमेषु करणे पञ्चाम्लतं योषिताम् ॥"
इति ज्योतिस्तत्त्वम् ॥

पञ्चाम्लतयोगः, पुं, (पञ्चानामम्लतानां गुडुचीआदीनां योगः ।) गुडुचीगोक्षुरसुश्रुलीसुरिष्टकाघृतावरीणां संयोगः । यदुक्तं राजनिर्घण्टे ।
"गुडूची गोक्षुरश्चैव सुश्रुली सुरिष्टका तथा ।
घृतावरीति पञ्चानां योगः पञ्चाम्लताभिधः ॥"

पञ्चाम्नायः, पुं, (पञ्चसंख्यकः आम्नायः ।) शिवस्य पञ्चवक्त्रविनिर्गतस्तन्त्रशास्त्रविशेषः । यथा.—
"पूर्व्वाम्नायः पूर्व्वमुखः पश्चिमः पश्चिमामुखः ।
दक्षिणो दक्षिणास्यस्तदुत्तरश्चोत्तरः परः ॥
निरुत्तरं तथा चोर्द्ध सिद्धान्तागमरूपिणम् ।
ऊर्द्ध्वाम्नायपरिज्ञानं नाल्पस्य तपसः फलम् ॥"
अन्यत्र ।
"पूर्व्वाम्नायः शब्दरूपो दक्षिणः कर्णरूपकः ।
पश्चिमः प्रश्नरूपः स्यादुत्तरश्चोत्तरस्तथा ॥
ऊर्द्ध्वाम्नायस्तत्त्वबोधः केवलानुभवात्मकः ॥"
इत्यादि । इति भैरवतन्त्रम् ॥
मम पञ्चमुखेभ्यश्च पञ्चाम्नायाः समुद्गताः ।"
इति कुलार्णवतन्त्रम् ॥ * ॥

"विभाति सुखपद्मं हि शिवस्य वरवर्णिनि ।
सद्योजातं वामदेवमघोरस्य ततः परम् ॥
तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातस्य वै शुक्लं शुद्धस्फटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
कृष्णवर्णमघोरस्य समं भीमविवर्द्धनम् ।
रक्तं तत्पुरुषं देवि ! दिग्मूर्त्ति मनोहरम् ॥
श्यामलस्य तथेशानं सर्व्वदेवशिवात्मकम् ।
चिन्तयेत् पश्चिमे चाद्यं द्वितीयस्य तथोत्तरे ॥
अघोरं दक्षिणे देवं पूर्व्वे तत्पुरुषं तथा ।
ईशानं मध्यतो ज्ञेयं चिन्तयेद्भक्तितत्परः ॥"
इति निर्व्वाणतन्त्रे ६ पटलः ॥ * ॥

अन्यत् षडाम्नायशब्दे द्रष्टव्यम् ॥

पञ्चाम्रं, क्ली, (अमन्ति रसानि प्राप्नुवन्तीति । अमगत्यादिषु + "अमिनम्योर्दीर्घश्च ।" उणां २ । १६ । इति रक् दीर्घश्चोपधायाः इति आम्रा वृक्षाः । पञ्चानां आम्राणामश्वत्थादिवृक्षाणां समाहारः ।) वृक्षविशेषाणां समाहारः । यथा,—
"अश्वत्थमेकं पिचुमर्दमेकं
न्यग्रोधमेकं दश पुष्पजातीः ।
द्वे द्वे तथा दाडिममातुलुङ्गे
पञ्चाम्रवापी नरकं न याति ॥"
इति वराहपुराम् ॥

अपि च ।
"अश्वत्थ एकः पिचुमर्द एको
द्वौ चम्पकौ त्रीणि च केशराणि ।
सप्ताथ तालाः नव नारिकेलाः
पञ्चाम्रोपी नरकं न याति ॥"
इति तिथितत्त्वम् ॥

पञ्चाम्लं. क्ली, (पञ्चानामम्लानां कोलादीनां समाहारः ।) अम्लपञ्चकम् । यथा.—
"कोलदाडिमवृक्षाम्लैरम्लवेतससंयुतैः ।
चतुरम्लैः पञ्चाम्लं मातुलुङ्गसमन्वितम् ॥"
इति शब्दचन्द्रिका ॥

पञ्चारी, स्त्री, (पञ्चपञ्चसंख्याश्चक्षतीति । ऋ गतौ "कर्म्मण्यण्" । ३ । २ । १ । इति अण् । गौरादित्वात् ङीष् ।) शारिवृक्षलता । इति शब्दमाला ॥ (पाचार ढक् इति भाषा ॥)

पञ्चार्चिः, [स्] पुं, (पञ्च अर्चींषि यस्य सः ।) बुधग्रहः । इति चिकाण्डशेषः ॥

पञ्चालः, पुं (पञ्चिविस्तारवचने + "तमिविशिविधिस्थिकुलीति ।" उणां १ । ११० । इति कालन् ।) देशविशेषः । इत्यणादिकोषः ॥ तस्य व्युत्पत्तिर्यथा । "हर्य्यश्वान्मुद्गलस्यञ्जयदृहदिषुयवीनरकाम्पिल्यसंज्ञाः । पञ्चानामेतेषां विषयाणां रक्षणायालमेते मत्पुत्रा इति पित्राभिहिता इति पञ्चालाः ।" इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (अस्य स्थितिनिर्णय उक्तस्तन्त्रशास्त्रे यथा,—
"कुरुक्षेत्रात् पश्चिमेषु तथोत्तरभागतः ।
इन्द्रप्रस्थान्महेशानि ! दशयोजनकद्वये ।
पञ्चालदेशो देवेशि ! सौन्दर्य्यगर्व्वभूषितः ॥") ।

पञ्चालाः, पुं, (पञ्चाला: क्षत्रियास्तेषां निवासोजनपदः । निवासेऽण् जनपदे लुप् ।) नीवृद्विशेषः । बहुवचनान्तोऽयम् । इति मेदिनी ॥

पञ्चालिका, स्त्री, (पञ्चभिर्वर्णैरलति इति । आ + अल भूषणे + ण्वुल् । टाप् स्वार्थे कन् इत्वञ्च ।) पुत्तली । इत्यमरटीकायां भरतः ॥

पञ्चाली, स्त्री, (पञ्चभिर्वर्णैरलति । आ + अल् भूषणे + अच् । गौरादित्वात् ङीष् ।) वस्त्रादिकृतपुत्तिका । कानिर पुतुल इति भाषा ॥ गीतविशेषः । इति मेदिनी ॥ पाँचाली इति भाषा ॥ (पञ्चारी रस्य लत्वे सिद्धम् ।) शारिवृक्षलता । इति चिकाण्डशेषः ॥ ढक् इति भाषा ॥

पञ्चावटं, क्ली, (पञ्च विस्तृतमुरः स्थलं आवटति वेष्टते इति । आ + वट् + अच् ।) उरस्कटम् । वालोपवीतम् । इति हारावली ॥ (पञ्चानां वटानां वटादिवृक्षाणां समाहारः । निपातनात् साधुः । पञ्चवटी । यथा, गोः रामायणे । ३ । २० । ३८ ।
"विवेश पञ्चावटमुग्रसेवितम्
रिपून् दिधक्षुः शूलभानिवाव्ययम् ॥")

पञ्चावस्थः, पुं, (पञ्चसु भूतेषु अवस्था यस्य । तस्य देहारम्भकस्वस्वकारणेषु लयत्वात्तथात्वम् ॥ शिवः । इति त्रिकाण्डशेषः ॥ पञ्चावस्थायुक्ते त्रि ॥

पञ्चाशत्, त्रि, (पञ्चदशतः परिमाणमस्य ।) "षड्विंशतिचिंशदिति ।" ५ । १ । ५९ । निपातनात् साधुः ।) संख्याविशेषः । इति ज्योतिषम् ॥ पञ्चाश इति भाषा ॥ (यथा, स्मृतिपञ्चाशति । ५१ ।

"पञ्चाशल्लिपिभिः पुरा भगवति ! त्वया यदङ्गीकृतं तच्चाहं सफलोऽधुनापि विमतिस्तत्पादपद्मस्मृतेः ॥")

पञ्चास्यः, पुं, (पञ्च विस्तृतं आस्यं यस्य ।) सिंहः । इत्यमरः । २ । ५ । १० ॥ (पञ्चानि आस्यानि यस्य । शिवः ॥ पञ्चमुखविशिष्टे, त्रि । यथा, गोः रामायणे । ५ । ७४ । २३ ।

"लक्षितेयं विशालाक्षी मया शोकपरायणा ।
आदायेतां न जानीषे पञ्चास्यामिव भोगिनीम् ॥")

पञ्चीकरणं, क्ली, पञ्चभूतानां भागविशेषेण मिश्रीकरणम् । यथा । "पञ्चीकरणन्तु आकाशादिपञ्चखेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु मध्ये प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्द्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागं परित्यज्य भागान्तरेषु संयोजनम् । तदुक्तम् ।

द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः ।
स्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते ॥ इति ॥
अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणार्थत्वात् । पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च वैशिष्ट्यात्तु तद्व्यादस्तद्व्याद इतिन्यायेन आकाशादिव्यपदेशः सम्भवति । तदानीमाकाशे शब्दोऽभिव्यज्यते । वायौ शब्दस्पर्शौ । अग्नौ शब्दस्पर्शरूपाणि । अप्सु शब्दस्पर्शरूपरसाः । पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च । एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यः भूर्भुवः स्वर्महर्जनस्तपः सत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानां अतलवितलसुतलरसातलतलातलमहातलपातालनामकानां अधोऽधो विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्गतचतुर्विधस्थूलशरीराणामन्नपानादीनाञ्चोत्पत्तिर्भवति ॥" इति वेदान्तसारः । ३६-४२ ॥

पञ्चेन्द्रियं, क्ली, पञ्चानां ज्ञानेन्द्रियाणां समाहारः । यथा । "श्रोत्रत्वङ्नेत्ररसनघ्राणं पञ्चेन्द्रियाणि च ।" इति शब्दचन्द्रिका ॥ पञ्चकर्म्मेन्द्रियञ्च ॥

पञ्चेषुः, पुं, (पञ्च इषवो यस्य ।) कामदेवः । इति हलायुधः ॥

पञ्चोपविषं, क्ली, (पञ्चसंख्यकं उपविषम् ।) उपविषपञ्चकम् । यथा, राजनिर्घण्टे ।

"स्नुह्यर्ककरवीराणि लाङ्गली विषमुष्टिका ।
एतान्युपविषाण्याहुः पञ्च पाञ्चित्यशालिनः ॥"

पञ्चोष्माणः, पुं, (पञ्च उष्माणः ।) आहारपाचकशरीरस्थपञ्चाग्नयः । यथा, सारकौमुद्याम ।

"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।
पञ्चाहारगुणान्स्वान्स्वान् पार्थिवादीन् पचन्त्यनु ।
पार्थिवाः पार्थिवानेव शेषाः शेषांशदेहगान् ॥"

पञ्जरं, क्ली, (पञ्जयते रुध्यते उदरयन्त्रमनेन । पञ्जिरोधे + अरन् ।) कायास्थिवृन्दम् । शरीरास्थिपञ्जरम् । (यथा, पद्मपुराणे । ६ । १७३ ।

"देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता ।
विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥"

पञ्जयते रुध्यते पक्ष्यादिरत्र ।) पक्ष्यादिबन्धगृहम् । इत्यमरभरतौ । पिँजरा इति भाषा । तत्पर्य्यायः । शालारम् २ । इति जटाधरः ॥ (यथा, हरेः रामायणे । २ । ६५ । ५ ।

"तेन शब्देन विहगाः प्रतिबुद्धाश्च सस्वनुः ।
शाखास्थाः पञ्जरस्थाश्च ये राजकुलगोचराः ॥")

पञ्जरः, पुं, (पञ्जयते रुध्यते आत्मा यस्मिन् । पञ्जिरोधे + अरन् ।) शरीरम् । इति त्रिकाण्डशेषः ॥ (यथा, हठयोगदीपिकायाम् । ४ । १८ ।

"द्वासप्ततिसहस्राणि नाडीद्वाराणि पञ्जरे ।
सुषुम्ना शाम्भवी शक्तिः शेषास्त्वेव निरर्थकाः ॥"
"पञ्जरे पञ्जरवच्छिरास्थिभिर्बद्धे शरीरे ।" इति तट्टीका ॥) देहास्थिसमूहः । तत्पर्य्यायः । कङ्कालः २ देहबन्धास्थि ३ । इति जटाधरः ॥ कलियुगम् । गवां नीराजनाविधिः । इति सारस्वताभिधानम् ॥

पञ्जराखेटः, पुं, (पञ्जरेणैव यन्त्रेण व्याखेटो मृगया यस्मात् ।) मत्स्यमारणोपाययन्त्रम् । पोलो इति भाषा । तत्पर्य्यायः । भ्रवः २ प्लवः ३ । इति त्रिकाण्डशेषः ॥ [राजनिर्घण्टः ॥

पञ्जलः, पुं, (पञ्ज + अलच् ।) कोलकन्दः । इति

पञ्जिः, स्त्री, (पञ्ज + इन् ।) सूत्रनालिका । इति शब्दमाला । पाँइज इति भाषा । पञ्जिका च ॥

पञ्जिका, स्त्री, (पञ्जि + स्वार्थे कन् टाप् ।) तूलनालिका । इति हारावली ॥ पाँइज इति भाषा ॥ टीकाविशेषः । यथाह हेमचन्द्रः ।

"टीका निरन्तरव्याख्या पञ्जिका पदभञ्जिका ॥"

अग्रसन्धानी । इति त्रिकाण्डशेषः ॥ पञ्चाङ्गम् । पाँजि इति भाषा : तत्श्रवणफलं यथा,—

"वारो हरति दुःस्वप्नं नक्षत्रं पापनाशनम् ।
तिथिर्भवति गङ्गाया योगः सागरसङ्गमः ।
करणं सर्व्वतीर्थानि श्रूयते दिनपञ्जिका ॥"
इति देवज्ञाः ॥

अपि च ज्योतिस्तत्त्वे वराहवचनम् ।

"दुःस्वप्ननाशको वारो नक्षत्रं पापनाशनम् ।
तिथिरायुष्करी प्रोक्ता योगो बुद्धिविवर्द्धकः ॥
चन्द्रः करोति सौभाग्यमंशकः सुखदायकः ।
करणाल्लभते लक्ष्मीं यः शृणोति दिने दिने ॥"

निःशेषपदव्याख्याची । तिथिवारादिज्ञापिका । आयव्ययलिखनार्था च । इत्यमरटीकायां भरतः ॥

पञ्जिकारकः, पुं, (पञ्जिं करोतीति । कृ + ण्वुल् ।) कायस्थजातिः । यथाह जटाधरः ।

"अथ कायस्थः करणः पञ्जिकारकः ॥"

(अस्य पञ्जिकरणकथा कायस्थशब्दे द्रष्टव्या ॥) पञ्जिकाकारश्च ॥

पञ्जी, स्त्री, (पञ्जि + वा ङीप् ।) पञ्जिः । नालिका । इति शब्दमाला ॥ पञ्जिका । पाँजि इति भाषा । यथोक्तं देवज्ञैः ।

"दैवज्ञवक्त्रेण शृणोति पञ्जीं
शतत्रयं याति शुनीव कृष्णे ॥"

गत्यविशेषः । यथाह ध्रुवानन्दमिश्रः ।

"प्रणम्य विघ्नेश्वरपादमादौ
सरस्वतीं तां कुलदेवताञ्च ।
शिशुप्रबोधाय कुलस्य पञ्जी
विविच्यते श्रीयुतमिश्रकेण ॥"

पञ्जीकरः, पुं, (पञ्जीं पञ्जिकां करोतीति । कृ + टः ।) कायस्थः । यथा । "कायस्थे कूटकृत्पञ्जीकरौ ।" इति त्रिकाण्डशेषः ॥

पट, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) पटति । इति दुर्गादासः ॥

पट, क त्विषि । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, पाटयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

पट, तृ क वेष्टने । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) ग्रन्थने । इत्यन्ये । पटयति मालां मालिकः । इति दुर्गादासः ॥

पटं, क्ली, (पटतीति । पट् + पचाद्यच् ।) छदिः । चालम् । इति पटलशब्दटीकायां भरतः ॥

पटः, पुं, क्ली, (पटयत्यनेन । पट वेष्टने घञर्थे कः ।) शोभनवस्त्रम् । तत्पर्य्यायः । सुचैलकः २ । इत्यमरः । २ । ६ । ११६ ॥ (यथा, पद्मदशौ । ६ । ७ ।

"यथा धौतो घट्टितश्च लाञ्छितो रञ्जितः पटः ।
चिदन्तर्यामिसञ्चाणि विराट् चात्मा तथर्य्यते ॥")

चित्रपटः । इति मेदिनी ॥ तस्य लक्षणं यथा,—

"पटस्य लक्षणं वक्ष्ये यथा सिध्यन्ति साधकाः ।
ग्रन्थिकेशूविहीने तु अजीर्णे समतन्तुके ॥
अस्फाटिते अच्छिद्रे तु स्खलनेन समालिखेत् ।
योगिनी रूपिणी कार्य्या जयादेः परिवारिता ॥
छेदेन च भवेद्दुःखी व्याधिते व्याधितो भवेत् ।
कुरूपेण कुरूपस्तु सूर्य्येण तु न पूज्यते ॥
लेखकस्य तु यद्रूपं चित्रे भवति तादृशम् ॥"
इति देवीपुराणम् ॥

पटः, पुं, प्रियालवृक्षः । इति मेदिनी ॥ पुरस्कृतः । इति विश्वः ॥

पटकः, पुं, (पटेन कुटुम्बेन कायति प्रकाशते इति । कै + कः ।) शिबिरम् । इति शब्दमाला ॥

पटकारः, पुं, (पटं शोभनवस्त्रं चित्रं वा करोति यः । पट् + कृ + अण् ।) तन्तुवायः । चित्रकरः ॥

पटकुटी, स्त्री, (पटस्य पटनिर्म्मिता वा कुटी ।) वस्त्रवेश्म । तাঁবু इति भाषा । तत्पर्य्यायः । केणिका २ गुणालयनिका ३ । इति हेमचन्द्रः ॥

पटचरं, क्ली, (भूतपूर्व्वं पटत् । भूतपूर्व्वे चरट् । यद्वा पटदित्यव्यक्तं शब्दं चरतीति । पटत् + चर + अच् ।) जीर्णवस्त्रम् । इत्यमरः । २ । ६ । ११५ ॥ (पट्यते आवेष्ट्यते इति । पट् + बाहुलकात् अत् । पटदिव चरति यः । चर् + अच् ।) चौरे पुं इत्यमरटीकायां रमानाथः ॥

पटमण्डपः, पुं, (पटानां वस्त्राणां मण्डपः ।) पटकुटी । इति शब्दचन्द्रिका ॥

पटमयं, क्ली, (पट + मयट् ।) वस्त्रगृहम् । यथा,—

"पटवासः पटमयं दूष्यं वस्त्रगृहं स्थलम् ॥"
इति त्रिकाण्डशेषः ॥

शाटी । यथा, शब्दरत्नावल्याम् ।

"पटवासः पटमयं शाटी शाटक इत्यपि ॥"

पटरकः, पुं, (पटर + स्वार्थे कन् ।) गुन्द्रदृश्यः । इति राजनिर्घण्टः ॥

पटलं, क्ली, (पटं विस्तृतं लाति । पट् + ला + "आतोऽनुपसर्गे" ३।२।३। कः । यद्वा पटतीति । पट + "इगुपधात्कित्" उणा ।१।१०८। इति कलच् ।) छदिः । चाल इति भाषा । नेत्ररोगः । इत्यमरः । ३ । ३ । २०० ॥ पिटकः । परिच्छदः । तिलकः । (यथा, कलाविलासे । १ । २५ ।

"अस्तमिते दिवसकरे तिमिरभरविदरदसंसक्ता ।
सिन्दूरपटलपाटलकान्तिरिवाग्रे बभौ सन्ध्या ॥")

समूहे क्ली स्त्री । इति मेदिनी ॥ (यथा, भागवते । ३ । १४ । २६ ।

"यस्यानवद्याचरितं मनीषिणो
गृणन्त्यविद्यापटलं विभित्सवः ।
निरस्तसाम्यातिशयोऽपि यत् स्वयं
पिशाचचर्यामचरत् गतिः सताम् ॥")

दृष्टेरावरकम् । चलुर परदा इति भाषा । यथाह माधवकरः ।

"प्रथमे पटले दोषो यस्य दृष्ट्या व्यवस्थितः ।
अयत्नानि सरूपाणि कदाचिदथ पश्यति ॥"

दृष्ट्या चत्वारि पटलानि । रसरक्ताश्रयं वात्यं द्वितीयं मांससंश्रयं तृतीयं मेदःसंश्रितं चतुर्थं कालकाक्षिसंश्रितम् । तथा च सुश्रुतः ।

"तेजोजलाश्रितं वात्यं तेष्वन्यत् पिण्डिताश्रितम् ।
मेदस्तृतीयं पटलमाश्रितं त्वक्षि चापरम् ।
पञ्चमाश्रयजं दृष्टेर्लिङ्गं वाहुल्यमिष्यते ॥"

इति । अत्र तेजःशब्देन रक्तं जलशब्देन रसो व्याख्यातः । तेषु पटलेषु वात्यादिभेदेनाधिष्ठानविशेषप्रभावात् दोषाणां लिङ्गविशेषमाह प्रथमे पटले इत्यादि । प्रथमे पटले सर्व्वाण्यक्षराणि न तु वात्ये । इति विजयरक्षितः ॥

पटलः, पुं, क्ली, (पाटयति दीर्य्यते यः । पट् + कलच् ।) ग्रन्थः । दृष्टः । इति शब्दरत्नावली ॥ दृष्टस्थाने दृग्लोऽपि पाठः ॥

पटलप्रान्तं, क्ली, (पटलस्य छदिषः प्रान्तम् ।) गृहचालिकान्तभागः । छाँचि इति भाषा । तत्पर्य्यायः । वलीकम् २ गोत्रम् ३ । इत्यमरः । २ । २ । १४ ॥

पटली, स्त्री, (पटल + ङीष् ।) छदिः । इति भरतहेमचन्द्रौ ॥ चाल इति भाषा ॥

पटवापः, पुं, (पट उप्यते प्राप्नुर्य्येऽ दीयते यत्र । पट + वप् + घञ्।) वस्त्रगृहम् । इति चिकाण्डशेषः ॥

पटवासः, पुं, (पटस्य पटनिर्म्मितो वा वासः गृहम् ।) वस्त्रगृहम् । झाटी । इति शब्दरत्नावली ॥

पटवासकः, पुं, पटो वास्यतेऽनेनेति घञि पटवासः ततः स्वार्थे कन् । पटवासचूर्णम् । तत्पर्य्यायः । पिष्टातः २ । पिष्टेन कुङ्कुमचूर्णादिना असतीति पिष्टातः पचाद्यच् । इत्यमरभरतौ ॥

पटहं, क्ली पुं, (पटेन हन्यते इति । पट + हन् + ड ।) पटतूर्य्यं जहाति पटहः डः निपातनात् तलोपः । इति भरतः ॥ आनकवाद्यम् । इत्यमरः । १ । ७ । ६ ॥

पटहः, पुं, (पट इत्यव्यक्तं शब्दं जहाति त्यजतीति । पट + हा + ड ।) पाटयति गमयति योधान् युद्धाय उत्साहवर्द्धकत्वात् पट गतौ नाम्नीति अहः । इति भरतः ॥ युद्धे वाद्यमानढक्का । तत्पर्य्यायः । आडम्बरः २ । इत्यमरः । २ । ८ । १०८ ॥ समारम्भः । हिंसनम् । इति शब्दरत्नावली ॥

पटाकः, पुं, (पटति गच्छतीति । पट् + निपातनात् आकः ।) पक्षिविशेषः । इत्युणादिकोषः ॥

पटाका, स्त्री, (पटाक + टाप् ।) पताका । इति शब्दरत्नावली ॥

पटालुका, स्त्री, (पट इव अलतीति । पट् + वाहुलकात् उकः ततष्टाप् ।) जलौका । इति चिकाण्डशेषः ॥

पटिः, स्त्री, (पट + इन् ।) पटभेदः । वागुलिः । कुम्भिकादुमः । इति मेदिनी ॥

पटिका, स्त्री, (पटि + स्वार्थे कन् ततः टाप् ।) पटिः । वस्त्रम् । यथा, लीलावती । [चे-

"विस्तारे चिकराः करास्त्रकमिता दैर्घ्ये विचित्राश्च ये
ते पेरुत्कटपट्टसूत्रपटिका अष्टौ लभन्ते शतम् ।
दैर्घ्ये सार्द्धकरत्रया परपटी हस्तार्द्धविस्तारिणी
ताडक् किं लभते इतं वद वणिक् वाञ्छिन्यकं वेत्सि चेत् ॥"

पटिष्ठः, त्रि, (अयमेषामतिशयेन पटुः । पट + "अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटी, स्त्री, (पट + इन् । वा ङीप् ।) वस्त्रभेदः । इति शब्दरत्नावली । यवनिका । इति चिकाण्डशेषः ॥

पटीयान्, [स्] त्रि, (अयमेषामतिशयेन पटुः । पटु + "द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटीरं, क्ली, (पटतीति । पट गतौ । "वृ वृकटिपटिशौटिभ्य ईरन् ।" उणा । ४ । ३० । इति ईरन् ।) तितउः । तुङ्गम् । मूलकम् । केदारः । वारिदः । वेणुसारः । वातिकः । चन्दनम् । इति शब्दरत्नावली ॥ खदिरम् । उदरम् । कन्दर्पः । हरवीर्य्यम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

पटु, क्ली, (पाटयति । पट गतौ ण्यन्तः । "कलिपाटीति ।" उणा । १ । १६ । इति उः पटादेश्च ।) क्षारः । लवणम् । इति मेदिनी ॥ पांशुलवणम् । इति रत्नमाला ॥

पटुः, पुं, (पाटयतीति । पट् + किप् + "कलिपाटीति ।" उणा । १ । १६ । इति उः पटादेश्च ।) पटोलः । इत्यमरः । २ । ४ । १५५ ॥ पटोलपत्रम् । इति विश्वः ॥ काकोदुम्बरलता । कारवेल्लः । चोरकः । इति राजनिर्घण्टः ॥

पटुः, त्रि, (पाटयतीति । पट गतौ । ण्यन्तः । "कलिपाटीति ।" उणा । १ । १६ । इति उः पटादेश्च ।) दक्षः । (यथा, रघुः । ६ । ४६ ।

"अनुभवन् नवदोलगटत्तूत्सवं
पटुरपि प्रियकण्ठनिषक्तया ।
अनयदासनरज्जुपरिग्रहं
भुजलतां जडतामवलाजनः ॥")

नीरोगः । चतुरः । इति मेदिनी ॥ (मधुरः । यथा, रघुः । ६ । ७३ ।

"कुम्भप्रसवभवः पटुरुदचैः
रुच्चचार निनदोऽभ्रसि तस्याः ॥")

तीक्ष्णः । स्फुटः । इति हेमचन्द्रः ॥ निष्ठुरः । इति जटाधरः ॥ धूर्त्तः । इति चिकाण्डशेषः ॥

पटुकः, पुं, (पटु + स्वार्थे कन् ।) पटोलः । इति शब्दरत्नावली ॥

पटुकल्पः, त्रि, ईषदूनः पटुः । (पटु + कल्पप् ।) इति व्याकरणम् ॥

पटुजातीयः, त्रि, पटुप्रकारः । (पटु + जातीयर् ।) इति व्याकरणम् ॥

पटुलवणं, क्ली, (पटु लवणं तत्प्रचुरं वणम् । ततः कन् ।) लवणलवणम् । इति राजनिर्घण्टः ॥

पटुपञ्चिका, स्त्री, (पटु पञ्चमस्याः कप् । टापि अत इत्वम् ।) क्षुद्रचञ्चुप्रः । इति राजनिर्घण्टः ॥

पटुपर्णिका, स्त्री, (पटु पर्णमस्याः । कप् टाप् अत इत्वञ्च ।) चौरिकीवृक्षः । इति राजनिघण्टः ॥

पटुपर्णी, स्त्री, (पटुपर्ण + "पाककर्णपर्णपुण्यफलेति ।" ४ । १ । ६४ । इति ङीष् ।) स्वर्णचौरी । इत्यमरः । २ । ४ । १३८ ॥

पटरूपः, त्रि, (प्रशस्तः पटुः । पटु + रूपप् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटोटजं, क्ली, (पटस्य छदिषः उटे दृश्यादौ जायते यत् । "सप्तम्यां जनेर्डः ।" ३ । २ । ९७ । इति डः ।) छत्राकः । इति शब्दरत्नावली ॥

पटोलं, क्ली, (पट गतौ + "कपिगडिगडीति ।" उणा । १ । ६७ । इति ओलच् ।) वस्त्रभेदः । इति मेदिनी ॥ तन्तु गुच्छरदेशीयविचित्रपटवस्त्रम् ॥

पटोलः, पुं, (पटति बहुगुणान् प्राप्नोतीति । पट गतौ + "कपिगडिगडीति ।" उणा । १ । ६७ । इति ओलच् ।) खनामप्रसिद्धलतिकाफलम् । पलवल इति हिन्दी भाषा ॥ (यथा, पञ्चतन्त्रे १ । ३०६ ।

"साम्बेवयत्र सिद्धिर्न तत्र दक्षो बुधेन विनियोज्यः ।
पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन ॥")

तत्पर्य्यायः । कुलकम् २ तिक्तकः ३ पटुः ४ । इत्यमरः । २ । ४ । १५५ ॥ कर्कशफलः ५ कुलजः ६ वाजिमान् ७ लताफलः ८ राजफलः ९ वरतिक्तः १० अम्लतिफलः ११ । इति रत्नमाला ॥ कटुफलः १२ कटुकः १३ कर्कशच्छदः १४ राजनामा १५ अम्लतफलः १६ पाण्डुः १७ पाण्डुफलः १८ बीजगर्भः १९ नागफलः २० कुठारिः २१ कासमर्द्दनः २२ पल्लरः २३ आजीफलः २४ ज्योतिष्मती २५ कक्षुम्नी २६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । सारकत्वम् । पित्तवलासकफकण्डूतिकुष्ठारुगज्वरदाहार्शोनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

पाचनत्वम्। हृद्यत्वम्। दृष्यत्वम्। लघुत्वम्। अग्निदीपनत्वम्। स्निग्धत्वम्। कासदोषत्रय-क्रिमिनाशित्वञ्च। तस्य मूलादिगुणाः।
"पटोलस्य भवेन्मूलं विरेचनकरं सुखात्।
नालं श्लेष्महरं पत्रं पित्तघ्नि फलं पुनः॥
दोषत्रयहरं प्रोक्तं तद्वत्त्वक् पटोलिका॥"
इति भावप्रकाशः॥
अपि च राजवल्लभः।
"पटोलं कफपित्तास्रगुज्वरकुष्ठव्रणापहम्।
विसर्पनयनव्याधिचिद्दोषगरनाशनौ।
पटोलफलकर्वे ति किञ्चिद्गुणान्तरावुभौ॥"

पटोलकः, पुं, (पटोल इव कायति प्रकाशते इति कै+कः।) शुक्तिः। इति शब्दमाला॥

पटोलिका, स्त्री, (पटोल+कन्+टाप्+अत इत्वञ्च।) फलविशेषः। झिङ्गा इति भाषा। पोरलि इति ख्याता। इति केचित्। इति भरतः॥ तत्पर्य्यायः। द्योतस्त्री २ जाली ३। इत्यमरः। २। ४। ११८॥ द्योतस्वा ४। इति स्वामी॥

पटोली, स्त्री, (पटोल+जातित्वात् ङीष्।) द्योतस्त्री। इति मेदिनी॥ (झिङ्गा इति भाषा॥ यथा, गारुडे १६८ अध्याये।
"पटोलीमुस्तकाभ्याञ्च वासकेन च गाग्र्येत॥")

पट्टं, क्ली, (पट् गतौ+क्तः। नेट्।) नगरम्। इति शब्दरत्नावली॥

पट्टः, पुं, (पट्+क्तः। नेट्।) पेषणपाषाणः। शिल् इति भाषा॥ (यथा, रघुः। १८। १७।
"तस्याभवत् खनुरुदारशीलः
शिलः शिलापट्टविशालवक्षाः॥")
व्रणादीनां बन्धनम्। पटी इति भाषा॥ चतुष्पथः। चौमाता रास्ता इति भाषा॥ राजादि-ग्रासनान्तरम्। पाट्टा इति भाषा॥ (यथा, मार्कण्डेये। ३६। ८।
"तदास्मात् पुत्र! निष्कृष्य मद्दत्तादङ्गुलीयकात्।
बाध्यन्ते ग्रासनं पट्टे सप्ताक्षरनिवेशितम्॥")
पीठः। इति मेदिनी॥ पिड़ि इति भाषा॥ फलकः। इति चिकाण्डशेषः॥ ढाल इति भाषा॥ उष्णीषादिः। इति स्वामी॥ पाग् इत्यादि भाषा॥ उत्तरीयादिः। इति सुभूतिः॥ एक पाट्टा इति भाषा॥ (यथा, भट्टिः। १०।६०।
"गलितमिव भुवो विलोक्य रामं
धरणिधरस्तनशुक्लपट्टचीनम्॥")
कौशेयः। इति मुकुटः॥ पाट् रेशम् इति च भाषा। लोहितकौशेयसुखीषादि। इति भरतः॥ राज्ञा रेशमी पाग् इत्यादि भाषा॥ (नृपादीनां किरीटविशेषस्वरूपपट्टलक्षणं बृहत्-संहितायां ४६ अध्याये उक्तम्। तद्यथा,—
"विस्तरशो निर्दिष्टं पट्टानां लक्षणं यदाचार्यैः।
तत् संक्षेपः क्रियते मयात्र सकलार्थसम्ग्रः॥
पट्टः शुभदो राज्ञां मध्येऽष्टावङ्गुलानि विस्तीर्णः।
सप्तनरेन्द्रमहिष्याः षड्युवराजस्य निर्दिष्टः॥
चतुरङ्गुलविस्तारः पट्टः सेनापतेर्भवति मध्ये।
द्वे च प्रसादपट्टः पञ्च ते कीर्त्तिताः पट्टाः॥
सर्व्वे द्विगुणायामा मध्यार्द्धेन पार्श्वविस्तीर्णाः।
सर्व्वे च शुद्धकाञ्चनविनिर्म्मिताः श्रेयसो वृद्ध्यै॥
पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजपार्थिव-महिष्योः।
एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया॥
क्रियमाणं यदि पत्रं सुखेन विस्तारमेति पट्टस्य।
वृद्धिजयौ भूमिपतेस्तथा प्रजानाञ्च सुखसम्पत्॥
जीवितराज्यविनाशं करोति मध्ये व्रणः ससुतपन्नः।
मध्ये स्फुटितस्याग्र्यो विग्रहकरः पार्श्वयोः स्फुटितः॥
अनुभनिमित्तोत्पत्तौ शास्त्रज्ञः शान्तिमादिशेद्-द्राज्ञः।
शस्त्रनिमित्तः पट्टो नृपराष्ट्रविवृद्धये भवति॥")

पट्टकः, पुं, पट्ट एव इत्यर्थे स्वार्थे कन्। पट्टः॥

पट्टजं, क्ली, (पट्टात् कौशेयात् जायते इति। पट्ट+जन्+ड।) वस्त्रभेदः। पट्टवस्त्रम्। इति जटाधरः॥ (यथा, महाभारते। २।५०।२३।
"और्णञ्च राङ्कवञ्चैव पट्टजं कीटजन्तथा।
कुटीशतं तथैवान्यत् कम्बलाभं सहस्रशः॥")

पट्टदेवी, स्त्री, (पट्टा सिंहासनार्हा देवी।) महादेवी। इति राजनिर्घण्टः॥ पाटराणी इति भाषा॥

पट्टनं, क्ली, (पटन्ति गच्छन्ति वणिजो यत्र। पट गतौ+बाहुलकात् तनन्।) पत्तनम्। इति द्विरूपकोषः॥

पट्टनी, स्त्री, (पट्टन+गौरादित्वात् ङीष्।) पत्तनम्। इति द्विरूपकोषः॥

पट्टरङ्गं, क्ली, (पट्टं वस्त्रं रज्यतेऽनेन। पट्ट+रञ्ज+घञ्।) पत्तरङ्गम्। इति राजनिर्घण्टः॥ वकम् इति भाषा॥

पट्टरञ्जनकं, क्ली, (पट्टानां वस्त्राणां रञ्जनम्। ततः कन्।) पत्तरङ्गम्। इति राजनिर्घण्टः॥

पट्टघ्नाकं, क्ली पुं, (पट्टस्य पट्टदृक्षस्य घ्नाकम्।) नालिताघ्नाकम्। इति शब्दमाला भावप्रकाशश्च॥ अस्य गुणाः गाढ़ीचणशब्दे द्रष्टव्याः॥

पट्टार्हा, स्त्री, (पट्टे नृपासने अर्हा योग्या।) महादेवी। इति राजनिर्घण्टः॥ पाटराणी इति भाषा॥

पट्टिका, स्त्री, (पट्टिरिव कायति प्रकाशते इति। पट्टि+कै+कः। स्त्रियां टाप्।) पट्टिकाख्य-लोधः। इत्यमरटीकायां वाचस्पतिः॥ (क्षुद्रः पट्टः। स्वार्थे कन्। स्त्रियां टाप् इत्वञ्च। वितस्तिविस्तारं वस्त्रम्। इति चिन्तामणिः॥ पट्टः। पाटा इति भाषा। यथा, नैषधे। १६। ६१।
"सर्व्वं विस्मृत्य देवात् क्षतिं-
सृमसि गतां घोषयन् यो धसंज्ञां
प्राक् संस्कारेण सम्यूत्थपि धुवति
शिरः पट्टिकापाठनेन॥")

पट्टिकाख्यः, पुं, (पट्टिका आख्या यस्य।) रक्त-लोधः। पाटियालोध इति भाषा। तत्पर्य्यायः। क्रमुकः २ पट्टी ३ लाक्षाप्रसादनः ४। इत्यमरः। २। ४। ४१॥

पट्टिकालोध्रः, पुं, (पट्टिका एव लोध्रः।) रक्त-लोधः। पाटिया लोध इति भाषा। तत्पर्य्यायः। क्रमुकः २ वल्कलोध्रः ३ दृढत्वक् ४ जीर्णपत्रः ५ दृढत्वक् ६ स्थूलपत्रः ७ अक्षिभेषजः ८ शावरः ९ श्वेतलोध्रः १० गालवः ११ दृढत्वचः १२ पट्टी १३ लाक्षाप्रसादः १४ वल्कः १५। इति राजनिर्घण्टः॥ स्थूलवल्कलः १६ जीर्णपत्रः १७ दृढत्पत्रः १८। इति भावप्रकाशः॥ लोध्रद्वय-गुणाः। कषायत्वम्। शीतत्वम्। वातकफास-विषनाशित्वम्। चक्षुष्यत्वम्। तत्र वल्कलोध्रको-विशिष्टः। इति राजनिर्घण्टः॥ गुरुत्वम्। लघुत्वम्। पित्तरक्तपित्तातीसारशोथनाशित्वञ्च। इति भावप्रकाशः॥

पट्टिलः, पुं, (पट्टो विद्यतेऽस्य। पट्ट+अस्त्यर्थे इलच्।) पूतिकरञ्जः। इति जटाधरः॥

पट्टिलोध्रः, पुं, (पट्टिरेव लोध्रः।) पट्टिकालोध्रः। इति शब्दरत्नावली॥

पट्टिलोध्रकः, पुं, (पट्टिलोध्र+स्वार्थे कन्।) पट्टिका-लोध्रः। इति शब्दरत्नावली॥

पट्टिशः, पुं, (पट् गतौ+बाहुलकात् टिशन्(स) च।) अस्त्रविशेषः। यथा,—
"परशुः पट्टिशो नाम स एव च परश्वधः॥"
इत्यमरटीकायां भरतः॥
(यथा, भागवते। ८। १०। ३६।
"शुशुक्षिभिश्चक्रगदार्ष्टिपट्टिशैः
शूलासिकैः प्रासपरश्वधैरपि।
निस्त्रिंशभल्लैः परिघैः ससुन्दरैः
सभिन्दिपालैश्च शिरांसि चिच्छिदुः॥")

पट्टी, स्त्री, (पट्टि+वा ङीप्।) पट्टिकालोध्रः। इति राजनिर्घण्टः॥ ललाटभूषा। इति विश्वः॥ तलसारकम्। अश्ववक्षःस्थलबन्धनरज्जुः। इति शब्दमाला॥

पट्टी, [न्] पुं, (पट्टोऽस्यास्तीति। इनिः।) रक्त-लोध्रः। इति स्वामी॥ इत्यमरटीकायां भरतः॥

पट्टोलिका, स्त्री (पट्टं पट्टाख्यं उलति प्राप्नोतीति। उल गतौ+खुल् टापि इत्वम्।) कुलफाशाक। अवस्थापत्रं इति केचित्। पाट्टा। इति च केचित्। इति चिकाण्डशेषः॥

पठ, वाचि। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पठति श्लोकं धीरः। इति दुर्गादासः॥

पठनं, क्ली, (पठ्+भावे ल्युट्।) वाचनम्। पड़न् इति भाषा। यथा, मार्कण्डेये। ६२। १८।
"भूतप्रेतपिशाचानां पठनादेव नाशनम्॥"

पठमञ्जरी, स्त्री, श्रीरागस्य चतुर्थरागिणी। तस्या ग्रामसंग्रहः पञ्चमः। गानसमयस्तु एकप्रहर-दिवसोत्तरम्। इति सङ्गीतदर्पणः॥ लक्षणं यथा, सङ्गीतदामोदरे।
"वियोगिनी कान्तवितीर्णपुष्पां
सजं वहन्ती वपुषातिसुग्धा।
आभाष्यमाणा प्रियया च सख्या
विधूसराङ्गी पठमञ्जरीयम्॥"

पठसमञ्जरी, स्त्री, रागिणीविशेषः। इति हलायुधः॥

पठिः, स्त्री, (पठ् + "सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्।) पठनम्। पाठः। इति शब्दरत्नावली ॥

पठितः, त्रि, (पठ् + क्त।) वाचितः। क्तपाठः। अधीतः। उच्चरितः। यथा, हास्यार्णवे।

"मया न पठिता चण्डी त्वया नापि चिकित्सितम्। अकस्मान्नगरोपान्ते कथं धूमायते चिता ॥"

पठितव्यं, त्रि, (पठ् + "तव्यत्तव्यानीयरः।" ३। १। ९६। इति तव्य।) पठनीयम्। पाठ्यम्। यथा, मार्कण्डेये देवीमाहात्म्ये। ६२। ६।

"तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः॥"

पड, इ क संहतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्। इदित्।) इ, कं, पण्डयति। संहतौ राशीकरणम्। इति दुर्गादासः॥

पड, इ ड गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्। इदित्।) इ, पण्डते। ड, पण्डते। इति दुर्गादासः॥

पण, ड व्यवहृतौ। स्तुतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) व्यवहृतौ व्यवहारे। ड, पणते। पणायति पणायते आयान्तत्वादुभयपदमिति बोपदेवः। प्राणानामपणिष्टासौ अत्र कर्म्मणि षष्ठी। स्तुतौ तु पणायति पणायते विष्णुं धीरः। अरे तु द्वयोरर्थयोरेव आयस्याप्राप्तिपक्षे आत्मनेपदमेव। अपणिष्ट पेणे पणिना पणिषीष्ट पणिष्यते अपणिष्यत। इति दुर्गादासः॥

पण, पुं, (पण्यतेऽनेन। पण व्यवहारे + "नित्यं पणः परिमाणे।" ३। ३। ६६। इति अप्।) कार्षिकताम्रिकः। स तु पञ्चक्रमणलमाषकाख्यताम्रकर्षैकृतव्यवहारद्रव्यम्। पूर्व्वं हि ताम्ररक्तिकायाः कपर्दक एको मूल्यमिति अशीतिवराटमूल्यः। लोके तूपचारात् कार्षापणवत् पणव्यपदेशो मूल्य एव। निर्व्वेषः। भृतिः। (पणो मूल्योऽस्यास्मिन्। पण + "अर्च्च आदिभ्यो ऽच्।" ५। २। १२०। इत्यच्।) द्यूतम्। गल्हः। आड् इति होड् इति वाजि इति च भाषा। (यथा, आर्य्यासप्तशती। ३५४।

"प्रतिभूः सुकृते विपत्तौ दक्षः सङ्गारसंकथां गुरुषु। पुरुषायितं पणस्त्रद्वाले परिभाव्यतां दायः॥"

पण्यते व्यवह्रियते इति। "पुंसि संज्ञायां घः प्रायेण।" ३। ३। ११८। इति घः।) मूल्यम्। धनम्। इत्यमरभरतौ॥ कार्षापणः। (यथा, मनुः। ८। २२४।

"यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति। तस्य कुर्य्यान्नृपो दण्डं स्वयं षण्णवतिं पणान्॥")

क्रयशाकाट्टिका। व्यवहारः। इति मेदिनी॥ विंशतिगण्डकः। इति हेमचन्द्रः॥ गौण्डिकः। इति जटाधरः॥ गृहम्। इति शब्दमाला॥ (पणते अधिकारिभेदेन सुखभोगादिकं व्यवहरति साधकस्य सुकृत्यनुसारेण वैकुण्ठवासादिफलं प्रदातीत्यर्थः। पचाद्यच्। यद्वा, पण्यते स्तूयते यः। पण स्तुतौ "पुंसीति संज्ञायां घः प्रायेण।" ३। ३। ११८। इति घः। विष्णुः। यथा, महाभारते। १३। १४६। ११५।

"ऊर्द्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः॥")

पणग्रन्थिः, पुं, (पणस्य विक्रयादेर्ग्रन्थिर्यत्र।) हट्टः। इति शब्दरत्नावली॥

पणनं, क्ली, (पण व्यवहारे + भावे ल्युट्।) विक्रयः। इति शब्दरत्नावली॥

पणफरं, क्ली, लग्नात् द्वितीयपञ्चमाष्टमैकादशस्थलग्नाः। यथा, ज्योतिस्तत्त्वे।

"पणफरं द्वितीयाष्टपञ्चमैकादशं विदुः॥"

पणवः, पुं, (पणं स्तुतिं वातीति। पण + वा + कः।) गायनपटहः। (यथा, गीतायाम्। १। १३।

"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः। सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥")

प्रणव इति केचित्। इत्यमरभरतौ॥

पणवा, स्त्री, (पणव + टाप्।) पणवः। यथा — "पणवः पणवा च स्यात् प्रणवोऽप्यत्र वर्त्तते॥"

इति भरतद्विरूपकोषः॥

पणसः, पुं, (पणायते इति। पण + "अत्यविचमीति।" उणां। ३। ११७। इति असच्।) पण्यद्रव्यम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

पणाङ्गना, स्त्री, (पणेन धनेन लभ्या अङ्गना। धनेन वश्यत्वात् तथात्वम्।) वेश्या। इति हेमचन्द्रः॥

पणाया, स्त्री, (पणायते व्यवह्रियते इति। पण व्यवहारे स्तुतौ च + स्वार्थे आय + ततो भावे अप्। ततष्टाप्।) क्रयविक्रयव्यवहारः। इति जटाधरः॥ (स्तुतिः। द्यूतम्। इति धात्वर्थलब्धोऽर्थः॥)

पणायित, त्रि, (पणायते स्म इति। पण व्यवहारे स्तुतौ च। "आयादय आर्द्धधातुके वा।" ३। १। ३१। इति स्वार्थे आयस्तत्। क्तः।) स्तुतः। इत्यमरः। ३। २। १०६॥ (व्यवहृतम्। क्रीतम्। विक्रीतम्। इति धात्वर्थलब्धोऽर्थः॥)

पणास्थि, क्ली, (पणस्य पणाय वा यदस्थि।) कपर्दकम्। वराटकः। इति चिकाण्डशेषः॥

पणास्थिकं, क्ली, (पणास्थि + स्वार्थे कन्।) वराटकः। इति हेमचन्द्रः॥

पणितं, त्रि, (पण्यते स्म इति। पण + क्त। अयाभावपक्षे सिद्धम्।) स्तुतम्। इत्यमरः।३।२।१०६॥ व्यवहृतम्। इति पणधात्वर्थदर्शनात्॥ (गल्हे, क्ली। वाजि इति भाषा। यथा, महाभारते। १। सौपर्णे। २२। ४।

"ततस्ते पणितं कृत्वा भगिन्यौ द्विजसत्तम!। जग्मतुः परया प्रीत्या परं पारं महोदधेः॥")

पणितव्यं, त्रि, (पण्यते इति। पण ड व्यवहारे स्तुतौ च। "तव्यत्तव्यानीयरः।" ३। १। ९६। इति तव्य।) विक्रेयद्रव्यम्। इत्यमरः। २। ६। ८२॥ स्तोतव्यम्। व्यवहार्य्यम्। इति पणधात्वर्थदर्शनात्॥

पण्डः, पुं, (पण्डते निष्फलत्वं प्राप्नोतीति। पण्ड् गतौ + पचाद्यच्। यद्वा पण ड व्यवहारे। "अमन्तात् डः।" उणां। १। ११३। इति डः।) क्लीवम्। नपुंसकम्। इत्यमरः। २। ६। ३६॥ निष्फले, त्रि॥

पण्डा, स्त्री, (पण ड व्यवहारे। "अमन्तात् डः।" उणां। १। ११३। इति डः। ततष्टाप्।) बुद्धिः। इति मेदिनी॥ तत्त्वानुगा बुद्धिः। इति हेमचन्द्रः॥

पण्डापूर्व्वं, क्ली, (पण्डं निष्फलं व्यपूर्व्वं व्यष्टम्।) फलाजनकाष्टम्। तद्विशिष्टे त्रि। यथा, "यद्यपि पण्डापूर्व्वं फलमिति तदपि न कामनाभावे अकरणापत्तेस्तौल्यात्।" इति सिद्धान्तमुक्तावली॥

पण्डित, पुं, (पण्डा वेदोक्तला तत्त्वविषयिणी वा बुद्धिः। सा जाता अस्य। "तदस्य संजातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्। यद्वा, पण्डते तत्त्वज्ञानं प्राप्नोतेऽसात्। गत्यर्थेति क्तः।) शास्त्रज्ञः। अस्य लक्षणं यथा,—

("निषेवते प्रशस्तानि निन्दितानि न सेवते। अ-नास्तिकः श्रद्दधान एतत् पण्डितलक्षणम्॥"

इति चिन्तामणिः॥)

"पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः। सर्व्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः॥"

इति महाभारते वनपर्व्व॥

अपि च श्रीभगवद्गीतायाम्। ५। १७।

"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥"

तत्पर्य्यायः। विद्वान् २ विपश्चित्३ दीपज्ञः४ सन्५ सुधीः ६ कोविदः ७ बुधः ८ धीरः ९ मनीषी१० ज्ञः११ प्राज्ञः१२ संख्यावान्१३ कविः१४ धीमान् १५ सूरिः १६ क्षती १७ क्षत्रिः १८ लब्धवर्णः १९ विचक्षणः २० दूरदर्शी २१ दीर्घदर्शी २२। इत्यमरः। २। ७। ५-६॥ विशारदः २३। कवी २४ सूरी २५। इति भरतः॥ विदग्धः २६ दूरदृक् २७ वेदी २८ बुद्धः २९ बुद्धः ३० विधानगः ३१ प्रज्ञिलः ३२ क्षत्रिः ३३। इति शब्दरत्नावली॥ विज्ञः ३४ मेधावी ३५। इति राजनिर्घण्टः॥ सिद्धकः। इति मेदिनी॥ (सर्व्वज्ञत्वात् महादेवः। यथा, महाभारते। १३। १७। १२४।

"न्यायनिर्व्वपणः पादः पण्डितो ह्यचलोपमः॥")

पण्डितम्मन्यः, त्रि, (आत्मानं पण्डितम्मन्यते यः सः। "आत्ममाने खश्च।" ३। २। ८३। इति खश्।) पण्डिताभिमानी। इति व्याकरणम्॥

पण्डितमानी, [न्] त्रि, (आत्मानं पण्डितं मन्यते इति। मन + इनिः।) पण्डिताभिमानी। यथा "मूर्खाः पण्डितमानिनः।" इति प्राचीनाः॥

पण्य, त्रि, (पण्यते इति। पण ड व्यवहारे स्तुतौ च। "अवद्यपण्यवर्य्यागर्ह्यमिति।" ३। १। १०१। निपातनात् साधु।) पणितव्यम्। विक्रेयद्रव्यम्। इत्यमरः। २। ६। ८२। (यथा, हेः रामायणे। २। ४८। ४।

"न चाहृष्यन् न चामोदन् वणिजो न प्रसारयन्।

न चाश्नीभन्त पण्यानि नापचन् गृहमेधिनः ॥") व्यवहार्य्यम्। स्तोतव्यम्। इति पणधात्वर्थदर्शनात् ॥ (क्ली, पण्यते व्यवह्रियतेऽत्र। पण+यत्। विपणिः। यथा, मनुः। ५। १२६।

"नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम्॥"

"पण्ये पण्यवीथिकायाम्।" इति कुल्लूकभट्टः॥)

पण्यवीथिका, स्त्री, (पण्यानां विक्रेयद्रव्याणां वीथिका गृहम्।) विपणिः। इत्यमरः। २।२।२॥ पण्यविक्रयशाला। इति हलायुधः॥ हट्टः। इत्यन्ये॥ विक्रयार्थप्रसारितनानाद्रव्याणां वणिग्वीथी। वाणियाविही इति बाजार इति च ख्यातः। इति केचित्। हट्टमण्डपः। इति केचित्। हट्टमध्यस्थपण्यविक्रयवीथी। इति केचित्। इति तट्टीकायां भरतः॥

"आपणः पण्यवीथी च द्वयं वीथीति संज्ञितम्॥"

इति शाश्वतः॥

पण्यवीथी, स्त्री, (पण्यानां वीथी विक्रयगृहम्।) क्रयविक्रयस्थानम्। इति शब्दमाला॥

पण्यशाला, स्त्री, (पण्यानां विक्रेयद्रव्याणां शाला गृहम्।) हट्टः। इति हेमचन्द्रः॥ विक्रयगृहञ्च॥

पण्यस्त्री, स्त्री, (पण्या मूल्येन लभ्या या स्त्री। यद्वा पण्ये हट्टादिस्थले स्थिता स्त्री।) वेश्या। इति कोषान्तरम्॥

पण्या, स्त्री, (पण्यते स्तूयते रोगघ्नत्वात्। पण ड व्यवहारे स्तुतौ च+कर्म्मणि यत् ततष्टाप्।) पिण्या। इति द्विरूपकोषः॥

पण्याङ्गना, स्त्री, (पण्या पण्येन मूल्येन लभ्या या अङ्गना।) वेश्या। इति हेमचन्द्रः॥

पण्याजीवः, पुं, (पण्यैः क्रयविक्रयद्रव्यैराजीवति प्राणिति। आ+जीव+कः।) क्रयविक्रयिकः। वणिक्। इत्यमरः। २। ६। ७८॥

पण्याजीवकं, क्ली, (पण्यैः क्रयविक्रयद्रव्यैराजीवतितिष्ठतीति। पण्याजीवस्तत स्वार्थे कन्। अभिधानात् क्लीवत्वम्। यद्वा, पण्याजीवैर्वणिग्भिः कार्य्यति शब्दायते इति। कै+कः।) हट्टः। इति त्रिकाण्डशेषः॥ पण्यजीवकमित्यपि पाठः॥

पण्यान्धा, स्त्री, (पण्यं अन्धयति स्वगुणेन या। अन्ध+अच्।) द्रव्यविशेषः। तत्पर्य्यायः। कङ्गुनीपत्रा २ पण्यधा ३ पणधा ४। अस्या गुणाः। समवीर्य्यत्वम्। तिक्तत्वम्। क्षारत्वम्। सारकत्वम्। ततकालग्रन्थिघातव्रणसंरोपणत्वञ्च।

"दीर्घा मध्या तथा ह्रस्वा पण्यान्धा त्रिविधा स्मृता।
रसवीर्य्यविपाकेषु मध्यमा गुणदायिका॥"

इति राजनिर्घण्टः॥

पण्यन्धा इत्यपि पाठः॥

पत् [द्] पुं, (पद्यते गच्छत्यनेन। पदौ ड गतौ+करणे क्विप्।) पादः। इत्यमरः। २।६।७॥ (यथा, मनुः। ४। २०७।

"मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदाचन।
केशकीटावपन्नञ्च पदास्पृष्टञ्च कामतः॥"

कश्चित्तु पादशब्दस्य पद् इत्यादेशो भवतीति पदन्ति। अन्येस्तत् न मन्यन्ते यतः "पदादयः पृथक्शब्दा इत्येके।" इति सुग्धबोधे बोपदेवेनोक्तम्॥)

पत, ल ज गतौ। ऐश्वर्य्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) ल, अपतत्। ज, पातः पतः। गतिरिह पतनम्। पतति पक्षं दृष्ट्वात्। इति दुर्गादासः॥

पत, तृ क गतौ। ऐश्वर्य्ये। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-अकं-सेट्।) ऐश्वर्य्यमिश्वरीभावः। गतिरिह पतनम्। पतयति पक्षं दृष्ट्वात्। इति दुर्गादासः॥

पत, य ड ऐश्वर्य्ये। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-अकं-सेट्।) य ड, पत्यते। ऐश्वर्य्यमैश्वर्य्यमिश्वरीभावः। इति दुर्गादासः॥

पतं, त्रि, (पततीति। पत्+अच्।) पुरुषम्। इति जटाधरः॥ (पतनकर्त्तरि च, त्रि॥)

पतगः, पुं, (पत उत्पतितः सन् गच्छति। यद्वा पतेन पक्षेण गच्छतीति। गम्+डः।) पक्षी। इत्यमरः। २। ५। ३३॥ (यथा, मनुः। ७।२३।

"देवदानवगन्धर्व्वा रक्षांसि पतगोरगाः।
तेपि भोगाय कल्पन्ते दण्डेनैव निपीड़िताः॥")

पतङ्गं, क्ली, (पत् ल गत्यैश्वर्य्ययोः। बाहुलकात् अङ्गच्।) सुतम्। पारदम्। इति मेदिनी॥ चन्दनभेदः। इति शब्दचन्द्रिका॥

पतङ्गः, पुं, (पतति गच्छतीति। "पतेरङ्गच् पक्षिणि।" उणां। १। ११८। इति अङ्गच्।) पक्षी। (यथा, मार्कण्डेये। १०। ८६।

"ततः सर्व्वेषु निस्तीर्णेषु पापी तिर्य्यक्त्वमभ्युत।
कृमिकीटपतङ्गेषु श्वापदे मशकादिषु॥")

सूर्य्यः। (यथा, माघे। १। १२।

"पतत्पतङ्गप्रतिमस्तपोनिधिः
पुरोऽस्य यावन्न भुवि व्यलीयत॥"

"कथं पतङ्गः सूर्य्यः। खगत्वसामान्योपचारात्।
'पतङ्गः शलभे सूर्य्ये पतङ्गः पक्षिणि स्मृतः॥'
इति कोषान्तरम्॥" इत्युज्ज्वलदत्तः॥)

शलभः। इत्यमरः। ३। ३। २०॥ शालिप्रभेदः। इति मेदिनी॥ जलमधूकवृक्षः। इति राजनिर्घण्टः॥

पतङ्गमः, पुं, (पत उत्पतितः सन् गच्छतीति। गम्+खच् मुम् च।) पक्षी। इति व्याकरणम्॥ (शलभः। यथा, भागवते। ७। ८।२४।

"अलक्षितोऽग्नौ पतितः पतङ्गमो
यथा नृसिंहौजसि सोऽसुरस्तदा॥")

पतङ्गिका, स्त्री, (पतङ्ग+स्वल्पार्थे संज्ञायां वा कन्। स्त्रियां टाप् अत इत्वञ्।) मधुमक्षिकाविशेषः। तत्पर्य्यायः। पुत्तिका २। इत्यमरः। २। ५। २७॥ (यथा, महाभारते। १। १०८। १०।

"पतङ्गिकानां पुच्छेषु त्वयेषीका प्रवेशिता।
कर्म्मणस्तस्य ते प्राप्तं फलमेतत्तपोधन!॥")

पतञ्जिका, स्त्री, (पतमभिगतं ग्रन्थुमित्यर्थः। ञिक्रयति पीड़यति स्वारोपितशरैरिति यावत्। पृषोदरात् साधुः।) धनुर्ज्या। इति शब्दरत्नावली॥

पतञ्जलिः, पुं, (पतः पतन् वा अञ्जलिः नमस्कार्य्यतया यस्मिन्। शकन्ध्वादित्वात् साधुः।) मुनिविशेषः। स तु पातञ्जलदर्शनपाणिनिटीकामहाभाष्यादिग्रन्थकर्त्ता। तत्पर्य्यायः। गोनर्दीयः २। इति हेमचन्द्रः॥ चूर्णिकृत् ३ भाष्यकारः ४। इति त्रिकाण्डशेषः॥ वररुचिः ५। इति शब्दरत्नावली॥ (केषाञ्चिन्मते योगसूत्रकारकपतञ्जलेर्भाष्यकृत् पतञ्जलिर्भिन्न एव। अनयोरभेदतान्तु निर्दिशन्ति पाश्चात्याः॥ पातञ्जलयोगशास्त्रन्तु पादचतुष्टयात्मकं तत्र प्रथमे पादे "अथ योगानुशासनम्।" इति योगशास्त्रारम्भप्रतिज्ञां विधाय "योगश्चित्तवृत्तिनिरोधः।" इत्यादिना योगलक्षणसूत्रा सप्रपञ्चसमाधिनिर्द्देशं कृतवान् भगवान् पतञ्जलिः। द्वितीये तु "तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः।" इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च बहिरङ्गाणि साधनानि च निरदिशत्। तृतीये "देशबन्धश्चित्तस्य धारणा।" इत्यादिना धारणाध्यानसमाधित्रयरूपमन्तरङ्गं संयमपदवाच्यं तत्र अवान्तरफलं विभूतिजातञ्च उपदिदेश। चतुर्थे पादे तु "जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः।" इत्यादिना ससिद्धिपञ्चकं सुखं प्रयोजनं कैवल्यं प्रधानादीनि पञ्चविंशतितत्त्वानि क्लेशकर्म्मविपाकाशयैरसंश्लिष्टं पुरुषं स्वेच्छया निर्म्माणकायमधिष्ठाय लौकिकादिसम्प्रदायप्रवर्त्तकं संसारदहने दग्धानां जीवानां निस्तारकञ्च उपदिष्टवान्॥)

पतत्रं, क्ली, (पतन्तं त्रायते इति। पतत्+त्रै+कः।) पक्षः। पाखा इति भाषा। इत्यमरः। २। ५। ३६। (यथा, भागवते। ८। ११। ३४।

"येन मे पूर्व्वमद्रीणां पक्षच्छेदः प्रजात्यये।
कृतो निविशतां भारैः पतत्रैः पततां भुवि॥"

(त्रं) पतत्र गतौ। "अमिनक्षियजिवधिपतिभ्योऽत्रन्।" उणां। ३। १०५। इति अत्रन्। वाहनम्। इत्युज्ज्वलदत्तः॥)

पतत्री, [न्] पुं, (पतत्रं पक्षो विद्यतेऽस्य। पतत्र+इनिः।) पक्षी। इत्यमरः। २। ५। ३३॥ (यथा, कुमारे। ५। ४।

"पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः॥")

पतत्रिः, पुं, (पतति उत्पततीति। "पतेरत्रिन्।" उणां। ४। ६८। इति अत्रिन्।) पक्षी। इत्यमरः। २। ५। ३३॥

पतद्ग्रहः, पुं, (पतत् सुखादिभ्यः स्खलत् जलादि गृह्णातीति। पतत्+ग्रह्+अच्।) प्रतिग्राहः। इत्यमरः। २। ७। १३६॥ पिकदानी इति भाषा॥

पतङ्गीरुः, पुं, (पतन् पक्षी भीरुर्यस्मात्।) श्येनः। इति शब्दरत्नावली॥

पतन् [तृ] पुं, (पततीति। पत्+शतृ।) पक्षी। (यथा, महाभारते। २। ३८। २८।

"नक्षत्राणां सुखं चन्द्र आदित्यस्तेजसां सुखम्।

पर्व्वतानां सुखं मेरुर्गरुड: पततां सुखम् ॥") पतनशीले त्रि। इति मेदिनी ॥

पतनं, क्ली, (पत्+भावे ल्युट्।) पात:। पड़न् इति भाषा। यथा,— [द्र:सहन् ॥"

"अग्ने: पतने न वेदना पतनज्ञानमतीव इत्युद्भट: ॥

"द्विजातिकर्म्मभ्यो हानि: पतनं परत्र चासिद्धिस्तमेके नरकम्।" इति हारीतसूत्रम् ॥ पापम्। यथा, प्रायश्चित्तविवेके।

"विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नर: पतनमृच्छति ॥"

पतम:, पुं, (पतति कर्म्मत्यये यस्मात्। पत्+अम। स्त्रीणपुण्यानां चन्द्रलोकात् पतनं ग्राह्ये प्रसिद्धम्।) चन्द्र:। (पततीति। पत्+अम।) पक्षी। पतङ्ग:। इति संक्षिप्तसारोणादिवृत्ति: ॥

पतयालु:, त्रि, (पत्+"सृहिधृषिपतिदयीति।" ३।२।१५८। इति आलच्।) पतनशील:। तत्पर्य्याय:। पातुक: २। इत्यमर: ।३।२।२७ ॥

पतस:, पुं, (पततीति। "अत्यविचमीति।" उणां ३।११७। इति असच्।) पक्षी। इत्युणादिवृत्ति: ॥ चन्द्र:। पतङ्ग:। इति संक्षिप्तसारोणादिवृत्ति: ॥

पताका, स्त्री, पत्यते ज्ञायते कस्यचित् भेदोऽनया। (पत्+"वलाकादयश्च।" उणां ४।१४। इति आक प्रत्ययेन साधु:।) ध्वजम्। निशान इति भाषा। (यथा, महाभारते ।६।२७।१५।

"श्वेतैश्चत्रै: पताकाभिर्ध्वजवारणवाजिभि:। तान्यनीकान्यशोभन्त राजन्नथपदातिभि: ॥") तत्पर्य्याय:। वैजयन्ती २ केतनम् ३ ध्वजम् ४। इत्यमर: ।२।८।६६ ॥ पटाका ५ जयन्ती ६ वैजयन्तिका ७ कदली ८ कन्दली ९ केतु: १० कदलिका ११ व्योममण्डलम् १२। इति शब्दरत्नावली ॥ चिह्नम् १३। इति जटाधर: ॥ केतनं ध्वजं एतद्वयं पताकादण्डे। इति भरत: ॥ सौभाग्यम्। नाटकाङ्गम्। इति मेदिनी ॥ (यथा, साहित्यदर्पणे। ६। २७।

"पताकास्थानकं योज्यं सुविचार्य्यैह वस्तुनि ॥" इह नाट्ये ॥ तल्लक्षणं यथा तत्रैव। ६। २८।

"यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्य: प्रयुज्यते। आगन्तुकेन भावेन पताकास्थानकन्तु तत् ॥"

तद्भेदानाह तत्रैव। ६। २९—३२।

"सहसैवार्थसम्पत्तिर्गुणवत्पुरुषात्तत:। पताकास्थानकमिदं प्रथमं परिकीर्त्तितम् ॥

यथा, रत्नावल्यां 'वासवदत्तेयमिति' राजा यदा ततकण्ठपाशं मोचयति तदा तदुक्त्या 'सागरिकेयमिति' प्रत्यभिज्ञाय 'कथं प्रिया मे सागरिका अलमलमतिमात्रम्' इत्यादि फलरूपार्थसम्पत्ति: पूर्व्वापेक्षया उपचारातिशयात् गुणवती उत्कृष्टा।१।

वच: सातिशयश्लिष्टं नानावस्त्वसमाश्रयम्। पताकास्थानकमिदं द्वितीयं परिकीर्त्तितम् ॥

यथा, वेणीसंहारे सूत्रधार:।

'रक्तप्रसाधितभुव: क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुता: सभृत्या:।

अत्र रक्तादीनां रुधिरशरीरार्थहेतुकत्वेनैवगणेन बीजार्थप्रतिपादनात् नेदमङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानम्। २।

अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत्। श्लिष्टप्रश्नोत्तरोपेतं तृतीयमिदमुच्यते ॥

लीनं अयुक्तार्थं श्लिष्टेन सम्बन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रश्नोत्तरेणोपेतं सविनयं विशेषनिश्चयप्राप्त्या सहितं सम्पद्यते यत् तत् तृतीयं पताकास्थानम्। यथा, वेणीसंहारे २ अङ्के।

कञ्चुकी। 'देव! भग्नं भग्नम्।' राजा। 'केन।' कञ्चुकी। 'भीमेन।' राजा। 'कस्य।' कञ्चुकी। 'भवत:।' राजा। 'आ:! किं प्रलपसि?' कञ्चुकी। (सभयम्) 'देव! ननु ब्रवीमि। भग्नं भीमेन भवत:।' राजा। 'धिक् वृद्धापसद! कोऽयमद्य ते व्यामोह:।' कञ्चुकी। 'देव! न व्यामोह: सत्यमेव। भग्नं भीमेन भवतो मरुता रथकेतनम्। पतितं किङ्किणीकाणवद्वाक्रन्दमिवत्तितौ ॥'


अत्र दुर्य्योधनोरुभग्नरूपप्रस्तुतसङ्क्रान्तमर्थोपक्षेपणम्। ३।

दार्ष्टो वचनविन्यास: सुश्लिष्ट: काव्ययोजित:। प्रधानार्थान्तरापेक्षी पताकास्थानकं परम्॥"8॥) अङ्क:। केतु:। इति हेमचन्द्र: ॥ अस्य विवरणं ध्वजशब्दे द्रष्टव्यम् ॥

पताकी, [न्] त्रि, (पताका विद्यतेऽस्य। पताका+इनि:।) वैजयन्तिक:। पताकाधारी। इत्यमर:। २। ८। ७१ ॥ (यथा, महाभारते। ६। १७। २०।

"स तु गोवासन: शैव्य: सहित: सर्व्वराजभि:। ययौ मातङ्गराजेन राजार्हेण पताकिना।") रिष्टारिष्टबोधकचक्रविशेष:। तस्य लिखनक्रमो यथा,—

"तिर्य्यगूर्द्धगता रेखास्तिस्रो देया: पताकया। युता: कार्य्या वेधविदा सर्व्वसङ्गतरेखया ॥ दक्षस्योत्तरेखातो वामं मेषाद्यराशय:। पञ्चाश्वयुग्मविंशाश्च भूद्वयेन्द्वम्बिसागरा:। कर्कटान्मीनपर्य्यन्तमङ्का देया यथाक्रमम् ॥



बालस्य जन्मकालीनयल्लग्नमजादिम। विन्यस्य चिन्तयेत् प्राज्ञ: शुभाशुभं यथाग्रहात्॥"

तच्च शुभाशुभज्ञानं यथा,—

"शुभदृष्टयोगवेधैर्लग्नाद्बालस्य शोभनम्। पापदृष्टयोगवेधैराश्रयक्षादिष्टिकालवित्। वत्सेऽधिके दिनं मध्ये मासो हीने च हायनम्॥"

वेधज्ञानं यथा,—

"कर्कमीनधनुर्भ्यांच हरे: कीटघटेन च। स्त्रियास्तौलिस्थगाभ्याञ्च घटे मीनेन कन्यया॥ धनुषो मृगकर्किभ्यां मकरे धनुषा स्त्रिया। मीने कर्कितुलाभ्याञ्च मीनस्त्रीधनुषात्वजे॥ तुलाकर्किमृगैर्द्वन्द्वे कीटकुम्भवृषेषु च। सिंहवर्द्धेऽनेषु वामदक्षिणसंमुखै:॥ राहुकेत्वर्कसौरारे: पापैर्विद्धो युतोऽशुभ:। तदन्यैर्युतविद्धस्तु लग्नराशि: शुभप्रद:॥"

रिष्टिकालो यथा,—

"एकोनविंशति: कर्के सिंहे सप्तदशैव तु। षट्विंशद्दवलायाञ्च षड्विंशतिस्तुलाधरे॥ वृश्चिके सिंहवज्ज्ञेयमृजचिंशच्छरासने। षड्विंशं मकरे ज्ञेयं कुम्भे सप्तदश स्मृता:॥ नव युग्मे तथा मीने मेषे षड्दशभिस्तथा। वृषभे च तथा सिंहे युग्मेऽक्षहरलोचने॥ चिन्तयाङ्कादियं संख्या दिनमासाब्दनिर्णये। एकाङ्कादिगृहाङ्कादा क्वचिद्विशेष सम्भव:॥"

अथ यामार्द्धाधिपज्ञानम्।

"वारेशादर्द्धयामेषु रात्र्यह्नो: पञ्चषट् क्रमात्। अधिपा: सूर्य्यशुक्राच्च यथार्काहं भवन्ति ते। रवीज्येन्दुभृगुव्याजशनिभूरवयो निशि॥ रविशुक्रज्ञरात्रीशशनीज्यक्षजभास्करा:। दिने ज्ञेया: परेऽह्येवं तत्राद्यश्चतुर्थहा:॥"

अथ दण्डाधिपज्ञानम्।

"पापदण्डे भवेद्विघ्नि: शुभदण्डे शुभं भवेत्। शुभग्रहस्य दण्डे तु कर्म्मारम्भाच्छुभं भवेत्॥ यस्यार्द्धयामलग्नस्य प्राग्दण्ड: सर्व्वदा तत:। षट् षट् परोक्ष्य दण्डाश्च त्रयो रात्रौ मता यथा॥ आदित्यभृगुजो बुधोऽपि च शशी सोमे शनौज्यौ कुजौ भौमेऽर्क: सितसोमजौ च शशिजे सोम: शनिर्व्वाक्पति:। जीवेऽङ्गारररवी भृगुर्भृगुसुते सौम्येन्दुमार्कजा: काले जीवमहीजतिग्मकिरणा रात्रौ च दण्डाधिपा:॥

यामार्द्धाधिपसंख्यातो द्वितीयस्तु तदर्द्धक:। तदर्द्धात्तु तृतीय: स्यात्तदर्द्धात्तु तुरीयक:॥ अङ्काभावे तु राहु: स्यात् तदङ्को वसुसंज्ञक:। भयाङ्कस्य परित्यागाद्विवाददण्डाधिपा यथा॥

रविदनुजबुधगौरीचन्द्रसुरासुरज्ञा: कुजरविदनुजज्ञार्चेन्दुसुरासुराश्च। गुरुशशिरविदैत्या: शुक्रभौमार्कदैत्या: शनिकुजरविदैत्या दण्डपास्वर्द्धयामे॥"

शुभाशुभदण्डज्ञानं यथा,—

"शेषार्कस्य दण्डौ सततशुभकरावादिशेषौ तथेन्दो: शेषो दण्ड: कुजस्याप्यथ गुरुबुधयोरादमर्द्धं प्रशस्तम्। आदिर्दण्डस्तथैको भृगुकुलनृपते: सर्व्वकार्य्येषु शस्तो दण्डास्त्वार एते क्वचिदपि समये नैव शौरे: प्रशस्ता:॥"

पतपताकी यथा,—
"प्रतिदण्डं पलान्येषां ज्ञात्वा वाच्यं क्वचिच्छुभम्॥
रवौ च वेदा वसवः सुधांशौ
कुजे च वाणाः शशिजे तथाङ्काः।
शुनाहतुर्दिक् च दृहस्पतौ स्या-
द्राहौ तुरङ्गा भृगुजे च रुद्राः॥"
बालस्य शुभाशुभफलं यथा,—
"अशुभे दण्डसंयोगे सर्व्वत्र पुण्यवर्जिते।
बालस्य मरणं शीघ्रं यदि पापैः समन्वितम्॥
अशुभग्रहदण्डे तु सर्व्वत्र पापवर्जिते।
बालस्य कुशलं सर्व्वं शुभैर्यदि समन्वितम्॥
अशुभो दण्डनाथो हि वेधश्चेत्तेन लभ्यते।
मरणं तत्र वक्तव्यं बालस्य नान्यथा भवेत्॥
पापस्य दण्डमात्रे तु तद्योगवेधवर्जिते।
बालस्य कुशलं तत्र शुभैर्यदि समन्वितम्॥"
इति ज्योतिषतत्त्वे पताकीवेधः॥
(स्त्रियां ङीप्। सेना। यथा, रघुः। ४। ८२।
"न प्रसेहे स रुद्वार्कमधारावर्षदुर्दिनम्।
रथवर्त्म रजोऽप्यस्य कुत एव पताकिनीम्॥")
पतिः, पुं, (पाति रक्षतीति। पा ल रक्षणे + डतिः।)
भूमम्। गतिः। इति विश्वः॥ पाणिग्रहीता।
भ्राता इति भाषा। तत्पर्य्यायः। धवः २
प्रियः ३ भर्त्ता ४। इत्यमरः। २। ६। ३५॥
कान्तः ५ प्राणनाथः ६ गुरुः ७ हृदयेशः ८
जीवितेशः ९ जामाता १० सुखोत्सवः ११
मर्म्मकीलः १२ रतगुरुः १३ स्वामी १४ रमणः
१५। इति शब्दरत्नावली॥ वरः १६ परिणेता
१७ गृही १८। इति राजनिर्घण्टः॥ तस्य लक्षणम्। विधिवत्पाणिग्राहकः। अनुकूलदक्षिण-
दृष्टग्रहभेदात् पतिश्चतुर्धा। सार्व्वकालिकपरा-
ङ्मनापराङ्मुखत्वे सति सर्व्वकालमनुरक्तोऽनु-
कूलः। १। सकलनायिकाविषयसमसहजानु-
रागो दक्षिणः। २। भूयो निःशङ्कः कृतदोषो-
ऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो
धृष्टः। ३। कामिनीविषयकपटपटुः शठः। ४।
इति रसमञ्जरी॥ * ॥ पतिसेवादिफलं यथा,—
"कथं मे सुव्रते! साध्वि! निद्राभङ्गः कृतस्त्वया।
यथैं व्रतादिकं तस्या या भर्त्तुश्चापकारिणी॥
तपश्चानशनञ्चैव व्रतं दानादिकञ्च यत्।
भर्त्तुरप्रियकारिण्याः सर्व्वं भवति निष्फलम्॥
यया प्रीतः पूजितश्च श्रीकृष्णः पूजितस्तया।
पतिव्रताव्रतार्थञ्च पतिरूपी हरिः स्वयम्॥
सर्व्वदानं सर्व्वयज्ञः सर्व्वतीर्थनिषेवणम्।
सर्व्वं व्रतं तपः सर्व्वमुपवासादिकञ्च यत्॥
सर्व्वधर्म्मश्च सत्यञ्च सर्व्वदेवप्रपूजनम्।
तत् सर्व्वं स्वामिसेवायाः कलां नार्हन्ति
षोड़शीम्॥
सुपुण्ये भारते वर्षे पतिसेवां करोति या।
वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः शतम्॥
विप्रियं कुरुते भर्त्तुर्विप्रियं वदति प्रियम्।
असत्कुलप्रजाता या तत्फलं शृणुतां सति!॥
कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ।
ततो भवति चाण्डाली पतिपुत्रविवर्ज्जिता॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४३ अध्यायः॥*॥
अपि च।
"स्वकान्तश्च परो बन्धुरिह लोके परत्र च।
नहि कान्तात् परः श्रेयान् कुलस्त्रीणां परो गुरुः॥
देवपूजा व्रतं दानं तपश्चानशनं जपः।
स्नानञ्च सर्व्वतीर्थेषु दीक्षा सर्व्वमखेषु च॥
प्रादक्षिण्यं पृथिव्याश्च ब्राह्मणातिथिसेवनम्।
सर्व्वाणि पतिसेवायाः कलां नार्हन्ति षोड़शीम्॥
किमतः पतिभक्तायाः अभक्तायाश्च भारते।
यया दुःखी सुखारम्भे साकाङ्क्षः प्रथमो भवेत्॥
पतिसेवापरो धर्म्मो नहि स्त्रीणां श्रुतौ श्रुतम्।
स्वर्गे ज्ञाने च सततं कान्तं नारायणाधिकम्।
दृष्ट्वा तच्चरणाम्भोजं सेवां नित्यं करिष्यसि॥
परिहासेन कोपेन भ्रमेणावज्ञया सुते!।
कटूक्तिं स्वामिनः साक्षात् परोक्षान्न करिष्यसि॥
स्त्रिया वाग्योनिदुष्टायाः कामतो भारते भुवि।
प्रायश्चित्तं श्रुतौ नास्ति नरकं ब्रह्मणः शतम्॥
सर्व्वधर्म्मपरीता या कटूक्तिं कुरुते पतिम्।
शतजन्मकृतं पुण्यं तस्या नश्यति निश्चितम्॥
दत्त्वा कन्यां दोषधिला जगाम मुनिपुङ्गवः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २४ अध्यायः॥
अपि च।
"या स्त्री भर्त्तुरसौभाग्या साऽसौभाग्या च सर्व्वतः।
शयने भोजने तस्या न सुखं जीवनं वृथा॥
यस्या नास्ति प्रियप्रेम तस्या जन्म निरर्थकम्।
तत् किं पुत्रे धने रूपे सम्पत्तौ यौवनेऽथवा॥
यन्नास्ति कान्ते च सर्व्वप्रियतमे परे।
सा शुचिर्धर्म्महीना च सर्व्वकर्म्मविवर्ज्जिता॥
पतिर्बन्धुर्गतिर्भर्त्ता देवतं गुरुरेव च।
सर्व्वस्माच्च परः स्वामी न गुरुः स्वामिनः परः॥
पिता माता सुतो भ्राता क्लिष्टो दत्त्वा मितं धनम्।
सर्व्वसदाता स्वामी च मूढानां योषितां सुराः!॥
कान्तिदेव हि जानाति महासाध्वी च स्वामिनम्।
अतिसङ्गप्रजाता च सुशीला कुलपालिका॥
असङ्गप्रसूता या दुःशीला धर्म्मवर्ज्जिता।
सुखदुष्टा योनिदुष्टा पतिं निन्दति कोपतः॥
या स्त्री हिंसति सर्व्वपरं पतिं विष्णुसमं गुरुम्।
कुम्भीपाके पचति सा यावदिन्द्राश्चतुर्दश॥
व्रतस्नानशनं दानं सत्यं पुण्यं तपश्चिरम्।
पतिभक्तिविहीनाया भस्मीभूतं निरर्थकम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५७ अध्यायः॥
अपि च।
"साध्व्याः सङ्गप्रजातायाः शतपुत्राधिकः पतिः।
असङ्गप्रसूता या दुःशीला ज्ञानवर्ज्जिता॥
स्वामिनं मन्यते नासौ पित्रोर्द्वेषेण कुत्सिता।
कुत्सितं पतितं मूढं दरिद्रं रोगिणं जड़म्॥
कुलजा विष्णुतुल्यञ्च कान्तं पश्यति सन्ततम्॥
हुताशनो वा सूर्य्यो वा सर्व्वतेजस्विनां परः।
पतिव्रतातेजसश्च कलां नार्हन्ति षोड़शीम्॥
महादानानि पुण्यानि व्रतान्यनशनानि च।
तपांसि पतिसेवायाः कलां नार्हन्ति षोड़शीम्॥
पुत्रो वापि पिता वापि बान्धवो वा सहोदरः।
योषितां कुलजातानां न कश्चित् स्वामिनः समः॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ४४ अध्यायः॥*॥
पतिदक्षिणादि यथा,—
"निरूपितश्च वेदेषु स्वशब्दो धनवाचकः।
तद्यस्यास्तीति स स्वामी वेदज्ञ! शृणु मद्वचः॥
तस्य दाता सदा स्वामी न च स्वं स्वामिनो भवेत्।
अहो अवस्था भवतां वेदज्ञानमबोधताम्॥
धर्म्म उवाच।
पत्नीं विना न स्वं साध्वि! स्वामिनं दातुमर्हति।
दम्पती ध्रुवमेकाङ्गौ तयोर्हीना च द्वौ समौ॥
निरूपिता पुण्यकृते व्रते स्वामी च दक्षिणा।
श्रुतौ श्रुतो यः स्वधर्म्मो विपरीतो ह्यधर्म्मकः॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ७ अध्यायः॥
पतिः, त्रि, (पाति रक्षति पालयतीति वा। "पतेर्डतिः।" उणां। ४। ५७। इति डतिः।)
अधिपतिः। तत्पर्य्यायः। स्वामी २ ईश्वरः ३
ईशिता ४ अधिभूः ५ नायकः ६ नेता ७ प्रभुः ८
परिवृढः ९ अधिपः १०। इत्यमरः। ३। ११०। ११॥
(यथा, मनुः। ७। ११५।
"ग्रामस्याधिपतिं कुर्य्यात् दशग्रामपतिं तथा।
विंशतीशं शतेशञ्च सहस्रपतिमेव च॥")
पतिंवरा, स्त्री, (पतिं वृणीते या सा। वृ अ वरणे + खच्। "संज्ञायां भृञामिदृजीति।" ३। २। ३६।
इति सुम्।) स्वयंवरा। स्वेच्छया पत्यन्वेषिणी।
(यथा, रघौ। ६। १०।
"मनुष्यवाह्यं चतुरश्रयान-
मध्यास्य कन्या परिवारशोभि।
विवेश मञ्चान्तरराजमार्गं
पतिंवरा कल्पविवाहवेश्मा॥")
क्षणजीवकः। इति शब्दचन्द्रिका॥
पतिन्नी, स्त्री, (पतिं हन्ति इति। "लक्षणे जायापत्योष्टक्।" ३। २। ५२। इति टक् ततो ङीप्।)
पतिनाशकहस्तरेखाविशेषः। यथा, "लक्षणे
जायापतिभ्याम्। जायाघ्नो हस्तः। पतिघ्नी पाणि-
रेखा।" इति संक्षिप्तसारव्याकरणम्। स्वामिहन्त्री।
(विवाहात् प्राक् चेन्नादिन्दत्तपिण्डादकस्य कुमार्य्यै
परीक्षार्थं दाने तदा स्नपयानजातन्तत्पिण्डस्य
यद्दशे कुमार्य्यास्तस्याः पतिहननरूपफलं यथा,
आश्वलायनगृह्यसूत्रे १। ५। ६। "अहौ पिण्डान्
क्षत्वा पिण्डानभिमन्त्र्य कुमारीं ब्रूयात् एषामेकं
गृह्णेति।" इति नियोजिता कुमारी यदि
स्नपयानादाहृतां स्वदं गृह्णाति तदा पतिघ्नीति
तां विद्यात्॥)
पतितः, त्रि, (पतति भ्रष्टो भवति स्वधर्म्मात् शास्त्र-
विहितकर्म्मणः सदाचारादिभ्यो वा यः। पत् +
कर्त्तरि क्तः। चलितः। गलितः। पतनाश्रयः।
पड़ा इति भाषा। तत्पर्य्यायः। प्रस्कन्नः २।
इति हेमचन्द्रः॥ पातित्यविशिष्टः। स्वधर्म्मच्युतः।
तस्य लक्षणं यथा, मार्कण्डेयपुराणे।
"स्वधर्म्मं यः समुत्सृज्य परधर्म्मं समाश्रयेत्।
अनापदि स विज्ञेयः पतितः परिकीर्त्तितः॥"

पातित्यकारणं यथा, मात्स्ये २०१ अध्याये ।
"चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति ॥"
पतिता यथा,—
"गराग्निविषदास्चैव पापण्डाः क्रूरवृद्धयः ।
क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् ॥
गिरिवृक्षप्रपातञ्च ये कुर्व्वन्ति नराधमाः ।
कुम्भिल्पजीविनश्चैव स्त्रीनालङ्कारकारिणः ॥"
तथा,—
"ब्रह्महत्या हता ये च ये च वै ब्राह्मणैर्हताः ।
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ॥"
तेषां दाहादिनिषेधो यथा,—
"पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ।
न चाश्रुपातः पिण्डो वा कार्य्यश्चाद्धादिकं क्वचित्॥"
इति शुद्धितत्त्वे ब्रह्मपुराणम् ॥ * ॥
तेषां संसर्गनिषेधो यथा, वराहपुराणे ।
"आसन्नप्रायनाचैनं भोजनात् कथनादिषु ।
सम्वत्सरेण पतति पतितेन सहाचरन् ॥"
प्रायश्चित्तेतरवैदिककर्म्मानधिकारी सन् नरकभागी । यथा,—
"पतितैः संप्रयुक्तानामिमां शृणुत निष्कृतिम् ।
सम्वत्सरेण पतति पतितेन सहाचरन् ॥
याजनाध्यापनाद्यौनाच्छ्वासयानाशनासनात् ।
यो येन पतितेनैव संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्य्यात् संसर्गस्य विशुद्धये ॥"
तेषामुदककार्य्यं यथा,—
"पतितस्यौदकं कार्य्यं सपिण्डैर्ब्राह्मणैः सह ।
निन्दितेऽहनि सायाह्ने ज्ञातिभिर्गुरुसन्निधौ ॥
दासीघटमयं पूर्णं पर्य्यस्येत् प्रेतवत् सदा ।
अहोरात्रमुपासीनं नाग्नौचं ब्राह्मणैः सह ॥
निवर्त्तयेरंस्ततस्तु सम्भाषणसहासनम् ॥"
इति मात्स्ये २०१ अध्यायः ॥
अत्याज्या पतिता यथा, मत्स्यपुराणे ।
"पतिता गुरवस्त्याज्या न तु माता कदाचन ।
गर्भधारणपोष्याभ्यां तेन माता गरीयसी ॥"
द्वादशवार्षिकव्रतनाश्यपापयुक्तः । तस्य और्द्धदेहिकविधिर्यथा, "पूर्व्वोक्तचात्महादेः दाहाशौचादिनिषेधस्तदानीमेव । वत्सरान्ते तु सर्व्वमौर्द्धदेहिकं कुर्य्यात् ॥
गोब्राह्मणहतानाञ्च पतितानां तथैव च ।
ऊर्द्धं संवत्सरात् कुर्य्यात् सर्व्वमेवौर्द्धदेहिकम् ॥"
इति हेमाद्रौ षट्त्रिंशन्मतात् ॥
एवं म्लेच्छीकृतानामपि । गयाश्राद्धमपि कार्य्यम् ।
"ब्रह्महा च कृतघ्नश्च गोघाती पक्षपातकी ।
सर्व्वे ते निष्कृतिं यान्ति गयायां पिण्डपातनात् ॥"
इत्यग्निपुराणात् ॥ * ॥
एवं ब्राह्मेऽपि ।
"क्रियते पतितानान्तु गते संवत्सरे क्वचित् ।
देशधर्म्मप्रमाणत्वात् गयाकूपे स्वयम्भुभिः ॥
मार्कण्डपादमूले वा श्राद्धं हरिहरौ स्मरन् ॥"
सूर्य्यपदे इत्यर्थः ॥ * ॥ तत्र वर्षमध्ये कृत्यमुक्तमपरार्के वायुपुराणे ।
"शुक्लपक्षे तु द्वादश्यां कुर्य्यात् श्राद्धन्तु वत्सरम् ।
द्वादशाहानि वा कुर्य्यात् शुक्ले च प्रथमेऽहनि ॥"
कागलेयः ।
"नारायणबलिः कार्य्यो लोकगर्हाभयान्नरैः ।
तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीदयम् ॥"
व्यासः ।
"नारायणं समुद्दिश्य ग्निवं वा यत् प्रदीयते ।
तस्य शुद्धिकरं कर्म्म तद्ब्रवैत्तैतदन्यथा ॥"
स चात्मघातादिप्रायश्चित्तं कृत्वा कार्य्यः । तदुक्तं हेमाद्रौ षट्त्रिंशन्मते ।
"कृत्वा चान्द्रायणं पूर्व्वं क्रिया कार्य्या यथाविधि ।
नारायणबलिः कार्य्यो लोकगर्हाभयात् नरैः ॥
पिण्डोदककिंयाः पश्चात् दशोत्सर्गादिकञ्च यत् ।
एकोद्दिष्टानि कुर्व्वीत सपिण्डीकरणं तथा ॥"
दिवोदासीये तूदकस्नातातपस्तु इत्याह ।
"पतिते च मृते शुद्धेः प्राजापत्यन्तु षोड़श ।
मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत् ॥"
इदं प्रायश्चित्ताहैपित्रादिविषयम् ।
"इन्द्रियैरपरित्यक्ता ये च मूढ़ा विषादिनः ।
घातयन्ति स्वमात्मानं चाण्डालादिहताश्च ये ॥
तेषां पुत्राश्च पौत्राश्च दयया समभिप्लुताः ।
यथाशास्त्रं प्रतन्वन्ति विधिनामप्रतिष्ठितम् ॥
तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवे ॥"
इति हेमाद्रौ तेनैवोक्तेः ॥ * ॥
तत्रैव वौधायनोऽपि । नारायणबलिं व्याख्यास्यामोऽभिशस्तपतितसुरापात्मत्यागिनां ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणि वा वारिमरणं यत्र यस्य तत्र तत्र कुर्व्वीतेति ॥ * ॥ शस्त्रपरिग्निष्टे तु चण्डालादित्याहुरुक्ता,—
"दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थीनि यत्नतः ।
प्रायश्चित्तन्तु कर्त्तव्यं पुत्रैश्चान्द्रायणत्रयम् ॥"
इत्युक्तम् ॥ * ॥ मदनरत्ने ।
"ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणि वा कुर्व्वीतेति ॥" * ॥ मदनरत्ने ब्राह्मे ।
"प्रमादादपि निःशङ्कस्त्वकस्माद्विधिचोदितः ।
चण्डालैर्ब्राह्मणैर्गौरैर्निहतो यत्र कुत्रचित् ॥
तस्य दाहादिकं कार्य्यं यस्मान्न पतितस्तु सः ।
चान्द्रायणं तप्तकृच्छ्रद्वयं तस्य विशुद्धये ॥
यद्वा कृच्छ्रान् पञ्चदश कृत्वा तु विधिना दहेत् ।
बुद्धिपूर्ब्बमन्धतानान्तु त्रिंशत्कृच्छ्रं समाचरेत् ॥"
इत्युक्तम् । स्मृतिरत्नावल्यां तद्द्विगुणं प्रायश्चित्तं कृत्वा अर्व्वागब्दात् सर्व्वं कार्य्यं इत्युक्तम् ।
"आत्मनो घातशुद्ध्यर्थं चरेच्चान्द्रायणद्वयम् ।
तप्तकृच्छ्रचतुष्कञ्च त्रिंशत्कृच्छ्राणि वा पुनः ॥
अर्व्वाक् संवत्सरात् कुर्य्यात् दहनादि यथोदितम् ।
कृत्वा नारायणबलिमनित्यत्वात्तदायुषः ॥"इति ॥
इदञ्चात्मवधनिमित्तं तज्जातिवधप्रायश्चित्तेन समुच्चितं कार्य्यम् । अतएव वौधायनेनोक्तम् । द्वादशवर्षाणि त्रीणि वेति । मदनपारिजाते स्मृत्यर्थसारे च ब्रह्महादीनां तद्योग्यं प्रायश्चित्तं कृत्वा नारायणबलिः कार्य्य इत्युक्तम् । एवं म्लेच्छीकृतानामपि ॥ * ॥ यत्तु कश्चिदाह । पुत्रकृतेन प्रायश्चित्तेन पितुः पापनाशे मानाभावः । आत्मघाते तु वचनादस्तु । महापातके तु कथं स्यादिति । स स्वयमेव आत्मवधप्रायश्चित्तस्य जातिवधनिमित्तेन समुच्चयं वदन् हृदयशून्य एव । नहि जातिवधनिमित्तं पुत्रैः कार्य्यमिति वचनमस्ति पुत्रकर्त्तृकसर्व्वप्रायश्चित्तादिविधानात्तेः । प्रागुक्तवौधायनवचनाच्चेति दिक् । इदं प्रायश्चित्ताहाणामेव । प्रायश्चित्तानर्हाणान्तु पतितौदकमात्रं कार्य्यमिति केचित् । मदनपारिजातादिस्वरसोऽप्येवम् । वस्तुतस्तु तदर्हानर्हयोर्व्वचनेऽनुपादानात् अविशेषात् तत्रापि नारायणबलिर्गयाश्राद्धञ्चेति युक्तम् ॥ * ॥ पतितौदकविधिस्तु मित्राद्यतिरिक्तविषय इत्यपरे । स यथा । हेमाद्रौ ब्राह्मे ।
"पतितस्य तु कारुण्यात् यस्तूष्णिं कर्त्तुमिच्छति ।
स हि दासीं समाहूय सर्व्वगां दत्तवेतनाम् ॥
अशुद्धघटहस्तान्तां यथाशक्तिं ब्रवीत्यपि ।
हे दासि ! गच्छ शूल्येन तिलानानय सत्वरम् ॥
तोयपूर्णं घटञ्चेमं सतिलं दक्षिणासुखी ।
उपविष्टा तु वामेन चरणेन ततः क्षिप ॥
कौण्डिये ! पातकिसंज्ञां त्वं पितेति मुहुर्व्वद ।
निगृह्य तस्य वाक्यं सा लब्धशूल्या करोति तत् ॥
एवं कृते भवेत्तूष्णिं पतितानां न चान्यथा ॥"
इति ।
इदञ्च मृताहे कार्य्यम् । पतितस्य दासी मृताहि यदा घटमपवर्ज्जयेदेतावतायसुपचरितो भवतीति मदनरत्ने विष्णुक्तेः । इदञ्चात्मत्यागिविषयम् । आत्मत्यागिनः पतितास्तेनाशौचोदकभाजः स्युरित्युपक्रम्य विष्णुना एतस्याभिधानादिति गौड़ाः । उपलक्षणत्वात् सर्व्वेषामिति तु युक्तम् । इति निर्णयसिन्धौ ५ परिच्छेदः ॥
पतिवत्नी, स्त्री, (पतिर्विद्यते यस्याः । पति+मतुप् । "अन्तवत्पतिवतोर्नुक् ।" ४ । १ । ३२ । इति निपातनात् वत्वं नुगागमश्च । ततः । "ऋन्नेभ्यो ङीप् ।" ४ । १ । ५ । इति ङीप् ।) सभर्त्तृका । सधवा । इत्यमरः । २ । ६ । १२ ॥ (यथा, रघुः । १५ । ३५ ।
"इतरेऽपि रघोर्वंश्यास्त्वयस्त्रीतामितेजसः ।
तद्योगात् पतिवत्नीषु पत्नीष्वासन् द्विरूनवः ॥")
पतिव्रता, स्त्री, (पतिव्रतमिव धर्म्मार्थकामेषु कायवाङ्मनोभिः सदोपास्योऽस्याः ।) स्वाम्यनुरक्ता । तत्पर्य्यायः । सुचरित्रा २ सती ३ साध्वी ४ । इत्यमरः । २ । ६ । ६ ॥ एकपत्नी ५ । इति शब्दरत्नावली ॥ तस्या लक्षणं यथा,—
"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना क्षमा ।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥"
इति शुद्धितत्त्वम् ॥ * ॥
तस्या माहात्म्यं यथा,—
नारद उवाच ।
"कस्मैत्वं केन राजेन्द्र ! तपसा वा तपोधन ! ।
उत्तमाञ्च गतिं याति क्षणवासः प्रशंस मे ॥
एवमुक्तस्तु धर्म्मात्मा नारदेनात्रवीत्तदा ।

यम उवाच ।
न तस्या नियमो विप्र ! तपो नैव च व्रतम् ।।
उपवासो न दानञ्च न दमो वा महामते ! ॥
यादृशी तु भवेद्विप्र ! शृणु तत्त्वं समासतः ।
प्रसुप्ते या प्रस्वपिति विबुद्धे जागर्ति स्वयम् ॥
भुङ्क्ते तु भोजिते विप्र ! सा न्यूनञ्चयति ध्रुवम् ।
मौने मौना भवेद्या तु स्थिते तिष्ठति या स्वयम् ।
सा न्यूनञ्चयते विप्र ! नान्यत् पश्यामि किञ्चन ॥
एकदृष्टिरेकमना भर्त्तुर्व्वचनकारिणी ।
तस्या विभीमहे सर्व्वे ये तथान्ये तपोधन ! ॥
देवानामपि सा साध्वी पूज्या परमशोभना ।
भर्त्ता वाभिहिता वापि प्रणत्याख्यायिनी भवेत् ॥
वर्त्तमानापि विप्रेन्द्र ! प्रत्याख्यानापि सा यदा ।
तदैव तं संश्रयति पतिं नान्यं कदाचन ॥
भर्त्तुर्न्यूनसुखं ब्रह्मन् ! या पश्यति वराङ्गना ।
एवं याति भवेन्नित्यं भर्त्तुः प्रियहिते रता ॥
अनुविद्धेन भावेन भर्त्तारमनुगच्छति ।
सा तु न्यूनसुखद्वारं न गच्छेद्ब्रह्मसम्भव ! ॥
एष माता पिता बन्धुरेष मे देवतं परम् ।
एवं शुश्रूषते या तु सा मां विजयते सदा ।
पतिव्रता तु या साध्वी तस्याश्चाहं कृताञ्जलिः ॥
भर्त्तारमनुध्यायन्ती भर्त्तारमनुगच्छति ।
भर्त्तारमनुशोचन्ती न्यूनद्वारं न पश्यति ॥
गौतवादित्रनृत्यानि प्रेक्षणीयान्यनेकशः ।
न शृणोति न पश्येत न्यूनद्वारं न पश्यति ॥
स्नायन्ती तिष्ठती वापि कुर्व्वन्ती वा प्रसाधनम् ।
नान्यच्च मनसा ध्यायेत् कदाचिदपि सुव्रता ॥
देवता अर्च्चयन्ती वा भोजयन्त्यथ वा द्विजान् ।
पतिं न त्यजते चित्तात् न्यूनद्वारं न पश्यति ॥
भानौ चानुदिते या तु उत्थाय च तपोधन ! ।
गृहं मार्जयते नित्यं न्यूनद्वारं न पश्यति ॥
चतुर्दृष्टः स्वभावश्च यस्या नित्यं सुसंवृतम् ।
शौचाचारसमायुक्ता सापि न्यूनं न पश्यति ॥
भर्त्तुर्मुखं प्रपश्यन्ती भर्त्तुश्चित्तानुसारिणी ।
वर्त्तते च हिते भर्त्तुर्मृतन्यूनद्वारं न पश्यति ॥
एवं कीर्त्तिमतां लोके दृश्यन्ते दिवि देवताः ।
मानुषाश्चाप्सु भार्य्या वै तत्र देशे तु दृश्यते ॥
कथितेवं पुरा विप्र ! आदित्येन पतिव्रता ।
मया तस्माच्च विप्रर्षे ! यथादृष्टं यथाश्रुतम् ॥
गुह्यमेतत्ततो दृष्ट्वा पूजयामि पतिव्रताम् ॥"

इति वाराहे पतिव्रताचरित्रम् ॥ * ॥

पतिव्रताधर्म्मो यथा,—
"पतिव्रतानां यद्धर्म्मं तन्निबोध व्रजेश्वर ! ।
नित्यं भर्त्तुर्य्युतसुकया तत्पादोदकमीप्सितम् ।
भक्तिभावेन सततं भोक्तव्यं तदनुज्ञया ॥
व्रतं तपस्या देवार्च्चां परित्यज्य प्रयत्नतः ।
कुर्य्याच्चरणसेवाञ्च स्नपनं परितोषणम् ॥
तदाज्ञारहितं कर्म्म न कुर्य्यादीरतः सती ।
नारायणात् परं कान्तं ध्यायते सततं सती ॥
परपुंसां पुरश्चैव सुवेषं पुरुषं परम् ।
यात्रामहोत्सवं नित्यं नर्त्तकं गायनं व्रज ।
परक्रीड़ाञ्च सततं नहि पश्यति सुव्रता ॥
यद्दृश्यं स्वामिनां नित्यं तदेवमपि योषिताम् ।
नहि त्यजेत्तु तत्सङ्गं त्रयमेव च सुव्रता ॥
उत्तरे नोत्तरं दद्यात् स्वामिनश्च पतिव्रता ।
न कोपं कुरुते शुद्धा ताड़नाच्चापि कोपतः ॥
क्षुधितं भोजयेत् कान्तं दद्यात् पानञ्च तोषणे ।
न बोधयेत्तं निद्रालुं प्रेरयत्येव कर्म्मसु ॥
पुत्राणाञ्च शतगुणं स्नेहं कुर्य्यात् पतिं सती ।
पतिर्बन्धुर्गतिर्भर्त्ता देवतं कुलयोषितः ॥
शुभं दृष्ट्वा सुधातुल्यं कान्तं पश्यति सुन्दरी ।
सस्मितं वदनं कृत्वा भक्तिभावेन यत्नतः ॥
पुरुषार्थाञ्च सप्तस्त्र सती स्त्री च समुद्धरेत् ।
पतिः पतिव्रतानाञ्च मुच्यते सर्व्वपातकात् ॥
नास्ति तेषां कर्म्मभोगः सतीनां व्रततेजसा ।
तया सार्द्धञ्च निष्कर्म्मी मोदते हरिमन्दिरे ॥
पृथिव्यां यानि तीर्थानि सतीपादेषु तान्यपि ।
तेजश्च सर्व्वदेवानां मुनीनाञ्च सतीषु च ॥
तपस्विनां तपः सर्व्वं व्रतिनां यत् फलं व्रज ।
दाने फलं यदाप्तृणां तत् सर्व्वं तासु सन्ततम् ॥
स्वयं नारायणः शम्भुर्विधाता जगतामपि ।
सुराः सर्व्वे मुनयो भीतास्ताभ्यश्च सन्ततम् ॥
सतीनां पादरजसा सद्यः पूता वसुन्धरा ।
पतिव्रतां नमस्कृत्य मुच्यते पातकान्नरः ॥
त्रैलोक्यं भस्मसात् कर्त्तुं त्रयमेव पतिव्रता ।
स्वतेजसा समर्था सा महापुण्यवती सदा ॥
सतीनाञ्च पतिः साध्वीपुत्रो निःशङ्क एव च ।
नहि तस्य भयं किञ्चिद्देवेभ्यश्च यमादपि ॥
मृतजन्मपुण्यवतां गृहे जाता पतिव्रता ।
पतिव्रताप्रसूः पूता जीवन्मुक्तः पिता तथा ॥
सती स्त्री प्रातरुत्थाय त्यक्त्वा च रात्रिवाससम् ।
भर्त्तारञ्च नमस्कृत्य करोति स्नपनं मुदा ॥
गृहकार्य्यं ततः कृत्वा स्नात्वा धौते च वाससी ।
गृहीत्वा शुक्लपुष्पञ्च भक्तितः पूजयेत् पतिम् ॥
स्नापयित्वा सुपूतेन जलेन निर्म्मलेन च ।
तस्मै दत्त्वा धौतवस्त्रं तत्पादौ क्षालयेन्मुदा ॥
आसने वासयित्वा च दत्त्वा भालं च चन्दनम् ।
सर्व्वाङ्गलेपनं कृत्वा दत्त्वा माल्यं गलेऽपि च ॥
सामवेदोक्तमन्त्रेण भोगद्रव्यैः सुधोपमैः ।
संपूज्य भक्तितः कान्तं स्तुत्वा च प्रणमेन्मुदा ॥
'ओं नमः कान्ताय शान्ताय सर्व्वदेवाश्रयाय स्वाहा ॥'
इत्यनेनैव मन्त्रेण दत्त्वा पुष्पञ्च चन्दनम् ।
पाद्यार्घ्यधूपदीपांश्च वस्त्रं नैवेद्यमुत्तमम् ॥
जलं सुवासितं शुद्धं ताम्बूलञ्च सुसंस्कृतम् ।
दत्त्वा स्तोत्रञ्च प्रपठेत् यत् कृतं पाद्यमेव च ॥
ओं नमः कान्ताय शान्ताय शिवचन्द्रस्वरूपिणे ।
नमः शान्ताय दान्ताय सर्व्वदेवाश्रयाय च ॥
नमो ब्रह्मस्वरूपाय सतीप्राणपराय च ।
नमस्याय च पूज्याय हृदाधाराय ते नमः ॥
पञ्चप्राणाधिदेवाय चक्षुषस्तारकाय च ।
ज्ञानाधाराय पत्नीनां परमानन्दरूपिणे ॥
पतिर्ब्रह्मा पतिर्विष्णुः पतिरेव महेश्वरः ।
पतिश्च निर्गुणाधारो ब्रह्मरूप ! नमोऽस्तु ते ॥
क्षमस्व भगवन् ! दोषं ज्ञानाज्ञानकृतञ्च यत् ।
पत्नीवन्धो ! दयासिन्धो ! दासीदोषं क्षमस्व च ॥
इदं स्तोत्रं महापुण्यं स्वयमाद्ये पद्मया कृतम् ।
सरस्वत्या च धरया गङ्गया च पुरा व्रज ॥
सावित्र्या च कृतं पूर्व्वं ब्रह्मणे चापि नित्यशः ।
पार्व्वत्या च कृतं भक्त्या कैलासे शङ्कराय च ॥
मुनीनाञ्च सुराणाञ्च पत्नीभिश्च कृतं पुरा ।
पतिव्रतानां सर्व्वासां स्तोत्रमेतत् शुभावहम् ॥
इदं स्तोत्रं महापुण्यं या शृणोति पतिव्रता ।
नरोऽन्यो वापि नारी वा लभते सर्व्ववाञ्छितम् ॥
अपुत्रो लभते पुत्रं निर्धनो लभते धनम् ।
रोगी च मुच्यते रोगात् बद्धो मुच्येत बन्धनात् ॥
पतिव्रता च स्तुत्वा च तीर्थस्नानफलं लभेत् ।
फलञ्च सर्व्वतपसां व्रतानाञ्च व्रजेश्वर ! ॥
इदं स्तुत्वा नमस्कृत्य मुक्तिं सा तदनुज्ञया ।
उक्तः पतिव्रताधर्म्मो गृहिणां शृणुतां व्रज ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः ॥ * ॥

पतिव्रतानामानि यथा,—
सूर्य्यस्य सुवर्चला १ शुक्रस्य शुची २ वशिष्ठस्य अरुन्धती ३ चन्द्रस्य रोहिणी ४ अगस्त्यस्य लोपामुद्रा ५ च्यवनस्य सुकन्या ६ सत्यवतः सावित्री ७ कपिलस्य श्रीमती ८ सौदासस्य मदयन्ती ९ सगरस्य केशिनी १० नलस्य दमयन्ती ११ रामस्य सीता १२ शिवस्य सती १३ नारायणस्य लक्ष्मीः १४ ब्रह्मणः सावित्री १५ रावणस्य मन्दोदरी १६ । इति पुराणान्तरम् ॥
(गायत्रीस्वरूपा भगवती। यथा, देवीभागवते । १२ । ६ । ६६ ।
"पतिव्रता पवित्राङ्गी पद्महासपरायणा ।
प्रज्ञावती सुता पौत्री पुत्रपूज्या पयस्विनी ॥")

पतेरः, पुं स्त्री, (पतति गच्छतीति । पत लृ गतौ + "पतिकठिकुटिगडिदंशिभ्य एरक् ।" उणां १।५६। इति कर्त्तरि एरक् ।) पक्षी । गन्तरि त्रि । इत्यमरादिकोषः ॥

पतेरः, पुं, (पतत्यस्मिन्निति । "पति कठीति ।" उणां १।५६। इति अधिकरणे एरक् ।) आधारः । गर्त्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पतङ्ग, क्ली, (पत्रमिव अङ्गं यस्य । पृषोदरात्साधु ।) रक्तचन्दनम् । इति शब्दरत्नावली ॥ वृक्षविशेषः । वकम् इति भाषा । तत्पर्य्यायः । पत्राङ्गम् २ रक्तकाष्ठम् ३ सुरङ्गदम् ४ पत्राख्यम् ५ पट्टरङ्गम् ६ भार्य्याहृत्तः ७ रक्तकः ८ लोहितम् ९ रङ्गकाष्ठम् १० रोगकाष्ठम् ११ कुचन्दनम् १२ पट्टरञ्जनकम् १३ सुरङ्गम् १४ । अस्य गुणाः । कटुत्वम् । रूक्षत्वम् । अम्लत्वम् । शीतत्वम् । गौल्यत्वम् । वातपित्तज्वरविष्फोटोन्मादभूतनाशित्वञ्च । इति राजनिर्घण्टः ॥
अपि च भावप्रकाशे ।
"पतङ्गस्तु रक्तसारः सुरङ्गो रञ्जनं तथा ।
पटरञ्जनमाख्यातं पत्तूरश्च कुचन्दनम् ॥
पतङ्गः मधुरः शीतः पित्तश्लेष्मव्रणासनुत् ।
हरिचन्दनवज्ज्ञेयं विशेषाद्दाहनाशनम् ॥"

पत्तनं, क्ली, (पतन्ति गच्छन्ति जना यस्मिन्। पत ल्ट गतौ + "वीपतिभ्यां तनन्।" उणां ३।१५०। इति तनन्।) नगरम्। इत्यमरः। २।२।१०॥ (यथा, भागवते। ७। २। १४।
"पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान्।
खेटखर्वटघोषांश्च ददृहुः पत्तनानि च॥")
महती पुरी। इति श्रीधरस्वामी॥ रुद्रजः। इति हारावली॥

पत्तनवणिक्, [ज्] पुं, (पत्तनस्य नगरस्य वणिक्।) नगरवणिक्। तत्पर्य्यायः। खाध्यायी २। इति त्रिकाण्डशेषः॥

पत्तिः, पुं, (पद्यते विपक्षमेनां प्रति पद्भ्यां गच्छतीति। पद्यौ ड गतौ + "पदिप्रथिभ्यां नित्।" उणां ४। १८२। इति तिः स च नित्।) पदातिकः। इत्यमरः। २।८।६६। (यथा, रघुः। ७।३७।
"पत्तिः पदातिं रथिनं रथेशः-
स्तुरङ्गसादी तुरगाधिरूढम्।
यन्ता गजस्याभ्यपतद्गजस्थं
तुल्यप्रतिद्वन्द्वि बभूव युद्धम्॥" *॥
पद्यते विपक्षं प्राप्नोतीति। पद् + तिन्।) वीरः। इति विश्वः॥

पत्तिः, स्त्री, (पत ल्ट गतौ + भावे क्तिन्।) गतिः। (पत्यते विपक्षो यया। पत् + करणे क्तिन्।) सेनाविशेषः। यदुक्तं अमरे। २।८।८०।
"एकैकेभरथा त्रिघ्ना पत्तिः पञ्च पदातिका॥"

पत्तिसंहतिः, स्त्री, (पत्तीनां पदातीनां संहतिः।) पदातिसमूहः। तत्पर्य्यायः। पादातम् २। इत्यमरः। २।८।६७॥

पत्तूरः, पुं, (पत गतौ + बाहुलकादूरः। निपातनात् तस्य ह्रस्वम्।) शालिञ्चशाकः। इति त्रिकाण्डशेषः॥ पत्तङ्गे, क्ली। इति भावप्रकाशः॥

पत्नी, स्त्री (पत्यर्थज्ञे सम्बन्धो यया। "पत्युर्नो यज्ञसंयोगे।" ४।१।३२। इति नकारादेशः ङीप् च।) वेदविधानेनोढा। अन्यत्रोपचारात्। पत्या उदाहविधिना समादिना ऊढा। इति भरतः॥ तत्पर्य्यायः। पाणिगृहीती २ द्वितीया ३ सहधर्म्मिणी ४ भार्य्या ५ जाया ६ दारा ७ सधर्म्मिणी ८ धर्म्मचारिणी ९ दारः १० गृहिणी ११। इति शब्दरत्नावली॥ सहचरी १२ गृहः १३ क्षेत्रम् १४ वधूः १५ जनी १६ परिग्रहः १७ ऊढा १८ कलत्रम् १९। इति हेमचन्द्रः॥ (पत्नीगुणेनैव हि पुरुषाः सुखिनो भवन्ति। यस्य पत्नी वशानुगा स भूस्थोऽपि स्वर्गस्थः। गृहाश्रमतुल्यं किञ्चिदपि नास्ति यदि तत्र हितकामा पत्नी वर्त्तते। सपत्नीक एव सर्व्वधर्म्मकरणार्हः। यदुक्तं दक्षसंहितायाम्।
"पत्नीमूलं गृहं पुंसां यदि छन्दोनुवर्त्तिनी।
गृहाश्रमसमं नास्ति यदि भार्य्या वशानुगा॥
तया धर्म्मार्थकामानां त्रिवर्गफलमश्नुते।
प्राक्कर्म्मे वर्त्तमाना तु क्लेशान्नु निवारिता॥
अन्यथा सा भवेत् पश्चात् यथा व्याधिरपेक्षितः।
अनुकूला न वाग्दुष्टा दक्षा साध्वी प्रियंवदा॥
आत्मगुप्ता स्वामिभक्ता देवता सा न मानुषी।
अनुकूलकलत्रो यस्तस्य स्वर्गं इहैव हि॥
प्रतिकूलकलत्रस्य नरको नात्र संशयः।
स्वर्गेऽपि दुर्लभं ह्येतदनुरागं परस्परम्॥
रक्तः एको विरक्तोऽन्यस्तस्मात् कष्टतरं नु किम्॥
गृहवासः सुखार्थाय पत्नीमूलं गृहे सुखम्।
सा पत्नी या विनीता स्याच्चित्तज्ञा वशवर्त्तिनी॥
दुःखदान्या सदा खिन्ना चित्तभेदात् परस्परम्।
प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः॥
योषित् सर्व्वा जलौकेव भूषणाच्छादनाद्यैः।
सुभूत्यापि कृता नित्यं पुरुषं ह्यपकर्षति॥
जलौका रक्तमादत्ते केवलं सा तपस्विनी।
इतरा तु धनं वित्तं मांसं वीर्य्यं बलं सुखम्॥
सशङ्का बालभावे तु यौवने विमुखी भवेत्।
क्षणवन्मन्यते पश्चाद्वृद्धभावे स्वकं पतिम्॥
अनुकूला न वाग्दुष्टा दक्षा साध्वी पतिव्रता।
एभिरेव गुणैर्युक्ता श्रीरेव स्त्री न संशयः॥
या हृष्टमनसा नित्यं स्थानमानविचक्षणा।
भर्त्तुः प्रीतिकरी नित्यं सा पत्नी ह्रीतरा स्मरा॥")

पत्राटः, पुं, (अटति सुखं विहरति अत्र इति अट + घञ्। ततः पत्रा चासौ अटः।) पत्नीगृहम्। यदुक्तं त्रिकाण्डशेषे।
"वासागारं भोगगृहं कन्यापत्राटनिष्कुटाः॥"

प(त्र)त्रं, क्ली, (पतति वृक्षात्। पत ल्ट गतौ + "सर्व्वधातुभ्यः ष्ट्रन्।" उणां ४।१५८। इति ष्ट्रन्।) वृक्षावयवविशेषः। पाता इति भाषा। तत्पर्य्यायः। पलाशम् २ छदनम् ३ दलम् ४ पर्णम् ५ छदः ६। इत्यमरः। २। ४। १४॥ पात्रम् ७ छादनम् ८ वर्हम् ९ वर्हणम् १० पत्रकम् ११। इति शब्दरत्नावली॥ *॥ विष्णवे पत्रविशेषदानफलं यथा नारसिंहे ५२ अध्याये।
"पत्राण्यपि सपुष्पाणि हरेः प्रीतिकराणि च।
प्रवक्ष्यामि नृपश्रेष्ठ! शृणुष्व गदतो मम॥
अपामार्गपत्रं प्रथमं तस्माद्भृङ्गारकं परम्।
तस्मात्तु खादिरं श्रेष्ठं ततश्च शमिपत्रकम्॥
दूर्व्वापत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम्।
पत्रं तस्मादमनकं ततो विल्वस्य पत्रकम्॥
विल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम्।
एतेषाञ्च यथालाभे पत्रैर्वा योऽर्चयेद्धरिम्॥
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते॥"
देवीप्रीतिकरपत्राणि यथा,—
"अपामार्गस्य पत्रन्तु ततो भृङ्गारपत्रकम्।
ततोऽपि गन्धिनीपत्रं बलाहकमतः परम्॥
तस्मात् खदिरपत्रन्तु वञ्जुलस्यकस्तथा।
आम्रन्तु बकगुच्छस्तु जम्बूपत्रं ततः परम्॥
बीजपूरस्य पत्रन्तु ततोऽपि कुशपत्रकम्।
दूर्व्वाङ्कुरं ततः प्रोक्तं शमीपत्रमतः परम्॥
पत्रमामलकं तस्माद्दामपत्रमतः परम्।
सर्व्वतो विल्वपत्रन्तु देयाः प्रीतिकरं मतम्॥"
इति कालिकापुराणे ६८ अध्यायः॥*॥
तेजपत्रम्। तत्पर्य्यायः। तमालपत्रम् १ पत्रकम् २ छदनम् ३ दलम् ४ पालाशम् ५ अंशुकम् ६ वासः ७ तापसम् ८ सुकुमारकम् ९ वस्त्रम् १० तमालकम् ११ रामम् १२ गोपनम् १३ वसनम् १४ तमालम् १५ सुरनिर्गन्त्यम् १६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातविषवस्तिकण्डूतिदोषनाशित्वम्। सुखमस्तकशोधनत्वञ्च। इति राजनिर्घण्टः॥ अपि च। भावप्रकाशे।
"पत्रकं मधुरं किञ्चित्तीक्ष्णोष्णं पिच्छिलं लघु।
निहन्ति कफवातार्शःकृच्छ्रासारुचिपीनसान्॥"
(पत्यते स्थानात् स्थानान्तरे अनेन। पत + "दात्रीशस्युयुजस्तुदसिसिचमिहपतदशनहः करणे।" ३। २। १८२। इति करणे ष्ट्रन्।) वाहनम्। शरपक्षः। पक्षिपक्षः। इति मेदिनी॥ *॥ (पत्यते पात्यते शास्त्रबोधायवर्णनिचयोऽनेन। पत + करणे ष्ट्रन्। अन्तर्निवन्तत्वात् तथात्वम्। (लिखनाधारः। पात् इति भाषा। यथा, ज्योतिस्तत्त्वे।
"याम्मासिके तु सम्प्राप्ते भ्रान्तिः संजायते यतः।
धात्राक्षराणि दृष्टानि पत्रारूढान्यतः पुरा॥"
धातुमयपत्राकृतिद्वयम्। पतर् इति तवक् इति च भाषा। यथा, तुलापुरुषदाने दानसागरे।
"सुवर्णपत्राभरणा च कार्य्या
सुलोहपार्श्वद्वयशङ्खलाभिः॥" *॥
(पात्यते स्थानात् स्थानान्तरं समाचारोऽनेन।) पत्री। लिपिः। तस्य रञ्जनं यथा,—
"सुवर्णरूप्यरङ्गाद्यै रञ्जयेत् पत्रमुत्तमम्।
सामान्योत्तममध्यानां पत्ररञ्जनमीरितम्॥" *॥
अथ पत्रप्रमाणम्।
"षड़ङ्गुलाधिकं ह्रस्वं पत्रमुत्तममीरितम्।
मध्यमं ह्रस्वमात्रं स्यात् सामान्यं सुष्ठिहस्तकम्॥"
अथ पत्रभङ्गप्रकारः।
"पत्रन्तु त्रिगुणीकृत्य ऊर्द्धे तु द्विगुणं त्यजेत्।
शीर्षभागे लिखेद्वर्णान् गद्यपद्यादिसंयुतान्॥"*॥
अथ पत्रस्य रचनक्रमः।
"राजलेखकमाहूय नृपो ब्रूयात् प्रयत्नतः।
पत्रं कुरु यथायोग्यं गद्यपद्यादिसंयुतम्॥
पण्डितद्वयमानीय लेखको रहसि स्थितः।
यथायोग्यानुसारेण पत्रं कुर्य्यान्मनोरमम्॥
दिनद्वयं त्रयं वापि विचार्य्य पण्डितैर्वरैः।
स्वभाग्यैर्दूषणं ज्ञात्वा विलिखेत् पत्रपुस्तके॥
सामान्यपत्रे संलिख्य रहसि आवयेन्नृपम्।
नृपाज्ञया शुभे पत्रे विलिखेद्राजलेखकः॥"* ॥
अथ लेखनप्रकारः।
"अङ्कुरं प्रथमं दद्यात् मङ्गलार्थं विचक्षणः।
मध्ये विघ्नसमायुक्तमधः सप्ताङ्कसंयुतम्॥ ५॥
तदधः स्वस्ति विन्यस्य ततो गद्यं सुशोभनम्।
ततः श्रीशब्दरूपाणि पदन्यासक्रमं लिखेत्॥
भाषया संस्कृतेनैव कुशलं विलिखेत् सुधीः।
ततः शुभाशुभं वार्त्तां संस्कृतैः प्राकृतैस्तथा॥
ततः प्रमाणसन्देशं ततो वार्त्तां नियोजयेत्।
कीर्त्तिप्रीतियुतं पद्यं ततः किमधिकादिकम्॥
पत्रप्रेषणश्लोकञ्च अङ्कमासादिसंयुतम्।

पत्रं

सर्व्वेषामेव पत्रेषु लिखनञ्चैवमीरितम् ॥
सर्व्वेषामेव पत्राणां विधिं ज्ञात्वा लिखेत्तु यः ।
स्वदेशे कीर्त्तिमाप्नोति तथा देशान्तरेष्वपि ॥
एवं शास्त्रक्रमं ज्ञात्वा यो लिखेद्राजपत्रकम् ।
स राजमन्त्रिभिः सार्द्धं यशः प्राप्नोत्यनुत्तमम् ॥
शास्त्रसन्दर्भमज्ञात्वा यो लिखेद्राजपत्रकम् ।
स राजमन्त्रिभिः सार्द्धं दुर्य्यशो महदाप्नुयात्॥"*॥

अथ पत्रनयनक्रमः ।

"राजपत्रं नयेन्मूर्द्ध्नि ललाटे पात्रमन्त्रिणाम् ।
गुरुपत्रं नयेन्मूर्द्ध्नि ब्राह्मणानान्तथैव च ॥
यतिसन्न्यासिनाञ्चैव स्वामिनश्च तथैव च ।
सादरेणैव यत्नेन तथा मूर्द्धनि धारयेत् ॥
भार्य्यापुत्रस्य मित्रस्य हृदये धारयेत् सुधीः ।
प्रवीराणां कण्ठदेशे पत्रधारणमीरितम् ॥
एतेषाञ्चैव पत्राणामुक्तं धारणलक्षणम् ।
अन्येषामपि पत्राणां नियमो नात्र दर्शितः ॥"

अथ पत्रपठनप्रकारः ।

"पत्रं धृत्वा नमस्कृत्य पूर्ब्बाग्रं स्थापयेत् सुधीः ।
दक्षिणाग्रेण सदसि नृपाग्रे राजलेखकः ॥
पत्रं वितत्य सदसि द्विवारं मनसा पठेत् ।
स्फुटं पश्चात् प्रवक्तव्यमत्रोभौ राजलेखकः ॥
रहसि श्रावयेत् पत्रं शुभं वा यदि वाशुभम् ।
पत्रं श्रुत्वा विदित्वार्थं सभायां श्रावयेत्ततः ॥
रहस्य-पत्रं रहसि नृपाग्रे श्रावयेद्द्विजः ।
अशुभं नैव सदसि शुभं पत्रं नृपाज्ञया ॥
एवं क्रमेण पत्रार्थं श्रावयित्वा द्विजोत्तमः ।
नृपतेः सन्निधौ स्थित्वा नृपाज्ञामनुवर्त्तते ॥"

अथ पत्रचिह्नानि ।

"ऊर्द्ध्वं षड़ङ्गुलं त्यक्त्वा वर्त्तुलं चन्द्रविम्बवत् ।
कस्तूरीकुङ्कुमैः कुर्य्याद्राजपत्रं सुचिह्नितम् ॥
मन्त्रिणां कुङ्कुमेनैव पण्डितस्यैव चन्दनैः ।
गुरूणां चन्दनेनैव सिन्दूरेणैव स्वामिनः ॥
भार्य्यायाश्चाप्यलक्तेन चन्दनैः पितृपुत्रयोः ।
सन्न्यासिनां चन्दनेन यतीनां कुङ्कुमेन च ॥
रक्तचन्दनपङ्केन भृत्यस्य समुदीरितम् ।
श्रोत्रियेणैव शूद्राणां पत्रचिह्नं प्रकल्पयेत् ॥
एतेषाञ्चैव सर्व्वेषां यथायोग्यानुसारतः ।
पत्रस्योर्द्धं तु मतिमान् कुर्य्यात् चिह्नं सुवर्त्तुलम्॥"

अथ राजपत्रस्य कोणच्छेदनप्रकारः ।

"दक्षिणे पत्रकोणस्य अधस्तात् छेदयेत् सुधीः ।
एकाङ्गुलप्रमाणेन राजपत्रस्य चैव हि ॥"

अथ राजपत्रादेः पदन्यासः ।

"महाराजाधिराजश्च दानशौण्डं तथैव च ।
तथा सच्चरितं योज्यं कल्पवृक्षादिकं न्यसेत् ॥
यथायोग्यानुसारेण तथैव गुणभेदतः ।
राजपत्रेषु सर्व्वेषु पदन्यासक्रमं विदुः ॥"

अथ मन्त्रिपत्रस्य ।

"प्रवरं गुणभेदेन तथा सच्चरितादिकम् ।
विन्यस्य विलिखेत् प्राज्ञो मन्त्रिपत्रे पदक्रमम् ॥"

अथ पण्डितस्य ।

"संख्यावद्वन्दितपदं शास्त्रार्थनिपुणादिकम् ।
पण्डितानाञ्च पत्रेषु विलिखेद्वै पदक्रमम् ॥"

अथ गुरुपत्रस्य ।

"सांख्यसिद्धान्तनिपुणं सनमस्कारकं पदम् ।
विन्यस्य विलिखेत् प्राज्ञो गुरुपत्रपदक्रमम् ॥"

अथ स्वामिपत्रस्य ।

"प्रवर्य्यं सनमस्कारं प्राणप्रियादिकं पदम् ।
विन्यस्य विलिखेद्धीमान् स्वामिपत्रपदक्रमम् ॥"

अथ भार्य्यापत्रस्य ।

"प्राणप्रियापदं साध्वीं तथा सच्चरितादिकम् ।
भार्य्यापत्रं लिखेद्विद्वान् पदक्रममनुत्तमम् ॥"

अथ पुत्रस्य ।

"प्राणपुत्रपदं तद्वत्तथा सच्चरितादिकम् ।
आशीर्व्वचनसंयुक्तं पुत्रपत्रपदक्रमम् ॥"

अथ पितृपत्रस्य ।

"प्रभुवर्य्यं नमस्कारं तथा सच्चरितादिकम् ।
विन्यस्य विलिखेत् पुत्रः पितृपत्रपदक्रमम् ॥"

अथ सन्न्यासियतिपत्रस्य ।

"सर्व्ववाञ्छाविनिर्मुक्तं सर्व्वशास्त्रार्थपारगम् ।
सन्न्यासियतिपत्रेषु विलिखेच्च पदक्रमम् ॥"

सामान्यस्य ।

"सामान्यभृत्यपत्राणां विनियोज्यासुकं प्रति ।
शुश्रूषावर्णितपदं क्षागतुल्यादिकं तथा ॥
एतेषामेव पत्रेषु यथायोग्यानुसारतः ।
विन्यस्य विलिखेत् प्राज्ञः पदक्रममनुत्तमम् ॥"

श्रीशब्दविन्याससंख्या यथा,—

"षड् गुरोः स्वामिनः पञ्च दे भृत्ये चतुरो रिपौ ।
श्रीशब्दानां त्रयं मित्रे एकैकं पुत्रभार्य्ययोः ॥"*॥

अथ राज्ञः प्रशस्तिः ।

स्वस्तिगीर्व्वाणचयचूड़ारत्नरानिरीचिस्रुभित-
चन्द्रचूड़चरणनखेन्दुवृन्दचन्द्रिकासन्दोहास्वाद-
चतुरचेतश्चकोरवरविषमसमरसञ्चरत्प्रबलतर-
तुरगखुरपुटपटलदलितभूपृष्ठोत्तिष्ठज्जिष्ठधूलि-
धाराधूसरितसकलहरिदन्तरप्रचण्डभुजदण्ड-
भ्राजमानखरतरासिविच्छासितप्रत्यर्थिपृथ्वीपति-
सार्थप्रार्थितानुकम्पासुधासम्पातानवरतविदृद्धा-
दरिद्रविद्रावणद्रविणराशिविश्राणनसमुपार्ज्जितो-
र्ज्जितयशोमरालावलिकवलितवलिदधीचिसञ्चित-
यशोऽण्डालजालभूपालकुलतिलकश्रीयुतमहा-
राजाधिराजेषु ॥ १ ॥

स्वस्तिप्रचण्डदोर्दण्डखण्डखण्डितारिमण्डल-
सुण्डोन्मुक्तसुक्तावलीमण्डितसंग्रामाङ्गनरङ्गमा-
णानेकवारणवाहादिकायकाण्डवक्रतरनक्रचक्र-
चक्रमणदुरतिक्रमभणीयापगापतिप्रभूतयशश्चन्द्र-
चन्द्रिकाद्योतविद्योतिताखिलजगच्चण्डलविविध-
द्रविणार्पणसन्तोषितसुरिसन्दृब्धस्तूयमानावदात-
कीर्त्तिनर्त्तकीनर्त्तनलीलालोलपरितोषितधुरीणो-
र्व्वश्यादिवेश्याजनसविलासगीयमानगुणश्रवणा-
न्दोलिताखण्डश्रवणकुण्डलपरित:प्रसर्पितप्रताप-
तपनोत्तापितारातितसमध्यासितनिकुञ्जकुञ्ज-
प्रसृतसौन्दर्य्यगाथाप्रमुदितश्रीमन्नारायणचरण-
किङ्करश्रीयुतमहाराजदानशौण्डेषु ॥ २ ॥ *॥

अथ मन्त्रिप्रशस्तिः ।

स्वस्तिश्रीमत्समस्तसामन्तसेवकनिर्व्याढकेषु।
कोषगोकुषिकृषीवलगजवाजिगृहपरिवारहर्ष-
हेतुनीतिसेतुरक्षणनिपुणेषु । अमन्दिश्वासैक-
निकेतनेषु श्रीश्रीमन्त्रिप्रवीरेषु आशीराशिनिवे-
दनकोऽयं वर्णभूतोऽत्यं भद्यमावेदयन् तत्त्यं
भद्यमथाहतमनुदिनमनुक्षणं पृच्छति स्म ॥ *॥

अथ गुरुप्रशस्तिः ।

स्वस्तिश्रीनारायणपदपाथोरुहनिःसरन्मक-
रन्दमधुपायमानमानसेषु । विविधविद्याविद्योति-
ताखिलगुणगणालङ्कृतवेदवेदाङ्गपारगस्वाश्रमो-
चिताचारसम्पन्नपरमहंसपरिव्राजकाचार्य्यसेव्य-
मानश्रीगोविन्दस्वरूपगुरुचरणारविन्देषु कोटि-
शः प्रणामाः ॥ * ॥

अथ भार्य्यायाः स्वामिप्रशस्तिः ।

स्वस्तिश्रीमद्दाम्प्रेमहेमभूषितास्मदादिभक्त-
जनेषु । कर्णयोरधिष्ठानेषु । नेत्रयोरधिदेवतेषु ।
कामस्य परिणामेषु । चतुर्व्वर्गप्रदायकेषु । ममा-
परूपेषु । श्रीमत्स्वामिचरणारविन्देषु । गोविन्द
इवेन्दिरायाः शङ्कर इव गिरिजायाः महेन्द्र इव
पुलोमजायाः प्रतिदिनं वर्द्धमाना समाराधना
प्रणामपूर्ब्बमास्ताम् ॥ * ॥

अथ भर्त्तुर्भार्य्याप्रशस्तिः ।

स्वस्तिश्रीमत्समस्तप्रेमपारावारयमूर्त्तौ प्रिय-
तमायां नेत्रयुग्मस्य कनीनिकायामिव चन्द्रस्य
क्षणदायामिव कमलाकरस्य कमलिन्यामिव
पथिकस्य छायायामिव श्रमातुरस्य शीतलाम्बत-
धारायामिव मम सप्रेम निवेदयन्ती पत्नी
शुभाशीराशीर्न्निवेदयतु सर्व्वदा ॥ * ॥

अथ पुत्रस्य पितरं प्रति प्रशस्तिः ।

स्वस्तिश्रीमदभिनवप्रेमवद्चित्तचिन्तितस्त्री
यानुरागानुरञ्जितानुगृहीतस्वगृह्यवर्गेषु । निज-
चरणसरोज-रञ्जितपरागसंरक्तास्मदादिभाल-
स्थलविशालभाग्यसम्भावुकेषु । श्रीयुतपितृचरण-
सरोरुहेषु । अकिञ्चित्करकिङ्करस्य मम बद्ध-
करसम्पुटस्यावनीपृष्ठलग्नाः साष्टाङ्गप्रणतयः
सहसमजस्रं विज्ञाप्यञ्च ॥ * ॥

अथ पितुः पुत्रं प्रति प्रशस्तिः ।

स्वस्तिश्रीविश्वेश्वरचरणसरोरुहानुग्रहसमा-
सादितातिविततानवद्यविद्याविलासपीयूषपर-
म्परापराभावुकानुपममाधुरीधुरीणविविधगुणा-
लङ्कृतनिजवंश्यावतंससकलविश्वासनिधाननिज-
कुलपवित्रीकृतात्मजायेषु । श्रीयुतशुद्धाचारपरि-
पूरितपुत्रेषु शुभाशिषां राशयः सन्तु विज्ञा-
प्यञ्च ॥ * ॥

अथ सन्न्यासियतिप्रशस्तिः ।

स्वस्तिश्रीमत्परमहंसपरिव्राजकाचार्य्यकरण-
निपुणतापराङ्मुखेषु । विषमविषयदोषदर्शन-
दूषितप्रपञ्चरचनाविभावेषु । वेदवेदान्तसांख्य-
सिद्धान्तबद्धदेवप्रकृतिपुरुषविवेकज्ञानग्रीवेषु ।
संख्यावन्मुख्यवन्दितचरणारविन्दस्वाश्रमोचिता-
चारपरिपालनपवित्रीकृतधरित्रीतलेषु । सकल-
भूदेव-पूजित-श्रीयुत-गोस्वामि-चरणारविन्देषु ।

ममावनीसंलग्नाः साष्टाङ्गप्रणामसहस्रमजस्रं ओं नमो नारायणायेति मन्त्रेणाकलितमस्तु ॥ * ॥

अथ भृत्यप्रशस्तिः ।

ॐस्वस्तिभगवच्चरणपरायणसकलद्रविणाधिरक्षकगोमहिष्यादिप्रतिपालकनिखिलवंश्याद्यनुसेवकवर्गवदासुकभृत्यं प्रति ॥ * ॥

अथारिप्रशस्तिः ।

स्वस्तिसमराङ्गनभरुप्रतिभटयशः परिपूरितसकलसामन्तराजधानीविजृम्भितवीरशब्दावधेतनिजवंश्यानुरक्तसततपरिचरस्मरणागतासुकं प्रति ॥ * ॥

अथ विवेकिनां प्रशस्तिः ।

स्वस्तिश्रीभगवत्पदपङ्कजपूजनोपचितपुण्यपुञ्जपवित्रीकृतान्तःकरणदिगखिलासिनीविसरङ्गन्निर्गलन्मिलन्मालतीमालाकलायशोरुनवन्निनिरवधिवसुविश्राणनाधरीकृतसुरपुरभूमीरुहेषु ।

स्वस्तिश्रीमत्परमेश्वरपादपाथोरुहाखादचतुरचित्तचञ्चरीकभूतेन्द्रारकवृन्दावननन्दितामितयशः पटीरपङ्कपटलालङ्कृतदिगङ्गनागणस्तनतटप्रबलप्रतापौर्व्वखर्व्वीकृतप्रत्यर्थिसार्थगर्व्वांकूपारपारेषु ।" इति वररुचिकृतपत्रकौमुदी ॥

पत्रकं, क्ली, (पत्रमेव । पत्र + स्वार्थे कन् ।) वृक्षस्य पत्रम् । पत्रावली । इति शब्दरत्नावली । तेजपत्रम् । अस्य गुणः । कफवायुर्गौकुष्ठासारुचिनाशित्वम् । इति राजवल्लभः । घ्राणेन्द्रियग्राके पुं । इति रत्नमाला ॥

पत्रकाहला, स्त्री, (पत्रकाणां आहला शब्दः ।) पिङ्गोला । पत्रशब्दः । इति हारावली ॥

पत्रकृच्छ्रः, पुं, (पत्रैः पत्रकाथैः साध्यः कृच्छ्रोव्रतविशेषः ।) पर्णकृच्छ्रव्रतम् । यथा,—

"पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः ।
प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः ॥"
इति याज्ञवल्क्यः ॥

"पलाशोदुम्बराब्जबिल्व-श्रीवृक्ष-पर्णानामेकैकेन कथितमुदकं प्रत्यहं पिबेत् कुशोदकञ्च एकस्मिन्नहनीति पक्षाहसाध्यः पर्णकृच्छ्रः ।" इति मिताक्षरा ॥

पत्रगुप्तः, पुं, (पत्राणि गुप्तानि यस्य ।) त्रिकण्टः । इति शब्दचन्द्रिका । तेकाँटा सिज् इति भाषा ॥

पत्रघना, स्त्री, (पत्रमेव घनं यस्याः । पत्रबाहुल्यात्तथात्वम् ।) सातलावृक्षः । इति राजनिर्घण्टः ॥

पत्राङ्ग, क्ली, (पत्रमञ्यतेऽनेन । अञ्च + करणे घञ् । यद्वा पत्रवत् अङ्गं यस्य । प्रकन्धादित्वात् साधु ।) पत्राङ्गम् । रक्तचन्दनम् । इति शब्दरत्नावली ।

पत्रभङ्गारः, पुं, (पत्रेषु भङ्गारस्तद्वत् शब्दो यस्य ।) पुरोटिः । इति त्रिकाण्डशेषः । रायभाटी इति भाषा ॥

पत्रणा, स्त्री, (अण प्राणे + अप् अणः । लक्ष्यं प्रतिगमनाय । पक्षेः अणो जीवनमिव यत्र ।) शरपत्ररचना । यथाह हारावली ।

"शराणां पत्ररचना पत्रणा परिकीर्त्तिता ॥"

पत्रतण्डुली, स्त्री, (पत्रेषु तण्डुलवत् विद्यतेऽस्याः । अर्श-आदित्वादच् । गौरादित्वात् ङीष् ।) यवतिक्ता । इति राजनिर्घण्टः ॥

पत्रतरुः, पुं, (पत्रप्रधानस्तरुः । प्राकपार्थिववत् समासः ।) दुष्खदिरः । इति राजनिर्घण्टः ॥

पत्रदारकः, पुं, (पत्रवत् दारयति वृक्षादि इति । दृ + णिच् + ण्वुल् ।) क्रकचः । इति त्रिकाण्डशेषः । करात् इति भाषा ॥

पत्रनाड़िका, स्त्री, (पत्रस्य नाड़िका ।) पत्रशिरा । इति जटाधरः ॥

पत्रपरशुः, पुं, (पत्रे धातुनिर्म्मितपत्राकारे परशुरिव । तच्छेदकत्वात्तथात्वम् ।) स्वर्णकारादीनां स्वर्णादिच्छेदिका । छेनी इति भाषा । तत्पर्य्यायः । व्रश्चनः २ । इत्यमरः । २।१०।३३॥ पत्रपर्शुः ३ । इति शब्दरत्नावली ॥

पत्रपा, स्त्री, (अपत्रपणमिति । अप + त्रप् + अच् । निपातनात् अकारलोपः ।) अपत्रपा । लज्जा । इति शब्दरत्नावली ॥

पत्रपालः, पुं, (पत्रवत् पल्यते प्राप्यतेऽसौ । पत्र + पल गतौ + घञ् ।) आयता छुरिका । इति हेमचन्द्रः । ३ । ४४८ ॥

पत्रपाली, स्त्री, (पत्रवत् पालिरग्रभागो यस्याः । ङीप् । कर्णनी । इति हलायुधः ॥ काँची इति भाषा ।

पत्रपाश्या, स्त्री, (पाश्यानां समूहः पाश्या । पत्रमिव पाश्या ।) स्वर्णादिरचितललाटाभरणम् । इत्यमरः । २।६।१०३ ॥ टीका इति भाषा ॥

पत्रपिण्याचिका, स्त्री, (पत्रैः पत्रेण वा पिण्याचीव । इवार्थे कन् ।) जलजा । टोका इति भाषा । तत्पर्य्यायः । खर्परः २ वारिजा ३ शूर्ड्खोलम् ४ । इति त्रिकाण्डशेषः ॥ मस्तके पलाशपत्रबन्धनम् । यदुक्तं

"बन्धः पलाशपत्राणां शीर्षे पत्रपिण्याचिका ॥"
इति हारावली॥

पत्रपुष्पः, पुं, (पत्रं पुष्पमिव यस्य ।) रक्ततुलसी । इति शब्दचन्द्रिका ॥

पत्रपुष्पकः, पुं, (पत्रपुष्प इव कायति प्रकाशते इति । कै + कः ।) भूर्ज्जपत्रम् । इति शब्दमाला ॥

पत्रपुष्पा, स्त्री, (पत्रपुष्प + स्त्रियां टाप् ।) तुलसी । इति शब्दमाला ॥ क्षुद्रपत्रतुलसी । इति रत्नमाला ॥

पत्रबन्धः, पुं, (पत्राणां बन्धो बन्धनं यस्मिन् । पुष्परचनाकाले हि पत्राणां ग्रन्थनं स्यादतस्तथात्वम् ।) पुष्परचना । यथा, शब्दरत्नावल्याम् ।

"रचना च परिष्वन्दः पत्रबन्ध इति त्रयम् ।
पत्रभङ्गप्रसूनादिरचनायां निगद्यते ॥"

पत्रबालः, पुं, (पत्रवत् बल्यते धीयतेऽस्मिन् । बल रचने + अधिकरणे घञ् । अग्रभागे पत्राकृतेस्तथात्वम् ।) तुलाधटः । इति त्रिकाण्डशेषः । दाँड़ इति भाषा ॥

पत्रभङ्गः, पुं, (पत्राणां लिखितपत्राकृतीनां भङ्गो विचित्रता यत्र ।) स्तनकपोलादौ कस्तूरिकादिरचितपत्रावली । तत्पर्य्यायः । पत्रलेखा २ पत्रवल्ली ३ पत्रलता ४ पत्राङ्गुली ५ । इति हेमचन्द्रः ॥ पत्राङ्गुलिः ६ पत्रभङ्गी ७ पत्रकर्म ८ पत्रभङ्गिः ९ पत्रावली १० । इति शब्दरत्नावली ॥

पत्रभङ्गी, स्त्री, (पत्रभङ्ग + गौरादित्वात् ङीष् ।) पत्रभङ्गः । इति शब्दरत्नावली ॥

पत्रयौवनं, क्ली, (पत्राणां यौवनं यत्र ।) पल्लवम् । नूतनपत्रम् । यथा, जटाधरः ।

"नवोद्गते किशलयं किशलं पत्रयौवनम् ॥"

पत्ररथः, पुं, क्ली, (पत्रं पक्षी रथो यानमिव यस्य ।) पक्षी । इत्यमरः । २ । ५ । ३३ ॥ (यथा, भागवते । १ । ६ । १३ ।

"चित्रस्रजे पत्ररथेर्विभ्रमङ्गमरश्रियम् ।
नलवेणुशरस्तम्बकुशकीचकगह्वरम् ॥")

पत्रलं, क्ली, द्रव्यम् । अघनदधि । इति हेमचन्द्रः ॥

पत्रलेखा, स्त्री, (पत्राणां कस्तूरिकादिरचितपत्राकृतीनां लेखा रचना ।) पत्रभङ्गः । इत्यमरः ॥ २ । ६ । १२२ ॥ (यथा, रघुः । ६ । ७२ ।

"महेन्द्रमास्थाय महोक्षरूपं
यः संयति प्राप्तपिनाकलीलः ।
चकार बाणैरसुराङ्गनानां
गण्डस्थलीः प्रोषितपत्रलेखाः ॥")

पत्रवल्ली, स्त्री, (पत्राणां रचितपत्राकृतीनां वल्ली लतेव ।) पत्रभङ्गः । इति हेमचन्द्रः ।३।३१८॥ (यथा, माघे । ८ । ५६ ।

"गण्डेषु स्फुटरचनाजपत्रवल्ली
पर्य्याप्तं पयसि विभूषणं बधूनाम् ॥")

रुद्रजटा । पलाशी लता । इति राजनिर्घण्टः ॥ पर्णलता च ॥

पत्रवाहः, पुं, (पत्रेण पत्रच्छदेन उह्यते इति । वह + घञ् ।) बाणः । इति जटाधरः ॥ (पत्रं लिपिं वहतीति । वह + अण् ।) लिपिवाहके च ॥

पत्रशाकः, पुं, (पत्रप्रधानः शाकः । शाकपार्थिववत् समासः ।) षड्विधशाकान्तर्गतपत्रात्मकशाकः । यथाह राजवल्लभः ।

"पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यादयोत्तरम् ॥"

पत्रशिरा, स्त्री, (पत्रस्य शिरेव ।) पत्रभङ्गः । तत्पर्य्यायः । माटिः २ । इति हारावली ॥ पर्णनाड़ी च ॥

पत्रश्रेणी, स्त्री, (पत्राणां श्रेणीव ।) द्रवन्ती । इति राजनिर्घण्टः ॥ पर्णपंक्तिश्च ॥

पत्रश्रेष्ठः, पुं, (पत्रं श्रेष्ठं यस्य ।) बिल्वः । इति राजनिर्घण्टः ॥

पत्रसूचिः, पुं, (पत्राणां सूचिरिव ।) कण्टकम् । इति त्रिकाण्डशेषः ॥

पत्रहिमं, क्ली, (पत्रेषु हिमं यस्मिन् दिने ।) हिमदुर्दिनम् । इति त्रिकाण्डशेषः ॥

पत्राख्यं, क्ली, (पत्रमेव आख्या यस्य ।) तेजपत्रम् । इति शब्दचन्द्रिका ॥ तालीशपत्रम् । इति राजनिर्घण्टः ॥

पत्राङ्गं, क्ली, (पत्रमिव अङ्गं यस्य । यद्वा पत्रेषु अङ्गतीति । अगि गतौ + अच् ।) रक्तचन्दनम् । रक्तचन्दनसदृशकाष्ठविशेषः । वकम् इति भाषा । इत्यमरः । २ । ६ । १३२ ॥ भूर्जम् । पद्मकम् । इति मेदिनी ॥

पत्राङ्गुलिः, स्त्री, (पत्रं अङ्गुलिरिव यत्र । यद्वा अङ्गुलिभिर्लिखितं रचितं पत्रं पत्राकृतिरत्र इति परनिपातत्वात्तथात्वम् ।) पत्रभङ्गः । स्तनकपोलादौ कस्तूरिकादिरचितपत्रावली । इत्यमरः । २ । ६ । १२२ ॥

पत्राङ्कनं, क्ली, (पत्रं लेखनपत्रमङ्यतेऽनेन । पत्र + अङ्क + करणे ल्युट् ।) मसी । इति शब्दरत्नावली ॥

पत्राढ्यं, क्ली, (पत्रैराढ्यम् ।) पिप्पलीमूलम् । पर्वतटणम् । इति राजनिर्घण्टः ॥

पत्राङ्गं, क्ली, पक्षाङ्गम् । इति राजनिर्घण्टः ॥

पत्रालुः, पुं, (पत्र + अस्त्यर्थे आलुः ।) कासालुः । इक्षुदर्भा । इति राजनिर्घण्टः ॥

पत्रावलिः, स्त्री, (पत्राणां पत्राकृतीनां आवलिः षड्लिरिव रचना यस्याः ।) गैरिकम् । इति शब्दचन्द्रिका ॥ (पत्राणां आवलिः श्रेणी राजिर्वा ।) पत्रश्रेणी च ॥

पत्रावली, स्त्री, (पत्रावलि + वा ङीप् ।) पत्रभङ्गः । इति शब्दरत्नावली ॥ नवदुर्गासम्यूदानकमधुमिश्रितयवचूर्णयुक्तनवाश्वत्थपत्राणि । यथा,—

"अमायां निशि संघे तु पत्रे चाश्वत्थसंज्ञके ।
क्रमात् पत्रावली देयं मधुना यवचूर्णकम् ॥"
इति कैवल्यतन्त्रम् ॥

देवादिसन्निधौ सन्दिग्धवस्तुनोरेकतरावधारणार्थमेकत्राक्षबालकोत्तोलिततत्तत्सन्दिग्धकोटिलिखितपत्रसमूहश्च ॥

पत्रिका, स्त्री, (पत्री एव । स्वार्थे कन् ततो ङीप् ।) पत्री । लिपिः । यथा, ज्योतिषे ।

"आदित्यादिग्रहाः सर्व्वे नक्षत्राणि च राशयः ।
दीर्घमायुः प्रकुर्व्वन्तु यस्येयं जन्मपत्रिका ॥"
(प्रशस्तपत्रं विद्यते यस्याः । पत्र + विद्यमानार्थे ठन् । कदल्यादिनवपत्रिका । यथा, दुर्गोत्सवपद्धतौ ।

"कदली दाड़िमी धान्यं हरिद्रा मानकं कचु ।
विल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका ॥")

पत्रिकाख्यः, पुं, (पत्रिका आख्या यस्य ।) कर्पूरभेदः । इति राजनिर्घण्टः ॥ पत्रिकागामके त्रि ॥

पत्रिणी, स्त्री, (पत्राणि सन्त्यस्याः । पत्र + इनिः । स्त्रियां ङीप् ।) पल्लवः । इति शब्दचन्द्रिका ॥

पत्री, [न्] पुं, (पत्रं पक्षो विद्यतेऽस्य । पत्र + इनिः ।) बाणः । (यथा, रघुः । ११ । ८४ ।

"शृंस किं गतिमनेन पत्रिणा
हन्मि लोकसुत ते मखार्ज्जितम् ॥")

पक्षी । इत्यमरः । ३ । ३ । १०५ ॥ (यथा, रघुः ११ । २६ ।

"तं चुरप्रप्रकलीकृतं क्षती
पत्रिणां व्यभजदाश्रमाद्दिः ॥")

श्येनः । (यथा, नैषधे । १६ । १२ ।

"नभसि महसां ध्वान्तध्वाङ्क्षप्रमाथगणपत्रिणा-
मिह विहरणैः श्येनम्मातां रवेरवधारयन् ॥"
"पत्रिणां श्येनाख्यपक्षिरूपाणाम् ।" इति तट्टीकायां नारायणः ॥ पत्राणि च्छदानि सन्त्यस्य । अत इनिः ।) वृक्षः । रथी । पर्व्वतः । इति मेदिनी ॥ तालः । श्वेतकिंशिही । गङ्गापत्री । पाची । इति राजनिर्घण्टः ॥ पत्रविशिष्टे, त्रि ॥

पत्री, स्त्री, (पत्र + स्त्रियां ङीप् ।) लिपिः । पत्रम् । यथा, ज्ञातके ।

"श्रीमत्पङ्कजिनीपतिः कुसुदिनीप्राणेश्वरो
भूभवः
प्राग्गाङ्किः सुरराजवन्दितपदो दैत्येन्द्रमन्त्री शुनिः ।
स्वर्भानुः शिखिनां गणो गणपतिर्न्नक्षेत्रलक्ष्मीधरा-
रक्षां रक्षतु सदैव यस्य विमला पत्री मया
लिख्यते ॥"

पत्रोपस्करः, पुं, (पत्रमेव उपस्कर उपकरणं यस्य ।) कासमर्दः । इति हारावली ॥

पत्रोर्णं, क्ली, (पत्रजा ऊर्णा साधनत्वेनास्त्यस्य । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् ।) वटलकुचादिपत्रेषु क्रिमिभिरूर्णायाः कृतत्वात् पत्रसम्बन्धिनी ऊर्णा अत्रेति । इति भरतः ॥ धौतकौषेयम् । इत्यमरः । २ । ६ । ११३ ॥ (यथा, महाभारते । १३ । १११ । १०३ ।

"पत्रोर्णं चोरयित्वा तु क्रकरत्वं नियच्छति ॥")

पत्रोर्णः, पुं, (पत्रेषु ऊर्णा यस्य ।) श्येनाकटच्चः । इत्यमरः । २ । ४ । ५६ ॥

पत्सलं, क्ली, (पतति गच्छति अस्मिन् । पत लृ गतौ + "पतेः रुच्च लः ।" उणां । ३ । ७४ । इति सरन् रस्य लच्च ।) पन्थाः । इत्युणादिवृत्तिः ॥

पथ, इ क गत्याम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । इदित् ।) इ क, पन्थयति । इति दुर्गादासः ॥

पथ, ए ञ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । ज्वलादिः ।) ए, अपथीत् । ञ, पाथः पथः । इति दुर्गादासः ॥

पथः, पुं, (पथति गच्छति अत्र । पथ गतौ + घञर्थे अधिकरणे कः ।) पन्थाः । इति त्रिकाण्डशेषः ॥

पथन्, [न्] पुं, पथः । इत्यमरटीका ॥ (पथति गच्छति । पथ गतौ + अच् ।) गमनकर्त्ता च ॥

पथिकः, त्रि, पन्थानं गच्छति यः । (पथिन् + "पथः ष्कन् ।" ५ । १ । ७५ । इति ष्कन् सो ङीषर्थः ।) पथगन्ता । (यथा, गोः रामायणे । १ । ५ । १० ।

"नानापथिकदूतैश्च वणिग्भिश्चोपशोभिताम् ।
देवतायतनैश्चैव विमानैरिव शोभिताम् ॥")

तत्पर्य्यायः । अध्वनीनः २ अध्वगः ३ अध्वन्यः ४ पान्थ्यः ५ । इत्यमरः । २ । ८ । १७ ॥ गन्तुः ६ यातुः ७ पथकः ८ यात्रिकः ९ यात्रकः १० । इति शब्दरत्नावली ॥ पथिनः ११ । इत्युणादिकोषः ॥

पथिकसन्ततिः, स्त्री, (पथिकानां सन्ततिः समूहः ।) पथिकसङ्घः । तत्पर्य्यायः । हारिः २ । इति त्रिकाण्डशेषः ॥ पथिकसंहतिः ३ । इति हारावली ॥

पथिका, स्त्री, (पथिक + टाप् ।) कपिलद्राक्षा । इति राजनिर्घण्टः ॥

पथिद्रुमः, पुं, (पथिः प्राप्तगुणो द्रुमः । बहुगुणवत्त्वात्तथात्वम् ।) खदिरवृक्षः । इति जटाधरः ॥ श्वेतखदिरः । इति राजनिर्घण्टः ॥

पथिलः, त्रि, (पथति गच्छतीति । पथ गतौ + "मिथिलादयश्च ।" उणां । १ । ५८ । इति निपातनात् साधुः ।) पथिकः । इत्युणादिकोषः ॥

पथिवाहकः, त्रि, (पन्थानं वाहयतीति । वह + णिच् + ण्वुल् ।) शाकुनिकः । निषुरः । इति शब्दमाला ॥ भारवाहकश्च ॥

पथ्यं, त्रि, (पथिन् + "धर्म्मपथ्यर्थन्यायादनपेते ।" ४ । ४ । ९२ । इति यत् ।) चिकित्सादौ हितकारकम् । तत्पर्य्यायः । करञ्जम् २ हितम् ३ । इति शब्दचन्द्रिका ॥ आत्मीयम् ४ आयुष्यम् ५ । सैन्धवे क्ली । इति राजनिर्घण्टः ॥

पथ्यः, पुं, (पथि साधुः । दिगादित्वात् यत् इनोलोपः ।) हरीतकीवृक्षः । यथा,—

"शिवायां वनतिक्तः स्यात् पथ्यः सुन्दरमालकौ ।"
इति शब्दमाला ॥

पथ्यशाकः, पुं, (पथ्यं हितकरं शाकं यस्य ।) तण्डुलीयशाकः । इति राजनिर्घण्टः ॥

पथ्या, स्त्री, (पथ्य + टाप् ।) हरीतकी । (यथा, हठयोगदीपिकायाम् । ३ । ३५ ।

"ततः सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रकर्षयेत् ।
पुनः सप्तदिने प्राप्ते रोगमात्रं समुच्छिनेत् ॥")

रुग्णेर्व्वारुः । चिर्भिटा ॥ वन्ध्या कर्कोटकी । इति राजनिर्घण्टः ॥ (संसाररोगस्य पथ्यस्वरूपत्वात् गङ्गापि पथ्यस्वरूपा । यथा, काशीखण्डे २६ । ११२ ।

"पद्मनाभपदार्घ्यैश्च प्रस्रुता पद्ममालिनी ।
परब्रह्मेति पुण्यैकरी पथ्या पूर्त्तिः प्रभावती ॥")

पथ्यादिगुग्गुलुः, पुं, (पथ्या आदिर्यस्य तथाविधः गुग्गुलुः ।) औषधविशेषः । यथा,—

"पथ्या विभीतामलकीफलानां
घृतं क्रमेण द्विगुणाभिवृद्धम् ।
प्रस्थेन युक्तञ्च पलद्वयार्द्धां
द्रोणे जले संस्थितमेकरात्रम् ॥
अर्द्धावशेषं कथितं कषायं
भाण्डे पचेत्तत् पुनरेव लोहे ।
अस्मिन् वरैरवतार्य्य दद्यात्
द्रव्याणि संचूर्ण्य पलार्द्धकानि ॥
विड्भङ्गदन्तीत्रिफलागुडूची-
लाक्षाचित्रान्नागरकोषणानि ।
यथेष्टचेष्टस्य नरस्य शीघ्रं
हिमाम्बुपानानि च भोजनानि ॥
निषेव्यमाणो विनिहन्ति रोगान्
मग्नप्रसीं नूतनखञ्जताञ्च ।
श्रीहानसुग्रं जठरार्त्तिगुल्मं
पाण्डुत्वकण्डूत्वविवातरक्तम् ॥

पथ्यादिको गुग्गुलुरेष नाम्ना
ख्यातः क्षितावप्रमितप्रभावः।
बलेन नागेन समं मनुष्यं
जवेन कुर्य्यात्तुरगेण तुल्यम्॥
आयुःप्रकर्षं विदधाति चक्षु-
र्बलं तथा पुष्टिकरो विषघ्नः।
क्षतस्य सन्धानकरो विशेषा-
द्रोगेषु ग्रस्तः सकलेषु तज्ज्ञैः॥"

इति भावप्रकाशः॥

पथ्यापथ्यं, क्ली. (पथ्यं रोगिणां हितकरं अपथ्यं अशुभकरं द्वयोः समाहारः।) रोगाणां हिताहितकारकद्रव्याणि।

तत्र तरुणज्वरे पथ्यं यथा।

वमनम्। लङ्घनम्। कालोऽहाः। यवागूः। स्वेदनम्। कटुतिक्तरसौ। एतानि पाचनानि॥*॥

नवज्वरे अपथ्यं यथा।

स्नानम्। विरेकः। सुरतम्। कषायः। व्यायामः। अभ्यञ्जनम्। दिवानिद्रा। दुग्धम्। घृतम्। वेदलम्। आमिषम्। तक्रम्। सुरा। स्वादुगुरुद्रवद्रव्याणि। अन्नम्। प्रवातः। भ्रमणम्। कोपः॥*॥

मध्यज्वरे पथ्यं यथा।

पुरातनषष्टिकः। पुरातनशालिः। वार्त्ताकुः। शोभाञ्जनम्। कारवेल्लः। वेत्राग्रम्। आषाढ़फलम्। पटोलम्। कर्कोटकम्। मूलकपोतिका। सुद्गमसूरचणककुलत्थसुकुरुकानां यूषः। पाठा। अम्लता। वास्तूकम्। तण्डुलीयः। जीवन्ती। काकमाची। सुपक्वानि द्राक्षाकपित्थदाड़िमबैकङ्कतफलानि। लघूनि सात्म्यानि च भेषजानि॥*॥

अथ पुराणज्वरे पथ्यम्।

विरेचनम्। क्षुर्दनम्। अञ्जनम्। नस्यम्। धूमः। अनुवासनम्। सिराव्यधः। संग्रमनम्। प्रदेहः। अभ्यङ्गः। अवगाहः। शिरोपचारः। एणः। कुलिङ्गः। हरिणः। मयूरः। लावः। शशः। तित्तिरिः। कुक्कुटः। क्रौञ्चः। कुरङ्गः। पृषतः। चकोरः। कपिञ्जलः। वर्त्तकः। कालपुच्छः। गोक्षीरम्। अजाक्षीरम्। गोघृतम्। अजाघृतम्। हरीतकी। पर्व्वतनिर्झराम्भः। एरण्डतैलम्। सितचन्दनम्। ज्योत्स्ना। प्रियालिङ्गनम्॥*॥

व्यायामञ्च अवायञ्च स्नानं चंक्रमणं तथा।
ज्वरमुक्तो न सेवेत यावन्नो बलवान् भवेत्॥*॥

अथातिसाररोगे पथ्यम्।

वमनम्। लङ्घनम्। निद्रा। पुराणाः शालिषष्टिकाः। विलेपी। लाजमण्डः। मसूरतुवरीशूद्गशूलावहरिणकपिञ्जलभक्षयूषः। सर्व्वे क्षुद्रमत्स्याः। भृङ्गी। खड्डोशः। मधुरालिका। तैलम्। छागघृतक्षीरे। गोदधितक्रे। गवाजयोर्दधिजं पयोजं वा नवनीतम्। नवरम्भापुष्पम्। नवरम्भाफलम्। क्षौद्रम्। जम्बुफलम्। भक्ष्यम्। महार्द्रकम्। निम्बम्। शालुकम्। विकङ्कतम्। कपित्थम्। बकुलम्। बिल्वम्। तिन्दुकम्। दाड़िमद्वयम्। तिलकम्। कच्चटदलम्। चाङ्गेरी। विजया। अरुणा। जातीफलम्। अहिफेनम्। जीरकः। गिरिमल्लिका। कुसुम्भुरु। महानिम्बम्। सकलकषायरसः। दीपनानि लघून्यन्नपानानि। नाभेर्द्व्यङ्गुलतोऽधस्तात् तथा वंशास्थिशूले शूलेषु अर्द्धचन्द्रवद्दाहः॥*॥

अतीसारे अपथ्यं यथा।

स्वेदः। अञ्जनम्। रुधिरमोक्षणम्। अम्बुपानम्। स्नानम्। अवायः। जागरणम्। धूमः। नस्यम्। अभ्यञ्जनम्। सकलवेगधारणम्। रूक्षाणि। असात्म्यमशनम्। विरुद्धान्नम्। गोधूमः। माषः। यवः। वास्तूकम्। काकमाची। निष्पावः। कन्दः। मधुशिग्रुः। रसालम्। पूगम्। कुष्माण्डम्। तुम्बी। वदरम्। गुर्व्वन्नम्। गुरुपानम्। ताम्बूलम्। इक्षुः। गुड़ः। मद्यम्। उपोदिका। द्राक्षा। अम्लवेतसफलम्। लशुनम्। धात्री। दुग्धाम्बु। मस्तु। गृहवारि। नारिकेलम्। स्नेहनम्। स्तगमदः। अखिलपत्रशाकम्। क्षारः। सर्व्वाणि सराणि। पुनर्नवा। इर्वारुकम्। लवणम्। अम्लम्॥*॥

अथ ग्रहणीरोगे पथ्यम्।

निद्रा। क्षुर्दनम्। लङ्घनम्। पुरातनशालयः। पुरातनषष्टिकाः। लाजमण्डः। मसूरतुवरीसुद्गभवयूषः। निःस्नेहोद्धृतसारगव्यदधि। स्त्रवां छाया वा पयोजं नवनीतम्। छागघृतपयोदधीनि। तिलतैलम्। सुरा। माक्षिकम्। शालूकम्। बकुलम्। दाड़िमयुगम्। नयं भव्यम्। रम्भापुष्पम्। रम्भाफलम्। तरुणबिल्वम्। शृङ्गाटकम्। चाङ्गेरी। विजया। कपित्थम्। कुटजम्। अजाजी। कर्पूरः। तक्रम्। कच्चटपल्लवम्। तिलकम्। जातीफलम्। जाम्बवम्। धन्याकम्। तिन्दुकम्। महानिम्बम्। अरुणा। अफेनम्। क्रव्यात्। लावशशैणतित्तिरिमांसयूषः। सर्व्वे क्षुद्रमत्स्याः। खड्डोशः। मधुरालिकामत्स्यः। खलिशः। सर्व्वकषायरसः। नाभेर्द्व्यङ्गुलतोऽधस्तात् तथा वंशास्थिशूले प्रज्वलितायसार्द्धचन्द्रदाहः॥*॥

अहण्यामपथ्यं यथा।

रक्तसुतिः। जागरः। अम्बुपानम्। स्नानम्। स्त्री। वेगविधारणम्। नस्यम्। अञ्जनम्। स्वेदनम्। धूमपानम्। श्रमः। विरुद्धाशनम्। आतपः। गोधूमः। निष्पावः। कलायः। माषः। यवः। आर्द्रकम्। क्षुत्कम्। राजमाषः। उपोदिका। वास्तूकः। काकमाची। कुष्माण्डः। तुम्बी। मधुशिग्रुः। कन्दः। ताम्बूलम्। इक्षुः। वदरम्। रसालम्। इर्वारुकम्। पूगफलम्। रसोनम्। धान्याम्लम्। सौवीरम्। तुषोदकम्। दुग्धम्। गुड़ः। मस्तु। नारिकेलम्। पुनर्नवा। बार्हतम्। वैशवम्। सर्व्वाणि पत्रशाकानि। दुग्धाम्बु। गोमूत्रम्। स्तगनाभिः। क्षारम्। समस्तानि सराणि। द्राक्षा। अम्लम्। लवणरसः। गुर्व्वन्नम्। गुरुपानम्। सर्व्वे पूपाः॥*॥

अथार्शसि पथ्यम्।

विरेचनम्। लेपनम्। अग्निकर्म्म। शस्त्रकर्म्म। पुरातनलोहितशालयः। पुरातनषष्टिकाः। यवाः। कुलत्थाः। गोधाखड्गजोष्ट्रकूर्म्माविकलिङ्गाजखरौतुकीशूतरक्तुचासशृगालकाकानां मांसानि। स्वल्पमांसाः प्रसहाः। पटोलम्। पत्तूरः। रसोनकम्। वह्निः। पुनर्नवा। शूरणः। वास्तूकम्। जीवन्तिका। दन्तशठः। सुरा। क्षुटिः। वयःस्था। नवनीतम्। तक्रम्। कक्कोलम। धात्री। रुचकम्। कपित्थम्। औष्ट्रसूत्राज्यपयांसि। भल्लातकम्। सर्षपतैलम्। गोमूत्रम्। सौवीरम्। तुषोदकम्। वातापहान्नपानम्। अग्निवर्द्धकान्नपानम्॥*॥

अर्शसि अपथ्यं यथा।

व्यानूपमामिषम्। मत्स्यः। पिण्याकः। दधि। पिष्टकम्। माषः। करीरम्। निष्पावः। विल्वम्। तुम्बी। उपोदिका। पक्वान्नम। सर्व्वशालूकम्। विष्टम्भीनि। गुरूणि। आतपः। जलपानम्। वमनम्। वस्तिकर्म्म। नदीनां सलिलम्। विरुद्धानि सर्व्वाणि। पूर्व्वदिग्भववायुः। वेगरोधः। स्त्रियः। पृष्ठयानम्। उत्कटकासनम्। यथास्वं दोषलं द्रव्यम्। रक्तपित्तिनां यद्यत् पथ्यापथ्यं तत्तदपि रक्तार्शोरोगिणां विशेषतो विद्यात्॥*॥

अथाग्निमान्द्याजीर्णादौ पथ्यम्।

श्लैष्मिके पूर्व्वं वमनम्। पैत्तिके मृदुरेचनम्। वातिके स्नेहनम्। यथावस्थं हितवस्तूनि। नानाप्रकारव्यायामः। दीपनानि। लघूनि। बहुकालसमुत्पन्ना सुद्गलोहितशालयः। विलेपी। लाजमण्डः। सुद्गभवमण्डः। सुरा। एणः। वर्हीं। शशः। लावः। सर्व्वे क्षुद्रमत्स्याः। शालिशूकम्। वेत्राग्रम्। वास्तूकम्। बालमूलम्। लशुनम्। वृहत्कुष्माण्डम्। नवीनकदलीफलम्। शोभाञ्जनम्। पटोलम्। वार्त्ताकुः। नलदाम्बु। कर्कोटकम्। कारवेल्लम्। बार्हतम्। महार्द्रकम्। प्रसारणी। काकमाची। चाङ्गेरी। सुनिषण्णकम्। धात्रीफलम्। मातुलुङ्गम्। दाड़िमम्। यवः। पर्पटः। अम्लवेतसम्। जम्बीरम्। नागरङ्गम्। माक्षिकम्। नवनीतम्। घृतम्। तक्रम्। सौवीरकम्। तुषोदकम्। धान्याम्लम्। कटुतैलम्। रामठम्। लवणार्द्रकम्। यमानी। मरिचम्। मेथी। धान्यकम्। जीरकम्। दधि। ताम्बूलम्। तप्तसलिलम्। कटुरसः। तिक्तरसः॥*॥

अग्निमान्द्याजीर्णादौ अपथ्यं यथा।

विरेचनम्। विण्मूत्रवायूनां वेगधारणम्। अतिरिक्ताशनम्। अध्यशनम्। जागरणम्। दिवसाशनम्। रक्तसुतिः। श्रमीध्यानम्। मत्स्यः। मांसम्। उपोदिका। जलपानम्। पिष्टकम्।

आम्रवम्। सर्व्वशालूकम्। कूर्चिका। मोरटः। क्षीरम्। किलाटः। प्रधानकम्। तालास्थिशूस्यम्। बालतालम्। स्नेहनम्। दुष्टवारि। विरुद्धपानान्नम्। असात्म्यपानान्नम्। विष्टम्भीनि। गुरूणि।

फलवर्त्तिं वमिं स्वेदं लङ्घनं चापतर्पणम्।
विश्लेषादलसे कुर्य्याद्विसूच्यामतिसारवत्॥ * ॥

अथ क्रिमिरोगे पथ्यम्।

आस्थापनम्। कायविरेचनम्। शिरोविरेचनम्। धूमः। कफघ्नानि द्रव्याणि। शरीरमार्ज्जना। पुरातनवेणवरक्तशालयः। पटोलम्। वेत्राग्रम्। रसोनम्। वास्तूकम्। हुताशः। मन्दारदलम्। सर्षपः। नवीनमोचम्। हरीतकीफलम्। तिक्तानि नालीचदलानि। मौषिकमांसम्। विड़ङ्गम्। पिचुमर्दपल्लवम्। पथ्या। तिलतैलम्। सर्षपतैलम्। सौवीरम्। शुक्तम्। तुषोदकम्। मद्य। पत्तूरमितालम्। अरुष्करम्। गोमूत्रम्। ताम्बूलम्। सुरा। स्वर्गाङ्गजम्। औष्ट्रमूत्राद्यपर्य्यायाणि। रामठम्। क्षारः। अजमोदा। खदिरः। वत्सकम्। जम्बीरनीरम्। सुषवी। यमानिका। सुराङ्गा-गुरुसिंग्रपोद्भवक्षारः। तिक्तकटुकषायरसाः॥*॥

क्रिमिरोगे अपथ्यं यथा।

छर्द्दिः। तद्वेगविधारणम्। विरुद्धपानाशनम्। दिवानिद्रा। द्रवद्रव्यम्। पिष्टान्नम्। अजीर्णभोजनम्। घृतम्। माषः। दधि। पत्रशाकम्। मांसम्। पयः। अम्लः। मधुररसः॥ * ॥

अथ पाण्डुरोगे पथ्यम्।

छर्द्दिः। विरेचनम्। पुरातनयवगोधूमशालयः। सुद्गाढ़कौमसूराणां यूषः। जाङ्गलजरसः। पटोलम्। वृद्धकुष्माण्डम्। तरुणकदलीफलम्। जीवन्ती। चुरः। मत्स्याण्डी। गुड़ूची। तण्डुलीयकम्। पुनर्नवा। द्रोणपुष्पी। वार्त्ताकुः। लशुनद्वयम्। पक्वाम्रम्। अभया। बिम्बी। शिग्रुः मत्स्यः। गोमूत्रम्। धात्री। तक्रम्। घृतम्। तैलम्। सौवीरकम्। तुषोदकम्। नवनीतम्। गन्धसारः। हरिद्रा। नागकेशरम्। यवक्षारः। लौहभस्म। कषायद्रव्यम्। कुङ्कुमम्। चरणयोः सन्धौ नाभेर्हृदुल्लादः मस्तके हस्तयोर्हृत्लेखनकक्षयोर्मध्ये च दाहः। यथादोषमिदं पथ्यं पाण्डुरोगवतां भवेत्॥ * ॥

पाण्डुरोगे अपथ्यं यथा।

रक्तसुतिः। धूमपानम। वमिः। वेगधारणम्। स्वेदनम्। मैथुनम्। शिग्रुः। पत्रशाकानि। रामठम्। माषः। अम्बुपानम्। पिण्याकः। ताम्बूलम्। सर्षपः। सुरा। वृद्धचणम्। दिवास्वप्नः। तीक्ष्णानि। लवणानि। सिन्धुविन्ध्याद्रिजातनदीनां जलम्। सर्व्वाण्यम्लानि। दुष्टाम्भः। विरुद्धाशनानि। गुर्व्वन्नम्। विदाहीनि॥ * ॥

अथ रक्तपित्ते पथ्यम्।

अधोगमे छर्द्दनम्। ऊर्द्धनिर्गमे विरेचनम्। उभयत्र लङ्घनम्। पुरातनाः षष्टिकशालिकोद्रवप्रियङ्गुनीवारयवप्रशातिकाः। मुद्गः। मसूरः। चणकः। तुवरी। सुकुष्टकः। चिङ्गटः। वर्म्मिमत्स्यः। शशः। कपोतः। हरिणः। एणः। लावः। शरालिः। पारावतः। वर्त्तकः। वकः। उरभ्रः। कालपुच्छः। कपिञ्जलः। कषायवर्गः। गोदुग्धघृतम्। अजादुग्धघृतम्। महिषीघृतम्। पनसम्। पियालम्। रम्भाफलम्। कच्चटम्। तण्डुलीयः। पटोलम्। वेत्राग्रम्। महार्द्रकम्। पुराणकुष्माण्डफलम्। पक्वतालम्। तद्बीजजलम्। वासा। खादूनि। विल्वम्। दाड़िमम्। खर्ज्जूरम्। धात्री। मिषिः। नारिकेलम्। कपोरु। शृङ्गाटकम्। पौष्करम्। कपित्थम्। शालूकम्। परूषकम्। भूनिम्बशाकम्। पिचुमर्दपत्रम्। तुम्बी। कलिङ्गम्। लाजशक्तवः। द्राक्षा। सिता। माक्षिकम्। ऐक्षवम्। शीतोदकम्। औद्भिदवारि। सेकः। अवगाहः। घृतधौतसर्पिः। अभ्यङ्गः। शिशिरप्रदेहः। हिमानिलः। चन्दनम्। इन्दुपादाः। मनोज्ञकुलविचित्रकथा। धाराग्रहम्। सुशीतं भूमिगृहम्। वैदूर्य्यसुक्तामणीनां धारणम्। रम्भोत्पलाम्भोरुहपत्राणां शय्या। क्षौमाम्बरम्। सुशीतोपवनम्। प्रियङ्गुः। चन्दनरूषितानां वराङ्गनानामालिङ्गनम्। पद्माकरसरित्ह्रदचन्द्रोदयहिमवद्दरीसुशीतगिरिनिर्झराणामालिङ्गनम्। श्रुतिप्रशस्तकीर्त्तनम्। प्रवीणनीरम्। हिमवालुका॥ * ॥

रक्तपित्ते अपथ्यं यथा।

व्यायामः। अध्वनिषेवणम्। रविकरः। तीक्ष्णानि कर्म्माणि। क्षोभः। वेगधारणम्। चपलता। हस्त्यश्वयानानि। स्वेदः। असुतिः। धूमपानम्। सुरतः। क्रोधः। कुलत्थः। गुड़ः। वार्त्ताकुः। तिलः। माषः। सर्षपः। दधि। क्षारः। कौपपयः। ताम्बूलम्। नलदाम्बु। मद्यम्। लशुनम्। शिग्रुः। विरुद्धाशनम्। कटु। अम्लम्। लवणम्। विदाहिद्वयम्॥ * ॥

अथ राजयक्ष्मणि पथ्यम्।

घृतपक्वमरिचजीरकसंस्कृतलावतित्तिरिजरसः। दोषाधिकस्य बलिनोऽन्ये वृद्धशुद्धेः। गोधूमः। मुद्गः। चणकः। अरुणशालयः। छागानि मांसनवनीतपयोघृतानि। क्रव्याट्मांसम्। जाङ्गलजा रसाः। मार्जारखरखरिकरणपरिशोषितसुचूर्णितपक्वपललं लेह्यम्। रागाः। काम्बलिकः। षाड़वः। वेशवारः। शृङ्गाटकिरणः। मधुररसः। मोचपनसाम्राणां पक्वफलानि। धात्री। खर्ज्जूरम्। पौष्करम्। परूषकम्। नारिकेलम्। शीभाञ्जनम्। वकुलम्। नवतालशस्यम्। द्राक्षा। मिषिः। माणिमन्थम्। सिंहास्यपत्रम्। अजागोमहिषीघृतम्। छागाशयः। छागावस्करमूत्रलेपः। मत्स्यखण्डिका। शिखरिणी। मदिरा। रसाला। कर्पूरम्। वृगमदः। सितचन्दनम्। अभ्यञ्जनानि। सुरभीण्यनुलेपनानि। स्नानम्। वेशरचनम्। अवगाहनम्। हर्म्यम्। स्रजः। स्मरकथा। वृद्धगन्धवाहः। गीतानि। लास्यम्। चन्द्ररुचिः। विपञ्ची। वृगदृशां सन्दर्शनम्। हेमचूर्णम्। मुक्तामणिप्रचूरभूषणधारणम्। होमः। प्रदानम्। अमरपूजा। द्विजपूजा। वृद्धान्नपानम्॥ * ॥

राजयक्ष्मणि अपथ्यं यथा।

विरेचनम्। वेगधारणम्। श्रमः। स्त्री। खेदः। अञ्जनम्। प्रजागरः। साहसकर्म्मसेवा। रूक्षान्नपानम्। विषमाशनम्। ताम्बूलम्। कालिङ्गम्। कुलत्थम्। माषः। रसोनम्। वंशाङ्कुरः। रामठम्। अम्लम्। तिक्तम्। कषायः। सर्व्वकटु। पत्रशाकः। क्षारः। विरुद्धाशनम्। ग्रिम्बी। कर्कोटकम्। विदाहिद्वयम्। क्षाराकठिल्लकम्॥ * ॥

अथ कासे पथ्यम्।

स्वेदः। विरेचनम्। छर्द्दिः। धूमपानम्। समाशनम्। शालिः। षष्टिकः। गोधूमः। श्यामाकः। यवः। कोद्रवः। आत्मगुप्ता। माषसुद्गकुलत्थानां रसाः। आम्योदकम्। अनूपधन्वदेशभवविविधमांसानि। सुरा। पुरातनसर्पिः। छागदुग्धम्। छागघृतम्। वास्तूकम्। वायसीशाकम्। वार्त्ताकुः। बालमूलकम्। कण्टकारी। कासमर्द्दः। जीवन्ती। सुनिषण्णकम्। द्राक्षा। बिम्बी। मातुलुङ्गम्। पौष्करम्। वासकः। चुटिः। गोमूत्रम्। लशुनम्। पथ्या। शोधम्। उष्णोदकम्। मधु। लाजाः। दिवसनिद्रा। लघून्यन्नानि॥ * ॥

कासे अपथ्यं यथा।

वस्तिः। नस्यम्। अवष्टम्भोच्चः। व्यायामः। दन्तघर्षणम्। आतपः। दुष्टपवनः। रजः। मार्गनिषेवणम्। विदाहीनि। विदाहीनि। विविधरूक्षाणि। शुक्लब्रह्मोद्गारकासवमिवेगविधारणम्। मत्स्यः। कन्दः। सर्षपः। तुम्बी। उपोदिका। दुष्टाम्बु। दुष्टान्नपानम्। विरुद्धाशनम्। गुरुशीतान्नपानम्॥ * ॥

अथ श्वासे पथ्यम्।

विरेचनम्। स्वेदनम्। धूमपानम्। प्रच्छर्द्दनम्। दिवास्वपनम्। पुरातनाः षष्टिकरक्तशालिकुलत्थगोधूमयवाः। शशः। अहिसक्। तित्तिरिः। लावः। दत्तः। शुकादयः। धन्वन्टगाः। धन्वपक्षिणः। पुरातनसर्पिः। अजादुग्धघृतम्। सुरा। मधु। निदिग्धिका। वास्तूकम्। तण्डुलीयः। जीवन्तिका। मूलकपोतिका। पटोलम्। वार्त्ताकुः। रसोनम्। पथ्या। जम्बीरम्। बिम्बीफलम्। मातुलुङ्गम्। द्राक्षा। चुटिः। पौष्करम्। उष्णवारि। कटुत्रयम्। गोमूत्रम्। कफानिलघ्नान्यन्नपानभेषजानि। वक्षःप्रदेशात् पार्श्वयुग्मे करस्थयोर्मध्यमयोर्द्वयोः कण्ठकूपे च प्रदीप्तलौहेन दाहः॥ * ॥

श्वासे अपथ्यं यथा।

मूत्रोद्गारक्षुर्द्दृष्टकासानां रोधः। नस्यम्।

वस्तिः । दन्तकाष्ठम् । श्रमः । अध्वा । भारः । रेणुः । सूर्यकिरणः । विष्टम्भीनि । व्यायामः । विदाहीनि । आनूपमामिषम् । निष्पावः । शैम्बकारीणि । माषः । रक्तसावः । पूर्ववातान्नपानम् । मेषीघृतदुग्धम् । दुष्टजलम् । मत्स्यः । कन्दः । सर्षपः । रूक्षशीतगुर्वन्नपानम् ॥ * ॥

अथ हिक्कायां पथ्यम् ।

स्वेदनम् । वमनम् । नस्यम् । धूमपानम् । विरेचनम् । निद्रा । स्निग्धानि लघून्यन्नानि । लवणानि । जीर्णकुलत्थगोधूमयवालिषष्टिकयवाः । एणतित्तिरिलावाद्या जाङ्गला मृगपक्षिणः । पञ्चकपित्थम् । लशुनम् । पटोलम् । बालमूलकम् । पौष्करम् । कृष्णातुलसी । मदिरा । नलदाम्बु । उष्णोदकम् । मातुलुङ्गम् । माक्षिकम् । सुरभिजलम् । वातश्लेष्महराण्यन्नपानानि । शीताम्बुसेकः । सहसा त्रासः । विस्रापनम् । भयम् । क्रोधः । हर्षः । प्रियोद्वेगः । प्राणायामनिषेवणम् । दग्धस्निग्धमृदाघ्राणम् । मूर्ध्नि धाराजलार्पणम् । नाभ्यूर्ध्वपीडनम् । पायूर्ध्वं नाभेर्ह्यङ्गुलाद्ध्वं च दीपदग्धहरिद्रया दाहः ॥ * ॥

हिक्कायां अपथ्यं यथा ।

वातश्लेष्मोद्गारकासशूलक्षवेगधारणम् । रजः । अनिलः । आतपः । विरुद्धान्नम् । विष्टम्भीनि । विदाहीनि । रूक्षाणि । कफदानि । निष्पावः । पिष्टकः । माषः । पिण्याकः । आनूपमामिषम् । अविदुग्धम् । दन्तकाष्ठम् । वस्तिः । मत्स्यः । सर्षपम् । अम्लम् । तुम्बी । कन्दः । तैलशुष्कम् । उपोदिका । गुरुशीतान्नपानम् ॥ * ॥

अथ स्वरभेदे पथ्यम् ।

स्वेदः । वस्तिः । धूमपानम् । विरेकः । कवलग्रहः । नस्यम् । भालसिरावेधः । यवः । लोहितशालिः । हंसाटवी । ताम्रचूडकैकिनां मांसरसाः । सुरा । गोकण्टकः । काकमाची । जीवन्ती । बालमूलकम् । द्राक्षा । पथ्या । मातुलुङ्गम् । लशुनम् । लवणार्द्रकम् । ताम्बूलम् । मरिचम् । सर्पिः ॥ * ॥

स्वरभेदे अपथ्यम् ।

आमकपित्थम् । वकुलम् । शालूकम् । जाम्बवम् । तिन्दुकम् । कषायः । वमिः । स्वप्नः । प्रजल्पनम् । अनुपानम् ॥ * ॥

अथारोचके पथ्यम् ।

वस्तिः । विरेकः । यथाबलं वमनम् । धूमोपसेवा । कवड़ग्रहः । तिक्तकाष्ठेन दन्तधावनम् । चित्रान्नपानम् । गोधूमः । मुद्गाः । लोहितशालयः । यष्टिका । वराहच्छागशशैणानां मांसम् । चेङ्गः । भक्षाखण्डम् । मधुरालिका । इक्षिशूः । प्रोण्डी । खलेशूः । कवयी । रोहितः । कर्कारूः । वेत्राग्रम् । नवीनमूलकम् । वार्त्ताकुः । शोभाञ्जनम् । मोचम् । दाड़िमम् । भव्यम् । पटोलम् । रुचकम् । घृतम् । पयः । बालतालम् । रसोनम् । शूरणम् । द्राक्षा । रसालम् । नलदाम्बु । काञ्जिकम् । मद्यम् । रसाला ।

दधि । तक्रम् । आर्द्रकम् । कक्कोलम् । खर्ज्जूरम् । पियालम् । तिन्दुकम् । पक्वकपित्थम् । बदरम् । विकङ्कतम् । तालास्थिमज्जा । हिमवालुका । सिता । पथ्या । यमानी । मरिचम् । रामठम् । स्वाद्वम्लतिक्तानि । देहमार्जना ॥ * ॥

अरोचके अपथ्यम् ।

कासोद्गारक्षुधानिद्रावमीनां वेगधारणम् । अजीर्णान्नम् । अरुड्मोचः । क्रोधः । लोभः । भयम् । शोकः । दुर्गन्धः । सूर्यसेवा ॥ * ॥

अथ छर्द्दौ पथ्यम् ।

विरेचनम् । छर्द्दनम् । लङ्घनम् । स्नानम् । स्पृजा । लाजमण्डः । पुरातनाः षष्टिकशालिमुद्गाः । कलायः । गोधूमः । यवः । मधु । मृगाहिशक्तित्तिरिलावकाद्याः । जाङ्गलमृगपक्षिणः । मनोज्ञनानारसगन्धरूपा रसाः । साढ़वा यूषाः । रागाः । खड़ाः । काम्बलिकाः । सुरा । वेत्राग्रम् । कुसुम्भुरु । नारिकेलम् । पत्रैलिमानि जम्बीरधात्रीसहकारकोलद्राक्षाकपित्थानि । हरीतकी । दाड़िमम् । बीजपूरम् । जातीफलम् । बालकम् । निम्बम् । वासा । सिता । घृताक्ता । करिकेशूरम् । हितमनःप्रीतिकरभक्ष्याः । भुक्तस्य वक्त्रे शिशिराम्बुसेकः । कस्तूरिका । चन्दनम् । इन्दुकिरणः । मनोज्ञगन्धान्यनुलेपनानि । सुगन्धिपुष्पधारणफलानि । स्वमनोनुकूलरूपरसगन्धस्पर्शशब्दाः । नाभेरधस्तादुपरिहृदाहः ॥ *

छर्द्दौ अपथ्यम् ।

नस्यम् । वस्तिः । स्वेदनम् । स्नेहपानम् । रक्तस्रावः । दन्तकाष्ठम् । प्रवाहणम् । वीभत्सदर्शनम् । भीतिः । उद्वेगः । उष्णस्निग्धासात्म्याद्यवैरोधिकान्नम् । रम्भा । शिम्बी । कोशवती । मधूकम् । चिञ्चा । सूक्ष्मैला । सर्षपः । देवदाली । व्यायामः । क्षुत्क्षिका । अञ्जनम् ॥ * ॥

अथ तृष्णायां पथ्यम् ।

शोधनम् । वमनम् । निद्रा । स्नानम् । कवलधारणम् । दीपदग्धहरिद्रया जिह्वाग्रशिरयोर्दाहः । कोद्रवाः । शालयः । पेयाः । विलेपी । लाजशक्तवः । अम्लमद्यम् । धन्वरसः । शर्करा । रागः । साढ़वः । भक्ष्यसूक्ष्मलघुरुचिकरतरसः । रम्भापुष्पम् । तैलकूर्चम् । द्राक्षा । पर्पटपल्लवः । कपित्थम् । कोलम् । मल्लिका । कुष्माण्डकम् । उपोदिका । खर्ज्जूरम् । दाड़िमम् । धात्री । कर्कटी । नलदाम्बु । जम्बीरम् । करमर्द्दम् । बीजपूरम् । गवां पयः । मधूकपुष्पम् । क्षीवेरम् । तिक्तानि । मधुराणि । बालतालाम्बु । शीताम्बु । पयःपेटी । प्रपानकम् । माक्षिकम् । सरसीतोयम् । घृताक्ता । नागकेशरम् । एला । जातीफलम् । पथ्या । कुसुम्भुरु । टङ्कणम् । घनसारः । गन्धसारः । कौशुद्री । शिशिरानिलः । चन्दनार्द्रप्रियाश्लेषः । रत्नाभरणधारणम् । हिमानुलेपनम् ॥ * ॥

तृष्णायां अपथ्यम् ।

स्नेहः । अञ्जनम् । स्वेदः । धूमपानम् । व्यायामः । नस्यम् । आतपः । दन्तकाष्ठम् । गुर्वन्नम् ।

अम्लम् । लवणम् । कषायः । कटुः । स्त्रियः । दुष्टजलम् । तीक्ष्णम् ॥ * ॥

अथ मूर्च्छायां पथ्यम् ।

सेकः । अवगाहः । मणिः । हारः । शीताः । प्रदेहाः । व्यजनानिलः । शीतानि गन्धवन्ति पानानि । धाराग्रहम् । शीतमरीचिरोचिः । धूमः । अञ्जनम् । लावणम् । श्रमभोजः । दाहः । सूचीपरितोदनम् । लोम्नां कर्षणाच्च लुञ्चनम् । नखान्तपीड़ा । दग्धोपदंशः । नासासुखद्वारमरुन्निरोधः । विरेचनम् । छर्द्दनम् । लङ्घनम् । क्रोधः । भयम् । दुःखकरी कथा । विचित्रा मनोहराः कथाः । छाया । नभोऽम्भः । शीतघृतसर्पिः । स्पृदूनि । तिक्तानि । लाजमण्डः । जीर्णयवलोहितशालयः । कौम्भं हविः । मुद्गयूषः । सतीलयूषः । धन्वोद्भवा मांसरसाः । रागाः । साढ़वाः । गव्यपयः । सिता । पुराणकुष्माण्डम् । पटोलम् । मोचम् । हरीतकी । दाड़िमम् । नारिकेलम् । मधूकपुष्पम् । तक्षुलीयः । तुषोदकम् । लघून्यन्नानि । प्रनीरनीरम् । सितचन्दनम् । कर्पूरनीरम् । हिमवालुका । अलुप्तशब्दः । अद्भुतदर्शनम् । उत्कटगीतम् । उत्कटवाद्यम् । श्रमः । स्मृतिः । चिन्तनम् । आत्मबोधः । धैर्यम् ॥ * ॥

मूर्च्छायामपथ्यं यथा ।

ताम्बूलम् । पत्रशाकम् । व्यवायः । स्वेदनम् । कटुः । लङ्घनप्रयोर्वैगरोधः । तक्रम् ॥ * ॥

अथ मदात्यये पथ्यम् ।

संशोधनम् । संशमनम् । स्वपनम् । लङ्घनम् । श्रमः । सम्वत्सरसमुत्पन्नशालिषष्टिकयवमुद्गमाषगोधूमसतीलाः । रागः । साढ़वः । एणतित्तिरिलावाजदक्षवर्हिमृगानामामिषम् । वेशवारः । विचित्रान्नम् । क्षुदाभक्ष्यम् । पयः । सिता । तक्षुलीयः । पटोलम् । मातुलुङ्गम् । परूषकम् । खर्ज्जूरम् । दाड़िमम् । धात्री । नारिकेलम् । गोस्तनी । पुराणसर्पिः । कर्पूरम् । प्रनीरम् । शिशिरानिलः । धाराग्रहम् । चन्द्रपादाः । मणयः । मित्रसङ्गमः । क्षौमाम्बरम् । प्रियाश्लेषः । उद्गतगीतवादित्रम् । शीताम्बु । चन्दनम् । स्नानम् ॥ * ॥

मदात्यये अपथ्यं यथा ।

स्वेदः । अञ्जनम् । धूमपानम् । लावणम् । दन्तघर्षणम् । ताम्बूलम् ॥ * ॥

अथ दाहे पथ्यम् ।

शालयः । यष्टिकाः । मुद्गाः । मसूराः । चणकाः । यवाः । धन्वमांसरसाः । लाजमण्डः । लाजशक्तवः । सिता । घृतधौतघृतम् । दुग्धम् । पयोभवनवनीतम् । कुष्माण्डम् । कर्कटी । मोचम् । पनसम् । स्वादुदाड़िमम् । पटोलम् । पर्पटम् । द्राक्षा । धात्रीफलम् । परूषकम् । शिग्रुः । तुम्बी । पयःपेटी । खर्ज्जूरम् । धान्यकम् । मिसिः । बालतालम् । पियालम् । शृङ्गाटकम् । कशेरुकम् । मधूकपुष्पम् । क्षीवेरम् ।

पथ्या। सर्वाणि तिक्तानि। घृतानि। प्रदेहाः। भूवेश्म। सेकः। अभ्यङ्गः। अवगाहनम्। पद्मोत्पलदलक्षौमाणां शय्या। घृतलकाननम्। विचित्रा कथा। गीतानि। शिशिरः। मञ्जुभाषणम्। उशीरचन्दनालेपः। घृतानि। शिशिरानिलः। धारागृहम्। प्रियास्पर्शः। प्रनीरम्। हिमवालुका। सुधांशुरश्मयः। स्नानम्। मद्यम्। मधुररसः॥ * ॥

दाहे अपथ्यम्।

विरुद्धान्नपानानि। क्रोधः। वेगधारणम्। गजाश्वयानम्। अध्वा। क्षारम्। पित्तकराणि। व्यायामः। आतपः। तक्रम्। ताम्बूलम्। मधु। रामठम्। यवान्नम्। कटुः। तिक्तः। उष्णः॥ * ॥

अथोन्मादे भूतोन्मादे च पथ्यम्।

मरुद्भवे पूर्वं स्वेदः। पित्तोद्भवे पूर्वं विरेकः। कफोद्भवे पूर्वं वमनम्। ततःपरं वस्तिविधिः। नस्यम्। सन्तर्जनम्। ताडनम्। अञ्जनम्। आश्वासनम्। त्रासनम्। बन्धनम्। भयम्। हर्षणम्। दानम्। धूपः। दमः। विस्मरणम्। प्रदेहः। शिराव्यधः। संभ्रमनम्। सेकः। आश्चर्यकर्माणि। धूमपानम्। धीधैर्यम्। सत्वम्। आत्मनिवेदनम्। अभ्यञ्जनम्। स्नापनम्। आसनम्। निद्रा। सुशीतान्यनुलेपनानि। गोधूमः। मुद्गः। अरुणशालयः। धारोष्णदुग्धम्। घृतशीतसर्पिः। नवीनघृतम्। पुरातनघृतम्। कूष्माण्डमिश्रम्। धन्वरसः। रसालम्। पुराणकुष्माण्डफलम्। पटोलम्। ब्रह्मीदलम्। वास्तूकम्। तण्डुलीयः। खराश्वमूत्रम्। गगनाम्बु। पथ्या। सुवर्णचूर्णम्। नारिकेलम्। द्राक्षा। कपित्थम्। पनसम्॥ * ॥

उन्मादे अपथ्यम्।

मद्यम्। विरुद्धान्नम्। उष्णभोजनम्। निद्राक्षुत्तृष्णावेगधारणम्। व्यायामः। आषाढफलम्। कठिल्लकम्। पत्रशाकम्। तिक्तानि। विम्बी॥ * ॥

अथापस्मारे पथ्यम्।

वातोद्भवे पूर्वं वस्तिः। पैत्तिके विरेचनम्। श्लैष्मिके वमनम्। परं धूपनम्। अञ्जनम्। नस्यम्। शिराव्यधः। दानम्। त्रासनम्। बन्धनम्। भयम्। तर्जनम्। ताडनम्। हर्षः। धूमपानम्। विस्मयः। धीधैर्यम्। आत्मादिविज्ञानम्। स्नानम्। अभ्यञ्जनम्। लोहितशालयः। मुद्गाः। गोधूमाः। प्रतनं हविः। कूष्माण्डमिश्रम्। धन्वरसः। दुग्धम्। ब्रह्मीदलम्। वचा। पटोलम्। वृन्ताकुष्माण्डम्। वास्तूकम्। खादुदाडिमम्। शोभाञ्जनम्। पयःपेटी। द्राक्षा। धात्री। परूषकम्। तैलम्। खराश्वमूत्रम्। गगनाम्बु। हरीतकी॥ * ॥

अपस्मारे अपथ्यम्।

चिन्ता। शोकभयम्। क्रोधः। अशुचीन्यन्नानि। मद्यम्। मत्स्यः। विरुद्धान्नम्। तीक्ष्णोष्णगुरुभोजनम्। अतिव्यवायः। आयासः। पूज्यपूजायतिक्रमः। पत्रशाकानि। विम्बी। आषाढफलम्। दुष्टानिद्रात्वुधावेगाः॥ * ॥

अथ वातरोगे पथ्यम्।

अभ्यङ्गः। मर्दनम्। वस्तिः। स्नेहः। स्वेदः। अवगाहनम्। संवाहनम्। संभ्रमनम्। प्रावृतिः। वातवर्षनम्। अग्निकर्म। उपनाहः। भूशय्या। स्नानम्। आसनम्। तैलद्रोणी। शिरोवस्तिः। शयनम्। नस्यम्। आतपः। सन्तर्पणम्। दृंहणम्। किलाटः। दधि। कूर्चिका। सर्पिः। तैलम्। वसा। मज्जा। स्वाद्वम्लवणा रसाः। नवीनतिलगोधूममाषाः। सम्वत्सरोषितशालिषष्टिकाः। कुलत्थरसः। सुरा। ग्राम्या गोश्वतरोष्ट्ररासभच्छागलादयः। आनूपाः कोलमहिषवन्यङ्कखड्गिगजादयः। औदका हंसकादम्बचक्रमद्गुरकादयः। विलेशया भेकगोधानकुलश्वाविदादयः। जाङ्गलाः चटककुक्कुटवर्हितित्तिरयः। शिलिन्द्राः। पर्वतः। नक्रः। गर्गरः। कवयी। इल्लिशः। एरण्डः। चुलुकी। कूर्मः। शिशुमारः। तिमिङ्गिलः। रोहितः। मद्गुरः। शृङ्गी। वर्म्मी। खड्गीशः। एते भक्षाः। पटोलम्। शिग्रु। वार्ताकुः। लशुनम्। दाडिमद्वयम्। पक्वतालम्। रसालम्। नलदाम्बु। परूषकम्। जम्बीरम्। बदरम्। द्राक्षा। नागरङ्गम्। मधूकजम्। प्रसारणी। गोजुरकः। शुक्लाची। पारिभद्रकः। पर्यांसि। पयःपेटी। घृतं तैलम्। गवां जलम्। मत्स्यण्डिका। ताम्बूलम्। धान्याम्लम्। निम्बिडीफलम्। स्निग्धोष्णभोज्यानि। स्निग्धोष्णानुलेपनम्। आमाशयसुपागते विरेचनम्। पक्वाशयस्थे तथा मांसस्थे स्निग्धविरेचनम्। प्रत्याश्वानाश्वानसङ्गे वर्त्तिः लङ्घनं दीपनम्। अस्थीलास्थे गुल्मविधिः। शुक्रस्थे क्षयजित्क्रिया। त्वङ्मांसास्रक्सिराप्राप्ते रक्तमोक्षणम्॥ * ॥

वातरोगे अपथ्यम्।

चिन्ता। प्रजागरः। वेगधारणम्। क्षुत्। श्रमः। अनशनम्। चणकः। कलायः। नीवारकङ्गुयववेणवकोरदूषश्यामाकचूर्णम्। कुरुविन्दः। दग्धधान्यानि। राजमाषः। मुद्गः। तडागसरिदम्बु। करीरम्। जम्बु। कपीरु। तलकम्। क्रमुकम्। स्थालम्। निष्पावबीजम्। तालफलास्थिमज्जा। प्रालूकम्। तिन्दुकम्। कठिल्लकम्। बालतालम्। विम्बी। पत्रशाकम्। उडुम्बरम्। शीताम्बु। रासभपयः। विरुद्धमन्नम्। क्षारः। शुष्कपललम्। क्षतजसृतिः। क्षौद्रम्। कषायकटुतिक्तरसाः। व्यायामः। हस्त्यश्वयानम्। चंक्रमणम्। खड्गः। आध्मानिनोऽहितवतोऽपि विरेचात् स्नानम्। प्रदुष्टसलिलम्। दन्तघर्षणम्॥ * ॥

अथ वाते गुग्गुलुसेवनं पथ्यम्।

क्षीरम्। मांसरसाः। यूषाः। कलमादिशालयः। यवगोधूममाषाः॥ * ॥

गुग्गुलावपथ्यम्।

व्यायामः। आतपः। रूक्षम्। स्नानम्। बहुभाषणम्। प्रवातः। मैथुनम्। यानम्॥ * ॥

अथ वातरक्ते पथ्यम्।

उत्तानेऽभ्यञ्जनम् सेकः सोपनाहः प्रलेपनम्। गम्भीरे स्नेहपानं आस्थापनं विरेचनम्। सर्वत्र स्वचीजलौकश्रृङ्गालाबुभिरमसृतिः। घृतधौतघृताभ्यङ्गः। मेषीदुग्धावसेचनम्। यवः। षष्टिकः। नीवारः। कलमः। अरुणशालिः। गोधूमः। चणकः। मुद्गः। तुवरी। मुकुष्टकः। अजागहिषीगवां पयः। लावः। तित्तिरिः। सर्पद्विट्। ताम्रचूडादिः। एते विष्किराः। प्रस्तुदाः शुकदात्यूहकपोतचटकादयः। उपोदिका। काकमाची। वेत्राग्रम्। सुनिषण्णकम्। वास्तूकम्। कारवेल्लम्। तण्डुलीयः। प्रसारणी। पत्तूरः। वृन्ताकुष्माण्डम्। सर्पिः। सम्पाकपल्लवम्। पटोलम्। रुचतैलम्। वृद्धीका। श्वेतपुनर्नवा। नवनीतम्। सोमवल्ली। कस्तूरी। सितचन्दनम्। शिग्रुपारुषकदेवदारुसरलस्नेहमर्दनम। तिक्तम्॥ * ॥

वातरक्ते अपथ्यम्।

दिवास्वप्नः। अग्निसन्तापः। व्यायामः। आतपः। मैथुनम्। माषः। कुलत्थः। निष्पावः। कलायः। क्षारसेवनम्। अम्बुजाबूपमांसानि। विरुद्धानि। दध्नीनि। इक्षुः। मूलकम्। मद्यम्। पिण्याकम्। अम्लम्। काञ्जिकम्। कटु। उष्णम्। गुरु। अभिष्यन्दि। लवणम्। शुक्तवः॥ * ॥

अथोरक्षते पथ्यम्।

सर्वोरूक्षविधिः। स्वेदः। कोद्रवः। रक्तशालिः। यवः। कुलत्थः। श्यामाकः। पुरातनोद्दालाः। शोभाञ्जनम्। कारवेल्लम्। पटोलम्। लशुनम्। सुनिषण्णम्। काकमाची। वेत्राग्रम्। निम्बपल्लवम्। पत्तूरः। वास्तूकम्। पथ्या। वार्ताकुः। तप्तवारि। सम्पाकशाकम्। पिण्याकम्। तक्रम्। अरिष्टम्। मधु। कटुः। तिक्तः। कषायः। क्षीरसेवा। गवां जलम्। यथाशक्तिव्यायामः। स्थूलस्याक्रमणम्। अच्छस्वदे सन्तरणम्। नदीषु प्रतिस्रोतः सन्तरणम्। श्लेष्मापहरणम्। अमारुतकोपनम्॥ * ॥

ऊरुस्तम्भे अपथ्यम्।

गुरुशीतद्रवस्निग्धविरुद्धासात्म्यभोजनम्। विरेचनम्। स्नेहनम्। वमनम्। रक्तमोक्षणम्। वस्तिः॥ * ॥

अथामवाते पथ्यम्।

रूक्षस्वेदः। लङ्घनम्। स्नेहपानम्। वस्तिः। लेपः। रेचनम्। पायुवर्त्तिः। अम्लोत्पन्नशालिकुलत्थाः। जीर्णं मद्यम्। जाङ्गलानां रसः। वातश्लेष्मघ्नानि सर्वाणि। तक्रम्। वर्षाभूः। एरण्डतैलम्। रसोनम्। पटोलम्। पत्तूरकम्। कारवेल्लम्। वार्ताकुः। शिग्रु। तप्तनीरम्। मन्दारः। गोकण्टकः। वृद्धदारः। भल्लातकम्।

गोजलम्। आर्द्रकम्। कटूनि। तिक्तानि। दीपनानि॥ * ॥

आमवाते अपथ्यम्।

दधि:। मत्स्य:। गुड:। क्षीरम्। उपोदिका। माष:। पिष्टकम्। दुष्टनीरम्। पूर्ब्बवात:। विरुद्धाशनम्। असात्म्यम्। वेगरोध:। जागर:। विषमाशनम्॥ * ॥

अथ शूले पथ्यम्।

कृद्दि:। स्वेद:। लङ्घनम्। पायुवर्त्ति:। वस्ति:। निद्रा। रेचनम्। पाचनम्। अम्लोत्पन्ना: शाल्य:। वाट्यमण्ड:। तप्तक्षीरम्। जाङ्गलानां रस:। पटोलम्। शोभाञ्जनम्। कारवेल्लम्। वार्त्ताकु:। पक्वाम्रम्। द्राक्षा। कपित्थम्। रुचकम्। पियालम्। शालिषष्टिकानि। वास्तूकम्। सामुद्रम्। सौवर्चलम्। हिङ्गु। विश्वम्। विड्म्। शताह्वा। लशुनम्। लवङ्गम्। एरण्डतैलम्। सुरभीजलम्। तप्तास्तु। जम्बीररस:। कुष्ठम्। लघनि। क्षाररजांसि॥ * ॥

शूले अपथ्यम्।

विरुद्धान्नपानम्। जागर:। विषमाशनम्। रूक्षतिक्तकषायाणि। शीतलानि। गुरूणि। व्यायाम:। मैथुनम्। मद्यम्। वैदलम्। लवणम्। कटु। वेगरोध:। शोक:। क्रोध:॥ * ॥

अधोदावर्त्तनाह्योः पथ्यम्।

नारिकेलपुष्पमिश्रितशीतलोदकपानम्। स्नेहस्वेद:। विरेक:। वस्ति:। फलवर्त्ति:। अभ्यङ्ग:। यव:। स्वस्विण्मूत्रमारुत:। आम्बोदकम्। आनूपरस:। रुचितैलम्। वारुणी। बालमूलकम्। सम्याक:। चिरुत्। तिल:। सुधादलम्। शृङ्गवेरम्। मातुलुङ्गम्। यवक्षार:। हरीतकी। लवङ्गम्। रामठम्। द्राक्षा। गोमूत्रम्। लवणानि। अधोवातसमुत्थे तु। स्नेह:। स्वेद:। वर्त्ति:। वस्ति:। समीरणहरान्नपानम्। तथा पुरीषजे। वस्ति:। स्वेद:। अभ्यङ्ग:। अवगाहनम्। फलवर्त्ति:। विड्भेद्यशमनपानम्। मूत्रवेगसमुत्पन्ने। त्रिविधं वस्तिकर्म्म। स्वेद:। अभ्यङ्ग:। अवगाह:। सर्पिषावपीडनम्। उद्गारोत्थे हिक्काप्रविधि:। कासजे कासजिद्विधि:। क्षवजे। स्वेदनम्। धूम:। औत्तरभक्तिकहृतम्। क्षवप्रवर्त्तननस्यम्। ऊर्द्धजत्रुकाभ्यङ्ग:। क्षयोत्थे शीतान्नपानम्। हृभोत्थे वातजित्क्रिया। निद्रावेगोत्थिते क्षीरम्। स्वप्नसंवाहनम्। वुभुक्षोत्थे स्निग्धाल्पोष्णलघुभोजनम्। वासजे वासस्मोक्ष:। स्वप्न:। मद्यम्। प्रियकथा। श्रमश्वाससमुत्पन्ने विश्राम:। वातहारिद्रयम्। शुक्रोत्थे वस्ति:। अभ्यङ्ग:। अवगाह:। चरणायुध:। शालि:। मदिरा। क्षीरम्। यौवनगर्व्वितप्रिया। कृद्भुत्थे लङ्घनम्। धूम:। मुक्ता प्रच्छर्द्दनम्। श्रम:। रूक्षान्नपानम्। विरेक:। रक्तमोक्षणम्॥ * ॥

उदावर्त्तनाह्योरपथ्यम्।

वमनम्। वेगरोध:। शमीधान्यम्। कोद्रव:। गालीचशाकम्। शालूकम्। जाम्बवम्। कर्कटीफलम्। पिण्याकम्। सर्व्वमालुकम्। करीर:। पिष्टवैकृतम्। विष्टम्भीनि। विरुद्धानि। कषायाणि। गुरूणि॥ * ॥

अथ गुल्मे पथ्यम्।

स्नेहस्वेद:। विरेक:। वस्ति:। वाहुसिराव्यध:। लङ्घनम्। वर्त्ति:। अभ्यङ्ग:। स्नेह:। पक्वे तु पाटनम्। सम्वत्सरसमुत्पन्नकलायरक्तशालय:। खड:। कुलत्थयूष:। धन्वमांसरस:। सुरा। गवाजयो: पय:। मृद्वीका। परूषकम्। खर्ज्जूरम्। दाडिमम्। धात्री। नागरङ्गम्। अम्लवेतसम्। तक्रम्। एरण्डतैलम्। लशुनम्। बालमूलकम्। पत्तूर:। वास्तूकम्। शिग्रु। यवक्षार:। हरीतकी। रामठम्। मातुलुङ्गम्। चूषणम्। सुरभीजलम्। स्निग्धोष्णाट्टहगलघुदीपनान्नानि। वातानुलोमनम्॥ * ॥

गुल्मे अपथ्यम्।

सर्व्वं वातकारि। विरुद्धाशनम्। वल्लूरम्। मूलकम्। मत्स्य:। मधुरफलम्। शुष्कशाकम्। शमीधान्यम्। विष्टम्भीनि। गुरूणि। अधोवातशुक्रमूत्रश्रमश्वासाश्रुधारणम्। वमनम्। जलपानम्॥ * ॥

अथ हृद्रोगे पथ्यम्।

स्वेद:। विरेक:। वमनम्। लङ्घनम्। वस्ति:। विलेपी। पुरातनरक्तशालय:। जाङ्गलजन्तुपक्षियूषा:। सुद्गकुलत्थरसा:। रागा:। खड:। काम्बलिका:। षाड्वा:। भक्ष्यम्। पटोलम्। कदलीफलम्। पुराणकुष्माण्डम्। रसालम्। दाडिमम्। सम्याकशाकम्। नवमूलकम्। एरण्डतैलम्। गगनाम्बु। सैन्धवम्। द्राक्षा। तक्रम्। पुरातनगुड:। शुण्ठी। यमानी। लशुनम्। हरीतकी। कुष्ठम्। कुस्तुम्बुरु। क्षणम्। आर्द्रकम्। सौवीरम्। शुक्तम्। मधु। वारुणीरस:। कस्तूरिका। चन्दनम्। प्रपानकम्। ताम्बूलम्॥ * ॥

हृद्रोगे अपथ्यम्।

लट्कृर्द्दिमूत्रानिलशुक्रकासोद्गारश्रमश्वासविड्भेदानां वेगधारणम्। सह्याद्रिविन्ध्यादिनदीनां जलम्। मेघोदय:। दुष्टजलम्। कषाय:। विरुद्धम्। उष्णम्। गुरु। तिक्त:। अम्ल:। चिरन्तनपचोत्थशाकानि। क्षार:। मधूकम्। दन्तकाष्ठम्। रक्तसुति:॥ * ॥

अथ मूत्रकृच्छ्रे पथ्यम्।

वातोद्भवे अभ्यङ्ग:। निरूह:। वस्ति:। स्नेह:। अवगाह:। उत्तरवस्ति:। सेक:। पैत्ते अवगाह:। शिशिरप्रदेह:। श्लेष्मो विधि:। वस्तिविधि:। विरेक:। श्लेष्मोद्भवे स्वेद:। विरेक:। वस्ति:। क्षार:। यवान्नम्। तीक्ष्णम्। उष्णम्। त्रिदोषजे अभ्यङ्गपुर:सराणि त्रिमलोदितानि सर्व्वाण्यमूनि। यथा यथा दोषमयं गण:। पुरातनलोहितशालि:। गोभवतक्रपयोदधीनि। धन्वामिषम्। सुद्गरस:। सिता। पुराणकुष्माण्डफलम्। पटोलम्। महार्द्रकम्। गोक्षुरक:। कुमारी। गुवाकखर्ज्जूरनारिकेलतालद्रुमाणां शिरांसि। पथ्या। तालास्थिमज्जा। चणुषम्। चुटि:। शीतपानम्। शीताशनम्। शनीरनीरम्। हिमवालुका॥ * ॥

मूत्रकृच्छ्रे अपथ्यम्।

मद्यम्। श्रम:। निधुवनम्। गजवाजियानम्। सर्व्वं विरुद्धाशनम्। विषमाशनम्। ताम्बूलम्। मत्स्य:। लवणम्। आर्द्रकम्। तैलभृष्टम्। पिण्याकम्। हिङ्गु। तिल:। सर्षप:। वेगरोध:। माष:। करीर:। अतितीक्ष्णम्। विदाहि। रूक्षम्। अम्ल:॥ * ॥

अथ मूत्राघाते पथ्यम्।

अभ्यङ्गनम्। स्नेह:। विरेक:। वस्ति:। स्वेद:। अवगाह:। उत्तरवस्ति:। पुरातनलोहितशालि:। धन्वभवमांसम्। मद्यम्। तक्रम्। पय:। दधि। माषयूष:। पुराणकुष्माण्डफलम्। पटोलम्। महार्द्रकम्। तालफलास्थिमज्जा। हरीतकी। कोमलनारिकेलम्। गुवाकखर्ज्जूरनारिकेलतालद्रुमाणां मस्तकानि॥ * ॥

मूत्राघाते अपथ्यम्।

सर्व्वाणि विरुद्धानि। व्यायाम:। मार्ग:। शीतलम्। रूक्षम्। विदाहि। विष्टम्भि। अवाय:। वेगधारणम्। करीरम्। वमनम्॥ * ॥

अधाश्मर्य्यां पथ्यम्।

वस्ति:। विरेक:। वमनम्। लङ्घनम्। स्वेद:। अवगाह:। वारिसेचनम्। यवा:। कुलत्था:। प्रपुराणशालय:। मद्यम्। धन्वाण्डजसम्भवरस:। पुराणकुष्माण्डफलम्। कर्कारुकम्। गोकण्टक:। वारुणशाकम्। आर्द्रकम्। पाषाणभेदी। यवशूक:। रेणु:। छिन्ना। अश्मनां समाकर्षणम्॥

अश्मर्य्यां अपथ्यम्।

मूत्रस्य शुक्रस्य च वेगधारणम्। अम्ल:। विष्टम्भि। रूक्षम्। गुर्व्वन्नपानम्। विरुद्धपानाशनम्॥ * ॥

अथ प्रमेहे पथ्यम्।

पूर्व्वं लङ्घनम्। वमनम्। विरेचनम्। प्रोद्वर्त्तनम्। शमनम्। दीपनम्। नीवार:। कङ्गु:। यव:। वेणव:। कोरदूष:। श्यामाक:। चूर्ण:। कुरुविन्द:। सुकुरुक:। गोधूम:। शालि:। कलम:। पुरातनकुलत्थ:। सुद्गाढ़कीचणकयूषरसा:। तिला:। लाजा:। पुरातनसुरा। मधु। वाट्यमण्ड:। तक्रम्। रासभजलम्। महिषीजलम्। कङ्क:। जाङ्गला: कपोतशशतित्तिरिलाववर्हिभृङ्गैणवर्त्मकशुकादय:। शोभाञ्जनम्। कुलकम्। कटिल्लकम्। कर्कोटकम्। तलकम्। वार्हतम्। औड्डरम्। लशुनम्। नवीनमोचम्। पत्तूरम्। गोक्षुरकम्। मूषिकपर्णिशाकम्। मन्दारपत्रम्। अग्नटता। त्रिफला। कपित्थम्। जम्बू:। कशेरु। कमलोत्पलकन्दबीजम्। खर्ज्जूरलाङ्गलिकतालतरूणां मस्तकम्। शोधम्। तिन्दुकफलम्। खदिर:। कलिङ्ग:।

पथ्याप

तिक्तः। कषायः। हस्त्यश्ववाहनम्। अतिभ्रमणम्। रविकिरणः। व्यायामः॥ * ॥

प्रमेहे अपथ्यम्।

मूत्रवेगः। धूमपानम्। स्वेदः। रक्तमोक्षणम्। सदासन्नम्। दिवानिद्रा। नवान्नम्। दधि। आनूपमांसम्। निष्पावम्। पिष्टान्नम्। मैथुनम्। सौवीरकम्। सुरा। शुक्तम्। तैलम्। क्षीरम्। घृतम्। गुड़ः। तुम्बी। तालास्थिमज्जा। विरुद्धाशनम्। कुष्माण्डम्। इक्षुः। दुरम्भु। स्वादु। अम्लः। लवणम्। अभिष्यन्दि॥ * ॥

अथ मेदसि पथ्यम्।

चिन्ता। श्रमः। जागरणम्। व्यायः। प्रोद्वर्त्तनम्। लङ्घनम्। आतपः। हस्त्यश्वयानम्। भ्रमणम्। विरेकः। प्रच्छर्दनम्। अपतर्पणम्। पुरातना वैणवकोरदूषश्यामाकनीवारप्रियङ्गुजूर्णाः। यवः। कुलत्थः। चणकः। मसूरः। मुद्गः। तुवरी। मधु। लाजाः। कटुतिक्तकषायाणि। तक्रम्। सुरा। त्रिफलाटमतस्याः। दग्धवार्त्ताकुः। फलत्रयम्। यवासकम्। शिरीषलोध्रहरीतकीनां चूर्णेन गात्रविलेपनम्। कटुत्रयम्। सर्षपतैलम्। एला। सर्वाणि रूक्षाणि। मुस्तैलम्। पत्रशाकः। अगुरुलेपनम्। प्रतप्तनीराणि। शिलाजतूनि। भोजनात् प्राक् वारिपानम्॥ * ॥

मेदसि अपथ्यम्।

स्नानम्। रसायनम्। शालिः। गोधूमः। सुखशीलता। क्षीरम्। इक्षुविकृतिः। माषः। सौहित्यम्। स्वेदनानि। मत्स्यः। मांसम्। दिवानिद्रा। सक्। गन्धः। मधुराणि। समग्रभोजनस्य पश्चात् जलपानम्। अतिमात्रोपचिते विशेषाद्वमनक्रिया॥ * ॥

अथोदररोगे पथ्यम्।

विरेचनम्। लङ्घनम्। अब्दसम्भवकुलत्थसुद्गारुणशालियवाः। जाङ्गलमृगपक्षिणः। सिता। सुरा। माक्षिकम्। सीधुः। माध्वीकम्। षाड़वः। तक्रम्। रसोनम्। रुचितैलम्। आर्द्रकम्। शालिशाकम्। कुलकम्। कठिल्लकम्। पुनर्नवा। शिग्रुफलम्। हरीतकी। ताम्बूलम्। एला। यवशूकम्। व्यायसम्। अजागवोष्ट्रीमहिषीणां पयः मूत्रञ्च। लघूनि। तिक्तानि। दीपनानि। वस्त्रेण सर्वेष्टनम्। अग्निकर्म्म। विषप्रयोगः। विशेषतः श्लीहसमुद्भवे वामे व्यग्रवाहौ धमनीव्यधः। वह्वाश्रये उदकजे चतोत्थिते नाभेरधः यथाविधिशस्त्रविधिः। समीरणोत्थे आदितः घृतपानम्। अभ्यञ्जनम्। अनुवासनम्॥ * ॥

उदररोगे अपथ्यम्।

स्नेहनम्। धूमपानम्। जलपानम्। सिराव्यधः। छर्द्दिः। यानम्। दिवानिद्रा। व्यायामः। पिष्टवैकृतम्। औदकानूपमांसम्। पत्रशाकम्। तिलः। उष्णानि। विदाह्यन्नानि। लवणाशनम्। शमीधान्यम्। विरुद्धान्नम्। दुष्टनीरम्। गुरूणि। महेन्द्रगिरिजातानां नदीनां जलम्। विष्टम्भीनि। छिद्रसमुद्भवे विशेषतः स्वेदः॥ * ॥

अथ श्लीपे पथ्यम्।

संशोधनम्। लङ्घनम्। रक्तमोक्षः। स्वेदः। प्रलेपः। परिषेचनम्। पुरातनशालियवकुलत्थसुद्गाः। गोधा। शल्लकः। भुजङ्गशुक्तित्तिरिताम्रचूड़लावादयो जाङ्गलविष्किराः। कूर्म्मः। रुद्धी। प्रपुराणसर्पिः। तक्रम्। सुरा। माक्षिकम्। आसवः। निष्पावः। कठिल्लकम्। रक्तशिग्रु। रसोनम्। कर्कोटकम्। मानमूलम्। सुवर्चला। शल्लकः। पटोलम्। वेत्राग्रम्। वाड़िङ्गनम्। मूलकम्। पुनर्नवा। चित्रकम्। पारिभद्रः। श्रीपर्णम्। निम्बः। सुरपल्लवम्। एरण्डतैलम्। कटुका। हरिद्रा। हरीतकी। चारनिषेवणम्। भल्लातकम्। गुग्गुलुः। आयसम्। कटूनि। तिक्तानि। दीपनानि। गोऽजामहिषीभवमूत्राणि। कस्तूरिका। शिलाजतु। पाण्डुरोगोक्तवद्विकर्म्म॥ * ॥

श्लीपे अपथ्यम्।

पवनसलिलम्। वेगरोधः। विरुद्धपानाशनम्। विषमाशनम्। स्वप्नचणम्। ग्राम्याजानूपपिशितलवणे। शुष्कशाकम्। नवान्नम्। गौड़म्। पिष्टान्नम्। दधि। क्षीरम्। विच्चलम्। मद्यम्। अम्लम्। धानाः। वल्लूरम्। गुरु। असात्म्यम्। विदाहि। अरात्रौ स्वप्नः। मैथुनम्॥ * ॥

अथ वृद्धिव्रध्नाधिकारे पथ्यम्।

संशोधनम्। वस्तिः। अरक्तमोक्षः। स्वेदः। प्रलेपः। अरुणशालयः। एरण्डतैलम्। सुरभीजलम्। धन्वामिषम्। शिग्रुफलम्। पटोलम्। पुनर्नवा। गोक्षुरः। अग्निमन्थः। ताम्बूलम्। पथ्या। सरला। रसोनम्। वाड़िङ्गनम्। शल्लकम्। मधूनि। कौम्भं घृतम्। तप्तजलम्। तक्रम्। आमवातापहमग्निकारि चान्नपानम्। पुराणसुरा। अर्द्धेन्दुवर्द्धनयोर्द्दाहः। आमाग्नये वाहुशिराव्यधः॥ * ॥

व्रध्नवृद्धावपथ्यम्।

विरुद्धपानान्नम्। असात्म्यसेवा। संक्षोभणम्। हस्तिहयादियानम्। आनूपमांसानि। दधीनि। माषाः। दुग्धानि। पिष्टान्नम्। उपोदिका। गुरूणि। शुक्रोत्थितवेगरोधः॥ * ॥

अथ गलगण्डादौ पथ्यम्।

छर्द्दिः। विरेचनम्। नस्यम्। स्वेदः। धूमः। शिराव्यधः। अग्निकर्म्म। क्षारयोगः। प्रलेपः। लङ्घनम्। पुराणघृतपानम्। जीर्णलोहितशालयः। यवाः। मुद्गाः। पटोलम्। रक्तशिग्रु। कठिल्लकम्। शालिशाकम्। वेत्राग्रम्। रूक्षाणि। कटूनि। सर्वाणि दीपनानि। गुग्गुलुः। शिलाजतु। विशेषतः जिह्वातलस्थसिराव्यधच्छेदः। मणिबन्धोर्द्ध अङ्गुलान्तरास्त्रिस्रो रेखाः कार्य्याः। गलगण्डगण्डमालापचीग्रन्थ्यर्ब्बुदातुरे यथादोषं यथावस्थं एतत् सर्व्वं पथ्यम्॥ * ॥

पथ्याप

गलगण्डे अपथ्यम्।

सर्व्वक्षीरेक्षुविकृतिः। आनूपमांसम्। पिष्टान्नम्। अम्लम्। मधुरम्। गुरुद्रव्यम्। अभिष्यन्दिद्रव्यम्॥ * ॥

अथ श्लीपदे पथ्यम्।

प्रच्छर्द्दनम्। लङ्घनम्। अरक्तमोक्षः। स्वेदः। विरेकः। परिलेपनम्। पुरातनयष्टिकशालयः। यवाः। कुलत्थाः। लशुनम्। पटोलम्। वार्त्ताकुः। शोभाञ्जनम्। कारवेल्लम्। पुनर्नवा। मूलकम्। पूतिका। एरण्डतैलम्। सुरभीजलम्। कटूनि। तिक्तानि। दीपनानि। वातोल्वणे गुल्मोपरिष्टात् चतुरङ्गुले सिराव्यधः। पैत्तिके गुल्मफलके शिराव्यधः। कफजे अङ्गुष्ठमूले सिराव्यधः॥ * ॥

श्लीपदे अपथ्यम्।

पिष्टान्नम्। दुग्धविकृतम्। गुड़ः। आनूपमामिषम्। स्वादुरसः। पारिपात्रसह्यविन्ध्यनदीजलम्। पिच्छिलम्। गुरुद्रव्यम्। अभिष्यन्दिद्रव्यम्॥ * ॥

अथ विद्रधौ पथ्यम्।

आमावस्थे रेचनलेपस्वेदासमोक्षणानि। जीर्णश्यामाककलमौ। कुलत्थः। लशुनम्। रक्तशिग्रु। निष्पावः। कारवेल्लः। पुनर्नवा। श्रीपर्णी। चित्रकम्। क्षौद्रम्। स्रोतोक्तानि सर्व्वाणि। पक्वावस्थे शस्त्रकर्म्म। पुराणरक्तशालिः। घृतम्। तैलम्। सुद्गरसः। विलेपी। धन्वजरसाः। शालिशाकम्। कदलम्। पटोलम्। हिमवालुका। चन्दनम्। तप्ताम्बु। शीताम्बु। व्रणोदितं सर्व्वम्॥ * ॥

विद्रधावपथ्यम्।

आमावस्थे स्रोतोक्तान्यपथ्यानि। पक्वावस्थे व्रणोक्तान्यपथ्यानि॥ * ॥

अथ व्रणस्रोतोव्रणसन्धीव्रणनाड़ीव्रणेषु पथ्यम्।

विस्रापनम्। रक्तसक्तिः। उपनाहः। विपाटनम्। स्रोधनम्। रोपणम्। पुराणसितशालयः। यवः। षष्टिकः। गोधूमः। जाङ्गलमृगपक्षिणः। विलेपी। लाजसक्तुः। कटुतैलम्। घृतम्। मधु। तैलम्। मसूरम्। तुवरी। मुद्गयूषः। शर्करा। आषाढ़फलम्। वार्त्ताकुः। कर्कोटकम्। पटोलम्। कारवेल्लम्। निम्बपत्रम्। वेत्राग्रम्। बालमूलकम्। मुनिवस्तकम्। शालिशाकम्। तण्डुलीयः। वास्तूकम्। त्रिफला। पनसम्। चोचम्। दाड़िमम्। कटुकाफलम्। जीवन्ती। सैन्धवम्। द्राक्षा। स्वादुतिक्तकषायाः। स्निग्धोष्णद्रवोत्तरान्नम्। व्यायामः। भ्रमणम्। दाहः। स्वेदनम्। बन्धनक्रिया। व्रणावचूर्णनम्। लेपः। धूपनम्। पत्रधारणम्। उष्णीरम्। बालव्यजनम्। चन्दनम्। तिललेपनम्। तप्तशीताम्बु। कर्पूरम्। पक्वतः परा वैकृताः॥ * ॥

व्रणस्रोतोव्रणसन्धीव्रणनाड़ीव्रणेषु अपथ्यम्।

नवधान्यम्। तिलः। कलायः। माषः। कुलत्थः।

क्षवरः। हिमाम्भः। विविधक्षीरेक्षुविकारः। अन्नानि। पत्रशाकम्। अजाङ्गलमांसम्। अमाक्षामान्नम्। विदाहि। विष्टम्भि। गुरूणि। कटु। अम्लम्। घृतम्। लवणम्। यवागूः। व्यायामः। उच्चैः परिभाषणम्। प्रियाममालोकनम्। अह्नि निद्रा। प्रजागरम्। नितान्तचंक्रमणम्। यथास्थितं प्रागधिरोपणम्। नस्यम्। ताम्बूलम्। अजीर्णता। प्रचण्डवातः। आतपः। धूमः। वृष्टिः। रजः। भयम्। क्रोधः। वमिः। प्रहर्षः। शोकः। विरुद्धाशनम्। अम्बुपानम्। तीक्ष्णम्। उष्णम्। रूक्षम्। विघट्टनम्। कण्डूयनम्। काष्ठनखादितोदः। निरन्नभावः। विषमोपचारः॥ * ॥

अथ भग्ने पथ्यम्।

घृताभ्यङ्गः। चन्दनम्। पङ्कप्रदेहः। बन्धनक्रिया। शालिः। प्रियङ्गुः। गोधूमः। मुद्गसतीलयोर्यूषः। नवनीतम्। घृतम्। क्षीरम्। तैलम्। मांसरसः। मधु। पटोलम्। लशुनम्। शिग्रु। पत्तूरम्। बालमूलकम्। द्राक्षा। धात्री। वत्सकवल्ली। लाक्षा। इंहणम्॥ * ॥

भग्ने अपथ्यम्।

लवणम्। कटुकम्। क्षारः। अम्लः। मैथुनम्। आतपः। व्यायामः। रूक्षान्नम्॥ * ॥

अथ भगन्दरे पथ्यम्।

आमे संशोधनम्। लेपः। लङ्घनम्। रक्तमोक्षणम्। पक्वे यथाविधिशस्त्रक्षारकर्म्माणि। सर्षपः। शालिः। मुद्गः। विलेपी। जाङ्गलरसः। पटोलम्। शिग्रु। वेत्राग्रम्। पत्तूरम्। बालमूलकम्। तिलसर्षपयोस्तैलम्। तिक्तवर्गः। घृतम्। मधु॥ * ॥

भगन्दरे अपथ्यम्।

विरुद्धान्यन्नपानानि। विषमाशनम्। आतपः। व्यायामः। मैथुनम्। युद्धम्। पृष्ठयानम्। गुरूणि। रूढव्रणोऽपि नरः संवत्सरं एतत् सर्व्वं परिहरेत्॥ * ॥

अथोपदंशे पथ्यम्।

छर्द्दिः। विरेकः। ध्वजमथनाड़ीवेधः। जलौका। परिषातनम्। सेकः। प्रलेपः। यवः। शालयः। धन्वामिषम्। मुद्गरसः। घृतम्। कठिल्लकम्। शिग्रुफलम्। पटोलम्। शालिशाकम्। नवमूलकम्। तिक्तम्। कषायम्। मधु। कूपवारि। तैलम्॥ * ॥

उपदंशे अपथ्यम्।

दिवानिद्रा। मूत्रवेगः। गुर्व्वन्नम्। मैथुनम्। गुड़ः। व्यायासः। अम्लम्। तक्रम्॥ * ॥

अथ शूकदोषे पथ्यम्।

लेपः। विरेकः। अस्रमोक्षः। सर्पिःपानम्। शालिः। यवः। जाङ्गलमांसम्। मुद्गयूषः। कठिल्लकम। पटोलम्। शिग्रु। कर्कोटम्। पत्तूरम्। बालमूलकम्। वेत्राग्रम्। आषाढ़फलम। दाड़िमम्। सैन्धवम्। वचा। कूपोदकम्। गन्धसारः। कस्तूरी। हिमवालुका। तक्रम्। कषायम्। तैलम्॥ * ॥

शूकदोषे अपथ्यम्।

मूत्रवेगः। दिवानिद्रा। व्यायामः। मैथुनम्। गुड़ः। विदाहि। गुरुद्रव्यम्। तक्रम्॥ * ॥

अथ कुष्ठरोगे पथ्यम्।

पश्चात् पश्चात् छर्द्दनम्। मासात् मासाद्विरेचनम्। त्र्याहात् त्र्याहात् नस्यम्। षष्ठे षष्ठे मासि अस्रमोक्षणम्। सर्पिर्लेपः। पुराणाः यवगोधूमशालिमुद्गाढ़कीमसूराः। माक्षिकम्। जाङ्गलामिषम्। आषाढ़फलम्। वेत्राग्रम्। पटोलम्। दृहतीफलम्। काकमाची। निम्बपत्रम्। लशुनम्। हिलमोचिका। पुनर्नवा। मेषशृङ्गम्। चक्रमर्द्दलम्। भल्लातकम्। पक्वतालम्। खदिरः। चित्रकः। वरा। जातीफलम्। नागपुष्पम्। कुङ्कुमम्। प्रतनहविः। कोषातकी। करञ्जोमातिलसर्षपनिम्बेङ्गुदीभवतैलम्। लघूनि अन्नानि। सरलदेवाक्षशिंशपागुरुसम्भवस्नेहः। गोखरोष्ट्राश्वमहिषीणां मूत्राणि। कस्तूरिका। गन्धसारः। तिक्तानि। क्षारकर्म्म॥ * ॥

कुष्ठरोगे अपथ्यम्।

पापकर्म्म। कृतघ्नभावः। गुरुनिन्दा। गुरुधर्षणम्। विरुद्धपानाशनम्। दिवानिद्रा। चण्डांशुतापः। विषमाशनम्। स्वेदः। रतम्। वेगरोधः। इक्षुः। व्यायामः। अम्लम्। तिलः। माषः। द्रवगुरुनवान्नानां भोजनम्। विदाहि। विष्टम्भि। मूलकम्। सह्याद्रिविन्ध्याद्रिसमुद्भवनदीजलम्। आनूपमांसम्। दधि। दुग्धम्। मद्यम्। गुड़ः॥ * ॥

अथ घृतपित्तोदर्दकोठरोगेषु पथ्यम्।

छर्द्दिः। विरेचनम्। लेपः। अस्रमोक्षः। पुराणशालिः। जाङ्गलामिषमुद्गकुलत्थानां यूषः। कर्कोटकम्। कारवेल्लम्। शिग्रु। मूलकपोतिका। शालिशाकम्। वेत्राग्रम्। दाड़िमम्। त्रिफला। मधु। कटुतैलम्। तप्तनीरम्। पित्तश्लेष्महरद्रव्यम्। सर्व्वकटुतिक्तकषायाणि॥ * ॥

घृतपित्तादावपथ्यम्।

विविधक्षीरेक्षुविकारः। मत्स्यः। उदकानूपभवामिषम्। नवीनमद्यम्। वमिवेगरोधः। प्राग्दक्षिणशायिवनः। अह्नि निद्रा। स्नानम्। विरुद्धाशनम्। आतपः। स्निग्धम्। अम्लम्। मधुरम्। कषायः। गुर्व्वन्नपानानि॥ * ॥

अथाम्लपित्ते पथ्यम्।

ऊर्द्धगे पूर्व्वं वमनम्। अधोगे पूर्व्वं विरेचनम्। पश्चादन्नाशनम्। निरूहः। शालिः। यवः। गोधूमः। मुद्गः। जाङ्गलरसः। तप्तशीतजलानि। शर्करा। मधु। शुक्लु। कर्कोटकम्। कारवेल्लम्। पटोलम्। हिलमोचिका। वेत्राग्रम्। वृहत्कुष्माण्डम्। रम्भापुष्पम्। वास्तूकम्। कपित्थम्। दाड़िमम्। धात्री। तिक्तानि। कफपित्तहरपानान्नम्॥ * ॥

अम्लपित्ते अपथ्यम्।

नवान्नम्। विरुद्धद्रव्यम्। पित्तकफकरद्रव्यम्। वेगरोधः। तिलः। माषः। कुलत्थः। तैलभक्षणम्। अविदुग्धम्। धान्याम्लम्। लवणम्। अम्लम्। कटु। गुर्व्वन्नम्। दधि। मत्स्यः॥ *॥

अथ विसर्पे पथ्यम्।

विरेकः। वमनम्। लेपः। लङ्घनम्। रक्तमोक्षणम्। पुराणा यवगोधूमकङ्गुषष्टिकशालयः। मुद्गः। मसूरः। चणकः। तुवरी। जाङ्गलरसः। नवनीतम्। घृतम्। द्राक्षा। दाड़िमम्। कारवेल्लकम्। वेत्राग्रम्। कुलकम्। धात्री। खदिरः। नागकेशरम्। लाक्षा। शिरीषः। कर्पूरम्। चन्दनम्। तिललेपनम्। हीवेरकम्। मुस्तकम्। सकलानि तिक्तानि॥

विसर्पे अपथ्यम्।

व्यायामः। अह्नि शयनम्। सुरतम्। प्रवातः। क्रोधः। शोकः। वमनम्। वेगः। अस्रक्षयनम्। शाकम्। विरुद्धाशनम्। दधि। कूर्च्चिका। सौवीरकादि। अनेकविधकिलाटः। गुर्व्वन्नपानम्। लशुनम्। कुलत्थः। माषः। तिलः। सकलमजाङ्गलमांसम्। स्वेदः। विदाहि। लवणम्। अम्लम्। कटु। मद्यम्। अर्कप्रभा॥*॥

अथ विस्फोटे पथ्यम्।

विरेचनम्। छर्द्दनम्। लेपः। लङ्घनम्। पुरातनषष्टिकशालयः। यवः। मुद्गः। मसूरः। चणकः। सकुष्टकः। धन्वामिषम्। गव्यघृतम्। कठिल्लकम्। वेत्राग्रम्। आषाढ़फलम्। पटोलम्। द्योतिष्मती। निम्बदलम्। चन्दनम्। तैलम्। सिताभ्रः। तिललेपः। लङ्घनम्। बालम्॥ * ॥

विस्फोटे अपथ्यम्।

स्वेदः। व्यवायः। व्यायामः। क्रोधः। गुर्व्वन्नम्। आतपः। वमिवेगः। पत्रशाकम्। प्रवातः। दिवास्वप्नः। आम्योदकम्। आनूपमांसम्। विरुद्धान्यशनानि। तिलः। माषः। कुलत्थः। लवणाम्लकटूनि। विदाहि। रूक्षम्। उष्णम्॥ * ॥

अथ मसूर्य्यां पथ्यम्।

पूर्व्वं लङ्घनवान्तिरेचनशिरावेधाः। शुष्काङ्गोज्ज्वलजीर्णषष्टिकशालयः। चणकः। मुद्गः। मसूरः। यवः। कपोतचटकदात्यूहक्रौञ्चजीवञ्जीवशुकादयः पक्षिणः। नङ्गलः। काठिल्लम्। व्याषाढ़कम्। कर्कोटम्। कदलम्। शिग्रु। रुचकम्। द्राक्षा। दाड़िमम्। मेध्यहृद्यान्नपानम्। कोलम्। माषरसः। अक्ष्णोः सेकविधौ मधुमधुकोद्भूतसुशीतोदकम्। शुष्कोदरकोषनीरम्। कर्पूरचूर्णम्। पक्वे मुद्गरसः। जाङ्गलरसः। शालिशाकम्। घृतम्। निर्गुण्डीजलम्। यत्नधूपविहितो धूपः। शुष्कगोमयभस्मगुण्ठनम्। शुष्के श्लेष्मापित्तयोः पिचुमर्दपत्रनिशयोरालेपः। शूने व्रणोक्तक्रिया॥ * ॥

मसूर्यामपथ्यम् ।

रतम् । स्वेदः । श्रमः । तैलम् । गुर्वन्नम् । क्रोधः । आतपः । दृश्याम्बु । दुष्टपवनः । विरुद्धान्नम् । निद्रावः । आनूपमांसम् । लवणम् । विषमान्नम् । कटु । अम्लम् । वेगरोधः ॥ * ॥

अथ क्षुद्ररोगे पथ्यापथ्यम् । यथा,—

क्षुद्ररोगेषु सर्व्वेषु नानारोगानुकारिषु ।
दोषान् दुष्टानवस्थाञ्च निरीक्ष्य मतिमान् भिषक् ।
तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्व्वशः ।
यथादोषं यथादुष्टं यथादृष्टञ्च कल्पयेत् ॥ * ॥

अथ सुखरोगे पथ्यम् ।

स्वेदः । विरेकः । वमनम् । गण्डूषः । प्रतिसारणम् । कवलः । अक्षकृसुतिः । नस्यम् । धूमः । ग्रीष्मर्त्तुकर्म्मभोगी । लघ्वन्नम् । यवः । मुद्गः । कुलत्थः । जाङ्गलरसः । दृष्टत्प्रोष्टी । कारवेल्लम् । पटोलम् । बालमूलकम् । कर्पूरनीरम् । ताम्बूलम् । तप्ताम्बु । खदिरः । घृतम् । कटु । तिक्तम् ॥ * ॥

सुखरोगे अपथ्यम् ।

दन्तकाष्ठम् । स्नानम् ॥ अम्लम् । मत्स्यः । आनूपामिषम् । दधि । क्षीरम् । गुड़ः । मांसम् । रूक्षान्नम् । कठिनान्नम् । अधोसुखशयनम् । गुरु । अभिष्यन्दकारि । दिवानिद्रा ॥ * ॥

अथ कर्णरोगे पथ्यम् ।

स्वेदः । विरेकः । वमनम् । नस्यम् । धूमः । सिराव्यधः । गोधूमः । शालिः । मुद्गः । यवः । प्रतुदविः । लावः । मयूरः । हरिणः । तित्तिरिः । वनकुक्कुटः । पटोलम् । घृतम् । वार्त्ताकुः । सुनिषण्णकम् । कठिल्लकम् । रसायनद्रव्यम् । ब्रह्मचर्य्यम् । अभाषणम् ॥ * ॥

कर्णरोगे अपथ्यम् ।

विरुद्धान्नपानम् । वेगरोधः । प्रजल्पनम् । दन्तकाष्ठम् । शिरःस्नानम् । अवायः । श्लेष्मलम् । गुरु । कण्डूयनम् । तुषारः ॥ * ॥

अथ नासारोगे पथ्यम् ।

निर्व्वातनिलयस्थितिः । प्रगाढ़ोष्णौषधारणम् । गण्डूषः । लङ्घनम् । नस्यम् । धूमः । छर्द्दिः । सिराव्यधः । कटुचूर्णं नासारन्ध्रे निःक्षिप्य चिः प्रवेशनम् । स्वेदः । स्नेहः । शिरोऽभ्यङ्गः । पुराणा यवशालयः । कुलत्थसुद्गयोर्यूषः । ग्राम्यजाङ्गलजा रसाः । वार्त्ताकुः । कुलकम् । घृतम् । कर्कोटः । बालमूलकम् । लशुनम् । दधि । तप्ताम्बु । वारुणी । कटुत्रयम् । कटु । अम्लम् । लवणम् । स्निग्धम् । उष्णम् । लघुभोजनम् ॥ * ॥

नासारोगे अपथ्यम् ।

विरुद्धान्नम् । दिवास्वप्नः । अभिष्यन्दि । गुरुन्नि । स्नानम् । क्रोधः । गण्डूषद्रव्याणां वेगधारणम् । श्रीकः । श्रवम् । भूशय्या ॥ * ॥

अथ नेत्ररोगे पथ्यम् ।

आद्योतनम् । लङ्घनम् । अञ्जनम् । स्वेदः । विरेकः । प्रतिसारणम् । प्रपूरणम् । नस्यम् । अक्षद्मोक्षः । ग्रन्थक्रिया । लेपनम् । आच्यपानम् । सेकः । मनोनिर्वृतिः । अङ्घ्रिपूजा । मुद्गः । यवः । लोहितशालिः । लावः । मयूरः । वनकुक्कुटः । कूर्म्मः । कुलिङ्गः । कपिञ्जलः । कौर्म्मं हविः । वन्यकुलत्थयूषः । पेया । विलेपी । लशुनम् । पटोलम् । वार्त्ताकुः । कर्कोटकः । कारवेल्लम् । नवीनमोचम् । नवमूलकम् । पुनर्नवा । मार्कवः । काकमाची । पत्तूरशाकम् । कुमारिका । द्राक्षा । कुसुम्भरु । माक्षिकमन्थम् । लोध्रम् । वरा । चौद्रम् । उपानद्वौ । नारीपयः । चन्दनम् । इन्दुखण्डम् । तिक्तम् । लघु ॥

नेत्ररोगे अपथ्यम् ।

क्रोधः । शोकः । मैथुनम् । अश्रुवायुविण्मूत्रनिद्रावमीनां वेगरोधः । सूक्ष्मेक्षणम् । दन्तविघर्षणम् । स्नानम् । निशाभोजनम् । आतपः । प्रजल्पनम् । छर्द्दनम् । अम्बुपानम् । मधूकपुष्पम् । दधि । पत्रशाकम् । कठिल्लम् । पिण्याकः । विरूढ़कम् । मत्स्यः । सुरा । अजाङ्गलमांसम् । ताम्बूलम् । अम्लम् । लवणम् । विदाहि । तीक्ष्णम् । कटु । उष्णम् । गुर्वन्नपानम् ॥ * ॥

अथ शिरोरोगे पथ्यम् ।

स्वेदः । नस्यम् । धूमपानम् । विरेकः । लेपः । छर्द्दिः । लङ्घनम् । ग्रीवोवक्षः । रक्तोन्मुक्तिः । वह्निकर्म्म । उपनाहः । जीर्णसर्पिः । शालिः । षष्टिकः । यूषः । दुग्धम् । धन्वमांसम् । पटोलम् । मुद्गः । द्राक्षा । वास्तूकम् । कारवेल्लम् । आम्रम् । धात्री । दाड़िमम् । मातुलुङ्गम् । तैलम् । तक्रम् । काञ्जिकम् । नारिकेलम् । पथ्या । कुष्ठम् । भृङ्गराजः । कुमारी । सुक्तः । उशीरम् । चन्द्रिका । गन्धसारः । कर्पूरम् ॥*॥

शिरोरोगे अपथ्यम् ।

श्रवणभ्रूनेत्रवाक्यनिद्राविद्यानां वेगधारणम् । अञ्जनम् । दुष्टनीरम् । विरुद्धान्नम् । सङ्घट्टिन्यसरिञ्जलम् । दन्तकाष्ठम् । दिवानिद्रा ॥ * ॥

अथ क्षीरोगे पथ्यापथ्यम् ।

यत्पथ्यं यदपथ्यञ्च रक्तपित्तेषु कीर्त्तितम् ।
प्रदरेषु यथादोषं तत्तन्नारी भजेत्प्राज्ञैः ॥
वातव्याधिमतां पथ्यमपथ्यञ्च यदीरितम् ।
योनिव्यापत्सु सर्व्वासु तद्विद्याच्च यथामलम् ॥*॥

अथ गर्भिणीपथ्यम् ।

शालिः । षष्टिकः । मुद्गः । गोधूमः । लाजमुक्तुः । नवनीतम् । घृतम् । क्षीरम् । रसाला । मधु । शर्करा । पनसम् । कदलम् । धात्री । द्राक्षा । अम्लम् । स्वादु । शीतलम् । कस्तूरी । चन्दनम् । माला । कर्पूरम् । अनुलेपनम् । चन्द्रिका । स्नानम् । अभ्यङ्गः । दृष्टशय्या । हिमानिलः । सन्तर्पणम् । प्रियवाक् । मनोरमविहारः । प्रियङ्गुरन्नपानम् ॥ * ॥

गर्भिण्या अपथ्यम् ।

स्वेदनम् । वमनम् । क्षारः । कलहः । विषमाशनम् । असात्म्यम् । नक्तसञ्चारः । वैषम्यम् । अप्रियदर्शनम् । अतिव्यवायः । आयासः । भारः । गुरुप्रावरणम् । अकालजागरणं स्वप्नश्च । कठिनोत्कटकासनम् । शोकः । क्रोधः । भयम् । उद्वेगः । श्रद्धा । वेगविधारणम् । उपवासः । अध्वगमनम् । तीक्ष्णोष्णगुरुविष्टम्भिभोजनम् । नक्तम् । निरशनम् । श्वभ्रकूपेक्षणम् । मद्यम् । आमिषम् । उत्तानशयनम् । स्त्रीणामनीप्सितम् ॥ * ॥

अष्टममासमारभ्य गर्भिण्या अपथ्यं यथा,—

तथा रक्तसुतिं सुप्तिं वस्तिमायासतोऽष्टमात् ।
एभिर्गर्भः सवेदाभः कुक्षौ सुष्यैम्रियेत वा ॥
भजेन्न नित्यं तिक्ताम्लकटूष्णकषायकान् ।
वातलैश्च भवेद्गर्भः कुब्जान्धजड़वामनः ॥
पित्तलैः खलती पिङ्गः श्वित्री पङ्गः कफात्मभिः ।
अपथ्यमिदमुद्दिष्टं गर्भिणीनां महर्षिभिः ॥*॥

अथ प्रसूतायाः पथ्यम् ।

लङ्घनम् । रूढ़स्वेदः । गर्भकोष्ठविशोधनम् । अभ्यञ्जनम् । तैलपानम् । कटुतिक्तोष्णसेवनम् । दीपनम् । पाचनम् । मद्यम् । पुराणयवशिग्रालयः । कुलत्थः । लशुनम् । ग्रिग्रु । वार्त्ताकुः । बालमूलकम् । पटोलम् । मातुलुङ्गम् । ताम्बूलम् । दाड़िमद्वयम् । श्लेष्मानिलघ्नानि । स्नानाद्धात् परं किञ्चित् हंसोदकम् । द्वादशाहात् परं आमिषम् । सार्द्धमासात् परं आहारादियत्नत्यागः ॥ * ॥

प्रसूतायां अपथ्यम् ।

श्रमः । नस्यम् । रक्तसुक्तिः । मैथुनम् । विषमाशनम् । विरुद्धान्नम् । वेगरोधः । असात्म्यम् । अतिभोजनम् । दिवानिद्रा । अभिष्यन्दि । विरुद्धं गुरुभोजनम् ॥

सूतिकास्वेव रोगेषु वातश्लेष्मोचितानि च ।
तत्तद्रोगानुकूल्येन पथ्यापथ्यानि निर्द्दिशेत् ॥*॥

अथ बालरोगे पथ्यापथ्यम् ।

दृश्यां ज्वरादिषु यत् पथ्यापथ्यं बालानामौचित्यात् तद्विधेयम् । मन्दाग्नौ यत् पथ्यापथ्यं बालानां पारिगर्भिके तद्विधेयम् । आगन्तुकोन्मादिनां यत् पथ्यापथ्यं बालानां यक्षरोगिणां तद्योज्यम् ॥ * ॥

अथ विषरोगे पथ्यम् ।

अरिष्टाबन्धनम् । मन्त्रक्रिया । छर्द्दिः । विरेचनम् । रूक्षणम् । शोणितास्रुक्षिः । परिषेकः । अवगाहनम् । हृदयावरणम् । नस्यम् । अञ्जनम् । प्रतिसारणम् । उत्कर्त्तनम् । प्रधमनम् । प्रलेपः । वह्निकर्म्म । उपधानम् । प्रतिविषम् ॥ धूपः । संज्ञाप्रबोधनम् । शालिः । षष्टिकः । कोरदूषः । प्रियङ्गुः । मुद्गः । हरेणुः । तैलम् । सर्पिः । शिखितित्तिरिलावेशगोधाखड्गाविदामिषम् । वार्त्ताकुः । कुलकम् । धात्री । विश्वावः । तण्डुलीयः । मण्डुकपर्णी । जीवन्ती । सुनिषण्णम् ।

उपोदिका। कालशाकम्। लशुनम्। दाडिमम्। विकङ्कतम्। प्राचीनामलकम्। पथ्या। कपित्थम्। नागकेशरम्। गोच्छागनरमद्यानि। तक्रम्। घृतात्। शर्करा। अविदाहीन्यन्नानि। सैन्धवम्। मधु। कुङ्कुमम्। पश्चिमोत्तरवातः। हरिद्रा। सितचन्दनम्। सुरसम्। शिरीषः। कस्तूरी। तिक्तानि। मधुराणि। हेमचूर्णम्॥ * ॥

विषरोगे अपथ्यम्।

क्रोधः। विरुद्धान्नम्। अध्यशनम्। व्यवायः। ताम्बूलम्। आयासः। प्रवातः। सर्वान्नम्। सर्वलवणम्। नानाविधसंस्वेदनम्। निद्रा। भयम्। धूमविधिः। क्षुधा॥ * ॥

अथ रोगसङ्करे पथ्यम्।

एषां गदानां यदि सङ्करः स्या-
त्तत्र प्रयत्नेन भिषङ्मनीषी।
उक्तेषु पथ्येषु विरोधि यद्य-
त्तत्तत् प्रयुञ्जीत चिकित्सितेषु॥*॥

रोगसङ्करे अपथ्यम्।

अपथ्यानि च सर्वाणि तत्तद्रोगोचितानि च। दोषबलावलविदेदो वर्ज्यवैद्यैरधिसङ्करे॥ * ॥

अथ वातिकरोगे पथ्यम्।

अभ्यङ्गः। परिमर्दनम्। व्यायामः। संवेदनम्। दंशदम्। स्नेहः। स्वेदनम्। आसवा। व्यायामः। संवाहनम्। वस्तिः। नस्यम्। प्रावरणम्। समीरणपरिहारः। अवगाहः। शिरोवस्तिः। विस्रावणम्। दिवाकरकरः। स्नानम्। विशापनम्। तैलद्रोणी। सरसता। गाढ़ोपनाहः। सुरा। भूमिशय्या। सुखशीलता। स्वादुम्ला रसाः। मज्जा। तैलम्। वसा। घृतम्। नवमाषः। कुलत्थः। तिलः। गोधूमः। मुद्गः। कलमः। शालिः। यष्टिकः। पेया। धान्यजलम्। पयः। क्षीरम्। मस्तु। सुखोष्णोदकम्। गोमूत्रम्। नलदाम्बु। दधि। पयःपेटी। यवः। कूर्चिका। आनूपाःरसरङ्कुगोलमहिषाः। रसः। धन्वोद्भवाः सर्पद्विट्लकवाकुतित्तिरिकुलिङ्गाः। कुम्भीरः। तिमिङ्गिलः। मकरः। गण्डूपदः। कच्छपः। रोहितमत्स्यः। वल्मीकः। मद्गुरः। सिलिन्धः। एरङ्गः। शङ्खौ। दक्षिणः। प्रोष्ठी। गर्गरः। पर्वतः। अन्ये जलजन्तवः। वार्ताकुः। कुलकम्। शिग्रु। लशुनम्। द्राक्षा। आम्रम्। आम्रातकम्। धात्री। दाडिमम्। अम्लवेतसफलम्। कोलम्। कपित्थम्। शिखा। पक्वतालम्। वकुलम्। गोकण्टकः। वास्तूकम्। शुक्लाचौ। गणिका। सरसा। मन्दारपत्रम्। ताम्बूलम्। सितशर्करा। लवणः। लोध्रः। तुरुष्कः। अगुरु। श्रीवासः। सरदारु। गुग्गुलुः। यत्याङ्गः। कुङ्कुमम्। स्निग्धोष्णविधिः। सच्चूर्णितं हेम रजतं सीसकञ्च। आलुतृपाटलमल्लिकापुष्पाणां विश्राणा माला॥ * ॥

वातिकरोगे अपथ्यम्।

चिन्ता। जागरणम्। अवश्यायः। वमिः। लङ्घनम्। व्यायामः। गजवाजिवाहनविधिः। सन्धारणम्। मैथुनम्। आघातः। अपतर्पणम्। प्रपतनम्। धातुक्षयः। क्षोभणम्। शोकः। चंक्रमणम्। विरुद्धान्नम्। सम्यक्शुष्कक्रमः। दृढत्वम्। जलदागमः। रजनीग्लेषः। अपराह्णः। भयम्। रूक्षात्यल्पकषायतिक्तकटुकक्षारातिशीतानामन्नानम्। लघ्वन्नम्। उद्रिका। आढ़की। कङ्गुः। उद्दालः। सुकुष्टकः। कोद्रवः। यवः। श्यामाकः। जूर्णादयः। शिग्रौ। जम्बु। राजमाषः। चणकः। मुद्गः। कुलत्थः। विषम। शालूकम्। क्रमुकम्। कर्कोरु। तलकम्। कठिल्लकम्। तिन्दुकम्। कर्कोटम्। नवतालशस्यम्। तालास्थिमज्जा। नदीतड़ागजलम्। करका। निष्पावबीजम्। पियाकः। शिग्रिराम्बु। रासभपयः। मद्यशाकम्। चिरट्। भूनिम्बम्। कटुका। करीरम्। अखिलशुष्कामिषम्। माक्षिकम्। धूमः। वह्निमरुत्। रजः। परिभवः। खट्वा॥ * ॥

अथ पैत्तिके पथ्यम्।

सर्पिःपानविधिः। विरेचनम्। अवश्यमोक्षः। सितशालिः। गोधूमः। आढ़किः। धान्यकम्। चणकः। मुद्गः। मसूरः। यवः। पर्य्युषितमद्यः। पयः। पयःपेटी। वरा। माक्षिकम्। लाजाः। धन्वरसः। घृतानि। सिता। शीतोदकम्। उद्विदः। कर्कोटम्। कदलम्। कण्टकिफलम्। वेत्राग्रम्। आषाढ़कम्। यष्टीका। कोमलकुलकम्। कुष्माण्डम्। वर्वाहः। तुम्बी। पर्पटकः। अल्पमारिषदलम्। कठिल्लकम्। दाड़िमम्। धात्री। कोमलतालशस्यम्। अभया। खर्जूरम्। औड़ुम्बरम्। विल्वम्। कषायः। तिक्तः। मधुरः। मधूकम्। वरी। काश्यम्। अयः। रजतम्। हेम। कटुका। निम्बः। चिरट्। चन्दनम्। हर्म्यतलम्। भूमिगृहम्। सुशीतलभवनम्। धारागृहम्। चन्द्रिका। रम्भाभोरुहनद्यपत्रशयनम्। शीताः प्रदेहाः। भूशय्या। मणिः। प्रदोषसमयः। शीतम्। प्रियालिङ्गनम्। स्नानम्। मित्रसमागमः। प्रियकथा। मन्दानिलः। अभ्युद्यानम्। वारिचरभवनम्। मनोरमतरभावाः। सुलास्येक्षणम्। पुन्नागोत्पलपाटलालसुमनःकञ्जारपुष्पाणि। कर्पूरम्। प्रवीरवीरम्। शीतक्रिया॥ * ॥

पैत्तिके अपथ्यम्।

धूमः। स्वेदनम्। आतपः। निष्ठीवनम्। सन्धारणम्। क्रोधः। क्षारः। अम्बा। गजवाजिवाहनविधिः। तीक्ष्णकर्म्म। व्यायामः। अम्लविदाहकारिसमयः। यौग्यः। विरुद्धान्नम्। मध्याह्नः। जलदाद्ययः। रजनीमध्यम्। मध्यवयः। व्रीहिः। वेणुफलम्। तिलः। लशुनम्। माषः। कुलत्थः। गुड़ः। निष्पावः। मदिरा। अतसी। प्रहीणलम्। धान्याम्लम्। उष्णोदकम्। जम्बीरम्। नलदाम्बु। हिङ्गु। लकुचम्। मूलम्। भल्लातकम्। ताम्बूलम्। दधि। सर्षपः। बदरम्। तैलाक्तम्। तिन्तिड़ी। कटु। अम्लम्। लवणम्। विदाहि॥ * ॥

अथ श्लैष्मिके पथ्यम्।

छर्दिः। लङ्घनम्। अञ्जनम्। निष्ठुवनम्। प्रोद्वर्त्तनम्। स्वेदनम्। चिन्ता। जागरणम्। श्रमः। अतिगमनम्। लट्वेगधारणम्। गण्डूषः। प्रतिसारणम्। प्रधमनम्। हस्त्यश्वयानम्। धूमः। प्रावरणम्। नियुद्धम्। अतिसंक्षोभः। नस्यम्। भयम्। रूक्षौषधविधिः। पुरातनशालिः। यष्टिका। निष्पावः। लघ्वन्नम्। पटकः। मुद्गः। कुलत्थरसः। क्षारः। सर्षपतैलम्। उष्णजलम्। धन्वामिषम्। राजिका। वेत्राग्रम्। कुलकम्। कठिल्लकम्। वार्ताकुः। औड़ुम्बरम्। कर्कोटम्। लशुनम्। मोचकसुमम्। शुक्राग्नम्। शूरणः। निम्बम्। मूलकपोतिका। वरुणः। तिक्तः। चिरट्। माक्षिकम्। ताम्बूलम्। नलदाम्बु। जीर्णमदिरा। क्षौद्रम्। वरा। गोजलम्। लाजाः। सुभृष्टतण्डुलभवम्। तिक्तम्। सुखोष्णालयः। काश्यम्। अयः। अञ्जनम्। मौक्तिकम्। कटुः। कषायरसः॥ * ॥

श्लैष्मिके अपथ्यम्।

स्नेहः। अभ्यञ्जनम्। आसवम्। अङ्गे व्यायनम्। स्नानम्। विरुद्धान्नम्। पूर्वाह्णः। शिशिरः। वसन्तसमयः। राज्यादिः। आद्यवयः। शुक्लमाद्यसमयः। अन्नपानकरम्बम्। माषः। नवतण्डुलः। मत्स्यः। मांसम्। इक्षुविकृतिः। दुग्धविकृतिः। तालास्थिमज्जा। द्रवः। पेया। भक्ष्यम्। उपोदिका। पलसम्। छत्राकम्। आषाढ़कम्। खर्जूरम्। अनुलेपनम्। पयःपेटी। पयः। पायसः। स्वादु। अम्लम्। लवणम्। गुरूणि। तुहिनम्। सन्तर्पणम्॥ * ॥

अथ वसन्तर्त्तौ पथ्यम्।

वमनम्। व्यायामः। व्यायामः। भेदः। भ्रमणम्। अग्निसेवा। कटुः। तिक्तः। विदाहि। तीक्ष्णम्। कषायः। मध्वोदनम्॥ * ॥

वसन्तर्त्तावपथ्यम्।

दिवानिद्रा। सन्तर्पणम्। आलस्यम्। सुधांशुसेवा। पिष्टालुकम्। स्वादु। गुरूदकान्नम्। पिष्टम्। दधि। क्षीरम्। घृतम्॥ * ॥

अथ ग्रीष्मर्त्तौ पथ्यम्।

चन्दनम्। शीतवातः। छाया। अम्बु। कषायान्नपानम्। प्रस्थनम्। सद्यःपयोभावितशीतभक्तम्। विश्रब्धत्वम्। प्रियभोजनम्॥ * ॥

ग्रीष्मर्त्तावपथ्यम्।

कटु। तिक्तम। उष्णम्। क्षारम्। अम्लम्। रौद्रम्। भ्रमणम्। अग्निसेवा। उन्निद्रता। भास्करतप्ततोयस्नानम्। अतिपानम्। दधि। तक्रम्। तैलम्॥ * ॥

अथ वर्षासु पथ्यम्।
लवणम्। अम्लम्। मिस्टम्। सारम्। प्रियम्। स्निग्धम्। गुरु। उष्णम्। बल्यम्। अभ्यङ्गः। उद्वर्त्तनम्। अग्निसेवा। तप्तान्नपानम्। दधि॥
वर्षास्वपथ्यम्।
पूर्ब्बपवनः। दृष्टिः। घर्म्मः। हिमः। श्रमः। नदीनीरम्। दिवास्वप्नः। रूक्षम्। नित्यनेयुनम्॥ *॥
शरदि पथ्यम्।
शीतरसानुपानम्। तरुच्छाया। चन्दनम्। इन्दुसेवा। सिता। मुद्गः। मसूरम्। गव्यदुग्धम्। इक्षुः। शाल्योदनम्॥ *॥
शरत्यपथ्यम्।
लवणम्। अम्लम्। तीक्ष्णम्। कटु। पिष्टम्। अतसी। विदाहि। सुरा। गालम्। दधि। तक्रम्। तैलम्। क्रोधः। उपवासः। आतपः। मैथुनम्॥ *॥
अथ हिमर्त्तौ पथ्यम्।
तप्तजलम्। उपनाहः। पयः। अन्नम्। पानम्। घृतम्। स्त्रीसेवा। वह्निसेवा। गुरूणि। यथेष्टमुक्तम्॥ *॥
हिमर्त्तावपथ्यम्।
दिवानिद्रा। कफोजनम्। अभोजनम्। लङ्घनम्। पुरातनान्नम्। लघुपाकि। शैत्यम्। वार्ब्बोदनम्। शीतजलावगाहः॥ *॥
शिशिरे पथ्यम्।
स्त्री। वह्निसेवा। मत्स्यः। अजमांसम्। दधि। दुग्धम्। सर्पिः॥ *॥
शिशिरेऽपथ्यम्।
तीक्ष्णोष्णकट्वम्लकषायतिक्तानि। वासुद्रकम्। आर्द्रभोजनम्। दिवानिद्रा। चन्दनम्। चन्द्रसेवा। शीतजलस्नानादि॥ *॥
माघे विशेषो यथा।
माघे च शीतद्रवमिष्टमिष्टं
कन्दः कदल्या गुरुशालिभक्तम्।
इति षड्ऋतुपथ्यापथ्याधिकारः॥ *॥
आगन्तुकज्वराणां पथ्यापथ्यं ज्वराधिकारे न लिखितमतोऽत्र लिख्यते।
"अभिघातसमुत्थाने पानाभ्यङ्गौ च सर्पिषः।
क्षतजे व्रणजे चापि क्षतव्रणचिकित्सितम्॥
ओषधीगन्धविषजे विषघ्नैः प्रसाधनम्।
अभिचाराभिशापोत्थे जपहोमादिभेषजम्॥
उत्पातग्रहपीड़ोत्थे दानस्वस्त्ययनादयः।
क्रोधोत्थिते पित्तहरं कामजे कामजित्क्रिया॥
कामशोकभयोद्भूते सर्व्वा वातहरी क्रिया।
आश्वासनस्वेदलाभो हर्षदायीनि यानि च॥
विषजेषतः पुनश्चात्र कामक्रोधसमुत्थिते।
भयशोकसमुद्भूते कामक्रोधौषधम्॥
भूताभिषङ्गजे भूतबन्धावेशनताड़नम्।
मनःशोभसमुत्पन्ने मनसः सान्त्वनानि च॥
इत्यागन्तुज्वरे पूर्ब्बैर्भिषग्भिः पथ्यमिष्यते।
विष्णोर्नामसहस्रस्य पाठनं श्रवणं श्रुतेः॥
देवानां ब्राह्मणानाञ्च गुरूणामपि पूजनम्।
ब्रह्मचर्य्यं तपो होमः प्रदानं नियमो जपः॥
साधूनां दर्शनं सत्यं रत्नौषधिविधारणम्।
मङ्गलाचरणञ्चेति वर्गः सर्व्वान् ज्वरान् जयेत्॥"
आगन्तुकज्वरे अपथ्यम्।
"अधिवासनकर्म्माणि रक्तसञ्चयधारणम्।
वमिवेगं दन्तकाष्ठमसात्म्यमपि भोजनम्॥
विरुद्धान्नपानानि विदाहीनि गुरूणि च।
दुष्टाम्बुक्षारमद्यानि पत्रशाकं विरूढ़कम्॥
नलदाम्बु च ताम्बूलं कलिङ्गं लकुचं फलम्।
आढ़कीमतस्यच्च पिण्याकं छत्राकं पिण्डवेक्षतम्॥
अभिष्यन्दीनि चैतानि ज्वरितः परिवर्জ্জयेत्॥"
इति पथ्यापथ्यविनिश्चयः समाप्तः॥
पद, स्थैर्य्ये। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) पदति। इति दुर्गादासः॥
पद, तृ क ङ गतौ। इति कविकल्पद्रुमः॥ (अदन्त-चुरा-आत्मं-सकं-सेट्।) क ङ, पदयते। इति दुर्गादासः॥
पद, य ङ औ गत्याम्। इति कविकल्पद्रुमः॥ (दिवा-आत्मं-सकं-अनिट्।) य ङ, पद्यते। औ, पत्ता। इति दुर्गादासः॥
पदं, क्लो, (पद+"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।" ३।१।१३४। इति अच्।) अवसायः। त्राणम्। स्थानम्। (यथा, मनुः। १२।१२५।
"एवं यः सर्व्वभूतेषु पश्यत्यात्मानमात्मना।
स सर्व्वसमतामेत्य ब्रह्माभ्येति परं पदम्॥")
चिह्नम्। पादः। वस्तु। इत्यमरः। ३।३।९३॥
शब्दः। वाक्यम्। प्रदेशः। पादचिह्नम्। श्लोकपादः। (यथा, हैः रामायणे। १।२।१८।
"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः।
श्रोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा॥")
किरणे पुं। इति मेदिनी॥ पदलक्षणं यथा,—
"वर्णाः पदं प्रयोगार्हाऽनन्वितैकार्थबोधकाः।"
इति साहित्यदर्पणे। २।४॥
श्रीकृष्णपदचिह्नं यथा,—
"सौवर्णीं राजतीं वापि पाषाणनिर्म्मितामपि।
पादयोश्चाङ्कितां कृत्वा पूजायैव समाचरेत्॥
दक्षिणस्य पदाङ्गुष्ठमूले चक्रं विभर्त्ति सः।
तच्च तन्मज्जनस्तोयसंसारक्लेदनाय सः॥
मध्यमाङ्गुलिमूले तु धत्ते कमलमच्युतः।
धातुश्चित्तहरेर्पादा लोभमायाति श्रोभनम्॥
पद्मस्याधो ध्वजं धत्ते सर्व्वानर्थजयध्वजम्।
कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम्॥
पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारकम्।
भोगसम्पत्क्षयं धत्ते यवमङ्गुष्ठपर्व्वणि।
तथा वामाङ्गुष्ठमूले पाशञ्चास्य जघन्यम्।
सर्व्वविद्याप्रकाशाय धत्ते च भगवान्नजः॥"
इति पाद्मे पातालखण्डे १२ अध्यायः॥
पदकः, पुं, पदं वेत्ति यः ("क्रमादिभ्यो वुन्।" ४।२।६१। इति वुन्।) पदज्ञाता। इति व्याकरणम्॥ (यथा, राजतरङ्गिण्याम्। ५।४६।
"रामलाक्षसुपाध्यायं ख्यातव्याकरणश्रमम्।
व्याख्याटपदकचक्रे स तस्मिन् सुरमन्दिरे॥")
स्वनामख्यातकण्ठभूषणश्च। देवपदत्तिस्तादि-युक्तत्वात्॥ (पदमेव इति स्वार्थे के कृते, क्लो। पदम्। यथा, महाभारते अनुशासनपर्व्वणि।
"इतःप्रभृति यातव्यं पदकं पदकं मुनैः॥")
पदगः, पुं, (पदाभ्यां गच्छतीति। गम लृगतौ+"अन्येभ्योऽपि।" इति डः।) पदातिकः। इत्यमरः। २।८।६६॥ पद्भ्यां गमनकर्त्तरि त्रि॥
पदन्यासः, पुं, (पदस्य गोपदस्येव न्यासो यत्र।) गोचुरः। इति शब्दचन्द्रिका॥ पदस्य विन्यासः। यथा, रसमञ्जरी।
"पदन्यासो गेहाङ्गिरङ्गिपशारोहयसमः
खगेहादन्यत् स्याद्वनमपरद्वीपतुलितम्।
वचो लोकालभ्यं स्वपयधनतुल्यं नगदृशः
पुमानन्यः कान्ताद्विधुरिव वसुर्योससुदितः॥"
(तन्त्रोक्तान्नपूर्णामन्त्रस्यपदानां तत्तदङ्गेषु न्यासः। यदुक्तं तन्त्रसारन्यासार्णवे।
"एकमेकं पुनश्चैकं पुनरेकं द्वयन्ततः।
चतुश्चतुस्तथा द्वाभ्यां पदान्येतानि पार्व्वति!॥
पदान्येतानि देवेशि! नवद्वारेषु विन्यसेत्।
मूर्द्धादिगुह्यपर्य्यन्तं पुनस्तेषु वरानने!॥
गुह्यादिब्रह्मरन्ध्रान्तं पदानां नवकं न्यसेत्॥")
पदभङ्गः, क्लो, (विभक्तियुक्तानां पदानां भङ्गं विश्लेषो यत्र। यद्वा, पदानि भज्यन्तेऽनेन। भञ्ज+करणे ल्युट्।) निरुक्तम्। गूढार्थशब्दव्याख्या। इति हेमचन्द्रः॥
पदभञ्जिका, स्त्री, (पदानां भञ्जिका विश्लेषिका।) पञ्जिका। टिप्पनी। इति हेमचन्द्रः॥
पदमाला, स्त्री, (पदानां माला विस्तृतिर्यस्याम्।) मोहनशीला विद्या। यथा,—
"पदमालां महाविद्यां सर्व्वदेवनमस्कृताम्।
वाचयामि सुरेशानसमादेशाद्धरिप्रम्॥"
इति देवीपुराणे ६ अध्यायः॥
अस्या विवरणं तत्रैव द्रष्टव्यम्। पदश्रेणी च॥
पदवि, स्त्री, (पद्यते गम्यतेऽनया। पद गतौ+"पदटिभ्यामविः।" इति अविः।) पङ्क्तिः। पन्थाः। इत्यमरः। २।१।१५॥
पदवी, स्त्री, (पदवि+"ङ्यादिकारान्तादक्तिनः।" इति पक्षे ङीष्।) पन्थाः। इत्यमरः।२।१।१५॥ (यथा, रघुः। ७।७।
"उत्कृष्टजीवागतिरागवाचा-
दलक्तकाङ्कां पदवीं ततान॥"
पङ्क्तिः। यथा, तत्रैव। ३।५०।
"अलं प्रयत्नेन तवात्र मा निधाः
पदं पदव्यां सगरस्य सन्ततेः॥"
पदम्। यथा, पञ्चतन्त्रे। १।२५८। "अथ तेन सिंहाय अमात्यपदवी प्रदत्ता व्याघ्राय शृग्यालत्वमिति॥")
पदछेदः, क्लो, (पादौ च अछेदश्च तयोः समाहारः। "अचतुरविचतुरेति।" ५।४।७७। इति

निपातनात् सिद्धम्।) युगपदुपस्थितचरणजानुनी। इति व्याकरणम्॥

पदाङ्कः, पुं (पदस्य अङ्कचिह्नम्।) क्रमाङ्कः। पादचिह्नम्। यथा,—

"ग्रामे ग्रामकवेदशोऽङ्गमिते श्रीकृष्णधर्म्मार्पयन्नानन्दप्रदनन्दनन्दनपदद्वन्द्वारविन्दं हृदि।
चक्रे लक्षणपदाङ्कदूतमतुलं प्रीतिप्रदं श्रृण्वतां धीरः श्रीरघुरामरायनृपतेराज्ञां गृहीत्वादरात्॥

इति पदाङ्कदूतकाव्यम्॥

पदाङ्गी, स्त्री, (हंसस्य पदमिव अङ्गं यस्याः। स्त्रियां ङीष्।) हंसपदी। इति राजनिर्घण्टः॥

पदाजिः, पुं, (पादाभ्यामजतीति। अज गतौ+"पादे च।" उणां। ४।१३१। इति पादे चोपपदे अजेरिञ्। "पादस्य पदाज्यातिगोपहतेषु।" ६।३।५२। इति पदादेशः। बहुलवचनात् अजेर्यभावः।) पदातिकः। इत्यमरः। २। ८। ६६॥

पदातः, पुं, (पदाभ्यामततीति। पद्+अत्+अच्।) पादातिकः। इति शब्दरत्नावली॥

पदातिः, पुं, (पादाभ्यामतति गच्छतीति "पादे च।" उणां ४।१३१। इति पाद्+अति+इण्। "पादस्य पदाज्यातिगोपहतेषु।' ६।३।५२। इति पदादेशः।) पदातिकः। पैयादा इति भाषा। तत्पर्य्यायः। पत्तिः २ पतगः ३ पादातिकः ४ पदाजिः ५ पद्गः ६ पदिकः ७। इत्यमरः। २। ८। ६६॥ पदातिकः ८ पादात् ६ पादाविकः १० पदात् ११ पायिकः १२ श्रवरालिः १३। इति शब्दरत्नावली॥ (यथा, महाभारते। १।१३६।३१।

"गजानश्वान् रथांश्चैव पातयामास पाण्डवः।
पदातींश्च रथांश्चैव न्यवधीदर्ज्जुनाग्रजः॥")

पदातिकः, पुं, (पदाति+स्वार्थे कन्।) पदातिः। इति शब्दरत्नावली॥

पदारः, पुं, (पदं ऋच्छति प्राप्नोतीति। ऋ+अण्।) पादधूलिः। पादालिन्दः। इति मेदिनी॥

पदार्थः, पुं, पदानां घटपटादीनां अर्थोऽभिधेयः। तत्पर्य्यायः। भावः २ धर्म्मः ३ तत्त्वम् ४ सत्त्वम् ५ वस्तु ६। इति जटाधरः॥ * ॥ (पदार्था हि दर्शनमतभेदेन नानाविधाः। तत्र वैशेषिकाणां मते।) सप्त पदार्थाः। यथा,—

"द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकम्।
समवायस्तथाभावः पदार्थाः सप्त कीर्त्तिताः॥"
"सप्तानामपि साधर्म्म्यं ज्ञेयत्वादिकमिष्यते।
द्रव्यादयः पञ्च भावा अनेके समवायिनः॥
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः॥"

इति भाषापरिच्छेदे। २, १४॥

"एते पदार्था वैशेषिकप्रसिद्धाः। नैयायिकानामप्यविरुद्धाः।" इति सिद्धान्तमुक्तावली॥ मोक्षोऽष्टमपदार्थास्तु न्यायग्रन्थे द्रष्टव्याः॥ (कपिलमते प्रकृत्यादयः पञ्चविंशतिः। पातञ्जलमते तु ईश्वरेण सह षड्विंशतिः। वेदान्तमते आत्मानात्मभेदात् द्विविधः। तत्र आत्मापि द्विविधः ईश्वरजीवाद्युपाधिभेदात्। अनात्मापि विद्याविद्याभेदेन द्विविधौ। केवलमविद्योपहितत्वाद्भेदश्चतहारः। अनात्मापि कारणसूक्ष्मस्थूलभेदात् त्रिविधः इति॥)

पदासनं, क्ली, (पदः पादस्य वा आसनम्।) पादपीठम्। इति हेमचन्द्रः॥ पा रासा टुल्। इति भाषा॥

पदिकः, पुं, (पादेन चरतीति। पाद+"पर्पादिभ्यः ष्ठन्।" ४।४।१०। इति ष्ठन्। ततः पदादेशश्च।) पदातिः। इत्यमरः। २। ८। ६७॥

पद्गः, पुं. (पद्भ्यां गच्छतीति। पद्+गम्+अन्येष्वपीति डः।) पदातिकः। इत्यमरः। २।८।६७॥

पद्धतिः, } स्त्री, (पद्भ्यां हन्ति गच्छतीति। हन
पद्धती, } गतौ+क्तिन्। "हिमकाषिहतिषु च।" ६।३।५४। इति पद्भावः। "वङ्कादिभ्यश्च।" ४।१।४५। इति वा ङीष्।) वर्त्म। (यथा, रघुः ३।४६।

"पथः श्रुतेर्दर्शयितार ईश्वराः
मलीमसामाददते न पद्धतिम्॥")

पंक्तिः। इति मेदिनी॥ ग्रन्थार्थबोधकग्रन्थः। इति हेमचन्द्रः॥ पदवी। सा च घोषवसुमित्रादिरूपा। यथा। "षष्ठेऽन्नप्राशनं मासि यष्टेऽब्दे मङ्गलं कुले इति मनुवचनात् चूड़ाकार्य्या यथाकुलमिति याज्ञवल्क्यवचनात् दैशानुशिष्टं कुलधर्म्ममुखं मशोवधर्म्मं नहि संत्यजेच्च इति वामनपुराणाच्च संस्कारमाचे कुलधर्म्मानुरोधेन कालान्तरे मङ्गलविशेषाचरणवत् शूद्राणां नामकरणे वसुघोषादिरूपपद्धतियुक्तनामत्वच्च बोध्यम्। एवमेव कुल्लूकभट्टः।" इत्युद्धाहतत्त्वम्॥

पद्धिमं, क्ली, (पादस्य हिमम्। "हिमकाषिहतिषु च।" ६।३।५४। इति पद्भावः।) पदस्य शीतलता। इति संक्षिप्तसारव्याकरणम्॥

पद्मं, क्ली पुं, (पद्यते इति। पद गतौ+"अर्त्तिस्तुसुहुसिति।" उणां। १।१३६। इति मन्। यद्वा, पद्मा लक्ष्मीरस्यस्मिन्। "अर्श आदिभ्योऽच्।" ५।२।१२३। इति अच्।) खनामख्यातपुष्पविशेषः। तत्पर्य्यायः। नलिनम् २ अरविन्दम् ३ महोत्पलम् ४ सहस्रपत्रम् ५ कमलम् ६ शतपत्रम् ७ कुशेशयम् ८ पङ्केरुहम् ९ तामरसम् १० सारसम् ११ सरसीरुहम् १२ विसप्रसूनम् १३ राजीवम् १४ पुष्करम् १५ अम्भोरुहम् १६। इत्यमरः। १। १०। ३६-४०॥ पङ्कजम् १७ अम्भोजम् १८ अम्बुजम् १९ सरसिजम् २० श्रीवासम् २१ श्रीपर्णम् २२ इन्दिरालयम् २३ जलेजातम् २४ अजम् २५ कञ्जम् २६ जलम् २७ नालीकम् २८ नालिकम् २९ वनजम् ३० अम्बानम् ३१ पुटकम् ३२ अब्जः ३३। इति शब्दरत्नावली॥ अस्य गुणाः। कषायत्वम्। मधुरत्वम्। शीतत्वम्। पित्तकफासनाशित्वञ्च। इति राजवल्लभः॥ अवशिष्टम् कमलशब्दे द्रष्टव्यम्॥ * ॥ पद्मकम्। तच्च गजस्य मुखादिस्थो बिन्दुसमूहः। यूहविशेषः। (यथा, मनुः ७। १८८।

"यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम्।
पद्मेन चैव यूहेन निविशेत सदा स्वयम्"॥)

निधिभेदः। (यथा, महाभारते। २।१०।३६।

"निधिप्रवरमुख्यौ च शङ्खपद्मौ धनेश्वरौ।
सर्व्वान्निधीन् प्रयुञ्जाथ उपास्तां वै धनेश्वरम्"॥)

संख्यान्तरम्। तच्च दशार्बुदम्। (यथा, महाभारते।

"अयुतम् प्रयुतञ्चैव पद्मम् खर्व्वमथार्ब्बुदम्"॥)

दशगुणञ्च इति मेदिनी॥ पद्मकाष्ठौषधिः। इति धरणिः॥ पुष्करमूलम्। सीमकम्। इति राजनिर्घण्टः (कल्पविशेषः। यथा, मार्कण्डेये ४७।३॥

"पद्मावसाने प्रलये निशासुप्तोत्थितः प्रभुः।
सर्व्वोत्पत्तिक्षमदा ब्रह्मा सृज्यं लोकमवैक्षत"॥)

शरीरस्थषट्पद्मादि यथा,—

"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम्॥
तदूर्द्धे कामबीजन्तु कलशान्तीन्दुनादकम्।
तदूर्द्धे तु शिखाकारा कुण्डली ब्रह्मविग्रहा॥
तद्वह्नौ हेमवर्णाभम व म-वर्णचतुर्दलम्।
हृतहेमसमप्रख्यं पद्मं तत्र विभावयेत्॥
तदूर्द्धेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम्।
वादिलान्तषड्वर्णैर्न युक्ताधिष्ठानसंज्ञकम्॥
मूलाधारषट्कानां मूलाधारं ततो विदुः॥१॥
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः॥२॥
तदूर्द्धे नाभिदेशे तु मणिपूरं महत्प्रभम्।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः॥
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्॥
शिवेनाधिष्ठितं पद्मं विश्वालोकैककारणम्॥३॥
तदूर्द्धेऽनाहतं पद्ममुद्यदादित्यसन्निभम्।
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम्॥
तन्मध्ये वाणलिङ्गन्तु सूर्य्यायुतसमप्रभम्।
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते॥
तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्यते।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम्॥४॥
तदूर्द्धन्तु विशुद्धाख्यं दलषोड़शपङ्कजम्।
स्वरैः षोड़शकैर्युक्तं धूम्रवर्णं महत्प्रभम्॥
विशुद्धं तनुते यस्मात् जीवस्य हंसलोकनात्।
विशुद्धं पद्ममाख्यातमाकाशाख्यं महत् परम्॥५॥
आज्ञाचक्रं तदूर्द्धे तु आत्मनाधिष्ठितं परम्।
आज्ञा संक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम्॥६॥
कैलासाख्यं तदूर्द्धे तु बोधनीन्तु तदूर्द्धतः।
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत!।
सहस्रारम्मुखं बिन्दुस्थानं तदूर्द्धमीरितम्॥"

इति तन्त्रसारः॥

पद्मः, पुं, (पद्यते इति। पद गतौ+"अर्त्तिस्तुसुहुसिति।" उणां। १।१३६। इति मन्।) दाशरथिः। नागविशेषः। इति धरणिः॥ (यथा, महाभारते।२।६।८।

"कृष्णश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान्॥"

पद्मोत्तराऽजः । स तु द्वादशजिनचक्रवर्त्यन्तर्गतचक्रवर्त्तिविशेषः । बलदेवः । इति हेमचन्द्रः । घोड़शरतिवत्यन्तर्गतप्रथमवन्धः । यथा,—
"हस्ताभ्याञ्च समालिङ्ग्य नारी पद्मासनोपरि ।
रमेद्गाढ़ं समाक्रम्य बन्धोऽयं पद्मसंज्ञकः ॥"
इति रतिमञ्जरी ॥

पद्मकं, क्ली, (पद्ममिव कायतीति । पद्म + कै + कः । पद्मप्रतिकृतिरक्तवर्णत्वात् तथात्वम् ।) बिन्दुजालम् । गजस्य मुखादिस्थो बिन्दुसमूहः । इत्यमरभरतौ ॥ (यथा, कुमारे । १ । ७ श्लोकटीकायां मल्लिनाथः । "अतएव कुञ्जरस्य ये बिन्दवः काये वयोविशेषभाविनः पद्मकाख्याः ।)
पद्मकाष्ठम् । इति मेदिनीधरणौ ॥ (यथा. गारुड़े १६८ अध्याये ।
"कर्पूरकः पद्मकञ्च एतैस्तैलं प्रसाधितम् ।
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम् ॥"
अस्य गुणा यथा. भावप्रकाशे ।
"पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ।
विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तहृत् ।
गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत् ॥")
कुष्ठम् । इति राजनिर्घण्टः ॥

पद्मकन्दः, पुं, (पद्मस्य कन्दः ।) कमलकन्दः । तत्पर्य्यायः । शालूकम् २ पद्ममूलम् ३ कटाक्षयम् ४ शालुकम् ५ जलालूकम् ६ । अस्य गुणाः । कटुत्वम् । विष्टम्भित्वम् । रूक्षत्वम् । रुच्यत्वम् । कषायत्वम् । कफपित्तकाश्मरीदाहविनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पद्मादिकन्दः शालूकं करहाटञ्च कथ्यते ।
मृणालमूलं भिस्साख्यं जलालूकञ्च कथ्यते ॥
शालूकं शीतलं रुच्यं पित्तदाहास्रनुद्गुरु ।
दुर्जरं स्वादुपाकञ्च स्निग्धानिलकफप्रदम् ॥
संग्राहि मधुरं रूक्षं भिस्साख्यमपि तद्गुणम् ॥"
इति भावप्रकाशः ॥

पद्मकाष्ठं, क्ली (पद्ममिव गन्धवत् काष्ठम् ।) ओषधिविशेषः । तत्पर्य्यायः । पद्मकम् २ पीतकम् ३ पीतम् ४ मालयम् ५ शीतलम् ६ हिमम् ७ शुभम् ८ केदारजम् ९ रक्तम् १० पाटलापुष्पसन्निभम् ११ पद्मवृक्षम् १२ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । रक्तपित्तविनाशित्वम् । मोहदाहज्वरभ्रान्तिकुष्ठविस्फोटभ्रान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥
अपि च भावप्रकाशे ।
"पद्मकं पद्मगन्धि स्यात्तथा पद्माह्वयं स्मृतम् ।
पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ॥
विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तहृत् ।
गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत् ॥"
इति भावप्रकाशः ॥

पद्मकी [न्,] पुं, (पद्मकं बिन्दुजालमस्त्यस्य । इनिः ।) भूर्जवृक्षः । इति शब्दमाला ॥

पद्मकेशरः, पुं क्ली, (पद्मस्य केशरः ।) किञ्जल्कः । इति राजनिर्घण्टः ॥ (यथा, इन्द्रजालसंग्रहे ।
"गोचीरैः पेषयेत्तुल्यं पद्मकेशरचन्दनम् ॥")

पद्मगर्भ,) त्रि, (पद्मस्येव गर्भोऽस्य । "उप-
पद्मगर्भि,) मानाच्च ।" ५।४।१३६ । इति इत् । सुग्धबोधमते तु वातूपमानादित्युक्तेर्विभाषा ।)
पद्मस्येव गर्भो यस्य तत् । इति सुग्धबोधव्याकरणम् ॥

पद्मगर्भः, पुं, (पद्मं गर्भः कुक्षिरिव यस्य । विष्णुनाभिकमलजातत्वात् तथात्वम् ।) ब्रह्मा । इति शब्दरत्नावली ॥ (पद्मस्य हृदयस्थपद्मस्य गर्भ आसनत्वेन कल्पितो यस्य उपासकैरितिशेषः । विष्णुः । यथा, महाभारते । १३।१४६।५१ ।
"पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ॥"
"पद्मस्य हृदयाख्यस्य मध्ये उपास्यत्वात् पद्मगर्भः ।"
इति भाष्यम् ॥
शिवः । यथा, तत्रैव १३।१७।१३२ ।
"पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥")

पद्माचारिणी, स्त्री (पद्ममिव चरतीति । चर + णिनिः स्त्रियां ङीप् ॥) उत्तरापथभवस्थलनामख्यातवृक्षविशेषः । (स्थलकमलिनी इति ख्याता ॥) तत्पर्य्यायः । अथथा २ अतिचरा ३ पद्मा ४ चारटी ५ । इत्यमरः । २ । ४ १४६ ॥ अस्याः पर्य्यायान्तरं गुणाश्च स्थलपद्मिनीशब्दे द्रष्टव्याः ॥

पद्मतनुः, पुं, (पद्मस्य तनुः ।) मृणालम् । इति राजनिर्घण्टः ॥

पद्मदर्शनः, पुं, (पद्मस्येव दर्शनमस्य ।) श्रीवासः । इति शब्दचन्द्रिका ॥ लोवान् इति भाषा ॥

पद्मनाभः, पुं, (पद्मं नाभौ यस्य । "अच्प्रत्यन्वय पूर्व्वात् सामलोम्नः ।" ५ । ४ । ७५ । इत्यत्र "अच्" इति योगविभागादच् । ब्रह्मोत्पत्तिकारणीभूतपद्मस्य नाभिजातत्वादस्य तथात्वम् ।) विष्णुः । इत्यमरः । १ । १ । १० ॥ (यथा, महाभारते । १३ । १४६ । १६ ॥
"अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥")
श्रूयते तस्य स्मरणीयत्वं यथा,—
"औषधे चिन्तयेद्विष्णुं भोजने च जनार्द्दनम् ।
शयने पद्मनाभञ्च विवाहे च प्रजापतिम् ॥"
इत्यादि हृद्वन्दिकेश्वरपुराणम् ॥
(हृदयपद्मस्यनाभौ नाभेरीषदुपरिभागे प्रकाशनात् महादेवः । यथा, महाभारते । १३ । १७ । १०५ ।
"पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ॥"
पद्ममिव वर्त्तुलाकृतिः नाभिर्यस्य । धृतराष्ट्रपुत्राणामन्यतमः । यथा, महाभारते ।१।६७।६५ ।
"ऊर्णनाभः पद्मनाभस्तथा नन्दोपनन्दकौ ॥"
नागविशेषः । यथा, तत्रैव । १२ । ३५५ । ४ ।
"क्षताधिवासो धर्म्मात्मा तत्र चक्षुःश्रवा महान् ।
पद्मनाभो महानाभः पद्म इत्येव विश्रुतः ॥")
भाविजिनविशेषः । इति हेमचन्द्रः ॥ (स्तम्भनास्त्रविशेषः । यथा, गोः रामायणे १ ।३१।७ ।
"पद्मनाभो महानाभः सुनाभो दुन्दुभिस्वनः ॥")

पद्मनाभिः, पुं, (पद्मं नाभौ यस्य । अजिति योगविभागस्य असार्व्वत्रिकत्वात् न अच् ।) पद्मनाभः । इति द्विरूपकोषः ॥

पद्मनालं, क्ली, (पद्मस्य नालम् ।) मृणालम् । यथा.
"कर्णिका पद्मनालन्तु मृणालं तन्तुलं विसम् ॥"
इति हेमचन्द्रः । ४ । २३१ ॥

पद्मपत्रं, क्ली, (पद्मस्य पत्रमिव । पद्मपर्णसादृश्यादस्य तथात्वम् ।) पुष्करमूलम् । इत्यमरः । २ । ४ । १४५ ॥ (यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये । "श्वेतोत्पलपद्मकपद्मपत्रप्रभृतिभिः ॥"*॥
पद्मस्य पत्रम् ।) कमलदलम् ॥ (यथा, हठयोगदीपिकायाम् । २ । ७० ।
"अन्तः प्रवर्त्तितोदारमारुतापूरितोदरः ।
पयस्यगाधेऽपि सुखात् प्लवते पद्मपत्रवत् ॥")

पद्मपर्णं, क्ली, (पद्मस्य पर्णं पत्रम् ।) पद्मपत्रम् । पुष्करमूलम् । इत्यमरटीका ॥

पद्मपलाशलोचनः, पुं, (पद्मस्य पलाशे पत्रे इव लोचने यस्य । पद्मपुष्पदलाकारचक्षुर्विशिष्टलात्तथात्वम् ।) विष्णुः । । यथा,—
"नान्यं ततः पद्मपलाशलोचनाद्-
दुःखच्छिदन्ते शरणायामि कञ्चन ।
यो मृग्यते हस्तगृहीतपद्मया-
श्रियेतरैरङ्ग ! विमृग्यमाणया ॥"
इति श्रीभागवते ४ स्कन्धः ॥


पद्मपाणिः, पुं, (पद्मं पाणौ यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ बुद्धः । सूर्य्यः । इति त्रिकाण्डशेषः ॥ (पद्महस्तके च ॥)

पद्मपुष्पः, पुं, (पद्ममिव पुष्पमस्य ।) कर्णिकारवृक्षः । पिकाङ्गपक्षी । इति शब्दचन्द्रिका ॥

पद्मप्रभः, पुं, (पद्मस्येव प्रभा दीप्तिर्यस्य ।) चतुर्विंशतितमार्हदन्तर्गतषष्ठार्हन् । इति हेमचन्द्रः ॥ पद्मतुल्यप्रभायुक्ते त्रि ॥

पद्मप्रिया, स्त्री, (पद्मानि प्रियाणि यस्याः ।) जरत्कारुमुनिपत्नी । मनसादेवी । इति शब्दरत्नावली ॥ (गायत्रीरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ६४ ।
"पद्मप्रिया पद्मसंस्था पद्माक्षी पद्मसम्भवा ॥")

पद्मबन्धः, पुं, (पद्मस्येव बन्धो रचना यस्य ।) चित्रकाव्यविशेषः । शब्दालङ्कारप्रभेदः । यथा.
"पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ।"
अस्य च तथाविधसन्निवेशवशेन चमत्कारविधायिनामपि वर्णानां तथाविधश्लोकाङ्गसमवायविशेषवशेन च चमत्कारविधायिभिर्वर्णैरभेदेनोपचारात्तच्छब्दालङ्कारत्वम् । उदाहरणं यथा, साहित्यदर्पणे ॥
"मारमा सुषमा चारु रुचा मार वधूत्तमा ।
मात्त धूर्त्ततमा वासा सा वामा मेसु मा रमा ॥"
अस्य पद्मदलेषु वर्णविन्यासक्रमः ॥



पद्मबन्धुः, पुं (पद्मस्य कमलस्य बन्धुः । सूर्य्योदये पद्मस्य प्रकाशतया तथात्वम् ।) सूर्य्यः । इति शब्दरत्नावली ॥ (पद्मेन बध्यते रुध्यते असौ निशायां मधुलोभात् इति भावः । बन्ध + उन् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

पद्मभूः, पुं, (पद्मं विष्णुनाभिभवकमलं भूरुत्पत्तिस्थानं यस्य । (यद्वा, पद्मात् भवतीति । भू + क्विप् ।) ब्रह्मा । इति हलायुधः ॥ (अस्योत्पत्तिकथा यथा भागवते । ६ । १ । ८—६ ।

"परावरेषां भूतानामात्मा यः पुरुषः परः ।
स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन ॥
तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः ।
तस्मिन् जज्ञे महाराज ! स्वयम्भूश्चतुराननः ॥")

पद्मसखी, स्त्री, (पद्मस्य सुखमिव सुखं उत्पत्तिप्रारम्भो यस्याः । स्त्रियां ङीप् ।) दुरालभा । इति शब्दचन्द्रिका ॥ (पद्मस्य सुखमिव सुखं वदनं यस्य ।) पद्मसदृशसुखविशिष्टे त्रि ॥

पद्मयोनिः, पुं, (पद्मं विष्णुनाभिकमलं योनिरुत्पत्तिस्थानं यस्य ।) ब्रह्मा । यथा,—

"अस्माच्च कारणाद्वत्स ! पुत्रो भवतु मे भवान् ।
पद्मयोनिरिति ख्यातो मत्प्रियार्थं जगत्त्रये ॥"

इति कौर्म्मे ६ अध्यायः ॥

पद्मरागः, पुं, (पद्मस्येव रागो यस्य ।) रक्तवर्णमणिविशेषः । माणिक इति भाषा । तत्पर्य्यायः । गोरत्नम् २ । लोहितकः ३ । इत्यमरः । २ । ६ । ६२ ॥ लोहितम् ४ । कुरुविन्दकम् ५ । इति शब्दरत्नावली ॥ (बृहत्संहितायां ८२ अध्याये अस्य परीक्षादिकं यथा,—

"सौगन्धिककुरुविन्दस्फटिकेभ्यः पद्मरागसम्भूतिः ।
सौगन्धिकजा भ्रमराञ्जनाभ्रजम्बूरसद्युतयः ॥
कुरुविन्दभवाः प्रबला मन्दद्युतयश्च धातुभिर्विद्धाः ।
स्फटिकभवा द्युतिमन्तो नानावर्णा विशुद्धाश्च ॥
स्निग्धः प्रभानुलेपो रक्तोऽर्च्चिष्मान् गुरुः सुसंस्थानः ।
अन्तःप्रभोऽतिरागा मणिरत्नगुणाः समस्तानाम् ॥
कषया मन्दद्युतयो लेखाकीर्णाः सधातवः खड्गाः ।
दुर्विद्धा न मनोज्ञाः सप्तैकरागेति मणिदोषाः ॥
भ्रमरस्निग्धिकरुक्षवर्णा
दीपशिखासमप्रभो भुजङ्गानाम् ।
भवति मणिः किल मूर्द्धनि योऽनर्घेयः स विज्ञेयः ॥
यस्तं बिभर्त्ति मनुजाधिपतिर्न तस्य
दोषा भवन्ति विषरोगकृताः कदाचित् ।
राष्ट्रे च नित्यमभिवर्षति तस्य देवः
शत्रूंश्च नाशयति तस्य मणेः प्रभावात् ॥
षड्विंशतिः सहस्राणीकस्य मणेः पलप्रमाणस्य ।
कर्षत्रयस्य विंशतिरुपदिष्टा पद्मरागस्य ॥
अर्द्धपलस्य द्वादशकर्षस्यैकस्य षट् सहस्राणि ।
यच्चाष्टमाधकधृतं तस्य सहस्रत्रयं मूल्यम् ॥
माषकचतुष्टयं दशशतकयं
द्वौ तु पञ्चशतमध्यौ ॥
परिकल्प्यमन्तराले
मूल्यं हीनाधिकगुणानाम् ॥
वर्णोनस्यार्द्धं तेजोहीनस्य मूल्यमर्धांशः ।
अल्पगुणो बहुदोषो मूल्यात् प्राप्नोति विंशांशम् ॥
आधूम्रं व्रणबहुलं स्वल्पगुणञ्चाप्नुयाद्विंशतिभागम् ।
इति पद्मरागमूल्यं पूर्व्वाचार्य्यैः समुद्दिष्टम् ॥")

राजनिर्घण्टोक्तपर्य्यायगुणौ माणिक्यशब्दे द्रष्टव्यौ तस्य वर्णो यथा,—

"सिंहले तु भवेद्रक्तं पद्मरागमनुत्तमम् ।
पीतं काञ्चनपुरोद्भूतं कुरुविन्दमिति स्मृतम् ॥
अशोकपल्लवच्छायमसृक् सौगन्धिकं विदुः ।
तुम्बुरे छायया नीलं नीलगन्धि प्रकीर्त्तितम् ॥
उत्तमं सिंहलोद्भूतं निकृष्टं तुम्बुरोद्भवम् ।
मध्यमं मध्यमं ज्ञेयं माणिक्यं त्रिविधभेदतः ॥"

तथा च ।

बन्धूकगुञ्जासकलेन्द्रगोप-
जवासनाक्तसमवर्णशोभाः ।
भ्राजिष्णवो दाडिमबीजवर्णा-
स्तथापरे किंशुकपुष्पभासः ॥
सिन्दूरपद्मोत्पलकुङ्कुमानां
लाक्षारसस्यापि समानवर्णाः ।
सान्द्रे निरागे प्रभया स्वयैव
भान्ति स्वलक्ष्म्या स्फुटमध्यशोभाः ॥
भानोश्च भासामनुवेधयोग-
मासाद्य रश्मिप्रकरेण दूरम् ।
पार्श्वानि सर्व्वाण्यनुरञ्जयन्ति
गुणोपपन्नाः स्फटिकप्रसूताः ॥
कुसुम्भनीलीयतिमिश्ररागं
प्रलयरक्ताम्बरतुल्यभासः ।
तथापरेऽरुष्करकण्टकारी-
पुष्पत्विषो हिङ्गुलकत्विषोऽन्ये ॥
चकोरपुंस्कोकिलसारसानां
नेत्रावभासश्च भवन्ति केचित् ।
अन्ये पुनर्नातिविपुष्पितानां
तुल्यत्विषः कोकनदोदराणाम् ॥
प्रभावकाठिन्यगुरुत्वयोगैः
प्रायः समानाः स्फटिकोद्भवानाम् ।
आनीलरक्तोत्पलचारुभासः
सौगन्धिकाख्या मणयो भवन्ति ॥
यो मन्दराजः कुरुविन्दजेषु
स एव जातः स्फटिकोद्भवेषु ।
निरर्च्चिषोऽन्तर्बहुलीभवन्ति
प्रभाववन्तोऽपि न ततसमानाः ॥
ये तु रावणगङ्गायां जायन्ते कुरुविन्दकाः ।
पद्मरागा घनं रागं बिभ्राणाः स्वस्फुटार्चिषः ॥
वर्णानुयायिनस्तेषामन्यदेशे तथापरे ।
न जायन्ते तु ये कैचित् मूल्यलेशमवाप्नुयुः ॥
तथैव स्फटिकोत्थानां देशे तुम्बुरसंज्ञके ।
सधर्म्माणः प्रजायन्ते स्वल्पमूल्याहि ते स्मृताः ॥"

अथ जात्यादि ।

"माणिक्यस्य प्रवक्ष्यामि यथा जातिचतुष्टयम् ।
ब्रह्मक्षत्रियवैश्यानां शूद्राणाञ्च यथाक्रमम् ॥
रक्तश्वेतो भवेद्विप्रस्तिरक्तस्तु क्षत्रियः ।
रक्तपीतो भवेद्वैश्यो रक्तनीलस्तथान्यजः ।
पद्मरागो भवेद्विप्रः कुरुविन्दस्तु बाहुजः ।
सौगन्धिको भवेद्वैश्यो मांसखण्डस्तथान्यजः ॥
शोणपद्मसमाकारः खदिराङ्गारसप्रभः ।
पद्मरागो द्विजः प्रोक्तश्छायाभेदेन सर्व्वदा ॥
गुञ्जासिन्दूरबन्धूकनागरङ्गसमप्रभः ।
दाड़िमीकुसुमाभासः कुरुविन्दस्तु बाहुजः ॥
हिङ्गुलाभाशोकपुष्पाभमौषत्पीतलोहितम् ।
जवालाक्षारसप्रायं वैश्यं सौगन्धिकं विदुः ॥
आरक्तः कान्तिहीनश्च चिक्कणश्च विशेषतः ।
मांसखण्डसमाभासो ज्ञेयजः पापनाशनः ॥"

मांसखण्डस्तु नीलगन्धेः संज्ञा ॥ * ॥

अथ दोषाः ।

"माणिक्यस्य समाख्याता अष्टौ दोषा मुनीश्वरैः ।
द्विच्छायश्च द्विरूपश्च सम्भेदः कर्करस्तथा ॥
अशोभनं कोकिलश्च जलं धूम्राभिधश्च वै ।
गुणाश्चत्वार आख्याताश्छायाः षोड़श कीर्त्तिताः ।
छायास्तु पूर्व्वोक्ता एव ।
"छायाद्वितयसम्बन्धाद्द्विच्छायं बन्धुनाशनम् ।
द्विरूपं द्विपदन्तेन माणिक्येन पराभवः ॥
सम्भेदो भिन्नमित्युक्तं ग्रहक्षतविधायकः ।
कर्करं कर्करायुक्तं पशुबन्धुविनाशनात् ॥
दुग्धेनेव समालिप्तमघनीपुटमुच्यते ।
अशोभनं समुद्दिष्टं माणिक्यं बहुदुःखकृत् ॥
मधुबिन्दुसमच्छायं कोकिलं परिकीर्त्तितम् ।
आयुर्लक्ष्मीयशो हन्ति सदोषं तन्न धारयेत् ॥
रागहीनं जलं प्रोक्तं धनधान्यापवादकृत् ।
धूम्रं धूमसमाकारं वैद्युतं भयमावहेत् ॥
तथा,—
"शोभाद्वितयवन्तो ये मनुजाः क्षतिकारकाः ।
उभयत्र पदं येषां तेन च स्यात् पराभवः ॥
भिन्नेन युद्धे क्षतुजः स्यात् कर्करव्यननाशकृत् ।
दुग्धेनेव समालिप्तः पुटके यस्तु सम्भवेत् ॥
दुःखकृत् स समाख्यातो न वृषे रत्नशोधकः ।
मधुबिन्दुसमा शोभा कोकिलानां प्रकीर्त्तिता ॥
तेषाञ्च बहुभेदाः सुवर्णे ते धार्य्याः कदाचन ॥"

अथ गुणाः ।

"गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता ॥"

तथा च ।

"वर्णाधिकं गुरुत्वञ्च स्निग्धता समताच्छता ।
अर्च्चिष्मत्ता महत्ता च मणीनां गुणसंग्रहः ॥" * ॥

फलम् ।

"ये कर्कराश्छिद्रमलोपदिग्धाः
प्रभाविमुक्ताः परुषा विवर्णाः ।
न ते प्रशस्ता मणयो भवन्ति
समानतो जातिगुणैः समस्तैः ॥
दोषोपदृष्टं मणिमप्रबोधाद्-
बिभर्त्ति यः कञ्चन कञ्चिदेकम् ।

नं बन्धुदुःखाय सबन्धुवित्त-
नाशादयो दोषगणा भजन्ते ॥
सपत्नमध्येऽपि कृताधिवासं
प्रमादवृत्तावपि वर्त्तमानम् ।
न पद्मरागस्य महागुणस्य
भर्त्तारमापन्न ससुपैति काचित् ॥
दोषोपसर्गप्रभवाश्च ये ते
नोपद्रवास्तं समभिद्रवन्ति ।
गुणैः समुस्थैः सकलैरुपेतं
यः पद्मरागं प्रयतो बिभर्त्ति ॥" * ॥

अस्य परीक्षा यथा,—

"बालार्ककरसंस्पर्शात् यः स्निग्धां लोहितां वमेत् ।
रञ्जयेदाश्रमं वापि स महागुण उच्यते ॥
द्राक्षे घृतगुणे स्निग्धो रञ्जयेद्यः समन्ततः ।
वमेत्स्निग्धां लोहितां वा पद्मरागः स उत्तमः ॥
अन्धकारे महाघोरे यो न्यस्तः सन् महामणिः ।
प्रकाशयति खद्योभः स श्रेष्ठः पद्मरागकः ॥
पद्मकोषे तु यो न्यस्तो विकाशयति तत्क्षणात् ।
पद्मरागवरो ह्येष देवानामपि दुर्लभः ॥
सर्व्वारिष्टप्रशमनाः सर्व्वसम्पत्तिदायकाः ।
चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम् ॥
यो मणिर्दह्यते दूराज्ज्वलदग्निसमच्छविः ।
वंशकान्तिः स विज्ञेयः सर्व्वसम्पत्तिकारकः ॥
पञ्च सप्त नव विंशति रागः
स्निग्ध एव सकलः खलु वर्ज्ज्ये ।
वर्ज्ज्येद्वमति वा करजाल-
सन्तरोत्तरमहागुणिनस्ते ॥
नीलं रसं दुग्धरसं जलं वा
ये रञ्जयन्ति द्विगुणप्रमाणम् ।
ते ते यथापूर्व्वमतिप्रशस्ताः
सौभाग्यसम्पत्तिविधानदायकाः ॥" * ॥

परिमाणम् ।

"गुञ्जाफलप्रमाणस्तु दशसप्तत्रिगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
क्रोष्टुकोलफलाकारो द्वादशाष्टाभिगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
बदरीफलतुल्यो यः खरदिग्वसुमाधकः ।
तथा धात्रीफलत्रिंशद्गुंजाद्वयष्टमाधकः ॥
तथाचफलतुल्यो यो वह्निपक्वैकसाधकः ।
ताम्बूलफलमानो यश्चतुस्त्रिंशद्गुंजातोलकः ॥
बिल्वीफलसमाकारो वसुषड्दशतोलकः ।
अतःपरं प्रमाणेन मानेन च न लभ्यते ।
यदि लभ्येत गुणेन तदा सिद्धिमवाप्नुयात् ॥
केचिच्चारुतराः सन्ति जातीनां प्रतिरूपकाः ।
विजातयः प्रयत्नेन विद्वांस्तानुपलक्षयेत् ॥
कलसपुरोद्भवसिंहलतुम्बुरुदेशोत्थमुक्तमालीयाः ।
श्रीपर्णिकाश्च सद्वंशा विजातयः पद्मरागाणाम् ॥
तुषोपसर्गात् कलसाभिधान-
मातान्त्रभावादपि तुम्बुरुत्थम् ।
काण्डात्तथा सिंहलदेशजातं
मुक्ताभिधानं नभसः स्वभावात् ।
श्रीपर्णकं दीप्तिनिराकृतित्वा-
द्विजातिलिङ्गाश्रय एष भेदः ॥"

तथा च ।

"स्नेहप्रदेहो मृदुता लघुत्वं
विजातिलिङ्गं खलु सार्व्वजन्यम् ।
यः श्यामिकां पुष्यति पद्मरागो
यो वा तुषाणामिव चूर्णमध्यः ॥
स्नेहप्रदिग्धो न च यो विभाति
यो वा प्रलुप्तः प्रजहाति दीप्तिम् ।
व्याक्रान्तमूर्द्धा च तथाङ्गुलिभ्यां
यः कालिकां पार्श्वगतां बिभर्त्ति ॥
सम्प्राप्य चोत्तेपपथानुवृत्तिं
बिभर्त्ति यः सर्व्वगुणानतीव ।
तुल्यप्रमाणस्य च तुल्यजातेः-
र्यो वा गुरुत्वेन भवेन्न तुल्यः ॥
प्राप्यापि रत्नाकरजां खजातिं
लघ्वेहगुरुत्वेन गुणेन विद्वान् ॥
अप्रणश्यति सन्देहे ग्लिलायां परिवर्षयेत् ।
दृष्टो योऽत्यन्तशोभावान् गरिमाणं न मुञ्चति ।
स ज्ञेयः शुद्धजातिस्तु ज्ञेयाश्चान्ये विजातयः ॥
खजातकं ससुत्थेन विलिखेद्वा परस्परम् ।
वज्रं वा कुरुविन्दं वा विमुञ्चान्योन्यकेनचित् ।
न शक्यं लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः ॥
जातस्य सर्व्वरूपि मणेर्न जातु
विजातयः कान्तिसमानवर्णाः ।
तथापि नानाकरणार्थमेवं
भेदप्रकारः परमः प्रदिष्टः ॥
गुणोपपन्नेन सहावबद्धो
मणिस्तु धार्य्यो विगुणेन जात्यः ।
न कौस्तुभेनापि सहावबद्धं
विद्वान् विजातिं विभृयात् कदाचित् ॥
चक्राल एकोऽपि यथा द्विजातीन्
समेत्य भूरीनपहन्त्ययत्नात् ।
तथा मणीन् भूरिगुणोपपन्नान्
ग्लपयति विद्रावयितुं विजातः ॥" * ॥

अथ मूल्यम् ।

बालार्काभिमुखं क्षत्वा दर्पणे धारयेच्छिखिम् ।
तत्र कान्तिविभागेन छायाभागं विनिर्द्दिशेत् ॥
वज्रस्य यत्सकुलसंख्ययोक्तं
मूल्यं ससुन्मापितगौरवस्य ।
तत्पद्मरागस्य गुणान्वितस्य
स्यान्माषकाख्या तुलितस्य मूल्यम् ॥
यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम् ।
तावन्मूल्यं तथाशुद्धे कुरुविन्दे विधीयते ॥
सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम् ।
तावन्मूल्यचतुर्थांशहीनं स्याद्वै सुगन्धिके ॥
यावन्मूल्यं समाख्यातं वैश्यवर्णे च सूरिभिः ।
तावन्मूल्यचतुर्थांशं हीयते शूद्रजन्मनि ॥
पद्मरागः पथं यस्तु धत्ते लाक्षारसप्रभः ।
कार्षापणसहस्राणि चिंशन्मूल्यं लभेत सः ॥
इन्द्रगोपकसङ्काशः कर्षत्रयधृतो मणिः ।
द्वाविंशतिं सहस्राणां तस्य मूल्यं विनिर्द्दिशेत् ॥

एकोनो नूयते यस्तु जवाकुसुमसन्निभः ।
कार्षापणसहस्राणि तस्य मूल्यं चतुर्दश ॥
बालादित्यद्युतिनिभः कर्षं यस्तु प्रतुल्यते ।
कार्षापणशतानान्तु मूल्यं सद्भिः प्रकीर्त्तितम् ॥
यस्तु दाड़िमपुष्पाभः कर्षार्द्धेन तु सम्मितः ।
कार्षापणशतानान्तु विंशतिं मूल्यमादिशेत् ॥
चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः ।
मूल्यं तस्य विधातव्यं सूरिभिः शतपञ्चकम् ॥
द्विमाषको यस्तु गुञ्जैः सर्व्वैरेव समन्वितः ।
तस्य मूल्यं विधातव्यं द्विशतं तत्त्ववेदिभिः ॥
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
शतैकसम्मितं वाच्यं मूल्यं रत्नविचक्षणैः ॥
अतोऽन्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।
स्वर्णद्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत् ॥
कार्षापणः समाख्यातः पुराणद्वयसम्मितः ।
अन्ये कुसुम्भपानीयमञ्जिष्ठोदकसन्निभाः ॥
काषाया इति विख्याताः स्फटिकप्रभवाश्च ते ।
तेषां दोषान् गुणान् वापि पद्मरागवदादिशेत् ॥
मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा ।
ब्रह्मक्षत्रियवैश्यान्त्यास्चतुर्धा ये प्रकीर्त्तिताः ॥
चतुर्विधैर्नृपतिभिर्धार्य्या सम्पत्तिहेतवे ।
अतोऽन्यथा धृतः कुर्य्यादोगघ्नोकभयञ्चयम् ॥"

इति युक्तिकल्पतरौ पद्मरागपरीक्षा ॥

पद्मलाञ्छनः, पुं, (पद्मवत् लाञ्छनं पद्माकारलक्षणं चिह्नमितियोगेन यस्य ।) ब्रह्मा । सूर्य्यः । कुबेरः । राजा । इति मेदिनी ॥ (बुद्धविशेषः । इति शब्दचिन्तामणिः ॥)

पद्मलाञ्छना, स्त्री, (पद्मं लाञ्छनं यस्याः ।) तारा । लक्ष्मीः । सरस्वती । इति मेदिनी ॥

पद्मवर्णकं, क्ली, (पद्मस्येव वर्णोऽस्य । कन् ।) पुष्करमूलम् । इति जटाधरः ॥ पद्मतुल्यवर्णयुक्ते त्रि ॥

पद्मवासा, स्त्री, (पद्मे वासो यस्याः ।) लक्ष्मीः ।) इति हेमचन्द्रः ॥

पद्मबीजं, क्लीं, (पद्मस्य बीजम् ।) कमलबीजम् । तत्पर्य्यायः । पद्माक्षम् २ गालोड्यम् ३ कन्दली ४ भेक्षा ५ क्रौञ्चादनी ६ क्रौञ्चा ७ क्षामा ८ पद्मपर्कटी ९ । अस्य गुणाः । कटुत्वम् । खादुत्वम् । पित्तच्छर्द्दिदाहासृग्दोषनाशित्वम् । पाचनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥

"पद्मबीजं हिमं स्वादु कषायं तिक्तकं गुरु ।
विष्टम्भि वृष्यं रूक्षञ्च गर्भसंस्रावकं परम् ॥
कफवातकरं बल्यं ग्राहि पित्तासृदाहनुत् ॥"

इति भावप्रकाशः ॥

(पद्मबीजमालाजपेनाशु साधकः सिद्धिमाप्नुयात् । इति तन्त्रशास्त्रे प्रसिद्धिः ॥ तदुक्तं यथा,—

"भक्त्या यो जपते नित्यं पद्मबीजैः सुदेशिकः ।
अचिराल्लभते सिद्धिं सत्यं सत्यं न संशयः ॥"

पद्मबीजाभं, क्ली, (पद्मबीजस्य आभा इव आभा यस्य । पद्मबीजवत् आभातीति वा । आ+भा+कः ।) मखाग्रम् । इति राजनिर्घण्टः । माखाना इति भाषा ॥

पद्मा, स्त्री, (पद्मं वासस्थलत्वेनास्त्यस्याः। "अर्श आदिभ्योऽच्।" ५। २। १२७। इति अच् टाप् च।) लक्ष्मीः। (यथा, रघुः। ४। ५।
"छायामण्डललक्ष्येण तमद्राक्षीत् किल स्वयम्।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम्॥")
लवङ्गम्। पद्मचारिणी। इत्यमरः॥ (पद्यते इति। "अर्तिस्तुसुहीति।" उणा०। १। १४०। इति मन् टाप् च।) पन्नगी। सा तु मनसा। पङ्क्तिका। इति मेदिनीशब्दरत्नावली॥ वृत्तार्हमाता। इति हेमचन्द्रः॥ कुसुमपुष्पम्। इति रत्नमाला॥ बृहद्रथराजकन्या कल्किदेवेन विवाहिता। यथा, कल्किपुराणे १० अध्यायः॥
"हरेरागमनं श्रुत्वा सहर्षोऽभूद्बृहद्रथः।
पुरोधसा ब्राह्मणैश्च पात्रैर्मिश्रैः सुमङ्गलैः॥
वाद्यताण्डवगीतैश्च पूजायोजनपाणिभिः।
जगामानयितुं कल्किं सार्द्धं निजजनैः प्रभुः॥
ततो जलाशयाभ्यासं गत्वा विष्णुयशःसुतम्।
मल्लिवैदिकमासीनं भुवनैकगतिं पतिम्॥
ददर्श पुरतो राजा रूपशीलगुणाकरम्।
साम्बुः सपुलकः श्रीमान् दृष्ट्वा साधु तमर्चयत्॥
ज्ञानागोचरमेतन्मे तवागमनमीश्वर!।
यथा मान्धातृपुत्रस्य यदनार्घेन कानने॥
इत्यूक्त्वा तं पूजयित्वा समानीय निजाश्रमे।
हर्म्यप्रासादसंबाधे स्थापयित्वा ददौ सुताम्॥
पद्मां पद्मविशालाक्षीं पद्मनेत्राय पद्मिनीम्।
पद्मजादेशितः पद्मनाभायादाद्यथा श्रियम्॥
कल्किर्लब्ध्वा प्रियां भार्यां सिंहले साधु सत्कृतः।
समुवास विशेषज्ञः समीक्ष्य दौष्प्रसुत्तमम्॥"

द्माकरः, पुं, (पद्मस्य आकरः।) पद्मजनकजलाशयः। तत्पर्य्यायः। तडागः २ कासारः ३ सरसी ४ सरः ५। इत्यमरः। १। १०। २८॥ सरोजिनी ६। इति जटाधरः॥ सरोवरः ७ तडाकः ८ तटाकः ९ सरस्म् १० सरम् ११ सरकम् १२। इति शब्दरत्नावली॥ पद्मसदृशागाधे महाजलाशये सपद्मे योग्यतया नियमे च। पद्मैव सरोमाले। इति पङ्क्तिकोद्भटादयोऽपि। पद्माकरादिद्वयं सपद्मागाधजलाशये। कासारादित्रयं क्वचिमपद्माकरे। इति स्वाम्यादयः। पद्माकरादिद्वयं पद्मयुक्तजलाशयमात्रे। कासारादित्रयं सरोवरमात्रे। इत्यन्ये। पद्मानामाकर उत्पत्तिस्थानं पद्माकरः क्वचित् पद्मशून्येऽपि योग्यतयेति नुभूतिः। इति भरतः॥

पद्माक्षं, क्ली, (पद्मस्य अक्षीव। समासे षच्।) पद्मबीजम्। इति हारावली॥ (पद्मे इव पद्मपुष्पदलवत् अक्षिणी यस्य।) पद्मतुल्याक्षे त्रि॥

पद्माटः, पुं, (पद्मं पद्मसाङ्घ्यं अटति गच्छति पद्मेषीति अट गतौ + "कर्म्मण्यण्।" ३। २। १। इति अण्।) चक्रमर्दः। इत्यमरः। २। ४। १४०॥

पद्मालया, स्त्री, (पद्ममेव आलयो वासस्थानं यस्याः।) लक्ष्मीः। लवङ्गम्। इत्यमरः॥ (लक्ष्मीस्वरूपत्वात् गङ्गापि। यथा, काशीखण्डे गङ्गासहस्रनामकीर्त्तने। २६। १०५।
"पद्मालया पराशक्तिः पुरजित्परमप्रिया॥")

पद्मावती, स्त्री, (पद्म + अस्त्यर्थे मतुप् मस्य वत्वम्। संज्ञायां दीर्घः।) मनसादेवी। नदीविशेषः। पद्मा इति ख्याता। इति शब्दरत्नावली॥ पद्मचारिणी। इति जटाधरः॥ जयदेवपत्नी। यथा,—
"जयति पद्मावतीरमणजयदेव-
कविभारतीभणितमतिशान्तम्।"
इति गीतगोविन्दः॥

पद्मावतीप्रियः, पुं, (पद्मावत्याः प्रियः स्वामी।) जरत्कारुमुनिः। इति शब्दरत्नावली॥ जयदेवश्च॥

पद्मासनं क्ली, (पद्ममिव पद्माकारेण वद्धमित्यर्थः। आसनम्।) योगासनविशेषः। यथा,—
"वामोरूपरि दक्षिणं नियमतः संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां धृतम्।
अङ्गुष्ठं हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविकारनाशनकरं पद्मासनं प्रोच्यते॥"
अन्यदपि।
"वामोरूपरि दक्षिणं हि चरणं संस्थाप्य वामं तथा-
प्यन्योरूपरि तस्य वन्धनविधौ धृत्वा कराभ्यां दृढम्।
अङ्गुष्ठं हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्रोगविनाशकारि यमिनां पद्मासनं प्रोच्यते॥"
इति गोरक्षसंहिता॥
(मत्स्येन्द्रनाथाभिमतं पद्मासनं यथा, हठयोगदीपिकायाम्। १। ४४-४७।
"वामोरूपरिदक्षिणं च चरणं संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढ़ौ।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्र-
मालोकयेदेतद्व्याधिविनाशकारि यमिनां
पद्मासनं प्रोच्यते॥
उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः।
ऊरुमध्ये तथोत्तानौ पाणी कृत्वा ततोऽङ्गुष्ठौ॥
नासाग्रे विन्यसेद्राजदन्तमूले तु जिह्वया।
उत्तम्भ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः॥
इदं पद्मासनं प्रोक्तं सर्व्वव्याधिविनाशनम्।
दुर्लभं येन केनापि धीमता लभ्यते भुवि॥")
पूजार्थं धातुमयपद्माकारासनञ्च।
(रतिविषयकपद्मासनम् यथा, रतिमञ्जर्य्याम् ४०
"पद्मासनो नागपादो लतावेष्टोऽर्द्धसंपुटः॥"
तल्लक्षणं यथा, तत्रैव ४२।
"हस्ताभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि।
रमेद्राढ़ं समाक्रम्य वन्धोऽयं पद्मसंज्ञकः॥")

पद्मासनः, पुं, (पद्मं विष्णुनाभिकमलं आसनं यस्य।) ब्रह्मा। कमलासनः। इत्यमरदर्शनात्॥

पद्माक्षः, स्त्री, (पद्मस्य आक्षा आख्या यस्याः।) पद्मचारिणी। इति राजनिर्घण्टः।

पद्मिनी, स्त्री, (पद्मानि सन्त्यस्याम्। पुष्करादित्वादिनिः।) पद्मयुक्तदेशः। पद्मसमूहः। पद्मलता। इति भरतः॥ तत्पर्य्यायः। नलिनी २ विसिनी ३। इत्यमरः। १। १०। ३६॥ रुग्गालिनी ४ कमलिनी ५ पुटकिनी ६ पङ्कजिनी ७ सरोजिनी ८। इति माधवः॥ नालिकिनी ९ नालीकिनी १० अरविन्दिनी ११। इति कोषान्तरम्॥ अम्भोजिनी १२ पुष्करिणी १३ जम्बालिनी १४। इति शब्दरत्नावली॥ अब्जिनी १५। तस्याः लक्षणं यथा,—
"मृदुनालदलोत्पुल्लैः ससुरभिता पुनः।
पद्मिनी प्रोच्यते प्राज्ञैर्विसिन्यादिश सा स्मृता॥"
तस्याः गुणाः।
"पद्मिनी मधुरा तिक्ता कषाया शिशिरा परा।
पित्तक्रिमिश्रीषवान्तिभ्रान्तिसन्तापदोषहृत्॥"
इति राजनिर्घण्टः॥ *॥
(पद्मं पद्मगन्धोऽस्यस्याः। पद्मस्य गन्ध इव गन्धो विद्यते शरीरे यस्या इति तात्पर्य्यार्थः। अत्रतु पद्मगन्धयोस्तादात्म्यमङ्गीकृत्यैव समासः कल्पितः।) चतुर्विधस्त्रीमध्ये स्त्रीविशेषः। तस्या लक्षणं यथा,—
"भवति कमलनेत्रा नासिकाचारुदन्ता
अविरलकुचयुग्मा दीर्घकेशी सुशाङ्गी।
मृदुवचनसुशीला वृत्यगीतानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा॥"
इति रतिमञ्जरी। ४॥*॥
(अस्या रतिप्रकारः यदुक्तः तत्रैव। २८।
"कुचं करेण संमर्द्य पीड़येदधरं दृढम्।
रमणं पद्मबन्धेन पद्मिनीरतिमादिशेत्॥")
सरोवरम्। पद्मम्। इति विश्वः॥ (यथा, कुमारे। १। ७६।
"सुरगज इव विभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद् वेगदीर्घोत्तलाङ्गः॥")
स्थलम्। इति शब्दमाला॥ हस्तिनी। इति धरणिः॥

पद्मिनीकण्टकः, पुं, (पद्मिनीकण्टक इव आकृतिर्विद्यतेऽस्य।) क्षुद्ररोगविशेषः। पद्मकाँटा इति भाषा। तल्लक्षणं यथा,—
"कण्टकैराचितं वृत्तं कन्दूसदृशमण्डलम्।
पद्मिनी कण्टकप्रख्यैस्तदाख्यं कफवातजम्॥"
आचितं व्याप्तम्। पद्मिनीकण्टकप्रख्यैः पद्मिनीनालकण्टकसदृशैः। तदाख्यं पद्मिनीकण्टकनामकम्॥ *॥
तच्चिकित्सा यथा,—
"पद्मिनीकण्टके रोगे कुर्य्यान्निम्बवारिणा।
तेनैव सिद्धं सक्षौद्रं सर्पिः पातुं प्रदापयेत्॥
निम्बारग्वधकल्केन सुहृद्रङ्गेण हितम्।
चतुर्गुणेन निम्बोत्थपञ्चकाथेन गोघृतम्॥
पचेत्तत्तु निम्बस्य क्षतमालस्य पत्रजैः।
कल्कैर्भृशं पचेत् सिद्धं तत् पिबेत् पलसंमितम्॥

पद्मिनीकण्टकाद्रोगान्मुक्तो भवति नान्यथा ॥"
इति निम्बादिष्टतम्। इति भावप्रकाशः ॥

पद्मिनीकान्तः, पुं. (पद्मिन्याः कान्तः। पद्मपुष्पप्रकाशकत्वादस्य तथात्वम्।) सूर्यः। इति जटाधरः ॥

पद्मिनीवल्लभः, पुं. (पद्मिन्या नलिन्या वल्लभः प्रियः। पद्मिनी वल्लभाऽस्येति वा।) सूर्यः। इति शब्दरत्नावली ॥

पद्मी, [न्] पुं. (पद्मं बिन्दुजालकमस्यास्य। पद्म + इनिः।) हस्ती। इत्यमरः। २। ८। ३५ ॥ (यथा, महाभारते। १२। २६। ६६।
"सर्व्वा रथगताः कन्या रथाः सर्व्वे चतुर्युजः।
घृतं घृतं रथे नागाः पद्मिनो हेममालिनः॥"
नाभिकमले हस्ते वा पद्ममस्यास्तीति। विष्णुः। यथा, महाभारते। १३। १४६। ५०।
"अनुकूलः शुतावर्त्तः पद्मी पद्मनिभेक्षणः।
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्॥")

पद्मेशयः, पुं, (पद्मे शेते इति। शीङ् ल शयने + "अधिकरणे शेतेः।" ३। २। १५। इति अच्। "शयवासवासिष्विति।" ६। ३। १८। इत्यलुक्।) विष्णुः। इति हेमचन्द्रः ॥

पद्मोत्तरः, पुं, (पद्मादुत्तरः वर्णतः श्रेष्ठः।) कुसुम्भः। इति राजनिर्घण्टः ॥

पद्मोत्तरात्मजः, पुं, (पद्मोत्तरस्य आत्मजः पुत्रः।) जिनचक्रवर्त्तिविशेषः। इति हेमचन्द्रः ॥

पद्मोद्भवः, पुं, (पद्मं उद्भव उत्पत्तिस्थानं यद्वा पद्मे पद्मादुद्भवो यस्य।) ब्रह्मा। अजयोनिरित्यमरदर्शनात् ॥ (यथा, महाभारते। १३। ६। ४।
"ततः पद्मोद्भवो राजन्! देवदेवः पितामहः।
उवाच मधुरं वाक्यमर्थवद्धेतुभूषितम्॥")

पद्मोद्भवा, स्त्री, (पद्मे पद्मादुद्भवो यस्याः।) मनसा देवी। यथास्याः पौराणिकथानम्।
"कान्त्या काञ्चनसन्निभां सुवदनां पद्मासनां शोभनां
नागेन्द्रैः कृतशेखरां विषहरीं पद्मोद्भवां जाङ्गलीम्॥"

पद्यं, क्ली, (पदं चरणमर्हतीति। पद + यत्।) कविकृतिः। श्लोकः। इत्यमरः। ३। ५। ३१ ॥ तस्य लक्षणं यथा, छन्दोमञ्जर्याम्।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्॥"
(तत्तु अन्वयगतिविशेषात् मुक्तकयुग्मकसन्दानितककलापककुलकभेदात् पञ्चविधम्। यदुक्तं साहित्यदर्पणे। ६। २८७।
"छन्दोवद्धपदं पद्यं तेनैकेन च मुक्तकम्।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते॥
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्॥"
"तदूर्द्धं कुलकं स्मृतम्।" इति क्वचित् पाठः॥)
श्राव्यम्। इति जटाधरः॥ ("पदमस्मिन् दृश्यम्।" ४। ४। ८७। इति यत्। नात्युष्ककर्दमः। इति सिद्धान्तकौमुदी॥)

पद्यः, पुं, (पद्भ्यां जातः। पद + यत्।) शूद्रः। इति मेदिनी॥ (यदुक्तं यजुषि।
"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः।
ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत॥")

पद्या, स्त्री, (पादाय हिता। शरीरावयवात् यत्।) "पद्यत्यतदर्थे।" ६। ३। ५२। इति पद्भावः।) स्मृतिः। इति विश्वः॥ पन्थाः। इत्यमरः। २। १। १५॥ (यथा, ऋग्वेदे। २। ३१। २।
"यदाशवः पद्याभिस्तितो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः॥" पादौ विध्यन्ति पद्याः शर्करा:। इति सिद्धान्तकौमुदी। "विध्यत्यधनुषा।" ४। ४। ८३। इति यत्। "पद्यत्यतदर्थे।" ६। ३। ५२। इति पदादेशः॥)

पद्रः, पुं, (पद्यतेऽस्मिन्निति। पद गतौ। "स्फायितञ्चीति।" उणां। २। १३। इति रक्।) ग्रामः। इति सिद्धान्तकौमुदीशब्दशब्दार्थचन्द्रिकोक्तिः॥ ग्रामपथः। इत्युणादिकोषः॥ भूलोकः। देशभेदः। इति संक्षिप्तसारोणादिवृत्तिः॥

पद्वः, पुं, (पद्यते गम्यतेऽस्मिन्नेन वा। पद गतौ "सर्व्वनिष्पद्यविभ्यो वेति।" उणां। १। १५३। इति निपातनात् सिद्धम्।) भूलोकः। रथः। इति संक्षिप्तसारोणादिवृत्तिः॥ पन्थाः। इत्युणादिकोषः॥

पद्वा, [न्] पुं, (पद्यते गम्यते यच्च। पद गतौ + "क्वामदिपदीति।" उणां। ४। ११२। इति वनिप्।) पन्थाः। इति संक्षिप्तसारोणादिवृत्तिः॥

पन, ङ इदुं। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) इदुंः स्तुतिः। पनायति पनायते विष्णुं धीरः। आयान्तत्वादुभयपदमिति वोपदेवः। अरे तु आयस्याप्राप्तिपक्षे आत्मनेपदमेव। ङ, अपनिष्ट पेने पनिता पनिष्यते पनिष्यते अपनिष्यत। इति दुर्गादासः॥

पनसः, पुं, (पनाय्यते स्तूयतेऽनेन देवः मनुष्यादिर्वेति। यद्वा पनायति स्तौति सन्तोषयतीत्यर्थः देवमनुष्यादीन् इति। पन स्तुतौ + "अत्यविचमितमीति।" उणां। ३। ११७। इति असच्।) फलवृक्षविशेषः। काँटाल इति भाषा॥ (यथा भागवते। ८। २। १०।
"चूतैः प्रियालैः पनसैरामैरात्रातकैरपि॥")
तत्पर्य्यायः। कण्टकिफलः २। इत्यमरः। २।४।६१॥ महासर्ज्जः ३ फलिनः ४ फलवृक्षकः ५ स्थूलः ६ कण्टफलः ७ मूलफलदः ८ अपुष्पफलदः ९ पूतफलः १० चम्पकोषः ११ चम्पालुः १२ कण्टकीफलः १३ रसालः १४ भद्रद्रुफलः १५ पानसः १६। इति शब्दरत्नावली॥ अस्य फलगुणाः। मधुरत्वम्। सुपिच्छिलत्वम्। गुरुत्वम्। बृंहत्वम्। बलवीर्य्यवृद्धिदत्वम्। श्रमदाहविशोषनाशित्वम्। रुचिकारित्वम्। आहित्वम्। परमदुर्ज्जरत्वञ्च। तद्बीजगुणाः। ईषत्कषायत्वम्। मधुरत्वम्। वातलत्वम्। गुरुत्वम्। रुच्यत्वम्। तत्फलविकारत्वगदोषनाशित्वञ्च।
"बालन्तु नीरसं वृद्धं मध्यं पक्वन्तु दीपनम्।
रुचिदं लवणाभ्यक्तं पनसस्य फलं स्मृतम्॥"
इति राजनिर्घण्टः॥ *॥
"पनसः कण्टकिफलः फलाग्रोऽतिबृहत्फलः।
पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम्॥
तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशम्।
बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतक्षयान्॥
आमन्तदेव विष्टम्भि वातलं तुवरं गुरु।
दाहकृन्मधुरं बल्यं कफमेदोविमर्द्दनम्॥
पनसोद्भूतबीजानि वृष्याणि मधुराणि च।
गुरूणि बह्ववर्चांसि कृच्छ्रमूत्राणि संवदेत्॥"
अन्यच्च।
"मज्जाः पनसजो वृष्यो वातपित्तकफापहः।
विशेषात् पनसं वर्ण्यं गुल्मिभिर्मन्दवह्निभिः॥
अलं पनसपाकाय फलं कदलसम्भवम्॥"
इति भावप्रकाशः॥ *॥
"कण्टाफलं सुमधुरं बृंहणं स्निग्धशीतलम्।
दुर्ज्जरं वातपित्तघ्नं श्लेष्मशुक्रबलप्रदम्॥
तदेव सर्पिषा युक्तं स्निग्धं वृद्धं बलप्रदम्।
कृच्छ्रिघ्नं न च चक्षुष्यं वृष्यञ्च वातपित्तजुत्॥
कण्टाफलमपक्वन्तु कषायं स्वादु वातलम्।
रक्तपित्तहरं स्वादु तत्फलास्थ्यपि तद्गुणम्॥"
इति राजवल्लभः॥

पनसतालिका, स्त्री, (पनसं दीर्घत्वेन स्तृत्यं यत्तालम्। तद्वत् फलमस्यस्याः। ठन्।) कण्टकिफलम्। इति शब्दमाला॥

पनसिका, स्त्री, (पनसवत् कण्टकमयाकृतिर्विद्यते यस्याः। पनस + ठन्।) क्षुद्ररोगविशेषः। स च कर्णमध्यजातव्रणः। तल्लक्षणं यथा,—
"कर्णस्याभ्यन्तरे जातां पिडकामुग्रवेदनाम्।
स्थिरां पनसिकां तान्तु विद्याद्वातकफोल्बणाम्॥"
तच्चिकित्सा यथा,—
"भिषक् पनसिकां पूर्व्वं स्वेदयेदथ लेपयेत्।
कल्कैर्मैनःशिलाकुष्ठनिग्धातालकदारुजैः॥
पक्वां विज्ञाय तां भित्त्वा व्रणवत् समुपाचरेत्॥"
इति भावप्रकाशः॥

पन्थाः, [इन्] पुं, पतन्ति यान्त्यनेन। (पत गतौ + "पतस्थ च।" उणां। ४। १२। इति इनिः थश्चान्तादेशः।) रथ्या। रास्ता इति भाषा॥ (यथा, मनुः। ४। ४५।
"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे॥")
तत्पर्य्यायः। अयनम् २ वर्त्म ३ मार्गः ४ अध्वा ५ पदवी ६ सृतिः ७ सरणिः ८ पद्धतिः ९ पद्या १० वर्त्मनी ११ एकपदी १२। इत्यमरः। २।१।१५॥ पथः १३ पदवि: १४ पदवी १५ सरणी १६ शरणिः १७ पद्धती १८ वर्त्मनि: १९। इति भरतः॥ शरणी २० वाटः २१ धर्म्मवर्त्मनम् २२ माथः २३ विबधः २४ वीवधः २५। इति शब्दरत्नावली॥ *॥

तस्य लक्षणम्।
"विंशद्धनूंषि विस्तीर्णो देशमार्गेषु तैः स्मृतः।
विंशद्धनुश्शतमार्गः सीमामार्गो दशैव तु॥
धनूंषि दश विस्तीर्णः श्रीमान् राजपथः स्मृतः।
वृषाजिरथनागानामसम्बाधः सुसञ्चरः॥
धनूंषि चैव चत्वारि शाखारथ्यासु निर्म्मिताः।

त्रिकराच्चोपरथास्तु द्विकराण्युपरश्चका ॥
जङ्घापथश्चतुर्थादक्षिपादस्य ग्रहान्तरम् ।
तृतीयपादखड्गपादः प्राग्वंशः पादकः स्मृतः ॥
अवकरः परीवारः पादमात्रः समन्ततः ॥"
इति देवीपुराणे गोपुरद्वारलक्षणाध्यायः ॥ * ॥
चतुष्पथलक्षणादि यथा,—
"एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे ।
तत्रस्थः साधयेद्योगी विद्यां त्रिभुवनेश्वरीम् ॥
चतुष्पथन्तु तत् प्रोक्तं त्रिकोणं यत्र वर्त्तते ॥"
इति नीलतन्त्रम् ॥ * ॥
पयगमनगुणाः ।
"अध्वा मेदःकफस्थौल्यसौकुमार्य्यविनाशनः ।
यत्तु चङ्क्रमणं नातिदेहपीड़ाकरं भवेत् ॥
तदायुर्बलमेधाग्निप्रदमिन्द्रियगोधनम् ॥"
इति राजवल्लभः ॥ * ॥
ब्राह्मणादिभ्यः पथावकाशो देयो यथा,—
"पन्था देयो ब्राह्मणाय स्त्रिये राज्ञे रथचक्षुषे ।
वृद्धाय भारयुक्ताय रोगिणे दुर्बलाय च ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥ * ॥
गोपथदानफलं यथा,—
"गोमार्गस्य तथा कर्त्ता गोलोके क्रीड़ते चिरम् ।"
इति प्रतिष्ठातत्त्वे हयशीर्षपञ्चरात्रम् ॥ * ॥
अस्याचारादाद्युपचारो यथा,—
"तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"
इति महाभारते ।३।३१२।११२। धर्म्मवकप्रश्ने युधिष्ठिरोत्तरम् ॥ * ॥ नरकविशेषः । यत्रा-टाच्यते । इति मनौ ४ अध्यायः ॥
पन्न, त्रि, (पद्यौ ड गतौ + "गत्यर्थेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्तः ।) च्युतम् । गलितम् । इत्यमरः । ३ । १ । १०४ ॥
पन्नः, पुं, (पन स्तुतौ + "कृवृजि षिदिपनीति ।" उणां । ३ । १० । इति नः स च नित् ।) अधो-गमनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
पन्नग, पुं, (पन्नं अधोगमनं पतितं वा गच्छ-तीति । गम ड गतौ + "सर्व्वत्र पन्नयोरुपसंख्या-नम् ।" ३ । २ । ४८ । इत्यस्य वार्त्तिं इति डः । पद्भ्यां न गच्छतीति वा विग्रहः ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥ (यथा, विष्णुपुराणे । १ । १७ । ७ ।
"पातालस्थं महात्मानं हिरण्यकशिपुं तदा ।
उपासाञ्चक्रिरे सर्व्वे सिद्धगन्धर्व्वपन्नगाः ॥")
ओषधीभेदः । पद्मकाष्ठम् । इति मेदिनी ॥
पन्नगकेशरः, पुं, (पन्नगवत् केशरो यस्य ।) नाग-केशरपुष्पम् । इति राजनिर्घण्टः ॥
पन्नगाशनः, पुं, (पन्नगं सर्पं अश्नातीति । अश्न भोजने + ल्युः । पन्नगः अशनं भक्ष्यो यस्येति वा ।) गरुड़ः । इत्यमरः । १ । १ । ३१ ॥
पन्नगी, स्त्री, (पन्नग + जातौ ङीष् ।) पन्नग-पत्नी । (यथा, भागवते । ३ । १६ । ११ ।
"तां स आपततीं वीक्ष्य भगवान् समवस्थितः ।
जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम् ॥")
मनसा देवी । यथा, तिथितत्त्वे ।
"पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥"
सर्पिणीक्षुपः । इति राजनिर्घण्टः ॥
पन्नद्धा, स्त्री, (पदि नह्धा बद्धा ।) चर्म्मपादुका । इति हेमचन्द्रः ॥
पन्नद्धी, स्त्री, (पदीश्वरणयोर्नद्धी ।) चर्म्मपादुका । इति त्रिकाण्डशेषः ॥
पपिः, पुं, (पाति लोकम् । पिबति वा । पा + "आदृगमहनजनः किकिनौ लिट् च ।" ३।२। १७१ । इति किः द्वित्वञ्च ।) चन्द्रः । पानकर्त्तरि त्रि । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, ऋग्वेदे ।६।२३।४। "पपिः सोमं दृढव्रतः ॥")
पपीः, पुं, (पाति लोकम् । पा रक्षणे + "यापोः कित् ईच्च ।" उणां । ३ । १५६ । इति ईक् द्वित्वञ्च ।) सूर्य्यः । चन्द्रः । इत्युणादिकोषः ॥
पपुः, पुं, (पाति रक्षतीति । "कुर्भ्रञ्छेति ।" उणां । १ । २३ । इति चकारात् अन्यतोऽपि कुर्द्वित्वञ्च ।) पालकः । धात्र्यां स्त्री । इत्युणादि-कोषः ॥
पमरा, स्त्री, गन्धद्रव्यविशेषः । सल्लकी इति ख्याता । अस्यागुलेपनगुणः । परमालक्ष्मीरक्षोज्वर-नाशित्वम् । इति राजवल्लभः ॥
पम्पा, स्त्री, (पाति रक्षति महर्ष्यादीन् स्वीय-पवित्रसलिलदानादिभिरिति शेषः । पा पालने + "स्वप्य-श्रिल्य-श्रव्य-वाव्य-रूप-पम्पा-तल्पाः ।" उणां । ३ । २८ । इति निपातनात् ह्रस्वत्वे मुड़ा-गमत्वे च साधुः ।) ओड्रदेशस्थनदीविशेषः । इत्युणादिकोषः ॥ (यथा, रघुः । १३ । ३० ।
"दूरावतीर्णा पिबतीव खेदा-
दमूनि पम्यासलिलानि दृष्टिः ॥"
इयं हि ऋष्यमूकपर्व्वतसन्निकटस्था । इति रामायणम् ॥)
पम्ब, गतौ । (भ्वां-परं-सकं-सेट् ।) ओष्ठ्यवर्ग-शेषोपधः । पम्बति । इति दुर्गादासः ॥
पय, ड गतौ । इति कविकल्पद्रुमः ॥ (भ्वां आत्मं-सकं सेट् ।) ड, पयते । इति दुर्गादासः ॥
पयः, [स्] क्ली, (पय्यते पीयते वा पय गतौ पी ड पाने वा + "सर्व्वधातुभ्योऽसुन् ।" उणां । ४ । १८८ । इत्यसुन् ।) जलम् । (यथा, रघुः ।१।६७। "पयः पूर्व्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते ॥") दुग्धम् । इति मेदिनी ॥ (यथा, मनुः । ३ । ८२ । "कुर्य्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्व्वापि पितृभ्यः प्रीतिमावहन् ॥")
पयःकन्दा, स्त्री, (पयः कन्दे यस्याः ।) क्षीर-विदारी । इति राजनिर्घण्टः ॥
पयःफेनी, स्त्री, (पयो दुग्धमिव फेनमस्याः । गौरा-दित्वात् ङीष् ।) दुग्धफेनीक्षुपः । इति राज-निर्घण्टः ॥
पयश्चयः, पुं, (पयसां चयः समूहः ।) जलसमूहः । तत्पर्य्यायः । पूरः २ वेल्लिः ३ । इति जटाधरः ॥
पयस्य, त्रि, (पयसो विकारस्तत्र हितं वा । पयस् + "गोपयसोर्यत् ।" ४ । ३ । १६० । इति यत् ।) पयोविकारः । घृतदध्यादि । इत्यमरः । २ । ६ । ५१ ॥ पयोहितम् । इति मेदिनी ॥
पयस्यः, पुं, (पयः पिबतीति ।) विड़ालः । इति शब्दचन्द्रिका ॥
पयस्या, स्त्री (पयस्य + टाप् ।) दुग्धिका । क्षीर-काकोली । स्वर्णक्षीरी । इति मेदिनी ॥ अर्क-पुष्पिका । इति रत्नमाला ॥ कुटुम्बिनीक्षुपः । इति राजनिर्घण्टः ॥ आमिक्षा । इति हेम-चन्द्रः ॥
पयस्वलः, पुं, (पयोऽस्त्यस्य । पयस् + "अन्येभ्यो-ऽपीति ।" वलच् ।) छागः । इति राज-निर्घण्टः ॥
पयस्विनी, स्त्री, (पयो विद्यतेऽस्याः । "अस्माया-मेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ततो ङीष् ।) नदी । (प्रशस्तजल-वत्त्वात्तथा पुण्यसलिलत्वाद् गङ्गा । यथा, काशी-खण्डे गङ्गासहस्रनामकीर्त्तने । २६ । १०६ । "परापरफलप्राप्तिः पावनी च पयस्विनी ॥")
धेनुः । (यथा, रघुः, । २ । २१ ।
"प्रदक्षिणीकृत्य पयस्विनीन्तां
सुदक्षिणा साक्षतपात्रहस्ता ॥")
रात्रिः । इति मेदिनी ॥ काकोली । क्षीर-काकोली । दुग्धकेनी । क्षीरविदारी । छागी । इति राजनिर्घण्टः ॥ जीवन्ती इति भावप्रकाशः ॥ (गायत्रीस्वरूपा महादेवी । यथा, देवीभाग-वते । १२ । ६ । ६६ ।
"प्रज्ञावती सुता पौत्री पुत्रपूज्या पयस्विनी ॥")
पयोगड़ः, पुं, (पयसो गड़ इव ।) घनोपलः । द्वीपः । इति शब्दमाला ॥
पयोघनः, पुं, (पयोभिर्घनः सान्द्रः ।) घनोपलः । इति हारावली ॥
पयोजन्मा, [न्] पुं, (पयसो जलस्य जन्म यस्मात् ।) मेघः । इति शब्दमाला ॥
पयोधरः, पुं, (धरतीति धरः । धृ + अच् । पयसो दुग्धस्य जलस्य वा धरः ।) स्तनः । (यथा, रघुः । १४ । २२ ।
"वड़ानलापीतपयोधरासु
नेता च मूलामिव कृत्तिकासु ॥")
मेघः । इत्यमरः । ३ । ३ । १६३ ॥ कोषकारः । नारिकेलम् । कणेरु । इति मेदिनी ॥
पयोधाः, [स्] पुं, (पयो जलं दधातीति । डु धा असि धारणे + "पयसि च ।" उणां । ४ । २२६ । इति असिः ।) समुद्रः । जलाधारः । इत्युणादि-कोषः ॥
पयोधिः, पुं, (पर्य्यांसि धीयन्तेऽस्मिन् । डु धा क् + "कर्म्मण्यधिकरणे च ।" ३ । ३ । ६३ । इति किः ।) समुद्रः । इति राजनिर्घण्टः ॥
पयोधिकं, क्ली, (पयोधौ समुद्रे कायति प्रका-शते इति । के + कः ।) समुद्रफेनः । इति राजनिर्घण्टः ॥

पयोनिधिः, पुं, (पयांसि निधीयन्तेऽस्मिन् । धा धारणे + अधिकरणे किः ।) समुद्रः । यथा,—
"न गणितं यदि जन्म पयोनिधौ
हरशिरःस्थितिभूरपि विस्मृता ।"
इति नैषधे । ४ । ५० ॥ (पय इव शुक्लः सत्त्वगुणः निधीयतेऽत्र इति विग्रहे । शिवः । यथा, महाभारते । १३ । १७ । ८७ ।
"लक्ष्मणो लक्ष्मितोऽत्र महामायः पयोनिधिः ॥")

पयोरः, पुं, (पयो जलं रातीति । रा + कः ।) खदिरः । इति शब्दचन्द्रिका ॥

पयोलता, स्त्री, (पयः क्षीरं तेनाढ्या लता ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

पयोव्रतः, पुं, (पयोमात्रपानसाध्यो व्रतः ।) पयोमात्रपानरूपव्रतविशेषः । यथा,—
"पुण्यां तिथिं समासाद्य युगमन्वन्तरादिकम् ।
पयोव्रतस्त्रिरात्रं स्यादेकरात्रमथापि वा ॥"
इति मात्स्ये १५२ अध्यायः ॥ * ॥

द्वादशाहसाध्यविष्णुव्रतविशेषः । यथा,—
कश्यप उवाच ।
"एतन्मे भगवान् पृष्टः प्रजाकामस्य पद्मजः ।
यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥
फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ।
अर्चयेदरविन्दाक्षं भक्त्या परमयान्वितः ॥
सिनीवाल्यां स्पृशालिप्य स्नायात् क्रोडविदीर्णया ।
यदि लभ्येत वै स्रोतस्तेनाम्भसुदीरयेत् ॥
त्वं देवादिवराहेण रसायाः स्थानमिच्छता ।
उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥
निर्व्वर्त्तितात्मनियमो देवमर्च्चेत् समाहितः ।
अर्घ्यायां स्थण्डिले सूर्य्ये जले वह्नौ गुरावपि ॥
नमस्तुभ्यं भगवते पुरुषाय महीयसे ।
सर्व्वभूतनिवासाय वासुदेवाय साक्षिणे ॥
नमोऽस्तवक्ताय सूक्ष्माय प्रधानपुरुषाय च ।
चतुर्विंशदगुणज्ञाय गुणसंख्यानहेतवे ॥
नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे ।
सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥
नमः शिवाय रुद्राय नमः शक्तिधराय च ।
सर्व्वविद्याधिपतये भूतानां पतये नमः ॥
नमो हिरण्यगर्भाय प्राणाय जगदात्मने ।
योगैश्वर्य्यशरीराय नमस्ते योगहेतवे ॥
नमस्त आदिदेवाय साक्षिभूताय ते नमः ।
नारायणाय ऋषये नराय हरये नमः ॥
नमो मरकतश्यामवपुषेऽधिगतश्रिये ।
केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥
त्वं सर्व्ववरदः पुंसां वरेण्य वरदर्षभ ! ।
अतस्ते श्रेयसे धीराः पादरेणुमुपासते ॥
अन्ववर्त्तन्त यं देवाः श्रीश्च तत्पादपद्मयोः ।
सृहयन्त इवामोदं भगवान्मे प्रसीदताम् ॥
एतैर्मन्त्रैर्हरेः कुर्य्यादावाहनपुरस्कृतम् ।
अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥
अर्चित्वा गन्धमाल्याद्यैः पयसा स्नापयेद्विभुम् ।
वस्त्रोपवीताभरणपाद्योपस्पर्शनेक्षतैः ॥
गन्धधूपादिभिश्चार्च्चेद्द्वादशाक्षरविद्यया ।
हुतं पयसि नैवेद्यं प्राश्यान्नं विभवे सति ॥
सर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ।
निवेदितं तद्भक्ताय दद्याद्भुञ्जीत वा स्वयम् ॥
दत्त्वाचमनमर्च्चित्वा ताम्बूलञ्च निवेदयेत् ।
जपेदष्टोत्तरशतं स्तवीत स्तुतिभिः प्रभुम् ॥
कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दण्डवन्मुदा ।
कृत्वा शिरसि तत्पूजां देवसद्वासयेत्ततः ॥
द्वावरान् भोजयेद्विप्रान् पायसेन यथोचितम् ।
भुञ्जीत तैरनुज्ञातः शेषं सैष्टः सभाजितैः ॥
ब्रह्मचार्य्यथ तद्रात्र्यां शेषभूते प्रथमेऽहनि ।
स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ॥
पयसा स्नापयित्वार्च्चेद्यावद्व्रतसमापनम् ।
पयोभक्षो व्रतमिदं चरेद्विष्णोर्व्रतोत्तमम् ॥
पूर्ब्ववद्धुत्वादद्यि ब्राह्मणांश्चापि भोजयेत् ।
एवन्द्वादशः कुर्य्यादृद्वादशाहं पयोव्रतम् ॥
हरेराराधनं होममर्हयं द्विजतर्पणम् ।
प्रतिपद्दिनमारभ्य यावत् शुक्लत्रयोदशीम् ॥
ब्रह्मचर्य्यमधःस्वप्नं स्नानं त्रिसवनञ्चरेत् ।
वर्ज्जयेदसदालापं भोगानुद्वाहवर्त्तनम् ॥
अहिंसः सर्व्वभूतानां वासुदेवपरायणः ।
त्रयोदश्यामथो विष्णोः स्नपनं पञ्चकैर्विभोः ॥
कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ।
पूजाञ्च महतीं कुर्य्यादृवित्तशाठ्यविवर्ज्जितः ॥
चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ।
सूक्तेन तेन पुरुषं यजेत सुसमाहितः ॥
नैवेद्यमतिगुणवद्दद्यात् पुरुषतुष्टिदम् ।
आचार्य्यं ज्ञानसम्पन्नं वस्त्राभरणधेनुभिः ॥
तोषयेदृत्विजश्चैव तद्विद्धारादिधनं हरेः ।
भोजयेत्तान् गुणवता सदन्नेन शुचिस्मिते ॥
अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागताः ।
दक्षिणां गुरवे दद्याद्दत्विग्भ्यश्च यथार्हतः ॥
अन्नादीनाश्वपाकांश्च प्रीणयेत् समुपागतान् ।
सत्त्ववत्सु च सर्व्वेषु दीनान्धकृपणेषु च ॥
विष्णोस्तत् प्रीणनं विद्वान् भुञ्जीत सह बन्धुभिः ।
नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचनैः ॥
कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम् ।
एतत् पयोव्रतं नाम पुरुषाराधनं परम् ॥
पितामहेनाभिहितं मया ते समुदाहृतम् ।
त्वञ्चानेन महाभागे ! सम्यक् चीर्णेन केशवम् ॥
आत्मना शुद्धभावेन नियतात्मा भजाव्ययम् ।
अयं वै सर्व्वयज्ञाख्यः सर्व्वव्रतमिति स्मृतम् ॥
तपःसारमिदं भद्रे दानश्रेष्ठरतर्पणम् ।
त एव नियमाः साक्षात्त एव च यमोत्तमाः ॥
तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ।
तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धया चर ॥
भगवान् परितुष्टस्ते वरानाशु विधास्यति ॥"
इति श्रीभागवते ८ स्कन्धे १६ अध्यायः ॥

पयोष्णी, स्त्री, (पयः सलिलं उर्व्वां उष्णगुणं वा ऽस्याः ।) नदीविशेषः । सा विन्ध्याचलदक्षिणे प्रसिद्धा । अस्या जलगुणाः ।
"पयोष्णीसलिलं रुच्यं पवित्रं पापनाशनम् ।
सर्व्वामयहरं सौख्यबलकान्तिप्रदं लघु ॥"
इति राजनिर्घण्टः ॥

परं, क्ली, (पॄ + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) केवलम् । इति मेदिनी ॥ मोक्षः । यथा । कैवल्यमन्तं परम् । इति मुक्तिपर्य्यायरत्नावली ॥ (ब्रह्म ब्रह्मा च । यदुक्तं श्रुतौ ।
"द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव च ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । २० ।
"प्रभूतस्त्रिककुद्धाम पवित्रं मङ्गलं परम् ॥"
ब्रह्मण आयुः । यथा, मार्कण्डेये । ४६ । ४२ ।
"एवन्तु ब्रह्मणो वर्षमेकं वर्षशतन्तु तत् ।
शतं हि तस्य वर्षाणां परमित्यभिधीयते ।
पञ्चाशद्विस्तथावर्षैः परार्द्धमिति कीर्त्यते ॥")

परं, [म्] व, नियोगः । शेषः । इति मेदिनी ॥

परः, पुं, (पॄ + अच् ।) शत्रुः । इत्यमरः ॥ (यथा, रघुः । ७ । ६७ ।
"इतः परानर्भकहार्य्यशस्त्रान्
वैदर्भि ! पश्चानुमता मयासि ॥")
ब्रह्मण आयुः । यथा,—
"कालसंख्यां समासेन पूर्ब्वार्द्धेऽयकल्पिताम् ।
स एव स्यात् परः कालस्तदन्ते परिपूज्यते ॥
निजेन तस्य मानेन चायुर्ब्वर्षशतं स्मृतम् ।
तत् पराख्यं तदर्द्धञ्च परार्द्धमभिधीयते ॥"
अपि च ।
"त्रीणि कल्पशतानि स्युरुक्तया यद्विर्द्विजोत्तमाः ।
ब्रह्मणः कथितं वर्षं पराख्यं तच्च तत् पदम् ॥"
इति कौर्म्मे ५ अध्यायः ॥
(शिवः । यथा, तत्रैव । १३ । १७ । ६७ ।
"कपिलः कपिशः शुक्र आयुश्चैव परोऽपरः ॥")

परः, त्रि, श्रेष्ठः । (यथा, आर्य्यासप्तशत्याम् । ३५५ ।
"परमोहनाय सुरो निष्करुणो
तरुणि ! तव कटाक्षोऽयम् ।
विशिख इव कलितकर्णः
प्रविशति हृदयं निःसरति ॥")
अरिः । दूरः । अन्यः । उत्तरः । इति मेदिनी ॥ * ॥
न्यायमते द्रव्यगुणकर्म्मवृत्तिसत्ता । इयं व्यापकजातिः । यथा,—
"सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥
परभिन्ना तु या जातिः सैवापरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च ॥"
इति भाषापरिच्छेदे । ८—६ ॥ * ॥

परान्नादिभक्षणादेः श्रीनाशकत्वं यथा,—
"परान्नञ्च परस्वञ्च परस्त्रियः परक्षितेः ।
परवेश्मनि वासञ्च शक्रादपि हरेच्छ्रियम् ॥"
इति गरुडपुराणम् ॥ * ॥

श्रेष्ठवाचकपरशब्दप्रयोगाः । यथा,—
"अन्नदातुः शतगुणोऽभीष्टदेवः परः स्मृतः ।
गुरुस्तस्माच्छतगुणो विद्यामन्त्रप्रदायकः ॥

अज्ञानतिमिराच्छन्नं ज्ञानदीपेन चक्षुषा ।
यः सर्व्वार्थं दर्शयति तत्परः कोऽपि बान्धवः ॥
गुरुदत्तेन मन्त्रेण तपसेष्टसुरं लभेत् ।
सर्व्वज्ञत्वं सर्व्वसिद्धिं तत्परः कोऽपि बान्धवः ॥
पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कापथ्यात् स महापातकी शिव ! ॥
नास्ति वेदात् परं शास्त्रं न हि ज्ञानात् परः सुरः ।
नास्ति गङ्गासमं तीर्थं न पुण्यं तुलसीपरम् ॥
क्षमावती भूपरा न पुत्रान्नास्ति परः प्रियः ।
न च देवात् परः शक्तो व्रतं नैकादशीं विना ॥
शालग्रामात् परो यत्नो न चैत्रं भारतात् परम् ।
परं पुण्यस्थलानाञ्च पुण्य वृन्दावनं यथा ॥
मोक्षदानां यथा काशी वैद्यानां यथा शिवः ।
न पार्व्वत्याः परा साध्वी न गणेशात् परो वशी ॥
न च विद्यासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४४ अध्यायः ॥

परःशतं, त्रि, शतात् परम् । शताधिकसंख्या । इत्यमरः । ३ । १ । ६४ ॥

परःश्वः, [स्] व्य, श्वो दिनात् परमह्नः परःश्वः परः सहस्रवत् पारस्करादित्वात् सुट् परःश्व इति मधुः । सुटं नेच्छन्त्यन्ये परश्व इत्याहुः । अतिक्रान्ते पूर्व्वतरे दिने परश्वो जात इति प्रयोगो गौणः तत्र परश्च तत् श्वश्चेति कर्म्मधारयः । इति भरतः ॥ श्वः पराहः । इत्यमरः । ३ । ४ । २२ ॥ परश्व । इति भाषा ॥

परःसहस्रं, त्रि, सहस्रात् परम् । सहस्राधिकसंख्या । इत्यमरटीका ॥

परकीयं, त्रि, (परस्येदम् । "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः । "कुगज्जनस्य परस्य च ।" इति कुक् ।) परसम्बन्धि । (यथा, मनुः । ४ । २०१ ।
"परकीयनिपानेषु न स्नायाच्च कदाचन ॥")

परकीया, स्त्री, (परकीय + टाप् ।) नायिकाभेदः । अस्या लक्षणं यथा । अप्रकटपरपुरुषानुरागा । सा च द्विविधा । परोढ़ा १ कन्यका च २ । कन्यायाः पित्राद्यधीनतया परकीयत्वम् । अस्या गुप्तैव सकला चेष्टा ॥*॥
परोढ़ा यथा,—
"अयं रेवाकुञ्जः कुसुमशरसेवासमुचितः
समीरोऽयं वेलादरविलसदैलापरिमलः ।
इयं प्रावृड्धन्या नवजलदविन्यासचतुरा
पराधीनं चेतः सखि ! किमपि कर्त्तुं न्यगयते ॥"*
गुप्ताविदग्धालक्षिताकुलटानुशयानासुदिताप्रभृतीनां परकीयायां एवान्तर्भावः । गुप्ता त्रिविधा । दृष्टसुरतगोपना १ वर्त्तिष्यमाणसुरतगोपना २ वर्त्तमानसुरतगोपना च ३ । त्रिविधा यथा,—
"श्वश्रूः क्रुध्यतु विद्विषन्तु सुहृदो निन्दन्तु वा यातरस्मिन् किन्तु न मन्दिरे सखि । पुनः स्वापो विधेयो मया ।
आखोराक्रमणाय कोणकुहराद्युत्फालमातन्वती मार्ज्जारी नखरैः खरैः क्षतवती कां कां न मे दुर्दशाम् ॥" * ॥
विदग्धा द्विविधा । वाग्विदग्धा १ क्रियाविदग्धा चेति २ । प्रथमा,—
"निविड़तमतमालमल्लिवल्ली-
विचकिलराजिविराजितोपकण्ठे ।
पथिकसमुचितस्रवाद्यतीर्त्रे
सवितरि तत्र सरित्तटे निवासः ॥"
द्वितीया यथा,—
"दासाय भवनगाथे वदरीमपनेतुमादिशति ।
हेमन्ते हरिणाक्षी पयसि कुठारं विनिक्षिपति ॥" * ॥
लक्षिता यथा,—
"यद्भूतं तद्भूतं यद्भूयात्तदपि वा भूयात् ।
यद्भवतु तद्भवतु वा विफलस्तव गोपनायासः ॥"*
कुलटा यथा,—
"एते वारिकणान् किरन्ति पुरुषान् वर्षन्ति नाम्भोधराः
शैलाः शाद्वलसङ्गमन्ति न स्रजन्त्येते पुनर्नायकान् ।
त्रैलोक्ये तरवः फलानि सृजते नैवारभन्ते जनान्
धातः ! कातरमालपामि कुलटाहेतोस्त्वया किं कृतम् ॥"
अपि च ।
"पृथ्वी तावच्चिकीर्षा विपुलनदनदीग्रावरुद्धं तदर्द्धं
तस्यामेवास्ति शैली विपिनमपि तथा चैत्रकासारकूपाः ।
लोकानामर्द्धनारी शिशुरपि जरसः कोऽपि रोगी विवेकी
मिथ्यावादी ममायं सुखरसुखवरः पुंश्चली पुंश्चलीति ॥" * ॥
अनुशयाना त्रिविधा ।
वर्त्तमानस्थानविघट्टनेन भाविस्थानाभावशङ्कया स्थानधिष्ठितसङ्केतस्थले भर्त्तुरगमनानुमानेन प्रत्येकं उदाहरणानि ।
"समुपागतवति चैत्रे निपतति पत्रे लवङ्गलतिकायाः ।
सुदृशः कपोलपाली शिव शिव तालीदलद्युतिं लेभे ॥"*॥
"निद्राक्लेकिमिथुनानि कपोतपोत-
व्याधूतनूतनमहीरुहपल्लवानि ।
तन्वापि तन्वि ! न वनानि कियन्ति सन्ति
यिद्यस्य न प्रियतमस्य गृहं प्रयाहि ॥
कर्णकल्पितरसालमञ्जरी-
पिञ्जरीकृतकपोलमण्डलः ।
निघ्नतन्नयनवारिधारया
राधया मधुरिपुर्निरीक्ष्यते ॥" * ॥
मुदिता यथा,—
"गोष्ठेषु तिष्ठति पतिर्वधिरा ननन्दा
नेत्रद्वयस्य न च पाटवमस्ति यातुः ।
इत्थं निगद्य सुतनुः कुचकुम्भसौम्नि
रोमाञ्चकञ्चुकमुदञ्चितमातनोति ॥" * ॥
कन्यका यथा,—
'किञ्चित्कुञ्चितहारयष्टिसरलभ्रूवल्लिसाचिस्मितं
प्रान्तभ्रान्तविलोचनद्युतिभुजा पर्य्यस्तकर्णोत्पलम् ।
व्यङ्गुल्या स्फुरदङ्गुलीयकरुचा कर्णस्य कण्डूयनं
कुर्व्वाणा वृषकन्यका सुकृतिनं सव्याजमालोकते ॥"
इति रतिमञ्जरी ॥

परक्षेत्रं, क्ली, (परस्य क्षेत्रं पत्न्यादि ।) परपत्नी । (यथा, मनुः । ३ । १७५ ।
"तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च ।
दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम् ॥")
परशरीरम् । परभूमिः । यथा,—
"दृष्ट्वापेहि परक्षेत्रादायाति क्षेत्रकः ।"
इति चन्द्रालोकः ॥
(तथा च मनुः । ८ । ३४१ ।
"द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविमौ हे च शूलके ।
व्याददानः परक्षेत्रात्र दण्डं दातुमर्हति ॥")

परयन्थिः, पुं, (परेण ग्रन्थिर्यत्र ।) पर्व्वावधिः । अङ्गुलिपर्व्व । इति हारावली ॥

परच्छन्दः, त्रि, (परस्य छन्दो यत्र ।) पराधीनः । इति हेमचन्द्रः ॥

परच्छिद्रं, क्ली, (परस्य छिद्रम् ।) परदोषः । यथा.
"नीचः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥"
इति गरुड़पुराणम् ॥

परजातः, त्रि, (परेण जातः । परपुष्टत्वात्तथात्वम् ।) परेधितः । औदासीन्येन परपुष्टः । परपोषितत्वात् । परस्माज्जातः । इत्यमरभरतौ ॥ अन्येनोत्पन्नश्च ॥ (कोकिले पुं । एष हि काकेन पुष्टो भवतीति प्रसिद्धिः ॥)

परजितः, त्रि, (परेण जितः ।) परपुष्टः । शत्रुणा पराजितः । इति केचित् ॥

परञ्जः, पुं, (परं जयतीति । जि जये + बाहुलकात् डः ।) तैलयन्त्रम् । क्षुरिकाफलः । फेनः । इति मेदिनी ॥

परञ्जनः, पुं, (परायाः पश्चिमस्या दिशो जनः स्वामी । निपातनात् साधुः ।) वरुणः । इति हेमचन्द्रः ॥

परञ्जयः, पुं, (परां पश्चिमां दिशं जयति स्वामित्वेन । जि + अच् । सर्व्वनाम्नः वृत्तौ पुंवद्भावः सुम् च ।) वरुणः । इति त्रिकाण्डशेषः ॥ शत्रुजयकर्त्ता । परान् जयतीति खप्रत्ययनिष्पन्नः ॥

परतन्त्रः, त्रि, (परस्तन्त्रं प्रधानं यस्य ।) पराधीनः । इत्यमरः ॥ (यथा, महाभारते । १३ । २ । १५ ।
"परतन्त्रं कथं हेतुमात्मानमनुपश्यसि ।
कर्म्मणां हि महाभाग ! सूक्ष्मं ज्ञेयमतीन्द्रियम् ॥"
परस्य तन्त्रं इति विग्रहे क्ली । परकीयशास्त्रम् । परं श्रेष्ठं तन्त्रमिति विग्रहे । उत्कृष्टशास्त्रम् । उत्तमपरिच्छदम् ॥)

परत्रभीरुः, त्रि, (परत्र परलोकान्तरघटनाविषये भीरुः ।) धार्म्मिकः । परकालभयशीलः । यथा,—

"परत्रभीरुं धर्म्मिष्ठसुदृक्तं क्रोधवर्ज्जितम् ॥"
इति मिताक्षरायां कात्यायनः ॥

परत्वं, क्ली. परस्य भावः । परता । न्यायमते तद्द्विविधम् । दैशिकम् १ । तत्तु बहुतरसूर्य्यसंयोगज्ञानजन्यगुणः । कालिकम् २ तच्च बहुतरकालान्तरितत्वज्ञानजन्यगुणः । एतद्द्वयं मूर्त्तपदार्थगुणः । दैशिकपरत्वस्यासमवायिकारणं दिक्शरीरसंयोगः । कालपरत्वस्यासमवायिकारणं कालपिण्डसंयोगः । ते अपेक्षाबुद्धिजन्ये । तन्नाशनाश्ये च । यथा,—
"परत्वञ्चापरत्वञ्च द्विविधं परिकीर्त्तितम् ।
दैशिकं कालिकञ्चापि मूर्त्त एव तु दैशिकम् ॥
परत्वं सूर्य्यसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥
तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिष्पन्दपूर्व्वोत्पन्नत्वबुद्धितः ॥
परत्वमपरत्वन्तु तदनन्तरबुद्धितः ।
अत्र त्वसमवायी तु संयोगः कालपिण्डयोः ॥
अपेक्षा बुद्धिनाश्याच्च नाश्यस्तेषां निरूपितः ।"
इति भाषापरिच्छेदः ॥

परदारः, (परस्य दाराः ।) परभार्य्या । तद्गमने दोषो यथा, कर्म्मलोचनम् ॥
"परदाररताश्चैव परद्रव्यहराश्च ये ।
अधोऽधो नरके यान्ति पीड्यन्ते यमकिङ्करैः ॥"
"ब्राह्मणः क्षत्रियो वैश्यो यो रतः परयोषिति ।
याति तस्यापूजितस्य रुषा लक्ष्मीर्गृहादपि ॥
इहातिनिन्द्यः सर्व्वत्र नाधिकारी स्वकर्म्मसु ।
परत्रैवान्धकूपे च यावदर्षशतं वसेत् ॥
अपि च ।
"किन्तज्जपेन तपसा मौनेन च व्रतेन च ।
सुरार्च्चनेन तीर्थेन स्त्रीभिर्यस्य मनो हृतम् ॥
सर्व्वमायाकरञ्चैव धर्म्ममार्गार्गलं नृणाम् ।
अवधानञ्च तपसां दोषाणामाश्रमं परम् ॥
कर्म्मबन्धनिबद्धानां निगड़ं कठिनं सुत ! ।
प्रदीपरूपं कीटानां मीनानां बड़िशं यथा ॥
विषकुम्भं दुग्धसुखमारम्भे मधुरोपमम् ।
परिणामे दुःखबीजं सोपानं नरकस्य च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३० । ६१ अध्यायः ॥ * ॥
"यस्तु पाणिग्रहीतीं तां हित्वान्यां योषितं व्रजेत् ।
अगम्यागमनं तद्धि सद्यो नरककारणम् ॥
नित्यं नैमित्तिकं काम्यं यागयोग्यव्रतादिकम् ।
क्षेत्रतीर्थाटनं तस्मिन् वासो धर्म्मक्रियादिकम् ॥
स्वाध्यायादि तपो दैवं पैत्रं कर्म्म वरानने ! ।
यात्रैतन्निष्फलं सर्व्वं परस्त्रीगमनान्नृणाम् ॥
परदाराभिगमनात् कोटि एकादशीव्रतम् ।
अपरं किमु वक्तव्यं निष्फलं निरये स्थितिः ॥
सत्यं सत्यं पुनः सत्यं सत्यमेव ब्रवीमि ते ।
परयोनौ पतन् बिन्दुः कोटिपूजां विनाग्रयेत् ॥"
इति पाद्मोत्तरखण्डे ७५ अध्यायः ॥ * ॥
अपि च ।
"त्याज्यं धर्म्मान्वितैर्नित्यं परदारोपसेवनम् ।
नयन्ति परदारा हि नरकानेकविंशतिम् ॥
सर्व्वेषामेव वर्णानामेष धर्म्मो ध्रुवोऽन्यक ! ॥
एवं पुरा सुरपते ! देवर्षिरसितोऽब्रवीत् ।
प्राह धर्म्मश्चवस्थानं खगेन्द्रायारुणाय हि ।
तस्मात् सुदूरतो वर्जेत् परदारान् विचक्षणः ।
नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥"
इति वामने ६३ अध्यायः ॥

परदुःखं, क्ली, (परेषां दुःखम् ।) अन्यजनपीड़ा । यथा,—
"त्यक्तात्मसुखभोगेच्छां सर्व्वसत्त्वसुखेषिणः ।
भवन्ति परदुःखेन साधवो नित्यदुःखिताः ॥
परदुःखातुरा नित्यं स्वसुखानि महान्त्यपि ।
नापेक्षन्ते महात्मानः सर्व्वभूतहिते रताः ॥"
इत्यग्निपुराणम् ॥

परदेवी, [नृ] त्रि, (परेभ्योदेवीति । पर + दिव् + णिनिः ।) विदूषकः । परदेवा । इति शब्दमाला ॥

परध्यानं, क्ली, (परं श्रेष्ठं ध्यानम् ।) ध्यानविशेषः । यथा,—
"ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् ॥
यत्तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तके ॥"
इति गरुड़पुराणम् ॥
(परस्य ब्रह्मणोध्यानं यद्वा परं ब्रह्मविषयकं ध्यानमिति । ब्रह्मचिन्तनम् ॥ परेषां ध्यानमितिविग्रहे । परानिष्टचिन्तनम् ॥)

परन्तपः, त्रि, (परान् शत्रून् तापयतीति । तप सन्तापे "इषितृपरयोस्तापेः ।" ३ । २ । ३६ । इति खच् । "खचि ह्रस्वः ।" ६ । ४ । ६४ । इति उपधाया ह्रस्वत्वे सुम् ।) परतापी । (यथा, भट्टिः । १ । १ ।
"अभूभृयो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः ॥")
(जितेन्द्रियः । इति चिन्तामणिः ॥ तामसमनोः पुत्रभेदः । यथा, हरिवंशे । ७ । २४ ।
"द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोधनः ।
तपोरतिरकल्माषस्तन्वीधन्वी परन्तपः ।
तामसस्य मनोरेते दशपुत्रा महाबलाः ॥"
नृपविशेषः । असौ हि मगधेश्वरः । यदुक्तं रघौ । ६ । २१ ।
"असौ शरण्यः शरणोन्मुखानां
मगधसत्त्वो मगधप्रतिष्ठः ।
राजा प्रजारञ्जनलब्धवर्णः
परन्तपो नाम यथार्थनामा ॥")

परपदं, क्ली, (परं श्रेष्ठं पदम् ।) श्रेष्ठस्थानम् । मुक्तिः । यथा,—
"कल्याणानां निदानं कलिमलमथनं जीवनं सज्जनानां
पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य ।"
इति महानाटकम् ॥
(परस्य परेषां वा पदं स्थानमितिविग्रहे-पदराट्टम् ॥)

परपाकनिवृत्तः, पुं, (परार्थात् पाकात् निवृत्तः ।) परोद्देश्यकपाकरहितः । पञ्चयज्ञाकर्त्ता । यथा,—
"गृहीत्वाग्निं समारोप्य पञ्चयज्ञान्न निर्व्वपेत् ।
परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्त्तितः ॥"
इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

परपाकरतः, पुं, (परस्य पाके रतः ।) परपाकरुचिः । प्रातः पञ्चयज्ञान्निर्व्वर्त्त्य परान्नभोजी । यथा,—मिताक्षरायां प्रायश्चित्ताध्याये ।
"पञ्चयज्ञान् स्वयं कृत्वा परान्नमुपजीवति ।
सततं प्रातरुत्थाय परपाकरतस्तु सः ॥"* ॥
परपाकनिवृत्तपरपाकरतयोरन्नभोजने दोषो यथा,—
"परपाकनिवृत्तस्य परपाकरतस्य च ।
अपक्वस्य च भुक्तान्नं द्विजश्चान्द्रायणञ्चरेत् ॥"
इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

परपिण्डादः, त्रि, (परस्य पिण्डं अन्नादिकमत्तीति । अद् लौ भक्षणे + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) परान्नोपजीवी । इत्यमरः । ३ । १ । २० ॥

परपुरुषः, पुं, (परः श्रेष्ठः पुरुषः ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (परोऽन्यः पुरुषः ।) अन्यपुमान् । उपनायकः । यथा,—
"राजन् जीवावधानं कुरु शृणु निभृतं प्रेयसीनां कुचेष्टा
एका ते कौलिकान्ता जगदटनपरा विश्वभोग्या परा श्रीः ।
या वा पाणौ गृहीता विधिवदसिलता मुग्धधारेति मत्वा
सोत्कण्ठं सापि नित्यं परपुरुषगतं मारभावादुपैति ॥"
इति कर्णाटराजस्मृति कालिदासः ॥

परपुष्टः, पुं, (परेण काकेन पुष्टः पालितः । डिम्भस्फोटनाक्षमया कोकिलया हि नीड़स्थं काकडिम्बमपसार्य्य स्वडिम्बे तत्र स्थापिते काक्या निजडिम्बबुद्ध्या तत्परिपाल्यते इति प्रसिद्धेरस्य तथात्वम् ।) कोकिलः । इति मेदिनी ॥ परेण पोषिते त्रि । इति धरणिः ॥

परपुष्टमहोत्सवः, पुं, (परपुष्टानां कोकिलानां महोत्सवो यत्र । आम्रसुकुलोद्गमे हि कोकिलानां आनन्दो जायते ।) आम्रः । इति शब्दमाला ॥

परपुष्टा, स्त्री, (परेण परपुरुषेण पुष्टा पालिता ।) वेश्या । इति मेदिनी ॥ पराश्रया । इति शब्दचन्द्रिका ॥ परसाड़ा इति भाषा ॥

परपूर्व्वा, स्त्री, परोऽन्यः पूर्व्वो भर्त्ता यस्याः सा पत्यन्तरग्रहणात् प्रागग्नेन गृहीतासीदित्यर्थः । अस्या लक्षणं यथा, मानवे ५ अध्यायः ॥
"पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते ।
निन्द्यैव सा भवेल्लोके परपूर्व्वेति चोच्यते ॥"
अस्याः प्रकारो यथा,—
"परपूर्व्वाः स्त्रियश्चस्रः सप्त प्रोक्ता यथाक्रमम् ।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा ॥"
इति मिताक्षरायां नारदः ॥

परप्रतिनप्ता, [ऋ] पुं, (प्रतिनप्तुः परः अन्तरः।) वृद्धप्रपौत्रः। इति हेमचन्द्रः॥

परभागः, पुं, (परस्य श्रेष्ठस्य भागः।) गुणोत्कर्षः। इति हेमचन्द्रः॥ (यथा, रघुः। ५।७०॥
"व्याभाति लब्धपरभागतयाऽधरोष्ठे
लीलास्मितं सदृशनार्द्धरिव त्वदीयम्॥")
सुमन्यत्। इति त्रिकाण्डशेषः॥ शेषांश्च॥

परभुक्ता, स्त्री, (परेण परपुरुषेण भुक्ता।) अन्यपुरुषसम्भोगविशिष्टा। यथा,—
"परभुक्ताञ्च कान्ताञ्च यो भुङ्क्ते स नराधमः।
स पच्यते कालसूत्रे यावच्चन्द्रदिवाकरौ॥
न सा दैवे न सा पित्रे याकाङ्क्षा पापसंयुता।
तस्या व्यालिङ्गने भर्त्ता भ्रष्टश्रीस्तेजसा हतः॥
देवताः पितरस्तस्य हव्यदाने च तर्पणे।
सुखिनो न भवन्त्येवमित्याह कमलोद्भवः॥
तस्माद्यत्नेन भार्य्याञ्च रक्षणं कुरुते सुधीः।
अन्यथा पापिनीभर्त्ता निश्चितं नरकं व्रजेत्॥
पदे पदे सावधानः कान्तां रक्षति पण्डितः।
न प्रतीतिस्थली योषा दोषाणाञ्च करण्डिका॥
कलत्रं पाकपात्रञ्च सदा रक्षितुमर्हति।
परस्पर्शादशुद्धाञ्च शुद्धां स्वस्पर्शने सदा॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १८अध्यायः॥*॥
अन्येन भक्षिते त्रि॥

रभृत्, पुं, (परान् कोकिलान् बिभर्त्तीति। डु भृञ् भरणे भृतिपुष्टौ + क्विप्। परेषां भृदिति कश्चित्।) काकः। इत्यमरः। २। ५। २०॥ (परजनपोषके, त्रि। यथा, भागवते। २। २। ५।
"चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्॥")

परभृतः, पुं, (परेण काकेन भृतः पुष्टः।) कोकिलः। इत्यमरः। २। ५। १६॥ (यथा, रुक्मिणीहरणे।
"परभृत इव नीडे रक्षितो वायसीभिः।"
स्त्रियां टाप्। यथा, रघौ। ६। ४७।
"परभृताभिरितीव निवेदिते
स्मरमते रमते स्म वधूजनः॥"
तथाच कुमारे। ६। २।
"चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी॥"
अत्र मल्लिनाथः। "परभृतया कोकिलया उन्मुखी सुखरा। परभृतेति क्रियाशब्दविवक्षायां 'जातेरस्त्री' इति ङीप् प्रत्ययो न भवति। अथवा भृङ्गरणं सम्यदादित्वात् क्विप्। परैः भृत्यस्यालया परभृता इति यौगेन व्याख्यातम्। पदमञ्जरीकारस्तु परैः भ्रियते इति कर्म्मणि क्विपमाह॥") परपोषिते त्रि॥

परम्, य, (पॄ पूर्त्तौ + यम्।) नियोगः। क्षेपः। इति मेदिनी॥ पश्चात्॥ (किन्त्वर्थे। यथा, पञ्चतन्त्रे।
"तेषां सर्व्वे शास्त्रपारगाः परं बुद्धिरहिताः॥"
अधिकम्। यथा, रघुः। १। १७।
"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्॥"
अनन्तरम्। यथा, तत्रैव। १। ६६।
"नूनं मत्तःपरं वेधाः पिण्डयित्वा दृशं दृशैः॥")

परम, य, अनुज्ञा। इति मेदिनी॥ हाँ इति भाषा। तथा च। ओमेवं परमं मते। इत्यमरः। ३। ४। १२॥ त्रीणि मते अनुमतौ। यौं कुरु ओमित्युक्तवतः। एवं वाढ़ं एवं यदाह भगवान्। परमन्ते आवसं ममेदं परमम्। त्रयं प्रकारेऽपि। इति भरतः॥

परमः, त्रि, (परं उत्कृष्टं मातीति। "आतोऽनुपसर्गे कः।" ३। २। ४। इति कः।) परः। उत्कृष्टः। इति मेदिनी॥ (यथा, मनुः। ८। २१८।
"सर्व्वथा ब्राह्मणाः पूज्याः परमं देवतं हि तत्॥")
प्रधानम्। (यथा, मनुः। ६। ६६।
"एवं संन्यस्य कर्म्माणि सकार्य्यपरमोऽमुहः॥")
आद्यः। ओङ्कारः। इति विश्वः॥ (यथा, कुमारे। ६। ३५।
"ततः परमिमुक्ता प्रतस्थे मुनिमण्डलम्॥")
अग्रेसरः। इति हेमचन्द्रः॥ (महादेवः। यथा, महाभारते। १३। १७। ५१।
मन्त्रवित् परमोमन्त्रः सर्व्वभावकरो हरः॥")

परमगतिः, स्त्री, (परमा गतिः।) मुक्तिः। मोक्षहेतौ त्रि। यथा। गुणातीतोऽपाग्रस्त्रिगुणसचिवस्त्वाश्चरमयस्त्रिमूर्त्तेर्यः स्थितिस्थितिविलयकर्म्माणि कुरुते। कृपापारावारः परमगतिरेष त्रिजगतां नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे॥ इति मङ्गलवादः॥ तस्या लक्षणं यथा,—
"यां विप्राः सर्व्वतः शान्ता विगुद्धा ज्ञाननिश्चयाः।
गतिं गच्छन्ति सन्तुष्टास्तामाहुः परमां गतिम्॥"
इति महाभारते मोक्षधर्म्मः॥

परमगवः, पुं, स्त्री, परमश्चासौ गौश्चेति श्रेष्ठगौः।

परमपदः, पुं, क्ली, (पद्यते ज्ञानिभिः प्राप्यते इति पदम्। ततः कर्म्मधारयः।) श्रेष्ठस्थानम्। परदेवताचरणः। यथा। स्वपुण्येराकीर्णं कुसुमधणुषो मन्दिरमहो पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुम्। स गन्धर्व्वश्रेणीपतिरपि कविब्राह्मतनदीनदीनः पर्य्यन्ते परमपदलीनः प्रभवति॥ इति कर्पूराख्यस्तोत्रम्॥

परमब्रह्म, [न्] क्ली, (परमं ब्रह्म।) परमेश्वरः। नारायणः। यथा।
सत्यतपा उवाच।
"यदेतत् परमं ब्रह्म त्वया प्रोक्तं महामुने!।
तस्य रूपं न जानन्ति योगिनोऽपि महात्मनः॥
अनामगोत्ररहितमरूपं मूर्त्तिवर्ज्जितम्।
कथं तज्ज्ञायते ब्रह्म संज्ञानामविवर्ज्जितम्॥
तत्तस्य संज्ञां कथय येन जानाम्यहं गुरो!॥"
दुर्व्वासा उवाच।
"यदेतत् परमं ब्रह्म वेदवादेषु पठ्यते।
स देवः पुष्करीकाक्षः स्वयं नारायणः परः॥
स यज्ञैर्विविधैरिष्टैर्दानैर्दक्षैश्च सत्तम!।
प्राप्यते परमो देवः स्वयं नारायणो हरिः॥"
इति वराहपुराणम्॥

परमर्षिः, पुं, (परमश्चासौ ऋषिश्चेति।) अस्य व्युत्पत्तिर्यथा,—
"ऋषिर्हिंसागतौ धातुर्विद्यासत्यतपःश्रुतेः।
एष सन्निचयो यस्मात् ब्रह्मणश्च ततस्त्वृषिः॥
विश्रुतिसमकालन्तु बुद्ध्या यत्तिर्ऋषिस्तयम्।
ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः॥
गत्यर्थाद्दृषतेर्धातोर्नामानि श्रुतिकारणम्।
यस्मादेष स्वयं भूतस्तस्माच्च ऋषिता मता॥"
इति मात्स्ये १२० अध्यायः॥
मेलादिऋषिविशेषः। इति त्रिकाण्डशेषः॥ (वेदव्यासो हि परमर्षिः। यथा, महाभारते। १। १। १७।
"द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा॥")

परमधर्म्मा, [न्] त्रि, परमश्चासौ धर्म्मश्च यस्य। इति कर्म्मधारयपूर्व्वपदबहुव्रीहौ सिद्धान्तकौमुदी॥

परमहंसः, पुं, (परमः श्रेष्ठः हंसः सोऽहं आत्मा यस्य।) सन्न्यासिविशेषः। अस्य लक्षणं यथा।
जातरूपधरो निर्द्वन्द्वो निरायग्रहस्तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः शुद्धमानसः प्राणसंधारणार्थं यथोक्तकाले भैक्षमाचरन् लाभालाभौ समौ कृत्वा शून्यागारदेवगृहतृणकूटवल्मीककृतमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकन्दरकोटरनिकरस्थण्डिलेष्वनिकेतवासी निरयत्नो निर्म्ममः शुक्लध्यानपरायणः अध्यात्मनिष्ठः शुभाशुभकर्म्मनिर्म्मूलनाय सन्यासेन देहत्यागं करोति यः स एव परमहंसो नामेति जीवन्मुक्तिविवेकः॥ (अयं हि चतुर्व्विधावधूतेषु श्रेष्ठः। यदुक्तं महानिर्व्वाणतन्त्रे।
"चतुर्णामवधूतानां तुरीयो हंस उच्यते।
त्रयोऽन्ये भोगयोगाढ्या मुक्ताः सर्व्वे शिवोपमाः॥"
परमहंसेन हि यज्ञोपवीतादिचिह्नानि परित्यज्य कौपीनादिकं धारणीयम्। यदुक्तं श्रुतसंहितायां ज्ञानयोगे।
"परमहंसस्त्रिदण्डञ्च रज्जुं गोबालमिश्रितम्।
शिक्यं जलपवित्रञ्च पवित्रञ्च कमण्डलुम्॥
पक्षिणीमजिनं रूचीं रूतं खनित्रीं कृपाणिकाम्।
शिखां यज्ञोपवीतञ्च नित्यकर्म्म परित्यजेत्॥
कौपीनं छादनं वस्त्रं कन्थां शीतनिवारिकाम्।
योगपट्टं बहिर्व्वस्त्रं पादुकां कृत्रमद्भुतम्॥
अक्षमालाञ्च यज्ञीयात् वेणवं दण्डमव्रणम्।
अग्निरित्यादिभिर्मन्त्रैः कुर्य्यादङ्गानि सदा॥
ओमिति च त्रिभिः प्रोक्त्य परमहंसस्त्रिपुष्करम्॥"
अविदुषा परमहंसेन एकदण्डेन भाव्यम्। विदुषा तु दण्डादिकं किमपि न धारणीयम्॥ यदुक्तं निर्णयसिन्धौ। "परमहंसस्त्रिदण्ड एव सोऽप्यविदुषः। विदुषान्तु सोऽपि नास्ति। न दण्डं न शिखां नाच्छादनं धरति परमहंसः॥" परमहंसास्तु केवलं प्रणवजपतत्परा एव भवन्ति। यदुक्तं श्रुतसंहितायाम्।
"प्रणवाद्याश्चयोवेदाः प्रणवे पर्य्यवस्थिताः।
तस्मात् प्रणवमेवैकं परमहंसः सदा जपेत्॥
विविक्तदेशमाश्रित्य सुखासीनः समाहितः।
यथाशक्ति समाधिस्थो भवेत् सन्न्यासिनां वरः॥"
परमहंसास्तु "तत्त्वमसि" इत्यादि महावाक्याव-

लम्भनेन आत्मज्ञानानुशीलिनो भवन्ति "सोऽहं" शिवोऽहं" इत्यादि वदन्तस्तत्त्वज्ञानावलम्बनरा परिचयं प्रयच्छन्ति च। एषामध्यो हि स्वामीत्याख्यया प्रसिद्धः। एते हि तीर्थभ्रमण-निपुणास्तीर्थस्थानस्थाश्च। मतस्य परमहंसस्य शरीरं भूमौ निखातलम्। यदुक्तं वायु-संहितायाम्।

"ऋते न दहनं कार्य्यं परमहंसस्य सर्व्वदा।
कर्त्तव्यं खननं तस्य नाशौचं नोदकक्रिया॥"

परमहंसस्तु दण्डिपरमहंसावधूतपरमहंसभेदेन द्विविधः। ये तु दण्डं परित्यज्य पारमहंस्य-व्रतावलम्बनं कुर्व्वन्ति ते दण्डिपरमहंसाः। ये चावधूतवृत्त्यानुष्ठानेन परमहंसास्ते एवा-वधूतपरमहंसाः। परं सर्व्वे एव प्रणवोपासकाः इति॥ * ॥

शुक्लयजुर्व्वेदगत उपनिषद्विशेषः। इति मुक्ति कोपनिषत्॥)

परमाणुः, पुं, (परमः सर्व्वोत्तमकोऽणुः।) पृथिव्यादिभूतचतुष्टयानां द्व्यणुकानामवयवः। स च नित्यः निरवयवः ततः किमपिसूक्ष्मं नास्ति। यथा,—

"नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा।
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी॥"

पारिमाण्डल्यनामकतत्परिमाणन्तु न कस्यापि कारणम्। यथा,

"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥"

जलादिपरमाणुरूपस्य नित्यत्वम्। पार्थिवपर-माणुरूपस्यानित्यत्वम्। पार्थिवपरमाणुरूप-स्यानित्यत्वम्। यथा, भाषापरिच्छेदे॥

"जलादिपरमाणौ तन्नित्यमन्यत् सहेतुकम्।"

तैरेव परमाणुभिरादुपादानैर्द्व्यणुकचसरेखादि-क्रमेण स्थूलक्षितिजलतेजोमरुतः सृजति परमे-श्वरः। यथा आयोजनं परमाणुकर्म्म तथा च सर्गाद्यकालीनं द्व्यणुकारम्भकपरमाणुकर्म्म यत्नजन्यं प्रयत्नवदात्मसंयोगजन्यं वा कर्म्मत्वात् अस्मदादिशरीरकर्म्मवत् इति कुसुमाञ्जलिः॥ प्रलयेऽतिस्थूलस्थूलनाशानन्तरं परमाणुक्रिया-विभागपूर्व्वसंयोगनाशादिक्रमेण द्व्यणुकनाशा-त्तिष्ठन्ति परमाणव एवेति। यथा,—

"दोधूयमानास्तिष्ठन्ति प्रलये परमाणवः।"

इति प्राचीनकारिका॥

तस्य महत्त्वाभावादतीन्द्रियत्वम्। यथा। महत्त्वं षड्विधं हेतुरिति भाषापरिच्छेदः॥ * ॥

कालविशेषः। यथा, श्रीभागवते ३।११।४-५॥

"स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्।
सतो विशेषभुग् यस्तु कालः स परमो महान्॥
अणुर्द्वौ परमाणू स्यात्तत्सरेणुस्त्रयः स्मृतः।
जालार्करश्म्यवगतः खमेवानुपतन्नगात्॥"

अस्यार्थः। एतदेव प्रपञ्चयति स इत्यादिना। सतः प्रपञ्चस्य परमाणुतां परमाणवस्थां यो भुङ्क्ते स कालः परमाणुः तस्यैवाविशेषं साकल्यं यो भुङ्क्ते स परममहान्। अयमर्थः ग्रहर्क्षतारात्मकस्य इत्यादिना यत् सूर्य्यपर्य्यटनं वक्ष्यति तत्र सूर्य्यो यावता परमाणुदेशमति-क्रामति तावान् कालः परमाणुः। यावता च द्वादशराश्यात्मकं सर्व्वं भुवनकोषमतिक्रामति स परममहान् संवत्सरात्मकः तस्यैवाहत्या युगमन्वन्तरादिक्रमेण द्विपरार्द्धान्तत्वमिति। तथा च पञ्चमे सूर्य्यगत्यैव कालादिविभागं वक्ष्यति।५। इदानीं द्व्यणुकादिलक्षणपूर्व्वकं मध्यमकालावस्थां कथयति द्वौ परमाणू अणुः स्यात् त्रयोऽणव-स्त्रसरेणुः स तु प्रत्यूच इत्याह जालार्केति गवाक्षप्रविष्टैर्व्वकरश्मिभ्यवगतः कोऽसौ योऽति-लघुत्वेन खमेवानुपतन् अगात् गतः। न गामिति पाठे खमेवानुपतन्नवगतः न तु गां पृथ्वीम्। इति श्रीधरस्वामी॥

परमाखङ्गकः, पुं, (परमाणुरङ्गं यस्य। कप्।) विष्णुः। इति शब्दमाला॥

परमात्मा, [न्] पुं, (परमः केवलः आत्मा।) परं ब्रह्म। तत्पर्य्यायः। आपोज्योतिः २ चिदात्मा ३। यथा,—

"परमात्मा परं ब्रह्म निर्गुणः प्रकृतेः परः।
कारणं कारणानाञ्च श्रीकृष्णो भगवान् स्वयम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥

(विष्णुः। यथा, महाभारते। १३। १४६।१५।

"भूतात्मा परमात्मा च सुक्तानां परमा गतिः॥"

महादेवः। यथा, तत्रैव। १३। १७। १३७।

"प्रीतात्मा परमात्मा च प्रयतात्मा प्रधानधृक्॥")

परमार्हतः, पुं. (परमः अर्हतः देवतर्व्वितः।) विष्णुः। यथा,—

"नमस्ते ज्ञानसद्भाव नमस्ते ज्ञानदायक।
नमस्ते परमार्हत नमस्ते पुरुषोत्तम!॥"

इति गरुड़पुराणम्॥

परमान्नं, क्ली, देवपित्रन्नत्वात् परमसुतृप्तहेतुमन्नम्। परमाणासुतृप्तहेतूनां देवादीनामन्नमिति वा। इति भरतः॥ तत्पर्य्यायः। पायसः २। इत्य-मरः। २। ७। २४॥ क्षीरिका ३। तस्य पाकप्रकारो यथा,—

"शुद्धेऽर्द्धपक्वे दुग्धे तु घृताक्तांस्तण्डुलान् क्षिपेत्।
ते सिद्धाः क्षीरिका ज्ञाता सा सिताढ्ययुतो-त्तमा॥"

अस्य गुणाः।

"क्षीरिका दुर्ज्जरा बल्या धातुपुष्टिप्रदा गुरुः।
विशेषेणी हरेत् पित्तरक्तपित्तामिमारुतान्॥"

इति भावप्रकाशः॥

परमायुः, [स्] क्ली, (परमं आयुः।) जीवित-कालः। यथा,—

"शतं वर्षाणि विंशत्या निशाभिः पञ्चभिः सह।
परमायुरिदं प्रोक्तं नराणां करिणामिह॥
अब्दा द्वात्रिंशदश्वानां मुनां द्वादशवत्सराः।
पञ्चविंशतिवर्षाणि खरस्य करभस्य च॥
चतुर्विंशतिरब्दानां वृषस्य महिषस्य च।
शूकरस्योष्ट्रवस्तादिपशूनां षड्दशान्विताः॥"

इति शब्दमाला॥ * ॥

अथायुरानयनम्।

"अज्ञानादायुषः सर्व्वं विफलं कीर्त्तितञ्च यत्।
तस्मादानयनं तस्य स्फुटार्थमभिधीयते॥
नीचान्तरस्य खेटस्य भागस्तुङ्गगुणो भवेत्।
चेष्टा केन्द्रस्तु चेत् षड्भाद्यधिकं चक्रशोधितम्॥
नान्यथा तस्य भागादि चेष्टा गुणक उच्यते।
गुणश्चेत् षष्टिहृतो न्यूनं तदा द्व्याप्तं सखा-नलः ३०॥
एवं तुङ्गगुणश्चेष्टा गुणो यत् स्यात् तयोर्वधात्।
मूलं कलादिकं तत् स्याद्गुणकस्फुट उच्यते॥
अथाश्वयुगुणं वक्ष्ये चेष्टादिसप्तवर्गजम्।
वर्गे चेष्टादिके सर्व्वे याम्यस्त्रिंशत्३० कलागुणः॥
अधिमित्रगृहे तत्त्वम् २५ मित्रे त्रिंशांशजानयः।
२१। ४०।
समे पञ्चदशांशाः शत्रौ खत्रिंशांशकोरगाः८।२०
पञ्चात्यरौ ५ तदैक्यं यत् चेष्टोत्थगुणयुक् पुनः।
स्वर्क्षे वर्गोत्तमे स्वांशे स्वत्रिंशांशे स्मरेयं गुणः॥
अधीष्टर्क्षे युगांशोनस्त्रिंशांशोनो मित्रवैरिणि।
समे द्व्याप्तो रिपौ चाप्तो युगांशस्त्रिंशतिघ्नभे॥
एवं स्मरादाश्वयुगो विशेषो यः स उच्यते।
स्वत्रिंशांशकः स्वांशको वा वर्गोत्तमगतोऽपि वा॥
यदि स्यादधिमित्रर्क्षे तदा तत्राश्वये गुणे।
गजनेत्रे समुद्धृत्तौ २८।३४ कलाद्यं मिश्रयेद्बुधः।
एवं मित्रगृहे तद्वद्रूपत्रिंशांशद्विमिश्रयेत् १६।३०।
शत्रुक्षेत्रे तु षड्लिप्ता कुनेत्रविकलां त्यजेत्॥६।२१
अधिशत्रुगृहे बाणस्त्र्यब्धौ ५। ४३ लिप्तादिकं त्यजेत्।
आश्वयस्य गुणस्यास्य वधः स्फुटगुणस्य यः॥
तन्मूलं कर्म्मयोग्यः स्याद्गुण आयुर्विधौ स्मृतः।
खेटानाञ्च तनोर्भागाः खाब्धि ४० घ्निष्टाः कलीकृताः॥
पुनः शून्यरसा ६० भक्ताः क्रमात् स्यादायुषः पलम्।
जन्मलग्नं ग्रहैर्योगं न्यूनं चक्रार्द्धतो यदि॥
तत्कला स्यात्तदाहारो नायं षड्भाधिके विधिः।
खखधृत्या १८०० खखाङ्केन ६०० गुणितं पलमायुषः॥
क्रमतः पापसौम्यानां हारार्द्धं शोधनं भवेत्।
खखधृत्यूनहारश्चेद्धारो हारदलं क्रमात्॥
आयुः पलार्द्धं शून्याब्धि धृत्याप्ता शोधनं तथा।
आयुःपलं शोधनोनमेवं चक्रार्द्धशोधनम्॥
चक्रार्द्धशोधने त्वेकराशौ द्व्यादिग्रहे सति।
एकस्याधिकवीर्य्यस्य हानिं सत्यः प्रभासते॥
आयुःपलं हतं स्त्रीयैर्गुणैर्योज्यैः कलादिभिः।
षष्ट्याप्तम् ६० तत् पुनः सूर्य्यसहस्राप्ताः १२००० समादयः।
तनोरायुः पलं सूर्य्यः सहस्राप्ताः समादयः।
चेष्टमं बलवद्दृग्योन्या राशितुल्याः समास्तथा॥
द्वादशाहतभागाद्यैर्दिनाद्यैरपि संयुताः।
एवं सूर्य्यादिलग्नानामायुः प्रस्फुटं भवेत्॥
सूक्ष्मान्तरितखेटस्य कला आयुःपलं भवेत्।
तच्चेत् षड्भः कलान्यूनं तदा तां द्विगुणाच्युतम्॥

अथवा ।
"मुनीचान्तरितः खेटः सवडभः सकलीकृतः ।
आयुःपलमिदं प्राज्ञैर्ज्ञेयं पैण्डादिकत्रये ॥
चंद्रोनं शून्यभक्तस्य विनाडमायुषः पलम् ।
अस्तगस्य द्विभागोनं हित्वा शुक्रग्नयोश्चरौ ॥
एकस्य यदि खेटस्य चंद्रार्द्धहानिसम्भवः ।
अधिकैका तदा हानिः कर्तव्याच्च विपश्चिता ॥
चक्रार्द्धशोधनं कार्य्यं पूर्ववत् सति सम्भवे ।
एवमायुःपलं पैण्डे जीवः प्रोक्ते निसर्गजे ॥
पैण्डं यथागतं सौरैर्भानोर्विंशांशसंयुतम् ।
चन्द्रस्य वेदभागाढ्यं भृगोः२०विंशांशसंयुतम् ॥
कुजगुर्व्योर्थुगांशोनं ज्ञस्यार्द्धं तत्परांशयुक् ।
आयुःपलं निसर्गाख्ये रविकार्य्योर्यथागतम् ॥
दशांशोनदलं ज्ञस्य जीवस्य विंशकांशकम् ।
दशांशं भूमिपुत्रस्य विंशत्यंशं निगद्यते ॥
दशघ्नं मुनिभिर्भक्तं शनेरायुःपलं भवेत् ।
जीवोक्तं सप्तभागोनं सर्वेषामायुषः पलम् ॥
आयुः पलस्य खाभ्राष्टदिग्भागेन १०८०० समायुतम् ।
इत्थमायुःपलं खाष्टदिग्घ्नाप्तम् १०८० स्यात् समादिकम् ॥
पैण्डनैसर्ग्यजीवोक्तं भवेदायुः खगामिनाम् ।"
अथवा ।
"रवेरायुःपलं चाप्तं विनखांशं दिनादिकम् ।
पैण्डमायुर्भवेदिन्दोर्वाणघ्नम्५ द्वादशो१२ द्धृतम् ।
कुजगुर्व्योर्थुगे नाप्तं बुधस्य पक्षभिर्हृतम् ।
कवेः शैलं७हतं विंशत्याप्तं २० सौरैर्गुणोद्धृतम् ।
विधोरायुःपलं लब्धं खरसैः स्यादिनादिकम् ॥
निसर्गे ज्ञशिपुत्रस्य३ रामघ्नं खयमोद्धृतम् ।
रविकार्य्योर्गुणघ्नं कुजस्य खगुणोद्धृतम् ॥
गुरोस्त्रिघ्नं खचन्द्राप्तं१० शनेस्तर्को ६ ग्नतोलितम् ॥"
अथवा ।
"आयुःपलमिनादीनां खाब्धिघ्नाप्तं ८६४० भागयुक् ।
द्विघ्नं सप्तघ्नमायुः स्यादिनाद्यं जीवभाषितम् ॥
विराग्निलयविकला खखखार्क१२००० हृतातनोः ।
तदंशकसमं ज्ञेयमायुः पैण्डादिकत्रये ॥
अंशतल्यं तनोरायुर्वदन्ति बहवो बुधाः ।
केचिद्राशिसमं केचित्तस्य यस्याधिपो बली ॥
लग्नस्फुटस्य लिप्ताभिर्हत्वादायुर्दुचारिणाम् ।
प्रत्येकं चन्द्रलिप्ताभि २१६०० र्भजेद्वर्षादिकं भवेत् ॥
अनेन हीनस्वस्वायुर्लग्ने पापग्रहे सति ।
दृष्टे तु सौम्यखेटेन तस्यार्द्धेन तदा वियुक् ॥
यावानमुनृपलस्यैव हृद्भक्तात्कभाषितम् ।
केचित् प्राहुर्लग्नराशिं त्यक्त्वा लिप्तादिका क्रिया ॥
अन्ये लग्नस्यापस्य भावौत्पत्फलताडितम् ।
परमं शोध्यमायुर्यत् तत्षष्ट्याप्तं विशोधयेत् ॥
तत्रापि लग्ने पापौ चेत् बलिनस्य फलेन तत् ।
साम्ये पृथक्फलेनैव क्रिया कार्या विचक्षणैः ॥
सापेक्षेपि लग्ने लग्नेशे न कर्तव्या त्वियं क्रिया ।
अंशायुषि न कार्य्यैवं हानिः प्राज्ञैः कथञ्चन ॥
लग्नस्य वीर्य्यादंशोत्थं पैण्डं भानोर्बलाधिकात् ।
निसर्गोत्थं विधोर्बौर्य्यादायुः साध्यं विचक्षणैः ॥
त्रयस्त्रेंद्रलहीनाः स्युर्जीवोक्तं साधयेत्तदा ।
लग्ने होर्लग्नभान्वोश्च सूर्येन्दोः समवीर्ययोः ॥
तदायुषो यदैक्याद्धं तदुक्तं श्रीपराशरिभिः ।
नात्रत्यभावनादायुः पृथक्शून्यनगांशकैः ॥
साष्टसूर्यांशकै१२८हीनं सौरं वर्षादिकं भवेत् ॥
पथ्याग्निः सधर्म्मा ये सच्छीलाढ्या जितेन्द्रियाः ।
गुरुदेवद्विजे भक्तास्तेषामेवायुरीरितम् ॥
ये पापा लुब्धकृपणा देवब्राह्मणनिन्दकाः ।
वस्वृतुर्वंङ्गनासक्तास्तेषां स्वल्पुरकालजः ॥"
इति तोषगण्यामायुर्दायाध्यायः ॥

परमायुषः, पुं, (परमं आयुर्यस्य । पृषोदरादित्वादच् । दीर्घकालजीवित्वादस्य तथात्वम् ।) असनवृक्षः । इति शब्दचन्द्रिका ॥

परमार्थः, पुं, (परमः श्रेष्ठः अर्थः ।) उत्तमवस्तु । यथार्थः । यथा,—
"प्रपञ्चो यदि वर्त्तेत निवर्त्तेत न संशयः ।
मायामात्रमिदं दैतमद्वैतं परमार्थतः ॥"
इति माण्डूक्यवार्त्तिकम् ॥
(तथा च कुमारे । ५ । ७५ ।
"उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ॥"
परमः मुख्यः अर्थः प्रयोजनमिति विग्रहे । मोक्षः । सुखम् । सुखभोगः दुःखाभावः ॥ इति न्यायदर्शनम् ॥)

परमार्हतः, पुं, (परमः अर्हन् देवता उपास्यतया अस्त्यस्य । परमार्हत् + अच् ।) जैनराजर्षिविशेषः । इति हेमचन्द्रः ॥

परमल्युः, पुं, परेभ्यो म्लुरस्य । (रोगादिना म्लोरभावात् अस्य तथात्वम् ।) काकः । इति त्रिकाण्डशेषः ॥

परमेश्वरः, पुं, (परमश्चासौ ईश्वरश्चेति ।) शिवः । इति हेमायुधः ॥ (यथा, महालिङ्गार्च्चनतन्त्रे शिवशतनाम प्रकरणे,—
"सहस्रारे महापद्मे त्रिकोणनिलयान्तरे ।
विन्दुरूपे महेशानि ! परमेश्वर ईरितः ॥")
विष्णुः । यथा,—
"इदन्तु द्वादशं प्रोक्तं पद्मं वै कैशवस्य हि ।
द्वादशारं तथा चक्रं यन्नाभिहृदयं तथा ॥
त्रियूहन्त्वेकमूर्त्तिश्च तयोक्तः परमेश्वरः ।"
इति वामने ५८ अध्यायः ॥
(स्त्रियां ङीप् । दुर्गा । यथा,—
देवीभागवते । ७ । ३० । ७० ।
"देवकी मथुरायान्तु पातालेषु परमेश्वरी ॥")

परमेष्ठिनी, स्त्री. (परमेष्ठिन् + ङीप् ।) ब्राह्मी । इति राजनिर्घण्टः ॥ वामनहाटी इति भाषा ॥
परमेष्ठिनः शुक्तिश्च ॥

परमेष्ठी, [न्] पुं, (परमे स्थानि चिदाकाशे ब्रह्मपदे वा तिष्ठतीति । स्थागतिनिवृत्तौ "परमे किन् ।" उणा० । ४ । १० । इति इनिः स च किन् । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ८ । इत्यलुक् "स्थाम्नि स्थगाम् । इति षत्वम् । परमे स्थाने ऽनाहत्तलक्षणे तिष्ठतीति कुल्लूकभट्टः ॥) ब्रह्मा । इत्यमरः । १ । १ । १६ । (यथा, मनुः । १।८०।
"मन्वन्तराण्यसंख्यानि सर्गः संहार एव च ।
क्रीड़न्निवैतत् कुरुते परमेष्ठी पुनः पुनः ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । ५८ ।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥"
महादेवः । यथा, महाभारते । ३ । ३० ।५८।
"क्रियतां दर्शने यत्नो देवस्य परमेष्ठिनः ।
दर्शनात्तस्य कौन्तेय ! संसिद्धः सर्व्वमेष्यसि ॥")
जिनः । इति हेमचन्द्रः ॥ शालग्रामविशेषः । यथा,—
"परमेष्ठी च शुक्लाभः पद्मचक्रसमन्वितः ।
चित्राकृतिस्तथा पृष्ठे सुषिरश्चातिपुष्कलम् ॥
परमेष्ठी लोहिताभश्चक्रमेकं तथा युतम् ।
विस्राकृतिस्तथा रेखा सुषिरश्चातिपुष्कलम् ॥"
इति ब्रह्मपुराणम् ॥
"परमेष्ठी च शुक्लाभश्चक्रपद्मसमन्वितः ।
स वर्त्तुलस्तथा पीतः पृष्ठे च सुषिरं ध्रुवम् ॥"
इति पुराणसंग्रहः ॥
"परमेष्ठी तु रक्ताभश्चक्रपद्मसमन्वितः ।
द्विधाकृतस्तथा पृष्ठे सुषिरश्चापि वर्त्तुलम् ॥
पीतवर्णयुतो वापि भुक्तिमुक्तिवरप्रदः ॥"
इति वैश्वानरसंहिता ॥ * ॥
गुरुविशेषः । यथा,—
"आदौ सर्व्वत्र देवेशि ! मन्त्रदः परमो गुरुः ।
परापरगुरुस्त्वं हि परमेष्ठी त्वहं गुरुः ॥"
इति डामरीलतन्त्रे २ पटलः ॥
मन्त्रदाता गुरुः प्रोक्तो मन्त्रस्तु परमो गुरुः ।
परापरगुरुस्त्वं हि परमेष्ठिगुरुस्त्वहम् ॥"
इति तन्त्रान्तरम् ॥
(अजमीढपुत्रः । यथा, महाभारते । १।८४।३१।
"अजमीढो वरस्तेषां तस्मिन् वंशः प्रतिष्ठितः ।
षट् पुत्रान् सोऽप्यजनयत् तिसृषु स्त्रीषु भारत ! ।
ऋक्षं धूमिन्यथोनिलौ दुष्मन्तपरमेष्ठिनौ ॥"
परमस्थानस्थिते वाच्यलिङ्गः । यथा, मार्कण्डेये । ७६ । २ ।
"अन्यजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः ।
चाक्षुषत्वमतस्तस्य जन्मन्यस्मिन्नपि द्विज ! ॥")

परम्परः, पुं, (परं प्रिपर्त्तीति । पॄ पालनपूर्त्तौ + अच् । "तत्पुरुषे कृतीति" अलुक् ।) प्रपौत्रादिः । स्वर्गभेदः । इति हेमचन्द्रः ॥ प्रपौत्रतनयः । इति मेदिनी ॥

परम्परा, स्त्री, अन्वयः । (यथा, कुमारे । ६।४६ ।
"गगनादवतीर्णा सा यथा वृद्धपुरःसरा ।
तोयान्तर्भास्करालीव रेजे मुनिपरम्परा ॥")
सन्तानः । वधः । हिंसा । इति हेमचन्द्रः ॥ परीपाटी । अनुक्रमः । इति शब्दरत्नावली ॥ यथा,
"इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥

एवं परम्पराप्राप्तं तथा राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ! ॥"
इति श्रीभगवद्गीतायां ४ अध्यायः ॥

परम्परार्क, क्ली, (परम्परया कायते प्रकाश्यते इति । कै + कः । परम्परास्थापितपशुहननात् तथात्वम् ।) यज्ञार्थपशुहननम् । तत्पर्य्यायः । ग्रमनम् २ प्रोक्षणम् ३ । इत्यमरः । २।७।२६ ॥ घातनम् ४ वधः ५ । इति शब्दरत्नावली ॥

परम्परीण, त्रि, (परांश्च परतरांश्च अनुभवति । "परोवरपरम्परेति ।" ५ । २ । १० । इति खः । प्रकृतेः परम्परभावो निपात्यते ।) परम्पराप्राप्तम् । यथा, भट्टिः । ५ । १५ ।
"लक्ष्मीं परम्परीणां त्वं पुत्रपौत्रीणतां नय ॥"

परशुः, पुं, (निपातयति देहादिकं पूरयतीति । पॄ + बाहुलकात् अशुः ।) केशराजः । इति त्रिकाण्डशेषः ॥

परलोकः, पुं, (परो लोकः ।) लोकान्तरम् । तच्च स्वर्गादि । यथा,—
"समश्नानाल्पभूयिष्ठपान्थवैमत्यमेत्य यम् ।
लोके प्रयाति पन्थानं परलोकेन तं कृतः ॥"
इति नैषधम् ॥

परलोकगमः, पुं, (परलोके लोकान्तरे गमो गमनं यस्मात् ।) मृत्युः । इति हेमचन्द्रः ॥

परवश्यः, त्रि, (परस्य परेषां वा वश्यः वशीभूतः ।) अन्यवशीभूतः । तत्पर्य्यायः । परायत्तः २ पराधीनः ३ परच्छन्दः ४ परवान् ५ । इति हेमचन्द्रः ॥ (यथा, मनुः । ४ । १५६ ।
"यद्यत् परवशं कर्म्म तत्तद् यत्नेन वर्ज्जयेत् ।
यद्यदात्मवशन्तु स्यात्तत्तत् सेवेत यत्नतः ॥")

परवाग्, पुं, (परं धर्म्मं वाचयति प्रकाशयति । वच शब्दे + क्विप् + इत् । धातूनामनेकार्थत्वात्र प्रकाशार्थः ।) धर्म्माध्यक्षः । वत्सरः । इति मेदिनी ॥ (परं प्रकृष्टं सर्पमित्यर्थः, वाचयतीति ।) कार्त्तिकेयवाहनो मयूरः । इति शब्दमाला ॥

परवान्, [त्] त्रि, (परः स्वामी अस्त्यस्य । "तदस्यास्त्यस्मिन्निति ।" ५ । २ । ९४ । इति मतुप् मस्य वः ।) पराधीनः । इत्यमरः । ३ । १ । १६ (यथा, रघौ । २ । ५६ ।
"भवानपीदं परवानवैति
महान् हि यत्नस्तव देवदारौ ।")

परव्रतः, पुं, (परं व्रतमस्य ।) इतरव्रतः । इति शब्दरत्नावली ॥

परश्वः, क्ली, (शृणातीति । पृषोदरादित्वात् साधुः । अस्य शर्व्वणात् अपरस्य घातोः सर्व्वत्वं जायते अतोऽस्य तथात्वम् ।) रत्नविशेषः । यथा,—
"सुस्तामाणिक्यपरश्वमणिरत्नाकरान्वितम् ।
लक्ष्मीसुखहरिद्रक्तमणिराजिविराजितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥

परश्वध्यं, त्रि, परश्वधे हितम् । तस्मै हितादाद्दन्तगवादेर्यत् । इति संक्षिप्तसारव्याकरणम् ॥ (यां उपगवादिभ्यो यत् । परशुहितम् । इति व्याकरणम् ॥)

परशुः, पुं, (परान् शत्रून् शृणाति हिनस्त्यनेनेति । शॄ हिंसायाम् + "आडृदमनम्यः क्नसिक्नसी च ।" उणा । १ । ३४ । इति कुः स च डित् ।) अस्त्रविशेषः । टाङ्गी इति भाषा ॥ तत्पर्य्यायः । पर्शुः २ परश्वधः ३ पर्श्वधः ४ स्वधितिः ५ कुठारः ६ । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ८८ । १४ ।
"ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ।
आहत्य देवीबाणौघैरपातयत भूतले ॥")

परशुधरः, पुं, (धरतीति धरः । धृ + अच् । ततः परशोर्धरः ।) गणेशः । इति हलायुधः ॥ (परशुरामः । परशुग्रहणप्रधानत्वादस्य तथात्वम् ॥)

परशुरामः, पुं, (परशुना कुठाराख्यशस्त्रेण रामः रमणं यस्य । परशुशस्त्रवधेनैव दुष्टक्षत्रियवंशान् निहत्यात्मानं रमयति इति तात्पर्य्यार्थः ।) भगवतः षोड़शावतारः । यथा,—
"अवतारे षोड़शमे पश्यन् ब्रह्मद्रुहो नृपान् ।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् ॥"
इति श्रीभागवते १ स्कन्धे २ अध्यायः ॥
तत्पर्य्यायः । जामदग्न्यः २ पर्शुरामः ३ परशुरामकः ४ भार्गवः ५ भृगुपतिः ६ भृगूत्तमः ७ । इति शब्दरत्नावली ॥ अस्योत्पत्त्यादिकं यथा —
मार्कण्डेय उवाच ।
"अथ काले यतीते तु जमदग्निर्महातपाः ।
विदर्भराजस्य सुतां प्रयत्नेन जितां स्वयम् ॥
भार्य्यार्थे प्रतिजग्राह रेणुकां लक्षणान्विताम् ।
सा तस्मात् सुषुवे पुत्रान् चतुरो वेदसम्मतान् ॥
रुमण्वन्तं सुषेणञ्च विश्वं विश्वावसुन्तथा ।
पश्चात्तस्यां स्वयं जज्ञे भगवान् मधुसूदनः ॥
कार्त्तवीर्य्यवधायासु शक्राद्यैः सकलैः सुरैः ।
याचितः पञ्चमः सोऽभूत्तेषां रामाह्वयस्तु यः ॥
भारावतारणार्थाय जातः परशुना सह ।
सहजः परशुस्तस्य तं जहाति कदाच न ॥
अयं निजपितामह्याश्चरुशक्तिविपर्य्ययात् ।
ब्राह्मः क्षत्रियाचारो रामोऽभूत् क्रूरकर्म्मकृत् ।
स वेदानखिलान् ज्ञात्वा धनुर्व्वेदञ्च सर्व्वशः ।
स्वतातात् कृतकृत्योऽभूद्देवविद्याविशारदः ॥"
इति कालिकापुराणे ८५ अध्यायः ॥
अवशिष्टं पाशुपतखण्डे ५० अध्याये द्रष्टव्यम् ॥
(अयमेव पितुरादेशात् परशुना स्वमातुः शिरश्छित्त्वा ततः प्रसन्नात् पितुर्वरं लब्ध्वा मातरं पुनर्जीवयामास । यदुक्तं महाभारते । ३ । ११६ । ५—१८ ।
"फलाहारेषु सर्व्वेषु गतेष्वथ सुतेषु वै ।
रेणुका स्नातुमगमत् कदाचित्रियतव्रता ॥
सा तु चित्ररथं नाम मार्त्तिकावतकं नृपम् ।
ददर्श रेणुका राजन्नागच्छन्ती यदृच्छया ।
क्रीड़न्तं सलिले दृष्ट्वा सभार्य्यं पद्ममालिनम् ।
ऋद्धिमन्तं ततस्तस्य स्पृहयामास रेणुका ॥
अभिचाराच्च सा तस्मात् क्लिन्नाम्भसि विचेतना ।
प्रविवेशाश्रमं त्रस्ता तां वै भर्त्ता त्वबुध्यत ॥
स (जमदग्निः) तां दृष्ट्वा श्रुतां धैर्य्यात् ब्राह्म्या लक्ष्म्या विवर्ज्जिताम् ।
धिक्शब्देन महातेजा गर्हयामास वीर्य्यवान् ॥
ततो ज्येष्ठो जामदग्न्यो रुमण्वान्नाम नामतः ।
आजगाम सुषेणश्च वसुर्विश्वावसुस्तथा ॥
तानानुपूर्व्म्या भगवान् वधे मातुरचोदयत् ।
न च ते जातसम्मोहाः किञ्चिदूचुर्विचेतसः ॥
ततः शशाप तान् क्रोधात्ते शप्तास्तेतनां जहुः ।
मृगपक्षिसधर्म्माणः क्षिप्रमासन् जड़ोपमाः ॥
ततो रामोऽभ्ययात् पश्चादाश्रमं परवीरहा ।
तमुवाच महाबाहुं जमदग्निर्महातपाः ॥
जहीमां मातरं पापां मा च पुत्र ! व्यथां कृथाः ।
तत आदाय परशुं रामो मातुः शिरोऽहरत् ॥
ततस्तस्य महाराज ! जमदग्नेर्महात्मनः ।
कोपोऽभ्यगच्छत् सहसा प्रसन्नश्चाब्रवीदिदम् ॥
ममेदं वचनात्तात ! कृतं ते कर्म्म दुष्करम् ।
वृणीष्व कामान् धर्म्मज्ञ ! यावतो वाञ्छसे हृदा ॥
स वव्रे मातुरुत्थानमस्मृतिञ्च वधस्य वै ।
पापेन तेन चास्पर्शं भ्रातृणां प्रकृतिन्तथा ॥
अप्रतिद्वन्द्वतां युद्धे दीर्घमायुश्च भारत ! ।
ददौ च सर्व्वान् कामांस्तान् जमदग्निर्महातपाः ॥"
अयं पुनर्बलदर्पितं आश्रमात् वत्सहारिणं कार्त्तवीर्य्यार्জ্জुनं हतवान् । अनेन जातामर्षात्तस्यार্জ্জুनस्य सुतास्ततःप्रभृति कालं प्रतीक्षमाणाः कदाचित् रामविरहितमाश्रममागत्य तस्य पितरं जमदग्निं निजघ्नुः । रामस्तु अस्मात् पितृवधामर्षात् त्रिःसप्तकृत्वः पृथिवीं निःक्षत्रियामकरोत् । ततो गच्छति काले दाशरथिना रामेण हृतगर्व्वो दक्षिणाशां गत्वा महेन्द्रे गिरौ उग्रेण तपसा कालं यापयति ॥)

परश्वः, [स्] अ, व्यः परदिनम् । आगामिदिनात् परदिनम् । इत्यमरः । ३ । ४ । २२ ॥ अस्य टीका परश्वःशब्दे द्रष्टव्या । गतदिनात् पूर्व्वदिनम् । पर्शु इति भाषा ॥ यथा,—
"परश्वश्च महाभाग ! स्नातुं गङ्गाह्रदं गता ।
अवतीर्णा विवस्वन्ति दृष्टनागेन केनचित् ॥"
इति मार्कण्डेयपुराणे अवीचिचरितम् ॥

परश्वधः, पुं, (पर + शि + अर्च्चिभ्योऽथेति कः । ततः परश्वं दधातीति । "आतोऽनुपेति" ३ । २ । ३, इति कः । कुठारः । इत्यमरः । २ । ८ । ६२ ॥ (यथा, रघौ । ६ । ४२ ।
धारां शितां रामपरश्वधस्य
सम्भावयत्युत्पलपत्रसाराम् ॥")

परसंज्ञकः, पुं, (परा श्रेष्ठा संज्ञा अस्य । ततः कप् ।) आत्मा । इति शब्दरत्नावली ॥

परस्परं, त्रि, ("सर्व्वनाम्ने डे वाच्ये समासवच्च बहुलम् ।" वार्त्ति असमासवद्भावे पूर्व्वपदस्य सुपः सुर्व्वत्वम् । कस्कादित्वात् विसर्ज्जनीयस्य सः ।) अन्योन्यम् । इतरेतरम् । यथा,—
"वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः ।

परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाचक्रुरिवादरेण ॥"
इति भट्टिः । २ । ५ ॥

परस्मैपदं, क्ली, (परस्मै परार्थं परबोधकं पदम् ।) दशलकारार्थां प्रत्येकं पूर्व्वनवविभक्तयः । यथा, "लड़ादिषु पूर्व्वे नव परस्मैपदं परे नव आत्मनेपदं परिभाष्यन्ते । इति संक्षिप्तसारव्याकरणम् ॥ (ताच्च पाणिनिमते । तिप् तस् झि । सिप् थस् थ । मिप् वस् मस् ॥) बोपदेवेनास्य परसंज्ञा कृता । यथा । "नवयः परे त्रितोऽन्यडिङ्गा ये ।" इति मुग्धबोधव्याकरणम् ॥

परस्वधः, पुं, (परस्वध+निपातनात् सत्वम् ।) परश्वधः । कुठारः । इत्यमरटीकायां रायमुकुटः ॥

परा, च, विमोचः । प्राधान्यम् । प्रातिलोम्यम् । धर्म्मम् । आभिमुख्यम् । श्लाघार्थम् । विक्रमः । गतिः । वधः । इति मेदिनी ॥ * ॥ उपसर्गविशेषः । अस्यार्थः । भङ्गः । अनादरः । प्रत्याहृतिः । व्यग्भावः । इति मुग्धबोधटीकायां दुर्गादासः ॥

परा, स्त्री, (पृ+अच्+ततः टाप् ।) वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥ (अस्याः गुणा यथा,—
"वन्ध्याकर्कोटकी लघ्वी कफघ्नदुग्धशोधिनी ।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
नाभिरूपमूलाधारात् प्रथमोदितनादस्वरूपवर्णः । यथा,—
"मूलाधारात् प्रथमसुदितो यस्तु भावः पराख्यः ॥"
इत्यलङ्कारकौस्तुभे प्रथमकिरणः ॥
(पूरयति सागरं भक्तमनोरथश्चेति युत्पत्त्या गङ्गा । यथा, काशीखण्डे । २६ । १०६ ।
"परानन्दा प्रकृष्टार्था प्रतिष्ठा पालनी परा ॥"
गायत्री । यथा, देवीभागवते । १२ । ६ । ६०।
"पार्व्वती परमोदारा परब्रह्मात्मिका परा ॥")

पराकः, पुं, (परं व्यत्यन्तं अकं दुःखं उपवासादिजन्यशारीरकादिक्लेशो यत्र यस्मादा वा ।) व्रतविशेषः । खड्गः । इति मेदिनी ॥ क्षुद्रः । रोगविशेषः । जन्तुविशेषः । इति विश्वः ॥ * ॥ पराकव्रतमाह मनुः । ११ । २१५ ।
"यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् ।
पराको नाम कृच्छ्रोऽयं सर्व्वपापापनोदनः ॥"
पराके पञ्च धेनवः पराकस्य प्राजापत्यपञ्चकतुल्यत्वात् । यथा अङ्गिराः ।
"षड्भिर्व्वर्षैः कृच्छ्रचारी ब्रह्महा तु विशुध्यति ।
मासि मासि पराकेण त्रिभिर्व्वर्षैर्यतोहति ॥"
अत्र षड्भिर्व्वर्षैः साग्नीतिग्रंतप्राजापत्यानि पूर्व्वसूक्तानि तथा प्रतिमास्येकैकपराकेण वर्षे द्वादश पराकाः वर्षत्रये षट्त्रिंशत् पराकाः । ततश्च षट्त्रिंशत् पराकाग्नीतुत्तरप्राजापत्यव्रततयोः प्रत्येकं ब्रह्मवधपापक्षयैककार्य्यकरत्वात् तुल्यत्वं षट्त्रिंशतश्च पञ्चगुणमग्नीतुत्तरव्रतं भवतीति । अतः प्राजापत्यपञ्चकतुल्यः पराकः । इति प्रायश्चित्ततत्त्वम् ॥ * ॥
"द्वादशाहोपवासेन पराकः सर्व्वपापहा ॥"
इति गरुड़पुराणे प्रायश्चित्तप्रकरणम् ॥

पराक्, [च्] त्रि, परा अञ्चतीति । (परा+अञ्च+क्विप् ।) प्रतिलोमगमनाश्रयः ॥

पराक्पुष्पी, स्त्री, (पराक् पुष्पं यस्याः ।) अपामार्गः । इति राजनिर्घण्टः ॥ (अपामार्गशब्देऽस्या विवृतिरुक्ता ॥)

पराक्रमः, पुं, पराक्रम्यतेऽनेन । (क्रम+"हलश्च ।" ३ । ३ । १२१ । इति घञ् । "नोदात्तोपदेशस्य ।" ७ । ३ । ३४ । इति न वृद्धिः ।) तत्पर्य्यायः । द्रविणम् २ तरः ३ सहः ४ बलम् ५ शौर्य्यम् ६ स्थाम ७ शुष्मम् ८ शक्तिः ६ प्राणः १० । इत्यमरः । २ । ८ । १०२ ॥ महः ११ शूषम् १२ सामर्थ्यम् १३ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये देवीमाहात्म्ये । ६२ । १३ ।
"पराक्रमश्च युद्धेषु जायते निर्भयः पुमान् ॥")
विक्रमः ॥ (यथा, मार्कण्डेये । २० । २५ ।
"यस्य मित्रगुणान् मित्राण्यमित्राश्च पराक्रमम् ।
कथयन्ति सदा सत्सु पुत्रवांस्तेन वै पिता ॥")
उद्योगः । इति मेदिनी ॥ निष्क्रान्तिः । इति शब्दरत्नावली ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ४४ ।
"व्यौषधं जगतः सेतुः सत्यधर्म्मः पराक्रमः ॥")

परागः, पुं, (परागच्छतीति । गम+अन्येभ्योपीति डः ।) पुष्पधूलिः । तत्पर्य्यायः । सुमनोरजः २ कौसुमरेणुः ३ । इत्यमरः । २ । ४ । १७ ॥ पुष्परेणुः ४ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशती । ५०६ ॥ [गेय ।
"लिप्तं न सुखं नाङ्गं न पश्यती न चरणाः परागस्पृशतेव नलिन्या विदग्धमधुपेन मधु पीतम् ॥")
धूलिः ॥ (यथा, रघुः । ४ । ३० ।
"प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्यथादीप्ति चतुरन्त इव स्वनः ॥")
ज्ञातीयद्रव्यम् ॥ गिरिप्रभेदः ॥ विख्यातिः ॥ उपरागः ॥ चन्दनम् । इति मेदिनी ॥ खच्छन्दगमनम् । इति शब्दरत्नावली ॥

पराङ्गदः, पुं, (परं अङ्गं काशीखण्डौ शिवत्वं ददातीति । दा+कः ।) शिवः । इति शब्दमाला ॥

पराङ्गवः, पुं, (पराङ्गं जलदृङ्मा प्रचुरशरीरं वाति प्राप्नोतीति । वा+कः ।) ससुद्रः । इति त्रिकाण्डशेषः ॥

पराङ्मुखः, त्रि, (पराक् प्रतिलोमगामि मुखं यस्य ।) विमुखः । तत्पर्य्यायः । पराचीनः २ । इत्यमरः । ३ । १ । ३३ ॥ (यथा, मनुः । १० । ११६ ।
"स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ॥
तल्लोकमाप्नुविद्वेषी, पुं । यथा, तन्त्रसारे ।
"कामबीजं सुखे माया शिरस्यङ्कुशमेव च ।
असौ पराङ्मुखः प्रोक्तो मध्ये तु बिन्दुलाञ्छितः ॥")

पराञ्चित, त्रि, (परेण व्याचितः पालितः ।) परपुष्टः । परद्वारा प्रतिपालितः । तत्पर्य्यायः । परिस्कन्दः २ परजातः ३ परैधितः ४ । इत्यमरः । २ । १० । १८ ॥ परिष्कन्दः ५ । इति भरतः ॥

पराचीनः, त्रि, (पराञ्चति अनभिमुखीभवतीति । अञ्चु+"ऋत्विग्दधृक् ।" ३ । २ । ५६ । इति क्विन् ततः स्वार्थे "विभाषाञ्चेरदिक् स्त्रियाम् ।" ५ । ४ । ८ । इति खः ।) पराङ्मुखः । इत्यमरः । ३ । १ । ३३ ॥ (यथा, भागवते । ३ । ३२ । २८ ।
"ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् ।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्म्मिणा ॥")

पराजयः, पुं, (परा+जि+अप् ।) रणे भङ्गः । इत्यमरः । २ । ८ । १११ ॥ (अत्र रण इत्युपलक्षणं वस्तुतस्तु विद्यावादादावपीतिबोद्धव्यम् ।) तत्पर्य्यायः । भङ्गः २ हारी ३ हारिः ४ पराभवः ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ७ । १६६ ।
"अनित्यौ विजयौ यस्माद्दृश्यते युध्यमानयोः ।
पराजयस्य संग्रामे तस्माद्युद्धं विवर्ज्जयेत् ॥")

पराजितः, त्रि, (परा+जि+कर्म्मणि क्तः ।) क्षतपराजयः । हारितः । तत्पर्य्यायः । पराभूतः २ विजितः ३ निर्जितः ४ जितः ५ । इति शब्दरत्नावली ॥ "इदं वाक्यमिदमवाक्यमेवं सति पराजितो भवतीति इमानि खलु पदानि भिषग्वादमार्गज्ञानार्थमधिगन्यानि भवन्ति ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

पराञ्चः, पुं, (परान् अञ्चतीति । अञ्चु व्याप्तौ+अच् ।) तैलयन्त्रः । घानः । क्षुरिकादलम् । इति शब्दरत्नावली ॥

परात्परः, पुं, परात् श्रेष्ठादपि परः श्रेष्ठः । स च श्रीकृष्णः । यथा,—
"देवाः कालस्य कालोऽहं विधातुर्विधिरेव च ।
संहारकर्त्तुः संहर्त्ता पातुः पाता परात्परः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥

परात्प्रियः पुं, (परादपि प्रियः ।) लवणविशेषः । इति शब्दचन्द्रिका । उलु इति भाषा ॥

परादनः, पुं, (परसुतत्वेन दत्तं अदनं यस्य यद्वा परान् शत्रून् अत्ति भक्षयति नाशयतीत्यर्थः आदयति विनाशयति खारोहिणं संग्रामे इति वा अद लुः क्विप् ल्युर्वा ।) पारसीघोटकः । इति त्रिकाण्डशेषः ॥

पराधीनः, त्रि, (परस्य परेषां वा अधीनः ।) परवशः । तत्पर्य्यायः । परतन्त्रः २ परवान् ३ नाथवान् । इत्यमरः । ३ । १ । १६ ॥ तस्य जीवन्मृतत्वं यथा,—
"स्वाधीनवृत्तेः साफल्यं न पराधीनवृत्तिता ।
ये पराधीनकर्म्माणो जीवन्नोऽपि च ते मृताः ॥"
इति गरुड़पुराणे ११३ अध्यायः ॥

परानसा, स्त्री, चिकित्सा । इति शब्दचन्द्रिका ॥

परान्नं, क्ली, (परस्य अन्नम् ।) अन्यस्वामिकभक्तपिष्टकादि ॥ परकर्त्तृकपाकजन्यमात्रम् । परगृहान्नम् । तस्य त्याज्यत्वं यथा,—

"परान्नं परवासञ्च नित्यं धर्म्मरतस्त्यजेत् ।"
इति स्मृति: ॥
संयमदिने तस्य त्याज्यत्वं यथा.—
"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"*॥
पारणदिने तस्य त्याज्यत्वं यथा,—
"अभ्यङ्गञ्च परान्नञ्च तैलं निर्म्मांसलङ्घनम् ।
तुलसीचयनं दूतं पुनर्भोजनमेव वा ॥
वस्त्रपीड़ां तथा चारं द्वादशीं वर्জ्जयेद्बुध:॥"*॥
तद्भोक्तुर्यागादेर्विफलत्वं यथा,—
"परपाकेन पुष्टस्य द्विजस्य ग्रहमेधिन: ।
दत्तं तप:धीतं यस्मात् तस्य तद्भवेत् ॥"*॥
तदुद्भुक्ता पुत्रोत्पादने दोषो यथा,—
"यस्यान्नेन तु सुप्तेन भार्य्या समधिगच्छति ।
यस्यान्नं तस्य ते पुत्रा अन्नाप्ते: प्रवर्त्तते ॥"*॥
ब्राह्मणादिस्वामिकान्नभोजने दोषो यथा,—
"ब्राह्मणान्नेन दारिद्र्यं क्षत्रियान्नेन प्रेष्यताम् ।
वैश्यान्नेन तु शूद्रत्वं शूद्रान्नेनरकं व्रजेत् ॥"
इत्येकादशीतत्त्वम् ॥*॥
परान्नभोजनेन तीर्थगमने फलस्याल्पत्वं यथा,—
"षोड़शांशं स लभते य: परान्नेन गच्छति ।
अर्द्धं तीर्थफलं तस्य य: प्रसङ्गेन गच्छति ॥"
इति प्रायश्चित्ततत्त्वम् ॥*॥
महागुरुनिपाते तस्य त्याज्यत्वं यथा,—
"अन्यत्राद्धं परान्नञ्च गन्धं माल्यञ्च मैथुनम् ।
वर्জ्जयेदृगुरुपाते तु यावत् पूर्णो न वत्सर: ॥"
इति शुद्धितत्त्वम् ॥*॥
तद्भोक्तुर्मन्त्रसिद्धिहानिर्यथा,—
"जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् ।
मनो दग्धं परस्त्रीभि: कथं सिद्धिर्वरानने ! ॥"
इति तन्त्रम् ॥*॥
तद्भोजने प्रतिप्रसवो यथा,—
"गुर्व्वन्नं मातुलान्नं वा श्वशुरान्नं तथैव च ।
पितु: पुत्रस्य चैवान्नं न परान्नमिति स्मृति: ॥"
इत्येकादशीतत्त्वम् ॥
परान्न:, त्रि, (परान्नं नित्यमस्त्यस्य । "अर्श आदिभ्योऽच्।" ५ । २ । १२७ । इति अच् ।) परान्नोपजीवी । तत्पर्य्याय: । परपिण्डाद: २ । इत्यमर: । ३ । १ । २० ॥
परापं, त्रि. (परागता आपो यस्मात् । "अवर्णान्नादवा ।" ६ । ३ । ६७ । इत्यस्य वार्त्तिं इत्यनेन पत्वे अय ईदभाव: ।) पत्वे ईत्वे परेपम् । इति सिद्धान्तकौमुदी ॥
परापरं, क्ली, (परमापिपर्त्ति।आ+पृ+अच्।)परुषकम् । इति भावप्रकाश: ॥ (अस्य विवरणं परुष शब्दे द्रष्टव्यम् ॥ परश्चापरश्च द्वयो: समाहार: ।) परमपरञ्च ॥ (यथा, विष्णुपुराणे । १ । ६ । २७ ।
"एतच्च सहयज्ञेन प्रजानां कारणं परम् ।
परापरविद: प्राज्ञास्ततो यज्ञान् वितन्वते ॥")
परापरगुरु:, पुं, (परमादपि पर: श्रेष्ठ: परापर: । पृषोदरादित्वात् साधु: ततः कर्म्मधारय: ।) गुरुविशेष: । स तु भगवती । (यथा,—
"आदौ सर्व्वत्र देवेशि ! मन्त्रद: परमो गुरु: ।
परापरगुरुर्ज्ञेयं हि परमेष्ठी त्वहं गुरु: ॥"
इति दक्षिणीलतन्त्रे २ पटल: ॥
(तन्त्रान्तरे च यथा,—
"मन्त्रदाता गुरु: प्रोक्तो मन्त्रस्तु परमो गुरु: ।
परापरगुरुर्ज्ञेयं हि परमेष्ठिगुरुर्ज्ञेयम् ॥")
पराभव:, पुं, (पराभूयते इति पराभवनमित्यर्थ: । परा+भू+भावे अप् ।) तिरस्कार: । (यथा, मार्कण्डेये । १८ । २८ ।
"मद्यासक्तोऽहमुच्छिष्टो नचैवाहं जितेन्द्रिय: ।
कथमिच्छथ मत्तोऽपि देवा: शत्रुपराभवम् ॥")
अस्य पर्य्याय: । न्यक्कार: २ तिरस्क्रिया ३ परिभाव: ४ विप्रकार: ५ परिभव: ६ अभिभव: ७ अत्याकार: ८ निकार: ९ । इति हेमचन्द्र: ॥ विनाश: । इति मेदिनी ॥
पराभूत:, त्रि, (पराभूयते स्म । परा+भू+क्त ।) पराजित: । इत्यमर: । २ । ८ । ११२ ॥
परामर्श:, पुं. (परान्मृश्यते इति । परामृश्यतेऽनेनेति वा । परा+मृश्+भावे घञ् ।) युक्ति: । विवेचनम् । तत्पर्य्याय: । वितर्क: २ उन्नयनम् ३ विमर्शनम् ४ अध्याहार: ५ तर्क: ६ ऊह: ७ । इति हेमचन्द्र: ॥ तर्कशास्त्रे तु व्याप्तिविशिष्टपक्षधर्म्मताज्ञानम् । यथा,—
"व्याप्यस्य पक्षधर्म्मत्वधी: परामर्श उच्यते ॥"
इति भाषापरिच्छेद: ॥
अस्यार्थ: "व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितिजनकम् । तच्च व्याप्य: पक्षे इति ज्ञानं पक्षो वा व्याप्यवान् इति ज्ञानं वा ।" इति सिद्धान्तमुक्तावली ॥ स चानुमितिव्यापार: । यथा,—
"व्यापारस्तु परामर्श: करणं व्याप्तिधीर्भवेत् ॥"
इति भाषापरिच्छेद: ॥
अस्यार्थ: । "अनुमायामनुमितौ व्याप्तिज्ञानं कारणं परामर्शो व्यापार: । तथा हि । येन पुरुषेण महानसादौ धूमे वह्निर्व्याप्तिर्गृहीता पश्चाच्च स एव पुरुष: क्वचित् पर्व्वतादौ अविच्छिन्नमूलां धूमरेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं तस्य पुरुषस्य भवति पश्चाच्च वह्निव्याप्यधूमवान् पर्व्वत इति ज्ञानं भवति स एव परामर्श इत्युच्यते ।" इति सिद्धान्तमुक्तावली ॥
परार्द्धं, क्ली (परमश्चतं वारि यस्मात् ।) वर्षशतम् । इति त्रिकाण्डशेष: ॥ (परमश्चतं अमरणधर्म्मैकं ब्रह्मात्मभूतं यस्य । इति विग्रहे वाचस्पतिलिङ्ग: । यथा, सुश्रुतोपनिषदि । ३ । २ । ६ ।
"वेदान्तविज्ञानसुनिश्चितार्था:
सन्न्यासयोगात् यतय: शुद्धसत्त्वा: ।
ते ब्रह्मलोकेषु परान्तकाले
परान्मृता: परिमुच्यन्ति सर्व्वे ॥")
परान्मृष्ट:, त्रि, (परान्मृश्यते स्म । परा+मृश्+कर्म्मणि क्त: ।) सम्बन्ध: । सम्बन्धयुक्त: । यथा,—
"क्लेशकर्म्मविपाकाद्यैरपरान्मृष्ट: । इति कुसुमाञ्जलिकारिकाव्याख्याने रामभद्र: ॥ कृतपरामर्श: । विवेचित: ॥
परायणं, त्रि, आसङ्गवचनम् । इत्यमर: । ३ । २ । २ ॥ परं केवलमयनमासक्तिस्थानमिति परायणम् । यथा धर्म्मपरायणो धर्म्मासक्त: । इति भरत: ॥ आश्रय: । (यथा, मनु: । ४ । १० ।
"वर्त्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायण: ॥"
तत्परम् । अभीष्टम् । इति मेदिनी ॥ (नित्यप्रतिष्ठा । यथा, रामायणे । २ । ४८ । १७ ।
"पादच्छायासुखं भर्त्तुस्त्वादृशस्य महात्मन: ।
स हि नाथोऽनुनाथास्त्वं स गति: स परायणम् ॥"
"परायणं शाश्वतप्रतिष्ठा ।" इति रामानुज: ॥)
परायत्तं, त्रि, परस्य परेषां वा. आयत्तम् ।) पराधीनम् । यथा,—
"तत्रायत्तवशाधीनच्छन्दवश: परात्परे ॥"
इति हेमचन्द्र: ॥
परारि, अ (पूर्व्वतरे वत्सरे इत्यर्थे "सद्य: परुत्परारीति ।" ५ । ३ । २२ । इति पूर्व्वतरस्य परभाव: आरि च प्रत्ययो वत्सरे ।) पूर्व्वतरवत्सरे । गतद्वितीयवर्षे । इत्यमरभरतौ ॥ (परस्य अरि: ।) परशत्रौ त्रि ॥
परारिन्, त्रि, (परारि भव: । "चिरपरुत्परारिभ्यस्त्रो वक्तव्य: ।" ४ । ३ । २३ । इत्यस्य वार्त्तिं इत्यनेन त्र: ।) पूर्व्वतरवत्सरसम्बन्धी । इति व्याकरणम् ॥
परारु:, पुं, (परार्च्छतीति । परा+ऋ+उन् ।) कारवेल्ल: । इति त्रिकाण्डशेष: ॥ (कारवेल्लशब्दे ऽस्य गुणादयो ज्ञातव्या: ॥)
परारुक:, पुं, (परार्च्छतीति । परा+ऋ+उक: ।) प्रस्तर: । इति त्रिकाण्डशेष: ॥
परार्द्ध क्ली,(परार्द्धमिति सर्व्वोत्कृष्टतया वर्द्धते इति । ऋधधर वृद्धौ+अच् ।) दशमध्यसंख्या । लक्षलक्षकोटि: । १००,०००,०००,०००,०००,००० इदं परमसंख्या अष्टादशाङ्कपर्य्यन्तम् । इति हेमचन्द्र: ज्योतिषञ्च ॥ (यथा, नैषधे । ३ । ४० ।
"यदि त्रिलोकीगणनापरा स्यात्
तस्या: समाप्तिर्यदि नायुष: स्यात् ।
पारे परार्द्धं गणितं यदि स्यात्
रथेयमि:शेषगुणोऽपि स स्यात् ॥")
ब्रह्मण आयुषोऽर्द्धम् । यथा,—
"निजेन तस्य मानेन वायुर्व्वर्षशतं स्मृतम् ।
तत् पराख्यं तदर्द्धञ्च परार्द्धमभिधीयते ॥"
इति कौर्म्मे ५ अध्याय: ॥
(तथा, मार्कण्डेये । ४६ । ४२—४३ ।
"शतं हि तस्य (ब्रह्मण:) वर्षाणां परमित्यभिधीयते ।
पञ्चाशद्विहितयावर्षै: परार्द्धमिति कीर्त्यते ॥
एवमस्य परार्द्धन्तु व्यतीतं द्विजसत्तम ! ।
यस्यान्तेऽभून्महाकल्प: पाद्म इत्यभिविश्रुत: ॥")
परार्द्ध्य:, त्रि, (परार्द्धं परार्द्धसंख्यावत् प्रधानत्वमर्हतीति। परार्द्ध+यत् यद्वा परस्मिन्नर्द्धे भव: । "परावराधमोत्तमपूर्व्वाच्च ।" ४ । ३ । ५ । इति

यत् ।) प्रधानः । श्रेष्ठः । इत्यमरः । ३ । १ । ५८ ।
(यथा, रघुः । १० । ६४ ।
"ताभ्यस्तथाविधान् स्वप्नान् श्रुत्वा प्रीतो हि पार्थिवः ।
मेने पराद्धर्यमात्मानं गुरुत्वेन जगद्गुरोः ॥")

परावर्तः, क्ली, (परावर्त्तते । परा + अव + वृत्तु लकात् अतच् ।) परूषकम् । इति राजनिर्घण्टः ॥

परावर्त्तः, पुं, (परा वर्त्तते इति । परा + वृत् + अप् ।) परिवर्त्तः । विनिमयः । इति हेमचन्द्रः ॥

परावहः, पुं, (परा वहतीति । वह् + अच् ।) सप्तवायुन्तर्गतसप्तमवायुः । स तु परिवहवायोरूर्द्धस्थितः । इति सिद्धान्तशिरोमणिः ॥ (यथा, हरिवंशे २३६ अध्याये ।
"आवहः प्रवहश्चैव विवहश्च समीरणः ।
परावहः संवहश्च उद्वहश्च महाबलः ॥")

परावित्तः, पुं, (परा + वध + क्तः ।) कुबेरः । इति शब्दमाला ॥

परावेदी, स्त्री, (परमुत्कर्षमाविन्दतीति । विद् + अण् । स्त्रियां ङीप् ।) दृहती । इति केचित् ॥

पराशरः, पुं, (अस्य निरुक्तिरुक्ता यथा, महाभारते । १ । १७६ । ३ ।
"परासुः स यतस्तेन वशिष्ठः स्थापितो मुनिः ।
गर्भस्थेन ततो लोके पराशर इति स्मृतः ॥"
"पराशेराशासनमवस्थानं येन स पराशरः ।
आङ्पूर्व्वाच्छासतेर्ड्डरन् ।" इति नीलकण्ठः ॥)
व्यासपिता । शक्तिसुनिपुत्रः । यथा,—
"सुतं जनयच्छक्तेरदृश्यन्ती पराशरम् ।
काली पराशरात् जज्ञे कृष्णद्वैपायनं मुनिम् ॥"
इत्यग्निपुराणम् ॥
(अयं हि द्वादशाध्यायात्मिकां धर्म्मसंहितां कृतवान् । सा च कलिकर्त्तव्यधर्म्मविषया । यदुक्तं तत्रैव ।
"कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥"
तत्र संहितायां १मे अध्याये युगभेदे धर्म्मभेदादिकथनम् । २अः आचारधर्म्मगृहधर्म्मादिकथनम् । ३अः अशौचव्यवस्था आत्महरणादिदोषाः । ४अः प्रायश्चित्तमतान्यैहिक्रियाकुशपुत्तलिकादिकथनम् । ५अः प्राणिदृष्टप्रायश्चित्तव्यवस्था । ६ अः प्राणिवधप्रायश्चित्तकथनम् । ७अः द्रव्यशुद्ध्यादि । ८अः गोवधादिप्रायश्चित्तम् । ९अः गोवधापवादादि । १०अः अगम्यागमनादिप्रायश्चित्तम् । ११अः अमेध्यभक्षणादि प्रायश्चित्तम् । १२अः प्रायश्चित्ताङ्गस्नानभेदादि ॥ * ॥
अयं खलु मत्स्यगन्धायां सत्यवत्यां वेदव्यासमुत्पादितवान् । एतद्विवरणमुक्तं यथा देवीभागवते । २ स्कन्धे । २अध्याये द्रष्टव्यम् ॥

पराञ् आशृणाति हिनस्तीति । पृ गि हिंसे + अच् ।" नागभेदः । यथा, महाभारते ।
१ । ५७ । १८ । "वराहको वीरणकः सुचित्रश्चित्रवेगिकः । पराशरस्तरुणको मणिस्कन्धस्थपारुणिः ॥")

पराशरी, [न्] पुं, पराशरेण प्रोक्तं भिक्षुसूत्रं पाराशरं तद्धीयतेऽस्याध्ययनायेति वा । इन् च । पराशरीति दुर्गादित्वात् । इत्यमरटीकायां भरतः ॥ पाराशरी । चतुर्थाश्रमी ॥

पराश्रया, स्त्री, (पर आश्रयो यस्याः ।) वृक्षोपरिजातलतताविशेषः । परसाड़ा इति भाषा । तत्पर्य्यायः । वन्ध्या २ वृक्षादनी ३ वृक्षरुहा ४ जीवन्तिका ५ वह्निनी ६ पुत्रिणी ७ वन्ध्या ८ परपुष्टा ९ । इति शब्दचन्द्रिका ॥ (अन्याश्रिते, त्रि ॥)

परासनं, क्ली, (परा + अस् + भावे ल्युट् ।) मारणम् । वधः । इत्यमरः । २ । ८ । ११३ ॥

परासुः, त्रि, (परागताः प्रस्थिता असवः प्राणा यस्य ।) मृतः । इत्यमरः । २ । ८ । ११७ ॥
(यथा, रघौ । ६ । ७८ ।
"तौ दम्पती बहु विलप्य शिशोः प्रहर्त्तुं शूल्यं निखातसुदृढारयतासुरस्तः ।
सोऽभूत् परासुरथ भूमिपतिं शशाप हस्तार्पितैर्नयनवारिभिरेव तृप्तः ॥"
परासुपरीक्षा वैद्यके यथा,—
"तस्य चेत् परिदृश्यमानं पृथक्त्वेन पादजङ्घोरुस्फिग्गुदरपार्श्व-पृष्ठेधिका-पाणिग्रीवा-तालोष्ठललाटं स्विन्नं शीतं प्रस्तब्धं दारुणं वीतमांसशोणितं वा स्यात् । परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् । तस्य चेत् परिदृश्यमानानि पृथक्त्वेन शुल्फजानुवङ्क्षण-गुदवृषण-मेढ्रनाभ्यंशस्तनमणिकहनुपर्शुकानासिका कर्णाक्षिभ्रूशङ्खादीनि स्रस्तानि भ्रस्तानि च्युतानि स्थानेभ्यः स्युः परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् ।"
"तस्य चेदुच्छ्वासोऽतिदीर्घोऽतिह्रस्वो वा स्यात् परासुरिति विद्यात् । तस्य चेन्मन्ये परिदृश्यमानेन न स्पन्देयातां परासुरिति विद्यात् । तस्य चेद्दन्ताः प्रतिकीर्णाः श्वेता जातशर्करा स्युः परासुरिति विद्यात् । तस्य चेत् पक्ष्माणि जटावद्धानि स्युः परासुरिति विद्यात् । तस्य चेच्चतुर्थे प्रकृतिहीने विकृतियुक्ते अत्युत्पिञ्छिते अतिप्रविष्टे अतिजिह्मे अतिविषमे अतिप्रसृते अतिविसृत्वन्धने सततोन्मिषिते सततनिमिषिते निमेषोन्मेषातिप्रवृत्ते विभ्रान्तदृष्टिके विपरीतदृष्टिके हीनदृष्टिके वक्रदृष्टिके नकुलान्ते कपोतान्ते अङ्गारवर्णे कृष्णनीलपीतश्यावताम्रहरितहारिद्रशुक्लवैकारिकाणां वर्णानामन्यतमेनाभिसंसृते वा स्यातां परासुरिति विद्यात् । तथास्य केशलोमान्यायच्छेत् । तस्य चेत् केशलोमान्यायस्यमानानि प्रसुश्चेरन् नचेत् वेदयत् परासुरिति विद्यात् ।
तस्य चेदुदरे शिराः प्रदृश्येरन् । श्यावताम्रनील-हारिद्रशुक्ला वा स्युः परासुरिति विद्यात् ।
तस्य चेन्नखा वीतमांसशोणिताः पक्वजाम्बरवर्णाः स्युः परासुरिति विद्यात् ।
अथास्याङ्गुलीरायच्छेत्तस्य चेदङ्गुलय आयस्यमाना नचेत् स्फुटेयुः परासुरिति विद्यात् ॥"
इति चरकेणेन्द्रियस्थाने चतुर्थेऽध्याय उक्तम् ॥
"वातास्थीला तु हृदये यस्योर्द्धमनुयायिनी ।
रुजान्नविद्वेषकरी स परासुरसंशयम् ॥"
इति सुश्रुते सूत्रस्थाने एकत्रिंशत्तमेऽध्याये ॥)

परासुता, स्त्री, (परासोर्मृतस्य भावः । परासु + तल् स्त्रियां टाप् ।) मृतत्वम् । निद्रापरवशता । इति पुराणम् ॥

परास्कन्दी, [न्] पुं, (परान् आस्कन्दितुं शीलमस्य । आ + स्कन्द् + णिनिः ।) चौरः । इत्यमरः । २ । १० । २५ ॥

परास्तं, त्रि (परास्यते स्म । परा + अस् + क्तः ।) निरस्तम् । पराजितम् । यथा—
"द्यौर्गिरासु वरमस्तु पुनर्भा-
स्वीकृतेव परवागपरास्ता ॥"
इति नैषधे ५ सर्गः ॥

पराह्णः, पुं, (परस्तात्तरवर्त्ति अह्णः । "राजाहः सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) परदिनम् । यथा । पूर्व्वाह्णे तद्विधत्वेऽपि पराह्णे चिसन्ध्याव्यापित्वे पराह्ण एव । इति सावित्रीव्रते तिथितत्त्वम् ॥

पराह्णः, पुं, (परश्च तदह्णेति कर्म्मधारयः । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । ततः नञ् णः ।) अपराह्णः । विकालः । (केषाञ्चिन्मते अयं पराह्णोऽपि ।)

परि, व्य, सर्व्वतोभावः । वर्ज्जनम् । आधिः । शेषः । इत्यमृतः । आख्यानम् । भागः । वीप्सा । आलिङ्गनम् । लक्षणम् । दोषाख्यानम् । निरसनम् । पूजा । व्याप्तिः । भूषणम् । इति मेदिनी ॥ उपरमः । शोकः । इति हेमचन्द्रः ॥ सन्तोषभाषणम् । इति शब्दरत्नावली ॥ उपसर्गविशेषः । अस्यार्थः । सर्व्वतोभावः । अतिशयः । वीप्सा । इत्यभावः । चिह्नम् । भागः । त्यागः । नियमः । इति सुग्धबोधटीकायां दुर्गादासः ॥

परिकथा, स्त्री, (परितः कथा ।) वाङ्मयभेदः । यथा,
"अथ वाङ्मयभेदाः स्युरुक्थ्याः खण्डकथा कथा ।
आख्यायिका परिकथा कलापकविशेषकौ ॥"
इति चिकाण्डशेषः ॥

परिकम्पः, पुं, (परितः कम्पो यस्मात् ।) भयम् । कम्पः । इति मेदिनी ॥

परिकरः, पुं, (परिकीर्य्यते इति । कॄ शब्दविक्षेपे + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् । यद्वा परिक्रियतेऽनेनेति पुंसीति घः ।) पर्य्यङ्कः । परिवारः । इत्यमरः । ३ । ३ । १६५ ॥ समारम्भः । वृन्दः । इति शब्दरत्नावली ॥ प्रगाढ़गात्रिकाबन्धः । (यथा, मार्कण्डेये । १६ । २५ ।
"गाढ़ं परिकरं बद्ध्वा शुक्लमादाय चाधिकम् ।
स्कन्धे भर्त्तारमादाय जगाम स्वदृगामिनी ॥")
विवेकः । इति विश्वः । सहकारी । यथा,—

"परिकरः सहकारी स च व्याप्यधर्म्मत्वादिः।"
इति सामान्यनिरुक्तौ जगदीशः॥
(अलङ्कारविशेषः। यथा, साहित्यदर्पणे।१०।७५।
"उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः॥"
उदाहरणं यथा तत्रैव। "अङ्गराज! सेनापते! द्रोणोपहासिन्! कर्ण! रक्षैनं भीमाद्दुःशासनम्॥")
परिकर्त्ता, [र्त्तृ] पुं, (परिकरोतीति। परि+कृ+तृच्।) अनूढ़ज्येष्ठे कनिष्ठविवाहस्य याजकः। इत्युद्वाहतत्त्वम्॥
परिकर्म्म, [न्] क्ली, (परिक्रियते इति। परि+कृ+मनिन्।) कुङ्कुमादिना शरीरशोभाधानरूपसंस्कारः। इति भरतः॥ स्नानोद्वर्त्तनादि। इति स्वामी॥ शरीरसंस्कारमात्रम्। इत्यन्ये॥ तत्पर्य्यायः। अङ्गसंस्कारः २। इत्यमरः।२।६।१२१॥ प्रतिकर्म्म ३। इति शब्दरत्नावली॥ (यथा कुमारे।४।१६।
"विबुधैरसि यस्य दारुणैः
असमाप्ते परिकर्म्मणि स्थितः।
तमिमं कुरु दक्षिणेतरं
चरणं निर्म्मितरागमेहि मे॥")
परिकर्म्मा, [र्म्मन्] पुं, (परितः कर्म्म यस्य।) परिचारकः। सेवकः। इति रत्नमाला॥
परिकर्म्मी, [न्] त्रि, (परिकर्म्म विद्यतेऽस्य। परिकर्म्म+इनिः।) परिकर्म्मा। इति हेमचन्द्रः॥
परिकाङ्क्षितः, त्रि, (परित्यक्तं काङ्क्षितं अभिलाषो येन।) तपस्वी। इति शब्दरत्नावली॥
परिकूटं, क्ली, (परि सर्व्वतो भूधितं कूटम्।) पुरद्वारकूटकम्। तत्पर्य्यायः। हस्तिनखः २ नगरद्वारकूटकम् ३। इति हेमचन्द्रः॥
परिक्रमः, पुं, (परिक्रमणम्। क्रमु पादविक्षेपे+भावे घञ्। "नोदात्तोपदेशस्येति।" ७।३।३४। इति उपधाया न वृद्धिः।) क्रीड़ार्थं पद्भ्यां गमनम्। तत्पर्य्यायः। विहारः २। इत्यमरः। ३।२।१६॥ प्रदक्षिणम्। यथा,—
वराह उवाच।
"शृणु भद्रे! महापुण्यं पृथिव्यां सर्व्वतो दिशम्।
परिक्रम्य यथाध्वानं प्रमाणगणितं शुभम्॥
भूम्याः परिक्रमे सम्यक् प्रमाणं योजनानि च।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च॥
तीर्थान्येतानि देवाश्च तारकाश्च नभस्तले।
गणितानि समस्तानि वायुना जगदायुषा॥
ब्रह्मणा लोमशेनैव नारदेन ध्रुवेण च।
जाम्बवता सपुत्रेण रावणेन हनूमता॥
एतैरनेकधा देवैः ससागरवना मही।
क्रमिता बालिना चैव बाह्वमखलरेखया॥
अन्तरा भ्रमणेनैव सुग्रीवेण महात्मना।
तथा च पूर्व्वदेवेन्द्रैः पञ्चभिः पाण्डुनन्दनैः॥
योगसिद्धैस्तथा कैश्चिन्मार्कण्डेयसुखैरपि।
क्रमिता न क्रमिष्यन्ति न पूर्व्वे नापरे जनाः॥
अल्पसत्त्वबलोपेतैः प्राणिभिश्चाल्पबुद्धिभिः।
मनसापि न शक्यन्ते गमनस्य च का कथा॥
सप्तद्वीपे तु तीर्थानि भ्रमणाद् यत् फलं भवेत्।
प्राप्यते चाधिकं तस्मान्मथुरायाः परिक्रमे॥
मथुरां समनुप्राप्य यस्तु कुर्य्यात् प्रदक्षिणम्।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामानभीप्सुभिः।
कर्त्तव्या मथुरां प्राप्य नरैः सम्यक् प्रदक्षिणा॥"
इति वराहपुराणम्॥
परिक्रमसहः, पुं, (परिक्रमं विहारं सहते इति। सह+पचाद्यच्।) छागलः। इति त्रिकाण्डशेषः॥
परिक्रिया, स्त्री, (परिकरणम्। परि+कृ+श्यप्। "रिङ् शयग्लिङ्क्षु।" ७।४।२८। इति रिङ्।) परिखाजलादिना वेष्टनम्। तत्पर्य्यायः। परिसर्पः २। इत्यमरः।३।२।२०॥ (एकाहयागविशेषः। यदुक्तं आश्वलायनश्रौते।६।५।१२।
"सद्यस्क्रिया अनुक्रिया परिक्रिया वा स्वर्गकामः॥" "परिक्रियायोगेकाहा भवति एषामन्यतमेन स्वर्गकामो यजेत॥" इति नारायणी॥)
परिक्षित्, पुं, (परि सर्व्वतोभावेन क्षीयते हन्यते दुरितं येन। परि+क्षि+क्विप्। कलिशासनकर्त्तृत्वादस्य तथात्वम्। यद्वा, परिक्षीणेषु कुरुषु क्षियति ईष्टे इति। तथा चोक्तं महाभारते।१०।१६।२—३॥
"विराटस्य सुतां पूर्व्वं स्नुषां गाण्डीवधन्वनः।
उपयम्य गतां दृष्ट्वा व्रतवान् ब्राह्मणोऽब्रवीत्॥
परिक्षीणेषु कुरुषु पुत्रस्तव भविष्यति।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति॥")
अभिमन्युपुत्रः। तत्पर्य्यायः। परीक्षित् २ पारिक्षीत; ३ परिक्षितः ४। इति शब्दरत्नावली॥ (अयं पुनर्युधिष्ठिरादनन्तरं कलियुगस्यारम्भे राजचक्रवर्त्ती आसीत्। कुरुक्षेत्रयुद्धे परिक्षीणे कुरुकुले अभिमन्युपत्न्या उत्तरायां गर्भाज्जातः। अयमेव गर्भस्थः क्रुद्धाश्वत्थाम्नाप्रयुक्तेन ब्रह्मास्त्रेण निहतोऽपि पुनर्भगवतः कृष्णस्य प्रभावात् जीवितं लब्धवान्। अयमेव दृषरूपिणं धर्म्मं निगृह्णन्तं कलिं प्रग्रहास। ततो गच्छति काले एकदाऽसौ मृगयायां विहरन् क्षुधार्त्तः पौड़ितः मौनव्रतावलम्बिनः शमीकस्य मुनेराश्रमं गत्वा प्रत्युत्तरदानपराङ्मुखस्य तस्य स्कन्धे धनुष्कोट्या मृतं सर्पमासज्जयामास। अनेनापराधेनेमं राजानं शमीकस्य पुत्रः शृङ्गी नामा तपस्वी इतः सप्तमेऽहनि तक्षकदष्टोऽयं मृतो भविष्यतीत्यभिशप्तवान्। एतदाकर्ण्यायं गङ्गातीरे मुनिप्रभृतिभिरीश्वरनामकीर्त्तनादिकमालोचयन् प्रायोपवेशने स्थितस्तक्षकदष्टो मृतश्च। इत्येतत्कथा महाभारते विस्तरतो द्रष्टव्या॥)
(कुरुपुत्रविशेषः। यथा, हरिवंशे।३२।६०।
"कुरोस्तु पुत्राश्चत्वारः सुधन्वा सुधनुस्तथा।
परिक्षित्तु महाबाहुः प्रवरश्चारिमेजयः॥"
अविक्षित-पुत्रः। यथा, महाभारते।१।६४।५०।
"अविक्षितः परिक्षिच्च बलाश्वश्च वीर्य्यवान्॥")
परिक्षिप्तं, त्रि, (परितः क्षिप्यते स्म इति। क्षिप्+क्त।) परिखादिना वेष्टितम्। तत्पर्य्यायः। निवृतम् २। इत्यमरः।३।१।८८॥ सर्व्वतोभावेन क्षेपयुक्तञ्च॥
परिखा, स्त्री, (परितः खन्यते इति। खन्+"अन्येष्वपीति।" ३।२।१०१। डः।) राजधान्यादिवेष्टनखातम्। इति भरतः॥ गड्खाइ इति खाना इति च यस्याः प्रसिद्धिः। तत्पर्य्यायः॥ खेयम्। इत्यमरः।१।१०।२६॥ (यथा, मनुः।७।१६६।
"भिन्द्याच्चैव तड़ागानि प्राकारपरिखास्तथा।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा॥")
तस्या मानं यथा,—
"प्रस्थे च परिखामानं गृहहस्तं प्रशस्यकम्।
परितः शिविराणाञ्च गम्भीरं दण्डहस्तकम्॥
सङ्केतपूर्व्वकञ्चैव परिखाद्वारमीप्सितम्।
शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे२०२ अध्यायः॥
परिखातः, त्रि, परिसर्व्वतोभावेन खातः प्रथितः। इति परिपूर्व्वखाधातोः कर्म्मणि क्तप्रत्ययनिष्पन्नः॥ विख्यातः॥
परिगणितः, त्रि, (परिसर्व्वतोभावेन गण्यते स्म। परि+गण+क्त।) सर्व्वतोभावेन गणनायुक्तः। यथा। "परिगणितव्यतिरिक्तेषु संसर्गज्ञातविशेषो नादरणीयः परिगणनानर्थक्यात्।" इति जीमूतवाहनः॥
परिगतः, त्रि, (परि+गम्+क्त।) प्राप्तः। विस्तृतः। ज्ञातः। वेष्टितः। इति मेदिनी॥ गतः। इति हेमचन्द्रः॥ वेष्टितः। यथा,—
"अथ सवल्कदुकूलकुथादिभिः
परिगतोज्ज्वलदुन्नतबालधिः।"
इति भट्टिकाव्ये।१०।१॥
परिग्रह्या, स्त्री, (परि सर्व्वतोभावेन गृह्यते या परि+ग्रह+कर्म्मणि क्यप्।) नारी। इति शब्दचन्द्रिका॥
परिग्रहः, पुं, (परिग्रहणमिति। परि+ग्रह+"ग्रह वृदृनिश्चिगमश्च।" ३।३।५८। इति अप्।) प्रतिग्रहः। (यथा, पञ्चतन्त्रे।४।७।
"कण्ठाश्लेषपरिग्रहे शिथिलता यन्नादराद्युष्मसे
तत्ते धूर्त्त! हृदि स्थिता प्रियतमा काचिन्ममेवापरा॥")
सैन्यपश्चाद्भागः। पत्नी। भार्य्या। (यथा, रघुः।६।१४।
"समशुक्मया सपत्नपरिग्रहा-
ननलकानलकानवमां पुरीम्॥")
परिजनः। परिवारः। आदरणम्। (यथा, रघुः।६।४६।
"अनुभवन्नवदोलनृतूत्सवं
पटुरपि प्रियकण्ठजिघृक्षया।
अनयदात्मनरक्षणपरिग्रहे
भुजलताजलतामवलाजनः॥")
स्वीकारः। (यथा, रघुः।१८।३८

"लोकेन भावी पितुरेव तुल्यः
सम्भावितो मौलिपरिग्रहात् सः ॥")
मूलम् । कन्दः । ग्रापः । ग्रपघः । इत्यमरभरतौ ॥ राहुवक्त्रस्थभास्करः । इत्यजयः ॥ (पुत्रदारादि-भर्णयपरिमाणम् । यथा, मनुः । १० । १२४ ।
"प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद् यथार्हतः ।
ग्रक्लिश्नावेक्ष्य दाक्ष्यञ्च भूतानाञ्च परिग्रहम् ॥"
परिग्रह्यतेऽनेनेति विग्रहे हस्तः ॥ विष्णुः । यथा, महाभारते । १३ । १४६ । ५८ ।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥"
"ग्रग्रजार्थिभिः परितो ग्रह्यते सर्व्वगतत्वात् परितो ग्रायत इति वा । पुण्यादिभिर्भक्तैरर्चितं परिग्रह्णाति इति वा परिग्रहः ॥" इति ग्राङ्कर-भाष्यम् ॥ साधनम् । यथा, रघुः । ६ । २१ ।
"ग्रजिनदण्डभृतं कुग्रमेखलां
यतगिरं मृगशृङ्गपरिग्रहम् ॥"
"मृगशृङ्गं परिग्रहः कण्डूयनसाधनं यस्यासौ ॥"
इति तट्टीकायां मल्लिनाथः ॥)
परिग्राहः, पुं, (परि + ग्रह + "परौ यज्ञे ।" ३ । ३ । ४७ । इति घञ् ।) यज्ञवेदिविशेषः । इति केचित् ॥
परिघः, पुं, (परि हन्यतेऽनेनेति । परि + हन् + "परौ घः ।" ३ । ३ । ८४ । इति ग्रप् वादेशश्च ।) लोहवह्लगुड़ः । लोहमय-लगुड़ः लोहसुखलगुड़ः । तत्पर्य्यायः । परि-घातनः २ । इत्यमरः । २ । ८ । ६१ ॥ परि-घातकः ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ६ । ६७ । २४ ।
"बाहूनामुत्तमाङ्गानां कार्मुकाणाञ्च भारत ! ।
गदानां परिघाणाञ्च हस्तानाञ्चोरुभिः सह ॥")
परिघातः । परितो हननम् । इत्यमरभरतौ ॥ विष्कम्भादिसप्तविंशतियोगान्तर्गत ऊनविंशति-योगः । (यथा, ज्योतिषे ।
"वज्रोऽसक् च यतीपातो वरीयान् परिघस्तथा ॥"
ग्रस्य ग्रर्द्धाग्रं परित्यज्य शुभं कर्म्म कुर्य्यात् । यदुक्तं तत्रैव ।
"परिघस्य त्वजेदर्द्धं शुभकर्म्म ततः परम् ॥")
ग्रथ परिघयोगजातफलम् ।
"उत्पत्तिकाले परिघो यदि स्या-
न्नरस्तदा वंशकुठारकर्त्ता ।
ग्रसत्यसाक्षी क्षमया विहीनः
स्वस्यानुभोक्ता विजितारिपक्षः ॥"
इति कोष्ठीप्रदीपः ॥
ग्रर्गलः । इति मेदिनी । सुन्दरः । मूलः । इत्य-जयः ॥ कलसः । काचघटः । गोपुरम् । सद्म । इति शब्दरत्नावली ॥ ॥ * ॥ (कार्त्तिकानुचर-विशेषः । यथा, महाभारते । ६ । ४५ । ३३ ।
"परिघञ्च वटञ्चैव भीमञ्च सुमहाबलम् ।
दहतिं दहनञ्चैव प्रघसौ वीर्य्यसम्मतौ ॥
ग्रंशोऽप्यनुचरान् पञ्च ददौ स्कन्दाय धीमते ॥"
चण्डालविशेषः । यथा, महाभारते । १२ । १३८ । ११४ ।
"लम्बकर्णो महाबक्त्रो मलिनो घोरदर्शनः ।
परिघो नाम चण्डालः शूलपाणिरदृश्यत ॥")
परिघातः, पुं, (परिहन्यतेऽनेन । परि + हन् + घञ् । "हनस्तोऽचिण्णलोः ।" इति तः ।) ग्रस्त्रम् । हननम् । इति धरणिः ॥
परिघातनः, पुं, (परितो घातनं यस्मात् ।) परिघा-स्त्रम् । इत्यमरः । २ । ८ । ६१ ॥ सर्व्वतो-भावेन हनने क्लीं ॥
परिघोषः, पुं, (परितो घोषो यस्मिन् ।) मेघ-शब्दः । शब्दः । ग्रवाद्यः । इति मेदिनी ॥
परिचयः, पुं, (परि समन्तात् चयनं बोधो ज्ञान-मित्यर्थः । परि + चि + ग्रप् ।) विशेषेण ज्ञानम् । चेना इति भाषा । तत्पर्य्यायः । संस्तवः २ । इत्यमरः ।३।२।२३॥ प्रश्रयः ३ । इति भरतः ॥ (यथा, माघे । ७ । ६१ ।
"न परिचयो मलिनात्मनां प्रसाधनम् ॥"
ग्रभ्यासः । यथा, माघे । २ । ७५ ।
"हेतुः परिचयस्तेषां वक्तुर्गुणनिकैव सा ॥"
नादस्य ग्रवस्थाविशेषः । यथा, हठयोगदीपि-कायाम् । ४ । ६६ ।
"ग्रारम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्याश्चतुष्टयम् ॥")
परिचरः, पुं, (परितश्चरतीति । परि + चर + पचाद्यच् ।) युद्धकाले परप्रहारात् रथरक्षकः । प्रजासामन्तव्यवस्थापनकारी । इति केचित् ॥ सेनायां राज्ञो दक्षनायकः । इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । परिधिस्थः २ । इत्य-मरः । २ । ८ । ६२ ॥ सहायः ३ । इति रत्न-माला ॥ (परिचर्य्याकारकः । यथा वैद्यके,—
"उपचारज्ञता दाक्ष्यमनुरागश्च कर्म्मणि ।
शौचञ्चेति चतुर्थाऽयं गुणः परिचरे जने ॥"
इति चरके सूत्रस्थाने नवमेऽध्याये ॥
"स्निग्धोऽनुगुप्तुर्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यक्षदश्रान्तः पादः परिचरः स्मृतः ॥"
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशेऽध्याये ॥)
परिचरणकर्म्म, [न्] क्लीं, (परिचरणं सेवैव कर्म्म ।) परिचर्य्या । तद्वैदिकपर्य्यायाः । इर-स्यति १ विधेम २ सपर्य्यति ३ नमस्यति ४ इर-स्यति ५ ऋधोति ६ ऋध्नुहि ७ ऋच्छति ८ सपति ९ विवासति १० । इति दश परिचरण-कर्म्माणः । इति वेदनिघण्टौ ३ ग्रध्याये ॥
परिचर्य्या, स्त्री, (परिचर्य्यते परिचरणमित्यर्थः । परि + चर् + "परिचर्य्यापरिसर्य्येति ।" ३ । ३ । १०१ । इत्यस्य वार्त्तिके इति स्त्रौ यक् च निपात्यते ।) सेवा । (यथा, देवीभागवते । १ । ४ । ११ ।
"ग्रथवा वार्द्धके प्राप्ते परिचर्य्यां करिष्यति ।
पुत्रः परमधर्म्मिष्ठः पुण्यार्थं कुलविद्भ्यो ॥")
तत्पर्य्यायः । वरिवस्या २ शुश्रूषा ३ उपा-सनम् ४ । इत्यमरः ।२ । ७ । ३५ । परिसर्य्या ५ उपासना ६ उपास्तिः ७ । इति भरतः ॥ शुश्रू-षणा ८ । इति शब्दरत्नावली ॥
परिचार्य्यः, पुं, (परिचीयते इति । चिञ् चिन्ताम् + "ग्रचौ परिचार्य्योपचार्य्यसमूह्याः ।" ३ । १ । १३१ । इत्यनेन साधुः ।) यज्ञाग्निः । तत्पर्य्यायः । समूह्यः२ उपचार्य्यः ३ । इत्यमरः ।२ । ७ । २० ॥ (ग्रग्निरिह न वह्निः किन्त्वग्निधारणार्थस्थल-विशेषः । इति सिद्धान्तकौमुदी ॥)
परिचारकः, त्रि, (परिचरतीति । परि + चर् + ण्वुल् ।) सेवकः । चाकर इति भाषा ॥ (यथा, मनुः । ७ । २१७ ।
"तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः ।
सुपरीक्षितमन्नाद्यमद्याज्जैर्विधापयेत् ॥")
तत्पर्य्यायः । भृत्यः २ दासेरः ३ दासेयः ४ दासः ५ गोप्यकः ६ चेटकः ७ नियोज्यः ८ किङ्करः ९ प्रेष्यः १० भुजिष्यः ११ । इत्य-मरः । २ । १० । १७ ॥ डिङ्करः १२ चेटः १३ गोप्यः १४ पराचितः १५ परिष्कन्दः १६ परि-कर्म्मी १७ । इति हेमचन्द्रः । ३ । २४ ॥
परिचार्य्यः, त्रि, परिचर्य्यतेऽसौ इति । परि + चर + कर्म्मणि ण्यत् । सेव्यः ॥
परिचितः, त्रि, (परि + चि + कर्म्मणि क्तः ।) परिचयविशिष्टः । ज्ञातः । यथा,—
"त्वत्तश्चेयं चिरपरिचिता जन्मभूमीति बुद्ध्या
मा खिद्यस्व त्रिभुवनजनत्राणहेतोः क्रमाङ्क ! ।
किन्न त्वार्य्यं भवति महतां चेत् परस्योपकारी ।
वाराणस्या मुनिरपि गतो दक्षिणाग्रामगण्यः ॥"
इति पदाङ्कदूतः ॥
परिचेयं, त्रि, परि पूर्ब्बचिधातोः कर्म्मणि यत्प्रत्ययेन निष्पन्नम् ॥ परिचययोग्यम् । परिचयनीयम् । परिचेतव्यम् ॥
परिच्छदः, पुं, (परिच्छाद्यतेऽनेनेति । परि + छद + णिच् + "पुंसि संज्ञायाम् ।" ३ । ३ । ११८ । इति घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४।६६ । इति उपधाह्रस्वः ।) परिवारः । इति हेम-चन्द्रः ॥ (यथा, आर्य्यासप्तशत्याम् । ६७३ ।
"सहधर्म्मचारिणी मम परिच्छदः सुतनु ! नेह सन्देहः ।
न तु सुखयति तुहिनदिनच्छन्नछायेव सज्जन्ती ॥")
हस्त्यश्ववस्त्रकम्बलाद्युपकरणम् । यथा,—
"परिच्छदं कृपार्हेऽर्थे परिवर्हेऽथया परे ॥"
इत्यस्य टीकायां भरतः ॥
(यथा, रघुः । १ । १६ ।
"सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
ग्राक्लेश्यकुण्ठिता बुद्धिर्मौर्व्वी धनुषि चातता ॥")
ग्राच्छादनम् । यथा,—
"पयःफेननिभा शय्या दान्ता रुक्मपरिच्छदा ।"
इति श्रीभागवतम् ॥
परिच्छन्दः, पुं, (परिच्छन्द्यतेऽनेन । परि + छदि संवरणे + घञ् ।) परिच्छदः । इति हला-युधः ॥
परिच्छन्नः, त्रि, परिपूर्ब्बच्छदधातोः कर्म्मरि कर्म्मणि च क्तप्रत्ययनिष्पन्नः ॥ परिच्छदविशिष्टः । सर्व्वतो-भावेनाच्छादितः । संवृतः ॥

परिच्छिन्नः, त्रि, (परि + छिद् + कर्म्मरि क्तः ।) परिच्छेदविशिष्टः । अवधिप्राप्तः । यथा,—
"परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विघ्नस्तत्तत्त्वं वयमिह हि यत्तं न भवसि ।"
इति महिम्नः स्तोत्रम् ॥
सर्व्वतोभावेन छेदविशिष्टश्च ॥
परिच्छेदः, पुं, (परि + छिद् + भावे करणादौ च घञ् ।) ग्रन्थविच्छेदः । यथा, चिकाण्डशेषे ॥
"सर्गवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः ।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् ॥
स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसन्ततयः ॥"
(तत्र काव्ये सर्गः । कोषे वर्गः । अलङ्कारे परिच्छेदोच्छ्वासौ । कथायामुद्घातः । पुराणसंहितादौ अध्यायः । नाटके अङ्कः । तन्त्रे पटलः । ब्राह्मणे काण्डम् । संगीते प्रकरणम् । इतिहासे पर्व्व । भाष्ये आह्निकम् । एवमन्येऽपि पादतरङ्गस्तवकप्रपाठकस्कन्धमञ्जरीलहरीशाखादयो ग्रन्थसन्ततयो ग्रन्थभेदे यथायथं ज्ञेयाः ॥*॥)
सीमा । अवधिः । यथा, मालतीमाधवे ।
"परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जृम्भति च तापञ्च कुरुते ॥"
परिजनः, पुं, (परिगतो जनः ।) परिवारः । पोष्यवर्गः । यथा, महिम्नः स्तोत्रे ।
"यदृद्धिं सूत्राम्नो वरद परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ॥"
नियतसन्निधिवर्त्तिपरिचारकः । यथा, आनन्दलहर्य्याम् । ३० ।
"किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम् ।
प्रणम्रेष्वेतेषु प्रसभमभियातस्य भवनं
हरस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥"
" परिजनः नियतसन्निधिवर्त्तिपरिचारकः । "
इत्यस्यश्लोकस्य व्याख्यायां गोपीरमणतर्कपञ्चाननः ॥
परिजल्पितं, क्ली, (परि + जल्प + भावे क्तः ।) दृष्टाङ्गचिन्तनल्पान्तर्गतद्वितीयजल्पनम् । यथा,
"प्रभोर्निर्दयताघ्राणाद्यापलाद्युपपादनात् ।
स्वविचक्षणतायुक्तिर्भङ्ग्या स्यात् परिजल्पितम् ॥"
इत्युज्ज्वलनीलमणिः ॥
परिज्मा, [न्] पुं, (परिजायते इति । परि + जन् + मन् । निपातनात् साधुः ।) चन्द्रः । अग्निः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पर्य्यजतीति । अजेः परिपूर्व्वस्य असुन्प्रत्ययादिना मनिप्रत्ययोऽकारलोपः आद्युदात्तत्वञ्च निपात्यते । परिगन्ता । इति वेदभाष्यम् ॥)
परिज्वा, [न्] पुं, (परि + ज्व सौत्रधातुः + "ज्वलुचन् पूर्व्वन्निति ।" उणां । १ । १५८ । इति कनिन् । इदन्तु उज्ज्वलदत्तमतम् ।) इन्द्रः । अग्निः । इति संक्षिप्तसारोणादिवृत्तिः ॥
परिडीनकं, क्ली, (परि + डी + क्तः । ततः स्वार्थे कन् ।) पक्षिगतिविशेषः । यथा,—
"डीनं प्रडीनमुड्डीनं संडीनं परिडीनकम् ।"
इति जटाधरः ॥
(तथाच महाभारते । ८ । ४१ । २७ ।
"अतिडीनं महाडीनं स्वडीनं परिडीनकम् ॥")
परिणतं, त्रि, (परिणमति स्म । परि + नम् + क्तः ।) पक्वम् । इत्यमरः । ३ । १ । ६६ ॥ तिर्य्यग्घातिगजः । इति हेमचन्द्रः ॥ (यथा, माघे । ४ । २६ ।
"सततमसुमतामगम्यरूपाः
परिणतदिक्करिकास्खटीर्विभर्त्ति ॥")
सर्व्वतोभावेन नतञ्च ॥
परिणयः, पुं, (परिणयनम् । परि + नी + अप् ।) विवाहः । इत्यमरः । २ । ७ । ५७ ॥
परिणामः, पुं, (परिणमनम् । परि + नम् + घञ् ।) विकारः । प्रकृतेरन्यथाभावः । यथा । सुखस्य विकारः क्रोधरक्तता । केचित्तु । प्रकृतिध्वंसजन्यविकारः । यथा काष्ठस्य विकारो भस्म । मृत्पिण्डस्य घटः । इत्यमरभरतौ ॥ चरमः । ग्रैष्मः । यथा,—
"परिणामसुखे गरीयसि
यदकेऽस्मिन् वचसि त्वतौजसाम् ।
अतिवीर्य्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥"
इति भारवौ । २ । ४ ॥
(निदानभेदेन यथा,—
"असात्म्येन्द्रियार्थसंयोगप्रज्ञापराधपरिणाम-भेदान्त्रिविधो वा ॥" "परिणामोऽयोगादियुक्ता ऋतुस्वभावजा शीतादयः । अधर्म्मस्य च रोगहेतोरत्रैवान्तर्भाव इति भट्टारहरिश्चन्द्रः ॥" इति माधवकरकृतरुग्विनिश्चयस्य प्रथमनिदानव्याख्याने विजयेनोक्तम् ॥
"कालस्य परिणामेन जरामृत्युनिमित्तजाः ।
रोगाः स्वाभाविका दृष्टाः स्वभावो निष्प्रतिक्रियः ॥"
इति चरके शारीरस्थाने प्रथमेऽध्याये ॥
अर्थालङ्कारभेदः । तल्लक्षणं यथा,—
"परिणामः क्रियार्थत्वेद्वियथी विषयात्मना ॥")
परिणामदर्शी, [न्] त्रि, (परिणामं चरमं पश्यतीति । दृश् + णिनि ।) चरमकालप्रेक्षी । पश्चाद्दर्शी । विषयादेः शेषद्रष्टा । इति भारतम् ॥
परिणामशूलः, पुं, (परिणामे चरमावस्थायां शूलं यस्य । यद्वा परिणामे भुक्तान्नादेः परिपाके उत्पद्यते शूलं यस्मात् ।) रोगविशेषः । तस्योत्पत्तिर्यथा,—
"स्वैर्निदानैः प्रकुपितो वायुः सन्निहिते यदा ।
कफपित्ते समाहत्य शूलकारी भवेद्बली ॥"
तस्य लक्षणं यथा,—
"भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम् ।
तस्य लक्षणमप्येतत् समासेनाभिधीयते ॥"
वातिकस्य तस्य लक्षणं यथा,—
"आध्मानाटोपविष्मूत्रविबन्धारतिवेपनैः ।
स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेद्भिषक् ॥"
पैत्तिकस्य तस्य लक्षणं यथा,—
"तृष्णादाहारतिस्वेदकट्म्लवमोत्तरम् ।
शूलं शीतशमप्रायं पैत्तिकं लक्षयेद्भिषक् ॥"
श्लैष्मिकस्य तस्य लक्षणं यथा,—
"छर्द्दिश्वासासमोहं स्वल्परुग्दीर्घसन्तति ।
कटुतिक्तोपशान्तौ च तद्विज्ञेयं कफात्मकम् ॥"
त्रिदोषजस्य तस्य लक्षणं यथा,—
"संसृष्टलक्षणं दृष्ट्वा त्रिदोषं परिकल्पयेत् ।
त्रिदोषजमसाध्यन्तु क्षीणमांसबलानलम् ॥"
इति माधवकरः ।
तस्यौषधं यथा, गरुडपुराणे ।
"लौहचूर्णसमायुक्तं त्रिफलाचूर्णमेव वा ।
मधुना खादितं रुद्र ! परिणामाख्यशूलनुत् ॥"
(चिकित्सास्य यथा,—
"वमनं तिक्तमधुरैर्विरेकश्चापि शस्यते ।
वस्तयश्च हिताः शूले परिणामसमुद्भवे ॥
विड्ङ्गतण्डुलयोर्घं त्रिवृद्दन्तीसचित्रकम् ।
सर्व्वाण्येतानि संचूर्ण्य श्लक्ष्णचूर्णानि कारयेत् ॥
गुडेन मोदकं कृत्वा भक्षयेत् प्रातरुत्थितः ।
उष्णोदकानुपानन्तु दद्यादग्निविवर्द्धनम् ॥
जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम् ॥
नागरगुडतिलकल्कं पयसा संसाध्य यः पुमान् पिबेत् ।
उग्रं परिणामशूलं तस्यापैति सप्तरात्रेण ॥"
"तिलनागरपथ्यानां भागं शुम्बूकभस्मनाम् ।
द्विभागगुडसंयुक्तं गुडीं कृत्वाऽत्रभागिकाम् ॥
शीताम्बुपानं पूर्व्वाह्णे भक्षयेत् क्षीरभोजनः ।
सायाह्णे रसकं पीत्वा नरो सुस्थेत दुर्ज्जयात् ॥
परिणामसमुत्थाच्च शूलाच्चिरभवादपि ।
शुम्बूकजं चूर्णञ्च पक्वेव लवणानि च ।
समांशां गुडिकां कृत्वा कलम्बीकरसेन वा ।
प्रातर्भोजनकाले वा भक्षयेत्तु यथाबलम् ॥
शूलाद्विमुच्यते जन्तुः सहसा परिणामजात् ॥
यः पिबति सप्तरात्रं शुक्तूनेकान् कलाययूषेण ।
स जयति परिणामरुजं चिरजामपि किमुत नूतनजाम् ॥
लौहचूर्णं वरायुक्तं विलीढं मधुसर्पिषा ।
परिणामशूलं शमयेत्तक्रमलं वा प्रयोजितम् ॥
सामुद्रं सैन्धवं चारो रुचकं रौमकं विड्म् ।
दन्ती लौहरजः किट्टं चित्रकक्षारयावकं समम् ॥
दधिगोमूत्रपयसा मन्दपावकपाचितम् ।
तदूर्ध्वाग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥
जीर्णाजीर्णे तु भुञ्जीत मांसादिघृतसाधितम् ।
नाभिशूलं प्लीहशूलं यकृद्गुल्मकृतञ्च यत् ॥
विद्रध्यलौलिकं हन्ति कफवातोद्भवन्तथा ।
शूलानामपि सर्व्वेषामौषधं नास्ति तत् परम् ॥
परिणामसमुत्थस्य विशेषेणान्तकृन्मतम् ॥"
इति समुद्राद्यं चूर्णम् ॥ * ॥
"सर्पिष्पलीगुडं सर्पिः पचेत् क्षीरे चतुर्गुणे ।
विनिहन्त्यञ्जपित्तञ्च शूलञ्च परिणामजम् ॥"
इति गुडपिप्पलीघृतम् ॥ * ॥
"काथेन कल्केन च पिप्पलीनां
सिद्धं घृतं माक्षिकसंप्रयुक्तम् ।

क्षीरानुपानं विनिहन्त्यवश्यं
मूलं प्रवृद्धं परिणामसंज्ञम् ॥"
इति पिप्पलीघृतम् ॥ * ॥

"मण्डूरं शोधितं पञ्चौ लौहजां वा गुडेन तु।
भक्षयन्मुच्यते मूलात् परिणामसमुद्भवात् ॥
संशोध्य चूर्णितं कृत्वा मण्डूरस्य पलाष्टकम्।
घृतावरीरसस्याष्टौ दध्नस्तु पयसस्तथा ॥
पलान्यादाय चत्वारि तथा गव्यस्य सर्पिषः।
विपचेत् सर्व्वमेकैकं यावत् पिण्डत्वमागतम् ॥
सिद्धन्तु भक्षयेन्मध्ये भोजनस्याग्रतोऽपि वा।
कृतात्मकं पित्तभवं मूलञ्च परिणामजम् ॥
निहन्त्येव हि योगोऽयं मण्डूरस्य न संशयः॥"
इति घृतावरीमण्डूरम् ॥ * ॥

इति वैद्यकचक्रपाणिसंग्रहे मूलाधिकारे ॥
"अजीर्णान्नरसः प्रोक्तो दग्धमः परिणामजः।"
"जीर्णेऽन्ने च भवेद्दुग्धस्तु स ज्ञेयः परिणामजः॥"
"लङ्घनं वमनञ्चैव विरेकश्चानुवासनम्॥
निरूहो वस्ति कर्म्माणि परिणामे विदोषजे।
चित्रकं चिरता दन्ती विड्ङ्गं कटुकत्रयम्॥
समं चूर्णं गुडेनाथ कारयेन्मोदकान् सुधीः।
भक्षयेत् प्रातरुत्थाय पश्चादुष्णोदकं पिबेत्॥
परिणामोद्भवं मूलं हन्ति शीघ्रं नरस्य च।
यवानीहिङ्गु सिन्धूत्थक्षारं सौवर्चलाभया।
सुरामण्डेन पातव्या परिणामे विदोषजे॥
हिङ्ग्वोषवचाजमोदहपुषा पथ्यायवानी शठी
जातीपिप्पलीदाडिमदहकौतिन्तीड़िचव्याग्नि-
कम्।
तस्मादम्लसुवर्चला च यवजक्षारं तथा सर्ज्जिका
सिन्धूत्थं विड्चूर्णकं समसमं स्याद्बीजपूरे रसे॥
संभाव्यं सुकृतात्मनेन गुड़िका चाक्षप्रमाणा तथा
कुक्षौ वातविकारिणां प्रदद्यतः मूलार्शसः
शीहकान्॥"
"एष हिङ्ग्वादिको नाम सर्व्वमूलार्शिनाशनः।
सर्व्ववातविकारघ्नः सर्व्वशूलनिवारणः।
परिणामोद्भवं मूलं वारयत्याशुसंशयम्॥"
इति हारीते चिकित्सितस्थाने नवमोऽध्यायः॥

परिणायः, पुं, (परितो वामदक्षियतो नयनम्। परि+नी+"परियोर्नीनोर्वृतावभेदयोः।" ३। ३।३०। इति घञ्।) प्रारीणां समन्तान्नयनम्। इत्यमरः। ३। १०। ४६॥ परेरिनो दीर्घत्वे परीणायश्च। इति भरतः॥

परिणाहः, पुं, (परिवृह्यतेऽनेन इति। परि+वृह+घञ्।) विस्तारः। तत्पर्य्यायः। विशालता २। इत्यमरः। २। ६। ११४॥ ओसार इति चौड़ा इति च भाषा॥ (यथा, महाभारते। ६। ७। २२।
"अरत्नीनां सहस्रञ्च शतानि दश पञ्च च।
परिणाहस्तु दृष्टस्य फलानां रसभेदिनाम्॥")

परिणेता, [तृ] पुं, (परिणयतीति। परि+नी+तृच्।) वोढ़ा। भर्त्ता २। इति राजनिर्घण्टः॥ (यथा,—
"स्त्रिये दत्तायतो दत्तान् परिनेतुः प्रसूतये।
अप्यर्थकामौ तस्यास्तां धर्म्म एव मनीषिणः॥"
इति रघुः। १। २५।)

परितः [स्] अ, (परि+"पर्य्यभिभ्याञ्च।" ५। ३। ६। इति तसिल्।) सर्व्वतः। चतुर्दिग्भिव्याप्तौ। इत्यमरः। ३।३।२३॥ (यथा, रघुः। ६।६।
"पुरोपकण्ठो पवनाश्ययार्थां
कलापिनासुद्धतनृत्यहेतौ।
प्रभातगाढ़ेषु परितो दिगन्तान्
तूर्य्यस्वने मूर्च्छति मङ्गलार्थे॥")

परितापः, पुं, (परिसर्व्वतोभावेन तप्यतेऽनेन। परि+तप्+घञ्।) दुःखम्। (यथा, भागवते। ७। ८। ५२।
"स तु जनपरितापं तत्कृतं जानता ते
नरहर उपनीतः पञ्चतां पञ्चविंश॥")
नरकान्तरम्। इति मेदिनी॥ शोकः। इति शब्दरत्नावली॥ (यथा, रामायणे। २।२२।२५।
"एतया सत्त्वया बुद्ध्या संस्तभ्यात्मानमात्मना।
बाहतेऽभिषिके मे परितापो न विद्यते॥")
भयम्। कम्पः। इति विश्वः॥ व्यथनञ्च॥
(यथा, मार्कण्डेये। १५। ४६।
"परितापश्च गात्रेभ्यः पीड़ाबाधाश्च कृत्स्नशः।
अपहन्ति नरव्याघ्र! दयां कुरु महीपते!॥")

परितुष्टः, त्रि, (परि+तुष्+क्तः।) परितोषयुक्तः। सन्तुष्टः। यथा,—
"यत् प्रार्थ्यते त्वया भूप! त्वया च कुलनन्दन!!
मत्तस्तत् प्राप्यतां सर्व्वं परितुष्टा ददामि तत्॥"
इति मार्कण्डेये देवीमाहात्म्ये। ९३। १०॥

परितोषः, पुं, (परितोषणमिति। परि+तुष्+घञ्।) सर्व्वतोभावेन तुष्टिः। सन्तोषः। यथा,—
"त्वामुदर! साधुमन्ये प्राकृ-
रपि यदसि लब्धपरितोषम्।
हृतहृदयं क्षुधिकाधिक-
वाञ्छाप्रभवदुर्भरं न पुनः॥"
इति प्रायश्चित्ततत्त्वे॥

परित्यागः, पुं, (परित्यजनमिति। परि+त्यज्+घञ्।) सर्व्वतोभावेन वर्জ্জनम्। तत्पर्य्यायः। क्षेरणम् २। इति त्रिकाण्डशेषः॥ * ॥
"गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते॥"
इति मत्स्यसूक्तम्॥

परित्राणं, क्ली, (परित्रायते इति। परि+त्रै+ल्युट्।) मारणोद्यतस्य निवारणम्। तत्पर्य्यायः। पर्य्यात्रिः २ हस्तवारणम् ३। इत्यमरः। ३। २। ५॥ रक्षणम्। यथा,—
"परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे॥"
इति श्रीभगवद्गीतायाम्। ४। ८॥

परिदानं, क्ली, (परिदीयते इति। परि+दा+भावे ल्युट्।) परीवर्त्तः। विनिमयः। इत्यमरः। २। ६। ८०॥

परिदायी, [न्] पुं, (परित्यज्य ग्राह्यधर्म्मं ददातीति। परि+दा+घिनिः।) अनूढ्यपुत्रे तत्कनिष्ठाय कन्यादाता। "यथा हारीतः। ज्येष्ठेऽनिर्विष्टे कनीयान् निर्विशन् परिवेत्ता भवति परिविद्धो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकस्ते सर्व्वे पतिताः।" इत्युद्वाहतत्त्वम्॥

परिदेवनं, क्ली, (परि+दिव+ल्युट्।) अनुशोचनोक्तिः। विलापः। इत्यमरः। १। ६। १६॥ (यथा, महाभारते। १। २। १४६।
"परिदेवनञ्च पाञ्चाल्या वासुदेवस्य सन्निधौ।
आश्वासनञ्च कृष्णस्य दुःखार्त्तायाः प्रकीर्त्तितम्॥")

परिदेवना, स्त्री, (परिदेवयतीति। परि+दिव+"ण्यासश्रन्थो युच्।" ३।३।१०७। इति युच्। ततष्टाप्।) शोकनिमित्तो विलापः। यथा,—
"अव्यक्तादीनि भूतानि यक्तमध्यानि भारत!।
अव्यक्तनिधनान्येव तत्र का परिदेवना॥"
इति श्रीभगवद्गीतादितीयाध्यायश्लोकव्याख्याने श्रीधरस्वामी॥ अपि च।
"न मन्त्रबलवीर्य्येण प्रज्ञया पौरुषेण च।
अलभ्यं लभते मर्त्यस्तत्र का परिदेवना॥
अव्यक्तादीनि भूतानि यक्तमध्यानि शौनक!।
अव्यक्तनिधनान्येव तत्र का परिदेवना॥
अयाचितो मया लब्धस्तत्प्रेषितः पुनः कुतः।
यत्रागतस्तत्र गतस्तत्र का परिदेवना॥
एकस्मिन् यदा रात्रौ नानापक्षिसमागमः।
प्रभाते दश दिशो यान्ति तत्र का परिदेवना॥
एकसार्थप्रयातानां सर्व्वेषान्तत्र गामिनाम्।
यद्येकस्खरितो याति का तत्र परिदेवना॥"
इति गरुड़पुराणे ११९ अध्यायः॥

परिधानं, क्ली, (परिधीयते यत्। परि+धा+कर्म्मणि ल्युट्।) परिधेयवस्त्रम्। तत्पर्य्यायः। अन्तरीयम् २ उपसंव्यानम् ३ अधोंशुकम् ४। इत्यमरः। २। ६। ११७॥ (यथा, पञ्चतन्त्रे। ५। २३।
"वरं वनं व्याघ्रगजादिसेवितं
जलेन हीनं बहुकण्टकावृतम्।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवितम्॥")

परिधायः, पुं, (परिधीयतेऽत्र। परि+धा+घञ्।) जनस्थानम्। परिच्छेदः। नितम्बः। इति मेदिनी॥ (जनस्थानमित्यत्र जलस्थानमिति केचित्॥)

परिधिः, पुं, (परिधीयतेऽनेन। परि+धा+"उपसर्गे धोः किः।" ३। ३। ९२। इति किः।) परिवेषः। चन्द्रसूर्य्यसमीपमण्डलम्। (यथा, रघुः। ८। ३०।
"अनृच्छत्सुपेयिवान् बभौ
परिधेर्मुक्त इवोष्णदीधितिः॥")
यज्ञियतरुशाखा। यज्ञियतरोः पलाशादेर्यज्ञ पशुबन्धनार्थं या शाखा निखायते तस्याम्। इत्यमरभरतौ॥ (यथाह आपस्तम्बः। "खादिरं पालाशं वैकङ्कतिदारुकमिध्मं करोति त्रयः

परिधयः पालाशकाष्ठकाः खादिरौदुम्बरबिल्वरोहितकविकङ्कतानां ये वा यज्ञिया वृक्षा आर्द्राः शुष्करसत्वचकाः ॥" इति ॥ * ॥)

भूगोलादेर्वेष्टनम्। यथा,—

"व्यासेभनन्दाग्निहते विभक्ते
खबाणसूर्य्यैः परिधिस्तु सूक्ष्मः ॥"

इति लीलावती ॥

(क्लो, परिधीयते यदिति। परि+धा+कर्म्मणि किः। परिधेयवस्त्रम्। यथा, भागवते। ८। ७। १७।

"मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युत्स्फूर्जि भ्राजद्विलुलितकचः सग्धरो रक्तनेत्रः ॥"

"कनकं सुवर्णमिव पीतं परिधि वस्त्रं यस्य" इति तट्टीका ॥)

परिधिस्थः, पुं, (परिधौ तिष्ठतीति। परिधि+स्था+कः।) परिचरः। इत्यमरः। २। ८।६२ ॥ युद्धकाले परप्रहारात् रथरक्षके। प्रजासामन्तव्यवस्थापनकारिणीति केचित्। सेनायां राज्ञो दण्डनायकः। इत्यन्ये। इति भरतः ॥

परिधेयं, त्रि, (परिधातुं योग्यम्। परि+धा+"अचो यत्।" ३। १। ९७। इति यत् "ईद्यति।" ६। ४। ६५। इति आत ईत् ततो गुणः।) परिधानीयम्। परिधातव्यम्। परिधानोपयुक्तवस्त्रादि। यथा,—

"न तु स्वभोग्यतयापि प्राप्ते परिधेयादौ स्मृतेरदृष्टार्थत्वापत्तेः।" इति विवादचिन्तामणिः ॥

परिपणं, क्लो, (परिपण्यते व्यवह्रियतेऽनेन। परि+पण्+"पुंसि संज्ञायां घः प्रायेण।" ३। ३। ११८। इति घः।) मूलधनम्। इत्यमरः। २। ९। ८०। पुँजि इति भाषा ॥

परिपन्थकः, पुं, (परिपन्थयति दोषादिकं प्राप्नोतीति। परि+पथि क गतौ+ण्वुल्।) शत्रुः। इति हेमचन्द्रः। ३। ३९३ ॥ (यथा, महाभारते। १०। १६। ३१।

"हतो दुर्य्योधनः पापो राज्यस्य परिपन्थकः ॥")

परिपन्थी, [न्] त्रि, (परिसर्व्वतो भावेन दोषाख्यानं पन्थयितुं शीलमस्य। परि+पन्थ+णिनिः।) शत्रुः। इत्यमरः। २। ८। ११। (यथा, गीतायाम्। ३। ३४।

"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥"

प्रतिकूलाचारी। यथाह कश्चित्।

"अपराधिनि चेत् क्रोधः क्रोधे क्रोधः कथं नहि।
धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि ॥")

परिपाकः, पुं, (परिपच्यते इति। परि+पच्+घञ्।) परिपक्वता। यथा, भावप्रकाशे।

"इत्यद्भुतं कैवलवह्निपक्व-
मांसेन मत्स्यः परिपाकमेति।"

नैपुण्यम्। यथा,—

"वीक्ष्य तस्य विनये परिपाकं
पाकशासनपदं स्पृशतोऽपि।"

इति नैषधपञ्चमसर्गः ॥

परिपाकिनी, स्त्री, (परिपाकः परिपाकशक्तिर्विद्यतेऽस्याः। परिपाक+इनि+ङीप्।) चित्रता। इति शब्दचन्द्रिका ॥

परिपाटिः, स्त्री, (परिपाटनम्। परि+पट्+स्वार्थे णिच्+अच इः। यद्वा परि भागे भागेन पाटिः पाटनं गतिर्यस्याम्।) पारिपाट्यविशिष्टः। तत्पर्य्यायः। आनुपूर्व्वी २ आवृत् ३ अनुक्रमः ४ पर्य्यायः ५। इत्यमरः। २। ७। ३७ ॥ आनुपूर्व्वम् ६ परिपाटी ७। इति भरतः ॥ आनुपूर्व्वम् ८ आनुपूर्व्वकम् ९। इति टीकान्तरम् ॥ क्रमः १०। इति जटाधरशब्दरत्नावल्यौ ॥

परिपिष्टकं, क्लो, (परि+पिष्+क्त+संज्ञायां कन्।) सौसकम्। इति राजनिर्घण्टः ॥

परिपुष्करा, स्त्री, (परितः पुष्करं सुखं यस्याः।) गोडुम्बा। इति शब्दचन्द्रिका ॥ राजगोमक् इति भाषा ॥

परिपूतं, क्लो, (परि+पू+क्तः।) अपास्ततुषधान्यम्। यथा, मनुः।

"परिपूतेषु धान्येषु शाकमूलफलेषु च।
निरन्वये श्रुतं दग्धुः सान्वयेऽर्द्धश्रुतं दमः ॥"

त्रि, सर्व्वतोभावेन पवित्रम् ॥ (यथा, माघे। २। १६।

"घूर्णयन् मदिराखादमदपाटलितद्युतिः।
रेवतीवदनोच्छ्वासपरिपूतपुटे दृशौ ॥")

परिपूर्णता, स्त्री, (परिपूर्णस्य भावः। परिपूर्ण+"तस्य भावस्त्वतलौ।" ५। १। ११९। इति तल् ततः "त्वान्तं क्लीवमलन्तं स्त्रियाम्।" इति वार्त्तिकोक्तत्वात् स्त्रियां टाप्।) परिपूर्णत्वम्। सम्पूर्णता। तत्पर्य्यायः। आभोगः २। इत्यमरः। २। ६। १३७ ॥

परिपूर्णत्वं, क्लो, (परिपूर्णस्य भावः। "तस्य भावस्त्वतलौ।" ५। १। ११९। इति त्व। ततः क्लीवत्वम्।) परिपूर्णता। सम्पूर्णत्वम्। इति जटाधरः ॥ (यथा,—

"दृश्यते परिपूर्णत्वं सुखचन्द्रस्य ते सखि!।
न जाने कञ्चकोरं हि विधाता पालयिष्यति ॥"

इत्युद्भटः ॥)

परिपेलं, क्लो, (परितः स्फुटतां गच्छतीति। पेल गतौ+अच्।) परिपेलवम्। कैवर्त्तीसुस्तकम्। इति शब्दमाला ॥ तन्नान्तरे यथा,—

"परिपेलं ध्रुवं वल्यं ततकुटन्नटसंज्ञकम्।
जायते सुस्तकाकारं शैवालकुलसञ्चये ॥"

इत्यमरटीकायां भरतः ॥

परिपेलवं, क्लो, (परि सर्व्वतः पेलवं स्फुटता यस्य।) कैवर्त्तीसुस्तकम्। इत्यमरः। २। ४। १३१ ॥ (अत्यन्तकोमले, त्रि। यथा, हरिवंशे। ६४। ८।

"स्फीतमध्यपरिपेलवं फलं
श्लीक्ष्णमध्यचिरकालसम्भवम् ॥"

गुणादयोऽस्य कैवर्त्तीसुस्तकशब्दे द्रष्टव्याः ॥)

परिप्लवं, त्रि, (परिप्लवते इति। प्लु+अच्।) चञ्चलम्। इत्यमरः। ३। १। ३५।

(यथा, माघे। १४। ६८।

"मतङ्गजाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुषः।
गच्छतः स मधुकैटभौ विभो-
र्यस्य नेत्रसुखविप्लवं क्षणम् ॥"

पुं, राज्ञः सुखीनलस्य पुत्रः। यथा, भागवते। ९। २२। ४२।

"सुनीथसस्य भविता वृक्षस्तुर्यसुखीनलः।
परिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः ॥")

परिप्लुतः, त्रि, (परिप्लु+क्तः।) जलादिप्लावितः। यथा, मार्कण्डेये देवीमाहात्म्ये १ अध्यायः ॥

"आवां जहि न यत्रोर्व्वी सलिलेन परिप्लुता ॥"

परिप्लुता, स्त्री, (परि+प्लु+क्तः। स्त्रियां टाप्।) मदिरा। इति हेमचन्द्रः। ३। ५६६ ॥ ग्राम्यधर्म्मे (मैथुने) वेदनावती योनिः। यथा,—

"परिप्लुतायां भवति ग्राम्यधर्म्मे रुजा भृशम्।"

इति योनिव्यापत्प्रदाने माधवकरः ॥

("पित्तलाया वृसंवासे त्वक्यदृग्गारधारणात्।
पित्तसंमूर्च्छितो वायुर्योनिं दूषयति स्त्रियाः ॥
शूनाक्षग्रीवमासाग्निनीलपीतमस्रक् स्रवेत्।
श्रोणीवंक्षणपृष्ठार्त्तिज्वरार्त्तायाः परिप्लुता ॥"

इति चरके चिकित्सास्थाने त्रिंशेऽध्याये ॥)

आप्लुते त्रि ॥

परिवर्हः, पुं, (परिवर्ह्यतेऽनेन। वर्ह प्राधान्ये+घञ्।) परिच्छदः। इत्यश्वबन्धकम्बलादि। वृषार्होऽर्घः। राजयोग्यत्वं सितच्छत्रादि। वृषार्हं सितच्छत्रादि अर्थो धनमिति केचित्। इत्यमरभरतौ ॥ (यथा,—

"निवेश्य गङ्गामनु तां महानदीं
चमूं विधानैः परिवर्हशोभिनीम्।
उवास रामस्य तदा महात्मनो
विचिन्तमानो भरतो निवर्त्तनम् ॥"

इति रामायणे। २। ८३। २६।)

परिभवः, पुं, (परि+भू+अप्।) अनादरः। इत्यमरः। १। ७। २२ ॥ (यथा, रघुः। १२। ३७।

"फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य मां।
म्लेच्छाः परिभवो यद्यप्यामित्यवेहि त्वया कृतम्॥")

परिभावः, पुं, (परि+भू+"परौ सुवोऽवज्ञाने।" ३। ३। ५५। इति घञ्।) परिभवः। इत्यमरः। १। ७। २२ ॥

परिभाषणं, क्लो, (परि+भाष्+ल्युट्।) सनिन्द उपालम्भः। इत्यमरः। १। ६। १४ ॥ उपालम्भो दुर्व्वादः। निन्द्या सह वर्त्तमानो य उपालम्भस्तच्च सनिन्दे परिभाषणम्। उपालम्भो गुणाविष्करणेन स्तुतिपूर्व्वकोऽपि भवति। यथा महाकुलस्य भवतः किमिदमुचितं भवति। अत्र तु सस्तुतौ न परिभाषणम्। टीकान्तरेऽपि वन्धुलस्य तवागम्यागमनं योग्यमिति निन्दापूर्व्वः। महाकुलस्य तव कथं विप्रबधः। इति स्तुतिपूर्व्वश्च उपालम्भः। इति भरतः ॥* ॥ नियमः। इति मेदिनी ॥ आलापः। इति विश्वः ॥

परिभाषा, स्त्री, (परि+भाष्+अच्। ततष्टाप्। परिष्कृतं भाषणम्। पदार्थविवेचकाचार्य्याणां युक्तियुक्ता वाक्। इति काव्यप्रकाशटीकायां चण्डीदासः॥ तत्पर्य्यायः। प्रज्ञप्तिः २ श्रौली ३ सङ्केतः ४ समयकारः ५। इति त्रिकाण्डशेषः॥ (सूत्रलक्षणविशेषः। सूत्रं षड्विधम्। यथा,—

"संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥")

"ग्रन्थस्य संक्षेपनिर्व्वाहार्थसङ्केतविशेषः। यथा चपोदितेत्यादि।" इति सुग्धबोधटीकायां दुर्गादासः॥ यथा माघे। १६। ८०।

"न खलु प्रतिहन्यते कुतश्चित्
परिभाषेव गरीयसी यदाज्ञा॥"

("अवश्यलक्ष्यलेशोक्तसन्दिग्धार्थप्रकाशिकाः।
परिभाषाः प्रवक्ष्यन्ते दीपीभूताः सुनिश्चिताः॥"
इति वैद्यकपरिभाषाया लक्षणम्॥

"प्रथमं परिभाषा स्याद्वैदव्याख्यानकन्तथा।"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये॥)

परिभूतं, त्रि, (परिभूयते स्म। परि+भू+क्तः।) अनादृतम्। तत्पर्य्यायः। अवगणितम् २ अवमतम् ३ अवज्ञातम्४ अवमानितम् ५। इत्यमरः। ३। १। १०६। अभिभूतम् ६। इति जटाधरः॥ अप्रसृतम् ७। इति शब्दरत्नावली॥ (यथा, सारावल्यां विंशाध्याये।

"परिभूतं सुखरहितं कुलटापुत्रमतिपापरतञ्च।
जनयति नक्षत्रपतिः क्षितिसुतदृष्टो भवि शूरम्॥")

परिभ्रमः, पुं, (परि+भ्रम्+अच्।) सर्व्वतोभ्रमणम्। परिपूर्ब्बभ्रमधातोर्भावे अल्प्रत्ययनिष्पन्नः॥

परिमण्डलं, त्रि, (परि सर्व्वतो मण्डलम्।) वर्त्तुलम्। इति हेमचन्द्रः॥ (यथा, भागवते। ५। २२। १६।

"लक्षोत्तरं साङ्गनवकोटियोजनपरिमण्डलं भूवलयस्य यथेन सगणयत्युत्तरं द्विसहस्रयोजनानि स भुङ्क्ते॥" परमाणुपरिमाणम्। परिमाणविशिष्टः परमाणुः। इति वैशेषिकसूत्रवृत्तिः॥ शब्दोऽयं न्यग्रोधशब्देन युक्तः अर्थान्तरं प्रकाशयति। पुं, पुरुषविशेषः। तस्य लक्षणं यथा, मात्स्ये ११८ अध्याये।

"न्यग्रोधौ तु स्फुटौ बाहू यासो न्यग्रोध उच्यते।
यासेन उच्छ्रयो यस्य अध ऊर्द्ध्वञ्च देहिनः।
समोच्छ्रयपरीणाहो न्यग्रोधपरिमण्डलः॥"

स्त्री, जघन्यान्तितरभागविशेषः। यथा, शब्दरत्नावल्याम्।

"स्तनौ सुकुटिलौ यस्या नितम्बे च विशालता।
मध्ये क्षीणा भवेद्यस्या न्यग्रोधपरिमण्डला॥"

पर्व्वतविशेषः। यथा महाभारते ६। ६। ११।

"परिमण्डलयोर्मध्ये मेरुः कनकपर्व्वतः।
आदित्यतरुणाभासो विधूम इव पावकः॥")

परिमलः, पुं, (परिमलते सुगन्धिपार्थिवकणां धरतीति। मल ड धारणे+अच्। "क्षितावेव गन्धः।" इति न्यायादस्य तथात्वम्।) विमर्द्दनम्। कुङ्कुमादिमर्द्दनम्। विमर्द्दोत्थजनमनोहरगन्धः। सुरतादिविमर्द्दोत्थविलेपनकुङ्कुमादिगन्धः। इत्यमरभरतौ॥ सुरभिमाल्यगन्धादिधारणेनोत्पन्नो हृद्यो गन्धः। इति स्वामी॥ (यथा, कलाविलासे। १। ५।

"रतिलुलितललितललनाङ्गमललववाहिनो
मुहुर्यत्र।
श्यकेशुकुसुमपरिमलवासितदेहा वहन्त्य-
निलाः॥")

तत्पर्य्यायः। आमोदः २ गन्धः ३ सौरभम् ४ सौरभम् ५। इति राजनिर्घण्टः॥ पण्डितसमूहः। इति शब्दरत्नावली॥

परिमाणं, क्ली, परिमीयतेऽनेन। (परि+मा+करणे ल्युट्।) परिमितव्यवहारासाधारणकारणम्। इति सिद्धान्तमुक्तावली॥ माप इति भाषा। (यथा, मनुः। ८। १३३।

"त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः॥")

तत्पर्य्यायप्रकारा यथा,—

"यौतवं द्रव्यं पाय्यमिति मानार्थकं त्रयम्।
मानं तुलाङ्गुलिप्रस्थैर्गुञ्जाः पञ्चादमाषकः॥
ते षोड्शाद्यः कर्षोऽस्त्री पलं कर्षचतुष्टयम्।
सुवर्णविस्तौ हेम्नोऽक्षे कुडवस्तु तत्पले॥
तुला स्त्रियां पलशतं भारः स्यादिंशतिस्तुलाः।
आचितं दशभारा: स्युः शाकटो भार आचितः॥
कार्षापणः कार्षिकञ्च ताम्रिके कार्षिके पणः।
अक्षिया वाढ़कद्रोणौ खारी वाहो निकुञ्चकः॥
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्।"
इत्यमरः। २। ६। ८५—८६॥*॥

न्यायमते तदुथा,—

"परिमाणं भवेन्मानव्यवहारस्य कारणम्।
अणु दीर्घं महद्ह्रस्वमिति तद्भेद ईरितः॥
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम्।
संख्यातः परिमाणाच्च प्रचयादपि जायते॥
अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम्।
परिमाणं घटादौ तु परिमाणजमुच्यते॥
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते।
परिमाणन्तूलकादौ नाशस्त्राश्रयनाशतः॥"
इति भाषापरिच्छेदे। ११०—११३॥

(परिमाणं निरूपयति। परिमाणमिति। परिमितव्यवहारासाधारणं कारणं परिमाणमित्यर्थः। तच्चतुर्व्विधं अणु महद्दीर्घं ह्रस्वञ्च इदं चातुर्व्विध्यं प्रत्यक्षसिद्धं तच्चाणुत्वह्रस्वत्वे महत्त्वदीर्घत्वे च समनियते तत्परिमाणं नित्यमित्यत्रपरिमाणमित्यनुवर्त्तते। अनित्यमिति पूर्व्वेणान्वितं तथाचानित्यं परिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यञ्चेत्यर्थः। तत्र संख्याजन्यमुदाहरति द्व्यणुकादाविति। द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकादिपरिमाणं वा न कारणं परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् द्व्यणुकादिपरिमाणन्तु परमाणुत्वापेक्षया नोत्कृष्टं त्रसरेणुपरिमाणन्तु न सजातीयं अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः। परिमाणजन्यमुदाहरति परिमाणं घटादाविति परिमाणजं कपालादि परिमाणजन्यम्। प्रचयजन्यमुदाहर्त्तुं प्रचयं निर्व्वक्ति प्रचय इति अर्थात् प्रचयस्य नवावयविनाशः कथं परिमाणनाशकः असत्यप्यवयविनि त्रिचतुरपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम्। परमाणुविश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च द्व्यणुकनाशः एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् सति च नाशकेऽनभ्युपगममात्रेण नाशस्य व्यपवदितुमशक्यत्वात् शरीरादावयवोपचये असमवायिकारणनाशस्यावश्यकत्वादवयवविनाशः व्यावश्यकः न च पटविनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं स्यादिति वाच्यं तत्रापि वेमात्यभिघातेन समवायिकारणतन्तुसंयोगनाशात् पटनाशस्यावश्यकत्वात् किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्व्वं तत्पट एव न स्यात् तन्तुरूपकारणाभावात् तन्तोरवयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्व्वपटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यम्। अवयविनः प्रत्यभिज्ञानन्तु साजात्येन दीपकलिकादिवत् न च पूर्व्वतन्तव एव तन्त्वन्तरसहकारात् पूर्व्वपटे सत्येव पटान्तरमारभ्यमिति वाच्यम् मूर्त्तयोः समानदेशत्वाविरोधात् एकदा नानाद्रव्यस्य तत्रानुपलभ्य बाधितत्वाच्च पूर्व्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यवश्यमभ्युपेयत्वात्॥" इति सिद्धान्तमुक्तावली॥)

परिमार्ग्यं, त्रि, (परि+मृज्+ण्यत्। "चजोः कु घिण्ण्यतोः।" ७। ३। ५२। इति जस्यगः। "मृजेर्वृद्धिः।" ७। २। ११४। इति वृद्धिः।) परिमृज्यम्। परिशोधनीयम्॥

परिमार्जनं, क्ली, (परि+मृज्+ल्युट् ततो वृद्धिः।) खाद्यभेदः। मधुमस्तकम्। यथा, शब्दचन्द्रिका।

"मधुतैलघृतैर्मध्ये वेष्टिताः समिताश्च ये।
मधुमस्तकमुद्दिष्टं तस्याख्या परिमार्जनम्॥"
परिशोधनञ्च॥

परिमितं, त्रि, (परि+मा+क्तः। परितो मितं वा।) युक्तम्। इति त्रिकाण्डशेषः॥ परिमाणविशिष्टम्। यथा, उद्भटः।

"द्रविणं परिमितमधिकं
व्यथयति जनमाकुलं कुरुते।
क्षीणाम्बुबलमिव पीन-
स्तनजघनायाः कुलीनायाः॥"

परिमेयं, त्रि, (परिमीयते इति। परि+मा+"अचो यत्।" ३। १। ९७। इति यत्। "ईद्यति॥" ६। ४। ६५। इति ईत् ततो गुणः।) परि-

मागविशिष्टम्। परिमातव्यम्। परिमाणीयम्। (यथा, रघुः। १। ३७।
"माभूदाश्रमपीडेति परिमेयपुरःसरौ।
अनुभावविशेषात्तु सेनापरिगताविव॥")
परिमोक्षः, पुं, (परितो मोक्षः परित्यागः।) मलत्यागः। यथा, श्रीभागवते २। ६। १०।
"पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद!।
हिंसायाः निर्ऋतेर्मृत्योर्निरयस्य गुदं स्मृतम्॥"
"परिमोक्षस्य मलत्यागस्य। पायुरिन्द्रियं गुदं स्थानम्। निर्ऋतेरलक्ष्म्याः।" इति तट्टीकायां श्रीधरस्वामी॥ * ॥ परित्राणम्। यथा, विष्णुधर्म्मोत्तरे।
"सर्व्वाशुभानां परिमोक्षकारि
संपूजनं देववरस्य विष्णोः।"
इति तिथ्यादितत्त्वम्॥
(विमुक्तिः। यथा, महाभारते। १। २। १६०।
"कर्णस्य परिमोक्षोऽच कुरुकुलाभ्यां पुरन्दरात्॥")
परिमोषी, [न्] त्रि, (परिमुष्णातीति। परि+मुष्+णिनिः।) परिमोषणशीलः। चौरः। (इति हेमचन्द्रः। ३। ४६॥)
परिरम्भः, पुं, (परिरम्भते इति। परि+रभि+घञ्। "रभेरशब्लिटोः।" ७। १। ६३। इति नुम्।) आलिङ्गनम्। इत्यमरः। ३। २। ३०॥ (यथा, गीतगोविन्दे। ५। ७।
"ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
मुग्धस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति॥")
परिवत्सरः, पुं, वत्सरः। इति जटाधरः॥ वत्सरविशेषः। यथा, मलमासतत्त्वे।
"ग्रकान्दात् पञ्चभिः शेषात् समाद्यादिषु वत्सराः।
सम्परीदानुपूर्ब्बाच्च तथोदापूर्ब्बका मताः॥"
"परिपूर्ब्बे तथादानं यवानाच्च द्विजोत्तमाः॥"
इति विष्णुधर्म्मोत्तरम्॥
परिवर्ज्जनं, क्ली, (परिवर्ज्यते, परित्यज्यते प्राणैर्येन। परि+वृज्+णिच्+ल्युट्।) मारणम्। इत्यमरः। २। ८। ११४॥ (भावे ल्युट्।) परित्यागः। यथा, उद्भटः।
"गोष्ठो न दोषो मधुराङ्गनानां
धूर्त्तस्य कृष्णस्य हि रीतिरेषा।
विपर्य्ययो येन कृतः स्वपित्नो-
स्तस्योपपत्नीपरिवर्ज्जनं किम्॥"
परिवर्ज्जनीया यथा, कौर्म्मे उपरिभागे १५ अः।
"एकशय्यासनं पंक्तिभाण्डपक्वान्नमिश्रणम्।
याजनाध्ययने योनिस्तथैव सहभोजनम्॥
सहाध्यायस्तु दशमः सहयाजनमेव च।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसञ्ज्ञिताः॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम्।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत्॥"
"यस्मिन्देशे न सम्मानो न प्रीतिर्न च बान्धवाः।
न च विद्यागमः कश्चित्तं देशं परिवर्ज्जयेत्॥"
इति चाणक्यम्॥
"ब्राह्मणं वालिशं क्षत्रमयोद्धारं विशं जड़म्।
शूद्रमक्षरसंयुक्तं दूरतः परिवर्ज्जयेत्॥
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम्।
कुवस्तुञ्च कुदेशञ्च दूरतः परिवर्ज्जयेत्॥"
इति गरुड़पुराणे ११३ अध्यायः॥
("यस्य वै भाषमाणस्य रुजत्यूर्द्धसुरोभ्यशम्।
अन्नञ्च यवते भुक्तं स्थितश्चापि न जीर्य्यति॥
बलञ्च हीयते यस्य क्षुधा चाभिप्रवर्द्धते।
जायते हृदि शूलञ्च तं भिषक् परिवर्ज्जयेत्॥"
इति चरकेणेन्द्रियस्थाने षष्ठेऽध्याय उक्तम्॥)
परिवर्त्तः, पुं, (परिवर्त्तनमिति। परि+वृत्+भावे घञ्।) विनिमयः। (यथा, रामायणे। २। १०५। २५।
"कृष्यन्नवृत्तसुखं दृष्ट्वा नवं नवमिवागतम्।
ऋतूनां परिवर्त्तेन प्राणिनां प्राणसंचयः॥")
कूर्म्मराजः। अपवर्त्तनम्। इति मेदिनी॥ युगान्तः। इति हेमचन्द्रः॥ ग्रन्थविच्छेदः। इति जटाधरः॥ मृत्युपुत्रस्य दुःसहस्यौरसेन कलिकन्यानिर्म्मादिगर्भजाताद्यपुत्रान्तर्गतद्वितीयपुत्रः। (यथा, मार्कण्डेये। ५१। २।
"अष्टौ कुमाराः कन्याश्च तथाद्यावतिभीषणाः।
दन्ताक्षदिस्तथोक्तिश्च परिवर्त्तस्तथापरः॥"
तन्नामनिरुक्तिर्यथा तत्रैव १४ श्लोके।
"अन्यगर्भे परान् गर्भान् सदैव परिवर्त्तयन्।
रतिमाप्नोति वाक्यञ्च विवक्षोरन्यदेव यत्॥
परिवर्त्तकसंज्ञोऽयं तस्यापि सितसर्षपैः।
रक्षोघ्नमन्त्रजप्यैश्च रक्षां कुर्व्वीत तत्त्ववित्॥")
तस्य पुत्रयोः कर्म्मादि यथा,—
"परिवर्त्तसुतौ द्वौ तु विरूपविकृतौ द्विज!।
तौ तु दृष्ट्वादिपरिखाप्राकाराम्भोधिसंश्रयौ॥
गुल्विन्यां परिवर्त्तौ कुरुतः पादपादिषु।
क्रोष्टुके! परिवर्त्तः स्याद्गर्भस्थान्योद्गरात्ततः॥
न वृक्षश्चैव नैवाद्रिं न प्राकारं पयोनिधिम्।
परिखां न समाक्रामेदबला गर्भधारिणी॥"
इति मार्कण्डेयपुराणे। ५१। ६२—६४॥
परिवर्त्तनं, क्ली, (परि+वृत्+ल्युट्।) परिवर्त्तः। तत्पर्य्यायः। परिदानम् २ विनिमयः ३ नैमेयः ४ व्यतिहारः ५ परावर्त्तः ६ वैमेयः ७ विमयः ८। इति हेमचन्द्रः॥ (यथा, रघुः। १६। १३।
"अङ्कमङ्कपरिवर्त्तनोचिते
तस्य नित्यतुरशून्यतासुमे।
वल्लकी च हृदयङ्गमस्वना
वल्गुवागपि च वामलोचना॥")
परिवर्त्तिका, स्त्री, मेढ्रजातक्षुद्ररोगविशेषः। तल्लक्षणमाह।
"मर्द्दनात् पीड़नाद्वापि तथैवाप्यभिघाततः।
मेढ्रचर्म्म यदा वायुर्भजते सर्व्वतश्चरन्॥
तदा वातोपसृष्टन्तु तच्चर्म्म परिवर्त्तते।
सवेदनं सदाश्वञ्च पाकञ्च व्रजति क्वचित्॥
मण्डलाधस्तात् कोषस्तु ग्रन्थिरूपेण लम्बते।
मारुतागन्तुसम्भूतां विद्यात्तां परिवर्त्तिकाम्।
सकण्डुः कठिना वापि सैव श्लेष्मसमन्विता॥
यस्यां वातजायामपि पित्तानुबन्धो बोद्धव्यो दाहपाकभावात्। कोषः चर्म्मकोषः॥ * ॥
अथ तस्याश्चिकित्सा।
"परिष्टुतं घृताभ्यक्तं सुस्विन्नमुपनाहयेत्।
चिराजं पञ्चराजं वा वातघ्नैः प्राक्स्वयादिभिः॥
ततोऽभ्यज्य घृतैश्चर्म्म पाटयेत् पीड़येन्मणिम्।
प्रविष्टे चर्म्मणि मणौ खेदयेदुपनाहयेत्॥
दद्याद्धातहरान् वस्तीन् स्निग्धान्यन्नानि भोजयेत्।"
इति भावप्रकाशः॥
परिवसथः, पुं, (परितो वसन्त्यत्र। परि+वस्+उपसर्गे वसेरिति अथच्।) ग्रामः। इति हेमचन्द्रः। ४। २७॥
परिवहः, पुं, (परि सर्व्वतोभावेन वहतीति। परि+वह्+अच्।) सप्तवायुनामगतषष्ठवायुः। स तु सुवहवायोरुपरिस्थितः। (यथा, सिद्धान्तशिरोमणौ।
"भूवायुरावह इह प्रवहस्तदूर्द्ध्वः
स्यादुद्वहस्तदनुसंवहसंज्ञकश्च।
अन्यस्ततोऽपि सुवहः परिपूर्व्वकात्स्यात्
वाहः परावह इमे पवनाः प्रसिद्धाः॥")
परिवादः, पुं, (परिसर्व्वतो दोषोल्लेखेन वादः कथनम्। परि+वद्+भावे घञ्।) अपवादः। (यथा, महानिर्व्वाणतन्त्रे। १। ४२।
"नीचसंसर्गनिरताः परवित्तापहारकाः।
परनिन्दापरद्रोह-परिवादपराः खलाः॥"*॥
परि+वद्+णिच्+करणे घञ्।) वीणावादनवस्तु। इति मेदिनी॥
परिवादकः, त्रि, (परिवदतीति। परि+वद्+ण्वुल्।) परिवादकर्त्ता। इति व्याकरणम्॥
परिवादिनी, स्त्री, (परिवदति स्वरानिति। परि+वद्+"सुप्यजातौ णिनिस्ताच्छील्ये।" ३। २। ७८। इति णिनिः स्त्रियां ङीप्।) सप्ततन्त्रीयुक्तवीणा। इत्यमरः॥ (यथा, माघे। ६। ६।
"कलतया वचसः परिवादिनी
स्वरजिता रजितावयमाययुः॥")
परिवादविशिष्टा च॥
परिवादी, [न्] त्रि, (परिवदतीति परिवदितुं शीलमस्य वा। परि+वद्+शीलार्थे कर्त्तरि णिनिः।) परिवादकर्त्ता। (यथा, महाभारते। ७। ७१। २६।
"साधूनसूयतां ये च ये चापि परिवादिनाम्॥"
परिवादो निन्दा विद्यतेऽस्य।) परिवादविशिष्टः। इति परिवादशब्दादस्यर्थे इनिः॥
परिवापः, पुं, (परिसर्व्वत उप्यते इति। परि+वप्+घञ्।) पर्य्युप्तिः। वपनम्। जलस्थानम्। परिच्छदः। इति मेदिनी। पे २५॥
परिवापनं, क्ली, (परि+वप्+णिच्+ल्युट्।) मुण्डनम्। इति हेमचन्द्रः॥
परिवापितं, त्रि, (परिवाप्यते स्म। परि+वप+णिच्+क्त।) मुण्डितम्। इत्यमरः॥ ३। १। ८५॥
परिवारः, पुं, (परिव्रियतेऽनेन। परि+वृ+करणे घञ्।) परिजनः। (यथा, रघुः। ६। १०।
"मनुष्यवाह्यं चतुरस्रयान-
मध्यास्य कन्या परिवारशोभि।

विवेश मध्यान्तरराजमार्गं
पतिंवरा कल्पविवाहवेषा ॥")
खड्गकोषः। परिच्छदः। इति मेदिनी। रे। २८०॥

परिवाहः, पुं, (पर्य्यह्यते लवणादिकं येन। परि+वह्+घञ्।) परीवाहः। जलोच्छ्वासः। इत्यमरटीकायां रमानाथः॥ (यथा, रघुः। ८।७४।
"स विवेश पुरीं तया विना
सुखदापायसुधाकरदर्शनः।
परिवाहमिवावलोकयन्
सुखुचः पौरवधूसुखाश्रुषु॥")

परिविद्धः, पुं, (परि+विद्+क्तः।) परिवित्तिः। यथा, उद्वाहतत्त्वे।
"ज्येष्ठेऽनिर्विशे कनीयान् निर्विशन् परिवेत्ता भवति परिविद्धो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकः ते सर्व्वे पतिताः॥"

परिवित्तिः, पुं, (परिवर्ज्जनं विन्दति लभते इति। परि+विद्+क्तिच्।) परिवेत्तृज्येष्ठः। क्षतविवाहस्यानूढ़ज्येष्ठभ्राता। इत्यमरः। २।७।५६॥ (यथा, मनुः। ३। १७१।
"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः॥")

परिविन्दन्, [त्] पुं, (परित्यज्य ज्येष्ठं भ्रातरं विन्दति अग्न्याधानभार्य्यादिकं लभते इति। विद्+शतृ।) परिवेदनकर्त्ता। यथा,—
"देशान्तरस्थक्लीवैकदयमानसहोदरान्।
वेश्याभिसक्तपतितभ्रूणतुल्यातिरोगिणः॥
जड़मूकान्धबधिरकुब्जवामनकुष्ठकान्।
अतिदुष्टानभार्य्यांश्च क्षत्रियस्तान् नृपस्य च॥
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा।
कुलटोन्मत्तचौरांश्च परिविन्दन् न दुष्यति॥"
इत्युद्वाहतत्त्वे छन्दोगपरिशिष्टम्॥

परिविष्णु, क्ली, सर्व्वतो विष्णुः। विष्णुं विष्णुं परि इत्यव्ययीभावसमासे दुर्गादासः॥

परिवृंहितं, त्रि, वृंहधातोः कर्म्मणि क्तः। (ततः परितो वृंहितमिति।) सर्व्वतोभावेन दीप्तिविशिष्टम्। सर्व्वतोभावेन करिगर्ज्जितम्। सर्व्वतोभावेन वृद्धिविशिष्टम्। सर्व्वतोभावेन ध्वनिविशिष्टम्॥

परिवृढ़ः, त्रि, (परिसर्व्वतोभावेन वृंहति वर्द्धते इति। वृंहि वृद्धौ+कर्त्तरि क्तः। निपातनात् हकारलोपो निष्ठातस्य ढ़त्वञ्च।) अधिपः। प्रभुः। इत्यमरः। ३। १। ११॥ (यथा, राजतरङ्गिण्याम्। ३। २८२।
"जगत्परिवृढ़ः प्रौढ़प्रीतिस्तं स फलार्थिनम्।
ज्ञात्वा प्रादुष्कृतवपुस्ततो भूयोऽप्यभाषत॥")

परिवृतः, त्रि, (परिसर्व्वतोभावेन वृतः।) आवृतः। वेष्टितः। यथा,—
"व्यवहारान् नृपः पश्येत् सभ्यैः परिवृतोऽन्वहम्।"
इति मिताक्षरा॥

परिवृत्तिः, पुं, (परिवर्ज्जने वर्त्तते इति। परि+वृत+क्तिच्।) परिविद्धिः। इति हेमचन्द्रः॥ (परि+वृत्+भावे क्तिन्। परिवर्त्तनम्। यथा, महाभारते। १४। १८। २६।
"तस्य कालपरीमाणमकरोत् स पितामहः।
भूतेषु परिवृत्तिञ्च पुनरावृत्तिमेव च॥"
अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। १०५।
"परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत्॥"
क्रमेणोदाहरणं यथा,—
"दत्त्वा कटाक्षमेणाक्षी जग्राह हृदयं मम।
मया तु हृदयं दत्त्वा गृहीतो मदनज्वरः॥"
अत्र प्रथमेऽर्द्धे समेन द्वितीयेऽर्द्धे न्यूनेन॥)

परिवृहितं, त्रि, सर्व्वतोभावेन वृद्धिविशिष्टम्। सर्व्वतोभावेनोद्यमविशिष्टम्। इति वृहधातोः कर्म्मणि क्तप्रत्ययनिष्पन्नम्॥

परिवेत्ता, [तृ] पुं, (परित्यज्य ज्येष्ठं भ्रातरं विन्दति भार्य्यामग्न्याधानादिकं वा लभते इति। विद् लाभे+"खुलृचौ।" ३। १। १३३। इति तृच्।) अनूढ़ज्येष्ठे कृतविवाहकनिष्ठः। इत्युद्वाहतत्त्वम्॥ (यथा, मनुः। ३। १७१।
"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः॥")

परिवेदनं, क्ली, (परि+विद्+ल्युट्।) विवाहः। अग्न्याधानम्। यथा,—
"क्लीवे देशान्तरगते पतिते भिक्षुकेऽपि वा।
योगग्राह्याभियुक्ते च न दोषः परिवेदने॥"
इत्युद्वाहतत्त्वे श्रातातपः॥
सर्व्वतोभावेन ज्ञानम्। (यथा, महाभारते। १४। १६। १२।
"स हि धर्म्मः सुपर्य्याप्तो ब्रह्मणः परिवेदने।
न शक्यं तमया भूयस्तथा वक्तुमशेषतः॥")
सर्व्वतोभावेन विचारणम्। सर्व्वतोभावेन विद्यमानत्वम्। सर्व्वतोभावेन लाभः॥

परिवेदिनी, स्त्री, (परिवेदोऽस्यास्तीति। इनि ङीप् च।) परिवेत्तुः स्त्री। इति हेमचन्द्रः॥

परिवेदनीया, स्त्री, (परिविद्यते या। परि+विद् अनीयर्।) अनूढ़ज्येष्ठे तत्कनिष्ठेन विवाहिता कन्या। अस्याः प्रमाणं परिदायिशब्दे द्रष्टव्यम्॥

परिवेषः, पुं, (परितो विश्यतीति। परि+विश्+घञ्।) वेष्टनम्। परिधिः। इति मेदिनी। षे। २७॥
"वातेन मण्डलीभूताः सूर्य्याचन्द्रमसोः कराः।
मालाभा व्योम्नि तनुते परिवेषः प्रकीर्त्तितः॥"
इति भरतधृतसाहसाङ्कः॥

परिवेषः, पुं, (परितो विश्यते व्याप्यतेऽनेन। विविरौ व्यापने+घञ्।) परिवृतिः। परिधिः। (वृहत्संहितायाम् ३४ अध्याये तल्लक्षणादिकमुक्तम्। तद्यथा,—
"सम्मूर्च्छिता रवीन्दोः किरणाः पवनेन मण्डलीभूताः।
नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः॥
ते रक्तनीलपाण्डुरकापोताभाभ्रबलहरिशुक्लाः।
इन्द्रयमवरुणनिर्ऋतिशशनेशृपितामहाग्निकृताः॥
धनदः करोति मेचकमन्योऽन्यगुणाश्रयेण चाप्यन्ये।
प्रविलीयते सुदुर्मुहुरल्पफलः सोऽपि वायुकृतः॥
चाषशिखिरजततैलक्षीरजलाभः स्वकालसम्भूतः।
अविकलवृत्तः स्निग्धः परिवेषः शिवसुभिक्षकरः॥
सकलगगनानुचारी नैकाभः घृतजसन्निभो रूक्षः।
असकलशकटशरासनशृङ्गाटकवत्स्थितः पापः॥
शिखिगलसमेऽतिवर्षे बहुवर्णे नृपवधो भयं धूम्रे।
हरिचापनिभे युद्धान्यशोककुसुमप्रभे चापि॥
वर्णेनैकेन यदा बहुलः स्निग्धः सुराभ्रकाकीर्णः।
स्वर्त्ती सद्यो वर्षं करोति पीतश्च दीप्तार्कः॥
दीप्तविहङ्गोद्गरतः कलुषः सन्ध्याश्रयोत्थितोऽतिमहान्।
भयकृत्तड़ित्कृल्काद्यैर्हतो नृपं हन्ति शस्त्रेण॥
प्रतिदिनमर्कहिमांशोरहर्निशं रक्तयोर्नरेन्द्रवधः।
परिविश्योरभौक्ष्णं लग्नास्तनभःस्थयोस्तद्वत्॥
सेनापतेर्भयकरो द्विमण्डली नातिशस्त्रकोपकरः।
त्रिप्रभृतिशस्त्रकोपं युवराजभयं नगररोधम्॥
वृष्टिस्त्राहेन मासेन विग्रहो वा ग्रहेन्दुभनिरोधे।
हौराजन्याधिपयोर्जन्मर्क्षे वाशुभो राज्ञः॥
परिवेषमण्डलगतो रवितनयः क्षुद्रधान्यनाशकरः।
जनयति च वातवृष्टिं स्थावरकृमिक्षत्रिहन्ता च॥
भौमे कुमारबलपतिसैन्यानां विद्रवोऽग्निशस्त्रभयम्।
जीवे परिवेषगते पुरोहितामात्यनृपपीड़ा॥
मल्लिस्थावरजेखकपरिवृद्धिश्चन्द्रजे सुवृष्टिश्च।
शुक्रे याचित्रियराज्ञां पीड़ा प्रियं चान्नम्॥
क्षुदनलमृत्युनराधिपशस्त्रेभ्यो जायते भयं केतौ।
परिविधे गर्भभयं राहौ व्याधिर्नृपभयञ्च॥
युद्धानि विजानीयात् परिवेषाभ्यन्तरे द्वयोर्ग्रहयोः।
दिवसशतः शस्त्रिणो वा क्षुद्दृष्टिभयं त्रिषु प्रोक्तम्॥
याति चतुर्षु नरेन्द्रः सामात्यपुरोहितो वशं स्त्रीषु।
प्रलयमिव विद्धि जगतः पश्चादिषु मण्डलस्थेषु॥
तारास्थस्य कुर्य्यात् पृथगेव समुत्थितो नरेन्द्रवधम्।
नक्षत्राणामथवा यदि केतोर्नोदयो भवति॥
विप्रक्षत्रियविट्शूद्रहा भवेत् प्रतिपदादिषु क्रमशः।
श्रेणीपुरकोशानां पक्षस्यादिष्वशुभकारी॥
युवराज्ञ्यास्तस्यां परतस्त्रिषु पक्षेषु दोषकरः।
पुरराष्ट्रोद्वादशसैन्यक्षोभक्षयोदशसु॥
नरपतिपत्नीपीड़ां परिवेषोऽभ्युत्थितश्चतुर्दशसु।

कुर्य्यात्तु पञ्चदश्यां पीड़ां मनुजाधिपस्येव ॥
नागरकाणामभ्यन्तरस्थिता यायिनाञ्च बाह्यस्था।
परिवेषमध्यरेखा विज्ञेया क्रन्दसाराणाम् ॥
रक्तः श्यामो रूक्षश्च भवति येषां पराजय-
स्तेषाम्।
स्निग्धः श्वेतो द्युतिमान् येषां भागो जय-
स्तेषाम्॥")

परिवेयणम्। इति हेमचन्द्रः ॥

परिवेषकः, पुं, (परिवेषतीति। परि+विष्+ण्वुल्।) परिवेष्टा। परिवेषणकर्त्ता। तस्य लक्षणं यथा,—

"स्नातश्चन्दनचर्चितः सुवसनः सखी प्रसन्नाननः
सद्भक्तः सुभगः प्रसन्नहृदयः श्रीकान्तपूजारतः।
स्वामिस्नेहपरः स्वकार्य्यनिपुणः प्रौढ़ो वदान्यः शुचि-
र्विप्रो वा परिवेषकस्तु कुलजश्चान्योऽपि वा
भूपतेः॥"

इति पाकराजेश्वरः ॥

परिवेषणं, क्ली, (परि+विष्+णिच्+ल्युट्।) वेष्टनम्। भोजनार्थं भोजनपात्रे अन्नादेर्दानम्। अथ श्राद्धे परिवेषणं मनुः।

"पाणिभ्यान्तूपसंगृह्य स्वयमन्नस्य वर्द्धितम्।
विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत् ॥

अन्नस्येति तृतीयार्थे षष्ठी वर्द्धितं पूरितं पात्रमिति शेषः। उपनिक्षिपेत् परिवेषणार्थम्। तथा च पाकस्थाल्या आकृष्य प्रथमं भोजनपात्रे न देयं किन्तु स्थाल्यादिकं पाणिभ्यां पात्रसमीपे भूमौ संस्थाप्य पश्चात् पाणिभ्यां पात्रान्तरिताभ्यां श्राद्धे परिवेषयेत्। उभाभ्यामपि हस्ताभ्यामाकृष्य परिवेषयेदिति मत्स्यपुराणात्। यत्तु श्राद्धे परिवेषणन्तु दक्षिणपाणिमात्रेणेवाङ्गानभिधानादिति मैथिलोक्तं तन्न। एकेन पाणिना दत्तं शूद्रादत्तं न भक्षयेदित्यादि पुराणीयेन एकपाणिदत्तशूद्रादत्तभक्षणनिषेधेन तन्मात्रपरिवेषणस्यापि निषिद्धत्वात् पाणिभ्यामपि पात्रान्तरितं कृत्वा देयम्।

हस्तदत्तञ्च ये स्नेहा लवणं व्यञ्जनानि च।
दातारं नोपतिष्ठन्ति भोक्ता भुङ्क्ते च किल्बिषम्॥
तस्मादन्तरितं देयं पर्णेनाथ कृशेन वा।
प्रदद्यान्न तु हस्तेन नायसेन कदाचन ॥

इति वशिष्ठवचनेन सामान्यतोऽभिधानात्। पितृभक्तितरङ्गिण्यामप्येवम्। मनुः।

गुणांश्च सूपशाकाद्यान् पयो दधि घृतं मधु।
विन्यसेदुदगग्रतः सम्यग्भूमावेव समाहितः॥
आमिषं पानपात्रञ्च भोक्तुर्दक्षिणतो न्यसेत्।
भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च॥
कृत्वानि चैव मांसानि पानानि सुरभीणि च।
उपनीय च तत् सर्व्वं शनकैः सुसमाहितः॥
परिवेषयेत् प्रयतो गुणान् सर्व्वान् प्रचोदयन्।
गुणान् उपकरणानि भूमावेव न तु व्यञ्जनादि-
पात्राणि अन्नादि पात्रोपरि निक्षिपेत्।" इति आह्निकतत्त्वम् ॥

परिवेषिका, स्त्री, (परिवेषति या। परि+विष्+ण्वुल्। स्त्रियां टाप् अत इत्त्वञ्च।) परिवेषणकर्त्री। तस्या लक्षणं यथा,—

"स्नाता विशुद्धवसना नवधूपिताङ्गी
कर्पूरसौरभसुखी नयनाभिरामा।
विम्बाधरा शिरसि वह्निसुगन्धिपुष्पा
मन्दस्मिता क्षितिभृतां परिवेषिका स्यात्॥"

इति पाकराजेश्वरः ॥

परिवेष्टितं, त्रि, सर्व्वतोभावेन वेष्टितम्। तत्पर्य्यायः। परिक्षिप्तम् २ वलयितम् ३ निवृतम् ४ परिष्कृतम् ५ परीतम् ६। इति हेमचन्द्रः ॥

परिव्याधः, पुं, (परि सर्व्वतोभावेन विध्यतीति। परि+व्यधौ ताड़े+"ग्रहादृव्यधेति।" ३। १। १४१। इति णः।) अम्बुवेतसः। इमोत्पलः। इत्यमरः। २। ४। ३०, ६०॥

परिव्रज्या, स्त्री, (परि+व्रज+भावे क्यप्। स्त्रियां टाप्।) तपस्या। इति हेमचन्द्रः। १। ८१। (इतस्ततो भ्रमणम्। यथा, मनुः। १०। ५२। "वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः॥"
"लौहवलयादि चालङ्करणं सर्व्वदा च भ्रमणशीलत्वम्॥" इति कुल्लूकभट्टः॥)

परिव्राजः, पुं, (परित्यज्य सर्व्वान् विषयभोगान् गृहाश्रमाद् व्रजतीति। परि+व्रज्+संज्ञायां कर्म्मणि घञ्।) परिव्राट्। इत्यमरटीकायां रमानाथः ॥

परिव्राजकः, पुं, (परिव्राज+स्वार्थे कन्। परिव्रजतीति। परि+व्रज्+ण्वुल् -वा।) परिव्राट्॥ (यथा, गोः रामायणे। ३। ५५। २।
"स परिव्राजकच्छद्मा महाकायशिरोधरः।
प्रतिपेदे स्वकं रूपं रावणो राक्षसाधिपः॥")

परिव्राजिः, स्त्री, (परि+व्रज्+णिच्+इन्।) आवणी। इति राजनिर्घण्टः॥ घुलकुड़ी इति भाषा॥ (आवणीमण्डूकपर्णीशब्दयोरस्या विशेषो ज्ञेयः॥)

परिव्राट्, [ज्] पुं, (परित्यज्य सर्व्वं विषयभोगं गृहस्थाश्रमाद् व्रजति गच्छतीति। परि+व्रज्+क्विप् दीर्घश्च।) चतुर्थाश्रमी। तत्पर्य्यायः। भिक्षुः २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५। इत्यमरः। २। ७। ४२॥ सन्न्यासी ६ श्रमणः ७। इति जटाधरः॥ परिव्राजकः ८ पराशरी ९ व्रजकः १०। इति शब्दरत्नावली॥ तस्य लक्षणं यथा, गरुड़पुराणे।

"सर्व्वारम्भपरित्यागो भैक्ष्याशं ब्रह्मचर्य्यता।
निष्परिग्रहताद्रोहसमता सर्व्वजन्तुषु॥
प्रियाप्रियपरित्यक्ते सुखदुःखविकारिता।
संबाह्याभ्यन्तरं शौचं सुखदुःखविकारिता॥
सर्व्वेन्द्रियसमाहारो धारणा ध्याननित्यता।
भावसंशुद्धिरित्येष परिव्राड्वर्य्य उच्यते॥"

परिश्रङ्कनीयः, त्रि, (परिश्रङ्कते इति। परि+श्रङ्क+अनीयर्।) सर्व्वतोभावेन श्रङ्काविषयः। यथा,

"श्राद्धं सुचिन्तितमपि प्रतिचिन्तनीय-
माराधितोऽपि नृपतिः परिश्रङ्कनीयः।
अङ्के स्थितापि युवतिः परिरक्षणीया
श्राद्धे नृपे च युवतौ च कुतो विश्वसम्॥"

इत्युद्भटः॥

परिश्लिष्टं, क्ली, (परितः श्लिष्टः। श्लिष्+क्तः।) परिश्लेषविशिष्टम्। अवश्लिष्टार्थबोधकग्रन्थः। इति हेमचन्द्रः। २। १७१॥ (यथा, छान्दोग्ये। परिश्लिष्टम्। गन्धपरिश्लिष्टमित्यादि॥)

परिशुष्कं, क्ली, (परितः शुष्कम्। शुष्+क्तः।) मांसभक्षणभेदः। यथा,—

"मांसं बहुघृतैर्भृष्टं सिक्तक्षौद्रासुना सुहुः।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते॥"

इति शब्दचन्द्रिका॥

सर्व्वतोनीरसे त्रि॥ (यथा, हेः रामायणे। २। ५६। ५।
"उपतप्तोदका नद्यः पङ्कलानि सरांसि च।
परिशुष्कपलाशानि वनान्युपवनानि च॥")

परिशोधः, पुं, (परि+शुध्+भावे घञ्।) परिशोधनम्। सर्व्वतोभावेन शुद्धिः॥

परिशोषः, पुं, (परि+शुष्+भावे घञ्।) सर्व्वतोभावेन शुष्कता। (यथा, गोः रामायणे। ४। १५। ३४।
"वायुर्कपरिपीतास्तुर्विपरिम्लानपङ्कजः।
तड़ाग इव कालेन परिशोषं गमिष्यति॥")

परिश्रमः, पुं, (परि+श्रम्+घञ्। न द्वित्वम्।) परिश्रान्तिः। तत्पर्य्यायः। श्रमः २ क्लमः ३ क्लेशः ४ प्रयासः ५ आयासः ६ आयामः ७। इति हेमचन्द्रः। २। २३३॥ (यथा, रघुः। १। ५८।
"तमातिथ्यक्रियाशान्त-रथक्षोभपरिश्रमम्।
पप्रच्छ कुशलं राज्ये राज्याश्रमसुनिं मुनिः॥")

परिश्रयः, पुं, (परिश्रयत्यस्मिन् इति। परि+श्रि+"एरच्।" ३। ३। ५६। इति अच्।) सभा। (भावे अच्।) आश्रयः। इति मेदिनी। ये। १२२॥

परिश्रान्तः, त्रि, (परि+श्रम+कर्म्मणि क्तः।) सर्व्वतोभावेन श्रान्तियुक्तः। (यथा, महाभारते। १। ४६। २६।
"परिश्रान्तो वयःस्थश्च षष्टिवर्षो जरान्वितः।
क्षुधितः स महारण्ये ददर्श मुनिसत्तमम्॥")

स्त्री। गायत्रीस्वरूपा भगवती। यथा, देवीभागवते। १२। ६। ८३।
"पावनी पादसहिता पेशला पवनाग्निनी।
प्रजापतिः परिश्रान्ता पर्व्वतस्तनमण्डला॥")

परिश्रुतः, त्रि, (परि+श्रु+क्तः।) सर्व्वतोभावेन श्रवणविशिष्टः॥

परिश्लेषः, पुं, (परि+श्लिष+भावे घञ्।) आश्लेषः॥

परिषत्, [द्] स्त्री, (परितः सीदन्त्यस्याम्। परि+सद्+अधिकरणे क्विप्। "सदिरप्रतेः।" ८। ३। ६६। इति षत्वम्।) सभा। इत्यमरः। २। ७। १५॥ (यथा, गोः रामायणे। २। १३। १६।

"याहशी परिषत् सीते ! दूतस्त्वयं तथाविधः।
ध्रुवमद्यैव राजा मां यौवराज्येऽभिषेक्ष्यति ॥"
परिषच्च खलु द्विविधा, ज्ञानवती मूढपरिषच्च, सैव द्विविधा सती त्रिविधा पुनरनेन कारणविभागेन सुहृत्परिषत्, उदासीनपरिषत्,प्रतिनिविष्टपरिषच्चेति। तत्र प्रतिनिविष्टायां परिषदि ज्ञानविज्ञानवचनप्रतिवचनशक्तिसम्पन्नायां मूढायां वा न कथञ्चित् केनचित् सह जल्पो विधीयते। मूढायान्तु सुहृत्परिषदि उदासीनायां वा ज्ञानविज्ञानमन्तरेणाप्यदीप्तयशसा महाजनट्टिष्टेन सह जल्पो विधीयते। तट्टिष्टेन च सह कथयता आविद्धदीर्घसूत्रसङ्कलैर्वाक्यदण्डकैः कथयितव्यम्। अतिहृष्टं सुहृमुद्धुरुपहसता परं रूपयता च परिषदमाकारेणवतस्यास्य वाक्यावकाशो न देयः। कथग्रन्थश्च नवन् वक्तव्यो नोद्यत इति। अथवा पुनर्हीनां ते प्रतिज्ञेति पुनश्चाक्ष्यमाणः प्रतिवक्तव्यः। परिसंवत्सरोभव ग्लिचस्व तावत्। पर्य्याप्तमेतावत्ते। सकृदपि हि पारिप्लविकं निहतं निहतमाहुरिति। नास्य योगः कर्त्तव्यः; कथञ्चिदप्येवं श्रेयसा सह विग्रह्य वक्तव्यमित्याहुरित्येके। नत्वेवं न्यायसा सह विग्रहं प्रशंसन्ति कुशलाः। प्रत्यवरेण तु सह समानाभिमतेन वा विग्रह्य जल्पता सुहृत्परिषदि कथयितव्यम्। अथवाप्युदासीनपरिषदि अनवधानश्रवणज्ञानविज्ञानोपधारणवचनशक्तिसम्पन्नायां कथयता चावहितेन परस्य सादृगुण्यदोषबलमवेक्षितव्यम्। समवेक्ष्य च यत्रैनं श्रेष्ठं मन्येत नास्य तत्र जल्पं योजयेत् अनाविष्कृतमयोगं कुर्व्वन्। यत्र त्वेनमवरं मन्येत तत्रैवैनमाशु निगृह्णीयात्।"
इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)
परिषत्त्वं यथा, प्रायश्चित्तविवेके।
"एकविंशतिसंख्याकैर्मीमांसान्यायपारगैः।
वेदाङ्गकुशलैश्चैव परिषत्त्वं प्रकल्पयेत् ॥"
परिषदः, पुं, (परितः सीदतीति। परि+सद्+अच्। "सदिरप्रतेः।" ८। ३। ६६। इति षत्वम्।) पारिषदः। अनुचरः। इति भरतकृतद्विरूपकोषः ॥
परिषद्यः, पुं, (परिषदमर्हतीति। परिषद्+यत्।) परिषद्वलः। इति भरतकृतद्विरूपकोषः ॥
परिषद्वलः, पुं, (परिषदस्यास्तीति। परिषद्+"रज:कृष्यासतिपरिषदो वलच्।" ५। २। ११२। इति वलच्।) सभासदः। पारिषदः। इति शब्दरत्नावली ॥ (यथा, भट्टिः। ४। १२।
"ब्रातीनयालदीप्राख्यः सत्वनः परिपूजयन्।
परिषद्वलाग्महाब्रह्मेराट नैकटिकाश्रमान् ॥")
परिष्कन्दः, त्रि, (परिष्कन्दतीति। परि+स्कन्दिरौ गतिशोषणयोः+घञ्वाच्। "परेश्च।" ८। ३। ७४। इति षत्वम्।) परिस्कन्दः। परपुरः। इत्यमरटीकायां रमानाथः ॥
परिष्कणः, त्रि, (परि+स्कन्द+क्तः। दस्य तस्य च नः। "परेश्च।" ८। ३। ७४। इति षत्वे णत्वञ्च।) परिस्कन्दः। इत्यमरटीकायां रायमुकुटः ॥
परिष्कारः, पुं, (परिष्क्रियतेऽनेन। परि+कृ+"सम्परिभ्यां करोतौ भूषणे।" ६। १। १३७। इति सुट्। "परिनिवीति।" ८। ३। ७०। इति षत्वम्।) अलङ्कारः। इत्यमरः। २। ६। १०१ ॥ संस्कारः। शुद्धिः ॥
परिष्कृतः, त्रि, (परिष्क्रियते स्म इति। परि+कृ+क्तः। "सम्परिभ्यामिति।" सुट्। "परिनिवीति।" ८। ३। ७०। इति षत्वञ्च।) भूषितः। अलङ्कृतः। इत्यमरः। २। ६। १००॥ वेष्टितः। इति हेमचन्द्रः ॥ आहितसंस्कारः। इति वैदिकशब्दटीकायां भरतः ॥
परिष्कृतभूमिः, स्त्री, वेदिः। परिष्कृता यज्ञार्थं पशुबन्धनाय यज्ञपात्रासादनाय चाहितसंस्कारा भूमिः। इत्यमरभरतौ ॥
परिष्वङ्गः, पुं, (परिष्वञ्जनम्। परि+स्वञ्ज+घञ्।) "परिनिवीति।" ८। ३। ७०। इति षत्वम्।) आलिङ्गनम्। इत्यमरः। ३। २। ३०॥ (यथा, गोः रामायणे। १। ४। ८८।
"अङ्गदप्रसुखानाञ्च हरीणां रामदर्शनम्।
हनूमतः परिष्वङ्गो राघवेण महात्मना ॥")
परिसभ्यः, पुं, सर्व्वतोभावेन सभायां साधुः इत्यर्थे यत् प्रत्ययः ॥ परिषद्यः। सभासदः ॥
परिसरः,पुं,(परिसरन्त्यत्र। परि+सृ+"पुंसीति।" ३। ३। ११८। इति घः।) पर्य्यन्तभूः। नदीनगरपर्व्वतादेरुपान्तभूमिः। इत्यमरभरतौ ॥ (यथा, मेघदूते। ६६।
"मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारैर्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम्॥")
न्युः। विधिः। इति मेदिनी। रे। २७६ ॥
परिसर्पः, पुं, (परि समन्तात् सर्पणम्। परि+सृप्+घञ्।) परिक्रिया। परिजनादिना वेष्टनम्। समन्तात् सर्पणम्। इत्यमरभरतौ ॥ (सर्पविशेषः। यथा, सुश्रुते कल्पस्थाने ४ अध्याये। तत्र दर्व्वीकराः। "गवेधुकः परिसर्पः खड्गफणः ककुदः पद्मो महापद्मः॥" इति। कुष्ठविशेषः। यथा, तत्रैव निदानस्थाने ५म अध्याये। "क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठञ्चर्म्मदलं विसर्पः परिसर्पः सिध्म विचर्चिका किटिभं पामा रकसा चेति॥")
परिसर्य्या,स्त्री,(परिसरणमिति। सृ गतौ+"परिचर्य्या परिसर्य्येति।" ३। ३। १०१। इत्यस्य वार्त्तिं इति निपातनात् सिद्धम्।) परीसारः। सर्व्वतोगमनम्। भूमौ सर्व्वतोभ्रमणम्। इति सर्व्वस्वम् ॥ अन्तसरणम्। इति केचित्। इत्यमरभरतौ ॥
परिस्कन्दः, पुं, (परिस्कन्दतीति। परि+स्कन्द+घञ्। "परेश्च।" ८। ३। ७४। इति पत्वे षत्वाभावः।) परपुरः। परेण प्रतिपालितः। इत्यमरः। २। १०। १८॥
परिस्कन्नः, पुं, (परि+स्कन्द+क्त। "परेश्च।" ८। ३। ७४। इति पत्वे षत्वाभावः।) परिस्कन्दः। इत्यमरटीकायां रायमुकुटः ॥
परिस्तोमः, पुं, (परि स्तूयते प्रशस्यते नानावर्णवत्त्वात्। परि+स्तु+"अत्तिस्तुभ्यामि।" मन्। यद्वा परिगतः स्तोमोऽत्र वर्णस्तोमत्वात्।) गजपृष्ठस्थचित्रकम्बलः। इत्यमरः। २।८।४२ ॥ हातीर पिठेर झुल इति भाषा ॥
परिस्यन्दः, पुं,(परि+स्यन्द+अधिकरणे घञ्।) कुसुमप्रकराद्दैः पत्रावल्यादेश्च रचना। इत्यमरः। २। ६। १३७॥ परिकरः। परिवारः। इति हेमचन्द्रः। ३। ३७६ ॥ (भावे+घञ्।) सर्व्वतोभावेन स्यन्दनञ्च ॥ (मर्द्दनम्। यथा, महाभारते। १। १५४। ८।
"अहमेनं हनिष्यामि प्रेक्षन्त्वार्य्ये सुमध्यमे !।
नायं प्रतिबलो भीरु ! राक्षसापसदो मम।
सोढुं युधि परिस्यन्दमथवा सर्व्वराक्षसाः ॥")
परिस्यन्दनं, क्ली, (परि सर्व्वतोभावेन स्यन्द्यते इति। परि+स्यन्द+ल्युट्।) सर्व्वतोभावेन कम्यनम्। यथा। कोऽपि परिस्यन्दनसाधनसाध्यः। यथा गमनादिः। कोऽप्यपरिस्यन्दनसाधनसाध्यः। यथा अवस्थानादिः। इति गोयीचन्द्रः ॥
परिस्यन्दमानः, त्रि, (परिस्यन्दते इति। परि+स्यन्द+शानच्।) सर्व्वतोभावेन कम्यमानः। यथा। "अनवरतपरिस्यन्दमाना परिमितपवनादिपरमाणुचेतनसंयोगसन्तानान्तःपातिव्यक्तीनामविरतमेवोपरमात्।" इति सामान्यलक्षणायां श्रीरोमणिः ॥
परिस्यन्दः, पुं, (परि+स्यन्द+भावे घञ्। अप्राणिकर्त्तृकत्वे वा षत्वम्।) परिस्यन्दः। इत्यमरटीकायां भरतः ॥
परिस्रुत्, स्त्री, (परिस्रवतीति। परि+सु+क्विप् तुक् च।) वरुणात्मजा। मदिरा। इत्यमरः। २। १०। ३६ ॥ (यथा, अथर्व्ववेदे। ३।१२।७।
"एमां परिस्रुतः कुम्भ आदधः कलशैरयुः ॥"
सर्व्वतोभावेन चरिते त्रि। यथा, ऋग्वेदे। ८। ३६। १०।
"त्वामापः परिस्रुतः परियन्ति स्वसेतवो नभन्ता-
मन्यके समे ॥")
परिस्रुतः, त्रि, (परितः सूयते स्म। सु सवणे+"गत्यर्थेति।" ३। ४। ७२। इति क्तः।) सर्व्वयुक्तः। सर्व्वतोभावेन चरितः। इति मेदिनी। ते। २०६ ॥ (वारुणीशब्देऽस्या विवृतिर्ज्ञातव्या। यथा, यजुर्व्वेदे। २। ३४।
"ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ॥")
परिस्रुता, स्त्री,(परितः सूयते स्मेति। परि+सु+क्तः। स्त्रियां टाप्। अन्नादिभ्यः चरणेन जात-

त्वात् तथात्वम्।) वारुणी। मदिरा इति मेदिनी। ते। २०६ ॥

परिहारः, पुं, (परिह्रियतेऽनेनेति। परि+हृ+घञ्।) अवज्ञा। अनादरः। इति शब्दरत्नावली ॥ ("परिहारो नाम तस्यैव दोषवचनस्य परिहरणं यया नित्यमात्मनि शरीरस्थे जीवलिङ्गान्युपलभ्यन्ते तस्य चापगमान्नोपलभ्यन्ते तस्मादन्यः शरीरादात्मा नित्यः शरीराच्चेति।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥ त्यागः। परिवर्जनम्। यथा, राजतरङ्गिण्याम्। ४। ६७६।

"दुर्वृत्तस्य प्रभोरन्यत परिहारात् न भेषजम् ॥" गोपनम्। यथा, शकुन्तलायां १ अङ्के।

"कथमिदानीमात्मानं निवेदयामि कथं वा आत्मनः परिहारं करोमि ॥" विजितद्रव्यादिकम्। यथा, मनुः। ७। २०१।

"जित्वा सम्पूजयेत् देवान् ब्राह्मणांश्चैव धार्म्मिकान्।
प्रदद्यात् परिहारांश्च स्थापयेदभयानि च ॥"

स्थानविशेषः। यथा, मनुः। ८। २३७।

"धनुः शतं परीहारो ग्रामस्य स्यात् समन्ततः॥" अत्र कुल्लूकभट्टः। "चतुर्हस्तो धनुः शब्दो यष्टिस्थाः पातः प्रक्षेपो ग्रामसमीपे सर्व्वासु दिक्षु चत्वारि हस्तशतानि क्षीन् वा यष्टिप्रक्षेपान् यावत् पशुप्रचारार्थं शस्यवपनादिसंरोधपरिहारः कार्य्यः ॥")

परिहार्य्यः, पुं, (परि+हृ+ण्यत्।) पारिहार्य्यः। वलयः। इति भरतद्विरूपकोषः ॥ परिहरणीये त्रि ॥ (यथा, शकुन्तलायाम् १ मे अङ्के।

"न परिहार्य्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते॥")

परिहासः, पुं, (परि+हस्+भावे घञ्।) परिहसनम्। ठाट्टा इति भाषा। परीहासः। यथा। "परिहासः केलिसुखः केलिर्देवननर्म्मणी।" इति चिकाण्डशेषः ॥ तत्पर्य्यायः। क्रीड़ः २ देवना ३। इति शब्दरत्नावली ॥ वर्कुरा ४। इति जटाधरः ॥ (यथा, शकुन्तलायाम् २ ये अङ्के।

"परिहासविजल्पितं सखे! परमार्थेन न गृह्यतां वचः ॥")

परीक्षकः, त्रि, (परि+ईक्ष+ण्वुल्।) निरूपकः। (यथा, पञ्चतन्त्रे। १। ८४।

"परीक्षका यत्र न सन्ति देशे
नार्घन्ति रत्नानि समुद्रजानि।
आभीरदेशे किल चन्द्रकान्तं
त्रिभिर्वराटैर्विपणन्ति गोपाः ॥")

तत्पर्य्यायः। कारणिकः २। इत्यमरः। ३।१।७ ॥ परीक्षते व्यवधारयति प्रमाणेन। यथा, वह्निना परीक्षकः स्वर्णस्य स्वर्णकारः। कारणैर्हेतुभिश्चरति कारणिकः इति भरतः ॥

परीक्षणं, क्ली, (परि+ईक्ष+ल्युट्।) परीक्षा। राज्ञा धर्म्मकामार्थभयेरमात्यादेर्भावतत्त्वनिरूपणम्। इति भरतः ॥ यथा,—

"भेदोपजापाद्युपधाधर्म्माद्यैर्यत् परीक्षणम्।"

इत्यमरः। २। ८। २१ ॥

सर्व्वतोभावेन दर्शनञ्च ॥

परीक्षा, स्त्री, (परित ईक्ष्यतेऽनया। परि+ईक्ष+"गुरोश्च हलः।"३। ३। १०२। इति अः। ततष्टाप्।) दिव्यम्। अथ दिव्यानि। तत्र बृहस्पतिः।

"धटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमम्।
तण्डुलश्च षष्ठः प्रोक्तः सप्तमं तप्तमाषकम् ॥
अष्टमं फालमित्युक्तं नवमं धर्म्मजं स्मृतम्।
दिव्यान्येतानि सर्व्वाणि निर्दिष्टानि स्वयम्भुवा ॥"

अथ किन्तद्दिव्यम्।

तत्र मानुषप्रमाणानिर्णयस्यापि निर्णायकं यत्तद्दिव्यमिति लोकप्रसिद्धम्। एतदपि यद्यपि प्रभुपथानामस्ति तथापि कालान्तरनिर्णायकत्वेन तेषां भेदात्। अपिना मानुषप्रमाणसत्त्वेऽपि यत्र धटादीनामङ्गीकारस्तत्रापि तद्भवति इति सूचितम्। अतएव लिखितसाक्षिभुक्तिलक्षणत्रिविधमानुषप्रमाणभिन्नप्रमाणं यत्तद्दिव्यं प्रमाणं तत् प्रमाणं न भावैकगोचरं किन्तु भावाभावाविशेषेण गोचरयतीति। तत्र महाभियोगेषु दिव्यान्याह याज्ञवल्क्यः।

"तुलाग्न्यापो विषं कोषो दिव्यानीह विशुद्धये।
महाभियोगेष्वेतानि शीर्षकस्योभियोक्तरि ॥"

विशुद्धये सन्दिग्धार्थस्य सन्देहनिवृत्तये। महाभियोगेषु महापातकादिगुरुतराभियोगेषु। शीर्षकस्य इति शीर्षकं प्रधानं व्यवहारस्य चतुर्थपादो जयपराजयलक्षणः। तेन दण्डो लक्ष्यते तत्र तिष्ठतीति शीर्षकस्थः तत्प्रयुक्तदण्डभागीत्यर्थः। महाभियोगान् स्मरयति कालिकापुराणम्।

"परदाराभिशापे च चौर्य्यागम्यागमेषु च।
महापातकशङ्कासु स्यादिव्यं नृपसाहसे ॥
प्रतिपत्तौ विवादे च पशुस्य स्थापने कृते।
तत्रैव स्थापयेद्दिव्यं शिरःपूर्व्वं महीपतिः ॥
परदाराभिशापे च बहवो यत्र वादिनः।
शिरोहीनं भवेद्दिव्यमात्मनः शुद्धिकारणात् ॥"

पितामहः।

"शिरःस्थायिविहीनानि दिव्यानि परिवर्ज्जयेत्।
चत्वारि तु धटादीनि कोषस्त्वेवाशिराः स्मृतः ॥"

महाभियोगेतरेऽपि कोषमाह स्मृतिः। कोषमल्पे च दापयेत्। याज्ञवल्क्योनाभियोक्तुर्वादिनः शिरोवर्त्तित्वाभिधानादभियोज्यस्य दिव्यकर्त्तृत्वं प्रतिपादितम्। उक्तमाह कात्यायनः।

"न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत्।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः ॥"

प्रत्यर्थिस्वीकारेणार्थिनोऽपि दिव्यमाह याज्ञवल्क्यः।

"रुचा वान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः।
विनापि शीर्षकान् कुर्य्यान्नृपद्रोहेऽथ पातके ॥"

इतरोऽभियुक्तः शिरः शारीरदण्डमर्थदण्डं वा वर्त्तयेत् स्वीकुर्य्यात्। बृहस्पतिः।

"स्नेहात्क्रोधाल्लोभतो वा भेदमायान्ति साक्षिणः।
विधिदृष्टस्य दिव्यस्य न भेदो जायते क्वचित् ॥"

भेदः सत्यादेरपरीत्यम्। यत्तु कात्यायनवचनम्।

"क्रिया न वैदिकी प्रोक्ता विद्यमानेषु साक्षिषु।
लेख्ये च मति वादेषु न स्याद्दिव्यं न साक्षिणः ॥"

इति तद्गुणान्वितसाक्षिसत्त्वे। यथा व्यासः।

"मणिमन्त्रौषधिबलात् प्रदत्तं वा विधानतः।
विसंवदेद्दिव्यमपि न तु साक्षी गुणान्वितः ॥"

अतएव नारदः।

"युक्तिव्यवस्थवस्तूनां शुद्धयर्थेनेमदीर्य्येत ॥"

एनं विपर्य्ययमाणमर्थं अर्द्दयेत पीड़येत। निर्द्धारयेदिति यावत् ॥* ॥ शुद्धयथानाह नारदः।

सत्यवाहनशस्त्राणि गोबीजकनकानि च।
देवताग्निपदांश्च दत्तानि सुकृतानि च ॥
सूनोश्छिन्नांसि पुत्राणां दारार्थां सुहृदात्मया।
अभियोगेषु सर्व्वेषु कोषपानमथापि वा ॥
इत्येते शुद्धयः प्रोक्ता मनुना स्वल्पकारणात् ॥"

बृहस्पतिः।

"यथोक्तविधिना देयं दिव्यं दिव्यविशारदैः।
अयथोक्तप्रदत्तन्तु न शुद्धं साध्यसाधने ॥
अदेशकालदत्तानि बहिर्वादिकृतानि च।
अभिचारं सदा त्वेवं कुर्व्वन्तीह न संशयः ॥"

बहिर्वादिकृतमभियोक्तारं विना कृतम्। एतच्च प्रायिकं आत्मशुद्धिपराणामभियोक्तारं विनापि दिव्यविधानात्।

तथा च नारदः।

"राजभिः शुद्धितानाञ्च निर्दिष्टानाञ्च दस्युभिः।
आत्मशुद्धिपराणाञ्च देयं दिव्यं शिरो विना ॥*॥"

अथ दिव्यदेशाः। कात्यायनः।

"इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणाम्।
नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत् ॥
प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे।
अतोऽन्येषु च कार्य्येषु सभामध्ये विदुर्बुधाः ॥"

इन्द्रस्थाने इन्द्रध्वजस्थाने ॥ * ॥

अथ दिव्यकालाः। पितामहः।

"चैत्रो मार्गशिराश्चैव वैशाखश्च तथैव हि।
एते साधारणा मासा दिव्यानामविरोधिनः ॥
घटः सर्व्वर्त्तुकः प्रोक्तो वाते वाति विवर्ज्जयेत्।
अग्निः शिशिरहेमन्तवर्षासु परिकीर्त्तितः ॥
शरदृग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषम्।
कोषस्तु सर्व्वदा देयस्तुला स्यात् सार्व्वकालिकी ॥"

मिताक्षरायां नारदः।

"न प्रीते तोयशुद्धिः स्यान्नोष्णकाले ऽग्निशोधनम्।
न प्रावृषि विषं दद्यात् प्रवाते न तुलां नृप! ॥"

नारदः।

"पूर्व्वाह्णे सर्व्वदिव्यानां प्रदानं परिकीर्त्तितम्।
नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचन ॥"

प्रीते हेमन्तशिशिरवर्षासु। उष्णकाले ग्रीष्मशरदोः। वर्षासु विषनिषेधश्चतुर्थवातिरिक्तपरः। वर्षे चतुर्थवा मात्रा इति वक्ष्यमाणनारदवचनात्। तण्डुलादीनान्तु विशेषानभिधानात् सार्व्वकालि-

कत्वम् । अत्र विषे विशेषतो वर्षानिषेधात् वस्त्रमाश्ववचने सिंहस्थरवावेव परीक्षामात्रनिषेधाच्च दिव्यान्तरं सिंहेतरत्र वर्षास्वपि कुर्व्वीत ।
अतोयाभ्यायने हरौ सुप्ते सर्व्वकर्म्माणि वर्ज्जयेदित्यस्य न विषयः । ज्योतिषे ।
सिंहस्थे मकरस्थे च जीवे चास्तमिते तथा ।
मलमासे न कर्त्तव्या परीक्षा जयकाङ्क्षिणा ॥
रविशुद्धौ गुरौ चैव न शुक्रोऽस्तङ्गते पुनः ।
"सिंहस्थे च रवौ नैव परीक्षा प्रस्यते बुधैः ॥
नाड्यां न चतुर्दश्यां प्रायश्चित्तपरीक्षणे ।
न परीक्षा विवाहश्च शनिभौमदिने तथा ॥
रविशुद्धौ गुरौ चैवेत्यत्र ग्रस्यत इति शेषः ॥
तथा च दीपिकायाम् ।
"नो शुक्रास्तोऽष्टमेऽर्के गुरुसहितरवौ जन्ममासेऽष्टमेन्दौ
विद्धौ मासे मलाख्ये कुजशनिदिवसे जन्मतारासु चाथ ।
नाड़ीनक्षत्रहीने गुरुरविरजनीनाथतारा-विशुद्धौ
प्रातः कार्य्या परीक्षा द्विजगुरुचरणध्यानयोदये ग्रस्तलग्ने ॥" * ॥
पितामहः ।
"प्रत्यर्थं दापयेद्दिव्यं राजा वाधिकृतोऽपि वा ।
ब्राह्मणानां स्तुवतां प्रकृतीनाञ्चयेव च ॥"
ब्राह्मणानां प्रकृतीनाञ्च प्रत्यर्थं दिव्यं दापयेदित्यन्वयः । प्रकृतयस्तु ।
"स्वाम्यमात्यः सुहृत् कोषो राष्ट्रदुर्गबलानि च ।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि चेति अमरसिंहोक्ताः ॥ * ॥
अथ दिव्यविशेषाधिकारिणः । नारदः ।
"ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः ।
वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु ॥
साधारणः समस्तानां कोषः प्रोक्तो मनीषिभिः ।
विवर्ज्यं ब्राह्मणस्य सर्व्वैस्तु तुला स्मृता ॥"
यत् पुनरनेन ।
"सत्रतानां भृशार्त्तानां व्याधितानां तपस्विनाम् ।
स्त्रीणाञ्च न भवेद्दिव्यं यदि धर्म्मस्यपेक्षितः ॥"
इति स्त्रादीनां दिव्यं निषिद्धं तत्तुलेतरविषयकमिति मूलपाणिः ॥ मिताक्षरायान्तु ।
स्त्रीपुंसयोर्विवादेन स्त्रीणां दिव्यमिति रूपा वान्यतरः कुर्य्यादिति विकल्पनिषेधार्थमेतदुक्तं भवति । अवश्याभियोगेषु स्त्रादीनामभियोक्तृत्वे अभियोज्यानामेव दिव्यं एतेषामभियोगे योज्यत्वेऽपि अभियोक्तृणामेव दिव्यं परस्पराभियोगे तु विकल्प एव तत्रापि तुलेवेति नियम्यते । तथा महापातकादिग्रहाभियोगे तु स्त्रादीनां तुलैव । यथा याज्ञवल्क्यः ।
"तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् ।
अग्निर्जलं वा शूद्रस्य यवाः सप्त विषञ्च वा ॥"
स्त्रीमात्रं जातिवयोऽवस्थाविशेषानादरेण बाल आद्योऽष्टवर्षाज्जातिविशेषानादरेण वृद्धोऽशीतिपरः । एतच्च वचनं सर्व्वदिव्यसाधारणेषु मार्गशिरस्थेचवेत्राख्येषु स्त्रादीनां सर्व्वदिव्यसमवधानविधाने नियमार्थकृतयार्थवत् । न च सर्व्वकालं स्त्रीबालतुलेवेति ।
"स्त्रीणान्तु न विषं प्रोक्तं न चापि सलिलं स्मृतम् ।
घटकोषादिभिस्तासामन्तस्तत्त्वं विचारयेत् ॥"
इति विषसलिलव्यतिरिक्तघटकोषादिभिः शुद्धिविधानात् । एवं बालादिष्वपि योजनीयम् । तथा ब्राह्मणादीनामपि न सार्व्वकालिकस्तुलादिनियमः ।
"सर्व्वेषामेव वर्णानां कोषाक्षुद्विर्विधीयते ।
सर्व्वाण्येतानि सर्व्वेषां ब्राह्मणस्य विषं विना ॥"
इति पितामहस्मरणात् ।
तस्मात् साधारणे काले बहुदिव्यसमवधाने तुलादिनियमार्थमेवेदं वचनम् । कालान्तरे तु तत्तत्कालविहितं सर्व्वेषाम् । तथा हि वर्षास्वग्निरेव सर्व्वेषां हेमन्तशिशिरयोस्तु क्षत्रियादीनां त्रयाणां अग्निविषयोर्विकल्पः ब्राह्मणस्य तु अग्निरेव न कदाचिद्विषं ब्राह्मणस्य विषं विनेति निषेधात् । ग्रीष्मशरदोस्तु सलिलमेव ।
येषां कुष्ठादीनान्तु विशेषेणाग्न्यादिनिषेधः ।
"कुष्ठिनां वर्ज्जयेदग्निं सलिलं श्वासकासिनाम् ।
पित्तश्लेष्मवतां नित्यं विषन्तु परिवर्ज्जयेदिति वचनात्तेषामग्न्यादिकालेऽपि साधारणं तुलाद्यैव दिव्यं भवति । यथा । तोयमग्निर्विषञ्चैव दातव्यं बलिनां वृथेति स्मरणात् । दुर्ब्बलानामपि सर्व्वथा विषनिषेधात् तत्कालानतिक्रमेण जातिवयोऽवस्थाश्रितानि दिव्यानि देयानि । अत्र च यस्य यानि विशेषसामान्यपर्य्युदस्तेतरविहितानि तानि मुख्यकल्पानुकल्परूपाणि वेदितव्यानि । यथा, ब्राह्मणस्य घटो मुख्यः कोषस्त्वनुकल्पः । जलाग्नी आपत्कल्पौ प्रागुक्तनारदवचने एवकारश्रुतेर्भुख्यकल्पादित्वं न तु प्रशस्ततमादित्वमिति । एवञ्चात्रापि व्ययथोक्तयदत्तन्तु न शुद्धं साधुसाधने इति प्रागुक्तं बोध्यम् । स्मृतिः ।
"अवश्याभियुक्तानां घटादीनि विनिर्दिशेत् ।
तण्डुलस्यैव कोषस्य शुद्धास्त्वेव न संशयः ॥"
अवश्यग्रोऽत्र निश्चयः । शिरोवर्त्तिनेति केचित् ।
इति व्यवहारदीपिका ॥ कात्यायनः ।
"असूयकाधमदासानां स्त्रेच्छानां पापकारिणाम् ।
प्रतिलोमप्रसूतानां निश्चयो न तु राजनि ॥
तत्प्रसिद्धानि दिव्यानि समये तेषु निर्दिशेत् ॥"
तत्प्रसिद्धानि सर्षपघटादीनि । तथा,—
देशकालाविरोधे तु यथायुक्तं प्रकल्पयेत् ।
अन्येन हारयेद्दिव्यं विधिरेष विपर्य्यये ॥"
अन्येन प्रतिनिधिना हारयेत् कारयेत् । विपर्य्यये अभियुक्तस्यासामर्थ्ये ।
अतएव महापातकादीनामन्यद्वारा दिव्यमाह स एव ।
"मातापितृद्विजगुरुबालस्त्रीराजघातिनाम् ।
महापातकयुक्तानां नास्तिकानां विशेषतः ॥
लिङ्गिनां प्रमदानाञ्च मन्त्रयोगक्रियावताम् ।
वर्णसङ्करजातानां पापाभ्यासप्रवर्त्तिनाम् ॥
एतेष्वेवाभियोगेषु निन्द्येष्वेव प्रयत्नतः ।
इत्याद्यभिधाय ।
दिव्यं प्रकल्पयेन्नैव राजा धर्म्मपरायणः ।
एतेरेव प्रयुक्तानां साधूनां दिव्यमर्हति ॥"
कात्यायनः ।
"न लौहग्रिल्पिनामग्निं सलिलं नाम्बुसेविनाम् ।
तण्डुलैर्न नियुञ्जीत ब्राह्मणं सुखरोगिणम् ॥"
नारदः ।
"स्त्रीबालातुरान् सत्त्वहीनान् परितापार्दितान्नरान् ।
बालवृद्धातुरादींश्च परीक्षेत घटे सदा ॥
नार्त्तानां तोयमुद्दिष्टं स्नान्न विषं पित्तरोगिणाम् ।
श्वित्र्यन्धकुनखादीनां नाग्निकर्म्म विधीयते ॥"
न मज्जनं स्त्रीबालयोर्धर्म्मशास्त्रविचारदैः ।
निरुत्साहान् व्याधिक्षुधान्तार्त्तांस्तोये निमज्जयेत् ॥
न चापि हारयेदग्निं न विषेण विशोधयेत् ॥
यत्तु,—
स्थावरेषु विवादेषु दिव्यानि परिवर्ज्जयेदिति पितामहवचनं तल्लिखितसामन्तादिसत्त्वे दिव्यनिषेधकम् । यद्यपि अलेख्यसाक्षिके दिव्यं व्यवहारे विनिर्दिष्टमिति स्मृतेर्विवादान्तरेऽपि लेख्यादिसत्त्वे दिव्यानादरस्मृत्यापि ऋणादानादिविवादे साक्ष्युपन्यासे कृतेऽपि प्रत्यर्थी यदि दण्डाङ्गीकारेण दिव्यमङ्गीकरोति तदा दिव्यमपि भवति साक्षिणां दोषसम्भवाद्दिव्यस्य तु निर्दोषत्वेन वस्तुतत्त्वविषयत्वात् तल्लक्षणत्वाच्च धर्म्मस्य । यथाह नारदः ।
"तत्र सत्ये स्थितो धर्म्मो व्यवहारस्तु साक्षिणि ।
दैवसाध्ये पौरुषन्तु न लेख्यन्तु प्रयोजयेत् ॥"
स्थावरविवादे तु प्रत्यर्थिना दण्डाङ्गीकारेण दिव्यावलम्बने कृते सामन्तादिदृष्टप्रमाणसद्भावेऽपि दिव्यं ग्राह्यमिति विकल्पनिवारणाय स्थावरेष्वित्यादि पितामहवचनं नात्यन्तिकदिव्यं निराकरणाय लिखिताद्यभावे स्थावरादिषु निर्णयाप्रसक्तेः ॥ * ॥
अथ द्रव्यसंख्या दिव्यविशेषाः । विष्णुः ।
अथ समयक्रियाराजद्रोहसाहसेषु यथाकामं निःशेषर्णस्तेयेष्वर्धप्रमाणादिति । समयो दिव्यं राजद्रोहादिषु यथाकामं राजेच्छानुरोधाद्दिव्यं निःशेषादिषु तु धनप्रमाणतारतम्यादित्यर्थः ।
दक्षस्मृतिः ।
"संख्या रश्मिरजोमूला मनुना समुदाहृता ।
कार्षापणान्ता सा दिव्ये नियोज्या विनये तथा ॥
विषं सहस्रेऽपहृते पादोने च हुताशनः ।
त्रिभागोने च सलिलमर्द्धे देयो घटः सदा ॥
चतुःशतोभियोगे तु दातव्यस्तण्डुलाधकः ।
त्रिगते तण्डुला देयाः कोषश्चैव तदर्द्धके ॥
शते हृतेऽपहृते च दातव्यं धर्म्मशोधनम् ।
गोचौरस्य प्रदातव्यं सभ्यैः कालं प्रयत्नतः ॥
एषा संख्या निकृष्टानां मध्यानां द्विगुणा स्मृता ।
चतुर्गुणोत्तमानान्तु कल्पनीया परीक्षकैः ॥"
रश्मिरजः ।

जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते॥"
इति मनूक्तम्॥

"कार्षापणान्ता पणान्ता कार्षापण: पण इति पर्य्यायदर्शनात्। विनये दृष्टे। एवञ्च सहस्र इत्यादौ पण इति ज्ञेयं उपक्रमात् निक्षेपाणां जातिकर्म्मगुणै:। नासहस्राहरेदग्निं न तुलां न विषन्तर्धेति याज्ञवल्क्यवचनं मध्यमोत्तमविषयत्वेन दक्षस्मृतिवचनैकवाक्यत्वादविरुद्धम्।

"सहस्रेषु घटं दद्यात् सहस्रार्द्धे तथायसम्।
अर्द्धस्यार्द्धे तु सलिलं तस्यार्द्धे तु विषं स्मृतम्॥"
इति वचनं यत्राख्यापराधे पातित्यं तद्विषयमिति। एतत् सर्व्वं स्तेयसाहसविषयम्। अपह्नवे तु कात्यायन:।

"दृष्टस्यापह्नवो यत्र प्रमाणं तत्र कारयेत्।
स्तेयसाहसयोर्द्विगं स्वल्पेऽप्यर्थे प्रदापयेत्॥
सर्व्वद्रव्यप्रमाणन्तु ज्ञात्वा हैम प्रकल्पयेत्।
हैमप्रमाणयुक्तन्तु तदा दिगं प्रदापयेत्॥
ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं स्मृतम्।
अग्नौतेश्च विनाशे तु दद्याच्चैव हुताशनम्॥
यद्या नाशे जलं देयं चत्वारिंशति वै घटम्।
विंशद्दशविनाशे तु कोषपानं विधीयते॥
पञ्चाधिकस्य वा नाशे ततोऽर्द्धार्द्धस्य तण्डुला:।
ततोऽर्द्धार्द्धविनाशे तु खादेत् पुत्रादिमस्तकान्॥
ततोऽर्द्धार्द्धविनाशे तु लौकिकञ्च क्रिया: स्मृता:।
एवं विचारयन्राजा धर्म्मार्थाभ्यां न हीयते॥"

सुवर्णानां पञ्च कृष्णलको मासस्तै सुवर्णस्तु षोड़श रूप्यमाषोत्तरिक्तकापरिमितहेम्नां नाशे अपह्नवे वा दशाधिकस्य पञ्चाधिकस्य वा विंशस्य नाशे कोषपानमित्यर्थ:। तण्डुला: पुनरल्पचौर्य्याभिप्रायेण न तु साहसादौ। चौर्य्ये च तण्डुला देया नान्यत्रेति विनिश्चय इति पितामहस्मृते:। तन्मायस्तु महाचौर्य्याभिप्रायम्।

महाचौर्य्याभियुक्तानां तन्मायो विधीयते।
इति स्मृते:॥

व्यवहारमाहृकायाम्।

"समक्षं साक्षिणां यत्र दिव्यैस्तमपि बोधयेत्।
प्राक्षान्तिकविवादेषु विद्यमानेषु साक्षिषु॥
दिव्यमानमते वादी न दृष्टेस्तत्र साक्षिण:॥"
इति दिव्यतत्त्वम्॥ *॥

घटादिनवविधपरीक्षा तत्तत्शब्दे द्रष्टव्या॥

("बुद्धि: पश्यति या भावान् बहुकारणयोगजान्।
युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्ग: साध्यते यया॥
एषा परीक्षा कार्त्स्न्येन यया सर्व्वं परीक्ष्यते।
परीक्ष्यं सदसच्चैव तथा चास्ति पुनर्भव:॥"
इति चरके सूत्रस्थाने एकादशोऽध्याये॥

"तत्र चेद्भिषगभिप्रेत्य भिषजं दृष्ट्वेङ्गितमनविरेचनास्थापनानुवासन-शिरोविरेचनानि प्रयोक्तुकामेन भिषजा कतिविधया परीक्षया कतिविधं परीक्ष्यं कस्मिंश्च परीक्ष्यविशेष: कथञ्च परीक्षितव्यं किंप्रयोजना च परीक्षा क्व च वमनादीनां प्रवृत्ति: क्व च निवृत्ति: प्रवृत्तिनिवृत्तिलक्षण-संयोगे च किं नैष्ठिकं कानि च वमनादीनां भेषजव्यापदि उपयोगं गच्छन्तीति। स एवं दृष्टो यदि मोहयितुमिच्छेत् ब्रूयादेनं बहुविधा परीक्षा तथा परीक्ष्यविधिभेद: कृतमेन विधिभेदप्रकृत्यन्तरेण परीक्ष्यस्य भिन्नभेदाद्यं भवान् पृच्छत्याख्यायमानं नेदानीं भवतोऽन्येन वा विधिभेदप्रकृत्यन्तरेण परीक्ष्यस्य भिन्नस्याभिलषितमर्थं श्रोतुमहमन्येन परीक्षा विधिभेदप्रकृत्यन्तरेण परीक्ष्यं भित्त्वार्थमाचक्ष्व इच्छां पूरयेयमिति।

द्विविधा परीक्षा ज्ञानवतां प्रत्यक्षमनुमानञ्च एतत्तु द्वयमुपदेशञ्च परीक्षात्रयमेवमेषा द्विविधा परीक्षा त्रिविधा वा सङ्क्षेपदेशेन।

दृष्टविधं परीक्ष्यं कारणादि यदुक्तमग्रे तदिह भिषगादिषु संसार्य्य सन्दर्शयिष्याम: इह कार्य्यप्राप्ते: कारणं भिषक्कारणं पुनर्भेषजं कार्य्ययोनिर्धातुवैषम्यं कार्य्यं धातुसाम्यं कार्य्यफलं सुखावाप्ति: अशुबन्ध आयु: देशो भूमिरातुरश्च काल: संवत्सरर्तुरात्मा च प्रवृत्ति: प्रतिकर्म्मासमारम्भ: उपायो भिषगादीनां सौष्ठवमभिविधानञ्च सम्यगित्याख्यास्योपायस्य विषय: पूर्व्वमेवोपायविशेषेण व्याख्यात इति कारणादीनि दृष्ट-दृष्टेषु भिषगादिषु संसार्य्य सन्दर्शितानि तथैवानुपूर्व्या एतद्दृष्टविधपरीक्षासूक्तम्।

तस्य यो यो विशेषो यथा यत्र च परीक्षितव्य: स स तथा तथा व्याख्यास्यते कारणं भिषगित्युक्तमग्रे तस्य परीक्षा भिषड्नाम यो भिषज्यति य: सूत्रार्थप्रयोगकुशल: यस्य वायु: सम्यग्विदितम्। यथावत् सर्व्वधातुसाम्यं चिकीर्षन्नात्मानमेवादित: परीक्षेत गुणेषु गुणत: कार्य्याभिनिर्वृत्तिं पश्यन् कञ्चिदहमस्य कार्य्यस्याभिनिर्वर्त्तने समर्थो नवेति।" इति चरके विमानस्थाने अष्टमेऽध्याये॥)

परीक्षित्, पुं, (परि सर्व्वतोभावेन क्षीयते हन्यते दुरितं येन। परि+क्षि वधे+क्विप्। कलिप्रशासनादस्य तथात्वम्। यद्वा, परिक्षीणेषु कुरुषु क्षियति ईष्टे इति। क्षि ञ् ऐश्वर्य्ये+क्विप्। "उपसर्गस्य दीर्घत्वं क्विप्चनादौ बहुलिङ्गवेत्।" इति वाक्यात् उपसर्गस्य दीर्घत्वम्। अस्य निरुक्तिरुक्ता महाभारते। १। ६५। ८४।

"स भगवता वासुदेवेनासंजातबलवीर्य्यपराक्रमोऽकालजातोऽस्त्राग्निना दग्धस्तेजसा स्वेन संजीवित:। संजीवयित्वा चैनमुवाच। परिक्षीणे कुले जातो भवत्वयं परीक्षित्नामेति।") अभिमन्युपुत्र:। स युधिष्ठिरादनन्तरं कलियुगारम्भे राजचक्रवर्त्ती आसीत्। यथा,—

"अभिमन्योरुत्तरायां परिक्षीणेषु कुरुष्वत्थाम-प्रयुक्तब्रह्मास्त्रेण गर्भ एव भक्षीकृतो भगवत: सकलसुरासुरवन्दितचरणयुगलस्य आत्मेच्छया कारणमानुषरूपधारिणोऽनुभावात् पुनर्जीवितमवाप्य परीक्षित्त्वञ्चे। योऽयं साम्प्रतमेतद्भूमण्डलमखण्डितायति धर्म्मेण पालयति।" इति विष्णुपुराणे ४ अंशे २० अध्याय:॥

"विपरीतानि दृष्ट्वा च निमित्तानि स पार्थिव:।
याते कृष्णे चकाराथ सोऽभिषेकं परीक्षित:॥
प्रयास्यन्ति यदा चैते पूर्व्वाषाढां महर्षय:।
तदा नन्दात् प्रभृत्येष कलिर्वृद्धिं गमिष्यति॥
यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि।
प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे॥"
इति तत्रैव २४ अ:। ३८—४०॥

(अनन्वपुत्र:। यथा, महाभारते। १। ६५।४०।

"अनघा खलु मागधीसुपयेमे अन्वतां
नाम तस्यामस्य जज्ञे परीक्षित्॥")

परीक्षित:, पुं, (परिक्षीणे कुरुकुले क्षियति सः ईष्टे सः इति। परि+क्षि+क्त:। उपसर्गस्य दीर्घत्वम्।) अभिमन्युपुत्र:। (यथा, देवीभागवते। २। ७। ६।

"परिक्षीणेषु वंशेषु जातो यस्मात् वर: सुत:।
तस्मात् परीक्षितो नाम विख्यात: पृथिवीतले॥"* ॥

परीक्षा सञ्जाता अस्य। परीक्षा इतच्। ऋतपरीक्षे, त्रि। यथा, गो: रामायणे। २।४३।६।

"स हि राजगुणैर्युक्तो युवराज: परीक्षित:॥")

परीणाय:, पुं, (परितो नयनम्। परि+नी+घञ्। "उपसर्गस्य दीर्घत्वं क्विप्चनादौ बहुलिङ्गवेत्।" इति पाक्षिको दीर्घ:।) परिणाय:। चारोर्द्वा समन्तान्नयनम्। इत्यमरटीकायां भरत:॥

परीत, त्रि, (परि+इ+क्त:।) परिवेष्टितम्। इति हेमचन्द्र:॥ (यथा, महाभारते। १। ११२। ७।

"तत: कामपरीताङ्गी वस्त्रमुत्प्रेक्षमाणसा।
व्रीड़माना सलं कृष्णी राज्ञ: स्कन्धे समाश्रयत्॥")

परीतत्, त्रि, (परि+तन+क्विप्+"नञ्क्विप्रयेति।" ६। ३। ११६। इति पूर्व्वपदस्य दीर्घ:।) सर्व्वतोभावेन विस्तृतम्। इति सुग्धबोधव्याकरणम्॥

परीभाव:, पुं, (परिभावयति इति। परि+भावि+घञ् वैकल्पिकदीर्घत्वञ्च।) परिभाव:। अनादर:। इत्यमरटीकायां भरत:॥

परीरं, क्ली, (पूर्य्यतेऽनेनेति। पॄ+"कृपॄ कटीति।" उणा। ३। १०। इति ईरन्।) कलम्। इत्युणादिकोष:॥

परीरम्भ:, पुं, (परिरभ्यते इति। परि+रभ+घञ् भावे वैकल्पिकदीर्घत्वम्।) परिरम्भ:। आलिङ्गनम्। इति भरतश्चिरूपकोष:॥

परीवर्त्त:, पुं, (परि+वृत्+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घ:।) परिवर्त्तनम्। तत्पर्य्याय:। प्रतिदानम् २ नैमेय: ३ निमय: ४। इत्यमर:। २। ६। ८०॥ परिवर्त्त: ५ वैमेय: ६ विनिमय: ७ परिदानम् ८। इति शब्दरत्नावली॥ कूर्म्मराज:। इति जटाधर:॥

परीवादः, पुं, (परि+वद्+भावे घञ्। "उपसर्गस्य घञीति।" ६।३। १२२। इति दीर्घः।) दोषोल्लासः। तत्पर्य्यायः। कुत्सा २ निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ कुत्सनम् ८ परिवादः ९ जुगुप्सनम् १० आक्षेपः ११ अवर्णः १२ निर्वादः १३ अपक्रोशः १४ भर्त्सनम् १५ उपक्रोशः १६ अपवादः १७ अववादः १८। इति शब्दरत्नावली॥ (यथा, "परीवादस्तथो भवति वितथो वापि महतां तथाप्युच्चैर्धाम्नां हरति महिमानं जनरवः। तुलो तीर्णस्यापि प्रकटितहताशेषतमसो रवेस्ताढक्तेजो नहि भवति कन्यां गतवतः॥") वीणादिवादनम्। येन काष्ठविशेषादिना वीणादिर्वाद्यते सः। इति जटाधरः।

परीवारः, पुं, (परिव्रियतेऽनेनेति। परि+वृ+घञ्। उपसर्गस्य दीर्घः।) खड्गकोषः। जङ्गमः। (यथा, रघुः। १५। १६।
"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः। क्रव्याद्गणपरीवारश्चितामिरिव जङ्गमः॥") परिच्छदः। इत्यमरः। ३। ३। १६८॥
परीवारः परिजने खड्गकोषे परिच्छदे। इत्यनेकत्र दर्शनात्। जङ्गमो जङ्गमविशेषः, परिजन इत्यर्थः। खड्गकोषोऽसिवायकः मेयान् इति ख्यातः। परिच्छदः शोभाजनकसुपकरणं छत्रचामरादिः सभ्यजनादिश्च एषु परीवारः। इति तट्टीकायां भरतः॥

परीवाहः, पुं, (परितो वहत्यनेनेति। परि+वह+"इलच्च।" ३। ३। १२१। इति घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) जलोच्छ्वासः। इत्यमरः। १।१०।१०॥ (अत्र जलशब्द उपलक्षणमात्रं ज्ञेयम्। द्रवद्रव्यस्य प्रवाहेऽप्यस्यार्थो बोद्धव्यः। यथा च महाभारते। ७। ६८। १३।
"रुधिरस्य परीवाहान् पूरयित्वा सरांसि च॥" परित उह्यते इति।) राजयोग्यवस्तु। इति मेदिनी॥ हे, ३३॥

परीक्षिः, स्त्री, (परि+इष्+"परे र्वा।" ३। ३। १०७। इत्यस्य वार्त्तिं इति पचे क्तिन्।) अन्वेषणा। इत्यमरः। २। ७। ३२॥ परिचर्य्या। प्राकाम्यम्। इति मेदिनी। टे, ४६॥

परीसारः, पुं, (परिसरणम्। परि+सृ+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) परिसर्य्या। सर्व्वतोगमनम्। इत्यमरः। ३। २। २१॥

परीहारः, पुं, (परिहरणम्। परि+हृञ् हरणे+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) अवज्ञा। इति शब्दरत्नावली॥

परीहासः, पुं, (परि+हस+घञ्। उपसर्गस्य दीर्घः।) परीहसनम्। (यथा, मार्कण्डेये। ३४।८४।
"परीवादं न कुर्व्वीत परीहासञ्च पुत्रक!॥") तत्पर्य्यायः। द्रवः २ केलिः ३ क्रीड़ा ४ लीला ५ नर्म्म ६। इत्यमरः। १। ७। ३२॥ परिहासः ७ केलिसुखम् ८ देवनम् ९। इति चिक्काण्डशेषः॥

परुः, पुं, (पिपर्त्तीति। पॄ लि पूर्त्तौ+बाहुलकादुः।) समुद्रः। स्वर्गलोकः। ग्रन्थिः। पर्व्वतः। इति संक्षिप्तसारोणादिवृत्तिः॥

परुः, [स्] क्ली, (पॄ+"अर्त्तिपॄपर्व्यजितनीति।" उणा। २। ११८। इति उस्।) ग्रन्थिः। इत्यमरः। २। ४। १६२॥ (यथा, वाजसनेयसंहितायाम्। १३।२०। [परुष्परि॥")
"काण्डात् काण्डात् प्ररोहन्ति परुषः (सः)

परुत्, य, (पूर्व्वस्मिन् वत्सरे इति। "सद्यः परुदिति।" ५। ३। २२। इति पूर्व्वस्य परभावः उत् च।) गतवत्सरः। इत्यमरः। २। ४। २०॥

परुत्तरः, त्रि, (परुत् गतवत्सरे भवः। परुत्+"चिरपरुत्परारिभ्यस्त्रो वक्तव्यः।" ४। ३। २३। इत्यस्य वार्त्तिं इति त्रः।) इति व्याकरणम्॥

परुद्वारः, पुं, (परुः समुद्रः पर्व्वतो वा द्वारमिव यस्य।) वोटकः। इति शब्दमाला॥

परुषं, क्ली, (पिपर्त्तीति अलं बुद्धिं करोतीति। पॄ+"पॄनहिकलिभ्य उषच्।" उणा। ४। ७५। इति उषच्।) निष्ठुरवाक्यम्। इत्यमरः। १। ६। १६॥ (परेषां देशजातिकुलविद्याशिल्परूपवृत्ताचारपरिच्छदशरीरकर्म्मजीविनां प्रत्यक्षदोषवचनं परुषमिति वदन्ति॥ यथा, हैः रामायणे। १। १ ८२।
"तामुवाच ततो रामः परुषं जनसंसदि। अन्त्यमास्थाय सा सीता विवेश ज्वलनं सती॥") नीलभिण्टी। इति शब्दचन्द्रिका॥ परुषफलम्। इति भावप्रकाशः॥ (नीलभिण्टीशब्दस्य गुणादयो ज्ञातव्याः॥)

परुषं, त्रि, (पिपर्त्तीति। पॄ लि पूर्त्तौ+"पॄनहिकलिभ्य उषच्।" उणा। ४। ७५। इति उषच्।) कर्ब्बुरः। (यथा, बृहत्संहितायाम्। ३। ३६।
"असितविचित्रनीलपरुषो जनघातकरः। खगमृगभैरवखररुतैश्च निशादुःखे॥") रूक्षः। (यथा, हैः रामायणे। १। ५८। १०।
"अथ रात्र्यां व्यतीतायां राजा चक्रालतां गतः। नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्द्धजः॥") निष्ठुरोक्तिः। इति मेदिनी। षे, ४०॥ (मलिनः। यथा, आर्य्यासप्तशत्याम्। ४१६।
"भस्मपरुषेऽपि गिरिशे स्नेहमयी त्वमुचितेन सुभगासि।"
"भस्ममलिनेऽपि गिरिशे।" इति तट्टीका॥)

परुषोक्तिकः, त्रि, (परुषमेव उक्तिर्यस्य। ततः स्वार्थे कन् कप् वा।) निष्ठुरवक्ता। इति जटाधरः॥

परूषं, क्ली, (पॄ+ऊषन्।) फलवृक्षभेदः। परुषफल इति वङ्गभाषा। फरूसा इति फलूहे इति च हिन्दीभाषा। तत्पर्य्यायः। परूषकम् २ नागदलोपमम् ३। इति रत्नमाला॥ परुषम् ४ अल्पास्थि ५ परापरम् ६। इति भावप्रकाशः॥ नीलचर्म्म ७ गिरिपीलु ८ परावतम् ९ नीलमण्डलम् १०। परुः ११। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। कफार्शिवातनाशित्वञ्च। तदाम्फलगुणः। पित्तदत्वम् उष्णत्वञ्च। तत्पक्वफलगुणाः। मधुरत्वम्। रुचिप्रदत्वम्। पित्तशोफहरत्वम्। तर्पणत्वञ्च। इति राजनिर्घण्टः॥
"परूषकं कषायाम्लमामं पित्तकरं लघु।
तत् पक्वं मधुरं पाके शीतं विष्टम्भि दीपनम्॥
हृद्यं लघ्वपित्तदाहासज्वरक्षयसमीरहृत्॥"
इति भावप्रकाशः॥
("परूषकैर्दाडिमकपीलुकानां
प्रियालसिंह्री करमर्दकानाम्।
फलानि चैतानि निहन्ति पित्तं
हन्याच्च सर्व्वातुरसन्निवेतम्॥"
इति हारीते प्रथमस्थाने दशमेऽध्याये॥)

परूषकं, क्ली, (परूष+स्वार्थे कन्।) परूषम्। इति राजनिर्घण्टः॥ (अस्य पर्य्याया यथा,—
"परूषकं परूषं स्यात् क्वचिन्नागदलोपमम्।"
इति वैद्यकरत्नमालायाम्॥
यथास्य गुणाः चरके सूत्रस्थाने २७ अध्याये।
"अम्लं परूषकं द्राक्षा वदर्य्याण्यारुकाणि च।
पित्तश्लेष्मप्रकोपीणि कर्कन्धुलकुचान्यपि॥"
"अत्यम्लमीषन्मधुरं कषायानुरसं लघु।
वातघ्नं पित्तजननमामं विद्यात् परूषकम्॥
तदेव पक्वं मधुरं वातपित्तनिबर्हणम्।
विपाके मधुरं शीतं रक्तपित्तप्रसादनम्॥"
इति सुश्रुते सूत्रस्थाने। ४६ अध्याये॥)

परेतः, त्रि, (परं लोकमितः।) मृतः। इत्यमरः। २। ८। ११७॥ (यथा, कुमारे। ५।६८।
"अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु॥")
भूतान्तरे पुं, । इति मेदिनी। ते, १२६॥

परेतराट्, [ज्] पुं, (परेतेषु मृतेषु राजते इति। राजृ क्विप् दीप्तौ+"सत्सद्भिरिति।" ३। २। ६१। इति क्विप्। यद्वा, परेतानां प्रेतानां राट्।) प्रेतराजः। यमः। इत्यमरः। १। १। ६१॥

परेद्यवि, य, परस्मिन्नहनि। ("सद्यःपरुदिति।" ५। ३। २२। इति निपातनात् साधुः।) परदिनम्। इति सुग्धबोधव्याकरणम्॥ यथा,—
"परेद्यवद्यपूर्व्वेद्युरन्येद्युश्चापि चिन्तयन्।
दृष्ट्विश्यौ मुनीन्द्राणां प्रियम्भावुकतामगात्॥"
इति भट्टिः। ४। १६॥

परेद्युः, [स्] य, (पर+एद्युस्।) परदिनम्। इति सुग्धबोधव्याकरणम्॥

परेपूं, त्रि, परा गता आपो यत्र। ("ह्रस्वान्तरुपसर्गेभ्योऽप ईत्।" ६। ३। ६७। इत्यस्य वार्त्तिं "अवर्णान्ताद्वा।" इति ईत्। परापम्।) इति सिद्धान्तकौमुदी॥

परेष्टुका, स्त्री, (परेरिष्यते इति। इष+बाहुलकात् तु। स्वार्थे कन्। स्त्रियां टाप्।) बहुस्तुतिः। बहुप्रस्तुता गौः। इत्यमरः। २। ६। ७०॥

परेधितः, त्रि, (परैरेधितः समर्द्धितः ।) औदासीन्येन परपुष्टः । परेण संवर्द्धितः । तत्पर्य्यायः । पराचितः २ परिष्कन्दः ३ परजातः ४ । इत्यमरः । २ । १० । १८ ॥ कोकिले पुं । इति शब्दमाला ॥

परोक्षं, क्ली, (अक्ष्णोः परम् ।) अप्रत्यक्षम् । असाक्षात् । यथा, चाणक्यश्लोके ।

"परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्জ্জयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥"

(परोक्षं परोक्षत्वमित्यर्थः विद्यतेऽस्य । "अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् ।) तद्विशिष्टे त्रि ॥ (श्रुत्याप्तजन्यादिज्ञानविशेषः । यथा, पद्मदशाम् । ७ । ३१ ।

"अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्त्तयर ॥")

परोक्षः, पुं, (परोक्षमस्यास्तीति । श्रुत्याप्तवाक्यश्रवणजन्यदार्ढ्याच्चेति बोध्यम् ।) तपस्वी । इति शब्दमाला ॥ ययातिपुत्रस्यानोः पुत्रविशेषः । यथा, भागवते । ९ । २३ । १ ।

"अनोः सभानरश्चक्षुः परोक्षश्च सुतास्त्रयः ॥")

परोपकारः, पुं, (परेषामुपकारः ।) परेषामुपकृतिः । अन्यसम्बन्धिहितम् । यथा,—

"एष मे प्रवरो भाति शुद्धधर्म्मप्रदो विधिः ।
परोपकरणादन्यत् सर्व्वमल्पं स्मृतं बुधैः ॥
परोपकारिभिर्दत्ता स्वप्राणा ऋषिभिः पुरा ।
अस्थिः प्रेतोपकारः स्यात् किन्नलब्धं मया पुनः ॥
दधीचिना पुरा गीतः श्लोकश्च श्रूयते भुवि ।
सर्व्वधर्म्ममयः सारः सर्व्वधर्म्मेषु सम्मतः ॥
परोपकारः कर्त्तव्यः प्राणैः कण्ठगतैरपि ।
परोपकारजं पुण्यं तुल्यं क्रतुशतैरपि ॥"

इति पद्मोत्तरखण्डे २२ अध्यायः ॥

परोवरीयः, त्रि, परांश्चावरांश्चानुभवति । ("परोवरपरम्परपुत्रपौत्रमनुभवति ।" ५ । २ । १० । इति ।) अवरस्योत्वं निपात्यते । श्रेष्ठाश्रेष्ठयुक्तः । इति सिद्धान्तकौमुदी ॥

परोष्णी, स्त्री, (परः शत्रुरुष्णो यस्याः ।) तैलपायिका । इत्यमरः । २ । ५ । २६ ॥ (काश्मीरदेशस्थनदीविशेषः । यथा, राजतरङ्गिण्याम् । ८ । २००७ ।

"कोष्टकोमल्लकोद्यैर्मितैर्युक्तोऽपि सादिभिः ।
तीर्त्वा परोष्णीं ततसेना निर्म्ममाथाप्रमाथिनीम् ॥")

पर्कटिः, पर्कटी, } स्त्री, (पृच् धी च् सम्पर्के + बाहुलकादटिः । "वृक्षादिभ्यश्च ।" ४ । १ । ४५ इति वा ङीष् ।) वृक्षविशेषः । इत्यमरटीकायां भरतः ॥ पाकुड़ इति भाषा ॥ (यथा, हितोपदेशे । "अस्ति तत्र महान् पर्कटीवृक्षः ॥") तस्य गुणाः भावप्रकाशे ।

"वृक्षः कषायः शिशिरो व्रणयोनिगदापहः ।
दाहपित्तकफास्रघ्नः स्तोयदा रक्तपित्तहृत् ॥"

पर्कटी, [न्] पुं, वृक्षविशेषः । पाकुड़ इति भाषा ॥ तत्पर्य्यायः । प्लक्षः २ जटी ३ । इत्यमरः । २ । ४ । ३२ ॥ क्रमण्डलुतरुः ४ । इति रत्नमाला ॥ कपोतनः ५ क्षीरी ६ सुपार्श्वः ७ कमण्डलुः ८ शृङ्गी ९ अवरोहः १० शाखी ११ गर्दभाण्डः १२ पीतनः १३ दृढ़प्ररोहः १४ प्लक्षकः १५ शृङ्गः १६ महाबलः १७ । अस्य गुणाः कटुत्वम् । कषायत्वम् । शिशिरत्वम् । रक्तदोषमूर्च्छाभ्रमप्रलापनाशित्वञ्च । विशेषतो दुग्धस्यास्येते गुणाः । इति राजनिर्घण्टः ॥

पर्ज्जनी, स्त्री, (परं स्वास्थ्यं जनयतीति । पर् + जन + णिच् । "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । स्त्रियां ङीप् ।) दारुहरिद्रा । इत्यमरः । २ । ४ । १०२ ॥

पर्জ্জन्यः, पुं, (पर्षति सिञ्चति वृष्टिं ददातीति । वृष्षु सेचने + "पर्জ্জन्यः ।" उणां । ३ । १०३ । इति निपातनात् षकारस्य जकारत्वे साधुः ।) इन्द्रः । (यथा, ऋग्वेदे । ६ । ५२ । १६ । [सुष्टुतिं नः ॥")

"अग्नीपर्জ্জन्याववतं धियं मेऽस्मिन् हवे सुहवा शृण्वायमानमेघः । इत्यमरः । ३ । ३ । १४६ ॥ मेघशब्दः । इति विश्वः ॥ अगर्জ্জन्नपि मेघः । इति भरतः ॥ यथा, श्रीभगवद्गीतायाम् ।

"यज्ञाद्भवति पर्জ্जन्यः पर्জ্জन्यादन्नसम्भवः ॥"

(कश्यपपत्न्या सुनेः पुत्रविशेषः । स तु गन्धर्व्वविशेषः । यथा, महाभारते । १ । ६५ । ४४ ।

"तथा शालिशिरा राजन् ! पर्জ্जन्यश्च चतुर्दश ।
कलिः पञ्चदशस्त्वेषां नारदश्चैव षोडशः ॥"

पर्জ্जन्य इव सर्व्वकामप्रदानात् विष्णुः । यथा, महाभारते । १३ । १४९ । १०० ।

"कुसुदः कुन्दरः कुन्दः पर्জ्जन्यः पावनोऽनिलः ॥"

"पर्জ্जन्यवदाध्यात्मिकादितापत्रयं शमयति सर्व्वान् कामानभिवर्षतीति पर्জ्जन्यः ।" इति शाङ्करभाष्यम् ॥)

पर्জ্जन्या, स्त्री, (पर्জ্जन्य + टाप् ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

पर्ण, तृ क हारित्ये । इति कविकल्पद्रुमः ॥ (अदन्तपुरां-परं-सकं-सेट् ।) हरित् पीतवर्णस्य भावः हारित्यम् । पर्णयति पर्णापयति चम्पकम् । इति दुर्गादासः ॥

पर्ण, क्ली, (पिपर्त्तीति । पॄ + "धापॄवस्यज्यतिभ्यो नः ।" उणां । ३ । ६ । इति नः । यद्वा, पर्णयतीति । पर्ण तृ क हारित्ये + अच् ।) पत्रम् । इत्यमरः । २ । ४ । १४ ॥ (यथा, कुमारे । ५ । २८ ।

"स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदा
वदन्त्यपर्णेति च तां पुराविदः ॥")

ताम्बूलम् । यथा, राजनिर्घण्टे ।

"अनिधाय मुखे पर्णं पूगं स्वादयते नरः ।
मतिभ्रंशो दरिद्रः स्यादन्ते न स्मरते हरिम् ॥"

ताम्बूलधारिलक्षणं यथा,—

"अनाढ्यार्य्योवृणांसश्च दृढ़भक्तिश्च पार्थिवे ।
ताम्बूलधारी भवति नारी वाप्यथ तद्गुणा ॥"

इति मात्स्ये १९८ अध्यायः ॥

(पिपर्त्ति पालयति गगनपातादिति । पॄ + न । पत्रम् । यथा, महाभारते । १ । ३३ । २४ ।

"तदुत्सृष्टमभिप्रेक्ष्य तस्य पर्णमनुत्तमम् ।
वृक्षानि सर्व्वभूतानि नाम चक्रुर्गुरुत्वतः ।
सुरूप पत्रमालक्ष्य तस्य पर्णमनुत्तमम् ॥")

पर्णः, पुं, (पिपर्त्तीति । पॄ पालने + "धापॄवस्यज्यतिभ्यो नः । उणां । ३ । ६ । इति नः । पलाशवृक्षः । इत्यमरः । २ । ४ । २६ ॥ (यथा, ऋग्वेदे । १० । ७ । ५ ।

"अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥")

पर्णकारः, पुं, (पर्णं ताम्बूलम् । करोति उत्पादयतीति । पर्ण + कृ + अण् ।) वारजीवी । वारुइ इति भाषा ॥ इति केचित् ॥

पर्णकृच्छ्रः, पुं, (पर्णैः साध्यं कृच्छ्रं व्रतं यत्र । पत्रकृच्छ्रव्रतम् । यथा, याज्ञवल्क्यः । ३ । ३१६ ।

"पर्णोडुम्बरराजीवबिल्वपत्रकुशोदकैः ।
प्रत्येकं प्रत्यहाभ्यस्तैः पर्णकृच्छ्र उदाहृतः ॥"

पर्णखण्डः, पुं, (पर्णमेव खण्डो यस्य । पुष्पादिहीनत्वात्तथात्वम् ।) वनस्पतिः । इति शब्दचन्द्रिका ॥ (पर्णस्य ताम्बूलस्य खण्डः ।) ताम्बूलैकांशश्च ॥

पर्णचोरकः, पुं, (पर्णं चोरयतीति । पर्ण + चोरि + ण्वुल् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

पर्णध्वत्, [स्] त्रि, पर्ण + ध्वनस् + कर्त्तरि क्विप् । पत्रध्वंसकर्त्ता । इति व्याकरणम् ॥

पर्णनरः, पुं, (पर्णैः पलाशपत्रैर्निर्म्मितो नरः नराकारः पुत्तलकः ।) पित्रादिश्राद्धावश्यकलाभे दाहार्थं तत्प्रतिनिधीभूतशरपलाशपत्ररचितोर्ध्वातनुवेष्टितयवपिष्टलिप्तनराकारपुत्तलकः । यथा,

"आश्वलायनशाखापरिशिष्टम् । अस्थिनाशे पलाशवृन्तानां त्रीणि षष्टिशतानि पुरुषप्रतिकृतिं कृत्वा, अग्नौत्यर्द्धन्तु शिरसि ग्रीवायां दश योजयेत् । 'उरसि त्रिंशतं दद्यात् विंशतिं जठरे तथा ॥ बाहुभ्याञ्च शतं दद्यात् दद्यादङ्गुलिभिर्दश । द्वादशार्द्धं वृषणयोरर्द्धं शिश्न एव च ॥ ऊरुभ्यान्तु शतं दद्यात् त्रिंशतं जानुजङ्घयोः । पादाङ्गुलीषु च दश एतत् प्रेतस्य लक्षणम् ॥' ऊर्णासूत्रेण संवेष्ट्य यवपिष्टेन लेपयेत् ॥' आदिपुराणम् ।

'तदलाभे पलाशोत्थैः पत्रैः कार्य्यः पुमानपि । शरैस्त्रिभिस्तथा षष्ट्या शरपत्रैर्विधानतः ॥' तदलाभे अश्वत्थलाभे । अत्र पलाशपत्रशरपत्रयोः तुल्यत्वेनोपादानात् आश्वलायनसूत्रेऽपि प्रतिकृतौ शरपत्रस्य लाभः । अत्राश्वाराद्योग्यलाभे शरपत्रैः पुत्तलकं कृत्वा शिरःप्रभृतिषु पलाशपत्राणि देयानि । ततो वेष्टनं ऊर्णासूत्रेण लेपनं यवपिष्टेनेति । अग्नौचाभ्यन्तरदाहे शेषादेनमुद्धिः । तदुत्तरपर्णनरदाहे तु चिराचमम् । एवं पर्णनरं दग्ध्वा चिराचमनुचिर्भवेदित्यादि पुराणात् । यत्रपार्श्वः ।

'पुत्राद्येदुपलभ्येरन् तदस्थीनि कदाचन ।
तदलाभे पलाशस्य सम्भवे हि पुनः क्रिया ॥'

हि यस्मात्तदलाभे अम्लामप्राप्तौ पलाशस्य तत्-
लक्षणपत्रलक्षस्य दाहक्रिया। पुनरपि सम्भवे
अस्थिलाभे पुनरपि अग्निदाहक्रिया विहिता
तस्मादृयदि पुनरस्थीनि प्राप्यन्ते तदा पुनर्दाह-
विराचार्य्याणि कर्म्मणि न पुनः पिण्डादिदानं वक्ष्य-
माणयुक्तेः। विष्णुः।
"त्रिपक्षे तु गते पर्णनरं दहादनधिकः।
त्रिपक्षाभ्यन्तरे राजन्नेव पर्णनरं दहेत्॥
तदूर्द्धमस्थी प्राप्य दर्भे वापि विचक्षणः॥"
दहेदिति शेषः। अस्यार्थः। अग्नौदाभ्यन्तरे
यदि पर्णनरदाहं न कुर्य्यात्तदा मरणदिना-
वधित्रिपक्षानन्तरं दाहः कार्य्य इत्यर्थः। इति
हरिदासतर्काचार्य्याः॥ यादवभट्टोऽप्येवम्। व्य-
हारोऽपि रूढ्यर्थ एव।
'पर्णनरं दहेन्नैव विना दर्भे कदाचन।
अस्थ्नामलाभे दर्भे तु ततः पर्णनरं दहेदिति॥'
दीपकलिकायां समनुवचनात् दर्भे पर्णनर-
दाहः। दर्भमित्यत्रारण्यौमिति क्वचित् पाठः।
अत्रारण्यौ क्षणा पिण्डकर्म्मणि क्षणपक्षस्य
प्राशस्त्योक्तेः।" इति शुद्धितत्त्वम्॥

पर्णभेदिनी, स्त्री, (पर्णानि भिनत्तीति। पर्ण+
भिद्+णिनिः स्त्रियां ङीप्।) प्रियङ्गुः। इति
राजनिर्घण्टः॥

पर्णभोजनः, पुं, (पर्णान्येव भोजनं यस्य। पर्णानि
भुङ्क्ते इति वा। भुज्+कर्म्मणि ल्युः।) छागलः।
इति शब्दरत्नावली॥

पर्णमाचालः, पुं, (पर्णमाचालयतीति। पर्ण+
आ+चल+णिच्+अण्। निपातनात् विभक्तेर-
लोपाभावः। बाहुलकात् सुम् वा।) कर्म्मरङ्ग-
वृक्षः। इति शब्दमाला॥

पर्णमृगः, पुं, (पर्णचरो मृगः पशुः।) मृग-
गणविशेषः। यथा,—
"वनौकोवृक्षमार्ज्जारवृक्षमर्कटिकादयः।
एते पर्णमृगाः प्रोक्ताः सुश्रुतादिमहर्षिभिः॥
वनौका वानरो वृक्षमार्ज्जारो वृक्षविड्रालः।
वृक्षमर्कटिका रक्षी इति लोके। एतेषां
मांसगुणाः। [हिताः।
"स्मृताः पर्णमृगा वृष्याश्चक्षुष्याः श्रोत्रिणे
श्वासार्शःकासश्रमनाः स्वप्नमूत्रपुरीषकाः॥"
इति भावप्रकाशः॥

पर्णलता, स्त्री, (पर्णप्रधाना लता।) नागवल्ली।
इति राजनिर्घण्टः॥

पर्णवल्ली, स्त्री, (पर्णप्रधाना वल्ली।) पलाशी
लता। इति राजनिर्घण्टः॥

पर्णशाला, स्त्री, (पर्णैः पत्रादिभिः रचिता
शाला। मध्यपदलोपिसमासः।) मुनीनां पत्र-
रचितगृहम्। तत्पर्य्यायः। उटजम् २। इत्य-
मरः। २। २। ६॥ पर्णोटजम् ३। इति शब्द-
रत्नावली॥ पर्णवती शाला। पर्णप्रधाना शाला
वा। इति भरतः॥ (यथा, रघुः। १। ६५।
"निर्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः।
तच्छिष्याध्ययननिवेदितावसानां
संविशः कुशशयने निशां निनाय॥"
मध्यदेशस्थग्रामविशेषः। यथा महाभारते।
१३। ६८। ३।
"मध्यदेशे महान् ग्रामो ब्राह्मणानां बभूव ह।
गङ्गायमुनयोर्मध्ये यासुनस्य गिरेरधः॥
पर्णशालेति विख्यातो रमणीयो नराधिप!॥")

पर्णसः, पुं, (पृ पूरणे+"सानसिवर्णसिपर्ण-
सीति।" उणा। ४। १०७। इति असिनुक्
च।) पद्मम्। इत्युणादिकोषः॥ जलयुद्धम्।
जलटुङ्गी इति भाषा॥ इति सिद्धान्तकौमुद्या-
मुणादिवृत्तिः॥ शाकम्। आभरणक्रिया। इति
संक्षिप्तसारोणादिवृत्तिः॥

पर्णाशनः, पुं, (पर्णं अत्ति भक्षयतीति। अद्+
ल्युः। पर्णानामशनः।) मेघः। इति शब्दमाला॥

पर्णासः, पुं, (पर्णैरसति दीप्यति शोभते इति
यावत्। अस दीप्तौ+अच्।) तुलसी। इत्य-
मरः। २। ४। ७६॥

पर्णिनी, स्त्री, (पर्णानि सन्त्यस्याः। पर्ण+इनिः।)
मावपर्णी। इति रत्नमाला॥ (यथा, सुश्रुते
उत्तरतन्त्रे ६२ अध्याये।
"वह्निडरजनीकुष्ठ पर्णिनीग्रारिवाद्वये॥"
अश्वरोविशेषः। यथा, हरिवंशे। २१८। ४६।
"मेनकासहजन्या च पर्णिनी पुच्छिकास्मृता॥")

पर्णी, [न्] पुं, (पर्णानि सन्त्यस्य। पर्ण+इनिः।)
वृक्षः। इति हेमचन्द्रः। ४। १८०॥

पर्णोटजं, क्ली, (पर्णैर्निर्मितं उटजम्।) पर्ण-
शाला। इति शब्दरत्नावली॥

पर्द, ड अपानोत्सर्गे। इति कविकल्पद्रुमः॥ (भ्वां-
आत्मं-अकं-सेट्।) ड, पर्दते दृढः। इति
दुर्गादासः॥

पर्दः, पुं, (पृ+बाहुलकात् दः।) केशसमूहः।
इत्युणादिकोषः॥ (पर्द अपानोत्सर्गे+अच्।)
अपानोत्सर्गश्च॥

पर्दनं, क्ली, (पर्द+ल्युट्।) अपानोत्सर्गः।
इति हेमचन्द्रः। ६। ३६॥ पाद् इति भाषा॥

पर्प, क्ली, (पृ पालनादौ+"खर्ज्जिपर्ज्जिपर्ज्ज्यवाप्य-
रूपपर्पल्याः।" उणा। १। २८। इति निपा-
तनात् सिद्धम्।) नवलवणम्। गृहम्। इत्युणादि-
कोषः॥ खड्गवाह्यफलकम्। इति सिद्धान्त-
कौमुद्यामुणादिवृत्तिः॥

पर्पटः, पुं, (पर्प+अटन्।) वृक्षविशेषः। श्वेत-
पापड़ा इति बङ्गभाषा। दवनपापर इति
हिन्दीभाषा। तत्पर्य्यायः। त्रियष्टिः २ तिक्तः ३।
इति रत्नमाला॥ चरकः ४ रेणुः ५ क्षत्तारिः ६
वरकः ७ अरकः ८ शीतः ९ शीतप्रियः १०
पांशुः ११ कल्पाङ्गः १२ कर्म्मकण्टकः १३ क्षुद्र-
शाखः १४ प्रगन्धः १५ सुतिक्तः १६ रक्त-
पुष्पकः १७ पित्तारिः १८ कटुपत्रः १९ वक्रः २०।
अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्।
पित्तश्लेष्मज्वररक्तदाहरुचिग्लानिमदभ्रमनाशि-
त्वञ्च। इति राजनिर्घण्टः॥*॥
"पर्पटो वरतिक्तश्च सृतः पर्पटकश्च सः।
कथितः पांशुपर्य्यायस्तथा कवचनामकः॥
पर्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान्।
संग्राही शीतलश्चिक्तो दाहनुद्वातलो लघुः॥"
इति भावप्रकाशः॥*॥
पित्तकभेदः। मापर इति भाषा॥ तस्य गुणः।
लघुत्वम्। रूक्षत्वञ्च। इति राजवल्लभः॥
"धूमसीरचिता छिङ्गुहरिदालवर्णयुताः।
जीरकखर्जिकाभ्याञ्च तनुं लात्वा च वेल्लिताः॥
दीपनाः पाचना रूक्षा गुरवः किञ्चिदीरिताः॥
मौद्गाश्च तद्गुणाः प्रोक्ता विशेषाल्लघवो हिताः।
चणकस्य गुणैर्युक्ताः पर्पटाश्चणकोद्भवाः॥
स्नेहे भृष्टास्तु ते सर्व्वे भवेयुर्मेथ्या गुणैः॥"
इति भावप्रकाशे पूर्व्वखण्डे द्वितीयभागे॥

पर्पटद्रुमः, पुं, (पर्पट एव द्रुमः।) कुम्भीवृक्षः।
इति राजनिर्घण्टः॥

पर्पटी, स्त्री, (पर्पट+ङीप्।) सौराष्ट्रमृत्तिका।
इति रत्नमाला॥ पिष्टकभेदः। इत्युणादिकोषः॥
उत्तरदेशभवसुगन्धिद्रव्यम्। पपरीति प्रसि-
द्धम्। पद्मावतीति च। तत्पर्य्यायः। रङ्गिनी २
लक्षा ३ जतुका ४ जननी ५ जनी ६ जतु-
लक्षा ७ संरक्ता ८ जतुकृत् ९ चक्रवर्त्तिनी १०।
अस्या गुणाः। तुवरत्वम्। तिक्तत्वम्। स्निग्धि-
त्वम्। वर्णकृत्त्वम्। लघुत्वम्। विषव्रणकफ-
कफपित्तास्रकुष्ठनाशित्वञ्च। इति भावप्रकाशः॥

पर्परीकः, पुं, (पिपर्त्तीति। पॄ+"शॄपृकृहॄां
कित्" रुक्चाभ्यासस्य।" उणा। ४।१६। इति ईकन्
कित्वं अभ्यासस्य रुगागमश्च।) सूर्य्यः। इत्यु-
णादिकोषः॥ वह्निः। इति त्रिकाण्डशेषः।
जलाशयः। इति संक्षिप्तसारोणादिवृत्तिः॥

पर्पिकः, पुं स्त्री, पर्पेण गच्छतीति। (पर्प+ठन्।
इत्वम्।) खड्गः। इति सिद्धान्तकौमुदी॥ [ङीष्।)

पर्ब्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वां परं-सकं-
पर्य्यङ्कः, पुं, (परितोऽङ्कते इति। परि+अकि-
लक्षणे+घञ्।) खट्वा। पालङ्क इति भाषा॥
इत्यमरः। २। ६। १३८॥ तत्पर्य्यायः। (मञ्चः
मचकः ३ पल्यङ्कः ४। इति हेमचन्द्रः। ३। ३४०॥)
पर्य्यङ्किका ५ परिकरः ६ अवसक्थिका ७)
इति च तत्रैव। ३। ३४३॥ (यथा, महा-
भारते। ३। २४६। ८।
"अथोपविष्टं राजानं पर्य्यङ्के ज्वलनप्रभे।
उपप्लुतं यथा सोमं राहुणा रात्रिसंक्षये।
उपगम्याब्रवीत् कर्णो दुर्य्योधनमिदं तदा॥"
योगपट्टः। यथा, कुमारे। ३। ४५।
पर्य्यङ्कबन्धस्थिरपूर्व्वकायं
ऋज्वायतं सन्नमितोभयांसम्॥")

पर्य्यङ्कपादिका, स्त्री, (पर्य्यङ्कस्यैव पादोऽवयवः।
टन् टाप् च।) कोलशिम्बी। इति राज-
निर्घण्टः॥

पर्य्यङ्कबन्धनं, क्ली, (पर्य्यङ्कवत् यद्बन्धनम्।)
वस्त्रादिना पृष्ठजानुजङ्घाबन्धनम्। पाछ्बाँधा
इति भाषा॥ यथा,—

"पादप्रसारणाच्चाग्रे तथा पर्य्यङ्कबन्धनम् ॥"
इत्यपराधीनगमनार्था हरिभक्तिविलासः ॥
पर्य्यटनं, क्ली, (परितोऽटनं भ्रमणम्। परि+अट+भावे ल्युट्।) सर्व्वतोभावेनाटनम्। पुनः पुनर्गमनम्। भ्रमणम्। तत्पर्य्यायः। ब्रज्या २ अटाट्या ३। इत्यमरः। २। ७।३६॥ (यथा, भागवते। ६। ७। १८।
"भूमेः पर्य्यटनं पुण्यं तीर्थसेवनिषेवणैः॥")
पर्य्यनुयोगः, पुं, (परितोऽनुयोगः पृच्छा। परि+अनु+युज्+भावे घञ्।) जिज्ञासा। इति हलायुधः॥ ("एतेनास्यापि पर्य्यनुयोगस्यानवकाशः।" इति दायभागः॥)
पर्य्यन्तः, पुं, (परितोऽन्तम्। प्रादिसमासः।) शेषसीमा। इति दुर्गादासः॥ (यथा, पञ्चतन्त्रे। १। १४१।
"पर्य्यन्तो लभ्यते भूमेः समुद्रस्य गिरेरपि।
न कथञ्चित् महीपस्य चित्तान्तः केनचित् क्वचित्॥"
समीपम्। यथा, हरिवंशे। १२२। ५३।
"पर्य्यन्तदेशं सरसेन देवी
लिलेप सा लोहितचन्दनेन॥"
पार्श्वः। यथा, रघौ। १८। ४३।
"पर्य्यन्तसञ्चारितचामरस्य
कपोललोलोभयकाकपक्षात्।
तस्याननादुच्चरितो विवादः
चखाल वेलास्वपि नार्यवाणाम्॥")
पर्य्यन्तभूः, स्त्री, (पर्य्यन्तस्य शेषसीमाया भूः पृथिवी।) नदीनगरपर्व्वतादेरुपान्तभूमिः। तत्पर्य्यायः। परिसरः २। इत्यमरः। २।१।१४॥
पर्य्यन्तिका, स्त्री, (परितः सर्व्वतो भावेन अन्तिका गुणादीनां नाशिका।) गुणभंगः। इति हारावली। २१०॥
पर्य्यन्यः, पुं, (पर्जन्य+पृषोदरादित्वात् साधुः।) इन्द्रः। शब्दायमानमेघः। मेघशब्दः। इत्युणादिकोषः॥ (यथा, गोः रामायणे। ६।३१।३२।
"ततो दुन्दुभिनिर्घोषः पर्य्यन्यनिनदोपमः॥")
पर्य्ययः, पुं, (परि क्रमशः अयो गमनम्।) क्रमोल्लङ्घनम्। (परि शास्त्रलोकाचारमर्य्यादां परित्यज्य अयो गमनमुल्लङ्घनमित्यर्थः।) व्यतिक्रमः। शास्त्रतो लोकव्यवहाराच्च प्राप्तस्यार्थस्य परित्यागः। तत्पर्य्यायः। अतिपातः २ उपाव्ययः ३। इत्यमरभरतौ॥ विपर्य्ययः ४ अत्ययः ५। अतिपतनम् ६ अत्ययः ७ अतिक्रमः ८। इति शब्दरत्नावली॥ (यथा, महाभारते। २।४८।१२।
"अन्याय्याच्छादये चार्द्धं यथा कुपुरुषस्तथा।
अर्द्धं धारये चोग्रं प्रतीच्छन् कालपर्य्ययम्॥")
पर्य्ययः, क्ली, (परितोऽयते गच्छत्यनेन। परि+अय+ल्युट्।) अन्वसन्धा। इति शब्दमाला॥ जिन् इति भाषा॥
पर्य्यवस्था, स्त्री, (परितोऽवस्थानम्। परि+अव+स्था+"आतश्चोपसर्गे।" ३। ३। १०६। इत्यङ्।) विरोधनम्। इत्यमरः। ३। २।२१॥
पर्य्यवस्थातृ, [क्] त्रि, (पर्य्यवतिष्ठते इति। परि+अव+स्था+तृच्।) पर्य्यवस्थाकर्त्ता। विरोधी। इति हलायुधः॥ (यथा, किरा-तार्জ্জুनीये। ११। १३।
"अन्तकः पर्य्यवस्थातां जन्तूनां सन्ततापदः।
इति त्वय्येव भवे भयो मुक्तावुत्तिष्ठते जगः॥")
पर्य्यवस्थानं, क्ली, (परितोऽवतिष्ठतेऽनेन। परि+अव+स्था+करणे ल्युट्।) विरोधः। इति जटाधरः॥ सर्व्वतोभावेनावस्थितिश्च॥
पर्य्यस्तः, त्रि, (परितोऽस्तः क्षिप्तः। अस्तु इर क्षेपे+क्तः।) पतितः। हतः। इति मेदिनी। ते, १२१॥ (सर्व्वतः प्रस्तः। विस्तृतः। यथा, हरिवंशे। १५६। २०। [राम॥")
"पर्य्यस्तां पृथिवीं कृत्स्नां साश्वां सरथकुञ्जराम्॥"
पर्य्यस्तिका, स्त्री, (परितः अस्यते क्षिप्यते शरीरमत्र। परि+अस क्षेपे+अधिकरणे क्तिन्। ततः स्वार्थे कन्।) खट्वा। इति हेमचन्द्रः। ३। ३४३॥
पर्य्याणं, क्ली, (परितो याति गच्छत्यनेनेति। परि+या+ल्युट्। पृषोदरादित्वात् साधुः। अश्वपल्ययनम्। इति हेमचन्द्रः। ४। ३१८॥ (यथा, हरिवंशे। ८३। ६।
"आरोहणमन्यवाजिनां
पर्य्याणादियुतस्य वाजिनः।
उपवाह्य तुरङ्गमस्य वा
कल्यस्येव विपन्नशोभना॥")
पर्य्याप्तं, क्ली, (परि+आप्+भावे क्तः।) यथेष्टम्। क्लृप्तिः। शक्तिः। निवारणम्। इति मेदिनी। ते, १२७॥ त्रि, प्राप्तः॥ (शक्तिसम्पन्नः। यथा, भगवद्गीतायाम्। २। १०।
"पर्य्याप्तन्त्विदमेतेषां बलं भीमाभिरक्षितम्।"
"पर्य्याप्तं समर्थं भाति इति।" श्रीधरस्वामी॥)
पर्य्याप्तिः, स्त्री, (परि+आप+क्तिन्।) परिचयम्। मरणोद्यतस्य निवारणम्। इत्यमरभरतौ॥ प्रकाशः। प्राप्तिः। इति शब्दरत्नावली॥ (क्लृप्तिः। यथा, कथासरित्सागरे। २६। १६६।
"गाङ्गिं वसनिनां वत्स! भुवि पर्य्याप्तये घनम्॥"
शक्तिः। यथा, तत्रैव। २६। ४०।
"प्रविष्टः सोऽप्यपश्यत्तां तत्र नेत्रोत्सवप्रदाम्।
धातुरद्भुतनिर्म्माणपर्य्याप्तिमिव रूपिणीम्॥")
स्वरूपसम्बन्धविशेषः। स च सर्व्वेषामेव पदार्थानां विशिष्टबुद्धिनियामकः। पदार्थभेदेन नाना। यथा। पर्य्याप्तिश्चायमेको घट इमौ द्वौ इत्यादि प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः। इति दीधितिः॥ समवायेन गुणे गुणस्यासत्त्वेऽपि चत्वारो गुणा इत्यादि प्रतीत्या गुणादिषु संख्यादिमत्त्वनियामकोऽपि तादृशसम्बन्धः। इति सामान्याभावे जगदीशः॥ द्वितीयद्युत्पत्तिवादे गदाधरभट्टाचार्य्यश्च॥
पर्य्यायः, पुं, (परि+इण गतौ+"परावनुपाख्यये इणः।" ३। ३। ६८। इति घञ्। क्रमप्राप्तस्यानतिपातोऽनुपाख्यः।) पर्य्ययणम्। क्रमः। (यथा, कुमारे। २। ३६।
"पर्य्यायसेवासुलभाय पुण्यसम्भारसम्भृतसम्भृताय।
उद्यानपालाभिरिवाभ्यनन्दत्तरुभिः सुपाश्वैः॥")
तत्पर्य्यायः। आनुपूर्व्वी २ आवृत् ३ परिपाटी ४ अनुक्रमः ५। इत्यमरः। २। ७। ३०॥ आनुपूर्व्व्यम् ६ आनुपूर्व्वम् ७ आनुपूर्व्वकम् ८ परिपाटिः ९। इति भरतादयः॥ प्रकारः। अवसरः। इति मेदिनी। ये, ८६॥ निर्म्माणम्। द्रव्यधर्म्मः। इति हेमचन्द्रः॥ ६। १३६। क्रमैकार्थवाचकाः शब्दाः पर्य्यायाः। इति विश्वरत्नः॥ सम्पर्कविशेषः। येन सह यत्सम्पर्कः सम्बन्धस्तेन सह तत्पर्य्यायः। यथा,—
"समानं कुलभावञ्च दानादानन्तथैव च।
तयोर्व्वंशसमानं हि पर्य्यायञ्च प्रचक्षते॥"
इति कुलदीपिका॥
(अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे १०। १०४।
"क्वचिदेकमनेकस्मिन्ननेकञ्चैकगं क्रमात्।
भवति क्रियते वा चेत् तदा पर्य्याय इष्यते॥"
उदाहरणं क्रमेण यथा,—
"स्थिताः क्वणं पद्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः।
वलीषु तस्याः स्खलिताः प्रपेदिरे
क्रमेण नाभिं प्रथमोदविन्दवः॥
विचरन्ति विलासिन्यो यत्र श्रोणिभरालसाः।
एककाकाक्षिवत्साश्च धावन्त्यरिपुरे तव॥
विस्फुरागादधरान्निवर्त्तित-
स्तनाङ्गरागादरुणाच्च कन्दुकात्।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
स्तनोत्तरीयग्रथनी तया करः॥
ययोरारोपितस्तारो हारस्तोरिवधूजनैः।
निधीयन्ते तयोः स्थूलाः स्तनयोरम्बुविन्दवः॥
क्वचिदाधारः संहतरूपोऽसंहतरूपश्च। क्वचिदाधेयमपि। यथा, 'स्थिताः क्वणं पद्मसु' इत्यत्र उदविन्दवः पद्मादावसंहतरूप आधारे क्रमेणाभवन्। 'विचरन्ति' इत्यत्राधेयभूता एककाद्यः संहतरूपारिपुरे क्रमेणाभवन्। एवमन्यत्। अत्र चैकस्यानेकत्र क्रमेणैव वृत्तिर्विशेषालङ्काराद्धेतोः। विनिमयाभावात् परिवृत्तेः॥")
पर्य्यायग्रयनं, क्ली, (पर्य्यायेण क्रमेण ग्रयनम्।) प्रहरिकादीनां क्रमेण ग्रयनम्। तत्पर्य्यायः। उपशायः २ विशायः ३। इत्यमरभरतौ॥
पर्य्यासः, पुं, (पर्य्यस्यते इति। परि+अस्+घञ्।) पतनम्। हननम्। इति पर्य्यस्तशब्दार्थदर्शनात्॥ (परिवर्त्तः। यथा, मार्कण्डेयपुराणे। ५४। २।
"महाभूतप्रमाणञ्च लोकालोकान्तथैव च।
पर्य्यासं परिमाणञ्च गतिचन्द्रार्कयोरपि॥")
पर्युदश्रं, क्ली, (पर्युदच्यते इति। परि+उद्+अच्+"ल्यल्युटौ बहुलम्।" ३। ३। ११३। इति ल्युट्।) अश्रम्। इत्यमरः। २। ६। ३॥

पर्य्युदस्तः, त्रि, (पर्य्युदस्यते इति । परि + उत् + अस + क्तः ।) पर्य्युदासविशिष्टः । विधान्वयिभेदात्मकनञर्थयुक्तः । यथा । यद्यपि पर्य्युदस्तराज्ञादिषु आद्धादिकरणे विधेरौदासीन्यान्न फलं न वा प्रत्यवाय इति सिद्धान्तः ॥ इति मलमासतत्त्वम् ॥ (परित उत्क्षिप्ते त्रि ॥)

पर्य्युदासः, पुं, परि सर्व्वतोभावेन उदास्यते विधिर्यत्र सः । (परि + उत् + अस् + घञ् ।) तस्य लक्षणम् आद्धविवेके ।

"सामान्यग्राप्तप्राप्तनिषेधस्त्वेव पर्य्युदासत्वम् ॥"

अपि च मलमासतत्त्वे ।

"प्राधान्यन्तु विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥"

अस्योदाहरणम् । अमावस्यायां पिण्डेभ्यो दद्यात् रात्रौ आद्धं न कुर्व्वीत । अत्र आद्धकरणे रात्रेः पर्य्युदासः ॥ (यथा च साहित्यदर्पणे । ७ । ३ ।

"जुगोपात्मानमत्रस्तो भेजे धर्म्ममनातुरः ।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ॥
अत्राचस्तामनूद्यात्मगोपनाद्यैर्विधेयमिति नञः पर्य्युदासतया गुणभावो युक्तः ॥")

पर्य्युषितं, त्रि, (परित्यज्य स्वकालमुषितम् । वस + क्तः ।) बुद्धम् । बासि इति भाषा । तस्याभक्षणीयत्वं यथा,—

"भक्तं पर्य्युषितोच्छिष्टं अस्पृष्टं पतितैश्चितम् ।
उदक्यास्पृष्टसंसृष्टं पर्य्यायान्नञ्च वर्ज्जयेत् ॥"

इति गरुड़पुराणम् ॥

"यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥"

इति भगवद्गीता ॥ * ॥

तस्य भक्ष्यत्वं यथा,—

"मन्त्राभिमन्त्रितं गृह्यं न च पर्य्युषितं नृप ! ।
अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात्तथा ॥
तद्वादरिकेभ्यश्च गुड़पक्केभ्य एव च ॥"

इत्याह्निकतत्त्वम् ॥

तुलसीयुक्तपुष्पे पर्य्युषितदोषाभावो यथा,—

"तुलसीलग्नपुष्पाणि पद्मं गङ्गोदकं क्रमात् ।
न पर्य्युषितदोषोऽत्र छिन्नभिन्नं न दुष्यति ॥"

इति पुराणम् ॥

पर्य्युषितभोजी, [न्] त्रि, (पर्य्युषितं बुद्धं भुङ्क्ते इति । भुज + णिनिः ।) बुद्धभोक्ता । इति कालापव्याकरणम् ॥

पर्य्येषणा, स्त्री, (इष् + युच् + टाप् । ततः परित एषणा ।) अन्वेषणा । इत्यमरः । २ । ७ । ३२ ॥ तर्कादिना यथार्थोधितधर्म्मान्वन्वेषणे । अन्वेषणमात्रेऽपि । इति भरतः ॥ (स्त्री, अन्वेषणम् । यथा, महाभारते । ३ । २६ । १८ ।

"ब्राह्मणेष्वेव मेधावी बुद्धिपर्य्येषणञ्चरेत् ॥")

पर्व्व, गतौ । (भ्वां-परं-सकं-सेट् ।) पर्व्वति । इति दुर्गादासः ॥

पर्व्व, पूर्त्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) पर्व्वति पयसा कुम्भं चेटी । इति दुर्गादासः ॥

पर्व्व, [न्] क्ली, (पर्व्वतीति । पर्व्व गतौ + बाहुलकात् कनिन् । यद्वा, पिपर्त्तीति । पॄ + "स्नामदिपद्यर्त्तिपॄभ्यः कनिन् ।" उणां । ४ । ११२ । इति कनिन् ।) महः । ग्रन्थिः । (यथा, भागवते । ५ । २१ । १७ । "तथा बालखिल्या ऋषयोऽङ्गुष्ठपर्व्वमात्राः षष्टिसहस्राणि पुरतः सूर्य्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ॥") प्रस्तावः । लक्षयान्तरम् । दर्शप्रतिपदोः सन्धिः । (पूर्णिमाप्रतिपदोःसन्धिश्च । यथा, साहित्यदर्पणे । "अकालजलदावली किरतु नाम मुक्तावलीरपर्व्वणि विधुन्तुदस्तुदतु नाम प्रीतद्युतिम् ॥") विषुवत्प्रभृति । इति मेदिनी । ने, ८८ ॥ ग्रन्थविच्छेदः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते अश्वमेधपर्व्वणि । तानि उक्तानि यथा तट्टीकायाम् ।

"आदिः सभावनविराटमयोद्यमश्च
भीष्मो गुरू रविजमद्रकसौप्तिकश्च ।
स्त्रीपर्व्व शान्तिरनुशासनमश्वमेध-
वासाश्रमो मुषलयानदिवावरोहः ॥")

सन्धः । इति शब्दचन्द्रिका ॥ (भङ्गी । यथा, रघुवंशे । १६ । ४६ ।

दिने दिने श्रीवलवन्त्यधस्तात्
सोपानपर्व्वाणि विसृष्टदम्भः ॥")

पञ्चपर्व्वाणि यथा । विष्णुपुराणम् ।

"चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥
स्त्रीतैलमांससम्भोगी पर्व्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं ध्रुवः ॥"

पर्व्वसु कर्त्तव्याकर्त्तव्यानि यथा । ब्रह्मपुराणे ।

"नित्यं ह्ययोरयनयोर्नित्यं विषुवतोर्द्वयोः ।
चन्द्रार्कयोर्ग्रहाणाञ्चतस्रोपातेषु पर्व्वसु ॥
अहोरात्रोषितः स्नानं आद्धं दानं तथा जपम् ।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयञ्च तत् ॥"

पराशरभाष्ये कूर्म्मपुराणम् ।

"अनध्यायेषु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्ज्जयेत् ॥"

पैठीनसिः । न पर्व्वसु तैलं चौरं मांसमभ्युपेयात् नामावस्यायां हरितमपि छिन्द्यात् । इति तिथ्यादितत्त्वम् ॥

पर्व्वकं, क्ली, (पर्व्वणा ग्रन्थिना कायतीति । कै + कः ।) ऊरुपर्व्व । इति शब्दचन्द्रिका ॥ आँटु इति भाषा ॥

पर्व्वकारी, [न्] पुं, (पर्व्व करोतीति । पर्व्व + कृ + णिनिः ।) धनादिलोभेनापर्व्वसु अमावास्याक्रियाप्रवर्त्तकः । यथा, विष्णुपुराणे द्वितीयांशे ६ अः ।

"स्त्री साहिषकश्चैव पर्व्वकारी च यो द्विजः ॥"

पर्व्वगामी, [न्] पुं, (पर्व्वसु चतुर्दश्यादिषु गच्छति स्त्रियमिति । पर्व्व + गम + णिनिः ।) पर्व्वसु स्त्रीगामी । इति पूर्व्वोक्तश्लोके पर्व्वकारीत्यत्र पर्व्वगामीति पाठद्वैधे स्वामी ॥

पर्व्वतः, पुं, (पर्व्वति पूरयतीति । पर्व्व पूरणे + "भृञ्जिधारिसर्जिदंशिभ्यश्चित्" उणां । ३ । ११० । इति अतच् ।) यद्वा, पर्व्वणि भागाः सन्त्यत्र । पाहाड़ इति भाषा ॥ तत्पर्य्यायः । महीध्रः २ शिखरी ३ प्राग्भृत् ४ अद्रार्य्यः ५ धरः ६ अद्रिः ७ गोत्रः ८ गिरिः ९ गावा १० अचलः ११ शैलः १२ शिलोच्चयः १३ । इत्यमरः । २ । ३ । १ ॥ स्थावरः १४ सानुमान् १५ पृथुशेखरः १६ धरणीकीलकः १७ कुठारः १८ जीमूतः १९ धातुभृत् २० भूधरः २१ स्थिरः २२ कुलीरः २३ कटकी २४ शृङ्गी २५ निर्झरी २६ अगः २७ नगः २८ दन्ती २९ । इति शब्दरत्नावली ॥ धरणीध्रः ३० भूभृत् ३१ क्षितिभृत् ३२ अवनीधरः ३३ कुधरः ३४ धराधरः ३५ प्रस्थवान् ३६ वृक्षवान् ३७ । इति राजनिर्घण्टः ॥ * ॥ सुमेरोः पूर्व्वे पर्व्वता यथा,—

"श्रीतान्तश्चक्रसुञ्जश्च कुलीरोऽथ कटङ्कटः ।
मणिशैलोऽथ वृषवान् महानीलो भवाचलः ॥
सुविन्दुर्मन्दरो वेणुः सुमेरो निमिषस्तथा ।
देवशैलस्य पूर्व्वेण मन्दरस्य महाचलाः ॥"*॥

सुमेरोर्दक्षिणे पर्व्वता यथा,—

"चिकूटः शिखरादिश्च कलिङ्गोऽथ पतङ्गकः ।
रुचकः सानुमांश्चैव ताम्रकोऽथ विशाखवान् ॥
श्वेतोदरः समलश्च वसुधारश्च रत्नवान् ।
एकशृङ्गो महाशैलो गजशैलः पिशाचकः ॥
पञ्चशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः ।
इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः ॥"

सुमेरोः पश्चिमे पर्व्वता यथा,—

"सुचक्षुः शिखिरश्चैव वैदूर्य्यः पिङ्गलस्तथा ।
पिञ्जरोऽथ तथा भद्रः सुरसः कपिलो मधुः ॥
अञ्जनः कुकुटः कृष्णः पाण्डुरश्चाचलोत्तमः ।
सहस्रशिखरस्त्वाद्रिः पारिपात्रश्च सप्तशृङ्गवान् ॥
पश्चिमेन तथा मेरोर्विष्कम्भात् पश्चिमाद्बहिः ।
एतेऽचलाः समाख्याताः शृणुष्वातस्त्वतोऽपरान् ॥"

सुमेरोरुत्तरे पर्व्वता यथा,—

"शृङ्गकूटोऽथ ऋषभो हंसनाभौ तथाचलौ ।
कपिलेन्द्रस्तथा शैलः सानुमान्नील एव च ॥
घृतपृष्ठः सुवर्णशृङ्गः तुम्बुको मेघपर्व्वतः ।
विराजाख्यो वराहाद्रिर्मयूरो रुचिरस्तथा ॥
इत्येते कथिता ब्रह्मन्मेरोरुत्तरतो नगाः ॥"

इति मार्कण्डेयपुराणम् ॥ * ॥

सप्तकुलपर्व्वतादि यथा,—

"सप्त येऽस्मिन् महापर्व्वा विस्तृताः कुलपर्व्वताः ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ॥
विन्ध्यश्च पारिपात्रश्च इत्येते कुलपर्व्वताः ।
तेषां सहस्रशस्त्वन्ये पर्व्वतास्तु समीपतः ॥
अविज्ञाताः पर्व्ववन्तो विपुलाश्चित्रसानवः ।
अन्ये तेभ्योऽपरिज्ञाता दृश्याः स्वल्पोपजीविनः ॥
तैर्विमिश्रा जनपदा आर्य्या म्लेच्छाश्च सर्व्वशः ॥"

इति मात्स्ये ६५ अध्यायः ॥ * ॥

विंशतिः श्रेष्ठपर्व्वता यथा,—

"हिमवान् हेमकूटश्च निषधो नीलपर्व्वतः ।
श्वेतश्च शृङ्गवान् मेरुर्माल्यवान् गन्धमादनः ॥

महेन्द्रो मलयः सह्यः शुक्तिमाॅश्चवानपि ।
विन्ध्यश्च पारियात्रश्च कैलासो मन्दरस्तथा ॥
लोकालोको महांस्तेषु तथैवोत्तरमानसः ।
एते विंशतिर्विख्याताः पर्व्वतास्तत्सुखा वराः ॥"
जम्बुद्वीपवर्षविभाजकपर्व्वता यथा,—
"लङ्कादेशाद्धिमगिरिरुदक् हेमकूटश्च तस्मात्
तस्माच्चान्यो निषध इति ते सिद्धपर्य्यन्तदेर्घ्याः ।
एवं सिद्धादुदगपि पुराच्छृङ्गवच्छृङ्गनीला
वर्षाण्येषां जगुरिह बुधा अन्तरे द्वीपिदेशान् ॥"
इति सिद्धान्तशिरोमणिः ॥ * ॥
पर्व्वतानां पक्षोत्पत्तिर्यथा,—
"ततोऽद्रयो जातपक्षा विष्णोश्चैव तु मायया ।
प्रस्थिता मेदिनीं त्यक्त्वा यथापूर्व्वं निवेशिताः ॥
तत् स्थानमसुराणान्तु धात्रादिष्टं जलार्णवे ।
प्रतीर्य्या पर्व्वताः सर्व्वे निममज्जुर्यथा गजाः ॥
तत्रासुरेभ्यः शृंसुस्ते चाधिपत्यं सुराश्रयम् ।
तच्छ्रुत्वैवासुराः सर्व्वे चक्रुरुद्योगमुत्तमम् ॥*॥"
युद्धजयानन्तरं तेषां पक्षोच्छेदो यथा,—
"धरणयान्तु गिरीन् स्थाप्य स्वेषु स्थानेषु गोपतिः ।
चिच्छेद पविना पक्षान् सर्व्वेषां सुरि चारिणाम् ॥
एकः सपक्षो मैनाकः सुरैस्तत्समये धृतः ॥"
इत्यग्निपुराणम् ॥ * ॥
पर्व्वतानां स्थावरजङ्गमरूपे यथा,—
"नद्यश्च पर्व्वताः सर्व्वे द्विरूपाश्च स्वभावतः ।
तोयं नदीनां रूपन्तु शरीरमपरन्तथा ॥
स्थावरं पर्व्वतानान्तु रूपं कायस्तथापरः ।
शुक्लीनामथ कर्व्वूनां तथैवान्तर्गता तनूः ॥
बहिरस्थिस्वरूपन्तु सर्व्वदैव प्रवर्त्तते ।
एवं जलं स्थावरञ्च नदीपर्व्वतयोस्तथा ॥
अन्तर्व्वसति कायस्तु सततं नोपपद्यते ।
आप्यायते स्थावरेण शरीरं पर्व्वतस्य तु ॥
तथा नदीनां कायस्तु तोयेनाप्यायते सदा ।
नदीनां कामरूपित्वं पर्व्वतानान्तथैव च ॥
जगत्स्थित्यौ पुरा विष्णुः कल्पयामास यत्नतः ।
तोयहानौ नदीदुःखञ्जायते सततन्त्विजाः ॥
विशीर्य्ये स्थावरे दुःखं जायते गिरिकायगम् ॥"
इति कालिकापुराणे २२ अध्यायः ॥*॥
अतः परं पर्व्वतेषु देवानामवकाशा वर्ण्यन्ते ।
तत्र योऽसौ शान्ताख्यः पर्व्वतस्तस्योपरि महेन्द्रस्य क्रीड़ास्थानं तत्र देवराजस्य पारिजातकवृक्षवनम् । तस्य पूर्व्वपार्श्वे कुञ्जरो नाम गिरिः तस्योपरि दानवानामष्टौ पुराणि च । तथा वज्रकेतुपर्व्वते राक्षसानामनेकानि पुराणि ते च नाना नीलकाः कामरूपिणः महानीले च शैलेन्द्रे पुराणि पञ्चदशसहस्राणि किन्नराणां ख्यातानि तत्र देवताश्चन्द्रादयो राजानः पञ्चदश किन्नराणां गर्व्विताः तानि सौवर्णानि विलप्रवेशनानि च पुराणि चन्द्रोदये च पर्व्वतवरे नागानामधिवासः ते च विलप्रवेशासेवितेषु वैनतेयविषयावर्त्तिनो व्यवस्थितानुरागे च दानवेन्द्रा व्यवस्थिता वेणुवत्यपि विद्याधरपुरत्रयं त्रिंशद्योजनशतविस्तीर्णमेकैकं तावदायतं उलूकरोमसममहावेत्रादयश्च राजानो विद्याधराणाञ्च एकैके च शैलराजनि स्वयमेव गरुड़ो व्यवस्थितः । कुञ्जरे तु पर्व्वतवरे नित्यं पशुपतिः स्थितः वृषभाङ्को महादेवः शृङ्गरो योगिनां प्रभुः अनेकगणभूतकोटिसहस्रपरिवारो भगवानादिपुरुषो व्यवस्थितः । वसुधारे चायुष्मान् वसुनाञ्च समावासः वसुधाररत्नधारयोर्मूर्द्धि अष्टौ सप्त च संख्यया पुराणि वसुसप्तर्षीणाञ्च । एकशृङ्गे च पर्व्वतोत्तमे प्रजापतेः स्थानं चतुर्व्वक्त्रस्य ब्रह्मणः । गजपर्व्वते च महाभूतपरिवृता स्वयमेव भगवती तिष्ठति । वसुधारे च पर्व्वतवरे मुनिसिद्धविद्याधराणामायतनं चतुरशीत्यपरपुर्य्यो महाप्राकारतोरणाः तत्र चानेकपर्व्वता नाम गन्धर्व्वा युद्धशालिनो वसन्ति तेषाञ्चाधिपतिर्देवो राजराजेकपिङ्गलः । सुरराक्षसाः पञ्चकूटे दानवाः शृतशृङ्गे यक्षाणां पुरशतम् । प्रभेदकस्य पश्चिमेन देवदानवसिद्धादीनां पुराणि तस्य गिरेर्मूर्द्धि महती सोमशिला तिष्ठति तस्याञ्च पर्व्वणि पर्व्वणि सोमः स्वयमेवावतरति । तस्यैवोत्तरपार्श्वे त्रिकूटं नाम तत्र ब्रह्मा तिष्ठति क्वचित्तत्र च वह्न्यायतनं तत्र मूर्त्तिमान् वह्निरुपास्यते देवैः । उत्तरे च शृङ्गाग्रे पर्व्वतवरे देवतानामायतनानि पूर्व्वेण नारायणस्यायतनं मध्ये ब्रह्मणः शृङ्गरस्य च पश्चिमे तत्र यक्षादीनां कानिचित् पुराणि । तस्य चोत्तरतीरे जातुच्छमहापर्व्वते त्रिंशद्योजनमण्डलं नन्दनं नाम सरस्तत्र नन्दो नाम नागराजो वसति शृतशृंगप्रपक्ष इति । इत्येतेऽष्टौ देवपर्व्वता विज्ञेयाः तेनानुक्रमेण हेमरजतरत्नवैदूर्य्यमनःशिलादिवर्णाः । इयञ्च पृथ्वी लक्षकोटिशृतानेकसंख्याता पूर्णा तेषु च सिद्धविद्याधराणां निलयाः । तद्यथा मेरोः पार्श्वतः केशरवलयालवालं सिद्धलोकेति कीर्त्यते इयञ्च पृथ्वी पद्माकारेण व्यवस्थिता एष सर्व्वपुराणेषु क्रमः सामान्यः प्रतिपाद्यते । इति वराहपुराणम् ॥ *॥ हिमालयादिपर्व्वतवासिनो यथा,—
"रक्षःपिशाचा यक्षाश्च सर्व्वे हैमवतास्तु ते ।
हैमकूटे तु गन्धर्व्वा विज्ञेयाश्चाप्सरोगणाः ॥
सर्व्वे नागाश्च निषधे शैववासुकितक्षकाः ।
महामेरौ व्यवस्थिंशृत् क्रीड़न्ते याज्ञिकाः सुराः ॥
नीले तु वैदूर्य्यमये सिद्धा ब्रह्मर्षयोवसन् ।
दैत्यानां दानवानाञ्च श्वेतपर्व्वत उच्यते ॥
शृङ्गवान् पर्व्वतश्रेष्ठः पितॄणां प्रतिसञ्चरः ।
इत्येतानि मयोक्तानि नव वर्षाणि भागशः ॥"
इति मात्स्ये ६५ अध्यायः ॥ * ॥
अथ पर्व्वतनदीजलगुणाः ।
"हिमवत्प्रभवा याश्च जलं तासाञ्चतोयमम् ।
पारियात्रभवा याश्च विन्ध्यपादप्रभवाश्च याः ॥
शिरोरुग्दोषकुष्ठानां ता हेतुः स्त्रीपदस्य च ।
चन्द्रार्ककरसंस्पृष्टं वायुनास्फालितं सुहुः ॥
पर्व्वतोपरि यद्वारि समं पौरन्दरेण तत् ।
तस्यानुगुणमुद्दिष्टं शैलप्रस्रवणोद्भवम् ॥
लेखनं दीपनं रूक्षं किञ्चिद्वातप्रकोपणम् ॥"
इति राजवल्लभः ॥ * ॥
पर्व्वते वर्णनीयानि यथा,—
"शैले मेघौषधीधातुवंशकिन्नरनिर्झराः ।
शृङ्गपादगुहारत्नवनजीवाद्युपत्यकाः ॥"
इति कविकल्पलता ॥ * ॥

अथ कैलासपर्व्वतवर्णनम् ।

"मध्ये हिमवतः पृष्ठे कैलासो नाम पर्व्वतः ।
तस्मिन्निधिपतिः श्रीमान् कुबेरः सह राक्षसैः ॥
अप्सरःसहितो राजा मोदते ह्यलकाधिपः ।
कैलासपादसम्भूतं पुण्यं शीतजलं शुभम् ॥
मन्दोदकं नाम सरः पयस्तु दधिसन्निभम् ।
तस्मात् प्रभवते दिव्या नदी मन्दाकिनी शुभा ॥
दिव्यश्च चन्दनवनस्तत्रास्तीरे महद्वनम् ।
प्रागुत्तरेण कैलासं दिव्यं सौगन्धिकं गिरिम् ॥
सर्व्वधातुमयं दिव्यं शृबलं पर्व्वतं प्रति ।
चन्द्रप्रभो नाम गिरिः शुभे रत्नसन्निभः ॥
तत्समीपे सरो दिव्यमक्षोदनाम विश्रुतम् ।
तस्मात् प्रभवते दिव्या नदी ह्यक्षोदका शुभा ॥
तस्यास्तीरे वनं दिव्यं महच्चैत्ररथं शुभम् ।
तस्मिन् गिरौ निवसति मणिभद्रः सहानुगः ॥
यक्षसेनापतिः क्रूरैर्गुह्यकैः परिवारितः ।
पुण्या मन्दाकिनी चैव नदी ह्यक्षोदका शुभा ॥
महीमण्डलमध्ये तु प्रविष्टा तु महोदधिम् ।
कैलासाद्दक्षिणप्राच्यां शिवं सर्व्वौषधिं गिरिम् ।
मनःशिलामयं दिव्यं शृबलं पर्व्वतं प्रति ॥
लोहितो हेमशृङ्गस्तु गिरिः सूर्य्यप्रभो महान् ।
तस्य पादे महद्दिव्यं लोहितं सुमहत् सरः ॥
तस्मात् प्रभवते पुण्यो लोहितश्च नदो महान् ।
देवारण्यं विशोकश्च तस्य तीरे महद्वनम् ॥
तस्मिन् गिरौ निवसति यक्षो मणिधरो बली ।
सौम्यैः स धार्म्मिकैश्चैव गुह्यकैः परिवारितः ॥*॥
कैलासात् पश्चिमोदीच्यां ककुद्मानोषधीगिरिः ॥
ककुद्मति च रुद्रस्य क्रीतपत्तिस्त्रिककुद्मिनः ।
तदवनं चैककुदं शैलं त्रिककुदं प्रति ॥
सर्व्वधातुमयस्तत्र सुमहद्दीप्तो गिरिः ।
तस्य पादे महद्दिव्यं मानसं सिद्धसेवितम् ॥
तस्मात् प्रभवते पुण्या सरयूर्लोकपावनी ।
तस्यास्तीरे वनं दिव्यं वैभ्राजनाम विश्रुतम् ।
कुबेरानुचरस्तस्मिन् प्रहेतितनयो बली ।
नाम्ना वै ब्रह्मधामेति राक्षसोऽनन्तविक्रमः ॥*॥
कैलासात् पश्चिमामाशां दिशः सर्व्वौषधिर्गिरिः
अरुणः पर्व्वतश्रेष्ठो रुक्मधातुविभूषितः ॥
भवस्य दयितः श्रीमान् पर्व्वतो हेमसन्निभः ।
ज्ञातकौशमयैर्दिव्यैः शिलाजालैः समन्ततः ॥
शृतसंख्यैस्तापनीयैः शृङ्गैर्द्दिवमिवोल्लिखन् ।
युक्तवान् सुमहद्दिव्यैर्दुर्गशैलो महोच्छ्रितः ॥
तस्मिन् गिरौ निवसति गिरीशो धूम्रलोहितः ॥
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ॥
तस्य पादात् प्रभवति शैलोदं नाम तत् सरः ।
तस्मात् प्रभवते पुण्या नदी शैलोदका शुभा ॥
सा षड्भिश्रुतियोर्मध्ये प्रविष्टा पश्चिमोदधिम् ।

अभ्युत्तरेण कैलासं ग्रिवं सर्व्वौषधिं गिरिम् ।
गौरन्तु पर्व्वतश्रेष्ठं हरितालमयं प्रति ।
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः ॥
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ।
रम्यं विन्ध्यसरो नाम यत्र राजा भगीरथः ॥
गङ्गार्थे स तु राजर्षिरवास बहुलाः समाः ।
दिवं यास्यन्ति मे पूर्व्वं गङ्गातोयपरिप्लुताः ॥
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता ॥"

इति मात्स्ये १०१ अध्यायः ॥

अथ दशधा क्षत्रिमपर्व्वतदानम् ।

"प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः ।
गुडाचलस्तृतीयस्तु चतुर्थो हेमपर्व्वतः ॥
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्व्वतः ।
सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ॥
राजतो नवमस्त्वेषां दृषदुच्चयपूर्व्वकः ॥
अयने विषुवे पुण्ये चतसृषूपरागे ग्रहिचये ।
शुक्लपक्षे तृतीयायामुपरागे ग्रहिचये ॥
विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः ।
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः ॥
धान्यशैलादयो देया यथाशास्त्रं विजानता ।
तीर्थे वायतने वापि गोष्ठे वा भवनाङ्गने ॥
मण्डपं कारयेद्धीमान् चतुरस्रसुदृश्यकम् ।
प्रागुदक्प्रवणञ्चैव प्राङ्मुखं वा विधानतः ॥
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान् ।
तन्मध्ये पर्व्वतं कुर्य्याद्विष्कम्भपर्व्वतान्वितम् ॥
धान्यद्रोणसहस्रेण भवेन्निरिरिहोत्तमः ।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्तिभिः शतैः ॥
मेरुर्मन्दाग्रीहिमयस्तुमध्ये
सुवर्णशृङ्गोच्चयसंयुतः स्यात् ।
पूर्व्वेण शुक्लाफलवच्चयुक्तो
याम्येन गोमेदकपुष्यरागैः ॥
प्रवाल गारुत्मतनीलरत्नैः
सौम्येन वैदूर्य्यसरोजरागैः ।
श्रीखण्डखण्डैरभितः प्रवाल-
लतान्वितः शुक्तिशिलातलः स्यात् ॥
ब्रह्मायं विष्णुर्भगवान् सुरारि-
र्दिवाकरोऽप्यत्र हिरण्मयः स्यात् ।
मूर्द्धन्यवस्थानममत्सरेण
कार्य्यन्त्वनेके च पुनर्दिवौकाः ॥
चत्वारि शृङ्गाणि च राजतानि
नितम्बभागेष्वपि राजतः स्यात् ।
तथेक्षुदण्डाहतकन्दरस्तु
घृतोदकप्रस्रवणश्च दिक्षु ॥
शुक्लाम्बराण्यम्बुधरावली स्यात्
पूर्व्वेण नीलानि च दक्षिणेन ।
वासांसि पश्चादथ कर्व्बराणि
रक्तानि चोत्तरतो घनाली ॥
रौप्यान्महेन्द्रप्रसवांश्च याम्यौ
संस्थाप्य लोकाधिपतीन् क्रमेण ।
नानाफलाली च समन्ततः स्या-
न्मेरोरयं मान्त्रविधेपनश्च ॥

वितानकस्योपरि पञ्चवर्ण-
मच्छादपुष्पाभरणं सितं वा ।
दत्त्वं निवेश्यामरशैलमग्र्या-
मतस्तु विष्कम्भगिरीन् क्रमेण ॥
तुरीयभागेण चतुर्दिशञ्च
संस्थापयेत् पुष्पविलेपनाढ्यान् ॥
पूर्व्वेण मन्दरमनेकफलावलीभि-
र्युक्तं यवैः कनकभद्रकदम्बचित्रम् ।
कामेन काञ्चनमयेन विराजमान-
माकारयेत् कुसुमवस्त्रविलेपनाढ्यम् ॥
क्षीरार्णवोदसरसाथ वनेन चैव
रौप्येण शुक्तिघटितेन विराजमानम् ।
याम्येन गन्धमदनञ्च निवेशनीयो
गोधूमसञ्चयमयः कनकौघतो वा ॥
हैमेन यज्ञपतिना हुतभाजनेन
वस्त्रेण राजतवनेन च संयुतः स्यात् ।
पश्चात्तिलाचलमनेकसुगन्धिपुष्पं
सौवर्णपिप्पलहिरण्मयहंसयुक्तम् ॥
आकारयेद्गजतपुष्पवनेन तद्व-
द्धस्तान्वितं दधिसितोदसरस्तथाग्रे ।
संस्थाप्य तं विपुलशैलमथोत्तरेण
शैलं सुपार्श्वमपि ताम्रमयं सुवस्त्रम् ॥
पुष्पेण हेमवटपादपशेखरन्त-
माकारयेत् कनकधेनुविराजमानम् ।
माक्षीकभद्रसरसा च वनेन तद्व-
द्दीप्तेन भास्करवता च युतं विधाय ॥
होमश्चतुर्भिरथ वेदपुराणविद्भि-
र्दान्तैरनिन्द्यचरितार्हतिभिर्द्विजेन्द्रैः ।
पूर्व्वेण हस्तमितमत्र विधाय कुण्डं
कार्य्यन्तिलैर्यवगुडेन समित्कुशैश्च ॥
रात्रौ च जागरमनुद्धतगीततूर्य्यै-
रावाहनञ्च कथयामि शिलोच्चयानाम् ।
त्वं सर्व्वदेवगणधामनिधे ! विरुद्ध-
मस्मद्गृहेष्वमरपर्व्वत ! नाग्रयासु ॥
हेमं विधत्स्व कुरु शान्तिमनुत्तमां नः
संपूजितः परमभक्तिमता मया हि ॥

त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः ।
मूर्त्तास्त्रैलगदृशैलस्त्वं नः पाहि सनातन ॥
यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मन्दिरम् ।
ब्रह्मादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे ॥
यस्मादशून्यममरैर्नागैरौभिश्च गिरिस्त्वम् ।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥
एवमभ्यर्च्च तं मेरुं मन्दरञ्चाभिपूजयेत् ।
यस्माद्वैजयेन त्वं भद्राश्वे च विशेषतः ।
श्रीभसे मन्दर ! क्षिप्रमतस्तुष्टिकरो भव ॥
यस्माच्चूडामणिर्जम्बुद्वीपे त्वं गन्धमादन ! ।
गन्धर्व्वयक्षश्रीभावात्ततः कीर्त्तिर्द्धरास्तु मे ॥
यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन च ।
हिरण्मयश्च शिखरस्तस्मात् पुष्टिर्भुवास्तु मे ॥
उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च ।
सुपार्श्व ! राजसे नित्यमतः श्रीरचयास्तु मे ॥
एवमामन्त्र्य तान् सर्व्वान् प्रभाते विमले पुनः ।

स्नात्वा गुरवे दद्यान्मध्यमं पर्व्वतोत्तमम् ॥
विष्कम्भान् पर्व्वतान्द्यादष्टसिद्धिसमृद्धः क्रमशो मुने ॥
गावो देयाश्चतुर्भिस्तु प्रदद्यादग्र्य नारद ! ॥
शक्तितः सप्त षट्पौ वा पञ्च दद्यादशक्तिमान् ।
एकापि गुरवे देया कपिलाय पयस्विनी ।
पर्व्वतानामशेषाणामेष एव विधिः स्मृतः ॥
त एव पूजने मन्त्रास्त एवोपस्कराः स्मृताः ।
यद्वाद्यां लोकपालानां ब्रह्मादीनाञ्च सर्व्वदा ॥
समस्तेष्वेव सर्व्वेषु होमः शैलेषु पठ्यते ।
उपवासी भवेन्नित्यमग्नौ नक्तमिष्यते ॥
विधानं सर्व्वशैलानां क्रमशः शृणु नारद ! ।
दानकाले च ये मन्त्राः पर्व्वतेषु च यत् फलम् ॥
अन्नं ब्रह्म यतः प्रोक्तमन्नं प्राणाः प्रकीर्त्तिताः ।
अन्नाद्भवन्ति भूतानि जगदन्नेन वर्त्तते ॥
अन्नमेव यतो लक्ष्मीरन्नमेव जनार्द्दनः ।
धान्यपर्व्वतरूपेण पाहि तस्मान्नगोत्तम ! ॥
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ।
मन्वन्तरशतं सार्द्धं देवलोके महीयते ॥
अप्सरोगणगन्धर्व्वैराकीर्णेन विराजितः ।
विमानेन दिवः पृष्ठमायाति सुरसेवितम् ॥
ततः कर्म्मक्षये राज्यमाप्नोतीह न संशयः ॥१॥
अथातः संप्रवक्ष्यामि लवणाचलसुत्तमम् ।
यत्प्रदाता नरो लोकं प्राप्नोति ग्रिवसंयुतम् ॥
उत्तमः षोडशद्रोणः कर्त्तव्यो लवणाचलः ।
मध्यमः स्याच्चतुर्विंशद्रोणैर्मध्यः स्मृतः ॥
वित्तहीनो यथाशक्त्या द्रोणार्द्धन्तु कारयेत् ।
चतुर्थांशेन विष्कम्भान् पर्व्वतान् कारयेत् पृथक् ॥
विधानं पूर्व्ववत् कुर्य्यात् ब्रह्मादीनाञ्च सर्व्वदा ।
तद्वद्धेमतनून् सर्व्वान् लोकपालान्निवेशयेत् ॥
सरांसि कामदेवादींस्तद्वच्च निवेशयेत् ।
कुर्य्याज्जागरमत्रापि दानमन्त्रं निबोधत ॥
सौभाग्यरससंभूतो यतोऽयं लवणो रसः ।
तथालक्तेन च मां पाहि पापान्नगोत्तम ! ॥
यस्मादमररसाः सर्व्वे सोत्कटा लवणं विना ।
प्रियश्च ग्रिवयोर्नित्यं तस्माच्छान्तिप्रदो भव ॥
विष्णुदेहसमुद्भूतो यस्मादारोग्यवर्द्धनः ।
तस्मात् पर्व्वतरूपेण पाहि संसारसागरात् ॥
अनेन विधिना यस्तु दद्याल्लवणपर्व्वतम् ।
उमालोके वसेत् कल्पं ततो याति परां गतिम् ॥२॥
अतः परं प्रवक्ष्यामि गुडपर्व्वतमुत्तमम् ।
यत्प्रदानान्नरः स्वर्गमाप्नोति सुरपूजितः ॥
उत्तमो दशभिर्भारैर्मध्यमः पञ्चभिर्मतः ।
त्रिभिर्भारैः कनिष्ठः स्यात् सदर्द्धान्यवित्तवान् ॥
तद्वदामलकं पूजा हैमश्चसुरार्चनम् ।
विष्कम्भपर्व्वतास्तद्वत् सरांसि वनदेवताः ॥
होमजागरणन्तद्वत् लोकपालाधिवासनम् ।
धान्यपर्व्वतवत् कुर्य्यादिमं मन्त्रमुदीरयेत् ॥
यथा देवेषु विष्वात्मा प्रवरोऽयं जनार्द्दनः ।
सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ॥
प्रणवः सर्व्वमन्त्राणां गारीणां पार्व्वती यथा ।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥
मम तस्मात् परां लक्ष्मीं गुडपर्व्वत ! देहि वै ।

यस्मात् सौभाग्यदायिन्या भ्राता त्वं गुडपर्व्वत !॥
निवासस्त्वं हि पार्व्वत्यास्तस्मान्मां पाहि सर्व्वदा।
अनेन विधिना यस्तु दद्याद्गुडमयं गिरिम् ॥
पूज्यमानः सगन्धर्व्वैर्गीरीलोके महीयते।
पुनः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ॥
आयुरारोग्यसम्पन्नः शत्रुभिश्चापराजितः॥ ३ ॥
अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम्।
यस्य प्रदानाद्भुवनं वैरिहं याति मानवः॥
उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः।
तदर्द्धेनाधमस्तद्वदल्पवित्तोऽपि शक्तितः॥
दद्यादेकपलादूर्द्धं यथाशक्त्या विमत्सरः।
धान्यपर्व्वतवत् सर्व्वं विदध्यान्मुनिपुङ्गव !॥
विघ्नभग्नैलांस्तदङ्ग ऋत्विग्भ्यः प्रतिपादयेत्।
नमस्ते ब्रह्मबीजाय ब्रह्मगर्भाय वै नमः॥
यस्मादनन्तफलदस्तस्मात् पाहि गिरीश्वर !।
यस्मादम्बरपत्रं त्वं तस्माद्भद्रं जगत्पते !॥
हैमपर्व्वतरूपेण तस्मात् पाहि नगोत्तम !।
अनेन विधिना यस्तु दद्यात् कनकपर्व्वतम्॥
स याति परमं ब्रह्मलोकमानन्दकारकम्।
तत्र कल्पशतन्तिष्ठंस्ततो याति परां गतिम्॥४॥
अतः परं प्रवक्ष्यामि तिलशैलं विधानतः।
यत्प्रदानान्नरो याति विष्णुलोकमनुत्तमम्॥
उत्तमो दशभिर्द्रोणैः पञ्चभिर्मध्यमो मतः।
त्रिभिः कनिष्ठो विप्रेन्द्र ! तिलशैलः प्रकीर्त्तितः॥
पूर्व्ववदापरं सर्व्वं विघ्नभपर्व्वतादिकम्।
दानमन्त्रं प्रवक्ष्यामि यथावन्मुनिसत्तम !॥
यस्माद्वधूवधे विष्णोर्देहात् स्वेदसमुद्भवाः।
तिलाः कृष्णाश्च समिधस्तस्माच्छान्त्यै भवन्त्विह॥
हव्यकव्येषु यस्माच्च तिला एवाभिरक्षणम्।
भवाद्दुद्धर शैलेन्द्र ! तिलाचल ! नमोऽस्तु ते॥
इत्यामन्त्र्य च यो दद्यात्तिलाचलमनुत्तमम्।
स वैष्णवं पदं याति पुनरावृत्तिदुर्लभम्॥
दीर्घायुष्कमवाप्नोति पुत्रपौत्रैश्च मानवः।
पितृभिर्देवगन्धर्व्वैः पूज्यमानो दिवं व्रजेत्॥५॥
अथातः संप्रवक्ष्यामि कार्पासाचलमुत्तमम्।
यत्प्रदानान्नरो नित्यमाप्नोति परमं पदम्॥
कार्पासपर्व्वतस्तद्वद्विघ्नशैलैरिहोत्तमः।
दशभिर्मध्यमः प्रोक्तः कनिष्ठः पञ्चभिर्मतः॥
भारैकाल्पधनो दद्याद्विप्तशाकेन वर्च्चितः।
धान्यपर्व्वतवत् सर्व्वमासाद्य मुनिपुङ्गव !॥
प्रभातायान्तु शर्व्वर्य्यां दद्यादिदमुदीरयेत्।
त्वमेवावरणं यस्मात्लोकानामिह सर्व्वदा॥
कार्पासाद्रे नमस्तस्मादघौघध्वंसनो भव।
इति कार्पासशैलेन्द्रं यो दद्यात् शर्व्वसन्निधौ॥
रुद्रलोके वसेत् कल्पं ततो राजा भवेदिह॥*॥६॥
अथातः संप्रवक्ष्यामि घृताचलमनुत्तमम्।
तेजोऽन्तमयं दिव्यं महापातकनाशनम्॥
विधाय घृतकुम्भानामुत्तमः स्यादृताचलः।
दशभिर्मध्यमः प्रोक्तः पञ्चभिस्त्ववरः स्मृतः॥
अल्पवित्तोऽपि कुर्व्वीत ह्याभ्यामिह विधानतः।
विघ्नभात् पर्व्वतांस्तद्वत्तुर्भागेन कल्पयेत्॥
घृतान्वितशुभपात्राणि कुम्भोपरि निवेशयेत्।
कारयेत् संहतानुच्चान् यथाशोभं विधानतः॥
वेष्टयेत् शुक्लवासोभिरिक्षुदण्डफलादिकैः।
धान्यपर्व्वतवत् सर्व्वं विधानमिह प्रोच्यते॥
अधिवासनपूर्व्वन्तु तद्वद्धोमसुरार्च्चनम्।
प्रभातायान्तु शर्व्वर्य्यां गुरवे च निवेदयेत्॥
विघ्नभपर्व्वतांस्तदङ्गत्विग्भ्यः श्रात्मनानसः।
संयोगादृतसम्भूतं यज्ञादग्नेस्ततेजसः॥
तस्मादृतार्चिर्विश्वात्मा प्रीयतामत्र शङ्करः।
यस्मात्तेजोमयं ब्रह्म घृते तच्च व्यवस्थितम्॥
घृतपर्व्वतरूपेण तस्मान्मां पाहि भूधर !।
अनेन विधिना दद्यादृताचलमनुत्तमम्॥
महापातकयुक्तोऽपि लोकमायाति शाङ्करम्।
हंससारसयुक्तेन किङ्किणीजालमालिना॥
विमानेनाप्सरोभिश्च सिद्धविद्याधरैर्वृतः।
विहरेत् पितृभिः सार्द्धं यावदाभूतसंप्लवम्॥७॥
अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम्।
सुवर्णपलसाहस्रैस्तु पर्व्वतः स्यादनुत्तमः॥
मध्यमः पञ्चशतिकस्त्रिशतैरवरः स्मृतः।
चतुर्थांशेन विघ्नभाः पर्व्वताः स्युः समन्ततः॥
पूर्व्वेण वज्रगोमेदैर्दक्षिणेनेन्द्रनीलकैः।
पुष्परागयुतैः कार्य्यो विद्रुद्भिर्गन्धमादनः॥
वैदूर्य्यविद्रुमैः पश्चात् संमिश्रो विपुलोऽचलः।
पद्मरागैः ससौवर्णैरुत्तरेण तु विन्यसेत्॥
धान्यपर्व्वतवत् सर्व्वमत्रापि परिकल्पयेत्।
तदर्द्धावाहनं कृत्वा दत्त्वान् देवांश्च काञ्चनान्॥
पूजयेद् पुष्यधान्यैः प्रभाते चाथ पूर्व्ववत्।
पूर्व्ववदृगुरु-ऋत्विग्भ्यः फलमन्त्रानुदीरयेत्॥
यथा देवगणाः सर्व्वे सर्व्वरत्नेष्ववस्थिताः।
तत्र रत्नमयो नित्यमतः पाहि महाचल !॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरेः।
सदानन्दप्रदानेन तस्मान्मः पाहि पर्व्वत !॥
अनेन विधिना यस्तु दद्याद्रत्नमहागिरिम्।
स याति वैष्णवं लोकममरेश्वरपूजितः॥
यावत् कल्पशतं साग्रं वासस्त्वेह नराधिप !।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत्॥
ब्रह्महत्यादिकं किञ्चिदृयदत्रासत्र वा कृतम्।
तत् सर्व्वं नाशमायाति गिरिर्व्वज्रहतो यथा॥८॥
अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम्।
यत्प्रदानान्नरो याति सोमलोकं द्विजोत्तम !॥
दशभिः पलसाहस्रैरुत्तमो रजताचलः।
पञ्चभिर्मध्यमः प्रोक्तस्तदर्द्धेनावरः स्मृतः॥
अप्रक्तौ विंशतेरर्द्धं कारयेत् शक्तितः सदा।
विघ्नभपर्व्वतांस्तद्वत्तुरीयांशेन कल्पयेत्॥
पूर्व्ववदाज्यतान् कुर्य्यान्मन्त्रादीन् विधानतः।
कलधौतमयांस्तत्र लोकेशान् रचयेद्बुधः॥
ब्रह्मविष्णुर्कवत् कार्य्यो नितम्बोऽत्र हिरण्मयः।
राजतं स्यादृयदन्येषां सर्व्वन्तदिह काञ्चनम्॥
शेषञ्च पूर्व्ववत् कुर्य्याद्धोमजागरणादिकम्।
प्रदद्यात्तं प्रभाते तु गुरवे रौप्यपर्व्वतम्॥
विघ्नभशैलाद्दक्षिणेभ्यः पूज्यवस्त्रविभूषणैः।
इमं मन्त्रं पठन् दद्याद्दभंपाणिर्विमत्सरः॥
पितृणां वल्लभं यस्माद्दविष्णोर्व्वा शङ्करस्य च।
रजतं प्राहि तस्मान्नः शोकसंसारसागरात्।
इत्थं निवेद्य यो दद्याद्रजताचलमुत्तमम्।
गवामयुतदानस्य फलं प्राप्नोति मानवः॥
सोमलोके स गन्धर्व्वैः किन्नराप्सरसाङ्गणैः।
पूज्यमानो वसेद्विद्वान् यावदाभूतसंप्लवम्॥ ९ ॥
अथातः संप्रवक्ष्यामि शर्करागैलमुत्तमम्।
यस्य प्रदानाद्विष्णुर्करुद्रास्तुष्यन्ति सर्व्वदा॥
अष्टभिः शर्कराभारैरुत्तमः स्याच्छैलः।
चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधमः स्मृतः॥
सार्द्धभारेण शैलन्तु यः कुर्य्यात् स्वल्पवित्तवान्।
विघ्नभपर्व्वतान् कुर्य्यात्तुरीयांशेन मानवः॥
धान्यपर्व्वतवत् सर्व्वमासाद्य मेरुसंयुतम्।
मेरोरुपरि तद्वच्च स्थाप्यं हैमतरुत्रयम्॥
मन्दारः पारिजातश्च तृतीयः कल्पपादपः।
एतदृक्षत्रयं मूर्द्ध्नि सर्व्वेष्वपि निवेशयेत्॥
हरिचन्दनसन्तानौ पूर्व्वपश्चिमभागयोः।
निवेश्यौ सर्व्वशैलेषु विशेषाच्छर्कराचले॥
मन्दरे कामदेवस्तु प्रत्यग्वक्त्रः सदा भवेत्।
गन्धमादनशृङ्गेषु धनदः स्यादृदङ्मुखः॥
प्राङ्मुखो वेदमूर्त्तिश्च हंसः स्याद्विपुलाचले।
हैमी सुपार्श्वसुरभी दक्षिणाभिमुखी भवेत्॥
धान्यपर्व्वतवत् सर्व्वमावाहनमखादिकम्।
कृत्वाथ गुरवे दद्यान्मध्यमं पर्व्वतोत्तमम्।
ऋत्विग्भ्यश्च नरः शैलानिमान्मन्त्रानुदीरयेत्॥
सौभाग्याद्यस्तमारोऽयं परमः शर्करायुतः।
तत् सदानन्दकारी त्वं भव शैलेन्द्र ! सर्व्वदा॥
अश्रुतं पिबतां ये तु निपेतुर्भुवि शीकराः।
देवानान्तत्समुत्थोऽयं पाहि नः शर्करागिरे !॥
मनोभवधनुर्मध्यादुद्भूता शर्करा यतः।
तस्मात्योऽसि महाशैल ! पाहि संसारसागरात्॥
यो दद्यात् शर्करागैलमनेन विधिना नरः।
सर्व्वपापविनिर्म्मुक्तः प्रयाति शिवमन्दिरम्॥
चन्द्रादित्यप्रतीकाशमधिरुह्याशुगैर्विभिः।
सहैव यानमातिष्ठेत् स तु विष्णुप्रचोदितः॥
ततः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत्।
आयुरारोग्यसम्पन्नो यावच्चन्द्रार्कतारकम्॥
भोजनं शक्तितः कुर्य्यात् सर्व्वशैलेष्वनुत्तरः।
सर्व्वाचारजवसमशीयात्तदनुज्ञया।
पर्व्वतोपस्करान् सर्व्वान् प्रापयेत् ब्राह्मणालयम्॥१०॥

इति मात्स्ये ७७ अध्यायः॥

देवर्षिविशेषः। यथा,—
"कश्यपान्नारदश्चैव पर्व्वतोऽरुन्धती तथा॥"

इत्यग्निपुराणम्॥

(यथाच, महाभारते। ३। ६३। २५।
"लोमशस्योपजग्मुश्च पादौ दैपायनस्य च।
नारदस्य च राजेन्द्र ! देवर्षेः पर्व्वतस्य च॥")

मत्स्यविशेषः। पावदा इति भाषा। अस्य गुणाः। वायुनाशित्वम्। स्निग्धत्वम्। बलशुक्रकारित्वञ्च। इति राजवल्लभः॥ दृष्टः। शाकभेदः। इति मेदिनी। ते, १२६॥ (सह्यांसविशेषः। स तु शङ्कराचार्य्यशिष्यस्य मण्डनमिश्रस्य

ग्निष्वत्तविशेषः। यथा, प्राणतोषिण्यां अवधूतप्रकरणे।
"वसेत् पर्व्वतमूलेषु प्रौढ़ो यो ध्यानधारणात्।
सारात्सारं विजानाति पर्व्वतः परिकीर्त्तितः॥")
पर्व्वतकाकः, पुं, (पर्व्वते जातः काकः। प्रायशः पर्व्वतजातत्वात्तथात्वम्।) द्रोणकाकः। इति हेमचन्द्रः। ४। ३। ८६॥
पर्व्वतजा, स्त्री, (पर्व्वताज्जायते या। पर्व्वत+जन्+"सुपि स्थः।" ३। २। ८८। इति डः।) नदी। इति हेमचन्द्रः। ४। १४६॥ (हिमगिरिजातत्वात् गौरी।) गिरिभववस्तुनि त्रि॥
पर्व्वतटङ्गं, क्ली, (पर्व्वतभवं टङ्गम्। शाकपार्थिववत् समासः।) टङ्गभेदः। सङ्ग इति हिन्दी भाषा। तत्पर्य्यायः। टङ्गाढ्यम् २ पचाढ्यम् ३ शृङ्गप्रियम् ४। अस्य गुणाः। बलपुष्टिकरत्वम्। पशूनां सर्व्वदा प्रियत्वञ्च। इति राजनिर्घण्टः॥
पर्व्वतमोचा, स्त्री, (पर्व्वतोद्भवा मोचा कदलीत्यर्थः।) गिरिकदली। इति राजनिर्घण्टः॥
पर्व्वतराजः, पुं, (पर्व्वतानां राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) हिमालयगिरिः। अस्य प्रमाणं वक्ष्यमाणशब्दे द्रष्टव्यम्॥
पर्व्वतराजपुत्री, स्त्री, (पर्व्वतराजस्य हिमालयस्य पुत्री।) दुर्गा। यथा, जिकनधनञ्जयसंग्रहयोः।
"शुक्लध्वजात् पञ्चयुते दशाहे
मूलर्क्षयुक्ता सितसप्तमी या।
आरभ्य तस्यां दशमीञ्च यावत्
प्रपूजयेत् पर्व्वतराजपुत्रीम्॥"
इति तिथ्यादितत्त्वम्॥
पर्व्वतवासिनी, स्त्री, (पर्व्वते वसतीति। पर्व्वत+वस+णिनि+ङीप्।) आकाशमांसी। इति राजनिर्घण्टः॥ गायत्री। यथा,—
"उत्तरे शिखरे देवि! भूम्यां पर्व्वतवासिनि!।
ब्रह्मयोनिसमुत्पन्ने! गच्छ देवि! यथासुखम्॥"
इति यजुर्व्वेदीयगायत्रीविसर्জ্জनमन्त्रः।
काली। यथा, श्यामापूजायां विसर्জ্জनमन्त्रः॥
"उत्तरे शिखरे देवि! भूम्यां पर्व्वतवासिनि!।
ब्रह्मयोनिसमुत्पन्ने गच्छ देवि! ममान्तरम्॥"
पर्व्वताधारा, स्त्री, (पर्व्वतः आधारो यस्याः। अष्टकुलाचलैः पृथिवी ध्रियते इति पुराणप्रसिद्धेस्तथात्वम्।) पृथिवी। इति हेमचन्द्रः। ४। ३॥
पर्व्वतारिः, पुं, (पर्व्वतानामरिः शत्रुः। पर्व्वतपक्षच्छेदनादस्य तथात्वम्।) इन्द्रः। इति शब्दरत्नावली॥
पर्व्वताश्रयः, पुं, (पर्व्वते आश्रयते इति। आ+श्रि श्रयणे+अच्।) मेघः। इति शब्दचन्द्रिका॥
पर्व्वताश्रयः, पुं, (पर्व्वत आश्रयो वासस्थानं यस्य।) शरभः। इति राजनिर्घण्टः॥ पर्व्वतवासिनि त्रि॥
पर्व्वतीयः, त्रि, (पर्व्वते भवः। पर्व्वत+"विभाषा-मनुष्ये।" ४। २। १४४। इति छः।) पर्व्वतसम्बन्धी। पर्व्वतभवः। पाहाड़िया इति भाषा। पर्व्वतशब्दात् भवार्थे ईयप्रत्ययनिष्पन्नः। (मनुष्ये तु पार्व्वतीयः। इति सिद्धान्तकौमुदी॥ यथा, रघुः। ४। ७७।
"तत्र जन्यं रघोर्घोरं पार्व्वतीयैरगण्यैरभूत्।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम्॥")
पर्व्वतोम्भिः, पुं, मतुस्यविशेषः। इति कस्मिन् भूरिप्रयोगे प्रमादलिखनं, पर्व्वतोवर्म्मिरिति मतुस्स्थयबोधकपाठः साधुः॥
पर्व्वधिः, पुं, (पर्व्वणि अमावस्यापूर्णिमयोः ह्रासवृद्धिं दधातीति। पर्व्व+धा+किः।) चन्द्रः। इति त्रिकाण्डशेषः॥
पर्व्वपुष्पी, स्त्री, (पर्व्वसु ग्रन्थिषु पुष्पं यस्याः। स्त्रियां ङीप्।) रामदूतीवृक्षः। नागदन्ती। इति शब्दचन्द्रिका रत्नमाला च॥
पर्व्वपूर्णता, स्त्री, (पर्व्वणः पूर्णता।) सम्भारः। आयोजनम्। इति भूरिप्रयोगः॥ पर्व्वणः पूर्णत्वञ्च॥
पर्व्वमूला, स्त्री, (पर्व्वणि पर्व्वणि मूलं यस्याः। यद्वा, पर्व्व ग्रन्थिरेव मूलं यस्याः।) श्वेता। इति राजनिर्घण्टः॥
पर्व्वयोनिः, पुं, (पर्व्व ग्रन्थिरेव योनिरुत्पत्तिकारणं यस्य।) इक्षुादि। इति हेमचन्द्रः। ४। २६६॥
पर्व्वरीर्णं, क्ली, पर्व्व। इति शब्दरत्नावली॥
पर्व्वरीणः, पुं, पर्णेतृन्तरसः। गर्व्वः। मारुतः। पर्णशिरा। स्तवकम्। दूतकमलः। पञ्चचूर्णरसः। इति शब्दरत्नावली॥ पर्परीण इति मेदिन्यां पाठः॥
पर्व्वरुट् [ह्], पुं, (पर्व्वसु ग्रन्थिषु रोहतीति। रुह+क्विप्।) दाड़िमः। इति त्रिकाण्डशेषः॥
पर्व्ववल्ली, स्त्री, (पर्व्वप्रधाना ग्रन्थिबहुला वल्ली लता।) मालादूर्व्वा। इति राजनिर्घण्टः॥
पर्व्वसन्धिः, पुं, (पर्व्वणोः सन्धिः) प्रतिपत्पञ्चदश्योरन्तरम्। इत्यमरः। १। ४। ७॥ "प्रतिपत्पञ्चदश्योर्यन्मध्यं स पर्व्वसन्धिः। किंवा स सन्धिः पर्व्वैक्यनयः। पञ्चदशानां पूरणी पञ्चदशी संख्याया डड्डिति डट् टित्त्वादीप्। पञ्चदशीशब्देन पूर्णिमामावास्ययोर्ग्रहणम्। अतएव पौर्णमास्या अमावास्या वा शेषसार्द्धदण्डचतुष्टयं प्रतिपदश्च प्रथमसार्द्धदण्डचतुष्टयं पर्व्वसन्धिरिति दृढ़ाः॥ सैंहिकेयो यदा राहुर्ग्रसते पर्व्वसन्धिष्विति यमः॥ पर्व्वणोः सन्धिः पर्व्वसन्धिः पृथातोर्वेनिपि पर्व्वपूरणी इत्यस्य नान्त्रीत्वनि वा पर्व्व। प्रतिपत्पञ्चदश्योस्तु सन्धिः पर्व्वाथ दिक् ककुबिति स्वामी॥ दर्शप्रतिपदोः सन्धौ ग्रन्थिप्रस्तावयोरपि। पर्व्वशब्दो हि विषुवत्प्रभृतिष्वपि दृश्यते॥ इति रत्नः।" इति भरतः॥
पर्व्वितः, पुं, (पर्व्व ग्रन्थिर्जातमस्य। पर्व्व+इतच्।) पर्व्वतमतुस्यः। इति शब्दरत्नावली॥
पर्शुः, पुं, (परं ग्रन्थं शृणातीति। शृङि हिंसे+"आङ्परयोः खनिशृभ्यां डिच्च।" उणां। १।३४। इति कुः स च डित्। पृषोदरादित्वात् दलोपः। यद्वा, स्पृशति ग्रन्थानिति। स्पृश संस्पर्शे+"स्पृशेः शश् शुनौ ट च।" उणां ५।२७। इति शुन् धातोश्च ट-शब्दादेशः।) परशुः। इति हेमचन्द्रः। ३।४५०॥ (यथा, रामायणे। ३। २८। २४।
"भिन्दिपालान् सुतीक्ष्णाग्रान् प्रासाणांश्च महोपलान्।
प्रासान् पाशांस्तथा पर्शून् कुन्तांश्च कुणपांस्तथा॥")
पर्शुका, स्त्री, (पर्शुरिव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्। स्त्रियां टाप्।) पार्श्वास्थि। इत्यमरः। २।६।९६॥
पर्शुपाणिः, पुं, (पर्शुः परशुः पाणौ यस्य।) गणेशः। इति हेमचन्द्रः। ३।१२१॥ (परशुरामः। इति व्युत्पत्तिलभ्योऽर्थः॥)
पर्शुरामः, पुं, (पर्शुधारी रामः। शाकपार्थिवादिवत् समासः। परशुना सह जातत्वादस्य तथात्वम्। यदुक्तं कालिकापुराणे ७८ अध्याये।
"भारावतरणार्थाय जातः परशुना सह।
सहजः परशुस्तस्य न जहाति कदाचन॥")
परशुरामः। इति शब्दरत्नावली॥
पर्श्वधः, पुं, (परश्वं दधातीति। परश्व+धा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः। पृषोदरात् साधुः।) कुठारः। इति जटाधरः॥
पर्ष, ड खेदे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) रेफोपधः। खेद इह आर्द्रीभावः। ड, पर्षते पयसा पटः। सर्ष इति चतुर्भुजः। सर्षते पसर्षे। इति दुर्गादासः॥
पर्षत्, [द्] स्त्री, (परिसीदन्त्यस्याम्। परि+सद्+"सत्सद्विषेति।" ३। २। ६१। इति क्विप्। "सदिरप्रतेः।" ८। ३। ६६। इति षत्वम्। बाहुलकात् इकारलोपः। यद्वा, "गृदृभसोरदिः।" उणां १।१२६। इति बहुलवचनात् पर्ष खेदने इत्यस्मादपि अदिः।) सभा। इत्यमरादिकोषः॥ (यथा, याज्ञवल्क्ये। १। ६।
"चत्वारो वेदधर्म्मज्ञाः पर्षत्तेविद्यमेव वा।
सा यूते यं स धर्म्मः स्यादेको बाधात्मवित्तमः॥")
पर्षद्बलः, त्रि, (पर्षत् सभा विद्यते यस्य। पर्षत्+"रजःकृतीति।" ५।२।११२। इति वलच्।) पारिषदः। इति शब्दरत्नावली॥ (यथा, भट्टिः। ४। १२।
"ब्राह्मीनवग्रालदीप्राक्षः सुलवः परिपूजयन्।
पर्षद्बलान् महाप्रक्षेराट नैकटिकाश्रमान्॥")
पल, क रक्षे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पालयति। इक्षवते-वेरुसिद्धे दीर्घिगोऽपि पाठः कानुबन्धानामिदनुबन्धवत् नेरनित्यतां बोधयति। तेन पालति पलति इत्यपि सिद्धम्। इति दुर्गादासः॥
पल, ज गतौ। इति कविकल्पद्रुमः॥ (भ्वां-एरं-सकं-सेट्।) ज, पालः पलः। इति दुर्गादासः॥

पलं, क्ली, (पलतीति। पल+अच्।) आमिषम्। कर्षचतुष्टयम्। इत्यमरः।३।३।२०१॥२।६।८६॥ तत्तु घ्राख्ये तोलकचतुष्टयम्। वैद्यके अष्टतोलकम्। लौकिके साष्टरक्तिद्विमाषकतोलकत्रितयम्। तत्पर्य्यायः। मुष्टिः २ प्रकुञ्चः ३ चतुर्थिका ४ विल्वम्५ षोड़शिकाम्बम्६। इति वैद्यकपरिभाषा॥ यथा, तिथ्यादितत्त्वे।

"पलन्तु लौकिकैर्मानैः साष्टरक्तिद्विमाषकम्। तोलकत्रितयं ज्ञेयं ज्योतिर्विद्भिः स्मृतिसम्मतम्॥" घिषटिका। इति राजनिर्घण्टः॥ सा तु घटिकाषष्टिभागैकभागः। षष्टिविपलञ्च। पलदण्डयोः प्रमाणन्तु।

"दशगुर्वक्षरोच्चारकालः प्राणः षडात्मकैः। तैः पलं स्यात्तु तत्षष्ट्या दण्ड इत्यभिधीयते॥" तेन च।

"मा कान्ते पक्षस्यान्ते पर्य्याकाशे देशे खाधीः कान्तं वक्षं दृष्ट्वा पूर्णं चन्द्रं मत्वा रात्रौ चेत्। क्षुत्क्षामः प्राट्चन्द्रतो राहुः क्रूरः प्राद्यात्तस्माद्वान्ते हर्म्यस्यान्ते प्रथ्येकान्ते कर्त्तव्या॥" अस्यैकपाठात् पलं षष्टिपाठाद्दण्डः। इति ज्योतिस्तत्त्वम्॥

पलः, पुं, (पलतीति। पल+अच्।) पलालः। इति हेमचन्द्रः।४।२४८॥ (यथा, महाभारते।३।२३३।११।

"चण्डाश्च गौण्डाश्च महाशनाश्च
चौराश्च दुष्टाश्च पलाश्च वर्ज्याः॥")

पलक्या, स्त्री, (पलकं मांसं तद्वृद्धये हितम्। पलक+यत्। स्त्रियां टाप्।) पालङ्क्याकः। इति राजनिर्घण्टः॥

पलगण्डः, पुं, (पलं मांसं तद्वत् गण्डति भित्तौ स्तदादिना लिम्पतीति। गण्ड+अच्।) लेपकः। इत्यमरः।२।१०।६॥ राज इति भाषा॥

पलङ्कटः, त्रि, (पलं मांसं कटति व्याकुचितं करोतीति। पल+कट+बाहुलकात् खच् सुम् च।) भयग्राहः। भीरुः। इति त्रिकाण्डशेषः॥

पलङ्करः, पुं, (पलं मांसं करोतीति। पल+कृ+अच्। "ततपुरुषे कृतीति।" ६।३।१४। इति द्वितीयायाः अलुक्।) पित्तम्। इति त्रिकाण्डशेषः॥

पलङ्कषः, पुं, (पलं कषतीति। कष हिंसायाम्+अच्। "ततपुरुषे कृतीति।" ६।३।१४। इति द्वितीयायाः अलुक्।) राक्षसः। इति मेदिनी। षे, ५३॥ कणगुग्गुलुः। इति राजनिर्घण्टः॥

पलङ्कषा, स्त्री, (पलङ्कष+टाप्।) गोचुरकः। राला। गुग्गुलुः। किंशुकः। सुरुरी। लाक्षा। इति मेदिनी॥ क्षुद्रगोचुरकः। महाश्रावणी। (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये।

"अजार्योश्चर्मरोमाणि वचाकुष्ठं पलङ्कषा॥") मक्षिका। इति राजनिर्घण्टः॥

पलप्रियः, पुं, (पलमामिषं प्रियं यस्य।) द्रोणकाकः। इति राजनिर्घण्टः॥ मांसाशिनि, त्रि॥

पलभा, स्त्री, (पलस्य भा इवार्यत्र।) मेषसंक्रमणादर्वाक् सपादाष्टदिने मध्याह्ने द्वादशाङ्गुलशङ्कुजा छाया। तत्पर्य्यायः। पलविभा २ विषुवत्प्रभा ३। यथा, ग्रहलाघवे।

"मेषादिगे सायनभागसूर्य्ये
दिनार्द्धजा भा पलभा भवेत् सा॥"

पलभयोर्द्वयतरखण्डकैः क्रमोत्क्रमस्थैर्हीनान्वितैर्लङ्कोदयैः स्वदेशीयोदया भवन्ति। अन्यत्स्वाधिकारेऽपि चरसंस्कृता ग्रहाः स्वस्वा भवन्तीति प्रयोजनम्॥ यथा, सिद्धान्तशिरोमणौ॥

"क्रियतुलाधरसंक्रमपूर्व्वतोऽयनलवोत्थदिनैर्विषुवद्दिनम्।
मकरकर्कटसंक्रमतोऽयनं द्युदलभा विषुवद्दिवसेऽच्यभा॥"

"एवं विषुवती छाया स्वदेशे या दिनार्द्धजा।
दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा॥"

इति सूर्य्यसिद्धान्तः॥

"व्यक्ततुलादिगतस्य रवेर्दिने
द्युदलभार्कमिताङ्गुलशङ्कुजा।
पलविभाथ— ॥"

इति ब्रह्मस्फुटसिद्धान्तः॥

पलल, क्ली, (पलति पल्यतेऽनेन वा। पल गतौ+"वृषादिभ्यश्चित्।" उणां १।१०८। इति कलच्।) मांसम्। इत्यमरः।२।६।३३॥ (यथा, गारुड़े।१८१ अध्याये।

"मार्ज्जारपललं विष्ठा हरितालञ्च भावितम्।
छागमूत्रेण तल्लिप्तो मूषिको मूषिकान् हरेत्॥") पङ्कम्। (यथा, गोः रामायणे।५।८०।२६।

'दोषपङ्कनिमग्नं त्वामयशःपललाप्लुतम्।
सर्व्वथा मानुषो रामस्त्रातमभ्युपनेष्यति॥") तिलचूर्णम्। इति मेदिनी। ले, १०४। "पललं तिलकल्कं स्यात्तिलचूर्णञ्च पिष्टकः। पललं मधुरं रुच्यं पित्तास्रबलपुष्टिदम्॥"

इति राजनिर्घण्टः॥

सैन्धवतिलचूर्णम्। तिलकुटा इति भाषा। यथा, वैद्यके।

"पललन्तु समाख्यातं सैन्धवं तिलपिष्टकम्। पललं मलकृद् वृष्यं वातघ्नं कफपित्तकृत्॥ दृंहणं गुरु वृष्यञ्च स्निग्धं मूत्रविवर्द्धकम्॥"

पलल, पुं, (पलतीति। पल गतौ+"वृषादिभ्यश्चित्।" उणां।१।१०८। इति कलच्। यद्वा, पलं मांसं लातीति। ला+कः।) राक्षसः। इति मेदिनी। ले, १०४॥

पललज्वरः, पुं, (पललस्य मांसस्य ज्वर इव।) पित्तम्। इति हारावली।१४१॥

पललाग्र्यः, पुं, (पलले आग्रेते इति। आ+ग्रीङ् ग्रयने+क्यच्।) गण्डरोगः। इति शब्दरत्नावली।

पलवः, पुं, (पलं पलायनं वाति हिनस्ति नाशयतीति। पल+वा ल गमनहिंसयोः+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) मनुष्यधारणोपायः। पोलो इति भाषा। तत्पर्य्यायः। प्लवः २ पञ्जराखेटः३। इति त्रिकाण्डशेषः॥

पलाग्निः, पुं, (पलस्य मांसस्य अग्निः। मांसपाकशक्तिवत्तयास्य तथात्वम्।) पित्तम्। इति हारावली।१४१॥

पलाङ्गः, पुं, (पलं मांसं तत्प्रधानं अङ्गं यस्य।) शिशुमारः। इति हारावली।७७॥

पलाण्डुः, पुं, (पलस्य मांसस्य अण्डमिवाचरतीति। "सृगव्वादयश्च।" उणां १।३८। इति कुप्रत्ययात् साधुः।) मूलविशेषः। पेयाज् इति भाषा। तत्पर्य्यायः। सुकन्दकः२। इत्यमरः।२।४।१४७॥ लोहितकन्दः३। इति रत्नमाला॥ तीक्ष्णकन्दः४ उग्रगन्धः५ मुखदूषणः६ भूतप्रियः७ कृमिघ्नः८ दीपनः९ सुखगन्धकः१० बहुपत्रः११ विश्वगन्धः१२ रोचनः१३ पलाण्डूः१४ सुकुन्दकः१५। इति शब्दरत्नावली॥ अस्य गुणाः। कटुत्वम्। बल्यत्वम्। कफपित्तवान्तिदोषनाशित्वम्। गुरुत्वम्। वृष्यत्वम्। रोचनत्वम्। स्निग्धत्वञ्च। इति राजनिर्घण्टः॥ यथा, भावप्रकाशे।

"पलाण्डुर्वनेषूच्च दुर्गन्धो सुखदूषकः।
पलाण्डुस्तु गुणैर्न्यूनो रसोनसदृशो गुणैः॥
स्वादुपाकरसोऽगुरुः कफरक्तप्रतिपित्तलः।
हरते केवलं वातं बलवीर्य्यकरो गुरुः॥"

पलाण्डुभक्षणे दोषो यथा,—

"पलाण्डुं विड्वराहञ्च छत्राकं ग्रामकुक्कुटम्।
लशुनं ग्रञ्जनञ्चैव जग्ध्वा चान्द्रायणञ्चरेत्॥"

इति प्रायश्चित्तविवेके याज्ञवल्क्यः॥

पलाद, पुं क्ली, (पलं मांसमत्तीति। अद भक्षणे+"कर्म्मण्यण्।" ३।२।१ इत्यण्।) राक्षसः। इति जटाधरः॥ (मांसभक्षके, त्रि॥)

पलादन, पुं क्ली, (पलं मांसमत्तीति। पल+अद+ल्युः।) राक्षसः। इति हेमचन्द्रः॥ मांसभक्षणशीले, त्रि॥

पलान्नं, क्ली, (पलं मांसं तेन सह पक्वं अन्नम्। श्रोकपार्थिवादिवत् समासः।) मांसादियुक्तसिद्धभक्तम्। पोलाओ इति भाषा। तस्य पाकप्रकारो द्रव्याणि च यथा। छागमांसं१ श्रावः ४ घृतं।० श्रावपादः। लवणं ३ माषकम्। लवङ्गं ३ माषकम्। एला ३ माषकम्। तण्डुलं १ श्रावः। मरिचं २ तोलकम्। तेजपत्रं २ तोलकम्। कुङ्कुमं १ माषकम्। आर्द्रकं २ तोलकम्। लवणं ६ तोलकम्। धन्याकं २ तोलकम्। द्राक्षा ५० श्रावपादार्द्धम्। छागमांसं क्षुद्रं घोरयित्वा शुष्कप्रक्षेपपाककरणानन्तरं पात्रान्तरे तेजपत्रोपरि अल्पाल्पखण्डगन्धद्रव्येण सह प्रथमं सन्नीकरणीयम्। ततस्तण्डुलं जलेनार्द्धसिद्धं कृत्वा मण्डगालनपूर्व्वकमल्पाल्पखण्डगन्धद्रव्येण सह तन्मांसोपरि सन्नीकरणीयम्। एवं प्रकारेण वारं वारं सन्नीकृत्य तदुपरि अवशिष्टघृत-

क्षेपणेन दण्डद्वयं तप्राङ्गारोपरि रचेत्। इति पाकरात्नेश्वरः॥ * ॥ अत्र मांसस्थाने मत्स्य-पलमज्जादिकं गन्धद्रव्येण सह दधियोगः घृत-परित्यागस्त्वधिक्यञ्च भवितुमर्हति॥

पलाशः, पुं, (पलं मांसं आशयते प्राप्यते बाहु-ल्येन अत्र। पल+आप्+घञ्।) कण्ठ-पाशकः। हस्तिकपोलः। इति शब्दमाला॥

पलायनं, क्ली, (पलायते इति। पलाय+भावे ल्युट्।) भयादिना स्थानान्तरगमनम्। पालान इति पीठ देशेन इति च भाषा॥ (यथा, रघुः। १६।३१।

"मित्र क्षत्रमपदिश्य पार्थतः
प्रस्थितं तमनवस्थितं प्रियाः।
विघ्न हे गुरु! पलायनच्छला-
व्यक्तसेति रुरुधुः कचग्रहैः॥")

तत्पर्य्यायः। अपयानम् २ संदावः ३ द्रवः ४ विद्रवः ५ उपक्रमः ६ संद्रावः ७ उद्द्रावः ८ प्रद्रावः ९। इति हेमचन्द्रः। ३। ४६६॥ निद्रावः १० उद्द्रवः ११ सन्त्रासः १२ द्रावः १३ शशालिका १४ अपक्रमः १५ चंक्रमः १६। इति शब्दरत्नावली॥

पलायितः, त्रि, (पलाय+क्तः।) पलायनविशिष्टः। तत्पर्य्यायः। नष्टः २ गृहीतदिक् ३ तिरो-हितः ४। इति हेमचन्द्रः॥

पलालः, पुं क्ली, (पलति ग्रस्यशून्यत्वं प्राप्नोतीति। पल+"लसिविशिविडीति।" उणां १।११७। इति कालन्। यद्वा, पलं अत्तीति। अद+ "कर्म्मण्यण्।" ३।२।१। इति अण्।) निष्फलकाण्डः। ग्रस्यशून्यधान्यनालः। इत्य-मरः। २।९।२२॥ पोयाल इति भाषा॥ (यथा, मनुः। ५।१२२।

"प्रोक्षणात् क्षणकाष्ठञ्च पलालञ्चैव शुध्यति॥")

क्ली, स्कन्दस्य मातृविशेषः। यथा, महा-भारते। ३। १२७। १०।

"काकी च हलिमा चैव मालिनी हंसिका तथा।
आर्य्या पलाला वैमित्रा सप्तैताः शिशुमातरः॥")

आलदोहदः, पुं, (पलालं दोहदं यस्य।) आम्रवृक्षः। इति शब्दमाला॥

पलाशं, क्ली, (पलं गतिं कम्पनमित्यर्थः। अश्नुते व्याप्नोतीति। पल+अश+"कर्म्मण्यण्।" ३। २।१। इत्यण्।) पत्रम्। इत्यमरः। २।४।१४॥ (यथा, महाभारते। ३। ३५। २५।

"वृक्षच्छाल इवानूपे शाखापुष्यपलाशवान्॥")

पलाशस्य पलाशवृक्षस्य इदम्। पलाशपुष्पादि। यथा कुमारे। ३। २६।

"बालेन्दुवक्राग्यविकाशभावात्
वसः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम्॥")

पलाशः, पुं, (पलाशानि पर्णानि सन्त्यस्य। "अर्श आदिभ्योऽच्।" ५।२।१२७। इत्यच्।) स्वनाम-ख्यातवृक्षः। स तु ब्रह्मणः स्वरूपः। यथा,—

स्कन्द उवाच।

"अश्वत्थरूपो भगवान् विष्णुरेव न संशयः।
रुद्ररूपो वटस्कन्द! पलाशो ब्रह्मरूपधृक्॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः।
दुःखापद्व्याधिदुरितान् विनाशकारिणो ध्रुवम्॥

ऋषय ऊचुः।

कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः।
एतत् कथय सर्व्वज्ञ! संशयोऽत्र महान् हि नः॥

सूत उवाच।

पार्व्वतीग्निषयोर्देवैः सुरतं कुर्व्वतोः किल।
अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नं कृतं पुरा॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः।
रेतःसेकसुखभ्रंशकम्यमाना तदा रुषा॥

पार्व्वत्युवाच।

क्रिमिकीटादयोऽप्येते जानन्ति सुरतेः सुखम्।
तस्माद्यूयं सुखभ्रंशाद्वृक्षत्वमाप्नुथ॥

सूत उवाच।

एवं सा पार्व्वती देवी अशपत् क्रुद्धमानसा।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः॥"

इति पाद्मोत्तरखण्डे १६० अध्यायः॥

तत्पर्य्यायः। किंशुकः २ पर्णः ३ वातपोथः ४। इत्यमरः। २। १। २६॥ याज्ञिकः ५ त्रिपर्णः ६ ब्रह्मपुष्पः ७ पूतद्रुः ८ ब्रह्मवृक्षकः ९ ब्रह्मोप-नेता १० काष्ठद्रुः ११। अस्य गुणाः। कषा-यत्वम्। उष्णत्वम्। क्रिमिदोषविनाशित्वञ्च॥ तद्-बीजगुणाः। पामकण्डूतिदद्रुत्वग्दोषनाशित्वम्॥ तत्पुष्पगुणाः। उष्णत्वम्। कण्डूकुष्ठनाशित्वञ्च॥ तत्पुष्पं चतुर्विधं यथा, राजनिर्घण्टे।

"रक्तः पीतः सितो नीलः क्रमुमेषु विभाव्यते।
किंशुकैर्गुणसाम्योऽपि सितो विज्ञानदः स्मृतः॥"
"पलाशः किंशुकः पर्णो याज्ञिको रक्तपुष्पकः।
क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः॥
पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित्।
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित्॥
भयसन्धानकृद्दोषयहृद्यर्शःक्रिमीन् हरेत्।
तत्पुष्पं स्वादु पाके तु कटु तिक्तं कषायकम्॥
वातलं कफपित्तासक्षूच्छिदघ्नाहि शीतलम्।
दाहदाहभ्रमं वातरक्तकुष्ठहरं परम्॥
फलं लघ्वग्नि मेहार्शःक्रिमिवातकफापहम्।
विपाके कटुकं रूक्षं कुष्ठगुल्मोदरप्रणुत्॥"

इति भावप्रकाशः॥

पलाशभेदा। यथा,—

"तद्भेदे स्यात् किंशुलुकः किंशुलो हस्तिकर्णकः॥"

इति शब्दरत्नावली॥

(पलाशस्य फलपुष्पादौ क्ली॥) शटी। (पलं मांसं अश्नातीति। पल+अश्+अण्। यद्वा, पले मांसे आशा यस्य।) राक्षसः। इति मेदिनी। शे, २४॥ हरितः। मगधदेशः। इति शब्दरत्नावली॥

पलाशः, त्रि, (पलवद्धरिद्वर्णेन अश्यते व्याप्यते इति। अश+घञ्।) हरिद्वर्णविशिष्टः। इति मेदिनी। शे, २१॥ निर्दयः। इति धरणिः॥

पलाशकः, पुं, (पलाश+संज्ञायां कन्।) शटी। इति जटाधरः॥ पलाशवृक्षः। इति शब्द-रत्नावली॥

पलाशपर्णी, स्त्री, (पलाशस्य पर्णमिव पर्णमस्याः। गौरादित्वात् ङीष्।) अश्वगन्धा। इति राज-निर्घण्टः॥

पलाशाख्यः, पुं, (पलाशस्य आख्या आख्या यस्य। यद्वा, पलाशं पलाशगन्धमाख्यातीति। आ+ ख्या+कः।) नाड़ीहिङ्गु। इति राजनिर्घण्टः॥

पलाशान्ता, स्त्री, (पलाशं अन्ते यस्याः। यद्वा, पलाशानां पत्राणां अन्तो गन्धवान् यस्याः।) गन्धपत्रा। इति राजनिर्घण्टः॥

पलाशी, [न्] पुं, (पलाशं विद्यतेऽस्य। पलाश +इनिः।) वृक्षः। इत्यमरः। २। ४। ५॥ (पलं मांसं अश्नातीति। अश+णिनिः।) राक्षसः। इति मेदिनी। ने, १६३॥ चौरि-वृक्षः। इति रत्नमाला॥ (पत्रविशिष्टे वाच्य-लिङ्गः। यथा,—

"ततः स भगवान् विद्वान् काश्यपो द्विजसत्तमः।
भस्मराशीकृतं वृक्षं विद्यया समजीवयत्॥
अङ्कुरं कृतवांश्चैव ततः पर्णद्वयान्वितम्।
पलाशिनं शाखिनञ्च तथा विटपिनं पुनः॥"

इति महाभारते। १। ४३। ६—१०॥

स्त्री, नदीविशेषः। इयन्तु शुक्तिमत्पर्व्वतसम्भवा। यथा, मार्कण्डेये। ५७। ३०।

"कृपा पलाशिनी चैव शुक्तिमत्प्रभवा स्मृता॥")

पलाशी, स्त्री, (पलाश+गौरादित्वात् ङीष्।) लाक्षा। लताविशेषः। तत्पर्य्यायः। पत्रवल्ली २ पर्णवल्ली ३ पलाशिका ४ सुपर्णी ५ सुपर्णी ६ दीर्घवल्ली ७ विषादनी ८ अम्लपत्री ९ दीर्घपत्री १० रसाढ्या ११ अम्बिका १२ अम्लातकी १३ काम्बिका १४। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। सुखदोषारोचकनाशित्वम्। पथ्य-त्वम्। पित्तकोपकारित्वञ्च। इति राजनिर्घण्टः॥

पलिक्नी, स्त्री, (पलितमस्या अस्तीति। "अर्श आदिभ्योऽच्।" इत्यच्। "असितपलितयोर्न।" वार्त्तिं। "कृन्दसि ङमेके।" इत्येकोक्तेर्भाषायाम-पि तस्य क इत्यादेशो भवति। ततो नान्त-त्वात् ङीष्।) वृद्धा। इत्यमरः। २। ६। १२॥ बालगर्भिणी गौः। इति हेमचन्द्रः॥

पलिघः, पुं, (परिहन्यतेऽनेनेति। परि+हन+ "परौ घः।" ८। २। २२। इति अप् घादे-शश्च। ततः "परेश्च घाङ्कयोः।" ८। २। २२। इति रस्य लः।) काचकलसः। घटः। प्राकारः। गोपुरम्। इति मेदिनी। घे, ६॥

पलितं, क्ली, (पलि+भावे क्तः। यद्वा, फलन-मिति। फल+"फलेरितजादेश्च पः।" उणां। ५। ३४। इति इतच् फस्य पत्वम्।) जरसा केशादौ शौक्ल्यम्। केशपाकः। इत्यमरः। २। ६। ४१॥ (यथा, मनुः। ६। २।

"गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥")

तस्य निदानं यथाह माधवकरः ।
"क्रोधशोकश्रमक्लान्तः शरीरोष्मा शिरोगतः ।
पित्तञ्च केशान् पचति पलितं तेन जायते ॥"
तच्चिकित्सा यथा,—
"लौहचूर्णस्य कर्षन्तु दशार्द्धं घृतमञ्जतः ।
धात्रीफलद्वयं पथ्ये द्वे नधैकं विभीतकम् ॥
पिष्ट्वा लोहमये भाण्डे स्थापयेन्निशि वासयेत् ।
लेपोऽयमचिराद्धन्ति पलितं नेह संशयः ॥
दशार्द्धं पञ्चकर्षाणि ।
काश्मर्य्या मूलमादौ सहचरकुसुमं केतकस्यापि मूलं
लौहं चूर्णं सभृङ्गं त्रिफलपलयुतं तैलमेभिः पचेयुः ।
कृत्वा लोहस्य भाण्डे क्षितितलनिहितं स्थापयेच्चासमेकं
केशाः काशप्रकाशा अपि मधुपनिभा अस्य योगाद्भवन्ति ॥
त्रिफला नीलिकापत्रं भृङ्गराजोऽयसो रजः ।
अवीमूत्रेण संपिष्टं लेपात् कृष्णीकरं परम् ॥"
इति भावप्रकाशे मध्यखण्डे क्षुद्ररोगाधिकारे ॥
पैलजम् । तापः । कर्दमः । इति मेदिनी । ते, १२२ ॥ (पल गतौ + "लोष्टपलितौ ।" उणा० ३ । ६२ । इति क्तप्रत्ययेन निपातनात् सिद्धम् ।) केशपाशः । इति हेमचन्द्र, उज्ज्वलदत्तश्च ॥

पलितः, पुं, (फलति छद्मावस्थायां केशग्रौक्ष्यादिकं प्राप्नोतीति । फल + "फलेरितजादेश्च पः ।" उणा० । ५ । ३४ । इति इतच् फस्य च पः ।) वृद्धः । इति जटाधरः ॥

पलिता, स्त्री, (पलित + टाप् ।) वृद्धा । इति जटाधरः ॥

पल्यङ्कः, पुं, (परिशोऽङ्कतेऽत्र इति । परि + अकि लक्षणे + घञ् । "परेश्च घाङ्कयोः ।" ८ । २ । २२ । इति रस्य लः ।) पर्य्यङ्कः । इत्यमरः । २ । ७ । १३८ ॥ (यथा, रामायणे । २ । ३२ । ६ ।
"पल्यङ्कमन्यास्तरणं नानारत्नविभूषितम् ।
तमप्यधिक्षिपति वैदेही प्रतिष्ठापयितुं त्वयि ॥")

पल्ययनं, क्ली, (परितः अयति गच्छति अनेन । परि + अय गतौ + करणे ल्युट् । रस्य लत्वम् ।) पर्य्यायगमः । इति हेमचन्द्रः । ४ । २१८ ॥ घोड़ार जिन् इति भाषा ॥

पल्लुल, तृ क लूनिपूर्त्योः । इति कविकल्पद्रुमः । (अदन्तचुरां-परं-सकं-सेट् ।) यकारयुक्तैकलकारमध्यः ह्रस्वमध्यश्च । लूनिश्छेदः । पूतिः पवित्रीकरणम् । अपपल्लुलत् ह्रणं लोकः । पल्लुलयति जनं गङ्गा । इति दुर्गादासः ॥

पल्लूल, तृ क लूनिपूर्त्योः । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) यकारयुक्तैकलकारमध्यः दीर्घमध्यश्च । लूनिश्छेदः । पूतिः पवित्रीकरणम् । अपपल्लूलत् ह्रणं लोकः । पल्लूलयति जनं गङ्गा । इति दुर्गादासः ॥

पल्ल, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) पल्लति । इति दुर्गादासः ॥

पल्लः, पुं, (पल्लति ग्रस्यादिप्राचुर्य्यं गच्छतीति । पल्ल + पचाद्यच् ।) स्थूलकुशूलकम् । इति मेदिनी । ले, ३० ॥ पाल्लुइ इति मराइ इति च भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने १३ अध्याये ।
"सुपिधानन्तु तं कृत्वा यवपल्ले निधापयेत् ॥")

पल्लवः, पुं, क्ली, (पल्यते इति पल् । पल् + क्विप् । लूयते इति लवः । लू + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् । ततः पल् चासौ लवश्चेति ।) नवपत्राद्यिुक्तशाखाग्रपर्व्व । इति भरतः ॥ नवपत्रस्तवकः । "इति मधुः ॥ पर्व्वपत्रादिसंघाते शाखायाः पल्लवो मतः ।" इति कोषान्तरम् ॥ (यथा, रघुः । ६ । ३३ ।
"अभिनयान् परिचेतुमिवोद्यता
मलयमारुतकम्पितपल्लवा ।
अमदयत् सहकारलता मनः
सकलिकाकलिकामजितामपि ॥")
तत्पर्य्यायः । किसलयम् २ । इत्यमरः । २ । ४ । १४ ॥ प्रवालम् ३ नवपत्रम् ४ । इति राजनिर्घण्टः ॥ वलम् ५ किसलम् ६ किशलम् ७ किशलयम् ८ विटपः ९ । इति शब्दरत्नावली ॥ पत्रयौवनम् १० । इति जटाधरः ॥ विस्तरः । वलम् । अलङ्कारः । अलङ्कारागः । इति विश्वमेदिन्यौ ॥ वलमित्यत्र वनमिति क्वचित् पाठः ॥ वलयः । चापलः । इति शब्दरत्नावली ॥ (देशविशेषः । तद्देशवासिषु पुं भूम्नि । यथा, मार्कण्डेये । ५७ । ३६ ।
"अपरान्ताश्च शूद्राश्च पल्लवाश्चर्म्मखण्डिकाः ।
गान्धारा गवलाश्चैव सिन्धुसौवीरमद्रकाः ॥")

पल्लवकः, पुं, (पल्लवेन शब्दायेण कायतीति । पल्लव + कै + कः ।) वेश्यापतिः । (पल्लव इव कायतीति ।) मत्स्यविशेषः । इति हलायुधः ॥ (पल्लवः किसलयैः कायतीति । अशोकवृक्षः । इति कश्चित् ॥)

पल्लवढः, पुं, (पल्लवप्रधानो दुर्वृक्षः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

पल्लवाधारः, पुं, (पल्लवस्य आधारः ।) शाखा । इति शब्दचन्द्रिका ॥

पल्लविकः, त्रि, (पल्लवः शब्दाररसोऽस्यास्त्यस्मिन् वा । पल्लव + ठन् ।) कासुकः । इति हेमचन्द्रः । २ । २४५ ॥

पल्लवितं, क्ली, (पल्लवोऽलङ्काराग सञ्जातोऽस्य । तारकादिभ्य इतच् ।) लाक्षारक्तः । इति मेदिनी । ते, २०४ ॥

पल्लवितः, त्रि, (पल्लवः सञ्जातोऽस्य । पल्लव + इतच् ।) सपल्लवः । पल्लवयुक्तः । ततम् । विस्तृतम् । इति मेदिनी । ते, २०४ ॥

पल्लवी, [न्] पुं, (पल्लवाः सन्त्यस्य । पल्लव + इनिः ।) वृक्षः । इति शब्दमाला ॥ (पल्लवविशिष्टे, त्रि । यथा, कुमारे । ३ । ५४ ।
"पर्य्याप्तपुष्पस्तवकावनम्रा
सञ्चारिणी पल्लविनी लतेव ॥")

पल्लिः, स्त्री, (पल्लतीति । पल्ल + "सर्व्वधातुभ्य इन् ।" इति इन् ।) ग्रामकः । कुटी । इति हेमचन्द्रः ॥ कुटीसमुदायः । ग्रामः । इत्यन्ये । गृहमिति भट्टः ॥ कुटीग्रामकयोः पल्लीति शाश्वतः ॥ स्थानमिति स्वामी ॥ पतन्ति भरणेन भ्रमणेन च जीवन्तीति क्विपि पतो गावः तेलीयन्तेऽत्र पल्लिः नास्तीति डिः पाल्लीगादीति ईपि पल्ली च गोपपल्लीप्रभृति च । इत्याभीरपल्लिशब्दटीकायां भरतः ॥ (गृहगोधिका । इति हेमचन्द्रे पल्लीशब्ददर्शनात् ॥)

पल्लिका, स्त्री, (पल्लि + स्वार्थे कन् ततष्टाप् ।) गृहगोधिका । इति राजनिर्घण्टः ॥

पल्लिवाहः, पुं, (पल्लिं कुटीं वाहयति निर्वाहयतीति । पल्लि + वह + णिच् + अण् ।) वृक्षभेदः । यथाह राजनिर्घण्टः ।
"पल्लिवाहो दीर्घवृक्षः सुपत्रस्ताम्रवर्णकः ।
अदृढः शाकपत्रादिः पशूनामबलप्रदः ॥"

पल्ली, स्त्री, (पल्लि + "वृद्धिकारादिति ।" वा ङीष् ।) खल्यग्रामः । (यथा, कथासरित्सागरे । १० । १३५ ।
"इतश्च गच्छ मत्पल्लीं जाने सा तत्र ते गता ।
अहं तत्रैव चेष्यामि दास्याम्यभिमिमञ्च ते ॥")
कुटी । इति विश्वमेदिन्यौ ॥ नगरभेदः । स तु दक्षिणदेशे प्रसिद्धः त्रिचनापल्लीग्रादिः । इति शब्दरत्नावली ॥ क्षुद्रजन्तुविशेषः । टिक्‌टिकी इति भाषा । तत्पर्य्यायः । सुबली २ गृहगोधा ३ विश्वम्भरा ४ व्योला ५ कुक्षिमत्स्यः ६ पल्लिका ७ गृहगोधिका ८ । इति राजनिर्घण्टः ॥ गृहगोलिका ९ माणिक्या १० भित्तिका ११ गृहोलिका १२ । इति हेमचन्द्रः । ४ । ३६३ ॥ अवश्लिष्टं व्योलीशब्दे द्रष्टव्यम् ॥ (अस्याः पतनफलसूक्तं यथा, ज्योतिषशास्त्रे ।
"निपतति यदि पल्ली दक्षिणाङ्गे नराणां
स्वजनधनवियोगो लाभदा वामभागे ।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणकृदिस्था सर्व्वसौख्यं ददाति ॥")

पल्वलं, क्ली, पुं, (पलति गच्छति पिबत्यस्मिन् वा । पल गतौ पा पाने वा + "सानसिवर्णसिपर्णसीति ।" उणा० । ४ । १०७ । इति निपातनात् वलच् प्रत्ययेन सिद्धम् ।) अल्पसरः । इत्यमरः । १ । १० । २८ ॥ (यथा, महाभारते । ७ । ५१ । ६ ।
"पल्वलानि च सर्व्वाणि सर्व्वे चैव ह्रदोत्पलाः ।
स्थावरं जङ्गमञ्चैव निःशेषं कुरुते जगत् ॥")
तस्य लक्षणं यथा,—
"अल्पं सरः पल्वलं स्यादृयत्र चन्द्रार्कांगे रवौ ।
न तिष्ठति जलं किञ्चित्तत्त्रयं वारि पाल्वलम् ॥
तज्जलगुणाः ।
पाल्वलं वार्य्यभिष्यन्दि गुरु स्वादु चिदोषकृत् ॥"
इति भावप्रकाशः ॥
"पाल्वलं गुर्व्वभिष्यन्दि विष्टम्भि दोषलं परम् ॥"
इति राजवल्लभः ॥

पवं, क्ली, (पूयतेऽनेन। पूञ् शोधने + "ऋदोरप्" ३। ३। ५७। इति अप्।) गोमयम्। इति शब्दचन्द्रिका॥ (गोमयशब्दे विवरणमस्य ज्ञातव्यम्॥)

पवः, पुं, (पवनमिति। पूञ् शोधने + भावे अप्। यद्वा, पुनातीति। पू + अच्।) निष्पावः। स च धान्यादीनां निर्मलीकरणम्। शाल्यादेः शोधनं बहुलीकरणम्। इत्यमरभरतौ॥ (पू + करणे अप्। यद्वा पुनातीति कर्त्तरि अच्।) वायुः। इति शब्दचन्द्रिका॥

पवनं, क्ली, (पूयते अग्निसंयोगेन यस्मिन्। पू + आधारे ल्युट्।) कुम्भकारस्य आमघटादिपाकस्थानम्। पोयान् इति भाषा। इति मेदिनी। ने, ८४॥ (यथा,—

"यः कुम्भकारपवनोपरिपङ्कलेप-
स्तापाय केवलमसौ न तु तापशान्त्यै॥")

इत्युद्भटः॥)

पयनमिति प्रमादपाठः। जलम्। इति शब्दमाला॥ प्रयते त्रि। इति शब्दरत्नावली। (भावे ल्युट्।) पवित्रीकरणञ्च॥

पवनः, पुं, (पुनातीति। पू + बहुलमन्यत्रापीति युच्।) निष्पावः। वायुः। इति मेदिनी। ने, ८४॥ (यथा, गीतायाम्। १०। ३१।

"पवनः पवतामस्मि रामः शस्त्रभृतामहम्॥")

अष्टौ वात्यपवना यथा, सिद्धान्तशिरोमणौ।

"भूवायुरावह इह प्रवहस्तदूर्द्ध-
स्थादुद्वहस्तदनु संवहसंज्ञकश्च।
अन्यः परोऽपि सुवहः परिपूर्व्वकोऽस्मा-
द्वाह्याः परावह इमे पवनाः प्रसिद्धाः॥"

सप्त पवनाधिपा यथा, ज्योतिस्तत्त्वे।

"शाकः शराब्धिसंयुक्तो मुनिभिर्भागहारितः।
आवहादिक्रमेणैव सप्त वाताः प्रकीर्त्तिताः॥
आवहः प्रवहश्चैव सम्वहो निवहस्तथा।
उद्वहो विवहो वायुः सप्त वाताः प्रकीर्त्तिताः॥"

अन्यद्वायुशब्दे द्रष्टव्यम्॥ (प्राणवायुः। यथा, हटयोगदीपिकायाम्। ३। ७५।

"अनेनैव विधानेन प्रयाति पवनो लयम्।
ततो न जायते मृत्युर्व्वारोगादिकं तथा॥")

उत्तममनुपुत्रविशेषः। यथा, भागवते। ८।१।२३।

"तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः।
पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप!॥")

पवनविजयः, पुं, (पवनं श्वासवायुर्विजयतेऽनेन। वि + जि + करणे अप्। यद्वा, पवनस्य विजयो यत्र।) शुभाशुभसूचकश्वासवायुजयोपायकग्रन्थविशेषः। यथा—

सूत उवाच।

"हरेः सुप्ता हरौ गौरी देहस्थं ज्ञानमब्रवीत्।
कुजो वह्निः रविः पृथ्वी शौरिरापः प्रकीर्त्तिताः॥
वायुसंस्थास्थितो राहुर्दक्षरन्ध्रावभासकः।
गुरुः शुक्रस्तथा सौम्यश्चन्द्रश्चैव चतुर्थकः॥
वामनाड्यान्तु मध्यस्थान् कारयेदात्मनस्तथा।
यदाचार इड़ायुक्तादा कर्म्म समाचरेत्॥
स्थानसेवां तथा ध्यानं वाणिज्यं राजदर्शनम्।
अन्यानि शुभकर्म्माणि कारयेत प्रयत्नतः॥
दक्षनाड़ीप्रवाहे तु प्राणिभीमश्च सैंहिकः।
दक्षश्चैव तथापोग्र पापानामुदयो भवेत्॥
शुभाशुभविवेको हि ज्ञायते तु स्वरोदयात्।
देहमध्ये स्थिता नाड्यो बहुरूपाः सुविस्ताराः॥
नाभेरधस्तादूर्द्धः कन्दो व्यङ्कुराश्च निर्गताः।
द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः॥
चक्रवच्च स्थितास्तासु सर्व्वाः प्राणहराः स्मृताः।
तासां मध्ये त्रयः श्रेष्ठा वामदक्षिणमध्यमाः॥
वामा सोमात्मिका प्रोक्ता दक्षिणा रविसन्निभा।
मध्यमा च भवेदग्निः फलती कालरूपिणी॥
वामा ह्यूर्द्धतरूपा च जगदाप्यायने स्थिता।
दक्षिणा रौद्रभागेन जगच्छोषयते सदा॥
द्वयोर्वाहे तु सूतुः स्यात् सर्व्वकार्य्यविनाशिनी।
निर्गमे च भवेद्वामा प्रवेशे दक्षिणा स्मृता॥
कारयेत् क्रूरकर्म्माणि प्राणे पिङ्गलसंस्थिते।
दृढ़ाचारे तथा सौम्यं चन्द्रसूर्य्यगतस्तथा॥
यात्रायां सर्व्वकार्य्येषु विषापहरणे दृढ़ा।
भोजने मैथुने युद्धे पिङ्गला सिद्धिदायिका॥
उच्चाटमारणाद्येषु कर्म्मस्वेतेषु पिङ्गला।
मैथुने चैव संग्रामे भोजने सिद्धिदायिका॥
शोभनेषु च कार्य्येषु यात्रायां विषकर्म्मणि।
शान्तिसुस्त्र्यर्थसिद्धौ च दृढ़ा योज्या नराधिपैः॥
द्वाभ्यां चैव प्रवाहे च क्रूरसौम्यविवर्ज्जने।
विद्यावतीन्तु जानीयात् संसारेषु विचक्षणः॥
सौम्यादिशुभकार्य्येषु लाभादिजयजीविते।
गमनागमने चैव वामा सर्व्वत्र पूजिता।
युद्धादिभोजने घाते स्त्रीणाञ्चैव तु सङ्गमे।
प्रशस्ता दक्षिणा नाड़ी प्रवेशे क्षुद्रकर्म्मणि॥
शुभाशुभानि कार्य्याणि लाभालाभौ जयाजयौ।
जीवाजीवाय यत् पृच्छेन्न सिध्यति च मध्यमा॥
वामाचारेऽथवा दत्ते प्रत्यये यत्र नायकः।
तत्रस्थः पृच्छते यस्तु तत्र सिद्धिर्न संशयः॥
वैच्छन्दो वामदेवस्तु यदा वहति चात्मनि।
तत्र भागे स्थितः पृच्छेत् सिद्धिर्भवति निश्चला॥
वामे वा दक्षिणे वापि यत्र संक्रमते शिरा।
घोरे घोराणि कर्म्माणि सौम्ये वै मध्यमानि च॥
प्रस्थिते भागतो हंसे द्वाभ्यां वै सर्व्ववाहिनि।
तदा सूतुं विजानीयाद्योगी योगविशारदः॥
यत्र यत्र स्थितः पृच्छेद्वामदक्षिणसंसुखः।
तत्र तत्र समं दिश्याद्वातस्योदयनं सदा॥
अयतो वामिका श्रेष्ठा पृष्ठतो दक्षिणा शुभा।
वामेन वामिका प्रोक्ता दक्षिणे दक्षिणा शुभा॥
जीवो जीवति जीवेन यच्छून्यं तत् स्वरो भवेत्।
यत्किञ्चित् कार्य्यमुद्दिष्टं जयादिशुभलक्षणम्॥
तत् सर्व्वं पूर्णनाड्यान्तु जायते निश्चिकल्पकम्।
अन्यनाड्यादिपर्य्यन्तपक्षत्रयमुदाहृतम्॥
यावत् षष्ठीन्तु पृच्छायां पूर्णायां प्रथमो जयेत्।
रिक्तायान्तु द्वितीयन्तु कथयेत्तदशङ्कितः॥
वामाचारः सम वायुर्जायते कर्म्मसिद्धिदम्।
प्रवृत्ते दक्षिणे मार्गे विषमे विषमाचरम्॥
अन्यच्च वामवाहे तु नाम वै विषमाचरम्।
तदासौ जयमाप्नोति योधः संग्राममध्यतः॥
दक्षवातप्रवाहे तु यदि नाम समाचरम्।
जायते नात्र सन्देहो नाड़ीमध्ये तु लक्षयेत्॥
पिङ्गलान्तर्गते प्राणे समानीयाद्दवह्नयेत्।
यावन्नाड्युदयं चारस्तां दिशं यावदाजयेत्।
न जातु जयते सोऽपि नात्र कार्य्या विचारणा॥
अथ संग्राममध्ये तु यत्र नाड़ी सदा वहेत्।
सा दिशा जयमाप्नोति शून्ये भङ्गं विनिर्द्दिशेत्॥
ज्ञातचारे जयं विद्यान्नष्टके मृतमादिशेत्।
जयं पराजयञ्चैव यो जानाति स पण्डितः॥
वामे वा दक्षिणे वापि यत्र सञ्चरते शिरा।
कृत्वा तत्पदमादौ तु यात्रां नयति शोभनाम्॥
अग्निसूर्य्यप्रवाहे तु सति युद्धं समाचरेत्।
तत्रस्थः पृच्छते यस्तु स साधुर्जयति ध्रुवम्॥
यां दिशं वहते वायुस्तां दिशं यावदाजयेत्।
जयते नात्र सन्देह इन्द्रो यद्वयतः स्थितः॥
मेषाद्या दश या नाड्यो दक्षिणा वामसंस्थिताः।
चरस्थिरद्विमार्गे तास्ताड़ये ताड़याः क्रमात्॥
निर्गमे निर्गमं याति संग्रहे संग्रहं विदुः।
पृच्छकस्य वचः श्रुत्वा घण्टाकारेण लक्षयेत्॥
वामे वा दक्षिणे वापि पक्षत्रयस्थितः शिवे।
ऊर्द्धोऽग्निरध आपश्च तिर्य्यक्संस्थः प्रभञ्जनः।
मध्ये तु पृथिवी ज्ञेया नभः सर्व्वत्र सर्व्वदा॥
ऊर्द्धं सूतुरधः शान्तिस्तिर्य्यक् चोच्चाटयेत् सुधीः।
मध्येऽस्तं विजानीयान्मोक्षः सर्व्वत्र सर्व्वगे॥"

इति गारुड़े पवनविजयादि ६७ अध्यायः॥

पवनव्याधिः, पुं, (पवनः वायुरोग एव व्याधिरस्य।) उद्भवः। श्रीकृष्णस्य सखा। इति त्रिकाण्डशेषः॥ (यथा,—

"विवक्षितामर्थविदस्ततक्षणप्रतिसंहृताम्।
प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम्॥"

इति माघे। २। १५॥

पवनात् प्रकुपितवायोरुद्भवो व्याधिः।) वायुरोगश्च॥

पवनात्मजः, पुं, (पवनस्य व्यात्मजः पुत्रः।) हनूमान्। इति शब्दरत्नावली॥ (पवनस्य वायोरात्मजः। "वायोरग्निः।" इति श्रुतेर्वायुजन्यतयास्य तथात्वम्।) हयवाहनः। इति मत्स्यपुराणम्॥ (भीमसेनः। इति महाभारतम्॥ यथा, राजतरङ्गिण्याम्। ८।२८०।

"वाहिनीरुद्धमार्गौ तौ पदवीमनुससृतुः।
मार्गे धनञ्जयेनैव शैनेयपवनात्मजौ॥")

पवनाशः, पुं, (पवनाय निष्पावाय अलति पर्य्याप्नोतीति। अल पर्य्याप्तौ + अच्।) धान्यविशेषः। देधान इति पोनरी इति च भाषा। तत्पर्य्यायः। देवधान्यम् २ चूर्णाढ्यः ३ बहुलः ४ बहुलः ५ बीजपुष्पः ६ पुष्पगन्धः ७। अस्य गुणाः। हितत्वम्। स्वादुत्वम्। सोहितत्वम्। श्लेष्मपित्तनाशित्वम्। व्रणप्यत्वम्। तुवरत्वम्। रूक्षत्वम्। क्लेदकारित्वम्। लघुत्वञ्च। इति भावप्रकाशः॥

पवनाशः, पुं, (पवनं वायुं अश्नाति भक्षयतीति। अश् भोजने + "कर्म्मण्यण्।" ३।२।१। इति अण्।) सर्पः। इति हलायुधः॥

पवनाशनः, पुं, (पवनो वायुरशनं भक्ष्यं यस्य।) सर्पः। इत्यमरः। १। ८। ८॥

पवनाशनाशः, पुं, (पवनाशनस्य सर्पस्य नाशो यस्मात्। यद्वा, पवनाशनं सर्पमश्नातीति। अश् + अण्।) गरुड़ः। इति हलायुधः॥ मयूरः। यथा, उत्तरचोरपञ्चाशिकायाम्।

"स्वयोनिभक्षध्वजसम्भवानां
श्रुत्वा निनादं गिरिगह्वरेषु।
तमोऽरिबिम्बप्रतिबिम्बधारी
रराव कान्ते! पवनाशनाशः॥"

पवनेष्टः, पुं, (पवने वायुरोगे इष्टः।) महानिम्बः। इति रत्नमाला॥ (महानिम्बशब्दोऽस्य गुणादिकं ज्ञेयम्॥)

पवनोन्मुज, क्ली, परूषम्। इति शब्दचन्द्रिका॥

पवमानः, पुं, (पवते शोधयतीति। पूङ् शोधने + "पूङ्यजोः शानन्।" ३।२।१।८। इति शानन्। "आने मुक्।" ७।२।८२। इति मुमागमः।) वायुः। इत्यमरः। १।१।६६॥ (यथा, रघुः। ८।६।

"न खरो न च भूयसा रुटुः
पवमानः पृथिवीरुहानिव।
स पुरस्कृतमध्यमक्रमो
नमयामास कृपानुदुद्वरन्॥"

अग्नेः स्वाहायां जातः पुत्रः। यथा, मार्कण्डेये। ५२। २७-२८॥

"योसावग्निरभीमानी ब्रह्मणस्तनयोऽग्रजः।
तस्मात् स्वाहा सुतान् लेभे त्रीनुदारौजसो द्विज!॥
पावकं पवमानञ्च शुचिञ्चापि जलाग्निजम्।
तेषान्तु सन्ततावेते चत्वारिंशच्च पञ्च च॥")

निर्मथ्याग्निः। स च गार्हपत्याग्निः। यथा,—

"अथ यः पवमानस्तु निर्म्मथ्योऽग्निः स उच्यते।
स च वै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः स्मृतः॥"

इति मात्स्ये ४८ अध्यायः॥

पवमानात्मजः, पुं, (पवमानस्य वायोरात्मजः। "वायोरग्निः।" इति श्रुतेर्पायुजन्यतयास्य तथात्वम्। यद्वा, पवमानस्य अग्निविशेषस्य आत्मजः।) हयवाहनः। यथा,—

"पवमानात्मजो ह्यग्निर्हयवाहन उच्यते॥"

इति मात्स्ये ४८ अध्यायः॥

पवाका, स्त्री, (पुनातीति। पूञ् गि शोधने + "वलाकादयश्च।" उणा ४। १४। इति आक-प्रत्ययेन निपातनात् साधुः।) वाल्मा। चक्र-वातः। इत्युणादिकोषः॥

पविः, पुं, (पुनातीति। पूञ् शोधने + "अच इः।" उणा ४। १३८। इति इः।) वज्रम्। इत्य-मरः। १। १। ५०॥

पवित्रः, त्रि, (पूयते स्म। पूङ् शोधे + क्तः। "पूङश्च।" ७।२।५१। इति इट्। "पूङः क्त्वा च।" १।२।२२। इति न किच्चम्।) पूतः। इति सुग्धबोध-व्याकरणम्॥ मरीचे, क्ली। इति राजनिर्घण्टः॥

पवित्रा [ऋ], त्रि, (पुनातीति। पू + ष्ट्रन्।) पवित्रताकारकः। यथा, नैषधे।

"तनुश्रिया यस्य हृतं स मन्मथः
कुलश्रिया यः पवितासदन्वयम्॥"

पवित्रं, क्ली, (पूयतेऽनेनेति। पूं + "पुवः संज्ञा-याम्।" ३। २। १८५। इति इत्रः।) वर्षणम्। कुशम्। (यथा, मनुः। २। ७५।

"प्राक्कूलान् पर्य्युपासीन: पवित्रैश्चैव पावितः॥")

ताम्रम्। पयः। इति मेदिनी। रे, १७७॥ घर्षणम्। इति विश्वः॥ अर्घोपकरणम्। इति हेमचन्द्रः॥ यज्ञोपवीतम्। इति त्रिकाण्डशेषः॥ घृतम्। मधु। इति राजनिर्घण्टः॥ पार्व्वण-श्राद्धादावर्घार्थं होमादावाज्यसंस्कारार्थञ्च साग्निर्गर्भकुशान्तरवेष्टितप्रादेशमात्रकुशपत्र-द्वयम्। यथा,—

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥"

इति श्राद्धतत्त्वम्॥

(विष्णुः। यथा, महाभारते। १२।१४६।२०।

"प्रभूतस्त्रिककुद्धाम पवित्रं मङ्गलं परम्॥"

महादेवः। यथा तत्रैव। १२।१७।३५।

"पवित्रञ्च महांश्चैव नियमो नियमाश्रितः॥")

पवित्रः, त्रि, (पू + इत्रः।) व्रतादिना शुद्धः। (यथा, गीतायाम्। ४। ३८।

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते॥")

तत्पर्य्यायः। प्रयतः २ पूतः ३। एतत्त्रयं प्राणिविषयमात्रम्। शुचिः ४ शुद्धः ५ प्रवि-त्रितः ६। इति शब्दरत्नावली॥ पुण्यः ७ पावनः ८। इति जटाधरः॥ (पूयतेऽनेन। पूङ् + "पुवः संज्ञायाम्।" ३।२।१८५। इति इत्रः।) शुद्धत्रयम्। तत्पर्य्यायः। पूतम् २ मेध्यम् ३। एतत्त्रयं अप्राणिद्रव्यविषयम्। इति ब्रह्मवर्गे विशेष्यनिघ्ने च अमरभरतौ॥ शुद्धम् ४ शुचि ५ पुण्यम् ६ पूतिवत् ७। इति जटाधरः॥ (यथा,—

"बल्यं पवित्रमायुष्यं सुमङ्गल्यं रसायनम्।
एतत्तु गव्यघृतगुणपरम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

पवित्रः, पुं, (पुनातीति। पू + कर्त्तरि इत्रः।) तिलवृक्षः। पुत्रजीववृक्षः। इति राजनिर्घण्टः॥ (तिलपुत्रजीवशब्दयोरस्य विवृतिर्ज्ञेया॥) कार्त्तिकेयस्य नामान्तरम्। यथा, महाभारते। ३। २३१। ६।

"षष्ठीप्रियश्च धर्म्मात्मा पवित्रो मातृवत्सलः॥")

पवित्रकं, क्ली, (पवित्र + कन्। यद्वा, पवित्रे पयसि कायतीति। के + कः।) जालम्। इति शब्दरत्नावली॥ गुणसूत्रजालम्। इत्यमरः। १। १०। १६॥ क्षत्रियस्य यज्ञोपवीतम्। यथा,

"कार्पासमुपवीतं स्याद्विप्रस्योर्द्धृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥

इति मनुवचनात् पवित्रकमपि तदुच्यते। इत्य-मरटीकायां भरतः॥

पवित्रकः, पुं, (पवित्र + स्वार्थे कन्।) कुशः। दमनकः। अश्वत्थः। उदुम्बरः। इति राज-निर्घण्टः॥

पवित्रधान्यं, क्ली, (पवित्रं धान्यम्। नित्यकर्म्म-धारयः।) यवः। इति राजनिर्घण्टः॥ (यव-शब्दोऽस्य गुणादयो वक्तव्याः॥)

पवित्रा, स्त्री, (पवित्र + टाप्।) तुलसी। इति शब्दमाला॥ नदीभेदः। इति हेमचन्द्रः॥ हरिद्रा। अश्वत्थीवृक्षः। इति राजनिर्घण्टः॥

पवित्रारोपणं, क्ली, (पवित्रस्य यज्ञोपवीतस्य आरोपणं प्रदानं यत्र।) श्रीकृष्णसम्प्रदानकोप-वीतदानरूपोत्सवविशेषः। यथा,—

"श्रावणस्य सिते पक्षे द्वादश्यां वैष्णवैर्मुदा।
कर्त्तव्यः कृष्णदेवस्य पवित्रारोपणोत्सवः॥"

अथ तन्नित्यता वक्ष्यपरिशिष्टे।

"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः।
हरिञ्च प्रीतिमाप्नोति यः पवित्रं समाचरेत्॥
विधिना शास्त्रदृष्टेन यो न कुर्य्यात् पवित्रकम्।
हरन्ति राक्षसास्तस्य वर्षपूजादिकं फलम्॥"

योगसारे च पवित्रोत्पत्तिप्रकाशनेन नागराजं पवित्रं प्रति श्रीरुद्रेण वरदानम्। यथा,—

"ये त्वां न बहुमन्यन्ते यथा सम्भावितो मया।
जपहोमादिकं तेषां फलं त्वामेतु निश्चयात्॥

विष्णुरहस्ये।

न करोति विधानेन पवित्रारोपणन्तु यः।
तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम!॥
तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः।
वर्षे वर्षे तु कर्त्तव्यं पवित्रारोपणं हरेः॥"

अथ पवित्रारोपणमाहात्म्यम्।

तत्र बौधायनः।

"यावांस्तनुः पवित्रस्य तावत् स्वर्गे महीयते।
आयुरारोग्यमैश्वर्य्यं विपुलं तस्य वर्द्धते॥

महासंहितायाम्।

सम्वत्सरेण या पूजा कृता वै मन्त्रिणा द्विज!।
पवित्रदानात् पूर्णा स्यादित्याह भगवान् हरिः॥

विष्णुरहस्ये।

पवित्रारोपणं विष्णोर्भुवि मुक्तिप्रदायकम्।
स्त्रीपुंकीर्त्तिप्रदं पुण्यं सुखसम्पद्भनावहम्॥
पुण्यानान्तु तथा पुण्यं सर्व्वपापहरन्तु वै।
पवित्रारोपणं तस्मात् पवित्रं परमं स्मृतम्॥
सम्वत्सरे नरो भक्त्या समभ्यर्च्च्य जनार्द्दनम्।
यत् फलं समवाप्नोति पवित्रारोपणेन तत्॥

किञ्च।

पापयत्यनसो नित्यं त्रायते भवबन्धनात्।
पवित्रं तेन विख्यातं ब्राह्मं तेजोऽभिधीयते॥
विष्णाख्यया तु विख्यातं तदा लोके विधीयते।
स एव सूत्ररूपेण यज्ञेशः कर्म्मणां प्रभुः॥
तदेव त्रिगुणीसूत्रं ततं नारायणाख्यया।
त्रिदेवात्मा त्रिवेदात्मा त्र्यक्षरः प्रणवः स्मृतः॥"

अथ पवित्रारोपणविधिः।

"सौवर्णे राजतैस्ताम्रैः सौमैः सूत्रैस्तु पाञ्चकैः।
कार्पासैर्वा पवित्राणीष्यते काश्यैः कुशैरपि॥

तच्च कार्पासिकं सूत्रं ब्राह्मणैरुक्षितं शुभम् ।
आनीय त्रिगुणीकृत्य पुनश्चिगुणवेष्टनैः ॥
पद्ममन्त्रेण तत् प्रोक्ष्य प्रक्षाल्य सुधिलाम्बुना ।
मूलेनाष्टोत्तरशतं मन्त्रेणाभिमन्त्रयेत् ॥
यावन्ति सन्ततेनास्य तन्तूर्द्दीनाम्य चाङ्गतः ।
ज्ञातकृताभिदग्धानि पवित्राणीश्वरेत् प्रभोः ॥
षट्त्रिंशद्दृग्यन्ययन्त्रेणामाग्रे कार्यास्त मध्यमे ।
चतुर्विंशतिरन्ते च द्वादशग्रन्थयो बुधैः ॥
अङ्गुष्ठपर्वमात्रन्तु कुर्यादृग्यन्थिमथोत्तमे ।
मदर्द्ध मध्यमे कुर्यात्तदर्द्धं च कनीयसि ॥
ग्रन्थीन् कुर्वीत सर्वत्र सुवृत्तान् सुमनोहरान् ।
न वै विषमसंख्याकान् ग्रन्थीन् कुर्वीत कुत्रचित् ॥
अष्टोत्तरशतैर्हीनं तन्तूत्तस्य पवित्रकम् ।
अष्टोत्तरशतं ग्रन्थिं वनमालाख्यमाचरेत् ॥
आरभ्य सुकुटं या तु सूत्रैर्विरचिता शुभा ।
आपादलम्बिनी माला वनमाला प्रकीर्तिता ॥
कार्यं तत्पवित्रञ्च सूत्रैर्द्वादशभिः शुभैः ।
अरविन्दमितं सूत्रं द्वादशग्रन्थिकं क्रमात् ॥
पवित्राणि परीवारदेवतानां समाचरेत् ।
सूत्रैस्तैरङ्गसंख्याकैः कलासंख्यार्कसंख्यकैः ॥
तेषु ग्रन्थीन् यथायोगं ब्रह्मा ब्रह्मैर्गुरोरपि ।
चतुर्विंशतिभिः सूत्रैः षड्विंशतिभिरात्मनः ॥
यथासम्भवमन्येषां पवित्राणि च कारयेत् ।
सम्पादयेच्च सर्वाणि शोभनान्येव यत्नतः ॥
तथा चोक्तम् ।
विशोभसूत्रदानेन कर्तुः स्यादशुभं फलम् ।
पवित्रं परया भक्त्या नमसा कुर्वीत शोभनम् ॥
रक्षयित्वाथ कार्पासीरागुरुगोरोचनादिना ।
वस्त्रेणाच्छाद्य पटले स्थापयेत्तानि वैष्णवे ॥"

इति पवित्रविनिर्माणम् ॥ * ॥

"कृत्वा कृत्यं दशम्याञ्च पवित्रारोपणाय हि ।
क्षणं विज्ञाप्य तत्रादिं यथा प्राग्लिखितं नयेत् ॥
एकादश्यां प्रभाते च नित्यकृत्यं समाप्य हि ।
देवालयमुपस्कृत्य मण्डलं रचयेत् शुभम् ॥
कृत्वा क्षणस्य नित्यार्चां पवित्रारोपणाप्तकाम् ।
पूजां विशेषतः कृत्वा क्षणं विज्ञापयेदिदम् ॥
क्रियालोपविघातार्थं यत्नया विहितं प्रभो ! ।
मयैतत् क्रियते देव ! भवत्तुष्टौ पवित्रकम् ॥
न मे विघ्नो भवत्वत्र कुरु नाथ ! दयां मयि ।
सर्व्वथा सर्व्वदा विष्णो ! मम त्वं परमा गतिः ॥
देवस्य सर्व्वतो न्यस्तैरन्तकाष्ठं जलं क्षणात् ।
स्वस्तिकाञ्च हरिद्राञ्च कुङ्कुमं रोचनानि च ॥
उपागहौ सितं सूत्रं चामरं व्यजनं तथा ।
यवा व्रीह्यादिधान्यानि यथास्थानं पृथक् पृथक् ॥
कुम्भं शङ्खाम्बुनापूर्य्य सर्व्वतोभद्रमण्डले ।
देवाग्रतो निधायास्मिन् परिचार्य्याधिवासयेत् ॥"

अथ पवित्राधिवासनम् ।

"भगवत्पुरतस्तानि पटलस्थानि पूजयन् ।
आषाढावाहयेन्मूलयुजा तन्मन्त्रतो बुधः ॥
तन्मन्त्रश्चायम् ।
ॐ संवत्सरस्य यागस्य परिचीकरणाय भोः ।
विष्णुलोकात् परिवाद्य आगच्छेह नमोऽस्तु ते ॥
तेष्वावाह्य यथास्थानं ब्रह्माद्या देवतास्ततः ।
तत्तन्मन्त्रैः सन्निधाप्याक्षतगन्धादिनार्चयेत् ॥
तत्र तत्र ता देवताश्चोक्ताः ।
ब्रह्मविष्णुमहादेवास्त्रिसूत्रीदेवताः स्मृताः ।
प्रणवः सोमवह्नी च ब्रह्मा नागः प्रभो रविः ॥
ग्रन्थिषु विश्वदेवाश्च नवसूत्राधिदेवताः ।
क्रिया च पौरुषी वीरा चतुर्थी चापराजिता ॥
जया च विजया चैव सुक्षिप्रा च सदाग्निवा ।
मनोन्मयी तु नवमी दशमी सर्व्वतोमुखी ।
ग्रन्थीनां देवताख्येतास्तासाञ्च विनिवेशयेत् ॥
तन्मन्त्राश्चैते ।
ॐ सर्व्वाभरणचित्राङ्ग ! सर्व्वदेवनमस्कृत ! ।
लावण्यरूपविश्वात्मन् ! ज्येष्ठसूत्रं समाश्रय ॥
ॐ सर्व्वलक्ष्मीकर ! श्रीश ! सर्व्वज्ञानरसात्मक ! ।
निवृत्तरूपविश्वात्मन् ! मध्यसूत्रं समाश्रय ॥
ॐ अतिवेगमरुद्यौनि ! पुरुषात्मन् ! दिवस्पते ! ।
कनीयो हे प्रभो ! देव ! तेजसा सूत्रमाश्रय ॥
यत्र मन्त्रो न वर्त्तेत तत्तन्नामैव तत्र च ।
नमोऽन्तं सप्ततुर्थीकमन्त्रः प्राग्लिखनाम्भसः ॥ * ॥
अथ क्षणकरणमन्त्रैः पट्टसूत्रेण निर्म्मितम् ।
वितस्तिमात्रं वध्नीयात् डोरकं मङ्गलात्मकम् ॥
तत्र मन्त्रः ।
ॐ संवत्सरव्रतानाञ्च यागानां फलदायि यत् ।
पवित्रीकरणायेतत् कौतुकं भरते नमः ॥
ततो गन्धपवित्रञ्च गृहीत्वा धूपितं बुधः ।
भगवन्तं नमस्कृत्य भक्त्या संप्रार्थयेदिदम् ॥
आमन्त्रितोऽसि देवेश ! सार्द्धं देवगणेश्वरैः ।
मन्त्रैर्लोकपालैश्च सहितः परिवारकैः ॥
आगच्छ भगवन्नीश ! विधिसंपूर्त्तिकारक ! ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ! ॥
ततश्च ।
विष्णुतेजोद्भवं रम्यं सर्व्वपातकनाशनम् ।
सर्व्वकामप्रदं देव नवाङ्गे धारयाम्यहम् ॥
अनेन मनुना विद्वान् मूलसंपुटितेन हि ।
दद्यात् गन्धपवित्रं तच्छ्रीकृष्णचरणाब्जयोः ॥
नीराज्य देवं स्तुत्वा च दत्त्वा पुष्पाञ्जलिं ततः ।
ततपवित्राणि तत्कुम्भमण्डलमनुनाघवा ॥
नृसिंहमनुना रक्षेत् कवचेनावगुण्ठयेत् ।
गीतवृत्यादिना कुर्याद्विधिवज्जागरं निशि ॥"

अथ पवित्रार्पणम् ।

"प्रातःकृत्यानि निर्वृत्य नित्यपूजां विधाय च ।
विशेषतोऽर्चयेद्देवं पवित्राणि च पूजयेत् ॥
महाभादित्रयोगेण नामसंकीर्त्तनोत्सवैः ।
मूलसंपुटितेनैव पवित्राण्यर्पयेत् क्रमात् ॥
वक्ष्यमाणेन मन्त्रेण भक्त्या कृष्णाय वैष्णवः ।
पूजां कृत्वा परीवारदेवानां तान्यथार्पयेत् ॥
अर्पणमन्त्रः ।
कृष्ण ! कृष्ण ! नमस्तुभ्यं गृहाणेदं पवित्रकम् ।
पवित्रकरणार्थाय वर्षपूजाफलप्रदम् ॥
पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ।
शुद्धो भवाम्यहं देव ! तत्प्रसादाज्जनार्द्दन ! ॥
महापूजां ततः कृत्वा स्तुत्वा नत्वार्थयेत् प्रभुम् ।
वनमालां यथा देव ! कौस्तुभं सततं हृदि ॥
तद्वत् पवित्रतन्तूंश्च पूजाञ्च हृदये वह ।
जानताजानतो वापि न कृतं यत्तवार्चनम् ॥
कैनचिद्विघ्नदोषेण परिपूर्णमस्तु मे ॥
अघाग्निं विधिनाभ्यर्च्च पवित्रं तस्य चार्पयेत् ।
क्षणं निवेदयेन्मन्त्रहीन इत्यादिना कृतम् ॥
गुरुञ्च ब्रह्मणा संपूज्य पवित्रं गुरवेऽर्पयेत् ।
वैष्णवेभ्यः पवित्राणि दत्त्वैकं धारयेत् स्वयम् ॥
संपूज्य वैष्णवान् विप्रान् ब्रह्मणा सम्भोज्य बन्धुभिः ।
सभं महाप्रसादार्द्धं सुखं भुञ्जीत वैष्णवः ॥"

अथ पवित्रविसर्ज्जनविधिः । तत्रैव ।

"मासं यत्नमहोरात्रं चिरात्रं धारयेत्तथा ।
देवं तं सूत्रमन्त्रैश्च देशकालानुसारतः ॥
प्रत्यहं स्नानकर्म्मादि सूत्रायुक्तार्थ कारयेत् ।
अभिषिच्याथ नीरेण पुनर्देवं निवेदयेत् ॥
तथान्ते देवमभ्यर्च्च विशेषात् पुण्यचन्दनैः ।
नैवेद्यं विविधं दत्त्वा ततः सूत्रं विसर्ज्जयेत् ॥
ॐ संवत्सरी शुभां पूजां सम्पाद्य विधिवन्मम ।
व्रजेदानीं पवित्र ! त्वं विष्णुलोकं विसर्ज्जितम् ॥
यावद्देवे पवित्राणि तावत्तिष्ठेत् समाहितः ।
ब्रह्मचारी हविष्याशी देवपूजापरायणः ॥
तत्फलञ्चोक्तं बौधायनेन ।
एवं यः कुरुते विद्वान् वर्षे वर्षे न संशयः ।
स याति परमं स्थानं यत्र देवो हृषीकेशः ॥"

अथ तत्र मुख्यगौणकालनिर्णयः ।

"मुख्यकालस्य चैवास्य विघ्नतोपगमे सति ।
भाद्रादावपि कर्त्तव्यं पवित्रारोपणं प्रभोः ॥
तथा च विष्णुरहस्ये ।
श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे ।
द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतम् ॥
सिंहस्थे वा रवौ कार्य्यं कन्यायाञ्च गतेऽथवा ।
तस्यामेव तिथौ सम्यक् तुलासंस्थे कथञ्चन ॥
मन्त्रतन्त्रप्रकाशे च ।
कर्कटञ्च गते सूर्य्ये तथा सिंहगतेऽपि वा ।
द्वादश्यां शुक्लपक्षस्य हरेर्दद्यात् पवित्रकम् ॥
अथ चेद्विघ्नपातेन मुख्यकालो न लभ्यते ।
कन्यागतेऽपि कुर्वीत यावत्तिष्ठति हरिः ॥"

इति हरिभक्तिविलासः ॥

पवित्रारोहणं, क्ली, (पवित्रस्य यज्ञोपवीतस्य आरोहणं सम्पादनं यत्र ।) पवित्रारोपणम् । यथा,—

"आषाढ़शुक्लपक्षस्य याम्यर्क्षे श्रावणस्य च ।
पवित्रारोहणं कुर्य्याद्देवाः प्रीतिकरं परम् ॥
दुर्गातन्त्रेण मन्त्रेण दुर्गाबीजेन भैरव ! ।
वैष्णवीतन्त्रमन्त्रेण पवित्रारोहणञ्चरेत् ॥
विशेषात् श्रावणादेव देव्याः कुर्य्यात् पवित्रकम् ।
सर्व्वेषामपि देवानां पवित्रारोहणञ्चरेत् ॥
आषाढ़े श्रावणे वापि संवत्सरफलप्रदम् ।
प्रतिपद्दिनमारभ्योक्ता पवित्रारोहणे तिथिः ॥
श्रिया देव्या द्वितीयातु तिथीनामुत्तमा तिथिः ॥
तृतीया भवभाविन्याश्चतुर्थी तनयस्य च ॥
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च ।

सप्तमी भास्करस्योक्ता दुर्गायाश्च तथाष्टमी ॥
मातृणां नवमी प्रोक्ता वासुकेर्दशमी स्मृता ।
एकादशी ऋषीणाञ्च द्वादशी चक्रपाणिनः ॥
त्रयोदशी त्वनङ्गस्य मम चैव चतुर्दशी ।
ब्रह्मणो दिक्पतीनाञ्च पौर्णमासी तिथिर्मता ॥
पवित्रारोहणं यो वै देवानां न समाचरेत् ।
तस्य सांवत्सरीपूजाफलं हरति केशवः ॥
तस्मादत्यत्नेन कर्त्तव्यं पवित्रारोहणं परम् ।
कृते बहुफलप्राप्तिस्तत्पूजा सफला भवेत् ॥
पवित्रं येन सूत्रेण यथा कार्य्यं विजानता ।
तत् शृणुष्व प्रमाणञ्च रचनासु च भैरव ! ॥
प्रथमं दर्भसूत्रञ्च पञ्चसूत्रं ततः परम् ।
ततः त्रौमं सुपुण्यं स्यात् कार्पासकमतः परम् ॥
पट्टसूत्रं तथान्येन पवित्राणि न कारयेत् ।
पवित्राणि विचित्राणि कर्त्तव्याणि प्रयत्नतः ॥
गन्धमाल्यैः सुरभिभिरर्चितानि यथोदितम् ॥
कन्या च कर्त्तयेत् सूत्रं प्रमदा वा पतिव्रता ॥
विधवा प्राभृशीला च दुःशीला नहि कर्त्तयेत् ।
यत् सूचिभिन्नं दग्धञ्च भस्मधूमाभिगुण्ठितम् ॥
तद्वर्ज्जयेत यत्नेन सूत्रमस्मिन् पवित्रके ।
उपयुक्तञ्चाक्षुदृष्टं मद्यरक्तादिदूषितम् ॥
मलिनं नीलरक्तञ्च यत्नेन परिवर्ज्जयेत् ।
सूत्रैः पवित्रं कुर्व्वीत कनिष्ठोत्तममध्यमम् ॥
कनिष्ठकं पवित्रन्तु सप्तविंशतितन्तुभिः ।
मर्त्यलोके यशःकीर्त्तिसुखसौभाग्यवर्द्धनम् ॥
चतुःपञ्चाशता प्रोक्तं तन्तूनां मध्यमं परम् ।
दिव्यभोगावहं पुण्यं स्वर्गसौख्यप्रदायकम् ॥
उत्तमञ्चैव तन्तूनामष्टोत्तरशतेन वै ।
तद्दत्त्वा तु महादेवे शिवसायुज्यमाप्नुयात् ॥
उत्तमं वासुदेवाय दद्यादयदि पवित्रकम् ।
तदा याति हरेर्लोकं साधको नात्र संशयः ॥
अष्टोत्तरशतन्तु रत्नमालेति गीयते ।
पवित्रन्तु महादेव्या मुक्तिमुक्तिप्रदायकम् ॥
रत्नमालान्तु यो दद्यान्महादेवे पवित्रकम् ।
कल्पकोटिसहस्राणि स्वर्गे स्थित्वा शिवो भवेत् ॥
एतत्तु नागहाराख्यं शङ्करस्य पवित्रकम् ।
अष्टोत्तरसहस्रेण तन्तूनां सुमनोहरम् ॥
यः प्रयच्छति मन्त्रन्तु स यावान् तन्तुसञ्चयः ।
तावत्कल्पसहस्राणि मम लोके प्रमोदते ॥
अष्टोत्तरसहस्रेण वनमाला हरेः स्मृता ।
तन्तूनां तस्य दानेन विष्णुसायुज्यमाप्नुयात् ॥
यत् कनिष्ठं पवित्रन्तु गाभिमात्रं भवेत्तु तत् ।
ह्रादग्रन्थिसंयुक्तमात्ममानेन योजयेत् ॥
ऊरुप्रमाणं मध्यं स्यात् ग्रन्थीनां तत्र योजयेत् ।
चतुर्विंशतिमध्यस्थ मालामात्मन एव च ॥
पवित्रसूत्तमं प्रोक्तं जानुमात्रञ्च भैरव ! ।
षट्त्रिंशत्तन्तुग्रन्थीनां योजयेदात्ममानतः ॥
शतमष्टोत्तरं कार्य्यं ग्रन्थीनां स्वविधानतः ।
नागहाराख्यं तद्वदर्घेषु च विधानतः ॥
पवित्रं क्रियते येन सूत्रेण ग्रन्थयः पुनः ।
तदन्यवर्णसूत्रेण कर्त्तव्या लक्षणान्विताः ॥
ग्रन्थिन्तु सप्तभिः कुर्य्यादृवेष्टनैस्तु कनिष्ठके ।
द्विगुणैर्मध्यमे कुर्य्यात्त्रिगुणैरुत्तमे तथा ॥
अधिवास्य पवित्राणि पूर्व्वस्मिन्दिवसे पुनः ।
मन्त्रन्यासं पवित्रेषु कुर्य्यात्तच्च परेऽहनि ॥
दुर्गाबीजेन मन्त्रेण मन्त्रन्यासं द्विजश्चरेत् ।
वैष्णवीतन्त्रमन्त्रेण कुर्य्युरन्ये च भैरव ! ॥
प्रतिग्रन्थि स्वयं कुर्य्यान्मन्त्रन्यासं विचक्षणः ॥
अङ्गुष्ठाग्रेण जप्यन्तु मालायामिह भैरव ! ।
यावन्तो ग्रन्थयश्चात्र तावन्त्येव च संन्यसेत् ।
मन्त्राणि तस्य तेन स्यात् देवाङ्गोपनियोजनम् ॥
दुर्गातन्त्रेण मन्त्रेण तत्त्वन्यासन्तु कारयेत् ।
एकत्र न्यस्य सकलं यज्ञपात्रे पवित्रकम् ॥
तस्मिन्निधाय पुष्पाणि गन्धादि च सुशोभनम् ॥
तत्त्वन्यासं ततः कुर्य्यादङ्गन्यायेन भैरव ! ॥
विष्णोस्तु मूलमन्त्रेण तत्त्वन्यासन्तु कारयेत् ।
इदं विष्णुरिति प्रोक्तं मन्त्रन्यासे द्विजस्य हि ॥
शूद्राणां मन्त्रविन्यासे मन्त्रो वै द्वादशाक्षरः ।
प्रासादेन तु मन्त्रेण मन्त्रन्यासो मम स्मृतः ॥
अनेन मन्त्रन्यासन्तु दानञ्चानेन कारयेत् ।
कुङ्कुमोशीरकर्प्पूरैश्चन्दनादिविलेपनैः ॥
पवित्राणि विलिप्याथ तत्त्वन्यासन्तु योजयेत् ।
सम्पूज्य विधिवद्देवीं मण्डले प्रयतो नरः ॥
वैष्णवीतन्त्रमन्त्रेण दुर्गामन्त्रेण भैरव ! ।
दुर्गाबीजेन दद्यात्तु देव्या मूर्द्ध्नि पवित्रकम् ॥
यस्य देवस्य या पूजा तस्य तस्यैव मण्डलम् ।
यस्य यस्य तु यो मन्त्रो यथाध्यानादिपूजनम् ॥
तं देवं तेन भावेन पूजयित्वा प्रयत्नतः ।
तस्यैव बीजमन्त्राभ्यां मूर्द्ध्नि दद्यात् पवित्रकम् ॥
पवित्रं समये दद्याद्वैष्णवस्य पवित्रकम् ।
सर्व्वेषामेव वेदानां सम्पूर्णार्थञ्च भैरव ! ॥
अग्निर्ब्रह्मा भवानी च गजवक्त्रो महोरगः ।
स्कन्दो भानुर्मालगणो दिक्पालाश्च नव ग्रहाः ॥
एषां घटेषु प्रत्येकं पूजयित्वा यथाविधि ।
मूर्द्ध्नि पवित्रमेकैकं दद्यादेभ्यः समाहितः ॥
पञ्चगव्यचरुं कृत्वा देव्यै दत्त्वाहुतित्रयम् ।
तेनैव वह्नये दत्त्वा ग्रामवे च यथाविधि ॥
आज्यैरुत्तरशतं तिलैराज्यैस्तथैव च ।
अष्टोत्तरशतं दद्यान्महादेव्यै च साधकः ॥
एवमेवं विधानेन विष्वादीनाञ्च वैष्णवः ।
पवित्रारोपणं कुर्य्याद्धर्म्मकामार्थसिद्धये ॥
नैवेद्यैर्विविधैः पेयैर्वटपिष्टकमोदकैः ।
कुष्माण्डैर्नारिकेलैश्च खर्ज्जूरैः पनसैस्तथा ॥
आम्रदाडिमकर्कारुक्षीरादिविविधैः फलैः ।
भक्ष्यभोज्यादिभिः सर्व्वैर्मद्यैर्मांसैस्तथोदनैः ॥
गन्धैः पुष्पैस्तथा धूपैर्दीपैश्च सुमनोहरैः ।
वासोभिर्भूषणैश्चैव भवानीं साधको यजेत् ॥
नटनर्त्तकसंघैश्च वेश्याभिरपि भैरव ! ।
वृत्तगीतैः समुदितो जागरं कारयेन्निशि ॥
भोजयेद्ब्राह्मणांश्चापि ज्ञातीनपि द्विजोत्तमैः ।
पवित्रारोहणे वृत्ते दक्षिणासुपदापयेत् ॥
हिरण्यं गां तिलं वासो घृतं वा शाकमेव वा ।
इमं मन्त्रं ततः पश्चात् साधकः समुदीरयेत् ॥
मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।

इयं सांवत्सरी पूजा तवास्तु परमेश्वरि ! ॥
ततो विसर्ज्जयेद्देवीं पूर्व्वभिः प्रतिपत्तिभिः ।
एवं कृते पवित्राणां दाने देव्या यथाविधि ॥
संवत्सरस्य या पूजा सम्पूर्णा वत्स ! जायते ।
कल्पकोटिशतं यावद्देवीगेहे वसेन्नरः ।
अत्रापि सुखसौभाग्यसम्पत्तिरतुला भवेत् ॥"

इति कालिकापुराणे ५८ अध्यायः ॥

गरुड़पुराणे ४२ । ४३ अध्याययोरप्येतद्दृश्यम् ॥

पवित्रितः, त्रि, पवित्रमस्य जात इत्यर्थे तारकादित्वात् इतच्प्रत्ययनिष्पन्नः । तत्पर्य्यायः । पवित्रः २ प्रयतः ३ पूतः ४ शुचिः ५ शुद्धः ६ । इति शब्दरत्नावली ॥

पश्, क वन्धे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पाशयति । इति दुर्गादासः ॥

पश्, श बाधे । अन्धे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट्।) श, पश्यति, पश्यते । बाधो विहतिः । अन्धो अन्धनम् । अन्धस्थाने स्पर्शनं पठन्ति केचित् । इति दुर्गादासः ॥

पश्, तृ क अनुपसर्गाद्बन्धबाधयोः । स्पर्शगत्योः । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) तालशोषधः । पश्यति । अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते । बाधो-विहृतिः । इति दुर्गादासः ॥

पश्यं, त्रि, (पशोरिदं पशवे हितं वा । पशु+यत् ।) पशुसम्बन्धि । इति संक्षिप्तसारव्याकरणम् ॥ (पशुहितकरम् । यथा, याज्ञवल्क्यः । १ । ३२१ ।

"रम्यं पश्यमाजीवं जाङ्गलं देशमावसेत् ॥")

पशुः, पुं, (अविशेषेण सर्व्वं पश्यतीति । दृशिरौ प्रेक्षणे + "अर्च्चिदृशिकम्यमिपंसीति ।" उणा । १ । २८ । इति कुः पश्यादेशश्च ।) अथवा युत्पत्तिर्यथा, "पश्यन्ति पश्यन्ति पार्श्वहस्ताभ्यां हिताहितम् ।" इति भरतः ॥ जन्तुविशेषः । तस्य लक्षणम् । लोमवालाङ्गुलवत्त्वम् । इति भाषारत्ने कणादः ॥ तद्भेदा यथा । सिंहः १ व्याघ्रः २ तरक्षुः ३ वराहः ४ कपिः ५ भल्लूकः ६ खड्गी ७ महिषः ८ शृगालः ९ विड़ालः १० गोधा ११ श्वावित् १२ हरिणः १३ कृष्णसारः १४ रुरुः १५ ऋक्षुः १६ रङ्कुः १७ शम्बरः १८ रौहिषः १९ गोकर्णः २० पृषतः २१ एणः २२ ऋष्यः २३ रोहितः २४ चमरः २५ गन्धर्व्वः २६ शरभः २७ रामः २८ स्मरः २९ गवयः ३० शशः ३१ खड्गाशः ३२ गौः ३३ उष्ट्रः ३४ छागः ३५ मेषः ३६ खरः ३७ हस्ती ३८ अश्वः ३९ । इत्यमरः ॥ * ॥ (यथा, ("पशुः पशूनां दौर्ब्बल्यात् कश्चिन्मर्त्ये शकायते ।
सशस्त्रं शकमासाद्य प्रकृतिं भजते पशुः ॥
तद्वदत्रो भ्रमध्यस्थः कश्चिन्मौख्यैकसाधनः ।
स्थापयत्याशमात्मानमाशन्वासाद्य भिद्यते ॥"

इति चरके सूत्रस्थाने त्रिंशेऽध्याये ॥)

तत्र आरण्यभेदेन चतुर्द्दशविधाः पशवो यथा,

"गौरविरजोऽश्वोऽश्वतरो गर्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः। महिषवानरऋक्षसरीसृपरुरुशुनश्चागश्चेति सप्तारण्याः पशवः॥" इति दुर्गोत्सवतन्त्रे पेटीनसिः॥ * ॥ वैद्यके भूमिष्ठजाङ्गलमेदेन स द्विविधः। तत्र विलशायित्वात् भूमिष्ठा नकुलगोधादयः। तेषां मांसगुणाः। "ग्रहसा भूमिष्ठानूपवारिजा वारिचारिणः। गुरुस्निग्धमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः॥ स्थलजा जाङ्गलाः प्रोक्ता मृगा जङ्गलचारिणः। जाङ्गला हरिणच्छागादयः। तेषां मांसगुणाः। लघवः प्रीतमधुराः सकषाया हिता नृणाम्॥ तेषामवयवादीनां गुणाः। गुरुभक्षा बहुभुजो ये चोपचितमेदसः। एकदेहेऽपि पूर्व्वार्द्धं मृगाणां पक्षिणां परम्॥ सर्व्वेषाञ्च शिरःस्कन्धग्रीवाचर्म्मयकृद्गुदम्। पादपुच्छान्त्रमस्तिष्कमुष्ककक्रोडाः समेहनाः। धातवः श्रोणिताद्याश्च गुरवः स्युः परस्परम्॥" इति राजवल्लभः॥ * ॥ ("तत्र गजगवयमहिषरुरुचमरस्वमररोहितवराहखड्गिगोकर्णकालपुच्छ-कोन्द्रयङ्कुरण्यगवयप्रभृतयः कूलचराः पशवः।" एषां गुणा यथा,— "वातपित्तहरा दृष्या मधुरा रसपाकयोः। स्निग्धा बलिनः स्निग्धा मृदवः कफवर्द्धनाः॥" इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥ "उष्ट्रा गजा वाजिनश्च महिषाः सौरभाजकाः। खरशूकरमेषाश्च श्वा च मार्জ্জারमूषकाः। इत्यते पशवो ज्ञेया ग्रामवासनिवासिनः॥" इति हारीते प्रथमस्थाने एकादशोऽध्याये॥) छागादौ पशुपदप्रयोगमाह यज्ञपार्श्वः। "उष्ट्रो वा यदि वा मेषश्छागो वा यदि वा हयः। पशुस्थाने नियुक्तानां पशुशब्दोऽभिधीयते॥" इति बलिदानप्रकरणे तिथितत्त्वम्॥ * ॥ अवैधपशुहनने दोषो यथा,— "वसेत् स नरके घोरे दिनानि पशुरोमभिः। सम्मितानि दुराचारी यो हन्त्यविधिना पशून्॥" इति गारुड़े ६५ अध्यायः॥ * ॥ पशुधिष्ठात्री देवता यथा,— "सिंहे वसति दुर्गा च गरुडे च प्रजापतिः। एणे च वसते वायुर्मेषे चैव च चन्द्रमाः॥ नक्षत्राणि च गृध्रके कृष्णसारे हरिः स्वयम्। घृतक्रतुर्गवां पृष्ठे गवये भुवनानि च॥ शूकरे मङ्गलाम्बष्ठौ गजे विघ्नगणेश्वरः। अश्वे तु द्वादशादित्या ब्राह्मणे सर्व्वदेवताः॥ ब्रह्मा तु चामरे चैव छागले तु तथानलः। एतस्मात् कारणादेते पूज्या वन्द्याः प्रयत्नतः॥" इति मत्स्यसूक्ततन्त्रे ३६ पटलः॥ * ॥ प्रमथः। देवः। प्राणिमात्रम्। इति शब्दरत्नावली॥ कृषकः। यज्ञः। संसारिणामात्मा। इति धरणिः॥ यज्ञोडुम्बरः। इति शब्दचन्द्रिका॥ * ॥ * ॥ साधकानां भावत्रयाणां प्रथमो भावः। तस्य निरूपो यथा, षष्ठपटले।

"पशुभावस्थितो नाथ! देवतां शृणु विस्तरात्। दुर्गापूजां विष्णुपूजां शिवपूजाञ्च नित्यशः॥ अवश्यं हि यः करोति स पशुरुत्तमः स्मृतः। केवलं शिवपूजाञ्च यः करोति च साधकः॥ पशूनां मध्यतः श्रीमान् शिवया सह मोदते। केवलं वैष्णवो धीरः पशूनां मध्यमः स्मृतः॥ भूतानां देवतानाञ्च सेवां कुर्व्वन्ति सर्व्वदा। पशूनामधमाः प्रोक्ता नरकस्था न संशयः॥ त्वत्सेवां मम सेवाञ्च ब्रह्मविष्णादिसेवनम्। कृत्वान्यसर्व्वभूतानां नायिकानां महाप्रभो!॥ यक्षिणीनां भूतिनीनां ततः सेवां शुभप्रदाम्। यः पशुर्ब्रह्मकृष्णादिसेवाञ्च कुरुते सदा॥ तथा श्रीनारकब्रह्मसेवां ये वा नरोत्तमाः। तेषामसाध्या भूतादिदेवता सर्व्वकामदा॥ वर्জ্জयेत् पशुमार्गेण विष्णुसेवापरो जनः॥" द्वितीयपटले। "नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम्। देवतादर्शनं पीठदर्शनं तीर्थदर्शनम्॥ गुरोराज्ञापालनञ्च देवतानित्यपूजनम्। पशुभावस्थितो मर्त्त्यो महासिद्धिं लभेद्ध्रुवम्॥" षष्ठपटले। "पुनर्भावं पशोरेव शृणुष्वादरपूर्व्वकम्। अकस्मात् सिद्धिमाप्नोति पशुर्नारायणोपमः॥ वैकुण्ठनगरे याति चतुर्भुजकलेवरः। शङ्खचक्रगदापद्महस्तो गरुड़वाहनः॥ महाधर्म्मस्वरूपोऽसौ महाविद्याप्रसादतः। पशुभावं महाभावं भावानां सिद्धिदं परम्॥ आदौ भावं पशोः कृत्वा पश्चात् कुर्य्यादवश्यकम्। वीरभावं महाभावं सर्व्वभावोत्तमोत्तमम्। तत्पश्चादतिसौन्दर्य्यं दिव्यभावं महाफलम्॥ इति रुद्रयामले उत्तरखण्डम्॥ * ॥ तस्य कालो यथा,— "आदौ दशमदण्डेन पशुभावमथापि वा॥" इति तत्रैव। "जन्ममात्रं पशुभावं वर्षषोड़शकावधि॥" इति वामकेश्वरे ५१ पटलः॥ * ॥ पशुभावकर्मत्यागकर्मत्यागभर्त्सनभावनिन्दामाह। "पशुभावरता ये च केवलं पशुरूपिणः। रात्रौ यत्नञ्च मन्त्रञ्च न स्पृशेत् न जपेत् क्वचित्॥ संशयो बलिदाने च तर्पणे च संशयः सदा। मन्त्रे चादरबुद्धिश्च अविश्वासो गुरौ सदा॥ प्रतिमासु शिलाबुद्धिर्भेदको देवते पुनः। निरामिषेण देवेशि! देवताया अपूजनम्॥ अज्ञानेन सदा स्नानं प्रत्यहं देहताड़नम्। सर्व्वेषाञ्चैव निन्दासु यः कुर्य्याच्च महेश्वरि!। स एव पशुभावेन अधमः परिकीर्त्तितः॥" इति रुद्रयामले उत्तरखण्डे ६ पटलः॥ * ॥ "रात्रौ नैव यजेद्देवीं सन्ध्यायां वा पराङ्मुखे। ऋतुकालं विना देवि! रमणं परिवर्জ্জयेत्॥ मांसादिकं महेशानि! त्यजेत् पञ्चसु पर्व्वसु। यदन्यद्वेदविहितं कुर्य्यान्नियमतत्परः॥" इति निर्व्वाणतन्त्रे १ पटलः॥ * ॥

पशूनां व्रतभङ्गप्रायश्चित्तं यथा,— "पशूनां व्रतभङ्गादौ विधिं प्रथमतः शृणु। व्रतभङ्गे नित्यभङ्गे नित्यपूजादिकर्म्मणि। सहस्रं प्रजपेन्मन्त्री व्रतदोषोपशान्तये॥" इति रुद्रयामले उत्तरखण्डे २ पटलः॥

पशु, य, (दृश्यते इति। दृश्+"अर्त्तिदृशीति।" उणा।१।२८। इति भावे कुः पशि-आदेशश्च।) दर्शनम्। इति मेदिनी। शे, १०॥

पशुक्रिया, स्त्री, (पशोरिव क्रिया कार्य्यम्।) मैथुनम्। इति हेमचन्द्रः। ३। २०१॥ (पशुना छागादिजन्तुना क्रिया इति विग्रहे छागादि पशुबलिदानकार्य्यम्। यथा, हरिवंशे।५७।५२। "क्रतानुयाता भूतेभ्यं नित्यं मांसबलिप्रिया। तिथौ नवम्यां पूजाञ्च प्राप्स्यसे सपशुक्रियाम्॥")

पशुगायत्री, स्त्री, (पशुकर्णजप्या गायत्री।) बलिदानीयपशुकर्णजप्यमन्त्रविशेषः। यथा,— पशुकर्णे पशुगायत्रीं जपेत्। सा यथा। "पशुपाशाय विद्महे शिरश्छेदाय धीमहि तन्नः पशुः प्रचोदयात्।" इति दुर्गोत्सवप्रयोगः॥

पशुपतिः, पुं, (पशूनां स्थावरजङ्गमानां पतिः।) शिवः। इत्यमरः। १। १। २२॥ (यथा, महाभारते। १३। १७। १३४। "ऊर्द्धगात्मा पशुपतिर्व्वातरंहा मनोजवः॥" तस्य निरुक्तिर्यथा चिन्तामणिधृतवचने,— "ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्त्तिताः। तेषां पतिर्महादेवः स्मृतः पशुपतिः श्रुतौ॥") अपरा निरुक्तिर्यथा, वराहपुराणे। "अहञ्च सर्व्वविद्यानां पतिराद्यः सनातनः। अहं वै पतिभावेन पशुमध्ये व्यवस्थितः। अतः पशुपतिर्नाम लं लोके ख्यातिमेष्यसि॥" अयं यजमानमूर्त्तिः। यथा। पशुपतये यजमानमूर्त्तये नमः। इत्यष्टमूर्त्तिपूजायां भविष्यपुराणम्॥ (महादेवो हि नेपाले पीठस्थाने पशुपतिरित्याख्यया विराजते। यदुक्तं महालिङ्गेश्वरतन्त्रे शिवस्य शतनामस्तोत्रे,— "नेपाले च पशुपतिः केदारे परमेश्वरः॥")

पशुपल्वलं, क्ली, (पशुप्रियं पल्वलं क्षुद्रजलाशय उत्पत्तिस्थानत्वेनास्यास्य। अच्। पशुप्रियं पल्वलमिवेति केचित्।) कैवर्त्तीमुस्तकम्। इति शब्दचन्द्रिका॥

पशुपाशकः, पुं, (पशूनामिव पाशो बन्धनं यत्र। ततः कप्।) रतिबन्धविशेषः। यथा,— "स्त्रियमानतपूर्व्वाङ्गीं स्वपादान्तःपदद्वयम्। ऊर्द्धांशेन रमेत् कामी बन्धोऽयं पशुपाशकः॥" इति रतिमञ्जरी॥

पशुप्रेरणं, क्ली, (पशूनां प्रेरणम्।) गवादीनां चालनम्। तत्पर्य्यायः। उदजः २। इत्यमरः। ३। २। ३६॥

पशुमोहनिका, स्त्री, (मुह्यतेऽनया। मुह+ल्युट्। स्वार्थे कन् टापि अत इत्वम्। ततः पशूनां मोहनिका।) कट्फीलता। इति राजनिर्घण्टः॥ (कट्फीशब्देऽस्या विशेषो ज्ञेयः॥)

पशुरज्जुः, स्त्री, पशूनामम्बादीनां बन्धनाय रज्जुः। बतपर्य्यायः। दामनी २। इत्यमरः। २।८।७३॥ बन्धनी ३। इति शब्दरत्नावली॥

पशुराजः, पुं, (पशूनां राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति समासान्तष्टच्।) सिंहः। इति शब्दचन्द्रिका॥

पशुहरीतकी, स्त्री, (पशूनां हरीतकीव हितकारित्वात्।) आम्रातकफलम्। इति चिकाण्डशेषः॥

पश्चात्, व्य, (अपरस्मिन् अपरस्मात् अपरो वा वसति आगतो रमणीयं वा। "पश्चात्।" ५। ३। ३२। इति अपरस्य पश्चभाव आतिश्च प्रत्ययोऽस्तातेर्विषये।) प्रतीची। चरमम्। इत्यमरः। ३। ३। २४२॥ (यथा, रघुः। ४।३०।

"प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम्।
ययौ पश्चादनादीति चतुरस्त्वेव वा चमूः॥")

अधिकारः। इति मेदिनी। ते, ३१॥

पश्चात्तापः, पुं, (पश्चात् अग्रतोऽकार्य्ये कृते चरमे तापः।) अनुशोचनम्। चरमे शोकः। पश्चात्ताप इति भाषा। तत्पर्य्यायः। अनुतापः २ विप्रतीसारः ३। इत्यमरः। १। ७। २५॥ (यथा, रामायणे। ३। ५१। ३६।

"उक्तेति परुषं वाक्यं पश्चात्तापसमन्वितः॥"

केचित्तु पश्चात् ताप इति पदद्वयमिच्छन्ति॥)

पश्चार्द्धः, त्रि, (अपरस्मादावर्द्धश्च इति। "अपरस्मार्द्धं पश्चभावो वक्तव्यः।" २। १। ५८। इत्यस्य वार्त्तिं इति पश्चभावः।) शेषार्द्धः। अपरार्द्धः। यथा, शकुन्तलायाम्। १अङ्के।

"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्व्वकायम्॥"

पश्चिमं, त्रि, (पश्चाद्भवम्। "अग्रादिपश्चाद्डिमच्।" ४। ३। २३। इत्यस्य वार्त्तिं इति डिमच्।) पश्चाद्भवम्। इत्यमरः। ३। १।८२॥ (यथा, रघुः। १७। ८।

"तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः।
स्मरन्तः पश्चिमामाज्ञां भर्त्तुः संग्रामयायिनः॥")

पश्चिमा, स्त्री, (पश्चिम+टाप्।) अस्ताचलावच्छिन्नदिक्। तत्पर्य्यायः। प्रतीची२ वारुणी३ प्रत्यक् ४। तद्दिग्भववायुगुणाः।

"पश्चिमो मारुतस्तीक्ष्णः कफमेहविशोषणः।
सद्यः प्राणहरो दुष्टः शोषकारी शरीरिणाम्॥"

इति राजनिर्घण्टः॥

अपिच। राजवल्लभः।

"पश्चिमोऽग्निवपुर्वर्णबलारोग्यविवर्द्धनः।
कषायः शोषणः स्वर्य्यो रोचनो विशदो लघुः॥
अपां लघुत्ववैशद्यशैत्यवैमल्यकारकः।
सर्व्वदर्शव्यभियङ्गप्रभावरसवीर्य्यकृत्॥
व्रणसंरोपणस्त्वच्यो दाहशोथत्रपापहः॥"

तद्दिगधिपतिर्वरुणः। यथा, अमरे। १।३।१।

"इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्।
कुवेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्॥"

तद्दिक्पतयो मिथुनतुलाकुम्भराशयश्च। यथा,

"प्रागादिदिक्कुभान्नाथा यथासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयास्त्रिराशृत्तिं परिभ्रमात्॥"

इति ज्योतिस्तत्त्वम्॥

पश्च, व्य, प्रशंसा। विस्मयः। इति शब्दरत्नावली॥ (पश्चतीति युत्पत्त्या "प्राग्घाभ्याधेट्दृशः शः।" ३। १। १३७। इति शप्रत्ययेन पश्चो वाच्यलिङ्गः। दर्शकः। यथा, सुश्रुतोपनिषदि। ३। १। ३।

"यदा पश्चः पश्यते रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति॥")

पश्यतिकर्म्मा, [न्] पुं, (पश्यतिर्दर्शनमेव कर्म्म यस्य।) दर्शनकर्म्मा। तद्वैदिकपर्य्यायाः। चिक्यात् १ चाकनत् २ आत्तच्म ३ चष्टे ४ विचष्टे ५ विचर्षणिः ६ विश्वचर्षणिः ७ अवचाकशत् ८। इत्यष्टौ पश्यतिकर्म्माणः। इति वेदनिघण्टौ ३ अध्यायः॥

पश्यतोहरः, त्रि, (पश्यन्तं जनमनादृत्य हरतीति। हृञ् हरणे+अच्। "षष्ठी चानादरे।" २। ३। ३८। इति अनादरे षष्ठी। "वाग्दिक्पश्यक्षुग्रो युक्तिदण्डहरेषु।" ६। ३। २१। इत्यस्य वार्त्तिं इति षष्ठ्या अलुक्।) चौरः। यथा, हेमचन्द्रे। ३।४६।

"यः पश्यतो हरेदर्थं स चौरः पश्यतोहरः॥"

पश्यन् [त्], त्रि, (पश्यतीति। दृशिर् प्रेक्षणे+"लटः शतृशानचावप्रथमासमानाधिकरणे।" २।२।१२४। इति शतृ।) ईक्षणकर्त्ता। इति व्याकरणम्॥ (यथा, मार्कण्डेये। ६२। २६।

"इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा।
पश्यतामेव देवानां तत्रैवान्तरधीयत॥")

पश्यन्ती, स्त्री, (पश्यति या दृश्+शतृ+ङीप्। ततः "शप्श्यनोर्नित्यम्।"७।१।८१। इति नुम्।) मूलाधारोत्थितहृदयगतनादरूपवर्णः। यथा,—

"मूलाधारात् प्रथममुदितो यस्तु तारः पराख्यः
पश्चात् पश्यन्त्याथ हृदयगो बुद्धियुग्मध्यमाख्यः॥"

इत्यलङ्कारकौस्तुभः॥

(यथाच,—

"वैखरीशक्तिनिष्पत्तिर्मध्यमा श्रुतिगोचरा।
द्योतितार्था तु पश्यन्ती सूक्ष्मा वागनपायिनी॥"

इति मल्लिनाथधृतवाक्यम्॥

ईक्षणकर्त्री। इति व्याकरणम्॥)

पश्चाचारः, पुं, (पशूनां तत्तदुक्ताधिकारिविशेषाणामाचारः।) आचारविशेषः। यथा,—

"वेदोक्तेन यजेद्देवीं कामसङ्कल्पपूर्व्वकम्।
स एव वैदिकाचारः पश्चाचारः स उच्यते॥"

इत्याचारभेदतन्त्रम्॥

पष, क वन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पाषयति। तालव्यान्त एवायमिति वह्वचः। दन्त्यान्त इति केचित्। मूर्द्धन्यान्तपाठस्तु कस्यचिदशुद्धेरेव। इति दुर्गादासः॥

पष, ञ वाधे। ग्रन्थे। इति कविकल्पद्रुमः॥ (भ्वां-उभं सकं-सेट्।) ञ, पषति पषते। बाधो विहतिः। ग्रन्थो ग्रथनम्। ग्रन्थनस्थाने सूर्द्धन्यं केचित् पठन्ति। इति दुर्गादासः॥

पष, तृ क अनुपसर्गाद्वन्धबाधयोः। सूर्द्धन्यवान्तः। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) मूर्द्धन्योपधः। क, पषयति। अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते। बाधो विहतिः। इति दुर्गादासः॥

पस, इ क नाशे। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) नाशः इह नष्टीकरणम्। इ क, पंसयति पापं गङ्गा। इति दुर्गादासः॥

पस, क बन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पासयति। पृथक्पाठादयं न ञित्। अन्यथा पस कि ञ इत्यनेनैवेष्टसिद्धे पृथक्पाठोऽनर्थकः स्यात्। इति दुर्गादासः॥

पस, ञ वाधे। ग्रन्थे। इति कविकल्पद्रुमः। (भ्वां-उभं-सकं-सेट्।) ञ, पसति पसते। इति दुर्गादासः॥

पस्त्यं, क्ली, (अपस्त्यायन्ति सङ्घीभूय तिष्ठन्ति जीवा यत्र। अप+स्त्यै सङ्घातशब्दयोः+"आतश्चोपसर्गे।" ३। १। १३६। इति कः। उपसर्गस्याकारलोपो निपातनात्।) गृहम्। इति हेमचन्द्रः। ४। ५६॥ (यथा, ऋग्वेदे। १०। ६६। ११। [सूर्य्याय॥"]

प्र पस्त्यमसुर हर्य्यतं गोरावि्ष्कृधि हरये

पङ्कवः, पुं, श्मश्रुधारिम्लेच्छजातिविशेषः। तस्य विवरणं यथा, हरिवंशे। १४। १५—१६।

"सगरस्तां प्रतिज्ञाय गुरोर्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानान्तथैव च॥
पारदाः सुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शकाः यवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलाः सर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः॥
सर्व्वे ते क्षत्रियास्तात! धर्म्मस्तेषां निराकृतः।
वशिष्ठवचनाद्राजन्! सगरेण महात्मना॥"

(क्वचित् पह्लवः पाठोऽपि दृश्यते। यथा, रामायणे। १। ५५। १८।

"तस्या हुम्भारवोत्सृष्टाः पह्लवाः शतशो नृप!।
अनाशयन् बलं सर्व्वं विश्वामित्रस्य पश्यतः॥")

पह्लिका, स्त्री, वारिप्रश्नी। इति शब्दमाला॥

पा, पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) अस्यैव पिबादेशः। पिबति पयः पात्यः। इति दुर्गादासः॥

पा, ल रक्षणे। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अनिट्।) ल, पाति। इति दुर्गादासः॥

पाः, त्रि, (पिबतीति । पा पाने + क्विप् ।) पानकर्त्ता ॥ (पाति रक्षतीति । पा रक्षणे + क्विप् ।) रक्षणकर्त्ता । ("विश्वं पातीति विश्वपाः ।" इति सुग्धबोधव्याकरणम् ॥)

पांशवः, पुं, (पांशोर्लवणविशेषस्य विकारः । पांशु + अण् ।) लवणविशेषः । पाङ्गा लोन इति भाषा ॥ तत्पर्य्यायः । रोमकम् २ औद्भिज्जम् ३ वसुकम् ४ वसुपांशुः ५ ऊषरजम् ६ औषरम् ७ ऐरिणम् ८ औच्चम् ९ सहम् १० । अस्य गुणाः । तीक्ष्णत्वम् । अत्युष्णत्वम् । कटुत्वम् । तिक्तत्वम् । दीपनत्वम् । दाहशोषकरत्वम् । ग्राहित्वम् । पित्तकोपकरत्वञ्च । इति राजनिर्घण्टः ॥

"औद्भिदं पांशुलवणं यज्जातं भूमितः स्वयम् ।
क्षारं गुरु कटु स्निग्धं श्लेष्मलं वातनाशनम् ॥"
इति भावप्रकाशः ॥

पांशुः, पुं, (पंशयति नाशयति आत्मानमिति । पंशि नाशने + "अर्च्चिडिशिकमीति ।" उणां । १ । २८ । इति कुः दीर्घश्च ।) धूलिः । इत्यमरः । २ । ८ । ६८ ॥ (यथा, मनुः । ४ । १०२ ।

"कर्णत्वङ्नेत्रनासाग्रजिह्वाहस्तपदाशनैः ।
स्त्रीषु वर्गाक्षनथायावध्यायञ्च पञ्चभिः ॥")

पूर्म्मार्थचिरसञ्चितगोमयः । सार इति भाषा ॥ इति मेदिनी । शे, ११ ॥ पर्पटः । कर्पूरविशेषः । इति राजनिर्घण्टः ॥ (दन्त्यसकारान्तोऽपि दृश्यते ॥)

पांशुकासीसं, क्ली, (पांसुरिव कासीसम् ।) कासीसम् । इति राजनिर्घण्टः ॥

पांशुकूली, स्त्री, (पांशुना कोलति आकुलीभवतीति । कुल + कः । ततः स्त्रियां ङीष् ।) राजमार्गः । यथा । "रथ्या पांशुकूली भवेत् ।" इति हारावली । ११२ ॥

पांशुकूलं, क्ली, (पांशोः कूलमिव ।) श्मशानपट्टोलिका । यथा, चिकाण्डशेषे ।

"श्मशानं धर्म्मकीलः स्याच्चुकुतिः शूद्रशासनम् ।
पट्टोलिका कूलमकौला पांशुकूलं न कस्यचित् ॥"

पांशुचत्वरः, पुं, (पांशुभिश्चत्वर इव ।) घनोपलः । इति शब्दमाला ॥

पांशुचन्दनः, पुं, (पांशुखिताभस्मरजश्चन्दनमिव यस्य ।) शिवः । इति चिकाण्डशेषः ॥

पांशुचामरः, पुं, (पांशुर्धूलिश्चामर इव यस्य ।) पटवासः । इति जटाधरः ॥ ताँवु इति भाषा ॥ (पांशौ दूर्व्वा चामर इव यस्य ।) दूर्व्वाच्छिततटी भूमिः । वर्द्धापकः । प्रशंसा । पुरोटिः । धूलिगुच्छकः । इति मेदिनी । रे, ३०५ ॥

पांशुजं, क्ली, (पांशोर्जायते इति । पांशु + जन् + डः ।) पांशुलवणम् । पाङ्गा लोन इति भाषा ॥ तत्पर्य्यायः । ऊषम् २ औद्भिदम् ३ । पाक्यम् ४ लवणम् ५ पटु ६ । इति रत्नमाला ॥ अस्य गुणाः । भेदकत्वम् । पाचनत्वम् । पित्तकारित्वम् । इति राजवल्लभः ॥

पांशुपत्रं, क्ली, (पांशुः कर्पूर इव सुगन्धि पत्रमस्य ।) वास्तूकम् । इति शब्दमाला ॥

पांशुमर्द्दनः, पुं, (मृद्यतेऽसाविति । मृद् + ल्युट् । मर्द्दनः । ततः पांशुः मर्द्दनो यत्र । यद्वा पांशोर्मर्द्दनं यत्र ।) केदारः । इति चिकाण्डशेषः ॥

पांशुरः, पुं, (पांशुं चिरसञ्चितगोमयादिकसुत्पत्तित्वेन राति । पांशु + रा + कः ।) दंशकः । डाँश इति भाषा ॥ पीठसर्पी । खड्गः । इति हारावली । १२३ ॥ (पांशुरस्यास्तीति । "नद्यपांशुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य वार्त्तिं इति रः । पांशुविशिष्टे, त्रि ॥ यथा, ऋग्वेदे । १ । २२ । १७ ।

"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांशु(सु)रे ॥")

पांशुरागिणी, स्त्री, (पांशुरागो विद्यतेऽस्याः । इनिः स्त्रियां ङीप् च ।) महामेदा । इति राजनिर्घण्टः ॥

पांशुलः, पुं, (पांशुर्विद्यतेऽस्य । पांशु + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) हरः । पापी । इति शब्दरत्नावली ॥ पुंश्चलः । शम्भोः खड्गाङ्गम् । इति मेदिनी । ले, १०८ ॥ पूतिकः । काँटाकरञ्ज इति भाषा ॥ इति शब्दचन्द्रिका ॥ पांशुयुक्ते त्रि । इति धरणिः ॥ (पांशुर्दोषः पापञ्च तद्युक्ते च त्रि । यथा, रघुः । १२ ।

"तस्याः खुरन्यासपवित्रपांशु
मपांशुलानां धुरि कीर्त्तनीया ।
मार्गं मनुष्येश्वरधर्म्मपत्नी
श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥")

पांशुला, स्त्री, (पांशुल + टाप् ।) कुलटा । भूमिः । इति शब्दरत्नावली ॥ केतकी । रजस्वला । इति राजनिर्घण्टः ॥

पांसनः, त्रि, (पंसयति गुणादिकं नाशयतीति । पंसि + ल्युः । बाहुलकात् दीर्घः ।) दूषकः । इति चिकाण्डशेषः ॥ (यथा, महाभारते । १ । १५४ । ३३ ॥

"निरावाधास्वथि हते मया राक्षसपांसन ! ।
वनमेतच्चरिष्यन्ति पुरुषा वनचारिणः ॥")

पांसुः, पुं, (पंसयतीति । पंसि नाशने + "अर्च्चिडिशिकमीति ।" उणां । १ । २८ । इति कुर्दीर्घश्च ।) धूलिः । (यथा, हैः रामायणे । २ । ८० । ६ ।

"अपरे पूरयन् कूपान् पांसुभिः शुभ्रमायतम् ।
निम्नभागांस्तथैवाशु समांश्चक्रुः समन्ततः ॥")

चिरसञ्चितगोमयम् । इत्युणादिकोषः भरतश्च ॥ सार इति भाषा ॥

पाकः, पुं, (पच् + भावे घञ् ।) पचनम् । क्लेदनम् । तत्पर्य्यायः । पचा २ । इत्यमरः । ३ । २ । ८ ॥ रन्धनम् । स तु सप्तप्रकारो यथा,—

"भर्ज्जनं तलनं स्वेदः पचनं क्वथनं तथा ।
तान्दूरं पुटपाकश्च पाकः सप्तविधो मतः ॥"

भर्ज्जनं केवलपात्रे । तलनं स्नेहद्वये । स्वेदनं अमुक्तापे । पचनं जले । क्वथनं सिद्धद्रव्यरसग्रहणे । तान्दूरं द्वारवद्धतप्तयन्त्रे । पुटपाकः अधोर्द्धाग्नितापे ज्ञेयः । इति पाकराजेश्वरः ॥

स्थालीमार्জ্জনाद्योदनपरीक्षान्तो व्यापारनिचयः पाकः । इति स्मृतिः ॥ * ॥ पाकभाजस्य त्याज्यत्वं यथा,—

"नित्यं नूतनभाजनेन कर्म्मणः पाक एव च ।
अथवा पक्षपर्य्यन्तं ततस्त्याज्यं मनीषिभिः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥

पाककाले शूद्रायाग्निदाननिषेधो यथा,—

"शूद्रायाग्निञ्च यो दद्याद् पाककाले विशेषतः ।
शूद्रापकं भवेदन्नं ब्राह्मणः शूद्रतामियात् ॥"
इति कर्म्मलोचनम् ॥ * ॥

एकोद्दिष्टश्राद्धे तस्य नित्यत्वं यथा,—

"एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम् ।
अभावे पाकपात्राणां तदहःसमुपोषणम् ॥"
इति श्राद्धतत्त्वम् ॥ * ॥

तस्य विधिर्यथा,—

"पूर्व्वाह्णाभिमुखो भूत्वा उत्तराह्णामुखेन वा ।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्জ্জयेत् ॥
अस्माह्णाभिमुखे पक्वमन्नतान्नं विजानता ।
पूर्व्वास्यो धर्म्मकामः श्रीकाङ्क्षानिश्च दक्षिणे ॥
श्रीकामश्चोत्तरमुखे पतिकामश्च पश्चिमे ।
ऐशान्याभिमुखे पक्वा दरिद्रो जायते नरः ॥
यदा तु आयसे पात्रे पक्वमश्नाति वै द्विजः ।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते ॥
ताम्रे पक्वा चक्षुहानिर्मेणौ भवति वै क्षयम् ॥
पित्तघ्यां पक्वमन्नञ्च पित्तरोगेण यज्ञस्विनि ! ।
पुष्करीकस्य यज्ञस्य लभते फलमीप्सितम् ॥
वातुलेन तु यत् पक्वं भगिन्या च कनिष्ठया ।
असगोत्रेण यत् पक्वं श्रोत्रियं तदपि स्मृतम् ॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वन्तथैव च ।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत् ॥
उडुम्बरेण काष्ठेन कदम्बस्य दलेन च ।
शूलेन करमर्द्देन उदरावर्त्तकेन च ॥
पक्वान्नं नैव भुञ्जीत भुक्त्वा रात्रिमुपावसेत् ।
गर्हितान्नमवीरान्नं भुक्त्वा कृच्छ्रं समाचरेत् ।
अप्रजा या तु वनिता नान्नीयादेव तद्गृहे ॥
शूलकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि ।
कलिङ्गातकस्यैव वचावारुणकस्य च ।
भेरण्डशूलालेर्वापि पक्वान्नं गर्हितं स्मृतम् ॥
यदा मृण्मयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथाष्टौ च तत्पाकं विसृजेत् गृही ॥
धनुः पाके तथा सिंहे मिथुने वा वरानने ! ।
यः कुर्य्याद्भोजनं देवि ! कृच्छ्रेणैव विशुध्यति ॥
एकदा तु जलं दद्याद् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत् ॥"
इति मत्स्यसूक्ते ४२ पटलः ॥ * ॥

परिणतिः । (यथा, मार्कण्डेये । ७० । ३४ ।

"स्वकर्म्मफलपाकेन भर्त्तुस्तस्य महात्मनः ।
वियोजिताहं तद्धेतुरयमासीन् निशाचरः ॥"

पिबति स्नान्यादिकं इति । पा पाने + "इगुभीकापाशल्यतिमर्च्चिभ्यः कनू ।" उणां । ३ । ४३ । इति कनू ।) शिशुः । जरसा केशशुक्लिम्नः । स्थाल्यादि । इति मेदिनी । के, २६ ॥

पेचक:। राक्षादि। भङ्ग:। भीति:। इति शब्द-रत्नावली॥ दैत्य:। इति हेमचन्द्र:। २।८८॥ (यथा, भागवते। ७। २। ४।

"भो भो दानवदैतेया! द्विमूर्द्धन्! त्र्यक्ष! शम्बर!। शतवाहो! हयग्रीव! नमुचे! पाक! इल्वल!।" पिबतीति। पा+"इगुपधज्ञाप्रीकिरः कः।" उणा ३। ४३। इति कन्।) पानकर्त्तरि त्रि॥

पाकक्षण:, पुं, (पाके क्षणो यस्य।) क्षण-फलपाक:। पानी आमला। इति शब्द-चन्द्रिका॥

पाकक्षणफल:, पुं, (पाके क्षणं फलं यस्य।) पाकक्षण:। इति शब्दमाला॥

पाकज, क्ली, (पाकात् जायते इति। पाक+ जन्+ड।) काचलवणम्। परिणामशूलम्। इति राजनिर्घण्टः॥ (पाकजाते त्रि। यथा, भाषापरिच्छेदे। ३६।

"स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकज:॥")

पाकपुटी, स्त्री, (पाकाय पुटी।) कुम्भशाला। इति हेमचन्द्र:।४।६६६॥ पोयान् इति भाषा॥

पाकफल:, पुं, (पाकक्षणं फलमस्य।) फलपाक:। इति शब्दचन्द्रिका॥ पानी आमला इति भाषा॥

पाकभाण्डं, क्ली, (पाकाय पाकस्य वा भाण्डम्।) पाकपात्रम्। यथा,—

"यस्य यस्य तु वर्णस्य यदृयत् स्यात्
पक्षिमन्त्यह:।
स तत्र गृहशुद्धिञ्च वस्त्रशुद्धिं करोत्यपि॥
पक्षिमन्त्यह: अशौचान्तदिम्। गृहशुद्धिं प्राक्तनपाकभाण्डत्यागोल्लेपनादिना।" इति शुद्धि-तत्त्वम्॥

पाकमत्स्य:, पुं, (पाक: पाकयुक्तो मत्स्यो यत्र।) मत्स्यव्यञ्जनम्। तत्पर्य्याय:। मत्स्यलम् २। इति शब्दचन्द्रिका॥ (सप्तद्रजातमत्स्य-विशेष:। यथा, सुश्रुते सूत्रस्थाने। ४६ अध्याये। "तिमितिमिङ्गिलकुलिशपाकमत्स्य-निरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहा-मीनराजीवप्रभृतय: सामुद्रा:॥" कीटविशेष:। यथा, सुश्रुते कल्पस्थाने ८ अध्याये।

"पञ्चकीटो दुन्दुभिको मकर: शतपादक:।
पञ्चालक: पाकमत्स्य: क्षुद्रशतुण्डोऽथ गर्दभी॥")

पाकयज्ञ:, पुं, (पाकसाध्यो यज्ञ:। शाकपार्थिव-वत् समास:।) वृषोत्सर्गगृहप्रतिष्ठादीनां होम:। चरुहोमाङ्गककर्म्म। यथा,—

"प्रायश्चित्ते विधुश्चैव पाकयज्ञे तु साहस:॥"
इति तिथितत्त्वम्॥

(ब्रह्मयज्ञादन्ये पञ्चमहायज्ञान्तर्गता वैश्वदेव-होमबलिकर्म्मनित्यश्राद्धातिथिभोजनात्मका-श्चत्वार: पाकयज्ञा:। यथा, मनु:। २। ८६।

"ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विता:।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम्॥"
अष्टकादयोऽपि पाकयज्ञा:। यथा, तत्रैव। २। १४३।

"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान्। य: करोति हुतो यस्य स तस्यत्विगिहोच्यते॥"
"अष्टकादीन् पाकयज्ञान्।" इति तट्टीकायां कुल्लूकभट्ट:॥)

पाकयज्ञिक:, पुं, (पाकयज्ञं करोतीति। पाकयज्ञ +ठञ्।) पाकयज्ञकर्त्ता। (पाकयज्ञस्य व्याख्यान-स्तत्र भवो वा। "क्रतुयज्ञेभ्यश्च।" ४। ३। ६८। इति ठञ्। पाकयज्ञव्याख्यानग्रन्थ:। पाकयज्ञभवश्च। इति व्याकरणम्॥)

पाकरञ्जनं, क्ली, (पाकं पच्यमानं रञ्जयतीति। रञ्ज+णिच्+ल्यु:।) तैलपत्रम्। इति शब्द-चन्द्रिका॥

पाकलं, क्ली, (पाकं लातीति। ला+"आतो-ऽनुपसर्गे क:।"३। २। ३। इति क:।) कुष्ठौ-षधि:। इत्यमर:। २। ४। १२६॥

पाकल:, पुं, (पाक+ला+क:।) कुञ्जरज्वर:। इति मेदिनी। ले, १०८॥ बोधनद्रव्यम्। अनिल:। अनल:। इति विश्व:॥ व्रणादि-कारिणि, त्रि॥

पाकलि:, स्त्री, (पाक+ला+इन्।) वृक्ष-विशेष:। इति रत्नमाला। रोहिणीति केचित्॥

पाकली, स्त्री, (पाकलि+ङीष्।) वार्काटी। इति शब्दमाला॥

पाकशाला, स्त्री, (पाकस्य शाला गृहम्।) रन्धनगृहम्। तत्पर्य्याय:। रसवती २। इति जटाधर:॥ पाकस्थानम्३ महानसम् ४। इत्य-मर:। २। ६। २७॥ अग्निकोणे तस्या: कर्त्तव्यता। यथा,—

"प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयम्।
शयनं याम्यदिग्भागे नैर्ऋत्यां शस्त्रमन्दिरम्॥
प्रतीच्यां भोजनगृहं वायुभागे सभागृहम्।
भाण्डारसदनं सौम्ये त्वैशान्यां देवतालयम्॥"
इति सुदर्शनचिन्तामणिटीकायां
पीयूषधारायां कश्यपवचनम्॥

पाकशासन:, पुं, (शासतीति। शास+ल्यु:। ततः पाकस्य तदाख्यया प्रसिद्धस्य असुरस्य शासन: शासा।) इन्द्र:। इत्यमर:। १।१।४४॥ तन्नाम-कारणं यथा, वामनपुराणे।

"पाकं जघान तीक्ष्णाग्रैर्नखैर्गर्गे: ककुत्वासै:।
तत्र नाम विभुर्लेभे शासनत्वाच्चरेर्ढ ढै:।
पाकशासनता शक्र: सर्व्वामरपतिर्व्विभु:॥"

पाकशासनि:, पुं, (पाकशासनस्यापत्यम्। "अत इञ्।" ४।१। ६५। इति इञ्।) इन्द्रपुत्र:। जयन्त:। इत्यमर:। १। १। ४६॥ (अर्জ্জुन:। यथा, महाभारते। १। १३७। ८।

"सोऽब्रवीन्मेघगम्भीरस्वरेण वदतांवर:।
भ्राता भ्रातरमज्ञातं सावित्र: पाकशासनिम्॥")

पाकशुक्ला, स्त्री, (पाके परिणामे शुक्ला।) खड़ी। यथा, शब्दचन्द्रिकायाम्।

"पाकशुक्ला शिलाधातु: कठिनी कक्खटी खड़ी॥"

पाकस्थानं, क्ली, (पाकस्य स्थानम्।) महानसम्। इत्यमर:। २। ६। २७॥

पाका, स्त्री, (पाक + अजादित्वात् टाप्।) बालिका। इति जटाधर:॥

पाकारि:, पुं, (पाकं ऋच्छतीति। ऋ गतौ+ इन्।) श्वेतकाञ्चनम्। इति रत्नमाला॥

पाकिमं, त्रि, (पाकेन निर्वृत्तम्। पाक+भाव-प्रत्ययान्तादिमप्।) पक्त्रिमम्। पाकेन निष्प-न्नम्। इति त्रिकाण्डशेष:॥ (यथा, सुश्रुते। सूत्रस्थाने। ४६ अध्याये।

"मेदोन्न: पाकिम: क्षारो मूत्रवस्तिविशोधन:॥")

पाकुक:, पुं, (पचतीति। पच पाके+"पचि-नश्योर्गुकनकनुमौ च।" उणा। २। ३०। इति गुकन् कादेशश्च।) सूपकार:। इत्य-मादिकोष:॥

पाक्यं, क्ली, (पक्वतेऽनेन। पच्+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्। "चजो: कुघिण्यतो:।" ७।३।५२। इति कुत्वम्।) विड्लवणम्। इत्यमर:। २। ६। ४२॥ पांशुलवणम्। इति रत्नमाला॥ (यथा, सुश्रुते।१।४२।

"सैन्धवसौवर्चलविड्पाक्यरोमकसामुद्रकपक्त्रिम-यवक्षारोषप्रस्तसुवर्चिकाप्रभृतीनि समासेन लवणो वर्ग:॥" पचनीये, त्रि। यथा, चक्रपाणि-संग्रहे ज्वराधिकारे पित्तज्वरचिकित्सायाम्।

"अवश्यायस्थितं पाक्यमेतत् पित्तज्वरापहम्॥")

पाक्य:, पुं, (पच्+ण्यत् कुत्वञ्च।) यवक्षार:। इत्यमर:। २। ६। १०६॥

पाक्षायण:, त्रि, (पक्षस्यार्धं पक्षे भव: पक्षेण निर्वृत्त इति वा। पक्ष+"युष्मच्छण्कठञिति।" ४। २। ८०। इति फक्।) पक्षसम्बन्धी। पक्षे भव:। इति सिद्धान्तकौमुदी॥

पाक्षिक:, त्रि, (पक्षे तिष्ठतीति। पक्ष+ठक्।) पक्षपाती। यथा,— [पाक्षिक:॥"

"स को राजा न शास्ता य: प्रजावध्वञ्च
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १४ अध्याय:॥
(पक्षिणो हन्तीति। "पक्षिमत्स्यमृगान् हन्ति।" ४। ४। ३५। इति ठक्।) पक्षिघातक:॥ (पक्षे पक्षान्तरे भवतीति। पक्षकालभव:॥ पक्षेण निर्वृत्त इति। पक्ष+ठञ्। पक्षसाध्य:। इति व्युत्पत्तिलब्धोऽर्थ:॥)

पाखण्ड:, पुं, (पातीति। पा+क्विप्। पाखण्डी-धर्म्मस्तं खण्डयतीति। खण्ड़ि भेदने+पचा-द्यच्। यदुक्तम्।

"पालनाच्च त्रयीधर्म्म: पाशब्देन निगद्यते।
तं खण्डयन्ति ते यस्मात् पाखण्डास्तेन हेतुना।
नानाव्रतधरा नानावेशा: पाखण्डिनो मता:॥")

पाखण्ड:। इत्यमरटीकायां भानुदीक्षित:॥

पागल:, पुं, (पा रक्षणं तस्मात् गलति आत्म-रक्षणात् विच्युतो भवतीति। गल्+अच्।) उन्मत्त:। वातुल:। यथा,—

"पागलायाङ्गहीनाय चाण्डाय वधिराय च।
जड़ाय चैव मूर्खाय क्लीवतुल्याय पापिने।
ब्रह्महत्यां लभेत् सोऽपि य: स्वकन्यां ददाति च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्याय:॥

पाचकं, क्ली, (पचतीति। पच्+ण्वुल्। पित्तरसेन भुक्तद्रव्यपचनादस्य तथात्वम्।) पित्तविशेषः। यथा,—
"पाचकं भ्राजकञ्चैव रञ्जकालोचके तथा।
साधकञ्चैव पञ्चेति पित्तनामान्यनुक्रमात्॥"
इति शब्दचन्द्रिका॥
पाचकादीनां स्थानान्याह।
"अम्याशये यकृत्प्लीह्नोर्हृदये लोचनद्वये।
त्वचि सर्व्वशरीरेषु पित्तं निवसति क्रमात्॥"
अथ तेषां कर्म्माण्याह।
"पाचकं पचते भुक्तं शेषाणिवलवद्बलम्।
रसमूत्रपुरीषाणि विरेचयति नित्यशः॥"
इति भावप्रकाशः॥
("पित्तं पक्वात्मकं तत्र पक्वामाशयमध्यगम्।
पञ्चभूतात्मकत्वेऽपि यत्तेजसगुणोदयात्॥
व्यक्तद्रवत्वं पाकादिकर्म्मणानलशब्दितम्।
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा॥
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम्।
करोति बलदानेन पाचकं नाम तत् स्मृतम्॥"
इति वाभटे सूत्रस्थाने द्वादशाध्याये॥)
पाचकः, पुं, (पचतीति। पच्+ण्वुल्।) अग्निः। इति हलायुधः॥ ("तच्चाहारहेतुकेन विशेषेण पक्वामाशयमध्यस्थं पित्तं चतुर्विधमन्नपानं पचति विरेचयति च रसदोषमूत्रपुरीषाणि तत्रस्थमेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य चाग्निकर्म्मणानुग्रहं करोति तस्मिन् पित्ते पाचकोऽग्निरिति संज्ञा।" इति सुश्रुते सूत्रस्थाने एकविंशेऽध्याये॥) त्रि, रूपकारः। पाककर्त्ता। यथा,—
"पुत्रपौत्रगुणोपेतः प्राज्ञश्चो मिष्टपाचकः।
शूरश्च कठिनश्चैव रूपकारः स उच्यते॥"
इति चाणक्यम्॥
अन्नादिपाककारकौषधादिश्च॥
पाचनं, क्ली, (पाच्यतेऽनेनेति। पच्+णिच्+करणे ल्युट्।) प्रायश्चित्तम्। इति मेदिनी। ने, ६०॥ दोषपाचककाथौषधम्। तस्य दानकालः। यथा, सारकौमुद्याम्।
"ज्वरितं षड्हेऽतीते लघुन्नप्रतिभोजितम्।
सप्ताहात् परतोऽस्वेदे सामे स्यात् पाचनं ज्वरे॥"
सर्व्वेषां पाचनद्रव्याणां परिमाणं यथा,—
"दशरक्तिकमाधेयं गृहीत्वा तोलकद्वयम्।
दत्त्वाम्भः षोड़शगुणं ग्राह्यं पादावशेषितम्॥"
इति परिभाषा॥
अथ सर्व्वज्वरे पाचनम्।
"नागरं देवकाष्ठञ्च धान्याकं दृहतीद्वयम्।
दद्यात् पाचनकं पूर्व्वं ज्वरिताय ज्वरापहम्॥"
इति नागरादि॥ १॥
अथ वातिकज्वरे।
"बिल्वादिपञ्चमूलस्य काथः स्याद्वातिकज्वरे॥"
इति बिल्वादिपञ्चमूली॥२॥
"पाचनं पिप्पलीमूलगुडूची विश्वभोऽथवा॥"
इति पिप्पलीमूलादि॥ ३॥
"किरातार्ष्टान्तरोदीच्यदृहतीद्वयगोक्षुरैः।
सश्रिराकलसीबिल्वैः काथो वातज्वरापहः॥"
इति किरातादि॥ ४॥
"राजा दृक्षादनी दारु सरलं सैलवालुकम्।
कषायः शर्करायौद्रयुक्तो वातज्वरापहः॥"
इति राजादि॥ ५॥
"बिल्वादिपञ्चमूली च गुडूच्यामलके तथा।
कुस्तुम्बुरुसमो श्लेष्म कषायो वातिके ज्वरे॥"
इति बिल्वादिपञ्चमूल्यादि॥ ६॥
"पिप्पलीशृङ्गिरिवाद्राक्षाशृतपुष्पाहरेणुभिः।
शृतः कषायः सगुड़ो हन्याच्छ्वसनजं ज्वरम्॥"
इति पिप्पल्यादि॥ ७॥
"गुड़ूची शृङ्गिरिवा द्राक्षा शृतपुष्पा पुनर्नवा।
सगुड़ोऽयं कषायः स्याद्वातज्वरविनाशनः॥"
इति गुड़ूच्यादि॥ ८॥
"द्राक्षागुड़ूचीकाश्मर्य्यशृङ्गायमाणाः सशृङ्गिरिवाः।
निःकाथ्य सगुड़ं काथं पिबेद्वातज्वरापहम्॥"
इति द्राक्षादि॥ ९॥*॥
अथ पैत्तिकज्वरे।
"कलिङ्गं कटफलं सुस्तं पाठातिक्तकरोहिणी।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे॥"
इति कलिङ्गादि॥ १०॥
"सक्षौद्रं पाचनं पैत्ते तिक्ताब्दैरुदयवैः शृतम्॥"
इति तिक्तादि॥ ११॥
"लोध्रोत्पलाब्दतापद्मशृङ्गिरिवाणां सशर्करः।
काथः पित्तज्वरं हन्यादथवा पर्पटोद्भवः॥"
इति लोध्रादि॥ १२॥ १३॥
"पटोलयवनिःकाथो मधुना मधुरीकृतः।
तीव्रपित्तज्वरामर्द्दी पानात्तृड्दाहनाशनः॥"
इति पटोलम्॥ १४॥
"दुरालभापर्पटकप्रियङ्गु-
भूनिम्बवासाकटुरोहिणीनाम्।
जलं पिबेच्छर्करयावगाढं
दृष्ट्वासपित्तज्वरदाहयुक्तः॥"
इति दुरालभादि॥१५॥
"व्योषमाद्या च मधुकं पिप्पलीमूलमेव च।
किराततिक्तकं सुस्तं मधुकं सविभीतकम्॥
सशर्करं पीतमेतत् पित्तज्वरनिबर्हणम्॥"
इति व्योषमाद्यादि॥ १६॥
"शृङ्गीका मधुकं निम्बं कटुकारोहिणीसमाः।
अवश्यायस्थितं पाक्यमेतत् पित्तज्वरापहम्॥"
इति शृङ्गीकादि॥ १७॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः।
किं पुनर्यदि युज्येत चन्दनोदीच्यनागरैः॥"
इति पर्पटकादि॥ १८॥
"विश्वाम्बुपर्पटोशीरधनचन्दनसाधितम्।
दद्यात् सुशीतलं वारि कटुकर्द्दिज्वरदाहजुत्॥"
इति विश्वादि॥ १९॥
"पर्पटाशृतधान्यानां काथः पित्तज्वरं जयेत्॥"
इति पर्पटादि॥ २०॥
"द्राक्षारम्भधयोश्चापि॥ २१॥ काश्मर्य्यस्याथवा पुनः॥ २२॥
द्राक्षाभयापर्पटकान्दतिक्ता-
काथं ससंपाकफलं विदध्यात्।
प्रलापमूर्च्छाभ्रमदाहशोष-
तृष्णान्विते पित्तभवे ज्वरे तु॥"
इति द्राक्षादि॥ २३॥
"घुषितं धन्याकजलं प्रातः पीतं सशर्करैर्पुंसाम्।
अन्तर्दाहं भ्रमयत्यचिरादूरप्ररूढ़मपि॥"२४॥
अथ कफज्वरे।
"मातुलुङ्गग्निफाविश्वव्रन्ताक्षीग्रन्थिकसंयुतम्।
कफज्वरेष्वयं सक्षारं पाचनं वा कणादिकम्॥"
इति मातुलुङ्गादि॥ २५॥
"कटुकं चित्रकं निम्बं हरिद्रेऽतिविषे वचाम्।
कुष्ठमिन्द्रयवं मुर्व्वां पटोलञ्चापि साधितम्॥
पिबेन्मरिचसंयुक्तं सक्षौद्रं श्लेष्मिके ज्वरे॥"
इति कटुकादि॥ २६॥
"निम्बविश्वाम्बुतादारुशृटीभूनिम्बपौष्करम्।
पिप्पल्यौ दृहती चेति काथो हन्ति कफज्वरम्॥"
इति निम्बादि॥ २७॥
"सिन्धुवारदलक्काथं श्लेष्मणं कफजे ज्वरे।
भङ्ग्योश्च बले चीर्णे कर्णे वा पिहिते पिबेत्॥"
इति सिन्धुवारादि॥ २८॥
"आमलक्यभया कृष्णा चित्रकञ्चैत्यथं गवः।
सर्व्वज्वरकफातङ्कभेदी दीपनपाचनः॥"
इति आमलक्यादि॥ २९॥
"त्रिफलापटोलवासाच्छिन्नरुहातिक्तरोहिणी-
षड्ग्रन्थाः॥"
इति त्रिफलादि॥ ३०॥
"मधुनाक्षेभ्रसमृत्थे दशमूली वासकस्य वा
काथः॥"३१॥
"सुस्तं वत्सकबीजानि त्रिफला कटुरोहिणी।
परूषकाणि च काथः कफज्वरविनाशनः॥"
इति सुस्तादि॥ ३२॥*॥
अथ वातपैत्तिकज्वरे।
"संसृष्टदोषेषु हितं संसृष्टमथ पाचनम्॥
विश्वार्ष्टताब्दभूनिम्बैः पञ्चमूलीसमन्वितैः।
शृतः कषायो हन्त्याशु वातपित्तोद्भवं ज्वरम्॥"
इति नवाङ्गम्॥ ३३॥
"त्रिफलाशाल्मलीरास्नाराजवृक्षाट-रूषकैः।
शृतमम्बु हरेत्तूर्णं वातपित्तोद्भवं ज्वरम्॥"
इति त्रिफलादि॥ ३४॥
"किराततिक्तकं सुस्तं द्राक्षामामलकीं शृटीम्।
निष्काथ्य पित्तानिलजे कथितं सगुड़ं पिबेत्॥"
इति किराततिक्तकादि॥ ३५॥
"निदिग्धिकावलारास्नाचायमाणार्ष्टतायुतैः।
मसूरविदलैः काथो वातपित्तज्वरं जयेत्॥"
इति निदिग्धिकादि॥ ३६॥
"गुड़ूची पर्पटं सुस्तं किरातं विश्वभेषजम्।
वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम्॥"
इति पञ्चभद्रम्॥ ३७॥
"मधुकं शृङ्गिरिवे द्राक्षा मधूकं चन्दनोत्पलम्।
काश्मरी पद्मकं लोध्रं त्रिफलां पद्मकेशरम्॥
परूषकं शृतालञ्च व्यत्यस्तुत्तमवारिणि।

मधुलाजसितायुक्तं तत् पीतं युक्तितं निशि ॥
वातपित्तज्वरदाहं तृष्णामूर्च्छावमिभ्रमान् ।
श्रमयेदक्तपित्तञ्च जीमूतानिव मारुतः ॥"
इति मधुकादि ॥ ३८ ॥ * ॥

अथ पित्तश्लैष्मिकज्वरे ।

"पटोलं चन्दनं मुस्तं वातिक्तापाठाम्रतागणः ।
पित्तश्लेष्मानिलच्छर्दिज्वरकण्डूविषापहः ॥"
इति पटोलादि ॥ ३९ ॥

"गुडूचीनिम्बधन्याकं पङ्कं रक्तचन्दनम् ।
एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः ॥
तृष्णासारोचकच्छर्दिपिपासादाहनाशनः ॥"
इति गुडूच्यादि ॥ ४० ॥

"किरातं नागरं मुस्तं गुडूचीञ्च कफाधिके ।
पाठोदीच्यम्रतालेस्तु सह पित्ताधिके पिबेत् ॥"
इति चातुर्भद्रकपाठासप्तकौ ॥ ४१ ॥ ४२ ॥

"गुडूची चन्दनं पङ्कं नागरेन्द्रयवासकम् ।
अभयारग्वधोशीरं पाठा धान्याब्दरोहिणी ॥
कषायं पाययेदेतत् पिप्पलीचूर्णसंयुतम् ।
पित्तश्लेष्महरं तन्द्रापिपासादाहनाशनम् ॥
विषमूत्रानिलविष्टम्भचिदोषप्रभवस्य च ।
गुडूच्यादिगणो ह्येष पाचनो दीपनः परः ॥"
इति गुडूच्यादिगणः ॥ ४३ ॥

"कण्टकार्य्यम्रताभार्गी नागरेन्द्रयवासकम् ।
भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणी ॥
कषायं पाययेदेतत् पित्तश्लेष्मज्वरापहम् ।
दाहतृष्णारुचिच्छर्दिकासहृत्पार्श्वशूलनुत् ॥"
इति कण्टकार्य्यादि ॥ ४४ ॥

"सपत्रपुष्पवासायाः रसः क्षौद्रसितायुतः ।
कफपित्तज्वरं हन्ति सासपित्तं सकामलम् ॥"
इति वासादि ॥ ४५ ॥

"पटोलं पित्तुमर्दञ्च त्रिफला मधुकं बला ।
साधितोऽयं कषायः स्यात् पित्तश्लेष्मभवे ज्वरे ॥"
इति पटोलादि ॥ ४६ ॥

"गुडूचीन्द्रयवारिष्टं पटोलं कटुरोहिणी ।
नागरं चन्दनं मुस्तं पिप्पलीचूर्णसंयुतम् ॥
अम्रताष्टक इत्येष पित्तश्लेष्मज्वरापहः ।
तृष्णासारोचकच्छर्दिदाहनिवारणः ॥"
इति अम्रताष्टकम् ॥ ४७ ॥

"पटोलयवधान्याकमुन्नामलकचन्दनम् ।"
पैत्तिके श्लैष्मपित्तोत्थे ज्वरटट्कर्दिदाहनुत् ॥"
इति पटोलादि ॥ ४८ ॥

क्षुद्राम्रताभ्यां सह नागरेण
सपुष्करैरेति किराततिक्तम् ।
पिबेत् कषायं त्विह पञ्चतिक्तं
ज्वरं निहन्त्यष्टविधं समग्रम् ॥"
इति क्षुद्रादि ॥ ४९ ॥

इति पित्तश्लैष्मिकज्वराधिकारः ॥ * ॥

अथ वातश्लैष्मिकज्वरे ।

"दीपनं कफविच्छेदि वातपित्तानुलोमनम् ।
ज्वरघ्नं पाचनं भेदि ग्रहं धान्यपटोलयोः ॥"
इति धान्यपटोलम् ॥ ५० ॥

"मुस्तनागरभूनिम्बं त्रयमेतत्त्रिकार्धिकम् ।
कफवातप्रशमनं पाचनं ज्वरनाशनम् ॥"५१ ॥

पिप्पली पिप्पलीमूलं चव्यं चित्रकनागरम् ।
दीपनीयः ग्रहो वर्गः कफानिलगदापहः ॥"
इति पञ्चकोलम् ॥ ५२ ॥

"पिप्पलीभिः ग्रहं तोयमनभिष्यन्दि दीपनम् ।
वातश्लेष्मविकारघ्नं ग्लीहज्वरविनाशनम् ॥"
इति पिप्पलीक्वाथः ॥ ५३ ॥

"व्याघ्रग्वधग्रन्थिकमुस्तनिक्ता-
हरीतकीभिः क्वथितः कषायः ।
सामे सशूले कफवातयुक्ते
ज्वरे हितो दीपनपाचनश्च ॥"
इति व्याघ्रग्वधादि ॥ ५४ ॥

"क्षुद्राम्रतानागरपुष्कराह्वयैः
कृतः कषायः कफमारुतोत्तरे ।
सश्वासकासारुचिपार्श्वरुक्करे
ज्वरे चिदोषप्रभवे च शस्यते ॥"
इति क्षुद्रादि ॥ ५५ ॥

"दशमूलीरसः पेयः कणायुक्तः कफानिले ।
अविपाकेऽतितन्द्रायां पार्श्वरुक्श्वासकासके ॥"
इति दशमूलम् ॥ ५६ ॥

"मुस्तं पर्पटकं शुण्ठी गुडूची सदुरालभा ।
कफवातारुचिच्छर्दिदाहश्वासज्वरापहा ॥"
इति मुस्तादि ॥ ५७ ॥

"दारुपर्पटभार्य्यब्दवचाधन्याककट्फलैः ।
साभयाविश्वपूतीकैः क्वाथो हिङ्गुमधूत्कटः ॥
कफवातज्वरे पीतो हिक्काश्वासगलग्रहान् ।
कासप्लीहप्रसेकांश्च हन्यात् तरुमिवाग्निः ॥"
इति दार्व्वादि ॥ ५८ ॥ * ॥

अथ त्रिदोषजज्वरे ।

"पञ्चमूलीकिरातादिर्गणो योज्यस्त्रिदोषजे ।
पित्तोत्कटे च मधुना कणया च कफोत्कटे ॥"
इति चतुर्भद्रपञ्चमूलम् ॥ ५९ ॥

"विल्वश्योणाकगाम्भारीपाटलागणिकारिकाः ।
दीपनं कफवातघ्नं पञ्चमूलमिदं महत् ॥"
इति बृहत्पञ्चमूली ॥ ६० ॥

"शालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम् ।
वातपित्तज्वरहरं कनीयः पञ्चमूलकम् ॥"
इति स्वल्पपञ्चमूली ॥ ६१ ॥

"उभयं दशमूलञ्च सन्निपातज्वरापहम् ।
कासे श्वासे च तन्द्रायां पार्श्वशूले च शस्यते ।
पिप्पलीचूर्णसंयुक्तं कण्ठहृद्ग्रहनाशनम् ॥"
इति दशमूलम् ॥ ६२ ॥

"चिरज्वरे वातकफोल्वणे वा
चिदोषजे वा दशमूलमिश्रः ।
किराततिक्तादिगणः प्रयोज्यः
शुद्ध्यर्थिने वा चिकृता विमिश्रः ॥"
इति चतुर्दशाङ्गम् ॥ ६३ ॥

"दशमूलं शुण्ठी शृङ्गी पौष्करं सदुरालभम् ।
भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी ॥
अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः ।
कासहृल्लासपार्श्वार्त्तिश्वासहिक्कावमीहरः ॥"
इति वातश्लेष्महरोऽष्टादशाङ्गः ॥ ६४ ॥

"भूनिम्बदारुदशमूलमहौषधाब्द-
तिक्तेन्द्रबीजधनिकेभकणाकषायः ।
तन्द्रीप्रलापकसनारुचिदाहमोह-
श्वासादियुक्तमखिलं ज्वरमाशु हन्ति ॥"
इति अष्टादशाङ्गम् ॥ ६५ ॥

"मुस्तपर्पटकोशीरदेवदारुमहौषधम् ।
त्रिफला धन्वयासञ्च नीली कम्मिल्लकं त्रिवृत् ॥
किराततिक्तकं पाठा बला कटुकरोहिणी ।
मधुकं पिप्पलीमूलं मुस्ताद्यो गण उच्यते ॥
अष्टादशाङ्गमुदितमेतद्वा सन्निपातनुत् ।
पित्तोत्तरे सन्निपाते हितश्चोक्तं मनीषिभिः ॥
मन्यास्तम्भ उरोघात उरःपार्श्वशिरोग्रहे ॥
६६ ॥

द्राक्षाम्रता शृटी शृङ्गी मुस्तकं रक्तचन्दनम् ।
नागरं कटुकं पाठा भूनिम्बं सदुरालभम् ॥
उशीरं पङ्कं धान्यं बालकं कण्टकारिका ।
पुष्करं पित्तुमर्दञ्च दशाष्टाङ्गमिदं शुभम् ॥
जीर्णज्वरारुचिश्वासकासश्वयथुनाशनम् ॥"
इति अपराष्टादशाङ्गम् ॥ ६७ ॥

"शृटी पुष्करमूलञ्च व्याघ्री शृङ्गी दुरालभा ।
गुडूची नागरं पाठा किरातं कटुरोहिणी ॥
एष शृण्यादिको वर्गः सन्निपातज्वरापहः ।
कासहृद्ग्रहपार्श्वार्त्तिश्वासे तन्द्राञ्च शस्यते ॥"
इति शृण्यादि ॥ ६८ ॥

"हृद्दलौ पुष्करं भार्गी शृटी शृङ्गी दुरालभा ।
वत्सकस्य च बीजानि पटोलं कटुरोहिणी ॥
हृद्दल्यादिगणः प्रोक्तः सन्निपातज्वरापहः ।
कासादिषु च सर्व्वेषु हितः सोपद्रवेषु च ॥"
इति हृद्दल्यादिगणः ॥ ६९ ॥

"भार्गी पुष्करमूलञ्च राज्ञाविल्वयमानिकाः ।
नागरं दशमूलञ्च पिप्पलीद्वाशु साधयेत् ॥
सन्निपातज्वरे देयं हृत्पार्श्वानाहशूलिनाम् ।
कासश्वासाग्निमान्द्यञ्च तन्द्राञ्च विनिवर्त्तयेत् ॥"
इति भार्ग्यादि ॥ ७० ॥

"द्विपञ्चमूली षड्ग्रन्था विश्वशृङ्गनखीद्वयम् ।
कफवातहरः क्वाथः सन्निपातहरः परः ॥"
इति द्विपञ्चमूल्यादि ॥ ७१ ॥

"कारवीपुष्करैरण्डत्रायन्तीनागरास्रताः ।
दशमूलीशृटीशृङ्गीयासभार्गीपुनर्नवाः ॥
तुल्या सर्व्वेश निष्क्वाथ्य पीतश्चोत्तिशोधनः ।
अभिन्यासं ज्वरं घोरमाशु हन्ति समुद्भतम् ॥"
इति दशमूलाद्यादि ॥ ७२ ॥

"मातुलुङ्गाम्लभिङ्गिक्षयाव्रीपाठोरुवूकजः ।
क्वाथो लवणमूत्राढ्योऽभिन्यासानाहशूलनुत् ॥"
इति मातुलुङ्गादि ॥ ७३ ॥

"कण्टरोधकफश्वासहिक्कासंन्यासपीडितः ।
मातुलुङ्गार्द्रकरसं दशमूलाम्भसा पिबेत् ॥"
इति मातुलुङ्गार्द्रकरसयुक्तदशमूलम् ॥ ७४ ॥

"योवान्द्विपलातिक्तापटोलारिष्टवासकैः ।
भूनिम्बाम्रतयासैश्च चिदोषज्वरनुत् जलम् ॥"
इति योवादि ॥ ७५ ॥

"चित्रद्विप्रालात्रिफलाकटुकारग्वधैः कृतः ।

सहारो भेदनः क्वाथः पेयः सर्व्वज्वरापहः ॥"
इति चित्रकादि ॥ ७६ ॥
अथ जीर्णज्वरे ।
"निदिग्धिकानागरकाम्बतानां
क्वाथं पिबेन्मिश्रितपिप्पलीकम् ।
जीर्णज्वरारोचककासशूल-
श्वासाग्निमान्द्यार्दितपीनसेषु ॥
हन्ताऽईगामयं प्रायः सायं तेनायमिष्यते ॥"
इति निदिग्धादि ॥ ७७ ॥
"पिप्पलीचूर्णसंयुक्तः क्वाथश्चिन्नरुहोद्भवः ।
जीर्णज्वरकफध्वंसी पञ्चमूलीकृतोऽथवा ॥
कासाजीर्णारुचिश्वासच्छर्दि पाण्डुक्रिमिरोगनुत् ॥ ७८ ॥
इति जीर्णज्वराधिकारः ॥ * ॥
अथ सन्तताद्विज्वरे ।
"मधुकं चन्दनं मुस्तं धात्री धान्यमुशीरकम् ।
क्विन्नोद्भवा पटोलश्च क्वाथं समधुशर्करम् ॥
ज्वरं पञ्चविधं हन्यात् सन्तताद्यं सुदारुणम् ।
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ॥
आमं विपाचयत्याशु निरामं शमयत्यपि ॥"
इति मधुकाद्यम् ॥७६॥
"कलिङ्गकाः पटोलस्य पत्रं कटुकरोहिणी ॥८०॥
पटोलं शारिवामुस्तं पाठा कटुकरोहिणी ॥८१॥
निम्बं पटोलं त्रिफला गुडूचीकां मुस्तवत्सकौ ॥
॥ ८२ ॥
किराततिक्तमृद्वीका चन्दनं विश्वभेषजम् ॥८३॥
गुडूच्यामलकं मुस्तम् ८४ अर्द्धश्लोकसमापनाः ।
कषायाः शमयन्त्याशु पञ्च पञ्चविधान् ज्वरान् ॥
सन्ततं सततान्येद्युस्तृतीयकचतुर्थकान् ।
गुडूचीमुस्तधात्रीणां कषायंवा समाक्षिकम् ॥
मुस्तामलकगुडूचीविश्वौषधकण्टकारिकाक्वाथः।
पीतः सकणाचूर्णः समधुर्व्विषमज्वरं हन्ति ॥"
इति मुस्तादि ॥ ८५ ॥ * ॥
अथ तृतीयकज्वरे ।
"महौषधाम्बतामुस्तचन्दनोशीरधान्यकैः ।
क्वाथस्तृतीयकं हन्ति शर्करामधुयोजितः ॥"
इति महौषधादि ॥ ८६ ॥
अथ चातुर्थकज्वरे ।
"वासाधात्रीस्थिरादारुपथ्यानागरसाधितः ।
सितामधुयुतः क्वाथश्चातुर्थकनिवारणः ॥"८७ ॥
इति ज्वराधिकारः ॥ * ॥
अथ ज्वरातीसारे ।
"पाठेन्द्रयवभूनिम्बमुस्तपर्पटकान्टताः ।
जयन्त्याममतीसारं सज्वरं समहौषधाः ॥"
इति पाठादि ॥ ८८ ॥
"नागरातिविषामुस्तभूनिम्बाम्बतवत्सकैः ।
सज्वरहरः क्वाथः सर्व्वातीसारनाशनः ॥"
इति नागरादि ॥ ८९ ॥
"ह्रीवेरातिविषामुस्तविल्वधान्यकनागरैः ।
पिबेत् पिच्छाविबन्धघ्नं शूलदोषामपाचनम् ॥
सरक्तं हन्त्यतीसारं सज्वरं वाथ विष्वरम् ॥"
इति ह्रीवेरादि ॥ ९० ॥
"गुडूच्यतिविषाधान्यमुस्तोवित्वाम्बवालकैः ।
पाठाभूनिम्बकुटजचन्दनोशीरपद्मकैः ॥
कषायः शीतलः पेयो ज्वरातीसारशान्तये ।
तृष्णासारोचकच्छर्द्दिपिपासादाहनाशनः ॥"
इति गुहगुडूच्यादि ॥ ९१ ॥
"उशीरं वालकं मुस्तं धान्याकं विश्वभेषजम् ।
समङ्गा धातकी लोध्रं बिल्वं दीपनपाचनम् ॥
हन्त्यरोचकपिच्छामं विबन्धं सातिवेदनम् ।
सशोणितमतीसारं सज्वरं वाथ विष्वरम् ॥"
इति उशीरादि ॥ ९२ ॥
"पञ्चमूलीबलाबिल्वगुडूचीमुस्तनागरैः ।
पाठाभूनिम्बह्रीवेरकुटजत्वक्फलैः शृतम् ॥
हन्ति सर्व्वानतीसारान् ज्वरदोषं वमिं तथा ।
सशूलोपद्रवं श्वासं कासं हन्यात् सुदारुणम् ॥"
इति पञ्चमूल्यादि ॥ ९३ ॥
"कलिङ्गातिविषाशुण्ठीकिराताम्बुवासकम् ।
ज्वरातिसारसन्तापं नाशयेदविकल्पतः ॥"
इति कलिङ्गादि ॥ ९४ ॥
"वत्सकस्य फलं दारु रोहिणी गजपिप्पली ॥"
इति वत्सकादि ॥ ९५ ॥
"श्वदंष्ट्रा पिप्पलीधान्यं बिल्वं पाठायमानिका॥"
इति श्वदंष्ट्रादि ॥ ९६ ॥
"द्वावपेतौ सिद्धियोगौ श्लोकार्द्धेनाभिधायितौ ।
ज्वरातीसारशमनौ विशेषाद्दाहनाशनौ ॥
नागराम्बतभूनिम्बबिल्ववालकवत्सकैः ।
ससुस्तातिविषोशीरैर्ज्वरातीसारमुज्वलम् ॥"
इति नागरादि ॥ ९७ ॥
"मुस्तकबिल्वातिविषापाठाभूनिम्ब-
वत्सकैः क्वाथः ।
मकरन्दगर्भयुतो ज्वरातिसारौ जयेद्घोरौ ॥"
इति मुस्तकादि ॥ ९८ ॥
"घनजलपाठातिविषापथ्योत्पलधान्य-
रोहिणीबिल्वैः ।
सेन्द्रयवैः शृतमम्भः सातीसारं ज्वरं जयति ॥"
इति घनादि ॥ ९९ ॥
"दशमूलीकषायेण बिल्वमज्जसमं पिबेत् ।
ज्वरे चैवातिसारे च सशोथे ग्रहणीगदे ॥"
इति दशमूलशुण्ठी ॥ १०० ॥
"किराताम्बाम्बतावित्वचन्दनोदीच्यवत्सकैः ।
शोथातीसारशमनं विशेषात् ज्वरनाशनम् ॥"
इति किरातादि ॥ १०१ ॥
इति ज्वरातीसाराधिकारः ॥ * ॥
अथातीसारे ।
"धान्यकं नागरं मुस्तं वालकं बिल्वमेव च ।
आमशूलविबन्धघ्नं पाचनं वह्निदीपनम् ॥"
इति धान्यपञ्चकम् ॥ १०२ ॥
"इदं धान्यचतुष्कं स्यात् पैत्तिं शुण्ठीं विना पुनः ॥"
इति धान्यचतुष्कम् ॥ १०३ ॥
"कचटदाडिमजम्बुश्लक्ष्णाटकपञ्चबिल्वह्रीवेरम् ।
जलधरनागरसहितं गङ्गाम्भसि पेचिगर्नी रुन्ध्यात्॥
इति कचटादि ॥ १०४ ॥
"किराततिक्तकं मुस्तं वत्सकं सरसाञ्जनम् ।
पिबेत् पित्तातिसारघ्नं सक्षौद्रं वेदनापहम् ॥"
इति किराततिक्तकादि ॥ १०५ ॥
"कुटजत्वक्फलं मुस्तं क्वाथयित्वा जलं पिबेत् ।
अतीसारं जयेदाशु शर्करामधुयोजितम् ॥"
इति कुटजादि ॥ १०६ ॥
"बिल्वचूताश्मनिर्यूहः पीतः सक्षौद्रशर्करः ।
निहन्याच्छर्द्यतीसारं वैश्वानर इवाहुतिम् ॥"
इति बिल्वादिक्वाथः ॥ १०७ ॥
"पटोलयवधान्याकक्वाथः पेयः सुशीतलः ।
शर्करामधुसंमिश्रश्छर्द्यतीसारनाशनः ॥"
इति पटोलादिक्वाथः ॥ १०८ ॥
"कुटजं दाडिमं मुस्तं धातकी बिल्ववालकम् ।
लोध्रचन्दनपाठाश्च कषायं मधुना पिबेत् ॥
सामे सशूले रक्ते च पिच्छासावे च शस्यते ।
कुटजादिरिति ख्यातः सर्व्वातीसारनाशनः ॥"
इति कुटजादि ॥ १०९ ॥
"समङ्गातिविषा मुस्तं बिल्वं ह्रीवेरधातकी ।
कुटजत्वक् फलं विश्वं क्वाथः सर्व्वातिसारनुत्॥"
इति समङ्गादि ॥ ११० ॥
"कुटजत्वकृतक्वाथो घनीभूतः सुशोभनः ।
लोहितोऽतिविषायुक्तः सर्व्वातीसारनाशनः ॥"
इति कुटजक्वाथः ॥ १११ ॥
"सवत्सकः सातिविषः सबिल्वः
सोदीच्यमुस्तैश्च कृतः कषायः ।
सामे सशूले सह शोणिते च
चिरप्रवृत्तेऽपि हितोऽतिसारे ॥"
इति वत्सकादि ॥ ११२ ॥
"कषायो मधुना पीतस्त्वचो दाडिमवत्सकात् ।
सद्यो जयेदतीसारं सरक्तं दुर्निवारणम् ॥"
इति कुटजदाडिमम् ॥ ११३ ॥ * ॥
अथ ग्रहण्याम् ।
"ग्रहणीमाश्रितं दोषमतीसारवदाचरेत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
नागरातिविषामुस्तक्वाथः स्यादामपाचनः ॥"
इति नागरादि ॥ ११४ ॥ * ॥
अथाग्निमान्द्ये ।
"विश्वाभयागुडूचीनां कषायेण षडङ्गणम् ।
पिबेत् श्लेष्मणि मन्देऽग्नौ त्वक्पत्रसुरभीकृतम् ॥
पञ्चकोलं समरिचं षडङ्गणमुदाहृतम् ॥"
इति षडङ्गणविश्वादि ॥ ११५ ॥ * ॥
अथामाजीर्णे ।
"धान्यनागरसंसिद्धं तोयं दद्याद्विचक्षणः ।
आमाजीर्णप्रशमनं दीपनं वस्तिशोधनम् ॥"
इति धान्यशुण्ठी ॥ ११६ ॥ * ॥
अथ पाण्डुरोगे ।
"फलत्रिकाम्बतावासातिक्ताभूनिम्बनिम्बजः ।
क्वाथः क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम्॥"
इति फलत्रिकादि ॥ ११७ ॥ * ॥
अथ रक्तपित्ते ।
"जलं खर्ज्जूरमृद्वीकामधुकैः सपरूषकैः ।
शृतशीतं प्रयोक्तव्यं तर्पणार्थं सशर्करम् ॥"
इति खर्ज्जूरादिजलम् ॥ ११८ ॥ * ॥

अथ राजयक्ष्मणि ।
"धन्याकपिप्पलीविश्वदशमूलीजलं पिबेत् ।
पार्श्वशूलज्वरश्वासपीनसादिनिवृत्तये ॥"
इति धन्याकादि ॥ ११९ ॥
"अश्वगन्धाष्टताभीरुदशमूलीबलात्रयाः ।
पुष्करातिविषे भूनिम्ब चयं क्षीररसाशिनः ॥"
इति अश्वगन्धादि ॥ १२० ॥
"दशमूलबलाराम्नापुष्करसुरदारुनागरैः क्वथितम् ।
पेयं पार्श्वांसशिरोरुक्कृच्छ्रकासादिशान्तये
सलिलम् ॥"
इति दशमूलादि ॥ १२१ ॥
इति राजयक्ष्माधिकारः ॥ * ॥
अथ कासे ।
"पञ्चमूलीक्वतः क्वाथः पिप्पलीचूर्णसंयुतः ।
रसाञ्जनमयो नित्यं वातकासमुदस्यति ॥"
इति पिप्पलीचूर्णयुक्तपञ्चमूली ॥ १२२ ॥
"पौष्करं कट्फलं भार्गी पिप्पलीविश्वसाधितम् ।
पिबेत् क्वाथं कफोद्रेके कासे श्वासे च दुर्दुरे ॥"
इति पौष्करादि ॥ १२३ ॥
"पिप्पलीचूर्णसंयुक्तं दशमूलीजलं पिबेत् ॥"
इति पिप्पलीचूर्णयुक्तदशमूली ॥ १२४ ॥
"कट्फलं कण्टकं भार्गी सुरसं धान्यं वचाभया ।
शृङ्गी पर्पटकं मुस्ता सुराह्वश्च जले श्रुतम् ॥
मधुच्छिन्नयुतं पेयं कासे वातकफात्मके ।
कण्ठरोगे मुखे शूले श्वासहिक्काज्वरेषु च ॥"
इति कट्फलादि ॥ १२५ ॥
"कण्टकारीकृतः क्वाथः सक्षारः सर्वकासहा ॥"
इति कण्टकारीक्वाथः ॥ १२६ ॥
इति कासाधिकारः ॥ * ॥
अथ हिक्कायाम् ।
"अष्टानागरधान्याग्नीपर्णीशृङ्गीसाधितक्वाथः ।
पीतः सक्षणाचूर्णः कासश्वासौ जयत्याशु ॥"
इति अष्टादि ॥ १२७ ॥
"दशमूलीकषायस्तु पुष्करेणावचूर्णितः ।
कासश्वासप्रशमनः पार्श्वहृच्छूलनाशनः ॥"
इति कुष्ठचूर्णयुक्तदशमूली ॥ १२८ ॥
"कुलत्थनागरव्याघ्रीवासाभिः क्वथितं जलम् ।
पीतं पुष्करसंयुक्तं हिक्काश्वासनिवारणम् ॥"
इति कुलत्थादि ॥ १२९ ॥
"शृङ्गीमहौषधक्वाथघनपौष्करचूर्णां
शुण्ठीमरिचशुद्धशर्करया विमिश्रयम् ।
क्वाथेन पीतमसृताहृषपञ्चमूल्याः
श्वासं चाहेश्च विनिहन्त्यतिदोषसूयम् ॥"
इति शृङ्गादि ॥ १३० ॥
इति हिक्काश्वासाधिकारः ॥ * ॥
अथ छर्द्याम् ।
"कषायो भृष्टसुस्तस्य सलाजमधुशर्करः ।
निहन्याच्छर्दितीसारं वैश्वानर इवाकृतिम् ॥"
इति भृष्टसुस्तकषायः ॥ १३१ ॥
"गुडूचीचिफलारिष्टपटोलैः क्वथितं पिबेत् ।
क्षौद्रयुक्तं निहन्त्याशु छर्दिं पित्तास्रसम्भवाम् ॥"
इति गुडूच्यादि ॥ १३२ ॥
"काथः पर्पटजः पीतः सक्षौद्रश्छर्दिनाशनः ॥"
इति पर्पटकाथः ॥ १३३ ॥
"क्वतं गुडूच्या विधिवत् कषायं हिमसंस्थितम् ।
तिरुच्यपि भवेत् पथ्यं मात्रिकेण समायुतम् ॥
दध्यादापोथितात्तोये प्रतप्ते निशि संस्थितात् ।
कषायो योऽभिनिर्याति स पीतः ससुदाहृतः ॥"
इति गुडूचीपीतकषायः ॥ १३४ ॥
"श्रीफलस्य गुडूच्या वा कषायो मधुसंयुतः ।
पेयश्छर्दिहरे पीतो दूर्वा वा तण्डुलाम्बुना ॥"
इति बिल्वमूलगुडूचीकषायौ ॥ १३५ ॥
"जम्ब्वाम्रपल्लवग्रवेधुकधान्यसेव्य-
क्षीरेक्षुवारि पिबतो मधुनाल्पमल्पम् ।
छर्दिः प्रयाति शमनं त्रिसुगन्धियुक्ता
लीढ़ा निहन्ति मधुनाथ दुरालभा वा ॥"
इति जम्ब्वादिवारि ॥ १३६ ॥
इति छर्द्यधिकारः ॥ * ॥
अथ मूर्च्छायाम् ।
"महौषधाष्टताच्चौद्रं पौष्करं ग्रन्थिकोद्भवम् ।
पिबेत् कषायुतं क्वाथं मूर्च्छा येषु गदेषु च ॥"
इति महौषधादि ॥ १३७ ॥
"पिबेद्दुरालभाक्वाथं सक्षतं भ्रमशान्तये ॥"
इति दुरालभाक्वाथः ॥ १३८ ॥
इति मूर्च्छाधिकारः ॥ * ॥
अथोन्मादे ।
"दशमूलाम्बु सक्षतं युक्तं मांसरसेन वा ।
ससिद्धार्थकचूर्णं वा पुराणं वैकृतं घृतम् ॥"
इति घृतादियुक्तदशमूलम् ॥ १३९ ॥ * ॥
अथापस्मारे ।
"क्षुत्कम्पोऽधिरजा यस्य खेदो हृल्लासादि-
ग्लानता ।
दशमूलीजलं तस्य कल्याणाद्यञ्च योजयेत् ॥"
इति दशमूलीकल्याणघृतौ ॥१४०॥*॥
अथ वातरोगे ।
"पञ्चमूलीकृतः क्वाथो दशमूलीकृतोऽथवा ।
रूक्षः स्नेहक्षया नस्यं मन्यास्तम्भे प्रशस्यते ॥"
इति पञ्चमूली-दशमूलीकाथौ ॥ १४१ ॥
"अर्दिते नवनीतेन खादेन्माषेऽक्षवीं नरः ।
क्षीरमांसरसैर्भुक्त्वा दशमूली जलं पिबेत् ॥"
इति दशमूली ॥ १४२ ॥
"माषबलाशुकशिम्बाकृष्णराम्नाश्वगन्धो-
रुबूकाणाम् ।
क्वाथो नस्यनिपीतो रामठलवणान्वितः कोष्णः ॥
अपहरति पक्षवातं मन्यास्तम्भं सकर्ण-
नादरुजम् ।
दुर्ज्जयमर्दितवातं सप्ताहाज्जयति चावश्यम् ॥"
इति माषबलादि ॥ १४३ ॥
"दशमूलीबलामाषक्वाथं तैलाज्यमिश्रितम् ।
सायं भुक्त्वा पिबेन्नस्यं विश्वश्यामवबाहुके ॥"
इति दशमूल्यादि ॥ १४४ ॥
"माषात्मगुप्तकैरण्डवाग्वालकश्रुतं पिबेत् ।
हिङ्गुसैन्धवसंयुक्तं पक्षाघातनिवारणम् ॥"
इति माषादि ॥ १४५ ॥
"वातघ्नैर्दशमूल्या च नरं कुलत्थपाचरेत् ॥"
इति वातघ्नगणदशमूलीकषायौ ॥ १४६ ॥
"दशमूली बला रास्ना गुडूची विश्वभेषजम् ।
पिबेदेरण्डतैलेन गृध्रसीखञ्जपङ्गुषु ॥"
इति एरण्डतैलयुक्तदशमूल्यादि ॥ १४७ ॥
"श्रेफालिकादलक्वाथो रुद्रजिप्पलिसाधितः ।
दुर्ज्जयं गृध्रसीरोगं पीतमात्रं समुद्धरेत् ॥"
इति श्रेफालीक्वाथः ॥ १४८ ॥
"पञ्चमूलीकषायस्तु रवृतैलविमिश्रितम् ।
चिरुतैर्वाथवा युक्तं गृध्रसीगुल्मशूलनुत् ॥"
इति एरण्डतैलयुक्तपञ्चमूली ॥ १४९ ॥
"दशमूलीकषायेण पिबेद्वा नागरामसा ।
कटीमूलेषु सर्व्वेषु तैलमेरण्डसम्भवम् ॥"
इति एरण्डतैलयुक्तदशमूलीशुण्ठीक्वाथौ ॥१५०॥
"गुग्गुलुं क्रोष्टुशीर्षे तु गुडूचीं चिफलामसा ।
क्षीरेक्षुरण्डतैलं वा पिबेद्वा रुद्रदारुकम् ॥"
इति गुग्गुलुयुक्तगुडूचीचिफलाक्वाथः ॥१५१॥
इति वातव्याध्यधिकारः ॥ * ॥
अथ वातरक्ते ।
"अष्टानागरधान्याकवर्षाभूवेषु पाचनकं सिद्धम् ।
जयति सरक्तं वातं सामं कुष्ठान्यग्नीषणि ॥"
इति अष्टादि ॥ १५२ ॥
"वत्सादनीयुद्भवः क्वाथः पीतो गुग्गुलुसंयुतः ।
समीरणसमायुक्तं शोणितं संप्रधावयेत् ॥"
इति वत्सादनीक्वाथः ॥ १५३ ॥
"वासागुडूचीं चतुरङ्गुलानां-
मेरण्डतैलेन पिबेत् कषायम् ।
क्रमेण सर्व्वाङ्गजमर्थशेषं
जयेदहन्यातभवं विकारम् ॥"
इति वासादि ॥ १५४ ॥
"लीढ़ा सुखितिकाचूर्णं मधुसर्पिःसमन्वितम् ।
छिन्नाकाथं पिबन् हन्ति वातरक्तं सुदुस्तरम् ॥"
इति गुडूचीक्वाथः ॥ १५५ ॥
"तिक्तोऽथवा पञ्चगुणेन पथ्या
जग्ध्वा पिबेच्छिन्नरुहाकषायम् ।
सवातरक्तं शमयत्युदीर्ण-
मामाशयुसंस्रव निहन्त्यवश्यम् ॥"
इति गुडूचीकषायः ॥ १५६ ॥
इति वातरक्ताधिकारः ॥ * ॥
अथोरुस्तम्भे ।
"शिलाजतुं गुग्गुलुं वा पिप्पलीमथ नागरम् ।
ऊरुस्तम्भे पिबेच्चूर्णैर्दशमूलीरसेन वा ॥"
इति शिलाजत्वादियुक्तदशमूली ॥ १५७ ॥
"भल्लातकाष्टताशुण्ठीदारुपथ्यापुनर्नवाः ।
पञ्चमूलीद्वयोन्मिश्रा ऊरुस्तम्भनिवारणाः ॥"
इति भल्लातकादि ॥ १५८ ॥
"पिप्पली पीप्पलीमूलं भल्लातकाथ एव वा ।
कल्को वा समधुर्देय ऊरुस्तम्भविनाशनः ॥"
इति पिप्पल्यादि ॥ १५९ ॥
इत्यूरुस्तम्भाधिकारः ॥ * ॥
अथामवाते ।
"शुण्ठीशुण्ठ्यभया चोग्रा देवाह्वातिविषाष्टता ।

कषायमामवातस्य पाचनं रूक्षभोजनम् ॥"
इति शूलादि ॥ १६० ॥
"शुंठी विषौषधं कल्कं वर्षाभूकाथसंयुतम् ।
सप्तरात्रं पिबेन्नृणामामवातविपाचनम् ॥"
इति पुनर्नवाकाथः ॥ १६१ ॥
"दशमूलास्तैरण्डराम्नागरदारुभिः ।
काथोरुबूकतैलेन सामं हन्यन्निलं गुरुम् ॥"
इति रास्नादशमूलम् ॥ १६२ ॥
"दशमूलीकषायेण पिबेद्वा नागराम्भसा ।
कृत्तिवस्तिकटीशूले तैलमेरण्डसम्भवम् ॥"
इति एरण्डतैलयुक्तदशमूलशुण्ठीकाथौ ॥१६३॥
"रास्नां गुडूचीमेरण्डं देवदारु महौषधम् ।
पिबेत् सर्वाङ्गवाते च सामे सन्धास्थिमज्जगे ॥"
इति रास्नापञ्चकम् ॥ १६४ ॥
"रास्नाऽष्टावरगधदेवदारु-
त्रिकण्टकैरण्डपुनर्नवानाम् ।
काथं पिबेन्नागरचूर्णमिश्रं
जङ्घोरुपृष्ठत्रिकपार्श्वशूली ॥"
इति रास्नासप्तकम् ॥ १६५ ॥
"शुण्ठीगोक्षुरकक्काथः प्रातः प्रातर्निषेवितः ।
सामे वाते कटीशूले पाचनो रुक्प्रणाशनः ॥"
इति गोक्षुरशुण्ठी ॥ १६६ ॥
"आमवाते कषायुक्तं दशमूलीजलं पिबेत् ॥"
इति कषायुक्तदशमूली ॥ १६७ ॥
इत्यामवाताधिकारः ॥ * ॥

अथ शूले ।
"बलापुनर्नवैरण्डबृहतीद्वयगोक्षुरैः ।
सहिङ्गु लवणं पीतं सद्यो वातरुजापहम् ॥"
इति बलादि ॥ १६८ ॥
"विश्वमेरण्डजं मूलं काथं पीत्वा जलं पिबेत् ।
हिङ्गुसौवर्चलोपेतं सद्यः शूलनिवारणम् ॥"
इति विश्वादि ॥ १६९ ॥
"हिङ्गुपुष्करमूलाभ्यां हिङ्गुसौवर्चलेन वा ।
विश्वैरण्डयवक्काथः सद्यः शूलनिवारणः ॥"
इति हिङ्गुपुष्करमूलयुक्तविश्वैरण्डयवकाथः ॥
१७० ॥
"तद्वद्वयवकाथो हिङ्गुसौवर्चलान्वितः ॥"
इति रुच्यादि ॥ १७१ ॥
"बृहत्यौ गोक्षुरैरण्डकुक्कुराकेक्षुरालिकाः ।
पीताः पित्तभवं शूलं सद्यो हन्ति सुदारुणम् ॥"
इति बृहत्यादि ॥ १७२ ॥
"घृतावरीसयष्ट्याह्वावासकुक्कुटगोक्षुरैः ।
घृतप्रीतं पिबेत्तोयं सगुडक्षौद्रशर्करम् ॥
पित्तासृग्दाहशूलघ्नं सद्यो दाहज्वरापहम् ॥"
इति घृतावर्य्यादि ॥ १७३ ॥
"त्रिफलानिम्बयष्ट्याह्वकटुकारग्वधैः घृतम् ।
पाययेन्मधुसंमिश्रं दाहशूलोपशान्तये ॥"
इति त्रिफलादि ॥ १७४ ॥
"शैलमेरण्डजं वापि मधुककाथसंयुतम् ।
शूलं पित्तोद्भवं हन्याद्गुल्मं पैत्तिकमेव च ॥"
इति मधुककाथः ॥ १७५ ॥
"त्रिफलारग्वधक्काथं सक्षौद्रं शर्करान्वितम् ।
पाययेद्रक्तपित्तघ्नं दाहशूलनिवारणम् ॥"
इति त्रिफलारग्वधकाथः ॥ १७६ ॥
"विश्वमूलमधेरण्डं चित्रकं विश्वभेषजम् ।
हिङ्गुसैन्धवसंयुक्तं सद्यः शूलनिवारणम् ॥"
इति विश्वमूलादि ॥ १७७ ॥
"सक्षारं वा पिबेत् क्काथं विल्वादेः कफशूलवान् ॥"
इति विल्वादिक्काथः ॥ १७८ ॥
"मातुलुङ्गरसो वापि शिग्रुक्काथस्तथापरः ।
सक्षारो मधुना पीतः पार्श्वहृद्वस्तिशूलनुत् ॥"
इति शिग्रुक्काथः ॥ १७९ ॥
"श्यामशूले क्रिया कार्या कफशूल-
विनाशिनी ।
सेयमामहरं सर्वं यदन्यदभिवर्द्धनम् ॥
पटोलत्रिफलारिष्टक्काथं समधुकं पिबेत् ।
पित्तश्लेष्मज्वरच्छर्दिदाहशूलोपशान्तये ॥"
इति पटोलादि ॥ १८० ॥
"विश्वोरुबूकदशमूलयवाम्भसा तु
हिङ्गुत्रिकट्वम्लवणत्रयपुष्करागाम् ।
चूर्णं पिबेद्धृदयपार्श्वकटीग्रहाम-
पक्काशयांश्चभृशरुग्ज्वरगुल्मशूली ॥"
इति विश्वादि ॥ १८१ ॥
"क्काथेन चूर्णपानं यत्तत्र क्काथप्रधानता ।
प्रवर्त्तते न तेनात्र चूर्णापेक्षी चतुर्दशः ॥
चूर्णं समं रुचकहिङ्गुमहौषधानां
शुण्ठ्याम्बुना कफसमीरणपित्तजेषु ।
हृत्पार्श्वपृष्ठजठरार्त्तिविसूचिकासु
पेयं तथा यवरसेन तु विड्विबन्धे ॥"१८२ ॥
"समं शुण्ठ्याम्बुनैवं योजना क्रियते बुधैः ।
तेनाक्ष्यमाणमेवात्र हिङ्गु संपरिदीयते ॥"
इति रुचकादि ॥ १८३ ॥
"हिङ्गु सौवर्चलं पथ्या विड्सैन्धवचतुष्टयम् ।
पौष्करञ्च पिबेच्चूर्णं दशमूलयवाम्भसा ॥
पार्श्वहृत्कटिपृष्ठांत्रशूले तन्त्रापतानके ।
श्रोणिश्वासके च कर्णरोगे च ग्रस्यते ॥"
इति हिङ्ग्वादिचूर्णयुक्तदशमूलीयक्काथः ॥१८४॥
"एरण्डविल्वबृहतीद्वयमातुलुङ्ग-
पाषाणभिद्विकटमूलकृतः कषायः ।
सक्षारहिङ्गुलवणो घृततैलमिश्रः
श्रोण्यंशमेढ्रहृदयस्तनवङ्क्षणेषु यः ॥"
इति एरण्डसप्तकः ॥ १८५ ॥
"एरण्डफलमूलानि बृहतीद्वयगोक्षुरम् ।
पर्णिन्यः सहदेवा च सिंहपुच्छीक्षुरालिका ॥
तुल्यैरेतैः घृतं तोयं यवक्षारयुतं पिबेत् ।
पृथग्दोषभवं शूलं हन्यात् सर्वभवन्तथा ॥"
इति एरण्डादशकः ॥ १८६ ॥
इति शूलाधिकारः ॥ * ॥

अथोदावर्त्ते ।
"श्यामा दन्ती द्रवन्ती वृक् महाश्यामा क्षुही
चित्रकः ।
सप्तला ग्रन्थिनी श्वेता राजवृक्षः सतिल्वकः ॥
कम्पिल्लकः करञ्जश्च हेमक्षीरीत्ययं गणः ।
सर्पिस्तैलरजःक्षारकल्केष्वन्यतमेन च ॥
उदावर्त्तोदरानाहविषगुल्मादिनाशनः ॥"
इति प्रत्येकं श्यामादिगणक्काथः ॥ १८७ ॥
इत्युदावर्त्ताधिकारः । आनाहेऽपि ॥ * ॥
अथ हृद्रोगे ।
"वातोपसृष्टे हृदये वामयेत् स्निग्धमातुरम् ।
हिङ्गुसौवर्चलीक्काथेन सक्षेहलवणेन च ॥"
इति स्नेहलवणयुक्तदशमूली ॥ १८८ ॥
"नागरं वा पिबेद्वृक्णं क्षायश्चाग्निवर्द्धनम् ।
कासश्वासानिलहरं शूलहृद्रोगनाशनम् ॥"
इति नागरक्काथः ॥ १८९ ॥
"वचानिम्बकषायाभ्यां वान्तं हृदि कफोल्बिते ।
वातहृद्रोगहृच्चूर्णं पिप्पल्यादिच्च पाचयेत् ॥"
इति वचानिम्बकषायौ ॥ १९० ॥
"हिङ्ग्वग्निसैन्धवाविड्विश्वकृष्णा-
कुष्ठाभयाचित्रकयावशूकम् ।
पिबेत् ससौवर्चलपुष्कराढ्यं
यवाम्भसा शूलहृदामयघ्नम् ॥"
इति हिङ्ग्वादिचूर्णयुक्तयवक्काथः ॥ १९१ ॥
"दशमूलकषायन्तु लवणक्षारसंयुतम् ।
कासं श्वासञ्च हृद्रोगं गुल्मशूलञ्च नाशयेत् ॥"
इति लवणक्षारयुक्तदशमूली ॥ १९२ ॥
इति हृद्रोगाधिकारः ॥ * ॥

अथ मूत्रकृच्छ्रे ।
"अम्लता नागरं धान्यो वाजिगन्धा चिरुष्टकम् ।
प्रपिबेद्वातरोगार्त्तः सशूलो मूत्रकृच्छ्रवान् ॥"
इति अम्लतादि ॥ १९३ ॥
"कुशः काशः शरो दर्भः इक्षुरित्यूलणोद्भवम् ।
पित्तकृच्छ्रहरं पञ्चमूलं वस्तिविशोधनम् ॥"
इति तृणपञ्चमूलम् ॥ १९४ ॥
"एतत् सिद्धं पयःपीत्वा मेढ्रगं हन्ति शोणितम् ॥
घृतावरीकाशकुशश्वदंष्ट्रा-
विदारिशालीक्षुकशेरुकाणाम् ।
क्काथं सुशीतं मधुशर्करार्द्धं
पिबन् जयेत् पैत्तिकमूत्रकृच्छ्रम् ॥"
इति घृतावर्य्यादि ॥ १९५ ॥
"हरीतकीगोक्षुरराजवृक्ष-
पाषाणभिद्वन्यवासकानाम् ।
क्काथं पिबेन्माक्षिकसंप्रयुक्तं
कृच्छ्रे सदाहे सरुजे विबन्धे ॥"
इति हरीतक्यादि ॥ १९६ ॥
"श्वदंष्ट्रा विल्वशोयं वा कफकृच्छ्रविनाशनम् ॥"
इति श्वदंष्ट्रावल्कषायौ ॥ १९७ ॥
"बृहतीधावनीपाठायवीमधुकपिङ्गलाः ।
पाचनीयो बृहत्यादिः कृच्छ्रदोषत्रयापहः ॥"
१९८ ॥
"क्काथं गोक्षुरबीजस्य यवक्षारयुतं पिबेत् ।
मूत्रकृच्छ्रं मूत्रकृच्छ्रं च पीतः शीघ्रं निवारयेत् ॥"
इति यवक्षारयुक्तगोक्षुरबीजक्काथः ॥ १९९ ॥
"क्रिया हिता त्वश्मरिभेदकारा
या मूत्रकृच्छ्रे कफमारुतोत्थे ।
यन्मूत्रकृच्छ्रे विहितन्तु पैत्ते
तत् कारयेच्छोणितमूत्रकृच्छ्रे ॥

चिरकटकारञ्जधदर्भकाश्म-
दुरालभापर्वतभेदपथ्याः ।
निघ्नन्ति पीता मधुनाश्मरीञ्च
संप्राप्तमूत्रोरपि मूत्रकृच्छ्रम् ॥"
इति चिरकटकादि ॥ २०० ॥
"कषायोऽतिबलामूलसाधितोऽग्नेयकल्कजित् ॥"
इति अतिबलाकषायः ॥ २०१ ॥
इति मूत्रकृच्छ्राधिकारः ॥ * ॥
अथ मूत्राघाते ।
"मूत्राघातान् यथादोषं मूत्रकृच्छ्रहरैर्जयेत् ।
पिबेच्छिलाजतुक्वाथे गवे वीरतरादिके ॥"
इति शिलाजतुयुक्तवीरतरादिकाथः ॥२०२॥
" रसं दुरालभाया वा कषायं वासकस्य वा ॥"
इति दुरालभावासकाथौ ॥ २०३ ॥
इति मूत्राघाताधिकारः ॥ * ॥
अथाश्मर्याम् ।
"वरुणस्य त्वचं श्रेष्ठां शुण्ठीगोक्षुरसंयुताम् ।
यवक्षारगुडं दत्त्वा क्वाथयित्वा पिबेद्भिताम् ॥
अश्मरीं वातजां हन्ति चिरकालानुबन्धिनीम् ॥"
इति वरुणत्वगादि ॥ २०४ ॥
"वीरतरः सहचरौ दर्भो वृक्षादनी नलः ।
गुन्द्रा काशकुशावंशभेदमोरटगुण्टकाः ॥
कुरुण्टकोऽथ वशिरो वसुकः सामिमन्थकः ।
इन्दीवरी श्वदंष्ट्रा च तथा कापोतवल्लकः ॥
वीरतरादिरित्येष गवो वातविकारजित् ।
अश्मरीमूर्वरामूत्रकृच्छ्राघानरुजापहः ॥"
इति वीरतरादिगणक्वाथः ॥२०५॥
"शुण्ठ्यग्निमन्थपाषाणशिग्रुवरुणगोक्षुरैः ।
अभयारग्वधफलैः क्वाथं कुर्याद्विचक्षणः ॥
क्षारमष्टगुणं तस्मिंश्चूर्णं दत्त्वा पिबेन्नरः ।
अश्मरीमूत्रकृच्छ्रघ्नं पाचनं दीपनं परम् ॥
हन्यात् कोष्ठाश्रितं वातं कटूरुगुदमेढ्रगम् ॥"
इति शुण्ठ्यादि ॥ २०६ ॥
"वरुणत्वक्कषायन्तु पीतन्तु गुडसंयुतम् ।
अश्मरीं पातयत्याशु बस्तिशूलविनाशनम् ॥"
इति वरुणक्वाथः ॥ २०७ ॥
"पिबेद्वरुणमूलत्वक्क्वाथं तत्कल्कसंयुतम् ॥"
इति वरुणकल्कयुक्तवरुणत्वक्कषायः ॥२०८॥
"क्वाथञ्च शिग्रुमूलोत्थः कदुष्णोऽश्मरिघातनः ॥"
इति शिग्रुक्वाथः ॥ २०९ ॥
"नागरवरुणकगोक्षुरपाषाणभित्कपोतवल्लजः
क्वाथः ।
गुडयावशूककिण्वः पीतो हन्यश्मरीसुग्राम् ॥"
इति नागरादि ॥ २१० ॥
"वरुणत्वक्शिलाभेदशुण्ठीगोक्षुरकैः कृतः ।
कषायः क्षारसंयुक्तः शर्करान्च भिनत्त्यपि ॥"
इति वरुणत्वगादि ॥ २११ ॥
"श्वदंष्ट्रैरण्डपत्राणि नागरं वरुणत्वचम् ।
एतत्क्वाथवरं प्रातः पिबेदश्मरिभेदनम् ॥"
इति श्वदंष्ट्रादि ॥ २१२ ॥
"एलोपकुल्यामधुकाश्मभेद-
कौन्तीश्वदंष्ट्रायवकोरुवूकैः ।
क्वाथं पिबेदश्मजतुप्रगाढ़ं
सशर्करं साश्मरिमूत्रकृच्छ्रे ॥"
इति एलादि ॥२१३॥
"शुक्राश्मर्य्यान्तु सामान्यो विधिरश्मरिनाशनः ॥"
इत्यश्मरीशर्करोधिकारः ॥*॥
अथ मेहे ।
"दूर्व्वाकशेरुपूतीककुभीकम्पवशैवलम् ।
जले निःकथितं पीतं शुक्रमेहहरं परम् ॥"
इति दूर्व्वादि ॥ २१४ ॥
"त्रिफलारग्वधदार्व्वाकषायो मधुना युतः ।
पीतो निहन्ति फेनाख्यं प्रमेहं नियतं नृणाम् ॥"
इति त्रिफलादि ॥ २१५ ॥
"लोध्राभयाकटफलमुस्तकानां
विड्ङ्गपाठार्ज्जुनधन्वनानाम् ।
कदम्बशालार्ज्जुनदीप्यकानां
विड्ङ्गदार्व्वौधवशल्यकानाम् ॥
चत्वार एते मधुना कषायाः
कफप्रमेहेषु निषेवणीयाः ॥
अश्वत्थाच्चतुरङ्गुल्या न्यग्रोधादेः फलत्रयात् ।
सञ्जिह्मरक्तसाराच्च क्वाथाः पञ्च समाक्षिकाः ॥
नीलहारिद्रशुक्लाख्यान् क्षारमाक्षिकसञ्ज्ञयान् ।
मेहान् हन्युः क्रमादेते सक्षौद्रो रक्तमेह-
जित् ॥
क्वाथः खर्ज्जूरकाश्मर्य्यतिन्दूकास्थ्याम्रतान्तकात् ॥"
इति खर्ज्जूरादि ॥ २१६ ॥
"लोध्रार्ज्जुनोशीरकुचन्दनानाम् २१७
अरिष्टसेव्यामलकाभयानाम् । २१८ ।
धात्यार्ज्जुनारिष्टकवत्सकानां २१९
नीलोत्पलेलातिनिशार्ज्जुनानाम् ॥ २२० ॥
चत्वार एते विहिताः कषायाः
पित्तप्रमेहे मधुसंप्रयुक्ताः ॥"
इति कषायचतुष्टयम् ॥ २२१ ॥
"छिन्नावल्किकषायेण पाठाकुटजरामठम् ।
तिक्तां कुष्ठञ्च सचूर्णं सर्पिर्मेहे पिबेन्नरः ॥"
इति छिन्नावल्किकषायः ॥ २२२ ॥
"कदरखदिरपूगक्वाथं क्षौद्राढ्ये पिबेत् ॥"
इति कदरादि ॥ २२३ ॥
"अग्निमन्थकषायन्तु वसामेहे प्रयोजयेत् ॥"
इति अग्निमन्थकषायः ॥२२४॥
"पाठाशिरीषदुस्पर्शसुव्वा- किंशुकतिन्दुकौ ।
कपित्थानां भिषक् क्वाथं हस्तिमेहे प्रयोजयेत् ॥"
इति पाठादि ॥ २२५ ॥
"कषायस्त्रिफलादारुमुस्तकैरथवा कृतः ॥"
इति त्रिफलादि ॥ २२६ ॥
"फलत्रिकं दारु निशां विशालां
मुस्तञ्च निष्क्वाथ्य निशांशकल्कम् ।
पिबेत् कषायं मधुसंप्रयुक्तं
सर्व्वप्रमेहेषु समुत्थितेषु ॥"
इति फलत्रिकादि ॥ २२७ ॥
"कटङ्कटेरीमधुकत्रिफलाचित्रकैः समैः ।
सिद्धः कषायः पातव्यः प्रमेहाणां विनोत्थितः ॥"
इति कटङ्कटेर्य्यादि ॥ २२८ ॥
"त्रिफलादारुदार्व्यभ्रक्वाथः क्षौद्रेण मेहहा ॥"
इति त्रिफलादि ॥ २२९ ॥
"कुटजासनदार्व्यभ्रफलत्रयभवोऽथवा ॥"
इति कुटजादि ॥ २३० ॥
इति प्रमेहाधिकारः ॥ * ॥
अथोदरे ।
"पयसा सचित्रतृकल्केनोरुवूकरसेन वा ।
सप्तलाक्षायमाणाभ्यां घृतेनारग्वधेन वा ॥"
इति चित्रतृकल्कयुक्तारग्वधक्वाथेरण्डक्वाथौ ॥
२३१ ॥
"सन्निपातोदरे सर्व्वा यथोक्ता कारयेत् क्रियाम् ।
पीतः क्षौद्रोदरं हन्यात् पिप्पलीमरिचान्वितः ॥
अम्बष्ठसंयुक्तः शिग्रुक्वाथः ससैन्धवः ॥"
इति शिग्रुक्वाथः ॥ २३२ ॥
"दशमूलदारुनागरच्छिन्नरुहापुनर्नवाक्वाथः ।
जयति जलोदरशोथप्लीहगलगण्डवात-
रोगार्शांसि ॥"
इति दशमूलादि ॥ २३३ ॥
"हरीतकीनागरदेवदारु
पुनर्नवाच्छिन्नरुहाकषायः ।
सगुग्गुलुर्मूत्रयुतश्च पेयः
शोथोदराणां प्रवरः प्रयोगः ॥"
इति हरीतक्यादि ॥ २३४ ॥
"एरण्डतैलं दशमूलमिश्रं
गोमूत्रयुक्तस्निफलारसो वा ।
निहन्ति वातोदरशोथशूलं
क्वाथः समूत्रो दशमूलजश्च ॥"
इति एरण्डतैलेन गोमूत्रेण वा युक्ता दशमूली ॥
२३५ ॥
"पुनर्नवानिम्बपटोलशुण्ठी-
तिक्ताम्बष्ठादार्व्वभयाकषायः ।
सर्व्वाङ्गशोथोदरकाश्यशूल-
श्वासान्वितं पांडुगदं निहन्ति ॥"
इति पुनर्नवाष्टकम् ॥ २३६ ॥
"पुनर्नवादार्व्वभयागुडूचीं
पिबेत् समूत्रां महिषाक्षयुक्ताम् ।
त्वग्दोषशोथोदरपाण्डुरोग-
स्थौल्यप्रसेकोर्द्धकफामयेषु ॥"
इति पुनर्नवाचतुष्कम् ॥ २३७ ॥
इति उदराधिकारः ॥ * ॥
अथ शोथे ।
"शुण्ठीपुनर्नवैरण्डपञ्चमूलहृतं जलम् ।
वातिके श्वयथौ शस्तं पानाहारपरिग्रहे ॥"
इति शुण्ठ्यादि ॥ २३८ ॥
"दशमूलं सर्व्वथा च शस्तं वाते विशेषतः ॥"
इति दशमूलम् ॥ २३९ ॥
"क्षीराशनः पित्तकृतेऽथ शोथे
त्रिवृद्गुडूचीत्रिफलाकषायम् ।
पिबेन्नरो मूत्रविमिश्रितं वा
फलत्रिकाचूर्णमथाक्षमात्रम् ॥"
इति त्रिवृतादि ॥ २४० ॥
"अभया दारु मधुकं तिक्ता दन्ती सपिप्पली ।

पटोलं चन्दनं दार्व्वी चायमाणेन्द्रवारुणी ॥
एषां क्वाथः ससर्पिष्कः क्षयपुञ्जरदाहहृत् ।
वीसर्पदुष्टव्रणासंतापसन्निपातविषापहः ॥"
इति अभयादि ॥ २४१ ॥

"पुनर्नवाविश्वबिल्वगुडूची-
मध्याकपथ्यामरदारुकल्कम् ।
प्रोथे कफोत्थे महिषाक्षमत्र-
युक्तं पिबेद्वा सलिलं तदैषाम् ॥"
इति पुनर्नवासप्तकम् ॥ २४२ ॥

"पुनर्नवादारुशुण्ठीक्वाथे मूत्रेण वा केवले ।
दशमूलजले वापि गुग्गुलुः प्रोथनाशनः ॥"
इति गुग्गुलुयुक्तपुनर्नवादिदशमूलकाथौ॥२४३॥

"सिंहास्याम्रतभण्टाकीकाथं कृत्वा समाक्षिकम् ।
पीत्वा प्रोथं जयेज्जन्तुः कासं श्वासं ज्वरं वमिम् ॥"
इति सिंहास्यादि ॥ २४४ ॥

"भूनिम्बविश्वकल्कं जग्ध्वा पेयः पुनर्नवाकाथः ।
अपहरति नियतमाशु प्रोथं सर्व्वाङ्गगं नृणाम् ॥"
इति पुनर्नवाकाथः ॥ २४५ ॥
इति प्रोथाधिकारः ॥ * ॥

अथालर्कौ ।

"पुनर्नवायास्तैलं वा तैलं नारायणन्तथा ।
पाने वस्तौ रुजोस्तैलं पेयं वा दशकाम्भसा ॥"
इति रुग्वतैलयुक्तदशमूलम् ॥ २४६ ॥

"रास्नायष्ट्याह्वतैरण्डबलागोक्षुरसाधितः ।
काथोऽलर्कविषं हन्यात्सु रुग्वतैलेन मिश्रितः ॥"
इति रास्नादि ॥ २४७ ॥
इति ब्रह्मदत्ताधिकारः ॥ * ॥

अथ विद्रधौ ।

"पुनर्नवादारुबिल्वदशमूलाभयाम्भसा ।
गुग्गुलुं रुग्वतैलं वा पिबेन्मारुतविद्रधौ ॥"
इति पुनर्नवादि ॥ २४८ ॥

"पिबेद्वा त्रिफलाक्वाथं त्रिवृत्कल्काक्षसंयुतम् ॥"
इति त्रिवृत्कल्कयुक्तत्रिफलाक्वाथः ॥२४९॥

"दशमूलीकषायेण सन्दोहनरसेन वा ।
शोथं व्रणं वा कोष्णेन सक्षारं परिषेचयेत् ॥"
इति दशमूलीकषायः ॥ २५० ॥

"क्वाथो वंशत्वगैरण्डस्वदंष्ट्राग्निभिदा कृतः ।
सक्षिङ्गसैन्धवः पीतः कोष्ठस्थं स्रावयेदसृक् ॥"
इति वंशत्वगादिकाथः ॥ २५१ ॥*॥

अथोपदंशे ।

"पटोलनिम्बत्रिफलागुडूची-
क्वाथं पिबेद्वा खदिराग्ननाथाम् ।
सगुग्गुलुं वा त्रिफलायुतं वा
सर्व्वोपदंशापहरः प्रयोगः ॥"
इति पटोलादि ॥ २५२ ॥

"त्रिफलायाः कषायेण भृङ्गराजरसेन वा ।
व्रणप्रक्षालनं कुर्य्यादुपदंशव्रणशान्तये ॥"
इति त्रिफलाक्वाथः ॥ २५३ ॥

"जयाजात्यर्कमारार्कसप्ताकानां दलैः पृथक् ।
कृतं प्रक्षालने क्वाथं मेढ्रपाके प्रयोजयेत् ॥"
इति जयादिक्वाथः ॥ २५४ ॥ * ॥

अथ भग्ने ।

"न्यग्रोधादिकषायन्तु सुशीतं परिषेचने ॥"
इति न्यग्रोधादि ॥ २५५ ॥ * ॥

अथ कुष्ठे ।

"त्रिफलापटोलरजनीमञ्जिष्ठारोहिणीवचा-
निम्बैः ।
एष कषायोऽभ्यस्तो निहन्ति कफपित्तजं
कुष्ठम् ॥"
इति गवक्षादयः ॥ २५६ ॥

"पटोलखदिरारिष्टत्रिफलाक्षद्वयैर्युतम् ।
तिक्ताघ्नः पिबेत् क्वाथं कुष्ठी कुष्ठं यथोहति ॥"
इति पटोलादि ॥ २५७ ॥

"धात्रीखदिरयोः क्वाथं पीत्वा वल्गुरसंयुतम् ।
शुक्लेक्षुधवलं श्वित्रं तूर्णं हन्ति न संशयः ॥"
इति धात्रीखदिरक्वाथः ॥ २५८ ॥ * ॥

अथ प्रीतपित्ते ।

"उद्दीर्णं वमनं कार्य्यं पटोलारिष्टवारिणा ॥"
इति पटोलारिष्टजलम् ॥ २५९ ॥ * ॥

अथास्रपित्ते ।

"निम्बषड्वृषधात्रीक्वाथक्षौद्रसुगन्धियुतः पीतः ।
अपनयति चास्रपित्तं यदि सुदुस्तं सुनृपतेव ॥"
इति निम्बषड्वादि ॥ २६० ॥

"कफपित्तवमीकण्ड्वरविस्फोटदाहहृत् ।
पाचनो दीपनः क्वाथः शृङ्गवेरपटोलयोः ॥"
इति शृङ्गवेरपटोलक्वाथः ॥ २६१ ॥

"पटोलं नागरं धान्यं क्वाथयित्वा जलं पिबेत् ।
कण्डूपामार्त्तिशूलघ्नं कफपित्तामयान्यजित् ॥"
इति पटोलादि ॥ २६२ ॥

"पटोलविश्वाम्रतरोहिणीकृतं
जलं पिबेत् पित्तकफोत्क्लेशे च ।
शूलभ्रमारोचकवह्निमान्द्य-
कासज्वरच्छर्द्दिनिवारणन्तत् ॥"
इति पटोलादि ॥ २६३ ॥

"यवक्षाराम्बष्ठपटोलानां क्वाथं क्षौद्रयुतं पिबेत् ।
नाशयेदम्लपित्तञ्च अरुचिञ्च वमिन्तथा ॥"
इति यवादि ॥ २६४ ॥

"वासाम्रतापर्पटकभूनिम्बनिम्बमार्कवैः ।
त्रिफलाकुलकैः क्वाथः सक्षौद्रश्चास्रपित्तहा ॥"
इति दशाङ्गम् ॥ २६५ ॥

"फलत्रिकं पटोलञ्च तिक्ताक्वाथः सितायुतः ।
पीतः क्षीतकमध्वक्तो ज्वरच्छर्द्यम्लपित्तजित् ॥"
इति फलत्रिकादि ॥ २६६ ॥

"पटोलधन्याकमहौषधान्दैः
कृतः कषायो विनिहन्ति शीघ्रम् ।
मन्दानलं पित्तबलासदाह-
च्छर्द्दिज्वरामानिलशूलरोगान् ॥"
इति पटोलादि ॥ २६७ ॥

"छिन्नोद्भवानिम्बपटोलपत्रं
फलत्रयं सुकथितं सुशीतम् ।
क्षौद्रान्वितं पीतमनेकरूपं
सुदारुणं हन्ति तदम्लपित्तम् ॥"
इति छिन्नोद्भवादि ॥ २६८ ॥

"पटोलत्रिफलानिम्बगुडं मधुयुतं पिबेत् ।
पित्तश्लेष्मज्वरच्छर्द्दिदाहशूलोपशान्तये ॥"
इति पटोलादि ॥ २६९ ॥

"सिंहास्याम्रतभण्टाकीकाथं कृत्वा समाक्षिकम् ।
अम्लपित्तं जयेज्जन्तुः कासं श्वासं ज्वरं वमिम् ॥"
इति सिंहास्यादि ॥ २७० ॥
इति अम्लपित्ताधिकारः ॥ * ॥

अथ विसर्पे ।

"कृष्णवर्त्मं प्रयोक्तव्यं पञ्चमूलचतुष्टयम् ॥"
इति पञ्चमूलचतुष्टयम् ॥ २७१ ॥

"सुस्तारिष्टपटोलानां क्वाथः सर्व्वविसर्पगुत् ॥"
इति सुस्तादि ॥ २७२ ॥

"धात्रीपटोलसुस्तानामथवा घृतसंयुतः ॥"
इति धात्र्यादि ॥ २७३ ॥

"अम्लतिक्तपटोलं निम्बपत्रैरुपेतं
त्रिफलखदिरसारं व्याधिघातञ्च तुल्यम् ।
क्वथितमिदमशेषं गुग्गुलोर्भागयुक्तं
जयति विषविसर्पान् कुष्ठमष्टादशाख्यम् ॥"
इति नवकषायः ॥ २७४ ॥

"अम्लतिक्तपटोलं सुस्तकं सप्तपर्णं
खदिरमसितवेत्रं निम्बपत्रं हरिद्रे ।
विविधविषविसर्पान् कुष्ठविस्फोटकण्डू-
रपनयति मसूरीं प्रीतपित्तं ज्वरञ्च ॥"
इति अम्लतादि ॥ २७५ ॥

"पटोलाम्बष्ठभूनिम्बवासकारिष्टपर्पटैः ।
खदिराब्दयुतैः क्वाथो विस्फोटार्त्तिज्वरापहः ॥"
इति पटोलादि ॥ २७६ ॥

"पटोलत्रिफलारिष्टगुडूचीसुस्तचन्दनैः ।
समुशीरैः रोहिणी पाठा रजनी सदुरालभा ॥
कथायं पाययेदेतन पित्तश्लेष्मज्वरापहम् ।
कण्डूत्वग्दोषविस्फोटविषवीसर्पनाशनम् ॥"
इति पटोलादि ॥ २७७ ॥

"भूनिम्बवासाकटुकापटोल-
फलत्रिकाचन्दननिम्बसिद्धः ।
विसर्पदाहज्वरवक्त्रशोष-
विस्फोटतृष्णावमिगुत् कषायः ॥"
इति भूनिम्बादि ॥ २७८ ॥

"सकफे पित्तयुक्ते तु त्रिफलां योजयेद्भिषक् ।
दुरालभां पर्पटकं पटोलं कटुकान्तथा ।
कोष्णं गुग्गुलुसंयुक्तं पिबेद्वा खदिराष्टकम् ॥"
इति दुरालभादि ॥ २७९ ॥

"कुष्ठली पित्तमर्द्दासु खदिरेन्द्रयवासु वा ।
विस्फोटान्नाशयत्याशु वायुर्जलधरानिव ॥"
इति कुष्ठल्यादि ॥ २८० ॥ * ॥

अथ मसूर्य्याम्।

"दुरालभां पर्पटकं भूनिम्बं कटुरोहिणीम् ।
श्लैष्मिक्यां पित्तजायां वा पाने निःक्वाथ्य दापयेत्॥"
इति दुरालभादि ॥ २८१ ॥

"निम्बं पर्पटकं पाठां पटोलं कटुरोहिणीम् ।
वासां दुरालभां धात्रीसुशीरं चन्दनद्वयम् ॥
एष निम्बादिकः क्वाथः पीतः शर्करया युतः ।
हन्ति चिरोद्भवमसूरीं क्षयवीसर्पसम्भवाम् ॥

उत्थिता प्रविशेद्या तु पुनस्तां वान्ति नो नयेत् ॥"
इति निम्बादि ॥ २८२ ॥
"पटोलकुण्डलीमुस्तवृषधन्वयवासकैः ।
भूनिम्बनिम्बकट्कापर्पटैश्च हृतं जलम् ॥
मसूरों ग्रमयेदामां पक्वाञ्चैव विशोषयेत् ।
नातः परतरं किञ्चिदिस्फोटज्वरशान्तये ॥"
इति पटोलादि ॥ २८३ ॥
"पटोलमूलारुष्णतण्डुलीयकं
पिबेद्धरिद्रामलकल्कसंयुतम् ।
मसूरिविस्फोटविदाहशान्तये
तदेव पित्तासवमिज्वरापहम् ॥"
इति पटोलादि ॥ २८४ ॥
"पटोलमूलारुष्णतण्डुलीयकं
तथैव धात्रीखदिरेण संयुतम् ।
पिबेज्जलं सुक्वथितं सुशीतं
मसूरिकारोगविनाशनं परम् ॥"
इति पटोलमूलादि ॥ २८५ ॥
"खदिरत्रिफलारिष्टपटोलाम्लवासकैः ।
क्वाथोऽष्टकाङ्गो जयति रोमान्तीञ्च मसूरिकाम् ॥
व्रीसर्पकुष्ठविस्फोटकण्डूदीनपि शान्तये ॥"
इति खदिराष्टकम् ॥ २८६ ॥
"अम्लतादिक्वाथस्तु जयेत् पित्तकफात्मिकाः ॥"
इति अम्लतादि ॥ २८७ ॥
"जातीपत्रं समञ्जिष्ठं दार्व्वीं पूगफलं शमीम् ।
धात्रीफलं समधुकं क्वथितं मधुसंयुतम् ॥
मुखरोगे कण्ठरोगे गण्डूषार्थं प्रशस्यते ॥"
इति जातीपत्रादि ॥ २८८ ॥
"अक्षणोः सेकं प्रशंसन्ति गवेधुमधुकाम्बुना ॥"
इति गवेधुमधुकक्वाथः ॥ २८९ ॥
"वेदनादाहशान्त्यर्थं स्वरागाच्च विशुद्धये ।
सगुग्गुलं वराक्वाथं युञ्जाद्वा खदिराष्टकम् ॥"
इति वराक्वाथखदिराष्टकौ ॥ २९० ॥
"निम्बातिमुक्तकाशोकप्रत्यक्पत्रवेतसपल्लवैः ।
निशापर्य्युषितः क्वाथो मसूरीभयनाशनः ॥"
इति निम्बादि ॥ २९१ ॥ इति मसूर्य्यधिकारः ॥ * ॥

अथ मुखरोगे ।

"दृहतीभूमिकदम्बककण्टकार्य्याः क्वाथः ।
गण्डूषतैलयुक्तः क्रिमिदन्तस्य वेदनाशमनः ॥"
इति दृहत्यादि ॥ २९२ ॥
"क्वाथपानन्तु दार्व्यौतड्डिम्बतार्क्ष्यकलिङ्गजम् ।
हरीतकीक्वाथयो वा पेयो माक्षिकसंयुतः ॥"
इति दार्व्यादिहरीतकीक्वाथौ ॥ २९३ ॥
"कटुकातिविषादारुपाठामुस्तकलिङ्गकाः ।
गोमूत्रक्वथिताः पेयाः कण्ठरोगविनाशनाः ॥"
इति कटुकादि ॥ २९४ ॥ * ॥

मुखपाके ।

"जातीपत्राम्लताद्राक्षायासदार्व्यौफलत्रिकैः ।
क्वाथः क्षौद्रयुतः पीतो गण्डूषो सुखपाकनुत् ॥"
इति जातीपत्रादि ॥ २९५ ॥
"पटोलनिम्बजम्ब्वाम्रमालतीनवपल्लवाः ।
प्रत्यक्पल्लवकः श्रेष्ठः कषायो मुखधावने ॥"
इति पटोलादि ॥ २९६ ॥
"पञ्चवल्ककषायो वा त्रिफलाक्वाथ एव वा ।
मुखपाकेषु सक्षौद्रः प्रयोज्यो मुखधावने ॥"
इति पञ्चवल्कत्रिफलाकषायौ ॥ २९७ ॥
"स्वरसः क्वथितो दार्व्या घनीभूतो रसक्रिया ।
सक्षौद्रा मुखरोगास्रगूदोषनाड़ीव्रणापहा ॥"
इति दार्व्यीक्वाथः ॥ २९८ ॥
"सप्तच्छदोशीरपटोलमुस्त-
हरीतकीनिक्तकरोहिणीभिः ।
यष्ट्याह्वराजद्रुमचन्दनैश्च
क्वाथं पिबेत् पाकहरं मुखस्य ॥"
इति सप्तच्छदयष्ट्याह्वादिक्वाथौ ॥ २९९ ॥
"पटोलमुस्तौत्रिफलाविशाला-
व्यायन्तितिक्ताचित्रतान्तानाम् ।
पीतः कषायो मधुना निहन्ति
मुखे स्थितस्तस्य गदानशेषान् ॥"
इति पटोलादि ॥ ३०० ॥
"क्वथितास्त्रिफलापाठाण्डदीक्वाजातिपल्लवाः ।
निषेव्या भक्षणीया वा त्रिफला मुखपाकहा ॥"
इति त्रिफलादि ॥ ३०१ ॥
इति मुखरोगाधिकारः ॥ * ॥

अथ प्रदरे ।

"दार्व्यीरसाञ्जनवृषाम्रकिरातविल्व-
भल्लातकैरवकृतो मधुना कषायः ।
पीतो जयत्यनिवलं प्रदरं सशूलं
पीतासितारुणविलोहितनीलकृष्णम् ॥"
इति दार्व्यादि ॥ ३०२ ॥ * ॥

अथ योनिव्यापदि ।

"गुडूचीत्रिफलादन्तीक्वाथेन परिषेचनम् ॥"
इति गुडूचीत्रिफलादन्तीक्वाथाः ॥ ३०३ ॥

अथ गर्भिण्याम् ।

"चन्दनं प्रारिवालोशद्वीक्वाथशर्करान्वितम् ।
एष क्वाथः प्रदातव्यो गर्भिण्या ज्वरशान्तये ॥"
इति चन्दनादि ॥ ३०४ ॥
"क्षीवेरारुणकृष्णचन्दनवलाधन्याकवत्सादनी-
मुस्तोशीरपवासपर्पटविषाक्वाथं पिबेद्गर्भिणी ।
नानावर्षरुजातिसारकगदे गर्भाश्रिते वा ज्वरे
योगोऽयं मुनिभिः पुरा निगदितः स्वल्पामये-
ष्वुत्तमः ॥"
इति दृहत्क्षीवेरादि ॥ ३०५ ॥ * ॥

अथ स्तनरोगे ।

"हरिद्रादिं वचादिं वा प्रपिबेत् स्तन्यदुष्टये ॥"
इति हरिद्रादिवचादिक्वाथौ ॥ ३०६ ॥
"तत्र वातात्मके स्तन्ये दशमूलोत्थलं पिबेत् ॥"
इति दशमूलक्वाथः ॥ ३०७ ॥
"पित्तदुष्टेऽम्लताभीरुपटोलं निम्बचन्दनम् ।
धात्री कुमारश्च पिबेत् क्वाथयित्वा सशारिवम् ॥"
इति अम्लतादि ॥ ३०८ ॥
"कफे वा त्रिफलाचव्यभूनिम्बकटरोहिणी ॥"
इति त्रिफलादि ॥ ३०९ ॥
"धात्री स्तन्यविशुद्ध्यर्थं सुक्षारक्षरसाधना ।
भार्गीदारुवचापाठाः पिबेत् सातिविषाः शृताः ॥"
इति भार्ग्यादि ॥ ३१० ॥
"सघृतं त्रिफलाक्वाथं स्तनरोगहरं पिबेत् ॥"
इति सघृतत्रिफलाक्वाथः ॥ ३११ ॥ * ॥

अथ सूतिकारोगे ।

"अम्लतानागरसहचरभद्रोत्कटपञ्चमूलजलदजलम् ॥
शृतशीतं मधुयुतं निवारयति सूतिकातङ्कम् ॥"
इति सूतिकादशमूलम् ॥ ३१२ ॥
"सहचरपुष्करवेतसमूलं वैकङ्कतदारुकुलत्थसमम् ।
जलमत्र ससैन्धवहिङ्गुयुतं सद्यो ज्वरशूलिकशूलहरम् ॥"
इति सहचरादि ॥ ३१३ ॥
"दशमूलीकृतः क्वाथः सद्यः सूतीरुजापहः ॥"
इति दशमूली ॥ ३१४ ॥ * ॥

अथ मक्कल्लशूले ।

"सूताया हृच्छिरोवस्तिशूलं मक्कल्लसंज्ञितम् ।
यवक्षारं पिबेत्तत्र मस्तुनोष्णोदकेन वा ॥
पिप्पल्यादिगणक्वाथं पिबेद्वा लवणान्वितम् ॥"
इति पिप्पल्यादिगणक्वाथः ॥ ३१५ ॥
इति स्त्रीरोगाधिकारः ॥ * ॥

अथ बालरोगे ।

"भेषज्यं पूर्व्वसृष्टिं नराणां यज्ज्वरादिषु ।
कार्य्यन्तदेव बालानां मात्रा त्वस्य कनीयसी ॥
हरिद्राद्वययष्ट्याह्वसिंहीशुक्रयवैः कृतः ।
शिग्रोर्ज्वरातिसारघ्नः कषायः स्तन्यदोषजित् ॥"
इति हरिद्रादि ॥ ३१६ ॥
"बिल्वस्य पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च ।
क्वाथावलेहौ मधुना विमिश्रौ
बालेषु योज्यावतिसारितेषु ॥"
इति बिल्वादिक्वाथः ॥ ३१७ ॥
"समङ्गाधातकीलोध्रप्रारिवाभिः शृतं जलम् ।
दुर्ब्बारेऽपि शिग्रोर्दियमतीसारे समाशिकम् ॥"
इति समङ्गादि ॥ ३१८ ॥
"नागरातिविषामुस्तबालकैरयवैः शृतम् ।
कुमारं पाययेत् प्रातः सर्व्वातीसारनाशनम् ॥"
इति नागरादि ॥ ३१९ ॥
"बिल्वमूलकषायेण लाजाश्चैव सशर्कराः ।
आलोड्य पाययेद्बालं छर्द्यतीसारनाशिनीः ॥"
इति सशर्करलाजयुक्तबिल्वमूलकषायः ॥ ३२० ॥
"पटोलत्रिफलारिष्टहरिद्राक्वथितं पिबेत् ।
शतविस्फोटवीसर्पज्वराणां शान्तये शिशुः ॥"
इति पटोलादि ॥ ३२१ ॥ * ॥

अथ विषे ।

"कटभ्यर्जुनशृङ्गीरियशेलुक्षीरिद्रुमत्वचः ।
कषायकल्कचूर्णाः स्युः कीटलूतास्रनाशहाः ॥"
इति कटभ्यादि ॥ ३२२ ॥ इति चक्रपाणिदत्तः ॥

पाचनं, त्रि, पाचयिता । इति मेदिनी । ने, ६१ ॥

अथ विशिष्टद्रव्याणामौर्द्ध्वं विशिष्टं पाचनद्रव्यमाह ।

"अलं पनसपाकाय फलं कदलसम्भवम् ।
कदलस्य तु पाकाय बुधैरभिहितं घृतम् ॥
घृतस्य परिपाकाय जम्बीरस्य रसो हितः ॥

नारिकेलफलतालबीजयोः
पाचकं सपदि तण्डुलं विदुः ।
क्षीरमाशु सहकारपाचनं
चारमज्जनि हरीतकी हिता ॥
मधूकमालूरकृपादनानां
परूषखर्ज्जूरकपित्थकानाम् ।
पाकाय पेयं पिचुमर्दबीजं
घृतेऽपि तक्रेऽपि तदेव देयम् ॥
खर्ज्जूरशृङ्गाटकयोः प्रशस्तं
विश्वौषधं कुत्र च भद्रमुस्तम् ।
यच्चाङ्गबोधिदफलेषु प्रोक्तं
प्रत्ये तथा वार्य्युषितं प्रणीतम् ॥
तण्डुलेषु पयसः पयो हितं
दीप्यकन्तु चिपिटे कणायुतम् ।
यष्टिका दधिजलेन जीर्य्यते
कर्कटी च सुमनेषु गीर्य्यते ॥"

सुमनेषु गोधूमेषु । गीर्य्यते कथ्यते ।

गोधूममाषहरिमन्थसतीलमुद्ग-
याको भवेज्झटिति मातुलपुत्रकेण ।
खण्डश्च खण्डयति माषभवन्त्वजीर्णं
तैलं कुलत्थमथवा विदधाति जीर्णम् ॥

मातुलपुत्रकः धुस्तूरफलम् ॥

कङ्ग्वामाकनीवाराः कुलत्थाश्चाविलम्बितम् ।
दध्नो जलेन जीर्य्यन्ति वैदलाः काञ्जिकेन तु ॥
पिष्टान्नं शीतलं वारि क्षुरारां सैन्धवं पचेत् ।
माषेक्षुरीनिम्बमूलं पायसं मुद्गयूषकैः ॥
वटो वैश्ववाराम्बवक्त्रेण फेनी-
भ्रमं पर्पटः शिग्रुवीजेन याति ।
कणामूलतो लड्डुकापूपशष्कु-
विपाको भवेच्छ्यलीमण्डयोश्च ॥

वेसवारः वेसर इति लोके । तद्यथा,—

स्नेहो निशाहिङ्गुलवङ्गकैला-
धान्याकजीरार्द्रकनागराणि ।
अम्लोषणं सैन्धवपर्णमन्ने
यथोचितं संस्कृतये प्रणीतमिति ॥

शष्कुली शष्कुकः पानकविशेषः । मण्डः माण्ड इति लोके ।

किमत्र चित्रं बहुमत्स्यमांस-
भोजी सुखी काञ्जिकपानतः स्यात् ।
इत्यद्भुतं केवलवह्निपक्व-
मांसेन मत्स्यः परिपाकमेति ॥

आममाम्रफलं मौने तद्वोजं पिण्डिते हितम् ।
कूर्म्ममांसं यवक्षाराच्छीघ्रं पाकमुपेति हि ॥
कपोतपारावतनीलकण्ठ-
कपिञ्जलानां शिग्रुतानि शुक्ला ।
कासस्य मूलं परिपीय पिष्टं
सुखी भवेन्ना बहुशो हि दष्टम् ॥
कपोतो धवलपाण्डुः ।
शाकानि सर्व्वाण्यपि यान्ति पाकं
क्षारेण मत्स्यस्तिलनालजेन ।
चञ्चूकसिद्धार्थकवास्तुकानां
गायत्रिसारकथितेन पाकः ॥
चञ्चूक चेषु इति लोके । गायत्री खदिरः ॥

पलङ्किकाकेसुककारवेल्ली-
वार्त्ताकुवंशाङ्कुरमूलकानाम् ।
उपोदिकालाबुपटोलकानां
सिद्धार्थको मेघरवस्य पक्वा ॥

मेघरवः चवराई इति लोके ।

विपच्यते शूरणकं गुडेन
तथालुकं तण्डुलजोदकेन ।
पिण्डालुकं जीर्य्यति कोरदूषात्
कशेरुपाकः किल नागरेण ॥
लवणस्तण्डुलतोयात् सर्पिर्जम्बीरकाम्लस्नात् ।
मरिचादपि तच्छीघ्रं पाकं यात्येव काञ्जिका-
त्तैलम् ॥
क्षीरं जीर्य्यति तक्रेण तद्गव्यं कोष्णमण्डकात् ।
माहिषं माक्षिकमन्थेन घृतक्षौद्रेण तद्धि ॥
मण्डकः माण्डे इति लोके ।
रसाला जीर्य्यति घोषात् खण्डं नागरभक्षणात् ।
सिता नागरमुस्तेन तथेक्षुक्षादिकारसात् ॥

जरामिरा गैरिकचन्दनाभ्या-
मभ्येति शीघ्रं सुनिभिः प्रणीतम् ।
उष्णेन घृतेन शिग्रुरेण चोष्णं
जीर्णो भवेत् चारगणस्तथाम्लैः ॥

इरा मदिरा ।

तप्तं तप्तं हेम वा तारमम्भौ
तोये क्षिप्तं सप्तकृत्वस्तदम्भः ।
पीत्वाजीर्णं तोयजातं निहन्या-
त्तत्र क्षौद्रं भद्रमुस्तं विशेषात् ॥

तत्र तोयाजीर्णे । इति भावप्रकाशे जठराग्निविकाराजीर्णविसूचिकालसकविलम्बिकाचिकित्सा ॥

पाचनः, पुं, (पाचयतीति । पच्+णिच्+"नन्दि-ग्रहीति ।" ३।१।१३४ । इति ल्युः ।) अग्निः । इति मेदिनी । ने, ६० ॥ अम्लरसः । इति हेमचन्द्रः । ६ । २४ ॥ रक्तैरण्डः । इति राजनिर्घण्टः ॥

पाचनकः, पुं, (पाच्यतेऽनेनेति । पच+णिच्+करणे ल्युट् । ततः संज्ञायां कन् ।) टङ्कणः । इति हेमचन्द्रः । ३ । १० ॥

पाचनी, स्त्री, (पाच्यते भुक्तद्रव्यादिकं यया । पच्+णिच्+ल्युट् । स्त्रियां ङीप् ।) हरीतकी । इति मेदिनी । ने, ६१ ॥ (पाचयतीति व्युत्पत्त्या परिपाचके वाच्यलिङ्गः । यथा, भावप्रकाशे पूर्व्वखण्डे १ भागे ।

"कण्टकारी सरा तिक्ता कटुका दीपनी लघुः ।
रूक्षोष्णा पाचनी कासश्वासजरकफानिलान् ॥")

पाचलं, क्ली, (पाचयतीति । पच्+णिच्+बाहुलकात् कलन् । यद्वा, पाचं पाचनं लातीति । ला+कः ।) पाचनम् । इति मेदिनी । ले, १०६ ॥

पाचलः, पुं, (पाचयतीति । पच्+णिच्+बाहुलकात् कलन् ।) पाचकः । अग्निः । राधनद्रव्यम् । वायुः । इति शब्दरत्नावली ॥

पाची, स्त्री, (पाचयति स्वप्रचरमादिप्रलेपादिना परिपक्वयति व्रणानिति । पच+णिच्+"सञ्ज्ञेधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् । "ऋदिकारादक्तिनः ।" ४ । १ । ४५ । इत्यस्य वार्त्तिकोक्त्या ङीप् ।) लताविशेषः । पाचि इति पच्चे इति च हिन्दी भाषा । तत्पर्य्यायः । मरकतपत्री २ हरितलता ३ हरितपत्रिका ४ पत्री ५ सुरभिः ६ मालारिष्टा ७ गारुत्मतपत्रिका ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । वातदोषग्रहभूतविकारनाशित्वम् । त्वग्दोषप्रशमनत्वम् । व्रणेषु हितत्वञ्च । इति राजनिर्घण्टः ॥

पाजः, [स्] क्ली, (पाति रक्षतीति पाज्यनेनेति वा । पा रक्षणे+"पातेर्बले जुट् च ।" उणां ४ । २०२ । इति असुन् जुड़ागमश्च ।) बलम् । इत्युणादिकोषः ॥ (यथा, ऋग्वेदे ।८।४६।२५।

"आ नो वायो महे तने याहि मखाय पाजसे ॥")

पाञ्चकपालः, त्रि, (पञ्चकपालस्येयमिति । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) पञ्चकपालयागसम्बन्धी ॥ इति व्याकरणम् ॥

पाञ्चजन्यः, पुं, (पञ्चजने दैत्यविशेषे भवः । "पञ्चजनादुपसंख्यानम् ।" ४ । ३ । ५८ । इत्यस्य वार्त्तिकोक्त्या ञ्यः ।) विष्णुशङ्खः । इत्यमरः । १।१।२६ ॥ "पञ्चजनो नाम दैत्यः समुद्रे तिमिरूप आसीत् तदस्थिजत्वात् ।" इति भरतः ॥ (यथा, गीतायाम् । १ । १५ ।

"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥"

अस्य विवरणम् यथा, हरिवंशे ।८६।१५—१७।

"समुद्रः प्रत्युवाचेदं दैत्यः पञ्चजनो महान् ।
तिमिरूपेण तं बालं ग्रस्तवानिति माधव ! ॥
स पञ्चजनमासाद्य जघान पुरुषोत्तमः ।
न चाससाद तं बालं गुरुपुत्रं तदाच्युतः ॥
स तु पञ्चजनं हत्वा शङ्खं लेभे जनार्द्दनः ।
यः स देवमनुष्येषु पाञ्चजन्य इति श्रुतः ॥"

पञ्चभिः काश्यपवंशिष्टप्राणाङ्गिरसत्यवनैर्जनैर्निर्वृत्तः । इति व्यञ् ।) अग्निः । इति मेदिनी । ये, १२२ ॥ (यथा, महाभारते ।३।२१६।१-५।

"काश्यपो ह्यथ वाशिष्ठः प्राणश्च प्राणपुत्रकः ।
अग्निराङ्गिरसश्चैव त्यवनश्चिसुवर्चकः ॥
अचरत् स तपस्तीव्रं पुत्रार्थे बहुवार्षिकम् ।
पुत्रं लभेयं धर्म्मिष्ठं यशसा ब्रह्मणा समम् ॥
महाव्याहृतिभिर्भीतः पञ्चभिस्तैस्तदा त्वथ ।
जज्ञे तेजो महार्चिष्मान् पञ्चवर्णः प्रभावनः ॥
समिद्धोऽग्निः शिरस्तस्य बाहू सूर्य्यनिभौ तथा ।
सङ्गनेत्रे च सुवर्णाभे कृष्णे जङ्घे च भारत ! ॥
पञ्चवर्णः सुतपसा ह्यतस्तैः पञ्चभिर्जनैः ।
पाञ्चजन्यः श्रुतो देवः पञ्चवंशकरस्तु सः ॥"

हारीतसुनिवंशीयस्य दीर्घबुद्धेः पुत्रः । इति स्कन्दपुराणे सह्याद्रिखण्डम् । १ । २७ । ४२ ॥)

पाञ्चजन्यधरः, पुं, (पाञ्चजन्यं तदाख्यया प्रसिद्धं शङ्खं धरतीति । धृ+अच् ।) विष्णुः । इति हारावली ॥

पाञ्चलिका, स्त्री, (पञ्चाली + स्वार्थे अण् । ततः कन् ततष्टापि अत इत्वञ्च ।) पञ्चालिका । इति भरतदिरूपकोषः ॥

पाञ्चशब्दिकं, क्ली, (पञ्चभिः शब्दैर्निर्वृत्तम् । "तेन निर्वृत्तम् ।" ५ । १ । ७६ । इति ठक् ।) पञ्चप्रकारवाद्यम् । यथा, स्कान्दे रेवाखण्डे ।

"अङ्गजं चर्म्मजञ्चैव तन्त्रजं कांस्यजं तथा ।
घनत्वञ्चेति मुनिभिः कथितं पाञ्चशब्दिकम् ॥"

पाञ्चार्थिकः, पुं, (पञ्चार्थाः सन्त्यत्र । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) पाशुपतः । यथा,—

"पाञ्चार्थिकः पाशुपतश्चिद्रूपः स्फूर्त्तिमात्रतः ॥"

इति त्रिकाण्डशेषः ॥

पाञ्चालं, क्ली, (पञ्चाल एव । पञ्चाल + स्वार्थे अण् ।) शास्त्रम् । यथा,—

"पित्रर्हृर्मृगयार्था द्वार्हद्विषेण पुरञ्जनः ।
राष्ट्रं दक्षिणपञ्चालं याति श्रुतधरान्वितः ॥

इति श्रीभागवते ।४। पुरञ्जनोपाख्याने ।२५।५०॥

"पञ्चानां विषयाणामन्यतोऽनवगतानां प्रकाशनायालमिति पञ्चालं शास्त्रम् ।" इति ।

"प्रवृत्तञ्च निवृत्तञ्च शास्त्रं पञ्चालसंज्ञकम् ।"

इति च तट्टीकायां श्रीधरस्वामी ॥

अत्र पञ्चालमिति पाठः किन्तु स्वार्थे णप्रत्यये पाञ्चालमपि भवति ॥

पाञ्चालः, त्रि, (पञ्चाले तदाख्यया प्रसिद्धे प्रदेशे भवः । "तत्र भवः ।" ४ । ३ । ५३ । इत्यण् ।) पञ्चालदेशोद्भवः ॥

पाञ्चालः, पुं, (पञ्चभिः प्रधानाभिर्दीभिरलति पर्य्याप्नोतीति पञ्चालः । ततः स्वार्थे अण् ।) देशविशेषः । स तु इषद्राजनगरम् । अधुना फरक्कावाद इति ख्यातः ॥ (यथा, महाभारते । १ । १३८ । ३ ।

"पाञ्चालराजं द्रुपदं गृहीत्वा रणमूर्द्धनि ।
पर्य्यानयत भद्रं वः सा स्यात् परमदक्षिणा ॥"

तद्देशवासिनि पुं भूम्नि ।) यथा,—

"पाञ्चालाश्चेदिमत्स्याश्च शूरसेनाः पटच्चराः ।"

इत्यादि विराटपर्व्व ॥

(ब्रह्मदत्तस्य सहचरविशेषः । यथा, हरिवंशे । २३ । २२ ।

"पाञ्चालकखरीकाभ्यां तस्य सख्यमभूत्तदा ॥")

पाञ्चालिका, स्त्री, (पाञ्चाली + स्वार्थे कन् । ततो ह्रस्वष्टाप् च ।) वस्त्रदन्तादिकृतपुत्तलिका । तत्पर्य्यायः । पुत्रिका २ । इत्यमरः ॥ पञ्चालिका ३ । इति भरतः ॥ शालभञ्जी ४ । इति हेमचन्द्रः ॥ पाञ्चाली ५ शालभञ्जिका ६ । इति जटाधरः ॥ (रीतिविशेषः । तल्लक्षणं यथा, साहित्यदर्पणे । ६ । ५ ।

"————वर्णैः श्लेषैः पुनर्द्वयोः ।
समस्तपञ्चपदी वन्यः पाञ्चालिका मता ॥")

पाञ्चाली, स्त्री, (पञ्चभिर्वर्णैरलतीति । अल + अच् । गौरादित्वात् ङीष् ।) पाञ्चालिका । (यथा, देवीभागवते । ४ । १६ । ४ ।

"यन्माया मोहितचाहं सदावर्त्ते प्रपालनः ।
परवान् दारुपाञ्चाली मायिकस्य यथा वशे ॥")

(पाञ्चाले भवा । पाञ्चाल + अण् । स्त्रियां ङीप् ।) पाण्डवपत्नी । तत्पर्य्यायः । कृष्णा २ पाण्डुपुत्रमिला ३ पार्व्वती ४ द्रौपदी ५ याज्ञसेनी ६ वेदिजा ७ । इति जटाधरः ॥ सैरन्ध्री ८ नित्ययौवना ९ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १६८ । ४१ ।

"कुमारी चापि पाञ्चाली वेदीमध्यात् समुत्थिता ॥"

अस्या जन्मादिविवरणं द्रौपदीशब्दे द्रष्टव्यम् ॥ रीतिविशेषः । पाञ्चालानां प्रियत्वादेवास्यास्तथात्वम् । यथा, साहित्यदर्पणे । ६ । २ ।

"वैदर्भी चाथ गौड़ी च पाञ्चाली लाटिका तथा ॥"

एतल्लक्षणं यदाह भोजः ।

"समस्तपञ्चपदामोजःकान्तिसमन्विताम् ।
मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः ॥")

पाट्, व, (पाटयति कार्य्यान्तरप्रेरणात् पूर्ब्बकार्य्यं छेदयतीति । पट + णिच् + क्विप् ।) सम्बोधनम् । इत्यमरः । ३ । ४ । ७ ॥

पाटकः, पुं, (पाटयति दीप्यतीति । पाटि + ण्वुल् ।) मद्दाकिक्कुः । कटकान्तरम् । वाद्यभ्रः । अट्टादिचालनम् । मूलद्रव्यापचयः । रोधः । इति मेदिनी ॥ ग्रामैकदेशः । इति हेमचन्द्रः ॥ (पाटयति छिनत्तीति । छेदके । भेदके, त्रि । यथा, हरिवंशे । १०१ । १४ ।

"अहं तमो घनीभूतमहमेव च पाटकः ॥")

पाटचरः, पुं, (पाटयन् छिन्दन् चरतीति । चर + पचाद्यच् । एषोदरादित्वात् साधुः ।) चौरः । इत्यमरः ॥ (यथा, प्रद्युम्नविजये । ७ अङ्के ।

"मन्त्रिन् ! कुलिङ्गसाहसिकत्वं किलैतस्य पापपाटचरस्य ॥")

पाटनं, क्ली, (पट + णिच् + भावे ल्युट् ।) छेदनम् । यथा,—

"अस्थिभङ्गं गवां कृत्वा लाङ्गूलच्छेदनं तथा ।
पाटने कर्णशङ्कूनां मासार्द्धन्तु यवान् पिबेत् ॥"

इति प्रायश्चित्ततत्त्वे यमः ॥

पाटलं, क्ली, (पाटलो वर्णोऽस्यास्तीति । पाटल + अर्श आदित्वादच् ।) पाटलीपुष्पम् । इत्यमरः ॥ गोलावाख्यपुष्पमिति केचित् ॥ (यथा, भागवते । ४ । ६ । १४ ।

"पाटलाशोकवकुलैः कुन्दैः कुरवकैरपि ॥"

पाटलेति केचित् ॥)

पाटलः, पुं, (पाटयतीति । पट + णिच् + वृषादित्वात् कलच् ।) श्वेतरक्तवर्णः । गोलाविशेष इति भाषा । आशुधान्यम् । इत्यमरः ॥ अस्य गुणाः । अल्पत्वम् । बहुनिष्यन्दित्वम् । चिरोषकारित्वञ्च । इति राजवल्लभः ॥ तद्वर्णयुक्ते, त्रि ॥ (यथा, रघौ । २ । २६ ।

"स पाटलायां गवि तस्थिवांसं
धनुर्द्धरः केशरिणं ददर्श ।

अधित्यकायामिव धातुमत्यां
लोध्रद्रुमं साधुमतः प्रफुल्लम् ॥")

पाटलद्रुमः, पुं, (पाटलस्य पाटलपुष्पस्य द्रुमो वृक्षः । यद्वा, पाटलो द्रुमः इति नित्यकर्म्मधारयः ।) पुन्नागवृक्षः । इति राजनिर्घण्टः ॥

पाटला, स्त्री, (पाटलो वर्णोऽस्यास्याः । पाटलवर्णत्वादेवास्यास्तथात्वम् ।) दुर्गा । यथा,—

"अपर्णानेकपर्णा च पाटला पाटलावती ॥"

इति तन्त्रसारे तस्याः शतनामस्तोत्रम् ॥ पुष्पवृक्षविशेषः । पारुल इति भाषा ॥ तत्पर्य्यायः । पाटलिः २ अमोघा ३ काश्यपाली ४ फलेरुहा ५ कृष्णवृन्ता ६ कुबेराक्षी ७ । इत्यमरः ॥ ताम्रपुष्पी ८ कुम्भिका ९ सुपुष्पिका १० वसन्तदूती ११ स्थाली १२ क्षिरगन्धा १३ अम्बुवासी १४ कालवृन्ती १५ । इति राजनिर्घण्टः ॥ मधुदूती १६ कालास्थली १७ अलिवल्लभा १८ । इति भावप्रकाशः ॥ कामदूती १९ कुम्भी २० तोयाधिवासिनी २१ । इति रत्नमाला ॥ अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफवातश्वोफाध्मानविश्वासमन्निपातनाशित्वञ्च । इति राजनिर्घण्टः ॥ तुवरत्वम् । अनुष्णत्वम् । दोषत्रयरुचिहिक्काव्रणनाशित्वञ्च ॥ तत्पुष्पगुणाः । कषायत्वम् । मधुरत्वम् । हिमत्वम् । क्लेद्यत्वम् । कफासनाशित्वञ्च । तत्फलगुणाः । पित्तातिसारदाहनाशित्वम् । हिक्कासपित्तकारित्वञ्च । इति भावप्रकाशः ॥ * ॥ तदुत्पत्तिर्यथा,—

"गते ब्रह्मणि सर्व्वोऽपि तपः संस्थ्य तं तदा ।
लिङ्गं चित्रवने रुद्रः प्रतिष्ठाप्य चचार ह ॥
विचरन्तं तदा भूयो महेशं कुसुमायुधः ।
आरात् स्थित्वायतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमग्रतो दृष्ट्वा क्रोधाभ्मातङ्गया हरः ।
स्मरमालोकयामास शिखाग्याकरणात्मिकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् पादादारभ्य कृत्स्नवत् ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्ससर्ज्ज धनुः श्रेष्ठं तच्चगामाथ पृथ्वी ॥
यदासीन्मुष्टिबन्धस्तु रुक्मपृष्ठो महाप्रभः ।
स चम्पकतरुर्जातः सुगन्धाढ्यो गुणाकृतिः ॥
नाहस्थानं शुभाकारं यदासीद्दृश्यभूषितम् ।
तच्जातं केशरारण्यं वकुलं नामतो नगैः ॥
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजिविभूषिता ॥"

इति वामने ६ अध्यायः ॥

रक्तलोध्रः । इति शब्दचन्द्रिका ॥

पाटलापुष्पसन्निभं, क्ली, (पाटलापुष्पस्य सन्निभा सादृश्यं यत्र ।) पद्मकाष्ठम् । इति राजनिर्घण्टः ॥

पाटलिः, स्त्री, (पाटि + भावे घञ् । पाटो दीप्तिर्स्त लातीति । ला + "अच इः ।" उणा ४ । १३८ । इति इः । पाटलिपुष्पाणां अतिसुश्रीकतायै वास्या तथात्वम् ।) पाटलापुष्पवृक्षः । इत्यमरः ॥

(यथा, महाभारते । ७ । २२ । १५ ।
"तन्नु पाटलिपुत्राणां समवर्णा दृश्यौत्तमाः ।
बहुमानाद् यराजन्त मत्स्यस्त्रीभिरधानिनः ॥")

पाटलिपुत्रं, क्ली, (पाटलिः पुत्र इव यस्य । बहुव्रीहौ पाटलिवृक्षोत्पत्तिस्थानत्वेनास्य तथात्वम् ।) नगरविशेषः । पाटना इति ख्यातः । तत्पर्य्यायः । कुसुमपुरम् २ । इति हेमचन्द्रः । ४ । ९२ ॥ पुष्पपुरम् ३ पाटलिपुत्रकम् ४ । इति त्रिकाण्डशेषः ॥ (इदन्तु गङ्गानीरस्थम् । यथा हितोपदेशे । "अस्ति भागीरथीतीरे पाटलीपुत्रनामधेयं नगरम् ॥"
इदमेव पुरा मगधानां राजधानी आसीत् । अजातशत्रुनामको भूपतेः पुत्राणां नीतिविद्याधिगमाय विष्णुशर्म्मणा पञ्चतन्त्रहितोपदेशाख्यो ग्रन्थो विरचितः ॥)

पाटली, स्त्री, (पाटं दीप्तिं लातीति । ला + कः । स्त्रियां ङीप् ।) कटभीवृक्षः । शुक्लकट्फलः । इति राजनिर्घण्टः ॥ (यथा, इन्द्रजाले १ अध्याये ।
"पृथ्वीं रुद्रजटामूलं मुखस्थं कारयेद्दृढम् ।
ताम्बूलादौ प्रदातव्यं वश्या भवति निश्चितम् ।
तथैव पाटलीमूलं ताम्बूलेन तु दापयेत् ॥")

पाटवं, क्ली, (पटोर्भावः कर्म्म वा । पटु + "इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इत्यण् ।) पटुता । यथा । "पाटवं संस्कृतोक्तिषु ।" इति हितोपदेशः ॥ (दार्ढ्यम् । यथा, पञ्चतन्त्रे । ४ । ६४ ।
"विचिन्त्यते कदाचित् धीः कर्म्मणा भोगदायिना ।
पुनः समाहिता सा स्यात् तदैवाभ्यासपाटवात् ॥")
आरोग्यम् । इति राजनिर्घण्टः ॥ (पटोरस्त्राः पाटवाः । इति सिद्धान्तकौमुदी ॥)

पाटविकः, त्रि, (पाटवं पटुत्वमस्त्यस्य । पाटव + ठन् ।) पटुः । धूर्त्तः । इति त्रिकाण्डशेषः ॥

पाटहिका, स्त्री, (पाटहं पटहावयवः तदाकृतिरस्त्यस्याः । पाटह + ठन् । टकारादाकृतिसङ्घ्यादेवास्यास्तथात्वम् ।) गुञ्जा । इति हारावली । १४५ ॥

पाटितं, त्रि, (पाट्यते स्म इति । पट + णिच् + क्तः ।) छतपाटनम् । तत्पर्य्यायः । दारितम् २ भिन्नम् ३ । इति हेमचन्द्रः ॥ (यथा, सुश्रुते । २ । १६ ।
"पाटितमनु बहुविदारितं वेदनावच्च ॥")

पाटी, स्त्री, (पाटयतीति । पाटि + "सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् । स्त्रियां वा ङीष् ।) वल्लाङ्गुषः । इति राजनिर्घण्टः ॥ परिपाटी । अनुक्रमः । यथा, "पाटीं सङ्गणितस्य वक्ष्मि चतुरप्रीतिप्रदां प्रस्फुटाम् ।" इत्यादि लीलावती ॥

पाटीरः, पुं, पटीरः । इति विश्वः । (यथा, मुकुन्दमालायाम् । ३२ ।
"लाटीनेत्रपुटीपयोधरघटीरेवातटीदुष्कुटी
पाटीरद्रुमवर्णनेन कविभिर्मूढैर्दिनं नीयते ।
गोविन्देति जनार्द्दनेति जगतां नाथेति कृष्णेति च
त्वाहारैः समयस्यैकमनसां पुंसामतिक्रामति ॥")

पाठ्यं, क्ली, (पठ्यस्य इदम् । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) पठ्यग्राकम् । यथा,—
"पाठ्यग्राकन्तु मधुरं दुर्जरं गुरुपाकि च ॥"
इति राजवल्लभः ॥
(पाटि + यत् । पाटनीये । छेद्ये, त्रि ॥)

पाठः, पुं, (पठनमिति । पठ + भावे घञ् ।) विधिना वेदस्याभ्यसनम् । (पठ + णिच् + भावे घञ् ।) शिष्यागामध्यापनम् । तत्पर्य्यायः । मन्त्रायत्नः २ ब्रह्मयज्ञः ३ पठनम् ४ पाठना ५ पाठनम् ६ अध्ययनम् ७ अध्यापनम् ८ अध्यापना ९ अध्यसनम् १० । इत्यमरभरतौ ॥ निपाटः ११ निपठः १२ । इति सङ्कीर्णवर्गे अमरः ॥ * ॥ माहात्म्यादिपाठे तु ॐ नारायणाय नमः ॐ नराय नमः ॐ नरोत्तमाय नमः ॐ हंसे नमः ॐ सरस्वत्यै नमः ॐ व्यासाय नमः । इति त्वा पाठ्यम् ।
"नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥"
इति विधेः ॥
एवञ्च भागवतीयस्तुतौ उदीरयेत् इत्यस्य स्वयन्तथा उदीरयन्त्यान् पौराणिकानुपश्चियतीति श्रीधरस्वामिव्याख्यानमनुपपन्नविरुद्धम् । चैवेति भारतपाठाचकारेण व्यासो लब्धः । भागवते चैवेत्यत्र व्यास इति साक्षान्निश्चितम् । जयपदार्थमाह ब्रह्मचारिकाण्डे भविष्यपुराणम् ॥
"अष्टादशपुराणानि रामस्य चरितन्तथा ।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत ! ॥
कार्ष्णाश्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ॥"
कार्ष्णो कृष्णद्वैपायनप्रणीतम् ।
"सौराश्च धर्म्मा राजेन्द्र मानवोक्ता महीपते ।
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ॥"
जयत्यनेन संसारमिति जयस्तदुग्रन्थः । एवञ्चार्थावलोकनात् आचाराद्वा स्तोत्रादावेष श्लोकः पठ्यते । मनुस्मृतौ वाराहीतन्त्रे च ।
"प्रणवञ्चादौ जपाच्च स्तोत्रं वा संहितां पठेत् ।
अन्ते च प्रणवं दद्यादित्यवाचादिमूरुषः ॥
सर्व्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत् ।
सुहृन्मानसचित्तेन पठितव्यं प्रयत्नतः ॥
न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य वाचनम् ।
आधारे स्थापयित्वा तु पुस्तकं वाचयेत् सुधीः ॥
हस्तसंस्थापनादेव यस्मादल्पफलं भवेत् ।
स्वयञ्च लिखितं यत्तु कृतिना लिखितन्न यत् ॥
अन्यान्यैर्लिखितं तत्तापि विफलं भवेत् ।
ऋषिच्छन्दादिकं न्यास्य पठेत् स्तोत्रं विचक्षणः ॥
स्तोत्रे न दृश्यते यत्र प्रणवन्यासमाचरेत् ।
सङ्कल्पिते स्तोत्रपाठे संख्यां कृत्वा पठेत् सुधीः ॥
अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ।
कृते विरामे मध्ये तु अध्यायादिं पठेन्नरः ॥"

ततश्च मार्कण्डेयपुराणीयदेवीमाहात्म्यस्यादौ ऋषिच्छन्दादिकं पठेत् । तद्यथा । प्रथमचरितस्य ब्रह्म ऋषिर्महाकाली देवता गायत्री छन्दो नन्दा शक्तिः रक्तदन्तिकाबीजमग्निस्तत्त्वं महाकालीप्रीत्यर्थं जपे विनियोगः । मध्यमचरितस्य विष्णुर्ऋषिर्म्महालक्ष्मीर्देवतानुष्टुप् छन्दः शाकम्भरी शक्तिर्दुर्गा बीजं सूर्य्यस्तत्त्वं महालक्ष्मीप्रीत्यर्थं जपे विनियोगः । उत्तरचरितस्य रुद्र ऋषिः सरस्वती देवता उष्णिक् छन्दो भीमा शक्तिर्भ्रामरीबीजं वायुस्तत्त्वं सरस्वतीप्रीत्यर्थं जपे विनियोगः ॥ नैयत्तकालिककल्पतरौ भविष्यपुराणम् ॥
"इतिहासपुराणानि श्रुत्वा भक्त्या महीपते ।
मुच्यते सर्व्वपापेभ्यो ब्रह्महत्यादिभिर्विभो ॥
ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात् ।
श्रुत्वान्यवर्णजाद्राजन् ! वाचकान्नरकं व्रजेत् ॥"
तथा ।
"देवार्चामग्नेः कृत्वा ब्राह्मणानां विशेषतः ।
ग्रन्थिञ्च ग्रन्थिलं कुर्य्यादाचकः कुरुनन्दन ॥
पुनर्ब्बध्नीत तन्त्रं न मुक्ता धारयेन्न क्वचित् ।
हिरण्यं रजतं गाञ्च तथा कांस्योपदोहनाः ॥
दत्त्वा तु वाचकायेह श्रुतस्यापोनियत् फलम् ।"
कांस्योपदोहनाः कांस्यक्रीड़ाः ।
"वाचकः पूजितो येन प्रसन्नस्तस्य देवताः ॥"
तथा ।
"ज्ञात्वा सर्व्वसमाप्तिञ्च पूजयेद्वाचकं बुधः ।
आत्मानमपि विक्रीय य इच्छेत् सफलं क्रतुम् ॥"
तथा ।
"विशेषमहतं ग्रन्थं सुश्लोकपदसन्ततम् ।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥
बुध्यमानः सदर्थं वै ग्रन्थार्थं कृतनिश्चयो नृप ।
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थवाचयेन्नृप ॥
य एवं वाचयेद्ग्रन्थं स विप्रो व्यास उच्यते ॥"
तथा
"सप्तस्वरसमायुक्तं काले काले विराम्यते ।
प्रदर्शयन्नृणां सर्व्वान् वाचयेद्वाचको नृप ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
पाठस्याष्टादशदोषा यथा,—
"शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम् ।
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम् ॥
काकस्वरं शिरसिगं तथा स्थानविवर्ज्जितम् ।
आकुलं तालहीनञ्च पाठदोषाश्चतुर्दश ॥
संगीतं शिरसः कम्पमस्पष्टकण्ठमनर्थकम् ॥"
इति मार्कण्डेयपुराणम् ॥ * ॥
अध्ययनक्रमो यथा,—
"आचम्य प्रयतो नित्यमधीयीत उदङ्मुखः ।
उपसंगृह्य तत्पादौ शीर्ष्यमाणो गुरोर्मुखम् ॥"
अध्यापनक्रमो यथा,—
"अधीष्वभो इति ब्रूयादिरामोऽस्त्विति चापरम् ।
प्राक् कूलान् पर्य्युपासीनः पवित्रैश्चैव पावितः ॥
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।
ब्राह्मणः प्रणवं कुर्य्यादन्ते च विधिवद्द्विजाः ॥

कुर्य्यादध्यापनं नित्यं स ब्रह्मादीनि पूर्व्वतः ।
सर्व्वेषामेव भूतानां वेदश्चक्षुः सनातनः ॥
अधीयीताथ यत्नित्यं ब्राह्मण्याद्वीयतेऽन्यथा ॥"
इति कौर्म्मे उपविभागे १३ अध्यायः ॥ * ॥
पाठनिषेधकालो यथा । यज्ञेऽनध्यायो न हवोपरागमात्रविषयः ।
"त्राद्धं नक्षत्रयेदृक्षं राज्ञो राहोश्च सूतके ।"
इति मनुवचनेन सामान्यतो निषेधात् ॥
एष त्राह्मानध्यायो यज्ञाङ्गविषय इति मिताक्षरा अन्यत्र त्वहोरात्रमनध्यायो याज्ञवल्क्यात् । यथा,—
"सन्ध्यागर्জ্জितनिर्घातभूकम्पोल्कानिपातने ।
समाप्य वेदं द्युनिशमारण्यकमधीत्य च ॥
पञ्चदश्यां चतुर्দ্দश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु भुक्त्वा वा आह्निकं प्रतिगृह्य च ॥"
द्युनिशमहोरात्रम् । चैत्रआवणमार्गशीर्षाणामादिप्रतिपदो नित्याः इति ब्रह्मचारिकाङ्धृतहारीतवचने एतासामनध्याये नित्यत्वाभिधानादन्यासां काम्यत्वम् । आदिप्रतिपदः शुक्लप्रतिपदः ॥
"सा च यौधिष्ठिरी सेना गर्জ্জेयग्रस्तताड़िता ।
प्रतिपत्पाठशीलानां विद्येव तनुतां गता ॥"
इति व्यासवचनमपि तावन्मात्रपरम् ॥ * ॥
गोतमोक्ताकालिकानध्याया यथा,—
आकालिकनिर्घातभूकम्पराहुदर्शनोल्का इति आकालिका इति । निमित्तकालमारभ्य परेद्युर्यावत् स एव कालस्तावदकालस्तत्र भवाः ॥
तथा,—
"विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥" * ॥
उल्कादिषु प्रतिप्रसवमाह मनुः ।
"वेदोपकरणे चैव स्वाध्याये चैव नित्यके ।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥"
पराशरभाष्ये कूर्म्मपुराणम् ।
"अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्জ্জयेत् ॥"
नारदः ।
"अयने विषुवे चैव ग्रयने बोधने हरेः ।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु ॥" * ॥
सन्ध्यागर्জ्जने श्राद्धचिन्तानिन्दामाह शङ्खचिन्तामणौ दुर्व्वासाः ।
"सन्ध्यायां गर्জ्जिते मेघे श्राद्धचिन्तां करोति यः ।
चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो बलम् ॥
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने ।
सन्ध्योतिः स्यादनध्याय इत्याह भगवान् मनुः ॥"
इति मनुवचनं वर्षाविषयम् ॥ * ॥
अरण्यादिषु विशेषमाह हेमाद्रिधृतापस्तम्बः ।
"उदयास्तमिते वापि सुकृष्णत्वयमागि यत् ।
तद्दिनं तदहोरात्रमनध्यायविदो विदुः ॥
केचिदाहुः कचिद्देशे यावत्तु दिननाड़िकाः ।
तावदेव त्वनध्यायो न तच्छेषे दिनान्तरे ॥"
तद्दिनं तां तिथिं प्राप्येत्यर्थः । दिनान्तरे तिथ्यन्तरे । अत्र पूर्व्ववचनसुत्तरमीमांसाध्यायिभिः परिगृहीतम् । परवचनन्तु अन्यग्रन्थपरम् । यत्तु निर्णयान्ततृधृतम् ।
"प्रतिपल्लेशमात्रेण कलामात्रेण चाष्टमी ।
दिनं दूषयते सर्व्वं सुरा गोघटं यथा ॥"
तदूषयत इत्यभिधानात् पूर्व्ववर्त्तितामात्रेण सर्व्वदिनदूषणाय । राजमार्त्तण्डे ।
"प्रे को चै चा द्वितीयास्ताः प्रेतपक्षे गते तु याः ।
या तु कोजागरे जाते चैत्रवल्याः परेऽपि याः ॥
चातुर्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः ।
सर्व्वाखेताखनध्यायः पुराणे परिकीर्त्तितः ॥"
इति तिथ्यादितत्त्वम् ॥
पाठकः, त्रि, (पाठयति अध्यापयतीति । पठ + णिच् + ण्वुल् ।) उपाध्यायः । इति हेमचन्द्रः । २ । ७८ ॥ (यथा, महाभारते ।३।३१२।१०५।
"पठका: पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्व्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ॥")
धर्म्मभाषकः । इति त्रिकाण्डशेषः ॥ (पठतीति । पठ + ण्वुल् । वाचकः । अध्येता ।
"सर्व्वगं गिलनस्थापि कासितं श्वासितन्तथा ।
नीचोच्चैश्चैव गम्भीरं वर्ज्जयेत् पाठकः सुधीः ॥"
इति हारीते प्रथमस्थाने प्रथमेऽध्याये ॥)
पाठभूः, स्त्री, (पाठस्य भूर्भूमिः स्थानमित्यर्थः ।) ब्रह्मारण्यम् । वेदादिपाठस्थानम् । इति त्रिकाण्डशेषः ॥
पाठमञ्जरी, स्त्री, (मञ्जु सुन्दरं यथा तथा रायति ग्रन्थायते इति । मञ्जु + रै + कः । स्त्रियां ङीप् । एषोदरादित्वात् लोपः । ततः पाठस्य मञ्जरी वाचिकेव ।) शारी पक्षिणी । इति शब्दमाला ॥
पाठशाला, स्त्री, अध्ययनगृहम् । पाठस्य अध्ययनस्य शाला गृहम् । इति षष्ठीतत्पुरुषसमासनिष्पन्ना ॥
पाठशालिनी, स्त्री, (पाठेन शालते शोभते इति । शाल + णिनिः + ङीप् ।) शारी पक्षिणी । इति शब्दमाला ॥
पाठा, स्त्री, (पठ्यते बहुगुणत्वेन कथ्यते इति । पठ + कर्म्मणि घञ् । अजादित्वात् टाप् ।) लताविशेषः । आकनादि इति भाषा । तत्पर्य्यायः । अम्बष्ठा २ अम्बष्ठिका ३ प्राचीना ४ पाषचेलिका ५ यूथिका ६ स्थापनी ७ श्रेयसी ८ विश्वकर्षिका ९ एकाष्ठीला १० कुचेली ११ दीपनी १२ वनतिक्तिका १३ सिक्तपुष्पा १४ दृढत्वक्ता १५ शिशिरा १६ वृकी १७ मालती १८ वरा १९ देवी २० वृत्तपर्णी २१ । अस्या गुणाः । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वातपित्तज्वरपित्तदाहातीसारशूलनाशित्वम् । भग्नसन्धानकारित्वञ्च । इति वैद्यकम् ॥ * ॥
"अम्बष्ठा बालिका बाला ग्रन्थाम्बा बालिकाम्बिका ।
अम्बा च माषिका चैव दृढ़वल्का मयूरिका ॥
ग्रन्थपर्णी चित्रपुष्पी श्रेयसी सुखवाचिका ।
छिन्नपत्री भूरिमल्लिर्विज्ञेया षोड़शाह्वया ॥
अम्बष्ठा सकषायाम्ला कफकण्ठरुजापहा ।
वातामयबलासघ्नी रुचिकृद्दीपनी परा ॥"
इति राजनिर्घण्टः ॥
"पाठाम्बष्ठाम्बष्ठकौ च प्राचीना पाषचेलिका ।
एकाष्ठीला स्मृता प्रोक्ता पाठिका वरतिक्तिका ॥
पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः ।
हन्ति शूलज्वरच्छर्दिकुष्ठातीसारहृद्रुजः ॥
दाहकण्डूविषश्वासकृमिगुल्मगलव्रणान् ॥"
इति भावप्रकाशः ॥
पाठिका, स्त्री, (पाठा + स्वार्थे कन् । टापि अत इत्वञ्च ।) पाठा । इति भावप्रकाशः ॥
पाठी, [न्] पुं, (पाठेव आकृतिर्विद्यते यस्य । पाठा + इनिः ।) चित्रकवृक्षः । इत्यमरः ॥ (पाठोऽस्यस्येति । "अत इनिठनौ ।"५।२।११५। इति इनिः ।) पाठविशिष्टः ॥ (कर्म्मोपपदेनास्य प्रमाणं यथा, मार्कण्डेये । ६८ । २६ ।
"बन्दिनामथ सूतानां विटानां शास्त्रपाठिनाम् ॥")
पाठीकुटः, पुं, (पाठीं कुटतीति । कुट + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) चित्रकवृक्षः । इति राजनिर्घण्टः ॥
पाठीनः, पुं, (पाठिं पृष्ठं नमयतीति । पाठि + नम + णिच् + "अन्येभ्योऽपीति ।"डः । "अन्येषामपि दृश्यते ।" ६ । ३ । १३७ । इति दीर्घः ।) मत्स्यविशेषः । बोयालि इति भाषा । तत्पर्य्यायः । सहस्रदंष्ट्रः २ । इत्यमरः ॥ सहस्रदंष्ट्री ३ वोदालः ४ वदालकः ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ५ । १६ ।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ॥")
अस्य गुणाः । श्लेष्मलत्वम् । स्निग्धत्वम् । मधुरत्वम् । कषायत्वम् । बल्यत्वम् । वृष्यत्वम् । पाके कटुत्वम् । रोचनत्वम् । वातपित्तजित्त्वञ्च । इति राजवल्लभः ॥ (यथा च ।
"पाठीनः श्लेष्मलो वृष्यो निद्रालुः पिच्छिलाशनः ।
दूषयदग्निपित्तन्तु कुष्ठरोगं करोत्यसौ ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
पाठकः । गुग्गुलुद्रुमः । इति मेदिनी । ने, ८८ ॥
पाठ्यं, त्रि, (पठ्यते इति । पठ + "ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् ।) पठनीयम् । पठितव्यम् । यथा,—
"तिष्ठ रे तिष्ठ कण्ठोष्ठं कुक्षयामि हृदादहम् ।
अपठ्यं पठतः पाठ्यमधिगोहि गुरोस्त्वं ते ॥"
इति नैषधे १७ सर्गः ॥
पाठ्यः, पुं, (पठ्यते अवच्छिद्यतेऽनेनेति । पठ + करणे घञ् ।) पाणिः । इति शब्दचन्द्रिका ॥ (पठ + भावे घञ् । पठनम् । समयः । यथा, महाभारते । २ । ५७ । ८ ।
"दीयामहे पार्थिव ! मा विशङ्कां
कुरुष्व प्राणेषु चिरेण मा कृथाः ॥")

पाणिः, स्त्री, (पणायन्ते व्यवहरन्त्यस्यामिति । पण + "अग्निपणाय्यो रुड़ायलुकौ च ।" उणा ४ । १३२ । इति इण् आयप्रत्ययस्य लुक् च ।) पण्यवीथी । इट्टः । इत्युणादिकोषः ॥

पाणिः, पुं, (पणायन्ते व्यवहरन्त्यनेन । पण ड व्यवहारे + "अग्निपणाय्यो रुड़ायलुकौ च ।" उणा ४ । १३२ । इति इण् आयप्रत्ययस्य लुक् च ।) स च मणिबन्धावधङ्गुलिपर्य्यन्तभागः । स तु गर्भस्थबालकस्य मासद्वयेन भवति ॥ इति सुबोधः ॥ तत्पर्य्यायः । पञ्चशाखः २ भुजः ३ समः ४ हस्तः ५ करः ६ । इत्यमरभरतौ ॥ भुजः ७ । इति जटाधरः ॥ कुलिः ८ । इति शब्दरत्नावली ॥ भुजादलः ९ । इति चिकाण्डशेषः ॥ (यथा, देवीभागवते । २ । २ । १६ ।

"त्यजनाभिसुगन्धां तां ज्ञात्वा कान्तां मनोरमाम् ।
जघ्राह दक्षिणे पाणौ सुनिर्म्मन्थपीड़ितः ॥")

कुलिकदृश्यः । इति रत्नमाला ॥ कुलियाकड़ा इति भाषा ॥

पाणिकच्छपिका, स्त्री, (कच्छपः कूर्म्मस्तदाकारोऽस्यस्याः । कच्छप + ठन् । टापि अत इत्वञ्च । पाणिभ्यां ज्ञता कच्छपिका कूर्म्माकृतिमुद्रा ।) कूर्म्ममुद्रा । यथा,—

"पाणिकच्छपिकां कुर्य्यात् कूर्म्ममन्त्रेण साधकः ।
तत्र संस्कृतपुष्पेण पूजयेदात्मनो वपुः ॥
पूजितं तेन पुष्पेण देवत्वं खस्य जायते ॥"

कूर्म्ममन्त्रो यथा,—

"द्वितीयं वेद्यवीतन्तं बीजं बिन्दुसंयुतम् ।
वह्निस्थो परिचरं कूर्म्मबीजं प्रकीर्त्तितम् ॥"

इति कालिकापुराणे ५६ अध्यायः ॥

पाणिग्रहीती, स्त्री, (पाणिर्गृहीतो यस्याः । "पाणिग्रहीती भार्य्यायाम् ।" ४ । १ । ५२ । इत्यस्य वार्त्तिकोक्त्या ङीष् ।) विधानेनोढ़ा । इत्यमरः । २ । ६ । ५ ॥

पाणिग्रहणं, क्ली. (पाणेर्ग्रहणं यत्र ।) विवाहः । इति हेमचन्द्रः । ३ । १८२ ॥ (यथा, रघुः । ७ । २६ ।

"इति खसुर्भोजकुलप्रदीपः
सभ्याय पाणिग्रहणं स राज्ञा ।
महीपतीनां पृथगर्हणार्थं
समादिदेशाधिकृतानधिश्रीः ॥")

पाणिघः, पुं, (पाणिं पाणिना वा हन्तीति । हन + "पाणिघताड़घौ शिल्पिनि ।" ३ । २ । ५५ । इति टक् टिलोपो घत्वञ्च निपात्यते ।) पाणिवादः । पाणिना ताड़नादिवाद्यम् । पाणिं वा हन्ति यः । यः पाणिनैव ताड़नादिवाद्यसृत्पादयति तत्र । यः पाणिना ताड़नमिव पाणिं वादयति तत्र च । इत्यमरभरतौ ॥

पाणिघातः, पुं, (पाणिना हन्तीति । हन + अग्निशिल्पित्वात् अच् ।) पाणितालकः । इति सिद्धान्तकौमुदी ॥ (हन + भावे घञ् । पाणिना घातो हननमिति । पाणिहननम् ॥)

पाणिजः, पुं, (पाणौ जायते इति । पाणि + जन् + "सप्तम्यां जनेर्डः ।" ३ । २ । ९७ । इति डः ।) नखः । इति हलायुधः ॥

पाणितलं, क्ली, (पाणितलमिव परिमाणमस्येति । अच् ।) कर्षपरिमाणम् । तोलकद्वयम् । इति वैद्यकपरिभाषा ॥ (पर्य्यायोऽस्या यथा,—

"कोलद्वयञ्च कर्षः स्यात् स प्रोक्ता पाणितालिका ।
अर्द्धं पिचुः पाणितलं किञ्चित् पाणिश्च तिन्दुकम् ॥
विड़ालपदकञ्चैव सुवर्णं कवलग्रहः ।
उदुम्बरश्च पर्य्यायैः कर्षं एव निगद्यते ॥"

इति भावप्रकाशे पूर्व्वखण्डे प्रथमेऽध्याये ॥

पर्य्यायान्तरं यथा,—

"विद्यादौ द्वंचणौ कर्षं सुवर्णञ्चाक्षमेव च ।
विड़ालपदकन्तच्च पिचुस्त्वाणितलन्तथा ॥
तिन्दुकञ्च विजानीयात् कवलग्रहमेव च ॥"

इति भरते कल्पस्थाने द्वादशेऽध्याये ॥ पाणितलम् ।) हस्ताधोभागः ॥ (यथा, मनौ । ४ । १४३ ।

"सृष्ट्वैतान्मुषिर्नित्यमद्भिः प्राणानुपस्पृशेत् ।
गात्राणि चैव सर्व्वाणि नाभिं पाणितलेन तु ॥")

पाणिनः, पुं, (पणिनो सुनेर्गोत्रापत्यम् । पणिन् + अञ् । "गाथिविदथिकेशिगणिपणिनश्च ।" ६ । ४ । १६५ । इति न टिलोपः ।) पाणिनिसुनिः । इति चिकाण्डशेषः ॥

पाणिनिः, पुं, (पणिनो सुनेर्युवापत्यम् । पणिन् + इञ् । न टिलोपः ।) सुनिविशेषः । तत्पर्य्यायः । आहिकः २ दाक्षीपुत्रः ३ शालङ्की ४ पाणिनः ५ शालातुरीयः ६ । इति चिकाण्डशेषः ॥ * ॥ (अयं हि पणिन्-वंशसम्भूतः प्रसिद्धो वैयाकरण-कर्त्ता । अस्य माता दाक्षी इत्याख्या विश्रुता । यथा, पातञ्जलकारिकायाम् । १ । १ । २० ।

"सर्व्वे सर्व्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ॥"

तथाच शिक्षायाम् । ५६ ।

"शालङ्कीः शालङ्कीं प्रादाद्दाक्षीपुत्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥"

अस्य शालातुरीय इत्याख्यापि श्रूयते । यथा, अभिधानचिन्तामणौ । ३ । ५१५ ।

"————————अथ पाणिनौ ।
शालातुरीयदाक्षेयौ————————॥"

"गान्धारप्रदेशविशेषशलातुरग्रामजातत्वादेवास्य तथा नाम ।" इति चिन्तामणिटीका ॥ परे तु शलातुरग्रामोऽस्य जन्मस्थानमिति न स्वीकुर्व्वन्ति । यतः शलातुरोऽभिजनोऽस्य इति युत्पत्त्या शालातुरशब्देन शलातुरदेशोद्भवे जने एवार्थो नावगम्यते । अष्टाध्यायीसूत्रपाठस्य "तूदीशलातुरवर्म्मतीकूचवाराट् ठक् छण् छ यकः ।"४ । ३ । ९४ । सूत्रात् अभिजनार्थे एव छण्प्रत्ययः । वृत्तिकारभट्टोजीदीक्षितेन तु "अभिजनश्च ।" ४ । ३ । ९० । इति सूत्रे "यत्र स्वयं वसति स निवासः । यत्र पूर्व्वैरुषितं सोऽभिजनः ।" इत्यभिजनशब्दस्यार्थः प्रदर्शितः । अतः स्वतः शलातुरप्रदेशः पाणिनेः पूर्व्वपुरुषाणां वासस्थानमित्येवावगम्यते नतु तस्येति ।

पुरा किल कात्यायननामा मुनिः सप्तलक्षश्लोकात्मकं बृहत्कथाभिधानं ग्रन्थं विरचय्य काणभूतये आवयामास । सोमदेवभट्टस्तु ततः सारांशं समुद्धृत्य कथासरित्सागर इत्याख्यया प्रसिद्धं ग्रन्थं निर्म्मितवान् तस्मादेषाख्यायिका समधिगम्यते । यथा, तत्रैव । ४ । २०—६५ ।

"अथ कालेन वर्षस्य शिष्यवर्गो महानभूत् ।
तत्रैकः पाणिनिर्नाम जड़बुद्धितरोऽभवत् ॥
स शुश्रूषापरिक्लिष्टः प्रेषितो वर्षमार्य्यया ।
अगच्छत् तपसे खिन्नो विद्याकामो हिमालयम् ॥
तत्र तीव्रेण तपसा तोषितादिन्द्रशेखरात् ।
सर्व्वविद्यासखं तेन प्राप्तं व्याकरणं नवम् ॥
ततश्चागत्य मामेव वादायाह्वयते स्म सः ।
प्रवृत्ते चावयोर्वादे प्रयाताः सप्तवासराः ॥
अहमेवाहि मया तस्मिन् जिते ततसमनन्तरम् ।
नभःस्थेन महाघोरो हूङ्कारः शुम्भता कृतः ॥
तेन प्रणष्टमैन्द्रत्वदस्मद्व्याकरणं भुवि ।
जिताः पाणिनिना सर्व्वे सखीभूता वयं पुनः ॥
अथ संजातनिर्व्वेदः स्वयंग्रहणिते धनम् ।
हस्ते हिरण्यदत्तस्य विधाय वणिजो निजम् ॥
उक्त्वा तत्रोपकोशायै गतवानस्मि शङ्करम् ।
तपोभिराराधयितुं निराहारो हिमाचलम् ॥"

* * * *

"अत्रान्तरे तुषाराद्रौ कृत्वा तीव्रतरं तपः ।
आराधितो मया देवो वरदः पार्व्वतीपतिः ॥
तदेव तेन शास्त्रं मे पाणिनीयं प्रकाशितम् ।
तदिच्छानुग्रहादेव मया पूर्व्वोक्ततच्छतम् ॥"

* * * *

"वर्षोऽथ मन्मुखादेष्यत् श्रोतुं व्याकरणं नवम् ।
ततः प्रकाशितं स्वामिकुमारेणैव तस्य तत् ।
ततो व्याड़ीन्द्रदत्ताभ्यां विघ्नो दक्षिणां प्रति ।
गुरुर्वर्षोऽब्रवीत् खर्णकोटिर्मे दीयतामिति ॥
अङ्गीकृत्य गुरोर्वाक्यं तौ च मामित्यवोचताम् ।
एहि राज्ञः सखे ! नन्दात् याचितुं गुरुदक्षिणाम् ।
गच्छामो नान्यतोऽस्माभिरियत् काञ्चनमाप्यते ।
नवाधिकायां नवतेः कोटीनामधिपो हि सः ॥"

इत्युपाख्यानेन पाणिनिः कात्यायनस्य राज्ञो नन्दस्य च समसामयिक इत्येवायाति । परं कात्यायनपाणिन्योः शब्दशास्त्रपाठेन पाणिनिः कात्यायनात् पूर्व्वतन इत्यनायासेनैव विज्ञायते । यतः कात्यायन एव पाणिनिकृतव्याकरणस्य वार्त्तिककारः । स च स्वकृतग्रन्थे विदुषां वरं पाणिनिं आचार्य्यत्वेन स्वीकृतवान् । [६ । ४ । १०४ । सूत्रस्य वार्त्तिं ।] पाणिनिस्तु स्वीयव्याकरणे पूर्व्वतनानां बहूनां विदुषां नामोल्लेखं कृतवान् परं कुत्रापि कात्यायनस्य नाम नाभिहितवान्तः स्वतोऽवगम्यते पाणिनिः कात्यायनात् वृद्धतर इति ।

अनेन महात्मना पाणिना रचितं व्याकरणं पाणिनीयाष्टकमित्याख्यया प्रसिद्धम् । कात्यायन

एवास्य वार्त्तिकं विधाय तीव्रसमालोचनाञ्चकार। परं पतञ्जलिः सूत्रपाठस्य वार्त्तिकस्य च महाभाष्यं विधाय सर्व्वतः प्रमादपरिशून्योऽयं पाणिनीयाष्टाध्यायीग्रन्थ इति प्रदर्शयन् कात्यायनतीव्रदृष्टेः ररक्षेयं समादरणीयं ग्रन्थसुत्तमम्। अष्टाध्यायीप्रारम्भे तु चतुर्दशसूत्राणि सन्ति तानि तु प्रत्याहारसूत्राणि।

अष्टाध्यायीसूत्रपाठे, आपिशलिः।६।१।९२। गालवः।६।३।६१। चाक्रवर्म्मणः।६।१।१३०। स्फोटायनः।६।१।१२३। काश्यपः।८।४।६७। गार्ग्यः।८।४।६७। भारद्वाजः।७।२।६३। सेनकः।५।४।११२। शाकटायनः।३।४।१११। शाकलः।२।१।१६। एतेषां पूर्व्वतनवैयाकरणानां नामानि सन्ति। अत्र ६६६ संख्यकानि सूत्राणि विद्यन्ते। काश्मीरराजस्य जयापीड़स्य राजत्वसमये पाणिनिव्याकरणं वार्त्तिकेन महाभाष्येण च सह विशेषविद्यार्थिसुधीवरविद्वज्जनग्राह्यार्थं प्रचलितमासीत्। यथा, राजतरङ्गिण्याम्। ४। ६३८—६४०।

"नितान्तं कृतसत्कृत्यस्य गुणवृद्धिविधायिनः।
श्रीजयापीड़देवस्य पाणिनेश्च किमन्तरम्॥
भाष्यव्याख्याक्षणे श्लोकैर्व्वैलक्षण्यदर्शनैः कृतः।
सोऽयं तस्य विपर्य्यासो बुधैरिव विवर्त्यते॥
कृतविप्रोपसर्गस्य भूतनिष्ठाविधायिनः।
श्रीजयापीड़देवस्य पाणिनेश्च किमन्तरम्॥"

कात्यायनकृतवार्त्तिकात् पतञ्जलिकृतमहाभाष्याच्च अन्या अपि अष्टाध्यायीसूत्रपाठस्य उज्झितमहाभाष्यस्य च वह्व्यश्लोकाः सन्ति बाहुल्यभिया तासां नामानि न प्रदत्तानि॥*॥)

पाणिनीयं, त्रि, (पाणिनिना प्रोक्तं उपदिष्टं वा। पाणिनि+"तेन प्रोक्तम्।" ४।३।१०१। इति छः।) पाणिनिना कृतं ग्रन्थादि। इति सुग्धबोधव्याकरणम्॥

पाणिन्धमः, त्रि, (पाणिं धमतीति। धमा ग्रन्थाग्निसंयोगयोः+ "उपपदेऽमन्मदपाणिन्धमाश्च।" ३।२।३७। इति खश् सुम् च।) हस्तकर्म्मतात्कालिकसंयोगकर्त्ता। एवं ग्रन्थकर्त्ता च। इति सुग्धबोधव्याकरणम्॥ ("पाणयो धायन्तेऽस्मिन्निति पाणिन्धमोऽन्धकाराद्याश्रय इत्यर्थः। तत्र हि सपांशूपनोदनाय पाणयः ग्रन्थान्ते।" इति सिद्धान्तकौमुदी॥)

पाणिन्धयः, त्रि, (पाणिभ्यां धयति पिबतीति। धेट पाने+ "नाड़ीमुनीक्षनकरसुस्तिपाणिनासिकात् धश्च।" इति सूत्रात् खश्प्रत्ययेन साधुः।) पाणिद्वारा पानकर्त्ता। इति सुग्धबोधव्याकरणम्॥

पाणिपादं, क्ली, पाणिश्च पादश्च द्वयोः समाहारः। पाणिपादयोः समाहारः। इति व्याकरणम्॥

पाणिपीड़नं, क्ली, (पाणेः पीड़नं ग्रहणं यत्र।) पाणिग्रहणम्। विवाहः। इत्यमरः॥ (पाणिभ्यां पीड़नमिति विग्रहे क्रोधादिना हस्तमर्द्दनम्॥)

पाणिमुक्, [ज्] पुं, (पाणिनैव मुच्यते दीयतेऽनेन चर्व्वादिद्रव्यं यद्वा, पाणिरिव मुच्यते यज्ञादिस्थले व्यवह्रियते इति। मुच्+क्विप्।) उड़म्बरवृक्षः। इति शब्दचन्द्रिका॥ (पाणिना मुञ्चति इति। मुच्+क्विप्।) पाणिकरणकमोक्तरि, त्रि॥

पाणिमर्द्दः, पुं, (पाणिं मृद्नातीति। पाणि+मृद्+"कर्म्मण्यण्।" ३।२।१।इत्यण्।) करमर्द्दकः। इति राजनिर्घण्टः॥

पाणिसूत्रं, क्ली, (पाणिभ्यां सूत्रं परिवर्त्तनम्।) अक्षम्। इति हलायुधः॥

पाणिरुहः, पुं, (पाणौ रोहतीति। रुह+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) नखः। इति राजनिर्घण्टः॥

पाणिवादः, त्रि, (पाणिं पाणिना वा वादयतीति। वद्+णिच्+अण्।) पाणिघः। मृदङ्गादिवादकः। इत्यमरः॥ (पाणिना वाद्यते इति। वद्+णिच्+कर्म्मणि घञ्। मृदङ्गादौ, क्ली। यथा, रामायणे। २। ६५। ४।

"अपदानान्युदाहृत्य पाणिवादान्यवादयन्॥")

पाणिवादकः, त्रि, (पाणिं पाणिना वा वादयतीति। वद्+णिच्+ण्वुल्।) पाणिवादः। इति हेमचन्द्रः। ३। ५८६॥ (यथा, रामायणे। २। ६५। ४।

"ततस्तु स्तुवतां तेषां स्तुतानां पाणिवादकाः।
अपदानान्युदाहृत्य पाणिवादान्यवादयन्॥")

पाणिसम्या, स्त्री, (पाणिभ्यां ह्रियतेऽसौ। हृञौ ग्र विशर्गे+"पाणौ हृञेर्यत्" वाच्यः।" इति ण्यत्। "चजोः कुः घिण्ण्यतोः।" ७।३।५२। इति कुत्वम्।) रज्जुः। इति सुग्धबोधव्याकरणम्॥

पाणीतलं, क्ली, (पाणितलं निपातनात् दीर्घः।) तोलकदण्डस्य। यथा,—

"विड़ालपदकर्षौ च पाणीतलसुकुम्बरम्॥"
इति शब्दमाला॥

पाणीकरणं, क्ली, (पाणौ क्रियतेऽनेनास्मिन् वा। कृ+ल्युट्। सप्तम्याः अलुक्।) विवाहः। इति जटाधरः॥

पाण्डरं, क्ली, (पाण्डुरो वर्णोऽस्यास्येति। अच्।) कुन्दपुष्पम्। गैरिकम्। इति शब्दचन्द्रिका॥

पाण्डरः, पुं, (पाण्डुरः शुक्लवर्णोऽस्यास्येति। अच्।) मरुवकवृक्षः। (पडि+अर+दीर्घश्च।) श्वेतवर्णः। (पर्व्वतविशेषः। स तु मेरोः पश्चिमे वर्त्तते। यथा, मार्कण्डेये। ५५। १०।

"अञ्जनः कुकुटः क्षुद्रः पाण्डरश्चाचलोत्तमः॥"
"पश्चिमेन तथा मेरोर्विष्कम्भात् पश्चिमाद्दिशः।
एतेऽचलाः समाख्याताः——————॥"

ऐरावतकुलोत्पन्ननागविशेषः। यथा, महाभारते। १। ५७। ११—१२।

"पारावतः पारिजातः पाण्डरो हरिणः क्षुद्रः।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः॥
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम्॥"

पक्षिविशेषः। यथा, ज्योतिस्तत्त्वधृतवचनम्।

"गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च।
चिल्लश्च धर्म्मचिल्लश्च भासः पाण्डर एव च।
यद्गेहे यस्य पतन्त्येते गेहं तस्य विपद्यते॥")

तद्वर्णविशिष्टे, त्रि। इत्युणादिकोषः॥ (यथा, हरिवंशे। ८२। ५०।

"असितास्वरसवीतं पाण्डरं पाण्डरासनम्॥")

पाण्डरपुष्पिका, स्त्री, (पाण्डरं शुक्लवर्णं पुष्पमस्याः। कप्। ततः कापि अत इत्वम्।) श्वेतलताभेदः। इति शब्दचन्द्रिका॥

पाण्डवः, पुं, (पाण्डोरपत्यया प्रसिद्धस्य राज्ञोऽपत्यम्। पाण्डु+"ओरञ्।" ४।२।७१। इत्यञ्।) पाण्डुनन्दनः। पञ्चपाण्डवोत्पत्तिर्यथा,—

वैशम्पायन उवाच।

"संवत्सरस्थते गर्भे गान्धार्य्या जनमेजय!।
आजघ्यामास वै कुन्ती गर्भार्थं धर्म्ममच्युतम्॥
सा बलिं त्वरिता देवी धर्म्मायोपजहार ह।
जजाप मन्त्रं विधिवद्दत्तं दुर्व्वाससा पुरा॥
संगम्य सा तु धर्म्मेण योगमूर्त्तिधरेण ह।
लेभे पुत्रं वरारोहा सर्व्वप्राणिहितं वरम्॥
ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽहनि।
दिवामध्यगते सूर्य्ये तिथौ पुण्येऽभिपूजिते॥
सन्दधेऽयुग्मं कुन्ती सुषाव प्रवरं सुतम्।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी॥
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः।
विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति॥
युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः।
भविता प्रथितो राजा त्रिषु लोकेषु विश्रुतः।
यशसा तेजसा चैव वृत्तेन च समन्वितः॥१॥*॥
धार्म्मिकं तं सुतं लब्ध्वा पाण्डुर्ज्ञा पुनरब्रवीत्।
प्राडुः क्षात्रं बलं श्रेष्ठं बलश्रेष्ठं सुतं वृणु॥
ततश्चोक्ता भर्त्रा तु वायुमेवाजुहाव सा।
तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः॥
तमप्यतिबलं जातं वागुवाचाशरीरिणी।
सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत!॥
इदमत्यद्भुतक्षात्रौज्जातमात्रे ह्युकोदरे।
यदङ्गात् पतितो मातुः शिलां गात्रैरचूर्णयत्॥
कुन्ती बाह्वभयोर्दिप्सा सहसोत्पतिता किल।
नान्वबुध्यत तं सुप्तसुतसङ्गे खे ह्युकोदरम्॥
वक्षसंहनन सौम्य कुमारो व्यपतद्गिरौ।
पतता तेन शतधा शिला गात्रैर्विचूर्णिता॥
तां शिलां चूर्णितां दृष्ट्वा पाण्डुर्विस्मयमागतः।
यस्मिन्नृहनि भीमस्तु जज्ञे भरतसत्तम!॥
दुर्य्योधनोऽपि तत्रैव प्रजज्ञे वसुधाधिप!॥२॥*॥
जाते ह्युकोदरे पाण्डुरिदं भूयोऽन्वचिन्तयत्।
कथन्नु मे वरः पुत्रो लोकश्रेष्ठो भवेदिति॥
दैवे पुरुषकारे च लोकोऽयं संप्रतिष्ठितः।
तत्र दैवन्तु विधिना कालयुक्तेन लभ्यते॥
इन्द्रो हि राजा देवानां प्रधान इति नः श्रुतम्।
अप्रमेयबलोत्साहो वीर्य्यवानमितद्युतिः॥
तं तोषयित्वा तपसा पुत्रं लप्स्ये महाबलम्।
यं दास्यति स मे पुत्रं स गरीयान् भविष्यति॥

कर्म्मणा मनसा वाचा तस्मात्तप्स्ये महत्तपः ।
ततः पाण्डुर्महाराजो मन्त्रयित्वा महर्षिभिः ॥
दिदेश कुन्त्याः कौरव्यो व्रतं सांवत्सरं शुभम् ।
आत्मना च महाबाहुरेकपादस्थितोऽभवत् ॥
उग्रं स तप आतस्थे परमेण समाधिना ।
आराधयिषुर्देवं त्रिदशानां तमीश्वरम् ॥
सूर्य्येण सह धर्म्मात्मा पर्य्यवर्त्तत भारत ! ।
ततः कालेन महता वासवः प्रत्यपद्यत ॥

शक्र उवाच ।

पुत्रं तव प्रदास्यामि त्रिषु लोकेषु विश्रुतम् ।
ब्राह्मणानां गवां चैव सुहृदां चार्थसाधकम् ॥
दुर्हृदां शोकजननं सर्व्वबान्धवनन्दनम् ।
सुतं तेऽहं प्रदास्यामि सर्व्वामित्रविनाशनम् ॥

इत्युक्तः कौरवो राजा वासवेन महात्मना ।
उवाच कुन्तीं धर्म्मात्मा देवराजवशः स्मरन् ॥
उदर्कस्तव कल्याणि तुष्टो देवगणेश्वरः ।
दातुमिच्छति मे पुत्रं यथासङ्कल्पितं हृदा ॥
अतिमानुषकर्म्माणं यशस्विनमरिन्दमम् ।
नीतिमन्तं महात्मानमादित्यसमतेजसम् ॥
दुराधर्षं क्रियावन्तमतीवाद्भुतदर्शनम् ।
पुत्रं जनय सुश्रोणि ! धाम क्षत्रियतेजसाम् ॥
लब्धः प्रसादो देवेन्द्रात् तमाशय शुभानने ! ॥
एवमुक्ता ततः शक्रमाजुहाव यशस्विनी ।
अथाजगाम देवेन्द्रो जनयामास चार्জ্জुनम् ॥
जातमात्रे कुमारे तु वागुवाचाशरीरिणी ।
महागम्भीरनिर्घोषा नभो नादयती तदा ॥
श्रूयतां सर्व्वभूतानां तेषाञ्चाश्रमवासिनाम् ।
कुन्तीमाभाष्य विस्पष्टमुवाचेदं शुचिस्मिताम् ॥
कार्त्तवीर्य्यसमः कुन्ति ! शिवितुल्यपराक्रमः ।
एष शक्र इवाजेयो यशस्ते प्रथयिष्यति ॥
अदित्या विष्णुना प्रीतिर्यथाभूदभिवर्द्धिता ।
तथा विष्णुसमः प्रीतिमर्द्धयिष्यति ते सुतः ॥
एष मद्रान् वशे कृत्वा कुरूंश्च सह सोमकैः ।
चेदिकाशिकरूषांश्च कुरुलक्ष्मीं वहिष्यति ॥
एतस्य भुजवीर्य्येण खाण्डवे हव्यवाहनः ।
मेदसा सर्व्वभूतानां तृप्तिं यास्यति वै पराम् ॥
ग्रामणीश्च महीपालान् एष जित्वा महाबलः ।
भ्रातृभिः सहितो वीरस्त्रीन् मेधानाहरिष्यति ॥
जामदग्न्यसमः कुन्ति ! वायुवेगपराक्रमः ।
एष वीर्य्यवतां श्रेष्ठो भविष्यति महायशाः ॥
तथा दिव्यानि चास्त्राणि निखिलेनाहरिष्यति ।
विप्रनष्टां श्रियञ्चायमाहर्त्ता पुरुषर्षभः ॥
एतामत्यद्भुतां वाचं कुन्ती शुश्राव भारत ! ।
वाचमुच्चरितामुच्चैस्तां निशम्य तपस्विनाम् ॥
बभूव परमो हर्षः शृतश्रुतनिवासिनाम् ।
तथा देवरथानाञ्च सेन्द्राणाञ्च दिवौकसाम् ॥
आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः ।
उदतिष्ठन्महाघोषः पुष्पवृष्टिभिरावृतः ॥" ३॥*॥

वैशम्पायन उवाच ।

"कुन्तीपुत्रेषु जातेषु धृतराष्ट्रात्मजेषु च ।
मद्रराजसुता पाण्डुं रहो वचनमब्रवीत् ॥
न मेऽस्ति त्वयि सन्तापो विगुणेऽपि परन्तप ।
नावरत्वे वराङ्गीयाः स्थित्वा चानघ ! नित्यदा ॥
गान्धार्य्याश्चैव नृपते ! जातं पुत्रशतन्तथा ।
श्रुत्वा न मे तथा दुःखमभवत् कुरुनन्दन ! ॥
इदन्तु मे महद्दुःखं तुल्यतायामपुत्रता ।
दिष्ट्या त्विदानीं भर्त्तर्म्मे कुन्त्यामप्यस्ति सन्ततिः ॥
यदि चापत्यसन्तानं कुन्तिराजसुता मयि ।
कुर्य्यादनुग्रहो मे स्यात्तव चापि हितं भवेत् ॥
संस्तम्भो मे सपत्नीत्वात् वक्तुं कुन्तिसुतां प्रति ।
यदि तु त्वं प्रसन्नो मे स्वयमेनां प्रचोदय ॥

पाण्डुरुवाच ।

ममाप्येष सदा मात्रि ! हृद्यर्थः परिवर्त्तते ।
न तु तां प्रसहे वक्तुमिष्टानिष्टविवक्षया ॥
तव त्विदं मतं मत्वा प्रयतिष्यामतः परम् ।
मन्ये ध्रुवं मयोक्ता सा वचनं प्रतिपत्स्यते ॥

वैशम्पायन उवाच ।

ततः कुन्तीं पुनः पाण्डुर्विविक्त इदमब्रवीत् ।
कुलस्य मम सन्तानं लोकस्य च कुरु प्रियम् ॥
मम चापिण्डनाशाय पूर्व्वेषामपि चात्मनः ।
मत्प्रियार्थञ्च कल्याणि ! कुरु कल्याणमुत्तमम् ।
यशसेऽर्थाय चैव त्वं कुरु कर्म्म सुदुष्करम् ॥
एवमुक्तान्नवीन्माद्री सकृच्चिन्तय देवतम् ।
तस्मात्ते भवितापत्यमनुरूपमसंशयम् ॥
ततो माद्री विचार्य्यैवं जगाम मनसाश्विनौ ।
तावागम्य सुतौ तस्यां जनयामासतुर्यमौ ॥
नकुलं सहदेवञ्च रूपेणाप्रतिमौ भुवि ।
तथैव तावपि यमौ वागुवाचाशरीरिणी ॥
रूपसत्त्वगुणोपेतावेतावत्यश्विनावपि ।
भासतस्तेजसात्यर्थं रूपद्रविणसम्पदा ॥
नामानि चक्रिरे तेषां शृतश्रुतनिवासिनः ।
भक्ष्या च कर्म्मणा चैव तथाग्नीभिर्विशाम्यते ॥
ज्येष्ठं युधिष्ठिरेत्येवं भीमसेनेति मध्यमम् ।
अर्জ্জुनेति तृतीयञ्च कुन्तीपुत्रानकल्पयन् ॥
पूर्व्वजं नकुलेत्येवं सहदेवेति चापरम् ।
माद्रीपुत्रावकथयंस्ते विप्राः प्रीतमानसाः ॥"

इति महाभारते १ । १२३—१२४ ॥

तेषां पुत्रा यथा,—

"प्रतिविन्ध्यः सुतः सोमः श्रुतकीर्त्तिस्तु चार্জ্জुनात् ।
शृतानीकः श्रुतकर्म्मा नौपद्याः पञ्च विक्रमात् ॥"

तेषां भार्य्या यथा, गारुडे १३६ अध्याये ।

"यौधेयी च हिडिम्बा च काशी चैव सुभद्रिका ।
विजया वै वैजयती पञ्चभ्यस्तु सुताः क्रमात् ॥
देवको घटोत्कचश्च अभिमन्युश्च सर्व्वगः ।
अहोवो निरमित्रश्च परिक्षिदभिमन्युजः ॥"

पाण्डवेयः, त्रि, (पाण्डोरियं इत्यञ् ङीप् च पाण्डवी कुन्ती माद्री च तयोरपत्यम् इति । ढक् ।) पाण्डोरपत्यम् । इति सुग्धबोधव्याकरणम् ॥ (युधिष्ठिरप्रभृतयः पञ्च भ्रातरः । यथा, महाभारते । १ । २०३ । १५ ।

"यावन्नायाति वार्ष्णेयः कर्षन् यादववाहिनीम् ।
राज्यार्थे पाण्डवेयानां पाञ्चाल्यसदनं प्रति ॥"

अभिमन्युपुत्रो नरपतिः परीक्षित् । यथा, भागवते । १ । ४ । ७ ।

"कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह ।
संवादः समभूत्तात ! यत्रैषा सात्वती श्रुतिः ॥")

पाण्डवाभीलः, पुं, (अभीः अभयं लातीति । ला + कः । पाण्डवोऽभीलो यस्मात् । पाण्डवानामभियमभयं लातीति वा ।) क्षत्रियः । इति त्रिकाण्डशेषः ॥

पाण्डवायनः, पुं, (पाण्डवानामयनं रक्षणं यस्मात् ।) क्षत्रियः । इति हेमचन्द्रः । २ । १३१ ॥

पाण्डित्यं क्ली, (पण्डितस्य भावः कर्म्म वा । इति "वर्णदृढादिभ्यः ष्यञ् च ।" ५ । १ । १२३ । इति ष्यञ् ।) पण्डितधर्म्मकर्म्मणी । यथा,—

"रसज्ञा पाण्डित्यच्छिदुरशिशिधामभ्रमभरान् ।"

इति मुरारिः ॥

(यथा, च महाभारते । ५ । ३१ । २ ।

"उत बालाय पाण्डित्यं पण्डितायोत बालताम् ।
ददाति सर्व्वमीशानः पुरस्ताच्चक्रमुच्चरन् ।")

पाण्डुः, पुं, (पडि गतौ + "सृगयुदयश्च ।" उणां । १ । ३८ । इति कुप्रत्ययः निपातनात् धातोर्दीर्घश्च ।) पाण्डुरफलीक्षुपः । पटोलः । इति राजनिर्घण्टः ॥ शुक्लपीतमिश्रितवर्णः । तत्पर्य्यायः । हरिणः २ । पाण्डुरः ३ । इत्यमरः ॥ पाण्डरः ४ । इति हेमचन्द्रः ॥

"सितपीतसमायुक्तः पाण्डुवर्णः प्रकीर्त्तितः ॥"

इति सुश्रुतिः ॥

भेदोऽपि दृश्यते यथा,—

"पाण्डुरस्तु रक्तपीतभागी प्रत्यूषचन्द्रवत् ।
पाण्डुस्तु पीतभागार्द्रः केतकीधूलिसन्निभः ॥"

इति भरतः ॥

तद्वति, त्रि । इत्यमरः ॥ (यथा रघुः । ३ । २ ।

"शरीरसादादसमग्रभूषणा
सुखेन सालक्षत लोध्रपाण्डुना ।"

नृपतिविशेषः । स तु शृङ्गानुपुत्रविचित्रवीर्य्यस्य क्षेत्रे व्यासाज्जातः । (यथा, महाभारते । १ । ११८ । ५ ।

"राजा पाण्डुर्महारण्ये मृगयालनिषेविते ।
चरन् मैथुनधर्म्मस्थं ददर्श मृगयूथपम् ।"

अस्य देहपाण्डुताकारणं नामनिरुक्त्यादिकं च यथा, महाभारते । १ । १०६ । १५-२८ ।

"अम्बालिकामथाभ्यागाद्दृष्ट्वा च सापि तम् ।
विवर्णा पाण्डुसङ्काशा समपद्यत भारत ! ।
तां भीतां पाण्डुसङ्काशां विवर्णां प्रेक्ष्य भारत ! ॥
व्यासः सत्यवतीपुत्र इदं वचनमब्रवीत् ।
यस्मात् पाण्डुत्वमापन्ना विरूपं प्रेक्ष्य मामिह ॥
अस्मादेष सुतस्ते वै पाण्डुरेव भविष्यति ।
नाम चास्येतदेवेह भविष्यति शुभानने ! ।")

नागभेदः । श्वेतहस्ती । सितवर्णः । रोग विशेषः । इति शब्दरत्नावली ॥ * ॥

पाण्डुरोगनिदानम् । यथा,—

"पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैस्त्रयः ।
चतुर्थः सन्निपातेन पञ्चमो भक्षणान्मृदः ॥
व्यायाममन्नं लवणानि मद्यं
स्त्रीं दिवास्वप्नमतीवतीक्ष्णम् ।

निवेवमाणस्य समेत्य रक्तं
दोषास्त्वचं पाण्डुरतां नयन्ति ॥ * ॥
तस्य पूर्वरूपाणि यथा,—
त्वक्स्फोटनष्ठीवनगात्रसाद-
मृद्भक्षणप्रेक्षणकूटशोथाः ।
विण्मूत्रपीतत्वमथाविपाको
भविष्यतस्तस्य पुरःसराणि ॥ * ॥
वातिकस्य तस्य लक्षणं यथा,—
त्वङ्नखनयनादीनां रूक्षत्वश्यावताभता: ।
वातपाण्डामये कम्पतोदानाहभमादयः ॥ * ॥
पैत्तिकस्य लक्षणं यथा,—
पीतमूत्रशकृन्नेत्रो दाहतृष्णाज्वरान्वितः ।
भिन्नविट्कोऽतिपीताभः पित्तपाण्डामयी नरः ॥
श्लैष्मिकस्य लक्षणं यथा,—
कफप्रसेकश्वयथुतन्द्रालस्यातिगौरवैः ।
पाण्डुरोगी कफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः ॥ * ॥
त्रिदोषजस्य लक्षणं यथा,—
ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः॥
मृत्तिकादनग्रीलस्य कृष्यत्यन्यतमो मलः ।
कषाया मारुतं पित्तमम्लरा मधुरा कफम् ॥
कोपयेन्मृद्रसादींश्च रौक्ष्यादुक्तश्च रूक्षयेत् ।
पूरयत्यविपक्वैव स्रोतांसि विरुजन्नपि ॥
इन्द्रियाणां बलं हत्वा तेजो वीर्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥ * ॥
मृत्तिकाभक्षणजन्यपाण्डुलक्षणं यथा,—
मृद्भक्षणाद्भवेत् पाण्डुस्तन्द्रालस्यनिपीडितः ।
सकासश्वासशूलार्शः सदारुचिसमन्वितः ॥
शूनाक्षिकूटगण्डभ्रूः शूनपाण्यभिमेहनः ।
क्रमिकोष्ठोऽतिसार्द्यते मलं सास्रकफान्वितम् ॥
तस्य असाध्यलक्षणं यथा,—
ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः॥
पाण्डुरोगश्चिरोत्पन्नः खरीभूतो न सिध्यति ।
कालप्रकर्षाच्छूनानां यो वा पीतानि पश्यति ॥
बद्धाल्पविट् सहरितं सकफं योऽतिसार्यते ।
दीनः श्वेतातिदिग्धाङ्गश्छर्दिमूर्च्छाज्वरान्वितः ॥
स नास्यस्रक्क्षयादूर्ध्वं पाण्डुः श्वेतत्वमाप्नुयात्॥
पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत् ।
पाण्डुसंघातदर्शी च पाण्डुरोगी विनश्यति ॥
अन्येषु शूनं परिहीणमध्यं
स्रानं तथान्येषु च मध्यशूनम् ।
गुदे च श्लेष्मस्थ सुप्तयोश्च
शूनं प्रताम्यन्तमसंशकल्पम् ॥
विवर्ज्येत् पाण्डुकिनं यशोऽर्थी
तथातिसारज्वरपीडितञ्च ॥"
इति माधवकरः ॥
(यथा च,—
"पित्तप्रधानाः कुपिता यथोक्तैः कोपनैर्मलाः ।
तत्रानिलेन बलिना क्षिप्तं पित्तं हृदि स्थितम् ॥
धमनीर्दश सम्प्राप्य व्याप्नुवत् सकलां तनुम् ।
श्लेष्मलयकृन्मांसानि प्रदूष्यान्तरमाश्रितम् ॥
त्वङ्मांसयोस्तत् कुरुते त्वचि वर्णान् पृथग्-
विधान् ।
पाण्डुहारिद्रहरितान् पाण्डुत्वं नेषु चाधिकम् ॥
यतोऽतः पाण्डुरित्युक्तः स रोगस्तेन गौरवम् ॥
धातूनां स्याच्च शैथिल्यमोजसश्च गुणक्षयः ॥
ततोऽल्परक्तमेदस्को निःसारः स्यात् क्षयेन्द्रियः ।
हृद्यमानैरिवाङ्गैर्न द्रवता हृदये न च ॥
शूनाक्षिकूटसदनः कोपनः क्षीवनोऽल्पवाक् ।
अन्नद्विट् श्लिश्लिरदेषी श्लीर्णरोमा हतानलः ॥
सक्षसक्थीव्वरी श्वासी कर्णचूड़ी भमी श्रमी ।
स पञ्चधा पृथग्दोषैः समस्तैर्मृत्तिकादनात् ॥
प्राग्रूपमस्य हृदयस्पन्दनं रूक्षता त्वचि ।
अरुचिः पीतमूत्रत्वं स्वेदाभावोऽल्पवह्निता ॥
सादः श्रमोऽनिलाक्तत्व गात्ररुक्तोदकम्पनम् ।
क्षणरूक्षारुणसिरानखविण्मूत्रनेक्षता ॥
श्लेष्मानाहास्यवैरस्यविड्भेदाः पार्श्वमर्द्दरुक् ।
पित्ताद्धरितपीताभसिरादित्वं ज्वरस्तमः ॥
हृत्स्वेदमूर्च्छाग्लपितृष्णादौर्गन्ध्यं कटुवक्त्रता ।
वर्चोभेदोऽम्लको दाहः कफात् शुक्लसिरादिता ॥
तन्द्रालवणवक्त्रत्वं रोमहर्षः स्वरक्षयः ।
कासः श्वर्द्दिश्च निचयाच्छ्लिश्लिरोऽतिद्विःसहः ॥
हृत्कषायानिलं पित्तमम्लरा मधुराकफम् ।
दूषयित्वा रसादींश्च रौक्ष्यादुक्तं विरूक्ष्य च ॥
स्रोतांस्यपक्वैवापूर्य कुर्याद्दृद्धा च पूर्ववत् ।
पाण्डुरोगं ततः शूननाभिपादास्यमेहनः ॥
पुरीषं क्रमिमन्मुञ्चेच्छ्लिश्लं साम्रकफं नरः ॥"
इति वाभटे निदानस्थाने । १३ । १—१३ ॥)
तस्यौषधं यथा,—
"लोहचूर्णं तक्रपीतं पाण्डुरोगहरं भवेत् ॥"
इति गारुड़े १८० अध्यायः ॥
अपि च ।
"सप्तरात्रं गवां मूत्रे भावितं चायसो रजः ।
पाण्डुरोगप्रशान्त्यर्थं पयसा प्रपिबेन्नरः ॥ १ ॥
गोमूत्रसिद्धं मण्डूरचूर्णं सगुड़मश्नतः ।
पाण्डुरोगः क्षयं याति षड़क्तिमूलञ्च दारुणम्॥२
अयोमलं सुसन्तप्तं भूयो गोमूत्रसाधितम् ।
मधुसर्पिर्युतं लीढ्वा पाण्डुरोगी सुखी भवेत् ॥३॥
पुनर्नवाचित्रदोषविड़ङ्गं दारु चित्रकम् ।
कुष्ठं हरिद्रे त्रिफला दन्ती चव्यं कलिङ्गकम् ॥
कटुका पिप्पलीमूलं सुस्तं श्रृङ्गी च कारवी ।
यमानी कट्फलञ्चेति पृथक्पलमितं मतम् ॥"४॥
इति भावप्रकाशः ॥ * ॥
(अस्य सकारणलक्षणचिकित्सादीनि यथा,—
"शृणु पुत्र! प्रवक्ष्यामि पाण्डुरोगं महागदम् ।
पञ्चैव पाण्डुरोगास्ते सम्भवन्तीह मानुषे ॥
वातिकः पैत्तिकश्चैव श्लैष्मिकः सान्निपातिकः ।
पञ्चमो रूक्षगः प्रोक्तो वक्ष्ये चैषान्तु सम्भवम् ॥
दीर्घाध्वना पीड़ितो वा ज्वरेण
रक्तस्रावो पीड़ितो वा व्रणेन ।
चिन्तायासाद्रोधनाद्वे मनुष्यं
चायं पाण्डुर्जायते सेवते यः ॥
चारक्षाम्लं कट्वमैरेयसेवा
अध्यायामाध्वेषुनातिश्रमेण ।
निद्रानाशो नातिनिद्रा दिवापि
योगेनैते रूक्षिकाभक्षणेन ॥
अतिस्निग्धिलशरीरे रोगसम्पीड़िते वा
लवणकटुकषाया सेवनाद्वेन रूक्षैः ।
अतिसुरतमनस्यं सेवनातिक्रमेण
नयति रुधिरशोषं तेन वै पाण्डुरोगम् ॥
तेनाक्षिकूटे श्वयथुः शरीरे
पाण्डुत्वमायाति सपीतमूत्रः ।
निष्ठीवते त्वक् प्रविदीर्यते च
संजायते तस्य पुरःसराणि ॥
तोदः परूषत्वशिरोगुरुत्वं
त्वङ्मूत्रनेत्रे नखकालिमा स्यात् ।
वातात्मकं तन्मनुजस्य विद्धि
लिङ्गैरुपेतोऽनिलपाण्डुरोगः ॥
श्यामत्वपीतत्वकरो हि लोके
विभर्त्ति शोषं कटुकास्यता च ।
मन्दज्वरो वै भ्रमशोषमोहः
पीतच्छविः पीतभवो हि पाण्डुः ॥
तन्द्रालुताशोफकफेन युक्तः
श्यालस्यकखेदगुरुत्वमेव ।
संजायते तस्य कफात्मकोऽसौ
नरस्य पाण्डुत्वभवो विकारः ॥
तन्द्रालस्यं श्वयथुर्वमथू कासश्वासश्लोषा
विड्भेदः स्यात् परुषनयने सज्वरो वै क्षुधार्त्तः ।
मोहस्तृष्णाक्लममथ मनुजस्याशु पश्येत् सदूर
त्याज्यो वैद्यैर्निपुणमतिभिः सन्निपातोत्थपाण्डुः ॥
मृत्तिकाभक्षणेनाथ शृणु पुत्र! गदो महान् ।
पाण्डुरोगो गरिष्ठोऽपि भवेद्वातोच्चयङ्करः ॥
मृद्भक्षणाच्चैव मलं प्रकीर्यं
स्रोतांसि रुन्धन्ति च मृत्तिकायाः ।
तेनैव नाम्रक् परिवर्द्धयन्ति
न तर्पयन्ते वपुषं रसेन ॥
चारात् कषायाम्लमधुरस्य पानात्
स कोपयत्याशु नरस्य मृत्तिका ।
श्लेष्मप्रकोपान्मधुरान् करोति
मृत्तिका न जघना हितकारिणी स्यात् ॥
विकृतिमुपगतास्ते मारुताद्याश्चयस्तु
बलवदनरुचीनां नाशयन्त्याशु दोषाः ।
भवति विकलमेवं पाण्डुरोगे शरीरं
भवति जठरपाण्डू रोग आशुप्रवीणः ॥"
"गोमूत्रमण्डे मतिमान् क्षापयेत् सप्तरात्रि-
कम् ।
तस्मात् चूर्णन्तु मधुना देयं पाण्डुमयापहम् ॥
त्र्यूषणं त्रिफला सुस्ता विड़ङ्गं चित्रकं
समम् ।
भागमेकं लौहचूर्णमित्युद्भावे विभावयेत् ॥
सप्ताहमथ लोहखल्वितं
पुनरपि ध्रुवं प्रवरं स्यात् ।
ग्रीलितन्तु मधुनापि घृतेन
पाण्डुरोगहृदयामयापहम् ॥

कामलार्शो हलीमकहरि
कथितं सुमतिभिश्च पण्डितैः ॥
इति लौहचूर्णवटकम् ॥ * ॥
चूर्णं त्रिफलया सह चित्रकं
मेघनादसुरदारुसमाधिकम् ।
ग्रन्थिकश्च गिरिभिल्लराजकं
धोजयेत् पलिकभागिकानिमान् ॥
चूर्णितार्द्रगुडमेव योजयेत्
लौहचूर्णमपि कज्जलप्रभम् ।
अष्टभागसममूत्रकल्पितं
पाचितं पुनरभवद्वरप्रदम् ।
सेवयेद्बलसुपक्वमं तथा
तक्रसंयुतमिहाशिनोभनम् ।
नाशयेच्च कफकामलान् क्रिमीन्
पाण्डुकुष्ठगुदजान् हलीमकम् ॥
इति मण्डूरवटकम् ।"*॥

पथ्यापथ्यादस्य यथा,—
"गोधूमशालियवचिकसुद्गकानां
श्यामाढकीघृतयुतं सपयःसतक्रम् ।
गाङ्गीववास्तुकमथो घृतपुष्पवर्त्ता
पथ्यं हितं निगदितं मनुजस्य पाण्डौ ॥
ग्राम्यानभ्रगोधूममसूराढकी यवाः ।
जाङ्गलानि च मांसानि भोजने च प्रशस्यते ॥
तिक्तानि रूक्षाणि कषायकाणि
तीव्राणि दाहीन्यपि कायिकानि ।
सुराम्लसौवीरकवीजपूरान्
तैलानि वर्ज्यानि च पाण्डुरोगे ॥"
इति हारीते चिकित्सितस्थाने नवमेऽध्याये ॥*॥

अस्य चिकित्सान्तरं यथा,—
"पाण्डामयी पिबेत् सर्पिरादौ कल्याणकाह्वयम् ।
पञ्चगव्यं महातिक्तं घृतं वारग्वधादिना ॥
दाडिमात् कुडवो धान्यात् कुडवार्द्धं पलं पलम् ।
चित्रकात् पञ्चवेराच्च पिप्पल्यर्द्धपलञ्च तैः ॥
काञ्जतैर्विंशतिपलं घृतस्य सलिलाढके ।
सिद्धं हृत्पाण्डुगुल्मार्शःप्लीहवातकफापहम् ।
दीपनं श्वासकासघ्नं मृदुवातानुलोमनम् ॥
दुःखप्रसवितोनाथ वन्ध्यानाञ्च प्रशस्यते ।
स्नेहितं वामयेत्तीक्ष्णैः पुनःस्निग्धञ्च शोधयेत् ।
पयसा मूत्रयुक्तेन बहुशः केवलेन वा ॥
दन्तीपलरसे कोष्णे काम्पिल्यांशजितमासृतम् ।
द्राक्षाञ्जलिं वा मृदितं ततः पिबेत् पाण्डुरोगजित् ॥
मूत्रेण पिष्टां पथ्यां वा ततःसिद्धं वा फलत्रयम् ।
स्वर्जक्षीरी त्रिवृच्छ्यामा भद्रदारु महौषधम् ॥
गोमूत्राञ्जलिना पिष्टं घृतं तेनैव वा पिबेत् ।
साधितं क्षीरमेभिर्वा पिबेद्दोषानुलोमनम् ॥
मूत्रे स्थितं वा सप्ताहं पयसा यो रजः पिबेत् ।
जीर्णे क्षीरेण भुञ्जीत रसेन मधुरेण वा ॥
मृद्वग्नीभयतो स्निग्धात् पथ्यां मधुघृतप्लुताम् ।
विश्वाजां कटुकां मुस्तां कृष्णं दारुकलिङ्गकः ॥
द्वाविंशाद्विपिचुर्म्मी वा कर्षार्द्धांशानुपाचयेत् ।
पीत्वा तत्पूर्वमम्भोभिः सुस्नेहिस्निग्धतो मधु ॥

पाण्डुरोगं ज्वरं दाहं कासं श्वासमरोचकम् ।
गुल्मानाहामवातांश्च रक्तपित्तञ्च तज्जयेत् ॥
वासागुडूचीत्रिफला कटीभूनिम्बनिम्बजः ।
क्वाथः क्षौद्रयुतो हन्ति पाण्डुपित्तासकामलाः ॥"
"गुडनागरमण्डूरतिलांश्चामलकात् समान् ।
पिप्पलीद्विगुणान् दद्यात् गुटिकां पाण्डुरोगिणे ॥
ताप्यं दार्व्याख्यं चव्यं ग्रन्थिकं देवदारु च ।
योषादि नरकेशैतच्चूर्णयेद्विगुणं ततः ।
मण्डूरञ्चाञ्जननिभं सर्व्वतोऽष्टगुणैश्च तत् ॥
पृथक्त्रिपक्वे गोमूत्रे वटकीकरणक्षमे ।
प्रक्षिप्य वटकान् कुर्य्यात् तान् खादेत्तक्रभोजनः ॥
एते मण्डूरवटकाः प्राज्ञदाः पाण्डुरोगिणाम् ।
कुष्ठान्यजरकं प्लीहमरस्तम्भमरोचकम् ॥
अर्शांसि कामलां मेहान् प्लीहानं गुल्मयन्ति च ।
ताप्यादिजतुरौप्यायोमलाः पञ्चपलाः पृथक् ॥
चित्रकत्रिफला योषविड्भैः पालिकैः सह ।
शर्करार्द्धपलोन्मिश्रा चूर्णिता मधुना हृताः ॥
पाण्डुरोगं विषं कासं यक्ष्माणं विषमं ज्वरम् ।
कुष्ठान्यजरकं मेहं प्लीहं श्वासमरोचकम् ॥
विशेषाद्धन्त्यपस्मारं कामलां गुदजानि च ।
कौटजत्रिफलानिम्बपटोलधनवागरैः ॥
भावितानि दशाहानि रसैर्द्वित्रिगुणानि वा ।
शिलाजतुपलानाष्टौ तावती सितशर्करा ॥
लक्ष्मीरी पिप्पली धात्री कर्कटाख्याः पलोन्मिताः ।
निर्दग्धाः फलमूलाभ्यां पलं युक्त्या त्रिजातकम् ॥
मधुत्रिपलसंयुक्तं कुर्य्यादक्षसमान् गुडान् ।
दाडिमाम्बुपयःपक्षिरसतोयसुरासवान् ॥
तान् भक्षयित्वानुपिबेन्निरमो मुक्त एव वा ।
पाण्डुक्रुष्ठज्वरप्लीहतमकार्शो भगन्दरम् ॥
कृमिमूत्रपूतीशुक्राग्निदोषगुल्मगरोदरम् ।
कासाष्ठग्रहपित्तास्रक् श्लीपगुल्मगलामयान् ॥
मेहवर्त्मभमान् हन्युः सर्व्वदोषहराः शिराः ॥"
इति वाभटे चिकित्सास्थाने षोडशेऽध्याये ॥*॥

"अवायमद्यं लवणानि मद्यं
मृदं दिवास्वप्नमतीवतीक्ष्णम् ।
निषेवमाणस्य प्रदूष्य रक्तं
कुर्व्वन्ति दोषास्त्वचि पाण्डुभावम् ॥
पाण्डामयोऽष्टादविधः प्रदिष्टः
पृथक्समस्तैर्युगपच्च दोषैः ।
सर्व्वेषु चैवेह पाण्डुभावो
यतोऽधिकोऽतः खलु पाण्डुरोगः ॥"
"कृष्णेक्षणं कृष्णसिरावनद्धं
तद्वर्णविण्मूत्रनखाननत्वं ।
वातेन पाण्डुं मनुजं व्यवस्येद्-
युक्तं तथान्नैरनुदप्रवेकैः ॥
पीतेक्षणं पीतसिरावनद्धं
तद्वर्णविण्मूत्रनखाननत्वं ।
पित्तेन पाण्डुं मनुजं व्यवस्येद्-
युक्तं तथान्नैस्तदुपद्रवैश्च ॥
शुक्लेक्षणं शुक्लसिरावनद्धं
तद्वर्णविण्मूत्रनखाननत्वं ।

कफेन पाण्डुं मनुजं व्यवस्येद्
युक्तं तथान्नैस्तदुपद्रवैश्च ॥
सर्व्वात्मके सर्व्वमिदं व्यवस्येद्
वक्ष्यामि लिङ्गान्यथ कामलायाः ॥"

चिकित्सान्तरं यथा,—
"साध्यन्तु पाण्डामयिनं समीक्ष्य
स्निग्धं घृतेनोर्द्धमधश्च शुद्धम् ।
सम्यादयेत् क्षौद्रघृतप्रगाढैः
हरीतकीचूर्णयुतैः प्रयोगैः ।'
पिबेद्घृतं वा रजनीविपक्वं
यत्रैफलं तैक्ष्वकमेव वापि ॥
विरेचनद्रव्यकृतं पिबेद्वि
योगांश्च वैरेचनिकान् घृतेन ॥"
"उभे हरिद्रौ रजनीं सुकाख्यां
सुकादनीञ्चापि सकाकमाचीम् ।
आदारिबिल्वीं सकदम्बपुष्पीं
विपाच्य सर्पिर्विपचेत् कषाये ॥
तत् पाण्डुतां हन्त्युपयुज्यमानं
क्षीरेण वा मार्गधिकां यथाग्निः ।
हितञ्च यष्टीमधुकं कषायं
चूर्णं समं वा मधुनावलिह्यात् ॥
गोमूत्रयुक्तं त्रिफलादनानां
दध्नायसचूर्णमनल्पकालम् ।
प्रवालमुक्ताञ्जनगन्धचूर्णं
लिह्यात्तथा काञ्चनगैरिकोत्थम् ॥
आर्द्रं गुडक्षौद्रकुडवप्रमाणं
विड्हरिद्रा लवणोत्तमञ्च ।
पृथक् पलांशानि समग्रमेत-
च्चूर्णं हितान्नी मधुनावलिह्यात् ॥
मण्डूरलोहाग्निविडङ्गपथ्या ,
योधांशकः सर्व्वसमानताप्यः ।
मूत्रासुतोऽयं मधुनावलेहः
पाण्डामयं हन्त्यचिरेण घोरम् ॥"
इत्युत्तरतन्त्रे चतुःसप्तत्यारिंशत्तमेऽध्याये सुश्रुतोक्तम् ॥*॥ चिकित्सार्थमस्य वटिकौषधं यथा,
"लौहचूर्णं निशायुग्मं त्रिफला कटुरोहिणी ।
प्रलिह्यान्मधुसर्पिर्भ्यां कामला पाण्डुरोगनुत् ॥"
इति निशालौहम् ॥
"गुडसूतं तथा गन्धं सूतहेमाभ्रगुग्गुलु ।
जैपालबीजं तुल्यञ्च घृतेन गुडकीकृतम् ॥
भक्षयेद्वरान्नाच्छोथपाण्डुप्रशान्तये ।
पञ्चाननवटी ख्याता अनुपानञ्च पूर्ब्बवत् ॥"
इति पञ्चाननवटी ॥
"पलं सूतं पलं गन्धं वह्निपथ्या पलं पलम् ।
सुस्नेहाम्लपत्रकाणाञ्च प्रतिसार्द्धपलं क्षिपेत् ॥
शूलघ्नं पिप्पलीमूलं विश्वाप्यि पलं पलम् ।
नागकेशरतः कर्षमेरकस्य पलन्तथा ॥
पुरातनगुडेनैव तुल्येनैव विमिश्रयेत् ।
मर्द्दयेत् कनकद्रावैरेककं वा घृतान्वितम् ॥
गुडेन वदराकाभान् कारयेद्वटकोन्मिश्रि ।
पाण्डुरोगहरः सोऽयं रसः कामेश्वरः स्वयम् ॥"
इति कामेश्वरो रसः ॥

इति वैद्यकरत्नेन्द्रसारसंग्रहे पाण्डुरोगाधिकारे ॥ * ॥ * ॥)

पाण्डुः, स्त्री, (पड़ि + कुः । निपातनात् दीर्घत्वम् ।) माषपर्णी । इति शब्दचन्द्रिका ॥ माषाणी इति भाषा ॥ पाण्डुवर्णस्त्री । इति सुग्धबोधव्याकरणम् ॥

पाण्डुकः, पुं, (पाण्डु + संज्ञायां कन् ।) पाण्डुरोगः । पाण्डुराजा । इति शब्दरत्नावली ॥ पाण्डुवर्णः । इति हलायुधः ॥

पाण्डुकण्टकः, पुं, (पाण्डुवर्णानि कण्टकान्यस्येति ।) अपामार्गः । इति राजनिर्घण्टः ॥

पाण्डुकम्बलः, पुं, (पाण्डुवर्णः कम्बलः नित्यकर्म्मधारयः ।) श्वेतप्रावारः । प्रस्तरभेदः । इति मेदिनी । ले, १७० ॥ पाण्डुवर्णकम्बलः । इति भरतः ॥

पाण्डुकम्बली, [न्] पुं, (पाण्डुवर्णकम्बलेन परिवृतः । पाण्डुकम्बल + "पाण्डुकम्बलादिनिः ।" ४ । २ । ११ । इति इनिः ।) पाण्डुवर्णकम्बलावृतरथः । इत्यमरः । २ । ८ । ५४ ॥ पाण्डुकम्बलयुक्ते, त्रि ॥

पाण्डुतरुः, पुं, (पाण्डुवर्णस्तरुरिति कर्म्मधारयः ।) धववृक्षः । इति राजनिर्घण्टः ॥

पाण्डुनागः, पुं, (पाण्डुवर्णो नाग इव । यद्वा, नाग इव पाण्डुरिति राजदन्तादिवत् समासः ।) पुन्नागवृक्षः । इति शब्दरत्नावली ॥ (पाण्डुवर्णो नाग इति विग्रहे ।) श्वेतहस्ती श्वेतसर्षपश्च ॥

पाण्डुपत्नी, स्त्री, (पाण्डु पत्नमस्या इति जातित्वात् ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—

"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपत्नी स्मृता कौन्ती हरेणुका ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पाण्डुपृष्ठः, त्रि, (पाण्डु पृष्ठं यस्य ।) पाण्डुवर्णपृष्ठयुतः । अलक्षयः । इति त्रिकाण्डशेषः ॥

पाण्डुफलः, पुं, (पाण्डूनि फलानि यस्य ।) पटोलः । इति राजनिर्घण्टः ॥

पाण्डुफला, स्त्री, (पाण्डु फलमस्या इति टाप् ।) चिर्भिटा । इति राजनिर्घण्टः ॥

पाण्डुभूमः, त्रि, (पाण्डुर्भूमिरत्र इति । "क्षयोदकपाण्डुसङ्ज्ञापूर्व्वाया भूमेरिष्यंत ।" ५ । ४ । ७५ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या अच् समासे ।) पाण्डुवर्णभूमियुक्तदेशः । यथा,—

"पाण्डूदक् क्षयतो भूमिः पाण्डूदक् क्षया मृत्तिका ॥"
इति हेमचन्द्रः ॥

पाण्डुमृत्, स्त्री, (पाण्डुः पाण्डुवर्णा मृत् मृत्तिका यत्र ।) पाण्डुभूमिः । पाण्डुमृत् इति कर्म्मधारये ।) खटी । इति राजनिर्घण्टः ॥

पाण्डुरः, पुं, (पाण्डुरस्यास्तीति । पाण्डु + "नगपांसुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या रः ।) श्वेतपीतमिश्रितवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १७ ॥ (यथा, भागवते । ८ । ८ । ३ ।

"तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः ।
तस्मिन् बलिः सृहाञ्चक्रे नेन्द्र ईश्वरशिक्षया ॥")

कामलारोगः । इति शब्दरत्नावली ॥ श्वित्ररोगे, क्ली । इति हलायुधः ॥

पाण्डुरङ्गः, पुं, (पाण्डुरागि अङ्गान्यस्येति ।) फलशाकविशेषः । पाटराङ्गा इति भाषा ॥ अस्य गुणाः । क्रिमिश्लेष्मपित्तनाशित्वम् । तिक्तत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥

पाण्डुरद्रुमः, पुं, (पाण्डुरः श्वेतः श्वेतपीतमिश्रितवर्णो वा द्रुमो वृक्षः ।) कुटजवृक्षः । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिका पुष्प इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥")

पाण्डुरपृष्ठः, त्रि, (पाण्डुरं पृष्ठमस्य ।) लक्षणहीनः । इति हेमचन्द्रः ॥ पाण्डुवर्णपृष्ठयुक्तश्च ॥

पाण्डुरफली, स्त्री, (पाण्डुरं पाण्डुवर्णं फलं अस्याः । जातित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पाण्डुः २ धूसरा ३ वृत्तबीजका ४ भूरिपलितदा ५ पाण्डुफली ६ । अस्या गुणाः । शीतोष्णत्वम् । गौल्यत्वम् । कफकासदोषपित्तभूताघातनाशित्वम् । बल्यत्वम् । वृष्यत्वञ्च । इति राजनिर्घण्टः ॥

पाण्डुरा, स्त्री, (पाण्डुरस्यस्या इति ततष्टाप् च ।) माषपर्णी । इति राजनिर्घण्टः ॥ पाण्डुरवर्णा च ॥

पाण्डुरागः, पुं, (पाण्डुरं पाण्डुरत्वं आ सम्यक् रूपेण गच्छतीति । गम + डः । यद्वा, पाण्डुः रागोऽस्येति ।) दमनकवृक्षः । इति राजनिर्घण्टः ॥ पाण्डुवर्णयुक्ते, त्रि ॥

पाण्डुरेक्षुः, पुं, (पाण्डुरः श्वेतवर्णं इक्षुः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

पाण्डुलेखः, पुं, (पाण्डुर्लेखः ।) पाण्डुलिपिः । सुसविदा इति पारस्यभाषा ॥ यथाह व्यासः ।

"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रं निवेशयेत् ॥
फलकं काष्ठादिपट्टकम् ।" इति व्यवहारतत्त्वम् ॥

पाण्डुलोमशा, स्त्री, (पाण्डूनि लोमानीवाङ्गान्यस्यस्याः ।) माषपर्णी । इति रत्नमाला ॥ पाण्डुवर्णलोमयुक्ता च ॥

पाण्डुलोमा, स्त्री, (पाण्डु लोम यस्याः ।) माषपर्णी । इति जटाधरः ॥ पाण्डुवर्णलोमयुक्ते, त्रि ॥

पाण्डुशर्करा, स्त्री, (पाण्डुः शर्करा इव यस्यां रोगावस्थायामित्यर्थः ।) रोगविशेषः । यथा, गारुडे १८२ अध्याये ।

"पित्तं वै मानवीमूलं श्लेष्मकाले समाहृतम् ।
साधितं क्षारगुडेन पौतं शर्करयान्वितम् ॥
हरेन्मूत्रनिरोधञ्च हरेद्वै पाण्डुशर्कराम् ॥"

पाण्डुशूर्म्मिला, स्त्री, द्रौपदी । इति त्रिकाण्डशेषः ॥

पाण्डुसोपाकः, पुं, वर्णसङ्करविशेषः । स तु चाण्डालादैदेह्यां जातः ॥ (अस्योत्पत्तिविवरणम् । यथा, मनौ । १० । ३७ ।

"चण्डालात् पाण्डुसोपाकस्त्वक्षारव्यवहारवान् ।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥"
"वैदेह्यां चण्डालात् पाण्डुसोपाकाख्यो वेणुव्यवहारजीवी जायते ।" इति तट्टीकायां कुल्लूकभट्टः ॥ क्वचित् पाण्डुसौपाकोऽपि पाठो दृश्यते । यथा, महाभारते । १३ । ४८ । २६ ।

"चण्डालात् पाण्डुसौपाकस्त्वक्सारव्यवहारवान् ॥")

पाण्यः, त्रि, (पण व्यवहारस्तुत्योः + ण्यत् ।) स्तुत्यः । स्तवनीयः । ("पण्या गौः व्यवहर्त्तव्यार्थः । पाण्यमन्यत् स्तुत्यर्हमित्यर्थः ।" इति "सिद्धान्तकौमुद्याम् । ३ । १ । १०१ । इत्यस्य सूत्रस्य वृत्तौ बालभातम् ॥)

पातः, पुं, (पत + घञ् ।) पतनम् । (यथा, महाभारते । ३ । १३३ । २६ ।

"वड़वे इव संयुक्ते श्येनपाते दिवौकसाम् ।
कस्मयोर्गर्भमाधत्ते गर्भं सुषुवतुश्च कम् ॥")

त्राते, त्रि । इति मेदिनी ॥ (पातयति चन्द्रसूर्य्यौ क्षादयतीति । पत + णिच् + अच् ।) राहुः । यथा,—

"ताड़ितः खदहनैर्हिंसकाः
षट्कषट्कशरकृत्तफलमांसाः ।
खं भुवे कुसुदिनीपतिपातो
राहुमाहुरिह केऽपि तदेव ॥"
इति सिद्धान्तशिरोमणिः ॥

पातकं, क्ली, (पातयति अधो गमयति दुष्क्रियाकारिणमिति । पत + णिच् + ण्वुल् ।) नरकसाधनमिति यावत् । तत्पर्य्यायः । अशुभम् २ दुष्कृतम् ३ दुरितम् ४ पापम् ५ एनः ६ पाप्मा ७ किल्बिषम् ८ कलुषम् ९ किल्बिषम् १० कल्मषम् ११ दृजिनम् १२ तमः १३ अंहः १४ कल्कम् १५ अघम् १६ पङ्कम् १७ । इति हेमचन्द्रः ॥ तच्च नवविधं यथा । अतिपातकम् १ महापातकम् २ अनुपातकम् ३ उपपातकम् ४ सङ्करीकरणम् ५ अपात्रीकरणम् ६ जातिभ्रंशकरम् ७ मलावहम् ८ प्रकीर्णकम् ९ । इति प्रायश्चित्तविवेकः ॥ एषां विवरणं तत्तच्छब्दे द्रष्टव्यम् ॥ कायवाङ्मनःकृतानि दशविधपापानि यथा,—

"अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥"
इति तिथ्यादितत्त्वम् ॥

पातङ्गिः, पुं, (पतङ्गस्य सूर्य्यस्यापत्यमिति । पतङ्ग + "अत इञ् ।" ४ । १ । १५ । इति इञ् ।) अरुणः । इति शब्दरत्नावली ॥

पातञ्जलं, क्ली, (पतञ्जलिना खनामविश्रुतमहर्षिणा प्रणीतं प्रोक्तं वा इति अण्।) पतञ्जलिमुनिप्रणीतपादचतुष्टयात्मकयोगशास्त्रनिरूपकदर्शनशास्त्रविशेषः॥ तत्र प्रथमे पादे अथ योगानुशासनमिति योगशास्त्रारम्भे प्रतिज्ञां विधाय योगश्चित्तवृत्तिनिरोध इत्यादिना योगलक्षणमभिधाय समाधिं सप्रपञ्चं निरदिशदृगवान् पतञ्जलिः॥ १॥ द्वितीये तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च बहिरङ्गानि साधनानि॥ २॥ तृतीये। देशबन्धश्चित्तस्य धारणेत्यादिना धारणाध्यानसमाधित्रयमन्तरङ्गं संयमपदवाच्यं तत्रावान्तरफलं विभूतिजातम्॥३॥ चतुर्थे जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय इत्यादिना सिद्धिप्रपञ्चनपूर्वकं परमं प्रयोजनं कैवल्यम्॥ ४॥ प्रधानादीनि पञ्चविंशतितत्त्वानि साङ्ख्योक्तान्येवात्रापि। षड्विंशस्तु परमेश्वरोऽधिकः। इति सर्व्वदर्शनसंग्रहः॥

पातनं, क्ली, (पत+णिच्+भावे ल्युट्।) अधोनयनम्। यथा "ऊर्द्धाधस्तिर्य्यक्पातनादिभी रसस्य नानाविधी मुद्रिरुक्ता।" इति रत्नावली॥

पाता, [तृ] त्रि, (पाति रक्षतीति। पा रक्षणे+तृच्।) रक्षिता। यथा,—

"संहारकर्त्तुः संहर्त्ता पातुः पाता परात्परः।
ममाज्ञयायं संहर्त्ता गत्वा तेन हरः स्मृतः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः॥ गन्धपत्रः। इति शब्दचन्द्रिका॥ वायुः इति भाषा॥

पातालं, क्ली, (पतत्यस्मिन् दुष्क्रियावन्त इति। पत+"पतिचषिभ्यामालच्।" उणां। १। २५६। इति आलच्। पादस्य तले वर्त्तते इति ष्ठोदरादित्वात् साधुरित्येके।) विवरम्। वड़वानलः। इति मेदिनी॥ खनामख्यातुर्थस्थानम्। यथा,—

"पातालं हिमुकश्चैव सुतलश्चतुथकम्॥"

इति ज्योतिस्तत्त्वम्॥

खनामख्यातभुवनविशेषः। तत्पर्य्यायः। अधोभुवनम् २ बलिसद्म ३ रसातलम् ४ नागलोकः ५। इत्यमरः॥ अधः ६ उरगस्थानम् ७॥ *॥

सप्तपातालानि यथा,—

"अतलं वितलञ्चैव वितलञ्च गभस्तिमत्।
तलं सुतलपाताले पातालानि तु सप्त वै॥"

इति शब्दरत्नावली॥

शेष उवाच।

"कथयामि महाभाग! पातालस्य विनिर्णयम्।
क्रमादेव निबोधैतत् सावधानो द्विजर्षभ!॥
पातालानि च सप्तैव सुनयः संप्रचक्षते।
अतल वितलञ्चैव सुतलञ्च तलातलम्॥
महातलञ्च विख्यातं ततो ज्ञेयं रसातलम्।
ततः पातालमित्येवं सप्त पातालसंज्ञकाः॥
एते स्वर्गाधिकसुखा विलस्वर्गाः प्रकीर्त्तिताः।
सद्दृढभवनोद्यानविहाराक्रीड़चत्वराः॥
या च सा मेदिनी ब्रह्मन्! धत्ते स्थावरजङ्गमान्।
अधस्तस्या यदतलं योजनायुततो द्विज!॥
मयपुत्रो महामायो वसत्यत्र महासुरः।
येन सृष्टाः पुरा माया षड्डनवतिः किल॥१॥
तदधो वितलं नाम योजनानां ततोऽयुते।
हरो विहरते तत्र भगवान् हाटकेश्वरः॥
सुपार्श्वदेर्भूतगणैर्भवान्या च सह प्रभुः।
प्रवृत्ता च सरित् तत्र हाटकी नाम विस्तृता॥२॥
अधः सुतलमित्येतत् योजनानां ततोऽयुते।
तत्रोदारश्रवाः पुण्यश्लोको वैरोचनिर्बलिः॥३॥
तलातलं ततोऽधस्तात् सुतलादयोजनायुते।
मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्महान्।
निवसत्यत्र सुचिरं मायानां परमाश्रयः॥ ४॥
महातले ततोऽधस्तादयोजनानामथायुते।
सर्पाणां कादवेयानां गणः क्रोधवशाक्षयः॥
गरुडात् सर्व्वदा भीतः सकुटुम्बः सुहृद्वृतः।
निवसत्यनभिज्ञातः पन्नगराजेन गरुडे॥ ५॥
रसातले ततोऽधस्तादयोजनानामथायुते।
निवसन्ति दानवाश्च ग्रकाङ्क्षीता निरन्तरम्॥६॥
पाताले तु ततोऽधस्तादयोजनानां द्विजायुते।
नागलोकेश्वराः शूरा निवसन्ति महाबलाः॥"७

इति पाद्मे पातालखण्डे १। २। ३ अध्यायाः॥*

अपि च अग्निपुराणे।

"अतलं सुतलञ्चैव वितलञ्च गभस्तिमत्।
महातलं रसातलं पातालं सप्तमं स्मृतम्॥
शुक्लभौमं शिलाभौमं पातालं नीलमृत्तिकम्।
रक्तपीतश्वेतलक्ष्यभौमानि च भवन्त्यपि॥
पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम्।
सुधिरं तानि कथ्यन्ते भुवनानि चतुर्दश॥
अष्टाविंशतिविख्यातास्ततो नरककोटयः।
नरकाणामधस्तात्तु धूमः कालाग्निसम्भवः॥
तस्याधस्तादनन्ताख्यो रुद्रः सर्व्वमयो महान्।
तदधो धर्म्मचक्रन्तु येनेदं धार्य्यते जगत्॥" *॥

अन्यच्च।

"दशसाहस्रमेकैकं पातालं मुनिसत्तम!।
अतलं वितलञ्चैव नितलञ्च गभस्तिमत्॥
महाख्यं सुतलञ्चार्य्य पातालञ्चापि सप्तमम्।
कृष्णशुक्लारुणापीताश्चर्कराशैलकाञ्चनाः॥
भूमयो यत्र मैत्रेय! वरप्रासादशोभिताः।
तेषु दानवदैतेयजातयः सुतसंघशः॥
निवसन्ति महाभागा अहयश्च महासुने!।
स्वर्लोकादपि रम्याणि पातालानीति नारद!॥
दिवार्कररमयो यत्र प्रभां न्वन्ति नातपम्।
शशिनश्च न शीताय निशि द्योताय केवलम्॥
पातालानामधस्ताच्चे विष्णोर्या तामसी तनुः।
शेषाख्यायदृगुणान् वक्तुं न शक्ता दैत्यदानवाः॥
योऽनन्तः पठ्यते सिद्धैर्देवदेवर्षिपूजितः।
यस्येषा सकला पृथ्वी फणामणिशिखारुणा।
आस्ते कुसुममालेव कस्तदीर्य्यं वदिष्यति॥
यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः।
तदा चलति भूरेषा सादितोयाब्धिकानना॥"

इति विष्णुपुराणे। २। ५। अध्यायः॥

पातालः, पुं, (पतति जारणार्थं पारदादिकं यत्र। पत+घञ्।) औषधपाकार्थयन्त्रविशेषः। इति शब्दचन्द्रिका॥ तत्प्रकारो यथा, वैद्यके।

"ऊर्द्धमापस्तले वह्निर्मध्ये तु रससंग्रहः।
पातालयन्त्रमेतद्धि शोधयेत् खतकादिकम्॥"

पातालगरुड़ी, स्त्री, (पातालाख्या गरुड़ी।) लताविशेषः। छेउड़ा इति हिन्दीभाषा॥ तत्पर्य्यायः। वत्सादनी २ सोमवल्ली तिक्तक्षीरा ३ मेषकाभिधा ५ तार्क्षी ६ सौपर्णी ७ गारुड़ी ८ दीर्घकाण्डा ९ दृढ़काण्डा १० महाबला ११ दीर्घवल्ली १२ दृढ़लता १३। अस्या गुणाः। मधुरत्वम्। पित्तदाहास्रदोषविषदोषनाशित्वम्। वृष्यत्वम्। सन्धानत्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥

अपि च।

"छिलिच्छिडो महामूलः पातालगरुड़ाह्वयः।
छिलिच्छिडः परं वृष्यः कफघ्नः पवनापहः॥"

इति भावप्रकाशः॥

पातालनिलयः, पुं, (पातालं पातालं वा निलयो यस्य।) दैत्यः। इति हलायुधः॥ सर्पः। इति राजनिर्घण्टः॥

पातालौकाः, [स्] पुं, (पातालमोकः स्थानमस्येति।) दैत्यः। इति हेमचन्द्रः॥ पातालवासिनि, त्रि॥

पातिः, पुं, (पाति रक्षतीति। पा+"पातेरतिः।" उणां। ५। ५। इति अतिप्रत्ययः।) प्रभुः। स्वामी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

पातिकः, पुं, (पातः पतनं जले निमज्जनोन्मज्जनमेवास्यास्येति। पात+ठन्।) शिशुमारः। इति शब्दमाला॥

पातिली, स्त्री, (पातिः सम्पातिः पक्षियूथं लीयतेऽत्र। ली+डः। ङीष् च।) वागुरा। (पातिः स्वामी लीयतेऽस्याम्।) नारी। ऋतुपात्रभेदः। इति मेदिनी॥ पातिल् इति भाषा॥

पातुकः, त्रि, (पत+"लषपतपदस्थेति।" ३। २। १५४। इति उकञ्।) पतयालुः। पतनशीलः। इत्यमरः॥ (यथा, महाभारते। १२। ६१। ४२।

"यमो राजा धार्म्मिकाणां मान्यानां परमेश्वरः।
संयच्छन् भवति प्राणानसंयच्छंस्तु पातुकः॥")

प्रपाते जलहस्तिनि च पुं। इति मेदिनी॥

पात्रः, त्रि, (नानागुणालङ्कृतो जनः।

"अपात्रः पात्रतां याति यत्र पात्रो न विद्यते॥"

इत्युणादिवृत्तिकृदुज्ज्वलदत्तः॥

तथा च महाभारते। १३। ६६। २२।

"शुभे पात्रे ये गुणा गोप्रदाने
तावान् दोषो ब्राह्मणस्यापहारे॥")

पाधातोस्त्रप्रत्ययनिष्पन्नत्वादेकतकारवानयम्॥

पात्रं, क्ली, पाति रक्षति क्रियामाधेयं वा। पिबन्त्यनेनेति वा। पा रक्षणे पा याने वा+"सर्व्वधातुभ्यः ष्ट्रन्।" उणां ४। १५८। इति ष्ट्रन्।)

आधेयधारणवस्तु। तत्पर्य्यायः। अमत्रम् २ भाजनम् ३। इत्यमरः।२। ८।३३॥ भाण्डम् ४ कोशः ५ कोषः ६ पात्री ७ कोशी ८ कोषी ९ कोशिका १० कोषिका ११। इति शब्दरत्नावली॥ (यथा, देवीभागवते। १। २। ४०।

"सकलयुगमयानामेकपात्रं पवित्र-
मखिलभुवनमातुर्नाम्बवद्दृश्चित्रम्॥")

योग्यम्। सुवादि। राजमन्त्री। तीरदयाम्तरम्। इति मेदिनी॥ पातार इति भाषा॥ पलम्। नाभ्यादुत्कर्षः। इति हेमचन्द्रः॥ आढकपरिमाणम्। इति वैद्यकपरिभाषा॥*॥

(यथा, चरके कल्पस्थाने १२ अध्याये।

"————————चतुः प्रस्थमथाढकम्।
पात्रं तदेव विज्ञेयं————————॥")

पात्राणां विधिर्यथा,—

"हेमपात्रेण सर्व्वाणि लभते चेति ताम्बुने!।
अर्घ्यं दत्त्वा तु रौप्येण आयुराप्नुयुतान् लभेत्॥
ताम्रपात्रेण सौभाग्यं धर्म्मं रत्नमयसम्भवे,।
वार्त्तपात्राणि रम्याणि नैष्ठिकादिषु कारयेत्॥
श्लेष्मलानि कदाचीनां रक्तानि सर्व्वकामिनाम्।
धातूत्थमानि पात्राणि वृषराष्ट्रविवृद्धये॥
त्रपुसीसकलौहानि अन्त्यजादिषु कारयेत्।
विवाहयज्ञश्राद्धेषु प्रतिष्ठासु विशेषतः॥
पात्राणाञ्चादरः कार्य्यः पात्राण्येवोत्तमानि च।
पात्रेषु पृथिवी दुग्धा सुधा पात्रेषु धार्य्यते॥
देवाः सोमः क्रतुर्यज्ञः पात्राण्येवं विदुर्बुधाः।
बलिहोमक्रियादीनि विना पात्रेन सिध्यति॥
तस्मात्पात्राङ्गमेवातः पात्राण्यग्र्याणि मङ्गलने!॥"

तत्परिमाणादिर्यथा,—

"षट्त्रिंशदङ्गुलं पात्रमुत्तमं परिकीर्त्तितम्।
मध्यमं तत्त्रिभागेण भागं कन्यसमीरितम्॥
वसुकुलप्रमाणन्तु ततः पात्रं कारयेत् क्वचित्।
नानाविचित्ररूपाणि पौष्करीकाङ्कतीनि च॥
शङ्खनौलोत्पलाकारपात्राणि परिकल्पयेत्।
रत्नादिरचितान् कुर्य्यात् काष्ठीमूलसुरचितान्॥
यथाशोभं यथालाभं तथा पात्राणि कारयेत्।
विना पात्रेण यः कुर्य्यात् प्रतिष्ठायाग्निकीं क्रियाम्।
विफला भवते सर्व्वा बान्धवादिधनाग्रहा॥"

इति देवीपुराणम्॥*॥

भोजनपात्राणि भोजनशब्दे द्रष्टव्यानि॥

पात्रटः, पुं, (पाता इव पित्रन्निव वा अटतीति। अट्+अच्।) कर्पटकः। क्षपणे, त्रि। इति शब्दरत्नावली॥

पात्रटीरः, पुं, (पात्रेव रक्षन्निव पित्रन्निव वा अटतीति। अट+बाहुलकात् ईरन्।) युक्तयापारमन्त्री। लौहपात्रम्। कांस्यपात्रम्। रजतपात्रम्। सिंहाणम्। पावकः। इति शब्दमाला मेदिनी च॥ रे, २८१। पिङ्गाग्रः। वायसः। कङ्कः। इति शब्दरत्नावली॥

पात्रपालः, पुं, (पात्रं पालयतीति। पाल+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) तुम्बाघटः। इति जटाधरः॥ पात्रव्योयार इति भाषा॥

पात्रसंस्कारः, पुं, (संस्क्रियते इति। सम्+कृ+घञ्। पात्रस्य संस्कारः शुद्धिः।) भाजनशुद्धिः। पुरोटिः। इति शब्दचन्द्रिका॥ रायभाटी इति भाषा॥

पात्री, स्त्री, (पा+ष्ट्रन्। धिवात् ङीष्।) पात्रम्। इति त्रिलिङ्गसंग्रहे अमरः। ३। ५। ४२॥ (यथा, पाद्मे क्रियाखण्डे तड़ागविधिप्रकरणे।

"पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम्।
तत्र निःक्षिप्य मकरं मत्स्यादींश्चैव सर्व्वशः॥")

पात्रीयं, क्ली, (पात्रे साधु। पात्र+बाहुलकात् छः।) यज्ञपात्रम्। इति त्रिकाण्डशेषः॥

पात्रीरः, पुं, (पात्रेण रातीति पात्रीं रातीति वा। रा+कः।) यज्ञपात्रम्। इति भूरिप्रयोगः॥

पात्रेसमितः, त्रि, (पात्रे भोजनसमये एव समितः सङ्गतः।) भोजनादन्यत्र यो न मिलितः सः। भोजनेष्वेव दृष्टः। यथा,—

"स पात्रेसमितोऽन्यत्र भोजनान्मिलितो न यः॥"

इति त्रिकाण्डशेषः॥

पापविशेषः। यथा,—

"निधाय हृदये पापं यः परं शंसति स्वयम्।
स पात्रेसमितोऽथ स्यात्॥" इति शब्दमाला॥

पात्रोपकरणं, क्ली, (पात्रस्य पात्राणां वा उपकरणम् उपभूषणम्।) उपभूषणम्। यथा,—

"रीतिवर्गादिसंजातं पात्रोपकरणादिकम्।
दद्यादायसवर्ज्जन्तु भूषणं न कदाचन॥
घण्टाचामरकुम्भादिपात्रोपकरणादिकम्।
तद्भूषणान्तरे दद्यादयसात्तदुपभूषणम्॥"

इति कालिकापुराणे ६८ अध्यायः॥

पात्रं, क्ली, (पतत्यनेति। पत+क्विप्। पतं अधः-पतनं त्रायते। त्रै+कः। ततः स्वार्थे प्रज्ञादित्वात् अण्। निदर्शनञ्च दर्शनीयम्।) पापिष्ठाता। यथा, भविष्यपुराणे।

"सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः।
पतनं त्रायते यस्मादतीवनरकार्णवात्॥"
महेश्वर इति प्रश्नार्थकं हेतोरविशेषात्।
तथा नन्दिपुराणम्।
"पात्राण्याध्यात्मिका मुख्या विष्णुछाद्यास्त्रिशो-
त्रिजः।
देवताश्च तथा मुख्या गोदानं श्रेष्ठदक्षिणम्॥"

इति प्रायश्चित्ततत्त्वम्॥

पात्रता, स्त्री, (पात्रस्य भावः।) पात्रत्वम्। विद्यातपस्याचारयुक्तता। यथा,—

"न विद्यया केवलया तपसा वापि पात्रता।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते॥"

इति शुद्धितत्त्वम्॥

पार्थं, क्ली, जलम्। इति मेदिनी। थे, ६॥

पाथः, पुं, (पातीति। पा+थुट् निपातनात्।) सूर्य्यः। अग्निः। इति मेदिनी। थे, ६॥

पाथः, [स्] क्ली, (पाति रक्षति जीवानिति। पा+"उदके थुट् च।" उणा। ४। २०४। इति असुन् थुट् च। "पातेरेोदके वाच्येऽसुन् तस्य थुड़ागम इत्युज्ज्वलदत्तः।) जलम्। इत्यमरः॥ (यथा, काशीखण्डे। २६। ४६।

"खरसन्तापशमनी क्षुन्निः पीयूषपाथसाम्॥")

पाथिः, [स्] पुं, (पिबति नद्यादिजलमाकर्षतीति। "पिबतेस्थुक् च।" उणा। २। ११५। इति इसिन् थुगागमश्च।) समुद्रः। इत्युणादिकोषः॥ चक्षुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (पीयते इति। पा+इसिन् थुगागमश्च।) कौलाले, क्ली। इत्युणादिकोषः॥

पाथेयं, क्ली, (पथि साधुरिति। "पथ्यतिथिवसति स्वपतेष्ठेञ्।" ४। ४। १०४। इति ठञ्।) पथि व्ययितव्यद्रव्यम्। इति हेमचन्द्रः॥ पथखरच इति भाषा॥ तत्पर्य्यायः। अध्वलम् २। इत्यमरः॥ सम्बलम् ३। इति भरतः॥ (यथा, देवीभागवते। ३। २५। १२।

"बुभुक्षिता तस्करैर्मार्गे वञ्चनाद्या तथा-कृता।
पाथेयञ्च हृतं सर्व्वं बालपुत्रा निराश्रया॥")

कन्याराशिः। यथा,—

"क्रियताङ्कुरिचितुमञ्जलीरत्रेयपाथेययूककौ-
पार्श्वाः।
तौच्चिक आकोकेरो क्षुरोगवान्त्यभत्रेत्यम्॥"

इति ज्योतिस्तत्त्वम्॥

पाथोजं, क्ली, (पाथसि जले जायते इति। जन+डः।) कमलम्। इति राजनिर्घण्टः॥ (यथा, नैषधे। १६। २७।

"अनतिग्रिथिले पुम्भावेन प्रगल्भबलाः खलु
प्रसभमबलाः पाथोजाक्षे निविश्य निरिन्धराः॥"

कमलशब्दे विवरणं द्रष्टव्यम्॥)

पाथोदः, पुं, (पाथो जलं ददातीति। दा+कः।) मेघः। इति त्रिकाण्डशेषः॥

पाथोधरः, पुं, (धरति धारयतीति वा। धृ+अच्। पाथसो धरः। पाथो धारयतीति। धारि+अच् हस्वश्चेके।) मेघः। इति हलायुधः॥ (यथा, राजतरङ्गिण्याम्। ३। २४०।

"अन्तर्यं सततं क्षुभ्यन्ति गम्भिताम्भोनिधेव पाथोधरै-
रार्त्ताम्भापतितांखरङ्गनजयैरालिङ्ग्य यङ्गन्मयी॥")

पाथोनिधिः, पुं, (पाथांसि जलानि निधीयन्तेऽस्मिन् इति। नि+धा+किः।) समुद्रः। इति शब्दरत्नावली॥

पाद्, पुं, (पद+क्विप्+क्वन्।) पादः। इति अटाधरः॥

पादः, पुं, (पद+करणे घञ्।) पद्यते गम्यतेऽनेन। पा इति भाषा। स च गर्भस्थबालकस्य मासद्वयेन भवति। यथा,—

"मासेन तु शिरो द्वाभ्यां बाहूदरहृदादङ्घियुगः॥"

इति भागवतीयषष्ठतृतीयस्कन्धः॥

तत्पर्य्यायः। पद् २ अङ्घ्रिः ३ चरणः ४। इत्यमरः॥ अंहिः ५। इति शब्दरत्नावली॥ * ॥ ऋग्वेदीयमन्त्रचतुर्थांशः। श्लोकचतुर्थांशः। यथा, पादाक्षेपोपे सत्येव पूर्य्यते। इह ऋक्पाद एव गृह्यते। इति वामनः॥ अविशेषात् श्लोकपादोऽपि। इत्यपरे। इति सिद्धान्तकौमुदी॥ * ॥ पादद्वारा पादाक्रमणादिनिषेधो यथा,—
"पादेन नाक्रमेत पादसुच्छिष्टं नैव लङ्घयेत्।
न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः॥"
इति कर्म्मलोचनम्॥ * ॥
पादप्रक्षालनादिनिषेधो यथा,—
"न पादप्रक्षालनं कुर्य्यात् पादेन वा कदाचन।
नाग्नौ प्रतापयेत् पादौ न कांस्ये धावयेद्बुधः॥
नातिप्रसारयेद्देवं ब्राह्मणान् गामथापि वा।
वायुमिन्दुविप्राग्नीं सूर्य्यं वा गुरुमेव वा प्रति॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥ * ॥
पादेन्द्रियस्याध्यात्मत्वं तस्मिन्नधिभूतमधिदैवतञ्च यथा, महाभारते आश्वमेधिकपर्व्वणि ४२ अध्याये।
"अतः परं प्रवक्ष्यामि सर्व्वं विविधमिन्द्रियम्।
पादावधात्मभित्याहुर्ब्राह्मणास्तत्त्वदर्शिनः॥
अधिभूतन्तु गन्तव्यं विष्णुस्तत्राधिदैवतम्॥"
बुधः। वृक्षमूलम्। तुरीयांशः। चतुर्थभागः। शैलप्रस्थानपर्व्वतः। महाद्रिसमीपे क्षुद्रपर्व्वतः। (यथा, हरिवंशे ६४। २०।
"उभयोर्विन्ध्यचर्य्योः पादे नगयोस्तां महापुरीम्॥")
मयूखः। किरणः। इति मेदिनी॥ (शिवः। यथा, महाभारते। १३। १७। १२४।
"न्यायनिर्व्यूढः पादः पक्षितो ह्यचलोपमः॥"
चिकित्सायाश्चतुष्टयं यथा,—
"वैद्यो व्याधुपसृष्टस्तु भेषजं परिचारकः।
एते पादाश्चिकित्सायाः कर्म्मसाधनहेतवः॥
गुणवद्भिश्चिभिः पादैश्चतुर्थो गुणवान् भिषक्।
व्याधिमल्पेन कालेन महान्तमपि साधयेत्॥
वैद्यहीनाश्चयः पादा गुणवन्तोऽप्यपार्थकाः।
उन्नादश्चोष्ट्रजाग्रो यथाश्वर्युं विनाश्वरे॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः।
सद्धर्म्मपरो यश्च स भिषक् पाद उच्यते॥
आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानागमवानपि।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते॥
प्रश्नस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम्।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम्॥
दोषघ्नमग्न्यनिकरमविकारि विपर्य्यये।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते॥
स्निग्धोऽनुद्धुर्वलवान् युक्तो व्याधितरक्षणे।
वैद्यवाक्यकृदस्वान्तः पादः परिचरः स्मृतः॥"
इति च सुश्रुते सूत्रस्थाने ३४ अध्यायः॥
"कारणं षोड्शगुणं सिद्धौ पादचतुष्टयम्॥"
इति चरके सूत्रस्थाने नवमेऽध्याये॥

अस्य शुभलक्षणं यथा,—
"अखेदनौ मृदुतलौ कमलोदराभौ
श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी।
उच्चौ शिरोविरहितौ च निगूढगुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य॥"
अशुभलक्षणञ्च यथा,—
"खर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःखप्रदौ॥")
पादकटकः, पुं, (पादस्य कटक इवेति।) नूपुरः। रवशून्यहंसाकृतिचरणभूषणम्। वेंक मल इति भाषा। तत्पर्य्यायः। हंसकः २। इत्यमरभरतौ॥
पादकृच्छ्रः, पुं, व्रतविशेषः। यथा,—
"एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन चैकेन पादकृच्छ्रं उदाहृतः॥"
इति गारुडे १०३ अध्यायः॥
पादगण्डिरः, पुं, (गण्यते चूर्य्यते पूर्य्यरक्षादि यस्मात् यत्र वा पादे इत्यर्थः। गड्+किरच् इति गण्डिरः पदः ततो राजदन्तादिवत् परनिपातनात् साधुः। गण्डीर इति पाठोऽपि दृश्यते तत्र गड्+ईरन्प्रत्ययेन साधुरिति।) श्लीपदम्। इति त्रिकाण्डशेषः॥ गोद इति भाषा॥ (श्लीपदशब्देऽस्य विवृतिर्विज्ञेया॥)
पादग्रहणं, क्ली, (पादयोर्ग्रहणम् इति। ग्रह+भावे ल्युट्।) अभिवादनम्। पादस्पर्शपूर्ब्बकप्रणामः। इत्यमरः॥ तन्निषेधो यथा, "समिद्भार्य्युदकुम्भपुष्पान्नहस्तो नाभिवादयेत् यस्यापीदं युक्तम्।" इति बौधायनः॥
"जपयज्ञजलस्यश्च समित्पुष्पकुशानलान्।
दन्तकाष्ठञ्च भक्ष्यञ्च वहन्तं नाभिवादयेत्॥"
इति लघुहारीतः॥
न पुण्याहतपाणिर्नाशुचिर्न जपन् न देवपित्र्यकार्य्यं कुर्व्वन्। अभिवादयेदित्यनुवृत्तौ ग्रन्थलिखितौ॥ * ॥ तद्विधिः।
"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत्॥
ऊर्द्धं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते॥"*॥
तत्प्रकारः।
"अभिवादात् परं विप्रो ज्यायांसमभिवादयन्।
असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत्॥
नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्व्वास्त्वयेव च॥
भोः शब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने।
नाम्नां स्वरूपभावो हि भो भाव ऋषिभिः स्मृतः॥"
इति मनुः। २। १२२—१२४॥
पादचतुरः, पुं, (पादे पदव्यापारे गमनादौ चतुरः।) काकः। सैकतम्। पिप्पलः। करकः। परदोषैकप्रवक्ता। इति मेदिनी। रे, ३०४॥

पादचारी, [न्] पुं, (पद्भ्यां चरतीति। चर गतौ+णिनिः) पदातिः। इति हेमचन्द्रः। ३। १६२॥ पद्भ्यां गमनशीले, त्रि॥ (यथा, भागवते। ६। १२। २६।
"गिरिराट् पादचारीव पद्भ्यां निर्झरयन् महीम्।
जगास स समासाद्य वह्निनं सहवाहनम्॥")
पादजः, पुं, (पद्भ्यां जायते इति। जन+डः।
"पद्भ्यां भूमिर्द्योर्नाभ्यत।" इति श्रुतेर्ब्रह्मणः पद्भ्यां जातत्वात्तथात्वम्।) शूद्रः। इति त्रिकाण्डशेषः॥ (यथा, हरिवंशे भविष्यपर्व्वणि, ३६। ६३।
"न विप्रा न च राजानो न वैश्या न च पादजाः॥"
पादोद्भवमात्रे, त्रि॥)
पादत्राणं, क्ली, (पादयोस्त्राणं यस्मात्।) पादुका। इति जटाधरः॥ (यथा, सुश्रुते चिकित्सितस्थाने ११ अध्याये। "अधनस्वबान्धवो वा पादत्राणातपत्रविरहितो भैक्षाशी ग्रामैकरात्रानुवासी मुनिरिव संयतात्मा योजनशतमधिकं वा गच्छेत्॥" प्रीतऋतूपचारेऽस्य व्यवहारो यथा,—
"उष्णत्वभावैर्बुधैः प्राहृतः शयनमाचरेत्।
शुक्लार्ककिरणान् खेदं पादत्राणञ्च सर्व्वदा॥")
पादपः, पुं, (पादेन मूलेन पिबति रसानिति। पा+कः।) वृक्षः। इत्यमरः॥ (यथा, हितोपदेशे। १। ६३।
"यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते॥"
पादौ पाति रक्षतीति। पा+रक्षणे+कः।) पादपीठः। इति मेदिनी। पे, २१॥
पादपरुहा, स्त्री, (पादपे वृक्षे रोहतीति। रुह+कः।) वन्दाकः। इति राजनिर्घण्टः॥
पादपा, स्त्री, (पादौ पाति रक्षतीति। पा+कः+टाप्।) पादुका। इति मेदिनी। पे, २१॥
पादपाग्रः, पुं, (पादस्य पाग्रः।) अश्वपादरज्जुः। तत्पर्य्यायः। दामाबन्धनम् २। इति हेमचन्द्रः। ४। २६५॥
पादपाशी, स्त्री, (पादपाश+स्त्रियां गौरादित्वात् ङीष्।) खड्डुका। खेड़ुया इति भाषा॥ शृङ्खला। शिकली इति भाषा॥ इति मेदिनी॥
पादपीठं, क्ली, (पादस्य पीठम्।) पादस्थापनासनम्। पा राखा टुल इति भाषा॥ तत्पर्य्यायः। पदासनम् २। इति हेमचन्द्रः। ३। ३८२॥ (यथा, रघुः। १७। २८।
"वितानसहितं तच्च भेजे पैत्रकमासनम्।
चूडामणिभिरुद्दृष्टपादपीठं महीक्षिताम्॥")
पादपीठिका, स्त्री, (पादपीठं साधनत्वेनास्त्यस्या इति। पादपीठ+ठन्।) शापितादिशिल्पम्। यथा,—
"शापितादिकशिल्पे तु कारिका पादपीठिका॥"
इति शब्दमाला॥

पादप्रक्षालनं, क्ली, (पादयोः प्रक्षालनम्।) चरणधौतम्। पा धोओया इति भाषा॥ अस्य गुणाः। मेधाजनकत्वम्। पवित्रत्वम्। आयुष्यत्वम्। अलक्ष्मीकलिनाशकत्वञ्च। इति राजवल्लभः॥ (यथा च,—
"पादप्रक्षालनं पादमलरोगश्रमापहम्।
चक्षुःप्रसादनं पथ्यं रक्षोघ्नं प्रीतिवर्द्धनम्॥"
इति चिकित्सितस्थाने चतुस्त्रिंशोऽध्याये सुश्रुतेनोक्तम्॥)

पादप्रधारणं, क्ली, (पादौ प्रधार्य्येते कण्टकादिभ्यो रक्ष्येतेऽनेनेति। प्र+धृ+णिच्+ल्युट्।) पादुका। इति केचित्॥

पादप्रहारः, पुं, (पादस्य पादेन वा प्रहारः।) पदाघातः। लाति इति भाषा॥ यथा।
"नायिकापादप्रहारादिना नायकस्य कोपादिवर्णनम्।" इति काव्यप्रकाशे सप्तमोल्लासः॥ (यथा च साहित्यदर्पणे। १०। ४६।
"दासे कृतागसि भवत्युचितः प्रभूणां
पादप्रहार इति सुन्दरि! नात्र दूये।
उत्पत्कठोरपुलकाङ्कुरकण्टकाये-
र्यद्भिद्यते मृदु पदं ननु सा व्यथा मे॥")

पादबन्धनं, क्ली, (पादयोर्गोमहिष्यादीनामित्यर्थः। यद्बन्धनम्।) गोमहिष्यादिबन्धनम्। इति जटाधरः॥ यादवशब्दटीकायां भरतश्च॥ (बध्नात्यनेनेति। बन्ध+करणे ल्युट्। पादयोर्बन्धनं तत्साधनवस्तु। गोमहिष्यादीनां पादबन्धनद्रव्यम्। यथा, हेमचन्द्रः। ४। ३२९।
"स तु ग्रन्थिलकः काष्ठमयैः स्यात् पादबन्धनैः॥")
चरणोद्गतञ्च॥

पादमूलं, क्ली, (पादयोर्मूलम्।) चरणाधोभागः। यथा, हेमचन्द्रः।
"पादमूलं गोहिरं स्यात् पार्ष्णस्तु घुटयोरधः॥"
(यथा, रामायणे। २। ७८। २५।
"सा पादमूले कैकेय्या मन्थरा निपपात ह॥"
प्रक्षन्तपर्व्वताधोभागः। यथा, कथासरित्सागरे। १। २७।
"महीं भ्रमन्तौ हिमवत्पादमूलमवापतुः॥")

पादरक्षणं, क्ली, (पादयो रक्षणं यस्मात्।) पादुका। इति हेमचन्द्रः। ३। ५७८॥

पादरज्जुः, स्त्री, (पादबन्धनार्था रज्जुः।) हस्तिपादबन्धनरज्जुः। तत्पर्य्यायः। पारी २। इति जटाधरः॥ चरणबन्धनदाममात्रञ्च॥

पादरथी, स्त्री, (पादस्य रथी क्षुद्रो रथ इव।) पादुका। इति त्रिकाण्डशेषः॥

पादरोहणः, पुं, (पादेमूलैः रोहतीति। रुह+ल्युः।) वटवृक्षः। इति राजनिर्घण्टः॥

पादवल्मीकः, पुं, (पादे वल्मीक इव।) श्लीपदम्। इति हेमचन्द्रः। ३। १७६॥ (श्लीपदरोगशब्देऽस्य विवरणं ज्ञातव्यम्॥)

पादविकः, पुं, (पदवीं धावतीति। पदवी+"मार्गोत्तरपदपदव्यनुपदं धावति।" ४। ४।३७। इति ठक्।) पथिकः। इति सिद्धान्तकौमुदी॥

पादविरजाः, [स्] स्त्री, (पादौ विरजा धूलिविहीनौ यस्याः।) पादुका। इति हारावली। ७४॥

पादशः, [स्] अ, पादं पादम्। पादशब्दात् वीप्सायां चतुरर्थप्रत्ययनिष्पन्नम्। इति व्याकरणम्॥ (यथा, मनुः। १। ८३।
"अरोगाः सर्व्वसिद्धार्थाश्चतुर्व्वर्षशतायुषः।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः॥")

पादशैलः, पुं, (पादः महाद्रिसमीपस्थः क्षुद्रपर्व्वतः स एव शैलः।) प्रत्यन्तपर्व्वतः। इति शब्दरत्नावली॥

पादशोथः, पुं, (पादोद्भवः शोथः। श्राकपार्थिवादिवत् समासः।) पादगतशोफः। यथा,—
"अनन्योपद्रवजातः शोथः पादसमुत्थितः।
पुरुषं हन्ति नारीन्तु सुखजो गुल्मजो दयम्॥"
इति माधवकरः॥
(यथा च हारीते चिकित्सितस्थाने २६ अः॥
"शोथो भवेच्च विकलेन्द्रियरोममार्गः
क्षीणे बले वपुषि चान्नकटूष्णसेवया।
शैत्यात्तथा विशदपिच्छलसेवनेन
रूक्षाभिघातपतनेन च धारणाद्वा॥
आमाशये गतिरतोऽपि नरस्य यस्य
अन्ते प्रधावति ततोऽपि च दोष एवः।
करोति पाणिचरणे च पृथक् प्रकृतो
हन्तेन वा भवति शोथविकारचारः॥
नरस्य चान्तःप्रभवाश्च शोथाः
साध्या भवेयुर्विनता सुखेषु।
असाध्यकाः सर्व्वशरीरगाश्च
पादे स्त्रिया वा वदने नरस्य॥")

पादस्फोटः, पुं, (पादस्य स्फोटः। पादं स्फोटयतीति वा। स्फुट्+"कर्म्मण्यण्।" ३। २। १, इत्यण्।) रोगविशेषः। तत्पर्य्यायः। विपादिका २। इत्यमरः॥ स्फुटी ३ स्फुटिः ४ पादस्फोटिः ५। इति शब्दरत्नावली॥ स तु एकादशक्षुद्रकुष्ठान्तर्गतस्तृतीयकुष्ठम्। यथा,—
"वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम्।
पाणिपादस्फुटनं पाण्योः पादयोश्च स्फुटनं विदारणं येन तत्। इति माधवकरः॥ अस्य चिकित्सा कुष्ठशब्दे द्रष्टव्या॥

पादहारकः, त्रि, (पादाभ्यां हियतेऽसौ। पादशब्दात् निपातनात् कर्म्मणि वकप्रत्ययान्तः। इति सुग्धबोधव्याकरणम्॥ ("क्तात्यल्युटौ बहुलम्।" ३।३।११३। इति कर्म्मणि ल्युल्। इति सिद्धान्तकौमुदी।) चरणहारा हरणकर्त्ता॥

पादाग्रं, क्ली, (पादयोरग्रम्।) चरणाग्रभागः। तत्पर्य्यायः। प्रपदम् २। इत्यमरः॥

पादाङ्गदं, क्ली, (पादस्य अङ्गदमिव।) नूपुरम्। इत्यमरः॥

पादातः, पुं, (पादाभ्यामतति गच्छतीति। अत+क्विप्।) पादातिः। इति शब्दरत्नावली॥ (पादाभ्यामत्तीति। अद्+क्विप्। दृषः। इति व्युत्पत्तिलभ्योऽर्थः॥)

पादातं, क्ली, (पदातीनां समूहः। पदाति+"भिक्षादिभ्योऽण्।" ४। २। ३८। इत्यण्।) पत्तिसंहतिः। पदातिसमूहः। इत्यमरः॥ (यथा, महाभारते। १२। ६६। ८।
"सादिनामन्तरे स्थाप्यं पादातमपि दंशितम्॥")

पादातः, पुं, (पादाभ्यामततीति। अत+अच्।) पादातिः। यथा,—
"पदातिपत्तिपादातपादातिकपदाजयः॥"
इत्यमरमाला॥
(यथा, महाभारते। २। ५८। ४३।
"अयुतं त्रीणि पद्मानि गजारोहाः सहादिनः।
रथानामर्ब्बुदं चापि पादाता बहवस्तथा॥")

पादातिः, पुं, (पादाभ्यामततीति। अत+इन्।) पदातिः। इति हेमचन्द्रः॥

पादातिकः, पुं, (पादातिरेव। पादाति+स्वार्थे कन्।) पदातिः। इति हेमचन्द्रः। ३। १६२॥

पादारकः, पुं, (पाद इव ऋच्छतीति। ऋ+ण्वुल्।) मौलिन्दः। इति त्रिकाण्डशेषः॥

पादालिन्दी, स्त्री, (पाद इव अलिन्दो यत्र। गौरादित्वात् ङीष्।) नौका। इति हारावली। ५६।

पादावर्त्तः, पुं, (पाद इव आवर्त्तते इति। आ+वृत्+अच्।) अरघट्टकः। इति हेमचन्द्रः। ४। १५६॥ रहट् इति हिन्दीभाषा॥

पादाविकः, पुं, (अव रक्षणे+भावे घञ्। पादेन अवः रक्षणम्। तत्र पादावे पादेन शरीरादिरक्षणे नियुक्तः। पादाव+"तत्र नियुक्तः।" ४। ४। ६६। इति ठक्।) पदातिः। इति शब्दरत्नावली॥

पादी, [न्] पुं, (पादोऽस्यास्तीति। पाद+इनिः।) पादविशिष्टजलजन्तुमात्रम्। अस्य गमना गुणाश्च. यथा, भावप्रकाशे।
"कुम्भीरकूर्म्मनक्राश्च गोधाग्राहशृङ्गवः।
चक्रिकाः शिंशुमारश्चेत्यादयः पादिनः स्मृताः॥
पादिनोऽपि च ये ते तु कोषस्थानां गुणैः समाः॥"
चतुर्थांशभागी। यथा, मनुः। ८। २१०।
"सर्व्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे।
तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः॥"

पादुकः, त्रि, (पद्यते गच्छतीति। पद+"लषपतपदेति।" ३। २। १५४। इति उकञ्।) गमनशीलः। पदधातोः कर्त्तरि ण्वुल्प्रत्ययनिष्पन्नः। इति सुग्धबोधव्याकरणम्॥

पादुका, स्त्री, (पादूरेव। पादू+स्वार्थे कन् ततो टाप्।) चर्म्मादिनिर्म्मितपादाच्छादनम्। जुता इति भाषा॥ तत्पर्य्यायः। पादूः २ उपानत्३। इत्यमरः॥ पन्नद्धा ४ पादरक्षिका ५ प्राणिहिता ६। इति हेमचन्द्रः॥ पन्नद्धी ७ पादरथी ८। इति त्रिकाण्डशेषः॥ कौथी ९। इति शब्दरत्नावली॥ * ॥ तस्या धारणविधिर्यथा,—
"वर्षातपादिके छत्री दण्डी राजादवीषु च।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत्॥"
इति ज्योतिस्तत्त्वम्॥

अस्या धारणगुणाः ।
"पादप्रधारणं दृष्ट्वा मोक्षस्थं चक्षुषोर्हितम् ।
सुखप्रचारमायुष्यं बल्यं पादरजापहम् ॥"*॥
अस्या अधारणे दोषा यथा,—
"पादाभ्यामनुपानद्भ्यां दृष्ट्वा चंक्रमणं सदा ।
अनारोग्यमनायुष्यमिन्द्रियघ्नमडहिकृत् ॥"
इति राजवल्लभः ॥ * ॥
तस्या दानफलं यथा,—
"दह्यमानाय विप्राय यः प्रयच्छत्युपानहौ ।
न तस्य मानसो दाहः कदाचिदपि जायते ॥
यानञ्चाश्वतरीयुक्तं तस्य हेममयं शुभम् ।
उपतिष्ठति विप्रर्षे सर्व्वरत्नविभूषितम् ॥
दानमत्र यथोत्पन्नं तत्ते वक्ष्यामि पार्थिव ।
शृण्वेकमना भूप ! लोके सर्व्वसुखप्रदम् ॥
जमदग्निमुनिः पूर्व्वं तपःस्वाध्यायकर्शितः ।
बाणखड्गधरो धन्वी बभूव सततोद्यतः ॥
धनुर्व्वेदे तथा वेदे सर्व्वास्त्रपारगोऽभवत् ।
क्षिपन् बाणांस्तथा ग्रस्यन् भार्य्ययानुगतो हि सः ॥
कदा निदाघकाले तु क्षिपन् बाणान् सहस्रशः ।
तस्थौ स्थाणुरिवासन्नः प्रतिकर्त्तुं महामुनिः ॥
निदाघतीव्रसन्तापाच्छन्त्या सततं भयात् ।
भर्त्तुः खेदात्तथा यान्त्यास्तस्याश्चक्षायते रविः ॥
क्षुत्तृष्णाश्रमतापार्त्ता तथा यातुं न शक्नुवत् ।
सुतापाद्दह्यविभ्रष्टा रेणुका च तपस्विनी ॥
तां दृष्ट्वा स मुनिः प्राह भार्य्यां किन्ते भवेच्चिरम् ।
कोपार्त्तमाह भर्त्तारं न कोपं कर्त्तुमर्हसि ॥
निदाघतीव्रसन्तापाद् भ्रष्टपादा त्वयार्हिता ।
इत्यभिदृष्ट्यभिः सृष्टा न ग्रसाकाङ्क्ष मार्गितुम् ॥
इत्युक्ते स क्रुधाविष्टः प्राह सन्धाय कार्मुके ।
मृषत्कं मां न जानाति सूर्य्यो विभ्रंशमीयिवान् ॥
यः सन्तपति मे भार्य्यां साध्वीं धर्म्मपरायणाम् ।
साध्वसाधु अजानन् वै फलमाप्नोतु तस्य हि ॥
इत्युक्ता स्थानमात्रस्थावर्कविभ्रंशहेतवे ।
प्रतीक्ष्य हि सुघोरेण क्रूररूपधरो मुनिः ॥
तं विज्ञाय मुनिं सूर्य्यो द्विजोभूत्वेदमब्रवीत् ।
किमालोकयसे सूर्य्य पुनः पुनरतीव हि ॥
सुबाणाचितपाणिस्त्वं कथयस्वाखिलं मुने ! ।
इत्युक्तः स तमाहेदं पातयिष्याम्यहं रविम् ॥
द्विजस्तु तमुवाचाथ मुने चित्रं विभाति मे ।
मातुरङ्गगतो यद्वद्बालश्चन्द्रं जिघृक्षति ॥
योजनानां सहस्राणि निमेषाद्याति यो दश ।
विप्र ! मुक्तेन बाणेन तं कथं पातयिष्यसि ॥
तच्छ्रुत्वा यमदग्निस्तं प्राह शृणु द्विजोत्तम ! ।
पातयिष्याम्यहं यद्वदिमं सूर्य्यं नभःस्थितात् ॥
विचरन्तं यदा सूर्य्यं मर्त्यलोके ह्यतन्द्रितः ।
मध्याह्ने स्थिरतामेति सर्व्वलोकान्ददर्शिवान् ॥
तत्काले सुमहल्लक्ष्यं भविष्यति दिवाकरः ।
एवं तं पातयिष्यामि पश्यतस्ते द्विजोत्तम ! ॥
तच्छ्रुत्वा सहसोदियक्षस्य प्रत्यक्षतां ययौ ।
सूर्य्यस्तं चमयामास दत्त्वा क्षत्रमुपानहौ ॥
ततःप्रभृति तच्छत्रं द्विजानां परिगीयते ।
दत्तं तैर्धार्य्यतेऽन्येषां क्षत्रियाणां द्विजोत्तम ! ॥
यो ददाति द्विजेभ्यस्तु तृतीयायासुपानहौ ।
वैशाखे शुक्लपक्षे तु सच्छत्रं कनकान्वितम् ॥
न तस्य मानसो दाहो म्रियुलोकेऽभिजायते ।
सर्व्वव्याधिविनिर्मुक्तः श्रियं पुत्रांश्च विन्दति ॥
कालादिह यदा याति मम लोके द्विजोत्तम ! ।
यानं वाश्वतरीयुक्तं सर्व्वहेममयं शुभम् ॥
दिव्याङ्गनाभिराकीर्णं सर्व्वरत्नविभूषितम् ।
उपतिष्ठति विप्रेन्द्र ! सर्व्वकामफलप्रदम् ॥"
इत्यग्निपुराणम् ॥ * ॥
विष्णुपदे सपादुकगमने दोषो यथा,—
वराह उवाच ।
"बह्वनुपानहौ पद्भ्यां यस्तु मानुषचक्रमेत् ।
चर्म्मकारस्तु जायेत वर्षाणान्तु त्रयोदश ॥
तत्र जन्मपरिभ्रष्टः शूकरो जायते पुनः ।
शूकराच्च परिभ्रष्टः श्वा च तत्रैव जायते ॥
ततः श्वत्वात् परिभ्रष्टो मानुषत्वेव जायते ।
मङ्गल्यञ्च विनीतञ्च अपराधविवर्ज्जितः ॥
शुद्धा तु सर्व्वसंसारं मम लोकाय गच्छति ॥
य एतेन विधानेन वसुधे ! कर्म्म कारयेत् ।
न स लिप्यति पापेन एवमेतन्न संशयः ॥"
इति वराहपुराणे उपानद्दानापराधप्रायश्चित्तम् ॥
अथ देवतापादुकानिर्म्माणपूजनविधिः । यथा,—
"मणिरत्नमयी कार्य्या हेमरूप्यमयी पि वा ।
चन्दनेनापि कर्त्तव्या पादुकाप्रतिमापि वा ॥
श्रीपर्णी श्रीद्रुमा चापि देवदारुमयी पि वा ।
षड्भुजा च सा कार्य्या पादुके पूजयेत् सदा ॥"
इति देवीपुराणम् ॥ * ॥
गुरुपादुकास्तोत्रं यथा,—
"ब्रह्मरन्ध्रसरसीरुहोदरे
नित्यसंयमवदातमद्भुतम् ।
कुण्डलीविवरकाण्डमण्डितं
द्वादशार्णसरसीरुहं भजे ॥ १ ॥
तस्य कन्दलितकर्णिकापुटे
कूजदरेखमकथादिरेखया ।
कोमलत्रितयकञ्चमण्डली-
भावलक्ष्यमवलालयं भजे ॥ २ ॥
ततपुटे पटुतडित्कडारिम-
स्पर्द्धमानमणिपाटलप्रभम् ।
चिन्तयामि हृदि चिन्मयं वपु-
र्विन्दुनादमणिपीठमण्डलम् ॥ ३ ॥
ऊर्द्धमस्य हुतभुक्शिखासखं
तद्विलासपरिहृद्यवासदम् ।
विश्वसारमहोत्सवोत्कटं
वाग्भवादियुगमादिहंसयोः ॥ ४ ॥
तत्र नाथचरणारविन्दयोः
कुङ्कुमासवभरीमरन्दयोः ।
इन्दमिन्दुमकरन्दशीतलं
मानसं स्मरति मङ्गलास्पदम् ॥ ५ ॥
पादुकापञ्चकस्तोत्रं पञ्चवक्त्रादिनिर्गतम् ।
षड्भाम्नायफलोपेतं प्रपठेत् पातिदुर्लभम् ॥"
इति रुद्रयामलः ॥

पादुकाकारः, पुं, (पादुकां करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चर्म्मकारः । इति हलायुधः ॥
पादुकाकृत्, पुं, (पादुकां करोतीति । कृ + क्विप् ।) चर्म्मकारः । इति हेमचन्द्रः । ३ । ५७८ ॥
पादूः, स्त्री, (पद्यते गम्यते सुखेन यया इति । पद + "वितृकमिपद्यर्त्तेः ।" उणा १ । ८७ । इति ऊः स च वित् ।) पादुका । इत्यमरः ॥
पादूकृत्, पुं, (पादूं पादुकां करोतीति । कृ + क्विप् । तुक् ।) चर्म्मकारः । इत्यमरः ॥
पादोदकं, क्ली, (पादप्रक्षालनजातं उदकम् । श्राकपार्थिवादिवत् समासः ।) चरणधौतजलम् । चरणाङ्गतम् । यथा,—
"हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकञ्च निर्म्माल्यं मस्तके यस्य सोऽच्युतः ॥
नैवेद्यमन्नं तुलसीविमिश्रं
विशेषतः पादजलं पिबेच्च ।
योऽश्नाति नित्यं प्रयतो मुरारेः
प्राप्नोति सद्यो मयुतां स भक्तिम् ॥
हत्या हन्ति यदङ्घ्रिसङ्गतुलसीस्पृष्टञ्च पादोदकं
नैवेद्यं बहुमद्यपानदुरितं गुर्व्वङ्गनासङ्गमम् ।
भक्त्याधीनमतिः स्थितिर्हरिजने तत्संगतिः सङ्गजा
ग्रालग्रामशिलादिमूर्त्तिमहिता जानन्ति के वै हरेः ॥"
इति पाद्मोत्तरखण्डे १०० अध्यायः ॥ * ॥
अथ श्रीचरणोदकाभिषेकमाहात्म्यं पद्मपुराणे ।
"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
ग्रालग्रामशिलातोयैर्योऽभिषेकं समाचरेत् ॥
गङ्गागोदावरीरेवानद्यो मुक्तिप्रदास्तु याः ।
निवसन्ति सतीर्थास्ता ग्रालग्रामशिलाजले ॥
कोटितीर्थसहस्रेषु सेवितैः किं प्रयोजनम् ।
तीर्थं यदि भवेत् पुण्यं ग्रालग्रामशिलोद्भवम् ॥"
तत्रैव गौतमाम्बरीषसंवादे ।
"येषां धौतानि गात्राणि हरेः पादोदकेन वै ।
अम्बरीष ! कुले तेषां दासोऽस्मि वसुधाम्बर ! सदा ॥
राजन्नेतानि तावच्च तीर्थानि भुवनत्रये ।
यावन्न प्राप्यते तोयं ग्रालग्रामाभिषेकजम् ॥"
स्कान्दे कार्त्तिकमाहात्म्ये ।
"ग्रहेऽपि वसतस्तस्य गङ्गास्नानं दिने दिने ।
ग्रालग्रामशिलातोयैर्योऽभिषिञ्चति मानवः ॥"
तत्रैवान्यत्र ।
"यानि कानि च तीर्थानि ब्रह्माद्या देवतास्तथा ।
विष्णुपादोदकस्पृष्टे कलां नार्हन्ति षोडशीम् ॥
ग्रालग्रामोद्भवो देवो देवो द्वारवतीभवः ।
उभयोः स्नानतोयेन ब्रह्महत्या निवर्त्तते ॥"
किञ्च ।
"स वै चावभृतस्नातः स च गङ्गाजलाप्लुतः ।
विष्णुपादोदकं स्पृष्ट्वा मुच्येत सर्व्वपातकैः मानवः ॥"
श्रीनृसिंहपुराणे ।
"गङ्गाप्रयागगयनैमिषपुष्कराणि
पुण्यानि यानि कुरुजाङ्गलयासुनानि ।

कालेन तीर्थसलिलानि पुनन्ति पापं
पादोदकं भगवतः प्रपुनाति सद्यः ॥"
स्मृतौ च ।
"त्रिरात्रिफलदा नद्यो याः काश्चिदसमुद्रगाः ।
समुद्रगाश्च पञ्चस्य मासस्य सरितां पतिः ॥
षण्मासफलदा गोदा वत्सरस्य तु जाह्नवी ।
पादोदकं भगवतो द्वादशाब्दफलप्रदम् ॥"
तन्नित्यता च गरुड़पुराणे ।
"जलञ्च येषां तुलसीविमिश्रितं
पादोदकं चक्रशिलासमुद्भवम् ।
नित्यं त्रिसन्ध्यं प्रवते न गार्चं
खगेन्द्र ! ते धर्म्मबहिष्कृता नराः ॥"
अथ श्रीचरणोदकपानमाहात्म्यम् । पाद्मे गौतमाम्बरीषसंवादे ।
"हरेः स्नानावशेषन्तु जलं यस्योदरे स्थितम् ।
अम्बरीष ! प्रणम्योर्द्धः पादपांशुः प्रगृह्यताम् ॥"
तत्रैव देवदूतविष्णुबलसंवादे ।
"ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु सेवितैः किं प्रयोजनम् ॥
कोटितीर्थसहस्रैस्तु सेवितैः किं प्रयोजनम् ।
नित्यं यदि पिबेत् पुण्यं शालग्रामशिलाजलम् ॥
शालग्रामशिलातोयं यः पिबेद्विष्णुना समम् ।
मातुः स्तन्यं पुनर्नैव स पिबेन्मुक्तिभाग्नरः ॥"
किञ्च ।
"दहन्ति नरकान् सर्व्वान् गर्भवासञ्च दारुणम् ।
पीतं येस्तु सदा नित्यं शालग्रामशिलाजलम् ॥"
तत्रैव श्रीमधूत्तकैतुसंवादे ।
"शालग्रामशिलातोयं विन्दुमात्रं तु यः पिबेत् ।
सर्व्वपापैः प्रमुच्येत मुक्तिमार्गे कृतोद्यमः ॥"
तत्रैव पुलस्त्यभगीरथसंवादे ।
"पादोदकस्य माहात्म्यं भगीरथ ! वदामि ते ।
पावनं सर्व्वतीर्थेभ्यो हत्याकोटिविनाशनम् ॥
धृते शिरसि पीते च सर्व्वास्तुष्यन्ति देवताः ।
प्रायश्चित्तन्तु पापानां कलौ पादोदकं हरेः ॥"
किञ्च ।
"त्रिभिः सारस्वतं तोयं सप्ताहेन तु गाङ्गेयम् ।
सद्यः पुनाति गाङ्गेयं दर्शनादेव यामुनम् ॥
पुनन्त्येतानि तोयानि स्नानदर्शनकीर्त्तनैः ।
पुनाति स्मरणादेव कलौ पादोदकं हरेः ॥
अर्च्चितैः कोटिभिर्लिङ्गैर्नित्यं यत् क्रियते फलम् ।
तत् फलं शतसाहस्रं पीतैः पादोदकैर्हरेः ॥
अशुचिर्वा दुराचारो महापातकसंयुतः ।
स्मृत्वा पादोदकं विष्णोः सदा शुद्धति मानवः ॥
पापकोटियुतो यस्तु म्रियते तत्क्षणे शिरे सुखे ।
देहे पादोदकं यस्य न प्रयाति यमालयम् ॥
न दानं न हविर्यैर्वा स्वाध्यायो न सुरार्च्चनम् ।
तैरपि पादोदकं पीत्वा प्रयान्ति परमां गतिम् ॥
विशाखाश्चन्द्रसंयुक्ता वैशाखी किं करिष्यति ।
पितृतारके महातीर्थे उज्जयिन्यां भगीरथ ! ॥
माघमासे प्रयागे तु स्नानं वै किं करिष्यति ।
प्रयागं सततं तस्य यस्य पादोदकं हरेः ॥
कार्त्तिके कार्त्तिकीयोगे किं करिष्यति पुष्करे ।
नित्यन्तु पुष्करं तस्य यस्य पादोदकं हरेः ॥
प्रबोधवासरे प्राप्ते मथुरायाञ्च तस्य किम् ।
नित्यञ्च यासुनं स्नानं यस्य पादोदकं हरेः ॥
काश्यामुत्तरवाहिन्यां गङ्गायान्तु मृतस्य किम् ।
यस्य पादोदकं विष्णोर्मुखे चैवावतिष्ठते ॥"
किञ्च ।
"हित्वा पादोदकं विष्णोर्योऽन्यतीर्थानि गच्छति ।
अनर्घ्यरत्नमुत्सृज्य लोष्टं वाञ्छति दुर्म्मतिः ॥
कुरुक्षेत्रसमो देशो विष्णुपादोदकं मतः ।
पतेद् यत्राक्षयं पुण्यं नित्यं भवति तद्गृहे ॥
गयापिण्डसमं पुण्यं पुत्त्राणामपि जायते ।
पादोदकेन देवस्य ये कुर्य्युः पिण्डतर्पणम् ॥
नासुराणां भयं तस्य प्रेतजन्यं न राक्षसम् ।
न रोगस्य भयं चैव नास्ति विघ्नकृतं भयम् ॥
न दुष्टा नैव घोराद्याश्चापदोत्थभयं नहि ।
ग्रहाः पीड़ां न कुर्व्वन्ति वैरा नश्यन्ति दारुणाः ॥
किं तस्य तीर्थगमने देवर्षीणाञ्च दर्शने ।
यस्य पादोदकं मूर्द्ध्नि शालग्रामशिलोद्भवम् ॥
प्रीतो भवति मार्त्तण्डः प्रीतो भवति केशवः ।
ब्रह्मा भवति सुप्रीतः प्रीतो भवति शङ्करः ॥
पादोदकस्य माहात्म्यं यः पठेत् केशवाग्रतः ।
स याति परमं स्थानं यत्र देवो जनार्द्दनः ॥"
ब्रह्माण्डपुराणे श्रीब्रह्मनारदसंवादे ।
"प्रायश्चित्तं यदि प्राप्तं लक्षं वा लघमर्षणम् ।
सोऽपि पादोदकं पीत्वा मुक्तिं प्राप्नोति तत्क्षणात् ॥
अशौचं नैव विदेत सूतके मृतकेऽपि च ।
येषां पादोदकं मूर्द्ध्नि प्राशनं ये प्रकुर्व्वते ॥
अन्तकालेऽपि यस्येह दीयते पादयोर्जलम् ।
सोऽपि सद्गतिमाप्नोति सदाचारैर्बहिष्कृतः ॥
अपेयं पिबते यस्तु भुङ्क्ते यश्चाप्यभोजनम् ।
अगम्यागमना ये वै पापाचाराश्च ये नराः ।
तेऽपि पूज्या भवन्त्यासु सद्यः पादाम्बुसेवनात् ॥"
किञ्च ।
"अपवित्रं यदन्नं स्यात् पानीयं चापि पापिनाम् ।
भुक्ता पीत्वा विशुद्धः स्यात् पीत्वा पादोदकं हरेः ॥
तप्तकृच्छ्रात् परं गव्यात् महाकृच्छ्रादिशिष्यते ।
चान्द्रायणात् परं कृच्छ्रात् पराकादपि सुव्रत ।
कायशुद्धिर्भवेदाशु पीत्वा पादोदकं हरेः ॥
अगुरुं कुङ्कुमं चापि कर्पूरं चानुलेपनम् ।
विष्णुपादाम्बुसंलग्नं तद्धि पावनपावनम् ॥
दृष्टिपूतन्तु यत्तोयं विष्णुना प्रभविष्णुना ।
तद्धि पापहरं पुत्र ! किं पुनः पादयोर्जलम् ॥
एतदर्थमहं पुत्र ! शिरसा विष्णुतत्परः ।
धारयामि पिबाम्यत्र माहात्म्यं विदितं मम ॥
प्रियस्त्वमसि पुत्र त्वदर्थे गदितं मया ।
रहस्यं मे त्वनर्हस्य न वक्तव्यं कदाचन ॥
धारयस्व सदा मूर्द्ध्नि प्राशनं कुरु नित्यशः ॥
जन्ममृत्युजराद्युःखैर्मोक्षं यास्यसि पुत्रक ! ॥"
विष्णुधर्म्मोत्तरे ।
"सद्यः फलप्रदं पुण्यं सर्व्वपापविनाशनम् ।
सर्व्वगङ्गाजलस्नानं सर्व्वदुःखविनाशनम् ।
दुःखघ्ननाशनं पुण्यं विष्णुपादोदकं शुभम् ॥
सर्व्वोपद्रवहन्तारं सर्व्वव्याधिविनाशनम् ।
सर्व्वोत्पातप्रशमनं सर्व्वतापनिवारणम् ॥
सर्व्वकल्याणसुखदं सर्व्वकामफलप्रदम् ।
सर्व्वसिद्धिप्रदं धन्यं सर्व्वधर्म्मैविवर्द्धनम् ॥
सर्व्वशत्रुप्रशमनं सर्व्वभोगप्रदायकम् ।
सर्व्वतीर्थस्य फलदं मूर्द्ध्नि पादाम्बुधारणम् ॥
प्रयागस्य प्रभासस्य पुष्करस्य च सेवने ।
पृथूदकस्य तीर्थस्य आचान्तो लभते फलम् ॥
चक्रतीर्थे फलं याद्दक् ताद्दक् पादाम्बुधारणात् ॥
सरस्वत्यां गयायाञ्च गत्वा यत् प्राप्नुयात् फलम् ।
तत् फलं लभते श्रेष्ठं मूर्द्ध्नि पादाम्बुधारणात् ॥"
स्कान्दे ।
"पादोदकस्य माहात्म्यं देवो जानाति शङ्करः ।
विष्णुपादच्युता गङ्गा शिरसा येन धारिता ॥
स्नानं नैवास्ति पापस्य देहिनां देहमध्यतः ।
सबाह्याभ्यन्तरं यस्य स्नानं पादोदकेन वै ॥
पादोदं विष्णुनैवेद्यसुदरे यस्य तिष्ठति ।
नाश्रयं लभते पापं स्वयमेव विनश्यति ॥
महापापग्रहग्रस्तो व्याधी रोगशतैरपि ।
हरेः पादोदकं पीत्वा सुच्यते नात्र संशयः ॥
शिरसा तिष्ठते येषां नित्यं पादोदकं हरेः ।
किं करिष्यन्ति ते लोके तीर्थकोटिशतैरपि ॥
अयमेव परो धर्म्म इदमेव परं तपः ।
इदमेव परं तीर्थं विष्णुपादाम्बु यत् पिबेत् ॥"
तत्रैव शिवोमासंवादे ।
"विलयं यान्ति पापानि पीते पादोदके हरेः ।
किं पुनर्विष्णुपादोदं शालग्रामशिलाप्लुतम् ॥
विशेषेण हरेत् पापं ब्रह्महत्यादिकं प्रिये ।
पीते पादोदके विष्णोर्यदि प्राणैर्विमुच्यते ।
हत्वा यमभटान् सर्व्वान् वैष्णवं लोकमाप्नुयात् ॥
तत्रैव शिवकार्त्तिकेयसंवादे शालग्रामशिलामाहात्म्ये ।
"छिन्नस्नेन महास्नेन । गर्भवासः सुदारुणः ।
पीतं येन सदा विष्णोः शालग्रामशिलाजलम् ॥
ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनम् ॥
प्रायश्चित्ते समुत्पन्ने किं दानैः किमुपोषणैः ।
चान्द्रायणैस्तु तीर्थैश्च पीत्वा पादोदकं शुचिः ॥
दहन्नारदीये मुक्तकोपाख्यानारम्भे ।
हरिपादोदकं वस्तु स्वयमात्मञ्च धारयेत् ।
स स्नातः सर्व्वतीर्थेषु विष्णोः प्रियतरस्तथा ॥
अकालमृत्युशमनं सर्व्वव्याधिविनाशनम् ।
सर्व्वदुःखोपशमनं हरिपादोदकं शुभम् ॥"
तत्रैव तदुपाख्यानान्ते ।
"हरिपादोदकस्पर्शाल्लुब्धको वीतकल्मषः ।
दिव्यं विमानमारुह्य मुनिभेनमथाब्रवीत् ॥
हरिपादोदकं यस्मान्मयि त्वं चिप्रवान् मुने ।
प्रापितोऽसि त्वया तस्मात्तद्विष्णोः परमं पदम् ॥"
हरिभक्तिसुधोदये ।
"पादं पूर्व्वं किल सृष्ट्वा गङ्गाभूत स्वर्गृमोचदा
विष्णोः सदस्तु तत्सङ्गि पादाम्बु कथमीर्ष्यते ॥

तापत्रयानलो योऽसौ न शाम्येत् सकलाब्धिभिः।
हुतं शाम्यति सोऽल्पेन श्रीमद्विष्णुपदाम्बुना॥
अघास्त्रामेद्यकवचं भवाम्बिस्तम्भनौषधम्।
सर्व्वाङ्गैः सर्व्वथा धार्य्यं पाद्यं शुचिसदः सदा॥
अष्टतत्त्वावहं नित्यं विष्णुपादाम्बु यः पिबेत्।
स पिबत्यष्टतं नित्यं मासे मासे तु देवताः॥
माहात्म्यमिदविष्णोस्य यो वक्ता सोऽपि निर्भयः।
न त्वनर्घ्यमणेर्मूल्यं कलयन्नघमश्नुते॥"
अन्यत्रापि।
"स ब्रह्मचारी स व्रती आश्रमी च सदा शुचिः।
विष्णुपादोदकं यस्य सुखे शिरसि विद्यते॥
जन्मप्रभृतिपापानां प्रायश्चित्तं यदीक्षते।
शालग्रामशिलावारि पापहारि निषेव्यताम्॥"
अतएव तेजोबिन्दुपञ्चरात्रे श्रीब्रह्मोक्तम्।
"पीठप्रक्षालादुदकं पृथगादाय पुत्रक!।
सिञ्चयेन्मूर्द्धि भक्तानां सर्व्वतीर्थमयं हि तत्॥"
इति।
"पादोदकस्य माहात्म्यं विख्यातं सर्व्वशास्त्रतः।
लेखितुं शक्नुयात् को हि सिन्धूर्मीन् गणयन्नपि॥
विष्णोर्गतस्य पादोदं तुलसीदलसंयुतम्।
गृहीत्वा वैष्णवेभ्यो दत्त्वा प्राणान् पिबेत्स्वयम्॥"
अथ गृहीतपादोदकमाहात्म्यं स्कान्दे ब्रह्मनारदसंवादे।
"कृत्वा पादोदकं गृह्णे वैष्णवानां महात्मनाम्।
यो दद्यात्तुलसीमिश्रं चान्द्रायणशतं लभेत्॥
गृहीत्वा कृष्णपादाम्बु गृह्णे कृत्वा तु वैष्णवः।
यो वहेत् शिरसा नित्यं स सन्निक्षपसोत्तमः॥"
पाद्मे देवदूतविष्णुदूतसंवादे।
"शालग्रामशिलातोयं यदि गृह्णन्तं पिबेत्।
हत्याकोटिविनाशं तु कुरुते नात्र संशयः॥"
अगस्त्यसंहितायाञ्च।
"शालग्रामशिलातोयं तुलसीदलवासितम्।
ये पिबन्ति पुनस्तेषां स्तन्यपानं न विद्यते॥
श्रीविष्णोर्वैष्णवानाञ्च पावनश्चरणोदकम्।
सर्व्वतीर्थमयं पीत्वा कुर्य्यादाचमनं न हि॥"
तदुक्तं स्कान्दे श्रीऋषिणा।
"विष्णोः पादोदकं पीत्वा पश्चादशुचिमङ्गया।
आचामति च यो मोहाद्ब्रह्महा स निगद्यते॥"
श्रुतिश्च। "भगवान् पवित्रो भगवत्पादौ पवित्रौ पादोदकं पवित्रं न तत्पाद्यं आचमनीयं यथा हि सोम इति।" सौपर्णे च।
"विष्णुपादोदकं पीत्वा भक्तपादोदकं तथा।
य आचामति संमोहात् ब्रह्महा स निगद्यते॥"
इति श्रीहरिभक्तिविलासः॥

पाद्यं, क्ली, (पादार्थसुदकम्। पाद+"पादार्घाभ्याञ्च।"५।४।२५। इति यत्।) पादाय वारि। पादप्रक्षालनार्थजलम्। इत्यमरः॥ तल्लक्षणं यथा,—
"पादावनेजनजलयद्दृश्यं पात्रमद्भुतम्।
लौहजं वा सरोजातं हैमं राजतमेव वा॥
ताम्रमत्तरथमपि वायवेनं सतामिति॥"
इति वैखानसग्रन्थः॥

"षड्ङ्गुलं प्रविस्तारसुत्सेधञ्चतुरङ्गुलम्।
ओष्ठमेकाङ्गुलं कुर्य्यान्नासिकां चतुरङ्गुलाम्॥
दृष्टे पादसमायुक्तं चतुरङ्गुलमानतः।
पाद्यपात्रमिति ख्यातं सर्व्वदेवप्रपूजने॥"
इति सिद्धान्तशेखरः॥

पानं, क्ली, (पा पाने+भावे ल्युट्।) पीतिः। द्रवद्रव्यस्य गलाधःकरणम्। (यथा, हितोपदेशे। "पयःपानं भुजङ्गानां केवलं विषवर्द्धनम्।") भाजनम्। (पाल रक्षणे+भावे ल्युट्।) रक्षणम्। इति मेदिनी॥ (पीयते खगादिभिर्यत्र। पा+अधिकरणे ल्युट्। कुल्या। इति हेमचन्द्रः। ४।१५५॥ पीयते यदिति। कर्म्मणि ल्युट्। जलम्। इति व्युत्पत्तिलब्धोऽर्थः॥ * ॥ पाति रक्षतीति। पा+ल्युः। रक्षाकर्त्तरि, त्रि। यथा, ऋग्वेदे। ६।७०।४।
"व्रतानि यानो अग्नयस्य चारुय
उभे कृष्णा अनु पश्यते विशौ॥"
पायनम्। अस्त्रशस्त्राणां तीक्ष्णायतासम्पादनव्यापारभेदः। पान् इति भाषा॥ यदुक्तं दृढसंहितायाम्।
"वडवोष्ट्रकरेणुदुग्धपानं
यदि पानेन समीहतेऽर्थसिद्धिम्।
भसपित्तभगाश्च वस्तदुग्धैः
करिहस्तच्छिदये सतालगर्भैः॥
आर्कं पयोहुडुविषाणमसीसमेतं
पारावताखुशकृता च युतं प्रलेपः।
शस्त्रस्य तैलमथितस्य ततोऽस्य पानं
पश्चाच्छितस्य न शिलासु भवेद्विघातः॥
क्षारे कदल्या मथितेन युक्ते
दिनोषिते पायितमायसं यत्।
सम्यक् शितं चाश्मनि नेति भङ्गं
न चान्यलौहेष्वपि तस्य कौण्ठ्यम्॥"
तथाच शुक्रनीत्याम्।
"इदमौषधसंयुक्तं शस्त्रपानं
रुधिरेण श्रियमिच्छतः प्रदीप्ताम्।
हविषा गुणवत् सुताभिलिप्तोः
सलिलेनाशयमिच्छतश्च वित्तम्॥")

पानः, पुं, (पीयते यस्मादिति। पा+अपादाने ल्युट्।) औडिकः। इति जटाधरः॥ निःश्वासः। इति हेमचन्द्रः। ६।४॥

पानकं, क्ली, (पानाय कायतीति। कै+कः।) पानद्रव्यविशेषः। तत्प्रकारो यथा, "यथोक्तपरिमितशर्करानिम्बूरसयुक्तोऽथवाम्लयुक्तः पक्वरसः। इति पाकराजेश्वरः॥ (यथा, सुश्रुते। १।४६।
"पानीयं पानकं मद्यं स्नस्यमेषु प्रदापयेत्॥"
क्वचित् पुंस्यपि दृश्यते। यथा, तत्रैव। १।३६।
"एभिर्लेपान् कषायांश्च तैलं सर्पींषि पानकान्॥"
तत्राम्रफलपानकम्। यथा,—
"आम्रमामं जलक्लिन्नं मर्दितं दृढपाणिना
सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम्॥

प्रपानकमिदं श्रेष्ठं भीमसेनेन निर्मितम्।
सद्यो रुचिकरं वल्यं शीघ्रमिन्द्रियतर्पणम्॥
अपक्वाम्ररसोद्भूतपानकं वातनाशनम्।
कफपित्तकरं किञ्चित् प्रत्यहं यदि सेवितम्॥"
पक्वाम्रस्य तु।
"सुपक्वमाम्रस्य फलं सुसृष्टिना
सम्मर्दितं शर्करया समन्वितम्।
एलालवङ्गार्द्रकवासवासितं
वर्णान्वितं कस्य न रोचकं भवेत्॥
पानकं चाम्रसम्भूतं स्वादम्लं गुरुपित्तजित्।
सुहृद्यं श्रेष्मलघ्वं वर्ण्यं वृष्यं रुचिप्रदम्॥"
अम्लिकाफलपानकं यथा,—
"अम्लिकायाः फलं पक्वं मर्द्दितं वारिणा दृढम्।
शर्करा मरिचोन्मिश्रं लवङ्गैलासुवासितम्॥
अम्लिकाफलसम्भूतं पानकं वातनाशनम्।
पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधनम्॥"
निम्बुफलपानकं यथा,—
"भागैकनिम्बुजं तोयं षड्भागं शर्करोदकम्।
लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम्॥
निम्बुफलभवं पानमत्यम्लं वातनाशनम्।
वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम्॥"
धान्याकपानकं यथा,—
"श्लिलायां साधुसम्पिष्टं धान्याकं वस्त्रगालितम्।
शर्करोदकसंयुक्तं कर्पूरादिसुसंस्कृतम्॥
नवीने नृन्मये पात्रे स्थितं पित्तहरं परम्॥
जम्बवाः पानकं यथा,—
"जम्बूफलं स्थूलतरं सुपक्वं
सम्मर्दितं शर्करयाम्बुनालम्।
सुवासितं वेल्लजभङ्गपत्रे
रुचिं विधत्ते विरुचौ जनानाम्॥
जम्बूफलभवं रुच्यं पानकं कफनाशनम्।
कषायं वातलघ्वं स्वादम्लं ग्राहकं परम्॥"
बीजपूरपानकम्।
"मातुलुङ्गरसे योज्यं त्रिगुणं शार्करं जलम्।
कर्पूरमरिचोन्मिश्रं पानकं स्यादिदं वरम्॥
मातुलुङ्गभवं पानं शूलानाह विनाशनम्।
श्वासे कासेऽरुचौ वातविड्बन्धेषु च पूजितम्॥"
हेमकिरणस्तु।
"शर्करानालिकेलाभ्यां बीजपूररसप्लुतम्।
षटपलं भवेद्धेमकिरणं नामपानकम्॥
पानकं हेमकिरणं रुच्यं वृष्यं बलप्रदम्।
सुस्निग्धं वातदृक्शुभ्रं किञ्चित् कफकरं गुरु॥"
करमर्दपानकं यथा,—
"लवङ्गार्द्रकसंयुक्तं सुपिष्टं वारिणा युतम्।
करमर्दं करैर्मर्द्यं सप्तभागसितान्वितम्॥
वातघ्नहृद्यदं भव्यं हृद्यमन्तरं स्मृतम्।
रक्तपित्तकरश्चोष्णमाकरं कारमर्दितम्॥"
नारङ्गपानकं यथा,—
"सुपक्वनारङ्गफलं निपीड़ितं
संयोजितं शर्करयाति शुभ्रया।
सहार्द्रकं चेन्दुकणैर्वासितं
पानेच्छया केन न संस्तुतञ्चणम्॥

नारङ्गफलसम्भूतं पानकं वातनाशनम्।
मधुरं विशदं रुच्यं सुस्निग्धं पित्तहृद्दृढम्॥"
चारस्य तु।
"चारट्टफलजं सगर्करं
मर्दितं शिशिरवारिणा दृढम्।
ऐलमार्द्रकयुतेन सुवासं
भक्तसिक्थमिलितं कृतहासम्॥
चारस्य फलजं पानं गुरु वृष्यं रुचिप्रदम्।
कफपित्तहरं श्रेष्ठं हृद्यं मधुरपाकि च॥
परुषजीरचुक्रादिद्राक्षादाडिमजं तथा।
एकैकं सम्भवं भिन्नं पानकं क्रियते बुधैः॥
एवमन्यस्य पुष्पस्य फलस्यान्यस्य वा तथा।
शर्करामरिचोन्मिश्रं रस्यं स्यात् पानकं वरम्॥
एवं हि पानकं कार्य्यं सुधिया सुष्ठु यत्कृतम्।
गुणा द्रव्यानुसारेण ज्ञातव्याः पानकेषु च॥"
यथास्य गुणाः,—
"श्रमक्षुत्तृट्क्लमहरं पानकं प्रीणनं गुरु।
विशदं मूत्रलं हृद्यं यथाद्रव्यगुणञ्च तत्॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥
"गौड़मन्मनन्वं वा पानकं गुरु मूत्रलम्।
तदेव खण्डशर्करासहितं पुनः॥
साज्यं सतीक्ष्णं सुस्निग्धं पानकं स्यान्निरत्ययम्।
"प्रवाणि रसांश्चैव पानीयं पानकं पयः।
खड़ान् यूषांश्च पेयांश्च सर्व्वे पार्श्वे प्रदापयेत्॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥"

पानगोष्ठिका, स्त्री, (पानस्य पानाय वा गोष्ठिका।) यत्र सम्भूय पीयते। मद्यपानचक्रम्। तत्पर्य्यायः। आपानम् २। इत्यमरः।२।१०। ४३॥

चक्रानुष्ठानं यथा श्यामारहस्यधृतम्। चक्राकारेण पंक्त्याकारेण वा भिन्नभिन्नासने स्वशक्तियुक्तश्चेत् युग्मयुग्मक्रमेण पङ्क्त्यासनेनोपविश्य सामयिकललाटे चन्दनं दत्त्वा शिवशक्तियुद्ध्या पुष्पञ्च दद्यात्। ततो यदि गुरुस्तत्र तिष्ठति तदादौ गन्धादिना तं पूजयित्वा तत्पात्रे पुष्पं दत्त्वा मुद्रासहितं तस्मै समर्घ्य प्रणमेत्। गुरोरभावे तत् पात्रं जले क्षिपेत्। ततः शक्तिपात्रं मुद्रासहितं शक्तये दत्त्वा सामयिकेभ्योऽपि ज्येष्ठानुक्रमेण वीरपात्रात् परान्तं मुद्रासहितं दद्यात्। ततः सामयिकोऽपि भक्त्या हस्तद्वयेन संगृह्य तदुपरि मूलमन्त्रमष्टधा जप्त्वा पूर्ब्ववदानन्दभैरवं भैरवीञ्च सन्तर्प्य गुरून् देवताश्च सन्तर्पयेत्। स्वकल्पोक्तविधिना भूतशुद्धिं कुर्य्यात्। ततश्चक्रनायकस्तैः सह पात्रवन्दनं कुर्य्यात्। यथा,
"श्रीमद्भैरवशेखरप्रविलसच्चन्द्राप्लुतप्लावितं
क्षेत्राधीश्वरयोगिनीसुरगणैः सिद्धैः समाराधितम्।
आनन्दार्णवकं महात्मकमिदं साक्षात्त्रिखण्डान्वितं
वन्दे श्रीप्रथमं करामृतजगत् पात्रं विशुद्धिप्रदम्॥"
इत्यभिमन्त्र्य वामहस्तेन पात्रमुत्तोल्य अन्योन्यवन्दनं कृत्वा गृह्णामीति गुरुशक्तिसाधकेश्वराणामाज्ञां गृह्णीयात्। ते जुषस्वेति ब्रूयुः। ततो मूलाधारात् कुण्डलिनीं इष्टदेवतास्वरूपां आत्मिकान्तां विभाव्य गुरुपादुकां स्मृत्वा शिवोऽहमिति विचिन्त्य हस्ताभ्यां पात्रं धृत्वा मूलमुच्चरन् कुण्डलिनीमुखे देवीं तर्पयेत्। एतदुक्तमुदयाकरपद्धत्याम्।
"कृत्वा मन्त्रतनुं स्मरेत् गुरुपदं देवीं बलां चिन्मयीं
पश्चात् वारत्रयं सदासवधृतं दीपैर्युतं कज्जलैः।
पुष्पाद्यैश्चभिमन्त्रितञ्च निविड़ं सम्मोहकध्वंसकं
ये सञ्चिन्त्य पिबन्ति यान्ति खलु ते मुक्तिञ्च
सुक्तिं पराम्॥"
तन्त्रान्तरे च।
"सिन्दूरतिलकं भाले पाणौ च मदिरासवम्।
कृत्वा पिबेद्गुरुं ध्यायंस्तथा देवीञ्च चिन्मयीम्॥"
ततः पात्रमाधारोपरि संस्थाप्य पुनस्तेन क्रमेण पराम्तं गृहीत्वा पात्रवन्दनं कुर्य्यात्। यथा,—
"मद्यं मीनरसावहं यदि तया दत्तञ्च पेयादिभिः
किञ्चिच्चञ्चलरक्तपङ्कजभृता तस्यै समावेदितम्।
वामे स्वात्मविशुद्धिशुद्धिकमलं पाणौ विधायात्मके
वन्दे पात्रमहं द्वितीयमधुनानन्दैकसंवर्द्धनम्॥
ततः पूर्ब्बवत् पात्रं शोधयित्वा अन्यत् पात्रवन्दनं कुर्य्यात्। यथा,—
"सर्व्वाम्नायकलाकलापकलितं कौतूहलद्योतनं
चन्द्रोपेन्द्रमहेन्द्रशम्भुवरुणब्रह्मादिभिः सेवितम्।
ध्यातं देवगणैः परं मुनिगणैर्मोचार्थिभिः
सर्व्वदा
वन्दे पात्रमहं तृतीयमधुना चात्मावबोधक्षमम्॥"
तृतीयपात्राभिवन्दनं कृत्वान्यत् पात्रवन्दनं कुर्य्यात्। यथा,—
"हैमं मीनरसावहं हरिहरब्रह्मादिभिः सेवितं
सुरामैथुनधर्म्मकर्म्मनिरतं चारान्वितक्तास्रयम्।
आचार्य्याष्टकसिद्धिभैरवकलामांसेन संशोधितं
पायात् पञ्चमकारतत्त्वसहितं पात्रं चतुर्थं नमः॥"
इति चतुर्थपात्रवन्दनं कृत्वान्यत्पात्रवन्दनं कुर्य्यात्। यथा,—
"आधारे भुजगाधिराजवलये पात्रं महीमण्डलं
मद्यं सप्तसमुद्रवारि पिशितं चाष्टौ च दिग्-
दन्तिनः।
सोऽहञ्चैव विभावयन् प्रतिदिनं तारागणै रचितो
ऽप्यादित्यप्रमुखैः सुरासुरगणैराकारैः
किङ्करैः॥"
इति पञ्चमपात्रं शोधयेत्। ततो यावद्द्रव्यादिकं न चलति तावत् पानादिकं कार्य्यम्। अथास्य प्रमाणं यथा रुद्रयामले।
"साधकेभ्यश्च शक्तिभ्यो दद्यान्निर्म्माल्यचन्दनम्।
सामयिकैः समं कुर्य्याद्देवि! पानादिभक्षणम्॥"
अन्यत्रापि।
"निविशेच्चक्ररूपेण पंक्त्याकारेण वा यथा।
शक्तियुक्तो वसेद्वापि युग्मयुग्मविधानतः।
शिवशक्तिधिया सर्व्वं चक्रमध्ये समर्पयेत्॥"
तन्त्रान्तरे च।
"ततः पुष्पं समादाय गुरोः पात्रे निवेदयेत्।
गुरवे च निवेदाय शक्त्यै दत्त्वा स्वयं हरेत्॥"
भावचूड़ामणौ च।
"साक्षाद्यदि गुरुर्न स्यात्तदातोये विसर्ज्जयेत्॥"
एतत् सर्व्वं कलौतरपरम्।
"दिव्यवीरमयो भावः कलौ नास्ति कदाचन॥"
इति कालीविलासवचनात्॥

पानपात्रं, क्ली, (पानस्य पेयमद्यादेः पात्रम्।) मद्यपानपात्रम्। मद्यपानस्य भाजनम्। तत्पर्य्यायः। चषकः २ सरकः ३ अनुतर्षणम् ४। इत्यमरः॥ पूर्ब्बहृयं मद्यपानपात्रे श्रेष्ठहृयं मद्यपरिवेषणपात्रे। इति भरतः॥ चषकम् ५ अनुतर्षः ६ पारी ७ पारीकम् ८। इति शब्दरत्नावली॥ * ॥ (यथा, मार्कण्डेये।८२।२६।
"ददावशून्यं सुरया पानपात्रं धनाधिपः॥")
अथ पानपात्रपरिमाणादि यथा कुलसारे।
"नयनाग्निबाणसंख्यकर्षेषु परमेश्वरि!।
पात्रं प्रकल्पयेदित्युक्तं कुलसाधने॥
इतोऽप्यधिकपात्रन्तु न कर्त्तव्यञ्च साधकैः॥"
कर्षं लौकिकतोलकमित्यर्थः। तदुक्तं कुलोत्तमे।
"गुञ्जाद्वादश माषः स्यात्तदष्टौ कर्ष उच्यते॥"
अथोत्तरतन्त्रे।
"अनुज्ञां पुरतो लब्ध्वा गृह्णामीति स्वयं वदेत्।
जुषस्वेत्यभ्यनुज्ञातो गुरुणा वा कुलीनकैः॥
गृह्णीयाच्च स्वयं सिद्धो बद्धपद्मासनः सुधीः॥"
कुलार्णवे।
"एकासने निविष्टा ये शुक्लैरेव भाजने।
एकपात्रे पिबेद्द्वयं ते यान्ति नरकाधमे॥"
एकपात्रमिति सर्व्वैर्मिलित्वा नैकपात्रे पिबेत्। न तु प्रतिवारं द्रव्यपाने भिन्नभिन्नपात्रं कार्य्यं अननुष्ठानलक्षणापत्तेः सम्प्रदायविरोधाच्च॥

पानवणिक्, [ज्] पुं, (पानाय पेयसुरादेर्विक्रयार्थं वणिक् पानस्य वणिक् वा।) शौण्डिकः। इति हेमचन्द्रः॥

पानभाजनं, क्ली, (पानाय पानस्य वा भाजनं पात्रम्।) पानपात्रम्। तत्पर्य्यायः। कंसः २। इत्यमरः।२।६।३२॥ "काम्यतेऽसौ कंसः कसुकङ्स्फूर्हि नाम्नीति सः दन्त्यान्तः। स्वार्थे ण्ये कांस्यञ्च। स्वर्णरजतादिनिर्म्मिते पात्रमात्रेऽपि कंसः। 'कंसः स्यात् तैजसे द्रव्ये पानपात्रेऽपि कांस्यवत्।' इति शाश्वतः॥
'पात्रान्तरे पानपात्रे कांस्यं कंसे च तैजसे।'
इति रभसः॥
पीयते पानं मद्यादि तस्य भाजनं पानभाजनम्।" इति भरतः॥

पानसं, क्ली, (पनसस्य इदं पनसफले भवं तत्फलस्य विकार इति वा अण्।) पनसभवमद्यम्। इति जटाधरः॥ पनससम्बन्धिनि, त्रि॥

पानात्ययः, पुं, (पानाद्धेतोः जातो योऽत्ययः रोगविशेषः।) मद्यात्ययरोगः। इति राजनिर्घण्टः॥

पानिलं, क्ली, (पानमाधारत्वेनास्त्यत्र इति इलच्।) पानपात्रम्। इति शब्दचन्द्रिका॥

पानीयं, क्ली, (पीयते इति। पा+अनीयर्।) जलम्। इत्यमरः।१।१०।४॥ पातव्ये रुचा-

गोये च त्रि ॥ पानार्हद्रव्यविशेषः । पाना इति वङ्गभाषा । शरबत् इति पारस्यभाषा । तत्र अम्लिकापानीयं पित्तवमिनाशकम् । मिष्टदाडिमीपानीयं प्रतिश्यायकासनाशकम् । अम्लदाडिमीपानीयं उदरविकारे धारकं क्षुधादर्द्धिकारकञ्च । निम्बूपानीयं हृद्दिद्दलासपित्तज्वरनिवारकं सकलाहारपाचकञ्च । नागरङ्गपानीयं कासपित्तविनाशकं अन्तःकरणप्राशस्त्यजनकञ्च । सेवचन्दनपानीयं बलकारकं उन्मादमूर्च्छारोगशान्तिकारकं रतिशक्तिवर्द्धकं उदरविकारोपकारकञ्च । इति पाकराजेश्वरः ॥ (अन्यत् पानकशब्दे द्रष्टव्यम् ॥ * ॥) जलदानविधिर्यथा,—

यम उवाच ।

"एतत्ते कथितं विप्र ! मम लोके तु दुर्लभम् ।
पानीयं सन्ततन्तस्माद्दातव्यं सुखमिच्छता ॥
अतोऽर्द्धं कारयेत् कूपं वापीं वा बहुपल्वलम् ।
बहुलोकाकुले देशे सर्व्वसत्त्वोपजीवितम् ॥"

इत्यग्निपुराणम् ॥

तद्दानानन्तरं पाद्मन्तु यथा,—

"पानीयं प्राणिनः प्राणाः पानीयं पावनं महत् ।
पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती ॥"

इति स्मृतिः ॥

तत्पर्य्यायः ।

"पानीयजीवनवनाम्बुतपुष्करोदकः-
पाथोऽम्बुशम्बरपयःसलिलोदकानि ।
आपः कवाद्यकबन्धजलानि नीरं
कीलालवारिकमलानि विगर्हणौ च ॥
भुवनं दहनारातिर्नाकोयं सर्व्वतोसुखम् ।
क्षीरं घनरसं निम्नगं मेघप्रसवो रसः ॥"

अस्य साधारणगुणाः ।

"पानीयं मधुरं हिमञ्च रुचिदं तृष्णाविशोषापहं
मोहभ्रान्तिमपाकरोति कुरुते शुक्लान्नपत्तिं
पराम् ।
निद्रालस्यनिरासनं विषहरं श्रान्तार्त्तिसन्तर्पनं
नृणां धौवलवीर्य्यवृद्धिजनकं गङ्गाम्बुपृथिप्रदम् ॥"
सद्यो वृष्टाम्बु भूमिस्थं कलुषं दोषदायकम् ।
चिरस्थितं लघु स्वच्छं पथ्यं स्वादु सुखावहम् ॥"

देशभूमिविशेषजलगुणाः ।

"जातं ताम्रभाजनदेव सलिलं वातादिदोषप्रदं
देशाभ्याघकरञ्च दुर्जरतरं दोषावहं धूसरात् ।
वातघ्नञ्च शिलाग्निरोत्थममलं पथ्यं लघु स्वादुकं
श्रेष्ठं श्यामभृदखिदोषशमनं सर्व्वामयघ्नं
जलम् ॥"

इति राजनिर्घण्टः ॥

"पिच्छिलं श्लेष्मलं क्लिन्नं पर्व्वग्रैवालकर्दमैः ।
विवर्णं विरसं सान्द्रं दुर्गन्धि न हितं जलम् ॥
चन्द्रार्ककरसंजुष्टं वायुना स्फालितं मुहुः ।
पर्व्वतोपरि यद्वारि समं पौरन्दरेण तत् ॥
तस्यातिगुणसंहृष्टं शैलप्रस्रवणोद्भवम् ।
शैखरं दीपनं रूक्षं किञ्चिद्वातप्रकोपणम् ॥"

इति राजवल्लभः ॥

पानीयनकुलः, पुं, (पानीये जले नकुल इव ।) उद्रः । उदिड़ाल इति भाषा । यथा,—

"उद्रस्तु जलमार्जारः पानीयनकुलो वसौ ॥"

इति हेमचन्द्रः ॥

पानीयपृष्ठजः, पुं, (पानीयपृष्ठे जलोपरि जायते इति । जन + डः ।) कुम्भी । इति रत्नमाला ॥ पाना इति भाषा ॥

पानीयफलं, क्ली, (पानीयजातं फलमिति मध्यपदलोपी समासः ।) मखान्नम् । इति भावप्रकाशः ॥ माखाना इति भाषा ।

पानीयमूलकं, क्ली, (पानीयमेव मूलमस्य । ततः कप् ।) सोमराजी । इति शब्दचन्द्रिका ॥

पानीयवर्द्धिका, स्त्री, (पानीयं वर्द्धयति प्रकाशयतीति । वर्द्धि + ण्वुल् । टाप् अत इत्वञ्च ।) वालुका । इति राजनिर्घण्टः ॥

पानीयशालिका, स्त्री, (पानीयस्य जलस्य वितरणार्थं शालिका शालायदृहमित्यर्थः ।) जलावस्थानगृहम् । पानिशाला इति जलछत्र इति च भाषा । तत्पर्य्यायः । प्रपा २ । इत्यमरः ॥ तत्कर्त्तृफलं यथा,—

"कूपारामप्रपाकारी तथा वृक्षादिरोपकः ।
कन्याप्रदः सेतुकारी स्वर्गमाप्नोत्यसंशयम् ॥"

इत्युद्वाहतत्त्वे यमः ॥

पानीयामलकं, क्ली, (पानीयमामलकं पानीयाख्यं आमलकं वा ।) प्राचीनामलकम् । पानि आमला इति भाषा । अस्य गुणाः । दोषत्रयज्वरनाशित्वम् । इति भावप्रकाशः ॥ सुखशुद्धिमलबद्धकारित्वम् । अम्लत्वम् । स्वादुत्वञ्च । इति राजवल्लभः ॥

पानीयाशुः, पुं, (पानीयसम्भूत आशुः ।) कन्दविशेषः । पनियालु इति हिन्दीभाषा । तत्पर्य्यायः । जलालुः २ क्षुपालुः ३ बालुकः ४ । अस्य गुणः । त्रिदोषनाशित्वम् । अग्निदीपनकारित्वञ्च । इति राजनिर्घण्टः ॥

पानीयाम्बा, स्त्री, (पानीयं जलं अम्बातीति । अम्ब् गतौ भोजने + बाहुलकात् नः ततष्टाप् ।) वल्लजा । इति राजनिर्घण्टः ॥

पान्थः, त्रि, (पथि कुशलः पन्थानं नित्यं गच्छतीति वा । "पथो ण नित्यम् ।" ५ । १ । ७६ । पथः पन्थ च इत्यनेन पन्थादेशे ञ्नित्यं णः । पथिकः । इत्यमरः । २ । ८ । १७ ॥ (यथा, हरिवंशे । ४२ । २ ।

"यथा निदाघसमये सूर्य्यांशुपरिपीड़ितः ।
पान्थो याति जलं दृष्ट्वा त्वरितं तृषिपासया ॥")

पापं, क्ली, (पाति रक्षति अस्मादात्मानमिति । पा + "पापीविधिभ्यः पः ।" उणा० ३ । २३ । इति पः ।) अधर्म्मम् । दुरदृष्टम् । तत्पर्य्यायः । पङ्कम् १ पाप्मा २ पापम् ३ किल्बिषम् ४ कल्मषम् ५ कलुषम् ६ दृजिनम् ७ एनः ८ अघम् ९ अंहः १० दुरितम् ११ दुष्कृतम् १२ । इत्यमरः ॥ पातकम् १३ तूलम् १४ कश्मलम् १५ शल्यम् १६ पापकम् १७ । इति शब्दरत्नावली (निषिद्धकर्म्मानुष्ठानविहितकर्म्माननुष्ठानाभ्यां पापोत्पत्तिं सविशेषमाह श्रीसदाशिवः ।

"अनुष्ठानं निषिद्धस्य त्यागो विहितकर्म्मणः ।
नृणां जनयतः पापं क्लेशशोकामयप्रदम् ॥
स्वानिष्टमात्रजननात् परानिष्टोपपादनात् ।
तदेव पापं द्विविधं जानीहि कुलनायिके ! ॥
परानिष्टकरात् पापात् मुच्यते राजशासनात्
अन्यस्मान्मुच्यते मर्त्त्यः प्रायश्चित्ता समाधिना ॥
प्रायश्चित्ताथवा दण्डैर्न पूता ये कृताहसः ।
नरकान् न निवर्त्तन्ते दहाम्युच्च निगर्हिताः ॥"

इति श्रीमहानिर्व्वाणतन्त्रे ॥)

तद्भेदविधं यथा,—

"प्राणाभिपातनं स्तेयं परदारमथापि च ।
त्रीणि पापानि कायेन सर्व्वतः परिवर्ज्जयेत् ॥
असत्प्रलापं पारुष्यं पैशुन्यमनृतन्तथा ।
चत्वारि वाचा वर्ज्जेन्न जल्पेत न चिन्तयेत् ॥
अनभिध्या परस्वेषु सर्व्वसत्त्वेषु सौहृदम् ।
कर्म्मणां फलमस्तीति त्रिविधं मनसा चरेत् ॥"

इति शान्तिपर्व्वणि दानधर्म्मः ॥

स्मृत्युक्तान्येतानि पातकशब्दे लिखितानि ॥ * ॥

पापस्य पुरुषत्रयानुवर्त्तित्वं यथा,—

"नाधर्म्मश्चरितो राजन् ! सद्यः फलति गौरिव ।
शनैरावर्त्तमानस्तु मूलान्यपि निकृन्तति ॥
यदि नात्मनि पुत्रेषु न चेत् पुत्रेषु नप्तृषु ।
पापमाचरितं कर्म्म त्रिवर्गमनुवर्त्तते ॥
फलत्येव ध्रुवं पापं गुरुसूक्ष्मविवेदने ॥"

इति मात्स्ये २८ अध्यायः ॥ * ॥

तीर्थस्य पापनाशकत्वं तच्च कृतपापस्य वज्रलेपत्वञ्च । यथा,—

"अन्यत्र हि कृतं पापं तीर्थमागाद्य गच्छति ।
तीर्थे तु यत् कृतं पापं वज्रलेपो भविष्यति ॥
मथुरायां कृतं पापं तत्रैव च विनश्यति ।
एषा पुरी महापुण्या यस्यां पापं न विद्यते ॥"

इति वाराहे मथुरामाहात्म्यम् ॥ * ॥

शेषपापलक्षणं यथा,—

"अतः परं प्रवक्ष्यामि शेषपापस्य लक्षणम् ।
ऋणं देवर्षिभूतानां मनुष्याणां विशेषतः ॥
पितॄणाञ्च द्विजश्रेष्ठ ! सर्व्ववर्णेषु चैकतः ।
ओंकारादिनिहत्तिश्च पापकार्य्यकृतिश्च या ॥
हत्यादिकं महापापं त्वगम्यागमनं तथा ।
कृतादिविक्रयं घोरं चाण्डालादिप्रतिग्रहम् ॥
स्वदोषगोपनं पापं परदोषप्रकाशनम् ।
ईर्षाद्विड् वाक्यदुष्टं निष्ठुरत्वं बड़म्बरम् ॥
ढाकित्वं तालवादित्वं नाम्ना वाद्याध्वर्म्मजः ।
मारणत्वमधार्म्मिक्यं नरकावहमुच्यते ॥
एतैः पापैस्तु संयुक्तः पच्यते यदि शूकरः ॥"

इति वामने ५८ अध्यायः ॥

साङ्कर्य्यनामकपापानि यथा,—

"एकगृह्याग्नयं पंक्तिभाङ्नपकान्नमिश्रणम् ।
याजनाध्यापने योनिसम्बन्धैव सहभोजनम् ॥
सहाध्यायस्तु दम्भः सहयाजनमेव च ।

एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसंज्ञिताः ॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम् ।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत् ॥"

इति कौर्म्मे उपविभागे १५ अध्यायः ॥

"आलापाद्गात्रसंस्पर्शात् संवासात् सहभोजनात् ।
आसनाच्छयनाद्यानात् पापं संक्रमते नृणाम् ॥
आसनादेकशय्याया भोजनात् पंक्तिसङ्करात् ।
ततः संक्रमते पापं घटाद्घट इवोदकम् ॥"

इति गारुड़े नीतिसारे ११२ अध्यायः ॥

राष्ट्रादिकृतपापेन राजादीनां परस्परं पापित्वं यथा,—

"राजा राष्ट्रकृतात् पापात् पापी भवति वै हरे! ।
तथैव राज्ञः पापेन तद्राज्यस्थास्तु ये जनाः ॥
वर्णाश्रमादयः सर्व्वे पापिनो नात्र संशयः ।
भार्य्यादोदुष्कृती स्वामी दूषिनात् स्वामिनोऽबला ॥

तथा देशिकपापात्तु शिष्यः स्यात् पातकी सदा ।
शिष्याद्धि पापिनो नित्यं गुरुर्भवति दुष्कृती ॥
पातकी यजमानः स्यात् पापिनोऽङ्ग! पुरोधसः ।
पुरोहितस्तथा पापी यजमानांहसो ध्रुवम् ॥"

अदत्तपुण्यपापभागित्वं यथा,—

"अदत्तानि च पुण्यानि पापानि च यथा प्रिये! ।
प्राप्यानि कर्म्मणा येन तद्यथावन्निशामय ॥
देशग्रामकुलानि स्युर्भागभाञ्जि कृतादिषु ।
कलौ तु केवलं कर्म्म फलभुक् पुण्यपापयोः ॥
अकृतेऽपि च संसर्गे व्यवस्थेयमुदाहृता ।
संसर्गात् पुण्यपापानि यथा यान्ति निबोध ततः ॥
एकत्र मैथुनाद्यानादेकपात्रस्थभोजनात् ।
फलार्द्धं प्राप्नुयात्कर्त्तुर्यथावत् पुण्यपापयोः ॥
स्पर्शनाद्वीक्षणादापि परस्य स्तवनादपि ।
दशांशं पुण्यपापानां नित्यं प्राप्नोति मानवः ॥
दर्शनस्पर्शनाभ्याञ्च मनोध्यानात्तथैव च ।
परस्य पुण्यपापानां शतांशं प्राप्नुयान्नरः ॥
परस्य निन्दापैशुन्यं धिक्कारञ्च करोति यः ।
तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति सः ॥
कुर्व्वतः पुण्यकर्म्माणि सेवां यः कुरुते परः ।
पत्नी भृत्योऽथ शिष्यो वा सजातीयोऽपि मानवः ।
तस्य सेवानुरूपेण तस्य तत्पुण्यभाग्भवेत् ॥
एकपंक्तेस्ततो यस्तु लङ्घयेत् परिवेष्यकः ।
तस्य पापशतांशन्तु लभते परिवेष्यकः ॥
स्नानसन्ध्यादिकं कुर्व्वन् संस्पृशेदा प्रभाषते ।
स पुण्यकर्म्मषष्ठांशं दत्वात्तस्मै सुनिश्चितम् ॥
धर्म्मोद्देशेन यो द्रव्यं परं याचयते नरः ।
तत् पुण्यं कर्म्मजं तस्य धनं दत्वाप्नुयात् फलम् ॥
अपहृत्य परद्रव्यं पुण्यकर्म्म करोति यः ।
कर्म्मकृत् पापभोक्ता च धनिनस्तद्भवेत् फलम् ॥
नापनुद्य ऋणं यस्तु परस्य म्रियते नरः ।
धनी तत् पुण्यमाप्नोति स्वधनस्यानुरूपतः ॥
बुद्धिद्रव्यानुमन्ता च यश्चोपकरणप्रदः ।
बलकृच्चापि षष्ठांशं प्राप्नुयात् पुण्यपापयोः ॥
प्रजाभ्यः पुण्यपापानां राजा षष्ठांशमुद्धरेत् ।
शिष्यादृगुरुः स्त्रिया भर्त्ता पिता पुत्रात्तथैव च ।
स्वपतेरपि पुण्यस्य भार्य्यार्द्धं समवाप्नुयात् ॥
परद्रव्येण दानादि कुर्व्वतः पुण्यकर्म्मणः ।
विना भृतकशिष्याभ्यां कर्त्ता षष्ठांशमाहरेत् ।
आत्मनो वा परस्यापि यदि सेवां न कारयेत् ॥

श्रीकृष्ण उवाच ।

दत्तं ह्रदत्तान्यपि पुण्यपापा-
न्यायान्ति नित्यं परसञ्चितानि ।
ग्रसन्ति चाग्निर्नितिहासमग्नं
पुराभवं पुण्यमतिप्रियञ्च ॥"

इति पाद्मोत्तरखण्डे । ७१।१५७ अध्यायः ॥

क्षुद्रजन्तुप्रभृतीनां वधे पापं तत्प्रायश्चित्तञ्च यथा,—

"वधे च क्षुद्रजन्तूनां हिंसकानाञ्च पण्डितः ।
कार्षापणं ससुतस्त्र्य ऋतुकाले प्रसुच्यते ॥
अहिंसकानां क्षुद्राणां वधे घृतगुणं ध्रुवम् ।
प्रायश्चित्तं ऋतुकाले कथितं पद्मयोनिना ॥
वधे विप्रक्षुद्रजन्तूनां पश्वादीनाञ्च कामतः ।
ततः घृतगुणं पापं निश्चितं मनुरब्रवीत् ॥
नराणां म्लेच्छजातीनां वधे घृतगुणं ततः ।
म्लेच्छानाञ्च व्रतानाञ्च यत् पापं लभते वधे ।
सक्षुद्रैकस्य च वधे ततः पापं लभते पुमान् ॥
सक्षुद्राणां व्रतानाञ्च यत् पापं लभते वधे ।
तत् पापं लभते नूनं गोवधेनैव निश्चितम् ॥
गवां दशगुणं पापं ब्राह्मणस्य वधे भवेत् ।
विप्रहत्यासमं पापं स्त्रीवधे लभते नरः ॥" *

पापिदर्शनजन्यपापं यथा,—

"पापं यद्दृश्ये तात! कथयामि निशामय ।
दुःस्वप्नं पापबीजञ्च केवलं विघ्नकारणम् ॥
गोघ्नञ्च ब्रह्मघ्नं वापि क्षतघ्नं कुटिलं तथा ।
देवघ्नं पितृमातृघ्नं पापं विश्वासघातिनम् ॥
मिथ्यासाक्ष्यप्रदातारं पक्षपातिथ्यविच्युतम् ।
ग्रामयाजिनमेवेति देवविप्रस्वहारिणम् ॥
अश्वत्थघातिनं दुष्टं शिववित्तुविनिन्दकम् ।
अदीक्षितमनाचारं सन्ध्याहीनं द्विजन्तथा ॥
देवलं वृषवाहञ्च शूद्राणां सूपकारकम् ।
शूद्रदाही च शूद्राणां शूद्रश्राद्धान्नभोजिनम् ॥
अवीरां छिन्ननासाञ्च देवब्राह्मणनिन्दकम् ।
पतिभक्तिविहीनाञ्च विष्णुभक्तिविहीनकम् ॥
शूद्राणां विधवाञ्चैव चण्डालं अभिचारिणीम् ।
ग्रसत् कोपयुतं दुष्टन्नग्नञ्च जारजम् ॥
चौरं मिथ्यावादिनञ्च शूरत्यागघातिनम् ।
मांसापहारिणञ्चैव ब्राह्मणं वृषलीपतिम् ॥
ब्राह्मणीगामिनं शूद्रं द्विजं वाहुंधिकन्तथा ।
अगम्यागामिनं दुष्टं चतुर्व्वर्णं नराधमम् ॥
मातासपत्नी माता च श्वश्रूश्च भगिनी सुता ।
गुरुपत्नी पुत्रपत्नी सोदरस्य प्रिया सती ॥
मातृष्वसा पितृष्वसा भागिनेयप्रिया तथा ।
मातुलानी नवोढ़ा च पितृश्वस्री रजस्वला ॥
पितृमातृप्रसूश्चैव चागम्याश्चादश स्मृताः ।
कीर्त्तिताः सामवेदे च परिपाट्याः सतां व्रज! ॥

एतान् दृष्ट्वा च स्पृष्ट्वा च ब्रह्महत्यां लभेन्नरः ।
तस्माद्देवादिमान् दृष्ट्वा सूर्य्यं दृष्ट्वा हरिं स्मरेत् ॥
कामतो यदि पश्यन्ति तत्तुल्यास्ते भवन्ति वै ।
तस्मात् सन्तो न पश्यन्ति पापभीता व्रजेश्वर! ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७।७८ अध्यायः ॥

(अनिष्टम् । वधः । इति राजानुजः ॥ यथा, रामायणे । २ । ८ । ३२ ।

"तस्मात् न लक्ष्मणे रामः पापं किञ्चित् करिष्यति ।
रामस्तु भरते पापं कुर्य्यादेव न संशयः ॥"

तद्वति, त्रि । इत्यमरः ॥ यथा, महाभारते । १ । ६० । १६ ।

"पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ।
कीटाः पतङ्गाश्च भवन्ति पापा
न मे विवक्षास्ति महानुभाव! ॥")

पापक, क्ली, (पापमेव । स्वार्थे कन् ।) पापम् । इति भूरिप्रयोगः ॥ (यथा, महाभारते । १ । ७४ । २७ ।

"मन्यते पापकं कृत्वा न कश्चिदेत्ति मामिति ।
विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥"

पापेन कायतीति । कै + कः । पापवति, त्रि । यथा, महाभारते । १ । ७४ । २६ ।

"एकोऽहमस्मीति च मन्यसे त्वं
न ह्येवमेतं देवसि सुनिं पुराणम् ।
यो वेदिता कर्म्मणः पापकस्य
यस्यान्तिके त्वं दुरितं करोषि ॥")

पापकृत्, त्रि, (पापं कृतवानिति । पाप + कृ + "सुकर्म्मपापमन्त्रपुण्येषु कृञः ।" ३ । २ । ८६ । इति क्विप् ।) पापकर्त्ता । यथा,—

"स्थापनेनानुतापेन तपसाध्ययनेन च ।
पापकृन्मुच्यते पापाद्दानेन च दमेन च ॥"

इति प्रायश्चित्ततत्त्वम् ॥

(यथा च महाभारते । १ । ६० । १६ ।

"पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ॥")

पापग्रहः, पुं, (पापोऽशुभकारी ग्रहः ।) अर्कोनचन्द्रः । कुजः । राहुः । शनिः । एतैर्युक्तो बुधः । रविः । यथा, ज्योतिःसारसंग्रहे ।

"अर्कोनेन्दुः कुजो राहुः शनिस्तैर्युत इन्दुजः ।
रविः पापा भवन्त्येते शुभाद्यास्ते प्रकीर्त्तिताः ॥"

पापघ्नः, पुं, (पापं हन्तीति । पाप + हन + "अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् ।) तिलः । इति राजनिर्घण्टः ॥ पापनाशके, त्रि इति शब्दबोधव्याकरणम् ॥

पापचेलिका, स्त्री, (पापमशुभं चेलति गच्छतीति । चेल + खुल् + टाप् । कापि अत इत्वञ्च ।) पाठा । इति रत्नमाला ॥ आकनादि इति भाषा ॥

पापचेली, स्त्री, (पापं चेलतीति । चेल + अच् + गौरादित्वात् ङीष् ।) पाठा । इत्यमरः । २ । ४ । ८५ ॥

पापनाशितः, पुं, (पापो नाशितः ।) धूर्त्तनाशितः । इति संक्षिप्तसारव्याकरणम् ॥

पापपतिः, पुं, (पापोत्पादकः पतिः।) उपपतिः। इति त्रिकाण्डशेषः॥

पापपुरुषः, पुं, (पापः पापमयः पुरुषः।) पापमयाङ्गनरः। यथा,—

"वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम्।
ब्रह्महत्याशिरस्कञ्च स्वर्णस्तेयभुजद्वयम्॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम्।
तत्संसर्गि महदृष्टमङ्गप्रत्यङ्गपातकम्॥
उपपातकरोमाढ्यं रक्तश्मश्रुविलोचनम्।
खड्गचर्म्मधरं क्रुद्धमेवं कृत्वा विचिन्तयेत्॥"

इति भूतशुद्धिप्रकरणे तन्त्रसारः॥ *॥

"दृष्ट्वादौ पुरुषञ्चण्डं संसारं सचराचरम्।
सर्व्वेषां दमनार्थाय दृष्टवान् पापपूरुषम्॥
द्विजातिहत्याश्मश्रुढ्यं मदिरापानलोचनम्।
सुवर्णस्तेयवदनं गुरुतल्पगतिश्रुतिम्॥
स्त्रीहत्यानासिकञ्चैव गोहत्यादोषबाहुकम्।
न्यासापहरणग्रीवं भ्रूणहत्यागलन्तथा॥
परस्त्रीगतिदुष्कालं सद्गुह्यकवधोदरम्।
ग्रहणापन्नहत्यादिनाभिं गर्ब्भकथाकटिम्॥
गुरुनिन्दासकृथिभागं कन्याविक्रयणोरुकम्।
विश्वासवाक्यकथनपायुं मित्रवधाङ्घ्रिकम्॥
उपपातकरोमाढ्यं महाकायं भयङ्करम्।
ध्यात्वैवं पिङ्गनेत्रं स्वाश्रयात्पञ्चदुःखदम्॥"

इति पाद्मे क्रियायोगसारे २१ अध्यायः॥

पापमुक्तः, त्रि, पापान्मुक्तः। निष्पापः। इति संक्षिप्तसारव्याकरणम्॥ स च यथा,—

"यः समः सर्व्वभूतेषु जितात्मा शान्तमानसः।
स पापेभ्यो विमुच्येत ज्ञानवान् स च वेदवित्॥
गुणागुणपरिज्ञाता त्यक्तयस्य क्षयस्य च।
ध्यानेनैव त्यसंमूढः स पापेभ्यः प्रमुच्यते॥
स्वदेहे परदेहे च सुखदुःखेन नित्यशः।
विचारज्ञो भवेद्यस्तु स सुखेतनसो ध्रुवम्॥
अहिंसः सर्व्वभूतेषु त्यक्तक्रोधविवर्जितः।
शुभव्यासः सदा यज्ञ स पापेभ्यः प्रमुच्यते॥
प्राणायामेन्द्रियनिर्दग्धं अघःसन्धारणानि च।
अवस्थितमना यस्तु स पापेभ्यः प्रमुच्यते॥
निराग्नीः सर्व्वतस्त्यक्तेदिष्टार्थेषु न लोलुपः।
परीतात्मा त्यजेत् प्राणान् सर्व्वपापात् प्रमुच्यते॥
अदृधानो जितक्रोधः परद्रव्यविवर्जितः।
अनसूयश्च यो मर्त्यः स पापेभ्यः प्रमुच्यते॥
गुरुशुश्रूषया युक्तो त्यहिंसानिरतश्च यः।
क्षुद्रञ्च क्षुद्रशीलञ्च स पापेभ्यः प्रमुच्यते॥
प्रशस्तानि च यः कुर्य्यादप्रशस्तानि वर्जयेत्।
बोऽभिगच्छति तीर्थानि विशुद्धिनान्तरात्मना।
पापादुपरतो नित्यं स पापेभ्यः प्रमुच्यते॥
उत्थाय ब्राह्मणं गच्छेन्नरो भक्त्या समन्वितः।
अभिगम्य प्रयत्नेन स पापेभ्यः प्रमुच्यते॥"

इति वराहपुराणम्॥

पापरोगः, पुं, (पापोद्भवो रोगः।) मसूरीरोगः। इति शब्दरत्नावली॥ (यथा, मनुः।५।१६४।

"अभिचारात्तु भर्त्तुः स्त्री लोके प्राप्नोति निन्द्यताम्।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते॥"

यत्पापजन्यो यद्योगो भवति तत् सर्व्वं कर्म्मविपाकशब्दे द्रष्टव्यम्॥)

पापर्द्धिः, स्त्री, (पापानां ऋद्धिर्हेतुर्यत्र।) नगरी। इति हेमचन्द्रः। ३। ५६१॥ (यथा, पञ्चतन्त्रे। २। ७८।

"अस्ति कस्मिंश्चिदुद्देशे कश्चित् पुलिन्दः।
स च पापर्द्धिं कर्त्तुं वनं प्रस्थितः॥")

पापलं, क्ली, परिमाणविशेषः। इति संक्षिप्तसारोणादिवृत्तिः॥ (पापं लातीति। ला+कः।) पापग्राहके, त्रि॥

पापघ्नमनी, स्त्री, (पापं घ्नत्यनयेति। घ्नम+णिच्+करणे ल्युट्। स्त्रियां ङीप्।) घ्नमीवृक्षः। इति राजनिर्घण्टः॥ पातकनाशिका च॥

पापात्मा, [न्] पुं, (पापः पापविशिष्ट आत्मा यस्य। पापे अधर्म्मे आत्मा बुद्धिर्यस्येति वा।) पापी। यथा,—

"पापात्मनां घ्रुवं गतिं विस्तरेण वदाम्यहम्।
षड्शीतिसहस्राणि योजनानि दुरात्मनाम्॥
प्रोक्तो मार्गस्य विस्तारः सर्व्वदुःखान्वितस्य च।
क्वचित्कचित् ज्वलद्वह्निः सन्तप्तः कर्द्दमः क्वचित्।
क्वचित् क्वचित् द्विजश्रेष्ठ! सन्तप्तं ताम्रवालुकम्॥
क्वचित् क्वचित्तीक्ष्णशिलाः क्वचित्तप्तशिलास्तथा॥
क्वचित् क्वचिच्छस्त्रवृष्टिः क्वचिदङ्गारवर्षणम्।
क्वचिदद्रिवृष्टिश्च क्वचित् पङ्कवर्षणम्॥
उष्णाम्बुवर्षणं क्वापि क्वचित् पाषाणवर्षणम्।
ज्वलदग्निरिव क्वापि सन्तप्तो याति मारुतः॥
गभीरा अन्धकूपाश्च क्षणाद्भृतसुखा द्विज!।
क्वापि कण्टकवृक्षाश्च नाराचसमकण्टकाः॥
पाषाणश्रेणयः क्वापि दुरारोहाः सपन्नगाः।
क्वचिन्नाद्यान्धकाराश्च क्वचित् श्रोणित-
कन्दराः॥
क्वचिदीरणवृक्षाश्च क्वचित् काग्राः क्वचित्शराः।
क्वचित् क्वचित् शर्करास्च लोष्टवश्च क्वचित्
क्वचित्॥
क्वचिदस्थां राशयश्च दुर्गन्धा मांसराशयः।
क्वचित् कण्डकराशिश्च शैवालानि क्वचित्
क्वचित्॥
कीलका वलयः क्वापि क्वचिद्व्याघ्रास्तथा शिवाः।
खड्गिनः करिणः क्वापि क्वचिद्वह्नि भयङ्कराः॥
एवं बहुविधक्लेशे घ्रायाजालविवर्जिते।
तस्मिन्मार्गे द्विजश्रेष्ठ! पापिनो यान्ति दुःखिनः॥
नग्ना विमुक्तकेशाश्च प्रेताकारभयङ्कराः।
गच्छन्ति पापिनस्तत्र शुष्ककण्ठौष्ठतालुकाः॥"

इति क्रियायोगसारे २२ अध्यायः॥

पापाम्नं, क्ली, (पापं घ्नन्त्यनयेति। घ्नन्त+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) तीर्थविशेषः। तस्य नामान्तरम् पृथूदकं वसुकीर्त्तिश्च। यथा,—

"पृथूदके महातीर्थे वसुकीर्त्तेति नामतः।
सुहाव घृतराष्ट्रस्य राष्ट्रं वरपतेस्ततः॥
घ्रूयमाने तदा राष्ट्रे प्रवृत्ते यज्ञकर्म्मणि।
अवीयत ततो राष्ट्रं नृपतेर्दुष्कृतेन वै॥
ततः स चिन्तयामास ब्राह्मणस्य विचेष्टितम्।
पुरोहितेन संयुक्तो रत्नान्यादाय सर्व्वशः॥
प्रसादनार्थं विप्रस्य वसुकीर्त्तेर्ययौ तदा।
प्रसादितः स राज्ञा च तुष्टः प्रोवाच तं नृपम्॥
ब्राह्मणा नावमन्तव्याः पुरुषेण विजानता।
ब्राह्मणक्षेदवज्ञातो नयत्येनपुरुषं कुलम्॥
एवमुक्त्वा स नृपतिमाज्येन पयसा पुनः।
उत्थापयामास मृतांस्तस्य राज्ञो हिते स्थितः॥
तस्मिंस्तीर्थे तु यः स्नाति श्रद्धानोजितेन्द्रियः।
स प्राप्नोति नरो नित्यं मनसा चिन्तितं फलम्॥
तत्तु तीर्थं सुविख्यातं पापाम्नं नाम नामतः।
यस्येह यज्ञशस्यस्य मधु सुस्राव वै नदी॥
तस्मिन् स्नातोऽथ भक्त्या च मुच्यते सर्व्वपातकैः।
फलं प्राप्नोति यज्ञस्य अश्वमेधस्य मानवः॥
पापाम्नमिति विख्यातं तीर्थं पुण्यतमं द्विजाः॥"

इति वामनपुराणे ३८ अध्यायः॥

पापी, [न्] पुं, (पापमस्त्यस्येति। इनिः।) पापयुक्तः। यथा,—

"रुधिरौघप्लुताः केचित् केचित् कर्द्दमभूषिताः।
केचित् केचित् क्षुधाक्रान्ताश्च पथि गच्छन्ति-
पापिनः॥
क्रन्दन्तो ययया केचित् सवद्वाष्पाकुलेक्षणाः।
शोचन्तः स्वानि कर्म्माणि केचिद्गच्छन्ति पापिनः॥
कस्यचिच्चर्म्मपाशस्य बन्धनं पापिनो गले।
कङ्काले कस्यचिद्बन्धः कस्यचिच्च भुजद्वये॥
कस्यचिन्नासिकारन्ध्रे निर्द्दयैर्यमकिङ्करैः।
अङ्कुशाग्रं विनिक्षिप्य क्रोधनाकृष्यते द्विज॥
पाशे सुचिसमुत्कीर्णे पाशं दत्त्वा दृढं रुषा।
आकृष्यते यमप्रेष्यैः केषाञ्चित् सचिवैतेनसाम्॥
शिक्यस्थान् गुरुपाषाणान् वहन्तः कर्म्मरज्जुकैः।
आयोभारांश्च शिक्याग्रैर्व्रजन्ति पथि पापिनः॥
कांश्चिद्गृहीत्वा केशेषु कांश्चित् कर्णेषु पापिनः।
कांश्चिद्गुदेषु पादेषु नयन्ति यमकिङ्कराः॥
ग्रीवासु पापिनः कांश्चित् करप्रहरणैर्दृढैः।
क्षिप्त्वा क्षिप्त्वा यमप्रेष्या नयन्ति यममन्दिरम्॥
यान्त्यधःशिरसः केचिदूर्द्ध्वपादास्तथा परे।
गच्छन्ति वायुभिः केचिदेकपादाश्च केचन॥
इत्येवं विप्लुताकारा आर्त्तरावविराविणः।
यमदूतैस्ताड्यमानाः पापिनोऽपि च तत्पथि॥"

इति पाद्मे क्रियायोगसारे २२ अध्यायः॥

पाम्ना, [न्] पुं, (पा+"नामन् सीमन्नितिः।" उणां। ४।१५०। इति मनिन्। पुगागमे निपातनात् साधुः।) पापम्। इत्यमरः। १। ४। २३॥ (यथा, मनुः। ६। ८५।

"अनेन क्रमयोगेन परिव्रजति यो द्विजः।
स विधूयेह पाम्नानं परं ब्रह्माधिगच्छति॥")

पाम, [न्] क्ली, (पा+मनिन्।) विचर्चिका। इत्यमरः। २। ६। ५३॥ (यथा, माधवकरः।

"क्ष्मा वक्त्राः पीड़रुजः श्रावबलः
पामेत्युक्ताः कण्डूकत्यः सदाहाः॥")

पामघ्नः, पुं, (पाम हन्तीति। हन्+टक्।) गन्धकः। इति जटाधरः॥

पामघ्नी. स्त्री, (पाम हन्तीति। हन्+टक्। टिलात् ङीप्।) कटुका। इति राजनिर्घण्टः॥
पामनः, त्रि, (पामास्यस्य इति। "लोमादि-पामादिपिच्छादिभ्यः शनेलचः।" ५। २।१००। इत्यस्य वार्त्तिकोक्त्या "पामादिभ्यो नः।" इति नः।) पामरोगविशिष्टः। तत्पर्य्यायः। कच्छुरः २। इति हेमचन्द्रः॥
पामरः, त्रि, (पाम पापादिदौरात्म्यमस्यस्येति। पामन्+"अश्मादिभ्यो रः।" ४। २। ८०। इत्यस्य वार्त्तिकोक्त्या रः। ततो न लोपे साधुः।) खलः। नीचः। इति मेदिनी। रे, १८२॥ (यथा, राजतरङ्गिण्याम्। १। ३७८।
"दूरात् पामरदुस्तस्ते: श्रुतिपथप्राप्तैः प्रबुद्धस्वभू-दृष्टो निर्झरवारिभिः सहमनाः श्वभ्रे निमज्जन्निव॥"
मूर्खः। इति हेमचन्द्रः॥
पामरोद्धारा, स्त्री, (पामरं उद्धरतीति। उत्+धृ+अण्। ततो अजादित्वात् टाप्।) गुडूची। इति शब्दचन्द्रिका॥
पामा, [न्] स्त्री, (पामन्+"मनः।" ४। १। ११। इति न ङीप्।) कच्छूः। इत्यमरः। २। ६। ५३॥ पाँचड़ा इति भाषा॥ अस्या औषधं यथा,—
"हरिद्रा हरितालञ्च दूर्व्वागोमूत्रसैन्धवम्। अयं लेपो हन्ति दृढं पामानं वै गरं तथा॥"
अपि च।
"माहिषं नवनीतञ्च सिन्दूरञ्च मरीचकम्। पामा विलेपिता नश्येत् बहुलापि दृढव्रज॥"
अन्यच्च।
"मरीचं चित्रकं कुष्ठं हरितालं मनःशिला। देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम्॥ विश्वाला करवीरश्च अर्कक्षीरं सकृत् पलम्। एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत्॥ प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत्। मृत्पात्रे लौहपात्रे वा शनैर्म्मृद्वग्निना पचेत्॥ पामा विचर्चिका चैव दद्रुविस्फोटकानि च। अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते॥ प्रसृतान्यपि स्निग्धानि तैलेनानेन क्षपयेत्। चिरोत्थितमपि स्निग्धं विवर्णं तत्क्षणाद्धरेत्॥"
इति गारुड़े १९४। १९८ अध्याययोः॥
पामारिः, पुं, (पामाया अरिर्नाशकः।) गन्धकः। इति हेमचन्द्रः॥
पायसः, पुं क्ली, श्रीवासः॥ टारपिन् इति भाषा। पयसा संस्कृतः। (पयसो विकार इत्यण्।) परमान्नम्। इत्यमरमेदिनीकरौ। अस्य पाकप्रकारो गुणाश्च।
"अतप्ततण्डुलो धौतः परिश्लिष्टो घृतेन च। खण्डयुक्तेन दुग्धेन पाचितः पायसो भवेत्॥ पायसः कफजिल्लो विदग्धो मधुरो गुरुः॥"
तस्य पित्रुद्देशेन गङ्गाम्भसि निःक्षेपे फलं यथा,—
"पितृनुद्दिश्य यो भक्त्या पायसं मधुसंयुतम्। गुड़सर्पिर्युतैः सार्द्धं गङ्गाम्भसि विनिःक्षिपेत्॥ तृप्ता भवन्ति पितरस्तस्य वर्षशतं हरे!। यच्छन्ति विविधान् कामान् पितृतृप्ताः पिता-महाः॥"
इति स्कान्दे काशीखण्डे २७ अध्यायः॥
चन्द्रप्रभपायसो यथा,—
"भल्लजीरचतुर्जातचन्द्रकान्तः सुरोत्तमः॥"
इति राजवल्लभः॥
पयोविकारे, त्रि। यथा,—
"कन्दूपकानि तैलेन पायसं दधि घृक्तवः। द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि॥"
इति तिथितत्त्वे वराहपुराणम्॥
पायिकः, पुं, पदातिकः। इति शब्दरत्नावली॥
पायुः, पुं, (पाति रक्षति शरीरं मलनिस्सारणेनेति। यद्वा, पिबति वस्त्यौषधमनेनेति। पा+"इवापाजीति।" उणां ९। १। इत्युण्। "आतो युक् चिण्कृतोः।" ७। ३। ३३। इति युक्।) मलद्वारम्। स तु गर्भस्थस्य सप्तभिर्मासैर्भवति। इति सुश्रुतबोधः॥ तत्पर्य्यायः। अपानम् २ गुदम् ३ च्युतिः ४ अधोमर्म्म ५ मूलद्वारम् ६ त्रिवलीकम् ७ वलिः ८। इति हेमचन्द्रः। ३। २०६॥ (यथा, पद्मपुराणे। १। २१।
"रजोगुणैः पञ्चभिस्तैर्यैः क्रमात् कर्म्मेन्द्रियाणि तु। वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे॥")
तस्याध्यात्मादि यथा,—
"अवाग्गतिरपानश्च पायुरध्यात्मदृश्यते। अधिभूतं विसर्गश्च मित्रश्चाधिदैवतम्॥"
इति महाभारते आश्वमेधिकपर्व्व॥
(स्वनामख्यातो भरद्वाजपुत्रः। यथा, ऋग्वेदे। ६। ४७। २४। "अन्वयः पायवेऽदात्॥"
"पायवे भरद्वाजपुत्रायेतत्तृचं ऋषयेऽदृभ्राय चाश्वथोऽश्ववानेतत्संज्ञः प्रस्तोकोऽदात् दत्तवान्।" इति तद्भाष्ये सायणः॥ पालके, त्रि। यथा, ऋग्वेदे। २। १। ७।
"त्वं पायुर्दमे यस्तेऽविधत्॥")
पार्य्यं, क्ली, (मीयतेऽनेनेति। मा माने+"गाध्यर्धनाथेति।" १। १। १२६। इति निपातनात् ण्यङ्घात्वादेः पत्वं युगागमश्च।) परिमाणम्। इत्यमरः। २। ६। ८५॥ पानम्। इति संक्षिप्तसारोणादिवृत्तिः॥ जलम्। निघण्टौ। त्रि। इति विश्वः॥ (पा पाने+णिच्+ण्यत्। पाययितव्ये। यथा, सुश्रुते। १। १६।
"घृतञ्च पाय्यं न नरः सुजीर्णे स्निग्धो विरेच्यः स यथोपदेशम्॥")
पार, तृ क कर्म्मसमाप्तौ। इति कविकल्पद्रुमः॥ (अदन्त पुरां-पर्-सर्क-सेट्।) अपपारत्। इति दुर्गादासः॥
पारं, क्ली, (पारयतीति। पार+पचाद्यच्।) परतीरम्। नदीलङ्घनाद्यन्तयतीरम्। इत्यमरः। १। १०। ८॥ (यथा, सङ्गीतदर्पणे।
"नादाब्धेस्तु परं पारं न जानाति सरस्वती। अद्यापि मज्जनभयात् तूष्णीं वहति वक्षसि॥")
पारः, पुं. (पूर्य्यतेऽनेनेति। पॄ+घञ्।) पारदः इत्यमरटीकायां भारतसुन्दरी॥ प्रान्तभागे, पुं क्ली। इति मेदिनी। रे, ५६॥
पारकः, त्रि, (पॄ पूर्त्तौ पालने प्रीतौ यायामे च+ण्वुल्।) पूर्त्तिकारकः। पालनकारकः। प्रीतिकारकः। यायामकारकः। एध्वर्थेषु एधातोः कर्त्तरि णकप्रत्ययनिष्पन्नः॥
पारक, [ज्] पुं, (पारयतीति। पार कर्म्मसमाप्तौ+णिच्+"पारेरणिः।" उणां १। १३५। इति अणिः। णिलोपः।) सुवर्णम्। इत्युणादिकोषः॥
पारकं, क्ली, (परस्मै लोकाय हितम्। पर+ष्यञ् कुक् च।) परलोकहितकर्म्म। यथा,—
"पादेन तस्य पारकं कुर्य्यात् सत्यमात्मवान्। अर्द्धेन चात्मभरणं नित्यनैमित्तिकन्तथा॥ पादस्यार्द्धार्द्धमर्थस्य मूलभूतं विवर्द्धयेत्। एवमाचरतः पुंसो ह्यर्थः साफल्यमृच्छति॥"
इति मार्कण्डेयपुराणम्॥
(परस्य इदमिति। परकीये, त्रि। यथा, मनुः। १०। ९७।
"वरं स्वधर्म्मो विगुणो न पारक्यः सुनुष्ठितः। परधर्म्मेण जीवन् हि सद्यः पतति जातितः॥")
पारगः, त्रि, (पारं गच्छतीति। पार+गम+"अन्तात्यन्ताध्वदूरपारसर्व्वानन्तेषु डः।" ३। २। ४८। इति डः।) पारगामी। तत्पर्य्यायः। कर्णरीकः २। इति शब्दमाला॥ (यथा, महाभारते। ४। १४। २१।
"उदतिष्ठच्छुदा स्तुतो गावं लब्धेव पारगः॥"
तथा च तत्रैव। १। १४०। १६।
"पारगश्च धनुर्युद्धे बभूवाथ धनञ्जयः॥")
पारगतः, पुं, (श्रोत्रादेः अविद्यायाः वा पारं गतः।) श्रिनः। इति हेमचन्द्रः॥ पारगे, त्रि॥
पारजायिकः, पुं, (परजायां गच्छतीति। परजाया+ठक्।) पारदारिकः। (यथा, महाभारते। १२। ६७। १८।
"वाक्शूरो दण्डपरुषो यश्च स्यात् पारजायिकः। यः परस्वमपादत्ते त्याज्या नस्ताहशा इति॥")
पारटोटः, पुं, प्रस्तरः। इति त्रिकाण्डशेषः॥
पारण्यः, पुं, (पारयतीति। पार+णिच्+ल्युः।) मेघः। इति शब्दमाला॥
पारण्यं, क्ली, (पार+भावे ल्युट्।) उपवासव्रतानन्तरदिवसकर्त्तव्यप्राथमिकभोजनम्। विवरणमस्य पारणाशब्दे द्रष्टव्यम्॥
पारणा, स्त्री.(पार+युच्+टाप्।) उपवासव्रतानन्तरदिवसकर्त्तव्यप्राथमिकभोजनम्। यथा,—
"पारणं पापनं पुंसां सर्व्वपापप्रणाशनम्। उपवासाङ्गभूतञ्च फलदं शुद्धिकारणम्॥ सर्व्वेष्वेवोपवासेषु दिवापारणमिष्यते। अन्यथा फलहानिः स्याद्ऋते धारणपारणम्॥ न रात्रौ पारणं कुर्य्याद्ऋते वै रोहिणीव्रतात्। निशायां पारणं कुर्य्याद्दर्शयित्वा महानिशाम्॥ पूर्व्वाह्णे पारणं प्रशस्तं ह्यत्वा विप्र! सुरार्चनम्।

सर्व्वेषां सम्मतं कुर्य्याद्व्रते वै रोहिणीव्रतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्माष्टमीव्रतखण्डे ८ अध्यायः ॥

अथ श्रीकृष्णजन्माष्टमीव्रतपारणकालः ।

"अष्टम्यामथ रोहिण्यां न कुर्य्यात्पारणं क्वचित् ।
हन्यात् पुराकृतं कर्म्म उपवासार्জितं फलम् ॥
तिथिरष्टगुणं हन्ति नक्षत्रञ्च चतुर्गुणम् ।
तस्मात् प्रयत्नतः कुर्य्यात्तिथिभान्ते च पारणम्॥"

अत्रोभयवियोगे पारणमुक्तम् । "यदा सार्द्धप्रहरनिशाभ्यन्तरे एकस्यैव वियोगस्तदैकतरवियोगेऽपि पारणम् ॥ तथा च नारदीये ।

"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
पारणन्तु न कर्त्तव्यं यावन्नैकस्य संक्षयः ॥
नार्योगिके व्रते प्राप्ते यद्यप्येको वियुज्यते ।
तत्रैव पारणं कुर्य्यादेवं वेदविदो विदुः ॥
यद्येकस्यापि सार्द्धप्रहरनिशाभ्यन्तरे न वियोगस्तदा तयोरवियोगेऽपि प्रातरुत्सवान्ते पारणम् । तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्व्वीत पारणम् । इत्युक्तत्वात् ॥ * ॥ महाष्टम्युपवासपारणं मत्स्यमांसोपहारेण कर्त्तव्यम् । यथा,—

"अष्टम्यां सम्पोष्यैव नवम्यामपरेऽहनि ।
मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमम् ॥
तेनैव विधिनाश्नन्तु स्वयं भुञ्जीत नान्यथा ॥"

स्त्रियास्तु पशुमांसभक्षणनिन्द्या न तेन पारणं किन्तु मत्स्येन । अष्टम्युपवासपारणे रविवारादौ मांसनिषेधः । एवं मांसाश्रनत्यागप्रकरणनियमेन नियोगादिष्वपि मांसं वर्জ्जनीयम् ॥ * ॥

अथ श्रीरामनवमीव्रतपारणकालः ।

"नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां वै दशम्यामेव पारणम् ॥"

अथैकादशीव्रतपारणकालः ।

"मद्यं भक्षयित्वा हरये निवेद्योपोषणं व्रती ।
द्वादश्यां पारणं कुर्य्याद्भक्त्वित्वा त्वुपोदकीम् ॥"

द्वादशीलङ्घने दोषमाह नारदीयम् ।

"महाहानिकरी ह्येषा द्वादशी लङ्घिता नृणाम् ॥"

विष्णुधर्म्मोत्तरे ।

"द्वादश्याः प्रथमः पा हरिवासरसंज्ञितः ।
तमतिक्रम्य कुर्व्वीत पारणं विष्णुतत्परः ॥"

अथ श्रवणद्वादश्युपवासपारणकालः ।

"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
तावदेव न भोक्तव्यं यावन्नैकस्य संक्षयः ॥
विष्णोर्वेध महीपाल श्रवणं वर्त्तते यदि ।
तिथिवेधेन भोक्तव्यं द्वादशीं नैव लङ्घयेत् ॥"

तिथिवेधेन एकादशीवेधेन भोक्तव्यं द्वादश्यां पारयेदित्यर्थः ॥ * ॥ अथ शिवरात्र्युपवासपारणकालः ।

"जयन्ती शिवरात्रिश्च कार्य्ये भद्रजयान्विते ।
कृतोपवासं तिथ्यन्ते तदा कुर्य्याच्च पारणम् ॥"

तिथ्यन्ते पारणन्तु जयन्तीमात्रपरम् । अत्र चतुर्दश्यामेव तत् ।

"ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
पूजितानि भवन्तीह भूतादे पारणे कृते ॥"*॥

पारणदिने वर्জ्यानि यथा, ब्रह्माण्डपुराणम् ।

"कांस्यं मांसं सुरां चौद्रं लोभं वितथभाषणम् ।
व्यायामञ्च व्यवायञ्च दिवास्वप्नं तथाञ्जनम् ॥
श्लिलापिष्टं मसूरांश्च द्वादशैतानि वैष्णवः ।
द्वादश्यां वर्জ्ययेन्नित्यं सर्व्वपापैः प्रमुच्यते ॥"

स्मृतिसन्दोहे ।

"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"

अत्रोपवसन्निति तद्दिने भोजनासम्भवात् सामीप्यात् पूर्व्वापरयोर्ग्रहणम् । इति तिथ्यादितत्त्वम् ॥

पारतः, पुं, (विविधव्याधिसङ्कटादिभ्यः पारं तनोतीति । तन + अन्येभ्योपीति डः ।) पारदः । इति हेमचन्द्रः । १ । ११६ ॥

पारतन्त्र्य, क्ली, (परतन्त्रस्य भावः । परतन्त्र + ष्यञ् ।) परतन्त्रता । पराधीनत्वम् । अन्यायत्तता । यथा, माधवकरः ।

"दोषाणां समवेतानां विकल्पेऽंशांशकल्पना ।
स्वातन्त्र्यपारतन्त्र्याभ्यां बाधैः प्राधान्यमादिशेत् ॥"

पारत्रिकं, त्रि, (परत्र भवम् । परत्र + ठक् ।) पारलौकिकम् । परत्र भवमित्यर्थे ष्ठिकप्रत्ययनिष्पन्नम् ॥

पारदः, पुं, (जरामरणसङ्कटादिभ्यः पारं ददातीति । दा + कः ।) धातुविशेषः । पारा इति भाषा । तत्पर्य्यायः । रसराजः २ रसनाथः ३ महारसः ४ रसः ५ महातेजः ६ रसेन्द्रः ७ रसोत्तमः ८ सूतराट् ९ चपलः १० जैत्रः ११ शिववीजम् १२ शिवः १३ अच्छतम् १४ रसेन्द्रः १५ लोकेशः १६ दुर्द्धरः १७ प्रभुः १८ रुद्रजः १९ हरतेजः २० रसधातुः २१ अचिन्त्यजः २२ खेचरः २३ अमरः २४ देहदः २५ म्लेच्छमुखकः २६ सूतः २७ स्कन्दः २८ स्कन्दमुखकः २९ देवः ३० दिव्यरसः ३१ रसायनश्रेष्ठः ३२ यशोदः ३३ । इति राजनिर्घण्टः ॥ सूतकः ३४ सिद्धधातुः ३५ पारतः ३६ । इति शब्दरत्नावली ॥ हरबीजम् ३७ रजस्वलः ३८ । इति हेमचन्द्रः ॥ शिववीर्य्यम् ३९ शिवाब्धयः ४० । इति भावप्रकाशः ॥ अस्य गुणाः । क्रिमिकुष्ठनाशित्वम् । चक्षुष्यत्वम् । रसायनत्वञ्च । इति राजवल्लभः ॥ अस्य भक्षणः पूर्व्ववीर्य्यं मासत्रयपर्य्यन्तं तिष्ठति । इति परिभाषा ॥*॥ अपि च ।

"पारदः सकलरोगनाशकः
षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एष कीर्त्तितो
देहलोहवरसिद्धिकारकः ॥
मूर्च्छितो हरते व्याधीन् वह्निः खेचरसिद्धिदः ।
सर्व्वसिद्धिकरो लीनो निरुत्थो देहसिद्धिदः ॥
विविधव्याधिभयोदयमरणजरासङ्कटेऽपि मर्त्तोभ्यः ।
पारं ददाति यस्मात्तस्मादयं पारदः कथितः ॥"

इति राजनिर्घण्टः ॥

तस्योत्पत्तिस्तत्त्वे यथा,—

"शिवाङ्गात् प्रच्युतं रेतः पतितं धरणीतले ।
तद्देहसारजातत्वाच्छुक्लमच्छमभूच्च तत् ॥
अत्र भेदेन विज्ञेयं शिववीर्य्यं चतुर्व्विधम् ।
श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात् ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च खलु जातितः ।
श्वेतं शुक्लं रजो नाम्ने रक्तं किल रसायने ॥
धातुवादे तु तत् पीतं खे गतौ कृष्णमेव च ॥
पारदः षड्रसः स्निग्धस्निग्दोषघ्नो रसायनः ।
योगवाही महातेज्यः सदा दृष्टिबलप्रदः ॥
सर्व्वामयहरः प्रोक्तो विग्रहात् सर्व्वकुष्ठनुत् ।
स्वल्पो रसो भवेद्ब्रह्मा बह्वो ज्ञेयो जनार्द्दनः ।
रक्षितः क्रामितश्चापि साक्षाद्देवो महेश्वरः ॥
मूर्च्छित्वा हरति रुजं बन्धनमनुभूय खे गतिं कुरुते ।
अजरीकरोति हि सूतः कोऽन्यः करुणाकरः स्तुतात् ॥"

रसार्णवे ।

"यस्य रोगस्य यो योगस्तेनैव सह योजितः ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥"

तस्य दोषा यथा,—

"मलं विषं वह्निगिरित्वचापलं
नैसर्गिकं दोषमुशन्ति पारदे ।
उपाधिजौ द्वौ त्रिपुनागयोगजौ
दोषौ रसेन्द्रे कथितौ मुनीश्वरैः ॥
मलेन मूर्च्छा मरणं विषेण
दाहोऽग्निना कष्टतरः शरीरे ।
देहस्य जाड्यं गिरिणा सदा स्या-
च्चाञ्चल्यतो वीर्य्यहृतिश्च पुंसाम् ॥
वह्निन कुष्ठं भुजगेन गण्डो
भवेदतोऽसौ परिशोधनीयः ॥

वह्निर्म्मिषं मलश्चेति मुख्या दोषास्त्रयो रसे ।
एते कुर्व्वन्ति सन्तापं मृतिं मूर्च्छां तृषां क्रमात् ॥
अन्येऽपि दोषाः कथिता भिषग्भिः पारदे यदि ।
तथाप्येते त्रयो दोषा हरणीया विशेषतः ॥

संस्कारहीनं खलु सूतराजं
यः सेवते तस्य करोति बाधाम् ।
देहस्य नाशं विदधाति नूनं
कष्टांश्च रोगान् जनयेन्नराणाम् ॥"

मारितस्य मूर्च्छितस्य तस्य गुणाः ।

"पारदः क्रमिकुष्ठघ्नो जयदो दृष्टिदः सरः ।
म्लेच्छकृच्च महावीर्य्यो योगवाही जराहरः ॥
सूतजोजोरूपदो दृश्यो वह्निजद्वातवर्द्धनः ।
यक्ष्मत्वनाशनः शूरः खेचरः सिद्धिदः परः ॥

पारदः सकलरोगहा स्मृतः
षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एव कीर्त्तित-
स्तेन तद्गुणगणैर्विराजते ॥" * ॥

अथ रसस्य शोधनविधिः । तत्र खेदनम् ।

"नागाधान्यैर्यथा प्राप्तैस्तुषवर्জ्जैर्जलान्वितैः ।
म्लेच्छाढ्यं पूरितं रूप्यं यावद्गलत्वमाप्नुयात् ॥
तन्मध्ये भृङ्गराजस्य विष्णुक्रान्ता पुनर्नवा ।

मोनाक्षी चैव सर्पाक्षी सहदेवी घृतावरी ॥
त्रिफला गिरिकर्णी च हंसपादी च चित्रकः ।
समूलं कुट्टयित्वा तु यथालाभं विनिःक्षिपेत् ॥
पूर्व्वाम्लभाण्डमध्ये तु धान्याम्लकमिदं स्मृतम् ।
स्वेदनादिषु सर्व्वत्र रसराजस्य योजयेत् ॥"
विष्णुक्रान्ता गिरिकर्णी च अपराजितैव श्वेत-नीलपुष्पभेदात् । अम्लसमारनालं वा तदभावे प्रयोजयेत् । तदभावे धान्याम्लाभावे ।
"त्रुट्यर्धं लवणं राजी रजनी त्रिफलार्द्रकम् ।
महाबला नागबला मेघनादः पुनर्नवा ॥
मेषशृङ्गी चित्रकश्च नवसारं समं समम् ।
एतत् समस्तं अस्तं वा पूर्व्वाम्लेनैव पेषयेत् ॥
प्रलिप्तेन कल्केन वस्त्रमङ्गुलमात्रकम् ।
तन्मध्ये निःक्षिपेत् सूतं वद्वा तत्तिन्दिनं पचेत् ॥
दोलायन्त्रेऽम्लसंयुक्ते जायते स्वेदितो रसः ॥"
मेघनादः चक्रराट् शाकविशेषः । मेषशृङ्गी मेढ़ा-शृङ्गी । तदलाभे कर्कटशृङ्गी ग्राह्या । नवसारं नौसादर । अन्यच ।
"शूलकानलसिन्धूत्थत्रुट्यर्धार्द्रकराजिकाः ।
रसस्य षोडशांशेन दद्यं युञ्जात् पृथक् पृथक् ॥
द्रव्येष्वनुक्तमानेषु मतं मानमिदं बुधैः ।
पटाक्तेषु चैतेषु सूतं प्रक्षिप्य काञ्जिके ॥
स्वेदयेद्दिनमेकञ्च दोलायन्त्रेण बुद्धिमान् ।
स्वेदात्तीव्रो भवेत् सूतो मर्द्दनाच्च सुनिर्म्मलः ॥"
शूलकं सुरङ्ग । अनलश्चित्रकम् । त्रुट्यर्धं त्रिकटु । राजिका राइ ॥ * ॥ अथ मर्द्दनम् ।
"इष्टिकाचूर्णचूर्णाभ्यामादौ मर्त्यो रसस्ततः ।
दध्ना गुडेन सिन्धूत्थराजिकाग्रहधूमकैः ॥"
अन्यच ।
"कुमारिकाचित्रकरक्तसर्षपैः
क्षतैः कषायैर्बृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥" * ॥
अथ मूर्च्छनम् ।
"त्रुट्यर्धं त्रिफलाबन्धाकन्दैः क्षुद्राद्वयान्वितैः ।
चित्रकोर्णानिशाचारकन्यार्कलवणार्कजैः ॥
सूतं क्षतेन यूषेण वारान् सप्ताभिमूर्च्छयेत् ।
इत्थं संमूर्च्छितः सूतस्त्यजेत् सप्तापि कञ्चुकान् ॥"
बन्धाकन्दः वाभ्राखसाकन्दः । क्षुद्राद्वयं छोटी-कटैया बड़ोकटैया । ऊर्णा ऊर्णानाभका । निशा हरिद्रा । चारः यवक्षारः । कन्या कुमारिका । अर्कः अर्कपत्ररसः । कनकः धत्तूरपत्ररसः ॥*॥
अथोर्द्धपातनम् ।
"मयूरग्रीवताप्याभ्यां नष्टपिष्टीकृतस्य च ।
यन्त्रे विद्याधरे कुर्य्यादसेन्द्रस्योर्द्धपातनम् ॥
सूतः स्यादूर्द्धपातेन सर्व्वदोषविवर्ज्जितः ॥"
मयूरग्रीवा तुतिया । ताप्यः सुवर्णमाषी । नष्ट-पिष्टीकृतस्य कुमारिकाद्रवयोगेन तावन्मर्द्दनं कर्त्तव्यं यावत् पारदः एधङ् दृश्यते इत्यर्थः । विद्याधरयन्त्रे क्रमरूपयन्त्रे ॥ * ॥
अथाधःपातनम् ।
"त्रिफलाग्निमुग्निखिभिर्लवणासुरिसंयुतैः ।
नष्टपिष्टं रसं कृत्वा लेपयेदूर्द्धभाजनम् ॥
ततो दीप्तैरधःपातमुपलेस्तस्य कारयेत् ।
यन्त्रे भूधरसंज्ञे तु ततः सूतो विमुच्यति ॥
स्वेदनादिक्रियाभिस्तु शोधितोऽसौ यदा भवेत् ।
तदा कार्य्याणि कुरुते प्रयोज्यः सर्व्वकर्म्मसु ॥"
अथ मुख्यदोषहरशोधनविधिः ।
"गृहकन्या हरति मलं त्रिफलाम्भि चित्रको विषं हन्ति ।
तस्मादेभिर्मिश्रैर्वारान् संमूर्च्छयेत् सप्त ॥"* ॥
अथ सर्व्वदोषहरः संक्षिप्तः शोधनविधिः ।
"कुमारिकाचित्रकरक्तसर्षपैः
क्षतैः कषायैर्बृहतीविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥
एवं कदर्थितः सूतः षण्ढो भवति निश्चितम् ।
वक्रौषधीकषायेण स्वेदितः स वली भवेत् ॥
सर्पाक्षीचित्रिकाबन्ध्याभृङ्गाम्लैः स्वेदितो वली ।
ततः स पारकद्रावैः स्विन्नः स्यादतिदीप्तिमान् ॥"
सर्पाक्षी नागफणी । चित्रिका अम्बिली । बन्ध्या बाँझखसा । भृङ्गः भृङ्गराजः । अम्लो सुत्ता । पावकः चित्रकः ॥ * ॥
अथ रसस्य मारणविधिः ।
"धूमसारं रसं तोरीं गन्धकं नवसादरम् ।
यामैकं मर्द्दयेदम्लैर्भागं कृत्वा समं समम् ॥
काचकूप्यां विनिःक्षिप्य तास्यं रुद्धस्रमुद्रया ।
विलिप्य परितो वक्त्रं मुद्रां दत्त्वा विशोषयेत् ॥
अधःसच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीं वालुकापूरैर्भृत्वा वा कूपिकागलम् ॥
निवेश्य चुल्ल्यां तदधो वह्निं कुर्य्याच्छनैः शनैः ।
तस्मादप्यधिकं किञ्चित् पावकं ज्वालयेत् क्रमात् ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत् खाङ्गशीतं तन्मर्द्दनं गन्धकं त्यजेत् ॥
अधःस्थञ्च मृतं सूतं गृह्णीयात्तन्तु मात्रया ।
यथोचितानुपानेन सर्व्वकर्म्मसु योजयेत् ॥" * ॥
अथान्यप्रकारः ।
"अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत् ।
तत् संपुटे क्षिपेत् सूतं मलपूदुग्धमिश्रितम् ॥"
मलपूः काष्ठोदुम्बरिका ।
"द्रोणपुष्पीप्रसूनानि विड्भृमिरिभेदकः ।
एतच्चूर्णमधश्चोर्द्धं दत्त्वा मुद्रां प्रदीपयेत् ॥
तद्गोलमाधमेत् सम्यक् मूषासंपुटे सुधीः ।
मुद्रां दत्त्वा शोषयित्वा ततो गजपुटे पचेत् ॥
एकेनैव पुटेनैव सूतकं भस्म जायते ।
तत् प्रयोज्यं यथास्थाने यथामात्रं यथाविधि ॥"
अथान्यप्रकारः ।
"काष्ठोदुम्बरिकादुग्धे रसं किञ्चिद्विमर्द्दयेत् ।
तद्गुडशूरुहिङ्गोत्थ मूषायुग्मं प्रकल्पयेत् ॥
क्षिप्त्वा तत्संपुटे सूतं तच्च मुद्रां प्रदीपयेत् ।
धृत्वा तन्नोलकं प्राज्ञो मूषासंपुटेऽधिके ॥
पचेद्गजपुटे तेन सूतकं याति भस्मताम् ॥"
अन्यः प्रकारः ।
"नागवल्लीरसैर्हृद्यैः कर्कोटीकन्दगर्भितैः ।
मूषासंपुटे पक्वः सूतो यात्येव भस्मताम् ॥"
इति भावप्रकाशे पूर्व्वखण्डे २ भागे ॥
अथ पारदशिवलिङ्गनिर्म्माणविधिः ।
"पारदे शिवनिर्म्माणे नानाविघ्नं यतः प्रिये ! ।
अतएव महेशानि ! शान्तिस्वस्त्ययनं चरेत् ॥
पारदं शिवबीजं हि ताड़नं नहि कारयेत् ।
ताड़नादितनाशः स्यात्ताड़नाद्वित्तहीनता ॥
ताड़नाद्रोगयुक्तत्वं ताड़नान्मरणं भवेत् ।
द्वादशं पार्थिवं लिङ्गमुपचारैश्च षोड़शैः ।
पट्टादिसूत्रनिर्म्माणरचितं शुक्लमेव वा ॥
पुरुषस्य यथायोग्यं युग्मवस्त्रं निवेदयेत् ॥
भोगयोग्यं प्रदातव्यं मधुपर्कं कुलेश्वरि ! ।
अलङ्कारं यथाशक्ति दद्यात् कल्याणहेतवे ॥
पूजयेद्धृदयस्थेन विद्यमन्त्रेण पार्व्वति ! ।
तोड़लोक्तेन विधिना प्रत्येकेनायुतं जपेत् ॥
आदौ पञ्चाक्षरं मन्त्रमष्टोत्तरशतं जपेत् ।
पूजान्ते प्रणमेत् पश्चात् प्रासादाख्यं महामनुम् ॥
दक्षिणान्तं समाचार्य्य हविष्याशी जितेन्द्रियः ।
ताम्बूलञ्च तथा मद्यं वर्जयेन्न कदाचन ।
असिंस्तन्त्रे हविष्यान्नं ताम्बूलं मौनसुत्तमम् ॥
होमयेत् परमेशानि ! दध्याज्यं वा घृताक्तकम् ।
होमस्य दक्षिणा कार्य्या तदा विघ्नैर्न लिप्यते ॥
ततः परस्मिन् दिवसे पारदं आनयेत् सुधीः ।
तस्योपरि जपेन्मन्त्रं सर्व्वबन्धं नवात्मकम् ॥
व्योमबीजं शिवार्णञ्च वर्णाद्यं विन्दुमस्तकम् ।
वायुबीजं चेन्दुयुतं चितयं चाग्नकं प्रिये ! ॥
इमं मन्त्रं महेशानि ! प्रजपेदौषधोपरि ॥
पारदे प्रजपेन्मन्त्रमष्टोत्तरशतं यदि ।
तदैवौषधयोगेन वह्नौ भवति नान्यथा ॥
ततः परस्मिन् दिवसे ग्रसेत् यत् प्राणवल्लभे ! ।
वरयेत् सर्व्वकर्त्तारं यथोक्तविभवावधि ॥
सुवर्णं चम्पकाकारं कर्णयुग्मे निवेशयेत् ।
चतुष्कोणयुतं स्वर्णं ग्रीवायां सुमनोहरम् ॥
हस्तद्वये महेशानि ! दद्याद्वलययुग्मकम् ।
वलयं शुक्लवर्णञ्च अङ्गुरीयं तथैव च ॥
ऊर्म्मीं दद्यात् पीतवर्णां क्षौमवस्त्रयुगं प्रिये ! ।
एवं कृत्वा महेशानि ! शिवरूपं विचिन्तयेत् ॥
अथातः संप्रवक्ष्यामि विधानं शृणु पार्व्वति ! ।
प्रस्तरे चैव संस्थाप्य भिण्टीपचरसेन च ।
प्रणवेन समालोड्य कुर्य्यात् कर्द्दमवत् प्रिये ! ॥
निर्म्माणयोग्यं तद्रूपं यदि स्यात् सुरसुन्दरि ! ।
तदा निर्म्माय तल्लिङ्गं पुनर्दृढ़तरं चरेत् ॥
खपुष्पसंयुते वस्त्रे अङ्गारे च करीषके ।
किञ्चिदुष्णं प्रकर्त्तव्यं यतो दृढ़तरं भवेत् ॥"
इति मालतीमाधवतन्त्रे ८ पटलः ॥ * ॥
सगररोजकृतमुक्तकेशम्लेच्छजातिविशेषः ॥
(यथा, महाभारते । २ । ५१ । १३ ।
"कैराता दरदा दर्व्वाः शूरा वैयामकास्तथा ।
औदुम्बरा दुर्विभागाः पारदाः सह वाह्लिकैः ॥")
अस्य विवरणं पह्लवशब्दे द्रष्टव्यम् ॥
पारदरुजकः, पुं, देशविशेषः । इति शब्दरत्नावली । स तु ओड्रदेशैकभाग इति केचित् ॥

पारदारिकः, पुं, (परेषां अन्येषां दारान् गच्छतीति। परदार + "गच्छतौ परदारादिभ्यः।"७।३।७। इत्यस्य वार्त्तिकोक्त्या ठक्।) पारजायिकः। परदाररतः। (यथा, महाभारते।२।३१।२५।
"तत्र माहिष्मतीवासी भगवान् हव्यवाहनः।
द्यूयते हि यदीतौ वै पुरस्तात् पारदारिकः॥")
"पुण्यकाण्डजयडिण्डिमायितं
यत्र गोतमकलत्रकामिनः।
पारदारिकविलाससाहसं
देवभर्त्तुरदटङ्कि भित्तिषु॥"
इति च नैषधे १८ सर्गः॥
अस्य दोषा यथा,—
"यः परस्त्रीषु निरतस्तस्य श्रीर्याति कुतो यशः।
स च निन्द्यः पापयुक्तः शश्वत् सर्व्वसभासु च॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे २१ अध्यायः॥
पारदार्य्यं, क्ली, (परदारा दारा यस्य स परदारस्तस्य कर्म्मेति ष्यञ्।) परदारगमनम्। यथा,
"भृतादध्ययनादानं भृताध्यापनमेव च।
पारदार्य्यं पारिवित्तं वार्धुष्यं लवणक्रिया॥"
इत्युपपातकगणने याज्ञवल्क्यः॥
पारदेश्यः, त्रि, प्रोषितः। पारदेशिकः। पथिकः। परदेशं गत इत्यर्थे ण्यप्रत्ययनिष्पन्नः॥ (परदेशे भव इति ष्यञ्। परदेशजातः। यथा, याज्ञवल्क्ये। २। २५५।
"स्वदेशपण्ये तु शतं वञ्चियत्वाऽऽत्तं पञ्चकम्।
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी॥")
पारमहंस्यं, त्रि, (परमहंसैर्गन्तव्यं परमहंसस्य भावः परमहंसेन ज्ञेयं यत् प्राप्यमिति वा। परमहंस + ष्यञ्।) परमहंससम्बन्धि। यथा,
"श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते।
यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्म्यमाविष्कृतं
तच्छृण्वन् सुपठन् विचारणपरो भक्त्या विमुच्येन्नरः॥"
इति श्रीमद्भागवते। १२। १३। १८॥
"पारमहंस्यं परमहंसैः प्राप्यम्।" इति तट्टीकायां श्रीधरस्वामी॥ (परब्रह्मधाम। यथा, भागवते। १। १८। २२।
"यत्रानुरक्ताः सहसैव धीरा
व्यपोह्य देहादिषु सङ्गमूढम्।
व्रजन्ति तत्पारमहंस्यमन्त्यं
यस्मिन्नहिंसोपशमः स्वधर्म्मः॥"
प्रत्यङ्निष्ठारूपम्। यथा, तत्रैव। २। ४। १२।
"पुंसां पुनः पारमहंस्य आश्रमे॥
व्यवस्थितानामनुपूर्व्यदर्शने॥"
ज्ञानस्वरूपम्। यथा, तत्रैव। ४। २१। ४१।
"न वै तथा चेतनया बहिष्कृते
हुताशने पारमहंस्यपर्य्यगुः॥")
पारमार्थिकः, त्रि, (परमार्थाय परमपुरुषार्थाय हित इति। ठक्।) परमार्थयुक्तः। यथा,—
"गतानुगतिको लोको न लोकः पारमार्थिकः॥"
इति पुराणम्॥

सुखम्। यथा,—
"त्रिचतुःपञ्चसप्ताष्टनवद्वादश एव च।
क्रमेण घटिका श्वेतास्तत्पृथ्वं पारमार्थिकम्॥"
इति तिथ्यादितत्त्वम्॥
(यथाचः। यथा, मनौ ६। ६२ श्लोकटीकायां कुल्लूकभट्टः। "तेषां प्रकाशाप्रकाशतस्कराणां स्वकर्म्मणि चौर्य्यादौ ये पारमार्थिका दोषा इति।" परस्परविभक्तः। यथा, भागवते। ३। २६। १।
"लक्षणं महदादीनां प्रकृतेः पुरुषस्य च।
स्वरूपं लक्ष्यतेऽमीषां येन तत् पारमार्थिकम्॥"
"पारमार्थिकं परस्परविभक्तमित्यर्थः।" इति तट्टीकायां श्रीधरस्वामी॥)
पारम्पर्य्यं, क्ली, (परम्परायां आगतम्। तत आगत इत्यण्। चतुर्व्वर्णादित्वात् ष्यञ्। परम्परा + स्वार्थे ष्यञ् वा।) आम्नायः। कुलक्रमः। इति हेमचन्द्रः॥ तथा च।
"यस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः।
तच्च तं नावमन्येत धर्म्मस्तत्रैव तादृशः॥"
इति विवादभङ्गार्णवः॥
परम्परायां भावश्च॥ (यथा, महाभारते। ६। ११०। २७।
"निहत्तेषु च सैन्येषु पारम्पर्य्येण सर्व्वशः।
विसृत्तकवचाः सर्व्वे भीष्ममीयुर्नराधिपाः॥")
पारम्पर्य्योपदेशः, पुं, (पारम्पर्य्येण गुरुपरम्परया प्राप्त उपदेशः।) उपदेशपरम्परा। तत्पर्य्यायः। ऐतिह्यम् २ इतिह ३। इत्यमरः। २। ७। १२॥ परम्परैव पारम्पर्य्यं स्वार्थे ष्यञ्। पारम्पर्य्येणोपदेशः पारम्पर्य्योपदेशः तत्र इतिहशब्दोऽव्ययः। यथा। इतिह ह स्मैवमुक्तं इह वटे यवः प्रतिवसतीति। इति एवं रूपं ह्यस्ति गच्छति इतिह ह्यजनादिति डः। इतिह शब्दात् स्वार्थे ष्यञ् ऐतिह्यम्। इति भरतः॥
पारलौकिकः, त्रि, (परलोके भवः परलोकाय हित इति वा। परलोक + ठञ्। "अनुशतीकादीनाञ्च।"७।३।२०। इति चित्त्वादुभयपदवृद्धिः।) परलोकसम्बन्धी। यथा,—
"दानपात्रमधमर्णमिहैक-
माहि कोटिगुणितं दिवि दायि।
साधुरेति सुकृतैर्यदि कर्त्तुं
पारलौकिककुसीदमसीदत्॥"
इति नैषधे। ५। ६२॥
(तथा च महाभारते। १३। १११। १६।
"तस्मात्त्यागात्तेरर्थैर्धर्म्मं सेवेत पण्डितः।
धर्म्म एको मनुष्याणां सहायः पारलौकिकः॥")
पारवतः, पुं, पारावतः। इति द्विरूपकोषः॥
पारश्वः, पुं, शूद्रायां विप्रतनयः। इत्यमरः। ३। ३। २०६॥ स तु निषादजातिः। यथा,—
"ब्राह्मणादैश्यकन्यायामम्बष्ठो नाम जायते।
निषादः शूद्रकन्यायां यः पारश्व उच्यते॥
शूद्रकन्यायामूढायां निषाद उत्पद्यते यतः;

संज्ञान्तरेण पारश्वश्चोच्यते। तस्योपनयनसंस्कारनिषेधमाह।
स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः॥
स जीवन्नेव शवतुल्यः।" इति मनुकुल्लूकभट्टौ॥
परस्त्रीतनयः। (परस्त्रीरेव स्वार्थे अण्।) शल्लम्। सल्लु लौहम्। इति मेदिनी। वे, ६०॥ परशुजाते, त्रि॥
पारशीकः, पुं, पारसीकः। इत्यमरटीकायां रमानाथः॥
पारश्वधः, पुं, (परश्वधेन युध्यतेऽसौ परश्वधः प्रहरणमस्येति वा। परश्वध + "तदस्येति।" अण्।) परश्वधधारी। पारश्वधिकः। इति हेमचन्द्रः॥
पारश्वधिकः, पुं, (परश्वधः प्रहरणमस्य। "परश्वधाट्ठञ् च।" ४। ४। ५८। इति ठञ्।) परशुहेतिकः। कुठारधारी। तत्पर्य्यायः। पारश्वधः २ परश्वधायुधः ३। इति हेमचन्द्रः॥
पारसिकः, पुं, पारसीकः। इति शब्दरत्नावली॥
पारसी, स्त्री, पारस्यभाषा। पारसदेशभवविद्यादि। तदारम्भदिनं यथा,—
"ज्येष्ठाश्लेषामघापूर्व्वारेवतीभरणीहये।
विशाखार्द्रोत्तराषाढ़शतभे पापवासरे॥
लग्ने स्थिरे सचन्द्रे च पारसीमारभेत् पठेत्॥"
इति गणपतिसङ्कल्पः॥
पारसीकः, पुं, पारसीकदेशोद्भवघोटकः। तत्पर्य्यायः। वानायुजः २। इति केचित्। इत्यमरटीकायां भरतः॥ पर्य्यदनः ३ आवर्त्तनः ४। इति चिकाण्डशेषः॥ (यथा, अश्ववैद्यके। ६। ८।
"पारसीकास्तालिकाभाः कोकाणाः केचिदुन्नताः।")
देशविशेषः। तत्पर्य्यायः। पारसिकः २। इति शब्दरत्नावली॥ तद्देशोद्भवे, त्रि॥ (यथा, रघुः। ४। ६०।
"पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना॥")
पारस्त्रैणेयः, त्रि, (परस्त्रियां जातः।"कल्याण्यादीनामिनड्।" ४। १। १२६। इति ढक् इनङादेशश्च। तत उभयपदवृद्धिः।) परस्त्रियाः सुतः। इत्यमरः। २। ६। २४॥
पारा, स्त्री, (पारोऽस्यस्या इत्यच् ततष्टाप्।) नदीविशेषः। सा तु पारिपात्रपर्व्वतोद्भवा। इति मेदिनी। रे, ५६॥ (यथा, माघे। १२। २४।
"पारा चर्म्मखती रूपा विदुषा वेणुमत्यपि॥")
पारापतः, पुं, (पारे त्रिरिनदादिपरपारे यद्वा, पारादप्यापतति लोभादिति। पत + अच्।) पारावतः। इत्यमरटीकायां रमानाथः॥
पारापारः, पुं, (पारचापारचाख्यस्येति। "अर्च आदिभ्योऽच्।" ५। २। १२७। इत्यच्।) पारावारः। इति द्विरूपकोषः॥
पारायणं, क्ली, साकल्यवचनम्। इत्यमरः। ३। २। २॥"पारं समाप्तिं अयते गच्छति प्राप्नोति पारायणं नन्द्यादित्वादनः। आविष्टलिङ्गत्वाद्विलिङ्गेन सामानाधिकरण्येऽपि क्लीबमेव पारायणम्। यथा धातुपारायणम्। रत्न-

पारायणं नाम लङ्केति मम मैथिलीति भट्टिः।"
इति भरतः॥ (पारमयन्ते समाप्तिं प्राप्नुवन्ति
येनेति। अय+ल्युट् करणे इत्येके।) पुराण-
पाठः। (यथा. देवीभागवते। ३। २६। १७।
"वरयेद्ब्राह्मणं प्राप्तं पारायणकृते तदा॥")
तत्र श्रीभागवतपाठानुक्रमो यथा,—
श्रीपार्व्वत्युवाच।
"स्कन्देर्दाद्यृभिः प्रोक्तं श्रीमद्भागवतं प्रभो!।
शुकस्तच्छ्रावयामास महाराजं परीक्षितम्॥
सप्ताहेनेति भगवन्! श्रूयते तत्र तत्र हि।
तस्यानुक्रममिच्छामि श्रोतुं ततफलमेव च॥
सदाशिव उवाच।
साधु पृष्टमहाभागे! लोके यत् प्रचरिष्यति।
पारायणमिति ख्यातं सद्यो मुक्तिप्रदं नृणाम्॥
शुकस्योक्तिक्रमेणैव पठेद्भागवतन्तु यः।
श्रावयेच्छृणुयाद्वापि तस्यानन्तं फलं भवेत्॥
कृतनित्यक्रियः प्रातः कृशहस्तः कृतासनः।
देवद्विजगुरूनत्वा ध्यात्वा विष्णुं सनातनम्॥
वेदव्यासं नमस्कृत्य शुकदेवञ्च भक्तितः।
हिरण्याक्षवधं यावत् प्रथमेऽहनि कीर्त्तयेत्॥
चरितं भरतस्यापि द्वितीयेऽथ तृतीयके।
मथनञ्चाण्डतस्यापि यत्र कूर्म्मः स्वयं हरिः॥
चतुर्थदिवसे चैव दशमे हरिजन्म च।
पञ्चमे तु पठेद्विद्वान् रुक्मिण्या हरणावधि॥
षष्ठे षोडशसंवादं सप्तमे तु समापयेत्।
अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन॥
कृते विरामे मध्ये तु अध्यायादिं पठेत् पुनः।
पठेदर्धं बुध्यमानः श्रावयेद्वैष्णवोत्तमे!॥
श्रोता तु प्राङ्मुखो भूत्वा शृणुयाद्भक्तितत्परः।
अध्याये स्वर्णमाषैकं तथा दद्याच्च दक्षिणाम्॥
समाप्तौ च ततो धेनुं स्वर्णशृङ्गीं निवेदयेत्।
कुर्य्याच्च वैष्णवं होमं सात्वतान् भोजयेत्ततः॥
एवं यः कुरुते देवि! पाठं भागवतस्य तु।
अवणं श्रावणं वापि स इष्टां गतिमाप्नुयात्।
एतत् पारायणं नाम सर्व्वकामफलप्रदम्॥
पाठकाले तु त्रिदशा मुनयश्च तपोधनाः।
पार्श्वदाश्च तथा विष्णोः सान्निध्यं तत्र कुर्व्वते॥
एतत्ते कथितं देवि! पारायणविधानकम्।
विष्णुप्रीतिकरं पुण्यं किमन्यः श्रोतुमिच्छसि॥"
इति पाद्मे पातालखण्डे पारायणमाहात्म्ये ७१
अध्याय॥ * ॥ अपिच।
कुमारा ऊचुः।
"अथ ते संप्रवक्ष्यामः सप्ताहयज्ञके विधिम्।
सहायैर्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः॥
दैवज्ञन्तु समाहूय सुहूर्त्तं पृच्छ यत्नतः।
विवाहे यादृशं वित्तं तादृशं परिकल्पयेत्॥
नभस्य आश्विनोर्ज्जौ च मार्गशीर्षः शुचिर्नभाः।
एते मासाः कथारम्भे श्रोतॄणां मोक्षसूचकाः॥
मासानां निर्णये यानि तानि त्याज्यानि सर्व्वथा।
सहायाश्च त एवात्र कर्त्तव्याः सोद्यमाश्च ये॥
देशे देशे तथा चैवं वार्त्ता प्रेष्या प्रयत्नतः।
भविष्यति कथा चात्र आगन्तव्यं कुटुम्बिभिः॥
दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्त्तनाः।
स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत्॥
देशे देशे विरक्ता ये वैष्णवाः कीर्त्तनोत्सुकाः।
तेष्वेव पत्रं प्रेष्यञ्च तल्लेखनमितीरितम्॥
सतां समाजो भविता सप्ताहं सुदुर्लभः।
अपूर्व्वरसरूपैव कथा चात्र भविष्यति॥
श्रीभागवतपीयूषकथासु रसलम्पटाः।
भवन्तश्च तदा शीघ्रमायान्तु प्रेमतत्पराः॥
नावकाशः कदाचिद्वा दिनमात्रं तथापि वा।
सर्व्वथा गमनं कार्य्यं त्वयोऽत्रैव सुदुर्लभः॥
एवमाकारणं तेषां कर्त्तव्यं विनयेन च।
आगन्तुकानां सर्व्वेषां वासस्थानानि कल्पयेत्॥
तीर्थे चैव वने चापि गृहे वा अवणं स्मृतम्।
विशाला वसुधा यत्र कर्त्तव्यं तत्कथास्थलम्॥
शोधनं मार्जनं भूमेर्लेपनं धातुमण्डनम्।
गृहोपस्करसंहृत्य गृहकोणे निवेशयेत्॥
अर्व्वाक् पक्षाद्दशो यत्नादास्तीर्णानि प्रलेपयेत्।
कर्त्तव्यं मण्डपं प्रोच्चैः कदलीषण्डमण्डितम्॥
फलपुष्पदलैर्विश्वक् विताने च विराजितम्।
चतुर्दिक्षु ध्वजारोपो बहुसम्पदिराजितः॥
ऊर्द्धं सप्तैव लोकाश्च कल्पनीयाः सुविस्तरम्।
तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबुध्य च॥
पूर्व्वं तेषामासनानि कर्त्तव्यानि यथोत्तरम्।
वक्तुश्चापि तथा दिव्यमासनं परिकल्पयेत्॥
उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा।
प्राङ्मुखोऽथ भवेद्वक्ता श्रोता चोदङ्मुखस्तदा॥
अथवा पूर्व्वदिक् ज्ञेया पूज्यपूजकमध्यतः।
श्रोतृणामागमः प्रोक्तो देशकालादिकोविदैः॥
विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिमान्।
दृष्टान्तकुशलो धीरो वक्ता कार्य्योऽतिनिस्पृहः॥
अनेककर्म्मविभ्रान्ताः स्त्रैणाः पाषण्डवादिनः।
शुकशास्त्रकथोच्चारे त्याज्यास्ते येऽप्यपण्डिताः।
वक्तुः पार्श्वे समर्थोऽर्थमन्यः स्थाप्यस्तथाविधः॥
पण्डितः संशयच्छेत्ता लोकबोधनतत्परः॥
वक्ता चौरं प्रकर्त्तव्यं दिनादर्व्वाक् व्रताप्तये।
अरुणोदयेऽसौ निर्व्वर्त्य शौचं स्नानं समाचरेत्॥
मण्डलञ्च प्रकर्त्तव्यं तत्र स्थाप्यो हरिस्तथा।
क्षणमुद्दिश्य मन्त्रेण चरेत् पूजाविधिं क्रमात्।
प्रदक्षिणनमस्कारान् पूजान्ते स्तुतिमाचरेत्॥
संसारसागरे मग्नं दीनं मां करुणानिधे!।
कर्म्मग्राहगृहीताङ्गं मामुद्धर भवार्णवात्॥
श्रीमद्भागवतस्यापि ततः पूजां प्रयत्नतः।
कर्त्तव्या विधिना प्रीत्या धूपदीपसमन्विता॥
ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत्।
स्तुतिः प्रसन्नचित्तेन कर्त्तव्या केवलं तदा॥
श्रीमद्भागवताख्यस्य प्रत्यक्षः कृष्ण एव हि।
स्वीकृतोऽसि मया नाथ! सत्कार्य्यं भवसागरे॥
मनोरथो मदीयोऽयं सफलः सर्व्वथा त्वया।
निर्विघ्नेनैव कर्त्तव्यो दासोऽहं तव केशव!॥
एवं दीनं वचः श्रोक्त्वा वक्तारञ्चाथ पूजयेत्।
संभूष्य वस्त्रभूषाभिः पूजान्ते तञ्च संस्तवेत्॥
शुकरूपप्रबोधज्ञः सर्व्वशास्त्रविशारदः।
एतत्कथाप्रकाशेन मदज्ञानं विनाशय॥
तदर्थे नियमः पश्चात् कर्त्तव्यः श्रेयसे सदा।
सप्तरात्रं यथाशक्त्या धारणीयः स एव हि॥
वरणं पञ्चविप्राणां कथाभागनिरूपणे।
कर्त्तव्यं तैर्हरेर्जपं हादशाक्षरविद्यया॥
ब्राह्मणान् वैष्णवान् चान्यान् तथा कीर्त्तन-
कारिणः।
नत्वा संपूज्य दत्त्वार्घ्यं स्वयमासनमाविशेत्॥
लोकचिन्ताधनागारपुत्रचिन्तामुपत्यज य।
कथाचिन्तामुद्वहतिः स लभेत् फलमुत्तमम्॥
आलस्यौद्धत्यमारभ्य सार्द्धं विग्रहरान्तकम्।
वाचनीया कथा सम्यक् धीरकण्ठं सुधीमता॥
कथाविरामः कर्त्तव्यो मध्याह्ने घटिकाद्वयम्।
तत्कथामनुकार्य्यं वै कीर्त्तनं वैष्णवैस्तदा॥
मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः।
हविष्यान्नेन कर्त्तव्यो नैकवारं कथार्थिना॥
उपोष्य सप्तरात्रं वा भक्तिश्चेत् शृणुयात्तदा।
घृतपानं पयःपानं कृत्वा वा शृणुयात् सुखम्॥
फलाहारेण वा आद्यमेकभक्तेन वा पुनः।
सुखसाध्यं भवेदेतत् कर्त्तव्यं श्रवणाय तत्॥
भोजनन्तु वरं मन्ये कथाश्रवणकारकम्।
नोपवासो वरः प्रोक्तः कथाविघ्नकरो यदि॥
सप्ताहव्रतिनां पुंसां नियमान् शृणु नारद!।
विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे॥
ब्रह्मचर्य्यमधःसुप्तिः पत्रावल्याञ्च भोजनम्।
कथासमाप्तौ भक्तिश्च कुर्य्यान्नित्यं कथाव्रती॥
द्विदलं मधु तैलञ्च गरिष्ठान्नन्तथैव च।
भावदुष्टं पर्य्युषितं जग्ध्वान्नित्यं कथाव्रती॥
दुष्टाकञ्च कलिङ्गञ्च दग्धमग्नं मसूरिकाम्।
निष्पावमामिषाद्यञ्च वर्ज्जयेत्तु कथाव्रती॥
पलाण्डुं लशुनं हिङ्गुं मूलकं गृञ्जनन्तथा।
जालिकामूलकुम्भाकं नैवाद्याच्च कथाव्रती॥
देववैष्णवविप्राणां गुरुगोव्रतिनान्तथा।
स्त्रीराजमहतां निन्दां वर्ज्जयेच्च कथाव्रती॥
कामं क्रोधं मदं दानं मत्सरं लोभमेव च।
दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती॥
रजस्वलान्त्यजस्पृष्टपतितव्रातकैस्तथा।
द्विजद्विड्वेदवाक्यैश्च न वदेदृयः कथाव्रती॥
सत्यं शौचं दयां मौनं मार्ज्जनं विनयन्तथा।
उदारं मानसं तद्वत् कुर्य्यादेवं कथाव्रती॥
दरिद्रश्च व्यथी रोगी निर्भाग्यः पापकर्म्मवान्।
अनपत्यो मोक्षकामः शृणुयात् स कथामिमाम्॥
अपुत्र्या काकवन्ध्या च वन्ध्या या च मृतार्भका।
सवदृयर्भा च या नारी तया श्राव्या प्रयत्नतः॥
एतेन विधिना दत्तं तदक्षयतरं भवेत्।
अत्युत्तमादिना सप्तकोटियज्ञफलप्रदम्॥
एवं कृत्वा व्रतविधिसुद्यापनमथाचरेत्।
तच्छ्रावणीव्रतवत् कर्त्तव्यं फलकाङ्क्षिभिः॥
अकिञ्चनेषु भक्तेषु प्रायो नोद्यापनाग्रहः।
श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः॥
एवं नगाधिपश्रेष्ठ समाप्ते श्रोत्रभिस्तदा।
पुस्तकस्य च वक्तुश्च पूजा कार्य्याऽतिभक्तितः॥

प्रसादस्तुलसीमाला श्रोत्रभ्यश्चाथ दीयताम् ।
स्वदङ्गतालललितं कीर्त्तनं कीर्त्यतां ततः ॥
जयशब्दो नमःशब्दः प्रह्लशब्दश्च गीयताम् ।
विप्रेभ्यो याचकेभ्यश्च वित्तमन्नञ्च दीयताम् ॥
विरक्तश्चेद्भवेत् श्रोता गीता वाच्या परेऽहनि ।
रहस्यचेत्तदा होमः कर्त्तव्यः कर्म्मशान्तये ॥
प्रतिश्लोकञ्च जुहुयाद्विधिना दशमस्य च ।
पायसं दधि सर्पिश्च तिलादिमधुसंयुतम् ॥
अथवा हवनं कुर्य्याद्गायत्र्या सुसमाहितः ।
तन्मयत्वात् पुराणस्य परमस्यास्य तत्त्वतः ॥
होमाशक्तौ बुधो हौम्यं दद्यात्तत्फलसिद्धये ।
नानाच्छिद्रनिरोधार्थं न्यूनताधिक्यतास्वयोः ॥
दोषयोः प्रशमार्थन्तु पठेन्नामसहस्रकम् ।
तेन स्यात् सफलं सर्व्वं नास्त्यस्मादधिकं यतः ॥
द्वादश ब्राह्मणान् पश्चाद्भोजयेन्मधुपायसैः ।
दद्यात् सुवर्णं धेनुञ्च व्रतपूर्णत्वसिद्धये ॥
शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च ।
तत्रास्य पुस्तकं स्थाप्य लिखितं ललिताक्षरम् ॥
संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणम् ।
वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ॥
आचार्य्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबन्धनैः ।
एवं कृते विधाने च सर्व्वपापनिवारणे ।
फलदं स्यात् पुराणन्तु श्रीमद्भागवतं शुभम् ॥
धर्म्मार्थकाममोक्षाणां साधनं नात्रसंशयः ।
इति ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि ॥
श्रीमद्भागवतेनैव भक्तिर्मुक्तिः प्रकाशिता ॥"
इति पाद्मोत्तरखण्डे श्रीभागवतमाहात्म्ये
६ अध्यायः ॥

पारायणिकः, पुं, (पारायणं वर्त्तयतीति । पारायण + "पारायणतुरायणेति ।" ५ । १ । ७२ । इति ठञ् ।) पाठकः । छात्रः । इति सिद्धान्तकौमुदी ॥

पारारुकः, पुं. (पॄ पूर्त्तौ + वन् । पारं पूर्त्तिं ऋच्छतीति । ऋ गतौ + उकञ् ।) प्रस्तरः । इति शब्दरत्नावली ॥

पारावतः, पुं, (पारे गिरिर्दुर्गनद्यादिपरपारे आपततीति । पार + आ + पत + अच् । पृषोदरादित्वात् पस्य वः । उड्डीयने सुदक्षत्वादेवास्य तथात्वम् । यद्वा, परावद्दूरदेशस्तस्मिन् अन्तरीक्षादिदूरदेशे भवः उड्डीयमानः सन् स्थित इत्यर्थः । परावत् + अण् ।) पक्षिविशेषः । पायरा इति भाषा ॥ तत्पर्य्यायः । क्रेङ्कारवः २ कपोतः ३ रक्तलोचनः ४ । इति रभसः ॥ पारापतः ५ कलरवः ६ अरुणलोचनः ७ मदनकाकुरवः ८ कामी ९ रक्तिलगः १० मदनमोहनवाग्विलासी ११ कण्ठीरवः १२ गृहकपोतकः १३ ॥ (यथा,—
"सिंहो बली द्विरदशूकरमांसभोजी
संवत्सरेण कुरुते रतिमेकवारम् ।
पारावतः खलु शिलाकणमात्रभोजी
कामी भवेदहनिशं वद कोऽत्र हेतुः ॥"
इत्यङ्गटः ॥)
अस्य मांसगुणाः । स्निग्धत्वम् । मधुरत्वम् । गुरुत्वम् । शीतलत्वम् । पित्तासृदाहनाशित्वम् । बल्यत्वम् । वीर्य्यवृद्धिदात्रत्वम् । इति राजनिर्घण्टः ॥ रसे पाके स्वादुत्वम् । कषायत्वम् । विशदत्वञ्च । इति राजवल्लभः ॥ तद्भेदो यथा,—
"पारावतोऽन्यो वङ्गेषु कासुको बुलबुलारवः ।
पारावताङ्घ्रिपिच्छश्च ज्ञेयो गलरवश्च सः ॥"
इति राजनिर्घण्टः ॥
मर्कटः । तिन्दुकः । इति मेदिनी । ते, २१२ ॥
गिरिः । इति हेमचन्द्रः ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ॥"
अम्लवर्गाणामाम्लतमः । यथा, सुश्रुते । १ । ४२ ।
"दाड़िमामलकमातुलुङ्गाम्रातककपित्थकरमर्द्दबदरकोलप्राचीनामलकतिन्तिड़ीककोशाम्रभव्यपारावतवेतसफललकुचाम्लवेतसदन्तशठतक्रसुरासुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लो वर्गः ॥" * ॥ परात् शकोरहङ्कारात् अवति रक्षतीति । अव रक्षणे + अण् । ततः पारावते इदमिति । तस्येदमित्यण् । दत्तात्रेयस्य गुरुः । इति चिन्तामणिः ॥)
पारावतपदी, स्त्री, (पारावतस्येव पादो मूलं यस्याः । ङीष् । पद्भावः ।) पारावताङ्घ्रिः । नयाफट्की इति भाषा ॥ इति रत्नमाला ॥
काकजङ्घा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ६ अध्याये ।
"पारावतपदीदन्तीवाकुचीकेशराह्वयैः ।
कण्टकार्य्या च तत्पक्वं घृतं कुष्ठिषु योजयेत् ॥")
पारावताङ्घ्रिः, स्त्री, (पारावतस्य अङ्घ्रिरिव अङ्घ्रिर्मूलं यस्याः ।) ज्योतिष्मती । इत्यमरः । २ । ४ । १५० ॥
पारावताङ्घ्रिपिच्छः, पुं, (पारावताङ्घ्रिरिव पिच्छः पक्षात्प्रदेशो यस्य ।) वङ्गदेशीयपारावतः । इति राजनिर्घण्टः ॥
पारावती, स्त्री,(पारावतस्येव ध्वनिरस्त्यस्या इति । अच् । ततो ङीष् ।) गोपगीतम् । नदीभेदः । (यथा, हारीते प्रथमस्थाने ७ अध्याये ।
"तथा चर्म्मखती वेत्रवती पारावती तथा ॥")
लवलीफलम् । इति मेदिनी । ते, २१२ ॥
पारावारं, क्ली, (पारं नद्यादिपरपारं आवृणोतीति । आ + वृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तटद्वयम् । इति मेदिनी । रे, २८१ ॥
पारावारः, पुं, (पारावारं तटद्वयं पारं अवारश्च वा अस्यस्येति । अच् ।) समुद्रः । इत्यमरः । १ । १० । १ ॥ (यथा, देवीभागवते । १ । ५ । ५६ ।
"यदर्थं कीलालं कलयितुमशक्तः स तु नरः
कथं पारावाराकलनचतुरः स्याद्वतमतिः ॥")
पारावारीणः, त्रि, (पारावारं गच्छतीति । पारावार + "राष्ट्रावारपाराद्घखौ ।" ४ । २ । ६३ । इत्यत्र "अवारपाराद्यत्नहीनादपि विपरीतादिति वक्तव्यम् ।" इति वार्त्तिकोक्त्या खः ।) पारावारे गच्छति यः । पारावारशब्दात् गोनृप्रत्ययनिष्पन्नः ॥
पाराशरं, क्ली, (पराशरेण कृतमिति । पराशर + अण् ।) पराशरोक्तभिक्षुसूत्रम् । इति पाराशरिभाष्यटीकायां भरतः ॥ (उपपुराणविशेषः । इति पुराणम् ॥ तृणविशेषः । यथाह चक्रदत्तः ।
"यष्टीबलागुडूच्यल्पपञ्चमूलीतुलां पचेत् ।
पूर्णेऽपामष्टभागस्थे तत्र पाचे पचेद्घृतम् ॥
धात्रीविदारीक्षुरसे क्षिपाचे पयसोन्मिले ।
सुपिष्टैर्जीवनीयैश्च पाराशरमिदं घृतम् ॥")
पाराशरः, पुं. (पराशरस्यापत्यं पुमान् । पराशर + "ऋष्यन्धकेति ।"४ । १ । ११४ । इत्यण् ।) व्यासदेवः । इति शब्दरत्नावली ॥ (पराशरकृतस्मृतिसंहिताविशेषः । यथा,—
"कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥"
अस्य विशेषविवरणन्तु पराशरशब्दे द्रष्टव्यम् ॥)
पराशरसम्बन्धिनि, त्रि ॥
पाराशरकल्पिकः, पुं, (पाराशरः पराशरकृतः कल्पस्तं वेत्त्यधीते वा । "विद्यालक्षणकल्पान्तात्रेति वक्तव्यम् ।" ४ । २ । ६० । इत्यस्य वार्त्तिकोक्त्या ठक् ।) पाराशरकल्पाध्यायी । पाराशरकल्पवेत्ता । इति सिद्धान्तकौमुदी ॥
पाराशरिः, पुं, (पराशरस्यापत्यम् । "अत इञ् ।" ४ । १ । ९५ । इतौञ् ।) वेदव्यासः । इति भूरिप्रयोगः ॥
पाराशरी, [न्] पुं, (पाराशर्य्येण प्रोक्तं भिक्षुसूत्रमधीते इति । पाराशर्य्य + "पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।" ४ । ३ । ११० । इति णिनिः ।) मस्करी । चतुर्थाश्रमी । पाराशर्य्येण प्रोक्तं भिक्षुसूत्रं इत्यर्थे णे पाराशर्यं तदधीतेऽस्याध्वर्यवायेति वैकाजादिति इन् । इत्यमरभरतौ ॥
पाराशर्य्यः, पुं, (पराशरस्यापत्यम् । पराशर + "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) व्यासः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । ४ । ३२ ।
"पाराशर्य्य ! महाभाग ! यत्त्वं पृच्छसि मामिह ॥")
पारिकाङ्क्षी, [न्] पुं, (पारमत्यास्तीति । इनिः । पारि ब्रह्मज्ञानं तत् काङ्क्षतीति । काङ्क्ष + णिनिः ।) तपस्वी । इत्यमरः । २ । ७ । ४२२ ॥ मस्करी । इति हेमचन्द्रः । ३ । ४७४ ॥
पारिजातः, पुं. (पारमस्यास्तीति पारी समुद्रस्तस्मात् जातः । समुद्रमन्थनकाले तद्गर्भजातत्वात् तथात्वम् । पारिणोऽद्रेर्जातः इति वा कश्चित् ।) पारिभद्रवृक्षः । सुरतरुः । इति मेदिनी । ते, २११ ॥ (समुद्रमन्थनकालेऽस्योत्पत्तिकथा यथा, भागवते । ८ । ८ । ६ ।

"ततोऽभवत् पारिजातः सुरलोकविभूषणम् ।
पूरयत्यर्थिनो योऽर्थैः शश्वद् भुवि यथा भवान् ॥")
अस्योत्पत्तिहरणे यथा,—
"अदित्यानुमतानुज्ञो देवराजो जनार्दनम् ।
यथावत् पूजयामास बहुमानपुरःसरम् ॥
ततो ददर्श कृष्णोऽपि सत्यभामासहायवान् ।
देवोद्यानानि सर्व्वाणि नन्दनादीनि सत्तम ! ॥
ददर्श च सुगन्धाढ्यं मञ्जरीपुञ्जधारिणम् ।
शैत्याह्लादकरं दिव्यं बालपल्लवशोभितम् ॥
मथ्यमानेऽम्भसि जातं जातरूपमयत्वचम् ।
पारिजातं जगन्नाथः केशवः केशिसूदनः ॥
तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम ! ।
कस्मान्न द्वारकामेष नीयते कृष्ण ! पादपः ॥
इत्युक्तः स प्रहस्येन पारिजातं गरुत्मति ।
आरोपयामास हरिस्तमूचुर्व्वनचारिणः ॥
भोः शची देवराजस्य महिषी तत्परिग्रहम् ।
पारिजातं न गोविन्द ! हर्त्तुमर्हसि पादपम् ।
शचीविभूषणार्थाय देवैरम्भतमन्थने ।
उत्पादितोऽयं न चेमौ गृहीत्वैनं गमिष्यसि ॥
अवश्यमस्य देवेन्द्रो निष्कृतिं कृष्ण ! यास्यति ।
वज्रोद्यतकरं शक्रमनुयास्यन्ति चामराः ॥
तदलं सकलैर्देवैर्विग्रहेण तवाच्युत ! ।
विपाककटु यत् कर्म्म न तच्छंसन्ति पण्डिताः ॥
इत्युक्ते तैरुवाचैतान् सत्यभामातिकोपिनी ।
का शची पारिजातस्य कोऽयं शक्रः सुराधिपः ॥
सामान्यः सर्व्वलोकानां यदीयोऽम्भतमन्थने ।
समुत्पन्नः सुराः कस्मादेको गृह्णाति वासवः ॥
यथा सुधा यथैवेन्दुर्यथा श्रीर्वनरश्मिनः ! ।
सामान्यः सर्व्वलोकस्य पारिजातस्तथा तरुः ॥
भर्तुर्बाहुमहागर्व्वा रुक्मिण्येनं यथा शची ।
तत् कथ्यतामलं क्षान्त्या सत्याहार्य्यति द्रुमम् ॥
कथ्यतां वै द्रुतं गत्वा पौलम्यां वचनं मम ।
सत्यभामा वदत्येनदिति गर्व्वोद्धताक्षरम् ॥
यदि त्वं दयिता भर्तुर्यदि वश्यः पतिस्तव ।
मङ्क्षुर्हरतो वृक्षं तत् कारय निवारणम् ॥
जानामि ते पतिं शक्रं जानामि त्रिदशेश्वरम् ।
पारिजातं तथाप्येनं मानुषी हारयामि ते ॥
श्रीपराशर उवाच ।
इत्युक्ता रुक्मिणो गत्वा शच्या जगुर्यथोदितम् ।
शची चोत्साहयामास सुतार्थां त्रिदशाधिपम् ॥
ततः समस्तदेवानां सैन्यैः परिवृतो हरिः ।
प्रययौ पारिजातार्थमिन्द्रो योधयितुं द्विज ! ॥
ततः परिघनिस्त्रिंशगदाशूलवरायुधाः ।
बभूवुस्त्रिदशाः सर्व्वाः शक्रे वज्रकरे स्थिते ॥
ततो निरीक्ष्य गोविन्दो नागराजोपरिस्थितम् ।
शक्रं देवपरीवारं युद्धाय समुपस्थितम् ॥
चकार शङ्खनिर्घोषं दिशः शब्देन पूरयन् ।
मुमोच च शरव्रातं सहस्रायुतसम्मितम् ॥
छिन्नैरश्वैर्गजैश्चाशु शस्त्रैश्चास्त्रैश्च सत्वरम् ।
जग्राह वासवो वज्रं क्षणाच्चक्रं सुदर्शनम् ॥
ततो हाहाकृतं सर्व्वं त्रैलोक्यं द्विजसत्तम ! ।
वज्रचक्रधरौ दृष्ट्वा देवराजजनार्दनौ ॥
क्षिप्तं वज्रमथेन्द्रेण जग्राह भगवान् हरिः ।
न सुमोच तथा चक्रं शक्र ! तिष्ठेति चाब्रवीत् ।
प्रनष्टवज्रं देवेशं गरुडोत्तवाहनम् ।
सत्यभामाब्रवीद्धीरं पलायनपरायणम् ॥
त्रैलोक्येश्वर ! नो युक्तं शचीभर्तुः पलायनम् ।
पारिजातमगाभोगा त्वामुपस्थास्यते शची ॥
श्रीपराशर उवाच ।
इत्युक्तो वै निवर्त्तते देवराजस्तया द्विज ! ।
प्राह चैनामलं चक्षि ! सख्युः खेदातिविस्तरैः ॥
न चापि सर्गसंहारस्थितिकर्त्ताखिलस्य यः ।
जितस्य तेन मे व्रीड़ा जायते विश्वरूपिणा ॥
यस्मिन् जगत् सकलमेतदनादिमध्ये
यस्मादृतच्च न भविष्यति सर्व्वभूतात् ।
तेनोद्भवप्रलयपालनकारणेन
व्रीड़ा कथं भवति देवि ! निराकृतस्य ॥
संस्तुतो भगवानित्थं देवराजेन केशवः ।
प्रहस्य भावगम्भीरमुवाचेन्द्रं द्विजोत्तम ! ॥
देवराजो भवानिन्द्रो वयं मर्त्त्या जगत्पते ! ।
क्षन्तव्यं भवतैवैतदपराधं कृतं मया ॥
पारिजाततरुश्चायं नीयतामुचितास्पदम् ।
गृहीतोऽयं मया शक्र ! सत्या वचनकारणात् ॥
श्रीशक्र उवाच ।
विमोहयसि मामीश ! मर्त्योऽहमिति किं वदन् ।
जानीमस्त्वां भगवतो न तु सूक्ष्मविदो वयम् ॥
नीयतां पारिजातोऽयं कृष्ण ! द्वारवतीं पुरीम् ।
मर्त्यलोके त्वया सृष्टे नायं वै स्थास्यते भुवि ॥
तथेत्युक्त्वा च देवेन्द्रमाजगाम सुरं हरिः ।
हर्षमुत्पादयामास द्वारकावासिनां द्विज ! ॥
अवतीर्य्याथ गरुडात् सत्यभामासहायवान् ।
निष्कुटे स्थापयामास पारिजातं महातरुम् ॥
यमभ्येत्य जनः सर्व्वो जातिं स्मरति पौर्व्विकीम् ।
व्याप्यते यस्य पुष्पाणां गन्धेनोर्वी त्रियोजना ॥
ततस्ते यादवाः सर्व्वे देहबन्धानमानुषान् ।
ददृशुः पादपे तस्मिन् कुर्व्वन्तो सुखदर्शनम् ॥"
इति विष्णुपुराणे पञ्चमेंऽशे पारिजातहरणे ३० । ३१ अध्यायौ ॥ (ऐरावतकुलजातनागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ।"
ऋषिविशेषः । यथा तत्रैव । २ । ५ । १९ ।
"पारिजातेन राजेन्द्र ! दैवतेन च धीमता ।
सुसुखेन च सौम्येन देवर्षिरमितद्युतिः ॥"
तन्त्रग्रन्थविशेषः । यथा, आगमतत्त्वविलासे ।
"भुवनेश्वरीं पारिजातं प्रयोगसारमुत्तमम् ॥")
पारिजातकः, पुं, पारिजोऽद्रेर्जातः पारिजात + स्वार्थे कः । 'पारे जातो विष्णुपद्याः पारिजातेति शब्दितः ।' इत्यागमः ॥ देवतरुः । तत्पर्य्यायः । मन्दारः २ । इत्यमरः । २ । ४ । २६ ॥ पारिभद्रवृक्षः । पालितामादार इति भाषा ॥ "पारि पारं प्राप्तं जातं जन्म यस्य । 'पारिभद्रे तु मन्दारस्मन्दारः पारिजातकः ।' इति हेमचन्द्रः ॥" इत्यमरटीकायां भरतः ॥

पारिणाय्यं, त्रि, (परिणये विवाहकाले लभ्यम् । परिणय + यञ् ।) परिणयलभ्यं धनादिकम् । यथा,—
"मातुः पारिणाय्यं स्त्रियो विभजेरन् ॥"
इति दायभागधृतवशिष्ठवचनम् ॥
पारिणाह्यं, त्रि, (परिणाहमर्हतीति । परिणाह + यञ् ।) गृहोपकरणगृह्यासनकुड्यकटाहादि । यथा, मनुः । ६ । ११ ।
"अर्घस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्म्मोपसंयोगे पारिणाह्यस्य चैश्वरे ॥"
"पारिणाह्यस्य गृहोपकरणस्य गृह्यासनकुड्यकटाहादेरवेक्षणे एनां नियोजयेत् ॥" इति तट्टीकायां कुल्लूकभट्टः ॥
पारितथ्या, स्त्री, (परितस्तथाभूता परितथा । ततः स्वार्थे यञ् ।) सीमन्तिकास्थितस्वर्णादिरचितपट्टिका । सिँती इति भाषा ॥ तत्पर्य्यायः । बालपाशा २ । इत्यमरः । २ । ६ । १०३ ॥
पारितोषिकं, त्रि, (परितोषेण लब्धं परितोषादागतं वा । परितोष + ग्रैषिकष्ठक् ।) आनतिकरम् । परितोषजनकद्रव्यम् । यथा,—
"ममापि चन्द्रशेखर-शरासनारोपणप्रथमवादिनः पारितोषिकं धारयसि ।" इति मुरारिः ॥
पारिन्द्रः, पुं, (पारीन्द्र + पृषोदरादित्वात् ह्रस्वः ।) सिंहः । इति हेमचन्द्रः । ४ । ३५० ॥
पारिपन्थिकः, पुं, (परिपन्थं पन्थानं वर्ज्जयित्वा याप्य वा तिष्ठति परिपन्थं हन्तीति वा । "परिपन्थञ्च तिष्ठति ।" ४ । ४ । ३६ । इति ठक् ।) चौरः । इति हेमचन्द्रः । ३ । ४५ ॥
पारिपार्श्यं, क्ली, (परिपार्श्वे + स्वार्थे यञ् ।) परिपार्श्वस्य भावः । परिपार्श्वशब्दात् भावे ष्यञ्प्रत्ययः ॥
पारिपात्रः, पुं, पर्व्वतविशेषः । तत्पर्य्यायः । पारियात्रः २ । इति शब्दरत्नावली ॥ स तु विन्ध्यस्य पश्चिमे मालवदेशस्य सीमापर्व्वतः ॥ (अयं हि भारतस्यास्य वर्षस्य कुलपर्व्वतानामन्यतमः । यथा, मार्कण्डेये । ५७ । ११ ।
"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ॥"
अस्मादुद्भूतनद्यो यथा, तत्रैव । ५७ । १६—२० ।
"वेदस्मृतिर्व्वेदवती वृत्रघ्नी सिन्धुरेव च ।
वेला सानन्दिनी चैव सदागौरी मही तथा ।
पारा चर्म्मण्वती नूपी विदिशा वेत्रवत्यपि ।
शिप्रा ह्यवन्ती च तथा पारिपात्राश्रयाः स्मृताः ॥")
पारिपात्रिकः, पुं, (पारिपात्र + स्वार्थे कन् ।) पारिपात्रपर्व्वतः । इत्यमरः । २ । ३ । ३ ॥
पारिपार्श्विकः, पुं, (परिपार्श्वं वर्त्तते इति । परिपार्श्व + "परिसृतश्च ।" ४ । ४ । २६ । इति चकारात् ठक् ।) नत्याः पार्श्वस्थः । इति हेमचन्द्रः ॥ त्रि, पार्श्ववर्त्ती । यथा, अमरकोषे । १ । ३ । ३१ ।
"भाटरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः ॥"

पारिप्लवं, त्रि, (परि+प्लु+अच्। ततः प्रज्ञाद्यण्।) चञ्चलम्। इत्यमरः।३।१।७५॥ (यथा, रघुः। ३। ११।

"तयोपचाराञ्जलिखिन्नहस्तया
ननन्द पारिप्लवनेत्रया नृपः॥")

आकुलः। इति मेदिनी। वे, ६०॥ (क्लो, तीर्थविशेषः। यथा, महाभारते। ३। ८३। १२।

"ततः पारिप्लवं गच्छेत्तीर्थं त्रैलोक्यविश्रुतम्।
अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति भारत!॥"

पुं, जलपक्षी। इति रामानुजः॥ यथा, रामायणे। ४। २७। २३।

"पारिप्लवप्लुतैर्जुष्टा बर्हिकौञ्चनिनादिता।
रमणीया नदी सौम्या सुनिसङ्कनिषेविता॥"

पञ्चममन्वन्तरीयप्रकृतिविशेषः। यथा, हरिवंशे। ७। २७।

"देवाश्चाभूतरजसस्तथा प्रकृतयोऽपरे।
पारिप्लवश्च रैभ्यश्च मनोरन्तरमुच्यते॥")

पारिभद्रः, पुं, (परितो भद्रमस्मात्। परिभद्रस्तः प्रज्ञाद्यण्।) वृक्षविशेषः। पालिताम्मादार इति भाषा॥ तत्पर्य्यायः। निम्बतरुः २ मन्दारः३ पारिजातकः ४। इत्यमरः।२।४।२६॥ रक्तकुसुमः५ क्रमिघ्नः६ बहुपुष्पः७ रक्तकेसरः८। इति राजनिर्घण्टः॥ अस्य गुणः। अनिलश्लेष्मव्रणोथमेदःक्रमिनाशित्वम्। अस्य पुष्पगुणः। पित्तरोगकर्णव्याधिनाशित्वम्। इति भावप्रकाशः॥ देवदारु। इति मेदिनी॥ सरलवृक्षः। इति शब्दचन्द्रिका॥ (यज्ञबाहस्य पुत्रविशेषः। शाकद्वीपस्थ वर्षविशेषः। यथा, भागवते। ५। २०। ६।

"तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहः खसुतेभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत्। सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमभिज्ञातमिति॥")

पारिभद्रकः, पुं, (पारिभद्र एव। स्वार्थे कन्।) देवदारुवृक्षः। इत्यमरः॥ (यथा, महाभारते। १। १२५। ३।

"पलाशैस्त्रिलकैर्नूतैश्चम्पकैः पारिभद्रकैः॥")

निम्बवृक्षः। कुष्ठौषधे, क्लो। इति राजनिर्घण्टः॥

पारिभाव्यं, क्लो, (परिभवाय रोगादिनाशाय हितम्। परिभव+ष्यञ्।) कुष्ठौषधम्। इत्यमरः।२।४।१२६॥ परिभुवो भावः। जामिनी इति भाषा॥ यथा,—

"सात्त्विकं पारिभाव्यञ्च दानं ग्रहणमेव च।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम्॥"

इति दायभागः॥

पारिभाषिकं, क्लो, (परिभाषात आगतम्। परिभाषा+ठञ्।) परिभाषयार्थबोधकं पदम्। यथा। तत्राधुनिकसङ्केतः परिभाषा तया अर्थबोधकं पदं पारिभाषिकम्। यथा ग्राम्यकारादिसङ्केतितनदीवृक्षादिपदम्। इति भक्तिवादे गदाधरः॥

पारिमाण्डल्यं, क्लो, (परिमण्डलस्य परमाणोर्भावः। परिमण्डल+ष्यञ्।) परमाणुपरिमाणम्। यथा, भाषापरिच्छेदे। १५।

"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥"

पारिमुखिकः, त्रि, (परिमुखं वर्त्तते इति। "परिमुखञ्च।" ४। ४। २६। इति ठक्।) परिमुखेन तिष्ठति यः। सम्मुखवर्त्ती। परिमुखशब्दात् णिकप्रत्ययनिष्पन्नः॥

पारियात्रः, पुं, (परितो यात्रया दृश्यते। "ग्रैवेयः।" ४।२।६२। इत्यण्।) पारिपात्रपर्व्वतः। इति शब्दरत्नावली॥ (यथा, गोलाध्याये। ३। ४२।

"माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः
सह्यः सविन्ध्य इह सप्तकुलाचलाख्याः॥")

पारियात्रिकः, पुं, (पारियात्र एव। स्वार्थे ठक्।) पारियात्रः। इति हेमचन्द्रः। ४। ६७॥

पारियानिकः, पुं, (परियानं प्रयोजनमस्य। परियान+ठञ्।) अध्वरथः। इति हेमचन्द्रः। ३। ४१६॥ परियातिकोऽपि पाठः॥

पारिरक्षकः, पुं, (परिरक्षति आत्मानमिति। परि+रक्ष+ण्वुल्। ततः प्रज्ञाद्यण्।) मस्करी। तापसः। इति हेमचन्द्रः। ३। ४७४॥

पारिप्लः, पुं, वृक्षविशेषः। पलाशपिप्पल इति गजहण्ड इति च भाषा॥ तत्पर्य्यायः। फलीप्लः २ कपिच्छतः ३ कमण्डलुः ४ गर्दभाण्डः ५ कन्दरालः ६ कपीतनः ७ सुपार्श्वकः ८। अस्य गुणाः। दुर्जरत्वम्। स्निग्धत्वम्। क्रिमिशुक्रकफप्रदत्वम्। फले अम्लत्वम्। मूले मधुरत्वम्। कषायत्वम्। स्वादुमज्जकत्वञ्च। इति भावप्रकाशः॥

पारिषदः, पुं, परिषदि तिष्ठति यः। (परिषदि साधुः। परिषदो ण्यः इत्यत्र योगविभागात् यः।) सभास्थः। तत्पर्य्यायः। सभ्यः २ सभासारः ३ सभासत् ४ परिषदलः ५ पर्षद्वलः ६ पारिषद्यः ७ पार्श्वदः ८। इति शब्दरत्नावली॥ (यथा, महाभारते। २। १०। ३२।

"शुकुकर्णसखाः सर्व्वे दिव्याः पारिषदास्तथा॥"

परिषद इदम्। "पत्राध्वर्युपरिषदश्च।" ४। ३।१२३। इति अण्।) परिषत्सम्बन्धिनि, त्रि॥

पारिषद्यः, पुं, (परिषदं समवैति। "परिषदो ण्यः।" ४। ४। ४४। इति ण्यः।) पारिषदः। इति शब्दरत्नावली॥

पारिहारिकः, त्रि, (परिहारे साधुः। परिहार+ठञ्।) परिहारकर्त्ता। परिहारं करोति यः इत्यर्थे णिकप्रत्ययनिष्पन्नः॥

पारिहार्य्यः, पुं, (परिह्रियते इति। परि+हृ+ण्यत्। ततः प्रज्ञाद्यण्।) वलयः। इत्यमरः॥ परिहारस्थे, क्लो॥

पारिहास्यं, क्लो, (परिहास+ष्यञ्।) परिहासस्य भावः। परिहासद्वारा कृतम्। यथा, श्रीभागवते। ६। अजामिलोपाख्याने। २।१४।

"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः॥"

"नन्वयं पुत्रनामाग्रहीत् न भगवन्नाम तत्राहुः। साङ्केत्यं पुत्रादौ सङ्केतितम्। पारिहास्यं परिहासेन कृतम्। स्तोभं गीतालापपूरणार्थे कृतम्। हेलनं किं विष्णुनेति सावज्ञमपि च वैकुण्ठनामोच्चारणम्।" इति तट्टीकायां श्रीधरस्वामी॥

पारी, स्त्री, (पारयत्यनयेति। पॄ पूर्त्तौ+णिच्+घञ्। ततो ङीष्।) पूरः। जलसमूहः। कर्करी। हस्तिपादरज्जुः। इति मेदिनी। रे, ५६॥ भार्य्या। पराग्। इति विश्वः॥ (पीयतेऽनेति। पा+क्विप्। तद्रातीति। रा+कः। ङीष्।) पानपात्रम्। इति त्रिकाण्डशेषः॥ (यथा, राजतरङ्गिण्याम्। ४। ३०३।

"कर्पूरपारीपतितं मौरेयमिव हारितम्॥")

दोहनपात्रम्। इति जटाधरः॥

पारीक्षितः, पुं, परीक्षितराजः। इति शब्दरत्नावली॥ जनमेजयः। परीक्षितोऽपत्यं इत्यर्थे ष्फप्रत्ययनिष्पन्नः॥ (यथा, देवीभागवते। २। ११। १२।

"ततः सुवर्णवर्म्माख्यो राजा काशीपतिः किल।
वपुष्मां शुभां कन्यां ददौ पारीक्षिताय च॥")

पारीण्यः, त्रि, (पारं गामीति। पार+"अवारपारत्यन्तानुकामं गामी।" ५। २। ११। इति खः।) पारगमनकर्त्ता। पारं गच्छति इत्यर्थे खीनप्रत्ययनिष्पन्नः॥ (यथा, भट्टिः। २। ४६।

"त्रिवर्गपारीणमसौ भवन्त-
मध्यासयन्नासनमेकमिभ्रः॥")

पारीन्द्रः, पुं, (पॄ पालने+कर्म्मणि इन्। पारिः पशुसस्य इन्द्रः।) सिंहः। अजगरसर्पः। इति हेमचन्द्रः॥

पारीरयः, पुं, (पार्य्यो जलपूरे रयं यस्य।) कमठः। दण्डः। पटशाटकः। इति विश्वः॥

पारुः, पुं, (पिबति रसानिति। पा+"बाहुलकात् पिबतेश्च। ४। १०१। इत्यत्र उज्ज्वलदत्तोक्त्या रुः।) वह्निः। सूर्य्यः। इत्युणादिकोषः॥

पारुष्यं, क्लो, (परुषस्य भावः। परुष+ष्यञ्।) अप्रियभाषणम्। तत्पर्य्यायः। अभिवादः २। इत्यमरः। १। ६। १४॥ तत्तु चतुर्व्विधवाङ्मयापापान्तर्गतपापविशेषः। यथा,—

"पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम्॥"

इति तिथ्यादितत्त्वम्॥

परुषत्वम्। दुर्व्वाक्यम्। इति मेदिनी। ये, ६४॥ इन्द्रस्य वनम्। इति विश्वः॥ अगुरु। इति शब्दचन्द्रिका॥

पारुष्यः, पुं, (परुषस्य भावः पारुष्यं दुर्व्वाक्यं तदिव नीतिवाक्यमस्ति अस्यास्मिन् वा इत्यच्।) दृढस्नायुः। इति मेदिनी। ये, ६४।

पारेरकः, पुं, (वध्यादेः पारमौर्त्ते गच्छतीति। ईर्+ण्वुल्।) खड्गः। इति शब्दमाला॥

पार्घटं, क्ली, (पादे घटते इति अच्। ततः पृषोदरादित्वात् साधुः।) पांशु। इति हारावली। १६२॥

पार्थः, पुं, पृथिवीपालः। (पृथायाः अपत्यं पुमान्। अश्वादित्वादण्।) पृथापुत्रः। (यथा, महाभारते। ३। २३५। १।

"सरस्तदासाद्य वनञ्च पुण्यं
ततः परं किमकुर्व्वन्त पार्थाः॥"

अर्জ্জुनः। यथा, भगवद्गीतायाम्। १। २५।

"उवाच पार्थ! पश्यैतान् समवेतान् कुरूनिति॥")

अर्জ্জुनश्चः। इति शब्दचन्द्रिका॥

पार्थक्यं, क्ली, (पृथक्+भावे ष्यञ्।) पृथक्त्वम्। पृथक् इत्यस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम्॥ ("घटप्रदीपवद् व्यञ्ययञ्जकयोः पार्थक्यमेव॥" इति साहित्यदर्पणम्॥)

पार्थवं, क्ली, (पृथोर्भावः। पृथु+अण्।) पृथुता। पृथोर्भावः इति भावार्थे ष्यञ्प्रत्ययनिष्पन्नम्॥ (पृथनामा राजा तस्येदमित्यण्। पृथुराजसम्बन्धिनि, त्रि। यथा, भागवते।१। ३। १४।

"ऋषिभिर्याचितो भेजे नवमं पार्थवं वपुः॥")

पार्थिवं, क्ली, (पृथिव्या विकारः पृथिव्यां भवमिति वा अण्।) तगरपुष्पम्। इति राजनिर्घण्टः॥

पार्थिवः, पुं, (पृथिव्या ईश्वरः।) पृथिवी+"तस्येश्वरः।" ५। १। ४२। इति अण्।) राजा। इत्यमरः॥ (यथा, मनुः। २। १३६।

"तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ।
राजस्नातकयोश्चैव स्नातको पृथमानभाक्॥"

वत्सरविशेषः। यथा,—

"बहुशस्यानि जायन्ते सर्व्वदेशे सुलोचने।
सौराष्ट्रलाटदेशे च पार्थिवे नात्र संशयः॥"

इति चिन्तामणिधृतवचनम्॥

पृथिव्या अयं इत्यण्।) शरावः। इति त्रिकाण्डशेषः॥ (पृथिव्या विकार इति। "सर्व्वभूमिपृथिवीभ्यामणञौ।" ५। १। ४१। इत्यण्।) पृथिवीविकृतौ, त्रि। इति मेदिनी॥ (यथा, भागवते। १। २। २४।

"पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः॥"

पृथिव्या निमित्तं संयोग उत्पातो वा॥

पृथिवीसम्बन्धिनि, त्रि। यदुक्तम्।

"मधुमत् पार्थिवं रजः॥")

पार्थिवी, स्त्री, (पृथिव्यां भवा। "दित्यदितीति।" ४। १। ८५। इत्यस्य सूत्रस्य वार्त्तिके "पृथिव्या आञौ।" इत्युक्तेरञ्। ततो ङीप्।) सीता। इति मेदिनी। वे, ४३॥

पार्परः, पुं, यमः। इति जटाधरः॥

पार्व्वणः, पुं, (पर्व्वणि ग्रहणयोग्यः इत्यण्।) ग्रहविशेषः। इति शब्दचन्द्रिका॥ (पर्व्वणि क्रियते यत् तत्।) अमावस्यापर्व्वसामान्ययोः कर्त्तव्यश्राद्धम्। यथा,—

"अमावस्यां यत् क्रियते तत् पार्व्वणमुदाहृतम्।
क्रियते पर्व्वणि वा यत्तत् पार्व्वणमुदाहृतम्॥"

इति भविष्यपुराणम्॥

पर्व्वणि यत् क्रियते इत्यनेनामावास्यायाः पर्व्वत्वात्तच्छ्राद्धस्य वैदिकप्रयोगाधीनयौगिकत्वेन पार्व्वणत्वप्राप्तौ अमावास्यायां पृथगभिधानं तदमावास्याश्राद्धस्य रूढित्वार्थं तेन पार्व्वणेन विधानेनेत्यादौ यौगिकनानावयवशक्त्यपेक्षया एकस्याः समुदायशक्तेर्लघुत्वात् अमावास्यापार्व्वणातिदेशो लभ्यते न तु पूपाष्टकादिपार्व्वणधर्म्मातिदेशः।" इति आह्निकतत्त्वम्॥*॥

सामगानां तस्य प्रयोगो यथा,—

"विप्राप्राप्ता आह्निकतो सुखार्थं क्रमसूचनम्।
आह्निकपूर्व्वदिने मांसस्त्रीत्यागश्चैकभोजनम्॥
आह्नाहे दन्तकाष्ठस्य त्यागः स्नानं तथोषसि।
याम्यास्यत्वं पादशौचे वाक्यर्चा विष्णुचिन्तनम्॥
तत्रैव पूजा मूलादानं परभूस्वामिनेऽथवा।
तत् पित्रभ्यश्चाग्रदानं रत्नादीपकुशद्विजाः॥
आह्वानुज्ञा च गायत्री देवताभ्य इति त्रिधा।
दर्भजलप्रोक्षणं रत्नाजलस्थापनमेकतः॥
पूर्व्वं विप्रकरे तोयं कुशासनमनन्तरम्।
दत्त्विशे देवविप्रस्य पित्रविप्रस्य वामतः॥
आवाहनार्घे न्युब्जश्च ततो गन्धादिपञ्चकम्।
ऐशानीक्रमतो रेखा प्रागग्रा देवमण्डले॥
नैर्ऋतीक्रमतो रेखा दक्षाग्रा पित्रमण्डले।
पात्राणां तेषु विन्यासो होमप्रक्षोऽग्निहोमकः॥
हुतशेषप्रदानञ्च पात्रालम्भोऽन्नवेक्षणम्।
इदमित्यङ्गुले: क्षेपस्तूष्णीं देवे यवस्य च॥
पित्रे मन्त्रेण निःक्षेपस्त्रिलस्यापहृता इति।
मधुनोऽन्ने च निःक्षेपो गायत्र्याश्चार्च्चपस्ततः॥
मधुवाता ऋचा चैव मधुशब्दत्रयेण च।
अन्नाभिमन्त्रणं तस्य दानं जलनिवेदनम्॥
गायत्र्यादित्रिकजपोऽप्यन्नहीनजपस्तथा।
द्विजाभावेऽपि तत्रार्थे गायत्र्यादित्रिकस्य च॥
पुण्याख्यानस्य च जपः सतिलप्रोक्षिते कुशे।
अग्निदग्धेतिमन्त्राभ्यां सतिलान्ननिवेदनम्॥
हस्तप्रक्षालनाचमनं हरिस्मृतिर्जलस्य च।
पित्रादिक्रमतो दानं गायत्र्यादिजपः पुनः॥
शेषान्नपिण्डयोः प्रश्नो निरूप्यमीति च मण्डले।
अपहतानिरूप्यभ्यां रेखायुग्मं पित्रक्रमात्॥
आसनो देवतेत्यस्य जप आवाहनं तिलैः।
अवनेजनदानञ्च मधुवाता मधुत्रयम्॥
अर्घ्यन्नमो पिण्डदानं दर्भक्षेपापघर्षणम्।
आचमनं स्मृतिर्विष्णोः पात्रप्रक्षालावनेजनम्॥
अत्रेत्यादिजपो वामावर्त्तनोदङ्मुखस्थतः।
आवृत्त्यामीजपश्चैव श्वासत्यागोऽञ्जलिस्थतः॥
नम इत्यादिकजपो वासोदानञ्च पूजनम्।
वसन्ताय जपश्चैव द्विजाग्र्यभूमिसेचनम्॥
दैवादिब्राह्मणे दानं जलादित्रितयस्य च।
शिवा इत्यादिनाक्षय्यमघोरा गोत्रमित्यपि॥
सपवित्रकुशाः पित्रे स्वधावाचनमर्জ্জनम्।
आघ्राणञ्चैव पिण्डानां तेषामुत्तोलनन्ततः।
न्युब्जोत्थानं पितुः पत्न्या दक्षिणादानमग्रतः॥
विश्वे देवाश्च प्रीयन्तां देवे वा जलमित्यपि।
विसर्জनं वाज इति आमावेति प्रदक्षिणम्॥
अन्यत् सर्व्वं समानम्।" इति आह्निकप्रयोगतत्त्वम्॥

पार्व्वतः, पुं, (पर्व्वते भवः। "विभाषा मनुष्ये।" ४। २। १४४। इति पर्व्वते अण्।) महानिम्बः। इति रत्नमाला॥ घोड़ानिम् इति भाषा॥ (अश्वविशेषः। यथा, महाभारते। १। १३६। २०।

"भौमेन प्राविशद्भूमिं पार्व्वतेनाभवद्गिरिः॥")

पर्व्वतसम्बन्धिनि, त्रि॥ (यथा, महाभारते। १। ६०। १०।

"यावत् पृथिव्यां विहितं गवाश्वं
सहारण्यैः पशुभिः पार्व्वतैश्च॥")

पार्व्वती, स्त्री, (पर्व्वतो हिमाचलस्तस्य तदधिष्ठातृदेवस्येति भावः अपत्यमिति। अण् ङीप् च।) दुर्गा। इत्यमरः॥ तस्या व्युत्पत्तिर्यथा,—

"तिथिभेदे कल्पभेदे पर्व्वभेदप्रभेदतः।
ख्यातौ तेषु च विख्याता पार्व्वती तेन कीर्त्तिता॥
महोत्सवविशेषेषु पर्व्वस्विति प्रकीर्त्तितम्।
तस्याधिदेवी या सा पार्व्वती परिकीर्त्तिता॥
पर्व्वतस्य सुता देवी साविर्भूता च पर्व्वते।
पर्व्वताधिष्ठातृदेवी पार्व्वती तेन कीर्त्तिता॥"

इति प्रकृतिखण्डे दुर्गोपाख्याने ५४ अध्यायः॥

ग्रन्थकी। गोपालपुत्रिका। इति मेदिनी॥ द्रौपदी। जीवनी। इति विश्वः॥ सौराष्ट्रमृत्तिका। इति रत्नमाला॥ क्षुद्रपाषाणभेदः। धातकी। सैंहली। इति राजनिर्घण्टः॥

पार्व्वतीनन्दनः, पुं, (पार्व्वत्या नन्दनः।) कार्त्तिकेयः। इत्यमरः। १। १। ४२॥

पार्व्वतीयकुमारः, पुं, (पार्व्वतीयः पार्व्वतीजातः कुमारः।) पार्व्वतीपुत्रः। यथा,—

"स्वानुशाखविशाखाश्च नैगमेयस्यैव च।
पार्व्वतीयाः कुमाराश्च चत्वारः परिकीर्त्तिताः॥"

इत्यग्निपुराणम्॥

पार्व्वतेयं. क्ली, (पर्व्वते भवम्। पर्व्वत+ढक्।) सौवीराञ्जनम्। इति शब्दचन्द्रिका॥

पार्व्वतेयः, पुं, (पर्व्वते भवः। पर्व्वत+ढक्।) सूर्य्यावर्त्तवृक्षः। इति रत्नमाला॥ खलसिया इति भाषा। पर्व्वतजाते, त्रि॥

पार्ष्णवः, पुं, (पर्ष्णुना आयुधेन जीवतीति। पर्ष्णु+"पर्ष्वादिर्यौधेयादिभ्योऽञौ।" ५।३।११७। इति अण्।) पर्ष्णुधारियोद्धा। पर्ष्णुना युध्यते इत्यर्थे व्याप्रत्ययनिष्पन्नः॥

पार्श्वं, क्ली, पुं, (स्पृश्यते इति। स्पृश+"स्पृशेः श्वश्पुनौ च।" उणा ५।२७। इति श्वश् च-आदेशश्च।) कक्षाधोभागः। इत्यमरः।२।६। ७६॥ पाश्च इति भाषा॥ (यथा, सुश्रुते चिकित्सितस्थाने। ३६ अध्याये।

"तिर्य्यक् प्रतिहिते नेत्रे तथा पार्श्वावपीड़िते॥"

यथा, भट्टिकाव्यस्य १ अङ्के।

"न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रघु-
जनात्॥")

पार्श्वं, क्ली, (स्पृश+श्वश् धातोः। ऋ-आदेशश्च।) चक्रोपान्तम्। (पर्ष्णूनां समूहः। अण्।) पर्ष्णुगणः। पार्श्वास्त्रिसमूहः। इति मेदिनी॥ (अनृजुरुपायः। इति सिद्धान्तकौमुदी॥)

पार्श्वः, पुं, जिनः। (अयमेव जैनागमोक्तत्रयोविंशतीर्थङ्करः। अस्य पिता विश्वसेनः माता च ब्रह्मी। यदुक्तं पार्श्वनाथचरित्रे। १०। ७१।

"श्रीलश्रीपार्श्वतीर्थेशो विश्वसेनगृहालये।
ब्रह्मीगर्भे जगन्नाथोऽवतरिष्यति सुक्षणे॥"

तथा च तत्रैव। ११। ३६।

"विश्वसेनपतेर्ब्रह्मा: सद्गर्भेऽवतरिष्यति।
श्रीपार्श्वनाथ एवाद्यतीर्थकर्त्ता जगद्गुरुः॥"

हेमचन्द्राचार्य्यादिमते तु अस्य पितृनाम अश्वसेनः मातृनाम वामा॥ *॥

अस्य जन्मकालादिर्यथा तत्रैव। ११।४५—४६, ६६—६७।

"वैशाखकृष्णपक्षस्य द्वितीयायां निशात्यये।
विशाखर्क्षे सुखमादौ सुमुहूर्त्ते सुरेश्वरः॥
अवतीर्य्य दिवश्च्युत्वा भुक्त्वा भोगान् सुनिर्म्मले।
राज्ञ्या गर्भे निरौपम्ये गुहस्फाटिकसन्निभे॥"

"नवमे मासि संपूर्णे पौषे मासि दशोदयात्।
लग्नपत्तेनिजे योगे शुभे एकादशीतिथौ॥
शुभलग्नमुहूर्त्तादौ सुखेनातिसुखेन सा।
सती देवकुमारीभिः सेव्या तीर्थङ्करं सुतम्॥"

बाल्यकाले एवास्य वैराग्योत्पत्तिर्जाता। ततोऽसौ संसारासक्तिं तुच्छीकृत्य गृहादिकं विहाय वनं प्रस्थितवान्। एतत्प्रचलितमतं यथा, तत्रैव। १४। ७८—६०।

"मिथ्यात्वेनाविरत्या च प्रमादेन कषायतः।
दुष्टयोगेन मूढानां महापापं प्रजायते॥
पचाग्निसाधनेनैव पृथिव्यादिशिराग्रयः।
म्रियते षड्विधः सर्व्वदित्थं तापसो भ्रूणम्।
जीवघातेन घोराघं तस्य पाकेन दुर्गतिः।
जायते च महद्दुःखं तापसानां जड़ात्मनाम्॥
ज्ञानहीनो वपुःक्लेशो व्यर्थः पाषाग्रवाहिनाम्।
दयां विना तपो धर्म्मः सर्व्वमस्ति निरर्थकम्॥
तुषखण्डनयोगेन लभ्यन्ते तण्डुला यथा।
न तथा ज्ञानकष्टेन मोक्षमार्गादयः क्वचित्॥
यथाम्बुमथनान्नैवोत्पद्यते जातुचिद्घृतम्।
तथा हिंसाकरैर्योगैस्तपसान्न सुखादि च॥
अचान्यान्नाद्यथा स्वर्गं गोरङ्गाच्च पयो न हि।
जायते जातु धर्म्मो वा सुखं पचाग्निसाधनात्॥
दावभीत्या यथान्धो धावन्नपि म्रियते यथा।
कुर्व्वन्नपि तपो ज्ञानी मज्जत्येव भवार्णवे॥
हेयाहेयविचारश्च पुण्यपापं हिताहितम्।
देवादेवं भवं मोक्षं स्वाश्रवं संवरं शुभम्॥
निर्ज्जरा तत्त्वविज्ञानं गुरुं चक्रुर्गुरुं शुभम्।
कुग्राहं वेत्ति नज्ञानी जात्यन्ध इव दन्तिनम्॥
अतो जैनमतं तथ्यं धर्म्मजीवदयावहम्।
तपोनाथं गृहाण त्वं त्यक्त्वेमच्च दुराग्रहम्॥
नैयत्यतपसा मोक्षः सुखं वाचामगोचरम्।
अज्ञानं तपसा दुःखं भ्रमणञ्च भवाटवौ॥
भवत्स्नेहेन तथ्यं ते हितञ्च धर्म्मसाधनम्।
वचः प्रोक्तं मयेति त्वां ह्यीच्छता शुभमञ्जसा॥"

तत्प्रचलितानुप्रेक्षादिमतं तत्रैव १५ अध्याये विशेषतो द्रष्टव्यम्॥ *॥

जैनग्राह्योक्ततत्त्वादीनि यथा, तत्रैव २० अध्याये।

"शृणु तत्त्वं गणाधीश। सार्द्धं द्वादशभिर्गणैः।
तत्त्वादीनि प्रवक्ष्येऽहं स्वैकचित्तेन संप्रति॥
जीवादिसत्पदार्थानां याथार्थ्यं तत्त्वमिष्यते।
सम्यग् जैनागमे तत्त्वं विद्धि नान्यत् कुग्रासने॥
जीवाजीवास्रवबन्धः संवरो निर्ज्जरा शिवः।
इत्युक्तानि जिनाधीशैः सप्त तत्त्वानि चागमे॥
संसारिमुक्तभेदेन द्विधा जीवा भवन्त्यहो।
मुक्ता भेदविनिष्क्रान्ता अनन्तगुणभाजनाः॥
भव्याभव्यप्रभेदेन द्विधा संसारिणोऽङ्गिनः।
त्रसस्थावरभेदेन वा मुक्तिभवे गामिनः॥
एकाक्षा विकलाक्षाः पञ्चाक्षाश्चेति ते मताः।
देवनारकतिर्य्यग्नृभेदा इति चतुर्व्विधाः॥
एकद्वित्रिचतुःपञ्चेन्द्रियभेदाच्चपञ्चधा।
पृथ्वम्भोजोमरुद्वृक्षत्रसभेदात् षड़ङ्गिनः॥
संज्ञिनोऽसंज्ञिनोद्वाक्षाद्या हि चतुरिन्द्रियाः।
एकाक्षा बादराः सूक्ष्माः सप्रतीत्यङ्गिराशयः॥
पर्य्याप्तेतरभेदेन ताः सप्त जीवयोनयः।
गुणिता अखिला जीवसमासाः स्युश्चतुर्दश॥
अष्टधा धातवो बादरसूक्ष्मेण चतुर्व्विधा।
नित्येतरनिकोता हि विकलत्रयदेहिनः॥
संज्ञिनोऽसंज्ञिनः सुप्रतिष्ठिताः अप्रतिष्ठिताः।
इति संसारिणो जीवभेदा एकोनविंशतिः॥
ते पर्य्याप्तेतरालब्धिपर्य्याप्तैर्वर्गिता भुवि।
सर्व्वे जीवसमासाः सप्तपञ्चाशत्प्रमा मताः॥
स्थावराश्च द्वित्रिचतुरिन्द्रियभेदाः सुरनारकाः।
द्विधापञ्चाक्षतिर्य्यञ्चस्तुर्भिरङ्गैस्त्रिसप्ततिः॥
नवधा मानवाश्चैव नवधा विकलाङ्गिनः।
इति जीवसमासाः स्युरष्टानवतिसंख्यकाः॥
पृथ्वम्भोजःसमीरा अप्यधा बादरसूक्ष्मताः।
नित्येतरनिकोताश्चतुर्द्धा बादरसूक्ष्मतः॥
निकोतसहितास्त्रद्रहिताः प्रत्येककायिनः।
एकत्र मेलिता एते सर्व्वे भेदाश्चतुर्दश॥
एकाक्षा गुणिताःस्तेद्वित्रिचतुरिन्द्रियत्रमाः स्फुटम्।
पर्य्याप्तकेतरालब्धिपर्य्याप्तैः स्युर्व्विनागमे॥
द्विप्रकाराः सुराः स्युः पर्य्याप्तापर्य्याप्तभेदतः।
तथा च नारको ज्ञेयो द्विधा दुःखाब्धिमध्यगः॥
जलस्थलनभश्चारिणः संज्ञासंज्ञिभेदतः।
षड़्विधा गर्भजा जीवाः पञ्चेन्द्रियसमाह्वयाः॥
भोगभूमिभवा जीवा द्विधा स्थलखगामिनः।
ते सर्व्वे मेलिता अष्टभेदाश्च गुणिताः पुनः॥
पर्य्याप्तेतरभेदाभ्यां षोड़शैव भवत्यपि।
संज्ञासंज्ञित्वभेदाभ्यां जलस्थलखचारिणः॥
षड़्वासन्मूर्च्छिनास्ते पर्य्याप्तियुक्तास्तथेतराः।
भवन्त्यलब्धिपर्य्याप्ताः प्रत्येकं किलाङ्गिनः॥
लब्धा एकत्र ते सर्व्वे भेदा अष्टादशप्रमाः।
गर्भसम्मूर्च्छिताः सर्व्वे स्युश्चतुस्त्रिंशद्विधाङ्गिनः॥
आर्य्यम्लेच्छभवा भोगकुभोगभूमिजा नराः।
अष्टभेदा मता वै पर्य्याप्तापर्य्याप्तभेदतः॥
सम्मूर्च्छिनो मनुष्या अलब्धिपर्य्याप्तसंज्ञकाः।
इति विश्वे भवन्त्यत्र नव भेदा नृयोनिजाः॥
पर्य्याप्तादित्रिभेदेन गुणिता विकलाङ्गिनः।
नवधा श्रीजिनैः प्रोक्ता ज्ञाननेत्रैर्व्वरागमे॥
अष्टानवतिरेते जीवसमासा विचक्षणैः।
विज्ञेया यत्नतस्तेषां दया कार्य्या सुसुज्ञुभिः॥
भूरोदकाग्निवाताख्या नित्येतरनिकोतकाः।
सप्तसप्तपृथग्लक्षाश्च वनस्पतयो दश॥
द्वित्रिचतुर्ज्ञेन्द्रिया द्वौ द्वौ लक्षौ देवाश्च नारकाः।
पञ्चेति हि चतुर्लक्षाश्चतुर्दशनृजातयः॥
चतुरशीतिलक्षा इमा जीवजातयोऽखिलाः।
रक्षणीया प्रयत्नेन ज्ञात्वा दक्षैः स्वमुक्तये॥
कोटीकोटीकानवनवतिलक्षाश्च कोटयः।
सत्पञ्चाशत्सहस्रा इत्यखिलाङ्गिकुलान्यपि॥
जीवितः प्रागनादौ हि जीविष्यति पुनः सदा।
जीवत्ययं ततस्तज्ज्ञो जीवद्रव्यं किलोच्यते॥
अक्षजाः पञ्च च प्राणा मनोवाक्कायतस्त्रयः।
आयुरुच्छ्वासनिश्वासौ दशेति संज्ञिनां मताः॥
असंज्ञिनां नवस्युस्ते विनात्र मनसाखिलाः।
चतुरेन्द्रियजीवानां त्वक्श्रौ कर्णैर्विना स्मृताः॥
त्रीन्द्रियाणां विना चक्षुः सप्त प्राणाः प्रकीर्त्तिताः।
द्वीन्द्रियाणां हि षट्प्राणाः कथिता नासिकां विना॥
सुखवाग्भ्यां विनैकाक्षाणां प्राणाः स्युश्चतुःप्रमाः।
यथायोग्यमपर्य्याप्तानां ज्ञेयास्ते जिनागमे॥
आहाराङ्गेन्द्रियोच्छ्वासनिश्वासवाक्यचेतसः।
षड़्वा पर्य्याप्तयश्चेति विज्ञेया संज्ञिदेहिनाम्॥
विकला संज्ञिनां पञ्चपर्य्याप्तयो मनो विना।
चतुःपर्य्याप्तयो ज्ञेया एकाक्षाणां वचो विना॥
निश्चयेन भवेत् केवलज्ञानदृग्मयोऽसुमान्।

अनन्तसुखवीर्याढ्यसिद्धसाङ्घ्य एव हि ॥
व्यवहारेण मिथ्यादिविभावगुणसंयुतः ।
नवादिदृग्नयैर्युक्तः प्राणी कर्मकृतैः कलौ ॥
मूर्तपुद्गलसंयोगान्मूर्त्तो गीर्यवहारतः ।
अमूर्त्तो निष्कलः शुद्धो ज्ञानमूर्त्तिश्च निश्चयात् ॥
व्यवहारे नयेनाङ्ग्युपचारस्वधात्मना ।
कर्मणो कर्मणां कर्त्ता भोक्ता तत्फलमञ्जसा ॥
उपचारस्वधानान्ना नयेन प्राणभृद्भुवि ।
कटवस्त्रगृहादीनां कर्त्ता च शिल्पिकर्मणाम् ॥
अशुद्धनिश्चयेनाङ्गी कर्त्ता च भावकर्मणाम् ।
रागद्वेषमदोन्मादशोकादिविषयात्मनाम् ॥
प्राक्पुस्त्यजनान्मृत्यु: प्रादुर्भावाद्यसम्भव: ।
द्रव्यरूपेण नित्यत्वं चतुर्गतिषु देहिनाम् ॥
जायतेऽतो गणाधीशैरुत्पादव्यय एव च ।
ध्रौव्यभावोऽत्र संप्रोक्त: सर्वेषां व्यवहारत: ॥
कायप्रमाण आत्मायं पर्यायनयत: क्वचित् ।
युक्त: प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् ॥
विना सप्तसमुद्घातैर्निश्चयेन भवेत् पुन: ।
कर्मोत्पन्नाङ्गहीनाङ्गी ह्यसंख्यातप्रदेशभृत् ॥
वेदनाख्य: कषायाख्यो विकुर्वणसमाह्वय: ।
मारणान्तिकसंज्ञस्तैजसाहारकसंज्ञकौ ॥
केवलाख्य: समुद्घाता: समेति श्रीजिनैर्मता: ।
केवल्यतैजसाहारायोगिनां स्यु: परेऽङ्गिनाम्
पुण्यपापफलानां हि विविधानां चतुर्गतौ ॥
धर्माधर्मैककरणां प्राणी भोक्ता व्यवहारत: ॥
स्वस्वरूपस्य कर्त्ता शुद्धनिश्चयनयादसौ ।
जन्ममृत्युजरातीतो न कर्त्ता बन्धमोक्षयो: ॥
अतोऽत्रात्माप्यसौ ध्येयो निर्विकल्पपदाश्रितै: ।
गुणै: सिद्धेन सादृश्यो ज्ञानमूर्त्तिरमूर्त्तिमान् ॥
यथाग्निकणिकैकोऽत्र दह्यन्ते काष्ठराशय: ।
अनन्तकर्मकाष्ठानि तथाध्यानलवाग्निना ॥
दन्तभग्नो यथा नागो दंष्ट्राभग्नोऽमलो हरि: ।
स्वकार्ये च तथा ध्यानहीन: कर्मारिघातने ॥
चिन्तामणिश्च रत्नानां कल्पवृक्षोऽत्र शाखिनाम् ।
चिदज्ञानां यथा शुक्रो नृणां मध्ये परो जिन: ॥
आत्मतत्त्वं च तत्त्वानां पदार्थानां तथा महान् ।
स्वकीयात्मपदार्थो द्रव्याणां स्वद्रव्य एव हि ॥
इति मत्वा स्वसंसिद्ध्यै मन: कृत्वातिनिश्चलम् ।
विषयेभ्यो विनिष्क्रान्तं संवेगादिगुणाङ्कितम् ॥
सर्वद्रव्यबहिर्भूतोऽप्यनन्तगुणसागर: ।
सर्वावस्थासु सर्वत्र स्वात्मा ध्येयो मुमुक्षुभि: ॥
इत्यात्मतत्त्वमाख्याय तीर्थनाथो गणान् प्रति ।
मार्गणादिकमाख्यातुं प्रारेभे मार्गसिद्धये ॥
गतिरिन्द्रियकायौ हि योगवेदकषायक: ।
ज्ञानसंयमदृग्लेश्याभव्यसम्यक्त्वसंज्ञिन: ॥
आहारे मार्गणास्वेति चतुर्दश निरूपिता: ।
जिनैस्तासु बुधैर्मृग्यो जीवतत्त्वो महाश्रिदे ॥
मिथ्यात्वासादनौ मिश्रो विरताख्यश्चतुर्थक: ।
देशाविरताख्य: प्रमत्तोऽप्रमत्तसंज्ञक: ॥
अपूर्वकरणो नाम्ना निवृत्तिकरणाभिध: ।
सूक्ष्मसाम्परायोऽप्युपशान्तक्षीणकषायका: ॥
सयोग्ययोगिनामानौ सद्गुणाश्रयणादिमे ।
चतुर्दशजिने: प्रोक्ता गुणस्थानगुणाकरा: ॥
सूक्ते: सोपानमाला एते भव्यानां जिनोदिता: ।
अभव्यानां किलैको मिथ्यागुणस्थानगाश्वत: ॥
हीनाधिकगुणैर्युक्ता अन्येष्वास्तेषु धीयुते: ।
गुणानां स्थानकेष्वङ्गिन: परीक्ष्य गुणव्रजै: ॥
इत्यादिवाक्सुधापूरैराप्ताश्च निखिलां सभाम् ।
अजीवतत्त्वमाख्यातुं पुनरारब्धवान् प्रभु: ॥
पुद्गलो बहुधा धर्मोऽधर्म आकाश एव हि ।
कालश्चेति जिनै: प्रोक्तो जीवद्रव्योऽत्र षड्धा ॥
पूरणाद्गलनाद्वृत्तै: पुद्गलोऽयं निरूपित: ।
मूर्त्तोऽनेकविध: सार्थनामक: कर्मदेहकृत् ॥
अष्टौ स्पर्शा रसा: पञ्च वर्णा: पञ्च गन्धौ द्विधा ।
इति विंशतिरत्रैव गुणा: प्रोक्ता द्विधात्मका: ॥
शुद्धागौर्येगुणा: शुद्धा मता: स्वाभाविकाश्च ते ।
गुणा: स्कन्धेषु ये शुद्धा विभवाख्या हि ते बुधै: ॥
अणुस्कन्धविभेदेन पुद्गलस्य द्विधा स्थिति: ।
स्निग्धरूक्षमयाणूनां सङ्घात: स्कन्ध उच्यते ॥
अणव: कार्यलिङ्गा: स्युरेकैकेतरयाखिला: ।
नित्या द्रव्यार्थिकेनानित्या: पर्यार्थिकेन च ॥
सूक्ष्मसूक्ष्मास्तथा सूक्ष्मा: सूक्ष्मस्थूलाभिधा: परे ।
स्थूलसूक्ष्मात्मका: स्थूला: स्थूलस्थूलाश्च पुद्गला: ॥
एकोरुण: सूक्ष्मसूक्ष्म: स्यादृश्यो नयनैर्नृणाम् ।
सूक्ष्मास्तेऽपि मता: सद्भिर्ये कर्ममयपुद्गला: ॥
रसनस्पर्शनघ्राणश्रोत्रैर्ये यान्ति पुद्गला: ।
व्यक्तान्ते समुद्दिष्टा: सूक्ष्मस्थूला जिनागमे ॥
स्थूलसूक्ष्मा जिनैर्ज्ञेयाश्चाक्षाण्योत्क्षातपादय: ।
जलच्छायादय: स्थूला उच्यन्ते पुद्गला बुधै: ॥
भूकाष्ठाद्रिविमानादय: स्थूलस्थूलपुद्गला: ।
षड्भेदा इति तीर्थेशै: पुद्गला हि निरूपिता: ॥
सूक्ष्मो बन्धस्था सूक्ष्म: स्थूल: संस्थानसंज्ञक: ।
भेदस्तमस्तथाच्छायाद्युद्योतातपादय: ॥
एते पुद्गलपर्याया विभावाख्या मता जिनै: ।
स्वाभाविकाश्च पर्याया अगुरूपा: पृथक् पृथक् ॥
शरीरवाङ्मन:प्राणापानदु:खसुखादिकान् ।
कुर्वन्ति पुद्गला जीवानां स्युर्जीवितादिकान् ॥
जीवपुद्गलयो: साद्यकर्त्ता जिनैर्मतो गतौ ।
अमूर्त्तो निष्क्रियो धर्मो मत्स्यानाश्च यथा जलम् ।
सहकारी मतो धर्म: स्थितौ पुद्गलजीवयो: ।
अमूर्त्तो निष्क्रियो नित्यो यथा च्छायाध्वगामिनाम् ॥
लोकालोकविभेदेन द्विधाकाशस्वमूर्त्तिमान् ।
अवकाशप्रद: सर्वद्रव्याणां निष्क्रियोऽक्षय: ॥
पदार्था यत्र लोक्यन्ते लोकाकाशो मतो हि स: ।
तस्माद्बहिरनन्तोऽप्यलोकाकाशोऽस्ति केवल: ॥
धर्माधर्मैकजीवानां लोकाकाशस्य सन्ति च ।
असंख्याता: प्रदेशा हि पुद्गलानामनेकधा ॥
निश्चयव्यवहारेण द्विधा कालोऽतिनिष्क्रिय: ।
द्रव्याणां सहकारी परिणतौ मूर्त्तिवर्जित: ॥
समयादिमय: कालो व्यवहारोऽत्र लक्ष्यते ।
गोदोहादिक्रियाद्यै: परत्वापरत्वयोगत: ॥
भिन्नाभिन्नाश्रवो येऽत्र लोकाकाशे सुसंस्थिता: ।
राशयस्त्वेव रत्नानां स कालो निश्चयाभिध: ॥
एकत्र सह जीवेन षड्द्रव्या मुनिभि: स्मृता: ।
ते कालेन विना ज्ञेया: पञ्चास्तिकायसंज्ञका: ॥
पुद्गलौघो य आयाति कर्मरूपोऽत्र रागिण: ।
द्रव्यभावविभेदेन द्विधा स आश्रवो भवेत् ॥
रागद्वेषादियुक्तेन परिणामेन येन हि ।
आश्रवन्त्यत्र कर्माणि स स्याद्भावाश्रवोऽङ्गिनाम् ॥
मिथ्यात्वपञ्चकं द्वादशाधा विरतयोऽशुभा: ।
प्रमादा हि चतुस्त्रैव योगा: पञ्चदशात्मका: ॥
सर्वदु:खाकरीभूता: कषाया: पञ्चविंशति: ।
एतेऽत्र प्रत्यया ज्ञेया भावाश्रवनिबन्धना: ॥
आयाति कर्मरूपेण पुद्गलौघोऽत्र योगिन: ।
द्रव्याश्रव: स विज्ञेयोऽप्यनन्तभवकारक: ॥
ध्यानाद्यैराश्रवो रुद्धो यैस्ते मुक्तिवल्लभा: ।
अन्यथा विफलक्लेशस्तपोदत्तादित: सताम् ॥
संश्लेषो जीवकर्मणोर्य: सम्बन्धो द्विधा मत: ।
भावद्रव्यप्रभेदेन विश्वाशर्माकरोऽशुभ: ॥
बध्यन्ते येन भावेन रागादिदूषितेन हि ।
कर्माणि भावबन्धोऽत्र सोऽनन्तसंसृतिप्रद: ॥
प्रकृतिस्थितिबन्धानुभागप्रदेशतोऽङ्गिनाम् ।
चतुर्धा बन्ध आम्नातोऽनेकविक्रियाकर: ॥
प्रकृति: स्वभाव: स्याच्च स्थिति: कालावधारणम् ॥
रसतुल्योऽनुभाग: प्रदेशो जीवप्रदेशयुक् ॥
सप्रकृतिप्रदेशाख्यौ बन्धौ च योगतो सताम् ।
स्थित्यनुभागबन्धौ कषायैर्भवनिबन्धनौ ॥
यथा बन्धनबन्धो लभते दु:खमनेकश: ।
कर्मभिर्जीवबद्धोऽपि तथा स्वभावादुर्गतौ ॥
सर्वाश्रवनिरोधो यो ध्यानाद्यैर्द्रव्यभावत: ।
स द्विधा संवर: प्रोक्त: स्वर्मुक्त्यादिकारक: ॥
चैतन्यपरिणामो य एकीभूतो निजात्मक: ।
निर्विकल्पमयो ज्ञेयो भावसंवर एव स: ।
त्रयोदशविधं वृत्तं परो धर्मो दशात्मक: ।
द्विषड्भेदा अनुप्रेक्षा: परीषहजयोखिल: ॥
पञ्चधा संयमो ध्यानश्रुतास्तासंयमादय: ।
भवन्त्यमी सतां सर्वे भावसंवरकारणम् ।
निरोध: क्रियते योऽत्र कर्मणां यत्नतो बुधै: ।
सद्रव्यसंवर: प्रोक्तोऽप्यनन्तगुणसागर: ॥
संवरेण स्वयं ज्ञेय दत्तेऽत्रालिङ्गनं सुदा ।
सतां स्वस्त्रीव मुक्तिश्रीर्नान्यथा क्लेशकोटिभि: ॥
प्राक्तन: कर्मबन्धो य: कालेन तपसाथवा ।
क्षीयते निर्जराभासविपाकेन रता द्विधा ॥
कर्मपाकेन या जाता सविपाकाखिलात्मनाम् ।
सापभाजनिता हेया परकर्मनिबन्धना: ॥
संवरेण समयात्र निर्जरा क्रियते बुधै: ।
तपोभि: साविपाका प्रादेयानेकसुखाकरा ॥
निर्जराकर्मणामत्र जायतेऽपि यथा यथा ।
आयाति निकटं मुक्तिस्तत्कारिणां तथा तथा ॥
अत्यन्तं योऽत्र विश्लेष: कर्मात्मनो स्वयोगिनाम् ।
काललब्धा स मोक्ष: स्यात् द्रव्यभावद्विधात्मक: ॥
क्षये हेतुर्वरो य: परिणामोऽखिलकर्मणाम् ।

भावमोक्षः स विज्ञेयः कर्म्ममोक्षनहेतुकृत् ॥
समस्तकर्म्मदेहादेर्वात्मा जायते पृथक् ।
तदेव द्रव्यमोक्षः स्यादनन्तगुणदायकः ॥
आपादमस्तकान्तं यथा वह्नौ बन्धनैर्दृढैः ।
मोचनाल्लभते सौख्यं तथा मुक्तो विधेः क्षयात् ॥
तस्मात् कर्म्मातिगो जीव एरण्डादिकबीजवत् ।
समयेन व्रजेदूर्द्धं यावल्लोकाग्रमस्तकम् ॥
तत्रैवास्यानिराबाधः मोक्षे गमनवर्जितः ।
निर्द्वो धर्म्मोऽस्ति कायाभावादनन्तसुखा-
श्रितः ॥
तत्र मुक्तो निराबाधं स्वात्मजं विषयातिगम् ।
दृष्ट्वा दृष्टासयेतं स सिद्धः शुद्धो महान् सुखम् ॥
दुःखानीतं निरौपम्यं प्राप्तं शाश्वतं सुखमव्ययम् ।
अनन्तं परमं ह्यन्यद्दृष्टानपेक्षमेव हि ॥
यद्देवमनुजैः सर्व्वैः सुखं त्रैलोक्यगोचरम् ।
मुक्तं तस्मादनन्तं तज्जायते परमेष्ठिनाम् ॥
एकेन समयेनैव भूषितानां गुणाष्टकैः ।
नित्यानामशरीराणां सल्लोकिकं क्षयच्युतम् ॥
इति विविधविभागैः सप्ततत्त्वानि सूक्ष्मै-
र्जगवगमसुबीजानि प्ररूप्यात्मवान् यः ।
परमुदमपि भव्यानाचकार स्वबीजै-
रक्षतपरमतुल्यैर्मौक्तिकं दद्यात् स्वशक्तिम् ॥
पार्श्वः सर्व्वसुखाकरोऽसुखहरः पार्श्वं श्रिता धर्म्मिणः
पार्श्वेनाशु समाप्यतेऽमरपदं पार्श्वाय मूर्द्धा नमः ।
पार्श्वान्नास्ति हितङ्करो भवभृतां पार्श्वस्य सूक्तिः प्रिया
पार्श्वे चित्तमहं दधेऽखिलविदे मां पार्श्व ! पार्श्वं नय ॥"
इति श्रीपार्श्वनाथचरित्रे २० सर्गः ॥*॥)
सन्निकृष्टे, त्रि । इति हेमचन्द्रः ॥

पार्श्वकः, त्रि, (अनुरुपायः पार्श्वं तेन अन्विच्छति अर्थानिति । "पार्श्वेनान्विच्छति ।" ५ । २ । ७५ । इति कन् ।) प्राज्ञेन विभवान्वेषी । यथा,—
"कृत्वा विभवान्वेषी पार्श्वकः सन्निजीवकः ॥"
इति हेमचन्द्रः ॥
स्वार्थे के पार्श्वार्थोऽपि । (यथा, याज्ञवल्क्ये । ३ । ८६ ।
"तन्मूले हे ललाटास्थिगण्डे नासाधनास्थिका ।
पार्श्वकास्थालके: साईमर्द्धं हि द्विसप्ततिः ॥")

पार्श्वतः, [स्] व, (पार्श्व + "आद्यादिभ्य उपसंख्यानम् ।" ५ । ३ । ३४ । इत्यस्य वार्त्तिकोक्त्या तसिः ।) पार्श्वात् । पार्श्वे । इत्यादि । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, रघुः । १६ । ३१ ।
"मित्रक्षत्रमपदिश्य पार्श्वतः
प्रस्थितं तमनवस्थितं प्रियाः ॥")

पार्श्वतीय: त्रि, (पार्श्वतो भवः । पार्श्व + "सुखपार्श्वतसोर्लोपश्च ।" ४ । २ । १३८ । इत्यस्य वार्त्तिकोक्त्या ढक् ।) पार्श्वसम्बन्धी । पार्श्वतो भवः । इति सिद्धान्तकौमुदी ॥

पार्श्वपरिवर्त्तनं, क्ली, (पार्श्वस्य पार्श्वेन वा परिवर्त्तनम् ।) कटिदानम् । कणिकापरिवृत्तिः । पाशफेराग इति भाषा । श्रीहरेः पार्श्वपरिवर्त्तनोत्सवो यथा,—
"भाद्रस्य शुक्लैकादश्यां शयनोत्सववत् प्रभोः ।
कटिदानोत्सवं कुर्य्यादेणवैः सह वैणवः ॥"
तथा च भविष्योत्तरे ।
"प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि ।
कटिदानं भवेद्विष्णोर्महापातकनाशनम् ॥
जलाशयान्तिकं नीत्वा संपूज्याभ्यर्च्य च प्रभुम् ।
कर्णिकापरिवृत्तिञ्च दक्षिणाङ्गे प्रकल्पयेत् ॥"
अस्य व्याख्या । शयनोत्सवात् कथञ्चिद्विशेषमनुवादपूर्ब्बकं लिखति । जलेति त्रिभिः कर्णिकायाः कट्याः परिवृत्तिं दक्षिणाङ्गे प्रकल्पयेदिति पूर्ब्बं वामाङ्गेन सुप्तस्याधुना दक्षिणाङ्गेन शाययेदित्यर्थः । तत्कालविशेषञ्च पूर्ब्बमेव निर्णीतोऽस्ति । अभ्यर्थनामन्त्रः ।
"देवदेव ! जगन्नाथ योगिगम्य ! निरञ्जन ! ।
कटिदानं कुरुष्वाद्य मासि भाद्रपदे शुभे ॥
महापूजां ततः कृत्वा वैष्णवान् परितोष्य च ।
देवं स्वमन्दिरे नीत्वा यथापूर्ब्बं निवेशयेत् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

पार्श्वपिप्पलं, क्ली, (पार्श्वे पिप्पलमिव ।) हरीतकीविशेषः । इति भावप्रकाशः ॥ गजहड़ इति हिन्दीभाषा ॥

पार्श्वभागः, पुं, (पार्श्वस्य भागः ।) पक्षभागः । हस्त्यादेः पार्श्वदेशः । इत्यमरः । २ । ८ । ४० ॥

पार्श्वशूलः, पुं, क्ली, (पार्श्वे जातः शूलः ।) शूलरोगविशेषः । तस्यौषधम् । यथा,—
"घृतपुष्पा देवदारु शालपर्णी वचागुरु ।
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्नवा ॥
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ।
हृच्छूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ॥"
इति गारुड़े १८६ अध्यायः ॥
(अस्य सम्प्राप्तिपूर्ब्बकलक्षणचिकित्सितानि यथा, सुश्रुते उत्तरतन्त्रे ४२ अध्याये ।
"रुणद्धि मारुतं श्लेष्मा कुक्षिपार्श्वावस्थितः ।
स संरुद्धः करोत्याशु मानं गुड़गुड़ायनम् ॥
सूचीभिरिव निस्तोदः सूक्ष्मोच्छ्वासो तदा नरः ।
नाम्नं वाञ्छति नो निद्रामुपैत्यग्निनिपीड़ितः ॥
पार्श्वशूलः स विज्ञेयः कफानिलसमुद्भवः ।
तत्र पुष्करमूलानि हिङ्गुसौवर्चलं विड़म् ॥
सैन्धवं तुम्बुरूण्याचूर्णं कृत्वा तु पाययेत् ।
पार्श्वहृद्वस्तिशूलेषु यवक्षारेण संयुतम् ॥
सर्पिःक्षीद्वोदरोक्तं वा घृतं वा हिङ्गुसंयुतम् ।
बीजपूरकसारं वा पयसा सह साधितम् ॥
एरण्डतैलमथवा मद्यमस्तुपयोरसैः ।
भक्षयेद्वापि पयसा जाङ्गलेन रसेन वा ॥"

पार्श्वस्थः, पुं (पार्श्वे तिष्ठतीति । पार्श्व + स्था + कः ।) पार्श्वस्थितनटः । इति हेमचन्द्रः ॥ समीपस्थिते, त्रि ॥ (यथा, महाभारते । ६ । २०० । १४८ ।
"यस्य मन्त्री च गोप्ता च पार्श्वस्थो हि जनार्द्दनः ॥")

पार्श्वास्थि, क्ली, (पार्श्वस्य अस्थि ।) शरीरपार्श्वस्थितास्थि । पाँजरा इति भाषा । तत्पर्य्यायः । पर्शुका २ । इत्यमरः । २ । ६ । ६६ ॥

पार्श्विकं, त्रि, (पार्श्व + ठक् ।) पार्श्वस्थितम् । पार्श्वजातम् । पार्श्वशब्दात् णिकप्रत्ययनिष्पन्नम् ॥

पार्श्वैकादशी, स्त्री, (पार्श्वसम्बन्धिनी हरेः पार्श्वपरिवर्त्तनजन्या एकादशी ।) भाद्रशुक्लैकादशी । तद्विवरणं पार्श्व परिवर्त्तनशब्दे द्रष्टव्यम् ॥

पार्श्वोदरप्रियः, पुं, (पार्श्वसुदरञ्च ताभ्यां प्रीणाति भोक्तारमिति । प्री + कः ।) कर्कटः । इति हेमचन्द्रः । ४ । ४१८ ॥

पार्षती, स्त्री, (पृषतस्यापत्यमिति । पृषत + अण् + स्त्रियां ङीप् ।) द्रौपदी । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ३ । ८५ ।
"युधिष्ठिरं भोजयित्वा शेषमश्नाति पार्षती ।
द्रौपद्यां भुञ्जमानायां तदन्नं क्षयमेति च ॥")

पार्षदः, त्रि, (परिषद + पृषोदरादित्वात् साधुः । यद्वा, पर्षदि साधुः पर्षदो ण्यः इत्यत्र योगविभागात् ण इति कश्चित् ।) पारिषदः । इति शब्दरत्नावली ॥ (यथा, भागवते । ३ । १६ । २ ।
"एतौ द्वौ पार्षदौ मह्यं जयो विजय एव च ॥")

पार्षदः, त्रि, (पर्षदि साधुः । पर्षद् + "पर्षदो ण्यः ।" इति ण्यः ।) पार्षदः । इति भरतः ॥

पार्ष्णिः, पुं. स्त्री. (पृष्यते भूम्यादिकमनेनेति । पृष् + "पृषिपृथिपार्ष्णिचूर्णिभूर्णि ।" उणा ४ । ५२ । इति निपात्यत्वेन निपातनात् साधुः ।) गुल्फस्याधोभागः । पादस्यान्यधरः । इत्यमरः । २ । ६ । ७२ ॥ गोड़सुड़ा इति गोड़ारि इति च भाषा । स तु गर्भस्थस्य मासद्वयेन भवति । इति सुश्रुतबोधः ॥ (यथा, कुमारे । १ । ११ ।
"उद्देजयत्यङ्गुलिपार्ष्णिभागान्
मार्गे शिलीभूतहिमेऽपि यत्र ॥")
सैन्यपृष्ठम् । इति मेदिनी । र्षे, २० ॥ (यथा, हरिवंशे । ३५ । ३२ ।
"उग्रेना तस्य जग्राह पार्ष्णिमाङ्गिरसस्तदा ॥")
पृष्ठम् । इति हलायुधः ॥ जिगीषा । यथा,—
"सैन्यपृष्ठे पुमान् पार्ष्णिः पश्चात्पदजिगीषयोः ॥"
इति रत्नकोषः ॥

पार्ष्णिः, स्त्री, उच्चदस्त्री । इति मेदिनी । र्षे, २० ॥ कुन्ती । इति धरणिः ॥

पार्ष्णिग्राहः, पुं, (पार्ष्णिं सैन्यपृष्ठं गृह्णातीति । ग्रह + अण् ।) पृष्ठतः शत्रुः । शत्रुजयोद्यतस्य विजिगीषोस्तच्छत्रुपक्षपातेन पार्ष्णिं पश्चात् पदं गृह्णाति यातीति यः । इत्यमरभरतौ ॥ (यथा, मनुः । ७ । २०७ ।
"पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले ॥")

पार्ष्णित्वं, क्ली, (पार्ष्णिं चायते इति । चे + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) पश्चादङ्गसेवा । इति सिद्धान्तकौमुदी ॥

पाल, क रक्षे । इति कविकल्पद्रुमः (चुरां-परं-सकं-सेट् ।) क, पालयति । ह्रस्ववनेर्वेष्टसिद्धे दीर्घिगोऽपि पाठः । कानुबन्धानामिदनुबन्धवन्नेरनित्यत्वं बोधयति । तेन पालति प्रलति इत्यपि सिद्धम् । इति दुर्गादासः ॥

पालः, पुं, (पालयतीव निष्ठीवनादिकमिति । पालि + अच् ।) यतदृग्रहः । इति हेमचन्द्रः ॥ पिक्‌दान् इति भाषा ॥ पालके, त्रि । यथा,

"दिवावक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे ।
योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात् ॥"
इति मनुः ॥

पालकः, पुं, (पालयतीति । पालि + ण्वुल् ।) घोटकरक्षकः । तत्पर्य्यायः । अश्वरक्षः २ वल्लभः ३ । इति जटाधरः ॥ चित्रकवृक्षः । इति राजनिर्घण्टः ॥ पालनकर्त्तरि, त्रि । यथा, प्रायश्चित्ततत्त्वं ।

"गोपालको गवां गोष्ठे यस्तु धूमं न कारयेत् ।
मक्षिकालीननरके मक्षिकाभिः स भक्ष्यते ॥"

पालकाप्यः, पुं, मुनिविशेषः । तत्पर्य्यायः । करेणुभूः २ । इति हेमचन्द्रः ॥ धन्वन्तरिः । इति त्रिकाण्डशेषः ॥

पालघ्नः, पुं, (पालं क्षेत्रं हन्तीति । हन + टक् ।) क्षुत्रा । इत्यमरः । २ । ५ । १६७ ॥

पालङ्कः, पुं, (पाल रक्षणे + सम्यदादित्वात् क्विप् । तेन अञ्चते इति । अञ्च + घञ् ।) शाल्मली । शाकभेदः । पालङ् इति भाषा । प्राजिपत्री । इति मेदिनी । के, ११७ ॥ वाज इति भाषा ॥

पालङ्की, स्त्री, (पालङ्क + गौरादित्वात् ङीष् ।) कुन्दुरुनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२१ ॥ शाकभेदः । पालङ् इति भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।

"यथादोषशाकैर्व्यासृतकन्तूलीयकजीवन्त्युपोदिकाश्ववलावालमूलकपालङ्कसनचिल्लीचुचुकलायवल्लीभिरन्यैश्च ॥") अस्या गुणाः । कफपित्तवातविबन्धनाशित्वम् । रूक्षत्वञ्च । इति राजवल्लभः ॥

पालङ्की, स्त्री, (पालङ्क + स्वार्थे अण् ।) शाकभेदः । पालङ् इति भाषा ॥ तत्पर्य्यायः । पलक्या २ मधुरा ३ चुरपत्रिका ४ सुपत्रा ५ स्निग्धपत्रा ६ ग्रामीणा ७ ग्राम्यवल्लभा ८ । अस्य गुणाः । ईषत् कटुत्वम् । मधुरत्वम् । पथ्यत्वम् । शीतलत्वम् । रक्तपित्तहरत्वम् । शाहित्वम् । परमतर्पणत्वञ्च । इति राजनिर्घण्टः ॥

पालङ्गा, स्त्री, (पालङ्ग + स्त्रियां अजादित्वात् टाप् ।) कुन्दुरुः । इत्यमरः ॥ कुन्दुरुखोटी इति भाषा । पालङ्गशाकः । तत्पर्य्यायः । वास्तुकाकारा २ क्षुरिका ३ क्षीरतक्षदा ४ । (यथा, सुश्रुते । १ । ४२ ।

"प्रायशः क्रूरवकको विदारकजीवन्तीचिल्ली-पालङ्गासुनिषण्णकप्रभृतीनि नीवारादयो मुद्गादयश्च समासेन कषायो वर्गः ॥") अस्या गुणाः । वातलत्वम् । शीतलत्वम् । श्लेष्मलत्वम् । भेदनत्वम् । गुरुत्वम् । विष्टम्भित्वम् । मदश्वास-पित्तरक्तविषापहत्वञ्च । इति भावप्रकाशः ॥

पालनं, क्ली, (पाल्यतेऽनेनेति । पालि + "करणाधिकरणयोश्च ।" ३ । ३ । ११७ । इति ल्युट् ।) सद्यःप्रसूतायाः गोः क्षीरम् । इति शब्दचन्द्रिका ॥ (पाल रक्षणे + भावे ल्युट् ।) रक्षणम् । यथा, "अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्म्मः ॥" इति मिताक्षरा ॥

पालाशं, क्लीं, (पलाशस्येदमिति । अण् ।) तमालपत्रम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥ (यथा, वाभटे शुल्मचिकित्सितायाम् ।

"पालाशं दहनाच्छुनं ग्रन्थिजयापामार्गकुष्ठाऽष्टकम् ॥")

पालाशः, पुं, (पालाशस्य वर्ण इव वर्णोऽस्येति । अच् ।) हरिद्वर्णः । (यथा, हरिवंशे । ६३ । ४ ।

"पालाशताम्राचितकर्व्वराणाम् ॥")

तद्वर्णविशिष्टे पलाशवृक्षसम्बन्धिनि च, त्रि । इत्यमरः ॥ (यथा, मनुः । २ । ४५ ।

"ब्राह्मणो बैल्वपालाशौ क्षत्रियो वटखादिरौ ॥")

पालाशषण्डः, पुं, (पालाशानां पलाशवृक्षाणां षण्डो यत्र ।) मगधदेशः । इति शब्दरत्नावली ॥ पलाशसमूहश्च ॥

पालिः, स्त्री, (पल्यते पाल्यते इति । पल पालने + "बाहुलकात् शूलसिपलतिभ्यश्च ।" ४ । १२६ । इत्युञ्प्रत्ययो ङीच् ।) कर्णलताग्रम् । (यथा, "यस्य पालिद्वयमपि कर्णस्य न भवेदिह ।
कर्णपीठं समे मध्ये तस्य विद्वा विवर्द्धयेत् ॥
बाह्यायामिह दीर्घायां सन्धिराभ्यन्तरो भवेत् ।
आभ्यन्तरायां दीर्घायां बाह्यसन्धिरुदाहृतः ॥
एकैव तु भवेत् पालिः स्थला पृथ्वी स्थिरा च या ।
तां द्विधा पाटयित्वा तु क्षित्वा चोपरि सन्धयेत् ॥
गण्डादुत्पाद्य मांसेन सानुवन्धेन जीवता ।
कर्णपालिमपालीसु कुर्य्यान्निर्द्धिद्य शास्त्रवित् ॥"
"कर्णपाल्यामयाभूतां पुनर्वक्ष्यामि सुश्रुत ! ।
कर्णपाल्यां प्रकुपिता वातपित्तकफाख्यः ॥
द्विधा वाप्यथ संरब्धाः कुर्व्वन्ति विविधा रुजः ।
विस्फोटः स्रुवंता स्रोफः पाल्यां दोषे तु वातिके ॥
दाहविस्फोटजननः स्रोफः पाकश्च पैत्तिके ।
कण्डूः सम्भवथुः स्तम्भो गुरुत्वञ्च कफात्मके ॥
यथादोषञ्च संशोध्य कुर्य्यात्तेषां चिकित्सितम् ।
स्वेदाभ्यङ्गपरीषेकैः प्रलेपाद्यग्निमोक्षणैः ॥
स्नहीं क्रियां दृढ़ञ्चीयैर्यथास्वं भोजनैस्तथा ।
य एवं वेत्ति दोषाणां चिकित्सां कर्त्तुमर्हति ॥
अत ऊर्द्धं नामलिङ्गैर्वक्ष्ये पाल्यामुपद्रवान् ।
उत्पाटकश्चोत्पुटकः स्रावः कण्डूयुतो भ्रमः ॥
अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथा ।
सावी च दाहवांश्चैव ग्रन्थीनां क्रमशः क्रियाम् ॥
अपामार्गः सर्ज्जरसः पाटलालकुचत्वचौ ।
उत्पाटके प्रलेपः स्यात् तैलमेभिश्च पाचयेत् ॥
ग्रन्थ्याकशिग्रुपूतीकगोधामेदोऽथ तद्वसा ।
वाराहं गव्यमेणेयं पित्तं सर्पिश्च संहरेत् ॥
लेपसुत्पुटके दद्यात्तैलमेभिश्च साधितम् ।
गौरीं सुगन्धां सश्यामामनन्तां तण्डुलीयकम् ॥
स्रावे प्रलेपनं दद्यात्तैलमेभिश्च साधितम् ।
पाठां रसाञ्जनं शौद्रं तथास्याद्युग्मकाङ्किकम् ॥
दद्याल्लेपं सकण्डूके तैलमेभिश्च साधितम् ।
व्रणीभूतस्य हेयं स्यादिदं तैलं विजानता ॥
मधुकं क्षीरकाकोली जीवकाद्यैर्विपाचितम् ।
गोधावराहसर्पाणां वसाः स्युः कृतदृंहणे ॥
प्रलेपनमिदं दद्यादवसिच्यावमन्थके ।
प्रपौण्डरीकं मधुकं समङ्गां धवमेव च ॥
तैलमेभिश्च सम्यक्तं ग्रन्थौ कण्डूमतः क्रियाम् ।
सहदेवा विश्वदेवा अजाक्षीरं ससैन्धवम् ॥
एतैरालेपनं दद्यात् तैलमेभिश्च साधितम् ।
ग्रन्थिके गुटिकां पूर्व्वं स्रावयेदवपाद्य तु ॥
ततः सैन्धवचूर्णन्तु दृष्ट्वा लेपं प्रदापयेत् ।
लिखित्वा ततः सूतं दृष्ट्वा चूर्णं रोध्रस्य जम्बुले ॥
क्षीरेण प्रतिसार्य्येनं शुद्धं संरोपयेत्ततः ।
मधुपर्णीं मधूकञ्च मधुकं मधुना सह ॥
लेपः सार्विषि दातव्यस्तैलमेभिश्च साधितम् ।
पञ्चकल्कैः समधुकैः पिष्टैस्तैश्च घृतान्वितैः ॥
जीवकाद्यैः ससर्पिष्कैर्दह्यमानं प्रलेपयेत् ॥"
इति सुश्रुते सूत्रस्थाने षोड़शोऽध्याये ॥)
अक्षिः । षड्लिः । (यथा, गीतगोविन्दे । ६ । १० ।

"विपुलपुलकपालिः स्फीतसीत्कारमन्त-
र्जनितजड़िमकाकुव्याकुलं व्याहरन्ती ॥")

अङ्कप्रभेदः । छात्रादिदेयम् । इति मेदिनी । ले । ६० ॥ यूका । जातसश्रुस्त्री । प्रान्तः । (यथा, गीतगोविन्दे । ३ । १३ ।

"भूपल्लवं धनुरपाङ्गतरङ्गितानि
वाणा गुणः श्रवणपालिरिति स्मरेण ।
तस्यामनङ्गजयजङ्गमदेवताया-
मस्त्राणि निर्ज्जितजगन्ति किमर्पितानि ॥")

सेतुः । कल्पितभोजनम् । प्रशंसा । उत्सङ्गः । प्रश्नः । इति हेमचन्द्रः ॥

पालिका, स्त्री. (पालिरेव । स्वार्थे कन् टाप् च ।) अक्षिः । इति शब्दरत्नावली ॥ कर्णपत्रम् । इति शब्दचन्द्रिका । धथादिच्छेदनी । तत्पर्य्यायः । कुन्तलिका २ । इति हारावली ॥

पालितः, त्रि, (पाल + क्त ।) रक्षितः । यथा,—

"चित्रलेखा समाज्ञाय पौत्रं कृष्णस्य योगिनी ।
ययौ विहायसा राजन् द्वारकां कृष्णपालिताम् ॥"
इति श्रीभागवतीयदशमस्कन्धे ६२ अध्यायः ॥
कायस्थस्य पदवितिविशेषः ॥

पालिन्दः, पुं, (पालयतीति । पालि + बाहुलकात् किन्दच् ।) कुन्दुरुकः । इति राजनिर्घण्टः ॥

पालिन्दी, स्त्री, (पालिन्द + गौरादित्वात् ङीष् ।) श्यामालता । इति रत्नमाला ॥ (यथा, सुश्रुते कल्पस्थाने १ अध्याये ।

"ग्रथ्यपित्तघृतश्यामा पालिन्दीतण्डुलीयके ॥") पालिन्दी। त्रिवृता। इति द्विरूपकोषः ॥ (अस्याः पर्य्यायो यथा,—

"त्रिवृत् श्यामार्द्धचन्द्रा च पालिन्दी च सुवेगिका।
मसूरविदलाकोलकेविका कालमेधिका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पालिन्दी, स्त्री, कृष्णत्रिवृता। इत्यमरः।२।४।१०८॥

पाली, स्त्री, (पालि + ऋदिकारादिति वा ङीष्।) यूका। सप्तस्रुयोषित्। इति मेदिनी। ले, ३०। श्रेणी। इति शब्दरत्नावली ॥ स्थाली। इति शब्दचन्द्रिका ॥

पावकः, पुं, (पुनातीति। पू + ण्वुल् + खुल्।) अग्निः। इत्यमरः।१।१।५७ ॥ (यथा, काशीखण्डे ६ अध्याये।

"अपावनानि सर्व्वाणि वह्निसंसर्गतः क्वचित्।
पावनानि भवन्त्येव तस्मात् स पावकः स्मृतः ॥")

वैद्यतोक्तिः। यथा,—

"पावकः पवमानश्च शुचिरग्निश्च ते त्रयः।
निर्म्मथ्यः पवमानः स्याद्वैद्युतः पावकः स्मृतः ॥
यश्चासौ तपते सूर्य्यः शुचिरग्निस्तसौ स्मृतः ॥"

इति कौर्म्मे १२ अध्यायः ॥

स च ब्रह्मणो मानसपुत्त्रादभिमानिनामकाग्नेः स्वाहायां जातः। यथा,—

"योऽसावग्निरभीमानी स्मृतः स्वायम्भुवेऽन्तरे।
ब्रह्मणो मानसः पुत्त्रस्तस्मात् स्वाहा व्यजीजनत्॥
पावकं पवमानञ्च शुचिरग्निञ्च यः स्मृतः ॥"

इति मात्स्ये ४८ अध्यायः ॥

सदाचारः। वह्निमन्थः। (अस्य पर्य्यायो यथा,

"तेजोमन्थो हविर्मन्थो ज्योतिष्को पावकोऽरणिः।
वह्निमन्थोऽग्निमन्थश्च मथनो गणिकारिका ॥"

इति वैद्यकरत्नमालायाम् ॥)

चित्रकः। भल्लातकः। विड्ङ्गः। इति मेदिनी। कं, ११८॥ श्वेतविल्वनरः। इति हेमचन्द्रः ॥ रक्तचित्रकः। कुसुम्भः। इति राजनिर्घण्टः ॥ (पवित्रकारके, त्रि। यथा, ऋग्वेदे। ३। ३१। २०।

"मिहः पावकाः प्रतता अभूवन् ॥")

पावकारणिः, पुं, (पावकाय वह्न्युत्पादनार्थं अरणिरिव।) अग्निमन्थः। इति शब्दमाला ॥

पावकिः, (पावकस्यापत्यम्। पावक + इञ्।) कार्त्तिकेयः। यथा,—

"कथं तं कृत्तिकापुत्त्रमुक्तवान् तं सुरं गुरुम्।
कथञ्च पावकिरसौ कथं वा माहनन्दनः ॥"

इति वराहपुराणम् ॥

पावनं, क्ली, (पावयत्यनेनेति। पूं + णिच् + ल्युट्।) जलम्। कङ्कुम्। इति मेदिनी। ने, ६०॥ गोमयम् ॥ इति शब्दचन्द्रिका ॥ रक्तचन्दनम्। कुङ्कुम्। इति राजनिर्घण्टः ॥ चित्रकम्। अध्यासः। प्रायश्चित्तम्। इति विश्वः ॥ (शुद्धिः। यथा, मनुः। ११। १७८।

"सा चेत् पुनः प्रदुष्येत्तु सङ्ग्रहेणोपयुञ्जिता।
कृच्छ्रं चान्द्रायणञ्चैव तदस्याः पावनं स्मृतम् ॥")

पावनः, पुं, (पावयतीति। पू + णिच् + ल्युः।) व्यासः। पावकः। इति मेदिनी। ने, ६० ॥ (यथा, ३।१८५। मनुश्लोकटीकायां कुल्लूकभट्टः।

"पावनः सम्भोऽग्नियः प्रीतापनोदनाद्यर्थं वह्नयु देशेष्वपि विधीयते ॥") सिद्धकः। इति विश्वः ॥ पीतभृङ्गराजः। इति राजनिर्घण्टः ॥ (विष्णुः। यथा, महाभारते। १३। १४६। ४५।

"भूतभव्यभवन्नाथः पवनः पावनोऽनलः ॥"

"पावयतीति पावनः। भीषास्माद्दातः पवत इति स्मृतेः।" इति श्रीशङ्करभाष्यम् ॥) सिद्धः। पवित्रे पावयितरि च, त्रि। इति हेमचन्द्रः ॥ (यथा, रघुः। १६। ५३।

"स त्वनेकवनिता सखोऽपि सन्
पावनोमनवलोक्य सन्ततिम्।
वैद्यपत्नपरिभाविनं गदं
न प्रदीप इव वायुमत्यगात् ॥")

पावनध्वनिः, पुं, (पावनः पवित्रजनको ध्वनिर्यस्य।) गृध्रः। इति राजनिर्घण्टः ॥ (पावनोध्वनिरिति विग्रहे।) पवित्रशब्दः ॥

पावनी, स्त्री, (पावयत्यनयेति। पू + णिच् + ल्युट् + ङीप्।) हरीतकी। इति विश्वः ॥ तुलसी। गौः। इति राजनिर्घण्टः ॥ गङ्गा। यथा, श्रीशङ्कराचार्य्यकृतगङ्गाष्टके।

"ब्रह्माण्डं खण्डयन्ती हरशिरसि जटावल्लिमुल्लासयन्ती
स्वर्लोकादापतन्ती कनकगिरिगुहागण्डशैलात् स्खलन्ती।
क्षौणीपृष्ठे लुठन्ती दुरितचयचमूर्निर्भरं भर्त्सयन्ती
पाथोधिं पूरयन्ती सुरनगरसरित्पावनी नः पुनातु ॥"

(इयन्तु गङ्गाया अंशविशेषः। यथा, मात्स्ये। १२०। ३६—४१।

"ततो विसर्ज्जयामास संरुद्धां स्वेन तेजसा।
नदीं भगीरथस्यार्थे तपसोग्रेण तोषितः।
ततो विसर्ज्जयामास सप्त स्रोतांसि गङ्गायाः।
त्रीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यथैव तु।
स्रोतांसि त्रिपथगायास्तु प्रत्यपद्यन्त सप्तधा ॥
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा।
सीता चक्षुश्च सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः ॥
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम्।
तस्माद् भागीरथी सा वै प्रविष्टा दक्षिणोदधिम् ॥"

शाकद्वीपस्य नदीविशेषः। यथा, मत्स्यपुराणे। १२१। ३१।

"नन्दा च पावनी चैव त्रितीया परिकीर्त्तिता ॥")

पाशः, पुं, (पश्यते बध्यतेऽनेनेति। पश् + घञ्।) शस्त्रभेदः। इति शब्दरत्नावली ॥ (वैद्यमायनधनुर्व्वेदोक्तपाशलक्षणं यथा,—

"पाशः सुरूक्षावयवो लौहधातुश्चिकोणवान्।
प्रादेशपरिधिः सीसगुलिकाभरणाञ्चितः ॥"

आग्नेयधनुर्व्वेदोक्तलक्षणं यथा,—

"दृग्गृहस्तो भवेत् पाशो दृप्तः करसुखस्तथा।
गुणकार्पासमुञ्जानामर्कस्नायवचर्म्मणाम् ॥
अन्येषां सुदृढ़ानाञ्च सुकृतं परिवेष्टितम्।
तथा त्रिंशत्समं पाशं बुधः कुर्य्यात्सुवर्त्तितम्॥"

अस्य क्रियादिकं यथा,—

"कर्त्तव्यं शिक्षकैस्तस्य स्थानं कक्षासु वै सदा।
वामहस्तेन संगृह्य दक्षिणेनोद्धरेत्ततः ॥
कुण्डलस्याकृतिं कृत्वा भाग्यैकं मस्तकोपरि।
क्षिपेत्————————— ॥"

"वल्गिते च प्लुते चैव तथा प्रव्रजितेषु च।
समयोगविधिं ज्ञात्वा प्रयुञ्जीत सुशिक्षितः ॥
विजित्वा तु यथान्यायं ततो वन्यं समाचरेत्।
कक्ष्यां बद्ध्वा ततः खड्गं वामपार्श्वावलम्बितम् ॥
दृढ़ं विगृह्य वामेन निष्कर्षेद्दक्षिणेन च ॥"

अन्यच्च।

"पराङ्मुक्तमपाङ्मुक्तं गृहीतं लघुसञ्चितम्।
ऊर्द्धक्षिप्तमधःक्षिप्तं सन्धारितविधारितम् ॥
श्येनपातं गजपातं ग्राहग्राह्यं तथैव च।
एवमेकादशविधा ज्ञेयाः पाशविधारणाः ॥"

वैद्यमायनोक्तक्रिया यथा,—

"प्रसारणं वेष्टनञ्च कर्त्तनञ्चेति ते त्रयः।
योगाः पाशाश्रिता लोके पाशाः क्षुद्रसमाश्रिताः ॥"

अन्यच्च।

"ऋज्वायतं विशालञ्च तिर्य्यक्भ्रामितमेव च।
पञ्च कर्म्मविनिर्द्दिष्टं यस्ते पाशे महात्मभिः ॥")

कक्षान्ते समूहार्थः। (यथा, माघे। ७। ६२।

"ग्रथग्निरसिजग्राग्रपातभारा-
दिव नितरां नतिमद्भिरंसभागैः ॥")

कर्णान्ते शोभनार्थः। क्षाचाद्यन्ते निन्दार्थः। पक्ष्यादिबन्धनरज्ज्वादि। इति विश्वः ॥ (यथा, महाभारते। ५। ६४। १।

"शकुनीनामिहार्थाय पाशं भूमावयोजयत्।
कश्चिच्छाकुनिकस्तात पूर्व्वेषामिति शुश्रुम ॥"

योगविशेषः। यथा, ज्योतिषे।

"यदा राशिपञ्चके सर्व्व ग्रहा भवन्ति तदा पाशाख्ययोगो भवति ॥" पारिभाषिकपाशो यथा, कुलार्णवे १ उल्लासे।

"घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी।
कुलं शीलं तथा जातिरष्टौ पाशाः प्रकीर्त्तिताः ॥"

खड्गेस्य दर्शनफलं यथा,—

"कार्पासभस्मास्थिकपालशूलं
चक्रञ्च पाशन्त्वथवा प्रपश्येत्।
तस्यापदं रोगधनक्षयं वा
रोगी मृतिं वा तनुतेऽतिकष्टम् ॥"

इति हारीते द्वितीये स्थाने द्वितीयेऽध्याये ॥)

पाशकः, पुं, (पाशयति पीड़यतीति। पश् + णिच् + खुल्।) द्यूतविशेषः। पासा इति भाषा। तत्पर्य्यायः। अक्षः २ देवनः ३। इत्यमरः। २। १०। ४५ ॥ सारिः ४ शारिः ५ सारः ६ शारः ७ पाशः ८। इति शब्दरत्नावली ॥

पाशपाणिः, पुं, (पाशः पाणौ यस्य ।) वरुणः । इति हलायुधः ॥

पाशुवपालनं, क्ली, (पाशुवं पशुसंघं पालयतीति । पालि + ल्युः ।) घासः । इति शब्दचन्द्रिका ॥

पाशितः, त्रि, (पाश + क्त ।) पाशयुक्तः । बद्धः । इति धरणिः ॥

पाशी, [न्] पुं, (पाशोऽस्त्यस्येति । पाश + इनिः ।) वरुणः । इत्यमरः । १ । १ । ६४ ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ३ । ८ ।
"यदि शक्रं यमं वापि कुबेरमपि पाशिनम् ॥")
व्याधः । इति मेदिनी । ने, ६१ ॥ यमः । इति कश्चित् ॥ पाशधरे, त्रि । इति विश्वः ॥

पाशीकृतः, त्रि, पाशवद्धः । अभूततद्भावे च्वि-प्रत्ययनिष्पन्नः ॥

पाशुपतः, पुं, (पशुपतिर्देवतास्येति । "तस्य देवता ।" ४ । २ । २४ । इति अण् ।) वक-पुष्पम् । (अस्य पर्य्यायो यथा, भावप्रकाशे ।१।१।
"शिवमल्ली पाशुपत एकाष्ठीलो वुको वसुः ॥")
पशुपत्यधिदेवतः । तद्भक्तः । इति मेदिनी । ते, २११ ॥ (क्ली, तन्त्रशास्त्रविशेषः । यथा, कूर्म्म-पुराणे १४ अध्याये ।
"एवं सम्बोधितो रुद्रो माधवेन सुरारिणा ।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम् ।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ॥"
अथर्व्ववेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्ति-कोपनिषदि ।
"सावित्र्यात्मा पाशुपतं परब्रह्मावधूतकम् ॥")

पाशुपतव्रतं, क्ली, (पाशुपतं पशुपतिसम्बन्धि व्रतम् ।) पशुपतिव्रतविशेषः । यथा,—
"यथा पशुपतिर्नित्यं हत्वा सर्व्वमिदं जगत् ।
न लिप्यते पुनः सोऽपि यो नित्यं व्रतमाचरेत् ॥
इहजन्मकृतं पापं पूर्व्वजन्मकृतञ्च यत् ।
व्रतं पाशुपतं नाम कृत्वा हन्ति द्विजोत्तम ! ॥
द्वादश्यामेकभक्ताशी चयोदश्यामथाचितम् ।
चतुर्द्दश्यां तथा नक्तमुपवासं परेऽहनि ॥
गोदधक्षैव हैरण्यं रौप्यं ताम्रमयन्तथा ।
सौवर्णं कारयेत् पात्रं गुञ्जाग्रौघ्रा पृथक् पृथक् ॥
तत्रैवोल्लेखयेन्मूर्त्तिं शिवायाश्च शिवस्य च ।
तत्प्रमाणं तृणं कुर्य्यात्रौप्यं हैमन्त्रयङ्गुलैः ॥
रौप्यादष्टगुणं ताम्रं तदर्द्धं वापि कारयेत् ।
चारपत्रे समारोप्य वस्त्रोत्तमयुतन्तथा ॥
चयोदश्यामेकभक्तं रिक्तायां नक्तमाचरेत् ।
कुर्य्यादयाचितं दर्शे पादलक्षव्रतञ्चरेत् ॥
गन्धपुष्पैः सुनैवेद्यैर्व्वस्त्राभरणदीपकैः ।
गङ्गाधरं समभ्यर्च्च्य प्रार्थयेत् प्रवरं वरम् ॥
गङ्गाधर ! महादेव ! सर्व्वलोकचराचर ! ।
अहि मे सर्व्वपापानि पूजितस्त्वि शङ्कर ! ॥
शङ्कराय नमस्तुभ्यं सर्व्वपापहराय च ।
यथा यमं न पश्यामि तथा मे कुरु शङ्कर ! ॥
यममार्गं यथा शम्भो ! न पश्यामि कदाचन ।
संपूजितो मया भक्त्या तथा मे कुरु शङ्कर ! ॥
गङ्गाधर ! धराधीश ! परात्पर वरप्रद ! ।
श्रीकण्ठ ! नीलकण्ठस्त्वमाकान्त ! नमोऽस्तु ते ॥
संपूर्ण्वेवंविधानेन प्रतिपद्युदिते रवौ ।
हैरण्यादीन् गोदधींश्च ब्राह्मणेभ्यो निवेदयेत् ॥
यथा त्वं सर्व्वगः सर्व्वः सर्व्ववासस्तु सर्व्वकृत् ।
न लिप्यसे विकुर्व्वाणस्तथा मां कुरु शङ्कर ! ॥
एवं स्तुत्वा नमस्कृत्य वृषादींश्च यथोदितान् ।
गुर्व्वादिभ्यो दिजेभ्यश्च शङ्करः प्रीयतामिति ॥
एवं व्रतमिदं कृत्वा वृषं दद्याद्द्विजातये ।
यममार्गं महाघोरं न पश्यति कदाचन ॥
यः करोति व्रतेनैव सर्व्वपापप्रणाशनम् ।
न स लिप्यते पापेन पद्मपत्रमिवाम्भसा ॥
ब्रह्महत्यादिभिः पापैरगम्यागमनादिभिः ।
मुच्यते पातकैर्घोरैर्नृभक्ष्यापेयजैः पुमान् ॥
यः करोति महाभाग ! दानं सर्व्वसुखावहम् ।
हत्वा पापान्यशेषाणि स्वर्गलोकं स गच्छति ॥"

इति वह्निपुराणे पाशुपतव्रतदानाध्यायः ॥
(यथा च शिवपुराणे वायुसंहितायां पूर्व्वभागे २६ अध्याये ।

ऋषय ऊचुः ।
"भगवन् ! श्रोतुमिच्छामो व्रतं पाशुपतं परम् ।
ब्रह्मादयोऽपि यत् श्रुत्वा सर्व्वे पाशुपताः स्मृताः ॥

वायुरुवाच ।
रहस्यं वः प्रवक्ष्यामि सर्व्वपापनिकृन्तनम् ।
व्रतं पाशुपतं श्रौतमथर्व्वशिरसि श्रुतम् ॥
कालग्निचापौरुषमांसी देशः शिवपरिग्रहः ।
क्षेत्रारामादिरम्यो वा प्रशस्तः शुभलक्षणः ॥
तत्र पूर्व्वं चयोदश्यां स्नातः सुकृताह्निकः ।
अनुज्ञाप्य क्षमाचार्य्यं संपूज्य प्रणिपत्य च ॥
पूजां वक्ष्यिकीं कृत्वा शुक्लाम्बरधरः स्वयम् ।
शुक्लयज्ञोपवीती च शुक्लमाल्यानुलेपनः ॥
दर्भासने समासीनो दर्भमुष्टिं प्रगृह्य च ।
प्राणायामत्रयं कृत्वा प्राङ्मुखो वाप्युदङ्मुखः ॥
ध्यात्वा देवञ्च देवीञ्च तद्विज्ञापनवर्त्मना ।
व्रतमेतत् करोमीति भवेत् संकल्प्य दीक्षितः ॥
यावच्छरीरपातं वा द्वादशाब्दमथापि वा ।
तदर्द्धं वा तदर्द्धं वा मासद्वादशकन्तु वा ।
तदर्द्धं वा तदर्द्धं वा मासमेकमथापि वा ।
दिनद्वादशकं वाथ दिनषट्कमथापि वा ॥
तदर्द्धं दिनमेकं वा व्रतसंकल्पनावधि ।
अग्निमाधाय विधिवद्विरजा होमकारणात् ॥
हुत्वाज्येन समिद्भिश्च चरुणा च यथाक्रमम् ।
पूर्व्वाद्याः पुरतो भूयस्तत्तन्नाम्ना सुहृत्सुहृद्गणम् ।
सुहृद्यानुन्मूलमन्त्रेण तैरेव समिदादिभिः ।
तत्तन्नामेतानि महेशे सुधन्वामित्यनुस्मरन् ।
पञ्च भूतानि तन्मात्राः पञ्च कर्म्मेन्द्रियाणि च ।
ज्ञानकर्म्मविभेदेन पञ्च पञ्च विभागशः ।
त्वगादिधातवः सप्त पञ्च प्राणादिवायवः ।
मनोबुद्धिरहंख्यातिगुणाः प्रकृतिपूरुषौ ।
रागो विद्या कला चैव नियतिः काल एव च ।
माया च शुद्धविद्या च महेश्वरसदाशिवौ ।
शक्तिश्च शिवतत्त्वञ्च तत्तानि क्रमशो विदुः ।
मन्त्रेस्तु विरजैर्हुत्वा होतासौ विरजो भवेत् ॥
अथ गोमयमादाय पिण्डीकृत्याभिमन्त्र्य च ।
न्यस्यात्मौ तच्च संरक्ष्य दिने तस्मिन् हविष्य-
मुक् ॥
प्रभाते तु चतुर्द्दश्यां स्नात्वा सर्व्वं पुरोदितम् ।
दिने तस्मिन्नितः हारः कालग्नेयं समापयेत् ॥
प्रातःपर्व्वणि चाप्येवं स्नात्वा होमावसानतः ।
उपसंहृत्य रुद्राग्निं शङ्खीयाङ्गस्य यत्नतः ॥
ततस्तु जटिलो मुण्डः शिखैकजट एव वा ।
भूत्वा स्नात्वा पुनर्वीतलज्ञश्चेत् स्याद्दिगम्बरः ॥
अन्यः काषायवसनश्चर्म्मचीराम्बरोऽथवा ।
एकाम्बरो वल्कली वा भवेदृक्षी च मेखली ॥
प्रक्षाल्य चरणौ पश्चाद्विराचम्यात्मनस्तनुम् ।
संकलीकृत्य तद्वस्त्र विरजानलसम्भवम् ॥
अग्निरित्याभिमन्त्रैः षड्भिराथर्व्वणैः क्रमात् ।
विन्यस्याङ्गानि मूर्द्धादिचरणान्तञ्च संस्पृशेत् ॥
ततस्तेन क्रमेणैव समुद्धृत्य च भस्मना ।
सर्व्वाङ्गोद्धूलनं कुर्य्यात् प्रणवेन शिवेन वा ॥
ततस्त्रिपुण्ड्रं रचरेत्त्रियायुषसमाकृयम् ।
शिवभावं समागम्य शिवयोगं समाचरेत् ॥
कुर्य्यात्त्रिसन्ध्यमप्येवमेतत् पाशुपतं व्रतम् ।
पूजनीयो महादेवो लिङ्गमूर्त्तिः सनातनः ॥
पद्मपद्मदलं हैमं नवरत्नैरलङ्कृतम् ।
कर्णिकाकेसरोपेतमासनं परिकल्पयेत् ॥
विभवे सदभावे तु रक्तं सिद्धमथापि वा ।
पद्मं तस्याप्यभावे तु केवलं भावनामयम् ॥
ततः पद्मकर्णिकामध्ये कृत्वा लिङ्गं कनीयसम् ।
स्फाटिकं पीठिकोपेतं पूजयेद्वि ततःक्रमात् ॥
प्रतिष्ठाप्य विधानेन तल्लिङ्गं स्नपनोदनम् ।
परिकल्प्यासनं मूर्त्तिं पञ्चवक्त्रप्रकारतः ॥
पञ्चगव्यादिभिः पूर्व्वैर्यथाविभवविस्तरैः ।
स्नापयेत् कलशैः पूर्णैः सहस्रादिह सम्भवैः ॥
गन्धद्रव्यैः सकर्पूरैश्चन्दनाद्यैः सकुङ्कुमैः ।
सवेदिकं समालिप्य लिङ्गं भूयश्च भूषितम् ॥
बिल्वपत्रैश्च पद्मैश्च रक्तश्वेतैस्तथोत्पलैः ।
नीलोत्पलैस्तथान्यैश्च पुष्पैस्तैस्तैः सुगन्धिभिः ॥
पुष्पैश्च घृतपत्रैश्च चित्रैर्दूर्व्वाक्षतादिभिः ।
समभ्यर्च्च्य यथालाभं महापूजाविधानतः ॥
धूपं दीपं तथाचार्घ्यं नैवेद्यञ्च समादिशेत् ।
निवेदयित्वा विभवे कल्याद्यञ्च समाचरेत् ॥
दत्तानि च विशिष्टानि न्यायोपार्जितानि च ।
सर्व्वद्रव्याणि देयानि व्रते तस्मिन् विशेषतः ॥
श्रीपत्रोत्पलपद्मानां संख्या साहस्रिकी मता ।
प्रत्येकमपरा संख्या शतमष्टोत्तरं द्विजाः ॥
तत्रापि च विशेषेण न त्यजेद्बिल्वपत्रकम् ।
हैममेकं परं प्राहुः पद्मं पद्मसहस्रकात् ॥
नीलोत्पलादिद्रव्येष्वेतत्प्रमाणं निवेदयेत् ।
पुष्पान्तराण्यनियमादृयथालाभं निवेदयेत् ॥
अष्टाङ्गमर्घ्यं संस्तृतं धूपाद्यैर्वा विशेषतः ।
लक्षाद्गुरुमधोराख्ये वक्त्रे सद्ये मनःशिलाम् ॥
चन्दनं वामदेवाख्ये हरितालञ्च पौरुषे ।
ईशाने भसितं केचिदालेपनमितीदृशम् ॥

न धूप इति मन्यन्ते धूपान्तरविधानतः ।
सितागुरुमघोराख्ये सुखे कृष्णागुरुं पुनः ॥
पौरुषे गुग्गुलुं सद्ये सौम्ये सौगन्धिकं सुखे ।
ईशानेऽपि उशीरादि दद्याद्धूपं विशेषतः ॥
शर्करामधुकर्पूरकपिलाघृतसंयुतम् ।
चन्दनागुरुकाष्ठाद्यं सामान्यं संप्रचक्षते ॥
कर्पूरवर्तिराख्याद्या देया दीपावली ततः ।
अर्घ्यमाचमनं देयं प्रतिवक्त्रमतःपरम् ॥
प्रथमावरणे पूज्यौ क्रमाद्वेरम्बषण्मुखौ ।
ब्रह्माद्यानि ततश्चैवं प्रथमावरणेऽर्चिते ॥
द्वितीयावरणे पूज्या विघ्नेशाद्यक्रवर्त्तिनः ।
तृतीयावरणे पूज्या भवाद्याश्चाष्टमूर्त्तयः ॥
महादेवादयश्च तथैकादशरुद्रकाः ।
चतुर्थावरणे पूज्याः सर्व्व एव गणेश्वराः ॥
बहिरेव तु पञ्चस्य पञ्चमावरणे क्रमात् ।
दश दिक्पतयः पूज्याः सास्त्राः सानुचरास्तथा ॥
ब्रह्मणो मानसाः पुत्राः सर्व्वेऽपि ज्योतिषाङ्गणाः ।
सर्व्वे देवाश्च देव्यश्च सर्व्वाः सर्व्वेऽपि खेचराः ॥
पातालवासिनश्चान्ये सर्व्वे मुनिगणा अपि ।
योगिनो मुख्यतः सर्व्वे पञ्चमे मातरस्तथा ॥
क्षेत्रपालश्च सगणः सर्व्वे चैतच्चराचरम् ।
यथावरणपूजान्ते सम्पूज्य परमेश्वरम् ॥
साज्यं सचन्दनं हृद्यं हविर्भक्ष्यं निवेदयेत् ।
सुखवासादिकं दत्त्वा ताम्बूलं सोपदंशकम् ॥
अलङ्कृत्य च भूयोऽपि नानापुष्पविभूषणैः ।
नीराजनान्ते विस्तीर्णं पूजाशेषं समापयेत् ॥
चन्दनाङ्गाक्षहारांश्च ग्रथनीये समर्पयेत् ।
आर्द्रं नृपोचितं हृद्यं तत्सर्व्वमनुरूपतः ॥
कृत्वा च कारयित्वा च हुत्वा च प्रतिपूजनम् ।
स्तोत्रं जपोहनं जप्त्वा विद्यां पञ्चाक्षरीं जपेत् ॥
प्रदक्षिणां प्रणामञ्च कृत्वात्मानं समर्पयेत् ।
ततः पुरस्ताद्देवस्य गुरुविघ्नौ च पूजयेत् ॥
दत्वार्घ्यमष्टौ पुष्पाणि देवमुद्रास्य लिङ्गतः ।
अमेद्यार्घ्यं ससंरक्ष्य उद्वास्य च तमप्युत ॥
प्रत्यहं जप हत्येवं कुर्य्यात्सर्व्वं पुरोदितम् ।
ततस्तत्साम्बुजं लिङ्गं सर्व्वोपकरणान्वितम् ॥
समर्पयेत् स्वगुरवे स्थापयेद् वा शिवालये ।
संपूज्य च गुरून्नत्वा व्रतिनश्च विशेषतः ॥
भक्तान् द्विजांश्च ग्रक्तश्चेद्दीनानाथांश्च तोषयेत् ।
स्वयं चानग्नयः फलमूलाशनोऽथवा ॥
पयोव्रती वा भिक्षाशी भवेदेकाशनस्तथा ।
नक्तं युक्ताग्नयो नित्यं भूशय्यानिरतः शुचिः ॥
भस्मशायी क्षमे शायी चीराजिनशयोऽथवा ।
ब्रह्मचर्य्यरतो नित्यं व्रतमेतत् समाचरेत् ॥
अर्कवारे तथार्द्रायां पञ्चदश्यां च पक्षयोः ।
अष्टम्यां च चतुर्दश्यां ग्रक्तस्तूपवसेदपि ॥
पापक्षप्तिकरोदक्यासूतिकान्त्यजपूर्व्वकान् ।
वर्ज्जयेत्सर्व्वयत्नेन मनसा कर्म्मणा गिरा ॥
क्षमादानदयासत्याहिंसाशीलः सदा भवेत् ।
सन्तुष्टश्च प्रशान्तश्च तपोध्यानरतः सदा ॥
कुर्य्यात्त्रिषवणस्नानं भस्मस्नानमथापि वा ।
पूजां वैशेषिकीञ्चैव मनसा कर्म्मणा गिरा ॥
बहुनात्र किमुक्तेन नाचरेदग्निवं व्रती ।
प्रमादात्तु तथाचारे निरूप्य गुरुलाघवम् ॥
उचितां निष्कृतिं कुर्य्यात् पूजाहोमजपादिभिः ।
आसमाप्तेर्व्रतस्यैवमाचरेन्न प्रमादतः ॥
गोदानञ्च वृषोत्सर्गं कुर्य्यात् पूजां जपं सदा ।
सामान्यमेतत् कथितं व्रतस्यास्य समासतः ॥
प्रतिमासं विशेषञ्च प्रवक्ष्यामि यथाक्रमम् ।
वैशाखे वज्रलिङ्गन्तु ज्येष्ठे मारकतं शुभम् ॥
आषाढे मौक्तिकं विद्याच्छ्रावणे नीलनिर्म्मितम् ।
माघे भाद्रपदे चैव पद्मरागमयं परम् ॥
आश्वयुज्याञ्च विधिवल्लोमेदकमयं शुभम् ।
कार्त्तिक्यां वै दृषं लिङ्गं वैदूर्य्यं मार्गशीर्षके ॥
पुष्यरागमयं पौषे माघे दुमणिजं तथा ।
फाल्गुन्यां चन्द्रकान्तोत्थं चैत्रे तद्वत्त्रयोऽथवा ॥
सर्व्वमासेषु रत्नानामलाभे हैममेव वा ।
हैमाभावे राजतं वा ताम्रं श्लैक्ष्णमेव वा ॥
स्फटिकं वा यथालाभं स्फाटिकं चान्यदेव वा ।
सर्व्वगन्धमयं वाथ लिङ्गं कुर्य्याद्यथारुचि ॥
व्रतावसानसमये समाचरितनैत्यकः ।
कृत्वा वैशेषिकीं पूजां हुत्वा चैव यथा पुरा ॥
संपूज्य च सदाचार्य्यं व्रतिनश्च विशेषतः ।
दैशिकेनाभ्यनुज्ञातः प्राङ्मुखो वाप्युदङ्मुखः ॥
दर्भासनो दर्भपाणिः प्राणापानौ नियम्य च ।
जपित्वा शक्तितो मूलं ध्यात्वा शाम्भं त्रियम्बकम् ॥
अनुज्ञाप्य यथापूर्व्वं नमस्कृत्य कृताञ्जलिः ।
ससुत्सृजामि भगवन् ! व्रतमेतत्त्वदाज्ञया ॥
इत्युक्त्वा लिङ्गमूलन्तु दर्भानुत्तरतस्त्यजेत् ।
ततो दग्धजटाचीरमेखलादपि चोत्सृजेत् ॥
पुनराचम्य विधिवत् पञ्चाक्षरमुदीरयेत् ।
यः कृत्वात्यन्तिकीं दीक्षामादेहान्तमनाकुलः ॥
व्रतमेतत् प्रकुर्वीत स तु वै नैष्ठिकः स्मृतः ।
सोऽत्याश्रमी च विज्ञेयो महापाशुपतस्तथा ॥
स एव तपसां श्रेष्ठः स एव च महाव्रती ।
न तेन सदृशः कश्चित् कृतकृत्यो सुसत्तम ॥
यतिर्यो नैष्ठिको ज्ञातस्तमाहुर्नैष्ठिकोत्तमम् ।
योऽनश्नन्नहरश्नाहं वा व्रतमेतत् समाचरेत् ॥
सोऽपि नैष्ठिकतुल्यः स्यात्तीव्रव्रतसमन्वयात् ।
कृताक्षो यश्चरेदेतद्व्रतं व्रतपरायणः ॥
द्वित्रैरकदिवसं वापि स च कश्चन नैष्ठिकः ।
कृत्यमित्येव निष्कामो यश्चरेद् व्रतमुत्तमम् ॥
शिवार्पितात्मा सततं न तेन सदृशः क्वचित् ।
भस्मच्छन्नो द्विजो विद्वान् महापातकसम्भवैः ॥
पापैर्विमुच्यते सद्यो मुच्यते नात्र संशयः ।
रुद्राणामेतदुत्तरं वीर्य्यं तद्वस्य परिकीर्त्तितम् ॥
तस्मात्सर्व्वेषु कालेषु वीर्य्यवान् भस्मसंयुतः ।
भस्मनिष्ठस्य दग्धन्ति दोषा भस्माग्निसङ्गमात् ॥
भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः ।
भस्मना दिग्धसर्व्वाङ्गो भस्मदीप्तत्रिपुण्ड्रकः ॥
भस्मशायी च पुरुषो भस्मकल्मषभक्षणात् ।
भूतिर्भूतिकरी पुंसां रक्षा रक्षाकरी परम् ॥
किमन्यदिह वक्तव्यं भस्ममाहात्म्यकारणम् ।
व्रती च भस्मना स्नातः स्वयं देवो महेश्वरः ॥
परमात्मेव देवानां भस्मेतत्परमेश्वरम् ।
धौम्याग्रजस्य तपसि स्थापदो यन्निवारिताः ॥
तस्मात्सर्व्वप्रयत्नेन कृत्वा पाशुपतं व्रतम् ।
धनवद्भस्म संगृह्य भस्मस्नानरतो भवेत् ॥"

इति श्रीशिवपुराणे वायुसंहितायां पूर्व्वभागे एकोनविंशोऽध्यायः ॥ * ॥)

पाशुपतास्त्रं, क्ली, (पाशुपतं पशुपतिसम्बन्धि अस्त्रम् ।) पशुपतेः शूलास्त्रम् । तस्य स्वरूपं यथा,—

"गजाननोऽपि सञ्चिन्त्य यत्तत् पाशुपतं परम् ।
महारूपं महाकायं युगान्ताग्निसमप्रभम् ॥
पञ्चवक्त्रं महाघोरं दशबाहुं त्रिलोचनम् ।
सौम्यं घोरं सुघोरास्यमूर्द्ध्वकेशं भयोत्कटम् ॥
जटाभारेन्दुगङ्गाहिप्रियमाणं शिवाङ्गजम् ।
वेणुवीणाग्रहघण्टं डमरुकारावसंकुलम् ॥
शिवारावं भयात्रासि गृध्रवायसचेष्टितम् ।
उल्कादण्डज्वलज्ज्वालं गोनाग्रहतभूषणम् ॥
ललल्लेखलनागेन्द्रं गजचर्म्मार्द्रवाससम् ।
कैकरं तर्ज्जमानन्तु शूलखट्वाङ्गधारिणम् ॥
ग्रसमानं समस्तं त्रैलोक्यं सचराचरम् ।
पुरतो विघ्ननाग्रस्य लेलिहानं व्यवस्थितम् ॥"

इति देवीपुराणम् ॥

पाशुपाल्यं, क्ली, (पशुपालस्य भावः कर्म्म वा । पशुपाल + ष्यञ् ।) वैश्यवृत्तिः । पशून् गोमहिष्यादीन् पालयति पशुपालः ठात् षञ् । पशुपालस्य भावः कर्म्म वा इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । इत्यमरभरतौ ॥ (यथा, मार्कण्डेये । २८ । ६ ।
"दानमध्ययनं यज्ञो वैश्यस्यापि त्रिधैव सः ।
वाणिज्यं पाशुपाल्यञ्च कृषिश्चैवास्य जीविका ॥")

पाश्चात्यः, त्रि, (पश्चात् + "दक्षिणापश्चात्पुरसस्त्यक् ।" ४ । २ । ६८ । इति त्यक् ।) पश्चाद्भवः । (यथा, देवीभागवते । १ । २७ । ६६ ।
"पाश्चात्यं यामिनीयामं ध्यानमेवान्वपद्यत ।
स्नात्वा प्रातः क्रियाः कृत्वा पुनरास्ते समाहितः ॥")

पश्चिमदेशजातः । इति सुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । १ । १२१ । ११ ।
"स विजित्य गृहीत्वा च भूपतीन् राजसत्तमः ।
प्राच्यादुदीच्यान् पाश्चात्यान् दाक्षिणात्यानकालयत् ॥")

पाश्चात्याकरसम्भवं, क्ली, (पाश्चात्ये पश्चिमदिग्भवे आकरे सम्भव उत्पत्तिर्यस्य ।) साम्भरीलवणम् । तत्पर्य्यायः । रोमकम् २ रामलवणम् ३ । इति रत्नमाला ॥

पाश्या, स्त्री, (पाश्नानां समूहः । पाश्न + "पाश्नादिभ्यो यः ।" ४ । २ । ४६ । इति यः ।) पाश्नसमूहः । इत्यमरः । ३ । २ । ४३ ॥

पाषकः, पुं, (पषति बध्नातीव चरणौ । पष बन्धे + ण्वुल् ।) पादाभरणविशेषः । पाउजी इति भाषा ॥ यथा,—

"रत्नपाषकयष्टीश्च विराजितपदाङ्गुलेः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥

पाषण्डः, पुं, (पापं सनोति दर्शनसंसर्गादिना ददातीति। षणु अ दाने + अमन्तात् डः। पृषोदरादित्वात् साधुः। यद्वा, पाति रक्षति दुष्कृतेभ्य इति। पा + क्विप्। पा वेदधर्म्मं षण्डयति खण्डयतीति। यदुक्तम्।
"पालनाच्च त्रयीधर्म्मः पाशब्देन निगद्यते।
तं ष(ख)ण्डयन्ति ते यस्मात् पाषण्डास्तेन हेतुना॥
नानाव्रतधरा नानावेशाः पाषण्डिनो मताः॥")
वेदविरुद्धाचारवान् सर्व्ववर्णचिह्नधारी। बौद्धक्षपणकादिः। इति भरतः॥ तत्पर्य्यायः। सर्व्वलिङ्गी २। इत्यमरः।२।७।४५॥ कौलिकः ३ पाषण्डिकः ४। इति शब्दरत्नावली॥ * ॥ पाषण्डादिसम्भाषणे दोषो यथा,—
"तस्मात् पाषण्डिभिः पापैरालापं स्पर्शनं त्यजेत्।
विशेषतः क्रियाकाले यज्ञादौ चापि दीक्षितः॥
क्रियाहानिर्य्यदे यस्य मासमेकं प्रजायते।
तस्यावलोकनात् सूर्य्ये पश्येत मतिमान् नरः॥
किं पुनर्य्यैस्तु सन्त्यक्ता त्रयी सर्व्वात्मना द्विज!।
पाषण्डभोजिभिः पापैर्व्वेदवादविरोधिभिः॥
पाषण्डिनो विकर्म्मस्थान् वैड़ालव्रतिकान् शठान्।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्॥
दूरापास्तस्तु संसर्गः सहास्या वापि पापिभिः।
पाषण्डिभिर्दुराचारैस्तस्मात्तान् परिवर्ज्जयेत्॥
एते नग्नास्तवाख्याता दृष्टा श्राद्धोपघातकाः।
येषां सम्भाषणात् पुंसां दिनपुण्यं प्रणश्यति॥
एते पाषण्डिनामानो म्लेच्छान्न आलपेद्बुधः।
पुण्यं नश्यति सम्भाषादेतेषां तद्दिनोद्भवम्॥
पुंसां जटाधरणमौण्ड्यव्रतां दृष्टैव
मोघाग्निनामखिलशौचनिराकृतानाम्।
तोयप्रदानपिहपिण्डबहिष्कृतानां
सम्भाषणादपि नरा नरकं प्रयान्ति॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः॥ * ॥
पाषण्डादीनां लक्षणं यथा,—
"भ्रष्टः स्वधर्म्मात् पाषण्डो विकर्म्मस्थो निगद्यते।
यस्य धर्म्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः॥
प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम्॥
तद्वान् वैड़ालव्रतिकः॥
प्रियं वक्ति पुरोऽन्यच्च विप्रियं कुरुते भृशम्।
वक्त्यपराधचेष्टस्य शठोऽयं कथितो बुधैः॥
सन्दिग्धहेतुभिर्यः सत्कर्म्मसु सहैतुकः।
अवैगुढ़धिर्नैष्कृतिकः स्वार्थसाधनतत्परः॥
शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः॥" इति।
एतद्टीकायां चामी॥ * ॥ अपि च।
सदाशिव उवाच।
"येऽन्यदेवं परत्वेन वदन्त्यज्ञानमोहिताः।
नारायणाच्युतगरुत्मन्तं ते वै पाषण्डिनस्तथा॥
कपालभस्माग्निधरा ये ह्यवैदिकलिङ्गिनः।
ऋते वनस्थाश्रमाच्च जटावल्कलधारिणः।
अवैदिकक्रियोपेतास्ते वै पाषण्डिनस्तथा॥
शङ्खचक्रोर्द्धपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः।
रहिता ये द्विजा देवि! ते वै पाषण्डिनो मताः॥
श्रुतिस्मृत्युक्तमाचारं यस्तु नाचरति द्विजः।
स पाषण्डीति विज्ञेयः सर्व्वलोकेषु गर्हितः॥
समस्तयज्ञभोक्तारं विष्णुं ब्रह्मण्यदेवतम्॥
उद्दिश्य देवताश्चैव जुहोति च ददाति च।
स पाषण्डीति विज्ञेयः स्वतन्त्रो वापि कर्म्मसु॥
स्वातन्त्र्यात् क्रियते यैस्तु कर्म्म वेदोदितं महत्।
विना वै भगवत्प्रीत्या ते वै पाषण्डिनः स्मृताः॥
यस्तु नारायणं देवं ब्रह्मरुद्रादिदेवतैः।
समत्वेनैव वीक्षेत स पाषण्डी भवेत् सदा॥
अनास्था क्रियते यैस्तु मनोवाक्कायकर्म्मभिः।
वासुदेवे न जानाति स पाषण्डी भवेत् द्विजः॥
हरेर्नामैकमन्त्राभ्यां लोकाः सङ्क्षिप्तविस्तृताः।
यदि वर्णाश्रमाद्या ये ते वै पाषण्डिनः स्मृताः॥
वर्णानां गुरवो नित्यं शिवे यद्यप्यवैष्णवाः।
भगवद्भक्तिरहिता वैष्णवादिविनिन्दकाः॥
रजस्तमोमया जीवहिंसका जीवभक्षकाः।
असत्प्रतिग्रहरता देवता ग्रामयाजकाः॥
भ्रष्टाचाराश्रया व्रात्या नानाविद्युधपूजकाः।
देवतोच्छिष्टश्राद्धादिभोजिनः शूद्रवृत्तिकयाः॥
विविधासत्कर्म्मरता भक्ष्याद्यविचारिणः।
लोभमोहमदक्रोधकामाहङ्कारिणः सदा॥
एवंविधाः पारदारिकाद्या येऽत्र शुभानने!।
अन्येषां का कथा तत्र पाषण्डा ब्राह्मणाः स्मृताः॥
वर्णाश्रमाद्या ये मर्त्याः स्वस्वधर्म्मविवर्ज्जिताः।
ते वै पाषण्डिनो देवि! नारायणबहिर्मुखाः॥
सर्व्वाग्निनो द्विजा येऽपि सर्व्वक्रियणस्तथा।
षड्वेदाचाररहितास्ते वै पाषण्डिनो मताः॥
ये त्वसङ्कल्पपानादिरता लोका निरन्तरम्।
प्रिये! पाषण्डिनो ज्ञेया इह ते नात्र संशयः॥
विष्णुवैष्णवगोभूमिदेवादिषु विशेषतः।
अश्वत्थतुलसीतीर्थचैत्यादिषु महागुरौ॥
लक्ष्मीसरस्वतीगङ्गायमुनासु वरानने!।
स्मृताः पाषण्डिनस्तेऽपि ये न सेवापरायणाः॥
रुद्राक्षेन्द्राक्षभद्राक्षस्फाटिकाक्षादिधारिणः।
जटिला भस्मलिप्ताङ्गास्ते वै पाषण्डिनः प्रिये!॥
असिजीवी मसीजीवी धावकः पाचकस्तथा।
एते पाषण्डिनो विप्रा मादकद्रव्यभोजिनः॥
देवि! कार्ष्णादयो भक्ता अनन्यशरणास्तु ये।
पाषण्डसङ्गं न कुर्य्युस्तद्धेतोः पानभोजने॥
यदि देववशाल्लोभान्मोहात्तस्यान्नभोजनम्।
ततस्तप्तजलपानञ्च चक्रुस्तत्सङ्गमादिकम्॥
तत्पानभोजनालापसङ्गालिङ्गनतोऽचिरात्।
पाषण्डिनो वैष्णवाः स्युरन्येषामपि का कथा॥
किमत्र बहुनोक्तेन ब्राह्मणा ये ह्यवैष्णवाः।
असदाचरणास्ते स्युस्तदा पाषण्डिनः स्मृताः॥
एतद्भोजनपानादिकर्म्मभिर्वैष्णवा जनाः।
पाषण्डिनस्तथा स्युर्व्वै जटाभस्मादिधारिणः॥"
इति प्राणोत्तरखण्डे पाषण्डाचरणं नाम ४२ अध्यः॥
तस्य त्याज्यत्वं यथा,—
"त्यज पाषण्डसंसर्गं सङ्गं भज सतां सदा।
कामं क्रोधञ्च लोभञ्च मोहञ्च मदमत्सरौ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः॥ * ॥
तस्य राष्ट्राहितकर्त्तृत्वता यथा,—
"कितवान् कुशीलवान् क्रूरान् पाषण्डस्थांश्च मानवान्।
विकर्म्मस्थान् शौण्डिकांश्च क्षिप्रं निर्व्वासयेत् पुरात्॥
एते राष्ट्रे वर्त्तमाना राज्ञः प्रच्छन्नतस्कराः।
विकर्म्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः॥"
इति मानवे ९ अध्यायः॥
अपि च।
"आकुर्व्वांश्च तथा क्षुद्रान् दृष्टार्थतत्त्वभाषिणः।
पाषण्डिनस्तापसादीन् परराष्ट्रेषु योजयेत्॥"
इति युक्तिकल्पतरुः॥
पाषण्डकः, पुं, (पाषण्ड एव। स्वार्थे कन्।) पाषण्डः। इति शब्दरत्नावली॥
पाषण्डी, [न्] पुं, (पां त्रयीधर्म्मं षण्डयतीति। पा + षण्ड + णिनिः।) पाषण्डः। इति जटाधरः॥ (यथा, मनुः। ४। ३०।
"पाषण्डिनो विकर्म्मस्थान् वैड़ालव्रतिकान् शठान्।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्॥")
पाषाणः, पुं, (पर्वति पीड़यत्यनेनेति। पर्व पीड़ने + बाहुलकात् आनच्। "पर्वणश्च।" २। ६०। इत्युज्ज्वलदत्तोक्त्या स च णित्।) प्रस्तरः। तत्पर्य्यायः। ग्रावा २ उपलः ३ अश्मा ४ शिला ५ दृषत् ६। इत्यमरः। २।३।४॥ ईश्मत् ७। इति भरतः॥ प्रस्तरः ८ पारावतः ९ पारटीटः १० टंकारः ११ काचकः १२। इति शब्दरत्नावली॥ (यथा, देवीभागवते। ४। २१। ५४।
"गतेऽथ नारदे कंसः समाहूयाथ बालकम्।
पाषाणे पोथयामास सुखं प्राप च मन्दधीः॥"
पाषाणादिनिर्म्मितत्वात् देवतापतिमादि। यथा, आर्य्यासप्तशत्याम्। ३८६।
"पूजां विना प्रतिष्ठा नास्ति न मन्त्रं विना प्रतिष्ठा च।
तदुभयविप्रतिपन्नः पश्यतु गीर्व्वाणपाषाणम्॥")
पाषाणगर्दभः, पुं, दुष्टसन्धिजसुदरोगविशेषः। तल्लक्षणमाह।
"वातश्लेष्मसमुद्भूतः क्रमयुर्दुष्टसन्धिजः।
स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः॥"
स्थिरः कठिनः॥ * ॥ तच्चिकित्सा यथा,—
"पाषाणगर्दभं पूर्व्वं खेदयेत् कुशलो भिषक्।
ततः पत्रसिकाप्रोक्तैः कल्कैरुष्णैः प्रलेपयेत्॥
वातश्लेष्मिकशोथघ्नैः कल्कैरन्यैश्च लेपयेत्।
परिपाकगतं भित्त्वा व्रणवत्तमुपाचरेत्॥
जलौकाभिर्हृते रक्ते स शाम्यति विनौषधम्।
एतत्सर्व्वेषु बहुषु प्रोक्तितं लिखितं ततः॥"
इति भावप्रकाशः॥
पाषाणचतुर्दशी, स्त्री, (पाषाणसाध्या पाषाणवत्पिष्टकभोजनसाध्या चतुर्दशी।) दीपावल्यां शुक्लचतुर्दश्याम्। यथा, भविष्ये।

"वृश्चिके शुक्लपक्षे तु या पाषाणचतुर्दशी।
तस्यामाराधयेन्नौरीं नक्तं पाषाणभोजनैः॥
पाषाणभोजनैः पाषाणाकारपिष्टकभोजनैः।"
इति तिथ्यादितत्त्वम्॥

पाषाणदारकः, पुं, (दारयति विदारयतीति। दृ+णिच्+ण्वुल्। पाषाणस्य दारकः।) टङ्कः। इति हेमचन्द्रः। ३। ५८३॥

पाषाणदारणः, पुं, (दारयतीति। दृ+णिच्+ल्युः। पाषाणस्य दारणो विदारकः।) टङ्कः। इत्यमरः। २। १०। ३४॥

पाषाणभेदनः, पुं, (पाषाणं अश्मरीं भिनत्तीति। भिद्+ल्युः।) वृक्षविशेषः। हाड्‌जुड़ी इति भाषा। तत्पर्य्यायः। अश्मघ्नः २ शिलाभेदः ३ अश्मभेदकः ४ श्वेता ५ उंपलभेदी ६ पलभित् ७ शिलगर्भजः ८। अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। मेहव्रणकृमिरक्तक्षयाश्मरीनाशित्वम्। शीतलत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"पाषाणभेदकोऽश्मघ्नो गिरिभिद्भिन्नयोजनी।
अश्मभेदो हिमसिक्तः कषायो वस्तिशोधनः॥
भेदनो हन्ति दोषार्शोगुल्मव्रणक्षयाश्मकृच्छ्रकृमीन्।
योनिरोगान् प्रमेहांश्च शीताम्लव्रणानि च॥"
इति भावप्रकाशः॥

पाषाणभेदी, [न्] पुं, (पाषाणं अश्मरीं भिनत्तीति। भिद्+णिनिः।) वृक्षविशेषः। पाथरचुर इति भाषा। तत्पर्य्यायः। अश्मभेदः २ शिलाभिदः ३ अश्मभित् ४। इति रत्नमाला॥ (अश्मभेदशब्दे ज्ञातव्यमस्य विवरणम्॥)

पाषाणी, स्त्री, (पाषाण+अल्पार्थे ङीष्।) क्षुद्रपाषाणः। स तु परिमापकविशेषः। वाट्‌खारा इति भाषा। तत्पर्य्यायः। पृषाकरा २। इति शब्दचन्द्रिका॥

पाहातः, पुं, (पाति रक्षति दुष्कृतेभ्य इति। पा+किप्। पां त्रयीधर्म्मं हन्ति गच्छतीति। हन् गतौ+डः। पाहं ब्रह्माणं अततीति। अच्।) ब्रह्मदारुवृक्षः। इति शब्दचन्द्रिका॥

पि, शृ गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-अनिट्।) शृ, पियति। इति दुर्गादासः॥

पिक, पुं, (अपि कायति शब्दायते इति। अपि+कै+"आतश्चोपसर्गे।" ३। १। १३६। इति कः। अपेरकारलोपः।) कोकिलः। इत्यमरः॥ २। ५। १६। (यथा,—
"पिक! विधुस्तव हन्ति समं तमस्त्वमपि चन्द्रविरोधिकुहूरवः।
इति तयोरनिशं हि विरोधिता कथमहो समता मम तापने॥"
इत्युद्भटः॥)

पिकप्रिया, स्त्री, (पिकानां प्रिया।) महाजम्बूः। इति राजनिर्घण्टः॥

पिकबन्धुः, पुं, (पिकानां बन्धुरिव।) आम्रवृक्षः। इति त्रिकाण्डशेषः॥

पिकरागः, पुं, (पिकानां रागोऽनुरागो यत्र।) आम्रवृक्षः। इति राजनिर्घण्टः॥

पिकवल्लभः, पुं, (पिकानां वल्लभः।) आम्रवृक्षः। इति भावप्रकाशः॥ (गुणाश्चास्य आम्रशब्दे ज्ञातव्याः॥)

पिकाक्षः, पुं, (पिकस्य अक्षि लोचनं तद्वत् वर्णो यस्य। समासे षच्।) रोचनी। इति शब्दचन्द्रिका॥

पिकाङ्गः, पुं, (पिकस्याङ्गमिव अङ्गं यस्य।) पक्षिविशेषः। इति शब्दचन्द्रिका॥

पिकानन्दः, पुं, (पिकानामानन्दो यस्मिन्।) वसन्तकालः। इति राजनिर्घण्टः॥

पिकी, स्त्री, (पिक+स्त्रियां ङीष्।) कोकिला। इति राजनिर्घण्टः॥

पिकेक्षणा, स्त्री, (पिकस्य ईक्षणं लोचनं तद्वत् वर्णो यस्याः।) कोकिलाक्षः। इति राजनिर्घण्टः॥ कोकिलचक्षुस्तुल्यचक्षुर्युक्ता च॥

पिक्कः, पुं, (पिक् इत्यव्यक्तशब्देन कायति शब्दायते इति। कै+कः। पिक इव कायतीति। पृषोदरादित्वात् साधुरित्येके।) हस्तिशावकः। इति शब्दमाला॥

पिङ्गं, क्ली, (पिङ्गतीति। पिङ्गि वर्णे+अच्। न्यङ्क्वादित्वात् कुत्वम्।) बालकः। इति मेदिनी। गे, १२॥ हरितालम्। इति राजनिर्घण्टः॥

पिङ्गः, पुं, (पिङ्गि वर्णे+अच्। कुत्वञ्च।) पिङ्गलवर्णः। तद्वति, त्रि। इत्यमरः। १। ५। १६॥ (यथा, महाभारते। १। १२३। ३२।
"पद्मपत्राननः पिङ्गस्तेजसा प्रज्वलन्निव॥")
मूषकः। इति राजनिर्घण्टः॥

पिङ्गकपिङ्गा, स्त्री, (पिङ्गा कपिङ्गा च। वर्णो वर्णेनेति समासः।) तैलपायिका। इति हेमचन्द्रः। ४। २७३॥

पिङ्गचक्षुः, [स्] पुं, (पिङ्गे चक्षुषी यस्य।) कुम्भीरः। इति हेमचन्द्रः। ४। ४१८॥

पिङ्गजटः, पुं, (पिङ्गा पिङ्गलवर्णा जटा यस्य।) शिवः। इति हेमचन्द्रः। २। ११३॥

पिङ्गलं, क्ली, (पिङ्गं लातीति। ला+कः।) रीतिः। इति राजनिर्घण्टः॥

पिङ्गलः, पुं, (पिङ्गो वर्णोऽस्यास्तीति। पिङ्ग+"सिध्मादिभ्यश्च।" ५। २। ९७। इति लच्।) नीलपीतमिश्रितवर्णः। तत्पर्य्यायः। कङ्कारः २ कपिलः ३ पिङ्गः ४ पिशङ्गः ५ कटुः ६। तद्वति, त्रि। इत्यमरः। १। ५। १६॥ केचित् इयं इयं पर्य्यायमाहुः। अत्र नीलपीतः कपिलः। रोचनाभः पिशङ्गः। कनकपिङ्गलः कटुः। इति सुभूतिः॥
"पिशङ्गो रोचना पाण्डुः कटुः कनकपिङ्गलः॥"
इति नाममाला॥
"पिङ्गदीपशिखाभः स्यात् पिशङ्गः पद्मधूलिवत्।
पीतनीलहरिद्रक्तः कङ्कारस्तृणवह्निवत्॥
अयस्तूक्तिः पीताङ्गः कपिलो रोचनाच्छवः॥
इत्यत्र भेदोऽपि दृश्यते। अल्पभेदत्वादिहासौ गाढतः।" इति तट्टीकायां भरतः॥ * ॥ नागभेदः। (यथा, महाभारते। १। ३५। ६।
"निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा॥")
रुद्रः। चक्षुरुपारिपार्श्विकः। निधिभेदः। कपिः। अग्निः। इति मेदिनी। ले, ११३॥ मुनिविशेषः। (यथा, महाभारते। १। ५३। ६।
"ब्रह्मभवत् साङ्करवो अध्वर्युश्चापि पिङ्गलः॥")
नकुलः। स्थावरविषविशेषः। इति हेमचन्द्रः। ४। १६५॥ चुद्रोलूकः। इति राजनिर्घण्टः॥ (यक्षविशेषः। यथा, महाभारते। ३। २३०। ५१।
"पिङ्गलो नाम यक्षेन्द्रो लोकस्यानन्ददायकः॥")
पर्व्वतविशेषः। इति ब्रह्माण्डपुराणम्॥) प्रभवादिषष्टिवर्षान्तर्गतैकपञ्चाशत्तमवर्षः। यथा,
"देशभङ्गोऽथ दुर्भिक्षं समासात् कथयाम्यहम्।
पिङ्गले चारुपङ्क्षाक्षि! दुर्भिक्षं नर्म्मदातटे॥"
इति ज्योतिस्तत्त्वम्॥ * ॥
पिङ्गलाचार्य्यकृतच्छन्दोग्रन्थविशेषः। यथा,—
"जो विविहमत्तसायरपारं पत्तो विविमलमइ हेलम्।
पढमं भासतरण्डो नाओसो पिङ्गलो जयइ॥"
अस्य व्याख्या।
"अथ छन्दःशास्त्रकर्त्तुः पिङ्गलाचार्य्यस्य स्तुतिरूपं मङ्गलं निर्विघ्नग्रन्थपरिसमाप्तये ग्रन्थकृत् करोति। विविधा नानाप्रकारकविन्यासविशिष्टा मात्रा यत्र तद्विविधमात्रं छन्दःकदम्बं तदेव सागरः अतिदुर्गमत्वात् भाषा एव तरण्डा नौर्यस्य। प्राकृते इच्छता तेन भाषयैव छन्दःशास्त्रसूत्रवानित्यवगम्यते। केचित्तु लघुगुरुरूपा या विविधा मात्रा सैव सागरः तत्पारं प्राप्तः अपिरवधारणे। विमलया मत्या हेला यत्र तद्यथा स्यात् निर्म्मलबुद्ध्या हेलयैव पारं गत इत्यर्थः। प्रथममित्यनेन छन्दःशास्त्रस्य प्रथमप्रणेतायमित्यवगम्यते। अर्थान्तरमप्यनेनैव व्यज्यते यो विविधमात्राभिः सागरपारं प्राप्तः विः पक्षी अर्थात्नरूढः तस्य विमलमतौ हेला यत्र तत् यथा स्यात् भाषा अनुनयवाक् सैव नौर्यस्य ईदृशो नागो जयति। एवं हि श्रूयते भोक्तुमुद्यतं गरुडं दृष्ट्वा सकौशलं सविनयं तमुवाच भो गरुड ममेदं कौशलं पश्य यद्येकवारंलिखितं मया लिख्यते तदा मां भक्ष इत्युक्त्वा सागरतीरं षड्विंशत्यक्षरपर्य्यन्तं प्रस्तारं प्रदर्श्य सशङ्कं प्रविवेश गरुडोऽपि वचनां गुरुत्वेन तच्च मत्वा तदेशाद्विरराम एतादृशं बुद्धिगौरवं यस्य अतएव जयति उत्कर्षेण वर्त्तते तं प्रति प्रणतोऽस्मीति व्यज्यते अथवा गाथायां भगणोपन्यासो मङ्गलार्थः प्रथमं भृत्योदासीनयोर्भगणजगणयोर्गोऽनुचितोऽपि कथमित्यवहितैर्भाव्यम्।" इति पिङ्गलसूत्रग्रन्थवृत्तिका च॥

पिङ्गललोहं, क्ली, (पिङ्गलं लोहमिति नित्यकर्म्मधारयः।) पित्तलम्। इति राजनिर्घण्टः॥

पिङ्गला, स्त्री, (पिङ्गल+टाप्।) वामनाख्यदिग्गजस्य स्त्री। इत्यमरः। १। ३। ४॥ कुसुदस्य करिणी। वेश्याविशेषः। इति मेदिनी। ले, ११३॥ तस्या उपाख्यानं यथा,—

"पिङ्गला नाम वेश्यासीद्विदेहनगरे पुरा।
तस्या मे ध्रियमाणं किञ्चिन्निबोध नृपनन्दन ! ॥
सा स्वैरिण्येकदा कान्तं सङ्केत उपनेष्यती।
अभूत् काले बहिर्द्वारि बिभ्रती रूपमुत्तमम् ॥
मार्ग आगच्छतो वीक्ष्य पुरुषान् पुरुषर्षभ !।
तान् शुल्कदान् वित्तवतः कान्तान् मेनेऽर्थ-
कामुका ॥
आगतेष्वपयातेषु सा सङ्केतोपजीविनी।
अन्यो वित्तवान् कोऽपि मामुपैष्यति भूरिदः ॥
एवं दुराशया ध्वस्तनिद्रा दार्यवलम्बिनी।
निर्गच्छन्ती प्रविशती निशीथं समपद्यत ॥
तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः।
निर्वेदः परमो जज्ञे चिन्ताहेतुः सुखावहः ॥
तस्या निर्विण्णचित्ताया गीतं शृणु यथा मम ॥
निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः।
न ह्यङ्गाजातनिर्वेदो देहबन्धं जिहासति ॥
पिङ्गलोवाच।
अहो मे मोहविततिं पश्यतां विजितात्मनः।
या कान्तादसतः कामं कामये येन बालिशा ॥
सन्तं समीपे रमणं रतिप्रदं
वित्तप्रदं नित्यमिमं विहाय।
अकामदं दुःखभयाधिशोक-
मोहप्रदं तुच्छमहं भजेऽज्ञा ॥
अहो मयात्मा परितापितो वृथा
सात्वृत्तवृत्त्यातिविगर्ह्य वार्त्तया।
क्षेयान्नराद्यार्थलवोऽशुभोत्थात्
क्लेशात् क्लेशं क्रीतेन वित्तं रतिमात्मनेच्छती ॥
यदस्थिभिर्निर्मितवंशवंश-
स्थूणं त्वचा रोमनखैः पिनद्धम्।
क्षरन्नवद्वारमगारमेतद्-
विण्मूत्रपूर्णं मदुपैति कान्या ॥
विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः।
यान्यमिच्छत्यसत्यस्मादात्मदात् काममच्युतात् ॥
सुहृत् प्रेष्ठतमो नाथ आत्मा चायं सूरौरिणाम्।
तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ॥
कियत् प्रियन्त इमे जनन् कामा ये कामदा नराः।
आद्यन्तवन्तो भार्यायाः देवा वा कालविद्रुताः।
नूनं मे भगवान् प्रीतो विष्णुः केनापि कर्म्मणा।
निर्वेदोऽयं दुराशाया यज्जातः सुखावहः ॥
मैवं सुमन्दभाग्यायाः क्लेशा निर्वेदहेतवः।
येनानुबन्धं निर्हृत्य पुरुषः शममृच्छति ॥
तेनोपकृतमादाय शिरसा ग्राम्यसङ्गताः।
त्यक्ता दुराशाः शरणं व्रजामि तमधीश्वरम् ॥
सन्तुष्टा श्रद्दधत्येतद्यथालाभेन जीवती।
विहराम्यमुनैवाहमात्मना रमणेन वै ॥
संसारकूपे पतितं विषयैर्मुषितेक्षणम्।
ग्रस्तं कालाहिनात्मानं कोऽन्यस्त्रातुमधीश्वरः ॥
आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदाखिलात्।
अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ॥
श्रीब्राह्मण उवाच।
एवं व्यवसितमतिर्दुराशां कान्ततर्षजाम्।
छित्त्वोपशममास्थाय शय्यामुपविवेश सा ॥
आशा हि परमं दुःखं नैराश्यं परमं सुखम्।
यथा संछिद्य कान्ताशां सुखं सुष्वाप पिङ्गला ॥"
इति श्रीभागवते ११ स्कन्धे श्रीभगवदुद्धव-
संवादे अष्टमोऽध्याये ।२२—४३ ॥ * ॥
कर्णिका। नाड़ीविशेषः। इति हेमचन्द्रः ॥
पक्षिभेदः। राजरीतिः। इति राजनिर्घण्टः ॥
शिंशपावृक्षः। इति रत्नमाला ॥ * ॥
अथ पिङ्गलादिनाड़ीनिरूपणम्।
"दक्षिणांशः स्मृतः सूर्य्यो वामभागो निशाकरः।
नाड़ीद्वयं विदुस्तासु सुखास्तिस्रः प्रकीर्त्तिताः ॥
इड़ा वामे तनोर्मध्ये सुषुम्णा पिङ्गला परे।
मध्या तासपि नाड़ी स्यादग्नीसोमस्वरूपिणी ॥"
"अत्रेता वामदृक्काधःस्था धनुर्व्वक्रा वामनासा-
पर्य्यन्तं गता एवं पिङ्गला दक्षिणाक्षाधःस्था
धनुर्व्वक्रा दक्षिणनासान्तं गता एतद्वयान्तर्गता
सुषुम्णा इत्यर्थः।" इति सारदातिलकम् ॥
"नाड़ीनां संवहो देवि ! कञ्चयोनिः खगाङ्कवत्।
तत्र नाड्यः ससुत्पन्नाः सहस्राणां द्विसप्ततिः ॥"
कञ्चस्य पक्षस्य योनिरुत्पत्तिस्थानं श्यालूकमिति
यावत्।
"प्रधानाः प्राणवाहिन्यो भूयस्तत्र दश स्मृताः।
इड़ा च पिङ्गला चैव सुषुम्णा च तृतीयिका।
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी।
अलम्बुषा कुहूश्चैव शङ्खिनी च दश स्मृताः ॥
एवं नाड़ीमयं चक्रं विज्ञेयं शक्तिचक्रके।
इड़ायाः पिङ्गलायाश्च मध्ये या सा सुषुम्-
णिका ॥
इयञ्च त्रिगुणा ज्ञेया ब्रह्मविष्णुशिवात्मिका।
रजोगुणा च वज्राख्या चित्रिणी सत्त्वसंयुता ॥
तमोगुणा ब्रह्मनाड़ी कार्य्यभेदक्रमेण च ॥"
इति निरुत्तरतन्त्रे प्रथमपटलः ॥
इड़ापिङ्गलयोः स्वरूपं यथा,—
"इड़ा च शुक्लचन्द्राभा तस्या वामे व्यवस्थिता।
पिङ्गला सितरक्ताभा दक्षिणं पार्श्वमाश्रिता।"
इति योगार्णवः ॥
"इड़ायां संस्थितश्चन्द्रः पिङ्गलायां दिवाकरः ॥"
इति तन्त्रान्तरम् ॥
पिङ्गलिका, स्त्री, (पिङ्गलो वर्णोऽस्यस्या इति। पिङ्गल+ठन्।) बलाका। इति जटाधरः ॥ (कीटविशेषः। यथा, सुश्रुते। ५। ८।
"मक्षिका कान्तारिका लक्षा पिङ्गलिका मधु-
लिका काषायी स्यात्किकेत्येवं षट् ताभिर्दष्टस्य दाहशोफौ भवतः ॥")
पिङ्गसारः, पुं, (पिङ्गमेव सारो यस्य।) हरि-
तालम्। इति राजनिर्घण्टः ॥ (हरितालशब्दे विततिरस्य ज्ञातव्या ॥)
पिङ्गस्फटिकः, पुं, (पिङ्गः पिङ्गलवर्णः स्फटिकः इति नित्यकर्म्मधारयः।) गोमेदमणिः। इति राजनिर्घण्टः ॥
पिङ्गा, स्त्री, (पिङ्गो वर्णोऽस्यस्या इति। अच् टाप् च।) गोरोचना। हिङ्गुः। नालिका। चक्षिका। इति मेदिनी। ने, ११ ॥ हरिद्रा। इति शब्दचन्द्रिका ॥ वंशरोचना। इति राज-निर्घण्टः ॥ (खनामख्याता तपस्विनी। अस्या आश्रमस्तु तीर्थस्यागत्वेन प्रसिद्धः। यथा, महाभारते। ३। ८२। ५५।
"पिङ्गातीर्थ उपस्पृश्य ब्रह्मचारी नराधिप !।
कपिलानां नरव्याघ्र ! शतस्य फलमश्नुते ॥"
तथा च तत्रैव। १३। २५। ५३।
"उल्लानक उपस्पृश्य आर्ष्टिषेणस्य चाश्रमे।
पिङ्गायाश्चाश्रमे स्नाता सर्व्वपापैः प्रमुच्यते ॥")
पिङ्गाक्षः, पुं, (पिङ्गं अक्षि यस्य। बच् समासे।) शिवः। इति त्रिकाण्डशेषः ॥ (कुम्भीरः। पिङ्ग-चक्षुःशब्ददर्शनात्॥ द्रोणपुत्रखगविशेषः। यथा, मार्कण्डेये। १। २१।
"पिङ्गाक्षश्च विबोधश्च सुपुत्रः सुमुखस्तथा।
द्रोणपुत्राः खगश्रेष्ठास्तत्रज्ञाः शास्त्रचिन्तकाः।'
पिङ्गलनेत्रे, त्रि। यथा, तत्रैव। ६६। ४५।
"नमस्तेऽनल ! पिङ्गाक्ष ! नमस्तेऽस्तु हुता-
शन ! ॥")
पिङ्गाक्षः, पुं, (पिङ्गं वर्णमश्नुते इति। अश+
अच्।) पक्षीपतिः। मत्स्यभेदः। पाङ्गाश इति भाषा॥ जात्यश्वर्णे, क्ली। इति मेदिनी। शे, २५॥
पिङ्गाक्षी, स्त्री, (पिङ्गं वर्णमश्नुते इति। अश+
अच्। स्त्रियां ङीष्।) नीलिका। इति मेदिनी। शे, २५ ॥
पिङ्गास्यः, पुं, (पिङ्गमास्यं वदनं यस्य।) पिङ्गाक्ष-
मत्स्यः। इति शब्दरत्नावली ॥
पिङ्गी, स्त्री, (पिङ्गो वर्णोऽस्यस्या इति। अच्।
ततो गौरादित्वात् ङीष्।) शमीवृक्षः। इति मेदिनी। गे, १२ ॥
पिङ्गेक्षणः, पुं, (पिङ्गानि पिङ्गलवर्णानि ईक्षणानि यस्य।) शिवः। इति हेमचन्द्रः। २। ११० ॥ (कुम्भीरः। पिङ्गचक्षुःशब्ददर्शनात्॥ पिङ्गल-नेत्रे, त्रि ॥)
पिचण्डः, पुं, (अपिचण्डतेऽनेनेति। अपि+
चडि कोपे+घञ्। अपेरलोपः।) मयूर-
वयवः। उदरम्। इति हेमचन्द्रः। ३। २६८ ॥
पिचण्डिलः, त्रि, (अतिशयितं पिचण्डसुदरमस्य।
पिचण्ड+तुन्दादित्वात् इलच्।) तुन्दिलः।
इति हेमचन्द्रः। ३। ११४ ॥ (यथा, काशी खण्डे। ८७। १२२।
"खाहाकारैर्वषड्कारैः सुरा जाताः पिच-
ण्डिलाः।
रचिता गिरयस्तेन सदन्नानां पदे पदे ॥")
पिचुमः, पुं, (पिचवे तूलाय साधुः। पिचु+यत्।)
कार्पासः। इति हेमचन्द्रः। ४। २०५ ॥
पिचिण्डः, पुं, उदरम्। इत्यमरः। २। ६। ७७॥
तस्य लक्षणं यथा,—
"भोगाढ्याः समजठरा निःस्वाः स्युर्घटसन्निभाः।
सर्पोदरा दरिद्राः स्युः————— ॥"
इति गारुडे ६३ अध्यायः ॥
मयूरवयवः। इति मेदिनी। डे, ३२ ॥

पिचिण्डिका, स्त्री, (पिचिण्ड इव पिण्डाकृतिरस्त्य स्येति । पिचिण्ड+ठन् ।) पिण्डिका । इति हेमचन्द्रः । ३ । २०६ ॥ पार डिम् इति भाषा॥

पिचिण्डिलः, पुं, (अतिशयितः पिचिण्ड उदरमस्य । पिचिण्ड+तुन्दादित्वात् इलच् ।) दृहदुदरयुक्तः । इत्यमरः । २ । ६ । ४४ ॥ तत्पर्य्यायः । पिचण्डिलः २ दृहत्कुक्षिः ३ तुन्दी४ तुन्दिकः ५ तुन्दिलः ६ उदरी ७ उदरिलः ८ । इति हेमचन्द्रः । ३ । ११४ ॥ (यथा, काशीखण्डे शिवशर्म्मणो वैकुण्ठलोकगमने विष्णुगणसंवादे ।

"पिचिण्डिलैः स्थूलवक्त्रैर्मेघगम्भीरनिस्वनैः ॥")

पिचुः, पुं (पेचतीति । पिच मर्द्दने+रुगयादित्वात् कुः । ।) कार्पासतूलः । इत्यमरः । २ । ६ । १०६ ॥ (यथा, सुश्रुते । ४ । ६ ।

"अर्शो वीक्ष्य शलाकयोत्पीड्य पिचुवक्त्रयोरन्यतरेण प्रस्थ्य क्षारं पातयेत् ॥") कुष्ठभेदः । कर्षः । असुरविशेषः । इति मेदिनी । चे, ७ ॥ भैरवः । शस्यभेदः । इति विश्वः ॥ (चिकित्सोपयोगिपञ्चकर्म्मान्तर्गतक्रियाविशेषः । यथा,—

"कामिन्यां पूतियोन्याञ्च कर्म्मणः स्नेहनो विधिः । क्रमः कार्य्यस्ततः स्नेहपिचुभिस्तर्पणं भवेत् ॥ शल्लकीबिल्वनीलाब्जबधवल्कपञ्चवल्कलैः । कषायैः साधितैः स्नेहः पिचुः स्यादहिमुत्तापहः ॥" इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापच्चिकित्सायाम् ॥)

पिचुकः, पुं, (पिचुरिव कायतीति । के+कः । ।) मदनवृक्षः । इति रत्नमाला ॥ मयना इति भाषा ॥

पिचुतूलं क्ली, (पिचोस्तूलम् । ।) तूलः । इति त्रिकाण्डशेषः ॥

पिचुमन्दः, पुं, (पिचुं कुष्ठविशेषं मन्दयति नाशयतीति । मन्द+अच् । ।) निम्बवृक्षः । इति हेमचन्द्रः । ४ । २०५ ॥ (यथा, आर्य्यासप्तशत्याम् । ३३६ ।

"पक्षानुरूपमिन्दिन्दिरेव माकन्दशेखरो सुखरः ।
अपि च पिचुमन्दसङ्कुचे मौकुलिकुलमाकुलं मिलति ॥")

पिचुमर्दः, पुं, (पिचुं कुष्ठविशेषं मर्दयति नष्टतीति वा । मृद्+अच् । ।) निम्बवृक्षः । इत्यमरः । २ । ४ । ६२ ॥ (यथा, देवीभागवते । ३ । १० । १२ ।

"असतामुपकाराय दुर्ज्जनानां विभूतयः ।
पिचुमर्दः फलाढ्योऽपि काकैरेवोपभुज्यते ॥"

पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।

"कैटर्य्यः पिचुमर्दश्च निम्बोरिष्टो वरत्वचा ।
दृढपत्रो हिङ्गुनिर्य्यासः सर्व्वतोभद्र इत्यपि ॥")

पिचुलः, पुं, (पिचुं लातीति । ला+कः । ।) आम्रवृक्षः । इक्षुलः । जलवायसः । इति मेदिनी । ले, ११२ ॥ तरुः । इत्यमरटीकायां भारतसुन्दरी ॥

पिच्च क छेदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पिच्चयति । इति दुर्गादासः ॥

पिच्चटं, क्ली, (पिच्चयतीति । पिच्च छेदने+अटन् ।) सीसकम् । रङ्गम् । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"रङ्गं वङ्गञ्च कस्तीरं त्रपुरङ्गं पृथक् पिच्चटम् ॥") नेत्ररोगे, पुं । इति मेदिनी । टे, ५० ॥

पिच्छ, ग्र वाधे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) ग्र, पिच्छती पिच्छन्ती । बाधो विहितिः । इति दुर्गादासः ॥

पिच्छं, क्ली, (पिच्छतीति । पिच्छ+अच् ।) मयूरपुच्छम् । तत्पर्य्यायः । शिखण्डः२ बर्हम्३ । इत्यमरः । २ । ५ । ३१ ॥ शिखिपुच्छम् ४ शिखण्डकम् ५ । इति शब्दरत्नावली ॥ (यथा, अनर्घराघवे । ६ । ६५ ।

"तस्यारिबलभीमस्य ध्वजदण्डस्य लाञ्छनम् ।
दर्पदीप्तः क्षुरप्रेण मायूरं पिच्छमच्छिनत् ॥") चूड़ा । इति मेदिनी । छे, ५ ॥

पिच्छः, पुं, (पिच्छतीति । पिच्छ+अच् ।) लाङ्गूलम् । इति मेदिनी । छे, ५ ॥

पिच्छलदला, स्त्री, (पिच्छलं दलं पत्रं यस्याः ।) वदरीवृक्षः । इति त्रिकाण्डशेषः ॥

पिच्छवायः, पुं, (पिच्छं बाय इव यस्य ।) श्येनपक्षी । इति राजनिर्घण्टः ॥

पिच्छा, स्त्री, (पिच्छ+अजादित्वात् टाप् ।) श्लाक्ष्णलोवेष्टः । इत्यमरः । २ । ४ । ४७ ॥ (अस्याः पर्य्यायो यथा,—

"निर्य्यासः श्लाक्ष्णलेः पिच्छा श्लाक्ष्णली वेष्टकोऽपि च ।
मोचासारो मोचरसो मोचनिर्य्यास इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पूगः । छटा । कोषः । मोचा । भक्तसम्भृतमण्डम् । पङ्क्तिः । अश्वपदामयः । इति मेदिनी । छे, ४ ॥ चोलिका । फञ्जिलाला । इति हारावली । २३० ॥ शिंशपावृक्षः । इति शब्दचन्द्रिका ॥

पिच्छिका, स्त्री, (पिच्छं मयूरबर्हं अस्त्यत्रेति । पिच्छ+ठन् ।) चामरविशेषः । यथा । "पिच्छिकां भ्रामयित्वा बहुविधं हास्यं कृत्वा पलमहं दास्ये तरसे इदं अलं अपिहा कुरुमम ।" इति रत्नावलीनाटके ४ अङ्कः ॥

पिच्छितिका, स्त्री, शिंशपा । इति शब्दचन्द्रिका॥ (विवृतिरस्याः शिंशपाशब्दे ज्ञातव्या ॥)

पिच्छिलं, त्रि, (पिच्छा भक्तसम्भृतमण्डं अस्त्यस्येति । पिच्छादित्वात् इलच् ।). भक्तमण्डयुक्तम् । इति रायमुकुटः ॥ सरसवञ्जनादि । इति भरतः ॥ क्षुपादि । इति रमानाथः । स्निग्धक्षुपादि । इति भानुदीक्षितः ॥ मण्डयुक्तभक्तम् । जलयुक्तव्यञ्जनम् । इति नीलकण्ठः ॥ तत्पर्य्यायः । विजिलम् २ । इत्यमरः । २ । ६ । ४६ ॥ विजयिनम् ३ विजिनम्४ विच्छलम् ५ इज्जलम् ६ लालसीकम् ७ । इति वाचस्पतिः ॥ (यथा, क्षुन्नोमङ्गल्याम् ।

"तरुणं सर्षपशाकं नवौदनानि पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥")

पिच्छयुक्तः ॥ (स्निग्धसरसपदार्थविशेषः । पेचलं इति भाषा ॥ यथा, साहित्यदर्पणे १० । ५५ ।

"काले वारिधरागामपतितया नैव ग्रहव्यते स्थातुम् ।
उत्कण्ठितासि तरले ! नहि नहि सखि ! पिच्छिलः पन्थाः ॥")

पिच्छिलः, पुं, (पिच्छं चूड़ाऽस्त्यस्येति । पिच्छादित्वात् इलच् ।) श्लेष्मान्तकवृक्षः । इति राजनिर्घण्टः ॥

पिच्छिलकः, पुं, (पिच्छिलः सन् कायतीति । के+कः ।) धन्वनवृक्षः । इति राजनिर्घण्टः ॥

पिच्छिलच्छदा, स्त्री, (पिच्छिलश्छदो यस्याः ।) उपोदकी । इति राजनिर्घण्टः ॥

पिच्छिलत्वक्, [च्] पुं, (पिच्छिला त्वग् यस्य ।) नागरङ्गवृक्षः । इति त्रिकाण्डशेषः ॥ धन्वनवृक्षः । इति रत्नमाला ॥

पिच्छिलसारः, पुं, (पिच्छिलः सारो यस्य ।) मोचरसः । इति राजनिर्घण्टः ॥

पिच्छिला, स्त्री, (पिच्छा+इलच् । ततष्टाप् ।) मोतिका । शिंशपा । (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"पिङ्गला पिच्छिला वीरा क्षुद्रसारा च शिंशपा ॥")

श्लाक्ष्णलिः । (अस्याः पर्य्यायो यथा,—

"श्लाक्ष्णलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सिन्धुभेदः । इति मेदिनी । ले, ११५ । कोकिलाक्षः । इक्षिकाचुपः । शूलीलक्षम् । अतसी । इति राजनिर्घण्टः ॥ कच्चूः । इति शब्दचन्द्रिका ॥

पिञ्ज, इ क भाषार्थे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सकं च-सेट् ।) इ क, पिञ्जयति । भाः दीप्तिः । षष्ठ्यर्थो निर्कतनहिंसाबलदानानि । इति दुर्गादासः ॥

पिञ्ज, इ ञ ड वर्णपूजयोः । इति कविकल्पद्रुमः ॥ (अदां-व्यात्मं-अकं-सकं च-सेट् ।) इ, पिञ्जते । ञ ड, पिण्ड्ते । इति दुर्गादासः ॥

पिञ्जं, क्ली, (पिञ्ज बले+भावे घञ् ।) बलम् । व्याकुले, त्रि । इति मेदिनी । जे, १३ ॥

पिञ्जः, पुं. (पिञ्ज वधे+भावे घञ् ।) वधः । इत्यमरः । २ । ८ । ११५ ॥ कर्पूरभेदः । इति राजनिर्घण्टः ॥

पिञ्जटः, पुं, (पिञ्जयति नेत्रं दूषयतीति । पिञ्ज+अटन् ।) नेत्रमलम् । पिंचुटि इति भाषा ॥ यथा, शब्दरत्नावल्याम् ।

"दूषीका दूषिका दूषिः पिञ्जेटपिञ्जटावपि ॥"

पिञ्जनं, क्ली, (पिञ्जयतेऽनेनेति। पिञ्जि स्फोटने + करणे ल्युट्।) कार्पासस्फोटनधनुः। तत्पर्य्यायः। विहननम् २ तूलस्फोटनकार्मुकम् ३। इति हेमचन्द्रः। ३। ५७६॥

पिञ्जरं, क्ली, (पिञ्जि दीप्तौ वर्णे वा + बाहुलकात् अरः। इत्युज्ज्वलदत्तः। ३। १३१।) हरितालम्। इत्यमरः। २। ६। १०३॥ स्वर्णम्। इति मेदिनी। रे, १८५॥ नागकेशरम्। इति राजनिर्घण्टः॥ पक्ष्यादिबन्धनगृहम्। कायास्थि इन्द्रम्। इत्यमरटीकायां रामाश्रमः॥

पिञ्जरः, पुं, (पिञ्जि + अरः।) अश्वभेदः। पीतरक्तवर्णः। इति हेमचन्द्रः॥ (सुमेरुपश्चिमपार्श्वस्थपर्व्वतविशेषः। यथा, मार्कण्डेये। ५५।६।
"पिञ्जरोऽथ महाभद्रः सुरसः कपिलो मधुः॥")
पीते, त्रि। इति मेदिनी। रे, ११५॥ (यथा, आर्य्यासप्तशत्याम्। ३६९।
"प्रियया कुङ्कुमपिञ्जरपाणिद्वययोजनाङ्कितं वासः।
प्रहितं मां याचयाञ्जलिसहस्रकिरणाय शिक्षयति॥")

पिञ्जरकं, क्ली, (पिञ्जरमेव। स्वार्थे कन्।) हरितालम्। इति राजनिर्घण्टः॥ (पुं, नागविशेषः। यथा, महाभारते। १। ३५। ६।
"नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः॥")

पिञ्जलं, क्ली, (पिञ्जि हिंसायां वर्णे च + कलच्।) कुशपत्रम्। हरितालम्। इति धरणिः॥

पिञ्जलः, पुं, (पिञ्जि + कलच्।) अत्यन्तव्याकुलसैन्यादिः। इत्यमरः। २। ८। ६६॥

पिञ्जली, स्त्री, (पिञ्जल + स्त्रियां ङीष्।) कुशान्तरवेष्टितप्रादेशमात्रसाग्रकुशपत्रद्वयम्। अस्या नामान्तरं पवित्रम्। यथा,—
"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥
एतदेव हि पिञ्जल्या लक्षणं समुदाहृतम्॥"
इति छन्दोगपरिशिष्टम्॥

पिञ्जा, स्त्री, (पिञ्जयते स्फोट्यते इति। पिञ्ज + गुरोश्चेति अः। ततष्टाप्।) तूलम्। हरिद्रा। इति त्रिकाण्डशेषः॥ छड़ी। छड़ा इति भाषा॥ यथा, शब्दमालायाम्। [च॥"
"प्रोत्फलः सिंहला स्थानश्छड़ी पिञ्जा छटापि

पिञ्जानं, क्ली, स्वर्णम्। इति राजनिर्घण्टः॥

पिञ्जिका, स्त्री, (पिञ्जयतीति। पिञ्जि + ण्वुल्। टापि अत इत्वम्।) तूलनालिका। इति त्रिकाण्डशेषः॥ पाँइज इति भाषा॥

पिञ्जूलं, क्ली, (पिञ्जयतीति। पिञ्जि + "खर्ज्जिपिञ्जादिभ्य ऊरोलचौ।" उणा ४। ६०। इति ऊलच्।) वर्त्तिका। इत्युणादिकोषः॥

पिञ्जूषः, पुं, (पिञ्जयति हिनस्ति कर्णौ इति। पिञ्जि + बाहुलकात् ऊषन्।) कर्णमलम्। इति हेमचन्द्रः। २। २६६॥

पिञ्जेटः, पुं. (पिञ्जटः। पृषोदरादित्वात् साधुः।) नेत्रमलम्। इति शब्दरत्नावली॥

पिञ्जोला, स्त्री. (पिञ्जयतीति। पिञ्जि + बाहुलकात् ओलः।) पत्रकाहला। पचशब्दः। इति हारावली। २०७॥

पिट, संहतौ। ध्वनौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अकंच-सेट्।) पेटति जनः किञ्चिदाग्नीकरोति शब्दायते वा। इति दुर्गादासः॥

पिटं, क्ली, (पेटति संहतो भवतीति। पिट + कः।) चालः। इति त्रिकाण्डशेषः॥

पिटः, पुं, (पेटति व्याप्नोति संहतो भवतीति। पिट संहतौ + कः।) पेटः। इति धरणिः॥ पेटारा इति भाषा॥

पिटकः, पुं, क्ली, (पेटतीति। पिट् + कुन्।) वंशवेत्रादिमयसमुद्गकः। पेटारी इति पेटा इति पेड़ा इति च ख्यातः। तत्पर्य्यायः। पेटकः २ पेड़ा ३ मञ्जूषा ४। इत्यमरः। २। १०। ३०॥ आद्यौ खल्वपेटिकायाम्। इति स्वामी॥ पेटः५ पेटिका ६ तरिः ७ तरीः मञ्जुषाः पेड़िका१०। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। ५०। ८६।
"कुहालदात्रपिटकास्तृङ् स्याल्याद्यिभाजनम्॥")

विस्फोटे, त्रि। इति मेदिनी। के, १२०॥ (देहेस्थानभेदेन जातस्फोट शुभाशुभसूचकम्। यथा, बृहत्संहितायाम्। ५२। १—१०।
"सितरक्तपीतलक्ष्णा विप्रादीनां क्रमेण पिटकाये।
ते क्रमशः प्रोक्तफला वर्णानामग्र्यजादीनाम्॥
सुस्निग्धश्लक्ष्णशोभाः शिरसि धनत्वं मूर्द्धसौभाग्यमाराद्
दौर्भाग्यं भ्रूयुगोत्थाः प्रियजनघटनामाशु दुःशीलताच्च।
तन्मध्योत्थाश्च श्लोकं नयनपुटगता नेत्रयोरिष्टदृष्टिं
प्रभ्रष्यां शुष्कदेशेऽश्रुजलनिपतनस्थानगाश्चाति चिन्ताम्॥
घ्राणागण्डे वसनसुतदाक्षोष्ठयोरग्रलाभं
कुर्युस्तद्वच्चिबुकतलगा भूरि वित्तं ललाटे।
इन्दोरेवं गजहतपदा भूषणान्यग्रपाणे
श्रोत्रे तद्वत्कनकमपि ज्ञानमात्मस्वरूपम्॥
शिरःसन्धिग्रीवाहृदयकुक्षपार्श्वोरसि गता
अयोघातं घातं सुततनयलाभं सुचमपि।
प्रियप्राप्तिं स्कन्धेऽप्यटनमथ भिक्षार्थमसकृद्
विनाशं कक्षोत्था विदधति धनानां बहु सुखम्॥
दुःखघ्नचुनिचयस्य विधातं
दृष्ट्वाहुयुगला रचयन्ति।
संयमच्च मणिबन्धनजाता
भूषणाद्यसुषवाहुयुगोत्थाः॥
धनाप्तिं सौभाग्यं सुचमपि कराङ्गुल्युदरगाः
सुपानानं नाभौ तदध इह चारैर्धनहृतिम्।
धनं धान्यं वस्त्रौ युवतिमथ मेढ्रे सुतनयान्
धनं सौभाग्यं वा गुदहृषजाता विदधति॥

पिड़कः पुं, (पीड़यतीति। पीड़ + खुल्। निपातनात् साधुः।) स्फोटकः। इति हेमचन्द्रः। ३। १३०॥

ऊर्वोर्यानाङ्गनालाभं जान्वोः शत्रुजनात् क्षतिम्।
शुल्फेन जङ्घयोर्गुल्फेऽध्वन्यक्लेशूदायिनः॥
स्फिक्पार्ष्णिपादजाता
धननाशागम्यगमनमध्वानम्।
बन्धनमङ्गुलिनिचये-
ऽङ्गुष्ठे च ज्ञातिलोकतः पूजाम्॥
उत्पातगण्डपिटका
दक्षिणतो वामतस्त्रभौघाताः।
धन्या भवन्ति पुंसां
तद्विपरीतास्तु नारीणाम्॥
इति पिटकविभागः प्रोक्त आ मूर्द्धतोऽयं
व्रणतिलकविभागोऽप्येवमेव प्रकल्पः।
भवति मशकलक्षावर्जनज्ञाप्यि तद्-
व्रिगदितफलकारि प्राणिनां देहसंस्थम्।")

पिटङ्गाशः, पुं. पर्व्वतोत्थिमतृस्यः। इति भूरिप्रयोगः॥

पिटङ्गोकी, स्त्री, इन्द्रवारुणी। इति रत्नमाला॥

पिटाकः, पुं, मुनिविशेषः। इत्युणादिकोषः॥

पिट्टकं, क्ली. (किट्टकं पृषोदरादित्वात् कस्य पः।) दन्तकिट्टकम्। इति शब्दरत्नावली॥

पिठ, क्लिथि। वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-वधे सकं-सेट्।) ओष्ठ्यवर्गाद्यादिः। पेठति। पिपिठतुः। क्लिथि दुःखानुभवे। इति दुर्गादासः॥

पिठरं, क्ली, (पिठं रातीति। रा + कः।) सुस्था। मन्थानदण्डः। इति मेदिनी। रे, १८४॥

पिठरः पुं, (पिठ्यते क्लिथ्यतेऽनेनेति। पिठ + करणे।) ग्रहभेदः॥ तत्पर्य्यायः। कुदङ्गः २ उद्घाटः ३। इति त्रिकाण्डशेषः॥ (यथा, अर्य्यासप्तशत्याम्। ५५२। [ष्यन्ति॥")
"विद्युज्ज्वालावलयितजलधरपिठरोदरादिनिस्वाली। इत्यमरः। २। ६। ३१॥ (यथा, महाभारते। ३। ३। ७२।
"यद्वीव्व पिठरं ताम्रं मया दत्तं नराधिप!।
यावत् वर्त्तयति पाञ्चाली पाचेयानेन सुव्रत!॥")
अग्निविशेषः। यथा, हरिवंशे। १७८। ३३।
"पिठरः पतगः स्वर्गश्चागाधो भाज एव च।
स्वधाकाराश्रयाः पञ्च अमृतार्थेऽपि चाग्नयः॥")
दानवविशेषः। यथा, महाभारते। २। ६। १३।
"घटोदरो महापार्श्वः क्रथनः पिठरस्तथा॥")

पिठरी, स्त्री, (पिठर + स्त्रियां ङीष्।) स्थाली। इत्यमरटीकायां रायमुकुटः॥

पिड, इ क संहतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इ क, पिण्डयति। संहतिः राशीकरणम्। इति दुर्गादासः॥

पिड, इ ड संहतौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं सेट्। सकं इति केचित्।) इ, पिण्ड्यते। ड, पिण्डते। इति दुर्गादासः॥

पिड़का, स्त्री, (पीड़यतीति। पीड़ + खुल् + टाप्। निपातनात् साधुः।) स्फोटकविशेषः। प्रमेजहा सा दशविधा। यथा,—
"ग्रराविका कच्छपिका जालिनी विनतालजी।
मसूरिका सर्षपिका पुत्रिणी च विदारिका।
विद्रधिश्चेति पिड़काः प्रमेहोपेक्षया दश॥"
तासां प्रत्येकलक्षणं यथा,—
"सन्धिमर्म्मसु जायन्ते मांसलेषु च धामसु।
अन्तोन्नता च तदूषा निम्नमध्या ग्रराविका॥१॥
सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः॥२॥
जालिनी तीव्रदाहार्त्तिर्मांसजालसमावृता॥३॥
अवगाढरुजा क्लेदा एष्ठे वाप्युदरेऽपि वा।
महती पिड़का नीला विनता नाम सा स्मृता॥४॥
रक्ताचिता स्फोटचिता दारुणा त्वलजी भवेत्॥५॥
मसूरफलसंस्थाना विज्ञेया सा मसूरिका॥६॥
गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी॥७॥
महत्यल्पचिता ज्ञेया पिड़का चापि पुत्रिणी॥८॥
विदारी कन्दवद्वृत्ता कठिना च विदारिका॥९॥
विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा॥"१०॥
कुष्ठपिड़का यथा,—
"कक्षू विपूयकक्षेव कुष्ठे श्लोणितसंश्रिते।
बाहुल्यं वक्त्रशोषश्च कार्कश्यं पिड़कोद्गमः॥"*॥
पिड़काविशेषो यथा,—
"यवाकारा सुकठिना ग्रथिता मांससंश्रिता।
पिड़का श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते॥
घनामवक्त्रां पिड़कासन्ततां परिमण्डलाम्।
अन्तर्जालीमलपूयां तां विद्यात् कफवातजाम्॥१
विद्रतास्रां महादाहां पक्वोडुम्बरसन्निभाम्।
परिमण्डलां पित्तजतां विद्रतां नाम तां विदुः॥२॥
ग्रथिताः पञ्च वा षड् वा दारुणाः कच्छपोपमाः।
कफानिलाभ्यां पिड़का ज्ञेयाः कच्छपिका बुधैः॥३॥

ग्रीवांसकक्षाकरपाददेशे
सन्धौ गले वा भिषिरेव दोषैः।
ग्रन्थिः सवल्मीकवदक्रियाणां
जातः क्रमेणैव गतः प्रवृद्धिम्॥
सुखैरनेकैः सुतितोदवह्नि-
र्विसर्पवत् सर्पति चोन्नताग्रैः।
वल्मीकमाहुर्भिषजो विकारं
निष्पत्यनीकं चिरजं विशेषात्॥४॥

पद्मकर्णिकवन्मध्ये पिड़काभिः समाचिताम्। इन्द्रवृद्धान्तु तां विद्याद्वातपित्तोत्थितां भिषक्॥५॥
मण्डलं वृत्तसंवृत्तं सरक्तं पिड़काचितम्। रजाकरीं गर्दभिकां तां विद्याद्वातपित्तजाम्॥६॥
वातश्लेष्मसमुद्भूतः क्षयपुष्टसन्निभः। स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः॥७॥
कर्णस्याभ्यन्तरे जातां पिड़कामुपवेदनाम्। स्थिरां पनसिकान्तान्तु विद्यादन्तःप्रपाकिनीम्॥८॥

विसर्पवत् सर्पति यः श्लोथस्तुरुपाकवान्।
दाहज्वरकरः पित्तात् स ज्ञेयो ज्ञालगर्दभः॥९॥
पिड़कासन्तमाङ्गस्थां वृत्तामल्पगरुग्ज्वराम्।
सर्व्वात्मिकां सर्व्वलिङ्गां जानीयादरिविलेखिकाम्॥१०॥
बाहुपार्श्वांसकक्षेषु क्षणस्फोटां सवेदनाम्।
पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्दिशेत्॥११॥
एकामेताडयीं दृष्ट्वा पिड़कां स्फोटसन्निभाम्।
त्वग्गतां पित्तकोपेन गन्धनामां प्रचक्षते॥१२॥
कक्षभागेषु ये स्फोटा जायन्ते मांसदारुणाः।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः॥
सप्ताहाद्दशरात्राद्वा पक्वाद्वा म्रियते मानवम्।
तामग्निरोहिणीं विद्यादसाध्यां सन्निपातजः॥१३॥
नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम्।
कुरुते दाहपाकौ च याधिर्न्नं विद्यमादिशेत्॥
तदेवाल्पतरैर्दोषैः कुनखं परुषं वदेत्॥१४॥
गम्भीरामल्पसंरम्भां सवर्णासुपरिस्थिताम्।
पादस्थानुग्रयीं तान्तु विद्यादन्तःप्रपाकिनीम्॥१५॥
विदारीकन्दवद्वृत्तां कक्षावङ्क्षणसन्धिषु।
विदारीति च तां विद्यात् सर्व्वजां सर्व्वलक्षणाम्॥"१६॥
इति माधवकरः॥

पिण्डं, क्ली, पुं, (पिण्डते संहतो भवतीति। पिडि संहतौ + अच्। पिण्डयते राशीक्रियते इति। कर्म्मणि घञ् वा।) आजीवनम्। अयः। इति मेदिनी। डे, १६॥ आद्धशेषद्रव्यनिर्म्मितविश्वफलाकारपित्रुद्देश्यकदेयान्नम्। यजुर्व्वेदिनां पिण्डशब्दो नपुंसकलिङ्गेन प्रयुज्यते। यथा,—
"अन्वष्टक्यं पिण्डं दद्यादसावेतत्त इति आद्धविवेकधृतपिण्डपित्रयज्ञीयकात्यायनवचने पिण्डविशेषणे एतदिति नपुंसकनिर्द्देशात् भाधेतेतच्च वै पिण्डं यन्नदत्तस्य पूरकमिति ऋष्यशृङ्गवचनेऽपि तथा दर्शनाच्च। छन्दोगानां पिण्डशब्दः पुंलिङ्गेन प्रयुज्यते। दर्भेषु मधु मधु मध्वित्यन्नमसी मदन्त इति जपित्वा त्रींस्त्रीन् पिण्डान् दद्यादिति गोभिलसूत्रे पिण्डानिति पुंलिङ्गनिर्द्देशात्।" इति श्राद्धतत्त्वम्॥*॥ गयादावात्मपिण्डदानविधिर्यथा,—
"गयाञ्च पिण्डदानञ्च गयाञ्च तीर्थमेव च।
पञ्चक्रान्तं क्रामरूपं पित्रिश्राद्धं भरित् शुभे॥
जनार्द्दनस्य हस्ते तु पिण्डं दद्यात् स्वकं नरः।
विरजे च तथा चाक्षयवटे च सोमके॥
जीवत्पिण्डप्रदानेन अक्षयायुर्जायते नरः।
यत्रागत्य महाक्षेत्रे स्वकं पिण्डं ददेत्तु यः।
मासद्वयाधिकं वर्षमायुषो वर्द्धते क्रमात्॥"
इति योगिनीतन्त्रे प्रथमतमे २ भागे ५ पटलः॥
अन्यत् गयाशब्दे द्रष्टव्यम्॥

पिण्डः, पुं, (पिडि संहतौ + अच्।) गोलः। (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"विद्वान् गोलः पिण्डकश्च एकतो गोलो रसोरसः॥)
बलम्। सान्द्रम्। ऐक्यकदेशः। (यथा, महाभारते। ३। १९२। ३।

"द्वौ चास्य पिण्डावधरेण कक्षा-
दजातरोमौ सुमनोहरौ च॥")
अगारैकदेशः। देहमात्रम्। (यथा, रघुः। २। ५७।
"एकान्तविध्वंसिषु मद्विधानां
पिण्डेष्वनास्था खलु भौतिकेषु॥")
निवापः। (यथा, मनुः। ३। २१५।
"त्रींस्तु तस्माद्विशेषात् पिण्डान् कृत्वा समाहितः।
औदकेनैव विधिना निर्व्वपेदक्षिणासुखः॥")
गोलः। सिक्थकः। ओड्रपुष्पम्। इति मेदिनी। डे, १६॥ द्वन्द्वम्। कवलः। इति हेमचन्द्रः॥ (यथा, मनुः। ११। २१७।
"एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत्॥")
गलकुष्ठम्। इत्यमरः। २। ८। ३०॥ मदनवृक्षः। इति राजनिर्घण्टः॥ (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"मदनश्चर्द्दनः पिण्डो नटः पिण्डीतकस्तथा।
करहाटो मरुवकः शल्यको विषपुष्पकः॥"
किलाटः। यथा, वैद्यकरत्नमालायाम्।
"किलाटः कुर्चिका पिण्डः————॥")
निवापस्य पिण्डदेयस्य विधिर्यथा,—
"यावदन्नमुपादाय हविषोऽर्भकमर्भकम्।
चरुणा सह सन्नीय पिण्डदानमुपक्रमेत्॥
आद्धार्थाद्धविषोऽन्नादेः सकाशात् यावदभ्युक्षणयज्ञनादि ततोऽल्पाल्पं गृहीत्वा यदग्नौ करणीयेषु सह सन्नीय मिश्रीकृत्य पिण्डदानमारभेतेत्यर्थः।
मध्वाज्यतिलसंयुक्तं सर्व्वयज्ञसंयुतम्।
उद्धृत्यादाय पिण्डन्तु कृत्वा विल्वफलोपमम्।
दद्यात् पितामहादिभ्यो दर्भमूलादृयथाक्रमम्॥
अत्र पितामहपदं पित्रपरं वचनान्तरैकवाक्यत्वात्।
सपित्रे प्रथमं पिण्डं दद्यादुच्छिष्टसन्निधौ।
पितामहाय चैवाथ ततपित्रे च ततः परम्॥
दर्भमूले त्वपसव्यमर्पयेत्पिण्डमेव तैः।
पिण्डे मातामहांस्तद्वदग्नमाल्यादिसंयुतैः॥
पीत्वयित्वा द्विजाग्र्याणां दद्यादाचमनन्ततः॥"
इति श्राद्धतत्त्वम्॥*॥
अन्नाद्यभावे फलादिनापि तस्य कर्त्तव्यत्वं यथा,—
"शेलूदं बदरोन्मिश्रं पिण्याकं दर्भसंस्तरे।
न्यूप्य पिण्डं ततो राम इदं वचनमब्रवीत्॥
इदं भुङ्क्ष्व महाराज। प्रीतो यदन्नाः वयम्।
यदन्नाः पुरुषा राजंस्तदन्नाः पितृदेवताः॥"
इत्ययोध्याकाण्डम्॥*॥
पूरकपिण्डविधिर्यथा,—
"ततश्चोत्तरपूर्व्वस्यामग्निं प्रज्वालयेद्विधि।
तण्डुलप्रस्थितं तत्र प्रक्षाल्य स्थिः पचेत् स्वयम्॥
सपवित्रैस्तिलैर्मिश्रां केशकीटविवर्जिताम्।
दारोपान्ते ततः क्षिप्त्वा मुद्गां वा गौरघृतिकाम्॥
तत्पृष्टे प्रस्थरहभांन् याम्यायान् दैग्यसम्भवान्

ततोऽवनेजनन्दद्यात् संस्मरन् गोत्रनामनी ॥
तिलसर्पिर्मधुक्षीरैः सक्षितं तन्नमेव हि ।
दद्यात् प्रेताय पिण्डन्तु दक्षिणाभिमुखस्थितः ॥
फलमूलगुडक्षीरतिलमिश्रन्तु कुत्रचित् ।
अर्घ्यैः पुष्पैस्तथा दीपैर्धूपैस्तोयैः सुशीतलैः ॥
ऊर्णातन्तुमयैः शुद्धैर्वासोभिः पिण्डमर्चयेत् ।
प्रयाति यावदाकाशं पिण्डाद्यस्तमयो द्विजा ॥
तावत्तु संमुखस्तिष्ठेत् सर्व्वं तोयै ततः क्षिपेत् ।
दिवसे दिवसे देयः पिण्ड एवं क्रमेण तु ॥
सद्यःशौचेऽपि दातव्याः सर्व्वेऽपि युगपत्तथा ।
चाहाशौचे प्रदातव्याः प्रथमे त्वेक एव हि ॥
द्वितीयेऽह्नि चत्वारस्तृतीये पञ्च चैव हि ।
एकस्तोयाञ्जलिस्त्वेवं पाक्षमेकञ्च दीयते ॥
द्वितीये दौ तृतीये त्रीन् चतुर्थे चतुरस्तथा ।
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त एव च ॥
अष्टमेऽष्टौ च नवमे नवैव दशमे दश ।
येन स्युः पञ्चपञ्चाशत्तोयस्याञ्जलयः क्रमात् ॥
तोयपात्राणि तावन्ति संयुक्तानि जलादिभिः ॥"
इति शुद्धितत्त्वम् ॥ * ॥

गयायामात्मपिण्डदानप्रमाणं यथा,—
"स्वकर्म्मधर्म्मयोगेन धनसञ्चयवद्यं बहु ।
उपार्जयित्वा प्रययौ गयातीर्थमनुत्तमम् ॥
पिण्डनिर्व्वपणं तत्र प्रेतानामनुपूर्व्वशः ।
चकार स्वपितॄणाञ्च दायादानामनन्तरम् ॥
आत्मनञ्च महाबुद्धिर्मशक्तेर्व्यां तिलैर्विना ।
पिण्डनिर्व्वपणं चक्रे तथान्येषाञ्च गोत्रिणाम् ॥
एवं प्रदत्तेष्वथ वै पिण्डेषु प्रेतभावतः ।
विमुक्तास्ते द्विज प्रेता ब्रह्मलोकं ततो गताः ॥"
इति वामने ७६ अध्यायः ॥

पिण्डकं, क्ली, (पिण्ड इव कायतीति । कै + कः ।) वोलम् । पिण्डमूलम् । इति राजनिर्घण्टः ॥ (गोलः । यथा, सुश्रुते शारीरस्थाने ३ अध्याये । "द्वितीये (मासि) हस्तपादशिरसां पञ्च पिण्डकानि वर्त्तन्तेऽङ्गप्रत्यङ्गविभागश्च स्पष्टो भवति ॥")

पिण्डकः, पुं, (पिण्ड इव कायतीति । कै + कः ।) सिङ्घनामगन्धद्रव्यम् । इत्यमरः । १ । ६ । १२८ ॥ (वोलः । अस्य पर्य्यायो यथा,—
"विद्वान् गोलः पिण्डकश्च पिण्डोवोलो रसोरसः ॥"
इति वैद्यकरत्नमालायाम् ॥)

पिण्याकः । इति चिकाण्डशेषः ॥ पिण्डालुः । इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—
"पिण्डको वातलः श्लेष्मी ग्राही दृष्यो महागुरुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

पिण्ड + स्वार्थे कन् । कवलः । यथा, हरिवंशे । भविष्यपर्व्वणि । १० । २१ ।
"पयःपानं तथा कुर्व्वन् भक्षयन् दधिपिण्डकम् ॥")

पिण्डकन्दः, पुं, (पिण्डाकारः कन्दः ।) पिण्डालुः । इति राजनिर्घण्टः ॥ (पिण्डालुशब्दोऽस्य विशेषो ज्ञातव्यः ॥)

पिण्डखर्ज्जूरः, पुं, (पिण्डवत् खर्ज्जूरः ।) खनामख्यातखर्ज्जूरः । तत्पर्य्यायः । राजजम्बूः २ पिण्डी ३ । इति जटाधरः ॥

पिण्डखर्ज्जूरी, स्त्री, (पिण्डखर्ज्जूर + स्त्रियां ङीष् ।) पिण्डखर्ज्जूरः । तत्पर्य्यायः । दीप्या २ खपिण्डा ३ मधुरस्रवा ४ फलपुष्पा ५ स्वादुपिण्डा ६ हयभक्षा ७ पिण्डखर्ज्जूरिका ८ । अस्या गुणाः । गौल्यत्वम् । हिमत्वम् । पित्तदाहार्शिश्वासभ्रमनाशित्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्ज्जूरी गोस्तनाकारा परादृङ्नीपादिहागता ॥
जायते पश्चिमे देशे सा क्षोहोरेति कीर्त्यते ।
खर्ज्जूरीचितयं शीतं मधुरं रसपाकयोः ॥
स्निग्धं रुचिकरं हृद्यं बलवीर्य्यहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भिशुक्रदम् ॥
कोष्ठमारुतशूलघ्नं वान्तिवातकफापहम् ।
ज्वराभिघातक्षुत्तृड्घ्नाकासश्वासनिवारकम् ॥
मदमूर्च्छामरुत्पित्तमदोद्भूतगदान्तकृत् ।
महद्भिश्च गुणैरुक्ता खल्पखर्ज्जूरिका स्मृता ॥
खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥"
अथ पिण्डखर्ज्जूरीभेदः ।
"सुनेपाली तु मृदुला दलहीनफला च सा ।
सुनेपाली भ्रमभ्रान्तिदाहमूर्च्छासपित्तघ्नुत् ॥"
इति भावप्रकाशे पूर्व्वखण्डे १ भागे ॥

पिण्डगोसः, पुं, (पिण्डवत् संहतो गोसः ।) गन्धरसः । इत्यमरटीकायां रमानाथः ॥

पिण्डतैलकः, पुं, (पिण्डवत् तैलं यस्य । कप् ।) तुरुष्कः । इति राजनिर्घण्टः ॥

पिण्डदः, पुं, (पिण्डं ददातीति । दा + कः ।) पिण्डदानकर्त्ता । यथा,—
"लेपभाजस्तृतीयाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषम् ॥"
इति शुद्धितत्त्वम् ॥

अपि च ।
"गङ्गेनेह परां सिद्धिं प्राप्नुवन्ति वारिणा नराः ।
पैत्र्याः पश्चात् क्रियाः कार्य्याः सर्व्वाश्चैवौर्द्धदेहिकाः ॥
क्रियां करोति यः पूर्व्वां पितुर्यस्य पिण्डदः ।
प्रायश्चित्तमशौचं तत् प्रायश्चित्ती भवेत्तु सः ॥"
इत्यग्निपुराणम् ॥

पिण्डपदं, क्ली, (पिण्डस्य संहतस्य पदम् ।) अङ्गविशेषः । यथा,—
"रूपाष्टकैर्विनिहतो भवनस्य बन्धः
कर्त्तुः खन्तुमिह युग्मशरैकनिघ्नम् ।
एकीकृतं रसनिशाकरयुग्मशुक्ल-
श्लेषं ततो भवति पिण्डपदं गृहस्य ॥
रूपाष्टकैरेकाशीत्या विनिहतः पूरितः भवनस्य बन्धः दीर्घप्रस्तारमिलितहस्ताः खन्तुं तत्संख्यानं युग्मशरैकनिघ्नं द्विपञ्चाग्न्युत्तरशतपूरितं एकीकृतं पूर्व्वक्रिया मिलितं रसनिशाकरयुग्मभक्तश्लेषं षोड़शाधिकद्विशतहस्तावच्छिष्टं तत् संख्यानं पिण्डपदसंज्ञं गृहस्य भवति ॥"
इति ज्योतिस्तत्त्वम् ॥

पिण्डपादः, पुं, (पिण्ड इव पादो यस्य ।) हस्ती । इति चिकाण्डशेषः ॥

पिण्डपुष्पं, क्ली, (पिण्ड इव पुष्पं पुष्पगुच्छो यस्य ।) अशोकपुष्पम् । (क्वचित् पुं । यथा,—
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
जवापुष्पम् । पद्मपुष्पम् । इति मेदिनी । पे, २७ ॥
तगरपुष्पम् । इति शब्दरत्नावली ॥

पिण्डपुष्पकः, पुं, (पिण्डपुष्पमिव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) वास्तूकम् । इति शब्दमाला ॥ (वास्तूकशब्दोऽस्य गुणादयो ज्ञातव्याः ॥)

पिण्डफला, स्त्री, (पिण्ड इव फलं यस्याः ।) कटुतुम्बी । इति जटाधरः ॥ (यथा,—
"खिन्नस्य विस्रापनमेव कुर्य्या-
दङ्गुष्ठलोहोपलवेणुदण्डैः ॥
विकङ्कतारग्वधकाकनम्बी
काकादनीतापसवृक्षमूलैः ।
आलेपयेत् पिण्डफलार्कभार्गी
करञ्जकालामदनैश्च विद्वान् ॥"
इति सुश्रुते चिकित्सितस्थानेऽष्टादशोऽध्याये ॥)

पिण्डबीजकः, पुं, (पिण्डवत् बीजानि यस्य । कप् ।) कर्णिकारवृक्षः । इति राजनिर्घण्टः ॥ (कर्णिकारशब्दे विवृतिरस्य ज्ञातव्या ॥)

पिण्डसुस्ता, स्त्री, (पिण्डवत् सूक्ष्मा सुस्ता ।) नागरसुस्ता । इति राजनिर्घण्टः ॥

पिण्डमूलं, क्ली, (पिण्डमिव मूलमस्य ।) गर्जरम् । मूलकभेदः । तत्पर्य्यायः । गजाह्वम् २ पिण्डकम् ३ पिण्डमूलकम् ४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । गुल्मवातादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

पिण्डलः, पुं, (पिण्डि संहतौ + बाहुलकात् कलच् ।) सेतुः । इति हारावली । १२६ ॥

पिण्डसः, पुं, (पिण्डेन परदत्तग्रासेन सनोति जीवतीति । सन + डः ।) भिक्षाजी । भिक्षोपजीवी । इति शब्दमाला ॥

पिण्डा, स्त्री, (पिण्ड + टाप् ।) पिण्डायसम् । कस्तूरीभेदः । सा कुलत्थिकातः कियत्स्थूला । इति राजनिर्घण्टः ॥ वंशपत्री । इति भावप्रकाशः ॥

पिण्डातः, पुं, (पिण्ड इव अतति सादृश्यमनुकरोतीति । अत + अच् ।) सिङ्घकः । इति रत्नमाला ॥

पिण्डाभ्रं, क्ली, (पिण्डवत् आभ्रं मेघजलसम्बन्धिद्रव्यम् ।) घनोपलः । इति शब्दमाला ॥

पिण्डायसं, क्ली, (पिण्डं संहतमायसम् ।) तीक्ष्णायसम् । इति राजनिर्घण्टः ॥

पिण्डारं, क्ली, (पिण्डं संहतमश्नुतीति । ऋ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) फल-

ग्राकविशेषः। पिण्डारा इति हिन्दीभाषा। अस्य गुणाः। शीतलत्वम्। बल्यत्वम्। पित्तनाशित्वम्। रुचिकारित्वम्। पाके लघुत्वम्। विशेषेण विषशान्तिकरत्वञ्च। इति भावप्रकाशः॥

पिण्डारः, पुं, (पिण्डं ऋच्छतीति। ऋ + अण्।) क्षपणकः। गोपः। महिषीरक्षकः। द्रुमभेदः। इति मेदिनी। रे, १८५॥ विकङ्कतवृक्षः। इति राजनिर्घण्टः॥

पिण्डालुः, पुं, (पिण्डवत् स्थूल आलुः।) कन्दगुडूची। कन्दभेदः। पेंड़ालु इति हिन्दीभाषा। चुवड़ि आलु इति बङ्गभाषा। तत्पर्य्यायः। ग्रन्थिलः २ पिण्डकन्दः ३ ग्रन्थिः ४ रोमशः ५ रोमकन्दः ६ रोमालुः ७ ताम्बूलपत्रः ८ नागकन्दः ९ पिण्डकः १०। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। मूत्रकृच्छ्रदाहशोषप्रमेहनाशित्वम्। दृष्यत्वम्। सन्तर्पणत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

पिण्डालुकं, क्ली, (पिण्डालुरिव प्रतिकृतिः। इवार्थे कन्।) आलुविशेषः। गोल आलु इति गुड़ आलु इति चुवड़ि आलु इति च भाषा। अस्य गुणाः। कफहरत्वम्। गुरुत्वम्। वातप्रकोपणत्वञ्च। इति राजवल्लभः॥ (यथा, सुश्रुते। १। ४६।

"विदारीकन्दशतावरीविसदृणालशृङ्गाटककशेरुकपिण्डालुकमध्यालुकहस्त्यालुकाष्ठालुकशृङ्गालुकरक्तालुकैन्दीवरोत्पलकन्दप्रभृतीनि॥")

पिण्डाह्वा, स्त्री, (पिण्डां कस्तूरीविशेषमाह्वयते स्वर्द्धते स्वगन्धेनेति। ह्वे + कः।) नाड़ीहिङ्गु। इति राजनिर्घण्टः॥

पिण्डिः, स्त्री, (पिडि संहतौ + इन्।) पिण्डिका। इत्यमरटीकायां रमानाथः॥

पिण्डिका, स्त्री, (पिण्डन्ते संहतानि भवन्ति पिण्डान्ते राशीक्रियन्ते वा अराणि यस्याम्। पिण्ड + घन्। गौरादित्वात् ङीष्। ततः कन्। ह्रस्वश्च।) रथनाभिः। इत्यमरः। २। ८। ५६॥ सा रथचक्रमध्ये मण्डलाकारा यस्यां सर्व्वाणि काष्ठान्यासज्यन्ते। इति रायमुकुटः॥ (पिण्डम्। यथा, हारीते प्रथमस्थाने सप्तमेऽध्याये।

"कांस्यपात्रं समुद्धृत्य परीक्षेत भिषग्वरः।
शुद्धकर्म्मा स तण्डुल श्वेतशाल्योदनस्य वा॥
पिण्डिका तत्र संश्लिष्टा नान्यथा भातिसा पुनः॥")

पिच्चिण्डिका। सा जानुनोऽधोमांसलप्रदेशः। इति हेमचन्द्रः॥ पायेर डिम् इति भाषा॥ (यथा, चरके सूत्रस्थाने ७ अध्याये।

"पक्वाशयशिरःशूलं वातवर्च्चो निरोधनम्।
पिण्डिकोद्वेष्टनाध्मानं पुरीषे स्याद्विधारिते॥")

श्वेतान्नम्। इति राजनिर्घण्टः॥ पीठम्। यथा,

सूत उवाच।

"पिण्डिकालक्षणं वक्ष्ये यथावदनुपूर्व्वशः।
पीठोक्तायं यथावच्च भागान् षोड़श कारयेत्॥
भूमावेकः प्रतिष्ठः स्याच्चतुर्भिर्जगती मता।
वृत्तो भागस्त्वेकः स्यात् वृत्तपट्टस्य भागतः॥
भागेस्त्रिभिस्तथा कण्ठं कण्ठपट्टस्तु भागतः।
भागेन वृत्तपट्टस्तु ग्रैवभागेन पट्टिकी॥
प्रच्चिन्त्यं भागमेकैकं जगती यावदेव तु।
निर्गमस्तु पुरस्तस्या यावद् विंशेषपट्टिकाः॥
पीठिकानान्तु सर्व्वासामेतत् सामान्यलक्षणम्।
निःग्रैवाद्देवताभेदात् शृणुध्वं द्विजसत्तमाः॥
स्थण्डिला वाथ वापी च यज्ञी वेदी च मण्डला।
पूर्णचन्द्रा च वज्री च पद्मा वार्द्धग्रिस्तथा॥
त्रिकोणा दशमी तासां संस्थानञ्च निबोधत।
स्थण्डिला चतुरस्रा तु वर्णिता मेखलादिभिः॥
वापी द्विमेखला ज्ञेया यज्ञी चैव त्रिमेखला।
चतुरस्रायतां वेदीं न तां लिङ्गेषु योजयेत्॥
मण्डला वर्त्तुला या तु मेखलाभिर्गणप्रिया।
रिक्ता द्विमेखला मध्ये पूर्णचन्द्रा तु सा भवेत्॥
मेखलात्रयसंयुक्ता षड़स्रा वज्रिका भवेत्।
षोड़शास्रा भवेत् पद्मा किञ्चिद्वृत्ता च मूलतः॥
तथैव धनुराकारा सार्द्धचन्द्रा प्रशस्यते।
त्रिशूलसदृशा तद्वत् त्रिकोणानूर्द्धतो मता॥
प्रागुदक्प्रवणा तद्वत्प्रशस्ता लक्षणान्विता।
परिवेषस्त्रिभागेन निर्द्देशस्तत्र कारयेत्॥
विस्तारस्तत्प्रमाणन्तु मूले चाग्रे तदूर्द्धतः।
जलवाहश्च कर्त्तव्यस्त्रिभागेन सुशोभनः॥
लिङ्गस्यार्द्धत्रिभागेन स्रौत्येन समधिष्ठिता।
मेखला तु त्रिभागेन खातं वै तत्प्रमाणतः॥
अथवा पादहीनन्तु शोभनं कारयेत् सदा।
उत्तरस्यं प्रमाणन्तु प्रमाणादधिकं भवेत्॥
स्थण्डिलायामधारोग्यं धनधान्यञ्च पुष्कलम्।
गोप्रदा तु भवेत् यज्ञी वेदी सम्पत्प्रदा भवेत्॥
मण्डलायां भवेत् कीर्त्तिर्वरदा पूर्णचन्द्रिका।
आयुःप्रदा भवेद्वज्री पद्मा सौभाग्यदायिनी॥
पुत्रप्रदार्द्धचन्द्रा स्यात् त्रिकोणा शत्रुनाशिनी।
देवस्य यजनार्थन्तु पिण्डिका दश कीर्त्तिताः॥
शैले शैलमयीं दद्यात् पार्थिवे पार्थिवीन्तथा।
दारुजे दारुजां कुर्य्यान्मिश्रे मिश्रान्तथैव च॥
नान्ययोनिस्तु कर्त्तव्या सदा शुभफलेप्सुभिः॥
अर्द्धायामसमं दैर्घ्यं लिङ्गायामसमं तथा।
यस्य देवस्य या पत्नी तां पीठे परिकल्पयेत्॥
एवमेतत् समाख्यातं समासात् पीठलक्षणम्॥"

इति मत्स्यपुराणे पीठिकानुकीर्त्तनं २३६ अः॥ (लिङ्गपीठम्। गौरीपट्टः। यथा, काशीखण्डे वायुसंहितायामुत्तरखण्डे। २८। ६।

"लिङ्गं पिण्डिकया सार्द्धं पञ्चगव्येन शोधयेत्॥")

पिण्डितं, त्रि, (पिडि + क्तः।) गणितम्। घनम्। इति विश्वमेदिन्यौ॥ (संहतः। यथा, वायुपुराणे।

"अर्द्धिग्रात् पिण्डितग्रिश्च सर्पिः काञ्चनसन्निभः।
स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्यसिद्धये॥")

गुणितम्। इति हेमचन्द्रः॥ तुरुष्के, पुं। इति राजनिर्घण्टः॥

पिण्डिलः, पुं, (पिण्डवदाकृतिरस्यस्येति। पिण्ड + इलच्।) सेतुः। इति त्रिकाण्डशेषः॥ शाकः। इत्युणादिकोषः॥

पिण्डिला, स्त्री, (पिण्डिल + टाप्।) गोडुम्बा। इति शब्दचन्द्रिका॥

पिण्डी, [न्] त्रि, (पिण्डोऽस्यस्येति। इनिः।) शरीरी। यथा,—

"यथा सूर्य्यं विना भूमिर्गर्भं दीपविवर्ज्जितम्।
लिङ्गहीनो यथा पिण्डी जयश्रीस्त्वां विना तथा॥"

इति जैमिनिभारते आश्वमेधिकपर्व्वणि ६८ अध्याये॥

पिण्डी, स्त्री, (पिण्डाकारोऽस्यस्या इति। अच्। ततो ङीष्।) पिण्डीतगरः। अलाबूः। खर्ज्जूरविशेषः। इति मेदिनी। डे, २०॥ ज्ञाननिरूपणार्थकोपन्यासः। इति धरणिः॥ (पिण्ड + ऋदिकारादिति वा ङीष्।) पिण्डिका। इत्यमरटीकायां रायमुकुटः॥ पिण्डम्। यथा,—

"नीताय तुरगायाशु भक्तपिण्डीं सुगन्धिनीम्।
दद्यात् पुरोहितस्तत्र संमन्त्र्य शान्तिमन्त्रकैः॥"

इति कालिकापुराणे ८६ अध्यायः॥

पिण्डीतकः, पुं, (पिण्डीं स्वल्पपिण्डं तनोतीति। तन + अनेभ्योऽपीति डः। ततः संज्ञायां कन्।) मदनवृक्षः। इत्यमरः। २। ४। ५२॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"मदनः श्वसनोराचो गोलः पिण्डीतकः फलम्।
छर्द्दालो विश्वपुष्पा च हरहाटस्तु ग्रल्यकः॥"

यथा च।

"पिण्डीतकस्य तु वराहविभावितस्य
मूलेषु कन्दशकलेषु च सौवचेषु।
तैलं क्षतं गतिमपोहति शीघ्रमेतत्
कन्देषु चामरवरायुधसाङ्गयेषु॥"

इति सुश्रुते चिकित्सितस्थाने सप्तदशोऽध्याये॥) तगरः। फणिज्झकः। इति विश्वः॥

पिण्डीतगरः, पुं, (पिण्डया पुष्पावच्छेदे स्वल्पपिण्डेन उपलक्षितस्तगरः।) तगरविशेषः। तत्पर्य्यायः। कपर्व्वकः २। इति त्रिकाण्डशेषः॥

पिण्डीतगरकः, पुं, (पिण्डीतगर + स्वार्थे संज्ञायां वा कन्।) तगरम्। इति राजनिर्घण्टः॥

पिण्डीतरुः, पुं, (पिण्डया उपलक्षितस्तरुः।) महापिण्डीतरुः। इति राजनिर्घण्टः॥

पिण्डीपुष्पः, पुं, (पिण्डीवत् पुष्पं पुष्पस्तवको यस्य।) अशोकवृक्षः। इति राजनिर्घण्टः॥ (अशोकग्रन्थेऽस्य विशेषो ज्ञेयः॥)

पिण्डीरः, पुं, (पिण्डीवत् पिण्डाकारागीर्त्यर्थः फलानि ईरयतीति। ईर + णिच् + अण्।) दाड़िमवृक्षः। इति त्रिकाण्डशेषः॥ हिङ्गीरः। इत्यमरटीकायां रायमुकुटः॥ नीरसे, त्रि। इति हारावली॥ १६६॥

पिण्डीशूरः, पुं, (पिण्डया पिण्डव्यापारे भोजने एव शूरः अतिनिपुणः नान्यत्र कार्य्यादाविति भावः।) स्वगेहमात्रे वसन् परदेशी। तत्पर्य्यायः। गेहेनदीं २ गेहेशूरः ३। इति हेमचन्द्रः। ३। ४१॥ (यथा, भट्टौ। ५। ८५।

"राक्षसान् वटुयज्ञेषु पिण्डीशूरान्निरस्तवान्।
यद्यसौ कूपमाखूकि! तवेतावति कः क्षयः॥")

पिण्डोलिः, स्त्री, भुक्तसमुज्झितः। इति हेमचन्द्रः। ३। ६१॥

पिण्या, स्त्री, पण्यते स्तूयते रोगहन्तृत्वात् पण्या पण ड यवच्च तौ स्तुतौ भ्वादन्यात्। तत्रानीयया इति यः निपातनादत् इत्। पण्येति पठति स्वामी। इति भरतः॥ ज्योतिष्मती॥ इत्यमरः॥ (ज्योतिष्मतीशब्देऽस्या विवृतिर्विज्ञेया॥)

पिण्याकः, पुं, क्ली, (पिनष्टीति। पिष्लृ संचूर्णने + "पिनाकादयश्च।" उणा। ४। १५५। इति आकप्रत्ययेन निपातनात् साधुः।) तिलकल्कः। (अस्य गुणाः यथा,—

"पिण्याको ग्लपनो रूक्षो विष्टम्भी दृष्टिदूषणः॥"

इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥

यथा, महाभारते। १२। १६७। ३६।

"नवनीतं यथा दग्धस्तथा कामोऽर्थधर्मतः।
श्रेयस्तैलं हि पिण्याकात् घृतं श्रेय उदाहृतः॥")

अस्य भक्षणे दोषो यथा,—

"पिण्याकं भक्षयित्वा तु यो वै मासुपसर्पति।
तस्य वै भ्रूण सुश्रोणि! प्रायश्चित्तं सुशोभनम्॥
उलूको दशवर्षाणि कङ्कश्चापि समाक्षयः।
जायते मानवस्तत्र मम कर्म्मपरायणः॥"

इति वराहपुराणम्॥

पिङ्ग। वाङ्निकम्। सिक्कः। इति मेदिनी॥ (सरलरसः। अस्य पर्य्यायो यथा,—

"तैलपर्णी दधित्थाख्यः पिण्याको रक्तशीर्षकः।
वेल्लो रसाढ्यः श्रीवासः श्रीपिण्डसरलद्रवौ॥"

इति वैद्यकरत्नमालायाम्॥)

पितरौ, पुं, जनकजनयित्र्यौ। माता च पिता चेति विग्रहे विकल्पादेकशेषे पितराविति प्राचः। इति भरतः॥ तत्पर्य्यायः। मातापितरौ २ मातरपितरौ ३ तातजनयित्र्यौ ४। इत्यमरः। २। ६। ३७॥ (यथा, रघुः। १। १॥

"जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ॥")

तयोरभक्त्या पालने दोषो यथा,—

"पितृमातृगुरूंश्चापि भक्तिहीनेन पालयेत्।
वाचा च ताड्येन्नित्यं स्वाभिनं कुलटा च या॥
सा ह्यतन्नीति विख्याता पापिनां भारते नरः।
वह्निकुण्डं महाघोरं स च सा च प्रयाति च॥
तत्र वह्नौ वसत्येव यावच्चन्द्रदिवाकरौ।
ततो भवेच्चण्डालीका च जन्म सप्त ततः शुचिः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४६ अध्यायः॥

पिता, [तृ] पुं, पाति रक्षत्यपत्यं यः। (पा रक्षणे + "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ।" उणा। २। ६६। इति तृच्प्रत्ययेन निपातनात् साधुः।) उत्पादकः। बाप् इति भाषा। तत्पर्य्यायः। तातः २ जनकः ३। इत्यमरः। २। ६। २८॥ प्रसविता ४ वप्ता ५ जनयिता ६ गुरुः ७ जन्मदः ८ जन्यः ९ जनिता १०। इति शब्दरत्नावली॥ बीजी ११ वप्रः १२। इति हेमचन्द्रः॥ *॥ तस्य मान्यत्वं लक्षणञ्च यथा,—

"मान्यः पूज्यश्च सर्व्वेभ्यः सर्व्वेषां जनको भवेत्।
अहो यस्य प्रसादेन सर्व्वान् पश्यति मानवः॥
जनको जन्मदाता च रक्षणाच्च पिता गृणाम्।
तातो विस्तीर्णकरणात् कलया सा प्रजापतिः॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः॥

स च गुरुः। यथा,—

"उपाध्यायः पिता ज्येष्ठभ्राता चैव महीपतिः।
मातुलः श्वशुरश्चाता मातामहपितामहौ॥
बन्धुर्ज्येष्ठपितृव्यश्च पुंस्येते गुरवः स्मृताः॥"

इति कौर्म्मे उपविभागे ११ अध्यायः॥

(ज्येष्ठपितृवर्य्यः पितृशब्दप्रयोगो यथा, महाभारते। ६। ५३। ३।

"गरुडस्य स्वयं तुण्डे पिता देवव्रतस्तव॥")

स हि महागुरुः। यथा, "महागुरुर्नाह विष्णुः। त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिताचार्य्यश्चेति॥" इति शुद्धितत्त्वम्॥

कामासक्तस्य पितुर्वचनमग्राह्यं यथा,—

"पितुर्वचो हि मा कार्षीः कामव्यासक्तचेतसः।
आत्मानञ्चाभिधिक्षस्व तदर्थं क्षत्रियो ह्यसि॥"

इत्यार्षेये श्रीरामं प्रति कौशल्यावाक्यम्॥

तस्य पुत्रकृतधर्म्माधर्म्मभागित्वं यथा,—

"यः पिता स तु पुत्रोऽयमिति वै वेदिकी श्रुतिः।
निगद्यते पुराणे तु तां शृणुष्व यथातथम्॥
न्यग्रोधस्य सुशाखायाः शुष्कास्तु गता भुवि।
प्ररोहानुपपद्यन्ते मूलभंशात्तथा सुताः॥
तद्विधानुपपद्यन्ते तथान्ये ते च तादृशाः।
तेभ्यश्चान्ये प्ररोहन्ति वीहिभ्योऽपि यथा तथा॥
एवं पुत्रैः कृतो धर्म्मस्तथाधर्म्मश्च भूपते।
पिता संलिप्यते तेन मा च त्वं संशयं कृथाः॥
न धर्म्मिणां नराणान्तु बीजनाशो भवेदिह।
सर्व्वथा प्रसंसते लोके बीजात् पुनः समुच्छ्रयः॥"

इत्यार्षेये पापनाशनतीर्थदानाध्यायः॥ *॥

तस्मिन् जीवति वाङ्निष्पत्तिकनिषेधो यथा,—

"न वाङ्निष्पत्तिकं कुर्य्यात् यस्य जीवन् पिता स्थितः।
तथा ज्येष्ठः सोदरश्च यस्य जीवति स तथा॥"

इति दक्षसंहितायाम्॥ *॥

उत्पादकपित्रपेक्षया मन्त्रदातृपितुर्गुरुतरत्वं यथा, तन्त्रसारे।

"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता।
तस्माच्छतगुणं पितुरप्यधिकं गुरुम्॥"

पञ्च पितरो यथा, चाणक्ये।

"जन्मदाता भयत्राता यस्य कन्या विवाहिता।
जनयिता चोपनेता च पञ्चैते पितरः स्मृताः॥"

सप्त पितरो यथा,—

"कन्यादाताऽन्नदाता च ज्ञानदाताभयप्रदः।
जन्मदो मन्त्रदो ज्येष्ठभ्राता च पितरः स्मृताः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३५ अध्यायः॥

एकविंशतिपितृगणा यथा,—

"विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः शुभासनः।
भूमिदो भूमिकृद्भूतिः पितॄणां ये गणा नव॥
कल्याणः कल्पदः कल्पतरः कल्पतराश्रयः।
कल्पताहेतुरनघः षड्मे ते गणाः स्मृताः॥
वरो वरेण्यो वरदो भूतिदः पुष्टिदस्तथा।
विश्वपाता तथा धाता सप्तैते च गणाः स्मृताः॥
महान् महात्मा महितो महिमावान्महाबलः।
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः॥
सुखदो धनदश्चान्यो धर्म्मदोऽन्यश्च भूतिदः।
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयम्॥
एकविंशतिपित्रगणा येषामप्तमिदं जगत्।
ते मेऽत्र तृप्तास्तुष्यन्तु दिशन्तु च सदा हितम्॥"

इति गारुडे पित्रस्तोत्रं ८६ अध्यायः॥

(पितॄणां स्तुतिपूर्ब्बकं नामसंख्यादिकथनम् यथा मार्कण्डेये। ६६। १३—४८।

रुचिरुवाच।

"नमस्येऽहं पितॄन् श्राद्धे ये वसन्त्यधिदेवताः।
दैवैरपि हि तर्प्यन्ते ये च श्राद्धे स्वधोत्तरैः॥
नमस्येऽहं पितॄन् स्वर्गे ये तर्प्यन्ते महर्षिभिः।
श्राद्धैर्मनोमयैर्भक्त्या मुक्तिमुक्तिमभीप्सुभिः॥
नमस्येऽहं पितॄन् स्वर्गे सिद्धाः सन्तर्पयन्ति यान्।
श्राद्धेषु दिव्यैः सकलैरुपहारैरनुत्तमैः॥
नमस्येऽहं पितॄन् भक्त्या येऽर्च्यन्ते गुह्यकैरपि।
तन्मयत्वेन वाञ्छद्भिर्श्रद्धामात्यन्तिकीं पराम्॥
नमस्येऽहं पितॄन्नित्यैरर्च्यन्ते भुवि ये सदा।
श्राद्धेषु श्रद्धयाभीष्टलोकप्राप्तिप्रदायिनः॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा।
वाञ्छितामीष्टलाभाय प्राजापत्यप्रदायिनः॥
नमस्येऽहं पितॄन् ये वै तर्प्यन्तेऽरण्यवासिभिः।
वन्यैः श्राद्धैर्यताहारैस्तपोनिधूतकिल्बिषैः॥
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकव्रतचारिभिः।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभिः॥
नमस्येऽहं पितॄन् श्राद्धे राजन्यास्तर्पयन्ति यान्।
कव्यैरन्यैर्विधिबलोक्तैरयफलप्रदान्॥
नमस्येऽहं पितॄन् वैश्यैरर्चन्ते भुवि ये सदा।
स्वकर्म्माभिरतैर्नित्यं पुष्पधूपान्नवारिभिः॥
नमस्येऽहं पितॄन् श्राद्धैर्ये शूद्रैरपि भक्तितः।
सन्तर्प्यन्ते जगत्यञ्च नाम्ना ख्याताः सुकालिनः॥
नमस्येऽहं पितॄन् श्राद्धैः पाताले ये महासुरैः।
सन्तर्प्यन्ते स्वधाहारास्यत्नदम्भमदैः सदा॥
नमस्येऽहं पितॄन् श्राद्धैरर्च्यन्ते ये रसातले।
भोगैरन्यैर्विधिबलागतैः कामानभीप्सुभिः॥
नमस्येऽहं पितॄन् श्राद्धैः सर्पैः सन्तर्पितान् सदा।
तत्रैव विधिबन्धलभोगसम्पत्समन्वितैः॥

पितॄन्नमस्ये निवसन्ति साक्षात्
ये देवलोके च तथान्तरीक्षे।
महीतले ये च सुरादिपूज्या-
स्ते मे प्रतीच्छन्तु मयोपनीतम्॥
पितॄन्नमस्ये परमात्मभूता
ये वै विमाने निवसन्ति मूर्त्ताः।
यजन्ति यानत्नमलैर्मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून्॥
पितॄन्नमस्ये दिवि ये च मूर्त्ताः
स्वधाभुजः काम्यफलाभिसन्धौ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु॥

तृप्यन्तु तेऽस्मिन् पितरः समस्ता
इच्छावतां ये प्रदिशन्ति कामान्।
सुरत्वमिन्द्रत्वमतोऽधिकं वा
सुतान् पशून् स्वानि बलं गृहाणि॥
सोमस्य ये रश्मिषु येऽर्कबिम्बे
शुक्ले विमाने च सदा वसन्ति।
तृप्यन्तु तेऽस्मिन् पितरोऽमृतोये-
र्गन्धादिना पुष्टिमितो व्रजन्तु॥
येषां हुतेऽग्नौ हविषा च तृप्ति-
र्ये भुञ्जते विप्रशरीरसंस्थाः।
ये पिण्डदानेन सुदं प्रयान्ति
तृप्यन्तु तेऽस्मिन् पितरोऽमृतोयैः॥
ये खड्गमांसेन सुरैरभीष्टैः
कृष्णैस्तिलैर्दैयमनोहरैश्च।
कालेन प्राकेन महर्षिवर्यैः
संप्रीणितास्ते सुदमत्र यान्तु॥
कव्यान्यशेषाणि च यान्यभीष्टा-
न्यतीव येषाममरार्चितानाम्।
तेषान्तु सान्निध्यमिहास्तु पुष्प-
गन्धान्नभोज्येषु मया कृतेषु॥
दिने दिने ये प्रतिगृह्णतेऽर्घां
मासान्तपूज्या भुवि येऽष्टकासु।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तृप्तिम्॥
पूज्या द्विजानां कुसुदेन्दुभासो
ये क्षत्रियाणाञ्च नवार्कवर्णाः।
तथा विशां ये कनकावदाता
नीलोनिभाः शूद्रजनस्य ये च॥
तेऽस्मिन् समस्ता मम पुष्पगन्ध-
धूपान्नतोयादिनिवेदनेन।
तथाग्निहोत्रेण च यान्तु तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः॥
ये देवपूर्व्वान्यतितृप्तिहेतो-
रश्नन्ति कव्यानि शुभाहुतानि।
तृप्ताश्च ये भूतिसृजो भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
निर्नाशयन्तस्त्वग्निवं प्रजानाम्।
आद्याः सुराणाममरैरपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः॥
अग्निस्वात्ता वर्हिषद आज्यपाः सोमपास्तथा।
व्रजन्तु तृप्तिं आद्धेऽस्मिन् पितरस्तर्पिता मया॥
अग्निस्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम्।
तथा वर्हिषदः पान्तु याम्यां ये पितरः स्मृताः॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः।
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः॥
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे।
विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः शुभाननः॥
भूतिदो भूतिकृद्भूतिः पितृणां ये गणा नव।
कल्याणः कल्यता कर्त्ता कल्यः कल्यतराश्रयः॥
कल्यताहेतुरनघः षड्डिमे ते गणाः स्मृताः।
वरो वरेण्यो वरदः पुष्टिदस्तुष्टिदस्तथा॥
विश्वपाता तथा धाता सप्तैवैते तथा गणाः।
महान्महात्मा महितो महिमावान्महाबलः॥
गणाः पञ्च तथैवैते पितृणां पापनाशनाः।
सुखदो धनदश्चान्यो धर्म्मदोऽन्यश्च भूतिदः॥
पितृणां कथ्यते चैतत्तथा गणचतुष्टयम्।
एकत्रिंशत्पितृगणा यैर्व्याप्तमखिलं जगत्॥
ते मेऽतुलप्रीतयन्तु यच्छन्तु च सदा हितम्॥")
श्रियः। यथा, महाभारते।१३। १७। १४१।
"सदसद्व्यक्तमव्यक्तं पिता माता पितामहः॥")
पितामहः, पुं, (पितुः पितेति। "पितृव्यमातुल-मातामहपितामहाः।" ४। २। ३६। इत्यत्र "मातृपितृभ्यां पितरि डामहच्।" इति वार्त्तिकोक्त्या डामहच्। ब्रह्मणि तु पितुः पिता जनकस्यापि जनकः। पितॄणां मरीच्यादीनां पितृगणानां पिता वा।) ब्रह्मा। (यथा, महाभारते। १। १। ३२।
"यस्मात् पितामहो यज्ञे प्रसूरेकः प्रजापतिः।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ॥"
श्रियः। यथा, महाभारते। १३। १७। १४१।
"सदसद्व्यक्तमव्यक्तं पिता माता पितामहः॥")
पितृपिता। इत्यमरः। २।६। ३३॥ ठाकुरदादा इति भाषा॥ अस्य पर्य्यायः। आर्य्यकः २।
इति शब्दमाला॥ (यथा, मनौ। ३। २२१।
"पिता यस्य तु वृत्तः स्याद् जीवेदापि पितामहः।
पितुः स नाम संकीर्त्य कीर्त्तयेत् प्रपितामहम्॥")
पितामही, स्त्री, (पितुर्मातेति। पितृव्यमातुलेत्यत्र "मातृपितृभ्यां पितरि डामहच्।" इति डामहच्। ततः "मातरि पितेति।" पितृकार्य्यं ततः पित्वात् ङीप्।) पितामहपत्नी। इति जटाधरः॥ ठाकुरमा इति भाषा॥ (यथा, कौर्म्मे उपविभागे ११ अध्याये।
"मातामही मातुलानी तथा मातुश्च सोदराः।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु॥")
पौत्रैः पितामहधनविभागकरणे पितामह्यै मातृवद्भागो देयः। यथा,—
"असुताश्च पितुः पत्न्यः समानांशाः प्रकीर्त्तिताः।
पितामह्यश्च सर्व्वास्ता मातृतुल्याः प्रकीर्त्तिताः॥"
इति दायभागे व्यासः॥
पितृक, त्रि, (पितुः सम्बन्धि पितुरागतं वेति। पितृ+कन्। यद्वा, पैतृक+पृषोदरादित्वात् साधुः।) पितृसम्बन्धि। यथा,—
"पैतृश्च पितृकश्चापि पित्र्यश्च पितुरागतम्॥"
इति शब्दमाला॥
पितृकानन, क्ली, (पितॄणां काननमिव।) श्मशानम्। इति जटाधरः॥ (यथा, महानिर्व्वाणतन्त्रे। १०। ७६।
"पञ्चवर्षाधिकान् मर्त्यान् दाहयेत् पितृकानने।
भर्त्रा सह कुलेनापि न दहेत् कुलकामिनीम्॥")
पितृगृह, क्ली, (पितॄणां गृहम्।) श्मशानम्। इति हेमचन्द्रः॥ (पितुर्गृहम्।) पितृवेश्म च॥
पितृतर्पण, क्ली, (तृप्यन्त्यनेनेति। तृप्+करणे ल्युट्। पितॄणां तर्पणमिति। यद्वा, तृप+भावे ल्युट्। पितॄणां तर्पणं तृप्तिर्यस्मात्।) पितृतीर्थम्। तत्तु तर्जन्यङ्गुष्ठयोर्म्मध्यम्। इति शब्दचन्द्रिका॥ निवापः। इति हेमचन्द्रः॥ तिलः। इति राजनिर्घण्टः॥ पितृतीर्थेन पितृदेहयकजलदानम्। तस्यानुष्ठानं तर्पणशब्दे द्रष्टव्यम्॥
पितॄणां तृप्तिमात्रञ्च॥
पितृतिथिः, स्त्री, (पितृप्रिया तिथिरिति मध्यलोपी समासः।) अमावास्या। यथा,—
"अमावास्यादिनं वोऽस्तु तस्यां कुशतिलोदकैः।
तर्पिता मानुषैस्तृप्तिं परां गच्छत नान्यथा॥"
इति वाराहे पितृसर्गस्थितिवर्णनम्॥
पितृतीर्थ, क्ली, (पितृप्रियं तीर्थम्।) गया। इति जटाधरः॥ (गयादि-२२२ पितृवल्लभतीर्थानि मत्स्यपुराणे श्राद्धकल्पे २२ अध्याये उक्तानि। यथा,—
"तीर्थानि कानि शस्तानि पितॄणां वल्लभानि च।
नामतस्तानि वक्ष्यामि संक्षेपेण द्विजोत्तमाः!।
पितृतीर्थं गया नाम सर्व्वतीर्थवरं शुभम्॥
यत्रास्ते देवदेवेशः स्वयमेव पितामहः।
तत्रैषा पितृभिर्गीता गाथा भागमभीप्सुभिः॥
बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्॥
तथा वाराणसी पुण्या पितॄणां वल्लभा सदा।
तत्राविमुक्तसान्निध्यं मुक्तिमुक्तिफलप्रदम्॥
पितॄणां वल्लभं तद्वत् पुण्यञ्च विमलेश्वरम्।
पितृतीर्थं प्रयागन्तु सर्व्वकामफलप्रदम्॥
वटेश्वरस्तु भगवान् माधवेन समन्वितः।
योगनिद्राग्रयस्तद्वत् सदा वसति केशवः॥
दशाश्वमेधिकं पुण्यं गङ्गाद्वारं तथैव च।
नन्दाह्रदे ललिता तद्वत्तीर्थं मायापुरी शुभा॥
तथा मित्रपदं नाम ततः केदारमुत्तमम्।
गङ्गासागरमित्याहुः सर्व्वतीर्थमयं शुभम्॥
तीर्थं ब्रह्मसरस्तद्वच्छतद्रुसलिले ह्रदे।
तीर्थन्तु नैमिषं नाम सर्व्वतीर्थफलप्रदम्॥
गङ्गोद्भेदस्तु गोमत्यां यत्रोद्भूतः सनातनः।
तथा यज्ञवराहस्तु देवदेवश्च शूलभृत्॥
यत्र तत्काञ्चनं द्वारमद्यापश्यति वै हरः।
नैमिषन्तु हरिचक्रस्य शीर्णा यत्राभवत् पुरा॥
तदेतन्नैमिषारण्यं सर्व्वतीर्थनिषेवितम्।
देवदेवस्य तत्रापि वाराहस्य तु दर्शनम्॥
यः प्रयाति स पूतात्मा नारायणपदं व्रजेत्।
कृतशौचं महापुण्यं सर्व्वपापविनाशनम्॥
यत्रास्ते नारसिंहस्तु स्वयमेव जनार्द्दनः।
तीर्थमिक्षुमती नाम पितॄणां वल्लभं सदा॥
सङ्गमे यत्र तिष्ठन्ति गङ्गायाः पितरः सदा।
कुरुक्षेत्रं महापुण्यं सर्व्वतीर्थसमन्वितम्॥
तथा च सरयूः पुण्या सर्व्वदेवनमस्कृता।
इरावती नदी तद्वत् पितृतीर्थाधिवासिनी॥
यमुना देविका काली चन्द्रभागा ह्यवन्तिका।
नदी वेणुमती पुण्या परा वेत्रवती तथा॥

पितॄणां वल्लभा ज्ञेताः श्राद्धे कोटिगुणा मताः।
जम्बूमार्गे महापुण्यं यत्र मार्गो हि लक्ष्यते ॥
अद्यापि पिट्टतीर्थं तत् सर्व्वकामफलप्रदम्।
नीलकुञ्जमिति ख्यातं पिट्टतीर्थं द्विजोत्तमाः! ॥
तथा रुद्रसरः पुण्यं सरो मानसमेव च।
मन्दाकिनी तथाच्छोदा विपाशाथ सरस्वती ॥
पूर्व्वमित्रपदन्तद्वैद्यनाथं महाफलम्।
क्षिप्रा नदी महाकालस्तथाकालञ्जरं शुभम् ॥
वंशोद्भेदं हरोद्भेदं गङ्गोद्भेदं महाफलम्।
भद्रेश्वरं विष्णुपदं नर्म्मदाद्वारमेव च ॥
गयापिण्डप्रदानेन समान्याहुर्मनीषिणः।
एतानि पिट्टतीर्थानि सर्व्वपापहराणि च ॥
स्मरणादपि लोकानां किमु श्राद्धकृतां नृणाम्।
ओङ्कारं पिट्टतीर्थञ्च कावेरी कपिलोदकम् ॥
सर्म्मदस्यखड्गेयास्तथैवामरकण्टकम्।
कुरुक्षेत्राच्छतगुणं तस्मिन् स्नानादिकं भवेत् ॥
शुक्रतीर्थञ्च विख्यातं तीर्थं सोमेश्वरं परम्।
सर्व्वस्माधिकरं पुण्यं शतकोटिफलाधिकम् ॥
श्राद्धे दाने तथा होमे स्वाध्याये जलसन्निधौ।
कायावरोहणं नाम तथा चर्म्मखती नदी ॥
गोमती वरुणा तद्वत्तीर्थमौशनसं परम्।
भैरवं भृगुतुङ्गञ्च गौरीतीर्थमनुत्तमम् ॥
तीर्थं वैनायकं नाम भद्रेश्वरमतः परम्।
तथा पापहरं नाम पुण्याथ तपती नदी ॥
मूलतापी पयोष्णी च पयोष्णीसङ्गमस्तथा।
महावोधिः पाटला च नागतीर्थमवन्तिका ॥
तथा वेणा नदी पुण्या महाप्राणं तथैव च।
महारुद्रं महालिङ्गं दण्डार्णा च नदी शुभा ॥
घृतरुद्रा घृताक्षा च तथा विश्वपदं परम्।
अङ्गारवाहिका तद्वन्नदौ तौ श्रीशचर्चरौ ॥
कालिका च नदी पुण्या वितस्ता च नदी तथा।
एतानि पिट्टतीर्थानि श्रूयन्ते स्नानदानयोः ॥
श्राद्धमेतेषु यद्दत्तमनन्तफलं स्मृतम्।
द्रोणी वाटनदी धारासरित् क्षीरनदी तथा ॥
गोकर्णं गजकर्णञ्च तथा च पुरुषोत्तमः।
द्वारका लक्ष्मणतीर्थञ्च तथार्बुदसरस्वती ॥
नदी मणिमती नाम तथा च गिरिकर्णिका।
धूतपापं तथा तीर्थं समुद्रो दक्षियस्तथा ॥
एतेषु पिट्टतीर्थेषु श्राद्धमानन्त्यमश्नुते।
तीर्थं मेघङ्करं नाम स्वयमेव जनार्द्दनः ॥
यत्र गृह्णन्धरो विष्णुर्मेखलायामवस्थितः।
तथा मन्दोदरी तीर्थं तीर्थं चम्पा नदी शुभा ॥
तथा सामलनाथञ्च महाप्राणनदी तथा।
चक्रवाकं चर्म्मकोटं तथा जम्बेश्वरं महत् ॥
अर्जुनं त्रिपुरं चैव सिद्धेश्वरमतः परम्।
श्रीशैलं शृङ्गरं तीर्थं नारसिंहमतःपरम् ॥
महेन्द्रञ्च तथा पुण्यमथ श्रीरङ्गसंज्ञितम्।
एतेष्वपि सदा श्राद्धमनन्तफलदं स्मृतम् ॥
दर्शनादपि चैतानि सद्यः पापहराणि वै।
तुङ्गभद्रा नदी पुण्या तथा भीमरथी सरित् ॥
भीमेश्वरं क्षण्वेणा कावेरी कुडमला नदी।
नदी गोदावरी नाम त्रिसन्ध्या तीर्थमुत्तमम् ॥
तीर्थं त्रैयम्बकं नाम सर्व्वतीर्थनमस्कृतम्।
यत्रास्ते भगवानीशः स्वयमेव त्रिलोचनः ॥
श्राद्धमेतेषु सर्व्वेषु कोटिकोटिगुणं भवेत्।
स्मरणादपि पापानि नश्यन्ति शतधा द्विजाः! ॥
श्रीपर्णी ताम्रपर्णी च जयातीर्थमनुत्तमम्।
तथा मत्स्यनदी पुण्या शिवधारं तथैव च ॥
भद्रतीर्थञ्च विख्यातं पम्पातीर्थञ्च शाश्वतम्।
पुण्यं रामेश्वरं तद्वदेलापुरमलं परम् ॥
अङ्गभूतञ्च विख्यातमानन्दकमलं बुधम्।
आम्रातकेश्वरं तद्वदेकाम्रकमतः परम् ॥
गोवर्द्धनं हरिक्षेत्रं छत्रवन्तं पृथूदकम्।
सहस्राक्षं हिरण्याक्षं तथा च कदली नदी ॥
रामाधिवासस्तत्रापि तथा सौमित्रिसङ्गमः।
इन्द्रकीलं महानादन्तथा च प्रियमेलकम् ॥
एतान्यपि सदा श्राद्धे प्रशस्तान्यधिकानि तु।
एतेषु सर्व्वदेवानां सान्निध्यं ह्यश्नते यतः ॥
दानमेतेषु सर्व्वेषु दत्तं कोटिशताधिकम्।
वाहुदा च नदी पुण्या तथा सिद्धवनं शुभम् ॥
तीर्थं पाशुपतं नाम नदी पार्व्वतिका शुभा।
श्राद्धमेतेषु सर्व्वेषु दत्तं कोटिशतोत्तरम् ॥
तथैव पिट्टतीर्थन्तु यत्र गोदावरी नदी।
शुतालिङ्गसहस्रैश्च सर्व्वान्तरजलावहा ॥
जामदग्न्यस्य तत्तीर्थं क्रमादायातमुत्तमम्।
प्रतीकस्य भयाद्भिन्नं यत्र गोदावरी नदी ॥
तत्तीर्थं हयकथानामश्वरोधुगसंज्ञितम्।
श्राद्धायिकार्य्यदानेषु तथा कोटिशताधिकम् ॥
तथा सहस्रलिङ्गञ्च राघवेश्वरमुत्तमम्।
सेन्द्रफेना नदी पुण्या यत्रेन्द्रः पतितः पुरा ॥
निहत्य नमुचिं शक्रस्तपसा स्वर्गमाप्तवान्।
तत्र दत्तं नरैः श्राद्धमनन्तफलदं भवेत् ॥
तीर्थन्तु पुष्करं नाम ग्रामाख्यामं तथैव च।
सोमपानञ्च विख्यातं यत्र वैश्वानरालयम् ॥
तीर्थं सारस्वतं नाम स्वामितीर्थं तथैव च।
मलन्दरा नदी पुण्या कौशिकी चन्द्रिका तथा ॥
वेदर्भा वाथ वेरा च पयोष्णी प्राङ्मुखा परा।
कावेरी चोत्तरा पुण्या तथा जालन्धरो गिरिः ॥
एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते।
लोहदण्डं तथा तीर्थं चित्रकूटस्तथैव च ॥
विन्ध्ययोगश्च गङ्गायास्तथा नदीतटं शुभम्।
कुलाभ्रन्तु तथा तीर्थं उर्व्वशीपुलिनं तथा ॥
संसारमोचनं तीर्थं तथैव ऋणमोचनम्।
एतेषु पिट्टतीर्थेषु श्राद्धमानन्त्यमश्नुते ॥
अट्टहासं तथा तीर्थं गौतमेश्वरमेव च।
तथा वप्रिष्ठं तीर्थन्तु हारितं तु ततः परम् ॥
ब्रह्मावर्त्तं कुशावर्त्तं ह्यतीर्थं तथैव च।
पिण्डारकञ्च विख्यातं ग्रहोद्धारं तथैव च ॥
घण्टेश्वरं विल्वकञ्च नीलपर्व्वतमेव च।
तथा च धरणीतीर्थं रामतीर्थं तथैव च ॥
अश्वतीर्थञ्च विख्यातमनन्तं श्राद्धदानयोः।
तीर्थं वेदशिरो नाम तथैवौघवती नदी ॥
तीर्थं वसुपदं नाम छागलाङ्कं तथैव च।
एतेषु श्राद्धदातारः प्रयान्ति परमं पदम् ॥
तथा च वदरीतीर्थं गयातीर्थं तथैव च।
जयन्तं विजयञ्चैव शुक्रतीर्थं तथैव च ॥
श्रीपतेश्च तथा तीर्थं तीर्थं रैवतकं तथा।
तथैव शारदातीर्थं भद्रकालेश्वरं तथा ॥
वैकुण्ठतीर्थञ्च परं भीमेश्वरमथापि वा।
एतेषु श्राद्धदातारः प्रयान्ति परमां गतिम् ॥
तीर्थं मालयहं नाम करवीरपुरं तथा।
कुशेश्वरञ्च विख्यातं गौरीशिखरमेव च ॥
नकुलेशस्य तीर्थञ्च कर्दमालं तथैव च।
दक्षिपुण्यकरं तद्वत् पुष्करीकपुरं तथा ॥
सप्त गोदावरीतीर्थं सर्व्वतीर्थेश्वरेश्वरम्।
तत्र श्राद्धं प्रदातव्यमनन्तफलमीप्सुभिः ॥
एष तूद्देशतः प्रोक्तस्तीर्थानां संग्रहो मया।
वागीशोऽपि न शक्नोति विस्तरात् किमु।
मानुषः ॥
सत्यं तीर्थं दया तीर्थं तीर्थमिन्द्रियनिग्रहः।
वर्णाश्रमाणां गेहेऽपि तीर्थन्तु समुदाहृतम् ॥
एततीर्थेषु यच्छ्राद्धं तत् कोटिगुणमिष्यते।
यस्मात् तस्मात् प्रयत्नेन तीर्थे श्राद्धं समाचरेत् ॥"*॥)
तर्व्वन्यङ्कुष्ठयोर्मध्यम्। इत्यमरः ॥
"अन्तराङ्गुष्ठदेशिन्योः पितॄणां तीर्थमुत्तमम् ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥

पिट्टदानं, क्ली, (पितरि पित्रे वा दानम्।) पित्राद्युद्देशेनान्नवस्त्रादिदानम्। पिट्टपदं श्रुतोपलक्षणं तेन मात्रादेरपि ग्रहणम्। तत्पर्य्यायः। निवापः २। इत्यमरः। २।७।३१ ॥ निवपनम् ३ पिट्टदानकम् ४। इति शब्दरत्नावली ॥

पिट्टदानकं, क्ली, (पिट्टदान+स्वार्थे कन्।) पित्राद्युद्देशकदानम्। इति शब्दरत्नावली ॥

पिट्टपक्षः, पुं, (पिट्टप्रियः पक्षः।) गौणाश्विनकृष्णपक्षः। स तु प्रेतपक्षः। तत्र श्राद्धफलं यथा, हेमाद्रिमाधवसंग्रहयोर्नागरखण्डम्।
"आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे।
यो वै श्राद्धं नरः कुर्य्यादेकस्मिन्नपि वासरे।
तस्य संवत्सरं यावत् तृप्ताः स्युः पितरो ध्रुवम्॥
नभा वाथ नभस्यो वा मलमासो यदा भवेत्।
सप्तमः पिट्टपक्षः स्यादन्यत्रैव तु पञ्चमः ॥"
इति मलमासतत्त्वम् ॥

पिट्टपतिः, पुं, (पितॄणां पतिः।) यमः। इत्यमरः। १।१।६१ ॥ (यथा, मार्कण्डेये १०४।३७
"त्वं ब्रह्मा हरिरजसंज्ञितस्त्रिमूर्त्तो
वित्तेशः पिट्टपतिरम्बुपतिः समीरः।
सोमोऽग्निर्गगनमहीधरोऽब्धिसंघः
किं स्तुत्यं तव सकलात्मरूपधारः ॥")

पिट्टपिता, [ऋ] पुं, (पितुः पिता।) पितामहः। इत्यमरः। २। ६। ३३ ॥

पिट्टप्रस्थः, क्ली, (पितॄणां प्रस्थमिव। पिट्टकृत्ये सन्ध्यावर्त्तिन्यास्तिथेर्य्यांशत्वादस्याः प्रस्थतुल्यपालकतया तथात्वम्।) सन्ध्या। इत्यमरः। १।४।३॥ (यथा, आर्य्यासप्तशत्याम्। ५०१।
"रजनीमियमुपनेतुं पिट्टप्रस्थः प्रथमसुपतस्थे।

रञ्जयति स्वयमिन्द्रं कुनायकं दुष्टदूतीव ॥"
पितुः प्रसूर्जनयित्री ।) पितामही ॥
पितृप्रियः, पुं, (पितॄणां प्रियः ।) भृङ्गराजः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य भृङ्गराजशब्दे ज्ञातव्याः ॥)
पितृबन्धुः, पुं, (पितुर्बन्धुः ।) पितामहभगिनीपुत्रः । पितामहीभगिनीपुत्रः । पितुर्मातुलपुत्रः । इत्युद्वाहतत्त्वम् ॥
पितृबान्धवः, पुं, (पितुर्बान्धवः ।) पितृबन्धुः । यथा, उद्वाहतत्त्वे ।
"पितुः पितुःस्वसुः पुत्राः पितुर्मातुःस्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥"
पितृभोजनः, पुं. (पितृभिर्भुज्यते इति । भुज + कर्म्मणि ल्युट् । पितुर्हेयकदानेऽस्य प्रशस्ततया तथात्वम् ।) माषः । इति राजनिर्घण्टः ॥ (भुज + भावे ल्युट् । पितॄणां भोजनमिति ।) पितॄणां भक्षणे, क्ली ॥
पितृभ्राता, [ऋ] पुं, (पितुर्भ्राता ।) पितृव्यः । इत्यमरः । २ । ६ । ३१ ॥
पितृयज्ञः, पुं, (पितृभ्यः पितॄद्दिश्येत्यर्थः यो यज्ञः ।) तर्पणम् । यथा, मनुः । ३ । ७० ।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"
पितृलोकः, पुं, (पितॄणां लोकः ।) पितॄणां भुवनम् । (यथा, महाभारते । ९ । ६२ । १० ।
"कथञ्च बहुलाः सेनाः पाण्डवैः क्षणसारथिः । अस्यन्नेकोऽनयत् सर्व्वाः पितृलोकं धनञ्जयः ॥")
अस्य विवरणं यथा,—
मार्कण्डेय उवाच ।
"सर्व्वेषामेव देवानामाद्यो नारायणो गुरुः । तस्माद्ब्रह्मा समुत्पन्नः सोऽपि सप्तात्मजन्मुनीन् ॥ मा यजस्वेति तेनोक्तास्तदा ते परमेष्ठिनः । आत्मनात्मानमेवाग्ये अयजन्त इति श्रुतिः ॥ तेषां वै ब्रह्मजातानां महावैकारिकर्म्मणाम् । अपश्यद्भाभिचारेण महानेष कृतो यतः । प्रभ्रष्टज्ञानिनः सर्व्वे भविष्यथ न संशयः ॥ एवं शप्तास्ततस्तेऽपि ब्रह्मणात्मसमुद्भवाः । सद्योवयस्कराः पुत्रानुत्पाद्य त्रिदिवं ययुः ॥ ततस्तेषु प्रयातेषु त्रिदिवं ब्रह्मवादिषु । तत्पुत्राः श्राद्धदानेन तर्पयामासुरञ्जसा ॥ ते च वैमानिकाः सर्व्वे ब्रह्मणः सप्त मानसाः । तत्पिण्डदानमन्त्रोक्तं प्रपश्यन्तो व्यवस्थिताः ॥
गौरमुख उवाच ।
ये च ते पितरो ब्रह्मन् स्वश्च कालं समासते । कियन्तो वै पितृगणास्तस्मिन् लोके व्यवस्थिताः ॥
मार्कण्डेय उवाच ।
श्रूयन्तां वराः केचिद्देवानां सोमवर्द्धनाः । ते मरीच्यादयः सप्त स्वर्गे ते पितरः स्मृताः ॥ चत्वारो मूर्त्तिमन्तो वै त्रयस्त्वन्ये ह्यमूर्त्तयः । तेषां लोकनिसर्गश्च कीर्त्तयिष्यामि तच्छृणु ॥ प्रभावश्च महर्षे त्वं विस्तरेण निबोध मे । धर्म्मसूत्रियरास्तेषां त्रयोऽन्ये परमा गणाः ॥ तेषां नामानि लोकांश्च कीर्त्तयिष्यामि तच्छृणु ॥ लोकाः सन्तानकामाय यत्र तिष्ठन्ति भास्वराः । अमूर्त्तयः पितृगणास्ते वै पुत्राः प्रजापतेः ॥ विराजस्य प्रजाः श्रेष्ठास्ते वैराजा इति स्मृताः । देवानां पितरस्ते हि तान् यजन्तीह देवताः ॥ एते वै लोकविभ्रष्टा लोकान् प्राप्य सनातनान् । पुनर्युगशतान्तेषु जायन्ते ब्रह्मवादिनः ॥ ते प्राप्य तां स्मृतिं भूयः सिद्धियोगमनुत्तमम् । चिन्त्य योगगतिं शुद्धां पुनरावृत्तिदुर्लभाः ॥ एतेऽस्मिन् पितरः श्राद्धे योगिनां योगवर्द्धनाः । आप्यायितास्तु ते पूर्व्वं वैराजैरपि योगबले रताः ॥ तस्मात् श्राद्धानि देयानि योगिनां योगसत्तमैः । एष वै प्रथमः सर्गः सोमपानामनुत्तमः ॥ एते त एकतनवो वर्त्तन्ते द्विजसत्तमाः । भूर्लोकवासिना याज्या भुवर्लोकनिवासिनः ॥ स्वर्गलोका मरीच्याद्यास्तेषां याज्या महर्गताः । कल्पवासिकसंज्ञानां तेषामपि जने स्थिताः ॥ सनकाद्यास्ततस्तेषां वैराजास्तपसि स्थिताः । तेषां सत्यगताः प्रोक्ता इत्येषा पितृसन्ततिः ॥ सप्तधा सप्तलोकेषु आदिमन्वन्तरक्रिया । अन्येषां वसवः साध्या रुद्रादित्याश्विनाविति ॥ अयतः सर्व्ववर्णानां साधारण्येन संस्थिताः । ऋषयश्च तदुत्पन्ना इति सप्तविधा गणाः ॥ तेषां कल्यास्तु संजाता महती पितृसन्ततिः । अग्निष्वात्ताश्च मारीचा वैराजा बर्हिषंज्ञिताः ॥ सुकाला नाम पितरो वशिष्ठस्य प्रजापतेः । तेऽपि याज्यास्त्रिभिर्वर्णैर्न शूद्रेण पृथक् कृतम् ॥ वर्णत्रयाभ्यनुज्ञातः शूद्रः सर्व्वान् पितॄन् यजेत् । न तु तस्य पृथक् सन्ति पितरः शूद्रजातयः ॥ सुकालेतनका ब्रह्मन् ! न दृश्यन्ते पितृष्वपि । विशेषश्चाक्षदृष्टा तु पुराणानाच्च दर्शनात् ॥ एवं ऋषिसुतैः श्राद्धैर्ज्ञात्वा याजकसम्भवान् । स्वयं दृष्ट्वा स्मृतिर्लब्धा पुत्राणां ब्रह्मणा ततः ॥ परं निर्व्वाणमापन्नास्तेऽपि ज्ञानिन एव च । वैश्यादीनां कश्यपाद्या वर्णानां वसवादयः ॥ अविशेषेण विज्ञेया गन्धर्व्वाद्या अपि ध्रुवम् । एष ते पैतृक सर्गं उद्देशेन महामुने ! । कथितो नान्त एवास्य वर्षकोट्या हि दृश्यते ॥"
इति वाराहे श्राद्धकल्पः ॥ * ॥
अपि च ।
"पितॄणां सम्भवं राजन् ! कथ्यमानं निबोध मे । पूर्व्वं प्रजापतिर्ब्रह्मा सिसृक्षुर्विविधाः प्रजाः ॥ एकाग्रमानसः सर्व्वास्तन्मात्रा मनसो बहिः । कृत्वा परमकं ब्रह्म ध्यायन् सर्व्वेश रूपकैः ॥ तस्यात्मनि तदा योगं गतस्य परमेष्ठिनः । तन्मात्रा निर्ययुर्देहाद्धूमवर्णकृतत्विषः ॥ पिबाम इति भाषन्तः सुरा सोममिनोऽसृजत् । ऊर्द्धं जिगमिषन्तो वै अधःसंस्थास्तपस्विनः ॥ तान् दृष्ट्वा सहसा ब्रह्मा तिर्यक्संस्थांस्तदोऽसृजान् । भवन्तः पितरः सन्तु सर्व्वेषां गृहमेधिनाम् ॥ ऊर्द्धगकास्तु ये तत्र ते नान्दीमुखसंज्ञिताः ॥ इत्युक्त्वा तु तदा ब्रह्मा तेषां पन्थानमाकरोत् । दक्षिणायनसंज्ञन्तु पितॄणान्तु पितामहः ॥ तूष्णीं ससर्ज भूतानि तमूचुः पितरस्ततः । वृत्तिं नो देहि भगवन् यया विन्दामहे सुखम् ॥
ब्रह्मोवाच ।
अमावास्यादिनं वोऽस्तु तस्यां कुप्तिलोदकैः । तर्पिता मानुषैस्तृप्तिं परां गच्छत नान्यथा ॥ तिला देयास्तथैतस्यामुपोष्य पितृभक्तितः । परमं तस्य सन्तृप्तिः परं यच्छत मा चिरम् ॥"
इति वाराहे पितृसर्गस्थितिवर्णनम् ॥ * ॥
पितृश्राद्धविशेषे देवताविशेषाः पितृगणाश्च यथा.
"क्रतुर्दक्षो वसुः सत्यः कामः कालस्तथा ध्वनिः । रोचकश्चार्द्रवाश्चैव तथा चान्यः पुरूरवाः ॥ विश्वेदेवा भवन्त्येते दश सर्व्वत्र पूजिताः । विश्वेदेवौ क्रतुदक्षौ सर्व्वास्विष्टिषु विश्रुतौ ॥ नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके । नवान्नालम्भने देवौ कामकालौ सदैव हि ॥ अपि कन्यागते सूर्य्ये श्राद्धे च ध्वनिरोचकौ । पुरूरवाश्चार्द्रवाश्च विश्वेदेवौ च पर्व्वणि ॥ सुभास्वरा बर्हिषदो ह्यग्निष्वात्तास्तथैव च । आज्यपाश्चोपहूताश्च ऋत्वादाश्च सुकालिनः । एते पितृगणाः सप्त पौराणाः केचिदेव हि ॥"
इत्यग्निपुराणम् ॥ * ॥
अग्निष्वात्तादेरुत्पत्तिर्यथा;—
"ततो निगृह्येन्द्रियकं विकारं चतुराननः । जिघृक्षुरपि तत्याज तां सन्ध्यां कामरूपिणीम् ॥ तनूशरीरात्तु धर्म्मांभो यत् पपात द्विजोत्तमाः । अग्निष्वात्ता बर्हिषदो जाताः पितृगणास्ततः ॥ भिन्नाञ्जननिभाः सर्व्वे पुण्डरीकावलोचनाः । नितान्तसंयताः पुण्याः संसारविमुखाः परे ॥ सहस्राणां चतुःषष्टिरग्निष्वात्ताः प्रकीर्त्तिताः । षड्भिर्लक्षसहस्राणि तथा बर्हिषदो द्विजाः ॥"
इति कालिकापुराणे २ अध्यायः ॥ * ॥
तेषां तर्पणविधिर्यथा,—
"अपसव्यं ततः कृत्वा सव्यं जानु च भूतले । अग्निष्वात्तांस्तथा सौम्यान् हविष्मतस्तथोष्मपान् ॥ सुकालिनो बर्हिषदस्तथा चैवाज्यपान् पुनः । तर्पयेत्तु पितॄन् भक्त्या सतिलोदकचन्दनैः ॥ दर्भपाणिस्तु विधिवत् प्रेतांस्तांस्तर्पयेत्ततः । पित्रादीन्नामगोत्रेण तथा मातामहानपि । सन्तर्प्य विधिवद्भक्त्या इमं मन्त्रमुदीरयेत् ॥ ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः । ते तृप्तिमखिलां यान्तु यश्चास्मत्तोऽभिवाञ्छति ॥"
इति मात्स्ये स्नानविधौ ८४ अध्यायः ॥
पितृवनं, क्ली, (पितॄणां वनमिव ।) श्मशानम् । इत्यमरः । २ । ८ । ११८ ॥ (यथा, महाभारते । ११ । ४ । १५ ।
"सर्व्वे पितृवनं प्राप्ता स्वपन्ति विगतज्वराः । निर्म्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धनैः ॥")
पितृवनेचरः, पुं, (पितृवने श्मशाने चरतीति, चर + "चरेष्टः ।" ३ । २ । १६ । इति टः । अलुक्समासः ।) शिवः । इति केचित् ॥

पितृवसतिः, स्त्री, (पितॄणां वसतिर्यत्र ।) श्मशानम् । इत्यमरटीकायां रमानाथः ॥

पितृव्यः, पुं, (पितुर्भ्राता । "पितृव्यमातुलमातामहपितामहाः ।" ४ । २ । ३६ । इत्यत्र "पितुर्भ्रातरि यत् ।" इति वार्त्तिकोक्त्या यत्प्रत्ययः ।) पितृभ्राता । इत्यमरः । २ । ६ । ३१ ॥ अपि च ।

"पितृव्यो जनकभ्राता ज्येष्ठतातोऽग्रजो यदि ।
पितुः कनिष्ठभ्राता तु खुल्लतातोऽभिधीयते ॥"

इति शब्दरत्नावली ॥

पितृष्वसा, [ऋ] स्त्री, (पितुः स्वसा भगिनी । "मातृपितृर्भ्यां स्वसा ।" ८ । ३ । ८४ । इति षत्वम् ।) पितुर्भगिनी । पिसी इति भाषा । यथा, "मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"

इति दायभागः ॥

पितृष्वसीयः, त्रि, पितृष्वसुरपत्यम् । (पितृष्वस्र + छः ।) पितृभागिनेयः । इति सुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । १ । १११ । २ ।
"पितृष्वसीयाय सुतामनपत्याय भारत ! ।
अग्रामये प्रतिज्ञाय स्वस्यापत्यं स सत्यवाक् ॥")

पितृसन्निभः, पुं, (सम्यङ्निभातीति सन्निभस्तुल्यः । पितुः सन्निभः ।) पितृतुल्यः । तत्पर्य्यायः । मनोजवः २ मनोजवसः ३ । इत्यमरभरतौ ॥

पितृस्तः, स्त्री, (स्तुते इति स्तृजननी । पितॄणां स्तृजननीव । पितृस्तुत्ये सन्त्यागामित्यास्त्रिधेर्य्यात्स्त्यात् जननीवत् पालकत्वेनैव तथात्वम् ।) सन्ध्या । इति शब्दमाला । (पितरं स्तुते इति । क्विप् । पितामही । इति युत्पत्तिलभ्योऽर्थः ॥)

पितृहूः, पुं, (पितृनाह्वयत्यनेनेति । पितृ + हृ + करणे क्विप् ।) दक्षिणकर्णः । यथा, श्रीभागवते । ४ । २५ । ५० ।
"पितृहूर्नृपपुर्य्या द्वार्दक्षिणेन पुरञ्जनः ॥"
"श्राद्धे च प्रथमं श्रोतव्यं कर्म्मकाण्डं इत्येतावता सामान्येन प्रवृत्तसंग्रहस्य कर्म्मकाण्डस्य दक्षिणकर्णेन श्रवणमिष्यते । ततस्तदर्थमनुष्ठाय पितृभिराहूतः पितृलोकप्रापकं पितृयानं प्रपद्यते । तदनेन प्रकारेण पितॄणामाह्वानमनेन भवति पितृहूर्दक्षिणः कर्णः । एवं तद्वैपरीत्येन उत्तरकर्णो देवहूः । तथा च आख्यास्यति ।
पितृहूर्दक्षिणः कर्णः उत्तरो देवहूः स्मृतः ।
प्रवृत्तश्च निवृत्तश्च श्राद्धं पञ्चाग्निसंज्ञितम् ॥"

इति तट्टीकायां श्रीधरस्वामी ॥

पित्तं, क्ली, (अपिद्यीयते प्रकृतावस्थया रक्ष्यते विकृतावस्थया नाश्यते वा शरीरं येनेति । अपि + दै ड पालने, दो य च्छेदने वा + क्तः । "अच उपसर्गात्तः ।" ७ । ४ । ४७ । इति तादेशः । अपेरल्लोपः ।) शरीरस्थधातुविशेषः । तत्पर्य्यायः । मायुः २ । इत्यमरः । २ । ६ । ६२ । पलज्वलः ३ । इति शब्दरत्नावली ॥ तेजः ४ तिक्तधातुः ५ उष्मा ६ अग्निः ७ अनलः ८ । (यथा, महाभारते । ६ । ८१ । ४१ ।
"अभिमन्योस्ततस्तेषु घोरं युद्धमवर्त्तत ।
शरीरस्थ यथा राजन् ! वातपित्तकफैस्त्रिभिः ॥")

अस्य गुणाः ।

"पित्तञ्च तिक्ताम्लरसञ्च सारकं
तूष्णं द्रवं तीक्ष्णमिदं मधौ वहु ।
वर्षान्तकाले शरदर्द्धरात्रे
मध्यन्दिने तप्यदिते च कुप्यति ॥"

इति राजनिर्घण्टः ॥*॥

अपिच ।

"सर्व्वं पित्तमपसारकुष्ठदुष्टव्रणापहम् ।
चक्षुष्यं कटुतीक्ष्णोष्णसुस्वादक्रिमिनाशनम् ॥"

इति राजवल्लभः ॥ * ॥

पित्तस्य स्वरूपमाह ।

"पित्तसुष्णं द्रवं पीतं नीलं सत्वगुणोत्तरम् ।
सरं कटु लघु स्निग्धं तीक्ष्णमम्लन्तु पाकतः ॥"

पीतं निरामम् । नीलं सामम् । एकं पित्तं वातवन्नामस्थानकर्म्मभेदैः पञ्चविधम् ॥ * ॥

तेषां पित्तानां नामान्याह ।

"पाचकं रञ्जकञ्चापि साधकालोचके तथा ।
भ्राजकञ्चेति पित्तस्य नामानि स्थानभेदतः ॥"*॥

अथ पाचकादीनां स्थानान्याह ।

"अग्न्याशये यकृत्प्लीह्नोर्हृदये लोचनद्वये ।
त्वचि सर्व्वशरीरेषु पित्तं निवसति क्रमात् ॥"*॥

अथ तेषां कर्म्माण्याह ।

"पाचकं पचते सुक्तं श्लेष्मामिबलवर्द्धनम् ।
रसमूत्रपुरीषाणि विरेचयति नित्यशः ॥"

पाचकं पित्तमामपक्वाशयमध्यस्थं षड्विधमाहारं भोज्यं भक्ष्यं चर्व्व्यं लेह्यं चूष्यं पेयं पचति दोषरसमूत्रपुरीषाणि पृथक् करोति च । तदग्न्याशयस्थमेवाग्न्याशयाख्या रसरञ्जनहृदयस्थकफतमोऽपनोदनरूपप्रसन्नप्रभाप्रकाशजनकाभ्यङ्गलेपादिपाचनाद्यग्निकर्म्मणा श्लेष्माणं पित्तस्थानानामनुग्रहं करोति । श्लेष्माण्यपि पित्तस्थानानि यकृत्प्लीहादीनि भागेन गत्वा तत्र तत्र रसरञ्जनादिकर्म्मभिरुपकरोतीत्यर्थः । कथमूतं पाचकपित्तं श्लेष्माग्निबलवर्द्धनं श्लेष्मा अम्बुयः पृथिव्यादिमहाभूतगताः सप्तधातुगताश्च । यत उक्तं चरकेण ।

"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।"

इति ।

उष्माणोऽग्नयः । यत उक्तं वाग्भटे ।

"दोषधातुमलादीनामुष्मेत्याग्नेयमाशनम् ।" इति ।

दोषधातुमलादीनामुष्मेत्यग्निरित्यर्थः । रसादिधातुगताश्च सप्त तेषां बलवर्द्धनम् । यथा यष्टे स्थापितानि रत्नानि खद्योतवद्दूरभास्वराणि तान्यपि दीपज्योतिषा दूरप्रकाशकानि भवन्ति । तथा अग्न्याशयस्थपाचकाग्नितेजसा सर्व्वे अग्नयो बलवन्तो भवन्ति । तथा च वाग्भटः ।

"अन्नस्य पक्ता सर्व्वेषां पक्तृणामधिको मतः ।
तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः ॥"

इति ॥

नन्वग्निरादित्यो विराड्रोहितः पित्तमेवाग्निरिति सन्देहः । उच्यते पित्तस्योष्णादिगुणद्वाराहारपाचनरञ्जनदर्शनादिकर्म्मणश्च न खलु पित्तव्यतिरेकेणान्योऽग्निः । तस्मादग्निरूपस्येव पित्तस्य स्थानभेदात् पाचकरञ्जकसाधकालोचकभ्राजकसंज्ञाः । तथा च वाग्भटे ।

"पाचकं तिलमात्रं स्यात् काटिन्यान्नास्य दीपना ।
अनुग्रहात्यविकृतं पित्तं पाकोष्मदर्शनैः ॥
क्षुत्तृड्रुचिप्रभामेधाधीशौर्य्यतनुमार्द्दवैः ।
पित्तं पक्वाशयं तच्च पक्वामाशयमध्यगम् ॥
पञ्चभूतात्मकत्वेऽपि यत्तेजसगुणोदयात् ।
तत्तद्वत्वं पाकादिकर्म्मणानलग्रन्थितम् ॥
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा ।
तत्रस्थमेव पित्तानां श्लेष्माणामप्यनुग्रहम् ॥
करोति बलदानेन पाचकं नाम तत् स्मृतम् ॥"

नन्वयं यदि पित्ताग्नेरभेदस्तदा कथं घृतं पित्तस्य शमनमग्नेर्दीपनमिति । तथा मनुष्याः पित्तं कुर्व्वन्ति न च तेऽग्निदीप्तिकरा इति । तथा पित्ताधिक्यात्तीक्ष्णोऽग्निरित्यपि कथं स्यात् । तथा समदोषः समाग्निश्चेत्यपि वक्तुं न युज्यते । तथा द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथेति । अत्रोच्यते । पित्तमग्नेः सततमधिष्ठानम् । तथा चोक्तं तन्त्रान्तरे ।

"अग्निभिन्नगुणैर्युक्तः पित्तं भिन्नगुणैस्तथा ।
द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथा ॥
तस्मात्तेजोमयं पित्तं पित्तोष्मा यः स मूर्त्तिमान् ।
स सञ्चरति कुक्षिस्थः सर्व्वतो धमनीमुखैः ॥
स कायाग्निः स कायोष्मा स पक्ता स च जीवनम् ।
अनन्यगतिरित्येवं देहे कायाग्निरुच्यते ॥"

अन्यच्च ।

"वामपार्श्वाश्रितं नाभेः किञ्चित् सोमस्य मण्डलम् ।
तन्मध्ये मण्डलं सौम्यं तन्मध्येऽग्नेर्व्यवस्थितः ॥
जरायुमात्रप्रच्छन्नः काचकोषस्थदीपवत् ॥"

तथा च मधुकोषे । "द्रवतेजःसमुदायात्मकस्य पित्तस्य तेजोभागोऽग्निरिति । तेन पित्तमप्यग्निवत् मन्यते । अग्नितापितायोगोलकवत् ।" परमार्थतस्तु अग्निः पित्ताद्भिन्न एवेति सिद्धान्तः । अतएवाह रसप्रदीपे ।

"आतुरो भगवानग्निरीश्वरोऽन्नस्य पाचकः ।
सौम्यात्तदन्नादानादनो विधेर्वक्तुं नैव शक्यते ॥
नाभौ मध्ये शरीरस्य विज्ञेयात् सोममण्डलम् ।
सोममण्डलमध्यस्थं विद्यात् सूर्य्यस्य मण्डलम् ॥
प्रदीपवत्तत्र वृणां स्थितो मध्ये हुताशनः ।
सूर्य्यो दिवि यथा तिष्ठंस्तेजोयुक्तैर्गभस्तिभिः ॥
विशोषयति सर्व्वाणि पल्वलानि सरांसि च ॥
तद्वच्छरीरिणां मुक्तं त्वनलो नाभिमाश्रितः ।
मयूखैः पचते चिप्रं नानाद्यञ्जनसंस्कृतम् ॥
स्थूलकायेषु सत्त्वेषु यवमात्रप्रमाणतः ।
क्षुद्रकायेषु सत्त्वेषु तिलमात्रप्रमाणतः ॥
कृमिकीटपतङ्गेषु चाणुमात्रोऽवतिष्ठते ॥" इति ।

पुनः प्रकृतमनुसरति ।

"रञ्जकं नाम यत् पित्तं तदसं ग्रीणतां नयेत्।
यत्तु साधकसंज्ञं तत् कुर्य्यादुद्बुद्धिं धृतिं स्मृतिम्॥"
धृतिं मेधाम्।
"यदालोचकसंज्ञं तद्रूपग्रहणकारणम्।
भ्राजकं कान्तिकारि स्यात्प्रेषाभ्यङ्गादिपाचकम्॥
पित्तप्रकृतिको यथा,—
"पित्तप्रकृतिको यादृक् तादृग्रोग्य निगद्यते।
अकालपलितो गौरः क्रोधी खेदी च बुद्धिमान्॥
बहुशुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति।
श्यामकेशः समी स्थूलो बहुवीर्य्यो महाबलः॥
पित्तं वह्निर्वेह्निर्वा तदस्मात्
पित्तोद्रिक्तस्त्रीव्रण्यो वुभुक्षुः।
गौरोष्णाङ्गस्ताम्रहस्तोऽङ्गिरक्तः
शूरो मानी पिङ्गकेशोऽल्पलोमा॥"
पित्तप्रकृतिकन्यगा यथा,—
"याम्यर्क्षकपिमार्जारयक्षोलूकाश्च पैत्तिकाः॥"
पित्तस्योपशमहेतुमाह।
"तिक्तस्वादुकषायशीतपवनच्छायानिशाभोजन-
ज्योत्स्नाभूरुहयन्त्रवारिजलदस्त्रीगानसंसर्ग-
नम्।
सर्पिःक्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं
पामाहारविहारभेषजमिदं पित्तं प्रशान्तिं
नयेत्॥"
अथ पित्तप्रकोपकारणानि।
"कट्वम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातप-
स्त्रीसंभोगलघ्वन्नुधाभिहननव्यायाममद्यादिभिः।
मुक्तेऽजीर्यति भोजने च शरदि ग्रीष्मे तथा
प्राणिनां
मध्याह्ने च तथार्द्धरात्रसमये पित्तप्रकोपो भवेत्॥"
इति भावप्रकाशे पूर्व्वखण्डे २ भागे॥
(यथा च।
"अत्युष्णरूक्षाम्लकटुप्रदाहैः
सौधोः सुरासेवनेनातिघर्म्मे।
क्रोधादपि खेदने च व्यवाये
व्यभोजने याति कोपञ्च पित्तम्॥
कुलत्थाढ़कीयूषमूलेषु ग्रिग्रु
तिलातसीराजिकाग्राकटन्दे।
निशाजागरे योधने च श्रमे वा
घनान्ते शरत्सु प्रकोपः प्रदिष्टः।
भृशं वासरे मध्यगेऽर्के निशीथे
ऽसुजीर्य्यंत्प्रशुष्के प्रकोपः प्रदिष्टः॥"
इति हारीते प्रथमस्थाने पञ्चमेऽध्याये॥)
स तु ज्वरजनकमन्दाग्नेर्जनकः।
"मन्दाग्नेस्तस्य जनको मन्दाग्नेर्जनकास्तयः।
पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः॥*॥
(यथा च।
"पित्तं पक्वाशयं तत्र पक्वामाशयमध्यगम्।
पञ्चभूतात्मकत्वेऽपि यत्तेजसगुणोदयात्॥
तत्तद्रवत्वं पाकादिकर्म्मणानलग्रन्थितम्।
पञ्चत्वं विभजते सारकिट्टौ पृथक् तथा॥
तत्रस्थमेव पित्तानां ग्रेषाणामप्युपग्रहम्।
करोति बलदानेन पाचकं नाम तत् स्मृतम्॥
आमाशयाश्रयं पित्तं रञ्जकं रसरञ्जनात्।
बुद्धिमेधाभिमानाद्यैरभिप्रेतार्थसाधनात्॥
साधकं हृद्गतं पित्तं रूपालोचनतः स्मृतम्।
दृक्स्थमालोचकं त्वक्स्थं भ्राजकं भाजनात्
त्वचः॥"
इति वाभटे सूत्रस्थाने द्वादशेऽध्याये॥
"पित्तविकाराश्चत्वारिंशदत्र तत्रैं व्याख्यास्यन्ते।
तद्यथा, ओषश्च प्रोषश्च दाहश्च दवथुश्च धूमकश्चाम्लकश्च विदाहश्च अन्तर्दाहश्चांसदाहश्चोष्माधिक्यञ्चातिस्वेदश्चाङ्गगन्धश्चाङ्गावयवदरणञ्च शोणितक्लेदश्च मांसक्लेदश्च त्वग्दाहश्च मांसदाहश्च त्वङ्मांसदरणञ्च रक्तकोठाश्च रक्तविस्फोटाश्च रक्तपित्तञ्च रक्तमण्डलानि च हरितत्वञ्च हरिद्रत्वञ्च नीलिका च कक्षा च कामला च तिक्तास्यता च पूतिसुखता च अम्लिकायाश्चाधिक्यञ्चाम्लनिष्ठास्यपाकश्च गलपाकश्चाक्षिपाकश्च गुदपाकश्च मेढ्रपाकश्च जीवादानञ्च तमःप्रवेशश्च हरितहारिद्रमूत्रनेत्रवर्च्चस्त्वचेति चत्वारिंशत् पित्तविकाराः। पित्तविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याता भवन्ति। सर्व्वेष्वपि स्वस्थेषु पित्तविकारेष्वन्येषु चाशुक्लेषु पित्तस्येदमात्मरूपमपरिणामिकर्म्मणश्च स्वलक्षणं यत्तदुपलभ्य तदवयवं वा विसृष्टसन्देहाः पित्तविकारमेवाध्यवस्यन्ति कुशलाः। तद्यथा,—
औष्ण्यं तैक्ष्ण्यं लाघवमनतिस्नेहो वर्णश्च शुक्लारुणवर्ण्यो गन्धश्च विस्रो रसौ च कटुकाम्लौ पित्तस्यात्मरूपाण्येवंविधत्वाच्च कर्म्मणः स्वलक्षणमिदमस्य भवति। तं तं शरीरावयवमाविशतो दाहोष्मपाकस्वेदक्लेदकोथस्रावरागाः। यथास्वञ्च गन्धवर्णरसाभिनिर्व्वर्त्तनं पित्तस्य कर्म्माणि तैरन्वितं पित्तविकारमेवाध्यवस्येत्। तं मधुरतिक्तकषायशीतैरुपक्रमैरुपक्रमेत। स्नेहविवेकप्रदेहपरिषेकाभ्यङ्गावगाहादिभिः पित्तहरैर्मात्रां कालञ्च प्रमाणीकृत्य विरेचनमनु सर्व्वोपक्रमेभ्यः पित्ते प्रधानतमं मन्यन्ते भिषजः। तद्ग्रादित एवामाशयमनुप्रविश्य केवलं वैकारिकं पित्तमूलत्वात्पचकर्मेति। तत्रावजिते पित्तेऽपि शरीरान्तर्गताः पित्तविकाराः प्रशान्तिमापद्यन्ते। यथाग्नौ घृतोदे केवलमग्नियच्च शीतं भवति तद्वत्॥" इति चरके सूत्रस्थाने विंशेऽध्याये॥*॥
"पित्तसुश्नीत्यं द्रवं विस्रमम्लकटुकञ्च। तस्योष्णात्वात् पित्तला भवन्त्युष्णासहाः सुकुमारावदातगात्राः प्रभूतपिप्रुव्यङ्गतिलकपिड्काः क्षुत्पिपासावन्तः क्षिप्रवलीपलितखालित्यदोषाः प्रायोऽल्पश्लक्ष्णकपिलश्मश्रुलोमकेशाः तैक्ष्ण्यात्तीक्ष्णपराक्रमाः तीक्ष्णायवः प्रभूताशनपानाः क्षिप्रासहिष्णवो दन्दश्यका द्रवत्वात् श्लथिलसन्धिमांसाः प्रभूतरक्तस्वेदस्त्रपुरीषाश्च विस्रत्वात् प्रभूतपूतिवक्त्रकक्षास्यशिरःशरीरगन्धाः कट्वम्लत्वादन्नशुक्रव्यवायाल्पाः। त एवं गुणयोगात् पित्तला मध्यवला मध्यायुषो ज्ञानविज्ञानवित्तोपकरणवन्तश्च।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)
पित्तघ्नी, स्त्री, (पित्तं हन्तीति। हन+"अमनुष्यकर्त्तृके च।" ३। २। ५३। इति टक्। ततो ङीप्।) गुडूची। इति शब्दचन्द्रिका॥ (पित्तनाशके, त्रि। यथा, भावप्रकाशे। १। १।
"मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः॥")
पित्तज्वरः, पुं, (पित्तनिमित्तको ज्वरः।) पैत्तिकज्वरः। यथा,—
"विशेषतः कोमलनारिकेलं
निहन्ति पित्तज्वरमूत्रदोषान्॥"
इति राजनिर्घण्टः॥
अस्य लक्षणं ज्वरशब्दे द्रष्टव्यम्॥*॥
अथ पित्तज्वरचिकित्सा।
"आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधाय सर्व्वान्।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत्॥"
इति वचनात् सामान्यतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने पित्तज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः। पैत्तिके दशरात्रेण ज्वरे युञ्जीत भेषजमिति। दशरात्रेण लङ्घनवता यतीतेनेत्यर्थः। किन्तदौषधं तदाह।
"तिक्तासुस्तायवेः पाठाकटुफलाभ्यां सहोदकम्।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे॥"
इति तिक्तादिकाथः॥
"पर्पटो वासकस्तिक्ता कैरातो धन्वयासकः।
प्रियङ्गुश्च शृतः काथ एष शर्करया युतः॥
पिपासादाहपित्तास्रयुक्तं पित्तज्वरं हरेत्॥"
इति पर्पटादिकाथः॥
"द्राक्षा हरीतकी सुस्ता कटुका शृतमालकः।
पर्पटश्च शृतः काथः एष पित्तज्वरापहः॥
सुखशीतप्रलापान्तर्दाहमूर्च्छाभ्रमप्रणुत्।
पिपासारक्तपित्तानां शमनो भेदनो मतः॥"
इति द्राक्षादिकाथः॥
"पटोलमथ धन्याकं मधुकं मधुसंयुतम्।
हन्ति पित्तज्वरं दाहं तृष्णाश्चातिप्रमाथिनीम्॥"
इति पटोलादिकाथः॥
"गुडूच्यामलकीयुक्तः केवलो वापि पर्पटः।
पित्तज्वरं हरेत्तूर्णं दाहशीतभ्रमान्वितम्॥"
इति गुडूच्यादिकाथः॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः।
किं पुनर्यदि युज्येत चन्दनोशीरवालकैः॥
ह्रीवेरचन्दनोशीरधनपर्पटसाधितम्।
दद्यात् सुशीतलं वारि तृट्छर्द्दिर्ज्वरदाहजुत्॥"
इति ह्रीवेरादिकाथः॥
"भूनिम्बातिविषालोध्रमुस्तकैरवाटताः।
बालकं धान्यकं बिल्वं कषायो माक्षिकान्वितः॥
विड्भेदश्वासकासांश्च रक्तपित्तज्वरं हरेत्॥"
इति भूनिम्बादिकाथः॥

"द्राक्षाचन्दनपद्मानि सुस्ता तिक्तास्तथापि च।
धात्री बालमुशीरञ्च लोध्रेन्द्रयवपर्पटाः॥
परूषकं प्रियङ्गुञ्च यवासो वासकस्तथा।
मधुकं कुलकं वापि किरातो धान्यकं तथा॥
एषां क्वाथो निहन्त्येव ज्वरं पित्तसमुत्थितम्।
तथा दाहं प्रलापञ्च रक्तपित्तं भ्रमं क्लमम्॥
मूर्च्छां छर्दिं तथा शूलं मुखशोषमरोचकम्।
कासं श्वासञ्च हृल्लासं नाशयेन्नात्र संशयः॥"
इति महाद्राक्षादिक्वाथः॥
"ससितो निम्बि पर्युषितः प्रातर्धान्याकतण्डुल-
क्वाथः।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम्॥"
इति धान्याकक्वाथः॥
"अम्बताया हिमः प्रातः ससितः पैत्तिकज्वरम्।
वासायाश्च तथा क्वासरक्तपित्तज्वरान् जयेत्॥"
इति अम्बतावासाक्वाथौ॥
"गुडूची भूमिनिम्बश्च बालं वीरणमूलकम्।
लघुसुस्तं चित्रङ्गाची द्राक्षा वासा च पर्पटः॥
एषां क्वाथो हरत्येव ज्वरं पित्तकृतं हृतम्।
सोपद्रवमपि प्रातर्निपीतो मधुना सह॥"
इति गुडूच्यादिक्वाथः॥
"प्रलाशस्य वर्ष्या वा निम्बस्य मृदुपल्लवैः।
अम्लपिष्टैः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम्॥
उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ।
शीताम्बुधारा बहुला पतन्ती
निहन्ति दाहं त्वरितं ज्वरञ्च॥
यष्ट्या तैलघृतक्षौद्रैर्लिहन् दाहज्वरापहा।
कासासृक्पित्तवीसर्पश्वासान् हन्ति वमीनपि॥"
तैलघृतक्षौद्रैरित्यत्र न समुच्चयः तेन केवलेन
क्षौद्रेणापि लिह्यात्।
"क्षाक्षिकार्द्रपटेनावगुण्ठनं दाहनाशनम्।
अथ गोतक्रसुस्निग्धशीतलीकृतवाससा॥
द्राक्षामलककल्केन कवलोऽत्र हितो मतः।
पक्वदाडिमबीजैर्वा धान्याकल्केन च क्वचित्॥"
इति कवलः॥ धान्यात् धान्याकम्॥ * ॥
अथान्नमाह।
"दाहवन्मर्दितं श्यामं निरस्रं हृद्यान्वितम्।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम्॥"
लाजतर्पणं लाजशब्दरूपतर्पणम्। सन्तर्पण-
स्वरूपमुक्तं सामान्यज्वरचिकित्सायाम्।
"सुद्गयूषौदनो देयः सितया पैत्तिके ज्वरे॥
हर्म्ये शुभ्राभ्रसङ्काशे शशाङ्ककरशीतले।
मलयोदकसंसिक्ते सुप्यात् पित्तज्वरी नरः॥
हारावलीचन्दनशीतलानां
सुगन्धपुष्पाम्बरभूषितानाम्।
नितम्बिनीनां सुपयोधराणा-
मालिङ्गनञ्चाशु हरन्ति दाहम्॥
आज्ञादक्षास्य विज्ञाय ताञ्च स्त्री रमयेत् पुनः।
हितञ्च भोजयेदन्नं न हितं सुरतं महत्॥
वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः।
नार्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः॥
इति पित्तज्वराधिकारः।" इति भावप्रकाशे
मध्यखण्डे प्रथमभागः॥ * ॥
पित्तश्लेष्मज्वरनाशकौषधं यथा,—
"गुडूचीपद्मकारिष्टधन्याकं रक्तचन्दनम्।
पित्तश्लेष्मज्वरच्छर्दिदाहतृष्णाश्रमक्लिक्लुत्॥"
इति गारुडे १८८ अध्यायः॥
(अस्य सलक्षणचिकित्सितान्यपराणि यथा,—
"मूर्च्छा दाहो भ्रममदहृषावेगतीक्ष्णोऽतिसार-
स्तन्द्रालस्यं प्रलपनवमिः पाकतास्त्रोष्ठवर्क्के।
स्वेदः श्वासो भवति कटुकं विक्लवं क्षुधा वा
एतैर्लिङ्गैर्भवति मनुजे पैत्तिको वै ज्वरस्तु॥
रोध्रोत्पलाम्बुतलता कमलं सिताढ्यं
तत्सारिवासहितमेव हि पाचनेषु।
निःक्वाथ्य पानमति चाशु निहन्ति पित्तं
पित्तज्वरप्रशमनं प्रकरोति पुंसाम्॥
कथितं तण्डुलपयसा शुक्राक्कटुरोहिणीसहि-
तम्।
क्वाथं यष्टीमधुना विनाशनं पित्तज्वराणान्तु।
इरालभार्गासकपर्पटानां
प्रियङ्गुनिम्बैः कटुरोहिणीनाम्।
किराततिक्तं कथितं कषायं
सशर्करार्द्धं कथितञ्च पाचनम्॥
सदाहपित्तज्वरमाशु हन्ति
दृष्ट्वाभ्रं शोषविकारयुक्तम्।
एकोऽपि वै पर्पटको वरिष्ठः
पित्तज्वराणां शमनाय योग्यः।
तस्मात् पुनर्नागरबालकाभ्यः
सिंहो यथा कङ्कटके प्रदत्तः॥
नागरोशीरसुस्ता च चन्दनं कटुरोहिणी।
धान्यकानां क्वाथ एव पित्तज्वरविनाशनः॥
अम्लतापर्पटोधात्री क्वाथः पित्तज्वरं हरेत्।
सितारम्बुधयोर्वापि कार्य्यं क्वाथ वा पुनः॥
द्राक्षापर्पटकं तिक्ता पथ्यारम्बुधसुस्तकैः।
क्वाथसृष्टाभ्रमदाहयुक्तपित्तज्वापहः॥
विदारिका रोध्रदधित्थकानां
स्वाभ्रातनुजस्य च दाडिमानाम्।
यथानुलोमेन च मूलपत्रं
निहन्ति तृड्दाहसमूर्च्छनञ्च॥
उत्तानस्य प्रसुप्तस्य कांस्यं वा ताम्रभाजनम्।
नाभौ निधाय धाराम्बुशीतदाहनिवारणम्॥
रम्भारामाकुचभरनमितालिङ्गनं पैत्तसङ्गे
अथायामं सुनिवरगदितं शीतलं सेवनं स्यात्।
सुभ्राभोगं मलयजसलिलासिक्तसंशीतयासो
सुक्ताहारो विशदसतुहिनं कौमुदी या सुखाय॥
एभिर्हन्ति हृततरनिभं मानुषाणान्तु पित्तं
दाहं शोषं क्लमममि तथा दुर्भ्रमं मूर्च्छनञ्च।
एतैर्योगैर्भवति नितरां पित्तदाहस्य शान्ति-
र्योग्या चैव प्रभवति सदा सत्क्रिया श्रीमताञ्च॥
यदि जिह्वा गलतालुशोषो वै मनुजस्य च।
केशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम्।
पेष्यमाणं तालुलेपः सद्यः पित्तदवापहः॥"
इति पित्तज्वरचिकित्सा॥ * ॥

पित्तद्रावी, [न्] पुं, (पित्तं द्रावयतीति। द्रु+णिच्+णिनिः।) मधुरजम्बीरः। इति राजनिर्घण्टः॥
पित्तरक्तं, क्ली, (पित्तसंदुष्टं रक्तमिति मध्यपदलोपी समासः।) रोगविशेषः। तत्पर्य्यायः। रक्तपित्तम् २ पित्तासृम् ३ पित्तशोणितम् ४। इति राजनिर्घण्टः॥ अस्य विवरणं रक्तपित्तशब्दे द्रष्टव्यम्॥
पित्तलं, क्ली, (पित्तं तद्वर्णं लातीति। ला+कः।) धातुविशेषः। पितल इति भाषा॥ (यथा, वैद्यकरत्नसारसंग्रहे जारणमारणाधिकारे।
"पित्तलञ्च तथा कांस्यं ताम्रवत्सारयेद्भिषक्।
ताम्रवच्छोधनं तेषां ताम्रवद्गुणकारकम्॥")
तत्पर्य्यायः। आरकूटम् २ रीतिः ३ पतिकावेरम् ४ हेमदारु ५। इति जटाधरः॥ रीती ६। इति शब्दरत्नावली॥ मिश्रम् ७। इति रत्नमाला॥ आरः ८ राजरीतिः ९ ब्रह्मरीतिः १० कपिला ११ पिङ्गला १२। इति भावप्रकाशः॥ क्षुद्रसुवर्णः १३ सिंहलम् १४ पिङ्गलकम् १५ पीतलकम् १६ लोहितकम् १७ पिङ्गललोहम् १८ पीतकम् १९। रीतिकायुगलगुणाः। तिक्तत्वम्। शीतलत्वम्। रसे लवणत्वम्। शोधनत्वम्। पाण्डुवातकृमिश्लीहपित्तनाशित्वञ्च।
"शुक्ला स्निग्धा लघुः शीता सुरङ्गा स्वच्छपत्रिका।
हेमोपमा शुभा स्वच्छा ज्ञात्वा रीतिः प्रकीर्त्तिता॥"
इति राजनिर्घण्टः॥
"रीतिरप्युपधातुः स्यात् ताम्रस्य यसदस्य च।
पित्तलस्य गुणा ज्ञेया खयोनिसदृशा बुधैः॥
संयोगस्य प्रभावेण तस्यान्योऽपि गुणाः स्मृताः।
रीतिकायुगलं रूक्षं तिक्तञ्च लवणं रसे।
शोधनं पाण्डुरोगघ्नं कृमिघ्नं नातिलेखनम्॥"
इति भावप्रकाशः॥ * ॥
भूर्जपत्रम्। इति शब्दमाला॥ (वाहुल्येन पित्तमस्यस्येति। पित्त+"सिध्मादिभ्यश्च।" ५। २। १७। इति लच्।) पित्तयुक्ते, त्रि। इति मेदिनी। ले, ११४॥ (पित्तवृद्धिकरे च। यथा, सुश्रुते सूत्रस्थाने। ४५ अध्याये।
"सक्षारं पित्तलं कौपं क्षेप्तृघ्नं दीपनं लघु॥"
यथा च माधवकरधृतरत्नविनिश्चयसंग्रहे पाण्डुरोगाधिकारे।
"पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते।
तस्य पित्तमरुद्भ्यां दग्धा रोगाय कल्पते॥")
पित्तला, स्त्री, (पित्तल+टाप्।) तोयपिप्पली। इति मेदिनी। ले, ११४॥
पित्तारिः, पुं, (पित्तानामरिर्नाशकः।) पर्पटः। लाक्षा। वर्व्वरम्। इति राजनिर्घण्टः॥
पित्र्य, क्ली, (पितरो देवता अस्येति। पितृ+"वायृतुपितृभ्यो यत्।" ४। २। ३१। इति यत्। "रीऋतः।" ७। ४। २७। इति रीआदेश्च। पितृदेवताकरणीयत्वादस्य तथात्वम्।) मधु।

इति राजनिर्घण्टः ॥ पितृतीर्थम् । तत्तु तर्ज्जन्यङ्गुष्ठान्तः । इति हेमचन्द्रः । ३ । ५०४ ॥ (पितुरिदं पितुरागतं वेति । पितृ + "पितुर्यत् ।" ४ । ३ । ७६ । इति यत् । ततो रीङादेशः ।) पितृसम्बन्धिनि, त्रि । यथा,—

"ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः ।
शेषास्तमुपजीवेयुर्यथैव पितरस्तथा ॥"

इति दायभागः ॥

(पितृप्रियत्वात् श्राद्धार्हे च त्रि । यथा, सुश्रुते । १ । ४६ ।

"कपित्थं खड्गिपित्थितं कषायमनिलापहम् ।
पित्र्यं पवित्रमायुष्यं बहुमूत्रं विरूक्षणम् ॥")

पित्र्यः, पुं, (पितुस्तुल्य इति । बाहुलकात् यत् । ततो रीङादेशः ।) ज्येष्ठभ्राता । इति हेमचन्द्रः । ३ । २१५ ॥ (पितृणां प्रिय इति यत् ।) माषः । इति शब्दमाला ॥

पित्र्या, स्त्री, (पितरो देवता अस्या इति । पितृ + यत् । पितृदेवतत्वादेव तथात्वम् ।) मघानक्षत्रम् । इति हेमचन्द्रः । २ । २५ ॥ पौर्णमासी । इति शब्दमाला ॥

पितृषन्, [तृ] पुं, (पतितुमिच्छतीति । पत् + सन् + "सनि मीमाघुरभलभशकपतपदामच इस् ।" ७ । ४ । ५४ । इति इस् । अभ्यासस्य लोपश्च । ततः पितृस + शप् ।) पक्षी । इत्यमरः । २ । ५ । ३४ ॥ प्रतिपन्ने पतनेच्छौ च त्रि । इति विश्वः ॥

पित्सलं, क्ली, (पतत्यत्रेति । पत + "सलः पतेरदिड्डा ।" २ । २६२ । इति उणादिकोषधृतसूत्रात् अधिकरणे सलः । अकारस्य इत्वं ।) पन्थाः । इत्युणादिकोषः । २ । २६२ ॥

पिधानं, क्ली, (अपि + धा + ल्युट् । अपेरलोपः ।) छदनम् । इत्यमरः । १ । ३ । १३ ॥ (यथा, आर्य्यासप्तशत्याम् । ४८१ ।

"युगपच्चघनोरःस्तनपिधानमधुरे ! जपास्मिता-
र्द्रमुखि ! ।
लोलाक्षि ! नेष पवनो विरमति तव वसनपरि-
वर्त्तो ॥")

उदञ्चनम् । इति हेमचन्द्रः । ३ । ६२ ॥

पिनद्धः, त्रि, (अपि नह्यते स्मेति । अपि + नह + क्तः । अपेरलोपः ।) परिहितवस्त्रादि । तत्पर्य्यायः । आसक्तः २ प्रतिसक्तः ३ अपिनद्धः ४ । इत्यमरः । २ । ८ । ६५ ॥ (आच्छादितः । यथा, भागवते । ११ । ८ । ३३ ।

"यदस्थिभिर्निर्मितवंशवंश-
स्थूलं त्वचा रोमनखैः पिनद्धम् ॥")

पिनाकः, पुं.क्ली, (पाति रक्षति पनाय्यते स्तूयते वा । पाल रक्षणे, पन स्तुतौ वा + "पिनाकादयश्च ।" उणा ३।१५। इति आकप्रत्ययेन निपातनात् साधुः ।) शिवधनुः । तत्पर्य्यायः । अजगवम् २ । (यथा, महाभारते । ६ । ६० । १८ ।

"पिनाकमिव रुद्रस्य क्रुद्धस्यान्तकमृत्यू ॥")

शूलम् । इत्यमरः । १ । १ । ३७ ॥ शूलमपि शृङ्गारमिहेति केचित् । इति भरतः ॥ पांशुवर्षणम् । इति मेदिनी । के, ११६ ॥

पिनाकी, [न्] पुं, (पिनाकोऽस्यास्तीति । इनिः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥ (यथा, हरिवंशे । ३५ । २० ।

"क्षत्वा च निश्चयं सर्व्वे पलायनपरायणाः ।
विहाय मथुरां रम्यां मानयन्तः पिनाकिनम् ॥"

रुद्रभेदः । यथा, मात्स्ये । ५ । २६—३० ।

"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ॥")

पिन्याकः, क्ली, (अपिगतो विज्ञातो यक्तगन्धत्वात् न्याको यस्य । अपेरलोपः ।) हिङ्गु । इति जटाधरः ॥

पिपतिषन्, [त्] त्रि, (पतितुमिच्छतीति । पत + सन् । ततः शप्ट ।) पतनेच्छुः । विहङ्गमे, पुं । इति मेदिनी । ते, २३१ ॥

पिपतिषुः, पुं, (पतितुमिच्छतीति । पत + सन् । पिपतिस + "सनाद्यन्तधातव उः ।" ३।२।१६८। इति उः ।) पक्षी । इति राजनिर्घण्टः ॥ (पतनेच्छौ, त्रि ॥)

पिपासा, स्त्री, (पातुमिच्छेति । पा + सन् + अः । ततष्टाप् ।) पानेच्छा । तत्पर्य्यायः । क्षुधा २ तर्षः ३ उपलाषिका ४ क्षुट् ५ क्षुधा ६ उदन्या ७ । इति हेमचन्द्रः । ३ । ५८ ॥ (यथा, सुश्रुते सूत्रस्थाने १ अध्याये । "स्वाभाविकाः क्षुत्पिपासाजराव्याधुनिद्राप्रभृतयः ॥")

पिपासित, त्रि, (पिपासा जातास्येति । पिपासा + इतच् ।) पिपासायुक्तः । क्षधितः । इति हलायुधः ॥ (यथा, मनौ । ८ । ६३ ।

"नयो सुप्तः कपालेन भिक्षार्थी क्षुत्पिपासितः ।
अन्धः शूद्रकुलं गच्छेद्यः साक्ष्यमृतं वदेत् ॥")

पिपासुः, त्रि, (पातुमिच्छुः । पा + सन् + उः ।) पानेच्छुः । तत्पर्य्यायः । क्षधितः २ क्षुधार्त्त ३ । इति हेमचन्द्रः । ३ । ५७ ॥ (यथा, महाभारते । ३ । २२३ । २५ ।

"भागार्थं तपसो धातुं तेषां सोमं तथाध्वरे ।
पिपासवो ययुर्देवाः घृतक्रतुपुरोगमाः ॥")

पिपीतकः, पुं, ब्राह्मणविशेषः । अस्य प्रमाणं पिपीतकीशब्दे द्रष्टव्यम् ॥

पिपीतकी, स्त्री, (पिपीतको ब्राह्मणविशेषः प्रवर्त्तकतयास्त्यत्रेति । अच् । गौरादित्वात् ङीष् ।) वैशाखशुक्लाद्वादशी । तत्र कर्त्तव्यव्रतं यथा,—

घृतानीक उवाच ।

"जलदानस्य माहात्म्यं त्वत्तया परिकीर्त्तितम् ।
तदहं श्रोतुमिच्छामि पिपीतकीकथां शुभाम् ॥
पुरा केन कृतश्चैतत् केन चैतत् प्रकाशितम् ।
कथं पिपीतकीनाम विधानञ्चैव कीदृशम् ॥
तत् सर्व्वं ब्रूहि देवर्षे ! यदि तुष्टो मयि प्रभो ! ॥

नारद उवाच ।

शृणु राजन् ! प्रवक्ष्यामि हादशीं तां पिपीतकीम् ।

यां कृत्वा यमलोकाद्वै प्राप्यते वैष्णवं पदम् ॥
पिपीतक इति ख्यातो ब्राह्मणः संशितव्रतः ।
तपःस्वाध्यायनिरतः सर्व्वप्राणिहिते रतः ॥
शान्तो दान्तः क्षमायुक्तो बलिहोमपरायणः ।
निवसन् निर्जनेऽरण्ये बहून् कालान् द्विजोत्तमः ॥
चिरं कृत्वा तपोऽरण्ये काले स्वल्पसुपेयिवान् ॥
ततः कालेन कियता यमदूतैर्महाबलैः ।
नीयमानः स विप्रेन्द्रो यमलोकं भयावहम् ॥
ददर्श्व बहुशस्तत्र नरान्निरयसंस्थितान् ॥
असिपत्रादनेकेषु कुम्भीपाकेषु संस्थितान् ।
कृतार्त्तस्वरान्तान् दृष्ट्वा विषादमगमद्विजः ।
क्षुत्तृषापासाकुलो भूत्वा प्रेतराजवशं गतः ॥
बहून् वस्त्राहृतान् कुम्भान् दृष्ट्वैतिमनोहरान् ।
प्रदेशानीप्सितांस्तत्र प्रासादैरुपशोभितान् ॥
गीतवाद्यादिशब्दैश्च सेव्यमानः समन्ततः ।
क्वचित् प्रहरमाणांश्च किङ्करैर्यमशासनैः ॥
नीयमानांस्ततः प्रेतान् वध्यमानान् स्वकर्म्मभिः ।
शोकसन्तापसंयुक्तान् क्षुधया परिपीडितः ॥
संपश्यमानो राजेन्द्र ! ययाचे किङ्करान् जलम् ।
बहुशो याच्यमानैश्च किङ्करैरभिताडितः ॥
स नीयमानो ददृशे बहुशाखं द्रुमोत्तमम् ।
सुच्छायं शीतलं रम्यं महान्तं पिप्पलद्रुमम् ॥
तत्रैव सजलान् कुम्भान् माल्यशोभान् सुशोभितान् ।
ददर्श्व वस्त्राहृतसुखान् सुवासितसुशीतलान् ॥
रक्षन्ति बहवस्तत्र किङ्कराः शस्त्रपाणयः ।
तोयदर्शनमात्रेण साह्लादो ब्राह्मणोऽभवत् ॥
विनयावनतो भूत्वा ययाचे किङ्करान्जलम् ।

ब्राह्मण उवाच ।

यमदूता महाभागास्तोयं मे दीयतामिति ।
अप्राप्य तोयं प्राणानां विनाशो जायते ध्रुवम् ॥
तस्मात्तोयप्रदानेन प्राणान्रक्षत मेऽधुना ।
श्रुत्वा विप्रस्य तद्वाक्यं सम्बभूवुर्यमकिङ्कराः ॥
न कृतं कर्म्म तद्विप्र ! येन तोयञ्च लभ्यते ॥
प्रार्थयान् पुनस्तोयं यमदूतैः स ताडितः ॥
क्षुधार्त्तवचनं श्रुत्वा यमः प्रोवाच तं द्विजम् ।
ब्रूहि त्वं विप्र ! मा रोदीः का ते पीड़ास्ति चेतसि ॥
पुनर्ययाचे तत्तोयं क्षुधाकुलचेतनः ।
श्रुत्वा विप्रस्य तद्वाक्यं तमुवाच स धर्म्मराट् ॥
त्वया तन्न कृतं कर्म्म येन वै लभ्यते जलम् ॥

ब्राह्मण उवाच ।

त्वयि प्रसन्ने दिक्पाल ! तत्तोयं दुर्लभं न मे ।
तस्मात्तोयप्रदानेन प्राणरक्षां कुरु प्रभो ! ॥
इत्थं बहुविधैर्वाक्यैर्यमः प्रीतोऽभवत्तदा ॥

यम उवाच ।

वरं वरय विप्रेन्द्र ! यत्ते मनसि वर्त्तते ॥

ब्राह्मण उवाच ।

यदि तुष्टोऽसि मे देव ! येन प्राप्तोऽस्मि तज्जलम् ।
तत् कुरुष्व धर्म्मराज ! सर्व्वप्राणीश्वर ! प्रभो ! ॥

यम उवाच ।
वैष्णवं तद्व्रतं विप्र ! कुरु गत्वा निजालयम् ।
विधानं शृणु विप्रेन्द्र ! द्वादशी याऽग्नी भवेत् ॥
वैशाखे शुक्लपक्षस्य द्वादशी वैष्णवी तिथिः ।
तस्यां सुशीतलजले स्नापयेत् केशवं प्रभुम् ॥
पूजयेन्नत्यपुष्पाद्यैर्धूपदीपैर्विधानतः ॥
नैवेद्यैर्विविधैश्चैव ताम्बूलैरथ वाससा ॥
जप्त्वा तु वैष्णवं मन्त्रं दण्डवत् प्रणमेत्ततः ।
दद्याद्विप्रेभ्यो विधिवत् कुम्भांस्तोयसमन्वितान् ।
प्रथमेऽब्दे चतुःकुम्भान् दद्यात्पञ्चसंयुतान् ॥
शुक्लवस्त्रावृतमुखान्युपवीतसुसंयुतान् ।
धनुर्बाणसमायुक्तान् सभोज्यदक्षिणान्वितान् ॥
द्वितीयेऽब्दौ घटान्दद्याद्धिशर्करसंयुतान् ।
तृतीये द्वादश घटान् तिलमोदकसंयुतान् ॥
चतुर्थे षोड़शघटान् दुग्धलड्डुकसंयुतान् ।
दद्यात् संपूज्य देवेशं द्विजातिभ्यः प्रयत्नतः ॥
दक्षिणां शक्तितो दद्यात् भोज्यञ्चैव विशेषतः ।
यत्र कुत्रापि संगच्छेन्न कुत्रापि त्वयान्वितः ॥
ततो द्विजो गृहं गत्वा चकार द्वादशीव्रतम् ॥
अन्ते जगाम स्वर्लोकं वैष्णवं पदमुत्तमम् ॥
पिपीतकीति नाम्नातो विख्यातो वैष्णवी तिथिः ।
नरो यः कुरुते भक्त्या नारी वा भक्तिसंयुता ।
इह पुत्रादिसम्पन्ना धनधान्यसुतान्विता ॥"
इति भविष्यपुराणे पिपीतकीव्रतकथा समाप्ता ॥

पिपीलकः, पुं, (अपिपीलतीति । अपि + पील स्नभने + खुल् । अपेरलोपः ।) पीलकः । इति हेमचन्द्रः । ४ । २७२ ॥ हेउया पिंपीड़ा इति भाषा ॥

पिपीलिका, स्त्री, (पिपीलक + टापि अत इत्वम् ।) क्षीणाङ्गी । इति हेमचन्द्रः । ४ । २७३ ॥ चुदे पिंपीड़ा इति भाषा ॥ तत्पर्य्यायः । पिपीलिकः २ पिपीलः ३ पीलकः ४ । इति शब्दरत्नावली ॥ पिपीलौ ५ पिपिली ६ स्त्रीसंज्ञा ७ । इति राजनिर्घण्टः ॥ क्षीरा ८ । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे । २४ । ४ ।
"श्रुत्वा तु याच्यमानां तां क्रुद्धां सूक्ष्मपिपीलिकाम् ।
ब्रह्मदत्तो महाहासमकस्मादेव चाहसत् ॥")

पिपीली, स्त्री, (अपिपीलतीति । पील् + अच् । अपेरलोपः । ततो गौरादित्वात् ङीष् ।) पिपीलिका । इति राजनिर्घण्टः ॥

पिप्पटा, स्त्री, खाद्यद्रव्यविशेषः । तत्पर्य्यायः । गुड़शर्करा २ । इति त्रिकाण्डशेषः ॥

पिप्पलं, क्ली, (पीयते इति । पा + अलच् । पृषोदरादित्वात् साधुः ।) जलम् । वस्त्रच्छेदभेदः । इति मेदिनी । ले, १११ ॥

पिप्पलः, पुं, (पिप्पलं जलं सिच्यमानत्वेनास्त्यस्य मूलावच्छेदे इति । पिप्पल + "अर्शआदिभ्योऽच् ।" ५।२।१२७ । इत्यच् ।) अश्वत्थवृक्षः । (यथा, महाभारते । २ । २१ । ८ ।
"वनराजीस्तु पश्येमाः पिप्पलानां मनोरमाः ।
लोध्राणाञ्च शुभाः पार्थ ! गौतमौकःसमीप्रजाः ॥")

निरंशुकः । पक्षिभेदः । इति मेदिनी । ले, ११२ ॥ * ॥ अश्वत्थस्वरूपं यथा,—
नारद उवाच ।
"अनायासेन यन्नृणां सर्व्वान् कामानवाप्नुयात् ।
सर्व्वदेवात्मकञ्चैव तन्मे ब्रूहि पितामह ! ॥
ब्रह्मोवाच ।
शृणु नारद ! यत्नेन शुद्धं सर्व्वात्मकं गुरुम् ।
प्रदक्षिणीकृत्य नित्यं नराणां सर्व्वकामदम् ॥
पूजयेत् परया भक्त्या सर्व्वसिद्धियुतो भवेत् ।
अश्वत्थं पूजयेद्विप्र ! सर्व्वसिद्धिविधायकम् ॥*॥
अश्वत्थदक्षिणे रुद्रः पश्चिमे विष्णुरेव च ।
ब्रह्मा चोत्तरतस्तस्य पूर्व्वे चेन्द्रादिदेवताः ॥
स्कन्धे स्कन्धे च पत्रेषु ब्राह्मणा ऋषयः स्मृताः ।
तस्य मूले सर्व्ववेदाः अङ्गा तस्य द्वमाश्रिता ॥
नदीनदाः सागराद्याः पूर्व्वस्यान्दिशि संस्थिताः ।
लोकधर्म्मान् समाश्रित्य तस्मात्तं सेवयेन्नरः ॥
पुराणस्मृतिमन्त्रेभ्यः सारमुद्धृत्य सञ्चितम् ।
निष्ठाप्रतिष्ठितं सम्यगश्वत्थं सेवयेन्नरः ॥
त्वं क्षीरी फलितश्चैव शीतलश्च वनस्पते ! ।
त्वामाराध्य नरो हन्यात् देहिकाधिष्ठितं मलम् ॥
अश्वत्थ ! यस्मात् त्वयि वृक्षराज !
नारायणस्तिष्ठति सर्व्वकारणम् ।
अतः शुचित्वं सततं तरूणां
विशेषतोऽरिष्टविनाशनोऽसि ॥
क्षीरोदमथने चैव यथा श्रीस्त्वामुपासते ।
सत्येन तेन वृक्षेन्द्र ! आशीर्मयि निषेवतु ॥
एकादशोऽसि रुद्राणां वसूनाञ्चाष्टमस्तथा ।
नारायणोऽसि देवानां वृक्षाणामसि पिप्पल ॥
अग्निगर्भस्त्वमश्वत्थ ! देवगर्भः प्रजापतिः ।
हरिर्यथैव श्रीगर्भो यज्ञगर्भ ! नमोऽस्तु ते ॥
अरातेरग्निरश्वत्थ ! परापर ! नमोऽस्तु ते ।
निर्वाते लभिवर्त्तन्तु स्वस्ति तेऽस्तु नमोऽस्तु ते ॥
अक्षिस्पन्दं भुजस्पन्दं दुःस्वप्नं दुर्निरीक्षितम् ।
शत्रूणाञ्च समुत्थानमश्वत्थ ! शमयाशु मे ॥
यं स्मृत्वा मुच्यते रोगैः सर्व्वपापैः प्रमुच्यते ।
समाश्रित्य च दीर्घायुस्तमश्वत्थं नमाम्यहम् ॥
अश्वत्थ ! सुमहाभाग ! सर्व्वदा प्रियदर्शन ! ।
दिव्यान्नभोजनं देहि शत्रूणाञ्च पराजयम् ॥
आयुः प्रजां धनं धान्यं सौभाग्यं सर्व्वदा सुखम् ।
देहि देव महावृक्ष ! त्वामहञ्चाभिवादये ॥
अश्वत्थ ! देवसूलस्कन्धभिः प्रोच्यते सदा ॥
ब्रह्महा गुरुहा चैव दरिद्रो व्याधिपीड़ितः ।
आदृत्य दशवत्तन्तु शुद्धः पापात्तिगो भवेत् ॥
ब्रह्मचारी हविष्याशी अधःशायी जितेन्द्रियः ।
पापापहन्ता मर्त्यस्तु व्रतमेतत् समाचरेत् ॥
एकहस्तं द्विहस्तं वा कुर्य्यादृगोमयलेपनम् ।
अश्वत्थे स्थापिते यस्तु मूले स्नपनमाचरेत् ॥
धनायुःसन्ततैर्हृद्यो नरकात्तारयेत् पितॄन् ॥
अश्वत्थमूलमासाद्य ग्राकेनान्नोदकेन वा ।
एकं वा भोजयेद्विप्रं कोटि कोटि फलं भवेत् ॥
अश्वत्थमूलमासाद्य तपो होमः सुरार्चनम् ।
अक्षयं सुनिशार्दूल ! ब्रह्मणो वचनं यथा ॥
एवं समर्च्चितोऽश्वत्थः सर्व्वसौख्यप्रदो भवेत् ।
यज्ञार्थं छेदितोऽश्वत्थः सर्व्वारोग्यप्रदो भवेत् ॥
अश्वत्थः पूजितो येन पूजिताः सर्व्वदेवताः ।
अश्वत्थश्छेदितो येन छेदिताः सर्व्वदेवताः ॥
अन्तःशुद्धः सुसत्त्वोऽश्वत्थो देवमयो गुरुः ।
स सेव्यः पूजनीयश्च गुणत्रयविनायकः ॥
भृगुवारे भौमे च मघाश्लेषे निशि सन्ध्ययोः ।
अश्वत्थदर्शनं कार्य्यं कुलत्रयभयात्मभिः ॥ * ॥
अश्वत्थस्य जले यस्य छाया तिष्ठति कुत्रचित् ।
तत् प्रयागसमं तीर्थं तत्र सन्निहितो हरिः ॥
तस्मात् कार्त्तिकमासेऽत्र पूर्व्वोक्तविधिना सुने ! ।
अश्वत्थं सेचयेद्विद्वान् संप्रदक्षिणमादिशेत् ॥
पापोपहतमर्त्यानां पापनाशो भवेद्ध्रुवम् ।
सकामो लभते कामं निष्कामो मोक्षमाप्नुयात् ॥
यः पठेत् शृणुयाद्वापि अश्वत्थस्य समीपतः ।
सर्व्वान् कामानवाप्नोति विष्णुसायुज्यमाप्नुयात् ॥"
इति पाद्मोत्तरखण्डे १२६ अध्यायः ॥
ऋषय ऊचुः ।
"कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ ॥
सूत उवाच ।
अश्वत्थरूपो भगवान् विष्णुरेव न संशयः ।
रुद्ररूपो वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥
दर्शनस्पर्शसेवासु तेन वै पापहराः स्मृताः ।
दुःखापद्व्याधिदुरितां विनाशकारिणो ध्रुवम् ॥
ऋषय ऊचुः ।
कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ।
एतत् कथय सर्व्वज्ञ ! संशयोऽत्र महान् हि नः ॥
सूत उवाच ।
पार्व्वतीश्वरयोर्देवैः सुरतं कुर्व्वतोः किल ।
अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नः कृतः पुरा ॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः ।
रेतःसेकसुखभ्रंशकाम्यमाना तदा रुषा ॥
पार्व्वत्युवाच ।
क्रिमिकीटादयोऽप्येते जानन्ति सुरतैः सुखम् ।
तस्माच्चिरं सुखभ्रंशादूयं वृक्षत्वमाप्स्यथ ॥
सूत उवाच ।
एवं सा पार्व्वती देवी अशपत् क्रुद्धमानसा ।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ॥
तस्मादिमौ विष्णुमहेश्वरावुभौ
बभूवतुर्व्वोधिवटौ सुशोभनौ ॥
बोधिस्त्वयं चार्कदिनं विनैव
नसृश्यतामर्कजवारयोगतः ॥
ऋषय ऊचुः ।
असृश्यत्वं कथं यातः सूत ! बोधितरुः स्वयम् ।
सृश्यत्वञ्च कथं प्राप्तस्तथायं शनिवासरे ॥
सूत उवाच ।
समुद्रमथनादूर्द्ध्वं रत्नान्यापुः सुरोत्तमाः ।
श्रेष्ठञ्च कौस्तुभं तेषु विष्णवे प्रददुः सुराः ॥
यावद्भ्रीचकारासौ लक्ष्मीं भार्य्यार्थमात्मनः ।
तावत् विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनम् ॥

लक्ष्मीरुवाच।
असंस्कृत्य कथं ज्येष्ठां कनिष्ठां परिणीयते।
तस्मात्त्वमग्रजामेतामलक्ष्मीं मधुसूदन!॥
विवाह्योद्वह मां पश्चादेष धर्म्मः सनातनः।
तस्माद्धर्म्मैयतिक्रामं न कुर्य्या मधुसूदन!॥
सूत उवाच।
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः।
उद्दालकाय सुनये सुदीर्घतपसे तदा।
आप्तवाक्यानुरोधेन तामलक्ष्मीं ददौ किल॥
स्थूलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम्।
सवदारक्तनयनां रूक्षपिङ्गशिरोरुहाम्॥
स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य स्वमाश्रमम्।
वेदध्वनिसमायुक्तमानयामास धर्म्मवित्॥
होमधूमसुगन्धाढ्यं वेदघोषेण नादितम्।
आश्रमन्तं विलोक्याथ यथिता साब्रवीदिदम्॥
ज्येष्ठोवाच।
नहि वासोऽनुरूपोऽयं वेदध्वनियुतो मम।
नात्रागमिष्ये भो ब्रह्मन्! नयस्वान्यत्र मां ध्रुवम्॥
उद्दालक उवाच।
कथं नायासि किंचात्र वर्त्तते क्षमतं तव।
तव योग्या च वसतिः का भवेत्तद्वद माम्॥
ज्येष्ठोवाच।
वेदध्वनिर्भवेद्यत्रयज्ञियतिथीनाञ्च पूजनम्।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहम्॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते।
पितृदेवार्चनं यत्र तत्र नैव वसाम्यहम्॥
दानशौचे न विद्येते परद्रव्यापहारिणः।
परदाररता यत्र तत्र स्थाने रतिर्मम॥
वृद्धसज्जनविप्राणां यत्र स्यादपमाननम्।
निष्ठुरं भाषणं यत्र तत्र सम्यग्वसाम्यहम्॥
सूत उवाच।
इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत्।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह॥
उद्दालक उवाच।
अश्वत्थवृक्षमूलेऽस्मिन्नलक्ष्मि! आश्वतां क्षणम्।
आश्रमस्थानमालोक्य यावदाश्याम्यहं पुनः॥
सूत उवाच।
इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः।
प्रतीक्षन्ती चिरं तत्र यदा तं न ददर्श सा॥
तदा रुरोद करुणं भर्त्तुस्त्यागेन दुःखिता॥
तस्यास्तु क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽश्रृणोत्।
तदा विज्ञापयामास विष्णुमुद्विग्नमानसा॥
लक्ष्मीरुवाच।
स्वामिन्! मङ्गिनी ज्येष्ठा स्वामित्यागेन दुःखिता।
तामाश्वासयितुं याहि कृपालो! यदहं प्रिया॥
सूत उवाच।
लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्॥
विष्णुरुवाच।
अश्वत्थवृक्षमासाद्य सदालक्ष्मि! स्थिरा भव।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति।
अश्वत्थोऽसौ भवेत्तस्मान्मन्दवारं विना किल॥
प्रत्यब्दमर्चयिष्यन्ति त्वां ज्येष्ठां गृहधर्म्मिणः।
तेष्वियं श्रीः कनिष्ठा ते सदा तिष्ठत्वनामया॥"
इति पाद्मोत्तरखण्डे। १६०—१६१। अध्यायौ॥
(रेवत्यां जातो मित्रस्य पुत्रविशेषः। यथा, भागवते। ६। १८। ६।
"रेतः सिषिचतुः कुम्भे उर्वश्याः सन्निधौ हुतम्।
रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं यधात्॥")
पिप्पलकं, क्ली, (पीयते इति। पा+अलच्। पृषोदरादित्वात् साधुः। ततः संज्ञायां कन्।) क्षतघ्नम्। सीवनद्रव्यम्। इति मेदिनी। के, १६८॥
पिप्पलिः, स्त्री, (पिपर्त्तीति। पॄ लि पूर्त्तौ+बाहुलकात् अलच्। गौरादित्वात् ङीष्। ह्रस्वः। पृषोदरादित्वात् साधुः।) पिप्पली। इति शब्दरत्नावली॥
पिप्पली, स्त्री, (पिपर्त्तीति+पॄ+बाहुलकात् अलच्। पृषोदरादित्वात् साधुः। गौरादित्वात् ङीष् वृक्षविशेषः। पिँपुल इति भाषा॥ तत्पर्य्यायः। क्षुद्रा २ उपकुल्या ३ वैदेही ४ मागधी ५ चपला ६ कृष्णा ७ उषणा ८ गौरी ९ कोला १०। इत्यमरः। २। ४। ६७॥ ऊषणा ११ पिप्पलिः १२। इति भरतः॥ शुकला १३ कटुबीजा १४ कोरङ्गी १५ तिक्तण्डुला १६ श्यामा १७ दन्तफला १८ मगधोद्भवा १९। अस्या गुणाः। ज्वरनाशित्वम्। वृष्यत्वम्। स्निग्धत्वम्। उष्णत्वम्। कटुत्वम्। तिक्तत्वम्। दीपनत्वम्। मारुतश्वासकासश्लेष्मोदरार्शोपहत्वञ्च। इति राजनिर्घण्टः॥ स्वादुपाकत्वम्। रसायनत्वम्। लघुत्वम्। पित्तलत्वम्। रेचनत्वम्। कुष्ठप्रमेहगुल्मार्शःश्लीहशूलामनाशित्वञ्च॥ आर्द्रायास्तस्या गुणाः। कफप्रदत्वम्। स्निग्धत्वम्। शीतलत्वम्। मधुरत्वम्। गुरुत्वम्। पित्तप्रशमनत्वञ्च। राजवल्लभे तु कफापहत्वम्। मधुयुक्तायास्तस्या गुणाः। मेदःकफश्वासकासज्वरहरत्वम्। वृष्यत्वम्। मेधाग्निवर्द्धनत्वञ्च। गुडपिप्पलीगुणाः। जीर्णज्वरे अग्निमान्द्ये च शस्तत्वम्। कासाजीर्णारुचिश्वासक्षतक्षयपाण्डुकृमिनाशित्वञ्च। द्विगुणात् पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मतः। इति भावप्रकाशः॥ (ऋष्यवन्तपर्व्वतान्निःसृतो नदीविशेषः। यथा, मात्स्ये। ११३। २५।
"तमसा पिप्पली श्रेणी तथा चित्रोत्पलापि च॥")
पिप्पलीका, स्त्री, अश्वत्थोवृक्षः। इति राजनिर्घण्टः॥
पिप्पलीमूलं, क्ली, (पिप्पल्या मूलमिव मूलमस्य।) खनामख्यातमूलम्। पिँपुलमूल इति भाषा। तत्पर्य्यायः। ग्रन्थिकम् २ चटिकाशिरः ३। इत्यमरः। २। ६। ११०॥ षड्ग्रन्थि ४। इति रत्नमाला॥ मूलम् ५ कोलमूलम् ६ कटुग्रन्थि७ कटुमूलम् ८ कटूषणम् ९ सर्व्वग्रन्थि १० पत्राढ्यम् ११ विरूपम् १२ शोषसम्भवम् १३ सुगन्धि १४ ग्रन्थिलम् १५। इति राजनिर्घण्टः॥ उषणम् १६। अस्य गुणाः। दीपनत्वम्। कटुत्वम्। पाचनत्वम्। लघुत्वम्। रूक्षत्वम्। पित्तकरत्वम्। भेदकत्वम्। कफवातोदरानाहश्लीहगुल्मक्रिमिश्वासक्षयापहत्वञ्च। इति भावप्रकाशः॥ उष्णत्वम्। रोचनत्वम्। इति राजनिर्घण्टः॥
पिप्पिका, स्त्री, दन्तमलम्। इति हेमचन्द्रः। ३। २६६॥
पिप्पुः, पुं, (अपि श्रवते देहोपरि इति। अपि+स्रु+डुः। अपेरलोपः।) जटुलः। इत्यमरः। २। ६। ४६॥
पियालः, पुं, (पीयति तर्पयतीति। पीय+"पीयुकणिभ्यां कालन् ह्रस्वः सम्प्रसारणञ्च।" उणां ३। ७६। इति कालन् ह्रस्वश्च।) वृक्षविशेषः। अस्यैव बीजं चिरौञ्जीति ख्यातम्। तत्पर्य्यायः। राजादनम् २ सन्नकटुः ३ धनुष्पटः ४। इत्यमरः। २। ४। ३५॥ राजातनम् ५ राजातनः ६ प्रियालः ७ सन्नः ८ कटुः ९ धनुः १० पटः ११। इति तट्टीका॥ ह्रसन्नकः १२ धन्वपटः १३ पियालकः १४। इति शब्दरत्नावली॥ खरस्कन्धः १५ चारः १६ बहुलवल्कलः १७ तापसेष्टः १८॥ (यथा, भागवते। ८। २। १०।
"चूतैः पियालैः पनसैराम्रैराम्रातकैरपि॥")
तस्य गुणाः। पित्तकफासनाशित्वम्। इति भावप्रकाशः॥ अस्य फलगुणाः। मधुरत्वम्। स्निग्धत्वम्। दृंहणत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः॥ गुरुत्वम्। सरत्वम्। दाहज्वरटषापहत्वञ्च। तस्य मज्जगुणाः। मधुरत्वम्। वृष्यत्वम्। पित्तानिलापहत्वम्। बृंहणत्वम्। अतिदुर्जरत्वम्। स्निग्धत्वम्। विष्टम्भित्वम्। आमवर्द्धनत्वञ्च। इति भावप्रकाशे पूर्व्वखण्डे प्रथमो भागः॥
पिल, क क्षुद्रे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पेलयति। क्षुद्रे प्रेरणे। इति दुर्गादासः॥
पिलुकः, पुं, (अपिलातीति। अपि+ला+बाहुलकात् डुः। अपेरलोपः। ततः कन्।) पीलुवृक्षः। इति शब्दरत्नावली॥
पिलुपर्णी, स्त्री, (पिलोरिव पर्णमस्याः। ङीष्।) मोरटा। इति रत्नमाला॥
पिल्लः, पुं, (क्लिन्ने चक्षुषी यस्येति। "इनच्पिटचिकचि च।" ५। २। ३३। इत्यत्र "क्लिन्नस्य चिल्लिल्लचास्य चक्षुषी।" इति वार्त्तिकोक्त्या पिल्लादेशः।) क्लेदयुक्तचक्षुः। (अस्य चिकित्सा यथा,—
"ताम्रपात्रे गुडामूलं सिन्धूत्थमरिचान्वितम्।
आरनालेन संघृष्टमञ्जनं पिल्लनाशनम्॥"
इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे॥)
तद्युक्ते, त्रि। इत्यमरः। २। ६। ६०॥

पिल्लका, स्त्री, (पिल्लेन क्लेदयुक्तचक्षुषा कायतीति। कै+कः। टाप्।) हस्तिनी। इति शब्दमाला॥

पिव, इ सेचने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) इ, पिन्वते। इति दुर्गादासः॥

पिश्र, श्र प अवयवे। इति कविकल्पद्रुमः॥ (तुदां-सुचां-परं अकं-सेट्।) श्र प, पिंश्रति पटः अवयवी स्यादित्यर्थः। इति दुर्गादासः॥

पिशङ्गः, पुं, (पिंश्रतीति। पिश्र+"विड्वनिभ्यः कित्।" उणां। १।१२०। इत्यङ्गच् स च कित्।) पिङ्गलवर्णः। तद्वति, त्रि। इत्यमरः। १। ५। १६—१७॥ (यथा, ऋग्वेदे। १। ८८। २।

"तेरुणीभिर्वरमा पिशङ्गैः शुभे कं यान्ति रथतूर्भिरश्वैः॥"

यथा च माघे। १। ६।

"पिशङ्गमौञ्जीयुजमर्जुनच्छविं
वसानमेणाजिनमञ्जनद्युति।
सुवर्णसूत्राकलिताधरांबरां
विडम्बयन्तं शितिवाससस्तनुम्॥"

नागभेदः। यथा, महाभारते। १। ५७। १६।

"भैरवो सुरुवेदाङ्गः पिशङ्गश्चोद्रपारकः॥")

पिशाचः, पुं, (पिशितं मांसमश्नातीति। पिशित+अश्+"कर्म्मण्यण्।" ३। २। १। इति अण्। ततः "पृषोदरादीनि यथोपदिष्टम्।" ६। ३। १०९। इति शितभागस्य लोपः अशभागस्य शाचादेशः।) देवयोनिविशेषः। इत्यमरः। १। १। ११॥ पिचाश इति भाषा॥ (यथा, मनौ। १। ३७।

"यक्षरक्षःपिशाचांश्च गन्धर्व्वाप्सरसोऽसुरान्॥"

"यक्षो वैश्रवणस्तदनुचराश्च। रक्षांसि रावणादीनि। पिशाचास्तेभ्योऽपकृष्टा अशुचिमरुद्देशनिवासिनः।" इति तट्टीकायां कुल्लूकभट्टः॥) तस्य लोको यथा,—

"अन्तरोच्चरा ये च भूतप्रेतपिशाचकाः।
वर्जयित्वा रुद्रगणांस्ते तत्रैव चरन्ति हि॥
नोर्द्धं विक्रमणे शक्तिस्तेषां सम्भृतयामनाम्।
अत ऊर्द्धं हि विप्रेन्द्र! राक्षसा ये कृतेनसः।
ते तु सूर्य्यादयः सर्व्वे विहरन्त्यूर्द्धवर्जिताः॥"

इति पाद्मे स्वर्गखण्डे १५ अध्यायः॥

प्रेतः। यथा, शुद्धितत्त्वे।

"अशौचान्तादितीयेऽह्नि यस्य नोत्पद्यते व्रणः।
पिशाचत्वं भवेत्तस्य दत्तैः श्राद्धशतैरपि॥"

पिशाचकी, [न्] पुं, (पिशाचाः सन्त्यस्येति। "वातातीसाराभ्यां कुक् च।" ५। २। १२६। इत्यत्र "पिशाचाच्च।" इति वार्त्तिकोक्त्या इनिः कुक् च।) कुबेरः। इति हेमचन्द्रः। २।१०।३॥

पिशाचदुः, पुं, (पिशाचानां दुः पिशाचप्रियो द्रुर्वा निवर्हत्वादन्धकारवत्त्वादशुचिस्थानजातत्वाच्च।) प्राखोटवृक्षः। इति त्रिकाण्डशेषः॥ (प्राखोटशब्दस्य विवृतिर्ज्ञातव्या॥)

पिशाचद्रुः, पुं, (पिशाचानां द्रुः पिशाचप्रियो द्रुर्वा।) प्राखोटवृक्षः। इति रत्नमाला॥

पिशाचसभं, क्ली, पिशाचानां सभा। इति नपुंसकलिङ्गसंग्रहटीकायां भरतः॥

पिशाची, स्त्री, (पिशाच+ङीष्।) पिशाचिका। स्त्री पिशाची। इति शब्दमाला॥ (पिशाचवद्गन्धोऽस्यस्या इति। अच् ततो ङीष्। तद्दुर्गन्धयुक्तत्वात् तथात्वम्।) गन्धमांसी। इति राजनिर्घण्टः॥

पिशितं, क्ली, (पिंश्रति अवयवीभवतीति। पिश्र+"पिशेः किच्च।" उणां। ३। ६५। इति इतन् स च कित्। यद्वा, पिश्रते खेति। क्तः।) मांसम्। इत्यमरः। २। ६। ६३॥ (यथा, मार्कण्डेयपुराणे। २५। १७।

"हासोल्लिसन्दर्शनमच्चियुग्म-
मत्युज्ज्वलं तर्ज्जनमङ्गनायाः।
कुचादि पीनं पिशितं घनं तत्
स्थानं रतेः किं नरकं न योषित्॥")

पिशिता, स्त्री, (पिशितवद्गन्धोऽस्यस्या इति। अच् ततष्टाप्।) जटामांसी। इति मेदिनी। ते, ३३॥

पिशिताशी, [न्] त्रि, (पिशितं अत्नातीति। अश्+णिनिः।) शाक्तुलः। मांसभक्षकः। इति हेमचन्द्रः। ३। ६३॥ (यथा, महाभारते। १। ८४। १४।

"सङ्कीर्णाचारधर्म्मेषु प्रतिलोमचरेषु च।
पिशिताशिषु चान्येषु म्लेच्छ! राजा भविष्यसि॥")

पिशी, स्त्री, (पिंश्रतीति। पिश्र+कः। गौरादित्वात् ङीष्।) जटामांसी। इति राजनिर्घण्टः॥ (जटामांसीशब्दोऽस्या गुणादयो ज्ञातव्याः॥)

पिशुनं, क्ली, (पिंश्रतीति। पिश्र+"क्षुधिपिशिमिथः कित्।" उणां ३। ५५। इति उनन्। स च कित्।) कुङ्कुमम्। इत्यमरः। २। ६। १२४॥ (पर्य्यायोऽस्य यथा,—

"कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम्।
सङ्कोचं पिशुनं धीरं वाह्लीकं श्रोणितामिधम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पिशुनः, पुं, (पिश्र+उनन्। स च कित्।) कपिवक्त्रः। नारदः। काकः। इति मेदिनी। ने, ६२॥ (अङ्गदृष्टः पुत्रः। यथा, मार्कण्डेये। ५१। ६५।

"अङ्गदृक् तनयं लेभे पिशुनं नाम नामतः॥"

कौशिकस्य पुत्रभेदः। यथा, हरिवंशे। २१।५-६।

"वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कविरेव च।
खलश्च पिटवर्त्ती च नामभिस्तस्य कर्म्मभिस्तथा॥
कौशिकस्य सुतास्तात! मिथ्या गार्ग्यस्य भारत!।
पितर्य्युपरते सर्व्वे व्रतवन्तस्तदाभवन्॥")

पिशुनः, त्रि, (पिश्र+उनन्। स च कित्।) अप्रकाशेनानुचितप्रबोधकः। परस्परभेदग्रीलः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः।

"द्विजिह्वः सूचकः कर्णेजपः पिशुन इत्यपि।
दुर्जनो दुर्विधो विश्वकद्रुच पिशुनः खलः॥"

इति जटाधरः॥ *॥

"कर्णेजपः सूचकः स्यादनौचित्यप्रबोधके।
परस्परं भेदशीले पिशुनो दुर्जनः खलः॥"

इति शब्दरत्नावली॥

(यथा, आर्य्यासप्तशत्याम्। ५६।

"अगुणज्ञेन न तथा व्यथयति कटुकूजितैर्यथा पिशुनः।
रुधिरादानादधिकं दूनोति कर्णे कृतघ्नभ्रमकः॥")

क्रूरः। इति मेदिनी। ने, ६२॥ (यथा, मनौ। ३। १६१।

"भामरी गण्डमाली च श्वित्र्यपस्मारिपिशुनस्तथा॥")

पिशुना, स्त्री, (पिशुन+टाप्।) एक्का। इति मेदिनी। ने, ६२॥ पिड्डिंगाक इति भाषा॥ (एक्काशब्दोऽस्या गुणादयो ज्ञातव्याः॥)

पिष, ध औ ल चूर्णने। इति कविकल्पद्रुमः॥ (रुधां-परं-सकं-अनिट्।) ध, पिनष्टि लोकोगोधूमम्। औ, पेष्टा। ल, अपिषत्। इति दुर्गादासः॥

पिष्टं, क्ली, (पिष्यते स्मेति। पिष+क्तः।) सीसकम्। इति रत्नमाला॥ पिष्टकः। यथा,—

"अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम्।
घृतादष्टगुणं तैलं मद्यान्न च भक्षणात्॥"*॥

अस्य गुणाः।

"पिष्टं प्राणकरं रूक्षं विद्याद्धि गुरु दुर्ज्जरम्॥
शालिपिष्टमया भक्ष्याः कफपित्तविनाशनाः।
वैदला गुरवो भक्ष्या विष्टम्भिन्यश्च मारुताः॥
सगुड़ाः सतिलाश्चैव सक्षौद्रक्षारशर्करकराः।
भक्ष्या बल्याश्च वृद्धाश्च गुरवो दृंहणाः परम्॥
सक्षेद्राः क्षेद्रसिक्ताश्च भक्ष्या गोधूमसम्भवाः।
गुरवस्तर्पणा वृद्धा बलोपचयवर्द्धनाः॥
मर्दितां समितां क्षीरनारिकेलघृतादिभिः।
अवगाह्य घृते पक्वा घृतपूरोऽयमुच्यते॥
घृतपूरो गुरुर्वृष्यः कफशुक्रमांसदः।
रक्तपित्तहरो हृद्यः स्वादुः पित्तहरोऽग्निदः॥"

गोधूमचूर्णं समिता।

"समिता मधुदुग्धेन खण्डेलामरिचादिभिः।
घृते पक्वा क्षिपेत् खण्डे संयावो दृंहणो गुरुः॥
समिता वेष्टिता मध्ये मधु दत्त्वा घृते श्रृता।
मधुमस्तकमुद्दिष्टं तद्दृष्यं गुरु दुर्ज्जरम्॥"

इति राजवल्लभः॥

पर्पटगुष्कुलीफेनकवटलड्डुकानां गुणास्तत्तच्छब्दे द्रष्टव्याः॥ *॥ चूर्णीक्रियते, त्रि॥ (यथा, कथासरित्सागरे। ६। ४१।

"क्षत्वा तांश्चणकान् पिष्टान् गृहीत्वा जलकुम्भिकाम्।
अतिष्ठं चत्वरे गत्वा छायायां नगराद्बहिः॥")

पिष्टकं, क्ली, (पिष्टमिव प्रतिकृतिः। स्वार्थे कन्।) तिलचूर्णम्। इति राजनिर्घण्टः॥

पिष्टकः, पुं, (पिष्टानां विकार इति। "संज्ञायाम्।" ४। ३। १४७। इति कन्।) पिष्टानां तण्डुलादीनां विकारः। पिटा इति भाषा॥

तत्पर्य्यायः। पूपः २ अपूपः ३। इत्यमरः। २।६।४८॥ आपूपः ४ पिष्टः ५। इति शब्दरत्नावली॥ अस्य गुणाः पिष्टशब्दे द्रष्टव्याः। नेत्ररोगविशेषः। इति मेदिनी। के, १२०॥ तस्य लक्षणम्। यथा,—

"श्लेष्मा मारुतकोपेन शुक्ले पिष्टसमुन्नतम्।
पिष्टवत् पिष्टकं विद्धि मलात्तादृग्घनसन्निभम्॥"

इति माधवकरः॥

(अस्य चिकित्सा यथा—

"वैदेही सितमरिचं सैन्धवं नागरं समम्।
मातुलुङ्गरसैः पिष्टमञ्जनं पिष्टकापहम्॥"

इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे॥)

पिष्टपं, क्ली, पुं, (विशुन्धत्वेन सुश्रुतेन इति। "विटपपिष्टपविग्निपोलपाः।" उणा०। ३।१४५। इति कपप्रत्ययेन निपातनात् साधुः।) सुवर्णम्। इत्यमररत्नकोषौ॥ (यथा, मनौ। ४। २३१।

"अनड्वाहः श्रियं पुष्टां गोदो ब्रह्मस्य पिष्टपम्॥")

पिष्टपचनं, क्ली, (पच्यते अत्रेति। पच+आधारे ल्युट्। पिष्टस्य पचनम्।) पिष्टपाकपात्रम्। तेलानी इति ख्यातम्। इति शब्दभूतिः॥ तत्पर्य्यायः। ऋजीषम् २। इत्यमरः। २। ६। ३२॥ ऋचीषम् ३। इति स्वामी॥ पिष्टपाकभृत् ४। इति हेमचन्द्रः॥ (यथा, सुश्रुते चिकित्सितस्थाने सप्तविंशाध्याये।

"विड्भक्तशकुलानां द्वौ पिष्टपचने पिष्टवदुत्क्लेदेति॥")

पिष्टपाकभृत्, क्ली, (पिष्टपाकं तदभिहितो भावो द्रव्यवत प्रकाशते इति न्यायात् पच्यमानपिष्टं बिभर्त्ति धारयतीति। भृ+क्विप् तुगागमश्च।) पिष्टकपाकपात्रम्। इति हेमचन्द्रः। ३। ८६॥

पिष्टपूरः, पुं, (पिष्टैः पूर्य्यते इति। पूरि+कर्म्मणि अप्।) वटकः। इति भूरिप्रयोगः। पिष्टकविशेषः। तत्पर्य्यायः। घृतपूरः २ घृतवरः ३ घार्त्तिकः ४। इति हेमचन्द्रः। ३। ६४॥

पिष्टवर्त्तिः, पुं, (पिष्टं वर्त्तयतीति। वर्त्ति+इन्।) सुश्रुतसुरादिपिष्टम्। तत्पर्य्यायः। चमसिः २। इति हेमचन्द्रः। ३। ६४॥

पिष्टसौरभं, क्ली, (पिष्टेन पेषणेन सौरभं यस्य।) चन्दनम्। इति शब्दरत्नावली। १०३॥

पिष्टातः, पुं, (पिष्टं अतति गच्छतीति। अत+अण्।) पटवासचूर्णम्। इति भरतः॥ वस्त्रादिवासनार्थमेकौषधतगन्धद्रव्यचूर्णम्। इति सारसुन्दरी॥ इक्का। इति भानुदीक्षितः॥ आबीर इति ख्यातः। इति रभसनाथशीलकवौ॥ तत्पर्य्यायः। पटवासकः २। इत्यमरः। २। ७। १३६॥ धूलिगुच्छकः ३। इति चिकाण्डशेषः॥

पिष्टिकं, क्ली, (पिष्टमुत्पत्तिकारणत्वेनास्त्यस्येति। ठन्।) तण्डुलोद्भवतण्डीरम्। इति राजनिर्घण्टः॥

पिष्टिका, स्त्री, (पिष्टं पेषणं साधनतया अस्त्यस्या इति। पिष्ट+ठन्। ततष्टाप्।) पिष्टद्विदलः। पिटी इति हिन्दीभाषा। यथा,—

"दालिः संस्थापिता तोये ततोऽपहृतकञ्चुका।
श्लिलायां साधु संपिष्टा पिष्टिका कथिता बुधैः॥"

इति भावप्रकाशः॥

पिष्टोड़ी, स्त्री, श्वेतार्म्बिः। इति राजनिर्घण्टः॥

पिष, ट कि टुतौ। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-अकं-सेट्। इदित्।) ट, पिंसयते। कि, पिंसयति पिंसति। द्युतिर्दीप्तिः। इति दुर्गादासः॥

पिष, ऋ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ऋ, अपिपेसत् अपिपिसत्। पिपेसतुः पिपिसतुः। इति दुर्गादासः॥

पिष, क षट्टार्थे। गत्याम्। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पेसयति। श्रद्धा-व्याप्त्योरयमिति केचित्। षट्टार्थो निकेतनहिंसावलदानानि। इति दुर्गादासः॥

पिहितं, त्रि, (अपि धीयते स्मेति। धा+क्तः।) "दधातेर्हिः।" ७। ४। ४२। इति ह्यादेशः। अपेरकारलोपः।) आच्छादितम्। तत्पर्य्यायः। संवीतम् २ रुद्धम् ३ आवृतम् ४ संवृतम् ५ छन्नम् ६ स्थगितम् ७ अपवारितम् ८ अन्तर्हितम् ९ तिरोधानम् १०। इति हेमचन्द्रः॥ (यथा, महाभारते। ४। ४४। १८।

"अञ्जनेन पिहिताः सर्व्वा दिशो न प्रतिभान्ति मे।
गाण्डीवस्य च शब्देन कर्णौ मे बधिरीकृतौ॥")

पी, ड य पाने। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-अनिट्।) ड य, पीयते। इति दुर्गादासः॥

पीठं, क्ली, (पेठन्त्युपविशन्त्यस्मिन्निति। पिठ+"इलच्।" ३। ३। १२१। इति घञ्। बाहुलकादिकारस्य दीर्घः। यद्वा, पीयतेऽत्रेति। पी ड पाने+बाहुलकात् ठक्।) उपवेशनाधारः। इत्यमरः। २। ६। १३८॥ पिड़ी चौकी इत्यादि भाषा। तत्पर्य्यायः। आसनम् २ उपासनम् ३ पीठी ४ विष्टरः ५। इति शब्दरत्नावली। व्रतिनामासनम्। तच्च कुशासनादि। तत्पर्य्यायः। विष्टरः २। इति त्रिकाण्डशेषः॥ वृषी ३। इति हेमचन्द्रः॥ (यथा, महाभारते। ५। ३८। २।

"पीठं दत्त्वा साधवेऽभ्यागताय
आनीयापः परिनिर्णिज्य पादौ।
सुखं पृष्ट्वा प्रतिवेद्यात्मसंस्थां
ततो दद्यादन्नमवेक्ष्य धीरः॥")

अथ पीठोद्देशः।

"धातुपाषाणकाष्ठैश्च पीठस्त्रिविध उच्यते।
धातवश्च श्लिलाश्चैव काष्ठानि विविधानि च॥
तदत्र संप्रवक्ष्यामि यदर्थेषासुपयुज्यते॥"

अथ मानम्।

"हस्तद्वयस्तु दैर्घ्येण तदर्द्धं परिणाहतः।
तदर्द्धोन्नतः पीठः सुख इत्यभिधीयते॥
हस्तद्वयदयाधिक्यात् पञ्च पीठा भवन्ति हि।
सुखं जयः शुभः सिद्धिः सम्पच्चेति यथाक्रमम्॥
धनभोगसुखैश्वर्य्यवाञ्छितार्थप्रदायकः।
समदीर्घसुखावाप्तिर्विषमे विषमापदः॥
आयामपरिणाहाभ्यां हस्तद्वयमितो हि यः।
अर्द्धहस्तोन्नतः पीठो जारको नाम विश्रुतः॥
दैर्घ्योन्नतिपरीणाहैश्चतुर्हस्तमितो हि यः।
राजपीठ इति ज्ञेयः सकलार्थप्रसाधकः।
अत्राभिषेकमिच्छन्ति क्षितिपस्य पुराविदः॥
दैर्घ्योन्नतिपरीणाहैः षड्हस्तमितो हि यः।
राज्ञां चित्तप्रसादार्थं केलिपीठाभिधानकः॥
दैर्घ्योन्नतिपरीणाहैरष्टहस्तमितो हि यः।
अङ्गपीठो ह्ययं नाम्ना भवेत् पञ्चसुखप्रदः॥
काञ्चनो राजपीठः स्याज्ज्यायो वा राजतः सुखः।
राज्ञामेवोपयोक्तव्यो लघवश्चोत्तरोत्तरम्॥
राजपीठे चिरायुः स्याज्जये सर्व्वां महीं जयेत्।
जारको जारयेच्छत्रून् सुखे सुखमवाप्नुयात्॥
राजतः कीर्त्तिजननो धनवृद्धिकरः परः।
ताम्रः प्रतापजननो विपक्षक्षयकारकः॥
लौहस्तूत्पाटने सार्व्वः सर्व्वकर्म्मसु युज्यते।
त्रपुसीसकरङ्गाद्याः शत्रुक्षयफलप्रदाः॥"

इति धातुपीठाः।

अथ श्लिलापीठाः।

"राजपीठो वज्रपाणेरेव नान्यस्य दृश्यते।
पद्मरागो दिनेशस्य चान्द्रकान्तो विधोरपि॥
राहोर्मारकतः पीठः शनेर्नीलसमुद्भवः।
गोमेदकस्तु सौम्यस्य स्फाटिकस्तु दृश्यते॥
शुक्रस्य वैदूर्य्यभवः प्रावालो मङ्गलस्य हि॥"

इत्थं पुराणवार्त्ता॥ *॥

"यो यस्य हि दशाजातः पीठस्तस्य हि तन्मयः।
स्फाटिकस्तु महीन्द्राणां सर्व्वेषामेव युज्यते॥
अभिषेके च यात्रायासुत्सवे जयकर्म्मणि।
जयस्कान्तोपवटितः संग्रामे पीठ इष्यते॥
गरुड़ोदुगारचित्ते वर्षासु वृषतिर्व्वसेत्।
मुद्गरत्नमयं पीठं भजते धनगर्व्वितः॥
सामान्यः प्रस्तरः पीठो विलासाय महीभुजाम्।
एषां मानं गुणाश्चापि विज्ञेया धातुपीठवत्॥"

अथ काष्ठपीठाः।

तदुक्तं यथा, मानं पूर्व्ववदेव।

"सम्पत्तिसुखवृद्ध्यर्थं गाम्भारीजनितो जयः।
जारको रोगनाशाय सुखः शत्रुविनाशनः॥
सिद्धिः सर्व्वार्थसंसिद्ध्यै विजयाय च वैरिणाम्।
शुभः स्यादभिषेके च सम्पद्वैरिनिवारणः॥
पानसो राजकः पीठः सुखसम्पत्तिकारकः।
जयः स्यादभिषेके च शुभः शत्रुविनाशनः॥
सुखो रोगविनाशाय सिद्धिः सर्व्वार्थदायिका।
सम्पद्विघाटनविधौ विज्ञेयं पीठलक्षणम्॥
चान्दनस्तु सुखः पीठो अभिषेके महीभुजाम्।
जयः स्याद्रोगनाशाय शुभः सौख्यं प्रयच्छति॥
जारको महतुत्सार्थं अन्ये तु रतिदुष्करः।
यज्ञतो निर्म्मितास्ते तु साम्राज्यफलदायकाः॥
कालेयको यावको हि भूभुजामभिषेचने।
पीठानगुरुकादीनामन्ये चन्दनवद्विदुः॥
वाकुलस्तु शुभः पीठो भूभुजामभिषेचने।

जयो रोगविनाशाय सुखसम्पत्तिकारकः ॥
सिद्धिः सिद्धिप्रदा सम्यत् संग्रामे विजयप्रदः ।
जारको जारणाय स्यादिति भोजस्य सम्मतम् ॥
एवं सुगन्धिकुसुमाः ससारा ये च पादपाः ।
वाकुलेन समः कार्य्य एवं पीठस्य निर्णयः ॥
ये शुष्ककाष्ठा वृक्षास्तु रुदवो लघवोऽथवा ।
गाम्भारीसदृशः पीठस्तेषां कार्य्यस्तथा गुणः ॥
फलिनश्च ससाराश्च रक्तसाराश्च ये नगाः ।
तेषां पानसवत् पीठस्तथैव गुणभावहेत् ॥"*॥

अथ निषेधः ।

"विज्ञेयो निन्दितः पीठो लौहोत्थः सर्व्वधातुजे ।
शिलोत्थः शार्करो वर्ज्यः कर्करश्च विशेषतः ॥
काष्ठेषु च पीठेषु नासारा नातिसारिणः ॥"
तथाहि ।
"आम्रजम्बुकदम्बानामासनं वंशजाशनम् ॥"
भोजस्याह ।
"गुरुः पीठो गौरवाय लघुर्लाघवकारकः ॥"
पराशरस्तु ।
"नागस्थिर्नातिस्थिश्च नागुरुर्नासमाकृतिः ।
पीठः स्यात् सुखसम्पत्तेः नातिदीर्घो न वामनः ॥
ये चान्ये पीठसदृशा दृश्याः शिल्पिविनिर्म्मिताः ।
गुणान्दोषांश्च मानञ्च तेषां पीठवदादिशेत् ॥
विचार्य्यैतेन विधिना यः शुद्धं पीठमाचरेत् ।
तस्य लक्ष्मीरियं वेश्म कदाचिन्न विमुञ्चति ॥
अज्ञानादथवा मोहादृयोऽन्यथा पीठमाचरेत् ।
एतानि तस्य नश्यन्ति लक्ष्मीरायुर्बलं कुलम् ॥"

इति युक्तिकल्पतरौ पीठोद्देशः ॥ * ॥

कृतयुगे दक्षकृतौ शिवनिन्दां श्रुत्वा प्राणांस्यक्तवत्या: सत्या: शरीरं शिरसि धृत्वा भ्रमति शिवे विष्णुना चक्रेण छिन्नास्तस्या अवयवा यत्र यत्र पतितास्त एव देशा एकपञ्चाशत्महापीठा अभवन् ॥ इति पौराणिकी वार्त्ता ॥ * ॥

तेषां निरूपणं यथा,—

ईश्वर उवाच ।

"मातः परापरे ! देवि ! सर्व्वज्ञानमयीश्वरि ! ।
कथ्यतां मे सर्व्वपीठं शक्तिभैरवदेवता ॥

देव्युवाच ।

शृणु वत्स ! प्रवक्ष्यामि दयालो ! भक्तवत्सल ! ।
याभिर्विना न सिध्यन्ति जपसाधनतत्क्रियाः ॥
पञ्चाशदेकपीठानि एवं भैरवदेवताः ।
अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च ॥
ममान्यवपुषो देव ! हिताय त्वयि कथ्यते ।
ब्रह्मरन्ध्रं हिङ्गुलायां भैरवो भीमलोचनः ॥
कोट्टरीसा महामाया त्रिगुणा या दिगम्बरी ॥१
शर्करारे त्रिनेत्रं मे देवी महिषमर्द्दिनी ।
क्रोधीशो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥ २ ॥
सुगन्धायां नासिका मे देवस्त्र्यम्बकभैरवः ।
सुन्दरी सा महादेवी सुनन्दा तत्र देवता ॥३॥
काश्मीरे कण्ठदेशश्च त्रिसन्ध्येश्वरभैरवः ।
महामाया भगवती गुणातीता वरप्रदा ॥ ४ ॥
ज्वालामुख्यां महाजिह्वा देव उन्मत्तभैरवः ।
अम्बिका सिद्धिदानाम्नी ५ स्तनं जालन्धरे मम ।
भीषणो भैरवस्तत्र देवी त्रिपुरमालिनी ॥ ६ ॥
हाटकपीठं वैद्यनाथे वैद्यनाथस्तु भैरवः ।
देवता जयदुर्गाख्या ७ नेपाले जानुनी मम ।
कपाली भैरवः श्रीमान् महामाया च देवता ॥८॥
मानसे दक्षहस्तो मे देवी दाक्षायणी हर ।
अमरो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥ ९ ॥
उत्कले नाभिदेशश्च विरजाक्षेत्रमुच्यते ।
विमला सा महादेवी जगन्नाथस्तु भैरवः ॥१०॥
गण्डक्यां गण्डपातश्च तत्र सिद्धिर्न संशयः ।
तत्र सा गण्डकी चण्डी चक्रपाणिस्तु भैरवः॥११॥
बहुलायां वामबाहुर्म्बहुलाख्या च देवता ।
भीरुको भैरवो देवः सर्व्वसिद्धिप्रदायकः ॥१२॥
उज्जयिन्यां कूर्परश्च माङ्गल्यः कपिलाम्बरः ।
भैरवः सिद्धिदः साक्षाद्देवी मङ्गलचण्डिका ॥१३॥
चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः ।
शक्तिरूपा भगवती भवानी तत्र देवता ॥
विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥ १४ ॥
त्रिपुरायां दक्षपादो देवता त्रिपुरा मता ।
भैरवस्त्रिपुरेशश्च सर्व्वाभीष्टफलप्रदः ॥ १५ ॥
त्रिस्रोतायां वामपादो भ्रामरी भैरवोऽम्बरः॥१६॥
योनिपीठं कामगिरौ कामाख्या तत्र देवता ।
यत्रास्ते त्रिगुणातीता रक्तपाषाणरूपिणी ।
यत्रास्ते माधवः साक्षादुमानन्दोऽथ भैरवः ॥
सर्व्वदा विहरेद्देवी तत्र सन्निर्न संशयः ।
तत्र श्रीभैरवी देवी तत्र नक्षत्रदेवता ॥
प्रचण्डचण्डिका तत्र मातङ्गी त्रिपुराम्बिका ।
बगला कमला तत्र भुवनेशी सुधूमिनी ॥
एतानि वरपीठानि शंसन्ति वरभैरव ! ।
एवं ता देवताः सर्व्वा एवन्ते दश भैरवाः ॥
सर्व्वत्र विरला चाहं कामरूपे यदे यदे ।
गौरीशिखरमारुह्य पुनर्जन्म न विद्यते ॥१७॥
करतोयां समासाद्य यावत् शिखरवासिनीम् ।
शतयोजनविस्तीर्णं त्रिकोणं सर्व्वसिद्धिदम् ॥
देवा मरणमिच्छन्ति किं पुनर्म्मानवादयः ।
भूतधात्री महामाया भैरवः क्षीरखण्डकः ॥
युगाद्यायां महादेव ! दक्षाङ्गुष्ठं पदो मम ॥१८॥
नकुलीशः कालिपीठे दक्षपादाङ्गुलीषु च ।
सर्व्वसिद्धिकरी देवी कालिका तत्र देवता ॥१९॥
अङ्गुलीषु च हस्तस्य प्रयागे ललिता भवः॥२०॥
जयन्त्यां वामजङ्घा च जयन्ती क्रमदीश्वरः ॥२१॥
भुवनेशी सिद्धिरूपा किरीटस्या किरीटतः ।
देवता विमला नाम्नी समर्त्ता भैरवस्तथा ॥२२॥
वाराणस्यां विशालाक्षी देवता कालभैरवः ।
मणिकर्णीति विख्याता कुण्डलञ्च मम श्रुतेः॥२३॥
कन्याश्रमे च एष्ठं मे निमिषो भैरवस्तथा ।
सर्व्वाणी देवता तत्र १४ कुरुक्षेत्रे च गुल्फतः ॥
स्थाणुर्नाम्ना च सावित्री देवता २५ मणिबन्धके ।
मणिबन्धे च गायत्री सर्व्वानन्दस्तु भैरवः ॥२६॥
श्रीशैले च मम ग्रीवा महालक्ष्मीस्तु देवता ।
भैरवः शम्बरानन्दो देशे देशे व्यवस्थितः ॥२७॥
कांचीदेशे च कङ्कालो भैरवो रुरुनामकः ।
देवता देवगर्भाख्या २८ नितम्बः कालमाधवे ॥
भैरवश्चासिताङ्गश्च देवी काली च सुक्तिदा ।
दृष्ट्वा दृष्ट्वा महादेव ! मन्त्रसिद्धिमवाप्नुयात् ॥
कुजवारे भूततिथौ निशार्द्धे यस्तु साधकः ।
नत्वा प्रदक्षिणीकृत्य मन्त्रसिद्धिमवाप्नुयात् ॥२८॥
शोणाख्या भद्रसेनस्तु नर्म्मदाख्ये नितम्बकः ॥३०॥
रामगिरौ स्तनान्यश्च शिवानी चण्डभैरवः ॥३१॥
वृन्दावने केशजाले उमानाम्नी च देवता ।
भूतेशो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥३२॥
संहाराख्य ऊर्द्वदन्ते देवी नारायणी शुचौ ।
अधोदन्ते महारुद्रो वाराही पञ्चसागरे ॥३३॥
करतोयातटे तल्पं वामे वामनभैरवः ।
अपर्णा देवता तत्र ब्रह्मरूपा करोद्भवा ॥३४॥
श्रीपर्व्वते दक्षतल्पं तत्र श्रीसुन्दरी परा ।
सर्व्वसिद्धिकरी सर्व्वा सुन्दरानन्दभैरवः ॥ ३५ ॥
कपालिनी भीमरूपा वामगुल्फो विभाषके ॥३६॥
उदरञ्च प्रभासे मे चन्द्रभागा यशस्विनी ।
वक्रतुण्डो भैरव-३७ श्चोर्ज्जीषो भैरवपर्व्वते ।
अवन्तौ च महादेवी लम्बकर्णस्तु भैरवः ॥३८॥
पिपुके भ्रामरी देवी विक्रताक्षो जले स्थले॥३९॥
गण्डो गोदावरीतीरे विश्वेशो विश्वमातृका ।
दक्षपार्श्वभैरवस्तु वामगण्डे तु राकिणी ॥
अमायी भैरवो वत्स ! सर्व्वशैलात्मकोपरि ॥४०॥
रत्नावल्यां दक्षस्कन्धः कुमारी भैरवः शिवः ॥४१॥
मिथिलायां उमा देवी वामस्कन्धो महोदरः॥४२॥
नलाख्यां नलापातो योगेशो भैरवस्तथा ।
तत्र सा कालिका देवी सर्व्वसिद्धिप्रदायिका॥४३॥
कर्णाटे चैव कर्णे मे अभीरुर्नाम भैरवः ।
देवता जयदुर्गाख्या नानाभोगप्रदायिनी ॥ ४४ ॥
वक्रेश्वरे मनःपातो वक्रनाथस्तु भैरवः ।
नदी पापहरा तत्र देवी महिषमर्द्दिनी ॥ ४५ ॥
यशोरे पाणिपद्मश्च देवता यशोरेश्वरी ।
चण्डश्च भैरवो यत्र तत्र सिद्धिमवाप्नुयात् ॥४६॥
अट्टहासे ओष्ठपातो देवी सा फुल्लरा स्मृता ।
विश्वेशो भैरवस्तत्र सर्व्वाभीष्टप्रदायकः ॥ ४७ ॥
हारपातो नन्दिपुरे भैरवो नन्दिकेश्वरः ।
नन्दिनी सा महादेवी तत्र सिद्धिर्न संशयः॥४८॥
लङ्कायां नूपुरश्चैव भैरवो राक्षसेश्वरः ।
इन्द्राणी देवता तत्र इन्द्रेणोपासिता पुरा ॥४९॥
विराटदेशमध्ये तु पादाङ्गुलिनिपातनम् ।
भैरवश्चाम्बताख्यश्च देवी तत्राम्बिका स्मृता ॥५०॥
मागधे दक्षजङ्घा मे योमकेशस्तु भैरवः ।
सर्व्वानन्दकरी देवी सर्व्वकामफलप्रदा ॥ ५१ ॥
एतास्ते कथिताः पुत्र ! पीठनाथाधिदेवताः ॥
क्षेत्राधीशं विना देवं पूजयेत् पीठदेवताम् ।
भैरवैर्हियते सर्व्वं जपपूजादिसाधनम् ॥
अज्ञात्वा भैरवं पीठं पीठशक्तिञ्च शङ्कर ! ।
प्राणनाथ ! न सिध्येत कल्पकोटिजपादिभिः ॥
न देयं परशिष्येभ्यो निन्दकाय दुरात्मने ।
शठाय वञ्चकायेदं दत्त्वा नश्यत्यवाप्नुयात् ॥
दद्यात् शान्ताय शिष्याय नैष्ठिकाय शुचौ प्रिये
साधकाय कुलीनाय मन्त्री मन्त्रार्थसिद्धये ॥")

इति तन्त्रचूड़ामणौ शिवपार्व्वतीसंवादे एकपञ्चाशद्विद्योत्पत्तौ पीठनिर्णयः समाप्तः । * ॥
(देवीभागवतोक्ताष्टाधिकशतपीठनामानि यथा. तत्रैव । ७ । ३० । ४४—६५ ।
"अपश्यन्तां सतीं वह्नौ दह्यमानान्तु चित्कलाम् ।
स्कन्धेऽप्यारोपयामास हा ! सतीति वदन् मुहुः ॥
बभ्राम भ्रान्तचित्तः सन्नानादेशेषु शङ्करः ।
तदा ब्रह्मादयो देवाश्चिन्तामापुरनुत्तमाम् ॥
विष्णुस्तु त्वरया तत्र धनुरुद्यम्य मार्गणैः ।
चिच्छेदावयवान् सत्यास्तत्तत्स्थानेषु तेऽपतन् ॥
तत्तत् स्थानेषु तत्रासीन्नामर्त्तिधरो हरः ।
उवाच च ततो देवान् स्थानेष्वेतेषु ये शिवाम् ॥
भजन्ति परया भक्त्या तेषां किञ्चिन्न दुर्लभम् ।
नित्यं सन्निहिता यत्र निजाङ्गेषु पराम्बिका ॥
स्थानेष्वेतेषु ये मर्त्याः पुरश्चरणकर्म्मिणः ।
तेषां मन्त्राः प्रसिध्यन्ति मायाबीजं विशेषतः ॥
इत्युक्त्वा शङ्करस्तेषु स्थानेषु विरहातुरः ।
कालं निन्ये नृपश्रेष्ठ ! जपध्यानसमाधिभिः ॥
जनमेजय उवाच ।
कानि स्थानानि तानि स्युः सिद्धपीठानि चानघ ! ।
कतिसंख्यानि नामानि कानि तेषाञ्च मे वद ॥
तत्र स्थितानां देवीनां नामानि च कृपाकर ! ।
कृतार्थोऽहं भवे येन तद्दास्यु महामुने ! ॥
व्यास उवाच ।
शृणु राजन् ! प्रवक्ष्यामि देवीपीठानि साम्प्रतम् ।
येषां श्रवणमात्रेण पापहीनो भवेन्नरः ॥
येषु येषु च पीठेषूपास्येयं सिद्धिकाङ्क्षिभिः ।
भूतिकामैरभिध्येया तानि वक्ष्यामि तत्त्वतः ॥
वाराणस्यां विशालाक्षी गौरीमुखनिवासिनी ।
क्षेत्रे वै नैमिषारण्ये प्रोक्ता सा लिङ्गधारिणी ॥
प्रयागे ललिता प्रोक्ता कामकी गन्धमादने ।
मानसे कुमुदा प्रोक्ता दन्तिने चोत्तरे तथा ॥
विश्वकामा भगवती विश्वकामप्रपूरिणी ।
गोमन्ते गोमती देवी मन्दरे कामचारिणी ॥
महोत्कटा क्षेत्रवरे जयन्ती हस्तिनापुरे ।
गौरी प्रोक्ता कान्यकुब्जे रम्भा तु मलयाचले ॥
एकाम्रपीठे संप्रोक्ता देवी सा कीर्त्तिमत्यपि ।
विश्वे विश्वेश्वरी प्राहुः पुरुहूताच्च पुष्करे ॥
केदारपीठे संप्रोक्ता देवी सन्मार्गदायिनी ।
मन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका ॥
स्थानेश्वरी भवानी तु विल्वके विल्वपत्रिका ।
श्रीशैले माधवी प्रोक्ता भद्रा भद्रेश्वरे तथा ॥
वराहशैले तु जया कमला कमलालये ।
रुद्रायो रुद्रकोट्यान्तु काली कालञ्जरे तथा ॥
शालग्रामे महादेवी शिवलिङ्गे जलप्रिया ।
महालिङ्गे तु कपिला माकोटे मुकुटेश्वरी ॥
मायापुर्य्यां कुमारी स्यात्तन्त्राने ललितास्मिका ।
गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे ॥
उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला ।
विपाशायाममोघाक्षी पाटला पुरुषर्द्धने ॥
नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी ।
विपुले विपुला देवी कल्याणी मलयाचले ॥
सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका ।
रमणा रामतीर्थे तु यमुनायां मृगावती ॥
कोटवी कोटतीर्थे तु सुगन्धा माधवे वने ।
गोदावर्य्यां त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥
शिवकुण्डे शुभानन्दा नन्दिनी देविकातटे ।
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने ॥
देवकी मथुरायान्तु पाताले परमेश्वरी ।
चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी ॥
करवीरे महालक्ष्मीरुमादेवी विनायके ।
आरोग्या वैद्यनाथे तु महाकाले महेश्वरी ॥
अभयेत्युष्णतीर्थेषु नित्या विन्ध्यपर्व्वते ।
माण्डव्ये माण्डवी नाम स्वाहा माहेश्वरीपुरे ॥
कुशलर्षे प्रचण्डा तु चण्डिकामरकण्टके ।
सोमेश्वरे वरारोहा प्रभासे पुष्करावती ॥
देवमाता सरस्वत्यां पारावारा तटे स्थिता ।
महालये महाभागा पयोष्ण्यां पिङ्गलेश्वरी ॥
सिद्धिका कृतशौचे तु कार्त्तिके त्वतिशाङ्करी ।
उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे ॥
माता सिद्धवने लक्ष्मीरनङ्गा भरताश्रमे ।
जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते ॥
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले ।
भीमादेवी हिमाद्रौ तु तुष्टिश्चिन्तेश्वरी तथा ॥
कपालमोचने शुद्धिर्माता कायावरोहणे ।
शङ्खोद्धारे धरा नाम धृतिः पिण्डारके तथा ॥
कला तु चन्द्रभागायामच्छोदे शिवधारिणी ।
वेणायामम्बिका नाम वर्य्यासुर्व्वशी तथा ॥
ओषधिश्चोत्तरकुरौ कुशद्वीपे कुशोदका ।
मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी ॥
अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये ।
गायत्री वेदवदने पार्व्वती शिवसन्निधौ ॥
देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती ।
सूर्य्यबिम्बे प्रभा नाम मातृणां वैष्णवी मता ॥
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा ।
चित्ते ब्रह्मकला नाम शक्तिः सर्व्वशरीरिणाम् ॥
इत्याद्यद्भुतानि स्युः पीठानि जनमेजय ! ।
तत्संख्याकास्तदीशाश्च देवाश्च परिकीर्त्तिताः ॥
सतीदेवाङ्गभूतानि पीठानि कथितानि च ।
अन्यान्यपि प्रसङ्गेन यानि मुख्यानि भूतले ॥
यः स्मरेच्छृणुयाद्वापि नामाष्टशतमुत्तमम् ।
सर्व्वपापविनिर्म्मुक्तो देवीलोकं परं व्रजेत् ॥
एतेषु सर्व्वपीठेषु गच्छेद् यात्राविधानतः ।
तर्पयेच्च पितॄन् श्राद्धादीनि विधाय च ॥
कुर्य्याच्च महतीं पूजां भगवत्या विधानतः ।
क्षमापयेच्चमग्रहाचीं जगदम्बां मुहुर्मुहुः ॥
कृतकृत्यं स्वमात्मानं जानीयाच्चनमेजय ! ।
भक्ष्यभोज्यादिभिः सर्व्वान् ब्राह्मणान् भोजयेत्ततः ॥
सुवासिनीः कुमारीश्च बटुकादींस्तथा नृप ! ।
तस्मिन् क्षेत्रे स्थिता ये तु चाण्डालाद्या अपि प्रभो ! ॥
देवीरूपाः स्मृताः सर्व्वे पूजनीयास्ततो हि ते ।
प्रतिग्रहादिकं सर्व्वं तेषु क्षेत्रेषु वर्ज्जयेत् ॥
यथाशक्तिपुरस्थार्य्यां कुर्य्यान्मन्त्रस्य सत्तमः ।
मायाबीजेन देवेशीं तत्तत्पीठाधिवासिनीम् ॥
पूजयेदनिशं राजन् ! पुरश्चरणकर्म्मवेत् ।
वित्तशाठ्यं न कुर्व्वीत देवीभक्तिपरो नरः ॥
य एवं कुरुते यात्रां श्रीदेव्याः प्रीतमानसः ।
सहस्रकल्पपर्य्यन्तं ब्रह्मलोके महत्तरे ॥
वसन्ति पितरस्तस्य सोऽपि देवीपुरे तथा ।
अन्ते लब्ध्वा परं ज्ञानं भवेन्मुक्तो भवाम्बुधेः ॥")
अन्यानि पीठादीनि कालीपुराणे १८।५०।६१ अध्यायेषु द्रष्टव्यानि ॥ * ॥ पीठन्यासस्तु न्यासग्रन्थे द्रष्टव्यः । पीठदेवतापूजनं न्यासक्रमेणैव ॥

पीठकेलिः पुं, (पीठे आसने केलिर्नर्म्मादिरस्य ।) पीठमर्द्दनायकः । यथा,—
"षिड्गो थलीकः षट्प्रज्ञः कामकेलिर्विदूषकः ।
पीठकेलिः पीठमर्द्दो भविलश्चिदुरो विटः ॥"
इति त्रिकाण्डशेषः ॥

पीठमर्द्दः, पुं, (पीड्यतीति । पीड् + अच् । पिठस्यासनस्य मर्द्दः ।) नायकविशेषः । तस्य लक्षणम् । कुपितस्त्रीप्रसादकः । उदाहरणं यथा,—
"कोऽयं कोपविधिः प्रयच्छ करुणागर्भं वचो जायतां
पीयूषद्रवदीर्घिकापरिमलैरामोदिता मेदिनी ।
आस्तां वा सृदृशासु लोचनमिदं यावत्तयन्त्या मुहु-
र्यस्ते कृष्यसि तस्य सुन्दरि ! तपोऽप्यन्दानि वन्दामहे ॥
नर्म्मसचिवोऽप्ययमेव ।" इति रसमञ्जरी ॥ (अयं हि नायकस्य उत्तमसहायानामग्रतमः । इति साहित्यदर्पणम् ।३।५३ ॥ नायकप्रियः । व्यतिषृष्टः । यथा, मेदिनी । दे, ५० ।
"पीठमर्द्दोऽति धृष्टे स्यात् नायकस्य प्रियेऽपि च॥"
यथा, महाभारते । ४ । २० । ३३ ।
"प्रेक्षते स्म विराटस्तु कङ्कञ्च बल्लवो जनाः ।
रथिनः पीठमर्द्दाश्च हस्त्यारोहाश्च नैगमाः ॥")

पीठसर्पी, [न्] चि, (पीठेन सर्पतीति । सृप् + णिनिः ।) खञ्जः । तत्पर्य्यायः । पांशुरः २ । इति हारावली ॥

पीठी, स्त्री, (पीठ + स्वार्थे ङीष् ।) आसनम् । इति शब्दरत्नावली ॥ पौंड़ी इति भाषा ॥

पीड, ऋ क वाधे । गाहे । इति कविकल्पद्रुमः ॥ (चुरां परं सकं सेट् ।) बाधो विहतिः । गाहो विलोड़नम् । ऋ, अपीपिड़त् अपिपीड़त् । क, पीड़यति शत्रुं लोकः । पीड़यति स्नानं कामी । इति दुर्गादासः ॥

पीड़नं, क्ली, (पीड़ बाधे अवगाहे वा + भावे ल्युट् ।) शस्त्रादिसम्पन्नदेशस्य परचक्रेण पीड़नम् । शत्रुकृतगाढ़प्रहारः । इति केचित् । पदाक्रमणम् । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । अवमर्द्दः २ । इत्यमरः ।२।८।९८ ॥ (यथा, देवीभागवते । ३ । १२ । १३ ।
"पीड़नञ्चैव पाञ्चाल्या सभायां द्यूते पराजयः ॥")

दुःखनम्। यथा,—
"भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम्।
नरकं पीड़ने चास्य तस्मादयत्नेन तं भरेत्॥"
इति दायभागधृतमनुवचनम्॥
मर्दनम्। टिपन चापन इत्यादि भाषा। यथा,—
"गर्भोऽभिघातविषमाशनपीड़नाद्यैः
पक्वं हमादिव फलं पतति क्षणेन॥"
इति माधवकरः॥
पीड़ा, स्त्री, (पीड़नमिति। पीड़+"पिदिभिदा-दिभ्योऽङ्।" ३। ३। १०४। इति अङ्। तत-ष्टाप्।) पीड़नम्। तत्पर्य्यायः। बाधा २ यथा ३ दुःखम् ४ आमानस्यम् ५ प्रसूतिजनम् ६ कष्टम् ७ कृच्छ्रम् ८ आभीलम् ९। इत्यमरः। १। ६। ३॥ आबाधा १०। इति हलायुधः॥ आमानस्यम् ११। इति रायमुकुटः॥ (शूलम् १२ रुग् १३ वेदना १४ आर्त्तिः १५ तोदः १६ रुजा १७। इति वैद्यकरत्नमाला॥ यथा, मनुः। ७। १६६।
"यदाबगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः।
तदात्वे चाल्पिकां पीड़ां तदा सन्धिं समाश्र-येत्॥")
एषां पीड़ादीनां मध्ये विशेष्यगामिनो ये दुःखकष्टकृच्छ्राभीलास्ते त्रिलिङ्गाः। सा आध्यात्मिकाधिभौतिकाधिदैविकताप्रत्ययभेदेन त्रिविधा। आध्यात्मिकोऽपि द्विविधः। यथा,—
"आध्यात्मिकादि मैत्रेय! ज्ञात्वा तापत्रयं बुधः।
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम्॥
आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा।
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयताञ्च सः॥
शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः।
गुल्मार्शःक्षयपुच्छश्वासच्छर्द्यादिभिरनेकधा॥
तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि॥"
अङ्गामयो वातजलोदरादिः। १॥ *॥
"कामक्रोधभयद्वेषलोभमोहविषादजः।
शोकासूयावमानेर्ष्यामात्सर्य्यादिभवस्तथा॥
मानसोऽपि द्विजश्रेष्ठ! तापो भवति नैकधा॥२॥
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः॥
ग्रहपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः।
सरीसृपादेश्च नृणां जन्यते चाधिभौतिकः॥
शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः।
तापो द्विजवरश्रेष्ठ! कथ्यते चाधिदैविकः॥
गर्भजन्मजराज्ञानमृत्युनारकजं तथा।
दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम!॥"
इति विष्णुपुराणे। ६। ५। १—६॥ *॥
कृपा। शिरोमाला। सरलद्रुः। इति मेदिनी। ड़े, २०॥
पीड़ितं, त्रि, (पीड़+क्तः। यद्वा, पीड़ास्य जातेति तारकादितात् इतच्।) स्त्रीयां करणम्। यन्त्रितम्। बाधितम्। इति मेदिनी। ते, १३४॥ मर्दितम्। इति हेमचन्द्रः॥ इतप्रत्यान्तः पीड़ार्थ्यायोऽप्यच॥ (मन्त्रभेदः। यथा, तन्त्रसारे। [क्रियाः॥])
"सहस्रार्णाधिका मन्त्रा दण्डकाः पीड़िता-
पीतं, क्ली, (पा+भावे क्तः।) पानम्। इति मेदिनी। ते, ३४॥ (पीतो वर्णोऽस्यास्तीति। अच्। पीताभत्वादस्य तथात्वम्।) हरितालम्। इति राजनिर्घण्टः॥ (हरिचन्दनम्। तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"पीतसारं सुगन्धितच्च तत्पीतं हरिचन्दनम्॥")
पीतः, पुं, (पिबति वर्णान्तरमिति। पा+कर्त्तरि औणादिकः क्तः।) वर्णविशेषः। हलदिया इति भाषा। तत्पर्य्यायः। गौरः २ हरिद्राभः ३। इत्यमरः। १। ५। १४॥ कुसुम्भः। अङ्कोटः। शाखोटः। पुष्परागः। इति राजनिर्घण्टः॥ पीतवस्तूनि यथा,—
"पीतानि ब्रह्म-१जीवे-२न्द्र-३गरुड़े-४श्वरदृग्-५ जटाः ६।
गौरी-७द्वापर-८गोमूत्र-९मधु-१०वीररसा-११ रजः १२।
हरिद्रा१३रोचना१४रीति-१५गन्धके१६ द्वीप-१७ चम्पके १८।
किञ्जल्क-१९वल्कले२०प्यालि-२१हरिताल-२२ मनःशिला २३।
कर्णिकारम्२४ चक्रवाक-२५ वानरौ२६ शारिकासुखम् २७।
केशवांशुक- ८मञ्जूक-२९सराग-३०कनका-दयः३१॥" *॥
पीतश्वेतवाचकानि यथा,—
"पीतश्वेतौ गौर-१द्विजराज-२कपर्द-३शम्भु-४ हरि-५पृताश्वाः ६।
हैमस्तोमा-७ष्टापद-८ मष्टारजत-९चन्द्र-१० कलधौताः११॥"
अस्यार्थः। गौरः श्वेतपीतयोः। द्विजराजो गरुड़चन्द्रयोः। कपर्दः शम्भुजटाजूटकपर्दयोः। शम्भुर्ब्रह्मविलोचनयोः। हरिः पिङ्गलसिंहयोः। ताक्ष्यो गरुड़ः पक्षे उच्चैःश्रवाः। हैमस्तोमः हेम्नोऽयं हैमः पक्षे हिमस्यायम्। अष्टापदं सुवर्णशरभयोः। अष्टारजतं सुवर्णरूप्ययोः। चन्द्रः स्वर्णशृङ्गयोः। कलधौतं हैमरूप्ययोः।
"सुशोभितारकूटस्थौ स्वर्णस्तोमसमद्युतिः।
दहनोपलसङ्काशनिर्गाङ्गेयक्षविषेशुकः॥"
अस्यार्थः। तारकूटो रूप्यसमूहः पक्षे आर-कूटो रीतिः। सुशोभनमर्थः कनकञ्च। गोपति-तार्क्ष्यकान्तिः रविगरुड़च्छविः। पक्षे गोपति-रिन्द्रः तस्य तार्क्ष्यसुरङ्गः। ग्रामदेवगिरिर्मनोज्ञ-मेरुः कैलासश्च॥*॥ पीतश्यामवाचकानि यथा,
"पीतश्यामौ कृष्णाम्बर-१ मधुजित्-२ ध्वान्त-जेतारः ३।
विद्युत्कान्तः ४ ध्वान्तदेषि-५ हरि-६ सूर्य्यव-च्छायाः ७॥"
अस्यार्थः। कृष्णाम्बरं विष्णुवस्त्रं सूर्य्याकाश्ययोः। मधुजित् मधुतुल्यविष्णोः। ध्वान्तजेता सूर्य्य-तमस्तुल्ययोः। विद्युत्कान्तः मेघतड़ित्मनो-ज्ञयोः। ध्वान्तदेषी सूर्य्यान्धकारतुल्ययोः। हरिः कपिकृष्णयोः। सूर्य्यवच्छायः सुवर्णसुन्दर-समुदतुल्यशोभयोः। इति कविकल्पलता॥
(पर्व्वतविशेषः। यथा, माघे। १२१। ६३।
"प्रथमः सूर्य्यसङ्काशः सुमना नाम पर्व्वतः।
पीतस्तु मध्यमस्तत्र शातकौम्भमयो गिरिः॥")
पीतं, त्रि, (पीतवर्णोऽस्यास्तीति। अच्।) पीत-वर्णयुक्तम्। इति मेदिनी। ते, ३४। (यथा, महाभारते। ४। ४१। २०।
"ये त्विमे निश्चिताः पीताः पृथवो दीर्घवाससः।
हेमरुक्माङ्गिपर्व्वाणो राजन्ते महाशराः॥"
पा+कर्म्मणि क्तः।) क्षतपानम्। यथा,—
"हालाहलमपि पीतं बहुशो भिक्षापि भक्षिता भवता।
अनयोरवगतरसयोः कियदन्तरं वद योगिन्!॥"
इत्युद्भटः॥
(पीतं पानमस्यस्येति। अच्। यद्वा, पीतं क्षीरं घीरं वा येन इत्युत्तरपदलोपः। पीतदुग्धादि-कम्। यथा, रघौ। २। १।
"अथ प्रजानामधिपः प्रभाते
जायाप्रतिग्राहितगन्धमाल्याम्।
वनाय पीतप्रतिबद्धवत्सां
यशोधनो धेनुमृषेर्मुमोच॥")
पीतकं, क्ली, (पीत+"वाचादिभ्यः कन्।" ५। ४। २६। इति स्वार्थे कन्।) हरितालम्। इत्यमरः॥ (पीतेन पीतवर्णेन कायतीति। कै+क।) कुङ्कुमम्। इति शब्दरत्नावली॥ (अस्य पर्य्यायो लक्षणञ्च यथा,—
"कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम्।
सङ्कोचं पिशुनं धीरं वाह्लीकं श्रोणिताभिधम्॥
काश्मीरदेशजे क्षेत्रे कुङ्कुमं यत्नवेष्टितम्।
सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम्॥
वाह्लीकदेशसञ्जातं कुङ्कुमं पाण्डुरम्भतम्।
केतकीगन्धयुक्तन्तन्मध्यमं सूक्ष्मकेशरम्॥
कुङ्कुमं पारसीकेयमधुगन्धि तदीरितम्।
ईषत्पाण्डुरवर्णन्तदधमं स्थूलकेशरम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
अगुरु। पद्मकाष्ठम्। रीतिः। माक्षिकम्। इति राजनिर्घण्टः॥ चन्दोदृचः। पीतशालः। इति रत्नमाला॥ क्षोमाकप्रभेदः। हरिद्रः। किंकि-रातदृचः। इति राजनिर्घण्टः॥ (पीतेन पीतवर्णेन रक्तमिति। पीत+"लाक्षारोचना-ट्टक्।" ४। २। २। इत्यस्य "पीतात् कन्।" इति वार्त्तिकोक्त्या कन्। पीतवर्णरञ्जिते पीत-वर्णविशिष्टे च त्रि॥ पीत+स्वार्थे कन्। पीतवर्णे, पुं। यथा, महाभारते। १२। १८८। ५।
"ब्राह्मणानां सितो वर्णः क्षत्रियाणान्तु लोहितः।
वैश्यानां पीतको वर्णः शूद्राणामसितस्तथा॥")
पीतकदली, स्त्री, (पीता कदलीति विल्वकमै-धारयः।) स्वर्णकदली। इति राजनिर्घण्टः॥

पीतकदुमः, पुं, (पीतको द्रुम इति नित्यकर्म्मधारयः।) हरिद्रवृक्षः। इति राजनिर्घण्टः॥ (हरिद्रशब्दोऽस्य विवरणं विज्ञेयम्॥)

पीतकन्दं, क्ली, (पीतः कन्दोऽस्य।) गर्जरम्। इति राजनिर्घण्टः॥

पीतकरवीरकः, पुं, (पीतः करवीर इति नित्यकर्म्मधारयः। ततः स्वार्थे कन्।) पीतवर्णकरवीरपुष्पवृक्षः। तत्पर्य्यायः। पीतप्रसवः २ सुगन्धिकुसुमः ३। अस्य गुणाः। सामान्यकरवीरगुणतुल्याः। इति राजनिर्घण्टः॥

पीतकावेरं, क्ली, (कुत्सितं वेरं शरीरं कावेरम्। पीतं कावेरं कुत्सितशरीरमपि यस्मात्।) कुङ्कुमम्। पित्तलम्। इति मेदिनी। रे, ३०५॥ (विट्तिरस्य कुङ्कुमपित्तलशब्दयोर्ज्ञेया॥)

पीतकाष्ठं, क्ली, (पीतं काष्ठमिति नित्यकर्म्मधारयः।) पीतचन्दनम्। इति राजनिर्घण्टः॥

पीतकीला, स्त्री, (पीता कीला कीलतुल्या लतेति नित्यकर्म्मधारयः।) आवर्त्तकीलता। इति राजनिर्घण्टः॥

पीतघोषा, स्त्री, (पीतानि पुष्पाणि सन्त्यस्या इति पीता पीतपुष्पेत्यर्थः। ततः पीता घोषेति कर्म्मधारयः।) पीतपुष्पघोषालता। इति रत्नमाला॥ अस्याः पर्य्यायः घोषकशब्दे द्रष्टव्यः॥

पीतचन्दनं, क्ली, (पीतं चन्दनमिति नित्यकर्म्मधारयः।) पीतवर्णचन्दनम्। तत्तु द्रविडदेशे प्रसिद्धम्। कलमक इति ख्यातम्। तत्पर्य्यायः। पीतगन्धम् २ कालेयम् ३ पीतकम् ४ माधवप्रियम् ५ कालेयकम् ६ पीतकाष्ठम् ७ वर्ब्बरम् ८। इति राजनिर्घण्टः॥ कालीयकम् ९ कालीयम् १० पीताभम् ११ हरिचन्दनम् १२ हरिप्रियम् १३ कालसारम् १४ कालानुसार्य्यकम् १५। अस्य गुणाः। रक्तचन्दनगुणतुल्यगुणत्वम्। वङ्गनाशित्वञ्च। इति भावप्रकाशः॥ शीतलत्वम्। तिक्तत्वम्। कुष्ठश्लेष्मकण्डूविचर्च्चिकादद्रुक्रिमिनाशित्वम्। कान्तिकरत्वञ्च। इति राजनिर्घण्टः॥

पीतचम्पकः, पुं, (पीतं चम्पकमिव शिखा यस्य।) प्रदीपः। इति जटाधरः॥ (पीतं चम्पकं तत्पुष्पमस्य।) पीतवर्णचम्पकपुष्पवृक्षश्च॥

पीततण्डुलः, पुं, (पीतस्तण्डुलोऽस्य।) कङ्गुनी। इति राजनिर्घण्टः॥

पीततण्डुला, स्त्री, (पीतस्तण्डुलोऽस्याः।) चर्व्विकावृक्षः। इति राजनिर्घण्टः॥

पीततुण्डः, पुं, (पीतं तुण्डं यस्य।) कारण्डवपक्षी। तत्पर्य्यायः। चक्षुश्चिः २ सुपत्रः ३। इति त्रिकाण्डशेषः॥

पीतता, स्त्री, (पीत+तल्+टाप्।) हरिद्राभता। पीतत्वम्। पीतशब्दात् भावार्थे तप्रत्ययनिष्पन्ना। इति व्याकरणम्॥ (यथा, महाभारते। ३। १४६। २६।
"द्वापरेऽपि युगे धर्म्मो द्विभागो नः प्रवर्त्तते।
विष्णुर्वै पीतसां याति चतुर्द्धा वेद एव च॥")

पीततैला, स्त्री, (पीतं तैलमस्याः।) ज्योतिष्मती लता। इति जटाधरः॥ महाज्योतिष्मती। इति राजनिर्घण्टः॥

पीतदारु, क्ली, (पीतञ्च तत् दारु चेति।) देवदारु। इत्यमरः। २।४।५३॥ (पर्य्यायोऽस्य यथा,—
"सुरदारु हकिलिमं सुराङ्गं भद्रदारु च।
देवकाष्ठम्पीतदारु देवदारु च दारु च॥"
इति वैद्यकरत्नमालायाम्॥)
सरलः। इति रत्नमाला॥ हरिद्रः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा,—
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा।
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च॥
पीतदुग्धा हरिद्रुग्धा पीतदारुकपीतकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पीतदुग्धा, स्त्री, पीतं दुग्धं यस्या यया वा। धेनुभेदे। दुग्धवत्यकैः संख्यिता गौः। इति हेमचन्द्रः॥ (पीतं पीतवर्णं दुग्धं क्षीरमस्याः। कटुपर्णी। चोक इति भाषा॥ यथास्याः पर्य्यायः।
"कटुपर्णी हैमवती हैमक्षीरी हिमावती।
हैमाद्री पीतदुग्धा च तनूमूलश्चोकसुच्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पीतदृः, पुं, (पीतो दृरिति नित्यकर्म्मधारयः।) सरलवृक्षः। दारुहरिद्रा। इत्यमरः। २।४।६०, २।४।९०१॥ (यथास्य पर्य्यायः।
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च।
पीतदृश्च हरिद्रश्च पीतदारुकपीतकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पीतनं, क्ली, (पीतं करोतीति। तत्करोतीति णिच्। ततो ल्युः। यद्वा, पीतं पीतवर्णं नयतीति। नी+डः।) कुङ्कुमम्। (यथा, श्रीकण्ठचरिते। ६। ३४।
"अपहृत्य पीतनमयेव-
ममरसुदृशां शरीरतः।
भीत इव गहनगाभिगुहां
प्रपलाय्य तूर्णमविशत् पयोभरः॥")
हरितालम्। पीतदारु। इत्यमरमेदिन्यौ॥

पीतनः, पुं, (पीतं करोतीति। णिच्। ततो ल्युः।) वृक्षः। इति राजनिर्घण्टः॥ आम्रातकः। इति मेदिनी। ने, ८९॥ (नन्दीवृक्षः। तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"नन्दीवृक्षस्ताम्रपाकी पलपाकी च पीतनः।
गन्धभाण्डो गन्धसुखो द्वितीयः शिप्रपाक्षसौ॥")

पीतनकः, पुं, (पीतन एव। पीतन+स्वार्थे कन्।) आम्रातकः। इति राजनिर्घण्टः॥

पीतपर्णी, स्त्री, (पीतानि पीतवर्णानि पर्णानि यस्याः। ङीप्।) शिंशपावृक्षः। इति शब्दचन्द्रिका॥ विछिटि इति भाषा॥

पीतपादा, स्त्री, (पीतौ पादौ यस्याः।) शारिकापक्षी। इति हेमचन्द्रः॥ पीतचरणयुक्ते, त्रि॥

पीतपुष्पं, क्ली, (पीतानि पुष्पाणि यस्य।) आकुल्यवृक्षः। इति राजनिर्घण्टः॥ (कुष्माण्डम्। तत्पर्य्यायो यथा भावप्रकाशे।
"कुष्माण्डं स्यात् पुष्पफलं पीतपुष्पं बृहत्फलम्॥")
हरिद्राभकुसुमञ्च॥

पीतपुष्पः, पुं, (पीतानि पीतवर्णानि पुष्पाणि यस्य।) कर्णिकारवृक्षः। इति शब्दचन्द्रिका॥ चम्पकवृक्षः। इति राजनिर्घण्टः॥ पीतभिण्टी। पिण्डीतकभेदः। इति रत्नमाला॥ (इक्षुदीवृक्षः। यथा, वैद्यकरत्नमालायाम्।
"पीतपुष्पोऽङ्गारपुष्प इक्षुदी तापसप्रियः॥"
राजकोशातकी। तत्पर्य्यायो यथा, भावप्रकाशे।
"धामार्गवः पीतपुष्पो जालिनी ज्ञातबोधना।
राजकोशातकी चेति तथोक्ता राजिमत्फला॥")

पीतपुष्पा, स्त्री, (पीतं पुष्पं यस्याः।) रक्तवारवधूः। भिक्षारिशाखुपः। आखुकी। इति राजनिर्घण्टः॥ (महाबला। तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"अत्यप्रोक्ता क्षतिबला पीतपुष्पा महाबला॥")

पीतपुष्पी, स्त्री, (पीतं पुष्पं यस्याः। जातित्वात् ङीष्।) शुक्लपुष्पी। सहदेवी। महाकोशातकी। अपुष्पी। इति राजनिर्घण्टः॥

पीतफलः, पुं, (पीतानि फलानि यस्य।) प्राखोटवृक्षः। इति त्रिकाण्डशेषः॥ कर्म्मारवृक्षः। इति राजनिर्घण्टः॥

पीतफलकः, पुं, (पीतफल एव। स्वार्थे कन्।) प्राखोटवृक्षः। इति भावप्रकाशः॥

पीतबालुका, स्त्री, (पीता बालुकेव चूर्णवरजो यस्याः।) हरिद्रा। इति त्रिकाण्डशेषः॥ पीतवर्णबालुकता च॥

पीतबीजा, स्त्री, (पीतं बीजं यस्याः।) मेथिका। इति राजनिर्घण्टः॥ पीतवर्णबीजयुक्ते, त्रि॥

पीतभृङ्गराजः, पुं, (पीतो भृङ्गराजः।) पीतभृङ्गराजः। पीत केशुरिया इति भाषा। तत्पर्य्यायः। स्वर्णभृङ्गारः २ हरिप्रियः ३ दैवप्रियः ४ वन्दनीयः ५ पावनः ६। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। चक्षुष्यत्वम्। केशरञ्जनत्वम्। कफमेदोपनाशित्वम्। तच्च गौडो रसायनः। इति राजनिर्घण्टः॥

पीतमणिः, पुं, (पीतो मणिरिति नित्यकर्म्मधारयः।) पुष्परागः। इति राजनिर्घण्टः॥ (पुष्परागशब्दोऽस्य विवरणं ज्ञातव्यम्॥)

पीतमाक्षिकं, क्ली, (पीतं माक्षिकम्।) माक्षिकम्। इति राजनिर्घण्टः॥

पीतसुरः, पुं, (पीतः पीतवर्णो सुरः।) सुरविशेषः। सोमा सुरा इति भाषा। तत्पर्य्यायः। वसुः २ खण्डोरः ३ प्रवेणः ४ जयः ५ शूरदः ६। इति हेमचन्द्रः। ४। २९८॥

पीतमूलकं, क्ली, (पीतं मूलमस्य । कप् ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

पीतयूथी, स्त्री, (पीता यूथी ।) स्वर्णयूथी । इति राजनिर्घण्टः ॥ (स्वर्णयूथीशब्दोऽस्या विवृतिर्विज्ञेया ॥)

पीतरक्तं, क्ली, (पीतं रक्तञ्च । वर्णो वर्णेनेति समासः ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥

पीतरागं, क्ली, (पीतो रागो वर्णो यस्य ।) किञ्जल्कम् । झिङ्गकम् । इति राजनिर्घण्टः ॥ पीतवर्णे, पुं । तद्वति, त्रि ॥

पीतरोहिणी, स्त्री, (पीता सती रोहतीति । रुह + णिनिः + ङीप् ।) काञ्चरी । इति भावप्रकाशः ॥ (यथा, भावप्रकाशे पूर्ब्बखण्डे प्रथमे भागे ।

"काञ्चीरी काञ्चरी हीरा काञ्चर्यः पीतरोहिणी ॥")

पीतलः, पुं, (पीतं लातीति । ला + कः ।) पीतवर्णः । इति हेमचन्द्रः ।४।३०॥ तद्युक्ते, त्रि ॥

पीतलकं, क्ली, (पीतलेन पीतेन वर्णेन कायति प्रकाशते इति । कै + कः ।) पित्तलम् । इति राजनिर्घण्टः ॥

पीतलोहं, क्ली, (पीतं लोहमिति नित्यकर्म्मधारयः ।) पित्तलभेदः । इति हेमचन्द्रः ।४।११४॥

पीतवासाः, [स्] पुं, (पीतं वासो वस्त्रं यस्य ।) श्रीकृष्णः । इति हलायुधः ॥ पीतवस्त्रयुक्ते, त्रि ॥ (यथा, महाभारते । २ । ६४ । ५३ ।

"यः सचक्रगदापाणिः पीतवासाः श्रितिप्रभः ।")

पीतवृक्षः, पुं, (पीतो वृक्षः ।) श्योनाकप्रभेदः । सरलवृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायः ।

"सरलः पीतवृक्षः स्यात्तथा सुरभिदारुकः ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

पीतशा(सा)लः, पुं, (पीतः शालो वृक्षविशेषः ।) असनवृक्षः । इति शब्दचन्द्रिका ॥ (यथा, कालिकापुराणे ६८ अध्याये ।

"पीतशालः परिमलो विमर्द्दोकासनद्रुमाः ॥")

पीतसारं, क्ली, (पीतः सारो यस्य ।) पीतवर्णचन्दनकाष्ठम् । हरिचन्दनम् । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।

"पीतसारं सुभद्रञ्च तत्पीतं हरिचन्दनम् ॥")

पीतसारः, पुं, (पीतः पीतवर्णः सारो यस्य ।) मलयजः । गोमेदकमणिः । इति मेदिनी । रे, २८३ ॥ अङ्कोठवृक्षः । इति जटाधरः ॥ तुरुष्कः । बीजकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।

"बीजकः पीतसारश्च पीतशालक इत्यपि ।
वन्यकपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः ॥")

पीतसारकः, पुं, (पीतः सारो यस्य । कप् ।) निम्बवृक्षः । अङ्कोठवृक्षः । इति राजनिर्घण्टः ॥

पीतसारि, क्ली, (पीतं पीतवर्णं सरति प्राप्नोतीति । सृ + णिनिः ।) सोतोऽञ्जनम् । इति शब्दचन्द्रिका ॥

पीतसालकः, पुं, (पीतः सालकः सालवृक्षः ।) पीतवर्णसालवृक्षः । पेया साल इति भाषा । तत्पर्य्यायः । सर्ज्जकः २ असनः ३ वन्यकपुष्पः ४ प्रियकः ५ बीजकः ६ । इत्यमरः । २ । ४ । ४२ ॥ अस्य पर्य्यायान्तरं गुणाश्च असनशब्दे द्रष्टव्याः ॥

पीतस्फटिकः, पुं, (पीतः स्फटिक इति नित्यकर्म्मधारयः ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥

पीता, स्त्री, (पीतो वर्णोऽस्यस्या इति । अच् । टाप् ।) हरिद्रा । इत्यमरः । २ । ६ । ४९ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।

"हरिद्रा पीतका गौरी काञ्चनी रजनी निशा ।
मेहघ्नी रजनी पीता वर्णिनी रात्रिनामिका ॥")

दारुहरिद्रा । महाज्योतिष्मती ॥ कपिलग्रिंग्रपा । प्रियङ्गुः । गोरोचना । इति राजनिर्घण्टः ॥ अतिविषा । इति शब्दचन्द्रिका ॥ (पीतवर्णयुक्ते, त्रि । यथा, विश्वकर्म्मप्रकाशे । २ । २४ ।

"श्वेता रक्ता तथा पीता कृष्णा वर्णानुपूर्ब्बशः ॥")

पीताङ्गः, पुं, (पीतं अङ्गं यस्य ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥

पीताब्धिः, पुं, (पीतः अब्धिः ससुद्रो येन ।) अगस्त्यमुनिः । इति हेमचन्द्रः । २ । ६६ ॥ (अगस्त्यमुनेः ससुद्रपानकथा यथा, महाभारते । ३ । १०५ । १—६ ।

"ससुद्रं स समासाद्य वातापिर्भगवानृषिः ।
उवाच सहितान् देवानृषींश्चैव समागतान् ॥
अहं लोकहितार्थं वै पिबामि वरुणालयम् ।
भवद्भिर्यदनुष्ठेयं तच्छीघ्रं संविधीयताम् ॥
एतावदुक्त्वा वचनं मैत्रावरुणिरच्युतः ।
ससुद्रमपिबत् क्रुद्धः सर्ब्बलोकस्य पश्यतः ॥
पीयमानं ससुद्रस्तु दृष्ट्वा सेन्द्रास्तदामराः ।
विस्मयं परमं जग्मुः स्तुतिभिश्चाप्यपूजयन् ॥
त्वं नस्त्राता विधाता च लोकानां लोकभावन ! ॥
तत्प्रसादात् ससुच्छेदं न गच्छेत् सामरं जगत् ॥
संपूज्यमानस्त्रिदशैर्महात्मा
गन्धर्ब्बतूर्य्येषु तदत्तु सर्ब्बशः ।
दीर्घेण पुण्येरवकीर्य्यमाणो
महार्ण्णवं निःसलिलं चकार ॥")

पीताम्बरः, पुं, (पीतं अम्बरं वस्त्रं यस्य ।) विष्णुः । इत्यमरः । १ । १ । १६ ॥ (यथा, विष्णुस्तोत्रे । २१ ।

"एतत्पातित्यदात्मो जघनमतिघनादेनसो मानभीयं ।
सातत्येनैव चेतोविषयमवतरत् पातु पीताम्बरस्य ॥")

श्लेष्मः । इति मेदिनी । रे, २८३ ॥ पीतवस्त्रयुक्ते, त्रि । हरिद्राभवसने, क्ली । (यथा,—

"पीताम्बरधरः स्रग्वी वनमालाविभूषितः ॥"

इति पुराणम् ॥)

पीताश्मा, [न्] पुं, (पीतः अश्मा ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥ (विवृतिरस्य पुष्परागशब्दे ज्ञातव्या ॥)

पीतिः, पुं, (पिबतीति । पा + क्तिच् । "घुमास्थागापेति ।" ६ । ४ । ६६ । इतीत्वम् ।) घोटकः । इत्यमरः । २ । ८ । ४२ ॥

पीतिः, स्त्री, (पा + भावे क्तिन् ।) पानम् । इति मेदिनी । ते, ३३ ॥ (पीयतेऽनयेति । करणे क्तिन्) सुरा । इति शब्दचन्द्रिका ॥

पीतिका, स्त्री, (पीतो वर्णोऽस्यस्या इति । टन् ।) हरिद्रा । इति रत्नमाला ॥ दारुहरिद्रा । इति राजनिर्घण्टः ॥ स्वर्णयूथी । इति जटाधरः ॥

पीती, [न्] पुं, (पीतं पानं प्राचुर्य्येणास्यस्येति । इनिः ।) पीतिः । घोटकः । इत्यमरटीकायां रायमुकुटः ॥

पातुः, पुं, (पिबति रसादीनिति । पा + "पः किच्च ।" उणां १ । ७१ । इति तुन् । स च कित् । कित्त्वात् ईत्वम् ।) सूर्य्यः । अग्निः । इत्युणादिकोषः । यूथपतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पीथं, क्ली, (पीयते इति । पा + "पातृतुदीति ।" उणां २ । ७ । इति थक् ।) जलम् । इति हेमचन्द्रः ॥ घृतम् । इत्युणादिकोषः ॥ (पिबति रसादीनिति । पा + कर्त्तरि थक् ।) सूर्य्यः । अग्निः । कालः । इति विकाण्डशेषः ॥

पीथिः, पुं, (पीति + पृषोदरादित्वात् तस्य थः ।) पीतिः । घोटकः । इत्यमरटीकायां स्वामी ॥

पीनः, त्रि, (ओ प्या यी ड दृद्धौ + क्तः । "ओदितश्च ।"८।२।४५। इति निष्ठातस्य नः ।) स्थूलः । इत्यमरः । ३ । १ । ६१ ॥ (यथा, आर्य्यासप्तशत्याम् । ५६१ ।

"वक्षःस्थलसुप्तं मम सुखसुपधातुं न मौलिमालभसे ।
पीनोत्तुङ्गस्तनभरदूरीभूतं रतश्रान्तौ ॥")

पीनसः, पुं, (पीनं स्थूलमपि जनं स्यति नाशयतीति । सो + कः ।) नासिकारोगविशेषः । पीनास इति भाषा । तत्पर्य्यायः । प्रतिश्यायः २ । इत्यमरः । २ । ६ । ५१ ॥ अपीनसः ३ प्रतिश्रायः ४ । इति भरतः ॥ नासिकामयः ५ । इति शब्दरत्नावली ॥ तस्य निदानं यथा,—

"आनह्यते यस्य विमुच्यते च
प्रक्लिद्यते धूपयति चैव नासा ।
न वेत्ति यो गन्धरसांश्च जन्तु-
र्भुंक्तं वमत्येति खलु पीनसेन ॥
तत्रानिलश्लेष्मभवं विकारं
ब्रूयात् प्रतिश्यायसमानलिङ्गम् ॥"

इति माधवकरः ॥

आमपीनसलक्षणं यथा,—

"शिरोगुरुत्वमरुचिर्नासास्रावश्च दुस्तरः ।
श्यामः क्षीयति यामीष्वामपीनसलक्षणम् ॥"

पक्वपीनसलक्षणं यथा,—

"आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति ।
खरवर्णविमुद्दिश्य पक्वपीनसलक्षणम् ॥"*॥

तस्यौषधानि यथा,—

"सर्ब्बेषु सर्ब्बकालं पीनसरोगेषु जातमात्रेषु ।
मरिचं गुडेन दत्त्वा भुञ्जीत नरः सुखं लभते ॥१

कटफलं पौष्करं मूलं योषं यासस्य कारवी।
एषां चूर्णं कषायं वा दद्यादाद्रेकजे रसैः॥
पीनसे स्वरभेदे च नासास्रावे हलीमके।
सन्निपाते कफे वाते कासे श्वासे च मुच्यते॥२॥
औषधिचक्रतालीशुतिन्तिड़ीकाम्लवेतसम्।
सचव्याजाजितुल्यांशमेलात्वक्पत्रपादिकम्॥
औषादिकमिदं चूर्णं पुराणगुड़मिश्रितम्।
पीनसश्वासकासघ्नं रुचिस्वरकरं परम्॥" ३॥
इति भावप्रकाशः॥*॥

"पिप्पलीत्रिफलाचूर्णं मधुसैन्धवसंयुतम्।
सर्व्वरोगेश्वरश्वासशीर्षपीनसनुद्भवेत्॥"
इति गारुड़े १८६ अध्यायः॥

(अस्य चिकित्सान्तरं यथा,—
"वातात् सकासवैस्वर्य्यं सचारं पीनसे घृतम्।
पिबेदसं पयश्चोष्णं स्नेहिकं धूममेव वा॥"
"दशमूलस्य निष्क्वाथे रास्नामधुककल्कवत्।
सिद्धं ससैन्धवं तैलं दशमूलो गुणाः स्मृतम्।
स्निग्धस्यास्थापनैर्दोषं निर्हरेदातपीनसे॥
स्निग्धाम्लोष्णैश्च लघ्वन्नं ग्राम्यादीनां रसैर्हितम्।
उष्णाम्बुना स्नानपाननिवातोष्णप्रतिश्रयः।
चिन्ताव्यायामवाक्चेष्टाव्यवायविरतो भवेत्।
पेयं सर्पिः पिबेत् सिद्धं मूलकैरहतमस्यः॥
पाचनार्थं पिबेत् पक्वे कार्य्यमूर्द्धविरेचनम्।
पाठादिरञ्जनैर्मूर्व्वापिप्पलीजातिपल्लवैः॥
दत्त्वा च साधितं तैलं नस्यं सम्यक्पीनसे।
पूयासृक्पित्तघ्नाः कषायो लवणानि च॥
पाकदाहाद्यरुचिषु शीता लेपाः ससेचनाः।
प्रेयसश्चोपचारश्च कषायस्वादुतिक्तकाः॥"
"गौरवारोचकेष्वादौ लङ्घनं कफपीनसे।
स्वेदाः सेकाश्च पाकार्थं स्निग्धे शिरसि सर्पिषा॥
लशुनं सुरचूर्णेन योजयेत्सरसायुतम्।
देयं कफघ्नं वमनमुत्क्लिष्टश्लेष्मणे हितम्॥
अपीनसे पूतिनस्ये घ्राणस्रावसकच्छके।
धूमः शस्तोऽवपीड़श्च कटुभिः कफपीनसे॥
मनःशिला वचायोषं विड़ङ्गं हिङ्गु गुग्गुलुः।
चूर्णो ध्रेयः प्रधमनः कटुभिश्च फलैस्तथा॥"
"स्निग्धस्य याहते वेगे छर्दनं कफपीनसे।
वमनीयघृतक्षीरैरतिलमाषयवागुभिः॥"
"सर्व्वजित् पीनसे दृष्टे कार्य्यं शीर्षे च शीर्षजित्।
शारीरबुद्धिमांसेषु क्रिया सर्व्वेष्वपेक्ष्य च॥"
इति चरके चिकित्सास्थाने २६ अध्याये॥
"सर्व्व एव प्रतिश्याया नरस्याप्रतिकारिणः।
क्रमेण रोगजनना जायन्ते दुष्टपीनसाः॥
बाधिर्य्यमान्ध्यमघ्राणं घोरांश्च नयनामयान्।
कासाग्निसादशोषांश्च दृष्ट्वा कुर्व्वन्ति पीनसाः॥"
इत्युत्तरतन्त्रे चतुर्विंशेऽध्याये सुश्रुतेनोक्तम्॥)

पीनसा, स्त्री, (पीनं स्रवतीति। सो+कः। टाप्।) कर्कटी। इति राजनिर्घण्टः॥ (कर्कटीशब्देऽस्या गुणादयो ज्ञातव्याः॥)

पीनसी, [न्] त्रि, पीनसरोगी। पीनसशब्दादस्त्यर्थे इनिप्रत्ययनिष्पन्नः॥ (यथा, सुश्रुते उत्तरतन्त्रे २४ अध्याये।

"विलङ्घने: पाचनदीपनीये-
रुपाचरेत् पीनसिनं यथावत्।
बहुद्रवैर्वातकफोपसृष्टं
प्रच्छर्दयेत् पीनसिनं वयस्थम्॥")

पीनोघ्नी, स्त्री, (पीनं स्थूलमूधोऽस्याः। "बहुव्रीहेरूधसो ङीष्।"४।१।२५। इति ङीष्। "उधसोऽनङ्।" ५।४।१३१। इति उधोऽन्तस्य बहुव्रीहेरनङादेशः।) गौवरस्तनी गौः। इत्यमरः। २।६।७१।

पीपरिः, पुं, (अपि पिपर्त्तीति। पॄ+इन्। अपेरल्लोपः। दीर्घश्च।) इक्षुवल्लः। इति राजनिर्घण्टः॥

पीय, प्रीणने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पीयूषं सौत्रधातुरयम्। इति दुर्गादासः॥

पीयुः, पुं, (पिबतीति। पा+"खरुशुकुपीयुनीलकुलिगु।" उणां। १।३७। इति कुः। निपातनात् युगागम इत्वं चान्तादेशः।) कालः। रविः। चूकः। इति मेदिनी। ये, ३७॥ काकः। इति संक्षिप्तसारोणादिवृत्तिः॥ (हिंसके प्रतिकूले च त्रि। यथा, ऋग्वेदे।१।१७४।८।
"भिनत्पुरो न भिदो व्यदेवीर्ननमो वधरदेवस्य पीयोः॥"
"पीयोः प्रतिकूलस्य वृत्रस्य।" इति तद्भाष्ये सायणः॥)

पीयूषं, क्ली, (पीयते इति। पीय सौत्रधातुः+"पीयेरूषन्।" उणां। ४।७६। इति ऊषन्।) अमृतम्। इत्यमरः। १।१।५१॥ (यथा, काशीखण्डे। २६।४६।
"खरसन्नामशमनी खनिः पीयूषपाथसाम्॥")
दुग्धम्। इति राजनिर्घण्टः॥ (यथा,—
"पानीयं क्लमनाशनं श्रमहरं मूर्च्छापिपासापहं तन्द्राच्छर्दिविबन्धहृल्लकरं निद्राहरं तर्पणम्।
हृद्यं गुप्तरसं त्रिदोषशमकं नित्यं हितं शीतलं लघ्वच्छं रसकारणन्तु निगते पीयूषवल्लीविनम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

पीयूषः, पुं, क्ली, (पीय+ऊषन्।) अभिनवं पयः। नवप्रसूतायाः गोः सप्तदिनाभ्यन्तरीयदुग्धम्। इत्यमरभरतौ॥
"अथ पीयूषपेयूषे नवं सप्तदिनावधि।"
इति शब्दार्णवः॥
"आसन्नराजप्रभवं क्षीरं पेयूष उच्यते॥"
इति हारावली॥

पीयूषमहाः, [स्] पुं, (पीयूषमण्डलमयं महः किरणं यस्य। यद्वा, पीयूषमिव महो यस्य।) चन्द्रः। इति शब्दरत्नावली॥

पीयूषरुचिः, पुं, (पीयूषं पीयूषमयी रुचिश्छविर्यस्य।) चन्द्रः। इति हलायुधः॥ (पीयूषे अमृते रुचिर्यस्य।) अमृतप्रियश्च॥

पील, रोधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) दीर्घौ। रोधः क्रियानिरोधः जड़ीभावः इत्यर्थः। पीलति पशुः। इति दुर्गादासः॥

पीलकः, पुं, (पीलति स्तम्भ्नातीति। पील+ण्वुल्।) पिपीलिका। इति हेमचन्द्रः॥ (कायस्थानां पङ्क्तिकरविशेषः। यथा, वङ्गजकुलाचार्य्यकारिकायाम्।
"आदित्या विष्णुगुप्ताश्च खिलश्च पीलकस्तथा॥")

पीलुः, पुं, (पीलति स्तम्भ्नातीति। पील+"स्तम्भ्यादयश्च।"उणां। १।३७। इति कुः।) प्रसूनम्। परमाणुः। मतङ्गजः। अस्थिखण्डम्। तालकाष्ठः। इति मेदिनी। ले, ३२॥ बाणः। क्षमिः। इति धरणिः॥ कोङ्कणादिदेशे प्रसिद्धः फलवृक्षविशेषः। पील इति भाषा। तत्पर्य्यायः। गुड़फलः २ अंसी ३। इत्यमरः। २।४।२८॥ शीतसहः ४ धानी ५ विरेचनः ६ फलशाखी ७ श्यामः ८ करभवल्लभः ९॥ (यथा, महाभारते। २।५०।४।
"उदुम्बरामीक्षिप्रतक्ष पुष्पाः पीलुप्रमीलूदेः॥")
अस्य फलगुणाः। श्लेष्मवायुगुल्मनाशित्वम्। पित्तदत्त्वम्। भेदकत्वम्। यत् स्वादु तिक्तं तत् गाढ़ुष्यं त्रिदोषहरत्वञ्च। इति राजनिर्घण्टः॥

पीलुनी, स्त्री, (पील+बाहुलकात् उन। गौरादित्वात् ङीष्।) मूर्व्वा। इति रत्नमाला॥

पीलुपत्रः, पुं, (पीलुयुक्तं पत्रमस्य।) मोरटालता। इति राजनिर्घण्टः॥

पीलुपर्णी, स्त्री, (पीलोरिव पर्णान्यस्याः। यद्वा, पीलुयुक्तानि पर्णान्यस्याः। "पाकर्कर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च।" ४।१।६४। इति ङीष्।) मूर्व्वा। विम्बिका। ओषधिभेदः। इति मेदिनी। णी, १०३॥

पीव, स्थौल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) पीवति लोकः। स्थूलः स्यादित्यर्थः। इति दुर्गादासः॥

पीव, [न्] त्रि, (प्यायते इति। ष्यैङ् वृद्धौ+"ष्यायेः सम्प्रसारणञ्च।" उणां। ४।११४। इति क्तनिप् सम्प्रसारणञ्च। "हलः।" ६।४।२। इति दीर्घः।) स्थूलम्। इत्यमरः। ३।१।६१॥ (यथा, भागवते। ६। १६। ६।
"पीवानं श्मश्रुलं श्रेष्ठं मीढुषं याजकोविदम्।
स एकोऽजदृषस्तासां बह्वीनां रतिवर्द्धनः॥")

पीवरः, त्रि, (प्यायते वर्द्धते इति। ष्यैङ्+"स्फिटरञ्छवरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः।" उणां। ३।१। अरच्। सम्प्रसारणं दीर्घश्च।) उपचितावयवः। मोटा इति भाषा। तत्पर्य्यायः। पीनः २ पीवा ३ स्थूलः ४। इत्यमरः।३।१।६१॥ (यथा, आर्य्यासप्तशत्याम्। ४२०।
"भयपिहितं बालायां पीवरमरुदयं मरोन्निद्रः।
निद्रायां प्रेमार्द्रः पश्यति निःस्वस्य निःस्वस्य॥")
पुं, तामसमन्वन्तरीयसप्तर्षिभेदः। यथा, मार्कण्डेये। ७४। ५६।

"ज्योतिर्धामा पृथुः काश्यश्चेोऽग्निर्वलकस्तथा।
पीवरश्च तथा ब्रह्मन्! सप्त सप्तर्षयोऽभवन्॥")

पीवरस्तनी, स्त्री, (पीवरौ स्थूलौ स्तनौ यस्याः।) "स्वाङ्गोपसर्ज्जनादिति।" ४।१।५४। इति ङीष्।) पीनोधी। इत्यमरः।२।६।७१॥ स्थूलस्तनयुक्ता नारी॥ (यथा, भारवौ। ८।१६।

"अपोहितुं लोचनतो सुखानिले-
रपारयन्तं किल पुष्पजं रजः।
पयोधरेणोरसि काचिदुन्मना:
प्रियङ्गवानोन्नतपीवरस्तनी॥")

पीवा, [न्] पुं, (प्यायते इति। प्यै ड वृद्धौ।+ "श्याप्योः सम्प्रसारणम्।" उणा० ४।१४। इति क्वनिप् सम्प्रसारणञ्च। "हलः।" ६।४। २। इति दीर्घः।) बलवान्। वायुः। इति संक्षिप्तसारोणादिवृत्तिः॥

पीवा, स्त्री, (पीयते इति। पी ङ य पाने+बाहुलकात् वः। ततष्टाप्।) उदकम्। इति संक्षिप्तसारोणादिवृत्तिः॥

पीवरा, स्त्री, (पीवर+टाप्।) अश्वगन्धा। शतावरी। इति राजनिर्घण्टः॥ स्थूला च॥

पीवरी, स्त्री, (प्यायते इति। प्यै+क्वरच्। सम्प्रसारणं दीर्घः ङीष् च।) शतमूली। इति रत्नमाला॥ शालपर्णी। इति भावप्रकाशे।१।१॥ तरुणी। गौः। इति संक्षिप्तसारोणादिवृत्तिः॥ (बर्हिषद्नामकपितॄणां मानसीकन्यानामन्यतमा। सा तु शुकदेवस्य पत्नी। यथा, हरिवंशे। १८। ४६—५२।

"एतेषां मानसी कन्या पिवरी नाम विश्रुता।
योगा च योगिपत्नी च योगिमाता तथैव च॥
भविनी द्वापरं प्राप्य युगं धर्म्मभृतां वरा।
पराशरकुलोद्भूतं शुको नाम महातपाः॥
भविष्यति युगे तस्मिन् महायोगी द्विजर्षभः।
व्यासादरण्यां सम्भूतो विधूमाग्निरिवोज्ज्वलन्॥
स तस्यां पितृकन्यायां पीवर्य्यां जनयिष्यति।
कृष्णं गौरं प्रभुं शम्भुं कृत्वीं कन्यां तथैव च॥")

पुंलिङ्गं, क्ली, (पुंसो लिङ्गं चिह्नम्।) पुंचिह्नम्। शिश्नः। (यथा, महाभारते। ५।१६४।१।

"किञ्चित् कालान्तरं दास्ये पुंलिङ्गं स्वमिदं तव।
आगन्तव्यं त्वया काले सत्यमेव वदस्व मे॥")

शब्दवाचकतायाम्, पुं। इति शब्दमाला॥ (पुंसो लिङ्गमस्येति। पुंलिङ्गविशिष्टे, त्रि। यथा, महाभारते। ६।५८।५७।

"पुंलिङ्गा इव नार्य्यस्तु स्त्रीलिङ्गाः पुरुषाभवन्।
दुर्य्योधने तदा राजन्! पतिते तनये तव॥")

पुंवृषः, पुं, (पुमानिव वर्षतीति। वृष+कः।) गन्धमूषिकः। इति शब्दमाला॥ छुँचा इति भाषा॥ (पुमान् गौः।) पुंगवश्च॥

पुंश्चलः, पुं, (पुंश्चलीव। उपचारात् पुंस्त्वम्।) व्यभिचारी। यथा, गारुडे ६६ अध्याये।

"ललाटोपहतास्तिस्रो रेखाः स्युः शतवर्षिणाम्।
पृथक्तं स्याच्चतस्रभिरायुः पञ्चभिरेव च॥
अरेखेणायुर्नवतिर्विच्छिन्नाभिश्च पुंश्चलाः॥"

पुंश्चली, स्त्री, (पुंसो भर्त्तुः सकाशात् चलति पुरुषान्तरं गच्छतीति। चल+अच्। गौरादित्वात् ङीष्।) असती। इत्यमरः।२।६।१०॥ अस्या अमरोक्तपर्य्यायः कुलटाशब्दे लिखितः। तदतिरिक्तपर्य्यायो यथा, धृष्टा १ दृप्ता २ धर्षिता ३। इति शब्दरत्नावली॥ लङ्का ४ निशाचरी ५ चपारण्डा ६। इति शटाधरः॥ तस्याश्चरित्रदोषादि यथा,—

"अहो! को वेद भुवने दुर्ज्ञेयं पुंश्चलीमनः।
पुंश्चल्यां यो हि विश्वस्तो विधिना स विडम्बितः।
वह्निष्कृतस्य यशसा धर्म्मेण सकुलेन च॥
वाञ्छितं नूतनं प्राप्य विनश्यति पुरातनम्।
सदा सकर्म्मसाध्या सा को वा तस्याः प्रियोऽप्रियः॥
देवे कर्म्मणि पित्र्ये च पुत्रे बन्धौ च भर्त्तरि।
दारुणं पुंश्चलीचित्तं सदा भ्रूभङ्गकर्म्मणि॥
प्राणाधिकं रतिज्ञं साप्तटङ्या हि पुंश्चली।
रत्नप्रदं रत्नविज्ञं विषदृष्ट्या हि पश्यति॥
सर्व्वेषां स्खलमस्त्येव पुंश्चलीनां न कुत्रचित्।
दारुणा पुंश्चलीजातिर्नरजातिभ्य एव च॥
निष्कृतिः कर्म्मभोगान्ते सर्व्वेषामस्ति निश्चितम्।
न पुंश्चलीनां विप्रेन्द्र! यावच्चन्द्रदिवाकरौ॥
अन्यासां कामिनीनाञ्च कीर्त्तिं हन्तुञ्च या दया।
सा नास्ति पुंश्चलीनान्तु कान्तं हन्तुं पुरातनम्॥
रतिज्ञं नूतनं प्राप्य विषतुल्यं पुरातनम्।
कान्तं दृष्ट्वा हिनस्त्येव सोपायेनावलीलया॥*॥
पृथिव्यां यानि पापानि पुंश्चलीष्वेव भारते।
तिष्ठन्ति ताभ्यो न परा: पापिष्ठाः सन्ति केचन॥
पुंश्चलीपरिपक्वान्नं सर्व्वपातकमिश्रितम्।
देवे कर्म्मणि पित्र्ये च देयं न च तथा जलम्॥
अन्नं विष्ठा पयो मूत्रं पुंश्चलीनाञ्च निश्चितम्।
दत्त्वा पिण्डेभ्यो देवेभ्यो मुक्ता च नरकं व्रजेत्॥
घृतवर्षं कालवृत्ते पक्वमेव सुदारुणे।
घोरान्धकारे क्षमयस्तं दशन्ति दिवानिशम्॥
पुंश्चल्यन्नञ्च यो भुङ्क्ते देवाद्यदि नराधमः।
सप्तजन्मकृतं पुण्यं तस्य नश्यति निश्चितम्॥
आयुःश्रीयशसां हानिरिह लोके परत्र च।
तस्मादयत्नाद्रक्षणीयं पाकपात्रं कलत्रकम्॥
पुंश्चलीदर्शने पुण्यं यात्रासिद्धिर्भवेद्ध्रुवम्।
स्पर्शने च महापापं तीर्थस्नानादिशुध्यति॥
स्नानं दानं व्रतञ्चैव जपञ्च देवपूजनम्।
निष्फलं पुंश्चलीनाञ्च भारते जीवनं वृथा॥"

उपस्थितसकामपुंश्चलीत्यागे दोषो यथा,—

"रहस्युपस्थितां कामात् पुंश्चलीञ्चेत्तेन्द्रियः।
परित्यजेद्धर्म्मभयादधर्म्मान्नरकं व्रजेत्॥"

सर्व्वदेव तस्यास्तपस्वित्याख्यत्वं गर्हितत्वञ्च यथा,

"उपस्थिता च या योषिदत्याख्या रागिणामपि।
श्रुतौ श्रुतमिति त्याज्या सर्व्वदेव तपस्विनाम्॥
अहो सर्व्वैः परित्याज्या पुंश्चली च विशेषतः।
धनायुःप्राणयशसां नाशिनी दुःखदायिनी॥
स्वकार्य्यतत्परा भ्रष्टा परकार्य्यविघातिनी।
निष्ठुरा नरघातिभ्यः सर्व्वापद्बीजरूपिणी॥
विद्युद्दीप्तिर्जले रेखा लोभाग्नेर्वी यथा भवेत्।
परद्रोहाद्यथा सम्पत् कुलटाप्रेमतत्परम्॥
सर्व्वेभ्यो हिंसजन्तुभ्यो विपद्बीजा सदैव सा।
यो विश्वसेत्तां संमूढो विपत्तस्य पदे पदे॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। २३। २४। ३२ अध्यायाः॥

पुंश्चिह्नं, क्ली, (पुंसः पुरुषस्य चिह्नम्।) शिश्नः। इति हेमचन्द्रः। ३। २७४।

पुंस, क मर्द्दे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) ओष्ठ्यवर्गशेषोपधः। संयोगादनुस्वारः। तेन क्विपि पुंसोऽसुङ्नाविति सुडि पुमान्। मर्द्दोऽभिमर्द्दनम्। क, पुंसयति खलं राजा। इति दुर्गादासः॥

पुंसवनं, क्ली, (पुमांसमिव सूते बलप्रदानेन पुरुषवत् जनयत्यनेनेति। सू+करणे ल्युट्।) दुग्धम्। इति हेमचन्द्रः। ३। ४०४॥ (पुमांसं सूतेऽनेनेति। सू ड ल+करणे ल्युट्।) संस्कारविशेषः। इति चिकाण्डशेषः॥ (यथा, रघुवंशे। ३। १०।

"यथाक्रमं पुंसवनादिकाः क्रियाः
धृतेश्च धीरः सदृशीर्यधत्त सः॥")

अस्येतिकर्त्तव्यता यथा। "गर्भस्य तृतीयमासोपक्रमे यच्छुद्दिनं तस्मिन् पतिः कृतनित्यक्रियः कृतवृद्धिश्राद्धः चन्द्रनामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य कृतस्नानां वधूमग्नेः पश्चिमायां दिशि स्वदक्षिगतः कुशेषु प्राङ्मुखीमुपवेश्य प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीममौ हुत्वा महाव्याहृतिहोमं कुर्य्यात्। यथा। प्रजापतिर्ऋषिर्गायत्री छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः ओं भूः स्वाहा। प्रजापतिर्ऋषिरुष्णिक् छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः ओं भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप् छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः ओं स्वः स्वाहा। ततः पतिरुत्थाय वधूपृष्टदेशे स्थितो वधूदक्षिणस्कन्धं सृष्ट्वा अपसव्येन दक्षिणहस्तेन अग्रवर्त्तितं वधूनाभिदेशं सृशन् जपति। प्रजापतिर्ऋषिरनुष्टुप् छन्दो मित्रावरुणाग्निवायवो देवताः पुंसवने विनियोगः।

ओं पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ।
पुमानग्निश्च वायुश्च पुमान् गर्भस्त्वोदरे॥

इत्येकं पुंसवनम्॥*॥

अपरपुंसवनकर्म्मार्थञ्च वटवृक्षस्य पूर्व्वोत्तरशाखायां फलयुगलशालिनीं क्षमिभिरनुपहतां वटयुङ्गां यवानां माषाणां वा त्रिभिस्त्रिभिर्गुंडकैः सप्त वारान् सप्तभिर्मन्त्रैः क्षीणीयात्। सप्तानां मन्त्राणामृष्यादयः साधारणाः। प्रजापतिर्ऋषिः सोमवरुणवसुरुद्रादित्यमरुद्विश्वेदेवा देवता न्यग्रोधशुङ्गापरिक्रयणे विनियोगः ओं यत्ते सौम्यं सोमायत्वा राज्ञे परिक्रीणामि। इति गुडकलयेन एकं क्रयणम्॥१॥

ॐ यद्यसि वारुणी वरुणायत्वा राज्ञे परिक्रीणामि। इति गुडकलयेण द्वितीयं क्रयणम् ॥ २ ॥ ॐ यद्यसि वसुभ्यो वसुभ्यस्त्वा परिक्रीणामि। इति गुडकलयेण तृतीयं क्रयणम् ॥ ३ ॥ ॐ यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा परिक्रीणामि। इति गुडकलयेण चतुर्थं क्रयणम् ॥४॥ ॐ यद्यसि आदित्येभ्य आदित्येभ्यस्त्वा परिक्रीणामि। इति गुडकलयेण पञ्चमं क्रयणम् ॥५॥ ॐ यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा परिक्रीणामि। इति गुडकलयेण षष्ठं क्रयणम् ॥६॥ ॐ यद्यसि विश्वेभ्यो देवेभ्यो विश्वेभ्यो देवेभ्यस्त्वा परिक्रीणामि। इति गुडकलयेण सप्तमं क्रयणम् ॥ ७ ॥ ततः क्रीतां वटशुङ्गां अनेन मन्त्रेण हस्तादाहरेत्। प्रजापतिर्ऋषिरोषधयो देवता न्यग्रोधशुङ्गाच्छेदने विनियोगः। ॐ ओषधयः समनसो भूत्वा अस्यां वीर्यं समाधत्त इयं कर्म्म करिष्यति। ततस्त्वां लवणवेष्टितामन्तरीक्षेणानीय अन्तरीक्षे स्थापयेत्। ततः शुभशोभननान्नोऽमेद्यत्तरतः प्रक्षालितशिलायां ब्रह्मचारी गर्भवती वा श्रुतस्वाध्यायहीनो वा ब्राह्मणः प्राङ्मुख आचारतो नीहारजलेन अनाकृत्तलोष्टेन पुनः पुनः पेषयेत्। ततोऽग्नेः पश्चिमत उत्तरायेषु कुशेषु पश्चिमाभिमुखीं वधूं पूर्व्वदिगानतमस्तकां कृत्वा तत्पृष्ठदेशे स्थितः पतिर्दक्षिणपाणेरङ्गुष्ठानामिकाभ्यां वक्षवङ्कां पेषितवटशुङ्गां गृहीत्वा गर्भवत्या दक्षिणनासाविवरे शुङ्गारसं निःक्षिपति। प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्नीन्द्रदेवतयो देवता न्यग्रोधशुङ्गारसस्य दाने विनियोगः।

ॐ पुमानग्निः पुमानिन्द्रः पुमान् देवो बृहस्पतिः। पुमांसं पुत्रं विन्दस्व तं पुमाननुजायताम् ॥

ततो महाव्याहृतिहोमं कृत्वा तूष्णीं प्रादेशप्रमाणां घृताक्तां समिधमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीच्यं ग्राम्यायणहोमादिकामदेयगानान्तं कर्म्म कृत्वा कर्म्मकारयित्रे ब्राह्मणाय दक्षिणां दद्यादिति पुंसवनम्।" इति दशकर्म्मपद्धतौ भवदेवभट्टः ॥*॥ अथ पुंसवनोक्तवाराः। रविमङ्गलबृहस्पतयः। नक्षत्राणि। पूर्व्वाषाढोत्तराषाढापूर्व्वभाद्रपदोत्तरभाद्रपदपुष्यपुनर्व्वसुमूलार्द्रारेवतीहस्ताश्रवणाश्लेषाश्विनः। तिथयः। नन्दा भद्राः। लग्नानि। कुम्भसिंहधनुर्मीनमिथुनानि। स्त्रियाश्चन्द्रादिशुद्धौ दशयोगभङ्गत्रिष्टिभद्राव्यतीपातादीन् परित्यज्य गर्भधारणदिनावधिद्वितीयमासे कर्त्तव्यम्। इति ज्योतिषम् ॥ * ॥ स्त्रीकर्त्तव्यव्रतविशेषः। यथा,—

श्रीराजोवाच।

"व्रतं पुंसवनं ब्रह्मन्! भवता यदुदीरितम्।
तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥

श्रीशुक उवाच।

शुक्ले मार्गशिरे पक्षे योषिद्भर्त्तुरनुज्ञया।
आरभेत व्रतमिदं सर्व्वकामिकमादितः ॥
निशम्य मरुतां जन्म ब्राह्मणानुमतेन च।
स्नात्वा शुक्लदती शुक्ले वसीतालङ्कृताम्बरे।
पूजयेत् प्रातराशात् प्राक् भगवन्तं श्रिया सह ॥
अजं ते निरपेक्षाय पूर्णकाम! नमोऽस्तु ते।
महाविभूतिपतये नमः सकलसिद्धये ॥
यथा त्वं कृपया धृत्या तेजसा महिमौजसा।
जुष्ट इंशगुणैः सर्व्वैस्ततोऽसि भगवान् प्रभुः ॥
विष्णुपत्नि! महामाये महापुरुषलक्षणे।
प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥
ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्ब्बलिमुपहरामीति। अनेनाहरहर्म्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शन-स्नान-वासोपवीत-भूषणगन्धपुष्पधूपदीपोपहारादुपचारान् समाहितोपाहरेत्।
हविःशेषञ्च जुहुयादनले द्वादशाहुतीः।
ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति।
श्रियं विष्णुञ्च वरदावग्निषां प्रभवायुभौ।
भक्त्या संपूजयेन्नित्यं यदीच्छेत् सर्व्वसम्पदः ॥
प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेण चेतसा।
दशवारं जपेन्मन्त्रं ततः स्तोत्रमुदीरयेत् ॥
युवाभ्यां विश्वस्य विभू जगतः कारणं परम्।
इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया।
तस्या अधीश्वरः साक्षात् त्वमेव पुरुषः परः ॥
त्वं सर्व्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान्।
गुणयक्तिरियं देवी यज्ञको गुणभुग्भवान् ॥
त्वं हि सर्व्वगुरीर्य्यात्मा श्रीः गुरीरेन्द्रियाश्रयः।
नामरूपे भगवती प्रत्ययस्यमपाश्रयः ॥
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ।
तथा म उत्तमश्लोक! सन्तु सत्या महाशिषः ॥
इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह।
तन्निसार्य्योपहरणं दत्त्वाचमनमर्च्चयेत् ॥
ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा।
यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्च्चयेद्धरिम् ॥
पतिञ्च परया भक्त्या महापुरुषचेतसा।
प्रियैस्तैस्तैरुपनमेत् प्रेमशीलः स्वयं पतिः ॥
विभ्रयाद् सर्व्वकर्म्माणि पत्न्या उच्चावचानि च।
शक्तमेकतरेणापि दम्पत्योरुभयोरपि ॥
पत्न्यां कुर्य्यादनर्हायां पतिरेतत् समाहितः।
विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात् कथञ्चन ॥
विप्रान् स्त्रियो वीरवतीः सगृहान्बलिमर्हणैः।
अर्च्चेदहरहर्भक्त्या देवं नियममास्थिता ॥
उद्यस्य देवं स्वे धाम्नि तन्निवेदितमश्नतः।
अद्यादात्मविशुद्ध्यर्थं सर्व्वकामसमृद्धये ॥
एतेन पूजाविधिना मासान् द्वादशहायनम्।
नीत्वाथोपरमेत् साध्वी कार्त्तिके चरमेऽहनि ॥
स्नेभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्च पूर्व्ववत्।
पयःस्नुतेन जुहुयाच्चरुणा सह सर्पिषा।
पाकयज्ञविधानेन द्वादशैवाहुतीः पृथक् ॥
आग्निषः शिरसादाय द्विजैः प्रीतैः समीरिताः।
प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया ॥
आचार्य्यमग्रतः कृत्वा वाग्यतः सह बन्धुभिः।
दद्यात् पत्न्यै चरोः शेषं सुप्रजस्त्वं सुसौभगम् ॥
एतच्चरित्वा विधिवद्व्रतं विभोः
रभीप्सितार्थं लभते पुमानिह।
स्त्री चैतदास्थाय लभेत सौभगं
श्रियं प्रजां जीवपतिं यशो गृहम् ॥
कन्या च विन्देत समग्रलक्षणं
पतिं त्ववीरा हतकिल्बिषाङ्गतिम्।
नष्टप्रजा जीवसुता धनेश्वरी
सुदुर्भगा सुभगा रूपमग्रियम् ॥
विन्देद्विरूपा विरुजा विमुच्यते
य आमयावीन्द्रियकल्यदेहम्।
एतत् पठन्नभ्युदये च कर्म्म-
ण्यनन्तदृष्टिः पितृदेवतानाम् ॥
तुष्टाः प्रयच्छन्ति समस्तकामान्
होमावसाने हुतभुक् श्रीर्हरिश्च।
राजन्महन्मरुतां जन्मपुण्यं
हितेव्रतचाभिहितं महत्ते ॥"

इति श्रीभागवते ६ स्कन्धे पुंसवनव्रतकथनं १६ अध्यायः ॥ (पुंवत् क्षयते इति। कर्म्मणि क्विप्। गर्भः। इति श्रीधरस्वामी ॥ यथा, भागवते। ५। २४। १५। "यस्मिन् प्रविष्टेऽसुरबधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च ॥"*॥ पुंस्त्वोत्पादके, त्रि। यथा, भागवते। ८। ६। २८।
"प्रपच्छुः कस्य कर्म्मेदं पीतं पुंसवनं जलम्।"
तथा च तत्रैव। ४। १३। ३७—३८।
"स विप्रानुमतो राजा गृहीत्वाञ्जलिनौदनम्।
अवघ्राय सदा युक्तः प्रादात् पत्न्या उदारधीः ॥
सा तत् पुंसवनं राज्ञी प्राश्य वै पत्युरादधे।
गर्भं काल उपावृत्ते कुमारं सुषुवे प्रजाः ॥")

पुंस्कोकिलः, पुं, (पुमान् कोकिलः।) पुरुषपिकपक्षौ। पुमुसृशब्देन कोकिलशब्दस्य कर्म्मधारयसमासे तस्यान्तलोपे पुंसः सन्निति मस्य सनि हते मस्यानुस्वारे निष्पन्नः। इति सुग्धबोधव्याकरणम् ॥ (यथा, कुमारे। ३। ३२।

"चूताङ्कुराखादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज ॥")

पुंस्त्वं, क्ली, (पुंसः पुरुषस्य भावः। पुमुस्+त्व।) शुक्रम्। इति हेमचन्द्रः। ३। २६३ ॥ पुरुषत्वञ्च ॥ (यथा, मार्कण्डेये। ५०। १२।
"सौम्यासौम्यैस्तथा भ्रान्तेः पुंस्त्वं स्त्रीत्वञ्च स प्रभुः।
विभेद बहुधा देवः पुरुषैरसितैः सितैः ॥")

पुंस्त्वविग्रहः, पुं, (पुंस्त्वस्य शुक्रस्येव विग्रहो यस्य।) भूलशुनम्। इति राजनिर्घण्टः ॥

पुक्कशः, पुं, (पुक् कुत्सितं कशति गच्छतीति। कश गतौ + अच्।) चण्डालः। इत्यमरः। २। १०। २० ॥ (यथा, मार्कण्डेये। १५। १८।
"अक्षतश्चोदमः पुंसां विमुक्तो नरकान्नरः।
मत्स्यस्तु वायसः कूर्म्मः पुक्कशो जायते ततः ॥"
स तु निषादात् शूद्रायां जातो जातिविशेषः। यथा, मनुः। ४। ७६।
"न संवसेच्च पतितैर्नचाण्डालैर्न पुक्कशैः ॥")

पुक्कसः, पुं, (पुक् कुत्सितं कषतीति। कष गतौ + अच्।) चण्डालः। इत्यमरटीकायां भरतः॥

पुक्कसः, पुं, (पुक् कुत्सितं कसतीति। कस गतौ + अच्।) चण्डालः। (स तु निषादात् शूद्रायां जातः। यथा, मनुः। १०। १८।

"जातो निषादात् शूद्रायां जात्या भवति पुक्कसः॥")

अधमे, त्रि। इति मेदिनीशब्दरत्नावल्यौ॥

पुक्कसी, स्त्री, कालिका। नीली। इति मेदिनीशब्दरत्नावल्यौ॥ (पुक्कस + जातौ ङीष्। पुक्कसस्त्रीजातिः। यथा, मनुः। १०। ३८।

"चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान्। पुक्कस्यां जायते पापः सदा सज्जनगर्हितः॥")

पुङ्खः, पुं, (पुमांसं खनतीति। खन + डः।) काण्डमूलम्। इत्यमरः। ३। ५। १७॥ पुङ्खल इति ख्यातम्॥ (अर्शआदित्वात् क्लीवलिङ्गोऽपि॥ यथा, रघुः। २। ३१।

"सत्त्वाङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे॥"

मल्लिनाथः। इति हेमचन्द्रटीका॥)

पुङ्गः, पुं, क्लीं, (पुङ्ग + एषोदरादित्वात् साधुः।) समूहः। इति शब्दचन्द्रिका॥

पुङ्गलः, पुं, (पुङ्गं देहसमूहं जाति आदत्ते इति। पुङ्ग + ला + कः।) आत्मा। इति भूरिप्रयोगः॥

पुङ्गवः, पुं, (पुमान् गौः। "गोरतद्धितलुकि।" ५। ४। ९२। इति टच्।) वृषः। (यथा, हरिवंशे। ७५। ४१।

"भवता रचिता लोका गोलोकश्च महालयम्। यद्वयं पुङ्गवैः सार्द्धं वर्त्तामः प्रसवेच्छया॥")

औषधभेदः। (पुमान् गौरिव मदवत्त्वाद्यतिशय्यादिद्योतनसमासः।) उत्तरपदस्थः श्रेष्ठवाचकः। इति मेदिनी। वे, ४४॥ (यथा, भागवते। १। ६। १२।

"इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभूम्नि॥")

वृषभौषधम्। महोषः। इति राजनिर्घण्टः॥

पुच्छ, प्रसादे। इत्यमरटीकायां रायमुकुटधृतधातुः॥ (भ्वां-परं-अकं-सेट्॥)

पुच्छः, पुं, क्लीं, (पुच्छतीति। पुच्छ प्रसादे + अच्।) लाङ्गूलम्। इत्यमरः। २। ८। ५०॥ (यथा, देवीभागवते। ५। ७। २६।

"खुरघातेन यथा देवान् पुच्छस्य भ्रमणेन च। स जघान रवाविष्टो महिषः परमाद्भुतः॥")

पक्षाङ्गे, पुं। इति मेदिनी। छे, ५॥ (यथा, महाभारते। ७। ६। २८।

"उल्का ज्वलन्ती संग्रामे पुच्छेनाहत्य सर्व्वशः॥")

लोमवल्लाङ्गूलेकलापे च, क्ली। इत्यादिकोषः॥

पुच्छटि, स्त्री, (पुच्छ प्रसादे + भावे क्विप्। पुच्छं प्रसादं अटतीति। अट गतौ + इन्।) अङ्गुलिमोटनम्। इति त्रिकाण्डशेषः॥ आङ्गुलमट्काग इति भाषा॥

पुच्छदा, स्त्री, (पुच्छमिव ददातीति। दा + कः।) लक्ष्मणाकन्दः। इति राजनिर्घण्टः॥

पुच्छी, [न्] पुं, (पुच्छोऽस्यास्तीति। पुच्छ + इनिः।) अर्कवृक्षः। इति राजनिर्घण्टः॥ कुक्कुटः। इति शब्दचन्द्रिका॥ लाङ्गूलयुक्ते, त्रि॥

पुञ्जः, पुं, (पिञ्जयते पिञ्जयतीति वा। पिञ्जि + अच्। पृषोदरादित्वात् साधुः।) समूहः। राशिः। इत्यमरः। २। ५। ४२॥ (यथा, मार्कण्डेये। ८। ८२।

"यष्टीतपत्रिपुञ्जश्च शुकमाल्यैरलङ्कृतः॥")

पुट, क पूर्त्तौ। भासि। इति कविकल्पद्रुमः॥ (पुरां-परं-पूर्त्तौ सकं-भासि अकं-सेट्।) क, पोटयति। भासि दीप्तौ। इति दुर्गादासः॥

पुट, त् क संसर्गे। इति कविकल्पद्रुमः॥ (अदन्तपुरां-परं-सकं-सेट्।) पुटयति पुष्पं सूत्रेण जनः संहतीत्यर्थः। इति दुर्गादासः॥

पुट, श्लि श्लेषे। इति कविकल्पद्रुमः॥ (तुदां-कुटां-परं-अकं-सेट्।) श्लि, पुटति अपुटीत् पुपोट। श्लेषः सम्बन्धीभावः। इति दुर्गादासः॥

पुटं, क्लीं, (पुटतीति। पुट संश्लेषे + कः।) जातीफलम्। इति राजनिर्घण्टः॥ उपर्य्यधोभावापन्नसंयुक्तसदृशकपालद्वयरूपौषधपाकपात्रम्। धात्वादिमारणोपयुक्तान् पुटप्रकारानाह रसप्रदीपे।

"लोहादेरपुनर्भावस्तद्गुणत्वं गुणाढ्यता। सलिले तरणञ्चापि तल्लिङ्गं पुटनाञ्चयेत्॥ गम्भीरे विस्तृते कुण्डे छिद्रशून्ये चतुरस्रके। वनोपलसहस्रेण पूरिते पुटनौषधम्॥ कोष्ठे रुद्धं प्रयत्नेन गोविड्डोपरि धारयेत्। वनोपलसहस्रार्द्धं कोष्ठिकोपरि निःक्षिपेत्॥ वह्निं निःक्षिपेत्तत्र महापुटमिति स्मृतम्॥१॥ कोष्ठं मुखा। गोविड्डा गोरटा। इति महापुटम्॥ सपादहस्तमानेन कुण्डे निम्ने तथायते। वनोपलसहस्रेण पूर्णमध्ये विधारयेत्॥ पुटगर्भसंयुक्तां कोष्ठिकां सुदृतां सुखे। अधोऽर्द्धानि करस्थानि अर्द्धान्युपरि निःक्षिपेत्॥ एतत्तुपुटं प्रोक्तं सर्व्वपुटोत्तमम्॥ हस्तचतुर्विंशत्यङ्गुलप्रमाणः स यथादः तेन त्रिंशद्दङ्गुलप्रमाणेनेत्यर्थः। अतएवोक्तम्।

साधारणो नराङ्गुल्या त्रिंशद्दङ्गुलको गजः॥

इति गजपुटम्॥ २॥

अरत्निमात्रके कुण्डे पुटं वाराहमुच्यते॥ ३॥ वितस्तिमात्रके खाते कथितं कौक्कुटं पुटम्। 'अरत्निस्तु निष्कनिष्ठेन सुदृढा' इत्यमरः। २। ६। ८६। निःसृतकनिष्ठया सुदृढोपचयिनो हस्तोऽरत्निरित्यर्थः।

षोडशाङ्गुलके खाते कस्यचित् कौक्कुटं पुटम्॥४॥ यत् पुटं दीयते खाते क्षारसंस्वेदगोमये। कपोतपुटमेतत्तु कथितं पुटपण्डितैः॥ ५॥ गोडाल्गगोखरक्षुण्णं शुष्कचूर्णितगोमयम्। गोवरं तत् समाख्यातं वरिष्ठं रससाधने॥ इष्टदाहक्षयितैर्यन्त्रैर्गोवरैर्दीयते पुटम्।

पुटपा तन्नोवरपुटं प्रोक्तं भिषग्भिः कृतभक्षणात्॥६॥ इष्टदाहे तुषैः पूर्णे मध्ये मूषां विधारयेत्। चिप्त्वाग्निं सप्तयेद्दाहं तद्दाहपुटमुच्यते॥"॥

इति भावप्रकाशे पूर्व्वखण्डे २ भागः॥

पुटः, पुं क्लीं, (पुटतीति। पुट श्लेषे + कः।) अश्वखुरः। इति शब्दरत्नावली॥

पुटः, त्रि, (पुट् + कः।) आच्छादनम्। पत्राद्यिरचितः पुष्पाद्याधारः। यथा, रघुः। २। ६५।

"दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश॥"

(यथा च मनौ। ६। २८।

"अश्मादाहृत्य वान्नीयादथो शाकान् वने वसन्। प्रतियह्य पुटेनैव पाणिना सकलेन वा॥")

मिथःसंश्लेषः। इति मुकुटः॥ इत्यमरटीकायां भरतः॥

पुटकं, क्लीं, (पुटवत् कायतीति। कै + कः।) पद्मम्। इति शब्दरत्नावली॥ स्वार्थे कप्रत्यये पुटशब्दार्थोऽप्यत्र॥

पुटकन्दः, पुं, (पुटमिव कन्दो यस्य।) कोलकन्दः। इति राजनिर्घण्टः॥

पुटकिनी, स्त्री, (पुटकानि सन्त्यस्येति। पुटक + "पुष्करादिभ्यो देशे।" ५। २। १३५। इति इनिः। स्त्रियां ङीप्।) पद्मिनी। पद्मयुक्तदेशः। पद्मसमूहः पद्मवता च। इति हेमचन्द्रः॥

पुटग्रीवः, पुं, (पुटमिव ग्रीवा यस्य।) गर्गरी। ताम्रकुम्भः। इति मेदिनी। वे, ६१॥

पुटपाकः, पुं, (पुटेन पाकः।) पुटाभ्यन्तरिकौषधपचनम्। अथ पुटपाकविधिः।

"पुटपक्वस्य कल्कस्य स्वरसो यद्यते यतः। अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया॥ पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्त्मना। लेपश्च द्व्यङ्गुलं स्थूले कुर्य्याद्वाङ्गुलिमात्रकम्॥ काशरौवटजम्बादिपत्रैर्वेष्टनमुत्तमम्। पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत्॥ कल्कचूर्णत्रयादास्तु देयाः कोलमिता बुधैः॥ अपि च।

द्वे विल्वे स्निग्धमांसस्य परं द्रव्यं पलं मतम्। द्रव्यस्य कुड्वमात्रं सर्व्वमेकत्र पेषयेत्॥ तद्देयं समालोप्य पत्रैः सूत्रपरिवेष्टितम्। पुटपाकविधानेन ततः पक्वं तदृतं बुधः॥ तर्म्मोक्तेन विधिना यथावदवचारयेत्॥ हरिमध्ये निषेव्यः स्यान्नित्यमुत्तानशायिनः। क्षेहगो लेखनश्चैव रोपणश्चेति स त्रिधा॥ स्निग्धः स्निग्धो विरूक्षस्य स्निग्धस्य स तु लेखनः। उष्णेनाग्नेयमितरः पित्तास्रघ्नश्च वातनुत्॥ इतरो रोपणः।

स्नेहमांसवसामज्जमेदःस्त्रावौषधैः कृतः। स्नेहनः पुटपाकः स्यात्तार्य्यो वा कथ्यते तु सः॥ वाक्यृतं क्षीरिकाघृतम्।

जाङ्गलानां पलन्मांसैर्लेखनद्रव्यसंयुतैः। जलाढकैर्जलस्यान्त्यगुडविड्लवणैर्युतैः॥ वसाप्रस्थेनकाम्बष्ठस्रोतोजदधिमस्तुभिः।

लेखनो वाक्शतं तस्य परं धारणमिष्यते ॥
स्नायुजाङ्गलमध्याभ्यतिक्तकद्रव्यभावितः ।
लेखनात्त्रिगुणो धार्य्यः पुटपाकस्तु रोपणः ॥
तिक्तकद्रव्याण्याह ।
निम्बाष्टतात्रपटोलनिदिग्धिकाभिः
स्यात् पञ्चतिक्तक इति प्रथितो गणोऽयम् ॥
आचरेत्तर्पणोक्तानु क्रियां व्यापत्तिदर्शने ॥
व्यापत्तिदर्शने मिथ्याकृतपुटपाकजनितव्याधि-दर्शने ।
तेजांस्यनिलमाकाशमादर्शे भास्कराणि च ।
नेत्रेत तर्पिते नेत्रे यच्च वा पुटपाकवान् ॥"
इति भावप्रकाशः ॥

पुटभेदः, पुं, (पुटं संश्लिष्टं भिनत्तीति । भिद+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) नदीवक्रम् । (नदीचक्रम् । इत्यमरः । १ । १० । ७ ॥ यथा, आर्य्यासप्तशत्याम् । ३६८ ।
"प्रायेणैव हि मलिना मलिनानामाश्रयत्वसुप-यान्ति ।
कालिन्दीपुटभेदः कालियपुटभेदनं भवति ॥")
पत्तनम् । आतोद्यम् । इति मेदिनी । दे, ५० ॥

पुटभेदनं, क्ली, (पुटैरश्वखुरैर्भिद्यते इति । भिद+कर्म्मणि ल्युट् ।) नगरम् । इत्यमरः ।२।२।१॥ (यथा, महाभारते । १ । १०० । १२ ॥
"स हास्तिनपुरे रम्ये कुरूणां पुटभेदने ।
वसन् सागरपर्य्यन्तामन्वशासद्वसुन्धराम् ॥")

पुटालुः, पुं, (पुटः संश्लिष्ट आलुः ।) कोलकन्दः । इति राजनिर्घण्टः ॥

पुटिका, स्त्री, (पुटं अस्त्यस्या इति । पुट+इन् +टाप् ।) एला । इति हारावली । ६७ ॥

पुटितं, क्ली, (पुटं जातमस्येति । पुट+इतच् । पुट+क्त वा ।) हस्तपुटम् । पाटितम् । स्यूते, त्रि । इति मेदिनी । ते, १३४ ॥ आद्यन्तप्रथ-वादियुक्तमन्नादौ पुटप्राप्ते च त्रि ॥

पुटी, स्त्री, (पुटतीति । पुट+कः । गौरादित्वात् ङीष् ।) कौपीनम् । इति जटाधरः ॥ आच्छा-दनम् । पत्रादिरचितः पुष्पाद्याधारः । इत्य-मरभरतौ ॥ (यथा, आर्य्यासप्तशत्याम् ।१४६।
"एरण्डपत्रशयना जनयन्ती खेदमलघुजघन-तटा ।
धूलिपुटीव मिलन्ती स्मरज्वरं हरति हलिक-वधूः ॥")

पुटोटजं, क्ली, (पुटं संश्लिष्टमुटजमिव ।) श्वेत-च्छत्रम् । इति त्रिकाण्डशेषः ॥

पुटोदकः, पुं, (पुटे अन्तर्भुजपात्रमध्ये उदकं यस्य ।) नारिकेलः । इति हारावली । १०० ॥

पुड्, क तौच्छ्ये । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) पञ्चमस्वरी । टड्याक्तः । एक-टकार इति रामः । क, पुड्यति । तौच्छ्यमल्पी-भावः । इति दुर्गादासः ॥

पुड, ड मर्दे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) पञ्चमस्वरी । ड, पुड्यते । मर्द-चूर्णीकरणम् । इति दुर्गादासः ॥

पुण, ण धर्म्मे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) शुभक्रियायामित्यन्ये । ण, पुणति शुभं लोकः । योगिता । इति दुर्गादासः ॥

पुण्डः, पुं, (पुण्ड्यते इति । पुडि मर्दे + घञ् ।) तिलकः । इति जटाधरः ॥

पुण्डरी, [न्] पुं, हस्तिनां मनुष्याणाञ्च चक्षुष्य-च्छदविटपः । शालपर्णीपत्रतुल्यपत्रः । पुण्ड-रिया इति ख्यातः । तत्पर्य्यायः । पौण्डरी-कम् २ पुण्डरीकम् ३ पुण्डरीयकम् ४ प्रपौण्ड-रीकम् ५ चक्षुष्यम् ६ पौण्डर्य्यम् ७ तालपुष्प-कम् ८ तालपुष्पम् ९ दृष्टिकृतम् १० स्थलपद्मम् ११ मालकम् १२ । केचित्तु पूर्ब्बदशकं पद्मकाण्डे प्रचक्षते ॥ इति शब्दरत्नावली ॥

पुण्डरीकं, क्ली, (पुण्डति अन्यपुष्पाणां गर्ब्बं चूर्णी-करोतीति । पुण्ड मर्दे + "फर्फरीकादयश्च ।" उणां । ४ । २० । इति ईकनूप्रत्ययेन निपा-तनात् साधुः । "पुण्डतेः पुण्डरीकम् ।" इत्यु-ज्ज्वलदत्तः ।) शुक्लपद्मम् । तत्पर्य्यायः । सिता-म्भोजम् २ । इत्यमरः । १ । १० । ४१ ॥ शुक्ल-पद्मम् ३ महापद्मम् ४ सिताम्बुजम् ५ । इति रत्नमाला ॥ अस्य पर्य्यायान्तरं गुणाश्च श्वेत-पद्मशब्दे द्रष्टव्याः ॥ (यथा, रघुः । ४ । १७ ।
"पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विड्व्यजयामास न पुनः प्राप तच्छ्रियम् ॥")
पद्ममात्रम् । इति भरतधृतयाडिः ॥ श्वेत-च्छत्रम् । मेघजभेदः । इति मेदिनी । के, १६६ ॥ सप्तमहाकुष्ठानामन्यतमः । तल्लक्षणं यथाह माधवकरः ।
"सर्व्वेतं रक्तपर्य्यन्तं पुण्डरीकदलोपमम् ।
सोत्सेधञ्च सरागञ्च पुण्डरीकं तदुच्यते ॥"

पुण्डरीकः, पुं, (पुण्डरीकवदर्शोऽस्यस्येति । अच् ।) अग्निकोणस्थदिग्गजः । व्याघ्रः । इत्यमरः ।३।३। ११ ॥ कोषकारभेदः । इति मेदिनी ॥ सहकारः । गणधरः । राजिलसर्पः । गजज्वरः । इति हेमचन्द्रः ॥ दमनकवृक्षः । इति राजनिर्घण्टः ॥ (धान्यविशेषः । तद्यथा,—
"पुण्याढकः पुण्डरीकस्तथा महिषमस्तकः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) कमण्डलुः । श्वेतवर्णः । इत्यनेकार्थकोषः ॥ (क्रौञ्चद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ८१ ।
"देवावृतः परेणापि पुण्डरीको महान् गिरिः ।
एते रत्नमयाः सप्त क्रौञ्चद्वीपस्य पर्व्वताः ॥"
तीर्थविशेषः । यथा, महाभारते ।३।८३।७६।
"शुक्लपक्षे दशम्याञ्च पुण्डरीकं समाविशत् ।
तत्र स्नात्वा नरो राजन् ! पुण्डरीकफलं लभेत् ॥"
यज्ञविशेषः । यथा, तत्रैव ।३।३०।१७ ।
"अश्वमेधो राजसूयः पुण्डरीकोऽथ गोसवः ।
एतैरपि महायज्ञैरिष्टं ते भूरिदक्षिणैः ॥"
नागविशेषः । यथा, तत्रैव । ५ । १०३ । १३ ।
"नागानामेकवंशानां यथाश्रेष्ठन्तु मे शृणु ।
द्वौ पद्मौ पुण्डरीकञ्च पुष्पो मुद्गरपर्णकः ॥"

रामचन्द्रवंशीयनृपविशेषः । यथा, रघुः ।१८।८।
"तेन द्विपानामिव पुण्डरीको
राज्ञामजय्योऽजनि पुण्डरीकः ।
श्रान्ते पितर्य्याहृतपुण्डरीका
यं पुण्डरीकाक्षमिव श्रिता श्रीः ॥"
पुण्डरीकाः सन्त्यत्रेति । अच् । पुण्डरीक-विशिष्टे, त्रि । यथा, मात्स्ये । १२० । ६८ ।
"पयोदस्तु ह्रदो नीलः स शुभः पुण्डरीकवान् ।
पुण्डरीकात् पयोदाच्च तस्मात् ह्रे सम्प्रकाश-ताम् ॥")

पुण्डरीकाक्षं, क्ली, (पुण्डरीकवद्दक्षिणौ यस्मात् । यच् समासे ।) पुण्डर्य्यम् । इति शब्दचन्द्रिका ॥

पुण्डरीकाक्षः, पुं, (पुण्डरीकवद्दक्षिणौ नेत्रे यस्य । यच् समासे ।) विष्णुः । इत्यमरः ।१ । १ । १६॥ (यथा, महाभारते । ५ । ७० । ६ ।
"पुण्डरीकं परं धाम नित्यमच्चरमव्ययम् ।
तद्भावात् पुण्डरीकाक्षो दस्युत्रासाज्जनार्द्दनः ॥"
"हृदयाख्यपुण्डरीकमश्नुते व्याप्नोति तत्रोपलभ्यत इति पुण्डरीकाक्षः । यत् पुण्डरीकं तच्चस्त-पुण्डरीकं परममध्यमन्त इति श्रुतेः । अक्षिणी पुण्डरीकाभे यस्येति वा ।" इति शाङ्करभा-ष्यम् ॥) तस्य स्मरणे बाह्याभ्यन्तरशुचित्वं यथा,
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥"
इति वामने ३३ अध्यायः ॥
(जलचरपक्षिविशेषः । तदुक्तं यथा,—
"उत्क्रोशः पुण्डरीकाक्षो मेघरावोऽम्बुकुक्कुटौ ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)

पुण्डरीयकं, क्ली, स्थलपद्मम् । इति शब्दमाला ॥ प्रपौण्डरीकम् । इति राजनिर्घण्टः ॥

पुण्ड्र्यं, क्ली, (पुण्डतीति । पुडि+अच् । तस्यार्थं प्रधानम् । शकन्ध्वादित्वात् साधुः ।) प्रपौण्ड-रीकम् । इत्यमरः । २।४।१२७ ॥ "हे हस्तिनां मनुष्याणाञ्च चक्षुष्ये चक्षुर्विटपे शालपर्णीपत्र-तुल्यपत्रे । पुण्डरिया इति ख्याते । प्रकृष्टं पुण्ड-रीकमिव दाहहरणात् प्रपौण्डरीकं च; सुप-चाद्यादित्वादन्तपदस्यादौ वृद्धिः । पुण्डयति खण्डयति दोषान् पुण्ड्र्यं पुडि मर्दे नाम्नीति अर्य्यः; पौण्डर्य्यमिति पाठे स्वार्थे ण्यः; वृद्धिः पुण्डरीकादिरप्यत्र ।
'स्थलपद्मं साधुपुष्पं वृक्षेऽत्र पुण्डरीयकम् ।'
इति रभसः ।" इत्यमरटीकायां भरतः ॥

पुण्ड्रः, पुं, (पुण्ड्यन्ते गुड्यन्ते कराद्यर्थं चूर्णीक्रियन्ते इति । पुडि मर्दे + "स्फायितञ्चीति ।" उणा० २।१३। इति रक् ।) इक्षुभेदः । पुँड्याक् इति भाषा । इत्यमरः ।२ । ४ । १६३ । दैत्यविशेषः । अतिमुक्तकः । चित्रम् । क्रिमिः । पुण्डरीकम् । देशविशेषे, पुं भूम्नि । इति मेदिनी । रे, ५६ ॥ (यथा, मात्स्ये । ११३ । ४५ ।
"प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलिप्तकाः ।
शाल्वमागधगोनर्द्दाः प्राच्या जनपदाः स्मृताः ॥")
तिलकवृक्षः । इति हेमचन्द्रः ॥ इक्षुवृक्षः ।

इति राजनिर्घण्टः ॥ (अश्वदेहस्यचिह्नविशेषः । अस्य लक्षणादिकं पुण्ड्रकशब्दे द्रष्टव्यम् ॥ बलिराजस्य चैतज: पुत्रविशेषः । यत्रान्वेव पुण्ड्रदेशो विख्यातः । यथा, महाभारते । १ । १०४ । ४७—५१ ।

"बलिः सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत् पुनः ।
तां स दीर्घतमाङ्गेषु सृष्ट्वा देवीमथाब्रवीत् ।
भविष्यन्ति कुमारास्ते तेजसादित्यवर्चसः ।
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ॥
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि ।
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः ॥
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ।
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः ॥
एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिजः ॥")

पुण्ड्रकः, पुं, (पुण्ड्र इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ४ । ३ । ९६ । इति कन् ।) माधवीलता । इत्यमरः । २ । ४ । ७२ ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"माधवी स्यात्तु वासन्ती पुण्ड्रकी मल्लिकोऽपिच ।
अतिमुक्तो विमुक्तश्च कामुकी भ्रमरोत्सवः ॥")
तिलकवृक्षः । (पुण्ड्र+स्वार्थे कन् ।) इक्षुभेदः । पुँड़ि आक् इति भाषा । तत्पर्य्यायः । रसालः २ इक्षुवाटी ३ योनिः ४ इक्षुयोनिः ५ रसाली ६ रसदालिका ७ करङ्गपालिः ८ । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । रुचिकारित्वम् । स्वादुत्वम् । पित्तदाहहरत्वम् । तृप्यत्वम् । तेजोबलविवर्द्धनत्वञ्च ॥ इति राजनिर्घण्टः ॥ (अश्वशरीरस्यचिह्नविशेषे, पुं, क्ली । यथा, अश्ववैद्यके । ३ । ७३—८१ ।
"अत ऊर्द्धं प्रवक्ष्यामि पुण्ड्राणां लक्षणं शुभम् ।
आनुपूर्व्व्या यथादृष्टं मुनिभिस्तर्थवेदिभिः ॥
शुक्तिशङ्खगदाखड्गपद्मचक्राङ्कुशोपमाः ।
शरासनसमाकाराः प्रशस्ताः पुण्ड्रकाः स्मृताः ॥
मत्स्यभृङ्गारप्रासादस्रग्वेदीयूपसन्निभाः ।
श्रीवृक्षदर्पणाकाराः शुभदाः परिकीर्त्तिताः ॥
शिरोललाटवदनं यः पुण्ड्रो व्याप्य तिष्ठति ।
स धन्यः पूजितो नित्यन्दृक्कश्चैव यो भवेत् ॥
पर्व्वतेन्द्रपताकाभा ये च सगदामसन्निभाः ।
ते सर्व्वे पूजिताः पुण्ड्रा धनधान्यफलप्रदाः ॥
इति पुण्ड्राः शुभाः प्रोक्ताः पूर्व्वशास्त्रानुसारतः ।
अशुभांश्चैव वक्ष्यामि यथायोगं समासतः ॥
काकक्रकचवल्लाहिगृध्रगोमायुसन्निभाः ।
असिताः पीतकाः रक्ताः पुण्ड्रका नैव पूजिताः ॥
तिर्य्यग्गाश्चैव विच्छिन्नाः ह्रस्वलाघाग्रसन्निभाः ।
शूलाग्रा वामदेहस्थाः पुण्ड्रका न शुभाः स्मृताः ॥
जिह्वाकल्माषरूक्षाणि भस्मवर्णनिभानि च ।
पुण्ड्रकाणि न शस्यन्ते भिन्नवर्णानि वाजिनः ॥"
पुण्ड्रदेशनृपतिः । यथा, महाभारते ।१ । ३ । २४ ।
"तथाङ्गवङ्गौ सह पुण्ड्रकेण
पाण्ड्रौड्रराजौ च सहान्ध्रकेन ॥")

पुण्ड्रकेलिः, पुं, (पुण्ड्रे इक्षुविशेषे केलिर्यस्य ।) हस्ती । इति शब्दमाला ॥

पुण्यं, क्ली, (पूयतेऽनेनेति । पू+"पूङो यसुक् ह्रस्वश्च ।" उणा० ५ । १५ । इति यत् सुगागमो ह्रस्वश्च ।) शुभादृष्टम् । तत्पर्य्यायः । धर्म्मम् २ श्रेयः ३ सुकृतम् ४ वृषः ५ । इत्यमरः । १ । ४ । २४ ॥ पुण्यभारोद्वहणमुक्तस्य पण्डितस्य निन्दा यथा, अग्निपुराणे ।
"पण्डितेनापि किन्तेन समर्थेन च देहिनाम् ।
यत् पुण्यं भारसंहोढुमशक्तं पारलौकिकम् ॥"
आत्मकृतपुण्यकथननिषेधो यथा,—
"इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात् ।
आधानुशोचनाभ्याच्च भस्मतेजो विभिद्यते ॥
तस्मादात्मकृतं पुण्यं वृथा न परिकीर्त्तयेत् ॥"
इति शुद्धितत्त्वे देवलः ॥ * ॥
अदत्तपुण्यभागित्वं पापशब्दे द्रष्टव्यम् ॥ * ॥
शोभनकर्म्म । पावनम् । सुन्दरे, त्रि । इति हेमचन्द्रः ॥ सुगन्धि । इति जटाधरः ॥

पुण्यकं, क्ली, (पुण्याय कायतीति । कै+कः ।) व्रतम् । तच्च उपवासादि । शास्त्रे पुण्यत्वेन पवित्रताजनकत्वेन यद्दोधितमुपवासादि तदेव व्रतं न तु यः कोऽपि नियमः । आदिना नक्तं भोजनाचारलक्षणादिपरिग्रहः । इत्यमरभरतौ ॥

पुण्यकव्रतं, क्ली, (पुण्यकं व्रतमिति ।) पतिसौभाग्यस्य श्रीकृष्णतुल्यपुत्रस्य च जनकः स्त्रीकर्त्तव्यनियमविशेषः । तस्य विधिर्यथा,—
महादेव उवाच ।
"हरेराराधनं कृत्वा व्रतं कुरु वरानने ! ।
व्रतञ्च पुण्यकं नाम वर्षमेकं करिष्यसि ॥
देवि ! शुद्धे च कालेऽत्र परं नियमपूर्व्वकम् ।
माघशुक्लत्रयोदश्यां व्रतारम्भः शुभः प्रिये ! ॥
गात्रं सुनिर्म्मलं कृत्वा शिरःसंस्कारपूर्व्वकम् ।
उपोष्य पूर्व्वदिवसे वस्त्रं प्रक्षाल्य यत्नतः ॥
धौते च वाससी धृत्वा उपविश्यासने शुचौ ।
आचम्य तिलकं कृत्वा निर्व्वाप्य आह्निकं पुरः ॥
घटस्यारोपणं कृत्वा स्वस्तिवाचनपूर्व्वकम् ॥
पुरोहितस्य वरणं पुरः कृत्वा प्रयत्नतः ।
संकल्प्य वेदविहितं व्रतमेतत् समाचरेत् ॥
व्रते त्रयाणि नित्यानि चोपहाराणि षोडश ।
देयानि नित्यं देवेशि ! कृष्णाय परमात्मने ।
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ॥
मधुपर्कञ्च स्नानीयं वस्त्राभरणानि च ।
सुगन्धिपुष्पं धूपञ्च दीपनैवेद्यवन्दनम् ॥
यज्ञसूत्रञ्च ताम्बूलं कर्पूरादिसुवासितम् ।
त्रयाण्येतानि पूजायाश्चाङ्गरूपाणि सुन्दरि ! ॥
देवि ! किञ्चिद्विहीनेनैवाङ्गहानिः प्रजायते ।
अङ्गहीनञ्च यत् कर्म्म चाङ्गहीनो यथा नरः ॥
अङ्गहीने च कार्य्ये च फलहानिः प्रजायते ।
अशोत्तरशतं पुष्पं पारिजातस्य विष्णवे ।
देयं प्रतिदिनं दुर्गे ! स्वात्मनो रूपहेतवे ॥
श्वेतचम्पकपुष्पाणां लक्षमश्वतमीप्सितम् ।
प्रदेयं हरये भक्त्या बहुसौन्दर्य्यहेतवे ॥

नीलोत्पलानां लक्षञ्च देयं कृष्णाय भक्तितः ।
व्रताङ्गभूतं देवेशि ! चक्षुषो रूपहेतवे ॥
हिमालयोद्भवं लक्षं रुचिरं श्वेतचामरम् ।
प्रदद्यौ केशवायैव केशसौन्दर्य्यहेतवे ॥
चन्द्रसूर्य्यरत्नरचितं दर्पणानां सहस्रकम् ।
देयं नारायणायैव नासिकासौन्दर्य्यहेतवे ॥
चन्द्रसूर्य्यरत्नरचितं पुटकानां सहस्रकम् ।
प्रदेयं गोपिकेशाय नासिकारूपहेतवे ॥
वन्धूकपुष्पलक्षञ्च देयं राधेश्वराय च ।
ओष्ठाधरयोश्चैव बहुसौन्दर्य्यहेतवे ॥
मुक्ताफलानां लक्षञ्च दन्तसौन्दर्य्यहेतवे ।
देयं गोलोकनाथाय शैलजे ! भक्तिपूर्व्वकम् ॥
रत्नगेण्डूकलक्षञ्च गण्डसौन्दर्य्यहेतवे ।
मदीश्वराय दातव्यं व्रते शैलेन्द्रकन्यके ! ॥
रत्नपात्रकलक्षञ्च देयं ब्रह्मेश्वराय च ।
ओष्ठाधःस्थलरूपाय प्राणेशि ! भक्तितो व्रते ॥
कर्णभूषणलक्षञ्च रत्नसारविनिर्म्मितम् ।
देयं सर्व्वेश्वरायैव कर्णसौन्दर्य्यहेतवे ॥
माध्वीककलसानाञ्च लक्षं रत्नविनिर्म्मितम् ।
देयं विश्वेश्वरायैव स्वरसौन्दर्य्यहेतवे ॥
सुधापूर्णेश्च कुम्भानां सहस्रं रत्ननिर्म्मितम् ।
देयं कृष्णाय देवेशि ! वाक्यसौन्दर्य्यहेतवे ॥
रत्नप्रदीपलक्षञ्च गोपवेशविधायिने ।
देयं किशोरवेशाय दृष्टिसौन्दर्य्यहेतवे ॥
धुस्तूरकुसुमाकारं रत्नपात्रसहस्रकम् ।
देयं गोरक्षकायैव गलसौन्दर्य्यहेतवे ॥
सद्रत्नसाररचितं पद्मनालसहस्रकम् ।
देयं तन्तुकपालाय बाहुसौन्दर्य्यहेतवे ॥
लक्षञ्च रक्तपद्मानां कक्षसौन्दर्य्यहेतवे ।
देयं गोपाङ्गनेशाय नारायणि ! हरिव्रते ॥
चक्रुरीयकलक्षञ्च रत्नसारविनिर्म्मितम् ।
अङ्गुलीनाञ्च रूपार्थं देयं देवेश्वराय च ॥
मणीन्द्रसारलक्षञ्च श्वेतवर्णं मनोहरम् ।
देयं मुनीन्द्रनाथाय नखसौन्दर्य्यहेतवे ॥
सद्रत्नसारहाराणां लक्षञ्चातिमनोहरम् ।
देयं मदनमोहाय वक्षःसौन्दर्य्यहेतवे ॥
सुपक्वश्रीफलानाञ्च लक्षञ्च सुमनोहरम् ।
देयं सिद्धेन्द्रनाथाय स्तनसौन्दर्य्यहेतवे ॥
सद्रत्नवर्त्तुलाकारं लक्षपात्रं मनोहरम् ।
देयं पद्मालयेशाय देहस्य रूपहेतवे ॥
सद्रत्नसाररचितनाभीनालसहस्रकम् ।
प्रदेयं पद्मनाभाय नाभिसौन्दर्य्यहेतवे ॥
सद्रत्नसाररचितरथचक्रसहस्रकम् ।
नितम्बसौन्दर्य्यार्थञ्च प्रदेयञ्चक्रपाणये ॥
सुवर्णरत्नकुम्भानां लक्षञ्च सुमनोहरम्
प्रदेयं श्रीनिवासाय श्रोणिसौन्दर्य्यहेतवे
घृतपात्रस्थलाजानां लक्षमज्ञानमश्नतम्
प्रदेयं पद्मनेत्राय पादसौन्दर्य्यहेतवे ॥
सुवर्णरचितानाञ्च खञ्जनानां सहस्रकम् ।
गतिसौन्दर्य्यहेत्वर्थं देयं लक्ष्मीश्वराय च ॥
राजहंससहस्रञ्च गजेन्द्राणां सहस्रकम् ।
सुवर्णश्छत्रलक्षञ्च देयं नारायणाय च ॥

पुण्यक

विचित्रं रत्नसारेण मुद्गैः सौन्दर्य्यहेतवे ॥
मालतीनाञ्च कुसुममत्तं लक्ष्मीश्वरि ! ।
देयं वृन्दावनेशाय हास्यसौन्दर्य्यहेतवे ॥
अमूल्यरत्नलक्षञ्च देयं नारायणाय वै ।
सुव्रते ! व्रतपूर्णार्थं शीलसौन्दर्य्यहेतवे ॥
शुद्धस्फटिकसङ्काशं मणीन्द्रसारलक्षकम् ।
देयं मुनीन्द्रनाथाय मनःसौन्दर्य्यहेतवे ॥
प्रवालसारसङ्काशं मणिसारसहस्रकम् ।
देयं कृष्णाय भक्त्या च प्रियानुरागवृद्धये ॥
माणिक्यसारलक्षञ्च देयं कृष्णाय यत्नतः ।
जन्मनः कोटिपर्य्यन्तं स्वामिसौभाग्यहेतवे ॥
कुष्माण्डं नारिकेलञ्च जम्बीरं श्रीफलं तथा ।
फलान्येतानि देयानि हरये पुत्रहेतवे ॥
रत्नेन्द्रसारलक्षञ्च देयं कृष्णाय यत्नतः ।
असंख्यजन्मपर्य्यन्तं स्वात्मनो धनवृद्धये ॥
वाद्यं नानाप्रकारञ्च कांस्यतालादिकं परम् ।
व्रते सम्पत्तिवृद्ध्यर्थं श्रीहरिं श्रावयेद्व्रती ॥
पायसं पिष्टकं सर्पिःशर्करारक्तं मनोहरम् ।
प्रदेयं हरये भक्त्या स्वात्मनो भोगवृद्धये ॥
सुगन्धिपुष्यमाल्यानां लक्षमत्तमभीप्सितम् ।
प्रदेयं हरये भक्त्या हरिभक्तिविवृद्धये ॥
नैवेद्यानि प्रदेयानि स्वादूनि मधुराणि च ।
श्रीकृष्णप्रीतिप्राप्त्यर्थं दुर्गे ! नानाविधानि च ॥
नानाविधानि पुष्पाणि तुलसीसंयुतानि च ।
श्रीकृष्णप्रीतये भक्त्या व्रते देयानि सुव्रते ! ॥
ब्राह्मणानां सहस्रञ्च प्रत्यहं भोजयेद्व्रती ।
स्वात्मनः पुत्रवृद्ध्यर्थं व्रते जन्मनि जन्मनि ॥
पुष्पाञ्जलिधृतं देयं नित्यं पूर्णञ्च पूजने ।
प्रणामधृतकं देवि ! कर्त्तव्यं भक्तिवृद्धये ॥
षण्मासांश्च हविष्यान्नं मासान् पञ्च फलादिकम् ।
हविः पत्रं जलं पत्रं व्रते पत्रे च सुव्रते ! ॥
रत्नप्रदीपधृतकं वह्निं दद्याद्विधानिधम् ।
रात्रौ हुताशनं कृत्वा नित्यं जागरणं व्रते ॥
स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥
मैथुनं विविधं त्याज्यं व्रते क्रीड़ाविवृद्धये ।
ज्ञानवृद्धिर्जागरणे सुबुद्धिर्मितभोजने ॥
लोभमोहकामक्रोधभयशोकविवादकम् ।
कलहञ्च परित्याज्यं व्रते बन्धुविवृद्धये ॥
संपूर्णे च व्रते देवि ! प्रतिष्ठा तदनन्तरम् ॥
त्रिंशतञ्च षड्यधिकं डङ्कं वस्त्रसंयुतम् ।
सभोज्यं सोपवीतञ्च सोपहारं मनोहरम् ॥
त्रिंशतञ्च षड्यधिकं सहस्रं विप्रभोजनम् ।
त्रिंशतञ्च षड्यधिकं सहस्रं तिलहोमकम् ॥
त्रिंशतञ्च षड्यधिकं सहस्रं स्वर्णमेव च ।
देया व्रतसमाप्तौ च दक्षिणा विविधेरिता ।
अन्यां समाप्तिदिवसे कथयिष्यामि दक्षिणाम् ॥
एतद्व्रतफलं देवि ! दृढ़ा भक्तिर्हरौ भवेत् ।
हरितुल्यो भवेत् पुत्रो विख्यातो भुवनत्रये ॥
सौन्दर्य्यं स्वामिसौभाग्यमैश्वर्य्यं विपुलं धनम् ।
सर्व्वाञ्छितसिद्धीनां बीजं जन्मनि जन्मनि ॥
इत्येवं कथितं देवि ! व्रतं कुरु महेश्वरि ! ।

पुण्यभू

पुत्रस्ते भविता साध्वीत्युक्त्वा च विरराम ह ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ।३-४। अध्यायौ ॥

पुण्यकृत्, त्रि, (पुण्यं करोति सेवति । क्त + "सुकर्म्मपापमन्त्रपुण्येषु कृञः ।" ३।२।८८। इति क्विप् । "इसस्य तुक् पिति कृति ।" ६।१।७१। इति तुगागमश्च ।) पुण्यकर्त्ता । धार्म्मिकः । यथा,
"पुण्यकृच्चाटुकारस्ते किङ्करः सुरतेषु कः ॥"
इति भट्टिः । ५ । ६८ ॥

पुण्यगन्धः, पुं, (पुण्यः पवित्रो गन्धश्च गन्धोऽस्य ।) चम्पकः । इति त्रिकाण्डशेषः ॥

पुण्यजनः, पुं, (पुण्यः विरुद्धलक्षणया पापी चासौ जनश्चेति ।) राक्षसः । इत्यमरः । १।१।६३॥ यक्षः । (यथा, हरिवंशे । २ । २६ ।
"सर्पैः पुण्यजनैश्चैव वीरुद्भिः पर्व्वतैस्तथा ॥"
पुण्याश्रितो जनः ।) सज्जनः । इति मेदिनी । ने, १६८ ॥

पुण्यजनेश्वरः, पुं, (पुण्यजनानां यक्षाणामीश्वरः ।) कुबेरः । इत्यमरः । १ । १ । ७३ ॥ (यथा, रघुः । ६ । ६ ।
"समतया वसुवृष्टिविसर्जनैः
नियमनादसतश्च नराधिपः ।
अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा ॥")

पुण्यत्वक्, क्ली, (पुण्यं पवित्रं त्वगम् ।) श्वेतकुष्ठम् । इति राजनिर्घण्टः ॥

पुण्यदर्शनः, पुं, (पुण्यं शुभजनकं दर्शनं यस्य ।) चाषपक्षी । इति राजनिर्घण्टः ॥ (यद्दर्शनेन पुण्यं भवति तत्र, त्रि । यथा, रघुः । १ । ८६ ।
"तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
आख्यमाशंसितावन्त्यप्रार्थनं पुनरब्रवीत् ॥")

पुण्यफलः, पुं, (पुण्यानि शुभानि फलानि यस्य ।) वनभेदः । तत्पर्य्यायः । लक्ष्मणारामः २ । इति शब्दमाला ॥ (पुण्यस्य फलं पुण्यजन्यं फलमिति वा ।) धर्म्मजन्यफले, क्ली ॥ (यथा, मनुः । ५ । ५३ ।
"वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥")

पुण्यभाक्, [ज्] त्रि, (पुण्यं भजतीति । भज + क्विप् ।) पुण्यविशिष्टः । यथा, पञ्चशायके ।
"क्रीड़ावन्तो विनीता लघुसुरतरताः पुण्यभाजः प्रगल्भाः स्युः ॥"

पुण्यभूः, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूर्भूमिः ।) आर्य्यावर्त्तदेशः । यथा, हेमचन्द्रे ।३।२८।
"आर्य्यावर्त्तो जन्मभूमिर्जिनचक्रार्हचक्रिणाम् ।
पुण्यभूराचारवेदी मध्यं विन्ध्यहिमालयोः ॥"

पुण्यभूमिः, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूमिः ।) आर्य्यावर्त्तदेशः । इत्यमरः ।२।१।८॥ स तु विन्ध्यहिमालयावधिमध्यदेशः । यथा,—
"आसमुद्रात्तु पूर्ब्बादासमुद्रात्तु पश्चिमात् ।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधाः ॥"
इति भरतधृतमधुः ॥
पुत्रवतः । इति शब्दरत्नावली ॥

पुण्यात्मा

पुण्यवान्, [त्] त्रि, (पुण्यमस्यास्तीति । पुण्य + मतुप् । मस्य वः ।) पुण्ययुक्तः । तत्पर्य्यायः । सुकृती २ धन्यः ३ । इत्यमरः ।३।१।३॥ सुकृत् ४ पुण्यकृत् ५ । इति जटाधरः ॥ धर्म्मवान् ६ श्रेयस्वान् ७ वृषवान् ८ । एते पुण्यपर्य्यायकशब्दोत्तरवतुप्रत्ययेन निष्पन्नाः ॥ (यथा, महाभारते । १२ । २६७ । २८ ।
"ऊर्द्धं भिक्षा प्रतिष्ठन्ते प्राणाः पुण्यवतां नृप ! ।
मध्यतो मध्यपुण्यानामधो दुष्कृतकर्म्मणाम् ॥")

पुण्यश्लोकः, पुं, (पुण्यः पुण्यदायकः श्लोको यशश्चरित्रं वा यस्य ।) विष्णुः । इति श्रीभागवतम् ॥ युधिष्ठिरः । इति महाभारतम् ॥ नलराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ७४ । ११ ।
"पुण्यश्लोकस्य वै रूपतो वार्ष्णेय इति विश्रुतः ॥")

पुण्यश्लोकी, स्त्री, (पुण्यः पुण्यजनकः श्लोको यशश्चरित्रं वा यस्याः ।) द्रौपदी । इति शब्दमाला ॥ सीता । यथा,—
"पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्द्दनः ॥"
इति पुराणम् ॥

पुण्या, स्त्री, (पुनाति या पूयतेऽनयेति वा । पू + "पूङो यसुक् ह्रस्वश्च ।" उणा० ५ । १५ । इति यत् सुक् ह्रस्वश्च धातोः । ततष्टाप् ।) तुलसी । इति शब्दमाला ॥ पुण्यजनिका च ॥

पुण्यात्मा, त्रि, (पुण्यः आत्मा स्वभावो यस्य ।) पुण्यस्वभावः । तस्य गत्यादिर्यथा,—
सुप्रज्ञोवाच ।
"शृणु विप्र ! प्रवक्ष्यामि यत्त्वया श्रोतुमिच्छते ।
पुण्यात्मनां पापिनाञ्च पन्थानं सुखदुःखदम् ॥
आदौ ब्रवीमि पन्थानं नृणां पुण्यवतामहम् ।
शृणुष्व द्विजशार्दूल ! श्रवतां प्रीतिवर्द्धनम् ॥
प्रस्तरैरिष्टकैर्वृक्षैः दिव्यवस्त्रैः समावृतः ।
भाति पुण्यात्मनां पन्थाः सर्व्वोपद्रववर्ज्जितः ॥
क्वचिन्नृत्यत्सर्व्वकन्याभिर्गीयते गानमुत्तमम् ।
क्वचिन्मञ्जुपुरीराभिरप्सरोभिश्च वृत्यते ॥
क्वचिच्च वीणाक्वणनं नानावाद्यं मनोहरम् ।
क्वचित् कुसुमवृष्टिश्च क्वचिदायुः सुशीतलः ॥
क्वचित् पुण्याः प्रीततोयाः कुत्रचित् भक्तशालिकाः ।
क्वचिद्देवाश्च गन्धर्व्वाः पठन्ति स्तवमुत्तमम् ॥
क्वचित् क्वचिद्दीर्घिकाश्च फुल्लपद्मसुशोभिताः ।
सुच्छायाः पादपाः क्वापि पुष्पिता वल्लुलादयः ॥
समस्तसुखसम्पन्ने पथि गच्छन्ति मानवाः ।
पुण्यात्मानो द्विजश्रेष्ठ ! सुखन्दत्तमवाप्य च ॥
केचित्तुरङ्गमारूढ़ा नानालङ्कारभूषिताः ।
उद्दण्डधवलच्छत्रैर्गच्छन्त्याहतमस्तकाः ॥
केचिद्यान्ति गजारूढ़ा रथारूढ़ाश्च केचन ।
यानारूढ़ा जनाः केचित् सुखेन यममन्दिरम् ॥

केचिद्देवाङ्गनाहस्तन्यस्तचामरवायुभिः ।
गच्छन्ति वीजिता मर्त्याः स्तूयमानाः सुरर्षिभिः ॥
केचिद्दिव्याङ्गनधराः सुचन्दनविभूषिताः ।
भुञ्जन्तो यान्ति ताम्बूलं पुण्यात्मानो यमालयम् ॥
निजगात्रत्विषा केचिज्ज्वालयन्तो दिशो दश ।
व्रजन्ति भ्रमणागारं चलद्गृहनिवासिनः ॥
केचिच्च पायसं दिव्यं भुञ्जन्तो यान्ति सत्तमाः ।
सुधापानं प्रकुर्वन्तः पथि गच्छन्ति केचन ॥
केचिद्दुग्धं पिबन्तश्च केचिदिक्षुरसं तथा ।
केचित्तक्रं पिबन्तश्च गच्छन्ति यममन्दिरम् ॥
केचिद्धानि खादन्तः केचिन्नानाफलानि च ।
केचिन्मधु पिबन्तश्च पुण्यवन्तो व्रजन्ति वै ॥
तानागतांस्ततो दृष्ट्वा नरान् धर्म्मपरायणान् ।
भास्करिः प्रीतिमासाद्य स्वयं नारायणो भवेत् ॥
चतुर्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः ।
शङ्खचक्रगदापद्मधारी गरुडवाहनः ॥
स्वर्णयज्ञोपवीती च क्षीरचारुतरानतः ।
किरीटी कुण्डली चैव वनमालाविभूषितः ॥
चित्रगुप्तो महाप्राज्ञश्चण्डाद्या यमकिङ्कराः ।
सर्व्वे नारायणाकारा बभूवुर्मधुरोक्तयः ॥
ततः स्वयं धर्म्मराजस्तान् सर्व्वान्मनुजोत्तमान् ।
परमां प्रीतिमासाद्य मित्रवत् पूजयेद्द्विज ! ॥
दिव्यैश्चान्यैः फलैश्चैव तेषां पुण्यवतां नृणाम् ।
भोजनं कारयित्वा तु तानुवाचाथ भास्करिः ॥

यम उवाच ।

यूयं सर्व्वे महात्मानो नरकक्लेशभीरवः ।
निजपुण्यप्रभावेन गम्यतां परमं पदम् ॥
संसारे जन्म संप्राप्य पुण्यं यः कुरुते नरः ।
स मे पिता स मे भ्राता स मे बन्धुः स मे सुहृत् ॥
इत्युक्ता धर्म्मराजेन ते सर्व्वे द्विजसत्तम ! ।
दिव्यं रथं समारुह्य नारायणपुरं ययुः ॥"
इति पाद्मोत्तरे क्रियायोगसारे २२ अध्यायः ॥

पुण्याहं, क्ली, (पुण्यश्च तदहश्चेति । "राजाहः-सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । "उत्तमैकाभ्याञ्च ।" ५ । ४।९० । इति अह्नादेशो न ।) पुण्यदिनम् । इत्यमरः ॥ (यथा, अमरशतके । ९१ ।

"पुण्याहं व्रजमङ्गलं सुदिवसं प्रातः प्रयातस्य ते
यत्स्नेहोचितमीहितं प्रियतम ! त्वं निर्गतः श्रोष्यसि ॥")

पुण्याहवाचनं, क्ली, (पुण्याहस्य वाचनम् ।) देवादिकर्म्मादौ मङ्गलार्थं पुण्याहमितिशब्दस्य वारत्रयकथनम् । यथा,—

"पुण्याहवाचनं देवे ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्य्यात् क्षत्रियवैश्ययोः ॥
सोङ्कारं ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत् ॥"
इत्युद्वाहतत्त्वे यमः ॥

पुत्त, गतौ ॥ (भ्वां-परं-सकं-सेट् ।) तदयान्तः । पुत्तिका । सौत्रधातुरयम् । इति दुर्गादासः ॥

पुत्तलकः, पुं, (पुत्त गतौ + भावे घञ् । पुत्तं गमनं लाति अन्यस्मादिति । ला + कः । ततः संज्ञायां कन् । अथाश्रयेणैव हि गमनादिक्रियावत्त्वादस्य तथात्वम् ।) पत्रादिनिर्म्मितप्रतिमूर्त्तिः । पुतुल इति भाषा । यथा. "आचारात् योग्यत्वाच्च शरपत्रैः पुत्तलकं कृत्वा शिरःप्रभृतिषु पलाशपत्राणि देयानि ।" इति शुद्धितत्त्वम् ॥

पुत्तलिका, स्त्री, लवणकाष्ठमृद्दर्भधातुरत्नादिनिर्म्मितप्रतिमूर्त्तिः । पुत्तली एवेति स्वार्थे कनि ईकारस्य ह्रस्वे टापि निष्पन्ना ॥

पुत्तली, स्त्री, (पुत्तं गमनं लाति अन्याश्रयेणेति । ला + कः । ततो ङीष् ।) मृदादिनिर्म्मितप्रतिमूर्त्तिः । यथा, उत्तरकामाख्यातन्त्रे ॥

"अमावास्यां समासाद्य मध्यरात्रौ विचक्षणः ।
मृन्मयीं पुत्तलीं कृत्वा दीपादिभिरलङ्कृताम् ॥"

पुत्तिका, स्त्री, (पुत्तं इतस्ततो भ्रमणमस्यस्या इति । पुत्त + ठन् । ततष्टाप् ।) मधुमक्षिकाविशेषः । तत्पर्य्यायः । पतङ्गिका २ । इत्यमरः । २ । ५ । २७ ॥ (पिपीलिकाप्रभेदः । यथा, मनुः । ४ । २३८ ।

"धर्म्मं शनैः सञ्चिनुयात् वल्मीकमिव पुत्तिकाः ।
परलोकसहायार्थं सर्व्वभूतान्यपीड़यन् ॥")

पु(त्र)त्रः, पुं, लयात् पुच्छमस्यानम् । यथा,—

"पुत्रस्पर्शे नरोऽसौ प्रथमसुतहृतः सिंहराशौ सुपुत्रः ॥"
इत्यादि ज्योतिस्तत्त्वम् ॥

(पुनाति पित्रादीनिति । पू + "पुवो ह्रस्वश्च ।" उणा० ४ । १६४ । इति क्त्रः धातोर्ह्रस्वत्वञ्च । तकारद्वये तु पुन्नामनरकात् त्रायते इति । पुत् + त्रै + डः । पितॄन् पातीति युतुपत्वा एषोदरादित्वात् साधुः । इति रामायणे ।२।१०७।१२ । श्लोकटीकायां रामानुजः ।) पुंसन्तानः । पुन्नामनरकत्राता । पुत इति वेटा इति च भाषा । तत्पर्य्यायः । आत्मजः २ तनयः ३ सूनुः ४ सुतः ५ । इत्यमरः । २ । ६ । २७ ॥ तनूजः ६ अपत्यम् ७ दायादः ८ कुलाधारकः ९ नन्दनः १० आत्मजन्मा ११ द्वितीयः १२ प्रकृतिः १३ खजः १४ । इति शब्दरत्नावली ॥ अस्य निरुक्तिर्यथा,—

"पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥"
इति महाभारते । १ । ७४ । ३७ ॥

(यथा च रामायणे । २ । १०७ । १२ ।

"पुन्नाम्नो नरकात् यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्र इति प्रोक्तः पितॄन् यः पाति सर्व्वतः ॥")

स च द्वादशविधः यथा,—

"औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादो बान्धवश्च षट् ॥
कानीनश्च सहोढ़श्च क्रीतः पौनर्भवस्तथा ।
स्वयन्दत्तश्च शौद्रश्च षड़दायादबान्धवाः ॥"*॥
तेषां लक्षणानि यथा,—

"स्वे क्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेद्धि यम् ।
तमौरसं विजानीयात् पुत्रमग्र्यमकल्पितम् ॥१॥
यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा ।
स्वधर्म्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः ॥२॥
माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्तिमः सुतः ॥३॥
सदृशन्तु प्रकुर्य्यादयं गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ॥ ४ ॥
उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ़ उत्पन्नस्तस्य स्यादयस्य तत्त्वजः ॥५॥
मातापितृभ्यामुत्सृष्टस्तयोरन्यतरेण वा ।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते ॥ ६ ॥
पितृवेश्मनि कन्या तु यं पुत्रञ्जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥७॥
या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वासती ।
वोढुः स गर्भो भवति सहोढ़ इति चोच्यते ॥८॥
क्रीणीयादयस्यापत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥९॥
या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते ॥१०॥
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं सर्ग्पयेद्यस्मै स्वयं दत्तस्तु स स्मृतः॥११
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत् सुतम् ।
स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः ॥१२॥
क्षेत्रजादीन् सुतानेनानेकादश यथोदितान् ।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥"
इति मानवे ९ अध्यायः ॥ * ॥

चतुर्विधपुत्रा यथा,—

सुमना उवाच ।

"ऋणसम्बन्धिनः केचित् केचिन्न्यासापहारकाः ।
रिपवश्च प्रियाश्चेति स्वकर्म्मैवशवर्त्तिनः ॥
भेदैश्चतुर्भिर्जायन्ते पुत्रा मित्राः स्त्रियस्तथा ।
भार्य्या पिता च माता च भ्रत्याः स्वजनबान्धवाः॥
स्वेन स्वेन हि जायन्ते सम्बन्धेन महीतले ।
न्यासापहारभावेन यस्य यस्य हृतं भुवि ॥
न्यासस्वामी भवेत् पुत्रो गुणवान् रूपवान् भुवि ।
येन चापहृतं न्यासं तस्य गेहे न संशयः ॥
न्यासापहरणाद्दुःखं स दत्त्वा दारुणं गतः ।
न्यासस्वामी स पुत्रोऽभून्न्यासापहारकस्य च ॥
गुणवान् रूपवांश्चैव सर्व्वलक्षणसंयुतः ।
भक्तिञ्च दर्शयेत्तस्य पुत्रो भूत्वा दिने दिने ॥
प्रियवाक्यधरो वापि बहुस्नेहं प्रदर्शयेत् ।
स्वीयं द्रव्यं ससुद्राद्यं प्रीतिहृत्याय चातुलाम् ॥
मुक्त्वा तु मोघमात्मीनं तदादाय पुनर्व्रजेत् ।
यथा तेन प्रदत्तं तन्न्यासापहरणात् पुरा ॥
दुःखमेवं महत् कृत्वा दारुणं प्राणनाशनम् ।
तादृग्यं तस्य दद्यात् स पुत्रो भूत्वा महागुणैः ॥
अन्यायुधस्तथा भूत्वा मरणं यान्ति ते तथा ।
दुःखं दत्त्वा प्रयान्त्येवं प्रकल्पैवं पुनः पुनः ॥
यदाह पुत्र पुत्रेति प्रलापं हि करोति सः ।
तदा हासं करोत्येव कः स पुत्रो हि कस्य च ॥
अनेनापि कृतं न्यासं मदीयं परिचारिणा ।
द्रव्यापहारोऽपि पिता पूर्व्वमत्रैव तस्य च ॥
पिशाचत्वं मया दत्तमत्रैव हि दुरात्मनः ।

द्रव्यापहरणेनापि मम प्राणा गताः किल ॥
दुःखेन महता चैव यदाहं पीडितः पुरा ।
तथा दुःखं प्रदत्त्वाहं द्रव्यं सुप्राप्यमुत्तमम् ॥
भोगेन सर्व्वमादाय चिरादिश्वास्य सौम्यवत् ।
गतोऽसि स्वगृहाद्यात कस्माहं सुत ईडृशः ॥
न चैषोऽपि पिता पूर्व्वमद्यैव न च कस्यचित् ।
पिप्राचलं मया दत्तमद्यैव च दुरात्मनः ॥
एवमुक्त्वा प्रयात्येव तं प्रहस्य पुनः पुनः ।
प्रयात्यनेन मार्गेण दुःखं दत्त्वा सुदारुणम् ॥
एवं न्यासस्य सम्बन्धात् पुत्राः किन्ने भवन्ति वै ।
संसारे दुःखबहुला दृश्यन्ते यत्र तत्र हि ॥१॥
ऋणसम्बन्धिनः पुत्रान् प्रवक्ष्यामि तवाग्रतः ।
ऋणं यस्य गृहीत्वा यः प्रयाति मरणं किल ॥
अन्नदाता सुतो भूत्वा भ्राता वाथ पिता प्रियः ।
मित्ररूपेण वर्त्तेत अन्तर्दृष्टः सदैव सः ॥
गुणं नैव प्रपश्येत स क्रूरो निष्ठुराकृतिः ।
जल्पते निष्ठुरं वाक्यं सदैव स्वजनेषु च ॥
नित्यं मिष्टं समश्नाति भोगान् भुङ्क्ते नित्यशः ।
द्यूतकर्म्मरतो नित्यं चौरकर्म्मणि नित्यशः ॥
गृहाद्द्रव्यं बलाद्धन्ति वार्य्यमाणः प्रकुप्यति ।
पितरं मातरञ्चैव कुत्सते च दिने दिने ॥
द्रावकक्षासकश्चैव वह्निष्ठुरजल्पकः ।
वञ्चयित्वैव सुप्राप्य हृत्वा सुखेन तिष्ठति ॥
जातकर्म्मादिभिर्ब्बाल्ये द्रव्यं गृह्णाति दारुणः ।
पुनर्व्विवाहसंयोगान्नानाभेदैरनेकधा ॥
एवं संचीयते द्रव्यं नैवमेतद्दलाद्यपि ।
गृहक्षेत्रादिकं सर्व्वं ममैव हि न संशयः ॥
पितरं मातरञ्चैव वदत्येवं दिने दिने ।
सुदण्डैर्मुसलैश्चैव कथाघातैस्तु दारुणैः ॥
मृते तु तस्मिन् पितरि तथा मातरि निष्ठुरम् ।
निःस्नेहो निर्घृणश्चैव जायते नात्र संशयः ॥
श्राद्धकार्य्याणि दानानि न करोति कदाचन ।
एवंविधास्त्वयः पुत्रा भवन्ति च महीतले ॥ २ ॥
रिपुपुत्रं प्रवक्ष्यामि तवाग्रे द्विजपुङ्गव ! ।
बाल्ये वयसि संप्राप्ते रिपुवद्वर्त्तते सदा ॥
पितरं मातरञ्चैव क्रीड़मानो हि ताड़येत् ।
ताड़यित्वा प्रयात्येवं प्रहस्यैव पुनः पुनः ॥
पुनरायाति तं तत्र पितरं मातरं पुनः ।
सक्रोधो वर्त्तते नित्यं वैरकर्म्मणि सर्व्वदा ॥
पितरं मारयित्वा तु मातरञ्च पुनः पुनः ।
प्रयात्येवं स दुष्टात्मा पूर्व्ववैरानुभावतः ॥ ३ ॥*॥
अथातः संप्रवक्ष्यामि यस्माज्ज्ञेयो भवेत् प्रियः ।
जातमात्रः प्रियं कुर्य्याद्बाल्ये नटनक्रीड़नैः ॥
वयः प्राप्य प्रियं कुर्य्यान्मातापित्रोरनन्तरम् ।
भक्त्या संतोषयेन्नित्यं ताभ्यौ परिपालयेत् ॥
स्नेहेन वचसा चैव प्रियसम्भाषणेन च ।
मृतौ गुरू समाज्ञाय स्नेहेन रुदते पुनः ॥
श्राद्धकर्म्माणि सर्व्वाणि पिण्डदानादिकां क्रियाम् ।
करोत्येवं सुदुःखार्त्तस्नेहो यावां प्रयच्छति ॥
कृतज्ञयान्वितः स्नेहान्निर्य्यापयति निश्चितः ।
यस्माज्ज्ञेयं भवेत् कान्त प्रयच्छति न संशयः ।
पुत्रो भूत्वा महाप्राज्ञ ! अनेन विधिना किल ॥४॥

उदासीनं प्रवक्ष्यामि तवाग्रे प्रिय ! साम्प्रतम् ॥
उदासीनेन भावेन सदैव परिवर्त्तते ।
ददाति नैव गृह्णाति न क्रुध्यति न तुष्यति ॥
नैवोपयाति संलक्ष्य उदासीनो द्विजोत्तम ! ।
तवाग्रे कथितं सर्व्वं पुत्राणां गतिरीदृशी ॥
यथा पुत्रास्तथा भार्य्या पिता माताथ बान्धवाः ।
भृत्याश्चान्ये समाख्याताः पशवस्तुरगास्तथा ।
गजा महिष्यो दासश्च ऋणसम्बन्धिनस्त्वमी ॥"*
सुपुत्रलक्षणं यथा,—

वशिष्ठ उवाच ।

"पुत्रस्य लक्षणं पुण्यं तवाग्रे प्रवदाम्यहम् ।
पुण्यप्रसक्तो यस्यात्मा सत्यधर्म्मरतः सदा ।
बुद्धिमान् ज्ञानसम्पन्नस्तपस्वी वाग्विदांवरः ॥
सर्व्वकर्म्मसु सन् धीरो वेदाध्ययनतत्परः ।
सर्व्वशास्त्रप्रवक्ता च देवब्राह्मणपूजकः ॥
याजकः सर्व्वयज्ञानां दाता त्यागी प्रियंवदः ।
विष्णुध्यानपरो नित्यं शान्तो दान्तः सुहृत्सदा ॥
पितृमात्रपरो नित्यं सर्व्वस्वजनवत्सलः ।
कुलस्य तारको विद्वान् कुलस्य परिपोषकः ॥
एवं गुणैः सुसंयुक्तः सुपुत्रः सुखदायकः ॥"*॥
पुत्रस्य जङ्गमतीर्थत्वं यथा,—
"सर्व्वतीर्थाहृतं तीर्थं पुत्रतीर्थसुदाहृतम् ।
यद्वेणो वैष्णवश्रेष्ठो सर्व्वधर्म्मबहिष्कृतः ॥
पृथुना पुत्रतीर्थेन पवित्रोऽगात् परं पदम् ॥
सत्पुत्रं परमं तीर्थं प्राप्य मुच्यन्ति पूर्व्वजाः ।
पितापि ऋणमुक्तः स्याज्जाते पुत्रे महात्मनि ॥"
वैष्णवपुत्रस्य पूर्व्वपुरुषत्राणत्वं यथा,—
"वैष्णवो यदि पुत्रः स्यात् सतारयति पूर्व्वजान् ।
पितृनधस्तना वंशास्तारयन्त्यतिपावनाः ॥"*॥
कुपुत्रजनने पितॄणां नरकगमनं यथा,—
"तथा यदि कुपुत्रः स्यात्तेन मज्जन्ति पूर्व्वजाः ।
सुघोरे नरके दीनाः शपन्ति च मुहुर्मुहुः ॥
यथा जलं कुम्भेन तरन्मज्जति मूढधीः ।
तथा पिता कुपुत्रेण तमस्यन्धे निमज्जति ॥
जातमात्रे कुजे जन्तौ संप्रेरते पितामहाः ।
किमेषोऽधो नयेदस्मानूर्द्धं वा वैष्णवो भवन् ॥"
इति पाद्मे भूमिखण्डे ११ । १२ । १८ । १२० ।
अध्यायाः ॥ * ॥
सप्तविधपुत्रा यथा,—
"वरजो वीर्य्यजश्चैव क्षेत्रजः पालकस्तथा ।
विद्यामन्त्रसुतानाथ गृहीतः सप्तमः सुतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥*॥
पुत्रसुखदर्शने पुण्यं यथा,—

पार्व्वत्युवाच ।

"गृहमागत्य प्राणेश ! तपसां फलदायकम् ।
कस्मे कस्मे ध्यासते यं तं पश्यागत्य मन्दिरम् ॥
शीघ्रं पुत्रसुखं पश्य पुण्यबीजं महोत्सवम् ।
पुन्नामनरकत्राणकारणं भवसारणम् ॥
स्नातश्च सर्व्वतीर्थेषु सर्व्वयज्ञेषु दक्षिणा ।
पुत्रस्य दर्शनस्यास्य कलां नार्हन्ति षोड़शीम् ॥
सर्व्वदानेन यत् पुण्यं यत् पृथिव्याः प्रदक्षिणम् ।
पुत्रदर्शनपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥

सर्व्वैस्तपोभिर्यत् पुण्यं यदेवानशनैर्व्रतैः ।
सत्पुत्रोद्भवपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥
यद्विप्रभोजनैः पुण्यं यदेव सुरसेवनैः ।
सत्पुत्रप्राप्तिपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ६ अध्यायः ॥*॥
पुत्रोत्सवविधिर्यथा,—
"परं पुत्रोत्सवं नन्दश्चकार परमादरात् ।
ददौ यशोदा गोपीभ्यो ब्राह्मणेभ्यो ददौ मुदा ।
धनानि नानावस्तूनि तैलसिन्दूरमेव च ॥"
अपि च ।
"नन्दः सचेलः स्नात्वा च भूत्वा धौते च वाससी ।
पारम्पर्य्यविधं तत्र चकार हृष्टमानसः ॥
ब्राह्मणान् भोजयामास कारयामास मङ्गलम् ।
वाद्यानि वादयामास वन्दिभ्यश्च ददौ धनम् ॥
ततो नन्दश्च सानन्दं ब्राह्मणेभ्यो ददौ धनम् ।
सद्रत्नानि प्रवालानि हीरकाणि च सादरम् ॥
तिलानां पर्व्वतान् सप्त सुवर्णं काञ्चनं मुने ! ।
रौप्यं धान्याचलं वस्त्रं गोसहस्रं मनोहरम् ॥
दधि दुग्धं शर्करांश्च नवनीतं घृतं मधु ।
मिष्टान्नं लड्डुकौघञ्च स्वादूनि मोदकानि च ॥
भूमिञ्च सर्व्वशस्याढ्यां वायुवेगांस्तुरङ्गमान् ।
ताम्बूलानि च तैलानि दत्त्वा हृष्टो बभूव ह ॥"
पुत्रप्रशंसा यथा,—
"धनं धान्यञ्च रत्नं वा तत् सर्व्वं पुत्रहेतुकम् ।
न भक्षितं यत् पुत्रेण तद्व्यर्थं निष्फलं भुवि ॥
घृतकूपायिका वापी घृतवापीसमं सरः ।
सरःघृताधिको यज्ञः पुत्रो यज्ञघृताहरः ॥
तपोदानोद्भवं पुण्यं जन्मान्तरसुखप्रदम् ।
सुखप्रदोऽपि सत्पुत्रः प्राणेभ्योऽपि सुनिश्चितम् ।
पुत्रादपि परो बन्धुर्न भूतो न भविष्यति ॥"
पुत्रात् पराजये आनन्दयुक्तत्वं यथा,—
"नन्दः सपुलको हृष्टः सभायां साश्रुलोचनः ।
आनन्दयुक्ता मनुजा यदि पुत्रैः पराजिताः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ । १४ । २१
अध्यायाः ॥ * ॥
बहवः पुत्राः काम्याः । यथा,—
"एकस्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेद्वा चाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥"
मातापित्रोराज्ञाकारिकनिष्ठपुत्रस्यापि राज्यभागित्वं यथा,—

ययातिरुवाच ।

"पुत्रो यस्त्वनुवर्त्तेत स राजा पृथिवीपतिः ।
भवन्तः प्रतिजानन्तु पुरू राज्येऽभिषिच्यताम् ॥

प्रजतय ऊचुः ।

यः पुत्रो गुणसम्पन्नो मातापित्रोर्हितः सदा ।
सर्व्वं सोऽर्हति कल्याणं कनीयानपि स प्रभुः ॥"
इति मात्स्ये २२।३४ अध्यायौ ॥ * ॥
सत्पुत्रोत्पत्तिमात्रेण पुन्नामनरकत्राणं स्वर्गगमनञ्च । यथा,—
"सत्पुत्रेण सुनिश्चेष्टाः सत्पुत्रेण हि दुर्म्मतिः ।
उत्तारयान्वियात् स्वर्गं पुन्नामनरकादृतम् ॥"
इत्यग्निपुराणम् ॥

पुत्रः

अपि च ।

"सत्पुत्रेण च जातेन वेणोऽपि त्रिदिवं ययौ ।
पन्नामनरकात्तातः स तेन सुमहात्मना ॥"

इति विष्णुपुराणे । १ । १३ । ४१ ॥ * ॥

विद्यादिरहितस्य पुत्रस्य निन्दा यथा,—

"तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी ।
कोऽर्थः पुत्रेण जातेन यो न विद्वान् धार्मिकः ॥
एकेनापि सुपुत्रेण विद्यायुक्तेन धीमता ।
कुलं पुरुषसिंहेन चन्द्रेण गगनं यथा ॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वनं सुवासितं सर्व्वं सुपुत्रेण कुलं यथा ॥
एको हि गुणवान् पुत्रो निर्गुणेन शतेन किम् ।
चन्द्रो हन्ति तमांस्येको न च ज्योतिः सहस्रशः ॥
लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ॥
जायमानो हरेद्दारान् वर्द्धमानो हरेद्धनम् ।
म्रियमाणो हरेत् प्राणान् नास्ति पुत्रसमो रिपुः ॥
ग्रौर्य्ये तपसि दाने वा यस्य न प्रथितं यशः ।
विद्यायामर्थलाभे वा मातुरुच्चार एव सः ॥"

इति गारुडे ११४।२१५ अध्यायौ ॥ * ॥

स च मध्यमोत्तमाधमभेदेन त्रिविधः । यथा,—

"यदुपात्तं यशः पित्रा धनं वीर्य्यमथापि वा ।
तन्न हापयते यस्तु स नरो मध्यमः स्मृतः ॥
तद्वीर्य्याभ्यधिकं यस्तु पुनरन्यत् स्वशक्तितः ।
निष्पादयति तं प्राज्ञा वदन्ति नरसत्तमम् ॥
यः पित्रा समुपात्तानि धनवीर्य्ययशांसि च ।
न्यूनतां नयति प्राज्ञास्तमाहुः पुरुषाधमम् ॥"

इति मार्कण्डेयपुराणम् ॥ * ॥

अपि च ।

"उत्तमश्चिन्तितं कुर्य्यात् प्रोक्तकारी च मध्यमः ।
अधमोऽश्रद्धया कुर्य्यादकर्त्तोच्चरितं पितुः ॥"

इति महाभारतम् ॥

(अनुरूपपुत्रप्राप्त्युपायो यथा,—

"ततः समाप्ते कर्म्मणि पूर्व्वं दक्षिणपादमभिहरन्ती प्रदक्षिणमग्निमनु परिक्रामेत् ततो ब्राह्मणान् स्वस्ति वाचयित्वा सह भर्त्राभ्यग्रेयं प्राश्नीयात् । पूर्व्वं पुमान् पश्चात् स्त्री नचोच्छिष्टमवघ्रेषयेत् । ततस्त्रौ सह संवसेतामहरात्रं तथाविधपरिच्छदावेव तथेष्टं पुत्रं जनयेताम् । या तु स्त्री श्यामं लोहिताक्षं वृषोरस्कं महाबाहुं पुत्रमाशासीत । या वा कृष्णं कृष्णश्मश्रुदीर्घकेशं शुक्लाक्षं शुक्लदन्तं तेजस्विनमात्मवन्तम् । एष एवानयोरपि होमविधिः किन्तु परिवर्हवर्णवर्ज्यं स्यात् पुत्रवर्णानुरूपस्तु यथाग्नीरेव तयोः परिवर्होऽन्यः कार्य्यः स्यात् । द्विजेभ्यः श्रुत्वा तु नमस्कारमेव कुर्य्यात् देवगुरुतपस्विसङ्घेभ्यश्च । या या च यथाविधं पुत्रमाशासीत तस्यास्तस्यास्तां पुत्राग्निमनुनिशम्य तांस्तान् जनपदान् मनसानुपरिक्रामयेत् । ततो या या येषां येषां जनपदानां मनुष्याणामनुरूपं पुत्रमाशासीत सा सा तेषां तेषां जनपदानामाहारविहारोपचारपरिच्छदाननुविधीयेति वाच्या स्यात् । इत्येतत् सर्व्वं पुत्राग्नेयं सन्दृब्धिकरं कर्म्म व्याख्यातम् ।"

"तथा च कुर्व्वती शनैः शनैः पूर्व्वं प्रवाहेन ततोऽनन्तरं बलवत्तरमिति तस्याश्च प्रवाह्यमाणायां स्त्रियः शब्दं कुर्य्युः प्रजाताः प्रजाता धन्यं धन्यं पुत्रमिति तथास्या हर्षेणाप्यायन्ते प्राणाः ।" इति चरके शारीरस्थानेऽष्टमेऽध्याये ॥)

पुत्रकः, पुं, (पुत्र + स्वार्थे संज्ञायामनुकम्पायां वा कन् ।) पुत्रः । (यथा, विष्णुपुराणे । १ । ११ । २१ । तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्रक ! । यस्य यावत् स तेनैव खेन तुष्यति बुद्धिमान् ॥") शरभः । धूर्त्तः । शैलविशेषः । वृक्षभेदः । इति मेदिनी । के, १२४ ॥ पतङ्गकः । अनुकम्पान्वितजनः । इति शब्दरत्नावली ॥

पुत्रकन्दा, स्त्री, (पुत्रप्रदो कन्दोऽस्याः । अस्याः कन्दस्य गर्भदोषनाशेन पुत्रदात्वात् तथात्वम् ।) लक्ष्मणाकन्दः । इति राजनिर्घण्टः ॥

पुत्रका, स्त्री, (पुत्र + स्वार्थे संज्ञायां वा कन् । टाप् । "न यासयोः ।" ७ । ३ । ४५ । इत्यस्य "क्षुतकापुत्रिकाकृन्दारकानां वेति वक्तव्यम् ।" इति वार्त्तिकोक्त्या ङीन इत्वाभावश्च ।) पुत्रिका । इति शब्दरत्नावली ॥

पुत्रजीवः, पुं, (पुत्रं गर्भे जीवयतीति । जीवि + अण् ।) वृक्षविशेषः । जियापुता इति भाषा । तत्पर्य्यायः । क्षीपदापहः २ । इति त्रिकाण्डशेषः ॥ कुमारजीवः ३ पुत्रञ्जीवकः ४ । इति रत्नमाला ॥ पवित्रः ५ गर्भदः ६ सुतजीवकः ७ ॥ अस्य गुणाः । हिमत्वम् । दृष्यत्वम् । श्लेष्मगर्भजीवदात्वम् । चक्षुष्यत्वम् । पित्तश्रमनत्वम् । दाहदत्वानिवारणत्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । वातकारित्वम् । रूक्षमूत्रमलत्वम् । स्वादुत्वम् । पटुत्वम् । कटुत्वम् । इति भावप्रकाशः ॥

पुत्रञ्जीवकः, पुं, (पुत्रं गर्भं जीवयतीति । जीवि + ण्वुल् । द्वितीयाया अलुक् ।) पुत्रजीवकवृक्षः । इति रत्नमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने १६ अध्याये ।

"अनेनैव विधानेन पुत्रञ्जीवकजं रसम् ।
प्रयुञ्जीत भिषक् प्राज्ञः कासशालाग्रविभागवित् ॥")

पुत्रस्य जीवके, त्रि ॥

पुत्रदा, स्त्री, (पुत्रं गर्भं ददाति सेवनेनेति । दा + कः ।) वन्ध्याकर्कोटकी । लक्ष्मणाकन्दः । गर्भदात्रीक्षुपः । इति राजनिर्घण्टः ॥

पुत्रदात्री, स्त्री, (पुत्रं ददाति सेवनेनेति । दा + ष्ट्रन् + ङीप् । वन्ध्यादोषनाशित्वादस्यास्तथात्वम् ।) मालवे प्रसिद्धो लताविशेषः । तत्पर्य्यायः । वासारिः २ भमरी ३ श्वेतपुष्पिका ४ वृतपत्रा ५ अतिगन्धाक्षुः ६ वेणुजाता ७ सुवल्लरी ८ । अस्या गुणाः । वातकटूष्णकफनाशित्वम् । सुरभित्वम् । सर्व्वदा पथ्यत्वम् । वन्ध्यादोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

पुत्रिका

पुत्रप्रदा, स्त्री, (पुत्रं प्रददाति सेवनेनेति । प्र + दा + कः । टाप् ।) त्वचिका । इति राजनिर्घण्टः ॥

पुत्रभद्रा, स्त्री, (पुत्रस्य भद्रमस्या इति ।) वृद्धजीवन्ती । इति राजनिर्घण्टः ॥

पुत्रमद्गुः, स्त्री, (पुत्रं पवित्रं मद्गुमिव पुष्पमस्याः । गौरादित्वात् ङीष् ।) अजमद्गुः । इति राजनिर्घण्टः ॥

पुत्रश्रेणी स्त्री, (पुत्राणां तनूसन्तानानां श्रेणिरत्र । ङीप् ।) स्त्रीकिपर्णी । इति रत्नमाला ॥ (यथा, सुश्रुते शल्यस्थाने ३८ अध्याये ।

"श्यामा महाश्यामा लक्ष्मणा शक्रिणी निष्पावकर्कोटिकाकरम्भकर्कारुकपुत्रश्रेणीगवाक्षी राष्ट्रवृक्षकरञ्जकृष्णगुञ्जोत्पलाक्षगलान्त्रीसुधाः सुवर्णक्षीरी चेति ॥")

पुत्रसूः, स्त्री, (पुत्रं सूते इति । सू + क्विप् ।) पुत्रजननिका । यथा,—

"पुत्रसूः पुण्यभूमिः स्याद्धनसूः पुत्रिकाप्रसूः ॥"

इति शब्दरत्नावली ॥

पुत्रान्नादः, त्रि, (पुत्रस्य अन्नं तदुपहृतमन्नमत्तीति । अद् + अण् ।) पुत्रान्नभोजी । तत्पर्य्यायः । कुटीचकः २ । इति त्रिकाण्डशेषः ॥

पुत्रिका, स्त्री (पुत्री + स्वार्थे कन् टाप् । "कैशरः ।" ७ । ४ । १३ । इति ह्रस्वः ।) कन्या । तत्पर्य्यायः । आत्मजा २ दुहिता ३ पुत्री ४ तनुजा ५ सुता ६ अपत्यम् ७ पुत्रका ८ स्वजा ९ तनया १० नन्दिनी ११ । इति शब्दरत्नावली ॥ (यथा, पञ्चतन्त्रे । ३ । २२१ ।

"पुत्रिकात्रवीत् । तात ! अतिदहनात्मकोऽयं नाहमेनमभिलषामि ॥" पुत्रीव प्रतिकृतिरस्या इति । पुत्री + "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ह्रस्वश्च ।) पुत्तलिका । यावतूलकः । इति मेदिनी । के, १२४ ॥ (यथा, सुश्रुते शल्यस्थाने । १६ अध्याये ।

"पीठोपमपालिरुभयतः क्षीणपुत्रिकाग्निनो निर्व्विधिमः शूलाग्रुसमवियमपालिश्चायोजिमः ॥"

पुत्रस्वरूपत्वेन कृता कन्या । तद्भर्त्तृजातः पुत्रस्तु कन्यादातुः पुत्रो भवतीति । यथा, मनौ । ९ । १२७–१२८ ।

"अपुत्रोऽनेन विधिना सुतां कुर्व्वीत पुत्रिकाम् ।
यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम् ॥"

यथा च महाभारते । १ । ६६ । १२ ।

"ता: सर्व्वाः स्वनवद्याङ्ग्यः कन्याः कमललोचनाः ।
पुत्रिकाः स्थापयामास नरपुत्रः प्रजापतिः ॥")

पुत्रिकापुत्रः, पुं. (पुत्रिकायाः जातोऽस्याः पुत्रे स हि मदीयः पुत्रो भविष्यतीति पुत्रस्वरूपत्वेन कृतायाः सुतायाः पुत्रः ।) पुत्रिकायाः सुतः । स च औरससमः । यथाह वसिष्ठः ।

"अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् ।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति ॥
अथवा पुत्रिकैवेह सुतः पुत्रिकासुतः सोऽप्यौरससम एव पित्रवयवानामस्यात्मात्मावयवानां

बाहुल्याच्च । यथाह वशिष्ठः । द्वितीयः पुत्रिकेवेति । द्वितीयः पुत्रः कर्त्येवेत्यर्थः ।" इति मिताक्षरा ॥

पुत्रिकाप्रसूः स्त्री, (पुत्रिकायाः कन्यायाः प्रसूर्जननी ।) पुत्रिकाजननी । तत्पर्य्यायः धनसूः २ । इति शब्दरत्नावली ॥

पुत्रिकासुतः, पुं, (पुत्रिकायाः सुतः ।) पुत्रिकायाः पुत्रः । पुत्रिकेव पुत्रः । अस्य प्रमाणं पुत्रिकापुत्रशब्दे द्रष्टव्यम् ॥

पुत्रिणी, स्त्री, (पुत्रोऽस्या अस्तीति । पुत्र + इनिः + ङीप् ।) पुत्रवती । यथा,—

"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् ।
सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥"

इति दायभागधृतमनुवचनम् ॥

पुत्री, [न्] पुं, (पुत्रोऽस्यास्तीति । पुत्र + इनिः ।) पुत्रयुक्तः । पुत्रशब्दादर्थे इनिप्रत्ययनिष्पन्नः ॥ यथा,—

"ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ।
पितॄणामनृणश्चैव स तस्मात्सर्व्वमर्हति ॥"

इति मनुः ॥

पुत्री, स्त्री, (पुत्र + "ग्राङ्गैरवाद्यो ङीन् । ४ । १ । ७३ । इति ङीन् । यद्वा, गौरादित्वात् ङीष् ।) सुता । इति हलायुधः ॥ अस्याः पर्य्यायः पुत्रिकाशब्दे द्रष्टव्यः । वृत्तविशेषः । इति शब्दचन्द्रिका ॥

पुत्रीयं, त्रि, (पुत्रस्य निमित्तं संयोग उत्पातो वेति । पुत्र + "पुत्राच्छ च ।" ५ । १ । ४० । इति छः ।) पुत्रार्थम् । (यथा, महाभारते १ । ६७ । १६३ ।

"धन्यं यशस्यं पुत्रीयमायुष्यं विजयावहम् ।
इदमंशावतरणं श्रोतव्यमनसूयता ॥"

यथा च रघौ । १० । ३ ।

"ऋष्यशृङ्गादयस्तस्य सम्भृताः सम्भृतक्रतोः ।
आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः ॥"

"पुत्रीयां पुत्रनिमित्ताम् ।" इति तट्टीकायां मल्लिनाथः ॥") पुत्रसम्बन्धि । पुत्रस्येदमित्यर्थे ईयप्रत्ययनिष्पन्नम् । इति व्याकरणम् ॥

पुत्रेष्टिः, स्त्री, (पुत्रनिमित्तिका इष्टिरिति मध्यपदलोपी समासः ।) पुत्रनिमित्तकयागविशेषः । इति जटाधरः ॥ यथा,—

"गृहीला पञ्चवर्षीयं पुत्रेष्टिं प्रथमश्चरेत् ॥"

इति स्मृतिः ॥

(अस्याः क्रियाविशेषो यथा,—

"ततः पुत्रकामा पश्चिमतोऽग्निं दक्षिणतो ब्राह्मणमुपवेश्यान्वालभेत सह भर्त्रा यष्टेष्टं पुत्रमाशासाना । ततस्तस्या आशासानाया ऋत्विक् प्रजापतिमभिनिर्दिश्य योनौ तस्याः कामपरिपूरणार्थं काम्यामिष्टिं निर्व्वपेद्विष्णुर्योनिं कल्पयतित्यन्वयाच्च ततश्चैवाज्येन स्थालीपाकमयभिः संसार्य्य चिर्जुहुयात् । यथाम्नायश्चोपमन्त्रितमुदपात्रं तस्मै दद्यात् सर्व्वोदकार्य्यान् कुरुष्वेति । ततः समाप्ते कर्म्मणि पूर्व्वं दक्षिणपादमभिहरन्ती प्रदक्षिणमग्निमनुपरिक्रामेत् ततो ब्राह्मणान् स्वस्ति वाचयित्वा सह भर्त्राश्नीयात् । पूर्व्वं प्रमान् पश्चात् स्त्री नचोच्छिष्टमग्नेर्यवेत् ततस्तौ सहसंवसेतामहरात्रं तथाविधपरिच्छदावेव सर्व्वेऽपुत्रं जनयेताम् ।
यातु स्त्रीग्राममोहितानं वृद्धोरस्कं महाबाहुं पुत्रमाशासीत । या वा कृष्णं कृष्णदंष्ट्रदीर्घकेशं शुक्लाक्षं शुक्लदन्तं तेजस्विनमात्मवन्तम् । एष एवानयोरपि होमविधिः किन्तु परिवर्हवर्णवर्ज्यं स्यात् पुत्रवर्णापुरुषस्य यथाग्नेरिव तयोः परिवर्होऽन्यः कार्य्यः स्यात् ।" इति चरके शारीरस्थानेऽष्टमेऽध्याये ॥)

पुत्रेष्टिका, स्त्री, (पुत्रेष्टि + स्वार्थे कन् टाप् च ।) पुत्रनिमित्तकयागविशेषः । इति जटाधरः ॥

पुत्रौ, पुं, (दुहिता च पुत्रश्च पुत्रौ इत्येकशेषः ।) पुत्रदुहितरौ । इत्यमरः । २ । ६ । ३० ॥ द्विवचनान्तोऽयम् ॥

पुत्र्य, त्रि, (पुत्रस्य निमित्तं संयोग उत्पातो वेति । पुत्र + "पुत्राच्छ च ।" ५ । १ । ४० । चकाराद्यत् ।) पुत्रीयम् । पुत्रनिमित्तसंयोगः पुत्रनिमित्तोत्पातो वा । इति पाणिनिः ॥

पुथ, इ कुत्से । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) पञ्चमस्वरी । इ, पुन्थ्यते । अन्तःस्थप्रथमादिरयमित्यन्ये । पुन्थति । इति दुर्गादासः ॥

पुथ, क लिघि । इति कविकल्पद्रुमः ॥ (चुरा० पर० अक० सेट् ।) क, पोथयति । लिघि दीप्तौ । इति दुर्गादासः ॥

पुथ, य हिंसे । इति कविकल्पद्रुमः ॥ (दिवा० पर० सक० सेट् ।) य, पुथ्यति पुपोथ । इति दुर्गादासः ॥

पुद्गलः, पुं (पूरणात् पुद् गलनात् गलः । ततः कर्म्मधारयः । वृद्धिद्वासवत्त्वाद्देहस्य तथात्वम् ।) देहः । (यथा, पार्श्वनाथचरिते । १२ । ११० ।

"चक्षुः शिरसि भाले च नेत्रे सर्व्वाङ्गपुद्गले ॥") आत्मा । इति शब्दरत्नावली ॥ परमाणुः । यथा,—

"स्थूला मध्यास्तथा सूक्ष्माः सूक्ष्मात् सूक्ष्मतराश्च ये ।
देहभेदा भवान् सर्व्वे ये केचित् पुद्गलाश्रयाः ॥"

इति विष्णुपुराणे ५ अंशे २० अध्यायः ॥

"पूर्य्यन्ते गलन्ति चेति पुद्गलाः । वृद्ध्यपक्षयभाजो येऽवयवास्तदाश्रया देहभेदाः । यथाहुः । पूरणाद्गलनाद्देहे पुद्गलाः परमाणव इति ।"

इति तट्टीकायां श्रीधरस्वामी ॥

पुद्गलः, त्रि, (पुत् वर्द्धनशीलः गलो ह्रासवांश्चेति कर्म्मधारयः ।) सुन्दराकारः । इति शब्दरत्नावली ॥ रूपादिमद्द्रव्यम् । इति हेमचन्द्रः ॥

पुनः, [र्] व, (पुनाय्यते स्तूयते इति । पुन + बाहुलकात् अर् अस्य उत्वञ्च ।) अप्रथमः । (यथा, मनुः । २ । १२० ।

"ऊर्द्धं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥")

भेदः । अवधारणम् । इत्यमरः । ३ । ४ । १५ ॥ अधिकारः । पश्चान्तरम् । इति मेदिनी ॥ रे, ७२ ॥ (यथा, रघुः । २ । ४८ ।

"भूतानुकम्पा तव चेदियं गौ-
रेका भवेत् स्वस्तिमति त्वदन्ते ।
जीवन् पुनः शश्वदुपप्लवेभ्यः
प्रजाः प्रजानाथ ! पितेव पासि ॥")

पुनःपुनः [र्] व, (पुनर् + वीप्सायां द्वित्वम् ।) वारंवारम् । तत्पर्य्यायः । सुहुः २ अभीक्ष्णम् ३ असकृत् ४ । इत्यमरः । ३ । ४ । १२ ॥ वारंवारेण ६ पौनःपुन्यम् ७ प्रतिक्षणम् ८ । इति शब्दरत्नावली ॥ (यथा, चाणक्ये ।

"अतिथिर्बालकश्चैव राजा भार्य्या तथैव च ।
अस्ति नास्ति न जानन्ति देहि देहि पुनः-
पुनः ॥")

पुनःपुना, स्त्री, नदीविशेषः । पुनपुना इति भाषा । यथा,—

"कीकटेषु गया पुण्या पुण्यं राजगृहे वनम् ।
अवनस्याश्रमः पुण्यो नदी पुण्या पुनःपुना ॥"

इति वायुपुराणे गयामाहात्म्यम् ॥

पुनःसंस्कारः, पुं, (पुनः पुनर्वारकृतः संस्कारः ।) द्वितीयवारोपनयनादिसंस्कारः । यथा,—

"पुनश्चसौ हृतो विप्रः पुनःसंस्कारमर्हति ॥"

इति ज्योतिस्तत्त्वम् ॥

पुनरागमनं, क्ली. (पुनः पुनर्वारमागमनम् ।) द्वितीयवारागमनम् । फिरे आसा इति भाषा ॥ यथा—

"संवत्सरव्यतीते तु पुनरागमनाय च ॥"

इति दुर्गोत्सवपद्धतिः ॥

पुनरुक्तं, क्ली, (उक्त + भावे क्तः । पुनः पुनर्वारमुक्तम् ।) पुनर्वारकथनम् । यथा,—

"आपातनो यदर्थस्य पौनरुक्त्येव भाषणम् ।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः ।"

इति साहित्यदर्पणम् ॥

(यथाह गौतमः । ५ । ५७—५८ ।

"शब्दार्थयोः पुनर्व्वचनं पुनरुक्तमन्यत्रानुवादात् ॥"

"पुनर्व्वचनं पुनरुक्तं तस्य विभागार्थं शब्दार्थयोरिति । तेन शब्दपुनरुक्तमर्थपुनरुक्तञ्च लभ्यते । अनुवादेऽतियाम्निवारणाय अन्यत्रानुवादादिति अनुवादान्यत्वे सतीत्यर्थः । निष्प्रयोजनं पुनरभिधानं हि पुनरुक्तं अनुवादस्तु व्याख्यारूपः सप्रयोजनक एवेति भावः । तथाच समानार्थकपूर्व्वानुपूर्व्वीकशब्दप्रयोगः शब्दपुनरुक्तम् । समानार्थकभिन्नानुपूर्व्वीकशब्दस्य निष्प्रयोजनं पुनरभिधानमर्थपुनरुक्तम् । आद्यं यथा घटो घट इति । द्वितीयं यथा, घटः कलस इति । एतस्य प्रमादादिना सम्भवः ।"*॥

पुनरुक्तभेदान्तरमाह ।

"अर्थादापन्नस्य स्वशब्देन पुनरभिधानम् ।"

"पुनरुक्तमित्यनुवर्त्तते । यस्मिन्नुक्ते यस्यार्थस्यौत्सर्गिकी प्रतिपत्तिर्भवति तस्य तेन रूपेण पुनरभिधानं पुनरुक्तम् । इदमेव च अर्थपुनरुक्तमिति गीयते । यथा वह्निरुष्ण इति पूर्व्वपदात्तिप्रोक्तिरियम् । उष्णो वह्निरिति उत्तरपदात्तिप्रोक्तिः । एवं वह्निरस्ति गेहे नास्तीति विध्यात्तिप्रोक्तिः । जीवन् गेहे नास्ति वह्निरस्तीति निषेधात्तिप्रोक्तिः । पुनरुक्तश्चैवंविधश्चेदं भाष्यादि सम्मतम् । तस्यैव शब्दस्य पुनरभिधानं पर्य्यायेणाभिधानम् अन्यत् पुनरर्थपुनरुक्तमित्याहुः ॥"* ॥ पुनर् + वच + कर्म्मणि क्तः । पुनःकथिते, त्रि । यथा, महाभारते । ८।४।१३ ।
"ब्रूहि सञ्जय ! तत्त्वेन पुनरुक्तां कथामिमाम् ॥")

पुनरुक्तजन्मा, [न्] पुं, (पुनरुक्तं जन्म यस्य । "द्वितीयं मौञ्जीबन्धने ।" इति मनुक्तेरस्य तथात्वम् ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥

पुनर्जन्मन्, [न्] क्ली, (पुनर्भूयो जन्म ।) पुनर्व्वारोत्पत्तिः । यथा,—
"आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्জ্জুन ! ।
मामुपेत्य तु कौन्तेय ! पुनर्जन्म न विद्यते ॥"
इति श्रीभगवद्गीतायाम् । ८ । १६ ॥

पुनर्नवः, पुं, (पुनरपि छिन्नेऽपि भूयोऽपि नवः ।) नखः । इति हेमचन्द्रः ॥

पुनर्नवा, स्त्री, (छिन्नायां पुनरपि नवा । यद्वा, पुनर्भूयोभूयः नूयते स्तूयते इति । नु स्तुतौ + "ऋदोरप् ।" ३ । ३ । ५७ । इत्यप् । ततष्टाप् । त्वभ्रादित्वात् न णत्वम् ।) शाकविशेषः । तत्पर्य्यायः । शोथघ्नी २ वर्षाभूः ३ प्रावृषायणी ४ कठिल्लकः ५ । एता अरुणाः ॥ श्वेतायाः पर्य्यायः । वृश्चीरा २ चिरादिका ३ । इति रत्नमाला ॥ विशाखः ४ कठिल्लः ५ अग्निवाटिका ६ पृथ्वी ७ सितवर्षाभूः ८ धनपत्रः ९ कठिल्लकः १० । अस्या गुणाः । उष्णत्वम् । तिक्तत्वम् । कफकासकृद्रोगशूलासपाण्डुशोफानिलनाशित्वञ्च । इति राजनिर्घण्टः ॥ भेदकत्वम् । रसायनत्वम् । आमदुर्नामव्रणोदरनाशित्वञ्च । इति राजवल्लभः ॥ * ॥
"पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका ।
कटुः कषाया रुच्यर्शःपाण्डुहृद्दीपनी परा ॥
शोफानिलगरश्लेष्महरी व्रणोदरप्रणुत् ॥ * ॥
पुनर्नवा परा रक्ता रक्तपुष्पानिलाटिका ।
शोथघ्नी क्षुद्रवर्षाभूर्वर्षकेतुः कठिल्लकः ॥
पुनर्नवारुणा तिक्ता कटुपाका हिमा लघुः ।
वातला व्याहिणी श्लेष्मपित्तरक्तविनाशिनी ॥"
इति भावप्रकाशः ॥

पुनर्भवः, पुं, (छिन्नोऽपि पुनर्भवतीति । भू + अच् ।) नखः । इत्यमरः । २ । ६ । ८३ ॥ रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ (पुनर् + भू + भावे अप् । पुनरुत्पत्तिः । यथा, महाभारते । १ । १ । २५५ ।
"सन्ततिश्च प्रवृत्तिश्च जन्मनश्च्युतपुनर्भवाः ॥"* ॥
पुनर्भवतीति । भू + अच् ।) पुनर्व्वारजाते, त्रि ॥

पुनर्भवी [न्] पुं, (पुनर्भवः पुनःपुनरुत्पत्तिरस्यस्तीति । पुनर्भव + इनिः ।) आत्मा । इति हेमचन्द्रः । ६ । २ ॥

पुनर्भूः, स्त्री, (पुनर्भवति जायात्वेनेति । भू + क्विप् ।) विरूढा । तत्पर्य्यायः । दिधिषूः २ । इत्यमरः । २ । ६ । २३ ॥ "अक्षतयोनित्वाद्विधवा पुनरुच्यते । इत्यसावन्यस्य भूत्वा अन्यस्य पुनर्भवतीति क्विपि पुनर्भूः । धिष्यते निन्दितनया ग्रह्यते द्विधिषूः धिष ग्रहे नास्तीति कूः निपातनाद्दित्वम् ।" इति तट्टीकायां भरतः ॥ सा त्रिविधा । यथा,—
"परपूर्व्वास्त्रियस्तन्वाः सप्त प्रोक्ता यथाक्रमम् ।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा ॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्म्मणा ॥
देशधर्म्मानपेक्ष्य स्त्री गुरुभिर्या प्रदीयते ।
उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्त्तिता ॥
उत्पन्नसाहसा उत्पन्नपतिचारा ।
असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते ।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्त्तिता ॥"
इति मिताक्षरा ॥ * ॥

पुनर्व्वारजाते, त्रि ॥

पुनर्याचा, स्त्री, (पुनरप्रथमा याचा ।) निवर्त्तनयात्रा । सा तु आषाढ़शुक्लपक्षीयरथद्वितीयानन्तरं तन्नवमदिवसविहिता श्रीजगन्नाथदेवस्य दक्षिणमुखयात्रा । फिरे रथ इति उल्टा रथ इति च भाषा । अस्या इतिकर्त्तव्यता यात्राशब्दे द्रष्टव्या ॥

पुनर्व्वसुः, पुं, (पुनः पुनः शरीरेषु वसति क्षेत्रज्ञरूपेणेति । पुनर् + वस + उः ।) विष्णुः । (यथा महाभारते । १३ । १४६ । ३६ ।
"अघनो विजयो जेता विश्वयोनिः पुनर्व्वसुः ॥") अग्निः । कात्यायनमुनिः । लोकभेदः । धनारम्भः । इति शब्दरत्नावली ॥ नक्षत्रविशेषः । स च धनुराकृतिपञ्चतारात्मकः । यथा,—
"मध्यवर्त्मनि शरासनाकृता-
वम्बरस्य सुरमाल्भे गताः ।
लिम्पिकाः सुमुखि ! पञ्चतारके
पञ्चपावकमिता घटोदयात् ॥"
इति कालिदासकृतराविलग्ननिरूपणम् ॥
तस्याधिष्ठात्री देवता अदितिः । इति जातकः ॥ तत्र जातफलम् । यथा, कोष्ठीप्रदीपे ।
"प्रभूतमित्रः कृतशास्त्रयत्नः
सद्वल्लकामी वरभूषणाढ्यः ।
दाता प्रतापी वसुधाधिपश्रीः
पुनर्व्वसौ यस्य भवेत् प्रसूतिः ॥"

पुनर्व्वसू, पुं, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतसप्तमनक्षत्रम् । तत्पर्य्यायः । यामकौ २ आदित्यौ ३ । इति हेमचन्द्रः ॥ द्विवचनान्तोऽयम् ॥

पुन्नागः, पुं, (पुमान् नाग इव श्रेष्ठत्वात् ।) वृक्षनाम ख्यातवृहत्पुष्पवृक्षविशेषः । तत्पर्य्यायः । पुरुषः २ तुङ्गः ३ केशरः ४ देववल्लभः ५ । इत्यमरः । २ । ४ । २५ ॥ कुम्भीकः ६ रक्तकेशरः ७ । इति रत्नमाला ॥ पुन्नागः ८ पाटलद्रुमः ९ रक्तपुष्पः १० रक्तरेणुः ११ अरुणः १२ । अस्य पुष्पगुणाः । मधुरत्वम् । शीतत्वम् । सुगन्धित्वम् । पित्तनाशित्वम् । भूरितो द्राववत्त्वम् देवताप्रसादनत्वञ्च । इति राजनिर्घण्टः ॥ कषायत्वम् । कफरक्तनाशित्वञ्च । इति राजवल्लभः ॥ * ॥ सितोत्पलः । जातीफलः । नरश्रेष्ठः । पाण्डुनागः । इति मेदिनी । गे, ४६ ॥

पुन्नाटः, पुं, (पुन्नाड़ + पृषोदरादित्वात् डस्य टः ।) चक्रमर्दः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"चक्रमर्दः प्रपुन्नाटो दद्रघ्नो मेषलोचनः ।
पुन्नाटः स्यादेड़गजचक्री पुन्नाट इत्यपि ॥")

पुन्नाड़ः, पुं, (पुमांसं नाड़यतीति । नड़ बंधे + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चक्रमर्दः । इति राजनिर्घण्टः ॥

पुन्नामनरकः, पुं, (पुदिति नाम यस्य स पुन्नामा । पुन्नामा चासौ नरकश्चेति कर्म्मधारयः ।) पुत इतिनामकनरकविशेषः । तच्च षोड़शविधपापैः पतति । यथा,—
ब्रह्मोवाच ।
"परदाराभिगमनं पापानाञ्चोपसेवनम् ।
पारुष्यं सर्व्वभूतानां प्रथमं नरकं स्मृतम् ॥
फलस्तेयं महापापं फलार्हस्य च पाटनम् ।
पाटनं वृक्षजातीनां द्वितीयं परिकीर्त्तितम् ॥
वर्ष्मादानं तथा दिष्टमवध्यवधबन्धनम् ।
विवादित्वमहेतूत्थं तृतीयं नरकं स्मृतम् ॥
भयदं सर्व्वसत्त्वानां नरभूतिविनाशनम् ।
भंशनं निजधर्म्माणां चतुर्थं नरकं स्मृतम् ॥
मारणं मित्रकौटिल्यं मिथ्याभिशपनञ्च यत् ।
मिष्टैकाशनमित्युक्तं पञ्चमञ्च विपाचनम् ॥
प्ररोहणं यन्त्रकरं यमनं योगनाशनम् ।
यानसुखस्य हरणं षष्ठमुक्तं नृपाचनम् ॥
राजभागस्य हरणं राजजायानिषेवणम् ।
राज्ये लङ्घितकारित्वं सप्तमं नरकं स्मृतम् ॥
स्तब्धत्वं लोलुपत्वञ्च लब्धधर्म्मार्थनाशनम् ।
नानाकर्म्मकरं प्रोक्तमष्टमं नरकं स्मृतम् ॥
ब्रह्मस्वहरणञ्चैव ब्राह्मणानां विनिन्दनम् ।
विरोधो ब्राह्मणैश्चोक्तो नवमो नरकक्षयम् ॥
शिष्टाचारविनाशञ्च मिथ्रद्वेषं शिशोर्व्वधम् ।
शास्त्रक्षेयं धर्म्मशून्यो दशमं परिकीर्त्तितम् ॥
षड़ङ्गनिधनं घोरं पाड़्गुण्यप्रतिघेधनम् ।
एकादशमभेवोक्तं नरकं सद्विरुत्तम ! ॥
सद्विरुक्तं सदा चैवमनाचारमसत्क्रिया ।
संस्कारपरिहीनत्वमिदं द्वादशमं स्मृतम् ॥
हानिर्धर्म्मार्थकामानामपवर्गस्य हारणम् ।
स्वर्गदृत्तुञ्च मतिदं त्रयोदशमसुच्यते ॥
समलं धर्म्महीनञ्च यद्दृश्यं यच्च दोषजम् ।
चतुर्दशकमेवोक्तं नरकं सद्विगर्हितम् ॥
अज्ञानत्वाप्यनिष्टत्वमशौचमशुभावहम् ।
गर्ह्यं तत् पञ्चदशकमसत्यवचनानि च ॥

आलस्यं वै पोड्शकमाक्रोशश्च विगर्हितः ।
सर्वस्य चातताधित्वमगारेष्वग्निदापनम् ॥
इच्छा च परदारेषु नरकाय निगद्यते ।
ईर्ष्याभावश्च सभ्येषु औद्धत्यन्तु विगर्हितम् ॥
एतेषु पापैः पुरुषः पुन्नामनरकं पतेत् ।
पुन्नामनरकं घोरं विनाग्निं प्राह सर्व्वतः ॥
एतस्मात् कारणात् साध्वस्तः पुत्रो निगद्यते ॥"
इति वामने ५८ अध्यायः ॥

पुप्फुल., पुं, (पुष्पफुल् । पृषोदरादित्वात् सस्य लत्वम् ।) उदरस्थवायुः । इति भूरिप्रयोगः ॥

पुप्फुस., पुं, (पुष्पफुसवत् आकृतिरस्यास्तीति । अच् ।) पद्मबीजाधारः । तत्पर्य्यायः । बीजकोषः २ वराटकः ३ । (पुप्फुस इति शब्दोऽस्य लोके ।) वामपार्श्वस्थमलाशयः । फाँफड़ा इति फुलघरा इति च भाषा । तत्पर्य्यायः । कोष्ठः २ । इति शब्दचन्द्रिका ॥ रक्तफेनजः ३ । इति हेमचन्द्रः ॥ तिलकम् ४ क्लोम ५ । इत्यमरः ॥ क्लोमम् ६ । इति भरतः ॥ फुप्फुसोऽपि पाठः ॥ (फुप्फुसशब्दोऽस्य विषयो ज्ञातव्यः ॥)

पुमान् [स्] पुं, (पाति रक्षतीति । पा + "पातेर्डुमुसुन् ।" उणा० । ४ । १७७ । इति डुमुसुन् । डित्त्वात् टिलोपः ।) मनुष्यजातिपुरुषः । तत्पर्य्यायः । पञ्चजनः २ पूरुषः ३ पूरुषः ४ नृ ५ । इत्यमरः । २ । ६ । १ ॥ (यथा,—

"स्वदेशजातस्य जनस्य लोके
गुणाधिके पुंसि भवत्यवज्ञा ।
निजाङ्गना यद्यपि रूपराशि-
स्तथापि पुंसां परदारचेष्टा ॥'

इत्युद्भटः ॥)

मनुष्यजातिः । इति केचिदिति भरतः ॥ पुंलिङ्गमात्रञ्च ॥ (कूटस्थपुरुषः । यथा, विष्णुपुराणे । १ । २ । २ ।

"सदसद्ब्रह्म य ईश्वरः पुमान्
गुणोर्म्मिसर्गस्थितिकालसंलयः ।
प्रधानबुद्ध्यादिजगत्प्रपञ्चकः
स नोऽस्तु विष्णुर्गतिभूतिमुक्तिदः ॥"

"अक्षरमिति विकारं निराकरोति पुमान् कूटस्थः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

पुर, ग्र अग्रगत्याम् । इति कविकल्पद्रुमः । (तुदा० पर० सक० सेट् ।) ग्र, पुरति अग्रेसरः कनिष्ठस्य अग्रे गच्छतीत्यर्थः । पोरिता । इति दुर्गादासः ॥

पुरं, क्ली. (प्रियते पूर्य्यते इति । पॄ पूर्त्तौ + कः ।) गेहः । देहः । पाटलिपुत्रः । पुष्पादीनां दलावृत्तिः । इति मेदिनी । रे, ५८—५६ ॥ नागरमुस्ता । इति रत्नमाला ॥ धर्म्म इति शब्दरत्नावली ॥ गृहोपरिगृहम् । इति विश्वः ॥

पुरं स्त्री क्ली, (पिपर्त्तीति । पॄ + सृजविसृजादित्वात् कः । यद्वा, पुरति अग्रे गच्छतीति । पुर + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) हट्टादिविशिष्टस्थानम् । इति श्रीधरस्वामी ॥ बहुभ्रामीयव्यवहारस्थानम् । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । पूः २ पुरी ३ नगरम् ४ पत्तनम् ५ स्थानीयम् ६ कटकम् ७ षट्टम् ८ निगमः ९ पुटभेदनम् १० । इति शब्दरत्नावली ॥ तस्य लक्षणादि यथा,—

मनुरुवाच ।

"राजा सहायसंयुक्तः प्रभूतधनसञ्चयम् ।
रम्यमाणन्तु सामन्तं मध्यमन्देशमावसेत् ॥
वैश्यशूद्रजनप्रायमनाहार्य्यन्तथा परैः ।
किञ्चिदन्नाद्यसंयुक्तं बहुकर्म्मकरन्तथा ॥
अदेवमातृकं रम्यमतुरङ्गजनान्वितम् ।
करैरपीडितं वापि बहुपुष्यफलन्तथा ॥
अगम्यं परचक्राणां नद्यासगहनादिभिः ।
समदुःखसुखं राज्ञः सततं प्रियमास्थितम् ॥
सरीसृपविहीनञ्च व्याडस्करवर्ज्जितम् ।
एवंविधं यथालाभं राजा विषयमावसेत् ॥
एतद्दुर्गं नृपः कुर्य्यात् यत्नामेकतमं बुधः ।
वनदुर्गं महीदुर्गं नरदुर्गन्तथैव च ॥
वार्क्षवैवाम्बुदुर्गञ्च गिरिदुर्गञ्च पार्थिव ! ।
सर्व्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥
दुर्गञ्च परिघोपेतं चयाट्टालकसंयुतम् ।
घृतगुग्गुलसुस्नेहैश्च घृतशस्त्रञ्च समावृतम् ॥
गोपुरं सकवाटञ्च तत्र स्यात् सुमनोहरम् ।
सपताकं गजारूढो येन राजा विगेत् पुरम् ॥
चतस्रश्च तथा कार्य्या वीथयः सर्व्वतोसुखाः ।
एकस्मिंस्तत्र वीथ्यग्रे देववेश्म भवेद्दृढम् ॥
द्वितीये वापि वीथ्यग्रे राजवेश्म विधीयते ।
धर्म्माधिकरणं कार्य्यं वीथ्यग्रे च तृतीयके ॥
चतुर्थे चैव वीथ्यग्रे गोपुरन्तु विधीयते ॥
आयतं चतुरस्रं वा वृत्तं वा कारयेत् पुरम् ।
सुस्निग्धैर्न त्रिकोणञ्च यवमध्यन्तथैव च ॥
अर्द्धचन्द्रप्रकारञ्च वज्राकारञ्च कारयेत् ॥
अर्द्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्वसेत् ।
अन्यत्र तन्न कर्त्तव्यं प्रयत्नेन विजानता ॥
राज्ञा कारागृहं कार्य्यं दक्षिणे राजवेश्मनः ।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ॥
गजानां प्राङ्मुखा शाला कर्त्तव्या वाप्युदङ्मुखा ।
आग्नेये च तथा भागे आयुधागारमिष्यते ॥
महानसञ्च धर्म्मज्ञ ! कर्म्मशालास्तथापराः ।
गृहं पुरोधसः कार्य्यं वामतो राजवेश्मनः ॥
मन्त्रिवैद्यविदाञ्चैव चिकित्सकगणैरेव च ।
तत्रैव च तथा भागे कोष्ठागारं विधीयते ॥
गवां स्थानं तथैवात्र तुरगाणान्तथैव च ।
उत्तराभिमुखा श्रेणी तुरगाणां विधीयते ॥
दक्षिणाभिमुखा वाथ परिग्रिष्टासु गर्हिता ।
तुरगासु तथा धार्य्याः प्रदीपैः सार्व्वरात्रिकैः ॥
कुक्कुटान् वानरांश्चैव मर्कटांश्च नराधिप ! ।
धारयेदश्वशालायां सवत्सां धेनुमेव च ॥
अजाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा ।
गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमम् ।
अस्तं गते न कर्त्तव्यं देवदेवे दिवाकरे ॥
ततस्तच्च यथास्थानं राजा विज्ञाय सारथिम् ।
दद्यादावसथस्थान् सर्व्वधामनुपूर्व्वशः ॥
योधानां शिल्पिनाञ्चैव सर्व्वेषामविशेषतः ।
दद्यादावसथान् दुर्गे मत्तकाशविदां शुभान् ॥
गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च ।
आहरेत भृशं राजा दुर्गे परबलारुजः ॥
कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते ।
न बहूनामतो दुर्गे विना कार्य्यं तथा भवेत् ॥
सर्व्वं निरर्थकं कार्य्यं विना दुर्गं महीपते ! ।
दुर्गे यन्त्राः प्रकर्त्तव्या नानाप्रहरणान्विताः ।
सहस्रघातिनो राजंस्तेषु रक्षा विधीयते ॥
दुर्गद्वाराणि गुप्तानि कार्य्याण्यपि च भूभुजा ।
सञ्चयश्चात्र सर्व्वेषामायुधानां विधीयते ॥
धनुषां चैपणीयानां तोमराणाञ्च भार्गव ! ।
शराणामथ खड्गानां कवचानान्तथैव च ॥
लगुडानाञ्च कुन्तानां परिघैः सह पार्थिव ! ।
अश्मनाञ्च प्रभूतानां सुद्गराणान्तथैव च ॥
त्रिशूलानां पट्टिशानां कुणपानाञ्च पार्थिव ! ।
प्रासानाञ्च सशूलानां शक्तीनाञ्च नरोत्तम ! ॥
परश्वधानां चक्राणां वर्म्मणाञ्चर्म्मभिः सह ।
कुद्दालरज्जुवेचानां पिटकानान्तथैव च ॥
वेसुकानाञ्च दात्राणामङ्गारस्य च सञ्चयः ।
सर्व्वेषां शिल्पभाण्डानां सञ्चयश्चात्र इष्यते ॥
वादित्राणाञ्च सर्व्वेषामौषधीनान्तथैव च ।
यवसानां प्रभूतानामिन्धनस्य च सञ्चयः ॥
गुडानां सर्व्वतैलानां गोरसानान्तथैव च ।
वसानामथ मज्ज्ञानां स्नायूनामस्थिभिः सह ॥
गोचर्म्मपटहानाञ्च धान्यानां सञ्चितस्तथा ।
तथैव पर्पटानाञ्च यवगोधूमयोरपि ॥
रत्नानां सर्व्ववस्त्राणां लोहानाञ्चाप्यशेषतः ।
कलायमुद्गमाषाणां चणकानां तिलैः सह ॥
तथा च सर्व्वशस्यानां पांशुगोमययोरपि ।
गुणसर्व्वरसं भूर्जतुलाञ्चाश्च टङ्कणम् ॥
राजा सञ्चिनुयाद्दुर्गे यच्चान्यदपि किञ्चन ॥"

कुम्भाश्चाग्नीविषाः कार्य्या आलसिंहादयस्तथा ।
व्याघ्राश्च पक्षिणश्चैव विरुद्धा ये परस्परम् ॥
स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक् ।
कर्त्तव्यानि महाभाग ! यत्नेन पृथिवीक्षिता ॥
उक्तानि चाप्यनुक्तानि राजद्रव्याण्यशेषतः ।
सुगुप्तानि पुरे कुर्य्यान्नानां हितकाम्यया ॥
जीवकर्षभकाकोलीव्यामलक्यः परूषकम् ।
शालपर्णी पृश्निपर्णी सुद्गपर्णी तथैव च ॥
माषपर्णी च मेदे द्वे शारिवे द्वे बलाद्वयम् ।
वीरा श्वसन्ती दृढ्या वृहती कण्टकारिका ॥
भङ्गी शृङ्गाटकी द्रोणी वर्षाभूर्भेरुण्डका ।
मधुपर्णी विदार्य्यौ द्वे महाचुद्रा महातया ॥
धन्वना सह देवाह्वा कटुकेरण्डकं विषम् ।
पर्णाशनाकण्टकीका फलगुखर्ज्जूरयष्टिका ॥
शुक्रातिशुक्रकाश्मर्य्यश्चातिच्छत्रवीरणाः ॥
इक्षुरिक्षुविकाराश्च फाणितादाश्च सत्तम ! ।
सिंही च महादेवी च विश्वदेवाटरूषकम् ॥
मधुकं पुष्पकं साक्षा घृतपुष्पा मधूलिका ।
घृतावरीमधूके च प्रियालन्तालमेव च ॥
आम्रगुप्ता कट्फलाम्रा दारदा राजघृष्टिका ।
राजसर्षपधान्याकश्चव्यप्रोक्ता तथोत्कटा ॥

कालशाकं पद्मबीजं गोवल्ली मधुवल्लिका ।
शीतपाकी कुलिङ्गाची काकजिङ्घोरुपत्रिका ॥
इक्ष्वारुचपुषी चोभौ गुञ्जारकपुनर्नवे ।
कशेरुका तु काश्मीरी विश्वशालूककेशरम् ॥*॥
शूकधान्यानि सर्व्वाणि शमीधान्यानि यानि च ।
क्षीरं क्षौद्रं तथा शुक्रं मज्जा तैलं वसा घृतम् ॥
निकोचाभिषुकास्फोटं वातासामारुमालकम् ।
एवमादीनि चान्यानि विद्धेयो मधुरो गणः ॥
राजा सञ्चिनुयात् सर्व्वं पुरे निरवशेषतः ।
दाड़िमाम्लातकाम्लाश्च तिन्तिड़ीकाम्लवेतसम् ॥
भव्यं कर्कन्धु लकुचं करमर्द्दकरूषकम् ।
बीजपूरककाश्मीरं मालती राजबन्धुकम् ॥
कौटकट्वयपर्णानि द्वयोरम्लिकयोरपि ।
पारेवतं नागरकं प्राचीनारुकमेव च ॥
कपित्थामलकी चुक्रं फलं दन्तशठस्य च ।
जम्बीरं नवनीतञ्च सौवीरकतुषोदके ॥
सुरारसञ्च मद्यानि मस्ततक्रदधीनि च ।
शुक्तानि चैव सर्व्वाणि ज्ञेयान्यम्लगणं द्विजाः ॥
एवमादीनि सर्व्वाणि राजा सञ्चिनुयात् पुरे ॥
सैन्यवोद्भिदपाटेयपाक्यसाम्बुदरोमकम् ।
कुप्यसौवर्च्चलविटं बालकेयं यवाक्षयम् ॥
औषचारं कालभस्म विज्ञेयो लवणो गणः ।
एवमादीनि सर्व्वाणि राजा सञ्चिनुयात् पुरे ॥
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
कुठेरकं समरिचं शिग्रुभल्लातसर्षपाः ॥
कुष्ठाजमोदा किणिही हिङ्गुमूलकधान्यकम् ।
कारवी कुचिकाजाख्यः सुसुखः कालमालिका ॥
फणिज्झकोऽथ लशुनं भूस्तृणं सुरसस्तथा ।
कायस्था च वयःस्था च हरितालं मनःशिला ॥
अम्लता च रदन्ती च रोहिषं कुङ्कुमं तथा ।
वचा एरण्डकाश्मीरं शुक्लकी हपुषा तथा ॥
सर्व्वपित्तानि मूत्राणि प्रायो हरितकानि च ।
सङ्गराणि च मूलानि वल्लिखारिविधानि च ॥
फलानि चैव च तथा सुघ्नेला हिङ्गुपत्रिका ।
एवमादीनि चान्यानि गणः कटुकसंज्ञकः ।
राजा सञ्चिनुयाद्दुर्गे प्रयत्नेन नृपोत्तम ! ॥*॥
सुरुचन्दनहीवेरकृतमालकदारवः ।
हरिद्रामलकोशीरं रक्तमालकवस्तुकम् ॥
दूर्व्वापटोलकटुकादन्तिलकपत्रकच्छुराः ।
किराततिक्तकं निम्बं विषा चातिविषा तथा ॥
तालीशपत्रं तगरं सप्तपर्णविकङ्कताः ।
काकोदुम्बरकोदीच्यसुरसः किणिही तथा ॥
षड्ग्रन्था रोहिणी मांसी पर्पटं मदयन्तिका ।
रसाञ्जनं भृङ्गराजं पतङ्गी परिपेलवम् ॥
दुष्प्रर्ग्रा गुरुणी कामा श्यामार्कं गन्धनाकुली ।
चतुष्पर्णी व्याघ्रनखमम्बका चतुरङ्गुला ॥
रम्भा चैव कुथापुष्पी तारास्फोता हरेणुका ।
वेत्राग्रो वेतसस्तुम्बी विषाणी लोहमञ्जनम् ॥
मालती करवीरक्षाख्या विषाङ्गी जिङ्गिका तथा ।
पर्य्यटञ्च गुडूची च गणश्चित्रकसंज्ञकः ॥
एवमादीनि चान्यानि राजा सञ्चिनुयात् पुरे ।
अभयामलके चोभे तथैव च विभीतकम् ॥
प्रियङ्गुधातकीपुष्पं मोचलोध्रार्জ্জुनासनाः ।
अनन्तान्ती सुरानङ्गा ग्रन्थिनार्कं कणं तथा ॥
भूर्জ্জपत्रं शिलोद्भेदं पाटलापत्रलोमकम् ।
समङ्गा चित्रतामूलं कार्पासा गैरिकाञ्जनम् ॥
विदुमं समधूच्छिष्टं कुम्भीकाकुसुदोत्पलम् ।
न्यग्रोधोदुम्बराश्वत्थकिंशुका ग्रिंशुपा शमी ॥
पियालपिलुका प्लाक्षगिरीषं पद्मकन्तथा ।
विल्वोऽग्निमन्थः शक्तश्च श्यामाकयवकोद्रवम् ॥
राजादनं करीरञ्च धान्यकप्रियकौ तथा ।
प्लाकोटाग्रोकवदराः कदम्बखदिरद्वयम् ॥
एषां पञ्चाशि साराणि मूलानि कुसुमानि च ।
एवमादीनि चान्यानि कषायाख्यो गणो मतः ॥
प्रयत्नेन नृपश्रेष्ठ ! राजा सञ्चिनुयात् पुरे ।
कोटाश्च मारणे योग्या यक्ष्मतायान्धवे च ॥
वातधूमाम्बुमार्गाणां दूषणानि तथैव च ।
धार्य्याणि पार्थिवैर्दुर्गे तानि वक्ष्यामि भारत ! ॥
विषाणान्धारणं कार्य्यं प्रयत्नेन महीभुजा ।
विचित्राश्च गदा धार्य्या विषप्रशमनास्तथा ॥
रक्षोभूतपिशाचघ्नाः शापघ्नाः पुष्टिवर्द्धनाः ।
कलाविदश्च पुरुषाः पुरे धार्य्याः प्रयत्नतः ॥
भीतान् प्रमत्तान् कुपितान् तथैव च विमानितान् ।
कुभृत्यान् पापशीलांश्च न राजा वासयेत् पुरे ॥
यन्त्रायुधाट्टालचर्य्योपपन्नं
समग्रधान्यौषधिसंप्रयुक्तम् ।
बलिग्रजनेश्वान्वितमावसेत
दुर्गं सुगुप्तं नृपतिः सदैव ॥"
इति मात्स्ये राजधर्म्मे दुर्गसम्पत्तिर्नाम १९१ अध्यायः ॥ * ॥ पुरे वर्ज्जनीयानि यथा,—
"पुरे हट्टप्रतोली च परिखातोरणध्वजाः ।
प्रासादाध्वप्रपारामवापीवेश्माः सतो त्वरौ ॥"
इति कविकल्पलता ॥
अवग्रिष्टं नगरशब्दे द्रष्टव्यम् ॥

पुरः, पुं, (पिपर्त्तीति । पॄ + कः ।) गुग्गुलुः । इत्यमरः । २ । ४ । ३६ । (अस्य पर्य्यायो यथा,—
"गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः ।
कुम्भीलूखलकः क्लीवे महिषाक्षः पलङ्कषः ॥"
"अग्निं तीक्ष्णमजीर्णञ्च वयायं श्रममातपम् ।
मद्यं रोषन्त्यजेत् सम्यग्गुणार्थी पुरसेवकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पीतभिराटी । इति शब्दचन्द्रिका ॥

पुरः, [स्] व्य, (पूर्व्वस्मिन् पूर्व्वस्मात् पूर्व्वो वा एवं पूर्व्वस्याः पूर्व्वस्यामित्यादि । पूर्व्व + "पूर्व्वाधरावराणामसि पुरधवश्चैषाम् ।" ५ । ३ । ३९ । इति असि तद्योगेन पुर इत्यादेशश्च ।) अग्रतः । इत्यमरः । ३ । ४ । ७ ॥ (यथा, कुमारे । ४ । ३ ।
"अयि जीवितनाथ ! जीवसी-
त्यभिधायोत्पतया तया पुरः ।
दहशे पुरयाजति क्षितौ
हरकोपानलभस्म केवलम् ॥")
प्राच्यां दिशि । प्रथमे काले । (यथा, अभिज्ञानशकुन्तलायाम् । ७ अङ्के ।
"उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं विधि-
स्तव प्रसादस्य पुरस्तु सम्पदः ॥")
पुरार्थे । अतीते । इति तट्टीकायां भरतः ॥

पुरःसरः, त्रि, (पुरोऽग्रे सरति गच्छतीति । सृ + "पुरोऽव्ययोरग्रेषु सर्त्तेः ।" ३ । २ । ११८ । इति टः ।) अग्रगामी । इत्यमरः । २ । ८ । ७२ ॥ (यथा, महाभारते । ४ । १६ । २२ ।
"यस्याः पुरःसरा ह्यासन् पृष्ठतश्चानुयायिनः ।
साहमद्य सुदेष्णायाः पुरःपश्चाच्च गामिनी ॥")
अस्य पर्य्यायः अग्रसरशब्दे द्रष्टव्यः ॥

पुरञ्जनः, पुं, (पुरं देहरूपं जनयतीति । जनि + बाहुलकात् डः ।) जीवः । यथा,—
"पुरुषं पुरञ्जनं विद्यात् यदधत्ताऽत्मनः पुरम् ।
एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥"
इति श्रीभागवते । ४ । २६ । २ ॥

पुरञ्जनी, स्त्री, (पुरञ्जन + गौरादित्वात् ङीष् ।) बुद्धिः । यथा,—
"न विदाम वयं सम्यक् कर्त्तारं पुरुषर्षभ ! ।
आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम् ॥
राजन् ! मदीयाः सर्व्वेते मामाहुश्च पुरञ्जनीम् ॥"
"बुद्धिन्तु प्रमदां विद्यान्मामाहमिति यत् कृतम् ।
यामधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्तेऽभिगुणान् ॥"
इति श्रीभागवते । ४ स्कन्धे । २५ । २६ अध्यायौ ॥

पुरञ्जयः, पुं, (पुरं शत्रुपुरं जयतीति । जि + खच् ।) सूर्य्यवंशीयराजविशेषः । तत्पर्य्यायः । काकुत्स्थः २ । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ९ । ६ । १२ ।
"पितर्य्युपरते भ्रात्रे विकुक्षिः पृथिवीमिमाम् ।
प्राप्तोदीच्यां हरिं यज्ञैः श्रद्धादेतौरितः ॥
पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः ।
ककुत्स्थ इति चाप्युक्तः श्रृणु नामानि कर्म्मभिः ॥"
पूरुवंशीयः क्षत्रियपुत्रः । यथा, हरिवंशे । ३१ । १८ ।
"क्षत्रियस्याभवत् पुत्रो वीरो राजा पुरञ्जयः ।
जनमेजयो महाराज ! पुरञ्जयसुतोऽभवत् ॥"
पुरं जयतीति । पुर + जि + खच् ।) पुरजयकर्त्तरि, त्रि ॥ (यथा, महाभारते । १ । १०२ । ४५ ।
"खाण्डवं तेऽपि राष्ट्राणि जगमुः परपुरञ्जय ! ॥")

पुरटं, क्ली, (पुरति अग्रे गच्छतीति । पुर + बाहुलकात् अटन् ।) सुवर्णम् । यथा,—
"हरेः पुरटसुन्दरद्युतिकदम्बसन्दीपितः
सदा हृदयकन्दरे स्फुरतु वः प्रभोर्नन्दनः ॥"
इति विदग्धमाधवः ॥

पुरणः, पुं, (पिपर्त्ति पूर्य्यते वेति । पॄ पालनादौ + "कृपॄवृजिमन्दिनिधाञः क्युः ।" उणा० २ । ८१ । इति क्युः । उत्वं रपरत्वञ्च ।) समुद्रः । इत्युणादिकोषः ॥

पुरतः, [स्] व, (पुरति अग्रे गच्छतीति। पुर+बाहुलकात् अतसुच्।) अग्रतः। इत्यमरः।३।४।७॥ (यथा, राजतरङ्गिण्याम्। १।१०७। "निर्गते मञ्जरीकुञ्जादपश्यत् पुरतस्ततः। कन्ये नीलनिचोलिन्यौ स केचिच्चारुलोचने॥")

पुरतटी, स्त्री, (पुरस्थिता तटीव।) हट्टी। क्षुद्रहट्टः। इति हारावली। १६४॥

पुरद्वारं, क्ली, (पुरस्य द्वारम्।) नगरद्वारम्। तत्पर्य्यायः। गोपुरम् २। इत्यमरः।२।२।१६॥ (यथा, मनुः। ५। ६२।

"दत्त्विग्नेन च्छतं शूद्रं पुरद्वारेण निर्हरेत्। पक्षिमोत्तरपूर्व्वेण्ड यथायोगं द्विजन्मनः॥")

पुरदिट्, [ष्] पुं, (पुरं देष्टीति। दिष्+क्विप्। मयनिर्म्मितानां पुरविशेषाणां दाहकत्वादस्य तथात्वम्।) शिवः। इति जटाधरः॥ (यथा, भागवते। ४। ६। ७।

"स इत्थमादिश्य सुरानजस्तु तैः समन्वितः पितृभिः सप्रजेशैः। ययौ सधिष्ण्याग्निभयं पुरद्विषः कैलासमद्रिप्रवरं प्रियं प्रभोः॥")

पुरन्दरं, क्ली, (पुर्+दारि+खच्।) चविकम्। इति शब्दचन्द्रिका॥

पुरन्दरः, पुं, (अरीणां पुरो दारयतीति। दृ+णिच्+"पूःसर्व्वयोर्दारिसहोः।" ३।२।४१। इति खच्। "वाचं यमपुरन्दरौ च।" ६।३।६१। इति निपातितः।) इन्द्रः। इत्यमरः।१।१।४४॥ (यथा, महाभारते। ३। १०९। ६।

"कालेयभयसन्त्रस्तो देवः साक्षात् पुरन्दरः। जगाम शरणं शीघ्रं तन्तु नारायणं प्रभुम्॥"

पुरं गेहं दारयतीति। दारि+खच्। निपातितः।) चौरः। यथा,—

"समांसमीना यदि पाकशाला समांसमीना दश धेनवः स्युः। पुरन्दरस्याविषयं यदि स्यात् पुरन्दरस्यापि पुरं न याचे॥"

इत्युद्भटः॥

पुरन्दरा, स्त्री, (पुरं दारयति प्रवाहैरिति। दारि+खच्। निपातनात् साधुः। ततष्टाप्।) गङ्गा। इति हारावली॥

पुरन्ध्रिः, स्त्री, (खजनसहितं पुरं धारयतीति। धृ+खच्। गौरादित्वात् ङीष्। एषोदरादित्वात् ह्रस्वो वा।) मतिपुत्रदृहित्रादिमती। इति भरतः॥ तत्पर्य्यायः। कुटुम्बिनी। इत्यमरः।२।६।६॥ (यथा, रघुः।७।२८।

"तौ स्नातकैर्बन्धुमता च राज्ञा पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम्। कन्याकुमारौ कनकासनस्थौ आर्द्राक्षतारोपणमन्वभूताम्॥")

स्त्रीभाक्षम्। इति राजनिर्घण्टः॥

पुरश्चरणं, क्ली, (पुरोऽग्रतश्चरणं मन्त्रजपादिपञ्चाङ्गकर्म्माचरणमिति।) पुरस्क्रिया। सा तु स्वेष्टदेवतामन्त्रसिद्ध्यर्थं तद्देवतापूजापूर्व्वकं तन्मन्त्रजपहोमतर्पणाभिषेकब्राह्मणभोजनरूपपञ्चाङ्गकसाधना। यथा, योगिनीहृदये।

"गुरोराज्ञां समादाय शुद्धान्तःकरणो नरः। ततः पुरस्क्रियां कुर्य्यान्मन्त्रसंसिद्धिकाम्यया॥ जीवहीनो यथा देही सर्व्वकर्म्मसु न क्षमः। पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः॥ तस्मादादौ स्वयं कुर्य्यात् गुरुं वा कारयेद्बुधः। गुरोरभावे विप्रं वा सर्व्वप्राणिहिते रतम्। स्निग्धं शास्त्रविदं मित्रं नानागुणसमन्वितम्॥ स्त्रियं वा सद्गुणोपेतां सपुत्रां विनियोजयेत्॥ आदौ पुरस्क्रियां कर्त्तुं स्थाननिर्णय उच्यते॥"

योगिनीहृदये।

"पुण्यक्षेत्रं नदीतीरं गुहापर्व्वतमस्तकम्। तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं वनम्॥ उद्यानानि विविक्तानि विल्वमूलं तटं गिरेः॥ तुलसीकाननं गोष्ठं दृषशून्यं शिवालयम्॥ अश्वत्थामलकीमूलं गोशालाजलमध्यतः। देवतायतनं कूलं समुद्रस्य निजं गृहम्॥ साधनेषु प्रशस्तानि स्थानान्येतानि मन्त्रिणाम्। अथवा निवसेत्तत्र यत्र चित्तं प्रसीदति॥"* ॥

तथा।

"गृहे शतगुणं विद्यान्नोष्ठे लक्षगुणं भवेत्। कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ॥ म्लेच्छदुष्टगवालशूद्रक्षतङ्कविवर्ज्जिते। एकान्तपावने निन्दारहिते भक्तिसंयुते॥ सुदेशे धार्म्मिके देशे सुभिक्षे निरुपद्रवे। रम्ये भक्तजनस्थाने निवसेत् तापसः प्रिये!॥ गुरूणां सन्निधाने च चित्तैकाग्र्यस्थले तथा। एषामन्यतमस्थानमाश्रित्य जपमाचरेत्॥ यत्र ग्रामे जपेन्मन्त्री तत्र कूर्म्मं विचिन्तयेत्॥"

गौतमीये।

"पर्व्वते सिन्धुतीरे वा पुण्यारण्ये नदीतटे। यदि कुर्य्यात् पुरश्चर्य्यां तत्र कूर्म्मं न चिन्तयेत्॥"

विल्वमूलादावपि कूर्म्मचिन्ता नास्ति तदुक्तं वैशम्पायनसंहितायाम्।

"पुण्यक्षेत्रं गृही तीर्थं देवतायतनं शुभम्। नदीतीरं तथा सिन्धुसङ्गमोऽतिमनोहरः॥ पर्व्वतस्य गुहाश्चैव तथा पर्व्वतमस्तकम्। विल्वमूलं समुद्रश्च वनमुद्यानमेव च॥ एषु स्थानेषु विप्रेन्द्र! कूर्म्मचक्रं न चिन्तयेत्। ग्रामे वा यदि वा वास्तौ गृहे तत्र विचिन्तयेत्॥"

अथ पुरश्चरणे भक्ष्यादिनियमः।

गौतमीये।

"पुरश्चरणकालम्तु भक्ष्याभक्ष्यं विचारयेत्। अन्यथा भोजनाद्दोषात् सिद्धिहानिः प्रजायते॥ शुद्धान्नञ्च समश्नीयात् मन्त्रसिद्धिसमीहया। तस्मान्नित्यं प्रयत्नेन शुद्धान्नाशी भवेन्नरः॥"

अगस्त्यसंहितायाम्।

"दधि क्षीरं घृतं गव्यं ऐक्षवं गुडवर्ज्जितम्। तिलाश्चैव सिता शुद्धाः कन्दः केसुकवर्ज्जितः॥ नारिकेलफलञ्चैव कदली लवली तथा। आम्रमामलकञ्चैव पनसञ्च हरीतकी॥ व्रतान्तरे प्रशस्तञ्च हविष्यं मन्यते बुधैः॥"

व्रतान्तर इति।

"हैमन्तिकं सितासिद्धं धान्यं मुद्गास्तिला यवाः। कलायकङ्गुनीवारा वास्तूकं हिलमोचिका॥ पटिका कालशाकञ्च मूलकं केसुकेतरत्। लवणे सैन्धवासाद्ये गव्ये च दधिसर्पिषी॥ पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी। पिप्पली जीरकञ्चैव नागरङ्गञ्च तिन्तिड़ी॥ कदलीलवलीधात्रीफलानिगुड़मैक्षवम्। अतैलपक्वं सुनयो हविष्यान्नं प्रचक्षते॥ शुद्धानी वा हविष्यान्नं शाकं यावकमेव वा। पयो मूलं फलं वापि यच्च यच्चोपलभ्यते॥ रम्भाफलं तिन्तिड़ीकं कमला नागरङ्गकम्। फलान्येतानि भोज्यानि एभ्योऽन्यानि विवर्ज्जयेत्॥"

यत्तु योगिनीतन्त्रे।

"चिञ्चाञ्च नालिकाशाकं कलायं लकुचं तथा। कदम्बं नारिकेलञ्च व्रते कुष्माण्डकं त्यजेत्॥"

तत्तु व्रतान्तरे बोध्यम्। चिञ्चा तिन्तिड़ी॥ * ॥

अथ वर्ज्जानि।

"विवर्ज्जयेन्मधु क्षारलवणं तैलमेव च। ताम्बूलं कांस्यपात्रञ्च दिवाभोजनमेव च॥"

तथा।

"क्षारञ्च लवणं मांसं मद्यं कांस्यभोजनम्। माषाढ़कीमसूरांश्च कोद्रवांश्चणकानपि॥ अन्नं पर्य्युषितञ्चैव निःस्नेहं कीटदूषितम्॥"

रामार्च्चनचन्द्रिकायाम्।

"मैथुनं तल्पशायित्वं तन्नोक्षौ परिवर्ज्जयेत्। ऋतुकालं विना मन्त्री स्वस्त्रियं नैव गच्छति॥ लवणञ्च पलञ्चैव क्षारं क्षौद्रं रसान्तरम्। कौटिल्यं क्षौरमभ्यङ्गमनिवेदितभोजनम्॥ असङ्कल्पितकृत्यञ्च वर्ज्जयेन्मद्यनादिकम्। स्नायाच्च पञ्चगव्येन केवलामलकेन वा॥ मन्त्रजप्तान्नपानीयैः स्नानाचमनभोजनम्। कुर्य्यादृषयोक्तविधिना त्रिसन्ध्यं देवतार्च्चनम्॥ अपवित्रकरो नरः शिरसि प्राप्तोऽपि वा। प्रलपन् प्रजपेद्यावत्तावत् निष्फलमुच्यते॥"

नारदीये।

"मृदु सोष्णं सुपक्वञ्च कुर्य्याद्दे लघु भोजनम्। नेन्द्रियाणां यथा वृद्धिस्तथा भुञ्जीत साधकः॥"

कुलार्णवेऽपि।

"यस्यान्नपानपुष्टाङ्गः कुरुते धर्म्मसञ्चयम्। अन्नदातुः फलस्यार्द्धं कर्त्तुमर्हं न संशयः॥ तस्मात् सर्व्वप्रयत्नेन परान्नं वर्ज्जयेत् सुधीः। पुरश्चरणकालेषु सर्व्वकर्म्मसु शाम्भवि!॥ भिक्षा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात्। परस्त्रीभिर्म्मनो दग्धं कथं सिद्धिर्वरानने!॥"

परान्नं भिक्षितेतरविषयम्। भिक्षायां तस्य खलोत्पादात्। तथा च।

"वैदिकाचारयुक्तानां शुचीनां श्रीमतां सताम्। सत्कुलस्थानजातानां भिक्षाशी चाग्रजन्मनाम्॥

विहाय वह्निं नहि वस्तु किञ्चित्
ग्राह्यं परेभ्यः सति सम्भवे च ।
असम्भवे तीर्थबहिर्विशुद्धात्
पञ्चातिरिक्ते प्रतिगृह्य जप्यात् ॥
तत्रासमर्थोऽनुदिनं विशुद्धात्
याचेत यावद्दिनमात्रमैक्ष्यम् ।
गृह्णाति रागादधिकं न सिद्धिः
प्रजायते कल्पशतेरसह्य ॥ * ॥
सकृदुच्चरिते ग्रन्थे प्रणवं सप्तधोरयेत् ।
प्रोक्ते पारशवे ग्रन्थे प्राणायामं सकृच्चरेत् ॥
बहुप्रलापी आचम्य न्यस्याङ्गानि ततो जपेत् ।
च्युतेऽप्येवं तथास्पृश्यस्नानानां स्पर्शनेन च ॥
एवमादौच नियमान् पुरश्चरणकृच्चरेत् ॥
विण्मूत्रोत्सर्गशङ्कादियुक्तः कर्म्म करोति यत् ।
जपार्च्चनादिकं सर्व्वमपवित्रं भवेत्प्रिये ! ॥
मलिनाम्बरकेशादिसुखदौर्गन्ध्यसंयुतः ।
यो जपेत्तं दहत्याशु देवता गुप्तिसंस्थिता ॥
आलस्यं जृम्भणं निद्रां च्युतं निष्ठीवनं भयम् ।
नीचाङ्गस्पर्शनं कोपं जपकाले विवर्ज्जयेत् ॥ * ॥
एवमुक्तविधानेन विलम्बं त्वरितं विना ।
उक्तसंख्यं जपं कुर्य्यात् पुरश्चरणसिद्धये ॥
देवतागुरुमन्त्राणामैक्यं सम्भावयन् धिया ।
जपेदेकमनाः प्रातःकालं मध्यन्दिनावधि ॥
यत्सङ्ख्या समारब्धं तत् कर्त्तव्यं दिने दिने ।
यदि न्यूनाधिकं कुर्य्यात् व्रतभ्रष्टो भवेन्नरः ॥"
सङ्केतमालायाम् ।
"यत्सङ्ख्या समारब्धं तत् जप्यं दिने दिने ।
न्यूनाधिकं न कर्त्तव्यमासमाप्तं सदा जपेत् ॥
प्रजपेदुक्तसङ्ख्यात्तुर्गुणजपं कलौ ॥"
अन्यत्रापि ।
"कृते जपस्तु कथितस्त्रेतायां द्विगुणो मतः ।
द्वापरे त्रिगुणः प्रोक्तश्चतुर्गुणजपः कलौ ॥"
कुलार्णवेऽपि ।
"न्यूनातिरिक्तकर्म्माणि न फलन्ति कदाचन ।
यथाविधिकृतान्येव सत्कर्म्माणि फलन्ति हि ॥
भूशय्या ब्रह्मचारित्वं मौनमाचार्य्यसेविता ।
नित्यपूजा नित्यदानं देवतास्तुतिकीर्त्तनम् ॥
नित्यं त्रिसवनं स्नानं क्षुद्रकर्म्मविवर्ज्जनम् ।
नैमित्तिकार्च्चनञ्चैव विश्वासो गुरुदेवयोः ॥
जपनिष्ठा द्वादशैते धर्म्माः स्युर्म्मन्त्रसिद्धिदाः ॥
स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम् ।
असत्यभाषणं नित्यभाषणं परिवर्ज्जयेत् ॥
सन्ध्यादावपि न भाषेत जपहोमार्च्चनादिषु ।
अन्यथाकृतिः सर्व्वं भवत्येव निरर्थकम् ॥
पुरश्चरणकाले तु यदि स्यान्मृतसूतकम् ।
तथा च कृतसङ्कल्पो व्रतं नैव परित्यजेत् ॥"
योगिनीहृदये ।
"शुचौ तु कुशशय्यायां शुचिवस्त्रधरः सदा ।
प्रत्यहं चालयेत् शय्यामेकाकी निर्भयः स्वपेत् ॥
असत्यभाषणं वाचं कुटिलां परिवर्ज्जयेत् ।
वर्ज्जयेद्गीतवाद्यादिश्रवणं नृत्यदर्शनम् ॥
अभ्यङ्गं मर्दनञ्चैव पुष्पधारणमेव च ।
त्यजेदुष्णोदकस्नानमन्यदेवप्रपूजनम् ॥"
तत्रैव ।
"नैकवासा जपेन्मन्त्रं बहुवासाकुलोऽपि वा ॥"
वैश्यन्यायनसंहितायाम् ।
"विपर्य्यासं न कुर्य्याच्च कदाचिदपि मोहतः ।
उपर्य्यधो वह्निर्व्वक्त्रे पुरश्चरणकृन्नरः ॥
पातितानामन्त्यजानां दर्शने भाषणे श्रुते ।
च्युतेऽधोवायुगमने जृम्भणे जपसूतके ॥
तथा तस्य च तत्प्राप्तौ प्राणायामं षडङ्गकम् ।
कृत्वा सम्यक् जपेत् प्रेम्णा यदा सूर्य्यादिदर्शनम् ॥"
आदिशब्दाद्वह्निं ब्राह्मणञ्च ॥ * ॥ तन्त्रान्तरे ।
"मनःसंहरणं शौचं मौनं मन्त्रार्थचिन्तनम् ।
अयमेवमनिर्व्वेदो जपसम्पत्तिहेतवः ॥ * ॥
उष्णीषी कञ्चुकी नग्नो मुक्तकेशो गणाकृतः ।
अपवित्रकरोऽशुद्धः प्रलपन् जपेत् क्वचित् ॥
अनासनः अयानो वा गच्छन् सुप्तान एव वा ।
अप्राकृतौ करौ कृत्वा शिरसा प्राकृतोऽपि वा ॥
चिन्ताव्याकुलचित्तो वा क्षुब्धो भ्रान्तः क्षुधान्वितः ।
रथ्यायामग्निस्थाने न जपेत्तिमिरालये ॥
उपानद्गूढपादो वा यानस्थोऽगतोऽपि वा ।
प्रसार्य्य न जपेत् पादावुत्कटासन एव च ।
न यत्रकुत्रे पाषाणे न भूमौ नासने स्थितः ॥"
तथा ।
"माञ्जारं कुक्कुटं क्रौञ्चं श्वानं शूद्रं कपिं खरम् ।
दृष्ट्वाचम्य जपेत् प्रेम्णा स्पृष्ट्वा स्नानं विधीयते ॥"
सर्व्वत्र जपे त्वयं नियमः । मानसे तु नियमो नास्त्येव । तथा च ।
"अशुचिर्व्वा शुचिर्व्वापि गच्छंस्तिष्ठन् स्वपन्नपि ।
मन्त्रैकशरणो विद्वान् मनसैव सदाभ्यसेत् ॥
न दोषो मानसे जाप्ये सर्व्वदेशेऽपि सर्व्वदा ॥"
श्यामादिजपे तु तत्तन्मन्त्रे विशेषो वक्तव्यः ॥
जपफलमाह शिवधर्म्मे ।
"जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् ।
सर्व्वेषामेव यज्ञानां जायतेऽसौ महाफलः ॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
प्रसन्ना विपुलान् कामान् दद्यान्मुक्तिञ्च शाश्वतीम् ॥"
पाद्मे ।
"यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः ।
जापिनं नोपसर्पन्ति भयभीताः समन्ततः ॥"
पाद्मनारदीययोः ।
"यावन्तः कर्म्मयज्ञाः स्युः प्रदिष्टानि तपांसि च ।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम् ॥
साहस्रन्तं वाचिकस्तेत्तन्मयस्य कीर्त्तितम् ।
तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः ॥"
तथा तत्रैव ।
"मानसः सिद्धिकामानां पुष्टिकामैरुपांशुकः ।
वाचिको मारणे चैव प्रशस्तो जप ईरितः ॥"
गौतमीये ।
"श्रुत्वा त्रिसवनं स्नानमन्यथा द्विः सकृच्च वा ।
त्रिसन्ध्यं प्रजपेन्मन्त्रं पूजनं ततृसमं भवेत् ॥"
सन्ध्यात्रये पूजाङ्गत्वाच्चप्रमशौचेऽपि तत्त्वमित्यर्थः ॥
"एकदा वा भवेत् पूजा न जपेत् पूजनं विना ।
जपान्ते वा भवेत् पूजा पूजान्ते वा जपेन्मनुम् ॥
प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि ॥"
मध्यन्दिनावधीति न नियमपरं किन्त्वधिककालावच्छेदपरम् । अन्यथा तत्त्वमयजपनियमे कदाचित् जिह्वाया जाड्याजाड्येन वा प्रतिनियतदिवसीयजपसङ्ख्याया अपूर्णत्वे अधिकत्वे वा नियमभङ्गः स्यात् ॥ * ॥
"मनः संहृत्य विषयान्मन्त्रार्थगतमानसः ।
न द्रुतं न विलम्बञ्च जपेन्मौक्तिकपंक्तिवत् ॥ * ॥
जपः स्यादचराद्वृत्तिर्मानसोपांशुवाचिकैः ।
धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम् ॥
उच्चरेदर्थसहितं मानसः स जपः स्मृतः ॥"
मन्त्रनिर्णये ।
"मानसं मन्त्रवर्णस्य चिन्तनं मानसः स्मृतः ।
जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतमानसः ॥
किञ्चित् श्रवणयोग्यः स्यात् उपांशुः स जपः स्मृतः ।
मन्त्रस्योच्चारयेद्वाचा वाचिकः स जपः स्मृतः ॥
उच्चैर्जपादिग्निष्टः स्यादुपांशुर्दशभिर्गुणैः ।
जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः ॥"
प्रकारान्तरम् ।
"निजकर्णागोचरो यो मानसः स जपः स्मृतः ।
उपांशुर्निजकर्णस्य गोचरः स प्रकीर्त्तितः ॥
निगदस्तु जनैर्वेद्यस्त्रिविधोऽयं जपः स्मृतः ॥"
तत्रान्तरे ।
"उच्चैर्जपोऽधमः प्रोक्त उपांशुर्म्मध्यमः स्मृतः ।
उत्तमो मानसो देवि ! त्रिविधः कथितो जपः ॥"
जिह्वाजपस्तु ।
"जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैरिति ॥
अतिविलम्बातिशीघ्रजपे दोषमाह ।
"अतिद्रुतो व्याधिहेतुरतिदीर्घो वसूच्चयः ।
अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् ॥
मनसा यः स्मरेत् स्रोतं वचसा वा मनुं जपेत् ।
उभयं निष्फलं याति भिन्नभाण्डोदकं यथा ॥"
गौतमीये ।
"प्रभुभावे स्थिता मन्त्राः केवला वर्णरूपिणः ।
सौम्यत्वमनुचरिताः प्रभुत्वं प्राप्नुवन्ति ते ॥"
पाद्मनारदीययोः ।
"मन्त्राक्षराणि चिच्छक्तौ प्रोतानि परिभावयेत् ।
तामेव परमव्योमि परमान्तर्हृदि स्थिते ॥
दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्विनेति ।"
गौतमीये दशाक्षरपटले ।
"मूलमन्त्रं प्राणवृद्ध्या सुषुम्नामूलदेशके ।
मन्त्रार्थं तस्य चैतन्यं जीवं ध्यात्वा पुनः पुनः ॥
कुलार्णवेऽपि ।
"मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः ।
न सिद्ध्यति वरारोहे ! कल्पकोटिशतैरपि ॥
जातसूतकमादौ स्यादन्ते च मृतसूतकम् ।
मृतकद्वयसंयुक्तो यो मन्त्रः स न सिद्ध्यति ॥
गुरोरुक्तमहितं त्यक्त्वा मन्त्रं यावज्जपेद्विधिवत् ।

सूतकद्वयनिर्मुक्तः स मन्त्रः सर्व्वसिद्धिदः ॥
जातसूतकमादौ स्यान्मृतसूतकमन्ततः ।
सूतकद्वयनिर्मुक्तो मन्त्रः सिद्ध्यति नान्यथा ॥"
तत्रैव ।
"तस्माद्देवि ! प्रयत्नेन ध्रुवेण पुटितं मनुम् ।
अष्टोत्तरशतं वापि सप्तवारं जपादितः ॥
जपान्ते च तथा जप्यात् चतुर्व्वर्गफलाप्तये ॥"
तत्रैव ।
"ब्रह्मबीजं मनोर्दत्त्वा चाद्यन्ते परमेश्वरि ! ।
सप्तवारं जपेन्मन्त्रं सूतकद्वयसुद्धये ॥ * ॥
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ।
शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥
लुप्तबीजाश्च ये मन्त्रा न दास्यन्ति फलं प्रिये ! ।
मन्त्राश्चैतन्यसहिताः सर्व्वसिद्धिकराः स्मृताः ॥
चैतन्यरहिता मन्त्राः प्रोक्ता वर्णास्तु केवलम् ।
फलं नैव प्रयच्छन्ति लक्षकोटिजपैरपि ॥
मन्त्रोच्चारे कृते यादृक् स्वरूपं प्रथमं भवेत् ।
शते सहस्रे लक्षे वा कोटिजापे न तत्फलम् ॥
हृदये ग्रन्थिभेदश्च सर्व्वावयवबर्द्धनम् ।
आनन्दाश्रूणि पुलको देहावेशः कुलेश्वरि ! ॥
गद्गदोक्तिश्च सहसा जायते नात्र संशयः ।
सङ्कटचरितेऽप्येवं मन्त्रे चैतन्यसंयुते ॥
दृश्यन्ते प्रत्यया यत्र पारम्पर्य्यं तदुच्यते ॥ * ॥
मासमात्रं जपेन्मन्त्रं भूतलिप्या तु संपुटम् ।
क्रमोत्क्रमात् सहस्रञ्च तस्य सिद्धो भवेन्मनुः ॥"
तत्र भूतलिपिः ।
"पञ्च हृस्वाः सन्धिवर्णा ओमाराभिनलन्धराः ।
अन्त्यमाद्यं द्वितीयश्च चतुर्थं मध्यमं क्रमात् ॥
पञ्चवर्गाश्चराणि स्युर्व्वान्तस्थेतेन्दुभिः सह ।
एषा भूतलिपिः प्रोक्ता द्विचत्वारिंशदक्षरैः ॥
मन्त्रस्तु ।
अ इ उ ऋ ऌ ए ऐ ओ औ ह य र व ल ङ
क ख घ ग ञ च छ झ ज ण ट ठ ढ ड न त
थ ध द म प फ भ व ग्र ष सा: ।
अतः परं मन्त्रसुद्धार्थं पुनः क्रमेणोल्लेखम् ॥*॥
गौतमीये ।
"एवं जपं पुरा कृत्वा तेजोरूपं समर्पयेत् ।
देवस्य दक्षिणे हस्ते कुशपुष्पाक्षतैवारिभिः ॥
सफलं तद्विधायैवं प्राणायामं समाचरेत् ।
जपस्यादौ जपान्ते च त्रितयं त्रितयं चरेत् ॥"*॥
मुक्तिविषये देया वामहस्ते । तथा च ।
"एवं जपं पुरा कृत्वा गन्धाक्षतकुशोदकैः ।
जपं समर्पयेद्देवा वामहस्ते विचक्षणः ॥ * ॥
जपान्ते प्रत्यहं मन्त्री होमयेत्तद्दशांशतः ।
तर्पणञ्चाभिषेकञ्च तत्तद्दशांशतो सुने ! ॥
प्रत्यहं भोजयेद्विप्रान् न्यूनाधिकप्रशान्तये ।
अथवा सर्व्वपूर्त्तौ च होमादिकमथाचरेत् ॥
सम्पूर्णायां प्रतिज्ञायां तर्पणादिकमाचरेत् ॥"
मुण्डमालायाम् ।
"यस्य यावान् जपः प्रोक्तस्तद्दशांशमनुक्रमात् ।
तत्तद्वैजपस्यान्ते होमं कुर्य्याद्दिने दिने ॥"
जपसङ्ख्यायां विशेषमाह मुण्डमालायाम् ।
नाक्षतैर्हस्तपर्व्वैर्वा न धान्यैर्न च पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसङ्ख्यान्तु कारयेत् ॥
लाक्षाकुङ्कुमसिन्दूरं गोमयञ्च करीषकम् ।
विलोड्य गुटिकां कृत्वा जपसङ्ख्यान्तु कारयेत् ॥"
पुरश्चरणचन्द्रिकायाञ्च ।
"ततो जपदशांशेन होमं कुर्य्याद्दिने दिने ।
अथवा लक्षसङ्ख्यायां पूर्णायां होममाचरेत् ॥"
तथा । होमाद्यशक्तौ च सनत्कुमारीये ।
"यदृयदङ्गं भवेद्वक्रं तत्सङ्ख्याद्विगुणो जपः ।
होमाभावे जपः कार्य्यो होमसङ्ख्याचतुर्गुणः ॥
विप्राणां क्षत्रियाणाञ्च रससङ्ख्यागुणः स्मृतः ।
वैश्यानां वसुसङ्ख्याकमेषां स्त्रीणामयं विधिः ॥
यं वर्णमाश्रितः शूद्रः स च तस्य विधिश्चरेत् ।
अनाश्रितस्य शूद्रस्य दिक्सङ्ख्याकः समीरितः ।
शूद्रस्य विप्रभृत्यस्य तत्पत्न्याः सदृशो जपः ॥"
अत्राप्यशक्तश्चेत् योगिनीहृदये ।
"होमकर्म्मण्यशक्तानां विप्राणां द्विगुणो जपः ।
इतरेषान्तु वर्णानां त्रिगुणादिः समीरितः ॥"
त्रिगुणादिः होमसङ्ख्यात्रिगुणजपः क्षत्रियेण कार्य्यः । वैश्येन चतुर्गुणः । शूद्रेण पञ्चगुणः ।
तदुक्तं कुलार्णवे ।
"यदृयदङ्गं विहीनं स्यात् तत्सङ्ख्यादिगुणो जपः ।
कुर्व्वीत त्रिचतुःपञ्च यथासङ्ख्यं द्विजादयः ॥"
एतेन स्त्रीशूद्राणां होमाधिकारः । तथा च ।
"वह्निजामर्द्धशूद्राङ्कयोगं चास्यं भवति शूद्राणाम् ।"
इति नागभट्टनिबन्धे ॥
शूद्राणां चास्यमिति कुब्जिकाप्रकरणे सारदायाम् ॥
स्त्रीणां होमाधिकारश्च तत्र ।
"लाजैस्तिलमधुरोपेतैर्होमः कन्यां प्रयच्छति ।
अनेन विधिना कन्या वरमाप्नोति वाञ्छितम् ॥"
अतः स्त्रीणां होमाधिकारः । तच्च ब्राह्मणद्वारा । तथा च तन्त्रे ।
"ओङ्कारोच्चारणाद्धोमात् शूद्रस्यामग्निलाभतः ।
ब्राह्मणीगमनाच्चैव शूद्रश्चाण्डालतां व्रजेत् ॥"
इति साक्षान्निषेधात् ।
तथा स्त्रीणामपि सर्व्ववैदिककर्म्मसु शूद्रतुल्यत्वप्रतिपादनात् ।
स्त्रीशूद्रकरसंस्पर्शो वह्निपातसमो मम ॥
इति भगवद्वचनाच्च । तथा च नारायणकल्पे ।
"अक्षराक्षरो महामन्त्रः सप्तार्णः शूद्रयोषितोः ।
प्रणवादिश्च यो मन्त्रो न स्त्रीशूद्रे प्रशस्यते ॥"
इति सर्व्वत्र स्त्रीणां शूद्रवदाचारः ॥*॥
शूद्रस्यापि स्वकर्त्तृकहोमः । तथा च वाराहीतन्त्रे ।
"यदि कामी भवत्येव शूद्रोऽपि होमकर्म्मणि ।
वह्निजायां परित्यज्य हृदयान्तेन होमयेत् ॥"
सर्व्वेषां वा द्विगुणो जपः । तथा च वाशिष्ठे ।
"यदृयदङ्गं विहीयेत तत्सङ्ख्यादिगुणो जपः ।
कर्म्मैवाङ्गसिद्ध्यर्थं तदशक्तेन भक्तितः ॥
न चेदङ्गं विहीयेत तद्विगुणमवाप्नुयात् ।
विप्रभोजनमात्रेण यज्ञं साङ्गं भवेत् ध्रुवम् ॥
यत्र भुङ्क्ते द्विजस्तत्रात्र भुङ्क्ते हरिः स्वयम् ॥"
तथा व्यासस्यसंहितायाम् ।
"यदि होमेऽप्यशक्तः स्यात् पूजायां तर्पणेऽपि वा ।
तावत्सङ्ख्यजपेनैव ब्राह्मणाराधनेन च ॥
भवेदङ्गद्वयेनैव पुरश्चरणमार्य्य वै ॥"*॥
वीरतन्त्रे ।
"नियमः पुरुषे ज्ञेयो न योषित्सु कथञ्चन ।
न न्यासो योषितामत्र न ध्यानं न च पूजनम् ॥
केवलं जपमात्रेण मन्त्राः सिद्ध्यन्ति योषिताम् ॥"
ततश्च ।
"गुरवे दक्षिणां दद्यात् भोजनाच्छादनादिभिः ।
गुरुसन्तोषमात्रेण मन्त्रसिद्धिर्भवेत् ध्रुवम् ॥"*॥
तथा च योगिनीहृदये ।
"गुरोरभावे पुत्राय तत्पत्न्यै वा निवेदयेत् ।
तयोरभावे देवेशि ! ब्राह्मणेभ्यो निवेदयेत् ॥
सम्यक्सिद्धेकमन्त्रस्य पश्चाद्धोमासनेन च ।
सर्व्वे मन्त्राश्च सिद्ध्यन्ति त्वत्प्रसादात् कुलेश्वरि ! ॥
गुरुमूलमिदं सर्व्वमित्याहुस्तन्त्रवेदिनः ।
एकग्रामे स्थितो नित्यं गत्वा वन्देत वै गुरुम् ॥
गुरुरेव परं ब्रह्म तस्मादादौ तमर्च्चयेत् ।
तदन्ते महतीं पूजां कुर्य्यात् साधकसत्तमः ॥
सुभार्य्यिणीं कुमारीञ्च भूषणैरपि भूषयेत् ।
मिष्टान्नं बहुधः कार्य्यं भुञ्जीत बन्धुभिः सह ॥
एवं सिद्धमनुर्म्मन्त्री साधयेत् सकलेप्सितान् ॥"*

अथ ग्रहणपुरश्चरणम् ।

तन्त्रे ।
"अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
ग्रहणेऽर्कस्य चेन्दोर्व्वा शुचिः पूर्व्वमुपोषितः ॥
नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः ।
स्पर्शादिमुक्तिपर्य्यन्तं जपेन्मन्त्रमनन्यधीः ॥" * ॥
यदि नक्रादिदूषिता नदी भवति तदा यत् कर्त्तव्यं तदाह रुद्रयामले ।
"अपि शुद्धोदकैः स्नात्वा शुचौ देशे समाहितः ।
ग्रासादिमुक्तिपर्य्यन्तं जपेन्मन्त्रमनन्यधीः ॥
इति ज्ञात्वा न सन्देहो जपस्य फलभाग्भवेत् ॥"
नद्यभावे ।
"यद्वा पुण्योदकैः स्नात्वा शुचिः पूर्व्वमुपोषितः ।
ग्रहणादिविमोक्षान्तं जपेन्मन्त्रमनन्यधीः ॥"* ॥
उपवासासमर्थे तु तत्रैव ।
अथवान्यप्रकारेण पौरश्चरणिको विधिः ।
चन्द्रसूर्य्योपरागे च स्नात्वा प्रयतमानसः ॥
स्पर्शनादिविमोक्षान्तं जपेन्मन्त्रं समाहितः ।
जपाद्दशांशतो होमं तथा होमात्तु तर्पणम् ।
एवं ज्ञात्वा तु मन्त्रस्य जायते सिद्धिरुत्तमा ॥"*॥
गोपालमन्त्रतर्पणे तु होमसमसङ्ख्यत्वं यथा,—
"इह गोपालमन्त्रस्य तर्पणं होमसङ्ख्यया ।
वर्णानामिह सर्व्वेषामित्यागमविदो विदुः ॥
दृष्ट्वा स्नात्वा सुसङ्कल्प्य विमोक्षान्तं जपेच्चरेत् ।
तावदृयज्ञादिकं कुर्य्यादृग्रहणान्ते शुचिः पुमान् ॥
एवं जपान्मन्त्रसिद्धिर्भवत्येव न संशयः ॥" * ॥

ग्रहणे जपस्य आवश्यकत्वम्।
"आहादेरनुरोधेन यदि जप्यं त्यजेन्नरः।
स भवेद्देवतादोही पितॄन् सप्त नयत्यधः॥"
इति सनत्कुमारीयवचनात्॥
वस्तुतस्तु आरब्धपुरश्चरणविषयमिदम्।
तथाहि।
"आरब्धे पुरश्चरणे यदि च ग्रहणं भवेत्
तदा आहाद्यनुरोधेन जपं न त्यजेत्। एवं
रात्रावपि पुरश्चरणविशेषे बोद्धव्यम्।" इति
सर्व्वसमञ्जसम्॥ * ॥ योगिनीहृदये।
"कल्पोक्तविधिना मन्त्री कुर्य्याद्धोमादिकन्ततः।
अथवा तद्दशांशेन होमादींश्च समाचरेत्॥"
तथा।
"अनन्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत्।
तदन्ते महतीं पूजां कुर्य्याद्ब्राह्मणभोजनम्॥।
ततो मन्त्रस्य सिद्ध्यर्थं गुरुं सम्पूज्य तोषयेत्।
एवञ्च मन्त्रसिद्धिः स्यात् देवता च प्रसीदति॥"
अत्र ब्राह्मणभोजनमावश्यकमेव।
"सर्व्वथा भोजयेद्विप्रान् हुतसाङ्गत्वसिद्धये।
विप्राराधनमात्रेण यज्ञः साङ्गः भवेद्ध्रुवम्॥"
क्रियासारे।
"दीक्षाहीनान् पशून् यस्तु भोजयेदा क्षमन्दिरे।
स याति परमेशानि! नरकानेकविंशतिम्॥
एवं यः कुरुते देवि! पुरश्चरणकं प्रिये!।
सर्व्वपापविनिर्म्मुक्तो देवीसायुज्यमाप्नुयात्॥"
यद्यपि पुरश्चरणपदं पश्चाङ्गपरम्। तथा च।
"जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम्।
पञ्चाङ्गोपासनं लोके पुरश्चरणमुच्यते॥"
तथापि ग्रहणादौ पुरश्चरणपदं गौणं जपमात्रपरम्।
"सूर्य्योदयं समारभ्य यावत् सूर्य्योदयान्तरम्॥"
इत्यादौ तथादर्शनात् तत्र होमादेरभावात्।
तर्हि कथं ग्रहणपुरश्चरणे होमादि इति चेत्
वचनादेव। न च पुरश्चरणस्य पञ्चाङ्गत्वात्
सर्व्वत्र तदेव स्यादिति वाच्यम्। ग्रहणे पुनस्तद्विधानमनर्थकं स्यात्। किञ्च ग्रहणे होमादिनियमात् नान्यत्र होमादिः। ग्रहणपुरश्चरणे
होमादिविधानन्तु प्रकृतीभूतपञ्चाङ्गपुरश्चरणतुल्यतावोधनाय। अतएव ग्रहणे पञ्चाङ्गस्वरूपपुरश्चरणे कृते सुखप्रयोगेऽप्यधिकार इति
प्रकटीकृतम्। तदकरणे पुनः केवलजपमात्रपुरश्चरणे कृते नाधिकार इति सर्व्वसम्मतमिति।
पुरश्चरणकालस्तु वाराहीये।
"चन्द्रतारानुकूले च शुक्ले पक्षे शुभेऽहनि।
आरभेत पुरश्चर्य्यां हरौ सुप्ते न चाचरेत्॥"
प्रतिप्रसवः। रुद्रयामले।
"कार्त्तिकाश्विनवैशाखमाघेऽथ मार्गशीर्षके।
फाल्गुने श्रावणे दीक्षा पुरश्चर्य्या प्रशस्यते॥"
यस्यास्ते यस्योदये च दीक्षापुरश्चरणयोर्निषेधमाह तन्त्रान्तरे।
"यस्यास्ते न्यूदिते नैव कुर्य्याद्दीक्षां जपं प्रिये!।
कृते नाशो भवेदायुः श्रीसुतसम्पदाम्॥"

अथ पुरश्चरणप्रयोगः।
तत्र तावत् भूमेः परिग्रहं कृत्वा पुरश्चरणप्राक्कृतीयदिवसे चौरादिकं विधाय वेदिकायाश्चतुर्दिक्षु क्रोशं क्रोशार्द्धयं वा क्षेत्रं चतुरस्रम्
आहारादिविहारार्थं परिकल्प्य तत्र कूर्म्मचक्रानुरूपं मण्डलं विधाय एकभक्तं कुर्य्यात्।
ततः परदिने स्नानादिकं विधाय शुद्धः सन्
वेदिकायाश्चतुर्दिक्षु अस्त्रमोङ्कारप्रच्छादितमन्त्रतमस्य वितस्तिमात्रान् दश कीलकान्, ॐ
नमः सुदर्शनाय अस्त्राय फड्डितमन्त्रेणाष्टोत्तरशतताभिमन्त्रितान् वेदिकाया दशदिक्षु.
ॐ ये चात्र विघ्नकर्त्तारो भुवि दिव्यन्तरीक्षगाः।
विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु॥
मयेतत् कीलितं क्षेत्रं परित्यज्य विदूरतः।
अपसर्पन्तु ते सर्व्वे निर्व्विघ्नं सिद्धिरस्तु मे॥
इत्यनेन निखन्य तेषु ॐ नमः सुदर्शनाय
अस्त्राय फड्डितमन्त्रेणास्त्रं संपूज्य पूर्व्वादिक्रमेण इन्द्रादिलोकपालान् पूजयेत्। तद्यथा।
ॐ भूर्भुवःस्वरिन्द्रलोकपाल इहागच्छ इत्यावाह्य पञ्चोपचारैरन्यांश्च पूजयेत्। तथा च
सुदर्शनायाम्।
"पुण्यक्षेत्रादिकं गत्वा कुर्य्याद्भूमेः परिग्रहम्।
तथा ह्यसुकमन्त्रस्य पुरश्चरणसिद्धये।
मयेयं गृह्यते भूमिर्मन्त्रोऽयं सिध्यतामिति॥"
तथा।
"ग्रामे क्रोशमितं स्थानं नद्यादौ खेच्छया मतम्।
नगरादावपि क्रोशं क्रोशयुग्ममथापि वा॥
क्षेत्रं वा यावदिच्छन्तु विहारार्थं प्रकल्पयेत्।
आहारादिविहारार्थं तावतीं भूमिमाक्रमेत्॥
चतुरिङ्गोऽवान् कीलान् अस्त्रमन्त्राभिमन्त्रितान्।
निखनेद्दशदिग्भागे तेष्वस्त्रञ्च प्रपूजयेत्॥
लोकपालान् पुनस्तेषु गन्धाद्यैः पूजयेत् सुधीः।
ततो मध्यस्थाने क्षेत्रपालं वास्तोष्पतिञ्च संपूज्य
सर्व्वविघ्नविनाशार्थं गणपतिं पूजयेत्। ॐ
अद्येत्यादि असुकगोत्रः श्रीअसुकदेवशर्म्मा मत्कर्त्तव्यासुकमन्त्रपुरश्चरणकर्म्मणि सर्व्वविघ्नविनाशार्थं गणेशपूजामहं करिष्ये। इति सङ्कल्प्य
वेदिकामध्ये पञ्चोपचारैर्गणेशं पूजयेत्। तदुक्तम्।
"क्षेत्रपालादिकं तत्र पूजयेत् विधिवत्ततः।
क्षेत्रेशं वास्तुनामानं विघ्नराजं समर्चयेत्॥
दिक्पालेभ्यो बलिं दद्यात् ततः क्षेत्रं समाविशेत्॥"
ततो मातृभक्तादिना पूजितदेवताभ्यो बलिं
दद्यात्। ततः।
"ॐ ये रौद्रा रौद्रकर्म्माणो रौद्रस्थाननिवासिनः।
मातरोऽणुरूपाश्च गणाधिपतयश्च ये॥
विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः।
सर्व्वे ते प्रीतमनसः प्रतिगृह्णन्त्विमं बलिम्॥"
इत्यनेन दशदिक्षु भूतेभ्यो बलिं दद्यात्। ततो
गायत्रीं जपेत्। तथा च।
"प्रातः स्नात्वा तु गायत्र्याः सहस्रं प्रयतो
जपेत्।
ज्ञाताज्ञातस्य पापस्य क्षयार्थं प्रथमं ततः॥"
इति विद्याधराचार्य्यः॥ * ॥
यत्तु प्रातः स्नात्वा तु गायत्र्या अयुतं प्रयतो
जपेत् इति। तत् पुनरत्यन्तपापग्रहणया। ॐ
अद्येत्यादि असुकगोत्रः श्रीअसुकदेवशर्म्मा
ज्ञाताज्ञातपापक्षयकामोऽष्टोत्तरसहस्रगायत्रीजपमयुतगायत्रीजपं वा अहं करिष्ये। इति
सङ्कल्प्य जपेत्। तत उपवासं हविष्यं वा
कुर्य्यात्॥ * ॥
तत्परदिने उषसि स्नानादिकं कृत्वा स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात्। यथा विष्णुः
ओम् अद्येत्यादि असुकगोत्रः श्रीअसुकदेवशर्म्मा
असुकदेवताया असुकमन्त्रसिद्धिप्रतिबन्धकताप्रोद्यदुरितक्षयपूर्व्वकतन्मन्त्रसिद्धिकामोऽद्यारभ्य
यावता कालेन सितॄस्यति तावत्कालमसुकदेवताया असुकमन्त्रस्य इयत्संख्यजपतद्दशांशहोमतद्दशांशतर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये। इति
सङ्कल्प्य भूतशुद्धिप्राणायाम

तथा च।
"तर्पयामि पदश्चोक्त्वा मन्त्रान्ते खेषु नामसु।
द्वितीयान्तेषु चैवेवं तर्पणस्य मनुर्मतः॥"
शक्तिविषये पुनर्मूलमुच्चार्य्य अमुकीं तर्पयामि स्वाहा। होमतर्पणयोः स्वाहेति तत्तत्तन्त्रवचनात्। नीलतन्त्रे।
"मन्त्रान्ते नाम चोच्चार्य्य तर्पयामि ततः परम्।
कुर्य्याच्चैव वरारोहे! स्वाहान्तं तर्पणे मतम्॥"
इत्यादि॥ विश्वेश्वरतन्त्रे।
"विद्यां पूर्व्वं समुच्चार्य्य तदन्ते देवताभिधाम्।
तर्पयामीति सम्प्रोक्त्वा स्वाहान्तस्तर्पणो मतः॥"
अभिषेकवाक्यन्तु। नमोऽन्तं मूलमुच्चार्य्य अमुकदेवतामहमभिषिञ्चामि इति कलसमुद्रया स्वमूर्द्धि अभिषिञ्चेत्। तथा च। गौतमीये।
"नमोऽन्तं मूलमुच्चार्य्य तदन्ते देवताभिधाम्।
द्वितीयान्तामहं पश्चादभिषिञ्चाम्यनेन तु॥
अभिषिञ्चेत् स्वमूर्द्धानं तोयैः कुम्भाख्यमुद्रया॥"
शक्तिविषये नीलतन्त्रे।
"मन्त्रान्ते नाम चोच्चार्य्य सिञ्चामीति नमः पदम्॥"
इति। ततो ब्राह्मणान् भोजयित्वा पूजां कुर्य्यात्॥ *॥ ततो दक्षिणा। अद्येत्यादि कृतैतदमुकमन्त्रपुरश्चरणकर्म्मणः साङ्गतार्थं दक्षिणामिदं काञ्चनं वह्निदैवतं अमुकगोत्राय गुरवे तुभ्यमहं सम्प्रददे। ततोऽच्छिद्रावधारणं कुर्य्यात्॥

अथ ग्रहणपुरश्चरणसङ्कल्पः।

तद्यथा,
ओम् अद्येत्यादि राहुयस्ते निशाकरे दिवाकरे वा अमुकगोत्रःश्रीअमुकदेवशर्म्मा अमुकदेवतायाः अमुकमन्त्रसिद्धिकामो ग्रासाद्विमुक्तिपर्य्यन्तं अमुकदेवतायाः अमुकमन्त्रजपरूपपुरश्चरणमहं करिष्ये। इति सङ्कल्प्य जपेत्। ततस्तद्दिने तत्परदिने वा स्नानादिकं विधाय ॐ अद्येत्यादि अमुकदेवतायाः अमुकमन्त्रस्य कृतैतत् ग्रहणकालीन-इयत्सङ्ख्याजपतद्दशांशहोमतद्दशांशतर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मणभोजनकर्म्माणमहं करिष्ये। इति सङ्कल्प्य होमादिकं कुर्य्यात्। दक्षिणादिकन्तु पूर्व्ववत्।"
इति श्रीमदानन्दकृततन्त्रसारः॥ *॥

(अथ रहस्य पुरश्चरणम्।

श्रीपार्व्वत्युवाच।
"कथयस्व महादेव! सिद्धिकारणमुत्तमम्।
येन सिद्धिं समायान्ति सर्व्वतन्त्राश्च सिद्धिदाः॥
येषु येषु च कालेषु पुरश्चर्य्या भवेद्ध्रुवम्॥

श्रीशिव उवाच।
कथयामि समासेन शृणुष्व पर्व्वतात्मजे!।
मेषराशौ दशसहस्रं प्रजपेन्मन्त्रमुत्तमम्॥
पुरश्चरणमेतद्धि शृणुष्व सुरवन्दिते!॥
वृषराशौ यदा मन्त्री द्वायुतं प्रजपेत् सुधीः।
तेन तस्य सुसिद्धिः स्यान् नात्र कार्य्या विचारणा॥
मिथुने च यदा मन्त्री त्रायुतं मन्त्रमुत्तमम्।
प्रजपेत् प्रयतो नित्यं पुरश्चरणमुच्यते॥
कर्कटे च यदा मन्त्री सहस्रं प्रत्यहं जपेत्।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणमुच्यते॥
सिंहे च सर्व्वमन्त्राणामयुतानां त्रयं जपेत्।
धर्म्मार्थकाममोक्षाणां फलभाग्भवति ध्रुवम्॥
कन्यायाञ्च यदा मन्त्री मन्त्रं मन्त्रपरायणः।
सहस्रं द्वादशञ्चैव जपेन्नियतमानसः॥
पुरश्चरणमेतद्धि सर्व्वकामार्थसाधनम्।
इह लोके सुखं भुक्त्वा चान्ते देवीपदं व्रजेत्॥
तुलायां प्रत्यहं मन्त्री सहस्रं साधको जपेत्।
अनेन विधिना देवि! पुरश्चरणमुच्यते॥
वृश्चिके चायुतं मन्त्रं शुभ्यायां प्रजपेत् सुधीः।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चर्य्याफलं भवेत्॥
धनुषि च यदा मन्त्रं जपेदयुतमादरात्।
इहैव कन्दर्पसमो धनवान् बलवान् सुखी॥
मकरे च यदा मन्त्रं जपेत् साधकसत्तमः।
चतुर्णामयुतं देवि! प्रत्यहं यतमानसः॥
धर्म्मार्थं भावयेन्नित्यं पुरश्चरणमुच्यते॥
कुम्भे चैव यदा मन्त्रं जपेदयुतमादरात्।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणमुद्भवेत्॥
मीने चैव यदा देवि! प्रजपेदयुतं त्रयम्।
तेन पुरश्चरणमित्याहुः सर्व्वागमविशारदाः॥
सर्व्वत्र जपनं श्रेयं रात्रौ वा मैथुनेऽपि वा।
शुभ्यायान्तु विशेषेण परयोषित्समागमे॥
हविष्याशी तदा देवि! जपेन्नियतमानसः।
एवंविधं जपं कृत्वा दशांशञ्च तदाचरेत्॥
दक्षिणां गुरवे दत्त्वा सिद्धिभाग् भवति ध्रुवम्।
अथवान्यप्रकारेण पुरश्चरणमुच्यते॥
रविवारादिसर्व्वेषु वारसंख्यासहस्रकम्।
जप्त्वा मन्त्रं सदा देवि! साधकः सिद्धिभाग् भवेत्॥
पुरश्चरणमेतद्धि नात्र कार्य्या विचारणा॥
एवंविधं समाचर्य्य दशांशञ्च तदाचरेत्।
गुरवे दक्षिणां दत्त्वा सर्व्वकाममवाप्नुयात्॥
केवलं जपमात्रेण पुरश्चरणमुच्यते।
येषु येषु च नक्षत्रेषु जायते सिद्धिरुत्तमा॥
कथयामि समासेन शृणुतां पर्व्वतात्मजे!।
अश्विन्यां जप्यते मन्त्रं साधकैश्च सहस्रकम्॥
तेन सिद्धिमवाप्नोति साधको नात्र संशयः।
द्विसहस्रं जपेन्मन्त्रं भरण्याञ्च यदा सुधीः॥
यमलोकं परित्यज्य धनेन च धनाधिपः।
कृत्तिकायां जपेन्मन्त्रं त्रिसहस्रञ्च साधकः॥
रोहिण्याञ्च यदा मन्त्रं जपेत् साधकसत्तमः।
सहस्रं वा शतं वापि सर्व्वकामार्थमाप्नुयात्॥
मृगशीर्षे यदा मन्त्रं नियतं प्रजपेत् सुधीः।
सहस्रपञ्चकञ्चैव वृहस्पतिसमो भवेत्॥
आर्द्रायां जप्यते मन्त्रं साधकैः सुसमाहितैः।
षट्सहस्रं यदा देवि! सर्व्वकामार्थसिद्धये॥
पुनर्व्वसुसमायोगे यदा सहस्रसत्तमम्।
जप्यते साधको नित्यं लभते च सुरोत्तमम्॥
पुष्यायाञ्च जपेन्मन्त्रं सप्तानाञ्च सहस्रकम्।
तेन सर्व्वसुसिद्धिः स्यात् पुरश्चर्य्याधिको विधिः॥
अश्लेषायां यदा देवि! मन्त्री मन्त्रं समाहितः।
सहस्रषट्कञ्चैव जपेत् सर्व्वार्थसिद्धये॥
दशसहस्रं मघायाञ्च जप्त्वा मन्त्रं समाहितः।
पुरन्दरसमो भूत्वा साधको विचरेत् भुवि॥
एकादशसहस्रन्तु पूर्व्वत्रये जपेत् सुधीः।
कुबेर इव वित्ताढ्यो जायते नात्र संशयः॥
उत्तरत्रितये देवि! सहस्रं द्वादशं तथा।
जप्यते साधकैर्नित्यं सर्व्वकामार्थसिद्धये॥
हस्तायाञ्च जपेद्देवि! सहस्रञ्च त्रयोदश।
सूर्य्यस्यैव समो भूत्वा विचरेत् भुवि साधकः॥
चित्रायाञ्च जपेन्मन्त्रं द्विसहस्रञ्च साधकैः।
नानाभोगसमायुक्तो भवेद् भुवि पुरन्दरः॥
स्वात्यां सर्व्वार्थसिद्धिः स्यात् द्विसहस्रस्य जापनात्।
साधकोऽयाहतगतिर्जायते नात्र संशयः॥
विशाखायां यदा मन्त्रं चतुःसहस्रकं प्रिये!।
जपेच्च साधको नित्यं सोमवत् प्रियदर्शनः॥
अनुराधायां यदा देवि! मन्त्री मन्त्रं सदा जपेत्।
पुत्रपौत्रसमायुक्तः खेचरो जायते ध्रुवम्॥
ज्येष्ठायाञ्च यदा मन्त्रं द्विसहस्रं विचक्षणः।
प्रजपन् लभते सिद्धिं नात्र कार्य्या विचारणा॥
मूलायाञ्च जपेन्मन्त्रं सहस्रं पञ्चकं प्रिये!।
नानासिद्धिमवाप्नोति साधको नात्र संशयः॥
वरुणेन समो भूत्वा जायते साधको भुवि।
शतभिषायां यदा मन्त्रं द्विःसहस्रं जपेत् सुधीः॥
महापातकान्मुच्येत फलभाग्भवति ध्रुवम्।
रेवत्याञ्च यदा मन्त्रं चत्वारि सहस्रकं तथा॥
जप्त्वा स्तुत्वा सदा देवि! सोमलोकमवाप्नुयात्।
रात्रौ वा मैथुने वापि शुभ्यायाञ्च व्यवस्थितः॥
प्रजपेत् साधको नित्यं साधयेदात्मनो हितम्।
सर्व्वदा प्रजपेन्मन्त्रं हविष्याशी दिवा शुचिः॥
दक्षिणां गुरवे दद्यात् यथा विभवविस्तरम्।
अथवान्यप्रकारेण पुरश्चरणमुच्यते॥
आदित्यादिवारयोगे नन्दादितिथियोगतः।
ततस्तत्र जपेन्मन्त्रं सहस्रपञ्चकं प्रिये!॥
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणमुद्भवेत्।
प्रतिपत्तिथिमारभ्य कृष्णायावत् भवेत् प्रिये!॥
तिथिसंख्यां समासाद्य वर्द्धयेच्च सहस्रकम्।
जप्त्वा मन्त्रं सदा मन्त्री सर्व्वकाममवाप्नुयात्॥
पुरश्चरणमेतद्धि कथितं ते वरानने!।
प्रतिपत्तिथिमारभ्य राका यावद् भवेत् प्रिये!॥
तावन्मन्त्रं प्रजपेत तिथिसंख्याक्रमेण तु।
सर्व्वभावसमायुक्तो जायते भावसाधकः॥
एतेनैव सुसिद्धिः स्यात् नात्र कार्य्या विचारणा।
अथवान्यप्रकारेण पुरश्चरणमुच्यते॥
वर्णादिकरणे देवि! जप्त्वा विद्यामनन्यधीः।
करणानुसारेणैव वर्द्धयेच्च सहस्रकम्॥
पुरश्चरणमेतद्धि सर्व्वतन्त्रे च गोपितम्।
साधकस्य हितार्थाय कथितं तदरानने!॥
अथवान्यप्रकारेण पुरश्चरणमुच्यते।
विष्कुम्भादिषु योगेषु यो जपेत् योगसंख्यया॥

सहस्रं साधको नित्यं सर्व्वसिद्धिपरायणः।
पुरश्चरणमेतद्धि तन्त्रे तन्त्रे निरूपितम्॥
संक्रान्त्यादिषु सर्व्वासु विषुवादिषु पार्व्वति!।
संक्रान्त्यनुसारेणैव वर्द्धयेच्च सहस्रकम्॥
पूर्व्वमुखो जपेन्मन्त्रं धनार्थी सर्व्वदा प्रिये!।
अन्नुगाधाय सततं दक्षिणाभिमुखो जपेत्॥"
इति खतन्त्रे तन्त्रे हरगौरीसंवादे रहस्यपुरश्चरणविधिः॥ * ॥) अत्र आगमकल्पद्रुमोक्तकूर्म्मचक्रंतच्छब्दे द्रष्टव्यम्। हरिभक्तिविलासीयपुरश्चरणन्तु तद्ग्रन्थे सप्तदशविलासे दर्शनीयम्॥

पुरश्छदः, पुं, (पुरश्छदति छादयतीति। छद्+अच्। यद्वा, पुरोऽग्रतश्छदाः पत्राण्यस्य।) छणविशेषः। उलु इति भाषा। तत्पर्य्यायः। दर्भः २ अग्रः ३ सोमपत्रः ४ परान्नप्रियः ५। इति शब्दचन्द्रिका॥

पुरस्कारः, पुं, (पुरस्करणमिति। पुरस्+कृ+भावे घञ्।) पुरस्क्रियाः। अभिशापः। अरिग्रहणम्। अग्रकरणम्। (पुरः क्रियतेऽनेनेति।) पूजनम्। ("तस्य बहुमानपुरस्कारं कृत्वा।" इति हितोपदेशः॥) स्वीकारः। सेकः। इति पुरस्कृतशब्दार्थदर्शनात्॥

पुरस्कृतः, त्रि, (पुरः क्रियते स्मेति। पुरस्+कृ+क्तः।) अभिशस्तः। अरिग्रस्तः। अग्रकृतः। पूजितः। इति मेदिनौ। ते, २१३॥ स्वीकृतः। सिक्तः। इति हेमचन्द्रः॥

पुरस्तात्, अ, (पूर्व्वस्मिन् पूर्व्वस्यां पूर्व्वस्मात् पूर्व्वस्याः वा पूर्वः पूर्व्वा वेति। पूर्व्व+"दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः।" ५। ३। २७। इति अस्तातिः। "अस्तातिच।" ५। ३। ३०। इति पूर्व्वस्य पुरादेशः।) प्राच्यां दिशि। यथा, पुरस्तात् सूर्य्य उदेति। प्रथमे काले। यथा, पुरस्ताद्बुद्धिः। पुरार्थे। अतीते। यथा, पुरस्तादाभोऽभूत्। अग्रतः अग्रे देशे। यथा, पुरस्तादायाति। इत्यमरभरतौ॥ (यथा च रघौ। २। ३४।

"मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः।
गुरोरपीदं धनमाहितार्ग्नेः
नैश्यत् पुरस्तादनुपेक्षणीयम्॥")

पुरा, अ, (पुरति अग्रे गच्छतीति। पुर+बाहुलकात् कः।) प्रबन्धः। वाक्यरचना पुराणादिः। यथा, पुराविदः। चिरम्। चिरन्तनम्। पुराणमित्यर्थान्तरम्। अतीतम्। भूतम्। चिरातीतमित्येकम्। यथा इतिहासः पुरावृत्तमिति केचित्॥ निकटः। सन्निहितः। आगामिकम्। अनागतम्। निकटागामिकः। भविष्यदासत्तिः। इति केचित्॥ इत्यमरभरतौ॥ भीरुः। इति शब्दरत्नावली॥ (प्राक्। इति हेमचन्द्रः। ६। १७१॥ यथा, पञ्चदश्याम्। २। १४।

"इदं सर्व्वं पुरा सृष्टेरेकमेवाद्वितीयकम्।
सदेवासीन्नामरूपे नास्तामित्यारुणैर्वचः॥")

पुरा, स्त्री, (पुरतीति। पुर+क+टाप्।) पूर्व्वदिक्। सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। गन्धवती २ दिशा ३ गन्धाढ्या ४ गन्धमादिनी ५ सुरभिः ६ भूरिगन्धा ७ कुटी ८ गन्धकुटी ९। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। शीतत्वम्। कषायत्वम्। कफपित्तश्वासास्रविषदाहार्त्तिभ्रममूर्च्छालघानाशित्वञ्च। इति राजनिर्घण्टः॥

पुराकृतं, त्रि, (पुरा पूर्व्वं पूर्व्वस्मिन् काले वा कृतम्।) प्रारब्धकर्म्म। पूर्व्वकालकृतपुण्यादि। यथा,—

"अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम्॥"
इति स्मृतिः॥

पुराणं, क्ली, (पुरा भवमिति। पुरा+"सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।" ४। ३। २३। इति ट्युः।) "पूर्व्वकालैकसर्व्वजगत्पुराणनवकेवलाः समानाधिकरणेन।" २। १। ६९। इति निपातनात् तुडभावः। यद्वा, "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु।" ४। ३। १०५। इति निपातितः। यद्वा, पुरा नीयते इति। नी+ड। णत्वञ्च।) व्यासादिमुनिप्रणीतवेदार्थवर्णितपञ्चलक्षणान्वितग्रन्थम्। तत्पर्य्यायः। पञ्चलक्षणम् २। इत्यमरः। १। ६। ५॥ पञ्चलक्षणानि यथा, सर्गः १ प्रतिसर्गः २ वंशः ३ मन्वन्तरम् ४ वंशानुचरितम् ५॥ महापुराणस्य दश लक्षणानि। यथा, सर्गः १ विसर्गः २ वृत्तिः ३ रक्षा ४ अन्तरम् ५ वंशः ६ वंशानुचरितम् ७ संस्था ८ हेतुः ९ अपाश्रयः १०॥ अथाष्टादशमहापुराणानि तेषां श्लोकसंख्यानि च तथा। ब्राह्मं दशसहस्रम् १ पाद्मं पञ्चपञ्चाशत्सहस्रम् २ वैष्णवं त्रयोविंशतिसहस्रम् ३ शैवं चतुर्व्विंशतिसहस्रम् ४ भागवतम् अष्टादशसहस्रम् ५ नारदीयं पञ्चविंशतिसहस्रम् ६ मार्कण्डेयं नवसहस्रम् ७ आग्नेयं चतुःशताधिकपञ्चदशसहस्रम् ८ भविष्यं पञ्चशताधिकचतुर्दशसहस्रम् ९ ब्रह्मवैवर्त्तम् अष्टादशसहस्रम् १० लैङ्गं एकादशसहस्रम् ११ वाराहं चतुर्विंशतिसहस्रम् १२ स्कान्दं शताधिकैकाशीतिसहस्रम् १३ वामनं दशसहस्रम् १४ कौर्म्मं सप्तदशसहस्रम् १५ मात्स्यं चतुर्दशसहस्रम् १६ गारुडं एकोनविंशतिसहस्रम् १७ ब्रह्माण्डं द्वादशसहस्रम् १८। समुदायेन चतुर्लक्षश्लोकाः। इति श्रीभागवतीयद्वादशस्कन्धः॥ (अपि च देवीभागवते १ स्कन्धे ३ अध्याये तथा मत्स्यपुराणे ५३ अध्याये एतद्विवरणं द्रष्टव्यम्॥) अपि च।

सूत उवाच।

"विस्तराणि पुराणानि चेतिहासञ्च शौनक!।
संहितां पञ्चरात्राणि कथयामि यथागमम्॥
सर्गञ्च प्रतिसर्गञ्च वंशो मन्वन्तराणि च।
वंशानुचरितं विप्र! पुराणं पञ्चलक्षणम्॥
एतदुपपुराणानां लक्षणञ्च विदुर्बुधाः।
महतान्तु पुराणानां लक्षणं कथयामि ते॥ *॥

सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम्।
कर्म्मणां वासना वार्त्ता मन्वनाञ्च क्रमेण च॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम्।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक्॥
दशाधिकं लक्षणञ्च महतां परिकीर्त्तितम्।
संस्थानञ्च पुराणानां निबोध कथयामि ते॥
परं ब्रह्मपुराणञ्च सहस्राणां दशैव च।
पञ्चोनषष्टिसाहस्रं पाद्ममेव प्रकीर्त्तितम्॥
त्रयोविंशतिसाहस्रं वैष्णवञ्च विदुर्बुधाः।
चतुर्विंशतिसाहस्रं शैवमेव निरूपितम्॥
यत्रोऽष्टादशसाहस्रं श्रीमद्भागवतं विदुः।
पञ्चविंशतिसाहस्रं नारदीयं प्रकीर्त्तितम्॥
मार्कण्डं नवसाहस्रं पुराणं पण्डिता विदुः।
चतुःशताधिकं पञ्चदशसाहस्रमेव च॥
परमग्निपुराणञ्च रुचिरं परिकीर्त्तितम्।
चतुर्दशसहस्राणि परं पञ्चशताधिकम्॥
पुराणप्रवरञ्चैव भविष्यं परिकीर्त्तितम्।
अष्टादशसहस्रञ्च ब्रह्मवैवर्त्तमीरितम्॥
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः।
एकादशसहस्रञ्च परं लिङ्गपुराणकम्॥
चतुर्व्विंशतिसाहस्रं वाराहं परिकीर्त्तितम्।
एकाशीतिसहस्रञ्च परमेव शताधिकम्॥
वरं स्कन्दपुराणञ्च सङ्क्षिरेव निरूपितम्।
वामनं दशसाहस्रं कौर्म्मं सप्तदशैव तु॥
मात्स्यं चतुर्दशं प्रोक्तं पुराणं पण्डितैस्तथा।
ऊनविंशतिसाहस्रं गारुडं परिकीर्त्तितम्॥
परं द्वादशसाहस्रं ब्रह्माण्डं परिकीर्त्तितम्।
एवं पुराणसंस्थानं चतुर्लक्षमुदाहृतम्॥
अष्टादशपुराणानामेषमेव विदुर्बुधाः।
एवमेवोपपुराणानामष्टादश प्रकीर्त्तिताः॥ *॥
इतिहासो भारतञ्च वाल्मीकं काव्यमेव च।
पञ्चकं पञ्चरात्राणां लक्षणमाहात्म्यपूर्व्वकम्।
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम्।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम्॥
पञ्चस्यः संहितानाञ्च लक्षणभक्तिसमन्विताः।
ब्रह्मणश्च शिवस्यापि प्रह्लादस्य तथैव च॥
गौतमस्य कुमारस्य संहिताः परिकीर्त्तिताः।
इति ते कथितं सर्व्वं क्रमेण च पृथक् पृथक्॥
अस्यैवं विपुलं शास्त्रं ममापि च यथागमम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अः॥

पद्मपुराणमते तु।

"निस्काराय तु लोकानां स्वयं नारायणः प्रभुः।
व्यासरूपेण कृतवान् पुराणानि महीतले॥
पठनाच्छ्रवणाद्येषां नृणां पापक्षयो भवेत्।
धर्म्माधर्म्मपरिज्ञानं सदाचारप्रवर्त्तनम्॥
गतिश्च परमा तद्वद्भक्तिर्भगवति प्रभौ।
तानि ते कथयिष्यामि सप्तमाणानि भूतले॥" *॥

पुराणसंख्यान्तरमाह।

"पुराणानि चतुर्लक्षाण्येतानि धरणीतले।
तथा महाभारतञ्च लक्षसंख्यं प्रकीर्त्तितम्॥
पञ्चलक्षमिदं राजन्! कथितं ब्रह्म केवलम्।
वेदः पञ्चमनामैष लोकनिस्तारकः परः॥

तत्र पद्मपुराणञ्च प्रथमं स प्रणीतवान्।
ततोऽन्यानि पुराणानि कृत्वा षोड़श तु क्रमात् ॥
अष्टादशं भागवतं सारमाकृष्य सर्व्वतः।
कृतवान् भगवान् व्यासः शुकञ्चाध्यापयत् सुतम्॥"
इति पातालखण्डे ७१ अध्यायः ॥ * ॥
आख्यानादिभिः सह व्यासः पुराणं चक्रे।
यथा,—
"आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः।
पुराणसंहितां चक्रे पुराणार्थविशारदः ॥
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै लोमहर्षणः।
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः ॥"
अस्य टीका यथा,—
आख्यानादिभिः सह पुराणं चक्रे व्यास इत्यन्वयः। तत्र च।
स्वयं दृष्टार्थकथनं प्राहुराख्यानकं बुधाः।
श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते ॥
गाथास्तु पित्रादिप्रभृतिगीतयः। कल्पशुद्धिः आद्धकल्पादिनिर्णयः ॥ * ॥
"सुमतिश्चाग्निवर्च्चाश्चमित्रायुः शांशपायनः।
अकृतव्रणोऽथ सावर्णिः षट् शिष्यास्तस्य चाभवन् ॥"
टीका। सुमत्यादयस्तु रोमहर्षणस्य षट्शिष्यास्ततश्च ताः षट् संहिता जगृहुः ॥ * ॥
"काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः।
लौमहर्षणिका चान्या तिस्रो मूलसंहिता ॥"
टीका। अकृतव्रण एव काश्यपः काश्यपो ह्यकृतव्रण इति वायुक्तेः। रौमहर्षणिका चान्या रोमहर्षणेन पुनः संज्ञेपेण प्रोक्ता ॥ * ॥
"चतुष्टयेनाप्येतेन संहितानामिदं मुने!।"
टीका। एतासां काश्यपादिकृतानां संहितानामर्थचतुष्टयेनापि मूलभूतेन तत्सारोद्धारात्मकं इदं श्रीविष्णुपुराणं मुने! मैत्रेय! मया कृतमिति शेषः ॥ * ॥
"आद्यं सर्व्वपुराणानां पुराणं ब्राह्ममुच्यते।
अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते ॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः ॥*॥
तेषां नामोच्चारणादिमाहात्म्यं यथा,—
"अष्टादशपुराणानां नामधेयानि यः पठेत्।
त्रिसन्ध्यं जपते नित्यं सोऽश्वमेधफलं लभेत् ॥"
इति मार्कण्डेयपुराणम् ॥ * ॥
तामसपुराणानि यथा,—
"मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दं तथैव च।
आग्नेयञ्च षड़ेतानि तामसानि निबोधत ॥"
सात्त्विकपुराणानि यथा,—
"वैष्णवं नारदीयञ्च तथा भागवतं शुभम्।
गारुड़ञ्च तथा पाद्मं वाराहं शुभदर्शने!।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥"
राजसपुराणानि यथा,—
"ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च।
भविष्यं वामनं ब्राह्मं राजसानि निबोधत ॥
सात्त्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गदाः शुभाः।
तथैव तामसा देवि! निरयप्राप्तिहेतवः ॥"
इति पाद्मोत्तरखण्डे ९३ अध्यायः ॥ * ॥
अष्टादशोपपुराणानि यथा,—
"आद्यं सनत्कुमारोक्तं नारसिंहमथापरम्।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ॥
चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम्।
दुर्व्वासशोक्तमाश्चर्य्यं नारदोक्तमतः परम् ॥
कापिलं वामनञ्चैव तथैवोशनसेरितम्।
ब्रह्माण्डं वारुणञ्चाथ कालिकाख्यमेव च ॥
माहेश्वरं तथा शाम्बं सौरं सर्व्वार्थसञ्चयम्।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम् ॥"
इति गारुड़े २२७ अध्यायः ॥ * ॥
कौर्म्मोक्तान्येतानि उपपुराणशब्दे द्रष्टव्यानि ॥
पुराणपाठक्रमस्तु पारायणशब्दे पाठशब्दे च द्रष्टव्यः ॥ अथाष्टादशमहापुराणानामनुक्रमणिका अर्थात् तेषां श्लोकपर्व्वखण्डभागोपाख्यानश्रवणदानफलानि लिख्यन्ते।

सूत उवाच।
"एतच्छ्रुत्वा नारदस्तु कुमारस्य वचो मुदा।
पुनरप्याह सुप्रीतो जिज्ञासुः श्रेय उत्तमम् ॥
नारद उवाच।
साधु साधु महाभाग! सर्व्वलोकोपकारकम्।
महातन्त्रं त्वया प्रोक्तं सर्व्वतन्त्रोत्तमोत्तमम् ॥
अधुना श्रोतुमिच्छामि पुराणाख्यानमुत्तमम्।
यस्मिन् यस्मिन् पुराणे तु यद्यदाख्यानकं मुने!।
तत्तत् सर्व्वं समाचक्ष्व सर्व्वज्ञस्त्वं यतो मतः ॥
तच्छ्रुत्वा वचनं विप्रा नारदस्य शुभावहम्।
पुराणाख्यानसंप्रश्नं कुमारः प्रत्युवाच ह ॥
सनत्कुमार उवाच।
पुराणाख्यानकं विप्र! नानाकल्पसमुद्भवम्।
नानाकथासमायुक्तमद्भुतं बहुविस्तरम् ॥
ऋषिः सनातनश्चायं यथा वेद तथापरः।
न वेद तस्मात् पृच्छ त्वं बहुकल्पविदांवरम् ॥
श्रुत्वेत्थं नारदो वाक्यं कुमारस्य महात्मनः।
प्रणम्य विनयोपेतः सनातनमथाब्रवीत् ॥
ब्रह्मन्! पुराणविच्छ्रेष्ठ! ज्ञानविज्ञाननत्पर!।
पुराणानां विभागं मे साकल्येनानुकीर्त्तय ॥
यस्मिन् श्रुते श्रुतं सर्व्वं ज्ञाते ज्ञातं कृते कृतम्।
वर्णाश्रमाचारधर्म्मं साक्षात्कारत्वमेष्यति ॥
कियन्ति च पुराणानि कियत् सङ्ख्यानि मानतः।
किं किमाख्यानयुक्तानि तदहं श्रम प्रभो!॥
चातुर्व्वर्ण्याश्रया नाना व्रतादीनां कथास्तथा।
ऋष्टिक्रमेण वंशानां कथाः सम्यक् प्रकाशय ॥
त्वत्तोऽधिको न चान्योऽस्ति पुराणाख्यानवित् प्रभो!॥
तस्मादाख्याहि मह्यं त्वं सर्व्वसन्देहभञ्जनम् ॥
ततः सनातनो विप्राः श्रुत्वा नारदभाषितम्।
नारायणं हृदि ध्यात्वा प्रोवाचाथ विदांवरः ॥
सनातन उवाच।
साधु साधु मुनिश्रेष्ठ! सर्व्वलोकोपकारक!।
पुराणाख्यानविज्ञाने यज्ञाता नैष्ठिकी मतिः ॥
तुभ्यं समभिधास्यामि यत् प्रोक्तं ब्रह्मणा पुरा।
मरीच्यादिऋषिभ्यस्तु पुत्रस्नेहाद्दृतात्मना ॥
एकदा ब्रह्मणः पुत्रो मरीचिर्नाम विश्रुतः।
स्वाध्यायश्रुतसम्पन्नो वेदवेदाङ्गपारगः ॥
उपस्थ्य स्वपितरं ब्रह्माणं लोकभावनम्।
प्रणम्य भक्त्या पप्रच्छ इदमेव मुनीश्वर!॥
पुराणाख्यानममलं यत्त्वं पृच्छसि मानद!॥
मरीचिरुवाच।
भगवन्! देवदेवेश! लोकानां प्रभवाव्यय!।
सर्व्वज्ञ! सर्व्वकल्याण सर्व्वाश्रय नमोऽस्तु ते ॥
पुराणबीजमाख्याहि मह्यं शुश्रूषते पितः!।
लक्षणञ्च प्रमाणञ्च वक्तारं पृच्छकं तथा ॥
ब्रह्मोवाच।
शृणु वत्स! प्रवक्ष्यामि पुराणानां समुच्चये।
यस्मिन् ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम्॥
पुराणमेकमेवासीत् सर्व्वकल्पेषु मानद!।
चतुर्व्वर्गस्य बीजञ्च शतकोटिप्रविस्तरम् ॥
प्रवृत्तिः सर्व्वशास्त्राणां पुराणादभवत्ततः ॥
कालेनाग्रहणं दृष्ट्वा पुराणस्य महामतिः।
हरिर्व्यासस्वरूपेण जायते च युगे युगे ॥
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा।
तदष्टादशधा कृत्वा भूर्लोके निर्दिशत्यपि ॥
अद्यापि देवलोके तु शतकोटि प्रविस्तरम्।
यस्यैव तस्य सारस्तु चतुर्लक्षेण वर्ण्यते ॥*॥
ब्राह्मम् १ पाद्मम् २ वैष्णवञ्च ३ शैवीयम् ४ तथैव च।
भागवतम् ५ नारदीयम् ६ मार्कण्डेयञ्च ७ कीर्त्तितम् ॥
आग्नेयञ्च ८ भविष्यञ्च ९ ब्रह्मवैवर्त्तं-१० लिङ्गके ११।
वाराहञ्च १२ तथा स्कान्दम् १३ वामनम् १४ कूर्म्म-१५ संज्ञकम्।
मात्स्यञ्च१६ गारुड़म् १७ तद्वद्ब्रह्माण्डाख्य-१८ मिति त्रिषट्॥
एकं कथानकं ह्येवं वक्तुः श्रोतुः समाश्रयम्।
प्रवक्ष्यामि समासेन निबोधय समाहितः ॥"*॥
तत्र प्रथमं ब्रह्मपुराणम्।
"ब्राह्मं पुराणं तत्रादौ सर्व्वलोकहिताय वै।
व्यासेन वेदविदुषा समाख्यातं महात्मना ॥
तस्मै सर्व्वपुराणाद्यं धर्म्मकामार्थमोक्षदम्।
नानाख्यानेतिहासाढ्यं दशसाहस्रमुच्यते ॥*॥
तत्पूर्व्वभागे।
"देवानामसुराणाञ्च यत्रोत्पत्तिः प्रकीर्त्तिता।
प्रजापतीनाञ्च तथा दक्षादीनां मुनीश्वर!॥
ततो लोकेश्वरस्यात्र सूर्य्यस्य परमात्मनः।
वंशानुकीर्त्तनं पुण्यं महापातकनाशनम् ॥
यत्रावतारः कथितः परमानन्दरूपिणः।
श्रीमतो रामचन्द्रस्य चतुर्थांशावतारिणः ॥
ततश्च सोमवंशस्य कीर्त्तनं यत्र वर्णितम्।
क्षत्रस्य जगदीशस्य चरितं कल्मषापहम् ॥
द्वीपानाञ्चैव सिन्धूनां वर्षाणां चाप्यशेषतः।
वर्णनं यत्र पातालस्वर्गाणाञ्च प्रदृश्यते ॥
नरकाणां समाख्यानं सूर्य्यस्तुतिकथानकम्।

पार्व्वत्याश्च तथा जन्म विवाहश्च निगद्यते ॥
दक्षाख्यानं ततः प्रोक्तमेकाम्रक्षेत्रवर्णनम् ।
पूर्व्वभागोऽयमुदितः पुराणस्यास्य मानद ! ॥"*॥
तदुत्तरभागे ।
"अस्योत्तरे विभागे तु पुरुषोत्तमवर्णनम् ।
विस्तरेण समाख्यातं तीर्थयात्राविधानतः ॥
अत्रैव कृष्णचरितं विस्तरात् समुदीरितम् ।
वर्णनं यमलोकस्य पितॄश्राद्धविधिस्तथा ॥
वर्णाश्रमाणां धर्म्माश्च कीर्त्तिता यत्र विस्तरात् ।
विष्णुधर्म्मयुताख्यानं प्रलयस्य च वर्णनम् ॥
योगानाञ्च समाख्यानं साङ्गानामपि वर्णनम् ।
ब्रह्मवादसमुद्देशः पुराणस्य च कीर्त्तनम् ॥
एतद्ब्रह्मपुराणन्तु भागद्वयसमाचितम् ।
वर्णितं सर्व्वपापघ्नं सर्व्वसौख्यप्रदायकम् ॥"*॥
तत्फलश्रुतिः ।
"श्रुतघ्नौकसंवादं भुक्तिमुक्तिप्रदायकम् ।
लिखित्वैतत् पुराणं यो वैष्णाख्यां हैमसंयुतम् ॥
जलधेर्युगलेनापि भक्त्या दद्याद्विजातये ।
पौराणिकाय सम्पूज्य वस्त्रभोज्यविभूषणैः ।
स वसेद्ब्रह्मणो लोके यावच्चन्द्रार्कतारकम् ॥
यः पठेच्छृणुयाद्वापि ब्राह्मानुक्रमणीं द्विज ! ।
सोऽपि सर्व्वपुराणस्य श्रोतुर्वक्तुः फलं लभेत् ॥
शृणोति यः पुराणन्तु ब्राह्मं सर्व्वं जितेन्द्रियः ।
हविष्याशी च नियतात् स लभेद् ब्रह्मणः पदम् ॥
किमत्र बहुनोक्तेन यदृयदिच्छति मानवः ।
तत् सर्व्वं लभते वत्स ! पुराणस्यास्य कीर्त्तनात् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिद्वारोपाख्याने चतुर्थपादे ६२ अध्यायः ॥१॥
द्वितीयं पद्मपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु पुत्र ! प्रवक्ष्यामि पुराणं पद्मसंज्ञिकम् ।
महत्पुण्यप्रदं नृणां शृण्वतां पठतां सदा ॥
यथा पक्षेन्द्रियः सर्व्वः शरीरीति निगद्यते ।
तथेदं पञ्चभिः खण्डैरुदितं पापनाशनम् ॥"*॥
तत्र प्रथमे सृष्टिखण्डे ।
"पुलस्त्येन तु भीष्माय दृष्टादिक्रमतो द्विज ! ।
नानाख्यानेतिहासाद्यैर्यत्रोक्तो धर्म्मविस्तरः ॥
पुष्करस्य च माहात्म्यं विस्तरेण प्रकीर्त्तितम् ।
ब्रह्मयज्ञविधानञ्च वेदपाठादिलक्षणम् ॥
दानानां कीर्त्तनं यत्र व्रतानाञ्च पृथक् पृथक् ।
विवाहः शैलजायाश्च तारकाख्यानकं महत् ॥
माहात्म्यञ्च गवादीनां कीर्त्तितं सर्व्वपुण्यदम् ।
कालकेयादिदैत्यानां वधो यत्र पृथक् पृथक् ॥
ब्रह्मणामर्च्चनं दानं यत्र प्रोक्तं द्विजोत्तम ! ।
तत्सृष्टिखण्डमुद्दिष्टं व्यासेन समहात्मना ॥"*॥
द्वितीये भूमिखण्डे ।
"पितृमात्रादिपूज्यत्वे शिवशर्म्मकथा पुरा ।
सुव्रतस्य कथा पश्चात् वृत्तस्य च वधस्तथा ॥
पृथोर्विष्णुस्य चाख्यानं धर्म्माख्यानं ततः परम् ।
पितृसुव्रतसंवादाख्यानं नहुषस्य कथा ततः ॥
ययातिचरितञ्चैव पुरुतीर्थनिरूपणम् ॥
राज्ञा जैमिनिसंवादो वज्राख्यैकथायुतः ॥
कथा रूपौकसुन्दर्य्या दुष्कृतेत्यवधार्चिता ।
कामोदाख्यानकं तत्र विदुष्कवधसंयुतः ॥
कृष्णस्य च संवादश्चवनेन महात्मना ।
सिद्धाख्यानं ततः प्रोक्तं खण्डस्यास्य फलोदयम् ॥
श्रुतधौनकसंवादं भूमिखण्डमिदं स्मृतम् ॥"*॥
तृतीये स्वर्गखण्डे ।
"ब्रह्माख्योत्पत्तिरुदिता यत्रर्षिभिश्च सौतिना ।
सप्तभूमिलोकसंस्थानं तीर्थाख्यानं ततः परम् ॥
नर्म्मदोत्पत्तिकथनं तत्तीर्थानां कथा पृथक् ।
कुरुक्षेत्रादितीर्थानां कथाः पुण्याः प्रकीर्त्तिताः ॥
कालिन्दीपुण्यकथनं काश्मीमाहात्म्यवर्णनम् ॥
गयायाश्चैव माहात्म्यं प्रयागस्य च पुण्यकम् ।
वर्णाश्रमानुरोधेन कर्म्मयोगनिरूपणम् ॥
व्यासजैमिनिसंवादः पुण्यकर्म्मकथाश्चितः ।
सप्तद्रुमधनाख्यानं व्रताख्यानं ततः परम् ॥
ऊर्ज्जप्रबोधमाहात्म्यं स्तोत्रं सर्व्वापराधघ्नम् ।
एतत्स्वर्गाभिधं विप्र ! सर्व्वपातकनाशनम् ॥"
चतुर्थे पातालखण्डे ।
"रामाश्वमेधे प्रथमं रामराज्याभिषेचनम् ।
अगस्त्याद्यागमश्चैव पौलस्त्याश्वयकीर्त्तनम् ॥
अश्वमेधोपदेशश्च हयचर्य्या ततः परम् ।
नानाराजकथाः पुण्या जगन्नाथानुवर्णनम् ॥
वृन्दावनस्य माहात्म्यं सर्व्वपापप्रणाशनम् ।
नित्यलीलानुकथनं यत्र कृष्णावतारिणः ॥
माधवस्नानमाहात्म्ये स्नानदानार्च्चने फलम् ।
धरावराहसंवादो यमब्राह्मणयोः कथा ॥
संवादो राजदूतानां कृष्णस्योच्चनिरूपणम् ।
शिवशर्म्मसमायोगो दधीच्याख्यानकन्ततः ॥
भस्ममाहात्म्यमतुलं शिवमाहात्म्यसुत्तमम् ।
देवरातसुताख्यानं पुराणस्यप्रशंसनम् ॥
गौतमाख्यानकञ्चैव शिवगीता ततः स्मृता ।
कल्पान्तरी रामकथा भरद्वाजसमास्थितौ ॥
पातालखण्डमेतद्धि श्रृण्वतां ज्ञानिनां सदा ।
सर्व्वपापप्रशमनं सर्व्वाभीष्टफलप्रदम् ॥"
पञ्चमे उत्तरखण्डे ।
"पर्व्वताख्यानकं पूर्व्वं गौर्य्यै प्रोक्तं शिवेन वै ।
जालन्धरकथा पश्चाच्छैलाद्यनुकीर्त्तनम् ॥
सगरस्य कथा पुण्या ततः परसुदीरितम् ।
गङ्गाप्रयागकाश्मीरां गयायाश्चाधिपुण्यकम् ॥
आम्रादिदानमाहात्म्यं तस्माद्वादशव्रतम् ।
चतुर्विंशैकादशीनां माहात्म्यं पृथगीरितम् ॥
विष्णुधर्म्मसमाख्यानं विष्णुनामसहस्रकम् ।
कार्त्तिकव्रतमाहात्म्यं माघस्नानफलन्ततः ॥
जम्बुद्वीपस्य तीर्थानां माहात्म्यं पापनाशनम् ।
साभ्रमत्याश्च माहात्म्यं वृषिंहोत्पत्तिवर्णनम् ॥
देवशर्म्मादिकाख्यानं गीतमाहात्म्यवर्णने ।
भक्त्याख्यानञ्च माहात्म्यं श्रीमद्भागवतस्य ह ॥
इन्द्रप्रस्थस्य माहात्म्यं बहुतीर्थकथाश्चितम् ।
मन्त्ररत्नाभिधानञ्च त्रिपाद्भूत्यनुवर्णनम् ॥
अवतारकथा पुण्या मत्स्यादीनामतः परम् ।
रामनामशतं दिव्यं तन्माहात्म्यञ्च दार्ढ्य ! ॥
परीक्षणञ्च भृगुणा श्रीविष्णोर्वैभवस्य च ।
इत्येतदुत्तरं खण्डं पञ्चमं सर्व्वपुण्यदम् ॥" * ॥
तत्फलश्रुतिः ।
"पञ्चखण्डयुतं पाद्मं यः शृणोति नरोत्तमः ।
स लभेद्वैष्णवं धाम शुक्ला भोगानिहेप्सितान् ॥
एतद्वै पञ्चपञ्चाशत्सहस्रं पद्मसंज्ञकम् ।
पुराणं वेदधित्वा वै ज्येष्ठां स्वर्णाज्यसंयुतम् ॥
यः प्रदद्यात् सुसंतुष्टस्तस्य पुराणज्ञाय मानद ! ।
स याति वैष्णवं नाम सर्व्वदेवनमस्कृतः ॥
पद्मानुक्रमणीमेतां यः पठेत् शृणुयात् तथा ।
सोऽपि पद्मपुराणस्य लभेत् अवभृथं फलम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिद्वारोपाख्याने चतुर्थपादे ६१ अध्यायः ॥ २ ॥
तृतीयं विष्णुपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्स ! प्रवक्ष्यामि पुराणं वैष्णवं महत् ।
त्रयोविंशतिसाहस्रं सर्व्वपातकनाशनम् ॥
यत्रादिभागे निर्द्दिष्टाः षड्वंशाः प्रकृतेर्द्विज ।
मैत्रेयाद्यास्तथा यत्र पुराणस्यावतारिकाः ॥"
तत्र प्रथमभागस्य प्रथमांशे ।
"आदिकारणसर्गश्च देवादीनाञ्च सम्भवः ।
समुद्रमथनाख्यानं दक्षादीनां ततोद्भवाः ॥
ध्रुवस्य चरितं चैव पृथोश्चरितमेव च ।
प्राचेतसं तथाख्यानं प्रह्लादस्य कथानकम् ॥
पृथग्राज्याधिकाराख्या प्रथमोऽंश इतीरितः ॥"
प्रथमभागस्य द्वितीयांशे ।
"प्रियव्रताद्यवाख्यानं द्वीपवर्षनिरूपणम् ।
पातालनरकाख्यानं सप्तस्वर्गनिरूपणम् ॥
सूर्य्यादिचारकथनं पृथग्गणचयसंयुतम् ॥
चरितं भरतस्याथ मुक्तिमार्गनिदर्शनम् ॥
निदाघऋभुसंवादो द्वितीयोऽंश उदाहृतः ॥"
प्रथमभागस्य तृतीयांशे ।
"मन्वन्तरसमाख्यानं वेदव्यासावतारकम् ।
नरकोद्धारकं कर्म्म गदितञ्च ततः परम् ॥
सगरस्यौर्वसंवादे सर्व्वधर्म्मनिरूपणम् ।
आह्निकञ्च तपोद्दिष्टं वर्णाश्रमनिवन्धने ।
सदाचारञ्च कथितं मायामोहकथा ततः ।
तृतीयोऽंशोऽयमुदितः सर्व्वपापप्रणाशनः ॥"
प्रथमभागस्य चतुर्थांशे ।
"सूर्य्यवंशकथा पुण्या सोमवंशानुकीर्त्तनम् ।
चतुर्थेऽंशे मुनिश्रेष्ठ ! नानाराजकथाश्चितम् ॥"
प्रथमभागस्य पञ्चमांशे ।
"कृष्णावतारसंप्रश्नो गोकुलीया कथा ततः ।
पूतनादिवधो बाल्ये कौमारेऽरिष्टहिंसनम् ॥
कैशोरे कंसहननं माथुरं चरितं तथा ।
ततस्तु यौवने प्रोक्ता लीला द्वारवतीभवा ॥
सर्व्वदैत्यवधो यत्र विवाहाश्च पृथग्विधाः ।
यत्र स्थित्वा जगन्नाथः कृष्णो योगेश्वरेश्वरः ॥
भूभारहरणं चक्रे परस्परहननादिभिः ।
अष्टावक्रीयमाख्यानं पञ्चमोऽंश इतीरितः ॥"

प्रथमभागस्य षष्ठांशे ।
"कलिजं चरितं प्रोक्तं चातुर्विंध्यं लयस्य च ।
ब्रह्मज्ञानसमुद्देशः खाष्किक्यस्य निरूपितः ॥
केशिध्वजेन चैत्येष षष्ठोंशः परिकीर्तितः ॥"
तस्य द्वितीयभागे ।
"अतःपरन्तु सूतेन शौनकादिभिरादरात् ।
पृष्टेन चोदिताः पुण्यविष्णुधर्म्मोत्तराक्रियाः ॥
नानाधर्म्मकथाः पुण्या व्रतानि नियमा यमाः ।
धर्म्मशास्त्रं चार्थशास्त्रं वेदाङ्गं ज्योतिषं तथा ॥
वंशाख्यानं प्रकरणात् स्तोत्राणि मनवस्तथा ॥
नानाविद्याश्रयाः प्रोक्ताः सर्व्वलोकोपकारकाः ।
एतद्विष्णुपुराणं वै सर्व्वशास्त्रार्थसंग्रहम् ॥"*॥
तत्फलश्रुतिः ।
"वाराहकल्पवृत्तान्तं व्यासेन कथितं त्विह ।
यो नरः पठते भक्त्या यः शृणोति च सादरम् ।
तावुभौ विष्णुलोकं हि व्रजेतां सुकृतभोगकौ ॥
तल्लिखित्वा च यो दद्यादाषाढ्यां घृतधेनुना ।
सहितं विष्णुभक्ताय पुराणार्थविदे द्विज ! ।
स याति वैष्णवं धाम विमानेनार्कवर्चसा ॥
यश्च विष्णुपुराणस्य समनुक्रमणीं द्विज ! ।
कथयेच्छृणुयाद्वापि स पुराणफलं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने
चतुर्थपादे ६४ अध्यायः ॥ ३ ॥
चतुर्थं वायुपुराणम् ।
ब्रह्मोवाच ।
"शृणु विप्र ! प्रवक्ष्यामि पुराणं वायवीयकम् ।
यस्मिन् श्रुते लभेद्भक्तिं रुद्रस्य परमात्मनः ॥
चतुर्विंशतिसाहस्रं तत् पुराणं प्रकीर्त्तितम् ।
श्वेतकल्पप्रसङ्गेन धर्म्माख्यत्राह मारुतः ॥
तदायवीयमुदितं भागद्वयसमाचितम् ॥" * ॥
तस्य पूर्व्वभागे ।
"सर्गादिलक्षणं यत्र प्रोक्तं विप्र ! सविस्तरम् ॥
मन्वन्तरेषु वंशाश्च राज्ञां ये यत्र कीर्त्तिताः ।
गयासुरस्य हननं विस्तराद्यत्र कीर्त्तितम् ॥
मासानामेव माहात्म्यं माघस्योक्तं फलाधिकम् ।
दानधर्म्मा राजधर्म्मा विस्तरेणोदितास्तथा ॥
भूपातालककुब्व्योमचारिणां यत्र निर्णयः ।
व्रतादीनाञ्च पूर्व्वोयं विभागः समुदाहृतः ॥"
तदुत्तरभागे ।
"उत्तरे तस्य भागे तु नर्म्मदातीर्थवर्णनम् ।
शिवस्य संहिताख्या वै विस्तरेण मुनीश्वर ! ॥
यो देवः सर्व्वदेवानां दुर्ज्ञेयः सनातनः ।
स तु सर्व्वात्मना यस्यां क्षीरे तिष्ठति सन्ततम् ॥
इदं ब्रह्मा हरिरिदं साक्षादेवं परो हरः ।
इदं ब्रह्म निराकारं कैवल्यं नर्म्मदाजलम् ॥
ध्रुवं लोकहितार्थाय शिवेन स्वशरीरतः ।
शक्तिः काचि सरिद्रूपा रेवेयमवतारिता ॥
ये वसन्त्युत्तरे कूले रुद्रस्यानुचरा हि ते ।
वसन्ति याम्यतीरे ये लोकं ते यान्ति वैष्णवम् ॥
ओंकारेश्वरमारभ्य यावत् पश्चिमसागरम् ।
सङ्गमाः पञ्च च त्रिंशन्नदीनां पापनाशनाः ॥
दशैकमुत्तरे तीरे त्रयोविंशति दक्षिणे ।
पञ्चत्रिंशत्तमः प्रोक्तो रेवासागरसङ्गमः ॥
सङ्गमैः सहितान्येवं रेवातीरद्वयेऽपि च ।
चतुःशतानि तीर्थानि प्रसिद्धानि च सन्ति हि ।
षष्टितीर्थसहस्राणि षष्टिकोट्यो मुनीश्वर ! ।
सन्ति चान्यानि रेवायास्तीरयुग्मे पदे पदे ॥
संहितेयं महापुण्या शिवस्य परमात्मनः ।
नर्म्मदाचरितं यत्र वायुना परिकीर्त्तितम् ॥"
तत्फलश्रुतिः ।
"लिखित्वेदं पुराणन्तु गुडधेनुसमाचितम् ।
श्रावण्यां यो ददेद्भक्त्या ब्राह्मणाय कुटुम्बिने ॥
रुद्रलोके वसेत् सोऽपि यावदिन्द्राश्चतुर्दश ।
यः श्रावयेदा शृणुयादायवीयमिदं नरः ।
नियमेन हरिष्याग्नौ स रुद्रो नात्र संशयः ॥
यश्चानुक्रमणीमेतां शृणोति श्रावयेत वा ।
सोऽपि सर्व्वपुराणस्य फलं श्रवणजं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने
चतुर्थपादे ६५ अध्यायः ॥ ४ ॥
पञ्चमं श्रीभागवतपुराणम् ।
ब्रह्मोवाच ।
"मरीचे ! शृणु वक्ष्यामि वेदव्यासेन यत् कृतम् ।
श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम् ॥
तदष्टादशसाहस्रसङ्ख्यातं पापनाशनम् ।
सुरपादपरूपोऽयं स्कन्धैर्द्वादशभिर्युतः ॥
भगवानेव विप्रेन्द्र ! विश्वरूपी त्वमीरितः ॥"
तस्य प्रथमस्कन्धे ।
"तत्र तु प्रथमे स्कन्धे कृतर्षीणां समागमः ।
व्यासस्य चरितं पुण्यं प्राक्तवानां तथैव च ॥
पारीक्षितसुपाख्यानमितीदं समुदाहृतम् ॥"
द्वितीयस्कन्धे ।
"परीक्षिच्छुकसंवादे स्थितिद्वयनिरूपणम् ।
ब्रह्मनारदसंवादेऽवतारचरितान्वितम् ॥
पुराणलक्षणञ्चैव सृष्टिकारणसम्भवः ।
द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता ॥"
तृतीयस्कन्धे ।
"चरितं विदुरस्याथ मैत्रेयेणास्य सङ्गमः ।
सृष्टिप्रकरणं पाद्मात्ब्रह्मणः परमात्मनः ॥
कापिलं साङ्ख्यमप्यत्र तृतीयोऽयमुदाहृतः ॥"
चतुर्थस्कन्धे ।
"सत्कर्म्मचरितमादौ तु ध्रुवस्य चरितं ततः ।
पृथोः पुण्यसमाख्यानं ततः प्राचीनबर्हिषः ।
प्रचेष तुर्य्यो गदितो विसर्गे स्कन्ध उत्तमः ॥"
पञ्चमस्कन्धे ।
"प्रियव्रतस्य चरितं तदंशानाञ्च पुण्यदम् ।
ब्रह्माण्डान्तर्गतानाञ्च लोकानां वर्णनन्ततः ॥
नरकक्षितिरित्येष संस्थाने पञ्चमो मतः ॥"
षष्ठस्कन्धे ।
"अजामिलस्य चरितं दक्षदुहितृनिरूपणम् ॥
वृत्राख्यानं ततः पश्चान्नरतां जन्म पुण्यदम् ।
षष्ठोऽयमुदितः स्कन्धो व्यासेन परिशोधिते ॥"
सप्तमस्कन्धे ।
"प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम् ।
सप्तमो गदितो वत्स ! व्यासनाकर्म्मकीर्त्तने ॥"
अष्टमस्कन्धे ।
"गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम् ।
समुद्रमथनञ्चैव बलिबैभवबन्धनम् ॥
मत्स्यावतारचरितमष्टमोऽयं प्रकीर्त्तितः ॥"*॥
नवमस्कन्धे ।
"सूर्य्यवंशसमाख्यानं सोमवंशनिरूपणम् ।
वंश्यानुचरिते प्रोक्तो नवमोऽयं महामते ! ॥"
दशमस्कन्धे ।
"कृष्णस्य बालचरितं कौमारञ्च व्रजस्थितिः ॥
केशोरं मथुराख्यानं यौवनं द्वारकास्थितिः ।
भूभारहरणञ्चात्र निरोधे दशमः स्मृतः ॥"
एकादशस्कन्धे ।
"नारदेन तु संवादो वसुदेवस्य कीर्त्तितः ।
यदोश्च दत्तात्रेयेण श्रीकृष्णेनोद्धवस्य च ॥
यादवानां मिथोऽन्तश्च मुक्तावेकादशः स्मृतः ॥"
द्वादशस्कन्धे ।
"भविष्यकलिनिर्देशो भोजो राज्ञः परीक्षितः ॥
वेदशाखाप्रणयनं मार्कण्डेयतपः स्मृतम् ।
सौरी विभूतिरुदिता सात्वती च ततः परम् ॥
पुराणसङ्ख्याकथनमाश्रये द्वादशो त्वयम् ।
इत्येवं कथितं वत्स ! श्रीमद्भागवतं तव ॥" * ॥
तत्फलश्रुतिः ।
"वक्तुः श्रोतुश्चोपदेष्टुरनुमोदितुरेव च ।
साहाय्यकर्त्तुर्गदितं भक्तिमुक्तिविमुक्तिदम् ॥
प्रौष्ठपद्यां पूर्णिमायां हेमसिंहसमाचितम् ।
देयं भागवतायेदं द्विजाय प्रीतिपूर्व्वकम् ॥
संपूज्य वस्त्रहेमाद्यैर्भगवद्भक्तिमिच्छता ।
योऽप्यनुक्रमणीमेतां श्रावयेच्छृणुयात्तथा ।
स पुराणश्रवणजं प्राप्नोति फलमुत्तमम् ॥"*॥
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने
चतुर्थपादे ६६ अध्यायः ॥ ५ ॥
षष्ठं नारदीयपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु विप्र ! प्रवक्ष्यामि पुराणं नारदीयकम् ।
पञ्चविंशतिसाहस्रं हरिचित्तकथाश्रयम् ॥" * ॥
तत्र पूर्व्वभागे प्रथमपादे ।
"सूतशौनकसंवादः सृष्टिसंक्षेपवर्णनम् ।
नानाधर्म्मकथाः पुण्याः प्रवृत्ता समुदाहृताः ॥
प्राग्भागे प्रथमे पादे सनकेन महात्मना ॥"
पूर्व्वभागे द्वितीयपादे ।
"द्वितीये मोक्षधर्म्माख्ये मोक्षोपायनिरूपणम् ।
वेदाङ्गानाञ्च कथनं शुकोत्पत्तिश्च विस्तरात् ।
सनन्दनेन गदिता नारदाय महात्मने ॥" * ॥
पूर्व्वभागे तृतीयपादे ।
"महातन्त्रे समुद्दिष्टं पशुपाशविमोक्षणम् ।
मन्त्राणां शोधनं दीक्षा मन्त्रोद्धारश्च पूजनम् ॥
प्रयोगः कवचं नामसहस्रं स्तोत्रमेव च ।
गणेशसूर्य्यविष्णूनां शिवशक्तेरनुक्रमात् ॥
सनत्कुमारमुनिना नारदाय तृतीयके ॥"
पूर्व्वभागे चतुर्थपादे ।
"पुराणलक्षणञ्चैव प्रमाणं दानमेव च ॥
पृथक् पृथक् समुद्दिष्टं दानकालपुरःसरम्

चैत्रादिसर्व्वमासेषु तिथीनाञ्च पृथक् पृथक् ॥
प्रोक्तं प्रतिपदादीनां व्रतं सर्व्वाघनाशनम् ।
सनातनेन मुनिना नारदाय चतुर्थके ॥
पूर्व्वभागोऽयमुदितो बृहदाख्यानसंज्ञितः ॥"
तदुत्तरभागे ।
"अस्योत्तरे विभागे तु प्रश्न एकादशीव्रते ॥
वशिष्ठेनाथ संवादो मान्धातुः परिकीर्त्तितः ।
रुक्माङ्गदकथा पुण्या मोहिन्युत्पत्तिकर्म्म च ॥
वसुशापश्च मोहिन्यै पश्चाद्दुद्धरणक्रिया ।
गङ्गाकथा पुण्यतमा गयायात्रानुकीर्त्तनम् ॥
काश्या माहात्म्यमतुलं पुरुषोत्तमवर्णनम् ।
यात्राविधानं क्षेत्रस्य वक्राख्यानसमन्वितम् ॥
प्रयागस्याथ माहात्म्यं कुरुक्षेत्रस्य ततपरम् ।
हरिद्वारस्य चाख्यानं कामोदाख्यानकं तथा ॥
बदरीनीर्यमाहात्म्यं कामाख्यायास्तथैव च ।
प्रभासस्य च माहात्म्यं पुराणाख्यानकं ततः ॥
गौतमाख्यानकं पश्चादेषादस्तवस्ततः ।
गोकर्णक्षेत्रमाहात्म्यं लक्ष्मणाख्यानकं तथा ॥
सेतुमाहात्म्यकथनं नर्म्मदातीर्थवर्णनम् ।
अवन्त्याश्चैव माहात्म्यं मथुरायास्ततः परम् ॥
वृन्दावनस्य महिमा वसोर्ब्रह्मान्तिके गतिः ।
मोहिनीचरितं पश्चादेवं वै नारदीयकम् ॥"*॥
तत्फलश्रुतिः ।
"यः शृणोति नरो भक्त्या श्रावयेद्वा समाहितः ।
स याति ब्रह्मणो धाम नात्र कार्य्या विचारणा ॥
यस्त्वेतदिषपूर्णायां धेनूनां सप्तकाञ्चितम् ।
प्रदद्याद्द्विजवर्य्याय स लभेन्मोक्षमेव च ॥
यश्चानुक्रमणीमेतां नारदीयस्य वर्णयेत् ।
शृणुयाद्वैकचित्तेन सोऽपि स्वर्गगतिं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे ६७ अध्यायः ॥ ६ ॥
सप्तमं मार्कण्डेयपुराणम् ।
श्रीब्रह्मोवाच ।
"अथ ते संप्रवक्ष्यामि मार्कण्डेयाभिधं मुने ! ।
पुराणं सुमहत् पुण्यं पठतां शृण्वतां सदा ॥
यत्राधिकृत्य शकुनीन् सर्व्वधर्म्मनिरूपणम् ।
मार्कण्डेयेन मुनिना जैमिनेः प्राक् समीरितम् ॥
पक्षिणां धर्म्मसंज्ञानां ततो जन्मनिरूपणम् ।
पूर्व्वजन्मकथा चैषां क्रिया च दिवसस्तेः ॥
तीर्थयात्रा बलस्यातो द्रौपदेयकथानकम् ।
हरिश्चन्द्रकथा पुण्या युद्धमाङ्गीवकाभिधम् ॥
पितापुत्रसमाख्यानं दत्तात्रेयकथा ततः ।
हैहयस्याथ चरितं महाख्यानसमाचितम् ॥
मदालसाकथाश्चोक्ता ह्यलर्कचरिताचिता ।
सृष्टिसंकीर्त्तनं पुण्यं नवधा परिकीर्त्तितम् ॥
कल्पान्तकालनिर्द्देशो यच्च सृष्टिनिरूपणम् ।
रुद्रादिसृष्टिरप्युक्ता द्वीपवर्षानुकीर्त्तनम् ॥
मन्वन्तराणि कथा नाना कीर्त्तिताः पापहारिकाः ।
तासु दुर्गाकथाश्चान्तं पुण्यदा चाष्टमेऽन्तरे ॥
ततः पश्चात् प्रणवोत्पत्तिस्तथैतेजःसमुद्भवः ।
मार्कण्डेयस्य च जन्माख्या तन्माहात्म्यसमाचिता ॥
वैवस्वताचयश्चापि वसुप्राश्चरितं ततः ॥"
वसुप्रीस्थाने वसुभ्री च पाठः ।
"खनित्रस्य ततः प्रोक्ता कथा पुण्या महात्मनः ॥
अविक्षिच्चरितं चैव किमिच्छव्रतकीर्त्तनम् ।
हरिश्चन्द्रस्य चरितं इक्ष्वाकुचरितं ततः ॥
तुलस्याश्चरितं पश्चाद्रामचन्द्रस्य सत्कथा ।
कुशवंशसमाख्यानं सोमवंशानुकीर्त्तनम् ॥
पुरूरवःकथा पुण्या नहुषस्य कथाद्भुता ।
ययातिचरितं पुण्यं यदुवंशानुकीर्त्तनम् ॥
श्रीकृष्णबालचरितं माथुरं चरितं ततः ।
द्वारकाचरितञ्चाथ कथा सर्व्वावतारजा ॥
ततः साह्यसमुद्देशः प्रश्नाख्यत्वकीर्त्तनम् ।
मार्कण्डेयस्य चरितं पुराणश्रवणे फलम् ॥"*॥
तत्फलश्रुतिः ।
"यः शृणोति नरो भक्त्या पुराणमिदमादरात् ।
मार्कण्डेयाभिधं वत्स ! स लभेत् परमां गतिम् ॥
यस्तु श्राद्धकृते चैतच्छ्रावं स लभते पदम् ॥
तत् प्रयच्छेल्लिखित्वा यः सौवर्णकरिसंयुतम् ।
कार्त्तिक्यां द्विजवर्य्याय स लभेद्ब्रह्मणः पदम् ॥
शृणोति श्रावयेद्वापि यश्चानुक्रमणीमिमाम् ।
मार्कण्डेयपुराणस्य स लभेद्वाञ्छितं फलम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे ६८ अध्यायः ॥ ७ ॥
अष्टमं अग्निपुराणम् ।
श्रीब्रह्मोवाच ।
"अथातः संप्रवक्ष्यामि तवाग्नेयपुराणकम् ।
ईशानकल्पवृत्तान्तं वशिष्ठायानलोऽब्रवीत् ॥
तत् पञ्चदशसाहस्रं नाम्ना चरितमद्भुतम् ।
पठतां शृण्वतां चैव सर्व्वपापहरं नृणाम् ॥
प्रश्नपूर्व्वं पुराणस्य कथा सर्व्वावतारजा ।
सृष्टिप्रकरणं चाथ विष्णुपूजादिकं ततः ॥
अग्निकार्य्यं ततः पश्चान्मन्त्रमुद्रादिलक्षणम् ।
सर्व्वदीक्षाविधानञ्च अभिषेकनिरूपणम् ॥
लक्षणं मण्डलादीनां कुण्डाया मार्ज्जनं ततः ।
प्रविचारोपणविधिर्देवालयविधिस्तथा ॥
शालग्रामादिपूजा च मूर्त्तिलक्ष्म पृथक् पृथक् ।
न्यासादीनां विधानञ्च प्रतिष्ठा पूर्त्तिका ततः ॥
विनायकादिदीक्षाणां विधिर्ज्ञेयस्ततः परम् ।
प्रतिष्ठा सर्व्वदेवानां ब्रह्माण्डस्य निरूपणम् ॥
गङ्गादितीर्थमाहात्म्यं जम्बुद्वीपवर्णनम् ।
ऊर्द्धाधोलोकरचना ज्योतिश्चक्रनिरूपणम् ॥
ज्योतिषञ्च ततः प्रोक्तं श्राद्धं युद्धजयार्णवम् ।
षट्कर्म्म च ततः प्रोक्तं मन्त्रयन्त्रौषधीगणः ॥
कुलिकादिसमर्च्चा च घोड़ान्यासविधिस्तथा ।
कोटिहोमविधानञ्च तदन्तरनिरूपणम् ॥
ब्रह्मचर्य्यादिधर्म्माश्च आह्निकल्पविधिस्तथा ।
गृहयज्ञस्ततः प्रोक्तो वैदिकस्मार्त्तकर्म्म च ॥
प्रायश्चित्तानुकथनं तिथीनाञ्च व्रतादिकम् ।
वारव्रतानुकथनं नक्षत्रव्रतकीर्त्तनम् ॥
मासिकव्रतनिर्द्देशो दीपदानविधिस्तथा ।
नवग्रहार्च्चनं प्रोक्तं नरकाणां निरूपणम् ॥
व्रतानाञ्चापि दानानां निरूपणमिहोदितम् ।
नाड़ीचक्रसमुद्देशः सन्ध्याविधिरनुत्तमः ॥
गायत्र्यर्थस्य निर्द्देशो लिङ्गस्योक्तं ततः परम् ।
राजाभिषेकमन्त्रोक्तिर्धर्म्मकल्पश्च भूभुजाम् ॥
स्वप्नाध्यायस्ततः प्रोक्तः शकुनादिनिरूपणम् ।
मण्डलादिकनिर्द्देशो रत्नदीक्षाविधिस्ततः ॥
रामोक्तनीतिनिर्द्देशो रत्नानां लक्षणं ततः ।
धनुर्व्विद्या ततः प्रोक्ता व्यवहारप्रदर्शनम् ॥
दैवासुरविमर्द्दाख्या ह्यायुर्व्वेदनिरूपणम् ।
गजादीनां चिकित्साश्च तेषां शान्तिस्ततः परम् ॥
गोनसादिचिकित्सा च नानापूजास्ततः परम् ।
शान्त्यश्चापि विविधा छन्दःशास्त्रमतः परम् ॥
साहित्यञ्च ततः पश्चादेकार्णादिसमाख्याः ।
सिद्धशिष्टानुशिष्टिश्च कोषः स्वर्गादिवर्गके ॥
प्रलयानां लक्षणञ्च शारीरकनिरूपणम् ।
वर्णनं नरकाणाञ्च योगशास्त्रमतः परम् ॥
ब्रह्मज्ञानं ततः पश्चात् पुराणश्रवणे फलम् ।
एतदाग्नेयकं विप्र ! पुराणं परिकीर्त्तितम् ॥"
तत्फलश्रुतिः ।
"लिखित्वा तु यो दद्यात् सुवर्णकमलाञ्चितम् ।
तिलधेनुयुतं वापि मार्गशीर्ष्यां विधानतः ।
पुराणार्थविदे सोऽथ स्वर्गलोके महीयते ॥
एषानुक्रमणी प्रोक्ता तवाग्नेयस्य भक्तिदा ।
शृण्वतां पठताञ्चैव वृणाञ्चेह परत्र च ॥"*॥
इति श्रीनारदीयपुराणे पूर्व्वभागे बृहदुपाख्याने
चतुर्थपादे ६६ अध्यायः ॥ ८ ॥
नवमं भविष्यपुराणम् ।
श्रीब्रह्मोवाच ।
"अथ ते संप्रवक्ष्यामि पुराणं सर्व्वसिद्धिदम् ।
भविष्यं भरत सर्व्वलोकाभीष्टप्रदायकम् ॥
यत्राहं सर्व्वदेवानामादिकर्त्ता समुद्यतः ।
सृष्ट्यर्थं तत्र सञ्जातो मनुः स्वायम्भुवः पुरा ॥
स मां प्रणम्य पप्रच्छ धर्म्मं सर्व्वार्थसाधकम् ।
अहं तस्मै तदा प्रीतः प्रावोचं धर्म्मसंहिताम् ॥
पुराणानां यदा व्यासो व्यासचक्रे महामतिः ।
तदा तां संहितां सर्व्वां पञ्चधा व्यभजन्मुनिः ॥
अघोरकल्पवृत्तान्तनानाश्चर्य्यकथान्विताम् ॥"
तत्र प्रथमपर्व्वणि ।
"तत्रादिमं स्मृतं पर्व्व ब्राह्मं यत्राख्युपक्रमः ।
सूतशौनकसंवादे पुराणप्रश्नसंक्रमः ।
आदित्यचरितः प्रायः सर्व्वाख्यानसमाचितः ॥
सृष्ट्यादिलक्षणोपेतः शास्त्रसर्व्वस्वरूपकः ।
पुस्तलेखकलेखानां लक्षणञ्च ततः परम् ॥
संस्काराश्चाथ सर्व्वेषां लक्षणञ्चाथ कीर्त्तितम् ।
पक्षत्यादितिथीनाञ्च कल्पाः सप्त च कीर्त्तिताः ॥
अश्वत्थाद्याः शैवकल्पा वैष्णवे पर्व्वणि स्मृताः ।
शैवे च कामतो भिन्नाः सौरे चान्यकथाश्रयः ॥
प्रतिसर्गाश्रयं पञ्चाख्यानाख्यानसमाचितम् ।
पुराणस्योपसंहारसहितं पर्व्व पञ्चमम् ॥
एषु पञ्चसु पूर्व्वेषु ब्रह्मणो महिमाधिकः ॥"
द्वितीयतृतीयचतुर्थपञ्चमपर्व्वसु ।
"धर्म्मे कामे च मोक्षे तु विष्णोश्चापि शिवस्य च ।
द्वितीये च तृतीये च सौरो वर्गश्चतुष्टये ॥
प्रतिसर्गाश्रयं सन्तं प्रोक्तं सर्व्वकथान्वितम् ।

सभविष्यं विनिर्दिष्टं पर्व्व व्यासेन धीमता ।
चतुर्दशसहस्रन्तु पुराणं परिकीर्त्तितम् ।
भविष्यं सर्व्वदेवानां साम्यं यत्र प्रकीर्त्तितम् ॥
गुणानां तारतम्येन समं ब्रह्मेति हि श्रुतिः ॥"
तत्फलश्रुतिः ।
"तल्लिखित्वा तु यो दद्यात् पौष्यां विद्वान् विमत्सरः ।
गुडधेनुयुतं हैमवल्लमाल्यविभूषणैः ॥
वाचकं पुस्तकञ्चापि पूजयित्वा विधानतः ।
गन्धाद्यैर्भाष्यभक्ष्यैश्च कृत्वा नीराजनादिकम् ।
यो वै जितेन्द्रियो भूत्वा सोपवासः समाहितः ॥
अथ वै यो नरो भक्त्या कीर्त्तयेच्छृणुयादपि ।
स मुक्तः पातकैर्घोरैः प्रयाति ब्रह्मणः पदम् ॥
योऽप्यनुक्रमणीमेतां भविष्यस्य निरूपिताम् ।
पठेद्वा श्रृणुयाच्चैतौ मुक्तिं मुक्तिञ्च विन्दतः ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने चतुर्थपादे १०० अध्यायः ॥ ६ ॥

दशमं ब्रह्मवैवर्त्तपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु वत्स ! प्रवक्ष्यामि पुराणं दशमं तव ।
ब्रह्मवैवर्त्तकं नाम वेदमार्गानुदर्शकम् ॥
सावर्णिर्यत्र भगवान् साक्षाद्वेदविदांवरः ।
नारदाय पुराणार्थं प्राह सर्व्वमलौकिकम् ॥
धर्म्मार्थकाममोक्षाणां सारः प्रीतिर्हरौ हरे ।
तयोरभेदसिद्ध्यर्थं ब्रह्मवैवर्त्तमुत्तमम् ॥
रथन्तरस्य कल्पस्य वृत्तान्तं यन्मयोदितम् ।
शतकोटिपुराणे तत् संक्षिप्य प्राह वेदवित् ॥
व्यासश्चतुर्द्धा संव्यस्य ब्रह्मवैवर्त्तसंज्ञितम् ।
अष्टादशसहस्रन्तत् पुराणं परिकीर्त्तितम् ॥
ब्रह्मप्रकृतिविघ्नेशकृष्णखण्डसमाचितम् ।
तत्र स्मृतर्धिसंवादे पुराणीयक्रमो मतः ॥"
तत्र प्रथमे ब्रह्मखण्डे ।
"सृष्टिप्रकरणं त्वाद्यं ततो नारदवेधसोः ।
विवादः सुमहान् यत्र द्वयोरासीत् पराभवः ॥
शिवलोकगतिः पश्चाज्ज्ञानलाभः शिवात्-
सुनेः ।
शिववाक्येन तत्श्चात् मरीचेः ! नारदस्य च ॥
मननञ्चैव सावर्णेर्ज्ञानार्थं सिद्धसेविते ।
आश्रमे सुमहत्पुण्ये त्रैलोक्याश्चर्य्यकारिणि ।
एतद्हि ब्रह्मखण्डं हि श्रुतं पापविनाशनम् ॥"
द्वितीये प्रकृतिखण्डे ।
"ततः सावर्णिसंवादो नारदस्य समीरितः ।
कृष्णमाहात्म्यसंयुक्तो नानाख्यानकथोत्तरः ॥
प्रकृतेरंशभूतानां कलानाञ्चापि वर्णितम् ।
माहात्म्यं पूजनाद्यञ्च विस्तरेण यथास्थितम् ॥
एतत्प्रकृतिखण्डं हि श्रुतं भूतिविधायकम् ॥"
तृतीये गणेशखण्डे ।
"गणेशजन्मसंप्रश्नः सपुण्यकमहाव्रतम् ।
पार्व्वत्याः कार्त्तिकेयेन सह विघ्नेशसम्भवः ॥
चरितं कार्त्तवीर्य्यस्य जामदग्न्यस्य चाद्भुतम् ।
विवादः सुमहान् पश्चाज्जामदग्न्यगणेशयोः ॥
एतद्विघ्नेशखण्डं हि सर्व्वविघ्नविनाशनम् ॥"
चतुर्थे श्रीकृष्णजन्मखण्डे ।
"श्रीकृष्णजन्मसंप्रश्नो जन्माख्यानं ततोऽद्भुतम् ।
गोकुले गमनं पश्चात् पूतनादिवधोऽद्भुतः ॥
बालकौमारजा लीला विविधारूच वर्णिताः ।
रासक्रीड़ा च गोपीभिः शारदी समुदाहृता ।
रहस्ये राधया क्रीड़ा वर्णिता बहुविस्तरा ॥
सहाक्रूरेण तत्पश्चान्मथुरागमनं हरेः ।
कंसादीनां वधे वृत्ते साम्बस्य द्विजसंस्कृतिः ॥
काश्यसान्दीपनेः पश्चाद्विद्योपादानमद्भुतम् ।
यवनस्य वधः पश्चाद्द्वारकागमनं हरेः ॥
नरकादिवधस्तत्र कृष्णेन विहितोऽद्भुतः ।
कृष्णखण्डमिदं विप्र ! नृणां संसारखण्डनम् ॥"
तत्फलश्रुतिः ।
"पठितञ्च श्रुतं ध्यातं पूजितं चाभिवर्णितम् ।
इत्येतद्ब्रह्मवैवर्त्तं पुराणं चात्यलौकिकम् ॥
व्यासोक्तं यादृशम्भूतं पठन् शृण्वन् विमुच्यते ।
विज्ञानज्ञानशमनात् घोरात् संसारसागरात् ॥
लिखित्वेदञ्च यो दद्यान्माघ्यां धेनुसमाचितम् ।
ब्रह्मलोकमवाप्नोति स मुक्तोऽज्ञानबन्धनात् ॥
यश्चानुक्रमणीं वापि पठेद्वा शृणुयादपि ।
सोऽपि कृष्णप्रसादेन लभते वाञ्छितं फलम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने चतुर्थपादे १०१ अध्यायः ॥ १० ॥

एकादशं लिङ्गपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु पुत्र ! प्रवक्ष्यामि पुराणं लिङ्गसंज्ञितम् ।
पठतां शृण्वतांचैव भक्तिमुक्तिप्रदायकम् ॥
यच्च लिङ्गाभिधं तिष्ठन् वह्निलिङ्गे हरोऽभ्यधात् ।
मह्यं धर्म्मादिसिद्ध्यर्थं अग्निकल्पकथाश्रयम् ॥
तदेव व्यासदेवेन भागद्वयसमाचितम् ।
पुराणं लिङ्गमुदितं बह्वाख्यानविचित्रितम् ॥
तदेकादशसाहस्रं हरमाहात्म्यसूचकम् ।
परं सर्व्वपुराणानां सारभूतं जगत्त्रये ॥
पुराणोपक्रमे प्रश्नः सृष्टिसंज्ञे मतः पुरा ॥"
तत्र पूर्व्वभागे ।
"योगाख्यानं ततः प्रोक्तं कल्पाख्यानं ततःपरम् ॥
लिङ्गोद्भवस्तदर्च्चा च कीर्त्तिता हि ततः परम् ।
सनत्कुमारशैलादिसंवादश्चाथ भावनः ॥
ततो दधीचिचरितं युगधर्म्मनिरूपणम् ।
ततो भुवनकोषाख्या सूर्य्यसोमान्वयस्ततः ॥
ततश्च विस्तरात् सर्गस्त्रिपुराख्यानकं तथा ।
लिङ्गप्रतिष्ठा च ततः पशुपाशविमोचणम् ॥
शिवव्रतानि च तथा सदाचारनिरूपणम् ।
प्रायश्चित्तान्यरिष्टानि काश्मीशैलवर्णनम् ॥
अन्धकाख्यानकं पश्चाद्वाराहचरितं पुनः ।
नृसिंहचरितं पश्चाच्छलन्मरुधस्ततः ॥
शैवं सहस्रनामाथ दक्षयज्ञविनाशनम् ।
कामस्य दहनं पश्चात् गिरिजायाः करग्रहः ॥
ततो विनायकाख्यानं वृत्राख्यानं शिवस्य च ।
उपमन्युकथा चापि पूर्व्वभाग इतीरितः ॥"*॥
तदुत्तरभागे ।
"विष्णुमाहात्म्यकथनमम्बरीषकथा ततः ।
सनत्कुमारनन्दीशसंवादश्च पुनर्मुने ! ॥
शिवमाहात्म्यसंयुक्तख्यानयोगादिकं ततः ।
सूर्य्यपूजाविधिश्चैव शिवपूजा च सुक्रिया ॥
दानानि बहुधोक्तानि श्राद्धप्रकरणन्ततः ।
प्रतिष्ठा तत्र गदिता ततोऽघोरस्य कीर्त्तनम् ॥
व्रजेश्वरी महाविद्या गायत्रीमहिमा ततः ।
न्यासकस्य च माहात्म्यं पुराणश्रवणस्य च ॥
एतस्योपरिभागस्ते लैङ्गस्य कथितो मया ।
व्यासेन हि निबद्धस्य रुद्रमाहात्म्यसूचिनः ॥"
तत्फलश्रुतिः ।
"लिखित्वैतत् पुराणन्तु तिलधेनुसमाचितम् ।
फाल्गुन्यां पूर्णिमायां यो दद्याद्भक्त्या द्विजातये ।
स लभेच्छिवसायुज्यं जरामरणवर्ज्जितः ॥
यः पठेच्छृणुयाद्वापि लैङ्गं पापापहं नरः ।
स भुक्तभोगो लोकेऽस्मिन्नन्ते शिवपुरं व्रजेत् ॥
लिङ्गानुक्रमणीमेतां पठेद्यः शृणुयात् तथा ।
तावुभौ शिवभक्तौ तु लोकहितयभोगिनौ ।
जायेतां गिरिजाभर्त्तुः प्रसादाच्च संशयः ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने चतुर्थपादे १०२ अध्यायः ॥ ११ ॥

द्वादशं वराहपुराणम् ।

श्रीब्रह्मोवाच ।

"शृणु वत्स ! प्रवक्ष्यामि वाराहं वै पुराणकम् ।
भागद्वययुतं ग्रन्थविष्णुमाहात्म्यसूचकम् ॥
मानवस्य तु कल्पस्य प्रसङ्गं मनुकृतं पुरा ।
निबद्धन्त पुराणेऽस्मिंश्चतुर्विंशसहस्रके ॥
व्यासो हि विदुषां श्रेष्ठः साक्षान्नारायणो भुवि ।
तत्रादौ शुभसंवादः स्मृतो भूमिवराहयोः ॥"
तत्र पूर्व्वभागे ।
"अथादिकृततृत्तान्ते रम्यस्य चरितं ततः ।
दुर्ज्जयाय च तत्पश्चाच्छाङ्खकल्प उदीरितः ॥
महातपस आख्यानं गौर्य्युत्पत्तिस्ततः परम् ।
विनायकस्य नागानां सेनान्यादित्ययोरपि ॥
गणानाञ्च तथा देव्या धनदस्य वृषस्य च ।
आख्यानं सत्रतपसो व्रताख्यानसमन्वितम् ॥
अगस्त्यगीता तत्पश्चाद्वसगीता प्रकीर्त्तिता ।
महिषासुरविध्वंसे माहात्म्यञ्च त्रिशक्तिजम् ॥
पर्व्वाध्यायस्ततः श्वेतोपाख्यानं गोप्रदानिकम् ।
इत्यादिकृततृत्तान्तं प्रथमोद्दिशनामकम् ॥
भगवद्धर्म्मके पश्चाद्व्रततीर्थकथानकम् ।
दानचिंशदपराधानां प्रायश्चित्तं शरीरकम् ॥
तीर्थानाञ्चापि सर्व्वेषां माहात्म्यं पृथगीरितम् ।
मथुराया विशेषेण श्राद्धादीनां विधिस्ततः ॥
वर्णनं यमलोकस्य ऋषिपुत्रप्रसङ्गतः ।
विपाकः कर्म्मणाञ्चैव विष्णुव्रतनिरूपणम् ॥
गोकर्णस्य च माहात्म्यं कीर्त्तितं पापनाशनम् ।
इत्येष पूर्व्वभागोऽस्य पुराणस्य निरूपितः ॥"
उत्तरभागे ।
"उत्तरे प्रविभागे तु पुलस्त्यकुरुराजयोः ।
संवादे सर्व्वतीर्थानां माहात्म्यं विस्तारात्पृथक् ॥
अशेषधर्म्माख्याताः पौष्करं पुण्यपर्व्व च ।
इत्येवं तव वाराहं प्रोक्तं पापविनाशनम् ॥"

तत्फलश्रुतिः ।
"पठतां शृण्वतामेव भगवद्भक्तिवर्द्धनम् ।
काञ्चनं गरुडं कृत्वा तिलधेनुसमान्वितम् ॥
लिखित्वैतच्च यो दद्याच्चैत्रां विप्राय भक्तितः ।
स लभेद्वैष्णवं धाम देवर्षिगणवन्दितः ॥
यो वानुक्रमणीमेनां शृणोत्यपि पठत्यपि ।
सोऽपि भक्तिं लभेद्विष्णौ संसारोच्छेदकारिणीम् ॥" * ॥
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरपाख्याने चतुर्थपादे १०३ अध्यायः ॥ १२ ॥
त्रयोदशं स्कन्दपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वक्ष्ये मरीचे! च पुराणं स्कन्दसंज्ञितम् ।
यस्मिन् प्रतिपदं साक्षान्महादेवो व्यवस्थितः ॥
पुराणं शतकोटौ तु यक्ष्येवं वर्णितं मया ।
लक्षितस्यार्थजातस्य सारो यासेन कीर्त्तितः ॥
स्कन्दाख्यस्तत्र खण्डाः सप्तैव परिकल्पिताः ।
एकाग्रीतिसहस्रन्तु स्कान्दं सर्व्वाघखण्डनम् ॥
यः शृणोति पठेद्वापि स तु साक्षाच्छिवः स्थितः ।
यत्र माहेश्वरा धर्म्माः षण्मुखेन प्रकाशिताः ॥
कल्पे तत्पुरुषे दृष्टाः सर्व्वसिद्धिविधायकाः ॥"
तत्र प्रथमे माहेश्वरखण्डे ।
"तस्य माहेश्वराद्यः खण्डः पापप्रणाशनः ।
किञ्चिन्यूनार्कसाहस्रो बहुपुण्यो बहुत्कथः ।
सुचरित्रश्रुतेर्युक्तः स्कन्दमाहात्म्यसूचकः ॥
यत्र केदारमाहात्म्यं पुराणोपक्रमः पुरा ।
दक्षयज्ञकथा पश्चाच्छिवलिङ्गार्च्चने फलम् ॥
समुद्रमथनाख्यानं देवेन्द्रचरितं ततः ।
पार्व्वत्याः सप्तपाख्यानं विवाहस्तदनन्तरम् ॥
कुमारोत्पत्तिकथनं ततस्तारकसङ्गरः ।
ततः प्रभुप्रताख्यानं चण्डाख्यानसमन्वितम् ॥
दूतप्रवर्त्तनाख्यानं नारदेन समागमः ।
ततः कुमारमाहात्म्यं पञ्चतीर्थकथानकम् ॥
धर्म्मवर्म्मनृपाख्यानं नदीसागरकीर्त्तनम् ।
इन्द्रद्युम्नकथा पश्चान्नाड़ीजङ्घकथान्विता ॥
प्रादुर्भावस्ततो मह्याः कथा दमनकस्य च ।
महीसागरसंयोगः कुमारेशकथा ततः ॥
ततस्तारकखण्डश्च नानाख्यानसमन्वितम् ।
वधश्च तारकस्याथ पञ्चलिङ्गनिवेशनम् ॥
द्वीपाख्यानं ततः पुण्यं ऊर्द्ध्वलोकश्ववस्थितः ।
ब्रह्माण्डस्थितिमानञ्च वर्करेशकथानकम् ॥
महाकालसमुद्भूतिः कथा चाम्य महाद्भुता ।
वासुदेवस्य माहात्म्यं कीर्त्तितार्थं ततः परम् ॥
नानातीर्थसमाख्यानं गुप्तक्षेत्रे प्रकीर्त्तितम् ।
पाण्डवानां कथा पुण्या महाविद्याप्रसाधनम् ॥
तीर्थयात्रासमाप्तिश्च कौमारमिदमद्भुतम् ।
अरुणाचलमाहात्म्यं सनकब्रह्मसंकथा ॥
गौरीतपःसमाख्यानं तत्तत्तीर्थनिरूपणम् ।
महिषासुरनाख्यानं वधश्चास्य महाद्भुतः ॥
श्रीशैलाचले शिवाख्यानं नित्यदा परिकीर्त्तितम् ।
इत्येष कथितः स्कान्दे खण्डो माहेश्वरोद्भुतः ॥"

द्वितीये वैष्णवखण्डे ।
"द्वितीयो वैष्णवः खण्डस्तस्याख्यानानि मे शृणु ।
प्रथमं भूमिवाराहं समाख्यानं प्रकीर्त्तितम् ॥
यत्र वोचक्रुधस्य माहात्म्यं पापनाशनम् ।
कमलायाः कथा पुण्या श्रीनिवासस्मितिस्तुतः ॥
कुलालाख्यानकं चात्र सुवर्णमुखरीकथा ।
नानाख्यानसमायुक्ता भारद्वाजकथाद्भुता ॥
मतङ्गाख्यानसंवादः कीर्त्तितः पापनाशनः ।
पुरुषोत्तममाहात्म्यं कीर्त्तितं चोत्कले ततः ॥
मार्कण्डेयसमाख्यानमम्बरीषस्य भूपतेः ।
इन्द्रद्युम्नस्य चाख्यानं विद्यापतिकथा शुभा ॥
जैमिनेः सप्तपाख्यानं नारदस्यापि वाडव! ।
नीलकण्ठसमाख्यानं नारसिंहोपवर्णनम् ॥
अश्वमेधकथा राज्ञो ब्रह्मलोकगतिस्तथा ।
रथयात्राविधिः पश्चाज्जगन्नाथविधिस्तथा ॥
दक्षिणाम्नर्तुपाख्यानं गुण्डिचाख्यानकं ततः ।
रथरत्नाविधानञ्च शयनोत्सवकीर्त्तनम् ॥
श्वेतोपाख्यानमुक्तं वह्न्युत्सवनिरूपणम् ।
दोलोत्सवो भगवतो व्रतं सांवत्सराभिधम् ॥
पूजा च कामिभिर्विष्णोरुद्दालकनियोगकः ।
मोक्षसाधनमुक्तं नानायोगनिरूपणम् ॥
दशावतारकथनं स्नानादिपरिकीर्त्तनम् ।
ततो वदरिकायाश्च माहात्म्यं पापनाशनम् ॥
अघमर्षादितीर्थमाहात्म्यं वैनतेयशिलाभवम् ।
कारणं भगवद्वासे तीर्थं कापालमोचनम् ॥
पञ्चधाराभिधं तीर्थं मेरुसंस्थापनं तथा ।
ततः कार्त्तिकमाहात्म्यं माहात्म्यं मदनालसम् ॥
धूम्रकोशसमाख्यानं दिनलक्षणानि कार्त्तिके ।
पञ्चभीष्मव्रताख्यानं कीर्त्तितं भुक्तिमुक्तिदम् ॥
तद्व्रतस्य च माहात्म्यं विधानं स्नानजं तथा ।
पुण्ड्रादिकीर्त्तनं चात्र मालाधारणपुण्यकम् ॥
पश्चात्तत्स्नानपुण्यं घण्टानादादिजं फलम् ।
नानापुण्यार्च्चनफलं तुलसीदलजं फलम् ॥
नैवेद्यस्य च माहात्म्यं हरिवासरकीर्त्तनम् ।
अखण्डैकादशीपुण्यं तथा जागरणस्य च ॥
मत्स्योत्सवविधानञ्च नाममाहात्म्यकीर्त्तनम् ।
ध्यानादिपुण्यकथनं माहात्म्यं मथुराभवम् ॥
मथुरातीर्थमाहात्म्यं पृथगुक्तं ततः परम् ।
वनानां द्वादशानाञ्च माहात्म्यं कीर्त्तितं ततः ॥
श्रीमद्भागवतस्यात्र माहात्म्यं कीर्त्तितं परम् ।
ब्रह्मशाण्डिल्यसंवादं अन्तर्लीलाप्रकाशकम् ॥
ततो माधवस्य माहात्म्यं स्नानदानजपोद्भवम् ।
नानाख्यानसमायुक्तं दशाध्याये निरूपितम् ॥
ततो वैशाखमाहात्म्ये शय्यादानादिजं फलम् ।
जलदानादिविधयः कामाख्यानमतः परम् ॥
शुतदेवस्य चरितं व्याधोपाख्यानमद्भुतम् ।
तथाच्युतप्रतीयादेर्विशेषात् पुण्यकीर्त्तनम् ॥
ततस्त्वयोध्यामाहात्म्ये चक्रतीर्थाख्यतीर्थके ।
ऋणापविमोक्षाख्ये तथाधारसहस्रकम् ॥
स्वर्गद्वारं चन्द्रहरिधर्म्मवर्ण्युपवर्णनम् ।
स्वर्गद्वारैरुपाख्यानं तिलोदा सरयूयुतिः ॥
सीताकुण्डं गुप्तहरिः सरयूर्घर्घराचयः ।

गोप्रचारश्च दुग्धेदं गुरुकुण्डादिपञ्चकम् ॥
घोषार्कादीनि तीर्थानि चक्रोदग्र ततः परम् ।
गयाकूपस्य माहात्म्यं सर्व्वाघविनिवर्त्तकम् ॥
माहेश्याश्रमपूर्व्वाणि तीर्थानि तदनन्तरम् ।
अजिनादिमानसादितीर्थानि गदितानि च ॥
इत्येष वैष्णवः खण्डो द्वितीयः परिकीर्त्तितः ॥"
तृतीये ब्रह्मखण्डे ।
"अतःपरं ब्रह्मखण्डं मरीचे! शृणु पुण्यदम् ।
यत्र वै मेतुमाहात्म्यं फलं स्नानेतरोद्भवम् ॥
गालवस्य तपश्चर्य्या राक्षसाख्यानकं ततः ।
चक्रतीर्थादिमाहात्म्यं देवीपतनसंयुतम् ॥
वेतालतीर्थमहिमा पापनाशादिकीर्त्तनम् ।
मङ्गलादिकमाहात्म्यं ब्रह्मकुण्डादिवर्णनम् ॥
हनूमत्कुण्डमहिमागस्त्यतीर्थभवं फलम् ॥
रामतीर्थादिकथनं लक्ष्मीतीर्थनिरूपणम् ।
शुक्रादितीर्थमहिमा तथा साध्याश्रमादिजः ॥
धनुष्कोट्यादिमाहात्म्यं क्षीरकुण्डादिजं तथा ।
गायत्र्यादिकतीर्थानां माहात्म्यं चात्र कीर्त्तितम् ॥
रामनाथस्य महिमा तत्त्वज्ञानोपदेशनम् ।
यात्राविधानकथनं सेतौ मुक्तिप्रदं नृणाम् ॥
धर्म्मारण्यस्य माहात्म्यं ततः परमुदीरितम् ।
स्थाणुः स्कन्दाय भगवान् यत्र तत्त्वमुपादिशत् ॥
धर्म्मारण्यसुसंभूतिस्तत्पुण्यपरिकीर्त्तनम् ।
कर्म्मसिद्धेः समाख्यानं ऋषिवर्य्यनिरूपणम् ॥
अप्सरातीर्थसुखानां माहात्म्यं यत्र कीर्त्तितम् ।
वर्णानामाश्रमाणाञ्च धर्म्मतत्त्वनिरूपणम् ॥
देवस्थानविभागश्च वकुलार्ककथा शुभा ।
कृत्वा नन्दा तथा शान्ता श्रीमाता च मतङ्गिनी ॥
पुण्यदात्र्यः समाख्याता यत्र देवैः समास्थिताः ।
इन्द्रेश्वरादिमाहात्म्यं द्वारकादिनिरूपणम् ॥
लोहासुरसमाख्यानं गङ्गाकूपनिरूपणम् ।
श्रीरामचरितञ्चैव सत्यमन्दिरवर्णनम् ॥
जीर्णोद्धारस्य कथनं शासनप्रतिपादनम् ।
जातिभेदप्रकथनं स्मृतिधर्म्मनिरूपणम् ॥
ततस्तु वैष्णवा धर्म्मा नानाख्यानैरुदीरिताः ।
चातुर्म्मास्ये ततः पुण्ये सर्व्वधर्म्मनिरूपणम् ॥
दानप्रशंसा तत्पश्चाद्गुरुस्य महिमा ततः ।
तपसश्चैव पूजायाः सच्छिद्रकथनं ततः ॥
प्रकृतीनां भिदाख्यानं शालग्रामनिरूपणम् ।
तारकस्य वधोपायो व्याख्यार्थो महिमा तथा ॥
विष्णोः शास्त्रयं दृष्टत्वं पार्व्वत्यनुनयस्ततः ।
हरस्य ताण्डवं दृष्ट्वं रामनामनिरूपणम् ॥
हरस्य लिङ्गपतनं कथार्थे जगतश्च ।
पार्व्वतीजन्मचरितं तारकस्य वधोद्भुतः ॥
प्रणवैश्वर्य्यकथनं तारकाचरितं पुनः ।
दक्षयज्ञसमाप्तिश्च द्वादशाक्षरकल्पनम् ॥
ज्ञानयोगसमाख्यानं महिमा द्वादशार्णजः ।
अवगादिकपुण्यञ्च कीर्त्तितं शर्म्मदं नृणाम् ॥"
तृतीये ब्रह्मखण्डस्योत्तरभागे ।
"ततो ब्रह्मोत्तरे भागे शिवस्य महिमाद्भुतः ।

पञ्चाक्षरस्य महिमा गोकर्णमहिमा ततः ॥
शिवरात्रेश्च महिमा प्रदोषव्रतकीर्तनम् ।
सोमवारव्रतस्यापि सीमन्तिन्याः कथानकम् ॥
भद्रायुनृपतिकथनं सदाचारनिरूपणम् ।
शिवधर्म्मसमुद्देशो भद्रायुदाहवर्णनम् ॥
भद्रायुमहिमा चापि भस्ममाहात्म्यकीर्तनम् ।
शूद्रराख्यानकस्यैव उमामाहेश्वरव्रतम् ॥
रुद्राक्षस्य च माहात्म्यं रुद्राध्यायस्य पुण्यकम् ।
अघमर्षादिकपुण्यञ्च ब्रह्मखण्डोऽयमीरितः ॥"*॥

चतुर्थं काशीखण्डे ।

"अतः परं चतुर्थन्तु काशीखण्डमनुत्तमम् ।
दिव्यनारदयोर्यत्र संवादः परिकीर्त्तितः ॥
सत्यलोकप्रभावञ्चागस्त्यावासे सुरागमः ।
पतिव्रताचरित्रञ्च तीर्थचर्य्याप्रशंसनम् ॥
ततश्च सप्तपुर्य्याख्या संक्षिप्ता निरूपणम् ।
ब्रह्मस्य च तपेन्द्राण्योर्लोकाप्तिः शिवधर्म्मणः ॥
अग्नेः समुद्भवश्चैव क्रियादरणसम्भवः ।
गन्धवत्यलकापुर्य्योरीश्वर्य्याच्च समुद्भवः ॥
चन्द्रोडुबुधलोकानां कुबेरस्यार्कसूर्य्ययोः क्रमात् ।
सप्तर्षीणां ध्रुवस्यापि तपोलोकस्य वर्णनम् ॥
ध्रुवलोककथा पुण्या सत्यलोकनिरीक्षणम् ।
स्कन्दागस्त्यसमालापो मणिकर्णीसमुद्भवः ॥
प्रभावश्चापि गङ्गाया गङ्गानामसहस्रकम् ।
वाराणसीप्रशंसा च भैरवाविर्भवस्ततः ॥
दक्षयज्ञानवाप्योरुद्भवः समनन्तरम् ।
ततः कलावत्याख्यानं सदाचारनिरूपणम् ॥
ब्रह्मचारिसमाख्यानं ततः स्त्रीलक्षणानि च ।
कृत्याकृत्यविनिर्देशो ह्यविमुक्तक्षेत्रवर्णनम् ॥
गृहस्थयोगिनोर्धर्म्माः कालज्ञानं ततः परम् ।
दिवोदासकथा पुण्या काशीवर्णनमेव च ॥
योगिचर्चा च लोलार्कोत्तरग्रामार्कजा कथा ।
द्रुपदार्कस्य तार्क्ष्याख्यारुणार्कस्योदयस्ततः ॥
दशाश्वमेधतीर्थाख्या मन्दराच्च गणागमः ।
पिशाचमोचनाख्यानं गणेशप्रेषणन्ततः ॥
मायागणपतेश्चाथ भुवि प्रादुर्भवस्ततः ।
विष्णुमायाप्रपञ्चोऽथ दिवोदासविमोक्षणम् ॥
ततः पञ्चनदोत्पत्तिर्विन्दुमाधवसम्भवः ।
ततो वैद्यावतीर्थाख्या शूलिनः काशिकागमः ॥
जैगीषव्येण संवादो व्येडाख्या मर्द्दगिरुतः ।
त्रैवाख्यानं कन्दुकेशाख्येश्वरसमुद्भवः ॥
ग्रैवेश्वरत्रयेश्वरयोः क्रत्तिवासस्य भोद्भवः ।
देवतानामधिष्ठानं दुर्गासुरपराक्रमः ॥
दुर्गायाः विजयश्चाथ ओङ्कारेशस्य वर्णनम् ।
पुनरोङ्कारमाहात्म्यं त्रिलोचनसमुद्भवः ॥
केदाराख्या च धर्म्मेशकथा विश्वभुजोद्भवा ।
वीरेश्वरसमाख्यानं गङ्गामाहात्म्यकीर्तनम् ॥
विश्वकर्म्मेशमहिमा दक्षयज्ञोद्भवस्तथा ।
सतीशरीरतेजादेर्भुजस्तम्भः पराशरः ॥
श्वेततीर्थकदम्बश्च मुक्तिमण्डपसंकथा ।
विश्वेशविभवश्चाथ ततो यात्रापरिक्रमः ॥" * ॥

पञ्चमे अवन्तीखण्डे ।

"अतः परं त्ववन्त्याख्यं शृणु खण्डञ्च पञ्चकम् ।
महाकालवनाख्यानं ब्रह्मशीर्षच्छिदा ततः ॥
प्रायश्चित्तविधिश्चाग्नेरुत्पत्तिश्च सुरागमः ।
देवदीक्षा शिवस्तोत्रं नानापातकनाशनम् ॥
कपालमोचनाख्यानं महाकालवनस्थितिः ।
तीर्थं कलकलेशस्य सर्व्वपापप्रणाशनम् ॥
कुब्जमश्वरसंज्ञञ्च सर्गं रुद्रस्य पुण्यदम् ।
कुटुम्बेशञ्च विद्याश्रमकेटेश्वरतीर्थकम् ॥
स्वर्गद्वारं चतुःसिन्धुतीर्थं शङ्करवापिका ।
सकराकुण्डगन्धवतीतीर्थन्यापप्रणाशनम् ॥
दशाश्वमेधैकादशीतीर्थं च हरिसिद्धिदम् ।
पिशाचकादियात्रा च हनूमत्कथमेश्वरी ॥
महाकालेशयात्रा च वल्लीकेश्वरतीर्थकम् ।
शुक्रेशभेशीपाख्यानं कृशस्थल्याः प्रदक्षिणम् ।
अक्रूरमन्दाकिन्यङ्गपादचन्द्राकवैभवम् ।
करभेशकुक्कुटेशलङ्डुकेशादितीर्थकम् ।
मार्कण्डेशं यज्ञवापी सोमेशं नरकान्तकम् ॥
केदारेश्वररामेशसौभाग्येशनरार्ककम् ।
केशार्कं शक्तिभेदश्च स्वर्गचरसुखानि च ॥
ओङ्कारेशादितीर्थानि अन्यकस्तुतिकीर्तनम् ।
कालारण्ये लिङ्गसङ्ख्या स्वर्गद्वङ्गाभिधानकम् ॥
कृशस्थल्या अवन्त्याश्चोज्जयिन्या अभिधानकम् ।
पद्मावती कुमुद्वत्यमरावतीतिनामकम् ॥
विशालाप्रतिकल्पाभिधाने च ज्वरशान्तिकम् ।
शिप्रास्नानादिकफलं नागोल्मीना शिवस्तुतिः ॥
हिरण्याश्ववधाख्यानं तीर्थं सुन्दरकुण्डकम् ।
नीलगङ्गा पुष्करारव्यं विन्ध्यावासनतीर्थकम् ॥
पूरघोत्तमाधिमासं तत्तीर्थश्राघनाशनम् ।
गोमतीस्नाने कुब्जे विष्णोर्नामसहस्रकम् ॥
वीरेश्वरसरः कालभैरवस्य च तीर्थके ।
महिमा नागपत्न्यां वृषिसिंहस्य जयन्तिका ॥
कुतुवेश्वरयात्रा च देवसाधककीर्त्तनम् ।
कर्कराजाख्यातीर्थञ्च विघ्नेशादिसुरोहनम् ॥
रुद्रकुण्डप्रभृतिषु बहुतीर्थनिरूपणम् ।
यात्राष्टतीर्थजा पुण्या रेवामाहात्म्यमुच्यते ॥
धर्म्मपुण्यस्य वैराग्ये मार्कण्डेयेन सङ्गमः ।
प्राग्भवानुभवाख्यानं अन्टतापरिकीर्त्तनम् ॥
कल्पे कल्पे पृथक् नाम नर्म्मदायाः प्रकीर्त्तितम् ।
स्तवमार्षे नार्म्मदस्य कालरात्रिकथा ततः ॥
महादेवस्तुतिः पश्चात् पृथक्कल्पकथादृता ।
विघ्नेश्वराख्यानकं पञ्चाङ्गलेश्वरकथा तथा ॥
गौरीव्रतसमाख्यानं त्रिपुरज्वालनन्ततः ।
देहपातविधानञ्च कावेरीसङ्गमस्ततः ॥
दारुतीर्थं ब्रह्मवर्ब्बं यज्ञेश्वरकथानकम् ।
अग्नितीर्थं रवितीर्थं मेघनादं दिदारुकम् ॥
देवतीर्थं नर्म्मदेशं कपिलाख्यं करङ्गकम् ।
कुब्जलेशं पिप्पलादं विमलेशञ्च शूलभित् ॥
ग्रन्थीहरणमाख्यातमन्यकस्य वधस्ततः ।
शूलभेदोद्भवो यत्र दानधर्म्माः पृथग्विधाः ॥
आख्यानं दीर्घतपस ऋष्यशृङ्गकथा ततः ।
चित्रसेनकथा पुण्या काश्मिराजस्य मोक्षणम् ॥
ततो देवशिलाख्यानं शबरीचरिताचितम् ।
व्याधाख्यानं ततः पुण्यं पुष्करिण्यर्कतीर्थकम् ॥
व्यापित्रेश्वरतीर्थञ्च शक्रतीर्थं करोटिकम् ।
कुमारेशमगस्त्येशं अघनेशञ्च माहात्म्यम् ॥
लोकेशं धनदेशञ्च मङ्गलेशञ्च कामजम् ।
नागेशञ्चापि गोपारं गौतमं शृङ्गचूडजम् ॥
नारदेशं नन्दिकेशं वरुणेश्वरतीर्थकम् ।
दधिस्कन्दादितीर्थानि हनूमत्तेश्वरन्ततः ॥
रामेश्वरादितीर्थानि सोमेशं पिङ्गलेश्वरम् ।
ऋणमोक्षं कपिलेशं पूतिकेशं जलेशयम् ॥
चण्डार्कयमतीर्थञ्च कङ्कोडीशञ्च नान्दिकम् ।
नारायणञ्च कोटीशं व्यासतीर्थं प्रभासिकम् ॥
नागेशं सङ्कर्षणकं मन्मथेश्वरतीर्थकम् ।
एरण्डीसङ्गमं पुण्यं सुवर्णाखिलतीर्थकम् ॥
करञ्जं कामदं तीर्थं भाण्डीरं रोहिणीभवम् ।
चक्रतीर्थं धौतपापं स्कान्दमाङ्गिरसाङ्कयम् ॥
कोटितीर्थमयोन्माखमङ्गारार्कं त्रिलोचनम् ।
इन्द्रेशं कम्बुकेशञ्च सोमेशं कोहनेशकम् ॥
नार्म्मदं चार्कमार्क्षेयं भार्गवेश्वरसत्तमम् ।
ब्राह्मं दैवञ्च भागेशमादिवाराहकं कवे ॥
रामेशमथ सिद्धेशमाहल्यं कङ्कटेश्वरम् ।
शाक्रं सौम्यञ्च नान्देशं तापेशं रुक्मिणीभवम् ॥
योजनेशं वराहेशं द्वादशीशिवतीर्थके ।
सिद्धेशं मङ्गलेशञ्च लिङ्गवाराहतीर्थकम् ॥
कुब्जेशं श्वेतवाराहं भार्गवेशं रवीश्वरम् ।
शुक्लादीनि च तीर्थानि हूंकारस्वामितीर्थकम् ॥
सङ्गमेशं नारकेशं मोक्षं मार्षञ्च गोपकम् ।
नागं ग्राम्यञ्च सिद्धेशं मार्कण्डाकूरतीर्थके ॥
कामोदशूलारोपाख्यं माण्डव्यं गोपकेश्वरम् ।
कपिलेशं पिङ्गलेशं भूतेशं गाङ्गगौतमे ॥
व्याश्वमेधं भृगुकच्छं केदारेशञ्च पापनुत् ।
खनखलेशं जालेशं शालग्रामं वराहकम् ॥
चन्द्रप्रभासमादित्यं शैपत्याख्यञ्च हंसकम् ।
शूलस्थानञ्च शूलेशमाम्रावाचित्रदेवकम् ॥
शिखीशं कोटितीर्थञ्च दशकन्यं सुवर्णकम् ।
ऋणमोक्षं भारभूतिरचास्ते पुंखसुष्किमम् ॥
श्यामलेशं कपालेशं शृङ्गेरक्षीभवन्ततः ।
कोटितीर्थं लोटनेशं फलस्तुतिरतः परम् ॥
इमिजङ्गलमाहात्म्यं रोहिताश्वकथा ततः ।
धुन्धुमारसमाख्यानं वधोपायस्ततोऽस्य च ॥
वधो धुन्धोस्ततः पश्चात् ततश्चित्रवहोद्भवः ।
महिमास्य ततश्चक्रीशप्रभावो रतीश्वरः ॥
केदारेशो लक्षतीर्थं ततो विष्णुपदीभवम् ।
सुखारं अवगान्धाख्यं ब्रह्मणश्च सरस्ततः ॥
चक्राख्यं ललिताख्यानं तीर्थञ्च बहुगोमथम् ।
रुद्रावर्त्तञ्च मार्कण्डं तीर्थं पापप्रणाशनम् ॥
रावणेशं शुक्लपटं देवान्वितीर्थकम् ।
जिह्वोदतीर्थसम्भूतिः शिवोद्भेदं फलस्तुतिः ॥
एष खण्डो ह्यवन्त्याख्यः श्रेयसां पापनाशनः ॥

षष्ठे नागरखण्डे ।

"अतः परं नागराख्यः खण्डः षष्ठोऽभिधीयते ॥
लिङ्गोत्पत्तिसमाख्यानं हरिश्चन्द्रकथा शुभा ।
विश्वामित्रस्य माहात्म्यं त्रिशङ्कुस्वर्गतिस्तथा ॥
हाटकेश्वरमाहात्म्यं हत्वासुरवधस्तथा ।

नागविलं शुक्लतीर्थमचलेश्वरवर्णनम् ॥
चमत्कारपुराख्यानं चमत्कारकरं परम् ।
गयशीर्षं बालशाखं बालमाडं नगाह्वयम् ॥
विष्णुपादश्च गोकर्णं युगरूपं समाश्रयः ।
सिद्धेश्वरं नागसरः सप्तार्घेयं शुगस्थकम् ॥
शृङ्गगर्तं नलेशश्च भीमं दूर्व्वेरसंकटम् ।
साम्भिलं शोभनाथश्च दौर्गमानर्केश्वरम् ॥
नमदग्निवधाख्यानं नैःक्षत्रियकथानकम् ।
रामह्रदं नागपुरं जङ्घलिङ्गश्च यज्ञभूः ॥
सुखीरादित्यिकार्कश्च सतीपरिणयस्तथा ।
बालखिल्यश्च यागेशं बालखिल्यश्च गोरुहम् ॥
लक्ष्मीशापः सामविंशः सोमप्रासादमेव च ।
अम्बाहृदं पादुकाख्यमाग्नेयं ब्रह्मकुण्डकम् ॥
गोमुखं लोहयज्ञाख्यमजापालेश्वरी तथा ।
घ्राणेश्वरं राजवापी रामेशो लक्ष्मणेश्वरः ॥
कुशेशाख्यं लवेशाख्यं लिङ्गं सर्व्वोत्तमोत्तमम् ।
अष्टषष्टिसमाख्यानं दमयन्त्याख्यिजातकम् ॥
ततोऽम्बा रेवती चात्र भद्रिकातीर्थसम्भवम् ।
क्षेमङ्करी च केदारं शुक्लतीर्थं सुखारकम् ॥
सत्यसन्धेश्वराख्यानं तथा कर्णोत्पलाकथा ।
अटेश्वरं याज्ञवल्क्यं गौर्यं गाणेशमेव च ॥
ततो वासुपदाख्यानमजागृहकथानकम् ॥
सौभाग्यान्धुकमूलेशं धर्म्मराजकथानकम् ।
मिश्राम्बदेश्वराख्यानं गाणपत्यत्रयं ततः ॥
जावालिचरितञ्चैव मकरेशकथा ततः ।
कालेश्वर्य्यधकाख्यानं कुण्डमाश्वरसन्तथा ॥
पुण्यादित्यं रौहिताश्वं नागरोत्पत्तिकीर्त्तनम् ।
भार्गवं चरितं चैव वैश्वामित्रं ततः परम् ॥
सारस्वतं पैप्पलादं कंसारीशश्च पैष्किकम् ।
ब्रह्मणो यज्ञचरितं सावित्र्याख्यानसंयुतम् ॥
रैवतं भर्तृयज्ञाख्यं सुखातीर्थनिरीक्षणम् ।
कौरवं हाटकेशाख्यं प्रभासं क्षेत्रकत्रयम् ॥
पौष्करं नैमिषं धार्म्ममरण्यत्रितयं स्मृतम् ।
वाराणसी द्वारकाख्यावन्त्याख्येति पुरीत्रयम् ॥
वृन्दावनं खाण्डवाख्यमदैकाख्यं वनत्रयम् ।
कक्षः शालस्तथा नन्दी ग्रामत्रयमनुत्तमम् ॥
व्यसिशुक्लपिलसंज्ञं तीर्थत्रयमुदाहृतम् ।
अर्ब्बुदो रैवतश्चैव पर्व्वतत्रयमुत्तमम् ॥
नदीनां त्रितयं गङ्गा नर्म्मदा च सरस्वती ।
सार्द्धकोटित्रयफलमेकैकस्मिन् कीर्त्तितम् ॥
कूपिका शुक्लतीर्थाम्रकं बालमाडनम् ।
हाटकेशक्षेत्रफलप्रदं प्रोक्तं चतुष्टयम् ॥
शाम्बादित्यं श्राद्धकल्पं यौधिष्ठिरमथान्धकम् ।
जलशायि चतुर्म्मास्यमशून्यशयनव्रतम् ॥
मङ्कणेशं शिवरात्रिस्तुलापुरुषदानकम् ।
पृथ्वीदानं वागकेशं कपालमोचनेश्वरम् ॥
पापपिण्डं साप्तलेङ्गं युगमानादिकीर्त्तनम् ।
निम्बेशशाकम्भर्य्याख्या रुद्रैकादशकीर्त्तनम् ॥
दानमाहात्म्यकथनं द्वादशादित्यकीर्त्तनम् ।
इत्येष नागरः खण्डः प्रभासाख्योऽधुनोच्यते ॥"
सप्तमे प्रभासखण्डे ।
"सोमेशो यत्र विश्वेशोऽर्कस्थलं पुण्यदं महत् ।
सिद्धेश्वरादिकाख्यानं पृथगत्र प्रकीर्त्तितम् ॥
व्यसितीर्थं कपर्द्दीशं केदारेशं गतिप्रदम् ।
भीमभैरवचण्डीशभास्कराङ्गारकेश्वराः ॥
बुधेश्यश्शुक्रसौरेन्द्रशिखीशा हरविग्रहाः ।
सिद्धेश्वराद्याः पश्चान्ये रुद्रास्तत्र व्यवस्थिताः ॥
वरारोहा शुभापाला मङ्गला ललितेश्वरी ।
लक्ष्मीशो वाडवेशश्चार्घीशः कामेश्वरस्तथा ॥
गौरीशवरुणेशाख्यसुधीशश्च गणेश्वरम् ।
कुमारेशश्च शाकल्यं शुकुलोत्कटगौतमम् ॥
दैत्यघ्नेशं चक्रतीर्थं सन्निहत्याक्षयं तथा ।
भूतेशादीनि लिङ्गानि आदिनारायणाक्षयम् ॥
ततश्चक्रधराख्यानं शाम्बादित्यकथानकम् ।
कथा कण्टकशोधिन्या महिषघ्नास्ततः परम् ॥
कपालीश्वरकोटीशबालब्रह्माक्षसत्कथा ।
नरकेशसमर्च्चेशनिधीश्वरकथा ततः ॥
बलभद्रेश्वरस्याथ गङ्गाया गणस्य च ।
जाम्बवत्याख्यसरित् पाण्डुकूपस्य सत्कथा ॥
घृतमेधलक्षमेधकोटिमेधकथा तथा ।
दुर्व्वासार्कयदुस्थानहिरण्यासङ्गमोत्कथा ॥
नगरार्कस्य क्षत्रस्य सङ्कर्षणसमुद्भवोः ।
कुमार्याः क्षेत्रपालस्य ब्रह्मेशस्य कथा पृथक् ॥
पिङ्गलासङ्गमेशस्य शुक्लरार्कघटेशयोः ।
ऋषितीर्थस्य नन्दार्कचित्रकूपस्य कीर्त्तनम् ॥
शृङ्गोपानस्य पर्व्वार्कन्यङ्कुमत्योः कथादृता ।
वाराहस्वामिदत्तान्तं छायालिङ्गाख्यगुह्यकयोः ॥
कथा कनकनन्दायाः कुन्तीगङ्गेशयोस्तथा ।
चमसोद्भेदविदुरशिलोकेशकथा ततः ॥
मङ्कणेशक्षेत्रपुरेशषष्टितीर्थकथा तथा ।
लक्ष्म्याप्राचीक्षयोरमानाथकथा तथा ॥
भृङ्गारशूलस्थलयोश्चवनार्कशयोस्तथा ।
अजापालेशबालार्ककुवेरस्थलजा कथा ॥
ऋषितोयाकथा पुण्या सङ्गालेश्वरकीर्त्तनम् ।
नारदादित्यकथनं नारायणनिरूपणम् ॥
तप्तकुण्डस्य माहात्म्यं मूलचण्डीशवर्णनम् ।
चतुश्चक्रमणाख्यचकलम्बेश्वरयोः कथा ॥
गोपालस्वामिवकुलस्वामिनोर्म्मरुतीकथा ।
क्षेमार्कोन्नतविघ्नेशजलस्वामिकथा ततः ॥
कालमेघस्य रुक्मिण्या ऊर्ध्वशीश्वरभद्रयोः ।
शुक्लावर्त्तमोचतीर्थगोय्यदाच्युतसङ्गमाः ॥
जालेश्वरस्य हूँकारकूपचण्डीशयोः कथा ।
आशापूरम्यविघ्नेशकलाकुण्डकथाद्भुता ॥
कपिलेशस्य च कथा जरद्गवशिवस्य च ।
नलकर्कोटेश्वरयोर्हाटकेश्वरजा कथा ॥
नारदेशमल्लभूषा दुर्गकूटगणेशजा ।
सुपर्णेशाख्यभैरवोर्भल्लतीर्थभवा कथा ॥
कीर्त्तनं कर्द्दमालस्य गुप्तसोमेश्वरस्य च ।
बहुस्वर्णेशशुक्लेशकोटीश्वरकथा ततः ॥
मार्कण्डेश्वरकोटीशदामोदरशशोलूकथा ।
स्वर्णरेखा ब्रह्मकुण्डं कुन्तीभीमेश्वरौ तथा ॥
नगीकुण्डञ्च सर्व्वस्वं क्षेत्रे वस्त्रापथे स्मृतम् ।
दुर्व्वासविल्वेशगङ्गेश्वरैवतानां कथाद्भुता ॥
ततोऽर्च्चुदे स्वप्नकथा अचलेश्वरकीर्त्तनम् ।
नागतीर्थस्य च कथा वशिष्ठाश्रमवर्णनम् ॥
भद्रकर्णस्य माहात्म्यं चिनेत्रस्य ततः परम् ।
केदारस्य च माहात्म्यं तीर्थागमनकीर्त्तनम् ॥
कोटीश्वररूपतीर्थकूपीकेशकथा ततः ।
सिद्धेशशुक्लेश्वरयोर्म्मणिकर्णीशकीर्त्तनम् ॥
पञ्चतीर्थयमतीर्थवाराहतीर्थवर्णनम् ।
चन्द्रप्रभासपिण्डोदश्रीमातापुष्कतीर्थजम् ॥
कात्यायन्याश्च माहात्म्यं ततः पिण्डारकस्य च ।
ततः कनखलस्याथ चक्रमानुव्रतीर्थयोः ॥
कपिलामितीर्थकथा तथा रक्तानुवन्यजा ।
गणेशपार्थेश्वरयोर्याचायासुहृल्लस्य च ॥
चण्डीस्थानं नागभवशिरःकुब्जमहेशजा ।
कामेश्वरस्य मार्कण्डेयोत्पत्तिश्च कथा ततः ॥
उद्दालकेशसिद्धेशगततीर्थकथा पृथक् ।
श्रीदेवमातीतृप्तिश्च व्यासगौतमतीर्थयोः ॥
कुलसन्तारमाहात्म्यं रामकोट्याख्यतीर्थयोः ।
चन्द्रोद्भेदेशानशङ्खब्रह्मस्थानोद्भवोद्भवम् ॥
त्रिपुष्करहृद्गुहेश्वरकथा शुभा ।
अविमुक्तस्य माहात्म्यसुमामाहेश्वरस्य च ॥
महौजसः प्रभावश्च जम्बुतीर्थस्य वर्णनम् ।
गङ्गाधरमिश्रकयोः कथा चाथ फलश्रुतिः ॥
द्वारकायाश्च माहात्म्ये चन्द्रशर्म्मकथानकम् ।
नागराख्याव्रतञ्च व्रतमेकादशीभवम् ॥
महाह्रदाग्निकाख्यानं प्रजादर्शसमागमः ।
दुर्व्वासस उपाख्यानं याचोपक्रमकीर्त्तनम् ॥
गोमत्युत्पत्तिकथनं तस्यां स्नानादिकं फलम् ।
चक्रतीर्थस्य माहात्म्यं गोमत्युदधिसङ्गमः ॥
सनकादिह्रदाख्यानं नृगतीर्थकथा ततः ।
गोप्रचारकथा पुण्या गोपीनां द्वारकागमः ॥
गोपीसरःसमाख्यानं ब्रह्मतीर्थादिकीर्त्तनम् ।
पञ्चनद्यागमाख्यानं नानाख्यानसमाचितम् ॥
शिवलिङ्गमहातीर्थक्षेत्रपूजादिकीर्त्तनम् ।
त्रिविक्रमस्य मूर्त्त्याख्या दुर्व्वासःक्षेत्रसंकथा ॥
कृशदैत्यवधोऽश्वोत्था विशेषार्चनजं फलम् ।
गोमत्यां द्वारकायाश्च तीर्थागमनकीर्त्तनम् ॥
क्षेत्रमन्दिरसंप्रेक्षा द्वारवत्यभिषेचनम् ।
तत्र तीर्थावासकथा द्वारकापुण्यकीर्त्तनम् ॥
इत्येष सप्तमः प्रोक्तः खण्डः प्राभासिको द्विज ! ।
स्कान्दे सर्व्वोत्तरकथा शिवमाहात्म्यवर्णने ॥"
तत्फलश्रुतिः ।
"लिखित्वैतत्तु यो दद्याद्वेदमूलसमाचितम् ।
माघ्यां सतृक्षयं विप्राय स याति मोदते पदे ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हृद्द्वयाख्याने
चतुर्थपादे १०४ अध्यायः ॥ १३ ॥
चतुर्दशं वामनपुराणम् ।
श्रीबह्वोवाच ।
"शृणु वत्स ! प्रवक्ष्यामि पुराणं वामनाभिधम् ।
त्रिविक्रमचरिताढ्यं दशसाहस्रसङ्ख्यकम् ॥
कूर्म्मकल्पसमाख्यानं वर्गत्रयकथानकम् ।
भागद्वयसमायुक्तं वक्तृश्रोतृशुभावहम् ॥" * ॥
तत्र पूर्व्वभागे ।
"पुराणप्रश्नः प्रथमं ब्रह्मश्रीर्घच्छिदा ततः ।

कपालमोचनाख्यानं दक्षयज्ञविहिंसनम् ॥
हरस्य कालरूपाख्या कामस्य दहनं ततः ।
प्रह्लादनारायणयोर्युद्धं देवासुराक्षयम् ॥
शुक्रेक्षुकंसमाख्यानं ततो भुवनकोशकम् ।
ततः काम्यव्रताख्यानं श्रीदुर्गाचरितं ततः ॥
तपतीचरितं पश्चात् कुरुक्षेत्रस्य वर्णनम् ।
सरोमाहात्म्यमतुलं पार्वतीजन्मकीर्त्तनम् ॥
सप्तसप्त्या विवाहश्च गौर्य्याख्यानकं ततः ।
ततः कौशिक्युपाख्यानं कुमारचरितं ततः ॥
ततोऽन्धकवधाख्यानं साध्वीपाख्यानकं ततः ।
जाबालिचरितं पश्चादरजायाः कथाद्भुता ॥
अन्धकेश्वरयोर्युद्धं गणत्वं चान्धकस्य च ।
मरुतां जन्मकथनं बलेश्च चरितं ततः ॥
ततस्तु लक्ष्म्याश्चरितं त्रैविक्रममतः परम् ।
प्रह्लादतीर्थयात्रायां प्रोच्यन्ते तत्कथाः शुभाः ॥
ततश्च धुन्धुचरितं प्रेतोपाख्यानकं ततः ।
नलचरपुराख्यानं श्रीदामचरितं ततः ॥
त्रिविक्रमचरित्रान्ते ब्रह्मप्रोक्तः स्तवोत्तमः ।
प्रह्लादबलिसंवादे सुतले हरिशंसनम् ॥
इत्येष पूर्वभागोऽस्य पुराणस्य तवोदितः ॥"
तदुत्तरे भागे ईश्वरागमनाख्ये ।
"शृणु तस्योत्तरं भागं ईश्वरागमनसंज्ञकम् ॥
माहेश्वरी भागवती सौरी गाणेश्वरी तथा ।
ततः संहिताश्चाः पृथक् साहस्रसङ्ख्याः ॥
माहेश्वर्य्यास्तु लक्ष्म्यास्तद्भक्तानाञ्च कीर्त्तनम् ।
भागवत्यां जगन्मातुरवतारकथाद्भुता ॥
सौर्य्यां सूर्य्यस्य महिमा गदितः पापनाशनः ।
गाणेश्वर्य्यां गणेशस्य चरितञ्च महौजसः ॥
इत्येतदामनं नाम पुराणं सुविचित्रकम् ।
पुलस्त्येन समाख्यातं नारदाय महात्मने ॥
ततो नारदतः प्राप्तं व्यासेन सुमहात्मना ।
व्यासात्तु लब्धवान् वत्स! तच्छिष्यो रोमहर्षणः ॥
स चाख्यास्यति विप्रेभ्यो नैमिषीयेभ्य एव च ।
एवं परम्पराप्राप्तं पुराणं वामनं शुभम् ॥" * ॥
तत्फलश्रुतिः ।
"ये पठन्ति च शृण्वन्ति तेऽपि यान्ति परां गतिम् ।
लिखित्वैतत् पुराणन्तु यः शूरद्विजेऽर्पयेत् ॥
विप्राय वेदविदुषे हेमधेनुसमन्वितम् ।
स समुद्धृत्य नरकान्नयेत् स्वर्गं पितॄन् स्वकान् ।
देहान्ते मुक्तभोगोऽसौ याति विष्णोः परं पदम् ॥"
इति श्रीनारदीयपुराणे पूर्वभागे ईश्वरागमनाख्याने चतुर्थपादे १०५ अध्यायः ॥ १४ ॥

पञ्चदशं कूर्मपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्स! मरीचेऽद्य पुराणं कूर्मसंज्ञितम् ।
लक्ष्मीकल्पानुचरितं यत्र कूर्मेशपूर्वकैः ॥
धर्मार्थकाममोक्षाणां माहात्म्यञ्च पृथक् पृथक् ।
रुद्रदुग्धप्रसङ्गेन प्राह विप्रेभ्यो दयालुकम् ॥
तत्सप्तदशसाहस्रं सूचतुःसंहितं शुभम् ।
यत्र ब्राह्म्यां पुरा प्रोक्ता धर्म्मा नानाविधा सुने! ॥
नानाकथाप्रसङ्गेन नृणां सन्ततिदायकाः ॥" * ॥
तत्पूर्वभागे ।
"तत्र पूर्वविभागे तु पुराणोपक्रमः पुरा ।
लक्ष्मीप्रद्युम्नसंवादः कूर्मर्षिगणसङ्कथा ॥
वर्णाश्रमाचारकथा जगदुत्पत्तिकीर्त्तनम् ।
कालसङ्ख्या समासेन लयान्ते स्तवनं विभोः ॥
ततः सङ्क्षेपतः सर्गः प्राकृतं चरितं तथा ।
सहस्रनाम पार्व्वत्या योगस्य च निरूपणम् ॥
भृगुवंशसमाख्यानं ततः स्वायम्भुवस्य च ।
देवादीनां ससृष्टिर्दक्षयज्ञाहितस्ततः ॥
दक्षसृष्टिकथा पश्चात् कश्यपान्वयकीर्त्तनम् ।
आत्रेयवंशकथनं क्षत्रस्य चरितं शुभम् ॥
मार्कण्डक्रौष्टुसंवादो व्यासपाराशवसंकथा ।
युगधर्म्मानुकथनं व्यासजैमिनिकी कथा ॥
वाराणस्याश्च माहात्म्यं प्रयागस्य ततः परम् ।
त्रैलोक्यवर्णनञ्चैव वेदशाखानिरूपणम् ॥"* ॥
तदुत्तरभागे ।
"उत्तरेऽस्य विभागे तु पुरा गौरीश्वरी ततः ।
व्यासगीता ततः प्रोक्ता नानाधर्म्मप्रबोधनी ॥
नानाविधानां तीर्थानां माहात्म्यञ्च पृथक् ततः ।
नानाधर्म्मप्रकथनं ब्राह्मीयं संहिता स्मृता ॥
अतः परं भगवती संहितार्थनिरूपणं ।
कथिता यत्र वर्णानां पृथग्वृत्तिरुदाहृता ॥"
तदुत्तरभागीयभगवत्याख्यद्वितीयसंहितायाः पञ्चपादेषु ।
"पादेष्वस्याः प्रथमे प्रोक्ता ब्राह्मणानां व्यवस्थितिः ।
सदाचारात्मिका वत्स! भोगसौख्यविवर्द्धनी ॥
द्वितीये क्षत्रियाणान्तु वृत्तिः सम्यक् प्रकीर्त्तिता ।
यया त्वाश्रितया पापं विधूयेह व्रजेद्दिवम् ॥
तृतीये वैश्यजातीनां वृत्तिरुक्ता चतुर्विधा ।
यया चरितया सम्यक् लभते गतिमुत्तमाम् ॥
चतुर्थेऽस्यास्तथा पादे शूद्रवृत्तिरुदाहृता ।
यया सन्तुष्यति श्रीशो नृणां श्रेयोविवर्द्धनः ॥
पञ्चमेऽस्यास्ततः पादे वृत्तिः सङ्करजोदिता ।
यया चरितयाप्नोति भाविनीमुत्तमां गतिम् ॥
इत्येषा पञ्चपदोक्ता द्वितीया संहिता सुने! ।
तृतीयाचोदिता सौरी नृणां कामविधायिनी ॥
षोढ़ा षट्कर्मसिद्धिं सा बोधयन्ती च कामिनाम् ।
चतुर्थी वैष्णवी नाम मोक्षदा परिकीर्त्तिता ॥
चतुष्पदी द्विजादीनां साचाद्ब्रह्मस्वरूपिणी ।
ताः क्रमात् षट्चतुर्द्वीपुराहस्राः परिकीर्त्तिताः ॥"
तत्फलश्रुतिः ।
"एतत्कूर्मपुराणन्तु चतुर्व्वर्गफलप्रदम् ।
पठतां शृण्वतां नृणां सर्व्वोत्तमगतिप्रदम् ॥
लिखित्वैतत्तु यो भक्त्या हेमकूर्मसमन्वितम् ।
ब्राह्मणायार्पयेद्दत्वा स याति परमां गतिम् ॥"
इति श्रीनारदीयपुराणे पूर्वभागे ईश्वरागमनाख्याने चतुर्थपादे १०६ अध्यायः ॥ १५ ॥

षोड़शं मत्स्यपुराणम् ।
श्रीब्रह्मोवाच ।
"अथ मात्स्यं पुराणं ते प्रवक्ष्ये द्विजसत्तम! ।
यच्चोक्तं सत्यकल्पानां वृत्तं सङ्क्षिप्य भूतले ॥
व्यासेन वेदविदुषा नरसिंहोपवर्णनम् ।
उपक्रम्य तदुद्दिष्टं चतुर्दशसहस्रकम् ॥
मनुमत्स्यसंवादो ब्रह्माण्डवर्णनन्ततः ।
ब्रह्मदेवासुरोत्पत्तिर्मारुतोत्पत्तिरेव च ॥
मदनदहनं तद्वत् लोकपालाभिपूजनम् ।
मन्वन्तरसमुद्देशो वैश्वाराख्याभिवर्णनम् ॥
सूर्य्यवैवस्वतोत्पत्तिर्व्वंशसङ्गमनं तथा ।
पितृवंशानुकथनं श्राद्धकालस्तथैव च ॥
पितृतीर्थप्रचारश्च सोमोत्पत्तिस्तथैव च ।
कीर्त्तनं सोमवंशस्य ययातिचरितं तथा ॥
कार्त्तवीर्य्यस्य चरितं दत्तं वंशानुकीर्त्तनम् ।
शुक्रशापस्तथा विष्णोर्दैत्यधा जन्म च द्विधा ॥
कीर्त्तनं पुरुवंशस्य वंशो हौनाशनः परः ।
क्रियायोगस्ततः पश्चात् पुराणं परिकीर्त्तितम् ॥
व्रतं नक्तचपुरुषं मार्त्तण्डशयनं तथा ।
क्षमाष्टमीव्रतं तद्वद्रोहिणीचन्द्रसंज्ञितम् ॥
तडागविधिमाहात्म्यं पादपोत्सर्ग एव च ।
सौभाग्यशयनं तद्वदगस्त्यव्रतमेव च ॥
तथानन्ततृतीयाया रसकल्याणिनीव्रतम् ।
तथैवानन्दकर्य्याश्च व्रतं सारस्वतं पुनः ॥
उपरागाभिषेकश्च सप्तमीशयनं तथा ।
भीमाख्या द्वादशी तद्वदनङ्गशयनं तथा ॥
अशून्यशयनं तद्वत् तथैवाङ्गारकव्रतम् ।
सप्तमीसप्तकं तद्वद्विशोकद्वादशीव्रतम् ॥
मेरुप्रदानं दशधा ग्रहशान्तिस्तथैव च ।
ग्रहस्वरूपकथनं तथा शिवचतुर्दशी ॥
तथा सर्व्वफलत्यागः सूर्य्यवारव्रतं तथा ।
संक्रान्तिशयनं तद्वद्विभूतिद्वादशीव्रतम् ॥
पतिव्रतानां माहात्म्यं तथा स्नानविधिक्रमः ।
प्रयागस्य तु माहात्म्यं दीपलोकानुवर्णनम् ॥
तथान्तरीक्षचारश्च ध्रुवमाहात्म्यमेव च ।
भवनानि सुरेन्द्राणां त्रिपुरोद्योतनं तथा ॥
पितृप्रवरमाहात्म्यं मन्वन्तरविनिर्णयः ।
चतुर्युगस्य सम्भूतिर्युगधर्म्मनिरूपणम् ॥
वह्न्यङ्गस्य तु सम्भूतिस्तारकोत्पत्तिरेव च ।
तारकासुरमाहात्म्यं ब्रह्मदेवानुकीर्त्तनम् ॥
पार्व्वतीसम्भवस्तद्वत्तथा शिवतपोवनम् ।
अनङ्गदेहदाहश्च रतिशोकस्तथैव च ॥
गौरीतपोवनं तद्वच्छिवेनाथ प्रसादनम् ।
पार्व्वतीऋषिसंवादस्तथैवोद्वाहमङ्गलम् ॥
कुमारसम्भवस्तद्वत् कुमारविजयस्तथा ।
तारकस्य वधो घोरो नरसिंहोपवर्णनम् ॥
प्रह्लादविसर्गस्तु तथैवान्धकघातनम् ।
वाराणस्यास्तु माहात्म्यं नर्म्मदायास्तथैव च ॥
प्रवरानुक्रमस्तद्वत् पितृगाथानुकीर्त्तनम् ।
तथोभयमुखीदानं दानं क्षमाजिनस्य च ॥
ततः सावित्र्युपाख्यानं राजधर्म्मांस्तथैव च ।
विविधोत्पातकथनं ग्रहशान्तिस्तथै च ॥

यात्रानिमित्तकथनं स्वप्नमङ्गलकीर्त्तनम् ॥
वामनस्य तु माहात्म्यं वाराहस्य ततः परम् ॥
समुद्रमथनं तद्वत् कालकूटाभिशान्तनम् ।
देवासुरविमर्दश्च वास्तुविद्या तथैव च ॥
प्रतिमालक्षणं तद्वदेवतास्थापनं तथा ।
प्रासादलक्षणं तद्वन्मण्डपानाञ्च लक्षणम् ॥
भविष्यराज्ञामुद्देशो महादानानुकीर्त्तनम् ।
कल्पानुकीर्त्तनं तद्वत् पुराणेऽस्मिन् प्रकीर्त्तितम्॥"
तत्फलश्रुतिः ।
"पवित्रमेतत् कल्याणमायुःकीर्त्तिविवर्द्धनम् ।
यः पठेच्छृणुयाद्वापि स याति भवनं हरेः ॥
लिखित्वैतत्तु यो दद्याद्धेममत्स्यगवान्वितम् ।
विप्रायाभ्यर्च्य विधिवे स याति परमं पदम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे दृष्टदुष्पाख्याने चतुर्थपादे १०७ अध्यायः ॥ १६ ॥
सप्तदशं गरुड़पुराणम् ।
श्रीब्रह्मोवाच ।
"मरीचे शृणु वक्ष्यद्य पुराणं गारुड़ं शुभम् ।
गरुड़ायाब्रवीत् पृष्टो भगवान् गरुड़ासनः ॥
एकोनविंशसाहस्रं तार्क्ष्यकल्पकथाश्रितम् ॥"
तत्र पूर्व्वखण्डे ।
"पुराणोपक्रमो यत्र सर्गसङ्क्षेपतस्ततः ।
सूर्य्यादिपूजनविधिर्दीक्षाविधिरतः परम् ॥
श्राद्धादिपूजा ततः पश्चान्नवव्यूहार्च्चनं द्विज ! ।
पूजाविधानञ्च तथा वैष्णवं पञ्जरं ततः ॥
योगाध्यायस्ततो विष्णोर्नामसाहस्रकीर्त्तनम् ।
ध्यानं विष्णोस्ततः सूर्य्यपूजा शुल्कुञ्जयार्च्चनम् ॥
मालामन्त्राः श्रियार्च्चाथ गणपूजा ततः परम् ।
गोपालपूजा चैलोक्यमोहनश्रीधरार्च्चनम् ॥
विष्वक्सेनार्च्चा पञ्चतत्त्वार्च्चा चक्रार्च्चा देवपूजनम् ।
व्यासादिसन्ध्योपास्तिश्च दुर्गार्च्चाथ सुरार्च्चनम् ॥
पूजा माहेश्वरी चातः पवित्रारोहणार्च्चनम् ।
मूर्त्तिध्यानं वास्तुमानं प्रासादानाञ्च लक्षणम् ॥
प्रतिष्ठा सर्व्वदेवानां पृथक्पूजाविधानतः ।
योगोऽष्टाङ्गो दानधर्म्मः प्रायश्चित्तं निधिक्रिया ॥
द्वीपेशनरकाख्यानं सूर्य्यव्यूहश्च ज्योतिषम् ।
सामुद्रिकं स्वरज्ञानं नवरत्नपरीक्षणम् ॥
माहात्म्यमथ तीर्थानां गयामाहात्म्यसुत्तमम् ।
ततो मन्वन्तराख्यानं पृथक् पृथक्विभागशः ॥
पित्राख्यानं वर्णधर्म्मा द्रव्यशुद्धिः समर्पणम् ।
श्राद्धं विनायकस्यार्च्चा ग्रहयज्ञस्तथाश्रमाः ॥
मननाख्या प्रेताशौचं नीतिसारो व्रतोत्सवः ।
सूर्य्यवंशः सोमवंशोऽवतारकथनं हरेः ॥
रामायणं हरिवंशो भारताख्यानकन्ततः ।
आयुर्व्वेदे निदानं प्राक् चिकित्साद्रव्यजा गुणाः ॥
रोगघ्नं कवचं विष्णोर्गरुड़ं चैपुरो मनुः ।
प्रश्नचूड़ामणिश्चान्ते हयायुर्व्वेदकीर्त्तनम् ॥
औषधीनामकथनं ततो व्याकरणोद्धरणम् ।
छन्दःशास्त्रं सदाचारस्ततः स्नानविधिः स्मृतः ॥
तर्पणं वैश्वदेवञ्च सन्ध्या पार्व्वणकर्म्म च ।
नित्यश्राद्धं सपिण्डाख्यं धर्म्मसारोऽघनिष्कृतिः ॥
प्रतिसंक्रम उल्कोऽम्बादुर्युगधर्म्माः कृतेः फलम् ।
योगशास्त्रं विष्णुभक्तिर्नमस्कृतिफलं हरेः ॥
माहात्म्यं वैष्णवस्याथ नारसिंहस्तवोत्तमम् ।
ज्ञानाख्यं गुह्यमष्टकं स्तोत्रं विष्णोश्चनाङ्कयम् ॥
वेदान्तसाङ्ख्यसिद्धान्तं ब्रह्मज्ञानं तथात्मकम् ।
गीतासारफलोत्कीर्त्तिः पूर्व्वखण्डोऽयमीरितः॥"
उत्तरखण्डे प्रेतकल्पे ।
"अथास्यैवोत्तरे खण्डे प्रेतकल्पः पुरोदितः ।
यत्र तार्क्ष्येण संपृष्टो भगवानाह वाड़व ! ॥
धर्म्मप्रकटनं पूर्व्वयोनीनां गतिकारणम् ।
दानाधिकं फलञ्चापि प्रोक्तमत्रौर्द्ध्वदेहिकम् ॥
यमलोकस्य मार्गस्य वर्णनञ्च ततः परम् ।
षोड़शश्राद्धफलकं दत्तानाञ्च च वर्णितम् ॥
निष्कृतिर्यममार्गस्य धर्म्मराजस्य वैभवम् ।
प्रेतपीड़ाविनिर्देशः प्रेतचिह्ननिरूपणम् ॥
प्रेतानां चरिताख्यानं कारणं प्रेततां प्रति ।
प्रेतकृत्यविचारश्च सपिण्डीकरणोक्तयः ॥
प्रेतत्वमोचनाख्यानं दानानि च विमुक्तये ।
आवश्यकोक्तमं दानं प्रेतसौख्यकरं हितम् ॥
शारीरकविनिर्देशो यमलोकस्य वर्णनम् ।
प्रेतत्वोद्धारकथनं कर्म्मकर्त्तृविनिर्णयः ॥
दृष्टयोः पूर्व्वक्रियाख्यानं पश्चात् कर्म्मनिरूपणम् ।
मध्यं षोड़शकं श्राद्धं स्वर्गप्राप्तिक्रियोद्दनम् ॥
सूतकस्याथ सङ्ख्यानं नारायणबलिक्रिया ।
दृषोत्सर्गस्य माहात्म्यं निषिद्धपरिवर्ज्जनम् ॥
अपमृत्युक्रियोक्तिश्च विपाकः कर्म्मणां नृणाम् ।
क्षयाक्षयविचारश्च विष्णुध्यानं विमुक्तये ॥
स्वर्गतो विहिताख्यानं स्वर्गसौख्यनिरूपणम् ।
भूर्लोकवर्णनञ्चैव सप्तधा लोकवर्णनम् ॥
पद्मोद्भवलोककथनं ब्रह्माण्डस्थितिकीर्त्तनम् ।
ब्रह्माण्डानेकचरितं ब्रह्मजीवनिरूपणम् ॥
आत्यन्तिकलयाख्यानं फलस्तुतिनिरूपणम् ।
इत्येतद्गारुड़ं नाम पुराणं भुक्तिमुक्तिदम् ॥"
तत्फलश्रुतिः ।
"कीर्त्तितं पापशमनं पठतां शृण्वतां नृणाम् ।
लिखित्वैतत् पुराणन्तु विदुषे यः प्रयच्छति ॥
सौवर्णं हंसयुग्माढ्यं विप्राय स दिवं व्रजेत् ॥"*॥
इति श्रीनारदीयपुराणे पूर्व्वभागे दृष्टदुष्पाख्याने चतुर्थपादे १०८ अध्यायः ॥ १७ ॥
अष्टादशं ब्रह्माण्डपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्स ! प्रवक्ष्यामि ब्रह्माण्डाख्यं पुरातनम् ।
यच्च द्वादशसाहस्रं भाविकल्पकथायुतम् ॥
प्रक्रियाख्योऽनुषङ्गाख्य उपोद्घातस्तृतीयकः ।
चतुर्थ उपसंहारः पादाश्चत्वार एव हि ॥
पूर्व्वपादद्वयं पूर्व्वो भागोऽत्र समुदाहृतः ।
त्रितीयो मध्यमो भागश्चतुर्थस्तूत्तरो मतः ॥"*॥
तत्र पूर्व्वभागे प्रक्रियापादे ।
"आदौ क्षयसमुद्देशो नैमिषाख्यानकं ततः ।
हिरण्यगर्भोत्पत्तिश्च लोककल्पनमेव च ॥
एष वै प्रथमः पादो द्वितीयं शृणु मानद ! ॥"
पूर्व्वभागे अनुषङ्गपादे ।
"कल्पमन्वन्तराख्यानं लोकज्ञानं ततः परम् ।
मानसीसृष्टिकथनं रुद्रप्रसववर्णनम् ॥
महादेवविभूतिश्च ऋषिसर्गस्ततः परम् ।
अग्नीनां विषयश्चाथ कालसङ्ख्याववर्णनम् ॥
प्रियव्रताख्योद्देशः पृथिव्याश्चाभविस्तरः ।
वर्णनं भारतस्यास्य ततोऽन्येषां निरूपणम् ॥
जम्बादिसप्तद्वीपाख्या ततोऽधोलोकवर्णनम् ।
ऊर्द्धलोकानुकथनं ग्रहचारस्ततः परम् ॥
आदित्यव्यूहकथनं देवयज्ञानुकीर्त्तनम् ।
नीलकण्ठाङ्कयाख्यानं महादेवस्य वैभवम् ॥
अमावास्यानुकथनं युगतत्त्वनिरूपणम् ।
यज्ञप्रवर्त्तनं चाथ युगयोरन्वयोः कृतिः ॥
युगप्रजालक्षणञ्च ऋषिप्रवरवर्णनम् ।
वेदानां व्यसनाख्यानं स्वायम्भुवनिरूपणम् ॥
शेषमन्वन्तराख्यानं पृथिवीदोहनन्ततः ।
चाक्षुषेऽतीते सर्गो द्वितीयोऽङ्गिः पुरोदले ॥"
मध्यमभागे उपोद्घातपादे ।
"अथोपोद्घातपादे तु सप्तर्षिपरिकीर्त्तनम् ।
प्राजापत्यव्ययस्तस्माद्देवादीनां समुद्भवः ॥
ततो जयाभिधाहारो मरुदुत्पत्तिकीर्त्तनम् ।
काश्यपेयानुकथनन्दक्षवंशनिरूपणम् ॥
पित्रकल्पानुकथनं श्राद्धकल्पस्ततः परम् ।
वैवस्वतसमुत्पत्तिः सृष्टिस्तस्य ततः परम् ॥
मनुपुत्राश्चयश्चातो गान्धर्व्वस्य निरूपणम् ।
इक्ष्वाकुवंशकथनं वंशोऽत्रेः सुमहात्मनः ॥
अमावसोश्चयश्च रजेश्चरितमद्भुतम् ।
ययातिचरितञ्चाथ यदुवंशनिरूपणम् ॥
कार्त्तवीर्य्यस्य चरितं जामदग्न्यं ततः परम् ।
वृष्णिवंशानुकथनं सगरस्याथ सम्भवः ॥
भार्गवस्यानुचरितं तथा कार्य्यवधाश्रयम् ।
समरस्याथ चरितं भार्गवस्य कथा पुनः ॥
देवासुराहवकथा कृष्णाविर्भाववर्णने ।
इतस्य च स्तवः पुण्यः शुक्रेण परिकीर्त्तितः ॥
विष्णुमाहात्म्यकथनं बलिवंशनिरूपणम् ।
भविष्यराजचरितं संप्राप्तेऽथ कलौ युगे ॥
एवमुद्घातपादोऽयं तृतीयो मध्यमे दले ॥"
उत्तरभागे उपसंहारपादे ।
"चतुर्थेसुपसंहारं वक्ष्ये खण्डे तथोत्तरे ।
वैवस्वतान्तराख्यानं विस्तरेण यथातथम् ॥
पूर्व्वमेव समुद्दिष्टं सङ्क्षेपादिह कथ्यते ।
भविष्याणां मनूनाञ्च चरितं हि ततः परम् ॥
कल्पप्रलयनिर्देशः कालमानं ततः परम् ।
लोकाश्चतुर्दशं ततः कथिता मानलक्षणैः ॥
वर्णनं नरकाणाञ्च विकर्म्माचरणैस्ततः ।
मनोमयपुराख्यान लयः प्राकृतिकस्ततः ॥
शैवंस्याथ पुरस्यापि वर्णनञ्च ततः परम् ।
विविधादृगुणसम्बन्धाज्जन्तूनां कीर्त्तिता गतिः ।
अनिर्देश्याप्रतर्क्यस्य ब्रह्मणः परमात्मनः ।
अन्वयव्यतिरेकाभ्यां वर्णनं हि ततः परम् ॥
इत्येष उपसंहारः पादो दृष्टः स चोत्तरः ।
चतुष्पादं पुराणं ते ब्रह्माण्डं समुदाहृतम् ॥
अष्टादशमनौपम्यं सारात्सारतरं द्विज ! ।
ब्रह्माण्डञ्च चतुर्लक्षं पुराणत्वेन पठ्यते ॥

तदेव यस्य गदितमष्टादशधा पृथक् ।
पाराशर्य्येण मुनिना सर्व्वेषामपि मानद ! ॥
वस्तुदृष्ट्या तेनैव मुनीनां भावितात्मनाम् ।
मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे ॥
मुनयो धर्म्मशीलास्ते दीनानुग्रहकारिणः ।
मया चेदं पुराणन्तु वशिष्ठाय पुरोदितम् ॥
तेन शक्तिसुतायोक्तं जातूकर्ण्याय तेन च ।
व्यासो लब्ध्वा ततश्चैतत् प्रभञ्जनसुखोद्गतम् ॥
प्रमाणीकृत्य लोकेऽस्मिन् प्रावर्त्तयदनुत्तमम् ॥"
तत्फलश्रुतिः ।
"य इदं कीर्त्तयेदस्य ! शृणोति च समाहितः ।
स विधूयेह पापानि याति लोकमनामयम् ॥
लिखित्वैतत् पुराणन्तु स्वर्णसिंहासनस्थितम् ।
पत्रेणाच्छादितं वस्तु ब्राह्मणाय प्रयच्छति ॥
स याति ब्रह्मणो लोकं नात्र कार्य्या विचारणा ॥
मरीचेरादशैतानि मया प्रोक्तानि यानि ते ।
पुराणानि तु सङ्क्षेपाच्छ्रोतव्यानि च विस्तरात् ॥
अष्टादशपुराणानि यः शृणोति नरोत्तमः ।
कथयेदा विधानेन नेह भूयः स जायते ॥
सूत्रमेतत् पुराणानां यन्मयोक्तं तवाधुना ।
तन्नित्यं श्रीलनीयं हि पुराणफलमिच्छता ॥
न दाम्भिकाय पापाय देवगुरुनिन्दकाय वै ।
देयं कदापि साधूनां देविषे न शठाय च ॥
शान्ताय रामचित्ताय शुश्रूषाभिरताय च ।
निर्म्मत्सराय शुचये देयं सद्वैष्णवाय च ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरोपाख्याने चतुर्थपादे १०६ अध्यायः ॥ १८ ॥ * ॥
इत्यष्टादशमहापुराणानुक्रमणिका समाप्ता ॥*॥
(अष्टादशमहापुराणानां निरुक्तिर्यथा शिवपुराणे उत्तरखण्डे मध्यमेश्वरमाहात्म्ये ।
"यत्र वक्ता स्वयं तत्र ! ब्रह्मा साक्षात् चतुर्म्मुखः ।
तस्मादेतन्नाम समाख्यातं पुराणं प्रथमं मुने ! ॥" १ ॥
तत्र इति मुनिसम्बोधनम् ।
"पद्मकल्पस्य माहात्म्यं तत्र यस्मादुदाहृतम् ।
तस्मात् पाद्मं समाख्यातं पुराणञ्च हितैषकम् ॥ २ ॥
पराशरकृतं यत्तु पुराणं विष्णुबोधकम् ।
तदेव व्यासकथितं पुलस्त्यपित्रोरभेदतः ॥ ३ ॥
यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं बहु ।
श्रूयतेऽमेतत् पुराणं हि पुराणज्ञा वदन्ति च ॥४॥
भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते ।
तत्तु भागवतं प्रोक्तं नतु देवीपुराणकम् ॥५॥
नारदोक्तं पुराणन्तु नारदीयं प्रचक्षते ॥ ६ ॥
यत्र वक्ता भवत्तत्र ! मार्कण्डेयो महामुनिः ।
मार्कण्डेयपुराणं हि तदाख्यातञ्च सप्तमम् ॥७॥
अग्नियोगात्तदाग्नेयं ८ भविष्योक्तैर्भविष्यकम् ।६।
विवर्त्तनात् ब्रह्मणस्तु ब्रह्मवैवर्त्तमुच्यते ॥ १० ॥
लिङ्गस्य चरितोक्तत्वात् पुराणं लिङ्गमुच्यते ।११।
वराहस्य च वाराहं पुराणं दादशं मुने ! ॥१२॥
यत्र स्कन्दः स्वयं श्रोता वक्ता साक्षात् महेश्वरः ।
तत्तु स्कान्दं समाख्यातम् १३ वामनस्य तु वामनम् ॥ १४ ॥
कौर्म्मं कूर्म्मस्य चरितम् १५ मात्स्यं मत्स्यस्य कीर्त्तितम् । १६ ।
गरुडस्तु स्वयं वक्ता यत्तद् गारुडसंज्ञकम् ॥ १७ ॥
ब्रह्माण्डचरितोक्तत्वात् ब्रह्माण्डं परिकीर्त्तितम् ॥" १८ ॥
पुराभवः वेदः । स्वार्थादिप्रतिपादको ग्रन्थः । यथा, शतपथब्राह्मणे । १४ । ६ । १० । ६ ।
"ऋग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि ॥"
तथा च बृहदारण्यकोपनिषदि ।
"अस्य महतो भूतस्य निश्वसितमेतद् यदृग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्वाङ्गिरस इतिहासः पुराणम् ॥"
"इदं वा अग्रेनैव किञ्चिदासीदित्यादिकं जगतः प्रागवस्थामुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम् ।" इति ऋग्वेदीयोद्घाते ॥ * ॥)
पुराणः, पुं, (पुरा पूर्व्वस्मिन् काले भव इति । पुरा + "सायंचिरंप्राह्णेप्रगेव्यये भ्येष्ठ्युट्युलौ तुट्च ।"४ । ३ । २३ । इति ष्ठ्युः निपातनात् तुड्भावः ।) यमः । (शिवः । यथा, महाभारते । १३ । १७ । १०६ ।
"बलवांश्चोपशान्तश्च पुराणः पुरुषर्षभः ॥")
पुरातने, त्रि । (यथा, मनुः । ५ । २३ ।
"बभूवुर्हि पुरोडाशा भक्ष्याणां स्नेहपक्तिमाम् ।
पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च ॥")
कार्षापणे, पुं क्ली । इति शब्दरत्नावली ॥ (यथा, मनुः । ८ । १३६ ।
"ते षोडश स्याद्धरणं पुराणश्चैव राजतम् ।
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ॥")
पुराणग, पुं, (पुराणैर्गीयते इति । गै + घञर्थे कः । यद्वा, पुराणं वेदं गायतीति । गै + "आतोऽनुपसर्गे ।" ३ । २ । ३ । इति कः ।) ब्रह्मा । इति हेमचन्द्रः । २ । १२६ ॥ पुराणगायके, त्रि ॥
पुराणपुरुषः, पुं, (पुराणैर्वेदादिभिरुपस्तुतः पुरुषः इति मध्यपदलोपिसमासः । यद्वा, पुराणः पुरुषः इति कर्म्मधारयः ।) विष्णुः । इति इति हेमचन्द्रः । २ । १२८ ॥ (यथा, पाद्मोत्तरखण्डे १११ अध्याये विष्णोरष्टोत्तरशतनामकीर्त्तने ।
"पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः ॥")
पुरातनः, पुं, (पुरा भवः । पुरा + ष्ट्युस्तुट् च ।) पुराणः । तदैदिकपर्य्यायः । प्रत्नम् १ प्रदिवः २ प्रवयाः ३ सनेमि ४ पूर्व्वम् ५ अह्नाय ६ । इति षट्पुराणनामानि । इति वैद्यनिघण्टौ ३ अध्यायः ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ६६ ।
"उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥")
पुरातनः, त्रि, (पुरा पूर्व्वस्मिन् काले भवः । पुरा + "सायंचिरेति ।"४ । ३ । २३ । इति ष्ट्युस्तुट् च ।) पूर्व्वकालभवः । पुराण इति भाषा । तत्पर्य्यायः । पुराणः २ प्रतनः ३ प्रत्नः ४ चिरन्तनः ५ । इत्यमरः । ३ । १ । ७७ ॥ चिरत्नः ६ । इति जटाधरः ॥ (यदुक्तं नीतिशास्त्रे ।
"नवं वस्त्रं नवं छत्रं नवा स्त्री नूतनं गृहम् ।
सर्व्वत्र नूतनं ग्राह्यं सेवकान्नं पुरातनं ॥")
पुराध्यक्षः, त्रि, (पुरस्य पुराधिकृतो वा अध्यक्षः ।) नगराधिकृतः । (यथा, महाभारते । १३ । १३५ । ११ ।
"चिकित्सकः कान्तपृष्ठः पुराध्यक्षः पुरोहितः ।
सांवत्सरो दृष्टाध्यायी सर्व्वे ते शूद्रसम्मिताः ॥")
अन्तःपुराध्यक्षलक्षणम् । यथा,—
"दृष्टः कुलोद्गतः शुद्धः पितृपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥"
इति युक्तिकल्पतरुः ॥
पुरारिः, पुं, (पुरस्य त्रिपुरस्य अरिः शत्रुः ।) शिवः । इति त्रिकाण्डशेषः ॥ (यथा, अध्यात्मरामायणे । १ । १ । ५ ।
"पुरारिगिरिसम्भूता श्रीरामार्णवसङ्गता ।
अध्यात्मरामगङ्गेयं पुनाति भुवनत्रयम् ॥")
पुरार्द्धविस्तरः, पुं, (पुरार्द्धे पूर्व्वार्द्धे विस्तरो विस्तृतिरस्येति ।) खेटः । इति हेमचन्द्रः । ४ । ३८ ॥
पुरावसुः, पुं, (पुरा पूर्व्वकाले उत्पत्तेः प्रागित्यर्थः वसुः ।) भीष्मः । इति त्रिकाण्डशेषः ॥
पुरावृत्तं, क्ली, (पुरा पुराणं वृत्तं चरितं यत्र ।) पूर्व्ववृत्तान्तनिबन्धनम् । तत्पर्य्यायः । इतिहासः २ । इत्यमरः । १ । ६ । ४ ॥ पूर्व्वचरितम् ३ । इति स्वामी ॥ (यथा, महाभारते । ७ । २८ । २४ ।
"शृणु गुह्यमिदं पार्थ ! पुरावृत्तं यथातथ ! ॥")
पुरासिनी, स्त्री, (पुरं नगरमस्यति त्यजतीति । अस + णिनिः + ङीप् ।) सहदेवीलता । इति राजनिर्घण्टः ॥
पुरासुहृत्, [द्] पुं, (पुरस्य त्रिपुरस्य असुहृत् शत्रुः ।) शिवः । इति हेमचन्द्रः । २ । ११४ ॥
पुरिः, स्त्री, (पूर्य्यते इति । पॄ + "हृगृपॄकॄतॄभ्य इः ।" उणा० ४ । १४२ । इति इः । स च कित् ।) पुरी । इत्यमरटीकायां भरतः ॥ नदी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (शरीरम् । इति पुरीतत्-शब्दटीकायां भरतः ॥)
पुरिः, पुं, (पूर्य्यते यज्ञशादिभिरिति । पॄ + इः । सच कित् ।) राजा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (सन्यासिविशेषः । शङ्कराचार्य्यशिष्यतोटकस्य शिष्येषु अन्यतमशिष्यासुपाधिविशेषः । इति केचित् ॥ तल्लक्षणं यथा, प्राणतोषिण्यामवधूतप्रकरणे ।
"ज्ञानतत्त्वेन संपूर्णः पूर्णतत्त्वपदे स्थितः ।
परब्रह्मरतो नित्यं पुरिनामा स उच्यते ॥"
तथा च सुखमालातन्त्रे २ पटले ।
"देवतायाः सदा ध्यानं श्रीगुरोः पूजनं तथा ।
अन्तर्यागेषु यो निष्ठः स वीरः पुरिरेव च ॥")

पुरी, स्त्री, (पुरि+वा ङीष्।) नगरी। इत्यमरः। २। २। १॥ (यथा, श्रीधरस्वामिधृत-भृगुवचनम्।
"नृपावासः पुरो प्रोक्ता विप्रां पुरमपीष्यते॥")
अस्या लक्षणादि पुरशब्दे नगरशब्दे च लिखितम्। तदर्शनं यथा, महाभारते।
३। १५। ५—८।
"पुरी समन्ताद्विहिता सपताका सतोरणा।
सचक्रा सहुड़ा चैव सयन्त्रखनका तथा॥
सोपग्लप्रतोलीका साट्टाट्टालकगोपुरा।
सचक्रग्रहणी चैव सोल्कालाताबपोथिका॥
सौष्टिका भरतश्रेष्ठ! समेरीपणवानका।
सतोरणाङ्गणा राजन्! सशतघ्नीकलाङ्गला॥
सभुशुण्ड्यश्मगुड़का सायुधा सपरश्वधा।
लोहचर्म्मवती चापि साग्निः सगुड़यष्टिका॥"
"पताकाध्वजाचलः। तोरणानि बहिर्द्वाराणि। चक्राणि योधगणाः। हुड़ास्तदाश्रयस्थानानि भाषायां बुरुजसंज्ञानि। अन्ये तु विष्णुचोत-सर्ज्जनयष्टयङ्गानि हुड़ा इत्याहुः उदाहरन्ति च। 'कल्पान्ते हुड़यष्टयङ्गानि रथस्योपरि सूरिभिः। विष्णुचक्रस्य गुह्यर्थं करादिसदृशं उच्यते॥'
इति॥
यन्त्राणि आग्नेयौषधबलेन दूरतः पिण्डोत्क्षेपणानि महान्ति भाषायां कामानसंज्ञकानि। क्षुद्राणि सीसगुलिकोत्क्षेपणयन्त्राणि बन्दूकसंज्ञकानि। खनकाः सुरङ्गद्वारा गुप्तमार्गकर्त्तारः॥
उपग्ल्याः सोढसुखाः कीलाः तदयुक्ताः प्रतोल्यो रथ्यामार्गा यस्यां सा। अट्टालकाः उत्सरियहाः। गोपुराणि पुरद्वाराणि। साट्टानि अट्टेन अन्नेन सहितानि अट्टालकादीनि यस्यां सा। साट्टेति विशेषणं उपग्ल्यस्य ग्रामान्तस्य रथ्यायाश्चेत्या सम्बध्यते। चक्रग्रहणी सैन्यनिग्राहिका मोर्चा इति म्लेच्छप्रसिद्धा। सोल्कालाताबपोथिका सोल्कमलातं ज्वालासहितमुल्मुकं यस्यां सा सोल्कालाता इति केचित्। अवबद्धाः पोथिका यन्त्रबद्धाः काष्ठपाषाणादयो रिपूणामुपरिपातनाय यस्यामिति प्राचः। उल्केवोल्का प्राणहरत्वात् यन्त्रोत्क्षिप्तो गोलः। अलातं सकाष्ठदण्डलोहमयमाग्नेयं प्रहरणं बाण इति भाषायां प्रसिद्धम्। तयोरप्रत्याख्येयगत्योरपि पोथिका पातयित्र्यः मन्त्रमय्यः शक्तयः कर्त्रा येन्द्रदत्तशक्तिसदृशा तदयुक्ताः सोल्कालाताबपोथिका॥*॥ उष्ट्रिका यन्त्रर्ष्टिमयानि भाण्डानि। सष्टिकेति पाठे ऋष्य आयुधविशेषाः॥*॥ अश्मगुड़काः वर्त्तुलीकृताः पाषाणाः। लोहमयानि चर्म्माणि कमठपृष्ठाकाराणि प्रहारवारकाणि ढाल इति प्रख्यातानि। साग्निः आग्नेयौषधसहिता गुड़ाः गोलकाः। यष्टयङ्गास्तदुत्क्षेपकयन्त्राणि। शत्रूणामुपरि पातनाय तप्तो गुड़ो द्रवीभूतो यत्र शिखरे स्थाप्यते तत्सहितेत्यन्ये॥" इति नीलकण्ठकृतभारतभावदीपनामटीका॥

पुरीतत्, पुं क्लीं, (पुरीं शरीरं तनोतीति। तन दुञ् विस्तारे+क्विप्। "गमः कौ।" ६।४।४०। इत्यत्र "गमादीनामिति वक्तव्यम्।" इति वार्त्तिकोक्त्या अनुनासिकलोपः। तुगागमश्च। पुरिं तनोतीति वाक्ये "नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ।" ६। ३। ११६। इति प्रत्यपदस्य दीर्घः।) अन्त्रम्। आँत इति ख्यातम्। अन्तति वध्नाति कालखण्डादि अन्त्रं अतिबन्धे नाम्नीतिरः। पुरिः शरीरं तनोतीति पुरीतत् क्विप् वनतनाद्यनिमामिति नलोपे स्वस्य तनिति तन् निपातनादिकारस्य दीर्घः। अन्त्रसाहचर्य्यात् क्लीबत्वम्। पुरीतदध्यियामिति वाचस्पतिः। इत्यमरभरतौ॥

पुरीमोहः, पुं, (पुरीं शरीरं मोहयतीति। मुह+णिच्+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) धुस्तूरः। इति शब्दमाला॥

पुरीषं, क्लीं, (पिपर्त्ति शरीरमिति। प+"शॄपॄभ्यां किच्च।" उणा०४।२०।इति ईषन्। स च कित्।) विष्ठा। इत्यमरः। २। ६। ६६॥
तदुत्सर्गविधिर्यथा,—
"मुहूर्त्ते ब्राह्म उत्थाय राजिवासं परित्यजेत्।
परिधायापरं वस्त्रं प्रयतस्थानतोऽन्यतः॥
सुखाङ्गिरस्तान् प्रक्षाल्य हिरण्यं तत्तो द्विजः।
क्षणं क्षणं स्थितिं कृत्वा खनित्वा नैर्ऋतीं दिशम्॥
खनित्रखननेनैव द्वादशाङ्गुल्यधोमुखम्।
गृहीत्वोदकपात्रञ्च मितं गच्छेद्दुरुत्तमम्॥
ग्रामाद्वा शरविक्षेपमाचामन्नुदिते रवौ।
मैत्रमावश्यकं कर्म्म नगराच्च चतुर्गुणम्॥
तत्रिसुहूर्त्तायतं गर्त्तं तथा कृत्वा गभीरकम्।
कृत्वा लङ्घिं खनित्रेण कुशैराच्छाद्य तत्तृणम्॥
शुच्चैः काष्ठैरयज्ञीयैर्भूगर्त्तं सवगुण्ठितः।
संवीताङ्गो वेणुदले पत्रैर्वाप्यथभाजने॥
छत्रं खनित्रं संस्थाप्य वारिपात्रसुपानहौ।
ततो द्विजरूपविशेद्रक्षेणाच्छाद्य मस्तकम्॥
यज्ञोपवीतं कर्णेऽथ धृत्वा मौनी च दक्षिणे।
आगतो द्विजमग्निं नोपश्यन् सन्तञ्च भास्करम्॥
गुरुं समीरणं सर्व्वदेवतामूर्त्तिमेव च।
मातरं पितरं चन्द्रं सर्व्वं गुरुजनं स्त्रियम्॥*॥
उदङ्मुखस्त्रिसन्ध्यासु दिवसे च यदा निशि।
दक्षिणामुख उत्सर्गं कुर्य्याच्चपूरीषयोः॥
पूर्व्वाह्णे तु दिवः कुर्य्यात्पश्चिमाभिमुखोऽथवा।
अपराह्णे पूर्व्वमुखो मूत्रगूथविसर्जनम्॥
मध्याह्ने प्रयतः कुर्य्यादुदगवाग्दक्षिणामुखः।
दक्षिणाभिमुखो रात्रौ द्विजो मैत्रं प्रयत्नतः॥
निशायामन्धकारे तु छायायां दिवसे तथा।
यथेच्छसुमुखो भूत्वा मैत्रं कुर्य्यात् द्विजो भयात्॥
दिगभ्रमाच्च मनोदुःखाद्विण्मूत्रस्य विसर्ज्जनम्।
मोहाद्यधोमुखः कुर्य्यादुदगवाक् प्रयतो द्विजः॥
सन्यासी ब्रह्मचारी च वानप्रस्थो गृही द्विजः।
शाखाध्यायी च देशानां सर्व्वयज्ञेषु दीक्षितः॥
मुनिश्च सर्व्वधर्म्मज्ञो दान्तः शान्त उदारधीः।
सदोत्तरमुखः कुर्य्यादेष्वन्यो नान्य एव च॥

प्रातश्च मैत्रं सायाह्णे दक्षिणाभिमुखो निशि।
योगिनान्तु यथा स्त्रीणां शूद्रादीनामयं क्रमः॥
न देवायतने क्षेत्रे न च जले नदे।
न नदीकूपमार्गेषु न वापीगोष्ठभस्मसु॥
न चिताग्निश्मशानेषु गोपुरे न द्विजालये।
नाभ्यःसमीपे न पुष्पे नाकाशे न च शाद्वले॥
न सस्ये न काम्ये च न तीर्थे न द्विजालये।
न यज्ञवृक्षसस्येषु नोपहारे चतुष्पथे॥
न शुष्कक्षेत्रे न खले पुष्पोद्याने न चत्वरे।
सोपानत्को न गच्छेच्च न रथ्यासेव्यभूतले॥
न वैद्यावालये गोत्रे न सूर्य्याभिमुखस्तथा।
न फालकृष्टकेदारे न तिष्ठेच्च कदाचन॥
न गच्छन्न च वल्मीके न च पर्व्वतमस्तके।
न जलं न दिशो भागान्नाकाशमवलोकयन्॥
न गोव्रजे नदीतीरे नित्यस्थाने न गोमये।
न यज्ञभूमौ न गृहे न पवित्रीकृतस्थले॥
द्विजो न देहच्छायायां शुक्लसूत्रविसर्जनम्।
कुर्य्याद्दृश्यैकाकूटे न च सप्राणिगर्त्तके॥
उद्धृताभ्योऽस्तिकाभ्यामित्यं नारद! यत्नतः।
क्षेत्रोत्सर्गं ततः कुर्य्यात् शौचं मृच्चपूरीषयोः॥
शुष्ककाष्ठेन लोष्ठेनाथशौचेन तृणेन वा।
प्रमार्ज्य गुह्यसुत्तिष्ठेत् शिश्नमेव विशेषतः॥
विधृत्य वामहस्तेन शिश्नमन्तूपवीतिनिशि।
चेद्दिवाभुखः सन्ध्यां दिवोत्तरमुखस्तदा॥
पूतिगन्धिजलं दुष्टं सफेनञ्च सबुद्बुदम्।
तीर्थादिकं सलवणं प्राधो वर्ज्यान्तरन्तथा॥
सप्तद्रगानदीवारः सासुद्रश्च सकर्दमम्।
यवनान्त्यजखाताम्भः सप्तद्रगनगोदकम्॥
धान्यक्षेत्रस्थ सलिलं सकीटञ्च परित्यजेत्।
मानवो देवखाताम्भः सकले शौचकर्म्मणि॥*॥
मृदः सकीटास्तीर्थानां देवायतनगोष्ठयोः।
नदीदधिनदीदेवखाततीरस्थ मृत्तिकाः॥
महीतलोद्भवाः क्षेत्रकूपयोः सिकताश्च याः।
अन्तर्जला धूलिमृदो वल्मीकस्थ च कर्दमाः॥
ऊषराश्च हलोत्खाता मृत्तिका भवनस्थ च।
अश्वत्थतुलसीधात्रीमूलादीनाञ्च या मृदः॥
श्मशानभूमेः शैलस्य तथा पूतस्थलस्य च।
शौचावशिष्टमार्गस्थ आखूत्खाताश्च मृत्तिकाः॥
यज्ञस्थानस्थ विप्राणां साधूनामालयस्य च।
मृत्तिका वर्ज्जयेदेता देवर्षे! शौचकर्म्मणि॥
पवित्रस्थानतो ग्राह्या द्वादशाङ्गुल्यधोमृदः।
द्विजैः सकलशौचार्थं मृकैरादिविवर्जिताः॥*॥
प्रथमेऽङ्गिर्नरः शौचं कुर्य्यान्मृद्भिरतः परम्।
पुनर्जलैः पुरीषस्य यथा गन्धक्षयो भवेत्॥
मृत्तिका प्रथमा शौचे लर्द्धप्रस्थतिसम्मिता।
पूर्णप्रस्थतिमात्रा तु द्वितीया सजला तथा॥
तृतीया प्रमिता शौचे सार्द्धप्रस्थातमृत्तिका।
चतुर्थ्याद्या क्रमादेवमर्द्धप्रस्थतिवर्द्धिता॥
यया मृत्तिकया पूर्यं त्रिपर्व्वं शौचकारिणः।
अर्द्धप्रस्थतिमात्रा सा मुनिभिः परिकीर्त्तिता॥
गुदे दद्यान्मृदस्तिस्रः पञ्च वा सप्त वा तथा।
मृदमेकां तथा शिश्ने तिस्रो वा मृत्तिका हृयम्॥

सप्त वामकरे दद्यान्मृदस्त्रिंशच्चतुर्हरेत् ।
तिस्रो वा हस्तयोः सप्त चतुर्हस्ते च षोड़श ॥
पाण्योरेकां मृदं पृष्ठे षड्वा तिस्रश्च मृत्तिकाः ।
हस्तद्वयनखेष्वेकां तिस्रश्च षड्मृदस्तथा ॥ * ॥
मैथुने रेतःस्खलने मूत्रोत्सर्गे च मृद्वयम् ।
दद्यात्तिस्रश्च शिश्नेकां तिस्रो वामकरे मृदः ॥
हस्ते च मृद्वयं मूत्रेत्तिस्रो वा गुह्यतत्परः ।
पदेकैके द्विजस्तिस्रो गृहीत्वा शौचमाचरेत् ॥
गृहिणो द्विगुणं शौचं यतेश्च ब्रह्मचारिणाम् ।
गृहस्थवानप्रस्थानां प्रोक्तं त्रिगुणमेव च ॥
सन्यासिनां वैखानानां शौचं स्यात् चतुर्गुणम् ।
हस्तपाद्दारिपात्रन्तु मृद्भिरद्भिश्च गोमयैः ॥
दिवा यद्धितं शौचं निशायामर्द्धकं भवेत् ।
एतदर्द्धमशौचे तु जातके मृतकेऽपि च ॥
चौरादिबाधिते मार्गे शौचमस्यार्द्धमाचरेत् ।
योषितामेतदर्द्धन्तु शूद्रादीनाञ्च नारद ! ॥
व्याधिभिश्चातुरो मर्त्य आर्त्तो यदि यथाबलम् ।
शौचं कुर्य्यात् क्षतं यत्र तत् स्थानं शोधयेज्जलैः ॥
वेदस्मृतिपुराणानि धर्म्मशास्त्राणि नैत्यिकम् ।
नैमित्तादिकर्म्म यः कुर्य्यादिहाय मन्दधीर्द्विजः ॥
प्रतिप्रज्ञानमायुश्च प्रज्ञां हन्ति यशः श्रियम् ।
बलमाचारहीनस्य सदा तस्यापवित्रता ॥ * ॥
सात्वतास्त्रेद्विजा भूपा वैश्यशूद्रान्त्यजाः स्त्रियः ।
कुर्व्वन्ति शौचं यत्नेन यावच्चेतःपवित्रता ॥
येषां श्रवणस्य मननं तथा नामप्रकीर्त्तनम् ।
सदैव स्मरणं भागवतानां साधुसेवनम् ॥
भक्तिप्रधौतमनसां गोविन्दार्पितकर्म्मणाम् ।
वाह्यान्तःशुद्धचित्तानां शुचिता तदहर्निशम् ॥
मृद्गोमयजलैः शौचमनेकैः कुरुते यदि ।
मनोऽपवित्रता यस्य कदाचिद्वै न शुध्यति ॥
गोविन्दद्दासता नास्ति यस्य लोकस्य जन्मनि ।
सोऽपि देहाशुचिः श्रुत्वा शौचं नैत्यादिकर्म्मसु ॥
शतधा यदि दैवर्षे शौचं कुर्य्यात् सहस्रधा ।
मृद्दारिगोमयैर्लोको भावदुष्टो न शुध्यति ॥
सदा चित्तापवित्रत्वमकार्य्यां भुवि यो नरः ।
तस्य तु स्यान्न मैत्यादिशौचेनैव स शुध्यति ॥
पर्व्वताकारकूटैश्च गोविट्सञ्चयदोजलैः ।
शौचं कृत्वा न शुध्येत दुश्चित्तो भवेद्यदि ॥"
इति पाद्मोत्तरखण्डे १०६ अध्यायः ॥
(उरुकम् । इति निघण्टुः । १ । १२ ॥ "पूरयति जगत् प्रलयकाले पूर्य्यते अनेन तड़ागादि पालकं वा जगतः प्रस्योत्पत्तिहेतुत्वात् । पॄणातेर्वा बाहुलकात् कीषन्प्रत्ययः ईकारस्योकारादेशः स च पकारात् परो द्रष्टव्यः ।" इति तत्र देवराजयज्वा ॥ यथा, ऋग्वेदे । १ । १६३ । १ ।
"यदक्रन्दः प्रथमं जायमान
उद्यन्त्समुद्रादुत वा पुरीषात् ॥"
"पुरीषात् सर्व्वकामानां पूरकाद्वृद्धिकात् ॥"
इति तद्भाष्ये सायनः ॥)

पुरीषजः, पुं, (पुर्य्या देहात् द्रव्यते त्यज्यते इति । पुरी + द्रव + कर्म्मणि क्विप् ।) पुरीषम् । इति त्रिकाण्डशेषः ॥

पुरीषमः, पुं, (पुरीषं मिमीते इति । मा + कः ।) माषः । इति त्रिकाण्डशेषः ॥

पुरुः, पुं, (पिपर्त्ति पूर्य्यते वेति । पॄ + "पॄभिदिव्यधिगृधिधृषिक्षिपेः ।" उणा० १ । २४ । इति कुः । "उदोष्ठ्यपूर्व्वस्य ।" ७ । १ । १०२ । इति उत्वम् । "उरण्रपरः ।" १ । १ । ५१ । इति रपरत्वम् ।) देवलोकः । नृपभेदः । स च ययातेः कनिष्ठपुत्रः । (आदूदन्तोऽपि पाठः ।) परागः । इति मेदिनी । रे, ५८ ॥ दैत्यः । इत्युणादिकोषः ॥ नदीभेदे, त्रि । इति शब्दरत्नावली ॥ (राजविशेषः । यथा, महाभारते । २ । ४ । २७ ।
"सुकर्म्मा चेकितानश्च पुरुश्चामित्रकर्षणः ॥"
चाक्षुषमनोः पुत्रभेदः । यथा, मार्कण्डेये । ७६ । ५५ ।
"उरुपुरुद्युतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥"
पर्व्वतभेदः । । यथा, महाभारते । ३ । ६० । २२ ।
"पर्व्वतश्च पुरुर्नाम यत्र जातः पुरूरवाः ।
भृगुर्यत्र तपस्तेपे महर्षिगणसेविते ॥"
शरीरम् । यथा, शुक्रविजये । १३ अध्याये ।
"पुरुसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।
शुकारस्य वकारोऽयं यत्नेन प्रयुज्यते ॥")
प्रचुरे, त्रि । इत्यमरः । ३ । १ । ६३ ॥ (यथा, नैषधे । १६ । ५ ।
"स्फुरति तिमिरस्तोमः पङ्कप्रपञ्च इवोच्चकैः
पुरुसितगरुच्चक्षुश्चक्षुष्पुटस्फुटचुम्बितः ॥")

पुरुकुत्सवः, पुं, इन्द्ररिपुविशेषः । यथा,—
"इन्द्रो विपश्चिद्वेषानां तद्रिपुः पुरुकुत्सवः ।
जघान हस्तिरूपेण भगवान्मधुसूदनः ॥"
इति गारुड़े ८७ अध्यायः ॥

पुरुदंशकः, पुं, (पुरु बहुलं यथा स्यात्तथा दशतीति । दन्श + खुल् ।) हंसः । इति त्रिकाण्डशेषः ॥

पुरुदंशाः, [स्] पुं, (पुरुं दैत्यविशेषं दशति छिनत्ति । दन्श + असुन् ।) इन्द्रः । इति जटाधरः ॥

पुरुषः, पुं, (पुरति अग्रे गच्छतीति । पुर + "पुरः कुषन् ।" उणा० ४ । ७४ । इति कुषन् ।) पिपर्त्ति पूरयति बलं यः पुषं वा एति य इति वा । पुमान् । (यथा, मनौ । १ । ३२ ।
"द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः ॥")
तत्पर्य्यायः । पूरुषः २ नाः ३ नरः ४ पञ्चजनः ५ पुमान् ६ अर्थाश्रयः ७ अधिकारी ८ कर्म्मार्हः ९ जनः १० अर्थवान् ११ । इति राजनिर्घण्टः ॥ मनुष्यः १२ मानवः १३ मर्त्यः १४ मानुषः १५ मनुः १६ । इति शब्दरत्नावली ॥ रसिकराजः १७ घनकामयामा १८ मदनशायकाङ्कः १९ मन्मथशायकलक्ष्यः २० । इति कविकल्पलता ॥ स चतुर्विधः । यथा,—
"शुक्लो नीलो हरिश्चाश्वो नृणां जातिचतुष्टयम् ॥"
शुक्लादीनां लक्षणं यथा,—
"मृदुवचनसुशीलः कोमलाङ्गः सुकेशः
सकलगुणनिधानः सत्यवादी शुक्लोऽयम् ।१।
वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
श्चपलमतिसुदेहः श्रीघ्रवेगो नीलोऽयम् ॥२॥
बहुगुणबहुवन्धुः श्रीघ्रकामो नताङ्गः
सकलरुचिरदेहः सत्यवादी हरोऽयम् ।३।
उदरकटिशुभ्रः स्यादुपकण्ठाधरौष्ठो
दशनवदननासाश्रोत्रदीर्घो हि वाजी ॥"४॥
इति रतिमञ्जरी ॥ * ॥
तस्य पञ्चलक्षणत्वं यथा,—
"प्राच्ये त्यागी गुणे रागी भोगी परिजनैः सह ।
शुक्ले बोद्धा रणे योद्धा पुरुषः पञ्चलक्षणः ॥"
इति प्राचीनाः ॥
जितेन्द्रियस्य पुरुषत्वं यथा,—
"सा श्रीर्या न मदं कुर्य्यात् स सुखी तृष्णया जृम्भितः ।
तन्मित्रं यत्र विश्वासः पुरुषः स जितेन्द्रियः ॥"
इति गारुड़े १६ अध्यायः ॥ * ॥
(अस्य लक्षणादिकं यथा,—
"उन्मानमानगतिसंहतिसारवर्ण-
स्नेहस्वरप्रकृतिसत्त्वमनूकमादौ ।
शौचं सुजाश्च विधिवत् कुशलोऽवलोक्य
सामुद्रविद्वदति यातमनागतञ्च ॥
अक्षेदनौ मृदुतलौ कमलोदराभौ
श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी ।
उष्णौ शिराविरहितौ सुनिगूढगुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य ॥
शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःखप्रदौ ।
मार्गायोत्कटकौ कषायसदृशौ वंशस्य विच्छित्तिदौ
ब्रह्मघ्नौ परिपक्वमृद्द्युतितलौ पीतावगम्यारतौ ॥
प्रविरलतनुरोमवृत्तजङ्घा
स्थिरदृकरप्रतिमैर्वरोरुभिश्च ।
उपचितसमजानवश्च भूपा
धनरहिताः श्वशृगालतुल्यजङ्घाः ॥
रोमैकैकं कूपके पार्थिवानां
द्वे द्वे क्षेये पण्डितश्रोत्रियाणाम् ।
चाण्डालैर्नः खरा मानवा दुःखभाजः
केशाश्चैवं निन्दिताः पूजिताश्च ॥
निर्मांसजानुस्त्रियते प्रवासे
सौभाग्यमल्पैर्विकटैर्दरिद्राः ।
स्त्रीनिर्जिताश्चापि भवन्ति निस्वै
राज्यं समासेद्य महद्धिराजुः ॥
लिङ्गेऽल्पे धनवानपत्यरहितः स्थूले विहीनो धनै-
र्मेढ्रे वामनते सुतार्थरहितो वक्रेऽन्यथा पुत्रवान् ।
दारिद्र्यं विनते त्वधोऽल्पतनयो लिङ्गे शिरासन्तते ।
स्थूलग्रन्थियुते सुखी मृदु करोत्यन्तं प्रमेहादिभिः ॥

पुरुषः

कोशनिगूढैर्भूपा दीर्घैर्भवेच्च वित्तपरिहीनाः । ऋजुवृत्तग्रोफसो लघुशिरालशिराश्च धनवन्तः ॥ जलस्थलुरेकवृषणो विषमैः स्त्रीचञ्चलः समैः क्षितिपः ।

ह्रस्वायुश्चोद्वृद्धैः प्रलम्बवृषणस्य प्रूतमायुः ॥ रक्तैराढ्या मणिभिर्निर्द्रव्याः पाण्डुरैश्च मलिनैश्च । सुखिनः सशब्दमूत्रा निःस्रा निःशब्दधाराश्च ॥ द्विश्चिचतुर्धाराभिः प्रदक्षिणावर्तवलितमूत्राभिः । पृथ्वीपतयो ज्ञेया विकीर्णमूत्राश्च धनहीनाः ॥ एकैव मूत्रधारा वलिता रूपप्रधानसुतदात्री । स्निग्धोन्नतसममण्डयो धनवनितारत्नभोक्तारः ॥ मणिभिश्च मध्यनिम्नैः कन्यापितरो भवन्ति निःस्वाश्च ।

वहुपशुभाजो मध्योन्नतेश्च नाभुलवर्णैर्धनिनः ॥ परिशुष्कवस्तिशीर्षैर्धनरहिता दुर्भगाश्च विज्ञेयाः ।

कुसुमसमगन्धसुक्ता विज्ञातया महीपालाः ॥ मधुगन्धे वहुवित्ता मत्स्यसगन्धे वहून्यपत्यानि । तनुशुक्रः स्त्रीजनको मांसगन्धो महाभोगी ॥ मदिरागन्धे यज्वा क्षारसगन्धे च रेतसि दरिद्रः । शीघ्रं मैथुनगामी दीर्घायुरतोऽन्यथाल्पायुः ॥ निःस्रोऽतिस्थूलस्फिक् समांसलस्फिक् सुखान्वितो भवति ।

व्याघ्रान्तोऽध्यर्धस्फिग्मण्डूकस्फिग्नराधिपतिः ॥ सिंहकटिर्मनुजेन्द्रः कपिकरभकटिर्धनैः परित्यक्तः ।

समजठरा भोगयुता घटपिठरनिभोदरा निःस्वाः ॥

अविकलपार्श्वा धनिनो निस्नैर्वक्रैश्च भोगसन्त्यक्ताः ।

समकुक्षा भोगाढ्या निम्नाभिर्भोगपरिहीनाः ॥ उन्नतकुक्षाः क्षितिपाः कुटिलाः स्युर्मानवा विषमकुक्षाः ।

सर्पोदरा दरिद्रा भवन्ति वक्राशिनश्चैव ॥ परिमण्डलोन्नताभिर्विस्तीर्णाभिश्च नाभिभिः सुखिनः ।

स्वल्पा त्वदृश्यनिम्ना नाभिः क्लेशावहा भवति ॥ वलिमध्यगता विषमा शूलाबाधं करोति नैःस्वाश्च ।

प्राक्यं वामावर्त्ता करोति मेधां प्रदक्षिणतः ॥ पार्श्वायता चिरायुषमुपरिष्टाच्चेश्वरं गवाढ्यमधः ।

घृतपत्रकर्णिकाभा नाभिर्मनुजेश्वरं कुरुते ॥ शुक्लान्तं स्त्रीभोगिनमाचार्यं वहुसुतं यथासङ्ख्यम् ।

एकद्विचिचतुर्भिर्वलिभिर्विद्यान्नृपं त्ववलिम् ॥ विषमवलयो मनुष्या भवन्त्यगम्याभिगामिनः पापाः ।

ऋजुवलयः सुखभाजः परदारद्वेषिणश्चैव ॥ मांसलगण्डैः पार्श्वैः प्रदक्षिणावर्तरोमभिर्भूपाः ।

विपरीतैर्निर्द्रव्याः सुखपरिहीनाः परप्रेष्याः ॥

पुरुषः

सुभगा भवन्त्यगुह्यचूचुका निर्धना विषमदीर्घैः । पीनोपचितनिमग्नैः क्षितिपतयश्चूचुकैः सुखिनः ॥ हृदयं सुसंवृतं पृथु च वपनं मांसलं च नृपतीनाम् ।

अधमानां विपरीतं खररोमचितं शिरालच्च ॥ समवक्षसोऽर्थवन्तः पीनैः शूराश्चकिक्षिनास्तनुभिः ।

विषमं वक्षो येषां ते निःस्वाः शुष्कनिधनाश्च ॥ विषमैर्विषमो जन्तुभिरर्थविहीनोऽस्थिसन्धिपरिगूढैः ।

उन्नतजत्रुर्भागी निस्नैर्निःस्वोऽर्थवान् पीनैः ॥ चिपिटग्रीवो निःस्वः शुष्का सशिरा च यस्य वा ग्रीवा ।

महिषग्रीवः शूरः प्राक्षान्तो वृषसमग्रीवः ॥ कम्बुग्रीवो राजा प्रलम्बकण्ठः प्रभक्षणो भवति । पृष्ठमभयमरोमशमर्थवतामशुभदमतोऽन्यत् ॥ अखेदनपीनोन्नतसुगन्धिसमरोमसङ्कुलाः कक्षाः ।

विज्ञातया धनिनामतोऽन्यथार्थैर्विहीनानाम् ॥ निर्मांसौ रोमचितौ भग्नावक्ष्यौ च निर्धनस्यांसौ ।

विपुलावक्षुच्छिन्नौ सुश्लिष्टौ सौख्यवीर्य्यवताम् ॥ करिकरसदृशौ वृत्तावाजानुवलम्बिनौ समौ पीनौ ।

बाहू पृथिवीशानामधमानां रोमशौ ह्रस्वौ ॥ हस्ताङ्गुलयो दीर्घाश्चिरायुषामवलिताश्च शुभगानाम् ।

मेधाविनाश्च सूक्ष्माश्चिपिटाः परकर्मनिरतानाम् ॥ शूलाभिर्धनरहिता वह्निर्नताभिश्च शुष्कनिर्याशाः ।

कपिसदृशकरा धनिनो याज्ञोपमपाणयः पापाः ॥ मणिवन्धनैर्निगूढैर्दृढैश्च सुश्लिष्टसन्धिभिर्भूपाः । हीनैर्हस्तच्छेदः स्थैर्यैः सशब्दैश्च निर्द्रव्याः ॥ पिठवित्तेन विहीना भवन्ति निम्नेन करतलेन नराः ।

संवृतनिम्नैर्धनिनः प्रोत्तानकराश्च दातारः ॥ विषमैर्विषमा निःस्वाश्च करतलैरीश्वरास्तु लाक्षाभैः ।

पीतैरगम्यवनिताभिगामिनो निर्धना रूक्षैः ॥ तुषसदृशनखाः क्लीवाश्चिपिटैः स्फुटितैश्च वित्तसन्त्यक्ताः ।

कनखविवर्णैः परतर्कुकाश्च तान्त्रैश्च भूपतयः ॥ अङ्गुष्ठयवैराढ्याः सुतवन्तोऽङ्गुष्ठमूलगैश्च यवैः ।

दीर्घाङ्गुलिपर्वाणः सुभगा दीर्घायुषश्चैव ॥ स्निग्धा निम्ना रेखा धनिनां तद्वत्यत्ययेन निःस्वानाम् ।

विरलाङ्गुलयो निःस्वा धनसञ्चयिनो घनाङ्गुलयः ॥ तिस्रो रेखा मणिवन्धगोत्थिताः करतलोपगा नृपतेः ।

पुरुषः

मीनयुगाङ्कितपार्ष्णिर्नित्यं सत्रप्रदो भवति ॥ वज्राकारा धनिनां विद्याभाजान्तु मीनपुच्छनिभाः ।

शुक्लातपत्रशिविकागजाश्वपद्मोपमा नृपतेः ॥ कलशुल्वशालपताकाङ्कुशोपमाभिर्भवन्ति निधिपालाः ।

दामनिभाभिश्चाढ्याः खस्तिकरूपाभिरैश्वर्यम् ॥ चक्रासिपरशुतोमरशक्तिधनुःकुन्तसन्निभा रेखाः ।

कुर्वन्ति चमूनाथं यज्वानमुलूखलाकाराः ॥ मकरध्वजकोष्ठागारसन्निभाभिर्महाधनोपेताः । वेदीनिभेन चैवाग्निहोत्रिणो ब्रह्मतीर्थेन ॥ वापीदेवकुलाद्यैर्धर्मं कुर्वन्ति च चिकीर्षाभिः ।

अङ्कुशमूलरेखाः पुत्राः स्युर्दारिकाः क्षमाः ॥ रेखाः प्रदेशिनीगाः शतायुषां कल्पनीयसूनाभिः ।

छिन्नाभिर्भ्रमपतनं वहुरेखारेखिणो निःस्वाः ॥ अतिशयदीर्घैश्चियुकैर्निर्द्रव्या मांसलैर्धनोपेताः ।

विम्बोपमैरवक्रैरधरैर्भूपास्तनुभिरस्राः ॥ ओष्ठैः स्फुटितविखण्डितविवर्णरूक्षैश्च धनपरित्यक्ताः ।

स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः ॥ जिह्वा रक्ता दीर्घा श्लक्ष्णा सुषमा च भोगिनां ज्ञेया ।

श्वेता क्षीणा परुषा निर्द्रव्याणां तथा तालु ॥ वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समश्च भूपानाम् । विपरीतं क्लेशसुखं महासुखं दुर्भगाग्राश्च ॥ स्त्रीसुखमनपत्यानां शास्त्रवतां मङ्गलं परिज्ञेयम् ।

दीर्घं निर्द्रव्याणां भीरुसुखाः पापकर्माणः ॥ चतुरस्रं धूर्तानां निम्नं वक्रश्च तनयरहितानाम् ।

कृपणानामतिह्रस्वं सम्पूर्णं भोगिनां कान्तम् ॥ अस्फुटितायं स्निग्धं श्लक्ष्णं शुभं मृदु च सन्ततश्चैव ।

रक्तैः परप्रेष्यौराः श्लक्ष्णैरश्लक्ष्णैश्च विज्ञेयाः ॥ निर्मांसैः कर्शैः पापस्तब्धवक्रपर्टैः सुवहुभोगाः ।

कृपणाश्च दुःखकर्णाः शुष्कुशवणाश्च भूपतयः ॥ रोमशकर्णा दीर्घायुषस्त धनभागिनो विपुलकर्णाः ।

क्रूराः शिरावगद्धैर्वालमैर्मांसलैः सुखिनः ॥ भोगी स्निग्धगण्डो मन्त्री सम्पूर्णमांसगण्डो यः । सुखभाक् शुकसमनासश्चिरजीवी शुष्कनासश्च ॥ छिन्नाशुरूपयागम्यगामिनो दीर्घया तु सौभाग्यम् ।

आकुञ्चितया चौरः स्त्रीगन्तुः स्यात्चिपिटनासः ॥

धनिनोऽग्रवक्रनासा दक्षिणवक्राः प्रभक्षणाः क्रूराः ।

ह्रस्वौ खण्डच्छिन्ना सुपुटा नासा सभाग्यानाम् ॥

धनिनां चुतं सकृद् द्विस्त्रिपिण्डितं ङादि सानुनादश्च ।
दीर्घायुषां प्रमुक्तं विज्ञेयं संहतश्चैव ॥
पद्मदलाभैर्धनिनो रक्तान्तविलोचनाः श्रियोभाजः ।
मधुपिङ्गलैर्महार्था मार्जारविलोचनाः पापाः ॥
हरिणाक्षा मण्डललोचनाश्च जिह्मेक्षा लोचनैश्चौराः ।
क्रूराः केकरनेत्रा गजसदृग्रूक्षाश्च भूपतयः ॥
ऐश्वर्यं गम्भीरैर्नीलोत्पलकान्तिभिश्च विद्वांसः ।
अतिकृष्णतारकाणामल्पायुत्वाटनं भवति ॥
मन्त्रित्वं स्थूलदृशां श्यावेक्षणाश्च भवति सौभाग्यम् ।
हीना दृग्भिःखानां स्निग्धा विपुलार्थभोगवताम् ॥
अभ्युन्नताभिरल्पायुषो विशालोन्नताभिरतिसुखिनः ।
विषमभ्रुवो दरिद्रा बालेन्दुनतभ्रुवः सधनाः ॥
दीर्घासंसक्ताभिर्धनिनः खण्डाभिरर्थपरिहीनाः ।
मध्यविनतभ्रुवो ये ते सक्ताः स्त्रीष्वगण्यासु ॥
उन्नतविपुलैः ग्रहैर्धन्या निम्नैः सुतार्थसन्त्यक्ताः ।
विषमललाटा विधना धनवन्तोऽर्धेन्दुसदृशेन ॥
शुक्तिविशालैराचार्यता शिरासन्तैरधर्मरताः ।
उन्नतशिराभिराढ्याः स्वस्तिकवत्संस्थिताभिश्च ॥
निम्नललाटा वधबन्धभागिनः क्रूरकर्मनिरताश्च ।
अभ्युन्नतैश्च भूपाः क्षपणाः स्युः सङ्कटललाटाः ॥
रुदितमदीनमनग्नं स्निग्धं च शुभावहं मनुष्याणाम् ।
रूक्षं दीनं प्रचुराश्रु चैव न शुभप्रदं पुंसाम् ॥
हसितं शुभदमकस्मं सनिमीलितलोचनं च पापस्य ।
हृष्टस्य हसितमसकृत् सोन्मादस्यासकृत्प्रान्ते ॥
तिस्रो रेखाः शृतजीविनां ललाटायताः स्थिता यदि ताः ।
चतसृभिरवनीशत्वं नवतिस्त्रायुः सपञ्चाब्दा ॥
विच्छिन्नाभिश्चागम्यगामिनो नवतिरप्यरेखेण ।
केशान्तोपगताभी रेखाभिरशीतिवर्षायुः ॥
पञ्चभिरायुः सप्ततिरेकाग्रावस्थिताभिरपि षष्टिः ।
बहुरेखेण शृतार्धं चत्वारिंशच्च वक्राभिः ॥
चिंशद्भूभल्याभिर्विंशतिकश्चैव वामवक्राभिः ।
क्षुद्राभिः खण्डायुर्न्यूनाभिश्चान्तरे कण्यम् ॥
परिमण्डलैर्गवाढ्याश्चक्राकारैः शिरोभिरवनीशाः ।
क्षिप्टैः पिङ्गमाक्षा करोटिशिरसां चिरायुत्वम् ॥
घटमूर्धा ध्वानरुचिर्हिमस्रक्कः पापकृद्धनैश्चयुक्तः ।
निम्नस्तु शिरो महतां बहुनिम्नमनर्थदं भवति ॥
एकैकभवैः स्निग्धैः कृष्णैराकुञ्चितैरभिन्नाग्रैः ।
रूढुभिर्न चातिबहुभिः केशैः सुखभाग् नरेन्द्रो वा ॥

बहुमूलविषमकपिलाः स्थूलस्फुटिताग्रपरुषरूक्षाश्च ।
अतिकुटिलाश्चातिघनाश्च मूर्धजा वित्तहीनानाम् ॥
यद्यद्गात्रं रूक्षं मांसविहीनं शिरावनद्धं च ।
तत्तदनिष्टं प्रोक्तं विपरीतमतः शुभं सर्वम् ॥
त्रिषु विपुलो गम्भीरस्त्रिष्वेव षड्न्नतश्चतुर्ह्रस्वः ।
सप्तसु रक्तो राजा पञ्चसु दीर्घश्च सूक्ष्मश्च ॥
नाभिः स्वरः सत्त्वमिति प्रदिष्टं
गम्भीरमेतत्त्रितयं नराणाम् ।
उरो ललाटं वदनं च पुंसां
विस्तीर्णमेतत्त्रितयं प्रशस्तम् ॥
वक्षोऽथ कक्षा नखनासिकास्यं
ककाटिका चेति षडुन्नतानि ।
ह्रस्वानि चत्वारि च लिङ्गपृष्ठं
ग्रीवा च जङ्घे च हितप्रदानि ॥
नेत्रान्तपादकरताल्वधरोष्ठजिह्वा
रक्ता नखाश्च खलु सप्त सुखावहानि ।
सूक्ष्माणि पञ्च दशनाङ्गुलिपर्वकेशाः
सार्कं त्वचा कररुहाश्च न दुःखितानाम् ॥
हनुलोचनबाहुनासिकाः
स्तनयोरन्तरमत्र पञ्चमम् ।
इति दीर्घमिदं तु पञ्चकं
न भवत्येव नृणामभूभृताम् ॥
इति क्षेत्रम् ॥

छाया शुभाशुभफलानि निवेदयन्ती
लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः ।
तेजोगुणान् वहिरपि प्रविकाशयन्ती
दीपप्रभा स्फटिकरत्नघटस्थितेव ॥
स्निग्धद्विजत्वक्खरोमकेशा-
छाया सुगन्धा च महीसुतस्य ।
तुष्ट्यर्थलाभाभ्युदयान् करोति
धर्म्मस्य चाहन्यहनि प्रवृत्तिम् ॥
स्निग्धा सिताच्छहरिता नयनाभिरामा
सौभाग्यमार्दवसुखाभ्युदयान् करोति ।
सर्वार्थसिद्धिजननी जननीव चाप्या
छाया फलं तनुभृतां शुभमादधाति ॥
चण्डाक्ष्या पद्महेमाभिवर्णा
युक्ता तेजोविक्रमैः सप्रतापैः ।
आग्नेयीनि प्राणिनां स्याच्चवाय
क्षिप्रं सिद्धिं वाञ्छितार्थस्य धर्त्ती ॥
मलिनपरुषकृष्णा पापगन्धानिलोत्था
जनयति वधबन्धव्याधनर्थार्थनाशान् ।
स्फटिकसदृग्रूपा भाग्ययुक्तात्युदारा
निधिरिव गगनोत्था श्रेयसां खल्ववर्णा ॥
छायाः क्रमेण कुजलाग्न्यनिलाम्बरोत्थाः
कैश्चिद्दन्ति दृग्र ताश्च यथादुपूर्व्या ।
सूर्यार्जनाभपुरुहूतयमोडुपानां
तुल्यास्तु लक्षणफलैरिति तत्समासः ॥
इति छाया ॥

करिहयरथौघभेरीन्दङ्गसिंहाब्दनिःस्वना भूपाः ।

गर्दभजर्जररूक्षस्वराश्च धनसौख्यसन्त्यक्ताः ॥
इति स्वरः ॥

सप्त भवन्ति च सारा मेदोमज्जात्वगस्थिशुक्राणि ।
रुधिरं मांसं चेति प्राणभृतां तत्समासफलम् ॥
ताम्बोष्ठदन्तपालीजिह्वानेत्रान्तपायुकरचरणैः ।
रक्तेषु रक्तसारा बहुसुखवनितार्थपुत्रयुताः ॥
स्निग्धत्वक्का धनिनो मृदुभिः सुभगा विचक्षणास्तनुभिः ।
मज्जामेदःसाराः सुशरीराः पुत्रवित्तयुक्ताः ॥
स्थूलास्थिरस्थिसारो बलवान् विद्यान्तगः सुरूपश्च ।
बहुगुरुशुक्राः सुभगा विद्वांसो रूरवन्तश्च ॥
उपचितदेहो विद्वान् धनी सुरूपश्च मांससारो यः ।
इति सारः ॥

सङ्घात इति च सुश्लिष्टसन्धिता सुखभुजो ज्ञेया ॥
इति संहतिः ॥

स्नेहः पञ्चसु लक्ष्यो वाग्जिह्वादन्तनेत्रनखसंस्थः ।
सुतधनसौभाग्ययुताः स्निग्धैस्तैर्निर्धना रूक्षैः ॥
इति स्नेहः ॥

द्युतिमान्वर्णः स्निग्धः क्षितिपानां मध्यमः सुतार्थवताम् ।
रूक्षो धनहीनानां शुद्धः शुभदो न सङ्कीर्णः ॥
इति वर्णः ॥

साध्यमनूकं वक्त्राङ्गोत्तमशार्दूलसिंहगरुडसुखाः ।
अप्रतिहतप्रतापा जितरिपवो मानवेन्द्राश्च ॥
वानरमहिषवराहाजतुल्यवदनाः सुतार्थसुखभाजः ।
गर्दभकरभप्रतिमैर्मुखैः शरीरैश्च निःस्वसुखाः ॥
इत्यनूकम् ॥

अष्टशतं धनुषः परिमाणं चतुरशीतिः पुंसाम् ।
उत्तमसमहीनानामङ्गुलसङ्ख्यास्वमानेन ॥
इत्यात्मानम् ॥

भारार्धतनुः सुखभाक् तुलितोऽतो दुःखभाग् भवत्यूनः ।
भारोऽतीवाढ्यानामध्यर्धः सर्वधरणीशः ॥
विंशतिवर्षा नारी पुरुषः खलु पञ्चविंशतिभिरब्दैः ।
अर्हति मानोन्मानं जीवितभागे चतुर्थे वा ॥
इति मानम् ॥

भूजलशिखिनिलाम्बर-
सुरनररक्षःपिशाचकृतिरक्षाम् ।
सत्त्वेन भवति पुरुषो
लक्षणमेतद्भवत्येषाम् ॥
महीस्वभावः शुभपुष्यगन्धः
सम्भोगवान् सुश्वसनः स्थिरश्च ।
तोयस्वभावो बहुतोयपायी
प्रियाभिलाषी रसभोजनश्च ॥
अग्निप्रकृत्या चपलोऽतितीक्ष्णक्रूरः क्षुधालुर्बहुभोजनश्च ।

वायोः स्वभावेन चलः क्रमस्य
क्षिप्रं च कोपस्य वशं प्रयाति ॥
स्वप्रकृतिर्निपुणो विहतास्यः
प्रश्नगतेः कुशलः सुधिराङ्गः ।
त्यागयुतो पुरुषो रूढकोपः
स्नेहरतश्च भवेत्तुरसक्तः ॥
मर्त्यसत्त्वसंयुतो गीतभूषणप्रियः ।
संविभागशीलवान्निजमेव मानवः ॥
तीक्ष्णप्रकोपः खलचेष्टितश्च
पापश्च सत्त्वेन निशाचराणाम् ।
पिशाचसत्त्वश्चपलो मलाक्तो
बहुप्रलापी च समुक्खणाङ्गः ॥
भीरुः क्षुधालुर्बहुभुक् च यः स्यात्
क्षेयः स सत्त्वेन नरस्तिरश्चाम् ।
एवं नराणां प्रकृतिः प्रदिष्टा
यक्षत्वगज्ञाः प्रवदन्ति सत्त्वम् ॥

इति प्रकृतिः ॥

शार्दूलहंससमदद्विपगोपतीनां
तुल्या भवन्ति गतिभिः स्त्रिखिनश्च भूपाः ।
येषाञ्च प्रश्नरहितं स्त्रिमितञ्च यातं
तेऽधीश्वरा इतपरिश्रुतगा दरिद्राः ॥

इति गतिः ॥

श्रान्तस्य यानमग्नञ्च वुभुक्षितस्य
पानं क्षुधापरिगतस्य भवेयु रक्षा ।
एतानि यस्य पुरुषस्य भवन्ति काले
धन्यं वदन्ति खलु तं नरलक्षणज्ञाः ॥
पुरुषलक्षणमुक्तमिदं मया
सुनिमतान्यवलोक्य समासतः ।
इदमधीत्य नरो नृपसम्मतो
भवति सर्व्वजनस्य च वल्लभः ॥"

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां पुरुषलक्षणं नामाष्टषष्टितमोऽध्यायः ॥ * ॥)

कृष्णभक्तपुरुषस्य गोविन्दपदाश्रयत्वं यथा,—
"स्त्रियो वा पुरुषो वापि ह्यातताथी नपुंसकः ।
भक्तत्वे गणनीयश्चेद्गोविन्दपदमाश्रयेत् ॥"

इति याज्ञोत्तरखण्डे ६६ अध्यायः ॥

पुरुषाणां मध्ये गुरवो यथा,—
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यो भावयति या स्तुते येन विद्योपदिश्यते ।
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ॥"

इति कौर्म्मे उपविभागे ११ अध्यायः ॥

आत्मा । इत्यमरः । ३ । ३ । २१८ ॥ (यथा, भागवते । ७ । १४ । ३७ ।
"पुराण्यनेन सृष्टानि नृतिर्य्यगृषिदेवताः ।
शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥"
यथा च भङ्गरविजये १३ अध्याये ।
"पुरुसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।
शकारस्य षकारोऽयं यत्नेन प्रयुज्यते ॥")
साङ्गतत्त्वज्ञः । पुन्नागपादपः । इति मेदिनी । ये, ४१ ॥ (तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ॥
"कुम्भीकः पुरुषस्तुङ्गः पुन्नागो रक्तकेशरः ॥")

विष्णुः । इति शब्दरत्नावली ॥ (स हि पुराणपुरुष एव । यथा, हरिवंशे । १२८ । २० ।
"एवं पुराणः पुरुषो विष्णुर्वेदेषु पठ्यते ।
अचिन्त्यश्चाप्रमेयश्च गुणेभ्यश्च परस्तथा ॥"
शिवः । यथा, महाभारते । १४ । ८ । १४ ।
"याम्यायाव्यक्तरूपाय सद्वृत्ते शङ्कराय च ।
क्षेम्याय हरिकेशाय स्थाणवे पुरुषाय च ॥"
जीवः । यथा, शिवपुराणे वायुसंहितायां पूर्व्वभागे । ४ । १६ ।
"प्रकृतिः चरमित्युक्तं पुरुषोऽचर उच्यते ।
तावियौ प्रेरयत्यन्यः स परः परमेश्वरः ॥")
दुर्गा । यथा,—
"महानिति च योगेषु प्रधानश्चैव कथ्यते ।
त्रिगुणा व्यतिरिक्ता सा पुरुषश्चेति चोच्यते ॥"

इति देवीपुराणे ४५ अध्यायः ॥

तस्य पञ्चविंशतितत्त्वात्मकत्वं जड़त्वञ्च यथा,—
"एभिः सम्यादितं भुङ्क्ते पुरुषः पञ्चविंशकः ।
ईश्वरेच्छावशः सोऽपि जड़ात्मा कथ्यते बुधैः ॥"

इति मात्स्ये तत्त्वकथनावसरे ७ अध्यायः ॥

(अश्वत्थागकर्म्मदः । यथा, माघे । ५ । ५६ ।
श्लोकटीकायां मल्लिनाथधृतवचनम् ।
"यच्चिमेनाग्रपादेन भुवि स्थित्वाग्रपादयोः ।
ऊर्द्धप्रेरणया स्थानमश्वानां पुरुषः स्मृतः ॥")
मेषमिथुनसिंहतुलाधनुःकुम्भराशयः । यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"

पुरुषग्रहा यथा,—
"भौमार्कजीवाः पुरुषाः क्लीवौ सोमजभानुजौ ।
स्त्र्याख्यौ भार्गवचन्द्रौ द्वौ तत्प्रतित्वात्तथोच्यते ॥"

पुरुषनक्षत्राणि यथा,—
"हस्तो मूलश्रवणपुनर्व्वसुमृगशिरस्तथा पुष्यः ।
गर्भाधानादिकार्य्येषु पुंनामायं गणः शुभदः ॥"

इति ज्योतिस्तत्त्वम् ॥

तद्वैदिकपर्य्यायः । मनुष्याः १ नरः २ धवाः ३ जन्तवः ४ विशः ५ क्षितयः ६ क्षत्रियः ७ चर्षणयः ८ नहुषः ९ हरयः १० मर्य्याः ११ मर्त्ताः १२ मर्त्ताः १३ व्राताः १४ तुर्व्वशाः १५ द्रह्यवः १६ आयवः १७ यदवः १८ अनवः १९ पूरवः २० जगतः २१ तस्थुषः २२ पञ्चजनाः २३ विक्षवन्तः २४ धृतनाः २५ । इति वेदनिघण्टौ २ अध्यायः ॥

पुरुषकं, क्लीं, पुं, (पुरुष एवेति । पुरुष + स्वार्थे कन् ।) घोटकानामङ्गस्थितिः । इति त्रिकाण्डशेषः ॥ शीखपाँओ इति हिन्दीभाषा ॥ (यथा, माघे । ५ । ५६ ।
"श्रीवृक्षकी पुरुषकोन्नमिताग्रकायः ॥"
"पुरुषकोऽश्वानां स्थानकभेदः । यदुक्तम्,—
'यच्चिमेनाग्रपादेन भुवि स्थित्वाग्रपादयोः ।
ऊर्द्धप्रेरणया स्थानमश्वानां पुरुषः स्मृतः ॥'
पुरुष एव पुरुषकस्तेन पुरुषकेण स्थानके-

नोन्नमित ऊर्द्धावस्थितोऽग्रकायः पूर्व्वकायो यस्य स तथोक्तः ।" इति तट्टीकायां मल्लिनाथः ॥)

पुरुषकारः, पुं, (पुरुषस्य कारः करणम् ।) पुरुषस्य कृतिः । पौरुषम् । चेष्टा । यथा,—

मनुरुवाच ।

"दैवे पुरुषकारे च किं न्याय्यं ब्रवीहि मे ।
अत्र मे संशयो देव छेत्तुमर्हस्यशेषतः ॥

मत्स्य उवाच ।

स्वमेव कर्म्म दैवाख्यं विद्धि देहान्तरार्जितम् ।
तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥
प्रतिकूलन्तथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यमुत्थानशीलिनाम् ॥
येषां पूर्व्वकृतं कर्म्म सात्त्विकं मनुजोत्तम ! ।
पौरुषेण विना तेषां केषाञ्चिद्दृश्यते फलम् ॥
कर्म्मणा प्राप्यते लोके राजसस्य तथा फलम् ।
छाच्छेण कर्म्मणा विद्धि तामसस्य तथा फलम् ॥
पौरुषेणाप्यते राजन् ! मार्गितव्यं फलं नरैः ।
दैवमेव विजानन्ति नराः पौरुषवर्জ্জिताः ॥
तस्मात्त्रिकालसंयुक्तं दैवं न सफलं भवेत् ।
पौरुषं दैवसम्पत्त्या काले फलति पार्थिव ! ॥
दैवं पुरुषकारश्च कालश्च मनुजोत्तम ! ।
त्रयमेतन्मनुष्यस्य सिद्धिदं स्यात् फलावहम् ॥
कृषेर्वृष्टिसमायोगादृश्यन्ते फलसिद्धयः ।
तासु काले प्रदृश्यन्ते नैवाकाले कथञ्चन ॥
तस्मात् सदैव कर्त्तव्यं सधर्म्मं पौरुषं नृभिः ।
एवन्ते प्राप्नुवन्तीह परलोकफलं ध्रुवम् ॥
लालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः ।
तस्मात् सर्व्वप्रयत्नेन पौरुषे यत्नमाचरेत् ॥
त्यक्तालसान् दैवपरान् मनुष्या-
नुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः ।
अन्विष्य यत्नादृणुते नृपेन्द्र !
तस्मात् सदोत्थानवता हि भाव्यम् ॥"

इति मात्स्ये दैवपुरुषकारको नाम १६५ अध्यायः ॥
(यथा च नीतिशास्त्रे ।
"यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥")

पुरुषकुञ्जरः, पुं, (पुरुषेषु कुञ्जरः श्रेष्ठ इति । पुरुषः कुञ्जर इवेत्युपमितसमासो वा ।) पुरुषश्रेष्ठः । यथा, अमरे । ३ । १ । ५६ ।
"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः ॥"
(यथा, रामायणे । २ । १० । ५ ।
"हन्तानार्य्ये ! ममामित्रे ! सकामा भव कैकयि ! ।
हते मयि गते रामे वनं पुरुषकुञ्जरे ॥")

पुरुषत्रा, अ, (द्वितीयासप्तम्यर्थवृत्तेः पुरुषशब्दात् "देवमनुष्यपुरुषपुरुमर्त्तेभ्यो द्वितीयासप्तम्योर्बहुलम् ।" ५ । ४ । ५६ । इति त्रा ।) पुरुषम् । पुरुषौ । पुरुषान् । पुरुषे । पुरुषयोः । पुरुषेषु ॥ देवादेर्द्वौ प्राग्वोक्ताजितिरूपेण चात्प्रत्ययनिष्पन्नम् । देवादिस्तु देवमनुष्यपुरुषपुरुमर्त्यवहु इत्यादि । इति मुग्धबोधटीकायां दुर्गादासः । (यथा, ऋग्वेदे । ३ । ३३ । ८ ।

"उक्थेषु कारो प्रति नो सुषस्व
मा नो नि कः पुरुषत्रा नमस्ते ॥"
"पुरुषत्रा पुरुषेषु।" इति तद्भाष्ये सायनः ॥)

पुरुषत्वं, क्ली, पुरुषस्य भावः। पुरुषवृत्तिरसाधारणधर्म्मः। पुरुषशब्दात् भावार्थे त्वप्रत्ययः। (यथा, महाभारते। ५। १८६। १३।
"हनिष्यसि रणे विप्रं पुरुषत्वच्च लप्स्यसे ॥")
पुंस्त्वच्च ॥

पुरुषदघ्नः, त्रि, पुरुषपरिमाणः। पुरुषशब्दात् परिमाणार्थे दघ्नट्प्रत्ययः। इति व्याकरणम् ॥

पुरुषदन्तिका, स्त्री, (पुरुषस्य दन्त इव आकृतिर्यस्याः। कप्। कापि ह्रस्व इत्वम्।) मेदा। इति राजनिर्घण्टः ॥ (मेदाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

पुरुषदयसः, त्रि, पुरुषपरिमाणः। पुरुषशब्दात् परिमाणार्थे दयसट्प्रत्ययनिष्पन्नः। इति व्याकरणम् ॥

पुरुषद्वेषी, [न्] त्रि, पुरुषद्वेषशीलः। पुरुषशब्दोपपदाद्विषधातोर्णिन्प्रत्ययनिष्पन्नः। इति व्याकरणम् ॥

पुरुषनागः, पुं, (पुरुषो नाग इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥

पुरुषपुङ्गवः, पुं, (पुरुषः पुङ्गव इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥

पुरुषपुष्करीकः, पुं, (पुरुषेषु पुष्करीकः श्रेष्ठ इत्यर्थः। यद्वा, पुरुषः पुष्करीको व्याघ्र इवेत्युपमितसमासः।) पुरुषव्याघ्रः। नरश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥ जिनराजविशेषः। इति हेमचन्द्रः। ३। ३६० ॥

पुरुषमात्रः, त्रि, पुरुषपरिमाणः। पुरुषशब्दात् परिमाणार्थे मात्रट्प्रत्ययः। इति व्याकरणम् ॥ (यथा, तैत्तिरीयसंहितायाम् ।५। २। ५। १।
"पुरुषमात्रेण वि मीमिते यज्ञेन वै पुरुषः सम्मितः ॥")

पुरुषर्षभः, पुं, (पुरुषः ऋषभ इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥

पुरुषव्याघ्रः, पुं, (पुरुषो व्याघ्र इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥ (यथा, महाभारते। ६। १६। ४३।
"एवन्ते पुरुषव्याघ्राः पाञ्चाला युद्धनन्दिनः ॥")

पुरुषशार्दूलः, पुं, (पुरुषः शार्दूल इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥ (यथा, महाभारते। ३। ८२। ६ ॥
"तव च भ्रातरं वीरमपश्यं सव्यसाचिनम्।
शक्रस्यार्द्धासनगतं तत्र मे विस्मयो महान्।
आसीत् पुरुषशार्दूल! दृष्ट्वा पार्थं तथागतम्॥")

पुरुषसिंहः, पुं, (पुरुषः सिंह इव पुरुषेषु सिंहः श्रेष्ठो वा।) पुरुषश्रेष्ठः। इत्यमरः। ३।१।५६॥ जिनराजविशेषः। तत्पर्य्यायः। ग्रैविः २। इति हेमचन्द्रः। ३। ३६० ॥

पुरुषादः, पुं, (पुरुषाणां जिनपुरुषाणामादः प्रथमः।) आदिनाथनामा जिनविशेषः। इति धनञ्जयः ॥ (पुरुषेषु जीवेषु आदः प्रथमः। पुरुषाणामादः इति वा।) विष्णुः ॥

पुरुषाधमः, पुं, (पुरुषेषु अधमोऽतिनिकृष्टः।) निकृष्टनरः। यथा, प्रायश्चित्ततत्त्वे।
"नार्थे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेवे स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति।
यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥"

पुरुषार्थः, पुं, (पुरुषस्य अर्थः।) पुरुषस्य प्रयोजनम्। स च चतुर्विधः। यथा, अग्निपुराणे।
"धर्म्मार्थकाममोक्षाश्च पुरुषार्था उदाहृताः॥"
(यथा, मनुः। ७। १००।
"एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम् ॥")
गोस्वामिमते भक्तिः पञ्चमपुरुषार्थः। (पुरुषकारः। यथा, महाभारते। ३। १७६। २७।
"दैवं पुरुषकारेण को वाधयितुमर्हति।
दैवमेव परं मन्ये पुरुषार्थो निरर्थकः॥")

पुरुषास्थिमाली, [न्] पुं, (पुरुषाणामस्थीनि तेषां माला अस्यास्तीति। पुरुषास्थिमाला+व्रीह्यादित्वात् इनिः।) शिवः। इति हेमचन्द्रः। २। २१९ ॥

पुरुषोत्तमः, पुं, (पुरुषेषु उत्तमः।) विष्णुः। इत्यमरः। १। १। २१॥ (यथा, रघुः। ३। ३६।
"हरिर्यथैकः पुरुषोत्तमः स्मृतः
महेश्वरस्त्र्यम्बक एव नापरः।
तथा विदुर्मां मुनयः प्रजापतिं
द्वितीयगामी न हि शब्द एव नः॥"
एतन्निरुक्तिर्यथा, महाभारते। ५। ७०। १०।
"पुराणात् सदनाच्चापि ततोऽसौ पुरुषोत्तमः॥")
जिनराजविशेषः। तत्पर्य्यायः। सोमभूः २। इति हेमचन्द्रः। ३। ३५६ ॥ पुरुषेषु मध्ये उत्तमः। यथा, धर्म्मपुराणे।
"विशेषसमभावस्य पुरुषस्यानघस्य च।
अस्मिन्नेष्वप्युदासीने मनो यस्य समं व्रजेत्॥
समो धर्म्मः समः स्वर्गः समो हि परमं तपः।
यस्यैवं मानसं नित्यं स नरः पुरुषोत्तमः॥"
(पुरुषोत्तमो जगन्नाथोऽस्यत्रेति। अच्। उत्कलखण्डैकदेशः। स तु पीठस्थानानामन्यतमः। तत्र भगवती विमलारूपेण विराजते। यथा, देवीभागवते। ७। ३०। ६४।
"गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे॥")
ग्रन्थकर्तृविशेषः। स तु प्रयोगरत्नमालाव्याकरणस्य द्विरूपैकाक्षरहारावलीकोषाणां अन्येषाञ्च कतिपयग्रन्थानां प्रणेता ॥)

पुरुहूत, त्रि, (पुरुं प्रचुरं हूतमाह्वानं यस्मै यस्य। पुरु यथा स्यात्तथा हूयते यज्ञेषु यस्य। पुरु यथा स्यात्तथा हूयते यज्ञेष्विति वा। यद्वा, पुरूणि बहूनि हूतानि नामानि यस्य।) इन्द्रः। इत्यमरः। १। १। ४४॥ (यथा, महाभारते। १। १२६। २५।
"पुरुहूतादयं जज्ञे कुन्त्यामेव धनञ्जयः॥")
प्रचुरनामविशिष्टे, त्रि। यथा, भागवते। ८। १। १३।
"स विश्वकायः पुरुहूत ईड्यः
सत्यः स्वयंज्योतिरजः पुराणः॥"
स्त्री, भगवती। सा तु पुष्करे पीठस्थाने विराजते। यथा, देवीभागवते। ७। ३०। ५६।
"विश्वे विश्वेश्वरीं प्राहुः पुरुहूताञ्च पुष्करे॥")

पुरूरवाः [स्] पुं, (पुरु प्रचुरं यथा स्यात्तथा रौतीति। "पर्व्वतश्च पुरुनाम यत्र यज्ञे पुरूरवाः।"३।६०।२२। इति महाभारतोक्तवचनात् पुरौ पर्व्वते रौतीति वा। पुरु+रु+"पुरूरवाः।" उणा० ४। २३१। इति असिप्रत्ययेन निपातनात् साधुः।) बुधस्य पुत्रः। स तु चन्द्रवंशीयादिराजः। तत्पर्य्यायः। बौधः २ ऐलः ३ उर्व्वशीरमणः ४। इति हेमचन्द्रः॥ यथा, अग्निपुराणे।
"ततो बुधाश्रमं प्रायादिड़ा रूपाश्रिता सती।
बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता॥
सोमपुत्रात्बुधाद्राजन्! तस्यां जज्ञे पुरूरवाः।
जनयित्वा ततः सा तं पुनः सुद्युम्नतां गता॥"
अपि च।
"इलोदरे च धर्म्मिष्ठं बुधः पुत्रमजीजनत्।
अश्वमेधशतं साग्रमकरोद्यः स्वतेजसा॥
पुरूरवा इति ख्यातः सर्व्वलोकनमस्कृतः।
हिमवच्छिखरे रम्ये आराध्य स जनार्द्दनम्।
लोकैश्वर्य्यमगाद्राजा सप्तद्वीपपतिस्तदा॥
केशिप्रभृतयो दैत्यास्तस्य भृत्यत्वमागताः।
उर्व्वशी यस्य पत्नीत्वमगात् सद्रूपमोहिता॥
सप्तद्वीपा वसुमती सशैलवनकानना।
धर्म्मेण पालिता तेन सर्व्वलोकहितैषिणा॥
चामरग्राहिणी कीर्त्तिः सम्यग्नैकाङ्गवाहिका।
विष्णुप्रसादाद्देवेन्द्रो ददावर्द्धासनन्तदा॥
धर्म्मार्थकामान्धर्म्मेण समभेवाभ्यपालयत्।
धर्म्मार्थकामास्तं द्रष्टुमाजग्मुः कौतुकात् पुरा॥"
इति मात्स्ये २४ अध्यायः॥
(अस्य विशेषविवरणन्तु हरिवंशे २६ अध्याये द्रष्टव्यम्॥ * ॥) विश्वदेवः। इति जटाधरः॥ पार्व्वणश्राद्धदेवः। यथा,—
"पुरूरवा माद्रवाश्च पार्व्वणे समुदाहृतौ॥"
इति श्राद्धतत्त्वे दृहस्पतिः॥

पुरोगः त्रि, (पुरोऽग्रे गच्छतीति। पुरस्+गम+डः।) अग्रगामी। इत्यमरः। २। ८। ७२ ॥ (यथा, रघुः। ६। ५५।
"व्याघातरेखे सुभुजो भुजाभ्यां
बिभर्त्ति यश्चापभृतां पुरोगः॥")
प्रधानः। इति हेमचन्द्रः। ६। ७४ ॥

पुरोगतिः, पुं, (पुरोऽग्रे गतिर्गमनमस्य।) कुक्कुरः। इति धरणिः॥ अग्रगे, त्रि॥

पुरोगमः, त्रि, (पुरोऽग्रे गच्छतीति। गम+अच्।) अग्रगामी। इत्यमरः। २। ८। ७२॥ (यथा, महाभारते। ६। १६। १०।

"यं दृष्ट्वा पार्थिवाः सर्व्वे दुर्य्योधनपुरोगमाः।
निवर्त्तिष्यन्ति संत्रस्ताः सिंहं क्षुद्रमृगा यथा॥"

कुक्कुरे, पुं। इति हेमचन्द्रटीका॥)

पुरोगामी, [न्] त्रि, (पुरोऽग्रे गच्छतीति। गम+णिनिः।) अग्रगामी। तत्पर्य्यायः। पुरोगः २ अग्रेसरः ३ प्रष्ठः ४ अग्रतःसरः ५ पुरःसरः ६ पुरोगमः ७। इत्यमरः। २।८।७२॥ नासीरः ८ प्रसरः ९। इति शब्दरत्नावली॥

पुरोटिः, पुं, (पुरोऽटतीति। अट+इन्।) पत्रभृङ्गारः। इति त्रिकाण्डशेषः॥ रायभाटि इति भाषा॥ (पुरःसंस्कारः। इति हारावली।९६४॥)

पुरोडाः, [श्] पुं, (पुर आदौ दाश्यते दीयते इति। पुरस्+दाश्र दाने+क्विप्। निपातनात् दस्य डः।) हविः। इति सुग्धबोधव्याकरणम्॥

पुरोडाश्यः, पुं, (पुरोऽग्रे दाश्यते दीयते इति। दाश्र+कर्म्मणि यत्। निपातनात् दस्य डः।) हविर्भेदः। स तु यवचूर्णनिर्म्मितरोटिकाविशेषः। (यथा, मनुः। ६। ११।

"वासन्तशारदैर्मेध्यैर्मुन्नैः स्वयमाहृतैः।
पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत् पृथक्॥")

पिष्टकचमसौ। हुतशेषः। इति मेदिनी। शे, १८॥ सोमरसः। इति हेमचन्द्रः॥

पुरोडाश्यं, त्रि, (पुरोडाशाय हितमिति। पुरोडाश+यत्।) पुरोडाशीयम्। हविर्योग्यम्। पुरोडाशाय हितम्। यथा, भट्टिः। ५। १२।

"आमिक्षीयं दधि क्षीरं पुरोडाश्यं तथौषधम्।
हविर्हेयङ्गवीनञ्च नाप्नुवन्ति राक्षसाः॥"

पुरोद्भवा, स्त्री, (पुरे उद्भवो यस्याः।) महामेदा। इति रत्नमाला॥

पुरोधाः, [स्] पुं, (पुरोऽग्रे दधाति मङ्गलमिति। पुरस्+धा+"पुरसि च।" उणा० ४। २३०। इति असिः। स च डित्।) पुरोहितः। इत्यमरः। २।८। ५॥ (यथा, रघुः। ३। १८।

"स जातकर्म्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते॥")

पुरोभागी, [न्] त्रि, (पुरः पूर्व्वमेव भजते इति। पुरस्+भज+णिनिः।) दोषमात्रदर्शी। इत्यमरः। ३। १। ४६॥ (यथा, राजतरङ्गिण्याम्। ६। ८३।

"कृपितोऽपि स यत्नेन व्यधीद्रागमोहितः।
तेनैवागात् पुरोभागिवितर्कातङ्कपात्रताम्॥")

अर्य्यामी च॥

पुरोहितः, पुं, पुरो हव्यादिरूपेषु कर्म्मसु धीयते आरोप्यते यः। (यद्वा, पुर आदावेव हितं मङ्गलं यस्मात्।) शान्त्यादिकर्त्ता। तत्पर्य्यायः। पुरोधाः २। इत्यमरः। २। ८। ५॥ धर्म्मकर्म्मादिकारकः ३। इति शब्दरत्नावली॥ तस्य लक्षणं यथा, भागवते।

"वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः।
आशीर्व्वादवचोयुक्त एष राजपुरोहितः॥"

तस्य वर्ज्जनीयलक्षणं यथा,—

"काणं श्वङ्गमपुत्रं वाप्यभिन्नमजितेन्द्रियम्।
न ब्रूयं याधितं वापि नृपः कुर्य्यात् पुरोहितम्॥"

इति कालिकापुराणम्॥ * ॥

पुरोहिते वर्ज्जनीयानि यथा,—

"पुरोहितो हितो वेदस्तितिक्षुः सत्यवाक् शुचिः।
ब्रह्मण्यो विमलाचारः प्रतिकर्त्तापदाग्दुः॥"

इति कविकल्पलता॥

(यथा च।

"दोषागन्तुजदन्तभ्यो रसमन्त्रविशारदौ।
रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ॥
ब्रह्मा वेदाङ्गमङ्गान्यायुर्व्वेदमभाषत।
पुरोहितमते तस्माद्वर्त्तेत भिषगात्मवान्॥"

इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशेऽध्याये॥)

पुर्व्व, पूर्त्तौ। पूर्त्तीकरणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पचमस्वरौ। पुः पुरौ पुरः। पुर्व्वति पयसा कुम्भं चेटी। इति दुर्गादासः॥

पुल, क उच्छ्रितौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) उच्छ्रितिरुन्नीभावः। क, पोलयति पर्व्वतः। इति दुर्गादासः॥

पुल, ञ महत्त्वे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ञ, पोलः पुलः। पोलति। इति दुर्गादासः॥

पुल, ग्र महत्त्वे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) ग्र, पुलति पुलिनं मरुदि महत्तु स्यादित्यर्थः। पोलिता। इति दुर्गादासः॥

पुलः, पुं, (पोलति उच्छ्रितो भवतीति। पुल+कः।) पुलकः। विपुले, त्रि। इति मेदिनी। ले, २३॥

पुलकं, क्ली, (पुलतीति। पुल+कः। ततः संज्ञायां कन्।) कङ्कुष्ठम्। तच्च पर्व्वतीयमृत्तिकाविशेषः। इति राजनिर्घण्टः॥

पुलकः, पुं, (पुल+स्वार्थे कन्।) रोमाञ्चः। तत्पर्य्यायः। रोमोद्भेदः २ त्वक्पुष्पम् ३ लम्बकुरः ४। इति त्रिकाण्डशेषः॥ (यथा, आर्य्यासप्तशत्याम्। ३७६।

"प्रेमलघूकृतकेशवबाहोरविपुलपुलककञ्चुकलसा।
गोवर्द्धनगिरिगुरुतां सुग्धवधूर्निभृतमुपहसति॥")

शरीरान्तर्व्वर्त्तिभ्रमकीटः। इति हेमचन्द्रः॥ (तुच्छधान्यम्। यथा, पञ्चतन्त्रे। ३। ६६।

"पुलका इव धान्येषु पूतिका इव पक्षिषु।
मशका इव मर्त्येषु येषां धर्म्मो न कारणम्॥")

प्रस्तरविशेषः। तस्य परीक्षा यथा,—

"पुण्येषु पर्व्वतवरेषु च निम्नगासु
स्थानान्तरेषु च तथोत्तरदेशगत्वात्।
संस्थापिताश्च नखरा मुनिभिः प्रकाश्यं
संपूज्य दानवपतिं प्रथिते प्रदेशे॥
दाक्षायणीवागदवमेकलकालगादौ
गुञ्जाञ्जनत्रयौद्रुमणालवर्णाः।
गन्धर्व्वबद्धिकदलीसदृशावभासा
एते प्रशस्ताः पुलकाः प्रकृताः॥
शुक्लाञ्जभृङ्गाकविचित्रभङ्गा
मूद्रैरुपेताः परमाः पवित्राः।
मङ्गल्ययुक्ता बहुभक्तिचित्रा
वृद्धिप्रदास्ते पुलका भवन्ति॥
काकश्वरासभगृध्रशृगालकोलरूपै-
र्गृध्रैः समांसरुधिरार्द्रसुखैरुपेताः॥
नृत्युप्रदास्तु विदुषा परिवर्ज्जनीया
मूल्यं पलस्य कथितञ्च शतानि पञ्च॥"

इति गारुडे ७७ अध्यायः॥

मणिदोषविशेषः। हरितालम्। गजान्नपिण्डम्। गन्धर्व्वविशेषः। इति मेदिनी। के, १२१॥ असुराजी। गन्धकः। इति हेमचन्द्रः॥

पुलकी, [न्] पुं, (पुलकोऽस्त्यस्येति। पुलक+इनिः।) धाराकदम्बः। इति राजनिर्घण्टः॥

पुलस्तिः, पुं, (पुल महत्त्वे+क्विप्। पुलं महत्त्वं अस्यते गच्छतीति। अस्+तिः। इत्युज्ज्वलदत्तः। ४। १७६।) पुलस्त्यमुनिः। इत्युणादिकोषः॥

पुलस्त्यः, पुं, सप्तर्षीणां मध्ये ऋषिविशेषः। इति शब्दरत्नावली॥ स ब्रह्मणः कर्णाभ्यां जातः। तस्य भार्य्या हविर्भूः कर्द्दमकन्या। तस्य पुत्राः अगस्त्यः विश्रवाश्च। इति श्रीभागवतम्॥ यथा, हरिवंशे। ७। ८।

"मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः।
पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः॥"

पुलहः, पुं, सप्तर्षीणां मध्ये ऋषिविशेषः। इति शब्दरत्नावली॥ स च ब्रह्मणो नाभितो जातः तस्य भार्य्या कर्द्दमसुनिकन्या गतिः। तस्य पुत्राः कर्म्मश्रेष्ठः यवीयान् सहिष्णुश्च। इति श्रीभागवतम्॥

पुलाकः, पुं, (पोलति उच्छ्रितो भवतीति। पुल+"बलाकादयश्च।" इति आकप्रत्ययेन निपातनात् साधुः।) तुच्छधान्यम्। आगड़ा इति ख्यातम्॥ (यथा, मनुः। १०। १२५।

"पुलाकान्खैव धान्यानां जीर्णांश्चैव परिच्छदान्॥")

संक्षेपः। अल्पत्वम्। भक्तसिक्थकम्। भक्तगुलिका। इत्यमरभरतौ॥ क्षिप्रम्। यथा पुलाककारी। इति स्वामी॥

पुलाकी, [न्] पु, (पुलाकः क्षिप्रता हस्तौ विद्येते अस्येति। पुलाक+इनिः।) हरः। इति हेमचन्द्रः। ३। १८०॥

पुलायितं, क्ली, (पुल+क्यच्+क्तः।) अश्वगतिः। तत्पर्य्यायः। विक्रान्तिः २। इति त्रिकाण्डशेषः॥

पुलिनं, क्ली, (पोलतीति। पुल महत्त्वे+"तलिपुलिभ्याञ्च।" उणा० २। ५३। इति इनन्। स च कित्।) तोयोत्थितस्थटम्। इत्यमरः। १। १०। ६॥ चर इति चड़ा इति च भाषा॥

(यथा, रामायणे। २। ६५। ६।
"क्वचिन्मणिनिकाशोदां क्वचित् पुलिनशालिनीम्।
क्वचित् सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम्॥")
जलादचिरोत्थितं तटम्। इति भरतः॥ तत्-चरणतोयसुक्तद्वीपम्। इति सुभूतिः॥ क्रमेणोत्थितं तटम्। इति स्वामी॥ जलमध्यस्थमुत्थितं तटम्। इति पञ्जिका॥ द्वीपम्। इति त्रिकाण्ड-शेषः॥ (यज्ञविशेषे, पुं। यथा, महाभारते। १। ३२। १६।
"उलूकश्वसनाभ्याञ्च निमिषेण च पक्षिराट्।
प्रस्थेन च संग्रामं चकार पुलिनेन च॥")

पुलिन्दः, पुं, (पुल महत्त्वे + "कृणिपुलीः किन्दच्।" उणा० ४। ८५। इति किन्दच्।) चण्डाल-भेदः। स च म्लेच्छग्रन्थवाच्यः। इत्यमरभरतौ॥ तस्योत्पत्तिर्यथा,—

पुलस्त्य उवाच।
"एवं गतेषु त्रैलोक्यं दानवेषु पुरन्दरः।
जगाम ब्रह्मसदनं सह देवैः शचीपतिः॥
तत्रापश्यत् स देवेशं ब्रह्माणं कमलोद्भवम्।
ऋषिभिः सार्द्धमासीनं पितरं स्वञ्च कश्यपम्॥
ततो ननाम शिरसा शक्रः सुरगणैः सह।
ब्रह्माणं कश्यपञ्चैव तांश्च सर्व्वांस्तपोधनान्॥
प्रोवाचेन्द्रः सुरैः सार्द्धं देवनाथं पितामहम्।
पितामह! हृतं राज्यं बलिना बलिना मम॥
ब्रह्मा प्रोवाच शक्रैतत् भुज्यते स्वकृतं फलम्।
शक्रः पप्रच्छ भो ब्रूहि किं मया दुष्कृतं कृतम्॥
कश्यपोऽप्याह देवेश! भ्रूणहत्या कृता त्वया।
दितुदरास्त्वया गर्भः क्षतो वै बहुधा बलात्॥
पितरं प्राह देवेन्द्रो मातुर्दुष्यतो विभो!।
कर्त्तनं प्राप्तवान् गर्भो यदशौचा हि साभवत्॥
ततोऽब्रवीत् कश्यपस्तु मातुर्दोषं सदासताम्।
गतस्ततो विनिहतो दोषोऽपि कुलिशेन भोः॥
तच्छ्रुत्वा कश्यपवचः प्राह शक्रः पितामहम्।
विनाशं प्राप्तनो ब्रूहि प्रायश्चित्तं विभो! मम॥
ब्रह्मा प्रोवाच देवेशं वशिष्ठः कश्यपस्तथा।
हितं सर्व्वस्य जगतः शक्रस्यापि विशेषतः॥
शङ्खचक्रगदापाणिर्माधवः पुरुषोत्तमः।
तं प्रणम्य शरणं स ते श्रेयो विधास्यति॥
सहस्राक्षोऽपि वचनं गुरूणां स निशम्य वै।
प्रोवाच स्वल्पकालेन कस्मिन् प्राप्तो बहूदयः॥
ता ऊचुर्देवता सर्व्वाः स्वल्पकाले बहूदयः॥
इत्येवमुक्तः सुरराड्भिरत्रिणा
मरीचिपुत्रेण च कश्यपेन।
तथैव मित्रावरुणात्मजेन
वेगान्महीपृष्ठमवाप्य तस्थौ॥
कालञ्जरस्योत्तरतः सुपुण्य-
स्तथा हिमाद्रेरपि दक्षिणस्याम्।
कुशस्थलात् पूर्ब्बत एव विश्रुतो
वसोः पुरात् पश्चिमतोऽवतस्थे॥
यत्राथ चक्रे भगवान् मुरारि-
र्वांस्तव्यमथक्लतनुक्लमूर्त्तिः।
ख्यातिं जगामाथ गदाधरेति
महाघवृन्दस्य शितः कुठारः॥
यस्मिन् द्विजेन्द्राः श्रुतिशास्त्रसंयुताः
समागतां यान्ति पितामहेन।
मरुत्पितॄन् यत्र च संप्रपूज्य
भक्त्या जनन्ये नहि चेतसेव।
फलम्महामेधमखस्य मानवा
लभन्त्यनन्तं भगवत्प्रसादात्॥
महानदी यत्र सुरर्षिकन्या
वालापदेशाद्विमलेमलेति।
चक्रे जगत् पापविनष्टमर्यं
सन्दर्शनप्राशनमज्जनेन॥
तत्र शक्रः समभ्येत्य महानद्यास्तटेऽद्भुते।
आराधनाय देवस्य कृत्वाश्रममवस्थितः॥
प्रातःस्नायी लघुःशायी एकभक्तिर्ह्ययाचितः।
तपस्तेपे सहस्राक्षः स्तुवन् देवं गदाधरम्॥
तस्यैवं तप्यतः सम्यक् जितसर्व्वेन्द्रियस्य च।
कामक्रोधविहीनस्य साग्रः संवत्सरो गतः॥
ततो गदाधरः प्रीतो वासवं प्राह नारद!।
शक्र प्रीतोऽस्मि भवतो मुक्तपापोऽसि साम्प्रतम्॥
निजं राज्यञ्च देवेश! प्राप्स्यसि त्वचिराद्दिवः।
यतिष्यामि यथा शक्र! भाविश्रेयो यथा तव॥
इत्येवमुक्तोऽथ गदाधरेण
विसर्जितः स्नाप्य मनोहरायाम्।
स्नातस्य देवस्य ततः पुरस्तात्
संप्रोचुरस्माननुशासयस्व॥
प्रोवाच तान् भीषणकर्म्मकारान्
नाम्ना पुलिन्दा मम पापसम्भवाः।
वसध्वमेवान्तरमद्रिसख्यो-
र्हिमाद्रिकालाञ्जरयोः पुलिन्दाः॥
इत्येवमुक्ता सुरराट् पुलिन्दान्
विमुक्तपापः सुरसिद्धवन्द्यैः।
संपूज्यमानोऽनुजगाम चाश्रमं
मातुस्तदा धर्म्मनिवासमाद्यम्॥"
इति वामने ७३ अध्यायः॥

पुलोमजा, स्त्री, (पुलोम्नो दैत्यात् जायते इति। जन + डः।) शची। इत्यमरः। १। १। ४८॥ (यथा, काशीखण्डे १० अध्याये।
"निष्पत्स्यते क्रतुशतं यः कश्चित् कुरुतेऽवनौ।
जितेन्द्रियोऽमरावत्यां स प्राप्नोति पुलोमजाम्॥")

पुलोमजित्, पुं, (पुलोमानं जयतीति। जि + क्विप् तुगागमश्च।) इन्द्रः। इति केचित्॥

पुलोमद्विट्, [ष्] पुं, (पुलोम्नो दैत्यविशेषस्य द्विट् शत्रुः।) इन्द्रः। इति हेमचन्द्रः। २। ८८॥

पुलोमभित्, [द्] पुं, (पुलोमानं भिनत्तीति। भिद् + क्विप्।) इन्द्रः। इति भूरिप्रयोगः॥

पुलोमा, [न्] पुं, असुरविशेषः। स इन्द्रस्य श्वशुरः। इति पुलोमजाशब्दटीकायां भरतः॥ (अयं खलिखन्द्रेण निपातितः। यथा, हरिवंशे। २०। १३४।
"कृत्वा सम्बन्धकं चापि विश्वसेच्छत्रुणा नहि।
पुलोमानं जघानाजौ जामाता सन् शतक्रतुः॥")

पुलोमारिः, पुं, (पुलोम्नोऽरिः शत्रुः।) इन्द्रः। इति त्रिकाण्डशेषः॥

पुष, पुष्टौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पोषति तातः पुत्रम्। इति दुर्गादासः॥

पुष, ल्ट य ञौ पुष्टौ। पोषणे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-अनिट्।) ल्ट, अपुषत्। य, पुष्यति। ञौ, पोष्टा। इति दुर्गादासः॥

पुष, क धृतौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, पोषयति। इति दुर्गादासः॥

पुष, ग पुष्टौ। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-सेट्।) ग, पुष्णाति पुपोष। इति दुर्गादासः॥

पुषा, स्त्री, (पुष्णातीति। पुष पुष्टौ + कः। ततष्टाप्।) लाङ्गलिकीवृक्षः। इति शब्दचन्द्रिका॥

पुषितं, त्रि, (पुष्यते स्मेति। पुष + क्तः। भ्वादिगणीयत्वात् इट्।) पुष्टम्। कृतपोषणपक्षिप्रभृति। इत्यमरः। ३। १। ६०॥

पुष्करं, क्ली, (पुष्णातीति। पुष पुष्टौ + "पुषः कित्।" उणा० ४। ४। इति करन्। स च कित्।) हस्तिशुण्डाग्रम्। (यथा, माघे। ५। ३०।
"आलोलपुष्करसुखोल्लसितैरभीक्ष्ण-
सुच्चाम्बभूवुरभितो वपुरम्बुवर्षैः॥")
वाद्यभाण्डमुखम्। (यथा, रघुः। १७। ११।
"नदद्भिः स्निग्धगम्भीरं तूर्य्यैराहतपुष्करैः॥"*॥
"पुष पुष्टौ। पुषः कित्। इति करन्प्रत्ययः। पुषिरत्रान्तर्नीतण्यर्थः। पोषयति भूतान्यवकाशप्रदानेन उदकदानादुपकारेण च। पुष्क वारि रातीति पुष्करं इति क्षीरस्वामी। पुषिरन्तर्ण्यर्थात् स्फायितञ्जिपुषिभ्यः कित्। इति विहितः करन्प्रत्ययो बाहुलकात् भवति। स्फायितञ्जिवञ्चिलुञ्चिपुषिभ्यः कित्। इति करु इति श्रीभोजदेवः। पोषयति भूतानीति। पुष्कोपपदादातेः आतोऽनुपसर्गे कः। यद्वा, वपुरित्युदकनाम तत् कर्त्तुं शीलमस्येति। क्वौ हेतुताच्छील्यानुलोम्येषु। इति टः। वपुष्करं सत् वकारलोपेन पुष्करम्। एषोदरादिः।"इति निघण्टौ देवराजयज्वा॥) जलम्। (यथा, शतपथब्राह्मणे। ६। ४। २। २।
"आपो वै पुष्करं प्राणोऽथर्वा प्राणो वा॥")
व्योम। (यथा, हारीते प्रथमस्थाने चतुर्थेऽध्याये।
"मेघाः सूर्य्यशिलासमानरुचयो ह्यल्पस्रवाल्पस्रवा
हंसालीकमलालिमञ्जितजलः पद्माकरः शोभनः।
तीव्रस्निग्धमयूखचन्द्रविमला स्वानन्दिनी कौमुदी
चित्रा धर्म्मविपक्वतोयसुरसा स्यान्निर्म्मलं पुष्करम्॥")

खड्गफलम्। पद्मम्। (यथा, रामायणे। २। ६५। १४।
"सखीवच्च विगाहस्व सीते! मन्दाकिनीं नदीम्।
कमलान्यवमज्जन्ती पुष्कराणि च भामिनि!॥")
तीर्थभेदः। (यथा, महाभारते। १। ३६। ३।
"गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे॥"
अस्य अन्यद्विवरणं पुंलिङ्गान्तपुष्करशब्दे द्रष्टव्यम्॥) कुष्ठौषधम्। इत्यमरः। २। ४। १८५॥ (यथास्य पर्य्यायः।
"उक्तं पुस्करमूलन्तु पौष्करं पुष्करञ्च ततः।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) खड्गकोषः। इत्यमरटीकायां मथुरेशः॥ काण्डम्। द्वीपभेदः। इति मेदिनी। रे, १८७॥ (अस्य विवरणं पुंलिङ्गान्तपुष्करशब्दे द्रष्टव्यम्॥) युद्धम्। इति नानार्थरत्नमाला॥ *॥

पुष्करः, पुं, (पुष+"पुषः कित्।" उणा० ४। ४। इति करन्। स च कित्।) रोगविशेषः। नागविशेषः। सारसपक्षी। नृपभेदः। स तु नलराजभ्राता। (यथा, महाभारते। ३। ५६। ४।
"स समाविश्य च नलं समीपं पुष्करस्य च।
गत्वा पुष्करमाहेदमेहि दीव्य नलेन वै॥"
अयं हि कलिसाहाय्येन अक्षदूते नलं विजित्य निषधाधिपोऽभवत्। एतद्वृत्तान्तं महाभारते वनपर्ब्बणि ५६ अध्याये द्रष्टव्यम्॥) वरुणपुत्रः। इति मेदिनी। रे, १८७॥ (वाद्यविशेषः। यथा, मार्कण्डेये। १०६। ६१।
"प्रावाद्यन्त ततस्तत्र वेणुवीणादिदर्दुराः।
पणवाः पुष्कराश्चैव झर्झराः पटहानकाः॥")
पर्ब्बतविशेषः। इति शब्दरत्नावली॥ *॥ सप्तद्वीपानां मध्ये द्वीपविशेषः। पुष्करद्वीपवर्णनं यथा,—

सूत उवाच।
"शाकद्वीपस्य विस्तारादिगुणेन समन्ततः।
क्षीरार्णवं समावृत्य द्वीपः पुष्करसंज्ञितः॥
एक एवात्र विप्रेन्द्राः पर्ब्बतो मानसोत्तरः।
योजनानां सहस्राणि चोर्द्धं पञ्चाशदुच्छ्रितः॥
तावदेव च विस्तीर्णः सर्ब्बत्र परिमण्डलः।
स एव द्वीपो यच्चार्द्धमानसोत्तरसंज्ञितः॥
एक एव महासानुः सन्निवेशाद्विधाकृतः।
तस्मिन्द्वीपे स्मृतौ तु द्वौ पुण्यौ जनपदौ शुभौ॥
अपरौ मानवस्याथ पर्ब्बतस्यानुमण्डलौ।
महावीतं स्मृतं वर्षं धातकीखण्डमेव च॥
स्वादूदकेनोदधिना पुष्करः परिभावितः।
तस्मिन्द्वीपे महाबाहो न्यग्रोधोऽमरपूजितः॥
तस्मिन्निवसति ब्रह्मा विश्वात्मा विश्वभावनः।
तत्रैव मुनिशार्दूला शिवनारायणालयम्॥
वसन्त्यत्र महादेवो हरार्द्धो हरिरव्ययः।
संपूज्यमानो ब्रह्मादैः कुमारादैश्च योगिभिः॥
गन्धर्ब्बैः किन्नरैर्यक्षैरीश्वरः क्षणपिङ्गलैः।
सुस्थास्तत्र प्रजाः सर्ब्बा ब्राह्मणाः सट्प्रत्यिभः॥
निरामया विशोकाश्च रागद्वेषविवर्ज्जिताः।
सत्यावृते न तत्रास्तां नोत्तमाधममध्यमाः॥
न वर्णाश्रमधर्म्माश्च न नद्यो न च पर्ब्बताः।
परेण पुष्करस्याथ समावृत्य स्थितो महान्॥
स्वादूदकः समुद्रस्तु समन्ताद्विजसत्तमाः।
परेण तस्य महती दृश्यते लोकसंस्थितिः॥"
इति कौर्म्मे ४७ अध्यायः॥ *॥

पुष्करद्वीपस्यराजा। तस्य रथः। यथा,—
"लोकेश्वरः सोऽपि नृभिर्मुनीन्द्रै-
र्देवैः सहेन्द्रैरथ ब्रह्मचारी।
द्वीपे शुभे पुण्यजनैरुपेते
उवास राजा स तु पुष्करस्थः॥
तेनैव नाम्ना स तु पुष्करोऽपि
सदोच्यते देवगणैः ससिद्धैः।
तेनैव यानेन तथाम्बुजेन
बभूव गत्वा तमथाक्षयन्ति॥"
इत्यग्निपुराणम्॥ *॥

ब्रह्मकृततीर्थविशेषः। तस्य नामान्तरम्। रूपतीर्थम् २ सुखदर्शनम् ३। तत्र ज्येष्ठपुष्करमध्यमपुष्करकनिष्ठपुष्करनामकास्त्रयो ह्रदाः। तस्य परिमाणं शतयोजनमण्डलम्। इति पद्मपुराणम्॥ *॥ योगविशेषे गङ्गादीनां पुष्करत्वं यथा,—
"मकरस्थो यदा भानुस्तदा देवगुरुर्यदि।
पूर्णिमायां भानुवारे गङ्गा पुष्कर ईरितः॥
गङ्गोत्तर्य्यां प्रयागे च कोटिसूर्य्यग्रहैः समः।
सिंहसंस्थे दिनकरे तथा जीवेन संयुते॥
पूर्णिमायां गुरोर्व्वारे गोदावर्य्यान्तु पुष्करः।
तत्र स्नानञ्च दानञ्च सर्ब्बं कोटिगुणं भवेत्॥
मेषसंस्थे दिवानाथे देवानाञ्च पुरोहिते।
सोमवारे सिताष्टम्यां कावेरी पुष्करो मतः॥
कर्कटस्थे दिवानाथे तथा जीवेऽहवासरे।
अमायां पूर्णिमायां वा कृष्णा पुष्कर उच्यते॥"
इतिस्कन्दपुराणे पुष्करखण्डे श्रीशैलमाहात्म्यम्॥
मेघनायकविशेषः। ततपरिज्ञानं यथा,—
"त्रियते शाकवर्षे तु चतुर्भिः शोभिते क्रमात्।
आवर्त्ते विद्धि सम्वर्त्ते पुष्करं द्रोणमम्बुदम्॥"
इति ज्योतिस्तत्त्वम्॥

तस्य फलम्। यथा,—
"पुष्करे दुष्करं वारि शस्यहीना वसुन्धरा।
विग्रहोपहता लोकाः पुष्करे जलदाधिपे॥"
इति ज्योतिषम्॥ *॥

क्रूरवार-भद्रातिथि-अमपादनक्षत्र-घटितासुभजनकयोगविशेषः। यथा,—
"पुनर्व्वसूत्तराषाढ़ा कृत्तिकोत्तरफल्गुनी।
पूर्ब्वभाद्रं विशाखा च रविभौमशनैश्चराः॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च।
एतेषामेकदा योगे भवतीति त्रिपुष्करः॥ *॥
जाते तु जारजो योगो मृते भवति पुष्करः।
त्रिगुणं फलदो दृष्टौ नष्टे मृते मृते तथा॥
प्रथमे मासि वर्षे वा कुटुम्बमपि पीड़येत्।
देवोऽपि यदि वा रक्षेत् तस्य पुत्रो न जीवति॥
अतस्तदोषशान्त्यर्थं होमयेदयुतं बुधः।
अशक्तश्च सुवर्णादिदानं कुर्य्यादृयथाविधि॥"
समर्थश्चेद् वराहसंहितोक्तं अयुतहोमादिकं कुर्य्यात्। वाक्यं यथा,—
श्रीविष्णुरोम् तत् सदद्यासुकेमास्यसुकपक्षेऽसुकतिथौ असुकगोत्रः श्रीअसुकदेवशर्म्मा अमुकगोत्रस्य प्रेतस्यासुकदेवशर्म्मणश्चिरपुष्करयोगकालीनमरणजन्यदोषशमनकामः इदं काञ्चनं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददे। ततो दक्षिणां दद्यात्। अन्यच्च पूजाहोमकर्म्माणी करिष्ये। इति विशेषः। एतत् सर्ब्वमग्नौचेऽपि कर्त्तव्यम्। यथा दक्षः।
सूत्यकाले त्विदं सर्ब्वं सूतकं परिकीर्त्तितम्।
आपद्गतस्य सर्ब्वस्य सूतकेऽपि न सूतकम्॥"
इति शुद्धिकारिका॥ *॥

अपि च।
"पुनर्व्वसूत्तराषाढ़ा कृत्तिकोत्तरफल्गुनी।
पूर्ब्वभाद्रं विशाखा च बढ़ंते वै त्रिपुष्कराः॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च।
शनिर्भौमो रविश्चैव वाराश्चैते त्रिपुष्कराः॥
एते त्रिपुष्करा ज्ञेयास्तथा द्वादशमासिके।
हिमासे च तथा प्राप्ते षण्मासे च चतुर्थके॥
षोड़शे मासि संपूर्णे कुटुम्बं पीड़येदध्रुवम्।
अन्तेऽप्युपान्ते मध्ये च पुष्करो हन्ति नान्यथा॥
तद्दोषप्रशमार्थन्तु होमयेदयुतं बुधः।
तिलव्रीहियवांश्चैव क्षीराज्येन समन्तथा॥
क्षीरेणैव तथाचार्य्यो जुहुयाद्भक्तिभावतः।
चरुञ्च अपयेत्तत्र प्राप्ते कुर्य्यादलिन्तथा॥
वेकङ्कोडुम्बराश्वत्थैः प्रत्येकाष्टोत्तरं शतम्।
एकैकं चित्रसंयुक्तं दर्भैश्च परिवेष्टितम्॥
यमाय वकङ्कतेन धर्म्मायोडुम्बरेण च।
अश्वत्थेचित्रगुप्ताय जुहुयात् क्रमशस्तथा॥
तद्वद् घृततिलांश्चैव तथा समिधमेव च।
एकीकृत्य समं सर्ब्वं चरुमाश्रित्य होमयेत्॥
यवव्रीहितिलैर्युक्तं तण्डुलं अपयेच्चरुम्।
दधिमध्याज्यसंयुक्तं होमः सहस्रसंख्यया॥
वेकङ्कोडुम्बराश्वत्थैर्होमयेदधिपूर्ब्बकम्।
यमं धर्म्मं चित्रगुप्तं पुष्करं पुरुषं तथा॥
तिथिं वारं तथा ऋक्षं पूजयित्वा तु होमयेत्।
पद्मवर्णेन चूर्णेन कुर्य्याद्धि पद्ममण्डलम्॥
यमं धर्म्मं चित्रगुप्तं स्थापयेत् क्रमशस्ततः।
तिलप्रपूरिते पात्रे लौहे च कृष्णवाससा॥
वेष्टयित्वा यमं तत्र स्थापयेल्लौहनिर्म्मितम्।
घृतप्रपूरिते पात्रे कांस्यपात्रे निरञ्जनम्॥
रौप्याकृतिं शुक्लवस्त्रवेष्टितं तत्र पूजयेत्।
गुड़प्रपूरिते पात्रे ताम्रपात्रे च मन्त्रियम्॥
स्वर्णाकृतिं रक्तवस्त्रवेष्टितं तत्र पूजयेत्।
क्षीरप्रपूरिते पात्रे प्रस्तरपात्रे च पुष्करम्॥
कृष्णाकृतिं कृष्णवस्त्रवेष्टितं तत्र पूजयेत्।
सुवर्णतुल्यमर्द्धं वा अथवा शक्तिभावतः॥
प्रतिमाश्च समाः सर्ब्वाः क्रमात्तत्र नियोजिताः
व्रीहौ यवे तथा धान्ये क्रमात् पात्रत्रयस्थतः॥

नूतने च क्रमात् पीठे स्थापयेद्विधिपूर्व्वकम् ।
मण्डलस्य चतुर्द्दिक्षु चतुःकुम्भांश्च स्थापयेत् ॥
दधिगुड़क्षीरपूर्णान् प्रकल्प्य संयुतेऽन्ततः ।
अथवा तन्मूलदेशे सच्चूतपल्लवांस्तथा ॥
पीतवस्त्रेण संयुक्तं कुर्य्याद्दृढचतुष्टयम् ।
चन्द्रातपं तदुपरि विचित्रं परिकल्पितम् ॥
कुम्भानाञ्च चतुःपार्श्वे यवतिलैर्युक्ततण्डुलान् ।
स्थापयेयुः क्रमात्तत्र पूजाकार्य्ये द्विजोत्तमाः ॥
मण्डलस्य तथा पूर्व्वे वारुणं घटमर्पयेत् ।
नानादेवान् गणेशादीन् ग्रहादींश्च समर्चयेत् ॥
हुत्वा यथाक्रमं तत्र बलिं दद्याद्विचक्षणः ।
पयोदृतेन क्षीरेण स्नापयित्वा यथाक्रमम् ॥
स्वेन स्वेनैव मन्त्रेण पूजयित्वा च होमयेत् ॥
एवं विधिप्रकारेण यः प्रेतं न तु होमयेत् ।
पुष्करारिष्टदोषस्तु चतुर्थ्यात्तस्य सम्भवेत् ॥
संवत्सरे तथा पूर्णे षोड़शे मासि वै तथा ।
षण्मासाभ्यन्तरे तस्य सुतहानिं विनिर्द्दिशेत् ॥
अथवा स्वामिनं हन्ति द्वितीयं भ्रातरन्तथा ।
तृतीयं सर्व्वहानिः स्यात् सुतवित्तविनाशनम् ॥
प्रेतारिष्टविनाशाय यमादीन् यो न होमयेत् ।
सर्व्वाणि तस्य नश्यन्ति गोमहिष्यादीनि सर्व्वतः ॥
एवंविधिकृतं होमं यः कर्त्तुमक्षमो भवेत् ।
होमं कृत्वा यथाशक्त्या धेनुमेकां प्रदापयेत् ॥
अस्मिन् कृते न सन्देहः प्रेतारिष्टं न पीड़येत् ।
न विघ्नो यजमानस्य न चारिष्टं प्रजायते ॥
एतद्धोमं विनिर्द्दिष्टं यत्नतो न करोति यः ।
न रक्षति यमस्तस्य एभिर्मासैश्च वत्सरम् ॥
सुतो भ्राता तथा जाया पतिः श्वशुर एव च ।
माता पिता स्वसा वापि पितृव्यो भगिनीपतिः ॥
ज्येष्ठभ्राता पतिश्चापि स्वामी चापत्यमेव च ।
एकैकं वर्षसंपूर्णे कुटुम्बं पीड़येद्ध्रुवम् ॥
षोड़शे मासि संपूर्णे बान्धवान् परिपीड़येत् ।
बान्धवानामभावे च वास्तुदृष्टो न जीवति ॥
त्रिपुष्करे तथा दोषे यः प्रेतं न तु होमयेत् ।
देवता यदि वा रक्षेत् तस्य पुत्रो न जीवति ॥
यत्किञ्चिद्दानसुतृप्तस्य सुखी भवति मानवः ।
न रक्षति यमस्तस्य यदि होमं न कारयेत् ॥
तस्मात् विधिप्रकारेण पुष्करारिष्टशान्तये ।
यमं धर्म्मं चित्रगुप्तं पूजयित्वा च होमयेत् ॥
मण्डले घटमारोप्य पूजयित्वा यथाक्रमम् ।
विधिपूर्व्वं तथा हुत्वा प्रान्ते दद्याद्बलिं बुधः ॥
प्रभाते च तथा रात्रावग्नौचान्तदिने तथा ।
आचार्य्यञ्च प्रकल्पाथ अपयेच्च चरुं ततः ॥
विप्रक्षत्रियवैश्यैर्भैः पिष्टैर्वैश्यस्य निर्म्मितम् ।
मृदस्य गोमयेनापि प्रतिमां दापयेत्ततः ॥
दत्त्वा मधुघृतात्तत्र चरुं पश्चाच्च दापयेत् ।
ततोऽरिष्टः प्रशान्तः स्यात्ततो होमं समापयेत् ॥
संकल्प्य विधिना पूर्व्वं वस्त्रयुग्मेन यत्नतः ।
आचार्य्यं वृणुयात्तत्र पश्चाद्ऋत्विजमेव च ॥"
इति वराहसंहितोक्तपुष्करशान्तिप्रमाणम् ॥

पुष्करकर्णिका, स्त्री, (पुष्करं पद्मं कर्णयति साद्दश्येन प्राप्नोतीति । कर्ण + ण्वुल् । टापि अत इत्वम् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥ (स्थलपद्मिनीशब्दे ऽस्या गुणादयो ज्ञातव्याः ॥)

पुष्करनाड़ी, स्त्री, (पुष्करं पद्मं नाड़यति सौन्दर्य्येण भंग्नयतीति । नाड़ + अच् । ततो ङीप् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥

पुष्करमूलं, क्ली, (पुष्करस्य मूलमिव मूलमस्य । पुष्करजातं मूलं वा ।) पुष्करदेशप्रसिद्धौषधिविशेषः । अस्य स्थाने कुष्ठं योजयन्ति । तस्यपर्य्यायः । मूलम् २ पुष्करम् ३ पद्मपत्रकम् ४ पुष्करिणी ५ वीरम् ६ पौष्करम् ७ पुष्कराक्षयम् ८ काश्मीरम् ९ ब्रह्मतीर्थम् १० श्वासारिः ११ मूलपुष्करम् १२ पुष्करजटा १३ पुष्करश्रिफा १४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातज्वरश्वासारोचककाश्यशोफपाण्डुनाशित्वञ्च । इति राजनिर्घण्टः ॥ "विशेषात् पार्श्वमूलतुः ।" इति भावप्रकाशः ॥ (व्यवहारोऽस्य यथा,—

"भार्गीं पुष्करमूलञ्च राज्ञां विल्वं यमानिकाम् ।
नागरं दशमूलञ्च पिप्पलीश्चाभ्र साधयेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे भार्ग्यादिक्वाथे ॥)

पुष्करमूलकं, क्ली, (पुष्करस्य कुष्ठस्य मूलम् । ततः संज्ञायां कन् ।) कुष्ठवृक्षस्य मूलम् । इति त्रिकाण्डशेषः ॥ (कुष्ठशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पुष्करश्रिफा, स्त्री, (पुष्करस्य श्रिफा जटेव ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥

पुष्करसजौ, पुं, (पुष्करस्य पद्मस्य सक् ययोरिति ।) अश्विनीकुमारौ । द्विवचान्तोऽयम् । इति शब्दरत्नावली ॥ (अश्विनीकुमारतुल्ये, त्रि । यथा, वाजसनेयसंहितायाम् । २ । ३३ ।
"आधत्त पितरो गर्भं कुमारं पुष्करसजम् ।
यथेह पुरुषोऽसत् ॥"
"किम्भूतं कुमारं पुष्करसजं पुष्कराणां पद्मानां सक् माला ययोस्तौ पुष्करसजौ अश्विनौ अश्विनीकुमारौ पुष्करसजौ पद्ममालिनौ देवानां भिषजौ । तत्तुल्यः कुमारः पुष्करसक् तम् । अश्विसाम्यकथनेन रोगहीनं सुन्दरञ्च पुत्रमधत्तेति सूचितम् ॥" इति तत्र वेददीपः ॥)

पुष्कराक्षः, पुं, (पुष्करवदक्षिणी यस्य । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।) विष्णुः । यथा, तिथ्यादितत्त्वे ।
"पुष्कराक्ष ! नमस्तेऽहं मायाविज्ञानसागरे ।
त्राहि मां देवदेवेश शरण्यस्त्वान्योऽस्ति रक्षिता ॥"
(श्रीकृष्णः । यथा, महाभारते । १ । २२० । १६ ।
"अथाब्रवीत् पुष्कराक्षः प्रहसन्निव भारत ! ॥")

पुष्कराङ्गः, पुं, (पुष्करस्य आङ्गा आङ्गा यस्य ।) सारसपक्षी । इत्यमरः । २ । ५ । २२ ॥ (पुष्करं आङ्गा यस्य । पुष्करमूलम् । यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये ।
"तुम्बुरुपुष्कराङ्गहिङ्खञ्जवेतसपथ्यालवणत्रयं यवक्षारेण पातुं प्रयच्छेत् ॥")

पुष्कराक्षयं, क्ली, (पुष्करं आक्षयो यस्य ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥ (यथा,—
"क्षुद्राम्लता नागरपुष्कराक्षये ।
क्षतः कषायः कफमारुतोद्भवे ।
सश्वासकासारुचिपार्श्वरुक्करे
ज्वरे त्रिदोषप्रभवे च शस्यते ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

पुष्करिणी, स्त्री, (पुष्करवत् आकृतिरस्यस्या इति । पुष्कर + इनिः । ततो ङीप् ।) स्थलपद्मिनी । पुष्करमूलम् । इति राजनिर्घण्टः ॥ (पुष्करं शुण्डादण्डस्तदस्यस्या इति । इनिः ।) हस्तिनी । सरोजिनी । (पुष्कराणि पद्मानि सन्त्यत्रेति ।) जलाशयः । इति मेदिनी । णि, १०४ ॥ शतधनुःपरिमितसमचतुरस्रजलाधारः । पुष्कर इति पुखरि इति च भाषा । तत्पर्य्यायः । खातम् २ । इत्यमरः । १ । १० । २७ ॥ जलकूपी ३ । इति जटाधरः ॥ पौष्करिणी ४ । इति शब्दरत्नावली ॥*॥
सा तु दक्षिणोत्तरायता कार्य्या ।
यथा,—
"कूपवापीपुष्करिण्यो दीर्घिका द्रोण एव च ।
तड़ागः सरसी चैव सागरश्चाष्टमो मतः ॥
सङ्क्षिप्तलाक्षयः कार्य्यो यत्राद्यान्योत्तरायतः ॥"
इति कल्पतरौ वायुपुराणम् ॥ * ॥
तस्या लक्षणं यथा । "पुष्करिणीतड़ागावाह वशिष्ठसंहितायाम् ।
'चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुरुत्तरः ।
शतधन्वन्तरश्चैव तावत् पुष्करिणी मता ।
एतत्पञ्चगुणः प्रोक्तस्तड़ाग इति निश्चयः ॥'
तेन चतुर्हस्तं विंशतिहस्तान्यूनतायां चतुःशतहस्तान्यूनाभ्यन्तरत्वेन पुष्करिणी । एतज्जलाशयाधारपरं न तु उपरितटम् । शतेन धनुर्भिः पुष्करिणी । इति नयवर्द्धमानधृतो वशिष्ठः ॥*॥
तत्करणे वास्तुयागः कर्त्तव्यः । महाकपिलपञ्चरात्रम् ।
'जलाधारगृहार्थञ्च यज्ञेद्वास्तुं विशेषतः ।
ब्रह्माद्यदितिपर्य्यन्ताः पञ्चाशत्त्रयसंयुताः ।
सर्व्वेषां किल वास्तूनां नायकाः परिकीर्त्तिताः ॥
असंपूज्य हि तान् सर्व्वान् प्रासादादीन्न कारयेत् ।
अनिष्यत्तिर्विनाशः स्यादुभयोर्धर्म्मधर्म्मिणोः ॥'
ब्रह्माद्यदितिपर्य्यन्ता इति कल्पान्तरम् । देवीपुराणोक्त ईशादिकल्प एव व्यवहियते । धर्म्मधर्म्मिणोस्तड़ागादितत्कर्त्रोः । आरम्भदिने तदकरणे उत्सर्गादिनेऽपि आदौ तत्करणम् ।
यथा,—
'प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ।
पुरवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये ॥
वास्तूपशमनं कृत्वा ततः सूत्रेण वेष्टयेत् ।
वास्तुपूजामकुर्व्वाणस्तद्वाहारो भविष्यति ॥'
इति मत्स्यपुराणे पुरवेश्मप्रवेशे वास्तुयागप्राप्तेः पूर्व्वोक्तवचने प्रासादधर्म्मातिदेशादत्र वाप्यादिप्रतिष्ठादिनेऽपि वास्तुयागकरणम् ॥ * ॥

तदारम्भे नक्षत्रादि दीपिकायाम् ।
'पुष्यामित्रकरोत्तरस्वरुणब्रह्माम्बुपित्र्येन्दुभिः
ग्रस्तेऽर्के शुभयोगवारतिथिषु क्रूरेष्ववीर्य्येषु च ।
पुष्येन्दौ जलराशिगे दशमगे शुक्रे शुभांशोदये
प्रारम्भः सलिलाशयस्य शुभदो जीवेन्द्रपुत्रोदये ।'
पुष्यानुराधा-हस्तोत्तरात्रय-धनिष्ठा मृतभिषा-
रोहिणी-पूर्वाषाढ़ा-मघा-मृगशिरोभिर्भैः ॥
मात्स्ये ।
'चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
लग्नोक्षायादि कर्त्तव्यमन्यच्च परिवर्जयेत् ॥
अश्विनी रोहिणी मूलसुत्तरात्रयमैन्दवम् ।
स्वाती हस्तानुराधा च ग्रहारम्भे प्रशस्यते ॥
वज्रव्याघातशूले च व्यतीपातातिगण्डयोः ।
विष्कम्भगण्डपरिघवर्जं योगेषु कारयेत् ॥
आदित्यभौमवर्जन्तु सर्व्वे वाराः शुभावहाः ।
प्रासादेऽप्येवमेव स्यात् कूपवापीषु चैव हि ॥'
ज्योतिषे । गुरोर्भृगोरस्तवाल्ये इत्यभिधाय
प्रतिष्ठारम्भणे देवकूपादेर्वर्जयन्ति हि ॥ * ॥
उत्सर्गफलमाह । कपिलपञ्चरात्रे ।
'संक्षेपात्तु प्रवक्ष्यामि जलदानफलं शृणु ।
पुष्करिण्यादिदानेन विष्णुः प्रीयति विश्वधृक् ॥'
जलाशयकरणार्थभूमिदानफलमाह चित्रगुप्तः ।
'जलाशयार्थं यो दद्यात् वारुणं लोकमाप्नुयात् ॥'
भूमिमिति शेषः ॥ * ॥ तत्प्रतिष्ठाकालमाह ।
मत्स्यपुराणम् ।
'शृणु राजन् ! महाबाहो ! तड़ागादिषु यो विधिः ।
चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ॥
माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ।
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ॥
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥'
अतीते प्रवृत्ते । तथा च प्रतिष्ठासमुच्चये ।
'माघेऽथ फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्येष्ठाषाढ़कयोर्वापि प्रवृत्ते चोत्तरायणे ॥'
ब्राह्मणवाचनं पुण्याहस्वस्तिऋद्धिवाचनम् ॥*॥
'पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ।
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृत्वा बहुफला भवेत् ॥
आषाढ़े द्वे तथा मूलसुत्तरात्रयमेव च ।
ज्येष्ठाश्रवणरोहिण्यः पूर्व्वभाद्रपदा तथा ॥
हस्ताश्विनी रेवती च पुष्यो मृगशिरस्तथा ।
अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते ॥*॥
बुधो दृष्टस्पतिः शुक्रस्त्रय एते शुभावहाः ।
एतन्निरीक्ष्य तं लग्नं नक्षत्रञ्च प्रशस्यते ॥
ग्रहताराबलं लब्ध्वा ग्रहपूजां विधाय च ।
निमित्तं सकलं ज्ञात्वा वर्जयित्वाद्भुतादिकम् ॥
शुभयोगे शुभग्रहे क्रूरग्रहविवर्जिते ।
लग्ने ऋक्षे च कुर्व्वीत प्रतिष्ठादिकमुत्तमम् ॥*॥
अयने विषुवे तद्वत् षड़शीतिमुखे तथा ।
एतेषु स्थापनं कार्य्यं विधिदृष्टेन कर्म्मणा ॥'
भविष्ये ।
'प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा ।
दशमी त्रयोदशी चैव पौर्णमासी च कीर्त्तिता ॥
सोमो बृहस्पतिश्चैव शुक्रश्चैव तथा बुधः ।
एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठायागकर्म्मणि ॥'
प्रतिष्ठाधिकारे व्यवहारसमुच्चयः ।
'कृष्णपक्षे च पञ्चम्यामष्टम्यां चैव शस्यते ॥'
दीपिकायाम् ।
'पुष्याश्विशक्रभगदैवतवासवेषु
सौम्यानिलेशमघरोहिणिमूलहस्ते ।
पौष्णानुराधहरिभेषु पुनर्व्वसौ च
कार्य्याभिषेकतरुभूतपतिप्रतिष्ठा ॥'
वासवं धनिष्ठा । ईश आर्द्रा । आर्द्रायाञ्चैव
सौभाग्यमिति प्रतिष्ठासारसमुच्चयात् ॥ * ॥
वापीत्यादीनां पूर्त्तत्वाभिधानात् शूद्रस्याधिकार-
माह जातूकर्णः ।
'वापीकूपतड़ागादि देवतायतनादि च ।
अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते ॥
अग्निहोत्रं तपः सत्यं वेदानामनुपालनम् ।
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते ॥
ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते ।
इष्टापूर्त्तं द्विजातीनां धर्म्मः सामान्य उच्यते ॥
अधिकारी भवेत् शूद्रः पूर्त्ते धर्म्मे न वैदिके ।'
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्ना-
करः ॥ एवं स्त्रीणामपि पूर्त्ताधिकारः । यथा,
नारीत्यनुवृत्तौ बृहस्पतिः ।
'पितृव्यगुरुदौहित्रान् भर्त्तुः स्वसीयमातुलान् ।
पूजयेत् कन्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रियः ॥'
अस्य पूर्त्तत्वात् वृद्धिश्राद्धमप्यादौ कर्त्तव्यम् ।
यथा, गोभिलः । 'वृद्धिः पूर्त्तेषु युग्मा नाग्नयेत्
प्रदक्षिणमुपचारः । यवैस्तिलार्थ इति ॥' * ॥
हयशीर्षपञ्चरात्रे ।
'वापीकूपतड़ागानां पश्चिमे यागमण्डपम् ।
कुर्य्यादृत्वयाक्रमेणैव कन्यसं मध्यमुत्तमम् ॥
कन्यसं दशहस्तन्तु कूपे प्रस्तं तथानघ ! ।
द्विघटं कारयेद्वाप्यां पुष्करिण्यां चतुर्घटम् ।
द्विरष्टहस्तं कुर्व्वीत तड़ागे मण्डपं शुभम् ॥'
कन्यसं कनीयांसम् ॥ * ॥ सङ्कल्पविधिमाह
भविष्ये ।
'गृहीत्वौडुम्बरं पात्रं वारिपूर्णं गुणान्वितम् ।
दर्भैश्चयं साग्रमूलं फलपुष्पसमन्वितम् ॥
जलाशयारामकूपे सङ्कल्पे पूर्व्वदिङ्मुखः ।
साधारणे चोत्तरास्य ऐशान्यां निक्षिपेत् पयः ॥'
मत्स्यपुराणे ।
'प्रागुदक्प्रवणे देशे तड़ागस्य समीपतः ।
चतुर्हस्तां शुभां वेदीं चतुरस्रां चतुर्मुखीम् ॥'
कारयेदित्यर्थः । तथा,—
'सर्व्वतः समवर्णाः स्युः पताका ध्वजसंयुताः ॥'
समवर्णा वक्ष्यमाणलोकपालवर्णाः ।
'अश्वत्थोडुम्बरप्लक्षवटशाखायुतानि च ।
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ॥'
तथा ।
'कुलशीलसमापन्नः स्थापकः स्याद्विजोत्तमः ॥'
स्थापक आचार्य्य इति रत्नाकरः ॥ * ॥
'सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यडुण्डुभौ ।
ताम्रौ कुलीरमण्डूकावायसः शिशुमारकः ॥
एवमासाद्य तान् सर्व्वानादौ चैव विशाम्यते ! ।
शुक्लमाल्याम्बरधरः शुक्लगन्धविलेपनः ॥
सर्व्वौषध्युदकस्नानक्षपितो वेदपुङ्गवः ।
यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः ।
पश्चिमं द्वारमाश्रित्य प्रविशेद्यागमण्डपम् ॥
ततो मङ्गलशब्देन भेरीणां निःस्वनेन च ।
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन तत्त्ववित् ॥
षोड़शारं ततश्चक्रं पद्मगर्भं चतुर्मुखम् ।
चतुरस्रञ्च परितो वृत्तं मध्ये सुशोभनम् ॥
वेदाक्षोपरि तत् कृत्वा ग्रहांल्लोकपतींस्तथा ।
विन्यसेन्मन्त्रतः सर्व्वान् प्रतिदिक्षु विचक्षणः ।
ऋक्षादीन् स्थापयेन्मध्ये वारुणं मन्त्रमाश्रितः ॥'
ऋक्षादीन् कूर्म्मादीन् ।
'ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुधः ।
विनायकन्तु विन्यस्य कमलामम्बिकान्तथा ॥'
पूजयेदिति शेषः । तथा,—
'नवग्रहमखं कृत्वा ततः कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न कार्य्यं जायते क्वचित् ॥'
ग्रहपूजामण्डलं शान्तिदीपिकायाम् ।
'वर्त्तुलो भास्करः कार्य्यो दृढ़श्चन्द्रो निशाकरः ।
अङ्गारकस्त्रिकोणस्तु बुधश्चापाकृतिस्तथा ॥
पद्माकृतिर्गुरुः कार्य्यश्चतुष्कोणस्तु भार्गवः ।
खड़्गाकृतिः शनिः कार्य्यो राहुस्तु मकराकृतिः ।
सर्पाकृतिस्तथा केतुः कार्य्यो मण्डलपूजने ॥'
मत्स्यपुराणे ।
'देवतानां ततः स्थाप्या विंशतिर्द्वादशाधिका ।
सूर्य्यः सोमस्तथा भौमो बुधजीवसितार्कजाः ॥
राहुः केतुरिति प्रोक्ता ग्रहा लोकहिते रताः ।
मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ॥
उत्तरेण गुरुं विद्याद्बुधं पूर्व्वोत्तरेण तु ।
पूर्व्वेण भार्गवं विद्यात् सोमं दक्षिणपूर्व्वके ॥
पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ।
पश्चिमोत्तरतः केतुं स्थापयेत् शुक्लतण्डुलैः ॥*॥
भास्करस्येश्वरं विद्याद्गुमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्यापि तथा हरिम् ॥
ब्रह्माणञ्च गुरोर्विद्यात् शुक्रस्यापि प्रजापतिम् ।
शनैश्चरस्य तु यमं राहोः कालन्तथैव च ।
केतूनाञ्चित्रगुप्तञ्च सर्व्वेषामधिदेवताः ॥ * ॥
अग्निरापः क्षितिर्विष्णुरिन्द्रः शक्रो च देवताः ।
प्रजापतिश्च सर्पश्च ब्रह्मा प्रत्यधिदेवताः ॥ * ॥
विनायकं तथा दुर्गां वायुमाकाशमेव च ।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥
संस्मरेद्रक्तमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ ॥
मन्दराहू तथा कृष्णौ धूम्रं केतुगणं विदुः ।
ग्रहवर्णानि देयानि वासांसि कुसुमानि च ॥
धूपामोदोऽथ सुरभिरुपरिष्टादितानकम् ।
शोभनं स्थापयेत् प्राज्ञः फलपुष्पसमन्वितम् ॥
गुड़ौदनं रवेः कुर्य्यात् सोमाय घृतपायसम् ।
संयावकं कुजे दद्यात् क्षीरान्नं सोमसूनवे ॥

दध्योदनन्तु जीवाय शुक्राय च घृतोदनम् ।
भूमेश्वराय क्षयरमाजमांसञ्च राहवे ।
चित्रोदनन्तु केतुभ्यः सर्व्वभक्षैः समर्चयेत् ॥'
स्कन्दपुराणम् ।
'जन्मभूर्गोचमेतेषां वर्षस्थानसुखानि च ।
योऽज्ञात्वा कुरुते शान्तिं ग्रहास्तेनावमानिताः ॥
उत्पन्नोऽर्कः कलिङ्गेषु यमुनायाञ्च चन्द्रमाः ।
अङ्गारकस्त्ववन्त्यान्तु मगधे तु हिमांशुजः ॥
सैन्धवेषु गुरुर्जातः शुक्रो भोजकटे तथा ।
शनैश्चरस्तु सौराष्ट्रे राहुर्वैराटिकापुरे ।
अन्तर्वेद्यां तथा केतुरित्येता ग्रहभूमयः ॥
आदित्यः काश्यपो गोत्र आत्रेयश्चन्द्रमा
भवेत् ।
भारद्वाजो भवेद्भौमस्तथात्रेयश्च सोमजः ॥
सूरपूत्र्योऽङ्गिरोगोत्रः शुक्रो वै भार्गवस्तथा ।
शनिः काश्यप एवायं राहुः पैठीनसिस्तथा ।
केतवो जैमिनेयाश्च ग्रहा लोकहिते रताः ॥'
कात्यायनः ।
'तद्गोत्रजानजानन्तो होमं यः कुरुते नरः ।
न तस्य फलमाप्नोति न सन्तुष्यन्ति देवताः ॥
न हुतं न च संस्कारो न च यज्ञफलं लभेत् ।
ब्राह्मणौ भार्गवाचार्यौ क्षत्रियावर्कलोहितौ ॥
वैश्यौ सोमबुधौ चैव शूद्रान् शूद्रान् विनि-
र्द्दिशेत् ॥'
शान्तिदीपिकायाम् ।
'शुक्रार्कौ प्राङ्मुखौ स्थाप्यौ शनिराहूकेतवौ च
दक्षिणौ ।
उत्तरास्यौ गुरुबुधौ पश्चिमास्यास्तथापरे ॥'
अग्निप्रणयनानन्तरं ग्रहावाहनमाह वैश्म्पा-
यनः ।
'अग्निप्रणयनं कृत्वा पश्चादावाहयेत् सुरान् ।
मध्ये तु भास्करं विद्यात्सोहितं दक्षिणेन तु ॥'
यद्यपि ग्रहादीनां बहवः शब्दा वाचकाः सन्ति
शब्दोपहितत्वार्थोऽर्थोपहितः शब्दो वा देवता
उभयथापि शब्दनियमात् व्यभिचारकः स्यात्
तथापि बहुषु दृष्टत्वात् सूर्य्यादिशब्देन ग्रहाणां
देवतात्वम् । तेन सूर्य्यसोमकुजबुधदृहस्पतिशुक्र-
शनैश्चरराहुकेतुपदैर्देवतात्वम् । अधिदेवता-
नान्तु ब्राह्मकोमास्कन्दविष्णुब्रह्मेन्द्रयमकाल-
चित्रगुप्तानामेभिरेव पदैः । तथा प्रत्यधिदेव-
तानाञ्च अग्निपृथिवीविष्णुइन्द्रशचीप्रजापति-
ब्रह्मणामेभिरेव पदैः । तथा विनायकदुर्गावा-
याकाशाग्निनामेभिरेव । इति कल्पप्रदीपः ॥*॥
शान्तिदीपिकोक्तध्यानानि प्रयोगे वक्ष्यन्ते ।
लोकपालमन्त्रानाह भविष्ये ।
'न्यासमन्त्रानहं वक्ष्ये लोकपालात्मकानिह ।
इन्द्रस्तु महसा दीप्तः सर्व्वदेवाधिपो महान् ।
वज्रहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥
आग्नेयः पुरुषो रक्तः सर्व्वदेवमयोऽव्ययः ।
धूमकेतुरनाधृष्यस्तस्मै नित्यं नमो नमः ॥
यमश्चोत्पलवर्णाभः किरीटी दण्डधृक् सदा ।
धर्म्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥
निर्ऋतिस्तु पुमान् क्षत्रः सर्व्वरत्नौषधीपो
महान् ।
खड्गहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥
वरुणो धवलो जिष्णुः पुरुषो निम्नगाधिपः ।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः ॥
वायुश्च सर्व्ववर्णोऽयं सर्व्वगन्धवहः शुभः ।
पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः ॥
गौरो यस्तु पुमान् सौम्यः सर्व्वौषधिसमन्वितः ।
नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः ॥
ईशानः पुरुषः शुक्लः सर्व्वविद्याधिपो महान् ।
शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ॥
पद्मयोनिश्चतुर्मूर्त्तिर्हंसवासाः पितामहः ।
यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नमः ॥
योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम् ॥
पुष्पवद्धारयेन्मूर्द्ध्नि तस्मै नित्यं नमो नमः ।
ओंकारपूर्व्वका ह्येते न्यासे बलिनिवेदने ।
मन्त्राः स्युः सर्व्वकार्य्याणां दिक्पतिपुष्टिफलप्रदाः ॥'
हयशीर्षपञ्चरात्रे ।
'अथवा कामतः कुर्य्यात् सूत्मरत्नादिनिर्म्मितम् ।
द्विभुजं हंसपृष्ठस्थं दक्षिणेनाभयप्रदम् ॥
वामेन नागपाशन्तु धारयन्तं सुभोगिनम् ।
मौलिनं वा महाभागं कारयेद्वृषवाहनम् ॥
वामे तु कारयेद्वह्निं दक्षिणे पुष्करं शुभम् ।
नागैर्नदीभिर्यादोभिः समुद्रैः परिवारितम् ॥
कृत्वैवं वरुणं देवं प्रतिष्ठाविधिमाचरेत् ॥'
पुष्करं ततपुत्रम् । तथा प्रसन्नवदनमिति ध्यानं
वक्ष्यते । वरुणमन्त्रोद्धारस्तु तत्रैव ।
'अष्टाविंशान्तबीजेन चतुर्दशयुतेन च ।
अर्द्धेन्दुबिन्दुयुक्तेन प्रणवोद्दीपितेन च ॥'
तेन ॐ वौं इति मन्त्रः ।
'प्रतिमायां स्थितिं कृत्वा प्रणवेन निरोधयेत् ।
पूजयेत् गन्धपुष्पाद्यैः सान्निध्यं पाशमुद्रया ॥'
स्थितिं प्राणप्रतिष्ठाम् । निरोधयेत् अन्तर्गता-
ङ्गुष्ठमुद्रिभ्यां निरोधमुद्रां दर्शयेत् । दानकल्प-
तरुरत्नाकरयोर्ब्रह्मपुराणपरिगृह्यम् ॥ अथातो
वरुणविधिं वापीकूपतडागयज्ञं व्याख्यास्यामः ।
पुण्ये तिथिकरणे शुभे नक्षत्रे प्रतीच्यां दिग्-
भाग आस्थाय प्राक्प्रवणे उदक्प्रवणे वा उदक्-
समीपे अग्निमुपसमाधाय वारुणं श्रपयित्वा
आज्यभागान्तं हुत्वा चतस्र आज्याहुतीर्जुहु-
यात् । समुद्रज्येष्ठा इति प्रत्यृचं ततो हविषा
अष्टभिर्जुहुयात् । तदायामि ब्राह्मणा वन्द-
मानः इति पञ्च । त्वन्नोऽग्ने वरुणस्य विद्वा-
नितिद्वे इमं मे वरुणं श्रुधी हवेति च स्विष्ट-
कृतश्च नवमं नव वै प्राणाः प्राण एव आप-
स्तस्मादापो नवभिर्जुहोति ॥*॥ मार्जनान्ते
धेनुमवतारयेत् । अवतार्य्यमाणान्तामनुमन्त्र-
येत् । इदं सलिलं पवित्रं कुरुष्व शुद्धः पूतो
मृतः सन्तु नित्यं तारयन्ती सर्व्वतीर्थाभिषिक्तं
लोकालोकं तरते तीर्य्यते च । इत्यनेन पुच्छाग्रे
यजमानः स्वयं स्नम आचार्य्येणान्वारब्ध उत्तीर्य्य
आपोऽस्माभातरः शुन्धयन्त्विति ऐशान्यां दिशि
उत्थापयेत् । सुयवसा भगवतीह भूया इति
हिं कृतश्चेत् तदा हिं कृण्वती वसुमती वसूना-
मिति जपेत् । तां सचेलकण्ठां कनकशृङ्गीं
वृषप्रजां रूप्यखुरां कांस्योपदोहां विप्राय सामा-
गाय दद्यात् इतरां वा । यथाशक्ति दक्षिणा च
देया इति । तत उत्सर्गं कुर्य्यात् । देवर्षिपि-
मनुष्याः प्रीयन्तां इत्याह शौनकः । यजमानो
ब्राह्मणान् भोजयित्वा स्वस्ति वाचयीतेति ।
अस्यार्थः । नित्यादीनां शुभत्वं पूर्व्ववचनेभ्यो
ज्ञेयम् । एवमेव विधिर्गोभिलपारस्करयज्ञोक्त-
कर्म्मानुष्ठानेष्वपि अनुष्ठीयते ।
'यत्रान्या तं स्वशाखायां परोक्तमविरोधि च ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादि कर्म्मवत् ॥'
इति छन्दोगपरिशिष्टात् ॥
ततश्च अग्निमुपसमाधायेति खदिरगृह्योक्तविधि-
नाग्निं संस्थाप्य वारुणं वरुणदेवताकं
चरुं निर्व्वाप्य आज्यभागान्तं हुत्वा इति
छन्दोगेतरपरम् । स तु विरूपाक्षजपान्तां
कुशण्डिकां समाप्य महाव्याहृतीर्हुत्वा प्रकृतं
कर्म्म कुर्य्यात् । तत्र प्रथमतः पिङ्गभृङ्गस्य
इत्यादि पुराणीयं ध्यात्वा अग्ने त्वं वरुणनामा-
सीति नाम कुर्य्यात् ।
'प्रतिष्ठायां रोहितश्च वास्तुयागे प्रजापतिः ।
जलाशयप्रतिष्ठायां वरुणः समुदाहृतः ॥'
इति स्मृतेः ।
तत आवाह्य पूजयित्वा समित्प्रक्षेपानन्तरं
महाव्याहृतिहोमं कृत्वा समुद्रा ज्येष्ठा इत्यादि
चतुर्भिर्मन्त्रैश्चतस्र आहुतीर्जुहुयात् । ॐ तद्वा-
यामीति ॐ तदिदन्नक्तमिति ॐ मुनःशेपो-
ह्यीति ॐ अवते हेलो वरुण इति ॐ उदु-
त्तममिति पञ्चभिः ॐ त्वन्नोऽग्ने इति द्वाभ्यां
ॐ इमां वरुण इत्यृचैव स्थानत्रयोक्तैर्व्याहृ-
तीभिः प्रत्येकमष्टभिर्मन्त्रैश्चरुं चतुरावर्त्तं भृगु-
गोत्रो भार्गवप्रवरश्च पश्चाद्वर्त्तं सुचा जुहुयात् ।
अग्नये स्विष्टकृते च । ततः कुशण्डिकोक्त-
विधिना शेषं समापयेत् । नव वै प्राणा इति
नवाहुतिस्तुतिः । मार्जनान्त इति यजमानाभि-
षेकः । तद्विधानन्तु मत्स्यपुराणे ।
'गजाश्वरथ्यावल्मीकसङ्गमात् हृदगोकुलात् ।
नदीमादाय कुम्भेषु प्रक्षिपेच्चतुरात्तथा ॥
गोरोचनाञ्च सिद्धार्थान् गन्धान् गुग्गुलुमेव च ।
स्नपनं तस्य कर्त्तव्यं पञ्चभङ्गसमन्वितम् ।
पूर्णकर्त्तृमहामन्त्रैरेवं कृत्वा विधानतः ॥'
पञ्चभङ्गाश्च शान्तिकपौष्टिककल्पतरुक्ताः ।
'अश्वत्थोडुम्बरप्लक्षवटचूतस्य पल्लवाः ॥'
महामन्त्रैः । सुरास्त्वामभिषिञ्चन्त्वित्यादिभिः ।
एतत्पर्य्यन्तं कूपेऽपि । कापिले ।
'ऐशान्यां स्थापयेद्यूपं स्नातात् पञ्चकरान्तरम् ।
यूपश्चेतिमन्त्रेण सर्पाकारं सुशोभनम् ।
पूजयित्वा तु वस्त्राद्यैस्ततो यष्टिं प्रचालयेत् ॥'
मात्स्ये ।
'त्रिरत्निमाचो यूपः स्यात् चीरिवृक्षविनिर्म्मितः ।

यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ॥'
क्षीरवृक्षोऽश्वत्थादि:। ततो धेनुं सचेलकरुडां कांस्यादुग्धविशेषणयुक्तां जलाग्रयेऽवतारयेत्। तथा हयशीर्षपञ्चरात्रे।
'गां सवत्सां समानीय सुशीलाञ्च पयस्विनीम्। कांस्योपदोहां घण्टादिवस्त्रपुष्पोपशोभिताम्। स्वर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठां सुशोभनाम् ॥ लाङ्गूलन्यस्तहस्तोऽसौ यजमान: सबान्धव:। ग्रामे: सन्तारयित्वा तामाचार्याय निवेदयेत् ॥'
कांस्योपदोहां कांस्यक्रोडामिति यावत्। कापिले।
अजले जलसूत्रपाद्य यजमान: सभार्य्यक:। तरेद्दे प्राङ्मुखो भूत्वा कृतगोलाङ्गूलाङ्गुलि: ॥'
इदं सलिलं पवित्रं इतिमन्त्रेणावतार्य्यमाणामनुमन्त्रयेत्। तत: प्राङ्मुख: सन्नवतारयेत्। सा च गौ: पश्चिमतोऽवतार्य्या। तत: कूलसमीपं गत्वा तर्पयेत्। यथा कापिलम्।
'पुन: पुच्छोदकेनाथ सतिलेन कुशेन तु। सुमनेनैवापसव्येन पितृतीर्थेन तर्पयेत् ॥
गताश्चागमिष्यन्ति ये कुले मम बान्धवा:। ते सर्व्वे तृप्तिमायान्तु मया दत्तजलेन वै।
ततो सुधामि मन्त्रेण सुचेलां वत्ससंयुताम् ॥'
आचार्य्यमान्वारभ्य उत्तीर्य्य आपोऽस्मान्मातर: शुन्धयन्त्विति मन्त्रेण ऐशान्यासत्यापयेत्। सुयवसा भगवतीह भूया इति ब्रूयात्। सा यदि हिंकारं करोति तदा हिं क्षखतीत्यादि जपेत्। तत उक्तविशेषणयुक्तां धेनुमाचार्य्याय सामगाय दद्यात्। ततो यथाशक्ति दक्षिणाञ्च दद्यात्। एतत्पर्य्यन्तं न कूपे अवक्षिपेत्। सम्भवात् ॥*॥ तत उत्सर्गं कुर्य्यात्। अत्र विशेषमाह रत्नाकरधृतमत्स्यपुराणम्।
'फलान्याचिन्त्य मनसा विविधानि शुभानि च। प्रदद्यात् सर्व्वभूतेभ्यो जलपूर्णं जलाग्रयम् ॥'
कापिलञ्च।
'ततस्तत्पश्चिमं तीरं गत्वा पूर्व्वाननस्थित:। जलोत्सर्गं प्रकुर्व्वीत सर्व्वसत्त्वार्थकं ध्रुवम् ॥'
सर्व्वसत्त्वार्थकं सर्व्वभूतप्रयोजनकम्। सर्व्वभूतेभ्य उत्सृजेदित्यर्थ:। देवपितृमानुष्या: प्रीयन्तामिति पठेदिति शेष:। उत्सृज्य यजमानो ब्राह्मणान् स्वस्ति वाचयीतेति दक्षिणाभिरिति शेष:। एतत्पर्य्यन्तं कूपेऽपि। जलाग्रयोत्सर्गस्य सर्व्वभूतोद्देश्यकत्वेन अपक्षुद्रचेतनोद्देश्यकत्वेऽपि त्यागत्वमपि। ततश्च कीटादेर्ममेदमिति स्वीकारायोग्यत्वेन वेदमेयोद्देश्यगतस्वत्वजनकत्यागरूपत्वात् अस्य यागत्वम्। अतएव जलाग्रयोत्सर्गसुपक्रम्य मत्स्यपुराणेऽपि। प्राप्नोति तदृयागत्वेन भूय इति यागत्वेनाभिहितम्। ततश्च तच्चलं स्वस्वत्वदूरीकरणेन नद्यादिवत् साधारणीकृतम्। अतएव
'सामान्यं सर्व्वभूतेभ्यो मया दत्तमिदं जलम्। रमन्तु सर्व्वभूतानि स्नानपानावगाहनै: ॥'
इति मन्त्रलिङ्गेन उपादानं विना कस्यापि न स्वत्वमिति। ततश्चास्य यागवदुत्तरप्रतिपत्तेरश्रुतत्वात् साधारणजनस्य परिग्रहमात्रेण गोतभोक्तृन स्वामित्वश्रुतेर्यजमानस्यापि तथात्वेन स्वामित्वात् तत्र स्नानादावदोष इति तत्त्वम्। यथा गोतम:। स्वामी रिक्थक्रयसम्भिभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्द्दिष्टं वैश्यशूद्रयोरिति। परिग्रहोऽनन्यपूर्व्वस्य जलदण्डकाष्टादे: स्वीकार इति मिताक्षरा ॥ ऋक्थाधिकारे यक्तमाह-पत्नस्व:। दायाद्यं शिलोञ्छौ चान्यत्रापरिगृहीतमिति। अपरिगृहीतमन्यास्वीकृतमखामिकमिति यावत्। निर्द्दिष्टं वेतनलब्धं निर्व्वेशो भृतिभोगयोरित्यमरकोषचिकाण्डशेषयो: ॥
हयशीर्षे।
'आपोहिष्ठेति तिसृभि: पवमानं विनि:क्षिपेत्। तीर्थतोयं तथा पुण्यं शान्तितोयं द्विजे: कृतम्॥ गोकुलं पाययेत् पश्चात् द्विजान् वेदविदस्तथा। ततोऽन्नं भोजयेद्विप्रान् दद्यात्तेभ्यश्च दक्षिणाम्॥ एतत्पर्य्यन्तं कूपेऽपि ॥ * ॥ कापिले।
'नागानामष्ट नामानि लिखितानि पृथक् पृथक्। तत: कुम्भे च नि:क्षिप्य गायत्र्या च विलोड्य वै ॥ उद्धरेत् पत्रिकामेकां तत्रैव नागमीक्षयेत्। यस्य नामोद्धरेदत्स स वै जलाधिप: स्मृत: ॥ तच्च संपूज्य गन्धाद्यैर्दद्यात् क्षीरञ्च पायसम् ॥' पद्मपुराणाश्वस्य योगीश्वरधृतवचनाद्यथा।
'अष्टौ नामान्यास्रपत्रे लिखा चैव प्रयत्नत: ॥' तानि च गारुडे।
'अनन्तो वासुकि: पद्मो महापद्मोऽथ तक्षक:। कुलीर: कर्कट: शङ्खो ह्यष्टौ नागा: प्रकीर्त्तिता:॥' एतानि नामानि आम्रपत्रे लिखित्वा कलसमध्ये नि:क्षिप्य गायत्र्या छन्दसा मथ्नामि इति रघुनाथधृतमन्त्रेणालोड्य यस्य नामोत्तिष्ठति तं यथा समावाह्यानेन नागेनास्य जलस्य रक्षा कर्त्तव्या इति ब्राह्मणान् आवयेत्। हयशीर्षे।
'वैणुकं वारुणञ्चैव पुन्नागं नागकेशरम्। वकुलं चम्पकञ्चैव निम्बञ्चैवाथ खादिरम् ॥ एतेषामेव दारूणां नागयष्टि: प्रकीर्त्तिता। सवक्रकोटरं त्यक्त्वा तस्मात् कुर्य्यादृयथेप्सितम् ॥' तथा च हरिवंशे:।
'मूलचक्राङ्कितां कृत्वा स्थापयित्वा जलाग्रये। हृदयाङ्गुलमानन्तु वापीचक्रं प्रकल्पयेत् ॥ घोडशं पुष्करिण्यान्तु विंशतिञ्च सरोवरे। सागरे हस्तमात्रन्तु लौहं ताम्रन्तु पैत्तलम् ॥ चक्रञ्च विविधं प्रोक्तं कुर्य्यात्तेषां यथेप्सितम्। शतहस्ता भवेद्वापी द्विगुणा पुष्करिण्यपि ॥ त्रिगुणन्तु सरोमानमत ऊर्द्धन्तु सागर:॥' ततो द्वादशपञ्चदशविंशत्यङ्गुलविंशत्यङ्गुलमानाभ्यां यष्टिं वक्ष्यमाणमन्त्रेण स्थापयेत्। ॐ गन्धद्वारेति गन्धवारिणा ॐ भद्रं कर्णेभिरिति तैलहरिद्राभ्यां ॐ काण्डात् काण्डादिति दूर्व्वाभि: ॐ हृषदादिव इत्यादिना सप्तमृत्तिकादिभि: ॐ मधुवातेति पञ्चाङ्गुलेन या: फलिनीरिति फलोदकेन ॐ युवासुवासा इति क्षुद्रयष्टिकायुतां पताकां यष्ट्यां बध्नीयात्। ॐ यष्टये नम: इतिमन्त्रेण पूजयेत्। पुष्पाद्यलङ्कृतां यष्टिं कन्दरसमीपं नयेत्। गुरुस्तु शङ्खादिनि:स्वने राजतवरुणप्रतिमां उत्तिष्ठेति समुत्थाय प्रदक्षिणत्रयं कृत्वा आपोहिष्ठा इत्यादिना मन्त्रेण वरुणस्योत्थापनमसि इतिमन्त्रेण च जले क्षिपेत्। ततस्तत्रैव खाते ग्राह्यगोमयदधिमधुकुशमहानदीजलपञ्चरत्नानि ॐ येतेवापी रोचने दिव इतिमन्त्रेण क्षिपेत्। ॐ ध्रुवं ध्रुवेण मनसा इतिमन्त्रेण यष्टिमभिमन्त्र्य ॐ यूपव्रश्चेतिमन्त्रेण जलमध्ये आरोपयेत्। ततो जलमातृ: पूजयेत्। यथा श्रीं पूर्व्वस्याम्। ह्रीं आग्नेय्याम्। धृतीं दक्षिणस्याम्। मेधां नैर्ऋत्याम्। श्रद्धां पश्चिमायाम्। विद्यां वायव्याम्। लक्ष्मीं उत्तरस्याम्। सरस्वतीं ऐशान्याम्। अधो विद्याम्। ऊर्द्धे लक्ष्मीम्। पाद्यादिभि: संपूज्य अग्निं प्रदक्षिणीकृत्य सूर्य्यादिद्वादशग्रहदेवता: पूजयेत्। क्षमस्वेति वरुणं क्षामयेत्। कापिलम्।
'शङ्खतूर्य्यादिनिनदैस्तथा वै क्षीरधारया ॥' जलाग्रयं प्रवेशयेदिति शेष:। प्रतिष्ठानन्तरं मातृस्थे।
ततः सहस्रं विप्राणामथवाऽष्टशतन्तथा।
भोजयेच्च यथाशक्त्या पश्चाद्गच्छेद्यथा विधिम् ॥"
इति जलाग्रयोत्सर्गतत्त्वम् ॥

पुष्करी, [न्] पुं, (पुष्करमस्यास्तीति। पुष्कर+इनि:।) हस्ती। इति त्रिकाण्डशेष: ॥

पुष्कलं, क्ली, (पुष्यति पुष्टिं गच्छत्यनेनेति। पुष+"कलञ्च।" उणा० ४। ५। इति कलन् स च कित्।) ग्रासचतुष्टयात्मकभिक्षा। यथा,—
"भिक्षामाहुर्य्यतिसमं तस्माच्चतुर्गुणम्।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते ॥"
इति कौर्म्मे उपविभागे १७ अध्याय: ॥
अष्टकुक्षिपरिमाणम्। यथा, प्रायश्चित्ततत्त्वे।
"अष्टसुत्रिर्भवेत् कुक्षि: कुक्षयोश्चौ च पुष्कलम्।
पुष्कलानि च चत्वारि आढक: परिकीर्त्तित: ॥"
(नगरविशेष:। यथा, रामायणे।७।११४।११।
"हतेषु तेषु सर्व्वेषु भरत: कैकयीसुत:।
निवेशयामास तदा सप्तरात्रे द्वे पुरोत्तमे ॥
तत्रं तत्रशिलायान्तु पुष्कलं पुष्कलावते।
गन्धर्व्वदेशे रुचिरे गान्धारविषये च स:॥")

पुष्कल:, त्रि, (पुष्कं महत्त्वं लातीति। ला+क:। यद्वा, पुष्कं पुष्टिर्महत्त्वमिति यावत् तदस्यस्तीति। पुष्क+"सिध्मादिभ्यश्च।" ५। २। ९७। इति लच्।) श्रेष्ठ:। इत्यमर:। ३। १। ४८ ॥ बहु:। इति हेमचन्द्र:॥ (यथा, महाभारते। ३। ३। १०।
"राजानो हि महात्मानो योनिकर्म्मविशोधिता:।
उद्धरन्ति प्रजा: सर्व्वास्तप आस्थाय पुष्कलम्॥")
उपस्थित:। इति जटाधर: ॥

पुष्टं, त्रि, (पुष+क्तः।) क्षतपोषणम्। तत्पर्य्यायः। पुषितम् २। इत्यमरः। ३।१।६७॥ पतम् ३। इति जटाधरः॥ (यथा, मनुः। ७। १७१।

"यदा मन्येत भावेन क्षुद्रं पुष्टं बलं स्वकम्।
परस्य विपरीतञ्च तदा यायादरिं प्रति॥")

पुष्टिः, स्त्री, (पुष+भावे क्तिन्।) पोषणम्। वृद्धिः। इति मेदिनी। टे, २३॥ (यथा, मार्कण्डेये। २२। ११।

"वैदिकैर्वारणैर्मन्त्रैः प्रजानां पुष्टिहैतुकैः॥")

अश्वगन्धा। इति राजनिर्घण्टः॥ षोड़शमातृकान्तर्गतदेवताविशेषः। इति आह्निकतत्त्वम्॥ (सा तु दक्षकन्यानामन्यतमा। यथा, मार्कण्डेये।

"प्रसूत्याञ्च तथा दक्षश्चतस्रो विंशतिस्तथा।
ससर्ज्ज कन्यास्तासाञ्च सम्यङ्नामानि मे शृणु॥
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा॥")

गणपतेः पत्नी। यथा, ब्रह्मवैवर्त्तपुराणे। २। १। ६६।

"पुष्टिर्गणपतेः पत्नी पूजिता जगतीतले।
यथा विना परिच्छीणाः पुमांसो योषितोऽपि च॥"

खड्गविशेषः। यथाह भोजः।

"मङ्गला विजया पुष्टिः क्षमा तुष्टिः सुखासनम्।
प्रचण्डा सर्व्वतोभद्रा खड्गानामाहुरेकविंशतिः॥"

तन्नोक्तचन्द्रकलाया नामान्तरम्। यथा, रुद्रयामले।

"अम्बता मानदा पूषा पुष्टिस्तुष्टी रतिर्धृतिः।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा।
पूर्णापूर्णामृतादायिन्यः शशिनः कलाः॥")

पुष्टिका, स्त्री, (पुष्टेः कं जलं यस्याः।) जलशुक्तिः। इति राजनिर्घण्टः॥

पुष्टिकान्तः, पुं, (पुष्टेः कान्तः।) गणेशः। इति शब्दरत्नावली॥

पुष्टिदा, स्त्री, (पुष्टिं ददातीति। दा+कः।) अश्वगन्धा। वृद्धिः। इति राजनिर्घण्टः॥ पुष्टिदात्री च॥

पुष्प, य प्रसूने। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) पञ्चमस्वरी। मूर्द्धन्योपधः। प्रसूनं विकसनम्। य, पुष्पाति प्रसूनोरकम्। इति दुर्गादासः॥

पुष्पं, क्ली, पुष्पाति विकसति यः। (पुष्प प्रसूने+अच्।) तरुलतादीनां प्रसवः। फुल इति भाषा। तत्पर्य्यायः। प्रसूनम् २। कुसुमम् ३ सुमनस् ४। इत्यमरः। २।४।१०॥ सूनम् ५ प्रसवः ६ सुमनः ७। इति शब्दरत्नावली॥ स्वरूपपुष्पचयनफलं यथा,—

"उपहार्य्याणि पुष्पाणि मम कर्म्मपरायणः।
यो मासुपानयेन्नूमे मम कर्म्मपथे स्थितः॥
पुष्पाणि तत्र यावन्ति मम मूर्द्धनि धारयेत्।
स लभ्या पुष्कलं कर्म्म मम लोकाय गच्छति॥"

अकर्म्मण्यपुष्पदाने दोषो यथा,—

वराह उवाच।

"अकर्म्मण्येन पुष्पेण यो मामर्च्चयते भुवि।
पातनं तस्य वक्ष्यामि तच्छृणु त्वं वसुन्धरे!॥
नाहं तत् प्रतिगृह्णामि न च ते वै मम प्रियाः।
मूर्खैर्भागवतैर्दत्तं मम विप्रियकारिणः॥
पतन्ति नरके घोरे रौरवे तदनन्तरम्।
अज्ञातस्य च दोषेण दुःखान्यनुभवन्ति च॥
वानरो दश वर्षाणि मार्जारश्च चतोदश।
मूषकः पञ्च वर्षाणि बलीवर्द्दश्च द्वादश॥
छागश्चैवाष्ट वर्षाणि मासं वै ग्रामकुक्कुटः।
त्रीणि वर्षाणि महिषो भवत्येव न संशयः॥
एतत्ते कथितं भद्रे! पुण्यं यन्मे न रोचते।
अकर्म्मण्यं विशालाक्षि! पुण्यं येन ददन्ति वै॥"

इति वराहपुराणम्॥*॥

देवीप्रियपुष्पाणि यथा,—

"पुष्पाणि देव्या वक्ष्यामि प्रियाणि शृणु संप्रति।
वकुलैश्चैव मन्दारैः कुन्दपुष्पकुरण्टकैः॥
करवीरार्कपुष्पैश्च शालमलेश्चापराजितैः।
दमनैः सिन्धुवारैश्च सुरभीमरुवकैस्तथा॥
लताभिर्मल्लिकाभिश्च दूर्व्वाङ्कुरैश्च कोमलैः।
मञ्जरीभिः कुशाग्राग्र विल्वपत्रैः सुशोभनैः॥
पूजयेद्देवीं देवीं कामाख्यां त्रिपुरां तथा।
अन्याश्च या शिवाप्रोक्ताः जायन्ते पुण्यजातयः॥
ता इमाः शृणु कौमार्य्यन्ते मया वेतालभैरव!।
मालती मल्लिका जाती यूथिका माधवीलता॥
पाटला करवीरश्च जवा तर्कारिका तथा।
कुब्जकं तगरश्चैव कर्णिकारोऽथ रोचनः॥
चम्पकाम्लातकौ वाणो वर्व्वरा मल्लिका तथा।
अशोको लोध्रतिलकौ वटरूक्षशिरीषकौ॥
शमीपुष्पञ्च द्रोणञ्च पद्मोत्पलवकारुणाः।
श्वेतारुणे त्रिसन्ध्ये च पलाशः खदिरस्तथा॥
वनमालाथ सेवन्ती कुसुदोऽथ कदम्बकः।
चक्रं कोकनदश्चैव भण्डिलो गिरिकर्णिका॥
नागकेशरपुन्नागौ केतक्यञ्जलिका तथा।
दोपदा बीजपूरञ्च नमेरुः शालमेव च॥
जपुश्री पञ्चविन्यञ्च भिण्टी पञ्चविधा तथा।
एवमाद्युक्तकुसुमैः पूजयेत् वरदां शिवाम्॥"*॥

वर्ज्जनीयपुष्पं यथा,—

"पुष्पञ्च क्षमिसम्भिन्नं विशीर्णं भग्नसुन्नतम्।
सकेशं मूषिकाधूतं यत्नेन परिवर्ज्जयेत्॥
याचितं परकीयञ्च तथा पर्य्युषितञ्च यत्।
अन्यस्मृष्टं पदास्पृष्टं यत्नेन परिवर्ज्जयेत्॥"

इति कालिकापुराणे। ६८। ५४। अध्यायौ॥

केशवपूजने प्रशस्तपुष्पाणि यथा,—

"मालती मल्लिका चैव यूथिका चातिसुक्तकः।
पाटला करवीरश्च जया सेवतिरेव च॥
कुब्जकञ्चगुरुश्चैव कर्णिकारः कुरण्टकः।
चम्पकस्तगरः कुन्दो वाणा वर्व्वरमल्लिका॥
अशोकस्त्रिलकश्चम्यस्तथा चैवाटरूषकः।
अमी पुष्पप्रकाराश्च प्रशस्ताः केशवार्चने॥
केतकीपद्मपुष्पञ्च पुष्पं भृङ्गारकस्य च।
तुलस्यामलकी चैव सदास्तुष्टिकरं हरेः॥
पद्मान्यम्बुससुत्पानि रक्तनीले तथोत्पले।
सितोत्पलञ्च लक्ष्मास्य दयितानि सदा नृप!।
तानि पुष्पाणि देयानि विष्णवे प्रभविष्णवे॥"

इत्यग्निपुराणम्॥*॥

अपि च।

"जाती शतावा सुमना कुन्दं बहुपुटं तथा।
वाणश्च पङ्कजाशोकं करवीरश्च यूथिका॥
पारिभद्रं पाटला च वकुलं गिरिशालिनी।
तिलकं वनजश्चैव पीतकं तगरस्तथा॥
एतानि हि प्रशस्तानि कुसुमान्यच्युतार्च्चने।
सुरभीणि तथान्यानि वर्ज्जयित्वा तु केतकीम्॥
येषामपि हि पुष्पाणि प्रशस्तान्यच्युतार्च्चने।
पल्लवान्यपि तेषां स्युः प्रशस्तानि महासुर!॥
वीरुधानां प्रधानेन वर्हिषाश्चार्च्चयेत्तथा।
नागरुक्षैश्चाम्बुजैः कमलेन्दीवरादिभिः॥
प्रवालैः शुचिभिः शुद्धैर्जलप्रक्षालितैर्दलैः।
वनस्पतीनामर्च्चेत तथा दूर्व्वाग्रपल्लवैः॥"

इति वामने ६१ अध्यायः॥*॥

विष्णौ पुष्पविशेषदानस्य फलं यथा,—

"आरामप्रभवैः पुष्पैरच्छिद्रैः कीटवर्जितैः।
तथापर्य्युषितैस्तुलसीकृत कार्णिके विष्णुमर्च्चयेत्॥
वर्णानां हि यथा विप्रस्तीर्थानां जाह्नवी यथा।
देवानाञ्च यथा विष्णुः पुष्पाणां मालती तथा॥
मालतीमालया देवं योऽर्च्चयेद्गरुड़ध्वजम्।
जन्मदुःखजरारोगैः कर्म्मभिर्मुच्यिमाप्नुयात्॥
मालतीमालया येन पूजितः कार्णिके हरिः।
पापलक्षायुतं तस्य वपुषः शौरिः प्रमार्जति॥
मालतीपुष्पमालाभिः कार्णिके पुष्पमण्डपम्।
विष्णोर्गृहे कृतं येस्तु ते यान्ति परमां गतिम्॥
जातिपुष्पैर्विरचितां मालां यः संप्रयच्छति।
विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः॥
यः स्वर्णकेतकीपुष्पैः पूजयेद्गरुड़ध्वजम्।
अब्दकोटिशतं यावत्सुरः स्यात्तस्य वै हरिः॥
दामोदरं पूजयेद्यः कुसुमैः केतकोद्भवैः।
स वसेद्विष्णुनिलये देवेन सह मोदते॥
मल्लिकाकुसुमैर्हैवं योऽर्च्चयेत्त्रिदशेश्वरम्।
कार्णिके परया भक्त्या दहेत् पापं त्रिधार्जितम्॥
सुगन्धैर्मल्लिकापुष्पैरच्युतं योऽर्च्चयेन्नरः।
स सर्व्वपापनिर्मुक्तो विष्णुलोके महीयते॥
वेदधर्म्मेण केनाऽत्र संप्राप्ते मधुमाधवे।
योऽर्च्चयेत् स मुनिश्रेष्ठ! लभते वैष्णवं पदम्॥
यः पुनः पाटलापुष्पैरर्च्चयेद्गरुड़ध्वजम्।
सुपुण्यात्मा परं स्थानं स प्रयाति हरेर्गृहे!॥
अगस्त्यपुष्पैर्देवेशं योऽर्च्चयन्ति जनार्द्दनम्।
देवर्षे! दर्शनात्तेषां नरकाणि प्रणश्यति॥
न तत् करोति विप्रेन्द्र! तपसा तोषितो हरिः।
यत् करोति शुचीकेशो मुनिपुष्पैरलङ्कृतः॥
विहाय सर्व्वपुष्पाणि मुनिपुष्पैश्च केशवम्।
कार्णिके योऽर्च्चयेद्भक्त्या वाजिमेधफलं लभेत्॥
मुनिपुष्पकृतां मालां ये यच्छन्ति जनार्द्दने।

शुक्रोऽपि ते: समं वत्स ! कुरुते ह्यभिभावनम् ॥
ददात्यभीप्सितान् कामान् दृष्टचिन्तामणिर्यथा ।
कार्त्तिके मुनिपुष्पेण पूजितो गरुडध्वज: ॥
गवामयुतदानेन यत्फलं कार्त्तिके मुने ! ।
मुनिपुष्पेण चैकेन कार्त्तिक्यां तत् फलं स्मृतम् ॥
येऽर्चयन्ति सुराध्यक्षं करवीरै: सितासितै: ।
तेषां वर्षशतं यावत् प्रसुप्तभवति केशव: ॥
बकुलाशोककुसुमैर्येऽर्चयन्ति जगत्पतिम् ।
नि:शङ्कास्ते भवन्तीह यावच्चन्द्रदिवाकरौ ॥
अशोककुसुमै रम्यैर्जन्माशोकभयापहम् ।
पूजयित्वा हरिं याति पदं विष्णोरनामयम् ॥
शुभगन्धै: सितैर्वत्स ! कुसुमै: पङ्कजोद्भवै: ।
अधोक्षजं समभ्यर्च्य नरो याति हरे: पदम् ॥
अभ्यर्च्य कौसुमै: पुष्पै: केशवं क्लेशनाशनम् ।
प्रयाति भवनं विष्णोर्वन्दितं त्रिदशैरपि ॥
अटरूषकपुष्पैश्च पूजयेद्यो जगत्पतिम् ।
स पुण्यवान्नरो याति तद्विष्णो: परमं पदम् ॥
कार्त्तिके योऽर्चयेद्विष्णुं तुलसीविल्वपङ्कजै: ।
त्रिदशैरपि पूज्य: स न शक्यो यमकिङ्करै: ॥
माधवे योऽर्चयेद्विष्णुं तुलसीविल्वपङ्कजै: ।
त्रिदशैरपि पूज्य: स वत्सं शक्यो न किङ्करै: ॥
माधवे योऽर्चयेद्विष्णुं सुपुष्पैस्तिलकोद्भवै: ।
धूतपापो निरातङ्क: स विष्णोर्याति तत् पदम् ॥
समित्पुष्पकुशादीनि श्रोत्रिय: स्वयमाहरेत् ।
शूद्रोपनीतैश्च हरे: पूजां कुर्वन् व्रजत्यध: ॥
तस्माद्विप्रो मुनिश्रेष्ठ ! शिष्येण स्वयमेव वा ।
पुष्पादीनि समाहृत्य पूजयेत् परमेश्वरम् ॥
विप्रो दूर्वाभये: पुष्पैस्तथा काशकुशोद्भवै: ।
तुलसीविल्वपद्मैश्च पूजयेद्देवता: पितॄन् ॥
नार्चयेत्तगरै: सूर्यं धूर्तपुष्पेण केशवम् ।
देवीं लकुचपुष्पैश्च शङ्करं नागकेशरै: ॥"
कालविशेषे तस्य पर्युषितत्वं यथा,—
"प्रहरं तिष्ठते जाती प्रहरार्द्धन्तु मल्लिका ।
त्रियामं मुनिपुष्पञ्च करवीरमहर्निशम् ॥"
आम्रमञ्जरीविल्वपत्रदानफलं यथा,—
"मञ्जरीं सहकारस्य ये प्रयच्छन्ति वैष्णवा: ।
कार्त्तिके सफलास्ते स्युर्गोकोटिफलभागिन: ॥
कार्त्तिके योऽर्चयेद्भक्त्या विल्वपत्रैश्च केशवम् ।
दद्यादयुतायुतफलं केशवस्तस्य वै सुते ! ॥
विल्वपत्रैश्च ये शस्तां कार्त्तिके कलिमर्द्दनम् ।
पूजयन्ति महाभक्त्या मुक्तिस्तेषां करे स्थिता ॥
नागकेशरपुष्पैर्य: पूजयेद्गरुडध्वजम् ।
स याति वैष्णवं स्थानं यत्र गत्वा न शोचते ॥
कदम्बकुसुमैर्यो वै पूजयेन्मधुसूदनम् ।
जन्मायुतार्जितं पापं क्षोटितं तेन नारद ! ॥
न तथा केतकीपुष्पैर्मालतीकुसुमैस्तथा ।
तोषमायाति देवेश: कदम्बकुसुमैर्यथा ॥
दृष्ट्वा कदम्बपुष्पाणि तोषमायाति माधव: ।
किं पुन: पूजितो देव: सर्वकामप्रदो हरि: ॥
हरिं किंशुकपुष्पैर्य: पूजयेन्निदशाधिपम् ।
वैकुण्ठे रमते शश्वत् विष्णुना सह वैष्णव: ॥
वर्षाकाले च देवेशं कुसुदैश्चन्दनार्चितै: ।
योऽर्चयेत् परमं विष्णुं संसारे न पुनर्विशेत् ॥
कुन्दपुष्पैश्च विप्रर्षे ! योऽर्चयेद्गरुडध्वजम् ।
कोटिजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥
शमीपुष्पैश्च देवेशं पूजयेदसुरद्विषम् ।
यमं न पश्येद्विप्रर्षे ! न याति दुर्गतिं नर: ॥"
इति पाद्मोत्तरखण्डे २३१ अध्याय: ॥ * ॥
लक्ष्मीतुल्यप्रियपुष्पाणि यथा, नारदीयसप्तमसहस्रे ।
"मालतीबकुलाशोकशेफालिनवमालिका: ।
अम्लानतगराङ्कोटमल्लिकामधुपिञ्छिका: ॥
यूथिमष्टापदं कुन्दं कदम्बं मधुपिप्पलम् ।
पाटला चम्पकं क्षय्यं लवङ्गमतिमुक्तकम् ॥
केतकं कुरुवकं विल्वं कञ्जारकरकं द्विजम् ।
पञ्चविंशतिपुष्पाणि लक्ष्मीतुल्यप्रियाणि मे ॥"
केशवार्चने निषिद्धपुष्पाणि यथा, विष्णुधर्म्मोत्तरे ।
"उग्रगन्धीन्यगन्धीनि कुसुमानि न दापयेत् ।
अन्यायतनजातानि कण्टकीनि तथैव च ॥
रक्तानि यानि धर्म्मज्ञ ! चैत्यवृक्षोद्भवानि च ।
श्मशानजातान्यन्यानि यानि चाकालजानि च ॥"
तथा ।
"कुटजं शाल्मलीपुष्पं गिरीयञ्च जनार्द्दने ।
निवेदितं भयं रोगं नि:स्वत्वञ्च प्रयच्छति ॥
वन्धुजीवकपुष्पाणि रक्तान्यपि च दापयेत् ।
अशुक्लरक्तकुसुमदानात् दौर्भाग्यमाप्नुयात् ॥"
परारोपितवृक्षस्य पुष्पग्रहणे दोष: । अगस्त्य: ।
"परारोपितवृक्षेभ्य: पुष्पाण्यानीय योऽर्चयेत् ।
अविज्ञाप्य च तस्येव निष्फलं तस्य पूजितम् ॥"
एतद्विषयेतरपरम् ।
"द्विजस्तृणैक:पुष्पाणि सर्व्वत: स्वयमाहरेत् ॥"
इति याज्ञवल्क्यात् ॥
"दैवात्प्रार्थनु कुसुममस्त्रेयं मनुरब्रवीत् ॥"
इति वचनात् ॥
"गोग्रार्थे हवमेधांसि वीरुदनस्पतीनाम् ।
पुष्पाणि स्वयमादद्यात् प्रजानि चापरिदंहितानि ॥".
इति गोतमवचनाच्च ॥
द्विषेतरस्य दोषोऽपि ।
"हृतं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम् ।
अप्रयच्छन्नियच्छागो दक्षस्तद्देवमर्हति ॥"
इति स्मृते: ॥*॥
देवोपरि धृतं मस्तकोपरि धृतं अधोवस्त्रधृतं अन्तर्जलस्थितञ्च पुष्पं दुरितमिति हरिभक्तिनामके ग्रन्थे । अभिवाद्याभिवादकस्करस्थपुष्पं प्रोक्षणात् कर्म्मक्षयम् । इति केचित् ॥ * ॥
याचितादिपुष्पदानस्य निष्फलत्वम् । याचितं निष्फलं पुष्पं क्रयक्रीतञ्च निष्फलमिति वदन्ति ।
वामहस्तचितादिपुष्पस्यादेयत्वं यथा,—
"न पुष्पञ्छेदनं कार्य्यं देवार्थे वामहस्तत: ।
न दद्यात्तानि देवेभ्य: संस्थाप्य वामहस्तत: ॥"
समित्पुष्पादीनां स्वयमाहरणीयत्वं हारीतोऽप्यातातपौ ।
"समित्पुष्पकुशादीनि ब्राह्मण: स्वयमाहरेत् ।
शूद्रानीतै: क्रयक्रीतै: कर्म्म कुर्व्वन् पतत्यध: ॥"
क्रये प्रतिप्रसवमाह ब्रह्मपुराणम् ।
"पुष्पैर्धूपैश्च नैवेद्यैर्वीरक्रयक्रियाहृते: ॥"
वीरक्रयो वीरवत् याच्ञाशून्येन विक्रेतुरुपस्थस्तूल्येन क्रय: ॥ * ॥ पुष्पदानप्रकारो ज्ञानमालायाम् ।
"पुष्पं वा यदि वा पत्रं फलं नैवेद्यमधोमुखम् ।
पुष्पाञ्जलिविधिं हित्वा यथोत्पन्नं तथार्पणम् ॥"
मध्याह्नस्नानानन्तरं पुष्पचयनस्य दोषो यथा,—
"स्नानं कृत्वा तु ये केचित् पुष्पं गृह्णन्ति वै द्विजा: ।
देवतास्तन्न गृह्णन्ति भस्मीभवति दारुवत् ॥"
एतत्तु द्वितीयस्नानाभिप्रायम् । इति रत्नाकर: ॥
वर्ज्जं मत्स्यसूक्ते ।
"स्नात्वा मध्याह्नसमये न छिन्द्यात् कुसुमं नर: ।
तत्पुष्पस्यार्पणे देवि ! रौरवे परिपच्यते ॥"
पुष्पाभावे देयानि यथा, विष्णुधर्म्मोत्तरे ।
"पुष्पाभावेऽपि देयानि पत्राणि च जनार्द्दने ।
पत्राभावे जलं दद्यात्तेन पुण्यमवाप्यते ॥" * ॥
पुष्पदानमाहात्म्यं यथा,—
"न रत्नैर्न सुवर्णेन न वित्तेन च भूरिणा ।
तथा प्रसादमायाति यथा पुष्पैर्जनार्द्दन: ॥ * ॥
देवताविशेषे वर्ज्जनीयपुष्पं यथा, ज्ञातातप: ।
"शिवे विवर्ज्जयेत् कुन्दसुमानच्च हरेस्तथा ।
देवीनामर्कमन्दारौ सूर्य्यस्य तगरन्तथा ॥" *
पुष्पविशेषाणां कालिकपर्य्युषितत्वम् । भविष्ये ॥
"पद्मानि सितरक्तानि कुसुदान्युत्पलानि च ।
एषां पर्य्युषिताग्रहा कार्य्या पञ्चदिनोत्तरम् ॥"
पुष्पविशेषस्यापर्य्युषितत्वं यथा,—
"तुलसगस्त्यविल्वानां न च पर्य्युषितात्मता ॥"
योगिनीतन्त्रे ।
"विल्वपत्रञ्च माघञ्च तमालामलकीदलम् ।
कञ्जारं तुलसीचैव पद्मञ्च मुनिपुष्पकम् ।
एतत् पर्य्युषितं न स्यात् यद्यान्यत् कालिकात्मकम् ॥"
कालिकात्मकं प्रस्फुटनयोग्यम् । इत्येकादश्यादितत्त्वम् । राघवभट्टमते पुष्पविशेषाणां कालिकपर्य्युषितत्वं यथा,
"विल्वापामार्गजातीतुलसिशमिशतकेतकीभृङ्गदूर्व्वा
मन्दाम्भोजादिदर्भा मुनितिलतगरब्रह्मकञ्जारमल्ली ।
चम्पाशारातिकुम्भीद्रुमनमरुवका विल्वतो ऽन्यानि ग्रस्ता-
स्त्रिंशत्तृप्त्यै क्रमेरीश्वरनिधिनिधि-वसु-भू-भू-यमा भूय एवम् ॥"
अक्षार्थ: । अक्षता अतताकरी । मन्द: मन्दार: । अद्रिर्नागकेशर: । मुनिरगस्त्य: । अभ्यारातिः करवीर: । कुम्भी पाटला । विल्वमारभ्य अद्रिपर्य्यन्तं गन्धयित्वा दर्भमारभ्य पुनर्विल्वादि गन्धयेत् । एतद्विनोत्तरं पर्य्युषितानीत्यर्थ: । इति पदार्थादर्श: ॥*॥ पुष्पक्रीड़ायां वर्ज्जनीयानि यथा,

पुष्पचयनम् १ पुष्पार्पणे दयितार्थिता २ माला ३ गोत्रस्खलनेर्ष्या ४ वक्रोक्तिः ५ सम्भ्रमाङ्गेष्टः ६ । इति कविकल्पलता ॥ (घोटकलक्षणविशेषः । यथा, अश्ववैद्यके । ३ । ८२—९२ ।

"आगन्तवस्तुरङ्गस्य ये भवन्त्यन्यवर्णगाः ।
बिन्दवः पुष्पसंज्ञास्तु ते हिताहितसंज्ञकाः ॥
तेषां प्रदेशभेदेन लक्षणं यद् व्यवस्थितम् ।
तत्तथैव समासेन विस्पष्टं कीर्त्यतेऽधुना ॥
अपाने च ललाटे च भ्रुवोर्मूर्द्धनि कर्णयोः ।
निगाले चैव केशान्ते पुष्पं धन्यतमं स्मृतम् ॥
स्कन्धे वक्षसि कट्यां च सुक्ष्योर्वाङ्कुक्षयोः ।
हन्वोः पृष्ठे च वाहानां पुष्पं स्वामिहितप्रदम् ॥
नाभौ केशे तथा कण्ठे दन्ते चैव हि वाजिनाम् ।
पुष्पं धन्यतमं प्रोक्तं भर्त्तुः सर्व्वार्थसाधकम् ॥
अप्रशस्तानि दृष्टानि सन्निधियानि वाजिनाम् ।
तानि सम्यक् प्रवक्ष्यामि पुष्पाख्यागमदर्शनात् ॥
अधरोष्ठे कटे प्रोथे उत्तरौष्ठे तथैव च ।
घोणायां गण्डयोश्चैव भ्रुकयोश्च तथा भ्रुवोः ॥
ग्रीवायाश्च वहे चैव स्कन्धयोः सूरके स्फिचि ।
पार्श्वौ क्रोडे च पुष्पाणि निन्दितानीति निश्चयः ॥
रक्तं पीतं तथा कृष्णं पुष्पं सर्व्वत्र नेष्यते ।
शुभप्रदेशसञ्जातं भवेत् साधारणं ततः ॥
पुत्रलाभं धनप्राप्तिमारोग्यं विजयं तथा ।
विन्द्यात् पुष्पैः शुभैर्भर्त्तुरशुभैश्च विपर्य्ययम् ॥
सर्व्वाङ्गपुष्पितो वाजी परित्याज्यो न संशयः ॥")

स्त्रीरजः । (यथा, मार्कण्डेये । ५९ । ४२ ।

"स्त्रीणां पुष्पं हरत्यन्या प्रवृत्तं सा तु कन्यका ॥")

विकाशः । इति मेदिनी । पे, ८ । धनदस्य विमानम् । नेत्ररोगविशेषः । इति हेमचन्द्रः ॥ फुली इति भाषा ॥ अस्यौषधं यथा,—

"हरीतकी वचा कुष्ठं पिप्पली मरिचानि च ।
विभीतकस्य मज्जा च गुडनाभिर्मनःशिला ।
सर्व्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत् ॥
नाशयेत्तिमिरं कण्डूं पटलान्यर्ब्बुदानि च ।
अधिकानि च मांसानि यच्च रात्रौ न पश्यति ॥
अपि द्विवार्षिकं पुष्पं मासैकेन साधयेत् ।
वर्षिचन्द्रोदया नाम वृद्धा दृष्टिप्रसादनी ॥"

इति चक्रपाणिदत्तः ॥

(अस्य चिकित्सान्तरं यथा,—

"पूर्व्वाहारविहारेषु नेत्रे पुष्पञ्च जायते ।
प्रथमं सुखसाध्यं स्यात् द्वितीयं कष्टसाधकम् ॥
तृतीयं शस्त्रसाध्यन्तु चतुर्थन्त्वसाधकम् ।
शुक्लपुष्पं तथा रोधं शुक्लनाभिर्मनःशिला ॥
काञ्जिकेन तु संपेष्य छायाशुष्कां भिषग्वरः ।
वातिके काञ्जिकेनापि पैत्तिके पयसा हिता ॥
श्लैष्मिके मधुसंयुक्ता पुष्पस्याञ्जनतो हिता ।"

इति हारीते चिकित्सितस्थाने चतुश्चत्वारिंशत्तमेऽध्याये ॥)

पुष्पकं, क्ली, (पुष्पमिव पुष्पैर्वा कायति प्रकाशते इति । कै + कः । पुष्प + संज्ञायां कन् वा ।) रीतिपुष्पम् । (पुष्पमिव प्रतिभाति । पुष्प + "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) धनदस्य विमानम् । (कालपर्य्ययेण धनदं विजित्य रावणेन हृतेऽस्मिन् रावणस्यैव जातम् । यथा, रघौ । १० । ४६ ।

"वैमानिकाः पुण्यकृतः त्यजन्तु मरुतां पथि ।
पुष्पकालोकसंक्षोभं मेघावरणतत्पराः ॥")

नेत्ररोगः । रक्तकर्दमम् । रसाञ्जनम् । लोहकौट्टम् । सुवर्णकारशकटी । इति मेदिनी ॥ कासीसम् । इति हेमचन्द्रः ॥ (पुष्प + स्वार्थे कन् । पुष्पम् । यथा, गारुडे १८२ अध्याये ।

"सप्ताभिमन्त्रितं कृत्वा करवीरस्य पुष्पकम् ।
स्त्रीणामग्रे भ्रामयेच्च जगद्वै सा वशा भवेत् ॥"

पुं, निर्व्विषसर्पजातिभेदः । यथा, सुश्रुते कल्पस्थाने । ४ अध्याये ।

"निर्व्विषास्तु गलगोली मूकपत्रोऽजगरो दिव्यको वर्षाहिकः पुष्पशकली व्योतीरथः चौरिकः पुष्पकोऽतिपताकोऽन्याहिको गौराहिको वृक्षेशय इति ॥" ✱ ॥ पर्व्वतभेदः । यथा, मार्कण्डेये । ५५ । १३ ।

"स्वर्णशृङ्गो ग्रातशृङ्गो पुष्पको मेघपर्व्वतः ॥"

प्रासादस्य मण्डपभेदः । यथा विश्वकर्म्मप्रकाशे । ६ अध्याये ।

"अथातः संप्रवक्ष्यामि मण्डपानाञ्च लक्षणम् ।
मण्डपान् प्रवरान् वक्ष्ये प्रासादस्यानुरूपतः ॥
विविधा मण्डपाः कार्य्याः श्रेष्ठमध्यकनीयसः ।
नामतस्तान् प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः ॥
पुष्पकः पुष्पभद्रश्च सुव्रतो नन्दनन्दनः ।
कौशल्यो वृद्धिसंकीर्णो गजभद्रो जयावहाः ॥")

पुष्पकरण्डकं, क्ली, (पुष्पाधारः करण्ड इव कायतीति । कै + कः । बहुतरमनोरमपुष्पाधारकत्वादस्य तथात्वम् ।) उज्जयन्यां शिवस्य उद्यानम् । यथा, शब्दमाला ।

"महाकालस्योज्जयनी विशालावन्तिका तथा ।
तस्य उद्यानकं ज्ञेयं ज्ञात्वा पुष्पकरण्डकम् ॥"

पुष्पकरण्डिनी, स्त्री, (पुष्पकरण्डकं शिवोद्यानमस्त्यस्या इति । इनिः । स्त्रियां ङीप् ।) उज्जयिनी । यथा, हेमचन्द्रः । ४ । ४१ ॥

"उज्जयिनी स्यादिशालावन्ती पुष्पकरण्डिनी ॥"

पुष्पकासीसं, क्ली, (पुष्पमिव कासीसम् ।) पीतवर्णकासीसम् । यथा, भावप्रकाशे ।

"अथ कासीसं भस्मवर्गः ।
कासीसं धातुकासीसं पांशुकासीसमित्यपि ।
तदेव किञ्चित् पीतन्तु पुष्पकासीसमुच्यते ॥
कासीसमम्लमुष्णञ्च तिक्तञ्च तुवरं तथा ।
वातश्लेष्महरं कोष्ठं नेत्रं कण्डूविषप्रणुत् ।
मूत्रशुक्राश्मरीश्वित्रनाशनं परिकीर्त्तितम् ॥"

तत्पर्य्यायः । कंसकम् २ नेत्रौषधम् ३ । इति हेमचन्द्रः ॥ वतुसकम् ४ मलीमसम् ५ कृष्णम् ६ विवदम् ७ नीलन्तुत्थकाः ८ । अस्य गुणाः । तिक्तत्वम् । शीतत्वम् । नेत्रामयापहत्वम् । क्षेपेण पामाकुष्ठादिनानात्वदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

पुष्पकीटः, पुं, (पुष्पप्रियः कीटः ।) भ्रमरः । इति त्रिकाण्डशेषः ॥ कुसुमकृमिमात्रञ्च ॥

पुष्पकेतनः, पुं, (पुष्पं केतनं ध्वजो यस्य ।) कामदेवः । इति हेमचन्द्रः । २ । १४२ ॥

पुष्पकेतु, क्ली, (पुष्पस्य नेत्ररोगविशेषस्य केतुरिव विनाशकत्वात् ।) कुसुमाञ्जनम् । इत्यमरः । २ । ६ । १०३ ॥

पुष्पघातकः, पुं, (हन्तीति । हन + ण्वुल् । घातकः । पुष्पाणां पुष्पवृक्षाणां घातकः नाशकः ।) वंशः । इति शब्दमाला ॥

पुष्पचापः, पुं, (पुष्पमेव पुष्पमयो वा चापोऽस्य ।) कामदेवः । इति हेमचन्द्रः । २ । १४१ ॥ (यथा, कथासरित्सागरे । १४ । २६ ।

"सा संमोहनवाय्यवारुणास्त्रैरिन्तरैः ।
विद्धेव पुष्पचापेन ततृषे समलक्ष्यत ॥"

पुष्पाणां चापः । पुष्पधनुः । यथा, रघौ । १९ । ४५ ।

"आततज्यमकरोत् स संसदा
विस्मयस्तिमितनेत्रमीक्षितः ।
शैलसारमपि नातियत्नतः
पुष्पचापमिव पेशलं स्मरः ॥")

पुष्पचामरः, पुं, (पुष्पं चामर इवास्य ।) दमनवृक्षः । इति त्रिकाण्डशेषः ॥ केतकवृक्षः । इति शब्दमाला ॥

पुष्पदः, पुं, (पुष्पं ददातीति । दा + कः ।) वृक्षः । इति हेमचन्द्रः । ४ । १८० ॥ पुष्पदातरि, त्रि ॥

पुष्पदन्तः, पुं. (पुष्पमिव शुक्लो दन्तोऽस्य ।) वायुकोणस्थदिग्गजः । इत्यमरः । १ । ३ । ४ ॥ विद्याधरविशेषः । इति मेदिनी । ते, २१३ ॥ जिनभेदः । इति हेमचन्द्रः ॥ नागभेदः । इति धरणिः ॥ (यथा, महाभारते । ७ । २०० । ७० ।

"अर्णी कृत्वेलपुत्रश्च पुष्पदन्तश्च चाम्रकः ॥"

पार्व्वतीप्रदत्तः कार्त्तिकेयस्यानुचरविशेषः । यथा, महाभारते । ८ । ४५ । ४६ ।

"उल्कादं पुष्पदन्तञ्च शङ्कुकर्णं तथैव च ।
प्रददावग्निपुत्राय पार्व्वती शुभदर्शना ॥"

विष्णोरनुचरविशेषः । यथा, भागवते । ८ । २१ । १७ ।

"जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः ॥"

शिवगणभेदः । यथा, कथासरित्सागरे । १ । ४६ ।

"प्रसादवित्तकः शम्भोः पुष्पदन्तो गणोत्तमः ।
न्यषेधि च प्रवेशोऽस्य नन्दिना द्वारि तिष्ठता ॥")

पुष्पदन्तकः, पुं, गन्धर्व्वविशेषः । स च महिम्नः स्तवकर्त्ता । इति शब्दरत्नावली ।

पुष्पदवः, पुं, (पुष्पाणां दवः ।) पुष्परसः । तत्पर्य्यायः । पुष्पसारः २ पुष्पस्नेदः ३ पुष्पजः ४ पुष्पनिर्य्यासकः ५ पुष्पाम्बुजः ६ । अस्य गुणाः । सुरभित्वम् । शीतत्वम् । कषायत्वम् । गौरुत्वम् । दाहभ्रमार्त्तिवमिमोहसुखामयतृष्णार्त्तिपित्तकफदोषविचारोचकनाशित्वम् । सरत्वम् । सन्तर्पणत्वञ्च । इति राजनिर्घण्टः ॥

पुष्पधन्वा, [न्] पुं, (पुष्पं धनुरस्येति । "धनुषश्च ।" ५ । ४ । १३२ । इति अनङादेशः ।)

कामदेवः । इत्यमरः । १ । १ । २७ ॥ (यथा, कुमारसम्भवे । २ । ६४ ।
"सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
व्रतमखमपतस्थे प्राञ्जलिः पुष्पधन्वा ॥")

पुष्पनिघः, पुं, (पुष्पं निहन्ति घुम्नतीति । पुष्प + निघ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

पुष्पन्धयः, पुं, (पुष्पं धयतीति । धेट पाने + खश् । "अरुर्द्विषदजन्तस्य मुम् । ६ । ३ । ६७ । इति मुम् ।) भ्रमरः । इति राजनिर्घण्टः ॥ पुष्परसपानकर्त्तरि, त्रि । पुष्पपूर्व्वाद्धेटधातोः कर्त्तरि खश्प्रत्ययनिष्पन्नत्वात् । इति सुग्धबोधव्याकरणम् ॥

पुष्पपथः, पुं. (पुष्पस्य स्त्रीरजसः पन्थाः सरणिः ।) योनिः । इति चिकाण्डशेषः ॥

पुष्पपुरं, क्ली, (पुष्पवत् पाटलिपुष्पयुक्तं तद्वत् श्रीभाजनकं वा पुरम् ।) पाटलिपुत्रनगरम् । इति भूरिप्रयोगः ॥ (यथा, रघौ । ६ । २४ ।
"अनेन चेदिच्छसि गन्तुमाशु
पाशिं वरेण्येन कुरु प्रवेशे ।
प्रासादवातायनसंश्रितानां
नेत्रोत्सवं पुष्पपुराङ्गनानाम् ॥"
"पुष्पपुराङ्गनानां पाटलिपुराङ्गनानाम् ।" इति तट्टीकायां मल्लिनाथः ॥)

पुष्पफलः, पुं, (पुष्पयुक्तं फलं यस्य ।) कुष्माण्डः । इति शब्दमाला ॥ कपित्थः । इत्यमरः । २ । ४ । २१ ॥

पुष्पमासः, पुं, (पुष्पाणां मासः पुष्पप्रधानो मासो वा ।) वसन्तः । इति राजनिर्घण्टः ॥ (यथा, हरिवंशे । ५६ । ४ ।
"मासान् वै पुष्पमासादीन् गणयन्तु मम स्त्रियः ।
परिणामे तु गर्भस्य शैघ्र्यं ज्ञास्यामहे वयम् ॥")

पुष्परक्तः, पुं, (पुष्पे पुष्पावच्छेदे रक्तं रक्तवर्णमस्य । यद्वा, पुष्पं रक्तमस्य ।) सूर्य्यमणिद्रुमः । इति शब्दचन्द्रिका ॥

पुष्परसः, पुं, (पुष्पाणां रसः ।) मकरन्दः । इत्यमरः । २ । ४ । १७ ॥ (यथा, भावप्रकाशे कासाधिकारे ।
"पलं पलञ्चापि कटुत्रयञ्च
तथा चतुर्जातफलं विचूर्ण्य ।
पलानि षट् पुष्परसस्य चापि
विनिःक्षिपेत्तञ्च विमिश्रयेच्च ॥")

पुष्परसाढ्यं, क्ली, (पुष्परस इत्याढ्य आख्या यस्य ।) मधु । इति राजनिर्घण्टः ॥

पुष्परागः, पुं, (पुष्पस्येव रागो वर्णोऽस्य ।) मणिविशेषः । पुखराज इति भाषा । तत्पर्य्यायः । मञ्जुमणिः २ वाचस्पतिवल्लभः ३ । इति भावप्रकाशः ॥ पीतः ४ पीतस्फटिकः ५ पीतरत्नः ६ पीताश्मः ७ गुरुरत्नम् ८ पीतमणिः ९ पुष्पराजः १० ॥ (यथा, रघौ । १८ । ३० ।
"तस्य प्रभा निर्ज्जितपुष्परागं
पौष्यान्तिमौ पुष्यमसूत पत्नी ॥"
"प्रभया निर्ज्जितः पुष्परागो मणिविशेषो येन ।" इति तट्टीकायां मल्लिनाथः ॥) अस्य गुणाः । अम्लत्वम् । शीतत्वम् । वातनाशित्वम् । दीपनत्वञ्च ॥ * ॥ तस्य धारणगुणः । आयुःश्रीप्रज्ञाकारित्वम् ॥ * ॥ तस्य लक्षणं यथा,—
"सुच्छायपीतगुरुगात्रसुरङ्गयुक्तं
स्निग्धञ्च निर्म्मलमतीव सुवृत्तशीतम् ।
यः पुष्परागसकलं कलयेदसह्य
पुष्णाति कीर्त्तिमतिशौर्य्यसुखायुरर्थान् ॥ * ॥
तस्य कुलक्षणं यथा,—
"क्षयाविन्दुहितं रूक्षं धवलं मलिनं लघु ।
विच्छायं भ्रकरागारं पुष्परागं सदोषकम् ॥"
तस्य परीक्षालक्षणे यथा, राजनिर्घण्टे ।
"दृष्टो विकाशयेत् पुष्परागमधिकमात्मीयम् ।
न खलु पुष्परागो जात्यतया परीक्षकैरुक्तः ॥"
तस्योत्पत्त्यादि यथा,—
सूत उवाच ।
"पतिता या हिमाद्रौ हि त्वचस्तस्य सुरद्विषः ।
प्रादुर्भवन्ति ताभ्यस्तु पुष्परागा महागुणाः ॥
आपीतपाण्डुरुचिरः पाषाणः पुष्परागसंज्ञस्तु ।
कौरण्टकनामा स्यात् स एव यदि लोहितापीतः ॥
आलोहितस्तु पीतः स्वच्छः काषायकः स एवोक्तः ।
आनीलयुक्तवर्णः स्निग्धः सोमालकः सगुणः ॥
अत्यन्तलोहितो यः स एव खलु पद्मरागसंज्ञः स्यात् ।
अपि चेन्द्रनीलसंज्ञः स एव कथितः सुनीलः सन् ॥
भूर्ज्जं वैदूर्य्यमयैरिव ग्रथितं तस्य रत्नशास्त्रविदः ।
धारणफलञ्च महत् किन्तु स्त्रीणां सुतप्रदो भवति ॥"
इति गारुडे ७५ अध्यायः ॥ * ॥
प्रकारान्तरम् ।
"गुणपुण्यसमः कान्त्या स्वच्छभावस्तु चिक्कणः ।
पुत्रदो धनदः पुण्यः पुष्परागमणिर्भवेत् ॥
दैत्यधातुसमुद्भूतः पुष्परागमणिर्द्विधा ।
पद्मरागाकरे कश्चित् कश्चित्तार्क्ष्योपलाकरे ॥
ईषत्पीतच्छविच्छायास्वच्छं कान्त्या मनोहरम् ॥
पुष्परागमिति प्रोक्तं रङ्गसोममहीभुजा ॥
ब्रह्मादिजातिभेदेन तद्विज्ञेयं चतुर्विधम् ।
छाया चतुर्विधा तस्य सिता पीता सितासिता ॥"
इति युक्तिकल्पतरुः ॥

पुष्परेणुः, पुं, (पुष्पाणां रेणुः ।) परागः । इति शब्दरत्नावली ॥ (यथा, रघौ । १ । ३८ ।
"सेव्यमानौ सुखस्पर्शैः शालनिर्य्यासगन्धिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥")

पुष्परोचनः, पुं. (पुष्पं रोचनेवास्य । पुष्पेषु रोचनः रुचिप्रदो वा ।) नागकेसरः । इति चिकाण्डशेषः ॥

पुष्पलावः, पुं, (पुष्पं लुनाति अवचिनोति मालार्थमिति । पुष्प + लू + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) मालाकारः । इति जटाधरः ॥ (स्त्रियां ङीष् । मालाकारपत्नी । यथा, मेघदूते । २८ ।
"गन्धस्वेदापनयनरुजा क्लान्तकर्णोत्पलानां
छायादानक्षणपरिचितः पुष्पलावीमुखानाम् ॥")

पुष्पलावी, [न्] पुं, (पुष्पं लुनातीति । लूञ्छिदि + णिनिः ।) मालाकारः । इति हेमचन्द्रः । ३ । ५६८ ॥

पुष्पलिट्, [ह्] पुं, (पुष्पं लेढीति । लिह् + क्विप् ।) भ्रमरः । इत्यमरः । २ । ५ । २६ ॥

पुष्पवती, स्त्री, (पुष्पमस्त्यस्या इति । पुष्प + मतुप् । मस्य वः । ततो ङीप् ।) रजस्वला । इत्यमरः । २ । ६ । २० ॥ (यदुक्तं,—
"कालमेघी भवेत् सोऽपि पुष्पवत्त्वाच्च धर्म्मतः ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८५ । १२ ।
"पुष्पवत्यामुपस्पृश्य त्रिरात्रोपोषितो नरः ।
गोसहस्रफलं लब्ध्वा पुनाति स्वकुलं नृप ! ॥")
पुष्पविशिष्टे, त्रि ॥ (यथा, रामायणे । २ । ६४ । १० ।
"पुष्पवद्भिः फलोपेतैश्छायावद्भिर्मनोरमैः ॥")

पुष्पवन्तौ, पुं, (पुष्प विकासे + भावे क्वन् । पुष्पो विकासोऽस्त्यनयोरिति । पुष्प + मतुप् । मस्य वः ।) एकयोक्त्या चन्द्रसूर्य्यौ । इत्यमरः । १ । ४ । १० ॥
"एकया उक्त्या अपृथग्वचनेन चन्द्रार्कौ पुष्पवच्छब्दवाच्यौ न तु पुष्पवानिन्दुः सूर्य्यो वेत्यभिधीयते । साङ्गे । एकयोक्तेति भिन्नप्रयोगे नैवेत्यर्थः । अतएव ह्यर्थकत्वात् सदा द्विवचनमित्यर्थः । पुष्पो विकाशग्रहदृयोगाद्धतुः । पुष्पवन्नक्षत्रोऽस्मो रूढोऽपि रविभ्यग्निनौ पुष्पवन्नाख्याविति नाममाला ।" इति तट्टीकायां भरतः ॥

पुष्पवाटी, स्त्री, (पुष्पाणां वाटी ।) पुष्पोद्यानम् । फुलबागान इति भाषा ॥ यथा, हेमचन्द्रः । ४ । १७६ ॥ [विका ।"
"वाटी पुष्पादृक्षवाक्षौ क्षुद्राराम: प्रसे-

पुष्पवाहनः, पुं, (पुष्पं पुष्करं वाहनमिव यस्य ।) पुष्करराजः । यथा, अग्निपुराणे ।
"राजा ययौ तत्र पुनरकरोत् पुष्पवाहनः ।
विभूतिद्वादशीं कृत्वा स गतः परमां गतिम् ॥"

पुष्पशकटी, स्त्री, आकाशवाणी । यथा,—
"चित्रोक्तिः पुष्पशकटी देवप्रश्न उपश्रुतिः ॥"
इति त्रिकाण्डशेषः ॥

पुष्पशरः, पुं, (पुष्पाणि शरा यस्य ।) कन्दर्पः । कुसुमेषुदर्शनात् ॥

पुष्पशरासनः, पुं, (पुष्पं शरासनं धनुर्यस्य ।) कन्दर्पः । पुष्पधन्वदर्शनात् ॥

पुष्पशून्यः, पुं. (पुष्पेण शून्यः ।) उदुम्बरः । इति राजनिर्घण्टः ॥ कुसुमरहिते, त्रि ॥

पुष्पसमयः, पुं, (पुष्पाणां समयः ।) वसन्तः । इत्यमरः ॥

पुष्पसारः, पुं, (पुष्पस्य सारः ।) गुग्गुलुः । इति राजनिर्घण्टः ॥ (पुष्पश्रेष्ठे, त्रि । यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।
"पुष्पसारां नन्दिनीञ्च तुलसीं कृष्णजीवनीम् ॥")

पुष्पसौरभा, स्त्री, (पुष्पे सौरभं यस्याः । तीव्रगन्धवत्त्वादेव तथात्वम् ।) कलिकारीवृक्षः । इति राजनिर्घण्टः ॥

पुष्पस्वेदः, पुं, (पुष्पाणां स्वेदः ।) पुष्पद्रवः । इति राजनिर्घण्टः ॥

पुष्पहासा, स्त्री, (पुष्पं स्त्रीरजः हास इव यस्याः ।) रजस्वला । इति शब्दरत्नावली ॥

पुष्पहीना, स्त्री, (पुष्पेण हीना ।) उडुम्बरवृक्षः । इति शब्दचन्द्रिका ॥ निष्फला । रजःशून्या । इति हेमचन्द्रः ॥

पुष्पा, स्त्री, (पुष्पं अभिधेयत्वेनास्त्यस्या इति । अर्श आद्यच् । टाप् ।) कर्णपुरी । अधुना भागलपुर इति ख्याता । तत्पर्य्यायः । चम्पा२ मालिनी३ । इति त्रिकाण्डशेषः ॥

पुष्पाजीवः, पुं, (पुष्पैराजीवति जीविकां निर्व्वाहयतीति । आ + जीव + अच् ।) मालाकारः । इति हेमचन्द्रः । ३ । ५६४ ॥

पुष्पाजीवी, [न्] पुं, (पुष्पैराजीवतीति । आ + जीव + णिनिः ।) मालाकारः । इति जटाधरः ॥

पुष्पाञ्जनं, क्ली, (पुष्पस्य नेत्ररोगविशेषस्य अञ्जनम् ।) अञ्जनभेदः । तत्पर्य्यायः । पुष्पकेतु २ कौसुम्भम् ३ कुसुमाञ्जनम् ४ रीतिकम् ५ रीतिपुष्पम् ६ पौष्पकम् ७ । तस्य गुणाः । हिमत्वम् । पित्तहिक्काम्लदाहविषकासार्शिसर्व्वनेत्रामयनाशित्वञ्च । इति राजनिर्घण्टः ॥

पुष्पाञ्जलिः, पुं, (पुष्पाणामञ्जलिः ।) कुसुमाञ्जलिः । प्रसूनाञ्जलिः । यथा,—

"पश्य पुष्पाञ्जलीन्दत्त्वा परिवाराचनञ्चरेत् ॥"

इति तन्त्रसारधृतभट्टः ॥

पुष्पावचायी, [न्] पुं, (पुष्पं अवचिनोतीति । अव + चि + णिनिः ।) मालाकारः । इति हेमचन्द्रः । ३ । ५६४ ॥

पुष्पासवं, क्ली, (पुष्पस्य आसवम् ।) मधु । इति राजनिर्घण्टः ॥ (यथा, ऋतुसंहारे । ५ । ५ ।

"यहीततामूलविलेपनस्रजः
पुष्पासवामोदितवक्त्रपङ्कजाः ॥")

पुष्पास्त्रः, पुं, (पुष्पमस्त्रमस्य ।) कन्दर्पः । इति शब्दरत्नावली ॥

पुष्पाक्षा, स्त्री, (पुष्पैराक्षयते अर्च्यते इति । आ + क्षे + कः । ततष्टाप् ।) व्रतपुष्पा । इति राजनिर्घण्टः ॥

पुष्पिका, स्त्री, (पुष्पाति विकसतीवेति । पुष्प + ख्युल् । टापि अत इत्वम् ।) दन्तमलम् । इति हारावली । १६५ ॥ लिङ्गमलम् । इति हेमचन्द्रः । ३ । २६८ ॥ अध्यायान्ते तत्प्रतिपादितोक्तिः ॥

पुष्पितः, त्रि, (पुष्प + क्तः । पुष्पं जातमस्येति । पुष्प + तारकादित्वात् इतच् वा ।) जातपुष्पः । पुष्पविशिष्टः । कुसुमितः । यथा,—

"एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्व्वं सुपुत्रेण कुलं यथा ॥"

इति चाणक्यः ॥

पुष्पिताग्रा, स्त्री, (पुष्पितं विकसितमिवाग्रं यस्याः ।) छन्दोविशेषः । तस्य लक्षणम् । यथा,—

"अयुजि नयुगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा ॥"

उदाहरणम् ।

"करकिसलयशोभया विभान्ती
कुचफलभारविनम्रदेहयष्टिः ।
स्मितरुचिरविलासपुष्पिताग्रा
व्रजयुवतिव्रततौ हरेर्मुदेऽभूत् ॥"

इति छन्दोमञ्जरी ॥

पुष्पेषुः, पुं, (पुष्पं इषुर्यस्य ।) कामदेवः । इति हेमचन्द्रः । २ । १४१ ॥ (यथा, कथासरित्सागरे । ७ । १६ ।

"तुल्याभिलाषामालोक्य स चैकां सुनिकन्यकाम् ।
ययावकस्मात् पुष्पेषुप्रहाघातरसङ्गताम् ॥")

पुष्यः, पुं, (पुष्यन्त्यस्मिन्नर्था इति । पुष + "पुषिद्यौ नक्षत्रे ।" ३ । १ । ११६ । इति क्यप् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गताष्टमनक्षत्रम् । तत्तु बाणाकारैकतारात्मकम् । इति ज्योतिषम् ॥ तत्पर्य्यायः । सिध्यः २ तिष्यः ३ । इत्यमरः । १ । ३ । २२ ॥ पुष्या ४ । इति भरतः ॥ (यथा, मनुः । ४ । ८६ ।

"पुष्ये तु छन्दसां कुर्य्याद्बहिरुत्सर्ज्जनं द्विजः ॥")

तस्य स्वरूपं यथा,—

"बालपीठकठिनौरजःप्रभे
मध्यमाश्रितविहायसे गुरौ ।
तौलिकात् पृथुतराद्वलोचने
लोचनाब्जकुमितागताः कलाः ॥" २ । ५२ ॥

इति कालिदासकृतरात्रिलक्षणनिरूपणम् ॥ * ॥

तत्र जातस्य फलम् ।

"प्रसन्नगात्रः पिठमाढभक्तः
स्वधर्म्मयुक्तोऽभिगयाभियुक्तः ।
भवेन्मनुष्यः खलु पुष्यजन्मा
सम्मानधामौकरवाहनाढ्यः ॥"

इति कोष्ठीप्रदीपः ॥

तत्रैव गङ्गास्नानफलं यथा,—

"संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्य्ययोः ।
पुष्ये स्नात्वा तु जाह्नव्यां कुलकोटीः समुद्धरेत् ॥"

इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥

पौषमासः । कलियुगः । इति मेदिनी । ये, ३८ ॥ (सूर्य्यवंशीयनृपविशेषः । यथा, रघुः । १८ । ३२ ।

"तस्य प्रभानिश्चितपुष्यरागं
पौष्यां तिथौ पुष्यमसक्त पत्री ।
तस्मिन्नपुष्यमुदिते समग्रां
पुष्टिं जनाः पुष्य इवं दितीये ॥"

पुष + भावे क्यप् । पुष्टिः । यथा, ऋग्वेदे । १ । १६१ । १२ ।

"त्रिः सप्त विष्युलिङ्गका विषस्य पुष्यमचन् ॥"

"विषस्यासदावरकस्य पुष्यं पोषमचन् ।" इति तद्भाष्ये सायनः ॥)

पुष्यरथः, पुं. (पुष्य इव रथः । पुष्ये यात्रोत्सवादौ रथो वा ।) यत् चक्रयानं युद्धार्थं न भवति किन्तु यात्रोत्सवादौ सः । तत्पर्य्यायः । चक्रयानम् २ । इत्यमरः । २ । ८ । ५१ ॥ (यथा, माघे । ३ । २२ ।

"महारथः पुष्यरथं रथाङ्गी
क्षिप्रं चपागाय इवाधिरूढः ॥")

पुष्यलकः, पुं, (पुष्यं पुष्टिं लकति लाकयति वा । लक + अच् ।) गन्धद्रव्यः । (यथा,—

"केशेषु चमरीं हन्ति सीन्धि पुष्यलको हतः ॥"

इति व्याकरणम् ॥)

चपलकः । क्लीबः । इति मेदिनी । के, १६६ ॥

पुष्यस्नानं, क्ली, (पुष्ये पुष्यनक्षत्रकाले स्नानम् ।) पुष्याभिषेकः । तस्य विधिर्यथा,—

और्व्व उवाच ।

"शृणु राजन् ! प्रवक्ष्यामि पुष्यस्नानविधिक्रमम् ।
येन विज्ञातमात्रेण विघ्ना नश्यन्ति सन्ततम् ॥
पौषे पुष्यर्क्षगे चन्द्रे पुष्यस्नानं नृपश्चरेत् ।
सौभाग्यकल्याणकरं दुर्भिक्षमरकापहम् ॥
विष्ट्यादिदुष्करणे व्यतीपाते च वैधृतौ ।
वज्रे शूले हर्षणादौ योगे यदि न लभ्यते ॥
तृतीयायुक्तपुष्यर्क्षे रविसौरिकुजेऽहनि ।
तदा समस्तदोषाणां तत्स्नानं हानिकारकम् ॥
यद्दोषाश्च जायन्ते यदि राज्येषु चेतयः ।
तदा पुष्यर्क्षमात्रे तु कुर्य्यान्नास्नान्तरेऽपि तत् ॥
इयन्तु ब्रह्मणा शान्तिरुद्दिष्टा गुरवे पुरा ।
शुक्रार्थं सर्व्वदेवानां शान्त्यर्थञ्च जगत्पते ! ॥ * ॥
तुषकेशास्थिवल्मीककीटदेशादिवर्জ্জिते ।
शुक्रराहुमिश्रखादिदोषैश्च परिवर्জ্জिते ॥
काकोलूककङ्कश्येन काकोलैर्गृध्रश्येनकैः ।
वर्জ্জिते कण्टकिवनविभीतकविवर्জ্জिते ॥
शिग्रुश्लेष्मातकाभ्याश्च जलौकाद्यैर्विवर्জ্জिते ।
सुस्थाने चम्पकाशोकवकुलादिविभूषिते ॥
हंसकारण्डवाकीर्णे सरस्तीरेऽथवा शुचौ ।
पुण्यस्नानाय नृपतिर्गृह्णीयात् स्नानसत्तमम् ॥
ततः पुरोहितो राजा नानावादित्रनिःस्वनैः ।
प्रदोषसमये गच्छेत्तत्स्नानं पूर्व्ववासरे ॥
तस्य स्नानस्य कौवेर्य्यां दिशि स्थित्वा पुरोहितः ।
सुगन्धचन्दनैः पानैः कर्पूराद्यधिवासितैः ॥
गोरोचनाभिः सिद्धार्थैरक्षतैश्च फलादिभिः ।
गन्धद्वारेत्यादिभिस्तु मन्त्रैः सर्व्वाधिवासिकैः ।
अधिवास्य तु तत् स्नानं पूजयेत्तत्र देवताः ॥
गणेशं केशवं शक्रं ब्रह्माणञ्चापि शङ्करम् ।
उमया सहितं देवं सर्व्वाश्च गणदेवताः ।
मातॄश्च पूजयेत्तत्र नृपतिः सपुरोहितः ॥
मङ्गलान् सकलान् कृत्वा नानावेद्यसमन्वयम् ।
प्रदद्यात् पायसं स्वादु फलं मोदकयावकौ ॥
अधिवास्य तु तत् स्नानं दूर्व्वासिद्धार्थकाक्षतैः ।
तस्मात् स्नानात्तु भूतानिःसारयेन्मन्त्रमीरयन् ॥
अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन स्नानमेतत् करोम्यहम् ॥
ततः करौ पुटीकृत्य मन्त्रेणानेन पार्थिवः ।
आवाहयेदिमान्देवान् पूज्यान् पुण्याभिषेकतः ॥
आगच्छन्तु सुराः सर्व्वे येऽत्र पूजाभिलाषिणः ।

दिग्पोऽभिपालकाः सर्व्वे ये चान्येऽप्यंशभागिनः ।
ततः पुण्याञ्जलिं दत्त्वा पुनर्मन्त्रं पठेदिमम् ॥
अद्य तिष्ठन्तु विबुधाः स्थानमासाद्य मामकम् ।
श्वः पूजां प्राप्य यातारो दत्त्वा शान्तिं महीं-
सृजे ॥

तत्र तां नृपती रात्रिं नयेत्तु सपुरोहितः ।
स्वप्ने शुभाशुभं विद्यान्नृपस्तु सपुरोहितः ॥
कृत्वा पूजान्तु देवानां रात्रौ स्थाने नृपः स्वपेत् ।
शुभाशुभफलं स्वप्ने ज्ञेयं दोषशमस्मते ॥
दुःस्वप्नदर्शनं चेत् स्यात्तदा पुण्याभिषेचने ।
होमं चतुःशतं कुर्याद्दद्याद्वापि गवां शतम् ॥
गोवाजिकुञ्जराणाञ्च प्रासादस्य गिरेस्तरोः ।
आरोहणं शुभकरं राज्यश्रीवृद्धिकारकम् ॥
दधिदेवसुवर्णानां भुजगस्य च दर्शनम् ।
वीणादूर्व्वाक्षतफलपुष्पच्छदविलेपनम् ॥
घृतांशुक्षत्रयष्टीनां पद्मस्य सुहृदां तथा ।
लाभः क्षयकरः शूचेरलङ्कारस्य भूभृतः ॥
दर्शनञ्चोपरागस्य निगडेनास्य बन्धनम् ।
मांसस्य भोजनञ्चैव पर्व्वतस्य विवर्त्तनम् ॥
नाभिमध्ये तरूत्पत्तिर्हतं प्रत्यग्ररोदनम् ।
अगम्यागमनं कूपपङ्कगर्त्तावतीर्णता ।
पर्व्वतस्य तथा नद्याः प्रोत्तारः शूचुकर्त्तनम् ।
स्वपुत्रमरणञ्चैव पानं रुधिरमद्ययोः ॥
भोजनं पायसस्यापि मनुष्यारोहणं तथा ।
कल्याणसुखसौभाग्यराज्यशूचुच्चयांस्तथा ।
एते स्वप्नाश्च कुर्व्वन्ति नृपस्य नृपसत्तम ! ॥
खरोष्ट्रमहिषाणान्तु आरोहो राज्यनाशकः ।
नृत्यं गीतं तथा हास्यं पाठश्चाप्यशुभप्रदः ॥
रक्तवस्त्रपरीधानं रक्तमाल्यानुरञ्जनम् ।
रक्तां कृष्णां स्त्रियञ्चैव कामयन् म्रियमाप्नुयात् ॥
कूपान्तरे प्रवेशश्च दक्षिणाशागतिस्तथा ।
पङ्के निमज्जनं स्नानं भार्य्यापुत्रविनाशनम् ॥
नाभौ यस्य भवेत् स्वप्ने तरूत्पत्तिर्नृपस्य च ।
आदाय गर्भनाडीन्तु शूकुनो याति खं द्रुतम् ।
स तु राज्यान्तरं प्राप्य महाकल्याणमाप्नुयात् ॥
दीर्घं विंशतिहस्तन्तु हस्तघोड़शविस्तृतम् ।
कुर्य्यात्तु लक्षणोपेतं यज्ञमण्डलसत्तमम् ॥
ततोऽपरेऽह्नि पूर्व्वाह्णे मातृणां पूजनञ्चरेत् ।
कुलदेवीं वसोर्धारां वृद्धिश्राद्धं तथैव च ॥
चन्दनागुरुकस्तूरीधूपकर्पूरचूर्णकैः ।
सम्पूज्य मण्डलस्थानं तस्मिन् द्वौ शम्भवे नमः ॥
अस्त्राय हुं फड्लिखेवं लिखेन्मन्त्रदयं बुधः ।
मन्त्रविन्मण्डलञ्चैव सूत्रैः कमलसम्भवैः ।
कौषेयैर्व्वा स्वस्तिकाख्यं प्रथमं मण्डलं लिखेत् ।
चतुर्हस्तप्रमाणन्तु मण्डलं विलिखेत्ततः ॥
हस्तप्रमाणं पद्मन्तु मण्डलस्य प्रकीर्त्तितम् ।
द्वाराणि सार्द्धहस्तानि कर्णिकाकेशरोज्झितम् ।
सितं रक्तञ्च पीतञ्च कृष्णं हरितमेव च ।
शालिचूर्णैस्तु कौसुम्भैर्हारिद्रैर्हरिदुद्भवैः ॥
कुर्य्यात्तथाङ्गनैचूर्णैं राजा मण्डलदृष्टये ।
पद्मात्ततः समारभ्य नालं पश्चिमगामिनीम् ॥
पश्चिमद्वारमध्येन घृतहस्तां विनिर्द्दिशेत् ।

प्रत्येकदारमध्ये तु पद्मञ्चैवाष्टपत्रकम् ॥
कुर्य्यान्मण्डलभागे तु चूर्णैरेव पृथक् पृथक् ।
चूर्णैस्तु मण्डलं कृत्वा सूत्राण्युत्सारयेत्ततः ॥
उत्सार्य्य सूत्रं प्रथमं मण्डलं पूजयेत्ततः ।
भवनाय नम इति ततो हस्तं वियोजयेत् ॥
सप्तावलम्बहस्तन्तु रजःपातं समारभेत् ।
मध्यमानामिकाङ्गुष्ठैरपरिस्पृश्ययेच्छया ॥
अधोमुखाङ्गुलिं कृत्वा पातयेत् सुविचक्षणः ।
समरेखा तु कर्त्तव्या विच्छिन्ना पुङ्खवर्ज्जिता ।
अङ्गुष्ठपर्व्वनैपुण्यात् समा कार्य्या विजानता ॥
संसक्तं विषमं स्थूलं विच्छिन्नं क्षयराहतम् ।
पर्य्यस्तमर्पितं क्षमालिखेन्न कदाचन ।
संसक्तं कलहं विद्याद्दूरेरेखे तु विग्रहम् ॥
अतिस्थूले भवेद्व्याधिर्निष्पत्तिर्व्रीड़ा विमिश्रिते ।
विन्दुभिर्भयमाप्नोति शूचुपक्षान्न संशयः ।
क्षयायां चार्थहानिः स्याच्छिन्नायां मरणं
ध्रुवम् ॥

वियोगो वा भवेत्तस्य दृष्टव्यसुतस्य वा ॥
अविदित्वा लिखेद्यस्तु मण्डलन्तु यथेच्छया ।
सर्व्वदोषानवाप्नोति ये दोषाः पूर्व्वभाषिताः ॥
सितसर्षपदूर्व्वाढ्या रेखाः कार्य्याः प्रमाणतः ।
विमलं विनयं भद्रं विमानं शुभदं शिवम् ॥
वर्द्धमानञ्च देवञ्च रताख्यं कामदायकम् ।
दशकं स्वस्तिकाख्यञ्च द्वादशैते तु मण्डलाः ॥
यथास्थानं यथायत्नं योजनीया विचक्षणैः ॥
सागरे मथ्यमाने तु पीयूषार्थं सुरासुरैः ।
पीयूषधारणार्थाय निर्म्मिता विश्वकर्म्मणा ।
कलां कलान्तु देवानामसित्वा ते पृथक् पृथक् ।
यतः क्षतास्तु कलसास्ततस्ते परिकीर्त्तिताः ॥
नवैव कलसाः प्रोक्ता नामतस्तान्निबोधत ।
गोक्षोपगोक्षो मरुतो मयूखश्च तथापरः ।
मनोहा लक्षिभद्रश्च विरजस्तनुशोषकः ।
इन्द्रियक्षोभ्य विजयो नवमः परिकीर्त्तितः ॥
तेषामेव क्रमाद्भूप ! नव नामानि यानि तु ।
शृणु तान्यपराण्येव शान्तिदानि सदैव हि ॥
क्षितीन्द्रः प्रथमः प्रोक्तो द्वितीयो जलसम्भवः ।
पवनाशी ततो दौ तु यजमानस्ततः परः ॥
कोषसम्भवनामा तु षष्ठः स परिकीर्त्तितः ।
सोमस्तु सप्तमः प्रोक्तश्चादित्यस्तु तथाष्टमः ॥
विजयो नाम कलसो योऽसौ नवम उच्यते ।
स तु पञ्चसुखः प्रोक्तो महादेवस्वरूपधृक् ॥
घटस्य पञ्चवक्त्रेषु पञ्चवक्त्रः स्वयन्तथा ।
यथाकालास्थितः सम्यक् वामदेवादिनामतः ।
मण्डलस्य च पद्मान्ते पञ्चवक्त्रं घटं न्यसेत् ॥
क्षितीन्द्रं पूर्व्वतो न्यस्य पश्चिमे जलसम्भवम् ।
वायवे वायवं न्यस्य आग्नेये ऋषिसम्भवम् ॥
नैर्ऋत्यां यजमानन्तु ऐशान्यां कोषसम्भवम् ।
सोमसूत्रतो न्यस्य सौरं दक्षिणतो न्यसेत् ॥
न्यस्येवं कलसांश्चैव तेषु चतान् विचिन्तयेत् ।
कलसानां मुखे ब्रह्मा ग्रीवायां शङ्करः स्थितः ॥
मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः ॥
दिक्पाला देवताः सर्व्वा वेष्टयन्ति दिशो दश ॥

कुक्षौ तु सागराः सप्त सप्तद्वीपाश्च संस्थिताः ।
नक्षत्राणि ग्रहाः सर्व्व तत्रैव कुलपर्व्वताः ॥
गङ्गाद्याः सरितः सर्व्वा वेदाश्चत्वार एव च ।
कलसेषु स्थिताः सर्व्वे तेषु तानपि चिन्तयेत् ॥
रत्नानि सर्व्वबीजानि पुष्पाणि च फलानि च ।
वज्रमौक्तिकवैदूर्य्यमहापद्मेन्द्रकाटिकैः ॥
सर्व्वधान्यमयं विश्वं नागरोड्डमरं तथा ।
बीजपूरकजम्बीरकाक्षीराम्रातदाड़िमान् ॥
यवं ग्रालिञ्च गोधूमं सितसर्षपम् ।
कुङ्कुमागुरुकस्तूरीमदनं रोचनं तथा ॥
चन्दनञ्च तथा मांसीमेलां कुष्ठं तथैव च ।
कर्पूरं पञ्चगव्यञ्च जलं निर्यासकाम्बुदम् ॥
प्रैलेयं वदरं जातीपत्रपुष्पे तथैव च ।
कालशाकं तथा एका देवी पूर्णकमेव च ॥
वर्षां धात्रीं समाङ्गिष्ठां तुरुष्कं मङ्गलाष्टकम् ।
दूर्व्वां मोहनिकां भद्रां घृतमूलीं शतावरीम् ॥
पर्णानां सवलां क्षुद्रां सहदेवां गजाह्वयाम् ।
पूर्णकोषां सितां पाठां गुडूचीं शिरसिकानलौ ॥
श्यामकं गजदन्तञ्च घृतपुष्पां पुनर्नवाम् ।
ब्राह्मीं देवीं शिवां रुद्रां सर्व्वसत्वानिकां तथा ।
समाहृत्य शुभानेतान् कलसेषु निधापयेत् ॥
कलसस्य यथादेशं विधिं शस्यं गदाधरम् ।
यथाक्रमं पूजयित्वा शस्यं सस्यतया यजेत् ॥
प्रासादेन तु मन्त्रेण शस्यतन्त्रेण शङ्करम् ।
प्रथमं पूजयेन्मध्ये नानानैवेद्यवेदनैः ।
दिक्पालानां घटेष्वेव दिक्पालानपि पूजयेत् ॥
पूर्व्वे बहिःस्थापितेषु ग्रहाणां कलसेषु च ।
नवग्रहान् पूजयेत्तु मातर्मांढघटेषु च ॥
सर्व्वे देवा घटे पूज्या घटस्त्रेयं पृथक् पृथक् ।
नवैव तत्र पूर्व्वोक्ताः सदा सुखतमा नृप ! ॥*॥
भक्ष्येभोज्यैश्च पेयैश्च पुष्पैर्नानाविधैः फलैः ।
यावकैः पायसैश्चापि यथासम्भवयोजितैः ।
पुण्यस्नानाय नृपतिः पूजयेत् सकलान् सुरान् ॥
दक्षिणे मण्डलस्याथ कुम्भं निर्म्माय पायसैः ।
समिद्भिः शालिभिर्द्वार्थैर्घृतैर्दर्व्याश्चतैस्तथा ।
केवलैश्च तथैवाज्यैः पूजयेत सकलान् सुरान् ॥
होमान्ते तोषयेद्दद्भिर्नृपः सार्द्धं पुरोहितम् ।
होमान्ते मण्डलोदीच्यां वेदिकायां सपट्टकम् ।
रोचनाक्षमलङ्कारान् तथा सर्व्वान्नियोजयेत् ॥
दद्या ऋजुलमङ्गुष्ठं हिर्द्यङ्गुलयावधि ।
वृत्तं वा चतुरस्रं वा पद्मकर्णिकसंस्थितम् ।
रत्नैश्चान् पद्ममध्ये तु गोरुक्षिकविनायकैः ॥
श्रीः श्रीवृक्षो वरारोहा स्वामी देवो शुभान्विता ।
रत्नैः सर्व्वैरलङ्कारैः पट्टं कार्य्यं हिहस्तकम् ।
हस्तविस्तारसुच्छ्रायं कर्णयन्तु दशाङ्गुलम् ॥
स्नानार्थं सार्द्धहस्तन्तु पट्टं वृत्तासनान्वितम् ।
मुख्या चतुर्गुणा दीर्घा धनुर्मानन्तु पीठकम् ॥
गजसिंहकताटोपं हेमरत्नविभूषितम् ।
सिंहाख्यं साद्धविस्ताराद्दण्डासनमथापि वा ॥
व्याघ्रचित्रकपट्टैर्वा उपधानानि कारयेत ।
अन्यैर्वा निर्म्मितैश्चर्म्मैर्दृतूलकपूरितान् ॥
मुख्या दैर्घ्यार्द्धविस्तीर्णा चतुर्हस्ता सुलक्षणा ।

वितरत्यधिकमिच्छन्ति नृपस्य गुरुविद्यया ॥
अर्द्धचन्द्रसमं कृत्वादासनं चतुरस्रकम् ।
उपधानानि पूज्यायाः कर्णादिमूलदेशतः ॥
पीठगेवात्र कार्य्याणि दर्भाचित्रयुतानि च ।
यानं सिंहासनं पट्टं पूज्योपकरणादिकम् ॥
राज्ञो नूतनयोग्यं तद्वेद्या उत्तरतो न्यसेत् ।
तत्रान्तु पश्चिमे स्वर्णरत्नौघनिचिते वरे ॥
पर्य्यङ्के यज्ञदार्व्वीनिर्म्मिते महदास्तरे ।
ऊर्णाच्छादनसंयुक्त चर्म्माष्टत्या चतुष्टयम् ॥
वृषभस्य तथोर्णाया: सिंहशार्दूलयोरपि ।
पादपीठे रचयते पादावारोप्य पार्थिव: ॥
तस्मिन् पर्य्यङ्कपृष्ठस्थे चर्म्मखण्डचतुष्टये ।
नानालङ्कारभूषाढ्यं नृपतिं रत्नमालिनम् ॥
स्नापयेद्ब्राह्मणै: सार्द्धं राजानं सुखसङ्गतम् ।
संवीतकवलं कृत्वा रत्नस्रावशोभितम् ॥
कलसैर्जलिपुष्पाद्यै: शालिपूर्णैश्च स्नापयेत् ।
अष्टौ षोडशविंशाद्यैशतमष्टाधिकञ्च वा ।
कलसानां समाख्याता अधिकस्योत्तरोत्तरम् ॥
जयकल्याणदेर्मङ्गलैर्मङ्गलोत्थैश्च गाम्भवै: ।
वैष्णवैरथ दिक्पालैर्ग्रहमन्त्रैश्च मालकै: ॥
आद्यं तेज: समुद्दिष्टमाद्यं पापहरं परम् ।
आद्यं सुराणामाहारमाद्ये लोका: प्रतिष्ठिता: ॥
भौमान्तरीक्षं दिव्यं वा यत्ते कल्मषमागतम् ।
सर्व्वं तदाद्यसंस्पर्शात् प्रयाशमुपगच्छतु ॥
ततोऽपनीय गात्रात्तु कमलं वस्त्रमेव च ।
कलसै: स्नापयेद्रूपं पुण्यस्नानार्थपूरितै: ।
एभिर्मन्त्रैर्नरश्रेष्ठ ! तत्तत्त्वार्थसाधकै: ॥ * ॥
सुराख्यमभिषिञ्चन्तु ये च सिद्धा: पुरातना: ।
ब्रह्मा विष्णुश्च रुद्रश्च साध्याश्च समरुद्गणा: ॥
आदित्या वसवो रुद्रा आश्विनेयौ भिषग्वरौ ।
अदितिर्दैवमाता च स्वाहा लक्ष्मी: सरस्वती ॥
कीर्त्तिर्लक्ष्मीर्धृति: श्रीश्च सिनीवाली कुहूस्तथा ।
दितिश्च सुरसा चैव विनता कद्रवे च ॥
देवपत्न्यश्च या: प्रोक्ता देवमातर एव च ।
सर्व्वास्त्वामभिषिञ्चन्तु सर्व्वे चाप्सरसां गणा: ॥
रक्षांसि मृत्युर्नाशश्च पक्षाहोरात्रसन्धय: ।
संवत्सरो दिवा रात्रि: कला: काष्ठा: क्षणा लवा: ॥
सर्व्वे त्वामभिषिञ्चन्तु कालस्यावयवाश्च ये ।
वैमानिका: सुरगणा मनव: सागरै: सह ॥
सरितश्च महानागा यक्षा: किंपुरुषास्तथा ।
वेद्यानसा महाभागा द्विजा वैहायसास्तथा ॥
सप्तर्षय: सदाराश्च ध्रुवस्थानानि यानि तु ।
मरीचिरत्रि: पुलह: पुलस्त्यो भृगुरङ्गिरा: ॥
क्रतु: सनत्कुमारश्च सनकोऽथ सनन्दक: ।
सनातनश्च दक्षश्च जैगीषव्योऽथ नन्दन: ॥
एकतश्च द्वितश्चैव त्रितो जावालिकाश्यपौ ।
दुर्व्वासा दुर्व्विनीतश्च कण्व: कात्यायनस्तथा ॥
मार्कण्डेयो दीर्घतपा: स्थूलशीर्षो विदूरथ: ।
और्व्व: सम्वर्त्तकश्चैव च्यवनोऽत्रि: पराशर: ॥
द्वैपायनो यवक्रीतो देवरात: सहाद्भुज: ।
एते चान्ये च बहवो देवव्रतपरायणा: ॥
सशिष्यास्त्वभिषिञ्चन्तु सदाराश्च तपोधना: ॥
पर्व्वतास्सरितो नद्य: पुण्यान्यायतनानि च ।
प्रजापति: क्षितिश्चैव गावो विश्वस्य मातर: ॥
वाहनानि च दिव्यानि सर्व्वलोकाचराचरा: ।
अमृत: पितरस्तारा ओषधा: सर्व्वदिग्जलम् ॥
एते चान्ये च बहव: पुण्यसंकीर्त्तना: शुभा: ।
तोयैस्त्वामभिषिञ्चन्तु सर्व्वाप्यायनिवर्द्धका: ॥
इत्येवं शुभदैवत्यैर्मन्त्रैर्दिव्यैस्तथापरै: ।
शैवैर्नारायणै रौद्रैर्मन्त्रसङ्घैस्समुद्भवै: ॥
आपोहिष्ठा हिरण्यैति सम्भवैति सुरेति च ।
मानस्तोकेतिमन्त्रेण गन्धद्वारेत्यनेन च ॥
सर्व्वमङ्गलमङ्गल्यै: श्रीश्च ते यशसेति च ।
इत्येवं स्नानमासाद्य गात्रमार्द्रन्तु कम्बलै: ॥
सर्व्वमङ्गलमन्त्रेण वस्त्रं कार्पासकं न्यसेत् ।
आचम्य च ततो देवान् गुरुं विप्रांश्च पूजयेत् ॥
छत्रं छत्रं चामरञ्च वरेणामन्त्र्य गर्जनया ।
मन्त्रं जप्त्वा धारयेत्तु ततो गच्छेद्वृताग्रतम् ॥
तत्र गत्वा वह्निमध्ये वह्निश्रीर्व्वाच्य पार्थिव: ।
अनिमित्तनिमित्तानि लक्षयेत्तत्र विज्ञभि: ॥
दैवज्ञकपुरोधामात्यबन्धिभिर्जनैर्वृत: ।
वाहिचघोषैस्तुमुलैस्तथा तौर्य्यत्रिकै: शुभै: ॥
स्नात्वा शेषे पुन: शान्तिमाशीर्व्वाच्य च वै द्विजान् ।
पूर्णां विधाय विधिवद्दक्षिणां कनकाप्लुत ॥
धान्यानि चाथ वासांसि दत्त्वा कुर्य्याद्विसर्ज्जनम् ।
तत: शेषजलै: सर्व्वानात्मादीन् पुरोहित: ।
सेचयेच्चतुरङ्गञ्च बलञ्चापि सराष्ट्रकम् ॥
एवं कृत्वा नृप: पश्चात्तिरात्रं संयतो भवेत् ।
मांसमैथुनहीनञ्च कुर्य्यात्क्षत्रियसेवनम् ॥
पुण्यनक्षत्रयुक्ता तु तृतीया यदि लभ्यते ।
तस्यां पूज्या सदा देवी चण्डिका शुक्लपक्षे च ॥
पञ्चालिकाविवाहाद्यै: स्त्रियूनां कौतुकैस्तथा ।
वैवाहिकेन विधिना मोदयेच्चण्डिकां शिवाम् ॥
चतुष्पथेषु सर्व्वेषु देवदेवीगृहेषु च ।
पताकाभिरलङ्कुर्य्यादेवं कुर्व्वन्न सीदति ॥
एवं कृत्वा शान्तियागं तथा पुण्याभिषेचनम् ।
चतुरङ्गै: समं राजा भार्य्याभिस्तनयै: सह ।
राज्यमण्डलसंयुक्त: परत्रेह न सीदति ॥
नात: परतरो यज्ञो नात: परतरोत्सव: ।
नात: परतरा शान्तिर्नात: परतरं शिवम् ॥
अनेनैव विधानेन नृपतेरभिषेचनम् ।
युवराज्याभिषेकञ्च कुर्य्याद्राजपुरोहित: ॥
नृपाभिषेककरणमादौ यदि समाचरेत् ।
अनेनैव विधानेन स्थिर: स्यान्नृपतिस्तदा ।
अयं यज्ञ: समुद्दिष्ट: शक्रार्थे ब्रह्मणा पुरा ।
एवं यज्ञं नृपो दृष्ट्वा परत्रेह न सीदति ॥"

इति कालिकापुराणे पुण्याभिषेक: ८६ अध्याय: ॥

पुण्या, स्त्री, (पुण्यति कार्य्यमीति । पुण्य + क्विप् यत् वा । निपातनात् साधु: । ततष्टाप् ।) पुण्यनक्षत्रम् । इति शब्दरत्नावली ॥ (यथा, इन्द्रजालतन्त्रसंग्रहे ।

"अश्विनीरुद्रमूलाश्च पुष्या पुनर्वसुस्तथा ।
यत्र्याकर्षञ्च कर्त्तव्यं कारयेच्च सदा बुध: ॥")

पुस्त, क, वन्धे । इति कविकल्पद्रुम: ॥ (चुरा०-उभ०-सक०-सेट् ।) पञ्चसम्बरी । इन्द्रोपध: । क, पुस्तयति । इति दुर्गादास: ॥

पुस्त, क्ली, (पुस्त्यते इति । पुस्त बन्धादरादौ + घञ् ।) वेष्टादिशिल्पकर्म्म । आदिना काष्ठपुत्तलिकास्वनित्रखननादि कर्म्म गृह्यते । इति शुभूत्यादय: ॥

चर्म्मा वा दारुणा वाथ वस्त्रेणाप्यथ चर्म्मणा ।
लोहरत्नै: कृतं वापि पुस्तमित्यभिधीयते ॥"

इत्यमरटीकायां भरत: ॥

(यथा, वाभटे सूत्रस्थाने । ३ ।

"पुस्तस्त्रीस्नानहस्त्यास्यप्रहर्त्तोशीरवारिणि ॥"

पुस्त्यते पथ्यते स्थाप्यते इत्यर्थे: आद्रियते वेति + पुस्त + घञ् ।) पुस्तकम् । इति मेदिनी ॥ (पुस्त + गौरादित्वात् ङीष् ।) स्त्रियां पुस्ती ॥

पुस्तकम्, क्ली, स्त्री, (पुस्त + स्वार्थे कन् ।) पुस्तम् । पुति इति भाषा । (यथा, हरिवंशे । २५६ । ७६ ।

"मुक्तामरधर: श्रीमान् शुचिर्भूत्वा स्वलङ्कृत: ।
अर्च्चयेत यथान्यायं गन्धमाल्यै: पृथक् पृथक् ॥
संहितापुस्तकान् राजन् ! प्रयत: शुचिसम्मत: ॥")

तस्य परिमाणं यथा,—

"मानं वक्ष्ये पुस्तकस्य शृणु देवि ! समासत: ।
मानेनापि फलं विन्द्यादमाने शीर्ष्टता भवेत् ॥
हस्तमात्रं सुविस्तारमाबाहुहृदयाङ्गुलम् ।
दशाङ्गुलं तथाष्टौ च ततो हीनं न कारयेत् ॥"

तस्य वेधो यथा,—

"वेधदयं सुविस्तीर्णं बाहुमात्रे चिरन्तनम् ।
समभागे महेशानि ! हस्तादौ रूपरन्ध्रकम् ॥
अङ्गुलं परित्यज्य अधो वेधं न कारयेत् ।
प्रादेशादौ भवेद्रन्ध्रो द्व्यङ्गुले वा समाचरेत् ॥
पुस्तकस्य च मध्यन्तु यत्नवेधं विकल्पयेत् ।
भार्य्याहानिर्भवेद्दारु धनानां वा क्षयो भवेत् ॥
दग्धरन्ध्रं भवेत् पीड़ा वस्त्रुलं शुभदं भवेत् ।"
चतुष्कोणे विप्रवस्तु त्रिकोणे मरणं भवेत् ॥

पुस्तककरणप्रकारं यथा,—

"भूर्जे वा तेजपत्रे वा तालै वा ताड़िपत्रके ।
अगुरुणापि देवेशि ! पुस्तकं कारयेत प्रिये ! ॥
सम्भवे स्वर्णपत्रे च ताम्रपत्रे च शङ्करि ! ।
अन्यत्रुलत्वचि देवि ! तथा केतकिपुत्रके ॥
मानेऽष्टपत्रे रौप्ये वा वटपत्रे वरानने ! ।
अन्यपात्रे वसुदले लिखित्वा य: समभ्यसेत् ।
स दुर्गतिमवाप्नोति धनहानिर्भवेद्ध्रुवम् ॥"

पुस्तकै वेदलिखननिषेधो यथा,—

"वेदस्य लिखनं कृत्वा य: पठेद्ब्रह्महा भवेत् ।
पुस्तकंवा गृहे स्थाप्यं यत्नपातो भवेद्ध्रुवम् ॥"

युगभेदे पुस्तकाक्षरस्थदेवा यथा,—

"सत्येऽक्षरे स्थित: शम्भु: शूलपाणिस्त्रिलोचन: ।
प्रजापतिर्द्वापरे च त्रेतायां सूर्य्य एव च ।
कृते युगे पिनाकी च कलौ लिप्यक्षरे हरि: ॥"

तल्लेखकपूजाफलं यथा,—
"आरम्भे च समाप्तौ च लेखकं प्रतिपूजयेत्।
हरिञ्च गन्धपुष्पाद्यैर्वस्त्रैश्च सुमनोहरैः॥
यावदक्षरसंख्यानं प्रतिपत्रे च सुन्दरि!।
तावद्युगसहस्राणि ब्रह्मलोके वसेच्चिरम्॥"
वेतनग्रहणे लेखकस्य दोषो यथा,—
"वेतनं यस्तु गृह्णीयात् लिखित्वा पुस्तकं स तु।
यावदक्षरसंख्यानं तावच्च नरके वसेत्॥"
भूमौ पुस्तकलेखनस्यापननिषेधो यथा,—
"न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तकं लिखेत्।
न सुक्ता पुस्तकं स्थाप्यं न सुक्तमाहरेत्तु तत्॥
भूकम्पग्रहणे चैव अक्षरं वाथ पुस्तकम्।
भूमौ तिष्ठति देवेशि! जन्मजन्मसु मूर्खता।
तदा भवति देवेशि! तस्मात्तत् परिवर्जयेत्॥"
इति योगिनीतन्त्रे द्वितीयभागे सप्तमपटलः॥*॥
तस्य दानफलं यथा,—
विप्राय पुस्तकं दत्त्वा धर्म्मशास्त्रस्य च द्विज!।
पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात्॥
शास्त्रदृष्ट्या जगत् सर्व्वं सुश्रुतञ्च शुभाशुभम्।
तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्त्तिके॥
वेदविद्याञ्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत्।
आत्मविद्याञ्च यो दद्यात्तस्य संख्या न विद्यते॥
त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च।
शास्त्रं कामदुधा धेनुः पृथिवी चैव शाश्वती॥"
इति पाद्मोत्तरखण्डे ११० अध्यायः॥*॥
वेदशास्त्रादिदानफलं यथा,—
"वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि।
मूल्येन लेखयित्वा यो दद्यादयाति स वैदिकम्॥
इतिहासपुराणानि लिखित्वा यः प्रयच्छति।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणीकृतम्॥"
इति गारुड़े २१५ अध्यायः॥*॥
भागवतदानविधानं तु पारायणग्रन्थे द्रष्टव्यम्॥

पुस्तकर्म्मा, न्, ि, (पुस्तं लिखनादिकं कर्म्म यस्य।) लेप्यादिशिल्पकर्म्मकर्त्ता। इति हलायुधः॥

पू, ङ शोधे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) शोधः दहे सुद्धीकरणम्। ङ, पवते पापिनं गङ्गा। इति दुर्गादासः॥

पू, ङ य शोधे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-सेट्।) अयं केचिन्न मन्यते। ङ य, पूयते। इति दुर्गादासः॥

पू, न गि शोधे। इति कविकल्पद्रुमः॥ (क्रया०-पु०-उभ०-सक०-सेट्।) न गि, जाह्नवी नः पुनातु। पुनीते। क्वचित् आप्रत्ययस्यापि पृषोदित्वात् ह्रस्व इति वररुचिः। तेन।
"स्मरणात् पुनते पापं धारणात् पूर्व्वसञ्चितम्।
दर्शनान्नाशते मोक्षमेतद्योगस्य लक्षणम्॥"
इति दुर्गादासः॥

पूगं, क्ली, (पूयते सुखमनेनेति। पू न पवने+"छापूखञ्जिभ्यः कित्।" उणा०। १। १२३। इति गन् कित्।) गुवाकफलम्। इत्यमरटीकायां रायमुकुटः॥ (यथा, भविष्यपुराणे। तालनवमीव्रतकथायाम्।
"पिण्डखर्ज्जूरं जातिञ्च एला चैव हरीतकी।
नारिकेलं तथा पूगं रम्भापक्वफलन्तथा।
तत्र सुखं प्रदातव्यं तालस्य फलसप्तमम्॥")

पूगः, पुं, (पूयतेऽनेनेति। पू+"छापूखञ्जिभ्यः कित्।" उणा०। १। १२३। इति गन्। स च कित्।) गुवाकः। समूहः। इत्यमरः॥ (यथा, महाभारते। ६। २१। १४।
"अनन्ततेजा गोविन्दः शूद्रपूगेषु निर्व्यथः।
पुरुषः सनातनतमो यतः क्षत्रक्षतो भयः॥")
क्लीबः। भावः। करटकिटचः। इति शब्दरत्नावली॥

पूगपात्रं, क्ली, (पूगस्य दन्तचर्व्वितपूगरसस्य आधारभूतं पात्रम्।) पूगपीठम्। पिकदानी। इति भाषा। तत्पर्य्यायः। करङ्कम् २। इति हारावली॥

पूगपीठं, क्ली, (पूगस्य दन्तचर्व्वितपूगरसस्य पीठमाधारपात्रम्।) पूगपात्रम्। तत्पर्य्यायः। कटकोलः २ पतद्ग्रहः ३। इति त्रिकाण्डशेषः॥

पूगपुष्पिका, स्त्री, (पूगसहितं पुष्पमत्रेति। पूगपुष्प+कप्। कापि अत इत्वम्।) विवाहसम्बन्धिपुष्पताम्बूलम्। तत्पर्य्यायः। कुहलिः २। इति त्रिकाण्डशेषः॥

पूगफलं, क्ली, (पूगस्य गुवाकस्य फलम्।) गुवाकफलम्। तत्पर्य्यायः। पूगम् २ चिक्कणी ३ चिक्का ४ चिक्कयम् ५ सोमाकम् ६ उद्वेगम् ७ क्रमुकफलम् ८। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"कषायमीषन्मधुरं किञ्चित् पूगफलं सरम्॥")

पूगरोटः, पुं, (पूगस्तच्च इव रोटयति दीप्यते प्रकाशते इति। रट्+अच्।) हिन्तालवृक्षः। इति त्रिकाण्डशेषः॥

पूज, क पूजे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) षष्ठस्वरी। क, पूजयति गुरुं लोकः। इति दुर्गादासः॥

पूजकः, त्रि, (पूजयतीति। पूज+ण्वुल्।) पूजाकर्त्ता। यथा, तिथ्यादितत्त्वे।
"यत्रैव भानुस्तु वियत्युदेति
प्राचीति तां वेदविदो वदन्ति।
तथा पुरः पूजकपूज्ययोश्च
तदागमज्ञाः प्रवदन्ति तान्तु॥"

पूजनं, क्ली, (पूज+भावे ल्युट्।) पूजा। अर्च्चनम्। यथा,—
"क्रुद्धेन न च कर्त्तव्यं लोभेन त्वरया न च।
मत्पूजनं विधानेन यदीच्छेत् परमां गतिम्॥"
इति वराहपुराणम्॥

पूजनी, स्त्री, (पूज्यते इति। पूज+कर्म्मणि ल्युट्। ङीप्।) चटका। इति भरतः॥ (ब्रह्मदत्तग्रहस्थितग्रहकृनिविहङ्गमस्त्रीविशेषः। यथा, महाभारते।१२। १३६। ४—१०।
"शृणुष्व राजन्! यदृत्तं ब्रह्मदत्तनिवेशने।
पूजन्या सह संवादं ब्रह्मदत्तस्य भूपतेः॥
काम्पिल्ये ब्रह्मदत्तस्य अन्तःपुरनिवासिनी।
पूजनी नाम शकुनिर्दीर्घकालं सहोषिता॥
ततश्चा सर्व्वभूतानां यथा वै जीवजीवकः।
सर्व्वज्ञा सर्व्वतत्त्वज्ञा तिर्य्यग्योनिं गतापि सा
अभिप्रजाता सा तत्र पुत्रमेकं सुवर्चसम्।
समकालञ्च राज्ञोऽपि देव्यां पुत्रो व्यजायत॥
तयोर्द्वे ऊतश्चा सा खेचरी पूजनी सदा।
समुद्रतीरं सा गत्वा आजहार फलद्वयम्॥
पुष्टार्थञ्च सुपुत्रस्य राजपुत्रस्य चैव ह॥
फलमेकं सुतायादाद्राजपुत्राय चापरम्।
अन्तराद्यद्धं बलतेजोऽभिवर्द्धनम्॥
आदायादाय सैवाशु तयोः प्रादात् पुनःपुनः।
ततोऽगच्छत् परां तृप्तिं राजपुत्रः फलाशनात्॥"
इत्यादि तत्रैवाध्याये विस्तरशो द्रष्टव्यम्॥)

पूजा, स्त्री, (पूजनमिति। पूज+"चिन्तिपूजिकथिकुम्बिचर्चश्च।" ३। ३। १०५। इति अङ्। ततष्टाप्।) पूजनम्। तत्पर्य्यायः। नमस्या २ अपचितिः ३ सपर्य्या ४ अर्चा ५ अर्हणा ६। इत्यमरः। २। ७। ३५॥ स्तुतिः ७। इति शब्दरत्नावली॥ (यथा, रामायणे।२।५२।५।
"अपि रामे महाभागा मम माता यशस्विनी।
वन्येरुपाहरत् पूजां पूजार्हे सर्व्वदेहिनाम्॥")
तस्याः सामान्यानुष्ठानं यथा,—
"आदाद्यादिकन्यासः करद्वयस्ततः परम्।
अङ्गुलिद्वयादिकन्यासौ हृदादिन्यास एव च॥
तालत्रयञ्च दिग्बन्धः प्राणायामस्ततः परम्।
ध्यानं पूजा जपश्चैव सर्व्वतन्त्रेष्वयं विधिः॥"
इति तन्त्रसारे यामलः॥
प्रकृतिविषये चतुःषष्टिरुपचारा यथा,—
आसनारोपणम्१ सुगन्धितैलाभ्यङ्गः२ मज्जनप्रालापवेशनम् ३ मज्जनमणिपीठोपवेशनम् ४ दिव्यस्नानीयम् ५ उद्वर्त्तनम् ६ उष्णोदकस्नानम् ७ कनककलसस्थितसकलतीर्थाभिषेकः ८ धौतवस्त्रपरिमार्ज्जनम् ९ अरुणदुकूलपरिधानम् १० अरुणदुकूलोत्तरीयम् ११ आलेपमण्डपप्रवेशनम् १२ आलेपमणिपीठोपवेशनम् १३ चन्दनागुरुकुङ्कुमकर्पूरकस्तूरीरोचनादिगन्धसर्व्वाङ्गानुलेपनम् १४ कुसुमभारस्य कालागुरुधूपमल्लिकामालतीजातीचम्पकाशोकपुन्नागकुरीपुन्नागकञ्जरायूथीसर्व्वर्त्तुकुसुममालाभूषणम्१५ भूषणमण्डपप्रवेशनम्१६ भूषणमणिपीठोपवेशनम् १७ नवमणिमुकुटम् १८ चन्द्रशकलम् १९ सीमन्तसिन्दूरम् २० तिलकरत्नम् २१ कालाञ्जनम् २२ कर्णपालीयुगलम् २३ नासाभरणम् २४ अधरयावकः २५ ग्रथनभूषणम् २६ कनकचिचपदकम् २७ महापदकम् २८ मुक्तावलिः २९ एकावलिः ३० देवच्छन्दकः ३१ केयूरयुगलवलयम् ३२ वलयावलिः ३३ ऊर्म्मिकावलिः ३४ काञ्चीदाम ३५ कटिसूत्रम् ३६ श्रोणीभाखाभरणम् ३७ पादकटकम् ३८ रत्ननूपुरम् ३९ पादाङ्गुरीयकम् ४० एककरे

प्राग्रः ४१ अन्यकरेऽङ्कुशम् ४२ इतरकरे पुष्पेषुचापः ४३ अपरकरे पुष्पबाणाः ४४ श्रीमन्माणिक्यपादुका ४५ स्वसमानवेशास्त्रावरणदेवताभिः सह सिंहासनारोहणम् ४६ कामेश्वरपर्यङ्कोपवेशनम् ४७ अन्तताम्बूलचर्वणम् ४८ आचमनीयम् ४९ कर्पूरवटिका ५० आनन्दोल्लासविलासहासम् ५१ मङ्गलारात्रिकम् ५२ श्वेतच्छत्रम् ५३ चामरयुगलम् ५४ दर्पणः ५५ तालवृन्तम् ५६ गन्धः ५७ पुष्पम् ५८ धूपः ५९ दीपः ६० नैवेद्यम् ६१ पुनराचमनीयम् ६२ ताम्बूलम् ६३ वन्दनञ्च ६४। इति तन्त्रसारे सिद्धयामलः॥ * ॥ षट्त्रिंशदुपचारा यथा,—

"आसनाभ्यञ्जने तद्वदुद्वर्त्तननिरूपणे।
सम्मार्जनं सर्पिरादिस्नपनावाहने तथा॥
प्राद्यार्घ्याचमनीयञ्च स्नानीयमधुपर्ककौ।
पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके॥
अलङ्कारो गन्धपुष्पधूपदीपास्तथैव च।
ताम्बूलादिकनैवेद्यं पुष्पमाला तथैव च॥
अनुलेपनञ्च शय्या च चामरव्यजनन्तथा।
आदर्शदर्शनञ्चैव नमस्कारोऽथ नर्त्तनम्॥
गीतवाद्ये च गानानि स्तुतिहोमप्रदक्षिणम्।
दन्तकाष्ठप्रदानञ्च ततो देवविसर्जनम्।
उपचारा इमे ज्ञेयाः षट्त्रिंशत् सुरपूजने॥"

इत्येकादशीतत्त्वम्॥

अष्टादशोपचारा यथा,—

"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
स्नानं वस्त्रोपवीतञ्च भूषणानि च सर्व्वशः॥
गन्धं पुष्पं तथा धूपं दीपमन्नञ्च दर्पणम्।
माल्यानुलेपनञ्चैव नमस्कारविसर्जने॥
अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत्॥"

अथ षोड़शोपचाराः।

"पाद्यमर्घ्यं तथाचामं स्नानं वसनभूषणे।
गन्धपुष्पधूपदीपनैवेद्याचमनन्ततः॥
ताम्बूलमर्चना स्तोत्रं तर्पणञ्च नमस्क्रिया।
प्रपूजयेत् प्रपूजायां उपचारास्तु षोड़श॥"

(अन्यप्रकारषोड़शोपचारा यथा,—

"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्काचमनीयस्नानं वसनाभरणानिच।
गन्धपुष्पधूपदीपनैवेद्यं वन्दनन्तथा॥")

अथ दशोपचाराः।

"पाद्यमर्घ्यं तथाचामं मधुपर्काचमनन्तथा।
गन्धादयो नैवेद्यान्ता उपचारा दश क्रमात्॥"

अथ पञ्चोपचाराः।

"गन्धादयो नैवेद्यान्ताः पूजाः पञ्चोपचारिकाः॥"

इति तन्त्रसारः॥

अशुद्धादेः पूजानिषेधमाह।

"अशुचिर्न महामायां पूजयेत्तु कदाचन।
अवश्यन्तु स्मरेन्मन्त्रं सोऽतिभक्तियुतो नरः॥
दन्तरक्ते समुत्पन्ने स्मरणञ्च न विद्यते।
सर्व्वेषामेव मन्त्राणां स्मरणान्नरकं व्रजेत्॥
जानूर्द्ध्वे चलने जाते नित्यकर्म्म न चाचरेत्।
नैमित्तिकञ्च तदधःस्रवद्रक्तो न चाचरेत्॥

लोतके च समुत्पन्ने क्षुरकर्म्मणि मैथुने।
धूमोद्गारे तथा वान्तौ नित्यकर्म्माणि संत्यजेत्॥
दृष्टे मृते त्वजीर्णे च नैव शुद्धा च किञ्चन।
कर्म्म कुर्य्यान्नरो नित्यं सूतके मृतके तथा॥
पत्रं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम्।
कणादिपिण्याकान्तञ्च फलं भुक्त्वा न चाचरेत्॥
जलस्थापि नरश्रेष्ठ! भोजनादूर्ध्वमाढ़ते।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा॥
जलौकां गूढ़पादञ्च कृमिगण्डूपदादिकम्।
कामाद्भ्रमेन संस्पृश्य नित्यकर्म्माणि संत्यजेत्॥
विशेषतः शिवापूजां प्रमीतपितृको नरः।
यावदस्थरपर्य्यन्तं मनसापि न चाचरेत्॥
महागुरुनिपाते तु कार्य्यं किञ्चिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मयज्ञञ्च श्राद्धं देवयुतञ्च यत्॥
गुरुमाचम्य विप्रञ्च प्रक्षाल्यैव च पाणिना।
न कुर्य्यान्नित्यकर्म्माणि रेतःपाते च भैरव!॥
आसनार्घ्यपात्रञ्च भयमासादयेन्न यत्।
ऊषरे कृमिसंयुक्ते स्थाने दृष्टेऽपि नार्चयेत्॥
नीचैरासाद्य तत्स्थानं शुचिः प्रयतमानसः।
अर्चयेच्चण्डिकां देवीं देवमन्यञ्च भैरव!॥
दिग्विभागे तु कौबेरी दिक् शिवाप्रीतिकारिणी।
तस्मात्तन्मुखमासीनः पूजयेच्चण्डिकां सदा॥"

पूजास्थानानि यथा,—

"लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च।
स्थण्डिलस्थां महामायां पादुके प्रतिमासु च॥
चित्रे च चिह्नखड्गे जलस्थां वापि पूजयेत्।
पञ्चाशद्दङ्गुलं खड्गं चिह्नखड्गं त्रिशूलकम्॥
शिलायां पर्व्वतस्थायां गङ्गायामपि तत्समा।
आर्य्यावर्त्ते मध्यदेशे तथा पर्व्वतगह्वरे॥
देवीं संपूजयेन्नित्यं भक्तिश्रद्धासमन्वितः।
वाराणस्यां सदा पूजा सम्पूर्णफलदायिनी॥
ततस्तु द्विगुणा प्रोक्ता पुरुषोत्तमसन्निधौ।
ततोऽपि द्विगुणा प्रोक्ता द्वारवत्यां विशेषतः॥
सर्व्वक्षेत्रेषु तीर्थेषु पूजा द्वारवतीसमा।
विन्ध्ये शतगुणा प्रोक्ता गङ्गायामपि तत्समा॥
आर्य्यावर्त्ते मध्यदेशे ब्रह्मावर्त्ते तथैव च।
विन्ध्यवत्फलदा पूजा प्रयागे पुष्करे तथा॥
ततश्चतुर्गुणं प्रोक्तं करतोयानदीजले।
तस्माच्चतुर्गुणफला नन्दिकुण्डे च भैरव!॥
तस्माच्चतुर्गुणा प्रोक्ता जयन्तीश्वरसन्निधौ।
तत्र सिद्धेश्वरीयोनौ ततोऽपि द्विगुणा स्मृता॥
ततश्चतुर्गुणा प्रोक्ता लौहित्यनदपार्श्वतः।
तत्समा कामरूपे तु सर्व्वत्रैव जले स्थले॥
सर्व्वश्रेष्ठो यथा विष्णुर्लक्ष्मीः सर्व्वोत्तमा यथा।
देवीपूजा तथा ज्ञेया कामरूपे सुरालये॥
देवीचैत्यं कामरूपं विद्यतेऽन्यत्र तत्समम्।
अन्यत्र विरला देवी कामरूपे गृहे गृहे॥
ततः शतगुणं प्रोक्तं नीलकूटस्य मस्तके।
ततोऽपि द्विगुणं प्रोक्तं हेरुके शिवलिङ्गके॥
ततोऽपि द्विगुणा प्रोक्ता धेनुपुत्रादियोनिषु।
ततः शतगुणं प्रोक्तं कामाख्यायोनिमण्डले॥"

इति कालिकापुराणे ५४।५७। अध्यायौ॥

पूजासनानि तत्फलानि च यथा,—

"उपविश्यासने रम्ये कृष्णाजिनकुशोत्तरे।
राङ्कवे कम्बले वापि काष्ठादौ व्याघ्रचर्म्मणि॥
न कुर्य्यादर्चनं विष्णोः शिवे काष्ठासनादिषु।
काष्ठासने कृता पूजा पाषाणे रोगसम्भवः॥
भूम्यासने गतिर्नास्ति वस्त्रासने दरिद्रता।
कुशासने ज्ञानवृद्धिः कम्बले सिद्धिरुत्तमा॥
कृष्णाजिने धनी पुत्री मोक्षः स्याद्व्याघ्रचर्म्मणि।
मन्त्रयोगं प्रकुर्व्वीत भोगार्थं सुखमासने॥"

इति ब्रह्मोत्तरखण्डे ७४ अध्यायः॥

पूजाधिकारिता प्रयोजकदेवषट्कपूजा यथा,—

"गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवां शिवाम्।
संपूज्य देवषट्कञ्च सोऽधिकारी च पूजने॥
गणेशं विघ्ननाशाय निष्पापाय दिवाकरम्।
वह्निं सुखाय विष्णुञ्च मुक्तये पूजयेन्नरः॥
शिवं ज्ञानाय ज्ञानेशं शिवाञ्च बुद्धिवृद्धये।
संपूज्य तान् लभेत् प्राज्ञो विपरीतमतोऽन्यथा॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः॥

द्वादशमासे विष्णुपूजाविधिर्यथा,—

"प्रत्यहं कार्त्तिके मासि जातीपुष्पैः समर्चयेत्।
दद्यादखण्डदीपञ्च नियतात्मा दृढ़व्रतः।
ब्राह्मणान् भोजयित्वाथ सहस्रायुष्यमाप्नुयात्॥
मार्गशीर्षे नवान्नेन वकपुष्पैश्च केशवम्।
समर्च्च्य भोजयेद्विप्रान् वैकुण्ठपदमाप्नुयात्॥
धनुर्व्युषसि देवेशं मासमेकं निरन्तरम्।
अर्चयेदुपवासेन करवीरैः सितासितैः॥
धूपैर्दीपैश्च नैवेद्यैर्यथाशक्त्या निवेदयेत्।
समाप्तौ भोजयेद्विप्रान् महाभागवतोत्तमान्॥
अश्वमेधसहस्रस्य फलमाप्नोत्यसंशयः॥
तपोमास्युदिते भानौ स्नात्वा नद्यां विशेषतः।
अर्चयेन्माधवीपुष्पैरुतपत्रैश्च शोभने!॥
पायसं विविधं दिव्यं भक्त्या तत्र निवेदयेत्।
मासान्ते वैष्णवान् विप्रान् भोजयेत् शक्तितो द्विजः॥
तपस्ये च तथा देवि! माधवैः कुसुमैः शुभैः।
स्नात्वा संपूजयेद्विष्णुं मासमेकं निरन्तरम्॥
शर्करासु घृतं नित्यमर्पयेच्च निवेदयेत्।
वैष्णवान् भोजयेच्छक्त्या मासान्ते शुभदर्शने!॥
मधुमासि तथा नित्यं वकुलैश्चम्पकैरपि।
पूजयेज्जगतामीशं गुड़ान्नञ्च! निवेदयेत्॥
मासान्ते वैष्णवान् विप्रान् भोजयेत् सुसमाहितः।
सहस्रवार्षिकं पूजाफलं नित्यमवाप्नुयात्॥
माधवे पूजयेद्विष्णुं घृतपद्मैर्महोत्पलैः।
पूजयित्वा विधानेन दध्यन्नफलसंयुतम्॥
गुड़ोदकञ्च भक्त्या वै तस्मिन् देवि! निवेदयेत्।
लक्ष्म्या युक्तो जगन्नाथः प्रीतो भवति पार्व्वति!॥
ज्येष्ठे तु शुक्लकमलैः पाटलैः कुसुदोत्पलैः।
अर्चयित्वा हृषीकेशमन्नं घृतगुलैर्युतम्॥
निवेदयित्वा भक्त्या वै गवां कोटिप्रदो भवेत्।
वैष्णवान् भोजयेन्नित्यं मासान्ते भक्तसत्तमः।
ब्राह्मणांश्च शिवे! सर्व्वं फलमानन्त्यमश्नुते॥

आषाढे देवताधीशं लक्ष्मीभर्त्तारमच्युतम् ।
श्रीपुष्पैरर्चयेन्नित्यं पायसान्नं निवेदयेत् ॥
मासान्ते भोजयेद्विप्रान् महाभागवतोत्तमान् ।
षष्टिवर्षसहस्रस्य पूजां प्राप्नोत्यसंशयम् ॥
नभोमास्यर्चयेद्विष्णुं पुन्नागैः केतकीदलैः ।
अर्चयित्वाच्युतं भक्त्या न भूयो जन्मभाग्भवेत् ॥
दद्याद्वै पिष्टकान् भक्त्या शर्कराघृतमिश्रितान् ।
ब्राह्मणान् भोजयित्वा तु सर्व्वमानन्त्यमश्नुते ॥
नभस्यर्च्चयेदीशं कुन्दैः कुरुवकैरपि ।
क्षीरान्नं गुडमिश्रन्तु भक्त्या तत्र निवेदयेत् ।
गवां कोटिप्रदानस्य प्रत्यहं समवाप्नुयात् ॥
इषे नीलोत्पलैर्मासि पूजयेन्मधुसूदनम् ।
भक्त्या निवेदयेत्तस्मिन् क्षीरमाज्यविमिश्रितम् ॥
कन्याकोटिसहस्राणि कन्याकोटिशतानि च ।
वैष्णवं लोकमाप्नोति मुदितः खजनैर्युतः ॥
ऊर्ज्जमासे स्वयं देवि ! कोमलैस्तुलसीदलैः ।
पूजयित्वाच्युतं भक्त्या तत्सायुज्यमवाप्नुयात् ॥"

इति पाद्मोत्तरखण्डे ७५ अध्यायः ॥

इदमासादौ दुर्गापूजादि देवीपुराणे द्रष्टव्यम् ॥

अथ देवपूजाविधिः ।

स्नातः स्नानासमर्थो आर्द्रवाससा कृतगात्रमार्জ্জनादिर्गृहमेधीयं गत्वा प्राङ्मुख उदङ्मुखो वा प्रक्षालितपादः शुचिर्द्विवासाः कुशहस्तः स्वाचान्तः सर्व्वत्र वीरासनोपविष्टः प्राङ्मुखः रात्र्युदङ्मुख एव मौनी ध्यानपरायणः कामरागभय-द्वन्द्वक्रोध-मात्सर्य्यत्वरा-रहितस्वमनाः सुमना वा शुचौ वसुपविष्टोऽनिदृग्दन्दशन्यरहिते देशे दक्षिणपार्श्वे नैवेद्यादुपकरणानि च वामपार्श्वे जलं पुरतो धूपदीपौ ताम्रादियात्रच्च यथासन्निवेशं पाद्यार्घ्याचमनीयपात्रं जलादिपूर्णमग्रतः स्थापयित्वा यथालाभं यज्ञोपवीतवस्त्रालङ्करणादि संस्थाप्य ।

ॐ अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन पूजाकर्म्म करोम्यहम् ॥

इत्युच्चार्य अस्त्राय फडिति तर्জ্জन्यङ्गुष्ठयोगध्वनिक्षोटिकया दशदिग्बन्धनं कुर्य्यात् ॥ * ॥

नादेवो देवमर्च्चयेदित्यनुरोधात् सर्व्वदेवार्च्चनेषु भूतशुद्धिमाहुरागमिकाः । सा यथा,—

सोऽहमिति मन्त्रेण जीवात्मानं नाभितो हृदिस्थपरमात्मनि संयोज्य ततः पृथिवीं जले जलं तेजसि तेजो वायौ ततो वायुमाकाशे प्रवेश्य दक्षिणाङ्गुष्ठेन दक्षिणनासापुटं धृत्वा यमिति वायुबीजेन षोड़शवारजप्तेन वायुकर्षणरूपपूरकसंज्ञया वायुचिन्तनरूपया वायुधारणया देहं शोषयित्वा ततो नासापुटावङ्गुष्ठानामिकाभ्यां धृत्वा रमिति वह्निबीजेन चतुःषष्टिवारजप्तेन स्तम्भनरूपकुम्भकसंज्ञया अग्निचिन्तनरूपया आग्नेय्या धारणया देहं दाहयित्वा लमितीन्द्रबीजेन दार्ढ्यिंगृहारजप्तेन दक्षिणनासापुटेन वायुनिःसारणरूपया रेचकसंज्ञया ऐन्द्र्यध्यानरूपया ऐन्द्र्याधारणया स्थिरीकृत्य वमिति वरुणबीजेन चतुःषष्टिवारजप्तेन जलाधिपध्यानरूपया जलाधिपधारणया चन्द्रमण्डलादन्तं स्रावयित्वा तेनाप्लाव्य प्रणवेन सर्व्वाङ्गं संघटितं पुनर्नवीभूतं चिन्तयित्वा वायुादिभूतानि योन्यादिभ्यो युतक्रमेण बहिः कृत्वा हंस इति मन्त्रेण परमात्मतो जीवं नाभिपद्मे न्यसेत् ॥ * ॥

तत ऋष्यादिन्यासः ।

गोपालमन्त्रे तु नारदाय ऋषये नमः शिरसि । गायत्रीच्छन्दसे नमो मुखे । श्रीकृष्णाय देवाय नमो हृदि । एवमन्यत्रोहनीयम् ॥ * ॥

ततः प्राणायामः ।

ततस्मूलमन्त्रेण षोड़शवारजप्तेन अङ्गुष्ठेन दक्षिणनासापुटं धृत्वा वामनासया वायुं पूरयेत् । अङ्गुष्ठानामिकाभ्यां नासापुटौ धृत्वा चतुःषष्टिवारजप्तेन वायुं कुम्भयेत् । वामनासामनामिकया धृत्वा दक्षिणनासया द्वात्रिंशद्वारजप्तेन वायुं त्यजेत् । पुनर्दक्षिणनासया पूरयेत् । उभाभ्यां कुम्भयेत् । वामनासया रेचयेत् । पुनर्वामया पूरयेत् । उभाभ्यां कुम्भयेत् । दक्षिणया रेचयेदिति ॥ * ॥

ततो वाङ्मातृकान्यासः । न्यासशब्दे द्रष्टव्यः ॥ अनेकदेवपूजने तु भूतशुद्धिमातृकान्यासयोरविशेषात् सकृदेवानुष्ठानम् ॥ * ॥

ततः करन्यासः ।

यथा गोपाले । ॐ क्रां अङ्गुष्ठाभ्यां नमः अङ्गुष्ठयोः । ॐ क्रीं तर्জ্জनीभ्यां स्वाहा तर्জ্জन्योः । ॐ क्रूं मध्यमाभ्यां वषट् मध्यमयोः । ॐ क्रैं अनामिकाभ्यां हूं अनामिकयोः । ॐ क्रौं कनिष्ठाभ्यां वौषट् कनिष्ठयोः । ॐ क्रः करतलपृष्ठाभ्यां फट् करतलपृष्ठयोः । एवमन्यत्राप्यूह्यम् ॥

ततोऽङ्गन्यासः ।

ॐ क्रां हृदयाय नमः हृदये हस्ततलेन । ॐ क्रीं शिरसे स्वाहा अङ्गुष्ठाङ्गुलिभिः शिरसि । ॐ क्रूं शिखायै वषट् अधोमुखाङ्गुलिमुद्रिना शिखायाम् । ॐ क्रैं कवचाय हूं वक्षःकरतलाभ्यां आशिरःपादपर्य्यन्तरूपसर्व्वाङ्गे । ॐ क्रौं नेत्राभ्यां वौषट् तर्জ্जनीमध्यमाभ्यां नेत्रयोः । ॐ क्रः अस्त्राय फट् ऊर्द्ध्वधस्तात्त्रयं क्षोटिकाभिर्दशदिग्बन्धनञ्च कुर्य्यात् । एवमन्यत्राप्यूह्यम् । आगमोक्तादिपूजने तु भूतशुद्ध्यादिनियमः अन्यच्च त्वनियमः ॥ * ॥

ततोऽर्घ्यस्थापनम् ।

वामतोऽर्घ्यपाद्याद्याचमनीयपात्राणि संस्थाप्य अर्घ्यपात्रं जलगन्धपुष्पैः संपूज्य तत्तद्देवतामूलमन्त्रं सर्व्वदेवतासाधारणं तु प्रणवं वा अष्टधा जप्त्वा धेनुमुद्रया अन्तरीक्षत्य तदुदकं पात्रान्तरे किञ्चित् क्षिप्त्वा तेनोदकेनात्मानं पूजोपकरणञ्चाभ्युक्षयेत् । प्रणवादितत्तद्देवताचतुर्थ्यन्तनाम्ना नमोऽन्तेन मूलमन्त्रेण वा आत्मानं गन्धादिभिरभ्यर्च्च्य तद्रूपं ध्यात्वा तत्ताम्रपात्रे चन्दनादिरचिताष्टदलपद्मे सम्बोधनान्तनाम्ना स्वागतं ते इति पृच्छेत् । दीक्षितस्तु मूलमन्त्रमुच्चार्य्य प्रणवादिचतुर्थ्यन्तनाम्ना नमोऽन्तेन दद्यादिति विशेषः । एवं पाद्यार्घ्याचमनीयादीनि दद्यात् । पाद्यार्घ्ययोः पौर्ब्वापर्य्ये त्वनियमः । ततो घृतमधुदधिमेलकपलमितं कांस्यपात्रस्थं पिहितञ्च मधुपर्कं पुनराचमनीयञ्च दद्यात् । ततो लौकिकषड्यधिकघृतत्रयतोलकान्यूनवैदिकाष्टोत्तरशतपलान्यूनजलेन तदभावे षष्टिरत्तिकमासद्वयाधिकत्रयोदशतोलकरूपवैदिकपलचतुष्टयान्यूनजलेन इदं स्नानीयं एवं दुग्धादिनापि । घृतादिस्नाने तु गन्धद्रव्यचूर्णकविरूक्षशुष्कोदकेन चालनं चाङ्गं ततः पुनराचमनीयं वाससी पुनराचमनीयं दद्यात् । प्रत्येकमलङ्कारं यज्ञोपवीतं गन्धं पुष्पं धूपं दीपं नैवेद्यं पुनराचमनीयं ताम्बूलं दत्त्वा मूलमन्त्रं यथाशक्ति जप्त्वा समर्प्य स्त्रिः प्रदक्षिणीकृत्य अष्टाङ्गप्रणिपातेन पञ्चाङ्गप्रणिपातेन वा शिरसि करद्वयसंयोगेन च प्रणम्य स्तुत्वा प्रणवादिसम्बोधनान्तनाम्ना क्षमस्वेति विसर्জ্জयेत् । यत्र यदुपचारद्रव्यासम्भवस्तद्दर्शे जलं देयम् । प्रतिष्ठितस्थिरतरप्रतिमायां तत्तदावाहनविसर्জ্জने न स्तः । एवं ग्रालग्रामे जले वा सर्व्वदेवपूजनेऽपि यथालाभं पाद्यादिद्रव्योपचारैः । गन्धपुष्पधूपदीपनैवेद्यैः पञ्चोपचारैः गन्धपुष्पाभ्यां वा केवलेन पुष्पेण केवलेनाचमनेन केवलेन जलेन मानसिकेन वा पूजयेत् । तत्र सामान्यदेवताधूपः शारदायाम् ।

सगुग्गुल्वगुरूशीरशर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नीचैर्देवाय दैशिकः ॥

एतैर्मिलितैर्यथालाभं वा । इति सर्व्वदेवतासाधारणो विधिः ॥ * ॥

ततः प्रथमं सूर्य्यपूजा ।

ॐ सूर्य्यायनमः इति पूजयेत् । तत्र गन्धाः । चन्दनागुरुकर्पूरवीरणमूलपद्मकाष्ठरक्तचन्दनानि । पुष्पाणि । मल्लिकामालतीकरवीरचम्पकपाटलावकुलतगरपीतझिण्टीकुन्दनवमल्लिकाशोकपद्मागस्त्यजवापुष्पाणि विहितानि । तुलसीक्षयातुलसीदूर्व्वाबिल्वपत्राणि राजिताकाशोकदलतगरसल्लकानि निषिद्धानि । धूपाद्य । गुग्गुल्वगुरुदेवदारुबिल्वानि । दीपस्तु घृतेन तैलेन वा । नैवेद्यानि विविधभक्ष्याणि ॥ * ॥

अथ गणेशपूजा ।

तदावाहने । ॐ भूर्भुवःस्वर्गणेश इहागच्छ इति दूर्व्वापुष्पाक्षतैरावाह्य ॐ गणेशाय नम इत्यनेन पूजयेत् । तत्र तुलसी निषिद्धा । रक्तचन्दनरक्तपुष्पादिकं विहितम् । देवतान्तरप्रसिद्धं अन्यत् सुकुलादिकं न देयम् ॥ * ॥

अथ दुर्गापूजा ।

ॐ भूर्भुवःस्वर्द्यौ इहागच्छ इति पुष्पाक्षतैरावाह्य ॐ दुर्गायै नम इत्यनेन पूजयेत् । तत्र

गन्धाः चन्दनागुरुकर्पूरकुङ्कुमानि। पुष्पाणि मल्लिकोत्पलपुन्नागशमीचम्पकाशोककर्णिकारकरवीरतुलसीविल्वपत्रादीनि विहितानि। सुकुलार्कमन्दारपुष्पाणि निषिद्धानि। धूपाः कृष्णागुरुसहितघृतमहिषाज्यगुग्गुलुविल्वान्यतमानि वीरणमूलचन्दनेऽपि। दीपस्तु घृतेन तैलेन वा। नैवेद्यानि आम्रनारिकेलखर्जूरकदलीबीजपूरादीनि। क्वथितं विष्टं फलं निषिद्धम्। यत्नपक्वकदलीफलमपि विहितम्॥ *॥

अथ शिवपूजा।

उदङ्मुखः ॐ नमः शिवाय नमः इति मन्त्रेण पूजयेत्। तत्र गन्धः अगुरुचन्दने। पुष्पाणि च अर्ककरवीरजातीवकुलपाटलाश्वेतमन्दारनागकेशरचम्पक-धुस्तूरविल्वामलक-तुलसीपत्राणि विहितानि। केतकीमाधवीपुष्पकुन्दयूथीमल्लिकाग्निरीषसर्जवन्यूकसुकुलमात्राणि निषिद्धानि। धूपस्तु घृतगुग्गुलुविल्वफलानि उशीरागुरुचन्दनानि च। दीपस्तु घृतेन तैलेन सर्वपादिना वा। नैवेद्यानि गुडखण्डघृतपक्वमातुलुङ्गफलादीनि॥ *॥

अथ पार्थिवशिवलिङ्गपूजाविधिः।

ॐ हराय नम इति ध्यानम्। ॐ महेश्वराय नम इति षडक्षरम्। ॐ मूलपाणी इह सुप्रतिष्ठितो भव इति प्रतिष्ठा। आचारात् ध्यायेन्नित्यमित्यादिना प्राग्दोक्तं ध्यायेत्। पिनाकधृक् इहागच्छ इत्यावाहनम्। ॐ पशुपतये नम इति क्षपनम्। एतत् पाद्यं ॐ नमः शिवाय नम इति पाद्यादिभिः संपूज्य वामावर्त्तेन वेद्यां प्राच्यादिषु ॐ सर्वाय क्षितिमूर्त्तये नमः ॐ भवाय जलमूर्त्तये नमः ॐ रुद्राय अग्निमूर्त्तये नमः ॐ उग्राय वायुमूर्त्तये नमः ॐ भीमाय आकाशमूर्त्तये नमः ॐ पशुपतये यजमानमूर्त्तये नमः ॐ महादेवाय सोममूर्त्तये नमः ॐ ईशानाय सूर्य्यमूर्त्तये नमः। इत्यष्टमूर्त्तीः पूर्व्वैः पूजयेत्। ततो सुखवाद्यं कृत्वा महादेव शमयेति संहारमुद्रया विसर्ज्जयेत्। स्त्रीशूद्रस्तु नमः शिवायेति मन्त्रेण पूजयेत्॥ *॥

अथ विष्णुपूजा।

शङ्खाद्यर्घ्यपात्रं पुरतो निधाय त्रिभागजलेनापूर्य्य वमिति धेनुमुद्रया अमृतीकृत्य ॐ विष्णवे नम इत्यष्टधा जपित्वा तेनोदकेनात्मानं पूजोपकरणञ्चाभ्युक्षेत्। दीक्षितस्तु तन्मन्त्रमुच्चार्य्य तन्मात्रा पूजयेत् अङ्गाद्यावरणञ्च पूजयेत् शालग्रामे मग्नौ प्रतिमाष्टदलपद्मजलादिषु। तत्र शालग्रामे आवाहनविसर्ज्जने न स्तः। ध्येयः सदेत्यादिना ध्यात्वा ॐ भगवन् विष्णो इहागच्छेत्याद्यक्षतपुष्पैरावाह्य इदमासनं ॐ श्रीविष्णवे नमः ॐ विष्णो स्वागतमिति पृच्छेत् एतत् पाद्यं ॐ विष्णवे नमः सामगस्तु इदमर्घ्यं ॐ विष्णवे नमः इति वदेत्। तदितरस्तु एतोऽर्घ्यं इति विशेषः। तत्र द्रव्याणि कुशपुष्पाक्षतसिद्धार्थचन्दनतोयानि यथालाभं वा अर्घ्यपात्रयोस्तु पौर्व्वाह्णार्घ्येण नियमः। आचमनीये सुगन्धिद्रव्ययुक्तजलं केवलं वा प्रशस्तजलम्। घृतमधुदध्यात्मको मधुपर्कः तदभावे केवलं वा मधु। पूर्व्ववदिदमाचमनीयं इदं स्नानीयं तत्र लौकिकषष्ट्यधिकशतचयतोलकान्यूनं जलम्। पुनराचमनीयं इदं वस्त्रं पुनराचमनीयं इदमाभरणं पुनराचमनीयं गन्धस्तु अङ्गुष्ठयुक्तकनिष्ठया गन्धमुद्रया तत्र चन्दनागुरुकर्पूरकुङ्कुमवीरणमूलपद्मकाष्ठसिङ्करक्तचन्दनकस्तूरिकाजातीफलानि घृष्टानि एतच्चूर्णानि वा एतद्द्राक्षारसो वा पुष्पाणि च तर्জ्जन्यङ्गुष्ठयोगरूपपुष्पमुद्रया तत्र मल्लिका-मालतीजाती-केतक्यशोक-चम्पकनागकेशरवकुल-पद्मोत्पलतुलसी-विल्वकरवीरपारिभद्रपाटलाश्वेतापराजिताबहुदलतगरश्वेतजवारक्ताशोकशतपुष्पभूमिचम्पकशेफालीनवमालिकायूथिकाकदम्बकुन्दलवङ्गमाधवीपुष्पवकबन्यूककुरुवकबिल्वपुष्प-बहुवारक-कञ्जारद्रोणपलाशपुष्पाणि विहितानि। नरसिंहेतरावतारे केतकी निषिद्धा। पर्य्युषितमच्छिद्राघ्रोक्षितस्वयंपतितोपहृतमध्याह्नकालोत्तरचुटितपद्मचम्पकेतरकलिकातुलसीतरशुष्कपत्रपरिहित-पुष्पविहितेतररक्तपुष्पत्वेत्यादृष्टोद्भवभ्रमणजात-कुटज-शालग्रामशिलीयपुष्पाणि निषिद्धानि। ब्राह्मणेतरस्य वनोद्भवानि च। विहितपत्राणि तुलसीबिल्वभृङ्गराजतमालामलककेतकीपत्राणि। पद्मकुन्दोत्पलानि पञ्चदिनात् परतः पर्य्युषितानि। तुलस्यगस्त्यबिल्वानि कदापि न पर्य्युषितानि। धूपस्थानञ्च देवस्य वामे पुरतो वा। तर्জ्जन्यङ्गुष्ठयोगरूपधूपमुद्रया वामहस्तेन घण्टां वादयन् देयः। स च भूमौ न देयः। धूपश्च जटामांसीमहिषाज्यगुग्गुलुकर्पूरागुरुसिङ्कदेवदारुजातीफलशर्करादीक्तमिश्रितगुग्गुल्वादयः। दीपस्थानं देवस्य दक्षिणतः पुरतो वा। मध्याङ्गुष्ठयोगरूपदीपमुद्रया एष दीपः घृतेन तैलेन वा भूमौ न देयः। नैवेद्यस्थानञ्च देवस्योत्तरदेशः। अनामिकाङ्गुष्ठयोगरूपनैवेद्यमुद्रया एतन्नैवेद्यं तत्र कदली-पनस-जम्बूलवनी-करमर्दक-धवि:संस्कृततिलमाषमुद्गयवगोधूमव्रीहिप्राज्यान्नं विहितम्। निषिद्धन्तु अजामहिषीचौरदधिघृतं पञ्चनख वराह-मत्स्य-गवा-छागेतरमांस-हिरण्योदकसूर्य्येतरश्चाण्डालदृष्टविड़ालाद्युच्छिष्टस्पृष्टाक्तपर्य्युषितेतरभक्ष्यम्। खण्डादीनि यवगोधूमव्रीहिविकाराश्च न पर्य्युषिताः। ततः पुनराचमनीयं ताम्बूलञ्च दत्त्वा अष्टोत्तरसहस्रं शतं दश वा उत्तरीयवस्त्रेण छादितहृदयो स्थितस्तिर्य्यगभूतदक्षिणकरः यथाशक्ति मूलमन्त्रं जपित्वा ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देव! त्वत्प्रसादात् त्वयि स्थिते॥ इत्यर्घोदकेन देवहस्ते जलं दद्यात्। ततोऽर्घ्यं गृहं गृहीत्वा त्रिः प्रदक्षिणीकृत्य,

ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष! ते चरणारविन्दम्॥
त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्म्मिष्ठ! आर्य्यवचसा यदगादरण्यम्।
मायामृगं दयितयेप्सितमन्वधाव-
द्वन्दे महापुरुष! ते चरणारविन्दम्॥

इति स्तुत्वा ॐ प्रसीद भगवन्निति दण्डवत् प्रणमेत्।

ॐ यत् किञ्चित् क्रियते देव मया सुकृतदुष्कृतम्।
तत् सर्व्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम्॥
इत्यनेन सर्व्वं समर्पयेत्॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्द्दन।
यत् पूजितं मया देव! परिपूर्णं तदस्तु मे॥
इति प्रार्थयेत्॥ ततः संहारमुद्रया निर्म्माल्यपुष्पमादाय भूमौ त्यजेत् विसर्ज्जनमन्त्रे ॐ भगवन् विष्णो शमयेति विसर्ज्जयेत् तदमन्त्रे निर्म्माल्यपुष्पमादाय।

ॐ तिष्ठ देव परे स्थाने स्वस्थाने परमेश्वर।
यत्र ब्रह्मादयः सर्व्वे सुरास्तिष्ठन्ति मे हृदि॥
इति मन्त्रेण देवं हृदि स्थापयेत्। तत ॐ विष्वक्सेनाय नम इति गन्धपुष्पनैवेद्यार्घं दद्यात्। ततो वैष्णवाय तन्निर्म्माल्यं अनुलेपनं नैवेद्यञ्च किञ्चिदुद्धृत्य शिरसि निर्म्माल्यं धार्य्यं सर्व्वाङ्गेष्वनुलेपनं कृत्वा यथाकालं पादोदकं नैवेद्यशेषमभुञ्जीत। तत्र पादोदकग्रहणे मन्त्रः।

ॐ कृष्ण कृष्ण महाबाहो भक्तानामार्त्तिनाशन।
सर्व्वपापप्रशमनं पादोदकं प्रयच्छ मे॥

ततस्तत्पानादौ परोदितदेवतानाम श्रुत्वा स्वयं त्रिरुद्धार्य्य पादोदकं पीत्वा तच्छेषम्। अकालमृत्युशमनं सर्व्वव्याधिविनाशनम्। विष्णोः पादोदकं पुण्यं शिरसा धारयाम्यहम्॥ इति शिरसि धारयेत्॥ नैवेद्यभक्षणे मन्त्रः।

ॐ उच्छिष्टभोजिनस्तस्य वयमुच्छिष्टकाङ्क्षिणः।
येन लीलावराहेण हिरण्याक्षो निपातितः॥
इत्युच्चार्य्य भक्षयेत्॥ *॥ यथालाभं दशोपचारैरेव वा पूजयेत्। तत्र दशोपचाराः। अर्घ्यपाद्याचमनीयमधुपर्काचमनगन्धपुष्पधूपदीपनैवेद्यानि। पञ्चोपचाराः। गन्धपुष्पधूपदीपनैवेद्यानि। गन्धपुष्पाभ्यां वा केवलपुष्पेण केवलजलेन वा पूजयेत् ततोऽमित्रक्षसरस्वतीलक्ष्मीणां पूजनम्। इत्याह्निकप्रयोगतत्त्वम्॥ *॥ तन्त्रोक्तसामान्यपूजा कलावतीगृह्ये द्रष्टव्या॥

पूजार्हः, त्रि, (पूजामर्हतीति। पूजा+अर्ह+"अर्हः।" ३।२।१२। इत्यच्।) पूजायोग्यः। मान्यः। इति शब्दरत्नावली॥ (यथा, मनुः। ६।२६।

"प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन॥")

पूजितः, त्रि, (पूज+क्तः।) प्राप्तपूजः। अर्चितः। तत्पर्य्यायः। अर्चितः २। इत्यमरः। १।१।६॥ (यथा, भट्टिः। ४।१।

पूतग

"निवृत्ते भरते धीमानत्रे रामस्तपोवनम् ।
प्रपेदे पूजितस्तस्मिन् दण्डकारण्यमीयिवान् ॥")
(जितयः, त्रि, पूजनीयः । पूजधातोः कर्म्मणि तव्यप्रत्ययनिष्पन्नः ॥
(जिलः, पुं, (पूज्यते इति । पूज+"गुपादिभ्यः कित् ।" उणा० १ । ५७ । इति इलच् । स च कित् ।) देवता । इति संक्षिप्तसारोणादिवृत्तिः ॥ पूज्ये, त्रि । इत्युणादिकोषः ॥
पूज्यः, पुं, (पूजयितुमर्हः । पूज+"अर्हे कृत्यतृचश्च ।" ३ । ३ । १६९ । इति यत् ।) श्वशुरः । पूजनीये, त्रि । तत्पर्य्यायः । प्रतीक्ष्यः २ । इत्यमरः । ३ । ३ । १५० ॥ यथा,—
"अहं हि पूर्व्वो वयसा भवद्भा-
स्तेनाभिवादं भवतां न युक्तम् ।
यो विद्यया तपसा जन्मना वा
वृद्धः स पूज्यो भवति द्विजानाम् ॥
अष्टक उवाच ।
अवादीस्त्वं वयसास्मि प्रवृद्ध
इति वैराजाभ्यधिकः कथञ्चित् ।
यो वै विद्वांस्तपसा स वृद्धः
स एव पूज्यो भवति द्विजानाम् ॥"
इति मात्स्ये ३९ अध्यायः ॥
पूय, क संघाते । राशीकरणे । इति कविकल्पद्रुमः ॥ (चुरा०-परo-सकo-सेट् ।) पञ्चस्वरी । क, पूययति धान्यं लोकः । राशीकरोतीत्यर्थः । इति दुर्गादासः ॥
पूतं, क्ली, (पूयते स्मेति । पू+कर्म्मणि क्तः ।) अपनीतवृषधान्यम् । बङ्गीभाषा धान इति भाषा ॥ तत्पर्य्यायः । बहुलीक्षतम् २ । इत्यमरः । २ । ९ । २३ ॥
पूतः, त्रि, (पू च शोधे+क्तः ।) व्रतादिना शुद्धः । तत्पर्य्यायः । पवित्रः २ प्रयतः ३ । इत्यमरः । २ । ७ । ४५ ॥ शुद्धः । यथा,—
"दधिगोमयादि सामान्यं पवित्रं स्वभावपवित्रं वा ।" इति भरतः ॥ तत्पर्य्यायः । पवित्रम् २ । मेध्यम् ३ । इत्यमरः । ३ । १ । ५५ ॥ यथा,—
"चक्षुःपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतं वदेद्वाक्यं बुद्धिपूतं विचिन्तयेत् ॥"
इति मार्कण्डेयपुराणम् ॥
सत्यम् । इति जटाधरः ॥
पूतः, पुं, (पूयते स्म येनेति । पू+करणे क्तः । यद्वा, पवते स्मेति गत्यर्थेति कर्त्तरि क्तः ।) शुक्रः । श्वेतकुशः । विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥
पूतक्रतायी, स्त्री, (पूतक्रतोरिन्द्रस्य स्त्री । पूतक्रतु+"पूतक्रतोरै च ।" ४ । १ । ३६ । इति ङीप् ऐकारादेशश्च ।) इन्द्रपत्नी । शची । इति जटाधरः ॥
पूतक्रतुः, पुं, (पूतः क्रतुर्येन ।) इन्द्रः । इति जटाधरः ॥
पूतगन्धः, पुं, (पूतः पवित्रो गन्धो यस्य ।) वर्व्वरः । इति राजनिर्घण्टः ॥

पूतना

पूतदारुः, क्ली, (पूतं पवित्रं दारुमिति नित्यकर्म्मधारयः ।) श्वेतकुशः । इति राजनिर्घण्टः ॥
पूतद्रुः, पुं, (पूतः पवित्रो द्रुः ।) पलाशवृक्षः । इति राजनिर्घण्टः ॥
पूतधान्यं, क्ली, (पूतं धान्यमिति नित्यकर्म्मधारयः ।) तिलः । इति राजनिर्घण्टः ॥
पूतना, स्त्री, (पूतं करोतीति । तत्करोतीति णिच् । ततो बहुलमन्यत्रापीति युच् ।) हरीतकी । इत्यमरः । २ । ४ । ३६ ॥ सिन्धुदेशजा खल्पत्वक् दृढदन्तिहरीतकी लेपने प्रशस्ता । इति राजवल्लभः ॥ (उत्पत्तिस्थानशाकृतिश्चास्या यथा,—
"पूतना भगधोद्भवा ।" "पूतना चतुरस्रका ।"
"पूतना चतरङ्गुला————————।"
इति हारीते कल्पस्थाने प्रथमेऽध्याये ॥)
गन्धमांसी । इति राजनिर्घण्टः ॥ दानवीभेदः । सा वकासुरभगिनी निजांसया स्तनकालकूटप्रदानात् श्रीकृष्णेन हता । (एतद्वृत्तान्तस्तु हरिवंशे ६२ अध्याये द्रष्टव्यः ॥) रोगभेदः । इति मेदिनी । ने, ६३ ॥ स च अहिपूतनानामबालरोगः । तस्य निदानं यथा,—
"पद्मवर्णो महापद्मो बाले दोषत्रयोद्भवः ।
ग्रसत्याशु हृदयं यो वा हृद्याद्वा गुदं व्रजेत् ॥
क्षुद्ररोगे च कथिते व्रणयन्त्राहिपूतने ॥"
क्षुद्ररोगोक्तं यथा,—
"गृध्रस्यूचसमायुक्तोऽग्नौ पाने शिशोर्भवेत् ।
खिन्ने वा स्नाप्यमाने वा कण्डूरक्तकफोद्भवा ॥
कण्डूयनात्ततः शिघ्रं स्फोटः स्रावश्च जायते ।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम् ॥"
इति माधवकरः ॥ * ॥
(लक्षणान्तरमस्या यथा,—
"सस्ताङ्गः खपिति सुखं दिवा न रात्रौ
विड्भिन्नं रुजति च काकतुल्यगन्धिः ।
कृद्दार्क्षो कृषिततनूरुहः कुमार-
स्तृष्णालुर्भवति च पूतनागृहीतः ॥"
इति सुश्रुतेनोत्तरतन्त्रे सप्तविंशेऽध्याये उक्तम् ॥
चिकित्सास्या यथा,—
"कपोतवङ्क्षारुको वरुणः पारिभद्रकः ।
आस्फोता चैव योज्याः स्युर्बालानां परिषेचने ॥
वचा वयस्था गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्ज्जरसश्चैव तैलार्थे वर्गं इष्यते ॥
हितं घृतं तुगाक्षीर्य्या सिद्धं मधुरकैश्च च ।
कुष्ठतालीशखदिरं चन्दनस्यन्दने तथा ॥
देवदारु वचाहिङ्गु कुष्ठं गिरिकदम्बकः ।
एलाहरेणवश्चापि योज्या तद्रूपने यदा ॥
गन्धनाकुलिकुम्भीका मञ्जानो वदरस्य च ।
कर्कटास्थि घृतश्चैव धूपनं सर्षपैः सह ॥
काकादनीं चित्रफलां विल्वीं गुञ्जाश्च धारयेत् ।
मत्स्यौदनश्च कुर्व्वीत क्षपरां पललक्षतथा ॥
शरावसम्पुटे कृत्वा बलिं भूमयहे हरेत् ।
उच्छिष्टेनाभिषेकेन शिरसि स्नानमिष्यते ॥
पूज्या च पूतना देवी बलिभिः सोपहारकैः ।
मलिनाम्बरसंवीता मलिनाङ्गविमूर्द्धजा ॥

पूतिः

शून्यागाराश्रिता देवी दारकं पातु पूतना ।
दुर्गन्धेना सुदुर्गन्धा कराला मेघकालिका ॥
भिन्नागाराश्रया देवी दारकं पातु पूतना ॥"
इति चोत्तरतन्त्रे द्वात्रिंशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥) बालमालकाविशेषः । यथा,—
"तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतना
नाम मालका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः ॥ गात्रमुद्वेजयति स्तन्यं न गृह्णाति दृष्टिं वधाति क्रन्दति ऊर्द्धं निरीक्षते । बलिमस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । गन्धमाल्यैश्च सम्पूज्य रक्तपुष्पं रक्तचन्दनं रक्तसम्पन्नजाः सम्पदीपाः सम्पक्वसिक्ताः मत्स्यमांससुराः अयमक्तश्च दक्षिणस्यां दिशि मध्याह्ने चतुष्पथे बलिर्दातव्यः शिवनिर्माल्यगुग्गुलुसर्षपनिम्बपत्रमेषशृङ्गैर्दिनत्रयं धूपयेत् । ॐ नारायणाय नमः हन हन सुख सुख हुं फट् स्वाहा । चतुर्थे दिवसे ब्राह्मणं भोजयेत् ततः सम्पद्यते शुभम् ।" इति चक्रपाणिदत्तः ॥
पूतनारिः, पुं, (पूतनाया अरिः शत्रुः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥
पूतनासूदनः, पुं, (पूतनां सूदयति सूदितवानिति वा । सूद+ल्युः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥
पूतनाहा, [न्] पुं, (पूतनां हन्तीति । हन+क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः ॥
पूतफलः, पुं, (पूतानि पवित्राणि फलान्यस्य ।) पनसः । इति राजनिर्घण्टः ॥ (पनसशब्दस्य विवरणं व्याख्यातम् ॥)
पूता, स्त्री, (पूत+टाप् ।) दूर्व्वा । इति राजनिर्घण्टः ॥
पूतात्मा, [न्] पुं, (पूतः पवित्र आत्मा स्वभावः ।) पवित्रस्वभावः । (पूत आत्मा स्वरूपं यस्य विष्णोः । यथा, महाभारते । १३ । १४९ । १५ ।
"पूतात्मा परमात्मा च मुक्तानां परमा गतिः ॥")
शुद्धदेहे, त्रि । यथा,—
"ग्राम्योऽपि स्तवराजेन स्तुत्वा सम्पूज्य चाहनम् ।
पूतात्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान् ॥"
इति ग्रामपुराणे सूर्य्यस्तवः ॥
पूति, क्ली, (पुनातीति । पू+कर्म्मरि क्तिच् ।) रोहिषतृणम् । इति राजनिर्घण्टः ॥
पूतिः, स्त्री, (पू+भावे क्तिन् ।) पवित्रता । दुर्गन्धः । इत्यमरटीकायां रायमुकुटः ॥ (यथा, गरुडे १८० अध्याये ।
"मेषमूत्रसमत्वाभ्यां कर्ण्ययोर्भेरजात् शिव ।
कर्ण्ययोः पूतिनाशः स्यात् क्रमिभावो विनश्यति ॥")
खट्टाग्रसुष्कः । खाटाशी इति भाषा । तस्यानुलेपनगुणः । परमालघूरुशोष्णरनाग्निदम् ।
इति राजवल्लभः ॥ (अस्या विशोधनं यथा,—
"यथालाभमपामार्गं खण्डादिचारलेपितम् ।
वासखेदेन संखिद्य पूतिं निर्लोमतां नयेत् ॥
दोलापाकं पचेत् पश्चात् पञ्चपल्लववारिणा ।
खलः साधुमिवोत्पीड्य ततो निस्क्लेदतां नयेत् ॥

आजग्मोभाञ्जनजलैर्भावयेच्च पुनः पुनः ।
शिग्रुमूलेन केतक्याः पुष्पपत्रपुटे च तम् ॥
पचेदेवं विमुक्तः सन् मृगनाभिसमो भवेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे ॥
दुर्गन्धविशिष्टे, त्रि । यथा, भगवद्गीतायाम् ।
१७ । १० ।
"यातयामं गतरसं पूति पर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥")
पूतिकं, क्ली, (पूत्या दुर्गन्धेन कायतीति । कै + क: ।) विष्ठा । इति राजनिर्घण्टः ॥ (दुर्गन्धविशिष्टे, त्रि । यथा, महाभारते ।१३।८।११।
"किं त्वया पापकं पूर्व्वं कृतं कर्म्म सुदारुणम् ।
यस्त्वं घ्रसग्राने मृतकान् पूतिकानतृप्ति कुतृप्तितान् ॥")
पूतिकः, पुं, (पूत्या कायतीति । कै + कः ।)
पूतिकरञ्जवृक्षः । इत्यमरः । २ । ४ । ४८ ॥
(अस्य पर्य्यायादिकं पूतिकरञ्जशब्दे द्रष्टव्यम् ॥)
पूतिकरजः, पुं, (पूतियुक्तः करजः ।) करञ्जभेदः । इत्यमरः ।२।४।४८ ॥ यथा, "अथ कटुकरञ्जघोराकरञ्जनामगुणाः ।
करञ्जो नक्तमालश्च करञ्जश्चिरबिल्वकः ।
घृतपूर्णकरञ्जोऽन्यः प्रकीर्य्यः पूतिकोऽपि च ॥
स चोक्तः पूतिकरजः सोमवल्कश्च स स्मृतः ।
करञ्जः कटुकस्तीक्ष्णो वीर्य्योष्णो योनिदोषहृत् ॥
कुष्ठोदावर्त्तगुल्मार्शोव्रणकृमिकफापहः ।
तत्पत्रं कफवातार्शःकृमिशोथहरं परम् ॥
भेदनं कटुकं पाके वीर्य्योष्णं पित्तलं लघु ।
तत्फलं कफवातघ्नं मेहार्शःकृमिकुष्ठजित् ॥
घृतपूर्णकरञ्जोऽपि करञ्जसदृशो गुणैः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पूतिकरञ्जः, पुं. (पूतियुक्तः करञ्जः ।) करञ्जविशेषः । नाटाकरञ्ज इति भाषा । कटकरेज इति हिन्दी भाषा । तत्पर्य्यायः । प्रकीर्य्यः २ पूतिकरजः ३ पूतीकरजः ४ पूतिकः ५ पूतीकः ६ कलिकारकः ७ कलिमालकः ८ कलहनाशनः ९ । इत्यमरभरतौ ॥ प्रकीर्य्यः १० रजनीपुष्पः ११ सुमनाः १२ पूतिकर्शिकः १३ कैड्र्यः १४ कलिमाल्यः १५ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । विषवातार्शिःकण्डूविचर्चिकाकुष्ठस्पर्शेत्यग्दोषनाशित्वञ्च ।
इति राजनिर्घण्टः ॥ (अस्य पर्य्यायान्तरं यथा,
"स चोक्तः पूतिकरजः सोमवल्कश्च स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पूतिकर्णः, पुं, (पूतिर्दुर्गन्धः कर्णो यस्मात् ।) कर्णरोगविशेषः । तल्लक्षणं यथा,—
पूतिकर्णमाह ।
"कर्णविद्रधिपाकाद्वा स कर्णो वारिपूरणात् ।
पूयं स्रवति यत् पूति स ज्ञेयः पूतिकर्णकः ॥"
कर्णस्रावाद्धेदार्थमाह ।
पूतीति नियमेन पूति यथा स्यादेवं स्रवति ॥
तच्चिकित्सा यथा,—
"कर्णस्रवे पूतिकर्णे तथैव कृमिकर्णके ।
सामान्यं कर्म्म कुर्व्वीत योगान् वैशेषिकानपि ॥
सर्ज्जिकाचूर्णसंयुक्तबीजपूररसं क्षिपेत् ।
कर्णस्रावरुजा दाहास्तेन नश्यन्त्यसंशयम् ॥१॥
आम्रजम्बुप्रवालानां मधुकस्य वटस्य च ।
एभिस्तु साधितं तैलं पूतिकर्णगदं हरेत् ॥२॥
जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ॥३॥
घृतं रसाञ्जनं नार्य्याः क्षीरेण क्षौद्रसंयुतम् ।
प्रशस्यते चिरोत्थे तत् स्रावे पूतिकर्णके ॥४॥
कुष्ठहिङ्गुवचादारुघृताक्षविश्वसैन्धवैः ।
पूतिकर्णापहं तैलं वस्त्रसूत्रेण साधितम् ॥
कुष्ठादितैलम् ॥ ५ ॥
"ग्रम्बूकस्य तु मांसेन कटुतैलं विपाचयेत् ।
तस्य पूरणमात्रेण कर्णनाड़ी प्रशाम्यति ॥ ६ ॥
चूर्णेन गन्धकश्रिलारञ्जनीभवेन
सुरंग्रकेन कटुतैलपलाष्टके तु ।
धत्तूरपत्ररसतुल्यमिदं विपक्वं
नाड़ीं जयेच्चिरभवामपि कर्णजाताम् ॥
सृष्टिः पलम् ॥ ७ ॥
कृमिकर्णविनाशाय कृमिघ्नीं कारयेत् क्रियाम् ।
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ॥
पूरणं हरितालेन गव्यमूत्रयुतेन च ।
धूपने कर्णदौर्गन्ध्ये गुग्गुलुः श्रेष्ठ उच्यते ॥"
इति भावप्रकाशः ॥
(चिकित्सास्य यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धुधूमरजो गुड़ः ।
पूरणः पूतिकर्णस्य ग्रमनो मधुसंयुतः ॥"
इत्युत्तरतन्त्रे एकविंशेऽध्याये सुश्रुतेनोक्तम् ॥)
पूतिकर्णकः, पुं, (पूतिः कर्णो यस्मात् । कप् ।)
कर्णरोगभेदः । तस्य लक्षणम् । यथा,—
"कर्णविद्रधिपाकाद्वा जायते चाम्बुपूरणात् ।
पूयं स्रवति वा पूति स ज्ञेयः पूतिकर्णकः ॥"
इति माधवकरः ॥
(लक्षणान्तरमस्य यथा,—
"स्थिते कफे स्रोतसि पित्ततेजसा
विलाप्यमाने श्रृशसम्प्रतापवान् ।
अवेदनो वाप्यथवा सवेदनो
घनं स्रवेत् पूति स पूतिकर्णकः ॥"
इत्युत्तरतन्त्रे विंशेऽध्याये सुश्रुतेनोक्तम् ॥)
औषधं यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धुधूमरजोगुड़ः ।
पूरणात् पूतिकर्णस्य ग्रमनो मधुसंयुतः ॥"
अथवा ।
"वरुणार्द्रकपित्थाम्रजम्बूपल्लवसाधितम् ।
पूतिकर्णापहं तैलं जातीपत्ररसेन वा ॥"
इति चक्रपाणिदत्तः ॥
(चिकित्सास्य यथा,—
"घृतं रसाञ्जनं नार्य्याः क्षीरेण क्षौद्रसंयुतम् ।
प्रशस्यते चिरोत्थेऽपि स्रावे पूतिकर्णके ॥"
इति चोत्तरतन्त्रे एकविंशतितमेऽध्याये सुश्रुतेनोक्तम् ॥)
पूतिका, स्त्री, (पूत्या कायतीति । कै + कः । टाप् ।) मार्जारी । इति राजनिर्घण्टः ॥
(कीटविशेषः । यथा, पञ्चतन्त्रे । ३ । ६६ ।
"पुलका इव धान्येषु पूतिका इव पक्षिषु ।
मशका इव मर्त्तेषु येषां धर्म्मो न कारणम् ॥")
लताग्राकविशेषः । इत्यमरटीकायां भरतः ॥ पुँइ इति भाषा ॥ अस्याः पर्य्यायगुणौ उपोदकीशब्दे द्रष्टव्यौ ॥ दादश्यां तद्भक्षणे दोषो यथा । पूतिका ब्रह्मचारिका । यदपि ।
'कुसुम्भं नालिकाशाकं वृन्ताकं पौतिकीन्तथा ।
भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः ॥'
इत्युशनसा सामान्यतोऽभिहितम् । अत्र नालिका श्वेतकलम्बीति कल्पतरुः । पूतिका च दादश्यामधिकदोषाय शूद्रविषयिका वा ।" इति तिथितत्त्वम् ॥ (इयं हि सोमांशुतो जातेति सोमस्यालाभे प्रतिनिधित्वेन ग्राह्या । यथा, महाभारते । ३ । ३५ । ३३ ।
"अस्ति मासः प्रतिनिधिर्यथा प्राहुर्मनीषिणः ।
पूतिकामिव सोमस्य तथैतं क्रियतामिति ॥")
पूतिकासुखः, पुं, (पूतिकाया सुखमिव सुखं यस्य ।)
ग्रम्बूकः । इति शब्दमाला ॥ (ग्रम्बूकशब्देऽस्य विषयो ज्ञेयः ॥)
पूतिकाष्ठं, क्ली, (पूति काष्ठमिति कर्म्मधारयः ।)
देवदारु । सरलवृक्षः । इत्यमरः । २ । ४ । ५४, २ । ४ । ६० ॥ पवित्रदारु च ॥
पूतिकाष्ठकं, क्ली, (पूतिकाष्ठ + स्वार्थे कन् ।)
सरलवृक्षः । इति शब्दचन्द्रिका ॥
पूतिगन्धं, क्ली, (पूतिर्गन्धो यस्य ।) रङ्गम् । इति राजनिर्घण्टः ॥
पूतिगन्धः, पुं, (पूतिर्गन्धो यस्य ।) गन्धकः । इक्षुदीवृक्षः । इति राजनिर्घण्टः ॥ दुर्गन्धे, त्रि ॥
(यथा, मनुः । ४ । १०७ ।
"नित्यानध्याय एव स्यात् ग्रामेषु नगरेषु च ।
धर्म्मेप्सुपुण्यकामानां पूतिगन्धे च सर्व्वदा ॥")
पूतिगन्धिः, त्रि, (पूतिर्गन्धो यस्य । "गन्धस्येदुत्पूतिसुसुरभिभ्यः ।" ५ । ४ । १३५ । इति इः ।) दुर्गन्धः । इत्यमरः । १ । ५ । १२ ॥ पूतिर्विट् पूतिरिव गन्धोऽस्य । इति रायमुकुटः ॥
(यथा, महाभारते । २ । ६० । २६ ।
"अयाधिजं कटुकं तीक्ष्णसुग्रं
यग्रोसृग्रं परुषं पूतिगन्धि ।
सतां पेयं यन्न पिबन्त्यसन्तो
मन्युं महाराज ! पिब प्रशाम्य ॥")
पूतिगन्धिकः, त्रि, (पूतिगन्धि + स्वार्थे कन् ।)
दुर्गन्धः । इति हेमचन्द्रः । ६ । २७ ॥
पूतिगन्धिका, स्त्री, (पूतिगन्धोऽस्त्यस्या इति । पूतिगन्ध + ठन् ।) वाकुची । इति राजनिर्घण्टः ॥
पूतितैला, स्त्री, (पूति दुर्गन्धं तैलं यस्याः ।)
ज्योतिष्मती । इति रत्नमाला ॥ नयाफटकी इति भाषा ॥ (पर्य्यायोऽस्या यथा,—
"पारावतपदी पिण्या नगवास्फुटवन्यनी ।
ज्योतिष्मती पूतितैला केचित्तामिङ्गुदीं विदुः ॥"
इति वैद्यकरत्नमालायाम् ॥)

पूतिनस्यः, पुं, (पूतिर्दुर्गन्धो नस्यः नासिकाभवो रोगः ।) नासारोगभेदः । तस्य लक्षणम् । यथा,

"दोषैर्विदग्धैरथवापि जन्तो-
र्ललाटदेशेऽभिहतस्य तैस्तैः ।
नासा स्रवेत् पूयमसृग्मिश्रं
तं पूयरक्तं प्रवदन्ति रोगम् ॥"

इति माधवकरः ॥

औषधं यथा,—

"आम्रीदन्तीवचाग्निगुडरसलवणोषसम्भवैः ।
पाचितं लावणं तैलं पूतिनासागदं जयेत् ॥"

अथवा ।

"त्रिकटुविड्ङ्गकसैन्धवदन्तीफलाग्निगुडरसदन्तीभिः ।
तैलं गोजलसिद्धं नस्यं स्यात् पूतिनस्यस्य ॥"

इति चक्रपाणिदत्तः ॥

(अस्य व्याख्याने श्रीकण्ठदत्तेन यद्विदेहवचनमाहृतं तदयथा । "नासिका भवो नस्यः पूतिर्नस्यो वायुर्यत्र तं पूतिनस्यम् ।" इत्येव विदेहः ।

"कफपित्तमस्रङ्मिश्रं सञ्चितं मस्तिं देहिनाम् ।
विद्यान्मुखगतोद्गाढं घ्राणं घ्राणाभिघातजम् ॥
ततः प्रस्यन्दते घ्राणात् सरक्तं पूति पीतकम् ।
पूतिनस्यन्तु तं विद्याद्घ्राणकण्डूक्षणप्रदम् ॥"

चिकित्सान्तरमस्य यथा,—

"पूर्व्वोद्दिष्टे पूतिनस्ये च जन्तोः
स्नेहस्वेदौ कृर्दनं भंसनञ्च ।
युक्तं भक्तं तीक्ष्णमस्यं लघुस्या-
दुष्णं तोयं धूमपानञ्च कार्य्ये ॥"

इत्युत्तरतन्त्रे त्रयोविंशेऽध्याये सुश्रुतेनोक्तम् ॥)

पूतिपत्रः, पुं, (पूति पत्रं यस्य ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥

पूतिपुष्पिका, स्त्री, (पूति पुष्पमस्याः । कापि अत इत्वम् ।) मातुलुङ्गा । इति रत्नमाला ॥ मखुरलेबु इति मौटा वा इति च भाषा ॥ (गुणादयोऽस्या मातुलुङ्गशब्दे ज्ञातव्याः ॥)

पूतिफला, स्त्री, (पूति फलं यस्याः ।) सोमराजी । इति रत्नमाला ॥

पूतिफली, स्त्री, (पूति फलं यस्याः । ङीष् ।) सोमराजी । इत्यमरः । २ । ४ । ६६ ॥ (अस्याः पर्य्यायो यथा,—

"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
अग्निलेखा लताफला सोमा पूतिफलीति च ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पूतिमयूरिका, स्त्री, (पूतिर्मयूरीव । ततः स्वार्थे कन् ह्रस्वश्च ।) अजगन्धा । इति राजनिर्घण्टः ॥

पूतिमेदः, पुं, (पूतिर्मेदोऽस्य ।) अरिमेदः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य अरिमेदशब्दे बोद्धव्यः ॥)

पूतिवातः, पुं, (पूतये पवित्रताय वातो यस्य ।) विल्वतरुः । इति रत्नमाला ॥ (पर्य्यायोऽस्य यथा,

"विल्वो महाकपित्थाख्यः श्रीफलो गोहरीतकी ।
पूतिवातोऽथ माङ्गल्यो मालूरश्च महाफलम् ॥"

इति वैद्यकरत्नमालायाम् ॥

(पूतिर्वातः ।) दुर्गन्धवायुश्च ॥

पूतिवृक्षः, पुं, (पूतिर्वृक्षः ।) श्योनाकः । इति रत्नमाला ॥ पवित्रदुर्गन्धौ तरुश्च ॥

पूतिश्वारिका, स्त्री, (पूतिः श्वारिरिव जायते इति । जन + ड । टाप् ।) खट्वाशो । इति त्रिकाण्डशेषः ॥

पूतीकः, पुं, (पूति + वा कीष् । तद्वत् कायतीति । कै + कः ।) पूतिकरञ्जः । इत्यमरटीकायां भरतः ॥ (यथास्य पर्य्यायः ।

"पूतीकरञ्जः पूतीकः प्रकीर्य्यश्च सकण्टकः ॥"

इति वैद्यकरत्नमालायाम् ॥

यथा च सुश्रुते । १ । ३६ ।

"पूतीकक्षिञ्चकः पाठा विड्ङ्गेलाहरेणवः ॥")

गन्धमार्जारः । इति राजनिर्घण्टः ॥

पूतीकरञ्जः, पुं, (पूतीयुक्तः करञ्जः ।) पूतिकरञ्जः । इति रत्नमाला ॥ नाटा इति भाषा ॥ (पर्य्यायोऽस्य यथा,—

"पूतीकरञ्जः पूतीकः प्रकीर्य्यश्च सकण्टकः ॥"

इति वैद्यकरत्नमालायाम् ॥)

पूतीका, स्त्री, (पूत्या दुर्गन्धेन कायतीति । कै + कः ।) पूतिका । इत्यमरटीकायां भरतः ॥

पूत्यण्डः, पुं, (पूति दुर्गन्धमण्डमस्य ।) गन्धकीटः । गँदीपोका इति भाषा ॥ (यथा, महाभारते । १२ । ३२२ । ७ ।

"पुलाका इव धान्येषु पूत्यण्डा इव पक्षिषु ।
तद्विधास्ते मनुष्येषु येषां धर्म्मो न कारणम् ॥")

जन्तुभेदः । इति मेदिनी । डे, १२ ॥ खटाशी इति भाषा ॥

पूनः, त्रि, (पू + क्तः । "पूनो विनाशे ।" ८ । २ । ४४ । इत्यस्य वार्त्तिकोक्त्या तस्य नः ।) नष्टः । इति सुग्धबोधव्याकरणम् ॥

पूपः, पुं, (पू + क्विप् । पूर्वं पवित्रं पाति रक्षतीति । पा + कः ।) पिष्टकः । इत्यमरः । २ । ८ । ४८ ॥ (यथा, मार्कण्डेये । १५ । २४ ।

"मधु कृत्वा नरो दंशः पूपं कृत्वा पिपीलिकः ।")

(पिष्टकशब्दस्य विवृतिर्द्रष्टव्या ॥)

पूपली, स्त्री, (पूपं तदाकारं लातीति । ला + कः ।) पोलिका । इति हेमचन्द्रः । ३ । ६३ ॥

पूपाली, स्त्री, (पूपाय अलतीति । अल + अच् । गौरादित्वात् ङीष् ।) पोली । इति त्रिकाण्डशेषः ॥

पूपाष्टका, स्त्री, (पूपद्रव्यसाधनी अष्टका अष्टमी ।) अग्रहायणीपूर्णिमायाः परतः कृष्णाष्टमी । तद्विवरणं अष्टकाशब्दे द्रष्टव्यम् । "तत्र नित्यं श्राद्धं पूपाष्टकं कर्त्तव्यम् । यथा गोभिलः । अष्टका यौर्द्धमाग्रहायण्यास्तिस्राष्टमी । ब्रह्मपुराणे ।

पित्र्यादानाय मूले स्युरष्टकास्तिस्र एव च ।
कृष्णपक्षे वरिष्ठा हि पूर्व्वा चेन्द्री विभायते ॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेवकी ॥

आद्या पूपैः सदा कार्य्या मांसैरन्या भवेत्तथा ।
शाकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः ॥"

इति तिथितत्त्वम् ॥

पूपिका, स्त्री, (पूपः पूपाकारोऽस्यस्या इति टन् । ततष्टाप् ।) पूलिका । इति हेमचन्द्रः । ३ । ६२ ॥

पूय, ईं ङ दुर्गन्धे । श्रीवर्य्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक० च-सेट् । निष्ठायामनिट् ।) षष्ठस्वरी । ईं, पूतः । ङ, पूयते मत्स्यः दुर्गन्धः स्यादित्यर्थः । श्रीवर्य्यभेदनम् । इति दुर्गादासः ॥

पूयं, क्ली, (पूयते दुर्गन्धो भवतीति । पूय + अच् ।) पक्वव्रणादिसम्भवघनीभूतशुक्लवर्णविक्ततरक्तम् । पूँय इति भाषा । तत्पर्य्यायः । क्षतजम् २ मलजम् ३ पूयनम् ४ । असितम् ५ । इति शब्दचन्द्रिका ॥ (यथा, महाभारते ।३।१६६।५४।

"ये च दुष्कृतकर्म्माणः पूयं तेषां विधीयते ॥")

पूयवर्द्धनद्रव्याणि यथा,—

नवधान्यमाषतिलकलायकुलत्थनिष्पावहरितकशाकाम्लवल्लकटुकगुडपिण्याकविल्लतिवल्लूरशुष्कशाकानूपौदकमांसवसाघृतोदकक्षीरापायसदधिदुग्धतक्रभ्रष्टतीन् परिहरेत् ।

"तक्रान्तेनैवधान्यादिर्योऽयं वर्गः उदाहृतः ।
दोषसंजननो ह्येष विज्ञेयः पूयवर्द्धनः ॥"

इति सुश्रुतः ॥

(अस्य विषयो यथा,—

"वाताहते नास्ति रुजा न पाकः
पित्ताहते नास्ति कफाच्च पूयः ॥"

इति सुश्रुते सूत्रस्थाने सप्तदशेऽध्याये ॥)

पूयनं, क्ली, (पूयतेऽनेनेति । पूय + ल्युट् ।) पूयम् । इति शब्दचन्द्रिका ॥

पूयरक्तः, पुं, (पूयविशिष्टं रक्तमस्मिन् ।) नासारोगभेदः । तस्य लक्षणम् । यथाह माधवकरः ।

"दोषैर्विदग्धैरथवापि जन्तो-
र्ललाटदेशेऽभिहतस्य तैस्तैः ।
नासा स्रवेत् पूयमसृग्मिश्रं
तं पूयरक्तं प्रवदन्ति रोगम् ॥"

(क्लीवलिङ्गेऽपि दृश्यते । यथा,—

"निचयादभिघाताद्वा पूयासृङ्नासिका स्रवेत् ।
तत् पूयरक्तमाख्यातं शिरोदाहरुजाकरम् ॥"

इति वाभटे उत्तरस्थाने नवविंशेऽध्याये ॥

चिकित्साऽस्य यथा,—

"वस्त्यासृङ्मोक्षरक्तपित्तोपशान्तिं
गाढ़ीवस्यात् पूयरक्ते चिकित्सा ।
वान्ते सम्यक् धावपीड़े वदन्ति
तीक्ष्णं धूमं शोधनञ्चात्र नस्यम् ॥"

इत्युत्तरतन्त्रे त्रयोविंशेऽध्याये सुश्रुतेनोक्तम् ॥)

पूयारिः, पुं, (पूयानामरिः तद्विनाशकत्वात् ।) निम्बतरुः । इति शब्दचन्द्रिका ॥ (विवरणमस्य निम्बशब्दे ज्ञातव्यम् ॥)

पूयालसः, पुं, (पूयः अलस इव यत्र । साक्षल्येन चिरान्निर्गमनादेव तथात्वम् ।) सन्धिगतरोगभेदः । तस्य लक्षणं यथा,—

"पक्वः श्लोफः सन्निजः संस्ववेदयः
सान्द्रं पूयं पूतिपूयालसः सः ॥"
इति सुश्रुतः ॥
("पूयालसः सोपनाहः सावाश्चत्वार एव च ।
पर्व्वणोकालजौ जन्तुर्ग्रन्थिसन्धौ न वामयाः ॥"
"पूयालसन्तु तं विद्यात् सन्धौ कानीनके नृणामिति वचनात् ॥" इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥)

पूर, इं य ड पूर्त्तौ । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-सेट् । निष्ठायामनिट् ।) दीर्त्तौ । ईं, पूर्णः । य ड, पूर्य्यन्ते पितरस्त्वेति हलायुधः । पूर्त्तिरिहाप्यायनम् । इति दुर्गादासः ॥

पूर, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) दीर्त्तौ । क, पितॄन् पूरयति श्राद्धे हव्यैः कव्यैश्च यः सदा । इति हलायुधः ॥ इति दुर्गादासः ॥

पूरं, क्ली, (पूरयति सौगन्ध्येनेति । पूर+कः ।) दाहागुरु । इति राजनिर्घण्टः ॥

पूरः, पुं, (पूरयतीति । पूर+कः ।) जलसमूहः । (यथा, रघौ । ३ । १७ ।
"महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥")
व्रणसंशुद्धिः । खाद्यविशेषः । इति मेदिनी । रे, ६० ॥ (प्राणायामादिकर्त्तुर्नासारन्ध्रेण बहिः-पवनाकर्षणम् । यथा, भागवते । ३ । २८ । ६ ।
"प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ।
प्रतिकूलेन वा चित्तं यथास्थिरमचञ्चलम् ॥"
बीजपूरः । तत्पर्य्यायो यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
सुकुन्धः पूरकः पूरो बीजपूर्णोऽम्लकेशरः ॥"
इति वैद्यकरत्नमालायाम् ॥)

पूरकः, पुं, (पूरयतीति । पूरि+ण्वुल् ।) बीजपूरः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
सुकुन्धः पूरकः पूरो बीजपूर्णोऽम्लकेशरः ॥"
इति वैद्यकरत्नमालायाम् ॥)
गुणकाङ्क्षः । इति लीलावती ॥ ध्यानादिकर्त्तृ-नासिकागतोच्छ्वासः । ब्रह्मध्यानपूर्ब्बकप्राणाया-माङ्गतत्तन्मन्त्रं जपन् वामनासिकया वायुना देहपूरणम् । (यथा, हटयोगप्रदीपिकायाम् । २ । ७१ ।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः ।
सहितः केवलश्चेति कुम्भको द्विविधो मतः ॥")
यथाच व्यासः ।
"आदानं रोधमुत्सर्गं वायोश्चिन्वन्ति समभ्यसेत् ।
ब्रह्माणं केशवं शम्भुं ध्यायेद्देवानुक्रमात् ॥
पूर्ब्बवत्ने त्रिर्जपमात्राभिधानादत्र चिन्विरिति वीप्सा सन्ध्यात्रयापेक्षया ।
ब्रह्माणं केशवं शम्भुं ध्यायन् मुच्येत बन्धनात् ॥
इति योगियाज्ञवल्क्यः ।
'भूर्भुवःस्वर्महर्जनस्तपः सत्यं तथैव च ।
प्रत्योङ्कारसमायुक्तं तथा ततं सवितुः पदम् ॥
ॐ आपो ज्योतिरित्येतच्छिरः पश्चात्तु योजयेत् ।
त्रिरावर्त्तनयोगात्तु प्राणायामस्तु ग्रन्थितः ॥
पूरकः कुम्भको रेचः प्राणायामस्त्रिलक्षणः ।
नासिकाग्रह उच्छ्वासो ध्यातः पूरक उच्यते ॥
कुम्भको निश्चलः श्वासो मुच्यमानस्तु रेचकः ॥
मोचनं विग्रहस्यति विष्णुपुराणम् ।
नासंवृतसुखो जृम्भेद्धासकासौ च वर्ज्जयेत् ।
नोच्चैर्हसेत् सशब्दञ्च न सुचेत् पवनं बुधः ॥"
इत्याह्निकाचारतत्त्वम् ॥
षोड़शचतुरन्यतरसंख्यकप्रणववीजान्यतरजपेनैकनासापुटकरणकप्राणायामाङ्गवायुपूरणम् । यथा, मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोड़शवारजपेन वामनासापुटे वायुपूरकं कुर्य्यादिति तन्त्रसारः ॥ * ॥ क्ली, प्रेतदेहनिष्पादकाशौच-कालदेयदग्धपिण्डम् । यथा,—
"पूरकेण तु पिण्डेन देहो निष्पद्यते यतः ।
क्षतस्य करणायोगात् पुनर्नावर्त्तयेत् क्रियाम् ॥"
इति वायुपुराणम् ॥
ऋष्यङ्गः ।
"न खधाञ्च प्रयुञ्जीत प्रेतपिण्डे दशाहिके ।
भावयेत्तत्तु वै पिण्डं यज्ञदत्तस्य पूरकम् ॥"
अत्र भावणविधौ एतत्पिण्डं यज्ञदत्तस्य पूरक-मित्येतावन्मात्रश्रुतेः शिरःपूरकमित्यादिविशे-षोल्लेखे प्रमाणं नास्ति । इति स्मार्त्तभट्टा-चार्य्याः ॥ प्रेतपिण्डेस्थिता दर्त्तैर्देहमाप्नोति भार्ग-वेति विष्णुधर्म्मोत्तरे देहश्रुतेर्देहपूरकमिति प्रयोगापत्तेश्च । तस्मादनिरुद्धभट्टाद्युक्तः केवल-पूरकप्रयोग एव युक्त इति । ज्ञातातपः ।
"भर्त्तुः पिण्डप्रदाने तु साध्वी स्त्री चेद्व्रजस्वला ।
वस्त्रं त्यक्त्वा पुनः स्नात्वा सैव दद्याच्च पूरकम् ॥"
इति शुद्धितत्त्वम् ॥ * ॥
पूरणकर्त्तरि, त्रि । इति शब्दरत्नावली ॥ (यथा, मनुः । ६ । २८६ ।
"प्राकारस्य च भेत्तारं परिखाणाञ्च पूरकम् ।
द्वाराणाञ्चैव भङ्क्तारं त्रिप्रमेव प्रवासयेत् ॥")

पूरणं, क्ली, (पूर्य्यते अनेनेति । पूर+करणे ल्युट् ।) पिण्डप्रभेदः । इति मेदिनी । णे, ६४ ॥ वृद्धिः । कुटन्नटम् । इति शब्दमाला ॥ अङ्कानां गुणनम् । इति शुभङ्करः ॥ वापतन्तुः । इति हेमचन्द्रः ॥

पूरणः, पुं, (पूर्य्यतेऽनेनेति । पूरि+करणे ल्युट् ।) विष्णुतैलम् । इति धरणिः ॥ सेतुः । इति हारावली ॥ (पूरयतीति । पूरि+कर्त्तरि ल्युः ।) समुद्रः । इति संक्षिप्तसारोणादिवृत्तिः ॥ पूरके, त्रि । इति मेदिनी । णे, ६३ ॥ (यथा, हरिवंशे । १२६ । ५२ ।
"आसन्नः सन्ततः साधनानां
श्रद्धावतां श्राद्धवृत्तिप्रणेता ।
पतिर्गणानां महतां सत्क्रतूनां
पायान्नेमिः पूरणः षड्गुणानाम् ॥")

पूरणी, स्त्री, (पूर्य्यते अनयेति । पूरि+ल्युट्+ङीप् ।) शाल्मलिवृक्षः । इत्यमरः । २ । ४ । ३६ ॥ (अस्या पर्य्यायान्तरं यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीतिच ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥")
पूर्य्यतेऽनया पूरणी । यथा पञ्चानां पूरणी पञ्चमी ॥

पूरान्नं, क्ली, (पूरं पूरकमन्नमत्र ।) दृक्षान्नम् । इति राजनिर्घण्टः ॥

पूरिका, स्त्री, (पूर्य्यते इति । पूरि+कः । स्त्रियां ङीप् । पूरी । ततः स्वार्थे कन् । टाप् पूर्ब्ब-ह्रस्वश्च ।) पिष्टकभेदः । पूरी इति कचुरी इति च भाषा । यथा,—
"माषाणां पिष्टिकां युञ्जान्नवमार्द्रकहिङ्गुभिः ।
तया पिष्टिकया पूर्णा समिता कृतपोलिका ।
ततस्त्वेले विपक्वा सा पूरिका कथिता बुधैः ॥"
अस्या गुणाः ।
"रूक्षा स्वादी गुरुः स्निग्धा वातपित्तासृदूषिका ।
चक्षुस्त्वेजोहरी चोष्णा पाके वातविनाशिनी ॥
तथैव घृतपक्वापि चक्षुष्या रक्तपित्तहृत् ॥"
इति भावप्रकाशः ॥
(अस्या गुणान्तरं यथा,—
"पूरिकाघृतपूरन्तु त्रिदोषशमनं परम् ।
दृष्यं संदीपनं खादु श्रमवातनिवारणम् ॥"
इति हारीते प्रथमे स्थाने द्वादशेऽध्याये ॥)

पूरितं, त्रि, (पूर्य्यते स्मेति । पूर्ण पूरि वा+क्तः । "वा दान्तशान्तपूर्णेति ।" ७ । २ । २७ । इति पक्षे इट् ।) कृतपूरणम् । तत्पर्य्यायः । पूर्णम् २ । इत्यमरः । ३ । १ । ८९ ॥ गुणितञ्च ॥

पूरुषः, पुं, (पुरति अग्रे गच्छतीति । पुर+"पुरः कुषन् ।" उणा० ४ । ७४ । इति कुषन् । "अन्येषा-मपि दृश्यते ।" ६ । ३ । १३७ । इति निपातनात् दीर्घः ।) पुरुषः । पुमान् । इत्यमरः । २ । ६ । १ ॥

अथ पूरुषलक्षणम् ।
"पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरक्तं त्रिगम्भीरं त्रिविशालं प्रशस्यते ॥
बाहुनेत्रहनुं कुक्षिर्ग्रीवा तथैव च ।
सक्थ्योरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥
ग्रीवाथ कर्णौ दृक्चञ्च ह्रस्वे जङ्घे सुपूजिते ।
चत्वारि यस्य ह्रस्वानि पूजां प्राप्नोति नित्यशः ॥
सूक्ष्माण्यङ्गुलिपर्व्वाणि दन्तकेशनखत्वचम् ।
पञ्च सूक्ष्माणि येषां हि ते नरा दीर्घजीविनः ॥
नासा नेत्रञ्च दन्ताश्च ललाटञ्च शिरस्तथा ।
हृदयञ्चैव विज्ञेयमुन्नतं षट् प्रशस्यते ॥
पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकोष्ठधरजिह्वा च सप्तरक्तं प्रशस्यते ॥
स्वरो बुद्धिश्च नाभिश्च त्रिगम्भीरसुदाहृतम् ।
उरः शिरो ललाटञ्च त्रिविस्तीर्णं प्रशस्यते ॥*॥
कटिर्विशाला बहुपुत्रभागी
विशालहस्तो नरपुङ्गवः स्यात् ।
उरो विशालं धनधान्यभागी
शिरो विशालं नरपूजितः स्यात् ॥

न श्रीस्यजति रक्ताक्षं नार्थः कनकपिङ्गलम् ।
दीर्घबाहुं न चैश्वर्य्यं न मांसोपचितांसकम् ॥
कदाचिद्दुःखितो मूर्खः कदाचिल्लोभमग्नः सुखी ।
कदाचित्तुन्दिलो दुःखी कदाचिच्चपला सती ॥
नेत्रस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् ।
ऽस्नस्नेहेन चैश्वर्य्यं पादस्नेहेन वाहनम् ॥
अकर्म्मकठिनौ हस्तौ पादावब्धनि कोमलौ ।
यस्य पाण्डितलौ रक्तौ तस्य राज्यं विनिर्द्दिशेत् ॥
दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्धनः ।
कृशलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपतिः ॥
रेखाभिर्बहुभिर्दुःखं स्वल्पाभिर्धनहीनता ।
रक्ताभिः श्रियमाप्नोति कृष्णाभिर्लोकपूजितः ॥
अङ्गुष्ठोदरमध्ये तु यवो यस्य विराजितः ।
उन्नतं भोजनं तस्य घृतं जीवति मानवः ॥
अङ्गुष्ठं कुलिशं छत्रं यस्य पाणितले भवेत् ।
ऐश्वर्य्यञ्च विनिर्द्दिष्टमग्नीत्यायुर्भवेद्ध्रुवम् ॥
धनुर्यस्य भवेत् पाणौ पङ्कजं वाथ तोरणम् ।
तस्यैश्वर्य्यञ्च राज्यञ्च अग्नीत्यायुर्भवेद्ध्रुवम् ॥
कनिष्ठातर्ज्जनीं यावत् रेखा भवति चाञ्चला ।
विंशत्यब्दाधिकशतं नरा जीवन्त्यनामयाः ॥
कनिष्ठामध्यमां यावत् रेखा भवति चाञ्चला ।
शतार्द्धं वाथ वाग्नीतिर्नरो जीवेन्न संशयः ॥
कनिष्ठानामिकायाञ्चेत् रेखा भवति चाञ्चला ।
षष्टिं पञ्चाशदब्दं वा नरा जीवन्त्यसंशयम् ॥
रेखया भिद्यते रेखा स्वल्पायुश्च भवेन्नरः ।
कनिष्ठायां स्थिता रेखा संख्या यावतिका स्मृता ।
तावती पुरुषाणान्तु नारी भवति निश्चितम् ॥
करमध्यगता रेखा ध्रुवा जीर्ह्यभवेद्यदि ।
नृपो वा नृपतुल्यो वा चिरं ख्यातोऽर्थवान्
भवेत् ॥
मत्स्यपुच्छप्रकीर्णेन विद्यावित्तसमन्वितः ।
पितामहस्य वा किञ्चित् धनञ्च लभते ध्रुवम् ॥
मध्यमायां यदि यवा दृश्यन्तेऽत्यन्तशोभनाः ।
तदान्यसञ्चितं वित्तं प्राप्नोत्यङ्गुष्ठके यवे ॥
यस्याथ चक्रमङ्गुष्ठे यवादूर्द्धञ्च दृश्यते ।
तदा वै पामरादीनामञ्चितं धनमाप्नुयात् ॥
तर्ज्जन्यामथ चक्रञ्च मित्रद्वारा धनम्भवेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
मध्यमायां स्थिते चक्रे देवद्वारा धनं लभेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
अनामायां भवेत् चक्रं सर्व्वद्वारा भवेद्धनम् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
कनिष्ठायां भवेच्चक्रं वाणिज्येन धनं भवेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥*॥
ललाटे दृश्यते यस्य चक्ररेखाचतुष्टयम् ।
अग्नीत्यायुः समाप्नोति पञ्चरेखाः घृतं समाः ॥
यस्योन्नतं ललाटञ्च ताम्रकर्णञ्च दृश्यते ।
रेखाहीनञ्च कक्षञ्च स चोन्मत्तो महीं भ्रमेत् ॥
यस्य जिह्वा भवेद्दीर्घा नासाग्रं लेढि सर्व्वदा ।
भोगी भवति निर्व्वाणः पृथ्वीं भ्रमति सर्व्वदा ॥
दन्ताश्च विरला यस्य नीचवन्नीचकर्म्मकृत् ।
प्रगल्भो दन्तुरः सत्यं वेदान्तपारगो भवेत् ॥"

प्रकारान्तरम् ।
"दन्ताश्च विरला यस्य गण्डे कूपोऽपि जायते ।
परस्त्रीरमणो नित्यं परवित्तेन वित्तवान् ॥
दीर्घलिङ्गे च सौभाग्यं सूक्ष्मलिङ्गे नृपो भवेत् ।
वक्षास्यकटिनेर्लिङ्गैः प्रमाणान्निर्गतैः सदा ।
रमते च सदा दास्यां निर्धनो भवति ध्रुवम् ।
कृशलिङ्गेन सूक्ष्मेण रक्तवर्णेन भूपतिः ।
बहुस्त्रीरमणो नित्यं नारीणां वल्लभो भवेत् ॥
कृशलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम् ।
राज्यं सुखञ्च दिव्याङ्गाः कन्यकायाः पतिर्भवेत् ॥
यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम् ।
अङ्कुशं कुलिशं वापि स राजा भवति ध्रुवम् ॥
कृशनिर्लोमशा ये स्युः केकराक्षाः कुचेलकाः ।
कातरा आलसिकाश्च ते दरिद्रा न संशयः ।
कपिला मलिनाङ्गाश्च रूक्षास्तेव दृढनखाः ॥
कृशातिदीर्घा मनुजास्ते दरिद्रा न संशयः ।
चिबुके श्मश्रुशून्या ये निर्लोमभुजदृशाश्च ये ।
ते धूर्त्ता नैव सन्देहः ससुद्रवचनं यथा ॥
रूक्षोसुखा भयष्टाः कृष्णदन्ताः कुचेलकाः ।
वक्रनासा वक्रनासास्ते नरा दुष्टमानसाः ॥
दयालवश्च दातारो रूपवन्तो जितेन्द्रियाः ।
परोपकारिणश्चैव तेऽपूर्व्वा मानवाः स्मृताः ॥"
इति सामुद्रके पुरुषलक्षणम् ॥ * ॥
दानवीरदयावीरयुद्धवीरसत्यवीरसंज्ञकपुरुष-
लक्षणन्तु पुरुषपरीक्षायन्थे द्रष्टव्यम् ॥

पूर्णः, त्रि, (पूर्यते स्मेति । पॄ पूरि वा + क्तः ।
"वा दान्तशान्तपूर्णदस्तस्वस्तिक्तघृतप्रभाः ।" ७ ।
२ । २७ । इति ट्टत्वाभावो निपात्यते च ।)
पूरितः । सकलः । इत्यमरः । ३ । १ । ६८ ॥
(यथा, पञ्चदश्याम् । ७ । ७७ ।
"तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥")
मृक्तः । इति मेदिनी । णे, २२ ॥ स्त्रीयसुखेच्छा-
वत्यः । इति गदाधरभट्टाचार्य्यः ॥ (प्रधायाः
पुत्रभेदः । यथा, महाभारते । १ । ६५ । ४७ ।
"सिद्धः पूर्णश्च बर्हिश्च पूर्णायुश्च महायशाः ॥"
नागभेदः । यथा, महाभारते । १ । ५७ । ५ ।
"कोटिशो मानसः पूर्णः शङ्खः पालो हली-
मकः ॥")

पूर्णकः, पुं, (पूर्ण + "संज्ञायां कन् ।" ५ । ३ ।
७५ । इति कन् ।) खर्जूरपक्षी । इति मेदिनी ।
के, १२५ ॥ (देवयोनिविशेषः । यथा, महा-
भारते । ७ । ५५ । ४ ।
"नटनर्त्तकगन्धर्व्वैः पूर्णकैर्वर्द्धमानकैः ।
नित्योद्योगैश्च क्रीड़द्भिस्तत्र स परिहर्षितः ॥")

पूर्णकुम्भः, पुं, (सलिलादिभिः पूर्णः कुम्भः ।)
जलपूरितघटः । तत्पर्य्यायः । भद्रकुम्भः २ ।
इत्यमरः । २ । ८ । ३२ ॥ (यथा, मनुः । ११ ।
१८७ ।
"प्रायश्चित्ते तु चरिते पूर्णकुम्भमयाँ नव ।
तेनैव सार्द्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये ॥")
पूर्णकलसादिश्च । इति भरतः ॥ (यथितानु-

लिप्ताभ्यां हस्ताभ्यां परिग्रहः पीड़नं पूर्णकुम्भः ।
इति नीलकण्ठः ॥ यथा, महाभारते । २ ।
२३ । १४ ।
"बाहुपाशादिकं कृत्वा पादाहतशिरावुभौ ।
उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तौ ॥")

पूर्णकोष्ठा, स्त्री, (पूर्णे कोष्ठमस्याः ।) नागर-
मुस्ता । इति राजनिर्घण्टः ॥

पूर्णपात्रं, क्ली, (पूर्णञ्च तत् पात्रञ्चेति नित्यकर्म्म-
धारयः ।) वस्तुपूर्णपात्रम् । वर्द्धापकः । इति
मेदिनी । रे, २८४ ॥ उत्सवकाले हर्षात्
गृहीतवस्त्रालङ्कारादि । तत्पर्य्यायः । पूर्णा-
लकम् २ । यथा,—
"हर्षादुत्सवकाले यदलङ्कारांशुकादिकम् ।
आकृष्य गृह्यते पूर्णपात्रं पूर्णालकञ्च तत् ॥"
इति जटाधरः ॥
(यथा, अनर्घराघवे । ३ । ४५ ।
"ग्राभवं चापमारोप्य योऽस्मानानन्दयिष्यति ।
पूर्णपात्रमियं तस्मै मैथिली कल्पयिष्यति ॥")
होमकर्म्मणि ब्रह्मदक्षिणा । यथा, गोभिलेनापि
दर्शादियागमभिधाय पूर्णपात्रो दक्षिणा ब्रह्मणे
दद्यादित्युक्तम् । चान्तत्वेऽपि पुंस्त्वं छान्दसम् ।
तस्य प्रमाणन्तु यज्ञसंग्रहे यज्ञपार्श्वपरिग्रहयोः ।
अष्टसृष्टिर्भवेत् कुक्षिः कुक्षयोश्चौ च पुष्कलम् ।
पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते ॥
अत्र षट्पञ्चाशदधिकशतद्वयसृष्टिमितं पूर्ण-
पात्रम् । असम्भवे तु ह्रस्वोगपरिग्रहम् ।
यावता बहुभोक्तृणां तृप्तिः पूर्णेन जायते ।
नावरार्द्धमतः कुर्य्यात् पूर्णपात्रमिति स्थितिः ॥"
इति संस्कारतत्त्वम् ॥

पूर्णबीजः, पुं, (पूर्णं बीजं यस्य ।) बीजपूर-
वृक्षः । इति राजनिर्घण्टः ॥ (विवृतिरस्य बीजपूरशब्दे
ज्ञातव्या ॥)

पूर्णमा, स्त्री, (पूर्णं कलापूर्णश्चन्द्रं पूरयं वा
मातीति । मा + कः । टाप् । पूर्णिमा । इत्य-
मरटीकायां भरतः ॥

पूर्णमासः, पुं, (पूर्णमासी पूर्णिमा साधनत्वेनास्य-
स्येति । अच् ।) पौर्णमासयागः । इति जटा-
धरः ॥ (यथा, तैत्तिरीयसंहितायाम् । २ । २ ।
१० । २ ।
"वै तिथ्यः सोमः पूर्णमासः साक्षादेव ब्रह्म-
वर्चसमवरुन्धे ॥")
पूर्णो मासो यत्रेति । पूर्णिमा । यथा, महा-
भारते । १२ । २६ । ११४ ।
"दर्शे च पूर्णमासे च चातुर्मास्ये पुनः पुनः ।
अयजद्दयमेधेन सहस्रं परिवत्सरान् ॥")

पूर्णमासी, स्त्री, (पूर्णो मासश्चान्द्रमासो यत्र ।
गौरादित्वात् ङीष् ।) पूर्णिमा । इति शब्द-
माला ॥

पूर्णा, स्त्री, (पूर्ण + टाप् ।) पञ्चमी । दशमी ।
पूर्णिमा । अमावस्या । यथा,—
"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः
क्रमात् ॥"

तत्र स्त्रीसंसर्गनिषेधो यथा,—
"पूर्णासु योषित् परिवर्ज्जनीया ॥"
इति तिथितत्त्वम् ।
"गुरौ पूर्णा च संयुक्ता सिद्धियोगाः प्रकीर्त्तिताः ॥"
इति ज्योतिःसारसंग्रहः ॥

पूर्णालकं, क्ली, वार्द्धायनाम्नम् । तत्पर्य्यायः । पूर्णपात्रम् २ । इति त्रिकाण्डशेषः । पूर्णानकमपि पाठः ॥

पूर्णावतारः, पुं, (पूर्णः अवतारः ।) वृसिंहः । रामः । यथा,—
"पूर्णो वृसिंहो रामश्च श्वेतद्वीपविराड्विभुः ।
परिपूर्णतमः कृष्णो वैकुण्ठे गोलके स्वयम् ॥
वैकुण्ठे कमलाकान्तो रूपभेदश्चतुर्भुजः ।
गोलोके गोकुले राधाकान्तोऽयं द्विभुजः स्वयम् ॥
तस्यैव तेजो नित्यञ्च चिन्तां कुर्व्वन्ति योगिनः ।
भक्ताः पादाम्बुजं तेजः कृतस्त्रेजखिना विना ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥

पूर्णिका, स्त्री, नासाच्छिन्नीनामकपक्षी । इति त्रिकाण्डशेषः ॥

पूर्णिमा, स्त्री, (पूर्णिः पूरणम् । पूर्णिं मिमीते इति । मा + कः । टाप् ।) पञ्चदशी तिथिः । तत्पर्य्यायः । पौर्णमासी २ । निशाकरे कलाहीने सा अनुमतिः ३ पूर्णे निशाकरे सा राका ४ । इत्यमरः ।१।४।७-८ ॥ पित्र्या ५ चान्द्री ६ पूर्णमासी ७ अनन्ता ८ चन्द्रमाता ९ निरञ्जना १० । इति वाचस्पतिः ॥ पूर्णिमा ११ । इति हलायुधः ॥ ज्योत्स्नी १२ इन्दुमती १३ सिता १४ । इति राजनिर्घण्टः ॥ सा द्विविधा । यथा,—
"राका चानुमती चैव द्विविधा पूर्णिमा मता ।
पूर्व्वोदितकलाहीने पौर्णमास्यां निशाकरे ।
पूर्णिमानुमती ज्ञेया पश्चात्तमितभास्करे ॥
यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह ।
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता ॥
यदा चास्तमिते सूर्य्ये पूर्णश्चन्द्रस्य चोदयः ।
युगपत् सोत्तरा रात्रौ तदानुमतिपूर्णिमा ॥
राकान्तामनुमन्यन्ते देवताः पितृभिः सह ।
रजनाश्चैव चन्द्रस्य राकेति कवयोऽब्रुवन् ॥"
इति देवीपुराणम् ॥*॥

सा चन्द्रस्य तिथिः । यथा,—
"तस्य ब्रह्मा ददौ प्रीतः पौर्णमासीं तिथिं प्रभुः ।
तस्यामुपोष्य येद्दानं तत्समर्थं प्रतिपादयेत् ॥
न चान्नाहारश्च भवेत्तस्य ज्ञानं प्रयच्छति ।
कान्तिं पुष्टिञ्च राजेन्द्र ! धनं धान्यञ्च केवलम् ॥"
इति वराहपुराणे सोमोत्पत्तिरहस्यम् ॥*॥

तस्यां जातफलम् ।
"कन्दर्पतुल्यो युवतीप्रियश्च
न्यायाप्रवित्तः सततं सहर्षः ।
शूरो बली शास्त्रविचारदक्ष-
श्चेत् पूर्णिमा जन्मनि यस्य जन्तोः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥

सा चतुर्दश्यायुक्ता ग्राह्या युग्मात् । यमः ।
"पक्षान्ते श्रोतसि स्नायात्तेन नायाति मत्पुरम् ॥"
विष्णुः ।
"दृश्येते सहितौ यस्यां दिवि चन्द्रबृहस्पती ।
पौर्णमासी तु महती ज्ञेया संवत्सरे तु सा ॥
तस्यां स्नानोपवासाभ्यामक्षयं परिकीर्त्तितम् ॥"
सहितौ मासनिर्द्धायिनिमित्तकृत्तिकादिनक्षत्रगतौ । महाकार्त्तिक्यादिदर्शनात् । तथा च राजमार्त्तण्डे ।
"माससंज्ञे यदा ऋक्षे चन्द्रः संपूर्णमण्डलः ।
गुरुणा याति संयोगं सा तिथिर्महती स्मृता ॥
स्कान्दमात्स्ययोः ।
"पौर्णमासीषु चैतासु मासर्क्षसहितासु च ।
एतासां स्नानदानाभ्यां फलं दशगुणं स्मृतम् ॥"
वैशाखीमधिकृत्य यमः ।
"गौरान् वा यदि वा कृष्णांस्तिलान् रौद्रेण संयुतान् ।
प्रीयतां धर्म्मराजेति पितॄन्देवांश्च तर्पयेत् ॥
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ।
अब्दायुतञ्च तिष्ठेच्च स्वर्गलोके न संशयः ॥"*॥
ब्रह्मपुराणे ।
"महाज्येष्ठ्यान्तु यः पश्येत् पुरुषः पुरुषोत्तमम् ।
विष्णुलोकमवाप्नोति मोक्षं गङ्गाम्बुमज्जनात् ॥*॥
ऐन्द्रे गुरुः शुक्रो वैव प्राजापत्ये रविस्तथा ।
पूर्णिमा गुरुवारेण महाज्येष्ठी प्रकीर्त्तिता ॥"
अनुराधास्थगुरावपि ।
"ऐन्द्रे मैत्रे यदा जीवस्तत्पक्षदशके रविः ।
पूर्णिमा शुक्रचन्द्रेण महाज्येष्ठी प्रकीर्त्तिता ॥"
अनुराधास्थचन्द्रेऽपि । अत्रभूतिः ।
"ऐन्द्रे मैत्रे तथवा मैत्रे गुरुचन्द्रौ यदा स्थितौ ।
पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्त्तिता ॥"
राजमार्त्तण्डे ।
"ज्येष्ठे संवत्सरे चैव ज्येष्ठमासस्य पूर्णिमा ।
ज्येष्ठाभेन समायुक्ता महाज्येष्ठी प्रकीर्त्तिता ॥"
ज्येष्ठसंवत्सरश्च ।
"ज्येष्ठामूलोपगे जीवे वर्षं स्याच्छक्रदेवतम् ॥"
इति विष्णुधर्म्मोत्तरोक्तो ग्राह्यः । संवत्सरोऽत्र वत्सरो बोध्यः । न तु संवत्सरादिपञ्चकान्तर्गतवर्षविशेषः । ज्येष्ठ इति विशेषणस्य वैयर्थ्यापत्तेः । संवत्सरे यदि स्यात्तिथि पाठः काल्पनिकः । प्रपञ्चस्तु मलमासतत्त्वेऽनुसन्धेयः ॥*॥
विष्णुधर्म्मोत्तरब्रह्मपुराणयोः ।
"माघे ज्येष्ठे तु संप्राप्ते नक्षत्रे शक्रदेवते ।
पौर्णमास्यां तदा स्नानं सर्व्वपापं हरेद्विजाः ॥
तस्मिन् काले तु ये मर्त्याः पश्यन्ति पुरुषोत्तमम् ।
बलभद्रं सुभद्राञ्च ते यान्ति पदमव्ययम् ॥"
स्कन्दपुराणे ।
"ज्येष्ठामहञ्चावतीर्णस्तत्पुण्यं जन्मवासरम् ।
तस्यां मे स्नपनं कुर्य्यान्महास्नानविधानतः ॥
ज्येष्ठ्यां प्रातःस्नानकाले ब्रह्मणा सहितञ्च माम् ।
रामं सुभद्रां संस्थाप्य मम लोकमवाप्नुयात् ॥"
विष्णुधर्म्मोत्तरे ।
"पौर्णमासी तथा माघी श्रावणी च नरोत्तमः ।
प्रौष्ठपद्यामतीतायां तथा कृष्णा चयोदशी ॥
एतासु श्राद्धकालात् वै नित्यानाह प्रजापतिः ॥"
तत्र पूर्व्वदिने सङ्गवलाभे रौहिणलाभे वा परदिने सङ्गवालाभे पूर्व्वदिने श्राद्धम् ।
"कृष्णपक्षस्य पूर्व्वाह्णे श्राद्धं कुर्य्यादिचक्षणः ।
कृष्णपक्षापराह्णे तु रौहिणस्तु न लङ्घयेत् ॥"
इति वायुपुराणवचनात् ॥
उभयदिने सङ्गवलाभे परदिने ।
"शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥"
इति विष्णुधर्म्मोत्तरात् ॥
एवमक्षयतृतीयादावपि ॥ * ॥ आषाढ़कार्त्तिकमाघपौर्णमासीषु दानमावश्यकम् । तथा चायोध्याकाण्डे भरतशपथे ।
"आषाढ़ी कार्त्तिकी माघी तिथयः पुण्यसम्भवाः ।
अप्रदानवतो यान्तु यस्यार्य्योऽनुमतो गतः ॥"
अप्रदानवतो दानरहितस्यैतास्तिथयो यान्तु आर्य्यः श्रीरामचन्द्रो गतो यस्यानुमतः इत्यन्वयः । उत्तरवाक्ये यच्छब्दान्न तच्छब्दापेक्षा ॥
अथ कोजागरव्रतम् । कल्पतरौ ब्रह्मपुराणम् ।
"आश्वयुज्यां पौर्णमास्यां निकुम्भो वालुकार्णवात् ।
आयाति सेनया सार्द्धं कृत्वा युद्धं सुदारुणम् ॥
तस्मात्तत्र नरैर्मार्गाः स्वगेहस्य समीपतः ।
शोधितव्याः प्रयत्नेन भूषितव्याश्च भूषणैः ॥
पुष्पार्घ्यफलमूलान्नसर्षपप्रकरैस्तथा ।
वेश्मानि भूषितव्यानि नानावर्णैर्विशेषतः ॥
सुस्नातैरनुलिप्तैश्च नरैर्भाव्यं सबान्धवैः ।
दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः ॥
स्त्रीबालवृद्धसत्त्वैश्च भोक्तव्यं पूजितैः सुरैः ॥"
पूजितैः सुरैरिति विशेषणे तृतीया । तेन पूजितसुरैरित्यर्थः ।
"पूज्याश्च सफलैः पत्रैस्तथा द्वारोर्द्धभित्तयः ।
द्वारोपान्ते सुदीप्तस्तु संपूज्यो हव्यवाहनः ॥
यवाज्यतृप्तोपेतैस्तण्डुलैश्च सुतर्पितः ।
संपूजितव्यः पूर्णेन्दुः पयसा पायसेन च ॥
रुद्रः सभार्य्यः स्कन्दश्च तदा नन्दीश्वरो मुनिः ।
गोमद्भिः सुरभिः पूज्या छागवद्भिर्हुताशनः ॥
उरभ्रवद्भिर्वरुणो गजवद्भिर्विनायकः ।
पूज्याः साध्याश्च रेवन्तो यथाविभवविस्तरैः ॥
ततः पूज्यो निकुम्भोऽपि समाश्वेस्तिलतण्डुलैः ।
सुगन्धिभिर्धृतोपेतैः छत्रराढ्यैश्च भूरिभिः ॥
ब्राह्मणान् भोजयित्वा तु भोक्तव्यं मांसवर्जितम् ।
वह्निपार्श्वगतैर्नार्या दृष्ट्वा क्रीड़ाः पृथग्विधाः ॥"
ततश्च द्वारोर्द्धभित्तिहव्यवाहनपूर्णेन्दुसभार्य्यरुद्रस्कन्दनन्दीश्वरसुनयः सर्व्वैरेव पूज्याः । द्वारोर्द्धभित्तिशब्दोश्च बहुवचनान्तः । नन्दीश्वरसुनिरेकः । गोमता सुरभिः । छागवता हुताशनः । मेषवता वरुणः । हस्तिमता विनायकः । अश्व-

वता रेवन्तः । सर्व्वैरेव निकुम्भः पूज्यः । महार्णवे लिङ्गपुराणम् ।
"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रञ्चैरावतस्थितम् ।
सुगन्धिनैशि सद्वेशो अर्च्चेज्जागरणञ्चरेत् ॥"
तथा,—
"निशीथे वरदा लक्ष्मीः को जागर्त्तीतिभाषिणी ।
तस्यै वित्तं प्रयच्छामि अर्च्चेः क्रीड़ां करोति यः ।
नारिकेलैश्चिपिटकैः पितॄन् देवान् समर्चयेत् ।
बन्धूंश्च प्रीणयेत्तेन स्वयं तदन्नो भवेत् ॥"
अत्र निशीति निशीथ इति चाभिधानाद्रात्रिकृत्यमिदम् ।
"ततः प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।
प्रदोषोऽस्तमयादूर्द्धं घटिकाद्वयमिष्यते ॥"
इति संवत्सरप्रदीपधृतवत्सवचनात् ॥
यद्दिने प्रदोषनिशीथोभयव्यापिनी पौर्णमासी तद्दिने कोजागरकृत्यम् । उभयव्याप्यनुरोधात् । यदा तु पूर्व्वदिने निशीथव्याप्तिः परदिने प्रदोषव्याप्तिस्तदा परेद्युस्तत्कृत्यम् । प्रधानपूजाकालव्याप्यनुरोधात् । यदा पूर्व्वेद्युर्निशीथव्याप्तिः परेद्युर्न प्रदोषव्याप्तिस्तदा सुतरां पूर्व्वेद्युस्तत्कृत्यम् ।
"अहःसु तिथयः पुण्याः कर्म्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते ॥"
इति वचनात् ॥
वर्जयेदित्यनुवृत्तौ मत्स्यसूक्ते ।
"महालक्ष्म्यास्तु तुलसीं भिण्टिकां काञ्चनन्तथा ॥"
लक्ष्मीध्यानमादित्यपुराणे ।
"पाद्माक्षमालिकाभीतिवह्निभिर्याम्यसौम्ययोः ।
पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरम् ॥
गौरवर्णां सुरूपाञ्च सर्व्वालङ्कारभूषिताम् ।
रौक्मपद्मद्वयकरां वरदां दक्षिणेन तु ॥"
पाद्मेति । दक्षिणे पाद्माक्षमालाभ्यां वामे पद्माङ्कुशाभ्यां भूषितां वामकरे हेमपद्मं दक्षिणकरे वरं दधतीत्यर्थः । ततः पाद्यादिभिः संपूज्य,—
"ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात् त्वदर्च्चनात् ॥"
इत्यनेन पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् ॥
इन्द्रध्यानमादित्यपुराणे ।
"चतुर्दन्तगजारूढो वज्रपाणिः पुरन्दरः ।
शचीपतिश्च ध्यातव्यो नानाभरणभूषितः ॥"
पाद्यादिभिः संपूज्य,—
"ॐ विचित्रैरावतस्थाय शचीत्कुलिशपाणये ।
पौलोम्यालिङ्गिताङ्गाय सहस्राक्षाय ते नमः ॥"
इति पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् । ततः कुबेरः संपूज्यः । इति रुद्रधरः ॥ तं पाद्यादिभिः संपूज्य,—
"ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः ॥"
इति प्रणमेत् ॥

अत्र प्रदोषे सर्व्वेषां पूजेति रुद्रधरप्रभृतयः ॥ न च निकुम्भपर्य्यन्तानां पूर्व्वाह्ण एव पूजनं निरपवादमिति वाच्यम् । दिवा तत्र न भोक्तव्यं इत्युपक्रम्य पूज्याश्च सफलैः पत्रैरित्यादिना विशिष्य पूजामभिधाय भोक्तव्यमित्यभिधानात् रात्रावेव पूजाभोजने अवगम्येते । अतएवाभुक्तानामेव भोक्तव्यं पूजितैः सुरैरित्यनेन विशिष्य दिवा पूजाभोजने विहिते ॥ * ॥
योगिनीतन्त्रे ।
"विरिञ्चेस्तु यदा टक्कां घण्टां लक्ष्मीयदा त्यजेत् ।
सर्व्ववाद्यमयीं घण्टां वाद्याभावे तु वादयेत् ॥"* ॥
लक्ष्मीवाक्यम् ।
"प्रकीर्णभाण्डामनवेक्ष्य कारिणीं
सदा च भर्त्तुः प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्जयामि ॥"
मार्कण्डेयः ।
"शिरः सपुष्पं चरणौ सुपूजितौ
वराङ्गनासेवनमन्नभोजनम् ।
अनग्निशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥
मानुषाश्चि यदे यत्र अहोरात्रञ्च तिष्ठति ।
तत्राक्ष्मि ! तवावासस्तथान्येषाञ्च रक्षसाम् ॥
सूर्य्यदात्रादिकं यत्र यदार्कैस्तथासनम् ॥"
हरिवंशे ।
"यत्र ह्रीः श्रीः स्थिता तत्र यत्र श्रीश्च सम्मतिः ।
सम्मतिर्ह्रीस्तथा श्रीश्च नित्यं क्षत्रे महात्मनि ॥"
मत्स्यपुराणे ।
"स्थिरो हि यो हि पुरुषः स्थिरश्रीरेव जायते ।
रचितुं नैव शक्नोति चपलश्चपलां श्रियम् ॥"
तथा,—
"अवश्यसुदयोगवतां श्रीरपारा भवेत् सदा ।
ब्रह्मप्रोत्साहिता देवा मन्यवः पुनरम्बुधिम् ॥"
कृत्यकौमुद्याम् ।
"नारिकेलोदकं पीत्वा अर्च्चेज्जागरणं निशि ।
तस्यै वित्तं प्रयच्छामि को जागर्त्ति महीतले ॥"
अक्षक्रीड़ायां व्यासयुधिष्ठिरसंवादः प्रचरति ।
तत्क्रीड़ा चतुरङ्गशब्दे द्रष्टव्या ॥ * ॥ वैष्णवाः पठन्ते स्कन्दपुराणम् ।
"पौष्यान्तु समतीतायां यावद्भवति पूर्णिमा ।
माघमासस्य देवेन्द्र ! पूजा विष्णोर्विधीयते ॥"
इति । पौर्णमास्यन्तमासमुपक्रम्य ।
"पितॄणां देवतानाञ्च मूलकं नैव दापयेत् ।
दद्यान्नरकमाप्नोति भुङ्क्ते वा ब्राह्मणो यदि ॥
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणव्रतम् ।
अन्यथा नरकं याति चण्डो विट् शूद्र एव च ॥
वरं भक्ष्यमभक्ष्यञ्च पिबेद्वा गर्हितञ्च यत् ।
वर्ज्जनीयं प्रयत्नेन मूलकं मदिरासमम् ॥"* ॥
फाल्गुने दोलयात्रामाह तीर्थचिन्तामणौ ब्रह्मपुराणम् ।
"नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम् ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥"

स्कन्दपुराणीयपुरुषोत्तममाहात्म्ये ऊनविंशाध्याये ।
"फाल्गुन्यां क्रीड़नं कुर्य्यात् दोलायां मम भूमिप ! ॥"
इति तिथितत्त्वम् ॥ * ॥
तस्याः पर्व्वत्वं पर्व्वशब्दे द्रष्टव्यम् ॥
पूर्त्त, क्ली, (पॄ पालने + भावे क्तः । "न ध्याख्यापॄमूर्च्छिमदाम् ।" ८ । २ । ५७ । इति निष्ठातस्य न नत्वम् ।) पालनम् । इति शब्दरत्नावली ॥ (पिपर्त्ति पालयत्यनेन जीवानिति । पॄ + करणे क्तः ।) खातादिकर्म्म । इत्यमरः । २ । ७ । २८ ॥ आदिना देवकुल्यादि । तदुक्तम् ।
"पुष्करिण्यः सभा वापी देवतायतनानि च ।
आरामश्च विशेषेण पूर्त्तं कर्म्म विनिर्द्दिशेत् ॥"
इति भरतः ॥
तत्करणफलम् ।
"इष्टापूर्त्तं द्विजातीनां प्रथमं धर्म्मसाधनम् ।
इष्टेन लभते स्वर्गं पूर्त्तेन मोक्षञ्च विन्दति ॥
वापीकूपतड़ागानि देवतायतनानि च ।
पतितान्युद्धरेद्यस्तु स पूर्त्तफलमश्नुते ॥"
इति वराहपुराणम् ॥ * ॥
वापीत्यादीनां पूर्त्तत्वाभिधानात् शूद्रस्याधिकारमाह जातूकर्ण्यः ।
"वापीकूपतड़ागादि देवतायतनानि च ।
अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते ॥
ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते ।
इष्टापूर्त्तं द्विजातीनां धर्म्मः सामान्य उच्यते ।
अधिकारी भवेत् शूद्रः पूर्त्ते धर्म्मे न वैदिके ॥"
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्नाकरः ॥ एवं स्त्रीणामपि पूर्त्ताधिकारः । यथा नारीतन्त्रतुष्टौ द्रष्टव्यति ।
"पितृव्यगुरुदौहित्रान् भर्त्तुः स्वश्रीयमातुलान् ।
पूजयेत् कन्यपुत्रांश्च दृष्ट्वानाथातिथीन् स्त्रियः ॥"
इति जलाशयतत्त्वम् ॥
(पूर्त्तं खातादिकर्म्म अङ्गत्वेनाख्यास्यति । अच् । धर्म्मविशेषे, पुं । यथा, मार्कण्डेये । १३ । ९५ ।
"यतस्ते विसृजन्त्यिष्टं निश्वस्य यदमेधिनः ।
तस्मादिष्टञ्च पूर्त्तञ्च धर्म्मौ द्वावपि नश्यतः ॥")
पूर्त्तः, त्रि, (पॄ + कर्म्मणि क्तः) पूरितः । क्लृप्तः । इति विश्वः ॥ (यथा, भागवते । ३ । २४ । ३१ ।
"ऐश्वर्य्यवैराग्ययशोऽवबोध-
वीर्य्यश्रिया पूर्त्तमहं प्रपद्ये ॥")
पूर्त्तिः, स्त्री, पूरणम् । पृधातोर्भावे क्तिः । इति व्याकरणम् ॥ (यथा, ऋग्वेदे । ६ । १३ । ६ ।
"विश्वाभिर्गीर्भिरभि पूर्त्तिमश्यां
मदेम शतहिमाः सुवीराः ॥")
पूर्व्व, क निकेतने । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-निमन्त्रणे सक०-निवासे अक०-सेट् ।) षष्ठस्वरी । निकेतनमिह निमन्त्रणं निवासो वा । कं, पूर्व्वयति द्विजान् भोक्तुं यज्ञे । पूर्व्वयति तीर्थेषु साधुः । इति दुर्गादासः ॥ वर्म्मवान्तोऽयम् ॥

पू(र्व्व)र्व्व:, त्रि, (पूर्व्वे निमन्त्रणे निवासे वा+अच्।) प्रथम:। (यथा, कुमारे। १।५१।
"यदेव पूर्व्वे जनने शरीरं
सा दक्षरोषात् सुदती ससर्ज्ज।
तदा प्रभृत्येव विसृक्तसङ्ग:
पति: पशूनामपरियहोऽभूत्॥"
यथाच मनु:। २।१८४।
"गुरो: कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्ज्जयेत्॥")
आदि:। (यथा, मनु:। २।७४।
"ब्राह्मण: प्रणवं कुर्य्यादादावन्ते च सर्व्वदा।
स्रवत्यनोङ्कृतं पूर्व्वं परस्ताच्च विशीर्य्यति॥")
प्राग्दिग्-देशकाला:। इत्यमर:॥ (यथा, मनु:। ५।६२।
"दन्तधावेन स्नानं मूत्रपुरीषे निर्हरेत्।
पञ्चमोत्तरपूर्व्वेषु यथायोगं द्विजन्मन:॥")
समग्रम्। इति तट्टीकायां स्वामी॥ अग्र:। इति हलायुध:॥ (यथा, मनु:। २।५०।
"चिराचामेदप: पूर्व्वं हि: प्रश्नव्याक्तितो सुखम्।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च॥")
पूर्व्वगङ्गा, स्त्री, (पूर्व्वा चासौ गङ्गा चेति।) नर्म्मदानदी। इति हेमचन्द्र:। ४। १४६॥
पूर्व्वज:, पुं, (पूर्व्वे जायते इति। पूर्व्व+जन+ड:।) ज्येष्ठभ्राता। इत्यमर:।२।६।४३॥ (पूर्व्वकालोत्पन्ने, त्रि। यथा, महाभारते।१।१०५।२६।
"तामङ्गि: परिषिच्यार्त्तां महर्षिरभिवाद्य च।
मातरं पूर्व्वज: पुत्रो वासो वचनमब्रवीत्॥")
पूर्व्वजा:, पुं, (पूर्व्वे पूर्व्वस्मिन् काले जायन्ते इति। जन+ड:।) दिव्यपितृगण:। तत्पर्य्याय:। पितर: २ चन्द्रगोत्रस्था: ३ व्यस्तगुरुस्था: ४ स्वधाभुज: ५ कव्यवालादय: ६। बहुवचनान्तोऽयम्। इति त्रिकाण्डशेष:॥
पूर्व्वजा, स्त्री, (पूर्व्वे जायते इति। जन+ड:। टाप्।) अग्रजा। ज्येष्ठा भगिनी। पूर्व्वज इत्यमरदर्शनात्॥
पूर्व्वजिन:, पुं, (पूर्व्वो जिन:।) अतीतजिनविशेष:। तत्पर्य्याय:। मञ्जुश्री: २ ज्ञानदर्शन: ३ मञ्जुभद्र: ४ मञ्जुघोष: ५ कुमार: ६ अशोरचक्रवान् ७ स्थिरचक्र: ८ वज्रधर: ९ प्रज्ञाकाय: १० आदिराट् ११ नीलोत्पली १२ महाराज: १३ नील: १४ शार्दूलवाहन: १५ धियाम्पति: १६ खड्गी १७ दण्डी १८ विभूषण:१९ बालव्रत:२० पद्मचीर: २१ सिंहकेलि: २२ शिखाधर: २३ वागीश्वर: २४। इति त्रिकाण्डशेष:॥
पूर्व्वदिक्, स्त्री, (पूर्व्वा दिक्।) प्राची दिक्। यस्यान्दिशि सूर्य्य उदेति। तदधिपतिरिन्द्र:। तस्या: पर्य्यायादि: पूर्व्वाशब्दे द्रष्टव्य:॥
पूर्व्वदिक्पति:, पुं, (पूर्व्वदिश: पतिरधिपति:।) इन्द्र:। इति हेमचन्द्र:। २। ८७॥
पूर्व्वदेव:, पुं, (पूर्व्वश्चासौ देवश्चेति। यद्वा, पूर्व्वौ देव इति सुप्सुपेति समास:।) असुर:। इत्यमर:। १।१।१२॥ (नरनारायणाश्रमौ। तत्र द्विवचनान्तोऽयम्। यथा, महाभारते। ५। ४६। ५।
"तेषां मनश्च तेजश्चाप्यादानाविवौजसा।
पूर्व्वदेवौ व्यतिक्रान्तौ नरनारायणाश्रमौ॥")
पूर्व्वदेश:, पुं, (पूर्व्वो देश:।) प्राचीदिगवस्थितजनपद:। तत्पर्य्याय:। वर्द्धनि: २। इति त्रिकाण्डशेष:॥ यथा,—
"प्राच्यां मागधगौडौ च वारेन्द्रीगौड़राढ़का:।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रय:॥"
इति ज्योतिस्तत्त्वम्॥
पूर्व्वपक्ष:, पुं, (पूर्व्व: पक्ष:।) शुक्लपक्ष:। इत्यमर:॥ (यथा, मनु:। ३। २७८।
"यथा चैवापर: पक्ष: पूर्व्वपक्षाद्विशिष्यते॥")
शास्त्रीयप्रश्न:। सिद्धान्तविरुद्धकोटि:। तत्पर्य्याय:। चोद्यम् २। इति त्रिकाण्डशेष:॥ देश्यम् ३ फक्किका ४। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। १। ३।
"पूर्व्वपक्षोक्तसिद्धान्तपरिनिष्ठासमन्वितम्॥"
अधिकरणावयवभेदो व्यवहारविशेष:। यथा, याज्ञवल्क्ये। २। १७।
"पूर्व्वपक्षेऽधरीभूते भवन्त्युत्तरवादिन:॥")
पूर्व्वपक्षपाद:, पुं, (पूर्व्वपक्ष एव पाद:।) चतुर्व्यादव्यवहारान्तर्गत: प्रथम: पाद:। तस्य संज्ञान्तरम्। भाषा २ प्रतिज्ञा ३ पक्ष: ४। इति मिताक्षरा॥ तत्र दृष्टम्ति:।
"पूर्व्वपक्ष: स्मृत: पादो द्विपादश्चोत्तर: स्मृत:।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णय: स्मृत:॥
मिथ्योक्तो च चतुर्व्यात् स्यात् प्रत्यवस्कन्दने तथा।
प्राड्न्याये च स विज्ञेयो द्विपात् संप्रतिपत्तिषु॥"
यद्यपि संप्रतिपत्तावपि निर्णयोऽस्ति तथाप्युत्तरवादिनैव भाषार्थस्याङ्गीकृततत्वेन क्रियासाध्यो न भवतीति द्विपादतोक्ता॥ * ॥
अथ भाषापाद:। तत्र भाषास्वरूपमाहतु: कात्यायनदृहस्पती।
"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदु:॥
स्वल्पाक्षर: प्रभूतार्थो नि:सन्दिग्धो निराकुल:।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधक:॥
यदा त्वेवंविध: पक्ष: कल्पित: पूर्व्ववादिना।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम्॥"
प्रतिज्ञा साध्याभिधायिका वाक्। तस्या दोषै: परस्परविरुद्धार्थपदादिभिस्त्यक्तम्। साध्यं साधनार्हाभिमतार्थं पक्षं विदु:। अन्यथा प्रतिज्ञादोषेण साध्यदोष: स्यात्। अतएवोक्तम्।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता।
असङ्करेण वक्तव्ये व्यवहारेषु वादिभि:॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्व्वोक्ते। नारदेनापि।
"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
तद्धानौ क्षीयते वादी तरंस्तासुत्तरो भवेत्॥"
उत्तरो विजयी यद्यप्यन्यच्च साध्यं ज्ञाप्यं तद्विशिष्टधर्म्मी पक्ष इति भेद:। तथाप्यत्र वाक्प्रत्याय्यर्थादिधर्म्मविशेषविशिष्टस्य पक्षतया धर्म्मिणोऽधर्म्मादेरेव साध्यत्वात् साध्यपक्षयोरभेदाभिधानम्। अतएव उपसंहारे च एवंविध: पक्ष इति मिताक्षरायान्तु भाषा प्रतिज्ञापक्ष इति नार्थान्तरमित्युक्तम्। भाषार्थसूक्ता भाषास्वरूपप्रपञ्चमाह स्वल्पाक्षर इति। निराकुल: पौर्ब्बापर्य्यविपर्य्यासादिशून्य:।
"अक्ष द्यूते च व्यवहारे च प्रवृते यज्ञकर्म्मणि।
यानि पश्यन्त्युदासीना: कर्त्ता तानि न पश्यति॥"
इति यज्ञसंग्रहवचनादुदासीनेभ्यो ज्ञात्वा शोधयेत्। तच्छोधनमाह बृहस्पति:।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
तल्लिखनप्रकारमाह व्यास:।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत्।
ऊनाधिकन्तु संशोध्य पश्चात् पक्षं निवेशयेत्॥"
फलकं काष्ठादिपट्टकम्। कात्यायन:।
"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत्।
पाण्डुलेखेन फलके तत: पक्षेऽभिलेखयेत्॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम्।
उत्तरेणावरुद्धस्य निवृत्ति: शोधनं भवेत्॥
अन्यदुक्तं लिखेद्योऽन्यदर्थिप्रत्यर्थिनोर्वच:।
चौरवच्छासयेत्तन्तु धार्म्मिक: पृथिवीपति:॥"
स्वभावोक्तमकृत्रिमम्। एतच्च स्वरविशेषादिना सुज्ञेयम्। अतएव याज्ञवल्क्य:।
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृप:।
भूतमप्यनुपन्यस्तं क्षीयते व्यवहारत:॥"
भूतं तत्त्वार्थसम्बद्धम्। यदाह नारद:।
"भूतं तत्त्वार्थसम्बद्धं प्रमादाभिहितं छलम्।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता॥
मनुष्यचित्तवैचित्र्यात् परीक्ष्या साध्वसाधुता।
सर्व्वेष्वर्थविवादेषु वाक्छलेनावसीदति॥
पशुस्त्रीभूम्यगादाने शास्त्रोऽप्यर्थान्न क्षीयते॥"
सर्व्वेषु अर्थविवादेषु प्रमादाभिधानेऽपि नावसीदति। अत्रोदाहरणं पशुस्त्रीत्यादि। अर्थविवादग्रहणान्यत्युक्तविवादेषु प्रमादाभिधाने प्रकृतार्थाक्षेपात् इति गम्यते। यथाहमनेन शिरसि पादेन ताडित इत्यभिधाय केवलं हस्तेन ताडित इति वदन् न केवलं दण्ड्य: पराजीयते च। तथा च त्वं मृतं मह्यं ऋणं धारयसि मत्त ऋणत्वेन गृहीतत्वादनृणकत्वादित्यादि भाषाशरीरं एतच्च संस्कृतदेशभाषान्यतरेण यथाबोधं वक्तव्यं लेख्यं वा मूर्खाणामपि वादिप्रतिवादित्वदर्शनात्। अतएवाध्यापनेऽपि तथोक्तम्। विष्णुधर्म्मोत्तरे।
"संस्कृते: प्राकृतैर्व्वाक्यैर्य: शिष्यमनुरूपत:।
देशभाषादुपायाद्वैर्बोधयेत् स गुरु: स्मृत:॥"
इति व्यवहारतत्त्वम्॥
पूर्व्वपदं, क्ली, (पूर्व्वं पदम्।) परपदप्राग्वर्त्तिविभक्त्यन्तप्रकृति:। यथा पूर्व्वपदात् संज्ञायामग:। इति पाकरणम्॥
पूर्व्वपर्व्वत:, पुं, (पूर्व्व: पूर्व्वदिक्स्थ: पर्व्वत:। इति नित्यकर्म्मधारय:।) उदयाचल:। इत्यमर:। २। ३। २॥

पूर्व्वफल्गुनी, स्त्री, (पूर्व्वा फल्गुनीति कर्म्मधारयः।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतेकादशनक्षत्रम्। तत्तु खट्वाकृतितारकाद्वयात्मकम्। तस्याधिष्ठात्री देवता भगः। इति सङ्गीतचिन्तामणिः॥ अपि च।

"दक्षिणोत्तरगते दितारके
योनिभे मिलति मस्तकोपरि।
कीटतः स्फुटसरोरुहानने!
निःसृता २६८ गजरसाचिलिम्पिकाः॥"

इ० ४। २८। इति कालिदासकृततरात्रिलमनिरूपणम्॥ * ॥ तत्र जातफलम्।

"शूरस्त्यागी साहसो भूमिभर्त्ता
कोपाक्रान्तः स्याच्छिरालोऽतिदक्षः।
धूर्त्तः क्रूरोऽत्यन्तवाताधिकः प्राक्-
फल्गुन्यर्क्षेजन्मकाले च यस्य॥"

इति कोष्ठीप्रदीपः॥

पूर्व्वफल्गुनीभवः, पुं, (पूर्व्वफल्गुन्यां भवतीति। भू+अच्।) दृष्टस्रुतिः। इति ग्रन्दमाला॥

पूर्व्वभद्रपदः, पुं, पूर्व्वभद्रपदाः, स्त्री, पूर्व्वभाद्रपदाः, स्त्री, } अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतपञ्चविंशनक्षत्रम्। तत्पर्य्यायः। प्रोष्ठपदाः २। इत्यमरः॥ "द्वे पूर्व्वभाद्रपदोत्तरभाद्रपदासु। प्रोष्ठो गौः भद्रञ्च गौः तस्यैव पाद आसां तास्तथा। ग्रहपतिरिव भद्रपादानुगतो राजेत्याख्यर्य्यमञ्जरी शेषाद्भद्रपदाशब्दो ङ्यादिः भाद्रपदाशब्दो दीर्घादिरपीति केचित्। दीर्घादिपाठः प्रामादिक इति सुकुटादयः॥ पूर्व्वे प्रोष्ठपदे द्वे उत्तरे तु भद्रपदे द्वे समुदायश्चासौ चतुःसंख्य इति बहुवचनम्। कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्द्वित्वात् द्विवचनम्। फल्गुनीप्रोष्ठपदाशब्दौ द्वित्वे बहुत्वे च भद्रपदा द्वेऽपीति केचित् भद्रपदेन युक्तः काल इति प्रयोगात् पुंलिङ्गोऽपि भद्रपद इति केचित्।" इति तट्टीकायां भरतः॥ * ॥

तां तु दक्षिणोत्तरवर्त्तिखट्वाकृतितारकाद्वयात्मिकाः। भाराकृतितारकाद्वयरूपा वा। तदधिदेवता अजपादः आसां जघन्यगुणः। इति ज्योतिषम्॥ अपि च।

"भारस्थसप्तर्षिकोपरिस्थिते
पूर्व्वभाद्रपदभे दितारके।
लिम्पिकाः करिकराभि २२८ धंमिता
निःसरन्ति वृषभोदयात् प्रिये!॥"

इ० ३। ४८। इति कालिदासकृततरात्रिलमनिरूपणम्॥ * ॥

तत्र जातफलम्।

"जितेन्द्रियः सर्व्वकलासु दक्षो
जितारिपक्षः खलु तस्य नित्यम्।
भवेन्महीयान् सुतरामपूर्व्वा
पूर्व्वा यदा भाद्रपदा प्रसूतौ॥"

इति कोष्ठीप्रदीपः॥

पूर्व्वयत्नः, पुं, (पूर्व्वश्चासौ यत्नश्चेति। पूर्व्वे पूर्व्वस्मिन् काले यत्नो वा।) जिनविशेषः। तत्पर्य्यायः। मणिभद्रः २ जभलः ३ जलेन्द्रः ४। इति त्रिकाण्डशेषः॥

पूर्व्वरङ्गः, पुं, (पूर्व्वं रज्यतेऽस्मिन्निति। रङ्ग+अधिकरणे घञ्।) नाट्योपक्रमः। इति हेमचन्द्रः। २। १६६॥ तत्पर्य्यायः। प्राक्संगीतम् २ गुणनिका ३। इति जटाधरः॥ (अस्य लक्षणं यथा, साहित्यदर्पणे। ६। २०।

"यत्राद्यवस्तुनः पूर्व्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्व्वन्ति पूर्व्वरङ्गः स उच्यते॥")

पूर्व्वरागः, पुं, (पूर्व्वः पूर्व्वजातो रागोऽनुरागः।) नायकनायिकयोर्दृश्याविशेषः। यथा,—

"श्रवणाद्दर्शनाद्वापि मिथःसंरूढरागयोः।
दृश्याविशेषो योऽप्राप्तौ पूर्व्वरागः स उच्यते॥"

इति साहित्यदर्पणम्॥

पूर्व्वराह्णः, पुं, (राह्णेः पूर्व्वो भागः। अच् समासे। "राह्णाह्णाहाः पुंसि।" २। ४। २६। इति पुंस्त्वम्।) राह्णेः पूर्व्वभागः। इति मुग्धबोधव्याकरणम्॥

पूर्व्वरूपं, क्ली, (पूर्व्वं रूपमिति कर्म्मधारयः।) पूर्व्वलक्षणम्। वैद्यके भाविव्याधिबोधकचिह्नम्। यथा,—

"————————प्राग्रूपं येन लक्ष्यते।
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः।
लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तदयथायथम्॥"

द्विविधं हि पूर्व्वरूपं भवति। सामान्यं विशिष्टञ्च। सामान्यं येन दोषदूष्यसंमूर्च्छनावस्थाजनितेन भाविज्वरादिव्याधिमोक्षं प्रतीयते न तु वातादिजनितत्वादिविशेषः। यथा। अमी रतिर्विवर्णत्वमिति। तथा बालगुरुवाक्यप्रदेशादि। सामान्याभिप्रायेणैव तन्नान्तरं यथा। व्याधेर्जातिर्बुभूषा च पूर्व्वरूपेण लक्ष्यते। भावः किमात्मकत्वञ्च लक्ष्यते लक्षणेन तु इति॥ तथाह पराशरः। पूर्व्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेष इति। विशिष्टं यथा। उरःक्षतादौ लिङ्गान्येव वातादिजान्यव्यक्तानि। यदुक्तं तत्रैव। अव्यक्तं लक्षणं तेषां पूर्व्वरूपमिति स्मृतमिति। तथाह सुश्रुतः।

सामान्यतो विशेषात्तु नृभाङ्गमर्दभूयिष्ठं हृदयोद्वेगि वातजमिति। प्राग्रूपं येन लक्ष्यते इत्यस्यार्थमाह रक्षितः। येन श्रमादिना उत्पित्सुः सामग्रीसाकल्यादुत्पादेच्छुरामयो रोगः दोषविशेषेण वातादिजन्यासाधारणवैपथ्यादिना अनधिष्ठितोऽसम्बद्धो लक्ष्यते ज्ञायते तत्प्राग्रूपमिति। लिङ्गमव्यक्तमल्पत्वादित्यस्यार्थमाह स एव। प्राग्रूपमित्यनेन पूर्व्वोक्तेन सम्बन्धः लिङ्गं लक्षणम् अव्यक्तं नात्यभिव्यक्तं तत्र हेतुरल्पत्वात् न त्वावरणादियोगादव्यक्तत्वमित्यर्थः यथायथं यस्य व्याधेर्यद्रूपं तदेवाव्यक्तं तस्य पूर्व्वमित्यर्थः। अन्ये तु पूर्व्वरूपलक्षणमाहुः।

स्थानसंश्रयिणः कुद्धा भाविव्याधिप्रबोधकम्।
दोषाः कुर्व्वन्ति यल्लिङ्गं पूर्व्वरूपं तदुच्यते॥ इति॥

संक्षेपतस्तु लक्षणं भाविव्याधिबोधकमेव लिङ्गं पूर्व्वरूपम्।" इति माधवकरविजयरक्षितौ॥

पूर्व्ववादः, पुं, (पूर्व्वो वादः।) व्यवहारे राजादिसमीपे प्रागावेदनम्। यथा,—

"पूर्व्ववादमपरित्यज्य योऽन्यमालम्बते पुनः।
पदसंक्रामणाज्ज्ञेयो हीनवादी स वै नरः॥"

इति मिताक्षरा॥

पूर्व्ववादी, [न्] पुं, (पूर्व्ववादोऽस्यास्तीति। पूर्व्ववाद+इनिः।) प्रागभियोक्ता। प्रथमविवादी। यथा,—

"प्राङ्न्यायकारणोक्तौ तु प्रश्नपूर्वं निदिश्येत क्रियाम्।
मिथ्योक्तौ पूर्व्ववादी तु प्रतिपत्तौ न सा भवेत्॥"

इति मिताक्षरा॥

पूर्व्वशैलः, पुं, (पूर्व्वः पूर्व्वदेशस्थितो वा शैलः।) उदयपर्व्वतः। इति जटाधरः॥

पूर्व्वसरः, त्रि, (पूर्व्वः सन् सरतीति। पूर्व्व+सृ+"पूर्व्वे कर्त्तरि।" ३। २। १६। इति टः।) अग्रगामी। यथा, भट्टिः। ५। ६७।

"द्विषन् वनेचराणां त्वमादाय चरो वने।
अग्रेसरो जघन्यानां माभूत् पूर्व्वसरो मम॥"

पूर्व्वसारः, त्रि, पूर्व्वं देशं सरतीति कर्त्तरि घञ् (अण्)प्रत्ययः। पूर्व्वसरः। इति व्याकरणम्॥

पूर्व्वा, स्त्री, (पूर्व्व+टाप्।) पूर्व्वदिक्। तत्पर्य्यायः। प्राची २ पुरा ३ माधोनी ४ ऐन्द्री ५ माघवती ६। तद्दिग्भववायुगुणाः।

"पूर्व्वस्तु मधुरो वातः स्निग्धः कटुरसान्वितः।
गुरुर्विदाहश्लेष्मघ्नो वातदः पित्तनाशनः॥"

इति राजनिर्घण्टः॥

अपि च। राजवल्लभः।

"प्राग्वातो मधुरः स्वादी बह्निमान्द्यकरो गुरुः।
वैरस्यगौरवौष्ण्यानि करोत्यप्स्रोधधीस्रु च॥
भग्नोत्पिष्टक्षतार्त्तेषु रागव्रणदाहकृत्।
सन्निपातज्वरश्वासकासदोषार्शोविषक्रिमीन्॥
कोपयेदामवातञ्च घनसंघातकारणम्॥"॥*॥

तद्दिग्धिपतयः मेघसिंहधनूराजयः। यथा,—

"प्रागादिककुभां नाथा यथासंख्यं प्रदक्षिणम्।
मेघाद्या राजयो ज्ञेयाश्चिराद्वृत्तिपरिभ्रमात्॥"

इति ज्योतिस्तत्त्वम्॥

पूर्व्वाः, पुं, पूर्व्वजाः। पूर्व्वपुरुषाः। बहुवचनान्तोऽयम्। इत्यमरः। ३। ३। १३३॥ (यथा, रघुः। १। ६७।

"मतुपरं दुर्लभं मत्वा नूनमावर्ज्जितं मया।
पयः पूर्व्वैः स्तनिश्वासैः कवोष्णमुपभुज्यते॥")

पूर्व्वाद्रिः, पुं, (पूर्व्वः पूर्व्वदिक्स्थितो वा अद्रिः पर्व्वतः।) उदयाचलः। तत्पर्य्यायः। दिनमूर्द्धा २। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। १। १८।

"पिङ्गोत्तुङ्गजटाजूटगतो यस्यानुते नवः।
सन्ध्यापिशङ्गपूर्व्वाद्रिश्रृङ्गसङ्गसुखं शशी॥")

पूर्व्वाषाढ़ा, स्त्री, (पूर्व्वा चासावाषाढ़ा चेति ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतविंशनक्षत्रम् । सा रूपाकृतिचतुस्तारात्मिका । गजदन्ताकृतिद्वितारात्मिका वा । अस्या अधिष्ठातृदेवता तोयम् । इति ज्योतिषम् ॥ अपि च ।

"सूर्पस्तस्मिन् शिरोगते चतुस्तारके करिकरोरुवारिमे ।
अन्त्यभादहतवाणि ! निर्गताः खेचरामरगणाङ्गलिप्रिकाः ॥"

इ० १।४६ ॥ इति कालिदासकृतराक्षसलक्षणम् ॥* ॥ तत्र जातफलम् ।

"भूयो भूयस्तूयमानानुरक्तो
भक्तो देवे बन्धुमान्योऽतिदक्षः ।
पूर्व्वाषाढ़ा जन्मकाले यदि स्या-
दाषाढ़ः स्याद्वैरिवर्गे नितान्तम् ॥"

इति कोष्ठीप्रदीपः ॥

पूर्व्वाह्णः, पुं, (अह्नः पूर्व्वम् । पूर्व्वापराधरेत्येकदेशिसमासः । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । "अह्नोऽह्नः ।" ८ । ४ । ७ । इति णत्वम् । "राजाहाः पुंसि ।" २ । ४ । २६ । इति पुंस्त्वम् ।) त्रिधाविभक्तदिनप्रथमभागः । स च चिंशद्दण्डदिनमाने सूर्य्योदयावधिदशदण्डकालः । यथा,

पूर्व्वाह्णो वै देवानां मध्यन्दिनं मनुष्याणामपराह्णः पितॄणाम् । इति श्रुतिः ॥ अपि च । त्रिधाविभक्तदिनभागाभिप्रायेण तु लोकाचिः ।

"पूर्व्वाह्णे मध्यमे वापि यदि पर्व्व समाप्यते ।
तदोपवासः पूर्व्वेद्युस्तदहर्याग इष्यते ॥
अपराह्णेऽथवा रात्रौ यदि पर्व्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते ॥"

उपोष्येति गाहोरात्राभोजनपरं किन्तु क्षते अग्न्याधाने देवा यजमानस्य समीपमुपवसन्तीति उपवासशब्देनाग्न्याधानमुच्यते । सूर्य्योदयावधिप्रहरद्वयम् । द्विधाविभक्तदिनपूर्व्वभागः । यथा । पूर्व्वाह्णापराह्णरूपद्विधाविभक्तदिनस्यावधित्वेनावर्त्तनमाह स्कन्दपुराणम् ।

"आवर्त्तनात्तु पूर्व्वाह्णो ह्यपराह्णस्ततः परः ॥"

आवर्त्तनात् वासरस्य छायापरिवर्त्तनात् प्रागिति शेषः । अतएवोक्तम् ।

"अश्वत्थं वन्दयेन्नित्यं पूर्व्वाह्णे प्रहरद्वये ।
अत ऊर्द्धं न वन्देत अश्वत्थन्तु कदाचन ॥"

इति मलमासतत्त्वम् ॥

पूर्व्वाह्णिकः, त्रि, (पूर्व्वाह्णे भव इति । पूर्व्वाह्ण + "विभाषा पूर्व्वाह्णापराह्णाभ्याम् ।" ४ । ३ । २४ । इति ष्युञौ तुट् च । "घकालतनेषु कालनाम्नः ।" ६ । ३ । १७ । इति विभाषया सप्तम्या अलुक् ।) पूर्व्वाह्णे भवः । इति सिद्धान्तकौमुदी ॥

पूर्व्वेद्युः, [स्] य, (पूर्व्वस्मिन्नहनीति । पूर्व्व + "सद्यःपरुत्परायैषमः परेद्यवद्यपूर्व्वेद्युरन्येद्युरिति ।" ५ । ३ । २२ । इत्येद्युसुप्रत्ययो निपात्यते ।) पूर्व्वदिनम् । इत्यमरः । ३ । ४ । २१ ॥ प्रातःकालः । धर्म्मवासरः । इति मेदिनी । अव्ययसे, ८४ ॥ (यथा, मनौ । ३ । १८७ ।

"पूर्व्वेद्युरपरेद्युर्वा श्राद्धकर्म्मण्युपस्थिते ।
निमन्त्रयेत त्र्यवरान् सम्यग्विप्रान् यथोदितान् ॥")

पूर्व्व, क निकेतने । इति कविकल्पद्रुमः ॥ (चुरा०-परं०-निमन्त्रणे सक०-निवासे अक०-सेट् ।) षष्ठस्वरी । निकेतनमिह निमन्त्रणं निवासो वा । क, पूर्व्वयति द्विजान् भोक्तुं गृही । पूर्व्वयति तीर्थेषु साधुः । इति दुर्गादासः ॥ अन्तवान्नोऽयम् ॥

पूल, कि संहतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-परं-सकं-सेट् ।) षष्ठस्वरी । कि, पूलयति पूलति । संहतौ राशीकरणम् । इति दुर्गादासः ॥

पूष, वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) षष्ठस्वरी । पूषति । इति दुर्गादासः ॥

पूषः, पुं, (पूषति वर्द्धते इति । पूष + कः ।) ब्रह्मदारुवृक्षः । इत्यमरः । २ । ४ । ४१ ॥ तुत इति भाषा ॥ (ब्रह्मदारुशब्दोऽस्य विषयो ज्ञेयः ॥)

पूषकः, पुं, (पूष + स्वार्थे कन् ।) ब्रह्मदारुवृक्षः । इति राजनिर्घण्टः ॥ पलाशपिप्पल इति हिन्दीभाषा ॥ अस्य पर्य्यायगुणाः तूलशब्दे द्रष्टव्याः ॥

पूषभासा, स्त्री, (पूषेव सूर्य्य इव भासते इति । भास + अच् । टाप् ।) इन्द्रनगरी । तत्पर्य्यायः । सुरपुरी २ । इति शब्दरत्नावली ॥

पूषासुक्तृत्, [द्] पुं, (पूष्णोऽसुक्तृत् । शिवो हि खांशुजवीरभक्षेणास्य इन्तसुत्पाटयामास अतोऽस्य तथात्वम् ।) शिवः । इति हेमचन्द्रः । २ । ११४ ॥

पूषा, [न्] पुं, (पूषतीति । पूष वृद्धौ + "अन्उक्षन् पूषन् क्ष्वीड्हन्निति ।" उणा० १ । १५८ । इति कनिन्प्रत्ययान्तो निपात्यते ।) सूर्य्यः । इत्यमरः । १ । ३ । २६ ॥ (यथा, मार्कण्डेये । १०६ । ६४ ।

"आदित्यं भास्करं भानुं सवितारं दिवाकरम् ।
पूषाणमर्य्यमाणञ्च खर्भानुं दीप्तदीधितिम् ॥"

स तु द्वादशादित्यानामन्यतमः । यथा, महाभारते । १ । ६५ । १५—१६ ।

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।
भगो विवस्वान् पूषा च सविता दशमस्तथा ॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः ॥")

पृ, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-परं०-सक०-सेट् ।) पूर्त्तिः पूर्णीकरणम् । क, पारयति पयसा कुम्भं लोकः । इति दुर्गादासः ॥

पृ, न प्रीतौ । इति कविकल्पद्रुमः ॥ (स्वा०-परं०-सक०-अनिट् ।) न, अतिथीन् पृणोति । इति दुर्गादासः ॥

पृ, लि पालने । इति कविकल्पद्रुमः ॥ (ह्वा०-परं०-सक०-अनिट् ।) लि, पिपर्त्ति । इति दुर्गादासः ॥

पृ, यृ ङ यायामके । इति कविकल्पद्रुमः ॥ (तुदा०-आत्म०-अक०-अनिट् ।) यायामको व्यापारः ॥ यृ ङ, धर्म्मे व्याप्रियते सुधीः । इति दुर्गादासः ॥

पृक्का, स्त्री, (स्पृश्यते इति । स्पृश् + बाहुलकात् कक् । पृषोदरादित्वात् साधुः ।) शाकविशेषः । पिड़िं इति भाषा ॥ तत्पर्य्यायः । मरुन्माला २ पिशुना ३ देवी ४ लता ५ लघुः ६ सप्तद्रान्ता ७ वधूः ८ कोटिवर्षा ९ लङ्कायिका १० । इत्यमरः ॥ मरुत् ११ माला १२ स्पृक्का १३ कोटी १४ वर्षा १५ लङ्कापिका १६ वर्षालङ्कायिका १७ । इति तट्टीकायां भरतः ॥ तस्करः १८ चोरकः १९ चक्रः २० । इति रत्नमाला ॥ अस्य गुणाः । पाके मधुरत्वम् । लघुत्वम् । पित्तकफनाशित्वञ्च । इति राजवल्लभः ॥

पृक्तं, क्ली, (पृच्यते स्म संबध्यते स्मेति । पृच् सम्पर्के + क्तः ।) धनम् । इति हेमचन्द्रः । २ । १०६ ॥ सम्पर्कयुक्ते, त्रि ॥ (यथा, रघौ । २ । १३ ।

"पृक्तस्तुषारैर्गिरिनिर्झराणा-
मनोकहाकम्पितपुष्पगन्धी ॥")

पृक्तिः, स्त्री, (पृच् + भावे क्तिन् ।) सम्पर्कः । स्पर्शः । तत्पर्य्यायः । सृष्टिः २ । इत्यमरः । ३ । २ । ६ ॥

पृच, ईं ल ङ सम्पर्के । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) ईं, पृक्तः । ल ङ, पृक्ते । परीपृच्यते । स चेह सम्पृक्तीभावः । सम्पृक्ते नाभिग्रस्तेर्य इति हलायुधः । सम्पृक्ते मधुना चूर्णे भिषगिति तु अन्तर्भूतण्यर्थत्वादिति चतुर्भुजः । इति दुर्गादासः ॥

पृच, कि संयमने । सम्पर्के । इति कविकल्पद्रुमः ॥ (चुरा० पक्षे भ्वा०-परं०-सक० सेट् ।) संयमनं बन्धनम् । कि, पर्चयति पर्चति दुष्टं राजा । इति दुर्गादासः ॥

पृच, धं ईं सम्पर्के । इति कविकल्पद्रुमः ॥ (रुधा०-परं०-सक० अक० च-सेट् । निष्ठायामनिट् ।) सम्पर्के इह संपृक्तीकरणं सम्पृक्तीभावश्च । ध, पृणक्ति धनुषा बाणम् । संपृणक्ति न पापिभिर्य इति हलायुधः । ईं, पृक्तः । पपर्च । इति दुर्गादासः ॥

पृच्छा, स्त्री, (प्रच्छ जिज्ञासायाम् + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः ।) प्रश्नः । इत्यमरः । १ । ६ । १० ॥ (यथा, नैषधचरिते । १६ । ६० ।

"इह किंसुषसि पृच्छाशंसिकिंशब्दरूप-
प्रतिनियमितवाचा वायसेनेष पृष्टः ।
भण फणिभवशास्त्रे तातः स्थानिनौका
वितिविहितनृहीवागुप्तरः कोकिलोऽभूत् ॥"

"पृच्छा तन्त्रात् यथाम्नायं विधिना प्रश्न उच्यते ॥"

इति च वैद्यकचरके सूत्रस्थाने चिंशेऽध्याये ॥)

पृज, इ ल ङ सम्पर्के । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-अक०-सेट् ।) सप्तमस्वरी । इ, पृङ्क्ते । ल ङ, पृङ्क्ते । अयं केचिन्न मन्यते । इति दुर्गादासः ॥

पृङ, प्र सुदि। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) सुदि क्षुण्णीकरणे। प्र, पृङति दीनं दाता। पर्डिता। इति दुर्गादासः॥

पृण, प्र क्षपि। इति कविकल्पद्रुमः। (तुदा०-पर०-सक०-सेट्।) क्षपि क्षपीकरणे। प्र, अग्निं पृणति यो द्विजः। पर्णिता। इति दुर्गादासः॥

पृतना, स्त्री, (प्रियते इति। पृङ् व्यायामे + वाहुलकात् तनन् गुणाभावश्च।) सेना। सेनाभेदः। इति मेदिनी। ने, ६४॥ वाहिनीत्रयम्। अत्र गणास्त्रिचत्वारिंशदधिकशतत्रयम् २४३। रथास्त्रिचत्वारिंशदधिकशतत्रयम् २४३। अश्वा ऊनत्रिंशदधिकसप्तशतम् ७२६। पदातिकाः पञ्चदशाधिकशतत्रयाधिकसहस्रम् १२१५। समुदायेन त्रिंशदधिकचतुःशताधिकसहस्रत्रयम् २४३०। इत्यमरभरतौ॥ (यथा, महाभारते। १। २। २१।

"त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः।
स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः॥"

"आप्रियन्तेऽत्र योद्धारः इति। पृङ् व्यायामे। 'पृपूसां कित्।' इति तनन्प्रत्ययः।" इति निघण्टौ देवराजयज्वा॥ संग्रामः। इति निघण्टुः॥ यथा, ऋग्वेदे। १। ८५। ८।

"शूरा इवेद्युयुधयो न जग्मयः
अवस्यवो न पृतनासु येतिरे॥"

"पृतनासु संग्रामेषु येतिरे।" इति तद्भाष्ये सायणः॥)

पृतनाषाट्, [साह्] पुं, (पृतनां सहते इति। सह + "कृन्दसि सहः।" ३। २। ६३। इति खिः। सहेरिति षः।) इन्द्रः। इति त्रिकाण्डशेषः॥

पृथ, क प्रक्षेपे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, पर्थयति गुड़मौषधे जनः। इति दुर्गादासः॥

पृथक्, व्य, (प्रथयतीति। प्रथ विक्षेपे + "प्रथः कित् सम्प्रसारणञ्च।" उणा० १। १३६। इति अजिः कित् सम्प्रसारणञ्च धातोः।) भिन्नम्। तत्पर्य्यायः। विना २ अन्तरेण ३ ऋते ४ हिरुक् ५ नाना ६ वर्ज्जनम् ७। इत्यमरः। ३। ४। ३॥ (यथा, मार्कण्डेये। १४। ६६।

"तेषामेतैः सितैः स्राग्भिर्मुहुर्विलपतां तथः।
पृथक् कुर्व्वन्ति वै यास्याः शरीरादति-
दारुणाः॥")

पृथक्चेत्राः, पुं, (पृथक् भिन्नं चेत्रं उत्पत्तिस्थानं येषामिति।) एकस्मान्नानावर्णस्त्रीजातपुत्राः। इति मिताक्षरा॥

पृथक्त्व, क्ली, (पृथगित्यस्य भावः। पृथक् + भावे त्व।) चतुर्विंशतिगुणान्तर्गतसप्तमगुणः। तस्य लक्षणम्। पृथक्प्रत्ययासाधारणकारणत्वम्। यथा, भाषापरिच्छेदे।

"संख्यायच्च पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम्।
अन्योन्याभावतो नास्य चरितार्थत्वमुच्यते॥
यस्मात् पृथगियं नेति प्रतीतिर्द्विविधा यया॥"

"पृथक्त्वं निरूपयति संख्यावदिति पृथक्प्रत्ययासाधारणकारणं पृथक्त्वम्। तन्नित्यतादिकं संख्यावत् यथा हि नित्येषु एकत्वं नित्यं अनित्ये अनित्यम् आश्रयद्वितीयत्वयोश्चोत्पद्यते आश्रयनाशान्नश्यति तथा एकपृथक्त्वमपि द्वित्वादिवत् द्विपृथक्त्वादिकमपीत्यर्थः।" इति सिद्धान्तमुक्तावली॥

पृथक्पर्णी, स्त्री, (पृथक् पर्णानि यस्याः। "पाकर्णपर्णपुष्पफलेति।" ४। १। ६४। इति ङीष्।) क्षुद्रशिम्बिविशेषः। चाकुल्या इति भाषा॥ तत्पर्य्यायः। पृश्निपर्णी २ चित्रपर्णी ३ अङ्घ्रिवल्लिका ४। इत्यमरः। २। ४। ६२॥ (यथा, सुश्रुते। १। ३६।

"पृथक्पर्ण्यात्मगुप्ता च हरिद्रे मालती सिता।
काकोल्यादिश्च योज्याः स्यात्प्रश्नो रोपणे
हृते॥"

पर्य्यायान्तरमस्या यथा, वैद्यकरत्नमालायाम्।

"पृश्निपर्णी पृथक्पर्णी लाङ्गुली क्रोष्टुपुच्छिका।
धावनिः कलशी तन्वी गूहाक्रोष्टुकमेखला॥
दीर्घा मृगालविन्नासा श्रीपर्णी सिंहपुच्छिका।
दीर्घपत्रा त्रिपत्रिका हृतिला चित्रपर्णिका॥")

पृथगात्मता, स्त्री, (पृथक् आत्मा स्वरूपं यस्य। तस्य भावः। तल्।) विवेकः। इत्यमरः। २। ७। ३८॥

पृथगात्मिका, स्त्री, (पृथक् आत्मा स्वरूपं यस्याः। काप्यत इत्वम्।) व्यक्तिः। यथा,—

"जातिर्जातेश्च सामान्यं व्यक्तिस्तु पृथगात्मिका॥"

इति जगद्धननजन्मागीत्यादिश्लोकोत्तरं क्वचिदमरकोषे पाठः॥

पृथग्जनः, पुं, (पृथक् सज्जनेभ्यो विभिन्नो जनः।) मूर्खः। नीचः। इत्यमरः। २। १०। १६॥ (यथा, मनुः। ७। १३७।

"यत्किञ्चिदपि वर्षस्य दापयेत् करसंज्ञितम्।
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम्॥")

पापी। इति शब्दरत्नावली॥ भिन्नलोकश्च॥

पृथग्बीजः, पुं, (पृथक् विभिन्नानि बीजानि यस्य।) भल्लातकः। इति राजनिर्घण्टः॥

पृथग्विधः, त्रि, (पृथक् विभिन्नलक्षणा विधा प्रकारो यस्य।) नानारूपः। इत्यमरः। ३। १। ६३॥ (यथा, मनुः। १। ४०।

"सर्व्वेषां तु नामानि कर्म्माणि च पृथग्विधम्॥")

पृथवी, स्त्री, (प्रथते विस्तारमेतीति। प्रथ + "प्रथेः क्विवन् सम्प्रसारणञ्च।" उणा० १। १५०। इत्यत्र 'क्वन्' इत्येके।' इत्युज्ज्वलदत्तोक्त्या क्वन् सम्प्रसारणञ्च। क्विबन्तात् ङीष्।) पृथिवी। यथा,

"पृथवी पृथिवी पृथ्वी धरा सर्व्वंसहा रसा॥"

इति भरतधृतवाचस्पतिः॥

पृथा, स्त्री, कुन्ती। इति जटाधरः॥ (इयं हि शूरस्य कन्या वसुदेवस्य भगिनी। अस्याः पिता शूरस्तु कुन्तिनृपाय निजवान्धवायापुत्रायैनां शतकन्यकारूपेण दत्तवान्। तत्र कुन्तिराजवेश्मनि निवसन्ती दुर्व्वाससं सन्तोष्य तस्मात् मन्त्रवरं लब्ध्वा कन्यावस्थायामेव सूर्य्यात् कर्णं वीरवरं प्रसूतवती। ततो गच्छति काले कुरुवंशावतंसः पाण्डुनृपतिरेनां परिणीतवान्। भर्त्रादिष्टा धर्म्मात् युधिष्ठिरं वायोर्भीमं इन्द्रादर्জ্জুनं प्रसूतवती। अनन्तरं भर्त्रादेशेन सपत्नीं मद्रसुतायै तन्मन्त्रं प्रदत्तवती तेन माद्री अश्विभ्यां नकुलसहदेवौ लेभे। इत्येषा कथा भागवते ६ स्कन्धे २४ अध्याये द्रष्टव्या॥)

पृथाजः, पुं, (पृथाया जायते इति। जन + डः।) कुन्तीपुत्रः॥ अर्জ্জुनश्च। इति राजनिर्घण्टः॥

पृथापतिः, पुं, (पृथायाः पतिः।) पाण्डुराजः। इति त्रिकाण्डशेषः॥

पृथिका, स्त्री, शतपदी। इति शब्दमाला॥

पृथिविः, स्त्री, (पृथवी। ङीषो वा ह्रस्वः।) पृथिवी। इति संक्षिप्तसारोणादिवृत्तिः॥

पृथिवी, स्त्री, (प्रथते विस्तारं यातीति। प्रथ + "प्रथेः क्विवन् संप्रसारणञ्च।" उणा० १। १५०। इति क्विवन् सम्प्रसारणञ्च। ङीष्।) मर्त्याद्यधिष्ठानभूता। तत्पर्य्यायः। भूः२ भूमिः३ अचला ४ अनन्ता ५ रसा ६ विश्वम्भरा ७ स्थिरा ८ धरा ९ धरित्री १० धरणी ११ क्षौणी १२ क्ष्मा १३ काश्यपी १४ क्षितिः १५ सर्व्वंसहा १६ वसुमती १७ वसुधा १८ उर्व्वी १९ वसुन्धरा २० गोत्रा २१ कुः २२ पृथ्वी २३ क्ष्मा २४ अवनिः २५ मेदिनी २६ मही। इत्यमरः। २। १। २—३॥ भूर् २८ भूमी २९ धरणिः ३० क्षोणिः ३१ क्षोणी ३२ क्षौणिः ३३ क्षमा ३४ अवनी ३५ महिः ३६ रत्नगर्भा ३७ सागराम्बरा ३८ अब्धिमेखला ३९ भूतधात्री ४० रत्नवती ४१ देहिनी ४२ पारा ४३ विपुला ४४ मध्यमलोकवर्त्मा ४५। इति भरतः॥ धरणीधरा ४६ धारणी ४७ महाकान्ता ४८ जगद्गृहा ४९ गन्धवती ५० खड्गनी ५१ गिरिकर्णिका ५२ धारयित्री ५३ धात्री ५४ सागरमेखला ५५ सहा ५६ अचलकीला ५७ गौः ५८ अब्धिद्वीपा ५९ द्विरा ६० दृढ़ा ६१ दृढ़िका ६२ इला ६३ इलिका ६४। इति शब्दरत्नावली॥ उदधिवस्त्रा ६५ इरा ६६ आदिमा ६७ ईला ६८ वरा ६९ उर्व्वरा ७० आद्या ७१ जगती ७२ पृथुः ७३ भुवनमाता ७४ निश्चला ७५ बीजप्रसूः ७६ श्यामा ७७ क्रोड़कान्ता ७८। इति राजनिर्घण्टः॥ खगवती ७९ अदितिः ८०। इति जटाधरः॥ * ॥ (पृथवी ८१। इति शब्दार्णवः॥) व्युत्पत्तिरस्या धर्म्मः। रूपद्रवत्वप्रत्ययोगित्वम्। इयं गुर्व्वी रसयुक्ता च। अस्या द्रवत्वं नैमित्तिकम्। अस्या गुणाः। सप्तः १ संख्या २ परिमितिः ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ वेगः ९ द्रवत्वम् १० गुरुत्वम् ११ रूपम् १२

रस: १३ गन्ध: १४। इयं गन्धकारणं नाना-
रूपवती षड्रसयुक्ता। गन्धस्तु द्विविध: सौरभं
असौरभम्। तस्या: सर्गः अनुग्राहीत-
पाकज:। सा द्विविधा नित्या अनित्या च। पर-
माणुस्वरूपा नित्या सावयवा अनित्या। सा
त्रिविधा देहेन्द्रियविषयरूपा। देहरूपा योनि-
जादि: इन्द्रियात्मिका घ्राणरूपा विषयात्मिका
द्व्यणुकादिब्रह्माण्डपर्य्यन्ता। यथा,—
"रूपद्रवत्वप्रत्नत्वयोगि स्यात् प्रथमचिकम्।
गुरुणी हे रसवती द्वयोर्नैमित्तिकौ द्रव:॥"
"स्पर्शादयोऽर्थौ वेगश्च द्रवत्वञ्च गुरुत्वकम्।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश॥
स्नेहहीना गन्धयुता क्षितावेते चतुर्दश।
तच्च त्रिविधं हेतुर्नानारूपवती मता॥
षड्विधस्तु रसश्चत्र गन्धोऽपि द्विविधो मत:।
स्पर्शस्तु तस्या विज्ञेयो ह्यनुग्राहीतपाकज:॥
नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा।
अनित्या तु तदन्या स्यात् सेवावयवयोगिनी॥
सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा।
योनिजादिभवेद्देहमिन्द्रियं घ्राणलक्षणम्॥
विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृत:॥"
इति भाषापरिच्छेदे। २८—३८॥

तस्या अध्यात्मादि यथा,—
"पृथिवी पञ्चमं भूतं घ्राणञ्चाध्यात्ममुच्यते।
अधिभूतं तथा गन्धो वायुस्तत्राधिदैवतम्॥"
इति महाभारते आश्वमेधिकपर्व्व॥
(यथा, मार्कण्डेये। ५४। ४।
"घृताद्रिकोटिविस्तारो पृथिवी कृतलक्षणो
द्विज!।
तस्या हि स्थानमखिलं कथयामि शृणुष्व तत्॥")
तस्या उत्पत्तिकारणं यथा,—
"श्रूयतां वसुधाजन्म सर्व्वमङ्गलकारणम्।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम्॥
अहो केचिदवन्तीति मधुकैटभमेदसा।
बभूव वसुधाजन्म तदविरुद्धमतं शृणु॥
ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा।
आवां वध न यत्रोर्व्वी पाथसा संवृतेति च॥
तयोर्जीवनकालेन प्रत्यक्षा साभवत् स्फुटम्।
ततो बभूव मेदश्च मरणस्थान्तरन्तयो:॥
मेदिनीति च विख्यातेत्युक्ता यैस्तन्मतं शृणु।
जलधौता कृशा पूर्व्वं वर्द्धिता मेदसा यत:॥
कथयामि च तज्जन्म सार्थकं सर्व्वसम्मतम्।
पुरा श्रुतं यत् श्रुत्वा धर्म्मवक्त्राच्च पुष्करे॥
महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम्।
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम्॥
स च प्रविष्ट: सर्व्वेषां तल्लोम्नां विवरेषु च।
कालेन महता तस्माद्बभूव वसुधा मुने!॥
प्रत्येकं प्रतिलोम्नाञ्च कूपेषु सा स्थिरा स्थिता।
आविर्भूता तिरोभूता सा जले च पुन: पुन:॥
आविर्भूता सृष्टिकाले तल्लोपर्य्यवस्थिता।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥
प्रतिविश्वेषु वसुधा शैलकाननसंयुता।
सप्तसागरसंयुक्ता सप्तद्वीपमिता सती॥
हिमाद्रिमेरुसंयुक्ता ग्रहचन्द्रार्कसंयुता।
ब्रह्मविष्णुशिवाद्यैश्च सुरैर्लोकैरुदालये॥
पुण्यतीर्थसमायुक्ता पुण्यभारतसंयुता।
पातालसप्ततदधस्तदूर्द्धे ब्रह्मलोकक:॥
ब्रह्मलोकश्च तत्रैव सर्व्वविश्वञ्च तत्र वै।
एवं सर्व्वाणि विश्वानि पृथिव्यां निर्म्मितानि च।
ऊर्द्धो गोलोकवैकुण्ठौ नित्यौ विश्वपरौ च तौ॥
नश्वराणि च विश्वानि सर्व्वाणि कृत्रिमाणि च।
प्रलये प्राकृते ब्रह्मन्! ब्रह्मणश्च निपातने।
महाविराड़ादिसृष्टौ सृष्ट: कृष्णेन चात्मना॥
नित्यै: स्थिता च प्रलये कालाकाशेश्वरै: सह।
चित्यधिष्ठातृदेवी सा वाराहे पूजिता सुरै:॥
मुनिभिर्मनुभिर्विप्रैर्गन्धर्व्वादिभिरेव च।
विष्णोर्वराहरूपस्य पत्नी सा श्रुतिसम्मता।
ततपुत्रो मङ्गलो ज्ञेयो यष्टेशो मङ्गलात्मज:॥

नारद उवाच।

पूजिता केन रूपेण वाराहे च सुरैर्महो।
वराहेण च वाराही सर्व्वै: सर्व्वाश्रया सती॥
तस्या: पूजाविधानञ्चाप्यधश्चोद्धरणक्रमम्।
मङ्गलं मङ्गलस्यापि जन्म वास वद प्रभो!॥

श्रीनारायण उवाच।

वाराहे च वराहश्च ब्रह्मणा संस्तुत: पुरा।
उद्धार महीं हत्वा हिरण्याक्षं रसातलात्॥
जले तां स्थापयामास पद्मपत्रं यथा ह्रदे।
तत्रैव निर्म्ममे ब्रह्मा सर्व्वं विश्वं मनोहरम्॥
दृष्ट्वा तदधिदेवीञ्च सकामा कामुकी हरि:।
वराहरूपी भगवान् कोटिसूर्य्यसमप्रभ:॥
कृत्वा रतिकरीं शय्यां मूर्त्तिञ्च सुमनोहराम्।
क्रीड़ाचकार रहसि दिव्यं वर्षमहर्निशम्॥
सुखसम्भोगसंस्पर्शात् मूर्च्छां संप्राप सुन्दरी।
विदग्धाया विदग्धेन सङ्गमोऽतिसुखप्रद:॥
विष्णुस्तदङ्गसंस्पर्शात् बुबुधे न दिवानिशम्।
वर्षान्ते चेतनां प्राप्य कामी तत्याज कामुकीम्॥
पूर्व्वरूपञ्च वाराहं दधार चावलीलया।
पूजाञ्चकार भक्त्या च ध्यात्वा च धरणीं सतीम्॥
धूपैर्दीपैश्च नैवेद्यै: सिन्दूरैरनुलेपनै:।
वस्त्रै: पुष्पैश्च बलिभि: संपूज्योवाच तां हरि:॥

श्रीमहावराह उवाच।

सर्व्वाधारा भव शुभे! सर्व्वै: संपूजिता सुखम्।
मुनिभिर्मनुभिर्देवै: सिद्धैश्च मानवादिभि:॥
अम्बुवाचीत्यागदिने ग्रहारम्भप्रवेशने।
वापीतड़ागारम्भे च गृहे च ऋषिकर्षणे॥
तव पूजां करिष्यन्ति मदरेण सुरादय:।
मूढ़ा ये न करिष्यन्ति यास्यन्ति नरकञ्च ते॥

वसुधोवाच।

वहामि सर्व्वं वाराहरूपेणाहं तवाज्ञया।
लीलामात्रेण भगवन्! विश्वञ्च सचराचरम्॥
मुक्तां शुक्तिं हरेरर्चां शिवलिङ्गं शिलां तथा।
शङ्खं प्रदीपं मन्त्रञ्च माणिक्यं हीरकं मणिम्॥
यज्ञसूत्रञ्च पुष्पञ्च पुस्तकं तुलसीदलम्।
जपमालां पुष्पमालां कर्पूरञ्च सुवर्णकम्॥
गोरोचनां चन्दनञ्च शालग्रामजलं विना।
एतान् वोढुमशक्ताहं क्षिप्ता च भगवन्!
शृणु॥

श्रीभगवानुवाच।

ब्रह्माख्येतानि मूढ़ा ये अर्पयिष्यन्ति सुन्दरि!।
ते यास्यन्ति कालसूत्रं दिव्यं वर्षशतं त्वयि॥
इत्येवमुक्ता भगवान् विरराम च नारद!।
बभूव तेन गर्भेण तेजस्वी मङ्गलग्रह:॥
पूजां चक्रु: पृथिव्याश्च ते सर्व्वे चाज्ञया हरे:।
काण्वशाखोक्तध्यानेन तुष्टुवु: स्तवनेन च॥
दद्युर्मूलेन मन्त्रेण नैवेद्यादिकमेव च।
संस्तुता विष्णुलोकेषु पूजिता सा बभूव ह॥

नारद उवाच।

किं ध्यानं स्तवनन्तस्या मूलमन्त्रञ्च किं वद।
गूढ़ं सर्व्वपुराणेषु श्रोतुं कौतूहलं मम॥

श्रीनारायण उवाच।

आदौ च पृथिवी देवी वराहेण च पूजिता।
तत: सर्व्वैर्मुनीन्द्रैश्च मनुभिर्मानवादिभि:।
ध्यानञ्च स्तवनं मन्त्रं शृणु वक्ष्यामि नारद!॥*॥
ॐ श्रीं ह्रीं क्लीं वसुन्धरायै स्वाहा।
इत्यनेनैव मन्त्रेण पूजिता विष्णुना पुरा॥
श्वेतचम्पकवर्णाभां शतचन्द्रसमप्रभाम्।
चन्दनोक्षितसर्व्वाङ्गीं रत्नभूषणभूषिताम्॥
रत्नाधारां रत्नगर्भां रत्नाकरसमन्विताम्।
वह्निशुद्धांशुकाधानां सस्मितां वन्दितां भजे॥
ध्यानेनानेन सा देवी सर्व्वैश्च पूजिता भवेत्।
स्तवनं शृणु विप्रेन्द्र! काण्वशाखोक्तमेव च॥

श्रीविष्णुरुवाच।

जये जये जयाकारे जयशीले जयप्रदे!।
यज्ञशूकरजाये च जयं देहि जयावहे॥
मङ्गले मङ्गलाधारे मङ्गल्ये मङ्गलप्रिये।
मङ्गलार्हे मङ्गलेशे मङ्गलं देहि मे भवे॥
सर्व्वाधारे सर्व्वबीजे सर्व्वशक्तिसमन्विते।
सर्व्वकामप्रदे देवि सर्व्वेष्टं देहि मे भवे॥
पुण्यस्वरूपे पुण्यानां बीजरूपे सनातनि।
पुण्याश्रये पुण्यवतामालये पुण्यदे भवे॥
रत्नाधारे रत्नगर्भे रत्नाकरसमन्विते।
क्षीररत्नरूपे रत्नार्हे रत्नसारप्रदे भवे॥
सर्व्वशस्यालये सर्व्वशस्यार्हे सर्व्वशस्यदे।
सर्व्वशस्यहरे काले सर्व्वशस्याधिके भवे॥
भूमे भूमिपसर्व्वस्वे भूमिपानां परायणे।
भूपाहङ्काररूपेण भूमिं देहि च भूमिपे॥
इदं पुण्यं महास्तोत्रं तां संपूज्य च य: पठेत्।
कोटि कोटि जन्म जन्म स भवेद्भूमिपेश्वर:॥
भूमिदानकृतं पुण्यं लभते पाठनाच्चन:।
भूमिदानहरात् पापान्मुच्यते नात्र संशय:॥
अम्बुवाचीभूखनने पापात् स मुच्यते ध्रुवम्।
अन्धकूपे कूपदजात् पापात् स मुच्यते ध्रुवम्।
परभूश्राद्धजात् पापान्मुच्यते नात्र संशय:॥
भूमौ वीर्य्यपरित्यागात् भूमौ दीपादिस्थापनात्।
पापेनान्मुच्यते प्राज्ञ: स्तोत्रस्य पठनान्मुने!।
अश्वमेधशतं पुण्यं लभते नात्र संशय:॥

नारद उवाच ।
भूमिदानफलं पुण्यं पापं तद्धरणे च यत् ।
परभूमौ श्राद्धपापं कूपे कूपदजं तथा ॥
असुवाचीभूखननं वीर्य्यत्यागजमेव च ।
दीपादिस्थापनात् पापं श्रोतुमिच्छामि यत्नतः ॥
अन्यं वा पृथिवीजन्यं पापं मत्प्रश्नतः परम् ।
यदस्ति तत्प्रतीकारं वद वेदविदांवर ! ॥

श्रीनारायण उवाच ।
वितस्तिमानां भूमिञ्च यो ददाति च भारते ।
सन्ध्यापूताय विप्राय स याति विष्णुमन्दिरम् ॥
भूमिञ्च सर्व्वशस्याढ्यां ब्राह्मणाय ददाति यः ।
भूमिरेणुप्रमाणञ्च वर्षं विष्णुपदे स्थितिः ॥
ग्रामं भूमिञ्च धान्यञ्च यो दद्यात्ययदाति च ।
सर्व्वपापविनिर्मुक्तौ चोभौ वैकुण्ठवासिनौ ॥
भूमिं दातुञ्च यत्काले यः साधुश्चानुमोदते ।
स च याति च वैकुण्ठं मित्रगोत्रसमन्वितः ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ।
स तिष्ठति कालसूत्रे यावच्चन्द्रदिवाकरौ ॥
तत्पुत्रपौत्रप्रभृतिर्भूमिहीनः श्रिया हतः ।
पुत्रहीनो दरिद्रश्चैवान्ते याति च रौरवम् ॥
गवां मार्गं विनिष्कृत्य यश्च ग्रस्यं ददाति च ।
दिव्यं वर्षशतञ्चैव कुम्भीपाकेषु तिष्ठति ॥
गोष्ठं तड़ागं निष्कृत्य मार्गं ग्रस्यं ददाति च ।
स च तिष्ठत्यसिपत्रे यावदिन्द्राश्चतुर्दश ॥
न पक्षपिण्डमुद्धृत्य परकूपे च स्नाति यः ।
प्राप्नोति नरकं नैव स्नानजं फलमेव च ॥
कामी भूमौ च रहसि वीर्य्यत्यागं करोति यः ।
श्लिष्मरेणुप्रमाणञ्च वर्षं तिष्ठति रौरवे ॥
असुवाच्यां भूखननं यः करोति च मानवः ।
स याति कृमिदंशञ्च स्थितिस्तत्र चतुर्युगम् ॥
परकीयलुप्तकूपे कूपं मूढ़ः प्रयच्छति ।
पुष्करिण्याञ्च लुप्तायां पुष्करिणीं यो ददाति च ॥
सर्व्वं फलं परस्यैव तन्मूर्म्मिं व्रजेत्तु सः ।
तत्र तिष्ठति सन्तप्तो यावदिन्द्राश्चतुर्दश ॥
परकीयतड़ागे च पङ्कमुत्सृज्य नोत्सृजेत् ।
रेणुप्रमाणवर्षञ्च ब्रह्मलोके वसेन्नरः ॥
पिण्डं पित्रे भूमिभर्त्तुर्न प्रदाय च मानवः ।
श्राद्धं करोति यो मूढ़ो नरकं याति निश्चितम् ॥
भूमौ दीपं योऽर्पयति स चान्धः सप्तजन्मनि ।
भूमौ ग्रन्थञ्च संस्थाप्य कुष्ठं जन्मान्तरे लभेत् ॥
सुक्तामाणिक्यहीरञ्च सुवर्णञ्च मणिन्तथा ।
यश्च संस्थापयेद्भूमौ स तिष्ठेन्नरके युगम् ॥
जपमालां पुण्यमालां कर्पूरं रोचनान्तथा ।
यो मूढ़श्चार्पयेद्भूमौ स याति नरकं ध्रुवम् ॥
मुने ! चन्दनकाष्ठञ्च रुद्राक्षं कुशमूलकम् ।
संस्थाप्य भूमौ नरके वसेन्मन्वन्तरावधि ॥
पुस्तकं यज्ञसूत्रञ्च भूमौ संस्थापयेत्तु यः ।
न भवेद्दिप्रयोनौ च तस्य जन्मान्तरे जनिः ॥
ब्रह्महत्यासमं पापमसुत्र च लभेद्ध्रुवम् ।
ग्रन्थियुक्तं यज्ञसूत्रं पूज्यञ्च सर्व्ववर्णकैः ॥
यज्ञं कृत्वा च यो भूमिं क्षीरेण नहि सिञ्चति ।
स याति तन्मूर्म्मिञ्च सन्तप्तः सप्तजन्मसु ॥
भूकम्पे ग्रहणे यो हि करोति खननं भुवः ।
जन्मान्तरे महापापी सोऽङ्गहीनो भवेद्ध्रुवम् ॥
भवनं यत्र सर्व्वेषां भूर्भूमिस्तेन कीर्त्तिता ।
वसुरत्नं या दधाति वसुधा सा वसुन्धरा ।
हरेरूरौ च या जाता सा चोर्व्वी परिकी-
र्त्तिता ॥
धरा धरित्री धरणी सर्व्वेषां धारणात्तु या ।
इज्या च यागाधारात्र चौणी क्षीणालये च या ।
महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता ॥
काश्यपी कश्यपस्येयमचला स्थिररूपतः ।
विश्वम्भरा तद्धरणाच्चानन्तानन्तरूपतः ॥
पृथिवी पृथुकन्यात्वाद्दित्तितत्वान्महासुने ! ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे पृथिव्युपाख्यानं ७ अध्यायः ॥ * ॥
तस्या भारा यथा,—
क्षितिरुवाच ।
"कृष्णभक्तिविहीना ये ये च तद्भक्तनिन्दकाः ।
तेषां महापातकिनामशक्ता भारवाहने ॥
स्वधर्म्माचारहीना ये नित्यकर्म्मविवर्जिताः ।
श्रद्धाहीनाश्च वेदेषु तेषां भारेण पीड़िता ॥
पितृमातृगुरुस्त्रीणां योऽयं पुत्रोप्यथोः ।
ये न कुर्व्वन्ति तेषाञ्च न शक्ता भारवाहने ॥
ये मिथ्यावादिनश्चात ! दयासत्यविहीनकाः ।
निन्दका गुरुदारार्णां तेषां भारेण पीड़िता ॥
मित्रद्रोही कृतघ्नश्च मिथ्यासाक्षिप्रदायकः ।
विश्वासघ्नः स्याप्यहारी तेषां भारेण पीड़िता ॥
कल्याणयुक्तनामानि हरेर्नामैकमङ्गलम् ।
कुर्व्वन्ति विक्रयं ये वै तेषां भारेण पीड़िता ॥
जीवघाती गुरुद्रोही ग्रामयाजी च लुब्धकः ।
ग्रन्थदाही शूद्रभोजी तेषां भारेण पीड़िता ॥
पूजायज्ञोपवासानि व्रतानि नियमानि च ।
ये ये मूढ़ा विहन्तारस्तेषां भारेण पीड़िता ॥
सदा हिंसन्ति ये पापा गोविप्रसुरवेदवान् ।
हरिं हरिकथां भक्तिं तेषां भारेण पीड़िता ॥
ब्रह्मादीनाञ्च भारेण पीड़िताहं यथा विधे ! ।
ततोऽधिकेन दैत्यानां तेषां भारेण पीड़िता ॥
इत्येवमुक्ता वसुधा रुरोद च मुहुर्मुहुः ।
ब्रह्मा तद्रोदनं दृष्ट्वा तामुवाच कृपानिधिः ॥
भारं तवापनेष्यामि दस्यूनामप्युपायतः ।
उपायतोऽपि कार्य्याणि सिध्यन्त्येव वसुन्धरे ! ॥
मन्त्रं मङ्गलकुम्भञ्च शिवलिङ्गञ्च कुङ्कुमम् ।
मधुकाष्ठं चन्दनञ्च कस्तूरीं तीर्थमृत्तिकाम् ॥
खड्गं गण्डकखड्गञ्च स्फटिकं पद्मरागकम् ।
इन्द्रनीलं सूर्य्यमणिं रुद्राक्षं कुशमूलकम् ॥
शालग्रामशिलाशङ्खतुलसीप्रतिमाचलम् ।
शङ्खप्रदीपमालाञ्च शिलार्चातुलसीं तथा ॥
निर्म्माल्यञ्चैव नैवेद्यं हरिदर्शमिदन्तथा ।
ग्रन्थियुक्तं यज्ञसूत्रं दर्पणं श्वेतचामरम् ॥
गोरोचनाञ्च सुक्ताञ्च शुक्तिं माणिक्यमेव च ।
पुराणसंहितां वह्निं कर्पूरं परशुं तथा ॥
रजतं काञ्चनञ्चैव प्रवालं रत्नमेव च ।
कुशग्रन्थिं तीर्थतोयं गन्धं गोशृङ्गगोमयम् ॥
त्वयि ये स्थापयिष्यन्ति मूढ़ाश्चैतानि सुन्दरि ! ।
पश्यन्ते कालसूत्रे च वर्षाणामयुतं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥
तस्या रूपान्तरं यथा,—
"इति तस्य वचः श्रुत्वा जनकस्य तदा क्षितिः ।
मुनीनां सन्निधौ रूपं दर्शयामास भूभृते ॥
नीलोत्पलदलश्यामामम्लानमालाधारिणीम् ।
बाहुयुग्मेन सुश्रेण स्तनालायतशोभिना ।
सुन्दरीं लोकधात्रीं तां दृष्ट्वा शृण्वन्नृपोऽलपत् ॥"
इति कालिकापुराणे ३६ अध्यायः ॥
पृथिव्यां ग्रामशस्यादुत्पत्तिकारणं यथा,—
प्रजा ऊचुः ।
"अराजके नृपश्रेष्ठ ! धरित्र्या सकलौषधीः ।
यस्मात्ततः क्षयं यान्ति प्रजाः सर्व्वाः प्रजेश्वर ! ॥
त्वं नो वृत्तिप्रदो धात्रा प्रजापालो निरूपितः ।
देहि नः क्षुत्प्रपीतानां प्रजानां जीवनौषधीः ॥
श्रीपराशर उवाच ।
ततोऽथ नृपतिर्दिव्यमादायाजगवं धनुः ।
शरांश्च दिव्यान् कुपितः सोऽभ्यधावद्वसुन्धराम् ॥
ततो ननाश त्वरिता गौर्भूत्वा तु वसुन्धरा ।
सा लोकान् ब्रह्मलोकादींस्त्रासादगमन्मही ।
यत्र यत्र ययौ देवी सा तदा भूतधारिणी ।
तत्र तत्र तु सा वैण्यं ददर्शाभ्युद्यतायुधम् ॥
ततस्तं प्राह वसुधा पृथुं पृथुपराक्रमम् ।
प्रवेपमाना तद्राजपरित्राणपरायणा ॥
पृथिव्युवाच ।
स्त्रीवधे त्वं महापापं किं नरेन्द्र ! न पश्यसि ।
येन मां हन्तुमत्यर्थं प्रकरोषि नृपोद्यमम् ॥
श्रीपृथुरुवाच ।
एकस्मिन् यत्र निधनं प्राप्तिते दुष्टकारिणि ।
बहूनां भवति क्षेमस्तस्य पुण्यप्रदो वधः ॥
पृथिव्युवाच ।
प्रजानामुपकाराय यदि मां त्वं हनिष्यसि ।
आधारः कः प्रजानान्ते नृपश्रेष्ठ ! भविष्यति ॥
पृथुरुवाच ।
त्वां हत्वा वसुधे ! बाणैर्मच्छासनपराङ्मुखीम् ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥
श्रीपराशर उवाच ।
ततः प्रणम्य वसुधा तं भूयः प्राह पार्थिवम् ।
प्रवेपिताङ्गी परमं साध्वसं समुपागता ॥
उपायतः समारब्धाः सर्व्वे सिध्यन्त्युपक्रमाः ।
तस्माद्ददाम्युपायन्ते त्वं कुरुष्व यदीच्छसि ॥
समस्तास्ता मया जीर्णा नरनाथ ! महौषधीः ।
यदीच्छसि प्रदास्यामि ताः क्षीरपरिणामिनीः ॥
तस्मात् प्रजाहितार्थाय मम धर्म्मभृतांवर ! ।
तन्तु वत्सं प्रयच्छस्व चरेयं येन वत्सला ॥
समाश्च कुरु सर्व्वत्र येन क्षीरं समन्ततः ।
वरौषधीबीजभूतं वीर ! सर्व्वत्र भावये ॥
श्रीपराशर उवाच ।
तत उत्सारयामास शैलान् शतसहस्रशः ।
धनुष्कोट्या तदा वैण्यस्तेन शैला विवर्द्धिताः ॥
नहि पूर्व्वविसर्गे वै विषमे पृथिवीतले ।

प्रतिभागः पुराणां वा ग्रामाणां वा पुराभवत् ॥
न ग्रस्यानि न गोरक्ष्यं न कृषिर्न वणिक्पथः ।
वैण्यात् प्रभृति मैत्रेय ! सर्व्वस्येतस्य सम्भवः ॥
यत्र यत्र समं तस्या भूमेरासीद्द्विजोत्तम ! ।
तत्र तत्र प्रजानां हि निवासः समरोचयत् ॥
आहारः फलमूलानि प्रजानामभवत्तदा ।
कृच्छ्रेण महता सोऽपि प्रनष्टास्वोषधीषु वै ॥
स कल्पयित्वा वत्सन्तु मनुं स्वायम्भुवं प्रभुम्
स्वे पाणौ पृथिवीनाथो दुदोह पृथिवीं पृथुः ॥
ग्रस्यजातानि सर्व्वाणि प्रजानां हितकाम्यया ।
तेनान्नेन प्रजास्तात ! वर्त्तयन्त्यापि नित्यशः ॥
प्राणप्रदानात् स पृथुर्यस्माद्भूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥
ततश्च देवैर्मुनिभिर्दैत्यै रक्षोभिरद्रिभिः ।
गन्धर्व्वैरुरगैर्यक्षैः पितृभिस्तरुभिस्तथा ॥
तत्तत्पात्रमुपादाय तत्र दुग्धा सुने ! पयः ।
वत्स ! दोग्धृविशेषाच्च तेषां तद्योनयोऽभवन् ॥
सैषा धात्री विधात्री च धारणी पोषणी तथा ।
सर्व्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥
एवंप्रभावः स पृथुः पुत्रो वैणस्य वीर्य्यवान् ।
जज्ञे महीपतिः पूर्व्वो राजाभूज्जनरञ्जनात् ॥"
इति श्रीविष्णुपुराणे १ अंशे पृथुचरितं १३ अध्यायः ॥ * ॥

तस्या नामगोरूपदोहनानां कारणानि यथा,—

ऋषय ऊचुः ।

"बहुभिर्धरणी सूक्ता भूपालैः श्रूयते पुरा ।
पार्थिवाः पृथिवीयोगात् पृथिवी कस्य योगतः ॥
किमर्थञ्च कृता संज्ञा भूमिः किं पारिभाषिकी ।
गौरितीयञ्च विख्याता कुतः कस्माद्ब्रवीहि नः ॥

सूत उवाच ।

वंशे स्वायम्भुवे ह्यासीदङ्गो नाम प्रजापतिः ।
मृत्योस्तु दुहिता तेन परिणीतातिदुर्मुखी ॥
सुनीथा नाम तस्यास्तु वेणो नाम सुतः पुरा ।
अधर्म्मनिरतः कामी बलवान् वसुधाधिपः ॥
लोकेऽप्यधर्म्मैकख्यातः परभार्य्यापहारकः ।
धर्म्माचारप्रसिद्ध्यर्थं जगतोऽस्य महर्षिभिः ॥
अनुनीतोऽपि न ददावनुज्ञां स यदा ततः ।
शापेन मारयित्वैनमराजकभयार्दिताः ।
ममन्थुर्बाहवोस्तस्य बलाद्वेमकल्मषाः ॥
तत्कायान्मथ्यमानात्तु निर्य्येतुर्म्लेच्छजातयः ॥
अरीरोरे मातुरंशेन क्षणाञ्जनसमप्रभाः ।
पितुरङ्गस्य चांशेन धार्म्मिको धर्म्मचारिणः ॥
उत्पन्नो दक्षिणाद्बाहोः सपतुः सप्तरो गदी ।
दिव्यतेजोमयवपुः सरत्नकवचाङ्गदः ॥
पृथुरेवाभवद्यस्मात्ततः पृथरजायत ।
स विप्रैरभिषिक्तश्च तपः कृत्वा सुदुश्चरम् ॥
विष्णोर्व्वरेण सर्व्वस्य प्रभुत्वमगमत् प्रभुः ।
निःस्वाध्यायवषट्कारं निर्धनं वीक्ष्य भूतलम् ॥
दग्धुमेवोद्यतः कोपाच्छरेणामितविक्रमः ।
ततो गोरूपमास्थाय भूः पलायितुमुद्यता ॥
पृष्ठतोऽनुगतस्तस्याः पृथुर्दीप्तशरासनः ।
ततः स्थित्वैकदेशे तु किं करोमीति साब्रवीत् ॥
पृथुरप्यवदद्वाक्यमीप्सितं देहि सुव्रते ! ।
सर्व्वस्य जगतः क्षीप्रं स्थावरस्य चरस्य च ॥
तथेव चाब्रवीद्भूमिर्दुदोह च नराधिपः ।
स्वे स्वे पात्रे पृथुवंत्सं कृत्वा स्वायम्भुवं मनुम् ॥
तदन्नमभवत् शुद्धं प्रजा जीवन्ति तेन वै ।
ततस्तु ऋषिभिर्दुग्धा वत्सः सोमस्तदाभवत् ॥
दोग्धा बृहस्पतिरभूत् पात्रं वेदस्तपो रसः ।
वेदैश्च वसुधा दुग्धा दोग्धा मित्रस्तदाभवत् ॥
इन्द्रो वत्सः समभवत् क्षीरमूर्ज्जस्करं बलम् ।
देवानां काञ्चनं पात्रं पितॄणां राजतन्तदा ॥
अन्तकश्चाभवद्दोग्धा यमो वत्सः सुधारसः ।
अलाबुपात्रं नागानां तक्षको वत्सकोऽभवत् ॥
विषं क्षीरं ततो दोग्धा धृतराष्ट्रोऽभवत् पुनः ।
असुरैरपि दुग्धेयमायसे मृण्मयीं पुनः ॥
पात्रे मायामभूद्वत्सः प्रह्लादश्च विरोचनः ।
दोग्धा द्विमूर्द्धा तच्चासीन्मायाया येन प्रवर्त्तिता ॥
यक्षैश्च वसुधा दुग्धा पुरान्तर्द्धानमीप्सुभिः ।
कृत्वा वैश्रवणं वत्समामपात्रे महीपते ! ॥
प्रेतैरचोगणैर्दुग्धा धरा रुधिरमुक्थगम् ।
रौप्यलाभोऽभवद्दोग्धा सुमाली वत्स एव तु ॥
गन्धर्व्वैश्च पुनर्दुग्धा वसुधा चाप्सरोगणैः ।
वत्सं चैत्ररथं कृत्वा गन्धान् पद्मदले तथा ॥
दोग्धा च सुरुचिर्नाम नाट्यवेदस्य पारगः ।
गिरिभिर्वसुधा दुग्धा रत्नानि विविधानि च ॥
औषधानि च दिव्यानि दोग्धा मेरुर्महाबलः ।
वत्सोऽभूद्धिमवांस्तत्र पात्रं शैलमयं पुनः ॥
वृक्षैश्च वसुधा दुग्धा क्षीरं छिन्नप्ररोहणम् ।
पालाशपात्रे दोग्धा तु सालः पुष्पदलाकुलः ॥
प्लक्षोऽभवत्ततो वत्सः सर्व्ववृक्षगणाधिपः ।
एवमन्यैश्च वसुधा तथा दुग्धा यथेप्सितम् ॥"
इति मत्स्यपुराणे १० अध्यायः ॥ * ॥

अन्यद्विवरणं भूगोलशब्दे द्रष्टव्यम् ॥ पृथ्वी ।

तद्देहिकपर्य्यायः । गौः १ मा २ ज्मा ३ क्ष्मा ४ क्षा ५ क्षामा ६ क्षोणी ७ क्षितिः ८ अवनिः ९ ऊर्व्वी १० पृथ्वी ११ मही १२ रिपः १३ अदितिः १४ इला १५ निर्ऋतिः १६ भूः १७ भूमिः १८ पृथा १९ गातुः २० गोत्रा २१ । इत्येकविंशतिपृथिवीनामधेयानि । इति वैद्यनिघण्टौ १ अध्यायः ॥ (अन्तरिक्षम् । इति निघण्टुः ।१।३ ॥ यथा, ऋग्वेदे ।१०।१२१।१ ।

"स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥"

"पृथिवीत्यन्तरिक्षनाम ।" इति तद्भाष्ये सायनः ॥)

पृथिवीगीता, स्त्री, (पृथिव्या गीता ।) पृथिवीकथा । यथा,—

"मैत्रेय ! पृथिवीगीताः श्लोकाश्चात्र निबोध तान् ।
यानाह धर्म्मध्वनिने जनकायासितो मुनिः ॥

श्रीपृथिव्युवाच ।

कथमेष नरेन्द्राणां मोहो बुद्धिमतामपि ।
येन केन सधर्म्माणोऽप्यतिविश्वस्तचेतसः ॥
पूर्व्वमात्मजयं कृत्वा जेतुमिच्छन्ति मल्लिकाः ।
ततो भृत्यांश्च पौरांश्च जिगीषन्ति तथा रिपून् ॥
क्रमेणानेन जेष्यामो वयं पृथ्वीं ससागराम् ।
इत्यासक्तधियो मृत्युं न पश्यन्त्यविदूरगम् ॥
समुद्रावरणं याति मनुमण्डलमथो नभम् ।
कियदात्मजयादेतन्मुक्तिरात्मजये फलम् ॥
उत्सृज्य पूर्व्वे यां याता यां नादाय गताः पिताः ।
तां मामतिविमूढत्वाज्जेतुमिच्छन्ति पार्थिवाः ॥
मनुकृते पितृपुत्राणां भ्रातृणामपि विग्रहाः ।
जायन्तेऽत्यन्तमोहेन ममत्वाहतचेतसाम् ॥
पृथ्वी ममेयं सकला ममेयं
ममेति चैषा मम शाश्वतेयम् ।
यो यो मृतोऽन्यत्र बभूव राजा
कुबुद्धिरासीदिति तस्य तस्य ॥
दृष्ट्वा ममत्वाहतचित्तमेकं
विहाय मां मृत्युपथं व्रजन्तम् ।
तस्यान्वयस्तत्र कथं ममत्वं
हृद्यास्पदं मत्प्रभवं करोति ॥
पृथ्वी ममैषासु परित्यजेनां
वदन्ति ये दूतमुखैः स्वपुत्रान् ।
नराधिपास्तेषु समातिहासः
पुनश्च मूढेषु दयाभ्युपैति ॥

श्रीपराशर उवाच ।

इत्येते धरणीगीताः श्लोका मैत्रेय यैः श्रुताः ।
ममत्वं विलयं याति तापन्यस्तं यथा हिमम् ॥"
इति विष्णुपुराणे ४ अंशे २४ अध्यायः ॥

पृथिवीपतिः, पुं, (पृथिव्याः पतिः ।) राजा । (यथा, मनुः । ७ । १७७ ।

"सर्व्वोपायैस्तथा कुर्य्यान्नीतिज्ञः पृथिवीपतिः ।
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः ॥") ऋषभनामौषधिः । इति मेदिनी । ते, २३१ ॥ यमः । इति हेमचन्द्रः ॥

पृथिवीपालः, पुं, (पृथिवीं पालयतीति । पृथिवी + पालि + अण् ।) राजा । यथा,—

"बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ॥"
इति रघुः ॥

पृथिवीशक्रः, पुं, (पृथिव्यां शक्र इव ।) राजा । इति हेमचन्द्रः । ३ । ३५३ ॥

पृथुः, पुं, (प्रथते विख्यातो भवतीति । प्रथ + "प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ।" उणा० १ । २६ । इति कुः सम्प्रसारणञ्च ।) त्रेतायुगे सूर्य्यवंशीयषष्ठमनृपः । वेणनृपस्य दक्षिणकरमथनाज्जातः । प्रजारञ्जनात् आद्यो राजाधिपः प्राप्तः । यथा,—

"अथ ते ऋषयः सर्व्वे प्रसन्नमनसस्ततः ।
गतकल्मषमेवं तं जातं वेणं नृपोत्तमम् ॥
ममन्थुर्दक्षिणं पाणिं तस्यैव च महात्मनः ।
मथिते तस्य पाणौ च सञ्जातं खेदमेव हि ॥
पुनर्ममन्थुस्ते विप्रा दक्षिणं पाणिमेव च ।
स्वकरात् पुरुषो जज्ञे ह्रादग्रादित्यसन्निभः ॥
तप्तकाञ्चनवर्णाङ्गो दिव्यमाल्याम्बरावृतः ।
दिव्याभरणशोभाङ्गो दिव्यगन्धानुलेपनः ॥

पृथुः

सुकुटेन सुवर्णेन कुण्डलाभ्यां विराजते ॥
महाकायो महाबाहू रूपेणाप्रतिमो भुवि ।
खड्गबाणधरो धन्वी कवची च महाप्रभः ॥
सर्व्वलक्षणसम्पन्नः सर्व्वालङ्कारभूषितः ।
तेजसा रूपभावेन साक्षादग्निरिव ज्वलन् ॥
आद्यमाजगवं नाम धनुर्गृह्य महावरम् ।
इन्द्रो दिवि यथा भाति भुवि वेणात्मजस्तथा ॥
तस्मिन् जाते महाभागे देवाश्च ऋषयोऽमलाः ।
उत्सवं चक्रिरे सर्व्वे वेणस्य तनयं प्रति ॥
दीप्यमानः स्ववपुषा वर्णैरेव महामतिः ।
शरांश्च दिव्यानुत्सार्थं कवचञ्च महाप्रभम् ॥
ददावन्द्रः सहस्राक्षो मालाञ्चास्लानपुष्पिकाम् ॥
जाते तस्मिन्महाभागे पृथौ वीरे महात्मनि ॥
संप्रहृष्टानि भूतानि समस्तानि द्विजोत्तमाः ।
सर्व्वतीर्थानि तोयानि पुण्यानि विविधानि च ॥
स्थावराणि चराण्येव अभ्यषिञ्चन्नराधिपम् ।
महावीरं प्रजापालं पृथुमेवं द्विजोत्तमाः ॥
पृथुं वैण्यं वसुन्धरायां अभिषिक्तं चराचरैः ।
देवैर्विप्रैस्तथा सर्व्वैरभिषिक्तो महामनाः ॥
राज्ञश्चैवाधिकारे वै पृथुर्वैण्यः प्रतापवान् ।
तदा पित्रा प्रजाः सर्व्वाः कदा नैवानुरञ्जिताः ॥
तेनानुरञ्जिताः सर्व्वाः सुखेमुंमुदिरे तदा ।
अनुरागात्तु वीरस्य नाम राजेत्यभाषत ॥
प्रयातस्य सुधीरस्य समुद्रस्य द्विजोत्तमाः ।
आपस्तस्मिरे सर्व्वा भयात्तस्य महात्मनः ॥
प्रयातस्य रथस्यापि तस्यैव च महात्मनः ।
दुर्गमार्गं विलोक्यैव स्वमार्गं पर्व्वता ददुः ॥
ध्वजभङ्गं न चक्रुस्ते गिरयः सर्व्व एव ते ।
अक्षुण्णपथा पृथिवी सर्व्वत्र कामधेनवः ॥
पर्জन्यः कामवर्षी च वेदयज्ञान् महोत्सवान् ।
कुर्व्वन्ति ब्राह्मणाः सर्व्वे क्षत्रियाश्च तथापरे ॥
सर्व्वकामफला वृक्षास्तस्मिन् शासति राजनि ।
न दुर्भिक्षं न च व्याधिर्नाकालमरणं तथा ॥
सर्व्वे सुखेन जीवन्ति लोका धर्म्मपरायणाः ।
तस्मिन् शासति दुर्द्धर्षे राजराजे महात्मनि ॥"

इति पाद्मोत्तरखण्डे २६ अध्यायः ॥ * ॥

तस्य माहात्म्यं यथा,—

"पृथुना प्रविभक्ता च शोभिता च वसुन्धरा ।
शस्यरत्नवती स्फीता पुरपत्तनशालिनी ॥
एवं प्रभावो वैण्यश्च राजासीद्राजसत्तमः ।
नमस्यश्चैव पूज्यश्च भूतिकामैर्नरोत्तमैः ॥
ब्राह्मणैर्वेदकामैश्च पृथुर्वैण्यः प्रतापवान् ।
आदिकर्त्ता राजानाञ्च योधानां प्रथमो नृपः ॥
यो हि योद्धा रणं याति कीर्त्तयित्वा पृथुं नृपम् ।
घोररूपान् स संग्रामान् क्षेमी तरति कौर्त्ति-
मान् ॥
वेश्यैरपि हि शूद्रैश्च खाः खा दक्षीरदुश्रितैः ।
पृथुरेव नमस्कार्य्यः सर्व्वसिद्धिकरस्तु सः ॥
एवं पृथुरभूत् पूर्व्वं प्रसादाच्चक्रपाणिनः ।
सार्व्वभौमो महातेजा दुर्व्विषह्यः सुरासुरैः ॥"

तस्य पुत्रौ द्वौ । यथा,—

"पृथोः पुत्रौ तु धर्म्मज्ञौ जज्ञातेऽस्त्रद्विषाग्रिनौ ।
शिखण्डी च हविर्द्धानमन्तर्द्धानाद्व्यजायत ॥"

अरेणाभूराजः पुत्रः । यथा, अग्निपुराणे ।

"अयोधस्तस्य पुत्रोऽभूत् ककुत्स्थो नाम वीर्य्य-
वान् ।
ककुत्स्थस्य अरेणाभूत्तस्य पुत्रः पृथुः स्मृतः ॥"

अग्निः । इति मेदिनी । थे, १० ॥ (प्रियव्रत-
वंशोद्भवस्य विभोः पुत्रः । यथा, विष्णुपुराणे ।
२ । १ । ३८ ।

"ध्रुवस्तस्मात् तथोत्कीर्य्यः प्रस्तारस्तत्सुतो विभुः ।
पृथुस्ततोऽभवन्नक्तो नक्तस्यापि गयः स्मृतः ॥"

तामसमन्वन्तरे ऋषिविशेषः । यथा,मार्कण्डेये ।
७४ । ५६ ।

"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वलकस्तथा ।
पीवरश्च तथा ब्रह्मन् ! सप्त सप्तर्षयोऽभवन् ॥")

पृथुः, स्त्री, (प्रथते विस्तारमेतीति । प्रथ+कुः
सम्प्रसारणञ्च ।) क्षणजीरकः । इत्यमरः । २ ।
६ । ३७ ॥ (एतत्पर्य्यायो यथा,—

"क्षणजीरः सुगन्धश्च तथैवोद्गारशोधनः ।
कालाजाजी तु सुषवी कालिका चोपकालिका ॥
पृथ्वीका कारवी पृथ्वी पृथुः क्षणोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च वृहज्जीरक इत्यपि ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
लक्षणार्थं । द्विदलपत्री । इति मेदिनी । थे, १० ॥
(पर्य्यायोऽस्या यथा,—

"द्विदलपत्री तु कवरी पृथ्विका पृथुका पृथुः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अद्विफेनः । इति शब्दरत्नावली ॥

पृथुः, त्रि, (प्रथ+कुः सम्प्रसारणञ्च ।) महत् ।
इत्यमरः । ३ । १ । ६० ॥ (यथा, आर्य्यासप्त-
शत्याम् । ११७ ।

"उल्लसितभ्रूधनुषा तव पृथुना लोचनेन रुचि-
राङ्गि ! ।
अचला अपि न महान्तः के चपलभाव-
मानीताः ॥")

निपुणः । इति शब्दरत्नावली ॥

पृथुकः, पुं, (पृथुरेव । पृथु+संज्ञायां कन् । यद्वा,
प्रथते इति । प्रथ+"अर्भकपृथुकेति ।" उणा०
५ । ५३ । इति कुकन् संप्रसारणञ्च ।) चिपिट-
कः । इत्यमरः ॥ क्लीवलिङ्गोऽप्ययम् । यथा,—

"द्विःखिन्नमन्नं पृथुकं शुष्कं देशविशेषके ।
नात्यन्तशुस्तं विप्राणां भक्षणे च निवेदने ॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २७ अध्यायः ॥
(यवास्य गुणाः ।

"पृथुका गुरवो बल्या कफविष्टम्भकारिणः ॥"

इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥

"पृथुका गुरवो भृष्टान् भक्षयेदल्पशस्तु तान् ।
यावा विदग्धा जीर्य्यन्ति सतुषा भिन्नवर्च्चसः ॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥

"पृथुका गुरवः स्निग्धा दृंहणा कफवर्द्धनाः ।
बल्याः क्षीरभावात्तु वातघ्ना भिन्नवर्च्चसः ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥

पृथुकः

चाक्षुषमन्वन्तरे देवगणभेदः । यथा, हरि-
वंशे । ७ । ३२ ।

"आद्या प्रभूता ऋभवः पृथुकाश्च दिवौकसः ॥")

पृथुकः, त्रि, (प्रथते इति । प्रथ+"अर्भकपृथुक-
पाका वयसि ।" उणा० ५ । ५३ । इति कुकन्
सम्प्रसारणञ्च । यद्वा, पृथु यथा स्यात् तथा
कायति शब्दायते इति । के शब्दे+कः ।)
बालकः । इति मेदिनी । के, १२६ ॥ (यथा,
माघे । ३ । ६० ।

"प्रक्रीडितान् रेणुभिरेत्य तूर्णं
निर्युज्यतन्यः पृथुकान् पृथिभ्यः ॥")

पृथुका, स्त्री, (पृथुः स्थूलैव । पृथु+कन्+
टाप् ।) द्विदलपत्री । इति शब्दचन्द्रिका ॥
(अस्याः पर्य्यायो यथा,—

"द्विदलपत्री तु कवरी पृथ्विका पृथुका पृथुः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
बालिका च ॥

पृथुकोलः, पुं, (पृथुः कोलः ।) राजबदरः । इति
राजनिर्घण्टः ॥

पृथुच्छदः, पुं, (पृथवश्छदाः पत्राणि यस्य ।) हरि-
दर्भः । इति राजनिर्घण्टः ॥ वृहत्पत्रे, त्रि ॥

पृथुपत्रः, पुं, (पृथूनि पत्राणि यस्य ।) रक्त-
लशुनः । इति राजनिर्घण्टः ॥

पृथुपलाशिका, स्त्री, (पृथूनि पलाशानि यस्याः ।
कप् । टापि अत इत्वम् ।) शटी । इति
राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—

"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ।
गन्धारिका गन्धबधूर्बंधूः पृथुपलाशिका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पृथुरोमा, [न्] पुं, (पृथूनि रोमाणि लोम-
स्थानीयानि अस्त्यस्येति ।) मत्स्यः । इत्य-
मरः । १ । १० । १७ ॥ वृहल्लोमयुक्ते, त्रि ॥

पृथुलं, त्रि, (पृथुं पृथुत्वमस्यास्तीति । पृथु+
सिध्मादित्वात् लच् । यद्वा, पृथुं लातीति । ला+
कः ।) महत् । इत्यमरः । ३ । १ । ६० ॥ (यथा,
माघे । १० । ६५ ।

"श्रोणिहु प्रियकरः पृथुलासु
स्पर्शमाप सकलेन तलेन ॥")

पृथुला, स्त्री, (पृथुल+टाप् ।) द्विदलपत्री । इति
जटाधरः ॥ (गुणादयोऽस्या द्विदलपत्रीशब्दे
ज्ञातव्याः ॥)

पृथुश्लिम्नः, पुं, (पृथुः श्लिम्ना यस्याः ।) श्लीपाक-
प्रभेदः । इति राजनिर्घण्टः ॥ (पर्य्यायान्तर-
मस्य यथा,—

"श्लीपाकः श्लीपदश्च स्यान्नटकट्टुटुकाः ।
मण्डूकपत्रपत्रोर्णसुकनासकुटन्नटाः ॥
दीर्घवृन्तोऽरुषापि पृथुश्लिम्नः कटम्भरः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पृथुशेखरः, पुं, (पृथु महत् शेखरं शृङ्गं यस्य ।)
पर्व्वतः । इति त्रिकाण्डशेषः ॥

पृथुस्कन्धः, पुं, (पृथुः स्थूलः स्कन्धो यस्य ।) शूकरः ।
इति राजनिर्घण्टः ॥

पृथूदकं, क्ली, (पृथु पुण्यप्रदत्वात् महदुदकं यस्य।) तीर्थभेदः। यथा,—
"ते श्रुत्वा ऋषयः सर्व्वे तीर्थमाहात्म्यसत्तमम्।
कपालमोचनमिति नाम चक्रुः समागताः॥
तत्रापि सुमहत्तीर्थं विश्वामित्रस्य विश्रुतम्।
ब्राह्मण्यं लब्धवान् यत्र विश्वामित्रो महामुनिः॥
तस्मिंस्तीर्थवरे स्नात्वा ब्राह्मण्यं लभते ध्रुवम्।
ब्राह्मणस्तु विशुद्धात्मा परं पदमवाप्नुयात्॥
ततः पृथूदकं गच्छेन्नियतो नियताशनः।
तत्र सिद्धस्तु ब्रह्मर्षी रुषद्गुर्नाम नामतः॥
जातिस्मरो रुषद्गुस्तु गङ्गाद्वारे तदा स्थितः।
अन्तकालं ततो दृष्ट्वा पुत्रान् वचनमब्रवीत्॥
इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम्।
विज्ञाय तस्य तद्भावं रुषद्गोस्ते तपोधनाः॥
तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम्।
स ते पुत्रैः समानीतः सरस्वत्यां समाप्लुतः॥
स्नात्वा तीर्थगुणान् सर्व्वान् प्राहेदमृषिसत्तमः।
सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम्॥
पृथूदके जप्यपरो नैनं श्वो मरणं लभेत्।
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिता॥
पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः।
चतुर्व्वर्गस्य दृष्टार्थमात्मज्ञानपरोऽभवत्॥
तस्माभिध्यायतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः।
मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रियास्तथा॥
ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन्।
चातुर्व्वर्ण्यं ततो दृष्ट्वा आश्रमस्थान् सुतांस्ततः॥
एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीतिसंज्ञितम्।
तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति॥"
इति वामनपुराणे ३८ अध्यायः॥
(यथा च महाभारते। ३। ८३।१३२—१३६।
"ततो गच्छेत राजेन्द्र! तीर्थं त्रैलोक्यविश्रुतम्।
पृथूदकमिति ख्यातं कार्त्तिकेयस्य वै नृप!॥
तत्राभिषेकं कुर्व्वीत पितृदेवार्च्चने रतः।
अज्ञानात् ज्ञानतो वापि स्त्रिया वा पुरुषेण वा॥
यत्किञ्चिदशुभं कर्म्म कृतं मानुषबुद्धिना।
तत् सर्व्वं नश्यते तत्र स्नानमात्रस्य भारत!॥
अश्वमेधफलञ्चापि लभते स्वर्गमेव च।
पुण्यमाहुः कुरुक्षेत्रं कुरुक्षेत्रात् सरस्वती॥
सरस्वत्याश्च तीर्थानि तीर्थेभ्यश्च पृथूदकम्।
उत्तमं सर्व्वतीर्थानां यस्त्यजेदात्मनस्तनुम्॥
पृथूदके जप्यपरो न तस्य मरणं भवेत्।
गीतं सनत्कुमारेण व्यासेन च महात्मना॥
वेदे च नियतं राजन्नधिगच्छेत् पृथूदकम्।
पृथूदकात् तीर्थतमं नान्यत्तीर्थं कुरूद्वह!॥
तस्मेध्यं तत् पवित्रञ्च पावनञ्च न संशयः।
तत्र स्नात्वा दिवं यान्ति येऽपि पापकृता नराः।
पृथूदके नरश्रेष्ठ! एवमाहुर्मनीषिणः॥")

पृथूदरः, पुं, (पृथु महदुदरं यस्य।) मेघः। इति हारावली। ८०॥ दृढतनुकुचौ, त्रि॥

पृथ्वी, स्त्री, (पृथुः स्थूलत्वगुणयुक्ता। "वोतो गुणवचनात्।" ४।१।४४। इति ङीष्।) पृथिवी। (यथा, देवीभागवते। ३। १३। ८।
"मधुकैटभयोर्मेदसंयोगात् मेदिनी स्मृता।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")
पृथोर्दुहितृत्वस्वीकारादेतन्नाम। यथा, अग्निपुराणे।
"दुहितृत्वमनुप्राप्ता देवी पृथ्वी तथोच्यते॥"
हिङ्गुपत्री। कृष्णजीरकः। इत्यमरः। २। ६। ३७, २। ६। ४०॥ (एतस्याः पर्य्यायो यथा,—
"कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः।
कालाजाजी तु सुषवी कालिका चापकालिका॥
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका।
उपकुञ्चो च कुञ्ची च दृढबीजक इत्यपि॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
दृत्ताईम्भाता। इति हेमचन्द्रः॥ पुनर्नवा। स्थूलेला। इति राजनिर्घण्टः॥ (सप्तदशाक्षरपादकश्छन्दोभेदः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥)

पृथ्वीका, स्त्री, (पृथ्वी+स्वार्थे कन्।) दृढदेला। इत्यमरः। २। ४। १२५॥ (अस्याः पर्य्यायो यथा,—
"एलाशूला च बहुला पृथ्वीका चिपुटापि च।
भद्रैला दृढदेला च चन्द्रबाला च निष्कुटिः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) स्थूलेला। कृष्णजीरकः। इति रत्नमाला॥ हिङ्गुपत्री। इति राजनिर्घण्टः॥

पृथ्वीकुरवकः, पुं (पृथ्व्यां भूमौ कुरवक इव।) श्वेतमन्दारकः। इति राजनिर्घण्टः॥

पृथ्वीजं, क्ली, (पृथ्व्यां जायते इति। जन+डः।) गड्डलवणम्। इति राजनिर्घण्टः॥

पृदाकुः, पुं, (पर्दते इति। पर्द अपानशब्दे+"पर्देर्नित् सम्पृसारणञ्चोपश्च।" उणा० ३। ८०। इति काकुः रेफस्य सम्पृसारणं अत्वोपश्च।) सर्पः। इत्यमरः। १। ८। ६॥ (यथा, महाभारते। ६। १७८। २७।
"स भीमं सहसाभ्येत्य पृदाकुः कुपितो भृशम्।
जघाहाजगरो घोरो भुजयोरुभयोर्बलात्॥")
वृश्चिकः। व्याघ्रः। चित्रकः। इति मेदिनी। के, १२५॥ कुञ्जरः। वृक्षः। इति संक्षिप्तसारोणादिवृत्तिः॥

पृश्निः, त्रि, (सृज्यते इति। सृज संसर्गे+"पृश्निपृक्तीति।" उणा० ४।५२। इति नि निपातनात् साधुः।) अल्पतनुः। इत्यमरः। २। ६। ४८॥ (यथा, महाभारते। १३। २६। ८६।
"दत्त्वा पृश्निं दृढतनुं विप्रकृष्टां
शिवाङ्गजां भगिनीं सुप्रसन्नाम्।
विभावरीं सर्व्वभूतप्रतिष्ठां
गङ्गां गता ये त्रिदिवं गतास्ते॥")
सर्व्वदुर्ब्बलाख्यास्त्रियः। इति भरतः॥ (शुक्लवर्णः। यथा, ऋग्वेदे। १। १६०। ३।
"धेनुञ्च पृश्निं वृषभं सुरेतसम्॥"
"पृश्निं शुक्लवर्णां धेनुम्।" इति तद्भाष्ये सायणः॥ प्राप्ततेजाः। यथा, ऋग्वेदे। १०। १८८। १।
"आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः॥")

पृश्निः, स्त्री, (सृपति द्रवजातं सृज्यते इति वा। सृज्+"पृश्निसृजीति।" उणा० ४।५२। इति नि निपातनात् साधुः।) रश्मिः। इति शब्दरत्नावली॥ (अन्नम्। वेदाः। जलम्। अमृतम्। इति महाभारतम्। १२। ३४१। ४४॥) सुतपोराजपत्नी। सैव जन्मान्तरे देवकी भूता। इति श्रीभागवते १० स्कन्धः॥

पृश्निका, स्त्री, (पृश्नौ जले कायति शोभते इति। कै+कः। यद्वा, पृश्नि स्वल्पं कं जलं यत्र।) कुम्भिका। इति शब्दमाला॥

पृश्निगर्भः, पुं, (पृश्निर्वेदादयो गर्भे यस्य। यद्वा, पृश्निः जन्मान्तरजातदेवकी तस्याः गर्भ उत्पत्तिस्थानत्वेनास्त्यस्येति। अर्च्।) श्रीकृष्णः। इति हारावली। ६॥ (अस्य निरुक्तिर्यथा महाभारते। १२। ३४१। ४४।
"पृश्निरित्युच्यते चान्नं वेदा आपोऽमृतं तथा।
ममैतानि सदा गर्भे पृश्निगर्भस्ततोऽस्म्यहम्॥")

पृश्निपर्णी, स्त्री, (पृश्नि स्वल्पं पर्णमस्याः। ङीष्।) लताविशेषः। चाकुलिया इति भाषा। चकरौत् इति हिन्दी भाषा। तत्पर्य्यायः। पृथक्पर्णी २ चित्रपर्णी ३ अङ्घ्रिवल्लिका ४ क्रोष्टुविन्ना ५ सिंहपुच्छी ६ कलश्रिः ७ धावनिः ८ गुहा ९। इत्यमरः। २। ४। ६२॥ केचित्तु पृश्निपर्ण्यादिचतुष्कं चाकुलिया इति ख्यातायाम्। क्रोष्टुविन्नादिपञ्चकं विरालकाँद इति ख्यातायामित्याहुः। एतत्तु वैद्या न श्रद्दधते। ते हि कलश्र्यादिशब्देन पृश्निपर्णीमेव गृह्णन्ति। पृश्निपर्णी सिंहपुच्छी चित्रपर्णी कटुसिंहपुच्छी चानयोरत्यभेदान्नवैवैकार्था इति केचित्। इति भरतः॥ अपि च।
पिटपर्णी १० लाङ्गली ११ क्रोष्टुपुच्छिका १२ पूर्णपर्णी १३ कलश्री १४ क्रोष्टुकमेखला १५ दीर्घा १६ शृगालदन्ता १७ चित्रपर्णी १८ सिंहपुच्छिका १९ दीर्घपत्रा २० अतिगुहा २१ पृष्ठिला २२ चित्रपर्णिका २३। इति साङ्गे रत्नमाला॥ महागुहा २४ शृगालविन्ना २५ धमनी २६ मेखला २७ लाङ्गूलिका २८ पृष्टिपर्णी २९ दीर्घपर्णी ३०। इति राजनिर्घण्टः॥ अङ्घ्रिपर्णी ३१ धावनी ३२। इति भावप्रकाशः॥ अस्या गुणाः। कटुत्वम्। अतीसारकासवातरोगज्वरोन्मादव्रणदाहनाशित्वञ्च। इति राजनिर्घण्टः॥ त्रिदोषघ्नत्वम्। दृष्यत्वम्। मधुरत्वम्। सरत्वम्। श्वासरक्तातीसारदाहनाशित्वञ्च। इति भावप्रकाशः॥ ग्राहित्वम्। इति राजवल्लभः॥

पृश्निभद्रः, पुं, (पृश्नौ भद्रं यस्य।) श्रीकृष्णः। इति शब्दमाला॥

पृश्निशृङ्गः, पुं, (पृश्निर्वेदादयः शृङ्गमिवास्य।) विष्णुः। इति शब्दमाला॥ (पृश्नि स्वल्पं शृङ्गमिव शुण्डाग्रं यस्य।) गणेशः। इति त्रिकाण्डशेषः॥

पृषती, स्त्री, (सृजति जलमिति । सृज+निः । ततो वा ङीष् ।) वारिपर्णी । इति शब्दरत्नावली ॥ (विवरणमस्या वारिपर्णीशब्दे ज्ञातव्यम् ॥) कुम्भिका । इति भूरिप्रयोगः ॥

पृष, उ सेके । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्वावेट् ।) उ, पर्षित्वा पृष्ट्वा । इति दुर्गादासः ॥

पृषत्, क्ली, (पर्षति सिञ्चतीति । पृष सेचने + "वर्तमाने पृषद्बृहन्महदिति ।" उणा० २ । ८४ । इति । अतिप्रत्ययो गुणाभावश्च निपात्यते । शतृवदस्य कार्य्यं विज्ञेयम् ।) जलबिन्दुः । इत्यमरः । १ । १० । ६ ॥ यथा, "पृषदपरुषविषाणाग्रेण लुठति ।" इति श्रीभागवते ५ स्कन्धे ८ अध्यायः ॥ "पृषत् जलबिन्दुस्तद्वत् अपरुषेण मृदुना विषाणाग्रेण लुठति सङ्कर्षति ।" इति तट्टीकायां श्रीधरस्वामी । इदं द्विवचनबहुवचनान्तमपि भवति ॥

पृषतः, पुं, (पर्षतीति । पृषि सेके + "पृषिरञ्जिभ्यां कित् ।" उणा० ३ । १११ । इति अतच् । स च कित् ।) बिन्दुः । इत्यमरः । १ । १० । ६ ॥ (यथा, रघौ । ३ । ३ ।

"करीव सिक्तं पृषतैः पयोमुचां
शुचिव्यपाये वनराजिपल्वलम् ॥")

श्वेतबिन्दुयुक्तमृगः । इति मेदिनी । ते, १३५ ॥ तत्पर्य्यायः । रङ्कुः २ शबलपृषकः ३ । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "हरिणर्श्यकुरङ्गकरालकृतमालशरभश्वदंष्ट्रा पृषतचारुस्करन्यङ्गमार्जकाप्लुतयो जङ्गाला मृगाः । कषाया मधुरा लघवो वातपित्तहरास्तीक्ष्णा व्रण्या वस्तिशोधनाश्च ।"*॥ द्रुपदराजस्य पिता । यथा, महाभारते । १ । १३१ । १७ ।

"भरद्वाजसखा चासीत् पृषतो नाम पार्थिवः ।
तस्यापि द्रुपदो नाम तदा समभवत् सुतः ॥"

मण्डलिसर्पान्तर्गतसर्पविशेषः । यथा,—

"आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोध्रपुष्प इत्यादिषु ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)

पृषतात्मजः, पुं, (पृषतां बिन्दूनां प्रतिर्नेता इत्यलुक्समासः ।) वायुः । इति जटाधरः ॥ (यथा, माघे । ६ । ५५ ।

"गजपतिदयसीरपि हैमन-
स्तुहिनयन् सरितः पृषतात्मजः ।
सलिलसन्ततिमध्वगयोषिता-
मतनुतातनुतापकृतं दृशाम् ॥")

पृषताश्वः, पुं, (पृषतो मृगविशेषोऽश्व इव गतिसाधनं वाहनो वा यस्य ।) वायुः । इत्यमरटीकायां भरतः ॥

पृषती, स्त्री, (पृषत + स्त्रियां ङीप् ।) श्वेतबिन्दुयुक्ता मृगी । इति मेदिनी । ते, १३५ ॥ (यथा, रघुः । ८ । ५६ ।

"पृषतीषु विलोलमौक्षितं
पवनाधूतलतासु विभ्रमाः ॥")

पृषत्कः, पुं, (पृष्यते सिच्यते क्षिप्यते इति । पृष + अतिः । ततः संज्ञायां कन् ।) बाणः । इत्यमरः । २ । ८ । ८६ ॥ (यथा, रघौ । ७ । ३५ ।

"अर्द्धभागे परबाणलूना
धनुर्भृतां हस्तवतां पृषत्काः ॥")

पृषदश्वः, पुं, (पृषन् मृगविशेषोऽश्व इव वाहको यस्य ।) वायुः । इत्यमरः । १ । १ । ६५ ॥ (यथा, ऋग्वेदे । १ । ८७ । ४ ।

"स हि स्वसृत् पृषदश्वो युवा गणोऽया ईशानस्त्वीषिभिरावृतः ॥"

राजर्षिभेदः । यथा, महाभारते । २ । ८ । १२ ।

"वश्वः सदश्वो वध्र्यश्वः पृथुवेगः पृथुश्रवाः ।
पृषदश्वो वसुमनाः क्षुपश्च सुमहाबलः ॥"

विरूपस्य पुत्रः । यथा, भागवते । ६ । ६ । १ ।

"विरूपः केतुमान् भ्रमुरभरीषसुताश्रयः ।
विरूपात् पृषदश्वोऽभूत् ततपुत्रस्तु रथीतरः ॥")

पृषदाज्यं, क्ली, (पृषद्भिः दधिबिन्दुभिः सहितमाज्यम् ।) सदध्याज्यम् । दधिमिश्रितघृतम् । इत्यमरः । २ । ७ । २४ ॥ (यथा, ऋग्वेदे । १० । ६० । ८ ।

"तस्मादयज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशूंस्तांश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥"

"पृषदाज्यं दधिमिश्रमाज्यम् ।" इति तद्भाष्ये सायनः ॥)

पृषद्बलः, पुं, (पृषदेव बलमस्य ।) वायुः । यथा,—

"ध्रुवित्रमरुदान्दोलः कुबेरश्चामरानिलः ।
पृषद्बलस्तु वायुः कुबेरे तु प्रमोदितः ॥"

इति शब्दमाला ॥

पृषन्तिः, पुं, (पर्षतीति । पृष सेचने + अतिप्रत्ययः । निपातनात् साधुः ।) बिन्दुः । यथा,—

"पयःपृषन्तिभिः सृष्टा वान्ति वाताः घृणेः घृणेः ॥"

इति भरतधृतजाम्बवतीविजयकाव्यम् ॥

पृषभाषा, स्त्री, (पर्षतीति । पृष सेके + कः । पृषान्नतवर्षिणी भाषा यत्र ।) अमरावती । इति शब्दरत्नावली ॥

पृषाकरा, स्त्री, (पृष + भावे किप् । पृषे सेचनाय आकीर्य्यते इति । आ + कृ + अप् + टाप् । प्रातः सन्ध्यायाश्चास्या उपरि जलसेचनादेव तथात्वम् ।) क्षुद्रशिला । इति शब्दचन्द्रिका ॥ वाटखारा इति भाषा ॥

पृषातकं, क्ली, (पृषन्तं पृषदाज्यम् आतकते इतस्ततीति । तक + अच् । पृषोदरादित्वात् साधुः ।) दधियुक्तघृतम् । इति हेमचन्द्रः ॥

पृषोदरः, त्रि, पृषदुदरं यस्य । ("पृषोदरादीनि यथोपदिष्टम् ।" ६ । ३ । १०६ । इति तलोपः ।) मनीषादित्वात् तलोपः । इति दुर्गादासः ॥

"भवेदर्णागमाद्वंसः सिंहो वर्णविपर्य्ययात् ।
वर्णादेशाच्च गूढात्मा वर्णलोपात् पृषोदरः ॥"

इति गोयीचन्द्रधृतकारिका ॥

पृषोद्यानं, क्ली, क्षुद्रोपवनम् । मनीषादित्वात् पृषतस्वकारलोपः । इति सुग्धबोधटीकायां दुर्गादासः ॥

पृष्ठं, क्ली, (पृष्यते सिच्यते इति । पृष "तिथपृष्ठगूथयूथप्रोथाः ।" उणा० २ । १२ । इति थक्प्रत्ययेन निपातनात् सिद्धम् ।) शरीरपश्चाद्भागः । इत्यमरः । २ । ६ । ७८ ॥ पीठ इति भाषा ॥ (यथा, मनौ । ४ । ७२ ।

"न विगर्ह्य कथां कुर्य्यान्नहिंस्यात्कंचनं न धारयेत् ।
गवाश्वं यानं पृष्ठेन सर्व्वथैव विगर्हितम् ॥")

परममात्रम् । इति मेदिनी । ठे, ७ ॥ (स्तोत्रविशेषः । यथा, शतपथब्राह्मणे । ८ । १ । १ । ५ ।

"चित्रतस्तोमाद्रथन्तरं पृष्ठं निरमिमीत ॥")

पृष्ठग्रन्थिः, पुं, (पृष्ठस्य ग्रन्थिः ।) गण्डुः । इति हेमचन्द्रः । ३ । ४४६ ॥ कुंज इति भाषा ॥

पृष्ठतः, [स्] अव्य, (पृष्ठ + "प्रतियोगे पञ्चम्यास्तसिः ।" ५ । ३ । ४४ । इत्यस्य "आद्यादिभ्य उपसंख्यानम् ।" इति वार्त्तिकोक्त्या तसिः ।) पश्चात् । यथा, भट्टिः । १ । २४ ।

"तं पृष्ठतः प्रष्ठमियाय नम्रो
हिंस्रेषु दीप्राक्षधरः कुमारः ॥"

पृष्ठदेशे । (यथा, मनौ । ८ । ३०० ।

"पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथा तु प्रहरन् प्राप्नुयात् चौरकिल्बिषम् ॥")

पृष्ठदृष्टिः, पुं, (पृष्ठे दृष्टिर्दर्शनं यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥

पृष्ठमांसादः, त्रि, (पृष्ठे परोक्षे मांसादः इव । असमक्षमनिष्टजनकवाक्यकथनादस्य तथात्वम् ।) वाक्याभिधायी । इति त्रिकाण्डशेषः ॥ चोगोलखोर इति पारस्यभाषा । (पृष्ठमांसमत्तीति । अद् । पृष्ठमांसभक्षके, त्रि ॥)

पृष्ठमांसादनं, क्ली, (पृष्ठे परोक्षे मांसादनं मांसभक्षणमिव कीर्त्तनस्याख्यानिष्टजनकत्वात् ।) परोक्षे दोषकीर्त्तनम् । इति हेमचन्द्रः । ३ । २६५ ॥ तद्वति, त्रि ॥ (पृष्ठमांस + अद् + कर्त्तरि ल्युः । पृष्ठमांसभक्षके, त्रि ।)

पृष्ठवंशः, पुं, (पृष्ठस्य वंशः वंश इव दण्ड इत्यर्थः ।) पृष्ठास्थि । पिठेर दाँड़ा इति भाषा ॥ तत्पर्य्यायः । रीढ़कः २ । इति हेमचन्द्रः ॥ (यथा, सुश्रुते शारीरस्थाने ६ अध्याये ।

"तत्र पृष्ठवंशसुभयतः प्रतिश्रोणी काण्डमस्थिनी कटीतरुणे नाम मर्म्मणी ।") स तु मासमात्रेण भवति । इति सुखबोधः ॥

पृष्ठवाट्, } [ह्] पुं, (पृष्ठं युगपार्श्वं वहतीति । वह + क्विप् ।) युगपार्श्वगतवृषः । पाँटे बाँधा गरु इति भाषा । इत्यमरः ॥ (पृष्ठं पृष्ठभागं वहतीति । वह + क्विप् । पश्चाद्भागवाहकः । यथा, हरिवंशे भविष्यपर्व्वणि । ५५ । ३१ ।

"दारुकं पृष्ठवाहन्तु कृत्वा केशव ईश्वरः ।

आग्नेयमस्त्रं संयोज्य शरे कस्मिंश्चिदीश्वरः।
अनेनं त्वां दहाम्यद्य यदि शक्तोऽसि वारय ॥") पृष्ठवाह्यः, पुं, (पृष्ठे वाह्यं वहनीयद्रव्यमस्य।) भारवाहकवृषः। तत्पर्य्यायः। स्थौरी २ पृष्ठ्यः ३। इति हेमचन्द्रः। ४। ३२६ ॥

पृष्ठभङ्गः, पुं, (पृष्ठे भङ्गमस्य। भङ्गस्य वक्रभावेन पृष्ठगमनात् तथात्वम्।) वनच्छागः। इति हेमचन्द्रः। ४। ३४४ ॥

पृष्ठभङ्गी, [न्] पुं, (पृष्ठे भङ्गमिव अस्यास्तीति। भङ्ग+इनिः।) भीमसेनः। नपुंसकम्। महिषः। इति मेदिनीशब्दरत्नावल्यौ ॥

पृष्ठोदयः, पुं, (पृष्ठेनोदयोऽस्य।) मेषवृश्चिककर्कटधनुर्मीनकरमीनलग्नाः। यथा, ज्योतिस्तत्त्वे।
"अजो गोपतियुग्मञ्च कर्किंधन्विन्मृगास्तथा।
निशासंज्ञाः क्षताख्येते शेषाश्चान्ये दिनात्मकाः ॥
निशासंज्ञा विमिथुनाः क्षताः पृष्ठोदयास्तथा।
शेषाः शीर्षोदया ज्ञेते मौनाद्योभयसंज्ञकः ॥"

पृष्ठ्य, क्ली, (पृष्ठानां स्तोत्रविशेषाणां समूह इति। पृष्ठ+"ब्राह्मणमाणववाड्वाद् यत्।" ४। २। ४२। इत्यस्य "पृष्ठाद्दुपसंख्यानम्।" इति वार्त्तिकोक्त्या यत्।) पृष्ठानां समूहः। इत्यमरः। ३। २। ४२ ॥

पृष्ठ्यः, पुं, (पृष्ठेन वहतीति। पृष्ठ+यत्।) पृष्ठेन भारवाहकाश्वः। तत्पर्य्यायः। स्थौरी २। इत्यमरः। २। ८। ४६ ॥ (यथा, महाभारते। १। २२२। ४६।
"पृष्ठ्यानामपि चाश्वानां वाजिकानां जनार्द्दनः।
ददौ शतसहस्राणि कन्याधनमनुत्तमम् ॥"
धारके, त्रि। यथा, ऋग्वेदे। ४। ३। १०।
"ऋतेन हि ष्मा वृषभश्चिदक्तः
पुमाँ अग्निः पयसा पृष्ठ्येन ॥"
"पृष्ठ्येन धारकेण पयसाक्तः।" इति तद्भाष्ये सायनः ॥)

पृष्ण्यः, त्रि, (पृश्निः। पृषोदरादित्वात् साधुः।) प्रश्निः। इत्यमरटीकायां भरतः ॥ पार्श्ण्यः। तत्र स्त्रीलिङ्गः। इत्युणादिकोषः ॥

पॄ, क पूर्त्तौ। इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट्।) क, पारयति। इति दुर्गादासः ॥

प, त्रि गि लि पालने। पूर्त्तौ। इति कविकल्पद्रुमः ॥ (क्रया०-क्रा०च-पर०-सक०-सेट्।) त्रि, पूर्त्तोऽस्ति। स्फायीतिदित्यत्र पूर्वग्रहणान्न निष्ठातस्य नः। गि, पृणाति। स्त्री तु पूर्णिरित्येव मनीषादित्वान्न निः। लि, पिपर्त्ति। इति दुर्गादासः ॥

पेचकः, पुं, (पचति पच्यते वा। पच+"पचिमथोरिच्च।" उणा० ५। ३७। इति वुन्। उपधाया अत इत्वच्च।) पक्षिविशेषः। पेंचा इति भाषा। तत्पर्य्यायः। उलूकः २ वायसारातिः ३। इत्यमरः। २। ५। १५ ॥ शुक्राक्षः ४ दिवान्धः ५ वक्रनासिकः ६ हरिनेत्रः ७ दिवाभीतः ८ नखाग्नी ९ पीयुः १० घर्घरः ११ काकभीरुः १२ नक्तचारी १३। इति त्रिकाण्डशेषः ॥ निशाचरः १४ कौशिकः १५ रूपनाशनः १६ पेचः १७ रक्तनासिकः १८ भीरुकः १९। इति शब्दरत्नावली ॥ करियुच्छ्मूलोपान्तः। गुदाच्छादकमांसपिण्डविशेषः। इत्यमरः। ३। ३। ६ ॥ पर्य्यङ्कः। यूकः। इति विश्वः ॥ मेघः। इति शब्दरत्नावली ॥

पेचकी, [न्] पुं, (पेचकोऽस्यास्तीति। पेचक+इनिः।) हस्ती। इति शब्दरत्नावली ॥

पेचिलः, पुं, (पच+बाहुलकात् इलच् अत इत्वच्।) हस्ती। इति त्रिकाण्डशेषः ॥

पेचु, क्ली, (पच्यते इति। पच+उनु। अत इत्वच्।) पेचुलौ। इति त्रिकाण्डशेषः ॥

पेचुली, स्त्री, (पच्यते इति। पच+उलच्। अत इत्वं गौरादित्वात् ङीष्।) शाकभेदः। कचु इति ख्यातः। यथा,—
"केचुकं पेचुली पेचु नाड़ीचौ विश्वरोचनः ॥"
इति त्रिकाण्डशेषः ॥

पेटः, पुं, (पेटतीति। पिट+अच्।) प्रहसनः। इति राजनिर्घण्टः ॥ पेटके, क्ली। इत्यमरः। २। १०। ३० ॥

पेटकः, पुं, (पेटतीति। पिट+ण्वुल्।) वंशवेत्रादिमयसमुद्गकप्रायः। पेटारी इति पेटी इति पेड़ा इति च ख्यातः। तत्पर्य्यायः। पिटकः २ पेड़ा ३ मञ्जूषा ४। इत्यमरः। २। १०। ३० ॥ आद्यौ स्वल्पपेटिकायाम्। परौ महापेटिकायामिति स्वामी ॥ समूहः। इति मेदिनी। के, ११७॥

पेटाकः, पुं, (पेटक+पृषोदरादित्वात् साधुः।) पेटकः। इति भरतहृदयकोषः ॥

पेटिका, स्त्री, (पिटतीति। पिट+ण्वुल्। कापि अत इत्वम्।) वृत्तविशेषः। पेटारि इति भाषा। तत्पर्य्यायः। कुवेराक्षी २ कुलिङ्गाक्षी ३ क्षुद्रवृन्तिका ४। इति रत्नमाला ॥ (यथा,—
"पेटिकामूललेपाच्च योनिर्भिन्ना प्रशाम्यति ॥"
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे ॥)

पेटी, त्रि, (पेट+गौरादित्वात् ङीष्।) पेटकः। इत्यमरः। २। १०। ३० ॥

पेड़ा, स्त्री, (पेटा। पृषोदरादित्वात् साधुः।) मञ्जूषा। महापेटिका। इत्यमरभरतौ ॥

पेण, ऋ पेणे। गतौ। श्रेणे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-श्रेणे अक०-सेट्।) ऋ, अपिपेणत्। अपिपेणतुः। इति दुर्गादासः ॥

पेत्वं, क्ली, (पीयते इति। पा पाने+"अन्येभ्योऽपि दृश्यन्ते।" उणा० ४। १०५। इति इत्वन्।) अम्लतम्। घृतम्। इत्युणादिकोषः ॥ (पुं, पतनशीलः पशुः। छागः। यथा, वाजसनेयसंहितायाम्। २६। ५८।
"सावित्रो धारुणः क्षया एकशितिपात् पेत्वः ॥"
"पेत्वः पतनशीलो वेगवान् पशुः ॥" इति तद्भाष्ये महीधरः ॥ तथाच ऋग्वेदे। ७।१८।१७।
"सिंह्रं चित् पेत्वेना जघान ॥"
"पेत्वेन छागेन जघान घातयामास।" इति तद्भाष्ये सायनः ॥)

पेयं, क्ली, (पीयते यदिति। पा पाने+कर्म्मणि यत्। "ईदूयति।" ६। ४। ६५। इति आत ईत् ततो गुणः।) जलम्। इति मेदिनी। ये, ३६ ॥ दुग्धम्। इति शब्दचन्द्रिका ॥ अष्टविधान्नान्तर्गतान्नविशेषः। यथा,—
"भोज्यं पेयं तथा चूष्यं लेह्यं खाद्यञ्च चर्व्वणम्।
निष्पेयञ्चैव भक्ष्यं स्यादन्नमष्टविधं स्मृतम् ॥"
इति राजनिर्घण्टः ॥
पातव्ये, त्रि। इति मेदिनी। ये, ३६ ॥ (यथा, महाभारते। १४। ४४। १०।
"सर्व्वेषां भक्ष्यभोज्यानामन्नं परममुच्यते।
द्रवाणाञ्चैव सर्व्वेषां पेयानामप उत्तमाः ॥")

पेया, स्त्री, (पीयते इति। पा+यत्। ततष्टाप्।) सिक्थसमन्वितपेयद्रव्यम्। अस्या गुणाः।
"पेया स्रोदाग्निजननी वातवर्च्चोऽनुलोमनी।
क्षुत्तृष्णाग्लानिदौर्ब्बल्यकुक्षिरोगविनाशिनी ॥"
इति राजवल्लभः ॥
मिश्रेया। इति शब्दचन्द्रिका ॥ आशा। अच्छमद्यम्। इति मेदिनी। ये, ३६ ॥

पेयूषः, पुं, क्ली, (पीय पाने+"पीयेरूषन्।" उणा० ४। ७६। इति ऊषन् बहुलवचनात् गुणः।) अभिनवं पयः। इत्यमरः ॥ नवप्रसूताया गोः सप्तदिनाभ्यन्तरीणदुग्धम्। यथा,
"आसप्तरात्रप्रभवं क्षीरं पेयूष उच्यते ॥"
इति हारावली ॥
"पीयते पेयूषः पीङ् पाने नान्नीति यूषः स्मृङ्न्यन्तः क्लीवञ्च। पीयूषञ्च अथ पीयूषपेयूषे नवं सप्तदीनावधीति शब्दार्णवः ॥" इति तट्टीकायां भरतः ॥ (यथा, मनुः। ५। ६।
"शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत् ॥")
अम्लतम्। अभिनवसर्पिः। इत्युणादिकोषः ॥

पेरुः, पुं, (पीयते रसानिति। पीङ् पाने+"मिपीभ्यां रुः।" उणा० ४। १०१। इति रुः।) वह्निः। सूर्य्यः। इत्युणादिकोषः ॥ समुद्रः। इति त्रिकाण्डशेषः ॥ (त्रि, रक्षकः। यथा, ऋग्वेदे। ६। ७४। ४।
"नरो हितमवसेहन्ति पेरवः ॥"
"नरो नेतारः पेरवः। पा रक्षणे। सापेरिलि रुन्निति रुनुप्रत्ययः। सर्व्वस्य रक्षकाः।" इति तद्भाष्ये सायनः ॥ पूरकः। यथा, ऋग्वेदे। ५। ८४। २।
"प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ॥")

पेरोजं, क्ली, उपरत्नविशेषः। पीरोजा इति यवनभाषा। तत्पर्य्यायः। हरिताश्मम् २ पेरुजम् ३। तद्विविधम्। भस्माङ्गं हरितञ्च। तस्य गुणाः।
"पेरुजं सुकषायं स्याद्गुरु दीपनं परम्।
स्थावरं जङ्गमञ्चैव संयोगाच्च यथा विषम् ॥
तत् सर्व्वं नाशयेत् शीघ्रं शूलभूतादिदोषजम् ॥"

पाठान्तरं यथा,—
"पित्तं सुकषायं स्यान्मधुरं दीपनं हयोः।
स्यावरादिविषघ्नं स्याद्धरितञ्चापरं गुरु॥
शीताङ्गं नाशयेच्छीघ्रं शूलं तिमिरभूतजम्॥"
इति राजनिर्घण्टः।

पेल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-चाले अक०-गतौ सक०-सेट्।) ऋ, अपिपेलत् पिपेलतुः। चालः कम्पः। इति दुर्गादासः॥

पेलं, क्ली, (पेलति सदा चलतीति। पेल+अच्।) अण्डकोषः। इति हेमचन्द्रः। ३। २०५॥

पेलवं, त्रि, (पेलं कम्पनं वातीति। वा+कः।) विरलम्। अत्र सावकाशत्वं प्रकारः। इत्यमरभरतौ॥ क्षुद्रः। इति हेमचन्द्रः। ३। ११३॥ कोमलम्। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। ५। ४।
"यदं सचेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः॥")

पेव, ऋ ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अपिपेवत। ङ, पेवते। इति दुर्गादासः॥

पेशलः, त्रि, (पिश अवयवे+भावे घञ्। पेशं जातीति। ला+कः। यद्वा, पेशोऽस्यास्तीति। सिध्मादित्वात् लच्।) चारुः। (यथा, देवीभागवते। ५। ६। ५६।
"महिषस्य वचः श्रुत्वा पेशलं मन्त्रिसत्तमः।
जगाम तरसा कामं गजाश्वरथसंयुतः॥")
सुन्दरः। (यथा, रघुः। ६। ४०।
"युवतयः कुसुमं दधुराहितं
तदलके दलकेसरपेशलम्॥")
दक्षः। चतुरः। कोमलः। इत्यमरभरतौ॥ (यथा, सुकुन्दमालायाम्। २१।
"इदं शरीरं परिणामपेशलं
पतत्यवश्यं श्लथसन्धि जर्जरम्।
किमौषधैः क्लिश्नसि मूढ़ दुर्मते!
निरामयं कृष्णरसायनं पिब॥")
धूर्तः। इति शब्दरत्नावली॥

पेशस्कृत्, पुं, (पेशो रूपान्तरं करोतीति। पेशस्+क+क्विप्। "दृक्षस्य पितिकृति तुक्।" ६। १। ७१। इति तुगागमः। अनेन गृहीतस्य कीटस्य रूपान्तरं भवति इत्यतोऽस्य तथात्वम्।) कीटविशेषः। कुमिरके इति भाषा। यथा,—
"कीटः पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः।
याति तत्साम्यतां राजन्! पूर्वरूपमसंत्यजन्॥"
इति श्रीभागवते। ११। ९। २३॥

पेशिः, पुं, (पिश+"कृपिशीति।" उणा० ४। ११८। इति इन्।) शतकोटिः। इत्युणादिकोषः॥ अस्त्रे माधविदले च स्त्री। इति संक्षिप्तसारे कृदन्तपादः॥

पेशी, स्त्री, (पिश+इन्। वा ङीष्।) अस्त्रम्। इत्यमरः। २।५।३७॥ (गर्भावेष्टनचर्म्ममयकोषः। यथा, सुश्रुते। २। २६।
"धमनीस्रोतोऽस्थितद्विवरपेशीप्रभृतिषु वा शरीरप्रदेशेषु॥") सपक्वकलिका। (यथा, सुश्रुते उत्तरतन्त्रे। ४० अध्याये।
"मधुकं विल्वपेश्यश्च शर्करामधुसंयुताः।
अतीसारं निहन्त्युच्चैः शालीषष्टिकयोः कणाः॥")
मांसी। खड्गपिधानकम्। मांसपिण्डी। इति मेदिनी। शे, १२॥ (यथा, महाभारते। १। ११५। १२।
"तां स मांसमयीं पेशीं ददर्श जपतां वरः॥"
(अस्याः संख्यावस्थानादयो यथा,—
"पञ्च पेशीशतानि भवन्ति। तासां चत्वारिंशतानि शाखासु। कोष्ठे षट्षष्टिः। ग्रीवां प्रत्यूर्द्ध्वचतुस्त्रिंशत्। एकैकस्यान्तु पादाङ्गुल्यां तिसृष्वसृक्षाः पञ्चदश। दश प्रपदे। पार्ष्णेरुपरि कूर्चसन्निविष्टास्तावत्य एव। दश गुल्फतलयोः। गुल्फजानून्तरे विंशतिः। पञ्च जानुनि। विंशतिरूरौ। दश वङ्क्षणे। शतमेवमेकस्मिन् सक्थि भवन्ति। एतेनेतरसक्थि बाहू च व्याख्यातौ। तिस्रः पार्श्वौ। एका मेढ्रे। सेवन्याश्चापराः। द्वे वृषणयोः। स्फिचोः पञ्च पञ्च। द्वे वस्तिशिरसि। पञ्चोदरे। नाभ्यामेका। एष्ठोर्द्वे संनिविष्टाः पञ्च पञ्च दीर्घाः। षट् पार्श्वयोः। दश वक्षसि। अक्षकास्थौ प्रति समन्तात् सप्त। द्वे हृदयामाशययोः। षट् यकृत्प्लीहोण्डुकेषु॥ ग्रीवायाश्चतस्रः। अष्टौ हन्वोः। एकैका काकलकगलयोः। द्वे तालुनि। एका जिह्वायाम्। ओष्ठयोर्द्वे। घोणायां द्वे। द्वे नेत्रयोः। गण्डयोश्चतस्रः। कर्णयोर्द्वे। चतस्रो ललाटे। एका शिरसीत्येवमेतानि पञ्च पेशीशतानि। सिरास्नायुस्त्रिपर्व्वाणि सन्धयश्च शरीरिणाम्। पेशीभिः संवृतान्यत्र बलवन्ति भवन्ति यतः॥ स्त्रीणान्तु विंशतिरधिकाः। दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च यौवने तासां परिदृढ़ाः। अपत्यपथे चतस्रस्तासां प्रहर्षेऽभ्यन्तरतो द्वे सखाश्रिते वाह्ये च प्रहर्षे द्वे। गर्भाच्छिद्रसंश्रितास्तिस्रः। शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव। पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति। तासां बहलपेलवस्थूलाण्वृजुवृत्तह्रस्वदीर्घस्थिरश्लक्ष्णकर्कशभावाः सन्धिस्थिरास्नायुप्रच्छादका यथादेशं स्वभावत एव भवन्ति॥ भवति चात्र।
पुंसां पेश्यः पुरस्तादाः प्रोक्ता लक्षणसंख्यतः।
स्त्रीणामाहृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः॥"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये।) नदीभेदः। पिशाचीविशेषः। राक्षसीविशेषः। इति शब्दरत्नावली॥ (वाद्यविशेषः। यथा, महाभारते। ६। ४२। ३।
"तथा भेर्यश्च पेश्यश्च ककचा गोविषाणिकाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥")

पेषणं, क्ली, पिषधातोर्भावे ल्युट्प्रत्ययनिष्पन्नम्। चूर्णनम्। (यथा, मार्कण्डेये। १४। ८७।
"अयं कृतघ्नो मित्राणामपकारी सुदुर्म्मतिः।
तप्तकुम्भे निपतति ततो यास्यति पेषणम्॥") खलम्। घृतगुग्गा। इति शब्दचन्द्रिका॥ तेकाँटासिज इति भाषा॥

पेषणिः, स्त्री, (पिष्यतेऽनयेति। पिष+करणे अनिः। वा ङीष्।) पेषणशिला। शिल इति भाषा। तत्पर्य्यायः। पेषणी २ षट्टः ३ शृङ्गाला ४ शृङ्गकच्छपः ५। इति शब्दरत्नावली॥ (यथा, मनुः। ३। ६८।
"पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्॥")

पेषलः, त्रि, (पेषोऽस्यास्तीति। पेष+सिध्मादित्वात् लच्।) पेशलः। इत्यमरटीकायां भरतरमानाथौ॥

पेषाकः, पुं, (पिष+आकन्।) पेषणिः। इत्युणादिकोषः॥

पेस, ऋ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अपिपेसत् पिपेसतुः। इति दुर्गादासः॥

पेसलः, त्रि, (पेशलः। एषोदरादित्वात् शस्य सत्वम्।) पेशलः। इत्यमरटीकायां भरतः॥

पै, शोधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) पायति ध्मात्यमतपेन। इति दुर्गादासः॥

पैङ्गूषः, पुं, (पिङ्गूषे साधुः। अण्।) कर्णः। इति हेमचन्द्रः। ३। २३७॥

पैठरं, त्रि, (पिठरे संस्कृतं पक्वम्। पिठर+अण्।) स्थालीपक्वमांसादि। इत्यमरः। २। ६। ४५॥ (यथा, गो० रामायणे। २। १००। ६३।
"प्रतप्तैः पैठरैश्चैव मार्गमायूरतैत्तिरैः॥")

पैठीनसिः, पुं, मुनिविशेषः। स च स्मृतिगोत्रयोः कारकः। इति पुराणम्॥

पैण्डिन्यं, क्ली, (पिण्डं परपिण्डं भक्षयतीत्यस्येति। पिण्ड+इन्। ततः ष्यञ्।) भैक्षजीविका। इति त्रिकाण्डशेषः॥

पैतामहं, त्रि, (पितामहस्येदम्। पितामह+"तस्येदम्।" ४।३।१२०। इत्यण्।) पितामहसम्बन्धिधनादि। यथा, कात्यायनः।
"पैतामहञ्च पित्र्यञ्च यच्चान्यत् स्वयमर्জ্জितम्।
दायादानां विभागेषु सर्व्वमेतद्विभज्यते॥"
बृहस्पतिः।
"पैतामहं धृतं पित्रा स्वशक्त्या यदुपार्জ্জितम्।
विद्याशौर्य्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतम्॥"
इति दायभागः॥

पैटकं, त्रि, (पितुरागतं पितुरिदं वेति। पिट+ठञ्।) पिटसम्बन्धि। इति शब्दमाला॥ यथा, मनुः।
"ऊर्द्धं पितुश्च मातुश्च समेत्य भ्रातरः समम्।
भजेरन् पैटकं रिक्थमनीशास्ते हि जीवतोः॥"
मनुविष्णू।
"पैटकन्तु यदा द्रव्यमनवाप्तमवाप्नुयात्।
न तत् पुत्रैर्भजेत् सार्द्धमकामः स्वयमर्জ্জितम्॥"

पैठीनसिः।
"पैठके विभज्यमाने दायाद्ये समो विभागः॥"
नारदः।
"ग्रौर्ध्वभार्याधने हित्वा यच्च विद्याधनं भवेत्।
त्रीण्येतान्यविभाज्यानि प्रसादो यच्च पैठकः॥"
इति दायभागः॥

पैठकभूमिः, स्त्री, (पैठकी पिष्टसम्बन्धिनी भूमिः।) पिष्टसम्बन्धिस्थानम्। तस्या माहात्म्यं यथा,—
श्रीभगवानुवाच।
"भवांश्च यादवैः सार्द्धं प्रविश्य द्वारकापुरीम्।
मत्पित्रा मातृभिः सार्द्धं माहेन्द्रे च क्रतौ नृप!॥
उग्रसेन उवाच।
वासुदेव न यास्यामि भूमिं तां पैठकीं पुनः।
सर्व्वतीर्थपरां शुद्धां दैवे कर्म्मणि पैठके॥
पारक्ये भूमिदेशे च पितॄणां निर्व्वपेत्तु यः।
तद्भूमिस्वामिपिण्डैः श्राद्धकर्म्म निहन्यते॥
पितॄणां निष्फलं श्राद्धं देवानामपि पूजनम्।
किञ्चित्फलप्रदश्चैव सम्पूर्णं पैठके स्थले॥
पुत्रपौत्रकलत्रेभ्यः प्राणेभ्यः प्रेयसी सदा।
दुर्ल्लभा पैठकी भूमिः पितुर्मातुर्गरीयसी॥
तत् स्नात्वा च पवित्रे च दैवे कर्म्मणि पैठके।
क्रीतेन तप्तते दानं परदत्तमशुद्धकम्॥
स्त्रियते पैठकीभूम्यां तीर्थतुल्यफलं लभेत्।
गङ्गाजलसमं पूतं पिष्टखातोदकं हरे॥
तत्र स्नात्वा जले पूते गङ्गास्नानफलं लभेत्।
पितॄणां तर्पणं तत्र पवित्रं देवपूजनम्॥
पैठकी जन्मभूमिश्चेत् फलं तद्विगुणं लभेत्।
पैठकीभूमितुल्या च दानभूमिः सतामपि॥"
इति ब्रह्मवैवर्त्ते श्रीदुर्गाजन्मखण्डे १०३ अध्यायः॥

पैठश्वसेयः, पुं, स्त्री, (पिष्टश्वसुरपत्यमिति। पिष्टश्वश्र+"ढक्कि लोपः।" ४।१।१३३। इति ज्ञापकत्वात् ढक् अन्तलोपश्च।) पिष्टभगिनीपुत्रः। इत्यमरः। २।६।२५॥ पिस्तुतभाइ इति भाषा॥ (स्त्रियां ङीप्। पिष्टभगिनीपुत्री। यथा, मनुः। ११।१७२।
"पैठश्वसेयीं भगिनीं स्वसीयां मातुरेव च।
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणं चरेत्॥")

पैठश्वसेयः, पुं, स्त्री, (पिष्टश्वसुरपत्यमिति। "पिष्टश्वसुश्छण्।" ४।१।१३२। इति छण्।) पिष्टभगिनीपुत्रः। इत्यमरः। २।६।२५॥ पिस्तुत भाइ इति भाषा॥

पैत्तः, त्रि, (पित्तात् आगतं पित्तस्य शमनं कोपनं वेति। पित्त+अण्।) पित्तव्याधिः। इति राजनिर्घण्टः॥ (यथा, माधवनिदाने गुल्माधिकारे।
"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्रोधातिमद्याकुहुताशसेवा।
आमाभिघातो रुधिरञ्च दुष्टं
पैत्तस्य गुल्मस्य निमित्तमुक्तम्॥")

पैत्तिकः, त्रि, (पित्तेन निर्वृत्त इति। पित्त+ठञ्।) पित्तव्याधिः। इति राजनिर्घण्टः॥ (यथा, चरके चिकित्सास्थाने २२ अध्याये।
"प्रततं कासमानञ्च ज्योतींषीव च पश्यति।
श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पैत्तिके॥")

पैत्रं, क्ली, (पितुरिदमिति। पितृ+अण्) पितृतीर्थम्। अङ्गुष्ठतर्ज्जन्योर्मध्यम्। इत्यमरः। २।७।५१॥ पितृसम्बन्धिनि, त्रि। (यथा, महाभारते। ७।१६६।७१।
"ऐन्द्रं याम्यं वारुणं वैत्तपात्र्यं
पैत्रं त्वाष्ट्रं कर्म्म सौम्यञ्च तुभ्यम्।
रूपं ज्योतिः शब्दमाकाशवायुः
स्पर्शः खाद्यं सलिलं गन्ध उर्व्वी॥")

पैत्राहोरात्रः, पुं, (पैत्रः अहोरात्रः।) पितृलोकस्य दिवारात्रिः। स तु मनुष्यमाने मासेकेन भवति। यथा—
"मासेन स्यादहोरात्रः पैत्रो वर्षञ्च दैवतः॥"
इत्यमरः। १।४।२१॥

पैलः, पुं, (पीलाया अपत्यमिति। पीला+"पीलाया वा।" ४।१।११८। इति अण्।) मुनिविशेषः। स च ऋग्वेदी यथा,—
"तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः।
वैशम्पायन एवैको निष्णातो यजुषामुत॥
अथर्ब्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः।
इतिहासपुराणानां पिता मे रोमहर्षणः॥"
इति श्रीभागवते १ स्कन्धे ४ अध्यायः॥

पैशाचः, पुं, (पिशाचस्यायमिति। पिशाच+अण्।) अष्टप्रकारविवाहान्तर्गताष्टमविवाहः। यथा याज्ञवल्क्यः। "पैशाचः कन्यका छलात्।" छलमाह मनुः। ३।३४।
"सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।
स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः॥"
इत्युदाहृतत्वम्॥
पिशाचसम्बन्धिनि, त्रि॥ (राजसकायान्तर्गतकायविशेषः। तल्लक्षणं यथा,—
"उच्छिष्टाहारता नैत्यं साहसप्रियता तथा।
स्त्रीलोलुपत्वं नैर्लज्ज्यं पैशाचकायलक्षणम्॥"
इति सुश्रुते शारीरस्थाने चतुर्थोऽध्यायः॥)

पैशुन्यं, क्ली, (पिशुनस्य भावः। पिशुन+ब्राह्मणादित्वात् ष्यञ्।) पिशुनता। खलता। तच्च दशविधपापान्तर्गतवाङ्मयपापविशेषः। इति तिथितत्त्वम्॥ यथा,—
"पैशुन्यं साहसं द्रोह ईर्षासूयार्थदूषणम्।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥")
इति मनौ। ६। ४८॥
अस्य विवरणं मातृकाग्रन्थे द्रष्टव्यम्॥

पैष्टः, त्रि, (पिष्टस्येदमिति। पिष्ट+अण्।) पिष्टसम्बन्धी। यथा,—
"यद्यपदन्तकः पूषा पैष्टमत्ति सदा चरुम्।
अमोघैश्वरणामान्यात्तच्छुलोऽत्र विधीयते॥"
इति तिथ्यादितत्त्वम्॥

पैष्टिकं, क्ली, (पिष्ट+ठञ्।) पिष्टानां समूहः। इति आपूपिकशब्दटीकायां भरतः॥ मद्यविशेषः। यथा। रूक्षमाध्वीकादिजनिते मद्यत्वये स्निग्धपैष्टिकादि न्यूनं मद्यं हेतुविपरीतमेव॥ इति विजयरक्षितः॥ (यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।
"प्रालला: श्लेष्मजनना: शुष्कुल्य: कफपित्तला:।
वौर्य्योष्णा: पैष्टिका मद्या: कफपित्तप्रकोपना:॥")

पैष्टी, स्त्री, (पिष्टेन निर्वृत्तेति। पिष्ट+अण्+ङीप्।) विविधधान्यविकारजा मदिरा। तस्या गुणाः।
"पैष्टी कट्वम्लतीक्ष्णा स्यादीषद्गौड़ीसमापरा।
वातहृत् कफशुक्रौषधित्तकृच्छ्रोहनी च सा॥"
इति राजनिर्घण्टः॥
(यथा च हारीते प्रथमे स्थाने एकादशेऽध्याये।
"गौड़ी माध्वी तथा पैष्टी निर्य्यासा कथिता-
परा।
इति चतुर्व्विधा ज्ञेया: सुरास्तासां प्रभेदका:॥"
"पैष्टी सन्दीपनी रुच्या कफशुक्रहातनाग्निनी।
पित्तला पाण्डुरोगघ्नी कारिणी बहुधा
मता॥")

पोगण्डः, पुं, (पुनातीति। पू+विच्। पौः शुद्धो गण्डो यस्य।) दशवर्षीयबालकः। यथा,—
"रोगी वृद्धस्तु पोगण्डः कुर्व्वन्त्यन्योव्रतं सदा॥"
इति प्रायश्चित्ततत्त्वे ब्रह्मपुराणम्॥

पोगण्डः, त्रि, (पौः गण्ड एकदेशोऽस्य।) अपोगण्डः। स्वभावतो न्यूनाधिकाङ्गः। ऊनविंशत्यङ्गुलीकेकविंशत्यङ्गुलीकादिजनः। यथा। पोगण्डो विकलाङ्गे स्यादिति हलायुधः। पोगण्डो विकलाङ्गकः। इति रत्नकोषः। इत्यमरटीकायां भरतः॥

पोटः, पुं, (पुटत्यनेति। पुट संश्लेषे+आधारे घञ्।) वेश्मभूमिः। इति जटाधरः॥ (पुटश्लेषे+भावे घञ्।) संश्लेषः। इति पोटगलग्रन्थटीकायां भरतः॥

पोटगलः, पुं, (पोटेन संश्लेषेण गलतीति। गल+अच्।) नलः। काशः। इत्यमरः। २।४।१६२॥ (अस्य पर्य्यायो यथा,—
"पोटगलो दृढत्काशः काकेक्षुः स च खड्गकः॥"
इति वैद्यकरत्नमालायाम्॥)
मत्स्यः। इति मेदिनी। ले, १५०॥ (सर्पजात्यन्तर्गतवैकरञ्जसर्पप्रभेदः॥ "राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः।" इति सुश्रुते कल्पस्थाने चतुर्थोऽध्याये॥)

पोटलिका, स्त्री, (पोटेन संश्लेषेण लीयते इति। ली+डः। ततः स्वार्थे कन् टाप् अत इत्वञ्च।) संश्लिष्टवस्त्रादि। इति केचित्॥ पुँटुलि इति भाषा॥

पोटा, स्त्री, (पुटति स्त्रीपुरुषरूपं संश्लिष्यतीति। पुट+अच्। टाप् च।) स्त्रीपुंसलक्षणा। इत्यमरः। २।६।१५॥ स्त्रीपुंसयोर्लक्षणं चिह्नं स्तनश्मश्रुादिरूपं यस्यां सा। इति भरतः॥

पोटिकः, पुं. (पोटः संज्ञोघोऽस्यस्येति ठन् ।) विस्फोटकः । इति केचित् ॥ (विस्फोटकशब्दे-ऽस्य विवृतिर्ज्ञातव्या ॥)

पोट्टली, स्त्री, (पोटेन संश्लेषेण लीयते इति । ली+डः । पृषोदरादित्वात् साधुः । ङीप् ।) पोट्टलिका । वस्त्रबद्धद्रव्यम् । पुँटुलि इति भाषा । यथा,—

"शुद्ध्यर्थं त्रिफलाकाथे गुडुच्याः काथ एव वा ।
दोलायन्त्रे पुरः पाच्यः पोट्टल्या वस्त्रबद्धया ॥"
इति वैद्यकम् ॥

पोडुः, पुं, (पुड्यतीति । पुड्+उन् ।) कपालास्थितलम् । इति राजनिर्घण्टः ॥

पोतः, पुं. स्त्री, (पुनातीति । पू+"इसिम्थिग्-वामिदमिलूपूधूविभ्यस्तन् ।" उणा० ३ । ८६ । इति तन् ।) शिशुः । इत्यमरः । २ । ५ । ६८ ॥ (यथा, कथासरित्सागरे । १२ । १३३ ।

"तत्रस्थात् स्वर्णमूलाख्याद् गिरेः संप्रेष्य राघवान् ।
आनाययत् पक्षिपोतं गरुड़ान्वयसम्भवम् ।")

पोतः, पुं (पुनाति इति । पू+"इसीतिः" उणा० ३ । ८६ । इति तन् ।) वहित्रम् । गृहस्थानम् । पोता इति भाषा । वस्त्रम् । इति मेदिनी । ते, ३७ । द्रव्यवर्धोपहस्ती । इति हेमचन्द्रः ॥ समुद्रयानम् । जाहाज इति भाषा ॥ (यथा, देवीभागवते । १ । ३ । ४२ ।

"सम्प्राप्य मानुषभवं सकलाङ्गयुक्तं
पोतं भवार्णवजलोत्तरणाय कामम् ।
सम्प्राप्य वाचकमहो न भजोति मूढः
सो वञ्चितोऽत्र विधिना सुहृदं पुराणम् ॥")

यथा,—

"समुद्रयाने रत्नानि महामौल्यानि साधुभिः ।
रत्नपारीक्षकैः सार्द्धमानयित्वे बहूनि च ॥
सुखेन सह संप्राप्तो महान्तं लवणार्णवम् ।
पोतारूढास्ततः सर्व्वे पोतवाहैरुपासिताः ।
अपारे दुस्तरेऽगाधे यान्ति वेगेन नित्यशः ॥"
इति वाराहे गोकर्णमाहात्म्याध्यायः ॥

पोतकी, स्त्री, (पोत इवेति । पोत+इवार्थे कन् । स्त्रियां ङीप् ।) पूतिका । इति शब्दमाला ॥ (अस्याः पर्य्यायो गुणाश्च यथा,—

"पोतक्युपोदिका सा तु मालवाग्नतवल्लरी ।
पोतकी शीतला स्निग्धा श्लेष्मला वातपित्तजुत् ॥
अकण्ड्या पित्तिला निद्रासुक्रदा रक्तपित्तजित् ।
बलदा रुचिकृत् पथ्या दृंहणी लघ्वि कारिणी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) श्यामापत्री । इति राजनिर्घण्टः ॥

पोतजः, पुं, (पोतः सन् न तु डिम्बादिरूप इति भावः । जायते इति । जन+डः ।) कुञ्जरादिः । यथा, हेमचन्द्रः । ४ । ४२१ ।

"अण्डजाः पक्षिसर्पाद्याः पोतजाः कुञ्जरादयः ॥"

पोतवणिक्, पुं, (पोतेन वणिक् ।) वहित्रेण वाणिज्यकर्त्ता । नौवाणिज्यकरः । तत्पर्य्यायः । सांयात्रिकः २ । इत्यमरः । १ । १० । १२ । समुद्रयानचारी ३ । इति जटाधरः ॥ नौवाणिज्यकरः ४ । इति शब्दरत्नावली ॥

पोतरथः, पुं. (पोतं रथतीति । रथ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) केनिपातकः । इति शब्दमाला ॥ हालि इति भाषा ॥

पोतलकप्रियः, पुं, (पोतलकः पर्व्वतविशेषः प्रियोऽस्य ।) बुद्धविशेषः । इति त्रिकाण्डशेषः ॥

पोतवाहः, पुं, (पोतं नावं वहतीति । वह+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) वहित्रवाहकः । हाँड़ि इति भाषा । तत्पर्य्यायः । नियामकः २ । इत्यमरः । १ । १० । १२ ॥

पोता, [ऋ] पुं, (पुनातीति । पू+"नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।" उणा० २ । ९६ । इति तृन्प्रत्ययेन निपात्यते ।) विष्णुः । इति संक्षिप्तसारोणादिवृत्तिः ॥ ऋत्विक् । इति भूरिप्रयोगः ॥ (यथा, ऋग्वेदे । ४ । ६ । ३ ।

"स सद्म परि णीयते होता मन्द्रो दिविष्टिषु ।
उत पोता नि षीदति ॥")

पोताच्छादनं, क्ली, (पोतमिवाच्छादयतीति । आ+छादि+ल्युः ।) वस्त्रकृत्रिमम् । इति हारावली ॥

पोताधानं, क्ली, (आधीयतेऽत्रेति । ल्युट् । आधानम् । पोतानां अल्पजलयानानामाधानम् ।) क्षुद्राल्पमत्स्यसंघातः । इत्यमरः । १ । १० । १६ ॥ पोना इति भाषा । अस्य गुणाः । सुस्निग्धत्वम् । लघुत्वम् । रोचनत्वञ्च । इति राजवल्लभः ॥

पोतिका, स्त्री, (पोतोऽस्यस्या इति । पोत+ठन् । यद्वा, पूतिका पृषोदरादित्वात् साधुः ।) पूतिका । इत्यमरटीकायां भरतः ॥ घृतपुष्पा । मूलपोती । इति राजनिर्घण्टः ॥

पोताशः, पुं, (पोतेभ्यः शिशुभ्यः अश्नुते क्षिप्यते इति । अश+घञ् ।) कर्पूरविशेषः । इति राजनिर्घण्टः ॥

पोत्रं, क्ली, (पूयतेऽनेनेति । पू+"हलसूकरयोः पुवः ।" ३ । २ । १८३ । इति ष्ट्रन् ।) सूकरसुखाग्रम् । जाङ्गलसुखाग्रम् । वक्त्रम् । इति मेदिनी । रे, ६१ ॥ वहित्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (पोत्रनामर्त्विजः पात्रभेदः । यथा, ऋग्वेदे । १ । १५ । २ ।

"मरुतः पिबत ऋतुना पोत्रादृज्ञं पुनीतन ।
यूयं हि ष्ठा सुदानवः ॥" "पोत्रात् पोत्रनामकस्य ऋत्विजः पात्रात् सोमं पिबत ।" इति तद्भाष्ये सायनः ॥)

पोत्राशुधः, पुं, (पोत्रं तन्मुखाग्रमेव आयुधं यस्य ।) सूकरः । इति राजनिर्घण्टः ॥

पोत्रिरथा, स्त्री, (पोत्री सूकरः रथ इव गतिसाधकोऽस्याः ।) शिवशक्तिविशेषः । इति त्रिकाण्डशेषः ॥

पोत्री, [न्] पुं, (पोत्रमस्यास्तीति । पोत्र+इनिः ।) सूकरः । इत्यमरः । २ । ५ । २ ॥ पोत्रविशिष्टे, त्रि ॥

पोलिन्दः, पुं. (पोतस्य अलिन्द इवेति । पृषोदरादित्वात् साधुः ।) नौकावयवभेदः । तत्पर्य्यायः । पादारकः २ । इति त्रिकाण्डशेषः ॥

पोलिका, स्त्री, (पोली+स्वार्थे कन् टाप् । पूर्व्वह्रस्वश्च ।) पिष्टकविशेषः । पातुजा रोटी इति हिन्दी भाषा । यथा,—

"कुर्य्यात् समितयातीव तन्वी पर्पटिका ततः ।
खेदयेत्तप्तके तान्तु पोलिकां तां जगुर्बुधाः ॥
तां खादेल्लिप्तिकायुक्तां तस्यां मण्डकवद्गुणाः ।
तप्तकं तावा इति लोके ।" इति भावप्रकाशः ॥ तत्पर्य्यायः । पूलिका २ पौलिः ३ पूपिका ४ पूपजा ५ । इति हेमचन्द्रः ॥

पोली, स्त्री, (पोलति महत्त्वं गच्छतीति । पुल्+ज्वलादित्वात् णः । ङीप् ।) पिष्टकविशेषः । तत्पर्य्यायः । पूपाली २ चर्पटी ३ । इति त्रिकाण्डशेषः ॥

पोषः, पुं, पोषणम् । पुषधातोर्भावे घञ् प्रत्ययनिष्पन्नः । यथा, भट्टिः ।

"यः सर्व्वदास्यानपुषत् स्वपोषम् ॥"
(यथा, च भागवते । ३ । ३० । १० ।
"अर्थैरापादितैर्गृध्नैर्हिंसयेतस्ततश्च तान् ।
पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयम् ॥")

पोषणं, क्ली, (पुष्+ल्युट् ।) पुष्टिः । वृद्धिः । पुषधातोर्भावेऽनट् प्रत्ययनिष्पन्नः ॥ (यथा, मार्कण्डेये । २८ । ८ ।

"तद्द्विजातिशुश्रूषा पोषणं क्रयविक्रयौ ।
वर्णधर्म्माख्यिमे प्रोक्ताः शूद्रस्यामाश्रमाश्रयाः ॥")

पोषयितृ, पुं, (पोषयतीति । पुष+णिच् +"स्तनिहृधिपुषिभ्रदिभ्यो ऽयिरिलुचौ ।" उणा० २ । २६ । इति इलुच् ।) कोकिलः । भर्त्ता । इति संक्षिप्तसारोणादिवृत्तिः ॥ पोषयत्कर्त्तरि, त्रि ॥

पोष्टा, [ष्टृ] पुं, (पुष्णातीति । पुष+ष्टृच् ।) पूतीकः । इति शब्दचन्द्रिका ॥ काँटाकरञ्ज इति भाषा ॥ पोषयत्कर्त्तरि, त्रि ॥ (यथा, हरिवंशे । २५ । १७ ।

"ताभिर्धार्य्यन्त्यये लोकाः प्रजाश्चैव चतुर्विधाः ।
पोष्टा हि भगवान् सोमो जगतो जगतीपते ! ॥")

पोष्टृवरः, त्रि, पोषकश्रेष्ठः । पोष्टृषु वर इति सप्तमी तत्पुरुषसमासः ॥

पोष्यः, त्रि, (पुष्यते इति । पुष+ण्यत् ।) पोषणीयः । पोषितव्यः । पुषधातोः कर्म्मणि यप्रत्ययनिष्पन्नः ॥ (यथा, राधातन्त्रे चतुर्दशपटले ।

"नन्दगोपस्य देवेशि ! लक्ष्मीस्तु सर्व्वदा प्रियः ।
आत्मना जायते यस्तु आत्मजः स उदाहृतः ।
पोष्यः पुत्र इति ख्यातो नन्दस्य वरवर्णिनि ! ॥")

पोष्यपुत्रः, पुं, (पोष्यः पुत्रः । पोष्यत्वेनैव पुत्रत्वं प्राप्त इत्यर्थः ।) पालनादिना सुतत्वप्राप्तः यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ९४ अध्याये ।

"अधुना क्षत्रिकानाच्च वर्ष्मा तत्पोष्यपुत्रकः ।
तन्नाम चक्रुस्ताः प्रेम्णा कार्त्तिकश्चेति कौतुकात् ॥"

अथ तस्य व्यवस्था।
"तत्राह मनुः।
'अपुत्रेण सुतः कार्य्यो यादृक् तादृक् प्रयत्नतः।
पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनाय च॥'
अत्रिश्च।
'अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः॥'
शौनकः।
'अपुत्रो मृतपुत्रो वा पुत्रार्थं ससुपोष्य च॥'
इति। तेन पुत्रोत्पत्त्या।
'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः।
पितृणामनृणश्चैव स तस्मात्तत्समर्हति॥'
इति मनुवचनावगत ऋणपरिहारेऽपि ततपुत्रमरणे पिण्डोदकाद्यर्थं पुनः पुत्रकरणमावश्यकम्। अत्र पुत्रपदं पौत्रप्रपौत्रयोरप्युपलक्षणम्। तयोरपि पिण्डदाद्यवश्यकरत्वाविशेषात्। अन्यथा सत्यपि पौत्रे मृतपुत्रस्य निर्निमित्तपुत्रपरिग्रहापत्तिरतः पुत्रपौत्रप्रपौत्ररहितस्यैव पुत्रीकरणमवगम्यते॥ * ॥ स्त्रिया भर्त्तुरनुज्ञया तदधिकारः। यथाह वशिष्ठः। 'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुः।' इति॥ * ॥ प्रतिनिधिरिति स च क्षेत्रजादिरेकादशविधः। यथाह मनुः।
'क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः॥'
दक्षस्मृतिः।
'पुत्रान्यायोदश प्रोक्ता मुनिना येऽनुपूर्व्वशः।
सन्तानकारणं तेषामौरसः पुत्रिका तथा॥
आद्यं विना यथा तैलं सर्पिः प्रतिनिधीकृतम्।
तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना॥'
तत्रापि कलौ न सर्व्वेषामभ्यनुज्ञानम्।
'अनेकधा हृताः पुत्रा ऋषिभिर्यैः पुरातनैः।
न शक्यास्तेऽधुना कर्त्तुं शक्तिहीनतया नरैः॥'
इति वचनात्॥
'दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः।'
इत्याद्यभिधाय।
'इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः।'
इति दत्तकेतरप्रतिनिधिनिषेधात्॥ * ॥ अतो दत्तकविधिर्विधीयते। तत्र शौनकः।
'ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्रसंग्रहः।
तदभावेऽसपिण्डे वा अन्यत्र तु न कारयेत्॥'
सपिण्डेष्विति सामान्यश्रवणात् समानासमानगोत्रेष्वित्यर्थः। तथा च सपिण्डाभावेऽसपिण्डः सगोत्रस्तदभावे भिन्नगोत्रोऽपि ग्राह्य इत्याह शाकलः।
'सपिण्डापत्यकश्चैव सगोत्रजमथापि वा।
अपुत्रको द्विजो यस्मात् पुत्रत्वे परिकल्पयेत्॥
समानगोत्रजाभावे पालयेदन्यगोत्रजम्।
दौहित्रं भागिनेयञ्च माद्यस्वस्रसुतं विना॥' इति अन्यत्र तु न कारयेदिति ब्राह्मणातिरिक्तक्षत्रियादिसमानजातीयो दत्तको व्यावर्त्तते। यदाह मनुः।
'माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः॥'
आपदि पुत्रप्रतिग्रहीतुरपुत्रत्वे सदृशं सजातीयं। यत्तमाह वृद्धयाज्ञवल्क्यः।
'सजातीयः सुतो ग्राह्यः पिण्डदाता स ऋक्थभाक्।
तदभावे विजातीयो वंशमात्रकरः स्मृतः॥'
ग्रासाच्छादनमात्रन्तु स लभेत तदर्क्थिन इति। दौहित्रं भागिनेयञ्चेति दौहित्रभागिनेयनिषेधः शूद्रातिरिक्तविषयः। तथा च शौनकः।
'क्षत्रियाणां स्वजातौ च गुरुगोत्रसमेऽपि वा।
वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु॥
सर्व्वेषामेव वर्णानां जातिष्वेव न चान्यतः।
दौहित्रो भागिनेयश्च शूद्रेषु क्रियते सुतः॥
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्॥'
जातिष्वेव न चान्यत इति नियमः सजातीयसम्भवे विजातीयनिषेधार्थः। अन्यथा प्रागुक्तकात्यायनविरोधः स्यात्॥ * ॥ तत्रापि सन्निहितसपिण्डेषु सति भ्रातृपुत्रे स एव पुत्रीकार्य्य इत्याह मनुः।
'सर्व्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत्।
सर्व्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥'
वृद्धशातातपः।
"यद्येकजाता बहवो भ्रातरश्च सहोदराः।
एकस्यापि सुते जाते सर्व्वे ते पुत्रिणः स्मृताः॥"
इति। अत्र वचनद्वयेऽपि भ्रातृसुते च पुत्रप्रतिनिधितया कथञ्चित् सम्भवत्यन्यो न प्रतिनिधिः कार्य्य इत्यवगम्यते॥*॥ भर्त्तृवंशमन्तरेण चास्या वंशान्तरासम्भवेन तस्यैव स्ववंशकरत्वञ्चेत् यतः समस्तस्यापि पुत्रप्रयोजनस्य सम्भवेन सति सपत्नीपुत्रे न दत्तकाद्युपादानम्॥ * ॥ केन पुत्रो देय इत्याह शौनकः।
'नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन।
बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नतः॥'
द्विपुत्रस्यापि पुत्रदाने अपरपुत्रनाशे वंशविच्छेदमाशङ्क्याह बहुपुत्रेणेति। स्त्रियास्तु जीवति भर्त्तरि तदनुमते प्रोषिते स्रुते वा तदनुज्ञां विनापि। यथा वशिष्ठः। 'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुः।' इति। अनुमतिश्चाप्रतिषेधेऽपि भवति। अप्रतिषिद्धं परमनुमतं भवतीत्न्यायात्॥ * ॥ निरपेक्षदानमाह याज्ञवल्क्यः।
'दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्॥'
तथा 'मातापित्रभ्यासृतृष्टस्तयोरन्यतरेण वेति॥'
अथ पुत्रपरिग्रहविधिमाह शौनकः।
'शौनकोऽहं प्रवक्ष्यामि पुत्रसंग्रहसुत्तमम्।
अपुत्रो मृतपुत्रो वा पुत्रार्थं ससुपोष्य च॥'
उपोष्य ग्रहणात् पूर्व्वदिने कृतोपवासः। वृद्धगौतमः।
'वाससी कुण्डले दत्त्वा उष्णीषं चाङ्गुलीयकम्।
आचार्य्यं धर्म्मसंयुक्तं वेद्यवं वेदपारगम्॥
मधुपर्केण संपूज्य राजानञ्च द्विजान् शुचीन्॥'
राज्ञो विप्रकृष्टत्वे ग्रामस्वामिनम्। 'बन्धूनाकृष्य सर्व्वासु ग्रामस्वामिनमेव च।' इतिस्मरणात्। द्विजानिति बहुवचनं चित्यपर्य्यवसितं कपिञ्जलन्यायात्।
'वह्निः कृशमयश्चैव पालाशश्चैधमेव च।
एतानाकृत्य बन्धूंश्च ज्ञातीनाकृष्य यत्नतः॥
बन्धूनन्नेन सम्भोज्य ब्राह्मणांश्च विशेषतः।
अग्न्याधानादिकं तत्र कृत्वाग्न्युत्पवनान्तकम्॥
दातुः समक्षं गत्वा च पुत्रं देहीति याचयेत्।
दाने समर्थो दातास्मै यो यज्ञेनेति पञ्चभिः॥'
दद्यादिति शेषः। बन्धून् आत्ममातृपितृबन्धून्। ज्ञातीन् सपिण्डान्। तथा।
'देवस्त्वेतिमन्त्रेण हस्ताभ्यां परिगृह्य च।
अङ्गादङ्गेत्यृचं जप्त्वा आघ्राय शिरसूर्द्धनि।
वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम्॥'
पुत्रच्छाया पुत्रसादृश्यं नियोगादिना स्वयमुत्पादनयोग्यत्वमिति यावत्। तथा।
'वृत्तगीतेन वाद्येन स्वस्तिशब्देन संयुतम्।
गृहमध्ये तमाधाय चरुं कृत्वा विधानतः॥
यस्त्वाकृतेत्यृचा चैव तुभ्यमग्ने त्यृचैकया।
सोमो दददित्येताभिः प्रत्यृचं पञ्चभिस्तथेति।'
वृद्धगौतमः।
'पायसं तत्र साज्यञ्च हुतसंस्कृञ्च होमयेत्।
प्रजापते न त्वदेतानित्युदिश्य प्रजापतिम्।'
इति॥
वशिष्ठः। 'पुत्रं प्रतिग्रहीष्यन् बन्धूनाकृष्य राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरान्वयं बन्धुसन्निकृष्टमेव गृह्णीयात्। सन्देहे चोत्पन्ने दूरान्वयं शूद्रमिव स्थापयेत्। विज्ञायते स्त्रैणेन बहूंश्चायत इति।' निवेशनं गृहम्। सन्देह इति दूरावस्थितबान्धवस्यात्यन्तदेशभाषाविप्रकर्षादिना कुलशीलादिसन्देहो भवत्येव तथात्वे निर्णयपर्य्यन्तं न व्यवहरेत् तत्र हेतुरेकेनेति। बन्धून् पित्रादीन्। एतदन्यतरविधिरावश्यकः॥ * ॥ ततश्च शौनकः।
'दक्षिणां गुरवे दद्यादृत्यग्नक्ति द्विजोत्तमः।
नृपो राज्यार्द्धमेवाथ वैश्यो वित्तशतत्रयम्।
शूद्रः सर्व्वस्वमेवापि अशक्तश्चेदृणवाबलम्॥'
राज्यार्द्धमर्द्धराज्योत्पन्नमेकवर्षीयद्रव्यम्। प्रदद्याद्दर्द्धराज्योत्थमेकवर्षार्जितं धनमिति वृद्धगौतमस्मरणात्। उत्तममध्यमाधमभेदेन वित्तानां सुवर्णरजततताम्राणामिति ज्ञेयम्।
'शतत्रयं नागकानां सौवर्णमथ राजतम्।
प्रदद्यात्ताम्रमथवा उत्तमादित्यवस्यया॥'
इति वृद्धगौतमस्मरणात्॥
सर्व्वस्वमेकवर्षभृतिलभ्यमिति यावत्॥ * ॥ तैत्तिरीयाणान्तु विधिविशेषमाह बौधायनः। अथ पुत्रपरिग्रहविधिं व्याख्यास्यामः। प्रतिग्रहीष्यन्नुपकल्प्यते हे वाससी हे कुण्डले अङ्गुलीयकमाचार्य्यश्च वेदपारगं कृशमयं बर्हिः-पर्णमयमिध्ममित्यथ बन्धूनाकृष्य निवेशनस्य मध्ये राजनि निवेद्य परिषदि वागारमध्ये ब्राह्मणं

वागालम्भन उपवेश्य पुण्याहस्वस्तिऋद्धिमिति वाचयित्वा यद्देवयजनोल्लेखप्रभृति आप्रणीताभ्यः क्षत्वा दातुः समक्षं गत्वा मे पुत्रं देहीति भिक्षेत् ददानीतीतर आह तं परिगृह्णीत धर्म्माय त्वा परिगृह्णामि सन्तत्यै त्वा परिगृह्णामीत्यर्थेनं वस्त्रकुण्डलादिभिरलङ्कृत्य परिधानप्रभृत्यग्निमुखं क्षत्वा पक्षा जुहोति यस्त्वा ददा कौरिक्षा मन्यमान इति पुरोऽनुवाक्यमनुद्य यस्त्वैवं सुक्षते जातवेद इति याज्यया जुहोति अथ धानाकृतिभिर्हुत्वा स्विष्टिकृत्प्रभृति सिद्धमाधेयवरप्रदानात् दत्तिर्वा ददात्येते च वाससी एते कुण्डले एतच्चाङ्गुरीयकमेवं त्वौरस उत्पद्यते तुरीयभागे सम्भवतीति आहेत्य बौधायन इति । * ॥ एवमुक्तविधभावं परिगृहीतस्य तु विवाहोचितधनमात्रभागित्वं न तंशभागित्वमित्यत्र वक्ष्यते । तथा च मनुः ।

'गोत्रऋक्थे जनयितुर्न हरेद्दत्रिमः सुतः ।
गोत्रऋक्थानुगः पिण्डो व्यपैति ददतः स्वधेति ॥'

एतेन दाढधने दानादेव पुत्रत्वनिवृत्तिद्वारा दत्रिमस्य स्वत्वनिवृत्तिर्दाढगोत्रनिवृत्तिश्च भवतीत्युच्यते । तथा च गोत्रादिनिवृत्तेरेव दर्शनात् संस्कुर्य्यात् स्वसुतान् पितेति स्मरणात् ग्रहणानन्तरसम्भाव्यमाना एव दत्तकस्य संस्काराः प्रतिग्रहीत्रा कार्य्या न पुनर्जनकेन क्षतपूर्व्या अपि निवर्त्तनीयाः ॥ * ॥ यदि च ततपूर्व्वभाविनोऽपि संस्कारा जनकेन न क्षतास्तदा औरसगर्भदोषनाशावश्यकत्वेन क्रमानुरोधेन च प्रतिग्रहीत्रैव ते समाधेयाः ॥ * ॥ एवमुपनयनमात्रकरणेऽपि प्रतिग्रहीतुर्दत्तकपुत्रसिद्धिः ।

'अन्यशाखोद्भवो दत्तः पुत्रत्वेनोपनायितः ।
स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभाक् ॥'

इति वशिष्ठस्मरणात् ॥

एतच्चाष्टमाब्दरूपतत्सुखकालाभ्यन्तरवर्त्ति-परिग्रहे बोध्यम् । अन्यथा सुखकाले अधिकारयोग्यत्वाभावे गौणकाले अनधिकारात्र तल्लिङ्गिरिति ॥ * ॥ अत्र च जनकप्रतिग्रहीत्रोरुभयोरपि पुत्राभिसन्धाने सति दत्तकस्य द्व्यामुष्यायणत्वेनोभयगोत्रभागित्वं विशिष्टतो वक्ष्यते ।

'चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥'

एवञ्च चूडाद्या इत्यतदृगुपसंविज्ञानबहुव्रीहिणा द्विजातीनामुपनयनलाभः शूद्रस्य विवाहलाभः ॥ * ॥ तथा पैठीनसिः । अथ दत्तकक्रीतलब्धिमपुत्रिकापुत्राः परपरिग्रहेणार्षेण येऽत्र जातास्तेऽसङ्कृतकुलीना द्व्यामुष्यायणा भवन्तीति । आर्षेण ऋष्युक्तेन परिग्रहेण । जनकग्रहीत्रोः स्वीकारेण द्व्यामुष्यायणा भवन्तीत्यर्थः ॥ * ॥ अथ तत्कर्तृकाह्वनिर्णयः । तत्र पितुः सपिण्डीकरणान्तश्चोढ़ग्रहाद्धे दत्तकस्य पूर्व्वग्रहीतत्वेऽपि सत्यौरसे नाधिकारः । औरसे पुनरुत्पन्ने तेषु ज्येष्ठं न विद्यते । इति देवलेन ज्येष्ठत्वप्रतिषेधात् ।

'पिण्डदोऽंशहरश्चैषां पूर्व्वाभावे परः परः ।'

इति याज्ञवल्क्यवचनाच्च । अन्यच्च सर्व्वौरसवत् । व्ययादे तु विशेषो यथा जातूकर्ण्यः ।

'औरसश्चेज्जनौ पुत्रौ विधिना पार्व्वणेन तु ।
प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं सुता दश ॥'

इतरे दत्तकादयः ॥ * ॥ अथ दत्तकाद्यौचादिनिर्णयः । तत्र शुद्धदत्तकस्य तु जनककुले परस्परमशौचं नास्त्येव गोत्रनिवृत्त्याशौचनिवृत्तेरेवेत्यविप्रतिपन्नत्वात् । द्व्यामुष्यायणस्य तु उभयत्रैवाशौचमिति । ब्रह्मपुराणे ।

'दत्तकश्च स्वयं दत्तः क्षत्रिमः क्रीत एव च ।
अपविद्धश्च ये पुत्रा भरणीयाः सदैव ते ॥
भिन्नगोत्राः पृथक्पिण्डाः पृथक्संग्रहकराः स्मृताः ।
जनने मरणे चैव त्र्याहाशौचस्य भागिनः ॥'

पराशरः ।

'भिन्नगोत्रः सगोत्रो वा नीतः संस्कृत्य चेच्छया ।
जनने मरणे तस्य त्र्याहाशौचं विधीयते ॥'

तथा ।

'औरसं वर्जयित्वा च सर्व्ववर्णेषु सर्व्वदा ।
क्षेत्रजादिषु पुत्रेषु जातेषु च मृतेषु च ।
अशौचन्तु चिरात्रं स्यात् समानमिति निश्चयः ॥'

अथ दत्तकविभागः । मनुः ।

'पुत्रान् दादश यानाह नृणां स्वायम्भुवो मनुः ।
तेषां षड्बन्धुदायादाः षड्दायादबान्धवाः ॥
औरसः क्षेत्रजश्चैव दत्तः क्षत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढ़श्च क्रीतः पौनर्भवस्तथा ।
स्वयं दत्तश्च शौद्रश्च षड्दायादबान्धवाः ॥'

बौधायनः ।

'औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तक्षत्रिमौ ।
गूढश्चैवापविद्धश्च रिक्थभाजः प्रचक्षते ॥
कानीनश्च सहोढ़श्च क्रीतं पौनर्भवन्तथा ।
स्वयं दत्तं निषादश्च गोत्रभाजः प्रचक्षते ॥'

औरस पुत्रिकापुत्र-क्षेत्रज-कानीन-गूढोत्पन्नापविद्ध-सहोढ़-पौनर्भव-दत्तक-स्वयमुपागत-क्रीतानभिधाय देवलः ।

'एते द्वादश पुत्रास्तु सन्तत्यर्थमुदाहृताः ।
आत्मजाः परजाश्चैव लब्धा याद्दच्छिकास्तथा ॥
तेषां षड्बन्धुदायादाः पूर्व्वेऽन्ये पितुरेव षट् ।
विशेषं वापि पुत्राणामाहुपूर्व्वो विशिष्यते ॥
सर्व्वे ह्यौरसदृक्षते पुत्रा दायहराः स्मृताः ।
औरसे पुनरुत्पन्ने तेषु ज्येष्ठं न विद्यते ॥
तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः ।
हीनास्तूपनीयैवंपुत्र्यासाच्छादनसम्मताः ॥'* ॥

वशिष्ठः । तस्मिंश्चेत् प्रतिग्रहीते औरस उत्पद्यते स चतुर्थभागभागी यदि नाभ्युदयिकेषु प्रयुक्तं स्यात् । स प्रतिग्रहीतपुत्रः आभ्युदयिकेषु यज्ञादिषु यदि औरसेन प्रयुक्तं न स्यात् प्रभूतं धनमिति शेषः । अतश्च दत्तकग्रहणानन्तरमौरसोत्पत्तौ तदौरसचतुर्थांशविधिर्वक्ष्यिष्यतो दत्तकविषयो ज्ञेयः । तथा देवलकात्यायनवचने तृतीयांशग्रहणविधिरित्युत्तरगुणदत्तकविषयो वाच्यः ।

'उपपन्नो गुणैः सर्व्वैः पुत्रो यस्य हि दत्रिमः ।
स हरेतैव तद्रिक्थं सम्प्राप्तोऽप्यन्यगोत्रतः ॥'

इति मनुवचनैकवाक्यत्वात् । गुणैर्जातिविद्याचारैः । तथा केनापि मुनिना दत्तकस्य बन्धुदायादत्वमन्येन चादायादत्वमुक्तं तत् गुणवद्गुणवद्भेदेन समाधेयं एवं दत्तकस्य धनग्रहणादौ मुनिभेदेन पूर्व्वापरोक्तिवैषम्यं गुणागुणविवेकेनापास्तं एतेनौरसस्य भ्रात्रादिधने येनैव भ्रात्रादिना सम्बन्धेन अधिकारित्वं तादृशेनैव सम्बन्धेन तादृग्दत्तकस्यापि यथासम्भवमुचितांशभागित्वमवधेयम् । एवं धनिनः पुत्रान्तरसत्त्वे मृतपितृकदत्तकपौत्रस्यापि दत्तकोचितांशभागित्वम् । तदसत्त्वे सर्व्वहरत्वमपीति । न च पौत्रस्य स्वपितृयोग्यांशभागित्वं नियमात् दत्तकगृहीतुः पितामहौरससत्त्वे तादृग्मृतपितृतुल्यस्वेवांशस्य तद्योग्यत्वात् दत्तकपौत्रः पितृयतुल्यमेवांशं लभतामिति वाच्यम् । पुत्रकस्य दत्तकत्वे चतुर्थांशः पौत्रस्य तु तथात्वे समानांश इति वैषम्यात् । ततश्च स्वसमानरूपस्य पितुर्यादृशांशः श्राद्धसिद्धस्तस्यैव स्वपितृयोग्यांशतेति यथोक्तमेव साधु । एवं रीतिः प्रपौत्रेऽप्यनुसर्त्तव्येति ॥ * ॥

'औरसः क्षेत्रजश्चैव दत्तः क्षत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च भागार्हास्त्रिनया इमे ॥
कानीनश्च सहोढ़श्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च दासश्च षड्मे पुत्रप्रतिनिधाः ॥
अभावे पूर्व्वपूर्व्वेषां परान् समभिवेचयेत् ।
पौनर्भवं स्वयंदत्तं दासं राज्ये न योजयेत् ॥'

तथा ।

'न क्षेत्रजादीन्त्सुतयात् राजा राज्येऽभिषेचयेत् ।
पितृव्यां शोधयेन्नित्यमौरसे तनये सति ॥' इति ।

एतावता प्रबन्धेनाभिहितो योऽयं क्षेत्रजदत्तकादीनामौरसेन सह विभागप्रकारः स तु शूद्रस्य न सम्भवति तस्य तु ।

'दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् ।
सोऽनुज्ञातो हरेदंशमिति धर्म्मो व्यवस्थितः ॥'

इति मनुवचनेन ज्ञातोऽपि दास्यां शूद्रेण कामतोऽंशहरो भवेत् ।

'सति पितरि कुर्य्युस्तं भ्रातरस्तद्भागिनम् ।
अभ्रातृको हरेत् सर्व्वं दुहितर्यां सुताहृते ॥'

इति याज्ञवल्क्येन च दासीपुत्रस्याप्यौरसेन समांशग्राहिणेन पितुरनन्तरं भ्रातृरहितस्य तस्यैव दौहित्रेण सह विभागदर्शनेन च दत्ताद्यपायितं सति पितरि क्षेत्रजदत्तकादीनामौरसेन समांशोऽस्ति तु तदर्हांशः अन्यथा यच्च क्षेत्रजदत्तकादीनामौरसचतुर्थांशत्वं तच्च तदपेक्षया अत्यन्तविप्रकृष्टाधिकारस्य दासीपुत्रस्यौरससमांशत्वमिति महद्वैषम्यं स्यात् एवं सतृश्च क्षेत्रजादिषु सत्सु पत्नीकन्ययो-

दौहित्राधिकारे कुल्लप्राधिकारविधिवाधापत्तिस्तेन दौहित्रपर्य्यन्ताधिकारिग्रन्थलायां तद्दैकतमे सत्यपि न दासीपुत्रस्य सर्व्वहरत्वं किन्तु तत्समांशः। अतएव।

'दत्तपुत्रे यथा जाते कदाचित्त्वौरसो भवेत्।
पितुर्वित्तस्य सर्व्वस्य भवेतां समभागिनौ॥'

इत्यपि वचनं शूद्रविषय एव योजनीयम्॥ * ॥

अथात्मपङ्क्तिप्रभृतिपुत्राणां धनानधिकारितया तदौरसक्षेत्रजयोरेव पितामहधनभागित्वश्रुतेर्न तद्गृहीतदत्तकपुत्रादेः पितामहधनाधिकारः किन्तु भरणमात्रं अन्यादिभार्य्याणां भरणविधानेन तद्भरणस्य दण्डापूपायितत्वात्। तथा अन्यपङ्क्त्यादीनधिकारिपुत्रानभिधायाह।

'औरसक्षेत्रजाश्चैषां निर्द्दोषा भागहारिणः।
अपुत्रयोषितश्चैषां भर्त्तृस्थाः साधुवृत्तयः॥
सुताश्चैषां प्रभर्त्तव्या यावन्न भर्त्तृसात् कृताः॥'

एवं दत्तकग्रहणानन्तरोत्पन्नौरसेन सह दत्तकस्य विभागदर्शनात् सत्यौरसे गृहीतस्य तु नांशभागित्वमिति। तथा विधानं विना परिगृहीतस्यापि नांशभागित्वमित्याह।

'तस्मिन् जाते सुते दत्ते न कृते च विधानके।
तत्सुतस्तस्य वित्तस्य यः स्वामी पितुरङ्गजः॥'
मनुः।

'अविधाय विधानं यः परित्यजति पुत्रकम्।
विवाहविधिभाजं तं न कुर्य्यादनभाजनम्॥'

इति।

अन्यजातीयदत्तकस्यापि नांशभागित्वमित्याह 'यदि स्यादन्यजातीयो गृहीतोऽपि सुतः क्वचित्।
नांशभाजं न तं कुर्य्यात् शौनकस्य मतं हि तत्॥'
इत्युक्तप्रायमित्यास्तां विस्तारः॥" इति दत्तकचन्द्रिका॥

पोष्यवर्गः, पुं, (पोष्याणां प्रतिपालनीयानां वर्गः।) प्रतिपालनीयगणः। स तु मात्रादिः। यथा,—

"माता पिता गुरुः पत्नी स्वपत्यानि समाश्रिताः।
अभ्यागतोऽतिथिश्चासि पोष्यवर्गो ह्यमी नव॥"
इति कालीखण्डम्॥

अपि च।

"माता पिता गुरुर्भ्राता प्रजा दीनः समाश्रिताः।
अभ्यागतोऽतिथिश्चासि पोष्यवर्गः उदाहृतः॥
भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम्।
नरकं पीड़ने चास्य तस्मात्प्रयत्नेन तं भरेत्॥"
इति गारुड़े २१५ अध्यायः॥

पौंसवनं, क्ली, (पुंसवनमेव। स्वार्थे अण्।) पुंसवनसंस्कारः। इति भूरिप्रयोगः॥

पौंस्नं, क्ली, (पुंस इदम्। पुंस्+"स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्।" ४।१।८७। इति स्नञ्।) पुंस्त्वम्। इति शब्दमाला। (धैर्य्यम्। यथा, भागवते। ४।२६।२६।

"का देवरं वज्रभृतं कुसुमास्त्रवेग-
विस्रस्तपौंस्नसुभगा न भजेत क्षत्रे॥"

त्रि, पुंसि भवः। पुंस आगतः। यथा, भागवते। १।१५।४५।

"पौंस्नं वपुर्दैर्ग्ययानमनन्यसिद्धे-
रौत्पत्तिके: समगुणन् युतमष्टभोगैः॥"

स्त्रियां ङीप्। पुरुषयोग्या। पुरुषहिता। यथा, भट्टिः। ५।६१।

"सङ्गच्छ पौंस्नि! स्त्रैणं मां युवानं तरुणी सुभे॥")

पौगण्डं, क्ली, (पोगण्डस्य भावः। पोगण्ड+अण्।) अवस्याविशेषः। यथा,—

"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।
कैशोरमापञ्चदशात् यौवनञ्च ततः परम्॥"

इतिदशमस्कन्धीयहादशाध्यायस्यसप्तत्रिंशश्लोकटीकायां श्रीधरस्वामिधृतवचनम्॥ (पोगण्डावस्थावति तदवस्थासम्बन्धिनि च त्रि। यथा, भागवते। ३।३१।२८।

"इत्येवं श्रेयसि सुकृते दुःखे पौगण्डमेव च॥")

पौण्डरीकं, क्ली, (पुण्डरीकमिव। पुण्डरीक+"शूर्पादिभ्योऽण्।" ५।३।१०७। इत्यण्।) प्रपौण्डरीकम्। इति राजनिर्घण्टः॥ (कुष्ठविशेषः। यथा, सुश्रुते निदानस्थाने ५ अध्याये।

"तत्र वातेनारुणं पित्तेनौदुम्बर्यग्निकदलाकाभकाकाभानि। श्लेष्मणा पौण्डरीकं दद्रुकुष्ठचेति॥" पुं, यज्ञविशेषः। यथा, महाभारते। १३।१०७।३६-३७।

"यस्तु संवत्सरं चान्नो भुङ्क्ते ऽहन्यहनि नरः।
देवकार्य्यपरो नित्यं जुह्वानो जातवेदसम्॥
पौण्डरीकस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम्।
पद्मवर्णविभश्चैव विमानमधिरोहति॥")

पौण्ड्र्यं, क्ली, (पुण्ड्र्यमेव। स्वार्थे अण्।) पुण्ड्र्यम्। इत्यमरटीकायां भरतः॥ (यथास्य पर्य्यायो गुणाश्च।

"प्रपौण्डरीकं पौण्ड्र्यं चक्षुष्यं पौण्डरीयकम्।
पौण्ड्र्यं मधुरं तिक्तं कषायं शुक्रलं हिमम्।
चक्षुष्यं मधुरं पाके वर्ण्यं पित्तकफप्रणुत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पौण्ड्रः, पुं, देशभेदः। चन्देल इति ख्यातः। इति शब्दरत्नावली॥ (सोऽस्य अभिजनोऽस्य राजा वा। अण्। तद्देशनृपः। यथा, हरिवंशे।

"पाण्ड्यं पौण्ड्रं कलिङ्गञ्च मात्स्यञ्चैव जनार्द्दनः।
जघान सहितान् सर्व्वान्————————॥"

पौण्ड्रदेशोद्भवे, पुंभूम्नि। यथा, हरिवंशे। ११६।५२।

"अङ्गवङ्गकलिङ्गैश्च सार्द्धं पौण्ड्रैश्च वीर्य्यवान्।
निर्य्ययौ चेदिराजस्तु भ्रातृभिः स महारथैः॥")

भीमसेनस्य शङ्खः। यथा,—

"पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः॥"
इति श्रीभगवद्गीतायाम्। १।१५॥

(पुडि खण्डने+"स्फायितञ्चीति।" उणा० २।१३। इति रक्। ततः प्रज्ञाद्यण्।) इक्षुभेदः। इति रत्नमाला॥ पुँड़ि इति भाषा॥

पौण्ड्रकः, पुं, (पौण्ड्र एव। स्वार्थे कन्।) इक्षुभेदः। पुँड़ि आक् इति भाषा। (यथा,—

"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः॥

नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
इत्येता जातयः स्थौल्यादुत्तरोत्तरगुणान् वक्ष्यामि यतः-परम्॥"

इति सुश्रुते सूत्रस्थाने १५ अध्याये॥)

अस्य गुणाः। शीतलत्वम्। दृढ्यत्वम्। स्निग्धत्वम्। मधुरत्वम्। दृंहणत्वञ्च। इति राजवल्लभः॥ (गुणान्तरमस्य यथा,—

"वातपित्तप्रशमनो मधुरो रसपाकयोः।
सुशीतो दृंहणो बल्यः पौण्ड्रको भीरुकस्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥

पौण्ड्रदेशीयनृपः। यथा, महाभारते। २।३४।१०।

"पौण्ड्रको वासुदेवश्च वङ्गः कालिङ्गकस्तथा॥")

जातिविशेषः। पुँड़ो इति भाषा। स च शौण्डिकायां वैश्याज्जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ (पौण्ड्रदेशोद्भवक्षत्रियविशेषः। स तु क्रियालोपादिना शूद्रत्वमापन्नः। यथा, मनुः। १०।४४।

"पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः॥")

पौण्ड्रवर्द्धनः, पुं, (पौण्ड्राणामिक्षुविशेषाणां वर्द्धनं यत्र।) देशभेदः। इति शब्दरत्नावली॥ बेहार इति ख्यातः॥ (यथा, कथासरित्सागरे। १६।१७।

"अभवत्तस्य भार्य्या च नगरात् पौण्ड्रवर्द्धनात्॥")

पौण्ड्रिकः, पुं, (पुण्ड्र+स्वार्थे ठञ्।) इक्षुभेदः। पुँड़ि इति भाषा। तत्पर्य्यायः। पुण्ड्रेक्षुः २ पुण्ड्रः ३ सेयः ४ अतिरसः ५ मधुः ६। इति शब्दमाला॥

पौतवं, क्ली, परिमाणम्। इति यौतवशब्दटीकायां भरतः॥

पौत्तिकं, क्ली, (पुत्तिकाभिर्मधुमक्षिकाविशेषैः कृतम्। पुत्तिका+"संज्ञायाम्।" ४।३।११७। इति ठञ्।) पिङ्गलवर्णपुत्तिकाख्यदृढमक्षिकाकृततृतवर्णमधु। इति अष्टाधररत्नमाले॥ (यथा, सुश्रुते। १।४५।

"पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च।
आर्घ्यमौद्दालिकं दालमित्यष्टौ मधुजातयः॥")

पौ(त्र)त्रः, पुं, (पुत्रस्यापत्यम्। पुत्र+"अवृद्धान्नञ्स्वसृदुहितृभ्योऽण्।" ४।१।१०४। इति अण्।) पुत्रस्य पुत्रः। नाति इति भाषा। तत्पर्य्यायः। नप्ता २। इति हेमचन्द्रः॥ यथा,—

"पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम्॥"
इति दायभागधृतमनुग्रन्थलिखितवशिष्ठहारीतवचनम्॥

पौत्री, स्त्री, (पुत्रस्यापत्यं स्त्री। पुत्र+अण्। ङीप्।) पुत्रात्मजा। तत्पर्य्यायः। नप्त्री २। इत्यमरः। २।६।२६॥

पौनःपुनिकः, त्रि, (पुनः पुनर्भवः। पुनःपुनः+ठञ्। टिलोपः।) पुनःपुनर्भवः। इति मुग्धबोधव्याकरणम्॥

पौनःपुन्यं, क्ली, (पुनःपुनः+स्वार्थे ष्यञ्। टिलोपः। पुनर्नारम्। तत्पर्य्यायः। वारंवारम् २ मुहुः३

ग्रथत् ४ असकृत् ५ पुनःपुनः ६ वारंवारेण ७ अभीक्ष्णम् ८ प्रतिक्षणम् ९। इति शब्दरत्नावली ॥

पौनर्भवः, पुं, (पुनर्भूवोऽपत्यमिति। पुनर्भू+"अपृथ्यानन्तर्ये विदादिभ्योऽञ्।" ४।१।१०४। इति अञ्।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः। इति जटाधरः॥ पुनर्भूपुत्रः। स तु भर्तृपरित्यक्तविधवयोरन्येनोत्पादितः। तस्य लक्षणं यथा,—

"या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया। उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते॥"

इति मानवे। ९।१७५॥

"येति। या भर्त्रा परित्यक्ता ऋतभर्तृका वा स्वेच्छया अन्यस्य पुनर्भार्या भूत्वा यमुत्पादयेत् स उत्पादकस्य पौनर्भवः पुत्र उच्यते।" इति तट्टीकायां कुल्लूकभट्टः॥ * ॥ भर्तृविशेषः। अक्षतयोन्योर्भर्तृपरित्यक्तविधवयोः पौनर्भवेन भर्त्रा सह विवाहविधिः एवं कौमारं पतिमृतेऽन्यान्यमाश्रित्यपुनरागतायास्तेन कौमारेण भर्त्रा सह विवाहविधिर्यथा,—

"सा चेदक्षतयोनिः स्याद्गतप्रत्यागतापि वा। पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति॥"

इति मानवे। ९।१७६॥

"सा चेदिति। सा स्त्री यद्यक्षतयोनिः सती अन्यमाश्रयेत्तदा तेन पौनर्भवेन भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति। यद्वा कौमारं पतिमृतेऽन्यान्यमाश्रित्य पुनस्तमेव प्रत्यागता भवति तदा तेन कौमारेण भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति।" इति तट्टीकायां कुल्लूकभट्टः॥*॥

कन्याविशेषेऽपि, स्त्री। सप्तविधपौनर्भवाः कन्या वर्ज्जनीयाः। यथा,—

"सप्त पौनर्भवाः कन्या वर्ज्जनीयाः कुलाधमाः। वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला॥ उदकस्पर्शिता या च या च पाणिगृहीतिका। अग्निं परिगता या च पुनर्भूप्रभवा च या। इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्॥ कृतकौतुकमङ्गला बहुकङ्कणा। उदकस्पर्शिता उदकपूर्व्वं दत्तेति रत्नाकरः।" इत्युद्वाहतत्त्वम्॥

पौरं, क्ली, (पुरे भवम्। पुर+"तत्र भवः।" ४।३।५३। इत्यण्।) रोहिषतृणम्। इत्यमरः। २। ४। १६६॥ रामकर्पूर इति ख्यातम्॥ (अस्य पर्य्यायो यथा,—

"कत्तृणं रौहिषं देवजग्धं सौगन्धिकन्तथा। भूतीकं वासपौरञ्च ग्रामकं घूमगन्धिकम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पुरोद्भूते, त्रि। इति मेदिनी॥ (यथा, रघुः।६।८५।

"इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणामेकवाक्यं विवव्रुः॥"

पुं, पुरराजपुत्रः। यथा, ऋग्वेदे। ८।३।१२।

"ग्रन्थी नो अस्य बद्ध पौरमाविथ धिय इन्द्र सिषासतः॥"

पूरः पूरक एव। स्वार्थे अण्। उदरपूरके, त्रि। यथा, तत्रैव। २।११।११।

"पृथन्तस्ते कुक्षी वर्द्धयन्त्वित्या सुतः पौर इन्द्रभाव॥")

पौरकः, पुं, (पौर इव कायतीति। कै+कः।) गृहबाह्योपवनम्। यथा,—

"निष्कुटस्तु गृहारामो बाह्यारामस्तु पौरकः॥"

इति हेमचन्द्रः। ४।१७८॥

पौरवः, पुं, (पुरोरपत्यमिति। पुरु+अण्।) पुरुवंशजः। यथा,—

"इक्ष्वाकुतनया भोजा अनोस्तु म्लेच्छजातयः। पुरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव!॥"

इति मात्स्ये ३४ अध्यायः॥

(देशविशेषः। यथा, मार्कण्डेये। ५८।५२।

"त्रिनेत्राः पौरवाश्चैव गन्धर्व्वाश्च द्विजोत्तम!। पूर्व्वोत्तरन्तु कूर्म्मस्य पादमेते समाश्रिताः॥"

पुरुवंशीये, त्रि॥ (यथा, शकुन्तलायां प्रथमेऽङ्के।

"कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्। अयमाचरत्यविनयं सुप्तासु तपस्विकन्यकासु॥")

पौरस्त्यः, त्रि, (पुरो भवः। पुरस्+"दक्षिणापश्चात्पुरसस्त्यक्।" ४।२।६८। इति त्यक्।) प्रथमः। इत्यमरः। ३।१।८०॥ (पूर्व्वदिग्भवः। यथा, रघुः। ४।३४।

"पौरस्त्यानेवमाक्रामन् तान् तान् जनपदान् जयी॥")

पौराणिकः, त्रि, (पुराणमधीते वेद वा। पुराण+"आख्यानाख्यायिकेतिहासपुराणेभ्यश्च।" ४।२।६०। इत्यस्य वार्त्तिकोक्त्या ठक्।) पुराणवेत्ता। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। १।४।१। "लोमहर्षणपुत्र उग्रश्रवाः सौतिः पौराणिको नैमिषारण्ये शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे ऋषीनभ्यागतानुपतस्थे॥" यथा च भागवते। १२।७।५।

"चत्वारश्च: कश्यपश्च सावर्णिरकृतव्रणः। वेणस्यायनहारीतौ षड्वै पौराणिका इमे॥")

पौरुषं, क्ली, (पुरुष+अण्।) पुरुषस्य भावः। पुरुषस्य कर्म्म। पुरुषस्य तेजः। इति मेदिनी॥

"क्लीवा हि दैवमेवैकं प्रशंसन्ति न पौरुषम्। दैवं पुरुषकारेण घ्नन्ति शूराः सदोद्यमाः॥"

इत्यग्निपुराणम्॥

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-र्दैवेन देयमिति कापुरुषा वदन्ति। दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः॥"

इति हितोपदेशः॥

पौरुषं, त्रि, (पुरुष+अण्।) ऊर्द्ध्वविस्तृतदोःपार्श्वपृष्ठमाणम्। पुरुषपरिमाणम्। इत्यमरः। ३।३।२२२॥ (पुरुषवाह्यः। यथा, मनुः। ८।४०४।

"पणं यानं तरे दाप्यं पौरुषोऽर्द्धपणं तरे॥")

पौरुषेयः, पुं, (पुरुष+"सर्व्वपुरुषाभ्यां णढञौ।" ५।१।१०। इत्यत्र "पुरुषाद्बधविकारसमूहतेन कृतेषु" इत्यर्थेषु ढञ्।) समूहः। (यथा, माघः। २।४।

"एकाकिनोऽपि परितः पौरुषेयवृता इव॥")

वधः। पुरुषस्य पदान्तरम्। इति मेदिनी॥

पौरुषेयः, त्रि, (पुरुष+ढञ्।) पुरुषकृतः। पुरुषविकारः। इति मेदिनी॥ (पुरुषसम्बन्धिनि। यथा, ऋग्वेदे। १०।८७।१६।

"यः पौरुषेयेण क्रविषा समंक्ते॥")

पौरोगवः, पुं, स्त्री, (पुरोऽग्रे गौर्नेयं यस्येति। पुरोगुः। ततः प्रज्ञाद्यण्।) पाकशास्त्राध्यक्षः। इत्यमरः। २।९।२७॥ (यथा, हरिवंशे। १४६।५८।

"हृष्टाश्वसौवर्च्चलशुक्लपूर्णान् पौरोगवोक्तानुपनेतुरेषाम्॥")

पौरोडाश्यः, पुं, (पुरोडाश एव। प्रज्ञाद्यण्।) पुरोडाशः। पुरोडाशसहचरितो मन्त्रः। इति सिद्धान्तकौमुदी॥

पौरोडाशिकः, पुं, (पुरोडाशसहचरितो मन्त्रः पुरोडाशः स एव पौरोडाश्यः। तस्य व्याख्यानस्तत्र भवो वा। "पौरोडाश-पुरोडाशात् ठन्।" ४।३।७०। इति ठन्।) पुरोडाशिकः। इति सिद्धान्तकौमुदी॥

पौर्णमासः, पुं, (पौर्णमास्यां भवः। पौर्णमासी+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।" ४।३।१६। इत्यण्।) यागविशेषः। इत्यमरः। २।७।४८॥ (यथा, मनुः। ४।२५।

"दर्शेन चार्द्धमासान्ते पौर्णमासेन चैव हि॥")

तथा हि। अमावस्यायां अमावस्यया यजेत पौर्णमास्यां पौर्णमास्या यजेत इति श्रुतिविहितदर्शपौर्णमासयागयोः कर्म्मस्वरूपप्रापकयोरुत्पत्तिश्रुतीः समामनन्ति। यथा। आग्नेयाष्टाकपालोऽमावास्यायां पौर्णमास्याञ्चुतो भवति। उपांशुयाजमन्तरा यजति ताभ्यामेवाग्नीषोमीयमेकादशकपालं पौर्णमास्यामेव प्रायश्चित्त ऐन्द्रं दधि भवत्यमावास्यायामैन्द्रं पयो भवत्यमावास्यायामिति। ताभ्यामाग्नेयाष्टाकपालोपांशुयाजाभ्याम्। तेन आग्नेयाष्टाकपालोपांशुयाजाग्नीषोमीयैकादशकपालाख्ये: पौर्णमास्याम्। आग्नेयाष्टाकपालैन्द्रदधियागैन्द्रपयोयागाख्ययोरमावास्यायामित्यर्थः। आसु श्रुतिषु अमावास्यापौर्णमासीपदानि प्रतिपत्सहिततदुभयपराणि। तत्र पूर्व्वयोर्यागारम्भः प्रतिपदोर्यागः। तथा च ह्येह वै पौर्णमास्यौ ह्ये अमावास्ये तस्मात् प्रतिपदुपवसन् यजेतापरेद्युरिति श्रुतिः। अस्यार्थः। यावज्जीविकयोर्दर्शपौर्णमासयोः प्रकृतिभूतयोर्विकृतिभूतौ दर्शपौर्णमासौ कौण्डपायिनामयनीयौ पशादौ कर्त्तव्यौ।" इति मलमासतत्त्वम्॥

पौर्णमासी, स्त्री, (पूर्णो मासोऽस्यां वर्त्तते इति। पूर्णमासादण् वक्तव्य इत्यण्। ततो ङीप्।) पूर्णिमा। इत्यमरः। १।४।७॥

पौर्व्वाह्णिकः, त्रि, (पूर्व्वाह्ण+"विभाषा पूर्व्वाह्णापराह्णाभ्याम्।" ४।३।२३। इति ठञ्।) पूर्व्वाह्णे भवः। पूर्व्वाह्णसम्बन्धी। इति सिद्धान्तकौमुदी॥

पौलस्ती, स्त्री, (पुलस्तेः स्त्र्यपत्यम्। पुलस्त+यञ्। ङीप्। यलोपः।) शूर्पणखा। इति व्याकरणम्॥

पौलस्त्यः, पुं, (पुलस्तेरपत्यमिति। पुलस्ति+गर्गादित्वात् यञ्।) कुबेरः। इत्यमरः। १।१।७२॥ राक्षसः। इति मेदिनी॥ (यथा, हरिवंशे। ३१।३५।

"सुमोच रथः पौलस्त्यं पुलस्त्येनानुयाचितः॥")

विभीषणः। इति शब्दरत्नावली॥

पौलिः, पुं, (पोलतोति। पुल महत्त्वे+ञ्वलादित्वात् णः। पौलेन निर्वृत्तः। सुतङ्गमादित्वात् इञ्।) पाकावस्थागतकलायादिः। आरब्धपाकयवसर्षपादिः। वह्निना ईषद्दग्धपुट्टपुट्टशब्दवान्। इति केचित्। ईषद्दग्धः। इति श्रीधरः। इति भरतः॥ तत्पर्य्यायः॥ आपक्वम् २ अभ्यूषः ३। इत्यमरः॥ अभ्युषः ४ अभ्योषः ५। इति भरतः॥

पौलोमी, स्त्री, (पुलोम्नोऽपत्यमिति। पुलोमन्+अण्। अनो लोपः।) शची। इति हेमचन्द्रः॥ (यथा, भागवते। ५।७।६।

"विराजमानः पौलोम्या सहार्द्धासनयाभ्रगम्॥")

पौषः, पुं, (पौषी पौर्णमास्यस्मिन्निति। तस्मिन् पौर्णमासीत्यण्।) वेदाख्यादिद्वादशमासान्तर्गतनवममासः। पुष्यनक्षत्रयुक्ता पौर्णमासी यत्र मासे सः। तत्पर्य्यायः। तैषः २ सहस्यः३। इत्यमरः॥ पौषिकः ४ हैमनः ५। इति राजनिर्घण्टः॥ तिष्यः ६ तिष्यकः ७। इति शब्दरत्नावली॥ अयं धनुःस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तरूपो मासचान्द्रः। क्षणप्रतिपदादिपौर्णमास्यन्तरूपो गौणचान्द्रः। धनूराशिस्थरविकः सौरः। इति स्मृतिः॥ * ॥ तत्र जातफलम्। यथा, कोष्ठीप्रदीपे।

"निगूढमन्त्रः सुहृदाङ्गयष्टिः
परोपकारी पितृवित्तहीनः।
कष्टान्वितार्थव्ययलब्धिभिन्नः
पौषप्रसूतः पुरुषः सुधीरः॥"

पौषी, स्त्री, (पुष्य+"नक्षत्रेण युक्तः।" इत्यण्। तिष्यपुष्येति यलोपः।) पुष्ययुक्ता पौर्णमासी। इत्यमरः॥ पुष्येण युक्ता रात्रिः। इति मुग्धबोधव्याकरणम्॥

पौष्करं, क्ली, (पुष्करस्येदमिति। पुष्कर+अण्।) पुष्करमूलम्। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो गुणाश्च यथा,—

"उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत्।
पद्मपत्रञ्च काश्मीरं कुलभेदमिमं जगुः॥
पौष्करं कटुकन्तिक्तसुक्तं वातकफज्वरान्।
हन्ति श्वोथारुचिश्वासान् विशेषात् पार्श्वशूलजुत्॥"

अस्य प्रतिनिधिर्यथा,—

"पौष्करोभावतः कुष्ठम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पौष्करमूलं, क्ली, (पौष्करं मूलम्।) पुष्करमूलम्। यथा,—

"मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे।"

इत्यमरः॥

"त्रीणि पुष्करमूले। पुष्करं सुगन्धिद्रव्यं वणिक्ख्यातं तस्य इदं पौष्करं यः पौष्करे मूले पुष्करादीत्यन्वयः।" इति भरतः॥

पौष्करिणी, स्त्री, (पौष्करं पुष्कराणां समूहोऽस्या अस्तीति। पौष्कर+इनि। स्त्रियां ङीप्।) पुष्करिणी। इति शब्दरत्नावली॥

पौष्टिकं, क्ली, (पुष्टेः इदं हितमिति। पुष्टि+ठञ्।) चौरसमये गात्राच्छादनवस्त्रविशेषः। कावार इति भाषा॥ अस्य गुणाः। धनचिह्नत्वम्। आयुष्यत्वम्। शुचित्वम्। रूपविराजनत्वञ्च। इति राजवल्लभः॥ धन्यं धनचिह्नम्। बल्यमिति वा पाठः। पुष्टिर्धनजनादीनां वृद्धिरित्यभिधीयते। तद्धेतुभूतं कर्म्म। इति दुर्गभङ्गः॥ (पुष्टिहिते, त्रि। यथा, महाभारते। १२।२६६।२६।

"सतां वृत्तमधिष्ठाय निष्ठीनानुच्छिखीवंदः।
मन्त्रवर्च्चं न दुष्यन्ति कुर्व्वाणाः पौष्टिकीः क्रियाः॥")

पौष्यं, त्रि, (पुष्येण निर्वृत्तम्। पुष्यस्येदं वेति। पुष्य+अण्।) पुष्यनिर्म्मितम्। पुष्यसम्बन्धि। यथा, कालिकापुराणे ६० अध्याये।

"आसनं प्रथमं दद्यात् पौष्यं दारुजमेव वा।
वास्त्रं वा चार्म्मजं कौशं मण्डलस्योत्तरे क्षिपेत्॥"

पौष्यकं, क्ली, (पुष्येण क्रायतीति। के+कः। पुष्यक+स्वार्थे अण्।) कुसुमाञ्जनम्। इत्यमरः॥

पौष्यी, स्त्री, (पुष्यस्य इयं इति। पुष्य+अण्। गौरादित्वात् ङीष्। पुष्याख्यया प्रसिद्धत्वात् तथात्वम्।) देशविशेषः। यथा,—

"अथ पुष्यपुरं पौष्यी तथा पाटलिपुत्रकम्॥"

इति शब्दरत्नावली॥

पौष्यः, पुं, (पुष्णोऽपत्यमिति। पूषन्+यञ्।) पूषपुत्रः। स च करवीरपुरस्य राजा। तस्य पुत्रः शिवांशजशङ्खशेखरः। यथा,—

"पूष्णः पुत्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः।
स पुत्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः॥
ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः।
ब्रह्मदत्तफलं हस्ते क्षत्वेदं तमुवाच ह॥
इदं फलं ब्रह्मदत्तं विभज्य नृपते! त्रिधा।
भोजयेस्ताः खजायाश्च प्रहृष्टः सुप्रमानसः॥
ततः फले स्वयं देवः प्रविवेश वृषध्वजः।
ततश्चखात्तत् फलं भूतं त्रिभागं स्वयमेव हि॥
ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम्।
तत् फलं नृपशार्दूल! गर्भाधाप्यहिताः शुभाः॥
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत।
खड्गत्रयं पृथक् राजा यथा भर्गेण भाषितम्॥
तच्च खड्गत्रयं पौष्यो यथास्थानं नियोज्य च।
एकं भिक्षुं चकाराशु तत्र पुत्रो व्यजायत॥
तस्य नामाकरोद्राजा ब्राह्मणैः सैः पुरोहितैः।
चन्द्रशेखर इत्येवं कान्त्या चन्द्रमसः समः॥
ब्रह्मावर्त्ताऽभवे रम्ये करवीराऽभये पुरे।
दृषद्वतीनदीतीरे राजा भूत्वा समोद ह॥"

इति कालिकापुराणे ४६ अध्यायात् सङ्कलितः॥ (नृपभेदः। स तु गुरुदक्षिणार्थमागताय उतङ्काय कुण्डले दत्तवान्। यथा, महाभारते। १।३।२१२।

"ततस्तद्वै पौष्यः प्रत्युवाच भगवन्निरेव पाचमासाद्यते भवांश्च गुरुवागतिधिस्तदिच्छे आहं कर्त्तुं क्रियतां चेव इति।" एतद्विशेषविवरणन्तु तत्रैव द्रष्टव्यम्॥)

प्याट्, य, ङे। भोः। इत्यमरः। ३।४।७॥

प्याय, ओ ईं ङ इद्धौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ओ ईं, पीनं सुखम्। उपसर्गात्तु प्रध्यानम्। अवाङ्गे तु ध्यानः पीनः खेदः। ङ, प्यायते। इति दुर्गादासः॥

प्युष, क उत्सर्गे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) अन्तःस्थाद्ययुक्तः। उत्सर्गे उत्सर्गे। क, प्योषयति धनं दाता। इति दुर्गादासः॥

प्युष, य इर् भागे। दहि। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) अन्तःस्थाद्ययुक्तः। य, प्युष्यति धनं दायादः। इर्, अप्युषत् अप्योषीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

प्युष, य इर् विभागे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) अन्तःस्थाद्ययुक्तः। य, प्युष्यति धनं दायादः। इर्, अप्युषत् अप्योषीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

प्ये, ङ इद्धौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-अनिट्।) अन्तःस्थाद्ययुक्तः। ङ, प्यायते। इति दुर्गादासः॥

प्र, य, (प्रथयतीति। प्रथ+डः।) विंशत्युपसर्गान्तर्गतप्रथमोपसर्गः। अस्यार्थाः। गतिः। आरम्भः। उत्कर्षः। सर्व्वतोभावः। प्राथम्यम्। ख्यातिः। उत्पत्तिः। व्यवहारः। इति दुर्गादासधृतपुरुषोत्तमः॥

प्रकटं, त्रि, (प्रकटतीति। प्र+कट+अच्।) स्पष्टम्। अस्य पर्य्यायः प्रकाशप्रगल्भे द्रष्टव्यः।

"प्रकटाप्रकटा चेति लीला सेयं द्विधोच्यते।"

इति भागवतान्ततम्॥

(यथा च, देवीभागवते। १।७।३८।

"जानन्ति ये न तव देवि! परं प्रभावं
ध्यायन्ति ते हरिहरावपि मन्दचित्ताः।
ज्ञातं मयाद्य जननि! प्रकटं प्रभावं
यद्विष्णुरप्यतितरां विवशोऽथ शेते॥")

प्रकटितं, त्रि, (प्र+कट+क्त।) प्रकाशितम्। इति हेमचन्द्रः॥ (यथा, देवीभागवते। १।७।४४।

"स्पृष्ट्वात्र मां भगवति ! प्रविनाग्निं चेन्नेच्छास्ति ते कुरु दयां परिहृत्य मौनम् ।
कस्मादिमौ प्रकटितौ किल कालरूपौ
यद्वा भवानि ! हसितुं तु किमिच्छसे त्वम् ॥")

प्रकम्पनः, पुं, (प्रकम्पयतीति । प्र + कपि + णिच् + ल्युः ।) वायुः । इति हेमचन्द्रः ॥ (यथा, माघे । १ । ६१ ।

"निष्पान्तनारीपरिधानधूनन-
स्फुटागसाप्यूरुषु लोलचक्षुषः ।
प्रियेषु तस्यानपराधबाधिताः
प्रकम्पनेनानुचकम्पिरे सुराः ॥")

नरकविशेषः । इति शब्दरत्नावली ॥ (राक्षसविशेषः । इति रामायणम् ॥ प्र + कपि + ल्युट् ।) कम्पातिशये, क्ली ॥

प्रकरं, क्ली, (प्रकीर्य्यते इति । प्र + कॄ + कर्म्मणि अप् ।) अगुरु । इति मेदिनी । रे, १७६ ॥

प्रकरः, पुं, (प्रकिरतीति । प्र + कॄ + अप् ।) समूहः । (प्रकीर्य्यते इति । प्र + कॄ + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) विकीर्णकुसुमादिः । इति मेदिनी । रे, १७८ ॥ (यथा, अमरुके । ३ ।

"यत्राग्रयो लगति तत्रागजा वसतु कुत्रापि निस्तुलसुखा
सुत्रामकालसुखसत्राग्रनप्रकरसत्राथकारिचरणा ।
कृत्रानिलातिरयपत्रांभिरामगुणमित्रामरीसमबधूः
कुत्रासहृन्मखिविचित्राकृतिः स्फुरितपुत्रादिदाननिपुणा ॥")

प्रकरणं, क्ली, (प्रक्रियते अस्मिन्निति । प्र + कॄ + आधारे ल्युट् ।) प्रस्तावः । (उक्तान्तः । इत्यमरः । ३ । ३ । ६३ ॥ यथा, महाभारते । ३ । २०४ । २१ ।

"एतत्प्रकरणं राजन्नधिकृत्य युधिष्ठिर ! ।
पतिव्रतानां नियतं धर्म्मेष्वावहितः शृणु ॥")

अभिनेयप्रकारः । रूपकभेदः । इति हेमचन्द्रः ॥ ग्रन्थसन्धिः । इति त्रिकाण्डशेषः ॥ पादः । स तु एकार्थावच्छिन्नश्लोकसमूहः । इति मुग्धबोधटीकायां दुर्गादासः ॥ (नाटकोक्तप्रकरणं तल्लक्षणादिर्यथा, साहित्यदर्पणे । ६ । २४० — २४१ ।

"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम् ।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ॥
सापायधर्म्मकामार्थपरो धीरप्रशान्तकः ॥
विप्रनायकं यथा मृच्छकटिकम् । अमात्यनायकं मालतीमाधवम् । वणिङ्नायकं पुष्पभूषितम् ।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित् ।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः ॥
कितवद्यूतकारादिविटचेटकसङ्कुलः ॥
कुलस्त्री पुष्पभूषिते । वेश्या तु रङ्गदत्ते । द्वे अपि मृच्छकटिके । अस्य नाटकप्रतिरूपतित्वात् प्रेक्षं नाटकवत् ॥")

प्रकरी, स्त्री, (प्रकीर्य्यते अत्रेति । प्र + कॄ + अप् । गौरादित्वात् ङीष् ।) नाट्याङ्गम् । चत्वरभूमिः । इति शब्दरत्नावली ॥

प्रकर्षः, पुं, (प्र + कृष् + भावे घञ् ।) उत्कर्षः । यथा, काव्यप्रकाशे ।

"गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः ॥"

(यथा च महाभारते । १ । १५६ । ३४ ।

"बालोऽपि यौवनं प्राप्य मानुषेषु विधाम्यते ! ।
सर्व्वास्त्रेषु परं वीरः प्रकर्षमगमद्बली ॥")

प्रकाण्डः, पुं क्ली, (प्रकृष्टः काण्डः इति प्रादिसमासः ।) मूलादारभ्य शाखावधिश्चभागः । गुँड़ी इति भाषा ॥ तत्पर्य्यायः । स्कन्धः २ । इत्यमरः । २ । ४ । १० ॥ काण्डम् ३ । इति शब्दरत्नावली ॥ दण्डः ४ । इति राजनिर्घण्टः ॥ विटपः । शस्त्रः । इति मेदिनी । डे, ३१ ॥ (यथा, अमरे । १ । ४ । २७ ।

"मतल्लिका मतल्लिका प्रकाण्डसुहृतल्लजौ ।
प्रशस्तवाचकाग्र्यमूत्रयः शुभावहो विधिः ॥")

प्रकाण्ड + स्वार्थे कन्प्रत्ययेन प्रशस्तार्थे । यथा, भट्टौ । ५ । ६ ।

"दण्डकामथवार्त्तां यौ वीर ! रक्षःप्रकाण्डकौ ।
वृथा संख्येऽवधातां तौ सभृत्यौ भूमिवर्द्धनौ ॥"

"रक्षःप्रकाण्डकौ प्रशस्तौ राक्षसौ ।" इति तट्टीकायां जयमङ्गलः ॥)

प्रकाण्डरः, पुं, (प्रकाण्डं राति गृह्णातीति । रा + कः ।) वृक्षः । इति शब्दचन्द्रिका ॥

प्रकामं, त्रि, (प्रगतं कामामिति प्रादिसमासः ।) यथेप्सितम् । इत्यमरः ॥ (यथा, महाभारते । ४ । १३ । २६ ।

"चित्रमाल्याम्बरधरा सर्व्वाभरणभूषिता ।
कामं प्रकामं सेवत्वं मया सह विलासिनि ! ॥")

प्रकारः, पुं, (प्रभेदकरणं प्रकृष्टकरणं वेति । प्र + कृ + घञ् ।) भेदः । (यथा, पञ्चदश्याम् । ७ । १४४ ।

"अश्नाति वा नवाश्नाति शुङ्क्ते वा स्वेच्छयाऽथवा ।
येन केन प्रकारेण क्षुधामपनिनीषति ॥")

साहश्यम् । इत्यमरः । २ । ८ । ५७ ॥

प्रकाशं, क्ली, (प्रकाशते इति । प्र + काश + अच् ।) कांस्यम् । इति हेमचन्द्रः ॥ (दीप्तिः । यथा, महाभारते । ३ । १७१ । २७ ।

"पुनः प्रकाशमभवत् तमसा ग्रस्यते पुनः ।
भवत्यदर्शनो लोकः पुनरप्सु निमज्जति ॥")

प्रकाशः, पुं, (प्रकाशते इति । प्र + काश + अच् ।) रौद्रः । तत्पर्य्यायः । द्योतः २ आतपः ३ । इत्यमरः । १ । ४ । ३४ ॥ राजनिर्घण्टोक्तपर्य्यायाः प्रभाशब्दे द्रष्टव्याः ॥ (यथा, पञ्चदश्याम् । २ । ३८ ।

"निर्ज्जगद्बोमहृच्चेत् प्रकाशतमसौ विना ।
क्व दृष्टं किञ्च ते पक्षे न प्रत्यक्षं वियत् खलु ॥")

प्रदीप्तः । तत्पर्य्यायः । स्फुटम् २ स्पष्टम् ३ प्रकटम् ४ उल्बणम् ५ व्यक्तम् ६ । इति हेमचन्द्रः ॥ प्रत्यक्षम् ७ उद्रिक्तम् ८ । इति जटाधरः ॥ प्रहासः । इति मेदिनी । शे, २४ ॥ अतिप्रसिद्धः । इति शब्दरत्नावल्यमरौ ॥

प्रकाशकः, त्रि, प्रकाशकर्त्ता । प्रकाशयतीत्यर्थे (ण्वुल्) शकप्रत्ययः ॥ (यथा, भगवद्गीतायाम् । १४ । ६ ।

"तत्र सत्त्वं निर्म्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ! ॥")

प्रकाशकज्ञाता, [तृ] पुं, (प्रकाशकस्य ज्ञातप्रतस्य ज्ञाता ।) कुक्कुटः । इति शब्दचन्द्रिका ॥ प्रकाशकज्ञातरि, त्रि ॥

प्रकाशात्मा, [न्] पुं, (प्रकाश आत्मा स्वरूपं देहो वा यस्य ।) सूर्य्यः । इति शब्दचन्द्रिका ॥ यत्तत्स्वभावे, त्रि ॥

प्रकाशितं, त्रि, (प्रकाशो जातोऽस्येति । प्रकाश + तारकादित्वात् इतच् । यद्वा, प्र + काश + णिच् + क्तः ।) प्रकाशविशिष्टम् । तत्पर्य्यायः । दर्शितम् २ आविष्कृतम् ३ प्रकटितम् ४ । इति हेमचन्द्रः ॥

प्रकीर्णं, क्ली, (प्रकीर्य्यते स्मेति । प्र + कॄ विक्षेपे + क्तः ।) ग्रन्थविच्छेदः । इति जटाधरः ॥ चामरम् । इति त्रिकाण्डशेषः ॥

प्रकीर्णः, पुं, (प्रकीर्य्यते दुर्गन्धमनेनेति । प्र + कॄ + क्तः ।) पूतिकरञ्जः । इति राजनिर्घण्टः ॥

प्रकीर्णः, त्रि, (प्रकीर्य्यते स्मेति । प्र + कॄ + क्तः ।) विक्षिप्तः । विस्तृतः । यथा,—

"प्रकीर्णभोगमनवेक्ष्यकारिणीं
सदैव भर्त्तुः प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्জ্জयामि ॥"

इति लक्ष्मीचरित्रम् ॥

नानाप्रकारमिश्रितः । यथा,—

"प्रकीर्णैः पुष्पाद्यैर्हरिचरणयोरञ्जलिरयम् ॥"

इति वेणीसंहारः ।

प्रकीर्णकं, क्ली, (प्रकीर्ण + स्वार्थे कन् ।) चामरम् । इत्यमरः । २ । ८ । ३१ ॥ विस्तारः । इति मेदिनी । के, १६६ ॥ ग्रन्थविच्छेदः । इति हेमचन्द्रः ॥ पापविशेषः । तथा विष्णुः । यदुक्तं तत् प्रकीर्णकम् ।

"प्रकीर्णपातके प्राप्ते गुरुत्वमथ लाघवम् ।
प्रायश्चित्तं बुधः कुर्य्यात् ब्राह्मणानुमते सदा ॥"

अनुक्तं अनुक्तनिष्कृतिकं पापम् ।

"अतिपातकाद्यन्यतमलेन विशेषतोऽनुक्तकम् ॥"

इति प्रायश्चित्तविवेकः ॥

प्रकीर्णकः, पुं, (प्रकीर्ण + संज्ञायां कन् ।) तुरङ्गमः । इति मेदिनी । के, १६६ ॥ (यथा, महाभारते । ७ । ३५ । ३७ ।

"आरूढान् शिक्षितैर्योधैः शस्त्रकृद्भिरयोधिभिः ।
विध्वस्तचामरकृथान् विप्रविद्धप्रकीर्णकान् ॥")

प्रकीर्त्तितं, त्रि, (प्रकीर्त्यते स्मेति । प्र + कृत् + क्तः ।) कथितम् । यथा,—

"प्रभूतमल्पं कार्यं वा यो नरः कर्त्तुमिच्छति।
सर्व्वारम्भेण तत् कुर्य्यात् सिंहादेकं प्रकीर्त्तितम्॥"
इति चाणक्यसंग्रहः॥

प्रकीर्य्यः, पुं, (प्रकीर्य्यते इति। प्र+कॄ+अण्यादिलात् यक्।) करञ्जभेदः। इत्यमरः॥ गाटाकरञ्ज इति भाषा॥ घृतकरञ्जः। रीठाकरञ्जः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—
"घृतपूर्णकरञ्जोऽन्यः प्रकीर्य्यः पूतिकोऽपि च।
स चोक्तः पूतिकरञ्जः सोमवल्कश्च स स्मृतः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

प्रकूलं, क्ली, (प्रकर्षेण कोलति राशीकरोति मेलीकरोति वेति। प्र+कुल+कः।) प्रशस्तवपुः। इति त्रिकाण्डशेषः॥

प्रकृतः, त्रि, (प्रक्रियते स्मेति। प्र+कृ+क्तः।) प्रकरणप्राप्तः। यथा। प्रकृतमनुसरामः। प्रकर्षेण कृतः। अविकृतः। प्रपूर्ब्बककृधातोः कर्म्मणि क्तप्रत्ययः॥ (प्रक्रान्तः। यथा, माघे।१९।४२।
"प्रकृतजपविधीनामास्यसुद्रक्षिदन्त-
मुदुरपि हितमौष्ठैरक्षरैर्लक्ष्यमन्यैः॥")

प्रकृतिः, स्त्री, (प्रक्रियते कार्य्यादिकमनयेति। प्र+कृ+क्तिन्।) स्वभावः। (यथा चरके विमानस्थाने प्रथमेऽध्याये।
"तत्र प्रकृतिरुच्यते स्वभावो यः स पुनराहारौषधव्यायामैः स्वभाविको गुणैर्द्रव्यगुणयोगः। तद्यथा मापसुद्गयोः शूकरैणयोश्च।") योनिः। लिङ्गम्॥ स्वामी। अमात्यः। सुहृत्। कोषः। राष्ट्रम्। दुर्गम्। बलम्। (यथा, मनौ।९।२९४।
"स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा।
सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते॥"
धर्म्माध्यक्षादिसप्तप्रकृतयो यथा,—
"धर्म्माध्यक्षो धनाध्यक्षः कोषाध्यक्षश्च भूपतिः।
दूतः पुरोधा दैवज्ञः सप्त प्रकृतयोऽभवन्॥")
पौरागां श्रेण्यः। इत्यमरः।२।८।१८॥
(यथा, मार्कण्डेये।१६।२०।
"प्रक्षिप्य तनयस्तस्मै दत्तात्रेयाय सोऽर्জ্জुनः।
आनाय्य प्रकृतीः सम्यगभिषेकमयाचत॥"
स्वरूपावस्था। यथा, हितोपदेशे।२।१६६।
"खेदितो महिषस्तेन रज्जुभिः परिवेष्टितः।
मुक्तो दादशभिर्वर्षैः स्वपुच्छः प्रकृतिं गतः॥")
श्लिष्टौ। इति हेमचन्द्रः॥ शक्तिः। (यथा,—
"प्रधानं प्रकृतिः शक्तिर्नित्याचाविकृतिस्तथा।
एतानि तस्या नामानि शिवमाश्रित्य याः स्थिताः॥"
इति पूर्ब्बखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम्॥)
योषित्। इति शब्दरत्नावली॥ परमात्मा। इति धरणिः। पञ्चभूतानि। करणम्। शुक्लम्। जन्तुः। एकविंशत्यक्षरपादच्छन्दोविशेषः। माता। इति नानार्थरत्नमाला॥ प्रत्ययात् प्रथमः। स च द्विधा धातुर्नाम च। इत्यजयपालः॥ (प्रकर्षेण सृष्ट्यादिकं करोतीति। प्र+कृ+कर्त्तरि क्तिच्।) भगवतो मायाख्या शक्तिः। सा च परापरभेदेन द्विधा। यथा,—
"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥ ४॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो! ययेदं धार्य्यते जगत्॥"५॥
इति श्रीभगवद्गीतायां ७ अध्यायः॥
"एवं श्रोतारमभिमुखीकृत्य इदानीं प्रकृतिद्वारा सृष्ट्यादिकर्तृत्वेन ईश्वरतत्त्वं प्रतिज्ञातं निरूपयिष्यन् परापरभेदेन प्रकृतिद्वयमाह भूमिरिति द्वाभ्याम्। भूम्यादीनि पञ्चभूतसूक्ष्माणि मनःशब्देन तत्कारणभूतोऽहङ्कारः बुद्धिशब्देन तत्कारणं महत्तत्त्वं अहङ्कारशब्देन तत्कारणमविद्या इत्येवमष्टधा भिन्ना। यदा भूम्यादिशब्दैः पञ्च महाभूतानि सूक्ष्मैः सह एकीकृत्य गृह्यन्ते। अहङ्कारशब्देनैवाहङ्कारं तेनैव तत्कार्य्याणि इन्द्रियाण्यपि गृह्यन्ते बुद्धिरिति महत्तत्त्वम्। मनःशब्देन तु मनसैवोन्नेयं अव्यक्तस्वरूपं प्रधानमित्यनेन प्रकारेण मे प्रकृतिर्म्मायाख्या शक्तिरष्टधा भिन्ना विभागं प्राप्ता। चतुर्विंशतिभेदभिन्नाप्यष्टस्वेवान्तर्भावविवक्षयाऽष्टधा भिन्नेत्युक्तम्। तथा च चैत्याधाये इमामेव प्रकृतिं चतुर्विंशतितत्त्वात्मना प्रपञ्चयिष्यति।
'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः॥'
इति॥ ३॥
अपरामिमां प्रकृतिमुपसंहरन् परां प्रकृतिमाह अपरेयमिति। अष्टधा प्रकृतिरुक्ता इयमपरा निकृष्टा जड़त्वात् परार्थत्वाच्च। इतः सकाशात् परां प्रकृष्टामन्यां जीवभूतां जीवस्वरूपां मे प्रकृतिं जानीहि। परत्वे हेतुः यया चेतनया चेत्रज्ञस्वरूपया स्वकर्म्मद्वारेणेदं जगद्धार्य्यते॥" ५॥ इति तट्टीकायां श्रीधरस्वामी॥
सत्त्वरजस्तमसां साम्यावस्था। यथा,—
"सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम्।
साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता॥
केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः।
एतदेव प्रजासृष्टिं करोति विकरोति च॥"
इति मात्स्ये ३ अध्यायः॥
तत्पर्य्यायः। प्रधानम्२। इत्यमरः॥ माया३ शक्तिः४ चैतन्यम्५। इति राजनिर्घण्टः॥
तस्या नामान्तराणि यथा,—
"तमोऽव्यक्तं शिवो धाम रजो योनिः सनातनः।
प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययौ॥
अनुद्रिक्तमनूनं वाप्यकस्मात्मचलं ध्रुवम्।
सदसच्चैव तत्सर्व्वमयक्तं त्रिगुणं स्मृतम्।
ज्ञेयानि नामधेयानि नरैरध्यात्मचिन्तकैः॥
अव्यक्तनामानि गुणांश्च तत्त्वतो
यो वेद सर्व्वाणि गतीश्च केवलाः।
विमुक्तदेहः प्रविभागतत्त्ववित्
स मुच्यते सर्व्वगुणैर्निरामयः॥"
इति महाभारते आश्वमेधिकपर्व्व॥ *॥
सा पञ्चविधा।

"गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती।
सावित्री च सृष्टिविधौ प्रकृतिः पञ्चमी स्मृता॥" *॥
तस्या उत्पत्तिर्यथा,—
"प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः।
सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता॥
गुणे प्रकृष्टे सत्त्वे च प्रशब्दो वर्त्तते श्रुतौ।
मध्यमे रजसि क्रत्र निशब्दस्तामसः स्मृतः॥
त्रिगुणात्मस्वरूपा या सर्व्वशक्तिसमन्विता।
प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते॥
प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः।
सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्त्तिता॥" *॥
तासां उत्पत्तिः स्वरूपञ्च यथा,—
"योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः।
पुंमांश्च दक्षिणार्द्धाङ्गात् वामाङ्गात् प्रकृतिः स्मृता॥
सा च ब्रह्मस्वरूपा च या या नित्या सनातनी।
यथात्मा च यथा शक्तिर्यथायौ दाहिका स्मृता॥
अतएव हि योगीन्द्रः स्त्रीपुंभेदं न मन्यते।
सर्व्वं ब्रह्ममयं ब्रह्मन्! पश्यति पश्यति नारद!॥
स्वेच्छामयं स्वेच्छया च श्रीकृष्णस्य सिसृक्षया।
साविर्बभूव सहसा मूलप्रकृतिरीश्वरी।
तदाज्ञया पञ्चविधा सृष्टिकर्म्माणि वेदतः॥"
दुर्गाप्रकृतिर्यथा,—
"अथ भक्तानुरोधाद्वा भक्तानुग्रहविग्रहा।
गणेशमाता दुर्गा या शिवरूपा शिवप्रिया॥
नारायणी विष्णुमाया पूर्णब्रह्मस्वरूपिणी।
ब्रह्मादिदेवैर्मुनिभिर्मनुभिः पूजिता स्तुता॥
सर्व्वाधिष्ठातृदेवी सा सर्व्वरूपा सनातनी।
धर्म्मसत्यपुण्यकीर्त्तियशोमङ्गलदायिनी॥
सुखमोक्षहर्षदात्री शोकार्त्तिदुर्गनाशिनी।
शरणागतदीनार्त्तपरित्राणपरायणा॥
तेजःस्वरूपा परमा तदधिष्ठातृदेवता।
सर्व्वशक्तिस्वरूपा च शक्तिरीशस्य सन्ततम्॥
सिद्धेश्वरी सिद्धरूपा सिद्धिदा सिद्धिदेश्वरी।
बुद्धिनिद्रा क्षुत्पिपासा छाया तन्द्रा दया स्मृतिः॥
जातिः शान्तिश्च क्षान्तिश्च कान्तिर्भ्रान्तिश्च चेतना।
तुष्टिः पुष्टिस्तथा लक्ष्मीर्वृत्तिर्माता तथैव च॥
सर्व्वशक्तिस्वरूपा सा कृष्णस्य परमात्मनः।
उक्ता श्रुतौ श्रुतिगुणाद्यातिस्तुत्यं यथागमम्॥
गुणोऽस्यनन्तोऽनन्ताया अपराश्च निगमाय॥"१
लक्ष्मीप्रकृतिर्यथा,—
"शृणु सत्त्वस्वरूपा या पद्मा च परमात्मनः।
सर्व्वसम्पत्स्वरूपा सा तदधिष्ठातृदेवता॥
कान्ता दान्ता च शान्ता च सुशीला सर्व्वमङ्गला।
लोभमोहकामरोषाहङ्कारपरिवर्জ্জिता॥
भक्तानुरक्ता पत्युश्च सर्व्वाभ्यश्च पतिव्रता।
प्राणतुल्या भगवतः प्रेमपात्री प्रियंवदा॥

प्रकृतिः

सर्वग्रस्वात्मिका सर्वजीवनोपायरूपिणी।
महालक्ष्मीश्च वैकुण्ठे पाताले वरदा सती॥
स्वर्गे च स्वर्गलक्ष्मीश्च मर्त्यानां गृहिणान्तथा।
सर्वप्राणिषु द्रव्येषु शोभारूपा मनोहरा॥
प्रीतिरूपा पुण्यवतां प्रभारूपा नृपेषु च।
वाणिज्यरूपा वणिजां पापिनां कलहाङ्कुरा॥
दयामयी भक्तिमतो भक्तानुग्रहकातरा।
चपले चपला भक्ता सम्पदे च धनाय च॥
जगज्जीवं मृतं सर्वं यया देव्या विना सुने!।
ग्रक्तिर्द्वितीया कथिता वेदोक्ता सर्वसम्मता॥
सर्वपूज्या सर्ववन्द्या चान्या मत्तो निशामय।" २॥*॥

सरस्वतीप्रकृतिर्यथा,—

"वाग्बुद्धिविद्याज्ञानाधिदेवता परमात्मनः।
सर्वविद्या सर्वरूपा सा च देवी सरस्वती॥
स्मृतिर्बुद्धिकविता मेधा प्रतिभा स्फूर्तिदा सताम्।
नानाप्रकारसिद्धान्तभेदार्थकल्पनाप्रदा॥
व्याख्या बोधस्वरूपा च सर्वसन्देहभञ्जिनी।
विचारकारिणी ग्रन्थकारिणी शक्तिरूपिणी॥
स्वरसङ्गीतसन्तानतालकारणरूपिणी।
विषयज्ञानवाग्रूपा प्रतिविश्वेषु जीविनाम्॥
व्याख्या सुद्राकरा शान्ता वीणापुस्तकधारिणी।
शुद्ध सत्त्वस्वरूपा च सुशीला श्रीहरिप्रिया॥
हिमचन्दनकुन्देन्दुकुमुदाम्भोजसन्निभा।
जपन्ती परमात्मानं श्रीकृष्णं रत्नमालया॥
तपःस्वरूपा तपसां फलदात्री तपस्विनी।
बुद्धिविद्यास्वरूपा च सर्वसिद्धिप्रदा सदा॥
यया विना च विश्वौघो मृको मृतसमः सदा।
देवी तृतीया गदिता श्रुतुक्ता जगदम्बिका॥
यथागमं यथाकिञ्चिदपरां संनिबोध मे।"३॥*॥

सावित्री प्रकृतिर्यथा,—

"माता चतुर्णां वेदानां वेदज्ञानस्य छन्दसाम्।
सन्ध्यावन्दनमन्त्राणां तन्त्राणाञ्च विचक्षणा॥
द्विजातिजातिरूपा च जपरूपा तपस्विनी।
ब्रह्मतेजोरूपा च सर्वसंस्कारकारिणी॥
पवित्ररूपा सावित्री गायत्री ब्रह्मणः प्रिया।
तीर्थानि यस्याः संस्पर्शं दर्शं वाञ्छन्ति शुद्धये॥
शुद्धस्फटिकसङ्काशा शुद्धसत्त्वस्वरूपिणी।
परमानन्दरूपा च परमा च सनातनी॥
परब्रह्मस्वरूपा च निर्वाणपददायिनी।
ब्रह्मतेजोमयी शक्तिस्तदधिष्ठातृदेवता॥
यत्पादरजसा पूतं जगत् सर्वञ्च नारद!।
देवी चतुर्थी कथिता पञ्चमीं वर्णयामि ते॥"४॥

राधाप्रकृतिर्यथा,—

"प्रेमप्राणाधिका देवी या पञ्चप्राणरूपिणी।
प्राणाधिकप्रियतमा सर्वाभ्यः सुन्दरी वरा॥
सर्वसौभाग्ययुक्ता च मानिनी गौरवान्विता।
वामार्द्धाङ्गस्वरूपा च गुणेन तेजसा समा॥
परा वरा सारभूता परमाद्या सनातनी।
परमानन्दरूपा च धन्या मान्या च पूजिता॥
रासक्रीड़ाधिदेवी च कृष्णस्य परमात्मनः।
रासमण्डलसंभूता रासमण्डलमण्डिता॥

प्रकृतिः

रासेश्वरी सुरसिका रासवासनिवासिनी।
गोलोकवासिनी देवी गोपीवेशविधायिका॥
परमाह्लादरूपा च सन्तोषहर्षरूपिणी।
निर्गुणा च गुणाकारा निर्लिप्तात्मस्वरूपिणी॥
निरीहा निरहङ्कारा भक्तानुग्रहविग्रहा।
वेदानुसारध्यानेन विज्ञाता सा विचक्षणैः॥
दृष्टिदृष्टा लसद्वेषा सुरेन्द्रैर्मुनिपुङ्गवैः।
वह्निशुद्धांशुकाधाना रत्नालङ्कारभूषिता॥
कोटिचन्द्रप्रभाजुष्टपुष्टश्रीयुक्तविग्रहा।
श्रीकृष्णभक्तिदा सैव दात्री च सर्वसम्पदाम्॥
अवतारे च वाराहे वृषभानुसुता च या।
यत्पादपद्मसंस्पर्शपवित्रा च वसुन्धरा॥
ब्रह्मादिभिरदृष्टा या सर्वदृष्टा च भारते।
क्षीरजसारसंभूता कृष्णवक्षःस्थलोज्ज्वला॥
यथा घने नवघने लोला सौदामिनी सुने!।
षष्टिवर्षसहस्राणि प्रतप्तं ब्रह्मणा पुरा॥
यत्पादपद्मनखरदृष्टये चात्मशुद्धये।
न च दृष्टापि स्वप्नेऽपि प्रत्यक्षस्यापि का कथा॥
तेनैव तपसा दृष्टा भुवि वृन्दावने वने।
कथिता पञ्चमी देवी सा राधा परिकीर्तिता॥
अंशरूपा कलारूपा कलांशांशसमुद्भवा।
प्रकृतिः प्रतिविश्वेषु देव्यश्च सर्वयोषितः॥
परिपूर्णतमा पञ्चविधा देवी प्रकीर्तिता।
यायाः प्रधानांशरूपा वर्णयामि निशामय॥"५॥

गङ्गा यथा,—

"प्रधानांशस्वरूपा या गङ्गा भुवनपावनी।
विष्णुविग्रहसंभूता द्रवरूपा सनातनी॥
पापिपापिन्धनदाहाय ज्वलदग्निस्वरूपिणी।
सुखस्वर्गज्ञानपाने निर्वाणपददायिनी॥
गोलोके स्नानप्रस्थानसुखसोपानरूपिणी।
पवित्ररूपा तीर्थानां सरिताञ्च परा वरा॥
शम्भुमौलिजटामेरुसुक्तापंक्तिस्वरूपिणी।
तपःसन्तापिनी सद्यो भारते च तपस्विनाम्॥
चन्द्रपद्मक्षीरनिभा शुद्ध सत्त्वस्वरूपिणी।
निर्लज्जा निरहङ्कारा साध्वी नारायण-
प्रिया॥"६॥

तुलसी यथा,—

"प्रधानांशस्वरूपा च तुलसी विष्णुकामिनी।
विष्णुभूषणरूपा च विष्णुपादस्थिता सती॥
तपःसङ्कल्पपूजादिसद्यःसम्पादिनी सुने!।
सारभूता च पुण्यानां पवित्रा पुण्यदा सदा॥
दर्शनस्पर्शनाभ्याञ्च सद्योनिर्वाणदायिनी।
कलौ कलुषशुष्केधदाहायाग्निस्वरूपिणी॥
यत्पादपद्मसंस्पर्शसद्यःपूता वसुन्धरा।
यत्स्पर्शदर्शं वाञ्छन्ति तीर्थानि चात्मशुद्धये॥
यया विना च विश्वेषु सर्वकर्मातिनिष्फलम्।
मोक्षदा या सुसत्त्वानां कामिनां सर्वकामदा॥
कल्पवृक्षस्वरूपा च भारते ब्रह्मरूपिणी।
त्राणाय भारतानाञ्च प्रजानां परदेवता॥" ७॥

मनसा यथा,—

"प्रधानांशस्वरूपा या मनसा कश्यपात्मजा।
शङ्करप्रियशिष्या च महाज्ञानविशारदा॥

प्रकृतिः

नागेश्वरस्यानन्तस्य भगिनी नागपूजिता।
नागेश्वरी नागमाता सुन्दरी नागवाहिनी॥
नागेन्द्रगणयुक्ता सा नागभूषणभूषिता।
नागेन्द्रैर्वन्दिता सिद्धयोगिनी नागदायिनी॥
विष्णुरूपा विष्णुभक्ता विष्णुपूजापरायणा।
तपःस्वरूपा तपसां फलदात्री तपस्विनी॥
दिव्यं चिलक्षवर्षञ्च तपस्तप्तं यया हरेः।
तपस्विनीषु पूज्या च तपस्विना च भारते॥
सर्पमन्त्राधिदेवी च ज्वलन्ती ब्रह्मतेजसा।
ब्रह्मस्वरूपा परमा ब्रह्मभावेन तत्परा॥
जरत्कारुमुनेः पत्नी कृष्णांशस्य पतिव्रता।
आस्तीकस्य मुनेर्माता प्रवरस्य तपस्वि-
नाम्॥" ९॥

षष्ठी यथा,—

"प्रधानांशस्वरूपा या देवसेना च नारद!।
मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्तिता॥
शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी॥
षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्तिता॥
पुत्रपौत्रप्रदात्री च धात्रीति जगतां सती।
सुन्दरी युवती रम्या सन्ततं भर्तुरन्तिके॥
स्थाने शिशूनां परमा वृद्धरूपा च योगिनी।
पूजा द्वादशमासेषु यस्या विश्वेषु सन्ततम्॥
पूजा च सूतिकागारे परा षष्ठदिने शिशोः।
एकविंशतिमे चैव पूजा कल्याणहेतुकी॥
शुम्भनियमिता चैषा नित्या काम्या श्रुतिः परा।
मातृरूपा दयारूपा शुभदा शुभरूपिणी॥
जले स्थले चान्तरीक्षे शिशूनां खप्रगोचरे॥" ८॥

मङ्गलचण्डी यथा,—

"प्रधानांशस्वरूपा च देवी मङ्गलचण्डिका
प्रकृतेर्मुखसंभूता सर्वमङ्गलदा सदा॥
सृष्टौ मङ्गलरूपा च संहारे कोपरूपिणी।
तेन मङ्गलचण्डी सा पण्डितैः परिकीर्तिता॥
प्रतिमङ्गलवारेषु प्रतिविश्वेषु वन्दिता।
पञ्चोपचारैर्योषिद्भिर्भक्त्या च परिपूजिता॥
पुत्रपौत्रधनैश्वर्ययशोमङ्गलदायिनी।
लोकसन्तापपापार्तिदुःखदारिद्र्यनाशिनी॥
परितुष्टा सर्ववाञ्छाप्रदात्री सर्वयोषिताम्।
रुष्टा क्षणेन संहर्त्तुं शक्ता विश्वं महेश्वरी॥" ९॥

काली यथा,—

"प्रधानांशस्वरूपा च काली कमललोचना।
दुर्गाललाटसम्भूता रणे शुम्भनिशुम्भयोः॥
दुर्गार्द्धांशस्वरूपा सा गुणेन तेजसा समा।
कोटिसूर्यप्रभाजुष्टपुष्टज्वालाविग्रहा॥
प्रधाना सर्वशक्तीनां वरा बलवती परा।
सर्वसिद्धिप्रदा देवी परमा सिद्धयोगिनी॥
कृष्णभक्ता कृष्णतुल्या तेजसा विक्रमेण गुणैः।
कृष्णभावनया शश्वत् कृष्णवर्णा सनातनी॥
संहर्त्तुं सर्वब्रह्माण्डं शक्ता निश्वासमात्रतः।
रणं देवैः समं तस्याः क्रीड़या लोकरक्षया॥
धर्मार्थकाममोक्षाञ्च दातुं शक्ता च पूजिता।
ब्रह्मादिभिः स्तूयमाना मुनिभिर्मनुभिर्नरैः॥"१०॥

वसुन्धराप्रकृतिर्यथा,—
"प्रधानांशस्वरूपा च प्रकृतेश्च वसुन्धरा।
आधाररूपा सर्व्वेषां सर्व्वांशस्यप्रकृतिका॥
रत्नाकरा रत्नगर्भा सर्व्वरत्नाकरालया।
प्रजाभिश्च प्रजेशैश्च पूजिता वन्दिता सदा॥
सर्व्वोपजीव्यरूपा च सर्व्वसम्पद्विधायिनी।
यया विना जगत् सर्व्वं निराधारं चराचरम्॥७॥
प्रकृतेश्च कला या यासा निबोध मुनीश्वर!।
यस्य यस्य च याः पत्न्यस्ताः सर्व्वा वर्णयामि ते॥
स्वाहा देवी वह्निपत्नी त्रिषु लोकेषु पूजिता।
यया विना हविर्दानं न ग्रहीतुं सुराः क्षमाः॥१
दक्षिणा यज्ञपत्नी च दीक्षा सर्व्वत्र पूजिता।
यया विना च विश्वेषु सर्व्वं कर्म्म च निष्फलम्॥२॥
स्वधा पितॄणां पत्नी च मुनिभिर्मनुभिर्नरैः।
पूजिता पिण्डदानञ्च निष्फलञ्च यया विना॥३॥
स्वस्तिदेवी वायुपत्नी प्रतिविश्वेषु पूजिता।
आदानञ्च प्रदानञ्च निष्फलञ्च यया विना॥४॥
पुष्टिर्गणपतेः पत्नी प्रतिविश्वेषु पूजिता।
यया विना परिक्षीणाः पुमांसो योषितो भवेत्॥५॥
अनन्तपत्नी तुष्टिश्च पूजिता वन्दिता भवे।
यया विना न सन्तुष्टाः सर्व्वे लोकाश्च सन्ततम्॥६
ईशानपत्नी सम्पत्तिः पूजिता च सुरैर्नरैः।
सर्व्वलोका दरिद्राश्च विश्वेषु च यया विना॥७॥
धृतिः कपिलपत्नी च सर्व्वैः सर्व्वत्र पूजिता।
सर्व्वलोकाः अधैर्य्याः सुर्व्वगतासु च यया विना॥८
यमपत्नी क्षमा साध्वी सुशीला सर्व्वपूजिता।
समुन्मत्ताश्च रुष्टाश्च सर्व्वलोका यया विना॥९॥
क्रीड़ाधिष्ठातृदेवी च कामपत्नी रतिः सती।
केलिकौतुकहीनाश्च सर्व्वलोका यया विना॥१०
सत्यपत्नी सती सुक्तिः पूजिता जगतां प्रिया।
यया विना भवे लोका बन्धुतारहिताः सदा॥११
मोहपत्नी दया साध्वी पूजिता च जगत्प्रिया।
सर्व्वे लोकाश्च सर्व्वत्र निष्ठुराश्च यया विना॥१२
पुण्यपत्नी प्रतिष्ठा सा पुण्यरूपातिपूजिता।
यया विना जगत् सर्व्वं जीवन्मृतपरं सुने!॥१३
सुकर्म्मपत्नी कीर्त्तिश्च धन्या मान्या च पूजिता।
यया विना जगत् सर्व्वं यशोहीनं मृतं यथा॥१४
क्रिया उद्योगपत्नी च पूजिता सर्व्वसम्मता।
यया विना जगत् सर्व्वं सुच्छन्नमिव नारद!॥१५॥
अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता।
यया विना जगन्मुक्तसुच्छन्नं विधिनिर्म्मितम्॥
सत्ये चादर्शने या च त्रेतायां सूक्ष्मरूपिणी।
अर्द्धावयवरूपा च द्वापरे संवृता भिया॥
कलौ महाप्रमत्ता च सर्व्वत्र व्यापिका बलात्।
कपटेन समं भ्रात्रा भ्रमत्येव गृहे गृहे॥१६॥
भ्रान्ति-१७ र्लज्जा १८ च भार्य्ये द्वे सुशीलस्य च पूजिता।
याभ्यां विना जगत् सर्व्वमुन्मत्तमिव नारद!॥
ज्ञानस्य भार्य्यास्तिस्रश्च बुद्धि-१९ र्मेधा २० स्मृति-२१ स्तथा।
याभिर्विना जगत् सर्व्वं मृढं मृतसमं तदा॥
मूर्त्तिश्च धर्म्मपत्नी सा कान्तिरूपा मनोहरा।
परमा सा च विश्वौघा निराधारा यया विना॥
सर्व्वत्र शोभारूपा सा लक्ष्मीर्मूर्त्तिमती सती।
श्रीरूपा मूर्त्तिरूपा च मान्या धन्या च पूजिता॥२२॥
कालाग्निरुद्रपत्नी च निद्रा सा सिद्धयोगिनी।
सर्व्वलोकाः समाच्छन्ना मायायोगेन रात्रिषु॥२३॥
कालस्य तिस्रो भार्य्याश्च सन्ध्या-२४ रात्रि-२५ दिनानि च २६।
याभिर्व्विना विधात्रा च संख्यां कर्त्तुं न शक्यते॥
क्षुत्-२७ पिपासे २८ मनोभार्य्ये धन्ये मान्ये सुपूजिते।
याभ्यां व्याप्तं जगत् सर्व्वं युक्तचित्ततमेव च॥
प्रभा च २९ दाहिका ३० चैव द्वे भार्य्ये तेजसस्तथा।
याभ्यां विना जगत् स्रष्टुं विधातापि नहीश्वरः॥
कालकन्ये स्मृत्यु ३१ जरे ३२ प्रज्वरस्य प्रिये प्रिये।
याभ्यां जगत् सुसुच्छन्नं विधात्रा निर्म्मितं विधौ॥
निद्राकन्या च तन्द्रा ३३ सा प्रीति-३४ रन्या सुखप्रिये।
याभ्यां व्याप्तं जगत् सर्व्वं विधिपुत्रविधेर्विधौ॥
वैराग्यस्य हि जाये च श्रद्धा-३५ भक्ती ३६ च पूजिते।
याभ्यां शून्यञ्जगत् सर्व्वं जीवन्मुक्तमिदं सुने!॥
अदिति-३७र्देवमाता च सुरभी २८ च गवां प्रसूः।
दितिश्च ३९ दैत्यजननी कद्रुश्च ४० विनता ४१ दनुः ४२॥
उपयुक्ताः सृष्टिविधौ एताश्च प्रकृतेः कलाः॥*
कलाश्चान्याः सन्ति वत्साससु काश्चिन्निबोध मे॥
रोहिणी ४३ चन्द्रपत्नी च संज्ञा ४४ सूर्य्यस्य कामिनी।
घृतरूपा४५ मनोर्भार्य्या शचीन्द्रस्य च गेहिनी ४६॥
तारा४७ बृहस्पतेर्भार्य्या वशिष्ठस्य त्वरुन्धती ४८।
अहल्या ४९ गौतमस्त्री तु सानसूया ५० चिकामिनी॥
पितॄणां मानसी कन्या मेनका ५१ साम्बिकाप्रसूः।
लोपामुद्रा ५२ तथा भूती ५३ कुबेरकामिनी तथा॥
वरुणानी ५४ यमस्त्री च बलेर्विन्ध्यावली ५५ तथा।
कुन्ती च ५६ दयमन्ती च ५७ यशोदा ५८ देवकी ५९ सती॥
गान्धारी ६० द्रौपदी ६१ सत्या ६२ सावित्री६३ सत्यवत्प्रिया।
वृषभानुप्रिया साध्वी राधामाता कलावती६४॥
मन्दोदरी ६५ च कौशल्या ६६ सुभद्रा ६७ कैटभी ६८ तथा।
रेवती ६९ सत्यभामा ७० च कालिन्दी ७१ लक्ष्मणा ७२ तथा॥
जाम्बवती ७३ नाग्नजिती ७४ मित्रविन्दा ७५ तथापरा।
लक्ष्मणा ७६ रुक्मिणी ७७ सीता ७८ स्वयं-लक्ष्मीः प्रकीर्त्तिता॥
कला योजनगन्धा च७९ व्यासमाता महासती।
बाणपुत्री तथोषा ८० च चित्रलेखा च ८१ तत्सखी॥
प्रभावती८२ भानुमती८३ तथा मायावती८४ सती।
रेणुका ८५ च ऋगोर्माता हलिमाता च रोहिणी ८६॥
एकानंशा ८७ च दुर्गांशा श्रीकृष्णभगिनी सती।
बह्व्यः सन्ति कलाश्चैव प्रकृतेरेव भारते॥
या याश्च ग्रामदेव्यस्ताः सर्व्वाश्च प्रकृतेः कलाः।
कलांशांशसमुद्भूता प्रतिविश्वेषु योषितः॥*॥
योषितामपमानेन प्रकृतेश्च पराभवः।
ब्राह्मणी पूजिता येन पतिपुत्रवती सती॥
प्रकृतिः पूजिता तेन वस्त्रालङ्कारचन्दनैः।
कुमारी चाष्टवर्षीया वस्त्रालङ्कारचन्दनैः।
पूजिता येन विप्रस्य प्रकृतिस्तेन पूजिता॥*॥
सर्व्वाः प्रकृतिसम्भूता उत्तमाधममध्यमाः।
सत्यांशाश्चोत्तमा ज्ञेयाः सुशीलाश्च पतिव्रताः॥
मध्यमा राजसाश्चांशास्ताश्च भोग्याः प्रकीर्त्तिताः।
सुखसम्भोगवश्याश्च स्वकार्य्ये तत्पराः सदा।
अधमास्तामसाश्चांशा अज्ञानकुलसम्भवाः॥
दुर्मुखाः कुलटा धूर्त्ताः स्वतन्त्राः कलहप्रियाः।
पृथिव्यां कुलटा याश्च स्वर्गे चाप्सरसां गणाः॥
प्रकृतेस्तामसांशांशाः पुंश्चल्यः परिकीर्त्तिताः।
एवं निगदितं सर्व्वं प्रकृतेः परिकीर्त्तनम्॥*॥
ताश्च सर्व्वाः पूजिताश्च पुण्यक्षेत्रे च भारते।
पूजिता सुरथेनादौ दुर्गा दुर्गतिनाशिनी॥
द्वितीये रामचन्द्रेण रावणस्य वधार्थिना॥
ततश्चाब्जगतां माता त्रिषु लोकेषु पूजिता।
जातादौ दक्षपत्न्याश्च निहत्य दैत्यदानवान्॥
ततो देहं परित्यज्य यज्ञे भर्त्तुश्च निन्दया।
जज्ञे हिमवतः पत्न्यां लेभे पशुपतिं पतिम्॥
गणेशश्च स्वयं कृष्णः स्कन्दो विष्णुकलोद्भवः।
बभूवतुस्तौ तनयौ पश्चात्तस्याश्च शौनक!॥
लक्ष्मीम्मेलयभूपेन प्रथमे परिपूजिता।
त्रिषु लोकेषु तत्पश्चाद्देवतासुनिमानवैः॥
सावित्री चाम्बुपतिना प्रथमे परिपूजिता।
तत्पश्चात्त्रिषु लोकेषु देवतासुनिमानवैः॥
आदौ सरस्वती देवी ब्रह्मणा परिपूजिता।
तत्पश्चात्त्रिषु लोकेषु देवतासुनिमानवैः॥
प्रथमे पूजिता राधा गोलोके रासमण्डले।
पौर्णमास्यां कार्त्तिकस्य कृष्णेन परमात्मना॥
गोपिकाभिश्च गोपैश्च बालिकाभिश्च बालकैः।
गवां गणैः सुरभ्या च तत्पश्चान्मायया हरेः॥
तदा ब्रह्मादिभिर्देवैर्मुनिभिर्मनुभिस्तथा।
पुष्पधूपादिभिर्भक्त्या पूजिता वन्दिता सदा॥

पृथिव्यां प्रथमे देवी सुयज्ञेनैव पूजिता।
ग्रङ्करेणोपदिष्टेन पुण्यक्षेत्रे च भारते॥
त्रिषु लोकेषु तत्पश्चादाज्ञया परमात्मनः।
पुष्पधूपादिभिर्भक्त्या पूजिता मुनिभिः सुरैः॥
कलया याः समुद्भूताः पूजितास्ताश्च भारते।
पूजिता ग्रामदेयश्च ग्रामे च नगरे मुने!॥
एवं ते कथितं सर्व्वं प्रकृतेश्चरितं शुभम्।
यथागमं लक्षणञ्च किं भूयः श्रोतुमिच्छसि॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे प्रकृतिचरितं नामानुक्रमः प्रथमोऽध्यायः॥ * ॥ पुरुषनाम्नोऽर्थे प्रकृतेर्नाम्न उच्चार्य्यता यथा,—

नारद उवाच।

"आदौ राधां समुच्चार्य्य पश्चात् कृष्णं विदुर्बुधाः।
निमित्तमस्य मां भक्तं वद भक्तजनप्रिय!॥

श्रीनारायण उवाच।

निमित्तमस्य विविधं कथयामि निशामय।
जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता।
गरीयसीति जगतां माता ग्रतगुणैः पितुः॥
राधाकृष्णेति गौरीशेत्येवं ग्रब्दः श्रुतौ श्रुतः।
कृष्णराधेग्रगौरीति लोके न च कदा श्रुतः॥
प्रसीद रोहिणीचन्द्र गृहाणार्घ्यमिदं मम।
गृहाणार्घ्यं मया दत्तं संज्ञया सह भास्कर!॥
प्रसीद कमलाकान्त गृहाण मम पूजनम्।
इति दृष्टं सामवेदे कौथुमे मुनिसत्तम!॥
राग्रब्दोच्चारणादेव स्त्रीतो भवति माधवः।
धाग्रब्दोच्चारतः पश्चाद्धावत्येव ससम्भ्रमः॥
आदौ पुरुषमुच्चार्य्य पश्चात् प्रकृतिमुच्चरेत्।
स भवेन्मातृगामी च वेदातिक्रमणे मुने!॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५० अध्यायः॥

प्रकृष्ट, त्रि, (प्रकृष्यते इति। प्र+कृष+क्त।) प्रकर्षयुक्तम्। तत्पर्य्यायः। सुखम् २ प्रसुखम्३ प्रवर्हम् ४ वर्य्यम् ५ वरेण्यम् ६ प्रवरम् ७ पुरोगम् ८ अनुत्तरम् ९ प्राग्रहरम् १० प्रवेकम् ११ प्रधानम् १२ अग्रेसरम् १३ उत्तमम् १४ अग्र्यम् १५ ग्रामणीः १६ अग्रणीः १७ अग्रिमम् १८ जात्यम् १९ अग्र्याम् २० अनुत्तमम्२१ अनवरार्द्ध्यम् २२ प्रेष्ठम् २३ परार्द्ध्यम् २४ परम् २५। इति हेमचन्द्रः। ६। ७४॥ (यथा, मनुः। ७। १७०।
"यदा प्रकृष्टा मन्येत सर्व्वास्तु प्रकृतीर्भृग्यम्।
अलुब्धितं तथात्मानं तदा कुर्व्वीत विग्रहम्॥"
आकृष्टम्। यथा, देवीभागवते। १। ६। ८२।
"रथाङ्गेन तदा च्छिन्ने विष्णुना प्रभविष्णुना।
जघनोपरि वेगेन प्रकृष्टे ग्रिरसी तयोः॥")

प्रकोष्ठः, पुं, (पुकुष्यतेऽनेनेति। प्र+कुष निष्कर्षे+"उषिकुषीति।" उणा० २। ४। इति स्थन्।) कफोणेरधोमणिबन्धपर्य्यन्तहस्तभागः। इत्यमरः। २। ६। ८०॥ (यथा, रघुः। ३। ५६।
"ततः प्रकोष्ठे हरिचन्दनाङ्किते
प्रमथ्यमानार्णवधीरनादिनीम्।
रघुः ग्रघाङ्कार्द्धसुखेन पत्रिणा
ग्ररासनज्यामलुनाद्विड़ौजसः॥")

ग्रहद्वारपिण्डकम्। वीथी इति विश्वोन्द इति च ख्यातम्। इति प्रपाणग्रन्दटीकायां भरतमुकुटमथुरेग्राः॥ (यथा, मानवे। ७। २२३। ग्रोकटीकायां कुल्लूकभट्टः।
"ततः सन्ध्योपासनं कृत्वा तस्मात् प्रदेग्रात् कञ्चान्तरं विविक्तप्रकोष्ठावकाग्रमन्यदृग्रत्वा गृहाभ्यन्तरे धृतग्रस्त्रो रक्षस्याभिधायिनां चराणां स्वयापारं ग्रृण्वीयात्॥")

प्रक्षरः, पुं, (प्रक्षर+पृषोदरादित्वात् साधुः।) अश्वकवचः। इति ग्रब्दमाला॥ प्रखर इति च पाठः॥

प्रक्रन्ता, [न्तृ] त्रि (प्र+क्रम+तृच्।) उपक्रमकर्त्ता। आरम्भकर्त्ता। इति ग्राकरणम्॥

प्रक्रमः, पुं, (प्र+क्रम+भावे घञ्।) क्रमः। अवसरः। इति मेदिनी। मे, ४६॥ प्रथमारम्भः। तत्पर्य्यायः। उपक्रमः २। इत्यमरः।३।२। २६॥ (यथा, कथासरित्सागरे। १८। ६३।
"पूर्व्वजैरपि हि प्राची प्रक्रमेण जिता दिग्वः।
गङ्गोपकण्ठे वासश्च विहितो हस्तिनापुरे॥")

प्रक्रान्तः, त्रि, (प्र+क्रम+क्तः।) प्रकरणस्थः। आरब्धः। यथा, भट्टिः। ४। ११।
"ग्रातिष्ठदुग्रु जपन् सन्ध्यां प्रक्रान्तामायतीमवम्।
प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रथमन्विम्॥"

प्रक्रिया, स्त्री, (प्र+कृ+ग्रः।) नृपतीनां चामरधूनच्छत्रधारणादिव्यापारः। तत्पर्य्यायः। अधिकारः २। इत्यमरः। २। ८। ३१॥ अधीकारः ३ नियतविधिः ४। इति ग्रब्दरत्नावली॥ प्रारब्धकार्य्यम्॥ (यथा, महाभारते। १२। १११। ५८।
"नोच्छ्रितं सहते कञ्चित् प्रक्रिया वैरकारिका।
ग्रुचेरपि हि युक्तस्य दोष एव निपात्यते॥")

प्रक्लिन्नः, त्रि, (प्र+क्लिद्+क्तः।) क्लिन्नः। इति जटाधरः॥ प्रकर्षेण क्लेदयुक्तश्च॥

प्रक्वणः, पुं, (प्र+क्वण ग्रब्दे+"क्वणो वीणायाञ्च।" ३। ३। ६५। इति अप्।) वीणायाः कथितः। वीणाग्रब्दः। तत्पर्य्यायः। प्रक्वाणः २। इत्यमरः। १। ६। २४॥ सुक्वाणः ३ सुक्वणः ४ उपक्वाणः ५ उपक्वणः ६। इति भरतः॥

प्रक्वाणः, पुं, (प्र+क्वण+घञ्।) प्रक्वणः। इत्यमरः। १। ६। २४॥

प्रचरः, पुं, (प्रकर्षेण चरति सञ्चलतीति। प्र+चर+अच्।) अश्वसन्नाहः। इति हेमचन्द्रः। ४। ३१७॥

प्रचालनं, क्ली, (प्र+चालि+ल्युट्।) धावनम्। मार्জ্জनम्। यथा,—
"धर्म्मार्थं यस्य वित्तेहा वरं तस्य निरीहता।
प्रचालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्॥"
इति हितोपदेग्रे १ परिच्छेदः॥

प्रचालितः, त्रि, (प्र+चालि+क्तः।) धौतः। मार्জ্জितः। इति हलायुधः॥

प्रक्षेपः, पुं, (प्र+क्षिप+घञ्।) औषधादिषु क्षेपणीयद्रव्यम्। यथा,—

"प्रक्षेपः पादिकः काय्याः क्वाथे कल्कसमो मतः।
षोड़ग्राश्चतुर्भागं वातपित्तकफार्त्तिषु॥
क्षौद्रं कषाये दातव्यं विपरीतं तु ग्रर्करा।
मात्रा क्षौद्रघृतादीनां क्वाथे च चूर्णवत्॥
माषिकं द्विगुणं चिन्त्यं जरयाद्यास्तु
ग्राणिकाः॥"
इति वैद्यकपरिभाषा॥

विक्षेपः। यथा, "समिदाज्यप्रक्षेपान्तं कर्म्म कृत्वा।" इति भवदेवभट्टः॥ (प्रहरणम्। यथा, भागवते। ४। २६। १६।
"मनोरभिर्व्वृद्धिसुतो दृन्नीड़ो दन्दकूवरः।
प्रक्षेन्द्रियार्थप्रक्षेपः सप्तधातुवरूथकः॥")

प्रक्षेपणं, क्ली, (प्र+क्षिप्+ल्युट्।) प्रकर्षेण क्षेपः। निक्षेपणम्। (यथा, याज्ञवल्क्ये। २। २६४।
"अर्धप्रक्षेपणात् विंग्रं भागं ग्रुल्कं नृपो हरेत्॥")

प्रक्षेड़नः, पुं, (प्रक्षेड़तीति। प्र+क्षिड़ अव्यक्तग्रब्दे+ल्युः।) नाराचः। इत्यमरः। २। ८। ८७॥

प्रक्षेड़ना, स्त्री, (प्रक्षेड़न+टाप्।) यद्वा, प्रक्षेड़नं अव्यक्तग्रब्दोत्स्रष्टेति। अच्+टाप्।) नाराचः। इत्यमरटीकायां भगीरथः॥

प्रक्षेदनः, पुं, (प्रक्षेदतीति। प्र+क्षिद अव्यक्तग्रब्दे+ल्युः।) नाराचः। इत्यमरटीकायां भगीरथः॥

प्रक्षेदना, स्त्री, (प्रक्षेदन+टाप्।) नाराचः। इत्यमरटीकायां भगीरथः॥

प्रखरः, पुं (प्रकृष्टः खरः।) हयसन्नाहः। कुक्कुरः। अश्वतरः। अत्यन्तखरे, त्रि। इति मेदिनी॥

प्रख्यः, त्रि, (प्रख्यातीति। प्र+ख्या ख्यातौ+कः।) उत्तरपदे तुल्यार्थवाचकः यथा,—
"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः॥"
इति हेमचन्द्रः॥
(यथा, महाभारते। १। २०८। ३१।
"हिपच्चगरुड़प्रख्यैर्हारैः सौधैश्च ग्रोभितम्।
गुप्तमग्निचयप्रख्यैर्गोपुरैर्मन्दरोपमैः॥"
श्रेष्ठः। यथा, तत्रैव। १२। २०४। ८।
"ज्ञानसृत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः।
यथादर्ग्रतले प्रख्ये पग्यत्यात्मानमात्मनि॥")

प्रख्यातः, त्रि, (प्र+ख्या+क्तः।) प्रकृष्टख्यातियुक्तः। विख्यातः। यथा,—
"यस्य व्याकरणे वरेण्यघटनास्कौताः प्रवन्धा इमे
प्रख्याता नव वेदकेऽपि तिथिनिर्द्धारार्थमेकोऽद्भुतः॥"
इति सुग्धबोधग्रेषे तद्धिग्रब्दमः॥

प्रख्यातवम्रकः, पुं, (प्रख्यातो वम्रो जनयिता यस्य। कप्।) विख्यातपिटकः। यथा,—
"स्यादासुयायणोऽसुष्य पुत्रः प्रख्यातवम्रकः॥"
इति हेमचन्द्रः। ३। १६६॥

प्रख्यातिः, स्त्री, प्रकृष्टकीर्त्तिः। विख्यातिः। प्रपूर्व्वख्याधातोः क्तिन्प्रत्ययनिष्पन्ना॥

प्रगण्डः, पुं, (प्रत्यासन्नो गण्डो यस्मिन्नर्य्यस्य।) कूर्परोपरिकक्षपर्य्यन्तभागः। इत्यमरः। २। ६। ८०॥ कनुइ अवधि वगल पर्य्यन्त इति भाषा॥

प्रगण्डी, स्त्री, (प्रगण्ड + गौरादित्वात् ङीष्) वहिःप्राकारः। दुर्गप्राकारभित्तौ शूराणां उपवेशनस्थानानि। (यथा, महाभारते। १२। ६६। ४३।
"प्रगण्डीः कारयेत् सम्यगाकाशननीस्तदा॥")

प्रगतजानुः, त्रि, (प्रगते संश्लिष्टे जानुनी यस्य।) प्रगतजानुकः। इत्यमरटीकायां रमानाथः॥

प्रगतजानुकः, त्रि, (प्रगते जानुनी यस्य। कप्।) यस्य जानुनोर्मध्ये नित्यं कादाचित्कं वा महदन्तरालं सः। पाषाराक् यक्ति इति भाषा॥ तत्पर्य्यायः। प्रज्ञुः २। इत्यमरः। २। ६। ४७॥ प्रज्ञः ३ प्रगतजानुः ४। इति भरतः॥

प्रगन्धः, पुं. (प्रकृष्टो गन्धो यस्य।) पर्पटः। इति राजनिर्घण्टः॥

प्रगल्भः, त्रि, (प्रगल्भते इति। प्र + गल्भ धार्ष्ट्ये + पचाद्यच्।) प्रत्युत्पन्नमतिः। तत्पर्य्यायः। प्रतिभान्वितः २। इत्यमरः। ३। १। २५॥ (यथा, महाभारते। १२। ६८। ५८।
"प्रज्ञा प्रगल्भं कुरुते मनुष्यं
राजा कृशान् वै कुरुते मनुष्यान्॥")

प्रगल्भता, स्त्री, प्रगल्भस्य भावः। (प्रगल्भ + तल्।) प्रागल्भ्यम्। तत्पर्य्यायः। उत्साहः २ अभियोगः ३ उद्यमः ४ प्रौढिः ५ उद्योगः ६ कियदेतिका ७ अध्यवसायः ८ ऊर्ज्जः ९। इति हेमचन्द्रः। २। २१३॥ तस्य लक्षणम्। यथा,
"निःशङ्कत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भता॥"
इत्युज्ज्वलनीलमणिः॥
(यथा, कुमारे। ६। ३२।
"आर्य्याप्यरुन्धती तत्र यापारं कर्त्तुमर्हति।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता॥")

प्रगल्भा, स्त्री, (प्रगल्भते दृष्टा भवतीति। प्र + गल्भ धार्ष्ट्ये + पचाद्यच्। ततष्टाप्।) नायिकाभेदः। अस्या लक्षणम्। प्रतिमात्रविषयकेलिकलापकोविदा। अस्याश्चेष्टा रतिप्रीतिः। आनन्दादात्मसंमोहः। रतिप्रीतिर्यथा,—
"संस्पृश्य स्तनमाकलय्य वदनं संश्लिष्य कण्ठस्थलं
निर्व्यूढाधरबिम्बमम्बरमपाकृत्य युदस्यालकम्।
देवस्यानुजिनीपतेः सपुलकं जिघ्रासमाने प्रिये
वामाक्षी वसनाञ्चलैः श्रवणयोर्नीलोत्पलं निह्नुते॥"
आनन्दादात्मसंमोहो यथा,—
"नखाङ्कितसुरःस्त्रोधरतले रदस्य क्षतं
च्युता वकुलमालिका विगलिता च मुक्तावली।
रतान्तसमये मया सकलमेतदाचोचितं
स्मृतिः क्व च मतिः क्व च क्व च तवालिङ्गिच्छाविधिः॥"
सा मानावस्थायां त्रिविधा। धीरा अधीरा धीराधीरा च। यत्रकोपप्रकाशा धीरा। अयत्रकोपप्रकाशा अधीरा। यत्रायत्रकोपप्रकाशा धीराधीरा। प्रौढ़ाधीरायास्तु रतावौदास्यम्। अधीरायास्तर्ज्जनताड़नादि। धीराधीरायां रतावौदास्यं तर्ज्जनादि च कोपस्य प्रकाशकम्। प्रौढ़ाधीरा यथा,—
"नो तल्पं भजसे न जल्पसि सुधाधाराशुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाशक्षमात्।
इत्थं केतकगर्भगौरि दयिते कोपस्य संगोपनं
किं स्यादेव नचेत् पुनः सहचरी कुर्व्वीत साचि स्मितम्॥"
प्रगल्भा अधीरा यथा,—
"प्रतिफलमवलोक्य स्त्रीयमिन्दोः कलायां
हरशिरसि परस्या वासमाशङ्कमाना।
गिरिशमचलकन्या तर्ज्जयामास कम्प
प्रचलबलयवेल्लत्कान्तिभाजा करेण॥"
प्रगल्भा धीराधीरा यथा,—
"तल्पोपान्तमुपेयुषि प्रियतमे साचीकृतग्रीवया
काकुव्याकुलवाचि साचिहसितस्फूर्जत्कपोलश्रिया।
हस्तन्यस्तकरे पुनर्मृगदृशा लाचारसञ्चालित-
प्रोष्ठीष्ठमयूखमांसलरुचो विस्कारिता दृष्टयः॥"
इति रसमञ्जरी॥
(तल्लक्षणञ्च यथा साहित्यदर्पणे। ३। १०१।
"स्मरान्धा गाढ़तारुण्या समस्तरतकोविदा।
भावोन्नता दरव्रीड़ा प्रगल्भाक्रान्तनायका॥"
तस्या उदाहरणभेदादिकं तत्रैव विशेषतो द्रष्टव्यम्॥)

प्रगाढ़, त्रि, (प्रकर्षेण गाह्यते स्मेति। प्र + गाह + क्तः। "यस्य विभाषा।" ७। २। १५। इति न इट्।) भृशम्। क्लेशम्। इत्यमरः। ३। ३। ४४॥ (यथा, महाभारते। ४। ५६। २६।
"अहमिन्द्राद्दृढां सृष्टिं ब्रह्मणः क्षतहस्तताम्।
प्रगाढे तुमुले चित्तमभ्यशिक्षं प्रजापतेः॥")
दृढ़म्। इति भरतः॥ (यथा, महाभारते। ७। ६७। ४८।
"तत्रान्तरीक्षे बाणानां प्रगाढ़ानां विशाम्पते।
संघर्षेण महार्चिष्मान् पावकः समजायत॥")
घनम्। यथा, सुश्रुते चिकित्सितस्थाने ५ अ०।
"तूणीप्रतूण्योः स्नेहलवणसुदकेन पाययेत् पिण्यल्यादिचूर्णं वा हिङ्गुयवक्षारप्रगाढं सर्पिर्वर्त्तिभिश्चेनमुपक्रमेत्॥")

प्रगाता, [तृ] त्रि, (प्र + गै + तृच्।) उत्तमगायकः। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। २३६। ८।
"ततो गोपाः प्रगातारः कृष्णला नृत्यवादिते।
धार्त्तराष्ट्रसुपातिष्ठन् कन्याश्चैव खलकृतः॥")

प्रगुणः, त्रि, (प्रकर्षेण गुणो यत्र।) ऋजुः। इत्यमरः। ३। १। ७२॥ (प्रकृष्टगुणवति, त्रि। यथा, रघौ। ६। ४६।
"परिचयं चललक्ष्मनिपातने
भयरुषोश्च तदिङ्गितबोधनम्।
अमनयात् प्रगुणाश्च करत्यसौ
तनुमतोऽनुमतः सचिवैर्यथौ॥")

प्रगृह्यं, त्रि, (प्रगृह्यते इति। प्र + ग्रह + "पदास्थिरिवाह्लापल्ल्येषु च।" ३। १। ११६। इति क्यप्। "ग्रहिज्येति। ६। १। १६। इति सम्प्रसारणम्।) सन्धिरहितं पदम्। इति मुग्धबोधव्याकरणम्॥ पदपक्षपरतन्त्रबहिर्भूतेषु गृह्यपदं निपात्यते। यथा, प्रगृह्यं पदं यत् स्वरेण न समुन्नीयते। इति दुर्गादासः॥ "आप्रगृह्यः स्मृतौ वाक्य।" इत्यमरः॥ प्रगृह्यः पाणिन्यादिकृतप्रगृह्यसंज्ञो डानुबन्धरहितः आङ्शब्दः योऽचा न सन्धीयते स इत्यर्थः। स्मृतौ स्मरणे यथा। आ ज्ञातं स जटायुरेषः। वाक्ये यथा। आ एवं मन्यसे। इति भरतः॥

प्रगे, अ, (प्रकर्षेण गीयतेऽत्रेति। प्र + गै + के।) प्रातः। इत्यमरः। ३। ४। १६॥ (यथा, माघे। १२। १।
"इत्थं रथाश्वेभनिषादिनाम्यगे
गणो नृपाणामथ तोरणाङ्गिहः।
प्रस्थानकालक्षमवेषकल्पना
कृतक्षणश्चेषमुदेत्यताच्युतम्॥")

प्रगेतनः, त्रि, (प्रगे प्रातर्भव इति। प्रगे + "सायचिरमिति।" ४। ३। २३। इति ट्यु तुट् च।) प्रगे भवः। प्रातर्भवः। तत्पर्य्यायः। श्वस्तनः २। इति राजनिर्घण्टः॥

प्रग्रहः, पुं. (प्रगृह्यते इति प्रगृह्णात्यनेनेति वा। प्र + ग्रह + "प्रे वणिजाम्।" ३। ३। ५२। "रज्जौ च।" ३। ३। ५३। इति घञ्भावपक्षे "ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) तुलासूत्रम्। अश्वादिरश्मिः। वन्दी। इत्यमरः। ३। ३। २३६॥ नियमनम्॥ (यथा, महाभारते। ३। १७६। १६।
"नहि मे सृप्यते कश्चित् कथञ्चित् प्रग्रहं गतः।
गजो वा महिषो वापि यदि काले नरोत्तम!॥")
भुजः। रश्मिः। (यथा, गोलाध्याये। ८।
"इन्दोः प्राच्यां भवति तरणेः प्रग्रहः किं प्रतीच्याम्॥")
सुवर्णालुमहीरुहः। इति मेदिनी॥ कर्णिकारवृक्षः। इति राजनिर्घण्टः॥ (तत्पर्य्यायो यथा,
"आरेवतो राजवृक्षः प्रग्रहश्चतुरङ्गुलः।
आरग्वधोऽथ सम्पाकः कृतमालः सुवर्णकः॥"
इति वैद्यकरत्नमालायाम्॥
प्र + ग्रह + भावे अप्। इन्द्रियादीनां निग्रहः। यथा, हरिवंशे भविष्यपर्व्वणि। ८। ७८।
"अर्थो हि केवलं तस्य प्रग्रहो बाह्यगोचरः।
तस्मात् सर्व्वप्रयत्नेन चित्तं रक्ष धनार्द्दन!॥"
धारणम्। यथा, हरिवंशे भविष्यपर्व्वणि २२। ४।
"उद्धवोऽथ महाबुद्धिरुग्रसेनो महाबलः।
अन्ये च यादवाः सर्व्वे कवचप्रग्रहे रताः॥"
अवलम्बनम्। यथा, हरिवंशे। ४१। १६६।
"नृपेष्वथ प्रनष्टेषु जगत्यप्रग्रहाः प्रजाः।
क्षणेन निर्वृते चैवं हत्वा चान्योन्यमाहवे॥
परस्परकृतक्षाश्च निराक्रन्दाः सुदुःखिताः।

एवं कष्टमनुप्राप्ताः कलिसन्ध्यांशके तदा ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । ६४ ।
"प्रग्रहो निग्रहो व्यग्रोऽनेकश्रृङ्गो गदाग्रजः ॥"
प्रकृष्टाधिष्ठानादौ, त्रि । यथा, रामायणे । २ ।
८२ । १ ।
"तामार्य्यगणसम्पूर्णां भरतः प्रग्रहां सभाम् ।
ददर्श बुद्धिसम्पन्नः पूर्णचन्द्रां निशामिव ॥"
"प्रग्रहा प्रकृष्टैर्व्यग्रिष्ठादिभिर्ग्रहोऽधिष्ठानं यस्यां सा ।" इति तट्टीका ॥ उद्यतबाहुः ।
यथा, रामायणे । ७ । ६५ । १४ ।
"एवमुक्तस्तु मुनिना प्राञ्जलिः प्रग्रहो नृपः ।
अभ्यवादयत प्राज्ञस्तद्वाक्यं सत्यप्रतिज्ञम् ॥")
प्रग्राहः, पुं,(प्रगृह्यते इति । प्र+ग्रह+"ग्रे वणिजाम् ।" ३ । ३।५२ । "रज्ज्वौ च ।" ३ ।३।५३। इति च घञ् ।) प्रग्रहः । इत्यमरः । ३ । ३ । २३६ ॥ ("ग्रे लिप्सायाम् ।" ३ । ३ । ४६ । इति घञ् । प्रग्रहणम् । "पात्रप्रग्राहेण चरति भिक्षुः ।" इति सिद्धान्तकौमुदी ॥)
प्रग्रीवः, पुं क्ली, (प्रकृष्टा ग्रीवा ग्रीवाऽतिरस्य ।) गृहादौ प्रान्ते धारणं दारुपङ्क्तिः । वातायनम् । इति सुभूतिः । सुखशाला । इत्येके । अश्वशाला । इति केचित् । इमशीर्षकम् । इति गोवर्द्धनः । इत्यमरटीकायां भरतः ॥
प्रघटावित्, [द्] त्रि, (प्रघटां आडम्बरं वेत्तीति । प्रघटा+विद्+क्विप् ।) आडम्बरज्ञः । इति त्रिकाण्डशेषः ॥
प्रघणः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र+हन+"अगारैकदेशे प्रघणः प्रघाणश्च ।" ३ । ३ । ७६ । इति कर्म्मणि अप् । नत्वञ्च ।) बहिर्द्वारप्रकोष्ठकम् । तत्पर्य्यायः । प्रघाणः२ अलिन्दः ३ । इत्यमरः । २ ।२ । १२ ॥ अलिन्दः ४ । इति भरतः ॥ ताम्रकुम्भः । लौहसुन्दरः । इति मेदिनी । णे, ६० ॥ (गृहाभ्यन्तरप्रख्यार्थपिण्डिका । यथा,—
"प्रघाणप्रघणालिन्दा द्वारबाह्यप्रकोष्ठके ।
गृहाभ्यन्तरप्रख्यार्थपिण्डिकायामपि त्रयम् ॥"
इति शब्दरत्नावली ॥)
प्रघनः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र+हन+अप् । न नत्वम् ।) प्रघणः । इति सुकुटः ॥
प्रघसः, पुं, (प्रकर्षेण अत्तीति । प्र+अद+अप् । "घञपोश्च ।" २ । ४ । ३८ । इति घसलादेशः ।) असुरः । दैत्यः । इति त्रिकाण्डशेषः ॥ (राक्षसभेदः । यथा, महाभारते ।३।२८४।२।
"यज्ञघ्नः पूतनो जम्भः खरः क्रोधवशो हरिः ।
प्रघसश्चारुजश्चैव प्रघसश्चेत्यमादयः ॥")
प्रघाणः, पुं, (प्रहन्यते इति । प्र+हन्+"अगारैकदेशे प्रघणः प्रघाणश्च ।" ३ । ३ । ७६ । अप् । पक्षे वृद्धिश्च ।) प्रघणः । इत्यमरः । २ । २ । १२ ॥ (यथा, नैषधे । १६ ।११ ।
"नयति भगवानम्भोजस्थानिवन्यनवान्धवः
किमपि मघवत्प्रासादस्य प्रघाणसुपप्लवाम् ।
अप्सरदरिध्वान्तप्रत्यग्रियत्पथमण्डली
लगनफलदश्रान्तस्वर्गाचलभ्रमविभ्रमः ॥")
प्रघातः, पुं, (प्रकर्षेण हन्यते यत्रेति । प्र+हन्+घञ् ।) युद्धम् । इति हेमचन्द्रटीका ॥
प्रघानः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र+हन+अप् । वृद्धिः । न नत्वम् ।) प्रघणः । इति सुकुटः ॥
प्रघूर्णः, पुं, (प्रघूर्णति भ्रमतीति । प्र+घूर्ण+अच् ।) अतिथिः । इति हेमचन्द्रः ॥ प्रकृष्टघूर्णयुक्ते, त्रि ॥
प्रघोषकः, पुं, (प्र+घुष्+भावे घञ् । ततः कन् ।) ध्वनिः । इति जटाधरः ॥
प्रचक्रं, क्ली, (प्रगतञ्चक्रमिति प्रादिसमासः ।) चलितसैन्यम् । प्रस्थितसेना । इत्यमरः ।२।८।६६॥
प्रचक्षाः, [स्] पुं, (प्रकर्षेण चक्षते वक्तीति । प्र+चक्ष+असिः । न खादेशः ।) दृढस्मृतिः । इत्युणादिकोषः ॥
प्रचण्डः, पुं, (प्रकर्षेण चण्डः उग्रगुणत्वात् ।) श्वेतकरवीरः । इति मेदिनी ॥ (वत्सप्रीनामनृपतेः सुनन्दागर्भजातः पुत्रभेदः । यथा, मार्कण्डेये । ११८ । २ ।
"बलीवलाकश्चण्डश्च पचण्डश्च सुविक्रमः ॥")
प्रचण्डः, त्रि, (प्रकर्षेण चण्डः ।) दुर्व्वहः । दुर्धर्षः । प्रगल्भः । (यथा, आर्य्यासप्तशत्याम् । ३३० ।
"नाहं वदामि सुतनु त्वमशीला वा प्रचण्डचरिता वा ।
प्रेमस्वभावसुलभं भयमुदयति मम तु हृदयस्य ॥")
प्रतापी । इति मेदिनी नानार्थरत्नमाला च ॥ (यथा, भागवते । १ । ७ । २१ ।
"ततः प्रादुष्कृतं तेजः प्रचण्डं सर्व्वतोदिशम् ।
प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥")
प्रचण्डमूर्त्तिः, स्त्री, (प्रचण्डा मूर्त्तिर्यस्य ।) वरुणवृक्षः । इति शब्दचन्द्रिका ॥ प्रतापयुक्तशरीरश्च ॥
प्रचण्डा, स्त्री, (प्रकर्षेण चण्डा ।) दुर्गायाः अष्टनायिकान्तर्गतनायिकाभेदः । इति कालीपुराणम् ॥ (सा तु कुगलखण्डे पीठस्थाने विराजते । यथा, देवीभागवते । ७ । ३० । ७३ ।
"कुगलखण्डे प्रचण्डा तु चक्षिकामरकण्टके ॥")
श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥
प्रचयः, पुं, (प्रचीयते इति । प्र+चिञ् चयने+"एरच् ।" ३।३। ५६ । इत्यच् ।) समूहः । इति शब्दचन्द्रिका ॥ शिथिलाश्लेषसंयोगः । स च परिमाणजनकः । यथा,—
"संघातः परिमाणाच्च प्रचयादपि जायते ।
प्रचयः शिथिलाश्लेषो यः संयोगस्तेन जन्यते ।
परिमाणन्तूलकादौ नाम्रखाश्रयनाम्रतः ॥"
इति भाषापरिच्छेदः ॥
(यज्ञादिकरणकपुण्यफलादीनां चयने । यथा,
"वृक्षाग्रस्थानां फलानां यज्ञा प्रचयं करोति ।"
इति सिद्धान्तकौमुदी । ३ । ३ । ४० ॥)
प्रचरः, पुं, (प्रचरत्यस्मिन्निति । प्र+चर+आधारे अप् ।) पन्थाः । इति धरणिः ॥ प्रकर्षेण गमनञ्च ॥
प्रचरद्रूपः, त्रि, यत्तरूपः । प्रचारविशिष्टः । प्रचरत् प्रकाशमानं रूपं स्वरूपं यस्य सः ॥
प्रचलाकः, पुं, (प्रकर्षेण चलतीति । प्र+चल+आकन् ।) शरारातः । शिखण्डः । भुजङ्गमः । इति मेदिनी । के, १६६ ॥
प्रचलाकी, [न्] पुं, (प्रचलाकः शिखण्डोऽस्यास्तीति । प्रचलाक+इनिः ।) मयूरः । इति मेदिनी ॥ (यथा, उत्तररामचरिते । २ अङ्के ।
"कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्-
कौचक-
स्लाघाडम्बरमूकमौकुलिकुलक्रौञ्चावतोऽयं गिरिः ।
एतस्मिन् प्रचलाकिनां प्रचलतां सुदृग्वेजिताः
कूजिते-
रुद्वेल्लन्ति पुराणचन्दनतरस्कन्धेषु कुम्भीनसाः ॥")
प्रचलायितं, त्रि, (प्रचल इवाचरतीति । "कर्त्तुः क्यङ् सलोपश्च ।" ३ । १ । ११ । इति क्यङ् । प्रचलाय-नामधातोः कर्त्तरि क्तः ।) निद्रादिना घूर्णितम् । इत्यमरः । ३ । १ । ३२ ॥
प्रचारः, पुं, (प्रचरणमिति । प्र+चर+भावे घञ् ।) प्रचरणम् । व्यक्तः । प्रकाशः । यथा,
"दमनकतरुग्राखालम्बिकोलङ्गयुग्मं
तुहिनकिरणबिम्बे खञ्जरीटप्रचारः ॥"
इति शङ्कराचार्य्यः ॥
(प्रचरत्यस्मिन्निति । प्र+चर+आधारे घञ् । गवादेश्चरणस्थानम् । यथा, महाभारते । १ । ४० । १८ ।
"परिश्रान्तः पिपासार्त्तः आससाद मुनिं वने ।
गवां प्रचारेष्वासीनं फेनमापिबतां पयः ॥"
अश्वानां नेत्ररोगविशेषः । तच्चिकित्सादिकं यथा, अश्ववैद्यके । ३० । ३१—३६ ।
"प्रच्छादयति यद्दृष्टिं मांसं पर्य्यन्तवर्त्तितम् ।
प्रचारकाख्यं तं विद्यात् नेत्ररोगं कफात्मकम् ॥
क्षितौ निपात्य तुरगं ततो नेत्रं प्रसारयेत् ।
ज्ञातकर्म्मा भिषग् विद्वान् वड़िशेनाविचर्त्तगि ॥
ततस्तीक्ष्णेन शस्त्रेण छिन्द्यात् प्रावरकं बुधः ।
तारकस्य यथा पीड़ा जायेत न मनागपि ॥
शुद्धं तत् पूरयेन्नेत्रं मधुना सैन्धवेन वा ।
प्रक्षाल्य पोत्याय ततः शङ्खनां वेधयेत् शिराम् ।
कुष्ठेन वचया चव्या तथा त्रिकटुकेन च ।
प्रतिपानं प्रदातव्यं सुरया लवणैः सह ॥
निर्व्वातं विहितं स्थानं ग्रासे दूर्व्वा च पूजिता ।
गुरुभक्ष्यं न दातव्यं मधुरञ्च विशेषतः ॥")
प्रचुरं, त्रि, (प्रचोरतीति । प्र+चुर+"इगुपधज्ञेति ।" ३ । १ ।१३५ । इति कः । यद्वा, प्रगतचुरायाः इति प्रादिसमासः ।) अनेकम् । तत्पर्य्यायः । प्रभूतम् २ प्राज्यम् ३ अदभ्रम् ४ बहुलम् ५ बहु ६ पुरुहम् ७ पुरु ८ भूयिष्ठम् ९ स्फिरम् १० भूयः ११ भूरि १२ । इत्यमरः । ३।१।६३॥(यथा, भागवते । ५ । १३ । २१ ।

"अहो नृजन्माखिलजन्मशोभनं
किं जन्मभिस्त्वपरैरप्यमुष्मिन् ।
न यत् हृषीकेशयशः कृतात्मनां
महात्मनां वः प्रचुरः समागमः ॥")

प्रचुरपुरुषः, पुं, (प्रचोरतीति । प्र + चुर कि स्त्रेये + कः । प्रचुरश्चासौ पुरुषश्चेति ।) चौरः । इति त्रिकाण्डशेषः ॥ (प्रचुरो बहुलः पुरुषश्चेति कर्म्मधारये ।) बहुनरश्च ॥

प्रचेतसी, स्त्री, (प्रचेतयति सञ्चिन्तयतीति । प्र + चित् + णिच् + असच् । गौरादित्वात् ङीष् ।) कट्फलः । इति राजनिर्घण्टः ॥ प्रचेतसः कन्या च ॥

प्रचेता, [तृ] पुं, (प्रचेतति युद्धादिस्थाने वीरान् सञ्चिनोतीति । प्र + चित् + तृच् ।) सारथिः । इति हेमचन्द्रः ॥

प्रचेताः, [स्] पुं, (प्रचेतनीति । प्र + चित + असुन् ।) वरुणः । इत्यमरः । १ । १ । ६४ ॥ (यथा, रघौ । १ । ८० ।

"हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः ।
सुजङ्गपिहितद्वारं पातालमधितिष्ठति ॥"

मुनिविशेषः । (यथा, मनौ । १ । ३५ ।

"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च ॥"

प्रकृष्टं चेतोऽस्य ।) प्रकृष्टहृदि, त्रि । इति मेदिनी ॥ प्राचीनबर्हिराजपुत्रः । यथा,—

"प्राचीनबर्हिर्भगवान् सर्व्वयज्ञेश्वरोऽवरः ।
समुद्रतनयायां वै दश पुत्रानजीजनत् ॥
प्रचेतसस्ते विख्याता राजानः प्रथितौजसः ॥"

इति कौर्म्मे १२ अध्यायः ॥

अपि च ।

"प्राचीनबर्हिरुत्पुत्रः पृथिव्यामेकराड्बभौ ।
उपयेमे समुद्रस्य तनयां स वै सुताम् ॥
तस्यात् सुषाव सामुद्री दश प्राचीनबर्हिषः ।
सर्व्वे प्रचेतसो नाम धनुर्व्वेदस्य पारगाः ॥
अपृथग्धर्म्मचरणास्तेऽतप्यन्त महत्तपः ।
दश वर्षसहस्राणि समुद्रसलिले प्लुताः ॥
प्रजापतित्वं संप्राप्य भार्य्या तेषाञ्च मारिषा ।
अभवद्वृक्षगुल्पेन तस्यां दक्षोऽभवत् ततः ॥"

इति गारुडे ६ अध्यायः ॥

(प्रकृष्टज्ञानयुक्ते, त्रि । यथा, ऋग्वेदे । २ । २३ । २ ।

"देवाश्चित् ते असुर्य्यप्रचेतसो बृहत्तो यन्नियं भागमानशुः ॥"

"हे बृहत्तो ! प्रचेतसः प्रकृष्टज्ञानास्ते त्वदीया देवाश्चिद् देवा अपि ।" इति तद्भाष्ये सायनः ॥)

प्रचेलं, क्ली, (प्रचेलतीति । प्र + चेल् + अच् ।) पीतकाष्ठम् । इति शब्दचन्द्रिका ॥

प्रचेलकः, पुं, (प्रकर्षेण चेलति गच्छतीति । प्र + चेल् + ण्वुल् ।) घोटकः । इति शब्दमाला ॥

प्रचोदनी, स्त्री, (प्रचोदते रोगो ययेति । प्र + चुद् + णिच् + ल्युट् । ङीप् ।) कण्टकारी । इत्यमरः । २ । ४ । ६३ ॥

प्रचोदितः, त्रि, (प्र + चुद् + क्तः ।) प्रेरितः । यथा,—

"प्रचोदिता येन पुरा सरस्वती ।"

इति श्रीभागवते २ स्कन्धे ४ अध्यायः ॥

प्रच्छ, औ ग्र ज्ञीप्से । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-द्विक०-अनिट् ।) ज्ञीप्सा ज्ञातुमिच्छा । ग्रप क्त इत्यस्यैव ज्ञानपक्षे निष्पादनात् । औ, अप्राक्षीत् । ग्र, पृच्छति वार्त्तां गुरुं शिष्यः । इति दुर्गादासः ॥

प्रच्छदः, पुं, (प्रच्छाद्यतेऽनेनेति । प्र + छद + णिच् + करणे घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९६ । इति उपधाया ह्रस्वः ।) आच्छादनम् । इति शब्दरत्नावली ॥ (यथा, रघुः । १६ । २२ ।

"प्रच्छदान्तगलिताम्बुबिन्दुभिः
क्रोधभिन्नवलयैर्विवर्त्तनैः ॥")

प्रच्छदपटः, पुं, प्रकर्षेण छाद्यतेऽनेन स चासौ पटश्चेति । आच्छादनपटः । पाछुड़ि इति ख्यातः । तत्पर्य्यायः । निचोलः २ । इत्यमरः । २ । ६ । ११६ ॥ निचुलः ३ । इति शब्दरत्नावली ॥ निचोलम् ४ । इति रभसः ॥ निचोली ५ । इति राजदेवः ॥ इत्यमरटीकायां भरतः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।

"वलीभङ्गाभोगैरलकपतितैः श्रीर्मुकुलमः
स्त्रियाः सर्व्वावस्थं कथयति रतं प्रच्छदपटः ॥")

प्रच्छना, स्त्री, (प्रच्छ + बाहुलकात् युच् । टाप् ।) आमन्त्रणा । इति शब्दधरः ॥

प्रच्छन्नं, क्ली, (प्र + छद् + क्त ।) अन्तर्द्धारम् । इत्यमरः । २ । २ । १४ ॥ आच्छन्ने, त्रि ॥ (यथा, महाभारते । ३ । ७१ । ३१ ।

"प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम् ॥")

प्रच्छर्दिका, स्त्री, (प्र + छर्द् वमने + "रोगाख्यायां ण्वुल् बहुलम् ।" ३ । ३ । १०८ । इति ण्वुल् । स्त्रियां टापि अत इत्वम् ।) वमिः । इत्यमरः । २ । ६ । ५५ ॥ (वमनकारके, त्रि ॥)

प्रच्छादनं, क्ली, (प्रच्छाद्यतेऽनेनेति । प्र + छद् + णिच् + ल्युट् ।) उत्तरीयवस्त्रम् । तत्पर्य्यायः । प्रावरणम् २ संवानम् ३ उत्तरीयकम् ४ । इति हेमचन्द्रः । ३ । ३३५ ॥ (नेत्रच्छदम् । यथा, अश्ववैद्यके । २ । १० ।

"प्रच्छादनं भवेदर्म्म चाक्षिकूटमतः परम् ॥"

"वर्म्म नेत्रच्छदं प्रच्छादनं प्रच्छादनापरनामकं भवेत् । वर्म्म नेत्रच्छदेऽध्वनीत्यमरः ॥" इति तट्टीका ॥ भावे ल्युट् । गोपनम् । यथा, महाभारते । १ । १६१ । १७ ।

"आत्मप्रच्छादनार्थं वै बाहुवीर्य्यमुपाश्रितः ।
विप्ररूपं विधायेदं मन्ये मां प्रति युध्यसे ॥")

प्रच्छादितं, त्रि, (प्र + छद + णिच् + क्तः ।) आच्छादितम् । इति हलायुधः ॥

प्रजः, पुं, (प्रजायते जायागर्भे इति । प्र + जन् + डः ।) पतिः । "जायायां प्रविश्य पुनर्जायते इति डे प्रजः पतिः ।" इति प्रजावतीशब्दटीकायां भरतः ॥

प्रजनः, पुं, (प्रजायतेऽनेनेति । प्र + जन् + करणे घञ् । "जनिवध्योश्च ।" ७ । ३ । ३५ । इति न वृद्धिः ।) उपसरः । इत्यमरः । ३ । २ । २५ ॥ द्वे स्त्रीगवादिषु पुङ्गवादीनां प्रथमगर्भाधानाय मैथुनाभियोगः । प्रजनं क्लीबमिति केचित् ॥ पशूनां गर्भग्रहणकालः । इति स्वामी ॥ गवां प्रथमगर्भग्रहणाभियोगः । इति सुभूतिः ॥ स्त्रीगवीषु पुङ्गवानां प्रथमगमनमिति सर्व्वस्वम् ॥ किन्तु वीर्य्यमुपसरं दृष्टेति भट्टिः । इत्यमरटीकायां भरतः ॥ (मैथुनसाधनोपस्थेन्द्रियम् । यथा, मनुः । १२ । १२१ ।

"वाय्वग्निं मित्रसुत्यर्गे प्रजने च प्रजापतिम् ॥"

प्र + जन् + भावे घञ् । पुत्रोत्पादनम् । यथा, मनुः । ६ । १२१ ।

"उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते ।
पिता प्रधानं प्रजने तस्माद्धर्म्म्येण तं भजेत् ॥"

जनयितरि, त्रि । यथा, भागवते । ८ । ५ । ३४ ।

"ईशो नगानां प्रजनः प्रजानां
प्रसीदतां नः स महाविभूतिः ॥"

तथा, भगवद्गीतायाम् । १० । २८ ।

"प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥")

प्रजननं, क्ली, (प्रजायतेऽनेनेति । प्र + जन् + ल्युट् ।) योनिः । (यथा, सुश्रुते । १ । २३ ।

"स्त्रिक्पायुप्रजननललाटगण्डौष्ठकर्णफलकोधोदरबाहुसुखाभ्यन्तरसंस्थाः सुखरोपणीव्रणाः ॥" प्र + जन् + भावे ल्युट् ।) जन्म । इति मेदिनी । ने, १६१ ॥ (यथा, राजतरङ्गिण्याम् । २ । ६१ ।

"वेधाः परां धुरमुपेति परीक्षकाणा-
मिच्छोः फलप्रजननेन कृतश्रमो यः ॥"

धात्रीकर्म्म । यथा, सुश्रुते शारीरस्थाने । १० अध्याये । "ततः कृतोपधाने मृदुविस्तीर्णे शयने स्थितामाभुग्नसक्थीमुत्तानामग्रकूर्चनीयाक्षतसः स्त्रियः परिगतवयसः प्रजननकुशलाः कर्त्तितनखाः परिचरेयुरिति ॥") प्रगमः । इति विश्वः ॥ (यथा, महाभारते । १ । १२० । ३७ ।

"तस्मात् प्रहेष्याम्यद्य त्वां हीनः प्रजननात् स्वयम् ।
सदृशात् श्रेयसो वाऽहं विद्धि पत्नीं यशस्विनि ! ॥"

प्रजनयतीति । प्र + जन + ल्युः । प्रजोत्पादके, त्रि । यथा, वाजसनेयसंहितायाम् । १६ । ४८ ।

"इदं हविः प्रजननं मेऽस्तु ॥")

प्रजनिका, स्त्री, (प्रजनयतीति । प्र + जन + णिच् + ण्वुल् । टापि अत इत्वम् ।) माता । इति शब्दधरः ॥

प्रजल्पः, पुं, (प्र + जल्प + भावे घञ् ।) वाक्यविशेषः । यथा,—

"असूयैर्य्यामदयुता यो ऽवधीरणसूचया ।
प्रियस्य कौशलोद्गारः प्रजल्पः स तु कथ्यते ॥"

इत्युज्ज्वलनीलमणिः ॥

(बहुभाषणम्। यथा, हठयोगप्रदीपिकायाम्। १। १५।
"अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः।
जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति॥")

प्रजवः, पुं, (प्रजवनमिति। प्र+जु वेगगतौ+"ऋदोरप्।" ३। ३। ५७। इति भावे अप्।) प्रकृष्टवेगः। प्रपूर्ब्बजुधातोर्भावेऽल्प्रत्ययनिष्पन्नः॥ (यथा, ऋग्वेदे। ७। ३३। ८।
"दातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः॥")

प्रजवी, त्रि, (प्रजवतीति। प्र+जु वेगगतौ+"प्रजोरिनिः।" ३। २। १५६। इति इनिः।) प्रकृष्टवेगयुक्तः। इत्यमरः। २। ८। ७३॥

प्रजा, स्त्री, (प्रजायते इति। प्र+जन्+"उपसर्गे च संज्ञायाम्।" ३। २। ६६। इति डः।) सन्ततिः। पितृमातृगुणदोषेण प्रजा विभिन्ना भवति। यथा, अग्निपुराणे।
"मातृणां प्रीतदोषेण पितृप्रीतगुणेन च।
विभिन्नास्तु प्रजाः सर्व्वा भवन्ति भवप्रीतिनाम्॥"
जनः। इत्यमरः। ३। ३। ३२॥ (यथा, रघुः। १। २४।
"प्रजानां विनयाधानात् रक्षणात् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥"
उत्पत्तिः। यथा, ऋग्वेदे। १०। ७२। ६।
"प्रजाये म्रियते त्वत्पुनर्मार्त्ताण्डमाभरत्॥")

प्रजागरः, पुं. (प्र+जाग+"ऋदोरप्।"३।३।५७। इति भावे अप्।) प्रकर्षेण जागरणम्। इति हलायुधः॥ यथा, अग्निपुराणे।
"देवतानां पितॄणाञ्च घोरं कृत्वा प्रजागरम्।
त्रेतायुगे चतुर्थांशे रावणस्तपसः क्षयात्।
रामं दाशरथिं प्राप्य समरे क्षयमीयिवान्॥"
(विष्णुः। यथा, महाभारते।१३। १४६।११५।
"आधारनिलयो धाता पुष्पहासः प्रजागरः॥"
"नित्यबुद्धस्वरूपत्वात् प्रजागरः।" इति तद्भाष्यम्॥ प्राणः। यथा, भागवते। ४। २७। १५।
"ते चण्डवेगानुचराः पुरञ्जनपुरं यदा।
हर्त्तुमारेभिरे तत्र प्रत्यषेधत् प्रजागरः॥"
"प्रजागरः प्राणः।" इति तट्टीकायां स्वामी॥)

प्रजाता, स्त्री, (प्रजातं प्रजननं सुतादीनामुत्पत्तिरित्यर्थः। तदस्या अस्तीति। अच्। ततष्टाप्।) जातापत्या। प्रसूता। इत्यमरः। २। ६। १६॥ (यथा, सुश्रुते निदानस्थाने ६ अध्याये।
"स्त्रीणामपप्रजातानां प्रजातानां तथाहितैः।
दाहज्वरकरो घोरो जायते रक्तविद्रधिः॥"
"ततोऽनन्तरं बलवत्तरमिति तस्याश्च प्रवाहमाणायां स्त्रियः शब्दं कुर्य्युः प्रजाता प्रजाता धन्यं धन्यं पुत्रमिति तथास्या हर्षमाप्यायन्ते प्राणाः। यदा च प्रजाता स्यात् तदेनामवेक्षेत काचिदस्या अमरा प्रपन्ना वाप्रपन्ना वेति॥"
इति चरके शारीरस्थाने ८ मेऽध्याये॥

अश्वविशेषे, पुं। यथा, कात्यायनश्रौतसूत्रे। २०। ३। २०।
"प्रजाते वायव्यम्।" "वडवायां कृतरेतःस्कन्दनः प्रजात इत्युच्यते॥" इति तद्भाष्यम्॥)

प्रजादा, स्त्री, (प्रजां गर्भदोषनिवारणेन सन्ततिं ददातीति। दा+कः। टाप्।) गर्भदात्रीक्षुपः। इति राजनिर्घण्टः॥ प्रजादातरि, त्रि॥

प्रजादानं, क्ली, (प्रजातो जन्मतो दानं शुद्धिरस्य।) रजतम्। इति शब्दचन्द्रिका॥ (प्रजाया दाने आदाने अदाने च॥)

प्रजानन्ती, स्त्री, (प्रजानातीति। प्र+ज्ञा+शतृ+ङीप्।) पण्डिता। प्राज्ञी। इति हेमचन्द्रः। ३। १८६॥ (विशेषवेत्तरि, त्रि। यथा, रामायणे। २। ७२। १४।
"तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम्।
अजानन्तं प्रजानन्ती राज्यलोभेन मोहिता॥")

प्रजापः, पुं, (प्रजाः पातीति। पा रक्षणे+कः।) राजा। इति हेमचन्द्रः। ३। ३५४॥

प्रजापतिः, पुं, (प्रजानां पतिः।) ब्रह्मा। इत्यमरः। १। १। १७॥ (यथा, महाभारते। १। १। ३२।
"यस्मात् पितामहो ब्रह्मा प्रभुरेकः प्रजापतिः।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ॥")
दक्षादिः। (यथा,—
"द्वितीये हि युगे सर्व्वमक्रोधव्रतमास्थितम्।
दिव्यं सहस्रवर्षाणामसुरा अभिदुद्रुवुः॥
तपोविघ्नं प्रमीकर्त्तुन्तपोविघ्नं महात्मनाम्।
पश्यन् समर्थश्चोपेक्षाञ्चक्रे दक्षः प्रजापतिः॥
पुनर्माहेश्वरं भागं भुवं दक्षप्रजापतिः।
प्रायो न कल्पयामास प्रोच्यमानः सुरैरपि॥"
इति चरके चिकित्सास्थाने ४तीयेऽध्याये॥)
महीपालः। इति मेदिनी। ते, २०८॥ (इन्द्रः। यथा, महाभारते। ३। १८५। १६।
"अयमेव विधाता हि तथैवेन्द्रः प्रजापतिः॥")
जामाता। दिवाकरः। वह्निः। त्वष्टा। इति हेमचन्द्रः॥ (यथा, वाजसनेयसंहितायाम्।१२।६१।
"तां विश्वेदेवैर्ऋतुभिः संविदानः
प्रजापतिर्विश्वकर्म्मा विमुञ्चतु॥"
मनुः। यथा, मनौ। १०। ७८।
"न तौ प्रति हि तान् धर्म्मान् मनुराह प्रजापतिः॥")
दक्ष प्रजापतयो यथा, आह्निकतत्त्वे।
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च।
देवान् सर्व्वानृषीन् सर्व्वांस्तर्पयेदक्षतोदकैः॥"
एकविंशतिप्रजापतयो यथा,—
"ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्म्मस्तथा यमः।
मरीचिरङ्गिराश्चैव पुलस्त्यः पुलहः क्रतुः॥
वशिष्ठः परमेष्ठी च विवस्वान् सोम एव च।
कर्दमश्चापि यः प्रोक्तः क्रोधोऽर्व्वाक् क्रीत एव च॥
एकविंशतिरित्येताः स्मृताः प्रजापतयः स्मृताः॥"
इति महाभारते मोक्षधर्म्मः॥ * ॥

पिता। यथा,—
"जनको जन्मदानाच्च रक्षणाच्च पिता नृणाम्।
ततो विस्तीर्णकरणात् कलया स प्रजापतिः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः॥*॥
स्वनामख्यातकीटविशेषश्च॥

प्रजावती, स्त्री, (प्रजास्त्यस्या इति। प्रजा+मतुप्। मस्य वः। स्त्रियां ङीप्।) भार्य्याया। इत्यमरः। २। ६। ३०॥ ज्येष्ठभार्य्यापत्नी। इति केचित्। इति भरतः॥ (यथा, रघुः। १४। ४५।
"प्रजावती दोहदशंसिनी ते
तपोवनेषु स्पृहयालुरेव।
स त्वं रथी तद्व्यपदेशनेयां
प्रापय्य वाल्मीकिपदं स्नुषेव॥"
प्रियव्रतपत्नी। यथा, मार्कण्डेये। ५३। १३।
"प्रियव्रतात् प्रजावत्यां वीरात् कन्या व्यजायत॥")
सन्तानविशिष्टा॥ (यथा, मार्कण्डेये। ६७। १८।
"साम्प्रतं सर्गकर्त्तृत्वमादिष्टं ब्रह्मणा मम।
सोऽहं पत्नीमभिष्यामि धन्यां दिव्यां प्रजावतीम्॥")

प्रजाहितं, क्ली, (प्रजायै हितम्।) जलम्। इति शब्दमाला॥ प्रजोपकारे, त्रि॥

प्रजिनः, पुं. (प्रकर्षेण जयतीति। प्र+जि+बाहुलकात् नक्।) वायुः। इति शब्दमाला॥

प्रजेश्वरः, पुं, (प्रजानामीश्वरः।) राजा। इति त्रिकाण्डशेषः॥ (यथा, रघुः। ३। ६८।
"तमभ्यनन्दत् प्रथमं प्रबोधितः
प्रजेश्वरः प्रातरनीकचारिणा हरेः॥")

प्रज्ञः, त्रि, (प्रकर्षेण जानातीति। प्र+ज्ञा+"आतश्चोपसर्गे।" ३। १। १३६। इति कः।) पण्डितः। इति प्राचशब्दटीकायां भरतः॥ (यथा, माण्डूक्योपनिषदि। ७।
"नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्॥") प्रगतजानुकः। इति प्रत्नशब्दटीकायां भरतः धरणिश्च॥

प्रज्ञप्तिः, स्त्री, (प्र+ज्ञा+णिच्+क्तिन्।) सङ्केतम्। इति त्रिकाण्डशेषः॥ (यथा, सर्व्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शनम्।
"विष्णोः प्रज्ञप्तिरेवैका शब्दैरेतैरुदीर्य्यते।
प्रज्ञप्तिरूपो हि हरिः सा च स्वानन्दलक्षणा॥"
ज्ञानम्। ज्ञापनम्। यथा, भागवते। ३। २५। १।
"कपिलस्तत्त्वसंख्याता भगवानात्ममायया।
जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम्॥"
जिनविद्यादेवीविशेषः। इति हेमचन्द्रः। २। १५३॥)

प्रज्ञप्ती, स्त्री, (प्रज्ञप्ति+षा ङीष्।) जिनविद्यादेवीविशेषः। इति हेमचन्द्रः। २। १५३॥

प्रज्ञा, स्त्री, (प्र+ज्ञा+कः। टाप्।) बुद्धिः। (यथा, रघुः। १। १५।
"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः॥"
एकायता। यथा, पञ्चदश्याम्। ७। १०६।
"तमेव धीरो विज्ञाय प्रज्ञां कुर्व्वीत ब्राह्मणः॥")
प्राज्ञी। प्रकर्षेण जानाति या। इत्यमरः॥

सरस्वती। इति शब्दरत्नावली॥ बुद्धिर्वैदिक-पर्य्यायः। क्रेतुः १ केतः २ चेतः ३ चित्तम् ४ क्रतुः ५ असुः ६ धीः ७ शचीः ८ माया ९ वयुनम् १० अभिख्या ११। इत्येकादशप्रज्ञा-नामानि। इति वेदनिघण्टौ ३ अध्यायः॥

प्रज्ञाकायः, पुं, (प्रज्ञा काय इवास्य।) मक्षुघोषः। इति त्रिकाण्डशेषः॥

प्रज्ञाचक्षुः, पुं, (प्रज्ञा एव चक्षुर्यस्य।) धृत-राष्ट्रः। इति शब्दरत्नावली॥ (यथा, महा-भारते। १।९। १४७।

"श्रुत्वा तु मम वाक्यानि बुद्धियुक्तानि तत्त्वतः। ततो ज्ञास्यसि मां सौते प्रज्ञाचक्षुषमित्युत॥")

प्रज्ञानं, क्ली, (प्रज्ञायतेऽनेनेति। प्र+ज्ञा+ल्युट्।) बुद्धिः। (यथा, महाभारते। ३। १८५। १६।

"त्वमेव मुह्यसे मोहात् न प्रज्ञानं तवास्ति ह")

चिह्नम्। इत्यमरः। ३।३।११२॥ (यथा, महा-भारते। ५। ३३। २६।

"नासं एष ह्युपयुक्ते परार्थे तत् प्रज्ञानं प्रथमं पक्षितस्य॥"

चैतन्यम्। तल्लक्षणं यथा, पञ्चतन्त्रे। ५। १।

"वेनेक्षते शृणोतीदं जिघ्रति व्याकरोति च। स्वादुसादू विजानाति तत् प्रज्ञानमुदीरितम्॥")

पण्डिते, त्रि। इति भरतद्विरूपकोषः॥

प्रज्ञी, [न्] त्रि, (प्रज्ञास्यस्येति। प्रज्ञा+इनिः।) पण्डितः। इति भरतद्विरूपकोषः॥

प्रज्ञुः, पुं, (प्रगते जानुनी यस्य। "प्रसम्भ्यां जानु-नोर्ज्ञुः।" ५। ४। १२६। इति ज्ञुः।) प्रगत-जानुकः। इत्यमरः। २। ६। ४७॥ यस्य जानुनोर्मध्ये नित्यं कादाचित्कं वा महदन्त-रालं तस्मिन् द्वयम्। इति भरतः॥

प्रज्वलितः, त्रि, (प्र+ज्वल+क्तः।) प्रकृष्टज्वलन-विशिष्टः। यथा,—

"अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। सुवर्णवर्णममलं समिद्धं सर्व्वतोमुखम्॥"

इति भवदेवभट्टः॥

प्रडीनं, क्ली, (प्र+डी नभोगतौ+क्तः।) पक्षिणां गतिविशेषः। इत्यमरः। २। ५। ३७॥ प्रथम-डीनं प्रडीनं उड्डयनाय क्रमवन्धः। तिर्य्यग्-गमनम्। इत्यन्ये। इति भरतः॥

प्रणः, पुं, (प्र+"नञ्पुराणे प्रात्।" ५। ४। ५ इत्यस्य वार्त्तिके। इति नः।) पुराणः। "पुरा-णार्थे वर्त्तमानात् प्रशब्दात् नो वक्तव्यः।" इति सिद्धान्तकौमुदी॥

प्रणतः, त्रि, (प्र+णम+क्तः।) प्रकर्षेण नतः। प्रणतिविशिष्टः। यथा,—

"ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्। भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष! ते चरणारविन्दम्॥"

इति श्रीभागवतम्॥

प्रणतिः, स्त्री, (प्रकृष्टं नमनमिति। प्र+णम+ भावे क्तिन्।) प्रणामः। तत्पर्य्यायः। प्रणि-पातः २ अनुनयः ३। इति हेमचन्द्रः॥ (यथा, रघौ। ११। ८६।

"राघवोऽपि चरणौ तपोनिधेः श्वश्रुतामिति वदन् समस्पृशत्। निर्व्यलीकमतिरस्य तत्क्षणं मूर्द्धनि प्रणतिरेव कीर्त्तये॥")

प्रणयः, पुं, (प्रणयनम्। प्र+णी+"अर्च्।" ३। ३। ५६। इति अच्।) प्रीत्या प्रार्थनम्। तत्पर्य्यायः। प्रश्रयः २। इत्यमरः। ३।२।२५॥ प्रसरः ३। इति भरतः॥ (यथा, रघौ।२।५८।

"समत्वमाभाषणपूर्व्वमाहु-र्वृत्तः स नौ सङ्गतयोर्व्वनान्ते। तद्भूतनाथानुग! नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम्॥")

प्रेम। (यथा, भगवद्गीतायाम्। ११। ४।

"सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति। अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि॥")

याच्ञा। विश्रम्भः। निर्व्वाणः। इति मेदिनी। ये, ८६॥

प्रणयी, पुं, (प्रणयोऽस्यास्तीति। प्रणय+इनिः।) स्वामी। इति हेमचन्द्रः॥ प्रणययुक्ते, त्रि। (यथा,—

"प्रणयिनि निजनाथे लज्जया मौनभावं प्रति किमिह नवोढ़ा रौति विर्वीकथाकं॥"

इत्युद्भटः॥)

प्रणयिनी, स्त्री, (प्रणयिन्+ङीप्।) भार्य्या। इति हेमचन्द्रः॥

प्रणवः, पुं, (प्रकर्षेण नूयते स्तूयते आत्मा स्वेष्ट-देवता वानेनेति। प्र+णुल स्तुतौ+"ऋदो-रप्।" ३। ३। ५७। इति अप्। "उपसर्गा-दसमासेऽपि णोपदेशस्य।" ८। ४। १४। इति णत्वम्। यद्वा, ब्रह्मविष्णुमहेशरूपत्वात् प्रण-म्यते इति। प्र+णम+कर्म्मणि घञ्। संज्ञा-पूर्व्वकत्वात् दृढ़त्वाभावः। पृषोदरादित्वात् मस्य वः।) ॐकारः। इत्यमरः। १। ६। ४॥ तस्य पर्य्यायो यथा,—

"ॐकारः प्रणवस्तारो वेदादिर्ब्रह्मुलो ध्रुवः। त्रैगुण्यं त्रिगुणो ब्रह्म सत्यो मन्त्रादिरव्ययः॥ ब्रह्मबीजं चितत्त्वश्च पञ्चरश्मिश्चिदेवतः॥"

इति बीजवर्णाभिधानम्॥

अपि च।

"ॐकारो वह्निलस्तारो वामश्च हंसकारणम्। मन्त्राद्यः प्रणवः सत्यं बिन्दुशक्तिश्चिदेवतम्॥ सर्व्वजीवोत्पादकश्च पञ्चदेवो ध्रुवश्चिकः। सावित्री त्रिशिखो ब्रह्म त्रिगुणो गुणजीवकः॥ आद्यबीजं वेदसारो वेदबीजमतः परम्। पञ्चरश्मिश्चिकूटे च त्रिभवे भवनाशनः॥ गायत्री बीजपञ्चाग्नी मन्त्रविद्याप्रभुः। अक्षरं माढकारश्चानादिदेवतमोक्षदौ॥"

इति तन्त्रम्॥ *॥

(यथा, महानिर्व्वाणतन्त्रे। ३। ३२।

"अकारेण जगत्पाता संहर्त्ता स्यादुकारतः। मकारेण जगत्स्रष्टा प्रणवार्थः उदाहृतः॥"

यथा च।

"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः। मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः॥"

वेदस्याध्ययनारम्भे अध्ययनसमाप्तौ च ब्राह्म-णस्य ॐकारोच्चारकर्त्तव्यत्वमुक्तं यथा मनौ। २। ७४।

"ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्व्वदा। स्रवत्यनोङ्कृतं पूर्व्वं परस्ताच्च विशीर्य्यते॥")

अस्योद्धारक्रमो यथा,—

"एकमेवाद्वयं ब्रह्म मायया तु चतुष्टयम्। रोहिणीतनयो रामः अकाराक्षरसम्भवः॥ तेजस्तात्मकप्रद्युम्न उकाराक्षरसम्भवः। प्रज्ञात्मको निरुद्धो वै मकाराक्षरसम्भवः। अर्द्धमात्रात्मकः कृष्णो यस्मिन् विश्वं प्रतिष्ठि-तम्॥"

इति गोपालतापनीयोपनिषत्॥ *॥

स च माङ्गलिकः। यथा,—

"ॐकारश्चाथ शब्दश्च द्वावेतौ ब्राह्मणः पुरा। कण्ठं भित्त्वा विनिर्य्यातौ तेन माङ्गलिकावुभौ॥"

इति सुग्धबोधटीकायां दुर्गादासः॥ *॥

अस्य माहात्म्यं यथा,—

"विश्वपादशिरोग्रीवं विश्वेशं विश्वभावनम्। यत्प्राप्तये महापुण्यमोमित्येकाक्षरं जपेत्॥ तदेवाध्ययनं तस्य स्वरूपं शृणतः परम्। अकारश्च तथोकारो मकारश्चाक्षरत्रयम्॥ एतास्तिस्रः स्मृता मात्राः सात्त्विकाजसतामसाः। निर्गुणा योगिगम्यान्या अर्द्धमात्रा तु सा स्मृता॥ गान्धारीति च विज्ञेया गान्धारस्वरसंश्रया। पिपीलिकागतिस्पर्शा प्रयुक्ता मूर्द्धनि लक्ष्यते॥ यदा प्रयुक्त ॐकारः प्रतिनिर्य्याति मूर्द्धनि। तदोङ्कारमयो योगी अक्षरे लक्षरो भवेत्॥ प्राणो धनुः शरश्चात्मा ब्रह्म वेधसदाहृतम्। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्॥ ओमित्येते त्रयो देवास्त्रयो लोकास्त्रयोऽग्नयः। विष्णुक्रमास्त्रयश्चैव ऋक्सामानि यजूंषि च॥ मात्राश्चार्द्धचतस्रस्तु विज्ञेयाः परमार्थतः। तत्र युक्तश्च यो योगी स तत्क्षयमवाप्नुयात्॥ अकारस्तत्र भूर्लोक उकारश्चोच्यते भुवः। सत्यञ्जनो मकारश्च स्वर्लोकः परिकल्प्यते॥ यक्ता तु प्रथमा मात्रा द्वितीयात्यक्तसंज्ञिका। मात्रा तृतीया चिच्छक्तिरर्द्धमात्रा परं पदम्॥ अनेनैव क्रमेणेता विज्ञेया योगभूमयः। ओमित्युच्चारणात् सर्व्वं गृहीतं सदसद्भवेत्॥ हृस्वा तु प्रथमा मात्रा द्वितीया दीर्घसंयुता। तृतीया तु प्लुतार्द्धाख्या वचसः साक्षगोचरे॥ इत्येतदक्षरं ब्रह्म परमोङ्कारसंज्ञितम्। यस्तं वेद नरः सम्यक् तथा ध्यायति वा पुनः॥ संसारचक्रसुत्सृज्य त्यक्तत्रिविधबन्धनः। प्राप्नोति ब्रह्मनिलयं परमं परमात्मनि॥

अचीर्णकर्म्मवन्तस्तु ज्ञात्वा मृत्युमुपस्थितम्।
उत्क्रान्तिकाले संप्राप्ते पुनर्योगित्वमृच्छति॥
तस्मादसिद्धयोगेन सिद्धयोगेन वा पुनः।
ज्ञेयान्यरिष्टानि सदा येनोत्क्रान्तौ न
सीदति॥"

इति श्रीमार्कण्डेयपुराणे ॐकारमाहात्म्यम्॥*॥

"यज्ञूनत्वातिरिक्तञ्च यच्छिद्रं यदयज्ञियम्।
यदमेध्यमशुद्धञ्च यातयामञ्च यद्भवेत्।
तदोङ्कारप्रयुक्तेन सर्व्वत्राविकलं भवेत्॥"

इति तिथ्यादितत्त्वम्॥*॥

"ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥"

इति श्रीभगवद्गीतायाम्। ८। १३॥

प्रणादः, पुं, (प्रणदनमिति। प्र+णद+घञ्।) अनुरागजशब्दः। इत्यमरः। १। ६। ११॥ "प्रीतिजनितो सुखकण्ठादिशब्दः। प्रीतिजं प्रीतिकृतम्। 'अनुरागकृते शब्दे प्रणादः प्रीतिकृतं तृणाम्।' इति शब्दार्णवः॥ गुणानुरक्तलोकप्रभवः शब्दः। इति मधुमाधवः। अनुरागजन्मा जनशब्दः। इति कलिङ्गः।" इत्यमरटीकायां भरतः॥ तारशब्दः। (यथा, रामायणे। २। ३८। २।

"तेन तत्र प्रणादेन दुःखितः स महीपतिः।
चिच्छेद जीविते श्रद्धां धर्म्मे यशसि चात्मनः॥")

श्रवणमयः। इति मेदिनी। दे, ३६॥ घोषस्य नामान्तरं कर्णनादः। यथा,—

"कर्णस्रोतःस्थिते वाते शृणोति विविधान्
स्वरान्।
भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते॥"

इति माधवकरः॥

प्रणामः, पुं, (प्र+णम+भावे घञ्।) प्रणतिः। प्रणिपातः। भक्तिश्रद्धातिशययुक्तनमस्कारः। स तु स्वापकर्षबोधकव्यापारविशेषः। इति सुग्धबोधटीकायां दुर्गादासः॥ स चतुर्व्विधः। अभिवादनम् १ अष्टाङ्गः २ पञ्चाङ्गः ३ करशिरःसंयोगश्च ४। प्रथमस्य लक्षणं तच्छब्दे द्रष्टव्यम्॥ द्वितीयो यथा,—

"पद्भ्यां कराभ्यां जानुभ्यासुरसा शिरसा दृशा।
वचसा मनसा चैव प्रणामोऽष्टाङ्ग ईरितः॥"

तस्य फलम्।

"भूमौ निपत्य यः कुर्य्यात् कृष्णेऽष्टाङ्गनतिं सुधीः।
सहस्रजन्मजं पापं त्यक्त्वा वैकुण्ठमाप्नुयात्॥"

तृतीयो यथा,—

"बाहुभ्यामेव जानुभ्यां शिरसा वचसा दृशा।
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवरा-
विमौ॥"*॥

प्रकर्षेण नमनम्। तद्विधिर्यथा, कालिकापुराणे।

"शिरोमत्यादयोः कृत्वा बाहुभ्याञ्च परस्परम्।
प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात्॥"

किञ्चागमे।

"दोर्भ्यां पद्भ्याञ्च जानुभ्यासुरसा शिरसा दृशा।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः॥*॥
जानुभ्यामेव बाहुभ्यां शिरसा वचसा धिया।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवराविमौ॥"

इति॥*॥

"गरुडं दक्षिणे कृत्वा कुर्य्यात्तत्पृष्ठतो बुधः।
अवश्यञ्च प्रणामांस्त्रीन् मुक्तश्चेदधिकाधिकान्॥"*॥

तथा च नारदपञ्चरात्रे।

"सन्निं वीक्ष्य हरिं चाद्यं गुरून् स्वगुरुमेव च।
द्विचतुर्व्विंशदथवा चतुर्व्विंशतदर्द्धकम्॥
नमेत्तदर्द्धमथवा तदर्द्धं सर्व्वदा नमेत्॥"*॥

विष्णुधर्म्मोत्तरे।

"देवाचार्यादर्शनादेव प्रणमेन्मधुसूदनम्।
स्थानापेक्षा न कर्त्तव्या दृष्ट्वार्चां द्विजसत्तमाः॥
देवार्चादृष्टिपूतं हि शुचि सर्व्वं प्रकीर्त्तितम्॥"*॥

अथ नमस्कारमाहात्म्यम्। नारसिंहे।

"नमस्कारः स्तुतौ यज्ञः सर्व्वयज्ञेषु चोत्तमः।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"

स्कान्दे।

"दण्डप्रणामं कुरुते विष्णवे भक्तिभावतः।
रेणुसङ्ख्यां वसेत् स्वर्गे मन्वन्तरशतं नरः॥"

तत्रैव ब्रह्मनारदसंवादे।

"प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत्।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"

तत्रैव श्रीग्रिवोमासंवादे।

"भूमिमापीड्य जानुभ्यां शिर आरोप्य वै
भुवि।
प्रणमेद्यो हि देवेशं सोऽश्वमेधफलं लभेत्॥"

तत्रैवान्यत्र।

"तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च।
नारायणप्रणामस्य कलां नार्हन्ति षोड़शीम्॥
घ्राणेनापि नमस्कारं कुर्व्वतः घ्राङ्मधुवने।
घृतजन्मार्ज्जितं पापं ततत्क्षणादेव नश्यति॥
रेणुमण्डितगात्रस्य कणा देहे भवन्ति ये।
तावद्वर्षसहस्राणि विष्णुलोके महीयते॥"

विष्णुधर्म्मोत्तरे।

"अभिवाद्य जगन्नाथं कृतार्थश्च तथा भवेत्।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी॥
जानुभ्याञ्चैव पाणिभ्यां शिरसा च विचक्षणः।
कृत्वा प्रणामं देवस्य सर्व्वान् कामानवाप्नुयात्॥"

विष्णुपुराणे।

"अनादिनिधनं देवं दैत्यदानवदारणम्।
ये नमन्ति नरा नित्यं न हि पश्यन्ति ते यमम्॥
ये जना जगतां नाथं नित्यं नारायणं द्विजाः।
नमन्ति न हि ते विष्णोः स्थानादन्यत्र गामिनः॥"

नारदीये।

"एकोऽपि कृष्णस्य कृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय॥"

हरिभक्तिसुधोदये।

"विष्णोर्दण्डप्रणामार्थं भक्तेन पतता भुवि।
पातितं पातकं कृत्स्नं नोत्तिष्ठति पुनः सह॥"

स्कान्दे देवहूतिविष्णुसंवादे।

"तपस्तप्त्वा नरो घोरमरण्ये नियतेन्द्रियः।
यत् फलं समाप्नोति तन्नत्वा गरुड़ध्वजम्॥
कृत्वापि बहुशः पापं नरो मोहसमन्वितः।
न याति नरकं नत्वा सर्व्वपापहरं हरिम्॥"

तत्रैव वेदनिधिस्तुतौ।

"अपि पापं दुराचारं नरं त्वत्प्रणतं हरे।
नेक्षन्ते किङ्करा याम्या उलूकास्त्वपनं यथा॥"

विष्णुपुराणे श्रीयमस्य निजभटानुशासने।

"हरिममरगणार्चिताङ्घ्रिपद्मं
प्रणमति यः परमार्थतो हि मर्त्यः।
तमपगतसमस्तपापबन्धं
व्रज परिहृत्य यथायमाज्यसिक्तम्॥"

ब्रह्मवैवर्त्ते।

"शरणागतरक्षणोद्यतं
हरिमीशं प्रणमन्ति ये नराः।
न पतन्ति भवाम्बुधौ स्फुटं
पतितानुद्धरति स्म तानसौ॥"

अष्टमस्कन्धे च बलिवाक्ये।

"अहो प्रणामाय कृतः समुद्यमः
प्रपन्नभक्तार्थविधौ समाहितः।
यल्लोकपालैस्त्वदनुग्रहोऽमरै-
रलब्धपूर्व्वोऽपसदेऽसुरेऽर्पितः॥"

अतएव नारायणशूद्रस्तवे।

"अहो भाग्यमहो भाग्यमहो भाग्यं नृणामिदम्।
येषां हरिपदाताम्रे शिरो न्यस्तं यथा तथा॥"

किञ्च। नारसिंहे श्रीयमोक्तौ।

"तस्य वै नारसिंहस्य विष्णोरमिततेजसः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"

भविष्योत्तरे च जलधेनुप्रसङ्गे।

"विष्णोर्हेवजगद्धातुर्जनार्हनजगत्पतेः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"

इत्यादि॥*॥

अथ प्रणामनित्यता। बृहन्नारदीये लुब्धकोपाख्यानारम्भे।

"सकृद्वा न नमेद्यस्तु विष्णवे शूलभृत्कारिणे।
शूकोपमं विजानीयात् कदाचिदपि नालपेत्॥"

किञ्च। पाद्मे वैशाखमाहात्म्ये यमब्राह्मणसंवादे।

"पश्यन्तो भगवद्वारं नाम शूलपरिच्छदम्।
अकृत्वा तत्प्रणामादि यान्ति ते नरकौकसः॥"*॥

अथ नमस्कारे निषिद्धानि। विष्णुस्मृतौ।

"जन्मप्रभृति यत्किञ्चित् पुमान् वै धर्म्ममाचरेत्।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात्॥"

वाराहे।

"वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत मामू।
श्वित्री स जायते मूर्खः सप्तजन्मनि भामिनि!॥"

किञ्चान्यत्र।

"अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे।
जपहोमनमस्कारान्न कुर्य्यात् कैशवालये॥"

अपि च।
"सङ्गमौ निपतितौ न शुक्लः प्रणमेन्मुहुः।
उत्थायोत्थाय कर्त्तव्यं दण्डवत् प्रणिपातनम्॥"
इति श्रीहरिभक्तिविलासे ८ विलासः॥
नतिविशेषस्तु यामले।
"त्रिकोणाकारा सर्व्वत्र नतिः शक्तेः समीरिता।
दक्षिणादायवीं गत्वा दिशं तस्याश्च शाम्भवीम्॥
ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत्॥"*॥
एकहस्तप्रणामनिषेधो यथा,—
"एकहस्तप्रणामञ्च एकं वापि प्रदक्षिणम्।
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम्॥"
इति तन्त्रसारः॥ *॥
कायिकवाचिकमानसभेदेन प्रत्येकं त्रिविधः। यथा, कालिकापुराणे ७० अध्याये।
"कायिको वाङ्मयश्चैव मानसस्त्रिविधः स्मृतः।
नमस्कारस्तु तत्रोक्तमाधममध्यमः॥
प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ।
जानुभ्यामवनीं गत्वा शिरसा स्पृश्य मेदिनीम्॥
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः।
जानुभ्यां क्षितिं संस्पृश्य शिरसा स्पृश्य मेदिनीम्॥
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः।
पुटीकृत्य करौ शीर्षे दीयते यदयथा तथा॥
अस्पृश्य जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते॥
यः स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः।
क्रियते भक्तियुक्तैर्वा वाचिकस्तूत्तमः स्मृतः॥
पौराणिकैर्वैदिकैर्वा मन्त्रैर्यो क्रियते नतिः।
मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ॥*
इष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं पुनः।
मनसं मानसं प्रोक्तमुत्तमाधममध्यमम्॥
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः।
कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः॥
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः।
प्रणाम इति विज्ञेयः स पूर्व्वं प्रतिपादितः॥"*॥
शूद्रपूजितदेवताप्रणामनिषेधो यथा,—
"यः शूद्रेणार्च्चितं लिङ्गं विष्णुं वा प्रणमेदृजुः।
निष्कृतिस्तस्य नास्त्येव प्रायश्चित्तायुतैरपि॥"
इति कर्म्मलोचनम्॥

प्रणाय्यः, त्रि, (प्रणीयते इति। प्र+णी+ण्यत्।) "प्रणाय्योऽसम्मतौ।" ३। १। १२८। इति साधुः।) असम्मतः। (यथा, भट्टिः। ६।६६।
"न प्रणाय्यो जनः कश्चित् निकार्य्यं तेऽधितिष्ठति॥")
अभिलाषविवर्ज्जितः। इति मेदिनी। ये, ६३॥ साधुः। इति त्रिकाण्डशेषः॥ प्रियः। इति सुग्धबोधव्याकरणम्॥

प्रणालः, पुं, (प्रणम्यते जलादिर्निःसार्य्यतेऽनेनेति। प्र+णल+घञ्।) जलनिःसरणमार्गः। इत्यमरः। १। १०। ३५॥ पयनाला इति भाषा॥

प्रणाली, स्त्री, (प्रणाल+गौरादित्वात् ङीष्।) जलनिःसरणमार्गः। इत्यमरः। १। १०। ३५॥ पयनाला इति भाषा॥ (यथा, रामायणे। २। ६२। १०।
"तद्वाक्यं करुणं राज्ञः श्रुत्वा दीनस्य भाषितम्।
कौशल्या अश्रुजद्राप्यं प्रणालीव नवोदकम्॥")

प्रणिधानं, क्ली, (प्रणिधीयतेऽनेनेति। प्र+नि+धा+ल्युट्।) प्रयत्नः। (यथा, महाभारते। ५। १०३। २१।
"प्रणिधानेन धैर्य्येण रूपेण वयसा च मे।
मनःप्रविष्टो देवर्षे! गुणकृष्णाः पतिर्वरः॥")
समाधिः। (यथा, रघुः। १। ७४।
"सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम्॥")
प्रवेशनम्। इति मेदिनी। ने, १६३॥ (यथा, सुश्रुते शारीरस्थाने ८ अध्याये।
"बहुशः श्रुता हीनशस्त्रप्रणिधानेनापविद्धा॥")

प्रणिधिः, पुं, (प्रणिधीयते इति। प्र+नि+धा+किः।) चरः। (यथा, देवीभागवते। ५।३।६।
"प्रणिधिं प्रेषयामास हयारिस्तु शचीपतिम्॥")
प्रार्थनम्। इत्यमरः। ३।३। ६६॥ अवधानम्। इति भरतः॥ (बृहद्रथपुत्रः। यथा, महाभारते। ३। २१६। ६।
"बृहद्रथस्य प्रणिधिः कश्यपस्य बृहत्तरः।
भागुरङ्गिरसो धीर! पुत्रो वर्चस्वी सौरभः॥")

प्रणिपातः, पुं, (प्र+नि+पत+घञ्।) प्रणतिः। इति हेमचन्द्रः॥ (यथा, कुमारे। ३। ६१।
"तस्याः सखीभ्यां प्रणिपातपूर्व्वं
स्वहस्तलून; शिशिरात्ययस्य।
अकीर्य्यत च्छाम्बकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः॥")

प्रणिहितं, त्रि, (प्र+नि+धा+क्तः।) स्थापितम्। प्राप्तम्। समाहितम्। इति मेदिनी। ते, २०३॥ (मिलितम्। यथा, रामायणे। ३। २५। ३४।
"ततः प्रणिहिताः सर्व्वा वानर्य्योऽस्य वशानुगाः।
चुक्रुशुर्व्वीरवीरेति भूयः क्रोशन्ति ताः प्रियम्॥")

प्रणीतं, त्रि, (प्र+नी+क्तः।) उपसम्पन्नम्। पाकेन रूपरसादिसम्पन्नशञ्जनादि। इत्यमरभरतौ। क्षिप्तम्। विहितम्। प्रवेशितम्। इति मेदिनी। ते, १२४॥ कृतम्। इति हेमचन्द्रः॥

प्रणीतः, पुं, (प्रणीयते इति। प्र+नी+क्तः।) संस्कृतानलः। यज्ञे मन्त्रादिना संस्कृताग्निः। इत्यमरः। २। ७। २०॥

प्रणीता, स्त्री, (प्रणीत+टाप्।) यज्ञपात्रविशेषः। इति मेदिनी। ते, १२४॥

प्रणुतं, त्रि, (प्र+णु+क्तः।) स्तुतम्। इत्यमरः। ३। १। १०६॥

प्रणेयः, त्रि, (प्रकर्षेण नेतुं शक्यः। प्र+नी+"अचो यत्।" ३। १। ६७। इति यत्।) वश्यः। इत्यमरः। ३। ३। २५॥ (यथा, महाभारते। १२। ५६। ६०।
"असत्प्रणेयो राजेति लोकांश्चैव वदन्त्युत॥")

प्रतितिः, स्त्री, (प्रतनोतीति। प्र+तन+क्तिच्।) विस्तृतिः। वल्ली। इति मेदिनी। ते, १२६॥

प्रततौ, स्त्री, (प्रतति+ङीष्।) व्रततौ। इत्यमरटीकायां भरतः॥

प्रतनः, त्रि, (प्र+"नञ्च पुराणे प्रात्।" ५। ४। २५। इत्यस्य वार्त्ति० इति चकारात् ट्यु तुट् च।) पुरातनः। इत्यमरः। ३। १। ७७॥

प्रतर्कणं, क्ली, (प्र+तर्क+भावे ल्युट्।) वितर्कः। तत्पर्य्यायः। तर्कः २ वितर्कः ३ ऊहः ४ वहः ५ ऊहः ६ वितर्कणम् ७ अध्याहारः ८ अध्याहरणम् ९ ऊहनम् १०। इति शब्दरत्नावली॥

प्रतलं, क्ली, (प्रकृष्टं तलम्।) पातालभेदः। इति मेदिनी। ले, १०६॥

प्रतलः, पुं, (प्रकृष्टं तलमस्य।) विस्तृताङ्गुलिपाणिः। चपेटः। इत्यमरः। २। ६। ८४॥

प्रतानः, पुं, विस्तृतः। प्रपूर्ब्बतनधातोर्घञ्प्रत्ययनिष्पन्नः॥ (तन्तुः। यथा, रघुः। २। ८।
"लताप्रतानोद्ग्रथितैः स केशैः
रधिज्यधन्वा विचचार दावम्॥")
वायुरोगविशेषः। तस्य संज्ञान्तरं अपतानकम्। यथा,—
"हृत्तिं संस्तभ्य संज्ञाञ्च हत्वा कण्ठेन कूजति।
हृदि मुक्ते नरः स्वास्थ्यं याति मोहं पुनः पुनः।
वायुना दारुणं प्राहुरेके तदपतानकम्॥"
इति माधवकरः॥

प्रतानिनी, स्त्री, (प्रतानो विस्तारोऽस्त्यस्या इति। प्रतान+इनिः।) प्रतानवती। विस्तृतलतादिः। इत्यमरभरतौ॥

प्रतापः, पुं, (प्र+तप्+घञ्।) कोषदण्डजतेजः। कोषो धनं दण्डो दमः तद्धेतुत्वात् सैन्यमपि दण्डः ताभ्यां यत्तेजो जायते सः। इति भरतः॥ तत्पर्य्यायः। प्रभावः २। इत्यमरः। २। ८। २०॥ (यथा, मनुः। ६। ३१०।
"प्रतापयुक्तस्तेजस्वी नित्यं स्यात् पापकर्म्मसु॥")
पौरुषम्। यथा, रामायणे। १। १। ११।
"समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान्॥"
"प्रतापः स्मृतिमात्रेण रिपुहृदयविदारकत्वं पौरुषं तद्वान्। 'प्रतापौ पौरुषातपौ।' इति कोषः।" इति तट्टीकायां रामानुजः॥) तापः। (यथा, रघुः। ४। १२।
"यथा प्रजादानाच्चन्द्रः प्रतापात् तपनो यथा।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्॥")
तेजः। इति मेदिनी। पे, २०॥ अर्कवृक्षः। इति राजनिर्घण्टः॥ (युवराजस्य कृत्ये, क्ली। यथा, भोजराजकृतयुक्तिकल्पतरौ।
"नीलो दण्डश्च वस्त्रञ्च शिरःकुम्भस्तु कानकः।
सौवर्णं युवराजस्य प्रतापं नाम विश्रुतम्॥")

प्रतापनं, क्ली, (प्र+तप+णिच्+भावे ल्युट्।) पीडनम्। इति शब्दरत्नावली॥ (यथा, सुश्रुते। १। २६।
"कानकं राजतं ताम्रं रैतिकं त्रपु सीसकम्।
चिरस्थानाद्विलीयन्ते पित्ततेजःप्रतापनात्॥")

प्रतापनः, पुं, (प्रतापयतीति । प्र + तप् + णिच् + ल्युः ।) नरकविशेषः । इति शब्दरत्नावली ॥ स च कुम्भीपाकः । इति श्रीभागवतम् ॥ (क्लेशदायके, त्रि । यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये । "रुद्रकोपाग्निसम्भूतः सर्व्वभूतप्रतापनः ॥")

प्रतापसः, पुं, (प्रतापं चक्षुस्तेजः स्यति नाशयतीति । सो + कः ।) शुक्लार्कवृक्षः । इत्यमरः । २ । ४ । ८१ ॥ (यथा, भावप्रकाशे । "श्वेतार्को गणरूपः स्याच्चन्दारो वसुकोऽपि च । श्वेतपुष्पो महापुष्पः सवालार्कः प्रतापसः ॥" प्रकृष्टस्तापसश्च ॥)

प्रतारकः, त्रि, (प्रतारयतीति । प्र + तॄ + णिच् + ण्वुल् ।) वञ्चकः । धूर्त्तः । यथा । यो यस्य प्रतारकः स तस्याध्यापकः ॥ (यथा च ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्याये । "गुरुघ्नश्चाप्रतीति वादी यो मिथ्यावादी प्रतारकः । देवदेवी गुरुद्वेषी स गोहत्यां लभेद्ध्रुवम् ॥")

प्रतारणं, क्ली, (प्र + तॄ + णिच् + भावे ल्युट् ।) प्रतारणा । तत्पर्य्यायः । वञ्चनम् २ वलीकम् ३ अभिसन्धानम् ४ । इति हेमचन्द्रः । ३ । ४३ ॥ (यथा, राजतरङ्गिण्याम् । १ । १५७ । "क्षुद्दे दामोदरीये यत्तस्याक्षीत् खण्डतं पुरम् । सेतुना तेन तत्रेच्छन् कर्त्तुं सोऽभ्यः प्रतारणम् ॥")

प्रतारणा, स्त्री, (प्र + तॄ + णिच् + युच् । टाप् ।) वञ्चना । यथा,—
"यदीच्छसि वशीकर्त्तुं जगदेकेन कर्म्मणा । उपास्यतां कलौ कल्पलता देवी प्रतारणा ॥"
इत्युड्डटः ॥

प्रतारितः, त्रि, (प्र + तॄ + णिच् + क्त ।) कृतप्रतारणः । तत्पर्य्यायः । वंसितः २ । इति त्रिकाण्डशेषः ॥

प्रति, अ, (प्रथते इति । प्रथ विख्यातौ + बाहुलकात् डति ।) विंशत्युपसर्गान्तर्गतपञ्चदशोपसर्गः । वीप्सादेवनाम्नि गिसंज्ञा कृता । अस्यार्थाः । प्रतिनिधिः । सुखसदृशः । यथा प्रद्युम्नः कृष्णवात् प्रति । वीप्सा । व्याप्तुमिच्छा । यथा वृक्षं वृक्षं प्रति सिञ्चति । लक्षणम् । चिह्नम् । यथा वृक्षं प्रति विद्योतते विद्युत् ॥ इत्यम्भूताख्यानम् । कथञ्चित् प्रकारमापन्नं इत्यम्भूतं तस्याख्यानम् । यथा साधुर्विप्रो मातरं प्रति । भागः । स्वीक्रियमाणोंऽशः । यथा हरं प्रति हलाहलम् ॥ प्रतिदानम् । गृहीतस्य प्रतिदानम् । यथा भक्तेः प्रत्यस्तं शुभ्रोः । तिलेभ्यः प्रति माषान् यच्छति । तिलान् गृहीत्वा माषान् ददातीत्यर्थः ॥ स्तोकम् । अल्पम् । यथा । शाकप्रति क्षपप्रति । क्षेपः । निश्चयः । इत्यमरभरतमेदिनीकाराः ॥ वार्त्तिः । प्रश्नोक्तिः । विरोधः । समाधिः । इति मुग्धबोधटीकायां दुर्गादासः ॥ अभिमुखम् । स्वभावः । इति शब्दरत्नावली ॥

प्रतिकः, त्रि, कार्षापणेन क्रीतः । "कार्षापणाद्ठिठन् वक्तव्यः प्रतिरादेशश्च वा ।" ५ । १ । २५ । इत्यस्य वार्त्तिकोक्त्या ठिठन् । कार्षापणिकः । इति सिद्धान्तकौमुदी ॥

प्रतिकर्म्म, [न्] क्ली, (प्रत्यङ्गं प्रतिख्यातं वा कर्म्म । शाकपार्थिवादिवत् समासः ।) प्रसाधनम् । वेषः । इत्यमरः । २ । ६ । ८६ ॥ (यथा, माघे । ५ । २७ ।
"आस्तीर्णतल्परचितावसथः क्षणेन वेषाञ्जनः कृतनवप्रतिकर्म्मकाम्यः ॥"
प्रतीकारः । यथा, महाभारते । ४ । ५६ । १८ ।
"उषिताः स्मो वने वासं प्रतिकर्म्मचिकीर्षवः । कोपं नार्हसि नः कर्त्तुं सदा समरदुर्ज्जय ! ॥"
अङ्गसंस्कारः । इति ऋचिदमरे । २ । ६ । १२१ ॥)

प्रतिकायः, पुं, (प्रतिगतः कायो यत्र ।) शरीरम् । प्रतिरूपकम् । इति जटाधरः ॥

प्रतिकारः, पुं, (प्रति + कृ + घञ् ।) प्रत्यपकारः । इति शब्दरत्नावली ॥ (यथा, रघुः । ८ । ४० ।
"प्रतिकारविधानमायुषः
सति शेषे हि फलाय कल्पते ॥")

प्रतिकाशः, त्रि, (प्रति + काश + घञ् ।) प्रतीकाशः । इत्यमरटीकायां भानुदीक्षितः ॥

प्रतिकासः, त्रि, (प्रति + कास + घञ् ।) प्रतीकाशः । इत्यमरटीकायां रमानाथः ॥

प्रतिकूपः, पुं, (प्रतिरूपः कूपः ।) परिखा । इति हारावली । १७४ ॥

प्रतिकूलं, त्रि, (प्रतीपं कूलादिति ।) अननुकूलम् । विपक्षः । तत्पर्य्यायः । प्रसव्यम् २ अपसव्यम् ३ अपष्ठु ४ प्रतीपम् । इत्यमरः । ३ । १ । ८४ ॥ (यथा, मनुः । ६ । २७५ ।
"राज्ञः कोषापहर्त्तॄंश्च प्रतिकूलेषु च स्थितान् ।
घातयेद्विविधैर्दण्डैररीणाञ्चोपजापकान् ॥")

प्रतिकृतिः, स्त्री, (प्रकृष्टा कृतिः ।) प्रतिमा । इत्यमरः । २ । १० । ३६ । प्रतिनिधिः । (यथा, रघुः । ८ । ६२ ।
"तेनाष्टौ परिगमिताः समाः कथञ्चित्
बालत्वादवितथसूनृतेन सूनोः ।
साहस्रप्रतिकृतिदर्शनैः प्रियायाः
स्वप्नेषु क्षणिकसमागमोत्सवेषु च ॥"
प्रति + कृ + भावे क्तिन् ।) प्रतिकारः । इति मेदिनी । ते, २१० । (यथा, हरिवंशे । २५० । २३ ।
"शृणुध्वं देवताः सर्व्वाः शुभ्रुप्रतिकृतिं पराम् ।
अवध्या दानवाः सर्व्वे ऋते शुक्रसमव्ययम् ॥")

प्रतिकृष्टं, त्रि, (प्रति कृष्यते स्मेति । प्रति + कृष् + क्तः ।) गर्ह्यम् । हिरादृत्त्याकर्षितम् । इति मेदिनी । टे, ६४ ॥

प्रतिक्षयं, अ, (क्षयं क्षयं प्रति ।) पौनःपुन्यम् । इति शब्दरत्नावली ॥ (यथा, कुमारे । ५ । १० ।
"प्रतिक्षयं सा कृतरोमविक्रियां
व्रताय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्व्वनिबद्धया तया
सरागमस्या रशनागुणास्पदम् ॥")

प्रतिक्षयः, पुं, (प्रतिक्षिणोति हिनस्ति विपक्षादीनिति । प्रति + क्षि + अच् ।) रक्षकः । इति शब्दरत्नावली ॥

प्रतिक्षिप्तः, त्रि, (प्रतिक्षिप्यते स्मेति । प्रति + क्षिप + क्तः ।) वारितः । प्रेषितः । इति मेदिनी । ते, २०५ ॥ अधिक्षिप्तः । इत्यमरः । ३ । १ । ४२ ॥ "ईर्ष्या कृताधिक्षेपे । सर्ष्यया परगुणं प्रति दुर्व्वचनमधिक्षेपः अधिक्षिप्यते स्म अधिक्षिप्तः क्तः एवं प्रतिक्षिप्तः । कस्यचित् प्रौढ्यादिकं प्रति सहमानेन दुर्व्वचनमधिक्षेपः स यस्य कृतः सोऽधिक्षिप्तः । इति सुकुटोऽपि । केचित्तु । दे प्रेषिते । आहूय प्रेषितो यस्तु प्रतिक्षिप्तः स उच्यते । इति क्षत्रदासः । इत्याहुः ।" इति भरतः ॥

प्रतिगतं, क्ली, (प्रतिसृष्टं गतं गमनम् ।) पश्चिगतिविशेषः । यथा,—
"गतागतप्रतिगतसम्यताद्याश्च पञ्चिकाम् ।
गतिभेदाः पञ्चिरहं कृताद्यो नीडमस्थियाम् ॥"
इति जटाधरः ॥
(प्रति + गम + कर्म्मणि क्तः । प्रतियाते, त्रि ।)

प्रतिग्रहः, पुं, (प्रतिग्रह्यमिति । प्रति + ग्रह + "ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति भावे अप् ।) स्वीकरणम् । सैन्यपृष्ठम् । (प्रतिगृह्णाति निष्क्रीवनादिकमिति । प्रति + ग्रह + "विभाषा ग्रहः ।" ३ । २ । १४३ । इति पचे अच् ।) पतद्ग्रहः । (प्रतिगृह्यते इति । प्रति + ग्रह + अप् ।) द्विजेभ्यो विधिवद्देयम् । तद्ग्रहः । ग्रहभेदः । इति मेदिनी । हे, ३९ ॥ ●॥ ब्राह्मणस्यार्थः प्रतिग्रहार्ज्जितः । यथा,—
"प्रतिग्रहार्जिता विप्रे क्षत्रिये शुल्कनिर्जिताः ।
वैश्ये न्यायार्जिताश्चार्थाः शूद्रे शुश्रूषयार्जिताः ॥"
अयाचितप्रतिग्रहे दोषाभावो यथा,—
"अयाचितोपपन्ने तु नास्ति दोषः प्रतिग्रहे ।
अस्तं तं विदुर्ब्राह्मणास्तस्मान्नैव निवर्त्तेत् ॥ ●॥
गुरुश्चर्त्वाग्निहोत्रिश्च वीर्य्यवान् देवतातिथीन् ।
सर्व्वतः प्रतिगृह्णीयात् न तु दृष्येत् स्वयं ततः ॥
साधुतः प्रतिगृह्णीयादथवाऽसाधुतो द्विजः ।
गुणवानल्पदोषश्च निर्गुणो हि निमज्जति ॥
एवं तस्करवृत्त्या वा लब्धा भरणमात्मनः ।
कुर्य्यादिष्टिं परतः प्रायश्चित्तं द्विजोत्तमः ॥"
इति गारुडे २१५ अध्यायः ॥ ●॥
तीर्थे प्रतिग्रहनिषेधो यथा,—
"सुवर्णमथ युक्तात्मा तत्रैवान्यप्रतिग्रहम् ।
स्वकार्य्ये पितृकार्य्ये वा देवताभ्यर्चनेऽपि वा ॥
निष्फलं तस्य तत्तीर्थं यावत्तद्गृहमश्नुते ।
अतस्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च ॥"
इति कौर्म्मे ३३ अध्यायः ॥ ●॥
राजादितः प्रतिग्रहनिषेधो यथा,—
"न राज्ञः प्रतिगृह्णीयान्न शूद्रपतितादपि ।
न चान्यस्मादगृह्यञ्च निन्दितान् वर्जयेद्बुधः ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥ ●॥
विद्यारहितस्य प्रतिग्रहनिषेधो यथा,—
"हेम भूमिं तिलान् गाञ्च अविद्वानाददाति यः ।
भस्मीभवति सोऽङ्गाय दातुः स्यान्निष्फलञ्च तत्॥

तस्मादविद्वान्नादद्यादल्पस्योऽपि प्रतिग्रहम् ।
विषमन्त्रापरिज्ञानी विषेणाल्पेन नश्यति ॥" *॥
गर्हितप्रतिग्रहादिर्यथा,—
"हस्तिकृष्णाजिनाद्यास्तु गर्हिता ये प्रतिग्रहाः।
सद्विप्रात्तान्न गृह्णीयुर्गृह्णन्तस्तु पतन्ति ते ॥
कृष्णाजिनप्रतिग्राही द्वयानां शुक्रविक्रयी ।
नवश्राद्धस्य भोक्ता च न भूयः पुरुषो भवेत् ॥"*॥
आपदि गर्हितप्रतिग्रहकर्त्तव्यता यथा,—
"प्रोक्तप्रतिग्रहाभावे प्रोक्तायां दृढदापदि ।
विप्रोऽश्नन् प्रतिगृह्णन् वा यतस्ततोऽपि नाघभाक्॥
गुर्वादिपोष्यवर्गार्थं देवाद्यर्थंश्च सर्व्वशः ।
प्रत्यादद्यादृत्विजो वस्तु भृत्यर्थमात्मनोऽपि च ॥
दधिचीराज्यमांसानि गन्धपुष्पाम्बुमत्स्यकान् ।
ग्राम्याग्राम्यासनं शाकं प्रत्याख्येयं न कर्हिचित् ॥
अपि दुष्कृतकर्म्मेभ्यः समादद्यादयाचितम् ।
पतितेभ्यस्तथान्येभ्यः प्रतिगृह्यमसंशयम् ॥"*॥
प्रतिगृहीतुं शक्तस्य लभ्यमानपरित्यागेन स्वर्गो भवति । यथा,—
"शक्तः प्रतिग्रहीतुं यो वेदतत्त्वः सुसंयतः ।
लभ्यमानं न गृह्णाति स्वर्गस्तस्य सुनिश्चितम्॥*॥
प्रतिग्रहन्तृयं वापि याचितं यो न यच्छति ।
तत्कोटिगुणितस्तस्तो दासत्वमश्नुते ॥*॥
दाता च नाश्नरेद्दानं प्रतिग्राही न याचते ।
तावुभौ नरकं यातौ दाता चैव प्रतिग्रही ॥*॥
वदन्ति कवयः केचिद्दानप्रतिग्रहौ प्रति ।
प्रत्यर्थं लिङ्गमेवेह दाढ्यायाचकयोर्बलम् ॥
दाढ्यहस्तो भवेद्दूर्द्धमधःस्यात्तेन प्रतिग्रही ।
यद्दानं प्रतिगृह्णीयात् प्रतिग्राही ध्रुवन्तथः॥"*॥
प्रतिग्रहप्रकारो यथा,—
"भूमेः प्रतिग्रहं कुर्य्याद्भूमिं कृत्वा प्रदक्षिणम् ।
करे गृह्य तथा कन्यां दासदासौ तथा द्विजाः॥
करं हि क्षुद्र विन्यस्य धर्म्मार्थं श्रेयः प्रतिग्रहः ।
आरुह्य च गवस्योक्तः कर्णे चाश्वस्य कीर्त्तितः॥
तथा चैकशफानाञ्च सर्व्वेषामविशेषतः ।
प्रतिगृह्णीत गां पृष्ठे कृष्णाजिनं तथा ॥
आरण्याः पशवः सर्व्वे ग्राह्याः पुच्छे विचक्षणैः ।
प्रतिग्रहमधोदृस्य आरुह्यैव तु पादुके ॥
ईषायाश्च रथो ग्राह्यश्चक्रे दक्षञ्च धारयेत् ।
द्रुमाणामथ सर्व्वेषां मूले न्यस्तकरो भवेत् ॥
आयुधानि समादाय तथा भूत्य विभूषणम् ।
धर्म्मध्वजौ तथा सृष्ट्वा प्रविश्य च तथा गृहम्॥
अवतीर्य तु सर्व्वाणि जलस्थानानि चैव हि ।
उपविश्य च गृह्यायां सम्पूजयित्वा करेण वा ॥
द्रव्याण्यन्यान्यथादाय सृष्ट्वा वा ब्राह्मणं पठेत् ।
कन्यादाने न तु पठेद्द्रव्याणि च पृथक् पृथक् ॥
प्रतिग्रहा द्विजश्रेष्ठ तत्रैवान्तर्भवन्ति ते ।
द्रव्याणामथ सर्व्वेषां द्रव्यसंग्रयणान्नरः ॥
वाचयेच्चलमादाय करेण च प्रतिग्रहम् ।
प्रतिग्रहस्य यो धर्म्मं न जानाति द्विजो विधिम् ॥
स द्रव्यस्तेन्यसंयुक्तो नरकं प्रतिपद्यते ।
अथापि हि प्रवक्ष्यामि विधिं सर्व्वं विशेषतः ॥ * ॥
वाजिप्रदानेन प्रतिग्रहे वा
दाढ्यग्रहीचोरपि येन पुण्यम् ।
स्वर्गं प्रजायेत शृणुष्वमेतत्
गृहीतयोर्वै विधिवद्विजेन्द्र ॥
कुर्य्यादसौ पञ्चदिनानि पूर्वं
पश्चोपचारैर्युतविष्णुपूजाम् ।
कृष्णाङ्गमन्तैर्घृतदुग्धहोमं
यद्ग्राम इत्यादि मरुत्वतीयम् ॥
सोङ्कारपूर्व्वादिभिरन्वितं तं
प्रत्येकमष्टौ जुहुयाद्विजेन्द्रः ।
सूर्य्येण मन्त्रेण च तद्दशौ
षष्ठ्या प्रयुक्तं त्रिशतं जुहोति ॥
कुर्य्याच्च गायत्रिजपं सहस्रं
पश्चात् प्रयच्छं तुरगं द्विजाग्र्यः ।
तद्वत्तथात्मानमयं नयेद्वि
दातापि चैतद्व्रतमाविदध्यात् ॥
द्विजाग्र्यवत् प्राक्तनपापमुक्तौ
द्वावप्यमू स्वर्गसनं लभेताम् ॥"

इति हेमाद्रौ दानखण्डे । ४ । ८ । अध्यायः ॥*॥
अपि च । विष्णुधर्म्मोत्तरे ।
"वीणानां सुष्टिमादाय रत्नान्यादाय सर्व्वतः ।
वस्त्रं दशाङ्गमादद्यात् परिधाय तथा पुनः ॥
आरुह्योपानहौ चैव यानमारुह्य पादुके ।
प्रतिग्रहीता सावित्रीं सर्व्वत्रैव प्रकीर्त्तयेत् ॥
ततस्तु सार्द्धं द्रव्येण तस्य द्रव्यस्य दैवतम् ।
समापयेत्ततः पश्चात् कामस्तुत्या प्रतिग्रहम् ॥
विधिं धर्म्मप्रमथो ज्ञात्वा यस्तु कुर्य्यात् प्रतिग्रहम् ।
दात्रा सह तरत्येव नावाडुर्गाण्यसौ द्विजः ॥"
ब्रह्मपुराणे ।
"ब्राह्मणः प्रतिगृह्णीयात् क्षत्रार्थं साधुसत्तथा ।
अयश्चमपि मातङ्गतिललौहांश्च वर्ज्जयेत् ॥
कृष्णाजिनतिलग्राही न भूयः पुरुषो भवेत् ॥
ग्राम्यालङ्कारवस्त्रादि प्रतिगृह्य नृतस्य च ।
नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा ॥"
तथा ।
"ब्रह्महत्या सुरापानमपि स्त्रेयं तरिष्यति ।
आतुरादृयदृगृहीतन्तु तत् कथं वै तरिष्यति ॥"
एतदादिद्रव्यदानं प्रतिगृहीतुर्दोषजनकम् ॥*॥
एतदनिच्छवे विद्यादिरहितत्वेनासमर्थाय च दातुरपि दोषजनकमाह दक्षः ।
"न केवलं हि तद्याति श्रेयमस्य च नश्यति ।"
तद्दत्तद्रव्यम् । अतएव याज्ञवल्क्यः ।
"विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।
गच्छन् प्रदातारमधो नयत्यात्मानमेव च ॥"
अधो नरकम् ॥*॥ एतद्दानप्रतिग्रहोत्तरमुक्ततपोजपादिभिरात्मतरणच्छाय स्वेच्छया प्रतिगृह्णते दानं न दोषाय इत्याह विष्णुः ।
"एतानि प्रतिगृह्णाति स्वेच्छयाभ्यर्थितो न तु ।
तस्मै दानं न दोषोऽस्ति यस्त्रात्मानन्तु तारयेत् ॥"
तारणप्रकारमाह हारीतः ।
"मणिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत् ॥" * ॥ देवलः ।
"प्रतिगृह्यं समर्थो हि कृत्वा विप्रो यथाविधि ।
निस्तारयति दातारमात्मानञ्च स्वतेजसा ॥"
स्कान्दे ।
"वेदाङ्गपारगो विप्रो यदि कुर्य्यात् प्रतिग्रहम् ।
न स पापेन लिप्येत पद्मपत्रमिवाम्भसा ॥"
महाभारते ।
"तीर्थे न प्रतिगृह्णीयात् पुण्येष्वायतनेषु च ।
निमित्तेषु च सर्व्वेषु न प्रमत्तो भवेन्नरः ॥"
प्रतिग्रहसमर्थस्य तदकरणे फलाधिक्यं यथा ।
याज्ञवल्क्यः ।
"प्रतिग्रहसमर्थो हि नादत्ते यः प्रतिग्रहम् ।
ये लोका दानशीलानां स तानाप्नोति पुष्कलान् ॥"
अपवादमाह स एव ।
"कृष्णाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि क्षितिः ।
मांसं ग्राम्यासनं धानाः प्रत्याख्येयं न वारि च ॥"
अन्यच्च ।
"ग्राम्यां गृहान् कृशान् गन्धानपः पुष्पं मणीन् दधि ।
मत्स्यान् धानाः पयो मांसं शाकञ्चैव न निर्णुदेत्॥"
मणीन् विषादिनिवारकान् ।
"एधोदकं फलं मूलमन्नमभ्युद्धृतञ्च यत् ॥"
अभ्युद्धृतमभ्यर्थं दत्तम् ।
"सर्व्वतः प्रतिगृह्णीयात् सध्र्योभयदक्षिणाम् ॥"
किमिति न प्रत्याख्येयमित्याह मनुः ।
"अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः ।
अन्यत्र कुलटापण्डपतितेभ्यस्तथा द्विषः ॥"
प्रतिग्रहमात्रे प्रयोगसारे ।
"प्रतिग्रहं न गृह्णीयादात्मभोगविधित्सया ।
देवतातिथिपूजार्थं यत्राहनसुपार्ज्जयेत् ॥"
अङ्गिराः ।
"कुटुम्बार्थे द्विजः शूद्रात् प्रतिगृह्णीत याचितम् ।
क्रतुर्थमात्मने चैव न हि याचेत कर्हिचित् ॥"
यज्ञार्थं याचने निन्दामाह याज्ञवल्क्यः ।
"चाण्डालो जायते यज्ञकरणाच्छूद्रभिक्षितात्॥"

इति शुद्धितत्त्वम् ॥

प्रतिग्राहः, पुं, (प्रतिगृह्णाति निर्व्वहनादिकमिति प्रति + ग्रह + "विभाषा ग्रहः ।"३ । १ । १४३। इति घञ् ।) पतद्ग्रहः । इत्यमरः । २ । ९ । १३८ ॥ (प्रति + ग्रह + भावे घञ् ।) प्रतिग्रहणञ्च ॥
प्रतिघः, पुं, (प्रतिहन्यतेनेति । प्रति + हन् + घञ् । न्यङ्क्वादित्वात् कुत्वम् ।) क्रोधः । इत्यमरः । १ । ७ । २६ ॥ (यथा, माघे । १५ । ५३ ।
"प्रतिघः क्रतोरपि समुपेत्य
नरपतिगणं समाश्रयत ॥"
प्रतिहननमिति ।) प्रतिघातः । इति मेदिनी । घे, १० ॥ मूर्च्छा । इति शब्दरत्नावली ॥
प्रतिघातनं, क्ली, (प्रति + हन् + णिच् + भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ९१४ ॥
प्रतिघ्नं, क्ली, (प्रतिहन्यस्मिन्निति । प्रति + हन् + घञर्थे कः ।) अङ्गम् । इति शब्दचन्द्रिका ॥

प्रतिच्छन्दः, [स्] क्ली, (छन्दोऽभिप्रायः । प्रतिगतं छन्दः इति प्रादिसमासः ।) प्रतिरूपम् । इति चिकाण्डशेषः ॥ (अकारान्तोऽपि दृश्यते । यथा, राजतरङ्गिण्याम् । ३ । ७७ ।
"रत्नः शिरःप्रतिच्छन्दैः स्थिरप्रणतिसूचकः ।
सनाथशिखरान् प्रादात् तस्मै रत्नःप्रतिध्वजान् ॥")

प्रतिच्छाया, स्त्री, (प्रतिगता छायामिति ।) प्रतिकृतिः । मृत्तिसदृशद्रव्यच्छिलादिनिर्म्मितप्रतिरूपम् । इत्यमरभरतौ ॥ (यथा, हरिवंशे । १५१ । ३० ।
"मायया तस्य प्रतिच्छाया दृश्यते हि नटालये ।
देहार्द्धेन तु कौरव्य ! सिषेवे च प्रभावतीम् ॥")

प्रतिजङ्घा, स्त्री, (प्रतिगता जङ्घाम् ।) अग्रजङ्घा । इति हेमचन्द्रः । ३ । ६१५ ॥

प्रतिजल्पः, पुं, (प्रतिगतो जल्पम् ।) वाक्यविशेषः । यथा,—
"दुरुच्चजल्पदम्भोऽस्मिन् प्राप्तिर्नार्हत्यनुद्धतम् ।
दूतसम्माननेनोक्तं यत्र स प्रतिजल्पकः ॥"
इत्युज्ज्वलनीलमणिः ॥

प्रतिजागरः, पुं, (प्रतिजागरणमिति । प्रति+जागृ+घञ् । "जाग्रोऽविचिण्णल्ङित्सु ।" ७ । ३ । ८५ । इति गुणः ।) प्रत्यवेक्षणम् । तत्पर्य्यायः । अवेक्षा २ । इत्यमरः । ३ । २ । २८ ॥ जागर-प्रतिनिधिः प्रतिजागरः । इदं ग्रहमवेक्षस्व इत्यादिनियोगस्य इति रायमुकुटः ॥

प्रतिजिह्वा, स्त्री, (प्रतिरूपा जिह्वा ।) तालु-मूलस्थक्षुद्रजिह्वा । आलजिव इति भाषा । तत्पर्य्यायः । प्रतिजिह्विका २ माध्वी ३ रसनकाकुः ४ अलजिह्विका ५ । इति शब्दरत्नावली ॥

प्रतिजिह्विका, स्त्री, (प्रतिजिह्वा + स्वार्थे कन् । टापि अत इत्वम् ।) प्रतिजिह्वा । इति चिकाण्डशेषः ॥

प्रतिज्ञा, स्त्री, (प्रतिज्ञायते इति । प्रति+ज्ञा+"आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् । टाप् ।) कर्त्तव्यत्वप्रकारकज्ञानानुकूलव्यापारः । इत्यनुमितिगादाधरी ॥ साध्यनिर्देशः । इति गोतमसूत्रम् ॥ साध्याभिधायिका वाक् । इति व्यवहारतत्त्वम् ॥ तत्पर्य्यायः । आम् २ प्रतिज्ञानम् ३ अङ्गीकारः ४ प्रतिश्रवः ५ ॐ ६ समाधिः ७ संवित् ८ आगूः ९ आश्रवः १० संश्रवः ११ नियमः १२ अभ्युपगमः १३ वाढम् १४ आत्मा १५ । इति शब्दरत्नावली ॥ सन्धा १६ सङ्गरः १७ संश्रावः १८ उररीकारः १९ श्रवः २० । इति जटाधरः ॥ * ॥ (यथा, गो० रामायणे । २ । ११० । ४ ।
"पूर्व्वन्तु रामस्तमिहानुयुज्य
श्रुत्वा च वाक्यं भरतस्य तस्य ।
चिकीर्षमाणो रघुनन्दनस्तां
पितुः प्रतिज्ञां स बभूव तूष्णीम् ॥")

प्रतिज्ञारोधो न कर्त्तव्यः । यथा,—
"त्वयास्य देवाधिपते वाच्यं साम यतो फलम् ।
प्रतिज्ञा नावरोद्धव्या स्वल्पकेऽपि च वस्तुनि ॥"
इत्यग्निपुराणम् ॥

प्रतिज्ञातं, त्रि, (प्रतिज्ञायते स्मेति । प्रति+ज्ञा+क्तः ।) अङ्गीकृतम् । इत्यमरः । ३ । २ । १०८ ॥ (यथा, मनुः । ८ । १३६ ।
"ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति ।
अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम् ॥")

प्रतिज्ञानं, क्ली, (प्रति+ज्ञा+ल्युट् ।) प्रतिज्ञा । इत्यमरः । १ । ५ । ५ ॥

प्रतिज्ञेयः, पुं, (प्रतिजानात्यनेनेति । प्रति+ज्ञा+यत् ।) स्तुतिपाठकः । इति भूरिप्रयोगः ॥ (प्रतिज्ञातुं शक्यः ।) प्रतिज्ञानयोग्ये, त्रि ॥

प्रतितालः, पुं, (प्रतिगतस्तालम् ।) तालविशेषः । यथा, सङ्गीतदामोदरे ।
"कान्तारः समराख्यश्च वैकुण्ठो वाञ्छितस्तथा ।
कथिताः शङ्करेणैव चत्वारः प्रतितालकाः ॥
कान्तारो यथा,—
कान्तारः प्रतितालस्तु चन्द्रक्रीडे द्रुतद्वयम् ।
दशाक्षरपदैर्नाथं शङ्कारे वर्त्तते रसे ॥ १ ॥
समराख्यो यथा,—
लघुद्रुतौ लघुश्चान्ते नृपताल उदाहृतः ।
रुद्रसंख्याक्षरपदः समरे वीरके रसे ॥ २ ॥
वैकुण्ठो यथा,—
रुद्रत्रयस्तु वैकुण्ठे प्रतितालेन संमीरितः ।
अर्कसंख्याक्षरैः पादो हास्ये त्रिपुटतालके ॥ ३ ॥
वाञ्छितो यथा,—
वाञ्छितसृतीये तालेलघुरेको द्रुतस्तथा ।
त्रयोदशाक्षरैर्युक्तो रसेऽद्भुते प्रकीर्त्तितः ॥" ४ ॥

प्रतितालो, स्त्री, (प्रतिगता तालमिति । गौरादित्वात् ङीष् ।) तालकोद्घाटनयन्त्रम् । इति हेमचन्द्रः ॥ चाबि इति भाषा ॥

प्रतिदानं, क्ली, (प्रतिदत्त्व दानं प्रतिरूपं दानं वा ।) विनिमयः । न्यस्तापैणम् । इत्यमरः । २ । ९ । ८१ ॥

प्रतिदार्य्यं, क्ली, (प्रतिदार्य्यतेऽस्मिन्निति । प्रति+दृ+णिच्+आधारे ण्यट् ।) गृहम् । इति शब्दमाला ॥

प्रतिदिनं, क्ली, दिनं दिनं प्रति । प्रत्यहम् । यथा,
"ततः प्रतिदिनं वेला वर्द्धते चियलात्मिका ॥"
इति सतुकुत्यसुक्तावली ॥

प्रतिदिवा, [न्] पुं, (प्रतिदीव्यतीति । प्रति+दिव+"कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः ।" उणा० १ । १५६ । इति कनिन् ।) सूर्य्यः । इति चिकाण्डशेषः ॥ प्रतिदिनञ्च ॥

प्रतिदीवा, [न्] पुं, (प्रतिदिवन् । पृषोदरादित्वात् साधुः ।) सूर्य्यः । इति शब्दरत्नावली ॥

प्रतिदेयं, त्रि, (प्रति+दा+यत् ।) क्रीतद्रव्यस्य दुष्क्रीतत्वहेतुना परावृत्य दानम् । यथा,—
"क्रीत्वा भ्रमेण यः पण्यं दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयन्तत्तस्मिन्नेवाह्नि विद्यतम् ॥"
इति मिताक्षरा ॥

प्रतिध्वनिः, पुं, (प्रतिरूपो ध्वनिरिति ।) प्रतिनादः । गुमुरन् इति भाषा ॥ तत्पर्य्यायः । प्रतिशब्दः २ प्रतिश्रुत् ३ प्रतिध्वानम् ४ । इति शब्दरत्नावली ॥ (यथा, नैषधे । १६ । १० ।
"वदनकुहरेष्वध्रिवृत्त्यामर्थं तदुदश्रति
श्रुतिपदमयस्तेषामेव प्रतिध्वनिरध्वनि ॥")

प्रतिध्वानं, क्ली, (प्रतिध्वननमिति । प्रति+ध्वन+घञ् ।) प्रतिध्वनिः । इत्यमरः । १ । ६ । २५ ॥

प्रतिनप्ता, [तृ] पुं, (प्रतिरूपो नप्ता नप्तुः सदृश इत्यर्थः ।) प्रपौत्रः । इति हेमचन्द्रः ॥

प्रतिनवं, त्रि, (प्रतिगतं नवं नवतामिति ।) नूतनम् । इति जटाधरः ॥ (यथा, मेघदूते । ३८ ।
"पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजवापुष्परक्तं दधानः ॥")

प्रतिनिधिः, पुं, (प्रतिनिधीयते सदृश्यीक्रियते इति । प्रति+नि+धा+"उपसर्गे धोः किः ।" ३ । ३ । ९२ । इति किः ।) प्रतिमा । इत्यमरः । २ । १० । ३६ ॥ सदृशः । (यथा, रघौ । १ । ८१ ।
"सुतां तदीयां सुरभेः क्षमा प्रतिनिधिं शुचिः ।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥")
तस्य विवेचनं यथा । "अत्यन्तासामर्थ्येषु स्कन्दपुराणम् ।
'पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा ।
एषामभाव एवान्यं ब्राह्मणं विनियोजयेत् ॥'
गरुडपुराणे ।
'भार्य्या भर्त्तृव्रतं कुर्य्यात् भार्य्यायाश्च पतिस्तथा ।
असामर्थ्ये तयोस्ताभ्यां व्रतभङ्गो न जायते ॥'
वराहपुराणे ।
'पितृमातृपतिभ्रातृश्वश्रूश्वशुरादिभूसुजाम् ।
अदत्तार्थसुपोषित्वा स्वयञ्च फलभाग्भवेत् ॥'
अत्रैव विषये कात्यायनः ।
'दक्षिणा नात्र कर्त्तव्या शुश्रूषा विहिता च या ।'
ननु प्रतिनिधौ समेऽपि शूद्रभोज्यन्नमन्नस्यफलं कुत्रान्वेति चेत् प्रधान एव । तथा च शारीरिकभाष्ये श्रुतिः । 'यां वै काण्वनयज्ञऋत्विज आशिषमाशासते यजमानायैव तामाशासते इति होवाच इति ।' ब्राह्मणसर्व्वस्वे तु यजमानायेत्यादौ यजमानस्यैव सेति पाठे विशेषः । तथा च सरलायां सूत्रम् । 'यां वै काण्वनयज्ञऋत्विगाशिषमाशास्ते सा यजमानस्यैवेति ।' ऋत्विग्यजमानपदे प्रतिनिधिप्रधानपरे आकाङ्क्षितत्वादिति । अतएव प्रतिनिधिपुत्रादिनाप्यायान्तु नः पितर इत्यादिवदनूह एव प्रकृते वाक्यस्य काण्वनिकत्वात्तच्च न तथेति ॥ * ॥ अत्र प्रतिनिधिप्रसङ्गेन स्मृत्यनुसारात् किञ्चिल्लिख्यते । कालमाधवीये ।
'काम्ये प्रतिनिधिर्नास्ति नित्यनैमित्तिके हि सः ।
काम्येषूपक्रमादूर्द्धमन्ये प्रतिनिधिं विदुः ॥'
अस्यार्थस्तु माधवाचार्य्येणाभिहितः । यथा नित्यनैमित्तिकं प्रतिनिधिनाप्युपक्रम्य कारयेत् । काम्यन्तु स्वसामर्थ्यं परीक्ष्य स्वयमेव उपक्रम्य कुर्य्यात् । असामर्थ्ये तु उपक्रमादूर्द्धं प्रतिनिधिनापि तत्कारयेत् । एतच्च काम्यं औतपरम् । काम्यस्मार्त्तन्तु अन्यद्वारापि उपक्रम्य कुर्य्यात् । तथा च पराशरभाष्ये श्रातातपः ।

'श्रौतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत्।
अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः॥'
अन्ततः उपक्रमात् परतः। अन्यथा नित्य-नैमित्तिकमात्रपरत्वे श्रौतस्मार्त्तभेदेनोपादानं व्यर्थं स्यात्तयोरविशेषादेव प्रतिनिधिलाभात्। अतएव भारतपाठादौ तथा समाचारः॥ * ॥
स्मृत्यर्थसारे।
'नाभावस्य प्रतिनिधिरभावान्तरमिष्यते।'
सजातीयमप्यभावान्तरमभावस्य प्रतिनिधि-र्नेष्यते। भावस्तु कदाचित्। यथोपवासादौ-ब्राह्मणभोजनादि।
'नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्।
श्रोत्रियायामभोज्यञ्च यद्दत्तं तदशेषतः।
ग्राह्यं प्रतिनिधित्वेन होमकार्य्ये न कुत्रचित्॥
द्रव्यं वैकल्पिकं किञ्चिद्यत्र सङ्कल्पितं भवेत्।
तदलाभे सदृग्ग्राह्यं न तु वैकल्पिकान्तरम्॥
उपात्ते तु प्रतिनिधौ सुख्यार्थो लभ्यते यदि।
तत्र सुख्यमनादृत्य गौणेनैव समापयेत्॥
संस्काराणामयोग्योऽपि सुख्य एव हि गृह्यते।
न तु संस्कारयोग्योऽन्यो गृह्यते प्रतिरूपकः॥
सुख्ये कार्य्यासमर्थे तु लक्षेऽप्येतस्य नादरः।
प्रतिरूपमुपादाय गृह्यमेवोपयुज्यते॥
काष्ठे रूपेऽथवा पर्णे चीरे पुष्पे फलेऽथवा।
गन्धे रसे सदृग्ग्राह्यं सर्व्वालाभे परं परम्॥
ग्राम्याणान्तु भवेद्ग्राम्यमारण्यानामरण्यजम्।
वस्त्राभावे तु गोधूमास्तथा येऽन्ययवादयः॥
हविष्ये गोदुग्धं ग्राह्यं तदलाभे तु माहिषम्।
आज्यं वा तदलाभे तु साक्षात्तैलं प्रयुज्यते॥
तैलाभावे यदीतरं तैलजं तिलसम्भवम्॥'
तैलजं तिलसम्भवं तैलभृत्तिलपिष्टम्।
'तदभावे तु सक्तेदं कौसुम्भं सर्षपोद्भवम्॥
दुग्धक्षेपोऽथ वा ग्राह्यः पूर्व्वाभावे परः परः।
तदभावे गवादीनां क्रमात् क्षीरं विधीयते॥
तदलाभे दधि ग्राह्यमलाभे तिल इष्यते।
यत्र सुख्यं दधि क्षीरं तत्रापि तदलाभतः॥
अजादेः क्षीरदध्यादि तदलाभे तु गोदुग्धम्।
सुख्यासन्नोऽथवा ग्राह्यः कार्य्यकारणसन्ततौ॥
अतएव घृताभावे पूर्व्वं दधि ततः पयः॥'
तथा।
'सर्व्वत्र गौणकालेषु कर्म्मणोदितमाचरेत्।
प्रायश्चित्तं वाहृतिभिर्हुत्वा कर्म्म समाचरेत्॥'
मात्स्ये।
'घृतं न लभ्यते यत्र शुष्कक्षीरेण होमयेत्।
क्षीरस्य च दधि ज्ञेयं मधुनश्च गुडो भवेत्॥'
आयुर्व्वेदेऽपि।
'मधु यत्र न विद्येत तत्र जीर्णगुडो भवेत्॥'
पैठीनसिः। 'काष्ठमूलपर्णपुष्पफलप्ररोहरस-गन्धादीनां सादृश्येन प्रतिनिधिं कुर्य्यात्। सर्व्वा-लाभे यवः प्रतिनिधिर्भवति।' काष्ठं नालं प्ररोहोऽङ्कुरः। 'सर्व्वालाभे यव' इति कण्वतरः॥ अवयव इति नारायणोपाध्यायः। भ्रान्ति-दीपिकायां नारदीयपक्षराचम्।

'अभावे चैव धातूनां हरितालं प्रशस्यते।
बीजानामप्यलाभे तु यव एको विधीयते॥
ओषधीनामलाभे तु सहदेवा प्रशस्यते।
रत्नानामप्यलाभे तु सुक्ताफलमनुत्तमम्॥
लौहानामप्यलाभे तु हेमपात्रं प्रकल्पयेत्।'
लौहानां तैजसमात्राणाम्। न्यायप्राप्तप्रति-निधिमधिकृत्य जैमिनिः।
'न देवताभिशब्दक्रियाभाभिति।' अस्यार्थः। देवताया अग्नेश्च आहवनीयादेः शब्दस्य मन्त्रस्य क्रियायाः प्रजाद्यदृष्टार्थकर्म्मणश्चादृष्ट-मात्रार्थकत्वेन आरादुपकारकत्वान्न प्रति-निधिः। व्रीह्यादीनान्तु सन्निपत्योपकारकाणां पुरोडाशसाधनं दृष्टमेव प्रयोजनमिति तत्र प्रतिनिधिरुचित इत्युक्तम्।" इत्येकादशी-तत्त्वम्॥ * ॥ "आरब्धकार्त्तिकादिस्नाने तु व्याध्यादिनासामर्थ्ये पुत्रादिभिः प्रतिनिधिना कारयितव्यं नानुकल्पविधिना नित्यस्नान एव तद्विधानादिति।" इति मलमासतत्त्वम्॥ * ॥
स्वयंकरणासामर्थ्ये अन्यद्वारा। यथा,—"दक्षः।
'स्वयं होमे फलं यच्च तदन्येन न जायते।
ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्-पतिः।
एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि॥'
विट्पतिर्ज्ञातिमाता। एवञ्च ऋत्विगादीतरत्र फलन्यूनता॥ * ॥ अत्राग्नौकाशङ्कया बोधन-दिनात् पूर्व्वं शुचितत्कालजीवित्वरूपाधिकारा-भावेऽपि यद्दरणादिकं क्रियते तत् कर्म्मकाले तस्य नारदोक्तस्वयं प्रवर्त्तनवत् प्रवर्त्तनाय न तु तदानीं प्रतिनिधीयते। अथवा।
'निःचिप्याग्निं स्वदारेषु परिकल्पार्त्विजन्यथा।
प्रवसेत् कार्य्यवान् विप्रो दृष्टेव न चिरं वसेत्॥'
इति छन्दोगपरिशिष्टवदत्रापि प्रतिनिधी-यते। एवं वरणं विनापि क्वचिदुदि ऋत्विक् प्रवर्त्तते तथापि तत्कर्म्मसिद्धिः। इच्छया च तत्रैव शुचिकाले दास्यतेति। तथा च नारदः।
'ऋत्विक् च त्रिविधो दृष्टः पूर्व्वैर्जुष्टः स्वयंकृतः।
यदृच्छया वा यः कुर्य्यादार्त्विज्यं प्रीतिपूर्व्वकम्॥'
यदृच्छया स्वेच्छया।" इति तिथ्यादितत्त्वम्॥
प्रतिपः, पुं, (प्रतिपाति पालयतीति। प्रति+पा+कः।) ज्ञानतुराजपिता। इति शब्द-रत्नावली॥
प्रतिपक्षः, पुं, (प्रतिकूलः पक्ष इति प्रादि-समासः।) शत्रुः। इति हेमचन्द्रः। ३।३६२।
(यथा, रुक्मकटिके १० अङ्के।
"अन्योन्यं प्रतिपक्षसंहतिमिमां लोकस्थितिं बोधय-न्नेष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः॥")
सादृश्यम्। यथा,—
"प्रतिवस्तुप्रतिनिधिप्रतिपक्षविडम्बकाः।"
इति काव्यचन्द्रिका॥
प्रतिवादी च॥

प्रतिपत्, [द्] स्त्री, (प्रतिपद्यते उपक्रम्यते-ऽनयेति। प्रति+पद्+करणे क्विप्।) प्रगड-वाद्यम्। इति त्रिकाण्डशेषः॥ बुद्धिः। तिथि-विशेषः। तत्पर्य्यायः। पक्षतिः २। इत्यमरः। १।४।१॥ सा च चन्द्रस्य प्रथमकलाक्रियारूपा। वृद्धिरूपा चेत् शुक्ला १ एकाङ्कबोधिता। ह्रास-रूपा चेत् कृष्णा १० सप्तदशाङ्कबोधिता॥ * ॥
तस्या अवस्था यथा। "सा च कृष्णा द्वितीया-युक्ता ग्राह्या प्रतिपत् सहितीया स्यादित्यापस्तम्बीयात्। शुक्ला अमावास्यायुता ग्राह्या। प्रतिपदाप्यमावास्येति वचनात्। त्रिमुहूर्त्तव्यापि-नीति तु सर्व्वत्र न युज्यादरः। तथा च पराश-रः।
'त्रिमुहूर्त्तव्यापिनी या तु सैव पूज्या सदा तिथिः।
न तत्र युग्मादरणमन्यत्र हरिवासरात्।'*॥
कृष्णापि उपवासे द्वितीयायुता न ग्राह्या। तथा च हेमाद्रिधृतः।
'द्वितीया पञ्चमी वेधाद्ग्राह्या च त्रयोदशी।
चतुर्दशी चोपवासे हन्युः पूर्व्वोत्तरे तिथी॥'
द्वितीया वेधात् योगात् प्रतिपत्तृतीये हन्तीत्यर्थः। एवमन्यत्र। अत्रोपवासपरेण विशेषविधानात् आपस्तम्बीयसामान्यवचनस्य सङ्कोचः॥ * ॥
कार्त्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रति भग-वद्वाक्यम्।
'वीर! प्रतिपदा नाम तव भावी महोत्सवः।
अत्र त्वां नरशार्दूल! हृष्टाः पुष्टाः सलङ्कृताः।
पुष्यदीपप्रदानेन पूजयिष्यन्ति मानवाः॥'
तत्र मन्त्रः।
'बलिराज! नमस्तुभ्यं विरोचनसुत प्रभो।
भविष्येन्द्र सुरारीते पूजेयं प्रतिगृह्यताम्॥'
प्रतिपदा प्रतिपत्तिथ्या। अत्र प्रतिपदि। ब्रह्म-पुराणे तु बलिराजेतिमन्त्रस्य पूर्व्वमृ।
'मन्त्रेणानेन राजेन्द्र! समक्षं सपुरोहितः।'
इत्यर्द्धम्॥
पद्मादपि।
'एवं पूजां नृपः कृत्वा रात्रौ जागरणं ततः।'
इत्युक्तमिति॥
पुनर्ब्रह्मपुराणे।
'शुक्रश्च पुरा द्यूतं ससर्ज्ज सुमनोहरम्।
कार्त्तिके शुक्लपक्षे च प्रथमेऽहनि भूपते!॥
जितश्च शुक्रस्तत्र जयं लेभे च पार्व्वती।
अतोऽर्थाच्छङ्करो दुःखी नित्यं गौरी सुखोचिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः॥
पराजयो विरुद्धश्च लक्ष्मणाशकरो भवेत्।'
द्यूतस्याप्राप्तिभिः क्रीड़नम्। यथा मनुः।
'अप्राप्तिभियत् क्रियते तल्लोके द्यूतमुच्यते।'*॥
तत्तिथिमधिकृत्य भविष्योत्तरे।
'यो यो यादृग्भावेन तिष्ठत्यस्यां युधिष्ठिर!।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि॥'
तथा।
'महापुण्या तिथिरियं बलिराज्यप्रवर्द्धिनी।

स्नानं दानं व्रतगुणं कार्त्तिकेऽस्यां तिथौ भवेत्॥'
प्रतिपद्रोहिणीयोगो यथा। भविष्ये।
'रोहिण्या प्रतिपद्युक्ता मार्गे मासि सितेतरा।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशते: समा॥' *॥
तस्या: संज्ञा नन्दा। तत्राभ्यङ्गनिषेधो यथा,—
'नन्दासु नाभ्यङ्गसुपाचरेच्च
क्षौरञ्च रिक्तासु जयासु मांसम्।
पूर्णासु योषित् परिवर्জ্জनीया
भद्रासु सर्व्वाणि समाचरेच्च॥' * ॥
नन्दादिक्रममाह ज्योतिषे।
'नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपद: क्रमात्॥'
प्रतिपदादिपञ्चदशतिथिषु पञ्चदशद्रव्यभक्षण-
निषेधमाह स्मृति:।
'कूष्माण्डे चार्थहानि: स्यात् दृहत्यां न स्मरे-
द्धरिम्।
बृहत्यां पटोले स्यादनर्थहानिश्च मूलके।
कलम्बी चायते विप्रे तिर्य्यग्योनिञ्च निम्बके।
तालं शरीरनाश: स्यान्नारिकेले च मूर्खता॥
तुम्बी गोमांसतुल्या स्यात् कलम्बी गोवधात्मिका।
ग्रिम्बी पापकरी प्रोक्ता पूतिका ब्रह्मघातिका॥
वार्त्ताकौ सुतहानि: स्यात्क्षिरोगी च माषके।
महापापकरं मांसं प्रतिपदादिषु वर्জ্জयेत्॥' *॥
तत्र क्षौरनिषेधो यथा। क्षौरं विशाखाप्रति-
पत्सु वर्জ্জ्यम्।" इति तिथ्यादितत्त्वम्॥ * ॥
तत्र जातफलम्।
"मणिकनकविभूषासंयुतस्वारुकान्ति-
र्निजकुलकमलोद्दाटमार्त्तण्डबिम्ब:।
प्रतिपदि शुक्लिपूर्णो लब्धजन्मा प्रतापी
भवति विमलवेद्यग्रस्वारुकेश: प्रवेश:॥"
इति कोष्ठीप्रदीप:॥ * ॥
सा अमैर्व्वस्तिथि:। यथा,—
महातपा उवाच।
"विष्णोर्विभूतिमाहात्म्यं कथितं ते प्रसङ्गत:।
तिथीनां शृणु महात्म्यं कथ्यमानं मया नृप!॥
इत्यभूतो महानग्निर्ब्रह्मक्रोधोद्भवो महान्।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो!।
यस्यामहं समस्तस्य जगत: ख्यातिमाप्नुयाम्॥
ब्रह्मोवाच।
देवानामथ यज्ञानां गन्धर्व्वाणाञ्च सत्तम!।
आदौ प्रतिपदा येन त्वमुत्पन्नोऽसि पावक!॥
त्वत्तस्तु प्रातिपदिकं संभविष्यन्ति देवता:।
अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति॥
तस्यां तिथौ हविर्य्येण प्राजापत्येन मन्त्रिणा।
होष्यन्ति तेषां प्रीता: स्यु: पितर: सर्व्वदेवता:॥
चतुर्विधानि भूतानि मनुष्या: पशवोऽसुरा:।
देवा: सर्व्वे सगन्धर्व्वा: प्रीता: स्युस्तर्पिते त्वयि॥
यश्चोपवासं कुर्व्वीत त्वद्भक्त: प्रतिपद्दिने।
तस्याग्नयो वा वर्त्तन्त शृण्वतस्तस्य फलं महत्॥
चतुर्युगानि षट्त्रिंशत्त्वल्लोकेशो महीयते।
तेजस्वी रूपसम्पन्नो द्रव्यवान् जायते नर:॥
इह जन्मन्यसौ राजा स्वर्गलोके महीयते।
दूतीभूय स्थितोऽप्यग्निर्ब्रह्मदत्ताश्रयं ययौ॥
य इदं शृण्वुयान्नित्यं प्रातरुत्थाय मानव:।
अग्नेर्जन्म स पापेभ्यो मुच्यते नात्र संशय:॥"
इति वराहपुराणे महातपोपाख्याने अग्न्युत्-
पत्तिनामाध्याय:॥ * ॥ प्रतिपदि चन्द्रदर्शन-
कारणम्। यथा, ज्योतिषि।
"अमावस्याघटीशोधा षष्ट्याहर्मानसंयुता।
सूर्य्यराहुघटीभ्यस्त्वेधिका दृश्यते शशी॥"
प्रतिपत्ति:, स्त्री, (प्रतिपदनमिति। प्रति+पद्+
क्तिन्।) प्रवृत्ति:। (यथा, कुमारे। ५। ४२।
"मनस्विनीनां प्रतिपत्तिरीदृशी॥")
प्रागल्भ्यम्। गौरवम्। (यथा, युक्तिकल्पतरौ
चारलक्षणे।
"सुभक्तो राजसु तथा कार्य्याणां प्रतिपत्तिमान्॥")
संप्राप्ति:। (यथा, रघु:। १। १।
"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगत: पितरौ वन्दे पार्व्वतीपरमेश्वरौ॥")
प्रबोध:। (यथा, भागवते। ३। ६। १४।
"चक्षुर्यागेन रूपाणां प्रतिपत्तिर्यतो भवेत्॥")
पदप्राप्ति:। इति मेदिनी। ते, २०६॥ मीमां-
सकमते फलशून्यकर्म्माङ्गम्। यथा। देव-
तोद्देशेन यागादौ त्यक्तहविरादेरग्नौ नि:क्षेप:।
पूजितप्रतिमादेर्जले विसर्জনमित्यादि। आहादौ
सर्व्वशेषाङ्गकर्म्म यथा। प्रतिपत्तिरूपकर्म्माङ्ग
एव प्रतिपाद्याभावे तन्निवृत्ति:। इति तिथ्यादि-
तत्त्वम्॥ * ॥ निर्व्वाहिताङ्गकद्रव्यकरणकाङ्गत्वं
प्रतिपत्तिरूपकर्म्माङ्गत्वम्। प्रतिपत्तिकर्म्म
उत्तरा क्रिया। यत्र एकेन द्रव्येण कर्म्म-
द्वयं निर्व्वाह्यते तत्र उत्तरं कर्म्म प्रतिपत्तिकर्म्म।
तन्निर्व्वाहकत्वं प्रतिपाद्यम्। इति तट्टीकायां
काशीरामवाचस्पति:॥ *॥ अथ प्रतिपत्त्यधि-
करणम्। अङ्गान्निरस्यति लोहितं निर-
स्यति गुदमोषयजति सर्व्वं जुहोति। इत्य-
ग्नीषोमीयपशौ श्रूयते। अङ्गान्निरस्यतीति द्रव्या-
न्तार्थम्। यथा पशोरुदरवर्त्तिमङ्गं त्यजति
तथा लोहितमपि त्यजति। अन्यत्र पशो:
शृतीर्षमांसोपक्रमेण होम:। अत्र तु गुदमांसोप-
क्रमेणेति। तत्र च यज्ञशेषं ऋत्विग्भ्यो ददातीत्य
परिभाषया मांसस्योत्तरा प्रतिपत्ति: प्राप्ता।
अत्र सर्व्वहवनेन प्रतिपत्त्यभावात् कर्म्मवैगुण्यं
स्यादिति। अत्र सिद्धान्त:। यदिकारादुपपत्ति
रिति। यदि प्रतिपाद्यं स्यात् तदा प्रतिपत्ति-
रङ्गमित्यर्थ:। इति रामकृष्णीयाधिकरण-
कौमुदी॥ * ॥ अपि च।
"उपांशुयाजद्रव्येण शेषकार्य्ये भवेन्न वा।
भवेद्विभ्य: सर्व्वेभ्य इत्युक्ता प्राप्तितस्तत:॥
उक्ताव्यद्रव्यशेषस्तु भाषुपस्कारणादिकृत्।
अतो न प्रतिपत्तार्ह: शेषकार्य्ये तत: कथम्॥"
इति माधवीयाधिकरणमालायाम् ५ पादे प्रथ-
माधिकरणम्॥
प्रतिपत्तिपटह:, पुं, (प्रतिपत्तये पटह:।) वाद्य-
विशेष:। नागरा इति भाषा। तत्पर्य्याय:।
सम्यापटह: २। इति हारावली॥
प्रतिपत्तूर्य्यं, क्ली, (प्रतिपदे संविदे तूर्य्यम्।)
दुगड़वाद्यम्। इति चिकाण्डशेष:॥
प्रतिपत्फला, स्त्री, (प्रतिपदं फलमस्या:।) क्षुप-
कारवेल्ली। इति राजनिर्घण्ट:॥
प्रतिपन्नं, त्रि, (प्रतिपद्यते स्मेति। प्रति+पद्+
क्त:।) अवगतम्। इत्यमर:। ३। २। १०८॥
(यथा, कुमारे। ४। ३३।
"प्रमदा: पतिवर्त्मगा इति
प्रतिपन्नं हि विशेषनैरपि॥")
अङ्गीकृतम्। इति मेदिनी। ने, १८४॥
विक्रान्त:। इति हेमचन्द्र:॥
प्रतिपर्णशिफा, स्त्री, (प्रतिपर्णं शिफा जटा
अस्या:।) द्रवन्ती। इति राजनिर्घण्ट:॥
प्रतिपादक:, त्रि, (प्रतिपादयतीति। प्रति+पद्+
णिच्+ण्वुल्।) प्रतिपत्तिजनक:। बोधक:।
(यथा, सर्व्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शने। "ननु
सजातीयविजातीयस्वगतनानात्वशून्यं ब्रह्मतत्त्व-
मिति प्रतिपादकेषु वेदान्तेषु जागरूकेषु कथ-
मशेषगुणशून्यत्वमिति॥") यथा च। प्रतिपाद्यप्रति-
पादकभावश्च सम्बन्ध:। इति दिनकरी॥
प्रतिपादनं, क्ली, (प्रति+पद्+णिच्+भावे
ल्युट्।) दानम्। प्रतिपत्ति:। बोधनम्। इति
मेदिनी। ने, २३६॥ (निष्पादनम्। यथा,
महाभारते। १२। १४१। १४।
"त्रेता विमोक्षसमये द्वापरप्रतिपादने॥")
प्रतिपालक:, त्रि, (प्रति+पा+णिच्+ण्वुल्।)
पालनकर्त्ता। प्रतिपालयतीति प्रतिपूर्व्व-
पाल्यन्तपाधातोर्ण्वुलन्तप्रत्ययनिष्पन्न:॥
प्रतिपालनं, क्ली, (प्रति+पा+णिच्+भावे ल्युट्।)
रक्षणम्। पोषणम्। यथा। "कृत्वा प्रकृतस्य
कर्णस्य राधाप्रतिपालनात् राधेयत्वं सङ्कथ्यते।"
इति दुर्गादास:॥
प्रतिपाल्यं, त्रि, (प्रति+पा+णिच्+कर्म्मणि
यत्।) प्रतिपालनीयम्। प्रतिपालितव्यम्।
प्रतिपूर्व्वपाल्यन्तपालरक्षणे इत्यस्मात् कर्म्मणि
यप्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते।
१३। ७५। २।
"या पुत्रकस्य ऋद्धस्य प्रतिपाल्या तदा भवेत्,
अथचेन्नाहरेत् मुख्यं क्रीता शुल्कप्रदस्य सा॥")
प्रतिप्रसव:, पुं, (प्रति प्रतिषिद्धं प्रसूते इति,
प्रति+प्र+सू+अप्।) निषिद्धस्य पुनर्विधा-
नम्। यथा, प्रायश्चित्ततत्त्वे।
"रविशुक्रदिने चैव द्वादश्यां श्राद्धवासरे।
इत्यादिना निषिद्धस्य तिलतर्पणस्य तीर्थेतरत्र
प्रतिप्रसवमाह स्मृति:।
अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च॥"
प्रतिप्रसूत:, त्रि, (प्रतिप्रसूते स्मेति। प्रति+प्र+
सू+क्त:।) प्रतिप्रसवविशिष्ट:। इति मल-
मासतत्त्वम्॥ पुन:सम्भावित:। यथा,—
"उक्तानि प्रतिसिद्धानि पुन:सम्भावितानि च।
सापेक्षनिरपेक्षाणि मीमांस्यानीह कोविदै:॥"
इति सत्यव्रतसुक्तावली॥

प्रतिफलं, क्ली, (प्रतिफलतीति । प्रति+फल्+अच् ।) प्रतिविम्बम् । यथा,—
"प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्त्रा वासमाशङ्कमाना ॥"
इति रसमञ्जरी ॥
तुल्यफलम् । फलं फलच ॥

प्रतिफलनं, क्ली, (प्रति+फल्+ल्युट् ।) प्रतिविम्बम् । यथा,—
"न बिम्बं त्वद्विम्बप्रतिफलनलाभादलघिमं
तुलामध्यारोढुं कथमपि न लज्जेत कलया ॥"
इत्यानन्दलहरी । ६२ ॥

प्रतिफलितं, त्रि, (प्रति+फल्+क्त ।) प्रतिबिम्बितम् । यथा,—
"मोहातीतो विशुद्धो मुनिभिरभिहितो मोहसंक्रान्तमूर्त्तिः
साक्षी स्वान्ते तदुत्थे प्रतिफलितवपुः—— ॥"
इत्यादि मुक्तिवादगदाधरी ॥

प्रतिफुल्लकः, त्रि, (प्रतिफुल्लति विकसतीति । प्रति+फुल्ल+ण्वुल् ।) प्रफुल्लः । इति शब्दचन्द्रिका ॥

प्रतिबद्धः, त्रि, प्रतिबन्धविशिष्टः । प्रतिपूर्ब्बबन्धधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥

प्रतिबध्यः, त्रि, (प्रति+बन्ध+यत् ।) प्रतिबन्धनीयः । प्रतिबन्धार्हः । यथा । वस्तुतो हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वप्रकारितान्यज्ञानवृत्तिप्रकारितावच्छेद्यत्वमेव प्रतिबध्यत्वं निवेश्यमिति व्याप्त्यनुगमजागदीशी ॥

प्रतिबन्धः, पुं, (प्रति+बन्ध+घञ् ।) कार्य्यप्रतिघातः । तत्पर्य्यायः । प्रतिरूभः २ । इत्यमरः । ३ । २ । २७ ॥ (यथा, रघौ । ८ । ८० ।
"स तपःप्रतिबन्धमन्युना
प्रसुखाविष्कृतचारुविभ्रमाम् ।
अमृतप्रभव मातुरीति तां
शमवेलाप्रलयोर्म्मिमा सुविं ॥")

प्रतिबन्धकः, पुं, (प्रतिबध्नातीति । प्रति+बन्ध+ण्वुल् ।) विटपः । इति शब्दचन्द्रिका ॥ प्रतिरोधके, त्रि ॥ (यथा, राजतरङ्गिण्याम् । ३ । १६६ ।
"त्यागिनो निष्फलस्यास्य को दोषोऽस्य महीपतेः ।
ममाप्युपर्य्यन्तु तन्नित्यं यच्छ्रेयःप्रतिबन्धकम् ॥")

प्रतिबन्धिः, पुं, (प्रतिबध्नात्यनेनेति । प्रति+बन्ध+इन् ।) अनिष्टान्तरप्रसञ्जकं वाक्यम् । प्रतिबन्धः । यथा । प्रतिबन्धेरनुत्तरत्वादाहेति विशेषव्याप्तिजागदीशी ॥

प्रतिबलः, त्रि, (प्रतिगतं बलमस्य ।) समर्थः । शूरः । इति त्रिकाण्डशेषः ॥ (प्रतिरूपं बलमस्य ।) तुल्यबलः ॥ (यथा, महाभारते । १ । १५४ । ८ ।
"नायं प्रतिबलो भीरु ! राक्षसापसदो मम ।
सोढुं युधि परिस्पन्दमथवा सर्व्वराक्षसाः ॥")

प्रतिभयं, त्रि, (प्रतिगतं भयं यत्र ।) भयङ्करम् । इत्यमरः । १ । ७ । २० ॥ (यथा, रामायणे । ६ । ६० । ३५ ।
"दिग्भ्यश्च प्रदिग्भ्यश्चैव तभूवुः शूरसङ्कुलाः ।
तमसा पिहितं सर्व्वमासीत् प्रतिभयं महत् ॥")

भये, क्ली । इति मेदिनी । ये, १२२ ॥

प्रतिभा, स्त्री, (प्रतिभाति शोभते इति । प्रति+भा+कः । टाप् ।) बुद्धिः । इति हेमचन्द्रः ॥ प्रत्युत्पन्नमतित्वम् । इति प्रतिभान्वितशब्दटीकायां भरतः ॥ नवनवोन्मेषशालिनी प्रज्ञा । यथाह, रुद्रः ।
"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ॥"
(यथा च, महाभारते । १२ । २५६ । १ ।
"सूक्ष्मं साधु समुद्दिष्टं नियतं ब्रह्मलक्षणम् ।
प्रतिभा त्वस्ति मे काचित् तां नूनमनुमानतः ॥")

प्रतिभायते इति । प्रति+भा+"आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् ।) दीप्तिश्च ॥

प्रतिभान्वितः, त्रि, (प्रतिभया अन्वितः ।) प्रगल्भः । प्रत्युत्पन्नमतियुक्तः । इत्यमरः । ३ । १ । २५ ॥

प्रतिभासुखः, त्रि, (प्रतिभान्वितं सुखमस्य ।) प्रगल्भः । इति हेमचन्द्रः । ३ । ७ ॥

प्रतिभावान्, [त्] त्रि, (प्रतिभा विद्यतेऽस्य । प्रतिभा+मतुप् । मस्य वः ।) प्रतिभान्वितः । प्रागल्भ्ययुक्तः । प्रतिभाशब्दादस्त्यर्थे वतुप्रत्ययेन निष्पन्नः ॥ (यथा, कथासरित्सागरे । ४ । ३२ ।
"आगच्छन्तीच सायन्तं कुमारसचिवो हठात् ।
अग्रहीदथ साध्येनमवोचत् प्रतिभावती ॥")

प्रतिभाहानिः, स्त्री, (प्रतिभाया हानिः ।) बुद्धिनाशः । इति शब्दमाला ॥

प्रतिभूः, पुं, (प्रतिरूपः प्रतिनिधिर्वा भवतीति । प्रति+भू+"भुवः संज्ञान्तरयोः ।" ३ । २ । १७६ । इति क्विप् । "धनिकाधमर्ण्ययोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः ।" इति सिद्धान्तकौमुदी ॥) लग्नकः । इत्यमरः । २ । १० । ४४ ॥ जामिन् इति पारस्यभाषा ॥ (यथा, प्रद्युम्नविजये । १ अङ्के ।
"यत्रैकः प्रतिभूः फलेषु कृतिनां यत्रेशु यत्रेश्वरो
विघ्नस्तोमतमःसमूहतपनः सोऽयं सदा
श्रीहरिः ॥")

तस्य कर्त्तव्यत्वं यथा,—
"सभापतेः कर्त्तव्यमाह कात्यायनः ।
'अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिनोः ।
स रक्षितो दिनस्यान्ते दद्याद्दृष्टव्याय वेतनम् ॥'
प्रतिभवति तत्कार्य्ये तद्वत्त्वमतीति प्रतिभूर्लक्षकः ।
वादयोग्यः विवादफलस्य साधितधनादिदानस्य दक्षदानस्य च क्षमः । वादिनः भाषावादिनः उत्तरवादिनश्च । तथा च याज्ञवल्क्यः ।
'उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्य्यनिर्णये ।
प्रतिभुवश्चभावे च राज्ञा संग्रहणं तयोः ॥'
राज्ञा संग्रहणं दण्डतुल्याधिकरणम् । निर्णयस्य कार्य्ये धनादिदाने राजदन्तादित्वात् कार्य्यशब्दस्य पूर्ब्बनिपातः । भृत्यस्तद्रक्षको राजनियुक्तः ।" इति व्यवहारतत्त्वम् ॥

प्रतिमः, त्रि, (प्रतिमातीति । प्रति+मा+"आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।) उत्तरपदस्थे सदृशवाचकः । यथा —
"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः ॥"
इति हेमचन्द्रः ॥
(यथा, रामायणे । २ । ४० । १३ ।
"आयसं हृदयं नूनं राममातुरसंशयम् ।
यद्वेगमप्रतिमे वने यातिन भिद्यते ॥")

प्रतिमा, स्त्री, (प्रतिमीयते इति । प्रति+मा+अङ् । टाप् ।) अणुकृतिः । गजदन्तस्य वन्यः । इति मेदिनी । मे, ४८ ॥ (प्रतिबिम्बम् । यथा, रघुः । ७ । ६४ ।
"निमीलितानामिव पङ्कजानां
मध्ये स्फुरन्तं प्रतिमाशशाङ्कम् ॥"
तथा च कुमारे । ७ । ३६ ।
"आत्मानमासक्तगवोपनीते
खड्गे निषक्तप्रतिमं ददर्श ॥")

प्रतिमीयते अनयेति करणे अङ् ।) मूर्त्तिसदृशशब्दच्छिलादिनिर्म्मितप्रतिरूपकम् । तत्पर्य्यायः । प्रतिमानम् २ प्रतिबिम्बम् ३ प्रतियातना ४ प्रतिच्छाया ५ प्रतिकृतिः ६ अर्च्चा ७ प्रतिनिधिः ८ । इत्यमरः । २ । १० । ३६ ॥ प्रतिच्छन्दः ९ प्रतिकायः १० प्रतिरूपम् ११ । इति हेमचन्द्रः ॥* ॥ (यथा, महाभारते । १ । १७२ । २७ ।
"गिरिपृष्ठे तु सा तस्मिन् स्थिता खचितलोचना ।
विभ्राजमाना शुशुभे प्रतिमेव हिरण्मयी ॥")

देवप्रतिमाघटनप्रमाणादि यथा,—
"विष्णोस्तावत् प्रवक्ष्यामि यादृग्रूपं प्रशस्यते ।
शङ्खचक्रधरं शान्तं पद्महस्तं गदाधरम् ॥
छत्राकारं शिरस्तस्य कम्बुग्रीवं शुभेक्षणम् ।
तुङ्गनासं सुचिक्कणं प्रशान्तोरुभुजक्रमम् ॥
कटिदेशसमं विद्याच्चतुर्भुजमथापि वा ।
द्विभुजं वापि कर्त्तव्यं भवनेषु पुरोधसा ॥" * ॥
देवमष्टभुजस्यास्य यथास्थानं निबोध मे ।
खड्गो गदा शरः पद्मं देयं दक्षियतो हरेः ।
धनुश्च खेटकश्चैव शङ्खचक्रे च वामतः ॥ * ॥
चतुर्भुजस्य वक्ष्यामि यथैवायुधसंस्थितिः ।
दक्षियेन गदां पद्मं वासुदेवस्य कारयेत् ॥
वामतः शङ्खचक्रे च कर्त्तव्ये भूतिमिच्छता ।
कृष्णावतारे तु गदा वामहस्ते प्रशस्यते ॥
यथेच्छया शङ्खचक्रमुपरिष्टात् प्रकल्पयेत् ।
अधस्तात् पृथिवी तस्य कर्त्तव्या पादमध्यतः ।
दक्षियो प्रथमं तद्वत् गरुत्मन्तं निवेशयेत् ।
वामतस्तु भवेल्लक्ष्मीः पद्महस्ता सुशोभना ।
गरुत्मानथवा वापि संस्थाप्यो भूतिमिच्छता ॥
श्रीश्च पृथ्वि च कर्त्तव्ये पार्श्वयोः पद्मसंयुते ।
तोरणोपरिदेशे च विद्याधरसमन्वितम् ॥
देवदुन्दुभिसंयुक्तं गन्धर्व्वमिथुनान्वितम् ।
मन्त्रवल्लीसमोपेतं सिंहव्यालसमन्वितम् ।
तथा कल्पलतोपेतं सुवक्त्रिरमरेश्वरैः ।
एवंविधो भवेद्विष्णुस्त्रिभागेनास्य पीठिका ॥
नवतालप्रमाणास्तु देवदानवकिन्नराः ।
अतःपरं प्रवक्ष्यामि मानोन्मानं विशेषतः ॥*॥
कालान्तरप्रविष्टानां भानूनां यद्रजः स्फुटम् ।

त्रासरेणुः स विज्ञेयो बालाग्रस्तैरष्टभिः ॥
तदष्टकैन लिक्षा तु यूका लिक्षाष्टकैर्मता ।
यवो यूकाष्टकं तद्वदष्टभिस्तैस्तदङ्गुलम् ॥
स्वकीयाङ्गुलमानेन सुखं स्याद्दादशाङ्गुलम् ।
सुखमानेन कर्तव्या सर्व्वावयवकल्पना ॥ * ॥
सौवर्णी राजती वापि ताम्री रत्नमयी शुभा ।
शैलदारुमयी वापि लौहसीसमयी तथा ॥
रीतिका धातुयुक्ता वा ताम्रकांस्यमयी तथा ।
शुभदारुमयी वापि देवतार्चा प्रशस्यते ॥ * ॥
अङ्गुष्ठपर्व्वादारभ्य वितस्तिर्यावदेव तु ।
गृहेषु प्रतिमा कार्य्या नाधिका प्रशस्यते बुधैः ॥
आषोड़शात्तु प्रासादे कर्तव्या नाधिका ततः ।
मध्यमेन कनिष्ठा तु कार्य्या वित्तानुसारतः ॥
द्वारोच्छ्रायस्य यन्मानमष्टधा तन्तु कारयेत् ।
भागद्वयेन प्रतिमा त्रिभागीकृत्य तत् पुनः ॥
पीठिका भागतः कार्य्या नातिनीचा न चोच्छ्रिता ।
प्रतिमासुखमानेन नव भागान् प्रकल्पयेत् ॥
चतुरङ्गुला भवेद्ग्रीवा भागेन हृदयं पुनः ।
नाभिस्तस्मादधः कार्य्या भागेनैकेन शोभिता ॥
निम्नत्वे विस्तरत्वे च अङ्गुलं परिकीर्त्तितम् ॥
नाभेरधस्तथा मेढ्रं भागेनैकेन कल्पयेत् ।
त्रिभागमायतावरू जानुनी चतुरङ्गुले ॥
जङ्घे द्विभागे विख्याते पादौ तु चतुरङ्गुलौ ।
चतुर्दशाङ्गुलस्तदन्मौलिरस्य प्रकीर्त्तितः ॥
ऊर्द्धमानमिदं प्रोक्तं पृथुत्वञ्च निबोधत ।
सर्व्वावयवमानेषु विस्तरं शृणुत द्विजाः ॥ * ॥
चतुरङ्गुलं ललाटं स्याद्वृत्तं नासा तथैव च ।
द्विरङ्गुलं हनु ज्ञेयमोष्ठश्चाङ्गुलसम्मितः ॥
अष्टाङ्गुलं ललाटन्तु तावन्मात्रे भ्रुवौ मते ।
अर्द्धाङ्गुला भ्रुवोर्लेखा मध्ये धनुरिवानता ॥
उन्नताया भवेत् पार्श्वे श्लक्ष्णा तीक्ष्णा प्रशस्यते ।
अक्षिणी द्व्यङ्गुलायामे तदर्द्धेन विस्तरे ॥
उन्नतोदरमध्ये तु रक्तान्ते शुभलक्षणे ।
तारका च त्रिभागेन दृष्टिः स्यात् पञ्चभागिकी ॥
द्विरङ्गुलं भ्रुवोर्मध्यं नासामूलमथाङ्गुलम् ।
नासाग्रविस्तरं तद्वत् पुटद्वयमथानतम् ॥
नासापुटविलं तद्वदर्द्धाङ्गुलसुदाहृतम् ।
कपोले द्व्यङ्गुले तद्वत् कर्णमूलादिनिर्गते ॥
हन्वग्रमण्डलं तदद्विस्तारी द्व्यङ्गुलो भवेत् ।
अर्द्धाङ्गुला भ्रुवो राजी दण्डालसदृशी समा ॥
अर्द्धाङ्गुलः समस्तदुत्तरोष्ठस्तु विस्तरे ।
निष्पावसदृशं तद्वन्नासापुटदलम्भवेत् ॥
दृक्कणौ ज्योतिरुत्सेधे च कर्णमूलात् षड़ङ्गुले ।
कर्णौ तु भ्रूसमौ ज्ञेयावूर्द्धेन्तु चतुरङ्गुलौ ॥
द्व्यङ्गुलौ कर्णपाशौ तु माषामेकान्तु विस्तृतौ ।
कर्णयोरुपरिष्टाच्च मस्तकं द्वादशाङ्गुलम् ।
ललाटं पृष्ठतोऽर्द्धेन प्रोक्तमष्टादशाङ्गुलम् ।
षट्त्रिंशद्दङ्गुलश्चास्य परिणाहः शिरोगतः ॥
सकेशनिचयश्चास्य द्विचत्वारिंशदङ्गुलः ।
केशान्ताङ्गुके तद्दङ्गुलानि तु षोड़श ॥
ग्रीवामध्यपरीणाहश्चतुर्विंशतिरङ्गुलः ।
अष्टाङ्गुला भवेद्ग्रीवा पृथुत्वेन विशिष्यते ॥
स्तनग्रीवान्तरं प्रोक्तमेकतालं स्वयम्भुवा ।
स्तनयोरन्तरं तद्वद्दादशाङ्गुलमिष्यते ॥
स्तनयोर्मण्डलं तद्वद्द्व्यङ्गुलं परिकीर्त्तितम् ।
चूचुके मण्डलस्यान्तर्यवमात्रे उभे स्मृते ॥
द्वितालश्चापि विस्तारादुच्चःश्लक्ष्णसदाहृतम् ।
कक्षे षड़ङ्गुले प्रोक्ते बाहुमूलस्तनान्तरे ॥
चतुर्दशाङ्गुलौ पादावङ्गुष्ठस्तु त्रिरङ्गुलः ।
पञ्चाङ्गुलपरीणाहमङ्गुष्ठाग्रं तथोन्नतम् ॥
अङ्गुष्ठकसमा तद्वदायामे स्यात् प्रदेशिनी ।
तस्याः षोड़शभागेन हीयते मध्यमाङ्गुली ॥
अनामिकाष्टभागेन कनिष्ठा चापि हीयते ।
पञ्चत्रयेण चाङ्गुल्यो गुल्फौ द्व्यङ्गुष्ठकौ मतौ ॥
पार्ष्णिर्द्व्यङ्गुलमात्रा तु कलयोक्ता प्रकीर्त्तिता ।
द्विपर्व्वाङ्गुष्ठकः प्रोक्तः परीणाहश्च द्व्यङ्गुलः ॥
प्रदेशिनीपरीणाहस्त्र्यङ्गुलः ससुदाहृतः ।
अन्यासामष्टभागेन हीयते क्रमशो द्विजाः ॥
अङ्गुलेनोच्छ्रयः कार्य्यः अङ्गुष्ठस्य विशेषतः ।
तदर्द्धेन तु शेषाणामङ्गुलीनान्तथोच्छ्रयः ॥
जङ्घाग्रे परिणाहस्तु अङ्गुलानि चतुर्दश ।
जङ्घामध्ये परीणाहस्तथैवाष्टादशाङ्गुलः ॥
जानुमध्ये परीणाह एकविंशतिरङ्गुलः ।
जानूच्छ्रायोऽङ्गुलः प्रोक्तो मण्डलं त्र्यङ्गुलं पुनः ॥
ऊरुमध्ये परीणाहश्चाष्टाविंशतिकाङ्गुलः ।
एकत्रिंशोपरिष्टाच्च दृषणौ त्र्यङ्गुलौ पुनः ॥
त्र्यङ्गुलश्च तथा मेढ्रं परीणाहे षड़ङ्गुलम् ।
मणिबन्धोदयं विद्यात् कैशरेखां तथैव च ॥
मणिबन्धपरीणाहश्चतुरङ्गुल इष्यते ।
विस्तारेण भवेत्तद्वत् कटिरष्टादशाङ्गुला ।
द्वाविंशतिस्तथा श्रोणी स्तनौ च द्वादशाङ्गुलौ ॥
नाभिमध्ये परीणाहो द्विचत्वारिंशदङ्गुलः ।
पुरतः पञ्चपञ्चाशत् कक्षाश्चैव तु वेष्टनम् ॥
कक्षयोरुपरिष्टात्तु स्कन्धौ प्रोक्तौ षड़ङ्गुलौ ।
अष्टाङ्गुलाच्च विस्तारे ग्रीवाश्चैव तु निर्दिशेत् ॥
परीणाहे तथा ग्रीवां कला द्वादश निर्दिशेत् ।
आयामो भुजयोस्तद्वद्द्विचत्वारिंशदङ्गुलः ॥
कार्य्यस्तु बाहुशिखरः प्रमाणे षोड़शाङ्गुलम् ।
ऊर्द्धं यद्बाहुपर्व्वान्तं विद्यादष्टादशाङ्गुलम् ॥
तथैकाङ्गुलहीनन्तु द्वितीयं पर्व्वसुच्यते ।
बाहुमध्ये परीणाहो भवेदष्टादशाङ्गुलः ॥
षोड़शोक्तः प्रबाहुस्तु षट्कलोग्यकरो मतः ।
सप्ताङ्गुलं करतलं पञ्चमध्याङ्गुली मता ॥
अनामिका मध्यमायाः सप्तभागेन हीयते ।
तस्यास्तु पञ्चभागेन कनिष्ठा परिहीयते ॥
मध्यमायास्तु हीना वै पञ्चभागेन तर्ज्जनी ।
अङ्गुष्ठतर्ज्जनीमूलादधः प्रोक्तस्तु तत्समः ॥
अङ्गुष्ठपरिणाहस्तु विज्ञेयश्चतुरङ्गुलः ।
शेषाणामङ्गुलीनान्तु भागो भागेन हीयते ॥
मध्यमामध्यपर्व्वन्तु अङ्गुलद्वयमायतम् ।
यवो यवस्तु सर्व्वासां तस्यां तस्यां प्रहीयते ॥
अङ्गुष्ठपर्व्वमध्यन्तु तर्ज्जन्या सदृशं भवेत् ।
यवद्वयाधिकं तद्वदयपर्व्वसुदाहृतम् ॥
पर्व्वार्द्धेन नखान् विद्यादङ्गुलीषु समन्ततः ।
स्निग्धं श्लक्ष्णं प्रकुर्व्वीत ईषद्रक्तं तथायतम् ॥
निम्नपृष्ठं भवेन्मध्ये पार्श्वतः कलयोच्छ्रितम् ।
तथैव केशपर्य्यन्तः स्कन्धोपरि दशाङ्गुलः ॥
स्त्रियः कार्य्यास्तु तद्विज्ञैस्तनोरुजघनाधिकाः ।
चतुर्दशाङ्गुलायामसुदरं तासु निर्दिशेत् ॥
नानाभरणसम्पन्नाः किञ्चित्प्रच्छन्नभूषिताः ।
किञ्चिद्दीर्घं भवेद्वक्त्रमलकावलिरुत्तमा ॥
नासा ग्रीवा ललाटञ्च निर्दिष्टाश्चतुरङ्गुलाः ।
अर्द्धार्द्धाङ्गुलिविस्तारः श्रुतेरधरपल्लवः ॥
अधिकं नेत्रयुग्मन्तु चतुर्भागेन निर्दिशेत् ।
ग्रीवावलिश्च कर्त्तव्या किञ्चिदर्द्धाङ्गुलोच्छ्रया ॥
एवं नारीषु सर्व्वासु देवानां प्रतिमासु च ।
नवतालमिदं प्रोक्तं लक्षणं पापनाशनम् ॥ * ॥
अतः परं प्रवक्ष्यामि देवाकारान् विशेषतः ।
दशतालः स्मृतो रामो बलिर्वैरोचनिस्तथा ॥
वराहो नरसिंहश्च सप्ततालश्च वामनः ।
मत्स्यकूर्म्मौ तु निर्दिष्टौ यथाशोभं स्वयम्भुवा ॥
अतः परं प्रवक्ष्यामि रुद्राद्याकारमुत्तमम् ।
आपीनोरुभुजस्कन्धसप्तकाञ्चनसप्रभः ॥
शुक्लाकल्पसंघातचन्द्राङ्कितजटो विभुः ।
जटासुकुटधारी च दिरण्यवृषराजितः ॥
बाहुवाराग्रहस्ताभो वृत्तजङ्घोरुमण्डलः ।
ऊर्द्धकेशस्तु कर्त्तव्यो दीर्घायतविलोचनः ॥
व्याघ्रचर्म्मपरीधानः कटिसूत्रत्रयान्वितः ।
हारकेयूरसम्पन्नो भुजङ्गाभरणस्तथा ॥
बाहवश्चापि कर्त्तव्या नानाभरणभूषिताः ।
ग्रीवोरुगण्डफलकः कुण्डलाभ्यामलङ्कृतः ॥
आजानुलम्बबाहुश्च सौम्यमूर्त्तिः सुशोभनः ।
खेटकं वामहस्ते तु खड्गश्चैव तु दक्षिणे ॥
शक्तिं दण्डं त्रिशूलञ्च दक्षिणे तु निवेशयेत् ।
कपालं वामपार्श्वे तु नागं खट्वाङ्गमेव च ॥
एकश्च वरदो हस्तस्तथाचलयोऽपरः ।
वेशाख्यस्थानकं कृत्वा दृष्ट्याभिनयसंस्थितः ॥
वृत्ते दशभुजः कार्य्यो गजासुरवधे तथा ।
तथा त्रिपुरदाहे च बाहवः षोड़शैव तु ॥
शङ्खचक्रं गदा शार्ङ्गं घण्टा तत्राधिका भवेत् ।
तथा धनुः पिनाकश्च शरो विष्णुमयस्तथा ॥
चतुर्भुजोऽथवाष्टौ वा ज्ञानयोगेश्वरो मतः ।
तीक्ष्णनासाग्रदशनः करालवदनो महान् ॥
भैरवः शूलहस्तो वो प्रत्यायतनसंस्थितः ।
न शूलायतने कार्य्यो भैरवस्तु भयङ्करः ॥
नारसिंहो वराहो वा तथान्येऽपि भयङ्कराः ।
न हीना नाधिकाङ्गा च कर्त्तव्या देवता क्वचित् ॥
स्वामिनं घातयेत्क्षिप्रं करालवदना तथा ।
अधिका शिल्पिनं हन्यात् क्षया चैवार्थनाशिनी ॥
कृशोदरी तु दुर्भिक्षं निर्म्मांसा धननाशिनी ।
वक्रनासा तु दुःखाय संचिप्राक्षी भयङ्करी ॥
चिपिटा दुःखशोकाय अनेत्रा नेत्रनाशिनी ।
दुःखदा होनवक्त्रा तु पाणिपादहता तथा ॥
हीनाङ्गा हीनजङ्घा च भ्रमोन्मादकरी नृणाम् ।
वक्रवक्त्रा च राजानं कटिहीना च या भवेत् ॥

प्राणिपादविहीनायां जायते मरको महान्।
जङ्घाजानुविहीना च प्रभुकल्लामकारिणी॥
पुत्रमित्रविनाशाय हीना वक्षःस्थलेषु या।
सम्पूर्णावयवा या तु आयुर्लक्ष्मीप्रदा सदा।
एवं लक्षणमासाद्य कर्तव्यः परमेश्वरः॥*॥
स्तूयमानः सुरैः सर्वैः समस्तादृग्यवेद्भवम्।
शुक्रेण नन्दिना चैव महाकालेन शुक्रुरम्॥
प्रणता लोकपालाश्च पार्श्वे तु गणनायकाः।
वृषदृष्टिरिटिश्चैव भूसवेतालसंवृतः।
सर्वे कुर्याच्च कर्तव्याः स्तुवन्तः परमेश्वरम्॥
गन्धर्वविद्याधरकिन्नराणा-
मप्सरोगुह्यकनायकानाम्।
गणैरनेकैः प्रणतो महेन्द्र-
मुनिप्रवीरैरभिनन्द्यमानम्॥
भृत्यात्मजैः प्रणतः प्रवाल-
पुष्पोपहारप्रचयं ददद्भिः।
संस्तूयमानं भगवन्तमीड्यं
नेत्रत्रयेणामरमर्त्यपूज्यम्॥*॥

सूत उवाच।

अधुना संप्रवक्ष्यामि अर्द्धनारीश्वरं परम्।
अर्द्धेन देवदेवस्य नारीरूपं सुशोभनम्॥
रुद्रार्द्धे तु जटाभारो बालेन्दुकलया युतः।
उमार्द्धे तु प्रदातव्यौ सीमन्ततिलकावुभौ॥
वासुकिं दक्षिणे कर्णे वामे कुण्डलमादिशेत्।
बालिका चोपरिष्टात्तु कपालं दक्षिणे करे॥
त्रिशूलं वापि कर्तव्यं देवदेवस्य शूलिनः।
वामतो दर्पणं दद्यादुत्पलं वा विशेषतः॥
वामबाहुश्च कर्तव्यः केयूरवलयान्वितः।
उपवीतश्च कर्तव्यं मणिमुक्तामयस्तथा॥
स्तनभारसमार्द्धं तु वामे पीनं प्रकल्पयेत्।
हारार्द्धमुज्ज्वलं कुर्यात् श्रोणयर्द्धन्तु तथैव च॥
लिङ्गार्द्धमूर्द्धं कर्तव्यं व्याघ्राजिनकृतांबरम्।
वामे लम्बपरीधानं कटिसूत्रत्रयान्वितम्॥
नानारत्नसमोपेतं दक्षिणं भुजगान्वितम्।
देवस्य दक्षिणं पादं पद्मोपरिसमास्थितम्॥
किञ्चिदूर्द्धन्तथा वामं भूषितं नूपुरेण च।
रत्नैर्विभूषितान् कुर्यादङ्गुलीरङ्गुलीयकान्॥
साञ्जलिकं तथा पादं पार्वत्या दर्शयेत् सदा।
अर्द्धनारीश्वरस्येदं रूपमखिलमुदाहृतम्॥*॥
उमामहेश्वरस्यापि लक्षणं शृणुत द्विजाः।
संस्थानन्तु तयोर्वक्ष्ये लीललितविभ्रमम्॥
चतुर्भुजं द्विबाहुं वा जटाभारेन्दुभूषितम्।
लोचनत्रयसंयुक्तमेकस्कन्धोपवीतिनम्॥
दक्षिणेनोद्धृतं शूलं वामं कुचभरं करम्।
दीपिचर्मपरीधानं नागरत्नोपशोभितम्॥
सुप्रतिष्ठं सुवेषञ्च तथार्द्धेन्दुकृताग्रनम्।
वामे तु संस्थिता देवी तस्योरौ बाहुगूहिता॥
शिरोभूषणसंयुक्तैरलकैर्ललितानना।
सबालिका कर्णवती ललाटतिलकोज्ज्वला॥
मणिकुण्डलसंयुक्ता कर्णिकाभरणा क्वचित्।
हारकेयूरवलया हरवक्त्रावलोकिनी॥
वामार्धं देवदेवस्य सृणन्ती लीलया क्वचित्।
दक्षिणन्तु बहिः कृत्वा बाहुं दक्षिणतोऽथवा॥
स्कन्धे वा दक्षिणे कृत्वा सृणमुत्पलकुड्मलम्। क्वचित्।
वामे च दर्पणं दद्यादुत्पलं वा सुशोभनम्॥
कटिसूत्रत्रयश्चैव नितम्बे स्यात् प्रलम्बकम्।
जया च विजया चैव कार्त्तिकेयविनायकौ॥
पार्श्वयोर्दृश्येत्तत्र सतोरणमगुच्छकम्।
मालाविद्याधरांस्तत्र वीणावानस्वरोगणः।
एतद्रूपमभेदस्य कर्तव्यं भूतिमिच्छता॥*॥
श्रीवनारायणं वक्ष्ये सर्वपापप्रणाशनम्।
वामार्द्धे माधवं कुर्यादक्षिणे शूलपाणिनम्॥
बाहुद्वयञ्च कृष्णस्य मणिकेयूरभूषितम्।
शङ्खचक्रधरं शान्तमारक्ताङ्गुलिविभ्रमम्॥
चक्रस्थाने गदाचापि पाणौ दद्यादधस्तले।
शङ्खञ्चेतरे दद्याद्भूत्यर्थं भूषणोज्ज्वलम्॥
पीतवस्त्रपरीधानं चरणं मणिभूषितम्।
दक्षिणार्द्धे जटाभारमर्द्धेन्दुकृतलक्षणम्॥
भुजङ्गहारवलयं वरदं दक्षिणं करम्।
द्वितीयञ्चापि कुर्वीत त्रिशूलवरधारिणम्॥
यज्ञोपवीतसंयुक्तं कट्यर्द्धे कृत्तिवाससम्।
मणिरत्नैश्च संयुक्तपादं नागविभूषितम्।
श्रीवनारायणस्येवं कल्पयेद्रूपमुत्तमम्॥*॥
महावराहं वक्ष्यामि पद्महस्तं गदाधरम्।
तीक्ष्णदंष्ट्रायुधोरास्यं मेदिनीवामकूर्परम्॥
दंष्ट्राग्रेणोद्धृतां दान्तां धरणीसुत्पलान्विताम्।
विमलोत्फुल्लनयनामुपरिष्टात् प्रकल्पयेत्।
दक्षिणं कटिसंस्थन्तु करन्तस्य प्रकल्पयेत्।
कूर्मोपरि तथा पादमेकं नागेन्द्रमूर्द्धनि।
संस्तूयमानं लोकेशैः समन्तात् परिकल्पयेत्॥*॥
नारसिंहञ्च कर्तव्यं भुजाष्टकसमन्वितम्।
रौद्रसिंहासनं तद्वद्विदारितमुखेक्षणम्॥
लम्बमानजटाकोटिं दारयन्तं दितेः सुतम्।
विनिर्गतान्त्रजालञ्च दानवं परिकल्पयेत्॥
वमन्तं रुधिरोद्गारं भ्रुकुटीकुटिलेक्षणम्।
युध्यमानञ्च कर्तव्यं क्वचित् करणवन्नखैः॥
परिश्रान्तेन देत्येन तर्ज्यमानं सुदुर्मुखैः।
दैत्यं प्रदर्शयेत्तत्र खड्गखेटकधारिणम्॥
स्तूयमानं तथा विष्णुं दर्शयेदमराधिपैः॥*॥
तथा त्रिविक्रमं वक्ष्ये ब्रह्माण्डाक्रमणोद्यमम्।
वामपार्श्वे तथा राहुमुपरिष्टात् प्रकल्पयेत्॥
अधस्ताद्रामनं तावत् कल्पयेत् सकमण्डलुम्।
दक्षिणे क्षत्रियां विद्यान्मुखं दीनं प्रदर्शयेत्॥
भल्लधारिणं तद्वल्लिम्लस्थेव पार्श्वतः॥
वन्यनाथापि कुर्वन्तं गरुडन्तस्य दर्शयेत्॥*॥
मत्स्यरूपं तथा मात्स्यं कौर्म्मं कूर्मोक्षतिं न्यसेत्।
एवं रूपन्तु भगवान् कार्य्यो नारायणो हरिः॥*॥
ब्रह्मा कमण्डलुधरः कर्तव्यः स चतुर्मुखः॥
हंसारूढः क्वचित् कार्य्यः क्वचिच्च कमलासनः।
वर्णेन पद्मगर्भाभश्चतुर्बाहुः शुभेक्षणः॥
कमण्डलुं वामकरे सुवं हस्ते च दक्षिणे।
वामे दण्डधरं तद्वत् सुचञ्चापि प्रदर्शयेत्॥
मुनिभिर्देवगन्धर्वैः स्तूयमानं समन्ततः।
कुर्वाणमिव लोकांस्त्रीन् शुक्लाम्बरधरं विभुम्॥
ऋगक्षमधरञ्चापि दिव्ययज्ञोपवीतिनम्।
आज्यस्थालीं न्यसेत् पार्श्वे वेदांश्च चतुरः पुनः॥
वामपार्श्वे तु सावित्रीं दक्षिणे च सरस्वतीं।
अग्रे च ऋषयस्तद्वत् कार्याः पैतामहे पदे॥*॥
कार्त्तिकेयं प्रवक्ष्यामि तरुणादित्यसन्निभम्।
कमलोदरवर्णाभं सुकुमारं कुमारकम्॥
गेण्डुकैश्चीरकैर्युक्तं मयूरवरवाहनम्।
स्थानीयखेटनगरे भुजान् द्वादश कल्पयेत्॥
चतुर्भुजः कर्क्कटे स्याद्दने ग्रामे द्विबाहुकः॥
शक्तिः पाशस्तथा खड्गः शरः शूलस्तथैव च।
वरदश्चैव हस्तः स्यादथवाभयदो भवेत्॥
एते दक्षिणतो ज्ञेयाः केयूरकटकोज्ज्वलाः।
धनुः पताकामुष्टिञ्च तर्ज्जनी च प्रसारिता॥
खेटकं ताम्रचूडञ्च वामहस्ते प्रशस्यते।
द्विभुजस्य करे शक्तिर्वामे स्यात् कुक्कुटोऽपरे।
चतुर्भुजे शक्तिपाशौ वामतो दक्षिणे त्वसिः।
वरदोऽभयदो वापि दक्षिणः स्यात् तुरीयकः॥*॥
विनायकं प्रवक्ष्यामि गजवक्त्रं त्रिलोचनम्।
लम्बोदरं चतुर्बाहुं व्यालयज्ञोपवीतिनम्॥
स्वस्तिकर्णं दृढच्छुण्डमेकदंष्ट्रं पृथूदरम्।
स्वं दन्तं दक्षिणकरे उत्पलञ्च तथापरे।
लड्डुकं परशुश्चैव वामतः परिकल्पयेत्।
दृढत्संछिन्नगमनं पीनस्कन्धाङ्घ्रिपाणिनम्॥
युक्तं बुद्धिकुबुद्धिभ्यामधस्तान्मधिकान्वितम्॥*॥
कात्यायन्याः प्रवक्ष्यामि रूपं दशभुजन्तथा।
त्रयाणामपि देवानामनुकारानुकारिणीम्॥
जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम्॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम्।
नवयौवनसम्पन्नां सर्वाभरणभूषिताम्॥
सुचारुदशनां तद्वत् पीनोन्नतपयोधराम्।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम्॥
त्रिशूलं दक्षिणे दद्यात् खड्गञ्चक्रन्तथैव च।
तीक्ष्णबाणं तथा शक्तिं दक्षिणे सन्निवेशयेत्॥
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च।
घण्टां वा परशुं वापि वामतः सन्निवेशयेत्॥
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत्।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम्॥
हृदि शूलेन निर्भिन्नं निर्यद्रक्तविभूषितम्।
रक्तरक्षीकृताङ्गञ्च रक्तविप्रुषितेक्षणम्॥
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम्।
सपाशवामहस्तेन धृतकेशञ्च दुर्गया।
वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत्।
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम्।
किञ्चिदूर्द्धं तथा वाममङ्गुष्ठं महिषोपरि।
स्तूयमानञ्च तद्रूपममरैः सन्निवेशयेत्॥*॥
इदानीं सुरराजस्य रूपं वक्ष्ये विशेषतः।
सहस्रनयनं देवं मत्तवारणसंस्थितम्।
पृथूरुवक्षोवदनं सिंहस्कन्धं महाभुजम्।
किरीटकुण्डलधरं पीवरोरुभुजेक्षणम्॥
वक्षोपलधरं तद्वन्नानाभरणभूषितम्।
पूजितं देवगन्धर्वैरीश्वरोगणसंस्तुतम्॥

छत्रचामरधारिण्यौ स्त्रियौ पार्श्वे तु कारयेत् ।
सिंहासनगतं वापि गन्धर्वगणसंयुतम् ॥
इन्द्राणीं वामतस्तस्य कुर्यादुत्पलधारिणीम् ॥
सूत उवाच ।
प्रभाकरस्य प्रतिमामिदानीं शृणुत द्विजाः ।
रथस्थं कारयेद्देवं पद्महस्तं सुलोचनम् ॥
सप्ताश्वचैकचक्रञ्च रथस्तस्य प्रकल्पयेत् ।
सुकुटेन विचित्रेण पद्मगर्भसमप्रभम् ॥
नानाभरणभूषाढ्यं भुजाभ्यां धृतपुष्करम् ।
स्कन्धस्थे पुष्करे ते तु लोलयैव धृते सदा ॥
चोलकच्छन्नवपुषं क्वचिच्चिह्नेषु दर्शयेत् ।
वल्गुयुग्मसमोपेतं चरणौ तेजसावृतौ ॥
प्रतीहारौ च कर्तव्यौ पार्श्वयोर्दण्डपिङ्गलौ ।
कर्तव्यौ खड्गहस्तौ च पार्श्वयोः पुरुषावुभौ ॥
लेखनीलक्षतहस्तञ्च पार्श्वे धातारमग्रयम् ।
नानादेवगणैर्युक्तमेवं कुर्याद्दिवाकरम् ॥
अरुणः सारथिस्तस्य पद्मिनीपत्रसन्निभः ।
अश्वौ च बलिसुग्रीवावन्तस्थौ तस्य पार्श्वयोः ॥
भुजङ्गरश्मिभिर्बद्धाः सप्ताश्वा रश्मिसंयुताः ।
पद्मस्थं वा हयस्थं वा पद्महस्तं प्रकल्पयेत् ॥*॥
अथेतु लक्षणं वक्ष्ये सर्वकामफलप्रदम् ।
दीप्तं सुवर्णवपुषमर्द्धचन्द्रासनस्थितम् ॥
बालार्कसदृशप्रख्यं वसनञ्चापि दर्शयेत् ।
यज्ञोपवीतिनं देवं लम्बकूर्चधरन्तथा ॥
कमण्डलुं वामकरे दक्षिणे त्वक्षसूत्रकम् ।
ज्वालावितानसंयुक्तमजवाहनमुज्ज्वलम् ।
कुक्षस्थञ्चापि कुर्वीत मुद्रिं सम्पुस्तिकान्वितम्॥*
तथा यमं प्रवक्ष्यामि दण्डपाशधरं विभुम् ।
महामहिषमारूढं कृष्णाञ्जनचयोपमम् ॥
सिंहासनगतञ्चापि दीप्ताग्निसमलोचनम् ।
महिषं चित्रगुप्तञ्च करालान् किङ्करांस्तथा ॥
समन्तादर्शयेत्तस्य सौम्यासौम्यांस्तथा नरान् ॥
राक्षसेन्द्रं तथा वक्ष्ये लोकपालञ्च नैर्ऋतम् ।
नरारूढं महाकायं रक्षोभिर्बहुभिर्वृतम् ॥
खड्गहस्तं महानीलं कज्जलाचलसन्निभम् ।
नरयुक्तविमानस्थं पीताम्बरविभूषितम् ॥ * ॥
वरुणञ्च प्रवक्ष्यामि पाशहस्तं महाबलम् ।
शङ्खस्फटिकवर्णाभं हारकेयूरसंवृतम् ॥
मृगाधिरूढं वरदं पताकाध्वजसंयुतम् ।
भूषणावगतं शान्तं किरीटवरधारिणम् ॥ * ॥
वायुरूपं प्रवक्ष्यामि धूम्रञ्च मृगवाहनम् ।
चित्राम्बरधरं शान्तं युवानं कुञ्चितभ्रुवम् ।
मृगाधिरूढं वरदं पताकाध्वजसंयुतम् ॥ * ॥
कुबेरञ्च प्रवक्ष्यामि कुण्डलाभ्यामलङ्कृतम् ।
हारकेयूररचितं सिताम्बरधरं सदा ॥
गदाधरञ्च कर्तव्यं वरदं मुकुटान्वितम् ।
नरयुक्तविमानस्थं मेषस्थं वापि कारयेत् ॥
वर्णेन पीतवर्णेन गुह्यकैः परिवारितम् ।
महोदरं महाकायं ऋद्ध्यष्टकसमन्वितम् ॥
गुह्यकैर्बहुभिर्युक्तं धनव्ययकरैस्तथा ॥ * ॥
तथैवेशं प्रवक्ष्यामि धवलं धवलेक्षणम् ।
त्रिशूलपाणिनं देवं चार्द्धं हयगतं विभुम् ॥ * ॥
मातॄणां लक्षणं वक्ष्ये यथावदनुपूर्व्वशः ।
ब्रह्माणी ब्रह्मसदृशी चतुर्वक्त्रा चतुर्भुजा ।
हंसाधिरूढा कर्तव्या साक्षसूत्रकमण्डलुः ॥*॥
महेश्वरस्य रूपेण तथा माहेश्वरी मता ।
जटासुकुटसंयुक्ता वृषस्था चन्द्रशेखरा ।
कपालमूलखट्वाङ्गवरदाथ चतुर्भुजा ॥ * ॥
कुमाररूपा कौमारी मयूरवरवाहना ।
रक्तवस्त्रधरा तद्वच्छूलशक्तिधरा तथा ॥
हारकेयूरसम्पन्ना ह्यकवाकुधरा तथा ॥ * ॥
वैष्णवी विष्णुसदृशी गरुत्मति समास्थिता ।
चतुर्बाहुश्च वरदा शङ्खचक्रगदाधरा ।
सिंहासनगता वापि बालकेन समन्विता ॥ * ॥
वाराहीञ्च प्रवक्ष्यामि महिषोपरिसंस्थिताम् ।
वराहसदृशीं देवीं घण्टाचामरधारिणीम् ।
गदाचक्रधरान्तद्वद्दानवेन्द्रविनाशिनीम् ॥ * ॥
इन्द्राणीमिन्द्रसदृशीं वज्रशूलगदाधराम् ।
गजासनगतान्देवीं लोचनैर्बहुभिर्वृताम् ।
तप्तकाञ्चनवर्णाभां सर्वाभरणभूषिताम् ॥ * ॥
तीक्ष्णखड्गधरान्तद्वद्धस्ते योगीश्वरीमिमाम् ।
दीर्घजिह्वाग्रदंष्ट्रेग्रीमस्थिखट्वेच मण्डिताम् ।
दंष्ट्राकरालवदनां कुर्याच्चैव लम्बोदरीम् ॥ * ॥
कपालमालिनीं देवीं मुण्डमालाविभूषिताम् ।
कपालं वामहस्ते तु मांसशोणितपूरितम् ॥
सकृत्मुण्डं शिरो न्यस्य शस्त्रिका दक्षिणे तथा ।
गृध्रस्या वायसस्या वा निर्म्मांसा विगतोदरी ।
करालवदना तद्वत् कर्तव्या सा त्रिलोचना ॥*॥
चासृङ्मा वह्निघण्टा च द्वीपिचर्म्मधरा शिवा ।
दिगम्बरा कालिका तद्वदासभस्था कपालिनी ॥
सुरक्तपुष्पाभरणा वह्निनी ध्वजसंयुता ।
विनायकञ्च कुर्वीत मातृणामन्तिके सदा ॥
वीरेश्वरञ्च भगवान् वृषारूढो जटाधरः ।
वीणाहस्तस्त्रिशूली च मातृणामग्रतो भवेत् ॥*॥
श्रियन्देवीं प्रवक्ष्यामि नवे वयसि संस्थिताम् ।
सुयौवनां पीनगण्डां रक्तोष्ठीं कुञ्चितभ्रुवम् ॥
पीनोन्नतस्तनतटां मणिकुण्डलधारिणीम् ।
सुमङ्गलं सुखं तस्याः शिरः सीमन्तभूषितम् ॥
पद्मस्त्रिकाग्रहस्तैर्वा भूषितां कुन्तलालकैः ।
कञ्चुकावृद्धगात्रौ च हारभूषौ पयोधरौ ॥
नागहस्तोपमौ बाहू केयूरकटकोज्ज्वलौ ।
पद्मं हस्ते च दातव्यं श्रीफलं दक्षिणे करे ॥
मेखलाभरणाक्रान्तश्चक्राकारनसुप्रभाम् ।
नागाभरणसम्पन्नां शोभनाम्बरधारिणीम् ।
पार्श्वे तस्याः स्त्रियः कार्याश्चामरव्यग्रपाणयः ।
पद्मासनोपविष्टान्तु पद्मसिंहासनस्थिताम् ॥
करिभ्यां स्नाप्यमाना सा भृङ्गाराभ्यामनेकशः ।
प्रतिपालयन्ती करिणौ भृङ्गाराभ्यां तथापरौ ॥
स्तूयमाना च लोकैश्चैस्तथा गन्धर्वगुह्यकैः ॥*॥
तथैव यक्षिणी कार्या सिद्धासुरनिषेविता ।
पार्श्वयोः कलसौ तस्याकोरण्यौ देवदानवाः ॥
नागाश्चैव तु कर्तव्याः खड्गखेटकधारिणः ।
अधस्तात्प्रकृतिस्त्रीणां नाभेरूर्द्ध्वञ्च पौरुषी ।
फणाश्च मूर्द्धि कर्तव्या द्विजिह्वा बहवः सभाः ।
पिशाचा राक्षसाश्चैव भूतवेतालजातयः ॥
निर्म्मांसाश्चैव ते सर्व्वे रौद्रा विकृतरूपिणः ।
क्षेत्रपालञ्च कर्तव्यो जटिलो विकृतानन: ॥
दिग्वासा जटिलस्तद्वत् श्वगोमायुनिषेवितः ।
कपालं वामहस्ते तु शिरः केशसमावृतम् ।
दक्षिणे शूलिकां दद्यादसुरक्षयकारिणीम् ॥*॥
अथातः संप्रवक्ष्यामि द्विसुतं कुसुमायुधम् ।
पार्श्वे चाश्वसुखं तस्य मकरध्वजसंयुतम् ॥
दक्षिणे पुष्पबाणञ्च वामे पुष्पमयं धनुः ।
प्रीतिः स्याद्दक्षिणे तस्य भोजनोपस्करान्विता ।
रतिस्तु वामपार्श्वे च शयनोपस्करान्विता ।
पटच्च पटहश्चैव खरः कामातुरस्तथा ॥
पार्श्वतो जलवापी च वनं नन्दनमेव च ।
सुशोभनश्च कर्तव्यो भगवान् कुसुमायुधः ॥
संस्थानभेदतश्चक्तं स्यादिसर्यं विश्वनेत्रकम् ।
एतदुद्देशतः प्रोक्तं प्रतिमालक्षणं मया ॥
विस्तरेण न शक्नोति वक्तुमप्यतिरुषि द्विजाः ॥"
इति मत्स्यपुराणे देवाधीनुकीर्त्तने प्रतिमालक्षणं नाम २३२। २३३। २३४। २३५ अध्यायाः ॥ * ॥ सा द्विविधा। स्थापनरूपा स्वयं व्यक्तरूपा च। यथा,—
श्रीसदाशिव उवाच ।
"शृणु देवि ! प्रवक्ष्यामि तदंशावसरं हरेः ।
स्थापनञ्च स्वयं व्यक्तं द्विविधं तत् प्रकीर्त्तितम् ॥
शिलाग्दारुलौहाद्यैः कृत्वा प्रतिकृतिं हरेः ।
श्रौतस्मार्त्तागमैः प्रोक्ता क्रियासंस्थापना हि तत् ॥
तत्स्थापनमिति प्रोक्तं स्वयं व्यक्तं हि मे शृणु ।
यस्मिंस्तु निहितो विष्णुः स्वयमेव वृणां भुवि ॥
पाषाणदारुलोहाद्यैः स्वयं व्यक्तं हि तत् स्मृतम् ।
स्वयं व्यक्ते स्थापने वा पूजयेन्मधुसूदनम् ॥
देवतानां महर्षीणामर्चनार्थं सनातनः ।
स्वयमेव जगन्नाथः सान्निध्यं याति केशवः ॥
यस्य यद्दियते भाग्यं तदेवाविर्भूद्भुवि ।
तदेव पूजयेन्नित्यन्तस्मिन्नेव रमेत् सदा ॥
श्रियोऽङ्गजायौ देवेशौ विधेरर्थे शुभानने ! ।
स एवेक्ष्वाकुनाथानां तपसाविर्भूद्भुवि ॥
मयापि काश्यां संपूज्यो माधवः कलुषापहः ।
दक्षिणोदधितीरे तु नीलाद्रौ पुरुषोत्तमे ॥
दारुरूपी जगन्नाथो ब्रह्मणा स्थापितः स्वयम् ।
स एव पूज्यः सर्व्वेषां लोकानां खलु पार्व्वति ! ॥
नरनारायणः साक्षात् पूज्यो बदरिकाश्रमे ।
गदाधरो गयायान्तु प्रयागे माधवस्तथा ॥
माधवो विधिवत् पूज्यो गङ्गासागरसङ्गमे ।
कपालमोचने तीर्थे कलिङ्गेऽच्युतो हरिस्तथा ॥
विष्णुश्च बदिरङ्गे तु भीमरूपिः शिवे यतः ।
द्वारकायां वासुदेवः कुरुक्षेत्रे रणेश्वरः ॥
नारायणो वङ्कटाद्रौ पूज्यो नित्यं सनातनः ।
स्वयं श्रीभगवान् कृष्णो धात्रि वृन्दावने भुवि ॥
गोविन्दः केशवो नन्दयशोदानन्दनो विभुः ।
पूज्यो मदनगोपालगोवर्द्धनधरादिकः ॥
चतुरशीतिके क्रोशे ब्रह्माण्डातीतके शिवे ! ।

कलिन्दनन्दिनीतीरे महाप्रलयवर्ज्जिते ॥
सदैव कार्य्यैरभ्यर्च्यः श्रीगोपीजनवल्लभः ।
यत्र यत्र हरेरर्चा स्वयं व्यक्ता शुभानने ! ॥
स्थानं तीर्थं तथा क्षेत्रं यज्ञदानमहोत्सवम् ।
संकीर्त्तनं सर्व्वभक्तिस्तथा कार्य्यादिकं जनम् ॥
कायेन मनसा वाचा भक्त्या देवि ! पुनः पुनः ।
तत्र तत्र समागम्य रमेऽहं संयतस्थितः ॥
नाहाङ्गयोगजं ज्ञानमर्च्चायां विन्दते नृणाम् ।
चक्षुषोर्विषयं प्राप्य ददाति फलमीप्सितम् ॥
सर्व्वावस्थासु सौरभ्यमर्च्चायां लभते नरः ।
अङ्गानामपि सान्निध्यं सर्व्वदा पृथिवीतले ॥
जम्बुद्वीपे महापुण्ये वर्षे वै भारते शुभे ।
अर्च्चायां सन्निधिर्विष्णोर्नेतरेषु कदाचन ॥
तस्माद्वै भारतं वर्षं मुनिभिश्चिदग्रैरपि ।
सेवितं सततं सुभु ! तपोयज्ञक्रियादिभिः ॥
भारतेऽस्मिन् महावर्षे नित्यं सन्निहितो हरिः ।
इन्द्रद्युम्ने तथा कौर्म्मे सिंहाद्रौ बदरीवने ॥
काश्यां प्रयागे सोमे च शालग्रामाचले तथा ।
नारायणाचले सोमे वराहे वामनाश्रमे ।
एवमाद्याः स्वयं व्यक्ताः सर्व्वकामफलप्रदाः ॥
स्वयमेव हि सान्निध्यं यस्मिन् याति जनार्द्दनः ।
तस्मिन्नेव स्वयं व्यक्तं वसन्ति सुतयः शुभाः ॥
महाभागवतश्रेष्ठो विधिना स्थाप्य केशवम् ।
मलेन कुर्य्यात् सान्निध्यं स्थापनं तद्विदुर्बुधाः ॥
न तु शाक्तादिभिः कार्य्यं सुकुन्दस्थापनादिकम् ।
श्रीहरेरर्चनं कर्म्म यात्रोत्सवमयाक्षरम् ॥
यत्किञ्चिदेष्णवैः कार्य्यमपरं मन्दिरादिकम् ।
ध्रुवं विष्णुर्न यच्छति व्यक्तमेतद्वदिष्यंति ॥"

इति पाद्मोत्तरखण्डे ७३ अध्यायः ॥ * ॥

भगवत्याः प्रतिमाराधनविधिर्यथा,—

ब्रह्मोवाच ।

"शृणु तस्याः सुराध्यक्ष ! आराधनविधिं परम् ।
यथा सा तोषिता पूर्व्वं शक्रादैः फलेप्सुभिः ॥
कर्म्मयज्ञेन देवेश ! तथा त्वमपि पूजय ।
शम्भुः पूजयते देवीं मन्त्रशक्तिमयीं शुभाम् ।
अक्षमालाकरो नित्यं तेनासौ विश्वरीश्वरः ॥
अहं शैलमयीं देवीं यजामि सुरसत्तम ! ।
तेन ब्रह्मत्वमेवेदं मया प्राप्तं सुदुर्लभम् ॥
इन्द्रनीलमयीं देवीं विष्णुरर्च्चयते सदा ।
विष्णुत्वं प्राप्तवांस्तेन अद्भुतैकं सनातनम् ॥
हेमीं हेममयीं कान्तां धनदोऽर्च्चयते सदा ।
तेनासौ धनदो देवो धनेशत्वमवाप्तवान् ॥
विश्वेदेवा महात्मानो रौप्यां देवीं मनोहराम् ।
यजन्ति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः ॥
वायुः पूजयते भक्त्या देवीं पित्तलसम्भवाम् ।
वायुत्वं तेन तत् प्राप्तमनौपम्यं गुणावहम् ॥
वसवः कांसिकां देवीं पूजयन्ति विधानतः ।
प्राप्तवन्तो महात्मानो वसुत्वं सुमहोदयम् ॥
अश्विनौ पार्थिवीं देवीं पूजयन्तौ विधानतः ।
तेन तावश्विनौ देवौ दिव्यदेहं गतावुभौ ॥
स्फाटिकां शोभनां देवीं वरुणोऽर्च्चयते सदा ।
वरुणत्वं हि संप्राप्तं तेन ब्रह्मन् समन्वितम् ॥
देवीमन्नमयीं पुण्यामग्निर्यजति भावितः ।
अग्नित्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम् ।
तास्त्वां देवीं सदाकालं भक्त्या देवो दिवाकरः ।
अर्च्चते तत्र सम्प्राप्तं तेन सूर्य्यत्वमुत्तमम् ॥
मुक्ताशैलमयीं देवीं सोमः पूजयते सदा ।
तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम् ॥
प्रवालकमयीं देवीं यजन्ते पन्नगोत्तमाः ।
तेन नागास्तु भोगाढ्याः प्रयान्त्यते परं पदम् ॥
लक्षायसमयीं देवीं पूजयन्त्यसुरोत्तमाः ।
राक्षसाश्च महात्मानस्तेऽमितविक्रमाः ॥
चपुषीसमयीं देवीं पिशाचाः पूजयन्ति ताम् ।
तेन ऋद्धिबलोपेताः प्रयान्ति परमं पदम् ॥
त्रैलोहिकां सदा देवीं यजन्ते गुह्यकादयः ।
तेन भोगबलोपेताः प्रयान्तीश्वरमन्दिरम् ॥
वज्रलौहमयीं देवीं यजन्ते मातरः सदा ।
मातृत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमं पदम् ॥
एवं देवाः समस्तर्व्वाः पिशाचोरगराक्षसाः ।
पूजयन्ते सदाकालं चर्च्चिकां सुरनायिकाम् ॥
तथा त्वमपि देवेन्द्र ! यदीच्छसि परां गतिम् ।
शिवां मणिमयीं पुण्यां लभसे मनसेप्सितान् ॥
कामान् सुरवराध्यक्ष ! कामिकैः पूजिता सदा ।
ददाति सर्व्वलोकानां चिन्तामण्यर्च्चया शिवा ॥"

अपि च ।

"हेमताम्रा च रूप्यार्च्चा शैलाचित्रायसापि वा ।
प्रतिष्ठायुक्ते स्थिता देवी सर्व्वकामफलप्रदा ॥
यो यस्य आयुधः प्रोक्तस्तस्यिंस्तां प्रतिपूजयेत् ।
देवी प्रत्यर्चिता पुंसां कामायुःसुतसौख्यदा ॥
यूजे संपूजिता वत्स ! सर्व्वं भवति पूजितम् ।
दार्व्वीं वा शैलजां वापि रत्नधातुमयीमपि ॥
विधिना शास्त्रदृष्टेन दग्धबाहुशिलोद्भवाम् ।
कारयेद्भक्तिमान् यस्तु देवीं शास्त्रविशारदः ॥"

स्थापनविधिर्यथा,—

"सर्व्वशैलेष्वकाष्ठोत्थं यद्वं वास्तुविभाजितम् ।
बलभीमण्डपं वत्स ! तावत्तु स्थापने शुभम् ॥
गन्धनैवेद्यधूपेन बलिमाल्यविभूषणैः ।
अधिवासनपूर्व्वास्तु स्थापनीयास्तु तद्विदैः ॥
वेदध्वनिमहाघोषैः स्तोत्रगीतोपशोभितम् ।
कर्त्तव्यं स्थापनं तासां बहुवादित्रनादितम् ॥
रात्रौ जागरणं तत्र देव्याः पूजार्थदृष्टये ।
सर्व्वलक्षणसम्पूर्णं सर्व्वोपकरणान्वितम् ॥
वापीकूपतडागादिवाटिकावनशोभितम् ।
वेश्मातूर्य्योपसम्पन्नं ध्वजच्छत्रविभूषितम् ॥
घण्टादर्पणदीपादि देयं द्रव्यं निरूपितम् ।
घटिका तत्र वर्षादि दिनसंख्यार्थसिद्धये ॥
कर्त्तव्या एकमेकं वा यथाकालपरिच्छिदे ।
अनेन विधिना यस्तु मातरः स्थापयेन्नरः ।
इहात्र पूजनीयस्तु मृतो याति परां गतिम् ॥"

इति देवीपुराणे मातृप्रतिष्ठामहाभाग्यम् ॥ * ॥

अन्यबुद्धीनां प्रतिमासु देवत्वं यथा,—

"अग्नौ क्रियावतामस्मि हृदि चाहं मनीषिणाम् ।
प्रतिमा स्वल्पबुद्धीनां ज्ञानिनामस्मि सर्व्वतः ॥ * ॥
प्रतिमां लक्षणवतीं यः कुर्य्यात्त्वेव मानवः ।
कैवल्यस्य परं लोकमक्षयं प्रतिपद्यते ॥
षष्टिवर्षसहस्राणां सहस्राणि महामुने ! ॥
क्रीडते देववत्तत्र अप्सरोभिः सकिन्नरैः ॥
यः स्थापयेद्धरेरर्चां सुप्रशस्ते निवेशने ।
पुरुषः कृतकृत्यत्वान्नैव मरणं नयेत् ॥ * ॥
संस्थाप्य प्रतिमां विष्णोर्हैमरूप्यसुशैलजाम् ।
रत्नजां रैतिकीं वापि वह्निस्तौर्घे शुद्धेऽपि वा ॥
महास्नानेन गोविन्दं सम्यक् संस्थाप्य मानवः ।
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम् ॥"

इत्यग्निपुराणम् ॥

प्रतिमानं, क्लो, (प्रतिमीयतेऽनेनेति । प्रति + मि मा वा + ल्युट् ।) प्रतिबिम्बम् । वाहित्यस्याधोभागः । इत्यमरः । २ । १० । ३६, २ । ८ । ३६ । "अस्य वाहित्यस्याधोभागो दन्तयोर्मध्यं प्रतिमानमुच्यते प्रतिमीयते अनेन प्रतिमानं कुञ् मिश्न क्षेपे अनट् मिश्योरिति डा । प्रतिमानं प्रतिच्छाया गजदन्तान्तरालयोरिति रुद्रः ।" इति भरतः । (यथा, महाभारते । ८ । २८ । ३६ ।
"प्रतिमानेषु कुम्भेषु दन्तवेष्टेषु चापरे ।
नियहीता भृशं नागाः प्रासतोमर-
शक्तिभिः ॥"
इत्तिललाटदेशः । इति महाभारतटीकायां नीलकण्ठः । ६ । ४५ । २७ ॥ * ॥ सादृश्यम् । यथा, ऋग्वेदे । १ । ३२ । ७ ।
"वृष्णो वधिः प्रतिमानं बुभूषन् ।
पुरुत्रा वृत्रो अशयद्व्यस्तः ॥"
"प्रतिमानं सादृश्यम् ।" इति तद्भाष्ये सायणः ॥ प्रतिनिधिः । यथा, ऋग्वेदे । ६ । २८ । १२ ।
"नास्य प्रचुर्न प्रतिमानमस्ति ।"
"प्रतिमानं प्रतिनिधिर्नास्ति ।" इति तद्भाष्ये सायणः ॥ * ॥ दृष्टान्तम् । यथा, भागवते । ७ । ४ । ३५ ।
"यं साधुगाथासदसि रिपवोऽपि सुरा नृप ! ।
प्रतिमानं प्रकुर्व्वन्ति किमुताधे भवादृशाः ॥"
तथा च महाभारते । ६ । २ । ३६ ।
"उग्रायुधश्च विक्रान्तः प्रतिमानं धनुष्मताम् ॥"
धान्यादिपरिमाणनिर्द्धारार्थप्रस्थद्रोणादिकम् । यथा, याज्ञवल्क्ये । २ । १०० ।
"तुलाधारणविद्भिरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां कृत्वावसारितः ॥"
मनुसंहितायाम् । ८ । ४०३ । श्लोके प्रतीमानं दृश्यते ॥)

प्रतिमार्गकः, पुं, (प्रतिदिग्गं मार्गो गमनपन्था यस्य । कप् ।) पुरविशेषः । यथा,—
"सोमचारिपुरं शैभसुन्दरः प्रतिमार्गकः ॥"
इति जटाधरः ॥
"हरिचक्रपुरं शैभसुन्दरः प्रतिमार्गकः ॥"
इति त्रिकाण्डशेषश्च ॥

प्रतिसुक्तः, त्रि, (प्रतिसुच्यते स्मेति। प्रति+सुच्+क्तः।) परिहितवस्त्रादिः। इत्यमरः। २।८।६५॥ (परित्यक्तः। यथा, रघुः। ४। ४३।
"गृहीतप्रतिसुक्तस्य स धर्म्मविजयी नृपः।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम्॥"
बङ्गः। यथा, भागवते। ३। १८। १०।
"न ह्यन्यपार्श्वः प्रतिसुक्तस्य वीरा
विकत्थनं तव गृह्णन्त्यभद्र॥"
प्रतिनिवृत्तः। विष्णुः। यथा, मार्कण्डेये।१५।१।
"नरकात् प्रतिसुक्तस्तु क्षमिः पतिसयाजकः॥"
प्रत्यर्पितः। यथा, रघुः। १६। ५६।
"तद्भ्रूलतीभिर्मदरागशोभां
विलोचनेषु प्रतिसुक्तमाशाम्॥")

प्रतियत्नः, पुं, (प्रतियत्यते इति। प्रति+यत् प्रयत्ने+"यजयाचयतविच्छप्रच्छरक्षो नङ्।"३। ३। ९०। इति नङ्।) लिप्सा। वाञ्छा। उपग्रहः। वन्दी। इत्यमरः। ३। ३। १०६॥ नियमादिः। सतो गुणान्तराधानम्। इति भरतः॥ संस्कारः। इति स्वामी॥ (यथा, माघे।३।५४।
"सुगन्धितामप्रतियत्नपूर्ब्बां
विभ्रन्ति यत्र प्रमदाय पुंसाम्॥"
"यत्र पुरि न प्रतियत्नः संस्कारः पूर्ब्बो यस्याः सा।" इति तट्टीकायां मल्लिनाथः॥) ग्रहणादिः। इति रामाश्रमः॥ प्रतिग्रहः। इति सुकुटः॥
"प्रतियत्नस्तु संस्कारलिप्सोपग्रहयोश्च॥"
इति मेदिनी। ने, १६६॥
रचना। इति जटाधरः॥ प्रयत्नवति, त्रि। इति त्रिकाण्डशेषः॥

प्रतियातना, स्त्री, (प्रतियात्यते अनया इति। प्रति+यत्+णिच्+"ण्यासश्रन्थो युच्।" ३। ३। १०७। इति युच्।) प्रतिमा। इत्यमरः। २। १०। ३६॥ (यथा, माघे।३।३४।
"अनिन्दिता या विदधे विधात्रा
सृष्टौ सृष्टिया प्रतियातनेव॥")
तुल्ययातना च॥

प्रतियोगः, पुं, प्रतियुज्यत इति। प्रति+युज्+भावे घञ्।) विरोधः। (पुनरुद्योगः। यथा, भागवते। ४। १०। २२।
"इति ब्रुवंश्चित्ररथः सतीं रहं
यतः परेषां प्रतियोगशङ्कितः।
शुश्राव शब्दं जलधेरिवेरितं
नभस्वतो दिक्षु रजोऽन्वदृश्यत॥"
"प्रतियोगः पुनरुद्योगः।" इति तट्टीकायां श्रीधरस्वामी॥)

प्रतियोगी, [न्] त्रि, (प्रतिरूपं युज्यते इति। प्रति+युज्+घिनुण्।) विरोधी। यथा,—
"साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम्। इति चिन्तामणिः॥ सत्प्रतिपक्षः। यथा,—
"प्रतियोगिनं दृष्ट्वा प्रतियोगी निवर्त्तते।" इति प्राचीनकारिका॥

प्रतिरम्भः, पुं, (प्रति+लम्भ+भावे घञ्। लस्य रः।) प्रतिलम्भः। इति हिरूपकोषः॥

प्रतिरूपं, क्ली, (प्रतिगतं प्रतिकृतं वा रूपमिति प्रादिसमासः।) प्रतिमा। इति त्रिकाण्डशेषः॥ (यथा, भागवते। ७। १०। २१।
"भवान् मे खलु भक्तानां सर्ब्बेषां प्रतिरूपधृक्॥"
त्रि, प्रतिगतं रूपमस्य। अनुरूपः। यथा, महाभारते। १। १०२। ६१।
"आत्मनः प्रतिरूपोऽसौ जन्यः पतिरिति स्थितेः।
विचित्रवीर्य्यं कन्याश्च पूजयामासतुः शुभे॥"
दानवविशेषे, पुं। यथा, महाभारते। १२। २२७। ५१। [मधुः॥")
"विश्वजित् प्रतिरूपश्च दृप्ताक्षो विष्करो
प्रतिरूपकं, क्ली, (प्रतिरूप+स्वार्थे कन्।) प्रतिबिम्बम्। इति जटाधरः॥ (यथा, महाभारते। १२। ५६। ४६।
"अग्निदैर्गरदैश्चैव प्रतिरूपककारकैः।
श्रेणीसुखोपजापैश्च वीरघ्नैर्दूषणेन च॥")

प्रतिरोधः, पुं, (प्रतिरुध्यते अनेनेति। प्रति+रुध्+करणे घञ्।) तिरस्कारः। इति श्रुतप्रकाशग्रन्थटीकायां भरतः॥ (प्रति+रुध्+कर्त्तरि घञ्।) सत्प्रतिपक्षः। यथा। पक्षसाध्यसाधनाप्रसिद्धिस्वरूपा सिद्धिबाधप्रतिरोधानां निरासः। इति सत्यभिचारग्रिरोमणिः॥

प्रतिरोधकः, पुं, (प्रतिरुणद्धि प्रतिरुध्य चौर्य्यं करोतीति। प्रति+रुध्+ण्वुल्।) चारः। इति हेमचन्द्रः। ३। ४५॥

प्रतिरोधी, [न्] पुं, (प्रतिरुणद्धीति। प्रति+रुध्+णिनिः। प्रतिरोधस्तिरस्कारोऽस्यास्तीति वा। प्रतिरोध+इनिः।) चौरः। इत्यमरः। २। १०। २५॥

प्रतिलम्भः, पुं, (प्रति+लभ्+भावे घञ्।) लाभः। तत्पर्य्यायः। लम्भनम् २। इति हेमचन्द्रः। यथा, श्रीहर्षः।
"नैव नः प्रियतमोभयथासौ
वध्यमुं न हसते हसते वा।
एकतो हि धिगनुग्रहगृह्या-
मन्यतः कथमदःप्रतिलम्भः॥"

प्रतिलोमः, त्रि, (प्रतिगतं लोम आनुकूल्यं यस्मादिति। "अच् प्रत्यवपूर्ब्बात्सामलोम्नः।" ५। ४। ७५। इति समासान्तोऽच्प्रत्ययः।) वामः। इति हेमचन्द्रः॥ (यथा, हरिवंशे। १२७।१४।
"बहूनि प्रतिलोमानि पुरा च कृतवान् मयि।
क्षन्तव्यो नारद! मोढ़ानि भ्रातेति च मयानघ!॥")
विलोमः। यथा,—
"तादृग्भावव्यवस्कार्य्याविति धर्म्मो व्यवस्थितः।
वैगुण्याज्जन्मनः पूर्ब्बः उत्तरः प्रतिलोमतः॥"
इति मानवे। ६। ६८॥

प्रतिलोमजः, त्रि, (प्रतिलोमात् जायते इति। प्रतिलोम+जन्+डः।) प्रतिलोमजातः। उत्तमवर्ण्यायां अधमवर्ण्याज्जातः। यथा,—
"संकीर्ण्ययोनयो ये तु प्रतिलोमानुलोमजाः।
अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः॥"
इति मानवे १० अध्याये॥

प्रतिवचः, [स्] क्ली, (प्रतिरूपं वचः।) प्रत्युत्तरम्। इति हेमचन्द्रः॥ (यथा, देवीभागवते। १। ११। ५४।
"सोमः शुक्रवचः श्रुत्वा किञ्चित् क्रोधसमाकुलः।
भक्त्या प्रतिवचः प्राह शुक्रदूतं सदा शुचिः॥")

प्रतिवचनं, क्ली, (प्रतिरूपं वचनम्।) प्रतिवाक्यम्। उत्तरम्। इति त्रिकाण्डशेषः॥ (यथा, कलाविलासे। २। ६।
"न ददाति प्रतिवचनं विक्रयकाले गृहीतो वणिग् मौनी।
निक्षेपपाणिपुरुषं दृष्ट्वा सम्भाषणं कुरुते॥"
प्रतिनिर्देशः। इति निरुक्तम्। ६। ३। ६॥)

प्रतिवसथः, पुं. (प्रतिवसथमश्नातीति। प्रति+वस्+बाहुलकात् अथ।) ग्रामः। इति हेमचन्द्रः। ४। २७॥

प्रतिवाक्, [च्] स्त्री, (प्रतिरूपा वाक्।) उत्तरम्। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। ७२। ७१।
"लाङ्गूलचालनं चेष्टा प्रतिवाचो विवर्ज्जनम्।
दन्तदर्शनमाराबन्धतो युद्धं प्रवर्त्तते॥")

प्रतिवाक्यं क्ली, (प्रतिरूपं वाक्यम्।) उत्तरम्। इत्यमरः। २। ६। १०॥

प्रतिवाणिः, स्त्री, (प्रतिरूपा वाणिः।) प्रत्युक्तिः। प्रत्युत्तरम्। इति भूरिप्रयोगः॥

प्रतिवादी, [न्] त्रि, (प्रतिवादोऽस्यास्तीति इनिः। यद्वा, प्रतिकूलं वदतीति। प्रति+वद्+णिनिः।) प्रतिपक्षः। यथा,—
"यदा त्वेवंविधः पक्षः कल्पितः पूर्ब्ववादिना।
दद्यात्तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम्॥"
इति व्यवहारतत्त्वे दक्षवचनम्॥

प्रतिवासरः, पुं, (प्रतिगतो वासरम्।) प्रतिदिनम्। तद्दिनम्। इति हारावली। १६६॥ (स्त्री, वासरं वासरं प्रतीति समासे। प्रतिदिनम्। यथा, राजतरङ्गिण्याम्। २। १२७।
"भूतेष्वहर्दमानेषु विजयेशानधश्यतः।
नियमो राजकार्य्येषु तस्याभूत् प्रतिवासरम्॥")

प्रतिवासी, [न्] त्रि, (प्रत्यासन्नं वसतीति। प्रति+वस्+णिनिः।) आसन्नवासी। निकटस्थायी। पड़शि इति भाषा। प्रतिवसतीति ग्रहादित्वाच्छिनुप्रत्ययनिष्पन्नः॥

प्रतिविम्बं, क्ली, (प्रतिरूपं विम्बमिति। "कुगतिप्रादयः।" २। २। १८। इति समासः।) प्रतिमा। प्रतिच्छाया। इत्यमरः। २।९०।३६॥ (यथा, मत्स्यपुराणे। १। १५।
"चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता।
तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा॥")

प्रतिविषा, स्त्री, (प्रतीपं विषं यस्याः।) अतिविषा। इत्यमरः। २।४।६६॥ आतइस इति भाषा॥ (यथा, सुश्रुते उत्तरतन्त्रे। ४० अः।

"महौषधं प्रतिविषा सुस्थं चैत्यामपाचना: ॥"
अस्या: पर्य्यायो यथा,—
"विषा त्रतिविषा विश्वा भङ्गी प्रतिविषारुणा।
शुक्लकन्दा घोषविषा भङ्गरा घुणवल्लभा ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

प्रतिविषु, स्त्री, विषुं विषुं प्रति। इति सुग्धबोधव्याकरणम् ॥

प्रतिविषुक:, पुं, (प्रतिगतो विषुर्यस्मिन्निति। प्रतिविषुर्मुचुकुन्दो नृपति:। सन्नास्त्रा कायति प्रकाशते इति। कै+क:।) मुचुकुन्दवृक्ष:। इति राजनिर्घण्ट: ॥ (पर्य्यायोऽस्य यथा,—
"मुचुकुन्द: चक्रवृक्षचक्रिक: प्रतिविषुक: ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

प्रतिवेश:, पुं, (प्रत्यासनो वेशो निवेश:। प्रतिविशत्यत्रेति आधारे घञ् वा।) प्रतिवासिगृहम्। आसन्नगृहिणां गृहम्। इति शब्दरत्नावली ॥ (त्रि, आसन्नवर्त्ती। यथा, ऋग्वेदे।१०।६६।१३।
"क्षेत्रस्य पतिं प्रतिवेशमीमहे।"
"प्रतिवेशं समीपे वर्त्तमानम्।" इति तद्भाष्ये सायण: ॥)

प्रतिवेशवासी, [न्] त्रि, (प्रतिवेशे वसतीति। वस्+णिनि:।) प्रतिवासी। यथा,—
"नो जाने प्रतिवेशवासिनि गुरो: किं भावि सम्भावितम्।"
इत्यलङ्कारकौस्तुभम् ॥

प्रतिवेशिन्, [न्] त्रि, (प्रतिवेश आसन्नवर्त्तिगृहमस्यास्तीति। इनि:।) प्रतिवासी। इति शब्दरत्नावली ॥ (यथा, मृच्छकटिके ३ अङ्के।
"दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गो
दोषांश्च मे वदति कर्म्मणि कौशलञ्च ॥")

प्रतिश्रावणं, क्ली, (प्रति+श्रास्+भावे ल्युट्।) आहूय भृत्यादीनां कार्य्ये प्रेरणम्। इत्यमर: ॥

प्रतिश्रुष्टं, त्रि (प्रतिगतं श्रिष्टमवश्रिष्टम्।) प्रत्याख्यातम्। (प्रति+श्रास्+क्त:।) प्रेषितम्। इति त्रिकाण्डशेष: ॥

प्रतिश्या, स्त्री, (प्रतिश्यायते इति। प्रति+श्यै गतौ+"आतश्चोपसर्गे।" ३।१।१३६। इति क:। टाप्।) प्रतिश्याय:। इति शब्दरत्नावली ॥

प्रतिश्याय:, पुं, (प्रतिचयं श्रायते इति। प्रति+श्यै+"श्रायादधासुसंभ्रवतीयेति।"३।२।१३१। इति घञ्।) पीनसरोग:। इत्यमर:।२।६।५२॥ (यथा, सुश्रुते उत्तरस्थाने ४५ अध्याये।
"प्रार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ॥"
अस्य सकारस्यलत्वं सम्प्राप्तिश्च यथा,—
"सन्धारणाजीर्णरजोऽतिभाष्य-
क्रोधर्त्तुवैषम्यशिरोऽभितापै:।
प्रजागरातिस्वपनाम्बुशीते-
रवश्यया मैथुनवाष्पधूमै: ॥
संस्थानदोषे शिरसि प्रदुष्टो
वायु: प्रतिश्यायमुदीरयेत्तु।
घ्राणार्त्तितोदै: श्वयथुर्ज्वराभ:
स्रावोऽनिलात् सस्वनमश्रुरोग: ॥
नासाग्रपाकज्वरवक्त्रशोष-
श्लेष्मोष्मपीतस्रवणानि पित्तात्।
कासारुचिस्रावनयनप्रसेका:
कफादुगुर: स्रोतसि चापि कण्डू: ॥
सर्व्वाणि रूपाणि तु सन्निपातात्
स्यु: पीनसे तीव्ररुजेऽतिदु:खे।
सर्व्वोऽतिदुष्टोऽहितभोजनात्तु
दुष्टप्रतिश्याय उपेक्षित: स्यात् ॥"
इति चरके चिकित्सास्थाने षड्विंशेऽध्याये ॥)

प्रतिश्रय:, पुं (प्रतिश्रीयते अस्मिन्निति। प्रति+श्रि+आधारे अच्।) यज्ञशाला। इति जटाधर: ॥ सभा। आश्रय:। इति मेदिनी। ये, १२२ ॥ ओक:। इति हेमचन्द्र: ॥ (यथा, महाभारते। १। १६६। ४।
"स सम्यक् पूजयित्वा तं विप्रं विप्रप्रभक्षदा।
ददौ प्रतिश्रयन्तस्मै सदा सर्व्वातिथिव्रत:॥"
निवास:। यथा, मनौ। १०। ५१।
"चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रय: ॥"
"प्रतिश्रयो निवास:।" इति मेधातिथि: ॥)

प्रतिश्रव:, पुं, (प्रति+श्रु+"ऋदोरप्।" ३। ३। ५७। इति अप्।) अङ्गीकार:। इत्यमर: ॥ (यथा, राजतरङ्गिण्याम्। ३। ४२४।
"इति सोऽभीष्टसंप्राप्तौ कारयित्वा प्रतिश्रवम्।
दूरसृत्क्रान्तमर्य्याद: सङ्गमं समयाचत ॥")

प्रतिश्रुत्, स्त्री, (प्रतिरूपं श्रूयते इति। प्रति+श्रु+सम्पदादित्वात् क्विप्।) प्रतिध्वनि:। इत्यमर:। १। ६। २५॥ (यथा, रघौ। १३। ४०।
"यस्यायमन्तर्हितसौधभाज:
प्रसक्तसङ्गीतदृढ़ध्वनेय:।
वियन्नत: पुष्पकचन्द्रशाला:
स्वयं प्रतिश्रुन्मुखरा: करोति ॥")

प्रतिश्रुत:, त्रि, (प्रतिश्रूयते स्मेति। प्रति+श्रु+क्त:।) अङ्गीकृत:। इत्यमर:। ३। २। १०६॥

प्रतिषिद्ध:, त्रि, (प्रति+सिध्+क्त:।) प्रतिषेधविषय:। निषिद्ध:। यथा। अप्रतिषिद्धमनुमतं भवतीति दत्तकचन्द्रिका ॥ (यथा च,—
"सर्व्वत्रानु दिवाखाप: प्रतिषिद्धोऽन्यत्र यौगात् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

प्रतिषेद्धा, [ऋ] त्रि, (प्रति+सिध्+तृच्।) प्रतिषेधकर्त्ता। तत्पर्य्याय: माशब्दिक: २। इति त्रिकाण्डशेष: ॥ (यथा, महाभारते। १। १८१। १०।
"यदा तु प्रतिषेद्धारं पापो न लभते क्वचित्।
तिष्ठन्ति बहवो लोकास्तदा पापेषु कर्म्मसु ॥")

प्रतिषेध:, पुं, (प्रति+सिध्+भावे+घञ्।) निषेध:। यथा, मलमासतत्त्वे।
"प्राधान्यन्तु विधेर्यत्र प्रतिषेधेऽप्रधानता।
पर्य्युदास: स विज्ञेयो यत्रोत्तरपदेन नञ्।"

प्रतिषेधक:, त्रि, (प्रतिषेधतीति प्रति+सिध्+ण्वुल्।) प्रतिषेधकर्त्ता। यथा अग्निपुराणे।
"षष्टिवर्षसहस्राणां सहस्राणि वसेद्दिवि।
योऽश्रुमन्तापि भवति निरये प्रतिषेधक:।"

प्रतिष्क:, पुं, (प्रतिष्कन्दति प्रतिगच्छतीति। प्रति+स्कन्द+बाहुलकात् ड:।) दूत:। इति शब्दरत्नावली ॥

प्रतिष्कग्र:, पुं, (प्रतिकग्रतीति। प्रति+कग्र+अच्। बाहुलकात् सुट्।) सहाय:। वार्त्ताहर:। पुरोग:। इति मेदिनी। ग्रे, ३६ ॥

प्रतिष्कष:, पुं, (प्रतिकष्यतेऽनेनेति। प्रति+कष् हिंसायाम्+अच्। बाहुलकात् सुट्।) चर्म्मरज्जु:। इति जटाधर: ॥

प्रतिष्कस:, पुं, (प्रतिकसति प्रतिगच्छतीति। प्रति+कस्+अच्। सुट्।) चर:। इति शब्दरत्नावली ॥

प्रतिष्टम्भ:, पुं, (प्रतिष्टम्भनमिति। प्रति+स्तम्भ+भावे घञ्। वत्वम्।) प्रतिबन्ध:। इत्यमर:। ३। २। २७॥ (यथा, रघौ। २। ३२।
"बाहुप्रतिष्टम्भविघट्टितमन्यु-
रभ्यर्णमागस्कृतमस्यगृह्णि: ॥")

प्रतिष्ठ:, पुं, (प्रतिष्ठा अस्यास्तीति। अच्।) सुपार्श्वनामकदृत्तार्हत्पिता। इति हेमचन्द्र:। १। ३६ ॥ प्रतिष्ठायुक्ते, त्रि ॥ (यथा, महाभारते। ५। ४६। ३०।
"आत्मैव स्थानं मम जन्म चात्मा
ओतप्रोतोऽहमजर: प्रतिष्ठ: ॥")

प्रतिष्ठा, स्त्री, (प्रतितिष्ठतीति। प्रति+स्था+"आतश्चोपसर्गे।" ३।३।१०६। इति भावादौ अङ्। टाप्।) गौरव:। (यथा, कथासरित्सागरे। २। ६६।
"किञ्च आकरत्वं लोके प्रतिष्ठां प्रापयिष्यति॥")
स्थिति:। स्थानम्। (यथा, रघु:। १६। ३५।
"वेदिप्रतिष्ठान् वितताध्वराग्नी-
यूपानपश्यच्छतशो रघूणाम् ॥"
आश्रय:। यथा, मार्कण्डेये। ८४। १०।
"गौरी त्वमेव अग्निमौलिकृतप्रतिष्ठा ॥")
यागनिष्पत्ति:। चतुरश्रपदम्। इति मेदिनी। ते, १३॥ *॥ (स्थिति:। यथा, हरिवंशे। २८। ३७।
"य इदं शाश्वतं स्थानात्प्रतिष्ठाञ्च शृतक्रतो:।
श्रद्दधाद्धारयेदापि न स दौरात्म्यमाप्नुयात्॥"
शरीरम्। यथा, ऋग्वेदे। १०। ७३। ६।
"साकं प्रतिष्ठा हृदया जघंथ ॥")
संस्कारविशेष:।(यथा,आर्य्यासप्तशत्याम्।३८६।
"पूजा विना प्रतिष्ठां नाप्नि न मन्त्रं विना प्रतिष्ठा च।
तदुभयविप्रतिपन्न: पश्यतु गीर्व्वाणपाषाणम्॥")
तद्विधानादि यथा,—
मत्स्यपुराणे।
"चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा।
समय: सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत्॥
प्राप्य पर्व्वं शुभं शुक्लमतीते चोत्तरायणे।
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा॥
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी।
आसु प्रतिष्ठा विधिवत् कृता बहुफला भवेत्॥*

प्रतिष्ठा सर्व्वदेवानां केशवस्य विशेषतः ।
उत्तरायणमापन्ने शुक्लपक्षे शुभे दिने ॥
क्षणपक्षे च पञ्चम्यामष्टम्यांचैव ग्रस्यते ॥' *॥
भुजबलभीमे ।
'युगादावयने पुण्ये कर्त्तव्यं विष्णुवद्दये ।
चन्द्रसूर्य्यग्रहे वापि दिने पुण्येऽथ पर्व्वसु ॥
या तिथिर्यस्य देवस्य तस्यां वा तस्य कीर्त्तिता ।
सन्नागमविशेषेण प्रतिष्ठा सुक्तिदायिनी ॥'*॥
पद्मपुराणे ।
'प्रतिपद्नवदस्योक्ता पवित्रारोपणे तिथिः ।
श्रिया देया द्वितीया तु तिथीनामुत्तमा स्मृता॥
तृतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च ।
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च ॥
सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी तथा ।
मातॄणां नवमी प्रोक्ता दशमी वासुकेस्तथा ॥
एकादशी ऋषीणाञ्च द्वादशी चक्रपाणिनः ।
त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्द्दशी ।
मम चैव सुनिश्रेष्ठ! पौर्णमासी तिथिः स्मृता ॥'
कल्पतरौ देवीपुराणम् ।
'महिषासुरहन्त्राञ्च प्रतिष्ठा दक्षिणायने ।
यस्य देवस्य यः कालः प्रतिष्ठाध्वजरोपणे ॥
गर्भापूरग्रिलान्यासे शुभदस्तस्य पूजितः ॥
यस्य देवस्य प्रतिष्ठाध्वजरोपणे यः कालः शुभदस्तस्य गर्भापूरग्रिलान्यासे गृहारम्भे स कालः पूजित इत्यर्थः ॥ * ॥ प्रतिष्ठासमुच्चये ।
'माघे वा फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्येष्ठाषाढ़कयोर्वापि प्रतिष्ठा शुभदा भवेत् ॥'* ॥
भविष्ये ।
'सोमो बृहस्पतिश्चैव शुक्रश्चैव बुधस्तथा ।
एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठा यज्ञकर्म्मणि ॥
मत्स्यपुराणम् ।
'आषाढ़े हे तथा मूलसुत्तरात्रयमेव च ।
ज्येष्ठाश्रवणरोहिण्यः पूर्व्वभाद्रपदस्तथा ॥
हस्तात्विनी रेवती च पुष्या ह्यर रस्तथा ।
अनुराधा तथा स्वाती प्रतिष्ठादौ प्रशस्यते ॥'
दीपिकायाम् ।
'प्राजेशवासवकरादितिभाग्निनीषु
पौष्णामरेज्यशशिभेषु तथोत्तरेषु ।
कर्त्तुः शुभे शुक्रशशिनि केन्द्रगते च जीवे
कार्य्या हरेः शुभतिथौ विधिवत् प्रतिष्ठा ॥
प्राजेशाद्यः । रोहिणीज्येष्ठाहस्तापुनर्व्वसुत्विनीरेवतीपुष्यान्तगशिरउत्तरफल्गुन्युत्तराषाढ़ोत्तरभाद्रपदान्तत्रयाणि ॥ * ॥ सर्व्वमङ्गलाढ़ढाम्ते देवीपुराणम् ।
'यथा द्वादशमे जीवे अष्टमे वाथ भास्करे ।
प्रतिष्ठा कारिता विष्णोर्महाभयकरी मता ॥'
कल्पतरौ देवीपुराणम् ।
'चतुर्व्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः ।'
प्रतिष्ठा ब्राह्मणद्वारैव कर्त्तव्या ।
'कर्त्तुमिच्छति यः पुण्यं मम मूर्त्तिप्रतिष्ठया ॥
अन्यैर्यजीयस्त्वाचार्य्यस्तेन लक्षणसंयुतः ।
ब्राह्मणः सर्व्ववर्णानां पञ्चरात्रविशारदः ।
ब्राह्मणानामलाभे तु क्षत्रियो वैश्यसूद्रयोः ॥
क्षत्रियाणामलाभे तु वैश्यः शूद्रस्य कल्पितः ।
कदाचिदपि शूद्रस्तु न च कार्य्यार्थमर्हति ।'*॥
हरिभक्तिविलासे ।
'प्रथमेक्षूद्भवं सृष्टं लिङ्गं वा हरिमेव वा ।
स सर्व्वयातनाभोगी यावदाभूतसंप्लवम् ॥'
यावदाभूतसंप्लवं प्रलयपर्य्यन्तम् ॥ तथा ।
'स्त्रीणामनुपनीतानां शूद्राणाञ्च जनेश्वर ! ।
स्पर्शने नाधिकारोऽस्ति विष्णौ वा शङ्करेऽपि वा ॥' * ॥
प्रतिष्ठाप्रकारस्तु मत्स्यपुराणादावुक्तः । तदसम्भवे विद्याकरवाजपेयिप्रभृतिसम्मतो भविष्यादुक्तः । यथा भविष्यपुराणम् ।
'स्नपनादि यथाशक्ति कृत्वा तन्मूलमन्त्रकम् ।
विन्यसेद्धृदयाम्भोजे प्रतिमासु स्थिता भवेत् ॥'
आदिपदात् पूजोत्सवहोमादि महाकपिलपञ्चरात्रोक्तकर्म्म च कर्त्तव्यम् । तद्यथा,—
'सपुष्पं सकुशं पाणिं न्यसेद्देवस्य मस्तके ।
पञ्चवारं जपेन्मूलमन्त्रोत्तरमतोत्तरम् ॥
ततो मूलेन मूर्द्धादिपीठान्तं संस्पृशेदिति ।
तत्तन्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत् ॥
पूजाञ्च महतीं कुर्य्यात् स्वमन्त्रोक्तां यथाविधि ।
प्राग्वप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत् ॥'
लिपिन्यासस्तु मातृकान्यासः । उक्तञ्च ।
'जपादौ सर्व्वमन्त्राणां विन्यसेन्न लिपिं विना ।
कृतं तन्निष्फलं विद्यात्तस्मात् पूर्व्वं लिपिं न्यसेत्॥
कादिमतेऽपि ।
'मातृकायाः षड़ङ्गञ्च मातृकान्यासमेव च ।
सर्व्वासां प्रथमं कृत्वा पश्चात्तन्त्रोदितं न्यसेत् ॥
एतद्वचनाच्च मातृकान्यासः पूर्व्वं पश्चात्तन्त्रन्यासः ॥'
क्रमदीपिकायामप्येवं क्रमः । मन्त्रन्यासश्च तत्तन्मन्त्रविशेषोक्तपदवर्णन्यासः । तदभावे मूलमन्त्रेण शिरसि हृत्सन्यासः । तत्तन्यासस्तु विष्णुविषयक एव । न्यासप्रमाणानि सारदाक्रमदीपिकोक्तान्यनुसन्धेयानि ॥ * ॥ प्राग्वप्रतिष्ठामन्त्रस्तु सारदात्रयोविंशतिपटलोक्तः । यथा,—
'पाशाङ्कुशपुटाग्रस्थिवर्णाद्यौबिन्दुविभूषितः ।
याता: सप्त सकाराद्या ओमसत्येन्दुसंयुतम् ॥
समस्ते हंसमन्त्रः स्यात्ततोऽष्टार्णपदं भवेत् ।
प्राणा इति वदेत् पश्चात् इह प्राणास्ततः परम् ॥
असुख जीव च इह स्थितोऽसुख्यपदं भवेत् ।
सर्व्वेन्द्रियाणिअसुखान्ते वाङ्मनश्चक्षुरन्ततः ॥
श्रोत्रघ्राणपदे प्राणा इहागत्य सुखं चिरम् ।
तिष्ठन्त्वमिवधूरन्ते प्राग्वमन्त्रोऽयमीरितः ॥
प्रत्यसुख्यपदात् पूर्व्वं पाशाद्यानि प्रयोजयेत् ।
प्रयोगेषु समाख्यातः प्राग्वमन्त्रो मनीषिभिः ॥'
पाशाङ्कुशपुटाग्रस्थिरित्यनेन प्रथमं पाशबीजं आं ततः शक्तिबीजं ह्रीं ततोऽङ्कुशबीजं क्रों वाग्भौ यकारः बिन्दुविभूषितो यं । याताः सप्त सकाराद्याः उद्धृतयकारानुवादेन सप्त तद्भिन्नं बीजं पूर्व्वं पृथगुद्धारेण ज्ञानानामपि सबिन्दुताख्यापनाय । अङ्कुशवायुनलावनिवरुणबीजानीत्युक्तम् । अत्र वायुबीजस्यैकत्वं बीजत्वेन सर्व्वेषां सबिन्दुत्वं वक्तुम् । राघवभट्टोऽप्येवम् । अन्यस्तु वाग्भौबिन्दुविभूषिता इति पठित्वा वादविन्दुविभूषिता इति व्याख्यातं याता इत्यस्य विशेषणं वदति । ओम इकारः सत्य ओकारः इन्दुबिन्दुः तेन हौं । असवइह प्राणाङ्कुशाभ्यां रितशक्तिमनोः परस्तादुच्चार्य्य यादिदेवसुवर्णमुखं सहंसमिति प्रपञ्चसारप्रतिपाद्यगुणमित्यनेन हौमिति पद्मपादाचार्य्यैर्व्याख्यातम् । अग्निवधूः स्वाहा । तेनायं मन्त्रः । आं ह्रीं क्रों यं रं लं वं ग्रं षं सं हौं हं सः असुख प्राणा इह प्राणाः आमित्यादि असुख जीव इह स्थितः आमित्यादि असुख सर्व्वेन्द्रियाणि आमित्यादि असुख वाङ्मनश्चक्षुश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । असुख इति षष्ठ्यन्तदेवतानामोपलक्षणम् ।
'अदःपदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते ।
असुख्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत् ॥'
इति नारदीयात् ॥
वशिष्ठसंहितायाम् ।
'हृदि हस्तं समिधाय प्राणस्थापनमाचरेत्॥'*॥
प्रागुक्तभविष्यपुराणवचनेन तन्मूलमन्त्रकं तत्तद्देवतामन्त्रकं च वैदिकस्तान्त्रिकञ्च ।
'ओङ्कारादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ॥'
ब्रह्मपुराणे ।
'ओङ्कारादिनमोऽन्तेन चतुर्थ्यन्ततत्तद्देवतानामरूपो वा ।"
कालिकापुराणे ।
'प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
तथैव हृदयेऽङ्गुष्ठं दत्वा मन्त्रञ्च मन्त्रवित् ॥
एभिर्मन्त्रैः प्रतिष्ठान्तु हृदयेऽपि समाचरेत् ।
अस्मे प्राणाः प्रतिष्ठन्तु अस्मे प्राणाः चरन्तु च ।
अस्मे देवत्वसंख्याये स्वाहेति मनुरीरयन् ॥
अङ्गमन्त्रैरङ्गमन्त्रैर्वैदिकैरित्यनेन च ।
प्राग्वप्रतिष्ठां सर्व्वत्र प्रतिमासु समाचरेत् ॥'
अङ्गमन्त्रैः अङ्गन्यासमन्त्रैः । अङ्गमन्त्रैः मूलमन्त्रैः वैदिकैर्मनोज्योतिरित्यादिभिः ॥ * ॥
स्नपनात् पूर्व्वं वल्मीकमृत्तिकादिभिस्तिस्रभिः स्नानमाह हयशीर्षपञ्चरात्रम् ।
'वल्मीकमृत्तिकाभिस्तु गोमयेन खभस्मना ।
स्नानयेच्छिल्पिसंस्पर्शदोषाणामुपशान्तये ॥
स्नापयेन्नवतोयेन शुद्धवस्त्रा तु देशिकः ॥
नमस्तेऽस्तु सुरेशानि प्रसीदे विश्वकर्म्मणा ।
प्रभावितापशेषजगद्धात्रि ! तुभ्यं नमो नमः ॥
त्वयि संपूजयामीशे नारायणनमामयम् ।
रहिता शिल्पिदोषैस्त्वन्द्विधुक्ता सदा भव ।'*॥
तेन यथाशक्ति स्नपनादिपूर्व्वकप्रतिमाहृदये तन्मूलमन्त्रविन्यासेन देवताया विशेषसन्निधिः प्रतिष्ठेति । राघवभट्टधृतमहाकपिलपञ्चरात्रेऽपि ।

'प्रतिष्ठाशब्दसंसिद्धिः प्रतिपूर्वाच्च तिष्ठतेः ।
बह्वर्थलाभिधातानां संस्कारादौ प्रतेः स्थितिः ॥
अर्थस्तदयमेतस्य गीयते ग्राब्दिकैर्जनैः ।
विशेषसन्निधिर्या तु क्रियते व्यापकस्य तु ॥
सम्मूर्त्तौ भावनामन्त्रैः प्रतिष्ठा साभिधीयते ॥'* ॥
स्वभक्षणा गोमयभक्षणा ।
'अशौचरं पलशतं स्नाने देयञ्च सर्व्वदा ॥'
पलमाह मनुः ।
'पञ्चकृष्णलको मासस्ते सुवर्णस्तु षोड़श ।'
पलं सुवर्णाश्चत्वारः । तेनाष्टरत्तिकाधिक-लौकिकमाषद्वयाधिकतोलकत्रयेण पलं भवति एवंविधाशौचरपलशतेन लौकिकषट्त्रयाधिकशत-त्रयतोलका इति । एवं वल्मीकमृदादिग्रालने गायत्र्या वल्मीकमृदा स्नापयेत् । तत्रापि अशौचरशतपलं मूलपाणिलिखितन्यायात् । गायत्र्या मूलमन्त्रेण वा गन्धोदकस्नाने शुद्धत्वात् एतोन्विन्द्रमित्यादि ऋक्त्रयात्मिकया देशिको गुरुर्यजमानो वा विष्णः नमोऽस्तु इत्यादिमन्त्रौ देवतान्तरे च तत्तद्देवतानामोहः । ग्रिवलिङ्ग-स्नाप्यशैलत्वात् स्त्रीलिङ्गमविरुद्धम् ॥* ॥ यमः ।
'कृत्वा देवकुलं सर्व्वं प्रतिष्ठाप्य च देवताम् ।
विधाय विविधं चित्रं तल्लोकं विन्दते ध्रुवम् ॥'
नारसिंहे ।
'प्रतिमां लक्षणोपेतां नरसिंहस्य कारयेत् ।
सर्व्वपापानि सन्त्यज्य स तु विष्णुपुरं व्रजेत् ॥
प्रतिष्ठा नरसिंहस्य यः करोति यथाविधि ।
निष्कामो नरशार्दूल ! देहबन्धात् प्रमुच्यते ।
सकामो नरसिंहस्य पुरं प्राप्य प्रमोदते ॥
विधिवत् स्नापयेद्यस्तु कारयित्वा जनार्द्दनम् ।
न जातु निर्गमस्तस्य विष्णुलोकात् कथञ्चन ॥'
माधवमानसोल्लासे ।
'देवस्य प्रमितायान्तु यावन्तः परमाणवः ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥'
राजमार्त्तण्डे ।
'पुत्रोत्पत्तौ सदा ग्राद्धमन्नप्राग्रनिके तथा ।
चूड़ाकार्य्ये व्रते चैव नान्दि पुंसवनेऽपि च ॥
प्राणिग्रहे प्रतिष्ठायां प्रवेग्रे नववेग्मनः ।
एतदृद्धिकरं नाम ग्रहस्यस्य विधीयते ॥'
स्कन्द उवाच ।
'कलौ चैकाहसाध्येन प्रतिष्ठां मन्त्रवित्तवान् ।
मध्यमेनाधमेनापि प्रकुर्य्यात्तान्त्रिकैर्मतैः ॥'
तथा ।
'नित्यं नित्यक्रमे मतिमान् कुर्य्यादभ्युदयं ततः ।
विप्रान् संपूजयित्वाथ ततो यागपुरं व्रजेत् ॥
गणेग्वरग्रहदिक्पालान् प्रतिकुम्भेग्व पूजयेत् ।
स्थण्डिले विधिवद्विष्णुं परिवारगणं यजेत् ॥
स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि ।
पञ्चाग्रतैः पञ्चगव्यैः पञ्चपल्लविकैरपि ॥
तिलतैलैश्च खड्गैश्च कषायैरपि सप्तमैः ।
पञ्चपुण्योदकैर्वाथ त्रिपञ्चैरपि सप्तमैः ॥
तुलसीकुन्दमालूरपत्रजाम्बुजिपत्रकम् ।
चम्पकाम्रग्रमीपद्मकरवीरञ्च पञ्चमम् ॥
मृत्तिका करिदन्तस्य पर्व्वताश्वखुरस्य च ।
कुग्रवल्मीकसम्भूतं मृदां पञ्चकमीरितम् ॥*॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुग्रोदकम् ।
कुर्य्यात् प्राग्रप्रतिष्ठाञ्च होमं कुर्य्यादृथाविधि ।
दग्ध्वा विधिवद्दद्यात् पूर्णाहुतिं तदनन्तरम् ॥'
इति भविग्यपुराणे तृतीयभागे ६ अध्यायः ॥*॥
'चतुरङ्गुलविस्तारा दीर्घा हस्तद्वयावधि ।
पताका लोकपालानां दग्धानां परिकीर्त्तिताः ।
पञ्चहस्ताश्च वै दण्डाः पतानानां प्रकीर्त्तिताः ॥'
ज्योतिषे ।
'दुग्धं सग्रर्करञ्चैव घृतं दधि तथा मधु ।
पञ्चाग्रतमिदं प्रोक्तं विधेयं सर्व्वकर्म्मसु ॥'* ॥
प्रतिष्ठानन्तरं मातृस्थं ।
'ततः सहस्रं विप्राणामष्टोत्तरग्रतन्तथा ।
भोजयेच्च यथाग्रक्त्या पञ्चाग्रद्वाथ विंग्रतिम् ॥'
षोड़ग्रोपचाराः आसनमित्यादि । दग्रोप-चाराः पाद्यादि । पञ्चोपचारा गन्धादि ।
'सर्व्वोपचारवस्तूनामलाभे भावनैव हि ।
निर्म्मलेनोदकेनानुपूर्व्वंतेत्याह नारदः ॥' * ॥
नारसिंहे ।
'स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ॥'
कालिकापुराणम् ।
'यद्दीयते च देवेभ्यो गन्धपुष्पादिकं तथा ।
अर्घ्यपात्रस्थितैस्तोयैरभिषिच्य तमुत्सृजेत् ॥'
देवीपुराणम् ।
'होमो यद्दादिपूजायां घृतमष्टोत्तरं भवेत् ।
अष्टाविंग्तितिरष्टौ वा यथाग्रक्ति विधीयते ॥'
काल्यायनः ।
'आज्यं द्रव्यमनादेग्ये जुहोतिग्व विधीयते ॥'
अत्र नीराजनमाह पूजारत्नाकरे देवीपुराणम् ।
'ग्रुक्लमेर्य्यादिनिर्दोषैर्घृतदीपैश्च पुष्कलैः ।
यावतो दिवसान् वीर ! देवा नीराजनं कृतम् ।
तावत्कल्पसहस्राणि स्वर्गलोके महीयते ॥
भक्त्या प्रिदंप्रदीपाद्यैर्घृताद्यैर्दीपवृन्दकैः ।
ओषधीभिश्च मेधाभिः सर्व्वबीजैर्यवादिभिः ॥
नवम्यां पर्व्वकालेषु यात्राकाले विग्येषतः ।
यः कुर्य्याच्छ्रद्धया वीर ! देवा नीराजनं नरः ।
यस्तु कुर्य्यात् प्रदीपेन सूर्य्यलोकं स गच्छति ।'
पर्व्वकाल उत्सवकालः । देवा इति स्त्रीत्वम-विवक्षितं बहुग्रो निबन्धकारैर्व्याख्यातत्वात् आचाराच्च ॥ * ॥ अथ प्रतिष्ठितमूर्त्तौ कदा-चित् पूजाभावेन महाकपिलपञ्चरात्रम् ।
'एकाहपूजाविहतौ कुर्य्याद्विगुणमर्चनम् ।
त्रिरात्रे च महापूजा संप्रोक्षणमतः परम् ॥
मासाद्दर्शनेकाहपूजा यदि विहन्यते ।
प्रतिष्ठेवेष्यते कैश्चित् कैश्चित् संप्रोक्षणक्रमः ॥'
संप्रोक्षणं ॐ देवस्य त्वेत्यादिना ।
'गवां रसैश्च संस्नाप्य दर्भतोयैर्विशोध्य च ।
प्रोक्षयेत् प्रोक्षणीतोयैर्मूलेनाष्टोत्तरं शतम् ॥
सपुष्पं सकुग्रं प्राक्षिं न्यसेद्देवस्य मस्तके ।
पञ्चवारं जपेन्मूलमष्टोत्तरग्रतोत्तरम् ॥
ततो मूलेन मूर्त्तादिपीठान्तं संस्पृग्रेदिति ।
तत्त्वन्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत् ॥
प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत् ।
पूजाञ्च महतीं कुर्य्यात् स्वतन्त्रोक्तां यथाविधि ।
यागहोमादिषु प्रायः संक्षेपोऽयं विधिः स्मृतः ॥'
अमृतग्रसमग्नेन तु बौधायनः । तासां द्रव्यवत् स्नानग्रौचानां देवार्चानां भूयः प्रतिष्ठापयेत् ।
तासामसृग्रसमग्नानाम् । प्रकृतिद्रव्यस्य ताम्रादे-र्यैरैरग्रौचं ज्ञात्वा पुनः प्रतिष्ठां कारयेदिति रत्नाकरः । तदा पूज्यत्वमित्याहुः रत्नाकरा-दयः ॥ * ॥ आदित्यपुराणे ।
'खण्डिते स्फुटिते दग्धे भाजमानविवर्जिते ।
योगहीने पशुस्पृष्टे पतिते दुष्टभूमिषु ॥
अन्यमन्त्रार्चिते चैव पतितस्पर्शदूषिते ।
दग्रखेतेषु नो चक्रुः सन्निधानं दिवौकसः ॥
इति सर्व्वगतो विष्णुः परिभाष्याचकार ह ॥'
उपचारद्रव्याणि नारदातिलके ।
'पाद्यं ग्यामाकदूर्व्वाजविष्णुक्रान्ताभिरिष्यते ।'
तदुक्तजलमिति ग्रेषः ।
'गन्धपुष्पाक्षतयवकुग्राग्रतिलसर्षपैः ।
सदूर्व्वैः सर्व्वदेवानामर्घ्यमेतदुदीरितम् ॥
जातीलवङ्गकक्कोलैर्जलमाचमनीयकम् ।
आज्यं दधिमधून्मिश्रं मधुपर्कं निवेदयेत् ॥'
काल्यायनः ।
'मधुपर्कं दधिमधुघृतसर्षपसहितं कांस्ये कांस्येन ।'
गन्धचन्दनकर्पूरकालागुरुभिरीरितः । पुष्पाणि देवदेयानि ।
'गुग्गुल्वगुरुग्रीरग्रर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नीचैर्देवस्य देग्रिकः ।
तत्र तत्र जलं दद्यादुपचारान्तरान्तरे ॥'
अत्र दृद्धिहोमौ स्वनावग्यकौ यथाग्रक्ति द्रव्य-भिधानात् ॥ * ॥ तथा चाप्यधनानां यज्ञ-मन्त्रेण विनापि पूजामाह विष्णुधर्म्मोत्तर-प्रथमकाण्डम् ।
'पूजा कार्य्या बहिर्वेद्यां श्रद्धया भृगुनन्दन ! ।
न लक्ष्यदक्षिणैर्यज्ञैर्लोदिह कदाचन ॥
विष्णुं देवनिकायस्थं यथाग्रद्धमरिन्दम ! ।
तपसा पूजयेन्नित्यं तस्माद्दरिधनो नरः ॥"* ॥
यत्तूक्तादे देवप्रतिष्ठावास्तुयागग्रहोत्सर्गाद्यहा तत्रैव दृद्धिग्राद्धं कुर्य्यात् । गणग्रः क्रियमाणे त्रितिवचनात् ॥ * ॥ तथा एकस्मिन्नपि अग्नौ होमद्वयं विधेयम् । एकाभावनेकहोमकरण-पक्षे तन्त्रेण परिसमूहनादिकमाह गोभिलः ।
गणेग्वरेकं परिसमूहनमग्नौ वह्निः पर्य्युक्षण-माज्यभागाविति ॥ * ॥ पूजादिकन्तु प्रत्येकमेव ।
ब्रह्मपुराणे ।
'देवानां प्रतिमा यत्र घृताभ्यङ्क्तमा भवेत् ।
पलानि तस्मे देयानि श्रद्धया पञ्चविंग्तिः ॥
अशौचरग्रतपलं स्नाने देयञ्च सर्व्वदा ॥'
नारसिंहे ।
यवगोधूमजेक्षूणैरङ्गुल्योज्झेन वारिणा ।
प्रक्षाल्य देवदेवेग्मं वारुणं लोकमाप्नुयात् ॥

प्रतिस

पादपीठन्तु यो दद्यात् विल्वपत्रनिघर्षणम् ।
उष्णाम्बुना च प्रक्षाल्य सर्व्वपापैः प्रमुच्यते ॥"
इति प्रतिष्ठातत्त्वम् ॥ * ॥
प्रकारान्तरं गारुड़े ४८ अध्याये मत्स्यपुराणे च द्रष्टव्यम् ।

प्रतिष्ठानं, क्ली, (प्रतितिष्ठत्यत्रेति । प्रति + स्था + अधिकरणे ल्युट् ।) नगरविशेषः । विठोर इति ख्यातः । तत्र पुरूरवा राजचक्रवर्त्ती आसीत् । इति महाभारतम् ॥ (यथा, देवीभागवते । ९ । १३ । १-२ ।
"सुद्युम्ने तु दिवं याते राज्यं चक्रे पुरूरवाः ।
सगुणश्च सुरूपश्च प्रजारञ्जनतत्परः ॥
प्रतिष्ठाने पुरे रम्ये राज्यं सर्व्वनमस्कृतम् ।
चकार सर्व्वधर्म्मज्ञः प्रजारञ्जनतत्परः ॥"
इदं हि गङ्गातीरस्थम् । यथा, हरिवंशे । २६ । ४०—४८ ।
"एवं प्रभावो राजासौदैलस्तु पुरुषोत्तमः ।
देशे पुण्यतमे चैव महर्षिभिरभिष्टुते ।
राज्यं स कारयामास प्रयागे पृथिवीपतिः ।
उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः ॥")
प्रतिष्ठितः, त्रि, (प्रतिष्ठा जातास्येति । तारकादित्वात् इतच् ।) प्रतिष्ठायुक्तः । (यथा, देवीभागवते । ३ । ६ । ७३ ।
"सदुद्भूतस्वहङ्कारस्तेनाहं कारणं शिवा ।
अहङ्कारश्च मे कार्य्यं त्रिगुणोऽसौ प्रतिष्ठितः ॥")
गौरवान्वितः । यथा,—
"प्रतिष्ठितानाञ्चाकीर्त्तिर्मरणादतिरिच्यते ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ३४ अध्यायः ॥
निष्पन्नयागः । संस्कृतः । इति प्रतिष्ठाशब्दार्थदर्शनात् ॥

प्रतिसरः, पुं, (प्रतिसरतीति । प्रति + सृ + अच् ।) मन्त्रभेदः । माल्यम् । कङ्कणम् । ब्रह्मयष्टिः । चक्रयष्टम् । इति मेदिनी । रे, २०६ ॥ प्रातःकालः । इति शब्दमाला ॥

प्रतिसरः, पुं क्ली, (प्रतिसरतीति । प्रति + सृ + अच् ।) मङ्गलम् । आरक्षम् । करक्षत्रम् । नियोज्ये, त्रि । इति मेदिनी । रे, २०६ ॥

प्रतिसर्गः, पुं, (प्रतिरूपः सर्गः ।) ब्रह्मणः सृष्यनन्तरं दक्षादीनां सृष्टिः । स च पुराणपञ्चलक्षणान्तर्गतलक्षणविशेषः । यथा,—
ऋषय ऊचुः ।
"आदिसर्गस्त्वया सूत ! कथितो विस्तरेण च ।
प्रतिसर्गञ्च ये येषामधिपास्तान् वदस्व नः ॥
सूत उवाच ।
यदाभिषिक्तः सकलाधिराज्ये
पृथुर्धरित्र्यामधिपो बभूव ।
तदौषधीनामधिपश्चकार
यज्ञव्रतानां तपसाञ्च सोमम् ॥
नक्षत्रताराद्विजवृक्षगुल्म-
लतावितानस्य च रक्षगर्भः ।
अपामधीशं वरुणं धनानां
राजानं प्रभुं वैश्रवणञ्च तद्वत् ॥

प्रतिस

विष्णुं रवीणामधिपं वसूना-
मग्निञ्च लोकाधिपतिश्चकार ।
प्रजापतीनामधिपञ्च दक्षं
चकार शक्रं मरुतामधीशम् ॥
दैत्याधिपानामथ दानवानां
प्रह्लादमीशञ्च यमं पितॄणाम् ।
पिशाचरक्षःप्रभृतेश्चवेता-
लराजत्वेच भूतपतिम् ॥
प्राचेयशैलेच पतिं गिरीणा-
मीशं समुद्रं सरिन्नदानाम् ।
गन्धर्व्वविद्याधरकिन्नराणा-
मीशं पुनश्चित्ररथञ्चकार ॥
नागाधिपं वासुकिसुग्रवीर्य्यं
सर्पाधिपं तक्षकमादिदेश ।
दिग्वारणानामधिपञ्चकार
गजेन्द्रमैरावतनामधेयम् ॥
सुपर्णमीशं पततामथाश्व-
राजानमुच्चैःश्रवसञ्चकार ।
सिंहं मृगाणां वृषभं गवाञ्च
ब्रह्मं पुनः सर्व्ववनस्पतीनाम् ॥
पितामहः पूर्व्वमथाभ्यषिञ्च-
देतान् पुनः पूर्व्वदिगाधिनाथान् ।
पूर्व्वेण दिक्पालमथाभ्यषिञ्च-
न्नान्ना सुधर्म्माणमरातिकेतुम् ॥
ततोऽधिपन्दक्षिणतश्चकार
सर्व्वेश्वरं यज्ञपदाभिधानम् ।
सकेतुमन्तं दिगधीशमीश-
श्चकार पश्चाज्जगतां गर्भः ॥
हिरण्यरोमाणमुदग्दिगीशं
प्रजापतिं मेरुसुतञ्चकार ।
अद्यापि कुर्व्वन्ति दिशामधीशाः
शब्दं वहन्तस्तु सुवोऽभिरक्षाम् ॥
चतुर्भिरेभिः पृथुनामधेयो
नृपोऽभिषिक्तः प्रथमं पृथिव्याम् ।
मन्वन्तरे चापि गते त एव
वैवस्वतश्चक्रुरमं पृथिव्याम् ॥
गतेऽन्तरे चाक्षुषनामधेये
वैवस्वताख्ये च पुनः प्रवृत्ते ।
प्रजापतिः सोऽस्य चराचरस्य
बभूव सूर्य्यान्वयवंशकर्त्ता ॥"
इति मात्स्ये आधिपत्यसेचनं मन्वन्तराधिपत्यं नाम ८ अध्यायः ॥ * ॥ अपि च ।
मार्कण्डेय उवाच ।
"वाराहोऽयं श्रुतः सर्गो वराहाधिष्ठितो यतः ।
प्रतिसर्गः श्रुतः सो वै दक्षाद्यैः श्रुतः पृथक् ॥
रुद्रो विराड् मनुर्दक्षो मरीच्याद्यास्तु मानसाः ।
यं यं सर्गं पृथक् चक्रुः प्रतिसर्गः स स स्मृतः ॥
विराट्सुतोऽङ्गसंज्ञान् मनून् यैर्व्याप्तं जगत् ।
मनुः स्वप्न मनून् सृष्ट्वा चकार बहुधाः प्रजाः ॥
प्रजाः सिसृक्षुः स मनुर्योऽसौ स्वायम्भुवाभवः ।
अङ्गजत् प्रथमं षड्वै मनून् षड्परान् सुतान् ॥
स्वारोचिषश्चोत्तमश्च तामसो रैवतस्तथा ।

प्रतिस

चाक्षुषश्च महातेजा विवस्वान् परतस्तथा ॥
यक्षरक्षःपिशाचाँश्च नागगन्धर्व्वकिन्नरान् ।
विद्याधरानप्सरसः सिद्धान् भूतगणान् बहून् ॥
मेघान् सविद्युतो दृप्तान् लतागुल्मद्रुमादिकान् ।
मत्स्यान् पशूंश्च कीटांश्च जलजान् स्थलजांस्तथा ॥
एताद्दृशानि सर्व्वाणि मनुः स्वायम्भुवः सृते ।
सहितः सङ्गजे सोऽस्य प्रतिसर्गः प्रकीर्त्तितः ॥
अन्ये यज्ञमनवो ये वै तेऽपि स्वे स्वेऽन्तरेऽन्तरे ।
प्रतिसर्गं स्वयं कृत्वा प्राप्नुवन्ति चराचरम् ॥
यज्ञस्य संभृतं यज्ञान् यूपं प्राग्वंशमेव च ।
धर्म्माधर्म्मौ गुणान् सर्व्वान् वराहः सृष्टवान् पुरा ॥
सुतान् बहून् ससृतपाद्य दक्षो देवर्षिसत्तमान् ।
महर्षीन् सोमपादीँश्च बहून् पितृगणांस्तथा ॥
सृष्टिं प्रवर्त्तयामास प्रतिसर्गोऽस्य स स्मृतः ।
अजायन्त सुखादृषिभ्यश्चक्रिया बाहुयुग्मतः ॥
ऊर्व्वोर्वैश्याः पदः शूद्राश्चतुर्वर्णाश्चतुर्मुखात् ।
ब्रह्मणः प्रतिसर्गोऽयं ब्राह्मः सर्गस्तः स्मृतः ॥
मरीचेः कश्यपो जातः कश्यपात् सकलं जगत् ।
देवा दैत्या दानवाश्च तस्य सर्गः प्रकीर्त्तितः ॥
अत्रेर्गोत्रादभूच्चन्द्रश्चन्द्रवंशस्ततोऽभवत् ।
तेन सर्व्वं जगद्व्याप्तं सोमसर्गः प्रकीर्त्तितः ॥
अथर्व्वाङ्गिरसौ कृत्वा पुत्राश्च बहवोऽपरे ।
मन्त्रयन्नादयो ये वै ते सर्व्वेऽङ्गिरसः स्मृताः ॥
आद्यपाद्याः पुलस्त्यस्य पुत्राश्चान्ये च राक्षसाः ।
प्रतिसर्गाः पुलस्त्यस्य बलवीर्य्यसमन्विताः ॥
काद्रवेया गजा अश्वाः प्रजा बहुतरास्तथा ।
सङ्गजे पुलहेनैष सर्गस्तस्य प्रकीर्त्तितः ॥
क्रतोः पुत्रा वालिखिल्याः सर्व्वज्ञा भूरितेजसः ।
अष्टाशीतिसहस्राणि ज्वलद्भास्करसन्निभाः ॥
प्रचेतसः सुताः सर्व्वे ये वै प्राचेतसाः स्मृताः ।
षड्यशीतिसहस्राणि पावकोपमतेजसः ॥
सुकालिनो वशिष्ठस्य पुत्राश्चान्येऽथ योगिनः ।
आरुन्धतेयाः पञ्चाग्निदृवाग्निष्टः सर्गं उच्यते ॥
भृगोश्च भार्गवा जाता ये वै दैत्यपुरोधसः ।
कवयस्ते महाप्राज्ञास्तैर्व्याप्तमखिलं जगत् ॥
नारदात्तारका जाता विमानानि तथैव च ।
प्रश्नोत्तराख्येवान्ये वृथ्यं गीतञ्च कौतुकम् ॥
एते दक्षमरीच्याद्याः कृतदारान् बहून् सुतान् ।
उत्पाद्योत्पाद्य पृथिवीं दिवञ्च समपूरयन् ॥
तेषां सुतेभ्यश्च सुताश्चतुःसुतेभ्यः परे सुताः ।
ससृतपन्नाः प्रवर्त्तन्ते येऽद्यापि भुवनेषु वै ॥
विष्णोस्तु चक्षुषः सूर्य्यो मनसश्चन्द्रमाः स्मृतः ।
श्रोत्राद्वायुः ससङ्गतो सुखादग्निरजायत ॥
प्रतिसर्गो ह्ययं विष्णोस्तथा चापि दिशो दश ।
सृष्ट्यर्थश्चन्द्रमाः पञ्चादत्रिनेत्राद्वातरत् ॥
भास्करः कश्यपाज्जातो भार्य्ययास्य समर्चितः ।
रुद्राश्च बहवो जाता भूतग्रामाश्चतुर्व्विधाः ॥
श्वपराहोष्ट्ररूपाश्च प्लवगोमायुगोसुखाः ।
ऋक्षमार्जारवदनाः सिंहव्याघ्रमुखाः परे ॥

नानाशस्त्रधराः सर्व्वे नानारूपा महाबलाः।
एष वः प्रतिसर्गोऽपि कथितो द्विजसत्तमाः॥"
इति कालिकापुराणे २६ अध्यायः॥

प्रतिसव्यं, त्रि, (गतिगतं सव्यं वाममिति।) प्रतिकूलम्। इति जटाधरः॥

प्रतिसान्धानिकः, पुं, (प्रतिसन्धानं प्रयोजनमस्येति। प्रतिसन्धान + ठक्।) मागधः। स्तुतिपाठकः। इति शब्दरत्नावली॥

प्रतिसीरा, स्त्री, (प्रतिसिनोति प्रतिबध्नातीति। प्रति + सि + "सृसिधिमिनां दीर्घश्च।" उणा० २। २५। इति क्रन् दीर्घश्च। ततष्टाप्।) यवनिका। अवधायकपटः। इत्यमरः।२।६।१२०॥

प्रतिसूर्य्यः, पुं, (प्रतिरूपः सूर्य्य इति प्रादिसमासः।) शकलासः। इति त्रिकाण्डशेषः॥ (यथा, सुश्रुते। कल्पस्थाने २ अध्याये।
"प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः॥"
उपसूर्य्यकमण्डलम्। यथा, बृहत्संहितायाम्। ३७। २।
"प्रतिसूर्य्यानां माला
दण्डभयातङ्कपरिहन्त्री॥")

प्रतिसूर्य्यकः, पुं, (प्रतिसूर्य्य + स्वार्थे कन्।) शकलासः। (यथा, उत्तररामचरिते द्वितीयेऽङ्के।
"सीमान: प्रदरोदरेषु विलसत्सख्याभासो या स्वयं
लक्ष्यन्ते प्रतिसूर्य्यकैरजगरस्वेदद्रवः पीयते॥"
तद्दष्टस्य चिकित्सा सुश्रुते कल्पस्थाने ८ अध्याये उक्ता। यथा,—
"प्रतिसूर्य्यकदष्टानां सर्पदष्टवदाचरेत्॥")
उपसूर्य्यकमण्डलम्। इति विश्वः॥ (अस्य शुभाशुभलक्षणम्। यथा, बृहत्संहितायाम्।३७।१-३।
"प्रतिसूर्य्यकः प्रशस्तो
दिवसकृततुवर्णसप्रभः स्निग्धः।
वैदूर्य्यनिभः स्वच्छः
शुक्लश्च क्षेमसौभिक्षः॥
पीतो व्याधिं जनय-
त्यग्न्योकरूपश्च शस्त्रकोपाय।
प्रतिसूर्य्यानां माला
दण्डभयातङ्कपरिहन्त्री॥
दिवसकृतः प्रतिसूर्य्यो
जलकटुदग्दक्षिणे स्थितोऽनिलकृत्।
उभयस्थः सलिलभयं
नृपमुपरि निहन्त्यधो जनहा॥")

प्रतिसृष्टः, त्रि, (प्रति + सृज् + कर्म्मणि क्तः।) प्रेषितः। प्रत्याख्यातः। इति मेदिनी। टे, ६५॥ दत्तः। इति धरणिः॥

प्रतिसोमा, स्त्री, (प्रतिरूपः सोमः सोमवल्ली यस्याः।) महिषवल्ली। इति राजनिर्घण्टः॥

प्रतिस्पर्द्धा, स्त्री, (प्रति + स्पर्द्ध + भावे अङ्।) प्रतिकक्षा। स्पर्द्धा। इति शब्दरत्नावली॥

प्रतिहतः, त्रि, (प्रतिहन्यते स्मेति। प्रति + हन् + क्तः।) द्विषः। प्रतिस्खलितः। रुद्धः। इति। मेदिनी। ते, २०५॥ निराग्रः। यथा,—
"मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः॥"
इति सुद्राङ्कितामरकोषे पाठः। ३। १। ४१॥

प्रतिहस्तकः, पुं, (प्रतिरूपः हस्तोऽवलम्बनरूपो यस्य। कप्।) प्रतिनिधिः। यथा,—
"आश्रितानां भृतौ स्वामिसेवायां धर्म्मसेवने।
पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः॥"
इति हितोपदेशे नीतिशास्त्रे सुहृद्भेदो नाम द्वितीयकथासंग्रहः परिच्छेदः॥

प्रतिहारः, पुं, (प्रतिविषयं प्रतीकं वा हरति स्वामिसमीपमानयतीति। प्रति + हृ + अण्।) द्वारपालः (यथा, देवीभागवते। १। १७। ३०।
"ज्ञातो हि प्रतिहारेण ज्ञानी कश्चिद् द्विजोत्तमः॥"
प्रति + हृ + आधारे घञ्।) द्वारः। इति शब्दरत्नावली॥ (यथा, रघौ। ६। २०।
"ततो नृपाणां श्रुतवृत्तवंशा
पुंवत्प्रगल्भा प्रतिहाररक्षी।
प्राक्सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा॥"
प्रतिरूपं हरतीति। हृ + अण्।) मायाकारः। इत्यमरटीकायां भरतः। २। १०। ११॥

प्रतिहासः, पुं, (प्रतिरूपो हासो यस्य।) करवीरः। इत्यमरः। २। ४। ७६॥ हासकर्म्मणि हास्यञ्च॥

प्रतीकः, पुं, (प्रतीयते प्रत्येति वा इति। प्रति + इ + अलीकादयश्चेति ईकन्प्रत्ययेन साधुः।) एकदेशः। अङ्गम्। (यथा, ऋग्वेदे। ७। ३६। १।
"वि सानुना पृथिवी सस्र उर्व्वी पृथु प्रतीक मध्येधे अग्निः॥"
"तथाग्निः पृथु विस्तीर्णं प्रतीकं पृथिव्या अवयवम्॥" इति तद्भाष्ये सायनः॥) खाद्यवाद्यनिषेधो यथा, कौर्म्मे १५ अध्याये।
"न खाद्यन्नखवाद्यं वै कुर्य्यान्नाङ्गुलिना पिबेत्॥"
अपि च, लक्ष्मीचरित्रे।
"खाङ्गे पीठे च वाद्यं हरति धनपतेः केशवस्यापि लक्ष्मीम्॥"
प्रतिकूले, त्रि। इत्यमरः।१।६।७०॥ विलोमः। इति मेदिनी। के, ११२॥

प्रतीकारः, पुं, (प्रतिकरणमिति। प्रति + कृ + घञ्। उपसर्गस्येति पक्षे दीर्घः।) कृतापकारस्य प्रत्यपकारः। तत्पर्य्यायः। वैरशुद्धिः २ वैरनिर्य्यातनम् ३। इत्यमरः। २। ८। ११०॥ (यथा, देवीभागवते। ३। २५। ३।
"दुर्गया सौ हतौ संख्ये नापराधो ममात्र वै।
अवश्यम्भाविभावेषु प्रतीकारो न विद्यते॥")
चिकित्सा। इति शब्दमाला॥

प्रतीकाश्यः, पुं, (प्रतिकाश्यते इति। प्रति + काश् + घञ्। उपसर्गस्य दीर्घः।) उपमा। इत्यमरः।२। १०। ३८॥ (यथा, महाभारते। ५। १५४। ३२।
"अद्य त्वां भगिनी रक्षः क्षय्यमाणं मयासकृत्।
द्रक्ष्यत्यद्रिप्रतीकाशं सिंहेनेव महाद्विपम्॥")

प्रतीक्षा, स्त्री, (प्रति + ईक्ष + अङ्।) प्रतीक्षणम्। अपेक्षा। प्रतिपूर्ब्बेक्षधातोर्भावे अप्रत्ययेन निष्पन्नः॥ (यथा महाभारते। ८। ४०। ५२।
"मित्रप्रतीक्षया शल्य धार्त्तराष्ट्रस्य चोभयोः।
अपवादैतिक्षाभिक्षिभिरेतैर्हि जीवसि॥")

प्रतीक्ष्यः, त्रि, (प्रतीक्ष्यते इति। प्रति + ईक्ष + ण्यत्।) पूज्यः। इत्यमरः। ३। १। ५॥ (यथा, रघौ। ५। १४।
"भक्तिः प्रतीक्ष्येषु कुलोचिता ते
पूर्व्वान् महाभाग! तयातिशेषे।
अतीतकालक्षमभ्युपैतः
त्वामर्थिभावादिति मे विषादः॥")
प्रतीक्षणीयः॥ (यथा, माघे। २। १०८।
"प्रतीक्ष्यं तत्प्रतीच्यायै प्रतिपद्यै प्रतिश्रुतम्॥")

प्रतीची, स्त्री, (प्रतिदिनान्तं प्रतिदिनान्ते इत्यर्थः। अञ्चति सूर्य्यमिति। अञ्चु गतिपूजनयोः + "ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च।" ३। २। ५९। इति क्विन् अनुलोपो दीर्घश्च। "उगितश्च।"४। १। ६। इति ङीप्।) पश्चिमदिक्। इत्यमरः। १। ३। १॥ (यथा, महाभारते। ४। ४१। १८।
"येनासौ व्रजयत् क्षत्रं प्रतीचीं दिशमाहवे।
कलापो ग्रीव तस्यासौनृमादीपुत्रस्य धीमतः॥"
त्रि, पश्चिमाभिमुखी। यथा, ऋग्वेदे।१।६२।६।
"विश्वानि देवी भुवनाभिचक्ष्या
प्रतीची चक्षुरुर्विया वि भाति।
विश्वं जीवं चरसे बोधयन्ती
विश्वस्य वाचमविदन् मनायोः॥"
"भुवना भुवनानि भूतजातान्यभिचक्ष्याभिप्रकाश्य प्रकाशयन्ति कृत्वानन्तरं प्रतीची प्रत्यङ्मुखी सती।" इति तद्भाष्ये सायनः॥ प्रतिनिवृत्तमुखी। यथा, ऋग्वेदे। १। १२४। ७।
"अभ्रातेव पुंस एति प्रतीची गर्त्तारुगिव सनये धनानाम्॥"
"अभ्रातेव भ्रातृरहितेव पुंसः पित्रादीन् प्रतीची स्वकीयस्थानात् प्रतिनिवृत्तमुखी।" इति तद्भाष्ये सायनः॥)

प्रतीचीन, त्रि, (प्रतीचि भवम्। प्रत्यच् + "विभाषाञ्चेरदिक् स्त्रियाम्।"५। ४। ८। इति खः। अञ्चोपो दीर्घश्च।) प्रत्यक्। प्रतीच्यां भवः। इति हेमचन्द्रः। २। ८२॥ (पराङ्मुखम्। यथा, ऋग्वेदे। ३। ५५। ८।
"सूरस्येव युध्यतो अन्तमस्य प्रतीचीनं दर्शये विश्वमायत्॥"
"विश्वं भूतजातं प्रतीचीनं पराङ्मुखं दर्शये।" इति तद्भाष्ये सायनः॥)

प्रतीच्य:, त्रि प्रतीच्यां भव:। प्रतीचीशब्दाद्भवार्थे ष्णाप्रत्ययनिष्पन्न:॥ पश्चिमदिग्जात:। (यथा, महाभारते। २। ३२। १२।
"रामठान् हारहूणांश्च प्रतीच्यांश्चैव ये नृपा:।
तान् सर्व्वान् स्ववशे चक्रे ग्रासनादेव पाण्डव:॥")

प्रतीत:, त्रि, (प्रतीयते स्म प्रत्येकमगादवेति। प्रति + इण् + कर्म्मणि कर्त्तरि वा क्त:।) ख्यात:। इत्यमर:। ३। १। ६॥ (यथा, रामायणे। २। ८। १०।
"प्राप्तां वसुमतीं प्रीतिं प्रतीतां हतविद्विषम्।
उपस्थास्यसि कौशल्यां दासीवत्त्वं कृताञ्जलि:॥")
सादर:। ज्ञात:। हृष्ट:। इति मेदिनी। ते, १२५॥ (पुं, विश्वेदेवानामन्यतम:। यथा, महाभारते। १३। ६१। ३२।
"अनुकम्पो प्रतीतश्च प्रदाताथांशुमांस्तथा॥")

प्रतीति:, स्त्री, (प्रति + इण् + भावे क्तिन्।) ज्ञानम्। इति जटाधर:॥ (यथा, भाषापरिच्छेदे। ११४।
"अन्योन्याभावतो नास्य चरितार्थत्वमुच्यते।
असात् पृथगिदं नेति प्रतीतिर्हि विलक्षणा॥")
ख्याति:। आदर:। हर्ष:। इति प्रतीतशब्दार्थदर्शनात्॥

प्रतीप, त्रि (प्रतिकूला आपो यस्मिन्। "ऋक्पूरब्धू:पथामानक्षे।" ५। ४। ७४। इति अप्रत्यय:। "ङ्याप्प्रातिपदिकात्।" ४। १। ६३। इति ङीप्।) प्रतिकूलम्। इति हेमचन्द्र:। ६। १०१॥ (यथा, भागवते। ३। १। १४।
"क एतन्मनोप्रबुधाव जिघ्रं
दाक्षा: सुतं यद्बलिनेव पुर:।
तस्मिन् प्रतीप: परलोक आस्ते
निर्व्यासलोमाशु पुराच्छ्वसान:॥"
क्ली, अर्थालङ्कारभेद:। तस्य लक्षणादिकं साहित्यदर्पणे १० परिच्छेदे उक्तम्। यथा,—
"प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्।
विम्बलत्वाभिधानं वा प्रतीपमिति कथ्यते॥
क्रमेण उदाहरणं यथा,—
वक्त्रेनेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरं
मेघैरन्तरितं प्रिये! तव मुखच्छायानुकारी शशी।
योऽपि त्वद्गमनानुकूलमतयस्ते राजहंसा गता-
स्तत्ताडङ्कविनोदमात्रमपि मे दैवेन न क्षम्यते॥
तद्वक्त्रं यदि सुद्विता शशिकथा सा हेम सा चेद्द्युति-
स्तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत् क्षितं का सुधा।
धिक्शब्दं धिगु धिग्भवो यदि च ते किंवा बहु ब्रूमहे
यत्सत्यं पुनरुक्तवस्तुविमुख: सर्गक्रमो वेधस:॥
अत्र वक्त्रादिभिरेव चन्द्रादीनां श्लोभातिवहनात् तेषां निष्फलत्वम्।
उक्ता चात्यन्तसत्कर्षमत्युत्कृष्टस्य वस्तुन:।
कल्पितेऽप्युपमानत्वे प्रतीपं केचिदूचिरे।
यथा,—
अहमेव गुरु: सुदारुणाना-
मिति हालाहल! तात! मास्म दृप्य:।
ननु सन्ति भवादृशानि भूयो
भुवनेऽस्मिन् वचनानि दुर्ज्जनानाम्॥
अत्र प्रथमपादे उत्कर्षातिशय उक्त:। तदनुक्तौ तु नायमलङ्कार:॥")

प्रतीप:, पुं, चन्द्रवंशीय ऋक्षराजपुत्र:। प्रान्तनुराजपिता च। इति पुराणं शब्दरत्नावली च॥ (यथा, महाभारते। १। ९७। २०।
"प्रतीप: प्रान्तनुं पुत्रं यौवनस्थं तलोऽन्वशात्।"
एतस्य विवरणं तत्रैवाध्याये विस्तरशो द्रष्टव्यम्॥)

प्रतीपदर्शिनी, स्त्री, (प्रतीपं प्रतिकूलं यामं वा पश्यतीति। दृश् + णिनि:। ङीप्।) स्त्रीमात्रम्। इत्यमर:। २। ६। २॥

प्रतीर, क्ली, (प्रतीरयति जलगतिकर्म्मसमाप्तिं नयतीति। प्र + तीर कर्म्मसमाप्तौ + क:।) तटम्। इत्यमर:। १। १०। ७॥

प्रतीवाप:, पुं, (प्रत्युप्यते प्रक्षिप्यते अथवा निक्षिप्यतेऽस्मिन्निति। प्रति + वप निक्षेपादौ + घञ्।) गलितस्य स्वर्णादेर्द्रव्यान्तरेणावचूर्णनम्। इति स्वामी॥ न्यसनम्। नि:क्षेपणमिति यावत्। इति सुभूति:॥ उपद्रव:। इति सुकुट:॥
"आवापस्तु प्रतीवापो मारोरीतिरुपद्रव:॥"
इति राजनिर्घण्टे:॥
इत्यतत्पदशब्दटीकायां भरत:॥ पानीयौषधविशेष:। यथा,—
"उषकादि प्रतीवापं पिबेत् संग्रहणाय वै॥"
इति विद्याधिचिकित्सायां चक्रपाणिदत्त:॥
(यथा च सुश्रुते सूत्रस्थाने। ४३ अध्याये।
"मदनफलमञ्जकार्थं वा पिप्पल्यादि प्रतीवापं तण्डुलीं वा निम्बरूपिका कषाययोरन्यतरेण सप्तपर्णं कफजव्याधिहरम्॥")

प्रतीवेश्य:, पुं, (प्रतिविश्यते इति। प्रति + विश् + घञ्। उपसर्गस्य दीर्घ:।) प्रतिवेश्य:। इति शब्दरत्नावली॥

प्रतीवेशी, [न्] स्त्री, (प्रतीवेशोऽस्यास्तीति। प्रतिवेश्य + "अत इनिठनौ।" ५। २। ११५। इति इनि:।) प्रतिवेशी। इति शब्दरत्नावली॥

प्रतीहार:, पुं, (प्रतिहियते अत्रेति। प्रति + हृ + घञ्। उपसर्गस्य दीर्घ:।) द्वार:। (प्रतिहरत्यत्रेति। कर्त्तरि घञ्।) द्वारपाल:। इत्यमर:। २। ८। ६॥ तस्य लक्षणम्। यथा,—
"इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शन:।
अप्रमादी सदा दक्ष: प्रतीहार: स उच्यते॥"
इति चाणक्यसंग्रह:॥
अपि च। मात्स्ये १९८ अध्याय:।
"प्रांशु: सुरूपो दक्षश्च प्रियवादी न चोद्धत:।
चित्तज्ञश्च सर्व्वेषां प्रतीहारो विधीयते॥"
सन्धिविशेष:। यथा, हारावली।
"मयास्योपकृतं पूर्व्वमयञ्चोपकरिष्यति।
इति य: क्रियते सन्धि: प्रतीहार: स उच्यते॥"

प्रतीहारी, [न्] त्रि, (प्रतिहरति स्वामिसमीपे सर्व्वविषयमिति। प्रति + हृ + णिनि:। उपसर्गस्य दीर्घ:। यद्वा, प्रतीहारो रक्षणीयत्वेनास्यास्तीति। इनि:।) द्वारी। द्वारार्थकप्रतीहारशब्दादस्यर्थे इनिप्रत्ययेन निष्पन्न:॥

प्रतीहारी, स्त्री, (प्रतीहारोऽस्या अस्तीति। अच्। गौरादित्वात् ङीष्।) द्वा:स्थिता। इति मेदिनी। रे, २८०॥

प्रतीहास:, पुं, (प्रतिरूपो हासोऽस्य। उपसर्गस्य दीर्घ:।) करवीर:। इत्यमर:। २। ४। ७६॥

प्रतुद:, पुं, (प्रतुदतीति। प्र + तुद् + क:।) यथादि:। आदिना श्येन:। कङ्क:। काक:। दोषकाक:। उलूक:। मयूर:। इति राजनिर्घण्टे:॥ अस्यमांसगुणा:।
"लावाद्या विष्किरो वर्ग: प्रतुदा जाङ्गला मृगा:।
लघव: प्रीतमधुरा: कषायाश्च हिता नृणाम्॥"
इति राजवल्लभ:॥
(यथा च चरके सूत्रस्थाने सप्तविंशाध्याये।
"प्रतपत्रो भृङ्गराज: कोयष्टी जीवजीवक:।
कैरात: कोकिलोऽत्यूहो गोपाकप्रियाह्वय:॥
लट्वा लट्वाको वभ्रुर्वेटहा डिण्डिमानक:।
जटी दुन्दुभिवाक्शावलोहपृष्ठकुलिङ्गका:॥
कपोतशुकसारङ्गचिरिटीकक्रियाटिका:।
शारिकाकलविङ्कश्च षटकोऽङ्गारचूडक:॥
यारावत: पाण्डुविक इत्युक्ता: प्रतुदा द्विजा:॥"
यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।
"कपोतपारावतभृङ्गराजपरभृतकोयष्टिककुलिङ्गयष्टकुलिङ्गगोचोड़कडिण्डिमानकशतपत्रकमाङ्गलिन्दकभेदाग्निमुखसारिकाशलघुलोहिरिङ्गलङ्गालदूषकसुपक्षीखञ्जरीटकहारीतदात्यूहप्रभृतय: प्रतुदा:।")

प्रतोद:, पुं, (प्रतुद्यतेऽनेनेति। प्र + तुद् + करणे घञ्।) अश्वादिताड़नदण्ड:। चाबुक् इति भाषा। तत्पर्य्याय:। प्राजनम् २ प्रवयणम् ३ तोत्रम् ४ तोदनम् ५। इति जटाधर:॥ (यथा, महाभारते। २। ५४। ८।
"प्रकालयेद्धिय: सर्व्वा: प्रतोदेनेव सारथि:।
प्रत्यभिध्यभियं दीप्तां चित्तक्षुभरतर्षभ!॥")

प्रतोली, स्त्री, (प्रतुद्यते परिभीयते इति। प्र + तुद् परिभवे + घञ्। गौरादित्वात् ङीष्।) रथ्या। इत्यमर:। २। २। ३॥ (यथा, रामायणे। २। ८०। १८।
"बहुपांशुचयाद्यापि परिखापरिवारिता:।
तत्रेन्द्रनीलप्रतिमा: प्रतोलीवरगोभिता:॥")
अभ्यन्तरमार्ग:। नाह इति ख्याते। कूली इति च ख्याते। हट्टादिमध्यनिर्म्मिते पथीति भाङ्ग:। दुर्गनगरद्वारे इति केचित्। इति तट्टीकायां भरत:॥

प्रत्तं, त्रि, (प्रदीयते स्मेति। प्र + दा + क्त:। "अच उपसर्गात् त:।" ७। ४। ४७। इति तादेश:।) दत्तम्। इति मुग्धबोधव्याकरणम्॥

प्रत्नः, त्रि, (प्र+"नञ्च पुराणे प्रात्।" इति चकारात् त्नप्।) पुरातनः। इत्यमरः। ३।१।७७॥ (यथा, भागवते। ५।२०।५।
"प्रत्नस्य विष्णो रूपं यत् सत्यस्यर्तस्य ब्रह्मणः।
अमृतस्य च मृत्योश्च सूर्य्यमात्मानमीमहि॥")

प्रत्यक्, [च्] त्रि, (प्रतीचतीति। प्रति+अनच्+किन्।) पश्चिमदिक्। पश्चिमदेशः। (यथा, मनुः। २।२१।
"हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः॥")
पश्चिमकालः। इति मेदिनी। चे, १६॥ (य, प्रतीच्यां दिशि प्रतीच्या दिशः प्रतीची दिग्वा एवं देशे काले च। "दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिक्देशकालेष्वस्तातिः।" ५।३।२७। इति अस्तातिः। "अधसेर्लुक्।" ५।३।३०। इति अस्तातेर्लुक्। "लुक् तद्धितलुकि।" १।२।४९। इति लुक्। दिक्देशकाले। इति मेदिनी। चे, १६॥ प्रतिलोमम्। यथा, भागवते। ४।२२।३७।
"यः क्षेत्रवित्तपतया हृदि विश्वगावि-
प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि॥"
प्रतिकूलम्। यथा, महाभारते। ५।८४।६।
"प्रत्यग्दुर्मेधसः प्राङ्मुखाः सिन्धुसत्तमाः।
विपरीता दिशः सर्व्वा न प्राज्ञायत किञ्चन॥")

प्रत्यक्पर्णी, स्त्री, (प्रत्यञ्चि पर्णानि अस्याः। पाककर्णेति ङीष्।) अपामार्गः। इत्यमरः। २।४।८६॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"रक्तोऽन्यो वप्रिरो दृक्तफलो धामार्गवोऽपि च।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली॥")
द्रवन्ती। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"द्रवन्ती सावरी चित्रा प्रत्यक्पर्ण्यर्कपर्ण्यपि।
चित्रोपचित्रान्यश्रोधी प्रत्यक्श्रेण्यार्षकर्ण्यपि॥"

प्रत्यक्पुष्पी, स्त्री, (प्रत्यञ्चि पुष्पाण्यस्याः। पाककर्णेति ङीष्।) अपामार्गः। इत्यमरः। २।४।८४॥ (यथा, सुश्रुते। १।४६।
"प्रत्यक्पुष्पीसदापुष्पीनिम्बकयायाणामन्यतमेनालोड्य मधुसैन्धवयुक्तां मात्रां पाययित्वा वामयेत्॥" पर्य्यायान्तरमस्याः। यथा,—
"स्थलमञ्जर्य्यपामार्गः प्रत्यक्पुष्पी मयूरकः।
क्षारमञ्जर्यधोघण्टा शिखरी खरमञ्जरी॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यक्श्रेणी, स्त्री, (प्रतीची श्रेणी यस्याः। समासान्तविधेरनित्यत्वात् न कप्।) दन्तीवृक्षः। मूषिकपर्णी। इत्यमरः। २।४।८८॥ (अस्याः पर्य्यायो यथा,—
"प्रत्यक्श्रेणी द्रवन्ती च पुत्रश्रेण्याखुपर्णिका।
वृषपर्ण्याखुपर्णी च मूषिका काञ्जिपत्रिका॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यक्ष, त्रि, (प्रतिगतमक्षि इन्द्रियं यत्र। समासे अच्। यद्वा, प्रत्यक्षमस्त्यस्येति। अर्श आदित्वात् अच्।) इन्द्रियग्राह्यम्। तत्पर्य्यायः। ऐन्द्रियकम् २। इत्यमरः। ३।१।७८॥ (यथा, ब्रह्मवैवर्त्ते। २।१।५२।
"यत्पादपद्मनखरदृष्टये चात्मशुद्धये।
न च दृष्टश्च स्वप्नेऽपि प्रत्यक्षस्यापि का कथा॥")
अनुभवविशेषः। तत् षड्विधम्। घ्राणजम् १ रासनम् २ श्रावणम् ३ चाक्षुषम् ४ स्पार्शनम् ५ मानसम् ६। निर्व्विकल्पकसविकल्पकभेदेन प्रत्येकं द्विविधम्। निर्व्विकल्पकन्तु अतीन्द्रियम्। सविकल्पकं मनोग्राह्यम्। षड्विधप्रत्यक्षे आश्रयस्य महत्त्वं कारणम्। इन्द्रियं करणम्। विषयेण सह इन्द्रियसन्निकर्षः। अस्य व्यापारः। यथा, भाषापरिच्छेदे।
"घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्।
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः॥
उद्भूतरूपं नयनस्य गोचरो
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम्॥
क्रियां जातिं योग्यवृत्तिं समवायञ्च तादृशम्।
यद्भाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः॥
उद्भूतसंख्यवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपान्यचक्षुषो योग्यं रूपमत्रापि कारणम्॥
द्रव्याश्रये त्वचो योगो मनसा ज्ञानकारणम्।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः स्मृतिः॥
ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते।
महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम्॥
विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः॥"
(यथा, विष्णूत्तरखण्डे।
"देवानर्च्चय सञ्चय प्रतिदिनं पुण्यानि जन्मान्तरे
भोगाय प्रयतो महाक्रतुविधौ स्वर्गाय हिंसां कुरु।
इत्यं वञ्चकवञ्चनोत्पथगता बुद्धिस्तदेयाचिरा-
दप्रत्यक्षपदार्थसार्थरहितं पश्यानमारोहतु॥")
यं, अञ्चि अञ्चि प्रतीति वीप्सायां यथार्थत्वेन समासः। अक्ष्णोराभिमुख्यमित्यर्थे। "तत्रेनाभिप्रती आभिमुख्ये।" २।१।१४। इत्यव्ययीभावः। "अव्ययीभावे शरत्प्रभृतिभ्यः।" ५।४।१०७। इत्यत्र "प्रतिपरसमनुभ्योऽक्ष्णः।" इति टच्। इन्द्रियलक्षणम्। अपरोक्षम्। यथा, मनुः। ६।५२।
"फलन्त्यनभिसन्धाय क्षेत्रिणां बीजिनान्तथा।
प्रत्यक्षं क्षेत्रिणामर्थो बीजादयोनिर्गरीयसी॥")

प्रत्यक्षदर्शनं, त्रि, (प्रत्यक्षं पश्यतीति। प्रत्यक्ष+दृश्+ल्युः। प्रत्यक्षं दर्शनं यस्येति वा।) साक्षी। इति शब्दमाला॥ (क्ली, प्रत्यक्षं दर्शनम्। यथा, महाभारते। ३।५७।३६।
"प्रत्यक्षदर्शनं यज्ञे गतिश्चानुत्तमा शुभा।
नैवधाये ददौ शक्रः प्रीयमाणः शचीपतिः॥")

प्रत्यक्षवादी, [न्] पुं, (प्रत्यक्षमेव प्रमाणत्वेन वदतीति। वद्+णिनिः।) बौद्धः। नास्तिकः। प्रत्यक्षं प्रमाणमिति तन्मतम्॥ (प्रत्यक्षं वदति यस्तत्र, त्रि॥)

प्रत्यक्षी, [न्] त्रि, (प्रत्यक्षमस्त्यस्येति। प्रत्यक्ष+इनिः।) यक्षदृष्टार्थः। इति त्रिकाण्डशेषः॥

प्रत्यगाशापतिः, पुं, (प्रत्यगाशायाः पश्चिमस्या दिशः अधिपतिः।) वरुणः। इति हलायुधः॥

प्रत्यग्रः, त्रि, (प्रतिगतमग्रं श्रेष्ठं प्रथमदर्शनं वास्येति।) नूतनः। इत्यमरः। ३।१।७७॥ (यथा, महाभारते। ८।३८।१८।
"दासीनां निष्ककण्ठीनां मागधीनां शतं तथा।
प्रत्यग्रवयसां दद्यां यो मे ब्रूयाद्वनञ्जयम्॥")
शोधितः। इति जटाधरः॥ (पुं, उपरिचरस्य वसोः पुत्राणामन्यतमः। यथा, भागवते। ९।२२।६।
"वसुस्तस्योपरिचरो बृहद्रथमुखास्सुतः।
कुशाम्बमत्स्यप्रत्यग्राद्याश्चैदिपाद्याश्च चैदिपाः॥")

प्रत्यग्रथः, पुं, (प्रतीच्यां रथ इव।) अहिच्छत्रदेशः। इति हेमचन्द्रः। ४।२६॥

प्रत्यङ्, [च्] त्रि, (प्रत्यञ्चतीति। प्रति+अनच्+किन्।) पश्चिमदिक्। पश्चिमदेशः। पश्चिमकालः। प्रतिपूर्ब्बाञ्चधातोः कर्त्तरि विच्प्रत्ययेन निष्पन्नः। इति व्याकरणम्॥ (यथा, शतपथब्राह्मणे। १२।८।२।३५।
"ऋतवः सर्व्वे पराञ्चः सर्व्वे प्रत्यञ्चः॥"
प्रतिगतः। अभिमुखः। यथा, ऋग्वेदे। १।५०।५।
"प्रत्यङ्देवानां विशः प्रत्यङुदेषि मानुषान्।
प्रत्यङ् विश्वं स्वर्दृशे॥"
"हे सूर्य्य त्वं देवानां विशो मरुन्नामकान् देवान्। मरुतो वै देवानां विश इति श्रुत्यन्तरात्। तान् मरुत्संज्ञकान् देवान् प्रत्यङुदेषि। तान् प्रतिगच्छन्नुदयं प्राप्नोषि। तेषामभिमुखं यथा भवति तथेत्यर्थः। तथा मानुषान् मनुष्यान् प्रत्यङुदेषि। तेऽपि यथास्मदभिमुखमेव सूर्य्य उदेतीति मन्यन्ते। तथा विश्वं व्याप्तं स्वः स्वर्लोकं दृशे द्रष्टुं प्रत्यङुदेषि। यथा स्वर्लोकवासिनो जनाः सर्व्वेऽपि स्वाभिमुखेन सूर्य्यं पश्यन्तीति।" इति तद्भाष्ये सायनः॥ अन्तर्यामी। इति श्रीधरस्वामी॥ यथा, भागवते। ६।८।२०।
"प्रत्यञ्चमादिपुरुषमुपतस्थुः समाहिताः॥")

प्रत्यङ्ग, क्ली, (प्रतिगतमङ्गमिति।) अवयवविशेषः। यथा, शब्दचन्द्रिकायाम्।
"प्रत्यङ्गं कर्णनासाक्षिचिबुकाङ्गानि करादिकम्॥"
(यथा, रामायणे। २।७४।१४।
"अङ्गप्रत्यङ्गजः पुत्रो हृदयाच्चापि जायते।
तस्मात् प्रियतरो मातुः प्रिया एव तु बान्धवाः॥"
"अतः परं प्रत्यङ्गानि वक्ष्यन्ते। मस्तकोदरपृष्ठनाभिललाटनासाचिबुकवक्षिग्रीवा इत्येता एकैकाः। कर्णनेत्रनासाभ्रूशङ्खांसगण्डकक्षस्तनपार्श्वस्फिग्जानुबाहूरुप्रभृतयो द्वे द्वे विंशतिः

रङ्गुलयः। सोतांसि च वक्ष्यमाणानि। एष-प्रत्यङ्गविभाग उक्तः॥" इति सुश्रुते शारीर-स्थाने पञ्चमेऽध्याये॥ अप्रधानम्। यथा, निरुक्ते। ७।१।५।

"एक आत्मा बहुधा स्तूयते एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्त्यपि॥" अङ्गं अङ्गं प्रति। यथा, गीतगोविन्दे। ११।११।

"ध्यायं नीलनिचोलचारुसुदृशां प्रत्यङ्गमालिङ्गति॥"

तथा च मनुः। ८। २०८।

"यस्मिन् कर्म्मणि यास्तु स्युरुक्ताः प्रत्यङ्ग-दक्षिणाः।
स एव ता आददीत भजेरन् सर्व्व एव वा॥"

नृपविशेषे, पुं। यथा, महाभारते। १।९।२३५।

"महापुराणसम्भाव्यः प्रत्यङ्गः परहा श्रुतिः।
एते चान्ये च राजानः प्रतश्चोऽथ सहस्रशः।
अयुतेऽयुतप्रचाश्चैव संख्याताश्चैव पद्मशः॥")

प्रत्यङ्गिरा, स्त्री, देवीविशेषः। तस्या ध्यानम्। यथा,—

"ग्रीवोपरिसमासीनां रक्ताम्बरतनुच्छदाम्।
सर्व्वाभरणसंयुक्तां गुञ्जाहारविभूषिताम्॥
षोड़शाब्दाञ्च युवतीं पीनोन्नतपयोधराम्।
कपालकर्त्तृकाहस्तां परमानन्दरूपिणीम्।
वामदक्षिणयोगेन ध्यायेन्मन्त्रविदुत्तमाम्॥"
इति प्रत्यङ्गिरास्तोत्रान्तर्गतम्॥

प्रत्यनीकः, पुं, (प्रतिगतः अनीकं युद्धमिति।) शत्रुः। इति हेमचन्द्रः। ३। ३८२॥ (प्रति-पक्षः। विरोधी। यथा, महाभारते। ७। १०। ३६।

"यस्य यन्ता हृषीकेशो योद्धा यस्य धनञ्जयः।
रथस्य तस्य कः संख्ये प्रत्यनीको भवेदपि॥"

यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।

"व्यतीवायतयामास्तु चपा येष्वृतुषु स्मृताः।
तेषु तत्प्रत्यनीकाढ्यं सुस्नोतप्रातरेव तु॥"

स्त्री, प्रतिपक्षसैन्यम्। यथा, भगवद्गीतायाम्। ११। ३२।

"ऋतेऽपि त्वां न भविष्यन्ति सर्व्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः॥"

अलङ्कारविशेषः। यदुक्तं काव्यप्रकाशे।

"प्रतिपक्षमशक्तेन प्रतिकर्त्तुं तिरस्क्रिया।
या तदीयस्य तत्तुल्ये प्रत्यनीकं तदुच्यते॥"

उदाहरणं यथा,—

"त्वं विनिर्म्मितमनोभवरूपः
सा च सुन्दर! भवत्यनुरक्ता।
पञ्चभिर्युगपदेव शरैस्तां
तापयत्यनुशयादिव कामः॥")

प्रत्यन्तः, पुं, (प्रतिगतोऽन्तमिति। अव्ययादयः क्रान्ताद्यर्थे। इति समासः।) म्लेच्छदेशः। इत्य-मरः। २। १। ७॥ (प्रान्तदुर्गम्। यथा, रघुः। ४। २६।

"स गुप्तमूलप्रत्यन्तः सुहृत्पार्ष्णिरयान्वितः।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया॥"

"गुप्तौ मूलं स्वनिवासस्थानं प्रत्यन्तः प्राप्तदुर्गश्च येन सः।" इति तट्टीकायां मल्लिनाथः॥ तद्देशजाते, त्रि॥ यथा, वराहसंहितायाम्। ४। २१।

"प्रत्यन्तान् कृतपांश्च हन्त्युडुपतिः शृङ्गे कुजेना-हते॥")

सन्निकृष्टे च त्रि॥

प्रत्यन्तपर्व्वतः, पुं, (प्रत्यन्तः सन्निकृष्टः पर्व्वतः।) महापर्व्वतसमीपवर्त्तिक्षुद्रपर्व्वतः। इत्यमरः। २। ३। ७॥

प्रत्यभियोगः, पुं, (प्रतिरूपोऽभियोगः।) प्रत्यप-राधः। यथा,—

"अभियोगमनिस्तीर्य्य नैनं प्रत्यभियोजयेत्।
अभियुक्तञ्च नार्य्येण नोक्तं विप्रकृतिं नयेत्॥"

"अभियुञ्जत इति अभियोगोऽपराधस्तमभियोग-मनिस्तीर्य्यापहृत्यैनमभियोक्तारं न प्रत्यभियोज-येदपराधेन न संयोजयेत्। यद्यपि प्रत्यभि-स्कन्दनं प्रत्यभियोगरूपन्तथापि स्वापराधपरि-हारात्मकत्वान्नास्य प्रतिषेधस्य विषयः। अतः स्वाभियोगानुपमर्द्दनरूपस्य प्रत्यभियोगस्यायं निषेधः।" इति मिताक्षरा॥

प्रत्यभिवादः, पुं, (प्रति+अभि+वद्+णिच्+भावे घञ्।) अभिवाद्यस्य गुरोराशीर्व्वचनम्। इति गोयीचन्द्रः।

प्रत्यभिवादनं, पुं, (प्रति+अभि+वद्+णिच्+भावे ल्युट्।) अभिवाद्यस्य गुरोराशीर्व्वचनम्। इति गोयीचन्द्रः॥

प्रत्ययः, पुं, (प्रति+इण्+भावकरणादौ यथा-यथं अच्।) अधीनः। शपथः। ज्ञानम्। (यथा, गारुड़े २३६ अध्याये।

"जायत्संस्कारसम्भूतः प्रत्ययो विषयान्वितः॥")

विश्वासः। (यथा, कुमारे। ४। ४५।

"इत्थं रतेः किमपि भूतमदृश्यरूपं
मन्दीचकार मरणव्यवसायबुद्धिम्।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेणा-
माश्वासयत् सुचरितार्थपदैर्वचोभिः॥")

हेतुः। (यथा, रघुः। १०। ३।

"अतिष्ठत् प्रत्ययापेक्षसन्ततिः स चिरं नृपः॥")

रज्जुः। ग्रन्थः। इत्यमरः। ३। ३। १४७॥ प्रथितत्वम्। आचारः। इति मेदिनी। ये, ८६॥ निश्चयः। (यथा, मनुः। ८। २५३।

"यदि संशय एव स्यात् लिङ्गानामपि दर्शने।
साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः॥")

स्वादुः। इति हेमचन्द्रः॥ प्रकृत्युत्तरजायमानः। वोपदेवेनास्य त्वसंज्ञा कृता। प्रत्ययन्तीति सुप्तिङन्तसंहिताः प्रत्ययाः। इति संक्षिप्तसार-व्याकरणम्॥ (यथा, रघुः। ११। ५६।

"ता नराधिपसुता नृपात्मजे-
स्ते च ताभिरगमन् कृतार्थताम्।
सोऽभवद्वरवधूसमागमः
प्रत्ययप्रकृतियोगसन्निभः॥")

सहकारी। इति त्रिकाण्डशेषः॥

प्रत्ययकारिणी, स्त्री, (प्रत्ययस्य विश्वासस्य कारिणी।) मुद्रा। इति त्रिकाण्डशेषः॥ मोहर इति भाषा॥

प्रत्ययितः, त्रि, (प्रत्ययो विश्वासः सञ्जातोऽस्येति। प्रत्यय+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५।२। ३६। इति इतच्।) आप्तः। विश्वस्तः। इत्यमरः। २। ८। १३॥ (यथा, कथासरित्-सागरे। १५। ६८।

"तत् श्रुत्वा यक्षराजा सोऽथ प्रत्ययितान् द्विजान्॥")

प्रत्यर्थी, [न्] त्रि, (प्रतिगतोऽर्थं प्रतिकूलं वा अर्थ-यते इति। प्रति+अर्थ+णिनिः।) शत्रुः। इत्यमरः। २। ८। ११॥ (यथा, साहित्य-दर्पणे। ३ परिच्छेदे।

"नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि पाणिद्वयं
वक्षोजौ करिकुम्भविभ्रमकरौमत्युन्नतिं
गच्छतः॥")

पुं, प्रतिवादी। इति शब्दरत्नावली॥ (यथा, मनुः। ८। ७६।

"सभान्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ।
प्राड्विवाकोऽनुयुञ्जीत विधिनानेन साम्ना-
यन्॥")

अर्थिप्रतिपक्षः। यथा,—

"प्रत्यर्थिनोऽग्रगतो लेखं यथावेदितमर्थिना।
समामासतदर्द्धाक्षरनामजात्यादिचिह्नितम्॥"

"अर्थ्यत इत्यर्थः साध्यः। सोऽस्यास्तीत्यर्थी। ततःप्रतिपक्षः प्रत्यर्थी।" इति मिताक्षरा॥

प्रत्यर्पितं, त्रि, (प्रति+ऋ+णिच्+क्तः।) प्रति-दत्तम्। यथा। "अर्थस्यवहारोऽपि एकस्मिन् वत्सरे यत्संख्याकं यद्द्रव्यं यतो येन गृहीतं प्रत्यर्पितञ्चेति। पुनरन्यस्मिन् वत्सरे तद्द्रव्यं तत्संख्याकं ततस्तेन गृहीतं याच्यमानोऽपि यदि ब्रूयात् सत्यं गृहीतं प्रत्यर्पितञ्चेति वत्सरान्तरे गृहीतं प्रत्यर्पितञ्च नास्मिन् वत्सर इत्युपयुज्यते।" इति मिताक्षरा॥

प्रत्यवसानं, क्ली, (प्रति+अव+सो+ल्युट्।) भोजनम्। इति हेमचन्द्रः। ३। ८७॥ (पर्य्यायान्तरमस्य यथा,—

"जग्धिः प्रत्यवसानञ्च भक्षणं भोजनाशने॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यवसितं, त्रि, (प्रति+अव+सो+क्तः।) भक्षि-तम्। इत्यमरः। ३। २। ११०॥

प्रत्यवस्कन्दः, पुं, (प्रति+अव+स्कन्द+घञ्।) चतुर्व्विधोत्तरान्तर्गतोत्तरविशेषः॥

प्रत्यवस्कन्दनं, क्ली, (प्रति+अव+स्कन्द+ल्युट्।) चतुर्व्विधोत्तरान्तर्गतोत्तरविशेषः। यथा,—

"प्रत्यवस्कन्दनं नाम सत्यं गृहीतं प्रतिदत्तं प्रतिग्रहलब्धमिति वा। यथाह नारदः।
अर्थिना लेखितो योऽर्थः प्रत्यर्थी यदि तत्तया।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं स्मृतम्॥"
इति मिताक्षरा॥

अपि च ।
"अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तन्तथा।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत् ॥"
इति व्यवहारतत्त्वे बृहस्पतिवचनम् ॥

प्रत्यवस्थाता, [तृ] त्रि, (प्रतिपक्षतया अवतिष्ठते इति । प्रति + अव + स्था + तृच् ।) शत्रुः । इति हेमचन्द्रः । ३ । ३६२ ॥

प्रत्यवायः, पुं, (प्रत्यवाप्यते इति । प्रति + अव + अय गतौ + घञ् ।) पापम् । दुरदृष्टम् । यथा,
"स्वयं केचिदुपात्तस्य दुरितस्य प्रचक्षते ।
अनुतप्तिं तथा चान्ये प्रत्यवायस्य मन्यते ॥"
इत्यैकादशीतत्त्वे जाबालवचनम् ॥

प्रत्यशा, [न्] पुं, (प्रतिरूपः अक्षा ।) गैरिकम् । इति चिकाण्डशेषः ॥

प्रत्यहं, अ, (अहः अहः प्रति । "नपुंसकादन्यतरस्याम् ।" ५ । ४ । १०८ । इति टच् ।) प्रतिदिनम् । यथा, कुमारसम्भवे ।
"गिरिश्चसुषुवे चारु प्रत्यहं सा सुकेशिनी ॥"

प्रत्याकारः, पुं, (प्रतिरूपः खड्गेन सदृशः आकारो यस्य ।) खड्गकोषः । इति हेमचन्द्रः । ३ । ४४७ ॥ खाप् इति भाषा ॥

प्रत्याख्यातः, त्रि, (प्रति + आ + ख्या + क्तः ।) दूरीकृतः । तत्पर्य्यायः । प्रत्यादिष्टः २ निरस्तः ३ निराकृतः ४ निक्षतः ५ विप्रकृतः ६ । इत्यमरः । ३ । २ । ४० ॥ क्वचित् पुस्तके प्रत्यादिष्टेत्यादिश्लोकमेकमधिकं दृश्यते तच्चात्यचतुष्कं प्रत्यादिष्टे । परत्यचतुष्कं तिरस्कृते । इति तट्टीकासारसुन्दरी ॥ (यथा, महाभारते । १ । १५६ । ८ ।
"वीरेणाहं तथानेन त्वया वापि यशस्विनि ! ।
प्रत्याख्याता न जीवामि सत्यमेतद्ब्रवीमि ते ॥")

प्रत्याख्यानं, क्ली, (प्रति + आ + ख्या + भावे ल्युट् ।) निराकरणम् । तत्पर्य्यायः । निरसनम् २ प्रत्यादेशः ३ निराकृतिः ४ । इत्यमरः । ३ । २ । ३१ ॥ (यथा, मार्कण्डेये । ६१ । ७२ ।
"प्रत्याख्यानार्हमेतत्तु त्वत्तश्चापमवाप्स्यसि ॥")

प्रत्यागमः, पुं, (प्रत्यागमनमिति । प्रति + आ + गम् + अप् ।) प्रत्यागमनम् । फिरे आसा इति भाषा ॥ यथा,—
"तीर्थयात्रासमारम्भे तीर्थप्रत्यागमेषु च ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(यथा, हरिवंशे भविष्यपर्व्वणि । ३६ । २४ ।
"किमर्थं ब्रूहि विप्रेन्द्र ! अस्मिन् प्रत्यागमो हि वः ॥")

प्रत्यादिष्टः, त्रि, (प्रत्यादिशते स्मेति । प्रति + आ + दिश् + क्तः ।) प्रत्यादेशविशिष्टः । तत्पर्य्यायः । निरस्तः २ प्रत्याख्यातः ३ निराकृतः ४ निक्षतः ५ विप्रकृतः ६ । इत्यमरः । ३ । १ । ४० ॥

प्रत्यादेशः, पुं, (प्रत्यादेशनमिति । प्रति + आ + दिश् + घञ् ।) निराकरणम् । प्रत्याख्यानम् । इत्यमरः । ३ । २ । ३१ ॥ (यथा, मेघदूते । ६६ ।
"प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ॥"
प्रसङ्गनिवारणम् । इति कुल्लूकभट्टः ॥ यथा, मनुः । ८ । ३३४ ।
"येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥")
भक्तं प्रति देवतामादेशश्च ॥

प्रत्याध्मानः, पुं, (प्रतिगतमाध्मानमीषत्-ग्रन्थौ यत्र ।) वातव्याधिविशेषः । तस्य लक्षणमाह ।
"विसृत्तपार्श्वहृदयं तदेवामाशयोत्थितम् ।
प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम् ॥"
विसृत्तपार्श्वहृदयं पार्श्वे हृदये विहाय जातं तदेवाध्मानम् । कफव्याकुलितानिलं कफेनावरुद्धवातम् ॥ * ॥ अथ तस्य चिकित्सा ।
"प्रत्याध्माने समुत्पन्ने कुर्य्यात् वमनलङ्घने ।
दीपनादि नियुञ्जीत पूर्व्ववद्वस्तिकर्म्म च ॥"
इति भावप्रकाशः ॥

प्रत्यालीढं, क्ली, (प्रति + आ + लिह + क्तः ।) धन्विनां पादसंस्थानविशेषः । तच्चोर्द्धस्य वामपादप्रसारे दक्षिणपादसङ्कोचः । इत्यमरटीकायां भरतः ॥ धन्विनामवस्थानविशेषः । यथा,—
"स्यात् प्रत्यालीढमालीढं समं पादं तथापरम् ।
वैशाखं मण्डलञ्चेति धन्विनां स्थानपञ्चकम् ॥
स्याद्दक्षपादसङ्कोचात् वामपादप्रसारणात् ।
प्रत्यालीढमिति प्रोक्तमालीढं तद्विपर्य्ययात् ॥
तुल्यं पादयुगं यत्र समपादमुदाहृतम् ।
वितस्त्यन्तरितं पादयुगं वैशाखमुच्यते ।
मण्डलाकारपादाभ्यां मण्डलं स्थानमीरितम् ॥"
इति शब्दरत्नावली ॥
(यथा च यादवः ।
"स्थानानि धन्विनां पञ्च तत्र वैशाखमञ्जिमाम् ।
वितस्त्यन्तरगौ पादौ मण्डलं तोरणाकृतौ ॥
समानौ स्यात् समपदमालीढं पदमग्रतः ।
दक्षिणं वाममाकृष्य प्रत्यालीढं विपर्य्ययः ॥")
अग्निते, त्रि । इति मेदिनी । ते, १२ ॥

प्रत्याशा, स्त्री, (प्रति किञ्चित् वस्तु लक्षीकृत्य आ समन्तात् अश्नुते व्याप्नोतीति । प्रति + आ + अश् + अच् । ततष्टाप् ।) आकाङ्क्षा । यथा, भ्रान्तिशतके ।
"स्फोटोऽत्र मरीचिकासु पशुवत् प्रत्याशया धावति ॥"

प्रत्यासन्नः, त्रि, (प्रति + आ + सद् + क्तः ।) निकटवर्त्ती । इति जटाधरः ॥ (यथा, प्रबोधचन्द्रोदये २ अङ्के ।
"आर्य्ये ! प्रत्यासन्नो महाराजः । तत्प्रत्युद्गमनेन संभावयतामार्य्यम् ॥")

प्रत्यासरः, पुं, (प्रत्यास्रियते इति । प्रति + आ + सृ + "अदोरप् ।" ३ । ३ । ५७ । इत्यप् ।) सैन्यपृष्ठः । इति शब्दरत्नावली ॥

प्रत्यासारः, पुं, (प्रत्यास्रियते इति । प्रति + आ + सृ + घञ् ।) यूहस्य पश्चाद्भागः । यूहस्य पश्चाद्भागान्तरम् । तत्पर्य्यायः । यूहपार्श्विः २ । इत्यमरभरतौ ॥

प्रत्याहरणं, क्ली, (प्रति + आ + हृ + भावे ल्युट् ।) प्रत्याहारः । इति शब्दरत्नावली ॥

प्रत्याहारः, पुं, (प्रति + आ + हृ + भावे घञ् ।) स्वस्वविषयेभ्य इन्द्रियाकर्षणम् । तत्पर्य्यायः । उपादानम् २ । इत्यमरः ॥ प्रत्याहरणम् ३ । इति शब्दरत्नावली ॥ स च योगाङ्गविशेषः । यथा,
"प्रत्याहारश्च तर्कश्च प्राणायामस्तृतीयकः ।
समाधिर्धारणं ध्यानं षड़ङ्गो योग उच्यते ॥"
इति तट्टीकायां भरतः ॥
प्रत्याहारमाह ।
"शब्दादिष्वनुरक्तानि निग्रह्याक्षाणि योगवित् ।
कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
अपि च ।
"इन्द्रियाणीन्द्रियार्थेभ्यः समाहृत्य स्थितो हि सः ।
मनसा सह बुद्ध्या च प्रत्याहारेण संस्थितः ॥"
इति गारुड़े २४० अध्यायः ॥
(यथा च पातञ्जले साधनपादे ।
"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥" २९ ॥
"स्वस्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इन्द्रियाणां प्रत्याहारः ॥" ५४ ॥)
अल्पेन बहूनां ग्रहणम् । यथा, अच् इति द्वादशेन सर्व्वस्वराणां ग्रहणम् । इति भरतः ॥

प्रत्युक्तिः, स्त्री, (प्रतिवचनमिति । प्रति + वच् + भावे क्तिन् । प्रतिरूपा उक्तिरिति वा ।) प्रत्युत्तरम् । इति शब्दरत्नावली ॥

प्रत्युत, अ, (प्रति च उत च इति इन्द्रः ।) वैपरीत्यम् । यथा । बुधादिवाक्यं तु न नियामकं प्रमाणाभावात् प्रत्युत फलश्रुतेर्गुणफलबोधकमिति । इति निष्यादिनत्वे जन्माष्टमीप्रकरणम् ॥ (यथा मार्कण्डेये । ६५ । २० ।
"विद्विषाक्रमणात् पुंभिरसद्भिः क्रियते तु यः ।
संयमो मुक्तये सोऽन्ते प्रत्युताधोगतिप्रदः ॥")

प्रत्युत्क्रमः, पुं, (प्रत्युत्क्रमणमिति । प्रति + उत् + क्रम् + घञ् ।) प्रधानप्रयोजनानुकूलप्रयोजनानुष्ठानम् । तत्पर्य्यायः । प्रयोगार्थः २ । इत्यमरः ॥ प्रकृष्टयोगः । इति केचित् । प्रकृष्टयुद्धार्थसंपक्रमः प्रयोगः तद्वान्यः । इति केचित् । प्रयोगो युद्धं तदभिधेय इति केचित् । प्रत्युत्क्रमो युद्धार्थ इति भागुरिः । युद्धार्थं प्रथमाक्रान्तिः । इत्यपरे । कर्म्मारम्भे प्रथमयुक्तिः प्रयोगः । इत्यपरे ॥ इति भरतः ॥

प्रत्युत्क्रान्तिः, स्त्री, (प्रति + उत् + क्रम् + क्तिन् ।) प्रत्युत्क्रमः । इत्यमरटीकायां क्षीरस्वामी ॥

प्रत्युत्तरं, क्ली, (प्रतिरूपमुत्तरम् ।) उत्तरं प्रति उत्तरम् । यथा । ममेयं भूमिः क्रमागतत्वात् इति वादुक्ते ममेयं भूमिर्दशवर्षोपभुज्यमानत्वात् इति प्रत्युत्तरम् । इति व्यवहारतत्त्वम् ॥

प्रत्युत्थानं, क्ली, (प्रत्युत्थीयते इति । प्रति + उत् + स्था + ल्युट् ।) अभ्युत्थानम् । गात्रोत्थानम् । यथा,—

"दीयन्तमप्येसचापि प्रियया चोद्ववेन च।
पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः॥"
इति श्रीभागवते। १०। ६८। २०॥

प्रत्युत्पन्नः, त्रि, (प्रति+उत्+पद्+क्तः।) उत्पत्तिविशिष्टः। प्रत्युत्पूर्व्वपद्धातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः॥

प्रत्युत्पन्नमतिः, त्रि, (प्रत्युत्पन्ना मतिर्यस्य।) सूक्ष्मबुद्धियुक्तः। तत्पर्य्यायः। कुशाग्रीयमतिः २ सूक्ष्मदर्शी ३ तत्कालधीः ४। इति हेमचन्द्रः॥ प्रतिभान्वितः। इति जटाधरः॥ (यथा,—
"प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः।
सत्यधर्म्मपरो यश्च स भिषक्पाद उच्यते॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्यायः॥)

प्रत्युद्गमनीयं, क्ली, (प्रति+उत्+गम्+अनीयर्।) धौतांशुकद्वयम्। इति मेदिनी। ये,१३४॥ (यथा, कुमारे। ७। ११।
"सा मङ्गलस्नानविशुद्धगात्री
गृहीतप्रत्युद्गमनीयवस्त्रा॥"
क्वचित् प्रत्युद्गमनीयवस्त्रा इत्यपि पाठः॥) समुपस्थानयोग्ये पूजनीये च, त्रि। इति शब्दरत्नावली॥

प्रत्युद्गमः, पुं, (प्रति+उत्+गम्+अप्।) प्रत्युत्थानम्। यथा, साहित्यदर्पणे ६ तृतीयपरिच्छेदे। ७३।
"एकत्रासनसंस्थितिः परिचिता प्रत्युद्गमाद्दूरतः॥"

प्रत्युद्गमनं, क्ली, (प्रति+उत्+गम्+ल्युट्।) प्रत्युत्थानम्। (यथा, प्रबोधचन्द्रोदये २ अङ्के।
"आर्य्य! प्रत्यासन्नो महाराजः। तत्प्रत्युद्गमनेन संभावयतामार्य्येण॥")

प्रत्यूषः, पुं, (प्रतोषति विनाशयति अन्धकारमिति। प्रति+उष् दाहे+"इगुपधज्ञेति।" ३। १। १३६। इति कः।) प्रत्यूषः। प्रातः। इत्यमरटीकायां मथुरेशः॥ (यथा, पञ्चतन्त्रे। १। २१२।
"प्रत्यूषे च स्वयंहमभ्युपेत्य द्वारदेशस्थितोऽपि विविधपौरुषत्योत्सुकतया तामाहेति॥")

प्रत्यूषः, [स्] क्ली, (प्रतोषति नाशयत्यन्धकारमिति। प्रति+उष्+"उषः कित्।" उणा० ४। २३३। इति असिः। स च कित्।) प्रत्यूषः। इत्यमरः। १। ४। २॥ यथा, भरतधृतसूर्य्यशतके।
"याति यक्तिं पुरस्तादरुणकिसलये प्रत्यूषः-
पारिजातः॥"

प्रत्यूषः, पुं, (प्रत्यूषति रुजति कामुकानिति। प्रति+ऊष् रोगे+कः।) प्रभातम्। इत्यमरः। १। ४। २॥ (यथा, मेघदूते। ३३।
"दीर्घीकुर्व्वन् पटुमदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः॥")
सूर्य्यः। इति शब्दरत्नावली॥ वसुभेदः। इति जटाधरः॥ (यथा, विष्णुपुराणे। १।१५।१११।
"वसवोऽष्टौ समाख्यातास्तेषां वक्ष्यामि विस्तरम्।
आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभावश्च वसवो नामभिः स्मृताः॥")

प्रत्यूषः, [स्] क्ली, (प्रति+ऊष्+असिः।) प्रभातम्। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। १। २१।
"प्रत्यूषस्यपराह्णे तु जीर्णेऽन्ने च प्रकुप्यति॥")

प्रत्यूहः, पुं, (प्रत्यूहनमिति। प्रति+ऊह्+घञ्।) विघ्नः। इत्यमरः। ३। २। १६॥ (यथा, मार्कण्डेये। १६। ५५।
"भर्तृशुश्रूषयादेव मया प्राप्तं महत् फलम्।
सर्व्वकामफलावाप्ता प्रत्यूहाः परिवर्जिताः॥")

प्रत्येकं, क्ली, एकं एकं प्रति। यथा, कर्पूरराखस्तोत्रे।
"प्रतैकं वा द्वयं वा त्रयमपि च परं बीजमत्यन्तगुह्यम्॥"
(यथा च कुमारे। २। ३१।
"एवं वदात्य भगवन्नाज्ञप्तं नः परैः पदम्।
प्रतैकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो!॥")

प्रथ, क प्रख्याने। ख्यातौ। इति कविकल्पद्रुमः॥ (चुरा०-परo-सकo-अकo-च सेट्।) रेफयुक्तः। क, प्राथयति। इति दुर्गादासः॥

प्रथ, म ष ड ख्यातौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्मo-अकo-सेट्।) रेफयुक्तः। म, प्रथयति। ष, प्रथा। ड, प्रथते गुणो प्रसिद्धः स्यादित्यर्थः। इति दुर्गादासः॥

प्रथमः, त्रि, (प्रथते प्रसिद्धो भवतीति। प्रथ्+"प्रथेरमच्।" उणा० ५। ६८। इति अमच्।) प्रधानम्। (यथा, रघुः। १०। ६७।
"राम इत्यभिरामेण वपुषा तस्य चोदितः।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम्॥")
आदिमः। तत्पर्य्यायः। आदिः २ पूर्व्वः ३ पौरस्त्यः ४ आद्यः ५। इत्यमरः॥ अग्रिमः ६ इति जटाधरः॥ प्राक्० इत्यव्ययवर्गे अमरः॥ (यथा, विष्णुपुराणे। १। ११। ५२।
"वाङ्मयार्थानखिलांश्चित्रं ज्ञापयेत्प्रथमं नरः॥")

प्रथा, स्त्री, (प्रथ्+"विच्छिदादिभ्योऽङ्।" ३।३।१०४। इत्यङ्। ततष्टाप्।) ख्यातिः। इत्यमरः। ३। २। ६॥ (यथा,) राजतरङ्गिण्याम्। १। १२।
"या प्रथामगमन्नेति सापि वाच्यप्रकाशने॥")

प्रथितः, त्रि, (प्रथ्+क्तः।) ख्यातः। इत्यमरः। ३। १। ६॥ (यथा, रघुः। ६। ७६।
"तेनावतीर्य्य तुरगात् प्रथितान्वयेन
पृष्टान्वयः स जलकुम्भनिषण्णदेहः॥"
खारोचिषमनोः पुत्रे, पुं। यथा, हरिवंशे। ७। १४।
"इविधः सुकृतिन्योतिरापो मूर्त्तिरयः स्मृतः।
प्रथितश्च नभस्यश्च नभ ऊर्ज्जस्वथैव च।
खारोचिषस्य पुत्रास्ते मनोस्तात! महात्मनः॥")

प्रथितिः, स्त्री, (प्रथ्+"पदिप्रथिभ्यां नित्।" उणां ४। १८२। इति तिः। स च नित्।) ख्यातिः। प्रथधातोर्भावे क्तिप्रत्ययेन निष्पन्ना। इति व्याकरणम्॥

प्रथिमा, [न्] पुं, (पृथोर्भावः। "पृथ्वादिभ्य इमनिज्वा।" ५। १। १२२। इति इमनिच्। "ऋतोऽलार्दलोर्घोः।" ६। ४। १६१। इति रः। "टेः।" ६। ४। १५५। इति टेर्लोपः।) पृथोर्भावः। पृथुत्वम्। इति सिद्धान्तकौमुदी॥ यथा,—
"प्रथिमानन्दधानेन घनेन जघनेन सा॥"
इति भट्टिः। ४। १०॥
त्रि, अतिशयेन पृथुः। पृथुशब्दादतिशयार्थे इमनिप्रत्ययेन निष्पन्नः। इति व्याकरणम्॥

प्रथिमिनी, स्त्री, (प्रथिमाऽस्यस्या इति। प्रथिमन्+"संज्ञायां मन्माभ्यां।" ५। २। १३०। इति इनिः।) प्रथिमयुक्तस्त्री। इति सिद्धान्तकौमुदी॥

प्रथिष्ठः, त्रि, अतिशयेन पृथुः। (पृथु+इष्ठन्।) अतिपृथुः। इति मुग्धबोधव्याकरणम्॥

प्रथुकः, पुं, पृथूकः। इत्यमरटीकायां रायमुकुटः॥

प्रदः, त्रि, प्रकर्षेण ददाति यः। (प्र+दा+कः।) प्रदाता। इति सिद्धान्तकौमुदी॥ (कर्म्मण्युपपदे तु "प्रे दाञः।" ३। २। ६। इति कः। यथा, मनुः। ४। २३२।
"यानप्रदाप्रदो भार्य्यामैश्वर्य्यमभयप्रदः॥")

प्रदक्षिणं, क्ली, पुं, (प्रगतं दक्षिणमिति। "तिङदृगुप्रभृतीनि च।" २। १। १७। इति समासः।) दक्षिणावर्त्तेन देवादिकसुद्दिश्य भ्रमणम्। यथा,
"एकं देवां रवौ सप्त चौणि कुर्य्याद्विनायके।
चत्वारि केशवे कुर्य्यात् शिवे चार्द्धप्रदक्षिणम्॥"
इति कर्म्मलोचनम्॥
सर्व्वदेवतातुष्टिप्रदक्षिणं यथा,—
"प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः।
दक्षिणं दर्शयेत् पार्श्वं मनसापि च दक्षिणः॥
सङ्क्षिप्य वेष्टयेत्तां देवात्प्रीतिः प्रजायते।
स च प्रदक्षिणो ज्ञेयः सर्व्वदेवौघतुष्टिदः॥
सर्व्वान् कामान् समामाद्य पश्चात्तोत्तमवाप्नुयात्॥
मनसापि च यो दद्याद्देवे भक्त्या प्रदक्षिणम्।
प्रदक्षिणादृयमयद्दे नरकाणि न पश्यति॥"
इति कालिकापुराणे ७० अध्यायः॥ *॥
अपि च। तन्त्रसारे।
"दक्षिणादायवीं गत्वा दिशं तस्याश्च शाम्भवीम्।
ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत्॥
अर्द्धचन्द्रं महेशस्य पृष्ठतश्च समीरितम्।
शिवप्रदक्षिणे मन्त्री अर्द्धचन्द्रक्रमेण तु॥
सव्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत्॥"
सोमसूत्रं जलनिःसरणस्थानम्।
"प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः।
दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः॥
त्रिधा च वेष्टयेत् सम्यक् देवतायाः प्रदक्षिणम्॥
एकहस्तप्रणामश्च एकं वापि प्रदक्षिणम्।
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम्॥"
(समर्थे, त्रि। यथा, रामायणे। ३। ४३। ५१।
"प्रदक्षिणेनातिबलेन पक्षिणा
जटायुषा बुद्धिमता च लक्ष्मण!॥"

"प्रदक्षिणेन समर्थेन।" इति तट्टीकायां रामानुजः॥)

प्रदक्षिणा, स्त्री, (प्रगता दक्षिणमिति। "तिष्ठद्गु प्रभृतीनि च। २।१।१७।" इति समासः।) प्रदक्षिणम्। यथा,—

अथ प्रदक्षिणा।

"ततः प्रदक्षिणां कुर्य्यात्सङ्ख्या भगवतो हरेः। नामानि कीर्त्तयन् प्रीतो ताक्ष्य साष्टाङ्गवन्दनम्॥"

प्रदक्षिणासङ्ख्या चोक्ता नारसिंहे।

"एकां षष्ठ्यां रवेः सप्त तिस्रो दद्याद्दिनायके। चतस्रः केशवे दद्यात् शिवे लङ्घप्रदक्षिणाम्॥"

प्रदक्षिणामाहात्म्यं वाराहे।

"प्रदक्षिणां ये कुर्व्वन्ति भक्तियुक्तेन चेतसा। न ते यमपुरं यान्ति यान्ति पुण्यकृतां गतिम्॥ यज्ञैः प्रदक्षिणं कुर्य्यात् साष्टाङ्गप्रणामकम्। दशाश्वमेधस्य फलं प्राप्नुयान्नात्र संशयः॥"

स्कान्दे ब्रह्मनारदसंवादे॥

"विष्णोर्विमानं यः कुर्य्यात् सङ्कल्पा प्रदक्षिणम्। अश्वमेधसहस्रस्य फलमाप्नोति मानवः॥"

तत्रैव चातुर्मास्यमाहात्म्ये।

"चतुर्व्वारं भ्रमीभिस्तु जगत् सर्व्वं चराचरम्। क्रान्तं भवति विप्राग्र्य! तत्तीर्थगमनाधिकम्॥"

तत्रैवान्यत्र।

"प्रदक्षिणं तु यः कुर्य्याद्धरिं भक्त्या समन्वितः। हंसयुक्तविमानेन विष्णुलोकं स गच्छति॥"

नारसिंहे।

"प्रदक्षिणेन चैकेन देवदेवस्य मन्दिरे। क्रतेन यत् फलं नृणां तच्छृणुष्व नृपात्मज!॥ पृथ्वीप्रदक्षिणफलं यत्तत् प्राप्य हरिं व्रजेत्॥"

अन्यत्र च।

"एवं ज्ञात्वा तु ज्ञानस्य यः कुर्य्याद्विप्रदक्षिणम्। सप्तद्वीपवतीपुण्यं लभते तु पदे पदे॥ पठन्नामसहस्रन्तु नामान्येवाथ केवलम्॥"

भक्तिसुधोदये।

"विष्णुं प्रदक्षिणीकुर्व्वन् यत्रयावर्त्तते पुनः। तदेवावर्त्तनं तस्य पुनर्नावर्त्तते भवे॥"

हरिनारदीये यमभगीरथसंवादे।

"प्रदक्षिणत्रयं कुर्य्यात् यो विष्णोर्मुनिसत्तम!। सर्व्वपापविनिर्म्मुक्तो देवेन्द्रत्वं समश्नुते॥"

तत्रैव प्रदक्षिणमाहात्म्ये सुधर्म्मोपाख्यानारम्भे।

"भक्त्या कुर्व्वन्ति ये विष्णोः प्रदक्षिणचतुष्टयम्। तेऽपि यान्ति परं स्थानं सर्व्वलोकोत्तमोत्तमम्॥ तत् स्थानं यत् सुधर्म्मस्य पूर्व्वस्मिन् गृहजन्मनि। लब्धप्रदक्षिणाभावान्नष्टासिद्धिरभूदिति॥"

अथ प्रदक्षिणायां निषिद्धं विष्णुस्मृतौ।

"एकहस्तप्रणामञ्च एका चैव प्रदक्षिणा। अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम्॥"

अकाले भोजनादिसमये। किञ्च।

"लक्ष्मीस्य पुरतो नैव सूर्य्यस्यैव प्रदक्षिणाम्। कुर्य्याद्भ्रमरिकारूपं वेणुस्त्रापादनौ प्रभौ॥"

तथा चोक्तम्।

"प्रदक्षिणं न कर्त्तव्यं विमुखत्वाच्च कारणम्॥"

इति श्रीहरिभक्तिविलासे ८ विलासः॥

प्रदत्तं, त्रि, (प्र+दा+क्तः।) प्रकर्षेण दत्तम्। इति मुग्धबोधव्याकरणम्॥

प्रदरः, पुं, (प्र+दॄ विदारणे+"ऋदोरप्।" ३।३।५७। इति भावादौ यथायथं अप्।) भङ्गः। वायुः। इत्यमरः॥ विदारः। नारीरुगभेदः। इति मेदिनी॥ *॥ अस्य नामान्तरं अङ्गदरम्। तत्तु पलितयोन्या रक्तादिधातुचरणम्। अस्य निदानम्। यथा,—

"विरुद्धमद्याध्यशनादजीर्णाद् गर्भप्रपातादतिमैथुनाच्च। यानाश्वयोगादतिकर्षणाच्च भाराभिघाताच्छयनाद्विषाच्च॥"

अङ्गदरं भवेत् सर्व्वं साङ्गमर्दं सवेदनम्। तस्यातिदुष्टौ दौर्ब्बल्यं भ्रमो मूर्च्छा मदस्तृषा। दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः॥"

स च चतुर्व्विधो यथा,—

"तं श्लेष्मपित्तानिलसन्निपाते-चतुःप्रकारं प्रदरं वदन्ति॥"

श्लैष्मिकस्य तस्य लक्षणम्।

"आमं सपिच्छाप्रतिमं सपाण्डु-पुलाकतोयप्रतिमं कफात्तु॥"

पैत्तिकस्य तस्य लक्षणम्।

"सपीतनीलासितरक्तमुग्रं पित्तान्वितं पित्तसमानवेगि पित्तात्॥"

वातिकस्य तस्य लक्षणम्।

"रूक्षारुणं फेनिलमल्पमल्पं वातान्वितं वातात् पिच्छितोदकाभम्॥"

तस्य त्रैदोषिकस्य लक्षणम्।

"सर्व्वैरसैर्पिहरितालवर्णं मज्जप्रकाशं कुणपं त्रिदोषात्। तत्साध्यसाध्यं प्रवदन्ति तज्ज्ञा न तत्र कुर्व्वीत भिषक् चिकित्साम्॥"

इति माधवकरः॥ *॥

अस्यौषधं यथा,—

"घृततुल्या रक्तशाल्या पीता क्षीरेण वै सह। प्रदरं हरते रोगं नात्र कार्य्या विचारणा॥"

इति गारुडे १८६ अध्यायः॥ *॥

अपि च।

"दध्ना सौवर्चलाजाजीमधूकं नीलसृत्पलम्। पिबेत् चौद्रयुतं नारी वातासृग्दरशान्तये॥ एषां प्रत्येकं मात्रद्वयम्। सर्व्वमेकीकृत्य दध्ना कर्षचतुष्टयेन पिष्ट्वा तत्र मात्राष्टकं मधु निःक्षिप्य पेयम्॥ *॥

"मधूकं कर्षमेकन्तु चतुष्कर्षा सिताम्बया। तण्डुलोदकसंपिष्टा लोहिते प्रदरे पिबेत्॥ वला कट्फलिलाक्षा या तस्या मूलन्तु चूर्णितम्। लोहिते प्रदरे खादेच्छर्करामधुसंयुतम्॥ *॥ शुचिस्नाने दाडिमस्या मूलमुत्तरदिग्भवम्। गोतमुत्तरफल्गुन्यां कटिबद्धं हरेद्धरुक्॥ *॥

रसाञ्जनं तण्डुलकस्य मूलं चौद्रान्वितं तण्डुलतोयपीतम्। अङ्गदरं सर्व्वभवं निहन्ति यासञ्च भागौ सह नागरेण॥ *॥

अशोकवल्कलकाथप्लुतं दुग्धं सुशीतलम्। यथाबलं पिबेत् प्रातस्तोयाङ्गदरनाशनम्॥"

अशोकवल्कलरसं द्राक्षिंशद्गुणसंमितेन जलेन निष्क्वाथ्य पेषित्वा पलार्द्धकल्केन सह क्षीरं पलार्द्धकमितं विपचेत् तत्तु दुग्धावशेषं कर्त्तव्यं तन्मध्ये पलचतुष्टयमितं दुग्धं पेयं वह्निबलापेक्षया वा॥ *॥

"कुशमूलं समुद्धृत्य पेषयेत्तण्डुलाम्बुना। एतत् पीत्वा त्र्यहं नारी प्रदरात् परिमुच्यते॥"

इति भावप्रकाशः॥

(तथास्य चिकित्सान्तरं यथा,—

"काकजङ्घामूलं वा मूलं कार्पासमेव वा। पाण्डुप्रदरशान्त्यर्थं पिबेत्तण्डुलवारिणा॥"

"कुशमूलं समुद्धृत्य पेषयेत्तण्डुलाम्बुना। एतत् पीत्वात्र्यहान्नारी प्रदरात् परिमुच्यते॥"

"प्रदरं हन्ति बलायामूलं दुग्धेन मधुयुतं पीतम्॥"

"गुडेन बदरीचूर्णं मोचमामं तथा पयः। पीत्वा लाजा च सक्तूता पृथक्प्रदरनाशनाः॥"

इति चक्रपाणिसंग्रहेऽङ्गदराधिकारे॥)

प्रदर्शितः, त्रि, (प्र+दृश्+णिच्+क्तः।) आलोकितः। यथा,—

"क्रियावाचित्वमाख्यातं प्रसिद्धोऽर्थः प्रदर्शितः। प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः॥"

इति मुग्धबोधटीकायां दुर्गादासः॥

प्रदलः, पुं, (प्रकर्षेण दलति दारयतीत्यर्थः। प्र+दल्+अच्।) बाणः। इति जटाधरः॥

प्रदानं, क्ली, (प्र+दा+भावे ल्युट्।) दानम्। इति शब्दरत्नावली॥ प्रकृष्टदानञ्च। (यथा, मनौ। ३।२४०।

"होमे प्रदाने भोज्ये च यदेभिरभिधीयते॥")

प्रदिक्, [ग्] स्त्री, (प्रगता दिग्भ्यः।) विदिक्। इति जटाधरः॥ (यथा, महाभारते १।१७४।३६।

"ततो विश्रान्तमनसो जनाःक्षुद्भयपीड़िताः। ग्रहाणि संपरित्यज्य ययुः प्रदिशो दिशः॥"

प्रकृष्टा दिक्। (यथा, हरिवंशे। १६३।८।

"प्रदिशो विदिशश्चैव शरधारासमाहताः। अन्धकारीकृतं व्योम दिनेशो नैव दृश्यते॥")

प्रदिग्धं, क्ली, (प्र+दिह्+कर्म्मणि क्तः।) मांसयञ्जनमेदः। यथा, शब्दचन्द्रिकायाम्।

"मांसं बहुघृतैर्भृष्टं सिक्तं क्षौद्राम्बुना सुधूः। क्षीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते॥ तदेव घृततक्राढ्यं प्रदिग्धं सचिनातकम्॥"

त्रि, प्रलिप्तः॥ (रूषितः। यथा, रामायणे। ५।५।२८।

"अवक्तरेखामिव चन्द्रलेखां पांशुप्रदिग्धामिव हेमरेखाम्॥")

प्रदीपः, पुं, (प्रकर्षेण दीपयति प्रकाशयति प्रदीप्यते इति वा। प्र+दीप्+णिच् वा+कः।)

प्रदीपः

दीपः । इत्यमरः । २ । ७ । १६८ ॥ तत्पर्य्यायः । स्नेहादीपकः २ कज्जलध्वजः ३ शिखातरः ४ गृहमणिः ५ ज्योतिःप्रियः ६ दशैलत्वनः ७ दोषातिलकः ८ दोषास्यः ९ नयनोत्सवः १० । इति शब्दरत्नावली ॥ (यथा, रघौ । ५ । ३७ ।

"रूपं तदोजस्वि तदेव वीर्य्यं
तदेव नैसर्गिकसुन्नतत्वम् ।
न कारणात् खाद्विभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात् ॥")

दीपमाहात्म्यम् । यथा,—

"दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः ।
चतुर्व्वर्गप्रदो दीपस्तस्माद्दीपं प्रदापयेत् प्रिये ! ॥"

सप्तप्रकारा दीपा यथा,—

"घृतप्रदीपः प्रथमस्तिलतैलोद्भवस्ततः ।
सार्षपः फलनिर्य्यासजातो वा रालिकोद्भवः ॥
दधिजश्चाम्लजश्चैव प्रदीपाः सप्त कीर्त्तिताः ॥"

तस्य पञ्चप्रकारा वर्त्तिका यथा,—

"पद्मसूत्रभवा दर्भगर्भसूत्रभवाथवा ।
सालजा वादरी वापि फलकोशोद्भवाथवा ॥
वर्त्तिका दीपजन्येषु सदा पञ्चविधाः स्मृताः ॥"

दीपपात्राणि यथा,—

"तैजसं दारवं लौहं मार्त्तिकं नारिकेलजम् ।
लाक्षाध्वजोद्भवं वापि दीपपात्रं प्रशस्यते ॥"*॥

दीपवृद्धे दीपस्थापनं भूमौ तन्निषेधश्च यथा,—

"दीपवृद्धाश्च कर्त्तव्यास्तेजसाद्यै च भैरव ! ।
वृद्धे च दीपो दातव्यो न तु भूमौ कदाचन ॥
सर्व्वंसहा वसुमती सहते न त्विदं द्वयम् ।
अकार्य्यपादघातञ्च दीपसन्तप्तयेव च ॥
तस्माद्दृथा तु पृथिवी तापं नाप्नोति वै तथा ।
दीपं दद्यान्महादेवे अन्यथोऽपि च भैरव ! ॥
कुर्व्वन्तं पृथिवीतापं यो दीपसृतृणेश्वरः ।
स ताम्रतापं नरकमाप्नोत्येव शतं समाः ॥ ● ॥
सुवृत्तवर्त्तिः सस्नेहः पात्रेऽभ्यर्च्ये सुदर्शने ।
वृक्षाग्रे वृषकोटौ तु दीपं दद्यात् प्रयत्नतः ॥
लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात् ।
न स दीप इति ख्यातो ज्ञोचवह्निस्तु स स्मृतः ॥
नेत्राङ्गादकरः सर्व्वभूमितापविवर्जितः ।
सुस्निग्धः शब्दरहितो निर्धूमो वातिदुष्कृतः ॥
दन्तिशावर्षभवर्त्तिस्तु प्रदीपो श्रीविवृद्धये ।
दीपवृक्षस्थिते शुद्धे स्नेहेनैव प्रपूरिते ॥
दन्तिशावर्षभवर्त्ता तु चारुदीपः प्रदीपकः ।
उत्तमः प्रोच्यते पुत्र ! सर्व्वसुखिप्रदायकः ॥
वृद्धेव वर्त्तितो दीपो मध्यमः परिकीर्त्तितः ।
विहीनः पाप्मतेऽभ्यामधमः परिकीर्त्तितः ॥"

इति कालिकापुराणे ६८ अध्यायः ॥ ● ॥

कार्त्तिके तद्दानफलं यथा,—

"कार्त्तिके मासि यो दद्यात् प्रदीपं सर्पिरादिना ।
आकाशे मस्तके वापि स याम्यपथं जयेत् ॥"

इति कर्म्मलोचनम् ॥ ● ॥

अपि च ।

"समभ्यर्च्य हरिं भक्त्या दीपं दत्त्वा दिवानिशम् ।
तत्र पापविशुद्धात्मा नरो याति दिवं नृप ! ॥
लक्षाप्रदे विशेषेण तत्र पञ्च दिनानि तु ।
पुण्यानि तेषु यद्दत्तमक्षयं सर्व्वकामिकम् ॥
एकादश्यां हरिमुद्दिश्य दीपं प्रज्वाल्य मूर्द्धिका ।
मानुष्यं दुर्लभं प्राप्य परां गतिमवाप सा ॥
द्वादश्यां तस्करो रात्रिदीपमुद्दीप्य चौर्य्यतः ।
कारणात् परमं प्राप्तो लोकं विष्णोः सनातनम् ॥
श्वपचोऽपि त्रयोदश्यां दीपान् दत्त्वापरैः सतान् ।
वेश्या लीलावती भूत्वा जगाम स्वर्गमक्षयम् ॥
लुब्धकोऽपि चतुर्दश्यां पूजयित्वा जनार्द्दनम् ।
निर्भक्तिः परसंगत्या विद्युल्लोकं जगाम सः ॥
गोपः कश्चिदमावास्यां पूर्णां दत्त्वाथ शार्ङ्गिणः ।
सुदुर्जयखलनामालो राजराजेश्वरोऽभवत् ॥
तस्माद्दीपाः प्रदातव्या रात्रावस्तमिते रवौ ।
गृहेषु सर्व्वमोक्षेषु चैत्येष्वायतनेषु च ॥
देवनागेषु रथ्यासु श्मशानेषु सरःसु च ॥"

इत्यग्निपुराणम् ॥

प्रदीपनः, पुं, (प्रदीपयतीति । प्र + दीप् + णिच् + ल्युः ।) स्थावरविषभेदः । इत्यमरः । २ । ८ । १० ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"काकोलो गरलः चुंडो वत्सनाभः प्रदीपनः ।
शौक्लिकेयो ब्रह्मपुत्रो विषं स्थाद्गरलो विषः ॥")

तस्य लक्षणम् यथा,—

"वर्णतो लोहितो यः स्यात् दीप्तिमान् दहनप्रभः ।
महादाहकरः पूर्व्वैः कथितः स प्रदीपनः ॥"

इति राजनिर्घण्टः ॥

प्रकाशके, त्रि ॥

प्रदेशः, पुं, (प्रदिश्यते इति । प्र + दिश् + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६ । ३ । १२२ । इति पाक्षिको दीर्घाभावः ।) देशमात्रम् । (यथा, हरिवंशे भविष्यपर्व्वणि । ५ । ३६ ।

"गरुडादवरक्षाय दीपिकादीपिते तदा ।
प्रदेशे पुष्करीकाक्षो स्थितस्तावत्सहामरैः ॥")

तत्पर्य्यायः । आख्यानम् २ आख्या ३ भूः ४ अवकाशः ५ स्थितिः ६ पदम् ७ । इति राजनिर्घण्टः ॥ तर्ज्जन्यङ्गुष्ठसन्मितः । भित्तिः । इति मेदिनी । शे, २५ ॥ संज्ञा । इति निरुक्तम् । १ । ४ । २ ॥ तन्नयुक्तिप्रकारविशेषः । यथा,—

"प्रस्तुतस्यातिक्रान्तेन साधनं प्रदेशः । यथा देवदत्तस्थानेन गृह्यतामुदत्तस्याप्ययमेवोद्दिश्यतीति ।" इत्युत्तरतन्त्रे पञ्चदशितमेऽध्याये सुश्रुतेनोक्तम् ॥)

प्रदेशनं, क्ली, (प्रदिश्यते अनेनेति । प्र + दिश् + करणे ल्युट् ।) कृपादेरपधौकनम् । भेटी इति ख्यातम् । तत्पर्य्यायः । प्राभृतम् २ उपायनम् ३ उपस्थानम् ४ उपहारः ५ उपदा ६ । इत्यमरः । २ । ८ । २७ । केचित्तु देवताभ्यो भक्त्या मित्रादिभ्यश्च प्रीत्या यत् प्रशस्तं लड्डुकादि दीयते तत् इत्याहुः । केचित्तु प्राभृतादि इयं अहया देवताब्राह्मणराजादिभ्यो यद्दीयते तत्र । उपायनादि चतुष्कं सुश्रुतमिदं दीयते त्वयेतत् मम कार्य्यं साधनीयमिति यद्दीयते घृतौ इति ख्याते इत्याहुः । किन्तु षट्कमेकार्थमेवेति बहवः । उपायनसुपस्थानं प्राभृतञ्चोपदा स्त्रियामित्यमरमालाः । इति भरतः ॥

प्रदेशिनी, स्त्री, (प्रदिश्यते अनयेति । प्र + दिश् + करणे ल्युट् ।) तर्ज्जनी । इत्यमरटीकायां भरतः ॥

प्रदेशिनी, स्त्री, (प्रदिशतीति । प्र + दिश् + णिनिः ङीप् ।) तर्ज्जनी । इत्यमरः । २ । ६ । ८१ ॥ (यथा, महाभारते । १ । ८३ । १६ ।

"तेऽदर्शयन् प्रदेशिन्या तमेव नृपसत्तमम् ।
अग्निर्ज्वालां मातरञ्च तथाचक्षुश्च दारकाः ॥"

"खेरकूले पादाङ्गुष्ठप्रदेशिन्यौ द्वयङ्गुलायते । प्रदेशिन्यास्तु मध्यमाग्रामिका कनिष्ठिका यथोत्तरं पञ्चमभागहीना ।" इति सुश्रुते शल्यस्थाने ३५ अध्याये ॥)

प्रदेहः, पुं, (प्रदिह्यते इति । प्र + दिह् लेपने + घञ् ।) प्रलेपः । इति वैद्यकम् ॥ (यथा, सुश्रुते शल्यस्थाने । १३ अध्याये ।

"इत्थमप्यविदग्धेऽपि जीर्य्यति प्रतिकारवेत् ।
स्नेहाभ्यङ्गपरीषेकैः प्रदेहैश्च तथा भिषक् ॥"

यथा च "प्रदेहो वातश्लेष्मप्रशमनः सन्धानः शोधनो रोपणः शोषवेदनापहश्च तस्योपयोगः व्रताव्रतेषु ।" इति सुश्रुते शल्यस्थाने २८ अध्याये ॥ अञ्जनविशेषः । तद्यथा —

"रूदः रूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥'

इति च तत्र शल्यस्थाने ४६ अध्याये ॥)

प्रदोषः, पुं, (दोषा रात्रिः । प्रारम्भो दोषायाः इति प्रादिसमासः । प्रक्रान्ता दोषा रात्रिरत्रेति वा ।) रजनीमुखम् । इत्यमरः । १ । ४ । १६ ॥ तत्तु रात्रेः प्रथमदण्डचतुष्टयम् । यथा,—

"प्रदोषोऽस्तमयादूर्द्धं घटिकाद्वयमिष्यते ॥"

इति तिथ्यादितत्त्वम् ॥

(यथा, कुमारे । ५ । ४४ ।

"वद प्रदोषे स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते ॥")

दोषः । इति हैमचन्द्रः ॥ (प्रशस्तो दोषो यस्येति । दुष्टे, त्रि । यथा, माघे । २ । ६८ ।

"ये चान्ये कालयवनाख्यरुक्मिदुर्मादयः ।
तमःस्वभावास्तेऽप्येनं प्रदोषमनुयायिनः ॥"

"ये चान्ये कालयवनाख्यरुक्मिदुर्मादयो राजानस्तमःस्वभावाः तमोगुणात्मकाः अतएव तेऽपि प्रदोषं प्रशस्तदोषम् । प्रदोषो दुष्टरात्रौ"इति वैजयन्ती । तामसमेवैनं चैद्यमनुयायिनः अनुयास्यन्ति सादृश्यादिति भावः ॥" इति तट्टीकायां मल्लिनाथः ॥)

प्रद्यु, क्ली, प्रकृष्टा द्यौः स्वर्गो यस्मात् सतः । पुण्यम् । इति सुबोधटीकायां दुर्गादासः ॥

प्रद्युम्नः, पुं, (प्रकृष्टं द्युम्नं बलं यस्य ।) कन्दर्पः । इत्यमरः । १ । १ । २६ ॥ स वासुदेवस्य चतुर्थीव्यूहः । यथा,—

"एकदेवं चतुर्व्याहं चतुर्धा पुनरच्युतः ।
बिभेद वासुदेवोऽसौ प्रद्युम्नो हरिरव्ययः ॥

कृष्णद्वैपायनो व्यासो विष्णुर्नारायणः स्वयम्।
अपां तरतमाः पूर्व्वं स्वेच्छया त्वभवद्धरिः॥"
इति कौर्म्मे ४८ अध्यायः॥

अपि च।

"अनिरुद्धः स्वयं ब्रह्मा प्रद्युम्नः काम एव च।
बलदेवः स्वयं शेषः कृष्णश्च प्रकृतेः परः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२६ अध्यायः॥
(नड्वलागर्भजातो मनोरपत्यभेदः। यथा, भागवते। ४।१३।१५-१६।

"मनोरसूत महिषी विरजान् नड्वला सुतान्।
पुरुं कुत्सं द्युतं दुम्नं सत्यवन्तं ऋतं व्रतम्॥
अग्निष्टोममतीरात्रं प्रद्युम्नं शिवसुक्तुकम्॥")

प्रद्योतः, पुं, (प्रकृष्टो द्योतः।) रश्मिः। इति हलायुधः॥ (यत्नभेदः। यथा, महाभारते। २।१०।१५।

"कर्णेरको गण्डकण्डुः प्रद्योतश्च महाबलः॥")

प्रद्योतनः, पुं, (प्रद्योतते इति। प्र+द्युत्+"अनुदात्तेतश्च हलादेः।" ३।२।१४६। इति युच्।) सूर्य्यः। इति हलायुधः॥ (भावे ल्युट्।) द्युतौ, क्ली॥

प्रद्रावः, पुं, (प्र+द्रु+"प्रे द्रुस्रुभ्वः।" ३।३।२७। इति घञ्।) पलायनम्। इत्यमरः। २।८।११॥

प्रधनं, क्ली, (प्रदधातीति। प्र+धा+"कृपद्भजि मन्दिनिधाञः क्युः।" उणा० २।८१। इति बाहुलकात् क्युः आतो लोपश्च।) युद्धम्। इत्यमरः। २।८।१०३॥ (यथा, देवीभागवते। ४।७।५३।

"वैरं भवति वित्तार्थं दारार्थं वा परस्परम्।
एषणारहितौ कस्मात् चक्रतुः प्रधनं महत्॥")
दारत्वम्। इति मेदिनी। ने, ८३॥ (प्रकृष्टं धनमस्येति विग्रहे प्रभूतधनविशिष्टे, त्रि॥)

प्रधानं, क्ली, (प्रधत्ते सर्व्वमात्मनीति। प्र+धा+युच्।) प्रकृतिः। (यथा, विष्णुपुराणे। १।१।२।

"सदसच्चैव यत्तत्र ईश्वरः पुमान्
गुणोन्मिश्रस्थितिक्षयसंज्ञयः।
प्रधानबुद्ध्यादिजगत् प्रपञ्चस्-
स नोऽस्तु विष्णुर्गतिभूतिमुक्तिदः॥")
महामात्रः। (यथा, मनुः। ७। २०२।

"प्रमाणानि च कुर्व्वीत तेषां धर्म्म्यान् यथोदितान्।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह॥"
प्रकृष्टोऽनेनात्मिन् वा। प्र+धा+क्युट्।) परमात्मा। वृद्धः। त्रि, प्रशस्तम्। तत्पर्य्यायः। प्रमुखम् २ प्रवेकम् ३ अग्रोत्तमम् ४ उत्तमम् ५ सत्यम् ६ वर्य्यम् ७ वरेण्यम् ८ प्रवर्हम् ९ अनवरार्घ्यम्१० परार्घ्यम्११ अग्र्यम् १२ प्राग्रहरम् १३ प्रग्र्यम् १४ अग्र्यम् १५ अग्रीयम् १६ अग्रिमम् १७। इत्यमरः।३।१।५७॥ (यथा, मनुः। ६। १२१।

"उपस्कर्त्तृनं प्रधानस्य धर्म्मतो नोपपद्यते।
पिता प्रधानं प्रजने तस्माद्धर्म्मेण तं भजेत्॥"

प्रधानः, पुं, (प्रधत्ते इति। प्र+धा+क्युः।) महामात्रः। सेनापत्यादिः। महामात्रः प्रधानः स्यादिति पुंस्काण्डे वोपालितः। इत्यमरटीकायां भरतः॥ (राजर्षिभेदः। यथा, महाभारते। १२। २३०। १८१।

"प्रधानो नाम राजा च यस्तं ते श्रोत्रमागतः।
कुले तस्य समुत्पन्ना सुलभा नाम विद्धि माम्॥")

प्रधिः, पुं, (प्रधीयते अनेनेति। प्र+धा+"उपसर्गे धोः किः।" ३।३।९२। इति किः।) नेमिः। इत्यमरः। २।८।५६॥ (यथा, महाभारते। ५।५१।५८।

"मन्ये पर्य्यायधर्म्मोऽयं कालस्यात्यन्तगामिनः।
चक्रे प्रधिरिवासक्तो नास्य ग्रक्ष्यं पलायितुम्॥")

प्रधीः, त्रि, (प्रकृष्टा धीर्बुद्धिर्यस्य।) प्रकृष्टबुद्धियुक्तः। (प्रकृष्टा धीः।) प्रकृष्टबुद्धौ, स्त्री। इति सुग्धबोधव्याकरणम्॥

प्रधूपिता, स्त्री, (प्रकर्षेण धूपिता।) श्लेष्मिता। खर्य्यगन्धयदिक्। इति मेदिनी। ते, २०७॥ प्रकर्षेण तप्ते दीप्ते च त्रि॥

प्रनष्टः, त्रि, (प्र+नश्+क्तः।) प्रकर्षेण नाशयुक्तः।

"कच्चिदज्ञानसम्भूतः प्रनष्टस्ते धनञ्जय!॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः॥

प्रनिघातनं, क्ली, (प्र+नि+हन्+णिच्+भावे ल्युट्।) प्रणिघातनम्। वधः। इति हेमचन्द्रः॥

प्रपञ्चः, पुं, (प्रपञ्चते इति। प्र+पचि यङ्लुगन्तः+घञ्।) विपर्य्यासः। विस्तरः। इत्यमरः॥

"विपर्य्यासो वैपरीत्यं भ्रमो वा मायेति स्वामी॥"
इति भरतः॥ सञ्चयः। प्रतारणम्। इति मेदिनी। चे, १५॥ संसारः। यथा,—

"पादुकापञ्चकस्तोत्रं पञ्चवक्त्रादिनिर्गतम्।
षड्भाषायुतलोपेतं प्रपञ्चे चातिदुर्लभम्॥"
इति गुरुपादुकास्तोत्रम्॥

प्रपञ्चितं, त्रि, (प्रपञ्चते स्मेति। प्र+पचि+क्तः।) विस्तृतम्। भ्रमयुक्तम्। यथा,—

"आत्मानमेवात्मतया विजानतां
तेनैव जातं निखिलं प्रपञ्चितम्।
ज्ञानेन भूयोऽपि च तत् प्रलीयते
रज्ज्वामहेर्भोगभवाभवौ यथा॥"
इति श्रीभागवते। १०। १४। २५॥

प्रपथः, त्रि, (प्रकृष्टः पन्था यत्र।) शिथिलः। इति भूरिप्रयोगः॥ (प्रकृष्टः पन्था इति प्रादिसमासः। प्रकृष्टमार्गः। यथा ऋग्वेदे। १०।१७।४।

"आयुर्विश्वायुः परिपासति त्वा
पूषा त्वा पातु प्रपथे पुरस्तात्॥")

प्रपथ्या, स्त्री, (प्रकृष्टा पथ्येति प्रादिसमासः।) हरीतकी। इति राजनिर्घण्टः॥ (हरीतकीशब्देऽस्या विवरणं ज्ञातव्यम्॥)

प्रपदं, क्ली, (प्रारब्धं प्रगतं वा पदमिति प्रादिसमासः।) पादाग्रम्। इत्यमरः। २।६।७१॥ (यथा, मनौ। ६। २२।

"भूमौ विपरिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम्।
स्थानासनाभ्यां विहरेत् सवनेषूपयन्नपः॥")

प्रपन्नः, त्रि, (प्रपद्यते स्मेति। प्र+पद्+क्तः।) शरणागतः। यथा,—

"गोविन्दं पुष्करीकाक्षमनन्तमजमव्ययम्।
केशवञ्च प्रपन्नोऽस्मि किन्नो मृत्युः करिष्यति।"
इति मार्कण्डेयपुराणे मृत्युञ्जयो नाम ७ अध्यायः॥

प्रपन्नाड्यः, पुं (प्रपन्नं व्यलति भूषयतीति। प्रपन्न+व्यल्+"कर्म्मण्यण्।" ३।२।१। इत्यण्। ड्लयोरैक्यम्।) प्रपुन्नाड्यः। चक्रमर्द्दकः। इति रत्नमाला॥ (विस्तृतिरस्य चक्रमर्द्दकशब्दे ज्ञेया॥)

प्रपा, स्त्री, (प्रकर्षेण पिबन्त्यस्यामिति। प्र+पा+"आतश्चोपसर्गे।" ३।३।१०६। इत्यङ्। धनर्थे को वा।) पानीयशालिका। इत्यमरः। २।२।७॥ (यथा, मनुः। ८।३१६।

"यस्तु रज्जुं घटं कूपादरेद्धित्वाच्च यः प्रपाम्।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत्॥")
यज्ञशाला। यथा, रामायणे। १। ७३। २०।

"विश्वामित्रं पुरस्कृत्य गृतानग्नेच्च धार्म्मिकम्।
प्रपामध्ये तु विधिवद्वेदिं कृत्वा महातपाः॥"
"प्रपामध्ये यज्ञशालामध्ये इति कतकः।" इति तट्टीकायां रामानुजः॥)

प्रपाणिः, पुं, (प्रकृष्टः पाणिः। प्रादिसमासः।) करस्याधोदेशः। पाणितलम्। इति राजनिर्घण्टः॥ (विषयोऽस्य यथा, "पञ्चदशाङ्गुलौ प्रपाणौ।" इति चरके विमानेऽष्टमेऽध्याये॥)

प्रपातः, पुं, (प्रपतत्यस्मादिति। प्र+पत्+"अवक्षेपे च कारके संज्ञायाम्।" ३।३।१६। इति घञ्।) निरवलम्बनपर्व्वतादिपार्श्वम्। आरुढ़ इति ख्यातम्। यस्मात् पतने अवस्थानक्रियाविशेषो नास्ति। तत्पर्य्यायः। अवटः २ भृगुः ३। इत्यमरः। २।३।४॥ (यथा, देवीभागवते। ४।७।४६।

"मधु पश्यति म्रक्षात्मा प्रपातं नैव पश्यति।
करोति निन्दितं कर्म्म नरकात् न बिभेति च॥")
निर्झरः। इति मेदिनी। ते, १२७॥ (भावे घञ्।) अभ्यवस्कन्दः। क्षुलम्। इति हेमचन्द्रः॥ (उड्डीनगतिविशेषः। यथा, पञ्चतन्त्रे। २। ५७। "अहं सम्पातादिकानष्टादुड्डीनगतिविशेषान् वेद्मि। उक्तञ्च।

सम्पातश्च प्रपातश्च महापातं निपातनम्।
चक्रं तिर्य्यक् तथा चोर्द्धमष्टमं लघुसञ्चकम्॥"
प्रपातनम्। यथा, सुश्रुते चिकित्सितस्थाने। ४० अध्याये।

"तत्तु नस्यं देयं वाताभिभूते शिरसि दन्तकेशस्नायुप्रपातदारुणकर्णशूलकर्णक्ष्वेडेतिमिरखरोपघातनासारोगस्य शोषापबाहुकाकालजबलीपलितप्रादुर्भावदारुणप्रबाधेषु इति॥")

प्रपायी, [ ] त्रि, (प्रपिबतीति। प्र+पा+णिनिः।) पानकर्त्ता। रसकर्त्ता। इति सुग्धबोधव्याकरणम्॥

प्रपावनं, क्ली, (प्रपेव कामपूरकं वनम्। यद्वा, प्रकर्षेण पावयतीति। पू+णिच्+कर्त्तरि ल्युः।) वनभेदः। कामारण्यम्। इति शब्दमाला॥

प्रपितामहः, पुं, (प्रकर्षेण पितामहः पितामहस्यापि पिता।) ब्रह्मा। इति त्रिकाण्डशेषः॥ (यथा, मार्कण्डेयपुराणे। १०१। २२।

"तद्भिन्नेद तदन्तःस्थो भगवान् प्रपितामहः।
पद्मयोनिः स्वयं ब्रह्मा यः स्रष्टा जगतां प्रभुः॥")

पितामहपिता। इत्यमरः। २। ६। ३३॥ (यथा, मनौ। ३। २२१।

"पिता यस्य तु वृत्तः स्याज्जीवेदापि पितामहः।
पितुः स नाम संकीर्त्त्य कीर्त्तयेत्प्रपितामहम्॥")

प्रपितामही, स्त्री, (प्रपितामह+स्त्रियां ङीष्।) प्रपितामहपत्नी। यथा,—

"स्वेन भर्त्रा सह श्राद्धं माता भुङ्क्ते स्वधामयम्।
पितामही च स्वेनैव स्वेनैव प्रपितामही॥"

इति दायभागः॥

प्रपुनाड़ः, पुं, (पुंमांसं नाड़यतीति। नड़ अंशे+अण्। प्रकृष्टः पुन्नाड़ः इति प्रादिसमासः। पृषोदरादित्वात् साधुः।) प्रपुन्नाड़ः। इत्यमरटीकायां भरतः॥ (अस्य घ्राणगुणा यथा,—

"कफापहं घ्राणसुखं वरुणप्रपुनाड़योः।
रूक्षं लघु च शीतञ्च वातपित्तप्रकोपणम्॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

प्रपुन्नड़ः, पुं, (प्रपुनाड़ः। पृषोदरादित्वात् हस्वः।) प्रपुन्नाड़ः। इत्यमरभरतौ॥

प्रपुन्नाटः, पुं, (पुमांसं नाटयतीति। नट्+णिच्+अण्। प्रकृष्टः पुन्नाट इति प्रादिसमासः।) चक्रमर्दः। इति राजनिर्घण्टः॥

प्रपुन्नाड़ः, पुं, (पुमांसं नाड़यतीति। नड़+अण्। प्रकृष्टः पुन्नाड़ इति प्रादिसमासः।) चक्रमर्दकः। चाकुन्दिया इति भाषा। इत्यमरः। २। ४। १४७॥ (विवृतिरस्य चक्रमर्दकशब्दे ज्ञेया॥)

प्रपुन्नालः, पुं, (प्रपुन्नाड़ः। ड़स्य लत्वम्।) प्रपुन्नाड़ः। इति भरतद्विरूपकोषः॥

प्रपूरिका, स्त्री, (प्रपूर्य्यते कण्टकैरिति। प्र+पूर+कर्म्मणि घञ्। स्वार्थे कन्। यद्वा, प्रपूरयतीति। प्र+पूर+ण्वुल्। टाप्। कापि अत इत्वम्।) कण्टकारी। इति शब्दचन्द्रिका॥

प्रपौण्डरीकं, क्ली, (पुण्डरीक+स्वार्थे अण्। प्रकृष्टं पौण्डरीकस्येव पुष्पं यस्य।) हस्तिनां मनुष्याणाञ्च चक्षुषः क्षुद्रविटपः। शालपर्णीपत्रतुल्यपत्रः। पुण्डरिया ख्यातः। इत्यमरभरतौ॥ तत्पर्य्यायः। चक्षुष्यम् २ शीतम् ३ श्रीपुष्पम् ४ पुण्डरी ५। इति रत्नमाला॥ पुण्ड्र्यम् ६ पुण्डरीयकम् ७ पौण्डरीयम् ८ सुपुष्पम् ९ सानुजम् १० अनुजम् ११॥ (यथा, सुश्रुते सूत्रस्थाने १६ अध्याये।

"प्रपौण्डरीकं मधुकं समङ्गां धवमेव च।
तैलमेभिश्च सम्यक्तं प्रशस्तं कण्डूमतः क्रियाम्॥"

अस्य गुणाः। चक्षुर्हितत्वम्। मधुरत्वम्। तिक्तत्वम्। शीतलत्वम्। पित्तरक्तव्रणज्वरदाहत्रयनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"पौण्ड्र्यं मधुरं तिक्तं कषायं शुक्रलं हिमम्।
चक्षुष्यं मधुरं पाके वर्ण्यं पित्तकफास्रनुत्॥"

इति भावप्रकाशः॥

प्रपौत्रः, पुं, (प्रकर्षेण पौत्रः। पौत्रस्यापि पुत्रत्वात् तथात्वम्।) पौत्रस्य पुत्रः। तत्पर्य्यायः। प्रतिनप्ता २। इति हेमचन्द्रः॥ (यथा, मार्कण्डेयपुराणे। ११०। १५।

"पुत्रान् पौत्रान् प्रपौत्रांश्च तथान्यानिष्टवान्धवान्।
पश्यतो मे मृतान् दुःखं किमन्यं हि भविष्यति॥")

प्रपौत्री, स्त्री, (प्रपौत्र+ङीष्।) पौत्रस्य कन्या। इति स्मृतिः॥

प्रफुल्लः, त्रि, (फुल्लतीति। भि फुल्लविकसने+क्तः।

"आदितश्चेति।" ७। २। १६। इति इड्भावः। "तिच।" ७। ३। ८६। इति उत्।

"अनुपसर्गात् फुल्लक्षीवेति।" ८। २। ५५। इति निष्ठातस्य लः। ततः प्रादिसमासः। यद्वा, प्रफुल्लतीति। प्र+फुल्ल विकसने+अच्।) विकाशयुक्तः। तत्पर्य्यायः। उत्फुल्लः २ संफुल्लः३ व्याकोषः ४ विकचः ५ स्फुटः ६ फुल्लः ७ विकसितः ८। इत्यमरः। २। ४। ७॥ प्रबुद्धः ९ जृम्भः१० स्मितः ११ उन्मिषितः १२ दलितः १३ स्फुटितः १४ उच्छ्वसितः१५ विजृम्भितः१६ स्मेरः १७ विनिद्रः१८ उन्निद्रः १९ विसुद्रः २० हसितः २१। इति हेमचन्द्रः॥ (यथा, रघौ।२।२६।

"स पाटलायां गवि तस्थिवांसं
धनुर्धरः केशरिणं ददर्श
अधित्यकायामिव धातुमय्यां
लोध्रद्रुमं सानुमतः प्रफुल्लम्॥")

प्रबन्धः, पुं, (प्रबध्यते इति। प्र+बन्ध+घञ्।) सन्दर्भः। इति त्रिकाण्डशेषः॥ (प्र+बन्ध+भावे घञ्।) काव्यादिग्रथनम्। यथा,—

"प्रबन्धोऽयं बन्धोरखिलजगतान्तस्य सरसाम्।"

इति हंसदूतः॥

प्रबन्धकल्पना, स्त्री, प्रबन्धस्य कल्पना रचना वक्तृता श्लोकसत्ता कथा।

"प्रबन्धकल्पनां श्लोकसत्तां प्राज्ञाः कथां विदुः।
परस्पराश्रया या स्यात् सा मताख्यायिका क्वचित्॥"

इति कोलाहलाचार्य्यः।

इत्यमरटीकायां भरतः॥

प्रबलः, पुं, (प्रकृष्टं बलतीति। प्र+बल प्राणने+अच्।) पल्लवः। इति शब्दमाला॥ (प्रकृष्टं बलमस्य।) प्रकृष्टबलयुक्ते, त्रि। यथा, मार्कण्डेयपुराणे। ८१। ६।

"आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः॥"

प्रकृष्टबले क्लीवञ्च॥

प्रबला, स्त्री, (प्रकृष्टं बलमस्याः।) प्रसारिणी। इति राजनिर्घण्टः॥ प्रकृष्टबलवती च॥ (यथा, रघौ। ८। ५०।

"सहतां हृतजीवितं मम
प्रबलामात्मकृतेन वेदनाम्॥")

प्रवालः, पुं क्ली, (प्रबलतीति। प्र+बल प्राणने+"व्यलितिकसन्तेभ्यो णः।" ३। ३। १४०। इति णः। यद्वा, प्र+बल+णिच्+अच्।) रक्तवर्णवर्त्तुलाकाररत्नविशेषः। पला इति भङ्गा इति च भाषा॥ तस्याधिष्ठात्री देवता मङ्गलः। इति ज्योतिषम्॥ तत्पर्य्यायः। विद्रुमः २। इत्यमरः। २। ९। ९३॥ अङ्गारकमणिः ३ अम्भोधिबल्लभः४ भौमरत्नम् ५ रक्ताङ्गः६ रक्ताकारः ७ लतामणिः ८। अस्य गुणाः। मधुरत्वम्। अम्लत्वम्। कफपित्तादिदोषनाशित्वम्। स्त्रीणां वीर्य्यकान्तिकरत्वम्। धृते मङ्गलदायित्वञ्च। इति राजनिर्घण्टः॥ * ॥ अपि च। सारकत्वम्। शीतलम्। कषायत्वम्। स्वादुत्वम्। वान्तिकारित्वम्। चक्षुर्हितत्वम्। धारणे पापालक्ष्मीनाशित्वञ्च॥ इति राजवल्लभः॥ * ॥ तस्य शुभलक्षणं यथा,—

"शुद्धं दृढ़ं घनं वृत्तं स्निग्धं गात्रसुरङ्गकम्।
समं गुरु सिराहीनं प्रवालं धारयेत् शुभम्॥"

तस्याशुभलक्षणं यथा,—

"गौरं रङ्गजलाक्रान्तं वक्रस्थूलं सकोटरम्।
रूक्षलक्ष्मं लघु श्वेतं प्रवालमशुभं त्यजेत्॥"

इति राजनिर्घण्टः॥ * ॥

तस्योत्पत्त्यादि यथा,—

सूत उवाच।

"आदाय शेषस्तस्याङ्गं यमस्याकम्पनादिषु।
चिक्षेप तत्र जायन्ते विद्रुमाः सुमहागुणाः॥
तत्र प्रधानं शुभ्रलोहिताभं
गुञ्जाफलापुष्पनिभं प्रदिष्टम्।
सनीलकं देवकरोमकञ्च
स्थानानि तेषु प्रभवं सुरागम्॥
अन्यत्र जातञ्च न तत् प्रधानं
मूल्यं भवेच्छिल्पिविशेषयोगात्॥
प्रसन्नं कमलं स्निग्धं सुरागं विद्रुमं हि तत्।
धनधान्यकरं लोके विद्याश्रीभयनाशनम्॥
परीक्षा पुलकस्योक्ता रुधिराक्षस्य वै मणेः।
स्फटिकस्य विद्रुमस्य रत्नज्ञानाय शौनक!॥"

इति गारुड़े ८० अध्यायः॥ * ॥

अथ विद्रुमपरीक्षा।

"श्वेतसागरमध्ये तु जायते वल्लरी तु या।
विद्रुमा नाम रत्नाख्या दुर्लभा वज्ररूपिणी॥
पाषाणं प्रभवत्येषा प्रयत्नात् कथिता सती।
विद्रुमं नाम यद्रत्नमामनन्ति मनीषिणः॥*॥
ब्रह्मादिजातिभेदेन तच्चतुर्विधमुच्यते।
अरुणं शुभ्ररक्ताख्यं कोमलं स्निग्धमेव च।
प्रवालं विप्रजातिः स्यात् सुखवर्धं मनोरमम्॥
जवाबन्धूकसिन्दूरदाड़िमीकुसुमप्रभम्।
कठिनं दुर्व्वेधमस्निग्धं क्षत्रजातिं तदुच्यते॥

प्रवुद्धः

बलाग्रकुसुमाभासं तथा पाटलसन्निभम् ।
वैद्यजातिर्भवेत् स्निग्धं वर्णाढ्यं मन्दकान्तिमम् ॥
रक्तोत्पलदलाकारं कठिनं न चिरद्युति ।
विद्रुमं शूद्रजातिः स्याद्दाह्यवेध्यं तथैव च ॥*॥
रक्तता स्निग्धता दार्ढ्यं चिरद्युतिः सुवर्णता ।
प्रवालानां गुणाः प्रोक्ता धनधान्यकराः पराः ॥
हिमाद्रौ यत्तु संजातं तद्रक्तमतिनिष्ठुरम् ।
तत्र लिप्तो भवेन्निम्नकक्षोऽतिमधुरः स्निग्धः ।
तस्य धारणमात्रेण विषवेगः प्रशाम्यति ॥*॥
विवर्णता तु खरता प्रवाले दूषणद्वयम् ।
रेखाकाकपदौ विद्रुर्यथा वर्ज्येषु दोषकृत् ।
तथा प्रवाले सर्व्वत्र वर्जनीयं विचक्षणैः ॥
रेखा हन्यादृग्यो लक्ष्मीमावर्त्तः कुलनाशनः ।
पट्टलो रोगकृत् ख्यातो विद्रुर्धनविनाशकृत् ॥
त्रासः संजनयेत्रासं नीलिका मृत्युकारिणी ।
मूल्यं शुद्धप्रवालस्य रूप्यद्विगुणमुच्यते ॥
धारणेऽस्यापि नियमो जातिभेदेन पूर्ब्बवत् ॥"*॥
तथाहि ।
"विरूपजातिं विषमं विवर्णं
खरप्रवालं प्रवहन्ति ये ये ।
ते मृत्युमेवात्मनि वै वहन्ति
सत्यं वदत्येष श्रुतौ मुनीन्द्रः ॥"
इति युक्तिकल्पतरौ प्रवालपरीक्षा ॥*॥
(अस्य संशोधनादिकं यथा,—
"कुमार्य्या तण्डुलीयेन तुल्येन च निषेचयेत् ।
प्रत्येकं सप्तवारांश्च तप्ततप्तानि क्षालयेत् ॥
मौक्तिकानि प्रवालानि तथा रत्नान्यशेषतः ।
शुद्ध्यादिविधवर्णानि स्निग्धन्ते नात्र संशयः ॥
श्रीदुग्धेन प्रवालञ्च भावयित्वा तु हड्डिके ।
मध्येऽपि तक्रसहितं स्थापयेत्तन्निरोधयेत् ।
चुल्ल्यामग्निप्रतापेन म्रियते प्रहरद्वये ॥
इति प्रवालमारणम् ॥"
इति वैद्यकरसेन्द्रसमग्रहे मारणमारणाधिकारे॥)
किशलयः । (यथा, कुमारे । १ । ४४ ।
"पुष्पं प्रवालोपहितं यदि स्यात्
मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्य्यादिशदस्य तस्या-
स्ताम्रौष्ठपर्य्यस्तरुचः स्मितस्य ॥")
वीणादण्डः । इति मेदिनी । ले, १०७ ॥
प्रवालफलं, क्ली, (प्रवालवद्रक्तं फलं यस्य ।) रक्तचन्दनम् । इति भावप्रकाशः ॥
प्रवालिकः, पुं, (प्रवालोऽस्यास्त बाहुल्येनेति । प्रवाल + "व्रत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) जीवशाकः । इति राजनिर्घण्टः ॥
प्रवाहुः, पुं, (प्रगतो बाहुमिति ।) कूर्परस्याधोभागः । यथा, विष्णुपुराणे ५ । ५ । १६ ।
"सुखं बाहुप्रबाहू च मनः सर्व्वेन्द्रियाणि च ।
रक्षत्यवाहतेश्चैवमेव नारायणोऽव्ययः ॥"
प्रबाहुकम्, य, समानकाले । ऊर्द्ध्वे । प्रबाहिकेति पाठान्तरम् । इति कौमुदीटीका तत्त्वबोधिनी ॥
प्रबुद्धः, त्रि, (प्र + बुध + क्तः ।) पण्डितः । प्रफुल्लः । इति हेमचन्द्रः ॥ (यथा, रघुः । १० । ६ ।
"प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥")
जागरितः । यथा, भट्टिः । ४ । १४ ।
"प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रणमन्निव ॥"
प्रबोधः, पुं, (प्र + बुधौ + अ अपगमे + भावे घञ् ।) विनिद्रत्वम् । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ८१ । ६० ।
"प्रबोधश्च जगत्स्वामी नीयतामच्युतो लघु ।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥")
प्रहरश्चात्र । यथा,—
"तावत् सत्यं जगद्भाति प्रबोधे सत्यसङ्गवेत् ॥"
इत्यात्मबोधवचनम् ॥
(यथा च रघुः । ५ । ६५ ।
"सुतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥")
प्रबोधनं, क्ली, (प्र + बुध् + ल्युट् ।) न्यूनपूर्ब्वगन्धस्य चन्दनादेः प्रयत्नविशेषेण पुनः पूर्ब्वसौगन्ध्योत्पादनम् । तत्पर्य्यायः । अनुबोधः २ । इत्यमरभरतौ । बोधजननञ्च ॥ (जागरणम् । यथा, हरिवंशे । १७७ । ७१ ।
"ततस्तूर्य्यनिनादैश्च गृहाणाञ्च महास्वनैः ।
प्रबोधनं महाबाहोः क्षणस्याकरियतालये ॥"
विकाशः । यथा, पञ्चतन्त्रे कथामुखे ।
"तदेतेषां बुद्धिप्रबोधनं यथा भवति तथा कोऽप्युपायेनानुष्ठीयतामिति ॥" तथा च ऋतुसंहारे । ५ । १० ।
"सुगन्धिनिःश्वासविकम्पितोत्पलं
मनोहरं कामरतिप्रबोधनम् ॥")
प्रबोधनी, स्त्री, (प्रबोधयतेऽनयेति । प्र + बुध् + णिच् + ल्युट् + ङीप् ।) दुरालभा । इति राजनिर्घण्टः ॥ (प्रबुध्यते हरिरत्रेति ।) श्रीहरेरुत्थानैकादश्यादिः ।
अथ प्रबोधनीकृत्यम् ।
"शयन्यामिव कल्यास्यां क्षीराम्भोधिमहोत्सवम् ।
प्रबोध्य क्षमां संपूज्य विधिनारोहयेद्रथम् ॥"
अथ प्रबोधनीकृत्यनिर्णयः ।
स्कान्दे तत्रैव ।
"जन्मप्रभृति यत् पुण्यं नरैरुपार्जितं भुवि ।
वृथा भवति तत्सर्व्वं न कृत्वा बोधवासरम् ॥"
अथ प्रबोधनीमाहात्म्यम् । तत्रैव ।
"प्रबोधन्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम् ।
सुकृतं कृतवृद्धीनां श्रृणु त्वं मुनिसत्तम ! ॥
तावद्गर्জति विप्रेन्द्र ! गङ्गा भागीरथी क्षितौ ।
यावन्नायाति पापघ्नी कार्त्तिके हरिबोधनी ॥
तावद्गर्জन्ति तीर्थानि आसमुद्रसरांसि च ।
यावत् प्रबोधनी विष्णोस्त्विधिर्नायाति कार्त्तिके ॥
वाजपेयसहस्राणि अश्वमेधशतानि च ।
एकेनैवोपवासेन प्रबोधन्यां लभेन्नरः ॥
दुर्लभश्चैव दुष्प्रापं त्रैलोक्ये सचराचरे ।
तदपि प्राप्यते विप्र ! ददाति हरिबोधनी ॥
ऐश्वर्य्यं सन्ततिं प्रज्ञां राज्यञ्च सुखसम्पदः ।
ददात्युपोषिता विप्र ! हेलया हरिबोधनी ॥
मेरुमन्दरतुल्यानि पापान्यत्यर्জितान्यपि ।
एकेनैवोपवासेन दहते हरिबोधनी ॥
पृथिव्यां यानि दानानि दत्त्वा यत् फलमाप्यते ।
एकेनैवोपवासेन ददाति हरिबोधनी ॥"
किञ्च ।
"जातः स एव सुकृती कुलं तेनैव पावितम् ।
कार्त्तिके सुनिश्रार्दूल ! कृता येन प्रबोधनी ॥
यानि कानि च तीर्थानि त्रैलोक्ये सम्भवन्ति च ।
तानि तस्य गृहे सम्यक् यः करोति प्रबोधनीम् ॥
सर्व्वं क्षेत्रं परित्यज्य तुष्ट्यर्थं चक्रपाणिनः ।
उपोष्यैकादशीं सम्यक् कार्त्तिके हरिबोधनीं ॥
किं तस्य बहुभिः क्रतुभिः परलोकप्रदैर्मुने ! ।
सङ्गोपोषिता येन कार्त्तिके हरिबोधनी ॥
स ज्ञानी स हि योगी च स तपस्वी जितेन्द्रियः ।
स्वर्गमोक्षौ च तस्यास्तामुपास्ते हरिबोधनीम् ॥
विष्णोः प्रियतमा ह्येषा धर्म्मसारस्य दायिनी ।
इमां सकृदुपोष्यैव मुक्तिभागी भवेन्नरः ॥
प्रबोधनीमुपोष्यैव न गर्भं विशते नरः ।
सर्व्वधर्म्मान् परित्यज्य तस्मात् कुर्व्वीत नारद ! ॥
स्नानं दानं तपो होमः सर्व्वदिश्च जनार्দनम् ।
नरैर्यत् क्रियते विप्र ! प्रबोधन्यां तदक्षयम् ।
महाव्रतमिदं पुत्र ! महापापौघनाशनम् ।
प्रबोधवासरं विष्णोर्विधिवत् समुपोषयेत् ॥
व्रतेनानेन देवेशं परितोष्य जनार्দनम् ।
विराजयन् दिशो दीप्ता प्रयाति सुवनं हरेः ॥"
पाद्मे च तत्रैव ।
"दुग्धाब्धिभोगिशयने भगवानन्तो
यस्मिन्दिने स्वपिति चाथ विबुध्यते च ।
तस्मिन्ननन्यमनसामुपवासभाजां
पुंसां ददात्यभिमतं गरुडाङ्कशायी ॥"
वाराहे च ।
"उपवासासमर्थानां सदैव पृथुलोचने ! ।
एका सा द्वादशी पुण्या समुपोष्या प्रबोधनी ॥
तस्यामाराध्य विश्वेशं जगतामीश्वरेश्वरम् ।
प्राप्नोति सकलं तद्धि द्वादशद्वादशीव्रतम् ॥
उत्तराङ्गारकयुता यदि सा भवति प्रिये ! ।
तदा सा महती पुण्या कोटिकोटिगुणोत्तरा ॥
शयने बोधने चैव कटिदाने च सुन्दरि ! ।
उपोष्यैव विधानेन यान्ति मज्जयतां नराः ॥
एकादशी सोमयुता कार्त्तिके मासि भाविनि ! ।
उत्तराभाद्रसंयोगे अनन्ता सा प्रकीर्त्तिता ॥
तस्यां यत् क्रियते भद्रे ! सर्व्वमानन्त्यमश्नुते ।
अनन्तपुण्यफलदा तेनानन्ता स्मृता फले ॥"
तत्रैव श्रीयमनारदसंवादे ।
"अन्यच्च ते प्रवक्ष्यामि गुह्याद्गुह्यतरं मुने ! ।
कार्त्तिकेऽमलपक्षे तु साचाद्देकादशी स्मृता ॥
भक्तिप्रदा हरेः सा तु नाम्ना ख्याता प्रबोधनी ।
या सा विष्णोः परा मूर्त्तिरव्यक्तानेकरूपिणी ॥
सा चिन्ता मानुषे लोके द्वादशी मुनिपुङ्गव ! ॥"
श्रीमथुरायाञ्च विशेषतः पाद्मे तत्रैव ।
"तावद्गर्জन्ति तीर्थानि वाजिमेधादयो मखाः ।

मथुरायां प्रिया विष्णोर्बोधनायाति बोधनी ॥
संसारदावतप्तानां कामसौख्यपिपासिनाम् ।
श्रीकृष्णपादपद्मस्य सान्निध्यं प्रीतिदं गृहम् ॥
भवपाशच्युतजनानां वै प्राप्तिकेयं प्रबोधनी ।
कथं न सेव्यते मूढैर्मथुरायां किमुच्यतः ॥"*॥
अथ विष्णोरतः प्रबोधन्यां श्रीभगवत्पूजादि-
माहात्म्यम् । स्कान्दे तत्रैव प्रबोधनीमाहात्म्ये ।
"येऽर्चयन्ति नरास्तस्यां भक्त्या देवन्तु माधवम् ।
समुपोष्य प्रसुप्यन्ते पापेस्ते समुपार्ज्जितैः ॥
बाल्ये यच्चार्ज्जितं वत्स ! यौवने वार्द्धके च यत् ।
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥
शुष्कार्द्रं सुनिशादृष्टं ! सुगुह्यमपि नारद ! ।
तत् चालयति गोविन्दस्तिथौ तस्यां प्रपूजितः ॥"
किञ्च ।
"प्रबोधवासरे विष्णोः कुरुते च हरेः कथाम् ।
सप्तद्वीपावनीदाने यत् फलं तद्वेत्त्वसौ ! ॥"
वाराहे च ।
"कौमुदस्य तु मासस्य या सिता द्वादशी भवेत् ।
अर्चयेद्यस्तु मां तत्र तस्य पुण्यफलं शृणु ॥
यावल्लोका हि वर्त्तन्ते यावत्तिष्ठेच्च मेदिनी ! ।
मद्भक्तो जायते तावदन्यभक्तो न जायते ॥"*॥
तस्या अनुष्ठानं यथा,—
ब्रह्मोवाच ।
"शृणु मे भक्तितः पुत्र ! बोधन्येकादशीं हरेः ।
उपोष्या येन विधिना तं विप्र ! प्रवदामि ते ॥
कार्त्तिके शुक्लपक्षे तु दशम्यां नियतः शुचिः ।
स्नात्वा देवार्चनं कृत्वा वह्निकार्य्यं यथाविधि ॥
आचान्तः सुप्रसन्नात्मा हविष्यान्नं सुसंस्कृतम् ।
भुक्त्वाचम्य स्वपेत् सम्यक् कृत्वा शौचञ्च पादयोः ॥
रात्रेश्च पश्चिमे यामे समुत्थाय यथाविधि ।
कृत्वा मूत्रपुरीषे तु शौचं कुर्य्यादतन्द्रितः ॥
कृत्वाष्टाङ्गुलमात्रन्तु चीरदत्तसमुद्भवम् ।
भक्षयेद्दन्तकाष्ठञ्च खात्वाचामेत् प्रयत्नतः ॥
मृद्भाङ्गानि तथाङ्गानि चिरं ध्यायेज्जनार्द्दनम् ।
अतसीपुष्पसङ्काशं कमलाक्षं चतुर्भुजम् ॥
शङ्खचक्रगदाशार्ङ्गपीतवस्त्रं किरीटिनम् ।
प्रसन्नवदनं देवं सर्व्वलक्षणलक्षितम् ॥
ततश्चानुदये वारिहस्तेन परिगृह्य च ।
कुशान्वितं प्रयत्नीयात् नियमं विष्णुतुष्टये ॥
ध्यात्वा जलं गृहीत्वा तु भानुरूपं जनार्द्दनम् ।
इष्टार्घ्यं दापयेत् पश्चात् करतोयेन मानवम् ॥
एवमुच्चारयेद्वाक्यं तस्मिन् काले महामुने ! ।
एकादश्यां निराहारः स्थित्वा चैवापरेऽहनि ।
भोक्ष्येऽहं पुष्करीकाक्ष ! शरणं मे भवाच्युत ! ॥
एवमुक्त्वा ततः सम्यक् नित्यकर्म्म सुकर्म्मधीः ।
समर्पयेद्विधानेन विष्णुं संपूजयेज्जने ! ॥
सहस्रसंख्यया मुख्यः सावित्रीं संजपेद्द्विजः ।
सर्व्वपापक्षयकरीं व्रतस्य परिपूर्त्तये ॥"
इति पाद्मोत्तरखण्डे १२६ अध्यायः ॥ * ॥
अथ प्रबोधकालनिर्णयः । भविष्ये ।
"आ-भा-का-सितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रशस्तापवर्जनादिकम् ॥"
पाद्मे ।
"पौष्णर्क्षेषौ यदा नाद्रि मैत्राद्यमपि नो निशि ।
द्वादश्यामपि तत् कुर्य्यादुत्थानं शयनं हरेः ॥
निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् ॥"
वाराहे च ।
"अपादनियमस्तत्र स्वापे वा परिवर्त्तने ।
पादयोगो यदा न स्याद्धस्तेनापि तदा भवेत् ॥"
किञ्च स्कान्दे ।
"रेवत्यन्तो यदा रात्रौ द्वादश्या च समन्वितः ।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥
रेवत्यादिरथान्तो वा द्वादश्या च विना भवेत् ।
उभयोरप्यभावे तु सन्ध्यायाञ्च महोत्सवः ॥"
वाराहे च ।
"द्वादश्यां सन्धिसमये नक्षत्रत्रयसम्भवे ।
आ-भा-का-सितपक्षेषु शयनावर्त्तनादिकम् ॥"
अतएव पुष्करपुराणे ।
"यस्य यस्य तु देवस्य यन्नक्षत्रं तिथिश्च या ।
तस्य देवस्य तस्मिंश्च शयनावर्त्तनादिकम् ॥" *॥
अथ भगवत्प्रबोधनविधिः ।
"शयनामिव निष्पाद्य महापूजां जलाशये ।
क्षमां नीत्वाथ सङ्कल्पं कृत्वा तञ्च प्रबोधयेत् ॥"
तत्र मन्त्रः ।
"ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्य्य-
सोमादिभिर्वन्दितपादपद्मः ।
बुध्यस्व देवेश जगन्निवास !
मन्त्रप्रभावेण सुखेन देव ! ॥
इयन्तु द्वादशी देव प्रबोधार्थं विनिर्म्मिता ।
त्वयैव सर्व्वलोकानां हितार्थं श्रेयसायिना ॥
उत्तिष्ठोत्तिष्ठ गोविन्द ! त्यज निद्रां जगत्पते ! ।
त्वयि सुप्ते जगत् सुप्तमुत्थिते चोत्थितं भवेत् ॥
गता मेघा वियच्चैव निर्म्मलं निर्म्मला दिशः ।
शारदानि च पुष्पाणि गृहाण मम केशवेति ॥"
उत्तिष्ठोत्तिष्ठेत्यत्र क्वचिच्चैवम् ।
"त्वयि सुप्ते जगन्नाथे जगत् सुप्तं भवेदिदम् ।
उत्थिते चेष्टते सर्व्वमुत्तिष्ठोत्तिष्ठ माधवेति ॥"
वाराहे च ।
"ब्रह्मेन्द्ररुद्रैरवितर्क्यभावो
भवाद्यृषिर्वन्दितवन्दनीयः ।
प्राप्ता तव द्वादशी कौमुदाख्या
जागृध्व जागृध्व च लोकनाथ ! ॥
मेघा गता निर्म्मलपूर्णचन्द्रः
शारदपुष्पाणि च लोकनाथ ! ।
अर्घं ददानीति च भक्तिहेतो-
र्जागृध्व जागृध्व च लोकनाथ ! ॥"
श्रुतिश्च । "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुले" इत्यादि ।
"ततस्तल्पात् समुत्थाय क्षमां वराहादिनिस्वनैः ।
तीरे सुखं निवेश्याथ प्रार्थयेत्तदनुग्रहम् ।
तथा हि क्षतीयस्कन्धे श्रीब्रह्मस्तुतौ ।
"सोऽसावदभ्रकरुणो भगवान् विवृद्ध-
प्रेमस्मितेन नयनाम्बुरुहं विजृम्भन् ।
उत्थाय विश्वविजयाय च नो विषादं
माध्व्या गिरापनयतात् पुरुषः पुराणः ॥"
इति ।
"ततः पुष्पाञ्जलिं दत्त्वा संस्थाप्य विधिवत् प्रभुम् ।
नीराज्य न्यासपूर्व्वञ्च वस्त्रादीनि समर्पयेत् ॥"
तथा च ब्राह्मे ।
"एकादश्यान्तु शुक्लायां कार्त्तिके मासि केशवम् ।
प्रसुप्तं बोधयेद्रात्रौ भक्तिश्रद्धासमन्वितः ॥
वृत्यगीतैस्तथा वाद्यैर्नृत्यज्ञःसाममङ्गलैः ।
विना पशुवधशब्देश्च पुराणश्रवणेन च ॥
वासुदेवकथाभिश्च स्तोत्रैरन्यैश्च वैष्णवैः ।
सुभाषितैरिन्द्रजालैर्भूमिशोभाभिरेव च ॥
पुष्पैर्धूपैश्च नैवेद्यैर्दीपवृक्षैः सुशोभनैः ।
होमैर्भक्ष्यैरुपैश्च फलैः शाकैश्च पायसैः ॥
इक्षोर्विकारैर्मधुना द्राक्षाखण्डैः सदाड्डिमैः ।
कुठेरकस्य मञ्जर्य्या मालत्या नवनेन च ॥"
नवनं पुष्पविशेषः ।
"कृष्णाभ्यां श्वेतरक्ताभ्यां चन्दनाभ्याञ्च सर्व्वदा ।
कुङ्कुमालक्तकाभ्याञ्च रक्तसूत्रैः सकुङ्कुमैः ॥
तथा नानाविधैः पुष्पैर्वैदैर्वैरक्रयाहृतैः ॥"
एवमेव प्रायः पाद्मे च । तथा स्कान्दे च ।
"बहुपुष्पैर्बहुफलैः कर्पूरागुरुकुङ्कुमैः ॥
हरेः पूजा विधातव्या कार्त्तिके बोधवासरे ॥"
इति ॥
"इत्थं कृत्वा महापूजां महानीराजनं तथा ।
व्रतान्तार्थं पठेत् कृष्णे सपुष्पाक्षतवारिणा ॥
वेदस्तुत्यादिना स्तुत्वा सस्वस्त्यादिना प्रभुम् ।
संप्रार्थ्य गीतवाद्यादिघोषैरारोहयेद्रथम् ॥"
तथा च भविष्योत्तरे श्रीकृष्णयुधिष्ठिरसंवादे ।
"महातूर्य्यरवे रात्रौ भ्रामयेत् स्यन्दने स्थितम् ॥
उत्सवं देवदेवेशं नगरे पार्थिवः स्वयम् ।
दीपोद्योतकरे मार्गे नृत्यगीतसमाकुले ॥"
अथ रथयात्रामाहात्म्यं भविष्योत्तरे तत्रैव ।
"यं यं दामोदरः पश्येदुत्थितो धरणीधरः ।
तं तं प्रदेशं राजेन्द्र ! सर्व्वं स्वर्गाय कल्पयेत् ॥"
किञ्च ।
"यावत्यदानि कृष्णस्य रथस्याकर्षणं नरः ।
करोति क्रतुभिस्तानि तुल्यानि नरनायक ! ॥
रथस्थं ये निरीक्षन्ते कौतुकेनापि केशवम् ।
देवतानां गणाः सर्व्वे भवन्ति सपरिच्छदाः ॥
स्त्रियोऽपि मुक्तिमायान्ति रथयात्रापरायणाः ।
पिङ्गमाल्यभृतं कुलं नयन्ति हरिमन्दिरम् ॥
कुर्व्वन्ति नर्त्तकीरूपं रथाग्रे कौतुकान्वितम् ।
अप्सरोभिः सह क्रीड़ां कुर्व्वन्तीन्द्राच्युतं दृशम् ॥
ये रथाग्रे प्रकुर्व्वन्ति गीतवाद्यादि मानवाः ।
देवलोकात् परिभ्रष्टा जायन्ते मरुतेश्वराः ॥
मौलिना स्यन्दनस्याग्रे गायमानाश्च गायकाः ।
वाहकैः सह राजेन्द्र ! प्रयान्ति हरिमन्दिरम् ॥
रथोत्सवे मुकुन्दस्य येषां हर्षोऽपि जायते ।
तेषां न नारकी पीड़ा यावदिन्द्राश्चतुर्दश ॥
रथोत्सवस्य माहात्म्यं कलौ वितनुते हि यः ।
पुण्यवृद्ध्या विशेषेण लोभेनाप्यथवा नरः ॥

सप्तद्वीपसमुद्रान्ता रत्नधान्यसमन्विता ।
सशैलवनपुण्याढ्या तेन दत्ता मही भवेत् ॥"
अन्यत्र च ।
"बोधनी जगदाधारा कार्त्तिके शुक्लपक्षतः ।
रथस्थो यत्र भगवांस्तुष्टो यच्छति वाञ्छितम् ॥
भजन्ते ये रथारूढं देवं सर्व्वेश्वरेश्वरम् ।
तेषां याचा कृता नृणां कामानिष्टान् प्रयच्छति ॥
श्रीकृष्णरथशोभां ये प्रकुर्व्वन्ति प्रहर्षिताः ।
तेषां मनोरथावाप्तिं यच्छते पुरुषोत्तमः ॥
कृष्णस्य रथशोभां ये प्रकुर्व्वन्ति सभक्तितः ।
वाञ्छितं तेभ्यो यच्छन्ति नित्यं सूर्य्यादयो ग्रहाः ॥
कृष्णस्य रथशोभां ये प्रकुर्व्वन्ति सुहर्षिताः ।
पदे पदे तथा पुत्र ! पुण्यं तेषां प्रयागजम् ॥
रथयात्रास्थिते कृष्णे जयेति प्रवदन्ति ये ।
जयेति च पुनर्य्ये वै शृण्वन्ति पुण्यं वदाम्यहम् ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ।
वाराणस्यादितीर्थेषु देवानामेव दर्शने ।
यत् पुण्यं कविभिः प्रोक्तं कार्त्तिकेन च नरेश्वर ! ॥
जयशब्दे कृते विष्णौ रथस्थे तत् फलं स्मृतम् ।
रथस्थितो नरैर्यस्तु पूजितो धरणीधरः ।
यथालाभोपपन्नैश्च पुष्पैर्भक्त्या समर्चितः ॥
ददाति वाञ्छितान् कामानन्ते च परमं पदम् ।
मङ्गलं ये प्रकुर्व्वन्ति धूपदीपांस्तथा स्तवम् ॥
नैवेद्यं वस्त्रपूजाश्च भक्त्या नीराजनं हरेः ।
रथारूढस्य कृष्णस्य संप्राप्ते हरिवासरे ॥
फलं न तस्या ज्ञातं जानाति यदि केशवः ।
ब्रह्मस्वहारी गोघ्नश्च भ्रूणहा ब्रह्मनिन्दकः ॥
महापातकयुक्तोऽपि ब्रह्महा गुरुतल्पगः ।
मद्यपः सर्व्वपापोऽपि कलिकालेन मोहितः ॥
रथाग्रतः पदैकेन मुच्यते सर्व्वपातकैः ॥"
किञ्चान्यत्र ।
"रथारूढे महाविष्णौ ये कुर्व्वन्ति जयस्वनम् ।
पूजाद्याखिलपापेभ्यो मुक्ता यान्ति हरेः पदम् ॥"
किञ्च ।
"रथस्याकर्षणं पूर्व्वं कुरुते दैत्यनायकः ।
ततः सुराः सिद्धसङ्घा यक्षा गन्धर्व्वमानवाः ॥
इत्यश्च रथयात्राया विधिर्यक्तः स्वतोऽभवत् ।
तथापि कश्चित्तत्रान्यो विशेषोऽपि वितन्यते ॥"

अथ रथयात्राविधिः ।

"श्रीकृष्णे तु रथारूढे कृता जयजयध्वनिम् ।
निष्पाद्य च महापूजामाग्नीर्वाक्यानि कीर्त्तयेत् ॥"

तथा च विष्णुधर्म्मे ।
"वक्त्रं नीलोत्पलरुचि लसत्कुण्डलाभ्यां सुघृष्टं
चन्द्राकारं रचिततिलकं चन्दनेनार्द्रतेन च ।
गत्वा लीलां जनसुखकरीं प्रेक्षणीनान्तरीयं
पद्मावासां सततसरसा धारयन् पातु विष्णुः ॥
युक्तः शैलादिवाहैर्मधुरतररणत्किङ्किणीजाल-
मालै-
रत्नौघैर्मौक्तिकानामविरतमणिभिः संभृतैश्चैव
हारैः ।
हेमैः कुम्भैः पताकाग्रिवतरुचिभिर्भूषितः
केतुसङ्घै-
श्चक्रैरंहोघ्नवन्यो दुरितहरहरेः पातु जैत्रो
रथो नः ॥
मोदन्तां सुजना ह्यनिन्दितधियः सत्साखिलो-
पद्रवाः
खस्थाः सुस्थिरबुद्धयः प्रतिहतामित्रा रमन्तां
सुखम् ।
रे दैत्या गिरिगह्वराणि गहनान्यासुव्रजध्वं भया-
दैत्यारिर्भगवानयं यदुपतिर्यानं समारोहति ॥
पलायध्वं पलायध्वं रे रे दितिजदानवाः ।
संरक्षणाय लोकानां रथारूढो हृषीश्वरः ॥
ततो विचित्रगद्यानि पठित्वाथ महाप्रभोः ।
महाप्रसादमालाश्च स्वीकुर्य्यात् परया मुदा ॥"
तस्माहात्म्यमुक्तम् ।
"भक्त्या गृह्णाति यो मालां वैष्णवीं मङ्गला-
श्रयाम् ।
न तेषां दुर्लभं किञ्चिदिह लोके परत्र च ॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामसमृद्धये ।
मालामेतां प्रयत्नीयात् सौख्यमोक्षप्रदायि-
नीम् ॥"

इति ॥

"संचिन्त्याकृष्यमाणश्च श्रीप्रह्लादादिभी रथम् ।
आकृष्य प्रेरयन् पूर्य्यां भ्रामयेद्वैष्णवैः सह ॥"
तथा च भविष्योत्तरे तत्रैव ।
"वृत्यमानेभांगवतैर्गीतवादित्रनिस्वनैः ।
भ्रामयेत् स्यन्दनं विष्णोः पुरमध्ये समन्ततः ॥"
किञ्च ।
"प्रबोधवासरे प्राप्ते कार्त्तिके माधुनन्दन ! ।
देवालयेषु सर्व्वेषु पुरमध्ये समन्ततः ॥
भ्रामयेत्तूर्य्यनिर्घोषैः रथस्थं धरणीधरम् ॥"
किञ्च ।
"रथागमे सकुन्दस्य पुरशोभान्तु कारयेत् ।
सर्व्वतो रमणीयन्तु पताकैरुपशोभितम् ॥
तोरणैर्वहुभिर्युक्ते रम्यास्तम्भैश्च शोभितम् ।
स्थाने स्थाने महीपाल ! कर्त्तव्यं पुण्यसंयुतम् ॥
विचित्ररथशोभा च कर्त्तव्या भावितैर्नरैरिति ॥
रथेन गच्छन् भगवानगुरुगच्छोऽखिलैर्जनैः ।
स्वगेहागतवान्नाऽन्यथा दोषो महान् भवेत् ॥" * ॥

अथ रथानुगमनविधिः । तत्रैव ।
"रथेन सह गच्छन्ति पार्श्वतः पृष्ठतोऽग्रतः ।
विष्णुनैव समाः सर्व्वे भवन्ति श्वपचादयः ॥
रथस्थं ये न गच्छन्ति भ्रममाणं जनार्द्दनम् ।
विप्राध्ययनसम्पन्ना भवन्ति श्वपचाधमाः ॥"
किञ्च ।
"येषां गृहागतो याति रथस्थो मधुसूदनः ।
पूजा तैस्तैः प्रकर्त्तव्या वित्तशाठ्यविवर्ज्जितैः ॥
अनर्चितो यदा याति गृहाद्यस्य महीधरः ।
पितरस्तस्य विमुखा वर्षाणां दश पञ्च च ॥
यः पुनः कुरुते पूजां गृहायाते तु माधवे ।
वसते श्वेतद्वीपे तु यावदिन्द्राश्चतुर्दश ॥"

अन्यत्र ।
"नानुव्रजति यो मोहाद्व्रजन्तं जगदीश्वरम् ।
ज्ञानाधिदग्धकर्म्मापि स भवेद्ब्रह्मराक्षसः ॥"

इति ॥

"अथ स्वमन्दिरं नीत्वा पूर्व्ववत् पूजयेत् प्रभुम् ।
रात्रौ जागरणं कुर्य्याद्विधिवद्वैष्णवैः समम् ॥"
अथ प्रबोधनीजागरणमाहात्म्यम् ।
स्कान्दे तत्रैव ।
"पूर्व्वजन्मसहस्रेषु पापं यत् समुपार्ज्जितम् ।
जागरेण प्रबोधन्यां दह्यते तूलराशिवत् ॥
कृत्वापि पातकं घोरं ब्रह्महत्यादिकं नरः ।
कृत्वा जागरणं विष्णोर्धूतपापो भवेन्नरः ॥
कर्म्मणा मनसा वाचा पापं यत् समुपार्ज्जितम् ।
त्यालयेत्तच्च गोविन्दः प्रबोधन्यान्तु जागरे ॥
दुष्प्राप्यं यत् फलं विप्रैरश्वमेधादिभिर्मखैः ।
प्राप्यते तत् सुखेनैव प्रबोधन्यान्तु जागरे ॥
आभूत सर्व्वतीर्थानि दत्त्वा गां काञ्चनीं महीम् ।
न तत् फलमवाप्नोति यत् कृत्वा जागरं हरेः ॥
चन्द्रसूर्य्योपरागे तु यत् फलं परिकीर्त्तितम् ।
तत्सहस्रगुणं पुण्यं प्रबोधन्यान्तु जागरे ॥
स्नानं दानं तपो होमः स्वाध्यायश्चार्च्चनं हरेः ।
तत् सर्व्वं कोटिगुणितं प्रबोधन्यान्तु जागरे ॥
समतीतं भविष्यच्च वर्त्तमानं कुलायुतम् ।
विष्णुलोकं नयत्याशु जागरेण प्रबोधनी ॥
चलन्ति पितरो हृष्टा विष्णुलोकमलङ्कृताः ।
विमुक्ता नारकैर्दुःखैः कर्त्तुः कृष्णप्रजागरम् ॥
भार्य्यापत्ये तु ये जाता भ्रातृ. पितृतस्तथा ।
तारयेन्नात्र सन्देहः प्रबोधन्यां तु जागरे ॥"
किञ्च ।
"फलैर्नानाविधैर्देवैः प्रबोधन्यान्तु जागरे ।
शुद्धे तोयं समादाय अर्घ्यं दद्याज्जनार्द्दने ॥
यत् फलं सर्व्वदानेषु सर्व्वतीर्थेषु यत् फलम् ।
तत् सर्व्वं कोटिगुणितं दत्त्वार्घ्यं बोधवासरे ॥"
पाद्मे च तत्रैव ।
"अन्यत्रापि प्रिया विष्णोर्जागरे स्यात् प्रबो-
धनी ।
किं पुनर्मथुरायां सा ततो वै जन्मसद्मनि ॥
एकैवैकादशी कृष्णजन्माष्टम्यहे कृता नरैः ।
ततोऽधिकं न कर्त्तव्यं लोके किञ्चन विद्यते ॥
रात्रौ जागरणं तत्र प्रीत्या कुर्व्वन्ति ये नराः ।
संसारे मोहसम्प्राप्ते ते सदा जायति जायति ॥"
किञ्च तत्रैव श्रीराधिकोपाख्यानान्ते ।

"सुबोधनीजागरपुण्यवैभवात्
प्रसन्न ईशो विधिवाक्यसत्यकृत् ।
चकार रासोत्सवनर्त्तनं सह
वृन्दावनेऽन्याभिरपीह राधया ॥
सा वृत्यमानाद्भुतगोपरूपिणा
कृष्णेन जन्मान्तरवाञ्छितेन ।
राधा महाप्रेमजवाकुलेन्द्रिया
निन्येऽन्यलोकं कथया कृतार्थताम् ॥
तस्मात् सुबोधनीं कृत्वा रात्रौ कृत्वा च जागरम् ।
समीप्सितं हरिं दृष्ट्वा का भीः संसारजा द्विजाः ॥

मथुरायान्तु किं वाच्यं जागरे हरिसन्निधौ ।
कार्त्तिके बोधनीं प्राप्य ततः श्रेयः परं न हि ॥
मथुरायां प्रबोधन्यां कृतजागरणस्य हि ।
क्षणार्द्धदानतो वेद्योमोचयद्ब्रह्मराक्षसम् ॥
जागरस्य च माहात्म्यं गीतवादित्रनर्त्तनम् ।
हरेः प्रीतिकरं राजौ वक्तुं मे नैव शक्यते ॥
यस्तु गायति कृष्णाग्रे कौमुदीं द्वादशीं क्षणम् ।
सर्व्वलोकान् परित्यज्य विष्णुलोकं स गच्छति ॥"
अतएवोक्तं तत्रैव ।
"राज्यमन्यत्र संत्यज्य स्फीतं निहतकण्टकम् ।
कार्त्तिके मथुरायां वै कौमुदीं जागरं चरेत् ॥"
अथ पारणादिनकृत्यम् ।
"प्रातर्नित्यक्रियां कृत्वा स्नात्वा संभोज्य भूसुरान् ।
गच्छन् कृतव्रताच्छिद्रं प्रदद्याद्द्विजादिकम् ॥
दानं यथाव्रतं तेभ्यो दत्त्वा पारणमाचरेत् ।
प्रवर्त्तयेच्च संयक्तं चातुर्मास्यव्रतेषु यत् ॥"
तथा च भविष्योत्तरे तत्रैव ।
"प्रभाते विमले स्नात्वा भोजयेद्ब्राह्मणैः शुभैः ।
घृतक्षीरदधिक्षौद्रकासारगुडमोदकैः ।
अर्चयेच्चन्दनैर्धूपैः पुष्पैर्गन्धैर्द्विजोत्तमान् ॥
आचान्तेभ्यस्ततो दद्यात्तस्मै यत्किञ्चिदेव हि ।
सुवाचा सुमनोभीष्टपुण्यफलादिकम् ॥
चतुरो वार्षिकान्मासान् नियमं यस्य यत् कृतम् ।
कथयित्वा द्विजेभ्यस्तद्याचेत्क्षमा सुदक्षिणाम् ॥"
एवमेव पाद्मे । तत्रैव किञ्चाधिकम् ।
"चातुर्मास्यव्रते विप्राः पश्चाद्यच्छिद्रवाचनम् ॥"

इति श्रीहरिभक्तिविलासे १६ विलासः ॥

प्रबोधिनी, स्त्री, (प्रबोधयति हरिमिति । प्र+बुध्+णिच्+णिनिः । ङीप् ।) प्रबोधनी । उत्थानैकादशी । यथा,—

वराह उवाच ।
"उपवासासमर्थानां सदैव पृथुलोचने ! ।
एका सा द्वादशी पुण्या उपोष्या या प्रबोधिनी ॥
तस्यामाराध्य विश्वेशं जगतामीश्वरेश्वरम् ।
प्राप्नोति सकलं तद्धि द्वादशद्वादशीफलम् ॥
पूर्ब्बाभाद्रपदा योगे सैव वा द्वादशी भवेत् ।
अतीव महती तस्यां सर्व्वकृत्यमथाक्षयम् ॥
उत्तराङ्गारसहिता यदि चैकादशी भवेत् ।
तदा कोटिगुणं पुण्यं केशवाक्षभते फलम् ॥
सकृदेवार्चिते तस्यां सर्व्वं कृतमिहाक्षयम् ।
यथा प्रबोधिनी पुण्या तथा यस्यां स्वपेद्धरिः ॥
उपोष्या हि महाभागे ! अनन्तफलदा हि सा ।
शयने बोधने चैव हरेस्तु परिवर्त्तने ॥
उपोष्यैव विधानेन नरो निर्म्मलतां व्रजेत् ।
तस्मात् सर्व्वप्रयत्नेन द्वादशीं समुपोषयेत् ॥
यदीच्छेत विशालाक्षि ! शाश्वतीं गतिमात्मनः ।
एकादशी सोमयुक्ता कार्त्तिके मासि भामिनि ! ।
उत्तराभाद्रसंयोगे अनन्ता सा प्रकीर्त्तिता ।
तस्यां यत् क्रियते भद्रे ! सर्व्वमानन्त्यमश्नुते ।
अनन्तपुण्यफलदा तेनानन्ता स्मृता प्रिये ! ॥
एकादशी भौमयुता यदा स्याद्भूतधारिणि ! ॥
स्नात्वा देवं समभ्यर्च्च्य प्राप्नोति परमं फलम् ।
प्राप्नोति सकलं तद्धि द्वादशद्वादशीं नरः ॥
जलपूर्णं तदा कुम्भं स्थापयित्वा विचक्षणः ।
पञ्चरत्नसमोपेतं घृतपात्रयुतं तथा ॥
तस्यां स्कन्धे तु धरितं मत्स्यरूपं जनार्द्दनम् ।
मायकेय सुवर्णेन सुतप्तेन वरानने ! ॥
स्थापयित्वा विधानेन कुङ्कुमेन विलेपितम् ।
पीतवस्त्रयुगच्छन्नं क्षीरोपानद्युगान्वितम् ॥
पूजयेत् कमलैर्देवि ! मद्भक्तः संजितेन्द्रियः ।
मत्स्यं कूर्म्मं वराहञ्च नारसिंहञ्च वामनम् ॥
रामं रामञ्च कृष्णञ्च बुद्धञ्चैव तु कल्किनम् ।
एवं दशावतारांश्च पूजयेद्भक्तिसंयुतः ॥
पुष्पैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि ।
संपूज्यैवमलङ्कारैर्विविधैः पूजनञ्चरेत् ॥
ततस्तस्याग्रतो देयं नैवेद्यं पात्रितं घृतम् ।
एवं संपूज्य गोविन्दं दिवापि कमलेक्षणम् ॥
रात्रौ चोत्थापनं कार्य्यं देवदेवस्य सुव्रते ! ।
प्रभाते विमले स्नात्वा भक्त्या संपूज्य केशवम् ॥
पुष्पधूपादिनैवेद्यैः फलैर्नानाविधैः शुभैः ।
ततस्तु पूजयेद्विद्वानाचार्य्यं भक्तिसंयुतः ॥
अलङ्कारोपहारैश्च वस्त्राद्यैश्च स्वशक्तितः ।
पूजयित्वा विधानेन तं देवं प्रतिपादयेत् ॥
जगदादे जगद्रूप अनादे जगदादिजत् ।
जलशायिन् जगद्योने प्रीयतां मे जनार्द्दन ! ॥
अनेनैव विधानेन कुर्य्यादेकादशीं नरः ।
तस्य पुण्यं भवेदृयत्तु तच्छृणुष्व वसुन्धरे ! ॥
यदि वक्त्रसहस्राणां सहस्राणि भवन्ति हि ।
संख्यातुं नैव शक्यन्ते प्रबोधिन्यास्तथा गुणाः ॥
तथाप्युद्देशमात्रेण शक्या वक्ष्यामि तच्छृणु ।
चन्द्रतारार्कसङ्काशमधिष्ठायानुजौविभिः ॥
सहैव यानमागच्छेन्मम लोकं वसुन्धरे ! ।
तत्र कल्पसहस्रान्ते सप्तद्वीपेश्वरो भवेत् ॥
आयुरारोग्यसम्पन्नो जन्मातीतो भवेत्ततः ।
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥
पापान्येतानि सर्व्वाणि श्रवणेनैव नाशयेत् ॥
पश्येच्च धीमानधनोऽपि भक्त्या
सृणोत्यनुग्रथ इह धीयमानः ।
प्रब्रूयोति भक्तस्य मतिं ददाति
विकल्मषः सोऽपि दिवं प्रयाति ॥
दुःस्वप्नं प्रग्रमसुपैति पठ्यमाने
माहात्म्ये भवभयहारके नरस्य ।
यः कुर्य्यादृव्रतवरमेतदव्ययाया
बोधिन्याः किमुत फलन्तु तस्य वाच्यम् ॥
ते धन्यास्ते कृतार्थाश्च तैरेव सुकृतं कृतम् ।
तैरात्मजन्म सफलं कृतं ये व्रतकारकाः ॥"

इति वराहपुराणे प्रबोधिनीमाहात्म्यम् ॥

प्रभञ्जनः, पुं, (प्रकर्षेण भनक्ति इत्यादीनिति । प्र+भन्ज्+युच् ।) वायुः । इत्यमरः । १ । १ । ६६ ॥ (यथा, महाभारते । ७ । १५४ । ७८ ।
"घटोत्कचसुतः श्रीमान् भिन्नाञ्जनचयोपमः ।
ररोध द्रौणिमायान्तं प्रभञ्जनमिवाद्रिराट् ॥"
मणिपुराधिपतिराजविशेषः । यथा, महाभारते । १ । २१७ । १६ ।
"राजा प्रभञ्जनो नाम कुलेऽस्मिन् सम्बभूव ह ।
अपुत्रः पुत्रवेनार्थी तपस्तेपे स उत्तमम् ॥")
भञ्जनकरैरि, त्रि ॥ (यथा, हरिवंशे । २४५ । १३ ।
"प्रभञ्जनो यो लोकानां युगान्ते सर्व्वनाशनः ॥"
यथा च महाभारते । १ । १२३ । १२ ।
"सा सलज्जा विहस्याह पुत्रं देहि सुरोत्तम ! ।
बलवन्तं महाकायं सर्व्वदर्पप्रभञ्जनम् ॥")

प्रभद्रः, पुं, (प्रकृष्टं भद्रं यस्मात् ।) निम्बः । इति राजनिर्घण्टः ॥ (प्रकृष्टो भद्र इति प्रादिसमासः । अच्छे, त्रि ॥)

प्रभद्रा, स्त्री, (प्रकृष्टं भद्रं यस्मात् । टाप ।) प्रसारिणी । इति राजनिर्घण्टः ॥

प्रभवः, पुं, (प्रभवत्यस्मादिति । प्र+भू+"अकर्त्तरि च कारके" इत्यधिकारात् अपादानार्थे । "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) जन्महेतुः । पित्रादिः । आद्योपलब्धिस्थानम् । आद्योपलब्धये प्रथमज्ञानार्थं यत् स्थानं देशः सः । यथा । वाल्मीकिः श्लोकप्रभवः । हिमवान् गङ्गाप्रभवः । इत्यमरभरतौ ॥ अपां मूलम् । सुनिभेदः । इति हेमचन्द्रः ॥ पराक्रमः । इति मेदिनी । वे, ४१ ॥ जन्म । इति शब्दरत्नावली ॥ (यथा, कुमारे । ५ । ८१ ।
"विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मसमोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति ॥"
सृष्टिः । यथा, देवीभागवते । १ । १६ । २ ।
"महाशक्त्या प्रभावेन त्वं मां विस्मृतवान् पुरा ।
प्रभवे प्रलये जाते भूत्वा भूत्वा पुनः पुनः ॥"
साध्यभेदः । यथा, हरिवंशे । १६६ । ४४ ।
"धर्म्माज्जयोऽजयश्चैव कामः साध्यासाध्यान् व्यजायत ।
प्रभवं च्यवनञ्चैव मीढ्वांसं सुरभीन्तथा ॥"
त्रि, प्रभूतः । यथा, ऋग्वेदे । २ । ३८ । ५ ।
"नानौकांसि दुर्य्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः ॥"
"प्रभवः प्रभूतो अग्नेः शोकस्तेजः ।" इति तद्भाष्ये सायनः ॥)

प्रभविष्णुः, पुं, (प्रभवितुं शीलमस्येति । प्र+भू+"सुवश्च ।" ३ । २ । १३८ । इति इष्णुच् ।) वटुकभैरवस्याष्टोत्तरशतनामान्तर्गतनामविशेषः । यथा । "प्रभविष्णुः प्रभावान् ।" इत्यादि विश्वसारतन्त्रे आपदुद्धारकल्पः ॥ प्रभुः । यथा,
"न भर्त्ता नैव च सुतो न पिता भ्रातरो न च ।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः ॥"

इति दायभागः ॥

प्रकर्षेण भवनशीले, त्रि ॥

प्रभविष्णुता, स्त्री, प्रभुता । प्रभविष्णुशब्दात् भावार्थे तप्रत्ययेन पदं निष्पन्नम् ॥ (यथा, राजतरङ्गिण्याम् । २ । ४० ।
"यत्साध्यानि दुःखानि क्षेप्तुं न प्रभविष्णुता ।
तन्महीपाल ! महतां महत्त्वस्य किमङ्कनम् ॥")

ततः सर्व्वे गणास्तच्च भुञ्जन्ते फललान्यपि।
हते वराहरूपे गणे भर्गमासाद्य ते गणाः।
चतुर्भागाः स्वयं भूत्वा भूतं कर्म्मेति वै जगुः॥
भूतत्वमभवत्तेषां चतुर्भागवतां तदा।
वचनात् पद्मजातस्य भूतग्रामास्ततो मताः॥
यो लोकविदितः पूर्व्वं भूतग्रामश्चतुर्व्विधः।
यतस्तेभ्योऽधिका यत्नैस्तदृङ्मात्रयाम उच्यते॥
इति वः सर्व्वमाख्यातं भूताः शृण्वगणा यथा।
यदाहारा यदाकारा यत्कृत्यास्ते महौजसः॥
य इदं शृणुयान्नित्यमाख्यानं योगसत्तमम्।
स दीर्घायुः सदोत्साही योगयुक्तश्च जायते॥"
इति कालिकापुराणे पारिषदोत्पत्तिर्नाम २६ अध्यायः॥ (धृतराष्ट्रपुत्राणामन्यतमः। यथा, महाभारते। १। ११७। १२।
"प्रमथश्च प्रमाथी च दीर्घरोमश्च वीर्य्यवान्॥")

प्रमथनं, क्ली, (प्र+मथ+भावे ल्युट्।) वधः। इत्यमरः। २। ८। ११५॥ (यथा, रामायणे। १। ३। २४।
"वालिप्रमथनञ्चैव सुग्रीवप्रतिपादनम्॥"
क्लेशनम्। विलोडनम्। इति मथधात्वर्थदर्शनात्॥ (प्रकर्षेण मथतीति। प्र+मथ्+ल्युः। प्रमाथके, त्रि। यथा, महाभारते। १।१०२।६२।
"स चाग्निरूपसङ्काशो देवतुल्यपराक्रमः।
सर्व्वासामेव नारीणां चित्तप्रमथनो रहः॥")

प्रमथा, स्त्री, (प्रमथति त्रिदोषानिति। प्र+मथ्+अच्।) हरीतकी। इति मेदिनी। थे, २१॥ (गुणादिकमस्य हरीतकीशब्दे ज्ञातव्यम्॥)

प्रमथाधिपः, पुं, (प्रमथानां अधिपः।) शिवः। इत्यमरः। १। १। ३३॥

प्रमथितं, क्ली, (प्रकर्षेण मथितम्।) निर्जलतक्रम्। इति राजनिर्घण्टः॥

प्रमदः, पुं, (प्र+मद्+"प्रमदसंमदौ हर्षे।" ३। ३। ६८। इति अप्।) हर्षः। इत्यमरः। १।४।२४॥ (यथा, कथासरित्सागरे। ६।१६२।
"तच्छ्रुत्वा मम राज्ञश्च विषादप्रमदौ द्वयोः।
अभूतां मेघमालोक्य हंसचातकयोरिव॥"
प्रमाद्यत्यनेनेति। प्र+मद्+करणे अप्।) धुस्तूरफलम्। इति शब्दचन्द्रिका॥ (दानवविशेषः। यथा, हरिवंशे। ३। ८७।
"प्रमदो मयः कृपयो हयग्रीवश्च वीर्य्यवान्॥"
वशिष्ठतनयानामन्यतमः। स तु उत्तममन्वन्तरे सप्तर्षिप्रभेदः। यथा, भागवते। ८। १। २४।
"वशिष्ठतनयाः सप्त ऋषयः प्रमदादयः।
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित्॥")
प्रमाद्यतीति। प्र+मद्+कर्त्तरि अच्। यद्वा प्रकर्षेण मदोऽस्य।) मत्ते, त्रि। इति मेदिनी। दे, ७५॥ (यथा, रघौ। १६। ३७।
"प्राविशन् प्रमदवर्द्धितेष्वभूत
क्षत्रियादिषु विहारविभ्रमः॥")

प्रमदकाननं क्ली, (प्रमदानां काननम्। "ङ्याप्रातिपदिकात्।" ६। ३। ६३। इति हस्वः। यद्वा, प्रमदाय हर्षाय यत् काननम्।) प्रमदावनम्। इत्यमरटीकायां भरतः। २। ४। ३॥

प्रमदवनं, क्ली, (प्रमदानां वनमिति। "ङ्याप्रातिपदिकात्।" ६। ३। ६३। इति ह्रस्वः।) राज्ञीनां पुरोचितवनम्। इत्यमरः। २। ४। ७॥

प्रमदा, स्त्री, (प्रमदयति पुरुषमिति। प्र+मद हर्षे+णिच्+अच्। यद्वा, प्रमदो हर्षोऽस्यास्या इति अच्। टाप्।) उत्तमयोषित्। इति मेदिनी। दे, ५॥ (यथा, कुमारे। ४। १२।
"नयनान्यरुणानि घूर्णयन्
वचनानि स्खलयन् पदे पदे।
असति त्वयि वारुणीमदः
प्रमदानामधुना विडम्बना॥")
चतुर्दशाक्षरवृत्तिविशेषः। तल्लक्षणं यथा, वृत्तरत्नाकरटीकायाम्।
"नजभजला गुरुश्च भवति प्रमदा॥")

प्रमदाकाननं क्ली, (प्रमदानां काननम्।) प्रमदवनम्। इत्यमरटीकायां भरतः। २। ४। ३॥

प्रमदावनं, क्ली, (प्रमदानां वनम्।) प्रमदवनम्। इति शब्दरत्नावली॥

प्रमनाः, [स्] त्रि, (प्रकृष्टं मनोऽस्य।) हर्षयुक्तः। इत्यमरः। ३। १। ७॥ (यथा, महाभारते। ८। ३७। ४१।
"इति बहुगुणरूपं प्रभावति
प्रमनसि मद्रपतौ रिपुस्तवम्॥")

प्रमयः, पुं, (प्र+मी वधे+भावे अच्।) वधः। इति हेमचन्द्रः। ३। ३४॥ (यथा, राजतरङ्गिण्याम्। १। ६।
"इदं इदं नृपोदन्तं वद्वा प्रमयमीयुषाम्।
अर्व्वाक्कालभवैर्वार्त्ता यत्प्रबन्धेषु पूर्य्यते॥")

प्रमा, स्त्री, (प्रमीयते इति। प्र+मा+"आतश्चोपसर्गे।" ३। ३। १०६। इति अङ्। टाप्।) यथार्थज्ञानम्। तत्पर्य्यायः। प्रमितिः २। इत्यमरः। ३। २। १०॥ प्रमाणम् ३। इति शब्दरत्नावली॥ (यथा, प्रबोधचन्द्रोदये। २य अङ्के।
"प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः।
वेदान्ता यदि शास्त्राणि वौद्धैः किमपराध्यते॥"
यथा च ऋग्वेदे। १०। १३०। ३।
"कासीत्प्रमा प्रतिमा किम्॥"
"यस्य प्रमा प्रमाणमियत्ता का कथम्भूतासीत्।"
इति तद्भाष्ये सायणः॥) न्यायमते तद्वति तत्प्रकारकज्ञानम्। भ्रमभिन्नज्ञानम्। अस्याः कारणं गुणः। स च प्रत्यक्षे विशेष्ये विशेषणस्य सम्बन्धः। अनुमितौ साध्यविशिष्टपक्षे परामर्शः। शाब्दबोधे योग्यतायाः तात्पर्य्यस्य वा यथार्थज्ञानम्। उपमितौ शब्दे सादृश्यबुद्धिः। यथा,—
"दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्।
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः॥
प्रत्यक्षे तु विशेष्येण विशेषणवता समम्।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः॥
पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत्।
शब्दे सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः।
शाब्दबोधे योग्यतायास्तात्पर्य्यस्याथ वा प्रमा॥
गुणः स्यादभ्रमभिन्नत्वं ज्ञानमुच्यते प्रमा।
अथवा तत्प्रकारं यत् ज्ञानं तद्वद्विशेष्यकम्॥"
इति भाषापरिच्छेदे। १३१-१३५॥
("दोषः इति। अप्रमां प्रति दोषः कारणं प्रमां प्रति गुणः कारणं तत्रापि पित्तादिरूपा दोषा अननुगताः तेषां कारणत्वम् अन्वयव्यतिरेकाभ्यामेव सिद्धम्। गुणस्य प्रमाजनकत्वन्तु अनुमानात् सिद्धम्। यथा प्रमाज्ञानसाधारणकारणभिन्नकारणजन्याजन्यज्ञानत्वात् अप्रमावत्। न च दोषाभाव एव कारणमस्त्विति वाच्यम्। पीतः शङ्ख इति ज्ञानस्थले पित्तदोषसत्त्वात् शङ्खप्रमानुत्पत्तिप्रसङ्गात् विनिगमनाविरहात् अनन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणकारणतायाः न्याय्यत्वात्। न च गुणसत्त्वेऽपि पित्तप्रतिबन्धात् शङ्खे न सैन्यज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं तथा च किं गुणस्य हेतुत्वकल्पनयेति वाच्यं तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः। एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वाच्च। तत्र दोषाः के इत्याकाङ्क्षायामाह पित्तेति। क्वचित् पीतत्वादिभ्रमे पित्तं दोषः क्वचित् चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः। क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवं दोषा भ्रान्तिजनका इत्यर्थः। अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमशो गुणान् दर्शयति प्रत्यक्षे इत्यादि। प्रत्यक्षे विशेषणवत् विशेष्यसन्निकर्षो गुणः अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुण इत्येवमग्रेऽप्यूह्यः। प्रमां निरूपयति भ्रमभिन्नमिति। नन्वेवं यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेऽपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावात् अत आह अथवेति। तद्वद्विशेष्यकं तत्प्रकारकं ज्ञानं प्रमा इत्यर्थः। इदन्तु बोध्यम्। येन सम्बन्धेन तद्वत्ता तेन सम्बन्धेन तद्वद्विशेष्यकं तेन सम्बन्धेन प्रकारकत्वं वाच्यम्। तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः॥" *॥)

प्रमाणं, क्ली, (प्रमीयते विज्ञायतेनेति। प्र+मा+ल्युट्।) विष्णुः। यथा,—
"प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः॥"
इति महाभारते शान्तिपर्व्वणि दानधर्म्मे॥
नित्यम्। मर्य्यादा। शास्त्रम्। (यथा,—
"आप्ता ऋषिर्तर्कस्मृतिविभागविदो निर्भ्रीत्युपतापदर्शिनश्च। तेषामेवङ्क्रियायोगात् यद्वचनं तत् प्रमाणम्। अप्रमाणं पुनर्मत्तोन्मत्तमूर्खरक्तदुष्टादृष्टवचनमिति।" इति चरके विमानस्थाने चतुर्थेऽध्याये॥) सत्यवादी। (प्र+मा+भावे ल्युट्।) हेतुः। (प्रमिणोतीति। प्र+मा+कर्त्तरि ल्युः।) प्रमाता। इति मेदिनी। णे, ६१॥ प्रमा।

इति शब्दरत्नावली ॥ नित्यस्त्रीविवेकत्ववानयं शब्दः । यथा वेदाः प्रमाणं स्मृतयः प्रमाणमित्यादि ॥ प्रमायाः करणम् । न्याये तु प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि । इत्यत्र बहुवचनान्तोऽपि ॥ (यथा, मनौ । २ । १३ ।

"अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते ।
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥"

वेदान्तसारे च । "वेदान्तो नाम उपनिषत् प्रमाणं तदुपकारीणि शारीरिकसूत्रादीनि च ॥" "उपनिषच्छब्दो ब्रह्मात्मैक्यसाक्षात्कारविषयः । सैव उपनिषत् प्रमाणं तस्याः प्रमारूपायाः करणभूता ।" इति विद्वन्मनोरञ्जनीटीका ॥)

प्रमाणबाधितार्थकः, पुं, (प्रमाणेन बाधितः अर्थो यस्य । ततः कप् ।) तर्कविशेषः । तस्य लक्षणम् । आत्माश्रयादिचतुष्कान्यप्रसङ्गत्वम् । स द्विविधः । याप्यिग्राहकः विषयपरिशोधकश्च । तत्राद्यो यथा । धूमो यदि वह्नियभिचारी स्यात्तदा वह्निजन्यो न स्यात् । द्वितीयस्तु पर्व्वतो यदि निर्वह्निः स्यात्तदा निर्धूमः स्यात् । इति तर्कजागदीशी ॥

प्रमातामहः, पुं, (प्रकृष्टो मातामहस्यापि जनकत्वादिति । प्रादिसमासः ।) मातामहपिता । यथा, अमरे ।

"पितामहः पितृपिता तत्पिता प्रपितामहः ।
मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः ॥"

प्रमातामही, स्त्री, (प्रकृष्टा मातामही ।) प्रमातामहपत्नी । इति स्मृतिः ॥

प्रमाथः, पुं, (प्र + मथ् + भावे घञ् ।) प्रमथनम् । बलात् हरणम् । इति पुंरामः । (निपात्य भूमौ पेषणम् । यथा, महाभारते । ४ । १२ । २७ ।

"क्षतप्रतिक्षतेश्चैव बाहुभिश्च सुसङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोन्माथनैस्तथा ॥"

अस्य टीकायां नीलकण्ठेन मन्त्रग्राह्यात् एतल्लक्षणमुद्धृतम् । यथा,—

"निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते ॥"

कुमारस्यानुचरभेदः । यथा, महाभारते । ९ । ४५ । २६ ।

"ततः प्रादादनुचरौ यमः कालोपमावुभौ ।
उन्मादश्च प्रमादश्च महावीर्यौ महाद्युती ॥"

शिवपारिषदप्रमथगणः । यथा, हरिवंशे । १७८ । ५३ ।

"ते प्रदीप्तप्रहरणा दैत्यदानवराक्षसाः ।
प्रमथगणसुखाश्च प्रायुधन् शस्त्रमयम् ॥")

प्रमाथी, [न्] त्रि, प्रपूर्ब्बमथधातोः कर्त्तरि णिनिः । पीड़नकर्त्ता । मारणकर्त्ता । प्रमथनशीलः । देहेन्द्रियक्षोभक इत्यर्थः । इति श्रीधरस्वामी ॥ यथा,—

"चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद्दृढम् ॥"

अपि च ।

"इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥"

इति श्रीभगवद्गीता ॥

प्रमादः, पुं, (प्र + मद् + भावे घञ् ।) अनवधानता । इत्यमरः । १ । ७ । ३० ॥ यथा,—

"लोभप्रमादविश्वासैः पुरुषो नश्यते चिरम् ।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥"

इति गारुड़े नीतिसारे ११५ अध्यायः ॥

प्रमादवान्, [त्] त्रि, (प्रमादोऽस्यास्मिन् वा । प्रमाद + मतुप् । मस्य वः ।) प्रमादयुक्तः । तत्पर्य्यायः । जाल्मः २ असमीक्ष्यकारी ३ खट्वारूढः ४ । इति जटाधरः ॥ (यथा, याज्ञवल्क्ये । ३ । १३६ ।

"निद्रालुः क्रूरलुब्धो नास्तिको याचकस्तथा ।
प्रमादवान् भिन्नदन्तो भवेत्तिर्य्यक्तु तामसः ॥")

प्रमादिका, स्त्री, (प्रमादोऽनवधानताऽस्यस्या इति । प्रमाद + ठन् । टाप् ।) दूषिता कन्या । तत्पर्य्यायः । संवेदा २ दूषिता ३ धर्षकारिणी ४ । इति शब्दरत्नावली ॥

प्रमादी, [न्] त्रि, (प्रमादोऽस्यस्येति । प्रमाद + इनिः ।) प्रमादविशिष्टः । अनवधानतायुक्तः । यदुक्तम् ।

"कुरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यते
यः सेवते पञ्चभिरेव पञ्च ॥"

प्रमापणं, क्ली, (प्र + मी अ हिंसायाम् + स्वार्थे णिच् + भावे ल्युट् ।) मारणम् । इत्यमरः । ३ । ८ । ११२ ॥ (यथा, मनुः । ११ । १४९ ।

"अस्थिमतान्तु सत्त्वानां सहस्रस्य प्रमापणे ।
पूर्णे चानस्थिकानान्तु मृदहत्याव्रतञ्चरेत् ॥")

प्रमितः, त्रि, (प्र + मि + क्तः । यद्वा, प्र + मा + क्तः । "द्रुतिस्तुतिमास्येति ।" ७ । ४ । ७० । इत्वम् ।) ज्ञातः । इति जटाधरः ॥ (अल्पत्वम् । इति विजयरक्षितः ॥ यथा, निदाने अर्शोरोगाधिकारे ।

"प्रमिताभ्यशनं तीक्ष्णं मद्यं मैथुनसेवनम् ॥"

परिमितम् । यथा, हठतत्त्वसंहितायाम् । १०४ । ३७ ।

"प्रमिताशनराशि वदन् ॥")

प्रमितिः, स्त्री, (प्र + मा वा मि + क्तिन् ।) प्रमा । इत्यमरः । १ । २ । १० ॥

प्रमीढ़ः, त्रि, (प्र + मिह सेचने + क्तः ।) घनः । स्निग्धः । इति मेदिनी । ढे, ८ ॥ (यथा,—

"लग्दोषिणां प्रमीढानां स्निग्धाभिष्यन्दिनां हिमाम् ।
शिशिरे लङ्घनं श्रेष्ठमपि वातविकारिणाम् ॥"

इति चरके सूत्रस्थाने द्वाविंशेऽध्याये ॥)

प्रमीतः, त्रि, (प्र + मी अ हिंसायाम् + क्तः ।) मृतः । यज्ञार्थेहतपशुः । इत्यमरः । २ । ८ । ११७ ॥

प्रमीला, स्त्री, (प्रमीलनमिति । प्र + मील संमीलने + "गुरोश्च हलः ।" ३ । ३ । १०३ । इत्यः । ततष्टाप् ।) तन्द्री । इत्यमरः । १ । ३ । १०५ ॥

प्रमुखं, क्ली, (प्रकृष्टं सुखमारम्भः ।) तदादिमम् । ततकालः । इति त्रिकाण्डशेषः ॥ (सम्मुखम् । यथा, भगवद्गीतायाम् । २ । ६ ।

"यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः ॥")

प्रमुखः, पुं, (प्रकृष्टं सुखं अग्रभागो यस्य ।) पुन्नागवृक्षः । इति शब्दचन्द्रिका ॥ समूहः । इति शब्दरत्नावली ॥

प्रमुखः, त्रि, (प्रकृष्टं सुखमाद्यं यस्य ।) प्रधानम् । (यथा, कुमारसम्भवे । २ । ३८ ।

"ज्वलन्मणिशिखाक्षेपं वासुकिप्रमुखा निधिः ।
शिरःप्रदीपतामेत्य सुजङ्गाः पर्य्युपासते ॥")

श्रेष्ठः । इत्यमरः । ३ । १ । ५७ ॥ (यथा, हितोपदेशे । १ । १२४ ।

"वर्णेषु प्रमुखो हस्ती न तथान्यो महीपतेः ॥")

प्रथमः । इति मेदिनी । खे, १० ॥ (यथा, महाभारते । २ । ६ । २ ।

"नारदप्रमुखास्तस्यामासन्ब्रह्मर्षयो महाजनः ।
समासीनाः सुमुखिरे सह राजर्षिभिस्तथा ॥")

मान्यः । इति शब्दरत्नावली ॥

प्रमुत्, [द्] त्रि, (प्रकृष्टामुत् प्रीतिर्यस्य ।) हृष्टः । इत्यमरः । ३ । १ । १०३ ॥ (प्रकृष्टा मुदिति विग्रहे प्रकृष्टशब्दः, स्त्री । यथा, महाभारते । १४ । ७ । ६ ।

"श्रुत्वा तु पार्थिवस्तेतत् सस्मर्ष प्रमुदं गतः ॥")

प्रमुदितः, त्रि, (प्र + मुद् + क्तः । "उदुपधादिति ।" १ । २ । २१ । इति पक्षे कित् ।) हृष्टः । इत्यमरः । ३ । १ । १०३ ॥ (यथा, देवीभागवते । ९ । १२ । ४७ ।

"वात्सल्यहृदो हरिरप्येष इवातिकामं
पादाहतिं प्रमुदितः पुरुषः पुराणः ॥")

प्रमेहः, पुं, (प्रकर्षेण मेहति चरति वीर्य्यादिरनेनेति । प्र + मिह चरणे + करणे घञ् ।) रोगविशेषः । तत्पर्य्यायः । मेहः २ मूत्रदोषः ३ । इति राजनिर्घण्टः ॥ बहुमूत्रता ४ । इति हेमचन्द्रः । ३ । १२४ ॥ अस्य निदानम् ।

"आस्यासुखं स्वप्नसुखं दधीनि
ग्राम्यौदकानूपरसाः पयांसि ।
नवान्नपानं गुड़वैकृतञ्च
प्रमेहहेतुः कफकृच्च सर्व्वम् ॥" * ॥

अस्य सम्प्राप्तिर्यथा,—

"मेदश्च मांसञ्च शरीरजञ्च
क्लेदं कफो बस्तिगतः प्रदूष्य ।
करोति मेहान् सपिडीर्बलासे-
स्तानेव पित्तं परिदूष्य चापि ॥" * ॥

वातिकस्य तस्य लक्षणम् ।

"पीडासु दोषेष्ववसक्थ्य धातून्
सन्दूष्य मेहान् कुरुतेऽनिलश्च ॥" * ॥

तस्य कफजादिभेदेन साध्यादिलक्षणम् । यथा,

"साध्याः कफोत्था दश पित्तजाः षट्
याप्या न साध्याः पवनाच्चतुष्काः ।
समक्रियत्वाद्विषमक्रियत्वा-
दसाध्यतयाच्च यथाक्रमन्तु ॥
कफः सपित्तः पवनश्च दोषा
मेदोऽस्रशुक्रामृवसालसीकाः ।

मज्जा रसौजः पिञ्जितञ्च दूष्याः
प्रमेहिणां विंशतिरेव मेहाः ॥" * ॥

तस्य पूर्व्वरूपम् ।

"श्लेष्मादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः ।
दाहश्चिक्कणता देहे लट् स्वाद्यास्यञ्च जायते ॥
सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता ।
दोषदूष्या विशेषैरपि तत्संयोगविशेषतः ।
मूत्रवर्णादिभेदेन मेदो भेदेषु कल्प्यते ॥"*॥

क्रमेण कफजानां दशानां लक्षणानि ।

"अच्छं बहुसितं घृतं निर्गन्धसदकोपमम् ।
मेहत्युदकमेहेन किञ्चिदाविलपिच्छलम् ॥
रक्तो रसमिवात्यर्थं मधुरं चेक्षुमेहतः ।
सान्द्रो भवेत् पर्य्युषितं सान्द्रमेहेन मेहति ॥
सुरामेही सुरातुल्यसुपर्य्युच्छमधोघनम् ।
संहृष्टलोमा पिष्टेन पिष्टवद्धूसरं सितम् ॥
शुक्लाभं शुक्लमिश्रं वा शुक्लमेही प्रमेहति ।
मृन्मार्जनं सिकतामेही सिकताकीर्णमेव च ॥
शीतमेही सुबहुशो मधुरं शीघ्रशीतलम् ।
शनैः शनैर्मेही मन्दं मन्दं प्रमेहति ॥
लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् ॥"

क्रमेण पित्तजानां दशानां लक्षणानि ।

"गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ॥
नीलमेहेन नीलाभं कालमेही मसीनिभम् ।
हारिद्रमेही कटुकं हरिद्रासन्निभं दहन् ।
विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् ।
विस्रसुग्गं सलवणं रक्ताभं रक्तमेहतः ॥" * ॥

क्रमेण वातजानां चतुर्णां लक्षणानि ।

"वसामेही वसामिश्रं वसाभं मूत्रवेगभुक् ।
मज्जाभं मज्जमिश्रं वा मज्जमेही सदुर्मुहुः ॥
कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः ।
हस्ती मत्त इवाजस्रं मूत्रं वेगविवर्जितम् ।
सलसीकं विबद्धञ्च हस्तिमेही प्रमेहति ॥"*॥

कफजादिभेदेन तेषामुपद्रवाः ।

"अविपाकोऽरुचिच्छर्द्दिर्निद्रानाद्याः सपीनसः ।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् ॥
बस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः ।
दाहस्तृष्णाग्निका मूर्च्छा विड्भेदाः पित्तजन्मनाम् ॥
वातजानामुदावर्त्तः कम्पहृद्ग्रहलोलताः ।
मूलसुप्तिहता शोषः कासः श्वासश्च जायते ॥"

अरिष्टलक्षणम् ।

"यथोक्तोपद्रवारिष्टमतिप्रसृतमेव च ।
पिड्कापीड़ितं गाढ़ं प्रमेहो हन्ति मानवम् ॥
जातः प्रमेही मधुमेहिनो वा
न साध्यरोगः स हि दोषदोषात् ।
ये चापि केचित् कृच्छ्रा विकारा
भवन्ति तांश्च प्रवदन्त्यसाध्यान् ॥ * ॥

सर्व्व एव प्रमेहास्तु कालेनाप्रतिकारिणः ।
मधुमेहत्वमायान्ति तदासाध्या भवन्ति हि ॥
मधुमेहे मधुसमं जायते स किल द्विधा ।
कुष्ठे धातुक्षयाद्यौ दोषाढ्यपथ्येऽथवा ॥
आद्यतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयन् ।
क्षीणः क्षणात् क्षणात् पूर्णो भजते लक्ष्यसाध्यताम् ॥
मधुरं यच्च मेहेषु प्रायो मधुव मेहति ।
सर्व्वेऽपि मधुमेहाख्या माधुर्य्याच्च तनोरतः ॥*॥
प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलम् ।
विषदं तिक्तकटुकं तदारोग्यं प्रचक्षते ॥"

इति माधवकरः ॥

अस्य दशविधपिड़काः पिड़काशब्दे द्रष्टव्याः ॥

अथ प्रमेहस्य चिकित्सा ।

"श्यामाककोद्दवोद्दाला गोधूमचणकावटी ।
कुलत्थाः कथिता भोज्ये पुराणा मेहिनां हिताः ॥
यवान्नविकृतिर्मुद्गाः शालयः षष्टिकास्तथा ।
तथा तिक्तानि शाकानि जाङ्गलाः पक्षिणो रुगाः ॥
उद्दालो वनकोद्रवः ॥ * ॥
प्रमेही गुड़दुग्धान्यतैलतक्रसुराः सदा ।
अम्लेक्षुरसपिष्टान्नानूपमांसानि वर्জ্জयेत् ॥ * ॥
सक्षाहरीतकीलोध्रैः कटफलेन कृतं स्नानम् ।
पीतं मधुयुतं हन्ति प्रमेहं कफहेतुकम् ॥ * ॥
पटोलनिम्बामलकाष्टतानां
पिबेत् कषायं मधुना समेतम् ।
उशीरखोधार्জ্জुनचन्दनानां
तथा पिबेत् पित्तनिमित्तमेही ॥ * ॥
पाठाशिरीषदुःस्पर्शाजातित्रिवृत्कर्कितुकैः ।
कपित्थस्य भिषक् क्वाथं हस्तिमेहे प्रयोजयेत् ॥
पाठादिभिः सहितस्य कपित्थस्य क्वाथम् ।
गुड़ूच्याः स्वरसः पेयो मधुना सर्व्वमेहजित् ।
हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः ॥
मधुना चैषजं चूर्णमथवाञ्जनतूत्थम् ।
लोहजं वाभयोत्थं वा लिह्यान्मेहनिषूदने ॥*॥
चन्द्रप्रभावचासुस्ताभूनिम्बसुरदारवः ।
हरिद्रातिविषा दार्व्वी पिप्पलीमूलचित्रकम् ॥
त्रिवृद्दन्ती पञ्चकञ्च त्रपुला वंशलोचना ।
प्रत्येकं कर्षमात्राणि कुर्य्यादेतानि बुद्धिमान् ॥
धान्यकं त्रिफला चव्यं विड़ङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं शोषं द्वौ द्वौ चारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षेहतलोहं स्याच्चतुष्कर्षा सिता भवेत् ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥
चन्द्रप्रभातिविख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् लक्ष्मदविधं तथा ॥
चतस्रश्चाश्मरीस्तद्वन्मूत्राघातांस्त्रयोदश ।
अक्षद्दृष्टिं पाण्डुरोगं कामलाञ्च हलीमकम् ॥
कासं श्वासं तथा कुष्ठमिमान्यमरोचकम् ।
वातपित्तकफव्याधीन् वल्या तृप्या रसायनी ॥
समाराध्य शिवं तस्मात् प्रयत्नादुगुटिकामिमाम् ।
प्राप्नवांश्चन्द्रमा यस्मात् तस्माच्चन्द्रप्रभा स्मृता ॥
चन्द्रप्रभाकचूर इति लोके । शोषं त्रिकटु । द्वौ द्वौ चारौ सर्জিকायवक्षारौ । लवणत्रयम् । सैन्धवं रुचकञ्चापि विड़ञ्च लवणत्रयमिति चन्द्रप्रभादिवटिका ॥ * ॥

प्रमेहपिड़कानां प्राक् कार्य्यं रक्तविमोचनम् ।
पाटनञ्च विपक्वानां ततो व्रणविधिः स्मृतः ॥"

इति भावप्रकाशः ॥

(अस्य सकारणपूर्व्वरूपसम्प्राप्तयस्तथोपद्रवश्च । यथा,—

"त्रिदोषकोपननिमित्ता विंशतिप्रमेहविकारास्तापरेऽपरिसङ्ख्येयाः । तत्र यथा त्रिदोषप्रकोपः प्रमेहानभिनिर्वर्त्तयति तथानुव्याख्यास्यामः ।

इह खलु निदानदोषदूष्यविशेषेभ्यो विकाराणां विघातभावाभावप्रतिविशेषा भवन्ति । यदा खलु ते त्रयो निदानादिविशेषाः परस्परं नानुबध्नन्त्यथाप्रकर्षादबलीयांसो वानुबध्नन्ति न तदा विकाराभिनिर्वृत्तिः । चिराद्वाप्यभिनिर्वर्त्तन्ते तनवो भवन्त्यसाध्यथोक्तसर्व्वलिङ्गा विपर्य्ययेण विपरीता इति सर्व्वविकारविघातभावाभावप्रतिविशेषाभिनिर्वृत्तिहेतुरुक्तः ।

तत्र इमे निदानादि विशेषाः श्लेष्मनिमित्तानां प्रमेहाणामाभ्यभिनिर्वृत्तिकरास्तद्यथा हायनकयवचीनकोद्दालकनैषधोत्कटसुकुन्दकमहाव्रीहिप्रमोदकसुगन्धकानां नवानामतिवेलमतिप्रमाणेनोपयोगः । तथा सर्पिष्मतां नवहरेणुमाषरूपाणां ग्राम्यानूपौदकानां मांसानां प्राक्तिलपललपिष्टान्नपायसकृशरविलेपीक्षुविकाराणां क्षीरमन्दकदधिदधमधुरतरुणप्रायाणामुपयोगो लवणाद्यायामवर्জ্জनस्वप्नशय्यासनप्रसङ्गो यश्च कश्चिदधिरन्योऽपि श्लेष्ममेहो मूत्रसञ्जननः सर्व्वः सनिदानविशेषः ।

बहुप्रवर्त्तिनो दोषविशेषः बहुबन्धं मेदः मांसञ्च शरीरक्लेदः शुक्रं शोणितञ्च वसामज्जानसीकारसलसीकः सङ्घाता इति दूष्यविशेषाः ।

क्रियाभावेवां निदानादिविशेषाणां सन्निपाते क्षिप्रं श्लेष्माप्रकोपमापद्यते प्रागतिभूयस्त्वात् । स प्रकुपितः क्षिप्रमेव शरीरे विसर्पं लभते । शरीरश्लैथिल्यात् स विसर्पे शरीरे मेदसेधादितो मिश्रीभावं गच्छति । मेदसश्चैव बहुबन्धत्वान्मेदसश्च गुणानां गुणैः समानगुणभूयिष्ठत्वात् स मेदसा मिश्रीभावं गच्छन् दूष्यसंज्ञितद्विप्रकृतत्वात् स विप्रकृतो दुष्टेन मेदसोपहितः शरीरक्लेदमांसाभ्यां संसर्गं गच्छति । क्लेदमांसयोरतिप्रमाणाभिवृद्धित्वात् स मांसे मांसप्रदोषात् पूतिमांसपिड़काः शरीरिका कच्छपिकाद्याः सञ्जनयत्यप्रकृतिभूतत्वात् शरीरक्लेदं पुनर्दूषयन् मूत्रत्वेन परिणमयति । मूत्रवहानां स्रोतसां बहुत्ववस्तिप्रभवानां मेदःक्लेदोपहितानि गुरूणि सुखान्यासाद्य प्रतिरुध्यते । ततः स्रैण्यं साध्यतां वा जनयति प्रकृतिविकृतिभूतत्वात् ।

शरीरक्लेदस्तु श्लेष्ममेदोमिश्रः प्रविशन् मूत्राशये मूत्रत्वमापद्यमानः श्लैष्मिकैरेभिर्गुणैरुपलभ्यते वैषम्यहानिरद्विद्युक्लेदस्तद्यथा श्वेतशीत मृन्मज्जिच्छिलाच्छस्निग्धगुरुमधुरसान्द्रप्रसादमहैः स्रञ्च येन गुणेनैकेनानेकेन वा भूयस्तरसप-

रुध्यते। तत्समाख्यं गौणं नामविशेषं प्राप्नोति। ते तु खल्विमे दशप्रमेहा नाम विशेषेण भवन्ति। तथा उदकमेहश्चेक्षुरालिकारसमेहश्च सान्द्रमेहश्च सान्द्रप्रसादमेहश्च शुक्रमेहश्च शुक्रमेहश्च शीतमेहश्च सिकतामेहश्च शनैर्मेहश्च लालामेहश्चेति।

ते दशप्रमेहाः साध्याः समानगुणमेदःस्थानत्वात् कफस्य प्रधान्यात् समानक्रियत्वाच्च।"

"उष्णाम्ललवणक्षारकटुकाजीर्णभोजनोपसेविनस्तथातितीक्ष्णातपाग्निसन्तापश्रमक्रोधविषमाहारोपसेविनश्च तथात्मकशरीरस्यैव क्षिप्रं पित्तं प्रकोपमापद्यते।

तत् प्रकुपितं तच्चैवानुपूर्व्या प्रमेहानिमान् षट् त्रिंशदभिनिर्वर्त्तयति। तेषामपि च पित्तगुणविशेषेण नामविशेषाः। तद्यथा,—क्षारप्रमेहश्च कालमेहश्च नीलमेहश्च लोहितमेहश्च मञ्जिष्ठामेहश्च हारिद्रमेहश्चेति ते षड्भिरेव क्षाराम्ललवणकटुकविस्रोष्णैः पित्तगुणैः पूर्व्ववत् समन्विताः। सर्व्व एव ते याप्याः संसृष्टदोषमेदःस्थानत्वात् विरुद्धोपक्रमत्वाच्चेति।"

"कटुककषायतिक्तरूक्षलघुशीतव्यवायव्यायामवमन-विरेचनास्थापन-शिरोविरेचनातियोगसन्धारणान्नघातानपोदेगशोकशोणितातिसेकजागरणविषमशरीरव्यासानुपसेवमानस्य तथात्मकशरीरस्यैव क्षिप्रं वायुः प्रकोपमापद्यते। स प्रकुपितस्तथात्मके शरीरे विसर्पन् यदा वसामादाय मूत्रवहानि स्रोतांसि प्रतिपद्यते तदा वसामेहमभिनिर्वर्त्तयति॥ * ॥ यदा पुनर्मज्जानं मूत्रवस्तावाकर्षति तदा मज्जमेहमभिनिर्वर्त्तयति॥ * ॥ यदा लसीकां मूत्राग्नेयेऽभिवहन् मूत्रमनुवर्त्तयंश्चोपातयति। लसीकातिबहुत्वादिक्षेपणाच्च वायोः खल्वस्यातिमूत्रप्रवृत्तिसङ्गं करोति। तदा स मत्त इव गजः क्षरत्यजस्रं मूत्रमवेगं तं हस्तिमेहिनमाचक्षते॥ * ॥ ओजः पुनर्मधुरस्वभावं तद्दौस्थ्यादायुः कषायत्वेनाभिसंहृत्य मूत्राग्नेयेऽभिवहति तदा मधुमेहं करोति॥ * ॥

तानिमांश्चतुरः प्रमेहान् वातजानसाध्यानाचक्षते। महात्ययिकत्वाद्विप्रतिषिद्धोपक्रमत्वात् तेषामपि च पूर्व्ववत् गुणविशेषेण नामविशेषाः। तद्यथा,—वसामेहश्च मज्जमेहश्च हस्तिमेहश्च मधुमेहश्चेति।"

"क्षयस्तु दोषाः प्रकुपिताः प्रमेहानभिनिर्वर्त्तयिष्यन्त इमानि पूर्व्वरूपाणि दर्शयन्ति। तद्यथा,—जटिलीभावं केशेषु माधुर्य्यमास्ये करपादयोः सुप्तता दाहः सुखतालुकण्ठशोषं पिपासामालस्यं मलञ्च काये कायच्छिद्रेषूपदेहं परिदाहं सुप्तता चाङ्गेषु षट्पदपिपीलिकाभिः शरीरमूत्राभिसरणं मूत्रे च मूत्रदोषान्वितं शरीरगन्धं निद्रां तन्द्राञ्च सर्व्वकालमिति।

उपद्रवास्तु खलु प्रमेहिणां तृष्णातीसारज्वरदाहदौर्ब्बल्यारोचकाविपाकाः पूतिमांसपिडका व्रणजीविद्रध्यादयश्च तत् प्रसङ्गाद्भवन्ति। तच्च साध्यान् प्रमेहान् संश्रोधनोपशमनैर्यथार्हं सुपपादयेच्चिकित्सेदिति।" इति चरके निदानस्थाने चतुर्थेऽध्याये॥)

प्रमोचनी, स्त्री, (प्रकर्षेण मुच्यतेऽनयेति। प्र+मुच्+ल्युट्+ङीप्।) गवाची। गोडुम्बा। इति जटाधरः॥ प्रकृष्टमोचनकर्त्तरि, त्रि॥ (यथा, महाभारते। ३। ८४। ५६।

"महाश्रमे वसेद्राजन् सर्व्वपापप्रमोचने॥")

प्रमोदः, पुं, (प्र+मुद् हर्षे+भावे घञ्।) हर्षः। इत्यमरः। १। ४। २४॥ (यथा, देवीभागवते। ४। २४। ५५।

"उत्पाद्य पुत्रजननप्रभवं प्रमोदं
दत्त्वा पुनर्विरहजं किल दुःखभारम्।
त्वं क्रीड़सि सुललितैः खलु नैर्विहारै-
र्नोचेत् कथं मम सुताग्निरतिर्वृथा स्यात्॥"

आमोदः। स तु गन्धविशेषः। यथा, भागवते। २। ६। २।

"अग्निनोरोषधीनाञ्च घ्राणो मोदप्रमोदयोः॥"

"मोदप्रमोदयोः सामान्यविशेषगन्धयोः घ्राणेन्द्रियं परमायनम्।" इति तट्टीकायां श्रीधरस्वामी॥ नागविशेषः। यथा, महाभारते। १। ५७। ११।

"विहङ्गः शरभो मेदः प्रमोदः संहतापनः॥"

स्कन्दानुचरविशेषः। यथा, तत्रैव। ८। ४५। ६३।

आनन्दश्च प्रमोदश्च स्खलितो ध्रुवकस्तथा॥")

प्रमोदितः, पुं, (प्र+मुद् हर्षे+क्तः। "उदुपधादिति।" १। २। २१। इति किदभावः। प्रमोदोऽस्य जातः इति तारकादित्वात् इतच् वा।) कुबेरः। इति शब्दमाला॥ प्रमोदयुक्ते, त्रि॥

प्रमोदिनी, स्त्री, (प्रमोदयतीति। प्र+मुद्+णिच्+णिनिः। ङीप्।) जिह्वनीवृक्षः। इति भावप्रकाशः॥ प्रकृष्टहर्षयुक्ता च॥

प्रम्लोचा, स्त्री, (प्रम्लोचति तापसादीन् प्रति गच्छतीति। प्र+म्लुच् गतौ+अच्। टाप्।) अप्सरोविशेषः। यथा, गारुड़े ६० अध्याये।

"तत्र तस्याम्रदीमध्यात् ससुतस्त्यौ मनोरमा।
प्रम्लोचा नाम तन्वङ्गी तत्समीपे वराप्सराः॥"

प्रयतः, त्रि, (प्र+यम्+क्तः। यद्वा, प्रयतते धर्म्मादावर्थमिति। प्र+यत्+अच्।) पवित्रः। इत्यमरः। २। ७। ४५॥ (यथा, मनुः। २। १८३।

"ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्॥"

नम्रः। इति रामायणटीकायां रामानुजः॥ यथा, रामायणे। १। २। २४।

"वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः।
प्राञ्जलिः प्रयतो भूत्वा तस्थौ परमविस्मितः॥"

प्रयत्नविशिष्टे च॥)

प्रयत्नः, पुं, (प्र+यत यत्ने+"यजयाचयतविच्छप्रच्छरक्षो नङ्।" ३। ३। ९०। इति नङ्।) प्रकृष्टयत्नः। (यथा, मनुः। ७। ६८।

"बुद्ध्या च सर्व्वं तत्त्वेन परराजचिकीर्षितम्।
तथा प्रयत्नमातिष्ठेदयथात्मानं न पीड़येत्॥")

न्यायमते स च त्रिविधः। यथा,—

"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्।
एवं प्रयत्नवैविध्यं तान्त्रिकैः परिदर्शितम्॥
चिकीर्षा कृतिसाध्येऽस्य साधनत्वमतिस्तथा।
उपादानस्य चाधेयं प्रवृत्तौ जनकं भवेत्॥
निवृत्तिस्तु भवेद्द्वेधा हिताहितसाधनताधियः।
यत्नो जीवनयोनिस्तु सर्व्वदातीन्द्रियो भवेत्॥
शरीरे प्राणसञ्चारे कारणं तत् प्रकीर्त्तितम्॥"

इति भाषापरिच्छेदः॥

(तल्लक्षणं यथा, साहित्यदर्पणे।

"प्रयत्नस्तु फलावाप्तेर्व्यापारोऽतित्वरान्वितः॥")

प्रयत्नवान्, [त्] त्रि, (प्रयत्नोऽस्यास्तीति। प्रयत्न+मतुप्। मस्य वः।) प्रकृष्टयत्नविशिष्टः। तत्पर्य्यायः। प्रतियत्नः२। इति त्रिकाण्डशेषः॥

प्रयस्त, त्रि, (प्र+यसु प्रयत्ने+क्तः।) कृतसत्कार्य्यादिना दृष्टेन प्रयत्नसुसंस्कृतयज्ञनादि। इत्यमरः। २। ६। ४५॥

प्रयागः, पुं, (प्रकृष्टो यागो यत्र। यत्र यज्ञः प्रकर्षेण भवतीत्यर्थः।) तीर्थभेदः। (प्रकृष्टो यागः।) यज्ञः। (प्रकृष्टा यागाः यज्ञा यस्य यस्माद्वा।) इन्द्रः। अश्वः। इति मेदिनी। गे, ४१॥ * ॥

अथ प्रयागमाहात्म्यम्।

"ततो गच्छेत धर्म्मज्ञ! प्रयागन्दिविसम्मतम्।
यत्र ब्रह्मादयो देवा दिशश्च सदिगीश्वराः॥
लोकपालाश्च सिद्धाश्च निरताः पितरस्तथा।
सनत्कुमारप्रमुखास्तथैव च महर्षयः॥
तथा नागाः सुपर्णाश्च सिद्धाश्च कृतवस्तथा।
गन्धर्व्वाप्सरसश्चैव सरितः सागरास्तथा॥
हरिश्च भगवान्साक्षे प्रजापतिभिरावृतः।
तत्र त्रीण्यग्निकुण्डानि तयोर्मध्ये तु जाह्नवी॥
प्रयागात् समतिक्रान्ता सर्व्वतीर्थपुरस्कृता।
तपनस्य सुता तत्र त्रिषु लोकेषु विश्रुता॥
यमुना गङ्गया सार्द्धं सङ्गता लोकभाविनी।
गङ्गायमुनयोर्मध्ये पृथिव्या जघनं स्मृतम्॥
प्रयागं जघनस्थानमुपस्थन्तयो विदुः।
प्रयागं सप्रतिष्ठानं कम्बलाश्वतरावुभौ॥
तीर्थं भोगवती चैव वेदी प्रोक्ता प्रजापतेः॥
तत्र वेदाश्च यज्ञाश्च मूर्त्तिमन्तो महामते!॥
प्रजापतिमुपासन्ते ऋषयश्च महाव्रताः।
यजन्ते क्रतुभिर्नित्यं तथा चक्रधराः सदा॥
ततः पुण्यतमं नास्ति त्रिषु लोकेषु सत्तम!॥
प्रयागं सर्व्वतीर्थेभ्यः प्रवदन्त्यधिकं द्विजाः॥
श्रवणात् तस्य तीर्थस्य नामसङ्कीर्त्तनादपि।
स्मृतिकालभनाद्वापि सर्व्वपापैः प्रमुच्यते॥
तत्राभिषेकं यः कुर्य्यात् सङ्गमे संशितव्रतः।
पुण्यं स महदाप्नोति राजसूयाश्वमेधयोः॥
एषा यजनभूमिर्हि देवानामपि सत्तमा।
दत्तं तत्र खलमपि महद्भवति सत्तम!॥
न वेदवचनात्तात! न लोकवचनादपि।
मतिरुत्क्रमणं याति प्रयागमरणं प्रति॥

दशतीर्थसहस्राणि षष्टिकोट्यस्तथापराः ।
तेषां सान्निध्यमत्रैव कीर्त्तितं सूतनन्दन ! ॥
यत् पुण्यं त्रिषु लोकेषु वेदविद्यासु यत् फलम् ।
स्नातमात्रस्य तत् पुण्यं गङ्गायमुनसङ्गमे ॥"
इति पाद्मे भूमिखण्डे १२७ अध्यायः ॥ * ॥
अपि च ।
"पुत्रकामः प्रयागे हि स्नायात् पुण्ये सितासिते ॥
धनकामः पुरा शक्रः स्नातो ह्यत्र द्विजोत्तम ! ॥
धनदस्य निधीन् सर्व्वान् तस्माञ्जहार मायया ।
नारायणो नरेणैव वर्षाणामयुतं पुरा ॥
अनाहारः प्रयागेऽस्मिन् स्नातवान् पुण्यसुत्तमम् ।
सिद्धिञ्च साधका यान्ति प्रयागेऽस्मिन् द्विजोत्तम ! ॥"
इति पाद्मोत्तरखण्डे २३ अध्यायः ॥ * ॥
अपि च ।
युधिष्ठिर उवाच ।
"भगवन् ! श्रोतुमिच्छामि प्रयागगमनं फलम् ।
स्नातानां का गतिस्तत्र स्नातानामपि किं फलम् ॥
ये वसन्ति प्रयागे तु ब्रूहि तेषान्तु किं फलम् ।
भवता विदितं ह्येतत् तन्मे ब्रूहि नमोऽस्तु ते ॥
मार्कण्डेय उवाच ।
कथयिष्यामि ते वत्स ! या चेष्टा यच्च तत् फलम् ।
दृष्टा महर्षिभिः सम्यक् कथ्यमानं मया श्रुतम् ॥
यत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ।
यत्र ब्रह्मादयो देवा रक्षां कुर्व्वन्ति सङ्गताः ॥
बहून्यन्यानि तीर्थानि सर्व्वपापहराणि च ।
कथितुं नेह शक्नोमि बहुवर्षशतैरपि ॥
संक्षेपेण प्रवक्ष्यामि प्रयागस्येह कीर्त्तनम् ।
षष्टिर्धनुःसहस्राणि यत्रा रक्षन्ति जाह्नवीम् ॥
यमुनां रक्षति सदा सविता सन्निवाहनः ।
प्रयागन्तु विशेषेण स्वयं रक्षति वासवः ॥
मण्डलं रक्षति हरिः सर्व्वदेवैश्च सम्मितम् ।
न्यग्रोधं रक्षते नित्यं मूलपाणिर्महेश्वरः ॥
स्नानं रक्षन्ति वै देवाः सर्व्वे पापहरं शुभम् ।
स्वकर्म्मणावृता लोका नैव गच्छन्ति तत्पदम् ॥
स्वल्पमल्पतरं पापं यदा तस्य नराधिप ! ।
प्रयागं स्मरमाणस्य सर्व्वमायाति संक्षयम् ॥
दर्शनात्तस्य तीर्थस्य नामसंकीर्त्तनादपि ।
मृत्तिकालभनाद्वापि नरः पापात् प्रमुच्यते ॥
पञ्चकुण्डानि राजेन्द्र ! येषां मध्ये तु जाह्नवी ।
प्रयागं विशतः पुंसः पापं नश्यति तत्क्षणात् ॥
योजनानां सहस्रेषु गङ्गां यः स्मरते नरः ।
अपि दुष्कृतकर्म्मासौ लभते परमां गतिम् ॥
कीर्त्तनान्मुच्यते पापात् दृष्टा भद्राणि पश्यति ॥
व्याधितो यदि वा हीनः क्रुद्धो वापि भवेन्नरः ।
गङ्गायमुनमासाद्य त्यजेत् प्राणान् प्रयत्नतः ॥
दीप्तकाञ्चनवर्णाभैर्विमानैर्भास्वरैर्भिभिः ।
दूषितान् लभते कामान् वदन्ति मुनिपुङ्गवाः ॥
सर्व्वरत्नमयैर्हैमैर्नानाध्वजसमाकुलैः ।
वराङ्गनासमाकीर्णैर्मोदन्ते शुभलक्षणैः ॥
गीतवादित्रनिर्घोषैः प्रसुप्तः प्रतिबुध्यते ।
यावन्न स्मरते जन्म तावत् स्वर्गे महीयते ॥
तस्मात् स्वर्गात् परिभ्रष्टः क्षीणकर्म्मा नरोत्तमः ।
हिरण्यरत्नसंपूर्णे सद्मनि जायते कुजे ॥
तदेव स्मरते तीर्थं स्मरणाच्च गच्छति ।
देशस्थो यदि वारण्ये विदेशे यदि वा गृहे ॥
प्रयागं स्मरमाणस्तु यस्तु प्राणान् परित्यजेत् ।
ब्रह्मलोकमवाप्नोति वदन्ति मुनिपुङ्गवाः ॥
सर्व्वकामफला तृष्णा मही यत्र हिरण्मयी ।
ऋषयो मुनयः सिद्धास्तत्र लोके स गच्छति ॥
स्त्रीसहस्रावृते रम्ये मन्दाकिन्यास्तटे शुभे ।
मोदते मुनिभिः सार्द्धं स्वकृतेनेह कर्म्मणा ॥
सिद्धचारणगन्धर्व्वैः पूज्यते दिवि देवतैः ।
अथ स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ॥
अतः शुभानि कर्म्माणि चिन्त्यमानः पुनः पुनः ।
गुणवान् वित्तसम्पन्नो भवतीह न संशयः ॥
कर्म्मणा मनसा वाचा सत्यधर्म्मप्रतिष्ठितः ।
गङ्गायमुनयोर्मध्ये यस्तु स्नानं प्रयच्छति ।
सुवर्णमणिमुक्तां वा तथैवान्यत् प्रतिग्रहम् ॥
स्वकार्य्ये पितृकार्य्ये वा देवताभ्यर्चनेऽपि वा ।
निष्फलं तस्य तत्तीर्थं यावत् तन्नमस्मृतं ॥
अतस्तीर्थं न शक्नीयात् पुण्येष्वायतनेषु च ॥
कपिलां पाटलाभान्तु यस्तु धेनुं प्रयच्छति ।
यावद्रोमाणि तस्या वै सन्ति गात्रेषु सत्तम ! ।
तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥"
इति कौर्म्मे प्रयागमाहात्म्ये ३३ अध्यायः ॥ * ॥
तत्र मुण्डनविधिर्यथा,—
"गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरौ मृते ।
आधाने सोमपाने च वपनं सप्तसु स्मृतम् ॥"
इति स्मृतिसमुच्चयलिखितवचनं प्रयागावच्छिन्नगङ्गायां विधायकम् । भास्करक्षेत्रं प्रयागः ।
अपि च । प्रयागमधिकृत्य ।
"केशानां यावती संख्या छिन्नानां जाह्नवीजले ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥"
प्रयागे स्त्रीणामपि मुण्डनं न तु केशानां दाक्षुल्लक्षेदनमात्रम् । यथा,—
"केशमूलमुपाश्रित्य सर्व्वपापानि देहिनाम् ।
तिष्ठन्ति तीर्थस्नानेन तस्मात्तान्यत्र वापयेत् ॥"
प्रयागे मुण्डनाकरणे दोषोऽपि ।
"गङ्गायां भास्करक्षेत्रे मुण्डनं यो न कारयेत् ।
स कोटिकुलसंयुक्त आकल्पं रौरवे वसेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
प्रयागभयः, पुं, (प्रयागात् प्रलयायागकारिजनात् बिभेति स्वपदपरिग्रहशङ्कयेति । भी + अच् ।) इन्द्रः । इति शब्दरत्नमाला ॥
प्रयाणं, क्ली, (प्र + या + ल्युट् । णत्वम् ।) गमनम् । इति हलायुधः । २ । २८७ ॥ यथा,—
"उड्डाटितनवद्वारे पञ्जरे विहगोऽनिलः ।
यत्तिष्ठति तदाश्चर्य्यं प्रयाणे विस्मयः कुतः ॥"
इत्युद्भटः ॥
तत्पर्य्यायः । प्रस्थानम् २ गमनम् ३ व्रज्या ४ अभिनिर्यायणम् ५ प्रयाणकम् ६ । इति हेमचन्द्रः । ३ । ४५३ ॥ अत्र राज्ञां युद्धादिप्रयाणे वर्ज्जनीयानि यथा । भेरीनिस्वनः १ भूकम्पः २ बलधूलिः ३ करभः ४ वृषः ५ श्वभ्रः ६ छत्रम् ७ वणिक् ८ शकटम् ९ रथः १० । इति कविकल्पलता ॥
प्रयातः, पुं, (प्रकर्षेण यातः । प्र + या + कर्त्तरि क्तः ।) सौम्रिकः । भृगुः । इति हेमचन्द्रः ॥ गते, त्रि ॥ (क्ली, भावे क्तः । गमनम् । प्रस्थानम् । यथा, छन्दोमञ्जर्य्याम्
"मया क्षोभितः कालियेत्थं कुरु त्वं
भुजङ्ग ! प्रयातं इतं सागराय ॥")
प्रयामः, पुं, (प्र + यम् + घञ् ।) नीवाकः । इत्यमरः । ३ । २ । २३ ॥ महार्घ्यहेतोर्धान्यादिषु जनानामादरातिशयेन तुलाधरणाधिक्यम् । इति केचित् । क्रयादरः । इति केचित् । मूल्याधिक्यहेतोर्निश्चयेन परिच्छेदनम् । इति केचित् । इति भरतः ॥
प्रयासः, पुं, (प्र + यस प्रयत्ने + भावे घञ् ।) प्रयत्नः । तत्पर्य्यायः । श्रमः २ क्लमः ३ क्लेशः ४ परिश्रमः ५ व्यायासः ६ आयासः ७ । इति हेमचन्द्रः । २ । २३७ ॥ (यथा, हठयोगप्रदीपिकायाम् । १ । १५ ।
"अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः ।
जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति ॥")
प्रयुक्तं, त्रि, (प्र + युज् + क्तः ।) प्रकर्षेण युक्तम् । यथा,—
"गुणप्रयुक्ताः परमर्म्मभेदिनः
शरा इवावज्ञभवा भवन्ति हि ।
तथाविधा ये तु विशुद्धवंशजा
व्रजन्ति चापा इव तेऽतिनम्रताम् ॥"
इत्युद्भटः ॥
प्रकृष्टसमाधियुक्तम् । प्रकृष्टसंयोगविशिष्टम् । प्रकृष्टनिन्दायुक्तम् । प्रकृष्टसंयमविशिष्टम् । प्रपूर्ब्बयुगधात्वर्थदर्शनात् । हेतौ क्ती । यथा । न च समवायिनिमित्ताभावप्रयुक्तो नियमेन कार्य्याभावः किन्त्वसमवायिकारणाभावप्रयुक्तोऽपि । इति रक्षितः ॥
प्रयुक्तिः, स्त्री, प्रयोजनम् । प्रपूर्ब्बयुजधातोर्भावे क्तिः (क्तिन्) । यथा,—
"तरुण्यो दृषली भार्य्या प्रवीरं पुत्रकाम्यति ।
ऋतस्य राजमातङ्गा इति न स्मुः प्रयुक्तयः ॥"
इति प्राचः ॥
(प्रयोगः । यथा, ऋग्वेदे । १ । १५१ । ८ ।
"युवां यन्ती: प्रथमा गोभिरञ्जत ऋतावाना
मनसो न प्रयुक्तिषु ॥"
"प्रयुक्तिषु प्रयोगेषु ।" इति तद्भाष्ये सायणः ॥)
प्रयुतं, क्ली, (प्रकर्षेण युतम् ।) नियतम् । इति हेमचन्द्रः । ३ । ५३७ ॥ (दशलक्षसंख्या । "एक दशशतसहस्रायुत लक्षप्रयुतकोटयः क्रमशः ।" इति लीलावती ॥ यथा च महाभारते । १ । ३५ । १६ ।
"बहूनीह सहस्राणि प्रयुतान्यर्ब्बुदानि च ।
अशक्यान्येव संख्यातुं पन्नगानां तपोधन ! ॥")

प्रयुद्यार्थः, पुं, (प्रयुद्यः अर्थो यस्य सः।) प्रत्युत्क्रमः। इति प्रयोगार्थशब्दटीकायां रमानाथः। ३। २। २६।

प्रयोक्ता, [क्तृ] पुं, (प्रयुनक्तीति। प्र+युज्+तृच्।) उत्तमर्णः। यथा,—

'उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात्॥' इत्यमरः। २। ८। ५॥

त्रि, प्रयोगकर्त्ता। (यथा रघुः। ५। ५७।

"संमोहनं नाम सखे! ममास्त्रं
प्रयोगसंहारविभक्तमन्त्रम्।
गान्धर्वमादत्स्व यतः प्रयोक्तु-
र्नचारिहिंसा विजयश्च हस्ते॥"

अनुष्ठाता। यथा, रघुः। ६। ७६।

"पुत्रो रघुस्तस्य पदं प्रशास्ति
महाक्रतोर्विश्वजितः प्रयोक्ता॥"

नियोगकर्त्ता। यथा, महाभारते। १३। २३। ६२।

"परदाराभिहर्त्तारः परदाराभिमर्षिणः।
परदारप्रयोक्तारस्ते वै निरयगामिनः॥"

नाट्याचार्य्यः। यथा, रघुः। १८। ३६।

"स प्रयोगनिपुणः प्रयोक्तृभिः
सञ्चचर्ष सह मित्रसन्निधौ॥")

प्रयोगः, पुं, (प्र+युज्+भावकर्म्मादौ यथायथं घञ्।) कार्म्मणम्। वशीकरणम्। प्रयुक्तिः। (यथा, रघुः। २। ४२।

"प्रत्यब्रवीच्चैनमिषुप्रयोगे
तत्पूर्व्वभङ्गे वितथप्रयत्नः॥")

निदर्शनम्। इति मेदिनी। गे, ४४॥ (यथा, पञ्चदश्याम्। ६। ४३।

"स्वयमात्मेति पर्य्यायस्तेन लोके तयोः सह।
प्रयोगो नास्त्यतः स्वत्वमात्मत्वञ्चान्यवारकम्॥"

घोटकः। इति शब्दमाला॥ (सामान्युपायानुष्ठानम्। यथा, माघे। ११। ६।

"क्षणप्रथितविबुधाः कल्पयन्तः प्रयोगा-
नुदधिमथ्नति राज्ये काव्यवद्दुर्विगाहे॥"

अभिनयः। यथा, रघुः। १८। ३६।

"स प्रयोगनिपुणः प्रयोक्तृभिः
सञ्चचर्ष सह मित्रसन्निधौ॥"

हृद्यो ऋणदानम्। स तु धनप्राप्युपायेषु अन्यतमः। यथा, मनुः। १०। ११५।

"सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च॥")

प्रयोगार्थः, पुं, (प्रयोगः अर्थः प्रयोजनं यस्य।) प्रधानप्रयोगानुकूलं प्रयोजनानुष्ठानम्। तत्पर्य्यायः। प्रत्युत्क्रमः २। इत्यमरः। ३। २। २६॥

प्रयोगी, [न्] त्रि, (प्रयोगोऽस्त्यस्येति। प्रयोग+"अत इनिठनौ।" ५। २। ११५। इति इनिः।) प्रयोगयुक्तः। (यथा, अमरे। २। ७। २०।

"समूहः परिचाय्योपचाय्यावग्नौ प्रयोगिणः॥")

प्रयोजकः, त्रि, (प्रयुनक्ति प्रेरयति कार्य्यादौ भृत्यादीनिति। प्र+युज्+ण्वुल्।) प्रयोगकर्त्ता। नियोगकर्त्ता। स्वतन्त्वतप्रयोजकौ कर्त्ता इति सुपद्मव्याकरणम्॥ (यथा, राजतरङ्गिण्याम्। ६। ११८।

"यान् द्रोहभीरून् सभाव्य संविभेजे यशस्करः
तस्य तत्तनयोच्छेदे त एवासन् प्रयोजकाः॥"

नियन्ता। यथा, याज्ञवल्क्ये। १। ५।

"ज्ञातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥")

प्रयोजनं, क्लो, (प्रयुज्यते इति। प्र+युज्+ल्युट्) कार्य्यम्। (प्रयुज्यतेऽनेनेति। प्र+युज्+करणे ल्युट्।) हेतुः। इति मेदिनी। ने, १८३॥ यथा,

"सर्वस्यैव हि शास्त्रस्य कर्म्मणो वापि कस्यचित्
यावत् प्रयोजनं नोक्तं तावत् तत् केन प्रगृह्यते॥
सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥"

इति प्राचः॥

('प्रयोजनञ्च द्विविधं मुख्यं गौणञ्च। तत्र अन्येच्छानधीनेच्छाविषयत्वं मुख्यप्रयोजनत्वम् अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजनत्वम्। तत्राद्यं सुखं तद्भोगो दुःखाभावश्च। द्वितीयं तदुपकारि शयनभोजनादि। तस्य मुख्यप्रयोजनेच्छयैव जन्याया इच्छाया विषयत्वात्तथात्वम्।" इति मुक्तिवादे गदाधरः॥ उद्देश्यः। यथा "अथ प्रयोजनम्। प्रयोजनं नाम यदर्थमारभ्यन्त आरम्भाः। यथा यद्यकालमृत्युरस्ति ततोऽहमात्मानमायुर्वेरुपचरिष्याम्यनायुषः परिहरिष्यामि कथं न मामकालमृत्युः प्रसहेतेति।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)

प्रयोज्यः, त्रि, (प्र+युज्+ण्यत्। 'प्रयोज्यनियोज्यौ शक्यार्थे।" ७। ३। ६८। इति निपातनात् साधुः। प्रयोक्तुं शक्यः। इति मुग्धबोधव्याकरणम्॥ (यथा, मनुः। ३। १५६।

"वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्ममिच्छता॥")

मूलधने, क्लो॥

प्ररूढः, पुं, (प्ररोहत्यत्रेति। प्र+रुह+क्तः।) जठरम्। इति मेदिनी। ढे, ८॥ (क्वचित् जरठोऽपि पाठः॥)

प्ररूढः, त्रि, (प्र+रुह्+क्तः।) बद्धमूलः। इति मेदिनी। ढे, ८॥ (यथा भागवते। ४। १३। १।

"प्ररूढभावो भगवत्यधोक्षजे
भ्रष्टुं पुनस्तं विदुरः प्रचक्रमे॥")

जातः। (यथा, रघुः। १३। ६।

"नाभिप्ररूढाम्बुरुहासनेन
संस्तूयमानः प्रथमेन धात्रा॥")

प्रवृद्धः। इति शब्दरत्नावली॥

प्ररोहः, पुं, (प्ररोहतीति। प्र+रुह्+अच्।) अङ्कुरः। इति हेमचन्द्रः। ४। १८५॥ (यथा, कुमारे। ५। ६०।

"दृमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्याः शशिमौलिसंश्रयः॥"

नन्दीवृक्षः। तत्पर्य्यायो यथा,—

"नन्दीवृक्षोऽस्त्रमेदः प्ररोहो गजपादपः।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्यादनश्मतिः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

प्रलपितः, त्रि, प्रपूर्व्वलपधातोः कर्म्मणि क्तः। कथितः। यथा, काव्यप्रकाशे।

"जनस्थाने भ्रान्तं नवकमृगतृष्णान्वितधिया
वचो वैदेहीति प्रतिपदमदश्रु प्रलपितम्॥"

प्रलम्बः, पुं, (प्रलम्बते इति। प्र+लम्ब+अच्। अतिदीर्घत्वादेव तथात्वम्।) दैत्यभेदः। स च दनुपुत्रः मनुष्यवध्यः। यथा,—

"एकाक्ष ऋषभोऽरिष्टः प्रलम्बनरकौ तथा।
इन्द्रवाधनकेशी च पुरः शङ्खोऽथ धेनुकः॥
गवेष्टिको गवाक्षश्च तालकेतुश्च वीर्य्यवान्।
एते मनुष्यवध्यास्तु दनोः पुत्रान्वयाः स्मृताः॥"

इत्यग्निपुराणम्॥

(अयं हि बलदेवेन निहतः। यथा, भागवते १०। स्कन्धे १८। अध्याये।

"तत्रोपाहूय गोपालान् कृष्णः प्राह विहारवित्।
हे गोपा विहरिष्यामो द्वन्द्वीभूय यथायथम्॥
तत्र चक्रुः परिवृढौ गोपा रामजनार्द्दनौ।
कृष्णसङ्घट्टिनः केचिदासन् रामस्य चापरे॥
आचेरुर्विविधाः क्रीड़ा वाह्यवाहकलक्षणाः।
यत्रारोहन्ति जेतारो वहन्ति च पराजिताः॥"

"उवाह कृष्णो भगवान् श्रीदामानं पराजितः।
वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम्॥
अविषह्यं मन्यमानः कृष्णं दानवपुङ्गवः।
वहन् द्रुततरं प्रागादवरोहणतः परम्॥

"अथागतस्मृतिरभयो रिपुं बलो
विहाय सार्थमिव हरन्तमात्मनः।
रुषाहनच्छिरसि दृढ़ेन मुष्टिना
सुराधिपो गिरिमिव वज्रंहसा॥
स आहतः सपदि विशीर्णमस्तको
मुखाद्दमन् रुधिरमपस्मृतोऽसुरः।
महारवं व्यसुरपतत् समीरयन्
गिरिर्यथा मघवत आयुधाहतः॥")

वृषभः। पयोधरः। लताङ्कुरः। शाखा। हारभेदः। (भावे घञ्) प्रलम्बनम्। इति मेदिनी। बे, १३॥ (देशविशेषः। यथा, रामायणे २। ६८। १२।

"न्यन्तेनापरतालस्य प्रलम्बस्योत्तरं प्रति।
निषेवमाणास्ते जग्मुर्नदीं मध्येन मालिनीम्॥"

लम्बमाने, त्रि। यथा, महाभारते १। १८५। १०।

"गूढोत्तरांसान् भुजगेन्द्रभोग-
प्रलम्बबाहून् पुरुषप्रवीरान्॥")

प्रलम्बघ्नः, पुं, (प्रलम्बं हन्तीति। हन्+कः। बलरामः इत्यमरः। १। १। २४॥

प्रलम्बभित्, पुं, (प्रलम्बं भिनत्तीति। भिद्+क्विप्। बलरामः। इति हेमचन्द्रः। २। १३८॥

प्रलम्बाण्डः, पुं, (प्रलम्बो लम्बमानः अण्डो यस्य।) दीर्घाण्डकोषविशिष्टः। तत्पर्य्यायः। पुष्करः २ इति हेमचन्द्रः। ३। १२१॥

प्रलम्बितः, त्रि, प्रपूर्व्वलम्बधातोः कर्त्तरि क्तः ॥ प्रकर्षेण लम्बितमात्यादिः ॥

प्रलयः, पुं, (प्रलीयते लीयते जगदस्मिन्निति। प्र+ली+"एरच्।" ३।३।५६। इत्यच्।) प्रलयः। तत्पर्य्यायः। संवर्त्तः २ क्षयः ३ क्षयः ४ कल्पान्तः ५। इत्यमरः। १।४।२२ ॥ लयः ६ संक्षयः ७ विलयः ८। इति शब्दरत्नावली ॥ प्रतिसर्गः ९ प्रतिसञ्चरः १०। स च नित्यनैमित्तिकप्राकृतात्यन्तिकभेदेन चतुर्धा। यथा,—

कूर्म्म उवाच।

"नित्यं नैमित्तिकञ्चैव प्राकृतात्यन्तिकौ तथा। चतुर्धायं पुराणेऽस्मिन् प्रोच्यते प्रतिसञ्चरः ॥"*

नित्यो यथा,—

"योऽयं महत्प्रयते नूनं नित्यं लोके चयन्त्विह। नित्यं संकीर्त्यते नाम्ना मुनिभिः प्रतिसञ्चरः॥"

नैमित्तिको यथा,—

"ब्राह्मो नैमित्तिको नाम कल्पान्ते यो भविष्यति।
त्रैलोक्यस्यास्य कथितः प्रतिसर्गो मनीषिभिः ॥"

प्राकृतो यथा,—

"महदाद्यं विशेषान्तं यदा संयाति संक्षयम्। प्राकृतः प्रतिसर्गोऽयं प्रोच्यते कालचिन्तकैः ॥"

आत्यन्तिको यथा,—

"ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि प्रलयः प्रतिसर्गोऽयं कालचिन्तापरैर्द्विजैः ॥ आत्यन्तिकश्च कथितः प्रलयो लयसाधनः ॥"*

नैमित्तिकप्रलयविस्तारो यथा,—

'नैमित्तिकमिदानीं वः कीर्त्तयिष्ये समासतः ॥ चतुर्युगसहस्रान्ते संप्राप्ते प्रतिसञ्चरे। आत्मसंस्थाः प्रजाः कर्त्तुं प्रतिपेदे प्रजापतिः ॥ ततो भवत्यनावृष्टिर्घोरा सा शतवार्षिकी। भूतक्षयकरी घोरा सर्वभूतभयङ्करी ॥ ततो यान्यल्पसाराणि शस्यानि पृथिवीतले। तानि चाग्रे प्रलीयन्ते भूमित्वमुपयान्ति च ॥ सप्तरश्मिरथो भूत्वा समुत्तिष्ठन् दिवाकरः। अप्सु रश्मिभिर्भवति पिबन्नम्भो गभस्तिभिः ॥ ततस्ते रश्मयः सप्त पिबन्त्यम्बु महार्णवे। तेनाहारेण ते सूर्य्या दीप्ताः सप्त भवन्ति हि ॥ तस्य ते रश्मयः सप्त सूर्य्या भूत्वा चतुर्दिशम्। चतुर्लोकमिदं कृत्स्नं दहन्ति शिखिनो यथा। व्याप्नुवन्तश्च ते विप्रास्तूर्द्ध्वाधश्च रश्मिभिः। दीप्यन्ते भास्कराः सप्त दहन्तोऽग्निप्रतापिनः। ते सूर्य्या वारिणा दीप्ता बहुसाहस्ररश्मयः। खं समावृत्य तिष्ठन्ति निर्दहन्तो वसुन्धराम् ॥ ततस्ते यां प्रतापेन दह्यमाना वसुन्धरा। सादिनद्यर्णवद्वीपा निस्नेहा समपद्यत ॥ दीप्ताभिः सप्ततताभिश्च ज्वालाभिश्च समावृतः। अधश्चोर्द्धञ्च तिर्य्यक् च समावृत्य सहस्रशः ॥ सूर्य्याग्निना प्रदग्धानां संदग्धानां परस्परम्। एकत्वमुपजातानामेकज्वालो भवेत् प्रभुः। सर्वलोकप्रणाशश्च सोऽग्निर्भूत्वात्मकुण्डली। चतुर्लोकमिदं कृत्स्नं निर्दहत्यात्मतेजसा ॥ ततः प्रलीने मय्यस्मिन् जङ्गमे स्थावरे तथा। निर्दग्धा निस्तृणा भूमिः कूर्म्मपृष्ठे प्रकाशते ॥ अम्बरीषमिवाभाति सर्व्वमापूरितं जगत्। सर्व्वमेव तदार्चिर्भिः पूर्णं जाज्वल्यते नभः ॥ पाताले यानि तीर्थानि महोदधिगतानि तु। तत्र तानि प्रलीयन्ते भूमित्वमुपयान्ति वै ॥ द्वीपाश्च पर्वतांश्चैव वर्षाण्यथ महोदधीन्। तान् सर्व्वान् भस्मसात् कृत्वा सप्तात्मा पावकः प्रभुः ॥ समुद्रेभ्यो नदीभ्यश्च पातालेभ्यश्च सर्व्वशः। पिबन्नपः समिद्धोऽग्निः पृथिवीमाप्यितोऽज्वलत्। ततः सम्वर्त्तकः शैलानतिक्रम्य महांस्तथा। लोकान् दहति दीप्तात्मा रुद्रतेजोविजृम्भितः ॥ स दग्ध्वा पृथिवीन्देवो रसातलमशोषयत्। अधस्तात् पृथिवीं दग्ध्वा दिवमूर्द्धं दहिष्यति ॥ योजनानां शतानीह सहस्राण्ययुतानि च। उत्तिष्ठन्ति शिखास्तस्य वायुः सम्वर्त्तकस्य च ॥ गन्धर्व्वांश्च पिशाचांश्च मनुष्यारगराक्षसान्। तदा दहत्यसौ दीप्तः कालरुद्रप्रचोदितः ॥ भूर्लोकञ्च भुवर्लोकं स्वर्लोकञ्च तथा महः। दहेदशेषं कालाग्निः कालो विश्वतनुः स्वयम् ॥ व्याप्तेषु तेषु लोकेषु तिर्य्यगूर्द्धमथाग्निना। तत्तेजः समनुप्राप्य कृत्स्नं जगदिदं शनैः ॥ अयोगोलनिभं सर्व्वं तदैवैकं प्रकाशते। ततो गजकुलोन्नादाः स्तनितैः समलङ्कृताः ॥ उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्त्तका घनाः। केचिन्नीलोत्पलश्यामाः केचित् कुमुदसन्निभाः। धम्रवर्णास्तथा केचित् तथा पीताः पयोधराः। केचिद्रक्ताभ्रवर्णाश्च स्थूलाः क्षारनिभास्तथा ॥ शङ्खकुन्दनिभाश्चान्ये जात्यञ्जननिभाः परे। मनःशिलानिभाश्चान्ये कपोतसदृशाः परे ॥ केचिद्द्रुह्यवर्णाभास्तथान्ये क्षीरसन्निभाः। तथा कर्व्वूरवर्णाभा भिन्नाञ्जननिभास्तथा ॥ इन्द्रगोपनिभाः केचिद्धरितालनिभास्तथा। काकाण्डकनिभाः केचिदुत्तिष्ठन्ति घना दिवि केचित् पर्व्वतसङ्काशाः केचिद्गजकुलोपमाः। कूटागारनिभाश्चान्ये केचिन्नीलकुलोद्वहाः ॥ बहुरूपा घोररूपा घोरस्वरनिनादिनः। तदा जलधराः सर्व्वे पूरयन्ति नभस्तलम् ॥ ततस्ते जलदा घोरा वारिणा भास्करात्मजाः। सप्तधा संवृतात्मानस्तमग्निं शमयन्त्युत ॥ ततस्ते जलदा वर्षं वर्षन्तीह हिमौघवत्। सुघोरमग्निवं सर्व्वं नाशयन्ति च पावकम् ॥ प्रवृत्तेन तदात्यर्थमम्भसा पूर्य्यते किल। अङ्गिस्ते जोऽभिभूतत्वात्तदाग्निः प्रविशत्यपः ॥ नष्टे चाग्नौ वर्षशतैः पयोदा जलसम्भवाः। प्लावयन्तोऽथ भुवनं महाजलपरिप्लवैः ॥ धाराभिः पूरयन्तोदं चोद्यमानाः स्वयम्भुवा। उदन्तः सलिलीघश्च वेला इव महोदधेः ॥ सादिद्वीपा तथा पृथ्वी जले संछाद्यते शनैः। आदित्यरश्मिभिः पीतं जलमात्मसु तिष्ठति ॥ पुनः पतति तद्भूमौ पूर्य्यन्ते तेन चार्णवाः ॥ ततः समुद्राः स्वां वेलामतिक्रान्तास्तु कृत्स्नशः। पर्व्वताश्च विलीयन्ते मही चाप्सु निमज्जति ॥ तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे। योगनिद्रां समास्थाय शेते देवः प्रजापतिः ॥ चतुर्युगसहस्रान्तं कल्पमाहुर्महर्षयः। वराहो वर्त्तते कल्पो यस्य विस्तार ईरितः ॥ असंख्यातास्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः। कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः ॥ सात्त्विकेष्वथ कल्पेषु माहात्म्यमखिलं हरेः। तामसेषु शिवस्योक्तं राजसेषु प्रजापतेः। सोऽयं प्रवर्त्तते कल्पो वाराहः सात्त्विको मतः ॥ अन्ये च सात्त्विकाः कल्पा मम तेषु परिग्रहः। ध्यानलभ्यस्तथा ज्ञानं लब्ध्वा तत्त्वेन योगिनः ॥ आराध्य गिरिशं यान्ति तत्परमं पदम्। सोऽहं सत्त्वं समाधाय मायी मायामयं स्वयम्॥ एकार्णवे जगत्यस्मिन् योगनिद्रां व्रजामि तु। मां पश्यन्ति महात्मानः सप्तं काले महर्षयः ॥ जनलोके वर्त्तमानास्तपसा योगचक्षुषा। अहं पुराणपुरुषो भूर्भुवः प्रभवो विदुः ॥ सहस्रचरणः श्रीमान् सहस्राक्षः सहस्रपात्। मन्योऽग्निर्ब्राह्मणा गावः कुशाश्च समिधो ह्यहम्। प्राक्षणी च स्रुवश्चैव सोमो घृतमयोऽस्म्यहम्। संवर्त्तको महानात्मा पवित्रं परमं यशः ॥ वेदवेद्यः प्रभुर्गोप्ता गोपतिर्ब्रह्मणो मुखम्। अनन्तस्त्वारको योगी गतिर्मतिमतां वरः ॥ हंसः प्राणोऽथ कपिलो विश्वमूर्त्तिः सनातनः। क्षेत्रज्ञः प्रकृतिः कालो जगद्बीजमयामृतम् ॥ माता पिता महादेवो मत्तो ह्यन्यन्न विद्यते ॥

आदित्यवर्णां भुवनस्य गोप्ता
नारायणः पुरुषो योगमूर्त्तिः।
मां पश्यन्ति यतयो योगनिष्ठा
ज्ञात्वात्मानममृतत्वं व्रजन्ति ॥"*॥

प्राकृतप्रलयविस्तारो यथा,—

कूर्म्म उवाच।

"अतः परं प्रवक्ष्यामि प्रतिसर्गमनुत्तमम्। प्राकृतं प्रसमासेन शृणुध्वं गदतो मम ॥ गते परार्द्धद्वितये काले लोकप्रकालकः। कालाग्निर्भक्षसात् कर्त्तुं करोति निखिलं मतिम् ॥ आत्मन्यात्मानमावेश्य भूत्वा देवो महेश्वरः। दहेदशेषं ब्रह्माण्डं सदेवासुरमानुषम् ॥ तमाविश्य महादेवो भगवानीललोहितः। करोति लोकसंहारं भीषणं लोकमात्रितः ॥ प्रविश्य मण्डलं सौरं कृत्वासौ बहुधा पुनः। निर्दहत्यखिलं लोकं सप्तसप्तिस्वरूपधृक् ॥ स दग्ध्वा सकलं सत्त्वं मन्वं ब्रह्मशिरो महत्। देवतानां शरीरेषु क्षिपत्यखिलदाहकः ॥ दग्धेष्वशेषदेहेषु देवो गिरिवरात्मजा। एकाकी सात्त्विकः शम्भोस्तिष्ठते वैदिकी श्रुतिः शिरःकपालैर्देवानां कृतसञ्चयभूषणः। आदित्यचन्द्रादिगणैः पूरयन् व्योममण्डलम् ॥

सहस्रनयनो देवः सहस्राकृतिरीश्वरः।
सहस्रहस्तचरणः सहस्रार्चिर्महाभुजः॥
दंष्ट्राकरालवदनः प्रदीप्तानललोचनः।
त्रिशूली कृत्तिवसनो योगमैश्वरमाश्रितः॥
पीत्वा तत् परमानन्दं प्रभूतममृतं स्वकम्।
करोति ताण्डवं देवीमालोक्य परमेश्वरः॥
पीत्वा नृत्यामृतं देवी भर्त्तुः परममङ्गला।
योगमास्थाय देवस्य देहमायाति शूलिनः॥
स त्यक्त्वा ताण्डवरसं स्वेच्छयैव पिनाकधृक्।
याति स्वभावं भगवान् दग्ध्वा ब्रह्माण्डमण्डलम्
संस्थितेष्वथ देवेषु ब्रह्मविष्णुपिनाकिषु।
गुणैरनेकैः पृथिवी विलयं याति वारिषु।
स वारितत्त्वं सगुणं ग्रसते हव्यवाहनः॥
तैजसं गुणसंयुक्तं वायौ संयाति संक्षयम्।
आकाशे सगुणो वायुः प्रलयं याति सत्तमाः॥
भूतादौ च तथाकाशं लीयते गुणसंयुतम्।
इन्द्रियाणि च सर्वाणि तैजसे यान्ति संक्षयम्॥
वैकारिके देवगणाः प्रलयं यान्ति सत्तमाः।
वैकारिकस्तैजसश्च भूतादिर्येति सत्तमाः॥
त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत्।
महान्तमेभिः सहितं ब्रह्माणमनुतोजसम्॥
अव्यक्तं जगतो योनिः संहरेदेकमव्ययम्।
एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः॥
नियोजयत्यथान्योन्यं प्रधानं पुरुषं परम्।
प्रधानपुंसोरजयोरेष संहार ईरितः॥
महेश्वरेच्छाजनितो न स्वयं विद्यते लयः।
गुणसाम्यं तदव्यक्तं प्रकृतिः परिगीयते॥
प्रधानं जगतो योनिर्मायातत्त्वमचेतनम्।
कूटस्थश्चिन्मयो ह्यात्मा केवलः पञ्चविंशकः॥
गीयते मुनिभिः साक्षी महानेकः पितामहः।
एव संहारकरणो शक्तिर्माहेश्वरी ध्रुवा॥
प्रधानाद्यं विशेषान्तं दग्धेदुद्र इति श्रुतिः।
योगिनामथ सर्वेषां ज्ञानविज्यस्तचेतसाम्।
आत्यन्तिकश्चैव लयं विदधातीह शङ्करः॥"

इति कौर्म्मे ।४२।४३। अध्यायो॥ * ॥

आत्यन्तिकप्रलयविस्तारो यथा,—

श्रीपराशर उवाच।

"आध्यात्मिकादि मैत्रेय! ज्ञात्वा तापत्रयं बुधः
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम्॥
आध्यात्मिको द्विविधः शारीरो मानसस्तथा
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयताञ्च सः॥
शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः।
गुल्मार्शःक्षययुग्श्वासच्छर्द्यादिभिरनेकधा॥
तथाचिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि॥
कामक्रोधभयद्वेषलोभमोहविषादजः।
शोकासूयावमानेर्ष्यामात्सर्य्यादिभवस्तथा॥
मानसोऽपि द्विजश्रेष्ठ! तापो भवति नैकधा।
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः॥
मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः।
सरीसृपाद्यैश्च नृणां जन्यते चाधिभौतिकः॥
शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः।
तापो द्विजवरश्रेष्ठ! कथ्यते चाधिदैविकः॥
तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः।
गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः॥
निरस्तातिशयाह्लादसुखभावैकलक्षणा।
भेषजं भगवत्प्राप्तिरैकान्तात्यन्तिकी मता॥
तस्मात्तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः।
तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म्म चोक्तं महामुने!॥
आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते।
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम्॥
अन्धन्तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम्।
यथा सूर्य्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजम्॥
मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम!।
तदेतच्छ्रूयतामत्र सम्बन्धे गदतो मम॥
द्वे ब्रह्मणो वेदितव्ये शब्दब्रह्म परञ्च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥
द्वे विद्ये वेदितव्ये वै इति चाथर्ब्वणी श्रुतिः।
परया त्वक्षरप्राप्तिरृग्वदादिमया परा॥
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम्।
अनिर्देश्यमरूपञ्च पाणिपादाद्यसंयुतम्॥
विभुं सर्व्वगतं नित्यं भूतयोनिमकारणम्।
व्याप्यव्याप्यं यतः सर्व्वं तं वै पश्यन्ति सूरयः॥
तद्ब्रह्म तत् परं धाम तत्रेयं मोक्षकाङ्क्षिणाम्।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्॥
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः।
वाचको भगवच्छब्दस्तस्याप्यस्याचरात्मनः॥
एवंनिगदितार्थस्य सतत्त्वं तस्य तत्त्वतः।
ज्ञायते येन तज्ज्ञानं परमन्यत्तयोमयम्॥
अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज!।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः॥
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते।
मैत्रेय! भगवच्छब्दः सर्व्वकारणकारणे॥
सर्वाणि तत्र भूतानि वसन्ति परमात्मनि।
भूतेषु च स सर्व्वात्मा वासुदेवस्ततः स्मृतः॥
खाण्डिक्यजनकायाह पृष्टः केशिध्वजः पुरा।
नामव्याख्या ह्यनन्तस्य वासुदेवस्य तत्त्वतः॥
भूतेषु वसते सोऽन्तर्व्वसन्त्यत्र च तानि यत्।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः॥
स सर्व्वभूतप्रकृतिर्विकार-
गुणांश्च दोषांश्च मुने! व्यतीतः।
अतीतसर्व्वावरणाखिलात्मा
तेनास्तृतं यद्भवनान्तराणि॥
समस्तकल्याणगुणात्मको हि
स्वशक्तिलेशावृततभूतसर्गः।
इच्छागृहीताभिमतोरुदेहः
संसाधिताशेषजगद्धितोऽसौ॥
तेजोबलैश्वर्य्यमहान्वितश्च
ज्ञानैश्वर्य्यशक्त्यादिगुणैकराशिः।
परः पराणां सकलो न यत्र
क्लेशादयः सन्ति परावरेशे॥
स ईश्वरो व्यष्टिसमष्टिरूपो-
ऽव्यक्तस्वरूपः प्रकटस्वरूपः।
सर्व्वेश्वरः सर्व्वदृक् सर्व्ववेत्ता
समस्तशक्तिः परमेश्वराख्यः॥
स ज्ञायते येन तदस्तदोषं
शुद्धं परं निर्म्मलमेकरूपम्।
संदृश्यते चाप्यवगम्यते वा
तज्ज्ञानमज्ञानमतोऽन्यदुक्तम्॥"

इति विष्णुपुराणे ६ अंशे आत्यन्तिकप्रतिसञ्चारो नाम ५ अध्यायः॥*॥ अपि च।

नारद उवाच।

"कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम्।
दिव्यैकयुगं ज्ञेयं तस्य या चैकसप्ततिः॥
मन्वन्तरन्तु तज्ज्ञेयं ते तु यत्र चतुर्दश।
स कल्पो नाम वै कालस्तदन्ते प्रलयस्तु यः॥
सा ब्रह्मरात्री राजेन्द्र! तत्र शेतेऽब्जासनः।
त्रयो लोकास्तदा राजन् लीयन्ते तन्निमित्ततः॥
नैमित्तिको लयो नाम दैनन्दिन इतीर्य्यते॥
एवं दिनप्रमाणेन ब्रह्मणः शतवार्षिकम्।
आयुः पूर्व्वपरार्द्धे तु परार्द्धे द्वे प्रकीर्त्तिते॥
द्विपरार्द्धे व्यतीते तु ब्रह्मणो जगदात्मनः।
तदा प्रकृतयः सप्त प्रलयं यान्ति भूमिप!॥
लयः प्राकृतिको ह्येष लीने ब्रह्मणि भूपते!।
अण्डकोषेऽपि सकलः प्रलयं याति सर्वशः॥
पूर्व्वरूपन्तु वक्ष्यामि प्रलयस्यास्य भूपते!।
शतवर्षाणि भूमौ हि पर्জ্জन्यो नैव वर्षति॥
दुर्भिक्षे निर्জ্জने लोके प्रजाः सर्वाः क्षुधार्दिताः।
परस्परं भक्ष्यमाणाः क्षयं यास्यन्ति भूमिप!॥
समुद्रे च धरण्याञ्च वृक्षेषु च लतासु च।
देहे च यो रसस्तं हि रविर्हरति रश्मिभिः॥
ततः संवर्त्तको नाम ज्वालामाली हुताशनः।
सङ्कर्षणमुखोत्पन्नो दहत्यनिलसारथिः॥
सर्व्वं ब्रह्माण्डभाण्डं वै तत्कालचोदगर्জितः।
एवं दग्धं महाराज! वह्नार्काभ्यां समन्ततः॥
दग्ध्वा गोमयपिण्डाभं ब्रह्माण्डं सारवर्জितम्।
प्रचण्डपवनो राजंस्ततो वर्षशतं पुनः॥
संवर्त्तको नाम महान् ब्रह्माण्डं चालयिष्यति।
ततो मेघा महाघोरा नानावर्णा अनेकशः॥
शतं वर्षाणि वर्षन्ति गर्জन्ति च महास्वनाः।
एकोदकं ततो विश्वं निर्गुणं निर्विकारकम्॥
भूमेर्गन्धगुणं राजन्! ग्रसत्यापः समन्ततः।
गुणनाशात् स्वयं पृथ्वी प्रलयं प्राप्नुते तदा॥
तेजस्त्वपां रसगुणं सगन्धं पिबते बलात्।
ततः प्रलयमायान्ति राजन्नापोऽपि तत्क्षणात्॥
तेजस्तु ततो रूपं रसगन्धसमन्वितम्।
वायुर्हरति चण्डात्मा तेजःप्रलयमृच्छति॥
आकाशस्तु ततो वायोः स्पर्शं परगुणैः सह।
समादत्ते महाराज! अम्बरेऽथ प्रलीयते॥
आकाशस्य गुणं शब्दं गुणैरन्यैः समन्वितम्।
अहङ्कारः समादत्त नभस्यस्मिन् प्रलीयते॥
तैजसेष्विन्द्रियाण्यङ्गदेवा वैकारिके तथा।
अहङ्कारे प्रलीयन्ते जगदेतच्चराचरम्॥
अहङ्कारं भक्षयन्ति ततः सत्त्वादयो गुणाः।
ग्रसते तान् महाराज! आद्या प्रकृतिरुच्यते॥

न तस्याः कालदोषेण परिणामो नरर्षभ ! ।
आद्यन्तरहिता सा हि नित्यं कारणमव्ययम्॥
शक्तिर्भगवतः सा हि तदेकपरमा च सा ।
इत्युक्तः प्रलयो राजन्! विश्वस्यास्य महामते !॥
यथोत्पत्तिक्रमेणास्य व्युत्क्रमेण लयस्तथा ॥"

इति पाद्मे स्वर्गखण्डे ३९ अध्यायः ॥

(सात्त्विकविकारान्तर्गतविकारविशेषः । तल्लक्षणं यथा, साहित्यदर्पणे । ३।१६७।
"प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिरोक्तिः॥")

प्रलापः, पुं, (प्रलपनमिति । प्र + लप् + भावे घञ्।) प्रलपनम् । अनर्थकवाक्यम् । निष्प्रयोजनमुक्तत्वादिवचनम् । इत्यमरभरतौ । १ । ६ । १५ ॥ रोगाणामुपसर्गोऽयम् ॥ (यथा, भावप्रकाशे ।
"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः
उपद्रवा भवन्त्येते मृतिश्च रसशेषतः ॥"
अस्य लक्षणं चिकित्सा च यथा,—
स्वहेतुकुपिताद्दातादसत्यदुरिरर्थकम् ।
वचनं यत्परो ब्रूते स प्रलापः प्रकीर्त्तितः ॥
सतगरवरतिक्ता रेवताभ्रोदतिक्ता
नलदतुरगगन्धा भारती हारहूरा ।
मलयजदयमूलीशङ्खपुष्पी सुपक्वा
प्रलपनमपहन्यु; पानतो नातिदूरात् ॥
वरतिक्तोऽत्र पटः नलदमुशीरं भारती ब्राह्मी हारहूरा द्राक्षा ।" इति भावप्रकाशस्य मध्यखण्डे प्रथमे भागे ॥)

प्रलापहा, [न्] पुं, (प्रलापं हन्तीति । हन् + क्विप् ।) कुलत्थाख्यानम् । इति राजनिर्घण्टः ॥

प्रलीनता, स्त्री, (प्रलीनस्य निश्चेष्टस्य भावः । प्रलीन + तल् ।) प्रलयः । तत्पर्य्यायः । इन्द्रियस्वापः २ चेष्टानाशः ३ । इति राजनिर्घण्टः ॥

प्रलेहः, पुं (प्रलिह्यते इति । प्र + लिह् + घञ्।) व्यञ्जनविशेषः । इति पाकराजेश्वरः । दम्योक्तं कोरमा इत्यादि पारस्यभाषा ॥)चिन्तामणौ घृत प्रलेहप्रकारो यथा,—
"स्थूलानि मांसखण्डानि क्षालितानि च वारिणा ।
तप्तसर्पिषि विनिक्षिप्य दर्व्या सञ्चालयन् पचेत्॥
तप्तं तत्र विनिःक्षिप्य लावणं जलमल्पकम् ।
पचेत् पटपटाशब्दं तस्मिन् मांसे प्रकुर्वति ॥
प्रक्षिपेद्दाड़िमीनीरं बहुलेन पचेत् पुनः ।
मांसपिण्डेषु सिद्धेषु देया शुण्ठी सजीरका ॥
ततश्चोत्तार्य्य तन्मांसं पृथक् कुर्य्यात् प्रलेहतः॥
प्रलेहं वाससा पूतं स्थापयेदन्यभाजने ॥
हिङ्गुना घृतयुक्तेन धूपेत् तच्च धूपयेत् ॥"
गौड़देशीयप्रलेहस्तु ।
"हिङ्गार्द्र बीजपूरैलालवणैः सभृतेन तु ।
कुट्टितामिषपिष्टेन तच्च दाड़िमबीजतः ॥
सौषणावेसवारेण प्रलेहो गौड़देशजः ॥
प्रलेहो रुचिदो बल्यः कफानिलहरज्वरः ।
सग्राही पित्तकृत् किञ्चिच्छिलाध्मानगदान् जयेत् ॥"
पूर्णप्रलेहस्तु ।
"मांसपूरणयोगेन कोष्ठाकारं विधाय च ।
स्निग्धं क्षुण्णं घृते भृष्टं प्रलेहविधिना पचेत् ॥
पूरणस्य प्रलेहोऽयं विशेषो वातनाशनः ।
श्रमान्तकारकश्चैव मुखवैरस्यहृद्गुरुः ॥"
शुक्लवर्णः प्रलेहः ।
"घृते वेसरधान्याकहिङ्गुभृष्टधिसंयुते ।
वस्त्रपूते ऽर्द्धसम्पक्वे क्षिप्तं मांसं विनिःक्षिपेत्॥"
पीतवर्णस्तु ।
"प्रलेहः पीतवर्णोऽपि कार्य्यः शुक्लप्रलेहवत् ।
विशेषोऽत्र हरिद्रायाः संसर्गः कुङ्कुमस्य वा ॥"
रक्तवर्णोऽपि ।
"तप्तसर्पिषि क्षिप्तेहिङ्गुसंयुक्तं कामसर्दकम ।
धान्यकं लवणाजाजीधीतं मांसञ्च तत् क्षिपेत्
ततोऽर्द्धस्फुटिते मांसे दाड़िमीबीजसंयुते ।
सम्यक्के चातिमृदुले तक्रं शुण्ठीञ्च निःक्षिपेत्॥
तत उत्तार्य्य वस्त्रेण गालयेद्पयेदपि ।
रक्तवर्णप्रलेहस्य संसिद्ध्यर्थं विनिःक्षिपेत् ॥
करमर्दं दाड़िमस्य स्थाने शेषन्तु पूर्ववत् ॥"
हरितवर्णस्तु ।
"मेथिकाकासमर्दाम्लकल्केन चलकारिते ।
घृते मांसं विनिःक्षिप्य पचेच्छुष्कप्रलेहवत् ॥
सिद्धे च गालयेद्धस्ते क्षत्वा वर्णप्रयोजनम् ।
ताम्बूलं कट्फजङ्गारं देयं हरितहेतुना ॥
अरुचौ रुचिदः सद्यो नानावर्णप्रसाधितः ।
प्रलेहः कफवातघ्नः किञ्चित् पित्तकरो लघुः ॥"
वटकप्रलेहोऽपि ।
"माषस्य पिष्टिका सूक्ष्मा वेसवारेण संयुता ।
बहुधा क्रियते तस्या वटिकावटकादिकम् ॥
आम्रविम्बीफलाकारं लड्डुकावटकादिकम् ।
शृङ्गाटकफलाकारं यथावृद्धिप्रकारजम् ॥
क्षत्वा हि बहुधाधारे स्नेहितं घृतभार्जितम् ।
सवेसवारजे तक्रे क्वथिते च मनोरमे ॥
निःक्षिप्य चालयेदौषदुत्तार्य्यैलादिवासिते ।
एवन्तु बहुधा कार्य्यो माषमुद्गप्रलेहकः ॥
प्रलेहो वातजिद्वल्यः शुक्रमांसप्रदो रसः ।
प्रौषनः प्राणयुक्तानां शुक्रदः क्षीणरेतसाम् ॥"
मत्स्यप्रलेहस्तु ।
"मांसप्रलेहवत्कार्य्यः प्रलेहो मत्स्यसम्भवः ।
आदौ तैले परं पक्वं सर्वमन्यत्तु पूर्ववत् ॥
वर्णस्य करणे देयं पूर्व्वोक्तं द्रव्यकं हि यत् ।
उद्भूलनं सुगन्धाय दातव्यं पूर्व्वसम्भवम् ॥
मत्स्यखण्डप्रलेहस्तु ।
"सम्यक् प्रक्षालितं मत्स्यं वेसवारेण वेष्टितम्
तप्ततैले क्षिपेत् खण्डं हिङ्गुसैन्धवमिश्रितम् ।
प्रलेहविधिवत् साध्यो मत्स्यखण्डप्रलेहकः ॥"

प्रवक्ता, [क्तृ] त्रि, प्रकर्षेण वक्ति यः (प्र + वच् + तृच्।) वेदादिवाचकः । यथा,—
"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणध्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥
इति मत्स्ये ७ अध्यायः ॥

प्रवचनं, क्ली, (प्रकर्षेण उच्यते इति । प्र + वच् + ल्युट् वेदः । (यथा, अमरकोषे । २।७।१० ।
"अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः ।
लब्धानुज्ञः समाहृत्तः सुत्वा त्वभिषवे क्षते ॥"
वेदाङ्गम् । यथा, मनुः । २ । १८४ ।
"अग्राः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥"
"प्रकर्षेणैव उच्यते वेदार्थ एभिरिति प्रवचनान्यङ्गानि तेषु अग्राः पड़ङ्गविदः।"इति तत्र कुल्लूकभट्टः ॥ तथा च हरिवंशे । १६७ । ६८ ।
"उवाच वेदांयतुरो मन्त्रप्रवचनार्चितान् ॥"*
प्रकृष्टं वचनमिति कर्म्मधारयः । प्रकृष्टवाक्यम् । इति मेदिनी । ने, १८१ ॥ (यथा, मुण्डकोपनिषदि । ३ । २ । ३ ।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैव आत्मा विवृणुते तनूं स्वाम् ॥")

प्रवचनीयः, त्रि,(प्रवक्तीति । प्र + वच् + "भव्यगेयप्रवचनीयेति ।" ३।४।६८। इति कर्त्तरि अनीयर्।) प्रवक्ता । (प्रोच्यते इति । प्र + वच् कर्म्मणि अनीयर ।) प्रवाच्यः । इति मेदिनी ये १३२ ।

प्रवणः, पुं, (प्रवन्ते गच्छन्ति जना अनेनेति प्रु गतौ + करणे ल्युट्) चतुष्पथः इत्यमरः ३।३।५६ ।

प्रवणः, त्रि,(प्रवतेऽत्रेति । प्र + अधिकरणे ल्युट क्रमनिम्नभूमिः । (यथा, मनुः । ३ । २०६ ।
"दक्षिणाप्रवणश्चैव प्रयत्नेनोपपादयेत् ॥"
उदग्रम् । प्रङ्खः । इति मेदिनी ।ने,५८॥ (यथा, मार्कण्डेये । २३ । ८८ ।
"धन्योऽहमतिपुण्योऽहं कोऽन्योऽस्ति सदृशो मया ।
यत्तातो मामभिद्रष्टुं करोति प्रवणं मनः ॥")
आयतः । प्रगुणः । चषः । इति विश्वः ॥
प्रुतः । स्निग्धः । इति शब्दरत्नावली ॥
आसक्तः । इति हेमचन्द्रः । ३।४९ ॥ (यथा, विष्णुपुराणे । ६ । १ । ११ ।
"प्रजास्रष्टा ब्रह्मणा सृष्टावातुर्वर्ण्यव्यवस्थितौ ।
सम्यक्त्वव्यवसायाचारप्रवणा मुनिसत्तम ! ॥")
चौरः इति धरणिः ।

प्रवत्स्यत्पतिका, स्त्री, (प्रवत्स्यन् प्रवासं गमिष्यन् पतिर्यस्याः । कप् ।) नायिकाभेदः । अस्या लक्षणम् । यस्याः पतिरग्रिमक्षणे देशान्तरं यास्यत्येव सा अस्यार्थेष्टा । काकुवचनकातरप्रेक्षणगमनविघ्नोपदर्शननिर्वेदसन्तापसम्मोहनिश्वासवैषादयः ॥ मुग्धा प्रवत्स्यत्पतिका यथा,—
"प्राणेश्वरे किमपि जल्पति निर्गमाय
वामोदरी वदनमानमयाञ्चकार ।
आली पुनर्निभृतमेत्य लतानिकुञ्ज-
मुन्मत्तकोकिलकलध्वनिमाततान ॥ १ ॥

मध्या प्रवत्स्यत्पतिका यथा,—
"गन्तुं प्रिये ! वदति निःश्वसितं न दीर्घ-
मामील वा नयनयोर्ज्वलमाविरासीत् ।
आयुर्लिपिं पठितुमेषदृशः परन्तु
भालस्थलीं किमु करः समुपाजगाम ॥"२॥
प्रौढ़ा प्रवत्स्यत्पतिका यथा,—
"नायं मुञ्चति सुभ्रुवामपि तनुत्यागी वियोगज्वर-
स्तेनाहं विहिताञ्जलिर्यदुपते ! पृच्छामि सत्यं वद ।
ताम्बूलं कुसुमं पटीरमुदकं यद्दत्तमुद्भिर्दीयते
तत् स्यादत्र परत्र वा किमु विषज्वालावलीदुःसहम् ॥"३॥
परकीया प्रवत्स्यत्पतिका यथा,—
"न्यस्तं पत्रगमूर्द्धि पादयुगलं भक्तिर्विमुक्ता गुरौ,
त्यक्ता नीतिरकारि किं न भवती हेतोर्मया दुष्कृतम् ।
अज्ञानां शतयातना नयनयोः कोपक्रमो रौरवः
कुम्भीपाकपराभवश्च मनसो युक्तं त्वयि प्रस्थिते ॥"४॥
सामान्यप्रवत्स्यत्पतिका यथा,—
"मुद्रां प्रदेहि बलयाय भवद्वियोग-
मासाद्य यास्यति वहिः सहसा यदेतत् ।
इत्थं निगद्य विगलज्जयनाम्बुधारा
वाराङ्गना प्रियतमं करयोर्बभार ॥"५॥
इति रसमञ्जरी ॥

प्रवयणं, क्ली, (प्रवीयतेऽनेनेति। प्र+अज गतौ क्षेपणे च+ल्युट्। "वा यौ।" २।४।५७। इति वी। "क्त्यचः।" ८।४।२८। इति णत्वम्।) प्रतोदः। इति हेमचन्द्रः।३।५५७॥ (प्र+वय गतौ+भावे ल्युट्। प्रकर्षेण गमनम्। इति केचित्)॥

प्रवयाः, [स्] त्रि, (प्रगतं वयो यस्य।) वृद्धः। इत्यमरः २।६।४२॥(यथा,रघुः।८।१८।
"नृपतिः प्रकृतीरवेक्षितुं
व्यवहारासनमाददे युवा।
परिचेतुमुपांशुधारणां
कुशपूतं प्रवयास्तु विष्टरम् ॥"
पुराणः। इति निघण्टुः। ३।२७॥ यथा, ऋग्वेदे।२।१३।४।
"अधा यो विश्वा भुवनानि मज्मनेशानकृत्-
प्रवया अभ्यर्धत ॥")

प्रवरं, क्ली, (प्रव्रियते इति। प्र+वृ+अप्।) अगुरु। इति भावप्रकाशः॥ गोत्रम्। श्रेष्ठे, त्रि। इति मेदिनी। रे, १७६॥ (यथा, मनुः। १०।२७।
एते षट् सदृशान् वर्षान् जनयन्ति स्वयोनिषु।
माद्यजात्यां प्रसूयन्ते प्रवरासु च योनिषु ॥")

प्रवरः, पुं, (प्र+वृ+अप्।) सन्ततिः। इति मेदिनी। रे, १७६॥ गोत्रप्रवर्त्तकमुनिव्यावर्त्तको मुनिगणः। तथा च यमदग्निगोत्रस्य प्रवराः यमदग्नौर्व्ववशिष्ठाः। भरद्वाजगोत्रस्य भरद्वाजाङ्गिरसबार्हस्पत्याः। विश्वामित्रगोत्रस्य विश्वामित्रमरीचिकौशिकाः। अत्रिगोत्रस्य चत्रात्रेयशातातपाः। गोतमगोत्रस्य गोतमवशिष्ठबार्हस्पत्याः। वशिष्ठगोत्रस्य वशिष्ठः। केषाञ्चित् वशिष्ठाच्यिसःकृतयः। काश्यपगोत्रस्य काश्यपावत्सारनैध्रुवाः। अगस्त्यगोत्रस्य अगस्त्यदार्ढीच्यैजैमिनयः। सौकालिनगोत्रस्य सौकालिनाङ्गिरसबार्हस्पत्यावत्सारनैध्रुवाः। मौद्गल्यगोत्रस्य और्व्वच्यवनभार्गवजामदग्न्याप्नुवतः। पराशरगोत्रस्य पराशरशक्तिवशिष्ठाः। बृहस्पतिगोत्रस्य बृहस्पतिकपिलपार्व्वणाः। काञ्चनगोत्रस्य अश्वत्थदेवलदेवराजाः। विष्णुगोत्रस्य विष्णुवृद्धिकौरवाः। कौशिकगोत्रस्य कौशिकाविजमदग्न्यः। कात्यायनगोत्रस्य अत्रिभृगुवशिष्ठाः। आत्रेयगोत्रस्य आत्रेयशातातपसांख्याः। काश्यगोत्रस्य काश्यावत्सदेवलाः। कृष्णात्रेयगोत्रस्य कृष्णात्रेयावत्सारेयावासाः। साङ्कृतिगोत्रस्य अध्याहाराविसाङ्कृतयः। कौण्डिन्यगोत्रस्य कौण्डिन्यास्तिमिककौण्याः। गर्गगोत्रस्य गार्ग्यकौस्तुभमाण्डव्याः। आङ्गिरसगोत्रस्य आङ्गिरसवशिष्ठबार्हस्पत्याः। अनावृकाच्यगोत्रस्य गार्ग्यगौतमवशिष्ठाः। अत्रिगोत्रस्य अत्रिबलिसारस्वताः। जैमिनीगोत्रस्य जैमिन्युतथ्यसाङ्कृतयः। वृद्धिगोत्रस्य कुरुवृद्धाङ्गिरोबार्हस्पत्याः। शाण्डिल्यगोत्रस्य शाण्डिल्यासितदेवलाः। वात्स्यगोत्रसावर्णगोत्रयोः और्व्वच्यवनभार्गवजामदग्न्याप्नुवतः। आलम्बायनगोत्रस्य आलम्बायनशालङ्कायनशाकटायनाः। वयाघ्रपद्यगोत्रस्य साङ्कृतिः। घृतकौशिकगोत्रस्य कुशिककौशिकघृतकौशिकाः। केषाञ्चित् कुशिककौशिकबभ्रुलाः। शक्तिगोत्रस्य शक्तिपराशरवशिष्ठाः। काण्वायनगोत्रस्य काण्वायनाङ्गिरसबार्हस्पत्यभरद्वाजाजमीढाः। वासुकिगोत्रस्य अच्योभ्यानन्तवासुकयः। गौतमगोत्रस्य गौतमाङ्गिरसबार्हस्पत्यनैध्रुवाः। केषाञ्चित् गौतमाङ्गिरसावासाः। शुनकगोत्रस्य शुनकशौनकगृत्समदाः। सौपायनगोत्रस्य प्रवराः और्व्वच्यवनभार्गवजामदग्न्याप्नुवतः। इति धनञ्जयकृतधर्म्मप्रदीपे गोत्रप्रवरविवेकः॥

प्रवर्गः, पुं, (प्रह्रज्यते निःक्षिप्यते इविरादिकमस्मिन्निति। प्र+ह्रज्+अधिकरणे घञ्।) होमाग्निः। इति हेमचन्द्रः।३।५००॥ (यथा, हरिवंशे। ४१।३४।
"दक्षिणाहृदयो योगी महासत्रमयो महान्।
उपाकर्म्मौष्ठरुचकः प्रवर्गावर्त्तभूषणः॥"
प्रवर्ग्य इति पाठोऽपि दृश्यते॥)

प्रवर्त्तकः, त्रि,(प्रवर्त्तयतीति। प्र+वृत्+णिच्+ण्वुल्।) प्रवर्त्तनकारी। प्रवृत्तिजनकः। यथा,
"प्रवर्त्तकं वाक्यमुवाच चोदना
निवर्त्तकं नैवमुवाच भाष्यकृत्।
ततश्च विघ्नो नहि चोदनास्ति सा
प्रवर्त्तिका या न भवेदिति स्थितिः॥"
इति संक्षेपशारीरकम्॥

(यथा च देवीभागवते।१।१४।४२।
"प्रथमं पठिताः वेदा मया विस्तारिताश्च ते।
हिंसामयास्ते पठिताः कर्म्ममार्गप्रवर्त्तकाः॥"
प्रयोजकः। यथा, भागवते।८।१७।४।
"धन्वन्तरिर्दीर्घतमस आयुर्वेदप्रवर्त्तकः।
यज्ञभुग् वासुदेवांशः स्मृतिमाद्यार्त्तिनाशनः॥")

प्रवर्त्तनं, क्ली, (प्र+वृत्+णिच्+ल्युट्।) प्रवृत्तिः। यथा,—
"तेऽन्ये वान्तं समश्नन्ति परोत्सर्गञ्च भुञ्जते।
इतरार्थग्रहे येषां कवीनां स्यात् प्रवर्त्तनम्॥"
इति काव्यप्रकाशः॥

आरम्भः। यथा,—
"मृते तु स्वामिनि पुनस्तद्वंश्ये वापि मानवे।
राजानमाप्नुयात् ततः कुर्य्यात् सेतुप्रवर्त्तनम्॥"
इति मिताक्षरा॥

प्रवर्त्तना, स्त्री, (प्र+वृत्+णिच्+युच्।)प्रवृत्तिप्रेरणम्। यथा, नैषधे।२।५१।
"अथवा भवतः प्रवर्त्तना
न कथं पिष्टमियं पिनष्टि न।
स्वत एव सतां परार्थता
ग्रहणानां हि यथा यथार्थता॥"

प्रवर्त्तितः, त्रि, (प्र+वृत्+णिच्+क्तः।)जातः। यथा, रघुवंशे।५।३७।
"रूपं तदोजस्वि तदेव वीर्य्यं
तथैव नैसर्गिकमुन्नतत्वम्।
न कारणात् स्खात् विभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात्॥"

प्रवर्हनं, क्ली, प्रपूर्व्वबर्हधातोर्भावे अनट् (ल्युट्।) विवर्द्धनम्। कर्त्तरि(ल्यु)अनप्रत्यये,वृद्धिकारके, त्रि॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"रक्तमांसं समधुरं कषायानुरसं स्मृतम्।
वातपित्तोपशमनं गुरु शुक्रप्रवर्हनम्॥")

प्रवर्हः, त्रि, (प्रवर्हति प्रवर्द्धते इति। प्र+बृह+अच्।) प्रधानम्। श्रेष्ठः। इत्यमरः।३।१।५७।

प्रवलाकी, पुं भुजङ्गः। चित्रमेखलकः। इति विश्वः॥

प्रवहः, पुं, (प्र+वह+भावे+अच्।) गृहनगरादेर्बहिर्गमनम्। इत्यमरः।३।१।१८॥ (प्रवहतीति। प्र+वह्+अच्।) वायुः। इति हेमचन्द्रः॥ समवायुन्तर्गतद्वितीयवायुः। स तु आवहवायोरूर्द्धस्थितः। इति सिद्धान्तशिरोमणिः॥
"यस्माज्ज्योतींषि वहति प्रवहस्तेन स स्मृतः।"
इति विष्णुपुराणे २ अंशे १२ अध्यायः॥
अस्य टीका। "यस्माज्ज्योतोंषि प्रकर्षेण वहति तेन स वायुः प्रवहः स्मृतः प्रवहस्यैव भेदाः सर्व्वे वायुस्कन्धाः॥" (मेघविशेषः। यथा स्कान्दे सह्याद्रिखण्डे।५।६।
"आवहः प्रवहश्चैव उद्वहोऽथ मघांस्तथा।
परीवहः पञ्चमश्च विनेयश्च परावहः॥")

प्रवहणं, क्ली, (प्रोह्यते अनेनेति। प्र+वह्+करणे ल्युट्।) कार्षीरथः। स्रोतवहनार्थ-

मुपरि वस्त्राच्छादितमनुष्यवाह्ययानविशेषः। इत्यमरभरतौ। २। ८। ५२॥ (यथा, मृच्छकटिकनाटके चतुर्थेऽङ्के। "प्रविश्य सप्रवहणश्रेष्ठ इति॥")

प्रवह्लिः, स्त्री, (प्रवह्लते आच्छादयतीति। प्र+वह्ल्+इन्।) प्रवह्लिका। इत्यमरटीकायां भरतः॥

प्रवह्लिका, स्त्री, (प्र+वह्ल्+खुल्। टाप् अत इत्वम्।) प्रहेलिका। इत्यमरः। १। ६। ६।

प्रवह्वी, स्त्री, (प्रवह्लि+पचे ङीप्।)प्रवह्लिका। इति भरतः॥

प्रवाक्, [च्] त्रि, (प्रकृष्टा वाग् यस्य।) वाचो युक्तिपटुः यथा,—

"वाचो युक्तिपटुर्वाग्मी वचोज्ञः प्रवचाः प्रवाक्॥"

इति जटाधरः॥

(स्त्री, प्रकृष्टा वागिति प्रादि समासः।)प्रकृष्टवाक्यञ्च॥

प्रवाचकः, त्रि, (प्रकृष्टं वक्तीति। प्र+वच्+खुल्।) प्रकृष्टवक्ता। प्रपूर्ब्बवचधातोः कर्त्तरि णकप्रत्ययः॥

प्रवाणिः, स्त्री, (प्रकर्षेण ऊयतेऽनयेति। प्र+वे+करणे ल्युट्। ङीप्। निपातनात् ङीपोऽकारस्य ह्रस्वः।) तन्त्रशलाका। इति निष्पुवाणिशब्दटीकायां भरतः॥ माकु इति भाषा॥

प्रवाणी, स्त्री, (प्र+वे+ल्युट्+ङीप्।) तन्त्रशलाका। इति निष्पुवाणिशब्दटीकायां भरतः॥ माकु इति भाषा॥

प्रवादः, पुं,(प्रकृष्टो वादः। प्र+वद्+घञ् वा।) परस्परवाक्यम्। यथा, भट्टिः। २। ३६।

"इत्थं प्रवादं युधि संप्रहारं
प्रचक्रतू रामनिशाविहारौ।
हृणाय मत्वा रघुनन्दनोऽथ
बाणेन रंचः प्रधनान्निरास्यत्॥"

जनरवः। यथा,—

"प्रेयांस्तेऽहं त्वमपि च मम प्रेयसीति प्रवादस्त्वं मे प्राणा अहमपि तवाऽस्मीति हन्त प्रलापः, त्व मे तेऽस्मामहमपि च यत्तच्च नो साधु राधे! व्याहारे नौ नहि समुचितो युष्मदस्मत्प्रयोगः॥"

इत्यलङ्कारकौस्तुभः॥

प्रवारः, पुं, (प्रवृणोत्यनेनेति। प्र+वृ+करणे घञ्।) प्रवरः। वस्त्रम्। प्रपूर्ब्ववृधातोर्घञ्। इति संक्षिप्तसारव्याकरणम्॥

प्रवारणं, क्लो, (प्र+वृ+णिच्+ल्युट्।) काम्यदानम्। इत्यमरः। ३।२।३॥ काम्यस्य कमनीयस्य वस्तुनो वरस्त्रीरत्नादिनो दानम्। काम्येन कामनया वा दानं प्रवारणमुच्यते। काम्यशब्दोऽत्र तन्त्रेणोभयार्थः। प्रकर्षेण वार्य्यते संगृह्यते प्रवारणं तच्च महादानम्। प्रवारणं महादानमिति त्रिकाण्डशेषः। इति तट्टीकायां भरतः॥ (प्रकर्षेण वारणमिति।) निषेधः। इति मेदिनी। ने, १०१॥

प्रवासः, पुं, (प्रवसन्त्यस्मिन्निति। प्र+वस्+"इलच्।" ३। ३। १२१। इति घञ्।) विदेशः। विदेशस्थितिः। यथा,—

"कर्णेजपेराहितराज्यलोभा
स्त्रैणेन नीता निकृतिं लघिम्ना।
रामप्रवासे व्यसृषन्नदोषं
जनापवादं सनरेन्द्रमृत्यम्॥"

इति भट्टिः। ३। ७॥ * ॥

द्वादशवर्षाश्रुतवार्त्ताकप्रोषितस्य तत्प्रवासादिने श्राद्धं कर्त्तव्यम्। यथा,—

"प्रवासवासरे ज्ञेयं तन्नाम्नेन्दुक्षयेऽथवा॥"

इति मिताक्षरा। ३। ७॥ * ॥

प्रवासागतेन गुर्वाद्यभिवादनं कर्त्तव्यम्। यथा,

"विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन्॥
मातृष्वसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा।
प्रपूज्या गुरुपत्नीव समास्ता गुरुभार्य्यया॥
भ्रातृभार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि।
विप्रोष्य भूप! संग्राह्या ज्ञातिसम्बन्धियोषितः॥
पितुर्भगिन्यां मातुश्च ज्यायस्याञ्च स्वसर्य्यपि।
मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी॥"

इति कौर्म्मे उपविभागे १३ अध्यायः॥

प्रवासनं,क्लो, (प्र+वास च्छेदे+ल्युट्।) वधः। इत्यमरः॥ (प्र+वस्+णिच्+ल्युट्।) प्रवासना। यथा, उत्तररामचरित्रे।

"सीताप्रवासनपटोः करुणा कुतस्ते॥"

प्रवासी, त्रि,(प्रवसितुं शीलमस्येति।प्र+वस्+"ग्रे लपसु द्रुमथवदवसः।" ३।२।१४५। इति घिनुण्।) प्रवासविशिष्टः। प्रोषितः। विदेशस्थः। यथा,—

"अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकदेशिकौ
प्रवासी तद्वणो हारिः पाथेयं सम्बलं समे॥"

इति हेमचन्द्रः। ३। १६७॥

(यथा, मार्कण्डेये। १८। ५१।

लक्ष्मीर्लक्ष्मीवतां श्रेष्ठा कण्ठस्था कण्ठभूषणम्।
अभीष्टबन्धुदारैश्च तथाश्लेषं प्रवासिभिः॥")

प्रवाहः, पुं, (प्र+वह्+भावे घञ्।) प्रवृत्तिः। (यथा, भागवते। ७। ६। ८।

"सत्त्वं कृतानगतयो वचसां प्रवाहैः॥"

जलस्रोतः। इति मेदिनी। हे, २१॥ (यथा, रघौ। ५। ४६।

"पूर्व्वं तदुत्पीडितवारिराशिः
सरित्प्रवाहस्खटमुत्ससर्प॥")

व्यवहारः। इति विश्वः॥ प्रकृष्टाश्वः। इति नानार्थरत्नमाला॥ (पुरीषादेर्निर्गमः। यथा, सुश्रुते उत्तरतन्त्रे। ४० अध्याये।

"प्रवाहेण गुदभ्रंशे सूचाघाते कटिग्रहे।
मधुराम्लघृतं तैलं सर्पिर्वात्यनुवासनम्॥")

प्रवाहकः, पुं, (प्रवहतीति। प्र+वह्+खुल्। राक्षसः। इति शब्दमाला॥ प्रकृष्टवहनकर्त्तरि, त्रि॥

प्रवाहिका, स्त्री, (प्रवहति मुहुर्मुहुः प्रवर्त्तते इति। प्र+वह्+खुल्। टाप् अत इत्वम्।) ग्रहणीरुक्। इत्यमरः। २। ६। ५५॥ (यथा, सुश्रुते सूत्रस्थाने। ३१ अध्याये।

"प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम्।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः॥"

अस्या निदानं ग्रहणीशब्दे द्रष्टव्यम्। अस्याः स्वरूपमाह चरकः।

"अग्न्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता।
अपक्वं धारयेत् तत्र पक्वं त्यजति वाप्यधः॥"

सुश्रुतोऽपि।

"षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता
आमपक्वाशयान्तःस्था ग्रहणी साभिधीयते॥
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः।
तस्मादग्नौ प्रदुष्टे तु ग्रहण्यपि विदुष्यति॥
तस्मात् कार्य्यः परीहारो ज्ञातिसारे विरिक्तवत्॥" * ॥

अतीसारे द्रवधातुप्रवृत्तिः ग्रहण्यान्तु बहुस्रावि मलस्य प्रवृत्तिरिति तयोर्भेदः॥ * ॥ ग्रहणीरोगस्य भेदं संग्रहग्रहणीरोगमाह।

"द्रवं घनं सितं स्निग्धं सकटीवेदनं शकृत्।
आमं बहु सपैच्छिल्यं सशब्दं मन्दवेदनम्॥
पक्वाम्नासाद्दशाहाद्वा नित्यत्वापि विमुञ्चति।
अन्नकूजतमालस्यं दौर्ब्बल्यं सदनं भवेत्॥
दिवा प्रकोपी भवति रात्रौ शान्तिञ्च गच्छति
दुर्ब्बिज्ञेया दुर्निवारा चिरकालानुबन्धिनी॥
सा भवेदामवातेन संग्रहग्रहणी मता॥"

अथ घटीयन्त्राख्यं ग्रहणीरोगमाह।

"प्रसुप्तिः पार्श्वयोः शूलं तथा जलघटीध्वनिः।
तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणीगदम्॥"

अथ ग्रहणीरोगस्यारिष्टमाह।

"यैर्लक्षणैः सिध्यति नातिसारस्तैः स्यान्न साध्यो ग्रहणीगदोऽपि।
हृद्दस्य जायेत यदा गदोऽयं
देहं तदा तस्य विनाशमृच्छेत्॥"*॥

अथ सामान्यग्रहणीरोगस्य चिकित्सामाह।

ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत्।
लङ्घनैर्दीपनीयैश्च मन्दातीसारभेषजैः॥
दोषं सामं निरामञ्च विद्यादतिसारवत्।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत्॥
पेयादि पटु लघ्वन्नं पञ्चकोलादिभिर्युतम्।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक्॥
कपित्थविल्वचाङ्गेरीतक्रदाड़िमसाधिता।
यवागूः पाचयत्यामं शकृत् संवर्त्तयत्यपि॥"

संवर्त्तयति घनीकरोति॥

अथ खड़्यूषः।

"मुद्गयूषं रसं तक्रं धान्याजोरकसंयुतम्।
सैन्धवेनान्वितं दद्यात् खड़्यूषमिति कीर्त्तितम्॥"

रसं लघुग्राहिकमांसभवम्॥ * ॥

"कर्षं गन्धकमर्द्धपारदसमे कुर्य्याच्छुभां कज्जलीं
त्राच्चं त्रूपलस्य पञ्चलवणं सार्द्धञ्च कर्षं पृथक्।

भृष्टं हिङ्गु च जीरकद्वययुतं सर्व्वार्द्धभागान्वितं
खादेद्वह्नितं प्रवृत्तिगदवांस्तक्रस्य विल्वेन च॥
लघुनायिकाचूर्णमित्यर्थः॥ इति लघुलाईचूर्णम्॥
त्रिकटु त्रिफला चैव विड्भङ्गं जीरकद्वयम्।
भल्लातकं यवानी च हिङ्गुलवणपञ्चकम्॥
गृहधूमो वचा कुष्ठं रसो गन्धकमभ्रकम्॥
क्षारत्रयाजमोदे च चित्रकं गजपिप्पली॥
मुस्ता मोचरसं पाठा लवङ्गं जातिपत्रकम्।
समभागकृतश्चैषां चूर्णं श्लक्ष्णं विनिर्म्मितम्॥
शक्राशनस्य चर्णन्तु चूर्णतुल्यं प्रदापयेत्।
मन्दाग्निकासदुर्नामग्रहपाण्डुरुचिज्वरान्॥
विष्टम्भं संग्रहं शूलं हन्यान्नानातिसारजित्
आमवातापहं बल्यं सूतिकादोषनाशनम्॥
वर्ज्यं तेषामपथ्यञ्च स्नानं पिशितभोजनम्।
पथ्यं काञ्जिकमत्रापि दधितक्रमथापि वा॥
बृहल्लाईचूर्णमिदं लाईभाषितमुत्तमम्॥"
इति बृहल्लाईचूर्णम्। बृहन्नायिकाचूर्णमिति
प्रसिद्धम्॥ * ॥
"जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः॥
तालीशपिप्पलीपथ्यास्थूलजीरकचित्रकैः।
शुण्ठीविड्भङ्गमरिचैः समभागविचूर्णितैः॥
यावन्त्येतानि सर्व्वाणि दद्याद्भृङ्गाञ्च तावतीन्।
सर्व्वचूर्णसमानांश्च प्रदेया शुभ्रशर्करा॥
कर्षमात्रमिदं खादेन्मधुना ज्ञापितं जनैः।
नाशयेद्ग्रहणीं कासं क्षयं श्वासमरोचकम्॥"
इति जातीफलादिचूर्णम्॥*॥
चित्रकं पिप्पलीमूलं क्षारौ लवणपञ्चकम्।
व्योषं हिङ्गुजमोदाञ्च चव्यञ्चैकत्र चूर्णयेत्॥
वटिका मातुलुङ्गस्य रसैर्वा दाड़िमस्य वा।
कृता विपाचयत्यामं प्रदीपयति चानलम्॥
क्षारौ सर्जिका यवक्षारश्च। लवणपञ्चकमिति।
"सैन्धवं रुचकञ्चैव विड्लं सामुद्रकं गड़म्॥"इति॥
व्योषं शुण्ठीपिप्पलीमरिचानि। अजमोदात्र
यवानिका। मातुलुङ्गबीजपूरकम्। इति चित्र-
कादिवटिका॥*॥
"श्रीफलशलाटुकल्को नागरचूर्णेन मिश्रितः
सगुड़ः।
ग्रहणीगदमत्युग्रं तक्रभुजाशोलितो जयति॥"
श्रीफलशलाटुः विल्वस्यामं फलम्। गुड़स्यात्र
भागद्वयम्। इति विल्वकल्कः॥ * ॥
"चतुष्पलं सुधाकाण्डं त्रिपलं लवणत्रयम्।
वार्त्ताकोः कुड़वञ्चार्कमूलाद्विल्वे तथानलात्
दग्ध्वा द्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम्॥
भुक्ता भुक्तं पचत्याशु नाशयेद्ग्रहणीगदम्॥
कासं श्वासं तथार्शांसि विसूचीञ्च हृदामयम्॥"
इति वार्त्ताकुगुटिका॥*॥
"मुस्तकातिविषाविल्वकौटजं सूक्ष्मचूर्णितम्।
मधुना च समालोढ़ं ग्रहणीं सर्व्वजां त्यजेत्॥"
कौटजं इन्द्रयवः। मुस्तकादिचूर्णम्॥*॥
"श्वेतो वा यदि वा रक्तः सुपक्को ग्रहणीगदः।
गुड़ेनाधिकसर्जेन भक्षितेनाशु नश्यति॥"
सर्जः सालः। सर्जरसचूर्णम्॥ * ॥
"विल्वाब्दग्रक्रयवबालकमोचसिद्ध-
माजं पयः पिबति यो दिवसत्रयेण।
सोऽतिप्रवृद्धचिरजग्रहणीविकारं
सामं सशोणितमसाध्यमपि क्षिणोति॥"
मोचो मोचरसः। क्षिणोति हन्ति॥*॥
"प्रस्थत्रये त्वामलकीरसस्य
गुडस्य दत्त्वार्द्धतुलां गुड़स्य।
चूर्णीकृतैर्ग्रन्थिकजीरचव्य-
व्योषैभृष्णाहवुषाजमोदैः॥
विड्भङ्गसिन्धुत्रिफलायवानी-
पाठाग्निधान्यैश्च पलप्रमाणैः।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेदयथावत्॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम्।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः॥
शाम्यन्ति चायं चिरमन्तरग्ने-
र्ईतस्य पुंस्त्वस्य च वृद्धिहेतुः।
क्षीणान्तु वन्ह्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रसिद्धः॥
तैले मनाक् चित्रकभृष्टा त्रिसुगन्धि पलं पलम्
सिद्धे निधेयमत्रैव गुड़े कल्याणपूर्व्वके॥"
इति कल्याणकगुड़ः॥*॥
"पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली।
धान्यकञ्च विड्भङ्गानि यवानी-मरिचानि च॥
त्रिफला चाजमोदा च नलिनी जीरकस्तथा।
सैन्धवं रौमकञ्चापि सामुद्रं रुचकं विड्म्॥
आरग्वधस्य त्वक्पत्रं सूक्ष्मैला चोपकुञ्चिका।
शुण्ठीशक्रयवार्द्धैव प्रत्येकं कर्षसम्मिताः॥
गृहीकायाः पलान्यत्र चत्वारि कथिता निहि।
त्रिवृतायाः पलान्यष्टौ गुड़स्यार्द्धतुला तथा॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु।
प्रस्थत्रयमिदं सर्व्वं शनैर्म्मृद्वग्निना पचेत्॥
औड़म्बरं चामलकं बादरं वा यथा फलम्।
तावन्मात्रमिदं खादेद्वयेद्वा यथानलम्॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम्
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंक्षयम्॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं
स्मरम्।
पिचुपाठान्वयाद्दन्ति रक्तपित्तञ्च विड्ग्रहम्॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः
तेभ्यो हितश्च बन्ध्यायै महाकल्याणको गुड़ः॥"
इति महाकल्याणकगुड़ः॥*॥
कुष्माण्डानां सुपक्वानां स्विन्नानां निष्कुलत्वचाम्
सर्पिःप्रस्थे पलशतं ताम्रपात्रे शनैः पचेत्॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली।
धान्यकानि विड्भङ्गानि नागरं मरिचानि च॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम्॥
एकैकस्य पलञ्चैकं त्रिवृतोऽष्टौ पलानि च।
तैलस्य च पलान्यष्टौ गुड़ात् पञ्चाशदेव तु॥
आमलक्या रसस्याद्य प्रस्थत्रयमुदीरितम्।
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक्
यावद्घ्वीप्रलेपः स्यात्तथैनमवतारयेत्।
औड़म्बरस्यामलकं बादरं वा यथा फलम्
तावन्मात्रमिदं खादेद्वयेद्वा यथानलम्।
अनेनैव विधानेन प्रयुक्तञ्च दिने दिने॥
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान्।
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः॥
कामलां पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम्।
वातशोणितवीसर्पदद्रूयक्ष्महलीमकान्॥
वातपित्तकफान् सर्व्वान् दुष्टान् गुह्यान् समा-
चरेत्।
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये
नराः॥
तेभ्यो हितो गुड़ोऽयं स्याद्वन्ध्यानामपि पुत्रदः
श्रेष्ठो बल्यो बृंहणश्च वयसः स्थापनः परः॥"
इति कुष्माण्डकल्याणकगुड़ः॥*॥
अतोसाराधिकारलिखितं विल्वतैलञ्चात्र हि-
तम्। इति भावप्रकाशे ग्रहणीरोगाधिकारः॥
(चिकित्सान्तरमस्या यथा,—
"बालं विल्वं गुड़ं तैलं पिप्पली विश्वभेषजम्।
लिह्याद्दाते प्रतिहते सशूले सप्रवाहिके॥
पयसा पिप्पलीकल्कः पीतो वा मरिचोद्भवः।
व्याहात् प्रवाहिकां हन्ति चिरकालानुबन्धि-
नीम्॥
कल्कः स्याद्बालविल्वानां तिलकल्कश्च तत्समः।
दग्धः सराम्लः स्नेहाढ्यः खड़ो हन्यात् प्रवाहि-
काम्॥"
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे॥
प्रवाही, स्त्री, (प्रोच्यते इति। प्र+वह्+
घञ्। गौरादित्वात् ङीष्) वालुका। इति
राजनिर्घण्टः॥
प्रविख्यातिः, स्त्री, (प्र+वि+ख्या+क्तिन्।)
अतिप्रसिद्धिः। तत्पर्य्यायः विश्रावः २। इत्य-
मरः। ३। २।२८॥
प्रविदारणं, क्ली, (प्रविदारयत्यत्रेति। प्र+वि+
दृ+णिच्+आधारे ल्युट्।) युद्धम्। इत्यमरः।
२।८।१०३॥ (प्र+वि+दृ+णिच्+भावे
ल्युट्।)अवदारणम्। इति मेदिनी। णे,११३॥
आकीर्णम्। इति शब्दरत्नावली॥ (प्र+वि+
दृ+णिच्+कर्त्तरि ल्युः। प्रविदारके, त्रि॥)
प्रवरः, पुं, पीतकाष्ठम् इति। शब्दचन्द्रिका॥
प्रविश्लेषः, पुं, (प्रकृष्टो विश्लेषो यस्य।) प्रकृष्ट-
विश्लेषः। तत्पर्य्यायः। विधुरम् २। इत्यमरः।
३। २। १०॥ यथा,—
"वैक्लव्येऽपि प्रविश्लेषे विधुरं विकले त्रिषु॥"
इति भरतधृतत्रिकाण्डशेषः॥
प्रविषा, स्त्री, (प्रहतं विषमनया।) अतिविषा।
इति क्वचिदमरे। २। ४। ९९॥ (अतिविषा-
शब्देऽस्य विवरणं ज्ञातव्यम्॥)
प्रविष्टः, त्रि, (प्र+विश्+कर्त्तरि क्तः।) प्रवेश-
विशिष्टः। यथा,—

"स तं प्रविष्टं वृतमाततायिभि-
र्भटैरनेकैरवलोक्य माधवः ॥"
इति श्रीभागवते दशमस्कन्धे ६२ अध्यायः ॥

प्रवीणः, त्रि, (प्रकृष्टा संसाधिता वीणास्य । यद्वा प्रवीणयति वीणया प्रगायतीति । प्र + वीण + णिच् + अच् । वीणया गायकस्य नैपुण्यप्रसिद्धेस्तत्तुल्यनैपुण्यात् तथात्वम् ।) प्रकृष्टं वेत्ति यः तत्पर्य्यायः । निपुणः २ अभिज्ञः ३ विज्ञः ४ निष्णातः ५ शिक्षितः ६ वैज्ञानिकः ७ कृतमुखः ८ कृती ९ कुशलः १० । इत्यमरः । ३ । १ । ४ ॥ (यथा कुमारे । १ । ४८ ।

"विश्वावसुप्राग्रहरैः प्रवीणैः
सङ्गीयमानत्रिपुरावदानः ।
अध्वानमध्वान्तविकारलङ्घ-
स्तारं तारापिधखण्डधारी ॥")

प्रवीरः, पुं, (प्रकृष्टो वीरः ।) सुभटः । (यथा, कथासरित्सागरे । २५ । १४५ ।

"इति तस्या वचः श्रुत्वा सप्रवीरोऽप्युवाच तान् ॥"

भौत्यस्य मनोः पुत्रभेदः । यथा, हरिवंशे ७।८८

"अभिमानी प्रवीरश्च जिष्णुः संक्रन्दनस्तथा ॥"

अत्र क्वचित् प्रवीणोऽपि पाठः ॥ पुरुवंशीयश्च प्रचिन्वतः पुत्रः । यथा, तत्रैव । ३१ । ५ ।

„प्रचिन्वतः प्रवीरोऽभून्मनस्युस्तस्य चात्मजः ॥'

धर्म्मनेत्रस्य उपदानवीगर्भजातः पुत्रभेदः । यथा, तत्रैव । ३२ । ७—८ ।

"तंसोः सुरोधो राजर्षिर्धर्म्मनेत्रः प्रतापवान् ।
ब्रह्मवादी पराक्रान्तस्तस्य भार्य्योपदानवी ॥
उपदानवी सुतान् लेभे चतुरस्तान् सुयोधतः ।
दुष्मन्तमथ सुष्मन्तं प्रवीरमनघं तथा ॥"

चण्डालपुरुषविशेषः । यथा, मार्कण्डेये । ८८६

"चण्डालोऽहमिहाख्यातः प्रवीरेति पुरोत्तमे ।
विख्यातो वध्यवधको मृतकम्बलधारकः ॥")

उत्तमे, त्रि । इति धरणिः ॥ (यथा, देवीभागवते । २ । ५ । २० ।

"कुरुप्रवीरं कुरु मां पतिं त्वं
हत्वा न गच्छेस्तनु यौवनं ते ॥")

प्रवृत्तः, त्रि, (प्रवर्त्तते स्मेति । प्र + वृत् + क्तः ।) प्रवृत्तिविशिष्टः । यथा,—

"प्रवृत्त एव स्वयमुज्झितश्रमः
क्रमेण पेष्टं भुवनद्वयामसि ।
तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः ॥"
इति शिशुपालवधे । १ । ४० ॥

आरब्धः । यथा,—

"प्रवृत्तमन्यथा कुर्य्यात् यदि मोहात् कथञ्चन
यतस्तदन्यथा भूतं तत एव समापयेत् ॥"
इति छन्दोगपरिशिष्टम् ॥

प्रकृष्टवर्त्तनविशिष्टश्च ॥ (यथा रामायणे । ७। ८० । १ ।

"अथ रात्र्यां प्रवृत्तायां शयानो रघुनन्दनम् ।
पप्रच्छ श्रवणं विद्धि लक्ष्मणस्य यथा वनम् ॥

प्रवृत्तिः, स्त्री,(प्रवर्त्तते इति । प्र + वृत् + क्तिन् । प्रवादः । उदन्तः । (यथा, मेघदूते । ४ ।

"प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ॥"

प्रवर्त्तनमिति । प्र + वृत् + क्तिन् ।) प्रवर्त्तनम् । (यथा, महाभारते । १२ । ३० । १६ ।

"वह्वर्थे हि ततस्तस्य हृदि कामो महात्मनः ।
यथा शुक्लस्य पक्षस्य प्रवृत्तो चन्द्रमाः शनैः ॥"

प्रवर्त्तते व्याप्नोति प्रसिद्धत्वेनेति । प्र + वृत् + क्तिच् । यत्नादिव्यापारः । यथा, महाभारते । १ । १ । २५५ ।

"असच्च सदसच्चैव यस्माद्विश्वं प्रवर्त्तते ।
सन्ततिश्च प्रवृत्तिश्च जन्ममृत्युपुनर्भवाः ॥"

"सन्ततिर्न्यासादिः । प्रवृत्तिर्यत्नादिः ॥"इति तट्टीकायां नीलकण्ठः ॥") अवन्त्यादिदेशः । इति मेदिनी । ते, १३० ॥ हस्तिमदः । इति हेमचन्द्रः ।४। २८० ॥ न्यायमते यत्नविशेषः । अस्याः कारणम् । चिकीर्षा । कृतिसाध्यताज्ञानम् । इष्टसाधनताज्ञानम् । उपादानप्रत्यक्षम् । यथा,—

"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ।
एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिदर्शितम् ॥
चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा ।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥"
इति भाषापरिच्छेदः ॥

(यथा, पञ्चदश्याम् । ६ १७३ ।

"देहादि पञ्चरं यन्त्रं तदारोहोऽभिमानिता ।
विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥"

प्रयत्नसहितादन्तःकरणात् प्रवृत्तिर्जायते । यदुक्तं कामन्दकीये नीतिसारे । १।३३—३५ ।

"आत्मा मनश्च तद्विद्यैरन्तःकरणमुच्यते ।
आभ्यान्तु सप्रयत्नाभ्यां सङ्कल्प उपजायते ॥
आत्मा बुद्धीन्द्रियाण्यर्थो वह्निष्करणमुच्यते ।
सङ्कल्पाध्यवसायाभ्यां सिद्धिरस्य प्रकीर्त्तिता ॥
उभे एते हि करणे यत्नानन्तर्य्यके स्मृते ।
तस्मात् प्रवृत्तिसंरोधाद्भावयेन्निर्मनस्कताम् ॥"

"आत्ममनोबुद्धिकर्म्मेन्द्रियाणां लक्षणमभिधाय बुद्धेरन्तःपरिकल्पनया कारणविभागमभिधातुमाह । आत्मा मनश्चेति । अभिहितेन लक्षणेनेति प्रतिपाद्यते यया विद्यया साऽन्वयविद्या सा विद्यते येषां ते तद्विद्याः कणादाक्षपादादयः तैः तद्विद्यैः आत्मा मनश्च अन्तःकरणमुच्यते । आभ्यां आत्ममनोभ्यां प्रयत्नसहिताभ्यां सङ्कल्पः प्रवृत्तिः इन्द्रियप्रवर्त्तनं उपजायते । वह्निःकरणमभिधातुमाह । आत्मा बुद्धीति । आत्मा उक्तलक्षणः । बुद्धिः मनः । इन्द्रियाणि बाह्यरूपाणि । अर्थाः शब्दादयः । कर्म्मेन्द्रियाणां हि उत्सर्गादिका अर्थाः प्रयोजनानि । एतत् सर्व्वं वह्निःकरणम् । सङ्कल्पः सम्यग्भूतार्थकल्पनं अध्यवसायः प्रयत्नविशेषः ताभ्यां अस्य आत्मनः सुखानुभवलक्षणा सिद्धिः प्रकीर्त्तिता । तदेवं अन्तःकरणप्रवृत्तिः प्रयत्नादेव बहिःकरणप्रवृत्तिरपि अध्यवसायलक्षणात् प्रयत्नादेवेति दर्शितं भवति एतदेव समर्थयन्नाह । उभे एते हीति । उभे एते अनन्तरोक्ते हि स्फुटं करणे अन्तर्वहिःकरणसंज्ञके यत्नानन्तर्य्यके प्रयत्नानन्तरं वर्त्तेते प्रयत्नप्रेरणादित्यर्थः । तस्मादिति । यस्मादेवं तस्मात् प्रवृत्तिसंरोधात् उभयात्मकस्य प्रयत्नस्यैव संरोधं कृत्वा निर्म्मनस्कतां भावयेत् निर्म्मनस्कभावं अभ्यस्येत् यावत् प्रयत्न एव निरुद्धो भवति तावदात्मा मनसा न युज्यते ततश्च विद्यमानमपि मनो नास्त्येव मनःकार्य्याकरणात् । अन्तःकरणविश्लेषात् प्रवृत्तिर्नोपपद्यते । एवमन्तःकरणप्रवृत्त्यभावात् वहिःकरणप्रवृत्तेरप्यभावः । तदभावात् इन्द्रियाणां विषयैः सम्बन्ध एव न स्यात् इति भावः।"इति तट्टीका)

प्रवृत्तिज्ञः, पुं,(प्रवृत्तिं वृत्तान्तं जानातीति । ज्ञा + कः ।) चारभेदः । तत्पर्य्यायः । वार्त्तिकः २ वार्त्तायनः ३ । इति त्रिकाण्डशेषः ॥

प्रवृद्धः, त्रि, (प्रवर्द्धते स्मेति । प्र + वृध् + क्तः ।) वृद्धियुक्तः । तत्पर्य्यायः । प्रौढः २ एधितः ३ । प्रसारितः । तत्पर्य्यायः । प्रसृतः २ इत्यमरः । ३ । १ । ७६ ॥ (यथा, देवीभागवते ।३।८।२९ ।

"सत्त्वं समुत्कटं जातं प्रवृद्धं शास्त्रदर्शनात् ।
वैराग्यं तत्फलं जातं तामसार्थेषु नारद ! ॥")

प्रवेकः, त्रि, (प्रविच्यते पृथक् क्रियते इति । प्र + विच् + कर्म्मणि घञ् ।) उत्तमः । प्रधानम् । इत्यमरः । ३ । १ । ५७ ॥ (यथा, भागवते । २ । ९ । ११ ।

"श्यामावदाताः शतपत्रलोचनाः
पिशङ्गवस्त्राः सुचयः सुपेशसः ।
सर्व्वे चतुर्बाहव उन्मिषन्मणि-
प्रवेकनिष्काभरणाः सुवर्चसः ॥")

प्रवेटः, पुं, (प्रवीयते खाद्यते इति । प्र + वी + बाहुलकात् टः ।)यवः । इति त्रिकाण्डशेषः ॥

प्रवेणि,स्त्री,(प्रकर्षेण वीयते इति । प्र + वी गतौ + "वीज्याज्वरिभ्यो निः" उणा० ४।४८ । इति निः । णत्वम् । यद्वा, प्रवेणति सौन्दर्य्यं प्राप्नोतीति । प्र + वेण गतौ + इन् । (कुथः वेणी । इति मेदनी । णे, ६३ ॥)

प्रवेणी,स्त्री,(प्रकर्षेण वीयते इति । प्र + वी गतौ + "वीज्याज्वरिभ्यो निः ।" उणा० ४।४८ । इति निः । णत्वम् । ऋदिकारादिति पाक्षिको ङीप् । वेणी । (यथा, रघौ । १५ । ३० ।

"तत्र सौधगतः पश्यन् यमुना चक्रवाकिणीम् ।
हैमभक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये ॥")

गजपृष्ठस्थचित्रकम्बलम् । इत्यमरः ।२।६।८८॥ (यथा, महाभारते । १५ । २७ । १३ ।

"अजितानि प्रवेणीश्च सुकृ सुवश्च महीपतिः ।
कमण्डलूंश्च स्थालीश्च पिठराणि च भारत ! ॥

नदीविशेषः । यथा, महाभारते ।३।८८।११।

"प्रवेण्युत्तरमार्गे तु पुण्ये कण्वाश्रमे तथा ।
तापसानामरण्यानि कौर्त्तितानि यथाश्रुति ॥"

प्रवेलः, पुं, (प्र+वेल्+अच्।) पीतमुद्गः। इति हेमचन्द्रः। ४। २३८॥
प्रवेशः, पुं, (प्र+विश्+"हलश्च।" ३। ३। १२१। इति भावे घञ्।) अन्तर्विगाहनम्। इति हेमचन्द्रः। ६। १०६॥ (यथा, कामन्दकीये नीतिसारे। ७। ३८।
"निर्गमे च प्रवेशे च राजमार्गं समन्ततः।
प्रोत्सारितजनं गच्छेत् सम्यगाविष्कृतो-
व्रतिः॥")
प्रवेशनं, क्ली, (प्रविश्यतेऽनेनेति। प्र+विश्+करणे ल्युट्।) सिंहद्वारम्। इति हेमचन्द्रः। ४। ५६॥ (प्र+विश्+भावे ल्युट्।) प्रवेशः। यथा हरिवंशे। १७४। ११२।
"तव योगप्रभावेन शक्यं तत्र प्रवेशनम्।
किं मे बहुविलापेन श्रूयतां सखि। कारणम्॥"
प्रवेष्टः, पुं, (प्रवेष्टते इति। वेष्ट् वेष्टने+अच्।) बाहुः। इत्यमरः। २। ६। ८०॥ बाहुनीचभागः। इति शब्दचन्द्रिका॥ हस्तिदन्तमांसम् इति हारावली। ३०॥ गजपृष्ठतल्पनम्। इति त्रिकाण्डशेषः॥
प्रव्यक्तं, त्रि, प्रव्यज्यते स्मेति। प्र+वि+अन्ज्+क्तः।) स्फुटम्। इत्यमरः। ३। १। ८१॥ (यथा सुश्रुते निदानस्थाने द्वितीयाध्याये।
"जातिष्वेतानि रूपाणि प्रव्यक्ततराणि भवन्ति")
प्रव्रजजितः, पु, (प्र+व्रज्+क्तः।) बुद्धभिक्षुशिष्यः। तत्पर्य्यायः। चेलुकः २ श्रामणेरः ३ महापाशकः ४ गोमी ५ इति त्रिकाण्डशेषः॥ त्रि, प्रव्रज्याश्रमविशिष्टः॥ (यथा पराशरसंहितायाम्। ४। २६।
नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥"
प्र+व्रज्+भावे क्तः। क्ली सन्यासः। यथा, महाभारते। ५। १७६। ५।
"अलं प्रव्रजितेनेह भद्रे! शृणु हितं वचः।
इतो गच्छस्व भद्रन्ते पितुरेव निवेशनम्॥")
प्रव्रजिता, स्त्री, (प्रव्रजितस्य लिङ्गमिव जटादिकमस्त्यस्या इति। अच्। टाप्।) मांसी। मुण्डीरी। (प्रव्रजित+टाप्।) तापसी। इति मेदिनी। ते, २१०॥
प्रव्रज्या, स्त्री, (प्र+व्रज+"व्रजयजोर्भावे क्यप्।" ५। ३। ६८। इति भावे क्यप्प्रत्ययः।) सन्यासः॥ (यथा, महाभारते। ३। १७७। ७।
"वाणवेगं हि कस्तस्य शक्तः सोढुं महात्मनः।
प्रव्रज्यायां हि मे हेतुः स एव पुरुषर्षभः॥"
यथा च कुमारे। ६। ६।
"मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः।
रत्नाच्छसूत्राः प्रव्रज्यां कण्ठसक्ता इवाश्रिताः॥"
"अत्र चतुर्थाश्रमवाचिना प्रव्रज्याशब्देन वानप्रस्थाश्रमो लक्ष्यते 'जटुः परिग्रहद्रोडां प्राजापत्यास्तपस्विनः' इति सपत्नीकत्वाभिधानात् 'सुतविन्यस्तपत्नीकः तया वानुगतोऽपि सन्, इति वानप्रस्थस्योभयथा स्मरणात्॥" इति तत्र मल्लिनाथः॥ इत्थाप्रव्रज्याश्रितानां निन्दनीयत्वमुक्तम्। यथा, मनौ। ५। ८६।
"इत्थाकृरजातानां प्रव्रज्यासु च तिष्ठताम्।
आत्मनस्त्यागिनाञ्चैव निवर्त्तेतोदकक्रिया॥"
क्ली, प्रव्रजनम्। यथा, महाभारते। ४। १७। ११।
"कोऽहि राज्यं परित्यज्य सर्व्वस्वं चात्मनासह।
प्रव्रज्यायैव दौष्यन्ति विना दुर्य्यूतदेविनम्॥")
प्रव्रज्यावसितः, पुं, (प्रव्रज्याया अवसितो विच्युतः सन्यासभ्रष्टः। यथा,—
"तवाहमित्युपगतः प्रव्रज्यावसितः कृतः॥"
इति दायभागवचनव्याख्यायां क्रमसंग्रहः॥ (यथा, कात्यायनवचनम्।
"प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजोत्तमाः।
निर्व्वासं कारयेद्विप्रं दासत्वं क्षत्रवैश्ययोः॥")
प्रशंसा, स्त्री, (प्र+शंस्+भावे अः। स्त्रियां टाप्।) प्रशंसनम्। तत्पर्य्यायः। वर्णना २ ईड़ा ३ स्तवः ४ स्तोत्रम् ५ स्तुतिः ६ नुतिः ७ श्लाघा ८ अर्थवादः ९। इति हेमचन्द्रः। २। १८४॥ (यथा, मनुः। १०। २२७।
धर्म्मेणैवस्तु धर्म्मज्ञाः सतां वृत्तिमनुष्ठिताः।
मन्वर्व्वर्णं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च॥")
आत्मप्रशंसानिषेधो यथा;—
"न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्जयेत्।
वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्जयेत्॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥
प्रशमः, पुं, (प्रशमनमिति। प्र+शम्+भावे घञ्।) शमता। उपशमः यथा,—
"एतानि दशपापानि प्रशमं यान्तु जाह्नवि!"
इति तिथ्यादितत्त्वम्॥
(यथा च हरिवंशे। ८८। ८१।
"स तेन वारिणा वह्निस्तत्क्षणात्प्रशमं ययौ॥"
प्रशमनं, क्ली, (प्र+शम्+णिच्+ल्युट्।) मारणम्। वधः इति हेमचन्द्रः॥ (प्र+शम्+ल्युट्।) शमता। प्रशान्तिः। यथा,—
"सर्व्वापाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि!।
एवमेव त्वया कार्य्यमस्माकं रिविनाशनम्॥"
इति मार्कण्डेयपुराणम्। ८१। ३५।
(प्रतिपादनम्। दानम्। इति कुल्लूकभट्टः॥ यथा, मनुः। ७। ५६।
"तैः सार्द्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम्।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च॥"
स्थिरीकरणम्। प्रशमनेन स्थिरीकरणेन। यथा रघुः। ४। १४।
"लब्धप्रशमनस्थस्यमथैनं समुपस्थिता।
पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा॥")
इति मल्लिनाथः॥
प्रशस्तं, त्रि, (प्रशस्यते स्मेति। प्र+शंस्+क्तः।) क्षेमम्। इति शब्दरत्नावली॥ प्रशंसनीयम्। अतिश्रेष्ठम्। इति मल्लिकादिग्रन्थटीकायां भरतः॥ (यथा, रघुः। ५। २५।
"इक्ष्वं प्रशस्ते महिते मदीये
वंशे चतुर्थोऽग्निरिवाग्न्यगारे॥")
प्रशस्यः, त्रि, प्रशंसनीयः। प्रपूर्व्वशंसधातोः कर्म्मणि क्यप्प्रत्ययेन निष्पन्नः॥ (यथा, कामन्दकीयनीतिसारे। ११। ५५।
अपघात् तापकृत्सम्यगनुरक्तिफलप्रदः।
अदीर्घकालोऽभीष्टस्य प्रशस्यो मन्त्र इष्यते॥")
प्रशान्, [म्] त्रि, प्रकर्षेण शाम्यति यः। (प्र+शम्+क्विप्। "अनुनासिकस्य क्विझलोः क्ङिति।" ६। ४। १५। इति दीर्घः।) शान्तः। इति मुग्धबोधव्याकरणम्॥ (सामर्थ्यं नान्तोऽव्ययोऽयम्॥)
प्रशान्तः, त्रि, (प्रकर्षेण शान्तः।) प्रकृष्टशमताविशिष्टः। यथा,—
"प्रशान्तस्वापदाकीर्णं मुनिशिष्योपशोभितम्॥"
इति मार्कण्डेयपुराणे। ८१। ८।
प्रशास्ता, [ऋ] त्रि, (प्रशास्तीति। प्र+शास्+तृच्। "असितस्कभितेति।" ७। २। ३४। इति निपातनादिड्भावः। यद्वा, "तन्तृची शंसिच्छदादिभ्यः संज्ञायाञ्चानिटौ। उणा० २। ८४। इति तृण् इट् च न।) ऋत्विक्। मित्रम्। इति संक्षिप्तसारोणादिवृत्तिः॥ शासनकर्त्ता॥ (यथा, कामन्दकीयनीतिसारे। १३। ४५।
"प्रशास्त्रध्वसेनानां मन्त्रमात्यपुरोधसाम्।
सम्यक्प्रचारविज्ञानं दुष्टानाञ्चावबोधनम्॥"
प्रश्नः, पुं, (प्रच्छनमिति। प्रच्छ+"यजयाचयतेति।" ३। ३। ९०। इति नङ्। "क्ष्नोः शूड़िति।" ६। ४। १८। इति शः। "प्रश्ने चेति" ३। २। ११७। इति ज्ञापकात् न सम्प्रसारणम्।) जिज्ञासा। तत्पर्य्यायः। अनुयोगः २ पृच्छा ३। इत्यमरः। १। ६। १०॥ (यथा, मनुः। १। ११५।
"साक्षिप्रश्नविधानञ्च धर्मं स्त्रीपुंसयोरपि॥"
"पृच्छा तन्त्राद्यथान्यायं विधिना प्रश्न उच्यते॥"
इति चरके सूत्रस्थाने त्रिंशोऽध्याये॥)
प्रश्नदूती, स्त्री, प्रश्नस्य दूतीव।) प्रहेलिका। इति त्रिकाण्डशेषः॥
प्रश्नी, स्त्री, (पृश्निः पृषोदरादित्वात् रः। वा ङीप्।) कुश्निका। इति त्रिकाण्डशेषः॥
प्रश्रयः, पुं, (प्रश्रयणमिति। प्र+श्रि+भावे अच्।) प्रणयः। इत्यमरः। ३। २। २५॥ (यथा कामन्दकीयनीतिसारे। ८। ८।
'अदीर्घसूत्रताचौद्रं प्रश्रयः स्वप्रधानता।
प्रकृतिस्फोटता चेति विजिगीषुगुणाः स्मृताः॥')
प्रश्रितः, त्रि, (प्र+श्रि+क्तः।) विनीतः। इत्यमरः। ३। १। २५॥ (यथा, रामायणे। १। १३। २।
"अब्रवीत् प्रश्रितं वाक्यं प्रसवार्थे द्विजोत्तमम्॥)
प्रश्लथः, त्रि, (प्रकृष्टः श्लथः।) शिथिलः। इति त्रिकाण्डशेषः॥
प्रष्टा, [ऋ] त्रि, (पृच्छतीति। प्रच्छ+तृच्। "ग्रथेति।" ८। २। ३६। इति षः।) प्रश्नकर्त्ता। तत्पर्य्यायः। कथंकथिकः २। इति

त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये । ७५ । २८ ।
"विवेश वह्निशालां वै प्रष्टारं प्राह हव्यभुक्॥")
प्रष्ठः, त्रि, (प्रतिष्ठते अग्रतो गच्छतीति । प्र + स्था + "सुपि स्थः ।" ३ । २ । ४ । इति कः । "प्रष्ठोऽग्रगामिनि ।" ८ । ३ । ८२ । इति षत्वम् ।) अग्रगामी । इत्यमरः । २ । ८ । ७२ ॥ (यथा, रघुः । १५ । १० ।
"आदिष्टवर्त्मा मुनिभिः स गच्छंस्तपतां वरः ।
विरराज रथप्रष्ठैर्बालखिल्यैरिवांशुमान् ॥")
प्रष्ठवाट्, [ह्] पुं, प्रष्ठः अग्रगामी सन् वहतीति । प्रष्ठ + वह् + "वहश्च ।" ३ । २ । ६४ । इति खिः ।) युगपार्श्वगः । इत्यमरः । २ । ८ । ६३ ॥ अग्रिचार्थं युगवाहिपार्श्वयोर्जितः । इति भरतः ॥ योजितं युगपार्श्वं दमनार्थं यं हालिका भ्रामयन्ति सः । इति मधुः ॥ युवा गौर्दमनाय योजितः । इत्यन्ये ॥
प्रष्ठौही, स्त्री, (प्रष्ठवाह + "वाहः ।" ४ । १ । ६१ । इति ङीष् ।) बालगर्भिणी । प्रथमगर्भवती गौः । प्रष्ठं प्रथमगर्भं वहति या सा । बाला सती गर्भिणी प्रथमगर्भेत्यर्थः । इति भरतः ॥ (यथा, महाभारते । १३ । ८३ । ३३ ।
प्रष्ठौहीनां पीवराणाञ्च तावद्
अग्र्या गृष्टयो धेनवः सुव्रताश्च ॥")
प्रस, म प ङ प्रसवे । ततौ । इति कविकल्पद्रुमः (भ्वा०-आत्म०-सक०-सेट् । रेफयुक्ताद्यः । म, प्रसयते । ष, प्रसा । ङ, प्रसते कीर्त्तिं विद्याम् । प्रसते विस्तारयति वेत्यर्थः । इति दुर्गादासः ॥
प्रसक्तं, क्ली, (प्र + सन्ज + क्त ।) नित्यम् । इति जटाधरः ॥ (यथा माधवकृतरुग्विनिश्चयस्य कासाधिकारे ।
"प्रसक्तवेगस्तु समीरणेन
भिनत्ति स्वरः कासति शुष्कमेव ॥"
"प्रसक्तवेगः सततकासवेगः ।" इति तट्टीकायां विजयरक्षितः ।) तद्धति, त्रि ॥ (आसक्तः । यथा, गीतायाम् । १६ । १६ ।
"अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥")
प्रसक्तिः, स्त्री, (प्र + सन्ज + भावे क्तिन् ।) प्रसङ्गः (यथा, किराते । ५ । ५० ।
"मा भूवन्नपथहरास्तवेन्द्रियश्वाः
सन्तापे टिघतु शिवः शिवां प्रसक्तिम् ॥")
अनुमितिः । आपत्तिः । इति सव्यभिचारशिरोमणिः ॥
प्रसङ्गः, पुं, (प्र + सन्ज + घञ् । सङ्गतिविशेषः । यथा,—
"स प्रसङ्ग उपोद्घातो हेतुतावसरस्तथा ।
निर्वाहकैककार्य्यत्वे पीठं सङ्गतिरिष्यते ॥"
तस्य लक्षणम् । स्मृतस्योपेक्षानर्हत्वम् । तदर्थस्तु स्मृतिविषयतापन्नत्वे सति ईप्सितविषयतानापन्नत्वम् । इत्यनुमितिग्रन्थे गदाधरभट्टाचार्यः ॥* ॥ "प्रकरणान्तरेण समापनं प्रसङ्गः । यथा प्रकारान्तरितो योऽर्थोऽसकृदुक्तः समाप्यते स प्रसङ्गः । यथा । महाभूतशरीरिसमवायः पुरुषस्तस्मिन् सोऽधिष्ठानमिति वेदोत्पत्तावभिधाय भूतविद्यायां पुनरुक्तं यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुष इति स खल्वेवं कर्म्म पुरुषचिकित्सायामधिकृतः ॥" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥") अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः । यथा,—
"दृष्टा तु हरते पापं स्पृष्टा तु त्रिदिवं नयेत् ।
प्रसङ्गेनापि या गङ्गा मोक्षदा श्रूयते सदा ॥"
इति प्रायश्चित्ततत्त्वम् ॥*॥
(यथा च देवीभागवते । ३ । ८ । ४२ ।
"अस्पष्टमपि तन्नाम प्रसङ्गेनापि भाषितम् ।
ददाति वाञ्छितानर्थान् दुर्ज्ञानमपि सर्वथा॥")
प्रसक्तिः । यथा,—
"आनीता भवता यदा पतिरता साध्वी धरित्रीसुता
स्फुर्जद्राक्षसमायया न च कथं रामाङ्गमङ्गीकृतम् ।
कर्त्तुं चेतसि पुण्डरीकनयनं दूर्वादलश्यामलं
तुच्छं ब्रह्मपदं भवेत् परवधूसङ्गप्रसङ्गः कुतः ॥"
इति नाटकम् ॥*॥
प्रस्तावः । यथा,—
तत्रैव गङ्गा यमुना च तत्र
गोदावरी तत्र सरस्वती च ।
सर्व्वाणि तीर्थानि वसन्ति तत्र
यत्राच्युतोदारकथाप्रसङ्गः ॥"
इति पौराणिकाः ॥*॥
मैथुनम् । यथा । प्रसङ्गनित्यद्रुतपृष्ठयानादिति रुग्विनिश्चयवचनटीकायां विजयरक्षितः ॥ (यथा च देवीभागवते । १ । १२ । २० ।
"ऋषयोऽपि तयोर्वीक्ष्य प्रसङ्गं रममाणयोः ।
परित्यज्य ययुस्तूर्णं नरनारायणाश्रमम् ॥")
प्रसज्यप्रतिषेधः, पुं, (प्रसज्य प्रवृत्तिं सम्पाद्य प्रतिषेधो निषेधः ।) निषेधविशेषः । तल्लक्षणं यथा,
"अप्रधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥"
अस्योदाहरणम् । भोजराजः ।
"पौषे चैत्रे क्षणपत्ते नवाब्दं नाचरेद्बुधः ।
भवेज्जन्मान्तरे रोगी पितृघ्नो नोपतिष्ठते ॥"
अत्र रोगीतिनिन्दाश्रवणात् प्रसज्यता । नोपतिष्ठते इति श्रवणात् पर्य्युदासता । इति मलमासतत्त्वम् ॥
प्रसत्तिः, स्त्री, (प्र + सद् + क्तिन् ।) प्रसन्नता । नैर्म्मल्यम् । इति जटाधरः ॥
प्रसत्वरी, स्त्री, (प्रसत्वन् + "वनो र च ।" ४ । १ । ७ । इति ङीप्रौ ।) प्रतिपत्तिः । इति संक्षिप्तसारोणादिवृत्तिः ॥
प्रसत्वा, [न्] पुं, (प्रसीदतीति । प्र + सद् + क्वनिप् ।) धर्म्मः । प्रजापतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥
प्रसन्नः, त्रि, (प्रसीदतीति । प्र + सद् + गत्यर्थेति क्तः ।) निर्म्मलः । तत्पर्य्यायः । अच्छः २ । इत्यमरः । १ । १० । १४ ॥ (यथा, महाभारते । ४ । २७ । २४ ।
"रसाः स्पर्शाश्च गन्धाश्च शब्दाश्चापि गुणान्विताः ।
दृश्यानि च प्रसन्नानि यत्र राजा युधिष्ठिरः ॥")
सन्तुष्टः । इति मेदिनी ने, ८६ ॥ (यथा, रघुः । ५ । १० ।
अपि प्रसन्नेन महर्षिणा त्वं
सम्यग्विनीयानुमतो गृहाय ॥")
प्रसन्नता, स्त्री, (प्रसन्न + तल् ।) प्रसन्नस्य भावः । तत्पर्य्यायः । प्रसादः २ । इत्यमरः । १ । ३ । १६ ॥ (यथा, हठयोगप्रदीपिकायाम् । २ । ७८ ।
"वपुः कृशत्वं वदने प्रसन्नता
नादस्फुटत्वं नयने सुनिर्म्मले ॥"
प्रसन्ना, स्त्री, (प्रसन्न + टाप् ।) सुरा । इत्यमरः । २ । १० । ४० ॥ मद्यविशेषः । तस्य गुणाः । "प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी । शूलप्रवाहिकाटोपकफवातार्शसां हिता ॥"
इति राजवल्लभः ॥
प्रसादविशिष्टा । यथा, मार्कण्डेये । ८१ । ४३ ।
"सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥"
प्रसन्नेरा, स्त्री, (प्रसन्ना निर्म्मला इरा जलमिव । मदिरा । इत्यमरटीकायां भरतः । २ । १० । ४० ॥)
प्रसभः, पुं, (प्रगता सभा सभाधिकारो यस्मात् । बलात्कारः । इत्यमरः । २ । ८ । १०८ ॥ (यथा, श्रीकण्ठचरिते । ५ । ४२ ।
"यस्मिन् विनिर्म्मितवति प्रसभं प्रकोपादत्युग्रनिग्रहनवानुभवोपदेशम् ॥")
प्रसरः, पुं, (प्र + सृ + भावादौ यथायथं अप् ।) तन्तुव्रणविटपादेर्विसर्पणम् । प्रकर्षेण निकटे सरणं सर्पणम् । तत्पर्य्यायः । विसर्पः २ । इत्यमरभरतौ । ३ । २ । २३ ॥ (यथा, रघुः । १६ । २० ।
"तिरस्क्रियन्ते क्रमितन्तुजालै-
र्विच्छिन्नधूमप्रसरा गवाक्षाः ॥"
प्रणयः । वेगः । इति मेदिनी । रे, १८२ ॥ (यथा, कलाविलासे । १ । २१ ।
"इति विनयनम्रशिरसा तेन वचो युक्तमुक्तमवधार्य्य ।
तमुवाच मूलदेवः प्रीतिप्रसरैः प्रसारितोत्साहः ॥")
समूहः । इति शब्दरत्नावली ॥) यथा, आर्य्यासप्तशत्याम् । ५८८ ।
"स्तननूतननखलेखालम्बी तव घर्म्मबिन्दुसन्दोहः ।
आभाति पट्टसूत्रे प्रविशन्निव मौक्तिकप्रसरः॥"
प्रकृष्टसञ्चरणम् । यथा,—
अत ऊर्द्धं प्रसरं वक्ष्यामः । तेषामेभिरातङ्कविशेषैः प्रकुपितानां पर्य्युषितकिण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो भवति तेषां वायुर्गतिमत्त्वात् प्रसरणहेतुः सत्यप्यचैतन्ये सति

रजोभूयिष्टो रजश्च प्रवर्त्तकं सर्व्वभावानाम् । यथा महानुदकसञ्चयोऽतिह्रदः सेतुमवदार्य्य-परिणोदकेन व्यामिश्रः सर्व्वतः प्रधावत्येवं दोषाः कदाचिदेकशो दिशः समस्ताः शोणितसहिता वानेकधा प्रसरन्ति ।" इति सुश्रुते सूत्रस्थाने २१ अध्यायः ॥) युद्धम् । इति विश्वः । नाराचः । इति भूरिप्रयोगः ॥

प्रसरणं, क्ली, (प्र+सृ+भावे ल्युट् ।) सैन्यानां सर्व्वतो व्याप्तिः । तत्पर्य्यायः । आसारः २ । इत्यमरः । २ । ८ । ९६ ॥ प्रसरणी ३ प्रसरणिः ४ प्रसारणी ५ । इति रामाश्रमः ॥ सैन्यानां तृणकाष्ठादिहेतवे इतस्ततो गमनम् इति हेमचन्द्रः । ३ । ४५५ ॥ (गमनमात्रम् । यथा, मृच्छकटिके । ३ अङ्के ।

"मार्জ্জারः क्रमणे मृगः प्रसरणे श्येनो ग्रहाङ्गुह्यने
सुप्तासुप्तमनुष्यवीर्य्यतुलने ज्ञा सर्पणे पन्नगः॥"

अभ्युत्थानादिकम् । यथा, भागवते । ५ । १ । २८ ।

"वर्हिष्यत्यासनादिनमेधमानप्रमोदप्रसरव्रीडाप्रसुमितहासावलोकरुचिरस्नेह्यादिभिरिति ॥")

प्रसरणी, स्त्री, (प्र+सृ+"अर्त्तिसृधृभ्यनिः ।" इति अनिः । ङीदादिकादिति वा ङीप् ।) प्रसरणम् । इत्यमरटीकायां भरतः । २ । ८ । ९६ ।

प्रसर्पणं, क्ली, (प्र+सृप्+ल्युट् ।) गमनम् । प्रसरणम् । प्रपूर्ब्बसृपधातोर्भावेऽनट्प्रत्ययः ॥ (यथा महाभारते । ३ । १२८ । ६ ।

"प्रसर्पणं महीपाल! रोध्यायामभितोजसः ।"

गतिसाधने, त्रि । यथा, ऋग्वेदे । १० । ६० । ७

"इदं तव प्रसर्पणं सुबन्धवेहि निरिहि ॥"

वर्त्तमानेदं तव शरीरं तव प्रसर्पणं प्रकर्षेण सर्पणसाधनम् ॥" इति तद्भाष्ये सायणः ॥)

प्रसवः, पुं, (प्र+सू+"ऋदोरप् ।)" ३ । ३ । ५७ । इत्यप् ।) गर्भमोचनम् । तत्पर्य्यायः । प्रसूतिः २ इत्यमरः । ३ । २ । १० ॥ यथा, रघुः । ३ । १२ ।

"पतिः प्रतीतः प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभ्रितामिव ॥"

गर्भग्रहणम् यथा, मनुः । ९ । ७० ।

"यथाविधभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात् सकृत्सकृदृतावृतौ ॥")

उत्पादः । (जन्म । यथा, रघुः । १ । २२ ।

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥"

"सह प्रसवो जन्म येषां ते सप्रसवाः सोदरा इव ।" इति तट्टीकायां मल्लिनाथः ॥) अपत्यम् । (यथा, रघुः । ८ । ३० ।

"ऋषिदेवगणस्वधाभुजां
श्रुतयागप्रसवैः स पार्थिवः ।
अनृणत्वमुपेयिवान् बभौ
परिधेर्मुक्त इवोष्णदीधितिः ॥"

फलम् । कुसुमम् । इति मेदिनी । वे, ४२ ॥ (यथा, रघुः । ४ । २३ ॥

"प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
अस्पृशैव तदागाः सप्तैव प्रसुप्तवः ॥"

आज्ञा । यथा, वाजसनेयसंहितायाम् । १० । २१ ।

"मरुतां प्रसवेन जय ।" "हे धृष्य मरुतां देवानां प्रसवेनाज्ञया त्वं जय शत्रूनिति शेषः ॥" इति तद्भाष्ये महीधरः ॥) प्रसवस्य मासनियमो यथा,—

"नवमे दशमे मासि नारी गर्भं प्रसूयते ।
एकादशे द्वादशे वा ततोऽन्यत्र विकारतः ॥"

इति भावप्रकाशः ॥*॥

प्रसूतिकारक्षौषधादि यथा,—

"पौतन्तु काञ्चिकं रुद्र ! क्षयितं शरपुङ्खया ।
हिङ्गुसैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥
मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत् ।
अपामार्गस्य वै मूलं योनिस्थञ्च प्रसूतिकृत् ॥
अपामार्गस्य वै मूले गर्भवत्यास्तु नामतः ।
उत्पाट्यमाने सकले पुत्रः स्यादन्यथा सुता ॥
अपामार्गस्य वै मूले नारीणां शिरसि स्थिते ।
गर्भशूलं विनश्येत नात्र कार्य्या विचारणा ॥"

इति गारुडे १९६ अध्यायः ॥*॥

अपि च

"पाठालाङ्गलिसिंहास्यमयूरकजटैः पृथक् ।
नाभिवस्तिभगालेपात् सुखं नारी प्रसूयते ॥
पाठायास्तु शिफा योनौ या नारी संप्रधारयेत्
उषः प्रसवकाले तु सा सुखेन प्रसूयते ॥
तुषाम्बुपरिपिष्टेन मूलेन परिलेपयेत् ।
लाङ्गल्याश्चपि मूलं तु क्षिप्रमेतेन गर्भिणी ॥
मातुलुङ्गस्य मूलानि मधुकं मधुसंयुतम् ।
घृतेन सह पातव्यं सुखं नारी प्रसूयते ॥"

इति चक्रपाणिदत्तः ॥*॥

सुखप्रसवमन्त्रो यथा,—

"अस्ति गोदावरीतीरे जम्भला नाम राक्षसी ।
तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत्॥"

सुखप्रसवचक्रं यथा—

"पञ्चरेखाः समुल्लिख्य तिर्य्यगूर्द्धक्रमेण हि ।
पदानि षड्दशापाद्य त्वेकमाद्ये सुनौ त्रयम्॥
नवमे सप्त दद्यात्तु बाणं पञ्चदशे तथा ।
द्वितीयेऽष्टावष्टमे षट्दिशि द्वौ षोड़शे श्रुतिः॥
एकादिना समं श्लेयमिच्छाद्यार्द्धं त्रिकोणके।
तदा द्वात्रिंशदादिः स्याच्चतुष्कोष्ठेषु सर्वतः ॥
दर्शनाहरणात्तासां शुभं स्यादेषु कर्मसु ।
द्वात्रिंशत् प्रसवे नार्य्यास्तुल्यं शल्यमे नृणाम्॥
भूताविष्टेषु पञ्चाशन्मृतापत्यासु वै शतम् ।
द्वासप्ततिस्तु बन्ध्यायां चतुःषष्टी रणाध्वनि ॥
विषे विंशो धान्यकीटेष्वधाविंशतिरेव च ।
चतुरष्टौ च बालानां रोदने परिकीर्त्तिताः ॥"

इति ज्योतिस्तत्त्वम् ॥*॥

तस्य वैकृतं यथा,—

गर्ग उवाच ।

"अकालप्रसवा नार्य्यः कालातीतप्रजास्तथा ।
विकृतप्रसवार्थैव युग्मप्रसवनास्तथा ॥
अमानुषा अवक्त्राश्च न जातव्यञ्जनास्तथा ।
क्षीणाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः ॥
पशवः पक्षिणश्चैव तथैव च सरीसृपाः ।
विनाशं तस्य देशस्य कुलस्य च विनिर्दिशेत्॥
निर्व्वासयेत्तां नृपतिः स्वराष्ट्रात्
स्त्रियश्च पूज्याश्च ततो द्विजेन्द्राः ।
किमिच्छकैर्ब्राह्मणतर्पणञ्च
लोके ततः शान्तिमुपैति पापम् ॥"

इति मात्स्ये अद्भुतशान्तिस्त्रीप्रसवविकृतो नाम २०८ अध्यायः ॥*॥

प्रसवाङ्गुतत्वं यथा,—

"एको द्वयङ्गयो गावः सप्तास्या नवदन्तिनः ।
सिंहप्रसूतिकाश्चैव कथिताः स्वामिघातकाः ॥"

तिस्र इति वक्तव्ये छान्दसत्वात् त्रय इत्युक्तम्। सिंहप्रसूताय स्त्रियो बोध्याः ।

"भानौ सिंहगते चैव यस्य गौः संप्रसूयते ।
मरणं तस्य निर्द्दिष्टं षड्भिर्मासैर्न संशयः ॥*
अत्र शान्तिं प्रवक्ष्यामि येन सम्यग्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्व्वीत घृताक्तैः राजसर्षपैः ।
आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ॥"

व्याहृतिभिश्चायं होमः ।

"सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम्॥"

अपि च ।

"सिंहराशौ गते सूर्य्ये गोप्रसूतिर्यदा भवेत् ।
पौषे च महिषी सूते दिवैवाश्वतरी तथा ॥
तदानिष्टश्चवेल्लिखित् तच्छान्त्यै शान्तिकञ्चरेत्
अस्य वामेतिसूक्तेन तद्दिशोरितिमन्त्रतः ॥
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ।
मृत्युञ्जयविधानेन जुहुयाच्च तथायुतम् ।
श्रीसूक्तेन ततः स्नायात् शान्तिसूक्तेन वा पुनः॥"

इत्यद्भुतसागरे नारदः ॥

प्रसवकः, पुं, (प्रसवेन पुष्पादिना कायति शोभते इति । कै+कः ।) पियालवृक्षः । इति शब्दमाला ॥ (विहतिविशेषोऽस्य पियालशब्दे ज्ञातव्यः ॥)

प्रसवबन्धनं, क्ली, (प्रसवानां पुष्पफलानां बन्धनं यत्र ।) वृन्तम् । इत्यमरः । २ । ४ । १५ ॥

प्रसवस्त्री, स्त्री, (प्रसवस्य स्त्रीव ।) माता । यथा, मृच्छकटिके ।

"इयमियं मयदानवनन्दिनी
विदधनाथजितः प्रसवस्त्री ॥"

प्रसविता, [ऋ] पुं, (प्रसूते जनयतीति । प्र+सू+तृच् ।) पिता इति शब्दरत्नावली ॥ (अनुज्ञाकर्त्तरि, त्रि । यथा, ऋग्वेदे । ७ । ६ । २

उदेति प्रसविता जनानां महान् केतुरर्णवः सूर्य्यस्य ।"

"जनानां सर्वेषां प्रसविता सर्वेषु कर्म्मसु अनुज्ञाता ॥" इति तद्भाष्ये सायणः ॥)

प्रसवित्री, स्त्री, (प्रसूते इति । प्र+सू+तृच्+ङीप् ।) जनयित्री । (यथा, महाभारते । १२ । २६३ । ८ ॥

"सावित्री प्रसवित्री च बहिर्वाक् मनसीतत:॥
माता। प्रपूर्वकसूधातोः कर्त्तरि ढच् ईप् च॥
प्रसव्यं, त्रि, (प्रगतं सव्यादिति।) प्रतिकूलम्। इत्यमरः। ३। १। ८४॥ प्रदक्षिणम्। यथा, रामायणे। २। ७३। २०॥
"प्रसव्यमपि तच्चक्रुर्ऋत्विजोऽग्निचितं नृपम्"
प्र+सू+कर्म्मणि यत्। प्रसवनीये च॥)
प्रसह्य, पुं, (प्रसहत इति। प्र+सह्+अच्।) बलात्कारेण भक्षकपक्षी। स च कुरर-श्येनादिः। यथा,—
"प्रसह्य भक्ष्यन्ते प्रसहास्तेन कीर्त्तिताः॥"
अस्य मांसगुणाः।
"गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः।"
इति राजवल्लभः।
अपि च भावप्रकाशे।
"काको गृध्रं उलूकश्च चिल्लश्च श्येनघातकः।
चाषो भासश्च कुरर इत्याद्याः प्रसहाः स्मृताः॥"
श्येनघातकः बाज इति लोके।
"प्रसहाः कीर्त्तिता एते प्रसह्य हिंस्य भक्षणात्।
प्रसहाः खलु वीर्य्योष्णास्तन्मांसं भक्षयन्ति ये॥
ते शोषभस्मकोन्मादैः शुक्रक्षीणा भवन्ति हि॥"
प्रसहनः, पुं, (प्रगतं सहनं सह्यगुणो यस्मात्।) हिंस्रपशुः। यथा,—
शार्दूलसिंहशरभर्क्षतरक्षुमुख्या
येऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते।
ते कीर्त्तिताः प्रसहनाः पललं तदीय-
मर्घःप्रमेहजठरामयजाड्यहारि॥"
इति राजनिर्घण्टः॥
आलिङ्गने, क्ली। यथा,—
"परस्परप्रसहनसुखनातिकाः
शुचौ सुखे बहुलविधा भिदा मताः॥"
इति काव्यप्रकाशटीकाधृतकाव्यकौमुदी॥
(प्र+सह्+भावे ल्युट्।) सहने, क्ली। तद्वति, त्रि॥
प्रसह्या, स्त्री, (प्र+सह्+अच्। टाप्।) हुड़-तिका। इति रत्नमाला॥ (गुणादयोऽस्या हुड़तीशब्दे ज्ञातव्याः॥)
प्रसह्य, व्य, (प्रकर्षेण सोढ्वा इति। प्र+सह्+क्त्वाचो ल्यप्।) हठार्थकम्। बलात्कारार्थम्। इत्यमरः। ३। ४। १०॥ (यथा, माघे। १।२७
"प्रसह्य तेजोभिरसह्यतां गते-
रदस्वया नुन्नमनुत्तमं तमः॥"
प्रसोढुं शक्य इति। प्र+सह्+यत्। प्रकर्षेण सोढुं शक्ये त्रि। यथा, रघुः। १४। ६२।
"ममैव जन्मान्तरपातकानां
विपाकविस्फूर्ज्जथुरप्रसह्यः॥")
प्रसह्यचौरः, पुं, (प्रसह्य बलात्कारेण चौरः।) हठात् चौर्य्यकारी। डाकाइत इति तुटेरा इति च भाषा॥ तत्पर्य्यायः। वन्दीकारः २ माचलः ३ चिल्लाभः ४। इति त्रिकाण्डशेषः॥
प्रसातिका, स्त्री, (सो नाशे+भावे क्तिन्। प्रगता सातिर्नाशो यस्याः। कप्।) अणुत्रीहिः। सूक्ष्मधान्यम्। इति रत्नमाला॥ (यथा, मार्कण्डेये। ३२। ८॥
"श्यामाकराजश्यामाकौ तद्वदेव प्रसातिकाः।
नीवाराः पौष्कलाश्चैव धान्यानां पिण्डसंज्ञये॥"
प्रसादः, पुं, (प्र+सद्+घञ्।) प्रसन्नता। नैर्म्मल्यम्। इत्यमरः। १। ३। १६॥ (यथा,
"प्रबोधचन्द्रोदये प्रस्तावनायाम्॥
"कल्पान्तवातसंक्षोभलङ्घिताग्नेयभूभृतः।
स्थैर्य्यप्रसादमर्य्यादास्ता एव हि महोदधेः॥")
अनुग्रहः। (यथा, रघुः। २। ६८।
"तस्याः प्रसन्नेन्दुमुखः प्रसादं
गुरुर्नृपाणां गुरवे निवेद्य।
प्रहर्षचिह्नानुमितं प्रियायै
शशंस वाचा पुनरुक्तयेव॥")
काव्यप्राणः। स्वास्थ्यम्। प्रसन्निः। इति मेदिनी। दे, ३५॥ वैदर्भीरीतियुक्तकाव्यगुणः। तस्य लक्षणम्। शाब्दशब्दभिन्नव्यङ्ग्यार्थपदवत्त्वम्। यथा,—
"ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः।
गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः।
व्यङ्ग्यार्थपदसाक्ष्यं प्रसादः परिकीर्त्तितः॥"
इति काव्यचन्द्रिका॥ *॥
(तथा च साहित्यदर्पणे ८ परिच्छेदे।
"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः
स प्रसादः समस्तेषु रसेषु रचनासु च॥"
देवनिवेदितद्रव्यं गुरूणां भुक्तावशेषश्च। यथा,
"आसीद्दशग्रीवजो राजा प्रजापालनतत्परः।
प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः॥"
इति स्कान्दे रेवाखण्डे सत्यनारायणव्रतकथा
प्रसादनं, क्ली, (प्रसादयतीति। प्र+सद्+णिच्+ल्युः।) अभ्रम्। इति चिकाण्डशेषः॥ (प्र+सद्+णिच्+ल्युट्।) प्रसन्नताकारकम्। यथा, बलवर्द्धप्रसादनमिति राजवल्लभः॥ (यथा च महाभारते। ४। ६८। २२।
"प्रसादनं पाण्डवस्य प्राप्तकालं हि रोचये॥")
प्रसादना, स्त्री, (प्र+सद्+णिच्+युच्+टाप्) सेवा। परिचर्य्या। इति हेमचन्द्रः। ३। १६०॥
प्रसाधनं, क्ली, (प्रसाध्यतेऽनेनेति। प्र+साध्+ल्युट्।) वेशः। इत्यमरः। २। ६। ८८॥ (यथा, मनुः। २। २११।
"अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च।
दशसु स्वासु न कार्य्याणि केशानाञ्च प्रसाधनम्॥"
कङ्कतिका। इति भरतधृतामरमाला॥ प्रकृष्टनिष्पत्तिश्च॥ (प्र+साध्+णिच्+ल्युः। प्रसाधयितरि, त्रि। यथा, ऋग्वेदे। १०।५३।२।
"यो यज्ञस्य प्रसाधनस्तं तुर्देवेष्वातनः॥")
प्रसाधनी, स्त्री, (प्रसाध्यतेऽनयेति। प्र+साध्+ल्युट्। ङीप्।) सिद्धिः। इति मेदिनी। नि, १८५॥ कङ्कतिका। इत्यमरः। २। ६। १३८॥ (यथा, सुश्रुते चिकित्सितस्थाने। २४॥
"केशप्रसाधनी केश्या रजोजन्तुमलापहा॥")
तद्युक्तिर्यथा,—
"प्रसाधनी दिङ्नवनागसप्त-
सङ्ख्याभिरङ्गाङ्गुलिभिः क्रमेण।
चतुर्विधानां पृथिवीपतीनां
सम्पत्तिसौभाग्ययशःसमृद्धिदा॥
काष्ठजा धातुजा चैव शृङ्गजा च यथाक्रमम्॥
जाङ्गलानूपसामान्यदेशजानां महीभुजाम्॥
छत्रदण्डवदुद्देयः काष्ठजाया विनिश्चयः।
कनकं रजतं ताम्रं पित्तलं सीसकं तथा॥
लौहं सर्व्वञ्च सर्व्वार्हमादित्यादिदशाभुवाम्।
राज्ञामेवोपयुज्येत कालकौर्त्तिप्रसाधनी॥
मृगाणां महिषाणाञ्च सिंहजाता प्रसाधनी।
गजदन्तसमुद्भूता राज्ञामेवोपयुज्यते॥
अत्रापि रत्नविन्यासो न्यूनयामरदण्डवत्॥"
इति युक्तिकल्पतरुः।
प्रसाधिका, स्त्री, (प्रसाध्यति निष्पादयतीति। प्र+साध्+ण्वुल्। टापि अत इत्वम्।) नीवारः। यथा,—
"प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम्॥"
अस्या गुणाः।
"नीवारः शीतलो ग्राही पित्तघ्नः कफवातजित्॥"
इति भावप्रकाशः॥
(प्रसाधयति अलङ्करोतीति। प्र+साध्+णिच्+ण्वुल्।) वेशकारिणी। यथा,—
"प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचित् त्वरागमेव॥"
इति कुमारसम्भवे सप्तमः सर्गः॥
(धान्यविशेषः यथा। "अग्रबीजिः प्रसाधिका।" इति वैद्यकरत्नमालायाम्॥)
प्रसाधित, त्रि, (प्र+साधि+क्तः। अलङ्कृतः। इत्यमरः। २। ६। १००॥ प्रकृष्टनिष्पन्नः। निष्पादितः। यथा, सारसंग्रहे।
"ततः प्रस्थमितं कल्कं दत्त्वा तोयचतुर्गुणे।
क्षीरे प्रसाधितं तैलं ग्रहणी बलवर्द्धनम्॥"
प्रसारः, पुं, (प्र+सृ+घञ्।) प्रसरणम्। इति हेमचन्द्रः। ३। ४८८॥ (यथा, सुश्रुते। १।२६
प्रसाराकुञ्चनाभ्यां निःशस्त्रमिति निर्दिशेत्॥
प्रसारणं, क्ली, (प्र+सृ+णिच्+ल्युट्।) पञ्चविधकर्म्मान्तर्गतकर्म्मविशेषः। स तु विस्तार-रूपः। यथा, भावापरिच्छेदे।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनन्तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च॥"
(परिवर्त्तनम्। यथा, कामन्दकीयनीतिसारे। १३। ३५।
"मित्रामित्रद्विरेफाणां भूमीनाञ्च प्रसारणम्॥"
प्रसारणी, स्त्री, (प्रसार्य्यते इति। प्र+सारि+ल्युट्। ङीप्।) लताविशेषः। गन्धभादालिया इति भाषा॥ अस्य गुणाः। वातपित्तनाशित्वम्। उष्णत्वम्। बलशुक्रकारित्वञ्च। इति राजवल्लभः॥ सैन्यानां सर्व्वतो व्याप्तिः। इति प्रसरणशब्दटीकायां भरतः॥
प्रसारिणी, स्त्री, प्रसरतीति। प्र+सृ+णिनिः ङीप्। लज्जालुलता। प्रसारणी। गन्धभादा-

लिया इति भाषा ॥ तत्पर्य्यायः । सुप्रसरा २ सारिणी ३ प्रसरा ४ सरा ५ चारुपर्णी ६ राजबला ७ भद्रपर्णी ८ प्रतानिकाऽप्रबला १० राजपर्णी ११ चन्द्रपर्णी १२ भद्रबला १३ चन्द्रवल्ली १४ प्रभद्रा १५ । अस्या गुणाः । गुरुत्वम् । उष्णत्वम् । तिक्तत्वम् । वातार्शःक्षयशुमलविष्टम्भनाशित्वञ्च । इति राजनिर्घण्टः ॥

प्रसारी,[न]त्रि,(प्रसरतीति । प्र+सृ+णिनिः) प्रसरणशीलः । तत्पर्य्यायः । विसृत्वरः२ विसृमरः ३ विसारी ४ । इत्यमरः । ३ । १ । ३१ ॥ (यथा, शिशुपालवधे । १७ । ४४ ।

"प्रसारिणी सपदि नभस्तले ततः
समीरणभ्रमितपरागरूषिता ॥")

प्रसितं,क्ली, (प्र+सो+क्तः।) पूयम् । इति शब्दचन्द्रिका ॥ आसक्ते, त्रि । इत्यमरः । ३।१।८॥ (यथा, रघौ । ८ । २३ ।

"इति शब्दादिषु चेन्द्रियेषु च
प्रतिषिद्धपरेषु जाग्रती ।
प्रसितावुदयापरवर्गयो-
रुभयीं सिद्धिमुभाववापतुः ॥")

प्रसितिः, स्त्री, (प्रसिनोति बध्नात्यनयेति । प्र+सि+करणे क्तिन् ।) बन्धनसाधनरज्जुनिगड़ादिः । इत्यमरः । ३ । २ । १४ ॥ (ज्वाला । यथा, ऋग्वेदे । २ । २५ । ३ ।

"अग्नेरिव प्रसितिर्नाह वर्त्तवे ।"

"प्रसीयते बध्यतेऽनयेति । प्रसितिर्ज्वाला ।" इति तद्भाष्ये सायनः ॥*॥ भावे क्तिन् । प्रबन्धनम् । यथा, ऋग्वेदे । ६ । ६ । ५ ।

"शूरस्येव प्रसितिः क्षातिरग्नेः ॥")

प्रसिद्धः त्रि, (प्रसिध्यतीति । प्र+सिध्+गत्यर्थेति क्तः ।) भूषितः ख्यातः । इति मेदिनी । धे, ३४॥ (यथा, पद्मदशम्याम् । ४ । ५७ ।

"काम्यादिदोषदृष्टाद्याः कामादित्यागहेतवः ।
प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव॥")

प्रसिद्धिः, स्त्री, प्र+सिध्+क्तिन् ।) टङ्कारः । ख्यातिः । इति त्रिकाण्डशेषः (यथा, कामन्दकीयनीतिसारे । २ । ६ ।

"विद्याश्चतस्र एवैता इति नो गुरुदर्शनम् ।
पृथक् पृथक् प्रसिद्ध्यर्थं यासु लोको व्यवस्थितः ॥")

भूवा । इति प्रसिद्धशब्दार्थदर्शनात् ॥

प्रसूः, स्त्री, (प्रसूते इति । प्र+सू+"सतिसूदिषेति ।" ३।२।६१ । इति क्विप् ।) माता । इत्यमरः । २ । ६ । २८ ॥ (यथा, ब्रह्मवैवर्त्ते । २ । १ । १२८ ।

"पितॄणां मानसी कन्या मेनका साम्बिकाप्रसूः॥"

घोटकी । इत्यमरः । ३ । ३ ।२२८॥ कदली । वीरुत् । इति मेदिनी । से, ४॥ (प्रसवकर्त्री । यथा सुश्रुते उत्तरतन्त्रे ३८ अध्याये ।

"प्रशंसिनो स्रन्दते तु क्षोभिता दुःप्रसूव या ॥")

प्रसूका, स्त्री, (प्रसूरेव। प्रसू+स्वार्थे कन् ।) वाजिनी । इति राजनिर्घण्टः ॥

प्रसूतं, क्ली, (प्रसूयते इति । प्र+सू+क्तः ।) कुसुमम् । इति मेदिनी । ते, १२४ ॥

प्रसूतः, त्रि, (प्र+सू+क्तः ।) सञ्जातः । (यथा, रघुः । १ । १२ ।

"तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥")

सूतः । इति मेदिनी । ते, १२४ ॥

प्रसूता, स्त्री, (प्रसूते स्म इति । प्र+सू+कर्त्तरि क्तः ।) जातसन्ताना । तत्पर्य्यायः । जातापत्या २ प्रजाता ३ प्रसूतिका ४ । इत्यमरः । २ । ६ । १६ ॥ (यथा सुश्रुते चिकित्सितस्थाने । ३१ ।

"अकाले च प्रसूता स्त्री स्त्रेहपानं विवर्जयेत् ॥"

यथा च हरिवंशे । ८४ । १०१ ।

"श्रूयन्ते हि स्त्रियो ब्रह्मन् व्यभिचारव्यतिक्रमैः
प्रसूता दिव्यसङ्काशान् पुत्रानमितविक्रमान् ॥")

प्रसूतिः, स्त्री,(प्रसूयते इति। प्र+सू+क्तिन् ।) प्रसवः । इत्यमरः । ३ । २ । १० ॥ (यथा,—

"कृष्णा वचा चापि जलेन पिष्टा
सैरण्डतैला खलु नाभिलेपात् ।
सुखं प्रसूतिं कुरुतेऽङ्गनानां
निपीड़ितानां बहुभिः प्रमादैः ॥"

इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥ प्र+सू+भावे क्तिन्) उद्भवः । (यथा, शकुन्तलायाम् ४ अङ्के ।

"आद्येवः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्व्वैरनुज्ञायताम् ॥")

तनयः । दुहिता । इति मेदिनी । ते, १२८ ॥ (सन्ततिः । यथा, रघुः । ५ । ७ ।

"कक्षिष्मतीगौषामनघा प्रसूतिः ॥"

कारणम् । यथा, रघुः । २ । ६३ ।

" न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नाम् ॥"

उत्पत्तिस्थानम् । यथा, महाभारते । १ । २३३ । १४ ।

"त्वं सर्व्वस्य भुवनस्य प्रसूति-
स्त्वमेवाग्ने ! भवसि प्रतिष्ठा ॥"

दक्षपत्नी । सा तु सतीजननी । यथा, ब्रह्मवैवर्त्ते । २ । १ । १२८ ।

"देवहूतिः कर्दमस्य प्रसूतिदक्षकामिनी ॥")

प्रसूतिका, स्त्री, प्रसूतः सूतोऽस्या अस्तीति। ठन् ।) प्रसूता । इत्यमरः । २ । ६ । १६ ॥

प्रसूतिजं, क्ली, (प्रसूतेरुद्भवमारभ्येत्यर्थः जायते इति । जन्+डः ।) दुःखम् । इत्यमरः।१।८।३।

प्रसूनं,क्ली,(प्रसूयते स्मेति। प्र+सू+क्तः । ओदित्त्वात् निष्ठातस्य नः।) पुष्पम् । (यथा, रघुः । २ । १० ।

"अवाकिरन् बाललताः प्रसूनै-
राचारलाजैरिव पौरकन्याः ॥")

फलम् । इत्यमरः । ३ । ४ । १७॥ जाते, त्रि । इति मेदिनी, ने । ८७ ॥

प्रसूनेषुः,पुं,(प्रसूनं पुष्पं इषुर्बाणो यस्य । कामदेवः । इति त्रिकाण्डशेषः ॥

प्रसृतं, क्ली, (प्र+सृ+क्तः ।) पलद्वयम् । इति शब्दमाला ॥ (यथा,सुश्रुते चिकित्सितस्थाने ६

"क्षणतिलप्रसृतं प्रकुञ्च वा प्रातः प्रातरनुसेवेत शीतोदकानुपानम् ॥"

पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

प्रसृतः, पुं, (प्र+सृ+क्तः ।) निकुञ्चितपाणिः । अञ्जलिः । इत्यमरः । २ । ६ । ८५॥ (यथा, शतपथब्राह्मणे । ४ । ५ । १० । ७ ।

"यद्यतुलभेरन् प्रसृतमात्रं वाञ्जलिमात्रं वा ॥"

प्रसृतः, त्रि, (प्र+सृ+क्तः ।) प्रहृष्टः । प्रसारितः । इत्यमरः । ३ । १ । ८८ ॥ (यथा,देवीभागवते । १ । १४ । ५ ।

"न शशाक नियन्तुञ्च स व्यासः प्रसृतं मनः ॥")

विनीतः । वेगितः । इति मेदिनी । ते, १२३ ॥ गतः । इति त्रिकाण्डशेषः ॥ नियुक्तः । इति हलायुधः । २ । ३६० ॥

प्रसृता, स्त्री, (प्र+सृ+क्तः । टाप् ।) जङ्घा । इति मेदिनी । ते,१२३ ॥ (विवरणमस्या जङ्घाशब्दे ज्ञातव्यम् ॥)

प्रसृतिः, स्त्री, (प्र+सृ+क्तिन् ।) प्रसृतः । आकुञ्चितपाणिः । इति रायमुकुटः राजनिर्घण्टश्च ॥ (यथा, याज्ञवल्क्ये । २ । ११२ ।

"देवानुद्यान् समभ्यर्च्य तत्स्नानोदकमाहरेत् ।
संस्राव्य पाययेत्तस्माज्जलाल्ल प्रसृतित्रयम् ॥"

सन्ततिः । यथा, महाभारते । ५ । १०१ । ३ ।

"वर्द्धितानि प्रसृत्या वै विनताकुलकर्त्तृभिः ॥"

प्रसूत्या इति वा पाठः ॥ पलद्वयम् । तद्यथा,

"पलाभ्यां प्रसृतिर्ज्ञेया———॥"

इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

प्रसेकः, पुं, (प्रसेचनमिति । प्र+सिच्+घञ् ।) सेचनम् । क्षुतिः । इति मेदिनी । के, १११ ॥ (यथा, ऋतुसंहारे । ३ । ६ ।

"मत्तद्विरेफपरिपीतमधुप्रसेक-
क्लिन्नं विदारयति कस्य न कोविदारः ॥"

रोगविशेषः । यथा, सुश्रुते । १ । ४६ ।

"श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ।
हन्तिमूलकयूषस्तु कफमेदोगलामयान् ॥")

प्रसेदिका, स्त्री, क्षुद्रारामः । इति हेमचन्द्रः । ४ । १७८ ॥ प्रसेदिका इति क्वचित्पाठः ॥)

प्रसेदिवान्, [स्] त्रि, प्रसन्नः । प्रपूर्वसदधातोः कर्त्तरि क्वसुप्रत्ययनिष्पन्नः ॥

प्रसेवः, पुं,(प्रसौव्यते स्रवतीति । प्र+सिव+"अकर्त्तरि चेति ।" ३ । ३ । १९ । इति घञ् ।) वीणाङ्गम् । सूतः । इति मेदिनी । वे, ४३ ॥

प्रसेवकः, पुं, (प्र+सिव+ण्वुल् । यद्वा, प्रसेव एव । स्वार्थे कन् ।) वीणाप्रान्तवक्रकाष्ठम् । दण्डाधः शब्दगाम्भीर्य्यार्थं दारुमयं भाण्डं यच्चर्म्मणा आच्छाद्य दीयते सः । इत्यन्ये । वीणास्थितालाबूफलम् । इत्यपरे । इति भरतः ॥

तत्पर्य्यायः। ककुभः २। इत्यमरः। १।७।७॥ सूत्ररचितभाण्डम्। धोकड़ा इति ख्यातः। तत्पर्य्यायः। स्यूनः २ स्योनः ३ धौतकटः ४ स्यतिः ५ स्यूतः ६। इति भरतः॥ (यथा, सुश्रुते। १।८। "हृतिवस्तिप्रसेवकप्रभृतिषट्कषड्वूर्णेषु भेद्ययोग्याम्॥") प्रकृष्टतन्तुसन्तानकर्त्ता च॥

प्रस्कण्वः, पुं, (प्रगतं कण्वं पापं यस्मादिति। "प्रस्कण्वहरिश्चन्द्रावृषी।" ६।१।१५३। इति सुट्।) ऋषिविशेषः। स च वैदिकसन्त्यान्तर्गतसूर्य्योपस्थानमन्त्रस्य ऋषिः। (यथा, ऋग्वेदे। १।४४।६। "प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम्॥")

प्रस्कन्दनं, क्ली, (प्र+स्कन्द+ल्युट्।) विरेकः। इति रत्नमाला॥ (यथा, महाभारते। १। ८४।२६। "अग्निप्रस्कन्दनपरस्त्वञ्चाप्येवं भविष्यसि॥")

प्रस्कन्नः, त्रि, (प्रकर्षेण स्कन्नः।) पतिते, त्रि। इति हेमचन्द्रः॥

प्रस्तरः, पुं, प्रस्तृणाति आच्छादयति यः। (प्र+स्तृ+पचाद्यच्।) शिला। पाथर इति भाषा। तत्पर्य्यायः। ग्रावा २ पाषाणः ३ उपलः ४ आकः ५ दृगत् ६ दृषत् ७ पाषाणकः ८ पाषटोटः ९ मृग्मरः १० काचकः ११ शिला १२॥ पल्लवादिरचितशय्या। यथा,— "पल्लवाद्यैरचिते शयनीये तु संस्तरः। प्रस्तरः प्रस्तरश्चेति प्रस्तारोऽपि च कुत्रचित्॥" इति शब्दरत्नावली॥ (यथा, मनुः। २।२०४। "गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च। आसीत गुरुणा सार्द्धं शिलाफलकनौषु च॥") मणिः। इति मेदिनी। रे, १८१॥

प्रस्तरिणी, स्त्री, (प्रस्तरस्तदाकारोऽस्त्यस्या इति प्रस्तर+इनिः ङीप्।) गोलोमिका। इति राजनिर्घण्टः॥ (विपर्य्योऽस्या गोलोमिकाशब्दे ज्ञेयः॥)

प्रस्तारः, पुं, (प्र+स्तृ+घञ्।) तृणवनम्। तत्पर्य्यायः। तृणाटवी २ ऋषः ३। इति हेमचन्द्रः। ४।१७७॥ पल्लवादिविरचितशयनीयम्। इति शब्दरत्नावली॥ शय्या। इति हारावली॥ छन्दःप्रभृतीनां प्रभेदज्ञापकसङ्केतविशेषः। यथा,— "आदौ सर्व्वगुरावाद्यात् लघु न्यस्य गुरोरधः। यथापरि तथा शेषं भूयः कुर्य्यादमुं विधिम्॥ जनं दद्यादृगुरुनेव यावत् सर्व्वलघुर्भवेत्। प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः॥" इति वृत्तरत्नावली॥ * ॥ अपि च। अहपत्थार। पढ़म गुरु ईह ठाणे लहुआ परिठवउ अण्णहो ए। सरिसा सरिसा पन्तौ उव्वरिआ गुरुलह देहु॥ अस्य टीका। एतद्वृत्तानां प्रस्तारज्ञानाधीनमिति प्रस्तारं दर्शयति। प्रथमं गुरोरधःस्थाने लघुकं स्थापय आत्मबुद्ध्या सप्तसु सप्तसु पंक्तिरुद्दृत्तौ गुरुलघू देहि सप्तसु पंक्तिर्दक्षिणे कार्य्या वामे गुरुलघुभिः पूरणं कार्य्यं इदन्तु मात्राप्रस्तारविषयं तत्रापि गुरोर्लिखनयोग्यत्वे गुरुर्लेख्यः अपरत्र लघुर्देयः। वर्णप्रस्तारे तु गुरुणैव पूरणं कार्य्यं तत्रायं प्रकारः आदौ गुरुर्लेख्यः तत्र प्रथमं गुरोरधःस्थाने लघुर्लेख्यः तद्दक्षिणे चोपरिस्थितपंक्तेः सप्तसु कार्य्या वामे च गुरुलघुभिः पूरणं कार्य्यं वामे चैक एकलघुः पतति वर्णप्रस्तारे तु वामे लघुस्वर्गो नास्ति यथा त्रिकलप्रस्तारे। ६६। प्रथमगुरोरधो लघुर्वामतश्च कलार्द्धपूरणं गुरुणैव कार्य्यं दक्षिणे च पंक्त्यभावः ततो गुरोरधो लघुर्लेख्यः दक्षिणे च लघोरधो लघुर्लेख्यः वामे च कलापूरणं एकेन लघुना कार्य्यं एवं चतुष्कला-६६दावपि बोध्यं यथा अक्षरच्छन्दसि६६एवमन्यत्रापि बोध्यम्॥ अथ सकलप्रस्तारसंख्या। दव्वीसा सत्तसंआतइं सत्तावइ सहज्जाइं वाआलिसइ लक्खं तेरहकोड़ी समग्गाइं। अस्य टीका। अत्र चैकाक्षरमारभ्य षड्विंशत्यवधिवर्णवृत्तानां प्रस्तारे कियती संख्येत्यत आह। १३४,२१७,७२६,षड्विंशतिः सप्तशतानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लक्षाण्येतावती संख्येयः समग्राणि अङ्कस्य वामा गतिरित्यङ्काः स्थाप्याः। इति पिङ्गलः शीघ्रबोधभूषणञ्च॥

प्रस्तार्य्यधर्म्म, [न्] क्ली, नेत्ररोगभेदः। तस्य लक्षणम्।

"प्रस्तार्य्यधर्म्म तनुस्त्रीर्णं श्यावं रक्तनिभं सिते॥" इति माधवकरः॥

अपि च।

"समस्ताद्विस्तृतः श्यावो रक्तो वा मांससञ्चयः सन्निपातेन दोषाणां प्रस्तार्य्यधर्म्म तदुच्यते॥" इति रुचितदृतनिधिः॥

तस्यौषधम्।

"कतकस्य फलं शङ्खं त्रपुषं सैन्धवान्वितम्। फेनो रसाञ्जनं चौद्रं विड्ङ्गानि मनःशिला॥ कुक्कुटाण्डकपालानि वर्त्तिरेषा व्यपोहति। तिमिरं पटलं काचमर्म्मशुक्रं तथैव च॥ कण्डूक्लेदाबुदं हन्ति मलमाशु सुखावती॥" इदि चक्रपाणिदत्तः॥

प्रस्तावः, पुं, (प्र+स्तु+"प्रे द्रुस्तुस्रुवः।" ३।३। २७। इति घञ्।) अवसरः इत्यमरः। ३। २।२४॥ प्रसङ्गस्तुतिः॥ इति भरतः॥ प्रसङ्गः इति भानुदीक्षितः॥ (यथा, मृच्छकटिके। ९अङ्के। "प्रस्तावेनाधिकरणिकस्त्वांद्रष्टुमिच्छतीति॥") प्रकरणम्। यथा,— "प्रस्तावदेशकालादेर्विशिष्टात्प्रतिमाजुषाम्॥" इत्यस्यार्थे काव्यप्रकाशः॥

प्रस्तावना, स्त्री, (प्रस्तावयति विघ्नाप्रयति कार्य्यादिकमिति। प्र+स्तु+णिच्+युच्। टाप्।) आरम्भः। इति जटाधरः॥ सूत्रधारेण सह नटीविदूषकादीनां परस्परविचित्रभाषणम्। तस्या लक्षणम्। यथा,— "नटी विदूषको वापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्व्वते॥ चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः॥ आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा॥" इति साहित्यदर्पणम्॥

प्रस्तिरः, पुं, (प्रस्तरः। निपातनात् इत्वम्।) पल्लवादिरचितशय्या। इति शब्दरत्नावली॥

प्रस्तीतः, त्रि, (प्र+स्त्यै+क्तः। "प्रस्त्योऽन्यतरस्याम्।" ८।२।५४। इति निष्ठातस्य सो वा।) संहतः। ध्वनितः। प्रपूर्व्वस्त्यैधातोः कर्म्मणि क्तप्रत्ययः। इति मुग्धबोधव्याकरणम्॥

प्रस्तुतः, त्रि, प्रस्तूयते स्मेति। प्र+स्तु+क्तः।) प्रकरणप्राप्तः। यथा,— "अप्रस्तुतप्रशंसा सा या चैव प्रस्तुताश्रया॥" इति काव्यप्रकाशः॥

प्राकरणिकः। प्रासङ्गिकः। इत्यलङ्कारकौस्तुभः॥ निष्पन्नः। यथा। प्रस्तुतदृत्तेर्मयट्। अन्नं प्रस्तुतं अन्नमयम्। यवागूः प्रस्तुता यवागूमयी। इति कलापतद्धितः॥ प्रकर्षस्तुतियुक्तः। प्रपूर्व्वस्तुधातोः कर्म्मणि क्तः। उपस्थितः। प्रतिपन्नः। उद्युक्तः। इति लोकव्यवहारदर्शनात्॥

प्रस्तृतः, त्रि, (प्र+स्तृ+क्तः।) अन्तरितः। इति त्रिकाण्डशेषः॥

प्रस्थः, पुं, (प्रकर्षेण तिष्ठतीति। प्र+स्था+"आतश्चोपसर्गे।" ३।१।१३६। इति कः। यद्वा, प्रतिष्ठतेऽस्मिन्नेन वेति घञर्थे कः।) परिमाणविशेषः। स तु चतुःकुडवरूपः। इत्यमरभरतौ॥ आढकचतुर्थांशः। इति लीलावती॥ द्विशरावपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, सुश्रुते शारीरस्थाने। ८। अध्याये। "बलिनो बहुदोषस्य वयस्थस्य शरीरिणः। परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे॥") प्रस्थः, पुं, क्ली, (प्र+स्था+कः।) अद्रेः समभूभागः। अद्रेरेकदेशः। इति भरतः॥ तत्पर्य्यायः। स्तुः २ सानुः ३। इत्यमरः। २। ३। ५॥ (यथा, कुमारे। १। ५४। "प्रस्थं हिमाद्रेर्मृगनाभिगन्धि किञ्चित् क्षणत्खिन्नरमध्युवास॥") उन्नितवस्तु। इति मेदिनी॥ विस्तारः। यथा, "दीर्घे प्रस्थे समानञ्च न कुर्य्यान्मन्दिरे बुधः॥" इति ब्रह्मवैवर्त्ते जन्मखण्डे १०२ अध्यायः॥ प्रकृष्टस्थितिविशिष्टे, त्रि॥

प्रस्थपुष्पः, पुं, (प्रस्थमितं पुष्पमस्य।) मरुवकः। इत्यमरः। २। ४। ७८॥ (तत्पर्य्यायो यथा,— भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे। "मारुतोऽसौ मरुवको मरुन्मरुरपि स्मृतः। फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः॥")

स्वल्पपत्रतुलसी । जम्बीरभेदः । इति केचित् ॥ जम्बीरसामान्यम् । इति केचित् । इति तट्टीकायां भरतः ॥

प्रस्थानं, क्ली, (प्र + स्था + ल्युट् ।) विजीगीषोः प्रयाणम् । इत्यमरः । २ । ८ । ८५ ॥ (यथा, देवीभागवते । ५ । ४ । १२ ।
सेनाभियोगं प्रस्थानं बलसंख्या यथार्थतः ।
धीरागाश्च परिज्ञानं कृत्वा यान्तु त्वरान्वितः ॥")
गमनमात्रम् । यथा, पदाङ्कदूते ।
"प्रस्थानन्ते कुलिशकलनान्त्रियितं पण्डिताग्रैः")

प्रस्थानविघ्नः, पुं, (प्रस्थानस्य विघ्नः ।) गमनव्याघातः । यथा । यः पुनर्विवाहावसरे मङ्गलवति वासरे प्रतिष्ठमानस्य तत्प्रस्थानौपयिकं कर्म्म प्रागङ्गीकृत्य तदानीं न करिष्यामीति प्रस्थानविघ्नमाचरति तदसौ द्विगुणां सृतिं दाप्यः । इति मिताक्षरा ॥

प्रस्थापितः, त्रि, (प्र + स्था + णिच् + क्तः ।) प्रेषितः । इति हेमचन्द्रः ॥ प्रकर्षेण स्थापितश्च॥

प्रस्थिका, स्त्री, (प्रस्थस्तदाकारोऽस्त्यस्या इति । प्रस्थ + ठन् ।) अम्बष्ठा । इति भावप्रकाशः ॥

प्रस्फुटः, त्रि, (प्रस्फुटति विकशतीति । प्र + स्फुट् + कः ।) प्रफुल्लः । इति शब्दरत्नावली ॥ (सुस्पष्टः । यथा, मार्कण्डेये । २७ । २१ ।
"निष्कृष्य शासनं तस्माद्दृष्ट्वा प्रस्फुटाक्षरम् ॥")

प्रस्फोटनं, क्ली, (प्रस्फोट्यतेऽनेनेति । प्र + स्फुट् + णिच् + करणे ल्युट् ।) सूर्पम् । इत्यमरः । २ । ९ । २६ ॥ (प्र + स्फुट् । भावे ल्युट् ।) ताडनम् । विकाशनम् । इति मेदिनी । ने, १९२ ॥ प्रवनम् । तुषादिशोधनम् । इति हेमचन्द्रः । ४ । ८३ ॥

प्रस्रवणं, क्ली, (प्रस्रवति जलमस्मादस्मिन्निति वा । प्र + स्रु + अपादाने अधिकरणे वा ल्युट् । यत्र स्थाने स्रुत्वा जलं गलति तत् । इति भरतः ॥ अविच्छेदेन स्रवज्जलं यत्र स्थाने पतति यत्र निपत्य च बहुलीभवति तत् । इति स्वाम्यादयः ॥ गिरेरुपरि निर्झरादिप्रभवजलसंघातः इति साङ्गः ॥ (यथा, हरिवंशे । ८ । ५४ । ११ ।
"पुण्यं तीर्थवरं दृष्ट्वा विस्मयं परमं गतः ।
प्रभावञ्च सरस्वत्याः प्रत्तप्रस्रवणं बलः ॥")
अजस्रं मन्दवेगेन स्रवज्जलम् । इति कोकटः ॥ तत्पर्य्यायः । उत्सः २ । इत्यमरः । २ । ३ । ५ ॥ जलप्रस्रावः ३ । यथा, मनुः । ४ । २०३ ।
"स्नानं समाचरेन्नित्यं गर्त्त प्रस्रवणेषु च ॥")
अस्य गुणाः । प्रस्रवणजलं स्वच्छं लघु मधुरं रोचनञ्च दीपनकृत् ॥ इति राजनिर्घण्टः ॥ (प्र + स्रु + भावे ल्युट् ।) प्रकर्षेण स्रवणम् ॥

प्रस्रवणः, पुं, (प्रस्रवति जलमस्मादिति । प्र + स्रु + अपादाने ल्युट् । माल्यवत्पर्वतः । इति हेमचन्द्रः । ४ । ८५ ॥ स्वेदः । इति त्रिकाण्डशेषः ॥

प्रस्रावः, पुं, (प्रसूयते इति । प्र + सू + "पेदुसुस्रुवः ।" ३ । ३ । २७ । इति घञ् ।) मूत्रम् । इत्यमरः । २ । ६ । ६७ ॥ गोप्रस्रावमाहात्म्यं यथा, वराहपुराणे ।
"प्रस्रावेण तु यः स्नायात् रोहिण्यां मानवो द्विजः ! ।
सर्वपापकृतान्दोषान् दहत्याशु न संशयः ॥"
(गुणादयोऽस्य मूत्रशब्दे ज्ञातव्याः ॥)

प्रस्वानः, पुं, उच्चैःशब्दः । प्रपूर्ब्बस्वनधातोर्घञ्प्रत्ययेन निष्पन्नः ॥

प्रस्वेदः, पुं, (प्र + स्विद् घर्म्मच्युतौ + घञ्) अतिशयघर्म्मः । (यथा, मार्कण्डेये । १२४ । १३ ।
"नरेन्द्रपुत्त्रा प्रस्वेदजलक्लिन्नानना समम् ॥")
तस्यौषधं यथा,—
"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीकक्कोलपुगानां लवङ्गस्य फलानि च ॥
अगुरुश्रीरकाश्मर्य्यः कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च चोलं मदनकं नखम् ॥
सरलः सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्पूरकः पद्मकञ्च एतैस्तैलं प्रसाधितम् ॥
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम् ।
पुमान् युवा स्यात् शुक्राब्धः स्त्रीणाञ्चात्यन्तवल्लभः ॥
स्त्रीशतं गच्छते रुद्र ! बन्ध्यापि लभते सुतम्॥"
इति गारुड़े १९८ अध्यायः ॥
(विषयोऽस्य यथा,—
"स्तैमित्यं मधुरास्यता च जड़ता निद्रा च तन्द्रा भृशं
गात्राणां गुरुताऽरुचिर्विरमता रोमोद्गमः शीतता ।
प्रस्वेदः श्रुतिबाधनञ्च कुरुते नेत्रे च पाण्डुच्छवि-
र्विष्टब्धामलवत्तिका च वमनं श्लेष्मज्वरैर्विदुः")
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये॥)

प्रहतं, त्रि, (प्रहन्यते स्मेति । प्र + हन् + क्तः ।) विततम् । क्षुण्णम् । इति शब्दरत्नावली ॥ प्रकर्षेण हिंसितम् । (यथा, महाभारते । ८ । ३० । ६ ।
"प्रहतरथनराश्वकुञ्जरं
प्रतिभयदर्शनमुल्बणव्रणम् ।
तदहितहतमावृतं बलं
पितृपतिराष्ट्रमिव प्रजाक्षये ॥")
प्रकर्षेण गतञ्च ॥ (विताड़ितम् । यथा, । भागवते । १० । ७२ । ३८ ।
"इत्थं तयोः प्रहतयोर्गदयोर्दृढ़ौरी
क्रुद्धौ स्वमुष्टिभिरयःसुरेरपिष्टाम् ॥")
वादितम् । यथा, रघुः । १८ । १४ ।
"स स्वयं प्रहतपुष्करः कृती
लोलमाल्यबलयो हरन् मनः ।
नर्त्तकीरभिनयातिलङ्घिनीः
पार्श्ववर्त्तिषु गुरुष्वलज्जयत् ॥")

प्रहनेमिः, पुं, (ग्रहाणां नेमिरिव । निपातनात् ग्रस्य प्रः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥ (ग्रहनेमिरिति वा पाठः ॥)

प्रहरः, पुं, (प्रक्रियते डकादिरस्मिन्निति । प्र + हृ + घः । अप् वा ।) वासरस्याष्टभागैकभागः । पहर इति हिन्दीभाषा । तत्पर्य्यायः । यामः २ । इत्यमरः । १ । ४ । ६ ॥ (यथा, कथासरित्सागरे । ४ । ३७ ।
"सङ्केतकं हितीयेऽस्मिन् प्रहरे पर्य्यकल्पत॥")
प्रहरकुटुम्बी, स्त्री, (प्रहरस्य कुटम्बी कुटुम्बिनीव") कुटुम्बिनीचुपः । इति राजनिर्घण्टः ॥

प्रहरणं, क्ली, (प्रक्रियतेऽनेनेति । प्र + हृ + करणे ल्युट् ।) अस्त्रम् । इत्यमरः । २ । ८ । ८२ ॥ (यथा, महाभारते । १२ । १६६ । २ ।
"धनुः प्रहरणं श्रेष्ठमतोवाच पितामह ! ॥")
कर्णीरथः । इति तट्टीका सारसुन्दरी ॥ (यथा,) भागवते । ४ । २६ । २ ।
"पञ्चप्रहरणं सप्तवरूथं पञ्चविक्रमम् ॥"
प्रक्रियतेऽस्मिन्निति । युद्धम् । इति हलायुधः । २ । २८८ ॥ (प्र + हृ + भावे ल्युट् ।) प्रहारः ॥ (यथा, महाभारते । ४ । ४ । ७ ।
"याने प्रहरणे चैव तथैवाग्निषु भारत ! ॥")

प्रहरी, [न्] त्रि, यामिकः । प्रहरो विद्यते अस्येतिप्रहरशब्दादस्त्यर्थे इन् प्रत्ययेन निष्पन्नः।

प्रहर्षणः, पुं, (प्रहर्षयतीति । प्र + हृष् + णिच् + ल्युः ।) बुधग्रहः । इति त्रिकाण्डशेषः ॥ हर्षविशिष्टे, हर्षकारके च, त्रि ॥ यथा, महाभारते । १ । २७ । ८ ।
"नानापक्षिरुतं रम्यं कद्रूपुत्रप्रहर्षणम् ॥"
प्र + हृष + भावे ल्युट् । आनन्दे क्ली । यथा, महाभारते । १२ । ३३६ । २५ ।
"अथ व्रतस्यावभृते वागुवाचाशरीरिणी ।
स्निग्धमम्भोरया वाचा प्रहर्षणकरी विभो !")

प्रहर्षणी, स्त्री, (प्रहर्षयतीति । प्र + हृष् + णिच् + ल्युः । ङीष् ।) हरिद्रा । इति हारावली । त्रयोदशाक्षरपादच्छन्दोभेदः । तस्या लक्षणं यथा । छन्दोमञ्जर्य्याम् । "त्राश्राभिर्मनजरगा प्रहर्षणीयम् ।" तस्या उदाहरणं यथा,—
"गोपीनामधरसुधारसस्य पाने-
रुत्तङ्गस्तनकलसोपगूहनैश्च ।
आश्चर्य्यैरपि रतिविभ्रमैर्मुरारेः
संसारे मतिरभवत् प्रहर्षणीह ॥"

प्रहसनं, क्ली, (प्र + हस् + भावे ल्युट् ।) प्रहासः । (प्रहसत्यनेन वा । प्र + हस् + आधारे करणे वा ल्युट् ।) रूपकभेदः । परिहासः । इति मेदिनी । ने, १८० ॥ आक्षेपः । इति हेमचन्द्रः ॥ रूपकभेदस्य लक्षणं यथा,—
"भाणवत्सन्धिसन्ध्यङ्गलास्याङ्गैर्विनिर्म्मितेः ।
भवेत् प्रहसने वृत्तं निन्द्यानां कविकल्पितम् ॥
तत्र नारभटीनापि विष्कम्भकप्रवेशकौ ।
अङ्गौ हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा ॥
तपस्विभगवद्विप्रप्रभृतिष्वत्र नायकः ।
एको यत्र भवेद्दृष्टो हास्यं तच्छुद्धमुच्यते ॥"
इति साहित्यदर्पणम् ॥

प्रहसन्ती, स्त्री, (प्रहसति प्रकर्षेण विकशतीति । प्र + हस् + शतृ + ङीप् ।) यूथी । इति त्रिकाण्डशेषः ॥ वासन्ती । इति राजनिर्घण्टः॥ प्रकृष्टाङ्गारधानी च ॥

प्रहस्तः, पुं, (प्रततः प्रस्तो वा हस्तो यत्र।) विस्तृताङ्गुलिपाणिः। चपेटः। इत्यमरः। २। ६। ८४॥ रावणसेनापतिविशेषः। यथा—
"ततो नीलाम्बूदप्रख्यं प्रहस्तो नाम राक्षसः।
अब्रवीत् प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा॥"
इति रामायणे लङ्काकाण्डे ८ सर्गः॥

प्रहारः, पुं, (प्रहरणमिति। प्र+हृ+घञ्।) आघातः। यथा, मार्कण्डेये।
"करप्रहारेण शिरश्चामरस्य पृथक् कृतम्॥"

प्रहारणं, क्लो, (प्र+हृ+णिच्+ल्युट्।) काम्यदानम्। इति प्रहारणशब्दटीकायां भारतसुन्दरी॥

प्रहारवल्ली, स्त्री, (प्रहारोपशमा आघातजन्यवेदनादिनाशिका वल्ली लता। शाकपार्थिवादित्वात् मध्यपदलोपः।) मांसरोहिणी। इति भावप्रकाशः॥ (पर्य्यायोऽस्या यथा,—
"मांसरोहिण्यतिरुहा हत्ता चर्म्मकरी क्षया।
प्रहारवल्ली विकशा वीरवत्यपि कथ्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

प्रहासः, पुं, (प्रकृष्टो हासो यस्य।) शिवः। इति त्रिकाण्डशेषः॥ (कार्त्तिकेयस्य अनुचरविशेषः। यथा, महाभारते। ९। ४५। ६६।
"रणोत्कटः प्रहासश्च श्वेतसिंहश्च नन्दकः॥"
नागविशेषः। तथा तत्रैव। १०। ५७। १५।
"पूर्णाङ्गदः पूर्णमुखः प्रहासः शकुनिर्दरिः॥"
प्रकृष्टो हासो यस्मात्।) नटः। इति धरणिः॥ (प्रकृष्टो हासः प्रकाशो यस्य।) सोमतीर्थम्। इति जटाधरः॥ (प्रकृष्टो हास इति।) अट्टहासः। इति शब्दरत्नावली॥ (यथा, कामन्दकीये। ५। २०।
"न नर्म्मसचिवैः सार्द्धं किञ्चिदप्यप्रियं वदेत्।
ते हि मर्म्माण्यभिघ्नन्ति प्रहासेनापि संसदि॥"

प्रहासी, [न्] पुं, प्रकृष्टं हासयति हसति च यः। (प्र+हस्+णिच् वा+णिनिः।) हासकारकः भाँड़ इति भाषा। तत्पर्य्यायः। वासन्तिकः २ केलिकिलः ३ वैहासिकः ४ विदूषकः ५ प्रीतिदः ६। इति हेमचन्द्रः। २। २४५॥ (हासकारिणि, त्रि। यथा, अथर्ब्ववेदे। ८। ६। १४।
"पापाकेश्याः प्रहासिनस्तम्बे ये कुर्व्वते॥")

प्रहिः, पुं, (प्रकर्षेण क्रियतेऽत्रेति। प्र+हृ+"प्रहरतेः कूपे।" उणा० ४। १३४। इति इण्। स च डित्।) कूपः। इत्यमरः। १। १०। २६

प्रहितं, क्लो, (प्रधीयते स्मेति। प्र+धा+क्तः।) सूपः। इति हेमचन्द्रः। ३। ६१॥ (प्र+हि प्रेरणे+क्त।) क्षिप्ते, त्रि। इति निरुक्तशब्दटीकायां भरतः॥

प्रहीणः, त्रि, (प्र+ओ हा त्यागे+क्त। "धुमास्थागेति।" ६। ४। ६६। इति आत ईत्। "ओदितश्च।" ८। २। ४५। इति निष्ठातस्य नः। ततो णत्वम्।) परित्यक्तः। प्रपूर्व्वहाधातोः कर्म्मणि क्तः। इति मुग्धबोधव्याकरणम्॥ यथा,—
"प्रहीणपूर्व्वध्वनिनाधिरूढ-
स्तुलामधारेण शरद्घनेन॥"
इति रघुकाव्यम्॥

प्रहुतं, क्लो, (प्रह्रियते स्मेति। प्र+हु+क्तः।) भूतयज्ञः। इति जटाधरः॥ (यथा, मनुः। ३। ७३—७४।
"अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च।
ब्राह्म्यं हुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते॥
जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः।
ब्राह्म्यं हुतं द्विजाग्र्यार्च्चा प्राशितं पितृतर्पणम्॥")

प्रहेणकं, क्लो, (प्रहेलकम्। पृषोदरादित्वात् लस्य णः।) पिष्टकविशेषः। तत्पर्य्यायः। वाचनम्२ व्रतोपायनम् ३। इति त्रिकाण्डशेषः॥ प्रहेलकम् ४ वाचनकम् ५। इति हारावली १५२

प्रहेलकं, क्लो, (प्रहिलति स्वादादिना अभिप्रायं सूचयतीव। प्र+हिल भावसूचने+ण्वुल्। प्रहिलति वेष्टयतीति। प्र+हिल ण्वुल् वा।) प्रहेणकम्। इति हारावली। १५२॥

प्रहेलिका, स्त्री, (प्रहिलति अभिप्रायं सूचयतीति। प्र+हिल अभिप्रायसूचने+ण्वुल्। टापि अत इत्वम्।) दुर्विज्ञानार्थप्रश्नः। कूटार्थभाषिता कथा। हेयालि इति भाषा। तत्पर्य्यायः। प्रवल्हिका २। इत्यमरः। १। ६। ६॥ प्रवह्लिका ३ प्रवल्हिः ४ प्रवल्ही ५ प्रहेलिः ६ इति भरतः॥ प्रश्नदूती ७ प्रवल्हीका ८। इति शब्दरत्नावली॥ तस्य लक्षणम्।
"व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात्।
यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका॥
सा द्विधार्थी च शाब्दी च विख्याता प्रश्नशासने
आर्थी स्यादर्थविज्ञानात् शाब्दी शब्दस्य भङ्गतः॥"
आर्थी। यथा,—
"तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः॥"
पानीयकुम्भ इति॥ शाब्दी यथा,—
"सदारिमध्यापि न वैरियुक्ता
नितान्तरक्ताप्यसितैव नित्यम्।
ययोक्तवादिन्यपि नैव दूती
का नाम कान्तेति निवेदयन्ति॥"
सारिका। इति विदग्धमुखमण्डनम्॥

प्रह्लादः, पुं, (प्रह्लादते इति। प्र+ह्लाद शब्दे+अच्। यद्वा, प्रह्लादयतीति। प्र+ह्लाद+णिच्+अच्। रलयोरैक्यम्। प्रह्लादः। स च हिरण्यकशिपोः पुत्रः परमवैष्णवः। (यथा, हरिवंशे। ३। ७१।
"हिरण्यकशिपोः पुत्रचत्वारः प्रथितौजसः।
अनुह्लादश्च ह्लादश्च प्रह्लादश्चैव वीर्य्यवान्॥")
तस्य चरित्रादिकं प्रह्लादशब्दे द्रष्टव्यम्॥ (जनपदविशेषः। यथा, महाभारते। ६। ८। ४६
"मत्स्याः सुदेष्णाः प्रह्लादा माहिषाः शिबिकास्तथा॥")

प्रह्लत्तिः, स्त्री, (प्र+ह्लाद+क्तिन्। ह्रस्वः।) प्रीतिः। (ह्लादेः स्वः क्ली च।") इति मुग्धबोधव्याकरणम्॥

प्रह्लन्नः, त्रि, (प्र+ह्लाद+क्त। "ह्लादो निष्ठायाम्।" ६। ४। ८५। इति ह्रस्वः। प्रीतः। इत्यमरः। ३। १। १०३॥

प्रह्लादः, पुं, (प्रह्लादयतीति। प्र+ह्लाद+णिच्+अच्।) प्रह्लादः। स च पूर्व्वजन्मनि शिवशर्म्मणः पुत्रः सोमशर्म्मनामाभूत् ततो दैत्यभावनया मृतः अनन्तरं कमलायां हिरण्यकशिपोः सकाशाद्दैत्यभावेन जातः। यथा,
सूत उवाच।
"स लोष्टेन समं मेने काञ्चनं भूषणं पुनः।
जिताहारः स धर्म्मात्मा निद्रया परिवर्जितः॥
विषयान् स परित्यज्य एकान्तमपि सेवते।
योगासनसमारूढो निराशो निष्परिग्रहः॥
तस्य वेलां सुसंप्राप्य मृत्युकालः समागतः।
आगतान् दानवान् विप्रः सोमशर्म्मा व्यलोकयत्॥
मृत्युकाले तु संप्राप्ते प्राणयात्राप्रवर्त्तके।
शालग्रामे महाक्षेत्रे ऋषीणामेव सन्निधौ॥
केचिद्दन्ति वै दैत्याः केचिद्दन्ति दानवाः।
एवंविधो महाशब्दः कर्णरन्ध्रगतस्तदा॥
तस्यैव विप्रवर्य्यस्य सुविप्राः सोमशर्म्मणः।
ज्ञानध्यानात् प्रचलतः प्रविष्टं दैत्यजं भयम्॥
तेन ध्यानेन तस्यापि दैत्यभूतेन वै तदा।
सत्वरं तस्य वै प्राणा गतास्तस्य महात्मनः॥
दैत्यभावेन संयुक्तः स हि मृत्युवशं गतः।
तस्माद्दैत्यगृहे जातो हिरण्यकशिपोस्तदा॥
देवासुरे महायुद्धे निहतश्चक्रपाणिना।
युध्यमानेन तेनापि प्रह्लादेन महात्मना॥
सुभृशं वासुदेवं तद्दिव्यरूपं विचिन्तितम्।
योगाभ्यासेन पूर्वेण ज्ञानमासीन्महात्मनः॥
सस्मार पौर्व्विकं सर्व्वं चरित्रं शिवशर्म्मणः।
सोऽप्यहं सोमशर्म्मा वै प्रविष्टो दानवीं तनुम्॥
कस्य कार्यं कदा पुण्यं केवलं ध्यानमुत्तमम्।
प्रयामि च महापुण्यैर्ज्ञानाख्यैर्मोचदायिभिः॥
समरे प्रीयमाणेन प्रह्लादेन महात्मना।
एवं चिन्ता कृता पूर्व्वं श्रूयतां द्विजसत्तम!॥
एतत्ते सर्वमाख्यातं सर्व्वसन्देहनाशनम्॥"
सूत उवाच।
"प्रह्लादे तु हते संख्ये देवदेवेन चक्रिणा।
संह्लादे च महावीर्य्ये तस्मिंश्च कालनेमिनि॥
प्रह्लादस्य तु या माता हिरण्यकशिपोः प्रिया।
प्रह्लादस्य महाशोकैर्दिवा रात्रौ प्रशोचति॥
पतिव्रता महाभागा कमला नाम दुःखिता।
खिद्यमाना दिवा रात्रौ नारदस्तामुवाच ह॥
मा शुचस्त्वं महाभागे पुत्रार्थे पुण्यभागिनि!
निहतो वासुदेवेन तव पुत्रः समेष्यति॥
तद्रूपलक्षणोपेतस्तवोदरे महामतिः।
प्रह्लादेति च वै नाम पुनरस्य भविष्यति॥
विहीन आसुरैर्भावैर्वैष्णवेन समन्वितः।

इन्द्रत्वं भोक्ष्यते भद्रे ! सर्वदेवैर्नमस्कृतः ॥
सुखीभव महाभागे ! पुत्रेण तेन वै सदा ।
न प्रकाश्या त्वया देवि ! स्ववार्त्तेयञ्च कस्यचित्
कर्त्तव्यमप्रज्ञानभावैः सुगोप्यं त्वं सदा कुरु ।
एवमुक्त्वा गतो विप्र नारदो मुनिसत्तमः ॥
कमलायाश्चोदरे वै आसीत् तज्ज्ञ चोत्तमम्
पुनः प्रह्लादो वै नाम तस्यां जातो महात्मनः ॥
बाल्यभावं गतो विप्र कृष्ण एवं विचिन्त्य च ।
नरसिंहप्रसादेन देवराजोऽप्यभूत् स हि ॥"
इति पाद्मे भूमिखण्डे ५ अध्यायः ॥ *॥
(अनेन सह नरनारायणयोर्युद्धमासीत्। एतद्विवरणन्तु देवीभागवते चतुर्थस्कन्धे नवमाध्याये द्रष्टव्यम् ॥) प्रमोदः। इति विश्वः ॥
(यथा, महाभारते । १ । ७० । ३ ।
"मनःप्रह्लादजननं दृष्टिकान्तमतीव च ॥")
शब्दः। इति धरणिः ॥ (नागविशेषः। यथा, महाभारते । २ । १० ।
"प्रह्लादो मूषिकादश्च तथैव जनमेजयः ॥")
प्रह्वः, त्रि,(प्रह्वयते इति । प्र + ह्वे + "सर्व्वानिदृषिरिति ।" उणा० १ । १५३ । इति वन्। आलोपश्च ।) नम्रः। इत्युणादिकोषः ॥ (यथा, रघुः । १६ । ८० ।
"विभूषणप्रत्युपहारहस्त-
मुपस्थितं वीक्ष्य विशाम्पतिस्तम्।
सौपर्णमस्त्रं प्रतिसञ्जहार
प्रह्वैर्ध्वनिर्बन्धरुषो हि सन्तः ॥")
आसक्तिः। इति हेमचन्द्रः। ३ । ४८ ॥
प्रा, ल पूर्त्तौ । (अदा०-पर०-सक०-अनिट् ।) ल, प्राति घटं जलेन लोकः। इति दुर्गादासः ॥
प्राक्, व्य, पूर्व्वदिग्देशकालाः। इत्यमरः । ३ । ४ । २३ ॥ प्राची दिक् प्राङ् देशः कालो वा प्राक्। एवं प्राच्या दिशः प्राचो देशात् कालाद्वा आगतः प्रागागतः। एवं प्राच्यां दिशि प्राचि देशे वा वसति प्राग्वसति। दिक्शब्दाद्दिग्देशकाले इति प्रथमापञ्चमीसप्तमीनां स्थात् अचो लुगिति स्थातो लुक्। इति तद्धीकायां भरतः ॥ ("दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिक्देशकालेष्वस्तातिः।" ५।३।२७ इति अस्तातिः। "अञ्चेर्लुक्।" ५ । ३ । ३० । अस्तातेर्लुक्। "लुक् तद्धितलुकि।" १ । २ । ४८ । इति स्त्रीप्रत्ययस्य लुक्।)पूर्व्वम्। (यथा, मनुः । २ । २८ ।
"प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म्मविधीयते॥")
प्रभातम्। अवान्तरम्। अतीतम्। अयम्। इति हेमचन्द्रः मेदिनी च। चे, ७॥ क्रमप्राप्तिः। इति शब्दरत्नावली ॥
प्राकषिकः, पुं, (प्राकषति हिनस्तीति । प्र + आ + कष् हिंसायाम् + "प्राडि पनिकषः।" उणा० २ । १४ । इति किकन् ।) पिङ्गः। मायानर्त्तकः। इत्युणादिकोषः ॥ (परदारोपजीवी । इत्युज्ज्वलदत्तः ॥)
प्राकाम्यं, क्ली, (प्रकामस्य भावः प्रकाम + ष्यञ् ।)ग्रिमस्याष्टविधैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः तच्च इच्छानभिघातः। इत्यमरटीकायां भरतो हेमचन्द्रश्च । २।११६ ॥ (यथा,तत्त्वकौमुद्याम्।
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥")
स्वाच्छन्द्यानुमतिः। तत्पर्य्यायः। अवसर्गः २ स्वाच्छन्द्यानुमननम् ३। इति त्रिकाण्डशेषः ॥ (यथा, कुमारे । २ । ११ ।
"व्यक्तो व्यक्तेतरत्वासि प्राकाम्यं ते विभूतिषु॥")
प्राकारः, पुं, (प्रक्रियते इति। प्र + कृ + घञ्। उपसर्गस्य घञीति दीर्घः।) वप्रोपरि अन्यच्च वा इष्टकादिरचितवेष्टनम्। (यथा, महाभारते । १ । २०८ । २९ ।
"प्राकारेण च सम्पन्नं दिवमाहत्य तिष्ठता ॥")
तत्पर्य्यायः। वरणः २ सालः ३। इत्यमरः ।२। २ । ३ ॥ शालः ४। इति भरतः ॥ वप्रः ५। यथा,—
"प्राकाररोधसोर्वप्रः पिटकेदारयोरपि ॥"
इति रत्नकोषः ॥
तस्य परिमाणं यथा,—
"ऊर्द्धं षोड्शहस्तेभ्यो नैव कुर्य्यादगेहं गृही।
ऊर्द्धं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम् ॥"
तस्य द्वारमानम्।
"प्रस्थे हस्तद्वयात् पूर्वं दीर्घे हस्तत्रयन्तथा।
गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ॥
न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अध्यायः
प्राकृतः, त्रि,(प्रकृष्टमकृतमकार्य्यं यस्य।) नीचः। इत्यमरः ॥ (यथा, देवीभागते ।१।१५।३१ ।
"अश्रुपातं करोत्यश्च विवशः प्राकृतो यथा ॥"
अविकारकः। यथा, भावप्रकाशे अजीर्णरोगाधिकारे।
"वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरम् ॥
प्राकृतं अविकारकम् ॥"*॥) प्रकृतिसम्बन्धी। यथा,—
"इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया।
पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः॥"
इति श्रीभागवते दशमस्कन्धे ३ अध्यायः ॥
(यथाच मार्कण्डेये । ४५ । ७३ ।
"इत्येष प्राकृतः सर्गः चेत्रज्ञाधिष्ठितस्तु सः ॥"
यथा च मनौ । ११ । १५८ ।
स कृत्वा प्राकृतं कृत्स्नं व्रतशेषं समापयेत् ॥"
"प्राकृतं प्राजापत्यं प्रकृतौ भवं प्राकृतं सर्वकृच्छ्राणां प्रकृतित्वादेवमुच्यते।" इति तद्भाष्ये मेधातिथिः ॥* प्रकृतौ भवस्तत आगतो वा। प्रकृति + "तत्र भवः।" ४। ३ । ५३। "तत आगतः।" ४। ३ । ७४ । इति वा अण् ।) भाषाभेदे, क्ली। स च संस्कृतप्रकृतिकः। यथा, अथ प्राकृतम्। अथशब्द आनन्तर्य्यार्थोऽधिकारार्थश्च । प्रकृतिः संस्कृतं तत्र भवं तत आगतं वा प्राकृतम्। संस्कृतानन्तरं प्राकृतमधिक्रियते। संस्कृतानन्तरं प्राकृतस्यानुशासनम्। सिद्धसाध्यमानभेदसंस्कृतयोनेरेव तस्य लक्षणं न देशस्य इति ज्ञापनार्थम्। संस्कृतसमन्तु संस्कृतलक्षणेनैव गतार्थम्। प्राकृते प्रकृतिप्रत्ययलिङ्गकारकसमाससंज्ञादयः संस्कृतवद्दिव्याः। लोकादिति च वर्त्तते। तेन ऋ ॠ ऌ ॡ ऐ औ ङ ञ श ष विसर्জ্জनीयप्लुतवर्जो वर्णसमाम्नायो लोकादवगन्तव्यः। ङञौ स्ववर्गसंयुक्तौ भवत एव। ऐदौतौ च केषाञ्चित्। कैतवं कैअवम्। सौन्दर्य्यं सौअरिअम्। कौरवाः कौअवा। तथा स्वरव्यञ्जनं द्विवचनं चतुर्थीबहुवचनञ्च न तु भवति। अबहुलं बहुलमित्यधिकृतं वेदितव्यमाशास्त्रपरिसमाप्तेः। ततश्च क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव भवति। इति हेमचन्द्रकृतप्राकृतशब्दानुशासनवृत्तौ अष्टमाध्यायस्य चतुर्थः पादः ॥*॥ (यथा च प्राकृतचन्द्रिकायाम्।
"प्रकृतिः संस्कृतं तत्र भवत्वात् प्राकृतं स्मृतं
तद्भवं तत्समं देशीत्यनेकमेतत् त्रिधा मतम् ॥"
चण्डाचार्य्यादयस्तु आर्षप्राकृतभेदेन प्राकृतं द्विविधं कल्पयन्ति। जैनबौद्धानां शास्त्रेषु प्राचीनतमनाटकादिषु च आर्षप्राकृतप्रयोगः प्रायशो दृश्यते ॥ कानिचित् विशेषलक्षणानि प्राकृतचन्द्रिकायामुक्तानि। यथा,—
"तत्तार्षं मागधी शौरसेनी पैशाचिकी तथा।
चूलिका पैशाचिकत्वापभ्रंशश्चेति षड्विधम् ॥
महाराष्ट्रोद्भवां भाषां प्रकृष्टं प्राकृतं विदुः।
आकरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥"
नाटकादौ उत्तमस्यापि नायकादेः कदाचित् मत्तादिदोषोपहतस्य प्राकृतकथनं नैव दोषाय यदुक्तं तत्रैव ।
"ऐश्वर्य्यादिप्रमत्तस्य दारिद्र्योपप्लुतस्य च।
उत्तमस्यापि पठतः प्राकृतं नैव दूष्यति ॥
क्रीड़ार्थं नृपतेरिष्टं प्राकृतञ्च द्विजन्मनाम्।
भरतेनोदितं प्राच्यमबाधितमिदं वचः ॥"
नाटकादौ बालस्त्रीवृद्धादीनामगुणान्वितानां प्राकृतकथनमेव युक्ततरम्। यथाह भरद्वाजः।
"गाथासु तु महाराष्ट्रा अन्या नाट्याश्रया मताः।
बालस्त्रीवृद्धभिक्षूणां श्रावकव्याजलिङ्गिनाम्।
यद्वोपपन्नमत्तानां प्राकृतं षण्ढरूपिणाम् ॥"*
प्रलयविशेषे, पुं। यथा, विष्णुपुराणे। १।७। ३८—३९ ।
"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्व्विधः ॥
ब्राह्मो नैमित्तिकस्तत्र यच्छेते जगतः पतिः।
प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ लयम् ॥"
प्राकृतज्वर,पुं,(प्राकृतः प्रकृतिसम्बन्धी ज्वरः। वर्षाशरद्वसन्तेषु त्रिषु, ऋतुषु क्रमेण वातपित्तकफज्वरः। यथा, माधवकरः।
"वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ॥"

प्राकृतदोषः, पुं, (प्राकृतो दोषः ।) वर्षाशरद्-वसन्तेषु क्रमेण कुपितो वातः पित्तं कफश्च । यथा, रक्षितः ।
"चयप्रकोपप्रशमाः पित्तस्य प्रावृडादिषु ।
श्लेष्मणः शिशिराद्येषु वायोर्घर्म्मादिषु त्रिषु ॥"
प्राकृतप्रलयः,पुं,(प्राकृतः प्रकृतिसम्बन्धी प्रलयः) प्रकृतेर्लयः । तस्य विवरणम् । यथा,—
"निर्गुणस्य च नित्यस्य चाव्यक्तरहितस्य च ।
निमेषाणां सहस्रेण प्रकृतेर्हण्ड उच्यते ॥
षष्टिदण्डात्मकस्तस्य वासरश्च प्रकीर्त्तितः ।
मासस्त्रिंशद्दिवारात्रैर्व्वर्षं द्वादशमासकैः ॥
एवं गते शताब्दे च श्रीकृष्णे प्रकृतेर्लयः ।
प्रकृत्याश्च प्रलीनायां तदेवं प्राकृतो लयः ॥
सर्व्वाः संहृत्य सा चैका महाविष्णोः प्रसूय या ।
कृष्णवक्त्रमि लीना च मूलप्रकृतिरीश्वरी ॥
शक्ता वदन्ति तां दुर्गां विष्णुमायां सनातनीम् ।
सर्व्वशक्तिस्वरूपाञ्च परां नारायणीं सतीम् ॥
ब्रह्माधिष्ठातृदेवीञ्च कृष्णस्य त्रिगुणात्मिकाम् ।
यन्मायया मोहिताश्च ब्रह्मविष्णुशिवादयः ॥
वेदवादास्तां महालक्ष्मीं परां राधां वदन्ति ते ।
यद्दर्शाङ्गा महालक्ष्मीः प्रिया नारायणस्य च ॥
प्राणाधिष्ठातृदेवीञ्च प्रेम्णा प्राणाधिकां वराम् ।
शश्वत् प्रेममयीं शक्तिं निर्गुणां निर्गुणस्य च ॥
नारायणश्च शम्भुश्च संहृत्य स्वगणान् बहून् ।
शुद्धसत्त्वस्वरूपौ च कृष्णे लीनश्च निर्गुणे ॥
गोपा गोप्यश्च गावश्च सुरभ्यश्च नराधिप ! ।
सर्व्वे लीनाः प्रकृत्याञ्च प्रकृतिः प्रकृतीश्वरे ॥
महाविष्णौ विलीनाश्च सर्व्वे ते क्षुद्रविष्णवः ।
महाविष्णुः प्रकृत्याञ्च सा चैवं परमात्मनि ॥
प्रकृतिर्योगनिद्रा च श्रीकृष्णनेत्रपद्मयोः ।
अधिष्ठानं चकारेवं मायया चेश्वरेच्छया ॥
प्रकृतेर्व्वासरं यावन्मितं कालं प्रकीर्त्तितम् ।
तावद्वृन्दावने निद्रा कृष्णस्य परमात्मनः ॥
अमूल्यरत्नतल्पे च वह्निशुद्धांशुकान्विते ।
गन्धचन्दनमाल्याढ्ये वायुना सुरभीकृते ॥
पुनः प्रजागरे तस्य सर्व्वसृष्टिर्भवेत् पुनः ।
एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥*॥
अपि च ।
"प्रकृतौ संस्थितो यस्मात् सर्व्वस्तस्मात्प्रसञ्जयः ।
अहङ्कारमहत्तत्त्वगतो यत् प्राकृतो लयः ॥
प्रकृतौ संस्थितो व्यक्तमतीतप्रलयस्तु यत् ।
तस्मात् प्राकृतसंज्ञोऽयमुच्यते प्रतिसञ्चरः ॥
अयं यः कथितो विप्राः प्राकृताख्यो महालयः॥"
इति कालिकापुराणे २४ अध्यायः ॥
प्राकृतमानुषः, पुं, (प्राकृतः सामान्यो मानुषः) सामान्यमनुष्यः । यथा महाभारते गदापर्व्वणि ।
"एकादशचमूनाथं भीम ! पादेन मा स्पृश ।
पञ्चानामपि यो भर्त्ता नासौ प्राकृतमानुषः ॥"
प्राकृतमित्रं, क्ली, (प्राकृतं स्वाभाविकं मित्रं सुहृत् ।) स्वदेशव्यवहितदेशावस्थितराजादिः । यथा, माघे । २ । ३६ ।
"सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः ।
स्यातामित्रौ मित्रं च सहजप्राकृतावपि ॥"
अस्य टीका । "ननु क्षुद्रोऽयं चैद्यः किं नः करिष्यतीत्याशङ्क्य तस्य बलवत्तां वक्तुं मित्रामित्रबलावलविवेकं तावत् करोति । सखेति । क्रियया उपकारापकारान्यतररूपया निर्वृत्तः कृत्रिमः सखा सुहृत् गरीयान् बलवान् एवं शत्रुश्च कृत्रिमो गरीयान् कुतः हि यस्मात्तौ कृत्रिममित्रशत्रू च कार्य्यतः उपकारापकाररूपकार्य्यवशात् निर्वृत्ताविति शेषः । उक्तकार्य्यो पाधेर्यावज्जीवमनपायादनर्योर्मित्रामित्रभावोऽपि अनपायीति गरीयस्त्वमिति भावः । सहजप्राकृतौ तु नैवमित्याह स्यातामिति । सहजातः सहजः एकशरीरावयवत्वात् तत्र सहजं मित्रं माढव्यसेयपिढव्यसेयादि, सहजशत्रुस्तु पिढव्यतत्पुत्रादिः प्रकृत्या सिद्धः प्राकृतः पूर्व्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः । तत्र विषयान्तरः प्राकृतः शत्रुः तदनन्तरः प्राकृतं मित्रं अपि त्वर्थे तौ सहजप्राकृतौ शत्रुमित्रे च स्यातां न त्वात्मकार्य्यवशादनियमेनोभयरूपतामापद्येते न कृत्रिमशत्रुमित्रे कृत्रिमशत्रुः शत्रुरेव मित्रञ्च मित्रमेवेति कृत्रिमावेव मित्रामित्रौ गरीयांसौ न तु सहजौ नापि प्राकृतावित्यर्थः । अनेन कृत्रिमत्वं सर्व्वापवादीति सिद्धम् ।" इति मल्लिनाथः ॥
प्राकृतशत्रुः, पुं,(प्राकृतः स्वाभाविकः शत्रुः ।) स्वदेशाव्यवहितदेशावस्थितराजादिः । यथा । "विषयान्तरः प्राकृतः शत्रुः ।" इति माघटीकायां मल्लिनाथः ॥
प्राकृतिकः, त्रि, (प्रकृति + ठञ् ।) प्रकृतिविकारः । प्रकृतिसम्बन्धी । यथा,—
"एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥
(प्रलयविशेषे,पुं । यथा विष्णुपुराणे १।७।३८।
"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज ।
नित्यश्च सर्वभूतानां प्रलयोऽयं चतुर्विधः ॥")
प्राक्तन, त्रि, (प्राक् प्राचि काले देशे प्राच्यां दिशि वा भवः । प्राक् + कालवाचिनोऽव्ययात् ट्युट्युलौ ।)प्राग्भवः । यथा ।"प्रपेदिरे प्राक्तनजन्मविद्याः ॥" इति कुमारसम्भवम् ॥
अन्यच्च ।
"प्राक्तनेन शुभं सर्व्वं सुखञ्च विभवस्थिरम् ।
दुःखं शोकः प्राक्तनेन विपत् सम्पच्च साम्प्रतम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १४अध्यायः॥
अपि च तत्रैव १२९ अध्याये ।
"विधाता लिखितं कर्म्म प्राक्तनं केन वार्य्यते ।
मा मुक्तं भोग्यते कर्म्म कल्पकोटिशतैरपि ॥"
प्राक्तनकर्म्म, क्ली,(प्राक्तनं पुराभवं कर्म्म अवश्यं तज्जनकत्वादपि तज्जन्यत्वारोपः ।) भाग्यम् । अदृष्टम् । इति जटाधरः ॥ पुराकृतकार्य्यञ्च ॥
प्राक्फलः,पुं, (प्राक् फलं यस्य ।) पनसः । इति जटाधरः ॥
प्राक्फल्गुनी, स्त्री, (प्राची फल्गुनी ।) पूर्व्वफल्गुनी । यथा । प्राक्फल्गुन्यश्च जन्मकाले च यस्य । इति कोष्ठीप्रदीपः ॥
प्राक्फल्गुनीभवः,पुं, (प्राक्फल्गुन्यां भव उत्पत्तिर्यस्य ।)बुधस्यतिः । इति हारावली ।३६॥
पूर्व्वफल्गुन्यां जाते, त्रि ॥
प्राक्फाल्गुनः, पुं, (प्राक्फल्गुन्यां भव इति । प्राक्फल्गुन + अण् ।)बुधस्यतिः । इति शब्दरत्नावली ॥
प्राक्फाल्गुनेयः,पुं, (प्राक्फल्गुन्यां भव इति । प्राक्फल्गुन + ढञ् ।) बुधस्यतिः । इति त्रिकाण्डशेषः ॥
प्राखर्य्यं,(प्रखरस्य भावः । प्रखर + ष्यञ् ।)प्रखरत्वम् । तीक्ष्णता । प्रखरशब्दात् भावार्थे ष्यञ्प्रत्ययः ॥
प्रागभावः, पुं, (प्राग्वर्त्ती अभावः ।) संसर्गाभावविशेषः ॥ (यथा, भाषापरिच्छेदे ।१२-१३
"अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथाध्वंसोऽप्यत्यन्ताभाव एव च ॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥")
तस्य लक्षणम् । विनाश्यभावत्वम् । इति सिद्धान्तमुक्तावली ॥
प्रागल्भ्यं, क्ली, प्रगल्भस्य भावः । प्रगल्भ + ष्यञ् ।) प्रगल्भता । यथा,—
प्रागल्भ्यहीनस्य नरस्य विद्या
शस्त्रं यथा कापुरुषस्य हस्ते ।
न क्षत्रियुत्पादयते शरीरे
हृदस्य दारा इव दर्शनीयाः ॥"
इति ज्योतिस्तत्त्वम् ॥
स्त्रीणामयत्नजभावविशेषः । यथा,—
"प्रागल्भ्योदार्य्यमाधुर्य्यगोभाधीरत्वकान्तयः ।
दीप्तिश्चायत्नजा भावहावहेलास्त्रियोऽङ्गजाः ॥"
इति हेमचन्द्रः ।४।१७३ ॥
(यथा च साहित्यदर्पणे । ३ । १०२ ।
"निःसाध्वसत्वं प्रागल्भ्यम् ॥" यथा,—
"समाश्लिष्टः समाश्लेषयुम्बितायुम्बनैरपि ।
दृष्टश्च दंशनैः कान्तं दासीकुर्व्वन्ति योषितः ॥"
प्रागुदीचीं,स्त्री,(प्राची उदीची च दिगिति कर्म्मधारयः । पूर्व्वोत्तरदिक् । ईशानकोणः । यथा तन्त्रोल्लीर्णमृत्तिकाः प्रागुदीच्यां दिशि क्षिपेत्" इति भवदेवभट्टः ॥
प्राग्ज्योतिषः,पुं, (प्राक् ज्योतिषं नक्षत्रं यत्र। तदुक्तं कालिकापुराणे ।
"अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज ह ।
"ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥"
कामरूपदेशः । इति हेमचन्द्रः । ४ । २२ ॥
स तु नरकराजपुरम् । यथा,—
श्रीभगवानुवाच ।
"करतोया सत्यगङ्गा पूर्व्वभागावधिस्थिता ।
यावल्लालितकान्तास्ति तावद्देशं पुरं तदा ॥
तत्र देवो महामाया योगनिद्रा जगत्प्रसूः ।
कामाख्यारूपमादाय सदा तिष्ठति शोभना ॥

अत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुतः।
अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः॥
अत्र स्वयं महादेवो ब्रह्मा चाहञ्च सर्वदा।
चन्द्रः सूर्य्यश्च सततं वसतेऽत्रैव पुत्रक!॥
सर्वे क्रीड़ार्थमायाता रहस्यदेशमुत्तमम्।
अत्र यौः सर्वतो भद्रा भोग्यमत्र सदा बहु॥
अत्रैव हि स्थितो ब्रह्मा प्राङ्मुखं ससर्ज्ज ह।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥
अत्र त्वं वस भद्रन्ते ह्यभिषिक्तो मया स्वयम्।
ततो विदर्भराजस्य पुत्रीं मायाञ्चयां हरिः।
पुत्रार्थं वरयामास नरकस्य स मां गुणैः॥"

इति कालिकापुराणे ८७ अध्यायः॥

(इदानीं प्रसिद्धमासामप्रदेशकियदंशकुचविहार)

कामरूपं पुराप्राग्ज्योतिषाख्यर्याभिहितम्॥"

प्राग्भारः, पुं, (प्रकृष्टो भारो यत्र।) पर्वताग्रभागः। इति त्रिकाण्डशेषः॥ कुचित् प्राग्भाव इति च पाठः॥

प्राग्रहरः, त्रि,(प्राग्रं प्रकृष्टमग्रं क्रियतेऽनेनेति। ह+अप्।) श्रेष्ठः। इत्यमरः। ३। १। ५८।

(यथा, रघौ। १६। २३।

"तथेति तस्याः प्रणयं प्रतीतः
प्रत्यग्रहोत्प्राग्रहरो रघूणाम्।
पूरय्यभिव्यक्तमुखप्रसादा
शरीरबन्धेन तिरोबभूव॥")

प्राग्राटं, क्ली, (प्राग्रे अटतीति। अट्+अच्।) अघनदधि। इति त्रिकाण्डशेषः॥

प्राग्र्य,त्रि,(प्रकर्षेणाग्रे भव इति। प्राग्र+यत्) श्रेष्ठः। इत्यमरः। ३। १। ५८॥ (यथा, महाभारते। ८। ५८। ११।

"कृत्वा हि सुमहत् कर्म्म हत्वा भीष्मसुखान् कुरून्।
जयः प्राप्तो यशःप्राग्र्यं वैरञ्च प्रतियाचितम्॥"

प्राग्वंशः, पुं,(प्राञ्चतीति। प्र+अञ्च+क्विन्प्राक् प्राक् वंशः सपत्नीकयजमानादिसमूहोऽत्र।) हविषां होतव्यानां आधारो यदृग्रहं ततः प्राक् पूर्व्वदेशे यजमानसदस्यादिस्थित्यर्थं गृहम् इत्यमरभरतौ॥ (यथा, हरिवंशे। ४१। ७।

"यूपं समितकुशं दर्व्वोचमसोलूखलानि च।
प्राग्वंशं यज्ञभूमिञ्च होतारं चयनञ्च यत्॥"

प्राक्चासौ वंशश्चेति कर्म्मधारयः॥) पूर्व्वकुलञ्च॥

प्राघातः, पुं,(प्रकृष्ट आघातोऽस्मिन्। यद्वा, प्राहन्यतेऽस्मिन्निति। प्र+आ+हन्+आधारे घञ्।) युद्धम्। इति हेमचन्द्रः। ३। ४६१॥

प्राधारः, पुं, (प्राधरणमिति। प्र+धृ प्रस्रवणे+घञ्। "उपसर्गस्य घञ्यमनुष्ये बहुलम्।" ६। ३। १२२। इत्युपसर्गस्य दीर्घः।)घृतादिचरणम्। तत्पर्य्यायः। स्रोतः २। इत्यमरः। ३। २। १०॥

प्राघुणः,पुं, (प्राघोणते भ्राम्यतीति। प्र+आ+घुण+कः।) अतिथिः। इति त्रिकाण्डशेषः॥ (कन्प्राघुण+स्वार्थे। प्राघुणकस्तत्रार्थे। यथा, पञ्चतन्त्रे चतुर्थतन्त्रे।

"तदागच्छ प्राघुणकन्यायेनास्मदावासम॥")

प्राघुणिकः,पुं,(प्राघुण+स्वार्थे ठक्।) अतिथिः। यथा, नैषधे। २। ५६।

"अमितं मधु तत्कथा मम
श्रवणप्राघुणिकीकृता जनैः।
मदनानलबोधनेऽभवत्
खग धाय्या धिगधैर्य्यधारिणः॥"

प्राघूर्णिकः, पुं, (प्र+आ+घूर्ण+भावे घञ्। प्राघूर्णो भ्रमणम्। तत्र साधु इति ठञ्।) अतिथिः। इति हेमचन्द्रः। २। ३३४॥

प्राङ्, त्रि, (प्रकर्षेण अञ्चतीति। प्र+अन्च+"ऋत्विग्दधृक्स्रगिति।" ३। २। ५९। इति क्विन्। "अनिदितां हल उपधायाः क्ङिति।" ६। ४। २४। इति नलोपः। "उगिदचाम्।" इति नुम्। संयोगान्तस्य लोपः। नुमो नकारस्य। "क्विन् प्रत्ययस्य कुः।" ८। २। ६२। इति कुत्वेन ङकारः।) पूर्व्वदिक्। पूर्व्वदेशः। पूर्व्वकालः। इति मेदिनी चे, ७॥

प्राङ्गः,पुं,(प्रकृष्टमङ्गं यस्य।) पणववाद्यम्। इति शब्दरत्नावली॥

प्राङ्गणं, क्ली, (प्रकृष्टमङ्गनमङ्गं यस्य।) पणववाद्यम्। इति शब्दरत्नावली॥ (प्रकर्षेण अङ्गनं गमनं यत्र। ल्युट्।) गृहभूमिः। आङ्गिना इति उठान इति च भाषा। तत्पर्य्यायः। अजिरम् २ चत्वरम् ३ अङ्गनम् ४। इति हेमचन्द्रः। ४। ७०॥ (यथा, भविष्योत्तरे।

"प्रदोषसमये स्त्रीभिः पूज्यो नीमूतवाहनः।
पुष्करिणीं विधायाथ प्राङ्गणे चतुरस्रिकाम्॥")

सूर्य्यविद्वस्य तस्य दोषो यथा,—

"अभद्रदं सूर्य्यवेधं प्राङ्गनञ्च तथैव च॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अः॥

प्राङ्न्यायः, पुं, (प्राक् न्यायः।) चतुर्थोत्तराल्लगंतोत्तरविशेषः। यत्राभियुक्त एवं ब्रूयादक्षिकर्षे अनेनाहमभियुक्तस्तु तच्च चायं व्यवहारमार्गेण पराजित इति। उक्तञ्च कात्यायनेन।

"आचारेणावसन्नोऽपि पुनर्लेखयते यदि।
सोऽभियेयो जितः पूर्व्वं प्राङ्न्यायेन स उच्यते॥"

इति मिताक्षरा॥

प्राचिका,स्त्री,(प्राञ्चतीति। प्र+अञ्च+क्विन्। टापि अत इत्वञ्च।) वनमल्लिका। इत्यमरभरतौ। ३। ५। ८॥ डाँश इति भाषा॥

प्राची, स्त्री, (प्रथमं अञ्चति सूर्य्यं प्राप्नोतीति। प्र+अञ्च+"ऋत्विग्दधृक्स्रगिति।" ३।२।५९। इत्यादिना क्विन्। "उदितश्च।" ४। १। ६। इति ङीप्। पूर्व्वा दिक् इत्यमरः। १।३।१॥ (यथा, महाभारते। १। ८५। १२।

"जनमेजयः खल्वनन्तां नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान्। यः प्राचीं दिशं जिगाय यावत् सूर्य्योदयात् ततस्तस्य प्राचिन्वत्वम्॥") पूजकपूज्ययोरग्रम्। यथा,—

"देवाग्रे स्वस्य चाग्र्ये प्राची प्रोक्ता गुरुक्रमैः॥"

इति।

"यत्रैव भानुस्तु वियत्युदेति
प्राचीति तां वेदविदो वदन्ति।
तथा पुरः पूजकपूज्ययोश्च
सदागमज्ञाः प्रवदन्ति तज्ज्ञे॥"

इति तिथ्यादितत्त्वम्॥

प्राचीनः,त्रि,(प्रागेवेति। प्राक्+"विभाषाञ्चेरदिक् स्त्रियाम्।"५। ४। ८ इति खः खस्येनादेशः। पूर्व्वदिग्देशकालभवः तत्पर्य्यायः। प्राक् २। (यथा, आर्य्यासप्तशत्याम्। ३५१।

"प्राचीनाचलमौलेर्यथा शशी गगनमध्यमधिवसति।
त्वां सखि! पश्यामि तथा छायामिव संकुचन्मानाम्॥"

यथा च भागवते। ४। २४। १०।

"प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम्॥"

प्रागग्रम्। यथा, ऋग्वेदे। १। १८८। ४।

"प्राचीनं वर्हिरोजसा सहस्रवीरमस्तृणन्॥"

"प्राचीनं प्रागग्रम्।" इति तद्भाष्ये सायनः॥ प्रकृष्टगन्ता। अपराङ्मुखः। यथा, ऋग्वेदे। १। ५४। ५।

"प्राचीनेन मनसा बर्हणावता।"

"प्राचीनेन प्रकर्षेण गन्त्रा अपराङ्मुखेनेत्यर्थः॥"

इति तद्भाष्ये सायनः॥)

पुं,प्राचीरम्। तत्पर्य्यायः आवेष्टकः२ वृतिः३। इति हेमचन्द्रः। ४। ४८॥

प्राचीनपनसः, पुं, (प्राचीनः पनस इति नित्यकर्म्मधारयः।) विल्वम्। इति त्रिकाण्डशेषः॥

प्राचीनबर्हिः, [स्] पुं, इन्द्रः। इति हेमचन्द्रः। २। ८५॥ (यथा, रघौ। ४। २८॥

स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा।
अहितानिलोद्धूतैस्तज्जयस्येव केतुभिः॥")

राजविशेषः। (यथा,महाभारते।१२।२०८।

"अत्रिवंशे समुत्पन्नो ब्रह्मयोनिः सनातनः।
प्राचीनबर्हिर्भगवांस्तस्मात् प्रचेतसो दश॥")

यथा च।

"इविर्द्धानात् षड़ाग्नेयी पुत्रानजनयद्व्रतम्।
प्राचीनबर्हिषं शुक्रं गयं कृष्णं प्रजाजिनौ॥
प्राचीनबर्हिर्भगवान् महानासीत् प्रजापतिः।
इविर्द्धानात् द्विजश्रेष्ठ! येन संवर्द्धिता प्रजाः॥
प्राचीनाग्राः कुशास्तस्य पृथिव्यां विश्रुता मुने।
प्राचीनबर्हिर्भगवान् ख्यातो भुवि महाबलः॥
समुद्रतनयायान्तु कृतदारो महीपतिः।
महतस्तपसः पारे सुवर्णायां महीपतिः॥
सुषुवे दश पुत्रांश्च ऋषिणां वै प्रचेतसः।
दशवर्षसहस्राणि समुद्रसलिलेशयाः॥"

इति वह्निपुराणे वरसर्गो नामाध्यायः॥

प्राचीना,स्त्री,(प्राचीन+टाप्।)वनतिक्तिका। इत्यमरः।२।४।८५॥ आकनादि इति भाषा॥ राज्ञा। इति शब्दचन्द्रिका॥ (प्राचि भवेति। प्राच्+खः। टाप्।) प्राग्भवा च॥ (पाठा।

तत्पर्य्यायो यथा,—
"पाठाम्बष्ठावष्ठकौ च प्राचीना प्राचचेल्लिका।
एकछोला रसा प्रोक्ता पाठिका वरतिक्तिका॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
प्राचीनामलकं, क्ली, (प्राचीनमामलकमितिनित्यकर्म्मधारयः।) पानीयामलकम्। पानी आमला इति भाषा। तत्पर्य्यायः। वारिवदरम् २। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। १। २०८। ४१।
"प्राचीनामलकैर्लोध्रैः रङ्गोलैश्च सुपुष्पितैः॥")
अस्य गुणः। दोषत्रयगरनाशित्वम्। इति भावप्रकाशः॥ (यथा च।
"गरदोषहरं नीपं प्राचीनामलकन्तथा॥"
इति शुश्रुते सूत्रस्थाने ४६ अध्यायः॥)
प्राचीनावीतं, क्ली, (प्राचीनं प्रदक्षिणं आवीयते स्रज्यते। आ+वी गत्यादौ+क्तः। यद्वा, प्राचीनं आवेतीति। "गत्यर्थेति।" क्तः।) आदौ वामकरे बद्धिष्कृते सति दक्षिणस्कन्धार्पितयज्ञसूत्रम्। इत्यमरभरतौ।२।७ ५०॥ तथाहि कौर्म्मे उपविभागे १० अध्याये।
"सव्यं बाहुं समुद्धृत्य दक्षिणे तु धृतं द्विजाः।
प्राचीनावीतमित्युक्तं पित्रे कर्म्मणि योजयेत्॥"
प्राचीनावीती, [त्]पुं, (प्राचीनावीतमस्त्रास्येति। प्राचीनावीत+इनिः।) प्राचीनावीतविशिष्टः। यथा। सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंसे प्रतिष्ठापयति सव्यं कक्षमवलम्बं भवति एवं प्राचीनावीती भवतीति। इति गोभिलः॥ प्रतिष्ठापयति यज्ञोपवीतमिति शेषः। इत्याह्निकतत्त्वम्॥
प्राचीपतिः, पुं, (प्राच्याः पूर्व्वस्या दिशः पतिः।) इन्द्रः। इति त्रिकाण्डशेषः॥
प्राचीरं, क्ली, (प्राचीयते इति। प्र+आ+चिञ्चयने+"सुसिचिमिञां दीर्घश्च।"उणा० २।२५। इति क्रन् दीर्घश्च।) प्रान्ततो वृतिः। इत्यमरः। २। २। ३॥ पाँचील इति भाषा॥ दुर्गार्थं नगरादेः प्रान्तभागे वेणुकण्टकवेत्रादिमयी वृतिर्वेष्टनिका। इति भरतः॥ स्वल्पायामपि वृतौ प्राचीरमुपचारादिति स्वाम्यादयः॥ तत्पर्य्यायः। वृतिः २। इति भट्टः॥ प्राचीनम् ३। इति मुकुटः।
"प्राचीरं प्रावरोऽपि४स्यात् प्रावृतिः५ प्रान्ततो वृतिः६।
इष्टकास्तृत्तिकाद्येश्च गृहवाह्यादिवेष्टने॥"
इति शब्दरत्नावली॥*॥
अथ प्राचीर निर्णयः।
"गजैरभेद्या मनुजैरलङ्घ्याः
प्राचीरखण्डा नृपतेर्भवन्ति॥
राजदण्डोद्यताः सर्व्वे प्राचीराः पृथिवीभुजः।
विंशतिस्ते तु पञ्चाग्रे पार्श्वयोः पञ्च पञ्च च॥
पश्चात् पञ्च च विज्ञेयाः प्राचीराः पृथिवीभुजः
सर्वप्रान्ते त्वावरणो नाम प्राचीर उच्यते॥
प्रतिप्राकारसंस्थानं द्वारं नाभिसुखस्थितम्"॥*
तत्र जयाख्यस्य दीर्घस्य वास्तुखण्डस्य निर्णयः।
तदयथा,—
"राजच्छन्दान्तरे पञ्च राजद्वारे महीपतेः।
राजदण्डत्रये सार्द्धे जयद्वारे प्रतिष्ठिताः॥
अद्वारे राजदण्डार्द्धे प्राचीराः पृथिवीपतेः।
एवं व्यवस्थिते स्थाने मध्यमे तद्धि तिष्ठति॥
राजच्छन्दत्रयं सार्द्धमायामे जयवास्तुनि।
परिणाहे पञ्च राजदण्डास्तिष्ठन्ति मध्यतः॥
राजपट्टाभिधानेन स्थानमेतन्निगद्यते।
अस्मिन् गृहं नृपः कृत्वा सुचिरं सुखमश्नुते॥
अन्यानाश्रमतो राजा योऽन्यत्र गृहमारभेत्।
सोऽचिरान्मृत्युमाप्नोति रोगं शोकं भयन्तथा॥
यमदण्डोदयदण्डौ कोणाष्टतिरुपस्रवः॥
ये चान्ये वास्तुदोषाः स्युः स्थाने दोषाश्च ये पुनः
न स्पृशन्ते राजपट्टस्तैः सर्व्वैर्गरुडो यथा।
द्विगुणादितोऽपि स्यात् क्रमाद्भङ्गादि वास्तुषु॥
राजच्छन्दमितेऽप्येवं प्राचीरे गुणदोषकौ॥"
इति युक्तिकल्पतरुः॥
प्राचेतसः, पुं,(प्रचेतसोऽपत्यमिति। प्रचेतस्+अण्।) वाल्मीकिमुनिः। इति हेमचन्द्रः। ३। ५१०॥ (यथा, रघुः। १५। ६३॥
"अथ प्राचेतसोपज्ञं रामायणमितस्ततः।
मैथिलेयौ कुशलवौ जगदुर्गुरुचोदितौ॥"
प्रचेतसोऽपत्यमात्रम्। विष्णुः। यथा,हरिवंशे। २०१। १४॥
"प्रभया तेजसा योगात्तस्मात् प्राचेतसः प्रभुः।
विष्णुरेव महायोगी कर्म्मणामन्तरङ्गतः॥"
दक्षः। यथा, महाभारते। १। ७५। ५।
"वीरिण्या सह सङ्गम्य दक्षः प्राचेतसो मुनिः।
आत्मतुल्यानजनयत् सहस्रं संसितव्रतान्॥")
प्राचेतसः, [स्] पुं, प्राचीनबर्हीराजपुत्राः। सान्तनित्यबहुवचनान्तोऽयम्। यथा,—
"एवमुक्तास्तु ते पुत्रास्ततः प्राचेतसो दश।
पयोधिसलिले मग्नास्तप्यन्ते सुदारुणम्॥
पतच्चिराजमारूढं नीलोत्पलदलच्छविम्।
ददृशुः प्राचेतसः सर्वे शिरोभिरवनीं गताः॥"
इति वह्निपुराणम्॥
प्राच्यः, पुं, (प्राचि भवः। प्राच्+"शुभ्रागपागुदक्प्रतीचो यत्।"४। २। १०१। इति यत्।) अरावत्याः प्राग्दक्षिणदेशः। इत्यमरः। २। १। ७॥(पूर्व्वदिग्भवे, त्रि। यथा मार्कण्डेये। ५७। ४२—४४।
"———प्राच्यान् देशान् निबोध मे।
अधारका सुदकरा अन्तर्गिर्य्या बहिर्गिराः॥
यथा प्रवङ्गा वङ्गेया मालदा मालवर्त्तिकाः।
ब्राह्मोत्तराः प्रविजया भार्गवा भ्रेयमल्लकाः॥
प्राग्ज्योदिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः
मल्ला मगधगोमन्ताः प्राच्या जनपदाः स्मृताः॥"
पूर्व्वदेशीये च, त्रि॥ (यथा, महाभारते। ८। ४५। २८॥
"प्राच्या दासा दृषला दाक्षिणात्याः।
स्तेना वाहीकाः सहरा वै सुराष्ट्राः॥")
प्राजकः, पुं, (प्राजयति प्रकर्षेण गमयति घोटकादीनिति। प्र+अज्+घिच्+ण्वुल्।) सारथिः। यथा, मनुवचने। ८। १८१॥
"यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य च।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विगतं दमम्"
"यत्र सारथेरकौशल्यादुयानमन्यथा गच्छति तत्र हिंसायां अधिचितसारथिनियोगात् स्वामी द्विगतं दण्डं दण्ड्यः स्यादिति कुल्लूकभट्टः।" इति प्रायश्चित्ततत्त्वम्॥
प्राजनं, क्ली, (प्रवीयतेऽनेनेति। प्र+अज्+ल्युट्। "वा यौ।" २। ४। ५७॥ इति पक्षे व्यभावः।) तोदनम्। इत्यमरः। २। ८। १२॥ पाचनीवाड़ी इति भाषा॥
प्राजापत्यं, क्ली, (प्रजापतिर्देवतास्येति। प्रजापति+'दित्यदित्यादित्यपत्युत्तरपदात् ण्यः।' ४।१।८५।इति ण्यः।) द्वादशाहसाध्यव्रतविशेषः तत्र दिवसत्रयं रात्रिमात्रभोजनम्२२ग्रासाः। दिवसत्रयं दिवामात्रभोजनम् २६ ग्रासाः। दिवसत्रयं अयाचितभोजनम् २४ ग्रासाः। दिवसत्रयं उपवासः। यथा,—
"त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम्।
त्र्यहं परन्तु नाश्नीयात् प्राजापत्यं चरन् द्विजः॥"
ग्रासंख्या पराशरेणोक्ता।
"सायं द्वात्रिंशतिग्रासाः प्रातः षड्विंशतिस्तथा
अयाचिते चतुर्व्विंशः परस्यानशनं स्मृतम्॥"
इति प्रायश्चित्ततत्त्वम्॥*॥
तस्य अगम्यागमनादिप्रायश्चित्तम्। यथा,—
"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम्।
गुर्व्वङ्गान्द्रायणाद्विप्रः प्राजापत्येन भूमिपः।
वैश्यः शान्तपनाच्छूद्रः पञ्चाशोभिर्व्विशुध्यति॥
प्रायश्चित्ते कृते दद्याद्गवां ब्राह्मणभोजनम्॥"
इति गारुड़े २२६ अध्यायः॥*॥
रोहिणीनक्षत्रम्। यथा—
"ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा।
पूर्णिमा गुरुवारेण महाज्येष्ठी प्रकीर्त्तिता॥"
इति प्रायश्चित्ततत्त्वम्॥
(प्रजापतेरपत्यमिति। ण्यः प्रजापतिपुत्रः। यथा, कुमारे। ६। ३४॥
"तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे।
जहुः परिग्रहव्रीड़ां प्राजापत्यास्तपस्विनः॥"
प्रजापतेरिदमिति। प्रजापतिसम्बन्धिनि, त्रि। यथा, मार्कण्डेये। ४८। ७७॥
"प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम्।
स्थानमैन्द्रं क्षत्रियाणां सङ्ग्रामेष्वपलायिनाम्)"
प्राजापत्यः, पुं, (प्रजापतेरयमिति। प्रजापति+ण्यः। "प्रजापतेर्यज्ञ आसीत् प्रयागे।" इति महाभारतीय। १। ५५। १॥ वचनात् तथात्वम्।) प्रयागः। इति त्रिकाण्डशेषः॥ जैनराजभेदः। तत्पर्य्यायः। त्रिपुत्रः २। इति हेमचन्द्रः। ३। ५८॥ कायनामकविवाहः।

सह धर्म्मं चरतां इति नियमं कृत्वा कन्यादानम्। यथा,—
"इत्युक्ता चरतां धर्म्मं सहजा दीयतेऽर्थिने।
स कायः पावयेत्तल्लः षट् षड्वंश्यान् महात्मना॥"
इति मिताक्षरा॥
कायः कः प्रजापतिर्देवता अस्येति प्राज पत्य इत्यर्थः। इत्युदाहृतत्त्वम्॥ (तथा च मनुः। ३। ३०।
"सहोभौ चरतां धर्म्मामिति वाचानुभाष्य च।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥"
प्राजापत्या, स्त्री, (प्रजापतिर्देवतास्या इति। प्राजापति+यः। स्त्रियां टाप्।) प्रव्रज्याश्रमपूर्वकर्त्तव्यप्रजापतिदेवताकसर्वस्वदक्षिणा इष्टिः। यथा, मानवे ६ अध्याये।
"प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम्।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्॥"
प्राजिता, [ऋ] पुं, (प्राजतीति। प्र+अज्+तृच्। वोभावाभावः।) सारथिः। इत्यमरः। २। ८। ५८॥ प्रकृष्टगन्तरि, त्रि॥
प्राज्ञः, पुं, (प्रकर्षेण जानातीति। प्र+ज्ञा+कः। ततः प्रज्ञ एव स्वार्थे अण्।) कल्किदेवस्य ज्येष्ठभ्राता। यथा,—
"कल्किं द्रष्टुं हरेरंशमाविभूतं तथ शम्भले।
कविं प्राज्ञं सुमन्तञ्च पुरस्कृत्य महाप्रभम्॥"
इति कल्किपुराणे द्वितीय अध्यायः॥
पण्डितः। इत्यमरः। २। ७। ५॥ (यथा,—
"पण्डिते च गुणाः सर्वे मूर्खे दोषा हि केवलम्
तस्मान्मूर्खसहस्रेषु प्राज्ञ एको विशिष्यते॥"
इत्युद्भटः॥)
राजशुकः। इति राजनिर्घण्टः॥ (प्रकर्षेण अज्ञः इति विग्रहे मूर्खोऽपि॥)
प्राज्ञः, त्रि, (प्रज्ञ+स्वार्थे अण्। यद्वा, प्रज्ञास्त्यस्येति। अच्।) पण्डितः। (यथा, महाभारते। १। १४६। १८॥
"पौरेषु विनिवृत्तेषु विदुरः सर्वधर्म्मवित्।
बोधयन् पाण्डवश्रेष्ठमिदं वचनमब्रवीत्॥
प्राज्ञः प्राज्ञं प्रलापज्ञः प्रलापज्ञमिदं वचः॥")
दक्षः। इति शब्दरत्नावली॥ (विज्ञः। यथा, मनुः। २। १२३।
"नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैव च॥")
प्राज्ञमानी, [न्] त्रि, (आत्मानं प्राज्ञं मन्यते इति। प्राज्ञ+मन्+णिनिः।) पण्डितामानी। यथा, चरके।
"दुःखिताय श्रमाणाय श्रद्दधानाय रोगिणे।
यो भेषजमभिज्ञाय प्राज्ञमानी प्रयच्छति॥"
प्राज्ञा, स्त्री, (प्रज्ञास्त्यस्या इति। अच्। टाप्। बुद्धिमती। तत्पर्य्यायः। धीमती २। इत्यमरः। २। ६। १२॥ बुद्धिः। यथा,—
"प्रज्ञा प्राज्ञा धरा ज्ञप्तिः पण्डा संवेदनं विदा"
इति रायमुकुटधृतशब्दार्णवः॥
प्राज्ञी, स्त्री, (प्रज्ञ+स्वार्थे अण्। ङीप्।) स्वयं ज्ञात्री। तत्पर्य्यायः। प्रज्ञा २। इत्यमरः। २। ६। १२॥ पण्डितपत्नी। इति प्राज्ञशब्दटीकायां भानुदीक्षितः॥
प्राज्यं, त्रि, प्रवीयते इति। प्र+अज्+ण्यत्। वीभावाभावः।) प्रचुरम्। इत्यमरः। ३। १। ६३॥ (यथा, कुमारे। २। १८।
"स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य वः।
युगपद्युगवाहुभ्यः प्राग्भ्यः प्राज्यविक्रमाः॥"
प्रभूतं आज्यं घृतं यस्येति 'विग्रहे प्रचुरघृतसम्पन्नः। प्रकृष्टमाज्यमिति विग्रहे प्रकृष्टघृते, क्ली॥)
प्राञ्जलः, त्रि, (प्र+अञ्ज+बाहुलकात् अलच्।) सरलः। यथा,—
"ऋजावजिह्मप्रगुणौ प्राञ्जलः सरलोऽपि च।"
इति जटाधरः॥
प्राट्, [क्] पुं, पृच्छति यः। (प्रच्छ+"क्विप् वचिप्रच्छीति।" उणा० २। ५७। इति क्विप् दीर्घः सम्प्रसारणाभावश्च।) प्रश्नकर्त्ता। इति मुग्धबोधव्याकरणम्॥
प्राड्विवाकः, पुं, (पृच्छतीति प्राट् विविच्य वक्तीति विवाकः। ततः कर्म्मधारयः।) व्यवहारद्रष्टा। जज् इति इङ्गरेजी भाषा। तत्पर्य्यायः। अक्षदर्शकः २। इत्यमरः। २। ८। ५॥ व्यवहारदर्शी ३। इति शब्दरत्नावली॥ ४ व्यवहाराणां ऋणादानादिविवादानां द्रष्टरि निर्णेतरि धर्म्माध्यक्षे इत्यर्थः। पृच्छति वादिप्रतिवादिवाक्यं प्राट् दृष्ट्वाऽहवाक् प्राड्डिति निपातः विविच्य वक्ति विवाकः कर्मण्यण् इति घञ् प्राट् चासौ विवाकश्चेति प्राड्विवाकः।
"विवादानुगतं पृष्ट्वा पूर्ववाक्यं प्रयत्नतः।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः॥"
इति स्मृतिः। इति भरतः॥
अपि च। अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट् तयोर्वचनं विरुद्धाविरुद्धञ्च सभ्यैः सह विविनक्ति विवेचयति वेति विवाकः प्राट् चासौ विवाकश्चेति प्राड्विवाकः। उक्तञ्च।
"विवादानुगतं पृष्ट्वा ससभ्यस्तत् प्रजत्नतः।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः॥"
इति मिताक्षरा॥
प्राणः, पुं, (प्राणिति जीवति बहुकालमिति। प्र+अन्+अच्। प्राणित्यनेनेति करणे घञ् वा।) ब्रह्मा। इति त्रिकाण्डशेषः॥ ब्रह्माकृतः १ (यदुक्तम्।
'हृदिप्राणो गुदेऽपानः समानो नाभिसंस्थितः')
वोलः। काव्यजीवः। अनिलः। बलम्। (यथा, हरिवंशे। ८६। ३६।
"वाहुप्राणेन शूराणां समाजोत्सवसन्निधौ॥")
पूरिते, त्रि। इति मेदिनी॥ सूक्ष्मशरीरसमुद्भवहितचैतन्यम्॥ प्राग्गमनवान् नासाग्रस्थानवर्त्ती वायुः। इति वेदान्तसारः॥ तस्य कर्म्म बहिर्गमनम्। इति श्रीधरस्वामी॥ तस्य रूपं स्थानानि च यथा,—
"इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्त्तितम्।
आस्यनासिकयोर्म्मध्ये हृन्मध्ये नाभिमध्यगे॥
प्राणालय इति प्राहुः पादाङ्गुष्ठेऽपि केचन॥"
इति योगार्णवः॥
(यथा महाभारते। १२। ३२८। ३५।
"प्राणिनां सर्वतो वायुर्यश्चेष्टां वर्त्तयते पृथक्।
प्राणनाच्चैव भूतानां प्राण इत्यभिधीयते॥")
पञ्चप्राणविवरणं बहुवचनान्तप्राणशब्दे द्रष्टव्यम्॥ धातुः पुत्रः। यथा,—
"आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः।
भार्य्ये धातृविधातृभ्ये तयोर्जातौ सुतावुभौ॥
प्राणश्चैव मृकण्डश्च पिता मम महायशाः॥"
इति मार्कण्डेये रुद्रसर्गाध्यायः॥
(धरपुत्रविशेषः। यथा मत्स्यपुराणे। ५। २३-२४
"द्रविणो हव्यवाहश्च नरपुत्रावुभौ स्मृतौ।
कल्पानिन्यां ततः प्राणो रमणः शिशिरोऽपि च॥
मनोहरा धरात् पुत्रानवापाथ हरेः सुता॥")
प्राणकः, पुं, (प्राणैः प्राणेन वा कायतीति। कै+कः।) सत्त्वजातीयः। प्राणिमात्रम्। जीवद्रुमः। चोलः। इति मेदिनी। के, ११५।
प्राणथः, पुं, (प्राणित्यनेनेति। प्र+अन् प्राणने+"शीङ्शपिरुगमीति।" उणा० ३। ११३। इति अथः।) वायुः। (प्राणितीति। कर्त्तरि अथः।) बलवान् इत्युणादिकोषः॥ प्रजापतिः। तीर्थम्। इति संक्षिप्तसारोणादिवृत्तिः॥
प्राणदं, क्ली, (प्राणं प्राणनं बलं वा ददातीति। प्राण+दा+"आतोऽनुपेति।" ३। २। ३। इति कः।) जलम्। रक्तम्। इति हेमचन्द्रः। ४। १३६॥ (प्राणदातरि, त्रि। यथा, कथासरित्सागरे। २८। ९॥
"अर्थप्रदानमेवाहुः संसारे सुमहत् तपः।
अर्थदः प्राणदः प्रोक्तः प्राणा ह्यर्थेषु कीलिताः॥").
प्राणदः, पुं, (प्राणं ददातीति। दा+कः।) जीवकवृक्षः। इति राजनिर्घण्टः॥
प्राणदा, स्त्री, (प्राणं जीवनं बलं वा ददातीति। दा कः। टाप्।) ऋद्धिवृक्षः। हरीतकी। इति राजनिर्घण्टः॥ (प्राणदात्री। यदुक्तम्।
"यशोहरे किमार्य्ये प्राणदा यमदूतिका॥")
प्राणनं, क्ली, (प्र+अन प्राणने+ल्युट्।) जीवनम्। इति जटाधरः॥ (यथा, भागवते। ३। २६। ४१।
"क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम्
तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः॥"
चेष्टनम्। यथा, ऋग्वेदे। १। ४८। १०।
"विश्वस्य हि प्राणनं जीवनं त्वे वियद्युक्ष्मि सूनरि॥"
"हे सूनरि उषोदेवि विश्वस्य सर्वस्य प्राणिजातस्य प्राणनं चेष्टनं जीवनं प्राणधारणञ्च।"

इति तट्टीकायां सायनः ॥ प्राणित्यनेनेति करणे क्युट्) गले, पुं । (इति शब्दचन्द्रिका ॥
प्राणनाथः, पुं,(प्राणानां नाथः ।) पतिः । इति शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"चाटुकारमपि प्राणनाथं रोषादपास्य या ।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा ॥"
स्त्रियां टाप् । पत्नी । यथा, विष्णुस्तोत्रे ।८।
"धात्रीं धात्रीं जनित्रीं प्रकृतिमविकृतिं विश्व शक्तिं विधात्रीं
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि ॥")
प्राणन्तः,पुं,(प्राणित्यनेनेति। प्र+अन्+"रुहि नन्दिजीविप्राणिभ्यः पिदाशिषि ।" उणा० ३ । १२७ । इति झच् ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ रसाञ्जनम्। इत्युणादि कोषः ॥
प्राणन्ती, स्त्री, (प्र+अन् झच् । स च पित् । पित्त्वात् ङीप् ।) क्षुत् । हिक्का । इत्युणादिकोषः ॥
प्राणप्रदा,स्त्री,(प्राणं प्रददातीति। प्र+दा+कः) ऋद्धिनामकौषधम् । इति रत्नमाला ॥ (प्राणदातरि, त्रि । यथा,कथासरित्सागरे ।२२।८६।
"त्वाञ्च दृष्ट्वाधुनाऽऽयोयो देवि ! प्राणप्रदः सुहृत्
सार्थवाहसुतः श्रीमान् वसुदत्तो मया स्मृतः॥")
प्राणभास्वान्, [त्] पुं, (प्राणेन वायुना जलेन वा भास्वान् उद्दीप्तः । समुद्रः । इति शब्दरत्नावली ॥
प्राणमयकोषः,पुं,(प्राणमयः कोषः आच्छादकः।) कर्म्मेन्द्रियसहितप्राणादिपञ्चकम् । इति वेदान्तसारः ॥
प्राणसंयमः, पुं, (प्राणानां संयमः ।) प्राणायामः । यथा, "तदशक्तौ तच्चतुर्थमेवं प्राणस्य संयमः ॥" इति तन्त्रसारः ॥
प्राणसङ्ग, [न्] क्लो, प्राणानां सङ्ग गृहम् ।) शरीरम् । इति केचित् ॥
प्राणसमा, स्त्री, (प्राणानां समा ।) पत्नी । इति हेमचन्द्रः । ३ । १८० ॥ (यथा, गीतगोविन्दे । १ । ३८ ।
"नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः॥"
प्राणतुल्ये, त्रि । यथा, रामायणे ।१।१।२६ ।
"रामस्य दयिता भार्य्या नित्यं प्राणसमा हिता ॥"
तथा च तत्रैव । २ । ३१ । १० ।
"प्रियः प्राणसमो वश्यो विधेयश्च सखा च मे॥"
पत्यौ, पुं । इति हेमचन्द्रः । ३ । १८० ॥)
प्राणहारकं, क्लो, (प्राणान् हरतीति । हृ+खुल् ।) वत्सनाभः । इति राजनिर्घण्टः ॥ असनाश्रके, त्रि ॥
प्राणाः,पुं,(प्राण्यन्तेभिरिति । प्र+अन+करणे घञ् । असवः । इत्यमरः । २ । ८ । ११८ ॥
"हे अङ्गसन्निहितेषु पञ्चवायुषु । अस्यन्ते असवः नाम्नीति डः । प्राणिति एभिः प्राणाः घञ् । एवमिति असुवत् प्राणा अपि पुं बहुत्वे इत्यर्थः असुप्राणशब्दाभ्यां बहुवचनान्ताभ्यां पञ्चप्राणादय उच्यन्ते न पुनरेकैकाभिधाने बहुवचनम् अतएव प्राणोऽपान इत्युक्तं हृदि प्राणो गुदेऽपान इत्यादि च दृश्यते ।" इति तट्टीकायां भरतः ॥ (यथा, हितोपदेशे । १ । ७३ ।
प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतानां दयां कुर्वन्ति साधवः ॥")
शरीरस्थपञ्चप्राणा यथा,—
"प्राणोऽपानः समानोदानव्यानौ च वायवः ॥"
शरीरस्था इमे————————॥"
इत्यमरः । १ । १ । ६७ ॥
"इमे प्राणादयः पञ्च वायवः शरीरे तिष्ठन्ति ते च नियतस्थानस्थाः ॥ यदाहुः ।
"हृदि प्राणो गुदे पानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशे च व्यानः सर्वशरीरगः ॥"
एवं तद्व्यापाराश्च यथा,—
अन्नप्रवेशनं सूत्राद्युत्सर्गोऽन्नविपाचनम् ।
भाषणादिनिमेषादितद्व्यापाराः क्रमादमी ॥"
इति च भरतः ॥
प्राणकराणि यथा,—
सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदकञ्चैव सद्यःप्राणकराणि षट् ॥"
प्राणहराणि यथा,—
"शुष्कं मांसं स्त्रियो हृद्धा बालार्कस्तरुणं दधि
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"
इति चाणक्यकर्म्मलोलोचने ॥
प्राणवियोगकालकर्त्तव्यं यथा,—
कण्ठस्थानं गते जीवे भीतिविभ्रान्तमानसः ।
ज्ञात्वा च विह्वलं तत्र शीघ्रं निःसारयेद्गृहात्॥
कुशास्तरणशायी च दिग्वासाः सर्वदा न पश्यति ।
लब्धस्मृतिमुहूर्त्तात्तु यावज्जीवो न नश्यति ॥
वाचयेत् स्वेहभावेन भूमे देवा द्विजातयः ।
सुवर्णञ्च हिरण्यञ्च यथोत्पत्त्येन माधवि ॥
परलोकहितार्थाय गोप्रदानं विशिष्यते ।
सर्व्वदेवमया गाव ईश्वरेणावतारिताः ॥
अमृतं चरयन्त्यश्च प्रचरन्ति महीतले ।
एतासाञ्चैव दानेन शीघ्रं मुच्येत किल्बिषात् ॥
पश्चात् श्रुतिपथं दिव्यमुत्कर्णेन च श्रावयेत् ।
यावत्प्राणान् प्रमुञ्चेत कृत्वा कर्म्म सुदुष्करम् ॥
दृष्ट्वा सुविह्वलं क्षीणं मम मार्गानुसारिणम् ।
प्रयाणकाले तु नरो मन्त्रेण विधिपूर्व्वकम् ॥
मन्त्रेणानेन कर्त्तव्यं सर्व्वसंसारमोचणम् ।
मधुपर्कं त्वरन् गृह्य इदं मन्त्रमुदाहरेत् ॥"
मन्त्रः ।
"गृहाण चेमं मधुपर्कमाद्यं
संसारनाशनकरं त्वमृतेन तुल्यम् ।
नारायणेन रचितं भगवत्-प्रियार्थां
दाहे च शान्तिकरणं सुरलोकपूज्यम् ॥
ततः एतेन मन्त्रेण दद्याद्वै मधुपर्ककम् ।
पुरुषो मृत्युकाले तु परलोकसुखावहम् ॥
एवं विनिःसृतात् प्राणात् संसारञ्च न गच्छति
नष्टसंज्ञं समुद्दिश्य ज्ञात्वा मृत्यवशं गतम् ॥
महावनस्पतिं गत्वा गव्यांश्च विविधानपि ।
घृततैलसमायुक्तं कृत्वा वै देहशोधनम् ॥
तेजोऽव्ययकरं वास्य तत्सर्व्वं परिकल्प्य च ।
दक्षिणायां शिरः कृत्वा सलिले तं निधाय च ॥
तीर्थाद्यावाहनं कृत्वा स्नापनं तस्य कारयेत् ॥
गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः ।
कुरुक्षेत्रञ्च गङ्गा च यमुना च सरिद्वरा ॥
कौशिकी च पयोष्णी च सर्व्वपापप्रणाशिनी ।
गण्डकी भद्रनामा च सरयूर्बलदा तथा ॥
वनानि नववाराहं तीर्थं पिण्डारकं तथा ।
पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा
सर्व्वाणि मनसा ध्यात्वा स्नानमेवन्तु कारयेत् ॥
प्राणाहृतन्तु तं ज्ञात्वा चितां कृत्वा विधानतः ।
तस्या उपरि तं स्थाप्य दक्षिणाग्रं शिरस्तथा ॥
देवानग्निमुखान् ध्यात्वा गृह्य हस्ते हुताशनम्
प्रज्वाल्य विधिवत्तत्र मन्त्रमेतदुदाहरेत् ॥"
मन्त्रः ।
"कृत्वा तु दुष्करं कर्म्म जानता वाप्यजानता ।
मृत्युकालवशं प्राप्य नरः पञ्चत्वमागतः ॥
धर्म्माधर्म्मसमायुक्तो लोभमोहसमाहतः ।
दहेयं तस्य गात्राणि दैवलोकाय गच्छतु ॥
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम् ।
ज्वलमानं तदा वह्निं शिरःस्थाने प्रदापयेत् ॥
चातुर्व्वर्ण्येषु संस्कारमेवञ्चैवति पुत्रक ! ।
गात्राणि वाससी चैव प्रक्षाल्य विनिवर्त्तयेत् ॥
मृतनाम तथोद्दिश्य दद्यात् पिण्डं महीतले ।
तदाप्रभृति चाशौचं दैवकर्म्म न कारयेत् ॥"
इति वराहपुराणे श्राद्धोत्पत्तिनामाध्यायः ॥
प्राणा,स्त्री,(प्राणिति बहुकालमिति । प्र+अन्+अच् । टाप् ।) पक्षिणीविशेषः । सा चारुणगरुड़योः श्वश्रूः । यथा,—
"पुलहस्यात्मजः सर्गः प्राणायास्तु निबोधत ।
कन्याः पञ्चेति विख्याताः प्राणाया वै विजज्ञिरे॥
श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री शुनी शुकी
अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ ॥
सम्पातिश्च जटायुश्च प्रसूतौ पक्षिणौ सत्तमौ ।
सम्पातिर्जनयन् गृध्रान् काकाः पुत्रा जटायुषः
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी॥"
इत्यग्निपुराणम् ॥
प्राणाधिनाथः,पुं, (प्राणानामधिनाथः ।)पतिः । इति हलायुधः । २ । ३४२ ॥
प्राणापानौ, पुं, (प्राणश्च अपानश्च तौ । तदाख्यौ वायू । यथा, विष्णुपुराणे ।६।७।४१ ।
"परस्परेणाभिभवं प्राणापानौ यदानिलौ ॥")
अश्विनीकुमारौ । यथा,—
"प्राणापानौ कथं देवावश्विनौ संबभूवतुः ॥"
इति प्रजापालप्रश्ने ।

महातप उवाच ।
"तस्यां त्वाट्टग्रामखरूप्यां मार्त्तण्डस्तीव्रतेजसा
बीजं निर्व्वापयामास तज्जलं तद्विधापतत् ॥
तत्र प्राणस्त्वपानश्च योनौ चात्मजितौ पुरा ।
वरदानेन च पुनर्मुर्त्तिमन्तौ बभूवतुः ॥
तौ त्वाट्टग्रामखरूरिण्यां जातौ यौ नरोत्तमौ ।
ततस्तावश्विनौ देवौ कीर्त्यते रविनन्दनौ ॥"

इति वाराहे अश्विनोत्पत्तिनामाध्यायः ॥

प्राणायामः, पुं, (प्राणस्य वायुविशेषस्य आयामो रोधः । यद्वा, प्राण आयस्यतेऽनेनेति । आ + यम् + करणे घञ् ।) योगाङ्गविशेषः । (यथा, भागवते । ३ । २८ । ११ ।
"प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥")

तत्राङ्गुलिनियमो ज्ञानार्णवे ।
"कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम् ।
प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना ॥"
स द्विविधः । सगर्भो निर्गर्भश्च । तथा च ।
"सगर्भो मन्त्रजापेन निर्गर्भो मात्रया भवेदिति"
मात्रा च ।
वामजानुनि तद्धस्तभ्रामणं यावता भवेत् ।
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः ॥"
अथ प्राणायामः । मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोड़शवारजपेन वामनासापुटे वायुं पूरयेत् तस्य चतुःषष्टिवारजपेन वायुं कुम्भयेत् । तस्य द्वात्रिंशद्वारजपेन वायुं रेचयेत् । पुनर्दक्षिणेनापूर्य्य उभाभ्यां कुम्भयित्वा वामेन रेचयेत् । पुनर्वामेनापूर्य्य उभाभ्यां कुम्भयित्वा दक्षिणेन रेचयेत् । तथा च कालीहृदये ।
"प्राणायामत्रयं कुर्य्यान्मूलेन प्रणवेन वा ।
अथवा मन्त्रबीजेन यथोक्तविधिना सुधीरिति॥"
सारसमुच्चयेऽपि ।
"विपरीतमतो विद्धीत बुधः
पुनरेव तु तद्विपरीतकर्मति ॥"
यौगिके पुनर्मात्रानियमः । तथा च गौतमीये ।
"मन्त्रः प्राणायामः प्रोक्तो यौगिकं कथयामि ते
पूरयेद्यमया विद्वान् मात्राषोड़शसंख्यया ॥"
यद्वा, चतुःषोड़शाष्टवारजपेन पूरकादिकं कुर्य्यात् । अथवा एकचतुर्द्विवारेण । तथा च तन्त्रान्तरे ।
"पूरयेत् षोड़शभिर्वायुं धारयेत्तच्चतुर्गुणैः ।
रेचयेत् कुम्भकार्द्धेन अशक्त्या तत्तुरीयकैः ॥"
तदशक्तौ तच्चतुर्थमेव प्राणस्य संयमः । अस्य नित्यत्वमाह तत्रैव ।
"प्राणायामं विना मन्त्रपूजने न हि योग्यता॥"
गोपालौ तु विशेषो यथा, —
कामबीजस्यैकवारजपेन दक्षिणनासया वायुं रेचयेत् । पुनः सप्तवारजपेन वामनासया वायुं पूरयेत् । नासापुटौ धृत्वा विंशतिवारजपेन वायुं कुम्भयेत् । पुनर्वामेन रेचयेत् । दक्षिणेन पूरयेत् । उभाभ्यां कुम्भयेत् पुनर्दक्षिणेन रेचयेत् । वामेनापूर्य्य उभाभ्यां कुम्भयेत् । तथा च ।
"एकेन रेचयेत् कामबीजेनैव पृथक् पृथक् ।
पूरयेत् सप्तजप्तेन विंशत्या तेन धारयेत् ।
सर्व्वेषु कृष्णमन्त्रेषु बीजेनानेन रेचयेत् ॥"
यद्वा मूलमन्त्रेणैव प्राणायामः । तथा च ।
"पवनसंयमनन्त्वमुनाचरेत् ।
यमिह जप्तुमसौ मनुमिच्छति ।"
यदि दशाक्षरं जपति तदा दशाक्षरेण चेत्तच्च चाष्टाविंशतिवारं रेचयेत् ।
"पूरयेद्दामया तद्दशधा रेचपूरककुम्भकैः ॥
प्राणायामौ भवेदेको रेचपूरककुम्भकैः ॥
अष्टाद्यक्षरेण चेत् द्वादशैवं समाचरेत् ॥"
अन्यमनुभिर्वर्णानुरूपमित्युक्तत्वात् ।
तत्तन्मन्त्रवर्णसंख्याकै रेचकादित्रयं कुर्य्यात् ।
क्रमदीपिकायां । रेचयेन्मारुतं दक्षया दक्षिणः । पूरयेद्दामया मध्यनाड्या पुनर्धारयेदित्यादि एतत्तु श्रीकृष्णमन्त्रविषयं नान्यत्र ।
इति तन्त्रसारः ॥ * ॥ अपि च ।
"आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः ।
मन्त्रध्यानयुतो गर्भो विपरीतो ह्यगर्भकः ॥
अगर्भात्तु सगर्भस्थः प्राणायामस्ततोऽधिकः ।
एवं द्विधा त्रिधाप्युक्तः पूरणात् पूरकः स च ॥
कुम्भको निश्चलत्वात् स रेचनाद्रेचकस्त्रिधा ।
लघुर्द्वादशमात्रः स्याच्चतुर्व्विंशतिकः परः ॥
षट्त्रिंशन्मात्रिकः श्रेष्ठः प्रत्याहारश्च रोधनम्॥"

इति गारुड़े ४८ अध्यायः ॥*॥

तस्य फलं यथा,—
"प्रथमे जनयेत् स्वेदं मध्यमेन च वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषानुक्रमात् ॥"

इति तत्रैव २३० अध्यायः ॥ * ॥

अन्यच्च ।
"यथा पर्व्वतधातूनां ध्मातानां दह्यते मलम् ।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ॥
प्रथमं साधनं कुर्य्यात् प्राणायामस्य योगवित् ।
प्राणापाननिरोधस्तु प्राणायाम उदाहृतः ॥
लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदलर्क ! शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिश्च मात्राभिरुत्तरीय उदाहृतः ॥
निमेषोन्मेषणे मात्रा तालो लघ्वक्षरो मतः ।
प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः ॥
प्रथमे जनयेत् स्वेदं मध्यमेन तु वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषानुक्रमात् ॥
मृदुत्वं सेव्यमानास्तु सिंहशार्दूलकुञ्जराः ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः॥
वश्यं सन्तं यथेच्छातो नागं नयति हस्तिपः ।
तथैव योगी कृन्देन प्राणं नयति साधितम् ॥
यथा हि साधितः सिंहो मृगान् हन्ति न मानुषान् ।
तद्वन्निषिद्धः पवनः किल्बिषं न नृणां तनुम् ।
तस्मादयुक्तः सदा योगी प्राणायामपरो भवेत्
शृणुतां मुक्तिफलदं तस्यावस्थाचतुष्टयम् ॥
ध्वस्तिः प्रास्तिस्तथा सम्विन्नसादश्च महीपते ! ।
स्वरूपं शृणु चैतेषां कथ्यमानमनुक्रमात् ॥
कर्म्मणामिष्टदुष्टानां जायते फलसंचयः ।
चेतसो विक्षेपायत्वं यत्र सा ध्वस्तिरुच्यते ॥"
इष्टदुष्टानां पुण्यपापानाम् ।
ऐहिकामुष्मिकान् कामान् लोभमोहात्म-
कांश्च यान् ।
निरुध्यास्ते सदा योगी प्राप्तिः सा सार्व्व-
कामिकी ॥
अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ।
विजानन्तीन्दूसूर्य्यं चंयहाणां ज्ञानसम्पदा ॥
तुल्यप्रभावस्तु यदा योगी प्राप्नोति सम्विदम् ।
तदा सम्विदिति ख्याता प्राणायामस्य सा
स्थितिः ॥
यान्ति प्रसादं येनास्य मनः पञ्च च वायवः ।
इन्द्रियाणीन्द्रियार्थाश्च स प्रसाद इति स्मृतः ।
शृणुष्व च महीपाल ! प्राणायामस्य लक्षणम् ।
युञ्जतश्च यथायोगं यादृग्विहितमानसम् ॥"
इति मार्कण्डेयपुराणे योगिचिकित्सानामाध्यायः ॥*॥ अन्यच्च ।
"प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यत्
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च॥
परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः सहितेनैव तृतीयः संयमात् तयोः ॥
तस्य चालम्बनवतः स्थूलरूपं द्विजोत्तम ! ।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम् ॥"
एतेषां टीका ।"प्राणायाममाह प्राणाख्यमिति सबीजः सालम्बनो भगवन्मूर्त्तिध्यानमन्त्रजपसहितः । द्विविधस्यापि तस्य पुनर्भेदं विधमाह परस्परेणेति । उच्छ्वासेन मुखनासिकाभ्यां बहिर्निर्गच्छति वायुः स प्राणः । निश्वासेनान्तः प्रविशति यः सोऽपानः । तत्र प्राणहृत्यापानहृत्तेरभिभवो निरोधो रेचकाख्यः प्राणायामः । एवमपानहृत्वा प्राणहृत्तेरभिभवः पूरकाख्यः । एवमनेन परस्पराभिभवप्रकारद्वयेन स प्राणायामो द्विधा तयोर्युगपत्संयमात् कुम्भकाख्यस्तृतीयः प्राणायामः यद्वा । सहितेनेत्येकमेव पदम् । तत्र चायमर्थः । सहितेन सद्गुरूपदिष्टमार्गेण रेचकपूरकाभ्यां यत् परस्पराभिभूतं हृयं यच्च कुम्भकेनोभयोः सहाभिभवः । एवमभिभवत्रयेणैव प्राणायाम इति । सबीजस्यालम्बनमाह । तस्य चेति । स्थूलं वक्ष्यमाणं हिरण्यगर्भादिरूपम् ।"इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥ * ॥ गायत्रीप्राणायामो यथा,—
"सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥
प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः
अहोरात्रकृतात् पापान्मुच्यते नात्र संशयः ॥
सर्व्वपापहरं प्रोक्तं प्राणायामं द्विजन्मनाम् ।

ततस्त्वभ्यधिकं नास्ति तपः परमपावनम् ॥
प्राणसंधारणं मासं कुशाग्रस्थघृतबिन्दुना ।
यः कुर्य्यात् प्रयतो नित्यं प्राणायामस्तु तत्समः॥
निरोधाज्जायते वायुस्तस्मादग्निस्ततो जलम्।
त्रिभिः शरीरं सकलं प्राणायामेन शुध्यति ॥
आकेशादानखाग्राच्च तपस्तप्येत सुदारुणम् ।
आत्मानं शोधयेदेवस्तु प्राणायामैः पुनः पुनः ॥
श्रावण्यां पौर्णमास्यान्तु सोपवासो जितेन्द्रियः।
प्राणायामशतं कृत्वा मुच्यते सर्वकिल्बिषैः ॥"
इत्यग्निपुराणम् ॥

प्राणिद्यूतं, क्ली, (प्राणिभिर्मे नादिभिः कृतं द्यूतमिति मध्यपदलोपो समासः ।)पणपूर्व्वकमेषकुक्कुटादियुद्धम् । तत्पर्य्यायः । समाह्वयः २ । इत्यमरः । २ । १० । ४६ ॥ साह्वयः । ३ । इति शब्दरत्नावली ॥

प्राणिमाता, स्त्री, (प्राणिनां मातेव गर्भदात्रत्वात् ।)गर्भदात्रीस्त्रियः । इति राजनिर्घण्टः ॥

प्राणिहिता, स्त्री, (प्राणिनां हिता ।) पादुका । इति त्रिकाण्डशेषः ॥ लोकहितकारिणी च ॥

प्राणी, [न्] त्रि, (प्राणाः सन्त्यस्येति । प्राण+ "अत इनिठनौ ।"५ । २।११५ । इति इनिः।) प्राणविशिष्टः। मनुष्यादिः। तत्पर्य्यायः। चेतनः २ जन्मी ३ जन्तुः ४ जन्युः५ शरीरी ६ । इत्यमरः । १ । ४ । ३० ॥ (यथा, मनौ । १ । २२ । "कर्म्मात्मनाञ्च देवानां सोऽसृजत् प्राणिनां प्रभुः ।
साध्यानाञ्च गणं सूक्ष्मं यज्ञञ्चैव सनातनम्॥")

प्राणीत्वं, क्ली, (प्रणीतस्य प्रयोजितस्य भावः । प्रणीत+ष्यञ्।)ऋणम् । यथा, त्रिकाण्डशेषः। "प्राणीत्वमृणमर्थानां प्रयोगः स्यात् कलाम्बिका ॥"

प्राणेशः, पुं, (प्राणानामीशः ।) पतिः इति जटाधरः ॥(यथा, साहित्यदर्पणे ३ परिच्छेदे । "स्वामिन् ! भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु
प्राणेश ! त्रुटितं पयोधरतटे हारं पुनर्योजय ॥")

प्राणेश्वरी, स्त्री, (प्राणानामीश्वरी ।) भार्य्या । इति हेमचन्द्रः ॥

प्रातः, [र्] व्य, (प्रातनोति । प्र+अत्+ "प्रातते रन्।" उणा० ५।५६। इति अरन् ।) प्रभातम् । तत्पर्य्यायः । प्रगे २ । इत्यमरः । ३। ४ ।१८॥ सूर्य्योदयादवधिर्मुहूर्त्तकालः । यथा,—
"प्रातःकालो मुहूर्त्तांस्त्रीन् मङ्गवस्तावदेव तु॥"
इति तिथ्यादितत्त्वम् ॥
(यथा, रघौ । १ । ९० ।
"प्रयता प्रातरन्वे तु सायं प्रत्युद्व्रजेदपि ॥")

प्रातःकृत्यं,क्ली,(प्रातःप्रभातकालस्य कृत्यं कर्त्तव्या क्रिया ।) प्रभातकर्त्तव्यकर्म्म । तदनुष्ठानं यथा,
"ब्राह्मे मुहूर्त्ते उत्थाय धर्ममर्थञ्च चिन्तयेत्।
कायक्लेशन्तदुद्भूतं ध्यायेत्तं मनसेश्वरम् ॥
उषःकालेऽथ संप्राप्ते कृत्वा चावश्यकं बुधः।
स्नायाच्चतुर्षु शुद्धासु शौचं कृत्वा यथाविधि ॥
प्रातःस्नानेन शुध्यन्ति येऽपि पापकृतो जनाः।
तस्मात् सर्व्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं शुभम्।
ऋषीणां शुचिता नित्यं प्रातःस्नानाच्च संशयः॥
मुखे सुप्तस्य मलतं लालाद्याः प्रस्रवन्ति हि।
ततो नैवाचरेत् कर्म्माण्यकृत्वा स्नानमादितः॥
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम्
प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः ॥
न च स्नानं विना पुंसां पावनं प्रत्यहं स्मृतम्।
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत्॥
अशक्तावशिरस्कं वा स्नानमस्य विधीयते।
आर्द्रेण वाससा चाथ मार्জनं कायिकं स्मृतम्
अप्रायत्ये समुत्पन्ने स्नानमेव समाचरेत्।
ब्राह्मादीनि यथाशक्ति स्नानान्याहुर्म्मनीषिणः॥
ब्राह्ममाग्नेयमुद्दिष्टं वायव्यं दिव्यमेव च।
वारुणं यौगिकं तद्वत् षोढा स्नानं प्रकीर्त्तितम्॥
ब्राह्मन्तु मार्জनं मन्त्रैः कुशैः सोदकबिन्दुभिः।
आग्नेयं भस्मना पादमस्तकादिविधूननम्॥
गवां हि रजसा प्रोक्तं वायव्यं स्नानमुत्तमम्।
यत्तु सातपवर्षेण स्नानन्तद्दिव्यमुच्यते॥
वारुणञ्चावगाह्यान्तु मानसन्त्वात्मवेदनम्।
यौगिकं स्नानमाख्यातं योगी विष्णुविचिन्तनम्
आत्मतीर्थमिति ख्यातं सेवितं ब्रह्मवादिभिः॥
मनःशुचिकरं पुंसां नित्यन्तत्स्नानमाचरेत्।
शक्तश्चेद्वारुणं विद्वान् प्राजापत्यन्तथैव च ॥*॥
प्रक्षाल्य दन्तकाष्ठं वै भक्षयित्वा विधानतः।
आचम्य प्रयतो नित्यं स्नानं प्रातः समाचरेत् ॥
मध्याङ्गुलसमस्थौल्यं द्वादशाङ्गुलसम्मितम्।
सत्वचं दन्तकाष्ठं स्यात्तस्याग्रेण च धावयेत् ॥
चौरिक्षुसमुद्भूतं मालतीसम्भवं शुभम्।
अपामार्गञ्च विल्वञ्च करवीरं विशेषतः ॥
वर्জयित्वा निन्दितानि गृहीत्वैवं यथोदितम्।
परिक्षिप्य दिनं पापं भक्षयित्वा विधानतः॥
नोत्पाटयेद्दन्तकाष्ठं नाङ्गुल्या धावयेत् क्वचित्
प्रक्षाल्य भुक्त्वा तज्जाच्छुचौ देशे समाहितः॥
स्नात्वा सन्तर्पयेद्देवानृषीन् पितृगणांस्तथा।
सम्मार्ज्य मन्त्रैरात्मानं कुशैः सोदकबिन्दुभिः॥
आपोहिष्ठाव्याहृतिभिः सावित्र्या वारुणैः शुभैः।
ॐकारव्याहृतियुतां गायत्रीं देवमातरम्।
जप्त्वा जलाञ्जलिं दद्याद्भास्करं प्रति तन्मनाः॥
प्राक्कूलेषु समासीनो दर्भेषु सुसमाहितः।
प्राणायामत्रयं कृत्वा ध्यायेत्सन्ध्यामिति स्मृतिः
या सन्ध्या सा जगत्सूतिर्माया तीता च निष्कला।
ऐश्वरी तु परा शक्तिस्तत्सन्ध्यसमुद्भवा ॥
ध्यात्वार्कमण्डलगतां विप्रः सन्ध्योपासनमाचरेत्
प्राङ्मुखः सततं विप्रः सन्ध्योपासनमाचरेत् ॥
सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु।
यदन्यत् कुरुते किञ्चित् न तस्य फलमाप्नुयात्॥
अनन्यचेतसः शान्ता ब्राह्मणा वेदपारगाः।
उपास्य विधिवत् सन्ध्यां प्राप्नुवन्ति परमां गतिम्
योऽन्यत्र कुरुते यत्नादन्यकार्य्यं द्विजोत्तमः।
विहाय सन्ध्याप्रणतिं स याति नरकायुतम॥
तस्मात् सर्व्वप्रयत्नेन सन्ध्योपासनमाचरेत्।
उपासितो भवेत्तेन देवो योगतनुः परः॥
सहस्रपरमां नित्यं शतमध्यां दशावराम्।
सावित्रीं वै जपेद्विद्वान् प्राङ्मुखः प्रयतः स्थितः
अथोपतिष्ठेदादित्यमुदयन्तं समाहितः।
मन्त्रैस्तु विविधैः सौरैर्ऋग्यजुःसामसम्भवैः॥
उपस्थाय महायोगं देवदेवं दिवाकरम्।
कुर्व्वीत प्रणतिं भूमौ मूर्द्धा नित्यञ्च मन्त्रवत्॥*
ॐ खं खखोल्काय शान्ताय कारणत्रयहेतवे।
निवेदयामि चात्मानं नमस्ते ज्ञानरूपिणे ॥
नमस्ते घृणये तुभ्यं सूर्य्याय ब्रह्मरूपिणे।
त्वमेव ब्रह्म परममापो ज्योती रसोऽमृतम्॥
भूर्भुवः स्वस्त्वमोङ्कारः सर्वे रुद्राः सनातनाः।
पुरुषः सन्महोऽतस्त्वां प्रणमामि कपर्दिनम्॥
त्वमेव विश्वं बहुधा सदसत् सूयसे च यत्।
नमो रुद्राय सूर्य्याय त्वामहं शरणं गतः॥
प्राचेतसे नमस्तुभ्यसुमायाः पतये नमः।
नमोऽस्तु नीलग्रीवाय नमस्तुभ्यं पिनाकिने॥
विलोहिताय भर्गाय सहस्राक्षाय ते नमः।
नम उमापतये तुभ्यमादित्याय नमोऽस्तु ते॥
नमस्ते बहुहस्ताय त्र्यम्बकाय नमोऽस्तु ते।
प्रपद्ये त्वां विरूपाक्ष ! महान्तं परमेश्वरम्॥
हिरण्मये गृहे गुप्तमात्मानं सर्व्वदेहिनाम्।
नमस्यामि परं ज्योतिर्ब्रह्माणं त्वां परामृतम्॥
विश्वं पशुपतिं भीमं नरनारीशरीरिणम्।
नमः सूर्य्याय रुद्राय भास्वते परमेष्ठिने।
उग्राय सर्व्वभक्षाय त्वां प्रपद्ये सदैव हि ॥*॥
एतद्वै सूर्य्यहृदयं जप्त्वा स्तवमनुत्तमम्।
प्रातःकालेऽथ मध्याह्ने नमस्कुर्य्याद्दिवाकरम्॥
इदं पुत्राय शिष्याय धार्म्मिकाय द्विजातये।
प्रदेयं सूर्य्यहृदयं ब्रह्मणा तु प्रदर्शितम्॥
सर्व्वपापप्रशमनं वेदसारं समुद्धृतम्।
ब्राह्मणानां हितं पुण्यं ऋषिसंघैर्निषेवितम्॥
यस्तु नित्यं पठेद्धीमान् प्रेक्षन्नादित्यमण्डलम्।
महापातकयुक्तोऽपि मुच्यते नात्र संशयः॥
क्षयापस्मारकुष्ठाद्यैर्व्याधिभिः पीड़ितोऽपि सन्
जप्त्वा शतगुणं स्तोत्रं स ह्याप्यो भवति द्रुतम्॥
भूतग्रहपिशाचातिबीजव्यसनकर्षिभिः।
स्तुवन् ध्यात्वा हरिं विप्रो मुच्यते महतो भयात्
अथागत्य गृहं विप्रः समाचम्य यथाविधि।
प्रज्वाल्य वह्निं विधिवज्जुहुयाज्जातवेदसम्॥
ऋत्विक्पुत्रोऽथ पत्नी वा शिष्यो वापि सहोदरः।
प्राप्यानुज्ञां विशेषेण जुहुयुर्व्वा यथाविधि॥
पवित्रपाणिः पूतात्मा शुक्लाम्बरधरोत्तरः।
अनन्यमानसो भूत्वा जुहुयात् संयतेन्द्रियः॥
विना दर्भेण यत् कर्म्म विना मन्त्रेण वा पुनः
राक्षसं तद्भवेत् सर्व्वं नामुत्रेह फलप्रदम् ॥*॥

देवतानि नमस्कुर्य्यादेयमारान्निवेदयेत्।
दद्यात् पुष्पादिकं तेषां हृदांश्चैवाभिवादयेत्॥
गुरुञ्चैवाभुग्नपासीत हितञ्चास्य समाचरेत्।
वेदाभ्यासं ततः कुर्य्यात् प्रयत्नाद्भक्तितो द्विजः॥
जपेदध्यापयेच्छिष्यान् श्रावयेच्च विधारयेत्।
अवेक्षेत च शास्त्राणि धर्म्मादीनि द्विजोत्तमः॥
वैदिकांश्चैव नियमान् वेदाङ्गानि विशेषतः।
उपेयादीश्वरञ्चाथ योगक्षेमप्रसिद्धये॥
साधयेद्विविधान्नर्थान् कुटुम्बार्थे ततो द्विजः॥"
इति कौर्म्मे उपविभागे १७ अध्यायः॥ *॥

अपि च।
"प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुम्।
प्रसन्नवदनं शान्तं स्मरेत्तन्नामपूर्व्वकम्॥"
ॐ नमो गुरवे तस्मा इष्टदेवस्वरूपिणे।
यस्य वाक्यामृतं हन्ति विषं संसारसंज्ञकम्॥"
इति पठेत्॥

"अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न
शोकभाक्।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान्॥"
इति भावयेत्।

"लोकेश! चैतन्यमयादिदेव
श्रीकान्त विष्णो भवदाज्ञयैव।
प्रातः समुत्थाय तव प्रियार्थं
संसारयात्रामनुवर्त्तयिष्ये॥
जानामि धर्म्मं न च मे प्रवृत्ति-
र्जानाम्यधर्म्मं न च मे निवृत्तिः।
त्वया हृषीकेश! हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि॥"

विष्णुपुराणे।
"प्रबुद्धचिन्तयेद्धर्म्ममर्थञ्चास्याविरोधिनम्।
अपीड्या तयोः काममुभयोरपि चिन्तयेत्॥"
धर्म्मलक्षणन्तु भविष्ये।
'धर्म्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयसाधनम्॥"
अतएव जैमिनिः। चोदनालक्षणोऽर्थो धर्म्म
इति। तेन वैदिकलिङ्प्रतिपाद्योऽर्थो धर्म्मः।
कोऽर्थो योऽभ्युदयाय इति तु भविष्ये॥ *॥
ततः ॐ प्रियदत्ताय भुवे नमः। इति नमस्कृत्य
दक्षिणं चरणं न्यसेत्। छन्दोगपरिशिष्टम्।
"श्रोत्रियं सुभगामग्निं गाञ्चैवाग्निचितं तथा
प्रातरुत्थाय यः पश्येदापन्नः स विमुच्यते॥
पापिष्ठं दुर्भगां मद्यं नग्नमुत्कृत्तनासिकम्।
प्रातरुत्थाय यः पश्येत् कल्यैरुपलक्षणम्॥"
अतएव व्यासः।
"धनिनः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत्॥"
महाभारते।
"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च।
ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम्॥"
मात्स्ये।
"कार्त्तवीर्य्यार्জ্জुनो नाम राजा बाहुसहस्रभृत्
योऽस्य संकीर्त्तयेन्नाम कल्यमुत्थाय मानवः॥
न तस्य वित्तनाशः स्यान्नष्टञ्च लभते पुनः॥"

कल्यं प्रातः॥ *॥
अथ विण्मूत्रोत्सर्गः। विष्णुधर्म्मोत्तरे।
"निद्रां जङ्घादृष्टौ राम! नित्यमेवारुणोदये
वेगोत्सर्गं ततः कृत्वा दन्तधावनपूर्व्वकम्॥
स्नानं समाचरेत् प्रातः सर्व्वकल्मषनाशनम्॥"
अरुणोदयकालमाह स्कन्दपुराणम्।
"उदयात् प्राक् चतस्रस्तु नाड़िका अरुणोदयः।
तत्र स्नानं प्रशस्तं स्यात्तद्धि पुण्यतमं स्मृतम्॥"
नाड़िका दण्डः। विष्णुधर्म्मोत्तरे।
"वेगरोधं न कर्त्तव्यमन्यत्र क्रोधवेगतः।"
आयुर्व्वेदेऽपि। न वेगितोऽन्यकार्य्यसिद्धिः
स्यान्नाजिला साध्यमामयम्। अङ्गिराः।
"उत्थाय पश्चिमे रात्रेस्तत आचम्य चोदकम्।
अन्तर्धाय तृणैर्भूमिं शिरः प्राहृत्य वाससा॥
वाचं नियम्य यत्नेन क्षौमोच्छ्वासवर्জ্জितः॥
कुर्य्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः॥"
विष्णुपुराणम्।
"ततः कल्यं समुत्थाय कुर्य्यान्मैत्रं नरेश्वर!।
नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः॥
तिष्ठेन्नातिचिरं तत्र नैव किञ्चिदुदीरयेत्॥"
कल्यमुषःकालम्। मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरीषोत्सर्गः। नैर्ऋत्यामुत्थानदेशमारभ्य
उत्थायेत्यनेन उपस्थिते: इषुप्रक्षेपयोग्यदेशादृष्टिः। तद्देशपरिमाणमाह पितामहः।
"मध्यमेन तु चापेन प्रक्षिपेत्तु शरत्रयम्।
हस्तानाञ्च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः॥"
आपस्तम्बः।
मूत्रपुरीषोत्सर्गं कुर्य्यादक्षिणां दिशं दक्षिणापरां वेति।" दक्षिणापरां नैर्ऋतीम्। मनुः।
"मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा॥"
यत्तु यमवचनम्।
"प्रत्यङ्मुखश्च पूर्व्वाह्णे अपराह्णे च प्राङ्मुखः।
उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः॥"
इति तदिच्छाविकल्पार्थं सूर्य्याभिमुखनिरासार्थञ्च न तु नियमार्थं देवलवचनविरोधात्।
तथा च देवलः।
"सदैवोदङ्मुखः प्रातः सायाह्णे दक्षिणामुखः।
विण्मूत्रमाचरेन्नित्यं सन्ध्यायां परिवर्জ্জयेदिति"
अत्र प्रातःसायाह्णशब्दौ दिवारात्रिपरौ पूर्व्वोक्तमनुवचनैकवाक्यत्वात्। सन्ध्यायां परिवर्জ্জयेदिति तु पोड़ितेतरपरम्॥*॥ यमः।
"कृत्वा यज्ञोपवीतन्तु पृष्ठतः कण्ठलम्बितम्।
विण्मूत्रे च गृहे कुर्य्यादुदङ्मुखो दक्षे समाहितः॥
पृष्ठतः पृष्ठे कण्ठलम्बितं निवीतं तत् पृष्ठलम्बितंनिवीतमापृष्ठदेशावलम्बं ग्राम्यधर्म्मेष्वितिनिगमपरिशिष्टवचनात्।
"नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः॥"
इति मनुवचनाच्च॥

अत्र संवीतं निवीतं संवीतं मानुष इति तैत्तिरीयश्रुतेः। मानुषे सनकादिकल्पे। पृष्ठलम्बितं निवीती वेति बौधायनीयाच्च। ततश्च हारवत्
कृत्वा पृष्ठलम्बितं स्कन्धे इत्यर्थः। एकवस्त्रतापक्षे व्यवस्थामाह सांख्यायनः। यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा अवगुण्ठित इति। कर्णे दक्षिणे। पवित्रं दक्षिणे कर्णे विण्मूत्रमाचरेदिति स्मृतौ तथा दर्शनात्। अवगुण्ठितः कृतशिरोऽवगुण्ठनः। मनुः।
"छायायामन्धकारे वा रात्रावहनि वा द्विजः।
यथासुखमुखः कुर्य्यात् प्राणबाधभयेषु च॥"
महाभारते।
"प्रत्यादित्यं प्रतिजलं प्रति गाञ्च प्रति द्विजम्।
मेहन्ति ये च पथिषु ते भवन्ति गतायुषः॥"
प्रतिः सांमुख्ये॥ *॥ मनुः।
"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां न च पर्व्वते॥
न जीर्णदेवायतने न वल्मीके कदाचन।
न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके।
गवाग्निविप्रादित्यमपः पश्यंस्तथैव च॥
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्জ্জनम्॥"
ससत्त्वेषु प्राणिमत्सु। संस्थित उत्थितः।
पर्व्वतनिषेधादेव मस्तकनिषेधे सिद्धे पुनर्निषेधो यत्र पर्व्वतोऽशक्यपरीहारस्तत्रापि मस्तकवर्জ্जनार्थः। अथवा। पर्व्वतमस्तकनिषेधोऽधिकदोषाय॥ *॥ वशिष्ठः।

"आहारनिर्हारविहारयोगाः
सुसंहता धर्म्मविदा तु कार्य्याः।
वाग्बुद्धिगुप्तौ च तपस्तथैव
धनायुषी गुप्ततमे तु कार्य्ये॥"

निर्हारो मूत्रपुरीषोत्सर्गः। विहारः स्त्रीसंभोगः। योगः समाधिः। वाग्बुद्धिरग्रभाषापरित्यागः। बहिर्गुणिरनिष्टचिन्तात्यागः। हारीतः
"आहारन्तु रहः कुर्य्यान्निर्हारञ्चैव सर्व्वदा।
गुप्ताभ्यां लक्ष्मपतेः स्यात् प्रकाशे हीयतेतया॥"
विष्णुपुराणम्।
"सोमाग्न्यर्काम्बुवायूनां पूज्यानाञ्च न संमुखम्
कुर्य्यात् क्षीवनविण्मूत्रवससुत्सर्गञ्च पण्डितः॥"
आपस्तम्बः। "न च सोपानत्को मूत्रपुरीषे कुर्य्यादिति।" हरदत्तमनुः।
"करटधृतपात्रेण कृत्वा मूत्रपुरीषके।
मृत्तृणाभ्यन्तु पानीयं पीत्वा चान्द्रायणञ्चरेत्॥"
भरद्वाजः।
"अथावकृष्यविण्मूत्रं लोष्टकाष्ठदृणादिना।
उदस्तवासा उत्तिष्ठदृष्ट्वं विधूनमेहनः॥"*॥
उदस्तवासाः कटिदेशादूर्द्धचिन्नवस्त्रः।

अथ शौचम्। देवलः।
"धर्म्मविद्भिश्चिरं हस्तमधःशौचे न योजयेत्।
तथैव वामहस्तेन नाभेरूर्द्धं न शोधयेत्।
प्रकृतिस्थितिरेषा स्यात् कारणादुभयक्रिया॥"
कारणाद्रोगादेः। ब्रह्माण्डपुराणम्।
"उदृतीटकमादाय मृत्तिकाञ्चैव वाग्यतः।
उदङ्मुखो दिवा कुर्य्याद्रात्रौ चेद्दक्षिणामुखः॥
सुनिर्लेपं मृदं दद्यात्सुदन्तं लप एव च॥"

कुर्य्याच्छौचमिति शेषः। सुनिर्णिक्ते भरद्वाजोक्त-लोष्टादिप्रमृष्टे गुदे। उदकपात्राभावे करेण जलाशयात् उदकग्रहणमाह आदित्यपुराणम्। "रत्निमात्रं त्यक्त्वा कुर्य्याच्छौचमनुद्धते। पश्चाच्च शोधयेत्तीर्थमन्यथा न शुचिर्भवेत्॥" तस्मिन् देशे शौचं कर्त्तव्यं यस्माद्रत्निमात्रव्यव-हितं जलं तत्स्थलमेव तीर्थं जलसमीपत्वात्॥* विष्णुपुराणम्। "वल्मीकमूषिकोत्खातां मृदमन्तर्जलान्तथा। शौचावशिष्टां गेहाच्च नादद्यात्तु प्रमत्तवान्॥ अन्तःप्राप्यवपत्राच्च हलोत्खातां सकर्षकाम्॥" मनुदक्षौ। "एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश। उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता॥ उभयोः करयोः। वामहस्ते दशदानानन्तरं तत्पृष्ठे षड्दानमाह हारीतः। दशमध्ये च षट् पृष्ठे इति। शङ्खदक्षौ। "तिस्रस्तु मृत्तिका देयाः कृत्वा तु नखशोधनम् तिस्रस्तु पादयोर्देयाः शुद्धिकामेन नित्यशः॥" नखशोधनं तृणादिना नखान्तर्मलशोधनम्। तिस्र इति हस्तयोरिति शेषः॥ * ॥ पादप्रक्षालनं न कांस्ये कर्त्तव्यमित्याह विष्णु-धर्म्मोत्तरम्। "दर्भैर्न मार्ज्जयेत् पादौ न च कांस्ये प्रधावयेत्॥ दक्षः। "लिङ्गे तत्र समाख्याता त्रिपर्व्वी पूर्य्यते यया अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता॥ द्वितीया च तृतीया च तदर्द्धं परिकीर्त्तितम्॥" यदा तु उक्तप्रमाणया मृदा गन्धलेपक्षयो न भवति तदा अधिकयापि कर्त्तव्यम्। "गन्धलेपक्षयकरं शौचं कुर्य्यादतन्द्रितः॥" इति याज्ञवल्क्यवचनात्॥ गुदादन्यत्र परिमाणमाह यमः। "मृत्तिका तु समुद्दिष्टा त्रिपर्व्वी पूर्य्यते यया। त्रिपर्व्वी तर्ज्जनीमध्यमानामिकानामग्रपर्व्व-त्रयम्॥ * ॥ मूलमात्रे तु स्मृतिः। "एकां लिङ्गे मृदं दद्यात् वामहस्ते तु सप्तयम् उभयोर्हस्तयोर्हे तु मूलशौचं प्रकीर्त्तितम्॥" ब्रह्मपुराणे। "पादयोर्हे गृहीत्वा च सुप्रक्षालितपाणिमान् द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्" पादयोर्हे एकैका। इदं मूत्रे पुरीषोत्सर्गे तिसृणां विधानात्॥ * ॥ दक्षः। "यथोदितं दिवा शौचमर्द्धं रात्रौ विधीयते। आतुरे च तदर्द्धं स्यात् तदर्द्धन्तु पथि स्मृतम्॥" ययोक्तकरणाशक्तावेवेदं न तु निशादिपुरस्कारे-णैव वाक्यस्यादृष्टार्थतापत्तेः॥* आपस्तम्बः। "पथि पादस्तु विज्ञेय आर्त्तः कुर्य्यादृयथाबलम् एतयोर्विरोधस्तु आर्त्तानार्त्ताभ्यां परिहर-णीयः। दक्षः। "देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्। उपपत्तिमवस्थाञ्च ज्ञात्वा शौचं प्रकल्पयेत्॥" ब्रह्मपुराणे। "न यावदुपनीयते द्विजः शूद्रस्तथाङ्गना। गन्धलेपक्षयकरं शौचं तेषां विधीयते॥ प्रमाणं शौचसंख्या वा न शिष्टैरुपदिश्यते। यावच्च शुद्धिं मन्येत तावत् शौचं समाचरेत्॥" दक्षः। "न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता। प्रायश्चित्तं प्रसज्जेत विहितातिक्रमे कृते॥ शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥" गन्धलेपक्षये सत्यधिकं न कर्त्तव्यं पूर्व्वोक्तयाज्ञ-वल्क्यविरोधात्। गन्धलेपाक्षये त्वधिकसंख्य-यापि। याज्ञवल्क्यवचनमनुपनीतादिपरं वा पूर्व्वोक्तब्रह्मपुराणैकवाक्यत्वात्॥ * ॥ "एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् त्रिगुणन्तु वनस्थानां यतीनाञ्च चतुर्गुणम्॥" इदन्तु द्वैगुण्यादिकं संख्यामात्रे तदनन्तराभि-धानात् व्याघ्रपादः। "शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथापरम्॥ गङ्गातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः। आमृत्योः स्नातकश्चैव भावदुष्टो न शुध्यति॥" स्मृतिः। "धावन्तञ्च प्रमत्तञ्च मूत्रोच्चारकृतन्तथा। भुञ्जानमाचमानञ्च नास्तिकं नाभिवादयेत्। जन्मप्रभृति यत्किञ्चित् चेतसा धर्म्ममाचरेत्। सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात्॥" ऋष्यशृङ्गः। "यस्मिन् स्थाने कृतं शौचं वारिणा तद्विशो-धयेत्। न शुद्धिस्तु भवेत्तस्य मृत्तिकांशो न शोधयेत्॥" शौचानन्तरं हारीतः। गोमयेन मृदा वा कमण्डलुं प्रमृज्य पूर्व्ववदुपस्पृश्य आदित्यसोम-मग्निं वा वीक्षेतेति। अत्र मार्ज्जनानन्तरं क्षालनं अन्यत्र तथादर्शनात्। आचमनान-न्तरं आदित्यादिदर्शनं यथासम्भवम्। शौचं कृत्वा मूत्रोच्चारं न पश्येत् दृष्ट्वादित्यमग्निं सोमं वा पश्येदिति॥* अथाचमनविधिः। दक्षः। "प्रक्षाल्य पाणी पादौ च त्रिः पिबेदम्बु वीक्षि-तम्। संहृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्॥ संहृत्य तिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत्। अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्॥ अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः। नाभिं कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै॥ सर्व्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्॥" पादप्रक्षालनं विशेषयति देवलः। "प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेत् शनैः उदङ्मुखो वा देवत्ये पैत्रके दक्षिणामुखः॥" शनैरत्वरः। देवपैत्रकेतरत्रापस्तम्बः। प्रत्यक्-पादावसेचनमिति। प्रत्यक् पश्चिमाभिमुखः। क्रममाह गोभिलः। सव्यं पादमवनेनिज इति सव्यं पादं प्रक्षालयेत्। दक्षिणं पादमवनेनिज इति दक्षिणं पादं प्रक्षालयेदिति अर्हणीये तथादर्शनात् सर्व्वत्र तथा कल्पते। पारस्करः। सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयतीतिसूत्रेण प्राक् सव्यपादप्रक्षालने सिद्धे सव्यं प्रक्षाल्य दक्षिणं प्रक्षालयतीत्यत्र सव्यग्रहणं सामान्यार्थं तेनान्यस्यापि पादप्रक्षालने सव्यस्यैव प्राथम्यम् अन्यार्थं पुनर्व्वचनमिति न्यायात्। अन्यार्थमधि-कारार्थम्। ब्राह्मणस्य दक्षिणं प्रथममिति सूत्रं तस्य पादौ यदि ब्राह्मणः प्रक्षालयति तदा दक्षिणं प्रथममिति न सव्यम्। यथा प्रक्षाल-यतीत्यनुवृत्तौ आश्वलायनः। दक्षिणमस्य ब्राह्म-णाय प्रयच्छेत् सव्यं शूद्रायेति। स्वयं प्रक्षालने सव्यस्यैव प्राथम्यमिति एवं हरिशर्म्मापि। आचमने पाणिपादप्रक्षालनं मूत्रादावुत्सर्गे। यथा हरपराशरः। "कृत्वाथ शौचं प्रक्षाल्य हस्तौ पादौ च मृज्जलैः। निवृद्दशिख आसीनो द्विज आचमनञ्चरेत्॥ कृत्वोपवीतं सव्यांशे वाङ्मनःकायसंयतः॥" आपस्तम्बः। इत्येवमङ्गिराजानु प्रक्षाल्य चरणौ पृथक्। हस्तौ चामणिबन्धाभ्यां पश्चादानीत संयतः॥ आजानु आमणिबन्धाभ्यामित्यवधु पादानं तत् पर्य्यन्ताशुचित्वशङ्कायां अधश्यमापनोदनाय अतिशयशौचाय वा। अतएवोक्तं अङ्गप्रकर्षात् फलप्रकर्ष इति॥* शिखाबन्धने विशेषमाह ब्रह्मपुराणम्। "गायत्र्या तु शिखां बद्ध्वा नैर्ऋत्यां ब्रह्मरन्ध्रतः जुटिकाञ्च ततो बद्ध्वा ततः कर्म समाचरेत्॥" पिबेदित्यत्रान्तर्जान्वाह याज्ञवल्क्यः। "अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः। प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्॥ अन्तर्जानु जानुनोर्मध्ये हस्तौ कृत्वेति शेषः। वाशब्दादीशानाभिमुखः। ईशानाभिमुखो भूत्वोपस्पृशेत्तु यथाविधि॥" इति मरीचिकल्पः। ब्राह्मेण तीर्थेण अङ्गुष्ठमूलेन। "कनिष्ठदेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्॥" इति याज्ञवल्क्यात्॥ देशिनी तर्ज्जनी। करस्य दक्षिणस्य। यथा मार्कण्डेयपुराणम्। "अङ्गुष्ठोत्तरतो रेखा या पाणेर्दक्षिणस्य च। एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै॥" अत्र द्विजो न स्त्रीशूद्राविति मिताक्षरा॥ अत एव। "स्त्रियास्तैदक्षिणं तीर्थं शूद्रजातेस्तथैव च। सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः॥" ब्राह्मतीर्थावरोधे तु मनुः। "कायत्रैदशिकाभ्यां वा न पैत्र्येण कदाचन।" उक्ततीर्थत्रयस्य व्रणादिनावरोधे करमध्याम-

काग्नेयेनापि । एवञ्च सर्व्वाविरोधे सुवर्णादिपात्रेणाप्याचमनं कार्य्यं स्वयमसाध्येऽन्येनाचमनं कारयितव्यम् । याज्ञवल्क्यः ।

"अङ्गिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः । हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः ॥ शुध्येरन् स्त्री च शूद्रश्च सकृत् सृष्टाभिरन्ततः ॥"

अन्ततः ओष्ठोपान्ते । उत्तरोत्तरमपकर्षात् । अतएव सृष्टाभिरित्युक्तं न तु भक्षिताभिरिति । स्त्री शूद्रो वाथ नित्याभ्रः चालनाच्च करोष्ठयोः इति ब्रह्मपुराणाच्च । आचमनार्थे पाणिपादप्रक्षालनमेवेत्येके । इति शूद्राधिकारे गोतमोक्तेश्च । आचमनाङ्गजलाभावे इदमित्याचाराध्यायः । मनुः ।

"हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः । वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः सृष्टाभिरन्ततः ॥"

अत्र वक्ष्यावधिप्राश्यनमुक्तम् अनुपनीतानान्तु स्त्रीशूद्रवदाचमनं न यावदुपनीयेत । इति प्रागुक्तशौचे तथादर्शनात् । मिताक्षरादयोऽप्येवम् । अम्बु विशेषयति बौधायनः । पादप्रक्षालनाच्छेषेण नाचामेत यदाचामेत् भूमौ स्रावयित्वाचामेदिति । उशनाः ।

"कांस्यायसेन पात्रेण त्रपुसीसकपित्तलैः । आचान्तः शतकृत्वोऽपि न कदाचिच्छुचिर्भवेत् ॥"

कांस्यादिपात्रकरणकाचमनं कांस्यायसेनेत्यादिना निषिद्धमिति केचित् । हस्तेनाचमनेऽपि कांस्यादिपात्रावर्ज्जितं तन्निषिद्धमित्यपरे । आचमनजलनिषेधे यङ्गलिखितौ । न शूद्रा शुद्धेकपाख्या वर्ज्जितेनेति अत्राशुचिपदम् आचमनकर्त्तृभिन्नपरम् । शूद्रसाहचर्य्यात् एक पाणिपदमपि आचमनकर्त्तृभिन्नपाणिपरम् । तेन स्वीयवामपाणावर्ज्जितमनिषिद्धम् । तथा च कमण्डल्वधिकारे बौधायनः । मूत्रपुरीषे कुर्वन् दक्षिणहस्तेन गृह्णाति सव्येनाचमनीयमिति । गृह्णाति जलपात्रमिति शेषः । आचामेदित्यनुवृत्तौ देवलः ।

"शिखां बद्ध्वा वसित्वा देनिर्निक्ते वाससी शुभे । तूष्णीं भूत्वा समादाय नोद्वीक्षेत्रविलोकयन् ॥"

एकवस्त्राः प्राचीनावीति न इत्यादिपारस्करदर्शनात् यत्र प्रेतस्नानतर्पणादौ एकवस्त्रत्वं विहितं तत्र तदङ्गत्वादेकवासा एवाचमनं कुर्य्यात् । प्रचेताः ।

"अनुष्णाभिरफेनाभिः पूताभिर्वीक्ष्य चक्षुषा । हृद्गताभिरशब्दाभिस्त्रयतुर्वाद्भिराचमेत् ॥"

चतुर्वेति भावशुद्ध्यपेक्षया विकल्पः । न तु फलभूयस्त्वार्थं कल्पनागौरवापत्तेः । वीक्षणानुष्णयोर्भट्टभाष्यमाधवाचार्य्यकृतपराशरभाष्ययोरपवादमाह यमः ।

"रात्रावौचितेनापि शुद्धिरुक्ता मनीषिभिः । उदके नातुराणाञ्च तथोष्णे नोष्णपायिनाम् ॥"

आचामेदित्यनुवृत्तौ वशिष्ठः । प्रदरादपि या गोस्तर्पणाय स्पर्शे वणरसदुष्टाभिर्याश्च स्रवशुभागमा इति । प्रदरो विदीर्णभूभागः । अशुभागमाः अशुचिदेशादागताः । यस्मिन् देशे वर्णादिदुष्टमेव तोयं तत्र तदपि ग्राह्यम् । तथा च मरीचिः ।

"येषु स्थानेषु यच्छौचं धर्म्माचारश्च यादृशः । तत्र तत्रावमन्येत धर्म्मस्तत्रैव तादृशः ॥ येषु स्थानेषु ये देवा येषु देशेषु ये द्विजाः । येषु स्थानेषु यत्तोयं या च यत्रैव मृत्तिका ॥" आचमने उदकग्रहणप्रकारं परिमाणञ्चाह भरद्वाजः ।

"आयतं पर्वणां कृत्वा गोकर्णाकृतिवत् करम् । संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः ॥ मुक्ताङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनञ्चरेत् । मापमज्जनमात्रास्तु संगृह्य त्रिः पिबेदपः ॥"

पाणिना दक्षिणेन । त्रिः पिबेदक्षिणेनापि इत्यादिपुराणोक्तेः । मार्कण्डेयः ।

"सव्यविन्यस्तहस्तेन कुर्य्यादाचमनक्रियाम् । नोच्छिष्टं तत्पविद्वन्तु भुक्तोच्छिष्टन्तु वर्ज्जयेत् ॥"

मदनपारिजाते हारीतः ।

"ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनञ्चरेत् ॥"

ग्रन्थनादग्रन्थिरिति समुद्रकरेऽपि । आचमनानुवृत्तौ देवलः ।

"न मच्छत्र शयानश्च न चलन्न परान् स्पृशन् । न हसन्नैव संजल्पन्नात्मानञ्चैव वीक्षयन् ॥"

चलन् कम्पमान इति रत्नाकरः ॥ आत्मानं आत्मस्थानं हृदयम् । वीक्षयन्निति स्वार्थे णिच् ।

"केशान्नखीवीमधः कायं न स्पृशन् धरणीमपि । यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करम् ॥"

अधःकायं नाभेरधःप्रदेशम् । करं दक्षिणम् । आचमनानुवृत्तौ गोभिलः ।

"नान्तरीयैकदेशेन कल्पयित्वोत्तरीयकम् ॥"

अन्तरीयमधःपरिधानं तदेकदेशमुत्तरीयं कृत्वा मरीचिः ।

"न वह्निर्जानुस्वरया नाग्रनखो न चोत्थितः । न पादुकास्थोऽन्यचित्तः शुचिः प्रयतमानसः ॥ उपस्पृश्य द्विजो नित्यं शुद्धः पूतो भवेन्नरः । भुक्त्वासनस्थो नाचामेन्नान्यकाले कदाचन ॥ जलस्थलोभयकर्म्मानुष्ठानार्थन्तु जलस्थलैकचरणेनाचमनं कर्त्तव्यमित्याह पैठीनसिः । अन्तरुदके आचान्तोऽन्तरैव शुद्धः स्यात् तस्मादन्तरेकं बहिरेकञ्च कृत्वा पादमाचरेत् सर्वत्र शुद्धो भवतीति । जले तूत्तिष्ठन्नाचामेत् । जानोरूर्द्धं जले तिष्ठन्नाचान्तः शुचितामियात् । अधस्तात् शतकृत्वोऽपि समाचान्तो न शुध्यतीति विष्णुक्तेः । हारीतः ।

"आर्द्रवासा जले कुर्य्यात्तर्पणाचमनं जपम् । शुष्कवासाः स्थले कुर्य्यात्तर्पणाचमनं जपम् ॥"

कात्यायनः ।

"स्नानमाचमनं होमं भोजनं देवतार्च्चनम् । प्रौढ़पादो न कुर्वीत स्वाध्यायं पितृतर्पणम् ॥ आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा । कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते ॥"

आसनारूढ़पादः आसनारोपितगादतलः । जानुनोर्जङ्घयोः कृतावसक्थिको वस्त्रादिना कृतपृष्ठजानुजङ्घाबन्धः । तृतीयेन भेदप्रतीतेः प्रौढ़पादस्य द्विविधत्वं प्रतीयते ॥*॥ अत्र च अनेकोद्दाह्ये दारुशिले भूमिसमे इष्टकाद्ये सङ्कीर्णीभूता इति बौधायनवचनात्तथाविधे आरूढ़पादोऽपि कुर्य्यात् । व्यासः ।

"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा । मुक्त्वा पादयोः शौचमाचन्तोऽप्यशुचिर्भवेत् ॥"

तथा ।

"अपः पाणिनखाग्रेण आचामेद्यस्तु ब्राह्मणः । सुरापानेन तत्तुल्यमित्येवमृषिरब्रवीत् ॥"

संहत्येति मुखं संहत्य अलोमकोष्ठस्पर्शी यथा न भवतीति तात्पर्य्यम् । तथा च वशिष्ठः ।

"आचान्तः पुनराचामेद्दासो विपरिधाय च । ओष्ठौ च संस्पृश्य तथा यत्र स्यातामलोमकौ ॥"

एवञ्च पागुक्तहारीतवचने ओष्ठयोर्म्मार्জ্জनमुक्तं तत् सलोमकयोरेवेति । एतदनन्तरं वामहस्तं पादौ शिरश्च दक्षिणेन पाणिनाभ्युक्षयेत् । तथा च कामधेनावापस्तम्बः । त्रिराचामेत् द्वाभिस्त्रिरोष्ठौ परिमृजेत् द्विरित्येके दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेति । गोभिलः । त्रिराचामेत् द्विः परिमृजीत पादावभ्युक्ष्य शिरोऽभ्युक्षयेदिति इन्द्रियाण्यङ्गिः । स्पृशेत् अक्षिणी नासिके कर्णाविति । इन्द्रियाणि इन्द्रियायतनानि इन्द्रियाणाममूर्त्तत्वात् तिसृभिरिति तर्জ্জनीमध्यमानामिकाभिः ॥*॥ सर्वत्राङ्गुष्ठयोगेन आचमनकारणमाह पैठीनसिः । अग्निरङ्गुष्ठस्तस्मात्तेनापि सर्वाणि स्थानानि स्पृशेत् । निष्ठीवनादायाचमनं यथा । वायुपुराणे ।

"निष्ठीवने तथाभ्यङ्गे तथा पादावसेचने । उच्छिष्टस्य च सम्भाषादशुच्युपहतस्य च ॥ सन्देहेषु च सर्वेषु शिखां मुक्त्वा तथैव च । विना यज्ञोपवीतेन नित्यमेव उपस्पृशेत् ॥ उद्वायससंस्पर्शे दर्शने चान्त्यवासिनाम् ॥"

हारीतः ।

"स्त्रीशूद्रोच्छिष्टसंभाषणे सूत्रपुरीषोत्सर्गदर्शनेदेवमभिगन्तुकाम आचामेदिति" याज्ञवल्क्यः ।

"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे । आचान्तः पुनराचामेद्दासो विपरिधाय च ॥"

ब्रह्मपुराणे ।

"होमे भोजनकाले च सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेदन्यत्रापि सकृत् सकृत् ॥ द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम् ॥"

स्मृतिः ।

"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने । कर्म्मस्थं एषु नाचामेत् दक्षिणं श्रवणं स्पृशेत् ॥"

अत्र हेतुमाह पराशरः ।
"प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा
विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत् ॥"
सांख्यायनः ।
"आदित्या वसवो रुद्रा वायुरग्निश्च धर्मराट् ।
विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः ॥"
पुराणसारवायुपुराणयोः ।
"यः कर्म्म कुरुते मोहादनाचम्येव नास्तिकः ।
भवन्ति हि वृथा तस्य क्रियाः सर्वा न संशयः ॥"*॥
अथ दन्तधावनम् । हरितातपः ।
"मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः ।
तस्मात् सर्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥"
आदित्यादीनां तस्य वर्ज्यत्वं यथा । विष्णुः ।
"श्राद्धे जन्मदिने चैव विवाहेऽजीर्णसम्भवे ।
व्रते चैवोपवासे च वर्जयेद्दन्तधावनम् ॥"
दन्तधावनमध्यादुदङ्मुखः प्राङ्मुखो वेति ॥*॥
दन्तलग्नस्य दन्ततुल्यत्वं यथा । गौतमः ।
दन्तास्पृष्टे दन्तवदन्यत्र जिह्वाभिघर्षणात् प्राक्
क्षुतेरित्येके । क्षुतेरास्रावबहिष्यान्निगरत्रेव
तच्छचिरिति । जिह्वाभिघर्षणायोग्यं दन्तलग्नं
अशौचजनकं न भवतीत्यर्थः । इदञ्चानुलभ्य-
मानरसविषयम् । दन्तवद्दन्तलग्नेषु रसवर्ज्ज-
मिति ग्रन्थवचनात् । जिह्वाभिघर्षणेऽपि अश-
क्यौदरणे न दोषः ।
"भोजने दन्तलग्नानि निर्हृत्याचमनञ्चरेत् ।
दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत् ॥
न तत्र कुर्य्याद्दुग्धो यत्नमुदरणे पुनः ।
भवेदशौचमत्यर्थं तृणवैधाद्व्रणे कृते ॥"
इति देवलवचनात् ॥
क्षुतेरित्युपलभ्यमानरसविषयम् । आस्रावो
लाला तद्बहिर्गरन्निव्यर्थः अतएव शोणितं
यथा न भवति तथा तृणादिना दन्तलग्न-
निःसारणाचरणम् ॥*॥ छन्दोगपरिशिष्टम् ।
"नादार्द्रकाष्ठैर्यमष्टाङ्गुलमपाटितम् ।
सत्वच दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत् ॥
उत्थाय नैत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः ।
परिलिख्य तु मन्त्रेण भक्षयेद्दन्तधावनम् ॥
आयुर्बलं यशो वर्चः प्रजा पशुवसूनि च ।
ब्रह्मप्रज्ञाञ्च मेधाञ्च त्वन्नो धेहि वनस्पते ॥"
शुचिर्भूत्वा हिरावमनेनेति शेषः ॥*॥ नर-
सिंहपुराणम् ॥
"दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम् ।
सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥"
प्रमाणं स्त्रीत्वमाह विष्णुः ।
"कनीन्यङ्गुलिभस्त्रीत्वं सकूर्चं द्वादशाङ्गुलम् ।
प्रातर्भूत्वा च यत्वाक् भक्षयेद्दन्तधावनम् ॥
प्रक्षाल्य भुक्त्वा तज्जह्याच्छुचौ देशे समाहितः॥"
सकूर्चं दलितायम् । द्वादशाङ्गुलन्तु छन्दोगेत-
रेषाम् ।
"द्वादशाङ्गुलन्तु विप्राणां क्षत्रियाणां नवाङ्गुलम्
अष्टाङ्गुलन्तु वैश्यानां शूद्राणान्तु षडङ्गुलम् ।
भक्षयेत् शास्त्रदृष्टानि पर्वस्वपि च वर्जयेत् ॥"
तिथिविशेषे तस्य वर्ज्जनं यथा । नृसिंहपुरा-
णम् ।
"प्रतिपद्दर्शषष्ठीषु नवम्यान्चैव सप्तमी ।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥
अलाभे दन्तकाष्ठानां प्रतिसिद्धदिने तथा ।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते ॥"
गण्डूषस्य दन्तकाष्ठकार्य्यकारित्वेऽपि न तत्र
मन्त्रान्वयः । शातातपः ।
"प्रतिपद्दर्शषष्ठीषु नवम्यां दन्तधावनम् ।
पत्रैरन्यत्र काष्ठेभ्य जिह्वोल्लेखः सदैव हि ॥"
गुवाकादिपत्रैर्दन्तधावनं निषिद्धं यथा। क्रिया-
कौमुद्यां वशिष्ठः ।
"गुवाकतालहिन्तालास्तथा ताड़ी च केतकी।
खर्ज्जूरनारिकेलौ च सप्तैते तृणराजकाः ॥
तृणराजशिरापत्रैर्यः कुर्य्याद्दन्तधावनम् ।
तावद्भवति चाण्डालो यावद्गां नैव पश्यति ॥"
पराशरभाष्ये याज्ञवल्क्यः ।
"नैष्टकालोष्टपाषाणैरितराङ्गुलिभिस्तथा ।
त्यक्त्वा अनामिकाङ्गुष्ठौ वर्ज्जयेद्दन्तधावनम् ॥"
प्रचेताः ।
"मध्याह्नस्नानकाले तु यः कुर्य्याद्दन्तधावनम् ।
निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह॥"
स्मृतिः ।
"वमन्तं जृम्भमाणञ्च कुर्वन्तं दन्तधावनम् ।
अभ्यक्तशिरसञ्चैव स्नातं नैवाभिवादयेत् ॥"
हारीतः ।
"शुचिं देवाभिरक्षन्ति पितरः शुचिमन्वियुः ।
शुचेर्विभ्यति रक्षांसि ये चान्ये दुष्टचारिणः ॥"
तथा ।
"स्नानं दानं तपस्त्यागो मन्त्रकर्म्मविधिक्रियाः
मङ्गलाचारनियमाः शौचभ्रष्टस्य निष्फलाः ॥
शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरन्तथा ।
मृज्जलाभ्यां भवेत् बाह्यं भावशुद्धिस्तथापरम्॥"
अथ प्रातःस्नानसन्ध्ये । ब्रह्मपुराणम् ।
"प्रातःस्नानं ततः कृत्वा संक्षेपेण यथोदितम् ।
सन्ध्याञ्चापि तथा कुर्य्यात् नित्यनैमित्तके तथा॥
कात्यायनः ।
"यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः ।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत् ॥
दन्तान् प्रक्षाल्य प्रातरनातुरः स्नायात् ॥*॥
आतुरं विशेषयति आयुर्वेदोक्तैः ।
"स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु ।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ॥"
तत्कालमाह विष्णुः । प्रातःस्नाङ्गरुणकिरण-
ग्रस्तां प्राचीमवलोक्य स्नायात् । इति समुद्र-
करधृतम् ॥ * ॥
"मृत्तिकातिलकं कुर्य्यात् स्नात्वा हुत्वा च
भस्मना ।
दुष्टदोषविघातार्थं चाण्डालाद्यादिदर्शने ॥"
उशनाः ।
"अभावे तृदकेनापि पितृदैवतमर्च्चयेत् ॥"
ब्रह्माण्डपुराणे ।
"कर्म्मादौ तिलकं कुर्य्यादूर्द्धं तद्वैष्णवं परम् ।
गोप्रदानं जपो होमः स्वाध्यायः पितृतर्पणम् ॥
भस्मीभवति तत्सर्व्वमूर्द्धपुण्ड्रं विना कृतम् ॥"
ब्राह्मे ।
"अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमा पुष्करी भवेत्
अनामिकार्थदा नित्यं मुक्तिदा च प्रदेशिनी ॥"
व्यासः ।
"जाह्नवीतीरसम्भूतां मृदं मूर्द्ध्नि बिभर्त्ति यः ।
बिभर्त्ति रूपं सोऽर्कस्यतमोनाशाय केवलम् ॥"
गोपीचन्दनमाह शातातपः ।
"गोमतीतीरमम्भूतां गोपीदेहसमुद्भवाम् ।
मृदं मूर्द्ध्ना वहेद्यस्तु सर्वपापैः प्रमुच्यते ॥"
ब्रह्माण्डपुराणे ।
"ऊर्द्धपुण्ड्रं सदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा
तिलकं वै द्विजः कुर्य्यात्, चन्दनेन यदृच्छया ॥
ऊर्द्धपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियश्च त्रिपुण्ड्रकम्
अर्द्धचन्द्रञ्च वैश्यश्च वर्त्तुलं शूद्रयोनिजः ॥"*॥
आतुराणान्तु ।
"अशिरस्कं भवेत् स्नानं स्नानाशक्तौ च कर्म्मि-
णाम् ।
आर्द्रेण वाससा वापि मार्জ্জनं देहिकं विदुः॥"
इति जाबालवचनात् शिरो विहाय गात्रप्रक्षा-
लनम् । तदशक्तावार्द्रवाससा गात्रमार्জ্জनं
कुर्य्यात् तदनन्तरं सन्ध्यां कुर्य्यात् । एतत्परमेव
प्रातःसन्ध्यां ततः कुर्य्याद् दन्तधावनपूर्वकमिति
याज्ञवल्क्यवचनम् । इत्याह्निकाचारतत्त्वम् ॥
प्रातःसन्ध्या,स्त्री.(सन्धौ भवा । यत् प्रत्ययः। टाप्
प्रातः प्रथमार्द्धीया सन्ध्या ।)सन्ध्यादेहपूर्व्वार्द्धम्
तदुत्पत्तिर्यथा ।
"तस्मिन् गिरौ चन्द्रभागे वृद्धशोणितसंभवाम्
सन्ध्यां दृष्ट्वाथ पप्रच्छ वशिष्ठः सादरन्तदा ॥
वशिष्ठ उवाच ।
किमर्थमागता भद्रे ! निर्জনं त्वं महीधरम् ।
कस्य वा तनया गौरि! किं वा तवचिकीर्षितम्
एतदिच्छाम्यहं श्रोतुं यदि गुह्यं न ते भवेत् ।
वदनं पूर्णचन्द्राभं निश्रीकं वा कथं तव ॥
श्रीमार्कण्डेय उवाच ।
तत् श्रुत्वा वचनं तस्य वशिष्ठस्य महात्मनः ।
दृष्ट्वा च तन्महात्मानं ज्वलन्तमिव पावकम् ॥
शरीरदृग्ब्रह्मचर्य्यसदृशं तं जटाधरम् ।
सादरं प्रणिपत्याथ सन्ध्योवाच तपोधनम् ॥
सन्ध्योवाच ।
यदर्थमागता शैलं मिदं तन्मे तपोधन ! ।
तव दर्शनमात्रेण तन्मे सेत्स्यति वा विभो ! ॥
तपः कर्त्तुमहं ब्रह्मन् ! निर्জনं शैलमागता ।
ब्रह्मणोऽहं मनोजाता सन्ध्या नाम्ना च विश्रुता
नोपदेशमहं जाने तपसो मुनिसत्तम ! ।
यदि ते रुच्यते गुह्यं मां त्वं समुपदेशय ॥
एतच्चिकीर्षितं गुह्यं नान्यत् किञ्च न विद्यते ।
अज्ञात्वा तपसो भावं तपोवनमुपस्थिता ॥
चिन्तया परिशुष्येऽहं वेपते च मनः सदा ॥

श्रीमार्कण्डेय उवाच ।
आकर्ण्य तस्या वचनं वशिष्ठो ब्रह्मणः सुतः ।
स्वयं स सर्वकृत्यज्ञो नान्यत् किञ्चन पृष्टवान् ॥
अथ तां नियतात्मानं तपसेऽतिधृतोद्यमाम् ।
वशिष्ठो मन्त्रयाञ्चक्रे गुरुवत् शिष्यवत्तदा ॥
वशिष्ठ उवाच ।
परमं यो महत्तेजः परमं यो महत्तपः ।
परमः परमाराध्यो विष्णुर्मनसि धीयताम् ॥
मन्त्रेणानेन देवेशं विष्णुं भज शुभानने ! ।
ॐ नमो वासुदेवाय इत्यनेन च सन्ततम् ॥
मार्कण्डेय उवाच ।
उपदिश्य वशिष्ठोऽथ सन्ध्यायै तपसः क्रियाम् ।
तामाभाष्य यथान्यायं तत्रैवान्तर्दधे मुनिः ॥
यथोक्तन्तु वशिष्ठेन मन्त्रं तपसि साधनम् ।
व्रतेन तेन गोविन्दं पूजयामास भक्तितः ॥
प्रसन्नस्तेन रूपेण यद्रूपं चिन्तितं तया ।
पुरः प्रत्यक्षतां यातस्तस्यां विष्णुर्जगत्पतिः ॥
निमीलिताक्ष्यास्तस्यास्तु प्रविश्य हृदयं हरिः ।
दिव्येङ्गिनं तदौ तस्यै वाचं दिव्यै च चक्षुषी ॥
दिव्यं ज्ञानं दिव्यचक्षुर्दिव्यां वाचमवाप्य सा ।
प्रत्यक्षं वीक्ष्य गोविन्दं तुष्टाव जगतां पतिम् ॥
अथ तस्याः शरीरन्तु वल्कलाजिनमंहतम् ।
परिचीर्णं जटाव्रातैः पवित्रं मूर्द्धि राजितम् ॥
निरीक्ष्य कृपयाविष्टो हरिः प्रोवाच तामिदम्॥
श्रीभगवानुवाच ।
यः पश्यति सकामस्त्वां पाणिग्राहमृते तव ।
स सद्यः क्लीवतां प्राप्य दुर्बलत्वं गमिष्यति ॥
पतिस्तव महाभागस्तपोरूपसमन्वितः ।
समकल्पश्चतुर्जीवो च भविष्यति सह त्वया ॥
अन्यच्च ते वदिष्यामि पूर्वं यन्मनसि स्थितम् ।
अग्नौ शरीरत्यागस्ते पूर्व्वमेव प्रतिश्रुतः ॥
स च मेधातिथेर्यज्ञे मुनेर्हादशवार्षिके ।
हुतप्रज्वलिते वह्नौ न चिरात् क्रियतां त्वया ॥
तत्र गत्वा स्वयं कन्यं मुनिभिर्नोपलक्षिता ।
मत्प्रसादादहल्लिजाता तस्य पुत्री भविष्यसि ॥
यस्ते वा वाञ्छनीयोऽस्ति स्वामी मनसि कथन
तत्रिधाय निजस्वान्ते त्यज वह्नौ वपुः स्वकम् ॥
नारायणः स्वयं सन्ध्यां पस्पर्शाथाग्रपाणिना ।
ततः पुरोडाशमयं तत् शरीरमभूत् क्षणात् ॥
समिद्धेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता ।
तदा विष्णोः प्रसादेन सा विवेश विधेः सुता ॥
वह्निस्तस्याः शरीरं तद्दग्ध्वा सूर्य्यस्य मण्डले ।
शुद्धं प्रवेशयामास विष्णोरेवाज्ञया पुनः ॥
सूर्य्यो द्विधा विभज्याथ तत् शरीरं तदा रथे ।
स्वके संस्थापयामास प्रीतये पितृदेवयोः ॥
यदूर्द्धभागस्तस्यास्तु शरीरस्य द्विजोत्तमाः ।
प्रातःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा ॥
यच्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगः ।
सा सायमभवत् सन्ध्या पितृप्रीतिप्रिया सदा ॥
सूर्य्योदयाच्च प्रथमं यदा स्यादरुणोदयः ।
प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी ॥
अस्तं गते ततः सूर्य्ये शोणपद्मनिभा सदा ।
उदेति सायंसन्ध्यापि पितॄणां मोदकारिणी ॥
इति कालिकापुराणे २२ अध्यायः ॥

प्रातःकालकर्त्तव्यवैदिकतान्त्रिकोपासनाविशेषः वैदिके तदनुष्ठानानि यथा । मार्जनम् १ प्रार्थनम् २ प्राणायामः ३ आचमनम् ४ आपोमार्जनम् ५ अघमर्षणम् ६ सूर्य्योपस्थानम् ७ देवतर्पणम् ८ सावित्र्यावाहनम् ९ सावित्रीध्यानम् १० सावित्रीजपः ११ सावित्रीविसर्जनम् १२ आदित्यशुक्रप्रीणनम् १३ आत्मरक्षणम् १४ रुद्रोपस्थानम् १५ ब्रह्मादिभ्यो जलदानम् १६ सूर्य्यार्घदानम् १७ सूर्य्यनतिः १८॥ तान्त्रिके तदनुष्ठानानि यथा । मन्त्राचमनम्१ जलशुद्धिः २ करन्यासः ३ अङ्गन्यासः ४ अघमर्षणम् ५ इस्तचालनम् ६ आचमनम् ७ सूर्य्यार्घदानम्८ गायत्र्या जलदानम्९ तर्पणम् १० गायत्रीध्यानम् ११ गायत्रीजपः १२ जपसमर्पणम् १३ इष्टदेवध्यानम् १४ प्राणायामः १५ मूलमन्त्रजपः१६जपसमर्पणम् १७ प्राणायामः १८ नमस्कारः १९ । इति स्मृतितन्त्रे ॥

प्रातःस्नानं,क्ली,(प्रातः प्रभातकाले यत् स्नानम्।) प्रभातकर्त्तव्यावगाहनादि । यथा,गारुडे५०अः "उषःकाले तु संप्राप्ते कृत्वा चावश्यकं बुधः । स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि ॥ प्रातःस्नानेन पूयन्ते येऽपि पापकृतो जनाः । तस्मात् सर्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥ प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टं करं हि तत् । सुखसुप्तस्य सततं लालाद्याः संस्रवन्ति हि ॥ अतो नैवाचरेत् कर्म्माण्यकृत्वा स्नानमादितः । अलक्ष्मीः कालकर्णी च दुस्वप्नं दुर्विचिन्तितम् प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः । न च स्नानं विना पुंसां प्राशस्त्यं कर्म्म- संस्मृतम् । होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत् अशक्तावशिरस्कन्तु स्नानमस्य विधीयते ॥" अपि च गारुडे २१५ अध्याये । "प्रातःसंक्षेपतः स्नानं मध्याह्ने विधिविस्तरम् । प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ॥ यतेस्त्रिसवनं प्रोक्तं सकृत्तु ब्रह्मचारिणः ॥" अपि च । "उषस्युषसि यत्स्नानं सन्ध्यायामुदिते रवौ । प्राजापत्येन तत्तुल्यं महापातकनाशनम् ॥ यत् फलं द्वादशाब्दानि प्राजापत्यैः कृतैर्भवेत् । प्रातःस्नायी तदाप्नोति वर्षेण अद्वयान्वितः ॥ य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान् प्रातःस्नायीभवेन्नित्यं द्वौ मासौ माघफाल्गुनौ॥ षट्तिलो माघमासन्तु प्रातःस्नायी ह्यविप्लवभुक् अतिपापं महाघोरं मासादेव व्यपोहति ॥ मातरं पितरञ्चापि भ्रातरं सुहृदं गुरुम् । समुद्दिश्य निमज्जेत द्वादशांशं लभेत्तु सः ॥"

प्रातराशः,पुं, (अश्नमिति । अश्+भावे घञ्। आशः । प्रातः प्रातःकाले आशो भोजनम् ।) प्रातःकालीनभोजनम्। तत्पर्य्यायः। कल्यवर्त्तः २ । इति हेमचन्द्रः ॥ प्रातर्भोजनम् ३ । इति त्रिकाण्डशेषः ॥ कल्यजग्धिः ४ । इति जटाधरः ॥ (यथा, भागवते । ३ । २ । २ । "यः पञ्चहायनो मात्रा प्रातराशाय याचितः । तन्नेच्छद्व्रचयन् यस्य सपर्य्यां बाललीलया ॥")

प्रातर्गेयः,पुं,प्रातःकाले गेय ईश्वरादिर्यैः । स्तुतिपाठकः । तत्पर्य्यायः । स्तुतिव्रतः २ । इति त्रिकाण्डशेषः ॥ प्रभातगात्रयेथे, त्रि ॥

प्रातर्भोक्ता, [क्तृ] पुं, (प्रातर्भुङ्क्ते इति । भुज+ल्वच् ।) काकः । इति शब्दचन्द्रिका ॥ प्रभाते भोजनकर्त्तरि, त्रि ॥

प्रातर्भोजनं, क्ली, (प्रातः प्रातःकाले भोजनम् ।) प्रातराशः । इति जटाधरः ॥

प्रातिका, स्त्री, (प्रातनोति । प्र+अत्+ण्वुल्-टाप् । अत इत्वम् ।) जवा । इति राजनिर्घण्टः ॥

प्रातिपदिकः, पुं, (प्रतिपदि तिथौ भव इति । प्रतिपद्+"कालात् ठञ्।" ४ । ३ । ११ । इति ठञ् ।) अग्निः । यथा,— "इत्यश्रुतो महानग्निर्ब्रह्मक्रोधोद्भवो महान् । उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो ! ॥ यस्यामहं समस्तस्य जगतः ख्यातिमाप्नुयाम् । ब्रह्मोवाच । देवानामथ यज्ञानां गन्धर्वाणाञ्च सत्तम ! । आदौ प्रतिपदा येन त्वमुत्पन्नोऽसि पावक ! ॥ त्वत्पदात् प्रातिपदिकं सम्भविष्यन्ति देवताः । अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति ॥" इति वराहपुराणम् ॥ (प्रतिपदे धातुभिन्नपदे भव इति । प्रतिपद+ठक् ।)नाग्नि, क्ली, । यथा, अधातुविभक्त्यर्थवत् प्रातिपदिकम् । इति सुपद्मव्याकरणम्

प्रातिभाव्यं,क्ली,(प्रतिभू+ष्यञ् । द्विपदद्वहिः ।) प्रतिभुवो भावः । जामिनी इति भाषा । यथा, "साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च । विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥" इति दायभागः ॥

प्रातिस्विकं,त्रि,(प्रतिस्वं भवः । प्रतिस्व+ठक् । असाधारणम् । तत्पर्य्यायः । अन्यासाधारणम् २ आवेशिकम् ३ । इति त्रिकाण्डशेषः ॥

प्रातिहारः, पुं, (प्रतिहार एव । स्वार्थे अण् ।) प्रातिहारिकः । इत्यमरटीकायां भरतः ॥

प्रातिहारकः, पुं, (प्रतिहारक एव । स्वार्थे अण् ।)प्रातिहारिकः इत्यमरटीकायां भरतः ॥

प्रातिहारिकः, पुं, (प्रतिहारः प्रतिहरणं व्याज इत्यर्थः । स प्रयोजनमस्येति । प्रतिहार+"प्रयोजनम् ।" ५ । १ । १०८ । इति ठञ् ।) मायाकारः । इत्यमरः । २ । १० । ११ ॥

प्रातीपः, पुं, (प्रतीपस्यापत्यं प्रतीपस्यायमिति वा । प्रतीप+अण् ।) प्रतीपपुत्रः । शान्तनुराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ५ । १४८ । २ । 'प्रातीपः शान्तनुस्तात ! कुलस्यार्थे ययोत्थितः॥)

प्राथमकल्पिकः, पुं, (प्रथमकल्प आद्यारम्भः प्रयोजनं यस्य । "प्रयोजनम् ।" ५।१ । १०८ । इति ठञ् । यद्वा, प्रथमकल्पमधीते इति । विद्यालक्षणकल्पान्ताच्चेति वक्तव्यमिति ठक् ।) प्रथमारब्धवेदाध्ययनः । प्रथमं शिक्षणीयकल्पं शास्त्रमधीते यः इत्यर्थे णिकः । तत्पर्य्यायः । शैक्षः २ । इत्यमरभरतौ ॥

प्राथमिकः, त्रि, (प्रथमे भवः । प्रथम + ठञ् ।) प्रथमभवः । यथा । यत्राविरलक्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र द्वितीयक्षणे पक्षतासम्पत्त्यर्थं द्वितीयः सिषाधयिषाविरहो विशेषणमस्तु सिद्धेः प्राथमिकस्तु किमर्थम् । इति पक्षतादिशिरोमणिः ॥

प्राथम्यं, त्रि, (प्रथम + ष्यञ् ।) प्रथमस्य भावः । यथा, "अस्माभिरेव प्राथम्येन नानामुनीनां वचनैरेवं विधो निबन्धः क्रियते ।" इति विजयरक्षितः ॥

प्रादुः [स्] ब्य, (प्रान्तीतिं । प्र + अद् + "बाहुलकादेरप्युसिप्रत्ययः ।" उणा० २ । ११८ । इत्यत्र उज्ज्वलदत्तोक्त्या उसिः ।) नाम । प्राकाश्यम् । स्फुटत्वम् । तत्पर्य्यायः । आविः२ । यथा । प्रादुरासीत् । आविर्भूतः । इत्यमरभरतौ ॥ (यथा, रघुः । ११ । १५ ।

"ध्वनिनादमथ गृह्णती तयोः
प्रादुरास बहुलत्वपाच्छविः ।
ताडका चलकपालकुण्डला
कालिकेव निविड़ा बलाकिनी ॥")

प्रकाशः । सम्भाव्यम् । इच्छा । इति शब्दरत्नावली ॥

प्रादुर्भावः, पुं, (प्रादुस् + भू + भावे घञ् ।) आविर्भावः । यथा,—

"वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा ॥"
इति कुवलयानन्दः ॥

प्रादेशः पुं, (प्रदिश्यते इति । प्र + दिश् + हलश्चेति घञ् । "उपसर्गस्य घञि"इति दीर्घः ।) तर्ज्जनीसहितविस्तृताङ्गुष्ठः । इत्यमरः २ । ६ । ८३ ॥ (यथा, महाभारते । ५ । ५१ । १९ ।

"प्रमाणतो भीमसेनः प्रादेशेनाधिकोऽर्জ্জুनात्॥

प्रदेश एव । स्वार्थे अण् ।) देशमात्रम् । यथा,

"प्रादेशो देशमात्रे च तर्জ্জन्यङ्गुष्ठसम्मिते ॥"
इति मेदिनी ॥

"अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते ॥"
इति देवीपुराणञ्च ॥

प्रादेशनं, क्ली, (प्र + आ + दिश् + ल्युट् ।) दानम् इत्यमरः । २ । ७ । ३० ॥

प्रादोषः, त्रि, (प्रदोषस्यायमिति । प्रदोष + अण् ।) प्रदोषसम्बन्धी । इति सिद्धान्तकौमुदी ॥ (प्रदोषे व्याहरतीति । "व्याहरति मृगः ।" ४ । ३ । ५१ । इति अण् । प्रादोषो मृगः । प्रदोषसहचरितं अध्ययनं सोढ़मस्य । "तदस्य सोढ़म् ।" ४ । ३ । ५२ । इति अण् । प्रादोषः शिष्यः । इति व्याकरणम् ॥)

प्रादोषिकः, त्रि, (प्रदोषस्यायमिति । प्रदोष + "निशाप्रदोषाभ्याञ्च ।" ४ । ३ । १४ । इति ठञ् ।) प्रदोषसम्बन्धी । इति सिद्धान्तकौमुदी ।

प्राधान्यं, क्ली, प्रधानस्य भावः । (प्रधान + भावे ष्यञ् ।) प्रधानत्वम् । यथा, धर्म्मदीपिकायाम् ।

"वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम् ॥"

प्राध्वं, व्य, (प्राध्वनतीति । प्र + आ + ध्वन + डम् ।) अनुकूलम् । इत्यमरः । ३ । ४ । ४ ॥ (यथा, रघुः । १३ । ४३ ।

'सभाजने मे भुजमूर्জ্জबाहुः
सख्येतरं प्राध्वमितः प्रयुङ्क्ते ॥")

प्राध्वः, त्रि, (प्रगतोऽध्वानमिति । "उपसर्गादध्वनः ।" ५ । ४ । ८५ । इति अच् ।) बहुदूरगामि-रथादिः । इति बोपदेवः ॥ दूरपथः । प्रघ्नः । बन्धः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । १६२ । २७ ।

"ततः शक्तिं गदां खड्गं धनुश्च भरतर्षभः ।
प्राध्वं कृत्वा नमश्चक्रे कुबेराय वृकोदरः ॥")

प्रान्तः, पुं, (प्रकृष्टोऽन्तः ।) अन्तभागः । शेषसीमा । यथा, कुमारे । ३ । ४३ ।

"प्रान्ते च संसक्तनमेरुशाखं
ध्यानास्पदं भूतपतेर्विवेश ॥"

प्रान्ततः, [स्] ब्य, (प्रान्त + तसिल् ।) प्रान्तभागे । यथा, प्राचीरं प्रान्ततो वृतिः । इत्यमरः । २ । २ । ३ ॥

प्रान्तरं, क्ली, (प्रकृष्टमन्तरमवकाशो व्यवधानं वा यत्र ।) दूरशून्योऽध्वा । इत्यमरः २।१।१७॥ छायातरुजलादिरहिते पथि प्रान्तरं दूरं शून्यो दूरशून्यः दूरत्वासौ शून्यश्चेति या दूरशून्यो जलादिवर्জितत्वात् दृष्टक् योऽध्वा स प्रान्तरमित्यन्वयः । प्रकृष्टमन्तरं व्यवधानमवकाशोवा अत्रेति प्रान्तरम् । इति भरतः ॥ (यथा,महानिर्व्वाणतन्त्रे । १ । ६४ ।

"कूपे गर्त्ते प्रान्तरे च प्रासादात् पर्व्वतादपि ।
पतिष्यन्ति मरिष्यन्ति मनुजा मदविह्वलाः ॥")

विपिनम् । कोटरम् । इति मेदिनी ॥

प्रान्तशून्यं, क्ली, (प्रान्ते शून्यमस्य ।) दूरशून्यं पथः । छायादिरहितपथः । इति शब्दरत्नावली ॥

प्रापणं, क्ली, (प्र + आप् + ल्युट् ।) नयनम् । प्राप्तिः । (यथा, मनुः । २ । ८५ ।

"प्रापणात् सर्व्वकामानां परित्यागो विशिष्यते ॥")

प्राप्तिप्रेरणा । प्रकर्षेण व्यापनम् । जन्तादञ्जन्ताद्वा प्रपूर्ब्बापधातोर्भावे अनट् प्रत्ययः ॥

प्रापणिकः, पुं, (प्रापणाय्यते इति । प्र + आ + पण व्यवहारे + "प्राड्डि पणिकषः ।" उणा० २ । ४१ । इति किकन् ।) पण्यविक्रयी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, माघे । ४ । ११ ।

"आख्यादिव प्रापणिकादजस्रं
जग्राह रत्नान्यमितानि लोकः ॥")

प्रापणीयं, त्रि, प्राप्यते यत् । (प्र + आप् + अनीयर् ।) प्राप्यम् (यथा,मेघदूते । ५ ।

"धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ॥")

प्रापेयः,पुं,गन्धर्व्वगणविशेषः । यथा, अग्निपुराणे

"प्रवाच्य जनयत् पुत्रान् दिव्यान् वैगायनोत्तमान् ।
चतुर्दश देवगन्धर्व्वाः प्रापेयाः परिकीर्त्तिताः ॥"

प्राप्तः, त्रि, (प्र + आप् + क्त ।) प्रस्थापितः । तत्पर्य्यायः । प्रणिहितः २ । लब्धः । तत्पर्य्यायः विन्नः २ भावितः ३ आसादितः ४ भूतः ५ । इत्यमरः । ३ । १ । ८६, ३ । १ । १०४ ॥ (उत्पन्नः । समुपस्थितः । यथा, मनुः । ११ । १२२

"एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनम् ।
सप्तागारांश्चरेद्भैक्ष्यं स्वकर्म परिकीर्त्तयन् ॥")

प्राप्तपञ्चत्वं, क्ली, (प्राप्तं पञ्चत्वं मरणं येन ।) मृतम् । इत्यमरः । २ । ८ । ११७ ॥

प्राप्तभावः, पुं, (प्राप्तो भावो येन ।) जातोद्यमः । इति शब्दचन्द्रिका ॥ (प्राप्तभार इत्यपि क्वचित् पाठः ॥) लब्धसत्तादौ, त्रि ॥

प्राप्तरूपः, त्रि, (प्राप्तं रूपं येन ।) पण्डितः । मनोज्ञः । इत्यमरः । ३ । ३ । १३१॥ रूपवांश्च

प्राप्तव्यं,त्रि,प्राप्यते यत् । प्रपूर्ब्बापधातोः कर्मणि तव्यप्रत्ययः । प्राप्यम् । (यथा, रामायणे । २ । २८ । १० ।

"आदेशो वनवासस्य प्राप्तव्यः स मया किल ॥")

प्राप्तिः, स्त्री, (प्र + आप् + क्तिन् ।) उदयः । (यथा, महाभारते । १४ । ४८ । ३ ।

"गच्छत्यात्मप्रसादेन विदुषां प्राप्तिमव्ययाम् ॥")

धनादिलब्धिः । अधिगमः । लाभः । इत्यमरभरतौ ॥ प्रापणम् । (यथा, मनुः । ८ । १०३ ।

"एष स्त्रीपुंसयोरुक्तो धर्म्मो वो रतिसंहितः ।
आपद्यपत्यप्राप्तिञ्च दायभागं निबोधत ॥")

संहतिः । इति शब्दरत्नावली ॥ अणिमाद्यष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । स च अभीप्सितप्रापणम् । इति हेमचन्द्रो भरतश्च ॥

प्राप्यं, त्रि, (प्र + आप् + ण्यत् ।) प्राप्तव्यम् । तत्पर्य्यायः । गम्यम् २ समासाद्यम् ३ । इत्यमरः ।३।१।८२॥ (यथा, मार्कण्डेये । ६२।२०

"मयैषा सानुरागेण बहुशः प्रार्थिता सती ।
निराकृतवती सेयमद्य प्राप्या भविष्यति ॥"

व्य, प्र + आप् + ल्यप् । यथा, मेघदूते ।

'प्राप्यावन्तीमुदयनकथाकोविदग्रामवृद्धान् ॥)

प्राबोधिकः, पुं, (प्रबोधाय हितः। प्रबोध + ठक्) उषःकालः । इति शब्दमाला ॥ प्राबोधकोऽपि पाठः ॥

प्राभवं, क्ली, (प्रभोर्भावः । प्रभु + अण् ।) श्रेष्ठत्वम् । इति शब्दचन्द्रिका ॥

प्राभाकरः पुं, (प्रभाकरस्यायं तन्मतं वेत्तीति । प्रभाकर + अण् ।) मीमांसकविशेषः । यथा, "व्याप्तिस्वरूपं निरूप्य परमतनिराकरणपूर्ब्बकं

स्वमतेन तदग्रहोपायमभिधातुं प्रथमं प्राभाकरमतमुपदर्शयति सेयमित्यादिना।" इति व्याप्तिग्रहोपायशिरोमणिः॥ प्राभाकरमते व्याप्तेः सकृद्दर्शनगम्यत्वंयथा,तस्मात् परिशेषेण सकृद्दर्शनगम्या सा। इति व्याप्तिग्रहोपायचिन्तामणिः॥

प्राभृतं,क्ली, (प्राभ्रियते स्मेति। प्र+आ+भृ क्त।) उपढौकनम्। इत्यमरः॥ (यथा, कथासरित्सागरे। १७। १६४।

"तं दत्तप्राभृतं दूतं स संमान्य व्यसर्जयत्॥")

प्राभृतकं, क्ली, (प्राभृत+स्वार्थेकन।) प्राभृतम् तत्पर्य्यायः। कौशलिका २। इति हारावली १५८॥

प्रामाद्यः,पुं,(प्रमाद्यत्यनेनेति।प्र+मद्+ण्यत्।) वासकः। इति शब्दचन्द्रिका॥ स्वार्थेण्यण् प्रमादः। तस्य भावे, क्ली।

प्रामाणिकः, त्रि, (प्रमाणादागतः। प्रमाण+ठक्।) हैतुकः। मर्य्यादार्हः। शास्त्रज्ञः। परिच्छेदकः। प्रमाणकर्त्ता। इतिप्रमाणशब्दात् कर्त्तरि णिकप्रत्ययः।

प्रामाण्यं, क्ली, (प्रमाणस्य भावः। प्रमाण+ष्यञ्।) प्रमाकरणत्वम्। प्रमाणशब्दाद्भावार्थे ष्यञ्प्रत्ययः॥ (यथा, मार्कण्डेये। १५। ४३।

"सत्यंभूतहितार्थोक्तिर्वेदप्रामाण्यदर्शनम्।
गुरुदेवर्षिसिद्धर्षिपूजनं साधुसङ्गमः॥")

प्रामाण्यवादः, पुं, (प्रामाण्यस्यवादः कथनम्।) प्रमाकरणताकथनम्। तद्इतितत्प्रकारकत्वप्रमात्वकथनम्। चिन्तामणिन्यायग्रन्थविशेषः। इति पूर्व्वाचार्य्याः॥ स यथा। अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशसुविद्यास्थानेष्वभ्यर्हिततमामन्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्र प्रेक्षावत् प्रवृत्त्यर्थं प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादावसूत्र यत्। तेषु प्रमाणाधीना सर्व्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते। इत्यादि गङ्गेशोपाध्यायः॥

प्रामोत्यं क्ली, (प्रमयनमिति। प्र+मी वधे+भावे क्त। तत्र प्रमीते मरणे साधु इति यञ्। अस्य वधत्वत्वात्तथात्वम्।) ऋणम्। इति विकाण्डशेषः। (प्रमीतस्य भाव इति। प्रमीत+ष्यञ्।) मृतत्वञ्च॥

प्रायः, पुं,(प्रकृष्टमयनमिति। प्र+अय+घञ् यद्वा, प्र+इ+"एरच्।" ३। ३। ५६। इत्यच्।) मरणम्। मरणार्थमनशनम्। (यथा, रामायणे। ४। ५३। १२।

"अहं वः प्रतिजानामि न गमिष्याम्यहं पुरीम्
इहैव प्रायमासिष्ये श्रेयो मरणमेव च॥")

तुल्यम्। बाहुल्यम्। इति मेदिनी। ये, ३६॥ (यथा, साहित्यदर्पणे। ३। १११।

"तस्कराः पण्डकाः मूर्खाः सुखप्राप्तधनास्तथा।
लिङ्गिनश्चक्रकामाद्या आसां (वेश्यानाम्) प्रायेण वल्लभाः॥")

वयः। इति हेमचन्द्रः॥ (पापम्। तपः। इति स्मृतिः॥ क्ली,प्रवेशः। युद्धम्। यथा, ऋग्वेदे। २। १८। ८।

"उप ज्येष्ठे वरूथे गभस्तौ
प्राये प्राये जिगीवांसः स्याम॥")

"किञ्च प्राये प्राये सोमपानार्थमिन्द्रस्य यज्ञशालायां प्रवेशे प्रवेशे जिगीवांसः शत्रूणां जेतारो भवेम। यद्वा, प्राये प्राये प्रकर्षेण इयते गम्यते योद्धृभिरिति प्रायं युद्धम्। तस्मिन् युद्धे जिगीवांसः शत्रून् जितवन्तो भवेम॥" इति तद्भाष्ये सायनः॥ त्रि, गमकः। यथा, मनौ। ३। २६४।

"प्रक्षाल्यहस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत्।
ज्ञातिभ्यः सत्कृतं दत्त्वाबान्धवानपि भोजयेत्॥

"प्रक्षाल्येति। तदनु हस्तौ प्रक्षाल्याचम्य ज्ञातिप्रायमन्नं कुर्य्यात्। ज्ञातीन् प्रेति गच्छतीति ज्ञातिप्रायं कर्म्मण्यण्। ज्ञातीन् भोजयेदित्यर्थः॥" इति कुल्लूकभट्टः॥)

प्रायः, [स्] व्य,[ज्] (प्र+अय गतौ+असुन्।) बाहुल्यम्। इत्यमरः। ३। ४। १७॥ (यथा, कथासरित्सागरे ६। १२३।

"ततोऽहं शर्व्ववाग्भी च ज्ञातवन्तौ क्रमेण ताम्
अत्रान्तरे स च प्रायः पर्य्यहीयत वासरः॥")

प्रायश्चित्तं, क्ली, (प्रायस्य पापस्य चित्तं विशोधनं यस्मात्। यदुक्तं स्मृतौ।

"प्रायः पापं समुद्दिष्टं चित्तं तस्य विशोधनम्॥
यद्वा, प्रायस्य तपसः चित्तम् निश्चय इति।
"पारस्करप्रभृतीनि च संज्ञायाम्।" ६। १। १५७। इत्यत्र। "प्रायस्य चित्तिचित्तयोः।" इति वार्त्तिकोक्त्या सुट् निपात्यते च। निरुक्तिस्तु निम्ने द्रष्टव्या।) पापक्षयमात्रसाधनं कर्म्म। यथा, हारीतः। प्रयतत्वाद्दोषचितमशुभं नाशयतीति प्रायश्चित्तम्॥*॥ (प्रायश्चित्तमिति। यत्तपःप्रभृतिकं कर्म्म उपचितं सञ्चितमशुभं पापं नाशयतीति कृत-तत्-तत्-कर्म्मभिः कर्त्तुः प्रयतत्वाद्दा ग्रहत्वादेव तत्प्रायश्चित्तम्। तथाच पुनर्हारीतः। यथा, क्षारोपस्पर्शदण्डनिर्णेजन-प्रक्षालनादिभिर्वासांसि शुध्यन्ति एवं तपोदानयज्ञैः पापकृतः शुद्धिमुपयान्ति। शुद्धिं पापक्षयम्। यथा, महाभारते।

"अग्निर्गात्रान् मलमिव तमो ह्यग्निभयादृषा
दानेन तपसा चैव सर्व्वपापमपोहति॥"

तेन पापक्षयमात्रसाधनत्वेन विधिबोधितं कर्म्म प्रायश्चित्तम्। मात्रार्थलाभस्तु प्रयतत्वादेवेत्येवकारार्थकवाग्यद्भात्। तथाच विष्णुः।
"वा स्यादविकल्पोपमयोरेवार्थे च समुच्चये।"
एवञ्च।
"अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे।"
इति विष्णुक्तस्याश्वमेधस्यापि प्रायश्चित्तत्वम्। पापक्षयस्वर्गोभयसाधकस्य तु तस्यापि न प्रायश्चित्तत्वम्। प्रायश्चित्तस्य स्वर्गं सादिजनकत्वेऽपि तदंशे विधिबोधितत्वाभावान्नासम्भवः॥
इति प्रायश्चित्ततत्त्वम्॥) तस्य व्युत्पत्तिर्यथा। अङ्गिराः।

"प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्॥"

निश्चयसंयुक्तमापक्षयसाधनत्वेन निश्चितमित्यर्थः॥*॥ पापन्तु वैदिकप्रतिपाद्योऽनर्थः अनर्थस्यानिष्टसाधनम्। पापकारणमुक्तं याज्ञवल्क्येन। यथा,—

"विहितस्यानुष्ठानान्निन्दितस्य च सेवनात्।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति॥"*॥

पापविशेषेणावस्थाविशेषमाह मनुः।

"शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्॥
इह दुश्चरितैः केचित् केचित् पूर्व्वकृतैस्तथा।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्य्ययम्॥"

यमः।

"सुरापो ब्रह्महा गोघ्नः सुवर्ण स्तेयकृन्नरः।
पतितैः संप्रयुक्तश्च कृतघ्नो गुरुतल्पगः।
एते पतन्ति सर्व्वेषु नरकेष्वनुपूर्व्वशः॥"*॥

प्रायश्चित्तमाहात्म्यं यथा। अङ्गिराः।

"उद्यच्छन् यद्वदादित्यस्तमः सर्व्वं व्यपोहति
तद्वत् कल्याणमातिष्ठन् सर्व्वं पापं व्यपोहति॥
पापञ्चेत् पुरुषः कृत्वा कल्याणमभिपद्यते।
मुच्यते पातकैः सर्व्वैर्महाभ्रैरिव चन्द्रमाः॥
कल्याणं प्रायश्चित्तम्॥*॥ तस्यावश्यकर्त्तव्यत्वमाह यमः।

"तपसोन्ते विशुध्यन्ति कर्म्मणां वा परिक्षयात्
तस्मात् कर्त्तव्यमेतेस्तु प्रायश्चित्तं विशुद्धये॥"

कर्म्मणां भोगेन परिक्षयादित्यर्थः॥*॥ प्रायश्चित्तार्हत्वमाह मनुः।

"अकुर्व्वन् विहितं कर्म्म निन्दितञ्च समाचरन्।
प्रसजंश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः॥*॥
अज्ञानादयदि वा ज्ञानात् कृत्वा कर्म्म विगर्हितम्।
तस्माद्विमुक्तिमन्विच्छन् द्वितीयं न समाचरेत्॥

प्रायश्चित्तस्य काम्यत्वं नैमित्तिकत्वं नित्यत्वञ्च यथा। जाबालः।

"काम्यानां सफलार्थञ्च दोषघातार्थमेव च।
अतः काम्यं नैमित्तिकञ्च प्रायश्चित्तमिति स्थितिः॥
चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये।
निन्द्यैश्च लक्षणैर्युक्ता जायन्ते निष्कृतैनसः॥*॥

ज्ञानाज्ञानकृतपापयोः प्रायश्चित्तभेदो यथा। अङ्गिराः।

"अकामतः कृते पापे प्रायश्चित्तं न कामतः।
स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्व्वके॥"*

अथ प्रायश्चित्तनिरूपणम्।

तत्रादौ अङ्गिराः।

"कृते निःसंशये पापे न भुञ्जीतानुपस्थितः।
भुञ्जानो वर्द्धयेत् पापमसत्यं पर्षदि ब्रुवन्॥
सचेलं वाग्यतः स्नात्वा क्षौद्रवासाः समाहितः।

उपस्थाय ततः शीघ्रमार्त्तिमान् धरणीं गतः ।
गावैव शिरसा चैव न च किञ्चिद्ददाहरेत् ॥"
उपस्थानञ्च ब्राह्मणान् वस्त्रादिना तोषयित्वा कार्य्यम् । महत्सु पापेषु राज्ञोऽप्यधिकारः कार्य्य इत्याह देवलः ।
"स्वयं वा ब्राह्मणैः कृच्छ्रमस्यदोषे विधीयते ।
राज्ञा च ब्राह्मणैर्यैव महत्सु परिचक्षते ॥"*
परिषदमाहाङ्गिराः ।
"एकविंशतिसंख्याकैर्मीमांसावेदपारगैः ।
वेदाङ्गकुशलैर्यैव परिषत् संप्रकल्पयेत् ॥
चातुर्विद्यो विकल्पो च अङ्गविद्धर्म्मपाठकः ।
त्रयस्त्र्यग्निर्गुणो हृद्यः पर्षत् स्यात्तु दशावरा॥"
मनुः ।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ।
त्रयस्त्र्यग्निर्गुणः पूर्व्वे पर्षत् स्यात्तु दशावरा॥"
अङ्गिराः ।
"एषा तु लघुकार्य्येषु मध्यमेषु तु मध्यमा ।
महापातकिशीर्षेषु शतशो भूय एव वा ॥"
प्रदर्शनार्थमिदम् । यावद्भिरेव निरूपणं तावद्भिरेव परिषत् । दृष्टार्थत्वादेव तस्याः । तथा च यमः ।
"एको द्वौ वा त्रयो वापि यद्ब्रूयुर्धर्म्मपाठकाः ।
स धर्म्म इति विज्ञेयो नेतरेषां सहस्रशः ॥*"॥
प्रायश्चित्ताकथने दोषो यथा,—
"आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः ।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः ॥
अनर्हितैरनाहृतैरदृष्टैश्चैव संसदि ।
प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः ॥
न्यायतो मार्गमाणस्य क्षत्रियादेः प्रणामिनः ।
अन्तरा ब्राह्मणं कृत्वा व्रतमेतत् समादिशेत् ॥
हारीतः ।
"यथावयो यथाकालं यथाप्राणञ्च ब्राह्मणे ।
प्रायश्चित्तं प्रदातव्यं ब्राह्मणैर्धर्म्मपाठकैः ॥
तस्मात् कृच्छ्रमथार्द्धं पादं वापि विधानतः ।
ज्ञात्वा बलाबलं कालं प्रायश्चित्तं प्रकल्पयेत्॥"
अथ कृच्छ्रावनुग्रहमाह पराशरः ।
"दुर्व्वलेऽनुग्रहः कार्य्यस्तथा वै शिशुहृद्धयोः ।
अतोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रही भवेत् ॥"
स्नेहादिनानुग्रहे दोषो यथा,—
"स्नेहाद्वा यदि वा लोभात् मोहादज्ञानतोऽपि वा ।
कुर्व्वन्त्यनुग्रहं ये तु तत् पापं तेषु गच्छति ॥"
शास्त्रीयप्रायश्चित्तमुदाहृत्य पश्चादनुग्रहः कार्य्य इत्याहाङ्गिराः ।
"कृत्वा पूर्व्वमुदाहारं यथोक्तं धर्म्मवक्तृभिः ।
पश्यात्कार्य्यानुसारेण शक्त्या कुर्व्वन्त्यनुग्रहम् ॥
हृद्यत्वादिभेदात् प्रायश्चित्तं यथा,—
"अशीतिवर्षस्य वर्षाणि बालो वाप्यूनषोड्शः ।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च ॥"

अथ पापनिष्क्रमणादिः ।

तत्र मनुः ।

"ख्यापनेनानुतापेन तपसाध्ययनेन च ।
पापकृन्मुच्यते पापात्तथा दानेन चापदि ॥"
आपदीत्यनेन अध्ययनतपसोर्दानमनुकल्पत्वमुक्तम् । एतद्धिंसाव्यतिरिक्तविषयम् । हिंसायान्तु दानं मुख्यम् । यथा, भविष्ये ।
'हिंसात्मकानां सर्व्वेषां कीर्त्तितानां मनीषिभिः ।
प्रायश्चित्तकदम्बानां दानं प्रथम उच्यते ॥"
तथा मनुः ।
"दानेन वधनिर्णेकं सर्पादीनामशक्नुवन् ।
एकैकशस्त्यरेत् कृच्छ्रं द्विजः पापापनुत्तये ॥"*॥
सामान्यप्रायश्चित्तानि यथा, संवर्त्तः ।
"हिरण्यदानं गोदानं भूमिदानं तथैव च ।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥"
यमः ।
"शोषणेन शरीरस्य तपसाध्ययने न च ।
पापकृन्मुच्यते पापात् दानेन च दमेन च ॥"
मनुः ।
"कृत्वा पापं हि सन्तप्य तस्मात् पापात्प्रमुच्यते ।
नैवं कुर्य्यां पुनरिति निवृत्त्या पूयते नरः ॥"
विष्णुपुराणम् ।
"प्रायश्चित्तान्यशेषाणि तपःकर्म्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥"
यमः ।
"गवाह्निका देवपूजा वेदाभ्यासः सरित्प्लवः ।
नाशयन्त्याशु पापानि महापातकजान्यपि॥"
गौतमः । "हिरण्यं गौर्व्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि । एतान्येवानादेशे विकल्पेन क्रियेरन् एनसि लघुनि लघूनि गुरुणि गुरूणि ।" विष्णुपुराणम् ।
"एवं विषयभेदाद्वै व्यवस्थाप्यानि पुत्रक ! ।
प्रायश्चित्तानि सर्व्वाणि गुरूणि च लघूनि च ॥
अन्यथा हि महाबाहो ! लघूनामुपदेशतः ।
गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत् ॥"
महाभारते ।
"यद्यकार्य्यशतं कृत्वा कृतं गङ्गाभिषेचनम् ।
सर्व्वं दहति गङ्गाम्भस्तूलराशिमिवानलः ॥"
व्रतानि शुद्धिकारणान्याह विश्वामित्रः ।
"कृच्छ्रं चान्द्रायणादीनि शुद्धभ्युदयकारणम् ।
प्रकाशे वा रहस्ये वा संशयेऽनुक्तके स्मृते ॥
प्राजापत्यः शान्तपनः शिशुकृच्छ्रः पराककः ।
अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रकः ॥
महाशान्तपनः शुद्धेः तप्तकृच्छ्रस्तु पावनः ।
जलोपवासकृच्छ्रश्च ब्रह्मकूर्च्चस्तु शोधकः ॥
एते समस्ता व्यस्ता वा प्रत्येकमेकशोऽपि वा ।
पातकादिषु सर्व्वेषु पापकेषु प्रयत्नतः ॥
कार्य्याश्चान्द्रायणेयुक्ताः केवला वा विशुद्धये ।
शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा ॥
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति ।
उपवासस्त्रिरात्रं वा मास पक्षस्तदर्द्धकम् ॥
षड्रुद्रादशाहादि कार्य्यं शुद्धिफलार्थिना ।
उपपातकयुक्तानामनादिष्टेषु चैव हि ॥
प्रकाशे च रहस्ये च अभिमन्त्र्याथपेक्षया ।
जातिग्रन्थिगुणान् दृष्ट्वा सकृद्दुष्टिकृतं तथा ॥
अनुबन्धादिकं दृष्ट्वा सर्व्वं कार्य्यं यथाक्रमम् ॥"
प्रकाशकृते पापे व्रतानि मुख्यानि । रहस्यकृते जपादीनि । यथा प्राजापत्यादीन्यभिधाय मनुः
"एतैर्द्विजातयः शोध्या व्रतैरापिकृतैनसः ।
अनापिकृतपापांस्तु मन्त्रैर्हौमिस्तु शोधयेत् ॥"
देवलः ।
"प्रकाश उक्तं यत्किञ्चित् त्रिंशभागो रहस्यके ।
त्रिंशभागः षष्टिभागः कल्पो जात्याद्यपेक्षया॥
इति प्रायश्चित्तविवेकः ॥

अथ प्रायश्चित्तपूर्व्वाङ्गकृत्यम् । अङ्गलिखितौ ।
"वाप्य केशनखान् पूर्व्वं घृतं प्राश्य वह्निर्निशि ।
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् ।
प्रायश्चित्तमुपासीनो वाग्यतस्त्रिसवनं स्नशेत्॥"
केशधारणेच्छायां द्विगुणव्रतादिकमाह हारीतः
"राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः
केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत् ॥
केशानां धारणार्थन्तु द्विगुणं व्रतमाचरेत् ।
द्विगुणे तु व्रते चौर्णे द्विगुणा दक्षिणा भवेत्॥"
विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम् ।
ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥"
सधवास्त्रीणां विशेषमाह भवदेवभट्टृतं वचनम् ।
"वपनं नैव नारीणां नानुव्रज्या जपादिकम् ।
न गोष्ठे शयनं तासां न च दद्यादृगवाजिनम्॥
सर्व्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम् ।
सर्व्वत्रैवं हि नारीणां शिरसो मुण्डनं स्मृतम्॥"
अथ धेनुमूल्यव्यवस्था । तत्र संवर्त्तः ।
"प्राजापत्यव्रताशक्तौ धेनुं दद्यात् पयस्विनीम्।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः ॥"
पयस्विनीमिति विशेषणं दुग्धोपयोगाय। सच वत्सं विना न सम्भवति। अतः सवत्साया एव दानं मुख्यम् । तदभावे यथोचितं मूल्यम् । तद्सम्भवे पुराणत्रयम् । द्वात्रिंशत्पणिका गावो वत्सः पौराणिको भवेदिति कात्यायनवचनात् षट्त्रिंशन्मतमिति कृत्वा पठन्ति ।
"धेनुः पञ्चभिराख्याता मध्यानां त्रिपुराणिकी।
कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्त्तिता ॥"
प्रायश्चित्तोत्तरकर्त्तव्यानि । यथा भविष्ये ।
"क्रियते शुद्धये यत्तु ब्राह्मणानान्तु भोजनम् ।
शुद्ध्यर्थमिति तत्प्रोक्तं वैनतेय ! मनीषिभिः ॥
जाबालः ।
"आरम्भे सर्वकृच्छ्राणां समाप्तौ च विशेषतः ।
आर्द्धं नैव हि श्राद्धाग्नौ जुहुयादाहुतीःपृथक्
श्राद्धं कुर्य्याद्व्रतस्यान्ते गोहिरण्यान्नदक्षिणम्॥
प्रायश्चित्तानन्तरं गोभ्यो यवसं दद्यात्। यदि तु गावस्तृप्तास्तृण न गृह्णीयुस्तदा पुनस्तत्प्रायश्चित्तमनुतिष्ठेत् । यथा हारीतः । स्वशिरसा यवसमादाय गोभ्यो दद्यात् यदि ताः प्रमुदिता न गृह्णीयुरथैनं प्रवर्त्तयेयुः । एनं कृतप्रायश्चित्तम् इतरथा न । इति प्रायश्चित्ततत्त्वम् ॥*॥

अथ प्रायश्चित्तविवेकोक्तनवविधपापानां प्रायश्चित्तानि लिख्यन्ते।

अथातिपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा।
ब्राह्मणस्य माठगमनं दुहितृगमनं स्नुषागमनञ्च।	अज्ञानतो द्विगुणद्वादशवार्षिकव्रतम्। तत्तु महापातके द्रष्टव्यम्। ज्ञानत एतद्द्विगुणम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं सुवर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
क्षत्रियवैश्यशूद्राणां माठदुहितृस्नुषागमनम्।	हुताशनप्रवेशेन मरणम्। चतुर्विंशतिवार्षिकव्रतं वा। एतत्तु अकामतः कामतस्तद्द्विगुणम्। माठदुहितृस्नुषाणामपि एतद्व्रतादिकं करणीयम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं सुवर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा।
अकामतो ब्राह्मणकर्तृकब्रह्मवधः।	द्वादशवार्षिकव्रतम्। यथा मनुः। "ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्। भैक्ष्याशात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम्। भिक्षाशी विचरेद्ग्रामं वन्धेर्यदि न जीवति॥"	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं हिरण्यादिकं वा।	१०० गावः। तदशक्तौ १०० कार्षापणाः।
कामतो ब्राह्मणकर्तृकब्रह्मवधः।	याज्ञवल्क्योक्तप्रकारेण मरणम्। तथा। लोमभ्यः स्वाहेति ऋचा लोमप्रभृति वै तनुम्। मज्जान्तां जुहुयादापि मन्त्रैरेभिर्यथाक्रमम्। एतत्तु कलौ ब्राह्मणेतरपरम्। तदशक्तौ द्विगुणद्वादशवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं सुवर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अज्ञानतो ब्राह्मणकर्तृकब्राह्मणीगर्भवधः।	ब्रह्मवधप्रायश्चित्तम्। अज्ञानत एतदर्धम्। अनुपनीतबालकवधेऽप्येवम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं सुवर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अकामतः सवनस्थब्राह्मणवधः	द्विगुणद्वादशवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं सुवर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
कामतः सवनस्थब्राह्मणवधः।	तद्द्विगुणम्। ४८ अष्टचत्वारिंशद्वार्षिकव्रतम्।	७२० धेनवः।	२१६० कार्षापणाः। तन्मूल्यं सुवर्णादि वा।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
ब्राह्मणकर्तृकमाठसोदरभ्रातृगुरुश्रोत्रियाहिताग्नीनां वधः।	४८ अष्टचत्वारिंशद्वार्षिकव्रतम्। एतच्च कामतः। अकामत एतदर्धम्।	७२० धेनवः।	२१६० कार्षापणाः। तन्मूल्यं सुवर्णादि वा।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
अज्ञानतो ब्राह्मणकर्तृकवेदपारगाततायिब्राह्मणवधः।	१२ वार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं सुवर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
अज्ञानतस्तस्य वधः।	तदर्धम्। ६ वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। तदशक्तौ ५० कार्षापणाः।
ज्ञानतोऽज्ञानतो वा ब्राह्मणकर्तृकपतितब्राह्मणवधः।	तथा।	तथा	तथा।	तथा।
अकामत आग्नेयकारिकादिब्राह्मणवधः।	एकवार्षिकव्रतम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। तदशक्तौ ८/६॥ कार्षापणाः।
कामतस्तस्य वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतः क्षत्रियकर्तृकब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्तद्विगुणम्। तच्च २४ वार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं सुवर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा।
कामतस्तद्वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतो वैश्यकर्तृकब्रह्मवधः।	ब्राह्मण कर्तृकवधप्रायश्चित्तत्रिगुणम्। तच्च ३६ वार्षिकव्रतम्।	५४० धेनवः।	१६२० कार्षापणाः।	३०० गावः। अशक्तौ ३०० कार्षापणाः।
कामतो वैश्यकर्तृकब्रह्मवधः।	७२ वार्षिकव्रतम्।	१०८० धेनवः।	३२४० कार्षापणाः।	६०० गावः। अशक्तौ ६०० कार्षापणाः।
अकामतः शूद्रकर्तृकब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्तचतुर्गुणम्। तच्च ४८ वार्षिकव्रतम्।	७२० धेनवः।	२१६० कार्षापणाः।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
कामतस्तद्वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतो ब्राह्मणकर्तृकब्राह्मणीवधः।	ब्रह्मवधप्रायश्चित्तार्द्धम्। तच्च ६ वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
कामतस्तद्वधः।	तद्द्विगुणम्। क्षत्रियस्य ब्राह्मणीवधे ब्राह्मणकर्तृकवधप्रायश्चित्त-द्विगुणम्। वैश्यस्य त्रिगुणम्। शूद्रस्य चतुर्गुणम्। अनेकब्राह्मणवधे प्रायश्चित्तस्यैकत्वम्। यदेव साक्षाद्वधकर्त्तुः प्रायश्चित्तं तदेव स्वल्पप्रवर्त्तुरनुग्राहकस्य अप्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य च पादहीनम्। वध्यप्रतिरोधकस्य अनुग्राहकस्य प्रवृत्त-प्रवर्त्तकरूपप्रयोजकस्य च अर्द्धम्। अनुमन्तुर्निमित्तिनश्च पादः। अशक्तौ स्त्रीबालवृद्धानां सर्व्वत्रार्द्धम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अज्ञानतो ब्राह्मणस्य पैष्टीसुरापानम्। हिरण्यस्तगौड़ीमाध्वीपानञ्च।	अग्निसमस्पर्शानां सुरागोमूत्रजलदुग्धघृत गोमयरसानामन्यतमस्यामरणात् पानम्। चतुर्विंशतिवार्षिकव्रतं वा।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अज्ञानतो ब्राह्मणस्य तासां पानम्।	एतदर्द्धम्। तच्च द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
अज्ञानतः क्षत्रियस्य पैष्टीसुरापानम्।	नववार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम्।	१३५ धेनवः।	४०५ कार्षापणाः। तन्मूल्यस्वर्णादि वा।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
अज्ञानतो वैश्यस्य पैष्टीसुरापानम्।	षाड्वार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम् स्त्रीबालवृद्धानामर्द्धादिकम्।	९० धेनवः।	२७० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	५० गावः। अशक्तौ ५० कार्षापणाः।
अज्ञानतो ब्राह्मणकर्तृकब्राह्मणस्वामिकाशीतिरत्निकायपरिमितसुवर्णस्तेयम्।	अपहृतद्रव्यं तस्यानुरूपं मूल्यं वा स्वामिने दत्त्वा द्वादशवार्षिकव्रतं करणीयम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ज्ञानतस्तत्कर्तृकतत्स्तेयम्।	एतद्द्विगुणं २४ वार्षिकव्रतम्। गुणवद्ब्राह्मणकर्तृके तु सर्व्वत्रार्द्धम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
ज्ञानतः क्षत्रियवैश्यशूद्रकर्तृकब्राह्मणस्वामिकाशीतिरत्निकापरिमितसुवर्णस्तेयम्।	राजकर्तृकमुपलाघातेन मरणम्। चतुर्विंशतिवार्षिकव्रतं वा।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा।
अज्ञानतस्तत्कर्तृकतत्स्वामिकतत्सुवर्णस्तेयम्।	द्वादशवार्षिकव्रतं स्त्रीबालहतानामर्धम्। एकस्योभयधर्मत्ववत्त्वे पादः।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा	१०० गावः। अशक्तौ १०० कार्षापणाः।
ज्ञानतो गुर्वङ्गनागमनम्। अथात् विमाष्टगमनम्। शूद्रस्य ब्राह्मणीगमनञ्च।	गुरुतल्पगः पापमभिभाष्य तप्ते लोहमये शयीत। ज्वलन्तीं लोहप्रतिमां मृण्मयीं प्रतिमां वा आलिङ्ग्य म्रियेत। स्वयंवा अग्निहवणावुत्कृत्य अञ्जलौ निधाय आमरणात् नैर्ऋतीमिष्टिमातिष्ठेत्।			
	चतुर्विंशतिवार्षिकव्रतं वा कुर्यात्। गुर्वङ्गनयापि एतत् करणीयम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अज्ञानतो गुर्वङ्गनागमः।	द्वादशवार्षिकव्रतम्। बालहत्ययोरर्धम्। एतच्चातुर्वर्ण्यविषयम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
चतुर्णां महापातकिनां संसर्गः।	ज्ञानतः सकृत् प्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
तत्र गुरुसंसर्गो यथा। पतिताचार्यात् वेदाध्ययनम्। १। पतितग्निष्ठाय वेदाध्यापनम्। २। पतितेन ऋत्विजा ज्योतिष्टोमादियजनम्। ३। पतितस्य ज्योतिष्टोमादिनिष्पादनरूपयाजनम्। ४। पतितेन पतितया वा परिणयनम्। ५। स्तेयादिपतितान्यब्राह्मणीगमनम्। ६। पतितान्नस्य पतितेन सहैकपात्रे भोजनम्। ७।	अज्ञानतःसकृत्प्रथमसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	ज्ञानतो द्वितीयसंसर्गिणः नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	अज्ञानतो द्वितीयसंसर्गिणः सार्धचतुर्वार्षिकव्रतम्।	६८ धेनवः।	२०२॥० कार्षापणाः।	३८ गावः। अशक्तौ ३७॥० कार्षापणाः।
	ज्ञानतस्तृतीयससर्गिणः षाड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
	अज्ञानतस्तृतीयसंसर्गिणश्चैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	ज्ञानाज्ञानतश्चतुर्थसंसर्गिणः प्रायश्चित्ताभावः। ब्रह्मघातिनां क्षत्रियवैश्यशूद्राणां ज्ञानाज्ञानतः संसर्गे तु क्रमेण एतस्य द्विगुणं त्रिगुणं चतुर्गुणं ज्ञेयम्।			
तत्र लघुसंसर्गो यथा। उपनयनं विना पतिताय वेदाध्यापनम्। १। पतितात्ताष्टाध्ययनम्। २। पतितयजमानस्य अष्टकादियज्ञयाजनम्। ३। पतितेन ऋत्विजाष्टकादियज्ञयजनम्। ४ पतितस्यब्राह्मणीगमनम्। ५। पतितशूद्रागमनम्। ६। अपतितान्नस्य पतितेन सहैकपात्रे भोजनम्। ७। पतितोच्छिष्टभोजनम्। ८।	ज्ञानतः षण्मासससंसर्गे प्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	अज्ञानतः षण्मासससंसर्गे प्रथमसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	ज्ञानतः षण्मासससंसर्गे द्वितीयसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	अज्ञानतः षण्मासससंसर्गे द्वितीयसंसर्गिणः सार्धचतुर्वार्षिकव्रतम्।	६८ धेनवः।	२०२॥० कार्षापणाः।	३८ गावः। अशक्तौ ३७॥० कार्षापणाः।
	ज्ञानतः षण्मासससंसर्गे तृतीयसंसर्गिणः षाड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
	अज्ञानतः षण्मासससंसर्गे तृतीयसंसर्गिणश्चैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	चतुर्थसंसर्गिणो ज्ञानाज्ञानतः प्रायश्चित्ताभावः।			

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
महापातकिनां लघुतरसंसर्गो-यथा। एकशय्याशनयानादिः। ततो लघुतर आलापस्पर्शनिःश्वासादिः।	एभिश्च त्रिभिर्लघुतरसंसर्गैरेको लघुसंसर्गः।			
	ज्ञानतस्त्रिभिर्लघुसंसर्गैर्वत्सरेण साम्यम्। तेनाष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	अज्ञानतो वत्सरद्वयेन।	तथा।	तथा।	तथा।
	ज्ञानत एकैकशो वत्सरत्रयेण।	तथा।	तथा।	तथा।
	अज्ञानाद्वत्सरषट्केन।	तथा।	तथा।	तथा।
	संलापादीनां त्रयाणां एकैकयानादिसमानत्वात् ज्ञानतो वत्सरत्रयेण पातः।	तथा।	तथा।	तथा।
	संलापादीनां त्रयाणां एकैकयानादिसमानत्वादज्ञानाद्वर्षषट्केन पातः। तेनाष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	ज्ञानादेकैकशो वत्सरनवकेन।	तथा।	तथा।	तथा।
	अज्ञानादेकैकशोऽष्टादशवत्सरैः पातः।*	तथा।	तथा।	तथा।
	नवविधपापान्वितानां मध्यात् येन पापीयसा यः संसृष्टः स तस्य व्रतं पादहीनं कुर्यात्॥ एतच्च प्रथमसंसर्गिणाम्। द्वितीयसंसर्गिणां द्विपादहीनम्। तृतीयसंसर्गिणां त्रिपादहीनं सर्वत्र ज्ञेयम्॥*॥ संसर्गाणामुक्तकालन्यूनाधिक्ये भागहारेण प्रायश्चित्तन्यूनाधिक्यं ज्ञेयम्॥*॥ रघुनन्दनभट्टाचार्यमते कलौ लघुसंसर्गेषु प्रतिग्रहादिषु पातित्याभावात् तत्प्रायश्चित्ताभावः।			
पतितोत्पन्नत्वमपि महापातकिसंसर्गविशेषः।	यस्य पतितस्य यत् प्रायश्चित्तं तस्य पातित्यदशायां जातस्य पुत्रस्य तत् तृतीयभागप्रायश्चित्तम्। तदानीं तज्जातायाः कन्यायाः पतितोत्पन्नपुत्रप्रायश्चित्ततृतीयभागप्रायश्चित्तम्।			

अथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ। धेनुदानम्।	तदशक्तौ। चूर्णीदानम्।	दक्षिणा।
समुत्कर्षे अनृतम्। तत्त समुत्कर्षनिमित्तं वाचा क्रियया वा अन्यथा प्रतिपादनं यथा शूद्रस्य ब्राह्मणोऽहमिति वचनं यज्ञोपवीतधारणञ्च। अथवा परस्य सम्यग्जातिविद्योत्कर्षे सति नायं ब्राह्मणो न च किञ्चिदयं जानीते इत्यनृतवचनम्। १। राजगामिपैशुनम्। तत्तु राजनि निर्दोषस्य दोषख्यापनम्। २। गुरोरलीकनिर्बन्धः। स तु गुरोर्जन्मदातुर्मृषादोषाभियोगः। ३।	द्वादशवार्षिकव्रतम्। एतच्च ज्ञानात्यन्ताभ्यासतः॥*॥ एतन्मध्यादुपपातके दृश्यते तदज्ञानादिना लघुविषयश्चेत्यादिव्यवस्थेयम्॥*॥ यच्च वशिष्ठवचनं ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुञ्जीत वेदमाचार्यात्। विष्णुः। समुत्कर्षानृते गुरोरालीकनिर्बन्धे तदाचारणे च मासं पयसा वर्त्तेत। आचारणं परदारगमनाभिशापः। वशिष्ठः। गुरोरालीकनिर्बन्धे सचेलस्नातो गुरुं प्रसादयेत् प्रसादात् पूतो भवति। एतानि प्रमादादिकृते बोध्यानि।	१८० धेनवः।	५४० कार्षापणाः	१०० गावः। अशक्तौ १०० कार्षापणाः।

अथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
एतानि त्रीणि ज्ञानतः अत्यन्ताभ्यासे अज्ञानकृतब्रह्महत्यासमानि। यागस्थयोः क्षत्रियवैश्ययोर्व्वधः। ४। गर्भिणीवधः। ५। रजस्वलावधः। ६। अत्रिगोवावधः। ७। ब्राह्मणव्यतिरिक्तविज्ञातगर्भवधः। ८। शरणागतवधः। ९। एतानि च अज्ञानकृतब्रह्महत्यासमानानि।				
ब्रह्मोज्झता। सा च असच्छास्त्राभियोगेन अधीतवेदविस्मरणम्। १। वेदनिन्दा। अर्थतो ग्रन्थतश्च।२। कौटसाक्ष्यम्। ३। सुहृद्वधः। स च ब्राह्मणव्यतिरिक्तमित्रवधः। ४। गर्हितान्नजग्धिः। सा च ज्ञानतोऽत्यन्ताभ्यासेन अन्त्यजान्नभोजनम्। ५। गर्हितान्नजग्धिः। ज्ञानतोऽत्यन्ताभ्यासेन क्रव्याकलशुनादिभोजनम्। ६। एतानि षट् अज्ञानकृतसुरापानसमानि।	द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणसम्बन्धिनिःक्षेपहरणम्। १। नरा२श्व३रजत४भूमि५वस्त्र६मणीना७ञ्चाभ्यासेन हरणम्। एतानि सप्त ब्राह्मणस्वामिकाशीतिरक्षिका परिमितसुवर्णस्तेयसमानि।	ज्ञानतो द्वादशवार्षिकव्रतम्। अज्ञानतस्त्वर्द्धम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
सपिण्डस्त्रीगमनम्। १। ब्राह्मणकुमारीगमनम्। २। चाण्डालादिस्त्रीगमनम्। ३। सवर्णमित्रस्त्रीगमनम्। ४। पुत्रस्यासवर्णस्त्रीगमनम्। ५। श्रौरसेतरपुत्रभार्य्यागमनम्। ६। पितृव्यस्नुषागमनम्। ७। मातृव्यस्नुषागमनम्। ८। गन्तारमपेक्ष्य हीनवर्णपितृपत्नीगमनम्। ९। पितृव्यपत्नीगमनम्। १०। मातामहपत्नीगमनम्। ११। मातुलपत्नीगमनम्। १२। श्वश्रूगमनम्। १३। स्वसृगमनम्। १४। ज्येष्ठभ्रातृपत्नीगमनम्। १५। राजपत्नीगमनम्। १६। श्रोत्रिय-	ज्ञानतो महापातकोक्तप्रकारेण मरणं तदर्द्धकल्पिकं चतुर्विंशतिवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
	अज्ञानतो१२ द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	पञ्चपुरुषाधिकगामिनीनामासां गमने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्द्धसप्तधेनुसंकलनात्।	यथाशक्ति।
	अभ्यासव्यभिचारिण्याः सकृद्गमने अर्थात् सप्तमपुरुषगामिन्या गमने पराकः।	५ धेनवः।	१५कार्षापणाः।	यथाशक्ति।
	अष्टमादिपुरुषगामिन्या गमने तप्तकृच्छ्रम्	४ धेनवः।	११०० कार्षापणाः। पादोनधेनुचतुष्टयस्य ग्राह्यत्वात्।	यथाशक्ति।

अथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
पत्नीगमनम्।१७। ऋत्विक्-पत्नीगमनम्। १८। उपाध्यायपत्नीगमनम् । १९ । गिष्यपत्नीगमनम् । २० । स्वसमखीगमनम्। २१। असवर्णाजातदुहितृगमनम्।	अज्ञानादारोहणमात्रे सम्बन्धविप्रकर्षे वा परावस्तप्तकृच्छ्रो वा।			
२२। आचार्य्यपत्नीगमनम्। २३। शरणागतागमनम्। २४। पव्रजितागमनम्।२५। धात्रीगमनम्। २६। मातृस्वसृगमनम्। २७। निःक्षत्रस्त्रीगमनम्। २८। वर्णोत्तमागमनम्।२९। एतानि गुरुतल्पगमनसमानि । *।	ज्ञानतो महापातकोक्तप्रकारेण मरणम्। तद्दैकल्पिकं चतुर्विंशतिवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	२०० गावः। अशक्तौ २०० । कार्षापणाः।
इति चतुःप्रकाराख्यनुपातकानि मिलित्वा एकपञ्चाशत्संख्येयानि।	अज्ञानतो द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तल्लभ्यस्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	पञ्चपुरुषाधिकगामिनीनामासां गमने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्द्धसमधेनुसंकलनात्।	यथाशक्ति।
	अभ्यासव्यभिचारिण्याः सकृद्गमने अर्थात् सप्तमपुरुषगामिन्या गमने पराकः।	५ धेनवः।	१५ कार्षापणाः	यथाशक्ति।
	अष्टमादिपुरुषगामिन्या गमने तप्तकृच्छ्रम्	४ धेनवः।	११० कार्षापणाः। पादोनधेनुचतुष्टयस्य ग्राह्यत्वात्।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ। धेनुदानम्।	तदशक्तौ। चूर्णीदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकज्ञानकृतब्राह्मणसामिकगोवधः।	वैसामिकव्रतम्। तदयथा। कृतसांशखवपनो व्यापादितायां गोयुग्मेणाकृतपरिधानोत्तरावगुण्ठनो सामनेकं गोसूक्तेन यवागूकृतान् यवान् पिबन् गोष्ठे वसेत्। अपरमासद्वये उपोष्यापराह्णे मायं स्वल्पं भुञ्जीत। जितेन्द्रियो गोसूक्तेन स्नानं चरेत्। दिवा गवानुगमनं क्वचिं तिष्ठन् गोरजःपानञ्च चरेत्। गोः शुश्रूषां नमस्कारञ्च कुर्य्यात्। रात्रौ वीरासनं वसेत्। तिष्ठन्तीषु गोष्वनुतिष्ठेत्। व्रजन्तीषु तास्वनुव्रजेत् आसीनासु तास्वासीनः। वीतमत्सरः। आतुरामभिशस्तां पतितां पङ्कलग्नां भयनिमित्तैर्वीरव्याघ्रादिभिराक्रान्तां च गां सर्व्वशक्तिभिर्विमोचयेत्। ग्रीष्मवर्षाशीतेषु मारुते शृंगं वाति वा गोस्त्राणमकृत्वा आत्मत्राणं न कुर्य्यात् आत्मनः अन्येषां वा गृहक्षेत्रखलेषु भक्षयन्तीं पिबन्तं वत्सञ्च निवारणाभिप्रायेण न कथयेत्। एतद्विधानेन यो गामनुगच्छति स गोहत्याकृतपापात् प्रमुच्यते। एकं वृषं दश गाश्च दक्षिणां दद्यात्। एतदशक्तौ वेदविद्भ्यः सर्व्वस्वं दद्यात्। एतच्चतुर्थ्यादिविषयम्। स्वागूढवालवृद्धानामदण्ड्यम्।	१२ धेनवो भवदेवभट्टसम्मताः।	३६ कार्षापणाः तल्लभ्यस्वर्णादि वा।	१ वृषः १० गावः अशक्तौ १५ कार्षापणाः।
		१७ धेनवो बहुसम्मताः।	५१ कार्षापणाः	तथा।

अथोपपापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ वर्णदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकाज्ञानकृतगवीवधः।	सार्द्धमासिकव्रतम्। तद्यथा। गोष्ठे गोसमीपे गोघ्नः स्थितिं कुर्य्यात्। तत्रैव क्षितौ शयनञ्च। शक्तुयावकपयोदधिसरगोमयानां भक्षणं क्रमशः कुर्य्यात्। नखरोमविवर्जितश्मश्रुवदनस्नानञ्चरेत्। जितेन्द्रियो वीतमत्सरश्च भवेत्। यथाशक्ति गायत्रीञ्च जपेत्। सार्द्धमासे पूर्णे सति विप्रान् भोजयेत्। गां तन्मूल्यं वा दक्षिणां दद्यात्। अनेन विधानेन गोघ्नः पापान्मुच्यते। एतद्व्रतं गोस्वामिने तत्सदृशरूपं गवान्तरं यथोक्तमूल्यं वा दत्त्वा कर्त्तव्यम्। स्त्रीशूद्रबालहतानामर्द्धं प्रायश्चित्तम्।	६ धेनवो भवदेवभट्टसम्मताः। ९ धेनवो बहुसम्मताः।	१८ कार्षापणाः। तन्मूल्यस्वर्णादि वा। २५॥० कार्षापणाः। बहुसम्मताः। सार्द्धधेनुसङ्गलनात्।	१ गौः। अशक्तौ १ कार्षापणः। स्मार्त्तमते ७॥० कार्षापणाः।
अज्ञानकृतशूद्रकर्त्तृक-ब्राह्मणस्वामिकगवीवधः।	त्रैमासिकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्।	६ धेनवो भवदेवभट्टसम्मताः। ९ धेनवो बहुसम्मताः।	१८ कार्षापणाः। २५॥० कार्षापणाः। बहुसम्मताः। तन्मूल्यस्वर्णादि वा।	१ गौः। अशक्तौ १कार्षापणः।
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्त्तृकक्षत्रियस्वामिकगवीवधः।	षाण्मासिकव्रतम्। तद्यथा। षाण्मासान् तद्धर्म्मणा परिहृतो गाग्रासाहर्त्ता गाव्रतो यवाग्री गाभिरेव सञ्चरन् तत्पापात् विमुच्यते।	१२ धेनवः।	३६ कार्षापणाः। तन्मूल्यस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकाज्ञानकृतक्षत्रियस्वामिकगवीवधः	षाण्मासिकव्रतार्द्धम्।	६ धेनवः।	१८ कार्षापणाः। तन्मूल्यस्वर्णादि वा।	यथाशक्ति।
शूद्रकर्त्तृकाज्ञानकृत-क्षत्रियस्वामिकगवीवधः।	षाण्मासिकव्रतार्द्धम्।	६ धेनवः।	१८ कार्षापणाः। तन्मूल्यस्वर्णादिवा	यथाशक्ति।
तत्कर्त्तृकाज्ञानकृततत्स्वामिकगवीवधः।	एतद्व्रतार्द्धम्। स्त्रीशूद्रबालहतानां सर्व्वत्रार्द्धम्।	३ धेनवः।	८ कार्षापणाः। तन्मूल्यस्वर्णादि वा	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकज्ञानकृतवैश्यस्वामिक-गवीवधः।	द्विगुणं मासव्रतम्। मासव्रतं यथा। मासैकं पञ्चगव्यपानं गोष्ठे वासः गवानुगमनं गोमतीजपः।	१० धेनवः।	३० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	यथाशक्ति।
तत्कर्त्तृकाज्ञानकृततत्स्वामिकगवीवधः।	एतदर्द्धम्।	५ धेनवः।	१५ कार्षापणाः। तन्मूल्यस्वर्णादि वा	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकज्ञानकृतशूद्रस्वामिकगवीवधः।	४ प्राजापत्यानि।	४ धेनवः।	१२ कार्षापणाः। तन्मूल्यस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकाज्ञानकृतशूद्रस्वामिकगवीवधः।	२ प्राजापत्ये। स्त्रीशूद्रबालहतानां सर्व्वत्रार्द्धम्। एकस्य स्त्रीशूद्रत्वाद्युभयधर्म्मवत्त्वे प्रायश्चित्तपादः।	२ धेनू।	६ कार्षापणाः। तन्मूल्यस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्त्तृकज्ञानकृतवधः।	द्विगुणं त्रैमासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	२४ धेनवो भवदेवभट्टसम्मताः। २४ धेनवो बहुसम्मताः।	७२ कार्षापणाः। १०२कार्षापणाः। बहुसम्मताः।	२ वृषौ २० गावः। अशक्तौ ३० कार्षापणाः।
ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसव्रतानां गवां शूद्रकर्त्तृकज्ञानकृतवधः	त्रैमासिकव्रतम्। अज्ञानतस्तदर्द्धम्।	१२धेनवः। १७ धेनवो बहुसम्मताः।	३६ कार्षापणाः। ५१ कार्षापणाः। बहुसम्मताः।	१० वृषः १० गावः। अशक्तौ १५ कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
क्षत्रियस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः।	द्विगुणं षाण्मासिकव्रतम्। अज्ञानतस्तदर्धम्।	२४ धेनवः।	७२ कार्षापणाः।	यथाशक्ति।
क्षत्रियस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः।	षाण्मासिकव्रतम्। अज्ञानतस्तदर्धम्।	१२ धेनवः।	३६ कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः।	चतुर्गुणं मासिकव्रतम्। अज्ञानतस्तदर्धम्।	२० धेनवः।	६० कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः।	द्विगुणं मासिकव्रतम्। अज्ञानतस्तदर्धम्।	१० धेनवः।	३० कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः।	८ प्राजापत्यानि। अज्ञानतस्तदर्धम्।	८ धेनवः।	२४ कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः।	४ प्राजापत्यानि। अज्ञानतस्तदर्धम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकाधमशूद्रस्वामिकगवीवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतशूद्रकर्तृकाधमशूद्रस्वामिकगवीवधः।	१ प्राजापत्यम्। अज्ञानतस्तदर्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अधमशूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः।	४ प्राजापत्यानि। अज्ञानतस्तदर्धम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
अधमशूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्वामिकाया गोरुत्पन्नमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः।	त्रैमासिकव्रतपादः। अज्ञानतस्तदर्धम्।	५ धेनवः।	१२॥० कार्षापणाः। सपादधेनुचतुष्टयसङ्कलनात्।	३॥० कार्षापणाः।
ब्राह्मणस्वामिकाया गोर्गात्रैसम्मितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः।	त्रैमासिकव्रतपादद्वयम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालवृद्धानामर्धम्।	९ धेनवः।	२५॥० कार्षापणाः। सार्धाष्टधेनुसङ्कलनात्।	७॥० कार्षापणाः।
ब्राह्मणस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः।	त्रैमासिकव्रतपादत्रयम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालवृद्धानामर्धम्। चैतन्ययुक्तगर्भवधे कृत्स्नमेव प्रायश्चित्तम्।	१३ धेनवः।	३८॰ कार्षापणाः। पादोनत्रयोदशधेनुसङ्कलनात्।	११॰ कार्षापणाः।
क्षत्रियस्वामिकाया गोरुत्पन्नमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	षाण्मासिकव्रतपादः। अज्ञानतस्तदर्धम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदग्रतो धेनुदानम् ।	तदग्रतो चूर्णोदानम् ।	दक्षिणा ।
क्षत्रियस्वामिकाया गोर्गात्रसम्मितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	षाण्मासिकव्रतपादद्वयम् । अज्ञाननस्तदर्धम् । स्त्रीशूद्रबालवृद्धानामर्धम् ।	६ धेनवः ।	१८ कार्षापणाः ।	यथाशक्ति ।
क्षत्रियस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	षाण्मासिकव्रतपादत्रयम् । अज्ञाननस्तदर्धम् । स्त्रीशूद्रबालवृद्धानामर्धम् । चैतन्ययुक्तगर्भवधे कृत्स्नमेव प्रायश्चित्तम् ।	९ धेनवः ।	२७ कार्षापणाः ।	यथाशक्ति ।
वैश्यस्वामिकाया गोरुत्पन्नमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः ।	द्विगुणमासव्रतस्य पादः । अज्ञाननस्तदर्धम् ।	३ धेनवः ।	७॥० कार्षापणाः । सार्धद्वयधेनुसङ्कलनात् ।	यथाशक्ति ।
वैश्यस्वामिकाया गोर्गातसम्मितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकवधः ।	द्विगुणमासव्रतस्य पादद्वयम् । अज्ञाननस्तदर्धम् । स्त्रीशूद्रबालवृद्धानामर्धम् ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
वैश्यस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	द्विगुणमासव्रतस्य पादत्रयम् । अज्ञाननस्तदर्धम् । स्त्रीशूद्रबालवृद्धानामर्धम् ।	८ धेनवः ।	२२॥० कार्षापणाः । सार्धसप्तधेनुसङ्कलनात् ।	यथाशक्ति ।
शूद्रस्वामिकाया गोरुत्पन्नगर्भस्य अर्थात् गर्भग्रहणदिनात् सावनमासद्वयानतिक्रान्तगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	१ प्राजापत्यम् । अज्ञाननस्तदर्धम् ।	१ धेनुः ।	१ कार्षापणाः ।	यथाशक्ति ।
शूद्रस्वामिकाया गोर्गात्रसम्मितगर्भस्य अर्थात् मासद्वयोपरिसावनमासद्वयानतिक्रान्तगात्राद्यवयवोत्पन्नगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	२ प्राजापत्ये । अज्ञाननस्तदर्धम् । स्त्रीशूद्रबालवृद्धानामर्धम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
शूद्रस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य अर्थात् चतुर्थमासोपरि सावनमासद्वयानतिक्रान्तगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	३ प्राजापत्यानि । अज्ञाननस्तदर्धम् । स्त्रीशूद्रबालवृद्धानामर्धम् । चैतन्ययुक्तगर्भवधे कृत्स्नमेव प्रायश्चित्तम् ।	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणस्वामिकानामतिवृद्धातिक्रूरातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	त्रैमासिकव्रतार्धम् । अज्ञाननस्तदर्धम् । स्त्रीशूद्रबालवृद्धानामर्धम् ।	९ धेनवः ।	२५॥० कार्षापणाः । सार्धाष्टधेनुसङ्कलनात् ।	७॥० कार्षापणाः ।
क्षत्रियस्वामिकानामतिवृद्धातिक्रूरातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	षाण्मासिकव्रतार्धम् । अज्ञाननस्तदर्धम् । स्त्रीशूद्रबालवृद्धानामर्धम् ।	६ धेनवः ।	१८ कार्षापणाः ।	यथाशक्ति ।
वैश्यस्वामिकानामतिवृद्धातिक्रूरातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	१ मासव्रतम् । अज्ञाननस्तदर्धम् । स्त्रीशूद्रबालवृद्धानामर्धम् ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
शूद्रस्वामिकानामतिवृद्धातिक्रूरातिबालातिरोगिणीनां	२ प्राजापत्ये । अज्ञाननस्तदर्धम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा
गवां ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवधः।	स्त्रीशूद्रबालहत्तानामर्धम्।			
ब्राह्मणस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नाज्ञानकृतवधः।	द्विगुणत्रैमासिकव्रतम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्तानामर्धम्।	३४ धेनवः।	१०२कार्षापणाः।	२ वृषौ २० गावः। अशक्तौ ३० कार्षापणाः।
क्षत्रियस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नाज्ञानकृतवधः।	द्विगुणषाण्मासिकव्रतम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्तानामर्धम्।	२४ धेनवः।	७२कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नाज्ञानकृतवधः।	चतुर्गुणमासव्रतम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्तानामर्धम्।	२० धेनवः।	६० कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नाज्ञानकृतवधः।	८ प्राजापत्यानि। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्तानामर्धम्। स्त्रीत्वाद्युभयधर्मावत्त्वे पादः। प्रयत्नभेदे प्रायश्चित्तानुवृत्तिः।	८ धेनवः।	२४कार्षापणाः।	यथाशक्ति।
अज्ञानकृतबहुकर्तृकब्राह्मणस्वामिकैकगववधः।	प्रत्येकं त्रैमासिकव्रतपादः। अज्ञानतस्तदर्धम्।	५ धेनवः।	१२॥० कार्षापणाः। सपादधेनुचतुष्टयसङ्कलनात्।	३॥० कार्षापणाः।
अज्ञानकृतबहुकर्तृकक्षत्रियस्वामिकैकगववधः।	प्रत्येकं षाण्मासिकव्रतपादः। अज्ञानतस्तदर्धम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
अज्ञानकृतबहुकर्तृकवैश्यस्वामिकैकगववधः।	प्रत्येकं द्विगुणमासव्रतपादः। अज्ञानतस्तदर्धम्।	३ धेनवः।	७॥० कार्षापणाः सार्धद्वयधेनुसङ्कलात्।	यथाशक्ति।
अज्ञानकृतबहुकर्तृकशूद्रस्वामिकैकगववधः।	प्रत्येकं प्राजापत्यम्। अज्ञानतस्तदर्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
द्वाभ्यामेकगववधः।	यदृयत्स्वामिकाया गोर्वधे यदृयत्प्रायश्चित्तमुक्तं प्रत्येकं सम्पूर्णं तत्तत् प्रायश्चित्तम्।			
द्वाभ्यामेकप्रयत्ननिष्पन्नबहुगववधः।	यदृयत्स्वामिकाया गोर्वधे यदृयत्प्रायश्चित्तं प्रत्येकं तद्गुण्यम्।			
एकप्रयत्ननिष्पन्नबहुकर्तृकबहुगववधः।	प्रत्येकं तत्तद्वधोक्तव्रतपादद्वयम्।			
एकप्रयत्ननिष्पन्नाभ्यासकृतबहुकर्तृकबहुगववधः।	प्रत्येकं तत्तद्वधोक्तव्रतद्विपादप्रायश्चित्तार्हत्तिः।			
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकैकहायनगववधः।	त्रैमासिकव्रतपादः। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्तानामर्धम्।	५ धेनवः।	१२॥० कार्षापणाः। सपादधेनुचतुष्टयसङ्कलात्।	३॥० कार्षापणाः।
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकद्विहायनगववधः।	त्रैमासिकव्रतार्धम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्तानामर्धम्।	९ धेनवः।	२५॥० कार्षापणाः। सार्धाष्टधेनुसङ्कलनात्।	७॥ कार्षापणाः।
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकत्रिहायणगववधः।	पादन्यूनत्रैमासिकव्रतम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्तानामर्धम्।	१३ धेनवः।	३८।० कार्षापणाः। पादोनत्रयोदश धेनुसङ्कलनात्।	११।० कार्षापणाः।
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकक्षत्रियस्वामिकैकहायनगववधः।	षाण्मासिकव्रतपादः। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्तानामर्धम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्त्तृकक्षत्रियस्वामिकद्विहायनगवीवधः।	षाण्मासिकव्रतपादद्वयम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	६ धेनवः।	१८कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्त्तृकक्षत्रियस्वामिकत्रिहायणगवीवधः।	पादन्यूनषाण्मासिकव्रतम्। अज्ञानस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	९ धेनवः।	२७कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्त्तृकवैश्यस्वामिकैकहायनगवीवधः।	मासैकव्रतार्द्धम्। अज्ञानतस्तदर्द्धम्।	३ धेनवः।	७॥० कार्षापणाः। सार्द्धद्वयधेनुसङ्कलनात्	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्त्तृकवैश्यस्वामिकद्विहायनगवीवधः।	मासव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्त्तृकवैश्यस्वामिकत्रिहायणगवीवधः।	पादोनं द्विगुणमासव्रतम्। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्द्धसप्तधेनुसङ्कलनात्।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्त्तृकशूद्रस्वामिकैकहायनगवीवधः।	१ प्राजापत्यम्। अज्ञानतस्तदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्त्तृकशूद्रस्वामिकद्विहायनगवीवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ज्ञानकृत ब्राह्मणक्षत्रियवैश्यकर्त्तृक शूद्रस्वामिकत्रिहायणगवीवधः।	३ प्राजापत्यानि। अज्ञानतस्तदर्द्धम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेणाहारप्रचारनिर्गमरोधनिमित्तवधः।	प्राजापत्यपादः।	१ धेनुः।	॥० पणाः। धेनुपादसङ्कलनात्	यथाशक्ति।
	क्षैण्यज्ञाने प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपादः। इदन्तु सर्व्वस्वामिकायाः सर्व्ववयस्कायाः गोः सर्व्वकर्त्तृकवधे बोद्धव्यम्।	२ धेनू।	५॥८० कार्षापणाः। पादार्द्धोनधेनुद्वयसङ्कलनात्।	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेणाकालबन्धना यथा बन्धननिमित्तवधः।	प्राजापत्यपादद्वयम्।	१ धेनुः।	१॥०कार्षापणाः। धेन्वर्द्धसंकलनात्।	यथाशक्ति।
	क्षैण्यज्ञाने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपादद्वयम्। एतदपि सर्वस्वामिकायाः सर्व्ववयस्कायाः गोः सर्वकर्त्तृकवधे बोद्धव्यम्।	४ धेनवः।	११० कार्षापणाः। पादोनधेनुचतुष्टयसङ्कलनात्।	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेण शलयकटादियोजननिमित्तवधः।	प्राजापत्यपादत्रयम्।	१ धेनुः।	२।०कार्षापणाः। पादोनधेनुसङ्कलनात्।	यथाशक्ति।
	क्षैण्यज्ञाने तु चान्द्रायणपादत्रयम्।	६ धेनवः।	१६॥८कार्षापणाः पादोनसार्द्धसप्तधेनुसङ्कलनात्	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेण कूपावटादिषु भयादिना निपातनेन शास्त्रीयदण्डनिपातनेन च वधः।	प्राजापत्यम्।		३ कार्षापणाः।	यथाशक्ति।
	क्षैण्यज्ञाने प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणम्। एतदपि सर्वस्वामिकादिविषयम्। यद्यत्स्वामिकयद्यत्	१ धेनुः। ८ धेनवः।	२२॥८ कार्षापणाः। सार्द्धसप्तधेनुसङ्कलनात्।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	कर्त्तृकयदृयङ्गववधे यदृयत्प्रायश्चित्तमुक्तं अप्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य तत्तत्प्रायश्चित्तस्य पादत्रयम्। प्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य पादद्वयम्। स्वल्पप्रवृत्तृरूपानुग्राहकस्य पादत्रयम्। वध्यप्रतिरोधकरूपानुग्राहकस्य पादद्वयम्।			
ब्राह्मणक्षत्रियवैश्यकर्त्तृकशूद्रेतरस्वामिकगवापालननिमित्तवधः।	सेतिकर्त्तव्यताकप्राजापत्यम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। इति कर्त्तव्यता यथा। सशिखं वपनं कार्य्यं त्रिसन्ध्यमवगाहनम्। शृङ्गैर्वापि खुरैर्युक्तं लाङ्गूलस्त्रवणादिभिः॥ आर्द्रमेव हि तच्चर्म्म परिधाय स गां व्रजेत्। तासां मध्ये वसेद्रात्रौ दिवा ताभिः समं व्रजेत्॥ ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः। प्रायश्चित्ते ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम्। अनड्वत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम्॥ इति पराशरोक्ता।	२ धेनू।	६ कार्षापणाः।	१ वृषः १ गौः। अशक्तौ ६ कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकशूद्रस्वामिकगवापालननिमित्तवध।	प्राजापत्यद्वयम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्त्तृकशूद्रेतरस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः। अप्राप्तदम्यावस्था तु त्रिहायणपर्य्यन्तम्।	सेतिकर्त्तव्यताकप्राजापत्यपादः।	धेनोरर्द्धस्यासम्भवात् १ एका धेनुः।	१॥० कार्षापणाः।	१॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्त्तृकशूद्रस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः।	प्राजापत्यव्रतत्रयपादः।	धेनोरर्द्धस्यासम्भवात् १ एका धेनुः।	१॥० कार्षापणाः	यथाशक्ति।
उत्सृष्टवृषवत्सतर्य्योर्वधः।	भूतपूर्वस्वामिकगववधप्रायश्चित्तद्विगुणम्। पूर्व्वस्वाम्यज्ञाने ब्राह्मणस्वामिकगववधद्विगुणप्रायश्चित्तम्।			
गवां शृङ्गभङ्गास्थिभङ्गचर्म्मनिर्म्मोचनलाङ्गूलच्छेदनम्।	दशरात्रं वज्रव्रतम्। मासार्द्धयवपानम्। प्राजापत्यं वा। वज्रव्रतं यथा। गोमूत्रेण समायुक्तं यावकञ्चोपयोजयेत्। एकाहनैव कृच्छ्रोऽयमुक्तयाग्निरसा स्वयम्। सर्व्वपापहरो दिव्यो नाम्ना वज्र इति स्थितः॥*॥ शृङ्गभङ्गादिना यन्मासाभ्यन्तरे गोर्मरणे न्यूनं वधप्रायश्चित्तं करणीयम्। गुरुणा समेन वा तेन प्रायश्चित्तेन शृङ्गभङ्गादिप्रायश्चित्तसिद्धिः। षण्मासोत्तरमरणे शृङ्गभङ्गादिप्रायश्चित्तमात्रं कर्त्तव्यम्॥	१ धेनुः।	२ कार्षापणाः।	यथाशक्ति।
गवां शुष्कमोषः।	यत्कर्त्तृकयत्स्वामिकगववधे यत्प्रायश्चित्तमुक्तं तत्कर्त्तृकतत्स्वामिकगवमुष्कमोषे तत्प्रायश्चित्तम्। मृत्युलिङ्गच्छेदयोस्तुल्यत्वाभिमानात्। अत्र प्रयोजकभेदस्यार्द्धं पादोनञ्च।			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
वृषस्य स्वयं ब्राह्मणकर्तृकहल-शकटादियोजनम्।	प्राजापत्यद्वयम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
योषिद्वयां ब्राह्मणकर्तृकहल-शकटादियोजनम्।	४ प्राजापत्यानि। ब्राह्मणेतरेषां प्राजापत्यद्वयम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
उत्सृष्टवृषस्य कपिलायाश्च ब्राह्मणकर्तृकहलशकटादि-योजनम्।	यतिचान्द्रायणद्वयम्। ब्राह्मणेतरेषां यतिचान्द्रायणैकम्।	सार्द्धसप्तधेन्वसम्भ-वात् ८ धेनवः।	२२॥० कार्षा-पणाः।	यथाशक्ति।
गोमांसखादके गोविक्रयविनि-मयादिः।	विक्रयादिमात्रे अज्ञानकृततत्तत्कर्तृकत-त्तत्स्वामिकगववधप्रायश्चित्तार्द्धम्। गो-मांसखादककर्तृकतद्ववधे तु अज्ञान-कृततत्तत्कर्तृकतत्तत्स्वामिकगववधो-क्तसंपूर्णप्रायश्चित्तम्।			

अथ गोवधापवादः।

तत्र पराशरः।

"धूय्यंषु वहमानेषु दण्डेनाभिहतेषु च। काष्ठेन लेष्टुना वापि पाषाणेन तु ताडितः॥ मूर्च्छितः पतितश्चैव मृतो वा सद्य एव च। एवं-गतानां भूर्य्याणां प्रवक्ष्यामि यथाविधि॥ उत्थितस्तु पदं गच्छेत् पञ्च सप्त दशापि वा। ग्रासं वा यदि गृह्णाति तोयं वा पिबति स्वयम्। पूर्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते॥" सम्वर्त्तः। "यज्ञेषु गोचिकित्सायां मूढगर्भविमोचने। यज्ञे कृते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते॥ औषधं स्नेहमाहारं ददतो ब्राह्मणेषु च। प्राणिनां प्राणरक्षार्थं प्रायश्चित्तं न विद्यते॥ दाहच्छेदशिराभेदप्रयत्नैरुपकुर्व्वताम्। द्विजानां गोहितार्थं वा प्रायश्चित्तं न विद्यते॥" याज्ञवल्क्यः। "क्रियमाणोपकारे तु मृते विप्रे न पातकम्। विपाके गोहयाश्वं भेषजाग्निक्रियासु च॥" मिताक्षरोधृतपराशरवचनम्। "कूपे खाते च धर्म्मार्थे गृहदाहे च ये मृताः। ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते॥" भवदेवभट्ट-धृतवचनम्। "शृङ्गभङ्गेऽक्षिभङ्गे च कटिभङ्गे तथैव च। यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते॥" सम्वर्त्तः। "देवद्रोण्यां विहारे च कूपेष्वायतनेषु च। एषु गोषु प्रपन्नासु प्रायश्चित्तं न विद्यते॥" देवद्रोणी स्वयंभूलिङ्गाद्यवस्थानगृहम्। विहारो गवां मैथुनम्। आयतनं सीमानिबन्धनस्थानम्। अत्र कूपायतनकर्तुर्दोषाभावो न तु गोस्वामिनः। इति प्रायश्चित्तविवेकप्रायश्चित्ततत्त्वस्मृतिसारमीखंडसम्मतं गोवध प्रायश्चित्तं समाप्तम्॥ * ॥

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियकर्तृकज्ञानकृत-क्षत्रियवधः।	अज्ञानकृत ब्रह्महत्याप्रायश्चित्तपादः। स तु त्रैवार्षिकव्रतरूपः।	४५ धेनवः।	१३५ कार्षा-पणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
ब्राह्मणक्षत्रियकर्तृकाज्ञानकृत क्षत्रियवधः।	सार्द्धत्रैवार्षिकव्रतम्।	सार्द्धद्वाविंशति-धेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षा-पणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
वैश्यकर्तृकज्ञानकृतक्षत्रियवधः	षाड्वार्षिकव्रतम्।	९० धेनवः।	२७ कार्षा-पणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
वैश्यकर्तृकाज्ञानकृतक्षत्रियवधः	त्रैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षा-पणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
शूद्रकर्तृकज्ञानकृतक्षत्रियवधः	नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षा-पणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
शूद्रकर्तृकाज्ञानकृतक्षत्रियवधः	सार्द्धचतुर्वार्षिकव्रतम्।	सार्द्धसप्तषष्टि-धेन्वसम्भवात् ६८ धेनवः।	२०२॥० कार्षा-पणाः।	३८ गावः। अशक्तौ ३७॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञान-कृतवैश्यवधः।	ब्रह्महत्याव्रताष्टमभागः। स च सार्द्धवा-र्षिकव्रतरूपः।	सार्द्धद्वाविंशति-धेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षा-पणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञान-कृतवैश्यवधः।	ब्रह्महत्याव्रतषोडशभागः। स च नवमा-सिकव्रतरूपः।	सपादैकादशधे-न्वसम्भवात् १२ धेनवः।	३३॥० कार्षा-पणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ वर्णदानम् ।	दक्षिणा
शूद्रकर्तृकब्राह्मणक्षत्रवैश्यवधः ।	ब्रह्महत्याव्रतचतुर्थभागः । स च चैवार्षिक व्रतरूपः ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशक्तौ २५ कार्षापणाः ।
शूद्रकर्तृकाब्राह्मणक्षत्रवैश्यवधः ।	ब्रह्महत्याव्रताष्टमभागः । स च सार्द्धवार्षिकव्रतरूपः ।	सार्द्धद्वाविंशति-धेन्वसम्भवात् २३ धेनवः ।	६७॥० कार्षापणाः ।	१३ गावः । अशक्तौ १२॥० कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकब्राह्मणक्षत्रियवैश्यशूद्रवधः ।	ब्रह्महत्याव्रतषोड़शभागः । स च नवमासिकव्रतरूपः ।	सपादैकादशधेन्वसम्भवात् १२ धेनवः ।	३३॥० कार्षापणाः ।	७ गावः । अशक्तौ ६।० कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकाब्राह्मणक्षत्रियवैश्यशूद्रवधः ।	ब्रह्महत्याव्रतद्वात्रिंशत्तमभागः । स च सार्द्धचतुर्मासिकव्रतरूपः । सर्व्वत्र बालवृद्धस्त्रीणामर्द्धम् । एकस्य बालत्वादिधर्म्मद्वयवत्त्वे पादः ।	पादार्द्धाधिकसार्द्धपञ्चधेन्वसम्भवात् ६ धेनवः ।	१६॥/० कार्षापणाः ।	४ गावः । अशक्तौ ३/० कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकब्राह्मणक्षत्रियवैश्यशूद्रवधः ।	ब्रह्महत्याव्रतद्वादशभागः । स च वार्षिक व्रतरूपः । अज्ञानतस्त्वे तदर्द्धम् ।	१५ धेनवः ।	१५ कार्षापणाः ।	८ गावः । अशक्तौ ८।/६॥= कार्षापणाः ।
सव्यवर्णकर्तृकाज्ञानकृतप्रतिलोमजातवधः अर्थात् अपकृष्टशूद्रवधः ।	चान्द्रायणव्रतम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः	२२॥० कार्षापणाः ।	यथाशक्ति ।
सव्यवर्णकर्तृकाज्ञानकृतापकृष्टशूद्रवधः ।	पराकव्रतम् । सर्वत्र बालवृद्धस्त्रीणामर्द्धम् । एकस्य बालत्वादिधर्म्मद्वयवत्त्वे पादः ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणकर्तृकाज्ञानकृतब्राह्मणीवधः ।	पाड्वार्षिकं महाव्रतम् । अज्ञानतस्त्वे तदर्द्धम् ।	८० धेनवः ।	२७० कार्षापणाः ।	५० गावः । ५० कार्षापणा वा ।
क्षत्रियकर्तृकाज्ञानकृतब्राह्मणीवधः ।	द्वादशवार्षिकव्रतम् । अज्ञानतस्त्वे तदर्द्धम् ।	१८० धेनवः ।	५४० कार्षापणाः ।	१०० गावः । १०० कार्षापणा वा ।
वैश्यकर्तृकाज्ञानकृतब्राह्मणीवधः ।	अष्टादशवार्षिकव्रतम् । अज्ञानतस्त्वे तदर्द्धम् ।	२७० धेनवः ।	८१० कार्षापणाः ।	१५० गावः । १५० कार्षापणा वा ।
शूद्रकर्तृकाज्ञानकृतब्राह्मणीवधः ।	चतुर्विंशतिवार्षिकव्रतम् । अज्ञानतस्त्वे तदर्द्धम् । सर्वत्र बालवृद्धस्त्रीणामर्द्धम् । एकस्य बालत्वाद्युभयधर्म्मवत्त्वे पादः ।	३६० धेनवः ।	१०८० कार्षापणाः ।	२०० गावः । अशक्तौ २०० कार्षापणाः ।
ब्राह्मणक्षत्रियकर्तृकाज्ञानकृतक्षत्रियावधः ।	वैवार्षिकव्रतम् । अज्ञानतस्त्वे तदर्द्धम् ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । २५ कार्षापणा वा ।
वैश्यकर्तृकाज्ञानकृतक्षत्रियावधः ।	षाड्वार्षिकव्रतम् । अज्ञानतस्त्वे तदर्द्धम् ।	८० धेनवः ।	२७० कार्षापणाः ।	५० गावः । ५० कार्षापणा वा ।
शूद्रकर्तृकाज्ञानकृतक्षत्रियावधः ।	नवदार्षिकव्रतम् । अज्ञानतस्त्वे तदर्द्धम् । सर्वत्र बालवृद्धस्त्रीणामर्द्धम् । एकस्य बालत्वाद्युभयधर्म्मवत्त्वे पादः ।	१३५ धेनवः ।	४०५ कार्षापणाः ।	७५ गावः । अशक्तौ ७५ कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवैश्यावधः ।	वार्षिकव्रतम् । अज्ञानतस्त्वे तदर्द्धम् ।	१५ धेनवः ।	४५ कार्षापणाः ।	८ गावः । ८।/६॥ कार्षापणा वा ।
शूद्रकर्तृकाज्ञानकृतवैश्यावधः ।	द्विवार्षिकव्रतम् । अज्ञानतस्त्वे तदर्द्धम् । स्त्रीबालवृद्धानामर्द्धम् एकस्य स्त्रीत्वाद्युभयधर्मवत्त्वे पादः ।	१० धेनवः ।	६०कार्षापणाः ।	१७ गावः । अशक्तौ १६॥/१३॥ कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकशूद्रावधः ।	वार्षिकव्रतम् । अज्ञानतस्तु एतदर्द्धम् । स्त्रीबालवृद्धानामर्द्धम् । एकस्य स्त्रीत्वाद्युभयधर्म्मवत्त्वे पादः ।	१५ धेनवः ।	४५कार्षापणाः ।	८ गावः । अशक्तौ ८।/६॥ कार्षापणाः ।
आत्रेयीवधः । आत्रेयी त्रिविधा । अविगोत्रा ऋतुस्नाता गर्भिणी च ।'	यत्कर्तृकयद्वर्णस्त्रीवधे यत्प्रायश्चित्तं तद्गुरुतल्पम् ।			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मण कर्त्तृकज्ञानकृतसकृत्सवर्णव्यभिचरितब्राह्मणीवधः।	वार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	१५ धेनवः।	४५कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
क्षत्रियकर्त्तृकज्ञानकृतसकृत्सवर्णव्यभिचरितब्राह्मणीवधः।	द्विवार्षिकव्रतम्। अज्ञानस्त्वेतदर्द्धम्।	३० धेनवः।	९०कार्षापणाः।	१० गावः। अशक्तौ१६॥/१३॥ कार्षापणाः।
वैश्यकर्त्तृकज्ञानकृतसकृतसवर्णव्यभिचरितब्राह्मणीवधः।	त्रैवार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
शूद्रकर्त्तृकज्ञानकृतसकृत्सवर्णव्यभिचरितब्राह्मणीवधः।	चतुर्वार्षिकव्रतम्। अज्ञानतस्त्वेतदर्द्धम्। बालवृद्धस्त्रीणामर्द्धम्। एकस्य उभयधर्म्मवत्त्वे पादः।	६० धेनवः।	१८० कार्षापणाः।	३४ गावः। अशक्तौ ३३।/६॥ कार्षापणाः।
ब्राह्मणकर्त्तृकाज्ञानकृतो भूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च ब्राह्मण्या वधः।	वृत्तिदानम्। ज्ञानकृते तु द्वैगुण्यम्। क्षत्रियस्य एतद्द्विगुणम्। वैश्यस्य त्रिगुणम्। शूद्रस्य चतुर्गुणम्।	०	०	यथाशक्ति।
ब्राह्मणक्षत्रियकर्त्तृकाज्ञानकृतो भूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च क्षत्रियाया वधः।	धनुर्दानम्। कामतो द्वैगुण्यम् वैश्यस्य एतद्द्विगुणम्। शूद्रस्य त्रिगुणम्।	०	०	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकाज्ञानकृतो भूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च वैश्याया वधः।	छागदानम्। कामतस्त्वेतद्द्विगुणम्। शूद्रस्य एतद्द्विगुणम्।	०	०	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्त्तृकाज्ञानकृतोभूयो व्यभिचरिताया अधमवर्णव्यभिचरितायाश्च शूद्राया वधः।	मेषदानम्। ज्ञानतो द्वैगुण्यम्। सर्व्वत्र स्त्रीबालवृद्धानामर्द्धम्। एकस्य उभयधर्म्मवत्त्वे पादः। प्रयोजकादीनां पादपादहानिः।	०	०	यथाशक्ति।
ब्राह्मणकर्त्तृकज्ञानकृतब्राह्मणीगर्भवधः।	द्वादशवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणकर्त्तृकाज्ञानकृतक्षत्रियागर्भवधः।	त्रैवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
ब्राह्मणकर्त्तृकज्ञानकृत वैश्यागर्भवधः।	सार्द्धवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणकर्त्तृकज्ञानकृत शूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्द्धम्।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः	७ गावः। अशक्तौ ६।० कार्षापणाः।
क्षत्रियकर्त्तृकज्ञानकृतब्राह्मणीगर्भवधः।	चतुर्विंशतिवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	२६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
क्षत्रियकर्त्तृकज्ञानकृतक्षत्रियागर्भवधः।	त्रैवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
क्षत्रियकर्त्तृकज्ञानकृतवैश्यागर्भवधः।	सार्द्धवार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
क्षत्रियकर्त्तृकज्ञानकृतशूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्द्धम्।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
वैश्यकर्त्तृकज्ञानकृतब्राह्मणीगर्भवधः।	षट्त्रिंशद्वार्षिकव्रतम्। अज्ञानतोऽर्द्धम्।	५४० धेनवः।	१६२० कार्षापणाः।	३०० गावः। अशक्तौ ३०० कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
वैश्यकर्तृकाज्ञानकृतक्षत्रियागर्भवधः।	षाड्वार्षिकव्रतम्। अज्ञानतोऽर्धम्।	८० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
वैश्यकर्तृकाज्ञानकृतवैश्यागर्भवधः।	सार्धवार्षिकव्रतम्। अज्ञानतोऽर्धम्।	सार्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
वैश्यकर्तृकाज्ञानकृतशूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्धम्।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
शूद्रकर्तृकाज्ञानकृतब्राह्मणीगर्भवधः।	अष्टचत्वारिंशद्वार्षिकव्रतम्। अज्ञानतोऽर्धम्।	७२० धेनवः।	२१६० कार्षापणाः।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
शूद्रकर्तृकाज्ञानकृतक्षत्रियागर्भवधः।	नववार्षिकव्रतम्। अज्ञानतोऽर्धम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
शूद्रकर्तृकाज्ञानकृतवैश्यागर्भवधः।	त्रैवार्षिकव्रतम्। अज्ञानतोऽर्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
शूद्रकर्तृकाज्ञानकृतशूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्धम्। ब्राह्मण्यादिगर्भे पुंस्त्वेन ज्ञाते विशेषेणाज्ञाते चोक्तं प्रायश्चित्तम्। स्त्रीत्वेन ज्ञाते सर्वत्रार्धं प्रायश्चित्तं ज्ञेयम्। सर्वत्र स्त्रीबालवृद्धानामर्धम्। प्रयोजकादीनां पादपादहानिः।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
यद्यपि गजाश्वादिवधः सङ्करीकरणापापमिदं तथापि हिंसासाजात्यादुपपातकप्रकरणे तत्प्रायश्चित्तं निरूप्यते।				
हयासामान्यपशुघातः। हयेतिग्रहणात् यागाद्यर्थं प्रायश्चित्ताद्यभावः।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
राजसम्बन्ध्युत्तमगजवधः।	पद्मनीलवृषदानम्।	०	२५ कार्षापणाः।	यथाशक्ति।
अत्यन्तोत्तमवाजिरासभवधः।	चान्द्रायणम्।	८ धेनवः। सार्धसप्तधेन्वसम्भवात्	२२॥० कार्षापणाः।	यथाशक्ति।
अश्ववधः।	वासोयुगदानम्। एतच्च ज्ञानतः। अज्ञानतस्त्वर्धम्।	०	०	यथाशक्ति।
मृगमहिषवराहकुक्कुरगण्डतरक्षुऋक्षवानरसिंहव्याघ्रपृषतचमरशरभादीनां वधः।	अहोरात्रोपवासान्ते घृतघटदानम्। एतच्चाज्ञानत सकृद्वधविषयम्। ज्ञानतो द्वैगुण्यम्।	०	उपवासासामर्थ्ये अष्ट पणाः।	यथाशक्ति।
अजाव्यादिवधः।	त्रिरात्रोपवासः। एतदज्ञानतोऽत्यन्तधार्मिकब्राह्मणकर्तृकसकृद्वधे वेदितव्यम्।	०	१॥० कार्षापणाः	हिरण्यं वस्त्रं वा।
	अशक्तस्य एकहायनवृषदानम्।	०	वृषमूल्यम् ५ कार्षापणाः।	यथाशक्ति।
	अशक्तस्य धेनुदानम्। तदशक्तौ प्राजापत्यव्रतम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अभ्यासे मासं यावकपानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
मार्जारगोधानकुलमण्डूकश्वपतत्रिमूषिकसर्पवधः। पतत्री गृहपक्षी।	त्र्यहं क्षीरपानम्। पादिककृच्छ्रं वा। एतत्सकृज्ज्ञानविषयम्। ज्ञानतोऽभ्यासे द्वादशरात्रं कृच्छ्रम्। स्त्रीशूद्रबालवृद्धानामर्धम्।	० यत्किञ्चिदधिकसपादधेन्वसम्भवात् २ धेनू।	१ कार्षापणः। ४ कार्षापणाः।	यथाशक्ति। यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा।
	कृष्णसर्पवधे तीक्ष्णाग्रलौहकीलिकादानमादौ कर्त्तव्यम्। सर्पजातीयषण्ढवधे पलालभारः सीसकमाषश्च दातव्यः। एतज्ज्ञानतः। एतदशक्तौ व्रतादिकं कर्त्तव्यम्।			
अथ सामान्यपक्षिवधः।	नक्तव्रतम्। द्विरत्निपरिमितरौप्यदानं वा।	•	⁄१३।— पणौ। नक्तव्रतस्योपवासतृतीयभागत्वात्।	यथाशक्ति।
	कामतोऽत्यन्ताभ्यासे शूद्रहत्याव्रतम्। गुरुगोवधव्रतं वा। स्त्रीशूद्रबालहतानामर्द्धम्। एकस्य स्त्रीत्वादुभयधर्म्मवत्त्वे पादः।	१२ धेनवः।	३६ कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
अथ विशेषपक्षिवधः। बकबलाका-हंससारसकारण्डवचक्रवाककुररगृध्रश्येनखञ्जरीटटिट्टिभोलूक-शुकशारिकातित्तिरिमयूरकाककलविङ्ककालञ्जकमद्गुकपोतपारावतादीनां वधः।	अहोरात्रोपवासः सर्वबीजदानञ्च। एतदज्ञानविषयम्।	•	उपवासानुकल्पः ॥० पणाः। सर्व्वबीजमूल्यम् ।० पणाः।	यथाशक्ति।
	ज्ञानकृते त्रिरहोपवासः। शक्तस्य गोदानम्। तत्रायं विशेषः। शुकवधे द्विहायनगवदानम्। क्रौञ्चवधे त्रिहायणगवदानम्। क्रौञ्चशुकभासमयूरश्येनगृध्रवधे वत्सतरीदानम्। अत्र हंसदानवत्सतरीदानयोर्व्यवस्था शक्ताशक्तविषयिका। एतज्ज्ञानाज्ञानां व्रतादिकम्।	•	१॥० कार्षापणः।	यथाशक्ति।
कोकिलशुककपोतकपिञ्जलकुक्कुटटिट्टिभखञ्जूरखञ्जरीटानां पुरुषभारपरिमितानां वधः।	उत्कृष्टशूद्रहत्याव्रतम्।	१५ धेनवः।	४५कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
मत्स्यमण्डूकमकरशिशुमारादिजलचरवधः।	सप्तरात्रव्रह्महत्याव्रतम्। एतज्ज्ञानतः सकृद्वधे।	•	१ कार्षापणः।	⁄११॥—पणौ।
	अहोरात्रोपवासः यथाशक्तिलवणदानञ्च। एतत् कामतः सकृत्। अभ्यासात्यन्ताभ्यासयोस्तु मत्स्यवधप्रायश्चित्तेदर्शयिष्यते।	•	॥० पणाः उपवासानुकल्पः। १॥०कार्षापणः। लवणमूल्यम् ।२।	।/३॥=पणाः।
अथ सास्थ्यनस्थिप्राणिवधः।				
सहस्रसंख्यकानां अस्थिमतां कृकलासादीनां ज्ञानकृतवधः।	आब्दिकं शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
अनस्थ्नां क्रमिकीटपतङ्गभ्रमरदंशमशकमक्षिकादीनां शकटपूरितमितानां ज्ञानकृतवधः।	आब्दिक शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
अस्थिमतां प्रत्येकं वधः।	पणदानम्।	•	•	यत्किञ्चित्।
अनस्थ्नां प्रत्येकं वधः।	प्राणायामः। पणदानं वा।	•	•	तथा।
अन्नशाकादिगुड़ादिसर्व्वरसफलपुष्पजातप्राणिवधः।	दिनमेकं घृतमात्रभोजनम्। एतदज्ञाने ज्ञाने तद्वैगुण्यम्।	•	॥० पणाः।	यथाशक्ति।
	अभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
फलवद्वृक्षलतागुल्मच्छेदनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।

अघोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
अफलवतामेतेषां छेदनम्।	अष्टाङ्गसाध्यङ्गच्छेदम्।	०	२ कार्षापणौ।	यथाशक्ति।
अत्यन्तोत्कृष्टफलवद्वृक्षच्छेदनम्।	चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
अभ्यासादत्यन्तोत्कृष्टफलवद्वृक्षच्छेदनम्।	आब्दिकव्रतम्।	१५ धेनवः।	४५कार्षापणाः।	९ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
चैत्यवृक्षश्मशानसीमपुण्यस्थानसुरालयजातवृक्षच्छेदनम्। विंशतिसंख्यकोपजीव्यवृक्षच्छेदनम्। ख्यातवृक्षच्छेदनञ्च।	पूर्वोक्तवृक्षच्छेदनप्रायश्चित्तार्द्धं गुरुणादि। सर्वत्र स्त्रीशूद्रबालवृद्धानामर्द्धम्।			
वापीकूपतडागसेतुसभातड़ागवप्रदेवतायतनभेदनम्।	ब्राह्मणेभ्यो निवेद्य घृतस्य आहुतीर्जुहुयात्। इदं विष्णुरिति प्रथमां मानस्तोके इति द्वितीयां विष्णोः कर्म्माणीति तृतीयां पादोऽस्यान्यामिति चतुर्थीं यां देवतामुत्सादयति तस्यै देवतायै। ब्राह्मणान् भोजयेत्। एतत् सकृदल्पोपघातविषयम्। अभ्यासे महोपघाते च प्राजापत्यम्। दण्डश्च। यथा। सकृदल्पोपघाते प्रथमसाहसम: २५० पणाः। अभ्यासे महोपघाते उत्तमसाहसः। १००० पणाः।			
देवताया उत्कृष्टप्रतिमाभेदनच्छेदनदहनहरणानि।	चान्द्रायणम्। वाप्यादिभेदनोक्तायतस्य आहुतयः। उत्तमसाहसो दण्डश्च। १००० पणाः।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
देवताया अपकृष्टप्रतिमाभेदनच्छेदनदहनहरणानि।	प्राजापत्यम्। पूर्वोक्तचतुराहुत्यादिदानम्। प्रथमसाहसो दण्डश्च। २५० पणाः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अथाभिचारः। स तु परहिंसार्थं जपहोमादिकर्म।	अतिकृच्छ्रम्। एतत् सकृदाचरणे। अभ्यासे प्रायश्चित्ताहर्त्तिः। इति हिंसाप्रायश्चित्तम्॥७॥	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
व्रात्ययाजनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
मूल्येन घृतस्य दहनवहनादिकम्।	स्नानपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
अथाभक्ष्यभक्षणम्। अभक्ष्यं षड्विधम्। जातिदुष्टम् १ क्रियादुष्टम् २ कालाश्रयविदूषितम् ३ संसर्गाश्रयदुष्टम् ४ सङ्केतेषम् ५ स्वभावतो दुष्टम् ६। जातिदुष्टं लशुनगृञ्जनपलाण्डुच्छत्राकाश्मेतवार्त्ताकीलालिकावर्त्तुलाकारालाबूकम् १ क्रियादुष्टं पतितसंस्पृष्टम २ कालदुष्टं बहुस्नानं चिरसंस्थितञ्च ३ संसर्गदुष्टं सुरालशुनपेयूषादियुक्तम् ४ सङ्केतेषं विचिकित्सितान्नम् ५ स्वभावदुष्टं पुरीषादि ६।	चान्द्रायणम्। एतद्गुरुतरविषयम्। विशेषानिर्देशेन्नेयम्।	सार्द्धसप्तधेन्वसम्भवात्८धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा
अपरत्व। संघातान्नम्। शूद्रोपनीतान्नम्। पतितोपनीतान्नम्। शूद्रवेश्मस्थान्नत्व।				
शूद्रस्य पक्वान्नभक्षणम्।	ब्राह्मणस्य व्याहोपवासः। एतदज्ञानतः।	१ धेनुः। अर्द्धधेन्वसम्भवात्।	१॥कार्षापणः।	यथाशक्ति।
	ज्ञानतः प्राजापत्यम्। आपदि भक्षणे मनस्तापः द्रुपदां शतजपो वा। क्षत्रियादीनां पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अभ्यासात् शूद्रस्य पक्वान्नभक्षणम्	ब्राह्मणस्य मासयावकपानम्।	२धेनू।	६ कार्षापणाः।	यथाशक्ति।
शूद्रस्यामान्नभक्षणम्।	क्षत्रियादीनां पादपादहानिः। उक्तप्रायश्चित्ततुरीयभागः। आपदि भक्षणे प्रायश्चित्ताभावः।			
अथ रजकशैलूषवेणुचर्मोपजीविकैवर्त्तान्त्यजान्नभक्षणम्।	चान्द्रायणम्। एतत् ज्ञानाभ्यासविषयम्। अज्ञाने त्वर्द्धम्।	८ धेनवः सार्द्धसप्तधेन्वसम्भवात्।	२२॥० कार्षापणाः।	यथाशक्ति।
	ज्ञानतोऽष्टधाभ्यासे कृच्छ्राब्दव्रतम्।	३० धेनवः।	८०कार्षापणाः।	१७ गावः। अशक्तौ १६॥⁄१६॥ कार्षापणाः।
	अज्ञानतोऽष्टधाभ्यासे एतदर्द्धम्। एतत्तु ब्राह्मणविषयम्। क्षत्रियादीनां पादपादहानिः।	१५ धेनवः।	४५कार्षापणाः।	९ गावः। अशक्तौ ८।⁄८॥ कार्षापणाः।
सकृदज्ञानकृतान्त्यजोत्सृष्टाशनम्।	ब्राह्मणस्य चान्द्रायणम्।	८ धेनवः।	२२॥०कार्षापणाः	यथाशक्ति।
	क्षत्रियस्य तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य तप्तकृच्छ्रार्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य तप्तकृच्छ्रपादः।	१धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	ज्ञानत एतद्द्विगुणम्।			
कापालिकान्नभक्षणम्।	ज्ञानात् कृच्छ्राब्दम्।	३० धेनवः।	८० कार्षापणाः।	१७ गावः। अशक्तौ १६॥⁄१६॥ कार्षापणाः।
	अज्ञानात् चान्द्रायणद्वयम्। एतदष्टधाभ्यस्तविषयम्। एतत् सर्वं ब्राह्मणस्य। क्षत्रियादौ पादपादहानिः।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
चाण्डालग्रपचक्षत्तृसूतवैदेहकमागधायोगवानामन्त्यावसायिनामन्नभक्षणम्।	ब्राह्मणस्य कामतः सकृद्भोजने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानतस्तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	बलाद्भोजने पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अज्ञानतोऽष्टचत्वारि शद्वारभोजने द्वादशवार्षिकव्रतम्। ज्ञानतश्चतुर्विंशतिवारभोजने एतदेव।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	ज्ञानतोऽष्टचत्वारिंशद्वारभोजने चतुर्विंशतिवार्षिकव्रतं अभ्यवहार्य्यता च।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
	सकृत्ज्ञानत आमान्नभोजने त्रिरात्रोपवासः। सर्व्वत्र क्षत्रियादीनां पादपादहानिः।		१॥० कार्षापणः।	यथाशक्ति।
	आपदि पक्वान्नभोजने क्षत्रियस्यसान्तपनम्	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य षड्रात्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य त्रिरात्रम्।	०	१॥०कार्षापणः।	यथाशक्ति।
चाण्डालपतितादीनामुत्सृष्टान्नभक्षणम्।	द्विजस्य पराकः।	५ धेनवः।	१५कार्षापणाः।	यथाशक्ति।
	शूद्रस्य कृच्छ्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	एतत् सकृदज्ञानविषयं ज्ञानतो द्विगुणादिकम्।			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
अथ सामान्याभोज्यान्नभोजनम्।	त्र्यहोपवासः।	०	१॥०कार्षापणः।	यथाशक्ति।
	एतत् सकृदज्ञानविषयम्।			
	ज्ञाने प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	क्षत्रियादीनां पादपादहानिः।			
अभोज्यान्नानि यथा। अनधीतवेदारब्धयज्ञान्नम्। ग्रामयाजिन्द्रोलकयज्ञान्नम्। क्लीवोद्वहनयज्ञान्नम्। मत्तक्रुद्धातुराणामन्नम्। केशेन कीटेन वा सह पक्वमन्नम्। कामतः पादस्पृष्टमन्नम्। भ्रूणघ्नादिपतितावेक्षितान्नम्। रजस्वलास्पृष्टान्नम्। पतत्रिणावलीढमन्नम्। शुना स्पृष्टमन्नम्। गवाघ्रातमन्नम्। प्लुष्टान्नम्। घोषण्या दत्तमन्नमित्यर्थः। गणान्नम्। मठब्राह्मणसंघान्नमित्यर्थः। गणिकान्नम्। विद्विज्जुगुप्सितान्नम्। स्तेनान्नम्। गायनान्नम्। तक्षान्नम्। वार्धुषिकान्नम्। दीक्षितान्नम्। दीक्षणीययागानन्तरं यज्ञसमाप्तिपर्यन्तं तदृयागकर्त्तृरन्नमित्यर्थः। कदर्य्यस्यान्नम्। रज्ज्वादिनाबद्धस्यान्नम्। अयोनिगड़युक्तस्यान्नम् अभिशस्तस्यान्नम्। क्लीवान्नम्। पुंश्चल्यन्नम्। दाम्भिकान्नम्। कृतघ्नस्य धर्म्मचारिणोऽन्नमित्यर्थः। शुक्रान्नम्। पर्य्युषितान्नम्। शूद्रोच्छिष्टान्नम्। चिकित्सकान्नम्। व्याधान्नम्। क्रूरान्नम्। उच्छिष्टभोजिनामन्नम्। उग्रस्यान्नम्। दारुणकर्म्मणो जातिविशेषस्य वा अन्नमित्यर्थः। सूतिकोद्देशेन पक्वमन्नम्। पर्य्याचान्तम्। आचमनव्यवहितान्नमित्यर्थः एकपंक्तिस्थानन्यानवमन्य यत्रान्ने भूज्यमाने केनचिदाचमनं क्रियते तत् पर्य्याचान्तमिति कुल्लूकभट्टः। अनर्चितान्नम्। अर्च्चाईस्यावज्ञया दत्तमन्नमित्यर्थः। श्यामांसम्। अवीरान्नम्। द्विषदन्नम्। नगराधिपान्नम्				

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा
पतितान्नम्। अवक्षुतान्नम्। अवशुसहितान्नमित्यर्थः। पिशुनान्नम्। अवृतिनामन्नम्। कूटसाक्ष्यन्नमित्यर्थः। यन्त्रफलविक्रायकान्नम्। शैलूषान्नम्। तुन्नवायान्नम्। क्षतघ्नान्नम्। कर्म्मारान्नम्। निषादान्नम्। रङ्गावतारकान्नम्। स्वर्णकारान्नम्। वेणुजीविनामन्नम्। लौहविक्रायकान्नम्। श्ववतामन्नम्। आखेटकार्थं शुनः पोषकाणामन्नमित्यर्थः। शौण्डिकवृत्तिद्विजान्नम्। चेलनिर्णेजकस्यान्नम्। वस्त्रधावकस्यान्नमित्यर्थः। रङ्गकान्नम्। कुसुम्भादिना वस्त्ररागकारकस्यान्नमित्यर्थः। नृशंसान्नम्। गृहस्थितोपपतिकान्नम्। उपपतिमर्थकान्नम्। गेहे ज्ञातं भार्य्याजारं ये सहन्ते तेषामन्नमित्यर्थः। स्त्रीजितान्नम्। अनिर्दशं प्रेतान्नम्। अनिर्गताशौचस्य सूतिकान्नमित्यर्थः। अतुष्टिकरान्नञ्च ॥७०॥	एतेषामभोज्यानामन्यतमानां भक्षणे पूर्वोक्तस्त्र्यहोपवासः। एष सकृदज्ञानविषयः।	•	१॥० कार्षापणः।	यथाशक्ति।
	ज्ञाने प्राजापत्यम्। क्षत्रियादीनां पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
चाण्डालादिपतितसृष्टान्नभक्षणम्।	प्राजापत्यम्। एतत्सकृदज्ञाने ब्राह्मणविषयम्। ज्ञाने ह्येतद्गुरुकम्। अभ्यासे तु प्रायश्चित्तावृत्तिः। क्षत्रियादीनां पादपादहानिः। एतत्कुक्कुट्यादिष्वभ्यासे ज्ञेयम्। रजकादिसृष्टान्नभक्षणे तु एतदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अत्र पतितपदं सर्वधर्म्मबहिष्कृतवाचि यवनादिम्लेच्छपरं उच्छिष्टान्नभोजनप्रकरणे तथा लिखनात् अतएव चण्डालसृष्टान्नभक्षणप्रतिज्ञायां पतितपदं पृथक् न लिखितम्।				
पतितस्त्रीं अक्षतस्नातस्य भोजनम्।	यान्नवल्क्योक्तचतुरहःसाध्यं तप्तकृच्छ्रम्।	सपादधेन्वसम्भवात् २ धेनू।	३॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानत एतदर्द्धम्। अभ्यासे प्रायश्चित्तावृत्तिः।			
	अत्यन्ताभ्यासे चान्द्रायणम्। क्षत्रियादीनां पादपादहानिः। चाण्डालादिस्त्रीं एतद्बोधितव्यम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
शूद्रादिसृष्टान्नस्य केशकीटोपहतान्नस्य च भक्षणम्।	एकोपवासः।	•	॥० पणाः।	यथाशक्ति।
हृद्यपाकान्नभक्षणम्। तत्तु देवतापित्रतिथिभक्षणवर्जितान्नम्।	प्राणायामत्रयम् घृतमात्रभोजनञ्च। एतदज्ञानतः। ज्ञानतो ह्येतद्गुरुकम्।	•	॥० पणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
हयामांसभक्षणम्। तत्तु पितृदेवार्चनरहितं मांसम्।	प्राजापत्यव्रतम्। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः। अभ्यासे प्राजापत्यावृत्तिः। एतत् रोगिदैवपित्रकर्म्मनिमन्त्रितेतरविषयम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
सामान्याभक्ष्यमांसभक्षणम्।	सप्तरात्रयवागूपानम्। एतत् सकृदज्ञाने। ज्ञानतो द्वै गुरुखम्। क्षत्रियादीनां पादपादहानिः। एतदभ्यासे प्रायश्चित्तावृत्तिः।	०	१॥० कार्षापणः।	यथाशक्ति।
अश्वगोकुञ्जरोष्ट्रशशकादिपञ्चनखातिरिक्तपञ्चनखक्रव्यादग्राम्यकुक्कुटानां मांसभक्षणम्। विड्वराहनरमांसभक्षणञ्च।	ब्राह्मणानां सकृदज्ञानतः प्राजापत्यम्। पुनरुपनयनञ्च। ज्ञाने तु द्वै गुरुखम्। अभ्यासे उपनयनसहितप्रायश्चित्तावृत्तिः। उपनयनाशक्तौ चान्द्रायणं तदशक्तौ धेन्वष्टकम्। क्षत्रियादीनां पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	अनड्वत्सहितगौः। अशक्तौ ६ कार्षापणाः।
हंसमद्गुकाकोलकाकखञ्जरीटमत्स्यादवलाकाशुकसारिकाचक्रवाकश्येनकीककलविङ्गरज्जुवालसारसदात्यूहभासकोकिलमण्डूकभुजगानामन्यतमस्य मांसभक्षणम्।	विप्रस्याज्ञानतः सकृद्भोजने त्रिरात्रोपवासः ज्ञानतो द्वै गुरुखम्। ज्ञानाभ्यासे प्रायश्चित्तावृत्तिः। क्षत्रियादीनां पादपादहानिः।	०	१॥०कार्षापणः।	यथाशक्ति।
मत्स्यभक्षणम्।	विप्रस्य कामतस्त्र्यहोपवासः। अकामत एतदर्द्धम्। क्षत्रियादीनां पादपादहानिः।	०	१॥०कार्षापणः।	यथाशक्ति।
वृथामांस-गर्भश्यामभूम्यन्तर्गतपक्वमांसर्जीवपक्वमांससूनामांसशुष्कमांसानामन्यतमस्य भक्षणम्। सूना घातनस्थली तद्भवं मांसम्।	कामतः सकृदभक्षणे त्र्यहोपवासः। अकामत एतदर्द्धम्। अभ्यासे प्रायश्चित्तावृत्तिः। एतत् ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	०	१॥० कार्षापणः।	यथाशक्ति।
		०	॥० पणाः।	यथाशक्ति।
षष्ठ्यां पञ्चपर्वसु च स्त्रीतैलमांससम्भोगः क्षुरकर्म च।	एकाहोपवासः। अभ्यासे प्रायश्चित्तावृत्तिः। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	०	॥० पणाः।	यथाशक्ति।
हयापायसपूपशष्कुलीक्षुरसंयावशिग्रुलोहितक्षत्तनिर्यासामेध्यप्रभवानां भक्षणम्।	कामतस्त्र्यहोपवासः। अज्ञानतस्तदर्द्धम्। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	०	१॥०कार्षापणः।	यथाशक्ति।
एकाकिमिष्टान्नभक्षणम्।	एकाहोपवासः। अभ्यासे द्वै गुरुखम्।	०	॥० पणाः।	यथाशक्ति।
अक्षेत्रात्रपर्य्युषितान्नदधिवर्जशुक्तचारलवणभक्षणम्।	अज्ञानत एकाहोपवासः। ज्ञानतस्त्र्यहोपवासः। अभ्यासे द्वै गुरुखम्।	०	॥० पणाः।	यथाशक्ति।
		०	१॥०कार्षापणः।	यथाशक्ति।
वाग्दुष्टभावदुष्टभावदुष्टभाजनपक्वद्रव्यभक्षणम्।	अभ्यासे त्रिरात्रयावकपानम्।	०	॥० पणाः।	यथाशक्ति।
शूद्रभाजने भिक्षकांस्ये च भोजनम्।	अहोरात्रोपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
कुम्भीभक्षणम्।	द्वादशरात्रं पयःपानम्।	सपादधेन्वसम्भवात् २ धेनू।	३॥० कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
लशुनपलाण्डुगृञ्जनभक्षणम्। रुपरसादिभिर्लशुनादितुल्यद्रव्यभक्षणञ्च।	ज्ञानतश्चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात्८धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानात्तप्तकृच्छ्रम्।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
	चिरतराभ्यासे संवत्सरयावकपानम्।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
	एतदुभयत्र पुनरुपनयनमपि शूद्राणामुपनयनतुल्यचान्द्रायणेन सह प्रकृतव्रतस्य पादः।			
सजातीयमृतसूतकिनां पक्वान्नभक्षणम्।	ज्ञानतः प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अज्ञानात् त्र्यहोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	अभ्यासे द्वैगुण्यादिकम्।			
मृतसूतकिनां ब्राह्मणक्षत्रियवैश्यशूद्राणामामान्नस्य ब्राह्मणकर्तृकभक्षणम्।	विप्रस्यामान्ने प्राणायामः। क्षत्रियस्यामान्ने शतगायत्रीजपः। वैश्यस्यामान्ने पञ्चशतगायत्रीजपः। शूद्रस्यामान्ने अष्टसहस्रगायत्रीजपः। अभ्यासे द्वैगुण्यम्।			
मृतकिसूतकिजलपानम्।	ब्राह्मणस्य पञ्चगव्यं पीत्वा उपवासः।	०	॥० पणाः।	यथाशक्ति।
	एतत् सकृदज्ञाने स्नाने तु द्वैगुण्यम्। अभ्यासे त्वावृत्तिः। तज्जलस्पर्शे स्नानमात्रम्। क्षत्रियादीनां पादपादहानिः।			
नवश्राद्धान्नभोजनम्। नवश्राद्धन्तु साग्नीनां चतुर्थपञ्चमनवमैकादशाहक्रियमाणं निरग्नीनान्तु आद्यश्राद्धमात्रम्।	चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात्८धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
प्रथममासिकश्राद्धान्नभोजनम्।	पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
त्रिपक्षे प्रेतश्राद्धान्नभोजनम्।	अतिकृच्छ्रम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
द्विमासादिषण्मासपर्य्यन्तं प्रेतश्राद्धान्नभोजनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
षण्मासादूर्द्धमब्दपर्य्यन्तं प्रेतश्राद्धान्नभोजनम्।	पादकृच्छ्रम्।	०	१ कार्षापणः।	यथाशक्ति।
पुनराब्दिकश्राद्धान्नभोजनं अर्थात् सपिण्डीकरणान्नभोजनम्। एतत् स्मार्त्तमतं शूलपाणिमते तु द्वितीयसांवत्सरिकान्नभोजनम्।	एकाहोपवासः।	०	॥० पणाः।	यथाशक्ति।
पत्न्याद्यनन्तरितहस्तदत्तानां पक्वहस्तदत्तानां शूद्रादत्तानाञ्चघृततैललवणव्यञ्जनपानीयपायसमाक्षिकफाणितगोरसशाकानां भक्षणम्।	द्व्यहसाध्यसान्तपनम्। एतत् ज्ञानतः। अज्ञानादर्द्धम्। लौहपात्रेण परिवेशनेऽप्येतदेव प्रायश्चित्तं ज्ञेयम्। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	०	१ कार्षापणः।	यथाशक्ति।
अकृतापोशानस्य अकृतमौनस्य च भोजनम्।	अष्टोत्तरशतगायत्रीजपः। एतद्विजानामनापद्विषयम्।	०	०	०
अकृताचमनस्य पानभोजनम्।	अष्टोत्तरसहस्रगायत्रीजपः उपवासो वा। अभ्यासे द्विगुणादि। एतत् कटुकषायताम्बूलेक्षुव्यतिरिक्तभोजनविषयम्।	०	॥० पणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
यज्ञोपवीतरहितकर्त्तृकान्नभोजनम्।	स्नानं शतगायत्रीजपः उपवासश्च।	•	॥० पणाः।	यथाशक्ति।
रेतोमूत्रपुरीषाणामन्यतमस्य भक्षणम्।	ज्ञानतश्चान्द्रायणम्।	८ धेनवः। सार्द्धसप्तधेन्वसम्भवात् पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानतस्तप्तकृच्छ्रम्।		११।० कार्षापणाः।	यथाशक्ति।
	बलात्कारे प्राजापत्यम्। सर्व्वत्र द्विजातीनां पुनः संस्कारश्च।	१ धेनुः।	१ कार्षापणाः।	यथाशक्ति।
विण्मूत्रादिदूषितफलादिभक्षणम्।	संसर्गमात्रे कृच्छ्रपादः।	०	॥० पणाः।	यथाशक्ति।
	सन्निकृष्टे अर्थात् महत्संसर्गे कृच्छ्रार्द्धम्। एतत् रसास्वादनानुपलम्भनपक्षे अज्ञानतः सकृद्विषयम्। ज्ञानतो द्वैगुण्यम्।	•	१॥० कार्षापणः।	यथाशक्ति।
	रसाद्युपलम्भे तु गोतमोक्ततप्तकृच्छ्रं द्वादशाहसाध्यम्। अज्ञानत उपलम्भे अर्द्धम्। क्षत्रियादीनां पादपादहानिः।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
सूत्रोष्टभोजनम्।	अहोरात्रोपवासः।	•	॥० पणाः।	यथाशक्ति।
	अभ्यासे याज्ञवल्क्योक्तचतुरहसाध्यतप्तकृच्छ्रम्।	सपादधेन्वसम्भवात् २ धेनू।	३॥० कार्षापणाः	यथाशक्ति।
ब्रह्मचारिणां मधुमांसभोजनम्।	ज्ञानतः प्राजापत्यम्। अज्ञानात् अर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्रह्मचारिणामामिषभाण्डपक्वान्नभोजनम्।	अर्द्धं कुशमूलविपक्वक्षीरपानमात्रम्। एतदज्ञानतः।	०	१ कार्षापणः।	यथाशक्ति।
	ज्ञानतो द्वैगुण्यम्।	०	२ कार्षापणौ।	यथाशक्ति।
देवतातिथिभृत्यादिवर्जनभोजनम्।	अभ्यासे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अस्थ्यादिदूषितान्नभोजनम्। अस्थिश दोऽन्नाभक्ष्यास्थिमात्रवचनम्।	स्नात्वार्कमर्च्चयित्वा घृतमात्राशनम्।	०	॥० पणाः।	यथाशक्ति।
मत्स्यकण्टकशम्बूकशङ्खशुक्तिकपर्द्दकभक्षणम्।	पञ्चगव्यमात्रभक्षणम्।	०	॥० पणाः।	यथाशक्ति।
पुंसवनसीमन्तोन्नयनकर्म्मणि भोजनम्।	स्नानाभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥०कार्षापणाः	यथाशक्ति।
	अज्ञानाभ्यासे तदर्द्धम्।	८ धेनवः।	११।०कार्षापणाः	यथाशक्ति।
	सकृदज्ञाने विण्मूत्रकृच्छ्रपादः।	०	॥० पणाः।	यथाशक्ति।
	सकृज्ज्ञाने द्वैगुण्यं कृच्छ्रार्द्धम्।	•	१॥०कार्षापणः।	यथाशक्ति।
जातकर्म्मादिसंस्कारान्नभोजनम्।	अज्ञानतोऽसपिण्डानां द्वादशाहसाध्यं सान्तपनम्।	०	१ कार्षापणः।	यथाशक्ति।
	ज्ञानतो द्वैगुण्यम्।	•	२ कार्षापणौ।	यथाशक्ति।
भोजनकाले गुदस्रावः।	अहोरात्रमुपित्वा पञ्चगव्यपानम्। एतत् सकृन्निगीर्णग्रासे।	०	॥० पणाः।	यथाशक्ति।
	अत्यन्तग्रासाशने त्रिरात्रोपवासः।	०	१॥०कार्षापणः।	यथाशक्ति।
भोजनकाले मृतसूतकान्त्यशौचे तदन्नभक्षणम्।	ग्रासभोजने एकोपवासः।	•	॥० पणाः।	यथाशक्ति।
	सकलान्नभोजने त्रिरात्रोपवासः। अभोजने स्नानमात्रम्।	०	१॥०कार्षापणः।	यथाशक्ति।
तैलाभ्यङ्गादिस्नानार्हस्याकृतस्नानस्य भोजनम्।	स्नात्वा अष्टोत्तरसहस्रगायत्रीजपः। अभ्यासे प्रायश्चित्तार्हत्तिः।	•	•	•

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
परिहितनीलीवस्त्रस्य भोजनम्।	अज्ञानतस्त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	ज्ञानात् द्वैगुण्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
स्वकीयोच्छिष्टभोजनम्।	कृच्छ्रपादः। एतत् सकृदज्ञानतः।	०	॥० पणाः।	यथाशक्ति।
	अभ्यासे द्वैगुण्यादिकम्। त्यक्तभाजने भोजनेऽप्येवम्।			
ब्राह्मणकर्तृकब्राह्मणोच्छिष्टभोजनम्।	महाव्याहृतिभिरमन्त्रं जलं पीत्वा उपवसेत्।	०	॥० पणाः।	यथाशक्ति।
	एतत् सकृदज्ञानतः।			
	ज्ञानात् द्वैगुण्यम्।	०	१ कार्षापणः।	यथाशक्ति।
ब्राह्मणकर्तृकक्षत्रियोच्छिष्टभोजनम्।	सकृदज्ञाने त्र्यहं ब्राह्मीरसविपक्वक्षीरपानमात्रम्।	०	१॥०कार्षापणः।	यथाशक्ति।
	ज्ञाने द्वैगुण्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्राह्मणकर्तृकवैश्योच्छिष्टभोजनम्।	सकृदज्ञाने त्र्यहोपवासः ब्रह्मसुवर्चलापानञ्च।	०	१॥०कार्षापणः।	यथाशक्ति।
	ज्ञानात् द्वैगुण्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्राह्मणकर्तृकशूद्रोच्छिष्टभक्षणम्।	सकृदज्ञाने षड्रात्रोपवासः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	ज्ञानात् द्वैगुण्यम्।			
	ज्ञानाभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	क्षत्रियादीनां पादपादानिः।			
	एतन्मातृपितृज्येष्ठभ्रातृणामुच्छिष्टव्यतिरिक्तविषयंतेषामुच्छिष्टस्याभोज्यत्वात्।			
विड्लाककाकमूषिकनकुलश्वगवां उच्छिष्टभोजनम्।	त्र्यहोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	एतत् सकृज्ज्ञानतः।			
	अज्ञाने ब्रह्मसुवर्चलां पीत्वोपवासः।	०	॥० पणाः।	यथाशक्ति।
	ब्रह्मसुवर्चला तु पीतकुसुमसूर्य्यावर्त्तः।			
	अत्यन्ताभ्यासे अतिकृच्छ्रम्।	३ धेनवः।	८ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य कुत्सितपङ्क्तौ भोजनम्। पङ्क्तेः कुत्सितत्वन्तु निन्दितब्राह्मणाद्युपवेशनेन जलादिना पङ्क्तिभेदमन्तरेण च भवति।	अहोरात्रोपवासः स्नानं पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	एतत् ज्ञानतः।			
	क्षत्रियपङ्क्तौ भोजने नक्तव्रतम्।	०	।० पणाः।	यथाशक्ति।
	वैश्यपङ्क्तौ एकरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	शूद्रपङ्क्तौ त्रिरात्रोपवासः।	०	१॥०कार्षापणः।	यथाशक्ति।
पङ्क्तिषु एकस्योत्थाने भोजनम्।	द्वादशसाध्यमान्तपनम्।	०	१ कार्षापणः।	यथाशक्ति।
	एतद्ब्राह्मणस्य।			
	क्षत्रियादीनां पादपादार्द्धानिः।			
	एतज्ज्ञानतः सकृत्। अज्ञानतोऽर्द्धम्।			
सुराभाजनस्थजलपानम्।	पक्वं यावकपानम्। एतज्ज्ञानतः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अज्ञानतोऽर्द्धम्।			
मद्यभाण्डस्थजलपानम्।	सप्तरात्रं यावकपानम्। एतज्ज्ञानतः।	०	१॥०कार्षापणः।	यथाशक्ति।
	अज्ञानतोऽर्द्धम्।			
	सुरासंसृष्टरेतोमूत्रादिदूषितजलादिपाने तु चतुरहसाध्यं तप्तकृच्छ्रम्।	सपादधेन्वसम्भवात् २ धेनू।	३॥० कार्षापणाः।	यथाशक्ति।
	एतदपि स्वाहनुपलब्धावभ्यासे।			
चण्डालकूपभाण्डोदकपानम्।	ब्राह्मणस्य सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	क्षत्रियस्य प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य प्राजापत्यार्द्धम्।	०	१॥० कार्षापणः।	यथाशक्ति।
	शूद्रस्य प्राजापत्यपादः।	०	॥० पणाः।	यथाशक्ति।
	एतत् सर्व्वं ज्ञानतः।			
	अज्ञानादेतस्यार्द्धम्।			
	आपत्कालेतु पूर्व्वेद्युरुपोष्य पञ्चगव्यपानम्	०	॥० पणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
चण्डालसृष्टक्षीरजलादिपानम्।	त्रिरात्रमुपोष्य पञ्चगव्यपानम्। एतत् ज्ञानतः।	०	१॥० कार्षापणः।	यथाशक्ति।
	अज्ञानात् द्व्यहसाध्यसान्तपनम्।	०	१ कार्षापणः।	यथाशक्ति।
अन्त्यजखानितकूपादिजलपानम्।	उपवासपूर्वकपञ्चगव्यपानम्। एतदज्ञानतः	०	॥० पणाः।	यथाशक्ति।
	ज्ञानात् द्वैगुण्यम्।	०	१ कार्षापणः।	यथाशक्ति।
अन्त्यजभाण्डस्थजलादिपानम्	ब्राह्मणस्यद्व्यहसाध्यं ब्रह्मकूर्चं व्रतम्। एतत् अज्ञानतः। ज्ञानतो द्वैगुण्यम्।	०	१ कार्षापणः।	यथाशक्ति।
	शूद्रस्य नोपवासः पञ्चगव्यपानमात्रम्। ब्रह्मकूर्चं यथा। "अहोरात्रोषितोभूत्वा पौर्णमास्यां विशेषतः। पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्चं विधिः स्मृतः॥" पञ्चगव्यं यथा। "गोशकृत् द्विगुणं मूत्रं सर्पिर्विद्यात्चतुर्गुणम्। क्षीरमष्टगुणञ्चैव पञ्चगव्ये तथा दधि॥" अथवा। "गोमूत्रमाषकाश्चष्टौ गोमयस्य तु षोड़श। क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्त्तिताः॥ गोमूत्रवद्दृतस्योक्तास्तद्वैन कुशोदकम्॥"	०	॥० पणाः।	यथाशक्ति।
गूढोदकपानम्।	उपोष्य बिल्वपद्मपलाशकुशानामुदकमात्रपानम्। एतद्द्व्यहसाध्यं ज्ञानतः सकृत्पाने। अज्ञानादर्द्धम्। नवभाण्डोदकपाने प्रायश्चित्ताभावः।	०	१ कार्षापणः।	यथाशक्ति।
पीतशेषपानीयपानम्। केवलवामहस्तेन जलपानञ्च।	त्रिरात्रोपवासः। एतच्च ज्ञानतः।	०	१॥०कार्षापणः।	यथाशक्ति।
	अज्ञानतोऽर्द्धम्। एतत् प्रायश्चित्तं ग्रासशेषाशनादिष्वपि ज्ञेयम्।	०	॥० पणाः।	यथाशक्ति।
	शूद्रपीतशेषजलपाने तु ब्राह्मणस्य चान्द्रायणम्।	सार्द्धसप्तधेन्वस्रवात्दधेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
प्रपादिजलपानम्। आदिना कूपजलाहरणार्थं घटस्थजलं द्रोणीजलं खड्गादिकोषस्थजलञ्च।	सचेलस्नानम्। उपवासश्च। एतत् सकृज्ज्ञानतः। आपदि दोषाभावः।	०	॥० पणाः।	यथाशक्ति।
विण्मूत्रसंसृष्टकूपजलपानम्।	त्रिरात्रोपवासः। एतदज्ञानतः।	०	१॥०कार्षापणः।	यथाशक्ति।
	ज्ञानतः सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	तथा।
विण्मूत्रसंसृष्टकुम्भस्थजलपानम्।	अज्ञानतः सान्तपनम्। ज्ञानतो द्वैगुण्यम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
शवदूषितजलपानम्। एतत् मानुषेतराभक्ष्यपक्षिनखशवदूषितकूपजलपानपरम्।	ब्राह्मणस्य त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	क्षत्रियस्य द्व्यहोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	वैश्यस्यैकाहोपवासः।	०	॥० पणाः।	यथाशक्ति।
	शूद्रस्य नक्तम्। सर्व्वेषां व्रतान्ते पञ्चगव्यपानम्। एतत् ज्ञानतः। अज्ञानतोऽर्द्धम्। एतदक्लिन्नशवे।	०	।० पणाः।	यथाशक्ति।
	ज्ञानतः क्लिन्ने षड्रात्रोपवासः। एतत् सर्व्वं मानुषशवेतरपरम्। मानुषशवे द्विगुणम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	कामाभ्यासे पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा
अपेयचौरपानम्। तत्चौरविकारपानञ्च। अपेयचौरं यथा। अनिर्दशानां गोमहिषीच्छागीनां चौरम्। औष्ट्रं ऐकशफं आविकञ्च। सन्धिनीचौरम्। सन्धिनी वृषाक्रान्ता। विवत्साचौरम्। अरण्यमृगीचौरम्। स्त्रीचौरम्। सवृद्धाचौरम्। यमसूचौरम्। विवत्साया अन्यवत्सायाश्च चौरम्। मथितचौरम्। छागवर्जं हिस्रनीचौरम्। अमेध्यभुजः चौरम्। व्रणादिदूषितस्तनीचौरञ्च।	ज्ञानतोभ्यासे पञ्चं यावकपानम्। अज्ञानतोऽर्धम्। चत्रियादौ पादपादहानिः। अत्र उष्ट्रीचौरमानुषीचौरपाने पुनरुपनयनञ्च। इति अभक्ष्यभक्षणप्रायश्चित्तम् ॥*॥	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अथ स्तेयम्। मणिमुक्ताप्रवालाश्ममयलोहकांस्योपलानां हरणम्।	द्वादशाहं कणभक्षणम्। तत् षड्पवासात्मकम्। अपहृतद्रव्यं स्वामिने दत्त्वेतत् करणीयम्। अत्र च सकृदभ्यासकालदेशद्रव्यस्वाम्यपहर्तृगुणदोन्याद्यपेक्षया उत्कृष्टापकृष्टद्रव्ययोर्वैषम्यदोषः समर्थनीयः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
रजताश्वगोभूमिकन्यानां सकृत् हरणम्। एतत् ब्राह्मणासम्बन्धिविषयम्। अत्र कन्यापदं अधमकन्यापरम्।	चान्द्रायणम्।	सार्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
उक्तेतरक्षुद्रपशुहरणम्।	प्राजापत्यम्। अभ्यासे चान्द्रायणम्।	१ धेनुः। ८ धेनवः।	३ कार्षापणाः। २२॥० कार्षापणाः।	यथाशक्ति। यथाशक्ति।
धान्यान्नधनानां हरणम्। अन्नं कृतान्नम्। धनं गवादि।	अब्दकृच्छ्रम्। एतत् ब्राह्मणकर्तृकब्राह्मस्वामिकदशकुम्भाधिकधान्यस्तेये ज्ञेयम्। कुम्भपरिमाणं यथा। दशद्रोणं भवेत् खारी कुम्भोऽपि द्रोणविंशतिः। द्विकालभोजनोचितभक्ष्यभोज्यान्नहरणे त्रिरात्रं पञ्चगव्यपानमात्रम्। भक्ष्यं मोदकादि। भोज्यशक्तादि। एककालभोजनोचितान्नहरणे एकरात्रं पञ्चगव्यमात्रपानम्। धनमपि एतत्परिमाणधान्यमूल्यमवसेयम्।	१५ धेनवः। ० ०	४५ कार्षापणाः। १॥० कार्षापणः। ॥० पणाः।	यथाशक्ति। यथाशक्ति। यथाशक्ति।
मनुष्यादिस्तेयम्। तत्तु दासदासीक्षेत्रगृहकूपवापीजलानां हरणम्।	चान्द्रायणम्। क्षेत्रादीनान्तु उपयोगातिशयाद्यभ्यासाद्यपेक्षयास्त्येव प्रायश्चित्तं गुरुलाघवमिति।	सार्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
गुडादिस्तेयम्। आदिना कार्पासमसर्षपलवणधान्यपक्वान्नौषधतैलगव्यावस्त्रोपानत्कांस्यलोहताम्रसीसकादयः।	कृच्छ्रपादः। एतत् सकृद्धरणविषयम्। अभ्यासेद्वै गुरुम्। अत्र किञ्चिदधिकद्रोणत्रयस्य धान्यस्य तावद्धान्यमूल्यानाद्यान्येषाञ्च हरणे एतद्वेदितव्यम्।	०	॥० पणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
तृणादिस्तेयम्। आदिना काष्ठद्रुमचेलचर्मामिषेक्षुतक्रमूलपुष्पवेदलसूत्रगन्धानां ग्रहणम्। वेदलं वेणुघटितभाण्डम्। गन्धः कस्तूर्यादिः। अत्रापवादः। अस्तेयमग्नये काष्ठमस्तेयञ्च तृणं गवे।	त्रिरात्रोपवासः। तृणादीनां हरणे मासैकव्रतम्। मासार्द्धव्रतञ्च। अङ्गमुनिना यदुक्तं तत् कालदेशापहर्तृस्वामीगुणदौर्गत्याभ्यासानभ्यासकामाकामापेक्षया उत्कृष्टापकृष्टद्रव्यापहारे च वेदितव्यम्।	•	१॥० कार्षापणः।	यथाशक्ति।
जीविकाहरणम्।	यस्य यस्य वर्णस्य वृत्तिच्छेदः तत्तद्वर्णवधोक्तं प्रायश्चित्तं कर्त्तव्यम्।			
	अल्पहरणपहारे चान्द्रायणम्। अत्र चोत्तमाधमत्वे प्रयोजकादिकं सकृदभ्यासौ ज्ञानाज्ञाने च संवीक्ष्य वधोक्तपादार्द्धादिव्यवस्थोह्यनीया।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
देवद्विजद्रव्यापहरणम्।	संवत्सरमप्सु मज्जनं अघमर्षणावर्त्तनञ्च। यद्यत्र गुरुप्रायश्चित्तं मन्वन्तरोक्तं तदत्यन्ताभ्यास उत्तमसम्बन्धादपेक्षया समूह्यम्। इति स्तेयप्रायश्चित्तम्॥*			
अथ अगम्यागमनम्। तत्र सवर्णासु अस्वजनस्त्रीगमनम्। तत्र ब्राह्मणस्य श्रोत्रियभार्य्यागमनम्।	सकृद्गमने त्रैवार्षिकव्रतम्। द्वितीये षाड्वार्षिकं तृतीये नववार्षिकं चतुर्थे संपूर्णं द्वादशवार्षिकम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
अश्रोत्रियनिर्गुणभार्य्यागमने द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।		३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१३ कार्षापणाः।
क्षत्रियस्य क्षत्रियभार्य्यागमनम्।	द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। अभ्यासे द्वैगुण्यादिकम्।	३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१३ कार्षापणाः।
वैश्यस्य वैश्यभार्य्यागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८/७ कार्षापणाः।
शूद्रस्य पञ्चयज्ञानुष्ठायिन्यायहृत्तशूद्रभार्य्यागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८/७ कार्षापणाः।
शूद्रस्यान्यशूद्रागमनम्।	षाण्मासिक व्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४/१३॥ कार्षापणाः।
ब्राह्मणस्य क्षत्रियागमनम्।	सार्द्धवार्षिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणस्य वैश्यागमनं विशिष्टशूद्रागमनञ्च।	षाण्मासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४/१३॥ कार्षापणाः।
ब्राह्मणस्याधमशूद्रागमनम।	सार्द्धमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२ धेनू।	५॥/० कार्षापणाः।	१ गौः। अशक्तौ १ कार्षापणः।
क्षत्रियस्य वैश्यभार्य्यागमनं सच्छूद्रागमनञ्च।	नवमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	१२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
क्षत्रियस्याधमशूद्रागमनम्।	त्रैमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	४ धेनवः।	११।० कार्षापणाः।	२ गावौ। अशक्तौ २ कार्षापणौ।
वैश्यस्य सच्छूद्रागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५कार्षापणाः।	८ गावः। अशक्तौ ८/७ कार्षापणाः।
वैश्यस्याधमशूद्रागमनम्।	सार्द्धचातुर्मासिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	६ धेनवः।	१६॥/० कार्षापणाः।	३ गावः। अशक्तौ ३/१ कार्षापणाः।
अथ प्रतिलोमस्त्रीगमनम्। तत्र शूद्रस्याज्ञानतो ब्राह्मणीगमनम्।	द्वादशवार्षिकव्रतम्। ज्ञानात् गुर्व्वङ्गनागमनोक्तप्रकारेणमरणम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	वैकल्पिकं चतुर्विंशतिवार्षिकव्रतम्। एतद्ब्राह्मण्यापि करणीयम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
वैश्यस्याज्ञानतो ब्राह्मणीगमनम्।	नववार्षिकव्रतम्। ज्ञानाद्दे गुरुम्। ब्राह्मण्यापि एतत् कार्य्यम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
क्षत्रियस्याज्ञानतो ब्राह्मणीगमनम्।	षाड्वार्षिकव्रतम्। ज्ञानाद्दे गुरुम्। ब्राह्मण्यापि एतत् कार्य्यम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
यद्यपि शूद्रस्य ब्राह्मणीगमनं महापातकत्वेन तथा क्षत्रियवैश्ययोर्ब्राह्मणीगमनमनुपातकत्वेन चोक्तं तथाप्यनुलोमगमनं तावदुपपातकमेव तत्सजातीयत्वेन प्रतिलोमस्त्रीगमनप्रायश्चित्तमप्युक्तमतो न वैषम्यमिति।				
शूद्रस्याज्ञानतः क्षत्रियागमनम्।	नववार्षिकव्रतम्। ज्ञानाद्दे गुरुम्। क्षत्रियाया अप्येतत्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
वैश्यस्याज्ञानतः क्षत्रियागमनं शूद्रस्याज्ञानतो वैश्यागमनञ्च।	नवमासाधिकषाड्वार्षिकव्रतम्। ज्ञानाद्दे गुरुम्। क्षत्रियाया वैश्यायाश्चाप्येतत्।	१०२ धेनवः।	३०३॥० कार्षापणाः।	५७ गावः। अशक्तौ ५६।० कार्षापणाः।
अथ समोत्तमवर्णद्विजिपुरुषव्यभिचरितसवर्णासवर्णस्त्रीगमनम्।				
तत्र ब्राह्मणस्य समोत्तमवर्णद्विजिपुरुषव्यभिचरितशूद्रागमनम्।	सकृद्गमने मासार्द्धं गोमूत्रसिद्धयावकपानम्	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अभ्यासे मासं गोमूत्रसिद्धयावकपानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य समोत्तमवर्णद्विजिपुरुषव्यभिचरितक्षत्रियागमनम्। तथाविधवैश्यागमनञ्च।	सकृद्गमने सान्तपनम्। अभ्यासे प्रायश्चित्तार्हत्तिः।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
अथ चातुवर्ण्यस्त्रैरिणीगमनम्। स्त्रैरिणीचतुःपुरुषगामिनी। सा द्विविधा। केनचिदनवरुद्धा अवरुद्धा च।	ब्राह्मणस्य स्त्रैरिण्या ब्राह्मण्या गमने त्रिरात्रोपवासः ब्राह्मणाय वृषभदानञ्च।	•	१॥० कार्षापणः।	यथाशक्ति।
	तथाविधक्षत्रियाया गमने त्रिरात्रोपवासः धनुर्दानञ्च।	•	१॥० कार्षापणः।	यथाशक्ति।
	तथाविधवैश्याया गमने त्रिरात्रोपवासः अयःशिलादानञ्च।	•	१॥० कार्षापणः।	यथाशक्ति।
	तथाविधशूद्राया गमने त्रिरात्रोपवासः उदकुम्भदानन्तथा संमार्जनीदानञ्च।	•	१॥० कार्षापणः।	यथाशक्ति।
ब्राह्मणस्य शूद्रान्त्यजादिगामिन्यस्त्रैरिणीगमनम्।	द्वादशवार्षिकव्रतम्। क्षत्रियादौ पादपादहानिः। विमातृस्त्रैरिणीचाण्डालस्त्रैरिणीगमनेऽप्येवम्। सर्व्वत्राभ्यासे द्वे गुरुम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणबन्धकीगमनम्। बन्धकी चात्र स्वभर्त्तुरतिरिक्तपञ्चपुरुषगामिनी।	कमण्डलुदानम्।	•	•	यथाशक्ति।
क्षत्रियबन्धकीगमनम्।	आयुधदानम्।	•	•	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा।
वैश्यबन्धकीगमनम्।	प्रतोददानम्।	०	०	यथाशक्ति।
शूद्रबन्धकीगमनम्।	स्नानपुरःसरप्राणायामः। एतानि बन्धकीगमनप्रायश्चित्तानि सवर्णानुलोमप्रतिलोमविषयाणि ॥*॥	०	०	०
अथ व्युत्क्रमविवाहः। तत्र ब्राह्मणस्य प्रथमतः क्षत्रियादिविवाहः।	दारव्यतिक्रमो खराजिनं बर्हिर्लोम परिधाय दारव्यतिक्रमिणे भिक्षां देहीति सप्तागाराणि चरेत्। सा वृत्तिः षण्मासान्। दारव्यतिक्रमो ब्राह्मणक्षत्रियवैश्यकन्याविवाहमकृत्वा यो ब्राह्मणः शूद्राविवाहं करोति स उच्यते। एतदनापदि सकृदज्ञानविषयम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	आपदि त्वाढ्य ज्ञातातपः। ब्राह्मणो राजन्यापूर्व्वो द्वादशरात्रं चरित्वा निर्विशेत् तांश्चैवोपगच्छेत्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	वैश्यापूर्व्वो तप्तकृच्छ्रम्।	सपादधेन्वसंभवात् २ धेनू।	३॥० कार्षापणाः।	यथाशक्ति।
	शूद्रापूर्व्वो कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५कार्षापणाः।	यथाशक्ति।
	अनापदि ज्ञानाभ्यासे मनूक्तत्वे वार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
वैश्यागमनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
पञ्चाधिकपुरुषगामिनी वैश्या रजस्वलागमनम्।	अभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥०कार्षापणाः	यथाशक्ति।
	त्रिरात्रोपवासः। घृतप्राशनञ्च। एतत् कामतः सकृद्गमने। अभ्यासे तु द्वे गुरुणादिकम्।	०	१॥० कार्षापणः।	यथाशक्ति।
ऋतौ भार्य्यानभिगमनम्।	त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	ज्ञानाभ्यासे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
पर्व्वसु स्त्रीगमनम्।	एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
श्राद्धदिने मैथुनम्।	एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
दिवामैथुनम्।	एकाहं यावकपानम्। नग्नस्त्र स्नाने नग्नपरस्त्रीदर्शनेऽप्येवं प्रायश्चित्तम्। अभ्यासे प्रायश्चित्तावृत्तिः ॥*॥	०	०	०
अथ स्त्रीव्यभिचारः।	समोत्तमवर्णेषु सकृदुपगमने प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	हिरभ्यासे पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	त्रिरभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात्८धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
अन्त्यजागमनम्। अर्थात् रजकचर्म्मकारनटवरुड़कैवर्त्तमेदभिल्लवेणुजीविशैलूषाणां स्त्रीषु गमनम्।	अज्ञानतश्चान्द्रायणम्। ज्ञानद्दे गुरुणम्।	सार्द्धसप्तधेन्वसंभवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	चतुर्विंशतिवारगमने द्वादशवार्षिकव्रतम् एतदज्ञानतः। ज्ञानतो द्वे गुरुणम्। अव्यवहार्य्यता च।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
कापालिकस्त्रीगमनम्।	ज्ञानादब्दकृच्छ्रम्।	३० धेनवः।	८० कार्षापणाः।	यथाशक्ति।
	अज्ञानाच्चान्द्रायणद्वयम्।	१५ धेनवः।	४५कार्षापणाः।	यथाशक्ति।
अथ तिर्य्यग्योनिगमनम्। तत्र गोवर्ज्जपशुगमनम्।	सचैलस्नानपूर्व्वकं गोभ्यो यवसभारदानम् इदं सकृद्गमने।			
गोगमनम्।	गोवधोक्तमासिकव्रतम्। एतत् सकृद्गमने।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अभ्यासे संवत्सरं प्राजापत्यम्।	३० धेनवः।	८० कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१६। कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	अत्यन्ताभ्यासे द्वादशवार्षिकव्रतम्। इत्युपपातके अगम्यागमनप्रायश्चित्तं समाप्तम् ॥ * ॥	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
अथ परिवेदनादि।	ज्येष्ठेऽनिर्विष्टे कनीयान्निर्विशन् परिवेत्ता परिविन्नो ज्येष्ठः। परिवेदनीया कन्या परिदायी दाता। परिकर्त्ता याजकः। ते सर्वे पतिताः। एतेषां प्रायश्चित्तम्।			
	संवत्सरं प्राजापत्यम्। एतत् कामतः। अकामतोऽर्धम्। अत्रापवादः। "देशान्तरस्थक्लीवैकव्रणषानसङ्गोदरान्। वेश्याभिसक्तपतितशूद्रतुल्यातिरोगिणः॥ जड़मूकान्धबधिरकुब्जवामनकुण्ठकान्। अतिवृद्धानभार्य्यांश्च ऋषिसक्तान्नृपस्य च। धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा। कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति॥"	३० धेनवः।	९० कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१६। कार्षापणाः।
व्रात्यत्वम् अर्थात् सावित्रीपतितत्वम्। पञ्चदशाब्दपर्य्यन्तमुपनयनाभावे ब्राह्मणस्य व्रात्यत्वम्। एकविंशतिवर्षपर्य्यन्तमुपनयनाभावे क्षत्रियस्य व्रात्यत्वम्। त्रयोविंशतिवर्षपर्य्यन्तमुपनयनाभावे वैश्यस्य व्रात्यत्वम्।	पित्रमातृरहितनिःस्वजनस्य सावित्रीपाते प्राजापत्यत्रयम्। यथाविधि उपनयनञ्च। आलस्यानवधानादिना सावित्रीपाते तु व्रात्यस्तोमयागः।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
	तद्वैकल्पिकं दिनत्रयाधिकमासचतुष्टयसमाप्यमुडुलोमव्रतम्। तद्व्रतं यथा। द्वौ मासौ यावकेनवर्त्तयेत् मासं पयसा अर्द्धमासमामिक्षया अष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमभ्यस्य अहोरात्रमुपवसेत्।	सपादनवधेन्वसम्भवात् १० धेनवः।	२७॥० कार्षापणाः।	यथाशक्ति।
	देशोपप्लवादिना सावित्रीपतने एकविंशतिरात्रं प्रकृतिमितयावकपानम्। तत उपनयनम्।	४ धेनवः।	९॥० कार्षापणाः।	यथाशक्ति।
अथावकीर्णम्। अर्थाद्ब्रह्मचारिणो योषिद्गमनम्।	षण्मासं ब्रह्महत्याव्रतम्। खरचर्मपरिधानञ्च।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४/१४ कार्षापणाः।
	अभ्यासे संवत्सरं ब्रह्महत्याव्रतम्।	१५ धेनवः।	४५कार्षापणाः।	९ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
पितृष्वसृसुतादिपरिणयनम्। आदिना मातृष्वसृसुतामातुलसुतामातामहसपिण्डासगोत्रासमानप्रवरादीनां ग्रहणम्।	चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	त्यागानन्तरं मातृवद्भरणम्। एतज्ज्ञानतः अज्ञाने कृच्छ्राब्दपादः।	४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
अग्न्युत्सादनम्। अर्थात् अग्निहोत्रिणामग्नित्यागः।	कामतः संवत्सरोत्सन्ने चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात्८धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	द्विवर्षोत्सन्ने सोमायनचान्द्रायणे। एतदनुसारेणोनाधिककालयोरुह्यम्।	सार्द्धाष्टधेन्वसम्भवात् ९ धेनवः।	२५॥० कार्षापणाः।	यथाशक्ति।
गृहस्थस्य चिरतरकालानग्नित्वम्।	गोवधोक्तवै मासिकव्रतम्। अल्पकाले अनाधाने च चान्द्रायणम्।	३२ धेनवः।	३६ कार्षापणाः।	१० गावः। १ वृषः। अशक्तौ १५ कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा
ब्राह्मणस्य वेदानध्ययनं यज्ञाकरणं पुत्रानुत्पादनञ्च।	त्रैमासिकं गोव्रतम्।	१२ धेनवः।	३६ कार्षापणाः।	१ वृषः। १० गावः। अशक्तौ १५ कार्षापणाः।
अनाश्रमित्वम्।	संवत्सरे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	वर्षद्वये अतिकृच्छ्रम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
	वर्षत्रये कृच्छ्रातिकृच्छ्रम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
	अत ऊर्द्धं चान्द्रायणम्।	सार्द्धसप्तधेन्वसभ्यात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
सूर्योदयास्तकालयोः शयनम्।	सकृदाचरणे स्नानम्। अभ्यासे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्रह्मचारिणः सन्ध्यादीनामतिक्रमः। आदिना अग्नीन्धनाकरणं भैक्ष्यचर्य्याकरणञ्च।	अरोगिणो निरन्तरं सप्तरात्रमकरणे अवकीर्णिव्रतम्। तत्तु खरचर्मपरिधानपूर्व्वकपाण्मासिकं ब्रह्महत्याव्रतम् एतदूनं ऊनं अधिके अधिकम्।	सार्द्धसप्तधेन्वसभ्यात् ८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४।१४ कार्षापणाः।
अनातुरस्टहस्थस्य सन्ध्यास्नानाद्यैकनित्यक्रियापातः।	दिनैकनित्यक्रियातिपाते एकाहोपवासः।	०	६ रक्तिकरजतम्	यथाशक्ति।
	दिनत्रयक्रियातिपाते कृच्छ्रार्द्धम्।	०	१॥० कार्षापणः।	यथाशक्ति।
	वर्षैकनित्यक्रियातिपाते एकदिनक्रियातिपातप्रायश्चित्तानुसरणेन प्रायश्चित्तम्।	०	२ पल ६ तोलक ४ माषकमितरजतम्।	यथाशक्ति।
शूद्रव्यतिरिक्तायाज्ययाजनम्। अयाज्यस्य निन्दितप्रतिग्रहादिना निन्दितब्राह्मणादयः।	शतगायत्रीजपः।	०	०	०
	अभ्यासे सहस्राधिकं चान्द्रायणं वा। दक्षिणात्यागाच्च पूतो भवति।	सार्द्धसप्तधेन्वसभ्यात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
शूद्रयाजनम्।	लोभादिना याजने अजितभुक्तावशिष्टधनत्यागाधजले प्रक्षेपपूर्व्वकं ब्रह्मचारिणे दानपूर्व्वकं वा चान्द्रायणं पुनरुपनयनञ्च। अक्षारलवणब्रह्मसुवर्च्चलापानञ्च। एतदशक्तौ तद्धनं परित्यज्य त्रिंशत्पुराणाः प्रदातव्याः।	सार्द्धसप्तधेन्वसभ्यात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	स्वेच्छादनुप्रसङ्गादिना याजने द्रव्यत्यागपूर्व्वकं प्राजापत्यम्। अज्ञानतः प्राणायामसहस्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
शूद्रप्रतिग्रहः।	सकृत्प्रतिग्रहे त्रिसहस्रगायत्रीजपः। अभ्यासे चान्द्रायणम्। एतच्च द्रव्यत्यागपूर्व्वकं कार्य्यम्।	सार्द्धसप्तधेन्वसभ्यात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
उच्छास्त्रवर्त्तिक्षत्रियनृपतिप्रतिग्रहः।	षष्ठे काले चौराशनं मासैकं जलवासः प्रसुरतरद्विजतर्पणञ्च। मासोपवासेनैवास्य सङ्क्षालनम्।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
अयाज्यजप्रतिग्रहः। स च अयाचितपुष्पफलशाकदलकाष्ठधान्यपयोमांसदधिशय्यागेहकुशगन्धमणिमत्स्यादीतरविषयः।	ज्ञानादष्टचत्वारिंशद्धाराभ्यासात्, द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	अज्ञानात् द्विरभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	ज्ञानात् द्विरभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसभ्यात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
चाण्डालप्रतिग्रहः।	अज्ञानात् अष्टचत्वारिंशद्धाराभ्यासात् द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	अज्ञानात् सकृत्कृते तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	ज्ञानात् सकृत्कृते चान्द्रायणम्।	सार्द्धसप्तधेन्वसभ्यात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
पतितप्रतिग्रहः।	ज्ञानात् सकृत्कृते चान्द्रायणम्। अज्ञानात्तदर्द्धम्।	सार्द्धसप्तधेन्वसभ्यात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
प्रायश्चित्तद्वयग्रहणम्।	त्रिसहस्रगायत्रीजपः मासैकं गोष्ठे पयःपानं वा। एतत् लघुतरपापप्रायश्चित्तद्वयग्रहणे।	०	०	०
स्वभावाद्यात्मकृष्णाजिनोभयतोसुखीमरण्यादिप्रतिग्रहः।	उत्तममरण्यादिप्रतिग्रहे दशसहस्रगायत्रीजपः। मध्यमे पञ्चसहस्रगायत्रीजपः। अधमे अष्टोत्तरसहस्रसावित्रीजपः। द्वादशरात्रं पयोव्रतञ्च। अत्यन्तनिषिद्धकृष्णाजिनोभयतोसुखीप्रतिग्रहे लक्षगायत्रीजपः।			
अथ ब्राह्मणस्य क्षत्रियवैश्यवृत्त्या धनार्जनम्।	संवत्सरे चान्द्रायणम्। संवत्सराभ्यन्तरे मासैकद्विकादौ चान्द्रायणभागहारः कल्प्यः। संवत्सरादूर्द्धं द्वैगुण्यत्रैगुण्यादिकं कल्प्यम्। आपत्काले दोषाभावः।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य सेवावृत्तिधनार्ज्जनम्।	प्राजापत्यत्रयं पुनरुपनयनञ्च। द्रव्यत्यागपूर्ब्बकं करणीयम्।	३ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य गीतादिना धनार्जनम्।	चान्द्रायणम्। कृतप्रायश्चित्तस्याप्यवहार्य्यत्वम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य शूद्रसेवनम्।	चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	चिरतरकालाभ्यासे त्रैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
अविक्रेयविक्रयः। ब्राह्मणस्याविक्रेयद्रव्याणि यथा। लवण पक्वान्न मधु क्षीर दधि घृतोदक सर्व्वगन्धोपल लाक्षा रक्तवासः गुड़ तैल ग्राम्यपशु एकशफ केशि सर्व्वारण्यपशु विद्या याग खात गोशुक्ल ऊर्णा रस विष तिल शुक्ल नीली कौषेयवासः चर्म्म तक्रामांस सुरा सोम केशि गोधूम कन्या हिङ्गु गुग्गुलु सर्जरस हरिताल मनःशिलाञ्जन गैरिक क्षार मणि मौक्तिक प्रवाल दन्त नख आर्द्रौषधि शुक्ति वेणु वैणव न्यग्रोधपात्र पुष्प मूल तुष कार्पास भस्मास्थि पिण्याक चपु सीसक कृष्णलोहोडुम्बर खड्गपात्राणि इत्यविक्रेयाणि।	सकृत्कृते चिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	द्विरभ्यासे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	निखिलविक्रये बहुतरकालाभ्यासे वा त्रिसवनस्नानाधःशयनचतुर्थकालभोजनरूपसंवत्सरव्रतम्। शूद्रस्यात्मन्यापदि दोषाभावः।	१५ धेनवः।	४५ कार्षापणाः।	६ गावः। अशक्तौ ८।० कार्षापणाः।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
निन्दितदेशगमनम्। तत्तु तीर्थयात्राव्यतिरेकेण। निन्दितदेशा यथा। कारस्करकलिङ्गोड्रान्ध्रवरयुगन्धरभूमिलयसिन्धुसौराष्ट्रसौवीरप्रत्यन्तदेशाङ्गवङ्गकलिङ्गादयः।	एतान् गत्वा तत्रैव चिरमुषित्वा गङ्गादिगमनम्। तदशक्तौ पुनरुपनयनम्।			
असत्याभिधानम्।	अतिचिरवासे पुनरुपनयनं चान्द्रायणञ्च।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	सङ्गदसत्यभाषणे क्षणानुक्षरणम्।			
	अत्यन्ताभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अतिबहुतरकालाभ्यासे माससाध्यचान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	साक्षिणोऽसत्यभाषणे ज्ञानाज्ञानतो द्वादशवार्षिकव्रतमित्युक्तमनुपातके।			
	विवाहभयमैथुनबालप्रतारणपरीहासगोब्राह्मणहितस्त्रीराजस्वप्राणात्ययसर्वधनापहारविषयेषु मिथ्याकथने दोषाभावः।			
उच्छिष्टस्य चाण्डालादिदर्शनम्।	दर्शने एकरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	सम्भाषणे द्विरात्रोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	संसर्गे त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	सहगमने सचैलस्नानम्। अनुच्छिष्टस्य दर्शने सूर्यादिदर्शनम्। सम्भाषणे ब्राह्मणसम्भाषणम्। इदं ज्ञाने।			
उच्छिष्टस्य सूर्यादिदर्शनम्। आदिना नक्षत्रचन्द्रौ। कामत इदम्।	एकोपवासः।	०	६ रत्तिकरजतम्।	यथाशक्ति।
तैलाभ्यक्तादिस्मृत्रोचारसमुत्सर्गः। आदिना अनाचान्तक्षमुत्कर्म्मिमैथुनिनः।	एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
विप्राग्र्यादिमध्यगमनम्। आदिना दम्पतीगवोर्यंढगमम्।	कामतोऽत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	सङ्गदभ्यासादिषु तु स्नातकव्रतलोपप्रायश्चित्तम्। एकदिनाभोजनम्। तदाद्यत्तिश्चोदनीया।	०	॥० पणाः।	यथाशक्ति।
अग्नौ पादप्रतापनम्। कूपेन पादसम्मार्जनञ्च।	एकोपवासः। इदं सङ्गत्करणे। अभ्यासे दैगुण्यादिकम्।	०	॥० पणाः।	यथाशक्ति।
गुरोर्नाम्नश्च तिरस्कारः।	दर्पेण हुङ्कारे लङ्घारे वादेन जये वाससा बन्धने दण्डेन ताडने च क्षिप्रं प्रसाद्य दिनमेकमुपवासः। एतदीषत्संरम्भतः सङ्गज्ज्ञेयम्।	०	॥० पणाः।	यथाशक्ति।
	ग्राम्यविवादे दर्पात् पुनः पुनर्जये ज्ञात्वा प्रक्षिप्तत्व त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	प्रमादतः पादेन सूर्य्ये एकरात्रोपवासः अभिवादनं प्रसादनञ्च।	०	॥० पणाः।	यथाशक्ति।
	क्रोधादिना अनुबन्धापेक्षया ग्राह्यप्राणापत्यादिकं कल्प्यम्।			
	महापातकेन ब्राह्मणस्य विद्याभिधाने क्षत्रातिक्रमम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ पूर्णदानम्।	दक्षिणा।
	उपपातकेन ब्राह्मणस्य विरुद्धाभिधाने प्राजापत्यम्। जातिभ्रंशकरपातकोपपातकादन्यत्राक्रोशस्य लघुगुरुभावं प्रतिसन्धाय एकरात्रत्रिरात्रषड्रात्रोपवासाः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	प्रतिश्रुत्यादानादौ अल्पत्वबहुत्वाभ्याम् एकरात्रत्रिरात्रषड्रात्रोपवासाः।			
	देवर्षिगोब्राह्मणाचार्यमातृपितृनरेन्द्राणां प्रति ष्ठीवनाक्रोशे उल्मुकेन जिह्वादाहो हिरण्यदानञ्च। गुरुब्राह्मणभिन्ने प्रत्याक्रोशने प्रतिताडने च दोषाभावः।			
मिथ्याब्राह्मणशपथः। यावज्जीवसुकृतशपथश्च।	विप्रस्य वधसंयुक्तमिथ्याशपथे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२।० कार्षापणाः।	यथाशक्ति।
	यावज्जीवसुकृतशपथे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अभिशापकरणम्।	मासमब्भक्षणम्। गायत्र्या वशिष्ठोक्तगुह्यवतीनां वा शतजपश्च। एतत् सङ्कल्पमहापातकाद्यभिशापे। उपपातके त्वभ्यासतो ज्ञेयम्। एषामहापातकाभिशापाभ्यासे त्वाकृत्तितारतम्यात् प्रायश्चित्ततारतम्यं कल्प्यम्। महापातकादन्यत्र एकविंशतिरात्रं सुवर्चलापानम्। हीनवर्णेन उत्तमवर्णाभिशापे प्रतिलोमोक्तदण्डव्यवस्थया प्रायश्चित्तं कल्प्यम्।	१३ धेनवः।	३६ कार्षापणाः।	यथाशक्ति।
अनृताभिशस्तता।	मासं छत्रम्।	सार्द्धधेनुद्वयासम्भवात् ३ धेनवः।	७।० कार्षापणाः।	यथाशक्ति।
	महापातकाभिशापे द्विमासं छत्रम्। एतदभिशापकालातिक्रमे ज्ञेयम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अभिशापकालनिर्णयप्रवृत्तस्य उपपातकादिना अभिशस्तस्य छत्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
आरूढपतितत्वम्। व्याधिक्रोधादिना सन्न्यासवाक्यमुच्चार्य योगृहस्थाश्रममाश्रयितुमिच्छति स आरूढपतितः तस्य भावः।	षण्मासान् प्राजापत्यम्। एतत् सन्न्यासग्रहणान्तरनिवृत्तानाम्। चिरतरकालसन्न्यासनिवृत्तस्य ब्राह्मणस्य स्वपदाङ्कनपूर्वकनिर्वासनम्। क्षत्रियविशोर्दास्यकरणम्।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
	यावज्जीवव्रतानुष्ठानप्रवृत्तयोः ब्रह्मचारिवानप्रस्थयोः स्वधर्मनिवृत्तयोश्चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२।० कार्षापणाः।	यथाशक्ति।
जलाग्न्यादिभ्रष्टता। आदिना उड्डयनप्रव्रज्यानशनविषप्रपतनप्रायोपवेशशस्त्रघातिभ्यो भंशनम्।	चान्द्रायणं तप्तकृच्छ्रद्वयं वा। अभ्यासे त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च। जातकर्मादिसंस्काराच्च।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२।० कार्षापणाः।	यथाशक्ति।
ब्रह्मबन्ध्यत्वापत्तिः	पितामहाद्याः प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	त्रिसन्ध्यं गोमयगोमूत्राभ्यां स्नानम्। त्र्यहं पञ्चगव्यकुशोदकमात्रपानञ्च। इदञ्च नाभ्यधोदेशभ्रंशविषयम्।			
	नाभेरूर्द्धं क्रमोन्नतौ षड्रात्रमुपवासः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ पूर्वोदानम्।	दक्षिणा।
	शिरसि क्रिमिदंशने दृषदश्चिमायुक्तसान्तपनं तप्तकृच्छ्रं वा।	यादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११० कार्षापणाः।	यथाशक्ति।
श्वादिदंशः। आदिना शृगालखरग्राम्यकुक्कुराभ्रराजीवृकराहपुंश्चलीवानरवायसानां दंशनम्।	पादयोरधिरदंशने जले प्राणायामः; घृतप्राशनञ्च। पादयोरतिगाढ़दंशने नद्यां १६ प्राणायामाः। नाभेरधोगाढ़दंशने ब्रह्मचारिव्रतञ्चार्द्धं सायं पयःपानम्।			
	गृहस्थस्य चिरात्रसुपवासः।	०	१।० कार्षापणः।	यथाशक्ति।
	एकाहमग्निहोत्रिणः।	०	।० पणाः।	यथाशक्ति।
	नाभ्यूर्द्धं दंशने एतद्द्वैगुण्यम्। बाह्वोश्चतुर्गुणम्। मूर्द्धि षोड़शगुणम्। इदं सरुधिरदंशने। नाभेरूर्द्धमतिगाढ़दंशने सागरगमनदीस्नानपूर्व्वकोपवासः; घृतं प्राणायामावर्त्तनञ्च।			
	व्रतस्थस्य श्वादिदंशने चिरात्रोपवासः सघृतयावकपानञ्च। बालस्याज्ञते अशक्ते वा तदीयपापत्वथं संकल्प्य पित्रादिः प्रायश्चित्तं कुर्य्यात्। दष्टस्थानस्य गायत्र्याष्टसहस्राभिमन्त्रणपूर्व्वकसुरसुकेन दहनम्। चतुर्भिः कलसैर्नदीसङ्गमे वा स्नानम्। स्त्रियास्तु विशेषः। उदितसोमनक्षत्रदर्शनं समुद्रदर्शनं वा। लक्षपक्षे चन्द्रगमनदिग्दर्शनम्।	०	१।० कार्षापणः।	यथाशक्ति।
विप्रादिहते चात्मघातनृते वा अशुपानजलादिदानम्।	दहनवहनकटक्रियातर्पणश्राद्धादौ तप्तकृच्छ्रम्।	३ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	तत्क्षवस्य केवलस्यार्द्धे अश्रुपाते वा एकाहोपवासः।	०	६ रत्तिकरजतम्।	यथाशक्ति।
	अभ्यासे अनडुत्सहितगोदश्चिमायुक्ततप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	१ वृषः। १ गौः। अशक्तौ ६ कार्षापणाः।
	आत्मघातिनः स्नेहात् दाहादिकरणे तप्तकृच्छ्रसहितपाञ्चगव्यम्। बलात्कारेण उद्बन्धनदत्तस्य प्राग्रच्छेदनदहनवहनेषु मासं भैक्षभक्षणं त्रिसवनस्नानञ्च। एतेन दहनवहनादिकरणे असम्बन्धिनां तत्क्षणात्।	१२ धेनवः।	२४।० कार्षापणाः।	यथाशक्ति।
	दहनवहनव्यतिरेकेण कामतः सर्व्वास्वौनाभ्यासस्थार्द्धे प्राजापत्यम्।	१ धेनुः।	२ कार्षापणाः।	यथाशक्ति।
	तथैवाभ्यासे तप्तकृच्छ्रम्।	३ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	द्विजस्य शूद्राग्न्वानुगमने चिराज्ञानौचं तदन्ते समुद्रगां नदीं गत्वा प्राणायामं घृतं स्नात्वा घृतप्राशनम्। अवन्तीमासाद्य १००८ गायत्रीजपो वा। द्विजस्य द्विजाग्न्वानुगमने १०८ गायत्रीजपः। शूद्रस्य सर्व्वाग्न्वानुगमने स्नानम्।			
वलात्कारितस्लेच्छदास्याशुभकर्म्म।	म्लेच्छचाण्डालादैर्दस्युभिः उच्छिष्टमार्ज्जनोच्छिष्टभक्षणखरोष्ट्रविड्वराहमांसभक्षणम्लेच्छस्त्रीसङ्गतदीयस्त्रीसङ्गभोजना-			

अघोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ। चूर्णोदानम्।	दक्षिणा।
	दिक्कृत्सितकर्म बलाच्चासेवं कारितस्य निरभिज्ञातेः प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	सायेच्चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२।० कार्षापणाः।	यथाशक्ति।
	क्षत्रियवैश्ययोः पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य मासार्द्धं यावकपानम्। वत्सरादूर्द्धं वर्षचतुष्टयं यावत् भागहारेण प्रायश्चित्तमर्द्धनीयम्। तदूर्द्धं ततुल्यत्वात् पतिततेन प्रायश्चित्तान्तराभावान्मरणम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अयुदकमूत्रपुरीषकरणम्।	सचैलस्नानं गोस्पर्शश्च। अभ्यासे एकोपवासः सचैलस्नानञ्च।	०	॥० पणाः।	यथाशक्ति।
जलाद्यगोरुच्चित्रव्यप्रक्षेपः।	मासं यावकपानम्। एतदभ्यासे।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	श्मशानं ईक्षदर्शनस्य चिरात्रोपवासः। इदमापः प्रहरत इति जपश्च।	०	१॥० कार्षापणः।	यथाशक्ति।
	अनार्षस्य कौतूहलादिना तन्नलक्षणम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
अन्योन्यानुक्तहेयोत्पादनम्। अर्थाक्षेत्राच्छेदकरणम्।	अहोरात्रमनशनं भूत्वा पयःपानम्।	०	५ रजतमाषकाः।	धनुर्दक्षश्च।
शक्रधनुःपलाशादिदर्शनकरणम्।	इदं शक्रधनुरिति व्यपदिश्य कामतो दर्शयित्वाहोरात्रोपवासः।	०	३ रूप्यमाषकाः।	यथाशक्ति।
श्राद्धनिमन्त्रितब्राह्मणानाङ्गानम्।	यतिचान्द्रायणम्।	४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
देवागारक्षतैरुकाकाङ्घ्रिकादिना गृहकरणम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
निष्ठीवनादि। आदिना वातकर्मोदस्थिष्टाशृतक्षुत्पतितसम्भाषणवासःपरिधानानि।	आचमनम्। गोस्पृष्टस्नानम्। अर्कदर्शनम्। दक्षिणश्रवणस्नानं वा। अन्त्यपूर्वाभावे ततः परम्। इन्द्रियप्रच्छर्दनमेध्यस्य सुखस्नानं स्नानम्।			
यतीनां व्रतोपव्रतभङ्गः। व्रतानि यथा। अहिंसासत्यास्तेयमैथुनवर्जनानि। उपव्रतानि यथा। अक्रोधशुश्रूषाप्रमादशौचाहारशुद्धीनि।	अहोरात्रोपवासपूर्वकचान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२।० कार्षापणाः।	यथाशक्ति।
	रमणेच्छया स्त्रीसमीपगमने प्राणायामशतपूर्वकस्नानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	असङ्कल्पे उपवासः प्राणायामशतञ्च।	०	॥० पणाः	यथाशक्ति।
	अकामतः पशुक्रिमिहिंसायां शक्रातिशक्रम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
	चान्द्रायणं वा। इन्द्रियदौर्बल्यात् स्त्रीदर्शनात् स्कन्दने षोडशप्राणायामाः। स्त्रियं विना कामतो दिवास्कन्दने चिरात्रोपवासः प्राणायामशतानि च। रात्रौ स्कन्दने स्नानपूर्वमेकहादशप्राणायामाः।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२।० कार्षापणाः।	यथाशक्ति।
	एकान्नमधुमांसानामश्नतां प्रत्यक्षवयसानामभोज्यानामेकैकस्य भोजने प्राजापत्यम्। योगिनां प्रमादे योगेन शुद्धिः। ज्ञानिनां ज्ञानमेव शुद्धिकारणम्। ब्रह्मचारिणोऽकामतः स्वप्ने रेतस्खलने स्नानम्। अर्कार्चनम्। त्रिः पुनर्मामित्यृचो जपश्च।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।

अथो उपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
व्रतभङ्गः।	लोभान्मोहात् प्रमादाद्वा व्रतभङ्गे उपवासत्रयं क्षीरसुखनच्च।	•	१॥० कार्षापणाः।	यथाशक्ति।
उच्छ्वासभक्षणम्।	कामतः सकृदारोहणे नमस्काने च प्राणायामः।			
	अभ्यासे चिरात्रोपवासः।	•	१॥० कार्षापणः।	यथाशक्ति।
	अथवधानेनारोहणे नमस्य ईषदभ्यक्तस्नानभोजने च प्राणायामशतम्। यत्र उपपातकगणपठितेषु यत्र प्रायश्चित्तं नोक्तं तत्रोपपातकसामान्यप्रायश्चित्तमेव ग्राह्यम्। तत्तु मनूक्तं त्रैमासिकं गोव्रतं चान्द्रायणं वा। याज्ञवल्क्योक्तं मासं पयःपानं पराको वा। एतान्येव प्रायश्चित्तानि पापस्य गुरुलाघवमवगम्य व्यवस्थेयानि॥ * ॥			

अथ जातिभ्रंशकरपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मणपीड़ाकरणम्। लशुनादिभक्षयोर्नित्यम्। मित्रे कौटिल्यम्। पुंसि मैथुनच्च।	कामतः सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	अकामतः प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	एतदभ्यासे।			
	अत्रायं विशेषः।			
	ब्राह्मणावगोरणे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणे दण्डादिनिपातने अतिकृच्छ्रम्।	३ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणस्य श्रोत्रियोत्पादने कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणाङ्गच्छेदने कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	दशगोदानच्च।			

अथ सङ्करीकरणपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
खराश्वोष्ट्रगवहस्तिच्छागमेषमीनाहिमहिषाणां वधरूपाणि।	सङ्करकरणे मासं यावकपानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	अभ्यासे कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथापात्रीकरणपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
निन्दितेभ्यो धनादानम्। वाणिज्यम्। भृतसेवनम्। असत्यभाषणच्च।	सकृत्करणे चतुरहसाध्यं तप्तकृच्छ्रं शीतकृच्छ्रं वा।	सपादधेन्वसम्भवात् २ धेनू।	३॥०कार्षापणाः।	यथाशक्ति।
	अभ्यासे महासान्तपनम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथ मलावहपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
कृमिकीटपक्षिणां हननम्। मद्यानुगतद्रव्यभोजनम्। फलकाष्ठपुष्पाणां स्तेयम्। अधैर्यम्। तच्च गीतश्रवणादि। अल्पेऽल्पचये अत्यन्तवेलत्वच्च।	सकृदाचरणे त्र्यहयावकपानम्। अभ्यासे तप्तकृच्छ्रम्। अत्यन्ताभ्यासे तप्तातितप्तकृच्छ्रम्। एषु चतुर्षु यच्च यच्च प्रायश्चित्तविशेषो नोक्तस्तत्रैव बोध्यम्।	० ४ धेनवः। ५ धेनवः।	॥-१२ १२ कार्षापणाः। १५ कार्षापणाः।	यथाशक्ति। यथाशक्ति। यथाशक्ति।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
यदुक्तं तत्प्रकीर्णकम्। इतिवचनात् अतिपातकाद्यल्पान्यतमत्वेन विशेषतोऽनुक्तानि पापानि।	चान्द्रायणम्। पराकः। तुलापुरुषः। गवानुगमनम्। प्राजापत्यम्। एतानि सर्वपापप्रणाशकानि। पापस्य गुरुलाघवं वीक्ष्य प्रायश्चित्तान्येतानि शिष्टैर्व्यवस्थेयानि।			
अधास्पृश्यस्पर्शनम्। तच्च चाण्डालरजस्वलापतितसूतिकाश्ववराहवस्पृष्टिअङ्गोच्छिष्टाद्यधिकयाम्याश्वकुक्कुटवराहादीनां स्पर्शनम्।	अनुच्छिष्टस्य चाण्डालादिस्पर्शे अकामतः सचेलं सग्निरस्कं स्नानम्। कामतः सचेलस्नानम्। महाव्याहृतिभिर्होमः। घृतप्राशनच्च। चिताधूमस्पर्शे ऋतुकालीनमैथुने दुःस्वप्ने वमने विरेके श्मश्रुकर्मणि यूपभस्मपचनखस्पृष्टसङ्घृतदृष्ट्या स्पर्शे स्नानपूर्वकं प्रक्षालितवस्त्रपरिधानम्। अशुतौ मैथुने मूत्रपुरीषत्यागवच्छुद्धिः।			
	सर्वाङ्गस्पर्शे चिरात्रोपवासः। रात्रौ ग्रववर्णास्पृश्यस्पर्शने सुवर्णं प्रक्षिप्य अग्निं सन्निधाय दिवाकृतजलैः स्नानम्। सर्वत्र प्रागन्नप्राशनात् शिशोरभ्युक्षणम्। प्राक् चूडाकरणात् बालस्याचमनम्। प्रागुपनयनात् कुमारस्य स्नानम्।		१॥० कार्षापणः।	यथाशक्ति।
अथोच्छिष्टस्य चाण्डालादिस्पर्शः। आदिना पतितरजस्वलान्त्यजन्मसूकरमद्यभाण्डानां ग्रहणम्।	सद्यः स्नात्वा परदिने प्रायश्चित्तं करणीयम्। ऊर्ध्वोच्छिष्टस्य प्राजापत्यम्। कामाभ्यासे सान्तपनम्। अज्ञाने चिरात्रोपवासः। पञ्चगव्यपानच्च। अर्धोच्छिष्टस्य अर्धातिनिगीर्णस्यास्य आमाशनोच्छिष्टस्य च प्राजापत्यपादः। आपदि ज्ञानात् विशेषो यथा।	१ धेनुः। ४ धेनवः। ० ०	३ कार्षापणाः। १२ कार्षापणाः। १॥० कार्षापणः ॥० पणाः।	यथाशक्ति। यथाशक्ति। यथाशक्ति। यथाशक्ति।
	मूत्रत्यागाप्रौचिनः ग्रवादिस्पर्शे एकोपवासः। पुरीषत्यागाप्रौचिनः ग्रवादिस्पर्शे दिनद्वयमुपवासः। मैथुनाप्रौचिनः ग्रवादिस्पर्शे दिनत्रयमुपवासः। पानाशुचीनां ग्रवादिस्पर्शे दिनचतुष्टयमुपवासः।	० ० ० ०	॥० पणाः। १ कार्षापणः। १॥० कार्षापणः। २ कार्षापणौ।	यथाशक्ति। यथाशक्ति। यथाशक्ति। यथाशक्ति।
अथ तलाभ्यक्तस्य चाण्डालादिस्पर्शः।	उपवासः। पञ्चगव्यपानच्च। चाण्डालोदकसंस्पृष्टस्य स्नानम्।	०	॥० पणाः।	यथाशक्ति।
	उच्छिष्टस्य चाण्डालोदकस्पर्शे चिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
अथ रजकादिस्पर्शः। आदिना चर्मीरवेणधीवरनटानां ग्रहणम्।	अशुच्छिष्टस्य द्विजस्य रजकादिभिरकामतः स्पर्शे आचमनम्। कामतः शिरोयतिरिक्ताङ्गस्पर्शे तदङ्गप्रक्षालनपूर्वकमाचमनम्। शिरःस्पर्शे स्नानम्। उच्छिष्टस्य तु ब्राह्मणस्यानुच्छिष्टचर्मीकारादिस्पर्शे एकरात्रं पयःपानम्।			
	उच्छिष्टचर्मीकारादिकपृक्तस्पर्शे त्रिरात्रोपवासान्ते घृतप्राशनम्। स्नानं तूर्ध्वोच्छिष्टविषयमेव।	•	१॥० कार्षापणः।	यथाशक्ति।
	अज्ञानतस्तद्भक्षणम्।	•	॥० पणाः।	यथाशक्ति।
अथोच्छिष्टस्य ब्राह्मणस्योच्छिष्टचण्डालस्पर्शः।	एकोपवासानन्तरं पञ्चगव्यपानम्। कामत इदम्।	•	॥० पणाः।	यथाशक्ति।
	अकामेऽधोच्छिष्टे च नक्तम्। पुनः स्पर्शेऽप्येवम्।	•	२ रजतरक्तिके।	यथाशक्ति।
अथोच्छिष्टोच्छिष्टसवर्णस्पर्शः।	द्वयोरेवोच्छिष्टयोर्ब्राह्मणयोरन्योन्यस्पर्शे तदन्नत्यागपूर्वकं स्नानम्। अत उच्छिष्टस्य विप्रस्यानुच्छिष्टविप्रस्पर्शे दोषाभाव एव। एतदकामतः।			
	कामतो नक्तपूर्वं घृताशनम्।	•	२ रजतरक्तिके।	यथाशक्ति।
	उच्छिष्टब्राह्मणस्योच्छिष्टचण्डालस्पर्शे नक्तम्।	•	२ रजतरक्तिके।	यथाशक्ति।
	ताडयवेश्यस्पर्शे उपवासः।	•	॥० पणाः।	यथाशक्ति।
	सज्ञानयोः सवर्णयोः परस्परस्पर्शे तदन्नत्यागपूर्वकं स्नानं प्राणायामश्च। अज्ञानात्तदन्नभोजने परेद्युः नक्तं पञ्चगव्यपानम्। तदन्ते भोजने न दोषः।			
	रागात् उपवासानन्तरं ब्रह्मकूर्चपानं हविष्यभोजनञ्च।	•	॥० पणाः।	यथाशक्ति।
	शूद्रस्यापि विप्रेषाश्रवणादुच्छिष्टोच्छिष्टसंस्पर्शे एतदेव। नक्ताभुक्तौ रजतरक्तिकादयं देयम्।			
अथ नीलीवस्त्रपरिधानम्।	अहोरात्रोपवासानन्तरं पञ्चगव्यपानम्। इदमज्ञाने। ज्ञाने द्वैगुण्यम्।	•	॥० पणाः।	यथाशक्ति।
	पालनाद्विक्रयात्तद्दृत्तेरुपजीवनात् त्रीणि छन्दांसि। नीलीवस्त्रधारिणां स्नानदानतपोहोमस्वाध्यायपितृतर्पणमङ्गायज्ञानां वृथात्वम्। स्त्रीणां क्रीडार्थसंयोगे ग्रथनीये न दोषः।	३ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
अथ पलाण्डुलशुनादिस्पर्शः। आदिना सुरामद्यशूद्रोच्छिष्टानां ग्रहणम्।	ऊर्ध्वोच्छिष्टस्य द्विजस्य कामतः स्पर्शे त्राहं कृच्छ्रजलपानं सावित्रीशतजपश्च।	•	१॥० कार्षापणलभ्यकाञ्चनम्।	यथाशक्ति।
	मूत्रोच्छिष्टस्य स्पर्शे नक्तम्।	•	२ रजतरक्तिके।	यथाशक्ति।
	क्षतपूरीषोत्सर्गस्य पलाण्डुलशुनादिस्पर्शे एकोपवासः।	•	॥० पणाः।	यथाशक्ति।
	ऊर्ध्वोच्छिष्टस्य द्व्यहोपवासः। एतत्त्रयमकामतः। अशुच्छिष्टस्य स्पर्शे केवलं स्नानम्।	•	१ कार्षापणः।	यथाशक्ति।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
	अधोच्छिष्टस्य कामतः सुरेतरमद्यस्पर्शे अकामतः शूद्रोच्छिष्टस्य लशुनादीनाञ्च स्पर्शे अहोरात्रोपवासः। पञ्चगव्यपानञ्च।	०	॥० पलाः।	यथाशक्ति।
	कामतः सुराया दर्शने स्नानं प्राणायामत्रयं घृतप्राशनञ्च।			
	अकामतः सुरायाः स्पर्शने घ्राणे चाप्येवम्।			
	कामतस्तस्याः स्पर्शे घ्राणे च जातिभ्रंशकरपापस्य प्रायश्चित्तं शेषम्। असोमपायिनां सुरापसम्बन्धिसुराघ्राणे उदकमज्जनं त्रिरघमर्षणं घृतप्राशनञ्च।			
अधोच्छिष्टस्य नरादिपुरीषस्पर्शः। आदिना श्वकाककङ्कगृध्रादिग्रहणम्।	अधोच्छिष्टस्य सचेलस्नानम्।			
	ऊर्ध्वोच्छिष्टस्योपवासः। पञ्चगव्यपानञ्च।	०	॥० पलाः।	यथाशक्ति।
अथानुच्छिष्टस्य मलस्पर्शः। मला यथा। "वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविप्रुषाः। श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः॥"	पूर्वेषां वसां नाभेरधः करद्वये च स्पर्शे मृज्जलाभ्यां क्षालनम्। उत्तरेषां वसां नाभेरधः करद्वये च स्पर्शे केवलजलेन क्षालनम्। नाभेरूर्ध्वं विण्मूत्रप्रभृतिस्पर्शे स्नानम्। चक्षुषि ओष्ठे बाहुकरयोश्च स्पर्शे मृत्तोयगोमयैस्तद्वक्षालनं स्नानं उपवासः पञ्चगव्यपानञ्च।	०	॥० पलाः।	यथाशक्ति।
	भासवानरमार्जारखरोष्ट्रशूकरादामेध्यस्पर्शे सचेलं स्नानम्।			
	एतदपि अनुच्छिष्टस्य नाभ्यूर्ध्वलेपोपहतविषयम्। अध उच्छिष्टविषयञ्च।			
	काकवलाडकाभ्यां विलिप्तस्य ओष्ठमुखाप्रविष्टामेध्यलिप्तशरीरस्य च तदङ्गक्षालनं स्नानञ्च। अमेध्यानि यथा। "मानुषास्थि शवं विष्ठा रेतो मूत्रार्तवं वसा। स्वेदाश्रुदूषिका श्लेष्मा मद्यञ्चामेध्यमुच्यते॥" एषां देहात् प्रच्युतानामेवामेध्यत्वम्।			
	मद्यविण्मूत्रविप्रुषां सुखमङ्गलस्पर्शे मृत्तिकागोमयैर्लेपनं स्नानं उपवासः। तदन्ते पञ्चगव्यपानञ्च। अत्र विशेषो यथा। परस्य मानुषस्यास्थिवसाविष्ठाशवमूत्ररेतोमज्जशोणितानां स्पर्शे लेपमार्जनं स्नानं आचमनञ्च। आत्मसम्बन्धिनामेतेषां स्पर्शे परिमार्जनमाचमनञ्च।	०	॥० पलाः।	यथाशक्ति।
अथ मानुषास्थिस्पर्शः।	सक्लेदमानुषास्थिस्पर्शे स्नानम्।			
	कामतः स्पर्शे स्नानं गायत्र्याश्शतजपः। घृतप्राशनं त्रिराचमनञ्च।			
	कामतोऽत्यन्ताभ्यासे त्रिरात्राशौचान्ते क्षुक्षुपादः।	०	॥० पलाः।	यथाशक्ति।
	निःस्नेहस्य स्पर्शे आचमनं गोस्पर्शः सूर्यदर्शनं वा। कामतोऽत्यन्ताभ्यासे अहोरात्राशौचान्ते एतानि कार्याणि।			
अथ रुदननिर्माल्यस्पर्शः।	सचेलस्नानम्।	०	०	०
अथ रजस्वलायाः सवर्णासवर्णरजस्वलास्पर्शः।	रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः। पञ्चगव्यपानञ्च। एतत् कामतः।	०	॥० पलाः।	यथाशक्ति।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	अकामतस्तदर्द्धं अर्धाग्नेक्रव्रतम्।	०	१० पणाः।	यथाशक्ति।
	रजस्वलाया ब्राह्मण्याः शेषवर्णरजस्वलायाः अर्थात् क्षत्रियादिरजस्वलायाः स्पर्शे षड्रात्रोपवासः। एतच्च कामतः। अकामतस्तदर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	रजस्वलायाः शूद्रायाः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	सवर्णयोरन्योन्यस्पर्शे एकोपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	अत्यन्ताधमरजस्वलादिरजस्वलास्पर्शे दाहसाध्यं ब्रह्मकूर्चव्रतम्। एतच्च कामतः। अकामतस्तदर्द्धम्। एतत् सर्वं शुद्धिकालानन्तरं अर्थात् पञ्चमेऽहनि कार्यम्।	०	१ कार्षापणलक्ष्यकाञ्चनम्।	यथाशक्ति।
अथ रजस्वलायाः पतितचाण्डालादिस्पर्शः। आदिना अन्त्यजवायससंयोगग्रहणम्।	प्रथमेऽह्नि स्पर्शे त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	द्वितीयेऽह्नि दाहोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	तृतीयेऽह्नि अहोरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	चतुर्थेऽह्नि विशुद्धिस्नानात् पूर्वं स्पर्शे नक्तम्। एतच्चाकामतः।	०	१ रौप्यमाषकम्।	यथाशक्ति।
	कामतः स्पर्शे सर्वत्र त्रिरात्रोपवासः। तदन्ते अज्ञातौ कारयितव्या च।	०	१॥० कार्षापणः।	यथाशक्ति।
अथ रजस्वलाया उच्छिष्टशूद्राश्वशूकरादिस्पर्शः। आदिना जम्बूकखरग्राम्यकुक्कुटानां ग्रहणम्।	प्रथमद्वितीयदिनयोरुच्छिष्टशूद्रास्पर्शे दाहोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	तृतीयदिने स्पर्शे एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
	चतुर्थदिने स्पर्शे नक्तम्।	०	२ रजतमाषकौ।	यथाशक्ति।
	कुक्कुटादिस्पर्शे सर्वत्र नक्तमेव। एतच्च प्रायश्चित्तं विशुद्धिस्नानानन्तरं कर्त्तव्यम्।	०	२ रजतमाषकौ।	यथाशक्ति।
	एकद्व्यादौ रजस्वलायास्चाण्डालस्पर्शे अहोरात्रोपवासः। पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	रजस्वलाया उच्छिष्टचाण्डालादिस्पर्शे द्विजस्त्रीणां प्राजापत्यम्। शूद्राया धेनुदानम्। एतच्च प्रायश्चित्तेषु रजस्वलात्वमेव निमित्ततो न ब्राह्मण्यादिभ्यो विशेषः। अत्रापवादः। "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च स्पृष्टास्पृष्टि न दुष्यति॥"	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अथ चाण्डालादिसङ्करः। आदिना श्वपाकपुक्कसयोर्ग्रहणम्।	संवत्सरैकचाण्डालसङ्करे मासैकं गोमूत्रयावकाहारः। एतत् प्रायश्चित्तं यौनादिवर्जितसंसर्गविषयम्।	१२ धेनवः।	३६ कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः। अभावे सर्वस्वम्।
	बालवृद्धस्त्रीशूद्राणामर्द्धम्। आपोढग्राह्याणाः। वयस्थैर्द्धे स्थविराः। चीर्णे प्रायश्चित्ते ब्राह्मणभोजनम्। एतत् प्रायश्चित्तं ब्राह्मणक्षत्रियविशां तुल्यमेव।	६ धेनवः।	१८ कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः। अभावे सर्वस्वार्द्धम्।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदग्रन्थौ धेनुदानम्।	तदग्रन्थौ चूर्णोदानम्।	दक्षिणा।
	पूर्वोक्तकालादल्पकालसङ्करे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	स्वल्पतरे पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अत्यन्तस्वल्पकाले कृच्छ्रद्वयम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	मूढस्यात्र प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	चाण्डालादिसङ्करे गृहादिशुद्धिर्यथा। भवनदहनं अर्थात् हुताशनज्वालासंस्पृष्टम्। पवनं अर्थात् पूर्वमृत्तिकाकर्षणेन मृत्तिकान्तरदानम्। सर्वेन्द्रियभाण्डभेदनम्। दारवार्थां तक्षणम्। शृङ्गशुक्तिरजतसुवर्णचेलानामद्भिः प्रक्षालनम्। कांस्यताम्राणामाकरे अर्थादग्नौ शुद्धिः। सौवीरपयोदधितक्राणां परित्यागः। काष्ठादिरसधान्यादिद्रव्याणां रक्षणम्। घृतादीनां तापनञ्च।			
	एकस्मिन्नेव कूपे द्विजानां चाण्डालानाञ्च सह जलपानं कुर्वतां संसर्गदुष्टानां उपवासः। पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	बालापत्यारोगिगर्भिणीदुष्टानां नक्तम्।	०	२ रजतरक्तिके।	यथाशक्ति।
	बालानां प्रहरद्वयमभोजनम्।	०	१रजतरक्तिका।	यथाशक्ति।
	चर्म्मकारादीनामविज्ञातसङ्करे तु चाण्डालसङ्करप्रायश्चित्तस्य षष्ठो भागः कर्त्तव्यः। संहतानां एकस्मिन्नुपहते तस्यैव शोधनम्। न तु तत्सृष्टिनां सर्व्वेषां शोधनम्। एकशाखामाषाद्यादौ चाण्डालादिभिः सहारोहणे ब्राह्मणस्य स्नानमात्रम्।			
	तत्र फलभोजने ब्राह्मणानुज्ञापनं सचैलस्नानं अहोरात्रोपवासः पञ्चगव्यपानञ्च। एतदवधाने।	०	॥० पणाः।	यथाशक्ति।
	सन्निधाने त्रिरात्रोपवासः। पञ्चगव्यपानञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
	एतदुभयं ज्ञानविषयम्। अज्ञाने एकवृन्ताद्यौ चाण्डालादिभिः सह फलभोजने अधमर्षणम्। एकावयविद्वारा परम्परासम्पर्केऽपि स्नानादिकम्। अचापवादः। "रथाकर्द्दमसोपानि नावः पन्थास्तथानि च। सम्पर्केनान्न प्रदूषयन्ति पक्वेष्टरचितानि च॥" तृणानि तृणसमूहः। पक्वेष्टरचितानि मठादीनि। द्वितीयसंसर्गिदौतीयसंसर्गिणोर्हस्तपादप्रक्षालनपूर्व्वकमाचमनम्। चतुर्थसंसर्गे दोषाभावः।			
	इत्यसृक्स्पृक्सम्पर्कप्रायश्चित्तम्॥ * ॥			
अथ रहस्यपापानि।	रहस्यकृते पापे रहस्यप्रायश्चित्तं करणीयम्। अन्येनावेदितमित्यर्थः। तत्र यदि कर्त्ता स्वयं प्रायश्चित्तानभिज्ञस्तदा कस्यचिद्रहस्यपापस्य किं रहस्यप्रायश्चित्तमिति सामान्येन प्रायश्चित्ताभिज्ञं पृष्ट्वा रहस्यं प्रायश्चित्तं कुर्य्यात्। तत्र यदि			

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदग्रक्तौ धेनुदानम्।	तदग्रक्तौ चूर्णोदानम्।	दक्षिणा।
	मरणान्तिकं प्रायश्चित्तं तत्र रहस्यकृतेऽपि मरणमेव कर्त्तव्यम्। यत्र तु व्रतादिकं तत्र जातिगुणसङ्कटदुष्कृतादपेक्षया प्रकाशकृतपापोक्तप्रायश्चित्तस्य विंशतिभागत्रिंशद्भागषष्टिभागाः कल्प्याः।			
	अथवा महापातकेष्वकामतो मनूक्तमाह्निकं व्रतं करणीयम्।	१५ धेनवः।	४५ कार्षापणाः।	६ गावः। अग्रक्तौ ८।८॥ कार्षापणाः।
	कामतो द्वैगुण्यम्।	३० धेनवः।	६० कार्षापणाः।	१० गावः। अग्रक्तौ १६॥१३॥ कार्षापणाः।
	अन्येषु पापेषु गुरुलाघवापेक्षया प्राणायामशतमेव एकाहद्व्याहत्र्याहक्रमेण मासं षण्मासं संवत्सरं वाभ्यसनीयम्। व्रतकरणाशक्तेनापि जपहोममधुमांसतीर्थसेवादानवेदाभ्यासादयः कार्य्याः। इति रहस्यप्रायश्चित्तम्॥			

इति मूलपाणिकृतप्रायश्चित्तविवेकोक्तनवविधपापानां प्रायश्चित्तानि समाप्तानि॥ * ॥

प्रायिकं, त्रि, (प्रायेण प्राये वा भवमिति। प्राय+ठक्।) बाहुल्ये भवम्। यथा। "चैत्यश्राद्धे तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणादिकम्।" इति प्रायश्चित्ततत्त्वम्॥

प्रायुधेयी, [न्] पुं, (प्रायुधि प्रकृष्टयुद्धादिस्थाने दीयते ग्रन्थायते इति। देय्+णिनिः।) घोटकः। इति शब्दचन्द्रिका॥

प्रायोज्यं, त्रि, (प्र+आ+युज्+णिच्+यत्।) प्रयोजनार्हम्। यथा। प्रायोज्यं न विभज्येत। यदृक्थस्य प्रयोजनार्हं पुस्तकादि तन्मूर्खैः सह न विभजनीयमिति दायभागः॥

प्रायोपविष्टः, त्रि, (प्रायेण मरणार्थमनशनेन उपविष्टः।) प्रायोपवेशविशिष्टः। यथा,—

"प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः॥"
इति श्रीभागवतम्।

"प्रायेण ह्रस्वपर्य्यन्तानशनेनोपविष्टम्।" इति तट्टीकायां श्रीधरस्वामी॥

प्रायोपवेशः, पुं, (प्रायेण ह्रस्वनिमित्तकानशनेन उपवेशः स्थितिः।) सङ्ख्यापूर्व्वकानशनस्थितिः। यथा,—

"प्रायोपवेशो राजर्षेर्विप्रशापात् परीक्षितः॥"
इति श्रीभागवते १२ स्कन्धः॥

प्रारब्धं, क्ली, (प्रकृष्टमारब्धं स्वकार्य्यजननायेति।) प्राक्तनम्। शरीरारम्भकादृष्टविशेषः। यथा,—

"प्रारब्धकर्म्मणां भोगादेव क्षयः॥" इति स्मृतिः।

"प्रारब्धमज्ञमभिमानशून्यः।"
इति श्रीभागवतम्॥

"प्रारब्धकर्म्मविक्षेपाद्वासना तु न गच्छति॥"
इति भगवद्गीतायां मधुसूदनसरस्वती च॥

(प्र+आ+रभ्+कर्म्मणि क्तः। कृतारम्भे, त्रि। यथा, रघौ। १४। ७।

"अथाभिषेकं रघुवंशकेतोः
प्रारब्धमानन्दजलैर्जनन्योः।
निर्वर्त्तयामासुरमात्यवृद्धा-
स्तीर्थाहृतैः काञ्चनकुम्भतोयैः॥")

प्रारम्भः, पुं, (प्र+आ+रभ्+भावे घञ्। सुम् च।) प्रकर्षेण आरम्भः। यथा, स्मृतिः।

"प्रारम्भे कर्म्मणां विप्रः पुष्करीकं स्मरेद्धरिम्॥"

(प्रारभ्यते इति। प्र+आ+रभ्+कर्म्मणि घञ्। सुमुच। कर्म्म। यथा, मार्कण्डेयपुराणे। ५१। १७।

"शुभानुभञ्च कुशलैः कुमारोऽन्यो ब्रवीति वै।
तत्रापि दृष्टे चाक्षेपः प्रारम्भत्याग एव च॥"

प्रकृष्ट आरम्भो योगो यस्येति विग्रहे। योगी। यथा, रघुः। १०। ६।

"प्रबुद्धपुण्डरीकार्च्चं बालातपनिभांशुकम्।
दिवसं शारदमिव प्रारम्भसुखदर्शनम्॥")

प्रार्थनं, क्ली, (प्र+अर्थ+ल्युट्।) प्रकर्षेण याचनम्। तत्पर्य्यायः। याच्ञा २ अभिशस्तिः ३ याचना ४ अर्थना ५ प्रार्थना ६। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। १४६। ३७।

"युगक्षयकृता धर्म्माः प्रार्थनानि विकुर्व्वते।
एतत् कलियुगं नाम अचिराद् यत् प्रवर्त्तते॥")

प्रार्थना, स्त्री, (प्र+अर्थ+णिच्+युच्।) प्रकर्षेण याचनम्। (यथा, महाभारते। ३।११२।८१।

"सन्तो दिगन्तमाकाशं गौरवं प्रार्थना विषम्।
आहस्य आक्षयः कालः कथं वा यच्च मन्यसे॥")

प्रार्थनीयं, क्ली, (प्रार्थ्यते इति। प्र+अर्थ+णिच्+अनीयर्।) द्वापरयुगम्। इति शब्दरत्नावली॥ प्रार्थनाविषये, त्रि॥ (यथा, पञ्चतन्त्रे। २। ११६।

"ततस्त्रयो: स्वभूर्प वृद्धा एकस्य वरः प्रार्थनीयः॥")

प्रार्थितः, त्रि, (प्रार्थ्यते स्मेति। प्र+अर्थ+क्तः।) याचितः। (यथा, देवीभागवते। २। ६। ५६।

"प्रार्थिता पतिना कुन्ती ददौ मन्त्रं दयान्विता।
एकपुत्रप्रबन्धेन माद्री पतिमते स्थिता॥")

शुचुसंरुद्धः। अभिहितः। इति मेदिनी॥ कृतः। इति त्रिकाण्डशेषः॥

प्रालम्बं, क्ली, (प्रालम्बते इति। लबि अवस्रंसने+अच्।) काष्ठात् ऋजुलम्बमानमाल्यम्। इत्यमरः। २।६।१३६॥ (यथा, रघौ। ६। २७।

"विसृत्वरंसादपरो विलासी
रत्नानुविद्धाङ्गदकोटिलग्नम्।
प्रालम्बसूत्रस्रज यथावकाशं
निनाय साचीकृतचारुवक्त्रः॥"

प्रकर्षेण लम्बमाने, त्रि॥)

प्रालम्बिका, स्त्री, (प्रालम्बते इति। अच्। संज्ञायां कन्। टापि अत इत्वम्।) स्वर्णरचितलम्बिका। सुवर्णहारः। इत्यमरः। २।६।१०४॥

प्रालेयं, क्ली, (प्रकर्षेण लीयन्ते लीना भवन्ति पदार्था अत्रेति प्रलयो हिमालयस्तत आगतम्। प्रलय+अण्। "केवलमिश्रयुप्रलयानां यादेरियः।"७। ३। २। इति यस्येयादेशः।) हिमम्। इत्यमरः। १। ३। १८॥ (यथा, देवीभागवते। ४। ५। १३।

"नरनारायणौ चैव चैरतुस्तप उत्तमम्।
प्रालेयाद्रिं समागत्य तीर्थे बदरिकाश्रमे॥")

प्रालेयांशुः, पुं, (प्रालेयानि हिमानि तद्वत् शीता वा अंशवो यस्य ।) चन्द्रः । इति हलायुधः ॥ (यथा, माघे । ६ । ८७ ।
"इत्थं नारीर्घटयितुमलङ्घामिभिः काममासन् प्रालेयांशोः सपदि रुचयः प्राप्तमागान्तरायाः ॥")

प्रावटः, पुं, (प्र + अव + अट् + अच् । प्रकृन्त्यादित्वात् साधुः ।) घनः । इति जटाधरः ॥

प्रावरः, पुं, (प्राट्टणोत्यनेनेति । प्र + आ + वृ + करणे अप् ।) प्राचीरम् । इति शब्दरत्नावली ॥

प्रावरणं, क्ली, (प्राट्टणोत्यनेन गात्रमिति । प्र + आ + वृ + करणे ल्युट् ।) उत्तरीयवस्त्रम् । तत्पर्य्यायः । प्रच्छादनम् २ संव्यानम् ३ उत्तरीयकम् ४ । इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम् । ४ । ६७४ ।
"वन्यकीपादसुद्राङ्कचारुप्रावरणादिभिः । गौरवार्हान् दुराचारैः सचिवान् पर्य्यधापयत् ॥")
प्रच्छदपटश्च ॥

प्रावारः, पुं, (प्रावियते गात्रमनेनेति । प्र + आ + वृ + करणे घञ् ।) उत्तरासङ्गः । उत्तरीयवस्त्रम् । इत्यमरः ॥ (यथा, महाभारते । २ । ४८ । ६ ।
"आच्छादयसि प्रावारानग्नाविव पिधित्सौदनम् । आजानेया वहन्त्यश्वाः कैनासि हरिभिः प्लुतः ॥")

प्रावारकीटः, पुं, (प्रावारस्य कीटः ।) कीटविशेषः । तत्पर्य्यायः । कुथः २ । इति जटाधरः ॥

प्रावृट्, [ष्] स्त्री, (प्रकर्षेण आ सम्यक्प्रकारेण च वर्षतीति । प्र + आ + वृष् + क्विप् । प्रावर्षत्यत्रेति आधारे क्विप् वा । यद्वा, वर्षणमिति वृट् प्रकृष्टा वृड्च । "नहिवृतिवृषीति ।" ६ । ३ । २१६ । इति पूर्व्वपदस्य दीर्घः ।) वर्षाकालः । श्रावणभाद्रमासौ । इत्यमरः । १ । ४ । १६ ॥ (यथा, रघौ । ६ । ५१ ।
"अथास्य चाम्भः पृषतोक्षितानि प्रालेयगन्धीनि शिलातलानि । कलापिनां प्रावृषि पश्य वृत्तं कान्तासु गोवर्द्धनकन्दरासु ॥")

प्रावृड्व्ययः, पुं, (प्रावृषः व्ययो नाशो यत्र ।) शरत्कालः । इति राजनिर्घण्टः ॥

प्रावृतं, त्रि, (प्रावियते स्मेति । प्र + आ + वृ + क्तः ।) प्रच्छदपटवस्त्रम् । ओढ़ितवस्त्रम् । इति भरतः ॥ तत्पर्य्यायः । निवीतम् २ । इत्यमरः ॥ निवृतम् ३ । इति तट्टीकायां स्वामी ॥

प्राट्टतिः, स्त्री, (प्राट्टणोति प्रकर्षेण आच्छादयति दृष्टिपथमनयेति । प्र + आ + वृ + करणे क्तिन् ।) प्राचीरम् । इति शब्दरत्नावली ॥ (मलः । यथा, सर्व्वदर्शनसंग्रहे शैवदर्शने ।
"प्राट्टतीयौ बलं कर्म्म मायाकार्य्यचतुर्विधम् । पाशुजालं समासेन धर्म्मनाम्नैव कीर्त्तितम् ॥"
"अस्यार्थः । प्राट्टणोति प्रकर्षेणाच्छादयत्यात्मनो दृक्क्रिये इति प्राट्टतिः स्वाभाविक्यशुचिर्मल इति ॥")

प्राट्टषा, स्त्री, (प्राट्टष् + हलन्तात् टाप् वा ।) घनागमः । वर्षाकालः । इति त्रिकाण्डशेषः ॥

प्राट्टषायणी, स्त्री, (प्राट्टषायां अयनमुद्भवो यस्याः । गौरादित्वात् ङीष् ।) कपिकच्छुः । इत्यमरः । २ । ४ । ६ ॥ आलकुशी इति भाषा ॥

प्राट्टषिकः, पुं, (प्राट्टषि वर्षाकाले कायति शब्दायते इति । कै + कः । अलुक्समासः ।) मयूरः । इति धरणिः ॥ (प्राट्टषि भवः । प्राट्टष् + ठक् ।) प्राट्टट्कालभवे, त्रि ॥

प्राट्टषेण्यः, पुं, (प्राट्टषि भवः प्राट्टट् देवतास्य वेति । प्राट्टष् + "कालेभ्यो भववत्" ४ । २ । ३ । इति "प्रावृष एण्यः ।" ४ । ३ । १७ । इति एण्यः ।) कदम्बवृक्षः । इति मेदिनी ॥ कुटजवृक्षः । धाराकदम्बः । इति राजनिर्घण्टः ॥

प्राट्टषेण्यः, त्रि, (प्राट्टषि भव इति । प्राट्टष् + एण्यः ।) प्राट्टट्कालभवः । इति मेदिनी ॥ (यथा, रघौ । १ । ३६ ।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ । प्राट्टषेण्यं पयोवाहं विद्युदैरावताविव ॥")
प्रावृष्यम् । इति शब्दरत्नावली ॥

प्राट्टषेण्या, स्त्री, (प्राट्टषेण्य + टाप् ।) कपिकच्छुः । रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

प्राट्टष्यं, क्ली, (प्राट्टषि भवमिति । यत् ।) वैदूर्य्यम् । इति राजनिर्घण्टः ॥ प्राट्टषि भवे, त्रि ॥

प्राट्टष्यः, पुं, (प्राट्टषि भव इति । प्राट्टष् + यत् ।) कुटजः । धाराकदम्बः । विकङ्कटकः । इति राजनिर्घण्टः ॥

प्राप्तिर्तं, क्ली, (प्रकर्षेण अप्तिर्तं यत्र ।) पिष्टयज्ञः । इति जटाधरः ॥ (प्र + अप् + कर्म्मणि क्तः ।) भक्षिते, त्रि ॥

प्राप्तिकः, पुं, (प्रश्नाय तदुत्तरप्रदानाय साधुरिति । प्रश्न + ठक् ।) सभ्यः । इति त्रिकाण्डशेषः ॥ प्रश्नकर्त्तरि, त्रि ॥

प्रासः, पुं, (प्रास्यते क्षिप्यते इति । प्र + अस् + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) कुन्तास्त्रम् । इत्यमरः । २ । ८ । ६३ ॥ कोँच इति भाषा ॥ (यथा, महाभारते । ६ । ६० । २३ ।
"गदाभिरसिभिः प्रासैर्वाणैश्चानतपर्व्वभिः ॥"
अस्य आकृतिलक्षणादिकं यदुक्तं शुक्रनीतौ तदुयथा,—
"प्रासास्तु चतुर्हस्तं दण्डयुग्मं सुरानन्दम् ॥"
यथाच ।
"प्रासस्तु सप्तहस्तः स्यादौम्रत्वेन तु वैष्णवः । लौहग्रीवश्चतुर्हस्तः कौशेयस्त्रवकाञ्चितः ॥ आकर्षश्च विकर्षश्च धूननं वेधनं तथा । चतस्र एता गतय उक्ताः प्रासं समाश्रिताः ॥")

प्रासकः, पुं, (प्रास + संज्ञायां स्वार्थे वा कन् ।) प्रासास्त्रम् । पाशकः । इति हेमचन्द्रः ॥

प्रासङ्गः, पुं, (प्रसज्यते इति । प्र + सृज + घञ् । उपसर्गस्येति दीर्घः) युगम् । इत्यमरः । २ । ८ । ५७ ॥ योयालि इति भाषा । "अनसः शकटस्य समन्धि अनसि समूहं वा यत् युगं ततोऽन्यत् यत् वस्त्रानां दमनकाले स्कन्धे आसज्यते तत् युगं प्रासङ्गः ।" इति भरतः ॥ (यथा, महाभारते । १३ । ६४ । १६ ।
"विशाखायामनड्वाहं धेनुं दत्त्वा च दुग्धदाम् । सप्रासङ्गञ्च शकटं सधान्यं वस्त्रसंयुतम् ॥")

प्रासङ्गः, पुं, (प्रासङ्गं वहतीति । प्रासङ्ग + "तदहति रथयुगप्रासङ्गम् ।" ४ । ४ । ७६ । इति यत् ।) युगवोढृवृषः । इत्यमरः । २ । १ । ६४ ॥

प्रासादः, पुं, (प्रसीदन्त्यस्मिन्निति । प्र + सद् + "हलश्च ।" ३ । ३ । १२१ । इत्याधारे घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६ । ३ । १२२ । इति उपसर्गस्य दीर्घः ।) देवभूभुजां गृहम् । इत्यमरः । २ । २ । ६ ॥ (यथा, देवीभागवते । २ । ६ । ४२ ।
"इत्युक्त्वा सचिवान् राजा कल्पयित्वा सुरक्षकान् ।
कारयित्वाथ प्रासादं सप्तभूमिकमुत्तमम् ॥")
तल्लक्षणादि यथा,—
सूत उवाच ।
"प्रासादानां लक्षणन्तु वक्ष्ये शौनक ! तच्छृणु ।
चतुःषष्टिपदं क्षेत्रं दिग्विदिक्षूपशोभितम् ॥
चतुष्कोणं चतुर्भिश्च द्वाराणि स्युःसंख्यया ।
चत्वारिंशद्भिश्चैव भित्तीनां कल्पना भवेत् ।
ऊर्द्धं चैवसमा जङ्घा जङ्घार्द्धद्विगुणं भवेत् ।
गर्भविस्तारविस्तीर्णा शुकाग्रा च विधीयते ॥
तच्चिभागेण कर्त्तव्या पञ्चभागेण वा पुनः ।
निर्गमस्तु शुकाग्रायाः उच्छ्रयः शिखरार्द्धगः ॥
चतुर्धा शिखरं कृत्वा त्रिभागे वेदिबन्धनम् ।
चतुर्थे पुनरस्यैव कण्ठमामलसारकम् ॥ * ॥
अथवापि समं वास्तु कृत्वा षोड़शभागिकम् ।
तस्य मध्ये चतुर्भागमादौ गर्भन्तु कारयेत् ॥
भागद्वादशकां भित्तिं ततस्तु परिकल्पयेत् ।
चतुर्भागेण भित्तीनामुच्छ्रयः स्यात् प्रमाणतः ॥
द्विगुणः शिखरोच्छ्रायो भित्तुच्छ्रायाच्च मानतः ।
शिखरार्द्धस्य चार्द्धेन विधेयास्तु प्रदक्षिणाः ॥
चतुर्दिक्षु तथा ज्ञेयो निर्गमस्तु तथा बुधैः ।
पञ्चभागेन संभज्य गर्भमानं विचक्षणः ॥
भागमेकं गृहीत्वा तु निर्गमं कल्पयेत् पुनः ।
गर्भसूत्रसमो भागादयतो सुखमरूपः ॥
एतत् सामान्यमुद्दिष्टं प्रासादस्य हि लक्षणम् ।
लिङ्गमानमथो वक्ष्ये पीठो लिङ्गसमो भवेत् ॥
द्विगुणेन भवेद्गर्भः समन्ताच्छौनक ! ध्रुवम् ।
तद्विधा च भवेद्भित्तिर्जङ्घा तद्विस्तरार्द्धगा ॥
द्विगुणं शिखरं प्रोक्तं जङ्घायाश्चैव शौनक ! ।
पीठं गर्भावरं कर्म्म तन्मानेन शुकाग्रकाम् ॥
निर्गमस्तु समाख्यातः शेषं मूलवदेव तु ।
लिङ्गमानः स्मृतो ह्येष द्वारमानमथोच्यते ॥*॥
कराग्रं वेदवत् कृत्वा द्वारं भागार्द्धकं भवेत् ।
विस्तरेण समाख्यातं द्विगुणं वेच्छया भवेत् ॥
द्वारवत् पीठमध्ये तु शेषं सुषिरकं भवेत् ।
पार्श्विकं शेषिकं भित्तिर्द्वारार्द्धेन परिग्रहात् ॥
तद्विस्तारसमा जङ्घा शिखरं द्विगुणं भवेत् ।

मुखाग्रा पूर्ववज्ज्ञेया निर्गमोच्छ्रायकं भवेत् ॥
मस्तके मानमेतत्तु स्वरूपचापरं वदे । * ।
त्रैवेदं कारयेत् चैत्यं यत्र तिष्ठन्ति देवताः ॥
दृत्यं ज्ञात्वा तु मानेन बाह्यभागविनिर्गतम् ।
नेमिः पादेन विस्तीर्णा प्रासादस्य समन्ततः ॥
गर्भन्तु द्विगुणं कुर्यात् नेम्या मानं भवेदिह ।
स एव भित्तिरुत्सेधो द्विगुणः शिखरो मतः ॥*॥
प्रासादानाच्च वक्ष्यामि मानं योनिश्च नामतः ।
मेरुराजः पुष्पकाश्चश्च कैलासो मालकाह्वयः ॥
त्रिपिष्टपश्च पर्वते प्रासादाः सर्वयोनयः ।
प्रथमश्चतुरस्रो हि द्वितीयस्तु तदायतः ॥
दृत्तो दृत्तायताश्चान्योऽष्टास्रश्चैव च पञ्चमः ।
एतेभ्य एव सम्भूताः प्रासादाः सुमनोहराः ॥
सर्वप्रकृतिभूतेभ्यश्चत्वारिंशच्च एव च ।
मेरुश्च मन्दरश्चैव विमानश्च तथापरः ॥
भद्रकः सर्वतोभद्रो रुचको नन्दनस्तथा ।
नन्दिवर्द्धनसंज्ञश्च श्रीवत्सश्च नवेत्यमी ॥
चतुरस्रात् समुद्भूता मेरराजादिति गण्यताम् ।*॥
वलभी गरुडराजश्च श्रीवत्सश्च मन्दिरम् ॥
विमानश्च तथा ब्रह्ममन्दिरं भवनं तथा ।
उत्तमं शिविका चैव नवैते पुष्पकोद्भवाः ॥*॥
वलयो दुन्दुभिः पद्मो महापद्मस्तथापरः ।
भद्रकः सर्वतोभद्रो रुचको नन्दनस्तथा ॥
गुवाटश्चस्तथान्यश्च वृत्ताः कैलाससम्भवाः ।*॥
गजोऽथ वृषभो हंसो गरुडः सिंहनामकः ॥
भूमुखो भूधरश्चैव श्रीजयः पृथिवीधरः ।
दृत्तायतः समुद्भूतो नवैते मालकाह्वयात् ॥*॥
वर्यं चक्रं तथान्यच्च सुरिकं वज्रसंज्ञितम् ।
वज्रः खस्तिकखड्गौ च गदा श्रीवृक्ष एवच ॥
विजयो वामतः श्वेतस्त्रिपिष्टपसमुद्भवाः ।*॥
त्रिकोणपद्मगर्भेन्दु चतुष्कोणं द्विरष्टकम् ॥
यत्र तत्र विधातव्यं संस्थानं मस्तकस्य तु ।
राज्यश्च विजयश्चैवमायुर्वर्द्धनमेव च ॥
पुत्रलाभः श्रियः पुष्टिस्त्रिकोणादिक्रमाद्भवेत् ॥*॥
कुर्यात् ध्वजादिसंख्यां वा द्वारि गर्भयुतास्तथा ।
मस्तकः समसंख्याभिर्भूषितः सूत्रतस्तथा ।
मस्तकस्य चतुर्थांशाद्भः कार्यो विजानता ॥
सर्वांगवाच्चकोपेतो निर्गमाच्चोदया भवेत् ।
सार्द्धभित्तिप्रमाणेन भित्तिमानेन वा पुनः ॥
भित्तेर्द्विगुण्यतो वापि कर्णका मस्तकाः क्वचित् ।
प्रासादे मञ्जरी कार्या त्रिना विषमभूमिका ॥
परिमाणनिरोधेन रेखा वैचित्र्यभूमिका ।
आधारस्तु चतुर्द्वारश्चतुर्मस्तकशोभितः ॥
शतपञ्चसमायुक्तो मेरुप्रासाद उत्तमः ।
मस्तकानां कर्णका भद्रैस्त्रिभिरलङ्कृताः ॥
घटवाकारमानानां भिन्ना भिन्ना भवन्ति ये ।
कियन्तो येषु साधारा निराधाराश्च केचन ।
प्रतिच्छन्दकभेदेन प्रासादाः सम्भवन्ति ते ।
अन्योन्यसङ्करात्तेषां घटना नाम भेदतः ॥
देवतानां विशेषाय प्रासादा बहवः स्मृताः ।
प्रासादे नियमो नास्ति देवतानां स्वयम्भुवाम् ॥
तस्मादेव देवतानाच्च पूर्वमानेन कारयेत् ।
चतुरस्रायतास्रश्च चतुष्कोणसमन्विताः ॥
चन्द्रशालान्विताः कार्या मेरोश्शिखरसंयुताः ।
पुरतो वाहनानाच्च कर्णका लघुमस्तकाः ॥
नाट्यशाला च कर्तव्या द्वारदेशसमाश्रया ।
प्रासादा देवतानाच्च कार्या दिक्षु विदिक्षुपि ॥
द्वारपालाच्च कर्तव्या सुखा गत्वा पृथक् पृथक् ।
किञ्चिद्दिदूरतः कार्या मठास्तत्रोपजीविनाम् ॥
प्राङ्मुखा जगती कार्या जलपुष्पफलान्विता ।
प्रासादेषु सुरान् स्थाप्य पूजाभिः पूजयेन्नरः ॥
वासुदेवं सर्वदेवान् सर्वभाक् तद्गृहादिशेत् ॥"
इति गारुडे प्रासादकीर्तनं नाम ४० अध्यायः ॥
(यथाच ।
"एतत् सामान्यसद्दिष्टं प्रासादस्येह लक्षणम् ।
अथान्यच्च प्रवक्ष्यामि प्रासादं लिङ्गमानतः ॥
लिङ्गपूजाप्रमाणेन कर्तव्या पीठिका बुधैः ।
पीठिकार्द्धेन भागः स्यात्तन्मानेन तु भित्तयः ॥
बाह्यमिति प्रमाणेन उत्सेधस्तु भवेत्ततः ।
भित्युच्छ्रायात्तद्विगुणः शिखरस्य समुच्छ्रयः ॥
शिखरस्य चतुर्भागा कर्तव्या स्यात् प्रदक्षिणा ।
प्रदक्षिणायास्तु समस्तयतो मस्तयो भवेत् ।
तस्य चार्द्धेन कर्तव्यस्तयतो सुखमस्तकः ।
प्रासादान्निर्गतौ कार्यौ कपोतौ गर्भमानतः ॥
ऊर्द्धभित्युच्छ्रयात्तस्य मञ्जरीं तु प्रकल्पयेत् ।
मञ्जर्याश्चार्द्धभागेन शुकनासं प्रकल्पयेत् ॥
ऊर्द्धं तथार्द्धभागेन वेदिबन्धो भवेदिह ।
वेदाश्चोपरि यच्छेषं कण्ठमामलसारकम् ॥
एवं विभज्य प्रासादं शोभनं कारयेद्बुधः ।
अथान्यच्च प्रवक्ष्यामि प्रासादस्येह लक्षणम् ॥
गर्भमानेन प्रासादप्रमाणं शृणुत द्विजाः ।
विभज्य नवधा गर्भं मध्ये लिङ्गस्य पीठिका ॥
पादादकच्च रुचिरं पार्श्वतः परिकल्पयेत् ।
मानेनानेन विस्तारो भित्तीनान्तु विधीयते ॥
पादे पञ्चगुणं ज्ञात्वा भित्तीनामुच्छ्रयो भवेत् ।
स एव शिखरस्यापि द्विगुणः स्यात् समुच्छ्रयः ॥
चतुर्धा शिखरं भज्य अर्द्धभागद्वयस्य वा ।
शुकनासं प्रकुर्वीत तृतीये वेदिका मता ॥
कण्ठमामलसारन्तु चतुर्थे परिकल्पयेत् ।
कपोलयोस्तु संहारो द्विगुणोऽस्य विधीयते ॥
शोभनेश्च प्रवालीभिरङ्गकैश्च विभूषितः ।
प्रासादेषु तृतीयस्तु मया तुभ्यं निवेदितः ॥
सामान्यमपरं तद्वत् प्रासादं शृणुत द्विजाः ।
त्रैवेदं कारयेत् चैत्यं यत्र तिष्ठन्ति देवताः ॥
दृत्यं ज्ञात्वा तु मानेन बाह्यभागविनिर्गतम् ।
नेमिः पादेन विस्तीर्णा प्रासादस्य समन्ततः ॥
गर्भन्तु द्विगुणं कुर्यान्नेमिमानं भवेदिह ।
स एव भित्तिरुत्सेधो द्विगुणः शिखरो मतः ॥
प्राग्रीवपञ्चभागेन निश्शासस्तस्य चोच्यते ।
कारयेच्छिखरं तद्वत् प्राकारस्य विधानतः ॥
प्राग्रीवं तस्य मानेन निष्कायेन विशेषतः ।
कुर्याद्दयच्च भागेन प्राग्रीवं कर्णमूलतः ॥
कारयेत् कनकं तत्र गर्भान्ते द्वारमूलतः ।
एवन्तु त्रिविधं कुर्यात् ज्येष्ठमध्यकनीयसम् ॥
लिङ्गमानात्तु भेदेन रूपभेदेन वा पुनः ।
एते सामान्यतः प्रोक्ता नामतः शृणुताधुना ॥
मेरुमन्दरकैलाशकुम्भसिंहगजास्तथा ।
विमानश्छन्दकस्तद्वत्तुरस्तस्त्रयेवच ॥
अष्टास्रः षोडशास्रश्च वर्तनः सर्वभद्रकः ।
वलभी नन्दनश्चैव नन्दिवर्द्धन एवच ॥
सिंहो वृषः सुपर्णश्च पद्मकोऽथ ससुद्गकः ।
प्रासादानां मतः प्रोक्तो विभागं शृणुत द्विजाः ॥
शतश्चङ्गसमायुक्तो मेरुप्रासाद उच्यते ।
नानाविचित्रशिखरो मेरुप्रासाद उच्यते ॥
मन्दरो द्वादश प्रोक्तः कैलासो नवभूमिकः ।
विमानश्छन्दकस्तद्वदनेकशिखरान्वितः ॥
स चाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्द्धनः ।
विंशाङ्ककसमायुक्तो नन्दनः ससुदाहृतः ॥
षोडशाङ्ककसंयुक्तो नानारूपसमन्वितः ।
अनेकशिखरस्तद्वत् सर्वतोभद्र उच्यते ॥
चन्द्रशालासमापेतो विज्ञेयः पञ्चभूमिकः ।
वलभी च्छन्दकस्तद्वच्छुकनासान्वितः ॥
वृत्तस्योच्छ्रायतस्तुल्यो मस्तकश्च त्रिवर्जितः ।
सिंहः सिंहगतिर्ज्ञेयो गजो गजसमस्तथा ॥
कुम्भः कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रयः ।
अङ्गुलीपुटसंस्थानपञ्चाङ्ककविभूषितः ॥
षोडशास्रः समन्तात्तु विज्ञेयः स ससुद्गकः ।
पार्श्वयोश्चन्द्रशालास्य उच्छ्रयो भूमिकाद्वयम् ॥
तथैकपद्मकः प्रोक्तः उच्छ्रयो भूमिकात्रयम् ।
षोडशास्रः स विज्ञेयो विचित्रशिखरः शुभः ॥
गरुडराजस्तु विख्यातः चन्द्रशालाविभूषितः ।
प्राग्ग्रीवेन विशालेन भूमिका स बहुत्तमाः ॥
अनेकचन्द्रशालस्तु गजप्रासाद उच्यते ।
पर्यन्तगृहराजो वै गरुडो नामनामतः ॥
सप्तभूम्युच्छ्रयस्तद्वच्चन्द्रशालात्रयान्वितः ।
भूमिकास्तु षड्ज्ञेयास्तत्रः सर्वतो भवेत् ॥
तथान्यो गरुडस्तद्वदुच्छ्रायो दशभूमिकः ।
पद्मकः षोडशास्रस्तु भूमिश्चयमथाधिकः ॥
पद्मतुल्यप्रमाणेन श्रीवृक्ष इति स्मृतः ।
पञ्चाङ्ककक्षिभूमिस्तु गर्भे हस्तचतुष्टयः ॥
वृषो भवति नाम्नाय प्रासादः सार्वकामिकः ।
सप्तकाः पञ्चकाश्चैव प्रासादा ये मयोदिताः ॥
सिंहस्य ते समा ज्ञेया ये चान्येऽत्यप्रमाणतः ।
चन्द्रशालैः समोपेताः सर्वे प्राग्रीवसंयुताः ॥
रेहिका दारवाश्चैव श्रेणजाश्च सतोरणाः ।
मेरुश्च शतहस्तः स्यान्मन्दरः पञ्चहीनकः ॥
चत्वारिंशत्तु कैलासश्चतुस्त्रिंशद्विभागकः ।
नन्दिवर्द्धनकस्तद्वदाविंशत् ससुदाहृतः ॥
त्रिंशद्भिर्नन्दनः प्रोक्तः सर्वतोभद्रकस्तथा ।
एते षोडशहस्ताः स्युश्चत्वारो देववल्लभाः ॥
कैलासो गरुडराजस्तु विमानश्छन्दको गजः ।
एते द्वादशहस्ताः स्युरेतेषां सिंहनादकः ॥
गरुडोऽष्टकरो ज्ञेयः सिंहो दश उदाहृतः ।
एवमेव प्रमाणेन कर्तव्याः शुभलक्षणाः ॥
यक्षराक्षसनागानां मानहस्तः प्रशस्यते ।
तथा मेर्वादयः सप्त ज्येष्ठविप्राः शुभावहाः ॥

प्राङ्मुख

श्रीदत्तकादयश्चार्यौ मध्यमाश्च उदाहृताः।
तथा सिंहादयः पञ्च कनिष्ठाः शुभदा मताः॥"
इति विश्वकर्म्मप्रकाशे ५ अध्यायः॥)

प्रासादकुक्कुटः, पुं, (प्रासादस्य देवभूभुजां गृहस्य कुक्कुट इव। सर्व्वदा प्रासादविचारित्वादस्य तथात्वम्।) पारावतः। इति त्रिकाण्डशेषः॥

प्रासिकः, पुं, (प्रासः प्रहरणमस्येति। प्रास+"प्रहरणम्।" ४।४।५०। इति ठक्।) प्रासाख्यधारी। प्रासप्रहारी। तत्पर्य्यायः। कौन्तिकः २। इत्यमरः। ५। ८। ७०॥

प्रास्यिकः, त्रि, (प्रस्थ+"सम्भवत्यवहरति पचति।" ५।१।५२। इति ठञ्। प्रस्थपरिमितधान्यादेः समावेग्रकः अवहारकः पाचकश्च।) प्रस्थं सम्भवति प्रास्थिकः कटाहः। प्रस्थं खल्लिन् समावेग्रयतीत्यर्थः। प्रास्थिकी ब्राह्मणी। प्रस्थमवहरति पचति वेत्यर्थः। इति सिद्धान्तकौमुदी॥ (प्रस्थं परिमाणमस्येति।"तदस्य परिमाणम्।" ५।१।५७। इति ठञ्। प्रस्थपरिमितः। यथा, सुश्रुते चिकित्सितस्थाने। १२ अध्याये।
"यवकोलकुलत्थांश्च प्रास्थिकान् सलिलद्रोणे निःक्वाथ्येति॥" प्रस्थेन क्रीतमिति। "तेन क्रीतम्।"५।१।३७। इति ठञ्। प्रस्थक्रीतः॥ प्रस्थस्य वापः। "तस्य वापः।" ५।१।४५। इति ठञ्। प्रस्थपरिमितव्रीह्यादिवपनयोग्ये क्षेत्रे। यथा, शब्दरत्नावल्याम्।
"द्रोणाढ़कखार्य्यादेर्वापादौ द्रौणिकस्तथा।
स्यादाढ़किकखारीको उत्तमर्णादयस्त्रिषु।
आदिर्भ्यां प्रास्थिकादिश्च पाकादौ द्रौणिको ऽपि च॥")

प्राहः, पुं, वृत्योपदेग्रः। इति शब्दमाला॥ निर्व्विसर्गश्चेत् प्रपूर्ब्बेतिवन्नबूधातो रूपमप्येवम्॥ (यथा, भट्टिः।
"प्राह स्म रामं भरतोऽपि सम्यक्॥")

प्राङ्कः, पुं, (प्रथमश्च तदर्हश्चेति। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्। "अङ्गेर्ह एतेभ्यः।" ५।४।८८। इति अङ्गादेग्रः। "अङ्गोऽदन्तात्।" ८।३।७। इति त्वत्वम्।) पूर्ब्बाह्णः। इत्यमरः।१।४।३॥ (यथा, सुश्रुते। ६।१८।
"अग्निः सूर्य्यो दिवा प्राङ्कः शुक्लो राकोत्तरं खराट्॥"*॥
प्रङ्कमर्हयर्च्चेति विग्रहे।"तिङ्कतिङ्प्रभृतीनि च।" २।१।१७। इत्यव्ययीभावः। प्रङ्कदिनयुते, त्रि॥)

प्राह्णे, अ, पूर्ब्बाह्णे। इति सिद्धान्तकौमुदी॥

प्राह्णेतनः, त्रि, (प्राह्णे भवः। "सायंचिरंप्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।"४।३।२३। इति ट्युल् तुट् च।) पूर्ब्बाह्णसम्बन्धी। इति सिद्धान्तकौमुदी॥

प्राङ्कतरां

प्राङ्कतरां, अ, (द्वयोरतिशयेन प्राङ्के। प्राङ्के+"किमेत्तिङव्ययघादाम्बद्रव्ये तरप् तमप्।" ५।४। इति सुग्धबोधव्याकरणम्। तरप्।) अतिशयपूर्ब्बाह्णे। इति सुग्धबोधव्याकरणम्॥

प्रियः, पुं, (प्रीणातीति। प्री+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः।) भर्त्ता। इत्यमरः।२।६।३५॥ (यथा, आर्य्यासप्तशत्याम्। ३४७।
"प्रथमति प्रश्नति घुम्पति संश्लिष्यति पुलकसङ्कलितैरङ्गैः।
प्रियसङ्गाय स्फुरितां वियोगिनी वामबाहुलताम्॥"
जामाता। यथा, मनुः। ३। ९१६।
"राजर्त्विक्स्नातकगुरून् प्रियश्वशुरमातुलान्।
अर्हयेन्मधुपर्केण परिसंवत्सरात् पुनः॥"
कार्त्तिकेयः। यथा, महाभारते स्कन्दनामानुकीर्त्तने। ३। २३१। ५।
"अमोघस्खनघो रौद्रः प्रियस्कन्दनस्तथा॥")
रुद्रविशेषः। इति जटाधरः॥ जीवकौषधम्। इति राजनिर्घण्टः॥ ऋद्धिनामौषधम्। वृद्धे, त्रि। इति मेदिनी॥ (यथा, महाभारते।
"सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।
प्रियञ्च नानृतं ब्रूयादेष धर्म्मः सनातनः॥")
प्रियोऽप्रियश्च कार्य्यवशाद्भवति। यथा,—
"न हि कस्य प्रियः को वा विप्रियो वा जगत्त्रये।
काले कार्य्यवशात् सर्व्वे भवन्त्येवाप्रियाः प्रियाः॥"
इति श्रीक्रियायोगसारे ५ अध्यायः॥

प्रियंवदः, पुं, (प्रियं वदतीति। वद+"प्रियवशे वदः खच्।" ३। २। ३८। इति खच्। मुम्।) खेचरः। गन्धर्व्वभेदः। (यथा, रघुः। ५।५३।
"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य॥")
प्रियभाषिणि, त्रि। इति शब्दरत्नावली॥ तत्कारणं यथा, दानसागरे स्त्रीवपुराख्यम्।
"गोसहस्रप्रदातारो भूमिदातार एव च।
ये सुवर्णप्रदातारस्तथा सर्व्वे प्रियंवदाः॥"
(दाहघ्नाङ्गरुहौ, स्त्री। तल्लक्षणं यथा, वृक्षरत्नाकरे।
"भुवि भवेन्नभरेः प्रियंवदा॥")

प्रियकः, पुं, (प्रिय+स्वार्थे संज्ञायां वा कन्।) पीतशालकः। (यथा, रामायणे। २। ७१। १२-१३।
"तत्र रम्ये वने वासं कृत्वासौ प्राङ्मुखो ययौ।
उद्यानसन्निधानायाः प्रियका यत्र पादपाः॥
शालांस्तु प्रियकान् प्राप्य प्रीधानाख्याय वाचिनः।
अनुज्ञाप्याथ भरतो वाहिनीं त्वरितो ययौ॥")
गोपः। (यथा, हरिवंशे। ७२। १५।
"प्रियके पुञ्जिते: गौरं श्यामं वाशासने: क्वचित्।
कठोरलक्षमाभाति निर्म्मलूरक्तं वनम्॥")
चित्रमृगः। (यथा, माघे। ४। ३२।
"रुचिरचित्रतनूरुहशालिभि-
र्विचलितैः परितः प्रियकव्रजैः॥"

प्रियङ्गु

पक्षिविशेषः। यथा, महाभारते।३।१५८।५२।
"प्रियकैश्चातकैश्चैव तथान्यैर्विविधैः खगैः॥")
अलिः। प्रियङ्गुः। कुङ्कुमम्। इति मेदिनी॥ धाराकदम्बः। अग्निशिखः। इति राजनिर्घण्टः॥ (स्कन्दानुचरविशेषः। यथा, महाभारते। ६। ४५। ६२।
"प्रियकश्चैव नन्दश्च गोनन्दश्च प्रतापवान्॥")

प्रियङ्करः, त्रि, (प्रियं करोतीति। प्रिय+ट+"क्षेमप्रियमद्रेऽण् च।" ३। २। ४४। इति णकारात् खच्। मुम्।) प्रियकारकः। यथा,
"महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम।
पितुः प्रियङ्करो भर्त्ता क्षेमकारस्तपस्विनाम्॥"
इति भट्टिः। ५। ७७॥
(दानविशेषः। यथा, कथासरित्सागरे। ४७। २४।
"महाबुद्ध्यचलाख्यौ च प्रियङ्करशुभङ्करौ।
एते महारथा यत्नरुचिधर्म्मरुची तथा॥")

प्रियङ्करी, स्त्री, (प्रियङ्कर+गौरादित्वात् ङीष्।) हस्तिजीवन्ती। श्वेतकण्टकारी। अश्वगन्धा। इति राजनिर्घण्टः॥

प्रियङ्गुः, स्त्री, (प्रियं गच्छतीति। प्रिय+गम्+क्विप्। गमेर्गुरादित्वात् कुप्रत्ययेन साधुः।) खनामख्यातसुगन्धिवृक्षविशेषः। (यथा, महाभारते।
"वामे चक्रगदाधरः स भगवान् क्रोड़ो प्रियङ्गोस्तले
दक्षोद्यच्छुकशालिमञ्जरिकया देव्या धरण्या सह॥")
तत्पर्य्यायः। श्यामा २ महिलाह्वया ३ लता ४ गोवन्दनी ५ गुन्द्रा ६ फलिनी ७ फली ८ विश्वक्सेना ९ गन्धफली १० कारम्भा ११ प्रियकः १२। इत्यमरः।२।४।५५॥ प्रियवल्ली १३ फलप्रिया १४ गौरी १५ वृत्ता १६ कङ्गुः १७ कङ्गुनी १८ भङ्गुरा १९ गौरवल्ली २० शुभगा २१ पर्व्वभेदिनी २२ शुभा २३ पीता २४ मङ्गल्या २५ श्रेयसी २६। अस्या गुणाः। शीतलत्वम्। तिक्तत्वम्। दाहपित्तासृदोषभ्रमवान्तिज्वरवक्त्रजाड्यनाशित्वम्। इति राजनिर्घण्टः॥ तुवरत्वम्। अनिलनाशित्वम्। रक्तातियोगदौर्गन्ध्यस्वेदगुल्मव्रणविषमोहनाशित्वञ्च। इति भावप्रकाशः॥ *॥ राजिका। पिप्पली। कङ्गुः। इति मेदिनी॥ कटुकी। इति धरणिः॥

प्रियजनः, पुं, (प्रियो जनः।) कृत्यलोकः। (यथा, आर्य्यासप्तशत्याम्। ६१६।
"सखि! दुरवगाहगहनो विदधानो विप्रियं प्रियजनेऽपि।
खल इव दुर्लक्ष्यस्तव विनतसुखस्योपरि स्थितः कोपः॥")
प्रौढ़भावज्ञः। यथा, उज्ज्वलनीलमणिः।
"प्रौढ़भावाशुविज्ञो यस्तस्य प्रियजनोऽत्र सः॥"

प्रियजीवः, पुं, (प्रियो जीवो यस्य यस्मिन् वा।) श्योनाकवृक्षः। इति राजनिर्घण्टः॥

प्रियतमः, पुं, मयूरशिखावृक्षः। इति शब्दचन्द्रिका॥ (अयमेषामतिशयेन प्रियः। प्रिय+तमप्।) अतिशयप्रिये, त्रि॥

प्रियतरः, त्रि, (अयमनयोरतिशयेन प्रियः। प्रिय+तरप्।) अनयोरतिशयेन प्रियः। इति व्याकरणम्॥ (यथा, गो० रामायणे। २। ३८। ७।

"प्राणेभ्योऽपि प्रियतरो ज्येष्ठो भ्राता गुरुश्च ते।
तस्मादस्य प्रयत्नेन शरीरं प्रतिपालय॥")

प्रियता, स्त्री, (प्रिय+तल्।) प्रियस्य भावः। हार्द्दम्। इत्यमरः। १।७।२७॥ (यथा, मनुः। ५।५०।

"न भक्षयति यो मांसं विधिं हित्वा पिशाचवत्।
स लोके प्रियतां याति व्याधिभिश्च न पीड्यते॥")

प्रियतोषणः, पुं, (प्रियस्य तोषणं यस्मात्। यद्वा, प्रियं तोषयतीति। तुष्+णिच+ल्युः।) षोडशग्रन्थातिरिक्तरतिबन्धविशेषः। तस्य लक्षणं यथा,—

"नारी पादौ स्वहस्तेन धारयेच्चनोपरि।
स्तनापीड्करः कामी कामयेत् प्रियतोषणः॥"
इति रतिमञ्जरी॥

प्रियस्य तुष्टिकारिणि, त्रि॥

प्रियत्वं, क्ली, (प्रियस्य भावः। प्रिय+त्व।) प्रियता। तत्पर्य्यायः। प्रेम २ प्रेमा ३ स्नेहः ४ प्रणयः ५ हार्द्दम् ६ प्रियता ७ स्निग्धता ८। इति शब्दरत्नावली॥

प्रियदर्शनः, त्रि, (प्रियं दर्शनं यस्य।) सुदृश्यः। तत्पर्य्यायः। चक्षुष्यः २। इति जटाधरः॥ (यथा, रघुः। १। ४७।

"तत्तद्भूमिपतिः पत्रैः प्रियदर्शनयन् प्रियदर्शनः।
अपि लक्षितमध्वानं बुबुधे न बुधोपमः॥")

प्रियदर्शनः, पुं, (प्रियं दर्शनं यस्य।) शुकपक्षी। शौरिकावृक्षः। इति जटाधरः॥ (गन्धर्व्वविशेषः। यथा, रघुः। ५। ५१।

"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य॥")

प्रियप्रायं, क्ली, (प्रियस्य प्रायो यत्र।) प्रियवाक्यम्। तत्पर्य्यायः। चटु २ चाटु ३। इति हेमचन्द्रः। २। १७८॥

प्रियप्रेप्सुः, त्रि, (प्रियं प्रेप्सतीति। प्र+आप्+सन्+उः।) इष्टार्थोद्युक्तम्। उत्सुकः। इति जटाधरः॥

प्रियमधुः, पुं, (प्रियं मधु मद्यं यस्य।) बलरामः। इति हेमचन्द्रः। २। १३८॥

प्रियवर्णी, स्त्री, (प्रियो वर्णो यस्याः। गौरादित्वात् ङीष्।) प्रियङ्गुः। इति जटाधरः॥

प्रियवल्ली, स्त्री, (प्रिया मनोज्ञा वल्ली लता।) प्रियङ्गुः। इति राजनिर्घण्टः॥

प्रियवादी, [न्] त्रि, (प्रियं मनोज्ञं वदतीति। वद्+णिनिः।) मनोज्ञवक्ता। यथा, चाणक्ये।

"कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम्।
को विदेशः सविद्यानां कः परः प्रियवादिनाम्॥"
(यथा च पञ्चतन्त्रे। २। १७४।

"सुलभाः पुरुषा राजन्! सततं प्रियवादिनः।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः॥")

प्रियव्रतः, पुं, (प्रियं व्रतं यस्य।) स्वायम्भुवमनुपुत्रः। यथा,—

"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु।
द्वौ पुत्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव॥"
इत्यग्निपुराणम्॥

(प्रियाणि व्रतानि यस्येति विग्रहे व्रतप्रिये, त्रि। यथा, ऋग्वेदे। १०। १५०। १।

"अग्ने देवानावह नः प्रियव्रतान्
मरुद्भिरुग्र प्रियव्रतान्॥")

प्रियसखः, पुं, (प्रियः सखा च हितकारित्वात्।

"राजाहःसखिभ्यष्टच्॥"५।४।९१। इति टच्।) खदिरः। इति शब्दचन्द्रिका॥ प्रियश्चासौ सखा चेति। (प्रियबन्धुः। यथा, मेघदूते। १२।

"आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलम्॥")

प्रियस्य सखा इति च। इति व्याकरणम्॥

प्रियसत्यं, क्ली, (प्रियं सत्यमिति कर्म्मधारयः।) सुनृतवाक्यम्। इति हेमचन्द्रः। २। १७८॥ (प्रियं सत्यं यस्येति विग्रहे सत्यप्रिये, त्रि॥)

प्रियसन्देशः, पुं, (प्रियं सन्दिश्यतीति। प्रिय+सम्+दिश्+घञ्।) चम्पकवृक्षः। इति शब्दचन्द्रिका॥ (प्रियः सन्देश इति कर्म्मधारयः।) प्रियसंवादश्च॥

प्रियसालकः, पुं, (प्रियः सालः। ततः स्वार्थे कन्।) असनवृक्षः। इति राजनिर्घण्टः॥ पेयासाल इति ख्यातः॥

प्रिया, स्त्री, (प्रिय+टाप्।) नारी। इति शब्दरत्नावली॥ भार्य्या। इति हेमचन्द्रः॥ (यथा, कुमारे। १। ३८।

"पुष्पासवाचर्चितनेत्रशोभि
प्रियासुखं किम्पुरुषश्चुचुम्बे॥")

एला। इति शब्दचन्द्रिका। मल्लिका। मदिरा। इति राजनिर्घण्टः॥ वार्त्ता। इति धरणिः॥ (पद्माक्षरच्छन्दोविशेषः। इति छन्दोमञ्जरी॥)

प्रियाम्बुः, पुं, (प्रियमम्बु यस्य।) आम्रवृक्षः। इति राजनिर्घण्टः॥ तत्फले क्षुद्रजले च क्ली॥ (जलप्रिये, त्रि॥)

प्रियालः, पुं, (प्रियाय हिताय अलति पर्य्याप्नोतीति। अल+अच्।) वृक्षभेदः। पियाल इति भाषा। अस्य बीजं चिरञ्जीति प्रसिद्धम्। तत्पर्य्यायः। चारः २ अक्षोटः ३ खरस्कन्धः ४ ललनः ५ चारकः ६ बहुवल्कः ७ सन्नहः ८ तापसप्रियः ९ स्नेहबीजः १० उपवटः ११ मज्जबीजः १२। इति राजनिर्घण्टः॥ पियालः १३। इत्यमरः। २। ४। ३५॥ बहुलवल्कलः १४ राजादनम् १५ तापसेष्टः १६ सन्नकटुः १७ धनुःपटः १८। अस्य गुणः। पित्तकफास्रनाशित्वम्॥ तत्फलगुणाः। मधुरत्वम्। गुरुत्वम्। स्निग्धत्वम्। सरत्वम्। मरुत्पित्तदाहज्वरक्षयापहत्वञ्च। तन्मज्जगुणाः। मधुरत्वम्। वृष्यत्वम्। पित्तानिलाप-

हत्वम्। वृद्धत्वम्। दुर्ज्जरत्वम्। स्निग्धत्वम् विष्टम्भित्वम्। आमवर्द्धनत्वञ्च। इति भावप्रकाशः॥ अपि च।

"चारस्य च फलं पक्वं वृष्यं गौल्लाखकं गुरु।
तद्वीजं मधुरं वृष्यं पित्तदाहार्शिनाशनम्॥"
इति राजनिर्घण्टः॥

प्रियाला, स्त्री, (प्रियाय अलतीति। अल+अच्+टाप्।) द्राक्षा। इति राजनिर्घण्टः॥

प्रियोदितं, त्रि, (प्रियाय प्रियेण वा यदुदितम्। प्रियमुदितमिति वा।) चाटुवाक्यम्। इति शब्दरत्नावली॥ प्रियवाक्यविषयः॥ (प्रियकथितवाक्यञ्च॥)

प्री, क तर्पणे। इति कविकल्पद्रुमः॥ (चुरा० पर०-सक०-अनिट्।) क, यं प्राययन्ति कविसूक्तिरसायनानि। इति हलायुधः॥ प्रीणयत्यपीति केचित्। इति दुर्गादासः॥

प्री, ड य प्रीतौ। कान्तौ। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-अनिट्।) प्रीतिरिह प्रीतीभावः। ड य, यः प्रीयते प्रणयिषु। इति हलायुधः। इति दुर्गादासः॥

प्री, ञ तर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-अनिट्।) ञ, प्रयति प्रयते। इति दुर्गादासः॥

प्री, ञ ग कान्तौ। तर्पणे। इति कविकल्पद्रुमः॥ (क्र्या०-उभ०-अक०-सक० च-अनिट्।) तर्पणमिह प्रीतीभावः प्रीतीकरणञ्च। ञ ग, प्रभुः प्रीणातु विश्वसुक्। प्रीणाति बान्धवजनानिति हलायुधः। प्रीणीते। इति दुर्गादासः॥

प्रीः, स्त्री, (प्री+क्विप्।) प्रीतिः। इति कविकल्पद्रुमधातुटीकायां दुर्गादासः॥ प्रथमा विभक्तिः। यथा, "त्रिशः प्रौढीचीचीपीधीभ्राः। स्त्रादीनि त्रीणि त्रीणि क्रमात् प्रौढीचीचीपीधीभ्रीसंज्ञानि स्युः।" इति मुग्धबोधव्याकरणम्॥

प्रीणः, त्रि, (प्र+"नञ्च पुराणे प्रात्।"५।४।२५। इत्यस्य वार्त्तिकोक्त्या खः।) पुरातनः। इति त्रिकाण्डशेषः॥ प्रीतः। इति व्याकरणम्॥

प्रीणनं, क्ली, (प्री+खार्थे णिच्+ल्युट्। धूञ् प्रीञोरिति नुक्।) तृप्तिकरणम्। तत्पर्य्यायः। तर्पणम् २ अवनम् ३। इत्यमरः। ३। २। १॥ (यथा, महानिर्व्वाणतन्त्रे। २। ४७।

"तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्।
तदाराधनतो देवि! सर्व्वेषां प्रीणनं भवेत्॥")

प्रीणसः, पुं, गण्डकः। इति राजनिर्घण्टः॥

प्रीतः, त्रि, (प्रीञ् प्रीणने+क्तः।) प्रीतियुक्तः। तत्पर्य्यायः। हृदः २ मत्तः ३ हृष्टः ४ प्रहृष्टः ५ प्रमुदितः ६। इत्यमरः। ३। २। १०३॥ कुषितः ७। (यथा, महाभारते। ४। ४०। २।

"प्रीतोऽस्मि पुरुषव्याघ्र! न भयं विद्यते तव।
सर्व्वांस्तुदामि ते शत्रून् रक्षे रक्षविशारद!॥")

क्ली, नर्म्म। इति मेदिनी। ते, ३३॥

प्रीतिः, स्त्री, (प्रीञ् तर्पणे+भावे क्तिन्।) हृष्टिः। (यथा, रामायणे। १। ६८। १२।

"प्रतिज्ञां मम राजेन्द्र! निर्वर्तयितुमर्हसि।
पुत्रयोरुभयोरेव प्रीतिं त्वमुपलप्स्यसे॥")
तत्पर्य्यायः। सुत् २ प्रमदः ३ हर्षः ४ प्रमोदः५ आमोदः ६ सम्मदः ७ आनन्दथुः ८ आनन्दः ९ शर्म्म १० शातम् ११ सुखम् १२। इत्यमरः। १। ४। २४॥ केचित्तु। मुदादिसप्तकं प्रीतौ। आनन्दाद्यादिपञ्चकं सुखे इत्याहुः इति भरतः॥ दृष्टदर्शनजन्यं सुखम्। इति मोक्षधर्म्मे नीलकण्ठः॥ कामपत्नी। इति मेदिनी। ते, ३४॥ सा पुरा अनङ्गवती वेश्या आसीत् विभूतिद्वादशीव्रतं कृत्वा रत्याः सपत्नी जाता। यथा,—
"वेश्यानङ्गवती नाम विभूतिद्वादशीव्रतम्।
समाप्य माघमासस्य द्वादश्यां लवणाचलम्॥
निवेदयन्ती गुरवे ग्रस्याश्चोपस्करान्विताम्।
अलंकृत्य चुधीकेशं सौवर्णामरपादपम्॥
सा चानङ्गवती वेश्या कामदेवस्य साम्प्रतम्।
पत्नी सपत्नी संजाता रत्याः प्रीतिरिति श्रुता॥"
इति मात्स्ये ८२ अध्यायः॥
विष्कम्भादिसप्तविंशतियोगान्तर्गत द्वितीययोगः। तत्र जातफलम्।
"प्रसूतिकाले यदि प्रीतियोगो
नरो न रोगः सुखवान् विनोदी।
रक्तानुरक्तो विदुषां प्रपन्नः
संप्रार्थितो यच्छति वित्तमेव॥"
इति कोष्ठीप्रदीपः॥
प्रेम। इति मेदिनी। ते, ३४॥
प्रीतिजुषा, स्त्री, (प्रीतिं जुषते सेवते इति। जुष् सेवने + कः। टाप्) अनिरुद्धपत्नी। उषा। इति शब्दरत्नावली॥ (प्रीतिभाजि, त्रि॥)
प्रीतिदः, पुं, (प्रीतिं ददातीति। दा + "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) भण्डः। भाँड़ इति भाषा। तत्पर्य्यायः। वासन्तिकः २ केलिकिलः ३ वैहासिकः ४ विदूषकः ५ प्रहासी ६। इति हेमचन्द्रः॥ हर्षसुखप्रेमदातरि, त्रि॥
प्रीतिदत्तं, क्ली, (प्रीत्या दत्तमिति।) प्रीत्या दत्तवस्तु। यथा, मिताक्षरायाम्।
"प्रीत्या दत्तन्तु यत् किञ्चित् श्वश्रा वा श्वशुरेण वा।
पादवन्दनिकञ्चैव प्रीतिदत्तं तदुच्यते॥"
भावे क्तप्रत्यये प्रीतिदानञ्च॥
प्रीतिभोज्यं, त्रि, (प्रीत्या भोज्यम।) प्रीत्या भक्षणीयमन्नादि। यथा,—
"अन्नानि प्रीतिभोज्यानि आपद्भोज्यानि वा पुनः।
न च संप्रीयसे राजन्न चैवापन्नता वयम्॥"
इति महाभारते। ५। ६१। २५॥
प्रु, ङ सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-अनिट्।) रेफयुक्तः। ङ, प्रवते। इति दुर्गादासः॥
प्रुष, उ दहि। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्। उदित्त्वात् क्त्वेट्।) उ, प्रोषित्वा प्रुष्ट्वा। दहि भस्मीकरणे। इति दुर्गादासः॥
प्रुष, ग सेके। पूर्त्तौ। क्षरे। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सेके पूर्त्तौ च सक०-क्षरे अक०-सेट्।) ग, प्रुष्णाति पुप्रोष। सेकस्थाने मोचनमिति धातुप्रदीपभट्टमल्लौ। इति दुर्गादासः॥
प्रुषः, त्रि, (प्रुष् दहि + क्तः।) दग्धः। इत्यमरः। ३।१।६६॥ (यथा, राजतरङ्गिण्याम्।६।१४४।
"सा यागज्वलने राजलक्ष्मना प्रीतसर्पिषि।
पूर्णाहुत्या समं साध्वी जुहाव सहसा तनुम्।
उपर्य्यस्या निरस्तासोः पुरः कुसुमवृष्टयः॥")
प्रुष्वः, पुं, (प्रुष्णाति स्निह्यति पिपर्त्ति वेति। प्रुष् + "अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्।" उणा० १। १५९। इति क्वन् टाप्।) ऋतुः। (प्रोषति दहतीति।) दिवाकरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
प्रुष्वा, स्त्री, (प्रुष्णाति स्निह्यतीति। प्रुष् + "अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्।" उणा० १। १५९। इति क्वन्। टाप्।) जलबिन्दुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, शतपथब्राह्मणे।५।३।४।१६। "अथ प्रुष्वा गृह्णाति॥")
प्रेक्षणं, क्ली, (प्रेक्षते पश्यत्यनेनेति। प्र + ईक्ष + करणे ल्युट्।) चक्षुः। इति शब्दरत्नावली॥ (भावे ल्युट्।) दर्शनम्। यथा, रसमञ्जरी।
"सञ्चारो रतिमन्दिरावधि पदन्यासावधि प्रेक्षणम्॥"
प्रेक्षणकूटः, पुं, (प्रेक्षणस्य कूटः।) चक्षुर्गोलकः। यथा, पाण्डुरोगपूर्व्वरूपे माधवकरः।
"लकपोटगलोवनगात्रसाद-
स्तदभक्षणप्रेक्षणकूटशोथाः॥"
प्रेक्षा, स्त्री (प्रकर्षेण ईक्षते ययेति। प्र + ईक्ष + "गुरोश्च हलः।" ३। ३। १०३। इति अः। टाप्।) प्रज्ञा। (यथा, महाभारते।३।१३६।७।
"सा तस्मै सर्व्वमाचष्ट यवक्रीभाषितं शुभा।
प्रत्युक्तश्च यवक्रीतं प्रेक्षापूर्व्वं तथात्मना॥")
दृष्टेक्षणम्। इत्यमरः। ३। ३। २९३॥ (यथा, मनौ। ६। ८४।
"प्रतिषिद्धापि चैतृया तु मद्यमभ्युदयेष्वपि।
प्रेक्षासमाजं गच्छेद्वा सा दक्षा लक्षणानि षट्॥"
प्र + ईक्ष + भावे अः। टाप्।) ईक्षणम्। इति भरतः॥ (यथा, भागवते।३। १६। ७।
"यत्सेवया चरणपद्मपवित्ररेणुं
सद्यः क्षताखिलमलं प्रतिलब्धशीलम्।
न श्रीर्विरक्तमपि मां विजहाति यस्याः
प्रेक्षालवार्थमितरे नियमान् वहन्ति॥")
शाखा। इति शब्दरत्नावली॥ (शोभा। यथा, भागवते। ३। ८। २५।
"प्रेक्षां क्षिपन्तं हरितोपलाद्रेः
सन्ध्याब्भ्रनीवेरुरुरत्नमम्रुः।
रत्नोदधारौषधिसौमनस्य-
वनस्रजो वेणुभुजाङ्घ्रिपाङ्घ्रेः॥"
"हरितोपलाद्रेर्मरकतशिलामयपर्व्वतस्य प्रेक्षां शोभां क्षिपन्तं खलावण्यातिशयेन तिरस्कुर्व्वन्तम्॥" इति तट्टीकायां स्वामी॥)
प्रेङ्खन् [त्] त्रि, (प्र + इखि गतौ + शतृ।) चलनविशिष्टः। संक्लिक्तविशिष्टः। यथा,—
"व्याकृष्टिवद्वखटकासुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः॥"
इत्याद्यमरशतके। १॥
प्रेङ्खा, स्त्री, (प्रेङ्खते गम्यतेऽनयेति। प्र + इखि गतौ + करणे घञ्। टाप्।) दोला। इत्यमरः। २। ८। ५३॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये। "नाभिगोगुरुवाङ्क्षण-प्रेङ्खादम्यत्यन्तरेणाभियायात्॥"*॥) पर्य्यटनम्। अश्वगतिः। संवेशनान्तरम्। इति मेदिनी। खे, ३। वृत्यम्। इति धरणिः॥
प्रेङ्खित, त्रि, (प्र + इखि गतौ + क्तः।) कम्पितम्। इत्यमरः। ३। १। ८७॥
प्रेङ्खोल, तृ क चापले। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-अक०-सेट्।) अन्तःस्थद्वितीयोपधः। अपिप्रङ्खोलत्। चापलं चञ्चलीभावः। इति दुर्गादासः॥
प्रेङ्खोलनं, क्ली, (प्रेङ्खोल्यते चल्यतेऽनेनेति। प्रेङ्खोल + करणे ल्युट्।) दोला। इति हेमचन्द्रः॥ (भावे ल्युट्। कम्पनम्। यथा, सुश्रुते निदानस्थाने ८ अध्याये। "विरेचनप्रेङ्खोलनाजीर्णगर्भशातनप्रभृतिभिर्विशेषैर्वन्धनान्मुच्यते गर्भः फलमिव वृन्तबन्धनादभिघातविशेषैः॥")
प्रेङ्खोलितं, त्रि, (प्रेङ्खोल + क्तः।) दोलितम्। तत्पर्य्यायः। तरलितम् २ लुलितम् ३ प्रेङ्खितम् ४ धुतम् ५ चलितम् ६ कम्पितम् ७ धूतम् ८ वेल्लितम् ९ आन्दोलितम् १०। इति हेमचन्द्रः॥
प्रेतः, पुं, (प्र + इ गतौ + क्तः।) नरकस्थप्राणी। इत्यमरः। १। ३। ५६॥ भूतभेदः। ऋते, त्रि। इति मेदिनी। ते, ३०॥ (यथा, मनुः।२।२४०।
"आचार्य्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते।
गुरुदारे सपिण्डे वा गुरुवत् वृत्तिमाचरेत्॥")
वैदिकविधानेन और्द्धदेहिकाभावात् विष्णुदेहाच्च बहुनरकभोगान्ते प्रेतशरीरं भवति। यथा,—
लोमश उवाच।
"ततो बहुतिथे काले स राजा पञ्चतां गतः।
वैदिकेन विधानेन न तस्मै और्द्धदेहिकम्॥
विष्णुप्रदेषमात्रेण युगानां सप्तविंशतिम्।
भुक्त्वा च यातनां यामीं निस्तीर्णनरको नृपः॥
समया गिरिराजस्तु पित्राद्यो भूत्तदा महान्॥"
तस्य रूपं यथा,—
"देवद्युतिरधीयानः शुश्राव करुणामयः।
समागत्य ततस्तत्र तं पित्राद्यं ददर्श सः॥
विकरालमुखं दीनं पिङ्गाक्षनयनं भृशम्।
ऊर्द्धमूर्द्धजलम्बाक्षं यमदूतमिवापरम्॥
चलच्छिरश्च लम्बोष्ठं दीर्घनक्षुश्चिराकुलम्।
दीर्घाङ्घ्रिं शुष्कतुण्डञ्च गर्त्ताक्षं शुष्कपञ्जरम्॥"
इति पाद्मोत्तरखण्डे १६ अध्यायः॥*॥

प्रेतत्वादिजनककर्म्माणि यथा,—
"हविर्भुङ्क्ते स्वयं यो वै गोविन्दं नार्चयन्ति ये।
लभन्ते नात्मविद्याञ्च सुतीर्थेषुसुखाश्च ये॥
सुवर्णं वस्त्रताम्बूलं रत्नमन्नं फलं जलम्।
आर्त्तेभ्यो न प्रयच्छन्ति सर्व्वे सुकृतदारकाः॥
ब्रह्मस्वञ्च स्त्रीधनानि लोभादेव हरन्ति ये।
बलेन छद्मना वापि धूर्त्ताश्च परवञ्चकाः॥
नास्तिकाः कुहकाश्चौरा ये चान्ये वकवृत्तयः।
बालवृद्धातुरस्त्रीषु निर्दयाः सत्त्ववर्জ্জिताः॥
अग्निदा गरदा ये च ये चान्ये कूटसाक्षिणः।
अगम्यागामिनः सर्व्वे ये चान्ये ग्रामयाजिनः॥
याधाचरणसम्पन्ना वर्णादिधर्म्मवর্জ্জिताः।
देवोपदेवदनुजरक्षोयक्षादिसेविनः॥
सर्व्वदा मादकद्रव्यपानमत्ता हरिद्विषः।
देवतोच्छिष्टपतितशूद्रान्नभोजिनः॥
असत्कर्म्मरता नित्यं सर्व्वपातकपापिनः।
पाषण्डधर्म्मचरणाः पुरोधीवृत्तिजीविनः॥
पिष्टमाल्लवणापत्यखदारत्यागिनश्च ये।
ये कदर्य्याश्च शुष्काश्च नास्तिका धर्म्मदूषकाः॥
त्यजन्ति स्वामिनं युद्धे त्यजन्ति शरणागतम्।
गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषकाः॥
महापत्तेषु सर्व्वेषु प्रतिग्रहरताश्च ये।
परद्रोहरता ये च तथा ये प्राणिहिंसकाः॥
परापवादिनः पापा देवतागुरुनिन्दकाः।
कुप्रतिग्राहिकाः सर्व्वे सम्भवन्ति पुनः पुनः॥
प्रेतराक्षसपैशाचतिर्य्यग्दृक्षकुयोनिषु।
न तेषां सुखलेशोऽस्ति इह लोके परत्र च॥"
इति पाद्मोत्तरखण्डे १८ अध्यायः॥*॥

पञ्चप्रेतोपाख्यानं यथा,—
ब्राह्मण उवाच।
"प्रेतानां नामजातीनां युष्माकं सम्भवः कथम्।
किमर्त्थं कारणञ्चैषां यूयमीदृग्नामकाः॥
प्रेता ऊचुः।
अहं खादु सदा शुक्ला दध्यां पर्य्युषितं सदा।
एतत्कारणसंदिग्धं नाम पर्य्युषितं मम॥१॥
क्षुधिता बहवोऽनेन विप्राद्या भ्रमकाङ्क्षिणः।
एतत् कारणसंदिग्धं रुचीसुखमिमं विदुः॥२॥
घृतं गच्छति विप्रेण याचितः क्षुधितेन वै।
पश्चाद्भुङ्क्ते द्विजः शिष्टमेव शीघ्रक उच्यते॥३॥
यदोपरि सदा शुद्धे खादु द्विजभयेन हि।
द्विजाय कुत्सितं दत्त्वा एष रोधक उच्यते॥४॥
मौनेनापि स्थिरो नित्यं याचितो विलिखेन्महीम्।
अस्माकमपि पापिष्ठो लेखको नाम एष वै॥५॥
मेदुरश्च लेखको याति रोधकः पार्श्वतःस्थिराः।
शीघ्रकः पङ्गुतां प्राप्तः रुचीरुचीसुखोऽभवत्॥"
प्रेतानामाहारो यथा,—
द्विज उवाच।
"ये जीवा भुवि तिष्ठन्ति सर्व्वे आहारमूलकाः।
युष्माकमपि आहारं श्रोतुमिच्छामि तत्त्वतः॥
प्रेता ऊचुः।
श्रृणु आहारमस्माकं सर्व्वसत्त्वविगर्हितम्।
श्लेष्मश्चपुरीषञ्च योषितान्तु मलेन च॥
शवानि त्वत्प्रसूतानि प्रेता भुञ्जन्ति तत्र वै॥
स्त्रीभिर्जेग्धानि जीर्णानि संकीर्णापहतानि च।
मलेनानिलगुप्तानि प्रेता भुञ्जन्ति तत्र वै॥
भयलज्जाविहीनानि पतितैः सेवितानि च।
अन्योन्यदस्युयुक्तानि प्रेता भुञ्जन्ति तत्र वै॥
कलहान्वितशोकानि त्वत्प्रसूतानि मज्जनैः।
सर्व्वस्वानि भाण्डानि प्रेता भुञ्जन्ति तत्र वै॥
बलिमन्त्रविहीनानि द्विजाहृतानि यानि तु।
नियमव्रतहीनानि प्रेता भुञ्जन्ति तत्र वै॥
गुरवो नैव पूज्यन्ते स्त्रीजितानि मलानि च।
सक्रोधान्यपवित्राणि प्रेता भुञ्जन्ति तत्र वै॥
भुञ्जन्ति भिन्नभाण्डेषु मर्य्यादारहितेषु च।
अन्योन्योच्छिष्टयुक्तेषु तत्र प्रेतास्तु भुञ्जते॥
सकेशमाक्षिकोच्छिष्टं पूतिपर्य्युषितं तथा।
सक्रोधञ्च सशोकञ्च तत्र प्रेतेषु भोजनम्॥
सनयं भोजनं यत्र नोत्तरीयं पदासनम्।
सोष्णीषं सासुरीकञ्च तत्र प्रेतेषु भोजनम्॥
अर्द्धरात्रं महाश्यामं सोत्पत्तिभ्रं पतितं तथा।
दुर्भुक्तं गोष्ठिकञ्चैव तत्र प्रेतेषु भोजनम्॥
सौतिकं मृतकञ्चैव रजसं कलुषीकृतम्।
निर्द्दीपं क्रमिवच्चाग्ने यद्भुक्तं प्रेतिकन्तु तत्॥
एतत्ते कथितं सर्व्वं यत् प्रेतेष्वेव भोजनम्।
निर्ब्बिघ्नाः प्रेतजाता वै पृच्छामस्त्वां द्विजोत्तम!॥"*॥

प्रेतत्वाभावकारणं यथा,—
"न प्रेतो जायते येन येन चैवेह जायते।
एतत् सर्व्वं समासेन ब्रूहि वदतां वर!॥
ब्राह्मण उवाच।
एकरात्रं त्रिरात्रं वा कृच्छ्रं चान्द्रायणादिकम्।
व्रतेष्वल्पधियो यस्तु न प्रेतो जायते नरः॥
मिष्टान्नपानदाताच सततं श्रद्धयान्वितः।
देवपूजाकरो नित्यं न प्रेतो जायते नरः॥
त्रिरग्निरेकपञ्चाग्निर्निरग्निर्वाप्युपासकः।
सर्व्वभूतदयापन्नो न प्रेतो जायते नरः॥
तुल्यमानापमानश्च तुल्यः काञ्चनलोष्टयोः।
तुल्यः शत्रौ च मित्रे च न प्रेतो जायते नरः॥
देवनातिथिपूजासु गुरुजातिषु नित्यशः।
वेदशास्त्ररतो नित्यं न प्रेतो जायते नरः॥
जितक्रोधो मदैश्वर्य्यलज्जासङ्गविवर्জ্জितः।
क्षमाक्रोधसुशीलश्च न प्रेतो जायते नरः॥
देवतातिथिपूजासु पर्व्वतांश्च नदीस्तथा।
प्रश्नेद्देवालयांश्चैव न प्रेतो जायते नरः॥"*॥

प्रेतत्वकारकं यथा,—
"शूद्रान्नं यो द्विजो भुङ्क्ते यः क्रामति द्विजोत्तमम्।
वृत्तिहा द्विजदेवेषु स प्रेतो जायते नरः॥
मातरं पितरं वृद्धं भ्रातिं साधुजनं तथा।
लोभात् त्यजति यः क्रुद्धं स प्रेतो जायते नरः॥
अयाज्ययाजकश्चैव याज्यश्च परिवर्জ্जयेत्।
शूद्रानुग्रहकर्त्ता च स प्रेतो जायते नरः॥
कुज्योतिषि कुविद्यासु कुजनेषु कुदेशकः।
शूद्रसेवाकरो राज्ञां स प्रेतो जायते नरः॥
सेवकायापदत्तो यः सेवकस्वपरिग्रहः।
तादृग्भावपि जायेते प्रेतौ कालान्तकिंप्रदः॥
द्विजानुमन्त्रितो भुङ्क्ते शूद्रान्नं वा द्विजस्य तु।
शूद्रेणैव द्विजः प्रेतो निरयानुपगच्छति॥
गीतवाद्यरसो नित्यं मद्यपस्त्रीनिषेवणात्।
द्यूतमांसप्रियो यस्तु स प्रेतो जायते नरः॥
दृषारेतो दृषामांसो दृषावादी दृषामतिः।
निन्दको द्विजदेवानां स प्रेतो जायते नरः॥
वृद्धं बालं गुरुं विप्रं योऽवमन्य भुनक्ति वै।
कन्यां ददाति मुल्केन स प्रेतो जायते नरः॥
न्यासापहर्त्ता मित्रघ्नक् परपाकरतस्तथा।
विश्रम्भघाती कूटश्च स प्रेतो जायते नरः॥
निर्द्दोषान् सुहृदो नारीत्यजेत् कालान्न पाति यः।
धनमीहेत यस्तेषां स प्रेतो जायते नरः॥
दुष्टाश्वरथयानानि वृत्तग्रथासनादि यः।
कृष्णाजिनञ्च युञ्जाति अनापत्सु गतो द्विजः॥
तथोभयसुखी कालं सशैलां मेदिनीं द्विजः।
कुरुक्षेत्रस्य यद्दानं चाण्डालात् पतितात्तथा।
मासिकेऽपि नवश्राद्धे भुञ्जन् प्रेतान्न मुच्यते॥
ब्रह्महा गोवधी स्त्रैयी सुरापो गुरुतल्पगः।
भूमिकन्यापहर्त्ता यः स प्रेतो जायते नरः॥
लालासङ्करकृन्नित्यं वर्णसङ्करकृत्तथा।
योनिसङ्करकृच्चापि स प्रेतो जायते नरः॥
विक्रीणाति विषं ग्रन्थं तिलानां लवणस्य तु।
गवां केशहरिणां मोहात् विक्रयात् प्रेततां व्रजेत्॥
कूटमाप्यै च तौल्यैन क्रयं क्रीणाति विक्रयात्।
मद्यतक्रपयोदध्नां स प्रेतो जायते नरः॥
स्त्रीरक्तो मद्यपाने तु दृग्यायामनुधावति।
नित्यनैमित्तिकेऽदाता स प्रेतो जायते नरः॥"
इत्यग्निपुराणम्॥*॥

मनुष्याणां आतिवाहिकदेहानन्तरं प्रेतदेहो भवति। यथा, विष्णुधर्म्मोत्तरे।
"ततश्चाशादेव गृह्णाति शरीरमातिवाहिकम्।
आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव!॥
केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्।
प्रेतपिण्डैस्ततो दत्तैर्देहमाप्नोति भार्गव!॥
भोगदेहमिति प्रोक्तं क्रमादेव न संशयः।
प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्॥
ब्रह्माग्नानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते।
तत्रास्य यातना घोराः शीतवातातपोद्भवाः॥
ततः सपिण्डीकरणे बान्धवैः स कृते नरः।
पूर्णे संवत्सरे देहमतोऽन्यं प्रतिपद्यते॥
ततः स नरके याति स्वर्गे वा स्वेन कर्म्मणा॥"
इति शुद्धितत्त्वम्॥

प्रेतकार्य्यं, क्ली, (प्रेताय प्रेतस्य वा कार्य्यम्।) मृतस्य दाहादिसपिण्डीकरणान्तं कर्म्म। यथा,
"अकृत्वा प्रेतकार्य्याणि प्रेतस्य धनहारकः।
वर्णानां यदधे प्रोक्तं तद्व्रतं नियतश्चरेत्॥"
इति दायतत्त्वम्॥
(यथाच महाभारते। १।९०२।९५।

"धर्म्मात्मा स तु गाङ्गेयश्चिन्ताशोकपरायणः।
प्रेतकार्य्याणि सर्व्वाणि तस्य सम्यक्कारयत्॥")

प्रेतगृहं, क्ली, (प्रेतस्य गृहम्।) श्मशानम्। इति हेमचन्द्रः। ४। ५५॥

प्रेततर्पणं, क्ली. (प्रेतस्य तर्पणम्।) मरणावधि-सपिण्डीकरणपर्य्यन्तं प्रेतशब्दोल्लेखेन जलदानम्। यथा। "अत्र प्रेततर्पणे तिलांस्त्विति विशेषोपादानात् सूर्य्यादिवारेणापि तिलैरेव तर्पणं प्रतीयते॥ तदनुष्ठानं यथा। अपः सर्व्वे शवस्यग्नेर्गत्वा पिण्डपदस्थाने प्रेतपदोक्तेन द्वितीयान्तं तर्पयेयुः पिण्डशब्दोच्चारणेऽपि पिण्डहा भवति। एतेन अमुकगोत्रं प्रेतं अमुकदेवशर्म्माणं तर्पयामि। इति सामगानां प्रयोगः। यजुर्व्वेदिनान्तु अमुकगोत्र प्रेत अमुकदेवशर्म्मन् तृप्यस्व। इति सम्बोधनान्तवाक्यम्।" इति शुद्धितत्त्वम्॥

प्रेतदेहः, पुं क्ली, (प्रेतस्य देहः।) प्रेतशरीरम्। यथा,—

"कृते सपिण्डीकरणे नरः संवत्सरात् परम्।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते॥"
इति तिथ्यादितत्त्वधृतविष्णुधर्म्मोत्तरीयवचनम्॥
पूरकपिण्डदानेन तदुत्पत्तिर्यथा,—
"शिरस्यादेन पिण्डेन प्रेतस्य क्रियते सदा।
द्वितीयेन तु कर्णाक्षिनासिकासु समासतः॥
गलांसभुजवक्षांसि तृतीयेन तथा क्रमात्।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च॥
जानुजङ्घे तथा पादौ पञ्चमेन तु सर्व्वदा।
सर्व्वमर्म्माणि षष्ठेन सप्तमेन तु नाड्यः॥
दन्तलोमाष्टमेन वीर्य्यञ्च नवमेन तु।
दशमेन तु पूर्णत्वं लभता क्षुदिपर्य्ययः॥"
इति शुद्धितत्त्वधृतकूर्म्मपुराणवचनम्॥

प्रेतनदी, स्त्री, (प्रेतवरणीया नदी।) वैतरणी। इति शब्दरत्नावली॥

प्रेतपक्षः, पुं, (प्रेतप्रियः पक्षः।) गौणचान्द्राश्विनकृष्णपक्षः। तत्र मृतस्य पार्व्वणविधिना सांवत्सरिकं श्राद्धं कर्त्तव्यम्। यथा,—

"आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे।
यो वै श्राद्धं नरः कुर्य्यादेकस्मिन्नपि वासरे॥
तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवम्॥
नभा वाथ नभस्यो वा मलमासो यदा भवेत्।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः॥" इति।
तत्र मृतस्य।
"सपिण्डीकरणादूर्द्धं यत्र यत्र प्रदीयते।
तत्र तत्र त्रयं कुर्य्याद्भर्च्चयित्वा मृताहनि॥
अमावास्यां त्रयो यस्य प्रेतपक्षेऽथवा पुनः।
सपिण्डीकरणादूर्द्धं तस्योक्तः पार्व्वणो विधिः॥"
इति शुद्धौ तेन प्रत्याब्दिकं पार्व्वणविधिना कर्त्तव्यम्। इति मलमासतत्त्वम्॥*॥ तत्र निषिद्धदिनेऽपि तिलतर्पणं कर्त्तव्यम्। यथा, स्मृतिः।
"तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके।
निषिद्धेऽपि दिने कुर्य्यात् तर्पणं तिलमिश्रितम्॥"
इति च मलमासतत्त्वम्॥

प्रेतपटहः, पुं, (प्रेतस्य पटहः।) मरणकाले वादनीयवाद्यविशेषः। तत्पर्य्यायः। भवरुत् २ स्थूलभङ्गुरकः ३। इति त्रिकाण्डशेषः॥

प्रेतपतिः, पुं, (प्रेतानां पतिः।) यमः। इति हलायुधः॥ (यथा, मार्कण्डेये। १०८। ४।
"दक्षः प्रेतपतेः शक्तिर्देवसेनापतेस्तथा।
अन्येषाञ्चैव देवानामायुधानि च विश्वकृत्।
चकार तेजसा भानोर्भासुराण्यरिशान्तये॥")

प्रेतपिण्डः, पुं, (प्रेताय देयः पिण्डः।) मरणावधि-सपिण्डीकरणपर्य्यन्तं प्रेतसम्प्रदानकपिण्डाकारान्नम्। यथा,—

"न स्वधाञ्च प्रयुञ्जीत प्रेतपिण्डे दशाहिके।
भावेतेतत्र वै पिण्डं यच्चदत्तस्य पूरकम्॥"*॥
तत्तत्पिण्डस्य प्रेताङ्गकरणत्वं यथा, ब्रह्मपुराणे।
"शिरस्यादेन पिण्डेन प्रेतस्य क्रियते सदा।
द्वितीयेन तु कर्णाक्षिनासिकासु समासतः॥
गलांसभुजवक्षांसि तृतीयेन तथा क्रमात्।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च॥
जानुजङ्घे तथा पादौ पञ्चमेन तु सर्व्वदा।
सर्व्वमर्म्माणि षष्ठेन सप्तमेन तु नाड्यः॥
दन्तलोमाष्टमेन वीर्य्यञ्च नवमेन तु।
दशमेन तु पूर्णत्वं लभता क्षुदिपर्य्ययः॥"*॥
तदकरणे दोषो यथा,—
"प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोचनम्।
प्रसाग्रानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते॥"*॥
पूरकपिण्डदानादेरितिकर्त्तव्यता यथा। पारस्करः। प्रेताय पिण्डं दत्त्वा अवनेजनदानप्रत्यवनेजनेषु नामग्राहं गृह्णीते तां रात्रिं विहायसि क्षीरोदके निदध्युः प्रेताय स्नाहि पिब चेदं क्षीरमित्युच्चार्य्येति। अत्र दानशब्देन पिण्डदानमुक्तं बहुवचनात्। तेनावनेजनपिण्डदानप्रत्यवनेजनेषु नामग्राहं नाम गृहीत्वा प्रेतपिण्डानुष्ठानं समाप्यम्। विहायसि रात्रौ क्षीरोदके प्रेताय स्नाहि पिब चेदं क्षीरमित्युच्चार्य्य निदध्युः।
"प्रथमेऽहनि यो दद्यात् प्रेतायान्नं समाहितः।
यत्रान्नवस्त्र चान्येषु स एव प्रददात्यपि॥"*॥
प्रथमपिण्डकर्त्तृनियमवत् प्रथमपिण्डद्वयनियमाह यमः पृच्छः।
"प्रथमेऽहनि यद्द्रव्यं तदेव स्याद्द्वयादिकम्।
सदा शौचेऽपि दातव्या सर्व्वेऽपि युगपत्तथा॥
त्र्याहाशौचे प्रदातव्या प्रथमे लेक एव हि।
द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि॥
एकस्तोयाञ्जलिस्त्वेवं पात्रमेकञ्च दीयते।
द्वितीये द्वौ तृतीये त्रीन् चतुर्थे चतुरस्तथा॥
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त एव च।
अष्टमेऽष्टौ च नवमे नवैव दशमे दश॥
येन स्युः पञ्चपञ्चाशत् तोयस्याञ्जलयः क्रमात्।
तोयपात्राणि तावन्ति संयुक्तानि तिलादिभिः॥"
इति शुद्धितत्त्वम्॥

प्रेतपुरं, क्ली, (प्रेतानां पुरम्।) यमालयः। यथा,
"यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः।
तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा॥"
इति श्राद्धतत्त्वम्॥

प्रेतराक्षसी, स्त्री, (प्रेतानां पिशाचभेदानां राक्षसीवापसर्पणकारित्वात्।) तुलसी। इति रत्नमाला॥

प्रेतवनं क्ली, (प्रेतानां वनमिव।) श्मशानम्। इति हेमचन्द्रः। ४। ५५॥

प्रेतवाहितः, त्रि, (प्रेतेन वाहितः।) भूताविष्टः। इति त्रिकाण्डशेषः॥

प्रेतशिला, स्त्री, (प्रेतानां प्रेतेभ्यो वा या शिला।) पिण्डदानार्थगयास्थितप्रस्तरविशेषः। यथा,—

ब्रह्मोवाच।
"येयं प्रेतशिला ख्याता गयायां सा त्रिधा स्थिता।
प्रभासे प्रेतकुण्डे च गयासुरशिरस्यपि॥
धर्म्मेण धारिता भूत्वे सर्व्वदेवमयी शिला॥
प्रेतत्वं ये गता नृणां पित्राद्या बान्धवाद्यः।
तेषामुद्धरणार्थाय यतः प्रेतशिला ततः॥
अतोऽत्र मुनयो भूपा राजपत्न्याद्यः सदा।
तस्यां शिलायां श्राद्धादिकर्त्तारो ब्रह्मलोकगाः॥
गयासुरस्य यन्मुण्डं तस्य पृष्ठे शिला यतः।
मुण्डपृष्ठो गिरिस्तस्मात् सर्व्वदेवमयो ह्ययम्॥
मुण्डपृष्ठस्य पादेषु यतो ब्रह्मसरोसुखाः।
अरविन्दवनन्तेषु तेन चैवोपलक्षितः॥
अरविन्दो गिरिर्नाम क्रौञ्चपादाङ्कितो यतः।
तस्माद्गिरिः क्रौञ्चपदः पितॄणां ब्रह्मलोकदः॥
गदाधरादयो देवा आद्या आदौ व्यवस्थिताः।
शिलारूपेण च यस्तस्मात्सैवमयी शिला।
गयाशिरश्छादयित्वा गुरुत्वादास्थिता शिला॥*॥
स्नात्वा प्रेतशिलादौ तु चरणाम्बुस्थितेन च।
पिण्डं दद्यादमेर्मन्त्रैरावाह्य च पितॄन् परान्॥
असत्कुले मृता ये च गतिर्येषां न विद्यते।
तेषामावाहयिष्यामि दर्भपृष्ठे तिलोदकैः॥
पितृवंशे मृता ये च मातृवंशे च ये मृताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
मातामहकुले ये च गतिर्येषां न जायते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
अजातदन्ता ये केचित् ये च गर्भेषु पीडिताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
बन्धुवर्गाश्च ये केचिन्नामगोत्रविवर्जिताः।
स्वगोत्रे परगोत्रे वा गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
उद्बन्धनमृता ये च विषशस्त्रहताश्च ये।
आत्मोपघातिनो ये च तेभ्यः पिण्डं ददाम्यहम्॥
अग्निदाहे मृता ये च सिंहव्याघ्रहताश्च ये।
दंष्ट्रिभिः श्वद्भिर्म्लेच्छैर्वापि तेषां पिण्डं ददाम्यहम्॥
अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथापरे।
विद्युच्चौरहता ये च तेषां पिण्डं ददाम्यहम्॥
रौरवे चान्धतामिस्रे कालसूत्रे च ये गताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
असिपत्रवने घोरे कुम्भीपाके च ये गताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥
अन्येषां यातनास्थानां प्रेतलोकनिवासिनाम्।

तेषामक्षयतृप्त्यर्थं इदं पिण्डं ददाम्यहम् ॥
पशुयोनिगता ये च पक्षिकीटसरीसृपाः ।
अथवा वृक्षयोनिस्थास्तेभ्यः पिण्डं ददाम्यहम् ॥
अमर्त्यस्थावरत्वं ये नीता यमशासने ।
तेषामक्षयतृप्त्यर्थं इदं पिण्डं ददाम्यहम् ॥
जात्यन्तरसहस्राणि भ्रमन्तः स्वेन कर्म्मणा ।
मानुष्यं दुर्लभं येषां तेभ्यः पिण्डं ददाम्यहम् ॥
ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा ॥
ये केचित् प्रेतरूपेण वर्त्तन्ते पितरो मम ।
ते सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा ॥
ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः ।
क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा ॥
विरूपास्त्वङ्गभग्ना ये ज्ञाताज्ञाताः कुले मम ।
तेषां पिण्डं मया दत्तमक्षय्यमुपतिष्ठताम् ॥
साक्षिणः सन्तु मे देवा ब्रह्मेशानादयस्तथा ।
मया गयां समासाद्य पितॄणां निष्कृतिः कृता ॥
आगतोऽहं गयां देव ! पिण्डकार्य्ये गदाधर ! ।
तन्मे साक्षी भवस्वाद्य अक्षयोऽहन्तथास्तु मे ॥"
इति गारुडे गयामाहात्म्ये २५-८६ अध्यायौ ॥

प्रेतशौचं, क्ली, (प्रेते सति प्रेतस्य वा शौचम् ।) मृतसंस्कारादि । यथा,—

याज्ञवल्क्य उवाच ।

"प्रेतशौचं प्रवक्ष्यामि तच्छृणुध्वं यतव्रताः ।
ऊनद्विवर्षे निखनेन्न कुर्य्यादुदकक्रियाम् ॥
आप्तज्ञानादनुव्रज्य इतरो ज्ञातिभिर्मृतः ।
यमसूक्तं तथा जप्यं जपन्निर्लौकिकाग्निना ॥
स दग्धश्च उपेतश्चेदाहिताग्नेस्तदर्थवत् ।
अग्न्यादृग्भ्रमादृग्वापि ज्ञातयो स्नपयन्त्यपः ॥
अप नः शोशुचदघमनेन पितृदिड्मुखाः ।
एवं मातामहाचार्य्यप्रेतानामोदकक्रियाः ॥
कामोदकाः सखिपुत्रस्वसीयश्वशुरर्त्विजः ।
नामगोत्रैश्च स्नुदकं सकृत् सिञ्चन्ति वाग्यताः ॥
यावच्छवप्रतिसत्तेना न कुर्युरुदकक्रियाम् ।
न ब्रह्मचारिणो ज्ञात्वा योषितः कामगास्तथा ॥
सुरापाश्चात्मघातिन्यो नाशौचोदकभाजनाः ।
अतो न रोदितव्यं हि त्वनित्या जीवसंस्थितिः ॥
क्रिया कार्य्या यथाशक्ति ततो यच्छेदृशस्तनू
प्रति ।
विदश्च निम्बपत्राणि नियता दारि वेश्मनः ॥
आचम्याथाधिसूदकं गोमयं गौरसर्षपान् ।
प्रविश्येयुः समालभ्य ज्वलाग्निं पदं शनैः ॥
प्रवेशनादिकं कर्म्म प्रेतसंस्पर्शिनामपि ।
ईरितं तत्तृचाच्छुद्धिः परेद्यः स्नानसंयमात् ॥
क्रीतलाजाग्नना भूमौ स्थण्डिले पृथक् पृथक् ।
पिण्डत्रयाहृता देयं प्रेतायाद्यं दिनत्रयम् ॥
जलमेकाहमाकाशे स्नाप्यं चौरश्च शस्त्रिये ।
वैतालोपासना कार्य्या क्रियाश्च श्रुतिचोदिताः ॥
आदन्तजन्मनः सद्य आचूडान्नैशिकी स्मृता ।
त्रिरात्रमव्रतादेस्त्र्यहमरात्रमतः परम् ॥
त्रिरात्रं दशरात्रं वा श्रावमाशौचमुच्यते ।
ऊनद्विवर्षे उभयोः सूतकं मातुरेव हि ।
अन्तरा जन्ममरणे प्रेषाहोभिर्विशुद्ध्यति ॥
दश द्वादश वर्षाणां तथा पञ्चदशैव च ।
चिरप्रहीणानि च तथा भवति प्रेतसूतकम् ॥
अदत्तकन्यासु वरेषु च विशोधनम् ।
गुर्व्वङ्गे वाग्यानभूषानमातुलश्रोत्रियेषु च ॥
अगौरसेषु पुत्रेषु भार्य्यास्वन्यगतासु च ।
निवासराजनि तथा तदहः शुद्धिकारणम् ॥
हतानां नृपगोविप्रैरन्त्यं चात्मघातिनाम् ।
विधादोष्ट हतानाञ्च नाशौचं पृथिवीपते ॥
सत्रिव्रतिव्रह्मचारिदाक्षव्रह्मविदां तथा ।
दाने विवादे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि हि कष्टायां सद्यःशौचं विधीयते ॥
कालोऽग्निः कर्म्मणश्चायुर्म्मनो ज्ञानं तपो जलम् ।
पश्चात्तापो निराहारः सर्व्वेषां शुद्धिहेतवः ॥"

इति गारुडे १०६ अध्यायः ॥

प्रेतश्राद्धं, क्ली, (प्रेताय प्रेतोद्देश्यकं वा श्राद्धम् ।) प्रेतोद्देश्यकश्राद्धम् । तदनुष्ठानं यथा । तत्र गोभिलः । अथैकोद्दिष्टमेकं पवित्रमेकोऽर्घ एकः पिण्डो नावाहनं नामौकरणं नात्र विश्वेदेवाः स्वदितमिति छन्दप्रश्नः । उपतिष्ठतामित्यन्नस्थाने अभिरम्यतामिति विसर्गोऽभिरतोऽस्मीति प्रतिवचनमेतत् प्रेतश्राद्धमिति । इति श्राद्धतत्त्वम् ॥ * ॥ तच्च नवश्राद्धं तत्तु सापिण्डकर्त्तव्यं चतुर्थपञ्चमनवमैकादशाद्येषु प्रेतश्राद्धम् । यथा यमः ।

"चतुर्थे पञ्चमे चैव नवमैकादशे तथा ।
तदन्नं दीयते जन्तोस्तत्प्रेतश्राद्धमुच्यते ॥"

इति श्राद्धविवेकः ॥ * ॥

सापिण्डिरसुमभयकर्त्तव्यं आद्यश्राद्धादिसपिण्डीकरणान्तं श्राद्धम् । यथा,—

"द्वादश प्रतिमास्थानि आद्यं षाण्मासिकं तथा ।
सपिण्डीकरणञ्चैव इत्येतत् श्राद्धषोडशम् ॥"

इति श्राद्धतत्त्वम् ॥*॥

अमुघटश्राद्धम् । तत्तु संवत्सरं यावत् प्रत्यहं प्रेतोद्देश्यकान्नजलदानरूपम् । यथा । पारस्करः । अहरहरन्नमस्मै ब्राह्मणायोदकुम्भञ्च दद्यात् पिण्डमप्येके निरुप्तन्ति । ददतीत्यर्थः । इति श्राद्धविवेकः ॥ * ॥ गयादितीर्थश्राद्धादिप्राप्तिनिमित्तमेकोद्दिष्टश्राद्धम् । यथा,—

"पित्रर्थन्तु निर्व्वर्त्त्य मासिके श्राद्ध एव तु ।
श्राद्धं प्रतिरुचौ चैव मातापित्रोर्म्मृताहनि ॥
असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत् ॥
तेनाम्बुघटश्राद्धे मृताहविहितमासिके तथा
विशिष्टतीर्थश्राद्धादिप्राप्तौ प्रेतश्राद्धकरणेच्छायां
मातापित्रोर्म्मृताहनि च असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत् ।" इति श्राद्धतत्त्वम् ॥

प्रेता, स्त्री, (प्रेत+स्त्रियां टाप् ।) प्रेतभावापन्ना । यथा । विष्णुरोम् तत् सदित्यादि अमुकगोत्रायाः प्रेतायाः अमुकदेव्या अशौचान्तादित्यर्थेऽद्य अमुकगोत्रायाः प्रेतायाः प्रेतत्वविमुक्तिपूर्ब्बकस्वर्गलोकगमनकामः सोपकरणचन्दनाङ्कितघेनुदानमहं करिष्यामि । इति सङ्कल्पः ॥ * ॥ स्तृता । यथा,—

"प्रेतायाः पुत्रिकायाः न भर्त्रा धनमर्हत्यपुत्रायाः ।" इति दायभागे श्रीकृष्णतर्कालङ्कारधृतबृहस्पतिवचनम् ॥

प्रेत्य, व, (प्र+इ+ल्यप् ।) लोकान्तरम् । तत्पर्य्यायः । असुत्र २ । इत्यमरः । १ । ४ । ८ ॥ (यथा, मनुः । २ । ६ ।

"श्रुतिस्तु वृद्धिदं धर्म्ममृतिष्ठन् हि मानवः ।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥")

प्रेम, [न्] क्ली, पुं, (प्रियस्य भावः । प्रिय+ "पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति इमनिच् । "प्रियस्थिरेति ।" ६ । ४ । १५७ । इति प्रादेशः । प्रो तर्पणे+मनिन् वा ।) सौहार्द्दम् । तत्पर्य्यायः । प्रेमा २ प्रियता ३ हार्द्दम् ४ स्नेहः ५ । इत्यमरः । १ । ७ । २७ ॥ (यथा, देवीभागवते । १ । १४ । २४ ।

"इत्थं व्यासः शुकं प्राप्तं प्रेम्णोत्थाय ससम्भ्रमः ।
आलिलिङ्ग सुतुर्व्वाक्यं मूर्द्ध्नि तस्य चकार ह ॥")

नर्म्म । इति मेदिनी । ने, ६४ ॥

प्रेमपातनं, क्ली, (प्रेम्णः स्नेहस्य पातनं यस्मात् । प्रेम्णा पातनं यस्येति वा ।) रोदनम् । नेत्रजलम् । इति शब्दचन्द्रिका ॥

प्रेमभक्तिः, स्त्री, (प्रेम्णा भक्तिः ।) स्नेहयुक्तश्रीकृष्णसेवा । विष्णुकान्तिकममता । तल्लक्षणं यथा, नारदपञ्चरात्रे ।

"अनन्यममता विष्णौ ममता प्रेमसंयुता ।
भक्तिरित्युच्यते भीष्म ! प्रह्लादोद्धवनारदैरिति ॥
प्रेमभक्तेश्च माहात्म्यं भक्तेर्म्माहात्म्यतः परम् ।
सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम् ॥"*॥

अथ प्रेमसम्पत्तिचिह्नानि यथा, भागवते ७ स्कन्धे ७ अध्याये श्रीप्रह्लादस्य बालानुशासने ।

"निशम्य कर्म्माणि गुणानतुल्यान्
वीर्य्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥
यदा ग्रहग्रस्त इव क्वचिद्धस-
त्याक्रन्दते ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे जगत्पते
नारायणेत्यात्ममतिर्गतत्रपः ॥
तदा पुमान् मुक्तसमस्तबन्धन-
स्तद्भावभावानुकृताशयाकृतिः ।
निर्द्दग्धबीजानुशयो मदीयसा
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥"

इति श्रीहरिभक्तिविलासे ११ विलासः ॥

प्रेमा, [न्] पुं, (प्रिय+इमनिच् । प्रो तर्पणे+मनिन् वा ।) स्नेहः । इत्यमरः । १ । ७ । २७ ॥ अस्य लक्षणं यथा,—

"सर्व्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे ।
यद्भावबन्धनं यूनोः स प्रेमा परिकीर्त्तितः ॥"

इत्युज्ज्वलनीलमणिः ॥

वासवः । वायुः । इति मेदिनी । ने, ६४ ॥

प्रेमालिङ्गनं, क्ली, (प्रेम्णा यदालिङ्गनम्।) स्नेहेन परिष्वङ्गः। नायकनायिकयोरालिङ्गनविशेषः। तल्लक्षणं यथा। नायककटिं नायिकयैकपादेन वेष्टयित्वा द्वितीयं पादं तस्य जङ्घोपरि स्थापयित्वा यदालिङ्गनं तत्। इति कामशास्त्रम्॥

प्रेमी, [न्] त्रि, (प्रेम अस्यास्तीति। इनिः।) प्रेमयुक्तः। स्नेहविशिष्टः। प्रेमशब्दादस्यर्थे इनिप्रत्ययेन निष्पन्नः। इति व्याकरणम्॥

प्रेयसी, स्त्री, (इयमनयोरतिशयेन प्रिया। प्रिय+ईयसुन्। "प्रियस्थिरेति।" ६।४।१५७। इति प्रादेशः। स्त्रियां ङीप्।) प्रियतमा नारी। तत्पर्य्यायः। दयिता २ कान्ता ३ प्राणेशा ४ वल्लभा ५ प्रिया ६ हृदयेशा ७ प्राणसमा ८ प्रेष्ठा ९ प्रणयिनी १०। इति हेमचन्द्रः॥

प्रेयान् [स्] पुं, (अयमनयोरतिशयेन प्रियः। प्रिय+ईयसुन्। प्रादेशः।) पतिः। तत्पर्य्यायः। दयितः २ कान्तः ३ प्राणेशः ४ वल्लभः ५ प्रियः ६ हृदयेशः ७ प्राणसमः ८ प्रेष्ठः ९ प्रणयी १०। इति हेमचन्द्रः॥ अतिप्रिये, त्रि। इति जटाधरः॥

प्रेरणं, क्ली, (प्र+ईर्+णिच्+ल्युट्।) प्रेषणम्। पाठान इति भाषा। यथा, मेघदूते। ३। ५५।

"धिक् त्वापले धतसिमवत्सलत्वं
यत्प्रेरणादुत्तरलीभवन्त्या॥"

प्रेरणा, स्त्री, (प्र+ईर्+णिच्+"ग्रहावृधिस्रुभ्यो युच्।" ३।३।१०७। इति युच्।) चोदना। (यथा, मेघदूते। ७०।

"द्रौण्ढानां भवति विफला प्रेरणा चूर्ध्वसृष्टिः॥")

फलभावना। विधिरिति यावत्। इति धर्म्मदीपिका॥

प्रेरितः, त्रि, (प्र+ईर्+क्तः।) प्रेषितः। यथा,—

"नपुंसकमिति ज्ञात्वा प्रियायै प्रेरितं मनः।
मनस्त्वेव रमते हता वाचिनिना वयम्॥"

इति प्राचीनाः॥

प्रेर्ता [तृ] पुं, (प्रकर्षेण ईर्त्ते इति। प्र+ईर् गतौ+"प्र ईरश्च दोस्तुट् च।" उणा० ४।२१६। इति क्तनिप् तुड़ागमश्च।) वसुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

प्रेर्वरी, स्त्री, (प्रकर्षेण ईर्त्ते इति। प्र+ईर् गतौ+"प्र ईरश्च दोस्तुट् च।" उणा० ४।२१६। इति क्तनिप् तुट् च। "वनोरच।" ४।१।७। इति ङीप् रक्षान्तादेशः।) नदी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

प्रेष, अं गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।)

प्रेषः, पुं (प्र+ईष्+घञ्।) प्रेषणम्। पीड़ा। इति जटाधरः॥

प्रेषणं, क्ली, (प्रेष्+भावे ल्युट्।) प्रेरणम्। यथा,

"जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे।
मित्रञ्चापदि काले च भार्य्याञ्च विभवक्षये॥"

इति चाणक्यसंग्रहः॥

प्रेषितं, त्रि, (प्रेष्+क्तः।) प्रेरितम्। तत्पर्य्यायः। प्रस्थापितम् २ प्रतिग्रहम् ३ प्रतिहृतम् ४। इति हेमचन्द्रः॥ (यथा, देवीभागवते। १।११।४६।

"प्रेषितोऽहं महाभाग! शक्रेण त्वां विवक्षया।
कथितं प्रभुणा यच्च तद् ब्रवीमि महामते!॥")

प्रेष्ठः, त्रि, (अयमेषामतिशयेन प्रिय इति। प्रिय+इष्ठन्। प्रादेशः।) अतिशयप्रियः। इत्यमरः। २। १। १११॥

प्रेष्ठा, स्त्री, (प्रेष्ठ+टाप्।) प्रेयसी। इति हेमचन्द्रः॥ जङ्घा। इति शब्दचन्द्रिका॥

प्रेष्यः, त्रि, (प्र+ईष्+कर्म्मणि ण्यत्।) दासः। इत्यमरः। २। १०। १७॥ (यथा, मनौ। ३। १५३।

"प्रेष्यो ग्रामस्य राज्ञश्च कुलस्री श्यावदन्तकः॥")

प्रेरणीयश्च॥

प्रेष्यः, पुं, (प्र+इष्+क्यप्। "प्राद्रुहोढोढ्येषेष्येषु।" ६।१।८६। इत्यस्य वार्त्तिकोक्त्या वृद्धिः।) क्लेशः। मर्द्दनम्। उन्मादः। प्रेषणम्। इति मेदिनी। षे, ६॥

प्रेष्यः, पुं, (प्र+इष्+कर्म्मणि ण्यत्। "प्राद्रुहोढोढ्येषेष्येषु।" ६।१।८६। इत्यस्य वार्त्तिकोक्त्या वृद्धिः।) क्लेशः। मर्द्दनम्। उन्मादः। प्रेषणम्। इति मेदिनी। षे, ६॥

प्रेष्यः, पुं, (प्र+इष्+कर्म्मणि ण्यत्। "प्राद्रुहोढोढ्येषेष्येषु।" ६।१।८६। इत्यस्य वार्त्तिकोक्त्या वृद्धिः।) प्रेष्यः। इत्यमरटीकायां भरतः॥ (यथा, कुमारे। ६। ५८।

"अङ्गं प्रैष्यभावे वः स्यादवरं चरणाङ्कितम्।
विभक्तानुग्रहं मन्ये हिरूपमपि मे वपुः॥"

क्ली, प्रेष्यस्य भावः। दासकर्म्म। यथा, कथासरित्सागरे। ३०। ६५।

"गवादिरक्षकान् पुत्रान् भार्य्यां कर्म्मकरीं निजाम्।
तस्य ज्ञात्वा यदाभ्यर्णे प्रेष्यं कुर्व्वन्नुवास सः॥")

प्रोक्तं, त्रि, (प्रकर्षेण उच्यते स्मेति। प्र+वच्+क्तः।) कथितम्। प्रकर्षेणोक्तम्। यथा,—

"अमरौघमुकप्रोक्तं निबं भागवतं शृणु॥"

इति श्रीभागवतम्॥

प्रोक्षणं, क्ली, (प्र+उक्ष सेचने+ल्युट्।) यज्ञार्थपशुसेचनम्। इत्यमरः। २। ७। २६॥ (यथा, महाभारते। ५। १७। ६।

"य इमे ब्राह्मणाः प्रोक्ता मन्त्रा वै प्रोक्षणे पशोः।
इते प्रमाणं भवतः उताहो नेति वासव!॥"

आहादनुचितसंस्कारः। यथा, भागवते। ६। ६। ८।

"चोदितः प्रोक्षणायाह दुर्मेतदकर्म्मकम्॥")

वधः। सेचनम्। इति मेदिनी। क्षे, ६४॥ (यथा, मनुः। ५। ११८।

"अद्भिस्तु प्रोक्षणं शौचं वस्त्राणां क्षान्यवाससाम्।
प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते॥")

प्रोचितं, त्रि, (प्र+उच+क्त।) निहतम्। सिक्तम्। इति मेदिनी। ते, १३६॥ यज्ञार्थे मन्त्रैः संस्कृतमांसादि। यथा,—

"भक्षयेत् प्रोचितं मांसं ब्राह्मणानां कदाचन।
दैवे नियुक्तः श्राद्धे वा नियमे तु विवर्ज्जयेत्॥"

आरण्यानामिदानीन्तनप्रोचणापेक्षा नास्ति। यथा, महाभारते।

"आरण्याः सर्व्वदेवत्याः प्रोचिताः सर्व्वतो मृगाः।
अगस्त्येन पुरा राजन्! मृगया तेन पूज्यते॥"

इति तिथ्यादितत्त्वम्॥

प्रोज्झासनं, क्ली, (प्र+उद्+जस् हिंसायाम्+णिच्+ल्युट्।) मारणम्। इति हेमचन्द्रः। ३। ३४॥

प्रोज्झितं, त्रि, (प्र+उज्झ+कर्म्मणि क्तः।) त्यक्तम्। यथा, श्रीभागवते। १। १। २।

"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सताम्॥"

प्रोज्झनं, क्ली, (प्र+उज्झ+ल्युट्।) प्रवर्जनम्। लोपनम्। मोछा इति भाषा॥ यथा,—

"प्रोज्झनैर्वामपादेन दरिद्रो भवति ध्रुवम्।
वैरिणाशकरं प्रोक्तं कवचं वज्रकारकम्॥"

इति रुद्रयामले वैरिहरकालीकवचम्॥

प्रोञ्छः, पुं, (प्रकर्षेण अञ्छते निष्ठीवनादिकं प्राप्नोतीति। प्र+अञ्छि गतौ+अच्। पृषोदरादित्वात् अस्य उत्वम्।) पतद्ग्रहः। पौगदान इति भाषा। यथा,—

"स्नानाचमनकः प्रोञ्छः कटकोलः पतद्ग्रहः॥"

इति हारावली। ४७॥

प्रोतं, क्ली, (प्र+वेञ् स्यूतौ+क्तः। यजादित्वात् सम्प्रसारणम्।) वस्त्रम्। इति जटाधरः॥

प्रोतं, त्रि, (प्र+वेञ्+क्तः। यजादित्वात् सम्प्रसारणम्।) खचितम्। इति मेदिनी। ते, ३७॥ स्यूतम्। (यथा, श्रीकृष्णचरिते। १५। २५।

"नीरन्ध्रमात्तपरिरम्भविजृम्भणस्य
रम्भोरुभिः सह विलासिजनस्य कामः।
प्रोतं विधातुमिव चेतसि रागसूत्रं
रोमाञ्चकञ्चुकनिचयं प्रपुरोचकार॥")

गुम्फितम्। इति हेमचन्द्रः॥

प्रोतोत्सादनं, क्ली, (प्रोते स्यूते सति प्रोतानां वस्त्राणां वा उत्सादनं उत्तोलनं उच्चालनं वा यत्र।) वस्त्रकुट्टिमम्। छत्रम्। इति त्रिकाण्डशेषः॥

प्रोतृपजः, पुं, (प्रकर्षेण उत्पजतीति। प्र+उत्+पज्+अच्।) वृक्षविशेषः। तत्पर्य्यायः। सिंहशालूकः २ छड़ीलः ३ छटा पिङ्गा ५। इति शब्दमाला॥

प्रोतृफुल्लं, त्रि, (प्रकर्षेण उत्फुल्लम्। प्र+उत्+फुल्ल विकासे+कर्त्तरि अच् वा।) विकसितम्। यथा,—

"ये वर्द्धिताः करिकपोलमदेन भृङ्गाः
प्रोतृफुल्लपङ्कजरजःसुरभीलताङ्गाः।
ते साम्प्रतं विधिवशाद्गमयन्ति कालं
निम्बेषु पार्कफुसुमेषु करीलकेषु॥"

इति भामिनीविलासः॥

प्रोत्साहः, पुं, (प्र+उत्+सह+घञ्।) प्रहर्षोत्साहः। "कर्म्मसु सुकरप्रथय उत्साह इति मधुः॥ कर्म्मसु दृढ़यत्नकारको भावः उत्साह

इति रमानाथः ॥ कर्म्मसु प्रत्यय उत्साह इति नयनानन्दः। अग्रथे बलोद्यम उत्साह इति केचित्।" इत्यमरटीकायां भरतः॥ (यथा, कथासरित्सागरे। १६। ६७।

"सोऽस्याः प्रोत्साहविश्लेषदुःखं यावदृच्यपो-
इति।
तावत् पद्मावतीपार्श्वं प्रययुस्ते महत्तराः॥")

प्रोष, ऋ ज पर्य्यापत्तौ। इति कविकल्पद्रुमः॥(भ्वा०-उभ०-अक०-सेट्।) रेफयुक्तः। ऋ, अपप्रोषत्। ज, प्रोषति प्रोषते। पर्य्यापत्तं सामर्थ्यम्। प्रपुप्रोषासे न कश्चन। पर्य्यापत्तं परिपूर्णता। इति गोविन्दभट्टः। इति दुर्गादासः॥

प्रोषः, पुं, क्ली, (प्रवते इति। प्रुष् गतौ+"तिथपृष्ठगूथयूथप्रोथाः।" उणा० २। १२। इति थक् निपातनात् गुणः। यद्वा, प्रोषते इति। प्रोष पर्य्यापत्तौ+"पुंसि संज्ञायां घः प्रायेण।" ३।३। ११८। इति घः।) अश्वनासिका। इत्यमरः। २। ८। ४६॥ (यथा, माघे ११। ११।

"रिरसयिषति भूयः ग्रथ्यमये विकीर्णं
पटुतरचमलौष्ठः प्रस्फुरत्प्रोथमश्वः॥"

शूकरनासिकापि। यथा, देवीभागवते। ५। २८। २५।

"वाराही शूकराकारा गूढ़प्रोथा सटाभृता॥")

प्रोषः, पुं, (प्रोषते इति। प्रोष पर्य्यापत्तौ+"पुंसि संज्ञायां घः प्रायेण।" ३।३। ११८। इति घः। यद्वा, प्रुष् गतौ+"तिथपृष्ठगूथयूथप्रोथाः।" उणा० २। १२। इति थक्। निपातनात् गुणः।) कटी। इति मेदिनी। षे, १०॥ घाटकः। इति त्रिकाण्डशेषः॥ क्षीरगर्भः। इति विश्वः॥ गर्भः। औषधम्। स्निक्। अश्वसुखम्। इति संक्षिप्तसारोणादिवृत्तिः॥

प्रोषः, त्रि, (प्रवते इति। प्रुष् गतौ+"तिथपृष्ठगूथयूथप्रोथाः।" उणा० २। १२। इति थक्। निपातनात् गुणः।) अध्वगः। इति मेदिनी। षे, १०॥ प्रथितः। इति त्रिकाण्डशेषः॥ स्थापितः। इति सिद्धान्तकौमुद्यादिवृत्तिः॥

प्रोषः, पुं, (प्रुष दाहे+भावे घञ्।) सन्तापः। इति राजनिर्घण्टः॥

प्रोषितः, त्रि, (वस्+क्तः। इट्। सम्प्रसारणम्। प्रकृष्टदूरं उषितः।) प्रवासगतः। यथा,—

"आर्त्तो सुहृता हृष्टे प्रोषिते मलिना हृता।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता॥"
इति शुद्धितत्त्वम्॥

(दूरीभूतः। यथा, कथासरित्सागरे। १। १४।

"पिहितहृदयस्तिधिषयो
रुचिरः प्रज्ञामरीचिनिचयस्ते।
तीक्ष्णांशोरिव सहजः
प्रोषिततिमिरः करोत्वोघ्राः॥")

प्रोषितभर्तृका, स्त्री, (प्रोषितो विदेशगतो भर्त्ता यस्याः। समासान्तकप्रत्ययः।) विदेशगतपतिका। इति जटाधरः॥ स्त्रीयादिनायिकाभेदः। तस्या लक्षणं यथा। देशान्तरे गते भर्त्तरि सन्तापाकुला प्रोषितभर्तृका। अस्याश्चेष्टा दशावस्था। यथा। [पद्मभिलाषः १ चिन्ता २ स्मृतिः ३ गुणोत्कीर्त्तनम् ४ उद्वेगः ५ विलापः ६ उन्मादः ७ व्याधिः ८ जडता ९ निधनम् १०। सुप्ता प्रोषितभर्तृका यथा,—

"दुःखं दीर्घतरं वहन्त्यपि सखीवर्गाय नो भाषते
ग्रैवालैः ग्रथनं वृथानयपि पुनः श्रेते न वा
लज्जया।
कक्षे गद्गदवाचमर्पयति दृशा धत्ते न वाक्षोदकं
सन्तापं सहते यदम्बुजमुखी तद्वेद वेतोभवः॥"

मुग्धा प्रोषितभर्तृका यथा,—

"वासस्तदेव वपुषो वलयन्तदेव
वृत्तस्य सैव वचनस्य च रञ्जकाञ्चौ।
वाचालभङ्गसुभगे सुरतौ समस्त-
मद्याधिकं भवति तत् सखि किन्निदानम्॥"

प्रगल्भा प्रोषितभर्तृका यथा,—

"माला बालाम्बुजदलमयी मौक्तिकी हार-
यष्टिः
काञ्ची स्थानात् प्रसरति हरौ सुभ्रुवः प्रस्थितेव।
अन्यद्वस्तु क्षिमपि धमनौ विद्यते वा नवेति
ज्ञातुं वाहोरहह वलयं याभिमुखं प्रयाति॥"

परकीया प्रोषितभर्तृका यथा,—

"अश्रूः पद्मदलं ददाति तदपि भ्रूसंज्ञया यच्छते
सद्यो मर्म्मरभङ्गया न च तया संसृज्यते
पाणिना।
यातुर्बाधि सुहृज्जनस्य वचसा प्रत्युत्तरं दीयते
श्वासः किन्तु न सूच्यते द्रुतवहक्रूरः करङ्गी-
डया॥"

सामान्यवनिता प्रोषितभर्तृका यथा,—

"विरहविदितमन्युःप्रेम विज्ञाय कान्तः
पुनरपि वसु तस्मादेह्य मे दास्यतीति।
मरिचनिचयमश्नोर्म्मस्य वाक्षोदकिन्दून्
क्षपति च पुरयोषिद्वारदेशोपविष्टा॥"
इति रसमञ्जरी॥

(अस्याः अवस्थानं यदुक्तं चिन्तामणौ तदृयथा,

"द्वारं परयदि यानं समाजोत्सवदर्शनम्।
क्रीडां शरीरसंस्कारं त्यजेत् प्रोषितभर्तृका॥")

प्रोष्ठः, पुं, (प्रकृष्टः ओष्ठोऽस्येति। "ओष्ठोष्ठयोः समासे वा।" २। २। ६४। इत्यस्य वार्त्तिकोक्त्या साधुः।) प्रोष्ठीमत्स्यः। इत्यमरटीकायां रायमुकुटः॥ (जनपदविशेषः। यथा, महाभारते। ६। ९। ६१।

"वाटधाः कोरकाः प्रोष्ठाः समवेगवयाश्चया॥"

गौः। इति सिद्धान्तकौमुदी। ५। ४। १२०।)

प्रोष्ठपदः, पुं, (प्रोष्ठो गौरुक्षेव पादौ यस्य सः। "सुप्रातसुश्वेति।" ५। ४। १२०। इति अच् प्रत्ययेन साधुः। प्रोष्ठपदो नक्षत्रविशेषस्तद्युक्ता पौर्णमासी यत्र मासे। अण्। पक्षे न वृद्धिः।) भाद्रमासः। इत्यमरः॥ (नक्षत्रविशेषः। यथा, महाभारते। ६। ३। १४।

"शुक्रः प्रोष्ठपदे पूर्व्वे समारुह्य विरोचते॥"

यथा च मार्कण्डेये। ३३। १५।

"अजाविकं प्रोष्ठपदे विन्देद्वार्द्धुषोत्तरे॥"

गोतुल्यपदयुक्ते, त्रि। इति शाकरत्नम्॥)

प्रोष्ठपदाः, स्त्री, (प्रोष्ठो गौरुक्षेव पादा यासाम्। "सुप्रातसुश्वेति।" ५। ४। १२०। इति बहुव्रीहावच् पक्षावच्च निपातितः।) पूर्व्वभाद्रपदनक्षत्रम्। २५। उत्तरभाद्रपदनक्षत्रम्। २६। तत्पर्य्यायः। भाद्रपदाः २। इत्यमरः। १। ३। २२॥ द्वे पूर्व्वभाद्रपदोत्तरभाद्रपदासु प्रोष्ठो गौः भद्रश्च गौः तस्येव पादा आसां तास्तथा। पूर्व्वे प्रोष्ठपदे द्वे उत्तरे तु भाद्रपदे द्वे समुदायस्यासां चतुःसंख्य इति बहुवचनम्। कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्द्वित्वाद्द्विवचनम्। इति भरतः॥ भाद्रपदशब्देन तारकाविशेषाणां समुदाय उच्यते तिरोहितावयवभेदपक्षे एकवचनम्। प्रोष्ठपदाशब्दस्तूद्भिन्नावयवभेदपक्षे बहुवचनमिति मैत्रेयः। इति रायमुकुटः॥

प्रोष्ठपदी, स्त्री, (प्रोष्ठपदाभिर्युक्ता पौर्णमासी। अण्। स्त्रियां ङीप्।) भाद्री पूर्णिमा। यथा,—

"प्रोष्ठपद्यामतीतायां तथा क्षत्रा त्रयोदशी।
एतांस्तु श्राद्धकालान् वै पितॄनाह प्रजापतिः॥"
इति तिथ्यादितत्त्वम्॥

अपि च।

"लिखित्वा तत्र यो दद्याद्वेमसिंहसमन्वितम्।
प्रोष्ठपद्यां पौर्णमास्यां स याति परमां गतिम्॥"
इति श्रीभागवतटीकायां श्रीधरस्वामी॥

प्रोष्ठपादः, त्रि, (प्रोष्ठपद+"सन्धिवेलेति।" ४। ३। १६। इत्यण्। "ज्ये प्रोष्ठपदानाम्।" ७। ३। १८। इति उत्तरपदस्याचामादेरचो वृद्धिः।) प्रोष्ठपदासु जातः। इति सिद्धान्तकौमुदी॥

प्रोष्ठी, स्त्री, पुं, (प्रकृष्टः ओष्ठो यस्याः। "ओष्ठोत्वयोः समासे वा।" नासिकोदरोष्ठेति जातेरिति वा ङीप्।) मत्स्यभेदः। पुँटी माछ इति भाषा। तत्पर्य्यायः। शूफरी २ शूफरः ३। इत्यमरः॥ श्वेतकोलः ४। इति शब्दरत्नावली॥ तस्या गुणाः। तिक्तत्वम्। कटुत्वम्। स्वादुत्वम्। शुक्रकारित्वम्। कफवातनाशित्वञ्च। इति राजवल्लभः॥ स्निग्धत्वम्। आस्यकण्ठरोगनाशित्वम्। श्रेष्ठत्वञ्च। इति राजनिर्घण्टः॥

प्रोढ़ः, पुं, (प्रोह्यते वितर्क्यते विस्मयाकुलितैरिति। प्र+ऊह+घञ्।) इक्षिपरुषः। पर्व्व। इति विश्वमेदिन्यौ। हे, ५। गजपरुषपर्व्व। इति त्रिकाण्डशेषशब्दरत्नावल्यौ॥

प्रोढ़ः, त्रि, (प्रकर्षेण ऊहते वितर्कयतीति। प्र+ऊह+कः।) निपुणः। (प्र+ऊह+भावे घञ्।) तर्कः। इति मेदिनी। हे, ६॥

प्रौढ़, त्रि, (प्रोह्यते क्षेपे। प्र+वह+क्तः। सम्प्रसारणम्। "प्रादूहोढोढ्येषेष्येषु।" इति वृद्धिः।) वर्द्धितम्। तत्पर्य्यायः। प्रवृद्धम् २ एधितम् ३। इत्यमरः। ३। १। ७६॥ (यथा, मेघदूते। २७।

"त्वत्सम्पर्कात् पुलकितमिव प्रौढ़पुष्पैः कदम्बैः॥")

प्रगल्भः। इति हेमचन्द्रः। ६। १३१॥ (यथा, रघुः। ६। ५८।
"त्रासातिमात्रचटुलैः स्खलितः सनेत्रैः
प्रौढ़प्रिया नयनविभ्रमचेष्टितानि॥")
निपुणः। इति राजनिर्घण्टः॥ (यथा, भागवते। ३। २। ६।
"ईक्षितन्यायः पुरुषप्रौढ़ा एकारामाश्च सात्वताः॥")
प्रकर्षेण ऊढ़ः॥

प्रौढ़पादः, पुं, (प्रौढ़ः पादो यस्य।) आसनारोपितपादतलः। आसनोपरिपादतलद्वयसंयोगपूर्ब्बकोपवेशः। वस्त्रादिना कृतपृष्ठजानुजङ्घाबन्धः। वस्त्रादिद्वारा पृष्ठजानुजङ्घाद्वयदृढ़बन्धनपूर्ब्बकोपवेशः। यथा,—
"आसनारूढ़पादस्तु जानुनोर्व्यङ्कयोस्तथा।
कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते॥
स्नानमाचमनं होमं भोजनं देवतार्चनम्।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पिङ्गलपञ्चमम्॥"
इति कात्यायनः॥ *॥

अनेकोद्वाह्ये दारुग्निले भूमिसमे दृष्टकाद्य संकीर्णीभूता इति बौधायनवचनात्तथाविधे आरूढ़पादोऽपि कुर्य्यात्। इत्याह्निकतत्त्वम्॥

प्रौढ़ा, स्त्री, (प्रौढ़+टाप्।) नायिकाभेदः। तत्पर्य्यायः। चिरिण्टी २ सुवया ३ क्षामा ४ दृढ़रजाः ५। इति राजनिर्घण्टः॥ यथा,—
"बाला तु तरुणी प्रौढ़ा वृद्धा भवति नायिका।
गुणयोगेन रन्तव्या नारी वश्या भवेत्तदा॥"
त्रिंशद्वर्षादूर्द्धं पञ्चपञ्चाशद्वर्षपर्य्यन्तं प्रौढ़ावस्था। यथा,—
"आषोड़शी भवेद्बाला तरुणी त्रिंशता मता।
पञ्चपञ्चाशती प्रौढ़ा भवेद्वृद्धा ततः परम्॥"
अस्या वशत्वकारणं यथा,—
"अलङ्कारादिभिर्बाला तरुणी रतियोगतः।
प्रेमदानादिभिः प्रौढ़ा वृद्धा च दृढ़ताड़नात्॥"
तस्या रमणे दोषो यथा,—
"बाला तु प्रायदा प्रोक्ता तरुणी प्रायहारिणी।
प्रौढ़ा करोति दृढ़त्वं वृद्धा मरणदा भवेत्॥"
इति रतिमञ्जरी॥
सुग्धादिविविधान्तर्गतप्रगल्भा नायिका। तत्र प्रौढ़ा खण्डिता यथा,—
"मासद्वीक्ष्य विपक्षपक्षलङ्घः पादाम्बुजालक्तकै-
रङ्कितानननमानतीकृतसुखी चित्रार्पितेवाभवत्।
रुद्धं नोक्तवती न वा कृतवती निश्वासकोच्चा-
दग्रः
प्रातर्मङ्गलमङ्गला करतलादादर्शमादर्शयत्॥"
प्रौढ़ा कलहान्तरिता यथा,—
"अकरोः किमु नेत्रयोर्निमानं
किमकार्षीः करपल्लवे निरोधम्।
कलहं किमधाः क्रुधा रसज्ञे
हितमर्थं न विदन्ति देवदृशः॥"
प्रौढ़ा उत्कण्ठिता यथा,—
"भ्रातर्नः कुलसञ्चियूथिरसालवन्यो
मातस्त्वमखिनि पितस्त्विमिर प्रसीद।
पृच्छामि किञ्च नवनीरधराभिरामो
दामोदरः कथय किं न समागमाम॥"
प्रौढ़ा वासकसज्जा यथा,—
"कृतं वपुषि भूषणं चिकुरधोरयौ धूपिता
लता शयनसन्निधौ क्रमुकवीटिकासम्भृतिः।
अकारि हरिणीदृशा भवनमेत्य देहत्विषा
स्फुरत्कनककेतकीकुसुमकान्तिभिर्दीपनम्॥"
प्रौढ़ाभिसारिका यथा,—
"स्फुरदुरसिजभारभङ्गुराङ्गी
किसलयकोमलकान्तिना पदेन।
अथ कथय कथं सहेत गन्तुं
यदि न निशासु मनोरथो रथः स्यात्॥"
प्रौढ़ा प्रवत्स्यत्पतिका यथा,—
"गायं सुचति सुभ्रुवामपि तनुत्यागे वियोगज्वर-
स्तेनाहं विहिताञ्जलिर्यदुपते! पृच्छामि सत्यं वद।
ताम्बूलं कुसुमं मटीरमुदकं यद्वन्धुभिर्दीयते
तत् स्यादत्र परत्र वा किमु विषज्वालावली-
दुःसहम्॥"
इति रसमञ्जरी॥
अन्यत् प्रगल्भाशब्दे द्रष्टव्यम्॥

प्रौढ़िः, स्त्री, (प्र+वह+क्तिन्। प्राढ़ूहेति वृद्धिः।) सामर्थ्यम्। इति सुग्धबोधव्याकरणम्॥ तत्पर्य्यायः। उत्साहः २ प्रगल्भता ३ अभियोगः ४ उद्यमः ५ उद्योगः ६ क्रियादैतिका ७ अध्यवसायः ८ ऊर्ज्जः ९। इति हेमचन्द्रः। २। २१४॥ (यथा, कथासरित्सागरे। १४। ६३।
"यथा यथा च दम्पत्योः प्रौढ़िं परिचयो ययौ।
तयोस्तथा तथा प्रेम नवीभावमिवाययौ॥")

प्रौढ्यः, त्रि, (प्र+ओढ्य अपनयने+अच्।) निपुणः। इति केचित्॥

प्रौष्ठपदः, पुं, (प्रोष्ठौ गौरुस्त्रेव पादा यासामिति प्रोष्ठपदा नक्षत्रविशेषाः। तद्युक्ता पौर्णमासी। प्रोष्ठपद+"नक्षत्रेण युक्तः कालः।" ४।२।३। इति अण्। ङीप्। प्रौष्ठपदी पौर्णमास्यस्मिन्। प्रौष्ठपदी+"सास्मिन् पौर्णमासीति।"४।२।२१। इति अण्।) भाद्रमासः। इत्यमरः। १। ३।२२। (यथा, महाभारते। १३। १०६। २८।
"प्रौष्ठपद्यन्तु यो मासमेकाहारो भवेन्नरः।
धनाढ्यः स्फीतमचलमैश्वर्यं प्रतिपद्यते॥"
प्रोष्ठपदासु भवे, त्रि। इति सिद्धान्तकौमुदी। ७। ३। १८॥)

प्रौढ़ः, पुं, (प्र+ऊह+कः। प्राढ़ूहेति वृद्धिः।) प्रकर्षोहः। इति सुग्धबोधव्याकरणम्।

प्लक्ष, न भक्षणे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) अन्तःस्थद्वितीययुक्तः। न, प्लक्षति प्लक्षते। इति दुर्गादासः॥

प्लक्षः, पुं, (प्लक्षते भक्षते विहगादिभिरिति। प्लक्ष+कर्म्मणि घञ्।) वृक्षविशेषः। पाकुड़ इति भाषा। तत्पर्य्यायः। जटी २ पर्कटी ३। इत्यमरः॥ पर्कटिः ४ प्लक्षा ५ शीर्षा ६ जटिः ७। इति शब्दरत्नावली॥ कपीतनः ८ चोरी ९ सुपार्श्वः १० कमण्डलुः ११ ब्रह्मी १२ अवरोहशाखी १३ गर्दभाण्डः १४ कपीतकः १५ दृढ़परोहः १६ शवकः १७ शवङ्गः १८ महाद्रुमः १९॥ वृक्षवृक्षपर्य्यायः। क्षुद्रः २० सुशीतः २१ शीतवर्य्यकः २२ पृथुः २३ महावरोहः २४ वृक्षपर्णः २५ पिप्परिः २६ भिदुरः २७ मङ्गलच्छायः २८। अस्य गुणाः। कटुत्वम्। कषायत्वम्। शिशिरत्वम्। रक्तदोषमूर्च्छाभ्रमप्रशमनाग्नित्वञ्च। इति राजनिर्घण्टः॥ व्रणयोनिगददाहपित्तकफशोथरक्तपित्तनाशित्वम्। पर्कटी च स्त्रियामपि। इति भावप्रकाशः॥ कन्दरालवृक्षः। द्वीपभेदः। अश्वत्थवृक्षः। इति मेदिनी। धे, १७॥ पक्षकः। इति हेमचन्द्रः॥

प्लक्षद्वीपः, पुं, (प्लक्षतरुपलक्षितो द्वीपः।) सप्तद्वीपान्तर्गतद्वीपविशेषः। तस्य विवरणं यथा,
सूत उवाच।
"जम्बुद्वीपस्य विस्तारादिगुणेन समन्ततः।
संवेष्टयित्वा क्षीरोदं प्लक्षद्वीपो व्यवस्थितः॥
प्लक्षद्वीपे च विप्रेन्द्राः सप्तासन् कुलपर्व्वताः।
उच्चायताः सुपर्व्वाणः सिद्धसंचनिषेविताः॥
गोमेदः प्रथमस्तेषां द्वितीयश्चन्द्र उच्यते।
नारदो दुन्दुभिश्चैव सोमश्च ऋषभस्तथा॥
विभ्राजः सप्तमः प्रोक्तो ब्रह्मणोऽत्यन्तवल्लभः।
तत्र देवर्षिगन्धर्व्वैः सिद्धैश्च भगवानजः॥
उपास्यते स विश्वात्मा साक्षी सर्व्वस्य विश्वदृक्।
तेषु पुण्या जनपदा नाधयो व्याधयोऽपि च॥
न तत्र पापकर्म्माणः पुरुषा वा कदाचन।
तेषां नद्यः सप्त चैव वर्षाणान्तु समुद्गताः॥
तासु ब्रह्मर्षयो नित्यं पितामहमुपासते।
अनुतप्ता शिखी चैव विपाप्मा त्रिदिवा क्लमा॥
अमृता सुकृता चैव नामतः परिकीर्त्तिताः।
क्षुद्रनद्यस्संख्याताः सरांसि सुबहून्यपि॥
न वै तेषु युगावस्था पुरुषा वै चिरायुषः।
आर्य्यकाः कुरवश्चैव विदग्धा भाविनस्तथा॥
ब्रह्मक्षत्रियविट्शूद्रास्तस्मिन् द्वीपे प्रकीर्त्तिताः।
इज्यते भगवान् सोमो वर्णैश्च निवासिभिः॥
तेषाञ्च सोमसायुज्यं सारूप्यं सुनिपुङ्गवाः।
सर्व्वे धर्म्मपरा नित्यं नित्यं मुदितमानसाः॥
पञ्चवर्षसहस्राणि जीवन्ति च निरामयाः॥"
इति कौर्म्मे भुवनकोषे ४६ अध्यायः॥ *॥
अपि च "ऋषिरुवाच। अतःपरं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते। जम्बुद्वीपो यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्ज्जम्बूखेन। लवणोदधिरपि ततो द्विगुणविष्कम्भेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन। प्लक्षो जम्बुप्रमाणो द्वीपाख्यातिकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। शिवं वयसं शुभं ग्राम्यं क्षेम-

मन्दतमभयमिति वर्षाणि। तेषु गिरयो नद्यश्च सप्तैवाभिख्याताः। मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा वृषणा आङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः। यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्द्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसन्दर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते। प्लक्षस्य विष्णो रूपं यत् सत्यर्तस्य ब्रह्मणः। अन्नस्य च रत्नौघं सूर्यमात्मानमीमहीति॥ प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियभोगः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्त्तते। प्लक्षश्च समानेनेन्दुरसोदेनावृतः।" इति श्रीभागवते ५ स्कन्धे २० अध्यायः॥

स्रव, ङ गत्याम्। (भ्वा०-आत्म०-सक०-सेट्।) अन्तःस्थेतीयुक्तः। ङ, स्रवते। भ्रु ङ इत्यनेनेवेरसिद्धे अस्य पाठः स्रविष्यते स्रवते इत्यादि सिद्ध्यर्थः। इति दुर्गादासः॥

स्रवं, क्ली, (स्रवते इति। भ्रु+अच्।) कैवर्त्तीसुस्तकम्। (अस्याः पर्य्यायो यथा,—

"कुटन्नटं दासपुरं वालेयं परिप्लवम्।
स्रवगोपुरगोनर्दं कैवर्त्तीसुस्तकानि च॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) गन्धद्रव्यम्। इति मेदिनी। वे, १८॥ श्रुतगे, त्रि॥

स्रवः, पुं, (भ्रु+"ऋदोरप्।"३।३।५७। इत्यप्।) स्रवणम्। (यथा, हरिवंशे। १२२। १०१।

"सागरानूपविपुलां प्रागुदक्स्रवगोतलाम्।
सर्व्वतोदधिमध्यस्थामभेद्यां त्रिदशैरपि॥"

स्रूयतेऽनेनेति करणे अप्।) मेलः। (यथा, सुश्रुतोपनिषदि। १। २। ७।

"स्रवा क्षते अदृढा यज्ञरूपा
अष्टादशोक्तमवरं येषु कर्म्म।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा
जराम्त्युं ते पुनरेवापि यन्ति॥"

स्रवते सन्तरतीति। भ्रु+अच्।) भेकः। अविः। शपचः। कपिः। जलकाकः। (यथा, सुश्रुते। १। ४६।

"स्रवाणामिक्षुरसाश्वः॥")

कुलकः। प्रवगः। पर्कटीद्रुमः। कारण्डवविहगः। शब्दः। प्रतिगतिः। इति मेदिनी। वे, १६॥ प्रेरणम्। शब्दः। इति शब्दरत्नावली॥ जलान्तरम्। इति हेमचन्द्रः। ३। ५४३॥ पलवः। इति त्रिकाण्डशेषः॥ पोली इति भाषा॥ जलकुटः। इति मिताक्षरा॥ (यथा, मनौ। ५। १२।

"कलविङ्कं स्रवं हंसं चक्राङ्गं ग्रामकुक्कुटम्।
सारसं रज्जुवालञ्च दात्यूहं शुकसारिकं॥"

वकविशेषः। यथा, रामायणे। २। १०३। ४३।

"रथाङ्गहंसा गत्यूहाः स्रवाः कारण्डवाः प्लवाः।
तथा पुंस्कोकिलाः क्रौञ्चा विसंज्ञा भेजिरे दिशः॥"

"स्रवा वकविशेषाः।" इति तट्टीकायां रामानुजः॥) जलचरपक्षिमात्रम्। यथा,—

"हंससारसकाश्चाषवककक्रौञ्चसरारिकाः।
नन्दीमुखीसकादम्बा बलाकाद्याः स्रवाः स्मृताः॥
स्रवन्ते सलिले यस्मादेते तस्मात् स्रवाः स्मृताः॥"

एतेषां मांसगुणाः।

"स्रवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः॥"

इति भावप्रकाशः॥

स्रवकः, पुं, (स्रवते इवेति। भ्रु+अच्। ततः स्वार्थे संज्ञायां वा कन्।) खड्गधारादिनर्मकः। तत्पर्य्यायः। केलकः २। इति त्रिकाण्डशेषः॥ केकलः ३ नर्मुः ४ केलिकोवः ५ कलायनः ६। इति शब्दरत्नावली॥ चण्डालः। इति हलायुधः॥ (सन्तरणोपजीवी। यथा, महाभारते। १३। २३। १५।

"गायना नर्त्तकाश्चैव प्लवका वादकास्तथा।
कथका योधकाश्चैव राजन्नार्हन्ति केतनम्॥")

भेकः। प्लवः। इति राजनिर्घण्टः॥

स्रवगः, पुं, (स्रवेण श्रुतगत्या गच्छतीति। गम्+"अन्येष्वपि दृश्यते।" ३। २। १०१। इति डः।) वानरः। (यथा, रघुवंशे। १२। ७०।

"स सेतुं बन्धयामास स्रवगैर्लवणाम्भसि।
रसातलादिवोन्मग्नं शृङ्गं स्वप्नाय शार्ङ्गिणः॥")

भेकः। सूर्य्यसारथिः। इति मेदिनी। गे, ४२॥ स्रवपत्नी। इति शब्दरत्नावली॥ गिरीवृक्षः। इति राजनिर्घण्टः॥

स्रवगतिः, पुं, (स्रवेण गतिर्यस्य।) भेकः। इति शब्दचन्द्रिका॥ (स्रवस्य भेकादेर्गतौ श्रुतगतौ च, स्त्री॥)

स्रवङ्गः, पुं, (स्रवेण श्रुतगत्या गच्छतीति। गम्+"गमश्च।" ३। २। ४७। इति खच्। "खच डिद्वा वाच्यः।" इति डित्। डित्वात् टेर्लोपः। सुमागमः।) वानरः। इत्यमरः। २। ५। ३॥ (यथा, रामायणे। २। २५। १८।

"स्रवङ्गा वृश्चिका दंशा मशकाश्चैव कानने।
शरीरञ्चाप कौटाश्च माभूवन् ग्रहणे तव॥"

"स्रवङ्गा वानराः।" इति तट्टीकायां रामानुजः॥) रङ्गः। इति शब्दचन्द्रिका॥ प्लवङ्गः। इति राजनिर्घण्टः॥

स्रवङ्गमः, पुं, (स्रवेण गच्छतीति। गम्+"गमश्च।" ३। २। ४७। इति खच्। सुमागमः।) भेकः। वानरः। इत्यमरः। ३। ३। १३०॥ (यथा, रामायणे। ४। ६२। ११।

"एष्यन्ति प्रेषितास्तत्र रामदूताः स्रवङ्गमाः।
आख्येया राममहिषी त्वया तेभ्यो विहङ्गम!॥")

श्रुतगतियुक्ते, त्रि॥

स्रवनः, त्रि, (स्रवते इति। भ्रु+ल्युः।) प्रवणः। क्रमनिम्नभूम्यादिः। यथा,—

"प्रागुदक्स्रवनां भूमिं कारयेत् यत्नतो नरः॥"

इति तिथ्यादितत्त्वे मत्स्यपुराणम्॥

(क्ली, भ्रु+ल्युट्। स्रवः। यथा,—

"प्लयनञ्चासनं वापि नेच्छेदापि द्रवोत्तरम्।
नाम्भातपौ न स्रवनं न यानं नापि वाहनम्॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

स्रावं, क्ली, (प्लक्षस्य फलम्। "प्लक्षादिभ्योऽण्।" ४। ३। १६४। इत्यण्। विधानसामर्थ्यात् तस्य फले न लुक्।) प्लक्षफलस्य फलम्। इत्यमरः। २। ४। १८॥ प्लक्षस्य विकारः। प्लक्षस्य समूहः। प्लक्षस्य भावः। प्लक्षस्येदम्। प्लक्षस्य हितम्। इत्यादि व्याकरणम्॥ (प्लक्षसम्बन्धिनि, त्रि। यथा,—

"नैयग्रोध औदुम्बर आश्वत्थ प्लाक्ष ईतीध्मो भवन्यते वै गात्रब्राध्नरसां यहाः स्त्र एव॥"

इति तैत्तिरीयसंहितायाम्। ३। ४। ८। ४॥)

स्रावणं, क्ली, (स्रु+णिच्+ल्युट्।) द्रवद्रव्यस्योर्द्ध्वप्रापणम्। उथ्लन इति भाषा। यथा,—

"तापनं घृततैलानां स्रावणं गोरसस्य च।
तस्मात्सुदृढं शुद्धेन्तु कठिनन्तु पयो दधि॥"

इति शुद्धितत्त्वम्॥ *॥

मज्जनम्। बहुतरजलसंयोगः। यथा,—

"एतत् श्रुत्वा वचो राजा प्रातिष्ठत भगीरथः।
यत्र तानि शरीराणि सागराणां महात्मनाम्॥
स्रावणार्थं नरश्रेष्ठ! पुण्येन सलिलेन च॥"

इति महाभारते। ३। १११० अध्यायः॥

स्रावितं, त्रि, (स्रु+णिच्+क्तः।) जलादिमज्जनादि। यथा,—

"सुप्रसन्नां सुवदनां करुणार्द्रनिजान्तराम्।
सुधास्रावितभूयिष्ठामार्द्रगन्धानुलेपनाम्॥"

इति गङ्गावाक्यावली॥

(यथा च देवीभागवते। २। ८। १०।

"पुरी सा वासुदेवस्य स्रावितोदधिना ततः॥")

स्रिह, ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) अन्तःस्थेतीयुक्तः। ङ, स्रेहते। इति दुर्गादासः॥

स्रिहा, [न्] पुं, (स्रेहते दृष्टिं गच्छतीति। स्रिह+कनिन्।) प्लीहरोगः। यथा, यक्ष्मतृस्रिहाग्लानि सुखादिव क्षिपन्निति वैद्यकम्। इत्यमरटीकायां भरतः॥ (यथा, याज्ञवल्क्ये। ३। ८४।

"वपावसावहननं नाभिः क्लोम यकृत् स्रिहा।")

प्लीहघ्नः, पुं, (प्लीहानं हन्तीति। हन+टक्।) वृक्षविशेषः। रोहड़ा इति ख्यातः। तत्पर्य्यायः। रोही २ रोहितकः ३ प्लीहशत्रुः ४ दाड़िमपुष्पकः ५ मांसदलनः ६ यकृद्दोरी ७ चलच्छदः ८। इति शब्दचन्द्रिका॥ रौहितेयः ९ रोहितः १० रोहीतकः ११ रौही १२। इति शब्दरत्नावली॥ (अस्य गुणाः रोहितकशब्दे द्रष्टव्याः॥)

प्लीहशत्रुः, पुं, (प्लीहः शत्रुर्नाशकत्वात्।) प्लीहघ्नवृक्षः। इत्यमरः। २। ४। ४६॥ (यथा, वैद्यकरत्नमालायाम्।

"रोही रोहितकः प्लीहशत्रुर्दाड़िमपुष्पकः॥")

प्लीहा, स्त्री, (प्लिह + कः। पृषोदरादित्वात् दीर्घः। स्त्रियां टाप्।) प्लिहरोगः। यथा, यजुर्वेदीये च समन्त्रे। इति बालकाण्डः। इत्यमरटीकायां भरतः॥

प्लीहा, [न्] पुं, (प्लिह + "अशुचन्पूषन्प्लीहन्निति।" उणा० १। १५८। इति कनिन् प्रत्ययेन साधुः।) कुक्षिवामपार्श्वस्थमांसखण्डम्। पिला इति ख्यातम्। तत्पर्य्यायः। गुल्मः २ प्लिहा ३। इत्यमरभरतौ॥ अस्य निदानम्।

"विदाह्यभिष्यन्दिरतस्य जन्तोः
प्रदुष्टमत्यर्थमसृक् कफश्च।
प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ
प्लीहोत्थमेतच्चतुरं वदन्ति॥
तद्वामपार्श्वे परिवृद्धिमेति
विप्लेषतः सीदति चातुरोऽत्र।
मन्दज्वराग्निः कफपित्तलिङ्गै-
रुपद्रुतः क्षीणबलोऽतिपाण्डुः॥"

इति माधवकरः॥ * ॥

रक्तजस्य तस्य लक्षणम्।

"भ्रमो भ्रमो विदाहश्च वैवर्ण्यं गात्रगौरवम्।
मोहो रक्तोद्गमश्च ज्ञेयं रक्तजलक्षणम्॥"*॥

पैत्तिकस्य तस्य लक्षणम्।

"सज्वरः सपिपासश्च सदाहो मोहसंयुतः।
पीतगात्रो विशेषेण प्लीहा पैत्तिक उच्यते॥"

श्लैष्मिकस्य तस्य लक्षणम्।

"प्लीहा मन्दरुजः स्थूलः कठिनो गौरवान्वितः।
अरोचकयुतः श्वेतः प्लीहा कफज उच्यते॥"

वातिकस्य तस्य लक्षणम्।

"नित्यमानद्धकोष्ठः स्यान्नित्योदावर्त्तपीड़ितः।
वेदनाभिः परीतश्च प्लीहा वातिक उच्यते॥
दोषत्रितयरूपाणि प्लीहासाध्ये भवन्ति हि॥"

अथ तस्य चिकित्सा।

"पातव्यो युक्तितः क्षारः क्षीरेणोदधिमुक्तिजः।
तथा दुग्धेन पातव्याः पिप्पल्यः प्लीहशान्तये॥१॥
अर्कपत्रं सलवणं पुटदग्धं सुचूर्णितम्।
निहन्ति मस्तुना पीतं प्लीहानमपि दारुणम्॥२॥
हिङ्गु त्रिकटुकं कुष्ठं यवक्षारश्च सैन्धवम्।
मातुलुङ्गरसोपेतं प्लीहशूलहरं रजः॥ ३॥
पालाशक्षारतोयेन पिप्पली परिभाविता।
प्लीहगुल्मार्त्तिशमनी वह्निमान्द्यहरी मता॥४॥

रसेन जम्बीरफलस्य शुद्ध-
नाभीरजः पीतमवल्गमेव।
प्राशप्रमाणं शमयेदशेषं
प्लीहामयं कूष्माण्डसमानमाशु॥ ५॥

शरपुङ्खमूलकल्कक्षारक्रियाजोड़ितः पीतः।
प्लीहानं यदि न हरते शैलोऽपि तदा जले प्लवते॥ ६॥

सुपक्वसहकारस्य रसः चान्द्रसमन्वितः।
पीतः प्रशमयत्येव प्लीहानं नेह संशयः॥ ७॥
सक्षिप्तं श्लक्ष्णलवणं पिप्पलीपूर्यं निशाप्रमुषितं नरः॥
राजिकाचूर्णसंयुक्तं खादेत् प्लीहोपशान्तये॥"८॥

इति भावप्रकाशः॥ * ॥

"पिप्पलीमधुपानाच्च यथा मधुरभोजनात्।
प्लीहा विनश्यते क्षिप्रं तथा॥ ९॥
केतकीपत्रजं क्षारं घृतेन सह भक्षयेत्।
तक्रेण शरपुङ्खाभ्यां पीत्वा प्लीहां विनाशयेत्॥" १०॥

इति गारुड़े १८७। १८८ अध्यायौ॥

("श्लेष्मितकफप्रसादजं हृदयं तदाश्रया हि ध्वमन्यः प्राणवहाः। तस्याधो वामतः प्लीहा फुप्फुसश्च॥" इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥ अस्य सहेतुकलक्षणादीनि यथा,—

"अग्नितस्यातिसंक्षोभाद् यानयानाभिचेष्टितैः।
अतिव्यवायभाराध्ववमनव्याधिकर्षणैः॥
वामपार्श्वाश्रितः प्लीहा क्षुतः स्थानात् प्रवर्द्धते।
श्लेष्मितं वा रसादिभ्यो विवृद्धत्वं विवर्द्धयेत्॥

इति तस्य प्लीहा कठिनोऽष्ठीलेवादौ वर्द्धमानः कक्षोपसंस्थान उपलभ्यते स चोपेक्षितः क्रमेण कुक्षिं जठरमन्याधिष्ठानञ्च परिक्षिपन्नुदरमभिनिर्व्वर्त्तयति॥

तस्य रूपाणि। दौर्ब्बल्यारोचकाविपाकवर्च्चोमूत्रग्रहतमःपिपासाङ्गमर्द्दच्छर्द्दिमूर्च्छाङ्गसादकासश्वासहृद्दुज्वरानाहाग्निनाशकार्श्यास्यवैरस्यपर्व्वभेदकोष्ठवातशूलान्यपि चोदरमरुचवर्च्चो विवर्णं वा नीलहरितहारिद्ररात्रिमङ्गवति।" चिकित्सास्य यथा,—

"पिप्पलीं तिक्तकं हिङ्गु नागरं हस्तिपिप्पलीम्।
भल्लातकं शिग्रुफलं त्रिफलां कटुरोहिणीम्॥
देवदारुहरिद्रे द्वे सरलातिविषे वचाम्।
कुष्ठं मुस्तं तथा पञ्च लवणानि प्रकल्प्य च।
दधिसर्पिर्वसातैलमज्जयुक्तानि दाहयेत्।
अन्तर्धूममतः क्षारात् विड़ालपदकं पिबेत्।
मदिरा दधिमस्तोष्णजलारिष्टसुरासवैः॥
प्लीहोगं क्षयथुं गुल्मं प्लीहार्शो जठराणि च।
विसूचिकासुदावर्त्तं वातास्रोलाश्च नाशयेत्॥"

इति चरके चिकित्सास्थाने ऽष्टादशेऽध्याये॥)

प्लीहारिः, पुं, (प्लीहाया अरिः शत्रुसन्नाशकत्वात्।) अश्वत्थवृक्षः। इति शब्दचन्द्रिका॥ (प्लीहनाशकवटिकौषधविशेषः। यथा,—

"हिङ्कर्षं लौहभस्मापि कर्षं ताम्रं प्रदापयेत्।
शुद्धसूतं तथा गन्धं कर्षमात्रं भिषग्वरः॥
मृगाजिनं पलं भस्म क्षिप्त्वाकाङ्क्षितचूर्णम्।
एवं भागक्रमेणैव कुर्य्यात् प्लीहारिसंज्ञकम्॥
नवगुञ्जामितं खादेदेष नित्यं हि पूतवान्।
प्लीहानं यकृतं गुल्मं हन्त्यवश्यं न संशयः॥"

इति प्लीहारिरसः॥ * ॥

इति वैद्यकरसेन्द्रसंग्रहे प्लीहाधिकारे॥)

प्लीहाशत्रुः, पुं, (प्लीहायाः शत्रुः।) प्लीहघ्नद्रव्यः। इति केचित्॥

प्लुष्टिः, पुं, (प्लुष्यति दहतीति। प्लुष दाहे + "प्लुषिकुषिशुष्यिभ्यः कित्।" उणा० ३। १५५। इति कित्।) अग्निः। इत्युणादिकोषः। क्षेडः। मर्दनम्। इति संक्षिप्तसारोणादिवृत्तिः॥

प्लुड़, ड सपने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-अनिट्।) अन्तःस्थतृतीययुक्तः। ड, प्लवते। इति दुर्गादासः॥

प्लुतं, क्ली, (प्लु + क्तः।) अश्वगतिविशेषः। स च त्वरया भम्येन गतिः। इत्यमरभरतौ॥ (यथा, अश्ववैद्यके। ३। १३२।

"अथ यः पुच्छतोऽश्वस्य भूमेरविगदो ध्वनिः।
अन्तरुत्पद्यते कश्चित्तदश्वप्लुत उच्यते॥")

तिर्य्यग्गतिः। इति कलिङ्गः॥ (यथा, कथासरित्सागरे। २७। १५६।

"तिर्य्यक्चक्रिर्य्यगेवास्य पेतुर्वक्रप्लुता मृगाः॥")

प्लुतः, पुं, (प्लुतं प्लुतवद्गतिरस्यास्तीति। प्लुत + अच्।) त्रिमात्रवर्णः। इति मेदिनी। ते, ३५॥ यथा,—

"एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम्॥"

इति दुर्गादासादिधृतप्राचीनकारिका॥

(तथाच।

"दूराह्वाने च गाने च रोदने च प्लुतो मतः॥"

इति च दुर्गादासधृतवचनम्॥

प्लु + क्तः।) भम्यगतियुक्ते, त्रि॥ (यथा, हरिवंशे। ६८। ८४।

"रामादनन्तरं जाताः प्लुतौ वै वीर्य्यवत्तरौ।
ताभ्यामेव प्लुताभ्याञ्च चरणेभ्याद्रितौ गिरिः॥"

अन्तर्णिजर्थत्वात् भावितः। यथा, ऋक्संहितायाम्। ५। ३४।

"सवयसे तमसि जगन्यप्लुतं भवति सुदितमभयच्च॥"

सिक्तः। यथा, याज्ञवल्क्ये। १। २३५।

"अग्नौ करिष्यन्नादाय पृच्छेत्प्लवं घृतप्लुतम्॥"

आप्तः। यथा, भागवते। १। २। १४।

"यस्यानुरागप्लुतहासरास-
लीलावलोकप्रतिलब्धमानाः।
व्रजस्त्रियो दृग्भिरनुप्रवृत्त-
धियोऽवतस्थुः किल लब्धयोगाः॥")

प्लुष, उ दहि। भस्मीकरणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्रावेट्।) उ, प्लोषित्वा प्लुष्ट्वा। इति दुर्गादासः॥

प्लुष, ग सेके। पूर्त्तौ। क्षेपे। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-क्षेपे अक०-सेट्।) ग, प्लुष्णाति। इति दुर्गादासः॥

प्लुष, य ल दहि। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) अन्तःस्थतृतीययुक्तः। य, प्लुष्यति। ल, अप्लुषत्। प्लुष्लोष। इति दुर्गादासः॥

प्लुषः, पुं, दहनम्। इति शब्दधातोर्भावे अल्-प्रत्ययः॥

प्लुष्टः, त्रि, (प्लुष + क्तः। "अस्य विभाषा।" ७। २। १५। इति इट् न।) दग्धः। इत्यमरः। ३। १। ६६॥ (यथा, ऋतुसंहारे। १। २२।

"पटुतरपवनवेगात् विप्लसंशुष्कपर्णाः।

अस्य लक्षणं यथा,—
"तत्र यद्विवर्णं भ्रुव्यतेऽतिमात्रं तत् भ्रुदम् ॥
चिकित्सास्य यथा,—
"दग्धस्योपशमार्थाय चिकित्सां संप्रचक्षते ।
भ्रुदस्यापि प्रतपनं कार्य्यमुक्तौषधम् ॥
शरीरे खिन्नभूयिष्ठे खिन्नं भवति शोणितम् ॥
प्रक्षया क्षुदकं शीतं स्कन्दयत्यतिशोणितम् ॥
तस्मात् सुखयति क्षणं नतु शीतं कथञ्चन ॥"
इति सुश्रुते क्षुद्रस्थाने द्वादशेऽध्याये ॥)

भ्रुस, इर् य दाहे । विभागे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) अन्तःस्थतृतीययुक्तः । इर्, अभ्रुसत् आभ्रोसीत् । य, भ्रुस्यति । इति दुर्गादासः ॥

भ्लेव, ङ्ग ङ सेवने । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) अन्तःस्थतृतीययुक्तः । ङ्ग, अपिभ्लेवत् । ङ, भ्लेवते । इति दुर्गादासः ॥

भ्लोषः, पुं, (भ्रुष दाहे + भावे घञ् ।) दाहः । इत्यमरः । ३ । २ । ६ ॥ (यथा, श्रीकण्ठचरिते । ४ । १७ ।
"दरीषु किन्नरीलोकं घर्त्ते यः भ्लोषविप्लवे ।
न्यासीक्षतमनङ्गेन भाक्षागारमिव स्वकम् ॥"
पित्तविकारविशेषः । तद्यथा । "पित्तविकारा-श्चत्वारिंशद्वत ऊर्द्धं व्याख्यास्यन्ते । तद्यथा भ्लोषश्च क्लोषश्च दाहश्च दवधुश्च धूमकश्चाम्लकश्च इत्यादिना ॥" इति चरके सूत्रस्थाने विंशेऽध्याये ॥)

भ्सा, ल भक्षणे । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) ल, भ्साति । इति दुर्गादासः ॥

भ्सा, स्त्री, (भ्सा + भावे क्विप् ।) भक्षणम् । इति त्रिकाण्डशेषः ॥

भ्सातं, त्रि, (भ्सा + क्तः ।) भक्षितम् । इत्यमरः । ३ । १ । ११० ॥

भ्सानं, क्ली, (भ्सा + भावे ल्युट् ।) भोजनम् । इति हेमचन्द्रः । ३ । ८८ ॥

फ

फ, फकारः । द्वाविंशतितमव्यञ्जनवर्णः । (पवर्गस्य द्वितीयवर्णश्च ।) अस्योच्चारणस्थानं ओष्ठः । इति व्याकरणम् । (यदुक्तं सिद्धान्तकौमुद्याम् ।
"उपूपध्मानीयानामोष्ठौ ॥") तस्य तत्त्वं यथा,—
"फकारं शृणु चार्व्वङ्गि ! रक्तविद्युल्लतोपमम् ।
चतुर्व्वर्गप्रदं वर्णं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं वर्णं सदा त्रिगुणसंयुतम् ।
आत्मादितत्त्वसंयुक्तं त्रिबिन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रे पञ्चमपटलः ॥ * ॥
"वक्रा वामगता रेखा ततोऽधःपङ्क्तिगा भवेत् ।
तस्माद्दूर्द्धगता भूला दक्षमारभ्य कुण्डली ॥
ब्रह्मा रुद्रश्च विष्णुश्च कुण्डली ब्रह्मरूपिणी ।
आत्मा वामाद्दक्षिणतः क्रमशः परिकीर्त्तिता ॥"
इति वर्णोद्धारतन्त्रम् ॥

तत्पर्य्यायः ।
"फकारश्च महेशानि ! शिखी चैव जनार्द्दनः ॥"
इति रुद्रयामलोक्तवर्णाभिधानम् ॥
अस्य ध्यानं यथा,—
"प्रलयाम्बुदवर्णाभां ज्वलज्जिह्वां चतुर्भुजाम् ।
भक्ताभयप्रदां नित्यां नानालङ्कारभूषिताम् ॥
एवं ध्यात्वा फकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"फः सखी दुर्गिणी धूम्रा वामपार्श्वो जनार्द्दनः ।
जया पादः शिखा रौद्री फेत्कारः शाम्भवी-प्रियः ॥
उमा विहङ्गमः कालः कुञ्जिनीप्रियपावकौ ।
प्रलयाग्निर्नीलपादोऽधरः पशुपतिः शुभ्रो ॥
फुत्कारो यामिनी वक्त्रा पावनो मोहवर्द्धनः ।
निष्फलरागहङ्कारः प्रयागो ग्रामणीः फलम् ॥"
इति नानातन्त्रशास्त्रम् ॥
(पदादौ अस्य प्रयोगेन भयसम्भावना । यदुक्तं वृत्तरत्नाकरटीकायाम् ।
"दोधः सौख्यं सदा नः सुखभयमरणक्लेशदुःखं पवर्गः ॥")

फं, क्ली, (फक्क असद्व्यवहारे + डः ।) रूप्योक्तिः । फुत्कृतिः । निष्फलभाषणम् । इति मेदिनी । फे, १ ॥

फः, पुं, यज्ञसाधनम् । स्थानम् । झञ्झावातः । इति मेदिनी । फे, १ ॥ वर्द्धकः । जम्भानिष्कारः । स्फुटः । फललाभः । इति विश्वः ॥ संज्ञाविशेषः । यथा । "हसोऽन्तः फः । हसौ विरामश्च फसंज्ञः स्यात् ।" इति मुग्धबोधव्याकरणम् ॥

फक्क, असद्व्यवहारे । भ्वादेर्गणौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) कोपधः । फक्कति खलः कुत्सितं व्यवहरतीत्यर्थः । फक्कति दृष्टो मन्दं गच्छतीत्यर्थः । इति दुर्गादासः ॥

फक्किका, स्त्री, (फक्क + "घात्वर्थनिर्द्देशे ण्वुल् वक्तव्यः ।" इति वार्त्तिकोक्त्या ण्वुल् । टापि अत इत्वम् ।) असद्व्यवहारः । फाँकि इति भाषा । तत्पर्य्यायः । चोद्यम् २ देश्यम् ३ पूर्व्वपक्षः ४ । इति शब्दरत्नावली ॥ (यथा, नैषधे । २ । ६५ ।
"पक्षिभाषितभाष्यफक्किका
विषमा कुक्कलनामवापिता ॥")
न्यायसम्बन्धिव्याख्या । यथा,—
"श्रीमता मथुरानाथतर्कवागीशधीमता ।
विवृतीकृत्य दर्श्यन्ते हितीयमणिफक्किकाः ॥"
रत्नानुमानखण्डटीकारम्भे मथुरानाथः ॥

फञ्जिका, स्त्री, (भनक्ति रोगानिति । भञ्ज आमर्द्दने + ण्वुल् । पृषोदरादित्वात् भस्य फः । टापि अत इत्वम् ।) ब्राह्मणयष्टिका । इत्यमरः । २ । ४ । ८६ ॥ (यथा, वैद्यकरसेन्द्रसार-संग्रहे ज्वराधिकारे दृङ्मूढ़ामधिरसे ।
"निर्गुण्डी फञ्जिका वासा रविमूलत्रिकण्टकैः ॥"
"फञ्जिका ब्राह्मणयष्टिका ।" इति तट्टीका ॥)
देवताड़ः । दुरालभा । इति शब्दचन्द्रिका ॥

फञ्जिपत्रिका, स्त्री, (भनक्ति रोगानिति भञ्जि । पृषोदरादित्वात् भस्य फः । फञ्जि रोगहारकं पत्रं यस्याः । कप् । टाप् । अत इत्वम् ।) आखुपर्णी । इति रत्नमाला ॥ (विवृतिरस्या आखुपर्णीशब्दे ज्ञातव्या ॥)

फञ्जी, स्त्री, (भनक्ति रोगानिति । भञ्ज + अच् । पृषोदरादित्वात् भस्य फः । गौरादित्वात् ङीष् ।) भार्गी । इति राजनिर्घण्टः ॥ (यथा, वैद्यक-चक्रपाणौ श्वासाधिकारे ।
"अन्वता नागरफञ्जीशाङ्गीपर्णासमाधितः
क्वाथः ।
पीतः सकणाचूर्णः कासश्वासौ निहन्त्यासु ॥"
तथाचास्या गुणाः हारीते प्रथमस्थाने दशमेऽध्याये ।
"वत्सादनी तथा फञ्जी तैलपर्णी तु सिंहिका ।
चक्रमर्द्दक इत्यन्ये दुर्ज्जरा वातकोपनाः ॥")

फट्, य, व्यनुकरणशब्दः । अस्त्रबीजम् । यथा । फड़स्त्रं शस्त्रमायुधम् । इति बीजवर्णाभिधानम् ॥ * ॥ भ्रान्तिकुम्भभ्रामणे अर्घ्यपात्रभ्रामणे अर्घ्यजलेन पूजोपकरणाभ्युक्षणे अन्तरीक्षग-विघ्नोत्सारणे विकिरद्वितये गन्धपुष्पाभ्यां करशोधने अघमर्षणे पापपुरुषताड़ने करशुद्धि-न्यासे नैवेद्यप्रोक्षणे होमाग्नेः क्रव्यादांशत्यागे होमाग्न्यावाहने तदग्निप्रोक्षणादौ च फड़िति-मन्त्रस्य प्रयोगः ॥ (यथा, भागवते । ६ । ८ । १० ।
"सविसर्गं फड़न्तं तत् सर्व्वदिक्षु विनिर्द्दिशेत् ॥"
विसर्गान्तादौ, चि । यथा, वाजसनेयसंहितायाम् । ७ । ३ । "देवाश्रो यस्त्वेड़े तत्सत्यमुपरि प्रुता भङ्क्षेन हतोऽसौ फट् ॥"
"असौ देव्यो हतो निहतः सन् फट् विसर्गो भवतु निष्फला विशरारवे अस्य क्रियन्तस्येतद्रूपम् । फलतीति फट् डलयोरैक्यम् । स्वाहाकारस्थाने फड़ित्यभिचारे प्रयुज्यते ।" इति तद्भाष्ये वेद-दीपे महीधरः ॥)

फटः, पुं क्ली, (स्फुट विकसने + पचाद्यच् । पृषोदरादित्वात् साधुः) पक्षा । इत्यमरशेषौ ॥
फटा, स्त्री, (फट + स्त्रियां टाप् ।) फक्षा । (यथा, पद्मवन्ते । ३ । ८३ ।
"निर्व्विषेणापि सर्पेण कर्त्तव्या महती फटा ।
विषं भवति मा वास्तु फटाटोपो भयङ्करः ॥")
दम्भः । इति मेदिनी । टे, २३ ॥ कितवः । इति हेमचन्द्रः ॥ * ॥
"स्यात् पवर्गद्वितीयादि फटायान्तु स्फटापि च ॥"
इतिभरतधृतशब्दभेदः ॥

फड़ङ्गा, स्त्री, (फड़िति शब्दं ङ्गति गच्छतीति । ङ्ग गतौ + अच् । टाप् ।) झिल्लिका । इति शब्दचन्द्रिका ॥ फड़ङ्ग इति भाषा ॥

फण, ण निःस्नेहे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) फेणतुः । पफणतुः । निःस्नेहः अनायासेनोत्पत्तिः । फणति वाञ्छितं श्रीमताम् । अनायासेन जातम् । अस्येव आत्मस्य

निष्ठायां अनायासकृतं फाणं इत्यमरः ॥ अतएव रमानाथोऽपि घटादौ फण गतौ इत्यत्र गतेरन्यत्र। फाणयति जनोऽनायासेन जनयतीत्यर्थ इत्याह। इति दुर्गादासः ॥

फण, मि अ गतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) मि, फणयति फाणयति। अ, फेणतुः फणतुः। इति दुर्गादासः ॥

फणः, त्रि, (फनति विस्तृतिं गच्छतीति। फण+अच्।) सर्पस्य विस्तृतमस्तकम्। यथा। फटायान्तु फणा द्वयोरित्यमरः ॥ ग्रहोर्थे कारणं फणम्। इति क्षीरस्वामी ॥ तत्पर्य्यायः। फणा २ फणम् ३ फटा ४ स्फटः ५ स्फटः ६ स्फटा ७। इत्यमरभरतौ ॥ दर्व्वी ८ भोगः ९ स्फुटः १०। इति हेमचन्द्रः ॥४॥९८१॥ स्फुटा ११ दर्विः १२ फटी १३। इति शब्दरत्नावली ॥ (यथा, महाभारते। १२।११४।१५।

"परिवादं ब्रुवाणो हि दुरात्मा वै महाजने।
प्रकाशयति दोषांस्तु सर्पः फणमिवोच्छ्रितम् ॥"

जत्रूर्द्ध्वमर्म्मविशेषः। यथा, सुश्रुते। ३। ६।

"जत्रूर्द्ध्वं मर्म्माणि चत्वारो ध्रमन्योऽधो मातृकाः। द्वे शङ्खाटिके द्वे विधुरे द्वौ फणौ द्वावपाङ्गौ द्वावावर्त्तौ द्वावुत्क्षेपौ द्वौ शृङ्गावेका क्षपणी पञ्च सीमन्तास्त्वारि शृङ्गाटकान्येकोऽधिपतिरिति ॥")

फणकरः, पुं, (फणः करो यस्येति। फणस्य करो वा।) सुजङ्गः। इति शब्दरत्नावली ॥

फणधरः, पुं, (धरतीति। धृ+अच्। फणस्य धरः।) सर्पः। इति शब्दरत्नावली ॥

फणधरधरः, पुं, (फणधरस्य सर्पस्य धरः।) शिवः। इति कविकल्पलता ॥

फणभृत्, पुं, (फणं बिभर्त्तीति। भृ+क्विप् तुक् च।) सर्पः। इति हेमचन्द्रः। ४। ३६६ ॥ (यथा, राजेन्द्रकर्णपूरे। ४।

"व्याप्तयोमतले नगाङ्कधवले निर्धौतदिङ्मण्डले देवत्वद्यशसि प्रशान्ततमसि प्रौढे जगत् प्रेयसि।
कैलासन्ति महीभृतः फणभृतः श्लेष्मन्ति पाथोधयः
क्षीरोदन्ति सुरद्विपन्ति करिणो हंसन्ति पुंस्कोकिलाः ॥")

फणवान्, [त्] पुं, (फणोऽस्यास्तीति। फण+मतुप्। मस्य वः।) सर्पः। इति शब्दरत्नावली ॥

फणा, स्त्री, (फणति प्रसारसङ्कोचं गच्छतीति। फण गतौ+अच्। टाप्।) सर्पफटा। इत्यमरः। १। ८। ६ ॥ (यथा, अभिज्ञानशकुन्तले ६ अङ्के।

"व्यनक्ति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते।
तेजस्वी संक्षोभात् प्रायः प्रतिपद्यते तेजः ॥")

फणाकरः, पुं, (करोतीति। कृ+अच्। फणाया करः।) सर्पः। इति शब्दरत्नावली ॥

फणाधरः, पुं, (धरतीति। धृ+अच्। फणाया धरः।) सर्पः। इति शब्दरत्नावली ॥

फणाभरः, पुं, (बिभर्त्तीति धरतीति। भृ+पचाद्यच्। फणाया भरः।) सर्पः। इति शब्दरत्नावली। १५ ॥

फणावान्, [त्] पुं, (फणास्यास्तीति। फणा+मतुप्। मस्य वः।) सर्पः। इति शब्दरत्नावली ॥

फणिकेसरं, क्ली, (फणीव केसरोऽस्य।) नागकेसरम्। इति राजनिर्घण्टः ॥ (गुणादयोऽस्य नागकेसरशब्दे ज्ञातव्याः ॥)

फणिखेलः, पुं, (फणिना सह खेलतीति। खेल+अच्।) भारतीपक्षी। इति त्रिकाण्डशेषः ॥ भारद इति भाषा ॥

फणिचक्रं, क्ली, (फणाकारं चक्रम्।) विवाहादिकर्म्मसु शुभाशुभज्ञानार्थं सप्तविंशतिनक्षत्रघटितसर्पाकारचिनाङ्किकचक्रम्। यथा,—

"अश्विन्यादि लिखेच्चक्रं सर्पाकारं चिनाङ्किकम्।
तत्र वेधवशाज्ज्ञेयं विवाहादौ शुभाशुभम् ॥
त्रिनाडीवेधनक्षत्रमश्विन्यार्द्रायुगोत्तराः।
हस्तेन्द्रमूलवारण्यः पूर्व्वभाद्रपदास्तथा ॥
याम्यः सौम्यो गुरुर्योनिश्चित्रा मित्रजलाश्रयम्।
धनिष्ठा चोत्तरा भाद्रा मध्यनाडीव्यवस्थिताः ॥
कृत्तिका रोहिणी सर्पो मघा स्वातीविशाखके।
उत्तरा श्रवणा पौष्णं पृष्ठनाडीव्यवस्थिताः ॥
अश्वादिनाडीवेधर्क्षे षष्ठं द्वितीयकं क्रमात्।
याम्यादितुर्य्यतुर्य्यञ्च कृत्तिकादिद्विषट्ककम् ॥
एवं निरीक्ष्य यत्नेन कन्यामन्ने गुरौ सुरे।
पयस्कीखामिमित्रेषु देशे ग्रामे पुरे गृहे ॥
एकनाडीस्थधिष्ण्यानि यदि स्युर्वरकन्ययोः।
तदा वेधं विजानीयादृगुर्व्वादिषु तथैव च ॥
प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतो वधः।
प्रनष्टं जन्मभं यस्य तस्य नामर्क्षतो भवेत्।
द्वयोर्जन्मभयोर्व्वेधे न कर्त्तव्यं कदाचन ॥
एकनाडीस्थिता चेत् स्याद्भर्त्तुर्नाशाय चाङ्गना।
तस्मान्नाडीवधो वीक्ष्यो विवाहे शुभमिच्छता ॥
प्राङ्नाथा वेधतो भर्त्ता मध्यनाथो भयङ्करः।
पृष्ठनाडीवधे कन्या म्रियते नात्र संशयः ॥
एकनाडीस्थिता यत्र गुरुर्मर्म्मज्ञ एव सः।
तत्र देयं गुरुं दृष्ट्वा क्रमेण फलमादिशेत् ॥
समासन्ने वधे शीघ्रं दूरवेधे चिरेण तु।
वेधान्तरमभानेन वर्षं दुष्टं प्रजायते ॥
प्रभुः पयस्कन्या मित्रं देशो यामः पुरं गृहम्।
एकनाडीगता भक्षा अभक्षा वेधवर्जिताः।
एकराश्यादियोगे तु नाडीदोषो न विद्यते ॥"

इति ज्योतिस्तत्त्वम् ॥


अपि च।

"सर्पाकारो घटनविशेषः
कृत्तिकाद्यिमदेवतशेषः।
पृष्ठे सुतहतिसङ्कटरोगः
क्रोडे कान्तापुत्रवियोगः।
मध्ये रेखे विहितविवाहे
उभयोर्म्मरणं वदति वराहः ॥
क्रोडे पृष्ठे यत्र उदाहम्
मध्ये क्रोडे बहुसम्मानम्।
मध्ये पृष्ठे भवति विवाहो
बहुसुतवित्तमिति च मुनिराह ॥"

इति समयप्रदीपः ॥*॥

तस्य विन्यासो यथा,—

पृष्ठे १ ६ ७ १२ १३ १८ १९ २४ २५



मध्ये २ ५ ८ ११ १४ १७ २० २३ २६

क्रोडे ३ ४ ९ १० १५ १६ २१ २२ २७ ॥

फणिजिह्वा, स्त्री, (फणिजिह्वेव आकृतिरस्यस्या इति अच्।) महाशृतावरी। महासमङ्गा। इति राजनिर्घण्टः ॥

फणिज्झकः, पुं, (फणिनामुज्झकः बहिष्कारक उत्पादक इति यावत्। एषोदरादित्वात् साधुः। फणितुल्यबहुपत्रपुष्पवत्त्वात् तथात्वम्।) क्षुद्रपत्रतुलसी ॥ (रक्तवर्णतुलसी च। तत्पर्य्यायश्च यथा, वैद्यकरत्नमालायाम्।

"सुगन्धाको गन्धनामा तीक्ष्णगन्धः फणिज्झकः ॥")

जम्बीरभेदः। इति केचित् ॥ जम्बीरसामान्यः। इति केचित्। तत्पर्य्यायः। समीरजः २ मरुवकः ३ प्रस्थपुष्पः ४ जम्बीरः ५। इत्यमरभरतौ ॥ (यथा,—

"मारुतोऽसौ मरुवको मरुत्कररपि स्मृतः।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरजः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

फणितः, त्रि, (फण गतौ+क्तः।) गतः। निःक्षेपितः ॥

फणितक्ष्मगः, पुं, (फणी शेष एव तल्पं फणितल्पं तस्मिन् गच्छतीति। गम+डः।) विष्णुः। सर्पशय्यायां गच्छति यः। इति व्युत्पत्तिः ॥

फणिप्रियः, पुं, (फणिनां प्रियः भक्ष्यत्वात्।) वायुः। इति शब्दरत्नावली ॥

फणिफेनः, पुं, (फणिनां फेन इव उग्रगुणत्वात्।) अहिफेनः। आफिं इति भाषा। यथा,—

"जातीफलं टङ्कणमम्बकञ्च
हिङ्गूलगन्धं परिमर्द्य यामम्।
भागद्वयं स्यात् फणिफेनकस्य
गान्धालिकापत्ररसेन मर्द्यम् ॥"

इति रत्नावली ॥

फणिवल्ली, स्त्री, (फणीव दीर्घा वल्ली।) नागवल्ली। इति राजनिर्घण्टः ॥

फणिहन्त्री, स्त्री, (फणिनो हन्तीति। हन्+टक्+ङीप्।) गन्धनाकुली। इति राजनिर्घण्टः ॥

फणिहृत्, स्त्री, (फणिनो हरति स्वगन्धेन अपसारयतीति। हृ+क्विप्। तुगागमश्च।) क्षुद्रदुरालभा। इति राजनिर्घण्टः ॥

फणी, [न्] पुं, (फणास्त्यस्येति। फणा+"व्रीह्यादिभ्यश्च।" ५। २। ११६। इति इनिः।) सर्पः। इत्यमरः ॥ (यथाच सुश्रुते कल्पस्थाने ४ अध्याये।

"ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः।
मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः ॥"

तद्रंगभ्रमप्रतीकारविधिर्यथा,—
"पक्षिणां विषवेगे तु प्रथमे ग्रीवितं हरेत्।
द्वितीये मधुसर्पिर्भ्यां पाययेत्तागदं भिषक्॥
नस्यकर्म्माञ्जने युञ्ज्यात्तृतीये विषनाशने।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ दापयेत्॥
ग्रीतोपचारं स्नात्वादौ भिषक्पथ्यमवेक्ष्यतौ।
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तिताम्॥
सप्तमे त्वपरीक्षेन शिरस्तीक्ष्णेन ग्रीवयेत्।
तीक्ष्णमेवाञ्जनं दद्यात्तीक्ष्णग्रच्छेद्य मूर्द्धि च॥
कृत्वात् काकपदं चर्म्म साधयेत्ता पिप्पितं क्षिपेत्॥"
इति च सुश्रुते कल्पस्थाने पञ्चमेऽध्याये॥)

सर्पिंजीवनामौषधिः। इति राजनिर्घण्टः॥
(केतुः। यथा, ग्रहभावप्रकाशे।
"कपिरत्यन्तधवलः पक्षौ ह्रस्वः ग्रशिखया।"
मोसकं अस्य विषयो यथा,—
"रसो गन्धरङ्गः सोषणोऽयं
पक्षी पिप्पलीलेव धूसूररिष्टः
जयेत् सन्निपातं त्रिगुञ्जाकृपाणं
भवेदर्कमूलास्तु सशोषचूर्णम्॥"
इति वैद्यकरत्नसारसंग्रहे ज्वराधिकारे पञ्चवक्त्ररसे॥ मरुवकनामौषधं यथा,—
"मारुतोऽसौ मरुवको मरुन्मरपि स्मृतः।
पक्षी पक्षिञ्जकश्चापि प्रस्थपर्ण्यः समीरजः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥)

पक्षीश्वरः, पुं, (पक्षिणामीश्वरः।) अगस्तः। इति शब्दरत्नावली॥

पक्षः, पुं, (पक्षति। पक्ष गतौ + "नमन्ताद् डः।" उणा० ९। ११९। इति डः।) जठरम्। इत्यादिकोषः॥

पक्षकारी, पुं, (पक्षं इत्यवस्तुशब्दं करोतीति। कृ + णिनिः।) पक्षिमात्रम्। इति शब्दचन्द्रिका॥

पक्षं, क्ली, (पक्षतीति। पक्ष + अच्। लक्ष्य रत्नम्।) फलकम्। इत्यमरटीकायां भरतः॥

पक्षपर्व्वक, क्ली, पूगफलम्। इति हारावली॥१३०॥

पक्षपरोक्षः, पुं, (स्फुरतीति। स्फुर स्फुरणे + "पक्षपरोक्षादयश्च।" उणा० ४। २०। इति ईक्षन् धातोः पक्षपरादेशश्च।) चपेटः। माईवे, क्ली। इति मेदिनी। के, २००॥

पक्षपरोक्षा, स्त्री, (पक्षपरोक्ष + टाप्।) पादुका। (स्फुरतीति ईक्षन्। टाप्। अनक्षि स्फुरत्वादेव तथात्वम्।) मदनः। इति संक्षिप्तसारोणादिवृत्तिः॥

पक्ष, क्षिप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।)

"इह मनुजकोमला मनीना
रविकरसञ्जनिताः फलन्ति भावाः॥"
इति भारविः॥
निष्पादनेऽपि वाक्षीकिः।
"फलति न यस्य चरितलोभाय दिशा शिरः॥"
इति दुर्गादासः॥

पक्ष, च गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) च, भावे, फलः। इति दुर्गादासः॥

पक्ष, णि आ भिदि। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) णि, फुल्लोऽस्ति। आ, फलितं फुल्लं तेन। फलति काष्ठं कुठारः। इति दुर्गादासः॥

पक्षं, क्लो, (फलतीति। फल निष्पत्तौ णि फला विशरणे वा + अच्।) लाभः। (यथा, अकुन्तलायाम्। १ अङ्के।
"ग्राप्तमिदमाश्रमपदं स्फुरति च बाहुः
कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र॥")
ग्रस्त्रम्। (यथास्य भक्षणविधिः।
"फलानि सर्व्वभक्ष्याणि प्रदद्याद्वै दलेषु च॥"
"फलानि सर्व्वभक्ष्याणि परिशुष्काणि यानि च।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत्॥"
इति सुश्रुते सूत्रस्थाने। ४६ अध्यायः॥
यथा च अकुन्तलायाम्।
"उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः॥")
फलकम्। (ग्रारिफलकार्थे यथा, महाभारते। ४। १। २४।
"वैदूर्य्यान् काञ्चनान् दान्तान् फलैर्य्योतीरसैः सह।
क्षौद्राक्तान् लोहितार्द्रांश्च निर्व्यत्स्यामि मनोरमान्॥")
हेतुलक्षम्। इत्यमरः॥ जातीफलम्। खुटिः। त्रिफला। (यथा,—
"हरीतकी चामलकी विभीतकमिदं त्रयम्।
त्रिफला फलमित्युक्तं तच्च ग्रेयं फलत्रिकम्॥"
इति वैद्यकपरिभाषायाम्॥)
कक्कोलम्। इति मेदिनी। ले, ३३। वाणाग्रम्। आर्त्तवम्। इति शब्दरत्नावली॥ फालः। इति हेमचन्द्रः॥ दानम्। इति धरणिः॥ शुष्कः। यथा,—
"अफलो शुष्यते मेघः सफलस्तु न शुष्यते।"
इति रामायणम्॥
(प्रमेयभेदः। यथा,—
"आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्॥" इति गोतमसूत्रम्।
तत्रैव फलसूत्रम् यथा। "प्रवृत्तिदोषजनितोऽर्थः फलम्॥" "सुखदुःखसंवेदनं फलम्। सुखविपाकं कर्म्मदुःखविपाकञ्च तत् पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेतम्। तथाहि प्रवृत्तिदोषजनितोऽर्थः फलमेतत् सर्व्वं भवति तदेतत् फलमुपादातव्यमुपादेयं हेयं त्यक्तं त्यक्तव्यमुपादेयमिति नास्य हानोपादानयोर्निष्ठा पर्य्यवसानं वास्ति स खल्वयं हानोपादानस्रोतसोह्यते लोकः।" इति वात्स्यायनः॥) जीवस्य कर्म्मफलमुक्तिर्यथा,—
"जीवः कर्म्मफलं भुङ्क्ते आत्मा निर्लिप्त एवच।
आत्मनः प्रतिबिम्बश्च देही जीवः स एव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥

दानफलं यथा,—
"यथा फलन्ति ग्रस्यानि न्यूनानि वाधिकानि च।
क्षयकार्य्यां क्षेत्रभेदे पात्रभेदे फलं तथा॥
सामान्यदिवसे विप्रे दानं समफलं भवेत्।
अमायां रविसंक्रान्त्यां फलं गुणगुणं भवेत्।
चातुर्मास्यां पौर्णमास्यामनन्तं फलमेव च॥
ग्रहणे ग्रग्निः कोटिगुणञ्च फलमेव च।
सूर्य्यस्य ग्रहणे चापि ततो दशगुणं भवेत्॥
अक्षयायामक्षयश्चैवासंख्यं फलमुच्यते।
एवमन्यच्च पुण्याहे फलाधिक्यं भवेदिह॥
यथा दाने तथा स्नाने जपेऽन्यत्पुण्यकर्म्मसु।
एवं सर्व्वत्र बोद्धव्यं नराणां कर्म्मणां फलम्॥
सामान्यदेशे दानञ्च विप्रे समफलं भवेत्।
तीर्थे देवगृहे चैव फलं गुणगुणं स्मृतम्॥
गङ्गायाञ्च कोटिगुणं क्षेत्रे नारायणे फलम्।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं क्रमेण च॥
यथा चैव कोटिगुणं तथा च विष्णुमन्दिरे।
केदारे च लक्षगुणं हरिद्वारे तथा फलम्॥
पुष्करे भास्करक्षेत्रे दशलक्षगुणं फलम्।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं क्रमेण च॥
सामान्यब्राह्मणे दानं समभेदे फलं भवेत्।
लक्षं क्रियान्वयपूते च पण्डिते च जितेन्द्रिये॥
विष्णुमन्त्रोपासके च बुधे कोटिगुणं भवेत्।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं गुरुं भवेत्॥
यथा दक्षेण सूत्रेण ग्रारावेण जवेन च।
कुम्भं निर्म्माति चक्रेण कुम्भकारो ह्यदा भुवि।
तथैव कर्म्मसूत्रेण फलं धाता ददाति च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३४ अध्यायः॥*॥
स्वप्नियफलस्य विष्णुदेयत्वं यथा,—
"भक्ष्याणि यानि पेयानि भोज्यान्यभिमतानि च।
फलञ्च वल्लभं यच्च तत्तद्देयं जगद्गुरवे॥"
इत्यग्निपुराणम्॥*॥
दूरफलदारा फलपातननिषेधो यथा,—
"न पातयेदिङ्गाभिः फलानि वै फलेन तु।
न खेष्टभार्य्यां ग्रिक्षेत नार्कवेण पलाशनम्॥"
इति कौर्म्मे उपविभागे १६ अध्यायः॥
कर्म्मजन्यशुभाशुभदुरदृष्टसम्भवस्वर्गनरकादि। तत्त्रिविधं यथा,—
"ग्रनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः॥
"ग्रनिष्टं नारकित्वम्। इष्टं देवत्वम्। मिश्रं मनुष्यत्वम्। एवं त्रिविधं पापस्य पुण्यस्य उभयमिश्रस्य च कर्म्मणो यत् फलं प्रसिद्धं तत् सर्व्वमत्यागिनामेव प्रेत्य परत्र भवति तेषां त्रिविधकर्म्मसम्भवात् न तु सन्न्यासिनां क्वचिदपि भवति।" इति तट्टीकायां श्रीधरस्वामी॥*॥
वेदादीनां फलम्। यथा, वह्निं प्रति मरीचिवाक्यम्।
"स तं प्राह फलं ब्रूहि वेदस्य च धनस्य च।
दारग्रहस्य विप्राद्यैः स्वर्गाप्रवर्गहेतवे॥

वह्निरुवाच ।
व्यग्निहोत्रफला वेदा दत्तमुक्तफलं धनम् ।
रतिपुत्रफला दारा: प्रौढवृत्तफलं श्रुतम् ॥"
इति वह्निपुराणे नित्याग्निकक्षानविधिनामाध्याय: ॥*॥ लवणादिसंयोगे फलस्याम्लत्वं यथा,
"तण्डुलोम्बुमिसंयोगाल्लवणयोगेन पिण्डकम् ।
फलं क्षितयसंयोगादम्लं भवति तत्त्वतात् ॥"
इति रामाचैनचन्द्रिकाधृतवचनमिति केचित् ॥
फल:, पुं, (फलतीति । फल + अच् ।) कुटजवृक्ष: । इति शब्दरत्नावली ॥ (यथा, सुश्रुते सूत्रस्थाने ३६ अध्याये ।
"कारीरकारिकाफलपटोलवार्त्ताकुकारवेल्लककैटिकाकेवुकोरुबूकपर्ण्यटककिरातितिक्तककर्कोटकारिष्टकोशातकीवेत्रकरीराटरूषकार्कपुष्पीप्रभृतीनि ॥")
फलकं, क्लो, पुं, (फल + संज्ञायां कन् ।) चर्म्म । इत्यमर: । २ । ८ । ६० ॥ ढाल इति भाषा ॥ (यथा, विष्णुपादादिकेशान्तवर्णनस्तोत्रे । ३१ ।
"भ्रूर्द्वे वामं क्षपायां फलकमरिगदे पद्मशङ्खौ सहस्रम्
विभ्राणा: शुभ्रजातं मम ददतु हरेर्वाहवो मोहहानिम् ॥")
फलक:, पुं, (फल + संज्ञायां कन् ।) अस्थिखण्डम् । इति जटाधर: ॥ नागकेशरम् । इति शब्दचन्द्रिका ॥ काष्ठादिफलकम् । यथा,—
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
ऊनाधिकन्तु संशोध्यं पश्चात् पत्रे निवेशयेत् ॥"
इति व्यवहारतत्त्वे व्यास: ॥
(यथा, मार्कण्डेये । ८७ । ५ ।
"भ्रुकुटीकुटिलात्तस्या ललाटफलकादद्भुतम् ।
काली करालवदना विनिष्क्रान्ताऽसिपाशिनी ॥")
रजकपट्टम् । धोपार पाट इति भाषा । यथा,
"ग्रालम्बे फलके शुद्धे निष्पाद्यासांसि नैपुणै: ।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥"
इति मिताक्षरा ॥
फलकपाणि:, पुं, (फलकं पाणौ यस्य ।) चर्म्मी । इत्यमर: । २ । ८ । ७१ ॥ ढाली इति भाषा ॥
फलककर्कशा, स्त्री, (फलेन कर्कशा ।) वनकोलि: । इति केचित् ॥
फलकाम:, त्रि, (फलं कामयते इति । कम + अच् ।) कर्म्मफलकामी । यथा,—
"धर्म्मवाञ्छिकिका मूढ़ा: फलकामा नराधमा: ।
अर्चयन्ति जगन्नाथं ते कामान्प्राप्नुवन्त्युत ॥"
इति मलमासतत्त्वधृतविष्णुधर्म्मोत्तरीयषष्ठीव्रतीयवचनम् ।
फलकी, [न्] पुं, (फलकं फलकाकारोऽस्यस्येति । फलक + इनि: ।) मत्स्यभेद: । पलुइ इति भाषा । (गुणादिकमस्य फलिशब्दे ज्ञातव्यम् ।) फलकान्विते, त्रि । इति मेदिनी । ने, १६ ॥
फलक्षार:, पुं, (फले फलावच्छेदे क्षार: ।) पानीयामलकम् । इति शब्दचन्द्रिका ॥
फलकेशर:, पुं, (फले केशर इवास्य ।) नारीकेलवृक्ष: । इति जटाधर: ॥
फलकोषक:, पुं, (फलं शुष्क एव कोषो यत्र । ततः कन् ।) शुष्क: । इति त्रिकाण्डशेष: ॥ (विवृतिरस्य शुष्कशब्दे ज्ञातव्या ॥)
फलग्रहि:, त्रि, (फलं गृह्णातीति । ग्रह + इन् ।) फलेग्रहि: । यथासमयं फलधरवृक्ष: । इत्यमरटीकायां भरत: ॥
फलग्राही, [न्] पुं, (फलं गृह्णातीति । ग्रह + णिनि: ।) वृक्ष: । इति धरणि: ॥ फलग्रहणकर्त्तरि, त्रि ॥
फलघनस:, पुं, दधिमिश्रितवटलक्चूर्णम् । इति आह्निकतत्त्वम् ॥
फलचोरक:, पुं, (फलं चोर इवास्य कन् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्ट: ॥
फलत्रयं, क्लो, (फलस्य त्रयम् ।) द्राक्षापरूषकाम्लयं: । (यथा,—
"द्राक्षापरूषकाम्लयैं: फलत्रयमुदाहृतम् ॥"
इति वैद्यकपरिभाषायाम् ॥)
त्रिफला । इति शब्दचन्द्रिका ॥
फलत्रिकं, क्लो, (फलस्य त्रिकम् ।) त्रिफला । (यथा,—
"पथ्याविभीतधात्रीणां फलै: स्यात्त्रिफला समै: ।
फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शुण्ठीपिप्पलीमरिचानि । इत्यमर: ।२।६।११६॥
फलद:, पुं, (फलं ददातीति । दा + "आतोऽनुपसर्गे ।" ३ । २ । ३ । इति क: ।) वृक्ष: । इति धरणि: ॥
फलद:, त्रि, (फलं ददातीति । दा + क: ।) फलदाता । यथा,—
"विप्रिरुफलदा कन्या निष्कामाद्यां विमुक्तिदा ॥"
इति मलमासतत्त्वधृतविष्णुपुराणवचनम् ॥
फलपक्वान्नं, क्लो, अम्लपक्वफलम् । इति राजनिर्घण्ट: ॥
फलपाक:, पुं, (फलेषु पाकोऽस्य ।) करमर्द्दक: । इत्यमरटीकायां भरत: ॥ पानीयामलकम् । इति शब्दचन्द्रिका ॥
फलपाकान्ता, स्त्री, (फलपाकेनान्तो नाशो यस्या: ।) ओषधि: । धान्यकदल्यादि: । इत्यमर: ।२।४।७॥
फलपाकी, [न्] पुं, (फलपाकोऽस्यस्येति । इनि: ।) गर्द्दभाण्ड: । इति रत्नमाला ॥ (यथास्य पर्य्याय: ।
"नन्दीवृक्षस्ताम्रपाकी फलपाकी च पीतन: ।
गर्द्दभाण्डो गन्धमुण्डो द्वितीय: क्षिप्रपाकसौ ॥"
इति च वैद्यकरत्नमालायाम्)
फलपुष्प:, पुं, (फलं पुष्प इव यस्य ।) वरुणवृक्ष: । इति त्रिकाण्डशेष: ॥
फलपुष्पा, स्त्री, (फलानि पुष्पाणीवास्या: ।) पिण्डखर्ज्जूरी । इति राजनिर्घण्ट: ॥
फलपूर:, पुं, (फलेन पूर: पूर्त्ति: ।) बीजपूर: । इत्यमर: । २ । ४ । ७८ ॥ (विवरणमस्य बीजपूरशब्दे ज्ञातव्यम् ॥)
फलपूरक:, (फलपूर + स्वार्थे कन् ।) बीजपूर: । इति भावप्रकाश: ॥
फलप्रद:, त्रि, (फलं प्रददातीति । प्र + दा + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति क: ।) फलदाता । यथा,—
"क्रीणीहि भो: फलानीति श्रुत्वा सत्वरमच्युत: ।
फलार्थी धान्यमादाय ययौ सर्व्वफलप्रद: ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्याय: ॥
फलप्रिया, स्त्री, (फलेन प्रीणातीति । प्री + क: । टाप् ।) प्रियङ्गु: । इति राजनिर्घण्ट: ॥ (गुणादयोऽस्या प्रियङ्गुशब्दे ज्ञेया: ॥)
फलभाक्, [ज्] त्रि, (फलं भजते इति । भज + "भजो ण्वि: ।" ३ । २ । ४२ । इति ण्वि: ।) फलभागी । यथा,—
"मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वश: ।
उल्लेखनमकुर्व्वाणो न तस्य फलभाग्भवेत् ॥"
इति तिथ्यादितत्त्वधृतब्रह्मविष्णुपुराणवचनम् ॥
फलभूमि:, स्त्री, (फलाय कर्म्मफलभोगाय भूमि: ।) कर्म्मफलभोगस्थानम् । यथा,—
"भरताब्धेरावसानि विदेहाश्च कुरून् विना ।
वर्षाणि कर्म्मभूम्य: स्यु: शेषाणि फलभूमय: ॥"
इति हेमचन्द्र: । ४ । १२ ॥
फलमुखा, स्त्री, (फलेन मुखा श्रेष्ठा ।) अजमोदा । इति राजनिर्घण्ट: ॥
फलमुद्गरिका, स्त्री, (फले फलावच्छेदे मुद्गरिका क्षुद्रमुद्गर इव ।) पिण्डखर्ज्जूर: । इति शब्दमाला ॥
फलयज्वा, स्त्री, (फलहेतुका यज्वा ।) प्रयोजनवती यज्वा । यथा, साहित्यदर्पणे ।
"यस्यास्य गूढ़ागूढ़त्वादिधा स्यु: फलयज्वा: ।"
फलवर्त्तुलं, क्लो, (फलं वर्त्तुलमस्य ।) कालिङ्गम् । इति राजनिर्घण्ट: ॥
फलवान्, [न्] त्रि. (फलमस्यास्तीति । फल + मतुप् । मस्य व: ।) फलयुक्तवृक्ष: । तत्पर्य्यायः । फलिन: २ फली ३ । इत्यमर: ॥ फलित: ४ । इति राजनिर्घण्ट: ॥ (यथा, मनु: । १ । ४७ ।
"अपुष्पा: फलवन्तो ये ते वनस्पतय: स्मृता: ।
पुष्पिण: फलिनश्चैव वृक्षास्तूभयत: स्मृता: ॥")
फलविक्रयिणी, त्रि, (फलविक्रयोऽस्या अस्तीति । इनि: । ङीप् ।) फलविक्रेत्री । फुलड़ाविनी इति हिन्दी भाषा । यथा,—
"फलविक्रयिणी तस्य घृतधान्यकरद्वयम् ।
फलैरपूरयद्गेहं: फलभाण्डमपूरि च ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्याय: ॥
फलवृक्ष:, पुं, (फलप्रधानो वृक्ष: । संज्ञायां कन् ।) पनस: । इति राजनिर्घण्ट: ॥ (पनसशब्देऽस्य विशेषो ज्ञातव्य: ॥)
फलश्राकं, क्लो, (फलमेव श्राकम् ।) षड्विधश्राकान्तर्गतफलरूपश्राकम् । यथा, राजवल्लभे ।
"पत्रं पुष्पं फलं नालं कन्दं संखेदजं तथा ।
श्राकं षड्विधमुद्दिष्टं गुरुं विद्यादुदोत्तरम् ॥"

फलग्राहवः, पुं, दाड़िमः। इति त्रिकाण्डशेषः॥
फलग्राही [न्], त्रि, (फलेन ग्राहयते ग्राहयति इति। ग्राह्+णिनिः।) फलाश्रयः। यथा,—
"परसमवेतधात्वर्थजन्यफलशालित्वं कर्म्मत्वम्।"
इति कर्म्मलक्षणे सारमञ्जरी॥
फलग्रैवेयिरः, पुं, (ग्रैवेयिरं ग्राम्रमस्य अण् ग्रैवेयिरम्। फलं ग्रैवेयिरं यस्य।) बदरवृक्षः। इति राजनिर्घण्टः॥
फलश्रुतिः, स्त्री, (फलस्य कर्म्मफलस्य श्रुतिः श्रवणम्।) कर्म्मफलश्रवणम्। यथा,—
"फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्।
श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनम्॥"
अपि च।
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे।
नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः॥"
इति श्रीभागवते ११ स्कन्धः। इति मलमासतत्त्वम्॥
फलश्रेष्ठः, पुं, (फलानां फलवृक्षाणां श्रेष्ठः।) आम्रवृक्षः। इति शब्दचन्द्रिका॥
फलसः, पुं, फलवृक्षः। इत्यमरटीकायां भरतः॥
फलस्नेहः, पुं, (फले स्नेहो यस्य।) आखोटवृक्षः। इति राजनिर्घण्टः॥
फलहारी, स्त्री, काली। फलं हरति या हृञ् हरणे कर्म्मोपपदेऽण् वातोः यङि ईप्प्रत्ययनिष्पन्नोऽयं शब्दः। सा च्येष्ठपञ्चदश्यां बहुफलादुपहारैः पूजनीया। यथा,—
"ज्येष्ठे मासि अमायां वै मध्यरात्रे महेश्वरि!।
पूजयेत् कालिकां देवीं नानाद्रव्योपहारकैः॥
तत्रैव सितपक्षे तु पञ्चदश्यां निशार्द्धके।
पूजयेच्च फलैर्नैवैः शक्तितो वापि कालिकाम्॥"
इति मायातन्त्रे १७ पटलः॥
फला, स्त्री, भिल्लिरिटावृक्षः। इति राजनिर्घण्टः॥ (भूमी। तत्पर्य्यायो यथा,—
"भूमी शुक्लफला तुङ्गा केशहन्त्री फलाह्विया।
मङ्गल्या च तथा लक्ष्मीः शूमीरः साह्विका स्मृता॥")
फलाढ्या, स्त्री, (फलेन आढ्या सम्पन्ना।) काष्ठकदली। इति राजनिर्घण्टः॥
फलाध्यक्षः, क्ली, (फलानामध्यक्षमिव।) राजादनवृक्षः। इत्यमरः। २। ४। ४५॥ (क्वचित् पुं। अस्य पर्य्यायः।
"राजादनः फलाध्यक्षो राजन्यः चीरिकापिच॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
फलानामधिपते, त्रि॥
फलादनः, पुं, (फलानामदनोभक्षकः। यद्वा, फलानां अदनं भक्षणं यस्य।) शुकपक्षी। इति हेमचन्द्रः। ४। ३०१॥ फलभक्षके, त्रि॥
फलान्नः, पुं, (फलेषु सतृसु अन्नो नाम्नो यस्य।) पंशुः। इति शब्दमाला॥
फलाम्लं, क्ली, (फलमम्लं यस्य।) वृक्षाम्लम्। इति राजनिघण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अ॥
"मद्यं मद्योचितानान्तु सर्व्वमांसेषु पूजितम्।
अमद्यपानामुदकं फलाम्लं वा प्रशस्यते॥")
फलाम्लः, पुं, (फलमम्लमस्य।) अम्लवेतसः॥ इति राजनिर्घण्टः॥
फलार्थी [न्], त्रि, (फलं अर्थयते इति। अर्थ्+णिनिः।) फलकामी। यथा,—
"सर्व्वसङ्कल्पे कर्त्तव्या प्रतिष्ठा विधिना बुधैः।
फलार्थैर्भिक्षुभिर्नित्यं यज्ञाग्निष्फलमुच्यते॥"
इति मठप्रतिष्ठातत्त्वधृतहयशीर्षपञ्चरात्रीयसङ्कर्षणकाण्डीयवचनम्॥
फलाशनः, पुं, (फलानभातीति। अश्+ल्युः।) शुकपक्षी। इति त्रिकाण्डशेषः॥ फलभक्षके, त्रि॥
फलासङ्गः, पुं, (फलेषु आसङ्गः।) फलासक्तिः॥ यथा,—
"त्यक्त्वा कर्म्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्म्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः॥"
इति श्रीभगवद्गीतायां ४ अध्यायः॥
फलिः, पुं, (फल+इन्।) मत्स्यविशेषः। फलुइ इति भाषा। अस्य गुणाः। स्वादुत्वम्। गुरुत्वम्। स्निग्धत्वम्। बलकारित्वम्। शुक्रवर्द्धनत्वञ्च। इति राजवल्लभः॥
फलिका, स्त्री, (फलमस्या अस्तीति। फल+ठन्। टाप्।) निष्पावी। इति राजनिर्घण्टः॥ (फलवा स्वार्थे कनि अस इत्वम्। पृषोदरादेरयमागमः। यथा, आर्य्यासप्तशत्याम्। ३३५।
"न प्राप्यसे कराभ्यां हृदयान्नापैषि वितनुषे बाधाम्।
त्वं मम भयावखिलकुसुमायुधविग्रहफलिकेव॥")
फलितं, त्रि, (फल+तारकादित्वात् इतच्।) फलमस्य जातम्। इति शब्दबोधव्याकरणम्॥ (यथा, देवीभागवते। १। १०। १२।
"संपश्यन् विविधान् देशान् लोकांश्च वित्तधर्म्मिणः।
वनानि पादपांश्चैव क्षेत्राणि फलितानि च॥")
वृक्षे, पुं। इति धरणिः॥ श्रेवेये, क्ली। इति राजनिर्घण्टः॥
फलिनः, त्रि, (फलानि सन्त्यस्येति। फल+"बहुलमन्यत्रापि।" उणा० २। ४६। इति इनच्।) फलवान्। इत्यमरः। २। ४। ७॥ पनसे फलवति वृक्षे च पुं। इति राजनिर्घण्टः॥
फलिनी, स्त्री, (फलमस्या अस्तीति। इनिः। ङीप्।) प्रियङ्गुवृक्षः॥ (पर्य्यायोऽस्या यथा,—
"प्रियङ्गुः फलिनी कान्ता लता च महिलाह्वया।
गुन्द्रा गुन्द्रफला श्यामा विश्वक्सेनाङ्गना प्रिया॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
यथा, रघौ। ८। ६१।
"मिथुनं परिकल्पितं त्वया
सहकारः फलिनी च नन्दिनौ
अविधाय विवाहसंक्रियां
भगवो गन्तुमयं न सम्मतम्॥")
अग्निशिखावृक्षः। इत्यमरः। २। ४। १२६॥
फली, [न्] त्रि, (फलमस्यास्तीति। फल+इनिः।) फलयुक्तवृक्षादिः। इत्यमरः। २। ४। ७॥
फली, स्त्री, (फलमस्यस्या इति अर्शआदिभ्यः अच्। स्त्रियां ङीप्।) प्रियङ्गुवृक्षः। इत्यमरः। २। ४। ७॥ (यथा, वैद्यकरत्नमालायाम्।
"विश्वक्सेना प्रिया कान्ता प्रियङ्गुः फलिनी-फली॥"
फलि+वा ङीप्।) फलिमतृक्षः। इति शब्दमाला॥
फलुः, पुं, लताभेदः। इत्युणादिकोषः॥
फलेग्रहिः, पुं, (फलं गृह्णातीति। फल+ग्रह+"फलेग्रहिरात्मम्भरिश्च।" ३।२।२६। इति उपपदस्य इदन्तत्वं ग्रहेरिन् प्रत्ययश्च निपात्यते।) यथासमयं फलधरवृक्षः। ऋतुप्राप्तौ फलानि गृह्णाति धारयतीति फलेग्रहिः ग्रहृत्वृदृस्निभ्यादिना इः सूत्रे फले निर्द्देशात् एकारः। किंवा फले गृह्णाति इति फलेग्रहिः कर्म्मण्याधारविवक्षा निपातनात् सप्तम्या अलुक् लुकि फलग्रहिश्च फलेग्रहिः फलग्रहिरिति वाचस्पतिः। इह ग्रहिर्धारणार्थः स्वीकारार्थश्च अत्र धारणार्थे वृक्ष एव रूढिः। स्वीकारार्थे तु क्रियाग्रहस्तैव यथा फलेग्रहीन् हंसि वनस्पतीनामिति भट्टिः॥ इति रायमुकुटादयः। इत्यमरटीकायां भरतः॥ फलग्रहश्चकर्णेरि, त्रि॥
फलेग्राहिः, पुं, (फले गृह्णातीति। ग्रह्+इन्। पृषोदरात् हृद्भः। निपातनात् सप्तम्या अलुक्।) फलेग्रहिः। इति शब्दरत्नावली॥
फलेन्द्रः, पुं, (फलेन इन्द्रः ऐश्वर्य्यशालीव। इन्द्रतुल्यफलादेरस्य तथात्वम्।) इन्द्रजम्बुः। तत्पर्य्यायः। नन्दः २ राजजम्बुः ३ महाफलः ४ सुरभिपत्रः ५ महाजम्बुः ६। अस्य गुणाः। स्वादुत्वम्। विष्टम्भित्वम्। गुरुत्वम्। रोचनत्वञ्च। इति भावप्रकाशः॥
फलेपुष्पा, स्त्री, (फले फलसुखे पुष्पं यस्याः। सप्तम्या अलुक्।) क्षुद्रक्षुपविशेषः। गूमा इति हिन्दीभाषा। तत्पर्य्यायः। द्रोणा २ द्रोणपुष्पी ३। अस्या गुणाः। गुरुत्वम्। स्वादुत्वम्। रूक्षत्वम्। उष्णत्वम्। वातपित्तकारित्वम्। क्षारत्वम्। लघुत्वम्। स्वादुपाकत्वम्। कटुत्वम्। भेदकत्वम्। कफामकामलाश्वोतमकश्वासजन्तुनाशित्वञ्च। इति भावप्रकाशः॥
फलेरुहा, स्त्री, (फले रोहतीति। रुह+कः। सप्तम्या अलुक्।) पाटलिवृक्षः। इत्यमरः। २। ४। ५४॥ (अस्याः पर्य्यायो यथा,—
"पाटलालिप्रिया स्थाली ताम्रपुष्पी फलेरुहा।
कामदूती कुबेराक्षी कुम्भी तोयाधिवासिनी॥"
इति वैद्यकरत्नमालायाम्॥)
फलेसक्तः, त्रि, (फले सक्त आसक्तः।) फलासक्तः। फलकामी। यथा, भगवद्गीतायाम्।
"युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्॥
अयुक्तः कामकारेण फलेसक्तो निबध्यते॥"

'फलेसक्तः मम फलायेदं कर्म्म करोमीत्येवं फलेसक्तो नितरां बन्धं प्राप्नोति।' इति मलमासतत्त्वम्॥

फलोत्तमा, स्त्री, (फलेषु उत्तमा।) काकली-द्राक्षा। इति राजनिर्घण्टः॥ (दुग्धिका। तत्पर्य्यायो यथा,—

"उत्तमा दुग्धिका दुग्धी फलोत्तमा फलिन्यपि॥"

इति वैद्यकरत्नमालायाम्॥)

फलोत्पत्तिः, पुं, (फलाय उत्पत्तिरस्य। प्रशस्तफलानां उत्पत्तिरत्र वा।) आम्रवृक्षः। इति शब्दचन्द्रिका॥

फलोदयः, पुं, (फलस्य उदयो यत्र।) लाभः। सुराजयः। हर्षः। इति शब्दरत्नावली॥ (फलस्य उदयः।) फलोत्पत्तिः। यथा, रघुः।

"सोऽहमाजन्मशुद्धानामाफलोदयकर्म्मणाम्।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्॥"

फल्कः, पुं, (फल निष्पत्तौ+"ल्लादाधारार्चिफलिभ्यः कः।" उणा० ३।४०। इति कः। सूत्रेऽत्र फलिभ्य इति पाठस्य विकल्पितत्वात् बाहुलकात् क इत्येके।) विसारिताङ्गम्। इत्यादिकोषः॥

फल्गु, त्रि, (फल निष्पत्तौ+"फलिपाटिनमिमनिजनामिति।" उणा० १। १६। इत्युः गुगागमश्च।) असारम्। इत्यमरः। ३। १। ५६॥ (यथा, माघे। ३। ७६।

"तरीषु तत्त्वमफल्गु भाङ्गं
सांयात्रिकानावपतोऽभ्यनन्दत्॥")

निरर्थकम्। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। ५। १५। ३२।

"न फल्गुवाक्यैः प्रतिबोधनीयो
राजा तु वीरैरिति नीतिशास्त्रम्॥"

सामान्यम्। क्षुद्रम्। यथा, भागवते। १।१३।४०।

"अहस्यानि सहस्रानामपदानि चतुष्पदाम्।
फल्गूनि तत्र महतां जीवो जीवस्य जीवनम्॥")

फल्गुः, स्त्री, (फल निष्पत्तौ+उः। गुगागमश्च।) गयास्थनदीभेदः। तस्या माहात्म्यादि यथा,—

सार्द्धक्रोशद्वयं मानं गयायां परिकीर्त्तितम्।
यत्क्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः॥
तत्र पिण्डप्रदानेन क्षत्रियत्वं प्रजायते।
नगाज्जनार्द्दनाच्चैव कूपाद्योत्तरमानसात्॥
एतद्गयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते।
तत्र पिण्डप्रदानेन पितॄणां परमा गतिः॥
पृथिव्यां यानि तीर्थानि ये समुद्राः सरांसि च।
फल्गुतीर्थे गमिष्यन्ति वारमेकं दिने दिने॥"

इति गारुडे ८३ अध्यायः॥

अन्यत् गयाशब्दे द्रष्टव्यम्॥* काकोडुम्बरिका। इत्यमरः॥ काकडुसुर इति भाषा॥ (अस्याः पर्य्यायो यथा,—

"भद्रा मलपूः फल्गुः स्यात् काकडुम्बरिका च सा॥"

इति वैद्यकरत्नमालायाम्॥)

अस्या गुणाः। गुरुत्वम्। श्लेष्मलत्वम्। शीतलत्वम्। स्वादुत्वम्। क्षत्रियकारित्वञ्च। इति राजवल्लभः॥ रेणुभेदः। फागु इति प्रसिद्धः। मिथ्यावाक्यम्। इति शब्दरत्नावली॥ वसन्तर्त्तुः। इति जटाधरः॥

फल्गुदा, स्त्री, (फल्गुरिति नाम ददाति धारयतीति। दा धारणे+कः।) गयानदी। यथा,

"तत्र देशे गया नाम पुण्यदेशोऽतिविश्रुतः।
नदी च फल्गुदा नाम पितॄणां स्वर्गदायिनी॥"

इति बृहद्धर्म्मपुराणे ५६ अध्यायः॥

फल्गुनः, पुं, (फलति कार्य्यादिकमस्मादिति। फल निष्पत्तौ+"फलेर्गुक् च।" उणा० ३। ५६। इति उनन् गुगागमश्च। फल्गुन्यां फल्गुनीनक्षत्रे जातः इति वा। "अविष्ठा फल्गुन्यनुराधेति।" ४।३।३४। इति जातार्थे प्रत्ययस्य लुक्। "लुक् तद्धितलुकि।" १।२।४६। इति स्त्रीप्रत्ययस्य च लुक्। एतन्निरुक्तिस्तु फाल्गुनशब्दे द्रष्टव्या।) अर्জ্জুनः। फाल्गुनमासः। इत्यमरटीकायां भरतः॥ (फल्गुनीभवे, त्रि। इति सिद्धान्तकौमुदी॥)

फल्गुनालः, पुं, (फल्गुनेन अलतीति। अल्+अच्।) फाल्गुनमासः। इति भूरिप्रयोगः॥

फल्गुनी, स्त्री, (फल्गुन+गौरादित्वात् ङीष्।) नक्षत्रविशेषः। तच्च पूर्ब्बफल्गुनी उत्तरफल्गुनी च। इति भरतश्चगोवर्द्धनागस्तः॥ (यथा, महाभारते। ४। ४२। १६।

"उत्तराभ्याञ्च पूर्ब्बाभ्यां फल्गुनीभ्यामहं दिवा।
जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः॥")

काकोदुम्बरिका। इति राजनिर्घण्टः॥ (फल्गुन्यां जाता। अविष्ठाफल्गुनीति अण्यो लुकि लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य च लुकि फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ इति वार्त्तिकोक्त्या टः। टित्वात् ङीप्॥)

फल्गुवाटिका, स्त्री, (फल्गूनां वाटीव इवार्थे कन्।) काकोदुम्बरिका॥ इति राजनिर्घण्टः॥ ("गुणादयोऽस्याः काकोदुम्बरिकाशब्दे ज्ञेयाः॥")

फल्गुवृक्षाकः, पुं, (फल्गुना वृक्षेणाकायति श्लीभवति इति। आ+कै+कः।) श्लेष्माकप्रभेदः। इति राजनिर्घण्टः॥

फल्गूत्सवः, पुं, (फल्गूनामुत्सवः।) फल्गुकरञ्जकगोविन्दोत्सवः। दोलयात्रा इति ख्यातः। यथा, दोलयात्रापद्धतिः।

"गोविन्दायुदयहीतन्तु यात्राङ्गं तत् प्रकीर्त्तितम्।
फल्गूत्सवं प्रकुर्व्वीत पश्चाद्दानि व्रताङ्गानि वा॥"

फल्यं, क्ली, (फलाय हितमिति। फल+यत्।) कुसुमम्। इति शब्दचन्द्रिका॥

फल्लकी [न्] पुं, (फल्लकः फलकस्तदाकारोऽस्यास्तीति। इनिः।) मत्स्यविशेषः। इति शब्दमाला॥ फलुई इति भाषा।

फल्गुफलः, पुं, सूर्पवातः। इति जटाधरः॥ कुलार वातास इति भाषा॥

फाः, पुं, सन्तापः। निष्फलभाषणम्। यथा,—

"फिः कोपे फाश्च सन्तापे तथा निष्फलभाषणे॥"

इति शब्दरत्नावली॥

दृद्धिः। बर्हकः। यथा "फा वृद्धौ बर्हके पुमान्॥" इति विश्वः॥

फाटकी, स्त्री, (स्फुट+णुल्। ङीप्। पृषोदरादित्वात् साधुः।) स्फटी। इति राजनिर्घण्टः॥

फाणिः, स्त्री, (फाणयतीति। फण गतौ+णिच्+इन्।) गुडः। करम्भः। इत्यादिकोषः॥

फाणितं, क्ली, (फण गतौ+णिच्+क्तः।) अर्द्धावर्त्तितेक्षुरसः। पेनीति ख्यातम्। इत्यमरभरतौ॥ (यथा, महाभारते। १३।६४।२३।

फल्गुनी पूर्ब्बसमये ब्राह्मणानासुपोषितः।
भक्ष्यान् फाणितसंयुक्तान् दत्त्वा सौभाग्यमृच्छति॥")

अस्य गुणाः। गुरुत्वम्। अभिष्यन्दित्वम्। दृंहणत्वम्। कफशुक्रलत्वम्। वातपित्तश्रमनाशित्वम्। मूत्रवस्तिविशोधनत्वञ्च॥*॥

"इक्षो रसस्तु यः पक्वः किञ्चिन्नाढो बहुद्रवः।
स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया॥"

इति भावप्रकाशः॥

(यथा च।

"शिरार्त्तेऽक्षनं कुर्य्यात् फाणितं मधुसंयुतम्॥"

इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे॥

"फाणितं शुक्तवः सर्पिर्दधिमस्तोऽम्बकाञ्जिकम्।
तर्पयं सूत्रशुक्रासृग्दोषवर्त्महरं पिबेत्॥"

इति चरके सूत्रस्थाने २३ अध्याये॥)

फाण्टं, त्रि, (फण्यते स्रोतीति। फण गतौ+"सुञ्धाञ्भ्रास्थेति।" ७। २। १८। इति निपातनात् साधुः।) अनायासलब्धम्। इत्यमरः। ७। १। ८४॥ कषायभेदः। यथा,—

"शिम्बीधान्यतोये हृदितः फाण्ट इत्यभिधीयते।"

अपि च।

"क्षुण्णद्रव्यपले सम्यक् जलसुखं विनिःक्षिपेत्।
पात्रे चतुःपलमितं ततस्तु स्रावयेज्जलम्॥
सोऽयं चूर्णद्रवः फाण्टो भिषग्भिरभिधीयते॥"

इति वैद्यकपरिभाषा॥

(तथास्य प्रस्तुतविधिः।

"सद्योऽभिष्णु पूतस्तु फाण्टस्त्वाग्नावकल्पने॥"

इति वाभटकल्पस्थाने षष्ठेऽध्याये॥)

फालं, क्ली, (फलाय सस्याय हितम्। फल+अण्। यद्वा, फल्यते विदार्य्यते भूमिरनेनेति। फल+घञ्।) हलोपकरणम्। इति मेदिनी। ले, ३४॥

फालः, पुं, (फल्यते विदार्य्यते क्षेत्रमनेनेति। फल+करणे घञ्।) काञ्चनस्थभूमिविदारकलौहः। फल्यते विशीर्य्यते भूमिरनेन यः। तत्पर्य्यायः। क्षुधिकः २। इत्यमरः। २।८।१२॥ क्षुधकः ३। फलम् ४। इति भरतः॥ क्षुधिका ५। फालम् ६। इति सुकुटः॥ कुशिकम् ७। इति हेमचन्द्रः। ३। ५५५॥ महादेवः। बलदेवः। कार्षासवस्त्रे, त्रि। इति मेदिनी। ले, ३४॥ नवविधदिव्यान्तर्गतोऽष्टमदिव्यम्। तस्य विधिर्यथा। दृहस्पतिः।

"आयसं द्वादशपलघटितं फालमुच्यते।
अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तरम्॥

अग्निवर्णं ततश्चौरो जिह्वया लेढयेत् सकृत्।
न दग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते॥"
चौरोऽत्र गोचौरः। गोचौरस्य प्रदातव्यं तप्त-
फालावलेहनमिति स्मृतिरिति मेधिलाः॥
अत्रापि त्वमग्ने इत्यादिमन्त्रानन्तरं आयसं
लेलिहानस्य जिह्वयापि समादिशेदिति पिता-
महोक्तेः प्राङ्विवाकशोधाभ्यामभिमन्त्रणं
कार्य्यम्॥*॥ तत्र प्रयोगः। लौकिकचत्वारिंश-
त्पलकमितं लौहघटितमदयवमध्यात्मकाङ्गुलाद-
दीर्घं तथाविधचतुरङ्गुलप्रस्तारं फालमग्नौ ता-
पयेत्। तत्र प्राङ्विवाको धर्म्मावाहनादिहवनान्तं
कर्म्म कृत्वा दक्षिणां दत्त्वा,—
'ॐ त्वमग्ने वेदाश्चत्वारश्च यज्ञेषु हूयसे।
त्वं मुखं सर्व्वदेवानां त्वं मुखं ब्रह्मवादिनाम्॥
जठरस्थोऽसि भूतानां ततो वेत्तसि शुभाशुभम्।
पापं पुनासि वै यस्मात्तस्मात् पावक उच्यते॥
पापेषु दग्धयात्मानमर्चिष्मान् भव पावक!।
अथवा शुभभावेन प्रीतो भव हुताशन!॥
त्वमग्ने सर्व्वभूतानामन्तश्चरसि साक्षिवत्।
त्वमेव देव जानीषे न विदुर्यान्ति मानवाः॥
अवहाराभिभग्नोऽयं मानुषः शुद्धिमिच्छति।
तदेनं संशयादस्माद्भगवन्मातुमर्हसि।'
इत्यनेनाभिमन्त्र्य अग्निवर्णं फालं जिह्वया सक-
लिह्यात् न दग्धश्चेत्तदा शुद्धः।" इति दिव्य-
तत्त्वम्॥

फालक्षतः, त्रि, (फालेन क्षतः।) फालेन कर्षित-
भूम्यादिः। यथा, मानवे। ४। ४६।
"न सूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां न च पर्व्वते॥"

फालाः, पुं, (फालयन्तीति। फल+णिच्+अच्।)
जम्बीरवीजानि। इति दुर्गटीकाटिप्पनीधृत-
कुलचन्द्रः॥

फाल्गुनः, पुं, (फलति निष्पादयतीति। फल+
"फलेर्गुक् च।" उणा० ३। ५६। इति उनन्
ततो गुक्। ततः प्रज्ञाद्यण्। यद्वा फल्गुन्यां
फल्गुनीनक्षत्रे जातः फल्गुनः। स एव। अण्
एतन्निरुक्तिर्यथा, महाभारते। ४। ४२। १६।
"उत्तराभ्याञ्च पूर्व्वाभ्यां फल्गुनीभ्यामहं दिवा।
जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः॥")
गुडाकेशः। नरौजसः। अर्ज्जुनस्यः। तपस्य
मासः॥ यथा,—
"फाल्गुनस्तु गुडाकेशे नदीजार्ज्जुनभूरुहे।
तपस्यसंज्ञे मासे तत्पूर्णिमायान्तु फाल्गुनी॥"
इति दन्त्यनान्तवर्गे मेदिनी॥
अतएव।
"फाल्गुने गगने फेने बलमिच्छन्ति वर्व्वराः।"
इति कारिका सम्मतिका। अत्र अबलमिच्छ-
न्तीति अकारप्रश्लेषो भ्रान्तानाम्॥*॥
(फल्गुनी पौर्णमासी अस्मिन्नस्ति। "विभाषा
फल्गुनीश्रवणाकार्त्तिकीचैत्रेभ्यः।" ४।२।२३।
इति प्रत्ये अण्।)
वैशाखादिद्वादशमासान्तर्गतैकादशमासः।
फल्गुनीनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासे
सः। इति तु प्रायिकाभिप्रायम्। स च त्रिविधः।
सुखचान्द्रो गौणचान्द्रः सौरश्च। यथा।
कुम्भस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तो मासो
मुखचान्द्रः। मुखचान्द्रफाल्गुनमासीयपौर्ण-
मास्यन्तः क्षयप्रतिपदादिको मासो गौण-
चान्द्रः। कुम्भराशिस्थरविभोगोपलक्षितकालात्-
मको मासः सौरः। इति मलमासतत्त्वम्॥*॥
तत्पर्य्यायः। तपस्यः २ फाल्गुनिकः ३ फल्गुनः
४। इत्यमरभरतौ॥ वत्सरान्तकः ५। इति
राजनिर्घण्टः॥*॥ तत्र जातफलम्।
"प्रियंवदः सज्जनवल्लभश्च
परोपकारी विमलाशयश्च।
दाता मिताशी प्रमदाभिलाषी
स्यात् फाल्गुने यस्य जनस्य जन्म॥"
इति कोष्ठीप्रदीपः॥
अथ फाल्गुनकृत्यम्। तत्र माघ्यनन्तरं
फाल्गुनकृष्णाष्टम्यां कालराकावासूकव्रताकोप-
करणान्नेन श्राद्धं कर्त्तव्यम्॥*॥ गौणचान्द्र-
फाल्गुनकृष्णचतुर्दश्यां शिवरात्रिव्रतम्। यद्दिने
प्रदोषनिशीथोभयव्यापिनी चतुर्दशी तद्दिने
व्रतमुभयव्याप्यनुरोधात्। यदा पूर्व्वेद्युर्निशीथ-
व्यापिनी परेद्युः प्रदोषमात्रव्यापिनी तदा पूर्व्वे-
द्युर्व्रतं प्रधानकालव्याप्यनुरोधात्। यदा तु
पूर्व्वेद्युर्न निशीथव्याप्तिः परदिने प्रदोषव्यापिनी
तदा परदिने प्रदोषव्यापिनीति वचनात्॥*॥
सुखचान्द्रफाल्गुनशुक्लद्वादश्यां गोविन्दद्वादशी।
"फाल्गुने शुक्लपक्षस्य पुण्यर्क्षे द्वादशी यदि।
गोविन्दद्वादशी नाम महापातकनाशिनी॥"
महापातकनाशकामो गङ्गायां स्नानमहं
करिष्ये। अत्र पद्मपुराणीयो मन्त्रः।
"महापातकसंज्ञानि यानि पापानि सन्ति मे।
गोविन्दद्वादशीं प्राप्य तानि मे हर जाह्नवि!॥"
फाल्गुनपौर्णमास्यां दोलयात्रा। तीर्थचिन्ता
मतौ ब्रह्मपुराणम्।
"नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम्।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत्॥"
स्कन्दपुराणीयपुरुषोत्तममाहात्म्ये त्रिंशाध्याये।
"फाल्गुन्यां क्रीडनं कुर्य्यात् दोलायां मम
भूपते!॥"
इति श्राद्धतत्त्वम्॥

फाल्गुनाद्युजः, पुं, (फाल्गुनादद्युपश्चात् जायते
इति। अद्यु+जन्+ड।) वसन्तकालः। इति
हारावली। अर्ज्जुनस्य कनिष्ठभ्राता च॥

फाल्गुनिकः, पुं, (फाल्गुनी पौर्णमास्यस्मिन् मासे
इति। "विभाषा फाल्गुनीश्रवणेति।" ४। २।
२३। इति ठक्।) फाल्गुनमासः। इत्यमरः।
१। ४। १५॥

फाल्गुनी, स्त्री, (फल्गुनीभिर्युक्ता पौर्णमासी।
"नक्षत्रेण युक्तः कालः।" ४। २। ३। इति
अण्। ततो ङीप्।) फाल्गुनमासस्य पूर्णिमा।
इति मेदिनी। ने, ६६॥ पूर्व्वफल्गुनीनक्षत्रम्।
उत्तरफल्गुनीनक्षत्रम्। इत्यमरटीकायां
भरतः॥

फिः, पुं, पापः। निष्फलवाक्यम्। इत्येकाक्षर-
कोषः। कोपः। इति शब्दरत्नावली॥

फिङ्कः, पुं, (फिङ्ग इति शब्देन कायति शब्दा-
यते इति। कै+कः।) पक्षिविशेषः। फिङ्गा
इति भाषा। तत्पर्य्यायः। कलिङ्गः २ कलिङ्गः
३ धूम्राटः ४। इति शब्दमाला। भृङ्गः ५।
इत्यमरः॥

फिरङ्गः, पुं, (फौ पापे क्रीधे वा रङ्गोऽनुरागो
यस्य।) स्वनामख्यातम्लेच्छदेशः। यथा,—
"पूर्व्वाम्नाये नवशतं षड्ग्रीतिः प्रकीर्त्तिताः।
फिरङ्गभाषया मन्त्रास्तेषां संसाधनादृषिः॥
अधिपा मङ्गलानाञ्च संख्यामेष्वपराजिताः।
इंरेशा नव षट् पञ्च लङ्कजाश्चापि भाविनः॥"
इति मेरुतन्त्रे २३ प्रकाशः॥
रोगविशेषः। अथ फिरङ्गस्य निरुक्तिमाह।
"फिरङ्गसंज्ञके देशे बाहुल्येनैव यद्भवेत्।
तस्मात् फिरङ्ग इत्युक्तो व्याधिर्व्याधिविशारदैः॥"
तस्य विप्रलम्भं निदानमाह।
"गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम्।
फिरङ्गिणोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः॥
व्याधिरागरजो ह्येष दोषाणामत्र संक्रमः।
भवेत्ता लक्षयेत्तेषां लक्षणैर्भिषजां वरः॥"
फिरङ्गिण्याः प्रसङ्गत इति विशेषार्थम्॥*॥
रूपमाह।
"फिरङ्गविविधो ज्ञेयो बाह्याभ्यन्तरस्तथा।
बहिरन्तर्भवश्चापि तेषां लिङ्गानि च ब्रुवे॥
तत्र बाह्यः फिरङ्गः स्यादिस्फोटसदृशोऽल्पकः।
स्फुटितो व्रणवद्ज्ञेयः सुखसाध्योऽपि स स्मृतः॥
सन्धेराभ्यन्तरः स स्यादुभयोर्लक्षणैर्युतः।
कष्टदोऽतिचिरस्थायी कष्टसाध्यतमश्च सः॥"
उपद्रवान् आह।
"कार्श्यं बलक्षयो नासाभङ्गो वङ्क्षे च मन्दता।
अस्थिग्रोगोऽस्थिवक्रत्वं फिरङ्गोपद्रवा अमी॥"
साध्यत्वादिकमाह।
"बहिर्भवो भवेत् साध्यो नूतनो निरुपद्रवः।
आभ्यन्तरस्तु कष्टेन साध्यः स्यादयमामयः॥
बहिरन्तर्भवो जीर्णः क्षीणस्योपद्रवैर्युतः।
बोध्यो व्याधिरसाध्योऽयमित्याचुर्मुनयः पुरा॥"
अथ फिरङ्गस्य चिकित्सा।
"फिरङ्गसंज्ञकं रोगं रसः कर्पूरसंज्ञकः।
अवश्यं नाशयेदेतदूचुः पूर्व्वे चिकित्सकाः॥
लिख्यते रसकर्पूरप्राश्ने विधिरुत्तमः।
अनेन विधिना खादन्मुखे व्रणं न विन्दति॥
गोधूमचूर्णं संनीय विदध्यात् सूक्ष्मकूपिकाम्।
तस्मध्ये निःक्षिपेत् सूतं चतुर्गुञ्जामितं भिषक्॥
ततस्तु गुटिकां कुर्य्यादृयथा न स्यादसो बहिः।

सूक्ष्मचूर्णं लवङ्गस्य तां वटीमवधूलयेत् ॥
दन्तस्रावो यथा न स्यात्तथा तामम्भसा गिलेत् ।
ताम्बूलं भक्षयेत् पश्चाच्छाकान्नलवणांस्त्यजेत् ॥
श्रममात्रपमध्वानं विशेषात् स्त्रीनिषेवणम् ॥
इति कर्पूररसः ॥ १ ॥

पारदष्टङ्कमानः स्यात् खदिरष्टङ्कसंमितः ।
आकारकरभस्यापि याम्यष्टङ्कद्वयोन्मितः ॥
टङ्कत्रयमितं चौद्रं खल्ले सर्वं विनिःक्षिपेत् ।
संमर्द्य तस्य सर्वस्य कुर्य्यात् सप्त वटीर्भिषक् ॥
स रोगी भक्षयेत् प्रातरेकैकामनुना वटीम् ।
वर्जयेदम्लवर्गौ फिरङ्गस्तस्य नश्यति ॥
इति सप्तगुणिकावटी ॥ २ ॥

पारदः कर्षमात्रः स्यात्तावदेव हि गन्धकः ।
तद्द्विगा अपि मात्राः स्युस्तेषां कुर्य्याच्च कज्जलीम् ॥
तस्याः सप्त वटीः कुर्य्यात्ताभिर्द्वंद्वं प्रयोजयेत् ।
दिनानि सप्त तेनस्यात् फिरङ्गान्तो न संशयः ॥
इति धूमप्रयोगः ॥ ३ ॥

पीतपुष्पबलापत्ररसेष्टङ्कमितं रसम् ।
हस्ताभ्यां मर्द्दयेत्तावत् यावत् स्वेदो न दृश्यते ॥
ततः संखेदयेद्धस्तादेवं वासरसप्तकम् ।
त्यजेल्लवणमम्लञ्च फिरङ्गेन नश्यति ॥ ४ ॥

चूर्णयेन्निम्बपत्राणि पथ्यां निम्बाष्टमांशिकाम् ।
धात्रीञ्च तावतीं रात्रिं निम्बीयैरम्भसा सह ॥
ग्राह्यमानमिदं चूर्णमक्षीयादम्भसा सह ।
फिरङ्गं नाशयत्येव वाह्यमाभ्यन्तरं तथा ॥ ५ ॥

तोपचीनिभवं चूर्णं ग्राह्यमानं समाक्षिकम् ।
फिरङ्गव्याधिनाशाय भक्षयेल्लवणं त्यजेत् ॥
लवणं यदि वा त्यक्तुं न शक्नोति तदा जनः ।
सैन्धवं स हि भुञ्जीत मधुरोपरसं हि तत् ॥ ६ ॥

अर्द्धकर्षमितं क्षतं कुरण्टकरसैः सह ।
खल्ले विमर्द्दयेत्तत्र पलार्द्धं गुग्गुलुं क्षिपेत् ॥
तत्राकैकरभं कुष्ठं त्रिफलाच्च पृथक् पृथक् ।
अर्द्धकर्षमितं सर्वं चूर्णयित्वा तु निःक्षिपेत् ॥
तत् सर्वं मधुसर्पिर्भ्यां द्विपलाभ्यां पृथक् पृथक् ।
मर्द्दयेदथ तत् खादेदर्द्धकर्षमितं रसम् ॥
व्रणः फिरङ्गरोगोत्थस्तस्यावश्यं विनश्यति ।
अस्थ्योऽपि चिरजातोऽपि प्रशाम्यति महाव्रणः ॥
एतद्भक्षयतः शोथो सुखस्य च न जायते ।
वर्जयेदत्र लवणमेकविंशतिवासरान् ॥ ७ ॥
इति फिरङ्गाधिकारः ।" इति भावप्रकाशः ॥

फिरङ्गरोटी, स्त्री, (फिरङ्गप्रिया रोटी । फिरङ्गानां रोटीति वा ।) रोटिकाविशेषः । पाओरोटी इति पाँउरुटि इति च भाषा । सा तु तालस्याथवा खर्ज्जूरस्य रसेन मधुरिकाजलेन वा मिश्रितां गोधूमकणिकामधिककालसुत्तमं संमर्द्य गोलाकारं स्थूलं स्थूलं निर्म्माय तन्दूरपाकेन निष्पादिता भवति । इति पाकराजेश्वरः ॥

फिरङ्गिणी, स्त्री, (फिरङ्गदेशो जन्मस्थानत्वेनास्यास्या इति । फिरङ्ग + इनि । ङीप् ।) फिरङ्गदेशोद्भवनारी । यथा,—
"गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम् ।
फिरङ्गिणीतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः ॥"
इति भावप्रकाशः ॥

फिरङ्गी [न्] पुं, (फिरङ्ग + इनि: ।) फिरङ्गदेशोद्भवपुरुषः । अस्य प्रमाणं पूर्व्वग्रन्थे द्रष्टव्यम् ॥

फुः, पुं, मन्त्रकम् । तुच्छवाक्यम् । इति विश्वः ॥

फुक्कः, पुं, (फुत्रासदवाक्येन कायति शब्दायते इति । फु + कै + क ।) पक्षी । इति शब्दचन्द्रिका ॥

फुटः, त्रि, (स्फुटतीति । स्फुट + कः । पृषोदरादित्वात् साधुः ।) सर्षपशाकः । इति हेमचन्द्रः । ४ । ३८१ ॥

फु(फू)त्, य, अनुकरणशब्दः । इति फुत्कारशब्ददर्शनात् । (यथा, "बालः पयसा दग्धोऽपि दध्यपि फुत्कृत्य भक्षयति ।" इति प्राचः ॥) तुच्छभाषणम् । इति केचित् ॥

फुत्करः, पुं, (फुदित्यव्यक्तशब्दं करोतीति । कृ + टः ।) अग्निः । इति शब्दचन्द्रिका ॥

फुत्कारः, पुं, (कृ + भावे घञ् । फुदित्यव्यक्तशब्दस्य कारः करणम् ।) फुत्करणम् । फु इति फूँक् इति च भाषा । फुत्कारवति पावके आहुतिनिषेधो यथा, तिथ्यादितत्त्वे ।
"अल्पे रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके ।
आर्द्रकाष्ठैः सशब्दप्ते फुत्कारवति पावके ॥
ज्वालार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम् ।
आहुतिं जुहुयादृग्यस्तु तस्य नाशो भवेद्ध्रुवम् ॥"

फुत्कृतिः, स्त्री, (फुदित्यव्यक्तशब्दस्य कृतिः करणम् ।) फुत्कारः । यथा, काव्यचन्द्रिका ।
"स्फुर्ज्जत्फुत्कृतिभीतिसम्भ्रमचमत्कारस्फुरत्सम्भ्रमा ॥"

फुप्फुसः, पुं, पुप्फुसः । कोष्ठविशेषः । स च हृदयनाड़िकासंलग्नाग्र्यविशेषः । फ्याप्ड़ा फुल्का कापासे इति च लोके । इति सुश्रुतः ॥ यथा,—
"स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृद्धुक्कः फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥"
इति माधवकरः ।
अस्य व्याख्या । "आमस्य स्थानं आमाग्र्यः । नाभेरूर्द्धम् । अग्र्यः स्थानं पक्वाग्र्यः नाभेरधः । मूत्रस्य स्थानं वस्तिः । रुधिरस्य स्थानं यकृत्प्लीहानौ । हृत् हृदयं रक्तरसपाकमलवद्यः श्लेष्मतमलरूपः उक्कः स चाग्नदेशे व्यवस्थितः पुरीषाधानम् । फुप्फुसः हृदयस्य वामपार्श्वे फुप्फुस इति ख्यातः ।" इति विजयरक्षितः । (यथा च ।
"तद्वामे फुप्फुसः श्वेतो दक्षिणार्द्धे यकृत्स्मृतम् ।
उदानवायोराधारः फुप्फुसः प्रोच्यते बुधैः ॥"
इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

फुल्लतिः, स्त्री, (फुल्ल + क्तिन् । "ति च ।"७।३।८८। इति अत उत् ।) फलनम् । इति सुग्धबोधव्याकरणम् ॥

फुल्ल, विकासे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) दुखी । लट्यान्तः । विकास इह कस्य गताविति दन्त्यान्तस्य घञि रूपम् । विपूर्व्वत्वेनार्थान्तरवाचितया विकसनमित्यर्थः । फुल्लति मल्लीकलिका । इति दुर्गादासः ॥

फुल्लः, त्रि, (फुल्लतीति । फुल्ल + अच् । यद्वा, फलतीति । फल विसरणे + क्तः । "आदितश्च ।"७।२।१६। इति इड्भावः । "ति च ।" ७ । ४ । ८१ । इति उत्वम् । अनुपसर्गात् । फुल्लक्षीवेति ।"८।२।५५। इति निष्ठा तस्य लः ।) विकसितः । इत्यमरः । २।४।८ ॥ (यथा, महाभारते । १ । १२८ । ४१ ।
"जलञ्च शुशुभे च्छन्नं पुल्लैर्जलरुहैस्तथा ॥")
पुष्पम् । फुल इति भाषा । यथा,—
"श्रीपञ्चम्यां श्रियं देवीं फुल्लैः संपूजयेत् सदा ॥"
इति कालिकापुराणम् ॥

फुल्लदाम, [न्] क्ली, (फुल्लानां पुष्पाणां दाम इव ।) छन्दोभेदः । यथा,—
"भो गौ नौ तौ गौ ग्ररहयतुरगैः फुल्लदाम प्रसिद्धम् ॥"
उदाहरणं यथा,—
"ग्रन्थश्लोकानां प्रकटितकथनं ध्वस्तमालोक्य कंसं
हृष्यच्चेतोभिरिन्दिवसतिभिर्योमसंस्थैर्विमुक्तम् ।
सुग्धाभोदेन स्वगितदशदिग्भोगमाकृतभङ्गं
मौलौ दैत्यारेर्न्यपतदशुभं खस्तरोः फुल्लदाम ॥"
इति छन्दोमञ्जरी ॥

फुल्लफालः, पुं, (फुल्लं फलतीति । फल + अच् ।) मूर्पवातः । इति चिकाकश्लेषः ॥

फुल्लरीकः, पुं, (फल + "फर्फरीकादयश्च ।" उणा० ४ । २० । इति ईकन्प्रत्ययेन निपातनात् साधुः ।) देशः । सर्पः । इति संक्षिप्तसारोणादिवृत्तिः ॥

फुल्ललोचनः, पुं, (फुल्ले विकसिते लोचने यस्य ।) मृगविशेषः । इति शब्दचन्द्रिका ॥ प्रफुल्लनेत्रयुक्ते, त्रि ॥

फुल्लिः, स्त्री, विकाशः । इदुधातुकथने तिड्वत्तिड् वा इति संक्षिप्तसारटीकात् भावे इड्प्रत्ययेन निष्पन्नः ॥

फेनः, पुं, (स्फायते वर्द्धते इति । स्फाय + "फेनमीनौ ।" उणा० ३ । ३ । इति नक् पे-ग्रन्थादेशश्च । मतान्तरे णत्वम् । दन्त्यनान्तपाठस्तु गरीयान् ।) फेनः । तरलद्रव्योपर्युत्थितबुद्बुदाकारवस्तु । फेना इति भाषा । यथा,—
"पयःफेननिभा शय्या दान्ता रत्नपरिच्छदा ॥"
इति पुराणम् ॥
क्षीरोदः । इत्यमरः । २ । ८ । १०५ ॥ समुद्रफेना इति भाषा । अस्य मूर्द्धन्यणान्तस्य प्रमाणं यथा,—
"हंसश्रेण्यो नदीतीरे निनदैः संप्रतीयिरे ।
यथा सारस्वता मन्त्रा अन्तरे फेनसङ्गता ॥"
इत्यमरटीकायां रघुनाथचक्रवर्त्ती ॥

फेण(न)पः, पुं, स्वयंपतितफलादिजीविमुनिविशेषः। यथा, श्रीभागवते। ३। १२। ४३।
"वैखानसा वालिखिल्यौदुम्बराः फेणपा वने।
न्यासे कुटीचकः पूर्वे बह्वोदो हंसनिष्क्रियौ॥"
"वने स्थिताश्चत्वारः। तत्र वैखानसाः अकृष्टपच्यवृत्तयः। वालिखिल्याः नवेऽन्ने लब्धे पूर्वसञ्चितान्नत्यागिनः। औदुम्बराः प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति तत्र व्याकृतैः फलादिभिर्जीवन्तः। फेणपाः स्वयं पतितैः फलादिभिर्जीवन्तः। कुटीचकः स्वाश्रमधर्मप्रधानः। बह्वोदः कर्म्मोपसर्জ্জनीकृत्य ज्ञानाभ्यासप्रधानः। हंसो ज्ञानाभ्यासनिष्ठः। निष्क्रियः प्राप्ततत्त्वः। एते च सर्व्वे यथोत्तरं श्रेष्ठाः।" इति सङ्क्षेपकायां श्रीधरस्वामी॥ (फेनं पिबतीति। फेन+पा+कः। फेनपागकर्म्मरि, त्रि। यथा, महाभारते। १। ६४। २२।
"फेनपांश्च तथा वत्सान्न दुहन्ति स्म मानवाः॥")

फेली(नी), स्त्री, (स्फायते वर्द्धते इति। स्फाय+नक्। गौरादित्वात् ङीष्।) खनामख्यातमिष्टान्नविशेषः। यथा, ऋतुमञ्जरी।
"वटो वेशवाराह्वयक्लेन फेली-
समं पर्पटः स्निग्धबीजेन याति॥"

फेत्कारिणी, स्त्री, (फेत् करोतीति। फेत्+णिनिः। ङीप्।) तन्त्रविशेषः। यथा,—
"उन्मत्तभैरवं नारसिंहं डामरभैरवम्।
ग्रिवाकारं मलिनाद्यमसिताङ्गादि यामलम्॥
सिद्धयोगेश्वरं तन्त्रं योगिनीजालमम्बरम्।
दृष्ट्वा ज्ञात्वा विधिं फेत्कारिणीतन्त्रं विरच्यते॥"
इति प्रथमश्लोकद्वयम्॥
"फेत्कारिणीतन्त्रं इदं मयोक्तं
ज्ञात्वा समस्तागमसारभूतं।
ग्रन्थोर्विनाशाय धनाय धर्म्म-
मोक्षाय सम्यक् प्रयतो नियोज्यः॥"
इति फेत्कारिणीतन्त्रस्य शेषश्लोकः॥

फेत्कारीयः, पुं, तन्त्रविशेषः। तन्त्रसारादिषेऽयं फेत्कारीये इति ग्रासनं लिखितम्॥

फेनः, पुं, (स्फायते वर्द्धते इति। स्फाय+"फेनमौनौ।" उणा० ३। ३। इति नक् फेश्च्यन्तादेशश्च।) फेव। फेना इति भाषा। तत्पर्य्यायः। हिक्कीरः २ अभिकः ३। इत्यमरः। २। ६। १०५॥ हिक्किरः ४। इति ग्रन्थरत्नावली। बहुदकः ५ जलहायः ६ फेनकः ७। इति त्रिकाण्डशेषः॥ स्फायते फेनः स्फायी ड ह्रस्वो नाऽभीति ङेनः निपातनात् सधुक् दन्त्यनाम्नः। इत्यमरटीकायां भरतः॥ अस्य दन्त्यनाम्नस्य प्रमाणान्तरं यथा,
"वागीरं नगरं फेनमनश्च दन्त्यनाम्नितम्।
आदुर्मगधमिच्छन्ति केचिन्मूर्द्धन्यवान्वितम्॥"
इति भरतसेनविरचितं सुखबोधनम्॥
(यथा, रघुः। १३। ११।
"आतङ्कनक्रैः सहसोत्पतद्भि-
र्भिन्नान् दिधा पद्म सपुष्पफेनान्॥"
तरङ्गस्योपरिसमुत्थितबुद्बुदाकारवस्तुमात्रम्। यथा, महाभारते। १। ३। ५२।
"भोः फेनं पिबामि यमिमे वत्सा मातृणां स्तनान् पिबन्त उद्गिरन्ति॥" *॥ उग्रश्रवसः पुत्रः। यथा, हरिवंशे। ३१। २६।
"उग्रश्रवो महाराज! फेनस्तस्य सुतोऽभवत्॥")

फेनकः, पुं, (फेन+स्वार्थे संज्ञायां वा कन्।) फेनः। इति त्रिकाण्डशेषः॥ पिष्टकविशेषः। अस्य गुणाः। लघुत्वम्। रूक्षत्वम्। शुक्रकारित्वम्। पित्तवायुनाशित्वञ्च। इति राजवल्लभः॥ (यथा च सुश्रुते। १। ४६।
"क्षुद्याः पथ्यतमास्तेषां लघवः फेनकादयः॥"
गात्रमार्জ্জनादिवत् क्रियाविशेषः। तस्य गुणा यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये।
"ऊर्व्वोः सञ्जनयत्याशु फेनकः स्थैर्य्यलाघवे।
कण्डूकोठानिलस्तम्भमलरोगापहश्च सः॥")

फेनका, स्त्री, (फेनेन कायतीति। के+कः। टाप्।) जलपक्वतण्डुलचूर्णम्। इति शब्दचन्द्रिका॥

फेनदुग्धा, स्त्री, (फेन इव दुग्धं यस्याः।) दुग्धफेनीक्षुपः। इति राजनिर्घण्टः॥

फेनल, त्रि, (फेनोऽस्यस्येति। फेन+"फेनादिलच्च।" ५। २। ६६। इति चात् लच्।) फेनवान्। इति सिद्धान्तकौमुदी॥

फेनवान्, [त्] त्रि, (फेनोऽस्यस्येति। "फेनादिलच्च।" ५। २। ६६। इत्यत्र अन्यतरस्यामित्यनुवृत्तेः पक्षे मतुप्। मस्य वः।) फेनिलः। इति सिद्धान्तकौमुदी। (यथा, महाभारते। ३। १४३। २०।
"तत्र सागरगा ह्यापः कीर्य्यमाणाः समन्ततः।
प्रादुरासन् सुकलुषाः फेनवत्यो विशाम्पते!॥")

फेनवाही, [न्] पुं, (फेनवत् सुश्रुतां वहतीति। वह+णिनिः।) वस्त्रम्। इति ग्रन्थमाला॥

फेना, स्त्री, (फेनोऽस्ति यावुल्लेनास्याः। फेन+अच्। टाप्।) खातलाक्षुपः। इति राजनिर्घण्टः॥

फेनाग्र्य, क्ली, (फेनस्याग्रम्।) बुद्बुदम्। इति हारावली। २०५॥

फेनायमान, त्रि, (फेनसुद्गमतीति। फेन+"फेनादिभ्यः क्यङ्।" ३। १। १६। इत्यस्य वार्त्तिकोक्त्या क्यङ्। ततः शानच्।) उत्थितफेनदुग्धादिः। फेन इव आचरति यः इत्यर्थे फेनशब्दात् क्याप्रत्ययानन्तरं शानप्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। ६। ३। ३७।
"प्रतिस्रोतोवहा नद्यः सरितः स्रोतिताश्च काः।
फेनायमानाः कूपाश्च नर्दन्ति वृषभा इव॥")

फेनाश्मनिः, पुं, (फेन इवाश्मनिर्वज्रं यस्य। फेनेन वृत्रासुरनाशनादेवास्य तथात्वम्।) इन्द्रः। इति शब्दमाला॥ (एतद्वृत्तान्तो यथा, देवीभागवते। ६। ६। ५५—५६।
"इति सञ्चिन्त्य मनसा कथं हन्यां रिपुं रवे।
अजेयं सर्व्वदा सर्व्वदेवैश्च दानवैस्तथा॥
यदि वृत्रं न हन्म्यद्य वर्द्धयित्वा महाबलम्।
न श्रेयो मम नूनं स्यात् सर्व्वथा रिपुवर्द्धनात्॥
अपां फेनं तदापश्यत् समुद्रे पर्व्वतोपमम्।
नायं शुष्को न चार्द्रोऽयं न च शस्त्रमिदं तथा॥
अपां फेनं तदा शक्रो जग्राह किल लीलया।
परां शक्तिञ्च संसार भक्त्या परमया युतः॥
स्मृतमात्रा तदा देवी स्वाग्रं फेने न्यधापयत्।
वज्रं तदागतं तत्र चकार हरिसंयुतम्॥
फेनागतं पविं तत्र शक्रश्चिक्षेप तं प्रति।
सहसा निपपातासु वज्राहत इवाचलः॥")

फेनिका, स्त्री, (फेन इवाकृतिरस्यस्याः। फेन+ठन्। टाप्।) पक्वान्नविशेषः। खाजा. इति भाषा। यथा,—
"समितायाः घृताद्यायाः वर्त्तीर्दीर्घाः समाचरेत्।
तासु सन्निहितां दीर्घां पीठस्योपरि धारयेत्॥
वेल्लयेद् वेल्लनेनैका यथैका पर्पटी भवेत्।
ततश्छुरिकया तान्तु संलग्नाश्चैव कर्त्तयेत्॥
ततस्तु वेल्लयेद्भूयः सङ्कटेन च लेपयेत्।
घृतचूर्णं घृतं तोयं मिश्रितं सङ्कटं भवेत्॥
ततः संवृत्य तां लोम्नीं विदधीत पृथक् पृथक्।
पुनस्तां वेल्लयेत् लोम्नीं यथा स्यान्मण्डलाकृतिः॥
ततस्तां सुपचेदाज्ये भवेयुश्च पुटाः स्फुटाः।
सुगन्धया शर्करया तदूलनमाचरेत्॥
सिद्धेयं फेनिकानाम्नी मण्डकेन समा गुणैः।
ततः किञ्चिल्लघुरियं विशेषोऽयमुदाहृतः॥"
इति भावप्रकाशः॥

फेनिलं, क्ली, (फेनोऽस्यस्येति। फेन+"फेनादिलच्च।" ५। २। ६६। इति इलच्।) कोलिफलम्। (अस्य पर्य्यायो यथा,—
"पुंसि स्त्रियाञ्च कर्क्कन्धुर्बदरी कोलमित्यपि।
फेनिलं कुवलं घोटा सौवीरं बदरं महत्।
अजप्रिया कुहा कोली विषमो भयकण्टका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) मदनफलम्। सफेने, त्रि। इति मेदिनी॥ (यथा, महाभारते। १। १५३। १०।
"उक्तं नवं प्रणास्यामि फेनिलं रुधिरं बहु॥")

फेनिलः, पुं, (फेन+इलच्।) अरिष्टवृक्षः। इत्यमरः। २। ४। ३१॥ हारिठा इति ख्यातः॥ (अस्य पर्य्यायो यथा,—
"अरिष्टकस्तु माङ्गल्यः क्षुद्रवर्ग्योऽर्थसाधनः।
रक्तबीजः पीतफेनः फेनिलो गर्भपातनः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) बदरवृक्षः। इति राजनिर्घण्टः॥ (स्त्रियां टाप्। जलब्राह्मी। यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये।
"अग्निदीप्तैः सुगीतैश्च फेनिलापल्लवैस्तथा॥")

फेरः, पुं, (फे इति ग्रन्थं राति ग्रहातीति। रा ग्रहणे+कः।) ग्रहणम्। इति ग्रन्थरत्नावली॥

फेरण्डः, पुं, (फे इत्यव्यक्तशब्देन रण्डतीति। रण्ड+अच्।) ग्रहणम्। इति हेमचन्द्रः। ४। ३५५॥

फेरवः, पुं, (फे इति रवो यस्य ।) शृगालः । इत्यमरः ।२।५।५ ॥ (यथा, कथासरित्सागरे । ४७ । ५३ ।
"हृष्यतां तरतां रक्ते नदतां चोत्सवाय सः ।
शूराणां फेरवाणाञ्च भूतानाञ्चाभवद्रवः ॥")
राक्षसः । इति मेदिनी । वे, ४४ ॥ धूर्ते हिंस्रे च, त्रि । इति शब्दरत्नावली ॥

फेरुः, पुं, (फे इति शब्देन रौतीति । रु ल ध्वनौ + मितद्वादित्वात् डुः ।) शृगालः । इत्यमरः । २ । ५ । ५ ॥ (यथा, भागवते ।८।१६।७।
"यद्देहेषु येऽतिमयो मार्च्चिताः सलिलैरपि ।
यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः ॥")

फेल, ऋ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अपिफेलत् पिफेलतुः । इति दुर्गादासः ॥

फेलं, क्ली, (फेल्यते दूरे निक्षिप्यते इति । फेल + घञ् ।) शुक्लसमुज्झितम् । उच्छिष्टम् । इति शब्दरत्नावली ॥

फेलकः, पुं, (फेल + स्वार्थे संज्ञायां वा कन् ।) शुक्लसमुज्झितम् । इति जटाधरः ॥

फेला, स्त्री, (फेल्यते इति । फेल + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । टाप् ।) शुक्लसमुज्झितम् । इत्यमरः । २ । ६ । ५६ ॥

फेलिः, स्त्री, (फेल + इन् ।) उच्छिष्टम् । इति जटाधरः ॥

फेलिका, स्त्री, (फेलिरेव । स्वार्थे कन् ।) उच्छिष्टम् । फेलाशब्दात् स्वार्थे ठिकप्रत्ययेन निष्पन्ना ॥

फेली, स्त्री, (फेलि + "ऋदिकारादक्तिनः ।" इति पक्षे ङीष् ।) शुक्लसमुज्झितम् । इति शब्दरत्नावली ॥

ब, वकारः । स च त्रयोविंशत्यक्षरवर्णः । (पवर्गस्य तृतीयवर्णश्च ।) तस्योच्चारणस्थानं ओष्ठः । इति वाकरणम् ॥ (यदुक्तं सिद्धान्तकौमुद्याम् । "उपूपध्मानीयानामोष्ठौ ॥") तस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"बकारं शृणु चार्व्वङ्गि ! चतुर्वर्गप्रदायकम् ।
शरच्चन्द्रप्रतीकाशं पञ्चदेवमयं सदा ॥
पञ्चप्राणात्मकं वर्णं त्रिबिन्दुसहितं सदा ॥"
(वर्णोद्धारतन्त्रे वर्णमालायामस्य स्वरूपमाह ।)
"त्रिकोणरूपिणी रेखा विष्णुग्रन्थिरूपिणी ।
मात्रा शक्तिः परा ज्ञेया ध्यानमस्य प्रचक्षते ॥"
अस्य ध्यानं यथा,—
"नीलवर्णां त्रिनयनां नीलाम्बरधरां पराम् ।
नागहारोज्ज्वलां देवीं द्विभुजां पद्मलोचनाम् ॥
एवं ध्यात्वा बकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तत्प्रयोगममन्त्रो यथा,—
"त्रिशक्तिसहितं वर्णं विविधान्ततोपेतम् ।
स्वयं कुण्डलिनीं देवीं सततं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"बो वनी भूधरो मार्गो घर्घरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगर्द्दः कपर्द्दिनी ॥
दृष्टवंशो भयामातुः शिखिवाहो युगन्धरः ।
सुखबिन्दुर्बली घण्टा योद्धा त्रिलोचनप्रियः ॥
क्लेदिनी तापिनी भूमिसुगणिन्द्रबलिप्रियः ।
सुरभिर्मुखविष्णुश्च संहारो वसुधाधिपः ॥
षष्ठापूरं चपेटा च मोदको गगनं प्रति ।
पूर्व्वाषाढ़ामध्यलिङ्गौ ग्रनिः कुम्भस्तृतीयकौ ॥"
इति नानातन्त्रग्रन्थम् ॥

बंहिष्ठः, त्रि, (अयमेषामतिशयेन बहुलः । बहुल + "अतिशायने तमबिष्ठनौ ।"५ । ३ । ५५ । इति इष्ठन् । "प्रियस्थिरेति ।" ६ । ४ । १५७ । इति बंहि-आदेशः ।) अतिशयबहुलः । इत्यमरः ॥ (यथा, महाभारते । १२ । ३२८ । ३६ ।
"योऽहिः संयोध्य जीमूतान् प्रयन्नाय प्रयच्छति ।
उदहो नाम बंहिष्ठस्तृतीयः स सदागतिः ॥")

बंहीयान्, [स्] त्रि, (अयमनयोरतिशयेन बहुलः । बहुल + "द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् । "प्रियस्थिरस्फिरोरुबहुलेति ।"६ । ४ । १५७ । इति बंहि-आदेशश्च ।) अतिशयबहुलः । अयमनयोरतिशयेन बहुः इत्यर्थे बहुशब्दादीयसुप्रत्ययेन निष्पन्नः । इति मुग्धबोधमतम् ॥

बः, पुं, वरुणः । कुम्भः । इति शब्दरत्नावली ॥
"बः पुमान् वरुणे विष्णौ भगे लोभे गतेऽपि च ।
गत्यन्ने तनुसन्ताने पुंस्येव वपने स्मृतः ॥"
इति मेदिनी । वे, १ ॥ * ॥
तस्य षाङ्गेतिकनामानि यथा । युगन्धरः १ सुरभिः २ सुखविष्णुः ३ संहारः ४ वसुधाधिपः ५ । इति बीजवर्णाभिधानम् । भूधरः ६ दृग्गर्द्दः ७ । इति रुद्रयामलोक्तबीजाभिधानम् ॥
अपि च ।
"बो वनी भूधरो मार्गो घर्घरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगर्द्दः कपर्द्दिनी ॥
दृष्टवंशो भयामातुः शिखिवाहो युगन्धरः ।
सुखबिन्दुर्बली घण्टा योद्धा त्रिलोचनप्रियः ।
क्लेदिनी तापिनी भूमिसुगणिन्द्रबलिप्रियः ।
सुरभिर्मुखविष्णुश्च संहारो वसुधाधिपः ॥
षष्ठापूरं चपेटा च मोदको गगनं प्रति ।
पूर्व्वाषाढ़ामध्यलिङ्गौ ग्रनिः कुम्भस्तृतीयकौ ॥"
इति तन्त्रान्तरम् ॥

ब(ब)कः, [ऽ] ङ कौटिल्ये । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक० च-सेट् ।) कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च । ङ, बङ्कते । ड, बङ्कते काष्ठं कुटिलं स्यादित्यर्थः । बङ्कते काष्ठं कुटिलं करोतीत्यर्थः । इति दुर्गादासः ॥

ब(ब)कः, पुं, (ब(ब)ङ्कते कुटिलीभवतीति । बकि + अच् । पृषोदरादित्वात् नलोपः ।) खनाम-

ख्यातपक्षिविशेषः । तत्पर्य्यायः । कङ्कः २ । इत्यमरः । २ । ५ । २२ ॥ द्वारबलिभुक् ३ कर्करेरुः ४ शुक्लवायसः ५ दीर्घजङ्घः ६ वकोटः ७ शुक्लबलिप्रियः ८ । इति शब्दरत्नावली ॥ निघण्टौ ९ शिखी १० चन्द्रविहङ्गमः ११ । इति त्रिकाण्डशेषः ॥ तीर्थसेवी १२ तापसः १३ मीनघाती १४ ऋषाध्यायी १५ निश्चलाङ्गः १६ धार्मिकः १७ । इति राजनिर्घण्टः ॥ अस्य मांसस्य गुणाः ।
"शूरारिबककाकाश्च दात्यूहाः पवनाशनाः ॥"
इति रत्नावली ॥

अपि च ।
"हंससारसकाचाषबकक्रौञ्चशूरारिकाः ।
नन्दीमुखीसकादम्बावलाकाद्याः प्लवाः स्मृताः ॥
प्लवन्ते सलिले यस्मात् एते तस्मात् प्लवाः स्मृताः ॥
कुलेचराः प्लवाश्चापि कोशस्थाः पादिनस्तथा ।
मत्स्या एते समाख्याताः पञ्चधानूपजातयः ॥
आनूपा मधुराः स्निग्धा गुरवो बद्धिसादनाः ।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशम् ॥
तथाभिष्यन्दिनस्ते हि प्रायोऽपथ्यतमाः स्मृताः ॥"
इति भावप्रकाशः ॥

खनामख्यातपुष्पवृक्षः । तत्पर्य्यायः । शिववल्ली २ पाशुपतः ३ एकाष्ठीलः ४ वसुः ५ । इत्यमरः ॥ एकाष्ठीला ६ वृक्षः ७ वसुकः ८ वल्लकः ९ । इति तट्टीका ॥ बकपुष्पः १० शिवमल्ली ११ । इति शब्दरत्नावली ॥ काकपीलुः १२ स्थूलपुष्पः १३ शिवप्रियः १४ काकनामा १५ वसवृक्षः १६ खपूरकः १७ रक्तपुष्पः १८ सुनितरः १९ अगस्तिः २० वङ्गसेनकः २१ । इति रत्नमाला ॥ अगस्त्यः २२ शीघ्रपुष्पः २३ सुनिदुमः २४ व्रणारिः २५ दीर्घफलकः २६ वक्रपुष्पः २७ सुरप्रियः २८ ।
"सितपीतनीललोहितकुसुमभेदाच्चतुर्विधोऽगस्तिः ।
मधुरग्निग्निरदोषश्रमकासविनाशनश्च भूतघ्नः ॥"
तथा च ।
"अगस्तिं शिशिरं गौल्यं त्रिदोषघ्नं श्रमापहम् ।
बलासकासवैवर्ण्यभूतघ्नञ्च बलावहम् ॥"
इति राजनिर्घण्टः ॥

अपि च ।
"अगस्तिकुसुमं शीतं चातुर्थकनिवारकम् ।
नक्तान्ध्यनाशनं तिक्तं कषायं कटुपाकि च ।
पीनसश्लेष्मपित्तघ्नं वातघ्न सुनिभिर्मतम् ॥"
इति भावप्रकाशः ॥

अन्यच्च ।
"वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि ।
कटुपाकानि तिक्तानि कासक्षयकराणि च ॥"
इति राजवल्लभः ॥
"बकः पाशुपतश्चैव शिवापीडश्च सुव्रतः ।
वसुकश्च शिवाङ्गश्च शिवेष्टः क्रमपूरकः ॥
शिवमल्लिः शिवाजादः शम्भवो रविसंमितः ।

वकोऽतिग्निग्निरस्तिक्तो मधुरो मधुगन्धकः ।
पित्तदाहकफश्वासश्रमहारी च दीपनः ।"
इति च राजनिर्घण्टः ।
"ग्रिवमल्ली पाशुपत एकाष्ठीला वुको वसुः ।
वुकोऽनुष्णः कटुस्तिक्तः कफपित्तविषापहः ।
योनिशूलक्षयादाहकृछ्रशोथास्रगाशुनः ।"
इत्यपि भावप्रकाशः ।
नालयशुकारः । यथा,—
"————ग्रो वाग्नो वपरो वकः ।"
इति बीजवर्णाभिधानम् ।*।
कुवेरः । रक्षोविशेषः । इति मेदिनी । के,३०। स च भीमेन हतः । (यथा महाभारते ।१।६५।७३।
"तस्यामप्येकचक्रायां वकं नाम राक्षसं हत्वा पाञ्चालनगरमभिगताः ।") अत्र कोषे पवर्गीय वकारादौ पठितोऽयं शब्दः किन्तु अमरटीकायां भरतेन अन्तःस्थवकारादिवचक्रधातुभ्यां क्रमेण घप्रत्ययेन अनुप्रत्ययेन च साधितः ।*। यन्त्रविशेषः । यथा,—
"जलकच्छपपातालदोलाभूधरवायुकाः ।
वकाद्या यन्त्रभेदाः स्युर्व्यान्याद्याश्च मूषिकाः ।"
इति शब्दचन्द्रिका ।
अस्य विवरणं यथा, वैद्यके ।
"दीर्घकण्ठकाचकूप्या गिलयेत् खल्वभाण्डकम् ।
तिर्यक्-स्थित्वा पचेत् पुल्यां वकयन्त्रमिति स्मृतम् ।"
असुरविशेषः । स च श्रीकृष्णेन हतः । यथा,—
"खं खं वतसकुलं सर्व्वे पाययिष्यन्त एकदा ।
गत्वा जलाशयाभ्यासं पाययित्वा प्रपुर्जलम् ।
ते तत्र ददृशुर्बाला महासत्त्वमवस्थितम् ।
तत्र सुवज्रनिर्भिन्नं गिरेः शृङ्गमिव च्युतम् ।
स वै वको नाम महानसुरो बकरूपधृक् ।
आगत्य तरसा कृष्णं तीक्ष्णतुण्डोऽग्रसद्बली ।
कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः ।
बभूवुरिन्द्रियाणीव विना प्राणं विचेतसः ।
तं तालुमूलं प्रदहन्तमग्निवद्
गोपालसूनुं पितरं जगद्गुरोः ।
चञ्चूहं सद्योऽतिरुषाऽऽददे बक-
स्तुण्डेन हन्तुं पुनरभ्यपद्यत ।
तमापतन्तं स निगृह्य तुण्डयो-
र्दोर्भ्यां बकं कंससखं सतां गतिः ;
पश्यत्सु बालेषु ददार लीलया
सदाबको वीरशिरोऽवीकसाम् ।"
इति श्रीभागवते १० स्कन्धे ११ अध्यायः ।
ब(व)कचिञ्चिका, स्त्री, मत्स्यविशेषः । तत्पर्य्यायः । बकाची २ । इति हारावली । १८८ ।
ब(व)कजित्, पुं, (बकं जितवान् इति । जि + क्विप् ।) भीमसेनः । इति त्रिकाण्डशेषः । श्रीकृष्णश्च ।
ब(व)कधूपः, पुं, (बक इव शुभ्रवर्णो धूपः ।) दक-धूपः । इत्यमरटीका ।
ब(व)कनिसूदनः, पुं, (निसूदयति हन्तीति । सूदि + ल्युः । बकस्य निसूदनो घातकः ।) भीमसेनः । इति हेमचन्द्रः । १ । २७२ । श्रीकृष्णश्च ।
ब(व)कपक्षकं, क्ली, (बकोपलक्षिताः पक्षा यत्र यस्मिन् कप् । बकोऽपि तत्र नाम्नीयादिति वचनादेव तथात्वम् ।) कार्त्तिकशुक्लैकादश्यादिपञ्चतिथ्यात्मकम् । यथा,—
"तत्रैकादश्यादितिथिपञ्चकं बकपञ्चकम् ।
बकोऽपि तत्र नाम्नीयान्मत्स्यश्चैव कदाचन ।
इति वचनात् ।" इति कृत्यतत्त्वम् ।
"किञ्च । कार्त्तिकमधिकृत्य ब्रह्मपुराणम् ।
'एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु ।
दिने दिने च खादेयं घृतलासु नदीषु च ।
वर्ज्जितव्या तथा हिंसा मांसभक्षणमेव च ।'
ततश्च मांसभक्षणनिषेधे कार्त्तिकमासतच्छुक्ल-पञ्चतदेकादश्यादिपञ्चदिनानि गृह्यान्नभक्षणभेदात् पापतारतम्याद्वा निबिडानि ।" इति तिथ्यादितत्त्वम् । अपि च ।
"एकादशीं समारभ्य यावत् पञ्चदशी भवेत् ।
बकोऽपि तत्र नाम्नीयान्मीनं मांसञ्च किं नरः ।"
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम् ।
ब(व)कपुष्पः, पुं, (बक इव बकं पुष्पं यस्य ।) बक-वृक्षः । इति शब्दरत्नावली । (बकस्य पुष्पम् ।) अगस्तिकुसुमे, क्ली ।
ब(व)कवृत्तिः, पुं, (बकस्येव स्वार्थसाधिका वृत्तिर्यस्य ।) बकतुल्यवर्णनविशिष्टः । यथा,—
"पापण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ।"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ।
तस्य लक्षणं यथा,—
"अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च बकवृत्तिरुदाहृतः ।"
इति तट्टीकायां श्रीधरस्वामी ।
अपि च ।
"अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठः शिखी विनीतश्च बकवृत्तिरुदाहृतः ।"
इति पाद्मोत्तरखण्डे ११५ अध्यायः ।
ब(व)कवैरी, [न्] पुं, (बकस्य वैरी घातकत्वात् ।) भीमसेनः । इति जटाधरः । श्रीकृष्णश्च ।
ब(व)कव्रती, [न्] पुं, (बकव्रतमस्यास्तीति इनिः ।) मिथ्याविनीतः । बकवृत्तिः । इति जटाधरः ।
तस्य लक्षणं यथा,—
"अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च बकव्रतधरो द्विजः ।"
इति दानसागरे मनुः ।
ब(व)काची, स्त्री, बकचिञ्चिकामत्स्यः । इति हारावली । १८८ ।
ब(व)कारिः, पुं, (बकस्य अरिः ।) श्रीकृष्णः । यथा,
"तदा बकारिं सुरलोकवासिनः
समाकिरन्नन्दनमल्लिकादिभिः ।
समीडिरे चागकगृह्यसंस्तवै-
स्तदद्भुतं गोपालसुता विसिस्मिरे ।"
इति श्रीभागवते । १० । ११ । ५२ ।
(भीमसेनश्च । बकराक्षसघातकत्वात् ।)
ब(व)कुलः, पुं, (ब(व)कुलते इति । ब(व)कि कौटिल्ये + "मद्गुरादयश्च ।" उणा० १ । ४२ । इति उरच् प्रत्ययरेफस्य लत्वं वहेर्गकोपश्चेत्युज्ज्वलदत्तः ।) खनामख्यातपुष्पवृक्षः । तत्पर्य्यायः । केसरः २ । इत्यमरः । २ । ४ । ६४ ॥ केशरः ३ । इति भरतः ॥ बकूलः ४ सिंहकेसरः ५ वरलब्धः ६ सीधुगन्धः ७ सकूलः ८ सकुलः ९ । इति शब्दरत्नावली ॥ स्त्रीसुखमधु १० दोहलः ११ मधुपुष्पः १२ सुरभिः १३ भ्रमरानन्दः १४ स्थिरकुसुमः १५ शारदिकः १६ करकः १७ सीसंज्ञः १८ विशारदः १९ गूढ-पुष्पकः २० धन्वी २१ मदनः २२ मद्यामोदः २३ चिरपुष्पः २४ । (यथा, महाभारते । १ । ६३ । ४२ ।
"पुन्नागैः कर्णिकारैश्च बकुलैरिन्द्रपाटलैः ॥") अस्य गुणाः । शीतलत्वम् । वृद्धत्वम् । विषदोषनाशित्वम् । मधुरत्वम् । कषायत्वम् । मदाढ्यत्वम् । हर्षदायकत्वञ्च । तत्कुसुमगुणाः । रुच्यत्वम् । पौराढ्यत्वम् । सुरभित्वम् । शीतलत्वम् । मधुरत्वम् । स्निग्धत्वम् । कषायत्वम् । मलसंग्रहकारकत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"बकुलो मधुगन्धश्च सिंहकेसरकस्तथा ।
बकुलस्तु वरोऽनुष्णः कटुः पाके रसे गुरुः ।
कफपित्तविषश्वित्रकृमिदन्तगदापहः ।"
इति भावप्रकाशः ॥
तत्फलगुणाः ।
"बकुलं मधुरं स्निग्धं दन्तस्थैर्य्यकरं परम् ।"
तत्पुष्पगुणाः ।
"पद्मं कषायं मधुरं शीतं पित्तकफास्रजित् ।
तद्वत् बकुलपुन्नागकञ्जारोत्पलपाटलम् ।"
इति राजवल्लभः ॥
अस्योत्पत्तिर्यथा,—
"विचरन्तं तदा भूयो महीं कुसुमायुधः ।
आरात् स्थित्वाग्रतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमग्रतो दृष्ट्वा क्रोधाभ्मातङ्गजा हरः ।
स्मरमालोकयामास शिखायाचरवाग्निकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् ! पादादारभ्य कृत्स्नवत् ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्सृज्य धनुः श्रेष्ठं तत्स्थानाय पपात ह ॥
यदासीन्मुखविन्यस्तहस्तपृष्ठं महाप्रभम् ।
स चम्पकतरुर्जातः सुगन्धाढ्यो गुणान्वितः ॥
नाहस्थानं शुभाकारं यदासीद्दग्धभूषितम् ।
तच्जातं केशरारण्यं बकुलं नामतो नगे ॥
या च कोटी शुभा स्कन्धोद्भिन्नशोभविभूषिता ।
जाता सा पाटला रम्या शृङ्गराजविराजिता ॥
नाहोपरि तथा सुरो स्थानं चन्द्रमविप्रभम् ।
पद्मगुल्माभवज्जाती गुल्माद्दकिरणोज्ज्वला ।
जङ्घे सुरा अधः कोट्यां स्थानं विद्रुमभूषितम् ।
तस्मात् बहुपुटा मल्ली संजाता विविधा सुने ॥"
इति श्रीवामनपुराणे ६ अध्यायः ॥

(शिवः। यथा, महाभारते तस्य सहस्रनाम-कीर्त्तने। १३। १७। १०६।
"बलिको वर्द्धको दक्षो वकुलश्चन्दनच्छदः।
सारग्रीवो महाजत्रुरलोलश्च महौषधः॥")
ब(व)कुला, स्त्री, (बकुल+टाप्।) कटुका। इति राजनिर्घण्टः॥
ब(व)कुली, स्त्री, (बकुल+गौरादित्वात् ङीष्।) काकोली। इति शब्दचन्द्रिका॥
ब(व)कूलः, पुं. (बकुल। पृषोदरादित्वात् दीर्घः।) बकुलवृक्षः। इति शब्दरत्नावली॥
ब(व)केरुका, स्त्री, (बकानां बकसमूहानां ईरकं गतिर्यत्र।) बलाका। वातावर्त्तितशाखा। इति मेदिनी। के, २०२॥
बकोटः, पुं, बकः। इति त्रिकाण्डशेषः॥
बठ, पैन्ये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) पैन्यमिह सामर्थ्यम्। बठति वीरो योद्धुं समर्थः स्यादित्यर्थः। इति दुर्गादासः॥
ब(व)ड़वा, स्त्री, (वलं वातीति। वल+वा+कः। टाप्। डलयोरैक्यात् वस्य ड़त्वम्।) घोटकी। इत्यमरः। २। ८। ४२॥ (यथा, महाभारते। २। २२२। ४५।
"वड़वानान्तु मुख्यानां चन्द्रांशुसमवर्चसाम्।
ददौ जनार्द्दनः प्रीत्या सहस्रं हेममूषितम्॥"
अस्या दुग्धगुणा यथा,—
"रूक्षोष्णं वड़वाक्षीरं वल्यं श्लेष्मानिलापहम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥ वड़वारूपधारिणी सूर्य्यपत्नी संज्ञा। यथा, मार्कण्डेयपुराणे। ७७। २३।
"सूर्य्यतापमविच्छन्ती तेजसस्तस्य बिभ्यती।
तपश्चचार तत्रापि वड़वारूपधारिणी॥"
अस्या विशेषविवरणन्तु तत्रैव विशेषतो द्रष्टव्यम्॥ छतीया सूर्य्यपत्नी। इति केचित्। यथा, भागवते। ८। १३। ८—६।
"विश्वकर्म्मसुते उभे।
संज्ञा छाया च राजेन्द्र! ये प्राग्भिहिते तव॥
छतीया वड़वामेके तासां संज्ञासुतास्त्रयः।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु॥")
अश्विनीनक्षत्रम्। इति ज्योतिषम्॥ (नारी-विशेषः। इति हेमचन्द्रः॥ दासी। यथाह नारदः।
"भक्तदासश्च विज्ञेयस्तथैव वड़वाछतः॥"
वासुदेवस्य खनामख्याता परिचारिका। इति हरिवंशः। ३५। १॥) वाड़वाग्निः। अस्योत्पत्तिर्यथा,—
"अथाकाशगता देवाः क्रुद्धं दृष्ट्वा महेश्वरम्।
प्रसीद जगतां नाथ! कामे क्रोधं परित्यज॥
इति स्म वदतां तेषाममराणां तदानलः।
ललाटचक्षुःसम्भूतो भस्माकार्षीच्चराचरम्॥
ब्रह्मा क्रोधानलं गृह्णीर्धत्तं सकलान् जगान्।
वड़वारूपिणं चक्रे देवानां पुरतस्तदा॥
वड़वा तां तदा देवाः सौम्यां ज्वालासुखीं शुभाम्।
दृष्ट्वा निर्विघ्नमनसो बभूवुः पूर्व्वपीड़िताः॥
वड़वां तां समादाय तदा ज्वालासुखीं विधिः।
सागरं प्रययौ लोकहिताय जगतां प्रभुः॥
गत्वाथ सागरं ब्रह्मा प्रोवाच परिपूजितः।
यथावत्तेन विप्रेन्द्राः समयञ्च निदेशयन्॥
अयं क्रोधो महेशस्य वड़वारूपधृक् त्वया।
ज्वालासुखः सदा धार्य्यो यावन्न विलयाम्यहम्॥
यदा त्वामहमागत्य वदामि सरितांपते!।
तदा त्वया परित्याज्यः क्रोधोऽयं वड़वासुखः॥
भोजनं भवतस्त्रोयमेतस्य तु भविष्यति।
यत्रादेव विधार्य्योऽयं यथा नो याति चान्तरम्॥
इत्युक्तो ब्रह्मणा सिन्धुरङ्गीचक्रे तदा क्रुधम्।
ग्रहीतुं वड़वावक्त्रं ग्रस्तोऽग्न्यग्रमथोरगम्॥
ततः प्रविष्टो जलधौ पावको वड़वासुखः।
वार्य्योघविग्रहंसस्य ज्वालामालातिदीपितः॥"
इति कालिकापुराणे ४१ अध्यायः॥
(नदीविशेषः। यथा, महाभारते। ३। २२१। २४।
"तमसा नर्म्मदा चैव नदी गोदावरी तथा।
वेत्रोपवेत्रा भीमा च वड़वा चैव भारत!॥"
तीर्थभेदः। यथा, महाभारते। ३। ८२। ८८।
"ततो गच्छेत वड़वां त्रिषु लोकेषु विश्रुताम्।
पश्चिमायान्तु सन्ध्यायां उपस्पृश्य यथाविधि॥")
ब(व)ड़वाछतः, पुं, (वड़वया दास्या छतः।) पञ्चदशदासान्तर्गतदासविशेषः। यथा,—
"भक्तदासश्च विज्ञेयस्तथैव वड़वाछतः॥"
इति नारदः॥
वड़वा दासी तल्लोभादङ्गीछतदासः। इति दायक्रमसंग्रहः। क्वचित् वड़वाश्चुतो वड़वा-छुतोऽपि पाठः॥
ब(व)ड़वाग्निः, पुं, (वड़वायाः सम्बन्धिन्याः घोटक्या मुखस्योऽग्निः।) वाड़वाग्निः। (अस्य विवरणन्तु वड़वानलशब्दे द्रष्टव्यम्।)
ब(व)ड़वानलः, पुं, (वड़वाया अनलः।) वड़वाग्निः। तत्पर्य्यायः। वलिमेन्धनः २ वड़वामुखः ३ काक-ध्वजः ४ वाडविजः ५ खन्दार्चिः ६ हव्यभुक् ७ वाडवभुक् ८। इति त्रिकाण्डशेषः॥ और्व्वः ९ वाड़वः १०। इत्यमरः। १। १। ५६॥ और्व्वस्य ऋषेरपत्यम् और्व्वः अः। वड़वायां विद्यमानो वाड़वः अः। वड़वाया अनलो वड़वानलः। आधाराधेयभावसम्बन्धः। पुरा किल और्व्वेण सुनिना अयोनिजं पुत्रमिच्छता वपो मथितं तत्र ज्वालामयः पुरुषो जातः स च सगरे वड़वामुखे अवस्थापितः। इति गौराणिकाः॥ इति तद्वीकायां भरतः॥ * ॥ तस्य विवरणं यथा,—
"और्व्वस्तु तपसाविष्टो निवेद्यौरुं हुताग्नये।
ममत्वैकेन दर्भेण सुतस्य व्रतधारिणम्॥
तस्योरुं सहसा भित्त्वा ज्वालामाली व्यजिम्भत॥
जगतो दहनाकाङ्क्षी पुत्रोऽग्निः समपद्यत॥
और्व्वस्योरुं विनिर्भिद्य और्व्वो नामान्तको-ऽनलः।
दिधक्षन्निव लोकांस्त्रीन् जज्ञे परमकोपनः॥
उत्पन्नमात्रश्चोवाच पितरन्दीनया गिरा।
क्षुधा मे बाधते तात! जगद्भक्षे त्वदस्य माम्॥
त्रिदिवारोहिभिर्ज्वालैर्जृम्भमाणो दिशो दश।
निर्दहन् सर्व्वभूतानि वर्द्धते सोऽन्तकोऽनलः॥
एतस्मिन्नन्तरे ब्रह्मा मुनिभौर्व्वं समागतः।
उवाच वार्य्यतां पुत्रो जगतस्त्वं दयां कुरु॥
अस्यापत्यस्य ते विप्र! करिष्ये स्थानमुत्तमम्।
तथ्यमेतन्मम वचः शृणु त्वं वदतांवर!॥
और्व्व उवाच।
धन्योऽस्म्यनुगृहीतोऽस्मि यन्मेऽद्य भगवान् प्रियोः।
मतिमेतान्ददातोह परमानुग्रहाय वै॥
प्रभातकाले संप्राप्ते काङ्क्षितव्ये समागमे।
भगवंस्तर्पितः पुत्र! कैर्द्रव्यैः प्राप्स्यते सुखम्॥
कुत्र वास्य निवासः स्याद्भोजनन्तु किमात्मकम्।
विधास्यतीह भगवान् वीर्य्यतुल्यं महौजसः॥
ब्रह्मोवाच।
वड़वासुखेऽस्य वसतिः समुद्रे वै भविष्यति।
मम योनिर्जलं विप्र! तत्र मे तोयदं सुखम्॥
अहमासे नियतं पिबन् वारिमयं हविः।
तद्विलुप्तं पुत्रस्य विद्धज्ञानमयंच तम्॥
ततो युगान्ते भूतानां मेघवाहश्च पुत्रक!।
सहितौ विचरिष्यावो निर्भुराण्डकरावहि॥
एवोऽग्निरन्तकाले तु सलिलाशी मया छतः।
दहनः सर्व्वभूतानां सदेवासुररक्षसाम्॥
एवमस्त्विति तं सोऽपि संहृतज्वालमण्डलः।
प्रविवेशार्णवसुखं विप्रगर्भान्तरप्रभम्॥"
इति मात्स्ये १५० अध्यायः॥
(मदनदहनाय हरनेत्रसमुद्भूतोऽग्निरपि वड़वा-नलः। अस्य प्रमाणादिकं वड़वाग्निशब्दे द्रष्टव्यम्॥) लङ्कायां दक्षिणे पृथिव्याश्चतुर्थभागरूपस्थान-विशेषः। इति सिद्धान्तशिरोमणिः॥ (वटि-कौषधविशेषः। यथा,—
"शुद्धताम्रस्य भागैकं मरिचस्य तथैव च।
विषं तत्तुल्यकं दद्यात् तत्सर्व्वं श्लक्ष्णचूर्णितम्॥
लाङ्गलीरसयुक्तं तत्सर्व्वं पुटके पचेत्।
वर्त्तिकाहितयं वापि चितयं वा प्रकल्पते॥
दोष बीजसमायुक्तस्त्रिदोषघ्नमनो भवेत्।
भक्षयेत् पवने चोये वड़वानलसंज्ञितम्॥
इति वड़वानलो रसः॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे॥)
ब(व)ड़वासुखः, पुं, (वड़वाया घोटक्या मुखमाश्रय-त्वेनास्यास्य। अण् आदिलात् अच्।) वड़वा-नलः। इति हेमचन्द्रः॥ (यथा, हरिवंशे। ८०। २२।
"सा यत्रैवार्थवगता तत्रैव वड़वामुखे॥"
महादेवस्य सहस्रनामसु एकं नाम। यथा, महाभारते। ७। २००। ११९।
"तस्य देवस्य यद्गुह्यं सहस्रे तदतिष्ठत।
वड़वामुखेति विख्यातं पिबत्योघमयं हविः॥"
महादेवस्य नामभेदः। यथा, महाभारते। १३। १७। ५५।

"विष्णुः प्रसादितो यत्नः ससुतो वड़वासुखः ॥"
कूर्म्मस्य दक्षिणकुक्षिस्थजनपदविशेषः । यथा, मार्कण्डेये । ५८ । ३० ।
"कूर्म्मस्य दक्षिणे कुक्षौ बाह्यपादस्तथापरम् ।
कान्योजाः पह्लवाश्चैव तथैव वड़वामुखाः ॥")
वटिकौषधविशेषः । यथा,—
"शुद्धसूतं समं गन्धं तुल्यताम्राभ्रटङ्कणम् ।
मासुरञ्च यवक्षारं खर्ज्जिकेत्थवणागरम् ॥
अपामार्गस्य च क्षारं पलाशवरणस्य च ।
प्रत्येकं सूततुल्यं स्यादम्लयोगेन मर्द्दयेत् ॥
हस्तिशुण्डीद्रवैश्चार्यौ मर्द्दयित्वा पुटेल्लघु ।
माषमात्रः प्रदातव्यो रसोऽयं वड़वामुखः ।
ग्रहणीं विविधां हन्ति संग्रहग्रहणीं ज्वरम् ॥
इति वड़वामुखो रसः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ग्रहण्यधिकारे ॥)
व(व)ड़वासुतौ, पुं, (वड़वाया घोटकीरूपायाः स्वसुतायाः संज्ञायाः सुतौ ।) अश्विनीकुमारौ । यथा, हेमचन्द्रः ।
"स्वर्वैद्यावश्विनीपुत्रावश्विनौ वड़वासुतौ ॥"
(तयोरुत्पत्तिकथा यथा, हरिवंशे ।८।४६—५३।
"गच्छ देव ! निजां भार्य्यां कुरुं चरति सोत्तरान् ।
वड़वारूपमास्थाय वने चरति गाढले ॥
स तथा रूपमास्थाय स्वभार्य्यारूपलीलया ।
दर्शं योगमास्थाय स्वां भार्य्यां वड़वां सतः ॥
अदृश्यां सर्व्वभूतानां तपसा नियमेन च ।
वड़वावपुषा राजंश्चरन्तीमकृतोभयाम् ॥
सोऽश्वरूपेण भगवांस्तां सुखे समभावयत् ॥
मैथुनाय विसेदुस्तौ परपूर्वप्रदृष्टया ।
सा तन्निरवमच्छुक्रं नासिकाभ्यां विवस्वतः ॥
देवौ तस्यामजायेतामश्विनौ भिषजां वरौ ।
नासत्यश्चैव दस्रश्च स्मृतौ दावश्विनाविति ॥")
व(व)ड़वाकृतः, पुं, (वड़वया दास्या कृतः ।) वड़वाकृतः । पञ्चदशप्रदासान्तर्गतदासविशेषः । यथा, वड़वायहदासौ तया कृतस्तक्षोभेन तासुद्वाह्य दासत्वेन प्रविष्टः । इति मिताक्षरा ॥
वड़िशं, क्ली, (वलिनो मत्स्यान् शनति नाशयतीति । शो + कः । तस्य कुत्वम् ।) मत्स्यधरणार्थं वक्रलौहकण्टकविशेषः । वँड़शी इति भाषा । तत्पर्य्यायः । मत्स्यवेधनम् २। इत्यमरः । १।१०।१२६ ॥ वलिशम् ३ वड़िशी ४ वड़िशा ५ । इति भरतः ॥ वलिशी ६ मत्स्यवेधनी ७ । इति तट्टिकान्तरम् ॥ वलिसी ८ वलिसम् ९ वरिशी १० वलिशिः ११। इति शब्दरत्नावली ॥ मत्स्यभेदनम् १२ । इति जटाधरः ॥ (यथा, महाभारते । १ । २८ । १० ।
"यस्ते कण्ठमनुप्राप्तो विगीर्य्य वड़िशं यथा ।
दहेदङ्गारवत् पुत्र ! तं विद्यात् ब्राह्मणर्षभम् ॥")
वड़िशी, स्त्री, (वड़िश + गौरादित्वात् ङीष् ।) वड़िशम् । इति शब्दरत्नावली ॥
वण, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा० परo-अकo-सेट् ।) वणति । इति दुर्गादासः ॥
वण्, पुं, (वणनमिति । वण् + अप् ।) शब्दः । इत्यमरटीकायां रभसः ॥
व(व)णिक्, [ज्] पुं, (पण्यते क्रयविक्रयादिना व्यवहरतीति । पण + "पणेरादेश्च वः ।" उणा० २ । ७० । इति इजिः पस्य च वः ।) क्रयविक्रयकर्त्ता । वाणिज्यकारकः । तत्पर्य्यायः । वैदेहकः २ सार्थवाहः ३ नैगमः ४ वणिजः ५ पण्याजीवः ६ आपणिकः ७ क्रयविक्रयिकः ८ । इत्यमरः ।२ । ९ । ७८ ॥ वैदेहः ९ विदेहः १० वाणिजः ११ वाणिजिकः १२ क्रायिकः १३ विक्रयिकः १४ । इति भरतादयः ॥ वाणिजकः १५ वाणिज्यकारः १६ । इति शब्दरत्नावली ॥ (यथा, माघे । १२ । २६ ।
"स्याद्यौ निवङ्क्ष्यन्नसि क्षणम्पुरः
सुप्तोच्च लाभाय कृतक्रयो वणिक् ॥")
करणान्तरम् । इति मेदिनी । जे, २६ ॥ वैश्यः । इति राजनिर्घण्टः ॥ (वाणिज्ये अधिकारादेवास्य तथात्वम् ॥ करणविशेषः । यथा, वृहत्संहितायाम् । ६६ । ७ ।
"ऋषिबीजग्रहाश्रयजानि गरे
वणिजिभ्रुवकार्य्यवणिग्युतयः ॥")
व(व)णिक्, [ज्] स्त्री, (पण्यते व्यवह्रीयते इति । पण + इजि । पस्य वः । अभिधानात् स्त्रीत्वम् ।) वाणिज्यम् । इति मेदिनी । गे, २६ ॥
व(व)णिग्बन्धुः, पुं, (वणिजः पण्याजीवस्य बन्धुर्धनदत्वात् ।) नीलोत्पलः । इति शब्दचन्द्रिका ॥
वणिग्भावः, पुं, (वणिजो भावः ।) वाणिज्यम् । वणिजां धर्म्मः । तत्पर्य्यायः । सत्यावृतम् २ । इत्यमरः ॥ वाणिज्यम् ३ वाणिज्या ४ वणिक्पथः ५ । इति जटाधरः ॥ वणिज्यम् ६ । इति शब्दरत्नावली ॥
व(व)णिग्वहः, पुं, (वहतीति । वह + अच् । वहः । वणिजां वाणिज्यद्रव्याणां वहः ।) उष्ट्रः । इति शब्दचन्द्रिका ॥
व(व)णिजः, पुं, (वणिगेव । वणिज् + स्वार्थे अण् । अभिधानात् न वृद्धिः ।) वणिक् । इत्यमरः । २ । ९ । ७८ ॥ वणादीकादशकरणान्तर्गतषष्ठकरणम् । तज्जातफलं यथा, कोष्ठीप्रदीपे ।
"प्राज्ञः क्षत्रो गुणवान् गुणज्ञो
वणिग्जनप्रामनेरयः स्यात् ।
यस्य प्रसूतौ वणिजाभिधानं
भाद्रप्रधानं द्रविणं हि तस्य ॥"
व(व)णिज्यं, क्ली. (वणिजो भावः कर्म्म वा । वणिज् + "दूतवणिग्भ्यां च ।" ५ । १ । १२६ । इत्यत्र काशिकोक्तेर्य्यः ।) वाणिज्यम् । इत्यमरभरतौ ॥ (यथा, मार्कण्डेये । ५० । ७६ ।
"त्रिभिः पूर्व्वगुणैर्युक्तं पाशुपाल्यवणिज्ययोः ॥")
वणिज्या, स्त्री, (वणिजां कर्म्म । वणिज् + यत् । टाप् । स्वभावात् स्त्रीलिङ्गोऽयम् ।) वाणिज्यम् । (यथा, कथासरित्सागरे । १३ । ३८ ।
"ततः स तत्पिता तेन तनयेन समं ययौ ।
द्वीपान्तरं क्षुधार्हतोर्वैणिज्यायपदेशतः ॥")
वद, व्यक्तायां । इति कविकल्पद्रुमः ॥ (भ्वा० परo-अकo-सेट् ।) वदति पर्व्वतः । आवादीत् अवदीत् । हसादेः सेम इत्यादिना वा दीर्घः । प्रवचदेवादौ दन्त्यादिर्वदेरग्रहणादिति प्राचः । इति दुर्गादासः ॥
व(व)दरं, क्ली, (वदति स्थिरीभवति छिन्नेऽपि पुनः प्ररोहतीति । वद + अरः ।) सेविफलम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"सुस्थिरप्रमाणं वदरं सेवं सिवितिकाफलम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कार्पासफलम् । कोलिफलम् । इति हेमचन्द्रः ॥ शृगालकोलिः । शेयाकुल इति भाषा । वदति स्थिरीभवति छिन्नस्यापि पुनःप्ररोहणात् । वदरं वृक्षफलेऽपि क्लीवम् । इति भरतः ॥ तत्पर्य्यायः । घोण्टा २ । इत्यमरः ॥ गोपघोण्टा ३ । इति सुभूतिः ॥ हस्तिकोलिः ४ गोपघण्टी ५ वदरीच्छदा ६ शृगालकोलिः ७ कर्कन्धुः ८ । इति रत्नकोषः ॥ वादिरम् ९ । इति शब्दरत्नावली ॥ अस्य विवरणं कोलशब्दे द्रष्टव्यम् ॥* ॥ वृहत्कोलिः । तत्पर्य्यायः । सौवीरम् २ । इति रत्नमाला ॥* ॥ कोलिमात्रम् । तत्पर्य्यायः । कर्कन्धुः २ वदरी ३ कोलम् ४ पेलिनम् ५ कुवलम् ६ घोण्टा ७ सौवीरम् ८ अक्षाप्रिया ९ कुहा १० कोलिः ११ विषमः १२ भयकण्टकः १३ । इति भावप्रकाशः ॥ सौवीरकः १४ गुडफलः १५ वालेष्टः १६ फलश्रेष्ठिरः १७ दृढबीजः १८ वृक्षफलः १९ कण्टकी २० वक्रकण्टकः २१ सुरसः २२ सुफलः २३ स्वच्छः २४ कर्कन्धूः २५ बदरः २६ कोला २७ कोली २८ कुवली २९ स्वादुफला ३० शुभ्रमखी ३१ पिच्छिला ३२ कुवलः ३३ । इति च शब्दरत्नावली ॥ (यथा, भागवते । ४ । ८ । ७२ ।
"चिराच्चान्ते चिराच्चान्ते कपित्थबदराशनः ।
आत्मतृप्तानुसारेण मासं निन्येऽर्च्चयन् हरिम् ॥")
अस्य गुणाः । मधुरत्वम् । कषायत्वम् । अम्लत्वञ्च ॥ परिपक्वस्य तस्य गुणाः । मधुराम्लत्वम् । उष्णत्वम् । कफकारित्वम् । पवनानिसाररक्तश्रमदोषाग्निविनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥ राजबदरभूबदरलघुबदराणां पर्य्यायगुणास्तत्तच्छब्दे द्रष्टव्याः ॥* ॥ अथ बदरविशेषाणां लक्षणानि गुणाश्च ।
"पक्वमानं सुमधुरं सौवीरं बदरं महत् ।
सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम् ॥
दृंहणं पित्तदाहास्रक्षयश्लेष्मानिवारणम् ॥* ॥
सौवीरात्तु लघुं पक्वं मधुरं कोलमुच्यते ॥
कोलन्तु बदरं प्राहुः रुच्यमुष्णञ्च वातजित् ।
कफपित्तकरञ्चापि गुरु सारकमीरितम् ॥* ॥
कर्कन्धुः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः ।
अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक् ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
शुष्कं भेद्यधिक्षुत् सर्व्वं लघु श्लेष्मातिसारजित् ॥"
इति भावप्रकाशः ॥

ब(व)दरः, पुं, (बदति स्थिरीभवति क्षिप्तेऽपि पुनः प्ररोहतीति। बद् + अरः।) कोलिवृक्षः। तत्पक्वादिगुणाः।

"बदरस्य पक्वलेपो ज्वरदाहविनाशनः।
त्वचा विस्फोटशमनी बीजं नेत्रामयापहम्॥"

इति राजनिर्घण्टः॥

अस्य पर्य्यायः फलगुणाश्च क्लीवलिङ्गबदरशब्दे द्रष्टव्याः॥ * ॥ देवसर्षपवृक्षः। इति राजनिर्घण्टः॥ कार्पासास्थि। इति मेदिनी॥ कापा सेर विचि इति भाषा॥ तत्र अन्तःस्थवकारादिशब्दमध्ये गृहीतोऽयम्॥

ब(व)दरफली, स्त्री, (बदरस्येव फलमस्याः। बदरफल + ङीप्।) भूबदरी। इति राजनिर्घण्टः॥

य(व)दरवल्ली, स्त्री, (बदरा बदरफलबहुला वल्ली लता।) भूबदरी। इति राजनिर्घण्टः॥

बदरा, स्त्री (बदति छिन्नायामपि पुनः प्ररोहणात् स्थिरीभवति या। बद् + बाहुलकादरः। टाप्।) वराहक्रान्तावृक्षः। (तत्पर्य्यायो यथा,

"वाराहीकन्द एवाग्नेयश्चमेकाराखुको मतः।
अनूपसम्भवे देशे वाराह इव लोमवान्।
विदारीखाडुकन्दा च सा तु क्रोष्ट्री सिता स्मृता।
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वाराहवदना ऋक्षबर्दरेत्यपि कथ्यते॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) कार्पासीवृक्षः। इत्यमरः। २। ४। १९६॥ एलापर्णी। इति मेदिनी। रे, २०७॥ विष्णुक्रान्ता। इति विश्वः॥

बदरामलकं, क्ली, (बदरफलमिवामलकम्।) प्राचीनामलकम्। इति हारावली। १०२॥

बदरिः, स्त्री, (बद + बाहुलकादरिः।) कोलिवृक्षः। इति शब्दचन्द्रिका॥

बदरिकाश्रमः, पुं, क्ली, (बदरिकाचिह्नित आश्रमः।) तीर्थविशेषः। (असौ च हिमालयपर्व्वतैकदेशे श्रीनगरसमीपे अलकनन्दानद्याः पश्चिमस्थतीरे अवस्थितः।) स तु नारायणस्य आसस्य चाश्रमः। यथा, महाभारते। ३ वैयास्तीर्थयात्रापर्व्वणि ९०। २३—३३।

"नारायणो विष्णुर्विष्णुः शाश्वतः पुरुषोत्तमः।
तस्यातियशसः पुण्या विशालां बदरीमनु॥
आश्रमः स्थायते पुण्यश्चिह लोकेषु विश्रुतः।
उष्णतोयवहा गङ्गा शीततोयवहा पुरा॥
सुवर्णसिकता राजन्! विशालां बदरीमनु।
ऋषयो यत्र देवाश्च महाभागा महौजसः॥
प्राप्य नित्यं नमस्यन्ति नारायणमजं विभुम्।
यत्र नारायणो देवः परमात्मा सनातनः॥
तत्र कृतयुगं जगत् पार्थ! तीर्थान्यायतनानि च।
तत् पुण्यं तत् परं ब्रह्म तत्तीर्थं तत्तपोवनम्॥
तत् परं परमं देवं भूतानां परमेश्वरम्।
शाश्वतं परमञ्चैव धातारं परमं पदम्॥
यं विदित्वा न मुह्यन्ति विद्वांसः शास्त्रदृष्टयः।
तत्र देवर्षयः सिद्धाः सर्व्वे चैव तपोधनाः॥
आदिदेवो महायोगी यत्रास्ते मधुसूदनः।
पुण्यानामपि तत् पुण्यं तत्र ते संशयोऽस्तु मा॥
एतानि राजन्! पुण्यानि पृथिव्यां पृथिवीपते!।
कीर्त्तितानि नरश्रेष्ठ! तीर्थान्यायतनानि च॥
एतानि वसुभिः साध्यैरादित्यैर्मरुद्गणैः।
ऋषिभिर्ब्रह्मकल्पैश्च सेवितानि महात्मभिः॥
चरन्नेतानि कौन्तेय! सहितैर्ब्रह्मवादिभिः।
भाक्तैश्च महाभागैरुत्कण्ठां विहरिष्यसि॥"

(तथा च भागवते। ७। ११। ६।

"योऽवतीर्य्यात्मनोंऽशेन दाक्षायण्यान्तु धर्म्मतः।
लोकानां खस्तयेऽध्यास्ते तपो बदरिकाश्रमे॥")

बदरी, स्त्री, (बदर + गौरादित्वात् ङीष्। बदरि + ऋदिकारादिति पक्षे ङीष् वा।) कोलिवृक्षः। इत्यमरः। २। ४। ३६॥ (अस्याः पर्य्यायो बदरशब्दे द्रष्टव्यः। यथा, भागवते। १। ७। ३।

"तस्मिन् स आश्रमे व्यासो बदरीखण्डमण्डिते॥")

कार्पासी। इति शब्दरत्नावली॥ कपिकच्छुः। इति राजनिर्घण्टः॥ (बदर्य्याः फलम् हरीतक्यादिभ्यश्चेति विकारार्थस्य लुक्। बदरीफलम्॥)

बदरीच्छदा, स्त्री, (बदर्य्याश्छदा इव छदा यस्याः।) हस्तिकोलिवृक्षः। शुक्लनखी। इति रत्नमाला॥

बदरीपत्रः, पुं, (बदर्य्याः पत्रमिव आकृतिर्यस्य।) नखीनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ (यथा,—

"बदरीपत्रकल्कं वा घृतभृष्टं ससैन्धवम्।
खरोपघाते कासे च लेहमेतत् प्रयोजयेत्॥"

इति वैद्यकचक्रपाणिसंग्रहे खरभेदाधिकारे॥)

बदरीपत्रकं, क्ली, (बदरीपत्र + स्वार्थे कन्।) नखीनामगन्धद्रव्यम्। इति जटाधरः॥

बदरीफला, स्त्री, (बदर्य्याः फलमिव फलं यस्याः।) नीलग्रोफालिका। इति शब्दमाला॥

बदरीशैलः, पुं, (बदरीबहुलः शैलः पर्व्वतः।) हिमालयपर्व्वतैकदेशः। बदरीवनं बदरिकाश्रम इति च ख्यातः। स तु श्रीनगराख्यदेशे अलकनन्दानदीपश्चिमतीरे वर्त्तते। इति पुराणान्तरम्॥

बद्ध, त्रि, (बध्यते स्म इति। बन्ध + कर्म्मणि क्तः।) बन्धनयुक्तम्। बाँधा इति भाषा। तत्पर्य्यायः। सन्दानितम् २ सूर्णम् ३ उद्गितम् ४ सन्दितम् ५ सितम् ६। इत्यमरः। ३। १। ६५॥ निगडितम् ७ नद्धम् ८ कीलितम् ९ यन्त्रितम् १० संयतम् ११। इति हेमचन्द्रः॥ (यथा, मनुः। ९। ३०८।

"वरयेन यथा पाशैर्बद्ध एवाभिदृश्यते।
तथा पापान्नियच्छीयात् व्रतमेतद्धि वारुणम्॥"

तथा च मेघदूते। ७९।

"तत्रापि च स्फटिकफलका काञ्चनीवासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः॥"

तथा च शाकुन्तले २ अङ्के।

"छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु॥")

बद्धगुदं, क्ली, (बद्धं गुदं पायुर्यत्र।) उदररोगविशेषः। तस्य निदानं यथा,—

"यस्यान्नमन्नैरुपलेपिभिर्वा
वालाश्मभिर्वा पिहितं यथावत्।
सञ्चीयते तस्य मलः सदोषात्
शनैः शनैः सङ्करवच्च नाड्याम्॥
निरुध्यते तस्य गुदे पुरीषं
निरेति कृच्छ्रादपि चाल्पमल्पम्।
कुक्षाभिमर्दे परिवृद्धिमेति
तस्योदरं बद्धगुदं वदन्ति॥"

इति माधवकरः॥ * ॥

तस्य चिकित्सा यथा। "स्निग्धस्विन्नस्याभ्यक्तस्याधो नाभेर्वामतश्चतुरङ्गुलमपहाय रोमराज्या उदरं पाटयित्वा चतुरङ्गुलप्रमाणमन्त्राणि निष्कृष्य निरीक्ष्य बद्धगुदस्यान्त्रप्रतिरोधकरमश्मानं वालं वापोह्य मलजातं वा ततो मधुसर्पिर्भ्यामभ्यञ्यान्त्राणि यथास्थानं स्थापयित्वा वाह्यं व्रणमुदरस्य सीव्येत् द्विव्रणीयोक्तेन विधानेन च रोपयेत्।" इति सुश्रुते चिकित्सितस्थाने १४ अध्यायः॥ (तथास्य सकारणलक्षणम्।

"पक्वाशयः सहान्नेन मुक्तैर्वायुने गुदे।
उदावर्त्तेऽथवार्शोभिरन्त्रसंमूर्च्छनेन वा॥
अपानो मार्गसंरोधात् दूषयित्वा कफादिकं कुपितोऽनिलः।
वर्च्चःपित्तकफान् रुद्धा जनयत्युदरं ततः॥"

तस्य रूपाणि।

"कृच्छ्रादाध्मानसुखतालुगुदोष्ठोरुसादकासश्वास-
हृल्लास्यारोचकाविपाकवर्च्चोमूत्रसङ्गाश्मानच्छर्दि-
श्चयथुशिरोहृन्नाभिगुदमूलान्यपिण्डोदरं मरुद्वातं
स्थिरमरुणनीलराजीसिरावनद्धमवाजिकं वा
प्रायो नाभ्युपरिगोपुच्छवदभिनिर्व्वर्त्तयति इत्येतत् बद्धगुदोदरमिति विद्यात्॥"

तथास्य चिकित्सा।

"स्निग्धाय बद्धोदरिणे मूत्रं तीक्ष्णौषधान्वितम्।
सतैललवणं दद्यात् निरूहं सानुवासनम्॥"

इति चरके चिकित्सितस्थाने चतुर्दशेऽध्याये॥)

बद्धपि, क्ली, बद्धपायिः। सृष्टिः। इति पुराणान्तरम्॥ बद्धाप्यौतीति च पाठः॥

बद्धफलः, पुं, (बद्धानि फलानि यस्येति।) करञ्जवृक्षः। इति राजनिर्घण्टः॥ (विवृतिरस्य करञ्जशब्दे ज्ञातव्या॥)

बद्धसृष्टिः, त्रि, (बद्धा दृढा दानाग्निवृत्त्या वा सृष्टिर्यस्येति।) दृढसृष्टिः। कृपणः। यथा, वैद्यके। ३। ८५।

"सजीवमप्यर्थिमुदे ददन्न-
स्तव त्रपा नेदृगबद्धमुष्टेः॥"

बद्धमूलं, त्रि, (बद्धं मूलं यस्येति।) दृढमूलम्। उत्पाटनानर्हमूलम्। यथा, माघे। २। ३८।

"त्वया विप्रकृतश्चेद्यो रुक्मिणी हरता हरेः।
बद्धमूलस्य मूलं हि मद्विधैरसरोरुभिः॥"

बद्धरसालः, पुं, (बद्धो रसेन आकृतः अतएव रसालः रसवान्।) त्रिविधरागान्तर्गता-

त्युत्तमाम्लः। तत्पर्य्यायः। चक्रतलाम्लः २ मध्याम्लः ३ सितजाम्लकः ४ वनेय्यः ५ मध्यमाम्लः ६ मदनेच्छापलः ७। तस्य कोमलफलगुणाः। कटुत्वम्। अम्लत्वम्। पित्तदाहदलत्वञ्च। तस्य सुपक्वफलगुणाः। स्वादुत्वम्। मधुरत्वम्। पुष्टिवीर्य्यबलप्रदत्वञ्च। इति राजनिर्घण्टः॥

वह्निशिखः, त्रि, (वह्नेर्वह्नेर्वा शिखा चूड़ा यस्येति।) शिखिः। इति मेदिनी। खे, १५॥ शिखावन्धनविशिष्टः। यथा, प्रायश्चित्ततत्त्वधृतवचनम्।

"सदोपवीतिना भाव्यं सदा वह्निशिखेन तु।
विशिखो ह्युपवीतञ्च यत् करोति न तत् कृतम्॥"

वह्निशिखा, स्त्री, (वह्नेर्वह्नेर्वा शिखा यस्याः।) उच्चटा। इति मेदिनी। खे, १५॥ (वह्नेर्वह्नेर्वा शिखा केशकलापो यस्याः।) सम्बद्धकेशा च॥

वध, क वन्धे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, वाधयति। इति दुर्गादासः॥

वध, ड निन्दे। वन्धे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ड, वीभत्सते खलं लोकः। वधते तत्र त्वादयो न प्रयुज्यन्ते। इति रमानाथः।

'भावधिष्ठा जटायुं मां सीतां रामाहमेधिषि।'
इति भट्टिः। ६। ८१॥ इति दुर्गादासः॥

वधिरः, त्रि, (वध्नाति कर्णमिति। वन्ध+"इषिमदिमुदीति।" उणा० १। ५२। इति किरच्।) श्रवणेन्द्रियरहितः। श्रुतिशक्तिहीनः। काला इति भाषा। तत्पर्य्यायः। एडः २। इत्यमरः। २। ६। ७८॥ कलः ३ श्रवणापटुः ४। इति शब्दरत्नावली॥ उच्चैःश्रवाः ५। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, मनुः। ११। ५२।

"एयं कर्म्मविशेषेण जायन्ते सङ्गिगर्हिताः।
जड़मूकान्धबधिराविकृताकृतयस्तथा॥"

वाधिर्य्यनिदानं यथा,—

"यदा शब्दवहं वायुः श्रोत आवृत्य तिष्ठति।
शूद्रः क्षैणान्वितो वापि वाधिर्य्यं तेन जायते॥"
इति माधवकरः॥

असाध्यवाधिर्य्यमाह।

"वाधिर्य्यं वालदोषोत्थं चिरोत्थञ्च विवर्ज्जयेत्।"
इति भावप्रकाशः॥*॥

अस्यौषधम्।

"कर्णमूले कर्णनादे वाधिर्य्ये चेड़ एव च।
चतुर्ष्वपि च रोगेषु सामान्यं भेषजं स्मृतम्॥
भृङ्गवेरञ्च मधु च सैन्धवं तैलमेव च।
कटूष्णं कर्णयोर्धार्य्यमेतत् स्याद्वेदनापहम्॥१॥
कर्णमूले कर्णनादे वाधिर्य्ये चेड़ एव च।
पूरणं कटुतैलेन हितं वातघ्नमौषधम्॥२॥
शिखरिश्चारजवारितण्डुलकल्केन साधितं तैलम्।
अपहरति कर्णनादं वाधिर्य्यञ्चापि पूरणतः॥
शिखरी अपामार्गः॥३॥
गवां मूत्रेण विस्रावि पिष्ट्वा तैलं विपाचयेत्।
सलिलञ्च षड्गुणं तद्वाधिर्य्यहरं परम्॥
क्षीरमज्ञातं याह्यम्। विस्रस्तैलम्॥४॥"इति भावप्रकाशः॥ यथा च।

"शुष्कमूलकशुण्ठीनां चारो हिङ्गुलनागरम्।
सूक्ष्मं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत्॥
वाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः।
क्रिमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात्॥"५
इति गारुड़े १८७ अध्यायः॥

व(ब)धूः, स्त्री, (वध्नाति प्रेम्णा या। वन्ध+ऊः नलोपश्च। अन्तःस्थवादौ तु वहति संसारभारं उह्यते भर्त्रादिभिरिति वा। वह+"वहेर्धश्च।" उणा० १। ८५। इति ऊः धश्चान्तादेशः।) नारी। स्नुषा। एका। इत्यमरः। ३। ३। १०१, २। ४। १२३॥ (अस्याः पर्य्यायो यथा,—

"एका स्यादभ्रातृकायां देवी मरुज्जाला जता लघुः।
सप्तद्वान्ता वधूः कोटिवर्षालङ्कापिकेष्वपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥)

ग्रारिवौषधिः। ग्रटी। (अस्याः पर्य्यायो यथा,

"ग्रटी पलाशी वङ्कुल्या सुव्रता गन्धमूलिका।
गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नवोढ़ा। (यथा, रघुः। ७। ४।

"वरः स वध्वा सह राजमार्गं
प्रापाध्वनश्छायनिवारितोष्मम्॥")

भार्य्या। इति मेदिनी। धे, १४॥ भरतेन अमरकोषटीकायां पवर्गीयवकारादिवन्धधातुना निष्पादितोऽयम्। मेदिनीकारेण तु अन्तःस्थवकारादिशब्दमध्ये संगृहीतः॥ अथ नववध्वा विरागमनयात्रा। तत्राष्टमदशमहादशषष्ठचतुर्थवर्षाणि निषिद्धानि। मासाः मार्गशीर्षफाल्गुनवैशाखा विहिताः। पक्षः शुक्लः। पुष्यस्वातीहस्ताधनिष्ठोत्तरात्रयाषाढोत्तरफल्गुन्युत्तरभाद्रपद्रेवतीरोहिणीपुनर्व्वसुपूर्व्वाषाढा एतानि नक्षत्राणि विहितानि। सोमबुधहस्पतिशुक्रवाराः विहिताः। तिथयो याचाप्रकरणोक्ताः। चन्द्रताराशुद्धौ कालशुद्धौ चाह स्मर्य्यवारवेलादिकमूलादीन् परित्यज्य कर्त्तव्या। इति ज्योतिषम्।

"दत्ते पाणिग्रहे गेहात् पितुः पतिगृहं प्रति।
पुनरागमनं वध्वास्तद्विरागमनं विदुः॥
विवाहमासि प्रथमं वध्वा आगमनं यदि।
तदा सर्व्वमिदं चिन्त्यं युग्माद्यब्दं विचक्षणैः॥
सुखा पितृगृहे नारी भुङ्क्ते स्वामिगृहे यदि।
दौर्भाग्यं जायते तस्याः म्रियन्ते कुलनायिकाः॥"
इति ज्योतिस्तत्त्वम्॥

वधूजनः, पुं, (वधूरेव जनः।) योषित्। इति त्रिकाण्डशेषः॥ (यथा, माघे। ३। ५२।

"स्तुतिप्रतिष्ठोऽपि सुखारविन्दे-
र्वधूजनस्त्रक्रमधश्चकार॥")

वधूटग्रयनं, क्ली, (वधूटीनां ग्रयनमिव। एषोदरादिकारस्याकारः।) गवाक्षः। यथा,—

"वातायनं गवाक्षः स्याद्वधूटग्रयनन्तथा॥"
इति त्रिकाण्डशेषः॥

वधूटिः, स्त्री, (अल्पवयस्का वधूः। अल्पार्थे टिः। पक्षे ङीष्। यद्वा, वधू+"वयस्यचरम इति वाच्यम्।" ४। १। २०। इत्यस्य वार्त्ति० इति ङीप्।) पुत्रभार्य्या। इति भरतधृतरभसकोषः। स्नुषासिनी। इति हेमचन्द्रः॥ अल्पा वधूः। यथा,—

"नूतनजलधरवपुषे गोपवधूटीदुकूलचौराय।
तस्मै नमः शठाय संसारमहौरुदस्य बीजाय॥"
इति भाग्रापरिच्छेदः। १॥

वधूत्सवप्रसवः, पुं, (वध्वा उत्सव आनन्दः स एव प्रसवः पुष्पादिर्यस्य।) रक्ताशोकः। इति राजनिर्घण्टः॥

वर्त्म, क्ली, (वर्त्तते ऽनेनेति। वन्ध+"सर्व्वधातुभ्यः ष्ट्रन्।" उणा० ४। १५८। इति ष्ट्रन्।) सीसकम्। इत्यमरः॥ वर्त्मेति पठति स्वामी॥ (अस्य पर्य्यायो यथा,—

"सीसं वर्त्मच वप्रञ्च योगेष्टं नागनामकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वर्त्मी, स्त्री, (वर्त्ततेऽनया। वन्ध+"सर्व्वधातुभ्यः ष्ट्रन्।" उणा० ४। १५८। इति ष्ट्रन् ङित्वात् ङीष्।) चर्म्मरज्जुः। इत्यमरः। २। १०। १२॥ वर्त्मी द्विरेफेति केचित्। वर्त्मा चर्म्मवन्धे भवा वार्त्मी दीर्घादिरिति ङ्युः॥

वन, द ड उ याचने। इति कविकल्पद्रुमः॥ (तना०-आत्म०-द्विक०-सेट्। ङावेट्।) द ड, वनुते। उ, वनित्वा वत्वा। इति दुर्गादासः॥

वन्स, औ ग वन्धे। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-अनिट्।) औ, अवान्सीत्। ग, वन्नाति। वन्सान्तं ग्रठ सुच सुच ग्रपये; किं धूर्त्त निर्व्वन्ससे। इत्यपपाठः। निर्व्वध्यते इति पाठमिति रमानाथः। वस्तुतस्तु अस्य गवन्तत्वान्नित्यत्वेन नेरभावे आत्मनेपदे च सिद्धम्। इति दुर्गादासः॥

वन्ध, क वन्धे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, वन्धयति। इति दुर्गादासः॥ (यथा, रामायणे। २। ८४। ४।

"वन्धयिष्यति वा पाशैरधवास्मान् वधिष्यति॥")

वन्धः, पुं, (वन्ध+हलश्चेति घञ्।) आधिः। वन्धनम्। इति मेदिनी। धे, ६॥ शरीरम्। इति हेमचन्द्रः॥ (कर्म्मजनिताद्दृष्टयशात् देहादेहान्तरोत्पत्तेः शरीरस्य तथात्वम्।) ग्रहादिवेष्टनम्। इति शब्दरत्नावली॥ तद्विवरणं यथा,

"रूपाष्टकैर्विनिहतो भवस्य वन्धः
कर्त्तुः स्वकर्त्तमिह युग्मशरैकनिघ्नम्।
एकीकृतं रवनिशाकरयुग्मभक्त-
शेषं ततो भवति पिण्डपदं ग्रहस्य॥
ग्रहभूमिसमाहृतपिण्डपदं
वसुलोचनरन्ध्रगजैर्गुणितम्।
रविभूधरचित्रगृहीयोद्धृत-
मायव्ययस्थितिरुच्यपदम्॥"

रूपाष्टकैरेकाग्रीत्या विनिहतः पूरितो भवनस्य बन्धः दीर्घप्रस्तारमिलितहस्ताः खण्डत्तं तत्संख्यानं युग्मशरैकनिघ्नं द्विपद्माशद्दुत्तरशतपूरितम् एकीकृतं पूर्वार्द्धेन मिलितं रसनिशाकरयुग्मशुक्तशैलं षोड़शाधिकद्विशतकृतावग्रिहं तत्संख्यानं पिण्डपदसंज्ञं गृहस्य भवति तद्गृहभूमिसमाहतपिण्डपदं वसुलोचनरन्ध्रजैः। अष्टहिनवाष्टभिर्यथाक्रमं गुणितं पूरितं यथाक्रमं रविभूधरचिंशद्योगहृतं द्वादशसप्तचिंशद्गतसप्तविंशतिभिर्हृतं गृहस्य यथाक्रममायव्ययस्थितिच्छदपदं भवतीत्यर्थः।

"रुद्रहस्तमिते बन्धे भरण्या योगतो यथा।
आयादयो भवन्त्यत्र वसुषट्तिथियुङ्मिताः॥
अत्र गच्छं दीयते पश्चात्तदेवायाति।
प्रत्यक्दक्षिणयोर्भे द्रविणार्द्धं विदिक्षु दहनादि।
पूर्व्वोत्तरयोर्गृहयोरश्विन्यादिभानि स्युः।
यत्र तु ग्रैवो नास्ति तत्र हारकाङ्कः ग्रैवः॥
ग्रैवाङ्के फले बोध्ये ग्रैवाभावे तु हारकात्।
अङ्कादेव फलं बोध्यमिति तन्त्रविदाम्मतम्॥
इत्युक्तत्वात्॥
व्ययाधिकं न कर्त्तव्यं गृहमायाधिकं शुभम्॥"
इति ज्योतिस्तत्त्वम्॥ *॥

षोड़शप्रकारा रतिबन्धा यथा, रतिमञ्जर्य्याम्। ३०—३१।

"पद्मासनो नागपदो लतावेष्टोऽर्द्धसम्पुटः।
कुलिशं सुन्दरश्चैव तथा केयूर एव च॥
हिल्लोलो नरसिंहोऽपि विपरीतस्तथापरः।
खञ्जो वै धेनुकश्चैव ससृत्कश्चस्ततः परः।
सिंहासनो रतिनागो विद्याधरस्तु षोड़श॥"
(एतेषां लक्षणानि तत्रैव। ३२-५७। उक्तानि। यथा,—

"हस्ताभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि।
रमेन्नाभ्यं समाक्रम्य बन्धोऽयं पद्मसंज्ञकः॥
पादौ स्कन्धयुगे हस्तौ क्षिपेल्लिङ्गं भगे लघु।
प्ररमेत् कामुको नारीं बन्धो नागपदो मतः॥
बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा रमेत् स्त्रियम्।
लघु लिङ्गं ताड़येद् योनौ लतावेष्टोऽयमुच्यते॥
स्त्रीपादावन्तरीक्षे तु किञ्चिदूर्द्धौ च जानुनि।
स्तनयोर्मर्द्दनं पीड़ा बन्धोऽयं मर्द्दसंपुटः॥
स्त्रीपादद्वयमास्फाल्य हठाल्लिङ्गस्य ताड़नम्।
योनिमापीड़येत् कामी बन्धः कुलिशसंज्ञकः॥
नारीपादद्वयं कामी धारयेदूर्द्धदेशतः।
कुक्षौ धृत्वा पीवेद्वङ्गं बन्धोऽयं रतिसुन्दरः॥
स्त्रियो जङ्घे समापीड्य दोर्भ्यां गात्रस्य मर्द्दनम्।
पुनः प्रपीड़येद् योनिं बन्धः केयूरसंज्ञकः॥
हृदि कृत्वा स्त्रियः पादौ कराभ्यां धारयेत् करौ।
वर्षणं ताड़येत् योनिं बन्धो हिल्लोलसंज्ञकः॥
पादौ संपीड्य योनौ च हठाल्लिङ्गप्रवेशनम्।
हस्तयोर्वेष्टनं गाढ़ं बन्धो नृसिंहसंज्ञकः॥
पादमेकसुरौ कृत्वा द्वितीयं कटिसंस्थितम्।
नारीञ्च सुरमेत् कामी विपरीतस्तु बन्धकः॥
पार्श्वोपरि पदौ कृत्वा योनौ लिङ्गेन ताड़येत्।
बाहुभ्यां ताड़येद्गाढ़ं खञ्जको बन्ध एव सः॥
सुप्तां स्त्रियं समालिङ्ग्य स्वयं सुप्तो रमेत् पुनः।
यल्लिङ्गं चालयेत् योनौ बन्धोऽयं धेनुकः स्मृतः॥
नारीपादौ च हस्तेन धारयेत् गलके पुनः।
स्तनार्पितकरो कामी बन्धश्चोत्कण्ठसंज्ञकः॥
स्वयं जङ्घाद्वयं बाह्वोः कृत्वा योषित्पदद्वयम्॥
स्तनौ धृत्वा रमेत् कामी बन्धः सिंहासनो मतः॥
पीड़येदुरुयुग्मेन कामुकः कामिनीं यदि।
रतिनागः समाख्यातः कामिनीनां मनोहरः॥
नार्य्याश्चोरुयुगं धृत्वा कराभ्यां ताड़येत् पुनः।
रमयेन्निर्भरं कामी बन्धो विद्याधरो मतः॥"
इति॥)

संज्ञाप्रभेदेन अन्योऽपि बन्धोऽस्ति। यथा,—
"कामप्रदो विपरीतो नागरो रतिपाशकः।
केयूरः प्रियतोषश्च ततः समपदस्तथा॥
ततश्चैकपदो ज्ञेयः सम्पुटश्चोर्द्धसम्पुटः।
ततः स्तनभवश्चैव ततो नु रतिसुन्दरः॥
ऊरुपीड़सरश्चक्री ततश्चोरुक्रमः स्मृतः।
वेरको हंसकीलस्तु ततो लीलासनस्तथा॥
अष्टादशक्रमाद्बन्धाः स्त्रीणां बहुसुखप्रदाः।
पुंसां सुखकराश्चैव कथितास्तु क्रमात्ततः॥"
इति स्मरदीपिका॥ *॥

अनभिसन्धितकर्म्मकर्त्तुर्बन्धाभावो यथा,—
"पञ्चबंदानैरशुभं शुचतेऽनभिसन्धितैः।
फलैस्तथोपभोगैश्च पूर्व्वकर्म्मशुभाशुभैः॥
एवं न बन्धो भवति कुर्व्वतः कारणं विना।
न च बन्धाय तत् कर्म्म भवत्यनभिसन्धितम्॥"
इति मार्कण्डेयपुराणम्॥
(हठयोगप्रदीपोक्ता योगसाधकबन्धा यथा, तत्रैव। १। ५५—५७।

अथोड्डीयानबन्धः।
"बद्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः।
तस्मादुड्डीयनाख्योऽयं योगिभिः समुदाहृतः॥
उड्डीनं कुरुते यस्मादविश्रान्तं महाखगः।
उड्डीयानं तदेव स्यात् तत्र बन्धोऽभिधीयते॥
उदरे पश्चिमं तानं नाभेरूर्द्ध्वं च कारयेत्।
उड्डीयानो ह्यसौ बन्धो मृत्युमातङ्गकेसरी॥"
अथ मूलबन्धः। तल्लक्षणादिकमुक्तं तत्रैव। १। ६१—६२।

"पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद्गुदम्।
अपानमूर्द्धमाकृष्य मूलबन्धोऽभिधीयते॥
अधोगतिमपानं वा ऊर्द्धगं कुरुते बलात्।
आकुञ्चनेन तं प्राहुर्मूलबन्धं हि योगिनः॥"
अथ जालन्धरबन्धः। अस्य लक्षणादिकमुक्तं तत्रैव। १। ७०—७१।

"कण्ठमाकुञ्च हृदये स्थापयेच्चिबुकं दृढम्।
बन्धो जालन्धराख्योऽयं जराम्रुत्युविनाशकः॥
बध्नाति हि शिराजालमधोगामि नभोजलम्।
ततो जालन्धरो बन्धः कण्ठदुःखौघनाशनः॥")

बन्धक, क्ली, (बध्नातीति। बन्ध + खुल्।) ऋणाय स्थापितं वस्तु। बाँधा इति भाषा। इति आधिशब्दनानार्थे अमरः॥ इदानीमाधिर्निरूप्यते। आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णेऽधिक्रियते आधीयत इत्याधिः। स च द्विधैव। ऋतकालोऽनृतकालश्च। पुनश्चैकैकशो द्विविधः गोप्यो भोग्यश्च। यथाह नारदः।

"अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः।
ऋतकालापनेयश्च यावद्येयोऽनृतस्तथा॥
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव चेति॥"

ऋते काले आधानकाल एवासुस्मिन् काले दीपोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते कालेऽपनेयः आत्मसमीपे नेतव्यो मोचनीय इत्यर्थः देयं दानं देयमनतिक्रम्य यावद्देयम् उद्यतो नियतः स्थापित इत्यर्थः। यावद्देयम् उद्यतो यावद्देयोऽयतः गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः। गोप्यो रक्षणीयः। एवञ्चतुर्विधस्याधेर्विशेषमाह।

"आधिः प्रणश्येत् द्विगुणे धने यदि न मोच्यते।
काले कालकृतो नश्येत् फलभोग्यो न नश्यति॥"

प्रयुक्ते धने खलतया वृद्ध्या कालक्रमेण द्विगुणीभूते यदाधिरधमर्णेन द्रव्यदानेन मोच्यते तदा नश्यत्यधमर्णस्य धनं प्रयोक्तुः खभवति। कालकृतः ऋतकालः आहितात्मादिषु पाठात् कालशब्दस्य पूर्व्वनिपातः स तु काले निरूपिते प्राप्ते नश्येत् हेगुण्यात् प्रागूर्द्धं वा। फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति। ऋतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाश उक्तः। काले कालकृतो नश्येदिति। अनृतकालस्य भोग्यस्य नाशाभाव उक्तः फलभोग्यो न नश्यतीति पारिशेष्यादाधिः प्रणश्येदित्येतदनृतकालगोप्याधिविषयमवतिष्ठते हेगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्हायनादिवसप्रतीक्षणं कर्त्तव्यं हरदत्तवचनात्।

"हिरण्ये द्विगुणीभूते पूर्णे काले ऋतावधौ।
बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च।
तदन्नराधनं दत्त्वा ऋणी बन्धमवाप्नुयादिति॥"

किञ्च।

"गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते।
नष्टो देयो विनष्टश्च दैवराजकृताहते॥"

गोप्याधेस्तान्त्रकटाहादेरुपभोगेन वृद्धिर्भवति। अन्येऽप्युपभोगे महत्यपि वृद्धिर्हातव्या समयातिक्रमात् तथा सोपकारे उपकारकारिणि बलीवर्द्दतान्त्रकटाहादौ भोग्याधौ सवृद्धिके हापिते हानिं व्यवहारासत्वं गमिते नो वृद्धिरिति सम्बन्धः। नष्टो विप्लुतिं गतस्तान्त्रकटाहादिश्चिह्नभेदादिना पूर्व्ववत्कृत्वा देयः तच्च गोप्याधिर्नष्टश्चेत् पूर्व्ववत् कृत्वा देयः। उपसृष्टोऽपि चेत् वृद्धिरपि हातव्या भोग्याधिर्यदि नष्टस्तदा पूर्व्ववत् कृत्वा देयः। वृद्धिसद्भावे वृद्धिर्वा हातव्या। विनष्टे आत्यन्तिकं नाशं प्राप्तः सोऽपि देयो मूल्यादिदानेन तद्दाने सवृद्धिकं मूल्यं लभते

यदि न ददाति तदा मूलनाश्यः। 'विनष्टे मूलनाश्यः स्याद्देवराजबलाद्धते।' इति नारदवचनात्। देवराजबलाद्धते। देवमसूदकदेशोपप्लवादि। दैवबलताद्विनाशाद्विना। तथा खापराधरहिताद्राजबलात्। देवराजबले तु विनाशे सद्वृद्धिकं मूलं दातव्यमधमर्णेनाध्मर्णं वा यथाह।

"स्रोतसापहृते क्षेत्रे राज्ञा चैवापहारिते।
आधिरन्योऽथ कर्त्तव्यो दैवं वा धनिने धनमिति॥"

तत्र स्रोतसापहृत इति दैवबलोपलक्षणम्। अपि च।

"आधेः स्वीकरणात् सिद्धौ रक्ष्यमाणोऽप्यसारताम्।
यातश्चेदस्य आधेयो धनभाग्वा धनी भवेत्॥
आधेर्गोप्यस्य भोग्यस्य च स्वीकरणादुपभोगादाधेयहस्तसिद्धिर्न साक्षिलिखनमात्रेण नाप्युद्देशमात्रेण यथाह नारदः।

"आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा।
सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा॥"

अस्य च फलम्।

"आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरेति।"

या स्वीकारात्मा क्रिया सा पूर्व्वा बलवती स्वीकाररहिता तु पूर्व्वापि न बलवतीति स आधिः प्रयत्नेन रक्ष्यमाणोऽपि कालवशेन यद्यसारतामिवहत एव सद्वृद्धिकमूल्यदानपर्य्याप्ततां गतस्तदाधिरन्यः कर्त्तव्यः। धनिने वा धनं देयं रक्ष्यमाणोऽप्यसारतामिति वदता आधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितम्। आधिः प्रणष्टेद्विगुणं दातव्यमपवादमाह।

"चरित्रबन्धकृतं सद्वृद्ध्या दापयेद्धनम्।
सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत्॥"

चरित्रं शोभनाचरितम्। चरित्रेण बन्धकं चरित्रबन्धकम्। तेन यत् द्रव्यमात्मसात् कृतं पराधीनं वा कृतम्। एतदुक्तं भवति धनिनः स्वल्पाग्रयत्नेन बहुमूल्यमपि द्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमात्मसात् कृतम्। यदि वाधमर्णस्य स्वल्पाग्रयत्नेनाल्पमूल्यमाधिं गृहीत्वा बहुद्रव्यमेव धनिनाधमर्णाधीनं कृतमिति तद्धनं नृपो दृष्ट्वा सद्य दापयेत् अयमाशयः, एवंरूपं बन्धकं द्विगुणीभूतेऽपि द्रव्ये न नश्यति किन्तु द्रव्यमेव द्विगुणं दातव्यमिति। तथा सत्यङ्कारकृतं करणं कारः भावे घञ् सत्यस्य कारः सत्यङ्कारः कारे सत्यागदस्तेति सुम् सत्यङ्कारेण कृतं सत्यङ्कारकृतम्। अयमभिसन्धिः। यदा बन्धकार्पणसमय एव इदं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यम्। नाधिनाश्य इति तदा तद्द्विगुणं दापयेदिति। अन्योऽर्थः। चरित्रशब्देन मङ्गलाचारयज्ञोत्रादिजनितमपूर्व्वमुच्यते यच्च तदेवाधीकृत्य यत् द्रव्यमात्मसात् कृतम्। तच्च तदेव द्विगुणीभूतं दातव्यं नाधिनाश्य इति। आधिप्रसङ्गादन्यदुच्यते। सत्यङ्कारकृतमिति क्रयविक्रयादिव्यवस्थानिर्व्वाहणाय यद्यङ्गुलीयकादिपरहस्ते ज्ञातं तद्व्यवस्थातिक्रमे द्विगुणं दातव्यं तत्रापि येनाङ्गुलीयकादर्पितं स एव चेद्व्यवस्थातिवर्त्ती तेन तदेव ज्ञातव्यम्। इतरश्चेद्व्यवस्थातिवर्त्ती तदा तदेवाङ्गुलीयकादिद्विगुणं प्रतिदापयेदिति। किञ्च।

"उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत्।
प्रयोजकेऽसति धनं कुतेऽन्यस्याधिमाप्नुयात्॥"

धनदानेनाधिमोक्तव्यायोपस्थितस्याधिर्मोक्तव्यो धनिना वृद्धिलोभेन न स्थापयितव्यः। अन्यथा असौ चोरे स्तेनचोरवद्दण्ड्यो भवेत् असन्निहिते पुनःप्रयोक्तरि कुते तदाप्तहस्ते सद्वृद्धिकं धनं निधायाधमर्णः स्वीयं बन्धकं गृह्णीयात्। अथ प्रयोक्ताप्यसन्निहितस्तदाप्ताश्च धनस्य ग्रहीतारो न सन्ति यदि वा असन्निहिते प्रयोक्तरि आधिविक्रयेण धनदित्साधमर्णस्य तत्र किं कर्त्तव्यमित्यपेक्षिते आह।

"तत्कालकृतमूल्यो वा तत्र सिद्धेद्वृद्धिकः।"

तस्मिन् काले यत्तस्याधिर्मूल्यं तत् परिकल्प्य तत्रैव धनिनि तमाधिं वृद्धिरहितं स्थापयेन्न तत ऊर्द्धं धनं वर्द्धते यावद्धनी धनं गृहीत्वा तमाधिं मुञ्चति यावद्वा तन्मूल्यद्रव्यन्यक्षिणे प्रवेशयति। यदा तु द्विगुणीभूतेऽपि धने द्विगुणं धनमेव ग्रहीतव्यं न त्वाधिनाश्य इति विचारितत्वाद्ग्रहणकाल एव तदा द्विगुणीभूते द्रव्ये असन्निहिते वाधमर्णे धनिना किं कर्त्तव्यमित्यत आह।

"विनाधारणकादापि विक्रीणीत ससाक्षिकम्।"

धारणकादधमर्णादिना अधमर्णे असन्निहिते साक्षिभिस्तदाप्तैश्च सह तमाधिं विक्रीय तद्धनं गृहीयाद्धनी वाशब्दो व्यवस्थितविकल्पार्थः। यदर्णद्रव्यकाले द्विगुणीभूतेऽपि धने धनमेव ग्रहीतव्यं न त्वाधिनाश्य इति न विचारितम्। तदा आधिः प्रणष्टेद्विगुणं दत्त्वाधिनाश्यः। विचारिते त्वयं पक्ष इति॥*॥ भोग्याधौ विशेषमाह।

"यदा तु द्विगुणीभूतस्तदाधौ तदा खलु।
भोक्तव्य आधिरुत्पन्ने प्रविष्टे द्विगुणे धने॥"

यदा प्रयुक्तं धनं स्वल्पतया वृद्ध्या द्विगुणीभूतं तदाधौ जाते तदुत्पन्ने आध्युत्पन्ने द्विगुणे धनिनः प्रविष्टे धनिनाधिर्भोक्तव्यः। यदि वादावेवाधौ दत्ते द्विगुणीभूते द्रव्ये त्वयाधिर्भोक्तव्य इति परिभाषया कारणान्तरेण वा भोगाभावेन तदा द्विगुणीभूतस्तस्मात्तदाधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्भोक्तव्यः। अधिकोपभोगे सदपि देयम्। सर्व्वथा सद्वृद्धिकमूल्यार्थापाकरणार्थाध्युपभोगविषयमिदं वचनम्। तमेनं त्वयाधिमाचक्षते लौकिकाः यच्च तु वृद्ध्यर्थ एवाध्युपभोग इति परिभाषा तत्र दैगुण्यातिक्रमेऽपि यावन्मूल्यदानं तावदुपभुञ्जते एवाधिम् एतदेव सद्दीकृतं वृद्धिसहितेन

"————ऋणी बन्धमवाप्नुयात्।
फलभोग्यं पूर्व्वकालं दत्त्वा द्रव्यञ्च सामकम्॥
यदि प्रकर्षितं तत् स्यात्तदा न धनभाग्धनी।
ऋणी च न लभेद्बन्धं परस्परमतं विना॥"

अस्यार्थः। फलं भोग्यं यस्यासौ फलभोग्यो बन्ध आधिः स च द्विविधः सद्वृद्धिकमूल्यापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च तत्र च वृद्धिमूल्यापाकरणार्थं बन्धं पूर्व्वकालं पूर्व्वः कालो यस्यासौ पूर्व्वकालस्तमाप्नुयादृणी। यदा सद्वृद्धिकं मूल्यं फलद्वारेण धनिनः प्रविशत्तदा बन्धमवाप्नुयादित्यर्थः। वृद्धिमात्रापाकरणार्थेन तु बन्धं सामकं दत्त्वाप्नुयादृणी। समं मूल्यं समयेव सामकम्। अस्यापवादमाह। यदि प्रकर्षितं तत् स्यात्तदन्धकं प्रकर्षितमतिशयितं वृद्धेरभ्यधिकफलं यदि स्यात्तदा न धनभाग्धनी। सामकं न लभेदन्धं मूल्यमदत्त्वैवर्णी बन्धमवाप्नुयादिति यावत्। अथाप्रकर्षितं तद्बन्धकं वृद्धेरप्यपर्य्याप्तन्तदा सामकं दत्त्वापि बन्धं लभेताधमर्णः वृद्धिशेषमदत्त्वैव लभेतेत्यर्थः। पुनरुभयत्रापवादमाह। परस्परमतं विना उत्तमर्णाधमर्णयोः परस्परानुमत्यभावे यदि प्रकर्षितं इत्याद्युक्तम्। परस्परानुमतौ तूत्तमर्णमपि बन्धकं यावन्मूल्यदानन्तावदुपभुञ्जते धनी निजमपि मूलमात्रदाने नैवाधमर्णो लभते। इतिमिताक्षरा॥

बन्धकः, पुं, (बन्ध+स्वार्थे कन्।) विनिमयः। इति विश्वमेदिन्यौ॥ आधिः। इति शब्दरत्नावली॥ रतद्विरुक्तः। इति नानार्थरत्नमाला॥ (बध्नातीति। बन्ध+ण्वुल्। बन्धनकर्त्तरि, त्रि। यथा, देवीभागवते। ५। १। ३६।

"न नारी न धनं गेहं न पुत्रा न सहोदराः।
बन्धनं प्राणिनां राजन्नहङ्कारस्तु बन्धकः॥")

बन्धकी, स्त्री, (बध्नाति मानसमिति। बन्ध+ण्वुल्। गौरादित्वात् ङीष्।) पुंश्चली। इत्यमरः। २। ६। १०॥ (यथा, मार्कण्डेयपुराणे। ३४। ८८।

"न बन्धकीभिर्न्न धनैर्बन्धकीप्रतिभिस्तथा॥")

इभी। इति मेदिनीहेमचन्द्रौ॥ पञ्चपुरुषगामिनी। (यथा, महाभारते। १।१२१।७४।

"नातश्चतुर्थं प्रसवमापतृक्षेऽपि वदन्त्युत।
अतःपरं स्वैरिणी स्याद्बन्धकी पञ्चमे भवेत्॥")

बन्धनं, क्लीं, (बन्ध+भावे ल्युट्।) बन्धनक्रिया। बाँधा इति भाषा। तत्पर्य्यायः। उद्दानम् २। इत्यमरः। २। ८। २६॥ कड्डनम् ३ बन्धः ४ संयमनम् ५। इति शब्दरत्नावली॥ (यथा, हितोपदेशे। १। ६५।

"आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्।
मात्रङ्गजा हि बध्नन्ति बन्धने॥")

बन्धः। इति मेदिनी। ने, ६०। हिंसा। इति शब्दरत्नावली। रज्जुः। इति हेमचन्द्रः॥ बध्यतेऽनेनेति करणव्युत्पत्त्या त्रि॥ (बध्यतेऽस्मिन् इति अधिकरणे ल्युट्। कारागारम्। बन्धनस्थानम्। यथा, भागवते। ३। २। २५।

"वसुदेवस्य देवक्यां जातो भोजेन्द्रबन्धने ॥"
बन्ध + कर्त्तरि ल्युः । महादेवस्य नामभेदे, पुं । यथा, महाभारते । १३ । १७ । १०० ।
"बन्धनो बन्धकर्त्ता च सुबन्धनविमोचनः ॥"
बन्धनकर्त्तरि, त्रि । यथा, तत्रैव । १३।१७।९१ ।
"बन्धनस्थसुरेन्द्राणां युधि मुक्तविनायुधः ॥")
बन्धनवेश्म, क्ली, (बन्धनाय बन्धनस्य वा वेश्म गृहम् ।) कारागारम् । इति हारावली ।१६६॥
बन्धनालयः, पुं, (बन्धनाय बन्धनस्य वा आलयः ।) कारागारम् । इत्यमरः । २ । ८ । ११६ ॥
बन्धस्तम्भः, पुं, (बन्धाय स्तम्भः ।) हस्तिबन्धनस्तम्भः । तत्पर्य्यायः । आलानम् २ । इत्यमरः । २ । ८ । ९१ । अङ्कुः ३ अंचोड़ः ४ । इति शब्दरत्नावली ॥
बन्धिचं, क्ली, (बन्ध + इत्र ।) कामदेवः । इत्युणादिकोषः ॥ चर्म्मबन्धनम् । इति संक्षिप्तसारोणादिवृत्तिः ॥
बन्धुः, पुं, (बन्ध बन्धने + "शृस्वृस्निहित्रपीति ।" उणा० १।११। इति उः ।) स्नेहेन मनो बध्नाति यः । तत्पर्य्यायः । सगोत्रः २ बान्धवः ३ ज्ञातिः ४ स्वः ५ स्वजनः ६ । इत्यमरः । २ । ६ । ३४ ॥ दायादः ७ गोत्रः ८ । इति शब्दरत्नावली ॥ बन्धवश्च त्रिविधाः । आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति । यथोक्तम् ।
"आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः । आत्ममातुलपुत्राश्च विज्ञेया ह्यात्मबान्धवाः ॥
पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुःपितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः । मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥"
तत्र चान्तरङ्गत्वात् प्रथममात्मबन्धवो धनभाजः तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमो वेदितव्यः । बन्धूनामभावे आचार्य्यः । इति मिताक्षरा ॥ * ॥ (यथा, मनुः । २।१३६।
"वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी । एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥"
"बन्धुः पितृव्यादिः ।" इति तट्टीकायां कुल्लूकभट्टः ॥) बन्धूकः । (यथा, अशोकवधे । २६ ।
"अभ्यर्च्य बन्धुपुष्पमालयेति ॥")
मित्रम् । (यथा, मेघदूते । ३४ ।
"बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ॥")
भ्राता । इति मेदिनी ॥ (यथा, रघुः । १२।१२।
"अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम् । मौलैरानाययामासुर्भरतं स्वमिताशुभिः ॥")
बन्धुकः, पुं, (बन्ध + उकः । यद्वा, बन्धुर्बन्धूकवृक्ष एव । बन्धु + स्वार्थे कन् ।) बन्धूकवृक्षः । इति शब्दरत्नावली ॥
बन्धुजीवः । बन्धुरिव जीवयति रसादिनेति । बन्धु + जीव + अच् ।) बन्धूकवृक्षः । इति शब्दरत्नावली ॥ (यथा, रघुः । ११ । २५ ।
"वीक्ष्य वेदिमथ रक्तबिन्दुभि-
र्बन्धुजीवकृतभूषणामिव ॥")

बन्धुजीवकः, पुं, (बन्धुवत् जीवयति रसादिना इति । बन्धु + जीव + ण्वुल् । यद्वा, बन्धुजीव एव । स्वार्थे कन् ।) बन्धूकवृक्षः । इत्यमरः । २ । ४ । ७३ ॥
बन्धुता, स्त्री, (बन्धोर्भावः बन्धूनां समूहो वा इति । "ग्रामजनबन्धुभ्यस्तल् ।" ४।२।४२। इति तल् ।) बन्धूनां समूहः । बन्धोर्भावः । इत्यमरः । २।६।३५॥ (यथा, ऋग्वेदे । ४ । ४ । ११ ।
"महो रुजामि बन्धुता वचोभिः ॥")
बन्धुदत्तम्, क्ली, (बन्धुना दत्तम् ।) पितृमातृभ्यां दत्तं स्त्रीधनम् । यथा । याज्ञवल्क्यः ।
"बन्धुदत्तं यथा शुल्कमन्वाधेयकमेव च । अप्रजायामतीतायां बान्धवास्तदवाप्नुयुः ॥"
बन्धुदत्तपदेन कन्यादशायां यत् पितृभ्यां दत्तं तदुच्यते । इति दायभागः ॥
बन्धुरं, क्ली, (बन्ध बन्धने + "मन्नुरादयश्च ।" उणा० १ । ४२ । इति उरप्रत्ययेन निपातनात् साधुः ।) सुकुटम् । इति शब्दरत्नावली ॥ (रथबन्धनम् । यथा, महाभारते । ३ । ३२ । ३१ ।
"अन्ये क्रुद्धं वरूथञ्च बन्धुरञ्च तथापरे । गन्धर्व्वा बहुसाहस्राश्चिक्षिपुः शतमन्यवम् ॥"
तथा च भागवते । ४ । २६ । १ ।
"द्वीपं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम् ॥")
बन्धुरः, पुं, (बन्ध + "मन्नुरादयश्च ।" उणा० १।४२। इति उरः निपातनात् साधुः ।) स्त्रीचिह्नम् । तिलकवृक्षम् । बन्धूकः । वधिरः । हंसः । इति मेदिनी । रे, १८६ । विहङ्गः । इति हेमचन्द्रः । कृष्णौषधम् । इति राजनिर्घण्टः । बकः । विहङ्गः । इति शब्दरत्नावली ॥
बन्धुरः, त्रि, (बन्ध + उरः ।) रम्यम् । (यथा, महागणपतिस्तोत्रे । १५ ।
"श्रेयः श्रेयः स देयान्नम विमलदृशो बन्धुरं सिन्धुरास्यः ॥")
नम्रम् । इति मेदिनी । रे, १८६ ॥ उन्नतानतम् । इत्यमरः ॥ (यथा, रघुः । १६ । ४७ ।
"बध्नाति मे बन्धुरगात्रि ! चक्षु-
र्हंसः कलुषानिव चित्रकूटः ॥")
बन्धुरा, स्त्री, (बन्धुर + टाप् ।) पतिव्रतोषा । इति मेदिनी । रे, १६० ॥
बन्धुरः, पुं, शुक्लवः । इति मेदिनी । रे, १६० ॥ बहुवचनान्तोऽयम् ॥
बन्धुलः, पुं, (बन्धुं लातीति । बन्धु + ला + कः ।) असतीसुतः । इत्यमरः । २ । ६ । २६ ॥ (यथा, स्कन्दकटिकनाटके चतुर्थे अङ्के ।
"परगृहललिताः परान्नपुष्टाः
परपुरुषैर्जनिताः परान्नजाताः ।
परधननिरता गुणैश्च बाह्या
गणकसभा इव बन्धुला नमामः ॥")
बन्धूकः । इति शब्दरत्नावली ॥
बन्धुलः, त्रि, (बन्धून् लाति स्नेहेन गृह्णातीति । बन्धु + ला + कः ।) सुन्दरः । नम्रः । इत्यजयपालः ॥

बन्धूकः, पुं, (बध्नाति सौन्दर्य्येण चित्तमिति । बन्ध + "उलूकादयश्च ।" उणा० ४ । ४१ । इति ऊकः ।) पीतपुष्पालकः । इति मेदिनी । के, १२८॥ पुष्पवृक्षविशेषः । बाँदुली इति बङ्गभाषा । दोपहरिया इति हिन्दी भाषा । तत्पर्य्यायः । रक्तकः २ बन्धूजीवकः ३ । इत्यमरः । २।४।७३॥ बन्धुकः ४ बन्धुः ५ बन्धुलः ६ बन्धुजीवकः ७ बन्धुजीवः ८ बन्धूलिः ९ बन्धुरः १० । इति शब्दरत्नावली ॥ रक्तः ११ माध्याह्निकः १२ । इति भावप्रकाशः ॥ ओष्ठपुष्पः १३ अर्कवल्लभः १४ मध्यन्दिनः १५ रक्तपुष्पः १६ रागपुष्पः १७ हरिप्रियः १८ । अस्य गुणाः ।
"असितसितपीतलोहितपुष्पविशेषात् चतुर्व्विधो बन्धूकः ।
ज्वरहरो विविधारिग्रहपित्तास्रघ्नमनः प्रसादनः सविषः स्यात् ॥"
इति राजनिर्घण्टः ॥
"बन्धूकः कफशुद्ध्याही रक्तपित्तहरो लघुः ॥"
इति भावप्रकाशः ॥
खधूपे, क्ली । बन्धूक इति ख्यातम् । यथा,—
"बन्धूको बन्धुजीवे स्यात् खधूपे स्यान्नपुंसकम् ॥"
इति हेमचन्द्रः ॥
बन्धूकपुष्पः, पुं, (बन्धूकस्य बन्धूजीवस्य पुष्पमिव पुष्पं यस्य ।) पीतपुष्पालकः । इत्यमरः । २।४।४४॥ बीजकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"बीजकः पीतसारश्च पीतपुष्पालक इत्यपि ।
बन्धूकपुष्पः प्रियकः सर्ज्जकक्षासनः स्मृतः ॥")
बन्धूरः, पुं, (बन्ध बन्धने । बन्ध + "मन्नुरादयश्च ।" उणा० १ । ४२ । इत्यत्र खर्ज्जूरादित्वादूरप्रत्ययेन सिद्धम् इत्यज्जलदत्तः ।) विवरम् । इत्युणादिकोषः ॥
बन्धूरः, त्रि, (बन्ध + खर्ज्जूरादित्वादूरप्रत्ययः ।) रम्यः । नम्रः । यथा, रभसे ।
"बन्धूरबन्धुरौ रम्ये नम्रे हंसे तु बन्धुरः ॥"
उन्नतानतम् । स्वभावात् यदुन्नतं उपाधिवशादीषन्नतं तत् । क्वचिदुन्नतं क्वचिदानतं स्त्रजादिकम् । इति केचित् । इत्यमरटीकायां भरतः ॥
बन्धूलिः, पुं, (बन्ध बन्धने । बन्ध + ऊलि ।) बन्धूकवृक्षः । इति शब्दरत्नावली ॥
बन्ध्यः, त्रि, (बन्ध + यक् ।) ऋतुप्राप्तावधिफलरहितवृक्षादिः । (यथा, रघुः । १ । ७० ।
"चित्तं स्वयमिव स्नेहादन्धमाश्रमपादपम् ॥")
तत्पर्य्यायः । अफलः २ अवकेशी ३ । इत्यमरः । २ । ४ । ७ ॥ विफलः ४ निष्फलः ५ । इति राजनिर्घण्टः ॥ बन्धनीयः । बन्धधातोः कर्म्मणि यप्रत्ययः ॥ (यथा, याज्ञवल्क्यः । २।२४६।
"अवन्ध्यं यश्च बध्नाति वद्धं यश्च प्रमुञ्चति ॥"
पुं, निवर्त्तितवारिः सेतुः । यथा, मिताक्षरायाम् ।
"सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च ।
तोयप्रवर्त्तनात् खेयो बन्ध्यः स्यात्तन्निवर्त्तनात् ॥")

वन्ध्या. स्त्री, (वन्ध+"अन्नाद्यच्च।" उणा० ३।१११। इति यक्।) अप्रजस्त्री। इति मेदिनी॥ बाँझा इति भाषा॥ (यथा, भागवते। ६। १४।१२।

"रूपौदार्य्यवयोजन्मविद्यैश्वर्य्यश्रियादिभिः।
संपन्नस्य गुणैः सर्व्वैश्चिन्ता वन्ध्यापतेरभूत्॥"

वन्ध्या स्त्री अष्टमे वर्षे अधिवेदनीया भवति यथाह मनुः। ९। ८१।

"वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा॥") अपत्यशून्यगौः। तत्पर्य्यायः। वशा २। इत्यमरः। २। ६। ६९॥ बालास्थगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ तृणलीविशेषः। यथा,—

"वन्ध्या च तृणली ज्ञेया तृणली च मृतप्रजा।
अपरा तृणली ज्ञेया कुमारी या रजस्वला॥"

इति प्रायश्चित्तविवेके उशनसो वचनम्॥*॥ योनिरोगविशेषः। यथा,—

"उदावर्त्ता तथा वन्ध्या विप्लुता च परिप्लुता।
वातला योनिजो रोगो वातदोषेण पञ्चधा॥"

तस्या लक्षणं यथा,—

"सा फेनिलमुदावर्त्ता रजःलक्ष्मेण मुञ्चति।
वन्ध्या निरार्त्तवा ज्ञेया विप्लुता नित्यवेदना॥
परिप्लुता या भवति गाढ्यधर्म्मं रजा भृशम्।
वातला कर्कशाङ्गी च शूलनिस्तोदपीड़िता॥"

तस्याश्चिकित्सा यथा,—

"बला सिता सातिबला मधूकं
वटस्य शुङ्गं गजकेशरञ्च।
एतन्मधुक्षीरयुतैर्निपीय
वन्ध्या सुपुत्रं नियतं प्रसूते॥
अश्वगन्धाकषायेण सिद्धं दुग्धं घृतान्वितम्।
ऋतुस्नाताङ्गना प्रातः पीत्वा गर्भं दधाति हि॥
पुष्पोद्भूतं लक्ष्मणाया मूलं दुग्धेन कन्यया।
पिष्ट्वा पीत्वा ऋतुस्नाता गर्भं धत्ते न संशयः॥
कुरण्टमूलं धातक्याः कुसुमानि वटाङ्कुराः।
नीलोत्पलं पयोयुक्तमेवं गर्भप्रदं ध्रुवम्॥
या बला पिबति प्रार्द्धपिष्टलं
क्षीरकेण सहितं हिताशना।
श्वेतया विग्रिखपुष्पया युतं
सा सुतं जनयतीह नान्यथा॥"

इति भावप्रकाशः॥

(चिकित्सान्तरमस्या यथा,—

"पिप्पल्याः शृङ्गवेरस्य मरिचं केशरस्तथा।
घृतेन सह पातव्यं वन्ध्यापि लभते सुतम्॥"

इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे॥
"बला सातिबला यष्टिशर्करा मधुसंयुता।
वन्ध्यागर्भंकरी पीता नात्र कार्य्या विचारणा॥"

इति भैषज्यधन्वन्तरौ क्षीरोगाधिकारे॥)

वन्ध्याकर्कोटकी, स्त्री, (वन्ध्यायाः कर्कोटकी। पुत्रदाढ्यतया वन्ध्यायाः उपकारित्वी अतोऽस्यास्तथात्वम्।) तिक्तकर्कोटकी। बाँझकर्कसा इति बाँझकर्कटेल इति बाँझककरोल इति च हिन्दीभाषा। तत्पर्य्यायः। वन्ध्या २ देवी ३ नागारातिः ४ नागहन्त्री ५ मनोज्ञा ६ पथ्या ७ हिया ८ पुत्रदा ९ सकन्दा १० श्रीकन्दा ११ कन्दवल्ली १२ ईश्वरी १३ सुगन्धा १४ सर्पदमनी १५ विषकण्टकिनी १६ परा १७ कुमारी १८ भूतहन्त्री १९। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। कफापहत्वम्। स्थावरादिविषघ्नत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"वन्ध्याकर्कोटकी देवी कन्या योगेश्वरीति च।
नागारिर्भेक्तदमनी विषकण्टकिनी तथा॥
वन्ध्याकर्कोटकी लघ्वी कफघ्नदुव्रणरोधिनी।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी॥"

इति भावप्रकाशः॥

व(ब)भ्र, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) व(ब)कारादिः। ओष्ठ्यवर्गचतुर्थोपधः। व(ब)भ्रति। इति दुर्गादासः॥

वभ्रवी, स्त्री. (वभ्रोः गिरस्येयं पत्नी। वभ्रु+अण्+ङीप्। न वृद्धिः।) दुर्गा। इति भूरिप्रयोगः॥

वभ्रि:, पुं, (वभ्र+इन्।) वज्रम्। इति केचित्॥ (भरणकर्त्तरि धारके च त्रि। यथा, ऋग्वेदे। ६। २३। ४।

"गन्तेयानि सवना हरिभ्यां
वभ्रिर्वज्रं यपिः सोमं दृदिर्गाः॥")

वभ्रुः, पुं. (विभर्त्ति भरति वा। भृ+"कुभ्रञ्।" उणा० १। २३। इति कुद्विलच्च।) अग्निः। शिवः। (यथा, महाभारते १३। महादेवस्य सहस्रनामकथने। १७। १४८।

"भ्रूभ्रो भ्रूभ्रुप्रियो वभ्रू राजराजो निरामयः॥") विष्णुः। (यथा, महाभारते १३। विष्णोः सहस्रनामकथने। १४९। २६।

"रुग्मी बभ्रुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः॥") विप्रालः। नकुलः। इति मेदिनी॥ (यथा, मार्कण्डेये। १५। ६।

"सञ्जायते महावक्त्रो मूषिको बभ्रुसन्निभः॥") मुनिविशेषः। इति हेमचन्द्रः॥ देशभेदः। इति शब्दरत्नावली॥ सितावरणाकः। इति राजनिर्घण्टः॥ खलतिः। इति हेमचन्द्रः।३।११०॥ (कपिलो वर्णः। इति मेदातिथिः॥ तद्गुणयुक्ते तु वाच्यलिङ्गः। यथा, मनुः। ४। १३०।

"नाक्रामेल्लामतक्षार्यां बभ्रुणो दीक्षितस्य च॥"

सोमपादसुतः। यथा, भागवते ९।२४।१।

"रोमपादसुतो बभ्रुर्यस्य कृतिरजायत।"

देवादृषसुतः। यथा, तत्रैव। ९। २४। ६।

"ऋष्यशृङ्गो वाद्यसुतस्त्वयो श्लोकौ पठन्त्यमू॥"

ययातिपुत्रस्य द्रुह्योः सुतः। यथा, तत्रैव। ९। २३। १४।

"द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः॥"

पञ्चगन्धर्व्वपतिषु अन्यतरः। यथा, रामायणे। ३। ४१। ४२।

"तत्र गन्धर्व्वपतयः पञ्च सूर्य्यसमप्रभाः।
शैलूषो यामशो गृध्रः शुको बभ्रुश्चथैव च॥"

विश्वामित्रपुत्रभेदः। यथा, महाभारते १३। ४। ५०।

"अष्टौगश्च शकुन्तश्च बभ्रुः कालपथस्तथा॥"

विश्वगर्भस्य पुत्रः। स तु यादवानामन्यतमः। यथा, हरिवंशे। ६४। ४८।

"वसुर्बभ्रुः सुषेणश्च सभाक्षश्चैव वीर्य्यवान्।
यदुप्रवीरा विख्याता लोकपाला इवापरे॥"

यथा च माघे। २। ४०।

"आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत्॥"

स च विनष्टप्राये यादवकुले पथि गच्छन् दस्युभिर्हतः। तत्कथा च महाभारते। १६। मौषलपर्व्वणि द्रष्टव्या॥ स्त्री, कपिला गौः। सा च निघ्नि अजानता पृथुधर्म्मेण खड्गेन हता। यथा, भागवते। ६।२। ६।

"खड्गमादाय तरसा प्रलीनोडुगमे निशि।
अजानन्नहनद्गौः शिरः शार्द्दूलशङ्कया॥")

बभ्रुः, त्रि, (बिभर्त्तीति। भृ+"कुभ्रञ्च।" उणा० १। २३। इति कुद्विलच्च।) पिङ्गलः। इत्यमरः॥ (यथा, कुमारे। ५। ८।

"बबन्ध बालारुणबभ्रवल्कलं
पयोधरोत्सेधविशीर्णसंहतिः॥"

यथा च रघुः। १५। १६।

"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः॥")

बभ्रुधातुः, पुं, (बभ्रुः पिङ्गलो धातुः।) सुवर्णगैरिकम्। इति राजनिर्घण्टः॥

बभ्रुवाहनः, पुं, मणिपुरस्य राजविशेषः। स च चित्राङ्गदायां अर्জ্জুनाज्जातः। यथा,—

"करेणुमत्यां नकुलो निरमित्रं तथार्জ্জुनः।
इरावत्यसुलूप्यां वै सुतायां बभ्रुवाहनम्॥
मणिपुरपतेः सोऽपि ततपुत्रः पुत्रिकासुतः॥"

इति श्रीभागवते। ९। २२। ३२॥

अपि च।

वैशम्पायन उवाच।

"श्रुत्वा तु नृपतिः प्राप्तं पितरं बभ्रुवाहनः।
निर्य्ययौ विनयेनाथ ब्राह्मणार्घपुरःसरः॥
मणिपुरेश्वरस्त्वेवमुपायातं धनञ्जयः।
नाभ्यनन्दत् स मेधावी क्षात्रधर्म्ममनुस्मरन्॥"
"भर्त्तारं निहतं दृष्ट्वा पुत्रस्य पतितं भुवि।
चित्राङ्गदा परिम्लाना प्रविवेश रणाजिरे॥"

इति महाभारते। १४। ७९ अध्यायः॥ (अस्यार्জ্জुनादिना युद्धादिकं तत्रैव विस्तरशो द्रष्टव्यम्॥)

बभ्र, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) बभ्रति। इति दुर्गादासः॥

बर्म्भ, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) बर्म्भति। इति दुर्गादासः॥

बर्म्भटः, पुं, (बर्म्भ+अटन्।) राजभावः। इति विकाण्डशेषः॥ बर्म्भटी इति ख्यातः॥ (विहितरक्षा राजभावशब्दे ज्ञेया॥)

बर्म्भटी, स्त्री. (बर्म्भट+गौरादित्वात् ङीष्।) पण्ययोषा। वेश्याभेदः। इति मेदिनी। टे, ५१॥

बर्ह, ङ क्षतौ। हिंसायाम्। दाने। वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-

सेट्।) रेफोपधः। ड, वर्हते। इति दुर्गादासः॥

वल, क ड निरूपणे। इति कविकल्पद्रमः॥ (चुरा०- आत्म०-सक०- सेट्।) क ड, वालयते धर्म्मं धीरः। अयं केचिन्न मन्यते। इति दुर्गादासः॥

वल, क म जीवने। इति कविकल्पद्रमः॥ (चुरा०-पर०-अक०-सेट्।) वलयति। इति दुर्गादासः॥

वल, ड दाने। वधे। निरूपणे। इति कविकल्पद्रमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ड, वलते। इति दुर्गादासः॥

वल, ज धान्यावरोधे। जीवने। इति कविकल्पद्रमः॥ (भ्वा०-पर०-सक०-अक०च-सेट्।) वालः वलः। धनस्य भावो धान्यं सन्दृब्धिस्तस्य अवरोधः प्रतिवन्धः धान्यावरोधः। वलति पुण्यहीनं विधिः। पुण्यहीनस्य सन्दृब्धिं प्रतिवध्नाति इत्यर्थः। अयमर्थो अन्येन्न मन्यते। वलत्यनेन श्लोकः। इति दुर्गादासः॥

व(व)लं, क्ली, (वलते विपक्षान् हन्तीति। वल + पचाद्यच्।) सैन्यम्। (यथा, भगवद्गीतायाम्। १। १०।
"अपर्य्याप्तं तदस्माकं वलं भीष्माभिरक्षितम्।
पर्य्याप्तन्त्विदमेतेषां वलं भीमाभिरक्षितम्॥")
स्थौल्यम्। सामर्थ्यम्। अत्र श्लेषस्य पर्य्यायः। द्रविणम् २ तरः ३ सहः ४ शौर्य्यम् ५ स्थाम ६ सुग्रम् ७ शक्तिः ८ पराक्रमः ९ प्राणः १०। इत्यमरः। २। ८। १०२॥ महः ११ सूग्म १२। इति शब्दरत्नावली॥ ऊर्ज्जः १३। इति जटाधरः॥ तद्वैदिकपर्य्यायः। ओजः १ मा(वा)नः २ शवः ३ तरः ४ तवः ५ त्वसः ६ शर्द्धः ७ वाधः ८ तृग्मम् ९ तविषी १० सुग्मम् ११ सुष्मम् १२ सूथम् १३ दक्षः १४ वीळुः १५ चौलम् १६ सहः १७ यहः १८ वधः १९ वर्गः २० दृढनम् २१ दृक् २२ मज्मना २३ पौंस्यानि २४ धर्णसिः २५ द्रविणम् २६ स्वन्नसः २७ शम्बरम् २८। इत्यष्टाविंशतिर्वलनामानि। इति वेदनिघण्टौ। २। ९॥ (यथा, मनुः। २। ५५।
"पूजितं ह्यशनं नित्यं वलमूर्জ্জञ्च यच्छति॥")
तत्तु गर्भस्थशालकस्य षष्ठे मासि भवति। इति सुश्रुतः॥ गन्धरसः। रूपम्। इति मेदिनी। ले, ३०॥ शुक्रम्। इति हेमचन्द्रः। ३। २८३॥ (यथाह सुश्रुतः। "धातूनां यत्परं तेजस्तत् स्वल्पोज स्वदेव वलमित्युच्यते॥") वपुः। इति जटाधरः॥ (यथा, रामायणे। ७। १। ३३।
"कीदृशो वै प्रभावोऽस्य किं वलं कः पराक्रमः॥")
पक्षवम्। इति शब्दरत्नावली॥ रक्तः। इति शब्दचन्द्रिका॥ (वलमस्यास्तीति। वल + अर्श आद्यच्।) वलयुक्ते, त्रि। इति मेदिनी॥*॥ सद्योवलकराणि वलहराणि च यथा,—
"सद्योवलकराण्याहुः वालाभ्यङ्गं सुभोजनम्।
सद्योवलहराण्याहुः अध्वानं मैथुनं ज्वरः॥"

वलकारकौषधं यथा, गारुड़े। ११५। १९६ अः।
"शिवामलकचूर्णं वै मधुना उदकेन वा।
वलानि कुर्य्यान्नासाया प्रलुवे भक्षणं शिव!॥"
पारिभाषिकवलानि। यथा,—
"विद्याभिजनमिचाणि दृढिसत्त्वधनानि च।
तपःसहायवीर्य्याणि दैवञ्च दशमं वलम्॥"
इति महाभारते आपद्धर्म्मः॥
अपि च।
"अवलस्य वलं राजा वालस्य रुदितं वलम्।
वलं मूर्खस्य मौनन्तु तस्करस्यानृतं वलम्॥"*॥
अपि च।
"क्षत्रियाणां वलं युद्धं व्यापारश्च वलं विशाम्।
भिक्षा वलं भिक्षुकाणां शूद्राणां विप्रसेवनम्॥
हरौ भक्तिर्हरेर्दासं वैष्णवानां वलं हरिः।
हिंसा वलं खलानाञ्च तपस्या च तपस्विनाम्॥
वलं वेश्यश्च वेश्यानां योषितां यौवनं वलम्।
वलं प्रतापो भूपानां वालानां रुदितं वलम्॥
सतां सत्यं वलं मिथ्या वलमेवासतां सदा।
अनुगानामनुगमः खलस्यानाच्च सञ्चयः॥
विद्या वलं पण्डितानां वाणिज्यं वणिजां वलम्।
ग्रस्यतसुकर्म्मशीलानां गाम्भीर्य्यं साहसं वलम्॥
धनं वलञ्च धनिनां शुचीनाञ्च विशेषतः।
वलं विवेकः शान्तानां गुणिनां वलमेकता॥
गुणो वलञ्च गुणिनां शौराणाञ्चौर्य्यमेव च।
विप्रवाक्यञ्च कापट्यमधर्म्मस्तन्द्रिनां वलम्॥
हिंसा च हिंसजन्तूनां सतीनां पतिसेवनम्।
वरशापौ सुराणाञ्च ग्रिथ्याणां गुरुसेवनम्॥
वलं धर्म्मो गृहस्थानां भक्तानां राजसेवनम्।
वलं स्तवः स्तावकानां ब्रह्म च ब्रह्मचारिणाम्॥
यतीनाञ्च सदाचारो व्यासः सन्न्यासिनां वलम्।
पापं वलं पातकिनां सुभक्तानां हरिर्वलम्॥
पुण्यं वलं पुण्यवतां प्रजानां नृपतिर्वलम्।
फलं वलञ्च वृक्षाणां जलधीनां जलं वलम्॥
जलं वलञ्च शस्यानां मतृस्नानाञ्च जलं वलम्।
ग्लानिर्वलञ्च भूपानां विप्राणाञ्च विशेषतः॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ३५ अध्यायः॥
व(व)लः, पुं, (वलते निरूपयति खेटमिति। वल + अच्। वलदेवपक्षे नामैकदेशग्रहणादपि सिध्यति भीमादिवत्।) काकः। (यथा, महाभारते। ७। ६। २५।
"यमाः श्येना वलाः कङ्का वायसाश्च सहस्रशः॥")
वलदेवः। इत्यमरः॥ (यथा, भागवते। ४। ५। १६।
"पूषो ह्यपातयत् दन्तान् कलिङ्गस्य यथा वलः॥")
अस्य पत्न्यादीनां नामानि यथा,—
"रेवतीं नाम तनयां रेवतस्य महीपतेः।
उपयेमे वलस्तस्यां जज्ञाते निशठोल्मकौ॥"
इति विष्णुपुराणे। ५। २५। १६॥
वरुणवृक्षः। इति शब्दचन्द्रिका॥ (वायुना प्रदत्तः कार्त्तिकेयानुचरभेदः। यथा, महाभारते। ९। ४५। ४२।
"वलश्चातिवलश्चैव महावक्त्रौ महावलौ।
प्रदत्तौ कार्त्तिकेयाय वायुभूतसुतम!॥"

रामपुत्रस्य कुशस्यान्वये जातस्य पारियात्रस्य पुत्रविशेषः। यथा, भागवते। ९। १२। २।
"देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः।
ततो वलः स्थलस्तस्मादुक्थनाभोऽर्कसम्भवः॥"
दनायुषः पुत्रविशेषः। यथा, महाभारते। १। ६५। ३३।
"दनायुषः पुत्राश्चत्वारोऽसुरपुङ्गवाः।
विक्षयो वलवीरौ च वृत्रश्चैव महासुरः॥"
मेघः। इति निघण्टुः। १। १०॥) दैत्यविशेषः। इति मेदिनी। ले, ३०॥ तस्य विवरणं यथा,—
"आसीद्दैत्यो वलो नाम महावलपराक्रमः।
देवगन्धर्व्वयज्ञानां चन्द्रेन्द्रभयकारकः॥
येन विष्णुर्यमः सूर्य्यो भग आजौ प्रपीड़िताः।
अग्निज्ञानलरक्षश्च वरुणश्च वशीकृताः॥
संयम्य येन नागेन्द्रा महाभोगा महाविषाः।
गरुड़श्च कृतो भृत्यः सदाशामभिवर्त्तिनः॥
येन संलिख्य शैलेन्द्रः कन्दुकाकारकारितः।
क्रीड़ार्थं येन विप्रेन्द्र! गिरयः प्रथिता भुवि॥
तेन देवाः सब्रह्मेन्द्रा दिवः सर्व्वे पलायिताः।
दत्तं स्थानन्तु पातालं समयं शरदां शतम्॥
तथा ते भयमापन्ना मानं त्यक्त्वा गता गुरुम्।
पृच्छन्ति विनयात् सर्व्वे शक्रस्य हितकारिणः॥
केनोपायेन देवानां स्वर्गवासो भवेद्दिज!।
भवान् हि नयवेत्ता च उपायं वद पृच्छताम्॥
त्वमेव शास्त्रवेत्ता च हितः शक्रस्य नित्यशः।
शुद्धोदधिनिमग्नानामतियोतो भव द्विज!॥
एवं पृष्टः स देवैस्तु गुरुर्व्वचनमब्रवीत्॥
बृहस्पतिरुवाच।
वदर्थं दानवः शक्र! न युद्धे भवतो वशः।
रणे न क्षयमायाति अजेयः समरे यतः॥
अतः कपटमास्थाय प्रार्थनीयः कृतुं प्रति।
दाता सत्यवलोपेतः स्वकार्यमर्थितेष्वपि॥
अतस्तस्य प्रार्थयिता विष्णुर्म्मायामहोदधिः।
द्विजरूपधरो भूत्वा याचनाय वधाय च॥
गुरुणा चोदिता देवाः सुतास्ते निधनम्मृति।
गताः सर्व्वे ततः शान्ता यत्र देवो जनार्द्दनः॥
माधवेन तदा देवा दृष्टा भयसमाकुलाः।
क्रमार्थासनसंलापैः सर्व्वे ते संस्तुता भृशम्॥
संपृच्छितास्तदा सर्व्वे किमायातावदन् सुराः॥
देवा ऊचुः।
वलेन वलिना देव! सर्व्वे विद्रासिता वयम्।
मायावी त्वं वधे तस्य नान्योपायो भवेत् क्वचित्॥
विष्णुरुवाच।
करोमि भवतामिष्टं किन्त्वसौ वलसंयुतः।
सात्विको नयवेत्ता च सर्व्वशास्त्रार्थपारगः॥
गूढमन्त्रविचारी स्याद्धर्म्मैकशरणक्षयः।
तस्य मायां कथं कर्त्तुं शक्यते सुरसत्तमाः॥
पुरैका भवते विद्या मम दत्ता तु शूलिना।
मोहिनी नाम विख्याता मोहं सा कुरुते भृशम्॥
ततोऽहं तस्य नाशाय स्मरामि परमेश्वरीम्।
स्मरिता परमां विद्यां द्विजभावो जनार्द्दनः॥

मध्यकायसुवेशश्च वेदपाठी सविस्तरः ।
परिग्राही हुताग्नस्य चपयज्ञो ब्रवेदृषजेत् ॥
यज्ञार्थं याचनां कस्य करोमि कथ्यतां मम ।
तं दृष्ट्वा सूर्य्यतेजोभसुक्लो विप्रेन्द्रजन् स च ॥
वलस्ते यज्ञनिष्पत्तिं करोति द्विजसत्तम ! ।
हेमकूटे महाशैले तिष्ठते दानवोत्तमः ॥
सर्व्वज्ञोऽपि महामायी वञ्चनाय तदा गतः ।
मोहिनीं जपमानस्तु विद्यां परमसिद्धिदाम् ॥
विचित्रं दनुराजस्य पुरं सर्व्वपुरोत्तमम् ।
प्राविशद्वेदं वेदात्मा पठमानो जनार्द्दनः ॥
दानवन्तु पुरं रम्यं जगाम त्वं यहोत्तम ! ।
द्वारं गतोऽसुरेन्द्रस्य कुर्य्यां प्राध्ययनं तदा ॥
द्वारपालो वदत्येवं श्रुत्वा वेदध्वनिं शुभम् ।
पुराणि रत्नानि शुभं ददामि याचतां वर ! ॥
इष्टं दानं द्विजश्रेष्ठ ! दुर्लभञ्च महामते ! ।
तेनोक्तं दर्शनं द्वाःस्थ दीयतां दनुसत्तमे ॥
तदा स पूर्व्वमादिष्टः प्रेषयामास तं नृपम् ।
वलिनं वलसम्पन्नं दानवं सुरमर्द्दनम् ॥
दानोद्यतकरो भद्रं दृष्ट्वा प्रीत्यावभाषत ।
किमायातो भवांश्चात्र कार्य्यं विप्र ! तदुद्दिश्य ॥
मोहिनीं जपमानस्तु वदते द्विजकेशवः ॥

ब्रह्मोवाच ।

अहं संप्रेषयामास विद्धि मां कश्यपात्मजम् ।
यज्ञाः सेन्द्रैः समारब्धा ऋषिभिश्चासुराधिप ! ॥
तस्य निष्पत्तये नाथ ! आगतोऽहं तवान्तिकम् ।
दानं मे दीयतां राजन् ! सिध्यते येन तन्मखः ॥

वल उवाच ।

येन संसिध्यते यज्ञो देवारब्धो द्विजोत्तम ! ।
तथा चाहं धनं दारान् शिरश्च ददामि ते ॥

ब्रह्मोवाच ।

येन संसिध्यते यज्ञो देवानामसुराधिप ! ।
तद्देयं तच्च आदिष्टं वलमन्त्रावयोरपि ॥

वल उवाच ।

याचतां येन ते कार्य्यं सत्यं विप्र ! ददामि ते ।
संस्मृत्य मोहिनीं विद्यां वदते द्विजसत्तमः ॥

ब्राह्मण उवाच ।

न मे धनैः स्वदारैर्वा न भूम्या गजवाजिभिः ।
रत्नैः कार्य्यं महाबाहो ! देवयज्ञोऽसुराधिप ! ॥
येन निष्पाद्यते यज्ञः सुखदश्च दिवौकसाम् ।
तमहं याचयिष्यामि दीयतां तद्व्रतं तव ॥
एतत् कार्य्यं मम भद्रं ऋषीणाञ्च विशेषतः ।
देवार्थे तव कायेन सिध्यते तन्मखोत्तमः ॥
तदा दत्ता तनुत्यागे दानवेन महात्मना ।
विष्णुनापि स्वचक्रेण शिरस्यभिहतोऽसुरः ॥
प्राकृतं देहमुत्सृज्य दिव्यकायस्वभूषितः ।
तस्यावयवसंजाता वभ्राद्या रत्नजातयः ॥
लोचने सूरतेजोभि पद्मरागादि चाभवन् ।
विष्णुहस्तदानेन कायो रत्नाकरोऽभवत् ॥"

इति देवीपुराणे ४७ अध्यायः ॥

व(ब)लत्रः, पुं, ध्वजः । इत्यमरः ।१।५।१३॥ वलते: क्विप् वलं अत्यत्यस्मिन् घञ् वलञ्च इति कप संयोगवान् । इति रायमुकुटः ॥ अवलञ्चते इति वलत्रः घञ् अकारलोपः । इति स्वाम्यादयः ॥ एतन्मते अन्तःस्थवकारादिः ॥ (यथा, माघे । ६ । ३४ ।

"हिरददन्तवलत्रमलक्षत
स्फुरितभङ्गमगच्छविकेतकम् ॥")

वलजं, क्ली, (वलात् जायते इति । वल + जन + ड ।) क्षेत्रम् । पुरद्वारम् । इत्यमरः ।३।३।३१॥ धान्यराशिः । इति वैजयन्ती ॥ यथा, माघे । १४ । ७ ।

"त्वं समीरण इव प्रतीचितः
कर्षकेण वलजात् पुपूषता ।")

युद्धम् । इति मेदिनी ॥ वलजन्ये, त्रि ॥

वलजा, स्त्री, (वलात् वलक्षतत्राहसयुहादिकात् जायते या । वल + जन + ड + टाप् ।) वरयोषा । यूथी । इति मेदिनी । जे, २६ ॥

वलती, स्त्री, प्रासादोपरिमञ्जलिका । इति पुराणम् ॥

वलदः, पुं, (वलं ददातीति । वल + दा + कः ।) जीवकः । इति राजनिर्घण्टः । पौष्टिककर्म्माङ्गहोमाग्निः । यथा । पौष्टिके वलदः स्तुतः । इति तिथ्यादितत्त्वम् ॥ (वृषभः । यथा, कथासरित्सागरे । ३० । १५३ ।

"अन्येद्युः प्रणयक्रीड़ायाजाच मम सत्रकम् ।
गवेऽवधारदं दान्तस्तत्त्वं वलदोऽभवम् ॥")

वलदातरि, त्रि । (यथा, ऋग्वेदे ।३।५३ । १८ ।
"वलं तोकाय तनयाय जीवसे त्वं हि वलदा
असि ॥")

वलदा, स्त्री, (वलद + टाप् ।) अश्वगन्धा । इति राजनिर्घण्टः । (अस्याः पर्य्यायो यथा,—

"गन्धाल्ला वाजिनामादिरश्वगन्धा हयाह्वया ।
वराहकर्णी वरदा वलदा कुष्ठगन्धिनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वलदीनता, स्त्री, (वलस्य दीनता ।) ग्लानिः । इति हेमचन्द्रः ॥

वलदेवः, पुं, (वलेन दीव्यतीति । दिव + अच् ।) वलरामः । तत्पर्य्यायः । वलभद्रः २ प्रलम्बघ्नः ३ अच्युताग्रजः ४ रेवतीरमणः ५ रामः ६ कामपालः ७ हलायुधः ८ नीलाम्बरः ९ रौहिणेयः १० तालाङ्कः ११ सुवली १२ हली १३ सङ्कर्षणः १४ सीरपाणिः १५ कालिन्दीभेदनः १६ वलः १७ । इत्यमरः ।१।१।२४॥ रुक्मिदर्पघ्नः १८ मधुप्रियः १९ हलधरः २० हलभृत् २१ हालभृत् २२ सौनन्दी २३ गुप्तवरः २४ संवर्षकः २५ वली २६ । इति शब्दरत्नावली ॥ (यथा भागवते ।९। १ । ३१ ।
"तदृगच्छ देवदेवांशो वलदेवो महावलः ॥")

अस्य ध्यानम् ।

"वलदेवं द्विबाहुञ्च शङ्खकुन्देन्दुसन्निभम् ।
वामे हलायुधधरं सुवलं दक्षिणे करे ॥
हालालोलं नीलवस्त्रं हेलावन्तं स्मरेत् परम् ॥"

इति कश्चिन्निबन्धः ॥

(अथ हि शेषसर्पस्यांशावतारः । यथा, महाभारते । १ । ६७ । १५१ ।

"शेषस्यांशश्च नागस्य वलदेवो महावलः ॥"

नाम्नामस्य कारणानि वलभद्रशब्दे द्रष्टव्यानि ॥)

वायुः । इति मेदिनी । वे, ६२ ॥

वलदेवा, स्त्री, वायमाणौषधिः । इति मेदिनी । वे, ६२ ॥ (गुणादयोऽस्याख्यायमाणशब्दे ज्ञातव्याः ॥)

वलप्रस्थः, स्त्री. (प्रस्थते इति प्रस्थर्जननी । वलस्य वलदेवस्य प्रस्थः ।) रोहिणी । वलराममाता । इति शब्दरत्नावली ॥

वलभद्रः, पुं. (वलं भद्रं श्रेष्ठमस्य । यद्वा, वलमस्यास्तीति वलः । अर्श आद्यच् । वलो वलवानपि भद्रः सौम्यः ।) वलदेवः । इत्यमरः ।१।१।२४॥ अनन्तः । वलप्रायो । इति हेमचन्द्रः ।२।१३६॥ लोध्रः । इति शब्दचन्द्रिका ॥ गवयः । इति राजनिर्घण्टः ॥ वलदेवस्य नाम्नां कारणानि यथा,—

"श्रुतं निरूपितं नाम्नां कनिष्ठस्य यथाश्रुतम् ।
ज्येष्ठस्य हलिनो नाम्नः सङ्कर्षणं ब्रवीमि तत् ॥
गर्भसङ्कर्षणादेव नाम्ना सङ्कर्षणः स्मृतः ।
नाम्न्यन्योऽस्त्येव वेदेषु तेनानन्त इति स्मृतः ॥
वलदेवो वलोद्रेकाद्धली च हलधारणात् ।
सितिवासो नीलवासात् सुवली सुवलायुधात् ।
रेवतीसहसम्भोगाद्रेवतीरमणः स्वयम् ॥
रौहिणीगर्भवासात्तु रौहिणेयो महामतिः ।
इत्येवं ज्येष्ठपुत्रस्य श्रुतं नाम निवेदितम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ९३ अध्यायः ॥

विष्णुपूजनोक्तादलपद्मस्थयोगिविशेषः । यथा,

"सर्व्वत्र मङ्गलं कार्य्यं वासुदेवस्य पूजने ।
एवमेव नृपश्रेष्ठ ! निष्फलं चान्यथेतरत् ॥
वलभद्रश्च कामश्च अनिरुद्धस्तदुद्भवः ।
नारायणस्तथा ब्रह्मा विष्णुः षष्ठः प्रकीर्त्तितः ॥
नरसिंहो वराहश्च योगिनोऽष्टौ प्रकीर्त्तिताः ।
पूर्व्वादिदलदेवेतान् वर्णतो मन्त्रतः पृथक् ॥
पूजयेत् कर्णिकामध्ये वासुदेवन्तु नायकम् ।
विमला नायिका तस्य वासुदेवस्य कीर्त्तिता ।
वलभद्रसुखानान्तु योगिन्यः शृणु पार्थिव ! ॥
आद्यायुतर्क्षिणी श्रेया ज्ञाना प्रसात् क्रिया परा ।
योगा प्रज्ञा तथैशानी अनुग्राती तथा क्षती ॥
सर्व्वाश्चतुर्भुजाः प्रोक्ताः शङ्खचक्रगदाधराः ।
योगिन्यो वलभद्रस्तु कामं विधियुते तथा ॥
विधे रूपन्तु पूर्व्वोक्तं हलञ्च सुवलन्तथा ।
शङ्खचक्रञ्च धत्ते स गदां पार्श्वस्थितान्तथा ॥"

इति कालिकापुराणे ८२ अध्यायः ॥

(पर्व्वतविशेषः । यथा, भागवते । ५।२०।२६।
"एतेषां वर्षमर्य्यादा गिरयो नद्यश्च सप्त सप्तैव ।
ईड्याज उपदेशो वलभद्रः प्लक्षकेसरः सहस्रस्रोतो देवपालो महानस इति ॥")

वलभद्रा, स्त्री, कुमारी। चायमाणा। इति मेदिनी। दे, २८४॥ (अस्याः पर्य्यायो यथा,—
"वलभद्रा चायमाणा चायन्ती गिरिसुता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वलभद्रिका, स्त्री, (वलभद्रैव। वलभद्रा+स्वार्थे कन्। कापि अत इत्वम्।) चायमाणा। इत्यमरः। २। ४। १५०॥

वलरामः, पुं, (रम+भावे घञ्। वलेन रामो रमणं यस्य।) वलदेवः। यथा,—
"वलरामानुजः श्रीमान् गजेन्द्रसुतपादकः॥"
इति नारदपञ्चरात्रे चतुर्थरात्रीये ८ अध्यायः॥
अस्य ध्यानम्।
"अन्तरे दिव्य उद्याने हरिचन्दनसंज्ञके।
तत्राधस्तात् स्वर्णपीठे विचित्रे मणिमण्डपे॥
तन्मध्ये मणिमाणिक्यदिव्यसिंहासनोज्ज्वले।
तत्रोपरि च रेवत्या सङ्कर्षणहलायुधम्॥
ईश्वरस्याभयानन्तमभिन्नगुणरूपिणम्।
शुद्धस्फटिकसंकाशं रक्ताम्बुजदलेक्षणम्॥
नीलवेलधरं स्निग्धं दिव्यगन्धानुलेपनम्।
कुङ्कुलाञ्चितसद्गण्डं दिव्यसुधास्मरस्मयम्॥
मधुपाने सदासक्तं मदाघूर्णितलोचनम्।
सुवलं दक्षिणे पार्श्वे वलरामं सदा स्मरेत्॥"
इति कश्चिन्निबन्धः॥

वलल, पुं, (वलं लातीति। वल+ला+क।) वलरामः। इत्यमरटीकायां भरतः॥

वलवत्, त्र, (वलमस्यास्तीति। वल+मतुप्। मस्य वः।) अतिशयम्। इत्यमरः। ३। ४। १॥ (यथा, शाकुन्तले प्रस्तावनायां सूत्रधारस्योक्तिः।
"वलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥")

वलवान् [त्], चि, (वलमस्यास्तीति। वल+मतुप्। मस्य वः।) वलविशिष्टः। तत्पर्य्यायः। मांसलः २ अंशुलः ३। इत्यमरः। २। ६। ४४॥ वीर्य्यवान् ४ वली ५। इति शब्दरत्नावली॥ (यथा, मनुः। १। ७६।
"आकाशात्तु विकुर्व्वाणात् सर्व्वगन्धवहः शुचिः।
वलवान् जायते वायुः स वै स्पर्शगुणो मतः॥")

वलवर्द्धिनी, स्त्री (वलं वर्द्धयतीति। वल+वृध्+णिनिः। ङीप्।) जीवकौषधिः। इति शटाधरः॥

वलविन्यासः, पुं, (वलानां सैन्यानां विशेषेण दुर्भेद्यत्वेन न्यासः स्थापनम्।) युद्धार्थं सैन्यस्य देशविशेषे विभज्य दुर्भेद्यत्वनिमित्तं स्थापनम्। तत्पर्य्यायः। व्यूहः २। इत्यमरः। २। ८। ७६॥ (वलविन्यासस्तु मकरपद्माद्रिभेदात् बहवः। तत्र संक्षेपतो मनुना युद्धयात्रार्थं केचिन्निर्दिष्टाः। यथा, मानवे। ७। १८७—१६१।
"दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा॥
यतश्च भयमाशङ्केत् ततो विस्तारयेद्वलम्।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम्॥
सेनापतिवलाध्यक्षौ सर्व्वदिक्षु निवेशयेत्।
यतश्च भयमाशङ्केत् प्राचीं तां कल्पयेद्दिशम्॥
गुल्मांश्च स्थापयेदात्मा कृतसंज्ञान् समन्ततः।
स्थाने युद्धे च कुशलानभीरूनविकारिणः॥
संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून्।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत्॥")

वलसूदनः, पुं, (वलं तन्नाम्ना प्रसिद्धं असुरं सूदयतीति। वल+सूद+ल्यु।) इन्द्रः। इति हलायुधः॥ (यथा, देवीभागवते। ५। ३। १३।
"नोचेदहं गृहाणास्त्रं युद्धाय वलसूदन!॥"
विष्णुः। इति देवीपुराणे ४० अध्यायः॥)

वलस्थितिः, स्त्री, (वलानां स्थितिरवस्थानं यत्र। अधिकरणात् स्त्रीत्वम्।) शिविरम्। इति त्रिकाण्डशेषः॥

वलहा, [न्], पुं, (वलं सामर्थ्यं हन्तीति। वल+हन्+क्विप्।) श्येना। इति शब्दरत्नावली॥ (वलं तन्नामानमसुरं हन्तीति। इन्द्रः॥ परवलविनाशके, त्रि। यथा, हरिवंशे। ११०। ४२।
"तच्चाहं युध्यमानस्तु भ्रातास्य वलहा वली।
स्थितो ममाग्रतः शूरो गदापाणिर्हलायुधः॥")

व(ब)ला, स्त्री, (कार्य्यकारित्वेन वलमस्त्यस्याः। वल+अर्श आद्यच् ततष्टाप्।) क्षुपविशेषः। वाला इति वाड़ियाला इति भाषा। तत्पर्य्यायः। वाट्यालकः २। इत्यमरः। २। ४। १०७॥ समङ्गा ३ ओदनिका ४ भद्रा ५ भद्रौदनी ६ खरकास्थिका ७ कल्याणिनी ८ भद्रवला ९ मोटा १० पाटी ११ वलाढ्या १२। इति राजनिर्घण्टः॥ प्रीतपाकी १३ वाट्या १४ वाटी १५ विनया १६ वाट्यालो १७ वाटिका १८। इति शब्दरत्नावली॥ अपि च।
"वाट्यालको वाट्यपुष्पी समांसा विलला वला।
श्वेतवाड़ियाला इति भाषा॥
ऋष्यप्रोक्ता त्वतिवला पीतपुष्पी महावला।
पीतवाड़ीयाला।" इति रत्नमाला॥ अस्या गुणाः। अतितिक्तत्वम्। मधुरत्वम्। पित्तातिसारनाशित्वम्। वलवीर्य्यप्रदत्वम्। पुष्टिकफरोधविशोधनत्व। इति राजनिर्घण्टः॥ अथ वलाचतुष्टयनामादि।
"वला वाट्यालिका वाट्या सैव वाट्यालकोऽपि च।
महावला पीतपुष्पा सहदेवी च सा स्मृता॥
ततोऽन्यातिवला ऋष्यप्रोक्ता कङ्कतिकासह।
गाङ्गेरुकी नागवला भद्रा हृद्या गवेधुका॥
वलाचतुष्टयगुणाः।
वलाचतुष्टयं शीतं मधुरं वलकान्तिकृत्।
स्निग्धं वाहि समीरासपित्तास्रक्षतनाशनम्॥
वलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम्।
सद्यातिसारं हरति दुष्टमेतन्न संशयः॥"
इति भावप्रकाशः॥
"स्निग्धायुष्या वला हृद्या वाहिनी वातपित्तजित्॥"
इति राजनिर्घण्टः॥
(विद्याविशेषः। सा च ब्रह्मणः सुता। विश्वामित्रेण रामाय प्रदत्ता। अस्याः प्रभावात् क्षुधाद्यजनितक्लेशो न भवेत्। यथा, रामायणे। १। २२। ११—२२।
"अथर्हयोजनं गत्वा सरय्वा दक्षिणे तटे।
रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत॥
गृहाण वत्स! सलिलं माभूत् कालविपर्य्ययः।
मन्त्रग्रामं गृहाण त्वं वलामतिवलां तथा॥
न श्रमो न ज्वरो वा ते न रूपस्य विपर्य्ययः।
न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः॥
न बाहोर्वीर्य्ये पृथिव्यामस्ति कश्चन।
त्रिषु लोकेषु वा राम! न भवेत् सदृशस्तव॥
वलामतिवलाञ्चैव पठतस्तात राघव!॥
न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये।
नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ!॥
एतद्विद्वादये लब्धे न भवेत् सदृशस्तव।
वला चातिवला चैव सर्व्वज्ञानस्य मातरौ॥
क्षुत्पिपासे न ते राम! भविष्येते नरोत्तम!॥
वलामतिवलाञ्चैव पठतस्तात राघव!॥
विद्याद्वयमधीयाने यशश्चाथ भवेद्भुवि॥
पितामहसुते ह्येते विद्ये तेजःसमन्विते।
प्रदातुं तव काकुत्स्थ! सदृशस्त्वं हि पार्थिव!॥
कामं बहुगुणाः सर्व्वे त्वय्येते नात्र संशयः।
तपसा सम्भृते चैते बहुरूपे भविष्यतः॥
ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः
प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः॥
विद्यासमुदितो रामः शुशुभे भीमविक्रमः।
सहस्ररश्मिर्भगवान् शारदीव दिवाकरः॥")

व(ब)लाकः, पुं, (वलेन अकतीति। वल+अक+पचाद्यच्।) वकजातिः। इति भरतः॥ (पूरुपुत्रः। स च पौतगङ्गस्य जह्नोः पौत्रः। यथा, भागवते। ९। १५। ३।
"जह्नोस्तु पूरुस्तत् पुत्रो वलाकस्तत्सुतोऽजकः॥"
वृत्तस्त्रीपुत्रभेदः। यथा, मार्कण्डेये। ११८। २।
"तस्य तस्यां सुनन्दायां पुत्रा द्वादश जज्ञिरे।
प्रांशुः प्रचीरः शूरश्च सुचक्रो विक्रमः क्रमः॥
बली वलाकश्चक्षुश्च प्रचण्डश्च सुविक्रमः॥"
जातूकर्ण्यस्य मुनेः शिष्यविशेषः। यथा, श्रीभागवते। १२। ६। ५८।
"जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम्।
वलाकपैलजाबालविरजेभ्यो ददौ मुनिः॥"
राक्षसभेदः। यथा, मार्कण्डेये। ६९। ६४।
"तां जहारादितनयो वलाको नाम राक्षसः॥"
खनामख्यातो व्याधविशेषः। यथा, महाभारते। ८। ६६। ४०।
"मृगव्याधोऽभवत् कश्चित् वलाको नामभारत॥")

व(ब)लाका, स्त्री, (वलते इति। वल संवरणे+वलाकादयश्च।" उणा० ४। १४। इति अक। यद्वा, वलेन अकतीति। वल+अक कुटिलगतौ+पचाद्यच्।) वकजातिविशेषः। (यथा, मनुः। ५। १४।
"वकश्चैव वलाकाश्च काकोलं खञ्जरीटकम्॥")
तत्पर्य्यायः। विषकण्ठिका २। इत्यमरः। २। ५। २५॥ विषकण्ठी ३ वलाकी ४। इति शब्दरत्नावली॥ कारायिका ५ लिङ्गलिका ६। इति शटाधरः॥ विषकण्ठी ७ शुष्काङ्गा ८

दीर्घकन्धरा ६ धर्म्मात्मा १० कासुकी ११ श्वेता १२ मेघानन्दा १३ जलाश्रया १४। बलेन ग्रस्ता दूरमूर्द्धमकर्षति। वल वल्ल संवरणे वलाकादय-श्चेत्याकन् वलाका। इति रायमुकुटकृतव्युत्पत्ति-ह्वयेन पवर्गीयबकारादिरन्तयकारादिश्चायं शब्दः॥*॥ अस्या मांसगुणाः। वातुनाग्निवम्। स्निग्धत्वम्। दृष्टमलत्वम्। दृष्यत्वम्। कफपित्त-हरत्वम्। हिमत्वञ्च। इति राजवल्लभः॥ सारस-हंसवलाकाचक्रक्रौञ्चादयो जले प्लवनात् प्लव-संज्ञाः कथितास्ते तन्मांसं गुरुञ्चाच वलदायि। अपि च।

"अन्ये वकवलाकाद्या गुरवः प्राणिभक्षणात्।"

इति राजनिर्घण्टः॥

अन्यच्च।

"हंससारसकाचाम्बुवकक्रौञ्चसरारिकाः।
नन्दीमुखी सकादम्बा वलाकाद्याः प्लवाः स्मृताः।
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि वलसृक्करकराः सराः॥"

इति भावप्रकाशः॥

(कासुकी। इति शब्दरत्नावली॥)

वलाक्षिता, स्त्री, (वलेन अक्षिता।) रामदीक्षा। इति शब्दरत्नावली॥

वलाटः, पुं, (वलेन अश्यते प्राप्यते इति। अट्+घञ्।) मुखः। इति हेमचन्द्रः॥

वलात्, व्य, (वलमतीति। वल+अत्+क्विप्।) हठात्। वलादिति निपातो हठार्थे इति स्वामी। इत्यमरटीकायां भरतः॥ यथा,—

"वलात् संदूषयेद्यस्तु परभार्य्यां नरः क्वचित्।
वधदण्डो भवेत्तस्य नापराधो भवेत् स्त्रियाः॥"

इति मात्स्ये २०१ अध्यायः॥

वलात्कारः, पुं, (वलात्करणम्। वलात्+कृ+भावे घञ्।) हठात्करणम्। तत्पर्य्यायः। प्रसभम् २ हटः ३। इत्यमरः। २। ८।१०८॥ हठात्कारः ४ प्रसभः ५। इति शब्दरत्नावली॥

"मत्ताभियुक्तस्त्रीबालवलात्कारकृतञ्च यत्।
तदप्रमाणं लिखितं भयोपधिकृतन्तथा॥"

इति ऋणादाने मिताक्षरायां नारदवचनम्॥

(यथा, रघुः। १०। ४७।

"ग्रापयन्निव तपोलक्ष्यवलात्कारकृच्यहैः॥")

वलात्मिका, स्त्री, (वलमेव आत्मा स्वरूपं यस्याः।) हस्तिशुण्डीवृक्षः। इति शब्दरत्नावली॥

वलाद्या, स्त्री, (वलाय आद्या श्रेष्ठा।) वला। इति राजनिर्घण्टः॥ (वलाशब्देऽस्या विवरणं ज्ञातव्यम्॥)

वलानुजः, पुं, (वलस्य वलरामस्य अनुजः कनिष्ठः।) श्रीकृष्णः। इति पुराणम्॥

वलामोटा, स्त्री, (वलमामोटयतीति। वल+ण्+मुट्+अच्। टाप्।) नागदमनी। इति भावप्रकाशः॥ (यथास्या गुणाः।

"वलामोटा कटूष्णोक्ता लघुः पित्तकफापहा।
सूत्रकृच्छ्रव्रणान् रक्तो नाशयेच्छालगर्हभान्॥
सर्व्वग्रहप्रशमनी निःशेषविषनाशिनी।
जयं सर्व्वत्र कुरुते धनदा सुमतिप्रदा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वलायः, पुं, (अयतीति अयः प्रापकः। वलस्य अयः।) वरुणवृक्षः। इति शब्दचन्द्रिका॥ (गुणादयोऽस्य वरुणशब्दे ज्ञातव्याः॥)

वलारातिः, पुं, (वलस्य तन्नाम्नो प्रसिद्धस्यासुरस्य अरातिः शत्रुः।) इन्द्रः। इत्यमरः।१।१।४६॥

वलालकः, पुं, (वलाय अलति समर्थो भवतीति। वल+अल्+कुल्।) पानीयामलकम्। इति शब्दचन्द्रिका॥

वलाग्रः, पुं, (वलमग्रातीति। वल+अग्र+अण्।) श्लेष्मा। इति हेमचन्द्रः।३।१२६॥ (यथा,

"वलाग्र एवायतमुन्नतञ्च
ग्रीवं करोत्यग्रगतिं निवार्य्य॥"

कण्ठगतरोगविशेषः। तल्लक्षणं यथा,—

"गले च ग्रीवं कुरुतः प्रवृद्धौ
श्लेष्मानिलौ श्वासरुजोपपन्नम्।
मर्म्मच्छिदं दुस्तरमेतमाहु-
र्व्वलाग्रसंज्ञं निपुणा विकारम्॥"

इति सुश्रुते निदानस्थाने षोड़शेऽध्याये॥

दन्त्यसान्तोऽप्ययं शब्दो दृश्यते॥)

वलासमः, पुं, मुद्गः। इति त्रिकाण्डशेषः॥

व(ब)लाहकः, पुं, (वलेन हीयते इति। वल+हा+कुन्। यद्वा, वारीणां वाहकः। पृषोदरादित्वात् साधुः।) मेघः। (यथा, कुमारे। १। ४।

"वलाहकच्छेदविभक्तरागा-
मकालसन्ध्यामिव धातुमत्ताम्॥")

मुस्तकः। इत्यमरः। १। ३। ६॥ पर्व्वतः। दैत्यविशेषः। नागविशेषः। इति मेदिनी॥ (यथा, महाभारते। २। ६। ६।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रवलाहकौ॥"

वलाहकसर्पस्तु दर्व्वीकरणामन्तर्गतः। इति सुश्रुते कल्पस्थाने ४ अध्यायः॥) रमागर्भोद्भवः कल्किदेवपुत्रः। यथा,—

"तथा रमा सिते पक्षे वैशाखे द्वादशीदिने।
जामदग्न्यादृतं चक्रे पूर्णं वर्षचतुष्टयम्॥
पट्टसूत्रं करे बद्ध्वा भोजयित्वा द्विजान् बहून्।
शुक्ला हविष्यं चीरान्नं समिरं स्वामिना सह॥
वृषभे पृथिवीं सर्व्वामपूर्व्वां सजनेर्ऋता।
सा पुत्रौ सुषुवे साध्वी मेघमालवलाहकौ॥
देवानामुपकर्त्तारौ यज्ञदानतपोव्रतौ।
महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ॥"

इति कल्किपुराणे ३१ अध्यायः॥

श्रीकृष्णरथाश्वविशेषः। यथा,—

"स्यन्दनस्तु घृतानन्दः सारथिश्चास्य दारुकः।
तुरङ्गाः श्वेतसुग्रीवमेघपुष्यवलाहकाः॥"

इति त्रिकाण्डशेषः॥

(यथाच भागवते। १०। ५३। ५।

"स चाश्वैः शुभ्रसुग्रीवमेघपुष्यबलाहकैः।
युक्तं रथमुपानीय तस्थौ प्राञ्जलिरग्रतः॥"

जयद्रथस्य भ्रातृविशेषः। यथा, महाभारते। ३। २५४। १२।

"जयद्रथो नाम यदि श्रुतस्ते
सौवीरराजः सुभगः स एषः।
तस्यापरे भ्रातरोऽदीनसत्त्वा
वलाहकानीकविदारणाद्याः॥"

नदविशेषः। स तु लवणसमुद्रगामी। यथा, मात्स्ये। १२०। ७२।

"वलाहकश्च ऋषभश्चक्षो मैनाक एव च।
विनिर्गताः प्रतिदिशं निम्नगा लवणाम्बुधिम्॥"

कुशद्वीपस्थपर्व्वतविशेषः। यथा, तत्रैव। १२२। ५५।

"वलाहकस्तृतीयस्तु जात्यञ्जनमयो गिरिः॥"

तारापीड़स्य राज्ञः स्वनामख्यातो वलाधि-कारी। यथा, कादम्बर्य्यां चन्द्रापीड़विद्या-भ्यासकथने। "चन्द्रापीड़मानेतुं राजा वलाधि-कृतं वलाहकनामानं आहूय दृढसुरगवल-पदातिपरिवृतमतिप्रगल्भेऽहनि प्राहिणोत्॥")

वलाहकन्दः, पुं, (वलं आहयतीति वलाहक्षा-द्यः कन्दः।) मुस्तकन्दः। इति राजनिर्घण्टः॥

वलिः, पुं, (वल्यते दीयते इति। वल दाने+"सर्व्व-धातुभ्य इन्।" उणा० ४। ११७। इतीन्।) करः। राजग्राह्यो भागः। (यथा, मनुः।७।८०।

"सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्वलिम्॥"

"राजा प्रकृतिरक्षार्थं साध्यादिभाग-मानयेत्।" इति कुल्लूकभट्टः॥) उपहारः। पूजासामग्री। इत्यमरभरतौ॥ (यथा, मार्कण्डेये। ६३। ८।

"ददतुस्तौ बलिञ्चैव निजगात्रासृगुक्षितौ॥")

चामरदण्डः। बलिवेश्मनामकपञ्चमहायज्ञान्त-र्गतभूतयज्ञः। इति हेमचन्द्रः।३।४८६॥ (गृहस्थो हि पञ्चसूनापापेन प्रतिदिनं संबध्यते। तन्निष्कृ-त्यर्थं प्रत्यहं पञ्च महायज्ञाः कर्त्तव्याः। यथाह मनुः। ३। ६८—७१।

"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्॥
तासां क्रमेण सर्व्वासां निष्कृत्यर्थं महर्षिभिः।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥
पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते॥"

"पशुवध्यस्थानं सूना। सूना इव सूना हिंसा-स्थानगुणयोगात्। चुल्ल्यादयः पञ्च गृहस्थस्य जीवहिंसास्थानानि। चुल्ली उद्दाहनी। पेषणी दृषदुपलात्मिका। उपस्करः गृहोपकरण-कुक्कुसंमार्জ্জन्यादिः। कण्डनी उदूखलमूषले। उदकुम्भो जलाधारकलशः।" इति तट्टीकायां कुल्लूकभट्टः॥ *॥ गृहस्थानां बलिरूपभूत-यज्ञस्य प्रतिदिनकर्त्तव्यतया तस्य विस्तृतिरुच्यते। गृहस्थः अनन्यचित्तो देवताधानपर एव होमान् कृत्वा प्राच्यादिषु दिक्षु बलिं हरेत्। तत्प्रकरणमाह। प्राच्यां इन्द्राय नमः। इन्द्र-

पुरुषेभ्यो नमः। दक्षिणस्यां यमाय नमः। यमपुरुषेभ्यो नमः। पश्चिमायां वरुणाय नमः। वरुणपुरुषेभ्यो नमः। उत्तरस्यां सोमाय नमः। सोमपुरुषेभ्यो नमः। ननु मनौ।३।८७। "इन्द्रान्तकाप्यनीन्दुभ्यः सानुगेभ्यो बलिं हरेत्।" इत्युक्तेः अन्तकाय नमः। अन्तकपुरुषेभ्यो नमः इत्यादिप्रयोगः साधुः स्यात्। अत उच्यते यद्यपि ग्रन्थावगम्यत्वाद्देवतात्वस्यान्तकाप्यनीन्दुग्रन्थैरेवोद्देशो युक्तस्तथापि बह्वृचगुह्यानसंवादादाद्यृचस्थे च यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यो सोमाय सोमपुरुषेभ्य इति प्रतिदिग्मिति पाठात् यथोक्त एव प्रयोगः। मरुद्भ्यो नमः इति द्वारे बलिं दद्यात्। जले अद्भ्यो नमः। सुषलोलूखले वनस्पतिभ्यो नमः। वास्तुपुरुषस्य शिरःप्रदेशे उत्तरपूर्वस्यां दिशि श्रिये नमः इति बलिं दद्यात्। वास्तुपुरुषस्य पादप्रदेशे दक्षिणपश्चिमायां दिशि भद्रकाल्यै नमः। इत्यनेन दद्यात्। केचित्तु गृहस्थग्रथनस्य शिरःस्थान-भूप्रदेशे श्रिये नमः। चरणभूप्रदेशे भद्रकाल्यै नमः इत्याहुः। ततो गृहमध्ये ब्रह्मणे पतये नमः वास्तोः पतये नमः इत्यनेन बलिं हरेत्। गृहाकाशे विश्वेभ्यो देवेभ्यो नमः। दिवाचरेभ्यो भूतेभ्यो नमः। दिवानक्तचारिभ्यो 'भूतेभ्यो नमः इत्यनेन दद्यात्। गृहस्योपरिस्थितगृहे सर्वात्मभूतये नमः इत्यनेन बलिं दद्यात्। केचित् बलिदातुः पृष्ठदेशस्यभूभागे सर्वात्मभूतये नम इत्यनेन दद्यादित्याहुः। ततो बलिदाता प्राचीनावीतिना दक्षिणासुखेन च सता उक्तबलिदानावशिष्टं सर्वमन्नं दक्षिणस्यां दिशि पितृभ्यः स्वधा इत्यनेन देयम्। ततोऽन्नदत्तं पात्रे समुद्धृत्य यथा रजसा न संसृज्यते तथा भुवि गृहके: अपतितचाण्डालपापरोगिवायसकृमिप्रभृतिभ्यो दद्यात्। एवं नित्यं कुर्वन् परं स्थानमश्नुतीति॥ * ॥) यथा,—

"ये चैवन्ति सदा विष्णुं निश्चलेनान्तरात्मना।
न ते भूयोऽभिजायन्ते श्वेतद्वीपनिवासिनः॥
एवं पुण्य विधानेन अतिथिं भोजयेत्ततः।
सायं प्रातर्यदन्नं स्याद्धुत्वाग्निं तेन तद्बलिम्॥"

इति वह्निपुराणम्॥*॥

"ततोऽन्नैस्तर्पणं कुर्याद्दद्याच्च बलिमित्यथ।
ब्रह्मणे गृहमध्ये तु विश्वेदेवेभ्य एव च॥
धन्वन्तरिं समुद्दिश्य प्रागुदीच्यां बलिं क्षिपेत्।
प्राच्यां शक्राय याम्यायां यमाय बलिमाहरेत्॥
प्रतीच्यां वरुणायैव सोमायोत्तरतो बलिम्।
दद्याद्वास्तुं विधात्रे च बलिं द्वारे गृहस्य च॥
अर्यम्णे च बलिं दद्यात् गृहेभ्यश्च समन्ततः।
नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत्॥
पितॄणां निर्वपेत्पिण्डं दक्षिणाभिमुखः स्थितः।
गृहस्यस्तत्परो भूत्वा सुसमाहितमानसः॥
ततस्तोयमुपादाय तिलैर्दत्त्वमनाय वै।
स्थानेषु निक्षिपेत् प्राज्ञस्तास्ता उद्दिश्य देवताः॥
एवं गृहबलिं कृत्वा गृहे गृहपतिः शुचिः।
आप्यायनाय भूतानां कुर्यादुत्सर्गमादरात्॥
स्वभ्यश्च स्वपतेभ्यश्च वयोभ्यश्चापेङ्गुवि।
वैश्वदेवं हि नामैतत् सायं प्रातरुदाहृतम्॥"

इति मार्कण्डेयपुराणम्॥*॥

अथ बलिः। वैश्वदेवपश्चाद्भूमौ जलं क्षिप्त्वा तच्छेषान्नेन साङ्गुष्ठेन दैवतीर्थेन ॐ विश्वेभ्यो देवेभ्यो नमः इति बलिं दद्यात् तदुपरि जलमनेन मन्त्रेण दद्यात् एवं सर्वत्र जलप्रक्षेपः। तदुत्तरे ॐ सर्वेभ्यो देवेभ्यो नमः। उभयोर्द्वारयोः प्राचीनावीती प्रालितवामजानुर्दक्षिणाभासुखो दक्षिणाग्रकुशत्रयोपरि सतिलमन्नं सव्यकुशत्रयेण पिण्डतीर्थेन ॐ पितृभ्यः स्वधा। ततः सर्वेषां बलीनासुपरि सर्वत्र प्रत्येकं जलनिषेकः। तत उपवीती देवतीर्थेन बलिपात्रप्रक्षालनोदकेनान्नेन ऐशान्यां ॐ यक्ष्मणेतत्ते नमस्तेऽस्तु मा माहिंसीः ॐ यक्ष्मणे नमः इत्यनेन दद्यात् जलञ्च देयम्॥ इत्यावश्यकबलिः॥*॥

अथ काम्यबलिः। बलीनां पश्चिमे जलेनोत्तरायां रेखां कृत्वा भूमौ जलं दत्त्वा,—

"ॐ देवा मनुष्याः पशवो वयांसि
सिद्धाः सयक्षोरगदैत्यसंघाः।
प्रेताः पिशाचास्तरवः समस्ता
ये चान्नमिच्छन्ति मया प्रदत्तम्॥
पिपीलिकाः कीटपतङ्गकाद्या
बुभुक्षिताः कर्मनिबन्धदेहाः।
प्रयान्तु ते तृप्तिमिदं मयान्नं
तेभ्यो विसृष्टं सुखिनो भवन्तु॥
येषां न माता न पिता न बन्धु-
र्नैवान्नसिद्धिर्न तथान्नमस्ति।
तत्तृप्तयेऽन्नं भुवि दत्तमेतत्
प्रयान्तु तृप्तिं सुदिता भवन्तु॥
ॐ भूतानि सर्वाणि तथान्नमेत-
दहञ्च विष्णुर्न यतोऽन्यदस्ति।
तस्मादहं भूतनिकायभूत-
मन्नं प्रयच्छामि भवाय तेषाम्॥
चतुर्दशो भूतगणो य एष
तृप्त्यै क्षुधा येऽखिलभूतसंघाः।
तृप्त्यर्थमन्नं हि मया विसृष्टं
तेषामिदन्तेऽस्तु सुदिता भवन्तु॥"

इत्यन्नं बलिं दद्यात्।

"ॐ ऐन्द्रवारुणवायव्या सौम्या वै नैर्ऋतास्तथा।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम्॥"

ॐ वायसेभ्यो नम इति पुनर्जलं देयम्। भूमौ जलं दत्त्वा,—

"ॐ श्वानौ द्वौ श्यावशबलौ वैवस्वतकुलोद्भवौ।
ताभ्यां पिण्डं प्रयच्छामि स्यातामेतावहिंसकौ॥"

ॐ श्वभ्यां नमः; ततः पुनर्जलं देयम्। भूमौ जलं दत्त्वा ॐ चण्डालपतितपापरोगिभ्यो नमः पुनर्जलं देयम्। भूमौ जलं दत्त्वा ॐ धर्मराजचित्रगुप्ताभ्यां नमः; ततः पुनर्जलदानम्। ततो जलं स्पृष्ट्वा अग्निं विसृज्य नमस्कृत्य संप्राप्य जले क्रियमाणे बलीनग्नौ जले वा क्षिपेत् पिण्डवत्। अन्नाभावे केवलजलेन पात्रान्तरस्थजले कुर्यात्। ततः कुशकुसुमसहितं जलपूर्णं ताम्रादिपात्रं हस्ते निधाय महावामदेव ऋषिर्विराड्गायत्री छन्द इन्द्रो देवता शान्तिकर्मणि जपे विनियोगः। ॐ कयानश्चित्र आभुवदूती सदा वृधः सखा कया शचिष्ठया वृता। ॐ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढ़ाचिदारुजे वसु। ॐ अभीषुणः सखीनामविता जरितॄणां शतमभवास्यूतये। इति वामदेवं गीत्वा गायत्र्यौ द्वे: पठित्वा ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु। ॐ स्वस्तीति द्वे: पठेत्। पार्वणश्राद्धादिकरणे पार्वणादिकं कृत्वैव वैश्वदेवादिकं कार्यं रात्रावपि पाकसत्त्वे यत्किञ्चिद्दग्धसत्त्वे वा वैश्वदेववलिकर्मणी कुर्यात्। शूद्रस्तु ब्राह्मणाभावे मन्त्रार्थं भावयन् नमो नम इति मन्त्रेण कुर्यात्। अधिभक्तानामेककरणादेव सर्वेषां सिद्धिः। इत्याह्निकाचारप्रयोगतत्त्वम्॥ * ॥ नवग्रहबलिर्यथा,—

"गुडौदनं रवेर्दद्यात् सोमाय घृतपायसम्।
यावकं मङ्गलायैव शालीन्नं सोमसूनवे॥
दध्योदनञ्च जीवाय शुक्राय तु घृतौदनम्।
शनैश्चराय कृशरमाजमांसञ्च राहवे॥
चित्रौदनञ्च केतुभ्यः सर्वभक्ष्यैः समर्चयेत्॥"

सर्वभक्ष्येषु तत्तद्द्रव्याभावे यथालाभोपपन्नैर्भक्ष्यैः। इति यहयज्ञतत्त्वम्॥ * ॥

दैत्यभेदः। इति मेदिनी। (अयं सावर्णस्य मनोरन्तरे इन्द्र आसीत्। यथा, मार्कण्डेये।८०।१०।
"तेषामिन्द्रो भविष्यस्तु बलिर्वैरोचनिर्मुने!॥")
स च दैत्यो विरोचनपुत्रः। तस्य अग्नायां पत्न्यां बाणज्येष्ठं पुत्रशतं जातम्। इति श्रीभागवतम्॥ यथा,—

"विरोचनस्य पुत्रस्तु बलिरेकः प्रतापवान्।
बलेः पुत्रशतं जज्ञे राजानः सर्व एव ते॥
तेषां प्रधानाश्चत्वारो विक्रान्ता; समहाबलाः।
सहस्रबाहुर्ज्येष्ठश्च कन्ये द्वे च बलेः सुते॥
बलेः पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः।
बाणो नाम विख्यातो गवो विक्रान्तपौरुषः॥"

इत्यग्निपुराणम्॥

तस्य पूर्वजन्मवृत्तान्तो यथा,—

शुक्र उवाच।

"धर्मध्वजो नाम बभूव राजा
विदेहदेशे निजधर्मशीलः।
यज्वा सुवाग्मी शुभकर्मकर्त्ता
स विष्णुभक्तोऽनुदिनं महात्मा॥
तस्य त्वमासीर्नृपते सुभक्तो
देहा द्विजानां पिशुनोऽविवेकी।
देहा गुरूणां सततं त्वदाता
नो साध्वसं ते वत पारलौक्यम्॥

एवंविधस्त्वं नृपसत्तमेन
प्रोक्तः कुरुष्वाघविनाशनाय ।
स्नानं हरेर्येन सुखं हि लभ्यो
लोके परे गयशतेन वापि ॥
श्रुत्वा भवांस्तदचनसत्कार
स्नानं ज्ञनेनापि जनार्दनस्य ।
दानं तथा गोः कृतवान् विधिज्ञो
तस्मात् फलं विद्धि तवाप्रमेयम् ॥
एवं त्वया प्राप्तमशेषराज्यं
देवासुराणामहितं विपक्षैः ।
संलभ्यसे त्वं पुनरेव सर्वं
संपूजयन् भक्तियुतः सुरेशम् ॥"
इत्यग्निपुराणम् ॥

वलिराजयज्ञे वामनदेवभिक्षा । यथा,—
लोमहर्षण उवाच ।
"सपत्नैर्वचनामुर्व्वीं हृत्वा संक्षुभितां वलिः ।
पप्रच्छोशनसं शुक्रं प्रणिपत्य कृताञ्जलिः ॥
आचार्य्य क्षोभमायाति साब्धिभूभृद्वना मही ।
कस्माच्च नासुरान् भागान् प्रतियुङ्क्ष्व वदस्व मे ॥
इति पृष्टोऽथ वलिना काव्यो वेदविदांवरः ।
उवाच दैत्याधिपतिं चिरं ध्यात्वा महामतिः ॥
अवतीर्णो जगद्योनिः कश्यपस्य गृहे हरिः ।
वामनेनेह रूपेण परमात्मा सनातनः ॥
स नूनं यज्ञमायाति तव दानवपुङ्गव ! ।
तस्य पादप्रविक्षेपादियं प्रचलिता मही ॥
इयमस्य जगद्धातुर्माया कृष्णस्य सात्वती ।
तत्सन्निधानादसुरा भागार्हा नासुरोत्तम ! ॥
भुञ्जते नासुरान् भागानपि तेन त्रयोऽप्ययः ।
शुक्रस्य वचनं श्रुत्वा हृष्टलोमाब्रवीद्वलिः ॥
धन्योऽहं कृतपुण्यश्च यतो जगत्पतिः स्वयम् ।
यज्ञमभ्यागतो ब्रह्मन् ! मत्तः कोऽन्योऽधिकः
पुमान् ।
यं योगिनः सदोद्युक्ताः परमात्मानमव्ययम् ॥
द्रष्टुमिच्छन्ति देवोऽसौ ममाध्वरमुपेष्यति ।
यन्मयाचार्य्य ! कर्त्तव्यं तन्ममादेष्टुमर्हसि ॥
शुक्र उवाच ।
त्वयास्य दैत्याधिपते ! स्वल्पकेऽपि हि वस्तुनि ।
प्रतिज्ञा नैव वोढ्व्या वाच्यं साम तथा फलम् ॥
वलिरुवाच ।
ब्रह्मन् ! कथमहं ब्रूयामन्येनापि हि याचितः ।
नास्तीति किमु देवेशे संसाराम्बौघहारिणि ॥
लोमहर्षण उवाच ।
इत्येवं वदतस्तस्य सम्यग्रः स जनार्दनः ।
सर्व्वदेवमयोऽचिन्त्यो मायावामनरूपधृक् ॥
तं दृष्ट्वा यज्ञवाटन्तु प्रविशन्तमसुराः प्रभुम् ।
जग्मुः प्रभावात्क्षोभन्ते तेजसा तस्य निष्प्रभाः ॥
स चार्घ्यमादाय वलिः प्रोद्भूतपुलकस्तदा ।
पूजयामास गोविन्दं प्राह चेदं महासुरः ॥
वलिरुवाच ।
सुवर्णरत्नसंघातान् गजाश्वमहिषीस्त्रियः ।
स्त्रियो वस्त्राण्यलङ्कारान् गावः कृष्णाश्च पुष्कलम् ।
तद्दामि तृणुष्वेदं ममार्थो सततं प्रियः ॥
इत्युक्तो दैत्यपतिना प्रीतिगर्भान्वितं वचः ।
प्राह सस्मितगम्भीरं भगवान् वामनाकृतिः ॥
ममास्मिन्नरणार्थाय देहि भूमिं पदत्रयम् ।
सुवर्णमामरत्नादि तदर्थिभ्यः प्रदीयताम् ॥
एतच्छ्रुत्वा तु गदितं वामनस्य महात्मनः ।
ददौ तस्मै महाबाहुर्वामनाय पदत्रयम् ॥
पाणौ तु पतिते तोये वामनोऽभूद्वामनः ।
सर्व्वदेवमयं रूपं दर्शयामास तत्क्षणात् ॥
जित्वा लोकत्रयं कृत्स्नं हत्वा चासुरपुङ्गवान् ।
पुरन्दराय त्रैलोक्यं ददौ विष्णुरुरुक्रमः ॥
सुतलं नाम पातालमधस्ताद्दसुधातलम् ।
वलेर्दत्तं भगवता विष्णुना प्रभविष्णुना ॥
अथ दैत्येश्वरं प्राह विष्णुः सर्व्वेश्वरेश्वरः ।
यत्त्वया सलिलं दत्तं गृहीतं पाणिना मया ॥
कल्पप्रमाणं तस्मात्ते भविष्यत्यायुरुत्तमम् ।
वैवस्वते तथातीते वले ! मन्वन्तरे तथा ।
सावर्णिके तु संप्राप्ते भवानिन्द्रो भविष्यति ।
इदानीं भुवनं दत्तं सर्व्वं शक्राय सर्व्वदा ॥
यदा सुरेण विप्रेण विरोधं त्वं करिष्यसि ।
बन्धिष्यति तदा पाशो वारुणो घोरदर्शनः ॥
वलिरुवाच ।
तत्रासनो मे पाताले भगवन् ! भवदाज्ञया ।
किं भावष्यत्युपादानमुपभोगोपयोगकम् ॥
श्रीभगवानुवाच ।
दानान्यविधिदत्तानि श्राद्धान्यश्रोत्रियाणि च ।
कृतान्यश्रद्धया यानि तानि दास्यन्ति ते फलम् ॥
अदक्षिणास्तथा यज्ञाः क्रियाश्चाविधिना कृताः ।
फलानि तव दास्यन्ति ह्यधीतान्यव्रतानि च ॥
उदकेन विना पूजा विना दर्भैश्च या क्रिया ।
आज्येन च विना होमं फलदास्ते च ते वले ! ॥"
इति वामनपुराणे ३१ अध्यायः ॥*॥

ययातिर्यज्ञोद्भवसुतपोराजपुत्रः । यथा, विष्णु पुराणे । ४ । १८ । २ । "तितिक्षोरपि रुचद्रथः पुत्रोऽभूत् तस्यापि हेमः हेमस्य सुतपाः सुतपसश्च वलिः ॥" (तथा च भागवते । ९ । २३ । ४ ।
"ततो होमोऽथ सुतपा वलिः सुतपसोऽभवत् ॥"
सुनिविष्टेयः । यथा, महाभारते ।२।४।२०।
"अर्व्वावसुः सुमित्रश्च मैत्रेयः सुनको वलिः ॥")
देवतोद्देशेन घातार्थोपकल्पितच्छागादिः । यथा, भविष्ये ।
"अजानां महिषाणाञ्च मेषाणाञ्च तथा वधात् ।
प्रीणयेद्विधिवत् दुर्गां मांसशोणिततर्पणैः ॥"
इति ।
पशुघातपूर्व्वकरक्तक्षीर्यथोर्व्वलित्वम् । यथा,—
"स्थाने नियोजयेद्रक्तं शिरश्च सप्रदीपकम् ।
एवं दत्त्वा वलिं पूर्णं फलं प्राप्नोति साधकः ॥"
इति च दुर्गातत्त्वम् ॥ * ॥
तच्छेदनार्थखड्गलक्षणमाह निबन्धतन्त्रे ।
"दादशाङ्गुलिको सुष्ठा दीर्घो हात्रिंशदङ्गुलः ।
वड्डङ्गुलस्तु विस्तारः खड्गः कार्य्यो विधूपमः ॥
छेदयेत्तेन खड्गेन वलिं पूर्व्वमुखस्थितम् ।
अथवोत्तरवक्त्रञ्च स्वयं पूर्व्वाननस्तु सः ॥"*॥
सकृत्प्रहारेण वलिछेदनं तदभावे दोषमाह तत्रैव ।
"हन्यादेकप्रहारेण स्वयं वा चान्यतोऽपि वा ॥
यद्यप्येकेन घातेन वलिश्छेदो न जायते ।
तदन्यं घातयेच्च महान् कर्त्तुर्हानिः पदे पदे ॥"
तन्त्रान्तरे ।
"एकखड्गप्रहारेण पशुर्यत्र न हन्यते ।
तदा विघ्नं विजानीयात् कर्त्तुश्चैव हि तत्क्षणात् ॥"
निबन्धेऽपि ।
"यज्ञोद्देशानिर्द्देशहानिश्चार्थहानिस्ततः परम् ।
पुत्रहानिः सुते सत्त्वं तदन्त्ये निश्चयः ॥
अतः सदो महेशानि ! तस्मात्तैर्होमयेत् सुधीः ।
होमादेव भवेच्छान्तिर्महत्त्वेन न संशयः ॥"*॥
प्रकारान्तरशान्तिमाह तत्रैव ।
"हन्यादेकप्रहारेण चान्यथा दोषमावहेत् ॥
तच्छान्त्यै जपेदिदां तारादेव्याः सहस्रकम् ।
सहस्रं जुहुयान्मांसैर्दद्याद्वा स्वर्णमाषकम् ॥
रुधिरं तत्तु पात्रस्थं न तु देयं कदाचन ।
वलिमन्त्रं समादाय भगवत्यै निवेदयेत् ॥"*॥
निबन्धे ।
"यद्यप्येकेन घातेन महिषो नैव छिद्यते ।
तदन्यं महतो हानिः कर्त्तुः पुत्रादिसम्भवाम् ॥
यस्मात् प्रजायते देवि ! ततः शान्तिं समाचरेत् ॥
आनीय महिषं तत्र घातयित्वा च तत्र वै ।
साग्निभिर्लोमसहितैर्हुत्वैहैवि ! यथार्थतः ॥
तच्छान्त्यै जपेदिदां कालीं वा तारिणीं पराम् ।
अयुतं परमेशानि ! सहस्रं वापि साधकः ॥
सहस्रं विल्वपत्रेषु जुहुयात् संस्कृतानले ।
ब्राह्मणं वा गुरुं वापि वरयेद् वसुभिः प्रिये ! ॥
प्रक्षिप्तं वरवेदाग्नौ बहुमानपुरःसरः ।
ततः स्वर्णं ब्राह्मणाय तस्मै दद्यात् शुभाप्तये ॥
एवञ्चेदृग्यजमानस्य शान्तिर्भवति नित्यशः ।
कृतस्तस्यैव शङ्का स्यात् हृद्विलहृत्सरोवधि ॥*
अथवा सर्व्वतोभद्रे नवकुम्भं निधापयेत् ।
सौवर्णं राजतं वापि ताम्रं वा तैजसन्तु वा ।
मार्त्तिकं वा चरेत्तत्र वित्तशाठ्यं न चाचरेत् ॥
तत्रैव कालिकां तारां तथा महिषमर्द्दिनीम् ।
यजेद्वा त्रिपुरां देवीं समस्तरश्मिसंज्ञिताम् ॥
कुलदीपैस्तथा वस्त्रैर्धनधान्यादिभिः प्रियैः ।
पूजयेत् परमेशानीं वित्तशाठ्यविवर्ज्जितः ॥
वलिमन्यं छागलं वा तरुणञ्च सुलक्षणम् ।
घातयित्वा पुरोभागे चतुर्थां शोणितं न्यसेत् ॥
अपरं शोणितं तत्र राजते खर्परे न्यसेत् ।
अङ्गशिस्तर्पयेद्देवीं वक्ष्यमाणविधानतः ॥
एकेन वटुकादींश्च तथैकेनापि भैरवान् ।
अपरेणापि चैवेशान्नन्देन योगिनीगणम् ॥
तर्पयित्वा ततः पश्चाद्देव्यास्तर्पणमाचरेत् ।
दक्षिणान्तं ततः कृत्वा पठेन्नामसहस्रकम् ॥
यथाशक्ति महेशानि ! भूयो देवीं घटे यजेत् ।
घटचक्रे घटान्वत्यग्नीशेऽस्त्रशङ्खादिकान् ॥

ब्रह्मकूर्चेन निःक्षिप्य चषकं सफलाक्षतम् ।
पिधाय कुम्भवक्त्रेण चौमेणाच्छादयेत् पुनः ॥
नम्रा नत्वा ततः साध्यं तत्रानीय सुहृद्वृतम् ।
नदतसु पञ्चवाद्येषु मुहूर्ते शोभने सुधीः ॥
अभिषिञ्चेन्मालकार्णैर्यजमानञ्च साधकः ।
सुमङ्गलाभिर्नारीभिः क्षिप्तपुष्पाक्षताक्षितम् ॥
अर्चितानां द्विजातीनामाशीर्वादपरं सरम् ।
करेणास्य शिरः स्पृष्ट्वा प्रयुञ्जीताशिषं पुनः ॥
भद्रमस्तु शिवञ्चास्तु महामाया प्रसीदतु ।
रक्षन्तु त्वां सदा देवाः सम्पदः सन्तु सर्व्वदा ॥
अथोत्थायाभिषिक्तः सन् तोषयेद्ब्राह्मणान् धनैः ।
एवमेदृग्यजमानस्य शान्तिर्भवति नित्यदा ॥
प्रमादाद्विघ्नितस्य शान्तिकर्म्म निरूपितम् ।
सर्व्वसम्पत्करं पुंसां सर्व्वसौभाग्यसिद्धिदम् ।
भूते च दुर्निमित्तादावप्येवं शान्तिमाचरेत् ॥"
इति निबन्धतन्त्रोक्तबलिविघ्नशान्तिसंग्रहः ॥*॥
अन्यच्च ।
"एकखड्गप्रहारेण पशुर्यत्र न हन्यते ।
तदा विघ्नं विजानीयाद्यातुर्वा क्षेत्तुरेव वा ॥"
प्रायश्चित्तमाह ।
"हन्यादेकप्रहारेण अन्यथा दोषमावहेत् ।
तत्क्षान्तये जपेद्विद्यां दुर्गाबीजसहस्रकम् ।
सहस्रं जुहुयाद्धोमे प्रदद्यात् स्वर्णमाषकम् ॥"
इति तत्त्वमहार्णवे वाचस्पतिमिश्रैरुक्तम् ॥*॥
अपरञ्च कालिकापुराणे ।
"चन्द्रहासेन कर्त्रा वा छेदनं सुखमिष्यते ।
खड्गेन च्छेदयेद्यस्तु प्रोक्षितं साधकः पशुम् ।
पक्षिणं वाथ राजेन्द्र ! ब्रह्महत्यामवाप्नुयात् ॥"
मत्स्यसूक्ते ।
"छेदयेत्तीक्ष्णखड्गेन प्रहारेण सकृद्बुधः ॥"
इति दुर्गोत्सवतत्त्वम् ॥
पश्वादिबलिदानविधिर्यथा,—
"बलिदानविधानञ्च शृणुष्व मुनिसत्तम ! ।
मायातिं महिषं छागं दद्यान्मेषादिकन्तथा ॥
सहस्रवर्षं सा प्रीता दुर्गा मायातिदानतः ।
महिषेण वर्षशतं दशवर्षञ्च छागलात् ॥
वर्षमेकेन कृष्णाखैः पक्षिभिर्हरिणैस्तथा ।
दशवर्षं क्षणसारैः सहस्राब्दञ्च गण्डकैः ॥
क्षत्रियैः पिठरीमांसैः षण्मासं पशुभिस्तथा ।
मासं सुधाखादिफलैरक्षतैरिति नारद ! ॥
युवकं व्याधिहीनञ्च सद्वर्णं लक्षणान्वितम् ।
विशुद्धमविकाराङ्गं सुवर्णं पुरुषेव च ॥
शिशुना बलिना दातुर्हन्ति पुत्रञ्च चक्षिका ।
वृद्धेनैव गुरुजनं क्षीणेन बान्धवन्तथा ॥
कुलञ्चैवाधिकाङ्गेन हीनाङ्गेन प्रजान्तथा ।
कामिनीं रुग्णभङ्गेन काणेन भ्रातरन्तथा ।
घण्टिकेन भवेन्नृत्युर्विघ्नञ्च चिपमस्तके ।
स्रुतं मित्रं ताम्रपृष्ठे भस्मी पुच्छहीनके ।
मायातीनाञ्च निर्णीतं शृणुष्व मुनिसत्तम ! ।
वक्ष्याम्यथर्ववेदोक्तं फलहानिर्यतिक्रमे ॥"*॥

अथ नरबलिः ।
"पितृमातृविहीनञ्च युवकं व्याधिवर्जितम् ।
विवाहितं दीक्षितञ्च परदारविहीनकम् ॥
अजारिकं विशुद्धञ्च सक्थ्नूरुं मूलकं वरम् ।
तदन्वेषी धनं दत्त्वा क्रीतं मूल्यातिरेकतः ॥
स्नापयित्वा च तं धर्म्मी संपूज्य वस्त्रचन्दनैः ।
माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥
तञ्च वर्षं भ्रामयित्वा चरद्वारेण यत्नतः ।
वर्षान्ते च समुत्सृज्य दुर्गायै तं निवेदयेत् ॥
अष्टमीनवमीसन्धौ दद्याच्छायातिमेव च ।
इत्येवं कथितं सर्व्वं बलिदानप्रसङ्गतः ॥"*॥
अपि च ।
"सप्तम्यां पूजनं कृत्वा बलिं दद्याद्विचक्षणः ।
अष्टम्यां पूजनं प्रोक्तं बलिदानविवर्जितम् ॥
अष्टम्यां बलिदानेन विपत्तिर्जायते ध्रुवम् ।
दद्याद्विचक्षणो भक्त्या नवम्यां विधिवद्बलिम् ॥
बलिदानेन विप्रेन्द्र ! दुर्गाप्रीतिर्भवेन्नृणाम् ।
हिंसाजन्यञ्च पापञ्च लभते नात्र संशयः ॥
उत्सर्गकर्त्ता दाता च क्षेत्ता पोष्टा च रक्षकः ।
अग्रपश्चान्निरोद्धा च सप्तैते वधभागिनः ॥
योऽयं हन्ति स तं हन्ति चेति वेदोक्तमेव च ।
कुर्व्वन्ति वैणवीं पूजां वैणवास्त्रेण हेतुना ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४१-४२ अध्यायौ ॥

श्रीभगवानुवाच ।
"क्रमन्तु बलिदानस्य स्वरूपं रुधिरादिभिः ।
यथा स्यात् प्रीतये सम्यक् तथा वक्ष्यामि पुत्रकौ ॥
वैणवीतन्त्रकथितः क्रमः सर्व्वत्र सर्व्वदा ।
साधकैर्बलिदानेषु ग्राह्यः सर्व्वसुरस्य तु ॥
पक्षिणः कच्छपा ग्राह्या मत्स्या नवविधा रुरवः ।
महिषो गोधिका गावश्छागो वभ्रुश्च शूकरः ॥
खड्गश्च क्षणसारश्च गोधिका सरभो हरिः ।
गृध्रो दूर्लश्च नरश्चैव खगाश्च रुधिरन्तथा ॥
चक्षिकाभैरवादीनां बलयः परिकीर्त्तिताः ॥
बलिभिः साध्यते मुक्तिं बलिभिः साध्यते दिवम् ।
बलिदानेन सततं जयेत् शत्रून् नृपान् नृपः ॥*॥
मत्स्यानां कच्छपानाञ्च रुधिरैः सततं शिवा ।
मांसैकत्वन्नियमायाति गृध्रैर्मांसास्तु शौनच ॥
रुरुणां शोणितैर्देवी नराणामपि शोणितैः ।
अष्टौ मासानवाप्नोति क्षत्रिं कक्षायदा च सा ॥
गोगोधिकाया रुधिरैर्व्वार्षिकीं क्षत्रिमाप्नुयात् ॥
क्षणसारस्य रुधिरैः शूकरस्य च शोणितैः ।
आप्नोति सततं देवी क्षत्रिं द्वादशवार्षिकीम् ॥
अजाविकानां रुधिरैः पञ्चविंशतिवार्षिकीम् ।
महिषाणाञ्च खड्गानां रुधिरैः शतवार्षिकीम् ।
क्षत्रिमाप्नोति परमां गृध्रोलरुधिरैस्तथा ॥
सिंहस्य सरभस्याथ खगास्य च शोणितैः ।
देवी क्षत्रिमवाप्नोति सहस्रं परिवत्सरान् ॥
मांसैरपि तथा प्रीती रुधिरैर्यस्य यावती ।
क्षणसारस्ततो खड्गं तथा मत्स्यञ्च रोहितम् ।
वार्ध्रीनसयुगञ्चापि पक्षं तेषां पृथक् शृणु ॥*॥
क्षणसारस्य मांसेन तथा खड्गेन चक्षिका ।
वर्षान् पञ्चशतान्येव क्षत्रिमाप्नोति केवलाम् ॥
रोहितस्य तु मत्स्यस्य मांसैर्वार्ध्रीनसस्य च ।
क्षत्रिमाप्नोति वर्षाणां शतानि त्रीणि मत्प्रिया ॥
चिःपिबत्तिन्द्रियत्रीवः श्वेतो दृङ्खञ्जपोतिः ।
वार्ध्रीनसः प्रोच्यतेऽसौ हंसे कङ्के च सत्तमः ॥
नीलग्रीवो रक्तशीर्षः क्षत्रपादः शितच्छदः ।
वार्ध्रीनसः स्यात् पक्षीशो मम विष्णोरतिप्रियः ॥
नरेण बलिना देवी सहस्रं परिवत्सरान् ।
विधिदत्तेन चाप्नोति क्षत्रिं कर्त्तुं त्रिभिर्नरैः ॥
नारेणैवाथ मांसेन त्रिसहस्राणि वत्सरान् ।
क्षत्रिं प्राप्नोति कामाख्या भैरवी मम रूपधृक् ॥
मन्त्रपूतं शोणितन्तु पीयूषं जायते सदा ।
मस्तकञ्चापि तस्यात्ति मांसञ्चापि सदा शिवा ॥
तस्मात्तु पूजने दद्याद्बलेः शीर्षञ्च लोहितम् ।
भोज्ये होमे च मांसानि नियुञ्जीयाद्विचक्षणः ॥
पूजासु नाम मांसानि दद्याद्वै साधकः क्वचित् ।
ऋते तु लोहितं शीर्षमन्यत् तत्तु जायते ॥*॥
कुष्माण्डमिक्षुदण्डञ्च मद्यमासवमेव च ।
एते बलिसमाः प्रोक्तास्त्रयो छागसमाः सदा ॥
चन्द्रहासेन कर्त्रा वा छेदनं सुखमिष्यते ।
दात्रासिधेनुकक्षुरप्रभल्लैश्चैवाधमं परिकीर्त्तितम् ॥
एभ्योऽन्यैः शक्तिबाणाद्यैर्बलिश्छेद्यः कदापि न ।
नास्ति देवी बलिं तस्य दाता शत्रुभवाप्नुयात् ॥
खड्गेन छेदयेद्यस्तु प्रोक्षितं साधकः पशुम् ।
पक्षिणं वा ब्रह्महत्यां सोऽवाप्नोति सुदुःसहाम् ।
नामन्त्र्य खड्गन्तु बलिं नियुञ्जीत विचक्षणः ॥
खड्गस्यामन्त्रणे मन्त्रा यावन्तः कथिताः पुरा ।
महामायाबलौ ते वै योज्यास्त्रीदिता बुधैः ॥
तैः खड्गमेते मन्त्रेषु योज्याः खड्गाभिमन्त्रणे ।
पूजने शारदादीनां कामाख्याया विशेषतः ॥
हिः कालीति ततो देव्या वज्रेश्वरिपदन्तथा ।
ततोऽनु लौहदण्डाय नमः शेषे तु योजयेत् ॥
संपूज्यानेन मन्त्रेण खड्गमादाय पाणिना ।
कालरात्र्यास्तु मन्त्रेण तं खड्गमभिमन्त्रयेत् ॥
नेत्रबीजस्य मध्यन्तु विराद्यं प्रयोजयेत् ।
ततोऽनु कालीति विकटदंष्ट्रेऽनु तत्पदम् ॥
हान्तादीनां ङतीयेन स्वरेणैकादशेन च ।
योजितो नादबिन्दुभ्यां हौ तत्पश्चान्नियोजयेत् ॥
फेत्कारिणिपदं तस्मात् खादय छेदयेति च ।
सर्व्वदुष्टानिति ततो हिमारय शुलापकम् ॥
खड्गेन छिन्धि छिन्धीति ततः किल किलेति वै ।
ततश्चिकि चिकीत्येव ततः पिब पिबेति च ।
ततोऽनु रुधिरञ्चैव स्फौं स्फौं किरि किरीति च ।
कालिकायै नम इति कालरात्र्यास्तु मन्त्रकम् ॥
इत्यनेन तु मन्त्रेण करवालेऽभिमन्त्रिते ।
कालरात्रिः स्वयं तस्मिन् प्रसीदत्यरिहानये ॥*॥
बलेः पूर्व्वोदिता मन्त्रा नित्यं ग्राह्यास्तु साधकैः ।
अयं मन्त्रस्तु वज्रस्य छेदनाविहानये ॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥

ततो देवतमुद्दिश्य कामसुद्दिश्य चात्मनः ।
छिद्रयेतेन खड्गेन बलिं पूर्व्वानतं तु तम् ॥
अथवोत्तरवक्त्रं स्वयं पूर्व्वमुखस्तथा ।
पूर्व्वोक्तान् सैन्यवादींस्तु रक्ते वस्त्रं नियोजयेत् ॥
मौक्तिकं राजतं ताम्रं रैत्यं पत्रपुटेऽथ वा ।
माहेयं कांस्यमथवा यज्ञकाष्ठमयेऽथ वा ।
पात्रं रुधिरदानाय कर्त्तव्यं विभवावधि ॥
न लौहे वास्फले वापि रैत्ये वाङ्गेय सैसके ।
दद्यात्रक्तं बलीनान्तु भूमौ सृष्टि सुवेऽथवा ॥
न घटे भूतले नापि न क्षुद्रे पात्रभाजने ।
रुधिरादि प्रदद्यात्तु भूतिकामो नरोत्तमः ॥
नरस्य तु सदा रक्तं माहेये तेजसेऽथवा ।
दद्यान्नरपतिस्तत्तु न पुटादौ कदाचन ॥*॥
हयमेधस्तदे दद्यान्न कदाचिद्धयं बलिम् ।
तथा दिक्पालमेधेषु गजं दद्यान्नराधिपः ॥
न कदाचित्तथा देवे प्रदद्याद्धयहस्तिनौ ।
हयार्के चामरन्तु बलिं दद्यान्नराधिपः ॥
सिंहं व्याघ्रं नरञ्चापि स्वगात्ररुधिरन्तथा ।
न दद्याद्ब्राह्मणो मद्यं तथा देवे कदाचन ॥
सिंहव्याघ्रनरान्दत्त्वा ब्राह्मणो नरकं व्रजेत् ।
इहापि स्यात् स हीनायुः सुखसौभाग्यवर्जितः ॥
स्वगात्ररुधिरं दत्त्वा चात्महत्यामवाप्नुयात् ।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ॥
न क्षणसारं वितरेद्विलिङ्गं क्षत्रियः क्वचित् ।
ददनः क्षणसारन्तु ब्रह्महत्या भवेद्ध्रुवम् ॥
यत्र सिंहस्य व्याघ्रस्य नरस्य विहितो वधः ।
ब्राह्मणोक्तौ तु वल्यादौ तत्रायं विहितः क्रमः ॥
कृत्वा घृतमयं व्याघ्रं नरं सिंहञ्च भैरव ! ।
अथवा पूपविकृतं यवचोदलजेऽथ वा ।
घातयेच्चन्द्रहासेन तेन मन्त्रेण संस्कृतम् ॥*॥
प्रभूतबलिदाने तु द्वौ वा त्रीन् वायतः क्षतान् ।
पूजयेत् प्रसुखान् कृत्वा सर्व्वान् तन्त्रेण साधकः ।
सामान्यपूजा कथिता बलीनां पूर्व्वतो मया ।
विशेषो यत्र यत्रास्ति तत्रतः शृणु भैरव ! ॥*॥
महिषं प्रदद्यौ देवे भैरवे भैरवाय वा ।
अनेनैव तु मन्त्रेण तथा तं पूजयेद्बलिम् ।
यथा वाहं भवान् देहि यथा वहसि चण्डिकाम् ।
तथा मम रिपून् हिंस शुभं वह बलापक ! ॥
यमस्य वाहनत्वन्तु वरूपधरायच ! ।
आयुर्वित्तं यशो देहि कालराय नमोऽस्तु ते ॥
खड्गस्य तु यदादानं क्रियते तत्र मन्त्रकम् ।
जलेनाभ्युक्ष्य कुर्व्वीत गुह्याजातेति भाषयन् ॥
देवे पित्रे च सुभगः खड्गस्त्वं खड्गसन्निभः ।
छिन्धि विघ्नान् महाभाग ! गुह्याजात नमोऽस्तु ते ॥
प्रदाने क्षणसारस्य मन्त्रोऽयं परिकीर्त्तितः ।
क्षणसार ! ब्रह्मसूर्त्ते ब्रह्मतेजोविवर्द्धन ।
चतुर्व्वेदमयः प्राज्ञः प्रज्ञां देहि यशो मम ॥*॥
तथा सरभपूजायां मन्त्रमेतत् प्रकीर्त्तितम् ।
त्वमष्टपादो विभ्रंशचन्द्रभागससुद्भव ! ।
अरसूर्त्ते महाभाग भैरवाख्य नमोस्तु ते ॥
यथा भैरवरूपेण वराहो निहतस्त्वया ।
तथा सरभरूपेण रिपुं विघ्नान्निसूदय ॥
हरिस्त्वं हररूपेण यथा वहसि चण्डिकाम् ।
तथाऽभानि मे नित्यं बहुविघ्नांश्च सूदय ॥
त्वं हरिः सिंहरूपेण जगत्त्रयहरूपिणम् ।
जघान येन सत्वेन हिरण्यकशिपुं हरन् ।
दत्तेवं सिंहपूजायां क्रम उक्तो मयाघव ! ॥*॥
नरे स्वगात्ररुधिरे पर्य्याये शृणु भैरव ! ।
पीठे चैद्दीयते मर्त्ये बलिं दद्यात् श्मशानजे ॥
श्मशानं भैरवाख्यञ्च तत्पूर्व्वं प्रतिपादितम् ।
कामाख्यानिलये शैले तन्त्रादौ विद्धि तत्क्रमम् ॥
मम रूपं श्मशानन्तु भैरवाख्यन्तु कथ्यते ।
तत्राङ्गत्वं तपःसिद्धौ त्रिभागन्तु भविष्यति ॥
पूर्व्वांशे भैरवाख्ये तु समुत्तरदिगंशके ।
दक्षिणांशे गिरौ दद्यात् भैरवा सुरबालया ॥
रुधिरं पश्चिमांशे तु हैरुकाख्ये नियोजयेत् ।
दत्त्वा संपूज्य च नरं विसृज्यागमनक्रमे ॥
पीठश्मशानेषु बलिं नेच्छेत्तु बलिदापकम् ।
अन्यत्रापि यतो यत्र दीयतेऽयं महाबलिः ॥
तत्रात्यन्तञ्च चोत्सृज्य छित्त्वान्यत्र शिरोऽन्तम् ।
निवेदयेत् साधकस्तु विसृज्य न विलोकयेत् ॥*॥
सुस्नातं मनुजं दोषं पूर्व्वाह्णे नियतात्मनम् ।
मांसमैथुनभोग्येन हीनं सक्तचन्दनोक्षितम् ॥
क्षतोत्तरासुखं तन्तु तदङ्गेषु च देवताः ।
पूजयेत्तच्च नाम्ना तु देवतेन च मानुषम् ॥
ब्रह्मरन्ध्रेषु ब्रह्माणं नासायाञ्च मेदिनीम् ।
कर्णयोस्तु तथाकाशं जिह्वायां सर्व्वतोमुखम् ॥
घ्राणेन्द्रियं नेत्रयोर्विष्णुं वदने परिपूजयेत् ।
ललाटे पूजयेच्चन्द्रं शक्रं दक्षिणकर्णतः ॥
वामकर्णे तथा वह्निं ग्रीवायां समवर्त्तिनम् ।
कैलासे विघ्नकर्त्तारं मर्त्ये भ्रुवोश्चापि प्रचेतसम् ॥
नासामूले च श्वसनं स्कन्धे चापि धनेश्वरम् ।
हृदये सर्व्वराजन्तु पूजयित्वा पठेदिदम् ॥
नरवर्य्य ! महाभाग सर्व्वदेवमयोत्तम ।
रक्ष मां शरणापन्नं सपुत्रबसुबान्धवम् ॥
सराज्यं मां सहापत्यं चतुरङ्गसमन्वितम् ।
रक्षन् परित्यज प्राणान् मरणे नियते सति ॥
महातपोभिर्दानैश्च यज्ञैर्यन्त साध्यते नृणाम् ।
तत्ते ददेहि महाभाग ! त्वत्तोऽपि प्राप्नुहि श्रियम् ॥
राक्षसाश्च पिशाचाश्च वेतालाद्याः सरीसृपाः ।
नृपाश्च रिपवश्चान्ये न मां ते घ्नन्तु त्वत्स्थले ॥
त्वत्कण्ठनालगलितैः शोणितैरङ्गसंयुतैः ।
आप्यायस्वात्मवन्नत्वा मरणे नियते सति ॥
एवं संपूज्य विधिवत् पूर्व्वतन्त्रेण पूजयेत् ।
पूजितो मनुरूपोऽयं दिक्पालाधिष्ठितो भवेत् ॥
अधिष्ठितस्तथान्यैश्च ब्रह्माद्यैः सकलैः सुरैः ।
क्षतपापोऽपि मनुजो निष्पापात्मा स तु जायते ॥
तस्य निष्कलुषस्यापु पीयूषं श्रोत्रितं भवेत् ।
प्रीणाति च महादेवी जगन्माया जगन्मयी ॥
सोऽपि कायं परित्यज्य मानुषं न चिराच्छृतः ।
भवेद्गणाधिपो मयापि बहुसत्कृतः ॥
इतोऽन्यथा प्रापयुतं मलमूत्रवसायुतम् ।
तं बलिं नहि गृह्णाति कामाख्यान्यापि नामतः ॥
अन्येषां महिषादीनां बलीनामथ पूजनात् ।
कायो मेध्यत्वमायाति रक्तं गृह्णाति वै शिवा ॥
अन्येभ्योऽपि च देवेभ्यो यदा यदुपनीयते ।
तदर्चितं प्रदद्यात्तु पूजिताय सुराय वै ॥*॥
कार्यं यज्ञच्छागतिष्ठं रोगिणश्च गलव्रणम् ।
स्त्रीवं हीनाङ्गमथवा वृद्धलिङ्गं गलद्व्रणम् ॥
श्वित्रिणञ्चातिवृद्धञ्च महापातकिनन्तथा ।
अष्टादशक्रवर्षोयं शिशुं क्षतकसंयुतम् ॥
ऊर्द्धं संवत्सराच्चापि महागुरुनिपातिनम् ।
बलिकर्म्मणि चैतांस्तु वर्जयेत् पूजितानपि ॥
पशूनां पक्षिणाञ्चापि नराणाञ्च विशेषतः ।
स्त्रियं न दद्यात्तु बलिं दत्त्वा नरकमाप्नुयात् ॥*॥
संघातबलिदानेषु योषितं पशुपक्षिणोः ।
बलिं दद्यान्मानुषीन्तु त्यक्त्वा संघातपूजितम् ॥
न च्छिन्नकाञ्चनं पशुं दद्यात् शिवाबलिम् ।
न च च्छिन्नकाञ्चनं प्रदद्याद्वै पतत्रिणम् ॥
कामाख्याङ्गादिदुष्टन्तु न पशुं पक्षिणन्तथा ।
देवे दद्यादृथा मर्त्ये तथैव पशुपक्षिणौ ॥
छिन्नलाङ्गूलकर्णादि भग्नदन्तन्तथैव च ।
भग्नशृङ्गादिकञ्चापि न दद्यात्तु कदाचन ॥
न ब्राह्मणं बलिं दद्यात् चाण्डालमपि पार्थिव ।
नोत्सृष्टं द्विजदेवेभ्यो भूपतेस्तनयं तथा ॥
रणे न विजितं दद्यात्तनयं रिपुभूभृतः ।
स्वपुत्रं भ्रातरं वापि पितरञ्च विरोधिनम् ॥
विट्पतिञ्च न दद्यात्तु भागिनेयञ्च मातुलम् ।
अनुक्तान्नापि दद्यात्तु तथाज्ञातान् नृगद्विजान् ॥
उक्तालाभे प्रदद्यात्तु गर्हभञ्चोष्ट्रमेव च ।
लाभेऽन्येषां न वितरेद्व्याघ्रसूर्क्षं खरन्तथा ॥
सम्पूज्य विधिवन्मर्त्ये पशुं पक्षिणमेव वा ।
संछिद्य चापि मन्त्रेण मन्त्रेणैव निवेदयेत् ॥*॥
नारं सर्वे शिरोरक्तं देवाः सम्यङ्निवेदयेत् ।
छागन्तु वामतो दद्यान्महिषं वितरेत् पुरः ॥
पक्षिणं वामतो दद्यादयतो देहशोणितम् ।
कथादानां पशूनान्तु पक्षिणाञ्च शिरोऽग्रजम् ॥
वामे निवेदयेत् पार्श्वे जलजानाञ्च सर्व्वशः ।
क्षणसारस्य कूर्म्मस्य खड्गस्य शूकरस्य च ॥
व्याहालामथ मत्स्यानामग्र एव निवेदयेत् ।
सिंहस्य दक्षिणे दद्यात् खड्गिनोऽपि च दक्षिणे ॥
एकदेशे न दद्यात्तु शिरो वा रुधिरं बुधः ।
उपन्यसे रणे वापि यथेष्टं वितरेन्नरम् ॥
यः कश्चिद्राजपुरुषो नान्यस्यापि कदाचन ।
बलिदानदिनात् पूर्व्वदिवसे तु बलिं नरम् ॥
मानस्तोकेनिमन्त्रेण देवीसूक्तत्रयेण च ।
गन्धद्वारेत्यनेनापि खड्गशूर्षे निधाय च ॥
तस्मिन् खड्गे च गन्धादि दत्त्वा तेनाधिवासयेत् ॥
गन्धादिकन्तु खड्गस्थं गले तस्य प्रदापयेत् ॥
अम्बेऽम्बिकेति मन्त्रेण रौद्रेण भैरवस्य च ।
एवन्तु संस्कृते मर्त्ये देवी रक्षति तं बलिम् ॥
न तस्य बाधयश्चापि क्षुधिता रजनौ न च ।

न खतकं दूषयेत्तं ज्ञात्वृतुपत्तिसम्भवादिकम् ॥*॥
छिन्नं नरस्य शीर्षन्तु पतितं यत्र यत्र च ।
यत् शुभचाशुभं वापि पश्वादीनाच्च तत् शृणु ॥
छिन्नं शिरस्तथेशान्यां नारं दिशच्च राक्षसे ।
पतितं राज्यहानिच्च विनाशच्च विनिर्दिशेत् ॥
पूर्व्वादियाम्यवारुण्यवायवादिगतं क्रमात् ।
श्रियं पुष्टिं भयं लाभं पुत्रलाभं धनं तथा ॥
क्रमाद्विनिर्दिशेन्नारं छिन्नशीर्षन्तु भैरव ! ।
उत्तरादिक्रमादेव महिषस्यापि मस्तकः ॥
पतितो वायुकाष्ठान्तं क्षयेदेतत् शृणुष्व तत् ॥
भोग्यं हानिस्तथैश्वर्य्यं वित्तं रिपुभयो भयम् ।
राज्यलाभं श्रियञ्चापि क्रमात्तद्विद्धि भैरव ! ॥
पशूनाञ्चैव सर्व्वेषां छागादीनामशेषतः ।
एवं फलं क्रमाद्विद्याद्बले जलभवाब्जजौ ॥
अन्यत्र तु श्रियं दद्यात् पतितं ग्रीवितं शिरः ॥
यः स्यात् कटकटाशब्दो दन्तानां छिन्नमस्तके ।
नराणां पशुपक्षादियाद्दादीनाच्च रोगदः ॥
जीवतं चक्षुषोर्जातं यदि स्रवति मस्तके ।
छिन्ने नरस्य राज्यस्य तदा हानिं विनिर्दिशेत् ॥
माहिषे मस्तके नेत्राद्यदि स्रवति जीवकम् ।
छिन्ने निवेदिते वैरिभूपस्तुं तदादिशेत् ॥
अन्येषामथ पश्वादिबलीनां शिरश्छेदितात् ।
निर्गतं जीवकं धत्ते परां भीतिं गदन्तथा ॥
हरति छिन्नशीर्षश्चेन्नारं स्यात् रिपुक्षयः ।
शीतद्विरायुषो दृष्टिः सदा दातुरसंशयः ॥
यदृच्छाक्यं निगदति तथा भवति चाचिरात् ।
हुङ्काराद्राज्यहानिः स्यात् श्लेष्मसावाच्च
पक्षताम् ॥
देवानां यदि नामानि भाषते छिन्नमस्तकः ।
विभूतिमतुलां विन्द्यात् वत्सरात्यन्तरे तदा ॥
रुधिरादानकाले तु ग्रहनक्षत्रे यदि स्रवेत् ।
कार्य्यं तदाधमर्णो वा दातुः स्याद्भरणं तथा ॥
श्वासेपाद्दामपादस्य महारोगः प्रजायते ।
अन्यत्रासेपचरणैः कल्याणमुपजायते ॥*॥
महिषस्य तु रक्तस्य मानुषस्याथ साधकः ।
अङ्गुष्ठानामिकाभ्यान्तु किञ्चिदुद्धृत्य भूतले ॥
महाकौशिकमन्त्रेण निक्षिपेद्वलिसप्तमम् ।
देवेभ्यः पूतनादिभ्यो नैर्ऋत्यां दिशि पूर्व्वतः ॥
महिषः पञ्चवर्षो यः पञ्चविंशतिवार्षिकः ।
बलिर्देयो नरो देवै तस्य रक्तन्तु भूतले ॥
नैत्यबीजत्रयं कामबीजं ह्रान्तात् प्रजापतिः ।
वह्निबीजं षट्स्वराभ्यां संपृक्तश्च तथापरः ॥
स एवेतास्यैतावदादिवर्गान्तसंयुतः ।
षट्स्वरश्मिसाबिन्दुचन्द्रयुक्तस्तथापरः ॥
हिमांशिकाबीजकान्तः कौशिकौजभिमन्त्रकम् ।
एष बलिः स्वाहेति च मन्त्रोऽयं कौशिकः स्मृतः ॥
नृपो वैरिबलिं दद्यात् खड्गमामन्त्र्य पूर्व्वतः ॥
महिषं वाथवा च्छागं वैरिनाम्नाभिमन्त्र्य च ।
खड्गेन वदनं बद्धा त्रिधा तस्य च मस्तकैः ।
छित्त्वा तस्योत्तमाङ्गन्तु देवै दद्यात् प्रयत्नतः ॥
यदा यदा रिपोर्वृद्धिर्म्बलिदानं तदापरम् ।
दद्यात्तथा शिरश्छित्त्वा रिपोस्तस्य क्षयाय च ॥

प्राणप्रतिष्ठाञ्च रिपोः कुर्य्यात्तस्मिन् पशावथ ।
तस्मिन् दीप्ते रिपुप्राणाः क्षीयन्ते विपदा युताः ॥
आदौ विश्वरूपिणी च चण्डिकेति ततः परम् ।
वैरिणस्त्वसुकेति स्वाहेत्यमेति तं पुनः ॥
वह्निभार्य्यां ततः पश्चात् खड्गमन्त्रं प्रकीर्त्तितम् ।
स्वयं स वरी यो देहि तमिमं पशुरूपिणम् ॥
विनाशय महामारि स्फें स्फें खादय खादय ॥
इत्यनेन तु मन्त्रेण बलेः शिरसि पुष्पकम् ।
दद्यात्ततस्तद्रुधिरं द्वाक्षराभ्यां निवेदयेत् ।
महानवम्यां शरदि यद्येवं दीयते बलिः ।
तदा तदाद्यभवेन्मांसैर्होमं समाचरेत् ॥
दुर्गातन्त्रेण मन्त्रेण प्रक्षोते दहने शुचौ ।
एवं दत्त्वा बलिं मर्त्यो रिपुक्षयमवाप्नुयात् ॥*॥
नाभेरधस्ताद्रुधिरं पृष्ठभागस्य च प्रिये ! ।
खगाक्षरुधिरं दद्यान्न कदाचन साधकः ॥
गोरुस्थ चिबुकस्यापि नेत्रियाद्वाच्च मानवः ।
कण्ठाधो नाभितश्चोर्द्धं वाक्षोः प्राप्नुयते तथा ॥
प्रदद्याद्रुधिरं वातं नातिकुर्य्याच्च साधकः ।
गण्डयोश्च ललाटस्य भ्रुवोर्मध्यस्य शोणितम् ॥
कर्णायस्य च वाक्षोश्च स्तनयोरुदरस्य च ।
कण्ठाधो नाभितश्चोर्द्धं हृद्भागस्य यतस्ततः ।
पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेदयेत् ॥
न गुल्फतोऽक्क् प्रदद्यात् जानोर्नापि च साधकः ।
न च रोगाविलादङ्गान्न्यूनाताच्च भैरव ! ॥
तदर्थे च हताघातात् सम्भवो शुभमानसः ।
हृतं रक्तं प्रदद्यात्तु पद्मपुष्पस्य पत्रके ॥
सौवर्णे राजते पात्रे कांस्ये पात्रे च मानवः ।
निधाय देवै दद्यात्तु तद्रक्तं चन्द्रमन्त्रकैः ॥
क्षयने छुरिकाखड्गं संकुलादि यदस्त्रकम् ।
घातेन हृदयस्थस्य महाफलमवाप्नुयात् ॥
पद्मपुष्पस्य पत्रन्तु यावद्रक्तं धृतं शोणितम् ।
ततप्रमाणचतुर्भागाधिकं रक्तन्तु साधकः ।
न कदाचित् प्रदद्यात्तु नाङ्गच्छेदमथाचरेत् ॥
यः खड्गदयसंजातं मांसं मानवमांसतः ।
तिलसुद्गप्रमाणाद्वा देवै दत्त्वा तु भक्तितः ।
वत्सरासाभ्यन्तरे तस्यात् कामसिद्धमवाप्नुयात् ॥
बाहोस्तु स्कन्धयोर्वापि यो दद्याद्दोषवर्जितम् ।
हृदये वा खेटपात्रं विना भक्ता तु साधकः ।
एकमात्रेण तद्दोषप्रदानस्य फलं शृणु ॥
भुक्त्वा च विपुलान् भोगान् देवीलोके यथेच्छया ।
कल्पक्षयन्तु संप्राप्य सार्व्वभौमो नृपो भवेत् ॥
महिषस्य शिरश्छिन्नं सप्रदीपं शिवापुरः ।
हस्ताभ्यां यः समादाय अहोरात्रञ्च तिष्ठति ॥
स चिरायुः पूतमूर्त्तिरिह भुक्त्वा मनोरमान् ।
भोगांस्तेन मदृग्रहगो गणानामधिपो भवेत् ॥
नरस्य शीर्षमादाय साधको दक्षिणे करे ।
वामे रुधिरं पात्रं गृहीत्वा गिरि चाश्नुते ॥
यावन्नाभं स्थितो मर्त्यो राजा भवति नेह यै ।
हृते मम पुरं प्राप्य गणानामधिपो भवेत् ॥
अजमात्रं बलीनां यः शिरोरक्तं करद्वये ।
गृहीत्वा चिन्तयेद्देवीं पुरस्थितो मानवः ।
स कामानिह संप्राप्य देवीलोके महीयते ॥

महामाये ! जगन्नाथे ! सर्व्वकामप्रदायिनि ! ।
ददामि देहरुधिरं प्रसीद्द वरदा भव ॥
इदुक्त्वा मूलमन्त्रेण नतिपूर्व्वं विचक्षणः ।
खगाक्षरुधिरं दद्यान्मानवः सिंहसन्निभः ॥
येनात्ममांसं सत्वेन ददामीश्वरि ! भूतये ।
निर्व्याजं तेन सत्वेन देहि हुं हुं नमो नमः ॥
इत्यनेन तु मन्त्रेण स्वमांसं वितरेद्बुधः ।
सौभाग्यं सुखसम्पन्नं प्रदीपं परमं शुचिम् ॥
दीपयन् मांसमिश्रं दीपं क्रौं क्रौं नमो नमः ।
इत्यनेन तु मन्त्रेण दीपं दद्यादिचक्षणः ॥
महानवम्यां शरदि रात्रौ स्कन्दविशाखयोः ।
यवचूर्णमयं कृत्वा रिपुं स्वरूपमेव वा ॥
शिरश्छित्त्वा बलिं दद्यात् ज्ञात्वा तस्य तु मन्त्रतः ।
अनेनैव तु मन्त्रेण खड्गमामन्त्र्य यत्नतः ॥
रक्तं किलकिली घोरघोरा धारविदिंसकः ।
ब्रह्मग्निखाग्निकाग्निरुग्रमसुकचारिसत्तमम् ।
भान्तो विसर्गसहितः स च विन्दुयुतोऽपरः ।
ब्रह्मामियोगसन्धेन विन्दुना च समन्वितः ।
शिरश्छित्त्वा बलिं दद्यात् ज्ञात्वा तस्य तु मन्त्रतः ॥
अनेनैव तु मन्त्रेण विन्दुना च समन्वितः ।
खड्गो बलिस्तु प्रोक्तः खड्गः स्कन्दविशाखयोः ॥
रक्तद्रवैः सेचयित्वा क्षत्रियं तं रिपुं बलिम् ।
कुचन्दनस्य तिलकं ललाटेऽभिनिवेशयेत् ॥
रक्तमाल्याधरं कृत्वा रक्तवस्त्रधरन्तथा ।
कण्ठे बद्धा रक्तसूत्रैर्नाभौ ग्रन्थ्यञ्च क्षत्रियम् ।
दक्षोत्तरशिरः स्कन्धं ज्ञात्वा खड्गेन छेदयेत् ॥
शिरस्तस्य ततो दद्यात् स्कन्दाय ते नमस्तुतः ।
चतुर्दीपखराधिभ्यां संयुक्तः स परः समः ॥
परतः परतः पूर्व्वे चन्द्रविन्दुसमन्वितः ।
स्कन्दस्य मूलमन्त्रोऽयं तेन तस्मै बलिं दद्येत् ॥
चतुर्दीपखराधिभ्यां पल्लवौयन्तु पूर्व्ववत् ।
प्रोक्तो विशाखमन्त्रोऽयं तेन तस्मै बलिं
दद्येत् ॥
कुटिलाग्रौ क्षणक्षिप्रवर्त्मौ रक्तांशुधारिणौ ।
त्रिशूलं करवालञ्च पाणिभ्यां दधिषे तथा ॥
विभ्रतौ शुकपाशञ्च कर्त्रीखट्वाङ्गमेव च ।
त्रिनेत्रौ नरसुक्कानां मालासुरसि बिभ्रतौ ॥
विकटौ दंष्ट्रभीमांगौ द्वौ द्वारपालकौ ।
ध्यानेन चिन्तयेदेवान् पुरतः संस्थितौ सदा ॥
वेदे माघि विते पक्षे चतुर्दश्यां विशेषतः ।
बलिभिर्महिषैश्छागैर्माष भैरवरूपिणम् ।
तोषयेन्मधुमिश्रैस्तैस्तेन तुष्टान्वहं सुतौ ।
खड्गखड्गबलिदानेन बलेः शीर्षं जलेन तु ।
अभिषिच्य तु मन्त्रेण मूलेनैव निवेदयेत् ॥
ईषत् प्राक्तन्तु बहुधा चालितं पूर्व्वमर्चितम् ।
वीक्षेत् कामस्य सिद्धिन्तु सिद्धभावश्च साधकः ॥
सितप्रेतो रथस्थोऽयं योगपीठस्य सन्निभः ।
ध्यायेदृक्षिन् महामाया सिद्धिं बोधयते यमः ॥
अनेनामन्त्रितं शीर्षं न चिराद्दृष्टि वेषते ।
तत्कार्य्यस्य तदा सिद्धिरसिद्धिस्तु विपर्य्ययात् ॥
एवं ददद्बलिं वीरो यथोक्तविधिनाहृता ।
बलिदानादेव चतुर्वर्गमाप्नोत्यसंशयम् ॥

एवं बलिप्रदानस्य क्रमो रूपन्तथैव च ।
कथितो रुधिराध्याय उपचारान् शृणुष्व मे ॥"
इति कालिकापुराणे ६६ अध्यायः ॥

बलिदाननिषेधो यथा,—
"जीवानुकम्पां विज्ञातुं ततो दुर्गां सदाशिवः ।
पप्रच्छ परमप्रीत्या गूढमेतद्वचो मुदा ॥
सर्व्वे विष्णुमया जीवास्त्वद्भक्ताश्च कथं शिवे ! ।
श्रुतं मया तवोद्देशे कुर्य्युः कामनया वधम् ।
महान् सन्देह इति मे ब्रूहि भद्रे ! सुनिश्चितम् ॥
शङ्करी तदचः श्रुत्वा शिववक्त्रविनिर्गतम् ।
भीतात्मानं हि ब्रह्मर्षे ! प्रत्युवाच सदाशिवम् ॥
श्रीपार्व्वत्युवाच ।
ये ममार्च्चनमिच्छन्ति प्राणिहिंसनतत्पराः ।
तत्पूजनं ममामेध्यं यद्दोषात्तदधोगतिः ॥
मदर्थे शिव ! कुर्व्वन्ति तामसा जीवघातनम् ।
आकल्पकोटिनिरये तेषां वासो न संशयः ॥
मम नाम्नाथवा यज्ञे पशुहत्यां करोति यः ।
क्वापि तन्निष्कृतिर्नास्ति कुम्भीपाकमवाप्नुयात् ॥
दैवे पैत्रे तथात्मार्थे यः कुर्य्यात् प्राणिहिंसनम् ।
कल्पकोटिशतं शम्भो ! रौरवे स वसेत् ध्रुवम् ॥
यो मोहान्मानसैर्देहिहत्यां कुर्य्यात् सदाशिव ! ।
एकविंशतिजन्मानि तत्तद्योनिषु जायते ॥
यज्ञे यज्ञे पशून् हत्वा कुर्य्यात् शोणितकर्द्दमम् ।
स पच्चेन्नरके तावद्यावच्छोणितमानि तस्य वै ॥
हन्ता कर्त्ता तथोत्सर्गकर्त्ता धर्त्ता तथैव च ।
तुल्या भवन्ति सर्व्वे ते ध्रुवं नरकगामिनः ॥
ममोद्देशे पशून् हत्वा सरक्तं पात्रमुत्सृजेत् ।
यो मूढः स तु पूयोदे वसेद्यदि न संशयः ॥
देवतान्तरमन्नामयाजेन खेच्छया तथा ।
हत्वा जीवांश्च यो भक्षेत् नित्यं नरकमाप्नुयात् ॥
यूपे बद्धा पशून् हत्वा यः कुर्य्याद्रक्तकर्द्दमम् ।
तेन चेत् प्राप्यते स्वर्गो नरकं केन गम्यते ॥
उपदेष्टा वधे हन्ता कर्त्ता धर्त्ता च विक्रयी ।
उत्सर्गकर्त्ता जीवानां सर्व्वेषां नरकं भवेत् ॥
मधुपर्कस्य वधायापि प्राणिनां क्रयविक्रये ।
तथा वृक्षच्छेदनायां कुम्भीपाको भवेद्ध्रुवम् ॥
स्वयं कामाशयो भूत्वा योऽन्यानेन विमोहितः ।
हन्त्यन्यान् विविधान् जीवान् कुर्य्यान्नाम शङ्कर ! ॥
तद्राज्यबन्धुसम्पत्तिज्ञातिदारादिसम्पदाम् ।
अचिराद्धे भवेन्नाशो ध्रुवः स नरकं व्रजेत् ॥
देवयज्ञे पितृश्राद्धे तथा माङ्गल्यकर्म्मणि ।
तस्यैव नरके वासो यः कुर्य्याज्जीवघातनम् ॥"
तथा ।
"मद्याजेन पशून् हत्वा यो भक्षेत् सह बन्धुभिः ।
तन्नाम्नां लोमसंख्याब्देरसिपत्रवने वसेत् ॥
आवयोरन्यदेवानां मत्वा च परकर्म्मणि ।
यः संपोष्य पशून् हन्यात् सोऽन्धतामिस्रमाप्नुयात् ॥
पशून् हत्वा तथा त्वां मां योऽर्च्चयेन्मांसशोणितैः ।
तावत्तन्नरके वासो यावच्चन्द्रदिवाकरौ ॥
निर्व्वह्निभस्मतुल्यं तत् बहुदग्धेन यत् कृतम् ।
यस्मिन् यज्ञे प्रभो शम्भो ! जीवहत्या भवेद् ध्रुवम् ॥
यज्ञमारभ्य चेत् शक्रः कुर्य्याद्वै पशुघातनम् ।
स तदाधोगतिं गच्छेदितरेषाञ्च का कथा ॥
आवयोः पूजनं मोहादृषे कुर्य्युर्मांसशोणितैः ।
पतन्ति कुम्भीपाके ते भवन्ति पशवः पुनः ॥
फलकामास्तु वेदोक्तैः पशुरालभनं मखे ।
पुनस्तत्तत् फलं भुक्त्वा ये कुर्व्वन्ति पतन्त्यधः ॥
स्वर्गकामोऽश्वमेधं यः करोति निगमाज्ञया ।
तद्भोगान्ते पतेद्भूयः स जन्मानि भवार्णवे ॥
ये हताः पशवो लोकैरिह स्वार्थेषु कोविदैः ।
ते परत्र तु तान् हन्युस्तथा खड्गेन शङ्कर ! ॥
आत्मपुत्रकलत्रादिसुसम्पत्तिकुलेच्छया ।
यो दुरात्मा पशून् हन्यादात्मादीन् घातयेत् स तु ॥
जानन्ति नो वेदपुराणतत्त्वं
ये कर्म्मेष्ठाः पण्डितमानयुक्ताः ।
लोकाधमास्ते नरके पतन्ति
कुर्व्वन्ति मूर्खाः पशुघातनञ्चेत् ॥
येऽज्ञानिनो मन्दधियोऽकृतार्था
भवे पशुं घ्नन्ति न धर्म्मग्राहम् ।
जानन्ति नाकं नरकं न मुक्तिं
गच्छन्ति घोरं नरकं नरास्ते ॥
मुह्यन्ति अकार्य्या न विदन्ति मूढा
न धर्म्ममार्गं परमार्थतत्त्वम् ।
पापं न पुण्यं पशुघातका ये
पूयोदवासो भवतीह तेषाम् ॥
जीवानुकम्पां न विदन्ति मूढा
भ्रान्ताश्च येऽसत्पथिनो न धर्म्मम् ।
स्नात्वा भवे प्राणिवधं न कुर्य्यु-
स्ते यान्ति मत्तां खलु रौरवाख्यम् ॥
ततस्तु खलु जन्तूनां घातनं नो करिष्यति ।
शुद्धात्मा धर्म्मवान् ज्ञानी प्राणान्ते नैव मानवः ॥
यदीच्छेदात्मनः क्षेमं त्यक्त्वा ज्ञानं तदा नरः ।
जीवान् कानपि नो हन्यात् सङ्कटापन्न एव चेत् ॥
सम्पत्तौ च विपत्तौ वा परलोकेच्छुकः पुमान् ।
कदाचित् प्राणिनो हत्यां न कुर्य्यात्तत्त्ववित् सुधीः ॥
मानवो यः परत्रेह तर्त्तुमिच्छेत् सदाशिव ! ।
सर्व्वविष्णुमयत्वेन न कुर्य्यात् प्राणिनां वधम् ॥
वधाद्रक्षति यो मर्त्यो जीवान् तत्त्वज्ञधर्म्मवित् ।
किं पुण्यं तस्य वक्ष्येऽहं ब्रह्माद्यं स तु रक्षति ॥
यो रक्षेत् घातनात् शम्भो ! जीवमात्रं दयापरः ।
त्वत्प्रियतमो नित्यं सर्व्वरक्षां करोति सः ॥
एकस्मिन् रक्षिते जीवे त्रैलोक्यं तेन रक्षितम् ।
वधात् शङ्कर ! वै येन तस्माद्रक्षेन्न घातयेत् ॥"
तथा.—
"पशुहिंसा विधिर्यत्र पुराणे निगमे तथा ।
उक्तो रजस्तमोभ्यां स केवलं तमसापि वा ॥
नरकस्वर्गसेवार्थं संसाराय प्रवर्त्तते ।
यतस्तत्कर्म्मभोगेन गमनागमनं भवेत् ॥
सत्त्वेन सात्त्वतग्रन्थे स विधिर्नैव शङ्कर ! ।
प्रवृत्तिनो निवृत्तिस्तु यद्यपि सात्त्विकी क्रिया ।
एवं नानाविधं कर्म्म प्रणीरालभनादिकम् ।
कामाशयः फलाकाङ्क्षी ज्ञात्वाज्ञानेन मानवः ॥
पश्चाज्ज्ञानासिना च्छित्त्वा भान्त्याद्यां तामसीं सदा ।
यमभीतिहरं भक्त्या यदि गोविन्दमाश्रयेत् ॥"
इति पाद्मोत्तरखण्डे । १०४।१०५ । अध्यायौ ॥

ब(व)लिः, स्त्री, (बलति संवृणोतीति । बल संवरणे + इन् ।) जरया शुथचर्म्म । तत्पर्य्यायः । चर्म्मतरङ्गः २ त्वगूर्म्मिः ३ त्वक्तरङ्गः ४ । इति राजनिर्घण्टः । जठरावयवः । (यथा, कुमारे । १ । ३६ ।
"मध्येन सा वेदिविलग्नमध्या
बलिव्यये चारु बभार बाला ।")
गृहदारुप्रभेदः । इति मेदिनी । ले, ५ । गुदाङ्कुरः । यथा,—
"पक्वाशया मारुतः पित्तं कफो गुदबलित्रयम् ।
सर्व्व एव प्रकुप्यन्ति गुदजानां समुद्भवे ॥
तस्मादर्शांसि दुःखानि बहुधाधिकराणि च ।
सर्व्वदोषोपतापीनि प्रायः कृच्छ्रतमानि च ॥
बाह्यायान्तु बलौ जातान्यङ्कुरोत्थसमानि च ।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च ।
इन्द्रजानि द्वितीयायां बलौ यान्याश्रितान्यपि ।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च ।
सहजानि चिरोत्थानि यानि चाभ्यन्तरा बलिम् ।
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्द्दिशेत् ॥"
इति माधवकरः ॥
(यथा च । "तत्र स्थूलान्प्रतिबद्धमर्द्दपक्वाङ्कुरं गुदमाहुस्तस्मिन् बलयस्तिस्रोऽध्यर्द्धाङ्गुलान्तरभूताः प्रवाहिण्यो विसर्ज्जनी संवरणी चेति । चतुरङ्गुलायताः सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः । शुद्धावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः । गजतालुनिभाश्चापि वर्त्तन्तः संप्रकीर्त्तिताः ।"
इति सुश्रुते निदानस्थाने द्वितीयेऽध्याये ॥
गन्धकः । तत्पर्य्यायो यथा,—
"गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि ।
सौगन्धिकश्च कथितो बलिर्बलरसापि च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बलिका, स्त्री, (बलैव । बला + स्वार्थे कन् । टापि अत इत्वञ्च ।) अतिबला । इति राजनिर्घण्टः ॥

बलिदानं, क्ली, (बलेः पूजोपकरणस्य देवतोद्देशेन संकल्पितच्छागादेर्द्वा दानम् ।) श्रीकृष्णपार्व्वतीभ्यां स्वस्मिन्निवेदितनैवेद्यांशदानम् । यथा,—
अथ बलिदानम् ।
"ततो यवनिकां विद्वानपसार्य्य यथाविधि ।
विश्वक्सेनाय भगवन्नैवेद्यांशं निवेदयेत् ॥
यथा च पञ्चरात्रे श्रीनारदवचनम् ।

विश्वक्सेनाय दातव्यं नैवेद्यं तच्छतांशकम्।
पादोदकं प्रसादञ्च लिङ्गे चण्डेश्वराय च ॥ * ॥
तद्विधिश्चोक्तः।
सुखादीप्तानतः पात्रान्नैवेद्यांशं समुद्धरेत्।
सर्व्वदेवस्वरूपाय पराय परमेष्ठिने ॥
श्रीकृष्णसेवायुक्ताय विश्वक्सेनाय ते नमः।
इत्युक्त्वा श्रीहरेर्वामे तीर्थलिप्तं समर्पयेत्।
घृतांशं वा सहस्रांशमन्यथा निष्फलं भवेत् ॥
पश्चाच्च बलिरित्यादिश्लोकायुच्चार्य्य वैष्णवः।
सर्व्वेभ्यो वैष्णवेभ्यश्च घृतांशं विनिवेदयेत् ॥ * ॥
तौ च श्लोकौ।
बलिर्विभीषणो भीमः कपिलो नारदोऽर्ज्जुनः।
प्रह्लादश्चाम्बरीषश्च वसुर्वायुसुतः ध्रुवः ॥
विश्वक्सेनोद्धवाक्रूराः सनकाद्याः शुकादयः।
श्रीकृष्णस्य प्रसादोऽयं सर्व्वे गच्छन्तु वैष्णवाः॥ इति।
इदं यद्यपि युज्येत दर्शनार्पणतः परम्।
तथापि भक्तवात्सल्यात् क्षणस्यात्रापि सम्भवेत् ॥
अथ बलिदानमाहात्म्यम्। नारसिंहे।
ततस्तदग्नेर्विधिवत् पार्श्वतः समन्ततः।
पुष्पाक्षतैर्विमिश्रेण बलिं यस्तु प्रयच्छति ॥
बलिना वैष्णवेनाथ क्षणा: सन्तो दिवौकसः।
शान्तिं तस्य प्रयच्छन्ति श्रियमारोग्यमेव च ॥"
इति श्रीहरिभक्तिविलासे ८ विलासः ॥
देवोद्देशेन यथाविधिपूजोपहारत्यागः। दुर्गादिदेवतोद्देशेन सङ्कल्पपूर्ब्बकच्छागादिपशुघातनम्। यथा,—
"बलिदानेन सततं जयेच्छत्रून् कृपान् कृप!॥"
इति कालिकापुराणम्॥
अस्य विधिनिषेधौ बलिशब्दे द्रष्टव्यौ ॥ * ॥
अथ बलिदानक्रमः। स्वयमुत्तराभिमुखः पूर्ब्बाभिमुखं बलिं अक्षयावयवं सुन्दरं कृष्णपुरं माल्यं कण्ठे वेष्टयित्वा स्नातं समागीय कृताञ्जलिः पठेत्।
"ॐ वाराही यमुना गङ्गा करतोया सरस्वती।
कावेरी चन्द्रभागा च सिन्धुरेवसागराः॥
पशुस्नानविधानाय सान्निध्यमिह कल्पय॥"
इति तीर्थान्यावाह्य ॐ अग्निः पशुरासीत्तेनायजन्त स एतल्लोकमजयत्तस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः। ॐ वायुः पशुरासीत्तेनायजन्त स एतल्लोकमजयत्तस्मिन् वायुः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः। ॐ सूर्य्यः पशुरासीत्तेनायजन्त स एतल्लोकमजयत् तस्मिन् सूर्य्यः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः। ॐ वाक्ते सुनामि प्राणांस्ते सुनामि श्रोत्रन्ते सुनामि मेढ्रन्ते सुनामि पायुन्ते सुनामि। मनस्त आप्यायतां वाक् त आप्यायतां प्राणस्त आप्यायतां चक्षुस्त आप्यायतां श्रोत्रन्त आप्यायतां यत्ते क्रूरं यदा स्थितं तत्त आप्यायतां तत्ते निष्ठायतां तत्ते सुध्यतु सुमहोभ्यः स्वाहा। इति मन्त्रैः स्नापयित्वा ॐ मेघाकारस्तमभमध्ये पशुं बन्धय बन्धय सद्यङ्गात्रावयवं पशुं बन्धय बन्धय ब्रह्माङ्कखड्गरूपस्तमे पशुं बन्धय बन्धय हूं फट् स्वाहा ॐ ह्रां ह्रीं हूं त्रां चण्डिकायै इमं पशुं प्रोक्षामि स्वाहा। इति प्रोक्षणम्। ततः सद्यङ्गात्रावयवं पशुं मोक्षं कुरु कुरु स्वाहेति मोक्षं कृत्वा शमस्वेति ललाटे सिन्दूरं दत्त्वा ॐ छागपशवे नम इति पाद्यादिकं दत्त्वा एतदधिपतये ॐ अग्नये नमः एतत्सम्मुदानीयाय ह्रीं दुर्गायै नमः इति पुष्पं दत्त्वा पशोरङ्गदेवताः पूजयेत्। यथा, शिरसि ॐ रुधिरवदनायै नमः ललाटे ॐ घ्राङ्क्रियै नमः भ्रूमध्ये ॐ भद्रायै नमः चक्षुषोः ॐ चिनेचायै नमः कर्णयोः ॐ पार्व्वत्यै नमः घ्राणे ॐ गौर्य्यै नमः चिबुके ॐ चण्डिकायै नमः दन्तपङ्क्तौ ॐ उग्रचण्डिकायै नमः जिह्वायां ॐ चण्डघण्टायै नमः मुखे ॐ विरूपाक्षायै नमः ग्रीवायां ॐ चण्डायै नमः। दृष्टे ॐ महाभैरवे नमः उदरे ॐ वेताल्यै नमः चतुष्पदे ॐ चण्डप्रियायै नमः पार्श्वयोः ॐ सर्व्वैश्वर्य्यै नमः कटिदेशे ॐ विरूपाक्षायै नमः खुराग्रे ॐ कौशिक्यै नमः लाङ्गूले ॐ प्रहर्षिण्यै नमः सर्व्वाङ्गेषु पञ्चषष्ठाद्यदेवताभ्यो नमः। इति संपूज्य उत्तरेजेत्। विष्णुः ॐ तत् सदद्यामुके मासि शुक्ले पक्षे असुकतिथौ वार्षिकश्रत्कालीनदुर्गामहोत्सवे असुकगोत्रस्य श्रीअसुकस्य दुर्गाप्रीतिकामनया दुर्गादेव्यै इमं पशुं वह्निदेवतं तुभ्यमहं घातयिष्यामि इत्युत्सृज्य कृताञ्जलिः पठेत्।
"ॐ छाग! त्वं बलिरूपेण मम भाग्याद्युपस्थितः।
प्रणमामि ततः सर्व्वरूपिणं बलिरूपिणम्॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा।
अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः॥
पशुयोनिप्रसूतोऽसि पूजाहोमादिकर्म्मसु।
तुष्टा भवतु सा देवी सरक्तपिशितैस्तव॥
चण्डिकाप्रीतिदानेन दातुरापदिनाशनः।
चासृग्बलिरूपाय बले! तुभ्यं नमोऽस्तु ते॥"
ततः "पशुपाशाय विद्महे शिरश्छेदाय धीमहि।
तन्नः पशुः प्रचोदयात्।" इति कर्णे जपेत्।
ततः खड्गमानीय ह्रीं इति बीजाक्षरं लिखित्वा ध्यायेत्।
"कृष्णं पिङ्गाकपाणिञ्च कालरात्रिस्वरूपिणम्।
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम्॥
रक्ताम्बरधरञ्चैव पाशहस्तं कुटुम्बिनम्।
पिबमानञ्च रुधिरं भुञ्जानं क्रव्यसंहतिम्॥"
एवं खड्गं ध्यात्वा गृहीत्वा,
"ॐ रसनात्वं चण्डिकायाः सुरलोकप्रसाधकः।"
इत्यभिमन्त्र्य ऐं ह्रीं खड्गाय नम इति पाद्यादिभिः संपूज्य पुनर्मुष्टौ ॐ महादेवाय नमः। धारे ॐ यमाय नमः। अग्रे ॐ ब्रह्मणे नमः।
"ॐ असिर्विघ्नसमः खड्गस्तीक्ष्णधारो दुरासदः।
श्रीगर्भो विजयश्चैव धर्म्मपाल! नमोऽस्तु ते॥
इत्यादौ तव नामानि स्वयमुक्तानि वेधसा।
नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः॥
हिरण्यञ्च शरीरन्ते धाता देवो जनार्द्दनः।
पिता पितामहो देवस्त्वं मां पालय सर्व्वदा॥
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः क्षुधोदरः।
भावशुद्धो मयैवञ्च अतितेजास्त्वमेव च॥"
ॐ तीक्ष्णदंष्ट्राय नम इति पुष्पं दत्त्वा ह्रां ह्रीं फट् इति खड्गमादाय ॐ कालि कालि ब्रजेश्वरि लौहदण्डायै नम इति जपित्वा छागस्य ग्रीवायां खड्गं त्वं शीघ्रं छिन्धि छिन्धि फट फट् स्वाहा। इति पूर्ब्बाभिमुखं बलिं स्वयमुत्तराभिमुखः उत्तराभिमुखं बलिं स्वयं पूर्ब्बाभिमुखो वा सकृत्प्रहारेण छिन्द्यात्। ततो न्यग्रोधादिपात्रे रुधिरमादाय चतुर्भागं कृत्वा ऐशान्यां ॐ विदारिकायै नमः आग्नेय्यां ॐ पूतनायै नमः नैर्ऋत्यां ॐ पापराक्षस्यै नमः वायव्यां ॐ कौशिक्यै नमः। ॐ ततः सदद्यामुके मासि असुकपक्षेऽसुकतिथौ वार्षिकश्रत्कालीनदुर्गामहोत्सवे असुकगोत्रस्य श्रीअसुकस्य दशवर्षावच्छिन्नश्रीदुर्गाप्रीतिकामः श्रीदुर्गादेव्यै छागपशुरुधिरं दास्यामि इति सङ्कल्प्य।
ॐ कालि कालि महाकालि कालिके पापनाशिनि।
शोणितञ्च बलिं गृह्ण वरदे वामलोचने॥"
एष रुधिरबलिः ॐ दत्तयज्ञेति मन्त्रेण दद्यात्। ततः ऐं ह्रीं श्रीं कौशिकि रुधिरेणाप्यायतामिति वदेत्। ततः शिरसि ज्वलद्वह्निं दत्त्वा ॐ ततः सदद्यामुके मास्यसुकपक्षेऽसुकतिथौ वार्षिकश्रत्कालीनदुर्गामहोत्सवे असुकगोत्रस्य श्रीअसुकस्य श्रीमद्दुर्गादर्शनाभिवन्दनसपर्य्यानाभिपूजनसपनतर्पणजनितपूर्ब्बपूर्ब्बाधिकपुण्यप्राप्तिकामो दुर्गादेव्यै सप्रदीपच्छागपशुशीर्षं दास्यामीति सङ्कल्प्य एष सप्रदीपच्छागपशुशीर्षबलिः ह्रीं दुर्गायै नम इत्युत्सृजेत्।
"ॐ जय त्वं सर्व्वभूतेशे सर्व्वभूतसमाश्रिते।
रक्ष मां निजभूतेभ्यो बलिं भुङ्क्ष्व नमोऽस्तु ते॥
ततः खड्गरुधिरमादाय।
"ॐ यं यं स्पृशामि पादेन यं यं पश्यामि चक्षुषा।
स स मे वश्यतां यातु यदि शक्रसमो भवेत्॥"
इति ललाटे तिलकं कुर्य्यात्। मेषघाते तु मेषेत्यूहेन योज्यम्। मेषरुधिरदाने तु एकवर्षावच्छिन्नदुर्गाप्रीतिकामः। प्रभूतबलिदाने तु द्वौ वा त्रीन् वा अयतः कृत्वा संप्रोक्ष्य तत्तत्पशुभ्यो नम इति संपूज्य छाग त्वमित्येकवचनान्तेन प्रयोगः। पक्षान्तरेऽप्येवम्। वाक्ये तु एतान् पशून् तुभ्यमहं घातयिष्ये। रुधिरदाने तु एतान् रुधिरबलीन् दास्यामि इति सङ्कल्प्य प्रत्येकेन दद्यात् शीर्षदानमप्येवम्। ततो मूलमन्त्रं यथाशक्ति जप्त्वा समर्प्य प्रणमेदिति नन्दिकेश्वरपुराणोक्तपद्धतिः॥ * ॥

अथ तान्त्रिकबलिदानविधिः। "तत्र सुलक्षणं पशुं देवाग्रे संस्थाप्य वक्ष्यमाणविधिना उत्सृजेत्। तदुक्तं यामले।

'देवाग्रे स्थापयित्वा तु पशुं लक्षणसंयुतम्।
श्वेतसर्षपविक्षेपात् भूतानुत्सारयेत्ततः॥'

अर्घ्योदकेन संप्रोक्ष्य अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य धेनुमुद्रयाऽमृतीकृत्य गन्धपुष्पाद्यैः पशुं संपूज्य मूलेन सप्तधा तत्त्वमुद्रया प्रोक्षणं कृत्वा कर्णे इदं मन्त्रं पठेत्। पशुपाशाय विद्महे विश्वकर्म्मणे धीमहि तन्नो जीवः प्रचोदयात्। ततो ह्रीं कालि कालि वज्रेश्वरि लौहदण्डाये नम इति मन्त्रेण खड्गं पूजयेत्। ततः खड्गमस्त्राग्नमधमूलं क्रमेण पूजयेत्। यथा ह्रूं वागीश्वरीब्रह्मभ्यां नमः। ह्रूं लक्ष्मीनारायणाभ्यां नमः। ह्रूं उमामहेश्वराभ्यां नमः। ततो ब्रह्मविष्णुग्निवशक्तियुक्ताय खड्गाय नमः। इति सर्व्वत्र पूजयित्वा प्रणमेत्।

'खड्ग गाय खरग्राहाय शक्तिकार्य्यार्थतत्पर!।
पशुश्चेद्यज्ञया शीघ्रं खड्गनाथ! नमोऽस्तु ते॥'

ततो महावाक्यं अमुकदेवताप्रीतिकामः अमुकदेवै इमं पशुं तुभ्यमहं संप्रददे। ततो निवेदयेत्।

'यथोक्तेन विधानेन तुभ्यमस्तु समर्पितम्॥'

ततो बलिं छिन्द्यात्। ततो रुधिरं समांसं देवै दद्यात्। ततोऽवशिष्टं वटुकादिभ्यो बलिं दद्यात् यथा ह्रुं वां वटुकाय नमः। इति गन्धादिभिः संपूज्य पूर्ब्ववन्मन्त्रेण वायवे बलिं दद्यात्। ह्रुं यां योगिनीभ्यो नमः इति संपूज्य पूर्ब्ववन्मन्त्रेण ईशाने बलिं दद्यात्। ह्रुं क्षां क्षेत्रपालाय नमः इति संपूज्य पूर्ब्ववन्मन्त्रेण नैर्ऋत्यां बलिं दद्यात्। ह्रुं गां गणपतये नमः इति संपूज्य पूर्ब्ववन्मन्त्रेण आग्नेय्यां गणेशाय बलिं दद्यात्।" इति तन्त्रसारः॥ * ॥ (नतु "मा हिंस्यात् सर्व्वाभूतानि" "अहिंसा परमो धर्म्मः।" इत्यादि वचनान्न कर्त्तव्यैव सर्व्वथा हिंसा कथं तर्हि हिंसाप्रवृत्तिः शुभाद्दष्टजनकत्वेन शास्त्रेणोपदिष्टा अतोऽवोच्यते। अथ वैधहिंसाविचारः। 'मा हिंस्यात् सर्व्वाभूतानि' इत्यत्र सर्व्वशब्दस्य व्यापकार्थपरतया एतदधिकरणसिद्धञ्च 'वायव्यं श्वेतमालभेत' इत्यादि विधेर्विषयाप्राप्तेरगत्या वैधातिरिक्तविषयत्वं सर्व्वाः सर्व्वाणि छन्दांसि देवत्वेन तत्पदं सिद्धम्। यद्यपि नाना दर्शनटीकाकृद्विवाचस्पतिमिश्रैस्तत्त्वकौमुद्याम् अभिहितं न च 'मा हिंस्यात् सर्व्वाभूतानि' इति सामान्यशास्त्रं विशेषशास्त्रेण 'अग्नीषोमीयं पशुमालभेत' इत्यनेन बाध्यते इति वाच्यं विरोधाभावात्। विरोधे हि बलीयसा दुर्ब्बलं बाध्यते। न चास्ति विरोधः भिन्नविषयत्वात्। तथाहि 'मा हिंस्यात्' इति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरकर्त्तव्यत्वमपि। न चानर्थहेतुत्वकर्त्तव्यकारकत्वयोः कश्चिदस्ति विरोधः। हिंसा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्चोपकरिष्यतीत्यन्तेन तदपि सांख्यनये। मीमांसकमते तु विरोध एव तथाहि गुरुनये न खलु सर्व्वभूतहिंसाभावविषयकं कार्य्यं इति निषेधविध्यर्थस्य बाधं विना अग्नीषोमीयपश्वालम्भनविषयकं कार्य्यमिति भावविध्यर्थं उपपद्यते। भट्टनये तु अङ्गे यथा तथास्तु। न च मुख्यपशुयागे पुरुषार्थैकपशुहिंसनस्यार्थसाधनत्वं अनर्थसाधनत्वञ्चोपपद्यते विरोधात्। वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव कृतो विधेरेव स्वभावो यः स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति अन्यथाङ्गानां प्रधानोपकारकत्वमपि नाङ्गीक्रियेत। अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्टसाधनत्वं अनर्थसाधनत्वं बलवदनिष्टसाधनत्वं न चानयोरेकत्र समावेश इति। अतएवोक्तं 'तस्माद्दयन्ने वधोऽवधः' इति। नन्वेवं 'श्येनेनाभिचरन् यजेत' इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वमवगतं 'अभिचारो मूलकर्म्म च।' १२।६३। इति मनुना उपपातकगणमध्ये पाठात् अनिष्टसाधनत्वमवगतम्। तदेतत्त्रयसुपपद्यतामिति चेन्मैवं 'आततायिनमायान्तं हन्यादेवाविचारयन्।' ८। ३५०। इत्येकवाक्यतया आततायित्वे दृष्टसाधनत्वं अनाततायित्वे तूपपातकत्वेन बलवदनिष्टसाधनत्वमित्यविरोध एव।" इति तिथितत्त्वम्॥)

ब(व)लिध्वंसी, [न्] पुं, (बलिं तदाख्यया प्रसिद्धं दैत्यविशेषं ध्वंसयतीति। बलि + ध्वंस + णिनि। वामनरूपेण बलेः सर्व्वस्वग्रहणादस्य तथात्वम्। यद्वा, बलिना पूजोपहारेण अविद्यां ध्वंसयितुं शीलमस्य।) विष्णुः। इत्यमरः। १। १। २१॥ (भगवता वामनरूपधरेण बलिकृतयज्ञगमनपूर्ब्बकं तत्सकाशात् सर्व्वस्वं गृहीतमित्येतत्कथा बलिशब्दे द्रष्टव्या॥)

ब(व)लिन्, चि, (बलिः श्रृथिलं चर्म्म अस्यास्तीति। बलि + मत्वर्थादिलात्।) बलिभः। जरया शृथचर्म्मयुक्तः। इत्यमरः। २। ६। ४५॥

ब(व)लिनन्दनः, पुं, (बलेस्तदाख्यया प्रसिद्धस्य दैत्यस्य नन्दनः पुत्रः।) बाणासुरः। इति शब्दरत्नावली॥ (अयं खलु यादवश्रेष्ठेन भगवता कृष्णेन सह युद्धमकरोत्। तपःप्रतापश्लाघातो महादेवेन च स्वयमस्य द्वारिकत्वमङ्गीकारः। तद्विवरणादिकं हरिवंशे १७३ अध्यायमारभ्य १८३ अध्यायपर्य्यन्तं द्रष्टव्यम्॥ बलेः ययातिवंशीयस्य राज्ञः नन्दनः क्षेत्रजः पुत्रः इति व्युत्पत्त्या अङ्गवङ्गकलिङ्गाद्याः। यदुक्तं, विष्णुपुराणे। ४। १८। १। "दैनात् सुतपास्तस्मात् बलिः यस्य क्षेत्रे दीर्घतमसा अङ्गवङ्गकलिङ्गसुह्मपुण्ड्राख्यं बालेयं क्षत्रमजन्यत॥")

ब(व)लिनी, स्त्री, (बलं दैत्यत्वेनास्त्यस्या इति इनिः। ङीप्।) वाद्यालकः। इति शब्दचन्द्रिका॥

ब(व)लिपुष्टः, पुं, (वैश्वदेवेन बलिना पुष्टः।) काकः। इत्यमरः। २। ५। २०॥

ब(व)लिपोदकी, स्त्री, (बलेः पोदकी उपोदकी।) उपोदकी। इति राजनिर्घण्टः॥

ब(व)लिप्रियः, पुं, (बलिसुपहारं प्रीणातीति। बलि + प्री + क।) लोध्रवृक्षः। इति शब्दचन्द्रिका॥ (बलिर्वैश्वदेवबलिः प्रियो यस्य इति व्युत्पत्त्या काकः। उपहारप्रिये वाच्यलिङ्गः॥)

ब(व)लिभः, त्रि, (बलिश्चर्म्मसंकोचोऽस्त्यस्येति। बलि + "तुन्दिबलिवटेर्भः।" ५। २। १३६। इति भः।) बलिनः। इत्यमरः। २। ६। ४५॥

ब(व)लिभुक्, [ज्] पुं, (बलिं वैश्वदेवबलिं गृहस्थदत्तद्रव्यं वा भुङ्क्ते इति। भुज् + क्विप्।) काकः। इत्यमरः। २। ५। २०॥ (यथा, भागवते। १। १८। ३३।

"अहो अधर्म्मः पालानां पीव्नां बलिभुजामिव॥")

ब(व)लिमन्दिरं, क्लीं, (बलेः खनामख्यातस्य राज्ञो मन्दिरमालयः।) बलिहिं वामनरूपाय विष्णवे सर्व्वस्वं दत्त्वा प्रह्लादेन सह पातालं निवसति इति पौराणिकी कथात्रानुसन्धेया।) अधोलोकः। पातालम्। इति शब्दमाला॥

ब(व)लिमान्, [त्] त्रि, (बलिश्चर्म्मसंकोचोऽस्त्यस्येति। बलि + मतुप्।) बलिनः। जरया शृथचर्म्मयुक्तः। इत्यमरटीका॥ (बलिः पूजोपहारं विद्यतेऽस्येति व्युत्पत्त्या उपहारविशिष्टः। यथा, रघुः। १४। १५।

"बाध्यायमानो बलिमन्निकेत-
मालेख्यशेषस्य पितुर्विवेश॥")

ब(व)लिमुखः, पुं, (बलिर्मुखे यस्य। यद्वा, बलिश्चर्म्मसङ्कोचस्तद्युक्तं मुखं यस्य।) वानरः। इत्यमरटीकायां रमानाथः॥

ब(व)लिष्ठः, पुं, (अतिशयेन बलवान् + बलवत् + इष्ठन्। विन्मतोर्लुगिति मतुपो लुक्। प्रशस्यभारवाहकत्वादस्य तथात्वम्।) उष्ट्रः। इति राजनिर्घण्टः॥ (धर्म्मसावर्णिकमन्वन्तरान्तर्गत ऋषिभेदः। यथा, मार्कण्डेये। ६४। १६।

"हविष्मांश्च बलिष्ठश्च ऋतिरन्यस्तथारुणिः।
निश्चरश्चानघश्चैव विशिष्टान्वो महामुनिः॥
सप्तमेऽन्तरे तस्मिन्नमिदेवस्य सप्तमः॥"

रथोरैवात् क्वचित् वरिष्ठश्चेति पाठो दृश्यते॥)

ब(व)लिष्ठः, त्रि, (अतिशयेन बलवान्। बलवत् + इष्ठन्। विन्मतोर्लुगिति मतुपो लुक्।) अतिशयबलवान्। यथा,—

"प्रायश्चित्तं विना पूता त्वमेव शुद्धमानसा।
अकामा या बलिष्ठेन च स्त्री जारेण दुष्यति॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५५ अध्यायः॥

बलिष्ठा यथा। वायुः १ विष्णुः २ गरुडः ३ हनूमान् ४ यमः ५ महावराहः ६ शरभः ७ सत्यतिज्ञा ८ गजः ९ पृथुराजः १० बलरामः ११ वाली १२ बलिः १३ भीमः १४ सती १५ प्रेमः १६ पुराकृतम् १७। इति कविकल्पलता॥

वलिष्णुः, त्रि, (वल्यते वध्यते इति। वल+इष्णुः।) अपमानितः। इत्युणादिकोषः॥

व(ब)लिसद्म, [न्] क्ली, (वलेर्लक्ष्मदाख्यदैत्यस्य सद्म निकेतनम्।) रसातलम्। इत्यमरः॥१।८।१॥

व(ब)लिहा, [न्] पुं, (वलिं हन्ति इति। वलि+हन्+क्विप्। वामनरूपेण वलेः सर्व्वस्वग्रहणादस्य तथात्वम्।) विष्णुः। इति हेमचन्द्रः॥

व(ब)ली, [न्] पुं, (वलमस्यास्तीति। वल+"वलादिभ्यो मतुवन्धतरस्याम्।" ५।२।१३६। इति मत्वे इनिः।) वलरामः। इति शब्दरत्नावली॥ उद्गः। महिषः। वृषभः। शूकरः। कपिः। कुन्दवृक्षः। इति जटाधरः॥ मायः। (खनामख्यातो वत्सप्रीपुत्रः। यथा, मार्कण्डेये। ११८। २।

"वली वलाकचक्रश्च प्रचक्रश्च सुविक्रमः॥")

वलयुक्ते, त्रि। तत्पर्य्यायः। अंशुलः २ निर्हिंसः ३ मांसलः ४ उपचितः ५। इति हेमचन्द्रः। ३।११२॥ (यथा, मार्कण्डेये। ३४।८६।

"सार्द्धं न वलिभिः कुर्य्यान्न च न्यूनैर्न निन्दितैः॥")

व(ब)ली, स्त्री, (वलि+पक्षे ङीष्।) वलिः। जरया शरीरभङ्गे। इत्यमरटीकायां भरतः॥ (यथा,—

"कृष्णं सुचूर्णितं कृत्वा घृतमाक्षिकसंयुतम्। भक्षयेत्तु स्वप्नवेलायां वलीपलितनाशनम्॥"

इति वैद्यकभैषज्यधन्वन्तरौ रसायनाधिकारे॥)

व(ब)लीकं, क्ली, (वलति संवृणोतीति। वल संवरणे+"अलीकादयश्च।" उणा० ४।२५। इति कीकन्।) पटलप्रान्तम्। इत्यमरः। २।२। १४॥ छाँचि इति भाषा॥ (यथा, माघे। ३।५३।

"यस्यामसेवन्त नमद्वलीकाः समं वधूभिर्वलभीर्युवानः॥")

व(ब)लीमुखः, पुं, (वलीयुक्तं मुखं यस्य।) वानरः। इत्यमरः। २।५।३॥

व(ब)लीयान्, [स्] त्रि, (अतिशयेन वलवान्। वलवत्+ईयसुन्।) अतिशयवलयुक्तः। यथा,—

"आगमादतिशयोर्मध्ये वलीयानागमो विधिः॥"

इति दुर्गादासटीका॥

व(ब)लीवर्द्दः, पुं, (ईर्लक्ष्मीः वर् वरत्वम्। वर् ईश्वर्यां क्विप्। ईश्च वर् च ईवरौ तौ ददातीति ईवर्दः। वलमस्यास्तीति वली। ततो वली च ईवर्दश्च इति।) वृषः। इत्यमरः। २।८।५८॥ (यथा, कथासरित्सागरे। २०।२७।

"संयोज्याथ वलीवर्द्दयुगं रचितमङ्गलः। कृत्वा वलिं तस्य तरोरारेभे क्षपितुं सः॥")

तीर्थयात्रायां तदारूढस्य दोषो यथा,—

"वलीवर्द्दसमारूढः श्वश्रु तस्यापि यत् फलम्। नरके वसते घोरे गवां क्रोधे हि दारुणे॥ सलिलञ्च न गृह्णन्ति पितरस्तस्य देहिनः॥"

इति भाविष्ये ८८ अध्यायः॥

व(ब)ल्यं, क्ली, (वलाय हितम्। वल+"वृक्षव्रह्मश्रपिशसेनिरष्टग्व्यग्व्ययेति।" ४।२।८०। इति यः।) प्रधानधातुः। शुक्रम्। वलकरे, त्रि। इति मेदिनी। ये, ४०॥ (यथा,—

"कटुस्नवीर्य्यो लशुनो हितश्च स्निग्धो गुरुस्त्वादुरसोऽथ वल्यः॥"

इति हारीते कल्पस्थाने तृतीयेऽध्याये॥)

वल्यः, पुं, (वलाय शुक्लाय हितः। वल+यः।) वृहन्भिक्षुकः। इति त्रिकाण्डशेषः॥

वल्या, स्त्री, (वलाय हिता। वल+"वृक्षव्रह्मश्रकण्ठेति।" ४।२।८०। इति यः। ततष्टाप्।) अतिवला। अश्वगन्धा। शिम्बीवृक्षभुप्।। प्रसारिणी। इति राजनिर्घण्टः॥

वल्ह, ड स्तुतौ। हिंसायाम्। दाने। वाचि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) अन्तःस्थलतीयोपधः। ड, वल्हते। इति दुर्गादासः॥

वल्कयती } स्त्री, (वल्कयस्तरुरस्यवतृषः। सोऽस्ति
वल्कयिनी } अस्याः। वल्कय+यामादित्वात्। पक्षे इनिः। अट्कुप्वाङिति णत्वम्। ततो ङीष्।) चिरप्रसूता गौः। इत्यमरभरतौ॥ (यथा, सिद्धान्तकौमुद्याम्। २।१।६५।

"गोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्वष्क-यणीप्रवक्तृश्रोत्रियाध्यापकधूर्त्तजरतीः॥")

वहु, त्रि, (वंहते इति। वहि वृद्धौ+"लहिवंहोर्नलोपश्च।" उणा० १।३०। इति कुर्नलोपश्च।) त्र्यादिसंख्या॥ अनेकम्। विपुलः। इति मेदिनी। हे, ६॥ तत्पर्य्यायः। प्रभूतम् २ प्रचुरम् ३ प्राज्यम् ४ अदभ्रम् ५ वहुलम् ६ पुरुहम् ७ पुरु ८ भूयिष्ठम् ९ स्फिरम् १० भूयः ११ भूरि १२। इत्यमरः। ३।१।९३॥ तद्वैदिकपर्य्यायः। उरु १ तुवि २ पुरु ३ भूरि ४ प्रभ्वत् ५ विश्वम् ६ परिसा ७ वाजसि ८ शतम् ९ सहस्रम् १० सलिलम् ११ कृवि १२। इति द्वादश वहुनामानि। इति वेदनिघण्टौ। ३।१॥ (यथा,मनुः। ७।८६।

"अल्पं वा वहु वाप्येव दानस्याकाङ्क्षते फलम्॥"

तथा, तत्रैव। ८।७७।

"एकोऽलुब्धस्तु साक्षी स्याद्वह्वः शुचोऽपि न स्त्रियः॥"

वहुमतम्। वहुमानम्। यथा, रघुः।१२।८६।

"रामस्तुलितकैलासमरातिं वहुमन्यत॥")

वहुकः, पुं, (वहु+संज्ञायां कन्।) कर्कटः। अर्कः। दालूकः। जलशातकः। इति मेदिनी। के, १२६॥ ("संख्याया अतिशदन्तायाः कन्।"५।१।२२। इति कन्। वहुभिः क्रीते, त्रि।)

वहुकण्टकः, पुं, (वहूनि कण्टकान्यस्य।) क्षुरगोक्षुरः। यवासः। छिन्नालः। इति राजनिर्घण्टः॥

वहुकण्टका, स्त्री, (वहवः कण्टाः कण्टकानि यस्याः।) कण्टकारी। इति राजनिर्घण्टः॥ (विट्तिरस्या; कण्टकारीशब्दे ज्ञातव्या॥)

वहुकन्दः, पुं, (वहवः कन्दा यस्य।) सूरणः। इति राजनिर्घण्टः॥

वहुकन्दा, स्त्री, (वहवः कन्दा यस्याः।) कर्कटी। इति राजनिर्घण्टः॥

वहुकरः, पुं, (वहु कार्य्यं करोतीति। वहु+कृ+"दिवाविभानिशाप्रभेति।" ३।२।२१। इति टः।) उद्गः। इति त्रिकाण्डशेषः॥

वहुकरः, त्रि, (वहु करोति सर्वं संमार्ष्टि इति। वहु+कृ+टः।) मार्जनकारी। तत्पर्य्यायः। खलपूः २। इत्यमरः। ३।१।९७॥ भूमिसम्मार्ज्जकः ३। इति शब्दरत्नावली॥ वहुकार्य्यकर्त्ता। यथा, भट्टिः। ५। ७८।

"निहन्ता वैरकारीणां सतां वहुकरः सदा। प्रारब्धिकरणस्थस्य शत्रोरन्तकरो रणे॥"

वहुकरी, स्त्री, (वहु करोति सर्वं संमार्ष्टि इति। वहु+कृ+टः। ङीष्।) सम्मार्ज्जनी। इति हेमचन्द्रः। ४।८२॥

वहुकर्णिका, स्त्री, (वहवः कर्णा इव पत्राणि यस्याः।) आखुकर्णी। इति राजनिर्घण्टः॥

वहुकूर्चः, पुं, (वहूनि कूर्चानि यस्य।) मधुनालिकेरिकः। इति राजनिर्घण्टः॥

वहुगन्धं, क्ली, (वहुर्गन्धो यस्मिन्।) लशुनम्। इति राजनिर्घण्टः॥ (दारचिनी इति भाषा॥)

वहुगन्धः, पुं, (वहुर्गन्धो यस्मिन्।) कुन्दरुकः। इति राजनिर्घण्टः॥ (उग्रगन्धे, त्रि।)

वहुगन्धदा, स्त्री, (वहुगन्धं ददाति या। वहुगन्ध+दा+कः।) कस्तूरी। इति राजनिर्घण्टः॥ (गुणादयोऽस्याः कस्तूरीशब्दे ज्ञातव्याः॥)

वहुगन्धा, स्त्री, (वहुर्गन्धो यस्याम्।) चम्पककलिः। यूथिका। छत्राकारकः। इति राजनिर्घण्टः॥

वहुगर्ह्यवाक्, [च्] त्रि, (वहु गर्ह्या वहु निन्दिता वाग् यस्य।) कुत्सितवहुवादी। इत्यमरः॥

वहुग्रन्थिः, पुं, (वहवो ग्रन्थयो यस्य।) भल्लातकः। इति शब्दचन्द्रिका॥ (भाउ इति भाषा॥)

वहुच्छिन्ना, स्त्री, (वहु यथा स्यात्तथा छिद्यते क्षीयते। वहु+छिद्+क्त।) कन्दगुडूची। इति राजनिर्घण्टः॥

वहुतः, [स्] व, (वहुभ्य इत्यर्थे वहुशब्दात्"पञ्चम्यास्तसिल्।" ५।३।७। इति तसिल्प्रत्ययः।) वहुभ्यः॥

वहुतन्त्रिः, त्रि, (वहवस्तन्त्रयो यस्य।) वहुतन्त्रविशिष्टः। यथा। वहुतन्त्रिः कायः। वहुतन्त्री ग्रीवा। वहुतन्त्रि गात्रम्। यथा च। विभज्य नक्तं दिवसस्ततस्त्रिधेति किराते कृसेकारान्ततन्त्रिशब्दस्य प्रयोगः। इति संक्षिप्तसारः॥

वहुतन्त्रीः, त्रि, (वहवस्तन्त्रो यस्मिन्।) वहुतन्त्रविशिष्टः। यथा। वहुतन्त्रीग्रीवा वहुतन्त्रीधमनी। इति सिद्धान्तकौमुदी॥ एवं वहुतन्त्रीः कायः। वहुतन्त्रि गात्रम्॥

वहुतन्त्रीकः, त्रि, (वहुतन्त्री+स्वार्थे कन्।) वहुतन्त्रविशिष्टः। यथा। वहुतन्त्रीका वीणा।

इति सिद्धान्तकौमुदी ॥ एवं बहुतल्लीकः पटः । बहुतल्लीकं वस्त्रम् ॥

बहुतरकविग्रः, पुं, (बहुतराणि कविग्राणि धान्यग्रीर्षाणि यस्य ।) रागीधान्यम् । इति राजनिर्घण्टः ॥

बहुता, स्त्री, बहूनां भावः । बहुग्रब्दात् तलौ भावे इति तप्रत्ययः ॥

बहुतिक्ता, स्त्री, (बहुस्तिक्तो रसो यस्याः ।) काकमाची । इति राजनिर्घण्टः ॥

बहुतिथः, त्रि, (बहु + "बहुपूगगणसङ्घस्य तिथुक्" । ५ । २ । ५२ । इति तिथुक् । मुग्धबोधमते "बहुगणपूगसंघातात्तिथट् तलोपश्च ।" ७ । ४२ । इति तिथट् ।) बहूनां पूरणः । इति व्याकरणम् ॥ (यथा, मार्कण्डेयपुराणे । २२ । १ ।

"ततः काले बहुतिथे गते राजा पुनः सुतम् ।
प्राह गच्छास्य विप्राणां ज्ञानाय चर मेदिनीम् ॥")

बहुत्व, त्य, (बहु + "सप्तम्याश्चल् ।" ५ । ३ । १० । इति चल् ।) बहुत्व । इति सिद्धान्तकौमुदी ॥

बहुत्वं, क्ली, बहूनां भावः । बहुग्रब्दात् त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । १ । ३५ । ४ ।

"बहुत्वान्नामधेयानि पन्नगानां तपोधन ! ॥")

बहुत्वक्, [च्] पुं, (बहवस्त्वचो यस्य ।) भूर्णवृक्षः । इति ग्रब्दरत्नमाला ॥

बहुत्वक्कः, पुं, (बहुत्वगेव । बहुत्वच् + स्वार्थे कन् ।) भूर्णवृक्षः । इति हेमचन्द्रः । ४ । २१० ॥

बहुदक्षिकः, त्रि, (बहवो दक्षाः सन्त्यस्य । बहुदक्ष + ठन् ।) बहुदक्षविग्रिष्टः । यथा । बहुदक्षिका नगरी बहुदक्षिको ग्रामः । इति सिद्धान्तकौमुदी ॥

बहुदुग्धः, पुं, (बहूनि दुग्धानि अपक्वावस्थायां यस्य । यद्वा, बहूनि दुग्धानीव सुक्षवस्त्वन्यस्य ।) गोधूमः । इति राजनिर्घण्टः ॥

बहुदुग्धा, स्त्री, (बहु दुग्धं यस्याः ।) बहुक्षीरा गौः । तत्पर्य्यायः । बभ्रुला २ । इति हेमचन्द्रः । ४ । ३३५ ॥ (क्षुद्रोट्टग्रः । बहुदुग्धविग्रिष्टत्वात् ॥)

बहुदुग्धिका, स्त्री, (बहुदुग्धा + स्वार्थे कन् । टाप् । अत इत्वम् ।) क्षुद्रोट्टग्रः । इति ग्रब्दचन्द्रिका ॥

बहुधा, व, (बहु + "विभाषा बहोर्धा विप्रकृष्टकाले ।" ५ । ४ । २० । इति धा ।) बहुप्रकारम् । इति व्याकरणम् ॥ (यथा, ऋग्वेदे । १ । १६४ । ४६ ।

"एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥"

तथा, गीतायाम् । ६ । १५ ।

"एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥"

"केचित्तु विश्वतो मुखं सर्व्वात्मकं मां बहुधा ब्रह्मरुद्रादिरूपेणोपासते ॥" इति तट्टीकायां श्रीधरस्वामी ॥)

बहुधारं, क्ली, (बह्वी धारा यस्य ।) वज्रम् । इति राजनिर्घण्टः ॥

बहुनाड़िकः, त्रि, (बहुनाड़ि + कन् ।) कायः । इति सिद्धान्तकौमुदी ॥

बहुनाड़ीकः, त्रि, (बह्व्यो नाड्यो यस्मिन् । बहुनाड़ी + कप् ।) दिवसः । इति संक्षिप्तसारः ॥ क्लमः । इति सिद्धान्तकौमुदी ॥

बहुनादः, पुं, (बहुर्महान् नादः ग्रब्दो यस्य ।) ग्रङ्खः । इति राजनिर्घण्टः ॥

बहुपटुः, त्रि, [टुः] बहुदक्षः पटुः । इति व्याकरणम् ॥ बहुषु कर्म्मसु दक्षश्च ।

बहुपत्रं, क्ली, (बहूनि पत्राण्यस्य ।) अम्लकम् । इति राजनिर्घण्टः ॥

बहुपत्रः, पुं, (बहूनि पत्राणि दलान्यस्य ।) पलाक्षुः । इति राजनिर्घण्टः ॥ अनेकपत्रयुक्ते, त्रि ॥

बहुपत्रा, स्त्री, (बहुपत्र + टाप् ।) तरुणीपुष्पम् । इति राजनिर्घण्टः ॥ (भूम्यामलकी । तत्पर्य्यायो यथा,—

"भूम्यामलकिका प्रोक्ता ग्रिवा तामलकीति च ।
बहुपत्रा बहुफला बहुवीर्य्याऽम्भटापि च ॥")

इति भावप्रकाग्रस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुपत्रिका, (बहुपत्रा + संज्ञायां स्वार्थे वा कन् । टापि अत इत्वम् ।) भूम्यामलकी । मेधिका । (अस्याः पर्य्यायो यथा,

"मेधिका मिधिनिर्मेथिर्दीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामन्था मिश्रपुष्पा च कैरवी ॥"

इति भावप्रकाग्रस्य पूर्व्वखण्डे प्रथमे भागे ॥) महाग्रतावरी । इति राजनिर्घण्टः ॥

बहुपत्री, स्त्री, (बहुपत्र + गौरादित्वात् ङीष् ।) लिङ्गिनी । ग्रङ्खकन्या । तुलसी । जतुका । दृढतो । गोरक्षदुग्धा । इति राजनिर्घण्टः ॥

बहुपर्ण, पुं, (बहूनि पर्णानि पत्राणि यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ अनेकपत्रयुक्ते, त्रि ॥

बहुपर्णिका, स्त्री, (बहुपर्ण + संज्ञायां कन् । टापि अत इत्वम् ।) आखुकर्णी । इति राजनिर्घण्टः ॥

बहुपर्णी, स्त्री, (बहुपर्ण + गौरादित्वात् ङीष् ।) मेधिका । इति राजनिर्घण्टः ॥ (यथा,—

"मेधिका मिधिनिर्मेथिर्दीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामन्था मिश्रपुष्पा च कैरवी ।
कुञ्जिका बहुपर्णी च पित्तलिङ्गायुरुद्विधा ॥"

इति भावप्रकाग्रस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुपात्, [द्] पुं, (बहवः पादो यस्य । अनेकग्रिफावत्त्वादस्य तथात्वम् ।) वटवृक्षः । इत्यमरः । २ । ४ । ३२ ॥

बहुपादः, पुं, (बहवः पादा यस्य । अनेकग्रिफावत्त्वादस्य तथात्वम् ।) वटवृक्षः । इति राजनिर्घण्टः ॥ (यथा,—

"वटो रक्तफलः श्रृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः ॥"

इति भावप्रकाग्रस्य पूर्व्वखण्डे प्रथमे भागे ॥

अनेकपादविग्रिष्टे, त्रि । यथा, भागवते । ४ । २६ । २ ।

"पुरुषं पुरञ्जनं विद्यात् यदनुग्रयात्मनः पुरम् ।
एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥"

तथा च महाभारते । १४ । ४२ । ३७ ।

"द्विपादबहुपादानि तिर्य्यग्गतिमतीनि च ॥")

बहुपुत्रः, पुं, (बहवः पुत्राः सन्ततयो यस्य ।) सप्तपर्णः । इति ग्रब्दचन्द्रिका ॥ अनेकसुतविग्रिष्टे, त्रि ॥ (यथा, हरिवंशे । ३ । ६४ ।

"बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्नुषाः ॥")

बहुपुत्री, स्त्री, (बहवः पुत्राः पुत्रसङ्घग्रमूलानि यस्याः ।) ग्रतमूली । इति रत्नमाला ॥ (ग्रतमूलीग्रब्देऽस्या विवरणं ज्ञातव्यम् ॥)

बहुपुष्पः, पुं, (बहूनि पुष्पाणि यस्य ।) पारिभद्रवृक्षः । इति राजनिर्घण्टः ॥

बहुपुष्पिका, स्त्री, (बहुपुष्पा + संज्ञायां कन् । अत इत्वम् ।) धातकी । इति राजनिर्घण्टः ॥

बहुप्रजः, पुं, (बह्व्यः प्रजा यस्य ।) सुक्षल्लकम् । इति राजनिर्घण्टः ॥ ग्रूकरः । इति हेमचन्द्रः । ४ । ३५४ ॥ बहुसन्ततिविग्रिष्टे, त्रि ॥ (छन्दसि तु "बहुप्रजाच्छन्दसि ।" ५ । ४ । १२२ । इति असुभागान्तः । यथा, सिद्धान्तकौमुद्यां वैदिकप्रक्रिया ।

"बहुप्रजा निर्ऋतिमाविवेग्र ॥")

बहुप्रतिग्रः, त्रि, (बह्व्यः प्रतिग्राः यस्मिन् ।) अनेक-पदसङ्कीर्ण-पूर्व्वपद-विग्रिष्ट-व्यवहारः । यथा । "यत्तु अनेकपदसङ्कीर्णः पूर्व्वपदो न सिद्ध्यतीति । तत्र यदनेकवस्तुसङ्कीर्णं दृश्यते तदा न दोषः । मदीयमनेन हिरण्यं वासो रूपकादि वापहृतमित्येवंविधस्याहृतत्वात् । ऋणादानपदसङ्करे पक्षाभास इति चेत् तदपि न मदीया रूपका अनेन दृष्टा गृहीताः सुवर्णमस्य हस्ते निक्षिप्तं मदीयं चैवमपहरति चैत्रादीनां पक्षलमिष्यते एव । किन्तु क्रियाभेदात् क्रमेण व्यवहारो न युगपदित्येतावत् । यथाह कात्यायनः ।

'बहुप्रतिग्रं यत् कार्य्यं व्यवहारेषु निश्चितम् ।
कामन्तदपि गृह्णीयाद्राजा तत्त्वेनुसृत्यवेति ॥'

तस्मादनेकपदसङ्कीर्णः पूर्व्वपदो युगपन्न सिध्यतीति तस्यार्थः ।" इति मिताक्षरा । अनेकप्रतिग्रायुक्ते, त्रि ॥

बहुप्रदः, त्रि, (ददातीति प्रदः । प्र + दा + क । बहूनां प्रदः ।) प्रचुरदाता । तत्पर्य्यायः । वदान्यः २ स्थूललक्षः ३ दानशौण्डः ४ । इत्यमरः । ३ । १ । ६ ॥ स्थूललक्षः ५ दानवीरः ६ दानपूर्त्तः ७ । इति ग्रब्दरत्नावली ॥ (पुं, महादेवः । यथा, महाभारते १३ । ग्रिवसहस्रनामकथने । १७ । १०८ ।

"कुलहारी कुलकर्त्ता बहुविद्यो बहुप्रदः ॥")

बहुप्रसः, स्त्री. (बहून् प्रसूते इति । बहु + प्र + सू + क्विप् ।) बहुसन्तानप्रसवकारिणी । तत्पर्य्यायः । क्षमिला २ । इति हेमचन्द्रः ।३।२२२॥

बहुफलः, पुं, (बहूनि फलानि यस्य ।) कदम्बवृक्षः । इति मेदिनी । बे, १५७ ॥ विकङ्कतः । तेजःपलः । इति राजनिर्घण्टः ॥

बहुफला, स्त्री, (बहूनि फलानि यस्याः ।) त्रपुषिका । माषपर्णी । काकमाची । त्रपुसी । शृगालकुली । क्षुद्रकारवेल्लो । इति राजनिर्घण्टः ॥ भूम्यामलकी । इति भावप्रकाशः ॥

बहुफलिका, स्त्री, (बहुफला + संज्ञायां कन् । अत इत्वम् ।) भूवदरी । इति राजनिर्घण्टः ॥

बहुफली, स्त्री, (बहुफल + ङीप् ।) न्यग्रोधवारः । इति राजनिर्घण्टः ॥ आमलकी । इति मेदिनी । बे, १५७ ॥

बहुफेना, स्त्री. (बहुः फेनो यस्याः ।) सातला । इति राजनिर्घण्टः ॥

बहुबलः, पुं, (बहु अतिशयं बलं यस्य ।) सिंहः । इति राजनिर्घण्टः ॥ अतिशयबलयुक्ते, त्रि ॥

बहुमञ्जरी, स्त्री, (बह्व्यो मञ्जर्य्यो यस्याः ।) तुलसी । इति भावप्रकाशः ॥

बहुमलः, पुं, (बहूनि मलानि यस्य ।) सीसकम् । इति रत्नमाला ॥ अनेकमलयुक्ते, त्रि ॥

बहुमार्गं, क्ली, (बहवो मार्गा यस्मिन् । बहुहिंसु पथवत्त्वात् तथात्वम् ।) चत्वरम् । इति हेमचन्द्रः । ४ । ५४ ॥ अनेकपथयुक्ते, त्रि ॥

बहुमूर्णिः, स्त्री, (बह्वी मूर्णिर्यस्याः ।) वनकार्पासः । इति शब्दचन्द्रिका ॥ नागाकारश्च ॥ (बहुमूर्णिधरे त्रि । पुं, छत्राकासवत् जन्तुविशेषः । बहुरूपी इति ख्यातः ॥ विष्णुः । यथा, महाभारते । १३ । १४६ । ६० ।

"अनेकमूर्तिरव्यक्तः शतमूर्तिः शतानतः ॥"

बहुमूर्द्धा, [न्] पुं, (बह्वयो मूर्द्धानो यस्य । "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।" इति श्रुतेस्तथात्वम् ॥) विष्णुः । इति शब्दरत्नावली ॥

बहुमूलः, पुं, (बहूनि मूलानि यस्य ।) वटवृक्षः । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा,—

"वटो बहुमूलश्च वाटीदीर्घः सदाफलः ॥"

इति वैद्यकरत्नमालायाम् ।)

शिग्रुः । शालवरः । इति राजनिर्घण्टः ॥ अनेकमूलयुक्ते, त्रि ॥

बहुमूलकं, क्ली, (बहुमूल + कन् ।) उशीरम् । इति भावप्रकाशः ॥ (वीरत्वम् । तत्पर्य्यायो यथा,—

"स्याद्वीरणं वीरतरुर्वीरश्च बहुमूलकम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुमूलकः, पुं, (बहुमूल एव । बहुमूल + स्वार्थे कन् ।) वटवृक्षः । इति जटाधरभूरिप्रयोगौ ॥

बहुमूला, स्त्री, (बहुमूल + टाप् ।) शतावरी । इति राजनिर्घण्टः ॥

बहुमूली, स्त्री, (बहुमूल + ङीप् ।) भाकन्दी । इति राजनिर्घण्टः ॥

बहुमूल्यं, त्रि, (बहूनि मूल्यानि यस्य ।) महार्घवस्तु । तत्पर्य्यायः । महाधनम् २ । इत्यमरः । २ । ६ । ११३ ॥

बहुरश्मिका, स्त्री, (बहूनि रश्मयो यस्याः । बहुरश्मि + टाप् । संज्ञायां कन् । टापि अत इत्वम् ।) मेदा । इति राजनिर्घण्टः ॥

बहुरसा, स्त्री, (बहु रसो यस्याः ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (रसवती स्त्री ॥)

बहुरुहा, स्त्री, (बहु यथा तथा रोहतीति । रुह् + क । टाप् ।) कन्दगुडूची । इति राजनिर्घण्टः ॥

बहुरूपः, पुं, (बहूनि रूपाणि यस्य ।) सर्व्वरसः । इत्यमरः । २ । ६ । १२८ ॥ शिवः । विष्णुः । कामदेवः । सरटः । इति मेदिनी । के, २७ ॥ ब्रह्मा । केशः । इति शब्दरत्नावली ॥ (रुद्रः । यथा, भागवते । ६ । ६ । १८ ।

"अजैकपादहिर्ब्रध्नो बहुरूपो महानिति ॥"

प्रियव्रतपुत्रस्य मेधातिथेः पुत्रभेदो वर्षभेदश्च । यथा, भागवते । ५ । २० । २५ । "तस्यापि प्रियव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजव-मनोजव-पवमान-धूम्रानीकचित्ररेफ बहुरूप-विश्वधारसंज्ञान् ।" इति ॥) बुद्धविशेषः । इति त्रिकाण्डशेषः ॥ नागारूपयुक्ते, त्रि ॥ (यथा, मनुः । १ । ४६ ।

"तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना ॥")

बहुरूपकः, पुं, (बहुरूप + स्वार्थे कन् ।) नाटकजन्तुः । इति राजनिर्घण्टः ॥

बहुरूपा, स्त्री, (बहुरूपस्य शिवस्य स्त्री । टाप् ।) दुर्गा । यथा,—

"अरूपा परभावत्वाद्बहुरूपा क्रियात्मिका ।
जाता शैलेन्द्रगेहे सा शैलराजसुता ततः ॥"

इति देवीपुराणे ४५ अध्यायः ॥

बहुरेखा, स्त्री, (बह्वी बहुला रेखा करस्यादिचिह्नम् ।) प्रचुरदीर्घचिह्नम् । बहुरेखायुक्तानां दोषो यथा,—

"रेखाभिर्बहुभिः क्षिप्रं स्वल्पाभिर्धनहीनताम् ।
रक्ताभिः सुखमाप्नोति श्वेताभिः प्रेष्यतां व्रजेत् ॥"

इति गारुडे ६४ अध्यायः ॥

बहुरेताः, [स्] पुं, (बहु रेतो यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥

बहुरोमा, [न्] पुं, (बहूनि लोमानि यस्य ।) मेषः । इति शब्दरत्नावली । ८० ॥ लोमशे, त्रि ॥

बहुलं, क्ली, (बंहते वर्द्धते गच्छतीति । बहि वृद्धौ कुलच् । नलोपश्च ।) आकाशम् । इति मेदिनी ॥ सितसरोरुहम् । इति राजनिर्घण्टः ॥

बहुलं, त्रि, (बहूनर्थान् लातीति । बहु + ला + क ।) प्रचुरम् । (यथा, मनुः । ४ । ६० ।

"नाधार्म्मिके वसेद्ग्रामे न व्याधिबहुले भृशम् ॥")

क्षत्रियवर्णः । इति मेदिनी । बे, ११८ ॥

बहुलः, पुं, (बहूनर्थान् लातीति । बहु + ला + क ।) अग्निः । क्षत्रियश्चः । इति मेदिनी । बे, ११८ ॥ (यथा, कुमारे । ४ । १३ ।

"बहुलेऽपि गते निशाकरे
क्षपयन्तीं दुःखमावयोः मोक्षयति ॥"

महादेवः । यथा, महाभारते ।१३। १७ ।१२८।

"मन्थानो बहुलो वायुः सकलः सर्व्वलोचनः ॥")

बहुलगन्धा स्त्री, (बहुलो गन्धो यस्याः ।) एला । इति राजनिर्घण्टः ॥

बहुलच्छदः, पुं, (बहुलानि च्छदानि यस्य ।) रक्तशिग्रुः । इति राजनिर्घण्टः ॥

बहुलवर्णं, क्ली, (बहूनि लवणानि यस्मिन् ।) औषरकम् । इति राजनिर्घण्टः ॥

बहुला, स्त्री, (बहूनर्थान् लाति या । बहु + ला + क । टाप् ।) गौलिका । एला । (यथा,—

"एला लूला च बहुला पृथ्वीका त्रिपुटापि च ।
भद्रैला हट्टदेला च चन्द्रबाला च निष्कुटिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

गौः । इति मेदिनी । बे, ११७ ॥ देवीविशेषः । यथा,—

"हरा सा तेन मुनिना निःसृत्य रविमण्डलात् ।
बहुला चागता तूर्णं प्रथमं मानसभूभृतः ॥
प्रथमं तत्र सावित्री गायत्री बहुला तथा ।
सरस्वती च दृषदा पश्चेता मानसाच्चले ॥"

इति कालिकापुराणे । २३ अध्यायः ॥

(नदीभेदः । यथा, मार्कण्डेये । ५७ । ३६ ।

"चीनाञ्चैव तुखाराश्च बहुला वाह्लतो नराः ॥"

खनामख्याता उत्तमराजपत्नी । यथा, तत्रैव । ६६ । ६ ।

"बाभ्रव्यां बहुलां नाम उपयेमे स धर्म्मवित् ।
उत्तानपादतनयः शूचौमिन्द्र इवोत्तमः ॥")

बहुलाः, स्त्री, क्षत्रियकान्यजम् । नित्यबहुवचनान्तोऽयं शब्दः । इति मेदिनी । बे, ११७ ॥

बहुलीकृतं, त्रि, (अबहुलं बहुलं कृतम् । अभूततद्भावे क्विः ।) अपनीततुषधान्यादि । बध्नोलान इति भाषा । तत्पर्य्यायः । पूतम् २ । इत्यमरः । २ । ६ । २३ ॥ (विकृतीकृतम् । यथा, मार्कण्डेये । २१ । ६२ ।

"पराक्रमवता वीर ! त्वया तद्बहुलीकृतम् ॥")

बहुवल्कः, पुं, (बहूनि वल्कानि यस्य ।) प्रियालः । इति राजनिर्घण्टः ॥

बहुवल्ली, स्त्री, ओड्रिद्रुपः । इति राजनिर्घण्टः ॥

बहुवारः, पुं, (बहूनि वारयतीति । बहु + वृ + णिच् + अण् ।) वृक्षविशेषः । बहुयार इति ख्यातः । तत्पर्य्यायः । श्रेणुः २ शीतः ३ शैत्यात्मः ४ शैत्यात्मकः ५ उद्दालः ६ उद्दालकः ७ । इति शब्दरत्नावली ॥ सेतुः ८ । इत्यमरटीकायां भरतः ॥ अस्य फलगुणाः । हिमत्वम् । शैत्यत्वम् । शुक्रकारित्वम् । गुरुत्वम् । दुर्जरत्वम् । मधुरत्वञ्च । इति राजवल्लभः ॥

बहुवारकः, पुं, (बहूनि रूक्षादीनि वारयतीति । बहु + वृ + णिच् + ण्वुल् ।) वृक्षविशेषः । (अस्य

गुणा बहुवारशब्दे उक्ताः। बहुयार इति ख्यातः। यथा, मनुसंहितायाः।५।१६। श्लोकस्य टीकायां कुल्लूकभट्टः। "ग्रेतुं बहुवारकपलं गोभवं पेयसं नवप्रसूतायाः गोः क्षीरमभिसंयोगात् कठिनं भवति एतान् यत्नतस्त्यजेत्।")

बहुविधः, त्रि, (बहवो विधा यस्य।) नानाप्रकारः। तत्पर्य्यायः। विविधः २ नानारूपः ३ पृथग्विधः ४। इत्यमरः। ३।१।८३॥ (यथा, गीतायाम्। ४।३२।

"एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे॥")

बहुविस्तीर्णा, स्त्री, (बहु यथा स्यात् तथा विस्तीर्णा।) कुंचिकाक्षुपः। इति शब्दचन्द्रिका॥ कुचड इति भाषा॥

बहुबीजं, क्ली, (बहूनि बीजानि यस्य।) गरुडगात्रम्। इति शब्दचन्द्रिका॥ आता इति भाषा॥ अस्य गुणा आटप्यशब्दे द्रष्टव्याः॥

बहुभीर्य्यः, पुं, (बहु बीर्य्यं तेजो यस्य।) विभीतकः। इति जटाधरः॥ तक्कलीयवृक्षः। ग्राम्यलिक्षुः। मरुवः। इति राजनिर्घण्टः॥

बहुभीर्य्या, स्त्री, (बहु बीर्य्यं तेजो यस्याः।) भूम्यामली। इति राजनिर्घण्टः॥

बहुव्रीहिः, पुं, षट्समासान्तर्गतसमासविशेषः। (सुग्धबोधमते।) अस्य सांकेतिकसंज्ञा हः। यथा, अन्यार्थानां दानां हसंज्ञः। उदाहरणं यथा। पीतमम्बरं यस्यासौ पीताम्बरो हरिः। इति बोपदेवः॥ स च तुल्याधिकरणानां पदानां अन्यार्थे स्यादिति बोध्यम्। यथा पीताम्बरादि। भिन्नाधिकरणानान्तु पुत्राय धनमस्य ग्रिष्याय विद्या अस्य इत्यादौ न स्यात्। समाहृत इत्युदाहरणेन कदाचिद्भिन्नाधिकरणानाञ्च स्यात् धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिः। एवं कामवृत्तिः उरसि लोमा कण्ठे काल इत्यादि। एवं पीताम्बर इत्युदाहरता विशेषणविशेष्ययोः समासे विशेषणमेव पूर्व्वं स्यादिति सूचितम्। तेन पीताम्बर इत्यत्र अम्बरपीत इति न स्यात्। एवं त्रिलोचनः चतुर्भुजः दीर्घकेशीत्यादि। एवं पीताम्बर इत्युदाहरता क्वचित् क्वान्तविशेषणं पूर्व्वं स्यात् क्वचित् परं वा स्यात् इति सूचितम्। तेन अव्याहतस्वैरगतेरिति। अर्थेषितं भर्त्तुरुपस्थितोदयमिति। स वृत्तचूड़श्चलकाकपक्षकैरित्यादि रघुः॥ सुखजातः सुरापीसो वृजग्रीवो माल्यधारक इति। एवं जातदन्तः दन्तजातः. जातश्मश्रुः श्मश्रुजातः पीततैलः तैलपीतः पीतघृतः घृतपीतः ऊढभार्य्यः भार्य्यांढः गतभार्य्यः भार्य्यागतः गतार्थः अर्थगतः अग्न्याहितः आहिताग्निः पुत्रजातः जातपुत्रः जातयामः यामजातः दुःखजातः जातदुःखः गडुकण्ठः कण्ठगडुः इत्यादि बोध्यम्। एवमुद्यतचक्रः चक्रोद्यतः उद्यतासिः असिउद्यतः उद्यतगदः गदोद्यतः उद्यतखड्गः खड्गोद्यत इति। आयुधेभ्यो नित्यं पूर्व्वमिति जौमराः॥ यथा उद्यतचक्र इत्यादि। एवं सर्व्वनामसकलात् पूर्व्वम्। सर्व्वचेतः। संख्यासर्व्वनाम्नोः संख्यापूर्व्वं स्यात्। द्विपरः त्रिपूर्व्वः। सप्तम्यन्तमचन्द्रादेः। सप्तम्यन्तं पदं पूर्व्वं स्यान्न चन्द्रादेः। धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिः उरसि लोमा कण्ठेकाल इत्यादौ उरसिजवत् क्लेरलुक्। चन्द्रादेस्तु चन्द्रशेखरः चन्द्रचूड़ः पद्मनाभः मूलपाणिः कुशहस्तः। प्रियो वा। गुड़प्रियः प्रियगुड़ः। किञ्च आरूढो वानरो यं स आरूढवानरो वृक्षः। दृष्टः क्रान्तो येन स दृष्टक्रान्तो भक्तः। दत्ता भूमिर्यस्मै स दत्तभूमिर्विप्रः। निर्गतः पक्षिणो यस्मात् वृक्षात् स निर्गतपक्षी वृक्षः। चत्वारो भुजा यस्यासौ चतुर्भुजो विष्णुः। बहूनि नक्षत्राणि यत्र तद्बहुनक्षत्रमाकाशम्। इति द्वितीयान्तादन्यपदार्था बहुव्रीहयः सर्व्वैर्मन्यन्ते। क्षमते तु प्रथमान्तान्यपदार्थोऽपि यथा सह माता वर्त्तते योऽसौ समातृकः एवं सपक्षकः सनामकं ब्राह्मणमानिनीत्यादि। इति दुर्गादासः॥ * ॥ (बहवो व्रीहयो यस्येति व्युत्पत्त्या) प्रभूतधान्ययुक्ते, त्रि। यथा,—

"इन्द्रो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष! कर्म्म धारय येनाहं स्यां बहुव्रीहिः॥"
इति प्राचीनाः॥

बहुशत्रुः, पुं, (बहवः शत्रवो यस्य।) चटकः। इति शब्दचन्द्रिका॥ (बहुशत्रुविशिष्टे, त्रि। तृतीयायां तिथौ पटोलभक्षणेन बहुशत्रुः स्यात्। यथा, तिथितत्त्वे।

"कुम्भार्के चार्थहानिः स्यादृक्षां न स्मरेद्धरिम्।
बहुशत्रुः पटोले स्यात् धनहानिस्तु मूलके॥")

बहुशः, अ, (बहूनि ददाति करोत्यादि वा। बहु+"वीप्सायामाभीक्ष्ण्यकादन्यतरस्याम्।" ५।४।४२। इति शस्।) बहूनि। इति व्याकरणम्॥ (यथा, मार्कण्डेये। ५२। २८।

"कथ्यन्ते बहुशश्चैते पिता पुत्रत्रयञ्च यत्॥")

बहुशल्यः, पुं. (बहु शल्यं यस्य।) रक्तखदिरः। इति राजनिर्घण्टः॥ अनेकशल्ययुक्ते, त्रि॥

बहुशालः, पुं, (बहुभिः शालते इति। बहु+शाल+अच्।) खदिरः। इति राजनिर्घण्टः॥

बहुशिखा, स्त्री, (बह्वी शिखा यस्याः।) जलपिप्पली। इति राजनिर्घण्टः॥ (बह्वी शिखा इति कर्म्मधारयसमासः।) अनेकशिखा च॥

बहुसन्ततिः, पुं, (बह्वी सन्ततिर्विस्तारोऽन्ययो वा यस्य।) वञ्जयष्टिः। इति शब्दचन्द्रिका॥ वेड़ाँग्र इति भाषा॥ अनेकसन्ततियुक्ते, त्रि॥

बहुसम्पुटः, पुं, (बहुः सम्पुटो यस्य।) विष्णुकन्दः। इति राजनिर्घण्टः॥

बहुसारः, पुं, (बहुः सारः स्थिरांशो यस्य।) खदिरः। इति राजनिर्घण्टः॥ (बहुसारविशिष्टे, त्रि। यथा, शतपथब्राह्मणे। ११। ७। ३। १॥ "स य एव बहुसारः॥")

बहुसुता, स्त्री, (बहुः सुतः सन्ततिर्मूलं वा यस्याः।) शतमूली। इत्यमरः। २। ४। १५॥

बहुसूः, स्त्री, (बहून् सूते या। बहु+सू+क्विप्।) शूकरी। इति शब्दरत्नावली॥ बहुप्रसवा च॥

बहुसूतिः, स्त्री, (बहुः सूतिः प्रसवो यस्याः।) बहुफला गौः। इत्यमरः। २। ९। ७॥ बहुसन्तानप्रसवा च॥

बहुस्रवा, स्त्री, (बहु यथा स्यात् तथा स्रवति या। बहु+स्रु+अच्। टाप्।) शुक्लकोशुः। इति शब्दचन्द्रिका॥ अनेकक्षरस्रवणे त्रि॥

बहुस्वनः, पुं, (बहुः प्रचण्डः स्वनः शब्दो यस्य।) पेचकः। इति केचित्॥ अनेकशब्दयुक्ते, त्रि॥

बहूपलः, पुं स्त्री, (बहूनि अयस्कानि यस्य।) शूकरः। लुब्धकः। इति राजनिर्घण्टः॥ बहुसन्तानयुक्ते, त्रि॥

बह्वाशी, [न्] त्रि, (बहु अश्नातीति। बहु+अश्+णिनि।) बहुभोजनशीलः। यथा, चाणक्ये। ६९।

"बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् खुनो गुणाः॥"

(बह्वी आशा यस्य।) बह्वाशाविशिष्टः॥ (धृतराष्ट्रपुत्रविशेषे, पुं। यथा, महाभारते। १। ११७। १६।

"आदित्यकेतुर्बह्वाशी नागदन्तोऽयबाह्यपि॥")

बह्वृक्, स्त्री, ऋग्वेदः (बह्व्य ऋचो यस्मिन्।) सूक्ते, क्ली। इति सुग्धबोधव्याकरणम्॥ "बह्व्य ऋचोऽधीतेऽधा येन इति व्युत्पत्त्या ऋग्वेदज्ञे ब्राह्मणे, पुं। यथा, मनुः। ३। १४५।

"यत्नेन भोजयेत् श्राद्धे बह्वृचं वेदपारगम्॥"

केचित् बह्वृच इत्यकारान्तमिच्छन्ति॥)

बह्वृची, स्त्री, (बह्वृचस्य ऋग्वेदज्ञस्य पत्नी। बह्वृच+ङीप्।) ऋग्वेदवेत्तुः पत्नी। इति जटाधरः॥ (बह्व्य ऋचोऽधीतेऽधा यथा इति विषये अधीयुर्नामाध्येत्री स्त्री। अनृचश्चबह्वृचश्चार्थे तदधीतेवेति वचनात्। "ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। इत्यत्ययः समाप्तान्तः। "ओतश्च चरकैः सह" इति जातित्वात् ङीष्। यद्यपि स्त्रीणां स्वाध्यायाध्ययनं निषिद्धं तथापि पुरा कल्पेष्वेतदासीत्। यथाह यमः।

"पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनञ्च वेदानां सावित्रीवचनं तथा॥"
इति॥)

बा(वा)ड्, ऋ ड आप्तावे। खाने। इति कविकल्पद्रुमः॥ (भा०-आत्म०-अक०-सेट्। आप्तावः उत्खननम्। इति दुर्गादासः॥) बोपदेवेन अन्तःस्थवकारादौ गृहीतः॥ (बाड़ते। अड़ित् चड़ि न वृद्धः। अबबाड़त्॥)

बा(वा)ड़वं, क्ली, (बड़वानां समूहः। बड़वा+"खण्डिकादिभ्यश्च।" ४। २। ४५। इत्यण्।) बड़वासमूहः। इत्यमरः॥ (बड़वाया इदं

मिति । वड़वा+अण् । वड़वासम्बन्धिनि, त्रि । यथा, सुश्रुते । १ । ४५ ।
"दीपनीयमचक्षुष्यं वाड़वं दधि वातलम् ॥")
वा(वा)ड़व:, पुं, (वाड़ं यज्ञान्तस्थानं वाति प्राप्नोतीति । वाड़+वा+क: ।) ब्राह्मण: । (वड़वायां घोटक्यां जात: । वड़वा+अण् ।) वड़वानल: । इत्यमर: ॥ तत्पर्य्याय: । और्व्व: २ संवर्त्तक: ३ अब्धाग्नि: ४ वड़वामुख: ५ । इति हेमचन्द्र: ॥ (यथा, मार्कण्डेये । ६६ । ६४ ।
"महोदधेर्जठरगतस्य वाड़वो
भवान् विभूत्या परया करे स्थित: ॥")
वा(वा)ड़वाग्नि:, पुं, (वड़वा समुद्रस्था घोटकी तत्सम्बन्धिन: ।) वड़वानल: । इति जटाधर: ॥ (यथा, माघे । ११ । ४५ ।
"पयसि सलिलराशेर्नक्तमन्तर्निमग्न:
स्फुटमनिशमसापि ज्वालया वाड़वाग्ने: ॥")
वा(वा)ड़वाग्र्य:, पुं, (वाड़वेषु ब्राह्मणेषु अग्र्य: श्रेष्ठ: ।) ब्राह्मणश्रेष्ठ: । यथा,—
"इत्याकर्ण्य वचस्तस्य वाड़वाग्र्यस्य धीमत: ।
पप्रच्छ हृष्टमानस्कस्तीर्थयात्राविधिं मुनिम् ॥"
इति पाद्मे पातालखण्डे १६ अध्याय: ॥
वा(वा)ड़वेयौ, पुं, (वड़वाया घोटकरूपधारिण्या: सूर्य्यपत्न्या अपत्ये पुमांसौ । वड़वा+ढक् ।) अश्विनीकुमारौ । इति शब्दमाला ॥
वा(वा)ड़व्यं, क्ली, (वाड़वानां ब्राह्मणानां समूह: । वाड़व+"ब्राह्मणमाणववाड़वाद् यत् ।" ४।२। ४२ । इति यत् ।) ब्राह्मणसमूह: । इत्यमर: ॥
वाड़िङ्गन:, पुं, (वाड़ं जलं तस्मे इङ्गते इति । वाड़+इङ्ग+क्यु ।) वार्त्ताकु: । इति रत्नमाला ॥
वाढं, क्ली, (वाह प्रयत्ने+क्त: । "क्षुब्धस्वान्तध्वान्तेति ।" ७ । २ । १८ । इति निपातनात् साधु: ।) अतिशय: । (यथा, कथासरित्सागरे । २४ । ६८ ।
"वाढं मया सा नगरी दृष्टा विद्याबलेन सता ॥")
प्रतिज्ञा । इत्यमर: । ३ । ३ । ४४ ॥ वाढमित्यवधारणमपीति दुर्ग: । इति भरत: ॥
"वाढं किञ्चु दृढे क्लीबमशुभत्यागयो: किञ्चु ॥"
इति नानार्थरत्नमाला ॥
(सत्यम् । यथा, रघु: । १६ । ५२ ।
"वाढमेषु दिवसेषु पार्थिव:
कर्म्म साधयति पुत्रजन्मने ॥")
वा(वा)ण:, पुं, (वक्ति वाण: शब्दायतेऽस्मादिति । वाण+अच् ।) अस्त्रविशेष: । तिर इति भाषा । तत्पर्य्याय: । क्षुरप्र: २ विशिख: ३ अजिह्मग: ४ खग: ५ आशुग: ६ कलम: ७ मार्गण: ८ शर: ९ पत्री १० रोप: ११ इषु: १२ । इत्यमर: । २ । ८ । ८६ ॥ चित्रपुङ्ख: १३ शायक: १४ घोरतर: १५ तूणचेड: १६ काण्ड: १७ विपर्यक: १८ शर: १९ वाजी २० पत्रवाह: २१ अस्त्रकण्टक: २२ ॥ लौहमयबाणस्य पर्य्याय: । प्रचुण्ड: १ लोहनाल: २ नाराच: ३ ॥ शिलीमुखस्य पर्य्याय: । प्रहित: १ निरस्त: २ ॥ विशाखबाणस्य पर्य्याय: । तीक्ष्ण: १ लिम्पक: २ दिग्ध: ३ ॥ तीरो निष्फलसायके । इति शब्दरत्नावली ॥ * ॥ (यथा, ऋग्वेदे । ६ । ७५ । १७ ।
"यत्र बाणा: संपतन्ति कुमारा विशिखा इव ।
तत्रा नो ब्रह्मणस्पतिरदिति: शर्म्म यच्छतु
विश्वहा शर्म्म यच्छतु ॥")
बलिराजस्य ज्येष्ठपुत्र: । यथा,—
"बले: पुत्रशतं ह्यासीद्बाणज्येष्ठन्ततो द्विजा: ।
बाण: सहस्रबाहु: स्यात् सर्व्वास्त्रगुणसंयुत: ॥
तपसा तोषितो यस्य पुरे वसति शूलधृक् ।
महाकालत्वमगमत् साम्यं यस्य पिनाकिन: ॥"
इति मत्स्यपुराणे ५ अध्याय: ॥
(अस्य जन्मादिविवरणन्तु बाणयुद्धशब्दे द्रष्टव्यम् । विस्तृतिस्तु हरिवंशे विष्णुपर्व्वणि १७३ अध्यायमारभ्य द्रष्टव्या ॥) गोस्तन: । केवल: । इति मेदिनी । णे, २७ ॥ अग्नि: । इति त्रिकाण्डशेष: ॥ काण्डावयव: । इति विश्व: ॥ भद्रमुञ्ज: । इति राजनिर्घण्ट: ॥ (पुं. क्ली, नीलझिण्टी । इति वैजयन्ती ॥ यथा, माघे । ६ । ४६ ।
"विकचबाणदलावलयोऽधिकं
रुरुचिरे रुचिरेक्षणविभ्रमा: ॥"
वर्ण्यते शब्द्यते इति । वर्ण शब्दे+"अकर्त्तरि च कारके संज्ञायाम् ।" ३ । ३ । १६ । इति घञ् । बाण् । इति निघण्टु: ॥ इक्ष्वाकुवंशीयोऽयोध्याराज: खगमखातो विकुक्षे: पुत्र: । यथा, रामायणे । १ । ७० । २२—२३ ।
"इक्ष्वाकोस्तु सुत: श्रीमान् कुक्षिरित्येव विश्रुत: ।
कुक्षेरथात्मज: श्रीमान् विकुक्षिरुदपद्यत ॥
विकुक्षेस्तु महातेजा बाण: पुत्र: प्रतापवान् ।
बाणस्य तु महातेजा अनरण्य: प्रतापवान् ॥"
कादम्बरीप्रणेता कविविशेष: । यथा, कादम्बर्य्यां कविवंशवर्णने ।
"सरस्वतीपाणिसरोजसम्भव-
प्रसादहोमश्रमसीकराभ्यस: ।
यशोंशुशुक्लीकृततत्त्वविष्टपात्
तत: सुरो बाण इति व्यजायत ॥
द्विजेन तेनाचत कञ्चकौष्ठया
महामनोमोहमलीमसान्यया ।
अलब्धवेदग्ध्यविलासमुग्धया
धिया निबद्धेयमतिद्वयी कथा ॥"
अयमेव हर्षचरितप्रणेता इति केचित् ॥)
वा(वा)णगङ्गा, स्त्री, (बाणेन प्रकटिता गङ्गा नदी-विशेष: ।) रावणबाणनिर्भिन्नसोमेश्वरगिरि-भवनदीविशेष: । यथा,—
"सोमेशाद्दक्षिणे भागे बाणेनाद्रिं विभिद्य वै ।
रावणेन प्रकटिता जलधारातिपुण्यदा ।
बाणगङ्गेति विख्याता या स्नानादघहारिणी ॥
स्नात्वा तु बाणगङ्गायां दृष्ट्वा बाणेश्वरं विभुम् ।
गङ्गास्नानफलं प्राप्य मोदते देववद्दिवि ॥"
इति वाराहे सोमेश्वरादिलिङ्गमहिमावसुक्ति-क्षेत्रमहिमा त्रिवेण्यादिमहिमा नामाध्याय: ॥
वा(वा)णदण्ड:, पुं, (बाणस्य दण्ड: ।) बाणदण्ड: । तत्पर्य्याय: । वेमा २ । इति हेमचन्द्र: ॥
वा(वा)णपुङ्खा, स्त्री. (बाणस्य+पुङ्खा ।) शरपुङ्खा । इति राजनिर्घण्ट: ॥
वा(वा)णपुरं, क्ली, (बाणस्य राज्ञ: पुरं नगरम् ।) बाणराजनगरम् । तत्पर्य्याय: । देवीकोट: २ कोटीवर्षम् ३ ऊषावनम् ४ शोणितपुरम् ५ । इति त्रिकाण्डशेष: ॥ आषेयम् ६ ऊषावनम् ७ कोट्टवीपुरम् ८ । इति शब्दरत्नावली ॥
वा(वा)णभट्ट:, पुं, ग्रन्थकारविशेष: । (स तु कादम्बर्य्यादिग्रन्थप्रणेता ।) "ननु मङ्गलं कथं क्रियते मङ्गलाद्विघ्नध्वंस: विघ्नध्वंसात् प्रारिप्सितसिद्धिरिति चेन्न । बाणभट्टादेर्मङ्गले सत्यपि ग्रन्थसमाप्त्यभावात् माघादौ मङ्गलाभावेऽपि समाप्तिदर्शनात् ।" इति सुग्धबोधटीकायां दुर्गादास: ।
वा(वा)णयुद्धं, क्ली, (बाणेन सह युद्धम् ।) बाणराजेन सह श्रीकृष्णस्य संग्राम: । तस्य विवरणम् । यथा,—
श्रीशुक उवाच ।
"बाण: पुत्रशतज्येष्ठो बलेरासीन्महात्मन: ।
सहस्रबाहुर्वाद्येन ताण्डवेऽतोषयन्महम् ॥
भगवान् सर्व्वभूतेश: शरण्यो भक्तवत्सल: ।
वरेण च्छन्दयामास स तं वव्रे पुराधिपम् ॥
स एकदाह गिरिशं पार्श्वस्थं वीर्य्यदुर्म्मद: ।
किरीटेनार्कवर्णेन संस्पृशंस्तत्पदाम्बुजम् ॥
नमस्ये त्वां महादेव ! लोकानां गुरुमीश्वरम् ।
पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम् ॥
दो:सहस्रं त्वया दत्तं परं भाराय मेऽभवत् ।
त्रिलोक्यां प्रतियोद्धारं न लभे त्वदृते समम् ॥
कण्डूत्या निष्टतैर्दोर्भिर्युयुत्सुर्दिग्गजानहम् ।
आद्यायां चूर्णयन्नद्रीन् भीतास्तेऽपि प्रदुद्रुवु: ॥
तत् श्रुत्वा भगवान् क्रुद्ध: केतुस्ते भज्यते यदा ।
तदर्म्मभं भवेन्मूढ ! संयुगं मत्समेन ते ॥
इत्युक्त: कुमतिर्हृष्ट: स्वगृहं प्राविशन्नृप ! ।
प्रतीक्षन् गिरिशादेशं स्वकीर्य्यनगरं कुधी: ॥
तस्योषा नाम दुहिता स्वप्ने प्रादुम्निना रतिम् ।
कन्याजभत कान्तेन प्राग्दृष्टश्रुतेन सा ॥
सा तत्र तमपश्यन्ती क्वासि कान्तेतिवादिनी ।
सखीनां मध्य उत्तस्थौ विह्वला व्रीडिता भृशम् ॥
बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता ।
सख्यपृच्छत् सखीन्यां कौतूहलसमन्विता ॥
कं त्वं मृगयसे ! सुभ्रु ! कीदृशस्ते मनोरथ: ।
हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये ॥
ऊषोवाच ।
दृष्ट: कश्चिन्नर: स्वप्ने श्याम: कमललोचन: ।
पीतवासा बृहद्बाहुर्योषितां हृदयङ्गम: ॥
तमहं मृगये कान्तं पाययित्वाधरं मधु ।
क्वापि यात: सृहयन्तीं क्षिप्त्वा मां दृक्शरार्त्तये ॥

चित्रलेखोवाच ।

व्यसनस्तेऽपनेष्यामि त्रिलोक्यां यदि भाव्यते ।
तमानेष्ये वरं यस्ते मनोहर्त्ता तमादिश ॥
दृष्ट्वा देवगन्धर्वसिद्धचारणपन्नगान् ।
दैत्यविद्याधरान् यक्षान् मनुजांश्च यथालिखत् ॥
मनुजेषु च सा दृष्ट्वीष्कूरमानकदुन्दुभिम् ।
बलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥
अनिरुद्धं विलिखितं वीक्ष्योषावाङ्मुखी
ह्रिया ।
सोऽसावसाविति प्राह स्मयमाना मधीयते ! ॥
चित्रलेखा तमाज्ञाय यौत्नं कृष्णस्य योगिनी ।
ययौ विहायसा राजन् ! द्वारकां कृष्णपालिताम् ॥
तत्र सुप्तं सुपर्यङ्के प्राद्युम्निं योगमास्थिता ।
गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत् ॥
सा च तं सुन्दरवरं विलोक्य मुदितानना ।
दुर्धर्षं स्वगृहे पुंभी रेमे प्राद्युम्निना समम् ॥
परार्ध्यवासः स्रग्गन्धधूपदीपासनादिभिः ।
पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषयार्चितः ॥
गूढः कन्यापुरे प्रद्युम्न प्रवृद्धस्नेहया तया ।
नाहर्गणान् स बुबुधे ऊषयापहृतेन्द्रियः ॥
तां तथा यदुवीरेण सुभ्यमानां हृतव्रपाम् ।
हेतुभिर्लक्षयाञ्चक्रुरारीतां दुरवच्छदैः ॥
भटा आवेदयाञ्चक्रू राजंस्ते दुहितुर्व्रजम् ।
विचेष्टितं लक्षयामः कन्याया कुलदूषणम् ॥
अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो ! ।
कन्याया दूषणं पुंभिर्दुष्प्रेक्षाया न विद्महे ॥
ततः प्रधर्षितो बाणो दुहितुः श्रुतदूषणः ।
त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीदुषादूढम् ॥
कामात्मजं तं भुवनैकसुन्दरं
श्यामं पिशङ्काम्बरमम्बुजेक्षणम् ।
दृष्ट्वा मुखं कुञ्चितकुन्तलत्विषा
स्मितावलोकेन च मण्डिताननम् ॥
दौश्चल्यमर्षैः प्रियया भृशोद्यया
तदङ्गसङ्गोत्थसुकर्मशोभनम् ।
बाहोर्दधानं मधुमल्लिकाश्रितां
तस्याश्च आसीनमवेक्ष्य विस्मितः ॥
स तं प्रविष्टं व्रतमाततायिभि-
र्भटैरनेकैरवलोक्य माधवः ।
उद्यम्य मौर्व्वं परिघं व्यवस्थितो
यथान्तको दण्डधरो जिघांसया ॥
जिघृक्षया तान् परितः प्रसर्पतः
शुनो यथा शूकरयूथपोऽहनत् ।
ते हन्यमाना भवनाद्विनिर्गता
निर्भिन्नमूर्द्धोरुभुजाः प्रदुद्रुवुः ॥
तं नागपाशैर्बलिनन्दनो बली
बद्ध्वा ससैन्यं रुषितो बबन्ध ह ।
ऊषा भृशं शोकविषादविप्लवा
बद्धं निशम्याश्रुकलाक्षरोत्सीत् ॥"

इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कन्धे बाणयुद्धे द्विषष्टितमोऽध्यायः ॥ * ॥

श्रीशुक उवाच ।

"अथप्रद्युम्नसाम्बादिरुद्धं तद्दयितानपि भारत ! ।
चत्वारो वार्षिका मासा यतीयुरनुशोचताम् ॥
नारदात्तदुपाकर्ण्य वार्त्तां बद्धस्य कर्म्म च ।
प्रययुः शोणितपुरं हृष्याः कृष्णदेवताः ॥
प्रद्युम्नो युयुधानश्च गदः साम्बोऽथ सारणः ।
नन्दोपनन्दभद्राद्या रामकृष्णानुवर्त्तिनः ॥
अक्षौहिणीभिर्द्वादशभिः समेताः सर्व्वतो
दिशम् ।
रुरुधुर्बाणनगरं समन्तात् सात्वतर्षभाः ॥
भज्यमानपुरोद्यानप्राकाराट्टालगोपुरम् ।
प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योऽभिनिर्ययौ ॥
बाणार्थे भगवान् रुद्रः ससुतः प्रमथैर्वृतः ।
आरुह्य नन्दिवृषभं युयुधे रामकृष्णयोः ॥
आसीत् सुतुमुलं युद्धमद्भुतं लोमहर्षणम् ।
कृष्णशङ्करयो राजन् ! प्रद्युम्नगुहयोरपि ॥
कुम्भाण्डकूपकर्णाभ्यां बलेन सह संयुगम् ।
शम्बस्य बाणपुत्रेण बाणेन सह सात्यकेः ॥
ब्रह्मादयः सुराधीशाः मुनयः सिद्धचारणाः ।
गन्धर्व्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥
भूतप्रेतपिशाचांश्च कुष्माण्डान् ब्रह्मराक्षसान् ।
द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः ॥
पृथग्विधानि प्रायुङ्क्त पिशाचास्त्राणि
शार्ङ्गिणे ।
प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः ॥
ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्व्वतम् ।
आग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च ॥
मोहयित्वाथ गिरिशं जृम्भणास्त्रेण जृम्भितम् ।
बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः ॥
स्कन्दः प्रद्युम्नबाणौघैरर्द्यमानः समन्ततः ।
असृग्विसृजन् गात्रेभ्यः शिखिना प्राद्रवद्रणात् ॥
कुम्भाण्डः कूपकर्णश्च पेतुर्मुष्टाहतौ भृशम् ।
दुद्रुवुस्तदनीकानि हतनाथानि सर्व्वशः ॥
वीक्ष्यार्द्यमानं स्वबलं दृष्ट्वा बाणोऽत्यमर्षितः ।
कृष्णमभ्यद्रवत् संख्ये रथी हित्वैव सात्यकिम् ॥
धनूंष्याकृष्य युगपद्बाणाः पञ्चशतानि वै ।
एकैकस्मिन् शरौ द्वौ द्वौ सन्दधे रजदुन्मदः ॥
तानि चिच्छेद भगवान् धनूंषि युगपद्धरिः ।
सारथिं रथमश्वांश्च हत्वा शङ्खमपूरयत् ॥
तन्माता कोट्टवी नाम नग्ना मुक्तशिरोरुहा ।
पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया ॥
ततस्तिर्य्यङ्मुखो नग्नामनिरीक्षन् गदायुधः ।
बाणश्च तावद्विरथश्छिन्नधन्वाविशत् पुरम् ॥
विद्राविते भूतगणे ज्वरस्तु त्रिशिराक्षिपात् ।
अभ्यधावत दाशार्हं दहन्निव दिशो दश ॥
अथ नारायणो देवस्तं दृष्ट्वा व्यसनं ज्वरम् ।
माहेश्वरो वैष्णवश्च युयुधाते ज्वराद्भुतौ ॥
माहेश्वरः समाक्रन्दन् वैष्णवेन बलार्दितः ।
अलब्ध्वा भयमन्यत्र भीतो माहेश्वरो ज्वरः ॥
शरणार्थी हृषीकेशं तुष्टाव प्रयताञ्जलिः ॥

ज्वर उवाच ।

नमामि त्वानन्तशक्तिं परेशं
सर्व्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं
यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥
कालो दैवं कर्म्म जीवः स्वभावो
द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
तत्संघातो बीजरोहप्रवाह-
स्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥
नानाभावैर्लीलयैवोपपन्ने-
र्देवान् साधून् लोकसेतून् बिभर्षि ।
हंस्युन्मार्गान् हिंसया वर्त्तमानान्
जन्मैतत्ते भारहाराय भूमेः ॥
तप्तोऽहन्ते तेजसा दुःसहेन
शान्तोग्रेणात्युल्बणेन ज्वरेण ।
तावत्तापो देहिनां तेऽङ्घ्रिमूलं
नो सेवेरन् यावदाशानुबद्धाः ॥

श्रीभगवानुवाच ।

त्रिशिरस्ते प्रसन्नोऽहं यतु ते मज्ज्वराद्भयम् ।
यो नौ स्मरति संवादं तस्य त्वन्नो भवेद्भयम् ॥
इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ।
बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्दनम् ॥
ततो बाहुसहस्रेण नानायुधधरो नृपः ।
सुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप ! ॥
तस्यास्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना ।
चिच्छेद भगवान् बाहूञ्शाखा इव वनस्पतेः ॥
बाहुषु च्छिद्यमानेषु बाणस्य भगवान् भवः ।
भक्तानुकम्प्युपव्रज्य चक्रायुधमभाषत ॥

श्रीरुद्र उवाच ।

त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ।
यं पश्यन्त्यमलात्मानमाकाशमिव केवलम् ॥
नाभिर्नभोऽग्निर्मुखमम्बरेतो
द्यौः शीर्षमाशाः श्रुतिरङ्घ्रिरुर्वी ।
चन्द्रो मनो यस्य हृदर्क आत्मा
अहं समुद्रो जठरं भुजेन्द्रः ॥
रोमाणि यस्यौषधयोऽम्बवाहाः
केशा विरिञ्चो धिषणा विसर्गः ।
प्रजापतिर्हृदयं यस्य धर्म्मः
स वै भवान् पुरुषो लोककल्पः ॥
तवावतारोऽयमकुण्ठधामन्
धर्म्मस्य गुप्त्यै जगतो भवाय ।
वयं च सर्व्वे भवतानुभाविता
विभावयामो भुवनानि सप्त ॥
त्वमेक आद्यः पुरुषोऽद्वितीय-
स्तुर्य्यः सदृग्धेतुरहेतुरीशः ।
प्रतीयसेऽथापि यथा विकारं
स्वमायया सर्व्वगुणप्रसिद्ध्या ॥
यथैव सूर्य्यः पिहितः स्वछायया
छायां च रूपाणि च सञ्चकास्ति ।
एवं गुणेनापिहितो गुणांस्त्व-
मात्मप्रदीपो गुणिनश्च भूमन् ॥

यन्मायामोहितधियः पुत्रदारगृहादिषु ।
उन्मज्जन्ति निमज्जन्ति प्रसक्ता वृजिनार्णवे॥
देवदत्तमिमं लब्ध्वा नृलोकमजितेन्द्रियः ।
यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्म-
वञ्चकः॥
यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरम् ।
विपर्ययेन्द्रियार्थार्थं विषमत्त्यमृतं त्यजेत् ॥
अहं ब्रह्माथ विबुधा मुनयश्चामलाशयाः ।
सर्व्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरम् ॥
तं त्वां जगत्स्थित्युदयान्तहेतुं
समं प्रशान्तं सुहृदात्मदैवम् ।
अनन्यमेकं जगदात्मकेतुं
भवापवर्गाय भजाम देवम् ॥
अयं ममेष्टो दयितोऽनुवर्त्ती
मयाभयं दत्तमसुष्य देव ! ।
सम्पाद्यतां तद्भवतः प्रसादो
यथा हि ते दैत्यपतौ प्रसादः ॥
श्रीभगवानुवाच ।
यदात्थ भगवंस्तात करवाम प्रियन्तव ।
भवतो यद्व्यवसितं तन्मे साध्वनुमोदितम् ॥
अवध्योऽयं ममाप्येव वैरोचनसुतोऽसुरः ।
प्रह्लादाय वरो दत्तो न वध्यो मे तवान्वयः॥
दर्पोपशमनायास्य प्रक्षत्ता बाहवो मया ।
क्षुदितश्च बलं भूरि यच्च भारायितं भुवः ॥
चत्वारोऽस्य सुताः शिष्टा भविष्यत्त्रजरामराः ।
पार्षदमुख्यो भवतो न कुतश्चिद्भयोऽसुरः ॥
इति लब्धाभयं कृष्णं प्रणम्य शिरसासुरः ।
प्रायुङ्क्त रथमारोप्य स बध्वा सपुनायत ॥
अक्षौहिण्या परिवृतं सुवासःसमलङ्कृतम् ।
सपत्नीकं पुरस्कृत्य ययौ रुद्रानुमोदितः ॥
स राजधानीं समलङ्कृतां ध्वजै-
र्मनोरमैर्भूषितमार्गचत्वराम् ।
विवेश शङ्खानकदुन्दुभिस्वनै-
रभ्युद्यतः पौरसुहृद्द्विजातिभिः ॥
य एतत् कृष्णविजयं शङ्करेण च संयुगम् ।
संस्मरेत् प्रातरुत्थाय न तस्य स्यात् पराजयः॥"
इति श्रीभागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यां दशमस्कन्धे बाणासुर-
संग्रामे श्रीकृष्णविजयस्त्रिषष्टितमोऽध्यायः ॥

वा(वा)णलिङ्गं, क्ली, (बाणार्चनार्थं कृतं लिङ्गम् । अन्यस्य निरुक्तिरुक्ता हेमाद्रौ। यथा,—
"बाणः सदाशिवो देवो बाणो बाणान्तरोऽपि च ।
तेन यस्मै कृतं तस्माद्बाणलिङ्गमुदाहृतम् ॥")
नर्म्मदानदुद्भवशिवलिङ्गम् । तस्य विवरणम् । यथा,—
"नर्म्मदाजलमध्यस्थं बाणलिङ्गमिति स्मृतम् ।
बाणलिङ्गे स्वयम्भूते चन्द्रकान्ताश्रयं स्थितम् ॥
चान्द्रायणशतं कार्य्यं भ्रूणहत्यानिवेदभक्षणात् ।
आत्माश्रयात्मविभागोऽयं बाणलिङ्गे न विद्यते ।
तदर्पितं जलं वाऽन्नं श्राद्धं प्रसादसंज्ञया ॥
शिवनाभमयं लिङ्गं सदा पूज्यं महर्षिभिः ।
यतश्च सर्व्वलिङ्गेभ्यस्तद्धि पूज्यतमं मतम् ॥
चतुरङ्गुलमुच्छ्रायं रम्यं वेदिकया युतम् ।
उत्तमं लिङ्गमाख्यातं प्रशस्तैश्च सुसाधितम् ॥
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमवरं स्मृतम् ।
तस्य ऊनं पूजनीयं न कदापि न तत्फलम् ॥
रुद्राक्षं शिवलिङ्गञ्च स्थूलस्थूलं प्रशस्यते ।
ग्रालग्रामो नार्म्मदश्च सूक्ष्मसूक्ष्मो विशिष्यते ॥"
पार्थिवादिलिङ्गापेक्षया बाणलिङ्गस्य श्रेष्ठत्वम् यथा,—
"कोमलेषु तु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते ।
कठिनेषु तु पाषाणं पाषाणात् स्फाटिकं परम् ॥
स्फाटिकात् पद्मरागश्च काश्मीरं पद्मरागतः ।
काश्मीरात् पुष्परागोत्थमिन्द्रनीलोद्भवं ततः ॥
इन्द्रनीलाच्च गोमेदं गोमेदाद्विद्रुमोद्भवम् ।
विद्रुमान्मौक्तिकं श्रेष्ठं तस्मात् श्रेष्ठन्तु राजतम् ॥
हैरण्यं राजतात् श्रेष्ठं हैरण्यात्तारकं वरम् ।
तारकात् पारदं श्रेष्ठं बाणलिङ्गं ततः परम् ॥"
इति मेरुतन्त्रे ६ प्रकाशः ॥
अथ बाणलिङ्गलक्षणम् । वीरमित्रोदयधृत-
कालोत्तरे ।
"बाणलिङ्गं तथा ज्ञेयं शुक्तिसुक्तिप्रदायकम् ।
उत्पत्तिं बाणलिङ्गस्य लक्षणं शृणुत यत्नः ॥
नर्म्मदादेविकायाश्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यनदीनाञ्च बाणलिङ्गानि वत्सक ! ॥
इन्द्रादिपूजितान्यत्र तच्चिह्नैर्विहितानि च ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ।
इन्द्रलिङ्गानि तान्याहुः सान्नाय्यार्थप्रदानि च ॥"
इतीन्द्रलिङ्गलक्षणम् ॥
"आरक्तं छिद्रकौलालसुषमाश्रीं करोत्यलम् ।
आग्नेयं तच्छक्तिनिभमथवा शुक्तिलाञ्छितम् ।
इदं लिङ्गवरं स्थाप्य तेजसाधिपतिर्भवेत् ॥"
इत्याग्नेयलिङ्गलक्षणम् ॥
"दक्षाकारं भवेद् याम्यमथवा रसनाकृति ।
यद्यदुक्तं सह तैर्न निर्निक्तं ज्ञायते तदा ।
निर्लिक्तं निधनत्वेन क्रियते स्थापितेन तु ॥"
इति याम्यलिङ्गलक्षणम् ॥
"राक्षसं खड्गसदृशं ज्ञानयोगफलप्रदम् ।
ककैरादिप्रलिप्तन्तु कुरूक्तकुत्सितयुतं तथा ।
राक्षसं निष्कृते लिङ्गं गार्हस्थे न सुखप्रदम् ॥"
इति नैर्ऋतलिङ्गलक्षणम् ॥
"वारुणं वर्त्तुलाकारं पाण्डुरं चालिवर्चसम् ।
वृद्धिं सुखादैर्वत्सलसंभोगाप्तन्तु मध्यगे ॥"
इति वारुणलिङ्गलक्षणम् ॥
"कृष्णं घृष्टं नवारुण्यं श्यामाभं श्यामसूत्रकम् ।
मस्तके स्थापितं तस्य न्यूनन्यूनमितस्ततः ॥"
इति वायुलिङ्गलक्षणम् ॥
"तूणपाशुपदाकारं गुह्यकेशस्य मध्यगम् ॥"
इति कुबेरलिङ्गलक्षणम् ॥
"दिनं वाप्यथवा रात्रिं ग्रस्याद्वृद्धिकरैर्बलम् ।
अक्षिमूलाङ्कितं रौद्रं हिमकुङ्कलवर्चसम् ॥"
इति रौद्रलिङ्गलक्षणम् ॥
"चतुर्व्वर्णमयं वापि वैष्णवं ज्ञायतेऽयतः ।
वैष्णवं शङ्खचक्राङ्कगदाद्यादिविभूषितम् ॥
श्रीवत्सकौस्तुभाङ्कञ्च सर्व्वसिद्धासनाङ्कितम् ।
वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम् ॥
वैष्णवं नाम तत् प्रोक्तं सर्व्वैश्वर्य्यफलप्रदम् ॥"
इति वैष्णवलिङ्गलक्षणम् ॥
"ग्रालग्रामादिसंस्थन्तु शङ्खाङ्कं श्रीविवर्द्धनम् ।
पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये ॥"
इत्यपि वैष्णवलिङ्गलक्षणम् ॥
हेमाद्रिधृतलक्षणकाण्डे ।
नारद उवाच ।
"अथ वक्ष्यामि ते विप्रचिह्नमेकादशं परम् ।
अवणाद्दृश्य पापानि नाशमायान्ति तत्-
क्षणात् ॥
मधुपिङ्गलवर्णाभं कृष्णकुक्षलिकायुतम् ।
स्वयम्भुलिङ्गमाख्यातं सर्व्वसिद्धैर्निषेवितम् ॥
नानावर्णसमाकीर्णं जटामूलसमन्वितम् ।
स्थूलशुक्लयाकृतं लिङ्गं सुरासुरनमस्कृतम् ॥
दीर्घाकारं शुभवर्णं कृष्णबिन्दुसमन्वितम् ।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरैः ॥
शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम् ।
त्रिलोचनं महादेवं सर्व्वपापप्रणोदनम् ॥
ज्वलल्लिङ्गं जटाजूटं कृष्णाभं स्थूलविग्रहम् ।
कालाग्निरुद्रमाख्यातं सर्व्वसत्त्वैर्निषेवितम् ॥
मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतकम् ।
श्वेतपद्मसमासीनं चक्ररेखाविभूषितम् ।
प्रलयाब्दसमायुक्तं त्रिपुरारिसमाह्वयम् ॥
शुभ्राभं पिङ्गलजटं मुण्डमालाधरं परम् ।
त्रिशूलधरमीशानं लिङ्गं सर्व्वार्थसाधनम् ॥
त्रिशूलडमरुधरं शुभ्रवस्त्रार्द्धभागतः ।
अर्द्धनारीश्वराकारं सर्व्वदेवैरभीष्टदम् ॥
ईषद्रक्तमयं कान्तं स्थूलं दीर्घं ससुज्ज्वलम् ।
महाकालं समाख्यातं धर्म्मकामार्थमोक्षदम् ॥
एतत्तु कथितं तुभ्यं लिङ्गचिह्नं महर्षिभिः ।
एकेनैव कृतार्थः स्यात् बहुभिः किमु सुव्रत ! ॥"
इति बाणलिङ्गचिह्नानि ॥
वीरमित्रोदयधृतकालोत्तरे ।
"उत्तमाङ्गं श्रेयसे योज्यं श्रीवर्द्धनं विवर्ज्जयेत् ।
यमवर्णन्तु यल्लिङ्गं यमाङ्गं वा कमण्डलुम् ॥
दक्षाङ्गं खड्गचिह्नं वा ब्रह्मज्ञानान्वितं मतम् ।
अग्निवर्णं महाकालं नन्दीशं पद्मरागवत् ॥
पद्मरागनिभं सर्व्वं महाभं सिद्धिपूजितम् ।
मौक्तिकाभं नीलनिभं रुद्रादित्यैः प्रपूजितम् ॥
वसुदेवः शेक्रयज्ञेशगुह्यकैर्यातुधानकैः ।
नानावर्णमयं नीलं शङ्खाङ्कमब्जलप्रभम् ॥"
इति बाणलिङ्गलक्षणम् ॥
वीरमित्रोदयधृतम् ।
"इत्येतत् लक्षणं प्रोक्तं परीक्षातत्त्वकोविदैः ।
त्रिःसप्तपक्षवारं वा तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शैलं पाषाणसम्भवम् ॥"
तुलाकरणन्तु तण्डुलेन । अपरतुलादिषु तण्डुला यद्यधिकाः स्युस्तदा तल्लिङ्गं शैलिकं पूज्य-
मवधार्य्यं लिङ्गभेदधिकं तदौदासीनपूज्यत्व-

इति किंवदन्तीति हेमाद्रिधृतलक्षणकाण्डे ॥
सूतसंहितायान्तु ।
"सप्तकल्पसुलारूढं वृद्धिमेति न हीयते ।
बाणलिङ्गमिति ख्यातं श्रेयं नर्म्मदसुच्यते ॥
त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं श्रेयं पाषाणसम्भवम् ॥"
वीरमित्रोदये ।
"नद्यां वा प्रक्षिपेद्यो यदा तदुपलभ्यते ।
बाणलिङ्गं तदा विद्धि न्यूनं सुखविवर्द्धनम् ॥"
इति बाणलिङ्गपरीक्षा ॥
बाणशब्दव्युत्पत्तिरपि तत्रैव ।
"अथ बाणं समाख्यातं यथा वस्ते तथादितः ।
बाणः सदाशिवो देवो बाणो बाणान्तरोऽपि च ॥
तेन यस्मै कृतं तस्माद्बाणलिङ्गमुदाहृतम् ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ॥
कृतप्रतिष्ठं तल्लिङ्गं बाणास्त्रेण शिवेन च ।
पङ्कजस्य फलाकारं कुक्कुटस्य समाकृति ॥"
पङ्कजफलं पद्मबीजम् । पङ्कजमुफलाकारं कुक्कुटाण्डसमाकृतीति हेमाद्रिधृतलक्षणकाण्डे पाठः।
"भुक्तिमुक्तिप्रदत्वेव बाणलिङ्गमुदाहृतम् ॥"
यामलवह्न्यसंहितायां देवीं प्रति शिववाक्यम्।
"प्रशस्तं नार्म्मदं लिङ्गं पङ्कजमुफलाकृति ।
मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम् ॥
हंसडिम्बाकृति पुनः स्थापनायां प्रशस्यते ।
स्वयं संभवते लिङ्गं गिरितो नर्म्मदातटे ।
पुरा बाणासुरेणाहं प्रार्थितो नर्म्मदातटे ।
अविवासं गिरौ तत्र लिङ्गरूपी महेश्वरः ।
बाणलिङ्गमपि ख्यातमतोऽर्थाल्लगतीतले ॥
अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत् ।
तत् फलं लभते मर्त्त्यो बाणलिङ्गैकपूजनात् ॥"
तथा ।
"ताम्री वा स्फाटिकी स्वार्णी पाषाणी राजती तथा ।
वेदिका च प्रकर्त्तव्या तत्र संस्थाप्य पूजयेत् ॥
प्रत्यहं योऽर्चयेल्लिङ्गं नार्म्मदं भक्तिभावतः ।
ऐहिकं किं फलं तस्य मुक्तिस्तस्य करे स्थिता ॥"
इति प्रत्यहबाणलिङ्गपूजाफलम् ॥
सूतसंहितायाम् ।
"संस्थाप्य श्रीबाणलिङ्गं रत्नकोटिगुणं भवेत् ।
रसलिङ्गे ततो बाणात् फलं कोटिगुणं स्मृतम् ॥
गुणांस्तु रसलिङ्गस्य वक्तुं शक्नोति शङ्करी ।
सिद्धयो रसलिङ्गे स्युरष्टिमाद्याः सुसंस्थिताः ॥"
केदारखण्डे ।
"रत्नधातुमयान्येव लिङ्गानि कथितान्यपि ।
पवित्राण्येव पूज्यानि सर्व्वकामप्रदानि च ॥
एतेषामपि सर्व्वेषां काश्मीरं हि विशिष्यते ।
काश्मीरादपि लिङ्गाच्च बाणलिङ्गं विशिष्यते ॥
बाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते ।
ऐहिकामुष्मिकं सर्व्वं पूजाकर्त्तुः प्रयच्छति ॥"
इति बाणलिङ्गप्रशंसा ॥
निन्दलिङ्गमाह तत्रैव ।
"कर्कशे बाणलिङ्गे तु पुत्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ॥
एकपार्श्वस्थिते धेनुपुत्रदारधनक्षयः ।
शिरसि स्फुटिते बाणे व्याधिर्मरणमेव च ॥
छिद्रलिङ्गेऽर्चिते बाणे विदेशगमनं भवेत् ।
लिङ्गे च कर्णिकां दृष्ट्वा व्याधिमान् जायते पुमान् ।
व्युत्पत्तिविलाये तु गोधनानां क्षयो भवेत् ॥"
हेमाद्रिधृतम् ।
"तीक्ष्णाग्रं वक्रशीर्षं च त्र्यस्रलिङ्गं विवर्ज्जयेत् ।
अतिस्थूलं चातिकृशं खण्डं वा भूषणान्वितम् ।
गृही विवर्ज्जयेत्ताहक् तद्धि मोक्षार्थिनो हितम् ॥"
इति दुष्टबाणलिङ्गलक्षणम् ॥
शुभलिङ्गमाह वीरमित्रोदये ।
"अर्धदं कपिलं लिङ्गं धनार्थं मोक्षकाङ्क्षिणाम् ।
लघु वा कपिलं स्थूलं गृही नैवार्चयेत् क्वचित् ॥
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ।
तत्सपीठमपीठं वा मन्त्रसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं लिङ्गं सर्व्वप्रासादपीठगम् ॥"
इति शुभबाणलिङ्गलक्षणम् ॥
स्कन्दसंहितायां भैरववाक्यम् ।
"बाणासुरः पुरा भद्रे ! शिवस्यातीव वल्लभः ।
जितः क्रोधोऽनुरक्तश्च शिवपूजाविधौ रतः ॥
बद्धिप्रो निपुणश्चैव शिवध्यानो लक्षणान्वितः ।
दिने दिने स्वयं दत्त्वा लिङ्गं स्थाप्य प्रपूजयेत् ॥
एवं वर्षशतं देवि ! दिव्यमानेन पूजयेत् ।
तदा तद्भक्तिसुलभः प्रत्यक्षः शङ्करो भवेत् ॥
शङ्कर उवाच ।
तुष्टोऽहं तव हे बाण ! वरं ब्रूहि किमिच्छसि ।
शङ्करस्य वचः श्रुत्वा बाणो वचनमब्रवीत् ॥
यदि तुष्टोऽसि हीनाय मह्यं त्वं मन्दभागिने ।
क्रियोऽहं तव देवेश ! लिङ्गं कृत्वा दिने दिने ॥
तत्तल्लक्षणसंसिद्धलक्षणं शास्त्रनिर्म्मितम् ।
शास्त्रार्थो दुर्लभो देव ! सिद्धस्तार्थश्च दुर्लभः ॥
तस्मात्त्वं यदि मे तुष्टो लिङ्गं देहि सुलक्षणम् ।
सर्व्वकामप्रदातार्थश्च सर्व्वसत्त्वानुकम्पनम् ।
सर्व्वेषाञ्च हितार्थाय प्रसादं कुरु शङ्कर ! ॥
इत्येवं वचनं तस्य शिवः परमकारणम् ।
श्रुत्वा कैलासमद्धानं शङ्करेण विनिर्म्मितः ॥
लिङ्गानां कोटिसंख्याश्च तथा चैव चतुर्दश ।
सिद्धलिङ्गं तदा तत्तु सर्व्व सदोदयं स्वयम् ॥
अयोध्यैवं सुसम्पूर्णं बाणस्य च समर्पितम् ।
अक्षय्यफलदं बाणं स्थाप्यमानञ्च नित्यशः ।
संपूज्य बाणः सद्भावं कृत्वा प्रणयनम्रदा ॥
तद्भावं स्वपुरं नीत्वा नूनं चिन्तयते शुचिः ।
अक्षयं यदि संसिद्धं स्थाप्यमानं दिने दिने ॥
सत्त्वानां सिद्धिहेत्वर्थं बाणस्थाने सुसंस्थिते ।
लिङ्गानां कालिकागर्त्ते सञ्चितासु त्रिकोटिषु ॥
श्रीशैले कोटयस्तिस्रः कोट्येका कन्यकाश्रमे ।
माहेश्वरे च कोटिस्तु कन्यातीर्थे तु कोटिका ॥
मरेन्द्रे चैव नेपाले एकैका कोटिरेव च ।
बाणार्थार्थं कृतं लिङ्गं बाणलिङ्गमतः स्मृतम् ॥
बाणो वा शिव इत्युक्तस्तत्कृतं बाणमुच्यते ॥
तस्मात्तेषु प्रदेशेषु पुण्यस्थानेषु तेषु वा ।
स्थितं तल्लिङ्गसद्भावं शिवस्याज्ञातिविग्रहे ॥"
इत्या तदाकृतिलक्षणसमुच्चयेऽपि ।
"स्वयम्भुलिङ्गबाणलिङ्गं मुक्ते स्वमुक्तये ।
सहस्रफलमन्यस्मादृषयो स्थापनपूजने ॥
श्रीशैले कालिकागर्त्ते लिङ्गाद्यौ कन्यकाश्रमे ।
कन्यातीर्थे वने याने महेन्द्रे वा सुरेश्वरे ॥
स्थितानि बाणलिङ्गानि शिवेनैव कृतानि तु ॥"
सिद्धान्तशेखरे बाणलिङ्गान्यधिकृत्य ।
"तदनेकप्रकारं स्यादन्यवर्णमपीठकम् ।
लक्ष्मलक्षणविहीनञ्च बाणं तत् पृथुलायकम् ॥"
बाणलिङ्गेष्वावाहनादि न कर्त्तव्यम् । तदुक्तं भविष्ये ।
"बाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं न च ॥" इति योगसारे पञ्चमपरिच्छेदे ।
"ब्राह्मे मुहूर्त्ते चोत्थाय यः स्मरेद्बाणलिङ्गकम् ।
सर्व्वत्र जयमाप्नोति सत्यं सत्यं महेश्वर ! ॥"
अथ बाणलिङ्गध्यानं तत्रैव ।
ॐ प्रमत्तं शक्तिसंयुक्तं बाणाख्यञ्च महाप्रभम् ।
कामबाणान्वितं देवं संसारदहनक्षमम् ॥
शङ्कारादिरसोल्लासं बाणाख्यं परमेश्वरम् ।
एवं ध्यात्वा बाणलिङ्गं यजेत्तं परमं शिवम् ॥
मनसा गन्धपुष्पाद्यैः संपूज्यास्य मनुं स्मरेत् ॥"
तथा ।
"प्राणायामं ततः कृत्वा बाणलिङ्गन्तु तोषयेत् ।
तदिष्टदेवयोरैक्यं विभाव्य वाग्भवं जपेत् ॥
ततो जपं समाप्याथ स्तवेनानेन तोषयेत् ॥"
अथ स्तवः ।
"ॐ बाणलिङ्ग महाभाग संसारात्त्राहि मां प्रभो ॥
नमस्ते घोररूपाय नमस्ते वक्त्रयोनये ॥
संसाराकारिणे तुभ्यं नमस्ते सूक्ष्मरूपधृक् ।
प्रमत्ताय महेन्द्राय कालरूपाय वै नमः ॥
दहनाय नमस्तुभ्यं नमस्ते योगकारिणे ।
भोगिनां भोगकर्त्रे च मोक्षदात्रे नमो नमः ॥
नमः कामाङ्गनाशाय नमः कल्मषहारिणे ।
नमो विश्वप्रदात्रे च नमो विश्वस्वरूपिणे ॥
बाणस्य वरदात्रे च रावणस्य क्षयाय च ।
रामस्यानुग्रहार्थाय राज्याय भरतस्य च ॥
मुनीनां योगदात्रे च राक्षसानां क्षयाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥
ऐं दाहिकाशक्तियुक्ताय महामायाप्रियाय च ।
भगप्रियाय सर्व्वाय वैरिणां नियहाय च ॥
परिव्राजाय योगिनां कौलिकानां प्रियाय च ।
कुलाङ्गनानां भक्ताय कुलाचाररताय च ॥
कुलभक्ताय योगाय नमो नारायणाय च ।
मधुपानप्रमत्ताय योगेशाय नमो नमः ॥
कुलनिन्दाप्रहाणाय कौलिकानां सुखाय च ।
कुलयोगाय निष्ठाय शुद्धाय परमात्मने ॥
परमात्मस्वरूपाय लिङ्गमूलात्मकाय च ॥
सर्व्वेश्वराय सर्व्वाय शिवाय निर्गुणाय च ॥
इत्येतत् परमं गुह्यं बाणलिङ्गस्य शङ्कर ! ।

यः पठेत् साधकश्रेष्ठो गाणपत्यं लभेत सः ॥
स्तवस्यास्य प्रसादेन योगी योगित्वमाप्नुयात् ।
राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च ॥
साधूनां साधनं देव ! कौलिकानां कुलं भवेत् ।
यं यं कामयते मन्त्री तं तमाप्नोति लीलया ॥
वाणलिङ्गप्रसादेन सर्व्वमाप्नोति सत्वरम् ।
किमन्यत् कथयामीह सर्व्वं वेत्सि कुलेश्वर ! ॥
महाभये समुत्पन्ने राजद्वारे कुलेश्वर ! ॥
देशान्तरभये प्राप्ते दस्युचौरादिसङ्कुले ।
पठनात् स्तवराजस्य न भयं लभते क्वचित् ॥
वाणलिङ्गस्य माहात्म्यं संक्षेपात् कथितं मया ।
तस्य श्रवणमात्रेण नरो मोक्षमवाप्नुयात् ॥
वाणलिङ्गं सदाराध्यं योगिनां योगसाधने ।
कौलिकानां कुलाचारे पशूनां पशुनिग्रहे ॥
वेदज्ञानां वेदपाठे रोगिणां रोगनाशने ।
यो यो नाराधयेदेनं सर्व्वं तन्निष्फलं भवेत् ॥"

इति श्रीयोगसारे सर्व्वागमोत्तमे पार्व्वतीशिवसंवादे वाणलिङ्गस्तोत्रं समाप्तम् ॥

वा(वा)णवारः, पुं, (वाणं परमुक्तशरं वारयतीति । वृ + णिच् + अण् ।) भटादेश्चोलाद्यतिसन्नाहः । तत्पर्य्यायः । वारवाणः २ वारणः ३ । इति शब्दरत्नावली ॥ चोलकः ४ । इति हारावली । १६० ॥ (स्त्रीवेऽपि दृश्यते । यथा, सुश्रुते । ४ । २४ ।
"वाणवारं न्यग्रोधोदुम्बराश्वत्थवल्कलैः ॥")

वा(वा)णसुता, स्त्री, (वाणस्य बाणासुरस्य सुता ।) ऊषा । इति शब्दरत्नावली ॥

वा(वा)णहा, [न्] पुं, (वाणं बाणासुरं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

वा(वा)णा, स्त्री, पुं, (वण्यते शब्द्यते इति । वण + घञ् । टाप् ।) नीलझिण्टी । इत्यमरः । २ । ४ । ७४ ॥

वा(वा)णा, स्त्री, वाणमूलम् । इति मेदिनी । णे, २७ ॥

वा(वा)णारिः, पुं, (वाणस्य बाणासुरस्य अरिः ।) विष्णुः । इति केचित् ॥

वा(वा)णाश्रयः, पुं, (वाणस्याश्रयः ।) धनुः । इति हलायुधः ॥

वा(वा)णासनं, क्ली, (वाणस्य आसनम् ।) धनुः । इति हलायुधः ॥

वा(वा)णिजः, पुं, (वणिगेव । वणिज् + अण् ।) वणिक् । इत्यमरः ॥ बाड़वाग्निः । इति चिकाण्डशेषः ॥

वा(वा)णिजिकः, पुं, (वणिगेव । वणिज् + ठञ् ।) बाड़वाग्निः । वणिक् । इति मेदिनी ॥ (वाणिजकोऽप्यत्र । यथा, मनुः । ३ । १८१ ।
"यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत् ॥")
धूर्त्तः । इति शब्दरत्नावली ॥

वा(वा)णिज्यं, क्ली, (वणिजो भावः कर्म्म वा । वणिज् + ष्यञ् ।) वैश्यवृत्तिभेदः । इत्यमरः ॥ वणिजः कर्म्म भावो वा । वाणिज्येत्यपि दृश्यते । इति भरतः ॥ तत्पर्य्यायः । सत्याकृतम् २ वाणिज्या ३ वणिक्पथः ४ । इति जटाधरः ॥ (यथा, मार्कण्डेये । ५१ । ५४ ।
"क्रयो वाणिज्यलाभे च भ्रान्तिं कुर्व्वन्तु मे सदा ॥")

क्रयविक्रयरूपस्य तस्य विवरणादि यथा,—
"मानेन तुलया वापि योऽंशमष्टमकं हरेत् ।
दण्डं स दाप्यो द्विगुणं वृद्धौ हानौ च कल्पितम् ॥"

यः पुनर्वणिक् व्रीह्यिकार्पासादेः पण्यस्याष्टमंशं कूटमानेन कूटतुलया वान्यथापहरत्यसौ पणानां द्विगुणं दण्डनीयः । अपहृतस्य पुनर्द्रव्यस्य वृद्धौ हानौ च दण्डस्यापि वृद्धिहानी कल्प्ये ॥
"भेषजस्नेहलवणगन्धधान्यगुड़ादिषु ।
पण्येषु प्रक्षिपन् स्नेहं पणान् दाप्यस्तु षोड़श ॥"
भेषजमौषधद्रव्यं स्नेहो घृतादिः गन्धद्रव्यसुधीरादि आदिशब्दाद्धिङ्गुमरिचादि । एतेष्वसारद्रव्यं विक्रयार्थं मिश्रयतः षोड़शपणो दण्डः ॥
किञ्च ।
"स्वचर्म्ममणिरूचाय:काष्ठवल्कलवाससाम् ।
अजातौ जातिकरणे विक्रेयाष्टगुणो दमः ॥"
न विद्यते बहुमूल्या जातिर्यस्मिन् स्वचर्म्मादिके तदजातिः तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसञ्चारणेन बहुमूल्यजातीयसाद्दश्यसम्पादने यथा मल्लिकामोदसञ्चारणेन स्वल्पिकायां सुगन्धामलकमिति । मार्जारचर्म्मणि वर्णोत्कर्षापादनेन व्याघ्रचर्म्मेति स्फटिकमणौ वर्णान्तरकरणेन पद्मराग इति कार्पासिके सूत्रे गुणोत्कर्षाधानेन पट्टसूत्रमिति कार्ष्णायसे वर्णोत्कर्षाधानेन रजतमिति विल्वकाष्ठे चन्दनामोदसञ्चारणेन चन्दनमिति कक्कोले त्वगाख्यं लवङ्गमिति कार्पासिके वाससि गुणोत्कर्षाधानेन कौशेयमिति विक्रेयस्यापादिनस्य दृश्यस्वचर्म्मादेः पण्यस्याष्टगुणो दण्डो वेदितव्यः ॥
"समुद्गपरिवर्त्तश्च सारभाण्डश्च कृत्रिमम् ।
आधानं विक्रयं वापि नयतो दण्डकल्पना ॥
भिन्ने पण्ये तु पञ्चाशत् पणे तु शतमुच्यते ।
द्विपणे द्विगुणो दण्डो मूल्यवृद्धौ च वृद्धिमान् ॥"
समुद्गं पिधानं सूत्रेण सह वर्त्तत इति समुद्गं करण्डकम् । परिवर्त्तनं व्यत्यासः । योऽन्यदेव सूत्रानां पूर्णं करण्डकं दर्शयित्वा हस्तलाघवेनान्यदेव स्फटिकानां पूर्णकरण्डकं समर्पयति यश्च सारं भाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्य दण्डकल्पना वक्ष्यमाणा वेदितव्या । कृत्रिमकस्तूरिकादेर्मूल्यभूते पण्ये भिन्ने न्यूने न्यूनपणमूल्यमिति । यावत्तस्मिन् कृत्रिमे विक्रीयते पञ्चाशत्पणो दण्डः पणमूल्ये पुनः शतं द्विपणमूल्ये द्विशतो दण्ड इत्येवं मूल्यवृद्धौ दण्डवृद्धिरज्ञेया ॥ * ॥ वणिजः प्रलाहः ।
"सम्भूय कुर्व्वतामर्घं सवाधकारुशिल्पिनाम् ।
अर्घस्य ह्रासं वृद्धिं वा जानतां दम उत्तमः ॥"
राजनिरूपितार्घस्य ह्रासं वृद्धिं वा जानतोऽपि वणिजः सम्भूय मिलित्वा कारूणां रजकादीनां शिल्पिनां चित्रकरादीनां सबाधं पीड़ाकरमर्घान्तरं लाभलोभात् कुर्व्वन्तः पणसहस्रं दण्डनीयाः ॥ * ॥ किञ्च ।
"सम्भूय वणिजां पण्यमनर्घेणोपरुन्धताम् ।
विक्रीणतां वा विहितो दण्ड उत्तमसाहसः ॥"
ये पुनर्वणिजो मिलित्वा देशान्तरादागतं पण्यमनर्घेण क्रीणन्मूल्येन प्रार्थयमाना उपरुन्धन्ति महार्घेण वा विक्रीणते तेषामुत्तमसाहसो विहितो दण्डो मन्वादिभिः ॥ * ॥ केन पुनरर्घेण पणितव्यमित्याह ।
"राजनि स्थापिते योऽर्घः प्रत्यहं तेन विक्रयः ।
क्रयो वा निखवस्तस्याद्वणिजां लाभकृत् स्मृतः ॥"
राजनि सन्निहिते सति यस्मिन्नार्घः स्थाप्यते निरूप्यते तेनार्घेण प्रतिदिनं क्रयो विक्रयो वा कार्य्यः । निर्गतः सर्वो निखवोऽंशः यस्मात् राजनिरूपितादर्घो निखवः स एव वणिजां लाभकारी न पुनः स्वच्छन्दपरिकल्पितात् । मनुना चार्घकरणे विशेषो दर्शितः ।
"पञ्चरात्रे पञ्चरात्रे पक्षे मासे तथा गते ।
कुर्व्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृप ! ॥"
इति ।
किञ्च ।
"स्वदेशपण्ये च शतं वणिक् गृह्णीत पञ्चकम् ।
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी ॥"
स्वदेशप्रापणपण्यं गृहीत्वा यो विक्रीणीतेऽसौ पञ्चकं शतं पणशतेन पणपञ्चकं लाभं गृह्णीयात् । परदेशप्रापि पुनः पण्ये शतपणमूल्ये दशपणान् लाभं गृह्णीयात् । यस्य पण्यग्रहणदिवस एव विक्रयः सम्पद्यते । यः पुनः कालान्तरेऽपि विक्रीणीते तस्य कालोत्कर्षवशाल्लाभोत्कर्षः कल्प्यः । एवञ्च यथार्घे निरूपिते पणशते पञ्चपणो लाभो भवति तथैवार्घे राज्ञा स्वदेशपण्यविषये स्थापनीयः ॥ * ॥ परदेशपण्ये अर्घनिरूपणप्रकारमाह ।
"पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ।
अर्घोऽनुग्रहतः कार्य्यः क्रेतुर्विक्रेतुरेव च ॥"
देशान्तरादागते पण्ये देशान्तरगमनप्रत्यागमनभाण्डग्रहणशुल्कादिस्थानेषु यावानुपयुक्तोऽर्थस्तावन्तमर्थं परिगण्य पण्यमूल्येन सह मेलयित्वा यथा पणशते दशपणो लाभः सम्पद्यते तथा क्रेतृविक्रेतोरनुग्रहकाम्यार्घो राज्ञा स्थापनीयः ॥ * ॥ प्रासङ्गिकं परिसमाप्याधुना विक्रीयासम्प्रदानमुच्यते । तत्स्वरूपं नारदेनाभिहितम् ।
"विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते ।
विक्रीयासम्प्रदानं तद्विवादपदमुच्यते ॥"
तत्र विक्रेयद्रव्यस्य चराचरभेदेन द्वैविध्यमभिधाय पुनः षड्विधत्वं तेनैव प्रत्यपादि ।
"लोकेऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा ।

षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः ॥
गणिकं तुलिमं मेयं क्रियया रूपतः श्रिया ॥"
इति ॥
गणिकं क्रमुकफलादि। तुलिमं कुङ्कुमादि। मेयं घृतादि। क्रियया बाहदोहादिरूपयोपलक्षितमश्वमहिष्यादि। रूपतः पण्याङ्गनादि। श्रिया दीप्त्या मरकतपद्मरागादि ॥*॥ इत्येतत् षट्प्रकारमपि पण्यं विक्रीयासंप्रयच्छतो दण्डमाह।
"गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति।
सोदयं तस्य दाप्योऽसौ दिगाभं वा दिगागते॥"
गृहीतं मूल्यं यस्य पण्यस्य विक्रेत्रा तद्गृहीतमूल्यं तद्यदि विक्रेत्रा प्रार्थ्यमानाय स्वदेशग्रामादौ क्रेत्रे न समर्पयति। तच्च पण्यं यदि क्रयकाले बहुमूल्यं सत् कालान्तरेऽल्पमूल्येनैव लभ्यते तदार्घह्रासजनितोदय उदयो वृद्धिः पण्यस्य स्थावरजङ्गमात्मकस्य तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः। यदा मूल्यह्रासजनितः पण्यस्योदयो नास्ति किन्तु क्रयकाले यावदेव यतो मूल्यस्येयत्पण्यमिति प्रतिपन्नं तावदेव तदा तत् पण्यमादाय तस्मिन् देशे विक्रीणानस्य यो लाभस्तेनोदयेन सहितं द्विकं त्रिकमित्यादि प्रतिपादितवृद्धिरूपोदयेन वा सहितं क्रेत्रे दाप्यावग्राहापनीयः ॥*॥ यथाह नारदः।
"अर्घक्षेदवहीयेत सोदयं पण्यमावहेत्।
स्थानिनामेष नियमो दिगाभं दिग्विचारिणाम्॥"
इति ॥
यदा त्वर्घमहत्त्वेन पण्यस्य न्यूनभावस्तदा तस्मिन् पण्ये वस्त्रगन्धादिके य उपभोगः तदाच्छादनसुखनिवासादिरूपो विक्रेतुस्तत्सहितं पण्यमूल्यं दाप्यः। यथाह नारदः।
"विक्रीय पण्यं मूल्येन यः क्रेतुर्नैव प्रयच्छति।
स्थावरस्य त्रयं दाप्यो जङ्गमस्य क्रियाफलम्॥"
इति ॥
विक्रेतुरुपभोगः त्रय उच्यते। क्रेतुः सम्बन्धित्वेन स्थीयमाणत्वान्न पुनः कुप्यपात्रगृहघातादिरूपः। तस्य तु।
"उपहन्येत वा पण्यं दह्येतापद्येत वा।
विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः॥"
इत्यनेनोक्तत्वात्।
यदा त्वसौ क्रेता देशान्तरात् पण्यग्रहणार्थमागतस्तदा तत् पण्यमादाय देशान्तरे विक्रीणानस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापयितव्यः। व्ययश्च क्रीतपण्यसमर्पणनियमोऽनुशयाभावे द्रष्टव्यः। सति त्वनुशये क्रीत्वा विक्रीय वा किञ्चिदित्यादि मनूक्तं वेदितव्यम् ॥*॥ किञ्च।
"विक्रीतमपि विक्रेयं पूर्वक्रेतर्यसंशयम्।
हानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेत्॥"
यदा पुनर्ज्ञाताऽनुशयः क्रेता पण्यं न जिघृक्षति तदा विक्रीतमपि पण्यं अन्यत्र विक्रेयम्। यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तच्च पण्यं राजदैविकेनोपहतं तदा क्रेतुरेवासौ हानिर्भवेत्। पण्याग्रहणरूपेण क्रेतृदोषेण नाशितत्वात् ॥*॥ अपि च।
"राजदैवोपघातेन पण्ये दोषमुपागते।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः॥"
यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयति अज्ञातानुशयोऽपि तच्च राजदैविकेनोपहतं भवति तदासौ हानिर्विक्रेतुरेवातोऽन्यदृष्टं पण्यं विनष्टसदृशं क्रेत्रे देयम्॥
किञ्च।
"अन्यहस्ते च विक्रीतं दुष्टं वा दुष्टवद्यदि।
विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत्॥"
यः पुनर्विनैवानुशयमेकस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते सदोषं वा पण्यं प्राच्छादितदोषं विक्रीणीते तदा तत्पण्यमूल्यात् द्विगुणो दमो वेदितव्यः। ॥*॥ नारदेनाप्यत्र विशेषो दर्शितः।
"अन्यहस्ते तु विक्रीय योऽन्यस्मै तत्प्रयच्छति।
क्रयं तद्द्विगुणं दाप्यो विनयं तावदेव तु॥
निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति।
स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव ते॥"
इति ॥
सर्वत्रायं विधिर्दत्तमूल्ये पण्ये द्रष्टव्यः। अदत्तमूल्ये पुनः पण्ये वाङ्मात्रक्रये क्रेतृविक्रेत्रोर्नियमकारिणः समयातीते प्रवृत्तौ निवृत्तौ वा न कश्चिद्दोषः ॥*॥ यथाह नारदः।
"दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्तितः।
अदत्तेऽन्यत्र समयान्न विक्रेतुरविक्रये॥" इति॥
विक्रयानुशयोऽभिहितः क्रीतानुशयस्वरूपं तु प्राक् प्रपञ्चितमधुना तदुभयसाधारणं धर्ममाह।
"त्रयं वृद्धिं च वणिजा पण्यानामविजानता।
क्रीत्वा नानुशयः कार्यः कुर्वन् षड्भागदण्डभाक्॥"
परीक्षितक्रीतपण्यानां क्रयोत्तरकालं क्रयकालपरिमाणतोऽर्घक्षतां वृद्धिमपश्यता क्रेत्रानुशयो न कार्यः। विक्रेत्रा च महार्घनिबन्धनं पण्यत्र्ययमपश्यता नानुशयितव्यम्। वृद्धित्रयपरिज्ञाने पुनः क्रेतृविक्रेत्रोरनुशयो भवतीति यतिरेकादुक्तमवगम्यते। अनुशयकालावधिश्च नारदेनोक्तः।
"क्रीत्वा मूल्येन यः पण्यं दुःक्रीतं मन्यते क्रयी।
विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाहनि स्फुटम्॥
द्वितीयेऽह्नि ददत् क्रेता मूल्यात्त्रिंशांशमाहरेत्।
द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तत्॥"
इति ॥
अपरीक्षितक्रयविक्रये पुनः पण्यवैगुण्यनिबन्धनानुशयावधिः दशैकपञ्चसप्ताहेत्यादिना दर्शित एव। तदनया वाचो युक्त्या वृद्धित्रयपरिज्ञानस्यानुशयकारणत्वमवगम्यते। यथा पण्यपरीक्षाविधिवशात् पण्यदोषाणां अतः पण्यदोषे

तद्दृष्टिक्षयकारणचित्तयाभावेऽनुशयकालाभ्यन्तरेऽपि यद्यनुशयं करोति तदा पण्यषड्भागं दण्डनीयः। अनुशयकारणसद्भावेऽपि अनुशयकालातिक्रमेणानुशयं कुर्वतोऽप्ययमेव दण्डः। उपभोगेनाविनश्वरेषु स्त्रिरार्घेष्वनुशयकालातिक्रमेणानुशयं कुर्वतो मनूक्तो दण्डो द्रष्टव्यः।
"परेण तु दशाहस्य न दद्यान्नापि दापयेत्।
आददानो ददच्चैव राज्ञा दाप्यः शतानि षट्॥"
इति मिताक्षरायां विक्रीयासम्प्रदानं नाम प्रकरणम्॥

अथ हृहस्पतिः।
"कुसीदकृषिवाणिज्यं प्रकुर्वीताक्षयं धनम्।
आपत्काले स्वयं कुर्वन् नैनसा लिप्यते द्विजः॥
लभ्यलाभैः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत्।
ते तुष्टास्तस्य तं दोषं शमयन्ति न संशयः॥
वणिक् कुसीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम्।
वणिक् कुसीददोषः स्यात् ब्राह्मणानाञ्च पूजनात्॥"
इत्याह्निकतत्त्वम्॥

वा(वा)णिज्या, स्त्री, (वाणिज्य+टाप्। अभिधानात् स्त्रीत्वम्।) वाणिज्यम्। इति जटाधरः॥

वा(वा)ध, ऋ ङ विहतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अववाधत्। ङ, वाधते। ऊनं न सर्वेष्वधिको ववाधे। इति रघुः॥ २।१४॥ इति दुर्गादासः॥

वा(वा)धः, पुं, (बाधनमिति। बाध+भावे घञ्।) प्रतिबन्धकः। आघातः। (यथा, ऋग्वेदे। ६।५१।४।
"यदीमर्भे महति वा हितासो बाधे मरुतो यद्यक्षाम देवान्॥")न्यायमते साध्याभाववत्पक्षः। यथा। ह्रदो वह्निमान्। इति सामान्यनिरुक्तिगादाधरी॥

वा(वा)धकः, पुं(वा(वा)धते इति। बाध+ण्वुल्।) स्त्रीरोगविशेषः। यथा,—
"रक्तमाद्री तथा षष्ठी चाङ्गेरी जलकुमारकः।
चतुर्विधो बाधकः स्यात् स्त्रीणां सुनिविभाषितः॥
तेषां स्वभावं वक्ष्यामि यथाग्राह्यं विधानतः।
एतेषां पूजनं कार्य्यं जनैः सन्तानकाङ्क्षिभिः॥
निःसारणं स्यापनञ्च बलिदानं जपस्तथा।
कर्त्तव्यो गुरुवाक्येन यथाग्राह्यं विचक्षणैः॥
चतुर्विधो बाधकस्तु जायते ऋतुकालतः॥"
तस्य लक्षणं यथा,—
"यथा कन्या तथा नार्भरधः पार्श्वे स्तनेऽपि च।
रक्तमाद्रीप्रदोषेण जायते फलहीनता॥
मासमेकं ह्रयं वापि ऋतुयोगो भवेद्यदि।
रक्तमाद्रीप्रदोषेण फलहीना तदा भवेत्॥"
इति रक्तमाद्र्याः॥
"नेत्रे हस्ते भवेज्ज्वाला योनौ चैव विशेषतः।
लालासंयुतरक्तञ्च षष्ठीबाधकयोगतः॥
मासैकेन भवेद्यस्या ऋतुस्नानह्रयं तथा।
मलिना रक्तयोनिः स्यात् षष्ठीबाधकयोगतः॥"
इति षष्ठ्याः॥

"उद्वेगो गुरुता देहे रक्तस्रावो भवेद्ध्रु ।
नाभेरधो भवेत् शूलं चाङ्गुर: स तु बाधक: ॥
ऋतुहीना चतुर्म्मासं त्रिमासं वा भवेद्यदि ।
छत्राकी करपादे च ज्वाला चाङ्गुरयोगत: ॥"
इति चाङ्गुरस्य ॥
"सशूला च सगर्भा च शुष्कदेहाल्परक्तिका ।
जलकुमारस्य दोषेण जायते फलहीनता ॥
वा छत्राकी भवेत् शूला बहुकालऋतुस्रुधा ।
गुरुस्रावी खल्परक्ता जलकुमारस्य दूषणात् ॥"
इति जलकुमारस्य ॥
इति वैद्यकम् ॥ बाधाजनके, त्रि ॥ (यथा, मार्कण्डेये । ३४ । १६ ।
"धर्म्मो धर्म्मानुबन्धार्थो धर्म्मो नात्मार्थ-
बाधक: ॥")
बा(वा)धनं, क्ली, (बाध + ल्युट् ।) पीड़ा । इति शब्दरत्नावली ॥ प्रतिबन्धकञ्च ॥ (बाधते इति । बाध + ल्युः । पीड़ादातरि प्रतिबन्धके च त्रि । यथा, हरिवंशे । ६५ । ५१ ।
"शूयतां कथयिष्यामि यत्रोभौ शत्रुबाधनौ ॥")
बा(वा)धा, स्त्री,(बाध + टाप् ।) पीड़ा । इत्यमर: । १ । ६ । ३ ॥ (यथा, मार्कण्डेये । २२ । ३ ।
"दुर्वृत्ता: सन्ति शतशो दानवा: पापयोनय: ।
तेभ्यो न स्यात् यथा बाधा सुनीनां त्वं तथा
कुरु ॥")
निषेध: । इति हेमचन्द्र: ॥
बा(वा)धित:, त्रि, (बाध + क्त ।) बाधायुक्त: । निवर्त्त: । यथा । सङ्गतविप्रतिषेधेन यद्बाधितं तद्बाधितमेव । इति मुग्धबोधटीकायां दुर्गादास: ॥
बाधिर्य्यं, क्ली, (बधिरस्य भाव: । बधिर + ष्यञ् ।) बधिरस्य भाव: । कर्णरोगविशेष: । तस्य निदानम् । यथा,—
"यदा शब्दवहं वायु: स्रोत आवृत्य तिष्ठति ।
शुद्ध: श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते ॥"
इति माधवकर: ॥
अस्यौषधं यथा,—
"शुष्कमूलकशुण्ठीनां चारो हिङ्गुलनागरम् ।
शुक्तं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयो: ।
क्रमशश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥"
अपि च ।
"प्रस्थे द्वे गरुडमालानां क्वाथयेद्द्रोणमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ।
काञ्जिकस्याढकं दत्त्वा पिष्ट्वान्येतानि दापयेत् ॥
पुनर्नवा गोक्षुरकं सैन्धवं शुण्ठयं वचा ।
सरलं सुरदारुञ्च हरितौ कण्टकारिका ॥
नस्यपानाञ्जनाद्यैश्च कर्णशूलं हनुग्रहम् ।
बाधिर्य्यं सर्व्वरोगाश्च अभ्यङ्गाच्च महेश्वर ! ॥"
इति गारुड़े १६८ अध्याय: ॥
(ससम्भ्रमिकारणमस्य यथा,—
"स एव शब्दाभिवहा यदा श्रिता:
कफानुयातो वपुरुद्य तिष्ठति ।
तदा नरस्याप्रतिकारसेविनो
भवेत् बाधिर्य्यमसंशयं खलु ॥"
इत्युत्तरतन्त्रे विप्रतिषेधाध्याये सुश्रुतेनोक्तम् ॥
अस्य चिकित्सा यथा,—
"सामान्यतो विशेषेण बाधिर्य्ये पूरणं हितम् ।
गवां मूत्रेण विस्रावि पिष्ट्वा तैलं विपाचयेत् ॥
सजलञ्च सदुग्धञ्च बाधिर्य्ये कर्णपूरणम् ।
सितामधुकविल्वीभि: सिद्धं वाजे पयस्यथ ॥
सिद्धं वा विस्रनि:क्वाथे शीतीभूतं तदुद्धृतम् ।
पुन: पचेद्घृतक्षीरं सितामधुकचन्दनै: ॥
विस्रास्रु गाढ़ं तत्तैलं बाधिर्य्ये कर्णपूरणम् ।
वक्ष्यते य: प्रतिश्याये विधि: सोऽप्यत्र पूजित: ।
वातव्याधिषु यश्चोक्तो विधि: स च हितो भवेत् ॥"
इति च तत्रैव विप्रतिषेधाध्याये तेनैवोक्तम् ॥)
बाध्य, त्रि, (बाध + ण्यत् ।) बाधनीयम् । बाधितव्यम् । निवर्त्त्यम् । यथा । साङ्गचिताल्लिङ्गदर्शनात् प्रकरणमिदं बाध्यम् । इति ब्रह्मसूत्रस्य समन्वयसाष्टीका: ॥ (यथा, मार्कण्डेये । ६६ । ४० ।
"नाहं खारोपियस्तुल्य: स्त्रीबाध्यो वा जले-
चरि ! ॥")
बाध्यता, स्त्री, (बाध्यस्य भाव: । बाध्य + तल् ।) बाध्यत्वम् । बाध्यस्य भाव: इत्यर्थे तप्रत्ययनिष्पन्नोऽयं शब्द: ॥
बान्धकिनेय:, त्रि, (बन्धक्या अपत्यं पुमान् । बन्धकी + "कल्याण्यादीनामिनङ् ।" ४ । १ । १२६ । इति ढक् इनङ् च ।) असतीसुत: । इत्यमर: । २ । ६ । २६ ॥
बान्धव:, पुं, (बन्धुरेव । बन्धु + "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इति स्वार्थे अण् ।) ज्ञाति: । इत्यमर: । २ । ६ । ३४ ॥ सुहृत् । इति मेदिनी । वे, ४५ ॥ (यथा, मनु: । ५ । ७० ।
"नातिवर्षेत् कर्हिचिद्वा बान्धवैरुदकक्रिया ॥")
अस्य विवरणं बन्धुशब्दे द्रष्टव्यम् ॥
बाभ्रवी, स्त्री, (बभ्रोर्महादेवस्य पत्नी । बभ्रु + अण् + ङीष् ।) दुर्गा । इति त्रिकाण्डशेष: ॥ (यथा, मार्कण्डेये । ६९ । २१ ।
"मेधे सरस्वति वरे भूति बाभ्रवि तामसि ! ॥")
बारकीर:, पुं. द्वारग्राही । बाड़व: । यूका । वेणिवेधिनी । नीराजितहय: । इति मेदिनी । रे, २८६ ॥
बार्म्बटीर:, पुं, चपु । आम्रास्थि । अङ्कुर: । गणिकासुत: । इति हेमचन्द्र: ॥
बार्हस्पत्य, त्रि, बृहस्पतेरिदं इत्यर्थे (अण्) यञ्प्रत्ययेन निष्पन्नम् ॥
बार्हस्पत्य:, पुं, (बार्हस्पत्यं बृहस्पतिप्रोक्तं शास्त्रं अधीयमानत्वेनास्त्यस्येति । अर्श आदित्वाच्च ।) नास्तिक: । यथा, हेमचन्द्र: ।
"स्याद्वादवाद्यार्हत: स्याच्छून्यवादी तु सौगत: ।
नैयायिकस्तूपदेशो योग: सांख्यस्तु कापिल: ॥
वैशेषिक: स्यादौलूक्यो बार्हस्पत्यस्तु नास्तिक: ।
चार्व्वाको लौकायतिकश्चेते षड़पि तार्किका: ॥"
(बृहस्पतिना प्रोक्तमिति । बृहस्पति + ण्य: ।) नीतिशास्त्रे, क्ली । इति केचित् ॥ बृहस्पतेरिदमिति वा । बृहस्पति + "दित्यदित्यादित्यपत्युत्तरपदाण् ण्य: ।" ४ । १ । ८५ । इति ण्य: ।) बृहस्पतिसम्बन्धिनि, त्रि ॥
बालं, क्ली, पुं, (वलतीति । वल + ण: ।) गन्धद्रव्यविशेष: । बाला इति ख्यातम् । इति मेदिनी ॥ तत्पर्य्याय: । ह्रीवेरम् २ वर्हिष्ठम् ३ उदीच्यम् ४ केशनामकम् ५ अमुनामकम् ६ । इत्यमर: । २ । ४ । १२२ ॥ ह्रिवेरम् ७ वर्हिष्ठम् ८ । इति भरत: ॥ बालकम् ९ वारिदम् १० इति शब्दरत्नावली ॥ वरम् ११ ह्रीवेरकम् १२ केश्यम् १३ वच्यम् १४ पिङ्गम् १५ ललनाप्रियम् १६ कुन्तलोशीरम् १७ कचामोदम् १८ । अस्य गुणा: । शीतलत्वम् । तिक्तत्वम् । पित्तवान्तिदाहज्वरकुष्ठातिसारश्वासव्रणनाशित्वम् । केशहितत्वञ्च । इति राजनिर्घण्ट: ॥ अपि च ।
"बाला वाह्यालिका वाह्या सैव वाह्यालिकापि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥
ततोऽन्यातिबला ऋष्यप्रोक्ता कङ्कतिकासह ।
गाङ्गेरुकी नागबला भद्रा हृद्या गवेधुका ॥
अस्य गुणा: ।
बलात्रितुल्यं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं वातहि समीरासपित्तासृक्षतनाशनम् ॥
बालात्रितुल्यविशेषगुणा: ।
बलामूलत्वक्चूर्णं पीतं सक्षीरशर्करम् ।
मूत्रातिसारं हरति दृष्टमेतन्न संशय: ॥
हरेन्महाबला क्षिप्रं भयेदातानुलोमनी ।
हन्यादतिबला मोहं पयसा सितया सह ॥"
इति भावप्रकाश: ॥
बाल:, त्रि, (वलतीति । बल प्राणने + "ज्वलितिकसन्तेभ्यो ण: ।" ३ । २ । १४० । इति ण: ।) मूर्ख: ॥ (यथा, मनु: । २ । १५३ ।
"अग्नौ भवति वै बाल: पिता भवति मन्तव: ।
अज्ञं हि बालमित्याहु: पितेत्येव तु मन्तवम् ॥"
"वैशब्दोऽवधारणे अज्ञ एव बालो भवति नत्वल्पवयस्क: ।" इति तट्टीकायां कुल्लूकभट्ट: ॥) अर्भक: । इति मेदिनी । ले, ४० ॥ द्वितीयस्य पर्य्यायाः । माणवक: २ । इत्यमर: । २ । ६ । ४२ ॥ बालक: ३ माणव: ४ किशोर: ५ वटु: ६ सुश्निन्नय: ७ वटुक: ८ किशोरक: ९ । इति शब्दरत्नावली ॥ पाक: १० गर्भ: ११ हितक: १२ शिशुक: १३ शिशु: १४ शाव: १५ अर्भ: १६ डिम्भक: १७ डिम्ब: १८ । इति राजनिर्घण्ट: ॥ स तु षोड़शवर्षपर्य्यन्त: प्रथमवयस्क: । यथा,—
"आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्ध: स्यात् सप्ततेरूर्द्धं वर्षीयान् नवते: परम् ॥"
इति स्मृति: । इति भरत: ॥
तस्य रक्षका: सर्व्वदेवता: । यथा,—
"अनाथबालवृद्धानां रक्षका: सर्व्वदेवता: ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्याय: ॥
अथ बालस्य परिचर्य्याविधि: ।
"बालमङ्के सुखं दध्यान्न चैनं तर्ज्जयेत् क्वचित् ।

महसा बोधयेन्नैव नायोग्यमुपवेशयेत् ॥"
अयोग्यमुपवेशनासमर्थम् ।
"नाङ्क्यं स्थापयेत् क्रोडे न चिरं शयने क्षिपेत् ।
रोदयेन्न क्वचित् कार्य्ये विधिमावश्यकं विना ॥"
आवश्यको विधिः मेषजदानतैलाभ्यङ्गोद्वर्त्तनादि।
नक्षिप्तमनुवर्त्तेत तं सदैवानुमोदयेत् ।
संसेवितमना एकं नित्यमेवाभिवर्द्धयेत् ॥
वातातपतडिद्दृष्टिधूमानलजलादितः ।
निर्मोक्तव्यानतश्चापि रक्षेद्बालं प्रयत्नतः ॥"
बालस्य स्वभावाद्विशेषाह ।
"अभ्यङ्गोद्वर्त्तने स्नानं नेत्रयो रञ्जनं तथा ।
वसनं रुटु यत्तच्च तथा मृदुतलोपनम् ॥
जन्मप्रभृति पथ्यानि बालस्यैतानि सर्व्वथा ॥"
बालस्य कवलादेः समयमाह ।
"कवलः पञ्चमादह्नोर्द्विगुणैरेव मैथुनम् ॥"
बाल्यादेरवधिमाह सुश्रुतः ।
"वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा ।
ऊनषोड़शवर्षस्तु नरो बालो निगद्यते ॥
त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथान्न-
भुक् ॥
दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्वयम् ।
तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधा मतः ॥
मध्ये षोड़शसम्वत्सरमध्यमः कथितो बुधैः ।
चतुर्धा मध्यमं प्राहुर्युवा दार्ढ्यगतो मतः ॥
चत्वारिंशत्समा यावत्तिष्ठेदीर्य्यादिपूरितः ।
ततः क्रमेण क्षीणः स्याद्यावद्भवति सप्ततिः ॥
वीर्य्यादीत्यादिशब्देन रसादिसर्व्वधात्विन्द्रिय-
बलोत्साहा उच्यन्ते । क्षीणः सर्व्वधात्विन्द्रिय-
बलोत्साहैर्हीनः ।
ततस्तु सप्ततेरूर्द्धं क्षीणधातुरसादिकः ॥
क्षीयमाणेन्द्रियबलः क्षीयरेता दिने दिने ।
वलीपलितखालित्ययुक्तः कर्म्मसु चाक्षमः ॥
कासश्वासादिभिः क्लिष्टो दुष्टो भवति मानवः ॥
बाल्ये विवर्द्धते श्लेष्मा पित्तं स्यान्मध्यमाश्रितम् ।
वार्द्धक्ये वर्द्धते वायुर्विचार्य्येतदुपक्रमेत् ॥
उपक्रमेत् चिकित्सेत् ॥ तन्मात्रान्तरे तु ।
बाल्यं दृष्टिस्त्वचिर्मेधा त्वग्दृष्टिः शुक्रविक्रमौ ।
बुद्धिः कर्म्मेन्द्रियं रेतो यौवनं दशतो दृशेत् ॥"
इति भावप्रकाशः ॥
(अथ बालाद्यशौचम् ।
"नवमादिमासजातबालस्याशौचकालाभ्यन्तर-
मरणे मातापित्रोरस्पृश्यत्वं युक्तम् । सदैव
स्वजातुल्यजननाशौचम् । भ्रातीनान्त्वशौचं
नास्ति । नवमादिमासषष्टतजातयोस्तु कन्या-
पुत्रयोः पित्रादि सपिण्डानां मातुश्च जननाशौचम् । तच्च ब्राह्मणानां दशाहं भूद्राणां
मासः । पुत्रजन्मनि पितुः सचैलस्नानं पुत्रमुख-
दर्शनात् परं पुनः सचैलस्नानम् । पुत्रकन्याजनने
ब्राह्मण्या दशाहानन्तरं लौकिककर्म्माधिकारः ।
पुत्रजनने ब्राह्मण्या विंशतिरात्रोत्तरस्नानात्
वैदिककर्म्माधिकारः । कन्याजनने तु ब्राह्मण्या
मासोत्तरस्नानात् वैदिककर्म्माधिकारः ।
शूद्रायाः कन्यापुत्रजनने त्रयोदशाहोत्तरं
लौकिककर्म्माधिकारः वैदिककर्म्मणि तु मासो-
त्तरस्नानात् शुद्धिः । एतत् सर्व्वं कन्यापुत्रयो-
र्विद्यमानत्वे बोध्यम् ॥
जननाशौचोत्तरं वत्सरासाभ्यन्तरमजातदन्त-
मरणे मातापित्रोरेकाहः । सपिण्डानान्तु सद्यः
शौचम् ॥ वत्सरासाभ्यन्तरेऽपि जातदन्तस्य
मरणे मातापित्रोरेकाहः । सपिण्डानामेकाहः ।
षण्मासोपरिद्विवर्षपर्य्यन्तं पित्रोरेकाहः । सपिण्डा-
नामप्यतचूड़े एकाहः । कृतचूड़े त्र्याहः । द्विवर्षो-
परिमासत्रयाधिकषड्वर्षपर्य्यन्तमनुपनीतबाल-
कस्य मरणे मातापित्रादिसपिण्डानां त्र्याहः ॥
तन्मध्येऽप्युपनीतस्य मरणे दशाहः । मासत्रया-
धिकषड्वर्षोपरि मरणे पित्रादिसपिण्डानां
दशाहः ॥
शूद्रस्य षण्मासाभ्यन्तरे अनुत्पन्नदन्तस्य मरणे
विरात्रम् । उत्पन्नदन्तस्य पञ्चाहः । षण्मा-
सोपरिद्विवर्षाभ्यन्तरे अकृतचूड़मरणे पञ्चाहः ।
तत्रापि कृतचूड़मरणे द्वादशाहः । द्विवर्षोपरि
षड्वर्षाभ्यन्तरे मरणे द्वादशाहः । अत्रापि
कृतोद्वाहेऽपि मासो यावद्धियते षड्वर्षोपरि-
मासः ॥ * ॥ "बालकजननानन्तरकर्त्तव्यमाह
वैद्यके । यथा,—"अथ बालं क्षौमपरिवृतं
क्षौमवस्त्रासृतायां भूम्यायां शाययेत् । पीलु-
वदरीनिम्बपरूषकप्लाक्षाभिश्चैनं वीजयेत् ।
मूर्द्धि चास्याहरहस्तैलपिचुमवचारयेत् ।
धूपयेच्चैनं रक्तोन्नैर्धूपैः । रक्तोन्नानि चास्य
पार्श्वपादशिरोग्रीवास्वबद्धनेत् तिलातसी-
सर्षपकणांश्चास्य प्रकिरेत् । अधिष्ठाने
चास्मिं प्रक्षालयेत् । ब्राह्मितोपासनीयश्चावेक्षेत ॥
ततो दशमेऽहनि मातापितरौ कृतमङ्गल-
कौतुकौ स्वस्तिवाचनं कृत्वा नाम कुर्य्यातां
यदभिप्रेतं नक्षत्रनाम वा ॥
ततो यथावर्द्धं धात्रीसुपेयान्मधुमप्रमाणां
मध्यमवयसमरोगां श्रीलवतीमचपलामलोलु-
पामक्षपामस्थलां प्रसन्नक्षीरामलब्धौलीमल-
लोहितस्तनीमथङ्गामयसनिनीं जीवद्वत्सां दोग्धीं
वत्सलामक्षुद्रकर्म्मिणीं कुले जातामतो भूयि
ष्ठैश्च गुणैरन्वितां ग्रामामारोग्यबलवृद्धये
बालस्य । तच्चोद्वेजनो करालं कुर्य्यात् । लम्ब-
स्तनीं नासिकामुखं छादयित्वा मरणमापा-
दयेत् । ततः प्रशस्तायां तिथौ शिरःस्नात
मङ्गलवाससंसृष्टसुखं शिशुमुपवेश्य धात्रीं
प्राङ्मुखीमुपवेश्य दक्षिणं स्तनं घृतमधूवत्परि-
सुतमभिमन्त्र्य मन्त्रेणानेन पाययेत् ।
चत्वारः सागरास्तुभ्यं स्तनयोः क्षीरवाहिनः ।
भवन्तु सुभगे नित्यं बालस्य बलवृद्धये ॥
पयोऽन्तरस्तं पीत्वा कुमारस्ते सुभानने ।
दीर्घमायुरवाप्नोतु देवाः प्राग्यान्तं यथा ॥
अतोऽन्यथा नानारसन्योपयोगस्यासात्म्यात्
व्याधिजन्म भवति । अपरिसुतेऽप्यतिस्तब्ध-
स्तन्यपूर्णस्तनयानादुत्सुप्तितसोतसः शिशोः
कासश्वासवमीप्रादुर्भावः । तस्मादेवं विधानं
स्तन्यं न पाययेत् ॥"
"बालं पुनर्मात्रसुखं ग्रहीयान्न चैनं तर्ज्जयेत्
सहसा न प्रतिबोधयेद्विश्वासभयात् सहसा
नापहरेदुत्क्षिपेद्वा वातादिविघातभयान्नोपवे-
शयेत् कौब्जभयात् नित्यचैनमनुवर्त्तेत प्रिय-
शुतैरभिलाषैः । एवमनभिहतमगाक्षमभिवर्द्धते
नित्यसुदयसत्त्वसम्पन्नो नीरोगः सुप्रसन्नमनाश्च
भवति । वातातपविद्युत्प्रभापादपलतासून्या-
गारनिस्वस्थानगृहच्छायादिभ्यो दुर्ग्रहोपसर्गं
तस्य बालं रक्षेत् ।
नासुचौ विक्षिपेद्बालं नाकाशे विषमे न च ।
नोग्रमारुतवर्षेषु रजोधूमोदकेषु च ॥
क्षीरसात्म्यतया क्षीरमाजं गव्यमथापि वा ।
दद्यादन्नस्य पर्य्याप्तिं बालानां वीक्ष्य माचया ॥"
इति सुश्रुते शारीरस्थाने दशमेऽध्याये ॥)
बा(वा)ल, पुं, (वलति मस्तकं रक्षति संवृणोतीति
वा । वल + ण ।) शिरोभवाच्छादनविशेषः ।
चुल इति भाषा । तत्पर्य्यायः । चिकुरः२ कचः
३ केशः ४ कुन्तलः ५ कुञ्जरः ६ शिरोरुहः ७
शिरसिरुट् ८ शिरोरुट् ९ शिरजः १० । इति
शब्दरत्नावली ॥ चोटकशिखुः । तत्पर्य्यायः ।
किशोरः २ । इत्यमरः ॥ अश्ववालधिः । करि-
वालधिः । नारिकेलः । इति मेदिनी । ले, ३९ ॥
पञ्चवर्षीयहस्ती । यथा,—
"पञ्चवर्षो गजो बालः स्यात् पोतो दशवर्षकः ॥"
इति हेमचन्द्रः ॥
(यथा, भागवते । ६ । १० । ६ ।
"यो लोकवीरसमितौ धनुरैशसूत्यं
सीतास्वयंवरसदे त्रिशतोपनीतम् ।
आदाय बालगजलील इवेक्षुयष्टिं
सज्यीकृतं नृप ! विकृष्य बभञ्ज मध्ये ॥")
पुच्छः । इति शब्दरत्नावली ॥ (यथा, कुमारे ।
१ । ४८ ।
"लज्जा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्व्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्बालप्रियत्वं शिथिलं चमर्य्यः ॥")
मत्स्यविशेषः । इति शब्दचन्द्रिका ॥
बालकं, क्ली, (बाल + स्वार्थे कन् ।) क्षीवेरम् ।
इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—
"बालकं शीतलं रूक्षं लघुदीपनपाचनम् ।
कफासरुचिवीसर्पकृद्रोगामातिसारजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अङ्गुलीयकम् । यारिहार्य्यम् । इति विश्वः ॥
बालकः, पुं, (बाल एव । बाल + स्वार्थे कन् ।)
शिशुः । (यथा, मार्कण्डेये । ५१ । ५३ ।
"भूतानां मातृभिः सार्द्धं बालकानान्तु
शान्तये ॥")
अश्वः । हयबालधिः । हस्तिबालधिः । अङ्गुरी-
यकम् । क्षीवेरम् । बलयम् । इति मेदिनी ।
के, १५७ ॥ केशः । इति विश्वः ॥ * ॥

बालाशौचं यथा,—
"अजातदन्ता ये बाला ये च गर्भादिनिःसृताः।
न तेषामग्निसंस्कारो न पिण्डं नोदकक्रिया॥
यदि गर्भो विपद्येत स्रवते वापि योषितः।
यावन्मासान् स्त्रियो गर्भस्तावद्दिनानि सूतकम्॥
आ नामकरणात् सद्य आ चूडान्तादहर्निशम्।
आ व्रतस्थाग्निराजेभ्य तदूर्द्धं दशभिर्दिनैः॥"
इति गारुडे १०६ अध्यायः॥
बालकस्य रक्षा यथा,—
"आदाय जलं संस्पृश्य यद्गोदापि ततो द्विज!।
गोपुच्छभ्रामणेनासु बालदोषमपाकरोत्॥
गोपुरीषमुपादाय नन्दगोपोऽपि मस्तके।
जलस्य प्रदरौ रक्षां कुर्वन्निदमुदीरयन्॥
नन्द उवाच।
रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः।
यस्य नाभिसमुद्भूतपङ्कजादभवज्जगत्॥
येन दंष्ट्राग्रविधृता धारयत्यवनी जगत्।
वराहरूपधृक् देवः स त्वां रक्षतु केशवः॥
नखाङ्कुरविनिर्भिन्नवैरिवक्षःस्थलो विभुः।
नृसिंहरूपी सर्व्वत्र स त्वां रक्षतु केशवः॥
वामनो रक्षतु सदा भवन्तं यः क्षणादभूत्।
त्रिविक्रमः क्रमाक्रान्तत्रैलोक्यः स्फुरदायुधः॥
शिरस्ते पातु गोविन्दः कण्ठं रक्षतु केशवः।
मुखं जठरं विष्णुर्जङ्घापादं जनार्द्दनः॥
मुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च।
रक्षत्वशेषतेजोभृत्सर्व्वस्व नारायणोऽव्ययः॥
शार्ङ्गखड्गगदाचक्रशङ्खनादहताः क्षयम्।
गच्छन्तु प्रेतकूष्माण्डा राक्षसा ये तवाहिताः॥
त्वां पातु दिक्षु वैकुण्ठो विदिक्षु मधुसूदनः।
हृषीकेशोऽम्बरे भूमौ रक्षतु त्वां महीधरः॥
एवं कृतस्वस्ययनो नन्दगोपेन बालकः।
शान्तिः शकटास्याधो बालपर्य्यङ्किकातले॥"
इति विष्णुपुराणे। ५। ५॥
बालकप्रिया, स्त्री, (बालकानां प्रिया।) रम्भावृक्षः। कदली। इति राजनिर्घण्टः॥
बालक्षमिः, पुं, (बालस्य क्षमिः।) केशकीटः। इति जटाधरः॥
बालक्रीड़नं, क्ली, (बालस्य क्रीड़नम्। क्रीड्+भावे ल्युट्।) बालखेला। यथा,—
"बालक्रीड़नमिन्दुशेखरवपुर्भङ्गावधि प्रस्तुता।"
रत्नादि महाराटकम्॥
बालक्रीड़नकः, पुं, (बालानां क्रीड़नकः क्रीड़नत्वम्। बालका हि कपर्द्दकेन क्रीड़न्तीति प्रसिद्धेस्तथात्वम्।) कपर्द्दकः। इति राजनिर्घण्टः॥
बालखिल्यः, पुं, बालखिल्यसुनिः। यथा,—
"विधिना निर्म्मिता पूर्व्वं वेदी परमपावनी।
अग्निवेश्यादिमुनयो बालखिल्यादयः स्थिताः॥"
इति हरिवंशभाषायां चित्रकूटमाहात्म्ये १ सर्गः॥
(बालखिल्यास्तु अङ्गुष्ठपरिमिताः षष्टिसहस्रसंख्यकाः। यथा, मार्कण्डेये। ५२। २४।
"क्रतोस्तु सन्ततिर्भार्य्या बालखिल्यानसूयत।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसाम्॥"
अङ्गुष्ठपरिमितसुक्ष्ममेतेषान्देहपरिमाणम्। यथा, महाभारते। १। ३१। ८—९।
"अथापश्यद्ददर्शान् स्वान् अङ्गुष्ठोदरसम्मितः।
पलाशदण्डिकामेकां सहितान् वहतः पथि॥
क्लिश्यमानान् मन्दबलान् गोष्पदे संप्लुतोदके॥")
बालगर्भिणी, स्त्री, प्रथमगर्भवती गौः। तत्पर्य्यायः। प्रष्ठौही २। इत्यमरः। २। ९। ७०॥ पलोजी ३। इति जटाधरः। बालगर्भवती ४। इति शब्दरत्नावली॥
बालगोपालः, पुं, (बालः शिशुश्चासौ गोपालः।) श्रीकृष्णमूर्त्तिविशेषः। यथा,—
"तीरपयोनिधिदत्तनिवासं
हास्यकटाक्षजगत्त्रयमोहम्।
श्यामलसुन्दरशैलविलासं
तं प्रणमामि च बालगोपालम्॥"
इति नारदपञ्चरात्रे गोपालाष्टकम्॥
बालग्रहः, पुं, (बालानां बालकानां ग्रहः।) बालकहन्तृग्रहविशेषः। (यथा, मार्कण्डेये। ९२। २७।
"बालग्रहाभिभूतानां बालानां शान्तिकारकम्॥")
एतेषां विवरणम्। यथा,—
"बालग्रहा अनाचारात् पीड़यन्ति शिशुं यतः।
तस्मात्तदुपसर्गेभ्यो रक्षेद्बालं प्रयत्नतः॥"
अथ बालग्रहाणां नामान्याह।
"स्कन्दग्रहस्तु प्रथमः स्कन्दापस्मार एव च।
शकुनी रेवती चैव पूतना गन्धपूतना॥
पूतना शीतपूर्व्वा च तथैव मुखमण्डिका।
नवमो नैगमेयश्च प्रोक्ता बालग्रहा अमी॥"
अथ ग्रहाणामुत्पत्तिमाह।
"नवस्कन्दाग्रयः प्रोक्ता बालानां ये ग्रहा अमी।
श्रीमतो दिव्यवपुषो नारीपुरुषविग्रहाः॥
एते स्कन्दस्य रचार्थं शक्तिकोमायिसूनुभिः।
सृष्टाः शरवणस्थस्य रक्षितस्य स्वतेजसा॥
स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा।
विभर्त्ति चापरां संज्ञां कुमार इति संग्रहः॥"
अथ हि कार्त्तिकेयादन्यः।
"स्कन्दापस्मारसंज्ञो यः सोऽग्निना तत्समद्युतिः।
स च स्कन्दसखो नाम्ना विशाख इति घोष्यते॥
ग्रहाः स्त्रीविग्रहा ये ते नागरूपाः प्रकीर्त्तिताः।
देवानां शक्तिकानां ते भागा राजसतामसाः॥
नैगमेयस्तु पार्व्वत्या सृष्टो ज्ञेयो ततो ग्रहः।
कुमारस्य हि देवस्य गुहस्यालंसमोऽस्ति वै॥
ततो भगवति स्कन्दे सुरसेनापतौ स्थिते।
उपतस्थुर्ग्रहा ह्येते दीप्तशक्तिधरं गुहम्॥
ऊचुः प्राञ्जलयश्चैनं हृष्टिर्नो दीयतामिति।
तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत्॥
ततो ग्रहांस्तदावाच भगवान् भगनेत्रहृत्।
तिर्य्यग्योनिं मानुषं च देवं च स्थितयं जगत्॥
परस्परोपकारेण वर्त्तते धार्य्यते तथा।
देवा नरान् प्रीणयन्ति तिर्य्यग्योनींस्तथैव च॥
ग्रहाकारं प्रदत्तास्तु उग्रवर्चाहिमानिभैः।
रत्नाञ्जलिनमस्कारैर्जयहोमैस्तथैव च॥
सम्यक् प्रयुक्तैश्च नराः प्रीणयन्त्यपि देवताः।
भागधेयं विभक्तञ्च ग्रेयं किञ्चिन्न विद्यते॥
तदुयुष्माकं शुभा वृत्तिर्बालेष्वेव भविष्यति॥"
अथ बालग्रहाणां बालग्रहणकारणमाह।
"कुलेषु येषु नेज्यन्ते देवाः पितर एव च।
ब्राह्मणाः साधवो वापि गुरवोऽतिथयस्तथा॥
निवृत्तगीतवादित्रेषु तथा कृतसितवस्त्रिषु।
निवृत्तभिक्षाबलिषु भयकांस्यग्रहेषु च॥
गृहेषु तेषु बालांस्तान् गृहा हिंसन्त्यगृहिताः।
तत्र वो विपुला वृत्तिः पूजा चैव भविष्यति॥
एवं गृहाः समुत्पन्ना बालान् हिंसन्ति चाप्यथ।
गृहीतस्तु बालाः स्युर्दुश्चिकित्स्यतमास्ततः॥"
अथ सामान्यग्रहगृहीतानां बालानां लक्षणान्याह।
"क्षणादुद्विजते बालः क्षणात्क्षपति रोदिति।
नखैर्दन्तैर्दारयति धात्रीमात्मानमेव च॥
कूर्द्दति गिरीयते दन्तान् खादेत् कूजति जृम्भते।
भ्रुवौ क्षिपति दन्तोष्ठं फेनं वमति वासकृत्॥
श्यामोऽति निघ्रि जागर्त्ति शूलाङ्गो भिन्नविट्स्वरः।
मत्स्यशोणितगन्धश्च न चाघ्राति यथा पुरा॥
दुर्ब्बलो मलिनाङ्गश्च नष्टसंज्ञोऽपि जायते।
सामान्यग्रहगृहीतस्य लक्षणं समुदाहृतम्॥"
अथ विशिष्टग्रहगृहीतानां लक्षणान्याह।
"स्रस्ताङ्गः स्रुतलसन्मिलत्तनुदृष्टिर्-
वक्त्राक्षो हतचरणैकपक्षनेत्रः।
उद्विग्नः ससलिलचक्षुरस्वरोदी
स्कन्दार्त्तो भवति च गाढ़सृष्टिवन्यः॥
निःसंज्ञो भवति पुनर्लभेत संज्ञां
संलब्धः करचरणैश्च हन्यतीव।
विक्षुभ्यं क्षणति विनद्य जृम्भमाणः
फेनं वा क्षणति च तत्सखाभिजुष्टः॥"
तत्सखाभिजुष्टः स्कन्दापस्मारयुक्तः।
"स्रस्ताङ्गो भयचकितो विदङ्गसन्धिः
साक्षावज्ञपरिपीड़ितः समन्तात्।
स्फोटैश्च प्रचितततुः सदाहपाकै-
र्विज्ञेयो भवति शिशुः शतः शकुन्या॥
रक्ताक्षो हरितमलोऽतिमात्रदेहः
प्रक्षावी वा मुखकरपादवेदनार्त्तः।
गृह्णातिश्वथिततनुश्च कर्णनासं
रेवत्या भृशमभिपीड़ितः कुमारः॥
श्यामाङ्गः क्षपति न वासरे न रात्रौ
विक्रुष्टैः क्षणति च कांस्यतुल्यगन्धिः।
क्षुद्रार्त्तो क्षुधिततनूरुहः कुमार-
स्तृष्णालुर्भवति च पूतनागृहीतः॥
यो हेडि क्षणमपि न क्षमेद्विजाक्ष-
र्द्धीभिर्व्वरसहिताभिरर्द्द्यमानः।
दुर्व्वर्णः सततमधापि योऽसगन्धि-
स्तं ब्रूयाद्भिषगथ गन्धपूतनार्त्तम्॥
आक्रन्दन् परिचकितः सुवेपमानः
संज्ञीनो भवति यथान्नकूजयुक्तः।

सक्ताङ्गो भृङ्गमतिसार्यते च यो वै
तं ब्रूयाद्भिषगथ घृतपूतनार्कम् ॥
स्नानाङ्गः सरुधिरपाणिपादवक्त्रो
यङ्काग्नी कलुषशिराटतोदरो यः ।
स ज्ञेयः शिशुरथ रक्तमक्षिकार्तः
सोद्वेगो भवति च मूत्रतुल्यगन्धिः ॥
यः फेनं वमति विनश्यते च मर्म्मे
सोद्वेगो विहसति वोर्ध्वमीक्षमाणः ।
कूजेच्च प्रततमथो वसास्रगन्धि-
र्निसंज्ञो भवति स नैगमेयजुष्टः ॥"

अथ सामान्यग्रहजुष्टानां चिकित्सामाह ।
सहासुरक्षतिकोदीच्यकाग्रयक्षाणं ग्रहापहम् ।
सहा माषपर्णी ।
"सप्तच्छदामयनिम्बाचन्दनैश्चानुलेपयेत् ।
सर्षपैलक् लशुनं सर्व्वा सर्षपारिष्टपल्लवाः ॥
विड़ालविड़्जालोममेषश्वक्षी वचा मधु ।
धूपः शिशोर्ज्वरघ्नोऽयमग्रग्रहनाशनः ॥
बालग्राम्तोरकर्म्माणि कार्य्याणि ग्रहशान्तये ।
वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च ॥
सारिवा सैन्धवश्चैव पिप्पली घृतमष्टमम् ।
सिद्धं घृतमिदं मेध्यं पिबेत् प्रातर्दिने दिने ॥
ढ़क्कृतिः शिप्रमेधा कुमारो बुद्धिमान् भवेत् ।
न पिशाचा न रक्षांसि न भूता न च मातरः ॥
न भवन्ति कुमाराणां पिबतामेतमङ्गलम् ॥"
अष्टमङ्गलं घृतम् ॥

अथ विशिष्यग्रहजुष्टानां चिकित्सामाह ।
"सोमवल्लीमिन्द्रवृक्षं वन्द्राकं विषजं शमीम् ।
मृगादन्याश्च मूलानि ग्रथितानि विधारयेत् ॥"
तत्र स्कन्दग्रहजुष्टस्य चिकित्सामाह ।
"स्कन्दग्रहोपसृष्टस्य कुमारस्य प्रशस्यते ।
वातघ्नदशमूलाभ्यां क्षीरेण परिषेचनम् ॥
देवदारुशि राल्याभ्यां मधुरेषु गणेषु च ।
सिद्धं सर्पिश्च सक्षीरं पातुमस्मै प्रदापयेत् ॥
सर्षपाः सर्षपिर्म्मोको वचा काकादनी घृतम् ।
उद्वाजाविगवाश्चापि रोमाण्युद्भूपनं भवेत् ॥"
काकादनी श्वेतगुञ्जा ।
सोमवल्लीमिन्द्रवृक्षं वृन्ताकं विषजं शमीम् ।
मृगादन्याश्च मूलानि ग्रथितानि विधारयेत् ॥"
सोमवल्ली सोमलता । इन्द्रवृक्षं ककुभम् ।
मृगादनी इन्द्रवारुणी ।

रक्तानि माल्यानि तथा पताकां
रक्तांश्च गन्धान् विविधांश्च भक्ष्यान् ।
घृतञ्च देवाय बलिं निवेद्य
सकुङ्कुटं स्कन्दगृहे निधाय ॥
स्नानं चिराजं निशि चत्वरेषु
कुर्य्यात् परं ग्रालियवैर्निवेद्य ।
गायत्रियुक्ताभिरथाहुतिभिश्च धीमान्
प्रक्षालयेदाहुतिभिश्च धीमान् ॥

रक्षामनः प्रवक्ष्यामि बालानां पापनाशिनीम् ।
अदृश्यन्ति कर्णेषा याभिरङ्गिरसस्त्रियः ॥
तपसां तेजसाचैव यशसां वयसां तथा ।
निधानं योऽव्ययो देवः स ते स्कन्दः प्रसीदतु ॥
ग्रहसेनापतिर्देवो देवसेनापतिर्विभुः ।
देवसेनारिपुहरः पातु त्वां भगवान् गुहः ॥
देवदेवस्य महतः पावकस्य च यः सुतः ।
गङ्गोमाकृत्तिकानाञ्च स ते शर्म्म प्रयच्छतु ॥
रक्तमाल्याम्बरधरो रक्तचन्दनभूषितः ।
रक्तदिव्यवपुर्देवः पातु त्वां क्रौञ्चदारणः ॥"
अथ स्कन्दापस्मारग्रहजुष्टस्य चिकित्सामाह ।
"विल्वः शिरीषो गोलोमी सुरसादिश्च यो गणः ।
परिषेकः प्रयोक्तव्यः स्कन्दापस्मारशान्तये ॥"
गोलोमी श्वेता दूर्व्वा । सुरसादिगणो यथा,—
"सुरसा श्वेतसुरसा पाठा पक्षी फणिज्झकः ।
सौगन्धिकं भूस्तृणको राजिका श्वेतवर्व्वरी ॥
कट्फलं खरपुष्पा च कासमर्दश्च शुक्लकः ।
विड़ङ्गमथ निर्गुण्डी कर्णिकार उदुम्बरः ॥
बला च काकमाची च तथा च विषमुष्टिका ।
कपर्दिमिश्रः ख्यातः सुरसादिरयं गणः ॥"
सुरसा ज्ञेयतुलसी । श्वेतसुरसा श्वेततुलसी ।
पक्षी भार्गी । फणिज्झकः मरुवकः । सौगन्धिकं कच्चूरम् । भूस्तृणकः सुगन्धतृणम् ।
खरपुष्पा वर्व्वरी । कासमर्दः कसौंदी । विषमुष्टिका वकाद्नि ॥ * ॥
"अष्टमूत्रविपक्वञ्च तैलमभ्यङ्गने हितम् ।"
मूत्राष्टकमाह ।
"गोजाविमहिषाश्वानां खरोष्ट्रकरिणान्तथा ।
मूत्राष्टकमिति ख्यातं सर्व्वग्राम्येषु सम्मतम् ॥
क्षीरीवृक्षकषायेण काकोल्यादिगणेन च ।
विपक्वं घृतं पञ्चाहात्सर्व्वं पयसा सह ॥
काकोल्यादिगणेन कल्कीकृतेन तैलं पक्वयम् ।
काकोल्यादिगणो यथा,—
"काकोली क्षीरकाकोली जीवकर्षभकस्तथा ।
ऋद्धिर्वृद्धिस्तथा मेदा महामेदा गुडूचिका ॥
सुपर्णी माषपर्णी पद्मकं वंशरोचना ।
शृङ्गी प्रपौण्डरीकञ्च जीवन्ती मधुयष्टिका ।
द्राक्षा चेति गणो नाम्ना काकोल्यादिरुदीरितः ।
स्नग्यश्छर्दृंहणो हृद्यः पित्तरक्तानिलापहः ।
उत्साद्नं वचा हिङ्गुयुक्तमत्र प्रकीर्त्तितम् ॥
यष्टीलूकपुरीषाभि कैया इक्षिनखो घृतम् ।
वृषभस्य च रोमाणि योन्यान्युद्भूपने सदा ॥
अजस्य कुक्कुटी विम्बी मर्कटीचापि धारयेत् ॥"
अजस्य यवासा इति लोके । कुक्कुटी ग्राम्यकी ।
"पक्वान्यामानि मांसानि प्रसन्नं रुधिरं पयः ।
सुरोदनं निवेदाथ स्कन्दापस्मारिणे वटे ॥"
वटे वटतले बलिं निवेदयेत्यन्वयः ।
तेन स्कन्दापस्मारिणा स्नानं कारयेदित्यन्वयः ।
"चतुष्पथे कारयेच्च स्नानं तेन सतः पठेत् ।
स्कन्दापस्मारसंज्ञो यः स्कन्दस्य दयितः सखा ।
विशाखः स शिशोरस्य शिवायास्तु शुभानन ॥"
अथ शकुनीग्रहजुष्टस्य चिकित्सामाह ।
"शकुनीग्रहजुष्टस्य कार्य्यं वैद्येन जानता ।
पैतसान्नकपित्यानां क्षीरेण परिषेचनम् ॥
क्षीरेरमधुकोशीरसारिवोत्पलपद्मकैः ।
लोध्रप्रियङ्गुमञ्जिष्ठागैरिकैः प्रदिहेच्छिशुम् ॥"
प्रदिहेत् लिम्पेत् । रूपसिद्धिरार्ष्यत्वात् ।
"स्कन्दग्रहोक्ता धूपाश्च हिता अत्र भवन्ति हि ।
स्कन्दापस्मारशमनं घृतमत्रापि पूजितम् ॥
घृतावर्त्ती शृङ्गवेरनागदन्तीनिदिग्धिकाः ।
लक्ष्मणां सहदेवाञ्च दृहतीञ्चापि धारयेत् ॥"
शृङ्गवेरः वड़ी इन्द्रवारुणी । नागदन्ती नागदुली इति लोके प्रसिद्धा ।
"तिलतण्डुलकं मांसं हरितालं मनःशिलाम् ।
बलिरेष निकुम्भेषु निवेद्यो नियतात्मना ॥
निकटे च प्रयोक्तव्यं स्नानमस्य यथाविधि ।
श्वेतगिरीषगन्धाश्वकुशगुग्गुलुसर्षपैः ॥
सिद्धमभ्यञ्जने तैलं धारणं पूर्व्वमेव तु ।
शकुनीग्रहशान्त्यर्थं प्रदेहं कारयेद्धितम् ॥
कुर्य्याच्च विविधां पूजां शकुन्याः कुसुमैः शुभैः ।
निकुम्भोक्तेन विधिना क्षपयेत्तं ततः पठेत् ॥
अन्तरीक्षचरा देवी सर्व्वालङ्कारभूषिता ।
अधोमुखी क्षुत्तृषार्त्ता शकुनी ते प्रसीदतु ॥
दुर्दर्शना महाकाया पिङ्गाक्षी भैरवस्वरा ।
लम्बोदरी शकुकर्णी शकुनी ते प्रसीदतु ॥"*॥
अथ रेवतीग्रहजुष्टस्य चिकित्सामाह ।
"अश्वगन्धाजशृङ्गी च शारिवाथ पुनर्नवा ।
सहा विदारी क्षीराभ्यां क्षीरेण परिषेचनम् ॥
अजशृङ्गी मेढ़ाशृङ्गी । सहा सेवतीपुष्पजातिः ।
तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्जरसे तथा ।
पलङ्कषायां गलदे तथा गौरकदम्बके ॥
सर्जरसः राल: पलङ्कषा गुग्गुलुः । गलदं लाम्बकसर्षपैरवत्पीतच्छविः । गौरकदम्बकः हारिद्रकः । हरदुया कदम्ब इति लोके ।
धवाश्वकर्णककुभशुक्लकौटिन्द्रकेषु च ।
काकोल्यादौ गणे चापि सिद्धं सर्पिः पिबेच्छिशुः॥
अश्वकर्णः शाल इति लोके प्रसिद्धः ।
कुलत्थाः शुक्लचूर्णञ्च प्रदेहः साक्षगन्धिकः ।
यष्टीलूकपुरीषाभि यवान् यवफले हृतम् ॥
सन्ध्ययोरुभयोः कार्य्यमेतद्धूपनं शिशोः ॥
यवफलो यवाङ्कुरः ।
सुक्ताः सुमनसो लाजाः पयःशाल्योदनं दधि ।
बलिर्निवेद्यो गोतीर्थे रेवत्ये प्रयतात्मना ॥
गोतीर्थे गोष्ठे ।
स्नानं धात्रीकुमाराभ्यां सङ्गमे कारयेद्भिषक् ।
नानावस्त्रधरा देवी चित्रमाल्यानुलेपना ॥
चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु ।
उपासते यां सततं देवी विविधभूषणाः ॥
लम्बा करालाविनता तथैव बहुपुत्रिका ।
रेवती शुष्कनासा च तुभ्यं देवी प्रसीदतु ॥*॥
अथ पूतनाग्रहजुष्टस्य चिकित्सामाह ।
कपोतवङ्का श्येनाक्षी वरुण: पारिभद्रकः ।
आस्फोता चैव योन्याः स्युर्बालानां परिषेचने ॥
कपोतवङ्का ब्राह्मी इति लोके । पारिभद्रो निम्बः । आस्फोता अपराजिता ।
नवा पयस्या गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्जरसश्चैव तैलार्थे कल्क इष्यते ॥

नवा पयस्या नूतना क्षीरविदारी। गोलोमी श्वेतदूर्वा।
हितं घृतं तगाक्षीर्या संसिद्धं मधुकेऽपि च।
कुष्ठतालीसखदिरा: स्यन्दनोऽर्जुन एव च॥
पनस: ककुभश्चापि मञ्जिष्ठो बदरस्य च।
कुक्कुटास्थि घृतञ्चापि धूपनं सह सर्षपै:॥
स्यन्दन: स्यन्दन इत्येव नाम्ना प्रसिद्ध:।
काकादनी चित्रफला विम्बी गुञ्जाश्च धारयेत्।
काकादनी श्वेतगुञ्जा। चित्रफला इन्द्रिन्द्रवारुणी।
मत्स्यौदनं बलिं दद्यात् क्षपरं पललं तथा।
सरावसंपुटं कृत्वा तस्मे भूम्यां गृहे भिषक्।
उत्तरदिग्भिमिक्तस्य ग्रिग्रो: स्नपनमिष्यते।
कुष्ठतालीसखदिरं चन्दनं स्यन्दनं तथा।
देववारु वचा हिङ्गु कुष्ठं गिरिकदम्बक:।
एला हरेणवश्चापि योज्या धूपने सदा॥
मलिनाम्बरसंवीता मलिना रूक्षमूर्द्धजा।
शून्यागाराश्रया देवी दारकं पातु पूतना॥*॥
अथ गन्धपूतनाग्रहगृहीतस्य चिकित्सामाह।
तिक्तद्रुमाणां पत्रेषु क्वाथं कार्येऽभिषेचने।
तिक्तद्रुमानाह।
निम्ब: पटोल: खदिरश्च गुडूची वासकस्तथा।
विसर्पकुष्ठगुत् स्वादो गणोऽर्धं पञ्चतिक्तक:॥
पिप्पली पिप्पलीमूलं वर्षाभू मधुरको मधु।
ग्राजपर्णीद्वयं चैव घृतार्धं समाहरेत्॥
सर्वगन्धै: प्रदेहश्च गात्रे चाभ्यङ्ग एव च।
सर्वगन्धै: कुङ्कुमागुरुकर्पूरकस्तूरीचन्दनै:।
अथवा शीतलै: चन्दनकर्पूरै: न तु कस्तूरीकुङ्कुमागुरुभिर्लेपासम्भवात्।
पुराणं कौक्कुटं कैशमं सर्पभवन्तथा।
जीर्णचाभीक्ष्णधूपो वासो धूपनायोपकल्पयेत्॥
कुक्कुटीं मर्कटीं विम्बीमनन्ताञ्चापि धारयेत्।
मांसमामं तथा पक्वं ग्रीवितञ्च चतुष्पथे।
निवेदयेन्नच गृहे ग्रिग्रो: स्नपनमिष्यते॥
करञ्जा पिङ्गला सुक्ता कषायाम्लरसंयुता।
देवी बालमिमं प्रीता रक्ष त्वं गन्धपूतने।"*॥
अथ शीतपूतनाग्रहगृहीतस्य चिकित्सामाह।
गोमूत्रं वस्तमूत्रञ्च सुक्ताचामरदारु च।
कुष्ठञ्च सर्वगन्धांश्च तैलार्धमवधारयेत्॥
सर्वगन्धान् चन्दनादीन्।
रोहिणीनिम्बखदिरपलाशककुभत्वच:।
नि:क्वाथ्य तस्मिन्नि:क्वाथे सक्षीरे विपचेद् घृतम्॥
श्वपोलकपुरीषाणि वस्तिगन्धा महिलचम्।
निम्बपत्राणि च तथा धूपनार्थं समाहरेत्॥
धारयेदपि गृध्राञ्च बलां काकादनीं तथा।
नद्या सप्तौदनेनापि तर्पयेच्छीतपूतनाम्॥
जलाशयान्ते बालस्य स्नपनञ्चोपदिश्यते।
जलाशयान्ते जलाशयतीरे।
देवे देवस्त्रीपहारो वारुणी रुधिरं तथा॥
सप्तौदनाग्निनी देवी सुरामांसोक्षितपायिनी।
जलाशयरता नित्यं पातु त्वां शीतपूतना॥"*॥
अथ सुखसङ्किकाग्रहगृहीतस्य चिकित्सामाह।
कपित्थं विल्वतर्कारीबासागन्धर्वहस्तका:।
कुवेराक्षी च योज्या: सुबालानां परिषेचने॥
तर्कारी गजियारि इति लोके। गन्धर्वहस्तक: श्वेत एरण्ड:। कुवेराक्षी पाढरि इति लोके।
खरसैर्भृङ्गपत्राणां तथैव हयगन्धया।
तैलं वचाञ्च संयोज्य पचेदभ्यङ्गनं शिशो:॥
भृङ्गपत्र: भगरा इति लोके।
वचा सर्जरसं कुष्ठं सर्षपोद्धूपने हितम्॥
वर्षाकं गूलकं माल्यमङ्गनं पारदं तथा।
मन:शिलाञ्चोपहरेत् गोक्षमध्ये बलिन्तत:॥
पायसं सपुरोडाशं तद्वल्यर्थमुपाहरेत्।
मन्त्रपूताभिरद्भिश्च तत्रैव स्नपनं हितम्॥
जलाभिमन्त्रणमन्त्रमाह।
अजकृता कामवती सुभगा कामरूपिणी।
गोक्षमध्यालयरता पातु त्वां सुखसङ्किका॥*॥
अथ नैगमेयग्रहगृहीतस्य चिकित्सामाह।
विस्राग्निमत्स्यपूतीकै: कार्यं स्यात् परिषेचनम्।
पूतीक: घोराकरञ्ज इति लोके प्रसिद्ध:।
प्रियङ्गुसरलागन्धाघृतपुष्पाकुटन्नटै:।
पचेत्तैलं सगोमूत्रं दधिमस्तुकाञ्जिकै:॥
कुटन्नट वितुन्नकनाम्नो वृक्षविशेषस्य त्वक्।
गुडत्वची इति लोके प्रसिद्धा। सुस्ताक्षत: श्वेतनाको वा।
वचां वयस्यां जटिलां गोलोमीं चापि धारयेत्।
वयस्या आमलकी गुडूची वा।
उत्सादनं हितञ्चात्र स्नेहापस्मारनाशनम्।
मर्कटीलूकयुक्तानां पुरीषाणि पिशितम्।
धूम: स्नपनके कार्यो बालस्य हितमिच्छता।
पिशितम् नैगमेयग्रहे।
तिलतण्डुलकं माल्यं भक्ष्यांश्च विविधानपि।
कौमारपिशितमेषाय प्रथमन्तु निवेदयेत्॥
मेषाय नैगमेयग्रहाय।
अधस्तात् क्षीरवृक्षस्य स्नपनञ्चोपदिश्यते॥
अजाननसलालाभि: कामरूपी महायशा:।
बालं पालयिता देवो नैगमेयोऽभिरक्षतु॥"
इति भावप्रकाश:॥
(तथास्य लक्षणान्तरं चिकित्सितञ्च यथा,—
"बलिग्राम्यौषधकर्माणि कार्याणि ग्रहशान्तये।
मन्त्रश्चायं प्रयोक्तव्यस्तत्रादौ सर्वकामिक:॥
ॐ नमो भगवते गरुड़ाय ग्रामकाय सदक्षर स्फुर स्फुर स्वाहा। ॐ कं खं टं पं ग्रं वैनतेयाय नम:। ॐ ह्रीं हुं चं।
बालदेहप्रमाणेन पुष्पमालान्तु सर्वत:।
प्रदद्यात् सुच्छिकाभक्तबलिर्देयस्तु ग्राम्तिक:।
ॐकारी सुवर्णपक्षी बालकं रक्ष रक्ष स्वाहा।
ॐ नारायणाय नम:।"
"प्रथमे दिवसे मासे वर्षे वा गृह्णाति नन्दा नाम माहका तया गृहीतमात्रस्य प्रथमं भवति ज्वर:। चक्षुरुन्मीलयति गात्रसुद्वेजयति न पिबते क्रन्दति स्नानं न गृह्णाति। आँतुकारश्च भवति। बलिन्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। नद्युभयतटन्मृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा शुक्लौदन: शुक्लपुष्पं सप्तध्वजा: सप्तप्रदीपा: सप्तस्रक्तिका: सप्तवटका:। सप्तसच्छुलिका: शुभ्रकिका गन्धताम्बूलं मत्स्यमांसं सुरामद्यभक्तञ्च पूर्वस्यान्दिशि चतुष्पथे मध्याह्ने बलिर्दातव्य: अश्वत्थपत्रं जलकुम्भे निक्षिप्य ग्रान्तुदकेन स्नापयेत्। रसोनसिद्धार्थकमेषशृङ्गनिम्बपत्रग्निवनिर्म्माल्यैर्बालकं धूपयेत्। ॐ नमो नारायणाय असुकस्य व्याधिं हन हन सुच सुच स्वाहा एवं दिनत्रयं बलिं दत्वा चतुर्थे दिवसे ब्राह्मणं भोजयेत्। तत: सम्पद्यते शुभम्॥
द्वितीये दिवसे मासे वर्षे वा गृह्णाति सुनन्दानाम माहका। तया गृहीतमात्रस्य प्रथमं भवति ज्वर:। चक्षुरुन्मीलयति गात्रसुद्वेजयति न पिबते क्रन्दति स्नानं न गृह्णाति आँतुकारश्च भवति।
बलिन्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्।
तण्डुलं क्षीरपृष्ठेकं गृहीत्वा दधिगुड़घृतमिश्रितं प्ररावेकं गन्धताम्बूलं पीतपुष्पं पीतसप्तध्वजा:। चत्वार: प्रदीपा: दग्धस्त्रिका: मत्स्यमांससुरास्त्रिलचूर्णञ्च पश्चिमस्यान्दिशि चतुष्पथे बलिर्दातव्य:। दिनानि त्रीणि त्रिसन्ध्यं तत: ग्रान्तुदकेन स्नापयेत्। ग्रिवनिम्बाक्ष्यसिद्धार्थमार्ज्जारलोम उशीरबालकृष्णधूपं दद्यात्। ॐ नमो नारायणाय असुकस्य व्याधिं हन हन सुच सुच ह्रीं फट् स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् तत: सम्यद्यते शुभम्।
तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतनानामाम्रहका तया गृहीतमात्रेण प्रथमं भवति ज्वर:। चक्षुरुन्मीलयति स्नानं न गृह्णाति मुष्टिं बध्नाति क्रन्दति ऊर्द्धं निरीक्षते। बलिन्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। नद्युभयतटन्मृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा रक्तचन्दनं गन्धताम्बूलं रक्तसप्तध्वजा:। सप्तप्रदीपा: सप्तस्रक्तिका:। पश्चिमांससुरान्यभक्तं दक्षिणस्यान्दिशि अपराह्णे चतुष्पथे बलिर्दातव्य:। ग्रिवनिम्बाक्ष्यगुग्गुलुसर्षपनिम्बपत्रमेषशृङ्गैर्दिनत्रयं धूपयेत्। ॐ नमो नारायणाय असुकस्य व्याधिं हन हन सुच सुच स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् तत: सम्पद्यते शुभम्॥
चतुर्थे दिवसे मासे वर्षे वा गृह्णाति सुखसुप्तिकानाम माहका तया गृहीतमात्रेण प्रथमं भवति ज्वर:। ग्रीवां नामयति चक्षुरुन्मीलयति स्नानं न गृह्णाति रोदिति स्वपिति मुष्टिं बध्नाति बलिन्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। नद्युभयतटन्मृत्तिकां गृहीत्वा पुत्तलिकां कृत्वा उत्पलपुष्पं गन्धं ताम्बूलं दग्धध्वजा: दीपाश्चत्वार:। त्रयोदग्ध स्त्रिका: मत्स्यमांससुरामद्यभक्तञ्च उत्तरस्यां दिशि अपराह्णे बलिर्देय: चतुष्पथे। ॐ नमो नारायणाय असुकस्य व्याधिं हन हन मथ मथ स्वाहा। चतुर्थे

दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम्।

पञ्चमे दिवसे मासे वर्षे वा यद्गृह्णाति कटपूतना नाम मालका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रमुद्वेजयति स्तन्यं न गृह्णाति सृष्टिं बध्नाति। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। कुम्भकारचक्रस्य मृत्तिकां गृहीत्वा पुत्तलिकां विधाय गन्धताम्बूलं शुक्लपुष्पं शुक्लौदनं पञ्च ध्वजाः पञ्च प्रदीपाः पञ्चवटकाः ऐशान्यां दिशि बलिर्दातव्यः। ग्राम्यपुदकेन स्नापयेत्। शिवनिर्म्माल्यसर्पनिर्म्मोक गुग्गुलु निम्बपत्रालकधूतैर्धूपं दद्यात्। ॐ नमो नारायणाय असुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम्॥ षष्ठे दिवसे मासे वर्षे वा यद्गृह्णाति शकुनिकानाम मालका तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रभेदं दर्शयति दिवारात्रावुत्थानं भवति। ऊर्द्धं निरीक्षते। बलिं तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। पिष्टकेन पुत्तलिकां कृत्वा शुक्लपीतरक्तपुष्पगन्धताम्बूलानि दद्यात्। दश दीपाः। दश पीतध्वजाः दश खस्तिकाः दश वटकाः। क्षीरजम्बुड़िकाः। मत्स्यमांससुरा आग्नेय्यान्दिशि निष्क्रान्ते मध्याह्ने बलिर्दातव्यः। ग्राम्यपुदकेन स्नापयेत्। शिवनिर्म्माल्यसर्षान्गुग्गुलुसर्पनिर्म्मोकनिम्बपत्रधूतैर्धूपं दद्यात्। ॐ नमो नारायणाय असुकस्य व्याधिं चूर्णय चूर्णय हन हन स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम्॥

सप्तमे दिवसे मासे वर्षे वा यद्गृह्णाति शुष्करेवती नाम मालका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रमुद्वेजयति सृष्टिं बध्नाति रोदिति। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। रक्तशुक्लपुष्पं गन्धताम्बूलरक्तौदनं क्षीरराक्षयोदश खस्तिकाः त्रयोदश सक्तुलिका जम्बुड़िका मत्स्यमांससुराः त्रयोदश ध्वजाः पञ्च प्रदीपाः। पश्चिमस्यान्दिशि ग्रामनिष्क्रान्तेऽपराह्णे वृक्षमाश्रित्य बलिर्दातव्यः। ग्राम्यपुदकेन स्नापयेत्। गुग्गुलुमेषशृङ्गसर्षपोग्रीर बालकधूतैर्धूपन्दद्यात्। ॐ नमो नारायणाय दीप्ततेजसे हन हन सुच सुच स्वाहा॥ चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम्।

अष्टमे दिवसे मासे वर्षे वा यद्गृह्णाति अर्यका नाम मालका तया गृहीतमात्रेण प्रथमं भवति ज्वरः। शरीरगन्धः पूतिगन्धश्च जायते। आहारं न गृह्णाति गात्रमुद्वेजयति। बलिन्तस्य प्रवक्ष्यामि ततः सम्पद्यते शुभम्। रक्तपीतध्वजाः चन्दनं पीतपुष्पं सक्तुलयः पर्पटिका मत्स्यमांससुराः जम्बुड़िकाः प्रत्यूषे बलिन्दद्यात्॥ ॐ नमो नारायणाय त्रैलोक्यविद्रवणाय चतुर्हिंग्रामीश्वराय व्याधिं हन हन सुच सुच ज्वल ज्वल दह दह ॐ ह्रीं फट् स्वाहा॥ चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्पद्यते शुभम्।

नवमे दिवसे मासे वर्षे वा यद्गृह्णाति खतिका नाम मालका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। नित्यं कर्द्दयति गात्रभेदं दर्शयति सृष्टिं बध्नाति। निद्रातितरा स्याद्बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। गजभयसटन्मृत्तिकां गृहीत्वा पुत्तलिकां निर्म्माय शुक्लवस्त्रेण वेष्टयेत्। शुक्लपुष्पं शुक्लौदनं गन्धताम्बूलं शुक्लाः त्रयोदश ध्वजाः त्रयोदश प्रदीपाः त्रयोदश खस्तिकाः त्रयोदश मत्स्यमांससुराः। उत्तरदिग्विभागे ग्राममिष्क्राम्ये बलिं दापयेत्। ग्राम्यपुदकेन स्नापयेत्। गुग्गुलुनिम्बपत्रगोधूमगोशृङ्गश्वेतसर्षपधूतैर्धूपं दद्यात्। ॐ नमो नारायणाय चतुर्भुजाय हन हन सुच सुच स्वाहा। चतुर्थदिवसे ब्राह्मणान् भोजयेत्ततः सम्पद्यते शुभम्।

दशमे दिवसे मासे वर्षे वा यदि गृह्णाति निर्ऋता नाम मालका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रमुद्वेजयति ओंकारं करोति पुरीषमूत्रञ्च बहु भवेत्। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। पारावारस्य मृत्तिकया पुत्तलिकां कृत्वा रक्तचन्दनगन्धताम्बूलादिभिर्भूषयित्वा पञ्च वर्णाः पञ्च ध्वजाः पञ्च प्रदीपाः पञ्च खस्तिकाः पञ्च पुत्तलिका मत्स्यमांससुराः वायव्यान्दिशि बलिन्दद्यात्। काकविष्ठागोमांसगोशृङ्गरसोगमाष्यांरसोमनिम्बपत्रधूतैर्धूपयेत्। ॐ नमो नारायणाय चूर्णितहस्ताय हन हन सुच सुच स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्ततः सम्पद्यते शुभम्॥

एकादशे दिवसे मासे वर्षे वा यदा गृह्णाति पिलिपिच्छिका नाम मालका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। आहारं न गृह्णाति। ऊर्द्धदृष्टिर्भवति गात्रभङ्गश्च भवति ओंकारश्च भवति। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। पिष्टकेन पुत्तलिकां कृत्वा रक्तचन्दनरक्तं तस्या मुखं दुग्धेन सिञ्चेत् पीतपुष्पं गन्धताम्बूलं सप्त प्रदीपा अष्टौ वटका अष्टौ सक्तुलिका अष्टौ पुरिका मत्स्यमांससुराः पूर्वस्यान्दिशि बलिर्दातव्यः। ग्राम्यपुदकेन स्नापयेत्। शिवनिर्म्माल्य गुग्गुलु गोशृङ्गसर्पनिर्म्मोकधूतैर्धूपयेत्। ॐ नमो नारायणाय सुच सुच स्वाहा। चतुर्थदिवसे विप्रान् भोजयेत्तेन सम्पद्यते शुभम्॥

द्वादशे दिवसे मासे वर्षे वा यदा गृह्णाति कासुका नाम मालका। तया गृहीतमात्र स्यादौ जायते ज्वरः। हसित्वा वदति अङ्गुल्या तर्ज्जयति क्रामति निःश्वसिति। मुहुर्मुहुरुद्वेजयति। आहारं न करोति। बलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम्। चौरेण पुत्तलिकां कृत्वा शुक्लकुसुमं गन्धताम्बूलं शुक्लाः सप्त ध्वजाः। सप्त सक्तुलिकाः। सप्त प्रदीपाः। करम्भेण दधिभक्तेन सर्वकर्म्मबलिं दद्यात् ग्राम्यपुदकेन स्नापयेत्। श्वेतसर्षपगुग्गुगुग्गुलुशिवनिर्म्माल्यधूतैर्धूपयेत्। ॐ नमो नारायणाय व्याधिं सुच सुच हन हन स्वाहा। चतुर्थदिवसे विप्रान् भोजयेत्। ततः सम्पद्यते शुभम्॥

इति रावणकृतं बालतन्त्रं समाप्तम्।

इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे।)

बालचर्य्या, पुं, (बालस्य बालकस्येव चर्य्या यस्य।) कार्त्तिकेयः। इति त्रिकाण्डशेषः॥ बालकस्य चरित्रे, क्ली॥

बालतनयः, पुं, (बालानि नवोद्गतपत्राणि तनयानीव यस्य।) खदिरवृक्षः। इत्यमरः।२।४।९६॥ (गुणादयोऽस्य खदिरशब्दे ज्ञातव्याः॥) बालकपुत्रश्च॥

बालतन्त्रं, क्ली, (बालाय बालकरक्षार्थं तन्त्रमुपायः ग्रन्थो वा।) गर्भिणीचर्य्या। तत्पर्य्यायः। कुमारभृत्या २ गर्भिण्यवेक्षणम् ३। इति त्रिकाण्डशेषः॥ (अस्य विवरणन्तु सुश्रुते खलस्थाने १ अध्याये। यथा, "ग्रह्यं ग्रहाणामयं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं वाजीकरणतन्त्रमिति॥" कौमारभृत्यस्य वा बालतन्त्रस्य सत्त्वमाह तत्रैव। "कौमारभृत्यं नाम कुमारभवनधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसंसृत्यनाच्च व्याधीनामुपशमनार्थम्॥" बालतन्त्रोक्ता कानि तान्याह तत्रैव ३ अध्याये।

"नवग्रहाङ्गतिज्ञानं स्कन्दस्य च निषेधनम्।
अपस्मारग्रकुन्धोश्च रेवत्याश्च पुनः पृथक्।
पूतनायास्तथान्यायाः मङ्किकाग्रहपूतना।
नैगमेयचिकित्सा च ग्रहोत्पत्तिः सयोनिजा॥
कौमारतन्त्रमित्येतत् ग्रारीरेषु प्रकीर्त्तितम्॥"

एतेषां विवरणन्तु बालग्रहशब्दे द्रष्टव्यम्॥)

बालदलं, क्ली, (बालं नवजातं दलम्।) नवदलम्। तत्पर्य्यायः। ग्रुण्यम् २। इत्यमरः।२।४।२६०॥ (यथा, रघौ २।२६ श्लोकटीकायां मल्लिनाथः। गङ्गायाः प्रपातस्तस्यान्ते समीपे विरूढानि जातानि ग्रुण्यानि बालदलानि यस्मिन् तत्।")

बालदलकः, पुं, (बालानि दलानीव दलानि यस्य। यद्वा बाल इव क्षुद्रं दलं यस्य। ततः स्वार्थे कन्।) खदिरवृक्षः। इत्यमरटीकायां भरतः॥

बालधिः, पुं, (बालाः केशाः धीयन्तेऽत्र। बाल + धा + कि।) केशयुक्तलाङ्गूलम्। इत्यमरः।२।८५०॥ (यथा, किरातेः १२। ४०।

"चमरीगवैः शिववलस्य
बलवति भयेऽप्युपस्थिते।
वंग्रवितिषु विधत्तपृथु-
प्रियबालबालधिभिरादरे धृतिः॥")

बालपत्रः, पुं, (बाल इव क्षुद्रं पत्रं यस्य।) खदिरवृक्षः। इत्यमरटीकायां भरतः॥ यवासः। इति राजनिर्घण्टः॥ (बालं पत्रमिति विग्रहे।) क्ली। नूतनपर्णम्॥ (यथास्य पर्य्यायः॥

"खदिरो रक्तसारश्च गायत्री दन्तधावनः।
कण्टकी बालपत्रश्च बहुशल्यश्च यक्ष्मियः॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

बालपत्रकः, पुं, (बालपत्र एव। स्वार्थे कन्।) खदिरवृक्षः। इति त्रिकाण्डशेषः॥

बालपाश्या, स्त्री, (बालपाशे केशबन्धने साधुः तत्र साधुरिति यत्।) सीमन्तिकाखितखर्जूरादिरचितपट्टिका। सिंती इति भाषा। तत्पर्य्यायः। परितथा २। इत्यमरः।२।६।१०३॥ बालपाश्यखितमणिः। इति तट्टीकायां भरतः॥

बालपुष्पिका, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः। ततः स्वार्थे कन् आपि अत इत्वम्।) यूथिका। इति राजनिर्घण्टः॥ (विततिरस्या यूथिकाशब्दे निर्देक्ष्यते।)

बालपुष्पी, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः सा।) यूथिका। इति जटाधरः॥

बालभद्रकः, पुं, (बालेऽपि भद्र इव। ततः स्वार्थे कन्।) विल्वभेदः। तत्पर्य्यायः। श्रीफलः २। इति शब्दचन्द्रिका॥

बालभैषज्यं, क्ली, (बालं भैषज्यम्। यद्वा, बालस्य शिशोर्भैषज्यम्।) रसाञ्जनम्। इति राजनिर्घण्टः॥ बालकस्यौषधञ्च। (तद्यथा,—
"भैषज्यं पूर्व्वसुहृदं नराणां यज्ञुरादिषु।
कार्य्यन्तदेव बालानां मात्रा तस्य कनीयसी॥"
इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे॥)

बालभोज्यः, पुं, (बालानां भोज्यः।) चणकः। इति राजनिर्घण्टः॥ बालकभक्ष्यणीये, त्रि॥

बालमूषिका, स्त्री, (बाला क्षुद्रा मूषिका इन्दुरः।) क्षुद्रमूषिका। छिट्का इन्दुर इति भाषा। तत्पर्य्यायः। गिरिका २। इत्यमरः।२।५।१२॥ चिक्कः ३ वेश्मनकुलः ४ चिका ५। इति शब्दरत्नावली॥

बालयज्ञोपवीतकं, क्ली, (बालं यज्ञोपवीतम्। ततः स्वार्थे कन्।) उपवीतिविशेषः। तत्पर्य्यायः। उरस्कटः २ पचवटः ३। इति त्रिकाण्डशेषः॥

बालराजं, क्ली, (बालः खल्पोऽपि राजते इति। राज+पचाद्यच्।) वैदूर्य्यम्। इति शब्दरत्नावली॥ बालकश्चेष्ठे, पुं॥

बालरोगः, पुं, (बालस्य रोगः।) बालकस्य व्याधिः। तस्य निदानं लक्षणानि चाह।
"बाधाद्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषजैस्तथा।
दोषा हैडे प्रकुप्यन्ति ततः स्तन्यं प्रदूषयति॥
मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः।
दूषयन्ति पयस्तेन जायन्ते व्याधयः शिशोः॥
वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः।
श्यामस्वरः क्षुधाक्षामः स्याद्वङ्विण्मूत्रमारुतः॥
स्निग्धो भिन्नमलो बालः कामलापित्तरोगवान्।
श्लेष्मदुष्टं पिबन् क्षीरं लालासुः श्लेष्मरोगवान्॥
निद्रार्दितो जडः सूनवक्त्रोच्छ्वसनः शिशुः॥
ज्वरार्त्ता व्याधयः सर्व्वे वक्ष्यन्ते मद्वतानु ये।
बालानामपि ते तद्वद्दोषजा भिषगुत्तमैः॥
बालानामेव ये रोगा भवन्ति महतां न च।
तालुकण्टकसंस्थानमधारय यतः॥"
तत्रादौ तालुकण्टकमाह।
"तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम्।
तेन तालुप्रदेशस्य निम्नता महती जायते।
तालुपातात् स्तनद्वेषः शुष्कात् प्राणं ग्रसद्द्रवम्।
लट्वचिक्कणकासरुजा श्वेतादुद्वरता वमिः॥"
प्राणं स्तन्यस्य। ग्रसद्द्रवं द्रवरूपम्॥
अथ महाषण्ढमाह।
"विसर्पेतु शिशोः प्राणनाशनः शोणितोद्भवः।
पद्मवर्णो महाषण्ढरोगो दोषत्रयोद्भवः।
ग्रस्ताभ्यां हृदयं याति हृदयाच्च गुदं व्रजेत्॥"
पद्मवर्णः लोहितवर्णः तच्च शोणितजो विसर्पः ग्रस्ताभ्यां हृदयं याति हृदयात् गुदं व्रजेत्। एवं वस्तितो गुदं याति। गुदतो हृदयं हृदयाच्छिरो याति इति बोद्धव्यम्॥
अथ कुकूणकमाह।
'कुकूणकः शोरदोषात् शिशूनामेव जायते।
जायते तेन तन्नेत्रं कण्डूरं प्रस्रवेन्मुहुः॥
शिशुः कुर्य्याल्ललाटाक्षिकूटनासाप्रघर्षणम्।
ग्रस्तो नाकैप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः॥'
कुकूणकः कोणुया इति लोके ख्यातः॥*॥
अथ सुक्किगुदपाकमाह।
'वातेनाक्षापिता नाभिः सरुजा सुक्किरुच्यते।
बालस्य गुदपाकाख्यो व्याधिः पित्तेन जायते॥'
अथाहिपूतनं आह।
'ग्रसन्मूत्रसमायुक्तोऽधौतेऽपाने शिशोर्भवेत्।
स्निग्धे वा स्नाप्यमानस्य कण्डूः रक्तकफोद्भवा॥
कण्डूयनात्ततः क्षिप्रं स्फोटाः स्रावश्च जायते।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम्॥
स्निग्धे स्नेहिते॥*॥ अथाजगल्लीमाह।
स्निग्धा सवर्णा ग्रथिता निरुजा शुक्लसन्निभा।
कफवातोत्थिता श्वेता बालानामजगल्लिका॥'
ग्रथिता गुम्फितेव। शुक्लसन्निभा। शुक्लाक्षतिः॥
अथ पारिगर्भिकमाह।
'मातुः कुमारी गर्भिण्याः स्तन्यं प्रायः पिबन्नपि।
कासाग्निसादवमथुतन्द्राकार्श्यारुचिश्रमैः॥
युज्यते कोऽरुहा च तमाहुः पारिगर्भिकम्।
रोगं परिभवाख्यञ्च तत्र बुद्ध्येत दीपनम्॥'
पिबन्नपीत्यपिशब्दादपिबन्नपि पारिगर्भिकः।
अहौड़ी इति लोके।
परिभवाख्यं परिभवेति नामान्तरम्॥*॥
अथ दन्तोद्भेदकान् रोगानाह।
'दन्तभेदः शिशोः सर्व्वरोगाणां कारणं स्मृतम्।
विशेषाच्च रविर्भेदकालच्छर्द्दिश्शिरोरुजम्॥
अभिष्यन्दस्य पोथक्या विसर्पस्य च जायते॥'
कारणमित्यन्वयः। पोथक्याः वर्त्मरोगविशेषस्य॥
अथ बालरोगाणां चिकित्सा।
'भैषज्यं पूर्व्वसुहृदं महतां यज्ञुरादिषु।
तदेव कार्य्यं बालानां किन्तु दाहादिकं विना॥'
दाहादिकं विना अग्निदाहादिसारवमनविरेचनशिराव्यधादिकं विना। महाकष्टे चोत्पन्ने वमनविरेकाद्यं स्यात्। यत आह सुश्रुतः।
विरेकवस्तिवमनानृते कुर्य्याच्च बालयादिति।
अत्ययात् विनाशकरकष्टात् ऋते विना॥
'त एव दोषा दूष्याश्च ज्वराद्या व्याधयश्च ते।
अतस्तदेव भैषज्यं मात्रा तस्य कनीयसी॥'
अस्य बालस्य। कनीयसीमात्रामाह विश्वामित्रः।
'विडङ्गचूर्णमात्रन्तु जातमात्रस्य भेषजम्।
अनेनैव प्रमाणेन मासि मासि प्रवर्द्धयेत्॥'
विडङ्गपरिमितं भैषजं चूर्णौषधं किंवा कल्कौषधाद्यवावलेहौषधं इत्यादिवर्त्मः। तत्रान्तरे तत्रैवाभिहितम्।
'प्रथमे मासि बालाय देया भेषजरक्तिका।
अवलेह्या तु कर्त्तव्या मधुसौरभिताहृते॥
एकैका वर्द्धयेत्तावद्यावत् संवत्सरो भवेत्।
तदूर्द्धं मात्रवृद्धिः स्याद्यावत् षोड़शवत्सरात्॥'
एकैका रक्तिकाम् तदूर्द्धं वर्षोपरि मात्रवृद्धिः प्रतिवर्षं पञ्चगुञ्जात्मकस्य मात्रस्य वृद्धिर्भवति।
गुञ्जाः पञ्चाद्यमाषक इत्यमरसिंहः॥
'ततः स्थिरा भवेत्तावद्यावदर्षाणि सप्ततिः।
ततो बालकवन्मात्रा ज्ञातव्या भूतेः भूतेः॥'
ततः षोड़शवत्सरोपरि।
'चूर्णैकरक्तावलेहानामियं मात्रा प्रकीर्त्तिता।
कषायस्य पुनः सैव विज्ञातव्या चतुर्गुणा॥
क्षीरस्य शिशोर्देयमौषधं क्षीरसर्पिषा।
धात्र्याश्चु केवलं देयं न क्षीरेणापि सर्पिषा॥'
क्षीरान्नादस्य पूर्ववत् क्षीरसर्पिषा। प्रकारान्तरेणौषधपानमाह सुश्रुतः।
'येषां गदानां ये योगाः प्रवक्ष्यन्ते गदङ्कराः।
तेषु तत्कल्कसंसिद्धौ पाययेत शिशुं स्तनौ॥'
अवयवानां बालानामभ्यन्तरव्याधिज्ञानोपायमाह।
'अङ्गप्रत्यङ्गदेशे तु रुजा यत्रास्य जायते।
सङ्कुसुंकुः शुध्यति तं शूयमानेन रोदिति॥
निमीलिताक्षो मूर्द्धस्थे रोगे नो धारयेच्छिरः।
वक्षिस्थे मूत्रवङ्क्षास्थौ क्षुधाक्षामोऽपि गच्छति॥
विण्मूत्रसङ्गवैकल्याच्छर्द्यानाहाजगल्लिकैः।
कोष्ठे व्याधौ विजानीयात् सर्व्वत्रस्थांश्च रोदनैः॥'
अन्नादौ ज्वरस्य चिकित्सामाह।
'सर्व्वे निर्व्वायते व्याधे स्तन्यं नैव निवार्य्यते।
मात्रया लङ्घयेद्वार्द्धौ शिशोरेतद्विलक्षणम्॥'
मात्रया लङ्घयेत् लघु भोजयेत्।
'भद्रमुस्ताभयानिम्बपटोलमधुकैः कृतः।
क्वाथः कोष्णः शिशोरेव निःशेषज्वरनाशनः॥'
भद्रमुस्तादिक्वाथः सर्व्वज्वरेषु॥*॥
'धनञ्जयारग्वधाग्निचूर्णैः क्षौद्रेण संयुतम्।
शिशोर्ज्वरातिसारघ्नं कासं श्वासं वमिं हरेत्॥'
अत्रैव अतिविषा। चतुर्भद्रिका ज्वरातिसारेषु॥

'बिल्वच पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च ।
काथावलेहौ मधुना विमिश्रौ
वातेषु योज्यावतिसारितेषु ।'

जलं बाला । बिल्वादिकाथावलेहौ। अतीसारेषु।

'समङ्गाधातकीलोधसारिवाभिः कृतं जलम् ।
दुर्ग्रहेऽपि शिशोर्देयमतीसारे समाचिकम् ।'

समङ्गा लज्जालुमूलम् । समङ्गादिकाथो दुर्ग्रहेऽतीसारे । * ।

'बिड्वङ्गान्यजमोदा च पिप्पलीतण्डुलानि च ।
एषामाजोष्ट्र पूर्वाणि सुखं तण्डेन चारिता ।
आमे प्रवृत्तेऽतीसारे कुमारं पाययेद्भिषक् ।'

बिड्वङ्गादिचूर्णमतीसारे । * ।

'मोचरसः समङ्गा च धातकी पद्मकेशरम् ।
पिष्टैरेतैर्यवागूः स्यादसृक्सातीसारनाशिनी ।'

मोचरसलज्जालुमूलधावैपुलकमलकेशरसमुदिततोला १ तण्डुलकोद्रवतोला १ जलतोला ११ सर्वमेकीकृत्य यवागूः साधनीया । मोचरसादियवागूः रक्तातिसारे । * ।

'नागरातिविषासुक्षावालकेन्द्रयवैः कृतम् ।
कुमारं पाययेत् प्रातः सर्वातीसारनाशनम् ।'

नागरादिक्वाथः सर्वातीसारे । * ।

'लाजासक्थिमधुका शर्करा क्षौद्रमेव च ।
तण्डुलोदकयोगेन क्षिप्रं हन्ति प्रवाहिकाम् ।'

लाजादिचूर्णं प्रवाहिकायाम् । * ।

'रजनी सरलो दारुहरीतकी गजपिप्पली ।
शङ्खिपर्णी शताह्वा च लोध्रं माक्षिकसंयुता ।
दोषमं यङ्ग्रहणीं हन्ति मारुतार्शसकामलाम् ।
ज्वरातीसारपाण्डूत्थं बालानां सर्वरोगजुत् ।'

रजन्यादिचूर्णं ग्रहण्यादौ । * ।

'पौष्करातिविषाशृङ्गीमागधीधन्वयासकैः ।
क्षतं चूर्णं सचौद्रं शिशूनां पद्मकासजित् ।'

पौष्करादिचूर्णं कासेषु । * ।

'पौष्करातिविषावासाकल्काक्षीरसं लिहन् ।
मधुना सुच्यते बालः कासैः पञ्चभिरुल्बणैः ।'

तुलसकादिरसः कासेषु । * ।

'काश्मीरकुसुमसंजातकेशरैरवलेहिका ।
मधुना चिरसंजातान् शिशोः कासान् व्यपोहति ।'

कासे । * ।

'धान्यं शर्करया युक्तं तण्डुलोदकसंयुतम् ।
पानमेतत् प्रदातव्यं कासश्वासामयं शिशोः ।'

धान्यादिपानं कासश्वासयोः । * ।

'द्राक्षावासाभयालज्जाचूर्णं क्षौद्रेण सर्पिषा ।
लीढ्वा चार्धं निहन्यात् कासञ्च तमकं तथा ।'

तमकं श्वासभेदम् । द्राक्षादिचूर्णं कासश्वासयोः।

'चूर्णं कटुकरोहिण्या मधुना सह योजयेत् ।
हिक्कां प्रशमयेत् क्षिप्रं दुर्हिक्कापि चिरोत्थिताम् ।'

हिक्कायां दुर्हिक्कायाञ्च । * ।

'श्वासाखिलाजमिश्रितं सचौद्रं हर्षिणद्रवेत् ।'

हर्षान् । * ।

'पीतं पीतं वमेद्यस्तु स्नग्धं तं मधुसर्पिषा ।
द्विवार्ताकी फलरसं पक्वकोलञ्च लेहयेत् ।'

द्विवार्ताकी दुहतीद्वयम् । * ।

'पक्वकोलानि पिप्पलीपिप्पली-
मूलचव्यचित्रकनागरानि ।'

क्षीरच्छर्दाम् । * ।

'क्षीरेक्षुकैराक्षौद्रं लीढ्वा दध्याहारं परम् ।
क्षतेन सिन्धुविम्बेनाद्विभागैरजोल्लिहन् ।
आनाहं वातिकं मूलं हन्यात्तोयेन वा शिशुः।'

आनाहे वातमूले च । * ।

'कबोष्णवासितक्षौद्रस्रुग्लासेन्द्रयवैः कृतः ।
मूत्रयत्ये प्रयोक्तव्यः शिशूनां क्षेत्र उत्तमः ।'

मूत्राघाते । * ।

'यदा तु दुर्बलो बालः क्षादप्यपि च वह्निमान् ।
विदारीकन्दगोधूमयवचूर्णं घृतप्लुतम् ।
खादयेत्तदनुक्षीरं घृतं समधुशर्करम् ।'

कार्श्ये । * ।

'सुस्निग्धाम्लवणानि भद्रदारुकलिङ्गकात् ।
पिट्वा तोयेन संलिप्येल्लेपोऽयं ग्रीथहृच्छिशोः ।'

ग्रीथे । * ।

'पटोलत्रिफलानिम्बहरिद्राक्वथितं पिबेत् ।
क्षतवीसर्पविस्फोटज्वरार्त्ता ग्लानये शिशुः ।'

क्षतवीसर्पविस्फोटज्वरेषु । * ।

'शङ्खधूमनिशाकुष्ठराजिकेन्द्रयवैः शिशोः ।
लेपस्तक्रेण हन्त्यासु विषमामविषार्चिकाम् ।
सारिवातिलखोत्राणां कषायो मधुकस्य च ।
संस्राविणि सुखे शस्तो धावनार्थे शिशोः सदा ।'

सुखस्रावे । * ।

'अश्वत्थत्वग्दलक्षौद्रैर्मुखपाके प्रलेपनम् ।'

सुखपाके । * ।

'पिप्पलीत्रिफलाचूर्णं घृतक्षौद्रपरिप्लुतम् ।
बालो रोदिति यस्मात्ते रोढुं दद्यात् सुखावहम् ।'

रोदने । * ।

'हरीतकी वचा कुष्ठं कल्कं माक्षिकसंयुतम् ।
पीत्वा कुमारः स्वप्नेन सुच्यते तालुकण्टकात् ।'

तालुकण्टके । * ।

'मलत्रिकं लोध्रपुनर्नवे च
सशृङ्गवेरं दहतीद्वयञ्च ।
आलेपनं क्षेत्रहरं सुखोष्णं
कुकूणके कार्यसुदाहरन्ति ।'

कुकूणके । * ।

'स्नुक्किङ्केनाभितप्तेन क्षीरसिक्तेन लोमशा ।
खेदयेदुत्थितां नाभिं ग्रीथस्तेनोपशाम्यति ।'

नाभिश्रोथे । * ।

'नाभिपाके निशालोध्रप्रियङ्गुमधुकैः कृतम् ।
तैलमभ्यञ्जने शस्तमेभिर्वाप्यवधूलनम् ।
दग्धेन छागशकृता नाभिपाकेऽवचूर्णनम् ।
लक्चूर्णैः क्षौद्रिणा वापि कुर्याच्चन्दनरेणुना ।'

नाभिपाके । * ।

'गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियाम् ।

रसाञ्जनं विशेषेण पालङ्क्यपनयोर्हितम् ।
शृङ्गयश्चाञ्जनेचूर्णं शिशूनां गुदपाकजुत् ।'

अञ्जनं रसाञ्जनम् । गुदपाके । * ।

'शृङ्गसौवीरयश्याह्वैर्लेपो देयोऽक्षिपूतने ।'

अक्षिपूतने । * ।

'पारिगर्भिकरोगे तु पूज्यते वह्निदीपनम् ।'

पारिगर्भिके । * ।

'दन्तपालिन्तु मधुना चूर्णेन प्रतिसारयेत् ।
धातकीपुष्यपिप्पलीधावीफलरसेन वा ।
दन्तोत्थानभवा रोगाः पीड़यन्ति न बालकम् ।
जाते दन्ते हि जायन्ति यतस्तद्धेतुका गदाः ।'

दन्तोद्भेदजरोगेषु । * ।

'सौवर्चलं सुस्नतं चूर्णं कृष्णं मधु घृतं वचा ।
मत्स्याक्षकः शृङ्गपुष्पी मधु सर्पिः सकाञ्चनम् ।
अर्कपुष्पीमधु घृतं चूर्णितं कतकं वचा ।
सक्षैमचूर्णं कैटर्यं श्वेता दूर्वा घृतं मधु ।
चत्वारोऽभिहिताः प्राज्ञा अर्द्धश्लोकसमापनाः ।
कुमाराणां वपुर्मेधाबलपुष्टिकराः स्मृताः ।'

सौवर्चलचूर्णम् । चतुर्ष्वपि योगेषु मारितसुवर्णचूर्णम् । मत्स्याक्षकः ब्राह्मी इति लोके प्रकाशे । अर्कपुष्पी अर्कसदृशपुष्पलता । कैटर्यं कट्फलम् । श्वेता दूर्वाविशेषमिति केचित् । संवत्सरं यावदेते योगाः प्रयोक्तव्याः द्वादशवर्षादीति केचित् । * ।

'बालानाञ्च वपुर्मेधाबलपुष्टिकराः स्मृताः ।
आचारसे समे तैलं मस्तुन्यथ चतुर्गुणे ।
रास्नाचन्दनकुष्ठाङ्गावाजिगन्धानिशायुतैः ।
घृताक्षदारुयश्याह्वसर्वातिक्तात्हरेणुभिः ।
संसिद्धं ज्वररोषघ्नं बलवर्णकरं शिशोः ।"

लाक्षादितैलं वातेषु । * । इति भावप्रकाशे बालरोगाधिकारः ।

बालवायवं क्ली, (बालवाये वेदुर्यप्रभवे देशविशेषे जायते इति । जन्+ड ।) वेदूर्यम् । इति त्रिकाण्डशेषः । (विदूर्तिर्विशेषश्चास्य वेदूर्यशब्दे ज्ञेयः ।)

बालवासः [स्] क्ली, (बालानां लोम्नां वालैर्निर्मितं वा वासः ।) केशनिर्मितवस्त्रम् । बालकस्य वस्त्रञ्च । इति केचित् ।

बालवाह्यः पुं, (बालाः शिशवो वाह्या यस्य । एते खलु कस्मिंश्चिदुपस्थिते भये शिशून् दृष्ट्वा निधाय पलायन्त इति प्रसिद्धेस्तथात्वम् ।) वनच्छागः । इति हारावली । ८१ । बालकवहनीये त्रि ।

बालव्यजनं, क्ली, (बालस्य चमरीपुच्छस्य वालेन वा निर्मितं यद्व्यजनम् ।) चामरम् । तत्पर्यायः । रोमगुच्छः २ प्रकीर्णकम् ३ । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । १३ ।

"लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः ।
वस्त्रार्द्धयुक्तं गिरिराजशब्दं
कुर्वन्ति बालव्यजनैश्चमर्यः ।")

बालकस्य वचनञ्च ।
"बालवचनमोषधं मक्षिकादीनां यथोदितम् ।"
इति द्वयगुप्तः ॥
बालव्रतः, पुं, मञ्जुघोषनामकपूर्व्वजिनविशेषः ।
इति त्रिकाण्डशेषः ॥
बालसन्ध्याभः, पुं, (बालसन्ध्या इव आभा यस्य ।)
अरुणवर्णः । इति हेमचन्द्रः ॥
बालसूर्य्यः, क्ली, (बालः सूर्य्य इव) वैदूर्य्यमणिः ।
इति त्रिकाण्डशेषः ॥ प्रातःकालीनसूर्य्ये, पुं ॥
बालसूर्य्यकं, क्ली, (बालसूर्य्य एव । बालसूर्य्य+
स्वार्थे कन् ।) वैदूर्य्यम् । इति शब्दरत्नावली ॥
बालहस्तः, पुं, (बाला हस्त इव मक्षिकादीनां
निवारकत्वात् ।) बालधिः । लोमयुक्तलाङ्गूलम् । इत्यमरः । (केशानां हस्तः समूहः यत्र ।
केशसमूहश्च इत्युज्ज्वलदत्तः ।)
बाला, स्त्री, (बालाः केशा इव पदार्था विद्यन्ते
यस्याः । बाल+अर्शआद्यच् ततष्टाप् ।)
नारिकेलः । हरिद्रा । मल्लिकाभेदः । अलङ्कार-
भेदः । मेध्यम् । त्रुटिः । स्त्री । इति मुग्धबोधिनी
मेदिनी ॥ धृतकुमारी । ह्रीवेरम् । इति शब्द-
चन्द्रिका ॥ अम्बष्ठा । नीलझिण्टी । इति राज-
निर्घण्टः ॥ एकवर्षवयस्का गौः । यथा,—
"वर्षमात्रा तु बाला स्यादतिबाला द्विवार्षिकी ।"
इति प्रायश्चित्ततत्त्वम् ॥
षोड़शवर्षीया स्त्री । सा शीघ्ररत्काले च
प्रशंसनीया हर्षदा च । इति राजवल्लभः ॥
(यथा, रतिमञ्जर्य्याम् ।
"बाला स्त्री प्रायदा प्रोक्ता तरुणी प्राण-
हारिणी ।
प्रौढ़ा करोति दृढ़तं दृढ़ा मरणमादिशेत् ॥"
यथा, मेघदूते । ८३ ।
"गाढ़ोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥"
कन्यामात्रेऽपि । यथा, मार्कण्डेये । २१ । २८ ।
"इयञ्च मूर्च्छामगतं कारणं यत् ब्रवीषि तत् ।
त्वयि प्रीतिमती बाला दर्शनादेव मानद ! ॥"
पञ्चवर्षा स्मृता बाला । इति हारीते । ९ । ५ ।)
अनूढ़ावार्षिकी कन्या । तस्याश्चोद्वयस्कबालस्य
च अग्निसंस्कारादिनिषेधो यथा,—
"अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः ।
न तेषामग्निसंस्कारो न पिण्डं नोदकक्रिया ॥"
इति गारुड़े १०७ अध्यायः ॥
बालाक्षी, स्त्री, (बालाः केशा इवाच्यिसदृशं च
पुष्पं यस्याः ।) केशपुष्पाख्यवृक्षः । तत्पर्य्यायः ।
मानसी२ दुर्गपुष्पी ३ केशधारिणी ४ । इति
शब्दचन्द्रिका ॥
बालार्कः, पुं, (बालो नवोदितोऽर्कः सूर्य्यः ।)
प्रातःकालीनसूर्य्यः । यथा,—
"रक्तवस्त्रपरीधानां बालार्कसदृशीं तनूम् ॥"
इत्यादि विश्वसारे जगद्धात्रीध्यानम् ॥
कन्यारागिसूर्य्यः । यथा,—
"शुष्कमांसं स्त्रियो दृष्ट्वा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"
इति चाणक्यम् ॥
बालिः, पुं (बाले केशे जातः । बाल+इञ् ।)
कपिविशेषः । तत्पर्य्यायः । ऐन्द्रः २ वाली ३ ।
इति त्रिकाण्डशेषः ॥ (अयमेव श्रीरामेण हतः ।
अस्य जन्मादिकविवृतिस्तु बालिन्-शब्दे
द्रष्टव्या ।)
बालिका, स्त्री, (बाला एव । बाल+स्वार्थे कन् ।
टाप् अत इत्वम् ।) बाला । कन्या । वासुका ।
पत्रकाहृता । कर्णभूषणम् । इति मेदिनी । के,
१३० । एला । इति शब्दरत्नावली ॥ कन्या-
स्वरूपलक्षणं यथा,—
"कन्या देया स्वयं प्रोक्ता कन्यारूपा तु मूलिनी ।
यावदृतुमती योनिः स्यात्तावद्देवी सुरारिहा ॥"
इति देवीपुराणम् ॥
बालिखिल्याः, पुं, पुलस्त्यकन्यायां सन्नत्यां क्रतोः
वष्टिसहस्रसंख्यकपुत्रा ऋषिविशेषाः । यथा,—
"प्रीत्या पुलस्त्यो भगवान् दत्ताग्निमग्रहञ्च प्रभुः ।
पूर्व्वजन्मनि सोऽगस्त्यः क्षुतः स्वायम्भुवेऽन्तरे ॥
वेदबाहुं तथा कन्यां सन्नतिर्नाम नामतः ।
पुत्रार्थां वष्टिसाहस्रं सन्नतिः सुषुवे क्रतोः ॥
ते चोर्द्ध्वरेतसः सर्व्वे बालिखिल्या इति स्मृताः ॥"
इति कौर्म्म १२ अध्यायः ॥
अपि च ।
"क्रतोश्च सन्नतिर्भार्य्या बालिखिल्यानसूयत ।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसाम् ॥"
इति मार्कण्डेयपुराणे रुद्रसर्गः । ५२ । २४ ॥
तेषामङ्गुष्ठपरिमाणस्य प्रमाणं यथा,—
"अथापश्यद्ऋषीन् दृष्ट्वानङ्गुष्ठोदरवर्ष्मणः ।
फलाद्यहरणकामेकां सङ्घशतान् बहतः पथि ॥
प्रकीर्णान् खेऽम्बिवाङ्गेषु गिराहारांस्तपोधनान् ।
क्षिप्रमानान् मन्दवलान् गोष्पदे संप्लुतोदके ॥"
इति महाभारते । १ । ३१ ॥
बालखिल्योऽपि पाठः । यथा, "ऋग्वेदान्तर्गत-
बालखिल्यमेकादशसूक्तं बालखिल्याः मूर्त्तयश्च
प्राणा वै बालखिल्याः । इति षड्विंशब्राह्मणम् ॥
बालिनी, स्त्री, अश्विनीनक्षत्रम् । इति हेमचन्द्रः ॥
बालिशं, क्ली, (बालाः सन्ति यस्य इति बाली,
मक्षकक्षेत्रे शीते वर्त्त । शीते + आधारे ड ।)
उपधानम् । इति शब्दमाला ॥ (ब्राह्मणादि-
राकृतिगणः । इति पाणिनिः । ५ । १ । १२४॥)
बालिशः, त्रि, (बाड़+इन् । अस्य लत्वं । बालिं
दृष्टिं शास्तीति । बालि+शो+आतोऽनुपेति
कः ।) शिशुः । (यथा, भागवते ।३।१४।२१।
"बालिशा वत यूयं वा अधर्म्मे धर्म्ममानिनः ॥"
बालिशा शिशुवत्तस्य इत्यर्थः ॥) मूर्खः । इति
मेदिनी । शे, २६ ॥ (यथा, मनुः । ३ । १७६ ।
"अपाङ्क्तो यावतः पाङ्क्तान् भुञ्जानानश्नु-
पश्यति ।
तावतां न फलं तत्र दाता प्राप्नोति बालिशः ॥"
"बालिशोऽज्ञः ।" इति तट्टीका ॥)
बालिहन्ता, पुं, (बालेर्बालिनो वा वानरराजस्य
हन्ता ।) श्रीरामचन्द्रः । इति शब्दरत्नावली ॥
(बालिवधकथा यथा, रामायणे । ४ । १६ ।
२७—३६ ।
"सूर्य्यपुत्रो महावीर्य्यः सुग्रीव इति श्रुतः ।
वालिना भयदर्पाभ्यां सुग्रीवो मन्दविक्रमः ॥
वालिनं प्रति सामर्षो दर्शयामास राघवम् ।
दृष्ट्वेः सप्तसालेषु शिखरैर्वसुकोटिभिर्नगैः ॥
सुदृष्टिभिर्बाहुभिः पद्मिर्बाहुभिश्च पुनः पुनः ।
तयोर्युद्धमभूद्घोरं दृष्ट्वासवयोरिव ॥
तौ शोणितार्द्रौ युध्येतां वानरौ वनचारिणौ ।
मेघाविव महाशब्दैस्तर्जमानौ परस्परम् ॥
क्षीयमाणमथापश्यत् सुग्रीवं वानरेश्वरम् ।
प्रेक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः ॥
ततो रामो महातेजा आर्त्तं दृष्ट्वा हरीश्वरम् ।
स शरं वीक्षते वीरो वालिनो वधकाङ्क्षया ॥
ततो धनुषि सन्धाय शरमाशीविषोपमम् ।
पूरयामास तच्चापं कालचक्रमिवान्तकः ॥
तस्य ज्यातलघोषेण चकम्पे पवनेश्वराः ।
प्रदुद्रुवुर्मृगाश्चैव युगान्त इव मोहिताः ॥
सृक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसन्निभः ।
राघवेण महाबाणो वालिवक्षसि पातितः ॥
ततस्तेन महातेजा वीर्य्ययुक्तः कपीश्वरः ।
वेगेनाभिहतो वाली निपपात महीतले ॥)
ओड्रदेशान्तर्गतग्रामविशेषश्च ॥
बाली, [न्] पुं, (बाल: केश उत्पत्तिस्थानत्वेन
विद्यते यस्य । बाल+इनिः । नामनिरुक्तिश्च
यथा, रामायणे ।
"अमोघरेतसस्तस्य वासवस्य महात्मनः ।
बालेषु पतितं वीर्यं बाली नाम बभूव सः ॥")
इन्द्रपुत्रवानररराजविशेषः । स तु श्रीरामचन्द्रेण
हतः । तस्योत्पत्तिर्यथा,—
"मेरुर्वनवरः श्रीमान् नानाधातुमयः शुभः ।
तस्य यज्ञार्थमारब्धं सर्व्वदेवतपूजितम् ॥
तस्मिन् दिव्या सभा रम्या ब्रह्मणः सृष्टयोजना ।
तस्यामासे सदा देवः पद्मयोनिश्चतुर्मुखः ॥
योगमभ्यसतस्तस्य नेत्राभ्यां पतन्त्यु सवतः ।
तदृक्षीतं भगवता पालिना चर्क्षतञ्च तत् ॥
निःक्षिप्तमात्रं तद्भूमौ ब्रह्मणा लोककर्त्तृणा ।
तस्मिन्नृक्षपतौ राम ! वानरः संबभूव ह ॥
उत्तरं मेरुशिखरं गतस्तत्र च हृष्टवान् ।
नानाविहगसंघुष्टं प्रसन्नसलिलं सरः ॥
आप्लुत्य चापतत्तस्मिन् हृदे वानरसत्तमः ।
उत्प्लुत्य तस्मात् स हृदादुत्थितः प्लवगः पुनः ॥
तस्मिन्नेव क्षणे राम ! स्त्रीत्वं प्राप स वानरः ।
तद्रूपमद्भुतं दृष्ट्वा त्रासितौ धैर्य्यमालभन् ॥
ततस्तस्यां सुरेन्द्रेण स्वप्नं शिरसि पातितम् ।
अनासाद्यैव तां नारीं सन्निवृत्तमथाभवत् ।
ततः सा वानरपतिं जग्मे वानरमीश्वरम् ॥
अमोघरेतसस्तस्य वासवस्य महात्मनः ।
बालेषु पतितं वीर्यं बाली नाम बभूव ह ॥
भास्करेणापि तस्यां वै कन्दर्पवशवर्त्तिना ।

बीजं निक्षिप्तं ग्रीवायां विधानमनुवर्तत ।
ग्रीवायां पतितं बीजं सुग्रीवः समजायत ।"
इति रामायणे उत्तरकाण्डे । १७ सर्गः ॥
अपि च ।
"वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमात्मजम् ।
सुग्रीवं जनयामास तपनस्तपतां वरः ।"
इति रामायणे बालकाण्डे १७ सर्गः ॥
"ततः शरेणाभिहतो रामेण रणकर्कशः ।
प्रपात सहसा वाली निकृत्त इव पादपः ॥"
इति किष्किन्धाकाण्डे १७ सर्गः ॥
(वालाः केशाः सन्त्यस्य ।) वालविशिष्टे, त्रि ॥
वालीशः, पुं, सूत्रकृच्छ्ररोगः । इति शब्दरत्नावली ॥
वा(वा)सुः, स्त्री, (वसते अनेन । वस प्राणने । वस + उसुन् ।) एलवालुकनामकगन्धद्रव्यम् । रत्नमालादिकोषः ॥
वा(वा)सुकं, क्ली, (वासुरेव । स्वार्थे कन् ।) एलवालुकम् । इत्यमरः । २ । ४ । १२१ ॥
वा(वा)सुकः, पुं, पानीयासुः । इति राजनिर्घण्टः ॥
वा(वा)सुका, स्त्री, (वासुक + टाप् ।) रेणुविशेषः । बालि इति भाषा । तत्पर्य्यायः । सिकता २ सिक्ता ३ शीतला ४ रूक्षशर्करा ५ प्रवाही ६ महारूक्षा ७ रूक्षा ८ पाकोपवर्धिका ९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । सन्तापश्रमनाशित्वञ्च ।
"सैकप्रयोगतश्चैव ग्राह्याग्निवातपित्तापहा ॥"
इति राजनिर्घण्टः ॥
ग्राह्या हस्तपादादि । कर्कटी । इति जटाधरः ॥ कर्पूरः । वस्त्रविशेषः । इति शब्दचन्द्रिका ॥
वा(वा)सुकागडः, पुं, (वासुकायाः गडतीति तस्मात् चरति यः । वासुका + गड चरणे + पचाद्यच् । वासुकाजातत्वादस्य तथात्वम् ।) मत्स्यविशेषः । बालिया इति भाषा । तत्पर्य्यायः । सिताङ्गः २ । इति हारावली । १६० ॥
वा(वा)सुकालिका, स्त्री, (वासुकावदाकारः स्वरूपोऽस्याः । कन् अत इत्वम् ।) शर्करा । इति शब्दचन्द्रिका ॥ (वासुका आत्मा यस्य ।) वासुकात्मके, त्रि ॥
वा(वा)सुकाप्रभा, स्त्री, (वासुकानामसुरेशूनां प्रभा यस्याम् । अलुक्समासे वासुकापरिधानत्वादस्य तथात्वम् ।) नरकविशेषः । इति हैमचन्द्रः । ५ । १ ॥
वा(वा)सुकामर्य, त्रि, (वासुका + मयट् ।) सिकतामयम् । इति सेकतशब्दटीकायां भरतः ॥
वा(वा)सुकायन्त्रं, क्ली; (वासुकाया यन्त्रम् ।) औषधपाकार्थयन्त्रविशेषः । यथा,—
"भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपके ।
कूपिकाकण्ठपर्य्यन्तं वासुकाभिश्च पूरिते ।
क्षेपयेत् कूपिकार्थं वह्निना यत्र पच्यते ।
वासुकायन्त्रमेतद्धि यन्त्रतन्त्रविदः स्मृतम् ॥"
इति भावप्रकाशः ॥

वा(वा)सुकाखेदः, पुं, (वासुकाभिर्विहितः खेदः ।) तप्तवासुकाभिस्वेदनम् । यथा,—
"वातश्लेष्महते खेदान् कारयेदुचितान्मितान् ।
स्निग्धः खेदो निषिद्धोऽत्र विना केवलवातजान् ॥
खर्परश्लक्ष्णपटलस्थितकाङ्किकसंसिक्तवासुकाखेदः ।
शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन् ॥
शीतर्त्तौ माहेयं त्यक्त्वा शीतौ पावकमाश्रयम् ।
हत्वा वातकफस्तम्भं खेदो त्वरमपोहति ॥"
इति भावप्रकाशः ॥
वा(वा)सुकी, स्त्री, (वसति वासयति वा । वस प्राणने + उक । स्त्रियां ङीप् ।) कर्कटीभेदः । तत्पर्य्यायः । बहुफला २ स्निग्धफला ३ क्षेत्रकर्कटी ४ क्षेत्ररुहा ५ काङ्किका ६ सूत्रफला ७ । अस्या गुणाः ।
"वासुकी वातशमनी शीता रुक्षा श्रमापहा ।
पित्तासृग्भ्रमनी रुच्या गुरुते कासपीनसौ ॥
"स्वादुवासुकी शरदि वर्षजदोषकर्त्री
हैमन्तिका च खलु पित्तहरा च रुच्या ।
स्निग्धं करोति खलु पौषसमर्द्धपक्का
पक्का लतीदमधुरा फलकारिणी च ॥"
इति राजनिर्घण्टः ॥
वा(वा)सुडी, स्त्री, कर्कटी । इति त्रिकाण्डशेषः ॥
वा(वा)सुड्डिका, स्त्री, कर्कटी । इति शब्दरत्नावली ॥
वा(वा)सुड्डी, स्त्री, कर्कटी । इति शब्दरत्नावली ॥
वा(वा)सूकः, पुं, (वसते प्राणान् हन्ति यः । वस ड वधे + ऊक ।) विषभेदः । इति हैमचन्द्रः । ३ । २ । ३ ॥
वा(वा)सेयः, पुं, (वसये उपकराय साधुः । वसि + "हृदिप्रधिवसेर्ढञ्" ५ । १ । १३ । इति ढञ् ।) रासभः । इत्यमरः । २ । ६ । ७७ ॥ (यथा, मार्कण्डेये । ५० । ८५ ।
"एकच्छागं द्विवार्षेयं त्रिगर्भं पञ्चमाहिषम् ।
वृद्धं वत्समातृकं यूपं यज्ञार्थं प्रोक्षय ॥"
वसेः खनामख्यातस्य दैत्यस्यापत्यं पुमान् । वसि + ढञ् ।) दैत्यविशेषः । इति भरतः ॥ (वसिः विरोचनपुत्रस्य बाणस्येदं पुत्रशतं जातम् तेन च वार्षेयबाणा विख्याताः । बहुत्वमधिकृत्य ।
"विरोचनस्य पुत्रस्तु वसिरेकः प्रतापवान् ।
वसेः पुत्रशतं जज्ञे राजानः सर्व एव ते ॥
तेषां प्रधानाश्चत्वारो विक्रान्ताः समरावलाः ।
सहस्रबाहुर्धर्मेण यज्ञे च वसेः सुते ॥
वसेः पुत्रास्तु पौलाच्च शतघ्नोऽथ सहस्रजः ।
वार्षेयो नाम विख्यातो गयो विक्रान्तपौरुषः ॥"
जनमेजयवंशोद्भवस्य सुतपसो राज्ञः पुत्रो वसिस्तस्य पञ्च पुत्राश्च वार्षेयाः । यथा, हरिवंशे । ३१ । ३०—३३ ।
"तेनस्य सुतपा जज्ञे जज्ञे सुतपसो वसिः ।
जातो मानुषयोनौ तु स राजा बाह्लनेयुधिः ॥
महायोगी स तु बलिर्बभूव नृपतिः पुरा ।
पुत्रानुत्पादयामास पञ्च वंशकरान् भुवि ।
अङ्गः प्रथमतो जज्ञे वङ्गः सुह्मस्तथैव च ।
पुण्ड्रः कलिङ्गश्च तथा वार्षेयं चास्तुषते ॥
वार्षेया ब्राह्मणाश्चैव तस्य वंशकरा भुवि ।
वसेस्तु ब्रह्मणा दत्ता वराः प्रीतेन भारत ! ॥")
अङ्गारवल्लरी । इति विश्वः ॥ चाङ्गेर्यमूलकम् । इति राजनिर्घण्टः ॥
वार्षेयः, त्रि, (वालाय हितः । वाल + ढञ् ।) रुद्रुः । वालहितः । इति मेदिनी ॥ (बलये उपहाराय हितः । बलि + हृदिप्रधिवसेर्ढञ् ।"५ । १ । १३ । इति ढञ् । तद्बलिः । यथा, सिद्धान्तकौमुद्याम् ।"वार्षेयास्तद्बलिः ॥" बलियोग्यः । यथा, रघौ ।१४ । ७७ ।
"पुष्पं फलञ्चार्णवमाददन्त्यो
यौनञ्च वार्षेयमजस्रदोहि ।
विनोदयिष्यन्ति नवाभिषङ्गा-
मुदारवाचो मुनिकन्यकास्ताम् ।"
वितुन्नकनाम्नो वृक्षस्य त्वचि स्त्री । तत्पर्य्यायो यथा,—
"कुटन्नटं दासपुरं वार्षेयं परिपेलवम् ।
श्रवणीपूरगोगर्दैकेवर्त्तीसुस्तकानि च ॥
सुस्तावत् पेलवपुटं शुक्लाभं स्यादितुन्नकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वार्षेयशाकः, पुं, (वार्षेयः बलिहितः शाकः ।) शाकभयदिका । इत्यमरः । २ । ४ । ६० ॥
वार्षेटः, पुं, (वार्षाणां हृष्टः प्रियः ।) वदरः । इति राजनिर्घण्टः ॥ वालकाभिलषिते, त्रि ॥
वालोपवीतं, क्ली, (वालानां वालकानां उपवीतम् ।) वालकपरिधानवस्त्रम् । तत्पर्य्यायः । पवावटम् २ उरस्कटम् ३ । इति हारावली । ४८ ॥ द्विजबालकानां यज्ञसूत्रञ्च ॥
वाल्मीकिः, पुं, वल्मीकस्यापत्यम् । (वल्मीक + इञ् ।) वल्मीकप्रभवो यस्मात् तस्माद्वाल्मीकिरित्यसौ इति ब्रह्मवैवर्त्तोक्तेः । वल्मीकप्रभवत्वेन गौणो पुत्रादिष्वप्यौणस्य वल्मीकापत्यत्वं यद्दीक्षेव साधुरपत्यार्थे । यद्वा वल्मीक इति ऋषिविशेषस्य संज्ञेत्याहुः ॥ मुनिविशेषः । यथा,—
"तपःस्वाध्यायनिरतं तपस्वी वाग्विदांवरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥"
इति रामायणप्रथमश्लोकः ॥
अपि च । ततस्तदनुयज्ञेन रामचरितं वरम् ।
निरवद्यं तमसादादेव सम्यक् विभाव्य भूलोकवर्त्तिनां चतुर्णां वर्णानां तापत्रयविमोचनाय ब्रह्मांशभूत एव भगवान् प्राचेतसो वाल्मीकिः सप्ततप्तकोटिरामायणसारभूतं चतुर्विंशत्यक्षरगायत्र्याख्यापरब्रह्मविद्याविलासभूतं रामायणं चतुर्विंशतिसहस्रश्लोकरूपं कुशलवाभ्यामगायत् । इति तट्टीका ॥ अपि च ।
"नारायणात्मकाः सर्व्वे तेषां रामोऽयजोऽभवत् ।
रावणान्तकरो राजा रघूणां वंशवर्द्धनः ।
वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तमः ॥")
इति मात्स्ये १३ अध्यायः ॥

वाल्यं, (बालस्य भावः कर्म्म वा। बाल+"पत्यन्त-पुरोहितादिभ्यो यक्।" ५। १। १२८। इति यक्।) बालस्य भावः। तत्पर्य्यायः। शिशुत्वम् २ प्रैढ्यवम् ३। इत्यमरः॥ तच्च षोड़श-वर्षपर्य्यन्तम्। आषोड़शाद् भवेद्बाल इत्युक्तेः। इति भरतः॥ (यथा मनुः। ५। १४८।

"बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने॥"

"वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकन्तथा।
ऊनषोड़श वर्षन्तु नरो बाल्यो निगद्यते॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वा(बा)ह्यः (व्यः) पुं, (वाधते नेत्रे इति। वाध+"ख्यत्र्यृष्यृष्यवाह्यरूपपर्पतल्याः।" उणां। ३। २८। इति यः। निपात्यते च।) उक्षा। अश्वः। इत्यमरः। २। ३। १२०॥ (यथा, रघौ। ८। ७०।

"अकरोत् पृथिवीरुहानपि
सुतशाखारसवासदूषितान्॥")

वाहः, पुं, } (वाहुरेव। पृषोदरादित्वात् साधुः।)
वाहा, स्त्री, } वाहुः। इत्यमरटीकायां रमानाथः॥ (यथाह उज्ज्वलदत्तः। १। १८।

"अकारान्तोऽपि बाहशब्दो भुजवाचकः। यथा च। बाहोऽभुजयोः पुमानिति हारावलीकरः। टाबन्तोऽयं। बाहुबाहा भुजाभुजः। सुबाहा इति वासवदत्तायां सुबन्धुरुक्तेः॥")

वाहावाहवि, व, बाहुभिर्बाहुभिः प्रहृत्तं यद् युद्धं तत्। इति शब्दबोधकारकल्पम्॥

वाहुः पुं, स्त्री, (वाधते ग्रन्थून् इति। वाध+"अर्त्तिहृधिकम्यमिपंसिवाधान्दृनिपद्यिभ्यश्च तुक् च तुक् दीर्घश्चकारान्त।" उणा० १। २८। इति कुप्रत्ययोऽन्तस्य चकारादेशश्च।) कचाटादुल्ल्यग्रर्यन्तावयवविशेषः। तत्पर्य्यायः। भुजः २ प्रवेटः ३ दोः ४। इत्यमरः। २। ६। ८०। दोषः ५ बाहः ६। इति जटाधरशब्दरत्नावल्यौ। तदैदिकपर्य्यायाः। आयती १ अवना २ अनीशू ३ अङ्गवाना ४ विनंयसौ ५ गभस्ती ६ कवसौ ७ बाहू ८ भूरिजौ ९ क्षिपस्नौ १० शुक्रारी ११ भरिजे १२। इति द्वादश बाहुनामानि। इति वेदनिघण्टौ २ अध्यायः॥४॥ (यथा ऋग्वेदे। ५। ५७। ६।

"ऋष्वो वो मरुतो अंसयोरधि
सह ओजो बाह्वोर्वो बलं हितम्॥"

वृषलक्षणबाहुलक्षणम्। यथा,—

"सिंहौसौ चेव भग्राक्षौ स्निग्धौ च विपुलौ भुजौ।
आजानुलम्बिनौ बाहू वृत्तौ पीनौ वृषेश्वरे॥"

इति गारुड़े ६६ अध्यायः॥

(अस्य शुभाशुभलक्षणसूक्तं यथा वासुदेवे।

"उड़ुद्धबाहुः पुरुषो वधबन्धनमाप्नुयात्।
दीर्घबाहुर्भवेद्राजा सप्तद्वचनं यथा॥
प्रलम्बबाहुरैश्वर्य्यं प्राप्नुयाद्भुवसंयुतम्।
ह्रस्वबाहुर्भवेद्दासः परप्रेष्यकरस्तथा॥
वामावर्त्तभुजा ये तु ये च दीर्घभुजा नराः।
संपूर्णबाहवो ये तु राजानस्ते प्रकीर्त्तिताः॥

पुरुषस्य दक्षिणबाहुस्पन्दने स्त्रियो वामबाहुस्पन्दने शुभं तद्विपरीते तु अशुभम्। यथा शाकुन्तले १ अङ्के।

"शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र॥"

बाहुर्दक्षिणबाहुः। फलं वरस्त्रीलाभरूपम्॥

"वामेतरभुजस्पन्दो वरस्त्रीलाभसूचकः॥"

इतिवचनात्॥)

कूर्परस्य ऊर्द्धभागः। यथा,—

"सुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च।
रक्षत्यबाहतेश्चर्य्यस्तव नारायणोऽव्ययः॥"

अस्य टीका। बाहू प्रबाहू च कूर्परस्य ऊर्द्धाधोभागौ। इति विष्णुपुराणे। ५। ५॥

बाहुकः, पुं, नलराजा। तत्पर्य्यायः। पुण्यश्लोकः २ ऋतुपर्णसखः ३ नैषधः ४। इति त्रिकाण्डशेषः॥ (पुष्करेण हृतराज्यो हि नलः सहदमयन्त्या विपिने दमयन्तीमपहाय प्रगच्छन् दावानलपरीतमगणभयादाक्रोशन्तं कर्कोटकनामानं नागमवलोक्य तत उद्धृतवान्। अथ प्रसन्नस्तस्य पन्नगस्योपदेशात् ऋतुपर्णस्य राज्ञो नगरं गत्वा बाहुक इत्यभिधेयस्तस्यैव राज्ञः घोटकपरिचर्य्यायां नियुक्तोऽभवत्। यदुक्तं महाभारते। ३। ६७। १-७।

"तस्मिन्नन्तर्हिते नागे प्रययौ नैषधो नलः।
ऋतुपर्णस्य नगरं प्राविशद्दृश्यमेऽहनि॥
स राजानमुपातिष्ठद् बाहुकोऽहमितिब्रुवन्।
अश्वानां वाहने युक्तः पृथिव्यां नास्ति मत्समः॥
अश्वहृदयज्ञेषु चैवाहं प्रथितो नेषुषेषु च।
अन्नसंस्कारमपि च जानाम्यन्यैर्विशेषतः॥
यानि शिल्पानि लोकेऽस्मिन् यचैवान्यत् सुदुष्करम्।
सर्व्वं यतिष्ये तत् कर्त्तुमृतुपर्ण! भरस्व माम्॥

ऋतुपर्ण उवाच।

वस बाहुक! भद्रन्ते सर्व्वमेतत् करिष्यसि।
शीघ्रयाने सदा बुद्धिर्हृदये मे विशेषतः॥
स त्वमातिष्ठ योगं तं येन शीघ्रा हया मम।
भवेयुरश्वाध्यक्षोऽसि वेतनं ते शतं शताः॥
त्वामुपस्थास्यतश्चैव नित्यं वार्ष्णेयजीवलौ।
एतार्थां रंस्यसे सार्द्धं वस वै मयि बाहुक!॥"

कौरवकुलोद्भवो नागभेदः। यथा महाभारते। १। ५७। १३।

"बाहुकः शङ्खवेरश्च धूर्णकः प्रातरासकौ।
कौरवकुलजाश्चैते प्रवरा दशवाहनम्॥")

बाहुकुण्ठः, त्रि (बाहौ बाहोर्वावयवे कुण्ठः।) कुण्ठितबाहुयुक्तः। कोपा इति भाषा। तत्पर्य्यायः। कुन्यः २ दोर्गडुः ३ इति जटाधरः॥

बाहुकुन्यः, पुं. (बाहुरिव कुणाति आचरतीति। बाहु+कुन्य+पचाद्यच्।) पक्षः। यथा,—

"गरुत्पक्षच्छदाः पत्रं पतत्रश्च तनूरुहम्।
देहधिर्देहकोवश्च बाहुकुन्यश्च कथ्यते॥"

इति शब्दचन्द्रिका॥

बाहुजः, पुं, (ब्रह्मणो बाहुभ्यां जायते यः। बाहु+जन्+ड। "ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। ऊरूतदस्य यद्वैश्यः पद्भ्यां शूद्रोऽभ्यजायत॥" इति श्रुतेस्तथात्वम्।) क्षत्रियः। इत्यमरः। २। ८। १। (यथा,—

"वत्स! वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम्।
तत्र गत्वा दिवोदासः काशिराजोऽस्ति-
बाहुजः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

क्षीरः। स्वर्णजातितिलः। इति मेदिनी। ले, २०॥

बाहुजातं त्रि॥

बाहुजाड्यं क्ली, (जे+भावे+क्युट्। बाहोर्जाड्यं यस्मात्।) अस्त्राघातनिवारणार्थबाहुबहुलौहादि। तत्पर्य्यायः। बाहुलम् २। इति हेमचन्द्रः। ३। ४३३॥

बाहुदन्ती, [न्] पुं, (बहवो दन्ता यस्य स बहुदन्त ऐरावतः स एव बाहुदन्तः। स्वार्थे अण्। बाहुदन्तोऽस्यास्तीति इनिः।) इन्द्रः। इति भूरिप्रयोगः॥

बाहुदा, स्त्री, (बाहू ददातीति या। बाहु+दा+आतोऽनुपसर्गेति।" ३। २। ३। इति कः। लिखितस्य मुनेर्बाहुप्रदानादस्यास्तथात्वम्।) नदीविशेषः। तत्पर्य्यायः। सैतवाहिनी २। इत्यमरः॥ कदाचिल्लिखिताख्यस्य मुनेर्भ्रातुः शङ्खस्य शून्याश्रमे फलभक्षणाद्राज्ञा बाहू च्छिन्नौ तौ चास्यां नद्यां तपस्यतस्तस्य पुनर्जाताविति। इत्यमरटीकायां भरतः॥ *॥ (एतत्कथा यथा, महाभारते। १२। २३। १०—४०। व्यास उवाच।

"अत्रापुदाहरन्तीममितिहासं पुरातनम्।
शङ्खश्च लिखितश्चास्तां भ्रातरौ संशितव्रतौ॥
तयोरावसथावास्तां रम्यकौ पृथक् पृथक्।
नित्यं पुष्पफलैर्देवपितॄन् बाहुदामनु॥
ततः कदाचिल्लिखितः शङ्खस्याश्रममागतः।
यदृच्छया शङ्खोऽपि निष्क्रान्तोऽभवदाश्रमात्॥
सोऽभिगम्याश्रमं भ्रातुः शङ्खस्य लिखितस्तदा।
फलानि पातयामास सम्यक्परिणतान्युत॥
अभ्युपादाय विप्रर्षो भक्षयामास स द्विजः।
तस्मिंश्च भक्षयत्येव शङ्खोऽप्याश्रममागतः॥
भक्षयन्तन्तु तं दृष्ट्वा शङ्खो भ्रातरमब्रवीत्।
कुतः फलान्यवाप्तानि हेतुना केन खादसि॥
सोऽब्रवीत् भ्रातरं ज्येष्ठमुपलभ्याभिवाद्य च।
इत एव गृहीतानि मयेति प्रहसन्निव॥
तमब्रवीत्तथा शङ्खस्तीव्ररोषसमन्वितः।
स्तेयं त्वया कृतमिदं फलान्यादत्ता स्वयम्॥
गच्छ राजानमासाद्य स्वकर्म्म कथयस्व वै।
अदत्तादानमेवं हि कृतं पार्थिवसत्तम!॥
स्तेनं मां त्वं विदित्वा च स्वधर्म्ममनुपालयन्।
शीघ्रं धारय चौरस्य मम दण्डं नराधिप!॥
इत्युक्तस्य वचनात् सुदुःखं स नराधिपम्।
अभ्यगच्छन् महाभागो लिखितः शंसितव्रतः॥
सुदुःखस्तम्भपालेभ्यः श्रुत्वा लिखितमागतम्।

अभ्यगच्छत् सहामात्यः पद्भ्यामेव जनेश्वरः ॥
तमब्रवीत् समागम्य स राजा धर्म्मवित्तमम् ।
किमागमनमाचक्षु भगवन् ! क्षतमेव तत् ॥
एवमुक्तः स विप्रर्षिः सुद्युम्नमिदमब्रवीत् ।
प्रतिश्रुत्य करिष्येति श्रुत्वा तत्कर्त्तुमर्हसि ॥
अनिष्टानि गुरुणा फलानि मनुजर्षभ ! ।
भक्षितानि महाराज ! तत्र मां ग्राधि·मा चिरम् ॥

सुद्युम्न उवाच ।

प्रमाणञ्चेन्मतो राजा भवतो दण्डधारणे ।
अनुज्ञायामपि तथा हेतुः स्याद्ब्राह्मणर्षभ ! ॥
स भवानभ्यनुज्ञातः सुधिकर्म्मा महाव्रतः ।
ब्रूहि कामानतोऽन्यांस्त्वं करिष्यामि हि ते वचः ॥

व्यास उवाच ।

स ऋग्भ्यमार्गो ब्रह्मर्षिः पार्थिवेन महात्मना ।
नाऋं स वरयामास तस्माद्दण्डाद्दते वरम् ॥
ततः स पृथिवीपालो लिखितस्य महात्मनः ।
करौ प्रच्छेदयामास धृतदण्डो जगाम सः ॥
स गत्वा भ्रातरं ग्रहमार्गरूपोऽब्रवीदिदम् ।
धृतदण्डस्य दुर्बुद्धेर्भवांस्तत्क्षन्तुमर्हसि ॥

शङ्ख उवाच ।

न कुप्ये तव धर्म्मज्ञ ! न त्वं दूषयसे मम ।
धर्म्मस्तु ते अतिक्रान्तस्तस्मै निष्कृतिः क्षता ॥
स गत्वा बाहुदां पुण्यां तर्पयस्व यथाविधि ।
देवानृषीन् पितॄंश्चैव मा चाधर्म्मे मनः क्षथाः ॥
तस्य तद्वचनं श्रुत्वा ग्रहस्य लिखितस्तदा ।
अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे ॥
प्रादुरास्तां ततस्तस्य करौ जलजसन्निभौ ।
ततः स विस्मितो भ्रातुर्दर्शयामास तौ करौ ॥"

नदीयं पुरा प्रसेनजिद्राज्ञो गौरी नाम आसीत् । ततः क्रुद्धेन भर्त्राभिशप्ता नदीरूपा जाता । यथा, हरिवंशे । १२ । ५ ।

"सेमे प्रसेनजिद्राज्ञो गौरीं नाम पतिव्रताम् ।
अभिशप्ता तु सा भर्त्रा नदी वै बाहुदा क्षता ॥"

पूरुवंशोद्भवस्य परीक्षिन्नाम्नो नृपतेर्भार्य्यायां बाहुदा । यथा, महाभारते । १ । ९५ । ४२ ।

"परीक्षितं खलु बाहुदासुपयेमे सुयशां नाम तस्यामस्य जज्ञे भीमसेनः ॥) बाहुदाजी च ॥

बाहुभूषा, स्त्री, (बाह्वोर्भुजयोर्भूषा भूषणम् ।) केयूरम् । इति हेमचन्द्रः । ३ । १२६ । बाहुभूषणमात्रञ्च ।

बाहुभेदी, [न्] पुं, (बाहुं भिनत्तीति । बाहु+भिद्+णिनिः ।) विष्णुः । इति भूरिप्रयोगः । बाहुभेदके त्रि ॥

बाहुमूलं, क्ली, (बाह्वो मूलम् ।) कक्षः । वगल इति भाषा । इत्यमरः । २ । ६ । ३६ ॥ (यथा साहित्यदर्पणे । ३ । १२३ ।

"कापि कुन्तलसंयानसंयमव्यपदेशतः ।
बाहुमूलं क्षणौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥")

बाहुयुद्धं, क्ली, (बाह्वो र्बाहुभ्यां वा युद्धम् ।) भुजाभ्यां संग्रामः । मल्लयुद्धम् । तत्पर्य्यायः । निर्युद्धम् २ । तस्य क्रमो यथा,—

"क्षतप्रतिक्षतैश्चित्रैर्बाहुभिश्च सकङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा ॥
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः ।
तलैर्वज्रनिपातैश्च प्रहराभिक्षतैश्च च ॥
शूलाकानखपातैश्च प्रादोद्धूतैश्च दारुणैः ।
जानुभिश्चाप्तनिर्घोषैः शिरोभिश्चावघट्टनैः ॥
तद्युद्धमभवद्घोरमग्र्यं बाहुतेजसा ।
बलप्राणेन शूराणां समाजोत्सवसन्निधौ ॥"

इति विराटपर्व्वणि १२ अध्यायः ॥

सकङ्कटः कङ्कटः करवर्षणञ्च; किञ्चस्तत्सहितैरित्यर्थः । क्षतप्रतिक्षतैः परप्रयुक्तिप्रतिक्षतैः । चित्रैर्विचित्रैर्वज्रैरिति शेषः । सन्निपातैत्यादि । एते मल्लानां शिक्षाविशेषाः । सन्निपातैः परस्परसङ्घातैः । अवधूतैर्बद्धमुष्टिभुजाघातैः । प्रमाथैः पातयित्वा पेषणैः । उन्मथनैः अन्तरीक्षे भुजाभ्यां मथनैः । क्षेपणैः स्थानात् प्रच्यावनैः । वराहोद्धूतनिस्वनैः । "अवाङ्मुखं स्कन्धगतं भ्रामयित्वा तथैव यः । चिक्षिप्तस्य शब्दः स भवेद्वराहोद्धूतनिस्वनः ॥ तर्जन्यङ्गुष्ठमथन प्रसारितकरो हि यः । सम्मुष्टिस्तलाख्यस्तु संग्रहो वक्ष्यमिष्यते ॥" अर्द्धचन्द्रतुल्यमल्लमुष्टिर्वज्रमित्यर्थः । "प्रहताङ्गुलिसङ्घातैः प्रकृतिः स्फुटता । द्विगुणोक्षतबाहुर्यस्तदीयार्थे यथाबलम् ॥ प्रहारः स शूलाकः स्यात् प्रादोद्धृतः पराहतम् ॥" जानुभिश्चाप्तनिर्घोषैः पाषाणघोरसङ्घट्टनजानुभिः करणैर्यान्यङ्गघट्टनानि तैः । बलप्राणेन बलोत्कर्षेण । इति तट्टीकायां । (यथा, मार्कण्डेयपुराणे । ८३ । १३ ।

"ततः सिंहः समुत्पत्य गजकुम्भान्तरस्थितः ।
बाहुयुद्धेन युयुधे तेनोच्चैस्तिदग्गारिणा ॥")

बाहुलं, क्ली, बाहुल्यम् । इति हेमचन्द्रः । ३ । ४१३ ॥ (बहुल+अण् ।) बहुलभावश्च ॥

बाहुलः, पुं, अग्निः । इति शब्दरत्नावली ॥ (बहुला कृत्तिका तया युक्ता पौर्णमासी बाहुली । बाहुली पौर्णमासी यस्मिन् । सास्मिन् पौर्णमासीत्यण् ।) कार्त्तिकमासः । इत्यमरः । १ । ४ । १८ ॥

बाहुलेयः, पुं, (बहुलानां कृत्तिकादीनामपत्यं पुमान् बहुला+ढक् ।) कार्त्तिकेयः । इत्यमरः । १ । १ । ४२ ॥

बाहुसहस्रभृत्, पुं, (बाहूनां सहस्रं बिभर्त्तीति । क्विप् । "दृक्षस्य पिति किति तुक् । ६ । १ । ७१ । इति तुक् च ।) कार्त्तवीर्य्यार्জ্জुनः । इति त्रिकाण्डशेषः ॥ (अस्य बाहुसहस्रप्राप्तिकथा यथा, महाभारते । १३ । १५२ । ७८ ॥

"स वरेऽब्रन्दितस्तेन नृपो वचनमब्रवीत् ।
सहस्रबाहुभूयां वै चलमध्ये गुरोऽन्यथा ॥
मम बाहुसहस्रन्तु पश्यन्तां सैनिका रणे ।
विक्रमेण महीं कृत्स्नां जयेयं संगतव्रतः ॥"
परशुरामो हि अस्य बाहुसहस्रं परशुना

चिच्छेद । अस्य विवरणादिकं कार्त्तवीर्य्यशब्दे द्रष्टव्यम् ॥)

बाहुबाहवि य, बाहुभिर्बाहुभिर्यद् युद्धं दृष्टं तत् । हाताहाति इति भाषा । इति शब्दबोधव्याकरणम् ॥

बिद ऽ अंशे । अवयव इत्यर्थः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऽ विन्द्यते । बिन्दुरितिशब्दव्युत्पत्त्यर्थमेवायं धातुपाराय्यम् । इति दुर्गादासीयटीका ॥

बिल क भ्रु विभेदने । इति कविकल्पद्रुमः ॥ (चुरा०-तुदा०-च-पर०-सक०-सेट् ।) क, बेलयति । भ्रु बिलति । इति दुर्गादासः ॥

बिस ऽर् य क्षेपे । इति कविकल्पद्रुमः । (दिवा०-पर० सक०-सेट् ।) य बिस्यति । ऽर् अबिसत अबेसीत् । अस्मात् पुषादित्वादिच्छं ऽ इत्यत्र । इति दुर्गादासः ॥

बीभत्सः, पुं (बीभत्स्यतेऽसौ । बध+सन्+करणे षन् ।) अर्জ্জुनः । इति मेदिनी । से, २६ ॥

बीभत्सः, त्रि, (बीभत्सा घृणाऽस्यास्त्र । अर्शआद्यच् ।) क्रूरः ॥ (यथा महाभारते । १ । १ । २१० ।

"यदाशौचं द्रोणपुत्रादिभिस्ते-
ईतान् प्राचालान् द्रौपदेयांश्च सुप्तान् ।
कृतं बीभत्समयग्र्यञ्च कर्म्म
तदा नार्घसे विजयाय सञ्जय ! ॥")

घृणाऽस्मा ॥ (यथा, मार्कण्डेये । १६ । १८ ।

"तथापि प्रणता भार्या तममन्यत दैवतम् ।
न तथाऽतिबीभत्सं सर्व्वश्रेष्ठममन्यत ॥")

विक्षतिः । इति मेदिनी । से, २६ ॥ (यथा,—

"दुर्दर्शैः पृथक्सर्व्वैर्बीभत्सालोकनादिभिः ।"

इति माधवकरकृतरसविनिश्चये दुर्द्दर्शाधिकारे ॥ बीभत्सालोकनं विक्षतिदर्शनमिति तट्टीकायां विजयरक्षितेनोक्तम् ॥) पापी । इत्यजयः ॥ अङ्गारादग्धरसान्तर्गतषष्ठरसः । तत्पर्य्यायः । विक्षतम् २ । इत्यमरः ॥ तस्य लक्षणादि यथा, साहित्यदर्पणे । ३ । २६३ ।

"जुगुप्सा स्थायिभावस्तु बीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥
दुर्गन्धमांसपिशितमेदांस्यालम्बनं मतम् ।
तत्रैव कृमिपाताद्यस्तद्दीपनमुदाहृतम् ॥
निष्ठीवनास्यवलननेत्रसङ्कोचनादयः ।
अनुभावास्तत्र मतास्तथास्युर्व्यभिचारिणः ॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ॥"

अस्य रसस्योदाहरणं यथा तत्रैव ।

"उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोष-
भूयांसि मांसा
न्यंसस्फिक् पृष्ठपिण्डात्यवयवसुलभान्युग्रपूतीनि
जग्ध्वा ।
अन्तःपर्यस्तनेत्रः प्रकटितदशनः प्रेतराट्
कराङ्गा
दङ्कस्यादस्थिसंस्थं स्वपुटगतमपि क्रव्यमत्यु-
ग्रमत्ति ॥")

वेक्षतच्च। यथा। अतिश्लीलितपारुष्यमभिग्निश्चितवेक्षतमित्यभिनन्दः। इयमिदं रसे क्लीवम्। तदालम्बने तु मांसशोणितादौ त्रिषु। इति तट्टीकायां भरतः॥

वीभत्सुः, पुं, (वीभत्सतीति। वध+सन्+उ। वृद्धे न्यायपक्षेन ग्रन्थकृतनादस्य तथात्वम्। एतन्निरुक्तिरत्ना। यथा, महाभारते ४। ४२। १८।

"न कुर्य्यां कर्म्म वीभत्सं युध्यमानः कथञ्चन।
तेन देवमनुष्येषु वीभत्सुरिति विश्रुतः॥")

अर्জ্জুनः। यथा,—

अर्জ্জुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः।
वीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः॥

इति महाभारते। ४। ४२। ६॥

वृक्क, कि आदिग्रन्थे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-पक्षे अक०-सेट्।) पञ्चमस्वरी कोपधः। चुरादिपक्षे कथने आदिपक्षे कुक्कुरादिग्रन्थेऽयमिति रमानाथः। किं, वृक्कयति वाचा बहुलोकः। वृक्कति श्वा। इति दुर्गादासः॥

वृक्कं, त्रि, (वृक्कयति वृक्कृक् इत्ययत्नग्रन्थं करोतीति। वृक्क+पचाद्यच्।) वचोऽभ्यन्तरमांसविशेषः। तत्पर्य्यायः। अयर्मांसम् २ हृदयम् ३ हृत् ४। इत्यमरः। २। ६। ६४॥ केचित्तु वृक्कात् पृथगेव हृदयान्तर्गतमांसविशेषे पद्माकारे हृदयादिहृदयमाहुः। धातोरनेकार्थत्वात् वृक्कते खादुत्वात् लभ्यते वृक्कं वृक्क कि आदिग्रन्थे घञ्। नाम्नः पुंलिङ्गोऽप्ययम्। स्त्रीलिङ्गोऽपीत्येके। इति स्वामी॥ वृक्का स्त्री वृक्कः पुमानपि। श्रोणितेषु स्त्रियां वृक्का वृक्कस्तु समये द्वयोरिति रभसात्। नदादित्वात् स्त्रियां वृक्कीत्यपि। वृक्कनान्नं क्लीवमुत्पन्नमितिरुद्रकलिङ्गादयः॥ उरस्यपि च वृक्कायां हृदयं मानसेऽपि चेति त्रिकाण्डशेषः॥ वृक्कग्रन्थस्य उकारस्य ऋकारादेशे तथैव हृक्कादिरूपञ्च। अथच तन्मांसञ्चेति अयमांसं वृक्कस्यायं संसृष्टीभूतं मांसं वृक्कायमांसमित्येकं नामेत्यन्ये। इति तट्टीकायां भरतः॥

वृक्कः, पुं, (वृक्कयति ग्रन्थायते इति। वृक्क+अच्।) छागः। इति त्रिकाण्डशेषः॥ समये पुं, क्लीवे। इति रभसः॥

वृक्कनं, क्ली, (वृक्क कि आदिग्रन्थे+भावे ल्युट्।) कुक्कुरग्रन्थः। तत्पर्य्यायः। भवक्कम् २। इति हेमचन्द्रः। ६। ४३॥

वृक्का, स्त्री, (वृक्क+टाप्।) वृक्कम्। इत्यमरटीकायां भरतः। श्रोणितम्। इति रभसः॥

वृक्का, [न्] (वृक्क+कनिन्।) पुं, वृक्कम्। इत्यमरटीकायां भरतः॥

वृक्कायमांसं, क्ली, (वृक्कस्यायमांसं।) हृदयम्। इत्यमरटीकायां रायमुकुटः॥

वृक्कारः, पुं, (वृक्क कि आदिग्रन्थे भावे घञ्। वृक्कं निनादस्तस्य कारः करणम्। "एकवर्ण्यत्रयो यत्र मध्यमस्तच्च लुप्यते" इति न्यायात् मध्यस्य ककारस्य लोपः।) सिंहध्वनिः। इति हारावली। १६४॥

वृक्षी, स्त्री, (वृक्ष+गौरादित्वात् ङीष्।) वृक्षम्। इत्यमरटीकायां भरतः॥

वृट, कि हिंसे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) कि वोटयति वोटति। इति दुर्गादासः॥

वृड, ग्रि उत्सर्गे। संवृतौ। इति कविकल्पद्रुमः॥ (कुटा०-तुदा०-पर०-सक०-सेट्।) ग्रि वृड्रति अवृड्रीत् वृवोड्र इति दुर्गादासः॥

वृद, इर् न उ निग्रामने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर् अवृदत् अवोदीत्। न वोदति वोदते। उ वोदित्वा वृत्वा। निग्रामनमाक्षेपणं प्रतिधानमिति यावत्। इति दुर्गादासः॥

वृद्धः, पुं, (वृध्यते स्म इति। वृध+क्त। यद्वा भावे क्त वृद्धं ज्ञानमस्यास्तीति अर्शआद्यच्।) भगवदवतारविशेषः। स तु दशावतारान्तर्गतनवमावतारः। यथा,—

"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम्।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति॥"

इति श्रीभागवते १ स्कन्धे ३ अध्यायः॥

अञ्जनस्य सुतः। अजिनसुत इति पाठे अजिनोऽपि स एव। कीटकेषु मध्ये गयाप्रदेशे। इति श्रीधरस्वामी॥ तत्पर्य्यायः। सर्व्वज्ञः २ सुगतः ३ धर्म्मराजः ४ तथागतः ५ समन्तभद्रः ६ भगवान् ७ मारजित् ८ लोकजित् ९ जिनः १० षड्भिज्ञः ११ दशबलः १२ अद्वयवादी १३ विनायकः १४ मुनीन्द्रः १५ श्रीघनः १६ शास्ता १७ मुनिः १८। इत्यमरः। १। १। १३॥ धर्म्मः १९ त्रिकालज्ञः २० धातुः २१ बोधिसत्त्वः २२ महाबोधिः २३ आर्यः २४ पद्मज्ञानः २५ दशार्हः २६ दशभूमिगः २७ चतुस्त्रिंशज्ज्ञातकृत्यः २८ दशपारमिताधरः २९ द्वादशाक्षः ३० त्रिकायः ३१ संगुप्तः ३२ दयाकूर्चः ३३ खजित् ३४ विज्ञानमाटकः ३५ महामैत्रः ३६। इति हेमचन्द्रः। २। १४६॥ धर्म्मचक्रः ३७ महासुनिः ३८ असमः ३९ क्षसमः ४० मैत्री ४१ बलः ४२ गुणाकरः ४३ अकनिष्ठः ४४ त्रिगुरवः ४५ बुधः ४६ वक्री ४७ वागग्रनिः ४८ जितारिः ४९ अर्हन्ः ५० अर्हन् ५१ महासुखः ५२। इति ग्रन्थरत्नावली॥ महाबलः ५३। इति जटाधरः॥*॥ ईश्वरनिरूपणे बुद्धविशेषाणां मतमाह। सर्व्वज्ञ इति सौगताः। निरावरण इति दिगम्बराः। लोकव्यवहारसिद्ध इति चार्व्वाकाः। शरीराद्येव चेतनानि गौरोऽहं नामीत्यादिज्ञानेन गौरवज्ञानवत्त्वयोः सामानाधिकरण्यानुभवादिति चार्व्वाकाणां मतञ्च। तेषां मते जगत्क्षणभङ्गुरत्वं तत्त्वन्तु क्षणभङ्गः पूर्व्वपुञ्जाद्योत्तरपुञ्जोत्पत्तिस्तथा च पुञ्जनिष्ठ एव कुर्व्वद्रूपत्वाख्यजातिविशेषः स्मरणजनकतावच्छेदक इति न दोषः। इति कुसुमाञ्जलिप्रथमस्तबकटीकायां रामभद्रः॥*॥ बुद्धानां दशविधमतभेदमाह।

"वदन्ति पुत्र आत्मेति १ हृद्प्राणतनुत्रयः।
देह आत्मेति २ चार्व्वाका इन्द्रियाण्यपरे ३ च ते॥
तेऽन्ये प्राण ४ स्ततोऽन्ये ते मन ५ आत्मेति वादिनः।
बुद्धिरात्मेति६ बौद्धा वै शून्यमात्मेति७ तेऽपरे॥
याज्ञिका यज्ञपुरुषं सर्व्वज्ञं ८ सौगता विदुः।
निरावरण ९ माहुर्यं दिगम्बरमतानुगाः॥
चार्व्वाकाश्चापि लोकानां व्यवहारप्रसिद्ध-
कम् १०॥"

इत्यात्मप्रकाशः॥*॥

पण्डितः। बुधिते, त्रि। इति मेदिनी। धे, १०॥

(बुद्धावतारस्य विवरणं यथा,—

इह खलु बौद्धशास्त्रसम्प्रदाये सम्पोक्ताः पञ्चविंशतिर्बुद्धा इष्यन्ते। तेषां शुद्धोदनौरसात् मायादेवीगर्भजातः शाक्यसिंहसर्व्वार्थसिद्धार्कबन्धुगौतमेति नामचतुष्टयेन प्रसिद्धोऽन्तिमतमः लोकविश्रुतो बुद्धः कपिलवस्तुनगरे कलेश्चतुःशतपूर्णाधिकद्विसहस्रमितेषु गतेष्वब्देषु शुक्लवासरे सुरद्विषां सम्मोहनाय साक्षाद्विवेकमूर्त्तिः स्वेच्छाविग्रहेण प्रादुर्बभूव।

अथ स वयसा सह क्रमेण शैलगुरुसाहसरूपौदार्य्यबलवीर्य्यादिभिर्वर्द्धते स्म। उदिते यौवने पित्राज्ञया स शाक्यान्वयजां मनोज्ञां रूपलावण्यवतीं दण्डपाणितनयां गोपानाम्नीमनुमतासुपयेमे।

जननसमयेऽस्य गणकाश्चुतवान् वरेश्वरः शुद्धोदनः याधिग्रस्तजराजर्जरसञ्जासिष्टजनदर्शनाज्जातवैराग्यः पुत्रस्ते गृहं सन्त्यक्ष्यतीति। तस्मात् सञ्जातशङ्को राजा शिल्पिभिरुपवनपरिवृतं सुगुप्तं रम्यं हर्म्म्यत्रयं भूभूषणं निर्म्मापयामास। तत्रासौ युवतीजनपरिवेष्टितसुपच्छन्दितं विषयविसृष्टचेतसं तनयं निवृत्तनिर्गमनम् स्वच्छन्दनान्दवासयत्। अथ गच्छति काले ऽस्य शिथिलीबभूव भोगसन्तर्षः। ततः कारागारमिव प्रतीयमानं निष्कुटनिकेतं विहायास्य धरण्या नानाख्यानं द्रष्टुमिच्छा सञ्जाता। ततः सोऽसे पित्रे शुद्धोदनाय सम्बोधयामास पर्य्यच्च नगरं प्रजानान्दृष्टिमवस्थाच्च विवोकयितुं वासना मे बलवतीति। राजा प्रथमं निवारयितुमियेष प्रलोभनेन। स नैव तु ततो विरराम। अथ विज्ञाय निर्बन्धं पुत्रस्य मन्त्रिणमादिदेश, कुमारे शाक्यसिंहे भ्रमितुमारब्धे राष्ट्रे मे जरातुरसञ्जासिष्टमानवाः केनापि कारणेन राजवर्त्मनि नोपतिष्ठन्तामिति विधोषयेति। तथानुष्ठिते कुमारः रथमारुह्य

सारथिनासह बहिर्निर्गत्य भ्रमितुमारब्धवान्। ततश्चतुर्दिक्षु प्रकृतिभिस्तारस्वरैर्जयोऽस्य प्राघोषि। नगरं वीक्षासौ मनसि परां मुदं प्राप्तवान्।

अथ स जरया जर्जरितं मानवमेकं ददर्शवान्। इतः प्राक कदाचिदपि स प्राक्यसिंहो जगतो दुःखं नानुभूतवान् इदानीं निरीक्ष्य प्रथमं तं जरायस्तं विवरणमस्य विज्ञातुं कुतूहली सारथिं पप्रच्छ। तदुक्तं यथा,—

"किं सारथे! पुरुष दुर्बल अल्पस्थाम
उच्छुष्कमांस रुधिरत्वचस्नायुनद्धः।
श्वेतशिरो विरलदन्तजराङ्गरूप
आलम्ब्य दण्ड व्रजतेऽसुखं स्खलन्त॥

सारथिराह।

एषो हि देव! पुरुषो जरयाभिभूतः
क्षीणेन्द्रियः सुदुःखितो बलवीर्यहीनो।
बन्धुजनेन परिभूत अनाथभूतः
कार्यासमर्थ अपविद्ध वनेव दारुः॥

बोधिसत्त्व आह।

कुलधर्मो एष अयमस्य हितं भवाहि
अथवापि सर्वजगतोऽस्य ह्यवस्था।
शीघ्रं भवाहि वचनं यथभूतमेत-
च्छ्रुत्वा तथार्थमिह योनि सचिन्तयिष्ये॥

सारथिराह।

नैतस्य देव! कुलधर्मो न सादृधर्मः
सर्वे जगस्य जरयौवनधर्षयाति।
तुभ्यापि माढपिढवान्धवज्ञातिसंघो
जरया अमुक्तं न हि अन्यगतिर्जनस्य॥"

बोधिसत्त्व आह।

धिक् सारथे! अयुधबालजनस्य बुद्धि-
र्यदयौवनेन मदस्त जरां न पश्यो।
आवर्तयाशिह रथं पुनरहं प्रवेक्ष्ये
किं मह्य क्रीडरतिभिर्जरयाश्रितस्य॥"

इति ललितविस्तरे १४ अध्याये।

अथ प्राक्यसिंहः सारथिं सन्दिदेश रथं सञ्चालयेति। गत्वा नगरस्य दक्षिणे द्वारि व्याधिग्रस्तं यातनामरीतपुरुषमेकमीक्षाचक्रे। ततः स सारथिं पप्रच्छ। तदुक्तं यथा,—

"किं सारथे! पुरुष रूपविवर्जगात्रः
सर्वेन्द्रियेभि विकलो गुरु प्रश्वसन्तः।
सर्वाङ्गमुष्क उदराकुल प्राप्तकृच्छ्रा
मूत्रे पुरीष खकि तिष्ठति कृत्यशत्रौ॥"

सारथिराह।

एषो हि देवपुरुषः परमं ग्लानो
व्याधीभयं उपगतो मरणान्तप्राप्तः।
आरोग्यतेजरहितो बलविप्रहीनो
अत्राणवीप्रसरणो ह्यपरायणश्च॥"

बोधिसत्त्व आह।

"आरोग्यता च भवते यथ खप्नक्रीडा
व्याधिर्भयश्च इम ईदृश घोररूपम्।
को नाम विज्ञपुरुषो इम दृष्ट्वा वस्थां
क्रीडारतिञ्च जनयेच्छुभसंज्ञितां वा॥"

अथ खलु भिक्षवो बोधिसत्त्वः प्रतिनिवर्त्य रथवरं पुनरपि पुरवरे प्राविशत्।

इति हि भिक्षवो बोधिसत्त्वोऽपरेण कालसमयेन पश्चिमेन नगरद्वारेणोद्यानभूमिमभिनिष्क्रमन्महता यूहेन सोऽद्राक्षीत् पुरुषं मृतं कालगतं मार्गे समारोपितं वेलवितानीकृतं ज्ञातिसङ्घपरिवृतं सर्वैरुदङ्गैः क्रन्दद्भिः परिदेवमानैः प्रकीर्णकेशैः पार्श्वावकीर्णशिरोभिरुरांसि ताडयद्भिरुत्क्रोशद्भिः पृष्ठतोऽनुगच्छद्भिः। दृष्ट्वा च पुनर्बोधिसत्त्वो जानन्नेव सारथिमिदमवोचत्।

"किं सारथे! पुरुष मञ्चोपरिगृहीतो
उद्धृत केशगस्य पांशु शिरे क्षिपन्ति।
परिप्रारयित्व विहरन्तुरस्ताड्यन्तो
नानाविलापवचनानि उदीरयन्तः।"

सारथिराह।

"एषो हि देवपुरुषो मृतु जम्बुद्वीपे
न हि भूय मातृपितृ द्रक्षति पुत्रदारान्।
अपहाय भोगयशमातृपितृमित्रज्ञातिसङ्घं
परलोक प्रागु न हि द्रक्षति भूय ज्ञातिम्॥"

बोधिसत्त्व आह।

"धिग्यौवनेन जरया समभिहतेन
आरोग्य धिग्विविधव्याधिपराहतेन।
धिग्जीवितेन पुरुषो न चिरस्थितेन
धिक्पण्डितस्य पुरुषस्य रतिप्रसङ्गैः॥
यदि जर न भवेया नैव व्याधिर्न मृत्यु-
स्तथपि च महदुःखं पञ्चस्कन्धं धरन्तो
किं पुन जरव्याधिमृत्यु नित्यानुबद्धाः
साधु प्रतिनिवर्त्य चिन्तयिष्ये प्रमोक्षम्॥

अथ खलु भिक्षवो बोधिसत्त्वः प्रतिनिवर्त्य तं रथवरं पुनरपि पुरं प्राविशत्॥ इति हि भिक्षवो बोधिसत्त्वस्यापरेण कालसमयेनोत्तरेण नगरद्वारेणोद्यानभूमिमभिनिष्क्रामतस्तस्मिन्नेव क्षणे देवपुत्रैर्बोधिसत्त्वस्यानुभावेनैव तस्मिन् मार्गे भिक्षुरभिनिर्मितोऽभूत्॥ अद्राक्षीद्बोधिसत्त्वस्तं भिक्षुं शान्तं दान्तं संयतं ब्रह्मचारिणमनतिक्षिप्तचक्षुर्युगमात्रप्रेक्षिणं प्रासादिकेनेर्यापथेन सम्पन्नं प्रासादिकेनाभिक्रमप्रतिक्रमेण सम्पन्नं प्रासादिकेनालोकितव्यवलोकितेन प्रासादिकेन सङ्घाटीपिण्डपात्रचीवरधारणेन मार्गे स्थितम्। दृष्ट्वा च पुनर्बोधिसत्त्वो जानन्नेव सारथिमिदमवोचत्।

"किं सारथे! पुरुष शान्त प्रशान्तचित्तो
नोत्क्षिप्तचक्षु व्रजते युगमात्रदर्शी।
कायायवस्त्रवसनो सुप्रशान्तचारी
पात्रं गृहीत्व न च उद्धत उन्नतो वा॥

सारथिराह।

एषो हि देवपुरुष इति भिक्षुनामा
अपहाय कामरतयः सुविनीतचारी।
प्रव्रज्यप्राप्तः समसमात्मन एवमात्मो
संरागद्वेषविगतो तिष्ठति पिण्डचर्यां॥

बोधिसत्त्व आह।

साधु सुभाषितमिदं मम रोचते च
प्रव्रज्य नाम विदुभिः सततं प्रशस्ता।
हितमात्मनश्च परसत्त्वहितस्य यत्र
सुखजीवितं सुमधुरमन्तं फलञ्च॥"

इति ललितविस्तरे १४ अः।

ततः संक्षुब्धचित्तोऽसौ स्वकीयं शुद्धावासं विवेश। दिवसेऽस्मिन् राहुलनामा पुत्रोऽस्य समजनि। राजा शुद्धोदनः खाङ्गस्य भ्रमणवृत्तान्तं सर्वं निशम्यास्य सन्न्यासग्रहणं ग्रहीष्यतीति स्वस्य परिरक्षणार्थम्।

रतिरसाभिज्ञान् युवतिजनान्नटपूरुषान् बहुतरान् प्रेषयामास बोधिसत्त्वस्य प्रमोहनाय। अथागता रजनी, सिद्धार्थस्य तु चित्तं व्याकुलितमतीव गेहात् प्रव्रज्य भैक्ष्यग्रहणार्थम्। ततो मृत्वादिप्रमोदात् परं निद्रिताः सर्वा युवतीर्विलोक्य शयनात् शुनैः शुनैरुत्थितो वलोकयत्।

"तत्र काश्चिदूर्ध्वपद्मरुवक्त्राः काश्चिद्विधुतकेशः काश्चिदिकीर्णाभरणाः काश्चिद्विस्रस्तमुकुटाः काश्चिद्विहस्तैरंगैर्विगोपितगात्राः काश्चिदिसंस्थितसुखाः काश्चिद्विपरिवर्तितनयनाः काश्चित् प्रस्रवन्त्यो लालाभिः काश्चिद्धसन्तः; काश्चित् प्रहसन्तः; काश्चिज्जल्पन्तः; काश्चिद्दन्तान् कटकटायन्तः; काश्चिद्विवर्णवदनाः काश्चिदिसंस्थितरूपाः; काश्चित् प्रलम्बितबाहवः; काश्चिद्विच्छिन्नवदनाः; काश्चिदुद्घाटितशीर्षाः; काश्चिदवगुण्ठितशीर्षाः; काश्चिद्विपरीतवर्णितसुखमेखलाः; काश्चित् प्रध्वस्तशरीराः; काश्चिद्विभग्नगात्राः; काश्चिन्निकुजाः; खुरखुरायमानाः; काश्चिज्जृम्भदङ्गसुपगुह्य परिवर्तितशीर्षशरीराः; काश्चिद्वीजावस्त्रव्याद्यपरिवृतपार्श्वयः; काश्चिद्वेल्लदन्तैः; कटकटायन्तः; काश्चित् किम्पुरुषकुलसम्मताडावकर्षितवाद्यभाण्डाः; काश्चिन्निमेषोन्मेषपरिवर्तनयनाः; काश्चिद्दृष्टास्रा एवं नदिक्षतं घरशीतलगतमन्मः-पुरं निरीक्ष्यमाणो बोधिसत्त्वः प्रभूतगर्भाशासुतपादयति स्म।" तत्रेदमुच्यते।

"तां दृष्ट्व उद्विग्न स लोकनाथः
करुणं विनिश्वस्य इदं जगाद।
अहो वता ह्यशुगता व्रजेयं
कथं रतिं विन्दति राक्षसीगणैः॥
अतिमोहतमावृते दुर्मतिः
कामगुणैर्निर्गुणसंज्ञिनः।
विहगपक्षरगता यथा नहि
लभन्ति कदाचिद् विनिःसृतम्॥"

इति ललितविस्तरे। १५ अध्याये।

अतीतेऽथ निशीथे सिद्धार्थोऽश्वपालमाहूयाह "जरामरणपक्षरनियतसत्त्वपरिमोचनस्य समयो ह्युपस्थितो मे।" अतएव ग्रहीष्यामि सन्न्यासम्। विस्मितोऽश्वपालोऽब्रवीत् राजपुत्रस्य ते सन्न्यासग्रहणमनुचितं न समर्थोऽसि सन्न्यासाश्रमस्य कष्टानि सोढुम्।

सिद्धार्थ आह।

"विवर्जिता: सर्पशिरा यथा भुवे-
र्विगर्हिता मीढघटा यथाशुचि:।
विनाशका: सर्वसुखस्य छन्दक
ज्ञात्वा हि कामान्न विजायते रति:॥"

छन्दक बहूनि दु:खशतानि पूर्वं-
जन्मान्तरे।
बन्धनाबन्धनाक्षाड्गनाशजैना: कामहेतो-
र्मया नो च निर्विदभूत्॥

संस्कृतमानवं प्रमदवपुषश्च
मोहाकुलं हृदि जानाहृतम्।
अन्धभूतं पुरा आत्मसंज्ञा-
यत्नाकारका वेदनातीतहृत्ता इमे॥

धर्मान्नाशत: सम्भूता चलचपलाश्-
चित्तमेघै: समा विद्युद्भि: सदृशा:।
ओसबिन्दूपमा ऋत्तुच्छा असारा:
अनात्मा च भूतस्वभावा इमे सर्वश:॥

अयमहमभिधश्च नामामिमात्मानाऽवतीर्य
संसार ओघैरहं तारयिष्येऽनन्तं जगत्।
शोकसंसारकान्तारशोर्म्मिरागग्रहा-
बाकुले वैराकुले दुस्तरे एव चित्तं मम॥

तदात्मगोत्तीर्य इदं भवार्णवं
सर्वैरदृष्टिर्यैश्चक्षुषैराचक्षम्।
स्वयं तरित्वा च अनन्तरं जगत्
स्वेऽन्तरीचे अजरामरे शिवे॥"

ललितविस्तरे १५ अध्याये।

अतश्छन्दक! प्रव्रजाम्यधुनैव सत्वरमानयाश्वम्। तथानुष्ठिते सिद्धार्थोऽवौ स्वौतनयगुरुजनान् सर्वान् राज्यमैश्वर्यञ्च विहायाश्वमारुह्य निर्गत:। निजनगराद्दादशयोजनदूरस्थितं मल्लराज्यं प्राप्य तत्रैव वग्गिडाश्रमसन्निधौ छन्दकमश्वसहितं विसृज्य कौषेयमपहाय पिधाय वल्कलवाससमेकाकी वैशाली नामनगरीमुपतस्थे। तत्र आराड़कालामनामा जिनपुरुषस्त्रिशतशिष्यैरवातसीत्, सिद्धार्थोऽस्य शिष्योऽभूत्। आहैकदा गुरु:, पवित्रचेता ऋजुर्भक्तिमान् पुरुष एवात्मं ब्रह्मचर्यं यत्तीतुम्, लब्धुञ्च सर्वमैश्वर्यम्। हृदि यस्य विमलो निर्व्याजप्रदीप: प्रदीप्तस्नेहमयवसनपटुर्भवेत्। न तस्य सुखदमैश्वर्यविजृम्भितगुरुवचनम्। तत: सप्तग्रतीं शिष्यततिन्दधानस्य रुद्रकनाम्न: साधो: समीपं गत्वा ज्ञानेन सम्भावयं गयशीर्षे जगाम। तत्रोद्भावितमनेन यद् ब्राह्मणा: श्रमणास्च बोधस्वरूपं लब्धुमविशुद्धं कायमानसं नियोजयन्ति तदयिमुत्पादयितुमात्मैकाग्रहृदय-घर्षणमिव वैफल्यं भजते। शुष्ककाष्ठस्वरूपहृदय-घर्षणेन यथा लब्धमनोरथा मानवास्तदत् कायमनसोर्विशुद्धयो: सतो: सतश्च बोधस्य लाभ: प्रत्यक्ष:। तत:परमसौ बोधिसत्त्वो गत्वा ग्रामसुदक्षिणाख्यं विजनं तत्रैवोषितुं मनो दधे। परमयत्नेनात्रैव कायशुद्धिं चित्तशुद्धिञ्च विधाय आरब्धजनाख्यं दुष्करं ध्यानं दधार।

अत्रान्तरौ कस्मिंश्चिद्दिवसे वदरीमेकिकां कस्मिंश्चिद्वा तण्डुलमेकं कदाचिदेकमात्रं कलायं भक्षयित्वा कस्मिंश्चिदुपोषणेन वा कालं विलङ्घ्य शुष्कच्छविर्मसीवर्णो बभूव। ततोऽसौ देहमित्थं निभन्य लब्धुं सम्बोधं न समर्थोभवेयमिति विचिन्त्य पोषणकरमाहारं जग्राह।

दिवसेऽस्मिन् शुद्धोदन: स्वप्नं ददर्श शिव: पुत्रो मे मणिसुक्तादिविभूषितवारणरूपेण उदुम्बर-तरुमारुरोह। त्रैलोक्यलोका: पूजनायास्या-मक्रन्नीव, यशोधरापि गोपापरनाम्नी ददर्श स्वप्नं विविधम् स्वयं ग्राक्यसिंहश्च पश्च, यथा जगदखिलं ग्रस्या मे, विम्बफलमिव सुमेरु-शिखरसुपधानीभूतं मे, वामदक्षिणकरहयं मे प्राच्यपश्चिमसमुद्रोपरि पादावुभौ मे दक्षि-णावौ प्रसर्पत:, नाभिकमलान् मे वसुस्थिते: स्थिरिकाहर्म्यैरापूरितमखिलं नभ:। ततस्रो-त्थायासौ ऊरुविलोडितायां सुजातायामिकायां गर्भात् सकाशात् भित्त्वा जग्राह।

इत: सिद्धार्थो ध्यानं दधार, निर्व्याणे पथि तस्य सततं परिपन्थी सन्नपि दुर्निवारो मार: परा-जितो ध्यानवीरेण योगिसिंहेन पलायनं चक्रे। ततस्तस्यैव कन्दर्पस्य तनये यतेते तस्रा रतिश्च योगिप्रवरस्य मोहनाय, विफलानि तु आता-ग्रनयोर्मनोरथानि। तत: सर्वेभ्य: ऊरुभ्यो विसृक्त: सिद्धार्थो बोधञ्च विमलं लेभे। तदाबा-धिरूढयोग: मनस्यस्य सुकुरे प्रतिफलितं सकारुणमखिलं जगत्। ततश्च चिन्तयामास स: जीवानां जन्म, तेषु च जीवस्य-संयोगो वियोग-श्चैव दु:खदु:खान्येतानि। न जानीते मानवस्तन् मोहजालेनाहतो दुर्विषहं दु:खं सहत इति। तत: कस्मादागतं जरामरणमिति चेतसा ऋते प्रज्ञे तेनैव निश्चिनोति स:, यच्चञ्चन एवानुरूपति जरामरणमिति, कुतस्तर्हि ह्यागतं जन्म किमस्य वा कारणम्? संसारादस्माज्जातिरतएव भव एव कारणमत्र। भवस्तर्हि कुत आयत: किमस्य वा कारणं? उपादानादागतो भवस्तदुपादानमेवास्य कारणम्। कस्मादुपा-दानमायातन्तर्हि किमस्य वा कारणं? तृष्णाया आगतस्तृपादानमतस्तृष्णैव कारणमस्येति। तर्हि कुत आयाता तृष्णा कारणं वा किमस्या:? वेदनाया आगता तृष्णा अतो वेदनैव कारण-मस्या:। कुत आयाता वेदना, अस्या वा किं कारणम्? स्पर्शादायाता वेदना, अत: स्पर्श एव कारणं वेदनाया इति। स्पर्शस्तर्हि कुत आयात: किं वा कारणमस्य?। षड़ायतना दागत: स्पर्शस्ततोऽस्य कारणं स एवेति। कुत आयातं षड़ायतनं कारणं वा किमस्य? नामरूपाभ्यामागतं षड़ायतनम् अतएवास्य कारणमेव तदिति। कुतस्तर्ह्यायाते नामरूपे कारणं वा किमनयो:? विज्ञानादागते नाम-रूपेऽतोऽनयो: कारणं विज्ञानमिति। कुत आयतं विज्ञानन्तर्हि कारणं वा किमस्य? संस्कारादागतं विज्ञानमतोऽस्य कारणं स एवेति। संस्कारस्तर्हि कुत आयात: कारणं वा किमस्य? अविद्याया आगत: संस्कार-स्ततोऽस्य कारणमविद्येति।

स्फुटमिदानीमविद्यैव कारणं जगतोऽखिलस्य। ततो विलोमेन प्रकटीभूतं यत् अविद्याया: संस्कार: संस्काराद् विज्ञानम्, विज्ञानान्नाम-रूपे ताभ्यां नामरूपाभ्यां षड़ायतनम्, षड़ाय-तनात् स्पर्श:, स्पर्शाद् वेदना, वेदनायास्तृष्णा तृष्णाया उपादानम् उपादानात् संसार: संसाराज्जाति: जातेर्जरामरणमिति।

प्रकारेणानेनोत्पन्नो दु:खदुमो जीवानाम्। तदिदानीं प्रतिभातं अविद्यैव मूलमस्य प्राद-पस्य निरस्तायामविद्यायां कृतो दु:खप्रसङ्ग: क्रमेण तस्मात् जन्मजरामरणं दु:खं चिन्ता-क्लेश: पीड़ा च सर्वे दूरे पलायन्ते। एवं जीवानामुदेति चित्ताकाशे सम्भानोक:। उदिते तस्मिन् मन:संयोगेन ज्ञानं दर्शनं विद्या स्मृतिर्बुद्धिश्च सर्वे प्रत्यक्षीभवति। तत इदानीं सिद्धार्थो बुद्ध: सञ्जात:।

ततश्चागतोऽत्र बिम्बिसारगर्भ्यो राजा बुद्धस्य श्रीपादपद्मसन्दर्शनाय। सोऽस्मै स्वुपदिदेश "अहिंसा परमो धर्म:।" इयतस्तमनुतिष्ठ तद्धर्मं निर्व्याजमोक्षशान्तिष्येति।

ततोऽसौ बुद्धो नैरञ्जनाख्यां नदीं चिरिका-वनञ्च त्यक्त्वा उरुबिल्वमुपवनं प्रतस्थे। अत्र स जनपथाग्रहासरानुपोषणमञ्जीक्षतवान्। तत स्तस्मात् स्थानान्निर्गत्य गयां नाम्नालं बुन्दहिरं लोहितवस्तुकं मत्स्यपुरं सारथिपुरञ्च क्रमेण गत्वा त्यक्त्वा च काश्यिकासुपतस्थे, अत्रास्य कौण्डिन्य: सिद्ध: शिष्योऽभूत् बुद्धत्वं ज्ञात्वा ज्ञानकौण्डिन्यं चकार। कालेऽस्मिन् बहु-संख्का लोका आगत्यागत्य बुद्धस्य शिष्या अभवन्।

तत: काश्यीधाम्न: स उरुबिल्वास्थितं वैनागी-नामकं ग्रामं प्रययौ तत्र नैरञ्जनतीरे नाम्ना उरुबिल्वाकाश्यप: शतार्धकविंशतिपया: पञ्च-शतशिष्यैरनुगत: प्रतिवसति स्म। लोका जान-न्त्यनुमहन्निति। बुद्धो गत्वास्य समीपं प्रदा-यास्मै ज्ञानोपदेशं विमलं शिष्यं तं चकार। दृष्ट्वा शक्तिमलौकिकीं बहवो लोका विश्रिता धर्मं बौद्धं गृहीतवन्त:।

तदा बिम्बसारो मगधराज: शुश्राव गयशीर्षे बुद्धदेव: प्राप्त इति। गत्वा समीपं प्रपूज्य च परमया भक्त्यास्य शिष्यत्वं स्वीचकार। ततो मागधो स्वीयां नगरीं गन्तुं विसस्मयायास तम्। यथादत्तं प्रणयं बुद्ध:। शारीपुत्रोऽत्र मौद्गलायनोऽस्य शिष्योऽभवत्।

श्रुतवान् कोशलपति: प्रसेनजित् बुद्धो देवो राजगृहे जेतवने प्रतिवसत्यधुनेति। गत्वा च तत्र त्वरितं बुद्धवन्दिषुराच, पूर्णकाश्यप: परिव्राजकगोशाल: वैराटपुत्रसञ्जय: अजितकेश:

कमल इत्यते अन्ये च बहवो बुद्धर्षयस्तिष्ठन्ति, न ते लोके कदापि बुद्धनाम्ना परिचाययितुं शक्ताः तर्हि भवान् किं न लज्जते अहं बुद्ध इत्यात्मानं परिचाययितुम्। बुद्धस्तम् 'कुमार-दर्शनसूत्रं, आचयामास तेनोन्मीलितचक्षुः ग्रिष्योऽभूत्तस्य ततः प्रसेनजित् कोशलराजः। दीक्षिते राजि कोशलेश्वरे बुद्धः शुद्धोदनाय संवादं प्रेषयामास "राजन्! पुत्रस्ते पापविदार्गो दुःखनिवारणमन्त्रनम्। तेनैव सोऽखिलस्य जगतस्तृष्णां पापीयसीं वारयामास, शुद्धोदनः ग्राक्षपतिराकर्ण्य दृत्तान्तं परां मुदमवाप। आनेतुं पुत्रं कपिलवस्तुनगर्यामस्मै दूतं पुनः पुनः प्रेषितवान् यो यः प्रयाति दूतोऽस्य सकाशं न स पुनः प्रतिनिवृत्तः स्थितोऽस्य दीक्षितस्तत्रैव। शुद्धोदनः साधुं कालुदायीति नामानं पत्रेण सह प्रेषितवान्। उदायी ग्रागमनादङ्गीचकार यदि चाहं दीक्षितोऽभविष्यम् वारमेकमपि प्रतिन्यवर्तिष्ये। उदायी बुद्धस्य समीपं गत्वैव दीक्षितः। बुद्धस्तं प्रतिज्ञापरिपूरणाय शुद्धोदनस्यान्तिकं प्रेषयामास। उदायी गत्वाह राजानं भो भूप! देवो बुद्धोऽत्राजिगमिषुर्नत्वयस्यातुमिच्छुर्नगर्याम् विहारेऽवस्थातुमिवेयं सः। राजा जेतवनस्यमिव न्यग्रोधारामं कपिलवस्तुनगरे विरचयामास तस्य प्रतीक्षाञ्चक्रे। तत्रागत्य बुद्धो न्यग्रोधारामे तस्थिवान्। अत्रागत्य पितरौ शुद्धोदनोऽन्तोदनञ्चास्य सत्कं सत्कं ग्रात्मसन्ततयश्च ग्रिष्या अभूवन्। तत्रावस्थानसमये बुद्धस्य बालयित्री गौतमी वनिता यशोधरा च भैक्षाश्रमं गृहीतवत्यौ पुत्रोऽपि राहुलोऽजातकनिष्ठो जनकेन दीक्षितः।

ततो बुद्धो गृध्रकूटमागत्य वसतिञ्चक्रे। समयेऽस्मिन् देवदत्तोऽस्य ज्ञातिजः ग्रग्रजः ग्रस्मिन्नं दात्तिगात्तादानिनाय। तेन च निहन्तुं बुद्धं कूटयन्त्रं निरमायि। अनेनाहतो बुद्धो यथा ग्राप निक्षेपणावसरे यन्त्रस्य तं बुद्धं रिरक्षिषुः कुम्भीरस्तत्प्रहारेण प्राणांस्यत्याजः।

कालेऽस्मिन् विम्बसारे मागधे पञ्चत्वं गते अजातशत्रुर्नृपो दुर्ग्रहो मगधं ग्रशासत्, देवदत्तोऽस्य मित्रमासीत्। एकदाजातशत्रुर्बुद्धसन्निधावागत्य पप्रच्छ तं "नानाकर्म्मसु सासक्तो मनुष्यो धनमभीप्सुपार्ज्जयितुं यतते, ग्राप्य तु वाञ्छितं धनं सुखी च भवति, धर्म्मे तथा तु निधाय मनस्तादृशं सुखं प्रत्यक्षमाप्नुयात् किम्? बुद्धः प्रत्युवाच किं कर्म्मणा यागेन होमेन वा। न्यायान्यायौ विफलौ अधमाधमासुत्तमानाञ्च तिरस्कारपुरस्कारौ च तद्वन् निष्फलौ। पितरौ नात्मीयौ च योऽस्मिन् जगति प्राप्तवान् महासत्त्वम्, सत्त्वे पथि प्रविष्टांश्च जानाति स एव जन्मैव त्यजतीति। सोऽस्मिन् जन्मन्येवाचार्य्योऽथयो निर्व्वाणं मोक्षं लभते न पुनरायाति यः। पृथिव्यादिभूतचतुष्टयेऽस्य यथाक्रमं भूतान्येकीभवन्ति। इत्यनुपदेशेन बुद्धस्य अजातशत्रोर्मानसं ततु तत्क्षणादेव प्रबुद्धं बभूव। योऽस्य जुगुप्सापात्रमासीत् स इदानीं भक्तिपात्रमस्याभूत्। अजातशत्रुर्बुद्धाद् दीक्षां जग्राह।

गृध्रकूटाद्बुद्धः पाटलीग्राममाजगाम। कपिलनामाच साधुर्ब्राह्मणोऽनेन बलोकि। सम्भाष्य तं पथि गच्छन्नसौ चतुर्हिंग्रं निरीक्षाञ्चक्रे, आनन्दोऽस्य परिचरो जिज्ञासयामास किमित्यं निरीक्षसे आचार्य्यचक्षुषीति। बुद्ध ग्राह आनन्द! परिहासोऽहमिमं लोकमिहानीम्। ततः स आत्रयामं जम्बुयामं भल्लयामं हस्तियामम् ग्रत्यञ्च वृजिनां मल्लानाञ्च ग्रामानतिक्रम्य भोजनगरं प्राप्तः। स्थानादस्माच्चुन्दकाख्यमहावनमागत्यावस्थितः। ग्रत्र कुरुनाञ्चो धातुगालकाद् वस्त्रिग्विशेषादाहार्य्यं गृहीतवान्।

ततोऽम्बानन्दं सम्बोधयामास भो नगरीं कुशीं गन्तास्मि। ग्रतःपरं तथागतो नगरीं मावामतिक्रम्य नदीं हिरण्वतीं तीर्त्वा निविडं वनमेकं प्राप्तः। ग्रथानन्दं प्राह पार्श्वयोरद्यौत्रवेदनया समाक्रान्तोऽस्मि, ग्रतोऽहमत्रैव तिष्ठामीति। ग्रानन्दो जलमानिनाय प्रक्षाल्य पादौ बुद्धो ध्यानं समालभत। कालेऽस्मिन्नागत्य पुक्कुशो मल्लराजः पादौ बुद्धस्य प्रपूजयामास। बुद्धोऽस्य दीक्षां चकार। सोऽस्मै दत्तवान् सौवर्णालङ्कारान् प्रणम्य च प्रस्थितः। गते मल्लराजे ग्रानन्दं प्राह बुद्धः प्रेयान् मेऽनन्द! त्वं परिधापयालङ्कारान् सौवर्णानङ्गेष्विति। तथानुष्ठिते तदानीं देहस्य ज्योतिरास्याखिलं जगद् ग्रालोकितमिवासीत्। भक्तिभरेणानन्दः प्राह भगवन्! न दृष्टं कदापि मयात्रभवतामेतादृग्मौज्ज्वल्यं देहस्य। दयस्व तावत् कथय कारणञ्चात्रेति। चकार प्रत्युत्तरं बुद्धो देवो निबोध ग्रानन्द! निर्व्वास्यतः प्रदीपस्य ग्निखेवाङ्गकान्तिर्मे द्युतकान्तेत्यत्र कारणम्।

ग्रनन्तरमुभौ मिलित्वा हिरण्वत्यास्तीरे ग्राजग्मतुः। बुद्धस्तत्र स्वीयं समस्तं परिच्छदं परिहायैकवस्त्रो नद्या हिरण्वत्याः कुशाच्च नगर्या उभययोर्मध्यदेशस्थं वनं विविक्तं विवेश। पथि प्राह ग्रानन्द! का ग्रस्य मे ग्रग्र्या विधनुस्तेति। ग्रानन्दः ग्रग्र्यां सज्जीचकार, सुप्रीत्यितो बुद्ध ग्रानन्दाय भिक्षुकार्य्या कर्त्तव्यं सचाग्रं विनयं माल्लकारीनि धर्म्मतत्त्वान्युपदिदेश। ग्रानन्दस्तत्सर्व्वं समाहितेन मनसा जग्राह। तत ग्रानन्दमादिदेश शालमध्यदृश्ययोर्मध्ये ग्रग्र्यां स्थापय निग्रीथोऽद्य मे ग्रेयं विजानीहीति। ततो बुद्धस्तत्रैव समाधिमाधाय रूपार्द्धेवं ज्योतिरवलोकयामास ततोऽसौ चिन्तयति स्म निर्व्वाणम्।

भक्तः परमानन्दो ररोद गद्गं संप्राप्याश्रु विमलितचाग्रप्रवाहोऽविरलधारया तमाह बुद्ध ग्रानन्द! संसारोऽयमसारः सारो निर्व्वाणमेव तदर्थं यतस्वेति। इत्थं परमकृपालुर्बुद्धदेवो निर्व्वाणं प्राप।

इत्थं स हरेरवतारः—

"विकीर्य्य विज्ञानमयीं प्रभां प्रभु-
र्जगत्प्रदीपः प्रथितः प्रभाकरः।
बुद्धः स राशिर्महसां महीय्यसो
ज्वलंश्च निर्व्वाणपदं परं गतः॥
प्रक्षाल्य चैलोक्यमलं मलीमसं
प्रवृद्धहिंसारसदूषितं विभुः।
प्रबोधधाराधरभूरिवारिभी
रराज देवो भुवि बोधभास्करः॥"

कुशीनगरस्थिते सुकूटबन्धनचैत्यस्य ग्रिष्याः देहं भस्मीभूतं चक्रुः। ग्रिष्ययूथेनास्य पवित्रदेहभस्मावशेषार्थं विवदमानेन निरशा भस्मभिरेभिरष्टप्रदेशेश्चत्वारो चैत्या निर्म्मिता भवन्तीति॥)

बुद्धम्, क्ली, (बुद्धं रूपाकारतो ज्ञातं द्रव्यम्।) स्त्रौपिकम्। लोत् इति भाषा। इति त्रिकाण्डशेषः॥

बुद्धिः, स्त्री, (बुध्यतेऽनयेति। बुध्+क्तिन्।) निश्चयात्मिकान्तःकरणवृत्तिः। इति वेदान्तसारः॥ सविकल्पकज्ञानम्। इति चण्डीटीकायां नागभट्टः॥ तत्पर्य्यायः। मनीषा २ धिषणा ३ धीः ४ प्रज्ञा ५ शेमुषी ६ मतिः ७ प्रेक्षा ८ उपलब्धिः ९ चित् १० सम्वित् ११ प्रतिपत् १२ ग्रप्तिः १३ चेतना १४। इत्यमरः। १। ५। १॥ धारणा १५ प्रतिपत्तिः १६ मेधा १७ मननम् १८ मनः १९ ज्ञानम् २० बोधः २१ हृल्लेखः २२ संख्या २३ प्रतिभा २४। इति राजनिर्घण्टः॥ ग्रात्मजा २५ पक्षा २६ विज्ञानम् २७। इति शब्दरत्नावली॥ * ॥ ग्रस्याः स्वरूपं यथा,—

"बुद्धिर्विवेचनारूपा सा ज्ञानजननी स्मृतौ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ ग्रध्यायः॥

ग्रस्या ग्रध्यात्माधिभूताधिदैवतानि यथा,—

"ग्रध्यात्मं बुद्धिरित्याहुः षड्इन्द्रियविचारिणी।
ग्रधिभूतञ्च मन्तव्यं ब्रह्मा तत्राधिदैवतम्॥"

इति महाभारते ग्राश्वमेधिकपर्व्व॥ * ॥

सा च सात्त्विकराजसतामसभेदेन त्रिविधा। सात्त्विकी यथा,—

"प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ!
सात्त्विकी॥"

राजसी यथा,—

"यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च।
ग्रयथावत् प्रजानाति बुद्धिः सा पार्थ!
राजसी॥"

तामसी यथा,—

"ग्रधर्म्मं धर्म्ममिति या मन्यते तमसावृता।
सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ!
तामसी॥"

इति श्रीभगवद्गीता॥

तस्याः पञ्च गुणा यथा,—
"इहानिष्टविपत्तिश्च व्यवसायः समाधिता।
संशयः प्रतिपत्तिश्च बुद्धेः पञ्च गुणान् विदुः॥"
इति महाभारते मोक्षधर्म्मः।

इहानिष्टविपत्तिः इहानिष्टानां वृत्तिविशेषाणां विपत्तिर्नाशः निद्रारूपा वृत्तिरित्यर्थः। व्यवसायः उत्साहः। समाधिता चित्तस्थैर्य्यं चित्तवृत्तिनिरोध इत्यर्थः। संशयः कोटिद्वयस्पृक् ज्ञानम्। प्रतिपत्तिः प्रत्यक्षादिप्रमाणवृत्तिः। इति तट्टीका॥ * ॥ तस्याः सप्त गुणा यथा—
"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणन्तथा।
ऊहोपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः॥"
इति हेमचन्द्रः॥ * ॥

तस्या वृत्तिः यच्चधा यथा। प्रमाणम् १ विपर्य्ययः २ विकल्पः ३ निद्रा ४ स्मृतिः ५। इति पातञ्जलम्॥ * ॥ बुद्धिक्षयकरा यथा,—
"क्रोधः क्रोधश्च लोभश्च कामो मोहः परासुता।
ईर्ष्या मानो विचिकित्सा कृपास्पृहा जुगुप्सता॥
द्वादशैते बुद्धिनाशहेतवो मानसा मलाः।"
इति कालिकापुराणे १८ अध्यायः॥ * ॥

अपि च।
"बुद्धिक्षयकरा एते मोक्षकासवन्तिकाः॥"
बुद्धिवृद्धिकरा यथा,—
"निम्बाटरूषवृन्ताच्च बुद्धिवृद्धिकरा मताः॥
बुद्धिक्षयकरान्नित्यं त्वजेद्राजा च भोजने।
भोजयेदन्नवृद्धिवृद्धिहेतुं नृपोत्तम!॥"
इति कालिकापुराणे ८६ अध्यायः॥ * ॥

न्यायमते सा विशेषगुणः पुनर्द्विविधा अनुभूतिः स्मृतिश्च। यथा,—
"विशुबुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा॥
प्रत्यक्षमथानुमितिस्तथोपमितिशब्दजे।"
इति भाषापरिच्छेदः॥

बुद्धिमान्, [त्] त्रि, (बुद्धिर्विद्यते यस्य। बुद्धि+मतुप्।) बुद्धियुक्तः। ज्ञानवान्। यथा,—
"तद्भुज्यते यद्विजशुक्लशेषं
स बुद्धिमान् यो न करोति पापम्॥"
इति गारुडे १५५ अध्यायः॥

बुद्धिसहायः, पुं. (बुद्धौ बुद्ध्या स्थिते कार्य्ये इति भावः। सहायः।) मन्त्री। इति हलायुधः॥ मत्या साहाय्यकर्त्ता च॥

बुद्धीन्द्रियं, क्ली, (बुद्धेर्बुद्ध्यात्मकं वा इन्द्रियम्।) ज्ञानेन्द्रियम्। यथा,—
"मनः कर्णौ तथा नेत्रे रसना त्वक् च नासिका।
बुद्धीन्द्रियमिति प्राहुः शब्दकोशविचक्षणाः॥"
इति शब्दरत्नावली॥
(यथा मनुः। २। ६०-६२।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता॥
बुद्धीन्द्रियाणि पञ्चेषां श्रोत्रादीन्यनुपूर्व्वशः।
कर्म्मेन्द्रियाणि पञ्चेषां पायुपादीनि प्रचक्षते॥
एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम्।
यस्मिन् जिते जितावेतौ भवतः पञ्चकौ गणौ॥"

बुद्बुदः, पुं. वर्त्तुलाकारजलविकारः। जलविन्दुकी इति भुड्भुड़ि इति च ख्यातः। बुद्बुदोऽम्बुस्फोट इत्यमरः। इत्यमरभरतौ॥ अन्यच।
"अवश्यायो हिमादग्निर्नीचसेवा यथे जलम्।
वेश्यारागः खले प्रीतिः बर्द्धते बुद्बुदोपमाः॥"
इति गारुडे १५ अध्यायः॥

गर्भस्यावयवविशेषः। यथा,—
"पञ्चरात्रेण कलनं बुद्बुदाकारता भवेत्॥"
इति सुश्रुतः॥

(यदुक्तं यथा,—
"प्रथमेऽहनि रेतश्च संयोगात् कललञ्च यत्।
जायतेबुद्बुदाकारं श्लेष्मातिच्च दशाहनि॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये॥)

बुध इर् ज न वेदने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्। ज्वलादिरयम्।) इर् अबुधत् अबोधीत्। ज बोधः बुधः। न बोधति बोधते। इति दुर्गादासः॥

बुध, औ विज्ञापने। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-अनिट्।) औ बोद्धा। बोधति गुरुः। इति दुर्गादासः॥

बुध, य ड औ वेदने। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) य ड बुध्यते ग्राह्यं सुधीः। औ बोद्धा। इति दुर्गादासः॥ (जागरार्थे अकर्म्मकोऽपि। यथा, रघौ।२०।६।
"ते च प्रापुरदन्वन्तं बुबुधे चादिपूरुषः॥"
"आदिपुरुषो विष्णुश्च बुबुधे योगनिद्रां जहौ इत्यर्थः।" इति तट्टीका।)

बुधः, पुं, (बुध्यते यः। "बुध्+इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः।) पण्डितः। तत्पर्य्यायः। विद्वान् २ विपश्चित् ३ दोषज्ञः ४ सन् ५ सुधीः ६ कोविदः ७ धीरः ८ मनीषी ९ ज्ञः १० प्राज्ञः ११ संख्यावान् १२ पण्डितः १३ कविः १४ धीमान् १५ ऋषिः १६ ज्ञानी १७ ऋद्धिः १८ लब्धवर्णः १९ विपश्चित्वः २० दूरदर्शी २१ दीर्घदर्शी २२। इत्यमरः। २। ७। ५॥ विदग्धः २३ दूरदृक् २४ सूरी २५ वेदी २६ दृढः २७ बुधः २८ विधानगः २९ प्रश्निलः ३०। इति शब्दरत्नावली॥ चक्षुः ३१ प्राप्तरूपः ३२ सुरूपः ३३ अभिरूपः ३४ बुधानः ३५ कवितावेदी ३६ वप्रा ३७ विदितः ३८ कविः ३९। इति जटाधरः॥ (यथा, नवरत्ने। १।
"अयुतं स्तुतिभिर्गुरुं प्रणतिभिर्म्मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं प्रीत्येन कुर्य्याद्वशम्॥")

नवग्रहान्तर्गतचतुर्थग्रहः। स च दृहस्पतिभार्य्यातारागर्भे चन्द्राज्जातः। तत्पर्य्यायः। सौम्यः २। सौम्यः ३। इत्यमरः।१।३।२६। हेमा ४ वित् ५ ज्ञः ६ बोधनः ७ इन्दुपुत्रः ८। इति ज्योतिस्तत्त्वम्॥ * ॥ तस्य जन्मादिवृत्तान्तं यथा। "मदावलेपाच्च सकलदेवगुरोर्बृहस्पतेस्तारां नाम पत्नीं जहार। बहुशस्तु बृहस्पतिर्योदितेन भगवता ब्रह्मणा चोद्यमानः सकलेभ्यश्च देवर्षिभ्यश्चमानोऽपि न सुमोच। तस्य बृहस्पतिर्हिषादुग्रता प्राप्तिर्य्याद्योऽभूत्। अङ्गिरसश्च सकाशादुपलब्धविद्यो भगवान् रुद्रो बृहस्पतेः साहाय्यमकरोत्। ततश्चोग्रता ततोहि जम्भकुम्भाद्याः समस्ता एव दैत्यदानवनिकाया महान्तमुद्यमचक्रुः। बृहस्पतेरपि सकलदेवसैन्यसहायः शक्रोऽभवत्। एवं तयोरतीवोग्रः संग्रामस्तारानिमित्तस्तारकामयनामाभवत्। ततश्च समस्तशस्त्रास्त्रयुद्धेषु रुद्रपुरोगमा देवाः दैत्येषु चाग्नेयदानवा सुसुचुः। एवञ्च देवासुराहवक्षोभक्षुब्धहृदयमर्गभमेव जगद् ब्रह्माणं शरणं जगाम। ततश्च भगवान् पुण्डरीकं शङ्करमसुरान् दैवांश्च निवार्य्य बृहस्पतये तारामदात्। ताञ्चान्तःप्रसवामवलोक्य बृहस्पतिराह। नैष मम क्षेत्रे भवत्यन्यसुतो धार्य्यत उत्सृजैनं अक्षममतिधार्य्यतेति। सा च तेनैवमुक्ता प्रतिव्रता भर्त्तृवचनात्तमिधीकाख्ये गर्भमुत्सर्जं। स चोत्सृष्टमात्र एवातितेजसा देवानां तेजांस्याचिक्षेप। बृहस्पतिमिन्दुञ्च तस्य कुमारस्यातिचारुतया साभिलाषौ दृष्ट्वा देवाः समुत्पन्नसन्देहास्तारां पप्रच्छुः। सत्यं कथयास्माकमतिसुभगे! कस्यायमात्मजः सोमस्याथ बृहस्पतेरित्युक्तापि सा तारा ह्रिया न किञ्चिदुवाच। बहुशोऽप्यभिहिता यदासौ देवेभ्यो नाचचक्षे ततः स कुमारस्तां शशुमुचत्। प्राह च। दुष्टाम्ब! कस्माज्जन्म तातं नाख्यासि। अद्यैव ते अलीकलज्जावत्यास्तया शास्तिमयमहं करोमि। यथा नैवमन्याप्यतिमत्यरवचना भविष्यतीति। अथ भगवान् पितामहस्तं कुमारं सन्निवार्य्य स्वयमपृच्छत्तारां। कथय वत्से! कस्यायमात्मजः सोमस्याथ बृहस्पतेरित्येवमुक्ता लज्जाजड़माह सोमस्येति। ततः स्फुरदुच्छ्वसितामलकपोलकान्तिर्भगवान्शुक्रपतिरालिङ्ग्य कुमारं साधु साधु वत्स! प्राज्ञोऽसीति बुध इति नाम चक्रे। इति विष्णुपुराणे ४ अंशे ६ अध्यायः॥ मत्स्यपुराणे चतुर्विंशाध्याये विशेषोऽयम्। सूत उवाच।
"ततः संवत्सरस्यान्ते द्वादशादित्यसन्निभः।
दिव्यपीताम्बरधरः पीताभरणभूषितः॥
सर्व्वास्त्रशस्त्रविद्विद्वान् हस्तिशास्त्रप्रवर्त्तकः।
राज्ञः सोमस्य पुत्रलाद्राजपुत्रो बुधः स्मृतः॥
जातमात्रः स तेजांसि सर्व्वाण्येवाच्छिपद्बली।
ब्रह्मादयश्च ते जग्मुर्देवा देवर्षिभिः सह॥
बृहस्पतिगृहे सर्व्वे जातकर्म्मोत्सवं तदा।
पप्रच्छुश्च सुरास्तारां केन जातः कुमारकः॥
ततः सा लज्जिता तेषां न किञ्चिदवदत्तदा।
पुनः पुनस्तदा दृष्टा लज्जयन्ती वराङ्गना॥
सोमस्येति चिरादाह ततोऽग्रह्यादिधुः सुतम्।

बुध्न इत्यकरोन्नाम प्रादाद्राज्यञ्च भूतले ॥
अभिषेकं ततः कृत्वा प्रधानमकरोद्विभुः ।
यज्ञभागं प्रदायाथ ब्रह्मा ब्रह्मर्षिसंयुतः ॥
पश्यतां सर्वभूतानां तत्रैवान्तरधीयत ।
इलोदरे च धर्मिष्ठं बुधः पुत्रमजीजनत् ॥"
अन्यत् सर्वमाख्यानमेकमेव । * ॥ अस्य वर्णः दूर्वाश्यामः । स च उत्तरदिङ्मण्डलभूद्भागधर्म्मवेदरजोगुणमिश्रितरसमिथुनराशिमरकतमञ्जिमगधदेशानामधिपतिः । अस्य मित्रं आदित्यः शुक्रश्च । अस्य शत्रुः मङ्गो । अस्य राशिभोगः अष्टादश दिनानि । इति ज्योतिस्तत्त्वम् । * ॥ ये तु मगधदेशोद्भवाः । अधिवंशजाताः । ह्रस्वभुजदीर्घैः । पीतवर्णाः । वैश्यजातिः । चतुर्भुजः । वामोर्द्धक्रमतश्चर्म्मवरखड्गगदाधारी । सूर्य्याक्षः । सिंहवाहनः । सौम्यः । पीतवस्त्रः । अस्याधिदेवता नारायणः । प्रत्याधिदेवता विष्णुः । धनिष्ठानक्षत्रयुक्तहादश्यां जातः । इति यज्ञयज्ञतत्त्वम् । * ॥ स च ग्रामचारी । शुभग्रहः । नीलवर्णः । सुवर्णद्रव्यस्वामी । वर्त्तुलाकृतिः । स्निग्धः । इष्टकाग्रहसञ्चारी । वातपित्तकफात्मकः । क्लीवग्रहः । प्रातःकाले प्रबलः । पश्चिमस्वामी । सकलरसप्रियश्च । इति ज्योतिषम् । अस्य वारे जातफलं यथा,—

"गुणी गुणज्ञः कुशलः क्रियादौ
विलासशीलो मतिमान् विनीतः ।
मृदुस्वभावः कमनीयमूर्त्ति-
र्बुधस्य वारे प्रभवो मनुष्यः ॥"

इति कोष्ठीप्रदीपः ॥*॥

सूर्य्यवंशीयराजविशेषः । यथा,—

"तस्मात् क्षतिरथस्यैव देवाभीढ़स्ततो बुधः ।
बुधाच्च विबुधश्चैव तस्माच्चाहार्हतस्ततः ॥"

इत्यग्निपुराणम् ॥

(वेगवती राज्ञः पुत्रः । यथा, भागवते । ९ । २ । ३० ।

"ततसुतः कैवलस्यात् वन्धुमान् वेगवांस्ततः ।
बुधस्तस्माभवद् यस्य तृणबिन्दुर्महीपतिः ॥")

बुधचक्रं, क्लो (बुधस्य यज्ञविशेषस्य चक्रम् ।) बुधयज्ञस्य खसञ्चारादष्टाश्रदिगोत्तरराशिमन्तरसञ्चारनक्षत्रावधिषण्विंशतिनक्षत्रघटितनरशुभाशुभज्ञानार्थनराकारचक्रम् । यथा,—

"भोगो सुखैकमथ मूर्द्धि चतुर्थ रोगः
प्रष्टपार्श्वमि सुखहतं सुखदं मृतेश्च ।
दुःखं पदाब्धिसमयो हृदि वक्त्रराज्यं
नाभौ सुखे द्विभगवेति वदं बुधस्य ॥"

इति समयाचन्द्रतम् ॥

बुधताबः, पुं, (बुधस्य यज्ञविशेषस्य तातः पिता ।) चन्द्रः । इति शब्दचन्द्रिका ॥

बुधरत्नं, क्लो, (बुधप्रियं रत्नम् । प्राकपार्थिवादित्वात् समासः ।) मरकतमणिः । इति राजनिर्घण्टः ॥

बुधवारः, पुं, (बुधस्य वारः ।) बुधग्रहस्य वासरः । यथा,—

"ये: सिता श्रावणे माघि अष्टमी रोहिणीयुता ।
किं पुनर्बुधवारेण सोमेनापि विशेषतः ॥"

इति तिथ्यादितत्त्वम् ॥

(अस्मिन् जातफलं यथा, कोष्ठीप्रदीपे ।

"गुणी गुणज्ञः कुशलः क्रियादौ-
विलासशीलो मतिमान् विनीतः ।
मृदुस्वभावः कमनीयमूर्त्ति-
र्बुधस्य वारे प्रभवो मनुष्यः ॥")

बुधशब्दः, पुं, पर्य्यम् । यज्ञपुरुषः । इति संक्षिप्तसारोद्धादिहतिः ॥

बुधसुतः, पुं, (बुधस्य सुतः पुत्रः ।) पुरूरवाः । इति पुराणम् ॥ (यदुक्तं हरिवंशे । २६ । १ ।

"बुधस्य तु महाराज ! विद्वान् पुत्रः पुरूरवाः ।
तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः ॥"

अयं हि इलागर्भसंभूतः ॥ बुधस्य बुहदेवस्य सुतः पुत्र इति विष्णुपुराणे । बुहपुत्रो राहुलः । स तु यशोधरायां गर्भसंभूतः ।)

बुधा, स्त्री, (बोधयति रोगिणं या । बुध् + "इगुपधेति ।" ३ । १ । १३५ । इति कसन्तरटाप् ।) जटामांसी । इति शब्दचन्द्रिका ॥ (गुणादिकमस्या जटामांसीशब्दे ज्ञातव्यम् ।)

बुधाढ्यः, पुं, (बोधयति बुध्यते वा । बुध बोधने + युधिबुधिदृग्भ्यः किच् ।" उणा० २ । ६० । इति आढ्यच् किच्च ।) गुरुः । विज्ञः । इति मेदिनी । ने, २६ ॥ ब्रह्मवादी । प्रियवादी । इत्यादिकोषः ॥ कविः । इति जटाधरः ॥

बुधाष्टमी, स्त्री, (बुधवारयुता अष्टमी । प्राकपार्थिवादित्वात् समासः ।

"अष्टमीबुधवारेण पञ्चयोगभयोर्यदा ।
भविष्यति तदा तस्यां व्रतमेतत् कृतं पुरा ॥"

इति वचनादस्याख्यातत्वम् ।) व्रतविशेषः यथा । बुधाष्टमीव्रतं चैत्रशुक्लेऽष्टहरिण्यनादीतरकाले कर्त्तव्यम् । यदाह राजमार्त्तण्डः ।

"पतङ्गे मकरे याते देवे नायति माधवे ।
बुधाष्टमीं प्रकुर्व्वीत वर्जयित्वा तु चैत्रकम् ॥
प्रसुप्ते च जगन्नाथे सन्ध्याकाले मधौ तथा ।
बुधाष्टमीं न कुर्व्वीत कृता हन्ति पुराकृतम् ॥"

एतद्व्रतमारब्धमपि चैत्रादौ न कर्त्तव्यमिति । यथा स्मृतिः ।

"मौने धनुषि देवेशे सुप्तेऽम्बुहरिणे तथा ।
बुधाष्टमीं न कुर्व्वीत पूर्व्वविद्धामपि क्वचित् ॥"

इति व्रतकालविवेकः ॥*॥

अपि च ।

"अष्टमी बुधवारेण पञ्चयोगभयोर्यदा ।
भविष्यति तदा तस्यां व्रतमेतत् कृतं यथा पुरा ॥
तस्यां नियमकर्त्तारो न स्युर्दुर्गतिभाजनाः ।
तद्युक्तस्याष्टमीनां वर्जयित्वाकुलोद्भवम् ॥
भक्तं सक्तिप्रभृत्याभ्यां कामनायुक्तमानवः ।
आम्रपत्रपुटे कृत्वा यो मुक्तं कुशवेष्टितं ॥
कलशिकाम्बिकोपेतं कार्य्यं तस्य फलं भवेत् ।
बुधं पञ्चोपचारेण पूजयित्वा जलाग्रये ॥
प्रक्षिपेत् दक्षिणां दद्यात् कर्करीं तण्डुलान्विताम् ।
बुं बुधायेति बीजार्णैः स्वार्णैः वा कमलादिके ॥
दाडिमापामार्गं क्षीरं दत्वा चाङ्गानि मथ्नतः ।
बुधाष्टमीकथा पुण्या श्रोतव्या व्रतिभिर्भुवम् ॥*॥
पुरे पाटलिपुत्राख्ये वीरो नाम द्विजोत्तमः ।
रम्भा भार्य्या च तस्याभूत् कौशिकः पुत्र उत्तमः ॥
दुहिता विजया नाम धनपालो ह्यभोऽभवत् ।
गृहीत्वा कौशिकस्तच्च योगे गङ्गागतोऽरमत् ॥
गोपालकैर्ब्बटुकैः क्रीडमानस्ततो बलात् ।
गङ्गातः स च उत्थाय वर्त्म बभ्राम दुःखितः ॥
जलार्थं विजया चागात् भ्रात्रा सार्द्धं साध्वसात् ।
पिपासितौ गृहीत्वार्घौ आगतोऽथ सरोवरम् ।
दिव्यस्त्रीवाक्यपूजादि दृष्ट्वा चाप्यथ विस्मितः ॥
स च गत्वा ययाचेऽन्नं सानुजोऽहं बुभुक्षितः ।
स्त्रियोऽब्रुवन् व्रतं कर्त्तुं दास्यामश्च कृते व्रतम् ।
यत्पर्य्याप्तमन्नपानार्थं पूजयामासतुर्बुधम् ।
पुटकद्वयं गृहीत्वान्नं बुभुजाते प्रदत्तकम् ॥
स्त्रियौ गता गतौ तौ तु धनपालमपश्यताम् ।
चौरैर्हृतं गृहीत्वाथ प्रदोषे प्राप्तवान् गृहम् ॥
वीरश्च दुःखितं गत्वा रात्रौ सुप्ता यथासुखम् ।
लब्धश्च चरितं दृष्ट्वा कस्य देया सुता मया ।
सुमायेत्यब्रवीद्दुःखात् स चायाद्व्रतसत्फलात् ॥
स्वर्गं गतौ च पितरौ व्रतं राज्ञाय कौशिकः ।
चक्रेऽयोध्यामहाराज्यं दत्त्वा च भगिनीं यमे ॥
यमोऽपि विजयामाह गृहस्थं पुरान्तरम् ।
गोहाटयाख्यञ्च गते यमे सा न तथाकरोत् ॥
अपश्यन्भ्रातरं सा सा यामिकां पार्श्वतोऽनयत् ।
अपोद्दिश्य कौशिकाय आचचक्षाथ विस्तरम् ।
व्रतं चक्रे ततो मुक्ता माता तस्याश्चरद्व्रतम् ॥"

इति गारुडे बुधाष्टम्यादि १३३ अध्यायः ॥*॥

विस्तरस्तु ब्रह्मपुराणोक्तबुधाष्टमीव्रतपद्धतौ द्रष्टव्यः ॥

बुधितं, त्रि, (बुध्यते स्म । क्तेट् बुध् + क्त ।) बुद्धम् । ज्ञातम् । इत्यमरः । २ । २ । १०८ ॥

बुधिलः, त्रि, (बुध्यते यः । बुध् + किलच् ।) विद्वान् । इत्युणादिकोषः ॥

बुध्नः, पुं, (बध्नातीति । बन्धबन्धने "बन्धेर्द्धिबधौ च ।" उणा० ३ । ५ । इति नक् बुधादेशश्च ।) वृक्षमूलम् । इत्यमरः । २ । ४ । १२ ॥ (मूलदेशः । अथर्ब्बभाष्यः । यथा, अथर्ब्ववेदे । २ । १४ । ४ ।

"यत्ते बुध्न आसीनाक्षा इन्द्रो वर्त्मेवाधितिष्ठतु ।")

शिवः । यथा,—

"निवेश्य बुध्नं चरणं क्षितावना
गुरुं समारोढुमधोपचक्रमः ।"

इति हरविलासे राजशेखरः । इति भरतः ॥

बुन्द, इर् अ उ निशामने। (इति कविकल्पद्रुमः। (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर् अबुन्दीत्। अ बुन्दति बुन्दते। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥ (यथा, भट्टिः। १४। ७२।
"सर्वसे शरवन्धेन दिग्धेनेति बुबुन्द सः॥")

बुन्ध, इर् अ उ निशामने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर् अबुधत् अबुन्धीत्। अ बुन्धति बुन्धते। उ बुन्धित्वा बुद्धा। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥

बुन्ध, क बन्धे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) पञ्चमस्वरी। क बुन्धयति॥ इति दुर्गादासः॥

बुबुधानः, पुं, आचार्य्यः। देवः। पण्डितः। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, ऋग्वेदे। ७। ४४। ३।
"दधिक्रावाणं बुबुधानो
अग्निमुषसं सूर्य्यं गाम्॥")

बुभुक्षा, स्त्री, (भोक्तुमिच्छा। भुज धौ भक्षे+"धातोः कर्म्मणः समानकर्तृकादिच्छायां वा।" ३। १। ७। इति सन्। ततः "अः प्रत्ययात्।" ३। ३। १०२। इत्यस्तटाप्।) क्षुधा। इत्यमरः। २। ६। ५४॥ (यथा, रामायणे। २। २८। १८।
"अतीववातस्निमिरं बुभुक्षा चास्ति नित्यशः।
भयानि च महान्त्यत्र ततो दुःखतरं वनम्॥")

बुभुक्षितः, त्रि, (बुभुक्षा भोजनेच्छा सञ्जातास्य। बुभुक्षा+"तदस्य संजातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) क्षुधितः। इत्यमरः। ३। १। १०॥ (यथा, मनुः। १०।१०५।
"अजीगर्तः सुतं हन्तुमुपासर्पदुभुक्षितः।
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन्॥")

बुल, क मज्जने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) क बोलयति प्रस्तरः प्रयसि। तालव्यवर्णाद्यादिरयमिति केचित्। इति दुर्गादासः॥

बुलिः, स्त्री, (बुल+इन् किच्च।) भगम्। इति हेमचन्द्रः। ३। २७३।

बुसं, क्ली, (बुस्यते उत्सृज्यते यत्। बुस्सिर् उत्सर्गे+"इगुपधेति।" ३। १। १३५। इति कः। पृषोदरादित्वात् वत्वं विभाषया।) बुसम्। तुच्छधान्यम्। आगड़ा इति भाषा। यथा,—
"उल्लेखमेषतुषतोयभयाभिलाषकुल्लायमाधवधवेषतुषारशैलाः। इति मूर्द्धन्यमध्ये पुरुषोत्तमः।
इति भरतः॥

बुस, य इर् ज्ञानौ। इति कविकल्पद्रुमः। (दिवा०-पर०-सक०-सेट्।) य बुस्यति अस्तं मेघः त्यजतीत्यर्थः। इर् अबुसत् अबोधीत्। अस्मात् पृषादित्वान्नित्यं ड इत्यन्ये। इति दुर्गादासः॥

बुसं, क्ली, (बुस्यते तुच्छत्वादुत्सृज्यते इति। बुस्स इर् उत्सर्गे+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) तुच्छधान्यम्। आगड़ा इति भाषा। तत्पर्य्यायः। कड़ङ्करः २। इत्यमरः। २। ६। २२॥ बुषम् २। इति भरतः॥ बूषम् ४। इति शब्दरत्नावली॥ (उदकम्। यथा, ऋग्वेदे। १०। २७। २४।
"आविः स्वः कृणुतेगूहते बुसम्॥"
"बुससुदकम्॥" इति सायणः॥)

बुस्त क अनादरे। आदरे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क बुस्तयति खलं लोकः। बुस्तयति धीरं साधुः। इति दुर्गादासः॥

बुस्तं, क्ली, (बुस्यते अनादृयते यत्। बुस्त क अनादरे+घञ्। यद्वा बुस्यते त्यज्यते स्म इति। बुस्सर उत्सर्गे कर्म्मणि क्तः।) मांसपिण्डकविशेषः। स्थालीभृष्टमांसम्। पनसादिफलस्थासारभागः। इत्यमरभरतौ॥ भौंता इति ख्यातः॥

बूकं, त्रि, (बुक्कयति शब्दायते इति। बुक्क+अच्। पृषोदरादित्वाद्दीर्घः।) बुक्कम्। हृदयम्। इत्यमरटीकायां रमानाथः॥

बृक्कं, त्रि, (बुक्कयति शब्दायते इति। बुक्क+अच्। पृषोदरादित्वाद्ऋकारः।) बुक्कम्। इत्यमरटीकायां सारसुन्दरी॥

बृ गि वृत्तौ। भृत्याम्। इति कविकल्पद्रुमः॥ (प्यादि, क्र्यादि०-पर०-सक०-सेट्।) गि बर्भोति बूर्णः बूर्णिः। इति दुर्गादासः॥

बेकटः, पुं, मत्स्यभेदः। तरुणः। विदूषकः। इति शब्दरत्नावली॥

बोकड़ी, स्त्री, वस्त्रान्नी। इति ज्ञाननिर्घण्टः॥

बोद्धा, त्रि, (बुध्यते यः। बुध्+तृच्।) बोधकर्त्ता। यथा,—
"बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।
अज्ञानोपहताश्चान्ये क्लिश्यमाने सभाजिते॥"
इति भर्तृहरिः॥

बोधः, पुं, (बोधनमिति। बुध्+भावे घञ्।) ज्ञानम्। इति त्रिकाण्डशेषः॥ (यथा मार्कण्डेये। २६। १।
"वर्द्धमानं सुतं सा तु राजपत्नी दिने दिने।
तमुद्रापादिना बोधमनयन्निर्ममात्मकम्॥"
व्यये हि बुद्धेर्जातः। तथाहि मार्कण्डेये। ५०।२७।
"बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम्।
अवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत॥"
ऋषिविशेषः। यथा मार्कण्डेये। ७६। २८॥
"तयोश्च सुतो दैत्यिन्या यद्दीप्ता च सुतश्च सा।
बोधस्य द्विजमुख्यस्य यद्धे नीतवती पुनः॥"
सूर्य्यरूपभेदः। यथा, मार्कण्डेये। १०१। १६।
"बोधश्चावगतिश्चैव स्मृतिर्विज्ञानमेव च।
इत्येतानीह रूपाणि तस्य रूपस्य भास्वतः॥"
जागरणकालः। चैतन्यम्। यथा, मार्कण्डेये। ८१। ६७।
"प्रबोधश्च जगत्स्वामी नीयतामधुसूदन लघु।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ॥")

बोधकः, पुं, (बोधयतीति। बुध्+णिच्+ण्वुल्।) सूचकः। इति शब्दमाला॥ पुस्तकान्तरे बोधकोऽपि पाठः। बोधजनके त्रि॥ (यथा, साहित्यदर्पणे। २। ४।
"वर्णाः पदं प्रयोगार्हान्वितैकार्थबोधकाः॥")

बोधकरः, पुं, (करोतीति करः। क्त+ट। बोधस्य प्रबोधस्य करः।) निशाग्नौ बोधकारकः॥ तत्पर्य्यायः। वैतालिकः २। इत्यमरः। १।८।६७॥

बोधज्ञः, पुं, (बोधं अभिप्रायं जानातीति।। बोध+ज्ञा+क।) अभिप्रायवेत्ता। श्रीकृष्णः। यथा,—
"सर्व्वभाववित्तो श्रेष्ठो बोधज्ञः कामशास्त्रवित्।
कामिनीं बोधयामास वासयामास वक्षसि॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५३ अध्यायः॥

बोधनं, क्ली, (बुध्+णिच्+ल्युट्।) ज्ञापनम्। इति मेदिनी। ने, ६६॥ वेदनम्। विज्ञापनम्। इति बुधाद्यर्थदर्शनात्॥ (उद्बोधनम्। यथा माघे। ६। ३४।
"समयेन तेन चिरसुप्तमनो-
भवबोधनं समबोधयत॥"
"मनोभवस्य कामस्य बोधनं उद्दीपनं यस्मिन्।" इति तट्टीकायां मल्लिनाथः। जागरणम्। यथा, रघौ। ६। ४६।
"परिचयं चललक्ष्मनिपातने
भयरुषोश्च तदिङ्गितबोधनम्॥"
"तेषां चललक्ष्माणां इङ्गितस्य चेष्टितस्य भयादिलिङ्गभूतस्य बोधनं ज्ञानं च करोति।" इति तट्टीकायां मल्लिनाथः॥) दुर्गायाः बोधनं यथा। देवीपुराणे।
"इदे मासशिते पक्षे नवम्यां बोधयेद्दुर्गां क्रौञ्चकौतुकमङ्गले॥"
अत्र ज्ञाद्यादित्वादिदे इत्यपि गौड़ाश्चिनपरम्। अतएव कालकौमुद्यादिधृतम्। यथा,—
"कर्कियर्के हरौ सुप्ते शुक्लाश्वजक्रियाश्विने।
तुलायां बोधयेद्दुर्गां दशम्यां तु जगार्हणम्॥"
इति॥
बोधयेदिति श्रेषः। तत्रापि नवमीबोधनं कन्यायामेव तथैव सम्भवात्। तेन सिंहार्के तुलार्केऽप्याश्विनत्वेन वाक्यरचना। एवं प्रतिवर्षं कर्त्तव्यत्वादार्द्रादिनक्षत्रयोगेऽपि बोधनादिकार्य्यम्। नक्षत्रयोगस्तु फलातिशयाय। तथा च लिङ्गपुराणम्।
"मूलाभावेऽपि सप्तम्यां केवलायां प्रबोधयेत्।
तथा तिथ्यन्तरेष्वेवं नक्षत्रेषु च सर्व्वदा॥"
यथाह देवलः।
"तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम्।
योगाभावे तिथिर्ग्राह्या देवाः पूजनकर्म्मणि॥"
ज्येष्ठानवम्यामार्द्रायोगो विधौ मन्त्रे च श्रूयते। तथा च लिङ्गपुराणम्।
"कन्यायां ज्येष्ठयुक्तायां पूजयित्वार्द्रमे दिवा।
नवम्यां बोधयेद्देवीं महाविभवविस्तरैः॥"
चतुर्थपादे गौतमादिवचनैः स्वनेदिति कालिकापुराणे पाठः।
"इदे मासशिते पक्षे नवम्यामार्द्रयोगतः।

प्रीतये बोधयामि त्वां यावत् पूजां करोम्यहम्॥
ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा॥"
इति मन्त्रलिङ्गम्॥

अकाल इति तु रात्रिशेष दक्षिणायनस्थ। तथाच स्मृतिः। तपस्तपस्यौ ग्रैष्मिराहतुः मधुश्च माधवश्च वासन्तिकावृतुः शुक्रश्च शुचिश्च शैशिरावृतुः। अथैतदुत्तरायणं देवानां दिनं नभाश्च नभस्यश्च वार्षिकावृतुः इषश्च ऊर्जश्च शारदावृतुः सहाश्च सहस्यश्च हैमन्तिकावृतुः। अथैतद्दक्षिणायनं देवानां रात्रिरिति। एवच। रात्रावेव महामाया ब्रह्मणा बोधिता पुरा। तथैव च नराः कुर्युः प्रतिसंवत्सरं नृपेत्येतद्विषयम्॥ अतएव लिङ्गपुराणकालिकापुराणयोर्हेवेत्युक्तम्। एवच कालिकापुराणे बोधने रात्राविति पदं देवतारात्रिपरम्। ततश्च पूर्व्वाह्णे नवम्यामार्द्रायुक्तायां बोधनं पूर्व्वाह्णेतरकाल एव आर्द्रालाभे दिवैवत्र दिवापदात्तत्रापि बोधनं अन्यथा दिवापदं व्यर्थं स्यात्। ज्योतिषार्णवे यत्तूक्तं वराहेण।

"कन्यादिमीनपर्य्यन्तं यत्र संप्राप्यते शिवः।
तत्र बोधः प्रकर्त्तव्यो देवा राज्ञां शुभप्रदः॥"

शिव आर्द्रा। एवञ्चोभयदिने पूर्व्वाह्णे नवमीलाभे परत्रार्द्रालाभे परत्र बोधनं न तु युग्मात् पूर्व्वत्र। युग्मबाधकपूर्व्वाह्णस्य बाधकनक्षत्रानुरोधात् दिवा नक्षत्रलाभे तु पूर्व्वाह्ण एव नवम्यां उभयत्र पूर्व्वाह्णलाभे पूर्व्वदिन एव युग्मात्। अत्र केवलनवम्यां बोधनविधेर्नक्षत्रस्यापि गुणफलत्वाच्च।

"माघेऽथ फाल्गुने वापि भवेद्यै माघसप्तमी।
माकरोति च यत्प्रोक्तं तत्प्रायोऽस्तिदर्शनात्॥"
इति॥

सौरागमात् माकर्य्यादिवत् आर्द्रायोग इत्यस्य प्रायिकत्वेनाभिधानं प्रतीयते। ततश्चार्द्रारहितबोधने मन्त्रान्तरानुपदेशात् तत्रत्यः प्रत्ययः युक्तत्वेन प्रयुज्यते।

"यत्पूजनाद्यतिरिक्तञ्च यच्छिद्रं यदयज्ञियम्।
यदमेध्यमशुद्धञ्च यातयामञ्च यद्भवेत्।
तदोङ्कारप्रयुक्तेन सर्व्वमाविफलं भवेत्॥"
इति योगियाज्ञवल्क्यात् षष्ठ्यां बोधनेऽप्येवम्॥
नवमीबोधनासामर्थ्ये तु षष्ठ्यां सायं बोधनम्। तथा भविष्ये।

"षष्ठ्यां विल्वतरौ बोधं सायंसन्ध्यासु कारयेत्॥"

तन्त्रोक्ता वराहेण।

"अर्द्धास्तमयात् सन्ध्या अस्तीभूता न तारका यावत्॥"

षष्ठ्यां बोधने तु प्रागुक्तं ऐं रावणस्य वधार्थायेति अष्टमष्यान्विते षष्ठ्यां सायाह्ने बोधयान्यत इति पठेत्। यदा तु पूर्व्वदिने सायं षष्ठीलाभः परदिने सायं विना षष्ठीलाभः तदा पूर्व्वेद्युर्बोधनं परदिने सायमामन्त्रणम्। यदा तूभयदिने सायं षष्ठ्यलाभस्तदा परेऽहनि पूर्व्वाह्णे षष्ठ्यां बोधनम्।

"बोधयेद्विल्वशाखायां षष्ठ्यां देवीं फलेषु च।
षष्ठ्यां बोधने तु नक्षत्रानुपदेशान्न तदादरः॥"
इति तिथ्यादितत्त्वम्॥

बोधनी, स्त्री, (बुध्+भावे ल्युट्। ङीष्। बोधः। (बोध्यतेऽनया। बुध्+णिच्+करणे ल्युट्। अन्यथा हि सुप्तिस्थो बोध्यते अतोऽस्य तथात्वम्।) पिप्पली। इति मेदिनी॥ (बुध्यतेऽस्याम्। बुध्+अधिकरणे ल्युट्। स्त्रियां ङीप्। अस्यां हि योगनिद्राया हरेः प्रबोधनात्तथात्वम्।) कार्त्तिकशुक्लैकादशी। सा तु उत्थानैकादशी। यथा,—

"प्रथमा बोधनी मध्ये या स्यात् शुक्लैकादशी भवेत्।
सैवोपोष्या प्रयत्नेन नान्या कृष्णा कदाचन॥"
इति तिथ्यादितत्त्वम्॥

अपि च।

"तावन्नर्त्तन्ति तीर्थानि वाजिमेधादयो मखाः।
मथुरायां प्रिया विष्णोर्यावन्नायाति बोधनी॥"
इति हरिभक्तिविलासे पद्मपुराणवचनम्॥

बोधनीय, त्रि, (बुध्+कर्म्मणि अनीयर्।) बोध्यः। बोधितव्यः। बोधयोग्यः॥

बोधवासरः, पुं, (बोधस्य भगवतो मायानिद्रायाः प्रबोधस्य वासरः।) भगवतः प्रबोधदिनम्। उत्थानैकादशी। यथा,—

"जन्मप्रभृति यत् पुण्यं नरेणोपार्जितं भुवि।
तथा भवति तत् सर्व्वं न कृत्वा बोधवासरम्॥"
इति हरिभक्तिविलासधृतस्कन्दपुराणवचनम्॥

बोधान, पुं, (बुध्यते इति। बुध्+आनच्।) गौष्यतिः। विप्रः। बुधभेदः। इति शब्दरत्नावली॥

बोधिः, पुं, (बुध+"सर्व्वधातुभ्य इन्।"४।११७। इति इन्।) समाधिभेदः। पिप्पलवृक्षः। इति मेदिनी। धे, १९॥ (यथास्य पर्य्यायः।

"पिप्पलो बोधिरश्वत्थः कुञ्जराशनः॥"
इति वैद्यकरत्नमालायाम्॥)

बोधः। इति चिकाण्डशेषः। ज्ञातरि, त्रि। इत्युणादिकोषः॥

बोधित, त्रि, (बुध्+णिच्+क्त।) ज्ञापितम्। यथा,—

"रात्रावेव महामाया ब्रह्मणा बोधिता पुरा॥"
इति तिथ्यादितत्त्वम्॥

बोधितरुः, पुं, (बोधिरेव तरुः।) अश्वत्थवृक्षः। इति हेमचन्द्रः। ४। १६७॥ (गुणादयोऽस्यात्यन्तग्रन्थे द्रष्टव्याः।)

बोधितव्य, त्रि, (बुध+णिच्+तव्य।) ज्ञापितव्यम्। यथा। बोधितव्योऽयं पूर्व्वपक्षः। इति प्राकृरभाष्यम्॥

बोधिद्रुमः, पुं, (बोधिरेव द्रुमः।) अश्वत्थवृक्षः। इत्यमरः। २। ४। २०॥

बोधिवृक्षः, पुं, (बोधिरेव वृक्षः।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥

बौधिसत्त्व, क्ली, (बोधि बोधवत् सत्त्वम्।) बुद्धविशेषः। इति हेमचन्द्रः। २। १४६॥ (यथा. कथासरित्सागरे। २२। ३५।

"दयालुर्बोधिसत्त्वांशः कोऽन्यो जीमूतवाहनात्।
शङ्खचूडादधिः कर्त्तुमपि कल्पद्रुमं क्षती॥")

बौद्ध, क्ली, (बुद्धेन प्रणीतम्। बुद्ध+अण्।) बुद्धप्रणीतनिरीश्वरशास्त्रम्। तत् सर्व्वैः शास्त्रकारैः खण्डितं अयाद्यम्। इति श्रीभागवतम्। बौद्धशास्त्रसंस्थापनकर्त्ता दृष्टश्रुतिः। यथा,—

"प्राह वाचस्पतिं देवः पौरोडाशे रजेः सुतेः।
न यज्ञभागो राज्यं मे निर्जितस्य दृष्टश्रुते!॥
राज्यलाभाय मे यज्ञं विधत्स्व धिषणाधिप!॥
ततो दृष्टश्रुतिः शक्रमकरोद्बलदर्पितम्।
ग्रहशान्तिविधानेन पौष्टिकेन च कर्म्मणा॥
गत्वाय मोहयामास राजपुत्रान् दृष्टश्रुतिः।
निजधर्म्मं समास्थाय वेदवाह्यं स वेदवित्॥
वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः।
वेदवाह्यान् परिज्ञाय हेतुवादसमन्वितान्।
जघान शक्रो वज्रेण सर्व्वधर्म्मबहिष्कृतान्॥"
इति मात्स्ये २४ अध्यायः॥

(बौद्धदर्शनं यथा, सर्व्वदर्शनसंग्रहे। "अत्र बौद्धैरभिधीयते यदभ्यधायि अविनाभावो दुर्बोध इति तदसाधीयः तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य सुज्ञानत्वात्। तदुक्तम्,

"कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमो दर्शनान्नदर्शनात्॥"
इति।

अन्वयव्यतिरेकावविनाभावनिश्चायकाविति पक्षे साध्यसाधनयोरव्यभिचारो दुरवधारो भवेत् भूते भविष्यति वर्त्तमाने असुपलभ्यमानेऽपि व्यभिचाराशङ्काया अनिवारणात्। ननु तथाविधस्थले तावकेऽपि मते व्यभिचाराशङ्का दुष्परिहरेति चेत् मैवं वोचः विनापि कारणं कार्य्यमुत्पद्यतामिमेवंविधायाः शङ्काया बाधातावधिकतया निवृत्तत्वात्। तदेव ह्याशङ्कते यस्मिन्नाशङ्क्यमाने बाधातादयो नावतरेयुः तदुक्तं बाधातावधिराशङ्केति। तस्मात्तदुत्पत्तिनिश्चयेन अविनाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्य्यहेत्वोः प्रत्यक्षोपलम्भानुपलम्भप्रयुक्तनिबन्धनः। कार्य्यस्योत्पत्तेः प्रागनुपलम्भः कारणोपलम्भे सत्युपलम्भः उपलब्धस्य पश्चात् कारणानुपलम्भादनुपलम्भ इति पञ्चकारण्या धूमधूमध्वजयोः कार्य्यकारणभावो निश्चीयते तथा तादात्म्यनिश्चयेनाप्यविनाभावो निश्चीयते यदि शिंशपा वृक्षत्वमतिपतेत् स्वात्मानमेव जह्यादिति विपक्षे बाधकप्रवृत्तेः अप्रवृत्ते तु बाधके भूयः सहभावोपलम्भेऽपि व्यभिचाराशङ्काया कः निवारयिता। शिंशपावृक्षयोश्च तादात्म्यनिश्चयो वृक्षोऽयं शिंशपेति सामानाधिकरण्यबलादुपपद्यते। न ह्यत्यन्तभेदे तत् सम्भवति पर्य्यायत्वेन युगपदपि प्रयोगायोगात् नाप्यत्यन्तभेदे गवाश्वयोरनुपलम्भात्। तस्मात्

कार्य्यात्मानौ कारणमात्मानमनुमापयत इति सिद्धम्।

यदि कश्चित् प्रामाण्यमनुमानस्य नाङ्गीकुर्य्यात् तं प्रति ब्रूयात् अनुमानं प्रमाणं न भवतीत्येतावन्मात्रमुच्यते तत्र न किञ्चन साधनमुपन्यस्यते उपन्यस्यते वा। न प्रथमः एकाकिनो प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायात्। नापि चरमः अनुमानं प्रमाणं न भवतीति ब्रुवाणेन त्वया अग्निरुष्णवचनस्योपन्यासे मम माता वन्ध्येतिवद्व्याघातापातात्। किञ्च प्रमाणतदाभासव्यवस्थापनं तत्समानजातीयत्वादिति वदता भवतैव स्वीकृतं स्वभावानुमानम्। परगता विप्रतिपत्तिस्तु वचनलिङ्गेनेति ब्रुवता कार्य्यलिङ्गकमनुमानम् अनुपलब्ध्या क्वचिदर्थे प्रतिषेधयतानुपलब्धिलिङ्गकमनुमानम्। तथाचोक्तं तथागतैः।

"प्रमाणान्तरसामान्यस्थितिरन्यधियां गतेः।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित्॥"

इति॥

पराक्रान्तत्वात्र ग्रन्थविस्तरभयादुपरम्यते।

ते च बौद्धाश्चतुर्विधा भावनया परमपुरुषार्थं कथयन्ति। ते च माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्व्वशून्यत्व-बाह्यशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्ववादानातिष्ठन्ते। यद्यपि भगवान् बुद्ध एक एव बोधयिता तथापि दोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यं यथा गतोऽस्तमर्क इत्युक्ते जारचौरानूचानाद्यः स्वेष्टानुसारेणाभिसरणप्रस्थहरणसदाचरणादिसमयं बुध्यन्ते। सर्व्वं क्षणिकं क्षणिकं दुःखं दुःखं स्वलक्षणं स्वलक्षणं शून्यं शून्यमिति भावनाचतुष्टयमुपदिष्टं द्रष्टव्यम्। तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं यत् सत् सत् क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा इति। न चायमसिद्धो हेतुः अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षासिद्धत्वात् व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिन्यायेन व्यापकक्रमाक्रमव्यावृत्तावक्षणिकात् सत्त्वव्यावृत्तेः सिद्धत्वाच्च। तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति परस्परविरोधे हि न प्रकारान्तरस्थितिः नैकतापि विरुद्धानासक्तिमात्रविरोधत इति न्यायेन व्याघातस्योच्चटत्वात्। तौ च क्रमाक्रमौ स्थायिनः सकाशाद्व्यावर्त्तमानौ अर्थक्रियामपि व्यावर्त्तयन्तौ क्षणिकत्वपक्ष एव सत्त्वं व्यवस्थापयत इति सिद्धम्।

नन्वक्षणिकस्यार्थक्रियाकारित्वं किं न स्यादिति चेत् तदयुक्तं विकल्पासहत्वात् तथा हि वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोः किमर्थक्रिययोः स्थायिनः सामर्थ्यमस्ति नो वा। आद्ये तयोरनिराकरणप्रसङ्गः समर्थस्य चेपायोगात् यत् यदा यत्करणसमर्थं तत् तदा तत्करोत्येव यथा सामग्री स्वकार्य्यं समर्थश्चायं भाव इति प्रसङ्गानुमानाच्च। द्वितीयेऽपि कदापि न कुर्य्यात् सामर्थ्यमात्रानुवन्धित्वादर्थक्रियाकारित्वस्य यत् यदा यन्न करोति तत् तदा तत्रासमर्थं यथा हि ग्रिलाशकलमङ्कुरे न चेष वर्त्तमानार्थक्रियाकरणकाले इत्तरवर्त्तिष्यमाणे अर्थक्रिये करोतीति तद्विपर्य्ययाच्च। ननु क्रमवत्सहकारिलाभात् स्थायिनः अतीतानागतयोः क्रमेण क्रमवत्युपपद्यते इति चेत् तच्चेदं भवान् पृष्टो वाचष्टां सहकारिणः किं भावस्योपकुर्व्वन्ति न वा न चेत् नापेक्षणीयास्ते अकिञ्चित् कुर्व्वतां तेषां तादात्म्यायोगात्। उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते न वा भेदपक्षे आगन्तुकस्यैव तस्य कारणत्वं स्यात् न भावस्याक्षणिकस्य आगन्तुकातिशयान्वयव्यतिरेकानुविधायित्वात्। कार्य्यस्य। तदुक्तम्।

"वर्त्तमानाभ्यां किं योन्यत्क्षणेभ्यस्ति तयोः
फलम्।
चर्म्मोपमश्चेत् सोऽनित्यः स्वतुल्यश्चेदसत्फलः॥"

इति।

अथ भावस्तैः सहकारिभिः सहैव कार्य्यं करोतीति स्वभाव इति चेत् अङ्ग तर्हि सहकारिणो न जह्यात् प्रत्युत पलायमानानपि गत्वे गत्वेन बद्ध्वा ह्यात्मं कार्य्यं कुर्य्यात् स्वभावस्यानपायात्। किञ्च सहकारिजन्योऽतिशयः किमतिशयान्तरमारभते न वा उभयथापि प्रागुक्तदूषणप्रपाणवर्षणप्रसङ्गः। अतिशयान्तरारम्भपक्षे बहुसुखानवस्थादौस्थ्यमपि स्यात् अतिशये जनयितव्ये सहकार्य्यन्तरापेक्षायां तत्परम्परापात इत्येकानवस्थाऽस्थेया तथाहि सहकारिभिः सलिलपवनादिभिः पदार्थैर्बीजे आधीयमाने बीजस्यातिशये बीजसुत्पादकमभ्युपेयम् अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत् बीजस्यातिशयमादधानं सहकारिसापेक्षमेवाधत्ते अन्यथा सर्व्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत। तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरतिशयान्तरमाधेयं बीजे तस्मिन्नप्युपकारे पूर्व्वन्यायेन सहकारिसापेक्षस्य बीजस्य जनकत्वे सहकारिसम्पाद्यबीजगतातिशयानवस्था प्रथमा व्यवस्थिता। अथोपकारः कार्य्यार्थमपेक्षमाणोऽपि बीजादिनिरपेक्षं कार्य्यं जनयति तत्सापेक्षो वा। प्रथमे बीजादेरहेतुत्वमापतेत्। द्वितीये अपेक्षमाणेन बीजादिना उपकारे अतिशय आधेयः एवं तत्र तत्रापीति बीजादिजन्यातिशयनिष्ठातिशयपरम्परापात इति द्वितीयानवस्था स्थिरा भवेत्। एवमपेक्षमाणेनोपकारेण बीजादौ धर्म्मिणयुपकारान्तरमाधेयमित्युपकाराधेयबीजातिशयाश्रयातिशयपरम्परापात इति तृतीयानवस्था दुरवस्था स्यात्। अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावोऽनतिशयात्मा निष्फलः अन्यश्चातिशयात्मा कुर्व्द्रूपादिपदवेदनीया जायत इति फलितं ममापि मनोरथदुर्गमेण।

तस्मादक्षणिकस्यार्थक्रिया दुर्घटा नाप्यक्रमेण घटते विकल्पासहत्वात्। तथाहि युगपत्सकलकार्य्यकरणसमर्थः स भावस्तदुत्तरकालमनुवर्त्तते न वा। प्रथमे तत्कालवत् कालान्तरेऽपि तावत् कार्य्यकारणमापतेत्। द्वितीये स्थायित्वहत्तयाशा मूषिकभक्षितबीजादावङ्कुरादिजननप्रार्थनामनुहरेत्। यद् विरुद्धधर्म्माध्यस्तं तन्नाना यथा शीतोष्णे। विरुद्धधर्म्माध्यस्तश्चायमिति जलधरे प्रतिबन्धसिद्धिः। न चायमसिद्धो हेतुः स्थायिनि कालभेदेन सामर्थ्यासामर्थ्ययोः प्रसङ्गतद्विपर्य्ययसिद्धत्वात्तत्रासामर्थ्यसाधकौ प्रसङ्गतद्विपर्य्ययौ प्रागुक्तौ सामर्थ्यसाधकावभिधीयेते यद्यदा यज्जनकासमर्थं तत्तदा तन्न करोति यथा ग्रिलाशकलमङ्कुरम् असमर्थश्चायं वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोरर्थक्रिययोरिति प्रसङ्गः यद्यदा यत् करोति तत्तदा तत्र समर्थं यथा सामग्री स्वकार्य्ये करोति चायमतीतानागतकाले तत्कालवर्त्तिन्यार्थक्रिये भाव इति प्रसङ्गव्ययः विपर्य्ययः। तस्मादिपक्षे क्रमयौगपद्यव्याप्तत्या व्यापकानुपलम्भेनाधिगतव्यतिरेकव्याप्तिकं प्रसङ्गतद्विपर्य्ययबलात् यद्दीतान्वयव्याप्तिकं सत्त्वं क्षणिकत्वपक्ष एव व्यवस्थास्यतीति सिद्धम्। तदुक्तं ज्ञानश्रिया।

"यत् सत्तत् क्षणिकं यथा जलधरः सन्तश्च
भावा अमी
सत्ताप्रत्तिरिहार्थकर्म्मणि मितेः सिद्धेषु सिद्धा
न सा।
नाप्येकेव विधान्यथा परकृतेनापि क्रियादर्शनेत्
हेधापि क्षणभङ्गसङ्गतिरतः साध्ये च विश्राम्यति॥" इति॥

न च क्षणभङ्गाक्षेपकत्वकक्षीकारेण सत्तासामान्ययोगित्वमेव सत्त्वमिति मन्तव्यं सामान्यावयवसमवायानामसत्त्वप्रसङ्गात्। न च तत्र स्वरूपसत्तानिबन्धनः सङ्केतव्यवहारः प्रयोजकगौरवापत्तेः अनुगतत्वानुगतत्वविकल्पपराहतेश्च सर्षपमहीधरादिषु विलक्षणेषु क्षणेष्वनुगतस्याकारस्य मणिषु सूत्रवद्भूतकणेषु गुणवच्चाप्रतिभासनाच्च। किञ्च सामान्यं सर्व्वगतं स्वाश्रयसर्व्वगतं वा प्रथमे सर्व्ववस्तुसङ्करप्रसङ्गः अपसिद्धान्तापत्तिश्च यतः प्रोक्तं प्रशस्तपादेन स्वविषयसर्व्वगतमिति। किञ्च विद्यमाने घटे वर्त्तमानं सामान्यमन्यत्र जायमानेन सम्बध्यमानं तस्मादागच्छत् सम्बध्यते अनागच्छद्वा आद्ये ह्यलापत्तिः द्वितीये सम्बन्धानुपपत्तिः। किञ्च विनष्टे घटे सामान्यमवतिष्ठते विनश्यति स्थानान्तरं गच्छति वा प्रथमे निराधारत्वापत्तिः द्वितीये नित्यत्ववाचो युक्तायुक्तेः

तृतीये द्रव्यत्वप्रसक्तिः इत्यादि दूषणग्रहणस्तत्त्वात् सामान्यमप्रामाणिकम्। तदुक्तम्।

"अन्यत्र वर्त्तमानस्य ततोऽन्यस्थानजन्मनि।
तस्मादचलनः स्थानादवृत्तिरिति युक्तता॥
यत्रासौ वर्त्तते भावस्तेन सम्बध्यते न तु।
तद्देशिनश्च यात्रोति किमप्येतन्महाद्भुतम्॥
न याति न च तत्रासीदस्ति पश्चान्न चाप्यवत्।
जहाति पूर्वं नाधारमहो बसनसन्ततिः॥"

इति॥

अनुवृत्तप्रत्ययः किमालम्बन इति चेत् अङ्ग अन्यापोहालम्बन एवेति सन्तोऽयमायुष्मतेति अलमतिप्रसङ्गेन।

सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थंकरसम्मतम् अन्यथा तन्निवृत्तयुनां तेषां तन्निवृत्त्युपाये प्रवृत्त्यनुपपत्तेः। तस्मात् सर्वं दुःखं दुःखमिति भावनीयम्। ननु किंवदन्ति दृष्टे दृष्टान्तः कथनीय इति चेन्नैवं खलक्षणानां क्षणानां क्षणिकतया सालक्षण्याभावात् नैतेन सदृशमपरमिति वस्तुसदृशत्वात्। ततः खलक्षणं खलक्षणमिति भावनीयम् एवं शून्यं शून्यमित्यपि भावनीयं स्वप्ने जागरणे च न मया दृष्टमिदं रजतादीति विशिष्टनिषेधस्योपलम्भात्। यदि दृष्टं सत् तदा तद्विशिष्टस्य दर्शनस्येदन्तायां अधिष्ठानस्य च तस्मिन्नध्यस्तस्य रजतत्वादेस्तत्सम्बन्धस्य च समवायादेः सत्त्वं स्यात् न चैतदिष्टं कस्यचिद्वादिनः। न चार्द्धजरतीयमुचितं न हि कुक्कुट्या एको भागः प्राकाय अपरो भागः प्रसवाय कल्प्यतामिति कल्प्यते। तस्मादध्यस्ताधिष्ठानतत्सम्बन्धदर्शनदृश्यानां मध्ये एकस्यानेकस्य वा असत्त्वे निषेधविषयत्वेन सर्वस्यासत्त्वं बलादापतेदिति भगवतोपदिष्टे माध्यमिकास्तावदुत्तमप्रज्ञा इत्यमत्रोक्तम् भित्त्युपादप्रसारणन्यायेन क्षणभङ्गाद्यभिधानमुखेन स्थायित्वानुकूलवेदनीयत्वानुगतसर्वसत्यत्वभ्रमबाधवर्त्तनेन सर्वशून्यतायामेव पर्य्यवसानम्। अतस्तत्त्वं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव तथाहि यदि घटादेः सत्त्वं स्वभावस्तर्हि कारकव्यापारवैयर्थ्यम्। असत्त्वं स्वभाव इति पक्षे प्राचीन एव दोषः प्राङ्नः स्यात्। यथोक्तम्।

"न सतः कारकापेक्षा क्षोमादेरिव युज्यते।
कार्य्यस्यासम्भवो हेतुः खपुष्पादेरिवासत॥"

इति॥

विरोधादितरौ पक्षावनुपपन्नौ तदुक्तं भगवता अलङ्कारावतारे

"बुद्ध्या विविच्यमानानां स्वभावो नावधार्य्यते।
अतो निरभिलप्यास्ते निःस्वभावाश्च दर्शिताः॥"

इति॥

"इदं वस्तुबलायातं यदद्यन्ति विपश्चितः।
यथा यथार्थाचिन्यन्ते विशीर्य्यन्ते तथा तथा॥"

इति च॥

न क्वचिदपि पक्षे अवतिष्ठत इत्यर्थः। दृष्टार्थव्यवहारश्च न स्वप्नव्यवहारवत् संवृत्या सङ्गच्छते। अत एवोक्तम्

"परिव्राट्कासकन्यनामेकस्यां प्रमदातनौ।
कुणपः कामिनो भक्ष्य इति तिस्रो विकल्पना॥"

इति॥

तदेवं भावनाचतुष्टयवशान्निखिलवासनानिवृत्तौ परनिर्व्याणं शून्यरूपं सेत्स्यतीति वयं कृतार्थाः नास्माकमुपदेश्यं किंचिदस्तीति। ग्रन्थेस्तावद्योगाचारचेति हयं करणीयम्। तत्राप्राप्तस्यार्थस्य प्राप्तये पर्य्यनुयोगो योगः गुरूक्तस्यार्थस्याङ्गीकरणमाचारः गुरूक्तस्याङ्गीकरणादुत्तमाः पर्य्यनुयोगस्याकरणादधमाश्च अतस्तेषां माध्यमिका इति प्रसिद्धिः। गुरूक्तभावनाचतुष्टयं बाह्यार्थस्य शून्यत्वं चाङ्गीकृत्यान्तरस्य शून्यत्वञ्चाङ्गीकृतं कथमिति पर्य्यनुयोगस्य करणात् केषाञ्चिद् योगाचारप्रथा। एषा हि तेषां परिभाषा स्वयं वेदनं तावदङ्गीकार्य्यम् अन्यथा जगदान्ध्यं प्रसज्येत। तत् कीर्त्तितं धर्म्मकीर्त्तिना।

"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यतीति॥"

बाह्यं बाह्यं गोपपद्यत एव विकल्पानुपपत्तेः। अर्थो ज्ञानग्राह्यो भावादुत्पन्नो भवति अनुत्पन्नो वा न पूर्वः उत्पन्नस्य क्षित्यभावात् नापरः अनुत्पन्नस्यासत्त्वात्। अथ मन्येथाः अतीत एवार्थो ज्ञानग्राह्यः तज्ज्ञानकत्वादिति तदपि बालभाषितं वर्त्तमानतावभासविरोधात् इन्द्रियादेरपि ग्राह्यत्वप्रसङ्गाच्च। किञ्च ग्राह्यः किं परमाणुरूपोऽर्थः अवयविरूपो वा। न चरमः क्षतक्षेकदेशविकल्पादिना तन्निराकरणात्। न प्रथमः अतीन्द्रियत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च। यथोक्तम्

"षट्केन युगपद्योगात् परमाणोः षडंशता।
तेषामप्येकदेशत्वे पिण्डः स्यादणुमात्रकः॥"

इति॥

तस्मात् स्वव्यतिरिक्तग्राह्यविरहात्तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम्। तदुक्तम्

"नान्योऽनुभाव्यो बुद्धेरस्ति तस्या नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते॥"

इति॥

ग्राह्यग्राहकयोरभेदश्चानुमानतश्च यद्वेद्यते येन वेदनेन तत्ततो न भिद्यते यथा ज्ञानेनात्मा वेद्यन्ते तेन च नीलादयः। भेदे हि सत्यधुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियमहेतोरभावात् तदुत्पत्तेरनियामकत्वात् यच्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः अत्राप्यनादिरविच्छिन्नप्रवाहाभेदवासनैव निमित्तम्। यथोक्तम्।

"सहोपलम्भनियमादभेदो नीलतद्धियोः।
भेदश्च भ्रान्तिविज्ञानैर्दृश्यतेन्दाविवाद्वयः॥"इति॥

"अविभागोऽपि बुद्ध्यात्मा विपर्य्यासितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥"

इति च॥

न च रसवीर्य्यविपाकादि समानमाम्रामोदकोपार्जितमोदकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकारविधुरायाः अपि बुद्धेर्यद्वशाद्ग्रहणपरिग्रहानुरोधेन विभिन्नग्राह्यग्राहकाकाररूपवत्तया तिमिरादुपप्लुताक्षां केशोण्डुकनाडीज्ञानभेदवदनादिप्रवाहवासनासामर्थ्याद्ग्राह्योपपत्तेः पर्य्यनुयोगायोगात्। यथोक्तम्

"अवेद्यवेदकाकारा यथा भ्रान्तेर्निरीक्ष्यते।
विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा॥
तथा ज्ञातव्यवस्थेयं केशादिज्ञानभेदवत्।
यदा तदा न सन्त्येव ग्राह्यग्राहकलक्षणा॥"

इति॥

तस्माद्बुद्धिरेवानादिवासनाबलादनेकाकारावभासत इति सिद्धम्। ततश्च प्रागुक्तभावनाप्रचयबलान्निखिलवासनोच्छेदविगलितविविधविषयाकारोपप्लवविशुद्धविज्ञानोदयो महोदय इति। अन्ये तु मन्यन्ते यथोक्तं बाह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात्। न च सहोपलम्भनियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयोरभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षव्यावृत्तिकत्वात्। ननु भेदे सहोपलम्भनियमात्मकं साधनं न स्यादिति चेन्न ज्ञानस्यान्तर्मुखतया च भेदेन प्रतिभासमानतया एकदेशग्रहैककालत्वलक्षणसहग्रहनियमासम्भवाच्च नीलाद्यर्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्ययादयतिरेकात्। अथोच्यते ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्देशेन प्रतिभासत इति न च तत्राहमुल्लेख इति। तथोक्तम्।

"परिच्छेदान्तराद्योऽयं भागो बहिरिव स्थितः।
ज्ञानस्याभेदिनो भेदप्रतिभासोऽप्युपप्लवः॥"

इति॥

"यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासते॥"

इति च॥

तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेर्न हि वसुमित्रो वन्ध्यापुत्रवदवभासत इति प्रेक्षावानाचक्षीत भेदप्रतिभासस्य भ्रान्तत्वे अभेदप्रतिभासस्य प्रामाण्यं तत्प्रामाण्ये भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च अविसंवादान्नीलतादिकमेव संविदाना बाह्यमेवोपादत्ते जगत्युपेक्षन्तेऽन्तरमिति व्यवस्थादर्शनाच्च। एवञ्चायमभेदसाधको हेतुर्गोमयपायसीयन्यायवदाभासतां भजेत अतोबहिर्वदिति वदता बाह्यं ग्राह्यमेवेति भावनीयमिति भवदीय एव बाधो भवन्तं प्रहरेत्।

ननु ज्ञानाभिन्नकालस्यार्थस्य बाह्यत्वमनुपपन्नमिति चेत् तदनुपपन्नम् इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने साकारसमर्पकतया

समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः। अतएव पर्यनुयोगपरिहारौ समर्थाहिधाताम्। "भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः। हेतुत्वमेव च यक्तेर्ज्ञानाकारार्पणक्षमम्॥"

इति॥

तथाच यथा पुष्टा भोजनमनुमीयते यथा च भाषया देशः यथा वा सम्भ्रमेण स्नेहः तथा ज्ञानाकारेण ज्ञेयमनुमेयम्। तदुक्तम्

"अर्थेन घटयत्येनां न हि मुक्तार्हरूपताम्। तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता॥"

इति॥

न हि वित्तिसत्तैव तद्देहना युक्ता तस्याः सर्वत्राविशेषात् तानु सारूप्यमाविशत् सरूपयितुं घटयेदिति च। तथाच बाह्यार्थसद्भावे प्रयोगः ये यस्मिन् सत्यपि कादाचित्काः ते सर्वे तदतिरिक्तसापेक्षाः यथा अविदग्धत्वज्ञिगमिषति मयि वचनगमनप्रतिभासा विवक्षुज्ञिगमिषुपुरुषान्तरसन्तानसापेक्षाः तथाच विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव नीलाद्युल्लेखना इति। तत्रालयविज्ञानं नामाहमास्पदं विज्ञानं नीलाद्युल्लेखि च प्रवृत्तिविज्ञानम्। यथोक्तम्

"तत् स्यादालयविज्ञानं यद्भवेदहमास्पदम्। तत् स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकसूचिखेत्॥"

इति॥

तस्मादालयविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्वाह्योऽर्थो ग्राह्य एव न वासनापरिपाकप्रत्ययः कादाचित्कत्वात् कदाचिदुत्पाद इति वेदितव्यम्। विज्ञानवादिनये हि वासनानामेकसन्तानवर्त्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजननशक्तिः तस्याश्च स्वकार्योत्पादं प्रत्याभिमुख्यं परिपाकः तस्य च प्रत्ययः कारणं स्वसन्तानवर्त्तिपूर्ववर्त्तिनः कक्षीक्रियते सन्तानान्तरनिबन्धनत्वानङ्गीकारात्। ततश्च प्रवृत्तिज्ञानजननालयविज्ञानवर्त्तिवासनापरिपाकं प्रति सर्वेऽप्यालयविज्ञानवर्त्तिनः क्षणाः समर्था एवेति वक्तव्यं न चैदेकोऽपि न समर्थः स्यादालयविज्ञानसन्तानवर्त्तित्वाविशेषात्। सर्वे समर्था इति पक्षे कार्यवैयानुपपत्तेः ततश्च कादाचित्कत्वनिर्वाहाय ग्रव्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाः बहवपि प्रत्ययाश्चतुरः प्रत्ययान् प्रतीत्योत्पद्यन्ते इति चतुरंशानिच्छताप्यच्छमतिना स्वानुभवमनाच्छाद्य परिच्छेत्तव्यम्। ते चत्वारः प्रत्ययाः प्रसिद्धाः आलम्बनसमनन्तरसहकार्यधिपतिरूपाः तत्र ज्ञानपदवेदनीयस्य नीलाद्यवभासस्य चित्तस्य नीलालम्बनप्रत्ययात् नीलाकारता भवति समनन्तरप्रत्ययात् प्राचीनज्ञानादेोधरूपता सहकारिप्रत्ययादालोकाच्चक्षुषोऽधिपतिप्रत्ययाद्विषयग्रहणप्रतिनियमः विदितस्य ज्ञानस्य रसादिसाधारण्यप्राप्तेर्नियामकं चक्षुरधिपतिर्भवितुमर्हति लोके नियामकस्याधिपतित्वोपलम्भात्। एवं चित्तचैत्यात्मकानां सुखादीनां चत्वारि कारणानि द्रष्टव्यानि एवं चित्तचैत्यात्मकस्कन्धः पञ्चविधः रूपविज्ञानवेदनासंज्ञा संस्कारसंज्ञकः। तत्र रूप्यन्त एभिर्विषया इति रूप्यन्त इति च युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः। प्रागुक्तस्कन्धद्वयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः। गौरित्यादिशब्दोल्लेखिसविज्ञानप्रवाहः संज्ञास्कन्धः। वेदनास्कन्धनिबन्धना रागद्वेषादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मौ च संस्कारस्कन्धः।

तदिदं सर्वं दुःखं दुःखायतनं दुःखसाधनञ्चेति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं सम्पादयेत्। अत एवोक्तं दुःखसमुदायनिरोधमार्गाश्चत्वारः आर्यस्य बुद्धाभिमतानि तत्त्वानि। तत्र दुःखं प्रसिद्धं समुदायो दुःखकारणं तद्विविधं प्रत्ययोपनिबन्धनो हेतूपनिबन्धनश्च। तत्र प्रत्ययोपनिबन्धनस्य संग्राहकं सूत्रम् इदं कार्यं ये अन्ये हेतवः प्रत्ययन्ति गच्छन्ति तेषामयमानानां हेतूनां भावः प्रत्ययत्वं कारणसमवायः तस्मात्तस्य फलं न चेतनस्य कस्यचिदिति सूत्रार्थः यथा बीजहेतुरङ्कुरो धातूनां वर्णा समवायाज्जायते। तत्र पृथिवी धातुरङ्कुरस्य काठिन्यं गन्धञ्च जनयति अप्धातुः स्नेहं रसञ्च जनयति तेजोधातू रूपमौष्ण्यञ्च वायुधातुः स्पर्शनं चलनञ्च आकाशधातुरवकाशं शब्दञ्च ऋतुधातुर्यथायोगं पृथिव्यादिकम्। हेतूपनिबन्धनस्य च संग्राहकं सूत्रम् तत्प्रादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषां धर्माणां धर्मता धर्मस्थितिता धर्मनियामकता च प्रतीत्य समुत्पादानुलोमतेति। तथागतानां बुद्धानां मते धर्माणां कार्यकारणरूपाणां या धर्मता कार्यकारणभावरूपा एषोत्पादादनुत्पादाद्वा स्थिता यस्मिन् सति यदुत्पद्यते तत्तस्य कारणस्य कार्यमिति धर्मतेत्यस्य विवरणं धर्मस्य कार्यस्य कारणानतिक्रमेण स्थितिः स्वार्थिकस्तल्प्रत्ययः धर्मस्य कारणस्य कार्यं प्रति नियामकता। नन्वयं कार्यकारणभावश्चेतनमन्तरेण न सम्भवतीति अत उक्तं कारणे सति तत्प्रतीत्य प्राप्य समुत्पादे अनुलोमता अनुसारिता या सैव धर्मता उत्पादादनुत्पादाद्वा धर्माणां स्थिता न चात्र कश्चिच्चेतनोऽधिष्ठातोपलभ्यत इति सूत्रार्थः। यथा प्रतीत्य समुत्पादस्य हेतूपनिबन्धः बीजादङ्कुरोऽङ्कुरात् काण्डं काण्डान्नालो नालान्नर्भस्ततः शूकं ततः पुष्पं ततः फलं न चात्र बाह्ये समुदाये कारणं बीजादि कार्यमङ्कुरादि वा चेतयिते अहमङ्कुरं निर्वर्तयामि अहं बीजेन निर्वर्तित इति। एवमाध्यात्मिकेष्वपि कारणद्वयमवगन्तव्यम्। पुरःस्थिते प्रमेयाद्यौ ग्रन्थविस्तरभीरुभिरुपरम्यते। तदुभयनिरोधः तदनन्तरं विमलज्ञानोदयो वा मुक्तिः तन्निरोधो

प्राय मार्गः स च तत्त्वज्ञानं तच्च प्राचीनभावनाबलाद्भवतीति परमं रहस्यं सूत्रस्यान्तं पृच्छता कथितं भवन्तश्च सूत्रस्यान्तं पृष्टवन्तः सौत्रान्तिका भवन्तिति भगवताभिहिततया सौत्रान्तिकसंज्ञा सञ्जातेति। केचन बौद्धा बाह्येषु गन्धादिषु आन्तरेषु रूपादिस्कन्धेषु सत्स्वपि तत्त्वानाश्वासमुत्पादयितुं सर्वं शून्यमिति प्राथमिकान् विनेयानधीकथत् भगवान् द्वितीयांस्तु विज्ञानमात्रमयमवभासविज्ञानमेवैकं सदिति ततीयानुभवं सत्यमित्यास्थितान् विज्ञेयमनुमेयमिति सैयं विरुद्धा भाषिति वर्णयन्तो वैभाषिकाख्यया ख्याताः। एषा हि तेषां परिभाषा समुच्चिनोति विज्ञेयानुमेयतत्ववादे प्रात्यक्षिकस्य कस्यचिदप्यर्थस्याभावेन याग्निसंवेदनस्यानाभावेनानुमानप्रवृत्त्यनुपपत्तेः सकललोकानुभवविरोधश्च। ततश्चार्थो द्विविधः ग्राह्योऽध्यवसेयश्च तत्र ग्रहणं निर्विकल्पकरूपं प्रमाणं कल्पनापोढत्वात् अध्यवसायः सविकल्परूपोऽप्रमाणं कल्पनाज्ञानत्वात्। तदुक्तम्।

"कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्। विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः॥"

इति॥

"ग्राह्यं वस्तुप्रमाणं हि ग्रहणं यदसोऽन्यथा। न तदस्तु न तज्ज्ञानं ग्रब्दलिङ्गेन्द्रियादिजम्॥"

इति च॥

ननु सविकल्पकस्याप्रामाण्ये कथं ततः प्रवृत्तस्यार्थप्राप्तिः संवादश्चोपपद्येयातामिति चेन्न तद्भ्रं मणिप्रभाविषयमणिविकल्पन्यायेन पारम्पर्येणार्थप्रतिलम्भसम्भवेन तदुपपत्तेः। अवशिष्टं सौत्रान्तिकप्रस्तावे प्रपञ्चितमिति नेह प्रतन्यते। न च विनेयाशयानुरोधेनोपदेशभेदः साम्प्रदायिको न भवतीति भणितव्यं यतो भणितं बोधचित्तविवरणे

"देशना लोकनाथानां सत्त्वाशयवशानुगाः। भिद्यन्ते बहुधा लोके उपायैर्बहुभिः किल॥ गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणाः। भिन्ना हि देशना भिन्ना शून्यताऽद्वयलक्षणा॥"

इति॥

द्वादशायतनपूजा श्रेयस्करीति बौद्धनये प्रसिद्धम्।

"अर्थानुपार्ज्य बहुशो द्वादशायतनानि वै। परितः पूजनीयानि किमन्यैरिह पूजितैः॥ ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च। मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैः॥"

इति॥

विवेकविलासे बौद्धमतमित्थमभ्यधायि।

"बौद्धानां सुगतो देवो विश्वश्च क्षणभङ्गुरम्। आर्यसत्त्वाख्यया तत्त्वचतुष्टयमिदं क्रमात्॥ दुःखमायतनञ्चैव ततः समुदयो मतः। मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः॥ दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः। विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च॥

पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम्।
धर्म्मायतननेतानि द्वादशायतनानि तु ॥
रागादीनां गणोऽयं स्यात् समुदेति वृणा कुदि।
आत्मात्मीयसभावाख्यः स स्यात् समुदयः पुनः॥
अस्थिकाः सर्व्वसंस्कारा इति या वासना
स्थिरा।
न मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥
प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा।
सप्त-प्रस्थानिका बौद्धाः स्थाना वैभाषिकादयः॥
अर्थी ज्ञानात्मितो वैभाषिकेण बहु मन्यते।
सौत्रान्तिकेन प्रत्यक्षयाह्योऽर्थो न बहिर्मतः॥
आकारसहिता बुद्धिर्योगाचारस्य सम्मता।
केवलां संविदं स्वस्थां मन्यते मध्यमाः पुनः॥
रागादिज्ञानसन्तानवासनाच्छेदसम्भवा।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता॥
क्षत्तिः कमण्डलुर्भैक्षं चीरं पूर्व्वाह्णभोजनम्।
सङ्घो रक्ताम्बरत्वञ्च श्रिश्रिये बौद्धभिक्षुभिः॥"
इति॥

इति सर्व्वदर्शनसंग्रहे बौद्धदर्शनम्॥)

(बुद्धेरिदमिति बुद्ध्यत्पत्त्या वाष्यलिङ्गः। बुद्धसम्बन्धि वस्तु॥)

बौद्धः, पुं, (बुद्धं बुद्धशास्त्रं वेत्तीति। बुद्ध+अण्।) बुद्धशास्त्रावलम्बी। तत्पर्य्यायः। भिक्षकः २ क्षपणः ३ अर्हीकः ४ वैनायिकः ५। इति विकाण्डशेषः॥

बौधः, पुं, (बुधस्यापत्यं पुमान्। बुध+अण्।) बुधस्य पुत्रः। स च पुरूरवाः। इति हेमचन्द्रः। १। ३६५॥

बध, य बौ ताड़े। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक० अनित।) य बिध्यति शूचुं शूरः। बौ अबात्सीत्। कश्चित् द्विभूतस्यानिकारीभूतयकारस्य वर्णैकारो वर्ग्यः अन्यच दन्त्यः इति मन्वानः सनि विध्यत्सतीत्याह। इति दुर्गादासः॥

ब्रुच, क उत्सर्गे। उत्सर्गः। (चुरा०-पर०-सक०-सेट्।) क ब्रोचयति धनं दाता। ब्रोचं चिकटु। इति दुर्गादासकृतधातुदीपिकायां गोविन्दभट्टः॥

ब्रज, गत्यादौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ब्रजति। इति दुर्गादासः॥

ब्रजतिः, स्त्री, (ब्रजन्ती सतिर्विस्तृतिर्यस्याः। पृषोदरादित्वात् साधुः। यद्वा, प्रथनोतीति। तनदुणविस्तारे "क्तिच् क्तौ च संज्ञायाम्।" ३। ३। १७४। इति क्तिच्। पृषोदरादित्वात् पस्य वः।) लता। विस्तारः। इत्यमरः॥

ब्रह्मः, पुं, (बृंहबृंहते+"बृन्मेर्ग्रहिवृषी च। उणा० ३। ५। इति मक् ग्रहादेशश्च।) सूर्य्यः। (यथा, ऋग्वेदे। १। ६। १।
"युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः।
रोचन्ते रोचना दिवि॥")
दृश्यमूलम्। अर्कवृक्षः। इत्यमरः। २। ४। १५। शिवः। इति हेमचन्द्रः॥ मेदिनीकारेणान्तःस्थ

वकारादौ लिखितोऽयं ग्रन्थः॥ (दिवम्। द्यौः। इति निघण्टुः॥ चतुर्दशमनोर्भौत्यस्य पुत्रभेदः। यथा, मार्कण्डेये। १००। १२।
"गुरुर्गभीरो ब्रध्नश्च भरतोऽनुग्रहस्तथा।
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः॥")
रोगविशेषः। तस्य लक्षणं यथा,
"अभ्यभिष्यन्दिगुर्वाम्लसेवनान्निशयं गतः।
करोति यन्निवक्षोयं दोषो बद्धगुदान्त्रयोः॥
ज्वरमूलाङ्गसादार्त्तं तं ब्रध्नमिति निर्द्दिशेत्॥"
इति माधवकरः॥

तस्य चिकित्सा।
"भृष्टैरक्तैस्तैलेन सम्यक् कल्कोऽभयाभवः।
क्षाराग्न्यम्बुसंयुक्तो ब्रध्नरोगहरः परः॥
अजाजीहपुषाकुष्ठं गोमेदवदरान्वितम्।
काञ्जिकेन तु संपिष्टं तल्लेपो ब्रध्नजित् परः॥"
गोमेदं पत्रम्। तथा च निघण्टौ धन्वन्तरिः।
"पत्रं दलाढ्यं रामं गोमेदं रसनाढ्यम्॥"
इति भावप्रकाशः॥
(अस्य सप्तम्यामिलक्षणं यथा,—
"यस्य वायुः प्रकुपितः ग्रीवाकम्पमूलकरश्चरन्।
वंक्षणादूरुषण्डौ याति ब्रध्नरूक्षोपजायते॥"
इति चरके सूत्रस्थानेऽष्टादशेऽध्याये॥)

ब्रह्म, क्ली, (बृंहति वर्द्धते निरतिशयमहत्त्वलक्षणवृद्धिमान् भवतीत्यर्थः। बृंहिबृहौ+बृंहेर्नोच्च।" उणा० ४। १४५। मनिन् नकारस्याकारः। रत्वञ्च।) वेदः। (यथाह श्रुतिः।
"तस्माद्वेतद्ब्रह्मनामरूपमन्नञ्च जायते॥"
तथा च भागवते। १। १। १।
"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः॥"
वेदान्तमते 'वस्तु सच्चिदानन्दाद्वयं ब्रह्म तथा अज्ञानादिसकलजड़समूहोऽवस्तु।' 'ब्रह्मैव नित्यं वस्तु तदन्यदखिलमनित्यम्।' तथाहि,—
"यस्मादर्व्वाक् संवत्सरोऽहोभिः परिवर्त्तते।"
तदेव ज्योतिषां ज्योतिः। नित्यं विभु सर्व्वगतं सुसूक्ष्मम्। आकाशवत् सर्व्वगतञ्च नित्यः। अजो नित्यः शाश्वतः सत्यं ज्ञानमनन्तं ब्रह्म रातेर्दानात्। परायणं यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति सभूमा यो वै भूमा तदमृतम्।" इत्यादि श्रुतिभ्यो ब्रह्मणि नित्यत्वं विशुद्धसत्त्वस्य पुंसः प्रतिभाति। तथा, नैवेह किञ्चनाग्र आसीत् मृत्युनैवेदमावृतमासीत्। आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चनमिषत् सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं नेति नेतिनेह नानास्ति किञ्चन यत्किञ्चान्यत् पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पम् अथ यदल्पं तन्मर्त्यम्।" इत्यादि श्रुतिवचनेभ्यो ब्रह्मणोऽन्यत्वं भेदप्रपञ्चेनित्यत्वञ्च तस्यैव पुंसः प्रतिभाति। तथानुमानमपि यथा, विमतोऽचैतन्यवर्गोऽनित्यो विभक्तत्वात् घटपटस्तम्भादिवत् इति। अनेन हि विभक्तस्यानित्यत्वेऽवगते तस्मिन्ननुगतप्रकाशात्मकस्य ब्रह्मणोऽविभक्तस्य नित्यत्वमपि अर्थादवगच्छति। इति वेदान्तसारे विद्वन्मनोरञ्जनीटीकायां॥ तत्र श्रुतिवाक्यानि यथा, "सत्यं ज्ञानमनन्तं ब्रह्म। विज्ञानमानन्दं ब्रह्म।" "आनन्दो ब्रह्मेति व्यजानात् आनन्दरूपममृतं यद् विभाति, यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तत् विजिज्ञासस्व तद्ब्रह्मेति।" इत्याद्यसंख्येयं श्रुतिवचनमनुसन्धेयम्॥")
तत्त्वम्। तपः। इत्यमरः। १। ३। ११४॥
ब्रह्म चतुर्विधं यथा। विराट् १ हिरण्यगर्भः २ ईश्वरः ३ तुरीयः ४। इति वेदान्तसारः॥
अस्य लक्षणम्। यथा, आत्मबोधे।
"यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम्।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्॥
यद्दृष्ट्वा नापरं द्रष्टव्यं यद्भूत्वा न पुनर्भवः।
यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत्॥
तिर्य्यगूर्द्ध्वमधःपूर्णं सच्चिदानन्दमद्वयम्।
अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत्॥
अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यते ह्ययम्।
अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत्॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत्।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम्॥
सर्व्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भास्वन्तवत्॥"
अपि च। "सत्यमानन्दमद्वयममृतमेकरूपं वाङ्मनसोऽगोचरं सर्व्वगं सर्व्वातीतं चिदेकरसं देशकालापरिच्छिन्नमपादमपि शीघ्रगमपाणि च सर्व्वग्रहमचक्षुरपि सर्व्वदृ अश्रोत्रमपि सर्व्वश्रोत्र अचिन्त्यमपि सर्व्वं सर्व्वनियन्तृ सर्व्वशक्ति सर्व्वेषां सृष्टिस्थितिलयकर्त्तृ किमपि वस्तु ब्रह्मेति वेदा वदन्ति॥" शुद्धबुद्धस्वभाव इत्यौपनिषदाः। १। आदिविद्वान् सिद्ध इति कापिलाः। २। क्लेशकर्म्मविपाकाद्यैरपरामृष्टो निर्म्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः। ३। लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः। ४। शिव इति शैवाः। ५। पुरुषोत्तम इति वैष्णवाः। ६। पितामह इति पौराणिकाः। ७। यज्ञपुरुष इति याज्ञिकाः। ८। सर्व्वज्ञ इति सौगताः। ९। निरावरण इति दिगम्बराः। १०। उपास्यत्वेन देशित इति मीमांसकाः। ११। लोकव्यवहारसिद्ध इति चार्व्वाकाः। १२। यावदुक्तोपपन्न इति नैयायिकाः। १३। विश्वकर्म्मेति शिल्पिनः। १४। इति कुसुमाञ्जलिटीकायां॥ योगशास्त्रमते।
"ब्रह्मतेजोमयं शुक्लं यस्य सर्व्वमिदं रसः।
एकस्य भूतं भूतस्य इयं स्थावरजङ्गमम्॥
इति महाभारते मोक्षधर्म्मे॥

तस्य टीका। ब्रह्मणः स्वरूपमन्तराविष्कारणार्थमाह। ब्रह्मतेजोमयमिति। तेजोमयं ज्ञानात्मकम्। शुक्रं बीजभूतम्। यस्य सर्व्वमिदं रसः रसनीयं ज्ञेयं सर्व्वं यस्मैकस्य भूतं सत्यं न तु विवर्त्तवादिनामिवासत्यं भूतस्य सिद्धस्य अक्षिपतस्य तच्च सर्व्वं स्थावरजङ्गमोपाधिवशात् द्वयं द्वेधा॥ तच्च सगुणनिर्गुणभेदेन द्विविधं यथा,

"ब्रह्मैकं मूर्त्तिभेदस्तु गुणभेदेन सत्तम।
तद्ब्रह्म द्विविधं वस्तु सगुणं निर्गुणं शिव!॥
मायाश्रितो यः सगुणो मायातीतश्च निर्गुणः।
स्वेच्छामयश्च भगवानिच्छया विकरोति च॥
इच्छाशक्तिश्च प्रकृतिः सर्व्वशक्तिप्रसूः सदा।
केचिदेकं वदन्त्येवं ब्रह्म ज्योतिः सनातनम्॥
केचिदाहुश्च द्विविधं ब्रह्म प्रकृतिपूर्व्वकम्।
अहञ्च ये च वदन्त्येकं प्रकृतिपुरुषयोः परम्॥
तस्माद्भवति तौ द्वौ च तद्ब्रह्म सर्व्वकारणम्।
अथवैकं परं ब्रह्म द्विविधं भवतीच्छया॥
इच्छाशक्तिश्च प्रकृतिः सर्व्वशक्तिप्रसूः सदा।
तत्रासक्तश्च सगुणः स शरीरी च प्राकृतः॥
निर्गुणस्तत्र निर्लिप्तः अशरीरी निरञ्जनः।
स चात्मा भगवान्नित्यः सर्व्वाधारः सनातनः॥
सर्व्वेश्वरः सर्व्वसाक्षी सर्व्वत्रास्ति फलप्रदः।
शरीरं द्विविधं प्रोक्तं नित्यं प्राकृतमेव च॥
नित्यं विनाशरहितं नश्वरं प्राकृतं सदा।
अहं त्वञ्चापि भगवन्नावयोर्नित्यविग्रहः॥
आवयोरंशभूता ये प्राकृता नश्वरग्रहाः।
ब्रह्मादयश्चराश्चाहं मदंशा विष्णुरूपिणः॥
ममाप्येवं द्विधा रूपं द्विभुजञ्च चतुर्भुजम्।
चतुर्भुजोऽहं वैकुण्ठे पद्मया पार्षदैः सह॥
गोलोके द्विभुजोऽहञ्च गोपीभिः सह राधया।
द्विविधं मे वदन्त्येवं द्वौ प्रधानौ तु तत्त्वतः॥
पुरुषश्च सदा नित्यो नित्या प्रकृतिरीश्वरी।
सदा तौ द्वौ च संसिद्धौ सर्व्वेषां पितरौ शिव!॥
सशरीरौ निःशरीरौ स्वेच्छया सर्व्वरूपिणौ।
प्राधान्यञ्च यथा पुंसः प्रकृतेश्च तथा सदा॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४३ अध्यायः॥

नन्दयशोदां प्रति श्रीकृष्णवाक्यं यथा,—

"मामेव परमं ब्रह्म भगवन्तं सनातनम्।
ध्यायं ध्यायं पुत्रबुद्धिं त्यक्त्वा लभ परं पदम्॥"

इति तत्रैव १२७ अध्यायः॥

सगुणस्य तस्य नवधा रूपं यथा,—

"योगिनो यं वदन्त्येवं ज्योतीरूपं सनातनम्१।
ज्योतिरभ्यन्तरे नित्यरूपं भक्ता वदन्ति यम्२॥
वेदा वदन्ति सत्यं यं३ नित्यमाद्यं विचक्षणाः४।
यं वदन्ति सुराः सर्व्वे परं स्वेच्छामयं प्रभुम्५॥
सिद्धेन्द्रा मुनयः सर्व्वे सर्व्वरूपं वदन्ति यम्६।
यमनिर्व्वचनीयञ्च योगीन्द्रः गुरुरो वदेत्७॥
स्वयं धाता च प्रवदेत् कारणानाञ्च कारणम्८।
शेषो वदेदनन्तं यं नवधा रूपमीश्वरम्९॥
तर्काणामेव सर्व्वेषां यं बहुविधं रूपमीश्वरम्।
वेदज्ञानामेकरूपं वेदानामेकमेव च॥
पुराणानामेकरूपं तस्मान्नवविधं स्मृतम्।
न्यायो निर्व्वचनीयञ्च यन्तं गुरुरोऽब्रवीत्॥
नित्यं वैशेषिकात्मानं वदन्ति च विपश्चितः।
सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्॥
मीमांसा सर्व्वरूपञ्च वेदान्तः सर्व्वकारणम्।
पातञ्जलोऽप्यनन्तञ्च वेदाः सत्यस्वरूपकम्॥
स्वेच्छामयं पुराणञ्च भक्ताश्च नित्यविग्रहम्॥"

इति तत्रैव १२८ अध्यायः॥

सगुणनिर्गुणभेदेन तस्य चतुर्धा रूपं यथा,—

"चतुर्विभागः संस्मृतो चतुर्धा संस्थितः स्थितौ।
प्रलयञ्च करोत्यन्ते चतुर्भेदो जनार्द्दनः॥
एकांशेन ब्रह्मासौ भवत्यवक्तमूर्त्तिमान्।
मरीचिमिश्राः प्रतयः प्रजानामग्रभागतः॥
कालस्तृतीयस्तस्यांशः सर्व्वभूतानि चापरः।
इत्थं चतुर्धा संस्मृतो वर्त्ततेऽसौ रजोगुणः॥
एकांशेन स्थितो विष्णुः करोति परिपालनम्।
मन्वादिरूपी चान्येन कालरूपी परेण च॥
सर्व्वभूतेषु चान्येन संस्थितिं कुरुते स्थितः।
सत्त्वं गुणमुपाश्रित्य जगतः पुरुषोत्तमः॥
आश्रित्य तमसो वृत्तिमन्तकाले तथा प्रभुः।
रुद्रस्वरूपो भगवानेकांशेन भवत्यजः॥
अन्यान्तकादिरूपेण भागेनान्येन वर्त्तते।
कालस्वरूपो भागोऽन्यः सर्व्वभूतानि चापरः॥
विनाशं कुर्व्वतस्तस्य चतुर्द्धैवं महात्मनः॥"

इति विष्णुपुराणे १ अंशे २१ अध्यायः॥

ब्रह्मध्यानं यथा,—

"ब्रह्मध्यानं प्रवक्ष्यामि मायातन्त्रविमर्द्दकम्।
यच्छ्रुत्वाज्ञानसि प्राज्ञस्तदृयच्छेज्ज्ञानमात्मनि॥
ज्ञानं महति संयच्छेद्य इच्छेत् ज्ञेय आत्मनि।
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम्॥
वर्जितं भूततन्मात्रैर्गुणजन्माशुनादिभिः।
स्वप्रकाशं निराकारं सदानन्दमनादिमत्॥
नित्यं शुद्धं बृहद्ब्रह्म सत्यमानन्दमद्वयम्।
तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम्॥
अहं ब्रह्मेत्यवस्थानं समाधिरिति गीयते।
आत्मानं रथिनं विद्धि शरीरं रथमेव तु॥
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च।
इन्द्रियाणि हयानाहुर्विषयास्तेषु गोचराः॥
आत्मेन्द्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः।
यस्य विज्ञानवानात्मा युक्तेन मनसा सदा॥
न स तत्पदमाप्नोति युक्तेन मनसा तदा।
स तत्पदमवाप्नोति स हि भूयो न जायते।
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥
अहिंसादि यमः प्रोक्तः शौचादिनियमः स्मृतः॥
आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः॥
प्रत्याहारो जयः प्रोक्तो ध्यानमीश्वरचिन्तनम्।
मनोधृतिर्धारणं स्यात् समाधिर्ब्रह्मणः स्मृतः॥"

साकारस्य तस्य ध्यानं यथा,—

"अमूर्त्तं चेत् स्थिरो न स्यात्ततो मूर्त्तं विचिन्तयेत्।
हृत्पद्मकर्णिकामध्ये शुद्धस्फटिकसन्निभम्॥
श्रीवत्सकौस्तुभयुतं वनमाली श्रिया युतः।
नित्यः शुद्धो बुद्धियुक्तः सत्यानन्दाद्वयः परः॥
आत्माहं परमं ब्रह्म परमज्योतिरेव तु।
चतुर्विंशतिमूर्त्तिः स शालग्रामशिलास्थितः॥
द्वारकादिशिलासंस्थो ध्येयः पूज्योऽपि वा हरिः।
मनसोऽभीप्सितं प्राप्य देवो वैमानिको भवेत्॥
निष्कामो मुक्तिमाप्नोति मूर्त्तीर्ध्यायन् स्तुवन् जपन्॥"

इति गारुडे मूर्त्तामूर्त्तध्यानं ४६ अध्यायः॥

ब्रह्मपदप्राप्तिकारणं यथा,—

"ब्रह्मण्याधाय कर्म्माणि निःसङ्गः कामवर्जितः।
प्रसन्नेनैव मनसा कुर्व्वाणो याति तत्पदम्॥"

इति कूर्म्मपुराणे २ अध्यायः॥

सर्व्वं ब्रह्म यथा,—

"ब्रह्मैवेदं जगत् सर्व्वं ब्रह्मणोऽन्यन्न विद्यते।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका॥"

इत्यात्मबोधः॥

ब्रह्मकन्यका, स्त्री, (ब्रह्मणः कन्यका सुता।) सरस्वती। इति त्रिकाण्डशेषः॥ ब्राह्मी। इति राजनिर्घण्टः॥

ब्रह्मकर्म्मसमाधिः, पुं, ब्रह्मण्येव कर्म्मात्मके समाधिश्चित्तैकाग्र्यं यस्य। यथा, श्रीभगवद्गीतायाम्। ४। २४।

"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना॥"

ब्रह्मकुण्डं, क्ली, (ब्रह्मणा निर्म्मितं कुण्डं सरोवरम्।) ब्रह्मणा निर्म्मितसरोवरविशेषः। यथा,

"पाण्डुनाथस्योत्तरस्यां ब्रह्मकुण्डाश्रयं सरः।
ब्रह्मणा निर्म्मितं पूर्व्वं स्नानाय स्वर्गवासिनाम्॥
आयामेन शतव्यामं विस्तीर्णेन तदर्द्धकम्।
सर्व्वपापहरं पुण्यं देवलोकात् समागतम्॥
तत्र स्नानमन्त्रः।
कमण्डलुसमुद्भूत ब्रह्मकुण्डान्नतस्त्व।।
हर मे सर्व्वपापानि पुण्यं स्वर्गञ्च साधय॥
इत्यनेन तु मन्त्रेण स्नाति तस्मिन् सरोजले।
पाण्डुनाथञ्च संपूज्य विष्णुसायुज्यमाप्नुयात्॥
ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"

इति कालिकापुराणे ८१ अध्यायः॥

ब्रह्मकूटः, पुं, (ब्रह्मा कूटे शिखरे यस्य।) पर्व्वतविशेषः। यथा, कालिकापुराणे ८१ अध्यायः॥

"ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"

ब्रह्मकूर्च्चं, क्ली, (ब्रह्मणो ब्राह्मणत्वस्य कूर्च्चमिव।) व्रतविशेषः। यथा।

"रजस्वले तु ये नार्य्यावन्योन्यं स्पृशतो यदि।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्च्चमतःपरम्॥"

पञ्चगव्यपानं व्रतरूपं तेनोपवासः। ब्रह्मकूर्च्चमाह जाबालः।

"अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः।
पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्च्चविधिः स्मृतः॥"

तदशक्तौ पुराणैकं दानयम्। इति प्रायश्चित्ततत्त्वम्॥ (ब्रह्मपुराणेऽपि अस्य व्यवस्था यथा। नरस्तु चतुर्दश्यां पूर्णिमायाममावास्यायामा पद्यगर्थं हविष्यान्नं वा भक्षयेत्। यस्तु पौर्णमासीषु ब्रह्मजूर्यं कुर्यात् तस्य सर्व्वपापक्षयो भवेत्। यस्तु मासेन द्विःकुर्यात् स यथेष्टाङ्गतिमाप्नुयात्॥)

ब्रह्मकोशी, स्त्री, (ब्रह्मणः कोशीव।) अजमोदा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या अजमोदाशब्दे ज्ञेयाः॥)

ब्रह्मगर्भा, स्त्री, (ब्रह्मैव गर्भो यस्याः।) आदित्यभक्ता। इति राजनिर्घण्टः॥

ब्रह्मगिरिः, पु, (ब्रह्मणो गिरिः पर्व्वतः।) ब्रह्मशैलः। इति शब्दरत्नावली॥ (नीलकूटाभिधेयकामाख्यानिलयस्य पूर्व्वभागे स्थितोऽयम्।) यथा, कालिकापुराणे ८२ अध्याये।

"तनस्तु नीलकूटाख्यं कामाख्यानिलयं परम्।
तत्पूर्व्वभागे वसति ब्रह्मा ब्रह्मगिरिं पुनः॥"

ब्रह्मघ्नी, स्त्री, गुरुकन्या। इति राजनिर्घण्टः॥ (ब्रह्माणं ब्राह्मणं हन्तीति। ब्रह्म+हन्+टक्। ततो ङीप्।) ब्रह्मघातिनी च॥

ब्रह्मचर्य्य, क्ली, (ब्रह्मणे वेदार्थं चर्य्यं आचरणीयम्।) आश्रमविशेषः। यथा, गारुडे ६४ अध्याये।

"ब्रह्मचर्य्यस्थितो नैकमन्नमद्यादनापदि।
व्राह्मणः काममश्नीयात् श्राद्धे व्रतमपीड़यन्॥
मधु मांसं तथाश्नीलमित्यादि परिवर्जयेत्।
प्रतिदेयं ब्रह्मचर्य्यं द्वादशाब्दानि पञ्च वा॥
गुरुहान्तिकमित्येके केचिदाप्तस्य षोड़श॥"

(ब्रह्मचर्य्ये अष्टाङ्गमैथुनप्रतिषेधः। यदुक्तम्।

"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेवच॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणम्॥"

एतच्च स्त्रीपुरुषयोः साधारणम्। पुंसः स्त्रीस्मरणादि शून्यत्वम्। स्त्रियाश्च पुरुषस्मरणादिराहित्यम् यतएवाह मनुः। ५। १६०॥

"सते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः॥"
"ब्रह्मचर्य्ये व्यवस्थिता अक्षतपुरुषान्तरमैथुना।"
इति कुल्लूकभट्टः॥

यमभेदः। यथा, पातञ्जले। २। ३०।

"अहिंसासत्यास्तेय ब्रह्मचर्य्यापरिग्रहा यमाः॥"
"ब्रह्मचर्य्यमुपस्थनियमः।" वीर्य्यधारणञ्चेति भाष्यम्॥ एतत्तु कलियुगे नास्ति। यथाह महानिर्व्वाणतन्त्रे।

"ब्रह्मचर्य्याश्रमो नास्ति वानप्रस्थोऽपि न प्रिये॥
गार्हस्थ्यो मैथुनस्यैव आश्रमौ द्वौ कलौ युगे॥")

ब्रह्मचारिणी, स्त्री, (ब्रह्मणा वेदेन चारयति आचरतीति। ब्रह्म+चर+खार्थे णिच्+कर्त्तरि ल्यु। ङीप्) भार्गी। इति रत्नमाला॥

ब्रह्मचारिणी, स्त्री, (ब्रह्मणि वेदे चरतीति, ब्रह्म+चर्+णिनिः। स्त्रियां ङीप्।) दुर्गा। यथा, देवीपुराणे ४५ अध्याये।

"वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी॥"
करुणोद्वृत्तः। इति राजनिर्घण्टः॥ ब्रह्मीशाकः। इति रत्नमाला॥ ब्रह्मचर्य्यव्रतधारिणी। यथा,

"आसीतामरणात् क्षान्ता नियता ब्रह्मचारिणी।
यो धर्म्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्॥"
इति मनुः। ५। १५८॥

ब्रह्मचारी, [न्] पुं, (ब्रह्म ज्ञानं तपो वा आचरति अर्जयत्यवश्यम्। ब्रह्म+चर+आवश्यके णिनिः।) प्रथमाश्रमी। इति भरतः॥ उपनयनानन्तरं नियमं कृत्वा गुरोः सन्निधौ स्थित्वा साङ्गवेदाध्ययनं करोति यः। स द्विविधः। उपकुर्व्वाणः नैष्ठिकश्च। तस्य नियमा यथा,—

"यदृच्छया विहितं चर्म्म यत् सूत्रं या च मेखला।
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि॥
सेवते मांस्तु नियमान् ब्रह्मचारी गुरौ वसन्।
संनियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः॥
नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्पणम्।
देवताभ्यर्चनञ्चैव समिदाधानमेव च॥
वर्जयेन्मधु मांसञ्च गन्धं माल्यं रसान् स्त्रियः।
शुक्तानि यानि सर्व्वाणि प्राणिनाञ्चैव हिंसनम्॥
अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणम्।
कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्॥
द्यूतञ्च जनवादञ्च परिवादं तथानृतम्।
स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च॥
एकः शयीत सर्व्वत्र न रेतः स्कन्दयेत् क्वचित्।
कामाद्धि स्कन्दयन्रेतो हिनस्ति व्रतमात्मनः॥
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः।
स्नात्वार्कमर्च्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्॥
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान्।
आहरेदयावदर्थानि भैक्षञ्चाहरहश्चरेत्॥
देवयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु।
ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्॥
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्जयेत्॥
सर्व्वं वापि चरेदग्रं पूर्व्वोक्तानामसम्भवे।
नियम्य प्रयतो वाचमभिशस्तांस्तु वर्জ्जयेत्॥
दूरादाहृत्य समिधः सन्निदध्याद्दिहायसि।
सायं प्रातश्च जुहुयात् ताभिरग्निमतन्द्रितः॥
अकृत्वा भैक्षचरणमसमिध्य च पावकम्।
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्॥
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता॥
व्रतवद्देवदैवत्ये पित्र्ये कर्म्मण्यथर्षिवत्।
काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते॥
ब्राह्मणस्यैव कर्म्मैतदुपदिष्टं मनीषिभिः।
राजन्यवैश्ययोस्त्वेवं नैतत् कर्म्म विधीयते॥
चोदितो गुरुणा नित्यमप्रचोदित एव वा।
कुर्य्यादध्ययने यत्नमाचार्य्यस्य हितेषु च॥
शरीरञ्चैव वाचञ्च बुद्धीन्द्रियमनांसि च।
नियम्य प्राञ्जलिस्तिष्ठेदीक्षमाणो गुरोर्मुखम्॥
नित्यमुद्धृतपाणिः स्यात् साध्वाचारः सुसंयतः।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः॥
हीनान्नवस्त्रवेषः स्यात् सर्व्वदा गुरुसन्निधौ।
उत्तिष्ठेत् प्रथमश्चास्य चरमश्चैव संविशेत्॥
प्रतिश्रवणसम्भाषे शयानो न समाचरेत्।
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः॥
आसीनस्य स्थितः कुर्य्यादभिगच्छंस्तु तिष्ठतः।
प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः॥
पराङ्मुखस्याभिमुखो दूरस्थस्येत्य चान्तिकम्।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः॥
नीचं शय्यासनञ्चास्य सर्व्वदा गुरुसन्निधौ।
गुरोस्तु चक्षुर्व्विषये न यथेष्टासनो भवेत्॥
नोदाहरेदस्य नाम परोक्षमपि केवलम्।
न चैवास्यानुकुर्व्वीत गतिभाषितचेष्टितम्॥
गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥
परीवादात् खरो भवति श्वा वै भवति निन्दकः।
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी॥
दूरस्थो नार्च्चयेदेनं न क्रुद्धो नान्तिके स्थितः।
यानासनस्थश्चैवैनमवरुह्याभिवादयेत्॥
प्रतिवातेऽनुवाते च नासीत गुरुणा सह।
असंश्रवे चैव गुरोर्न किञ्चिदपि कीर्त्तयेत्॥
गोरथोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च॥
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्।
न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत्॥
विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु।
प्रतिषेधत्सु चाधर्म्मान् हितञ्चोपदिशत्सु च॥
श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत्।
गुरुपुत्रेषु चार्य्येषु गुरोश्चैव स्वबन्धुषु॥
बालः समानजन्मा वा शिष्यो वा यज्ञकर्म्मणि।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति॥
उत्सादनञ्च गात्राणां स्नापनोच्छिष्टभोजने।
न कुर्य्याद्गुरुपुत्रस्य पादयोश्चावनेजनम्॥
गुरुवत् प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम्॥
गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः।
पूर्णविंशतिवर्षेण गुणदोषौ विजानता॥
स्वभाव एव नारीणां नराणामिह दूषणम्।
अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः॥
अविद्वांसमलं लोके विद्वांसमपि वा पुनः।
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम्॥
माता स्वसा दुहिता वा न विविक्तासनो भवेत्।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति॥
कामन्तु गुरुपत्नीनां युवतीनां युवा भवि।
विधिवद्वन्दनं कुर्य्यादसावहमितिब्रुवन्॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन्॥
यथा खनन् खनित्रेण नरो वार्य्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति॥

मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखा-
जटः ।
नैनं ग्रामेऽभिनिम्लोचेत् सूर्य्यो नाभ्युदियात्
क्वचित् ॥
तच्चेदभ्युदियात् सूर्य्यः शृणानं कामचारतः ।
निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेदिनम् ॥
सूर्य्येण ह्यभिनिर्मुक्तः शृणानोऽभ्युदितश्च यः ।
प्रायश्चित्तमकुर्व्वाणो युक्तः स्यान्महतैनसा ॥
आचम्य प्रयतो नित्यमुभे सन्ध्ये समाहितः ।
शुचौ देशे जपन् जप्यमुपासीत यथाविधि ॥"
इति मानवे । २ । १०४-२२२ ॥
अपि च । श्रीऔर्व्व उवाच ।
"बालः क्रतोपनयनो वेदाहरणतत्परः ।
गुरुगेहे वसेद्भूप ! ब्रह्मचारी समाहितः ॥
शौचाचारवता तत्र कार्य्यं शुश्रूषणं गुरोः ।
व्रतानि चरता यत्नाद्यैराज्ञा कृतबुद्धिना ॥
उभे सन्ध्ये रविं भूप ! तथैवाग्निं समाहितः ।
उपतिष्ठेत्तथा कुर्य्याद्गुरोरप्यभिवादनम् ॥
स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीत चासति ।
शृण्वो गुरौ नृपश्रेष्ठ ! प्रतिकूलं न संभजेत् ॥
तेनोक्तः पठेद्वेदं नान्यचित्तः पुरःस्थितः ।
अनुज्ञातश्च भिक्षान्नमश्नीयाद्गुरुणा ततः ॥
अवगाहेदपः पूर्व्वमाचार्य्येणावगाहिताः ।
समिज्जलादिकञ्चास्य कल्यं कल्यमुपानयेत् ॥
गृहीतग्राह्यवेदश्च ततोऽनुज्ञामवाप्य वै ।
गार्हस्थ्यमावसेत् प्राज्ञो निष्पन्नगुरुनिष्कृतिः ॥"
इति विष्णुपुराणे । ३ । ६ । १-७ ॥
अपि च । गारुडे ६८ अध्याये ।
"भिक्षाचर्य्यांच शुश्रूषा गुरोः स्वाध्याय एव च ।
सन्ध्याकर्म्माग्निकार्य्यञ्च धर्म्मोऽयं ब्रह्मचारिणः ॥"
स तु द्विविधः । यथा, कौर्म्मे २ अध्याये ।
"ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः ।
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् ॥
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ।"
(गन्धर्व्वविशेषः । यथा महाभारते । १ । १२३ । ५५ ।
"ब्रह्मचारी बहुगुणः सुवर्णश्चेति विश्रुतः ।
विश्रावसुर्भूमन्युश्च सुचन्द्रश्च गुरुस्तथा ॥")
ब्रह्मजज्ञः, पुं, (ब्रह्मणो जायते य इति ब्रह्मजः ।
ब्रह्म + जन् + ड । जानातीति ज्ञः । ज्ञा + कः ।
ततः कर्म्मधारयः ।) समष्टिस्थूलदेहाभिमानि-
विराट् । स च हिरण्यगर्भोज्ञातः सर्व्वज्ञः ।
यथा, कठोपनिषदि । १ । १० ॥
"त्रिनाचिकेतस्त्रिभिरेत्य सन्धिं
त्रिकर्म्मकृत् तरति जन्ममृत्यू ।
ब्रह्मजज्ञं देवमीड्यं विदित्वा
निचाय्येमां शान्तिमत्यन्तमेति ॥"
पुनरपि कर्म्मस्तुतिमेवाह त्रिनेति । त्रिना-
चिकेतः त्रिकृत्वो नाचिकेतोऽग्निः चितो येन स
त्रिनाचिकेतः तादृज्ञानस्तदध्ययनस्तदनुष्ठानवान्
वा । त्रिभिर्माढपित्राचार्य्यैरेत्य प्राप्य सन्धिं
सत्यानं मात्राद्यनुशासनं यथावत् प्राप्येत्येतत् ।
तद्धि प्रामाण्यकारणं श्रुत्यन्तरादवगम्यते ।
यथा माढमानित्यादेः । वेदस्तुतिश्चिद्रूपैर्व्वा
प्रत्यक्षानुमानागमैर्व्वा तेभ्यो हि विशुद्धिः
प्रत्यक्षा । त्रिकर्म्मकृत इत्याध्ययनदानानां कर्त्ता
तरति अतिक्रामति जन्म च मृत्युञ्च जन्ममृत्यू ।
किञ्च ब्रह्मजज्ञमिति । ब्रह्मजज्ञं ब्रह्मणो
हिरण्यगर्भाज्जातो ब्रह्मजः ब्रह्मजज्ञासौ
ज्ञश्चेति ब्रह्मजज्ञः सर्व्वज्ञो ह्यसौ तं देवं द्योतन-
ज्ञानादिगुणवन्तं ईड्यं स्तुत्यं विदित्वा ज्ञात्वा
निचाय्य दृष्ट्वा च आत्मभावेन इमां स्वबुद्धि-
प्रत्यक्षां भ्रान्तिं उपरतिं अत्यन्तमेति अतिशये-
नेति वैराजं परं ज्ञानकर्म्मसमुच्चयानुष्ठानेन
प्राप्नोतीत्यर्थः । इति शङ्कराचार्य्यकृतभाष्यम् ॥
ब्रह्मजटा, स्त्री, (ब्रह्मणो जटेव संहता ।)
दमनकवृक्षः । इति राजनिर्घण्टः ॥
ब्रह्मजीवी, [न्] पुं, (ब्रह्मणा वेदेन वेदोक्त-
श्रौतादिकर्म्मणा इत्यर्थः जीवतीति । ब्रह्म +
जीव् + णिनिः ।) द्विजकार्य्येषु सत्वेन परि-
चारकः । यथा । अनृतवाक् तस्करो राजभृत्यो
वृत्तारोपकवृत्तिर्गरदोऽग्निदोऽश्वरथगजारोह-
शस्त्रवृत्ती रङ्गोपजीवी श्यागमिकः सूत्रीपाध्यायो
वृषलीपतिर्भाण्डिको नक्षत्रोपजीवी अवृत्ति-
र्ब्रह्मजीवी चिकित्सकः देवलकः पुरोहितः
कितवो मद्यपः कूटकारकोऽपत्यविक्रयी मनुष्य-
पशुविक्रेता चेति तानुद्धरेत् समेत्य न्यायतो
ब्राह्मणश्चवस्थया सर्व्वद्रव्यत्यागेन चतुर्थकालाहा-
राः सम्वत्सरं क्षिपवनसुपस्पृशेयुस्तस्मान्ते
देवपितृतर्पणं गवाह्निकञ्चैवैकं व्यवहार्याः ।
इति मिताक्षरायां प्रायश्चित्ताध्याये प्रचेतसो
वचनम् ॥
ब्रह्मज्ञः, पुं, (ब्रह्म जानातीति । ब्रह्म + ज्ञा + कः ।)
श्रीगोपालः । यथा,—
"वाग्दाता वाक्प्रदो वाणीनाथो ब्राह्मण-
रक्षकः ।
ब्रह्मज्ञो ब्रह्मजत् ब्रह्मा ब्रह्मकर्म्मप्रकाशकः ॥"
इति नारदपञ्चरात्रे गोपालसहस्रनामस्तोत्रे ८
अध्यायः ॥
(विष्णुः । यथा महाभारते । १३ । १४६ । ८४ ।
"ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥"
कार्त्तिकेयः । यथा, महाभारते । ३ । २३१ । ११ ।
"ब्रह्मण्यो वै ब्रह्मजो ब्रह्मविद्यं
ब्रह्मण्येषो ब्रह्मवतां वरिष्ठः ।
ब्रह्मप्रियो ब्राह्मणसत्रतो त्वं
ब्रह्मज्ञो वै ब्राह्मणानाञ्च नेता ॥")
ब्रह्मज्ञः, त्रि, (ब्रह्म जानातीति । ब्रह्म + ज्ञा + कः ।)
ब्रह्मवेत्ता । यथा,—
"स ब्रह्मज्ञः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः ।
चीनाचारक्रमाचारैर्यो यजेत्तारिणीं नरः ॥"
इति चीनाचारप्रयोगविधिः ॥
ब्रह्मज्ञानं, क्ली, (ब्रह्मणि ब्रह्मविषये यज्ज्ञानम् ।)
ब्रह्मविषयकज्ञानम् । इति समञ्जसाकृतिः ॥ *॥
तत्त्वमस्यादिवाक्यजन्यप्रतिपादितवृत्त्यारूढ-
ज्ञानम् । इति वेदान्तलघुचन्द्रिका ॥ "मिथ्या-
वासनाविरहविशिष्टमात्मभिन्नभिन्नज्ञानम् ॥"
इतिमुक्तिवादः ॥ * ॥ "क्लेशकर्म्मविपाकाद्यय-
निवर्त्तकहिरण्यगर्भविषयकं ज्ञानम् ।" इति
वैजयन्तीधृतपातञ्जलमतम् ॥ * ॥ "प्रकृतिपुरु-
षयोर्विवेकविषयज्ञानम् ।" इति तत्रैव सांख्य-
मतम् ॥ तथा च ।
सूत उवाच ।
"वेदान्तसांख्यसिद्धान्तब्रह्मज्ञानं वदाम्यहम् ॥
अहं ब्रह्म परंज्योतिर्विष्णुरित्येव चिन्तयन् ।
सूर्य्ये हृद्गोऽग्नि वह्नौ च ज्योतिरेकं त्रिधा
स्थितम् ।
यथा सर्पिः शरीरस्थं गवां न कुरुते बलम् ।
निर्गतं कर्म्मसंयुक्तं दत्तं तासां महाबलम् ॥
तथा विष्णुः शरीरस्थो न करोति हितं नृणाम् ।
विनाराधनया देवः सर्व्वगः परमेश्वरः ॥
आरुरुक्षुमतीनान्तु कर्म्मज्ञानसुदाहृतम् ।
आरूढ़योगदृष्टानां ज्ञानं त्यागः परं मतम् ॥
ज्ञातुमिच्छति शब्दादीन् रागद्वेषोऽथ जायते ।
लोभो मोहः क्रोध एतैर्युक्तः पापं नरश्चरेत्
हस्तावुपस्थमुदरं वाक् चतुर्थी चतुष्टयम् ।
एतत् सुसंयतं यस्य स विप्रः कथ्यते बुधैः ॥
परवित्तं न गृह्णाति हिंसां न कुरुते तथा ।
नाक्षक्रीड़ारतो यस्तु तस्य हस्तौ सुसंयतौ ॥
परस्त्रीवर्जनपरस्तस्योपस्थं सुसंयतम् ।
अलोलुपो मितं भुङ्क्ते जठरं तस्य संयतम् ॥
सत्यं हितं मितं ब्रूते यः सदा तस्य वाग् यता ।
यस्य संयतान्येतानि तस्य किं तपसाध्वरैः ॥
ऐक्यं यद्बुद्धिमनसोरिन्द्रियाणाञ्च सर्व्वदा ।
विश्वेश्वरे परे देवे ध्यानमेतत् प्रकीर्त्तितम् ॥
भ्रुवोर्मध्ये स्थितां बुद्धिं विषयेषु युनक्ति यः ।
जीवो जाग्रदवस्थायामेवमाहुर्विपश्चितः ॥
इन्द्रियाणासुपरमे मनसि ह्यवतिष्ठते ।
स्वप्नान् पश्यत्यसौ जीवो बाह्यानाभ्यन्तरानथ ॥
हृदि स्थितः स तमसा मोहितो न स्मरत्यपि ।
यदा कस्य कुतो वेत्ति सुषुप्तिरिति कथ्यते ॥
जाग्रतो यस्य नो तन्द्रीर्न मोहो न श्रमस्तथा ।
उन्नद्धयते न जानाति शब्दादिविषयान् यथा ॥
इन्द्रियाणि समाहृत्य विषयेभ्यो मनस्तथा ।
बुद्ध्याहङ्कारमपि च प्रकृत्या बुद्धिमेव च ॥
संयम्य प्रकृतिञ्चापि चिच्छक्त्या केवले स्थितः ।
पश्यत्यात्मनि चात्मानमात्मात्मप्रकाशकम् ॥
चिद्रूपमग्रतं शुद्धं निष्क्रियं व्यापकं शिवम् ।
तुरीयायामवस्थायामाख्यितोऽसौ न संशयः ॥
शब्दादयो गुणाः पञ्च सत्त्वाद्यास्तु गुणास्त्रयः ।
पुर्य्यष्टकस्य पञ्चस्य पञ्चाग्र्यश्च तानि हि ॥
साम्यावस्था गुणवता प्रकृतिस्तच्च कर्णिका ।
कर्णिकायां स्थितो जीवो देहे चिद्रूप एव हि ॥
पुर्य्यष्टकं परित्यज्य प्रकृतिञ्च गुणात्मिकाम् ।
यदा याति तदा जीवो याति मुक्तिं न संशयः ।
शरीरेण चतुर्भागः कर्म्म बुद्धीन्द्रियाणि च ।
त्रिपञ्चकं विनश्येत याति पुर्य्यष्टकं सदा ।
सन्यार्य्यश्चैव जीवेन योगसेवी हि मुक्तिभाक् ॥

प्राणायामो जपश्चैव प्रत्याहारोऽथ धारणा ।
ध्यानं समाधिरित्येते षड्योगस्य प्रसाधकाः ॥
पापक्षयो देवतानां प्रीतिरिन्द्रियसंयमः ।
मनसः स्थिरता तैभ्यस्तत्त्वालोकश्च सर्व्वदा ॥
गायत्र्या प्रणवेनाथ माचया प्राणसंयमः ।
जपध्यानयुतो गर्भस्तेन हीनस्त्वगर्भकः ॥
षट्त्रिंशन्मात्रिकः श्रेष्ठश्चतुर्विंशतिमात्रिकः ।
मध्या द्वादशमात्रास्तु ओंकारं सततं जपेत् ॥
श्रुत्वा यथाक्षरं सम्यक् शब्दं गौर्याति संसुखी ।
प्रणवे च कृते तद्वत् परं ब्रह्म न संशयः ॥
चारके प्रणवे जप्ते परं ब्रह्म प्रसीदति ।
अष्टाक्षरश्च जप्तव्यो गायत्री द्वादशाक्षरा ॥
सर्व्वेषामिन्द्रियाणान्तु प्रवृत्तिर्विषयेषु या ।
निवृत्तिर्मनसा तस्यां प्रत्याहारः प्रकीर्त्तितः ॥
इन्द्रियाणीन्द्रियार्थेभ्यः समाकृत्य स्थितो हि सः ।
मनसा सह बुद्ध्या च प्रत्याहारेण संज्ञितः ॥
प्राणायामैर्द्वादशभिर्यावत् कालस्तु भवेत् ।
यस्तावत् क्षणमप्यन्तं मनो ब्रह्मणि धारयेत् ॥
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः ।
तुष्टे तु नियतो युक्तः समाधिः सोऽभिधीयते ॥
ध्यायन्न चलते यस्य मनोऽभिध्यायते भृशम् ।
प्राण्यावधिकृतं कालं यावत् सा धारणा स्थिता ।
ध्येये सक्तं मनो यस्य ध्येयमेवानुपश्यति ।
नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्त्तितम् ॥
ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् ।
यत्तत् ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥
ध्येयमेव हि सर्व्वत्र ध्येयस्तन्मयतां गतः ।
पश्यति ह्येतरहितं समाधिः सोऽभिधीयते ॥
मनः संकल्परहितमिन्द्रियार्थेषु चिन्तयन् ।
यस्य ब्रह्मणि संलीनं समाधिस्थः स कीर्त्तितः ॥
ध्यायतः परमात्मानमात्मस्थं यस्य योगिनः ।
मनस्तन्मयतां याति समाधिस्थः स कीर्त्तितः ॥
चित्तस्यास्थिरता भ्रान्तिर्दौर्मनस्यं प्रमादता ।
योगिनां कथिता दोषा योगविघ्नप्रवर्त्तकाः ॥
स्थित्यर्थं मनसः सर्व्वं स्थूलरूपं विचिन्तयेत् ।
तद्व्रतं निश्चलीभूतं सूक्ष्मस्थं स्थिरतां व्रजेत् ॥
न विना परमात्मानं किञ्चिज्ज्ञगति विद्यते ।
विश्वरूपं तमेवेह इति ज्ञात्वा न मुह्यति ॥
ओंकारं परमं ब्रह्म ध्यायेदक्षयितं विभुम् ।
क्षेत्रक्षेत्रज्ञरहितं जपेन्मात्रार्थयान्वितम् ॥
हृदि सञ्चिन्तयेत् पूर्व्वं प्रधानं तस्य चोपरि ।
तमो रजस्तथा सत्त्वं मण्डलत्रितयं क्रमात् ॥
कृष्णरक्तसितं तस्मिन् पुरुषं जीवसंज्ञितम् ।
तस्योपरि गुणैश्वर्य्यमष्टपत्रं सरोरुहम् ॥
ज्ञानन्तु कर्णिका तत्र विज्ञानं केसरं स्मृतम् ।
वैराग्यं नाल तत्कन्दो वैष्णवो धर्म्म उत्तमः ॥
कर्णिकायां स्थितं चक्रं जीवबन्धविनाशनं विभुम् ।
ध्यायेदुरसि संयुक्तमोङ्कारं मुक्तिसाधकम् ॥
यक्तायक्ते च पुरुषस्त्रिसो मात्राः प्रकीर्त्तिताः ।
अर्द्धमात्रा परं ब्रह्म ज्ञेयोऽध्यात्मविदुत्तमैः ॥
ध्यायन् यदि त्यजेत् प्राणान् याति ब्रह्मण्य-
सैनिकम् ।

हरिं संस्थाप्य देहेऽस्मे ध्यायन् योगी च
मुक्तिभाक् ॥
आत्मानमात्मना केचित् पश्यन्ति ध्यानचक्षुषः ।
सांख्येनबुद्ध्या तथैवान्ये योगेनान्ये तु योगिनः ॥
ब्रह्मप्रकाशकं ज्ञानं भवत्यविभेदकम् ।
तत्रैकचित्ततायोगी मुक्तिदो नात्र संशयः ॥
जितेन्द्रियात्मकरणो ज्ञानदृष्टो हि यो भवेत् ।
स मुक्तः कथ्यते योगी परमात्मन्यवस्थितः ॥
आसनस्थानविधयो न योगस्य प्रसाधकाः ।
विलम्बजनकाः सर्व्वे विस्तारः परिकीर्त्तितः ॥
शिशुपालः सिद्धिमागात् स्मरणाभ्यासमौरवात् ।
आमगः सर्व्व एवेह पूर्व्वराजे परे तथा ॥
योगाभ्यासं प्रकुर्व्वन्तः पश्यन्त्यात्मानमात्मना ।
सर्व्वभूतेषु कारुण्यं विद्वेषं विषयेषु च ॥
गुप्तश्रोत्रादिरादिश्च कुर्व्वन् योगी विमुच्यते ।
इन्द्रियेरिन्द्रियार्थांस्तु न जानाति नरो यदा ॥
काष्ठवत् ब्रह्मसंलीनो योगयुक्तस्तदा भवेत् ।
सर्व्वे वर्णाः स्त्रियः सर्व्वाः म्लेच्छा पापानि
भक्षसात् ।
ध्यानाग्निनामलाः सन्तो लभन्ते परमां गतिम् ।
मथनात् दृश्यते ह्यग्निस्तद्वत् ध्यानेन वै हरिः ॥
ब्रह्मात्मनोर्यदैकत्वं स योगश्चोत्तमोत्तमः ।
वाह्येरुपायैर्मुक्तिर्न नान्तःस्थैः स्याद्यमादिभिः ।
सांख्यज्ञानेन योगेन वेदान्तश्रवणेन च ।
प्रत्यक्षतात्मनो या हि सा मुक्तिरभिधीयते ॥
अनात्मन्यात्मरूपत्वमसतः सत्स्वरूपता ।
दुःखाभावे तथा सौख्यं माया विद्याविना-
ग्निजा ॥"

इति गारुड़े ब्रह्मज्ञाने २४० अध्यायः ॥

ब्रह्मज्ञानी, त्रि, (ब्रह्मज्ञानं विद्यतेऽस्य । ब्रह्मज्ञान + इनि ।) ब्रह्मज्ञानविशिष्टः । यथा,—
"कुशलाकुशलोत्तिरहितः समदर्शकः ।
लिङ्गाश्रमपरित्यागी ब्रह्मज्ञानी निगद्यते ॥"

इति गरुड़रामन्दीपिका ॥

तेनापि लब्धभक्तिः कर्त्तव्या । यथा,—
ब्रह्मानन्देन पूर्णोऽहं तेनानन्देन पूर्णधीः ।
तथापि शून्यमात्मानं मन्ये लब्धरतिं विना ॥"
इति पाद्मे पातालखण्डे जाबालिं प्रति ब्रह्म-
विद्यावचनम् ॥

ब्रह्मण्यः, पुं, (ब्रह्मणे हितः । ब्रह्मन् + "खलयव-मावतिलतृणब्रह्मणश्च ।"५ । १ । ७ । इति यत् ।
"येषाभावकर्म्मणोः ।" ६ । ४ । १६८ । इत्यनुप्रक्षा ।) विष्णुः । यथा, महाभारते १३ । १४६ । ८३ ।
"ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥"
अपि च ।
"ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ।
ब्रह्मण्यः पुष्करीकाक्षो ब्रह्मण्यो विष्णुरच्युतः ॥"

इत्याह्निकचन्द्रिका ॥

ब्रह्मदारुतरुः । इत्यमरः । २ । ४ । ४१ ॥ सल्लक्यम् । तूलतरुः । इति राजनिर्घण्टः ॥

ग्नेश्वरः । (स्त्री । दुर्गा । यथा महाभारते ६ । २२ । २६ ।
"वेदस्मृतिमहापुण्ये ब्रह्मण्ये जातवेदसि ।
जम्बूकटकचैत्येषु नित्यं सन्निहितालये ॥")
ब्रह्मणि साधौ च । इति मेदिनी । ये, ६६ ॥

ब्रह्मण्यदेवः, पुं, (ब्रह्मण्यो देवः ।) श्रीकृष्णः । यथा,—
"नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥"

इति नारदीयपुराणम् ॥

(यथा च भागवते । ४ । २१ । ३७ ।
"ब्रह्मण्यदेवः पुरुषः पुरातनो
नित्यं हरिर्यच्चरणाभिवन्दनात् ॥")

ब्रह्मतालः, पुं, चतुर्मुखतालः । स तु, दशतालात्मकः । तच्च ७ मात्राः । मात्रा तु, क च ट त प इति पञ्चाक्षरोच्चारणसुखारणकालः । सैव लघुमात्रा । तदर्द्धं द्रुतमात्रा । तत्रार्थे ४ लघवः ६ द्रुताः । ०। ०० । ००० । यथा,—
"चतुर्मुखाभिधे तालेऽगणागणन्तरं श्रुतः ॥"

इति सङ्गीतदामोदरः ॥

ब्रह्मतीर्थं, क्ली, (ब्रह्मणस्तीर्थम् ।) पुष्करस्थलम् । इति राजनिर्घण्टः ॥ पुष्करतीर्थञ्च ॥ (तच्च स्नानफलम् । यथा, महाभारते । ३ । ८३ । १०५ ।
"ततो गच्छेत राजेन्द्र ! ब्रह्मणस्तीर्थमुत्तमम् ।
तत्र वर्षावरः स्नात्वा ब्राह्मण्यं लभते नरः ।
ब्राह्मणश्च विशुद्धात्मा गच्छेत परमां गतिम् ॥")

ब्रह्मत्वं, क्ली, ब्रह्मणो भावः । ("ब्रह्मणस्त्वः ।"५ । १ । १२६ । इति त्वः ।) तत्पर्य्यायः । ब्रह्मभूयम् २ ब्रह्मसायुज्यम् ३ । इत्यमरः । २ । ७ । ५२ । ब्रह्मसापूज्यम् ४ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । ५७ । ६० ।
"ब्रह्मत्वममरेशत्वं देवत्वं मरुतस्तथा ॥")

ब्रह्मदण्डः, पुं, (ब्रह्मणो ब्राह्मणस्य दण्डः सिद्धयष्टिः ।) ब्राह्मणयष्टिका । इति शब्दचन्द्रिका ॥ वशिष्ठस्य सिद्धयष्टिः । यथा,—
"धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम् ।
एकेन ब्रह्मदण्डेन हतो नाग्निस्त्रा मम ॥"

इति रामायणे विश्वामित्रवाक्यम् ॥

(ब्रह्मणो ब्राह्मणस्य प्रापरूपो दण्डः ।) ब्रह्मशापः । यथा,—
"ब्रह्मदण्डहता ये च विद्युदग्निहताश्च ये ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥"

इति तिथ्यादितत्त्वम् ॥

(अयं हि राजधर्म्मे भृगुणाग्नेयोपायः । यदुक्तं महाभारते । २ । ५ । १२३ ।
"कश्चिद्दण्डाश्च सर्व्वाश्च ब्रह्मदण्डश्च तेऽनघ ! ।
विषयोगास्तथा सर्व्वे विदिताः भृगुणाग्नना ॥")

ब्रह्मदर्वी, स्त्री, (ब्रह्मणे ब्रह्मोपासनार्थं दर्वी स्रुग्वो दर्वः ।) स्रुक्स्रुवविशेषः । तत्पर्य्यायः । अजदर्वी २ कण्टपत्रफला ३ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । कफगोदानिलापहत्वञ्च ।

इति राजनिर्घण्टः। (यथा गारुडे १८६ अध्याये।
"ब्रह्मदण्डी तु पुष्पेण स्नाने पाने वशीकरा॥")
ब्रह्मदत्तः, पुं, इक्ष्वाकुवंशीयराजविशेषः। तत्पर्य्यायः। ब्रह्मसुतः २। इति हेमचन्द्रः। १। ३५८॥ (यथा महाभारते। २। ८। २०।
"ब्रह्मदत्तस्त्विगर्भश्च राजोपरिचरस्तथा॥"
खनामख्यातो नीपपुत्रः। यथा, भागवते। ६। २१। २५।
पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत्।
स कृत्वा शुककन्यायां ब्रह्मदत्तमजीजनत्॥"
ब्रह्मणा दत्त इति विग्रहे वाच्यलिङ्गः। यथा, रामायणे। १। १८। ३८।
"अमोघा दर्शनेऽस्मै ब्रह्मदत्ता सुतेजसः।
दत्ता मह्यं महेन्द्रेण तूणौ चाक्षयसायकौ॥")
ब्रह्मदर्भा, स्त्री, (ब्रह्मणे हितो दर्भो यस्याः।) यमानिका। इत्यमरः। २। ४। १४५॥ (यथास्याः पर्य्यायः।
"यमानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका।
वैदेशी दीप्यका दीप्या तथा स्वादुरसा कया॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
ब्रह्मदारु, क्ली, (ब्रह्मणो ब्राह्मणस्य हितकरो दारुः।) खनामख्याताश्वत्थाकारवृक्षविशेषः। तत्पर्य्यायः। नूदः २ पूषः ३ क्रमुकः ४ ब्रह्मदारुः ५ तूलम् ६। इत्यमरः। २। ४। ४१॥ पलाशिकम् ७। इति वाचस्पतिः॥ तलम् ८। इति भरतः॥ पूगः ९ यूषः १०। इति शब्दरत्नावली॥ (क्रमुकार्थे पर्य्यायो यथा,
"तूनः स्थूलश्च पूगश्च क्रमुको ब्रह्मदारु च॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
ब्रह्मदेवः, पुं, (ब्रह्मा ब्राह्मणरूपी देवः।) प्रेतयोनिप्राप्तब्राह्मणः। इत्यौणादिकम्॥
ब्रह्मधामन्, क्ली, (ब्रह्मणो ब्रह्मलोकप्राप्तेर्धामेव।) काश्यां चक्रतीर्थस्य पूर्व्वभागे पितामहेश्वरलिङ्गस्थाधस्तीर्थविशेषः यथा,—
"पितामहेश्वरं लिङ्गं ब्रह्मणोपरिस्थितम्।
पूजयित्वा नरो भक्त्या ब्रह्मलोकमवाप्नुयात्॥
ब्रह्मस्रोतःसमीपे तु कृतं कर्म्म शुभाशुभम्।
परामक्षयतामेति शुभमेव ततश्चरेत्॥
अल्पमल्पं यत् कर्म्म कृतमत्र शुभाशुभम्।
प्रलयेऽपि न तस्यास्ति प्रलयो मुनिसत्तम!॥
नाभितीर्थमिदं प्रोक्तं नाभीभूतं यतः क्षितेः।
अपि ब्रह्माण्डगोलस्य नाभिरेषा शुभोदया॥
सा माणिकर्णिकेयं नाभिगामीत्यभूमिका।
ब्रह्माण्डगोलकं सर्व्वं यस्यामेति जयोदयम्॥
ब्रह्मनालं परं तीर्थं त्रिषु लोकेषु विश्रुतम्।
तत्सङ्गमे नरः स्नातः कोटिजन्ममलं हरेत्॥
ब्रह्मनाले प्रतिदृश्येष्वपि कीकसमात्रकम्।
ब्राह्मणब्रह्मप्राप्तास्ते न विघ्नन्ति कदाचन॥"
इति स्कन्दपुराणे काशीखण्डे बिन्दुमाधवबिन्दुसंवादे वैष्णवतीर्थमाहात्म्ये नाम ६१अः॥
ब्रह्मनिर्व्वाण, क्ली, (ब्रह्मणि परब्रह्मे निर्व्वाणं लयः।) ब्रह्मणि निर्वृत्तिः। यथा, श्रीभगवद्गीतायाम्। २। ७२।
"एषा ब्राह्मी स्थितिः पार्थ! नैनां प्राप्य विमुह्यति।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्व्वाणमृच्छति॥"
ब्रह्मपर्ण, क्ली, (ब्रह्मवत्सदाख्यया प्रसिद्धस्य वृक्षस्य पर्ण्णम्। पलाशपत्रम्। यथा,—
"भोजनं ब्रह्मपर्णेषु कथयालोचनं हरेः।
दर्शनं वैष्णवानाञ्च महापातकनाशनम्॥"
इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये १९०अः॥
ब्रह्मपर्णी, स्त्री, (ब्रह्मेव विस्तीर्णानि आमूलं स्थितानि पर्ण्णानि यस्याः।) वृश्चिपर्णी। इति राजनिर्घण्टः॥
ब्रह्मपवित्र, पुं, (ब्रह्मणि वेदोक्तकर्म्मणि पवित्रः।) कुशः। इति राजनिर्घण्टः॥
ब्रह्मपादपः, पुं, (ब्रह्मा तदाख्यया प्रसिद्धः पादपः।) पलाशवृक्षः। इति हेमचन्द्रः। ४। २०२॥
ब्रह्मपुत्रः, पुं, विषभेदः। इत्यमरः। १। ८। १०॥ तस्य लक्षणं यथा,—
"वर्णतः कपिलो यः स्यात्तथा भवति सारकः।
ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले॥"
इति भावप्रकाशः॥
(पर्य्यायोऽस्य यथा,
"काकोली गरलः पुंड्रो वत्सनाभः प्रदीपनः।
शौक्लिकेयो ब्रह्मपुत्रो विषं स्यादृगरलो धिषः॥"
इति वैद्यकरत्नमालायाम्॥
ब्रह्मपुत्रः, पुं, सत्यम्। धर्म्मः १ मरीच्यादिः॥ मनुः। यथा मार्कण्डेये। ६४। ११।
"मन्वन्तरे च दशमे ब्रह्मपुत्रस्य धीमतः।
सुखासीना निरुद्वाश्च निःप्रकाराः सुराः स्मृताः॥"
नारदः। वशिष्ठः।) क्षेत्रभेदः। नदभेदः। इति मेदिनी। रे, २८५॥ ग्रैवस्य पर्य्यायः। अमोघाबन्धः २ लौहित्यः ३ लोहितः ४। इति शब्दरत्नावली॥ * ॥ अस्य नदस्योत्पत्तिमाहात्म्ये यथा,—
सगर उवाच।
"अमोघायां कथं जज्ञे लौहित्यो ब्रह्मणः सुतः।
कथं शान्तनुभार्य्यायां रेतः स कमलासनः॥
पारस्यैवेयपुत्रे वा कथं जज्ञे पितामहात्।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम!॥
और्व्व उवाच।
शृणु त्वं नृपशार्दूल! कथयामि महत्तरम्।
आख्यानं ब्रह्मपुत्रस्य लौहित्यस्य महात्मनः॥
हरिवर्षे महावर्षे शान्तनुर्नाम नामतः।
मुनिरासीन्महाभागो ज्ञानवान् सुतपोधनः॥
तस्य भार्य्या महाभागा अमोघाख्या महासती।
हिरण्यगर्भस्य मुनेस्तृतृहन्द्राश्रमोद्भवा॥
तया सार्द्धं स कैलासमर्य्यादापर्व्वतेऽवसत्।
लौहित्याख्ये सरस्तीरे वै गन्धमादने॥
एकदा स तपोनिष्ठो निजपृष्ठादिगोचरे।
जगाम वनमध्यस्तु चिन्वन् बहुफलानि च॥
तस्मिन्नवसरे ब्रह्मा सर्व्वलोकपितामहः।
तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया॥
तां दृष्ट्वा देवगर्भाभां युवतीमतिसुन्दरीम्।
मोहितो मदनेनासु तथाभूद्धृषितेन्द्रियः॥
उदीरितेन्द्रियो भूत्वा जिघृक्षुस्तां महासतीम्।
अथाधावत्तदा ब्रह्मा सम्मुखो मदनार्दितः॥
धावमानं विधातारं दृष्ट्वामोघा महासती।
मैवं मैवमिति प्रोक्ता पर्य्यशाला जलीयत॥
इदमोचाच धातारममोघा कुपिता तदा।
पर्य्यशालान्तरगता द्वारमाश्रित्य तत्क्षणात्॥
अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम्।
बलात् प्रमथ्या चाहं तत्रया त्वाच शपाम्यहम्॥
अमोघया चैवमुक्ते विधातुश्च तदा नृप!।
रेतश्चस्कन्द च तदैवाश्रमे शान्तनोर्मुनेः॥
क्षुते रेतसि धातापि हंसयानं समास्थितः।
लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ॥
गते वेधसि शान्तनुर्निजमाश्रममागतः।
आगत्य दृष्ट्वा हंसानां पदचोभं तथा भुवि॥
तेजश्च पतितं भूमौ विधातुर्ज्वलनोपमम्।
अमोघां परिपप्रच्छ पर्य्यशालान्तरस्थिताम्॥
किमेतत्र सुभगे! प्रवृत्तं दृश्यते तु यत्।
पक्षिणाञ्च पदचोभस्तेजश्चैव कीदृशम्॥
सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम्।
अमर्षितेव त्यगदद्राकुला विकलानना॥
हंसयुक्तस्यन्देन कोऽप्यागत्य चतुर्मुखः।
कमण्डलुकरो भीरु रतिं मां समयाचत॥
ततो मया भर्तृहितः स कुटज्ञान्तरलीनया।
प्रधाव्य तेजः स यातो मया शापभयार्दितः॥
कुरु तत्र प्रतीकारं यदि शक्नोषि शान्तनो!।
न हि मां धर्षयां सोढुं कश्चित् शक्नोति जीवभृत्॥
स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः।
इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत्॥
दिव्यज्ञानेन स ज्ञात्वा देवकार्य्यमुपस्थितम्।
तीर्थावतारणञ्चापि हिताय जगतां मुनिः।
ज्ञात्वोर्द्धं चिन्तयित्वा स्वभार्य्यामिदमब्रवीत्॥
इदं तेजो ब्रह्मणस्तं पिताऽमोघे! ममाज्ञया।
हिताय सर्व्वजगतां देवकार्य्यार्थसिद्धये॥
भवत्या निकटं ब्रह्मा स्वयमेव समागतः।
तामप्राप्य स महात्मा आवयोः स समर्थ्य च।
गतो निजाश्रमं तत्त्वं कर्त्तुमर्हसि मद्वचः॥
तत् श्रुत्वा शान्तनोर्वाक्यममोघातीव लज्जिता।
शान्तयन्तीव तं प्राह पतिं नत्वा महासती॥
गान्धस्य तेजो धास्यामि न चेत् विमनस्कता।
अवश्यं यदि कर्त्तव्यं प्रीत्या त्वं मयि चोत्तमम्॥
ततस्तस्या वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः।
स्वयं प्रीत्या च तत्तेजस्तस्या गर्भे यशेचयत्॥
संक्रामितेः शान्तनुना तेजोभिर्ब्रह्मणः सती।
गर्भं दधानामोघाख्या हिताय जगतां ततः॥
तस्यां काले तु संप्राप्ते संजातो जलसञ्चयः।
तन्मध्ये तनयश्चापि गौरवर्णः किरीटधृक्॥

रत्नमालासमायुक्तो रक्तगौरश्च ब्रह्मवत् ।
चतुर्भुजः पद्मविद्यावरशक्तिधरस्तथा ।
शिशुमारशिरस्थश्च तुल्यकायो जलोत्करैः ॥
तं ज्ञात्वा तथाभूतं ध्यानतुर्लोकध्यानतः ।
चतुर्णां पर्वतानाञ्च मध्यदेशे न्यवेशयत् ॥
कैलासश्चोत्तरे पार्श्वे दक्षिणे गन्धमादनः ।
जारुधिः पश्चिमे शैलः पूर्व्वे सम्बर्त्तकाक्षयः ॥
तेषां मध्ये स्वयं कुण्डं पर्व्वतानां विधेः सुतः ।
कृत्वातिवृत्ते नित्यं शुरदीव निशाकरः ॥
तं तोयमध्यगं पुत्रमासाद्य दक्षिणः स्वयम् ।
क्रमतस्तस्य संस्कारानकरोद्दक्षशुद्धये ॥
अथ काले बहुतिथे यतीते ब्रह्मणः सुतः ।
तोयराशिस्वरूपेण वृद्धे पद्म योजनात् ॥
तस्मिन् दैवात् पशुः सम्भुर्दैतीय इव सागरे ।
शीतामलजले हृद्ये दैत्यक्षारसां गते ॥
तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान् ।
चक्रे मातृवधं घोरमात्मयं पितुराज्ञया ॥
तस्य पापस्य मोक्षाय स्वपितुस्तोषदेशतः ।
स जगाम महाकुण्डं ब्रह्मार्थं स्नातुमिच्छया ॥
तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत् ।
वीर्यं परशुना कृत्वा तत्र स्नानवतारयत् ॥*॥
अपि च ।
ब्रह्मकुण्डात् स्रुतः सोऽथ कासारे लोहितार्द्रके ।
कैलासोपत्यकायान्तु न्यपतद्ब्रह्मणः सुतः ॥
तस्मादपि सरस्तीरं समुत्थाय महाबलः ।
कुठारेण दिशं पूर्व्वामनयद्ब्रह्मणः सुतम् ॥
ततोऽपरत्रापि गिरिं हैमशृङ्गं विभिद्य च ।
कामरूपान्तरं पीठमवाप्तवदमुं हरिः ॥
तस्य नाम विधिश्चक्रे स्वयं लौहितगङ्गकम् ।
लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत् ॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा ।
शोषयन् सर्व्वतीर्थानि दक्षिणं याति सागरम् ॥
प्रागेव दिव्ययमुनां स त्यक्त्वा ब्रह्मणः सुतः ।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् ॥*॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात् ॥"
इति कालिकापुराणे ८४ । ८५ अध्यायः ॥
अन्यच्च ।
मौने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीम् ।
पिबेदशोककलिकाः स्नायाल्लौहित्यवारिणि ॥
पुनर्व्वसौ वृषे लग्ने चैत्रे मासि सिताष्टमीम् ।
लौहित्ये विरजे स्नायात् सर्व्वपापैः प्रमुच्यते ॥*॥
स्नानमन्त्रो यथा,—
"पृथिव्यां यानि तीर्थानि सरितः सागरादयः ।
सर्व्वे लौहित्यमायान्ति चैत्रे मासि सिताष्टमीम् ॥
ब्रह्मपुत्र महाभाग शान्तनोः कुलनन्दन ! ।
अमोघगर्भसम्भूत पापं लौहित्य मे हर ।"
इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥

ब्रह्मपुत्री, स्त्री, (ब्रह्मणः पुत्री कन्या ।) सरस्वती नदी । इति हेमचन्द्रः । ४ । १५१ ॥ वाराहीकन्दः । इति राजनिर्घण्टः ॥
ब्रह्मपुरी, स्त्री, (ब्रह्मणः पुरी ।) विधातुर्धाम । यथा । भूलोकान्तरीक्षस्वर्गलोकादि ब्रह्माण्डोदरवर्त्ति च ब्रह्मपुरीनामकं त्रैलोक्यस्वरूपं मम हृदयमध्ये वाह्ये च सूर्य्यमण्डलमध्यवर्त्ति तेजसा स एकीभूतं ज्योतिरहमिति चिन्तयन् जपं कुर्य्यात् । इति गायत्रीव्याख्या ॥ * ॥ काशी । यथा,—
"विद्याप्रबोधोदयजन्मभूमि-
र्वाराणसी ब्रह्मपुरी दुरत्यया ॥"
इति प्रबोधचन्द्रोदयनाटकम् ॥
ब्रह्मबन्धुः, पुं, (ब्रह्मणो बन्धुरिव ।) अधिक्षेपः । निन्दितब्राह्मणः । निर्द्देशः । अव्यात्मनामकब्राह्मणः । इत्यमरः । ३ । ३ । १०३ ॥ तथा हि । अधिक्षेपे निन्दायां गम्ये अधिक्षेप्यो ब्रह्मबन्धुः । यथा ब्रह्मबन्धो ! किमेतत्ते इति । अधिक्षिप्यतेऽसौ अधिक्षेपोऽधिक्षेप्यः कर्म्मणि घञ् वा । ब्रह्मैव बन्धुरस्य नान्यः । ब्रह्मकर्म्माभावात् निन्द्या अधिक्षेपे समासोऽभिधानात् । ब्रह्मबन्धुः निर्द्देशे यस्य देवादेर्नाम न गृह्यते स ब्रह्मबन्धुरितिनिर्द्दिश्यते इत्यर्थः । स्त्रियां ("ऊङुतः ।"४ । १ । ६६ । इति ऊङ् ।) ब्रह्मबन्धूः । ब्रह्मबन्धुर्ब्राह्मणजातिविशेषे च । ब्राह्मणजातिविशेषे निर्द्देशे ब्रह्मबन्धुरधिक्षेपे इति वोपालितः । इति भरतः ॥*॥ (यथा, मार्कण्डेये । ७५ । ६० ।
"ब्रह्मबन्धोः सुता न त्वं बाले ! नैव तपस्विनः ।
सुता त्वं मम यो देवान् कर्त्तुमन्यान् समुत्सहे ॥")
तस्य दैहिकवधनिषेधो । यथा, भागवते १ स्कन्धे ।
"वपनं द्रविणादानं स्थानान्निर्य्यापणन्तथा ।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥"
ब्रह्मभूतिः, स्त्री, (ब्रह्मणो भूतिरङ्गसम्पदिव भूतिर्यस्याः ।) सन्ध्या । इति शब्दरत्नावली ॥ (ब्रह्मणो भूतिरुत्पत्तिर्यस्या इति विग्रहे वाचस्पतिलिङ्गः ॥)
ब्रह्मभूमिजा, स्त्री, (ब्रह्मभूमेर्जायते या । ब्रह्मभूमि + जन + ड । टाप्) सिंहली । इति राजनिर्घण्टः ॥
ब्रह्मभूयं, क्ली, (ब्रह्मणो भावः । ब्रह्म + भू + "भुवो भावे ।" ३ । १ । १०७ । इति क्यप् ।) ब्रह्मत्वम् । इत्यमरः । २ । ७ । ५२ ॥ (यथा मनुः । १२ । १०२ ।
"वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥"
"अस्मिन्नेव लोके तिष्ठन् ब्रह्मभूयाय ब्रह्मत्वाय कल्पते ।" इति तट्टीकायां कुल्लूकभट्टः ॥
मोक्षः । यथा गीतायाम् । १४ । २६ ।
"मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥"
"ब्रह्मभूयाय दृश्यभावाय मोक्षायावकल्पते समर्थो भवति ।" इति तट्टीकायां स्वामी ॥)
ब्रह्ममूर्द्धभृत्, पुं, (ब्रह्मणो मूर्द्धभृत् शिरोभूषणमिव ।) शिवः । इति वटुकभैरवस्य वकारादिसहस्रनामान्तर्गतनाम ॥
ब्रह्ममेखलः, पुं, (ब्राह्मणां ब्रह्मज्ञानां मेखला पुंवद्भावः ।) मुञ्जः । इति केचित् ॥
ब्रह्मयज्ञः, पुं, (ब्रह्मणो ब्रह्मणे वा यज्ञः ।) विधिना वेदस्याध्ययनम् । शिष्याणामध्यापनञ्च । इत्यमरभरतौ ॥ यथा, मनौ । ३ । ७० ।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"
ब्रह्मयष्टिः, स्त्री (ब्रह्मणो यष्टिरिव ।) भार्गी । इति शब्दरत्नावली ॥ (वृक्षविशेषः । यथा, गारुडे १६२ अध्याये ।
"ब्रह्मयष्टिफलं पिष्टं वारिणा तेन लेपतः ।
तेन दृष्टं रक्तदोषः प्रणश्यति न संशयः ॥")
ब्रह्मयोनिः, पुं, (ब्रह्मणो योनिरुत्पत्तिस्थानम् ।) ब्रह्मगिरिः । इति शब्दरत्नावली ॥ (ब्रह्मप्राप्तिकारणब्रह्मध्यानम् । यथा मनुः । १० । ७४ ।
"ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिता ।
ते सम्यगुपजीवेयुः षट् कर्म्माणि यथाक्रमम् ॥"
"ये ब्राह्मणा ब्रह्मप्राप्तिकारणब्रह्मध्याननिष्ठाः स्वकर्म्मानुष्ठाननिरताश्च ते षट्कर्म्माणि वक्ष्यमाणान्यध्यापनादीनि क्रमेण सम्यगनुतिष्ठेयुः ॥" इति तट्टीकायां कुल्लूकभट्टः ॥ अपरस्य ब्रह्मणो योनिरुत्पत्तिकारणम् । यद्वा ब्रह्म सत् योनिः सर्व्वेषासुत्पत्तिकारकं ब्रह्म । यथा, मुण्डकोपनिषदि । ३ । १ । ३ ॥
"यदा पश्यः पश्यते रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ॥"
तीर्थविशेषः । यथा महाभारते । ३ । ८३ । १३१ ।
"ब्रह्मयोनिं समासाद्य शुचिः प्रयतमानसः ।
तत्र स्नात्वा नरव्याघ्र ! ब्रह्मलोकं प्रपद्यते ॥"
ब्रह्मा योनिरुत्पत्तिकारणं यस्य इति विग्रहे वाचस्पतिलिङ्गः । यथा रघौ । १ । ६४ ।
"त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
सानुबन्धा कथं न स्युः सम्पदो मे निरापदः ॥"
यथा च मार्कण्डेये । २३ । ३० ।
जगद्धात्रीमहं देवीं साविराधयिषुः शुभाम् ।
स्तोष्ये प्रणम्य शिरसा ब्रह्मयोनिं सरस्वतीम् ॥")
ब्रह्मयोनी, स्त्री, (ब्रह्मा योनिरुत्पत्तिकारणं यस्याः । स्त्रियां पक्षे ङीप् ।) कुरुक्षेत्रे सरस्वतीतीरे एथूदकनिकटे तीर्थविशेषः । तत्र ब्रह्मणा चत्वारो वर्णाः सृष्टाः । यथा,—
"सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम् ।
एथूदके जप्यपरो नैनं श्वो मरणं लभेत् ।
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिताः ।
एथूदकं समाश्रित्य सरस्त्यास्तटे स्थितः ॥
चतुर्व्वर्गस्य सृष्ट्यर्थमात्मज्ञानपरोऽभवत् ।
तस्याभिध्यायतः सृष्टिर्ब्रह्मणोऽव्यक्तजन्मनः ॥

मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रिया-
स्तथा ।
ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन् ॥
चातुर्व्वर्ण्यं ततो दृष्ट्वा आश्रमस्थान् सुतांस्ततः ।
एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीतिसंज्ञितम् ॥
तत्र स्नात्वा सुक्तिकामः पुनर्योनिं न पश्यति ।"
इति वामनपुराणे ३८ अध्यायः ॥

ब्रह्मरन्ध्रं, क्ली, (ब्रह्मणः परमात्मनः अधिष्ठानाय-
रन्ध्रं आकाशः यद्वा, ब्रह्मणे ब्रह्मप्राप्तये रन्ध्रम् ।
एतद्रन्ध्रेण प्राणोत्क्रमणे ब्रह्मलोकप्राप्तेरस्य
तथात्वम् ।) उत्तमाङ्गम् । ब्रह्मतालु इति भाषा ।
यथा । ॐ नमः ब्रह्मरन्ध्रं । इति तन्त्रसारः ॥
अपि च । ब्रह्मरन्ध्रसरसीरुहोदरे इत्यादि
गुरुपादुकास्तोत्रम् ॥ (यथा च हठयोग-
प्रदीपिकायाम् । ४ । १६ ।
"श्रुत्वा सुषुम्नासङ्केतं त्यक्त्वा वायुञ्च मध्यगम् ।
स्थित्वा सदैव सुस्थाने ब्रह्मरन्ध्रं निरोधयेत् ॥")

ब्रह्मराजः, पुं, (राज्ञेरयं राजः । ब्रह्मणो राजः ।)
ब्राह्मसुकूर्मः । इति श्रीधरस्वामी ॥ यथा,—
"ब्रह्मराज उपाकृत्य वासुदेवानुमोदिताः ।
अनिच्छन्त्यो युयुर्गोप्यः स्वगृहान् भगवत्प्रियाः ॥"
इति श्रीभागवते । १० । ३३ । ४६ ॥

ब्रह्मरातिः, पुं, याज्ञवल्क्यमुनिः । इति हेमचन्द्रः ॥
ब्रह्मज्ञानं राति ददाति यः । ब्रह्मशब्दात्
राधातोर्नन्धीति क्विप्रत्ययनिष्पन्नोऽयम् । इति
तट्टीका ॥ ब्रह्मणो निशायां स्त्री । सा दैव-
सहस्रयुगेन भवति । इति पुराणम् ॥ (मनुष्य-
कालपरिमाणतो ब्रह्मणो रात्रिपरिमाणमुच्यते ।
नेत्रपरिस्पन्दनकालो निमेषः । अष्टादशनिमे-
षास्तु काष्ठा । त्रिंशत् काष्ठास्तु कला । त्रिंशत्
कलास्तु क्षणः । क्षणास्तु द्वादश मिलित्वा एको
मुहूर्तः ।
"तास्तु त्रिंशत्क्षणास्ते तु मुहूर्त्तो द्वादशा-
ख्रियाम् ॥"
इत्यमरः । १ । ४ । ११ ॥
मनुमत तु त्रिंशत्कला मिलित्वा एको मुहूर्तः
स्यात् यदुक्तं तत्रैव । १ । ६४ ।
"त्रिंशत्कला मुहूर्तः स्यादहोरात्रन्तु तावतः ॥"
ते त्रिंशन्मुहूर्त्ता एकोऽहोरात्रः । अहो-
रात्रास्तु पञ्चदशसंख्यका एकः पक्षः । पक्षस्तु
शुक्लकृष्णभेदात् द्विविधः । ताभ्यामुभाभ्यां
पक्षाभ्यां मासः स्यात् । मासस्तु पित्र्ये रात्रा-
हनी । कृष्णपक्षस्तु पितृणामहः शुक्लपक्षस्तु
गर्ब्बरी । षड्भिर्मासैरयनं भवेत् । अयनन्तु
दक्षिणोत्तरभेदात् द्विविधम् । ताभ्यामयनाभ्यां
वत्सरः स्यात् । वत्सरस्तु दैवे रात्राहनी ।
उत्तरायणं देवानामहः दक्षिणायनन्तु रात्रिः ।
मानुषाणां यत्कृतादियुगचतुष्टयं तदैव युगं
ज्ञेयम् । एवं दैवयुगसहस्रेण ब्रह्मणोऽहः
दैवयुगसहस्रेण च रात्रिर्भवति । तथा च
मनौ । १ ७१ । श्लोकस्य टीकायां कुल्लूकभट्टः ।
"विष्णुपुराणे मानुषचतुर्युगसहस्रेण ब्रह्माह-
र्कीर्त्तनान्मानुषचतुर्युगेनैव दिव्ययुगागमनात् ।
तथा च विष्णुपुराणम् ।
"कृतं त्रेतादापरञ्च कलिश्चेति चतुर्युगम् ।
प्रोच्यते तत्सहस्रन्तु ब्रह्मणो दिवसो मुने ! ॥"
तथा च मनुः । १ । ६८-७३ ।
"ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः ।
एकैकशो युगानान्तु क्रमशस्तन्निबोधत ॥
चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥
यदेतत्परिसंख्यातमादावेव चतुर्युगम् ।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥
दैविकानां युगानान्तु सहस्रं परिसंख्यया ।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च ॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः ।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदो जनाः ॥"
"यदेतदिति । एतस्य श्लोकस्यादौ यदेतन्मानुषं
चतुर्युगं परिगणितं एतदेवानां युगमुच्यते ।
चतुर्युगशब्देन सन्ध्यासन्ध्यांशयोरप्राप्तिशङ्कायाम-
ाह एतद्द्वादशसाहस्रमिति स्वार्थेऽण् । चतु-
र्युगैरेव द्वादशसहस्रसंख्यैर्दिव्यं युगमिति तु
मेधातिथेर्भ्रमो नादरणीयः मनुनानन्तरं दिव्य-
युगसहस्रेण ब्राह्मस्याप्यभिधानात् ॥" इति
तट्टीकायां कुल्लूकभट्टः ॥)

ब्रह्मराक्षसः, पुं. (आदौ ब्रह्मा ब्राह्मणः पश्चात्
राक्षसः कुकर्म्मभिः राक्षसयोनिं गतः ।)
भूतविशेषः । यथा,—
"संयोगं पतितैर्गत्वा परस्त्रीञ्च योषितम् ।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ॥"
इति मानवे । १२ । ६० ॥
(स च यज्ञविनाशकारी भूतयोनिगतत्वात् ।
यथा, रामायणे । २ । ११ । ११ ।
"ग्रक्षोऽवाप्तमयं यज्ञो न।शर्त्तव मही चिता ।
नचेदाश्रद्धानेन न चाल्पद्रविणेन च ॥
क्षिप्रं हि ग्रसयन्त्येव यज्ञघ्नं ब्रह्मराक्षसाः ॥")
महादेवस्य गणविशेषः । यथा,—
"डाकिनीर्जातुधानांश्च वेतालान् सविनायकान् ।
भूतमातृपिशाचांश्च कुष्माण्डान् ब्रह्मराक्ष-
सान् ॥"
इति श्रीभागवते वायुयुद्धे ६३ अध्यायः ॥
पारिभाषिकब्रह्मराक्षसाः । यथा,—
"गर्ब्बः स्त्री कच्छपश्चैव वाजी वधिर एव च ।
यद्दीतार्थं न गृह्णन्ति पञ्चैते ब्रह्मराक्षसाः ॥"
इति व्यवहारप्रदीपः ॥

ब्रह्मरीतिः, स्त्री, (ब्रह्मवर्च्चा रीतिः ।) पित्तलभेदः ।
यथा, हेमचन्द्रः । ४ । ११४ ॥
"पित्तलारोऽथारकूटः कपिलोऽहं सुवर्णकम् ।
रिरी रीरी च रीतिश्च पीतलोऽहं सुलोहकम् ॥
ब्राह्मी तु राज्ञी कपिला ब्रह्मरीतिर्महेश्वरी ॥"
राजरीतिः । इति राजनिर्घण्टः ॥ (तथास्याः
पर्य्यायान्तरम् ।
"पित्तलन्त्वारकूटं स्याद्दारोरीतिश्च कथ्यते ।
राजरीतिर्ब्रह्मरीतिः कपिला पिङ्गलापि च ॥"
इति वैद्यकरत्नमालायाम् ।
ब्रह्मणो ब्राह्मणस्य रीतिश्च ॥)

ब्रह्मर्षिः, पुं, (ब्रह्मा ब्राह्मणः ऋषिः । यद्वा,
ब्रह्म वेदं परब्रह्म वा ऋषति वेत्ति इति । बाहु-
लादिसुनिगमः । इति हेमचन्द्रः ॥ (यथा,
रामायणे । १ । ६३ । २०—२१ ।
"ब्रह्मण्यस्तु वचः श्रुत्वा विश्वामित्रस्तपोधनः ।
प्राञ्जलिः प्रणतो भूत्वा प्रत्युवाच पितामहम् ॥
ब्रह्मर्षिशब्दमतुलं स्वार्जितैः कर्म्मभिः शुभैः ।
यदि मे भगवान्नाह ततोऽहं विजितेन्द्रियः ॥"
तथा च महाभारते । १३ । १६ । ६० ।
"ततो वैश्रवणोऽभ्येत्य अहावक्रमनिन्दितम् ।
विधिवत् कुशलं पृष्ट्वा ततो ब्रह्मर्षिमब्रवीत् ॥")

ब्रह्मर्षिदेशः, पुं, (ब्रह्मर्षीणां देशः वासयोग्य-
स्थानम् ।) कुरुक्षेत्रादिदेशचतुष्टयम् । यथा,
"कुरुक्षेत्रञ्च मत्स्याश्च पाञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः ।
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवाः ॥
इति मानवे । २ । १६-२० ॥

ब्रह्मलोकः, (ब्रह्मणो लोको भुवनम् ।) ब्रह्मणो
भुवनम् । यथा,—
"सत्यन्तु सप्तमो लोको ह्यपुनर्भववासिनाम् ।
ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः ॥"
इति देवीपुराणम् ॥
अपि च ।
"षड्गुणेन तपोलोकात् सत्यलोको विराजते ।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः ॥"
अस्य टीका । जनलोकापेक्षयैव षड्गुणेन
द्वादशको ह्युच्छ्रायेण तपोलोकानन्तरं सत्य-
लोकः । न तु तपोलोकात् षड्गुणेनेति मन्त-
व्यम् । तथासत्यश्चत्वारिंशत्को ह्युच्छ्राय-
त्वेन ब्रह्माण्डे तस्यावकाशाभावात् । सूर्य्यम-
ण्डलयोरन्तः कोट्यः स्युः पञ्चविंशतिरिति
शुकोक्तेः । सत्यलोक एव कलाभेदेन ब्रह्म-
धिष्ण्यात् परं वैकुण्ठलोकादि ज्ञेयम् । एवञ्च
भूतलादूर्द्धं यद्दशगुणोत्तराण्यर्वाग्विंशतिकोट्यो
भवन्ति । सत्यलोकादूर्द्धञ्च यद्दशगुणोनको-
टिद्वयादण्डकटाह इति ज्ञेयम् । अपुनर्मारकाः
पुनर्जन्मशून्याः । इति विष्णुपुराणे । २ अं । ७ अः ॥
(ब्रह्मण एव लोकः । तुरीयब्रह्मस्वरूपम् । यदुक्तं
श्रुतपथब्राह्मणे । १४ । ७ । १ । ३१ ।
"एषोऽस्य परमो लोक एषोऽस्य परम आनन्द
एतस्यैवानन्दस्याण्यानि भूतानि मात्रामुप-
जीवन्ति । स यो मनुष्याणां राद्धः समृद्धो
भवति । अन्येषामधिपतिः सर्व्वैर्मानुष्यकैः
कामैः सम्पन्नतमः स मनुष्याणां परम
आनन्दः । अथ ये शतं मनुष्याणामानन्दाः ।
स एकः पितॄणां जितलोकानामानन्दः । अथ
ये शतं पितॄणां जितलोकानामानन्दाः स एक

कर्म्मदेवानामानन्दः ये कर्म्मजा देवत्वमभिसम्पद्यन्ते अथ ये घृतं कर्म्मदेवानामानन्दाः। स एक आजानदेवानामानन्दो यच्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये घृतं आजानदेवानामानन्दाः। स एको देवलोक आनन्दो यच्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये घृतं देवलोक आनन्दाः। स एको गन्धर्वलोक आनन्दो यच्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये घृतं गन्धर्वलोक आनन्दाः। स एकः प्रजापतिलोक आनन्दो यच्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये घृतं प्रजापतिलोक आनन्दाः। स एको ब्रह्मलोक आनन्दो यच्च श्रोत्रियोऽवृजिनोऽकामहतः। एषः ब्रह्मलोकः सम्राट्। शिवः यथा, महाभारते। १३। १७। १४२।
"निर्व्वाणं ब्राह्मणैश्चैव ब्रह्मलोकः परागतिः॥")

ब्रह्मवद्यं, क्ली, (ब्रह्म वेदस्य वदनम्। "वद सुपि क्यप् च।" ३। १। १०६। इति भावे यत्।) ब्रह्मणो वाक्यम्। इति ह्यप्रकरणे सुग्धबोधटीकायां दुर्गादासः॥

ब्रह्मवद्या, त्रि, (ब्रह्मणा वेदेन उद्यते वा। "वदः सुपि क्यप् च।" ३। १। १०६। इति कर्म्मणि यत् स्त्रियां टाप्।) कथा। इति सुग्धबोधव्याकरणे स्त्रीप्रकरणम्॥

ब्रह्मवर्च्चसं, क्ली, (ब्रह्मणो वेदस्य तपसो वा वर्च्चसेव। "ब्रह्महस्तिभ्यां वर्च्चसः।" ५। ४। ७८। इति अच्।) ब्राह्मणस्य वृत्ताध्ययनर्द्धिः। इत्यमरः। २। ७। ३६॥ अस्य टीका। वेदबोधितसदाचारस्य परिपालनं वृत्तम्। व्रतयज्ञपूर्व्वकं गुरुमुखेन वेदाभ्यासोऽध्ययनम्। तयोर्द्वितृपरिपालनजनितस्तेजस उपचयो ब्रह्मवर्च्चसं स्यात्। ब्रह्मश्चिरात्रेति अः। इति भरतः॥ तपःस्वाध्यायजं यच्च तेजस्तु ब्रह्मवर्च्चसम्। इति जटाधरः॥ (तथा च मनुः। ४।६३।
"ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः।
प्रज्ञां यशश्च कौर्त्तिञ्च ब्रह्मवर्च्चसमेव च॥")

ब्रह्मवर्त्तः, पुं, (ब्रह्मणां ब्राह्मणानां वर्त्तः वर्त्तनं यस्मिन्।) ब्रह्मावर्त्तदेशः। इति शब्दरत्नावली॥ (सरस्वतीदृषद्वत्योर्देवनद्योर्मध्यगतोऽयं प्रदेशः॥)

ब्रह्मवर्द्धनं, क्ली, (ब्रह्मवत्तपसो वर्द्धनं यस्मात्।) ताम्रम्। इति हेमचन्द्रः। ३। १०६॥

ब्रह्मवादः पुं, (ब्रह्मणो वेदस्य वादो वदनं पठनमिति यावत्।) वेदपाठः। तत्पर्य्यायः। श्रुताध्ययनम् २। इति शब्दरत्नावली। २२१॥ (यथा भागवते। ३। २२। ६२।
"दृष्ट्वातिमात्रं ब्रह्मवादे आत्मवत्से स्वयं हरिः॥")
ब्रह्मणो ब्रह्मनिर्व्वयस्य वादः कथनमिति विग्रहे ब्रह्माधिकारेण तत्त्वनिर्व्वयवाक्यम्। ब्रह्मवादो वेदपाठोऽस्यास्तीति ब्रह्मवादिनिर्द्दिष्टे, त्रि। यथा. हरिवंशे। ८२। ३३।
"ब्राह्मणैर्ब्रह्मवादैश्च पुराणोऽयं हि गीयते॥")

ब्रह्मवादी, [न्] पुं, (ब्रह्मवादो वेदपाठोऽस्यास्तीति। ब्रह्मवाद+इनि।) वेदवक्ता। तत्पर्य्यायः। वेदाज्ञी २। इति जटाधरः॥ यथा, गीतायाम्। १७। २४।
"तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥")

ब्रह्मवादिनी, स्त्री, गायत्री। यथा,—
"आयाहि वरदे देवि! त्र्यक्षरे ब्रह्मवादिनि!॥"
इत्यादि गायत्र्या आवाहनम्॥

ब्रह्मविद्या, स्त्री, (ब्रह्मणो ब्रह्मविषयिणी या विद्या।) ब्रह्मज्ञानम्। यथा,—
"न्यायागतधनः शुद्धो ब्रह्मविद्यापरायणः।
स्वधर्म्मपालको नित्यं सोऽतिथेयाय कल्पते॥"
इति कौर्म्मे २ अध्यायः॥
(दुर्गा। यथा, महाभारते। ६। २२। २७।
"त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम्।
स्कन्दमातर्भगवति! दुर्गे कान्तारवासिनि!॥")

ब्रह्मविन्दुः, पुं, (ब्रह्मणो विन्दुः।) वेदपाठे सुखनिर्गतविन्दुः। इति भरतः॥

ब्रह्मवृक्षः, पुं, (तदाख्यया प्रसिद्धो वृक्षः। यद्वा, ब्रह्मणे वेदकर्म्मार्थं यो वृक्षः।) पलाशवृक्षः। इति हलायुधः॥ उडुम्बरः। इति रत्नमाला॥

ब्रह्मवृत्तिः, स्त्री, (ब्रह्मणो ब्राह्मणस्य वृत्तिर्जीवनोपायः।) ब्राह्मणस्य जीवनोपायः। यथा,—
"स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥"
इति श्रीभागवतम्॥

ब्रह्मवेदः, पुं, (ब्रह्मणो वेदः ज्ञानम्।) ब्रह्मज्ञानम्। यथा,—
"प्राजापत्यः परं ब्रह्म परमात्मा चतुर्मुखः।
प्राजापत्यः परं विष्णोर्ब्रह्मवेदस्वरूपकम्॥"
इति गीतासारः॥

ब्रह्मवेदिः, स्त्री, (ब्रह्मणो वेदिरिव।) देशविशेषः। यथा,—
"ब्रह्मवेदिः कुरुक्षेत्रं मत्स्यरामह्रदान्तरम्॥"
इति हेमचन्द्रः। ३। २६॥

ब्रह्मवैवर्त्तं, क्ली, (विवृतिरेव वैवर्त्तम्। स्वार्थे अण्। ब्रह्मणो वैवर्त्तं विवर्त्तोयत्र।) यथा च ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १। ५८।
"विवृतं ब्रह्म कार्त्स्न्येन यत्रोक्तं यत्र शौनक!।
ब्रह्मवैवर्त्तकं तेन प्रवदन्ति पुराविदः॥")
अष्टादशमहापुराणान्तर्गतदशमपुराणम्। यथा,
"अष्टादशसहस्रञ्च ब्रह्मवैवर्त्तमीरितम्।
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२२ अः॥

ब्रह्मशाकः, पुं, (ब्रह्मेव शाकं शुल्यमग्रभागो यस्य। अतिलघ्वायत्वात्तथात्वम्।) सोमवल्कः। इति रत्नमाला॥ बावला इति भाषा॥

ब्रह्मशासनं, क्ली, (ब्रह्मणः शासनं निर्व्वयो उपदेशो वा यस्मिन्।) ब्रह्मविचारग्रन्थम्। तत्पर्य्यायः। धर्म्मकौलकः २। इति शब्दरत्नावली॥ ब्रह्मशाखा॥ नवद्वीपस्य पूर्व्वदक्षिणकोणे गङ्गापारे ग्रामविशेषे, पुं॥ (ब्रह्मणो विधातुः शासनम्। वेदः॥ प्रतिपादितमेतत् वृहन्नारदीये ४ पादे १०१ अध्याये॥)

ब्रह्मसंहिता, स्त्री, (ब्रह्मणः संहिता।) भगवत्सिद्धान्तसंग्रहग्रन्थविशेषः। यथा,—
"अध्यायशतसम्पन्ना भगवद्ब्रह्मसंहिता।
सर्व्वोपनिषदां सारैः सङ्गिता ब्रह्मणोदिता॥"
इति ब्रह्मसंहितायां भगवत्सिद्धान्तसंग्रहे मूलसूत्राख्यपञ्चमाध्यायस्य जीवगोस्वामिप्रतटीका॥

ब्रह्मसम्भवः, पुं, द्विपृष्ठनामकैकविंशेषः। इति हेमचन्द्रः॥

ब्रह्मसर्षः, पुं, (ब्रह्म वृहान् सर्षः।) सर्षविशेषः। तत्पर्य्यायः। हलाहलः २ अम्बलाला ३। इति त्रिकाण्डशेषः॥

ब्रह्मसायुज्यं, क्ली, (युनक्तीति युजः। "दृशुधेति।" ३। १। १६५। कः। ततः "तेन सहेति।" २। २। २८। इति बहुव्रीहिः। "बोपसर्जनस्य।" ६। ३। ८२। इति सहस्य सः। ततः सयुजस्य भावः सायुज्यं। यद्वा, योजयतीति युक् सम्पदादित्वात् क्विप्। ततो बहुव्रीहिरन्तः सयुजो भावः। ततः ब्रह्मणः सायुज्यं योजकत्वम्।) ब्रह्मणो भावः। तत्पर्य्यायः। ब्रह्मभूयम् २ ब्रह्मत्वम् ३। इत्यमरः। २। ७। ५२॥ ब्रह्मसायुज्यम् ४। इति शब्दरत्नावली॥ (सुग्धबोधमतेऽस्य युत्पत्तिर्यथा।) ब्रह्मणो भवनं तादृश्यं ब्रह्मभूयं भूहनः क्यविति क्यप्। त्वतौ भावे इति त्वे ब्रह्मत्वं। योजनं युक् तत्सहितः सयुक् तद्भावः सायुज्यं ततो ब्रह्मणा विग्रहः। इति भरतः॥

ब्रह्मसावर्णिः, पुं, (ब्रह्मपुत्रो सावर्णिः।) दशम मनुः। अस्मिन् मन्वन्तरे विष्वक्सेनोऽवतारः। शम्भुरिन्द्रः। सुरसेनविरुद्धाद्याः देवाः। हविष्मदाद्याः सप्तर्षयः। भूरिसेनाद्या मनुपुत्रा भविष्यन्ति। इति श्रीभागवतम्। ८।१३।२१-२२॥
अन्यच्च।
"मन्वन्तरे तु दशमे ब्रह्मपुत्रस्य धीमतः।
सुरसेना विरुद्धाद्या द्विप्रकाराद्यथा सुताः॥
घृतसंज्ञा हि ते देवा भविष्यन्त्यज वै सुतौ।
ततपुत्राणां घृतं भावि तद्देवानां तदा घृतम्॥
ग्राह्यिरिन्द्रस्तदा भावी सर्व्वैरिन्द्रगुणैर्युतः।
सप्तर्षींस्तु निबोध त्वं ये भविष्यन्ति वै तदा॥
आपो मूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च।
नाभागोऽप्रतिमश्चैव वाग्विरुश्चैव सप्तमः॥
सुक्षेत्रश्चोत्तमौजाश्च भूरिसेनः सुवीर्य्यवान्।
घृतानीकोऽथ वृषभो अनमित्रो जयद्रथः॥
भूरिद्युम्नः सुवर्च्चाश्च तस्येते तनया मनोः।"
इति ब्रह्मसावर्णिकम्।
इति मार्कण्डेयपुराणे॥ ६४। ११-१६॥

ब्रह्मसः, पुं, प्रद्युम्नः। इत्यमरः।१।१।२८॥ कामदेवः। इत्यमरमाला॥ अनिरुद्धपक्षे ब्रह्मार्थं सूतवान् ब्रह्मसः॥ (सूडलप्रसवे। "अन्येभ्योऽपीति।" ३।२।१७८। क्विप्।) कल्पान्तरे किलानिरुद्धमूर्त्तेर्भगवतो ब्रह्मा जातः। तथा च ब्रह्मपुराणम्। अनिरुद्धात्ततो ब्रह्मा तन्नाभिकमलोद्भवः॥ कामदेवपक्षे। ब्रह्म तपः सुवति प्रेरयति ब्रह्मसः। सूङ् प्रेरणे ("अन्येभ्योऽपि दृश्यते।"३।२।१७८। इति) क्विप्। इति भरतः। (कामेनैव सर्व्वतपःसु प्रवर्त्तनादस्य तथात्वम्॥)

ब्रह्मसूत्रं, क्ली, (ब्रह्मणि वेदग्रहणकाले उपनयनसमये इत्यर्थः सूतं यत् सूत्रम्।) यज्ञसूत्रम्। तत्पर्य्यायः। पवित्रम् २ यज्ञोपवीतम् ३ द्विजायनी ४। इति त्रिकाण्डशेषः॥ उपवीतम् ५ सावित्रम् ६ सावित्रीसूत्रम् ७। इति शब्दरत्नावली॥ (यथा भागवते। ८।१८।१४।
"तस्योपनीयमानस्य सावित्री सविताब्रवीत्।
दृढस्यति ब्रह्मसूत्रं मेखलां कश्यपोऽददात्॥"
तटस्थलक्षणपरं उपनिषद्ब्राह्मणम्। ब्रह्मनिर्णयसूत्रम्। यथा गीतायाम्। १३। ४।
"ऋषिभिर्बहुधागीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥"
अस्य व्याख्याने श्रीधरस्वामिना यदुक्तं तदुच्यते। "ऋषिभिर्वसिष्ठादिभिर्योगग्राह्येषु ध्यानधारणादिविषयत्वेन वैराग्यादिसरूपेण बहुधा गीतं निरूपितम्। विविधैर्विचित्रैर्नित्यनैमित्तिककाम्यकर्म्मादिविषयैश्छन्दोभिर्वेदैर्नानापूजनीयदेवतारूपेण गीतं ब्रह्मणः सूत्रैः पदैश्च ब्रह्म सूत्र्यते सूच्यते एभिरिति ब्रह्मसूत्राणि यतो वा इमानि भूतानि जायन्त इत्यादीनि तटस्थलक्षणपराणि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादीनि तैश्च बहुधा गीतम्। किञ्च हेतुमद्भिः सदेव सोम्येदमग्र आसीत् कथमसतः सज्जायत इति। को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयातीत्यादि युक्तिमद्भिः। अन्यात् अपानचेष्टां कः कुर्य्यात् प्राण्यात् प्राणव्यापारं वा कः कुर्य्यादिति श्रुतिपदयोरर्थैः। विनिश्चितैरुपक्रमोपसंहारैकवाक्यतया असन्दिग्धार्थप्रतिपादकैरित्यर्थः। तदेवमेतैर्विस्तरेणोक्तं दुःसंग्रहं संक्षेपतस्तुभ्यं कथयिष्यामि तत् शृणित्यर्थः। यदा "अथातो ब्रह्मजिज्ञासा" इत्यादीनि ब्रह्मसूत्राणि यस्यन्ते तान्येव ब्रह्म पदाते निश्चीयते एभिरिति पदानि तैर्हेतुमद्भिरौचितेर्ना शब्दं आनन्दमयोऽभ्यासादित्यादि युक्तिमद्भिर्विनिश्चितार्थैः॥)

ब्रह्मसुतः, पुं, (ब्रह्मणः सुतः पुत्रः।) इक्ष्वाकुवंशोद्भवराजविशेषः। तत्पर्य्यायः। ब्रह्मदत्तः २। इति हेमचन्द्रः। १। १२८॥ (ब्रह्मपुत्रे वशिष्ठादौ च॥)

ब्रह्मस्वं, क्ली, (ब्रह्मणो ब्राह्मणस्य स्वं धनम्।) ब्राह्मणसम्बन्धि धनम्। तस्य हरणे दोषो यथा,
"ब्रह्मस्वं वा गुरुस्वं वा देवस्वं वापि यो हरेत्।
स क्षतघ्न इति ज्ञेयो महापापी च भारते॥
अवटोदे वसेत् सोऽपि यावदिन्द्राश्चतुर्दश।
ततो भवेत् सुरापीतौ ततः शूद्रस्ततः शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४६ अध्यायः॥

ब्रह्महत्या, स्त्री, ब्रह्मणो हननम्। (हनस्य च।३।१।१०८। इति भावे क्यप् तकारोऽन्तादेशश्च। स्त्रीत्वं लोकात्।) ब्राह्मणवधः। यथा,
"एकदा च गुरोः कोपात् प्रकृतेरवहेलनात्।
ब्रह्महत्या वशभ्रष्टो बभूव हृतचेतसः॥"
तस्या रूपं यथा,—
"रक्तवस्त्रपरीधाना दृढा स्त्रीवेशधारिणी।
सप्ततालप्रमाणा सा शुष्ककङ्कोद्भतालुका॥
दंष्ट्राप्रमाणदशना महाभीतव कातरम्।
धावन्तं परिधावन्ती बलिष्ठा हृतचेतनम्॥
खड्गहस्ता हताशं तं दयाहीना च सूच्छ्रितम्॥
दृष्ट्वा दृष्ट्वा च तां घोरां सारं सारं गुरोः पदम्॥
विवेश मानसरो हंसालक्ष्मलक्षनतः।
तत्र गन्तुं न शक्ता सा ब्रह्मणः शापकारणात्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ४७ अः॥
अतिदेशेन ब्रह्महत्या यथा,—
यम उवाच।
"श्रीकृष्णे च तदर्चायां हरायां प्रकृतौ यथा।
शिवे च शिवलिङ्गे वा सूर्य्ये सूर्य्यमणौ यथा॥
गणेशे वा तदर्चायामेवं सर्व्वत्र सुन्दरि!।
यः करोति भेदबुद्धिं ब्रह्महत्यां लभेत्तु सः॥
स्वगुरौ स्वेष्टदेवेषु जन्मदातरि मातरि।
करोति भेदबुद्धिं यो ब्रह्महत्यां लभेत्तु सः॥
वैष्णवेष्वन्यभक्तेषु ब्राह्मणेष्वितरेषु च।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः॥
हरेः पादोदकैष्वन्यदेवपादोदकेषु तथा।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः॥
यो मूढो विष्णुनैवेद्ये चान्यनैवेद्यके तथा।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः॥
सर्व्वेश्वरेश्वरे कृष्णे सर्व्वकारणकारणे।
सर्व्वाद्ये सर्व्वदेवानां सेव्ये सर्व्वात्मनात्मनि॥
मायया नानारूपे वाप्येक एव हि निर्गुणे।
करोत्यन्येन समतां ब्रह्महत्यां लभेत्तु सः॥
पितृदेवार्चनं पौर्व्वापरं वेदविनिर्म्मितम्।
यः करोति निषेधञ्च ब्रह्महत्यां स विन्दति॥
ये निन्दन्ति सुधीकेशं तन्नामोपासकं तथा।
पवित्राणां पवित्रञ्च ब्रह्महत्यां लभन्ति ते॥
ये निन्दन्ति विष्णुमायां विष्णुभक्तिप्रदां सतीम्।
सर्व्वशक्तिस्वरूपाञ्च प्रकृतिं सर्व्वमातरम्॥
सर्व्वदेवीस्वरूपाञ्च सर्व्वार्थां सर्व्ववन्दिताम्।
सर्व्वकारणरूपाञ्च ब्रह्महत्यां लभन्ति ते॥
कृष्णजन्माष्टमीं रामनवमीं पुण्यदां पराम्।
शिवरात्रिन्तथा चैकादशीं वारं रवेस्तथा॥
पञ्च पर्व्वाणि पुण्यानि ये न कुर्व्वन्ति मानवाः।
लभन्ते ब्रह्महत्यां ते पाषाणाधिकपापिनः॥
अमुवाच्यां भूखननं जले शौचादिकञ्च ये।
कुर्व्वन्ति भारते वर्षे ब्रह्महत्यां लभन्ति ते॥
गुरुञ्च मातरं तातं साध्वीं भार्य्यां सुतं सुताम्।
अनार्य्या यो न पुष्णाति ब्रह्महत्यां लभेत्तु सः॥
विवाहो यस्य न भवेत् न पश्यति सुतन्तु यः।
हरिभक्तिविहीनो यो ब्रह्महत्यां लभेत्तु सः॥
हरेरनैवेद्यभोजी नित्यं विष्णुं न पूजयेत्।
पुण्यं पार्थिवलिङ्गं वा ब्रह्महत्यां लभेत्तु सः॥
अवीरामश्च योसुङ्क्ते योनिजीवी च ब्राह्मणः।
यस्त्रिसन्ध्याविहीनश्च ब्रह्महत्यां लभेत् तु सः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे।३०।१४४-१५६॥
तथा च मनुः। ११। ५४-५५।
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥
असृतञ्च समृतकर्षे राजगामि च पैशुनम्।
गुरोश्चालीकनिर्ब्बन्धः समानि ब्रह्महत्यया॥"
तथा च चिन्तामणिधृतदेवीभागवतवचनम्।
"निद्राभङ्गः कथाच्छेदो दम्पत्योः प्रीतिभेदनम्।
शिशुमारविभेदश्च ब्रह्महत्या समं स्मृतम्॥")
ब्रह्महत्याप्रायश्चित्तं प्रायश्चित्तग्रन्थे महापातकप्रायश्चित्तव्यवस्थायामादौ द्रष्टव्यम्॥

ब्रह्महा, [न्] पुं, (ब्रह्मार्थं ब्राह्मणं हतवान्। ब्रह्म+हन्+"ब्रह्मभ्रूणवृत्रेषु क्विप्।" ३। २८७। इति क्विप्।) ब्रह्मणः ब्राह्मणवधकर्त्ता। यथा,—
"ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्।
भिक्षाशनात्मविशुद्ध्यर्थं कृत्वा ध्वजशिरोध्वजम्॥
भिक्षाशी विचरेद्ग्रामं वर्ज्जयेदि न जीवति।
ब्रह्महत्यापनोदाय मितभुक् संयतेन्द्रियः॥
स सर्व्वस्वं वेदविदे ब्राह्मणायोपपादयेत्।
धनं वा जीवनायालं यद्वा सपरिच्छदम्॥"
इति प्रायश्चित्तविवेकः॥
तस्य नरकभोगान्ते जन्मानि यथा,—
"शूकरखरोष्ट्राणां गोऽजाविश्वपक्षिणाम्।
चण्डालपुक्कसानाञ्च ब्रह्महा योनिमृच्छति॥"
इति मानवे। १२। ५५॥

ब्रह्महविः, [स्] क्ली, (ब्रह्मैव हविरर्य्यमाणमाज्यम्।) अर्य्यमाणं हविरपि ब्रह्मैव। यथा,—
"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना॥"
इति श्रीभगवद्गीतायाम्। ४। २४॥

ब्रह्महुतं, क्ली, (ब्रह्मणि ब्राह्मणे हुतम् दत्तम्। ब्रह्मपदमत्र उपलक्षणं तेन वृत्राद्ये बोध्यम्।) पञ्चमहायज्ञान्तर्गतयज्ञविशेषः। स तु पृथक्। अतिथिपूजनरूपः। इति जटाधरः॥

ब्रह्मा, [न्] पुं, (बृंहति वर्द्धते यः। बृहि बृहौ+"बृंहेर्नोऽच।" उणा०४।१४५। मनिन् नकारस्याकारश्च।) ऋत्विग्भेदः। तस्य स्थापनविधिर्यथा। ततः प्रादेशप्रमाणं दृषाक्तं समिधं तूष्णीमग्नौ हुत्वा ब्रह्मस्थापनं कुर्य्यात्। समाप्यपक्षाग्नृतकुशप्रस्तरचितं हिरण्यिचमावर्त्तमर्द्धसुखं दर्भवटं अधीतवेदं ब्राह्मणं वा हस्त-

सुतरासङ्गं वा कमण्डलुं वा ब्रह्मत्वेन परिकल्प्य धारासहितसुदकपात्रं गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन दक्षिणदेशं गत्वा अरत्निमात्रान्तरिते देशे पूर्वाभिमुखीं वारिधारां दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य पश्चिमाभिमुखोऽनुपविश्य स्थितेन। वामहस्तानामिकाङ्गुष्ठाभ्यामास्तीर्णकुशमेकं गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्देवता ब्रह्मशिरसने विनियोगः। ॐ शिरसः परावसुरित्यनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। ततः पुनरुपस्पृश्य दक्षिणपादेन सव्यपादमवष्टभ्य उत्तरमभिमुखीभूय आस्तीर्णकुशानद्भिरभ्युक्ष्य प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्देवता ब्रह्मोपवेशने विनियोगः। ॐ आवसोः सदने सीद इति। ब्राह्मणब्रह्मपक्षे तु ब्राह्मण एव सौदामीति ब्रूयात् अनेन कुशोपरि पूर्व्वाग्रं कुशब्राह्मणं ब्राह्मणब्रह्मपक्षे तु उत्तराभिमुखं स्थापयित्वा तदुपरि कुशान् दत्त्वा अद्भिरभ्युक्ष्य कुशकुसुमैरर्चयेत्। ततस्तेनैव यथा प्रत्याहृत्य आसने पूर्व्वाभिमुख उपविशो भूमिनमादिकं कुर्य्यात्। यदि तु ब्रह्मत्वेनारोपितो ब्रह्मा अयज्ञीयवाचं वदेत् तदा इमं मन्त्रं जपेत्: प्रजापतिर्ऋषिर्गायत्रीच्छन्दो विष्णुर्देवता अयज्ञीयवाग्वचननिमित्तजपे विनियोगः। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुले इति जपेत्। कुशादिब्रह्मपक्षे तु कर्म्मकर्त्तुरेव क्षताक्षतावेक्षणादिब्रह्मकार्य्यकर्त्तुस्तत्तदयज्ञीयवाग्वचननिमित्तंस एव जपेत्। इति भवदेवभट्टः। * ।

योगभेदः। स तु विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चविंशयोगः। तत्र जातफलम्।

"नानाशास्त्राभ्याससंनीतकालो
वर्णाचारैः संयुतश्चारुकीर्त्तिः।
शान्तो दान्तो जायते चारुकर्म्मा
क्रतौ यस्य ब्रह्मयोगप्रयोगः॥"

इति कोष्ठीप्रदीपः॥

विप्रः। इति मेदिनी॥ अर्हदुपासकविशेषः। इति हैमचन्द्रः। सृष्टिकर्त्तृदेवताविशेषः। ब्रूंहति प्रजा यः। ततृपर्य्यायः। आत्मभूः २ सुरज्येष्ठः ३ परमेष्ठी ४ पितामहः ५ हिरण्यगर्भः ६ लोकेशः ७ स्वयम्भूः ८ चतुरानन: ९ धाता१० अजयोनिः११ द्रुहिणः१२ विरिञ्चिः१३ कमलासनः १४ सृष्टा १५ प्रजापतिः १६ वेधाः १७ विधाता १८ विश्वसृक् १९ विधिः २०। इत्यमरः।१।१।१६-१७॥ द्रुहणः २१ विरिञ्चः२२ स्वयम्भुः ३३ पद्मयोनिः २४ पद्मासनः २५ विश्वसृविधिः २६। इति भरतः॥ देवदेवः २७ पद्मगर्भः २८ गुणसागरः २९ वेदगर्भः ३० वक्षरेताः ३१ स्वभूः ३२ सत्यारामः ३३ सुधाकर्म्मा ३४ ह्रपाङ्गेतः ३५ स्वसर्पणः ३६ लोकनाथः ३७ महावीर्य्यः ३८ सरोजी ३९ मञ्जुवाक्: ४० नाभिजन्मा ४१ वहुरूपः ४२ जटाधरः ४३ सततप्रतर्पितः ४४ कञ्जजः ४५ प्रभुः ४६ चिन्तामणिः ४७ पद्मयोनिः ४८ पुराणगः ४९ अष्टकर्णः ५० हंसरथः ५१ सर्व्वकर्म्मा ५२ चतुर्मुखः ५३। इति शब्दरत्नावली॥ कः ५४। इत्येकाक्षरकोषः॥ आः ५५ श्रुतपत्रनिवासः५६ स्वायम्भुवमनुपिता ५७। इति कविकल्पलता॥ मः ५८। इति प्रणवशाखा॥ (नाभिजन्मा ५९। अजजः ६०। पूर्व्वः ६१। निधनः ६२। कमलोद्भवः ६३। सदानन्दः ६४। रजोमूर्त्तिः ६५। सत्यकः ६६। हंसवाहनः ६७। इति कस्यचिदमरकोषे दृश्यते।१।१।१७।)

तस्य स्वरूपं यथा,—

मार्कण्डेय उवाच।

"ततो ब्रह्माण्डसंस्थानं दर्शयामास शम्भवे।
वर्द्धे तोयराशिस्थं ब्रह्माणञ्च यथा पुरा॥
तन्मध्ये पद्मगर्भाभं ब्रह्माणं जगतः पतिम्।
ज्योतीरूपं प्रकाशार्थं सृष्ट्यर्थञ्च पृथग्गतम्॥
शरीरिणं स दृष्ट्वा ब्रह्माण्डान्तर्गतं शुचुः।
चतुर्भुजं प्रकाशन्तं ज्योतिर्भिः कमलासनम्॥
तत्रैव च त्रिधाभूतं वपुर्ब्राह्मं ददर्श सः।
ऊर्द्धमध्यान्तमार्गेषु ब्रह्मविष्णुशिवात्मिकान्॥
अधोऽर्द्धभागे वपुषो ब्रह्मत्वमगमत्तथा।
मध्ये यथा विष्णुभूतां ददर्शान्तस्थ शम्भुताम्॥
एकमेव शरीरन्तु त्रिधाभूतं सुचुर्भुचुः।
हरो ददर्श खे गर्भे तथा सर्व्वमिदं जगत्॥
कदाचिद्देहमेवं कायं ब्राह्मो काये लयं व्रजेत्।
ब्राह्मं तथा वैष्णवे च शाम्भवे वैष्णवं तथा॥
शाम्भवं वैष्णवे काये ब्राह्मो चाप्यथ शाम्भवम्।
गच्छन्तं लीनतां शम्भुरेकताच्च शुचुर्भुचुः॥
ददर्श वामदेवोऽपि भिन्नं चाप्यथ पृथग्गतम्।
परमात्मनि गच्छन्तं लीनतां तद्वपुश्च यत्॥"

इति कालिकापुराणे १४ अध्यायः॥ * ॥

तस्य पूजाविधिर्यथा।

"शृणु राजन्नवहितो ब्रह्मणः पूजनक्रमम्॥
ब्रह्मबीजं पुरा प्रोक्तं यन्मन्त्रं पूर्व्वतश्चरेत्।
तेनैव तनुं संपूज्य परं निर्व्वाणमाप्नुयात्॥
एतस्य चाङ्गमन्त्रन्तु यथा भर्गेण भाषितम्।
वेतालभैरवाद्यांस्तु रूपञ्च शृणु भूमिप!॥
तस्य मन्त्रोद्धारो यथा,—

"षष्ठीतीयश्च वह्निश्च शेषस्वरसमन्वितः।
चन्द्रविन्दुसमायुक्तो ब्रह्ममन्त्रः प्रकीर्त्तितः॥
अनेनैव तु मन्त्रेण ब्रह्माणं यः प्रपूजयेत्।
स कामानिष्टं संप्राप्य ब्रह्मलोके प्रमोदते।"

तस्य ध्यानं यथा,—

"ब्रह्मा कमण्डलुधरश्चतुर्वक्त्रश्चतुर्भुजः।
कदाचित्पद्मकमले हंसारूढः कदाचन॥
वर्णेन रक्तगौराङ्गः प्रांशुस्तुङ्गाङ्ग उन्नतः।
कमण्डलुर्वामकरे स्रुवो हस्ते तु दक्षिणे॥
दक्षिणाधस्रजा माला वामाधश्च तथा स्रुवः।
आज्यस्थाली वामपार्श्वे वेदाः सर्व्वेऽयतः स्थिताः॥
सावित्री वामपार्श्वस्था दक्षिणस्था सरस्वती।
सर्व्वे च ऋषयो ह्यत्र कुर्य्युर्देवस्य चिन्तनम्॥
चतुष्कोणं चतुर्द्वारमष्टपत्रसमन्वितम्।
चतुष्कोणे सङ्गतन्तु शुक्लमण्डलमुत्तमे॥
सम्मार्जनादिकं सर्व्वं यात्रायाः प्रतिपत्तयः।
यात्रा उत्तरतस्तोक्ता योगपीठेऽङ्गदेविका।"

तस्य पूजाक्रमो गायत्री च यथा,—

"आधारशक्तिप्रमुखांस्तथा सञ्जान्तु पूजयेत्।
अष्टपत्रेषु पद्मस्याष्टौ दिक्पालान् प्रपूजयेत्॥
पद्मासनाय विद्महे हंसारूढाय धीमहि।
तन्नो ब्रह्मप्रचोदयात्॥
एषा तु ब्रह्मगायत्री पूजयेदनया विधिम्।
निर्म्माल्यधारी चैतस्य सनत्कुमार उच्यते॥
उपचाराः पूर्व्ववत्तु नैवेद्यञ्चानुकल्पितम्।
रक्तकौशेयवस्त्रन्तु ब्रह्मप्रीतिकरं परम्॥
आज्यं सपायसं सर्पिस्तिलयुक्तस्य भोजनम्।
सितरक्तसमायुक्तं चन्दनं परिकीर्त्तितम्॥
पार्श्वयोः शङ्करं विष्णुं पूजने पूजयेन्नरः।
सुरादीन् करसंस्थांस्तु मण्डले परिपूजयेत्॥
सरस्वतीञ्च सावित्रीं हंसं पद्मन्तथैव च।
अयं विशेषः कथितः प्रणामस्यास्य दक्षवत्॥
पद्मबीजभवा माला जपकर्म्मणि कीर्त्तिता।
पूर्णार्घ्यौ तिथौ यात्रे पूजाकर्म्मणि सर्व्वदा॥
क्षीरेणार्घ्यं प्रदद्यात्तु सर्व्वदा ब्रह्मणे नृप!।
अयन्ते कथितो भूप! यथा भर्गेण भाषितः॥
दर्शयता स्वपुत्राभ्यां कामरूपाक्षयं शुभम्।
यत्र तत्र विधिश्चैव साधकः परिपूजयेत्॥
पीठे सम्यक् पूजयित्वा परं निर्व्वाणमाप्नुयात्॥"

इति कालिकापुराणे ८२ अध्यायः॥

तस्यापूज्यत्वकारणम् यथा। मोहिन्युवाच।

"उत्तिष्ठ जगन्नीथ! पारं कुरु सुरार्त्तवे।
निमग्नां दुस्तरे घोरे कर्णधार! भयानके॥
अतीवनिर्जनस्थाने सर्व्वजन्तुविवर्जिते।
सुगन्धिवायुना रम्ये पुंस्कोकिलरुतयुते॥
सन्तप्तं त्वन्मनस्कामां दासीं जन्मनि जन्मनि।
क्रीणीहि रतिपर्य्यन्तमूल्यरत्नेन सत्वरम्॥
इत्युक्ता मोहिनी सद्यो जगत्स्रष्टुश्च ब्रह्मणः।
विचकर्ष करं वस्त्रं सस्मिता कामविह्वला॥
विज्ञाय समयं धाता तामुवाच भयातुरः।
पीयूषतुल्यवचनं परं विनयपूर्व्वकम्॥"

ब्रह्मोवाच।

"शृणु मोहिनि! मदाक्यं सत्यं सारं हितं स्फुटम्।
न कुरु त्वञ्च त्रैलोक्ये स्त्रीजातीनामपत्रपाम्॥
त्यज मामम्बिके! पुत्रं वृद्धं निष्कामभेव च।
त्वत्कर्म्मयोग्यं रसिकं युवानं पश्य सस्मिते!॥
निषेकाद्यन्यते पत्नी गुरुर्भर्त्ता शुभाशुभम्।
मन्त्रः शिश्नमपत्यञ्च सर्व्वमेतन्न संशयः॥
त्वया सह मम रतेर्निबन्धो नास्ति सुव्रते!।
चुद्दं मद्दा यत् कर्म्म सर्व्वं दैवनियन्त्रकम्॥
इत्युक्त्वन्तं ब्रह्माणं सारन्तं मतपदाम्बुजम्।
विचकर्ष पुनर्वेग्रा कामेन हतचेतना॥
एतस्मिन्नन्तरे शीघ्रं स्थानं तत् सुमनोहरम्।
आजग्मुर्मुनयः सर्व्वे ज्वलन्तो ब्रह्मतेजसा॥
दृष्ट्वा तांश्च मुनिश्रेष्ठानागतांश्च ममेच्छया।

तत्याज मोहिनी श्रीघ्रं व्रीड़या कमलोद्भवम् ।
तत्रोवाच जगद्धाता तद्वामपार्श्वतश्च सा ।
प्रणेतुर्मुनयश्चक्रे भक्तिगन्धात्मकन्धराः ॥
आग्निष्वं युयुजे ब्रह्मा वासयामास तान् प्रभुः ।
तेषु मध्ये प्रजज्वाल यथा तारासु चन्द्रमाः ॥
पप्रच्छुर्मुनयो देवं कथमेषा तवान्तिके ।
सर्व्वेज्ञानाच्च प्रवरा मोहिनीत्येवमेव च ॥
श्रुत्वा मुनीनां वचनमुवाच तान् प्रजापतिः ॥

ब्रह्मोवाच ।

अपूर्व्वं नृत्यगीतञ्च चिरं श्रुत्वा शुभावहा ।
उवासेयं परिश्रान्ता यथा कन्या पितुः पुरः ॥
इत्युक्त्वा जगतां धाता जहास मुनिसंसदि ।
जहसुर्मुनयः सर्व्वे सर्व्वज्ञास्तत्र राधिके ! ॥
सर्व्वं रहस्यं विज्ञाय जगत्स्रष्टुश्च मानसम् ।
सदाशुकोप कुलटा हास्यव्याजेन संसदि ॥
सर्व्वाङ्गकम्यमाना सा कुलटा कुटिलानना ।
रक्तपङ्कजनेत्रा च कोपप्रस्फुरिताधरा ॥
उत्थाय च सभामध्ये तेषाञ्च पुरतः स्थिता ।
संबुध्योवाच ब्रह्माणं श्मश्रुकन्या यथा रुषा ॥

मोहिन्युवाच ।

अये ब्रह्मन् ! जगन्नाथ ! वेदकर्त्ता त्वमेव च ।
किंवा वेदप्रविहितं कर्म्म किन्तद्विपर्य्ययम् ॥
विचारं मनसा खेन कुरु वेदविदां गुरो ! ।
स्वकन्यायां यतस्पृहा च कथं हसति नर्त्तकीम् ॥
निर्म्मिताहमीश्वरेण सर्व्वेज्ञा सर्व्वगामिनी ।
सतां कर्म्म विरुद्धं यत्तदत्यन्तविडम्बनम् ॥
दासीतुल्यां विनीतान्च देवेन शरणागताम् ।
यतो हसति गर्व्वेण ततोऽपूज्यो भवाचिरम् ॥
अचिराद्दर्पभङ्गन्ते करिष्यति हरिः स्वयम् ।
निबोध शरणं ब्रह्मन् ! वेधसावाचेव साम्प्रतम् ॥
तवैव वचनं श्रौतं मन्त्रं यज्ञाति यो नरः ।
भविता तस्य विघ्नञ्च न वास्तवुपद्रावस्तताम् ॥
भविता वार्षिकी पूजा देवतानां युगे युगे ।
तव माघ्याच्च संक्रान्त्यां न भविष्यति सा पुनः ॥
कल्पान्तरेऽथ कल्पे वा देहे देहान्तरेऽथ ते ।
पुनः पूजा न भविता या गता या गतेऽथ च ॥
इत्युक्त्वा मोहिनी श्रीघ्रं जगाम मदनालयम् ।
तेन सार्द्धं रतिं लब्धा बभूव विश्वरा पुनः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे मोहिनीशापब्रह्मदर्पभङ्गप्रस्तावः ११ अध्यायः ॥
तस्य सृष्टिक्रमो यथा । मनुरुवाच ।
"चतुर्मुखत्वमगमत् कस्मात्लोकपितामहः ।
कथं लोकानसृजद्ब्रह्मा ब्रह्मविदांवरः ॥"

मनुरुवाच ।

"तपश्चचार प्रथममम्बरान्तां पितामहः ।
आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः ॥
पुराणं सर्व्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यशब्दमयं पुण्यं श्रुतकोटिप्रविस्तरम् ॥
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।
मीमांसा न्यायविद्या च प्रमाणात्मकसम्मता ॥"
तस्य मानसदक्षपुत्रसृष्टिर्यथा,—
"वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः ।
मनसः पूर्व्वसृष्टा वै जाता ये तेन मानसाः ॥
मरीचिरभवत् पूर्व्वं ततोऽत्रिर्भगवानृषिः ।
अङ्गिराश्चाभवत् पश्चात् पुलस्त्यस्तदनन्तरम् ॥
ततः पुलहनामा वै ततः क्रतुरजायत ।
प्रचेताश्च ततः पुत्रो वशिष्ठश्चाभवत् पुनः ॥
पुत्रो भृगुरभूत्तत्र नारदोऽपि चिरादभूत् ।
दह्यमानः मानसात् ब्रह्मा जपन् पुत्रानजीजनत् ॥"
तस्य शरीरदक्षप्रजासृष्टिर्यथा,—
"शरीरात्तस्य वक्ष्यामि मालतीजान् प्रजापतेः ।
अङ्गुष्ठाद्दक्षिणाद्दक्षप्रजापतिरजायत ॥
धर्म्मस्तनात्ततोभवद्धृदयात् कुसुमायुधः ।
भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः ॥
मुखान्मोहः समभवद्दम्भाद्भूमदः ।
प्रमोदश्चाभवत् कण्ठान्मृत्युर्नीचगतो नृप ! ॥
रभसः करमध्यात्तु ब्रह्मणस्तुरभूत्ततः ।
एते नव सुता राजन् ! कन्या च दशमी पुनः ॥
अङ्गजा इति विख्याता दक्षमी ब्रह्मणः सुता ॥"
तस्य चतुर्मुखत्वस्य कारणं यथा,—
"ततः स्वदेहसम्भूतामात्मजामित्यकल्पयत् ।
दृष्ट्वा तां यथितस्तावत् कामबाणार्द्दितो विभुः ।
अहो रूपमहो रूपमिति चाह प्रजापतिः ॥
ततो वशिष्ठप्रमुखा भगिनीमिति चुक्रुशुः ।
ब्रह्मा न किञ्चिदब्रूते तच्छुखालोकनादते ॥
अहो रूपमहो रूपमिति प्राह पुनः पुनः ।
ततः प्रणामनम्रां तां पुरस्तादभ्यलोकयत् ॥
अथ प्रदक्षिणचक्रे सा पितुर्वरवर्णिनी ।
पुत्रेभ्यो लज्जितस्तस्य तद्रूपावीक्षणेच्छया ।
आविर्भूतं ततो वक्त्रं दक्षिणं पार्श्वतश्चतुः ॥
विलोलस्तुरदीर्घश्च पार्श्वात्तस्तदागतः ।
चतुर्थमभवत् पश्चादामं कामशरातुरम् ॥
ततोऽभवच्चतस्रः कामातुरतया तथा ।
उत्पतन्त्याश्चादाकाशमालोकनकुतूहलात् ॥
दृष्ट्यर्थं यत् श्रुतं तेन तपः परमदारुणम् ।
तत् सर्व्वं नाशमगमत् स्वस्तोपगमेच्छया ॥
तेनास्य वक्त्रमभवत् पञ्चमञ्चास्य भीमतः ।
आविर्भवच्चटाभिश्च तद्वक्त्रादेवोत्तप्रभुः ॥"

इति मत्स्यपुराणे ३ अध्यायः ॥ ॥

अथ ब्रह्मणो यथा, मार्कण्डेयपुराणे ।
"भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसन्तथा ।
मरीचिं दक्षमत्रिञ्च वशिष्ठञ्चैव मानसम् ।
अथ ब्रह्मात्मजैर्ब्रह्मा पुराणे निश्चयं गताः ॥"
ब्रह्मभेदे तस्य जन्मादि यथा,—
"ब्रह्मणो मे मानसं जन्म प्रथमं द्विजपूजितम् ।
चाक्षुषं वै द्वितीयं मे जन्म चासीत् पुरातनम् ॥
तत्प्रसादात्तु मे जन्म तृतीयं वाचिकं महत् ।
ततः श्रवणजं चापि चतुर्थं जन्म मे विभो ! ॥
नासजन्मापि मे जन्म ततः पञ्चममुच्यते ।
अण्डजं चापि मे जन्म ततः षष्ठं विनिर्मितम् ॥
इदञ्च सप्तमं जन्म पद्मजन्मेति मे प्रभो ! ।
सर्गे सर्गे त्वहं पुत्रस्तव त्रिभुवनर्च्चित ! ॥"

इति महाभारते शान्तिपर्व्वणि मोक्षधर्म्मे

अनिरुद्धरूपविष्णुं प्रति पाशुपतीयब्रह्मवचनम् । ॥ । तस्य प्रलयकालो यथा,—
"द्वात्रिंशद्वर्ष्मकोट्यस्तु तथा वृन्दारकं भवेत् ।
खर्व्वद्वयं निखर्व्वञ्च शङ्कुत्रययुतं तथा ॥
पद्ममेकं वसुद्राक्ष त्रयो ब्रह्मसमागते ।
ब्रह्मा विष्णुर्दिने चैकः प्रलयेवं वदन्ति ते ॥
मनीषिणस्तथा विष्णुरहन्युग्रस्य शङ्करः ।
ईश्वरस्य तथा चासौ स सांख्यप्रकृतेस्तथा ॥
अतः परं परे धात्रि कालसंख्या न विद्यते ।
ब्रह्मणोऽतः परं संख्या नास्ति चैतन्मतं हि नः ॥"
अपि च ।
"एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ।
भोगिशय्यागतः शेते त्रैलोक्यग्रासदंष्ट्रितः ॥
जलस्थैर्योगिभिर्दृश्यमानोऽजसम्भवः ।
अतीतानागतं सर्व्वं स वुद्धा वेत्ति पुनः ॥
एवन्तु ब्रह्मणो वर्षं तथा वर्षशतं भवेत् ।
मते वर्षे शते ब्रह्मा परमात्मनि लीयते ॥"

इत्यग्निपुराणम् ॥

ब्रह्मायभूः, पुं, (ब्रह्मणोऽग्ये सम्मुखे भवतीति । भू+क्विप् । यद्वार्थे ब्रह्मणो देहाज्जातत्वात्तथात्वम् ।) घोटकः । इति हारावली । ५२ ॥

ब्रह्माञ्जलिः, पुं, (ब्रह्मणे वेदपाठार्थं कृतो योऽञ्जलिः ।) सामवेदपाठे स्वरविभागार्थं योऽञ्जलिः क्रियते सः । अध्ययनस्यादावन्ते च गुरवे प्रणवोच्चारणपूर्व्वकोऽञ्जलिः क्रियते सः । तत्पाठार्थत्वात् ब्रह्मणोऽञ्जलिः । इत्यमरटीकायां भरतः । २ । ७ । ३६ ॥ (यथा, मनुः । २ । ७०-७१ ।
"अध्येष्यमाणञ्चाचान्तो यथावदाकृतासुदङ्मुखः ।
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः ॥
ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
संहृत्य हस्तावध्येयं हि ब्रह्माञ्जलिः स्मृतः ॥")

ब्रह्माणी, स्त्री, (ब्रह्मात्मकमति कौर्णयतीति । अच् गुरुदे कर्म्मण्यण् । ङीप् ।, यद्वा, ब्रह्मात्मानमति जीवयतीति । अनच्सुप्रत्यये यस्यादेशात् कर्म्मणि अपि क्ते "वीरनिटि ।६ । ४ । ५१ । इति खिलोपः "टिड्ढेति ।" ४।१।१५। इति ङीप् पूर्व्वपदादितिवत्वच ।) ब्रह्मणः पत्नी । इति शब्दमाला । ब्रह्मणोऽङ्गशरीरात् तस्या उत्पत्तिर्नामान्तरञ्च यथा,—
"ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् ।
स्त्रीरूपमहमेकारीदर्द्धं पुरुषरूपवत् ॥
घृतरूपा च सा ख्याता सावित्री च निगद्यते ।
सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप ! ॥"

इति मत्स्यपुराणे ३ अध्यायः ॥ ॥

अपि च ।
"हंसयुक्तविमानार्थे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥"

इति मार्कण्डेयपुराणे । ८८ । ९३ ॥ ॥
(इयं हि पूर्व्वप्रकृतेर्दुर्गायाः ब्रह्मशक्तिः । यदुक्तं मार्कण्डेये । ९० । ३३ ।

देव्युवाच ।
"एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट ! मय्येव विशन्त्यो मद्विभूतयः ॥
ततः समस्ताः देव्यो ब्रह्माणी-प्रमुखा लयम् ।
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥") दुर्गा । यथा,—
"ब्रह्माणी ब्रह्मजननाद्ब्रह्माचरपरा मता ॥"
इति देवीपुराणे ४५ अध्यायः ॥*॥
रेणुकानामगन्धद्रव्यम् । इति रत्नमाला । राजरीतिः । इति राजनिर्घण्टः ॥

ब्राह्मं, क्ली, (ब्रह्मणो जगत्सृष्टुरिदम् । चतुर्दशभुवनगोलकः । यद्वा, ब्रह्मणा विश्वस्रष्ट्रा कृतमिदम् ।) भुवनकोषः । विश्वगोलकः । यथा,—
"ब्रह्माण्डरचनाख्यानं श्रूयतां सावधानतः ।
ब्रह्माण्डरचनार्थञ्च भक्ता जानन्ति यत्नतः ॥
सुरयश्च सुराः सन्तः किञ्चिज्जानन्ति दुःखतः ।
जानामि विश्वसर्ब्बार्थं ब्रह्मानन्तो महेश्वरः ॥
धर्म्मः सनत्कुमारश्च नरनारायणावृषी ।
कपिलश्च गणेशश्च दुर्गा लक्ष्मीः सरस्वती ।
वेदाश्च वेदमाता च सर्ब्बज्ञा राधिका स्वयम् ।
एते जानन्ति विश्वार्थं नान्यो जानाति कश्चन ।
वैषम्यार्थञ्च सुधियः सर्ब्बे विज्ञातुमक्षमाः ।
नित्याकाशो यथात्मा च तथा नित्या दिशो दश ॥
यथा नित्या च प्रकृतिस्तथैव विश्वगोलकः ।
गोलोकश्च यथा नित्यस्तथा वैकुण्ठ एव च ॥
एकदा मयि गोलोके रासे वृत्तं प्रकुर्ब्बति ।
आविर्भूता च वामाङ्गाद् बाला षोढ़शवार्षिकी ॥
श्वेतचम्पकवर्णाभा शरच्चन्द्रसमप्रभा ।
अतीवसुन्दरी रम्या रमणीनां परात्परा ॥
दृग्वह्नास्या प्रसन्नास्या कोमलाङ्गी मनोहरा ।
वह्निशुद्धांशुकाधाना रत्नाभरणभूषिता ॥
यथा जलदपङ्क्तिश्च बलाकाभिर्विभूषिता ।
सिन्दूरबिन्दुना चारुचन्द्रचन्दनबिन्दुभिः ॥
कस्तूरीबिन्दुभिः सार्द्धं सीमन्ताधःस्थलोज्ज्वला ।
अमूल्यरत्ननिर्म्माणसुस्निग्धकिरणोज्ज्वला ॥
रत्नकुण्डलयुग्मेन गण्डस्थलसमुज्ज्वला ।
कुङ्कुमालक्तकस्तूरीचारुचन्दनपत्रकैः ॥
विचित्रेण सुचित्रेण सुकपोलस्थलोज्ज्वला ।
खगेन्द्रचञ्चुविनिन्दिनासा चार्व्वी सुशोभिता ॥
गजेन्द्रगण्डनिर्मुक्तसुस्ताभूषणभूषिता ।
कृष्णा विमुक्तमुक्ताभदन्तपङ्क्तिमनोहरा ॥
वलिता ललितातीव पक्वबिम्बाधरा वरा ।
शरत्पूर्णेन्दुनिन्दास्या पद्मनिन्दितलोचना ॥
कृष्णसारनिभोद्भिन्नसुचारुकज्जलोज्ज्वला ।
अमूल्यरत्ननिर्म्माणकेयूरकङ्कणोज्ज्वला ॥
मणीन्द्रराजराजीभिः शङ्खयुग्मकरोज्ज्वला ।
रत्नाङ्गुरीयकैरेभिरन्वताङ्गुलिभूषिता ॥
रत्नेन्द्रराजराजेन जघनश्रोणिरक्षिता ।
रत्नपाषकराजीभिः पादाङ्गुलिविराजिता ।
सुन्दरालक्तरागेण चरणाधःस्थलोज्ज्वला ॥
गजेन्द्रगामिनी रामा कामिनी वामलोचना ।
मां ददर्शं कटाक्षेण रमणी रमणोत्सुका ॥
रासे संभूय रामा सा दधाव पुरतो मम ।
तेन राधा समाख्याता पुराविद्भिः प्रपूजिता ॥
प्रहृष्टप्रकृतिश्चास्याश्चेन प्रकृतिरीश्वरी ।
प्रोक्ता स्यात् सर्ब्बकार्य्येषु तेन प्रकृतिः प्रकीर्त्तिता ॥
सर्ब्बाधारा सर्ब्बरूपा मङ्गलार्था च सर्ब्बतः ।
सर्ब्बमङ्गलदक्षा सा तेन स्यात् सर्ब्बमङ्गला ॥
वैकुण्ठे सा महालक्ष्मीर्नामभेदे सरस्वती ।
प्रसूय वेदान् विदिता वेदमाता च सा सदा ॥
सावित्री सा च गायत्री धात्री त्रिजगतामपि ।
पुरा संहृत्य दुर्गाञ्च सा दुर्गा च प्रकीर्त्तिता ॥
तेजःसु सर्ब्बदेवानामाविर्भूता पुरा सती ।
तेनाद्यप्रकृतिर्ज्ञेया सर्ब्बासुरविमर्द्दिनी ॥
सर्ब्वानन्दा च सानन्दा दुःखदारिद्र्यनाशिनी ।
शत्रूणां भयदात्री च भक्तानां भयहारिणी ॥
दक्षकन्या सती सा च शैलजा तेन पार्ब्बती ।
सर्ब्बाधारस्वरूपा सा कलया सा वसुन्धरा ॥
कलया तुलसी गङ्गा कलया सर्ब्वयोषितः ।
सृष्टिं करोमि च यया तथा शक्त्या पुनःपुनः ॥
दृष्ट्वा तां रासमध्यस्थां मम क्रीड़ा तया सह ।
बभूव सुचिरं तात ! यावद्वै ब्रह्मणः शतम् ॥
अत्यद्भुतं कौतुकञ्च महाश्चर्य्यमीप्सितम् ।
तयोर्दयोर्धर्म्मराशिः सुस्राव रासमण्डले ॥
तस्माज्जलोद्भवं जज्ञे नाम्ना कामसरोवरम् ।
पपात धर्म्मधाराधो वेगेन विश्वगोलके ॥
बभूव जलपूर्णञ्च ब्रह्माण्डानाञ्च गोलकम् ।
जलपूर्णं पुरा सर्ब्वं सृष्टिशून्यं व्रजेश्वर ! ॥
हुङ्कारान्ते च तस्याश्च वीर्य्याधानं मया कृतम् ।
दधार गर्भं सा राधा यावद्वै ब्रह्मणः शतम् ॥
सुषाव सा तदण्डे च द्विधा तत् परमाद्भुतम् ।
चुकोप देवी तं दृष्ट्वा रुरोद विवसाद सा ॥
पादेन प्रेरयामास तमधो विश्वगोलके ।
स पपात जले तात ! सर्ब्वाधारो महान् विराट् ॥
डुङ्कारपूतं जलञ्च मया शप्तं च सा पुरा ।
अनपत्या च सा राधा मत्शापेन पुरा विभो ! ॥
तेन प्रस्रुता क्रमतो दुर्गा लक्ष्मीः सरस्वती ।
ततस्तः परिपूर्णा सा प्रस्रुताच सुनिश्चितम् ॥
देवीभ्योऽन्याभ्यापि काभ्यो न प्रस्रुता व्रजेश्वर ! ॥
कलया प्रभवो यासां कलांशांशेन वा व्रज ॥
जज्ञे महान् विराट् तेन डिम्भेन कलयाश्रयः ।
अन्तर्हृत्पीयूषं मया दत्तं पपौ च सः ॥
जले स्थावररूपश्च स शेते निजकर्म्मजः ।
उपाधानं जलं तस्य तस्य योगबलेन च ।
तस्य लोमाश्च कूपानि जलपूर्णानि सन्ततम् ।
प्रत्येकं क्रमतस्तेषु शेते क्षुद्रविराट् पुनः ॥
सहस्रपत्रं कमलं जज्ञे क्षुद्रस्य नाभितः ।
तत्र जज्ञे स्वयं ब्रह्मा तेनायं कमलोद्भवः ॥
तत्राविर्भूय स विधिश्चिन्ताग्रस्तो बभूव च ।
कस्माद्देहः क्व माता मे पिता वा क्व च बान्धवः ॥
दिव्यं त्रिलक्षवर्षञ्च बभ्राम कमलान्तरे ।
ततो दृष्ट्वा पद्मजन्मं सस्मार तपसा च माम् ॥
तदा मया दत्तमन्त्रं जजाप कमलान्तरे ।
दिव्यं सप्तवर्षलक्षं नियतं संयतः शुचिः ॥
तदा मत्तो वरं लब्ध्वा स्रष्टा सृष्टिचकार सः ।
मायया प्रतिब्रह्माण्डे ब्रह्मविष्णुशिवात्मकाः ॥
दिक्पाला द्वादशादित्या रुद्राश्चैकादशापि वा ।
नव ग्रहाष्टौ वसवो देवाः कोटित्रयस्तथा ॥
ब्राह्मणक्षत्रविट्शूद्रा यज्ञगन्धर्व्वकिन्नराः ।
भूतादयो राक्षसाश्चाप्येवं सर्ब्वं चराचरम् ॥
विश्वे विश्वे विनिर्म्माणं स्वर्गाः सप्त क्रमेण वै ।
सप्तसागरसंयुक्ता सप्तद्वीपा वसुन्धरा ॥
काञ्चनीभूमिसंयुक्ता तमोयुक्तस्थलं ततः ।
पातालाश्च तथा सप्त ब्रह्माण्डमेभिरेव च ॥
विश्वे विश्वे चन्द्रसूर्य्यौ पुण्यक्षेत्रञ्च भारतम् ।
तीर्थान्येतानि सर्ब्वत्र गङ्गादीनि व्रजेश्वर ! ॥
यावन्ति लोमकूपानि महाविष्णोः क्रमेण च ।
विश्वान्येव हि तावन्ति ह्यसंख्यानि पितर्भुवम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।८४।५२-१०२॥
अपि च ।
"देवीगुणत्रयाविष्टमण्डञ्च कोटिविस्तरम् ।
ब्रह्मादिस्तम्बपर्य्यन्तसृष्टपन्नं चराचरम् ॥
अण्डे हिरण्यगर्भस्य यदूर्द्धं गर्भसंश्रितम् ।
तन्नोत्पन्नमिदं लोमरूपाणि द्वीपमेदी भवेत् ॥
अधोर्द्धं काञ्चनमयश्चतुरस्रोच्छ्रितो महान् ।
उत्पन्नः स चतुःशृङ्गो मेरुर्दैवतसंश्रयः ॥
पृथिवी पद्मदिक् शैलं मेरुरस्य तु कर्णिका ।
युगाद्यकोटिविस्तीर्णं तत्र लोका रथं रविः ।
देवीवशवृत्तितो देवैर्याति तस्य प्रदक्षिणम् ॥"
इति देवीपुराणम् ॥
अथ ब्रह्माण्डगोलमाह ।
"भूभूधरश्चिदग्रदानवमानवाद्या
ये याश्च धिष्ण्यगगनेचरचक्रकक्षाः ।
लोकत्रयस्थितिरुपर्य्युपरिप्रदिष्टा
ब्रह्माण्डभाण्डजठरे तदिदं समस्तम् ॥"
अथान्योदितं ब्रह्माण्डमानं पूर्व्वोक्तमपि प्रसङ्गादनुवदति ।
कोटिघ्नैर्खनगन्दृष्टकनखभूभूधृद्भुजङ्गेन्दुभिर्ज्योतिःशास्त्रविदो वदन्ति नभसः कक्षाभिमां योजनैः ।
तद्ब्रह्माण्डकटाहसम्पुटतटे केचिज्जगुर्वेष्टनं
केचित् प्रोचुरदभ्रदभ्रकगिरिं पौराणिकाः सूरयः ॥
करतलकलितामलकवदमलं
सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहततमसो
नभसः परिधिरदितस्तैः ॥
ब्रह्माण्डमेतन्मितमस्तु नो वा
कल्पे यदः क्रामति योजनानि ।
यावन्ति पूर्व्वैरिह तत्प्रमाणं
प्रोक्तं खकक्षाख्यमिदं मतं नः ॥"
इति सिद्धान्तशिरोमण्यौ गोलाध्याये भुवनकोषः॥

महादानविशेषः । यथा,—
मत्स्य उवाच ।
"अथातः संप्रवक्ष्यामि ब्रह्माण्डविधिमुत्तमम् ।
यत्कृत्वा सर्व्वदानानां महापातकनाशनम् ॥
पुण्यं दिनमथासाद्य गुलापुरुषदानवत् ।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ॥
लोकेशावाहनं तद्वदधिवासनकं यथा ।
कुर्य्यादिशुपलादूर्द्धमासहस्राच्च शक्तितः ॥
कलसद्वयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः ।
दिग्गजाष्टकसंयुक्तं षड्वेदाङ्गसमन्वितम् ॥
लोकपालाष्टकोपेतं मध्यस्थितचतुर्म्मुखम् ।
शिवाच्युतार्कशिखरसप्तलक्ष्मीसमन्वितम् ॥
वस्वादित्यमरुद्गर्भं महारत्नसमन्वितम् ।
वितस्तिरङ्गुलशतं यावदायामविस्तरम् ॥
कौशेयवस्त्रसञ्जीतं तिलद्रोणोपरि न्यसेत् ।
तथाष्टादश धान्यानि समन्तात् परिकल्प-
येत् ॥
पूर्व्वेणानन्तशयनं प्रद्युम्नं पूर्व्वदक्षिणे ।
प्रकृतिं दक्षिणे देशे सङ्कर्षणमतः परम् ॥
पश्चिमे चतुरो वेदाननिरुद्धमतः परम् ।
अग्निमुत्तरतो हैमं वासुदेवमतःपरम् ॥
समन्तादगुरुपीठस्थानर्द्धयेत् काञ्चनान् बुधः ।
स्थापयेद्रत्नसंयुक्तान् पूर्णकुम्भान् दशैव तु ॥
दशैव धेनवो देयाः सहैमाम्बरशोभनाः ।
पादुकोपानहच्छत्रचामरासनदर्पणैः ॥
भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः ।
होमाधिवासनान्तं तु स्थापितो वेदपुङ्गवैः ।
इममुच्चारयेन्मन्त्रं त्रिः कृत्वाथ प्रदक्षिणम् ॥
नमोऽस्तु विश्वेश्वर ! विश्वधाम
जगत्सवित्रे भगवन्नमस्ते ।
सप्तर्षिलोकामरभूतलेश !
गर्भेण सार्द्धं वितरामि रत्नम् ॥
ये दुःखितास्ते सुखिनो भवन्तु
प्रयान्तु पापानि चराचराणाम् ।
त्वद्दानग्रस्तार्हतपातकानां
ब्रह्माण्डदोषाः प्रलयं व्रजन्तु ॥
एवं प्रजन्यामरविश्वगर्भं
दद्याद्विजेभ्यो दशधा विभज्य ।
भागद्वयं तत्र गुरोः प्रकल्प्य
समं भजेच्छेषमतः क्रमेण ॥
स्वल्पे तु होमे गुरुरेक एव
कुर्य्यादथैकाग्निविधानयुक्त्या ।
स एव संपूज्यतमोऽस्यवित्ते-
र्यथोक्तवस्त्राभरणादिकेन ॥
इत्थं य एतदखिलं पुरुषोऽत्र कुर्य्याद्
ब्रह्माण्डदानमधिगम्य महद्विमानम् ।
निर्द्धूतकल्मषविशुद्धतनुर्मुरारे-
रागन्दकृत्यदसुपेति सहामरोभिः ॥
सन्तारयेत् पितृपितामहपुत्रपौत्रान्
बन्धुप्रियातिथिकलत्रसुताधिकः सः ।
ब्रह्माण्डदानसुकृतोद्भवपापकोच-
मानन्दयेच्च जननीकुलमप्यशेषम् ॥
इति पठति शृणोति वा य एतत्
सुरभवनेषु गृहेषु धार्म्मिकाणाम् ।
मतिमपि च ददाति मोदतेऽसा-
वमरपतेर्भवने सहामरोभिः ॥"
इति मत्स्यपुराणे महादानानुकीर्त्तने ब्रह्माण्ड-
दानको नाम २५० अध्यायः ॥*॥ अपि च ।
"इदानीं कार्त्तिकी चेयं वर्त्तते ऽद्य नराधिप ! ।
ब्रह्माण्डं सर्व्वसम्पन्नं भूतरत्नौषधीयुतम् ॥
देवदानवयत्नेन युक्तमेतत् सदा विभो ! ।
एतद्धेममयं कृत्वा सर्व्वरोगरसान्वितम् ॥
सरत्नं पुरुषं कृत्वा कार्त्तिक्यां द्वादशीदिने ।
अथवा पञ्चदश्यां वै कार्त्तिक्यान्तैव नान्यतः ॥
पुरोहिताय गुरवे दापयेद्भक्तिमान्नरः ।
ब्रह्माण्डोदरवर्त्तीनि यानि भूतानि पार्थिव ! ।
तानि दत्तानि तेन स्युः समासात् कथितं तव ॥
यो यत्नेयंयते राजन् ! सहस्रवरदक्षिणैः ।
सैकोद्दिष्टो यजेत्तस्य ब्रह्माण्डस्य विशेषतः ॥
यः पुनः सकलश्चेदं ब्रह्माण्डं दातुमिच्छति ।
तेन यज्ञं क्रतुं दत्तं पठितं कीर्त्तितं भवेत् ॥"
वराह उवाच ।
"एतत् श्रुत्वा ततो राजा हैमकुम्भे प्रकल्पनम् ।
ब्रह्माण्डन्यधये प्रादात् सविधानञ्च तत्त्वतः ॥
सर्व्वकामैः सुसम्पन्नो ययौ स्वर्गं नराधिपः ॥"
इति वराहपुराणम् ॥

ब्रह्मात्मभूः, पुं, (ब्रह्मण आत्मनः शरीरात् भवतीति । ब्रह्मात्मन् + भू + क्विप् ।) अत्रिः । इति शब्दमाला ॥ (अस्य ब्रह्मशरीरजातत्वमुक्तं बृहदारण्यकौपनिषदि ।१।२।६-७। तद् यथा,—
"प्राणा वै यज्ञो वीर्य्यं तत्प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमधियत तस्य शरीर एव मन आसीत् । सोऽकामयत मेधं म इदं स्यादात्मन्वनेन स्यामिति । ततोऽत्रिः समभवद्यदत्यस्रत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम् ।" अत्र शाङ्करभाष्यं यथा,—
"प्राणाश्चक्षुरादयः । वै यज्ञो यज्ञोहेतुत्वात्तेषु हि सतुसुखातिर्भवति । तथा वीर्य्यं बलमस्मिन् शरीरे । नह्युत्क्रान्तप्राणो यज्ञस्थो बलवान् भवति । तस्मात् प्राणा एव यज्ञो वीर्य्यं चास्मिन् शरीरे । तदेवं प्राणलक्षणं यज्ञोवीर्य्यमुदक्रामत् उत्क्रान्तवत् तदेवं यज्ञोवीर्य्यभूतेषु प्राणेषूत्क्रान्तेषु शरीरान्निष्क्रान्तेषु तच्छरीरं प्रजापतेः श्वयितुमुच्छूनभावङ्गमधियतामेध्यभावत् । तस्य प्रजापतेः शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आसीत् । यथा कस्यचित् प्रिये विषये दूरङ्गतस्यापि मनो भवति तद्वत् । स तस्मिन्नेव शरीरे गतमनाः सन् किमकरोदिति ॥ उच्यते सोऽकामयत कथं मेधं मेधार्हं यज्ञियं मे ममेदं शरीरं स्यात् । किंस्वात्मन्वी आत्मवान् स्यामिति प्रविवेश। यस्मात्तच्छरीरं महियोगाद्गतयज्ञोवीर्य्यं सदश्वदश्वयत् ततस्तस्मादश्वः समभवत् । ततोऽश्वनामा प्रजापतिरेव साक्षादश्व स्तूयते । यस्माच्च पुनः स्तुप्रवेशात् गतयज्ञोवीर्य्यत्वादमेध्यं सन्मेध्यमभूत् तदेव तस्मादेवाश्वमेधस्याश्वमेधनाम्नः क्रतोरश्वमेधत्वमश्वमेधनाम लाभः ॥")

ब्रह्मादनी, स्त्री, हंसपदी । इति राजनिर्घण्टः ॥

ब्रह्मादिजाता, स्त्री, (ब्रह्मणः आदिजाता सम्भूता। क्वचित् ब्रह्माभिजाता इति पाठो दृश्यते ।) गोदावरी । इति राजनिर्घण्टः ॥

ब्रह्मापेतः, पुं, (ब्रह्मणां ब्रह्मतेजःस्वरूपं सूर्य्यमुपेत उपगतः ततः पृषोदरात् साधुः ।) माघमासे सूर्य्यनिकटस्थितराक्षसः । यथा,—
"त्वष्टा च यमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ ऋतजिद्धृतराष्ट्रश्च सप्तमः ॥
माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे ।"
इति विष्णुपुराणे । २ । १० । १५ ॥

ब्रह्मारण्यं, क्ली, (ब्रह्मणो वेदस्य अरण्यमिव ।) वेदपाठभूमिः । इति त्रिकाण्डशेषः ॥

ब्रह्मार्पणं, क्ली, (ब्रह्मैवार्पणमिति विग्रहे यदर्पणं तद्ब्रह्मैव । यथा, गीतायाम् । ४ । २४ ॥
"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणाहुतम् ॥"
"ब्रह्मार्पणं येन करणेन प्रकारेण ब्रह्मविद्भिरभावर्पयति तद्ब्रह्मैवेति पश्यति तस्मात्व्यतिरेकेणाभावं पश्यति यथा शुक्तिकायां रजताभावं पश्यति तद्वदुच्यते ब्रह्मैवार्पणमिति यथा यद्भवतं तच्छुक्तिकैवेति । ब्रह्म अर्पणमित्यसमस्ते पदे यदर्पणबुद्ध्या गृह्यते लोके तदस्य ब्रह्मविदो ब्रह्मैवेत्यर्थः । इति शाङ्करभाष्यम् ।) ब्रह्मणि समर्पणम् । तत्प्रकारो यथा,
"ब्रह्मणा दीयते देयं ब्रह्मणे संप्रदीयते ।
ब्रह्मैव दीयते चेति ब्रह्मार्पणमिदं परम् ॥
नाहं कर्त्ता सर्व्वमेतद्ब्रह्मैव कुरुते तथा ।
एतद् ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ॥
प्रीयतां भगवानीशः कर्म्मणानेन शाश्वतः ।
करोति सततं बुद्ध्या ब्रह्मार्पणमिदं परम् ॥
यद्वा फलानां संन्यासं प्रकुर्य्यात् परमेश्वरे ।
कर्म्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम् ॥"
इति कूर्म्मपुराणे ४ अध्यायः ॥

ब्रह्मावर्त्तः, पुं, (ब्रह्मणां ब्रह्मनिष्ठब्राह्मणानामावर्त्त इव । बहुलब्राह्मणाश्रयत्वादस्य तथात्वम् ।) देशविशेषः । तत्पर्य्यायः । तपोवटः २ । इति त्रिकाण्डशेषः । तत्परिमाणादि यथा,—
"सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥
तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥
कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः ॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवाः ॥
इति मानवे । २ । १७-२० ॥
(तीर्थविशेषः । यथा, महाभारते ।३।८३।५०।
"ततो गच्छेत धर्म्मज्ञ ! ब्रह्मावर्त्तं नराधिप ! ।
ब्रह्मावर्त्ते नरः स्नात्वा ब्रह्मलोकमवाप्नुयात् ॥"

अपरञ्च तत्रैव । ३ । ८१ । ४० ।
"ब्रह्मावर्त्तं ततो गच्छेत् ब्रह्मचारी समाहित:।
अश्वमेधमवाप्नोति सोमलोकञ्च गच्छति ॥")

ब्रह्मासनं, क्ली, (ब्रह्मणे ब्रह्मप्राप्त्यै आसनम् ।) ध्यानासनम् । योगासनम् । इत्यमर: ।२।७।४०॥ ध्यानं परमार्थचिन्तनम्। योगश्चित्तवृत्तिनिरोधमात्रम् । ध्यानं निराकारभावनम् । योग: साकारभावनमिति वा । तयो: पद्मस्वस्तिकादासनं यत् तत्र ब्रह्मासनं स्यात् । इति भरत: ॥ (आसनविशेष: । तल्लक्षणं यथा,—
"ब्रह्मासनं तदा वक्ष्ये यत्कृत्वा ब्राह्मणो भवेत्।
एकपादसुरौ दत्त्वा तिष्ठेदूर्द्धाक्षतिर्भवेत् ॥"
ब्रह्मण आसनमितिविग्रहे ब्रह्मान्तरञ्च ॥)

ब्रह्माख्यं, क्ली, (ब्रह्मसरूपमस्यम् ।) ब्रह्मस्वरूपाख्यम् । यथा, देवीपुराणे ।
"तदा रामेण क्रुद्धेन ब्रह्माख्यं प्रति रावणे ।
नारायणविघातार्थं चिन्तितं चतुराननम् ॥
सुञ्जमेखलदण्डाक्षसुवदर्भकृताजिनम् ।
कूष्माण्डवटुलमागत्य पुरत: स्थितम् ॥"

ब्रह्मिष्ठा, स्त्री, (अतिशयेन ब्रह्म । ब्रह्म + इष्ठन् + टाप् च ।) दुर्गा । यथा,—
"ब्रह्मिष्ठा वेदमातृत्वात् गायत्री परमाप्यजा ।
वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी ॥"
इति देवीपुराणे ४५ अध्याय: ॥

ब्रह्मी, स्त्री, (मेधाजनकत्वात् ब्रह्मणे हिता । ब्रह्म + अण् । वाहुलकात् न ङीप् ।) पङ्कगङ्गकमत्स्य: । इति त्रिकाण्डशेष: ॥ पाँकाल इति भाषा । फञ्जिकाशक: । शाकभेद: । ब्रमी इति भाषा । इति मेदिनी । मे, १६ ॥ ब्रह्मीशाकस्य पर्य्याय: । मत्स्याक्षी २ सरसा ३ वयस्था ४ ब्रह्मचारिणी ५ । इति रत्नमाला ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठरोग चिकित्सायाम् ।
"तैलतुल्यं प्रदातव्यं खरसञ्च पृथक् पृथक् ।
महाकालवचाब्रह्मी तुम्बुरुयिङ्गपुत्रिका ॥")
अस्या गुणा: । भेदकत्वम् । खरकारित्वम् । पित्तकफनाशित्वञ्च । इति राजवल्लभ: ॥ अस्या: पर्य्यायान्तरं गुणाश्च ब्राह्मीशब्दे द्रष्टव्या: ॥

ब्रह्मीघृतं, क्ली, (ब्रह्मीजातं घृतम् ।) औषधविशेष: । सारस्वतघृतमिति ख्यातम् । यथा,—
"सम्मूलपञ्चाङ्गुलमाच ब्रह्मीं प्रक्षाल्य वारिणा ।
उदूखले खोदयित्वा रसं वस्त्रेण गालयेत् ॥
रसे चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत् ।
हरिद्रा मालती कुष्ठं दृष्टती सहरीतकी ।
एतेषां पलिकैर्भागै: श्रेयास्तु कार्षिका: स्मृता: ॥
पिप्पलीथ विड़ङ्गानि सैन्धवं शर्करा वचा ।
सर्व्वमेतत् समालोड्य शुनैर्देयञ्च प्रक्षेत् ॥
एतत्प्राशनमात्रेण वाग्विशुद्धि: प्रजायते ।
सप्तरात्रप्रयोगेण किन्नरै: सह गीयते ॥
अर्द्धरात्रप्रयोगेण खरो भवति कौकिल: ।
मासमेकं प्रयोगेण भवेत् श्रुतिधरो नर: ॥
पञ्च गुल्मान्-प्रमेहांश्च कासं पञ्चविधं जयेत् ।
वन्ध्यानाञ्चैव नारीणां नराणामप्यरेतसाम् ।
घृतं सारस्वतं नाम बलवर्णकरं परम् ॥"
इति जयनारायणशतचिकित्सारत्नसंग्रह: ॥
(अपरञ्च ।
"ब्रह्मीरसे वचाकुष्ठशङ्खपुष्पीभिरेवच ।
पुराणं मेध्यसंस्कारमपस्मारनाशनम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽपस्माराधिकारे ॥)

ब्रह्मोक्तं, त्रि, ब्रह्मणि या सम्यक् प्रकारेण उक्तं यथितम् । ("लोपोऽस्योमाङो: ।" इति सूत्रेण अकार लोप: ।) इति सुग्धबोधव्याकरणम् ॥

ब्रह्मोत्तर, त्रि, ब्रह्मा ब्राह्मण: उत्तर: प्रधानं यस्य । ब्राह्मणस्वामिकभूम्यादि । इति व्यवहार प्रसिद्धम् ॥ (देशभेद: । इति माधवम् ।१२०।५०॥)

ब्रह्मोद्यं, क्ली, (ब्रह्मणो वेदस्य वदनम् । ब्रह्म + वद् + ण्यप् ।) ब्रह्मणो वाक्यम् । इति सुग्धबोधव्याकरणम् ॥

ब्रह्मोद्या, त्रि, (ब्रह्म + वद् + ण्यत् + टाप् ।) ब्रह्मण: कथा । इति सुग्धबोधव्याकरणम् । (यथा, मनु: । २ । २३१ ।
"ब्रह्मोद्याञ्च कथा: कुर्य्यात् पितृणामेतदीप्सितम् ॥"
"परमात्मनिरूपणपरा: कथाश्च कुर्य्यात् ।"
इति तट्टीकायां कुल्लूकभट्ट: ॥)

ब्रह्मोपनेता, [ऋ] पुं, (ब्रह्मार्थं ब्राह्मणं उपनयते इति । ब्रह्म + उप + नी + तृच् । उपनयनहेतुकदण्डत्वात्तथात्वम् ।) पलाशवृक्ष: । इति राजनिर्घण्ट: ॥ ब्राह्मणोपनयनकर्त्ता च ॥

ब्रह्मौदनं, क्ली, (ब्रह्मणे देयमोदनम् ।) यज्ञे ऋत्विग्भ्यो दत्तमन्नम् । इति वैद्यिका: । (यथा, अथर्ववेदे । ४ । ३५ । ७ ।
"ब्रह्मौदनं पचामि श्रध्नस्तु मे श्रद्धानस्य देवा: ॥")

ब्राह्मं, क्ली, (ब्रह्मण इदम् । ब्रह्मन् + "तस्येदम् ।"४।३।१२०। इत्यण् । 'नस्तद्धिते ।' ६।४।१४४। इति टिलोप: ।) ब्रह्मतीर्थं । तत्तु अङ्गुष्ठस्य मूले वर्त्तते । इत्यमर: ॥ २ । ७ । ५१ ॥ अनेन तीर्थेन द्विजस्याचमनं यथा, आह्निकतत्त्वे ।
"अन्तर्जानुशुचौ देश उपविश्य उदङ्मुख: ।
प्राप्य ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥
अङ्गुष्ठोत्तरतो रेखा या पार्श्वदेशिनश्च य ।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै ॥"
ब्रह्मपुराणम् । यथा,—
"ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ॥"
इति मलमासतत्त्वधृतविष्णुपुराणवचनम् ॥
(ब्रह्मसम्बन्धिनि, त्रि । यथा, मनु: । १ । ६८ ।
"ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासत: ।
एकैकशो युगानान्तु क्रमशस्तन्निबोधत ॥"
ब्रह्मा देवतास्य इति । ब्रह्मन् + "तस्य देवता ।" ४ । २ । २४ । इत्यण् । टिलोप: । ब्रह्मदेवताकमन्त्रादि । यथा, रघु: ।१२ । ६० ।
"अमोघं सन्दधे बाणं धनुष्येकधनुर्द्धर: ।
ब्राह्ममस्त्रं प्रियाशोकश्लथनिष्कर्षणौषधम् ॥")

ब्राह्म:, पुं, (ब्रह्मणोऽपत्यं पुमान् इति । ब्रह्मन् + "तस्यापत्यम् । ४ । १ । ९२ । इत्यण् । "नस्तद्धिते ।" ६ । ४ । १४४ । इति टिलोप: ।) नारद: । इति जटाधर: ॥ (ब्रह्मण इदमायमिति अण् ।) विवाहविशेष: । यथा,—
"वरमाहूय यत्रार्घ्यालङ्कृता कन्या यत्र दीयते स: ।"
यथा,—
"आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्म्म: प्रकीर्त्तित: ॥"
इत्युद्वाहतत्त्वम् ॥
("रात्रेश्च पश्चिमे यामे सुप्तोत्थो ब्राह्म उच्यते ।" इति नियमात् रात्रिशेषयामार्द्धस्थितोऽरुणोदयात् प्राक्कालो ब्राह्मो मुहूर्त्त: । यथा, मनु: । ४ । ९२ ।
"ब्राह्मे मुहूर्त्ते बुद्ध्येत धर्म्मार्थौ चानुचिन्तयेत् ॥")

ब्राह्मणं, क्ली, (ब्रह्मन् + अण् न टिलोप: ।) ब्रह्मसंघात: । ब्राह्मणसमूह: । वेदभाग: । इति मेदिनी । ने, ६० ॥

ब्राह्मण:, पुं, ब्राह्मणो विप्रस्य प्रजापतेर्वा अपत्यम् । ब्रह्म वेदमधीते वा स: । इति भरत: ॥ (ब्रह्मन् + अण् "ब्राह्मोऽजातौ ।" ६ । ४ । १७१ । इति टिलोप: ।) तत्पर्य्याय: । द्विजाति: २ व्यजन्मा ३ भूदेव: ४ वाड़व: ५ विप्र: ६ । इत्यमर: ॥ २ । ७ । ३ ॥ द्विज: ७ सूत्रकण्ठ: ८ ज्येष्ठवर्ण: ९ अग्रजातक: १० द्विजन्मा ११ वक्त्रज: १२ मैत्र: १३ वेदवास: १४ नय: १५ गुरु: १६ । इति शब्दरत्नावली ॥ ब्रह्मा १७ षट्कर्म्मा १८ द्विजोत्तम: १९ । इति राजनिर्घण्ट: ॥* ॥ अयं सर्व्ववर्णश्रेष्ठ: । ब्रह्मणो मुखाज्जात: । शाकद्वीपे तस्य संज्ञा हंस: । शाल्मलद्वीपे श्रुतिधर: । कुशद्वीपे कुशल: । क्रौञ्चद्वीपे गुरु: । शाकद्वीपे ऋतव्रत: । पुष्करद्वीपे सर्व्वे एकवर्णा: । अस्य शास्त्रनिरूपितधर्म्माश्रय: अध्ययनं यजनं दानञ्च । जीविकास्तिस्र: अध्यापनं याजनं प्रतिग्रहश्च । अयमाश्रमचतुष्टयवान् भवति । यथा । ब्रह्मचारी गृहस्थ: वानप्रस्थ: सन्यासी च । क्षत्रियवैश्ययोस्तु क्रमश एकैकपादहीनत्वमिति बोध्यम् । इति श्रीभागवतम् ॥ * ॥ ब्राह्मणीक्षत्रियावैश्यासु ब्राह्मणाज्जातो ब्राह्मण: । यथा,—
"ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मण: स्यान्न संशय: ।
क्षत्रियायां तथैव स्याद्वैश्यायामपि चैव हि ॥"
इति महाभारते अनुशासने । ४० । २८ ॥
तस्य लक्षणं यथा,—
"ज्ञात्वा कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च ।
एभिर्युक्तो हि यस्त्विध्मं स द्विज उच्यते ॥"
इति वह्निपुराणम् ॥
अपि च ।
"न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च य: ।
सर्व्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदु: ॥

ब्राह्मणः

ऋषेरिव गवाह्नीतः कौहित्यान्नरकादिव।
कुलपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः॥
येन केनचिदाच्छन्नो येन केनचिदाशितः।
यत्र क्वचन शायी च तं देवा ब्राह्मणं विदुः॥
विसृष्टं सर्वसङ्गेभ्यो मुनिमाकाशवत् स्थितम्।
अल्पमेकचरं शान्तं तं देवा ब्राह्मणं विदुः॥
जीवितं यस्य धर्मार्थं धर्मो रत्यर्थमेव च।
अहोरात्राच्च पुण्यार्थं तं देवा ब्राह्मणं विदुः॥
निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः॥"

इति महाभारते मोक्षधर्मः॥*॥

अपि च। विप्राखयूप उवाच।

"विप्रस्य लक्षणं ब्रूहि लक्षशक्तिः का च तत्कृता।
यतस्त्वावृत्यदेवेश वाग्वागाः ब्राह्मणाः स्मृताः॥

कल्किरुवाच।

वेदा मामीश्वरं प्राहुरव्यक्तं व्यक्तिमत् परम्।
ते वेदा ब्राह्मणमुखे नाना धर्माः प्रकाशिताः॥
यो धर्मो ब्राह्मणानां हि सा भक्तिर्मम पुष्कला।
तयाहं तोषितः श्रीशः संभवामि युगे युगे॥
ऋङ्मन्त्रैस्तु चितं स्रुक्त्रं सधवानिर्मितं शुभैः।
तन्मुखत्रयमधोक्तः यज्ञस्रुक्त्रं विदुर्बुधाः॥
त्रिगुणं तदृग्यजुर्युक्तं वेदप्रवरसंस्तुतम्।
शिरोधरात्राभिमध्यात् पृष्ठार्द्धपरिमाणकम्॥
यजुर्विदां नाभिमितं सामगानामयं विधिः।
वामस्कन्धेन विधृतं यज्ञस्रुक्त्रं बलप्रदम्॥
ऋङ्मन्त्रचन्दनाद्यैस्तु धारयेत्तिलकं द्विजः।
भाले त्रिपुण्ड्रं कर्त्राङ्गं केशपर्यन्तसुज्वलम्॥
पुण्ड्रमङ्गुलिमानन्तु त्रिपुण्ड्रं तत्त्रिधाकृतम्।
ब्रह्मविष्णुशिवावासं दर्शनात् पापनाशनम्॥
ब्राह्मणानां करे स्वर्गो वाचो वेदाः करे हरिः।
गात्रे तीर्थानि यागाश्च नाड्यां प्रकृतिरक्षिता॥
सावित्री कण्ठकुहरा हृदयं ब्रह्मसंस्तुतम्।
तेषां स्नानान्तरे धर्मैः पृष्ठेऽधर्मैः प्रकीर्तितः॥
भूदेवा ब्राह्मणा राजन्! पूज्या वन्द्याः सदुक्तिभिः।
चातुराश्रम्यकुशला मम धर्मप्रवर्तकाः॥
बालाश्चापि ज्ञानवृद्धास्तपोवृद्धा मम प्रियाः।
तेषां वचः पालयितुमवतारः कृता मया॥
महाभाग्यं ब्राह्मणानां सर्वपापप्रणाशनम्।
कलिदोषहरं श्रुत्वा मुच्यते सर्वतो भयात्॥"

इति कल्किपुराणे ४ अध्यायः॥*॥

अपि च।

"कर्मणा ब्राह्मणो जातः करोति ब्रह्मभावनाम्।
स्वधर्मनिरतः शुद्धस्तस्माद्ब्राह्मण उच्यते॥"

इति ब्रह्मवैवर्ते गणेशखण्डे ३५ अध्यायः॥*॥

अपि च।

"जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः।
वेदाध्ययनसम्पन्नः षट्सु कर्मस्ववस्थितः॥
शौचाचारपरो नित्यं विघसाशी गुरुप्रियः।
नित्यव्रती सत्यरतः स वै ब्राह्मण उच्यते॥
सत्यं दानमथोऽद्रोह आनृशंस्यं क्षमा घृणा।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः॥*॥

ब्राह्मणः

तस्य धर्मो यथा,—

ब्राह्मणस्य तु यो धर्मस्तं ते वक्ष्यामि केवलम्।
दममेव महाराज! धर्ममाहुः पुरातनम्॥
स्वाध्यायाभ्यसनञ्चैव तत्र कर्म समाप्यते।
तच्चेदितमुपागच्छेदनमानं स्वकर्मभिः॥
अकुर्व्वाणं विकर्म्माणि आत्मं प्रज्ञानतर्पितम्।
कुर्व्वीतोपेत्य सन्तानमथ दद्यादृयजेत च॥
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते।
परिनिष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्राह्मणः॥
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते।"

इति पाद्मे स्वर्गखण्डे २६ अध्यायः॥*॥

तस्य माहात्म्यादि यथा,—

"सर्वेषामेव वर्णानां ब्राह्मणः परमो गुरुः।
तस्मै दानानि देयानि भक्तिश्रद्धासमन्वितैः॥
सर्वदेवमयो विप्रः प्रत्यक्षत्रिदशो भुवि।
स तारयति दातारं दुस्तरे विश्वसागरे॥

हरिरुवाच।

सर्वधर्मगुरुर्विप्रस्तया प्रोक्तः सुरोत्तम!।
तेषां मध्ये च कः श्रेष्ठः कस्मै दानं प्रदीयते॥

ब्रह्मोवाच।

सर्वेऽपि ब्राह्मणाः श्रेष्ठाः पूजनीयाः सदैव हि।
अविद्या वा सविद्या वा नात्र कार्या विचारणा॥
क्षेत्रादिदोषनिघ्ना ये ब्राह्मणा ब्राह्मणोत्तम!।
आत्मभ्यो देवविप्रेऽपि परेभ्यो न कदाचन॥
अनाचारा द्विजाः पूज्या न च शूद्रा जितेन्द्रियाः।
अभक्ष्यभक्षका गावः कोलाः सुमतयो न च॥
माहात्म्यं भूमिदेवानां विशेषादुच्यते मया।
तव स्नेहाद्विजश्रेष्ठ! निगृह्यतां समाहितः॥
क्षत्रियाणाञ्च वैश्यानां शूद्राणां गुरवो द्विजाः।
अन्योन्यं गुरवो ज्ञेयाः पूजनीयाश्च भूसुर!॥
ब्राह्मणं प्रथमेदृष्ट्वा विष्णुबुद्ध्या नरोत्तमः।
आयुः पुत्राश्च कीर्तिश्च सम्पत्तिस्तस्य वर्द्धते॥
न च नीति दिनं यस्तु मूढधीर्मानवो भुवि।
सदर्शनेन तच्छीघ्रं दुःखमिच्छति केशवः॥"

पुण्यादिदृष्टब्राह्मणस्य प्रणामविधेर्यथा,—

"पुण्यदृष्टं पयोदृष्टं देवदृष्टञ्च भूसुर!।
न नमेद्ब्राह्मणं प्राज्ञस्तेनाभ्यङ्कितवित्तवत्॥
जलस्थं देवदेवेशं ध्यानमञ्जितचेतसम्।
देवपूजाञ्च कुर्व्वन्तं न नमेद्ब्राह्मणं बुधः॥
वह्निक्रियां प्रकुर्व्वन्तं सुस्नानञ्च द्विजोत्तम!।
तथा सामानि गायन्तं न नमेद्ब्राह्मणं बुधः॥
ब्राह्मणा यत्र तिष्ठन्ति बहवो द्विजसत्तम!।
प्रत्येकन्तु नमस्कारस्तत्र कार्यो न धीमता॥
क्षतात्मिवादनं विप्रं भक्त्या यो नाभिवादयेत्।
स चाण्डालसमो ज्ञेयो नाभिवाद्यः कदापि च॥
क्षतप्रणामं तनयं नमेतां पितरौ न च।
क्षतप्रणामाः सर्वेऽपि नमस्कार्या द्विजैर्द्विजाः॥
क्षतदोषान् द्विजान् गाञ्च न द्विषन्ति विचक्षणाः।
द्विषन्ति यापि मौढ्येन तेषां रुष्टः सदा हरिः॥
याचकान् ब्राह्मणान् यस्तु कोपदृष्ट्या प्रपश्यति।

ब्राह्मणः

दृष्ट्वोग्रचेष्टयं तस्य नेत्रयोः कुरुते यमः॥
विप्रनिर्भर्त्सनं दृष्ट्वा येन वक्त्रेण कुर्व्वते।
तस्मिन् वक्त्रे यमस्तप्तं लौहपिण्डं ददाति वै॥
ब्राह्मणो यदृगुद्दिष्टं सुदत्तं तदृगुद्दिशेत्।
देवताः सकला एव पितरश्च सुरर्षयः॥"

तस्य पादोदकादिमाहात्म्यं यथा,—

विप्रपादोदकं यस्तु कणमात्रं वहेद्बुधः।
देहस्थं पातकं तस्य सर्वमेवाशु नश्यति॥
कोटित्रह्माङ्गमध्येषु सन्ति तीर्थानि यानि वै।
तीर्थानि तानि सर्वाणि वसन्ति द्विजपादयोः॥
विप्रपादोदकैर्निर्त्यं सिक्तं स्यादृयस्य मस्तकम्।
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः॥
सर्वपापानि घोराणि ब्रह्महत्यादिकानि च।
सद्य एव विनश्यन्ति विप्रपादाम्बुधारणात्॥
यथाद्या यादवः सर्वे परमक्लेशदायकाः।
गच्छन्ति विलयं सद्यो विप्रपादाम्बुभक्षणात्॥
पित्रर्थं यानि तोयानि दीयन्ते विप्रपादयोः।
तैस्तृप्ताः पितरः स्वर्गे तिष्ठन्त्याचन्द्रतारकम्॥
प्रक्षाल्य विप्रचरणौ दूर्व्वाभिर्यो ऽर्चयेद्बुधः।
तेनार्चितो जगत्स्वामी विष्णुः सर्वसुरोत्तमः॥
विप्राणां पादनिर्माल्यं यो मर्त्यः शिरसा वहेत्।
सत्यं सत्यमहं वच्मि तस्य मुक्तिर्हि ग्राम्यती॥
तस्य प्रदक्षिणफलम्।

"विप्रं प्रदक्षिणीकृत्य वन्दते यो नरोत्तमः।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥"

तस्य पादसेचनफलम्।

यो दद्यात् फलताम्बूलं विप्राणां पादसेचने।
इह लोके सुखं तस्य परलोके ततोऽधिकम्॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्।
मोक्षार्थी लभते मोक्षं विप्रपादस्य सेचनात्॥
रोगी रोगात् प्रमुच्येत पापी मुच्येत पातकात्।
मुच्येत बन्धनाद्बद्धो विप्राणां पादसेचनात्॥
अनपत्याश्च या नार्य्यो मृतापत्याश्च याः स्त्रियः।
बद्धपत्या जीववत्सा स्युर्विप्रपादसेचनात्॥"

इति पाद्मे क्रियायोगसारे २० अध्यायः॥

तस्य सन्ध्याया अकरणे दोषो यथा,—

"नोपतिष्ठति यः पूर्वां नोपास्ते यस्तु पश्चिमाम्।
स शूद्रवद्बहिः कार्यः सर्वस्माद्विजकर्मणः॥"

तस्य सन्ध्याकरणफलं यथा,—

"यावज्जीवनपर्य्यन्तं वह्निसन्धं करोति च।
स च सूर्य्यसमो विप्रस्तेजसा तपसा सदा॥
तत्पादपद्मरजसा सद्यः पूता वसुन्धरा।
जीवन्मुक्तः स तेजस्वी सन्ध्यापूतो हि यो द्विजः॥
तीर्थानि च पवित्राणि तस्य संस्पर्शमात्रतः।
तस्मात् पापानि यान्त्येव वैनतेयादिवोरगाः॥
सन्ध्याया अकरणे दोषो यथा,—
"न यज्ञन्ति सुरास्तेषां पितरः पिण्डतर्पणम्।
स्वेच्छया न दिनातीव त्रिसन्ध्यरहितस्य च॥"

तस्य निन्दितकर्माणि यथा,—

"विष्णुमन्त्रविहीनश्च त्रिसन्ध्यरहितो द्विजः।
एकादशीविहीनश्च विप्रहीनो ह्ययोरगः॥
हरेर्नैवेद्यभोजी न श्रावको हृषवाहकः।

ब्राह्मणः

शूद्रान्नभोजी विप्रश्च विप्रहीनो यथोरगः ।
ग्रामदाही च शूद्रान्नी यो विप्रो हव्यलीपतिः ।
शूद्रान्नी क्षपकारी च शूद्रयाजी च यो द्विजः ।
अविक्रयी मधुक्रीवी विप्रहीनो यथोरगः ।
यः कन्याविक्रयी विप्रो यो हरेर्नामविक्रयी ।
यो विद्याविक्रयी विप्रो विप्रहीनो यथोरगः ।
ह्यश्वोदये च दिवसभोजी मनुष्यभोजी च यो द्विजः ।
द्विजापूजादिरहितो विप्रहीनो यथोरगः ।"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे २१ अध्यायः ।७।

अपि च ।

"यदि शूद्रान्नभोक्तृद्विजो हव्यलीपतिरेव सः ।
स च मरो विप्रजातेश्च चाण्डालात् सोऽधमः स्मृतः ।
विप्रान्नमत्र तन्मिश्रो मद्यं तस्य च तर्पणम् ।
तत्पिबन्ति सुराश्चात्र पूजने तत्समं भवेत् ।
कोटिजन्मार्जितं पुण्यं सन्ध्यार्चातपसार्जितम् ।
द्विजस्य हव्यलीभोगान्नाश्नन्नेव न संशयः ।
ब्राह्मश्च सुरापीतो विष्भोजी हव्यलीपतिः ।
हरिद्वारवरभोजी च कुम्भीपाकं व्रजेद्ध्रुवम् ।"

अपि च ।

"करोत्यन्यद्दा सन्ध्यां सन्ध्यां वा न करोति यः ।
विप्रत्वं वर्जयेद्यो वा सन्ध्याहीनश्च च द्विजः ।
नारायणक्षेत्रादितीर्थे तस्य प्रतिग्रहादीनां यथा,
"तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पुरे ।
नारायणीं परमेशं गङ्गासागरसङ्गमे ।
पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले ।
हरिद्वारे च केदारे सोमे वदरिकाश्रमे ।
सरस्वतीनदीतीरे पुण्ये हिमवते वने ।
नैमिषारण्यके गोप्रतीर्थे विल्वेशाख्ये हिमालये ।
इतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च ।"

पारिभाषिकमहापातकिब्राह्मणा यथा,—

"शूद्रयाजोऽग्निहत्याजी ग्रामयाजीति कीर्तितः ।
देवोपजीवजीवी च देवलश्च प्रकीर्तितः ।
शूद्रान्नाशोपजीवी यः क्षपकारः प्रकीर्तितः ।
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः ।
इते महापातकिनः कुम्भीपाकं प्रयान्ति ते ।"

इति ब्रह्मवैवर्ते प्रकृतिखण्डे २० अध्यायः ।७।

विप्राणामाशौचवचनं पूर्वखण्डस्थयमं यथा,—

"ब्राह्मणं कर्तुमर्हन्ति प्रथमसमदा ग्रिसुम् ।
पूर्वखण्डस्थयमं यद्यो विप्राशौचवचनं ध्रुवम् ।"

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १९ अध्यायः ।

ब्राह्मणस्य स्वधर्मो यथा,—

"ब्राह्मणस्य स्वधर्मश्च चिरन्तनमनेकं हरेः ।
तन्मादोषकर्मवैद्यभक्तश्च सुधाधिकम् ।
अहं विद्या अहं ब्रह्ममनिवेदं हरेर्नृप ! ।
भवन्ति शूकराः कर्मे ब्राह्मणा यदि भुञ्जते ।
आशौचं भुञ्जते विप्रा एकादश्यां न भुञ्जते ।
ब्रह्मवर्चादिने चैव शिवरात्रौ सुनिश्चितम् ।

ब्राह्मणः

तथा रामनवम्यां च यत्नतः पुण्यवासरे ।
ब्राह्मणानां स्वधर्मश्च कथितो ब्रह्मणा नृप ! ।"

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ५८ अध्यायः ।

ब्राह्मणस्य ब्राह्मत्वनियमा यथा,—

"वेदं वेदौ तथा वेदानथो वा तु समाहितः ।
तदर्थमभिगम्याथ तत्र स्नायाद्विजोत्तमः ।
गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया ।
चीर्णव्रतोऽथ सुस्नातो ह्यग्नयः स्नातुमर्हति ।
वेदवीत्यारवेदयष्टिमन्त्रस्नानमथोत्तरम् ।
यज्ञोपवीतद्वितयं सोदकञ्च कमण्डलुम् ।
ह्यश्वोद्भवीयममलं पादुके छात्युपानहौ ।
रौक्मे च कुण्डले धार्ये छत्रकैङ्गनखः शुचिः ।
स्वाध्याये नित्ययुक्तः स्याद्द्विर्मांसं न धारयेत् ।
अन्यत्र काञ्चनाद्विप्रो न रत्नं विभृयात् क्वचित् ।
शुक्लाम्बरधरो नित्यं सुगन्धः प्रियदर्शनः ।
न जीर्णमलवद्वासा भवेच्च विभवे सति ।
न रक्तसूत्रवस्त्राद्यं धृतं वासो न कुञ्चिकाम् ।
गोपानद्दौ वस्त्रं वाथ पादुके च प्रयोजयेत् ।
उपवीतमलङ्कारं कुम्भान् स्वाञ्जनानि च ।
नापरेषां परीदध्याद्वासो न विधृतं वसेत् ।
आचरेद्द्विजवद्दोमान् षडङ्गामालम: शुभाम् ।
रूपलक्षणसंयुक्तां योनिदोषविवर्जिताम् ।
असाङ्गोत्रप्रभवामसमानार्षगोत्रजाम् ।
आचरेद्ब्राह्मणो भार्यां शीलशौचसमन्विताम् ।
ऋतुकालाभिगामी स्यादृयावत् पुत्रोऽभिजायते ।
वर्जयेत् प्रतिषिद्धानि प्रयत्नेन दिनानि तु ।
षष्ठ्यष्टमी पर्वदशी द्वादशी च चतुर्दशी ।
ब्रह्मचारी भवेन्नित्यं तद्दिनस्मरणादपि ।
आदधीतावसथ्याग्निं जुहुयाच्चातवेदसम् ।
व्रतानि स्नातको नित्यं यावन्ति च पालयेत् ।
वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः ।
अकुर्वाणः पतत्यात्मु नरकानतिभीषणान् ।
अभ्यसेत् प्रयतो नित्यं वेदं यज्ञान् द्वापयेत् ।
कुर्यादृयज्ञादि कर्माणि सन्ध्योपासनमेव च ।
सदा समाधिकः कुर्यादुपेयादीश्वरं सदा ।
देवतान्यपि गच्छेत्तु कुर्याद्वाग्यभिषोषणम् ।
न धर्मं स्नापयेद्विद्वान् न पापं गूहयेदपि ।
कुर्यात्तालहितं नित्यं सर्वभूतानुकम्पकः ।
वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च ।
वेशवाग्बुद्धिसारूप्यमाचरन् विचरेत् सदा ।
श्रुतिस्मृत्युदितं सम्यक् साधुभिर्यच्च सेवितः ।
तमाचरन्निषेवेत नेहेतान्यत्र कर्हिचित् ।
येनास्य पितरो याता येन याताः पितामहाः ।
येन यान्ति सतां मार्गं तेन गच्छन्नरिष्यति ।
नित्यं स्वाध्यायशीलः स्यान्नित्यं यज्ञोपवीतिमान् ।
सत्यवादी जितक्रोधो ब्रह्मभूयाय कल्पते ।
सन्ध्यास्नानरतो नित्यं ब्रह्मयज्ञपरायणः ।
अनलसुर्दृढाङ्गो यतस्थः प्रजावहत ।
वीतरागभयक्रोधो लोभमोहविवर्जितः ।
सावित्रीजापनिरतः श्रद्धावान् सुव्रतो यतौ ।
मातापित्रोर्हिते युक्तो गोब्राह्मणहिते रतः ।
दाता यज्ञी देवभक्तो ब्रह्मलोके महीयते ।

ब्राह्मणः

त्रिवर्गसेवी सततं देवतानाञ्च पूजनम् ।
कुर्यादहरहर्नित्यं नमस्येत् प्रयतः सुरान् ।
विभागशीलः सततं क्षमायुक्तो दयात्मकः ।
यहस्थस्तु समायुक्तो न यहे न यहो भवेत् ।
क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः ।
अध्यात्मं नित्यता ज्ञानमेतद्ब्राह्मणलक्षणम् ।
एतस्मान्न प्रमाद्येत विशेषेण द्विजोत्तमः ।
यथाशक्ति चरन् कर्म निन्दितानि विवर्जयेत् ।
विधूय मोहकलिलं लब्ध्वा योगमनुत्तमम् ।
यहस्थो मुच्यते बन्धान्नात्र कार्या विचारणा ।
विगर्हातिक्रमद्वेषहिंसावन्धवधात्मनाम् ।
अन्यमनुष्यसत्त्वानां दोषाणां वर्जनं क्षमा ।
खद्गःखेष्विव कारुण्यं परदुःखेषु बौद्धदात् ।
दया मनुसुतैः प्रोक्तः साक्षाद्धर्मस्य साधनम् ।
चतुर्दशानां विद्यानां धारणं हि यथार्थतः ।
विज्ञानमितरं विद्याद्येन धर्मो विवर्द्धते ।
अधीत्य विधिवद्विद्यामर्थञ्चोपलभ्य तु ।
धर्मैकार्थान्निवृत्तश्च तद्विज्ञानमिष्यते ।
सत्येन लोकं जयति सत्यन्तु परमं पदम् ।
यथा भूतप्रसादस्तु सत्यमाहुर्मनीषिणः ।
दमः शरीरावनतिः शमः प्रज्ञा प्रसादजः ।
अध्यात्मगतरं विद्याद्यत्र गत्वा न शोचति ।
यत्र स देवो भगवान् विद्यते यत्र विद्यते ।
साक्षादेव महादेव ! तज्ज्ञानमिति कीर्तितम् ।
तन्निष्ठस्तत्परो विद्वान्नित्यमक्रोधनः शुचिः ।
महायज्ञपरो विप्रो लभते तदनुत्तमम् ।
धर्मैस्त्रायतनं यत्राक्षरौरं परिपालयेत् ।
न हि देहं विना रुद्र ! पुरुषैर्विद्यते परः ।
नित्यं धर्मार्थकामेषु युञ्जीत नियतो द्विजः ।
न धर्मवर्जितं काममर्थं वा मनसा स्मरेत् ।
सोदरेषि स्वधर्मेण गत्वधर्मं समाचरेत् ।
धर्मो हि भगवान्देवो गतिः सर्वेषु जन्तुषु ।
भूतानां प्रियकारी स्यान्न परद्रोहकर्मधीः ।
न वेददेवतानिन्दां कुर्यान्नैव न सम्वदेत् ।
यस्त्रिसं नियतो विप्रो धर्माध्यायं पठेत् शुचिः ।
अध्यापयेच्छ्रावयेद्वा ब्रह्मलोके महीयते ।"

इति कौर्मे उपविभागे १४ अध्यायः ।

अपि च । सूत उवाच ।

"आनृशंस्यं क्षमा सत्यमहिंसा दममार्दवम् ।
ध्यानं प्रसादो माधुर्यमार्जवं शौचमेव च ।
दत्त्वा दानं तपः सत्यं स्वाध्यायो ह्यात्मनियतः ।
व्रतोपवासौ मौनञ्च स्नानं पैशुन्यवर्जनम् ।
एभिर्युक्तो सुनिश्रेष्ठ यः सदा वर्तते द्विजः ।
हुत्वा तु पावकं सर्वं परं ब्रह्माधिगच्छति ।
अविद्यो वा सविद्यो वा निरग्निः साग्निकोऽपि वा ।
यो विप्रस्तपसा युक्तः स परं स्वर्गमाप्नुयात् ।
सर्वेषामुत्तमं श्रेष्ठं विमुक्तिफलदायकम् ।
ब्राह्मणस्य तपो वक्ष्ये तन्मे निगदतः शृणु ।
सायं प्रातश्च यः सन्ध्यामुपास्ते स्वस्थमानसः ।
जपन् हि पावनीं देवीं गायत्रीं वेदमातरम् ।
तपसा भावितो देवो ब्राह्मणः पूतकिल्बिषः ।

न सीदेत् प्रतिगृह्णन् सप्तद्वीपां सपत्तनाम्।
दे सन्ध्ये जुपतिष्ठेत गायत्रीं प्रयतः शुचिः॥
यत्तस्य दुष्कृतं नास्ति पूर्वतः परतोऽपि वा।
यज्ञदानरतो विद्वान् साङ्गवेदस्य पाठकः॥
गायत्रीध्यानपूतस्य कलां नार्हन्ति षोडशीम्।
एवं किल्बिषयुक्तस्तु विनिर्दहति पातकम्॥
उभे सन्ध्ये जुपासीत तस्मान्नित्यं द्विजोत्तमः॥
तस्य देहापवित्रत्वं यथा,—
"यथा देहापवित्रत्वं विप्रादीनां यतो भवेत्।
देवर्षे! शृणु तत्सर्वं नराणामानुपूर्विकम्॥
जातके मृतकेऽशाते जलौकाभिः शते तथा।
अपवित्रो द्विजातीनां देहः सन्ध्यादिकर्मसु॥
अपूतसप्तशुक्तसर्गे नरो मूत्रपुरीषयोः।
अस्पृश्यस्पर्शने चैव ब्रह्मयज्ञजपादिषु॥
रक्तपाते नखच्छेददन्तखड्गादिभिः क्षते।
विप्रादेरशुचिः कायः शस्त्रास्त्रैः कण्टकादिभिः॥
सूतकेऽशाननोच्छिष्टेऽपवित्रः स्मृतमैथुने।
शृणु ब्राह्मणादीनां शरीरं क्षुरकर्मणि॥
ज्वरादिभिश्चतुःसप्तदिरोगैर्युक्ते द्विजन्मनाम्।
वपुरप्रयतं पूजादानहोमजपादिषु॥
धूमोद्गारे वमौ श्राद्धपतितान्नादिभोजनैः।
तथा च रेतःस्खलने सर्वदेहापवित्रता॥
अपवित्रं द्विजातीनां वपुः स्याच्छ्राद्धदर्शने।
गर्हितदानग्रहणे पतिते पातकादिभिः॥
अशौचार्त्तेन मुक्तिः स्याज्ज्ञातके मृतके द्विज!॥
सर्ववर्णाश्रमादीनां तनोः सन्ध्यादिकर्मसु॥"
इति पाद्मोत्तरखण्डे १०६ अध्यायः॥
अथ श्राद्धीयब्राह्मणनिर्णयः।
मान्धातोवाच।
"कीदृग्भ्यः प्रदातव्यं भवेच्छ्राद्धं महामुने!।
द्विजेभ्यः किंगुणिभ्यो वा तन्मे व्याख्यातुमर्हसि॥
नारद उवाच।
ब्राह्मणान्न परीक्षेरन्नान्यवर्णास्त्रयो नृप!।
दैवे कर्मणि पित्र्ये च न्याय्यमाहुः परीक्षणम्॥
देवता पूजयन्त्योह दैवेनैव हि तेजसा।
उपेयुः तस्माद्विप्रेभ्यः सर्वेभ्यो दापयेन्नरः॥
श्राद्धे तथ महाराज! परीक्षेद्ब्राह्मणं बुधः।
कुलशीलवयोरूपविद्ययाभिजनेन च॥
तेषामन्ये पङ्क्तिदूषास्तथान्ये पङ्क्तिपावनाः।
अपाङ्क्तेयास्तु ये राजन्! कीर्त्तयिष्यामि तान् शृणु॥"

अपाङ्क्तेया यथा,—
कितवो भूयहा यश्च पशुपालो निराकृतिः।
यामप्रेष्यो वार्द्धुषिको गायनः सर्वविक्रयी॥
अगारदाही गरदः कुण्डाशी सोमविक्रयी।
सामुद्रिको राजभृतस्तैलिकः कूटकारकः॥
पित्र्या विवदमानश्च यस्य चोपपतिर्गृहे।
अभिशस्तस्तथा स्तेनः क्लीबं यश्चोपजीवति॥
पर्वकारश्च शूची च मित्रध्रुक् पारदारिकः।
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च॥
अभिशस्तः परिक्रामेदृत्विग् यज्ञं च दुष्ट एव च।
परिविन्दिस्तु यश्च स्यादुद्वन्नो गुरुतल्पगः॥
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति।
ईदृशा ब्राह्मणा ये च अपाङ्क्तेयास्तु ते मताः॥
दत्तानि गच्छते हव्यं यद्देवान्तु प्रदीयते।
आहे सुप्ता महाराज! दुष्कर्मा गुरुतल्पगः॥
आहं नाश्नाति तस्य पितरोऽपि न भुञ्जते।
सोमविक्रयिणे दत्तं विड्भातुल्यं भवेन्नृप!॥
भिषजे श्लेष्मितसमं नष्टं देवलके तथा।
अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम्॥
बहुवाजिके दत्तं नेह नामुत्र तद्भवेत्।
भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे॥
ये तु धर्म्मव्यपेतेषु चरित्रापगतेषु च।
हव्यं कव्यं प्रयच्छन्ति तेषां तत्राय गच्छति॥
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः।
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम्॥
एतान् विद्धि महाबाहो! अपाङ्क्तेयान् द्विजाधमान्।
शूद्राधानपदेशून्तु ये कुर्व्वन्त्यल्पबुद्धयः॥
वर्हिं काष्ठः घृतं खड्गः चित्रौ यावत् प्रपश्यति।
पङ्क्त्यां वसूपविष्टायां तावद्दूषयते नृप!॥
यद्देहितग्निरा शुङ्क्ते यद्भुङ्क्ते दक्षिणासुखः।
सोपानत्कश्च यद्भुङ्क्ते सर्वं विद्यात्तदासुरम्॥
अक्षय्यते च यद्दत्तं यच्च श्राद्धादिवर्जितम्।
सर्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत्॥
श्वानश्च पङ्क्तिदूषाश्च नावेक्षेरन् कथञ्चन।
तस्मात् परिहृते दद्यात्तिलांश्चात्र विकीरयेत्॥
तिलैर्विरहितं श्राद्धं क्षतं क्रोधवशेन च।
यातुधानाः पिशाचाश्च विघ्नमुत्पादयन्ति तद्धवि॥
अपाङ्क्तेयो यतः पङ्क्त्यां भुञ्जानो नश्यते यतः।
तावत् फलाद्भ्रंशयति दातारं तस्य वाविघ्नम्॥"
पङ्क्तिपावना यथा,—
"इमे हि मनुजश्रेष्ठ! विज्ञेयाः पङ्क्तिपावनाः।
विद्यावेदव्रतस्नाताः ब्राह्मणाः सर्व्व एव हि॥
सदाचारपराश्चैव विज्ञेयाः पङ्क्तिपावनाः।
मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः॥
ऋतुकालाभिगामी च धर्म्मपत्न्यां यः सदा।
वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत॥
अथर्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः।
सत्यवादी धर्म्मशीलः स्वकर्म्मनिरतश्च यः॥
ये च पूयेषु तीर्थेषु अभिषेकप्लुतश्रमाः।
मखेषु च समश्नेषु भवन्त्यवभृतप्लुताः॥
अक्रोधना ह्यचपलाः शान्ता दान्ता जितेन्द्रियाः।
सर्वभूतहिता ये च ब्राह्मणेतान्निमन्त्रयेत्॥
एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः।
यतयो मोक्षधर्म्मज्ञा योगाः सुचरितव्रताः॥
ये चैतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान्।
ये च भाष्यविदः केचिद् ये च आकरवे रताः॥
अधीयते पुराणं ये धर्म्मशास्त्राणि चाप्युत।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः॥
उपपन्नो गुरुकुले वेदवादी सदासदः।
अध्याप्य सर्व्वेषु वेदेषु सर्वप्रवचनेषु च॥
यावदेते प्रपश्यन्ति पङ्क्त्यां तावत् पुनन्ति च।

ततो हि पावनात् पङ्क्त्या उच्यन्ते पङ्क्तिपावनाः॥
ऋत्विगनुपाध्यायः स वेदयावनं व्रजेत्।
ऋत्विग्भिरनुज्ञातः पङ्क्त्या हरति दुष्कृतम्॥
अथ वेदेदवित् सर्वैः पङ्क्तिदोषैर्विवर्जितः।
न च स्यात् यतितो राजन्! पङ्क्तिपावन उच्यते॥
तस्मात् सर्वप्रयत्नेन परीक्षामन्नयेद्विजान्।
स्वकर्म्मनिरतान् शान्तान् कुले जातान् बहुश्रुतान्॥
यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च।
न प्रीयाति पितॄन् देवान् स्वर्गंच न स गच्छति॥
ब्राह्मणो ह्यग्निधीयानस्तृणादिरिव ह्याग्नति।
तस्मिन् श्राद्धं च दातव्यं न हि भस्मनि हूयते॥
ऋतौ वा समये विप्रं ये वरन्ति महीपते!।
निश्चिताः सर्वधर्म्मज्ञान् देवा ब्राह्मणान् विदुः॥
स्वाध्यायनिरता ज्ञाननिष्ठाश्चैव च।
तपोनिष्ठाश्च योद्धव्याः कर्म्मनिष्ठाश्च मार्षिव!॥
लक्षणानि ज्ञाननिष्ठेभ्यः प्रतिष्ठाप्यानि भूमिप!।
तत्र ये ब्राह्मणान् केचिन्निन्दन्ति हि ते नराः॥
ये तु निन्दन्ति तच्छेषु न तान् श्राद्धेषु भोजयेत्।
ब्राह्मणा निन्दिता राजन्! हन्युस्ते पुरुषं वृथा॥
वेदाङ्गवाणां वचनश्रद्धेयो भूयते नृप!।
दूरादेव गिरीशेत ब्राह्मणान् वेदपारगान्॥
प्रियो वा यदि वाऽश्रेयो न श्राद्धमावपेत्।"
इति पाद्मे स्वर्गखण्डे श्राद्धपात्रनिर्णयो नाम ९५ अध्यायः॥ आततायिब्राह्मणवधे दोषाभावो यथा,—
"आत्मानं हन्तुमायान्तमपि वेदान्तपारगम्।
न दोषो हनने तस्य न तेन ब्रह्महा भवेत्॥
प्रायश्चित्तं हिंसकानां न वेदेषु निरूपितम्।
वधे सशुचिने तेषामित्याह कमलोद्भवः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २५ अध्यायः॥
(श्रौ, मन्त्रेतरवेदभागः। आद्यश्रौतन्यास तन्निरसनपूर्व्वकं तत्प्रचलमाह ऋग्वेदभाष्योपक्रमप्रकरणे यथा। "तत्र ब्राह्मणस्य प्रचलं नास्ति। कुतः? वेदभागागामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च प्रत्यक्षाद्याप्रतियोगीः श्रोधयितुमशक्यत्वात्। पूर्व्वोक्तमन्त्रभाग एकः। भागान्तराणि च कानिचित् पूर्व्वैरुदाहृतं संग्रहोत्तानि।
"हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना॥" इति।
तेन ह्यर्थं क्रियते इति हेतुः १। तद्ब्राह्मणमिति निर्वचनम् २। अमेध्या वै माषाः इति निन्दा ३ वायुर्वै क्षेपिष्ठा देवतेति प्रशंसा ४। तद्यत्किंचित्तस्य भुङ्क्तवामो मा हैवामिति संशयः५। यज्ञमानेन सम्मितोदुम्बरो भवतीति विधिः ६। मायामेव मह्यं पचन्तीति परक्रतिः ७ पुरा ब्राह्मणा अमेहुरिति पुराकल्पः ८। यावतोऽन्नान् प्रतियह्णीयात्तावतो वारुणांश्चतुष्कपालान्

निर्वपेदिति विशेषावधारणकल्पना ६। एवमन्यदपि उदाहार्य्यम्। न च हेत्वादीनामन्यतमं ब्राह्मणमिति वक्तव्यम्। मन्त्रेष्वपि हेत्वादिसद्भावात्। इन्द्रवोवासुग्नन्हीति हेतुः। उदानिषुर्महीरिति तस्मादुदकमुच्यते इति निर्वचनम्। मोघमन्नं विन्दते अप्रचेताः इति निन्दा। अग्निर्मूर्द्धादिवः इति प्रशंसा। अयः खिदासीदुपरिखिदासीति संशयः। वसन्ताय कपिञ्जलानालभत इति विधिः. सहस्रमयुतादद्दितिपरक्तिः। यज्ञेन यज्ञमयजन्त देवा इति पुराकल्पः। इति करणवचनं ब्राह्मणमिति चेत् न इत्यदा इत्ययथा इत्यपच इति ब्राह्मणो गायेदित्यस्मिन् ब्राह्मणेन गातव्ये मन्त्रेतिवाग्नेः। इत्याहेत्यनेन वाक्येनोपनिबद्धं ब्राह्मणमिति चेन्न राजाचित्तं भगं भक्षीत्याह यो वा रथाः शुचिरसीत्याह इत्यनयोर्मन्त्रयोरतिवाग्नेः आख्यायिकारूपं ब्राह्मणमिति चेन्न यमयमीसंवादस्तुक्षादावतिवाग्नेः तस्माद्ब्राह्मणस्य लक्षणमिति प्राप्ते ब्रूमः मन्त्रब्राह्मणरूपौ द्वावेव वेदभागौ इत्यङ्गीकारात् मन्त्रलक्षणस्य पूर्व्वमभिहितत्वादवशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति। तदेतल्लक्षणद्वयं जैमिनिः सङ्गयामास तच्चोदकेषु मन्त्राख्येषु ब्राह्मणशब्द इत्यादि।"

विष्णुः। यथा, महाभारते। १३। १४६। ८४।
"ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मशो ब्राह्मणप्रियः॥"

प्रियः। यथा, तत्रैव। १६। १७। १३३।
"ब्रह्मस्त्रह्मशब्दब्रह्मा ब्रह्मविद् ब्राह्मणो गतिः॥"

ब्रह्म जानातीति व्युत्पन्नो परब्रह्मवेत्तरि, त्रि॥)

ब्राह्मणब्रुवः, पुं, (ब्राह्मणवंशोत्पन्नतया वेदोक्तकर्म्माकुर्व्वन्नपि आत्मानं ब्राह्मणं ब्रवीतीति। ब्राह्मण+ब्रू+क्विं+बाहुलकात् न वधादेशः।) ब्राह्मणजातिमात्रोपजीवी। यथा,—
"विप्रः संस्कारयुक्तो न नित्यं सन्ध्यादि कर्म्म वः।
नैमित्तिकन्तु नो कुर्य्यात् ब्राह्मणब्रुव उच्यते॥
युक्तः स्यात् सर्व्वसंस्कारैर्द्विजस्तु नियमव्रतैः।
कर्म्म किञ्चिन्न कुरुते वेदोक्तं ब्राह्मणब्रुवः॥
गर्भाधानादिभिर्युक्तश्चोपनयनेन च।
न कर्म्मैतन्न चाधीते स ज्ञेयो ब्राह्मणब्रुवः॥
अध्यापयति नो शिष्यान्नाधीते वेदसत्तमम्।
गर्भाधानादिसंस्कारैर्युतः स्याद्ब्राह्मणब्रुवः॥"

इति प्राणोत्तरखण्डे १०६ अध्यायः॥
तस्मिन् दाने फलविशेषो यथा,—
"सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे।
अधीते शतसाहस्रमनन्तं वेदपारगे॥"

इति मात्स्ये ७। ८५॥

ब्राह्मणयष्टिका, स्त्री, (ब्राह्मणस्य यष्टिरिव। ततः स्वार्थे संज्ञायां वा कन् अत इत्वञ्च।) क्षुद्रविल्वः। वामनहाटी इति भाषा। तत्पर्य्यायः। पञ्चिका २ ब्राह्मणी ३ पद्मा ४ भार्गी ५ अक्षारवल्ली ६ वाल्येयशाकः ७ वर्व्वरः ८ वर्व्वरकः ९। इत्यमरः। २। ४। ८६॥ ब्रह्मयष्टिः १० ब्रह्मयष्टी ११ पञ्चोका १२ यष्टी १३ ब्रह्मयष्टिका १४ दुर्व्वरा १५ अक्षारवल्लरी १६ वाल्येयः १७ ब्राह्मिका १८। इति शब्दरत्नावली॥ ऋषभवा १९ पद्मा २० खरशाकः २१ वह्निका २२। अस्या गुणाः।
"भार्गी रूक्षा कटुस्तिक्ता रक्तोष्णा पाचनी लघुः।
दीपनी तुवरा गुल्मरक्तकुष्ठाग्न्यपेदृष्णवम्॥
श्लेष्मकासकफश्वासपीनसव्वरमारुतान्।"

इति भावप्रकाशः॥

ब्राह्मणयष्टी, स्त्री, (ब्राह्मणस्य यष्टीव।) भार्गी। इति राजनिर्घण्टः॥

ब्राह्मणहितः, त्रि, (ब्राह्मणस्य हितः।) ब्राह्मणस्य हितकारी। तत्पर्य्यायः। ब्राह्मण्यः २। इति जटाधरः॥

ब्राह्मणायनः, पुं, (ब्राह्मणस्यापत्यम्।"गर्गादिभ्यः यक्।" ४। १। १०५। इति यक्।) शुद्धसन्तानजो विप्रः। इति त्रिकाण्डशेषः॥

ब्राह्मणी, स्त्री, पञ्चिका। एका।
("शूद्राद्यक् ब्राह्मणीदेवी मरुन्माला लता लघुः।
सप्तप्रान्ता वधूः कोटिवर्षालब्धो पिकेष्टापि॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
भार्गी। तत्पर्य्यायो यथा,—
"पद्मा गन्धर्व्वहाका च काष्ठो चाङ्गारपर्ण्यपि।
भार्य्यम्बुयष्टिका ब्राह्मी ब्राह्मणी ब्रह्मचारिणी॥"
"हरेणुरेणुका कौन्ती ब्राह्मणी हैमगन्धिनी॥"

इत्युभे वैद्यकरत्नमालायाम्॥
ब्राह्मण+ङीष्।) ब्राह्मणपत्नी। इति विश्वः। (यथा, मनुः। ८। ३७६।
"ब्राह्मणीं यवगुप्तान्तु गच्छेतां वैश्यपार्थिवौ।
वैश्यं पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम्॥")

वरटी। इति त्रिकाण्डशेषः। पिपीलिकाभेदः। तत्पर्य्यायः। स्थूलशीर्षिका २। इति हेमचन्द्रः॥
ब्राह्मणीगमने दोषो यथा,—
"कुलटाविप्रपत्नीनां गमने सुरविप्रयोः।
ब्रह्महत्याशतोद्भूतं पातकन्तु भवेद्ध्रुवम्॥
तासासुपस्थितानाञ्च गमने तत्तुर्य्यकम्।
आगे धर्म्मो नाशि पापमित्याह कमलोद्भवः॥
विप्रपत्नीव्रतीनाञ्च गमनेन वलेन वै।
ब्रह्महत्याव्रतं पापं भवेदेव श्रुतौ श्रुतम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४५ अध्यायः॥
(वृद्धिः। इयं हि भगवता ब्राह्मणीमेव कल्पिता अर्जुनाय कथिता। यथा, महाभारते १४। ३४। ११-१२।

अर्जुन उवाच।
"क्व नु सा ब्राह्मणी ब्रह्मन्! कथासौ ब्राह्मणर्षभः।
याभ्यां सिद्धिरियं प्राप्ता तापुभौ वद मेऽनघ!॥

श्रीभगवानुवाच।
मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीम्।
क्षेत्रज्ञ इति यत्तोक्तः सोऽहमेव धनञ्जय!॥"

तीर्थविशेषः। यथा, महाभारते।३।८४।५५।

"ततो वै ब्राह्मणीं गत्वा ब्रह्मचारी जितेन्द्रियः।
पद्मवर्णेन यानेन ब्रह्मलोकं प्रपद्यते॥")

ब्राह्मण्यं, क्ली, (ब्राह्मणानां समूहः। ब्राह्मण+"ब्राह्मणमाणवकाड्यावयत्।" ४। २। ४२। इति यत्।) ब्राह्मणसमूहः। इत्यमरः। २। ७।४१॥ ब्राह्मणत्वम्। इति मेदिनी। ये, ६७। (यथा, मनुः। १। १७।
"भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः।
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः॥
ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः।
कृतबुद्धिषु कर्त्तारः कर्त्तृषु ब्रह्मवेदिनः॥")

ब्राह्मण्यः, पुं, ग्रहभेदः। इति शब्दमाला॥

ब्राह्मसुकूर्म्मः, पुं, (ब्राह्मो ब्रह्मदेवताको सुकूर्म्मः।) अरुणोदयकालस्थं प्रथमदण्डद्वयम्। ब्राह्मसुकूर्म्ममाह पितामहः।
"रात्रेश्च पश्चिमे यामे सुकूर्त्तौ ब्राह्म उच्यते।"
पश्चिमे यामे शेषार्द्धप्रहरे। शेषार्द्धप्रहरे ब्राह्मो सुकूर्म्म इति मदनपारिजाताद्। तत्रापि सूर्य्योदयात् प्राक् अर्द्धप्रहरे द्वौ सुकूर्त्तौ तत्राद्यो ब्राह्मः द्वितीयो रौद्रः। इत्यादितत्त्वम्॥ ॥
"ब्राह्मे सुकूर्त्ते चोत्तिष्ठेत् सुस्थो रक्षार्थमायुषः।
शरीरचिन्तां निर्व्वर्त्त्य मैत्रं कर्म्म समाचरेत्॥"

इति राजवल्लभः॥
तत्तुल्यं प्रातःशब्दग्रन्थे द्रष्टव्यम्। ब्राह्मो सुकूर्म्मः। स तु एकमनुस्थितिकालः।
"दैविकानां युगानान्तु सहस्रं ब्रह्मणो दिनम्।
मन्वन्तरं तथैवैकं तस्य भागचतुष्टयम्॥"

इति लिङ्गपुराणवचनात्।

ब्राह्माहोरात्रः, पुं, (ब्रह्मणोऽहोरात्रः।) ब्रह्मणो दिनयामिन्यौ। स तु देवयुगसहस्रद्वयेन भवति। स च सृष्टौ कल्पद्वयकालः। तत्र दिवसद्वयकल्पः रात्रिश्च तयकल्पः। इत्यमरटीकायां भरतः॥
"दैविकानां युगानान्तु सहस्रं परिसंख्यया।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदो जनाः॥"

इति मात्स्ये १। ७२।

ब्राह्मिका, स्त्री, (ब्राह्मी एव। संज्ञायां कार्य्ये वा कन् अतइत्वञ्च।) ब्राह्मयष्टिका। इति शब्दरत्नावली॥

ब्राह्मी, स्त्री, (ब्रह्मस्व इदम्। ब्रह्म+अण्। ङिद्वोप्रः। स्त्रियां ङीप्।) दुर्गा। यथा,—
"इन्द्रदग्धशरीरोऽयं यदप्रमेयं प्रभावतः।
इन्द्रविद्योर्ध्वमित्युक्तं ब्राह्मी देवी ततः स्मृता॥"

इति देवीपुराणे ४५ अध्यायः॥
शिवस्याष्टमाष्टकान्तर्गतमाष्टकाविशेषः। सा च ब्रह्मशक्तिः। सरस्वती। प्राकमेदः। तत्पर्य्यायः। मतस्त्वाची २ वयस्या ३ सोमवल्ली ४। इत्यमरः। २। ४। १३०॥ चत्वारि सोमवतायां। ब्राह्मीशाकं इति केचित्। इति तट्टीकायां भरतः॥ (यथा, गारुडे १९६ अध्याये।
"वचा विकटुकश्चैव लवणं चूर्णसत्तमम्।
ब्राह्मीरसे भावितञ्च मधुसर्पिःसमन्वितम्।

सप्ताहं भक्षितं कुर्यान्मेधर्यं मतिं पराम् ॥") ब्रह्मीशाकस्य पर्य्यायान्तरं यथा। सरस्वती ५ सौम्या ६ सुरश्रेष्ठा ७ सुवर्चला ८ कपोतवेगा ९ वेधात्री १० दिवतेजा: ११ महौषधी १२ स्वायम्भुवी १३ सौम्यलता १४ सुरेष्टा १५ ब्रह्मकन्यका १६ मण्डूकमाता १७ मण्डूकी १८ सुरसा १९ मेधा २० वीरा २१ भारती २२ वरा २३ परमेष्ठिनी २४ दिव्या २५ शारदा २६। अस्या गुणा:। हिमत्वम्। कषायत्वम्। तिक्तत्वम्। वातासृपित्तनाशित्वम्। बुद्धिप्रज्ञा-मेधाकारित्वम्। आयुर्वर्द्धकत्वञ्च। इति राज-निर्घण्ट:॥ अपि च।

"ब्राह्मी कपोतवङ्क्षी स्यात् सोमवल्ली सरस्वती॥"

अथ ब्रह्ममाण्डूकी।

"मण्डूकपर्णी माण्डूकी ब्राह्मी दिव्या महौ-षधी॥"

अस्या गुणा:।

"ब्राह्मी हिमा वरा तिक्ता लघुर्मेध्या च शीतला।
कषाया मधुरा स्वादुपाकायुष्या रसायनी॥
स्वर्य्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित्।
विषशोथज्वरहरी तद्वन्मण्डूकपर्णिनी॥"

इति भावप्रकाश:॥ ॰॥

फल्गिका। वामनहाटी इति भाषा। षड्-गड्मतस्य:। पाँकाल इति भाषा। सोमवल्लरी। सोमलता इति ख्याता। इति मेदिनी। महाज्योतिष्मती। बड़ी मालकङ्गनी इति हिन्दी भाषा। मत्स्याक्षी। मच्छाक्षी इति छछमछरिया इति च हिन्दी भाषा। वाराहीकन्द:। हिलमोचिका। इति राजनिर्घण्ट:॥ हिंचा इति भाषा। रोहिणीवृक्षम्। इति हैमचन्द्र:॥ (ब्रह्म+अण्+ङीप्।) ब्रह्माधि-ष्ठातृदेवताकत्वात् तथात्वम्॥ सूर्य्यरश्मि:। यथा, मार्कण्डेये। १०६। ७१।

"ब्राह्मी माहेश्वरी चैव वैष्णवी चैव ते तनू:।
त्रिधा यस्य स्वरूपन्तु भानोर्भास्वान् प्रसीदतु॥"

त्रि, ब्रह्मप्राप्तियोग्या। यथा, मनु:। २। २८।

"स्वाध्यायेन व्रतैर्होमै स्त्रैविद्येनेज्यया सुतै:।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनु:॥")

ब्रह्मभवा। यथा गीतायाम्। २। ७२।

"एषा ब्राह्मी स्थिति: पार्थ! नैनां प्राप्य विमुह्यति॥")

ब्राह्मीकन्द:, पुं, (ब्राह्मा: कन्द इव कन्दो यस्य।) वाराहीकन्द:। इति राजनिर्घण्ट:॥

ब्राह्मं, क्ली, विज्ञय:। ब्रह्मम्। इति धरणि:॥ (ब्रह्मण इदम्। ब्रह्मन्+अण्।) ब्रह्मसम्बन्धिनि त्रि। (यथा, मार्कण्डेये। ६। ३८।

"चतुर्दश गुणो ह्येष कालो ब्राह्ममह:
स्मृतम्॥")

नित्यकारब्राह्मग्रन्थार्थोऽप्यत्र॥ (यथा, रघु:। १२। ६७।

"ब्राह्ममस्त्रं प्रियाशोकग्रस्तनिष्कर्मबौधम्॥")

ब्रुवत् [त्] त्रि, (ब्रवीतीति। ब्रू+शतृ।) कथयन्। वक्ता। यथा,—

"स्मृते नि:संशये पापे न शुश्रोतानुपस्थित:।
शुश्रावो वर्द्धयेत् पापमसत्यं संसदि ब्रुवन्॥"

इति प्रायश्चित्ततत्त्वम्॥

ब्रुवाण:, त्रि, (ब्रूते इति। ब्रू+शानच्।) वक्ता। यथा,—

"इति ब्रुवाणो मधुरं हितञ्च
तमाश्विहन्मेथिलयज्ञभूमिम्।
रामं मुनि: प्रीतिमना मखान्ते
यथाचि राज्ञां निजिहत्तयिष्यन्॥"

इति भट्टि:। २। ४०॥

ब्रू ल ञ उक्तौ। इति कविकल्पद्रुम:॥ (अदा०-उभ०-द्विक०-सेट्।) ल ञ ब्रवीति। ब्रूते। विब्रूति: कटके श्रुतेश्च अरविहितकार्य्य-स्यानित्यत्वान्न वचादेश:। इति दुर्गादास:॥

भ

भ भकार:। स च यञ्जनचतुर्विंशतितम: पवर्गीय-चतुर्थो वर्ण:। अस्योच्चारणस्थानं ओष्ठ:। इति व्याकरणम्॥ (तथा च सिद्धान्तकौमुद्याम्। उपूपध्मानीयानामोष्ठौ॥") तस्य स्वरूपादि यथा,—

"भकारं शृणु चार्व्वङ्गि! स्वयं परमकुण्डली।
महामोक्षप्रदं वर्णं तरुणादित्यसंप्रभम्॥
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा।"

इति कामधेनुतन्त्रम्॥

(वङ्गाक्षरावली) तस्य लिखनक्रमो यथा,—

"ऊर्द्धाध:क्रमतो रेखा वामे वक्रा तु कुण्डली।
पुनश्चाधोगता सैव अत ऊर्द्धगता पुन:॥
ब्रह्मा शम्भुश्च विष्णुश्च क्रमतस्तासु तिष्ठति॥"

अस्य वेखनप्रकारान्तरं यथा,—

"किञ्चिदाकुञ्चिता रेखा वामहस्तिकतो गता।
ततो वक्रा वामगता तासु वाग्यादय: क्रमात्॥
ऋजुमात्रा मध्यगता कोणाद्यगता पुन:।
महाग्नेयिस्वरूपा सा ध्यानमस्य प्रचक्षते॥"

तद्यथा,—

"तडित्प्रभां महादेवीं नागकङ्कणशोभिताम्।
षड्भुजां वरदां भीमां रक्तपङ्कजलोचनाम्॥
रक्तवस्त्रपरीधानां रक्तपुष्पोपशोभिताम्।
चतुर्वर्गप्रदां देवीं साधकाभीष्टसिद्धिदाम्॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

तन्त्रशास्त्रमतो यथा,—

"त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये!।
आत्मादितत्त्वसंयुक्तं भकारं प्रणमाम्यहम्॥"

इति वर्णोद्धारतन्त्रम्॥

तस्य नामानि यथा,—

"भ: क्षिप्रा भ्रमरो भीमो विश्वमूर्त्तिर्निशाभवम्।
द्विरण्डो भूषणो मूलं यज्ञसत्त्वस्य वाचक:॥
नक्षत्रं भ्रमणा दीप्तिर्वयो भूमि: पयो नभ:।
नाभिर्भद्रं महाबाहुर्विश्वमूर्त्तिर्विताण्डक:॥
प्राणात्मा तापिनी वक्षा विश्वरूपी च चन्द्रिका।
भीमसेन: सुधासेन: सुखो मायापुरं हर:॥"

इति तन्त्रान्तरन्यासाख्यम्॥

भं, क्ली, (भातीति। भा दीप्तौ+बाहुलकात् ड:।) नक्षत्रम्। इत्यमर:। १। ३। २१॥ (यथा, सूर्य्यसिद्धान्ते। १। २६।

"प्राग्गतिस्तमतस्तेषां भगणै: प्रत्यहं गति:।
परिवाहवशाद्भिन्ना तद्वशाद् भानि सुव्रते॥")

यह:। इति शब्दरत्नावली। राशि:। यथा,—

"राशिनामानि च चेत्थं भवन्त्यं शनाम च॥"

इति ज्योतिस्तत्त्वम्॥

भ:, पुं, (भातीति। भा दीप्तौ+बाहुलात् ड:।) शुक्राचार्य्य:। इति मेदिनी। भे, १॥ अमर:। इत्येकाक्षरकोष:। आत्मा:। इति शब्दरत्ना-वली॥

भक्तं, क्ली, (भज्यते क्षीयते भजसेवायां+कर्म्मणि क्त:।) अन्नम्। इत्यमर:। २। ९। ४८॥

अथ भक्तस्य नामानि साधनं गुणाश्च।

"भक्तमन्नं तथान्नञ्च क्षुच्छूरञ्च कीर्त्तितम्।
ओदनोऽस्त्री स्त्रियां भिस्सा दीदिवि: पुंसि भावित:॥"

सुधौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत्।
तद्भक्तं प्रहृतक्षीणं विग्रहं गुणवत्तमम्॥
भक्तं बह्निकरं पथ्यं तर्पणं रोचनं लघु।
अधौतमहृतं ग्रीष्मं गुर्व्वरुक्षं कफप्रदम्॥"

इति भावप्रकाश:॥

हरये निवेदितान्नस्य नित्यं भक्षणे फलं यथा,

"ये विप्रा हरये दत्त्वा नित्यमन्नञ्च भुञ्जते।
उच्छिष्टभोजनास्तेषां हरेर्दास्यं लभेन्नर:॥"

हरये अदत्त्वा तद्भक्षणे दोषो यथा,—

"न दत्त्वा हरये भक्ष्यं भुङ्क्ते वेदभ्रमादपि।
पुरीषसदृशं वस्तु फलं भवति सर्व्वथा॥
सूकरैर्हरिभक्तञ्च नैवेद्यभोजनोत्सुक:।
आमान्नं हरये दत्त्वा पाकं कृत्वा च खादति॥"

अन्नदानफलं यथा,—

"अन्नञ्च सर्व्वजीवेभ्य: पुण्यार्थं दातुमर्हति।
दत्त्वा विशिष्टजीवेभ्यो विशिष्टं फलमाप्नुयात्॥
अतो दत्त्वा मानुषेभ्यो लभतेऽष्टगुणं फलम्।
ततो विशिष्टभूतेभ्यो दत्त्वा तद्विगुणं फलम्॥
दत्त्वान्नं वैष्णवातिथ्यक्षत्तस्त्वाष्टगुणं फलम्।
दत्त्वान्नं क्षत्रियेभ्योऽपि वैश्यान्नां द्विगुणं भवेत्॥
क्षत्रियाणां शतगुणं विप्रेभ्योऽन्नं प्रदाय च।
विप्राणाञ्च शतगुणं ब्राह्मणे ब्राह्मणे फलम्॥
ब्राह्मणानां शतगुणं भक्ते विप्रे लभेद्ध्रुवम्।
स चान्नं हरये दत्त्वा भुङ्क्ते भक्ता च सादरम्॥
विष्णवे भक्तविप्राय दत्त्वा दातुश्च यत् फलम्।
तत् फलं लभते नूनं भक्तब्राह्मणभोजने॥
भक्ते तुष्टे हरिस्तुष्टो हरौ तुष्टे च देवता:।
भवन्ति सिक्ता: शाखाश्च यथा मूलनिषे-चनात्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २१ अध्याय:॥

तस्य एकादश्यां पापान्नभयत्वं भक्षणे दोषश्च यथा,—
"एकादश्यामागतायां पापयन्त्यां जगत्त्रयम्।
स्नातव्यमन्नमाश्रित्य भवता पापपूरुषम्॥
अन्नमाश्रित्य तिष्ठन्तं भवन्तं पापपूरुषम्।
न हनिष्यति मन्मन्त्रैरियमेकादशी तिथिः॥
तस्मादन्नं न भोक्तव्यं कदाचिदपि सत्तमैः।
आत्मनो हितमिच्छद्भिः संप्राप्ते हरिवासरे॥
संसारे यानि पापानि तान्येवैकादशीदिने।
अन्नमाश्रित्य तिष्ठन्ति पुष्करीकेषजान्नया॥
कुर्व्वतां सर्व्वपापानि नरकान्निष्कृतिर्भवेत्।
न निष्कृतिर्भवेत्तेषां भुञ्जतां हरिवासरे॥
मात्रां भक्षाणि यावन्ति भुञ्जते हरिवासरे।
प्रतिभक्षं ब्रह्महत्याकोटिजं पातकं लभेत्॥
सर्व्वपापान्नयं भक्तं त्यक्तव्यं हरिवासरे।
मोहाद्ये भुञ्जते वापि ते ज्ञेयाः पापिनां वराः॥"
इति पाद्मे क्रियायोगसारे २१ अध्यायः॥
वर्जनीयान्नं यथा,—
"नाद्यात् शूद्रस्य विप्रोऽन्नं मोहाद्वा यदि वान्यतः।
स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि॥
यच्छ्राद्धात् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम्।
जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते॥
ब्राह्मणश्चत्रियविशां शूद्रस्य च सुनीश्वराः।
यस्यान्नेनोदरस्थेन मृतस्तद्योनिमाप्नुयात्॥
राजान्नं वर्षकान्नञ्च तक्षोऽन्नञ्चक्रकारिणः।
गवान्नं गणिकान्नञ्च वस्त्रान्नञ्चैव वर्जयेत्॥
चक्रीपजीविरजकतक्षरध्वजिनां तथा।
गान्धर्व्वजीवकारान्नं सूतकान्नं विवर्जयेत्॥
कुलालचित्रकर्म्मान्नं वार्द्धुषेः पतितस्य च।
पौनर्भवच्छात्रिकयोरभिशस्तस्य चैव हि॥
सुवर्णकारशैलूषयाधितस्यातुरस्य च।
चिकित्सकस्य चैवान्नं पुंश्चल्या दाम्भिकस्य च॥
स्तेननास्तिकयोरन्नं देवतानिन्दकस्य च।
सोमविक्रयिणश्चान्नं व्रणकस्य विशेषतः॥
भार्य्याजितस्य चैवान्नं यस्य चोपपतिर्गृहे।
उत्सृष्टस्य कदर्य्यस्य तथैवोच्छिष्टभोजनः॥
अपङ्क्त्यान्नञ्च संचारं गृध्रजीवस्य चैव हि।
क्रीतस्यान्त्यावसायिन्नान्नं मत्तोन्मत्तस्य चैव हि॥
भीतस्य रुदितस्यान्नं अवक्रुष्टं परिप्लुतम्।
ब्रह्मद्विषः पापरुचेः आहिताग्नेः सूतकस्य च॥
दुष्पाकस्य चैवान्नं श्वाश्रान्नं श्वशुरस्य च।
अज्ञानान्तु नारीणां सूतान्नस्य तथैव हि॥
कदूक्रान्नं विशेषेण गृध्रविक्रयिणस्तथा।
शौण्डान्नं नालिकान्नञ्च भिषजामन्नमेव च॥
विड्वराहजननस्यान्नं परिवित्तान्नमेव च॥
पुनर्भुवो विशेषेण तथैव दिधिषूपतेः।
अवज्ञातञ्चावधूतं सरोषं विलयान्वितम्॥
गुरावपि न भोक्तव्यमन्नं सत्कारवर्जितम्॥
दुष्कृतं हि मनुष्यस्य सर्व्वमन्नेष्वनुष्ठितम्।
योऽस्यान्नेन जीवेत स तस्याप्नोति किल्बिषम्॥"
"आभीरः कुलमित्रञ्च गोपालो दासनापितौ।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्॥
कुशीलवः कुम्भकारः क्षेत्रकर्म्मक एव च।
एते शूद्रेषु भोज्यान्ना दत्त्वा स्वर्गं प्रयं वुधैः॥"
इति कौर्म्मे उपविभागे १६ अध्यायः॥
तस्य सुखत्वं पारिभाषिकत्वञ्च यथा,—
"तण्डुलोऽम्भसिसंयोगाच्चवणयोगेन पिष्टकम्।
पक्वं चितयसंयोगादन्नं भवति तत्त्वतः॥"
इति रामाश्रमचन्द्रिकाधृतवचनमिति केचित्॥
(धनम्। यथा, मनौ। ११। ७।
"यस्य त्रैवार्षिकं भक्तं पर्य्याप्तं भृत्यवृत्तये।
अधिकं वापि विद्येत स सोमं पातुमर्हति॥"
"भक्तं धनम्।" इति तट्टीकायां मेधातिथिः।)
भक्तः, त्रि, (भजते स्मेति। भजसेवायां + क्तः।)
तत्परः। इति हेमचन्द्रः॥ (यथा, महाभारते। १। १७२। १४।
"नलां दृष्ट्वा पुनरन्यां द्रष्टुं कल्याणि! रोचये।
प्रसीद वरवर्णिन्यभक्तं मां भज भाविनि!॥"
पूज्यविषयकानुरागो भक्तिशब्दार्थः।) अथ श्रीभगवद्भक्तलक्षणानि। लिङ्गपुराणे।
"व्रतकर्म्मगुणज्ञानभोगजन्मादिमत्सखि।
ग्रहेष्वपि च कृष्णस्य भक्ताः सन्ति तथा तथा॥
श्रीभागवते एकादशस्कन्धे। उत्तमभक्ता यथा,
"आत्मात्मजाप्त गृहपशुन्यजनाभिधेषु
यावदग्रः।
भज्यत्वनेन भावेन ते मे भक्ततमा मताः॥"
मध्यमभक्तो यथा,—
"ईश्वरे तदधीने वा बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥"
प्राकृतभक्तो यथा,—
"अर्च्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥"
इति श्रीहरिभक्तिविलासः॥
अपि च।
"भक्तानां लक्षणं ब्रूहि भक्तानुग्रहकातर!।
येषां सम्दर्शनात् सद्यः पूतो नराधमः॥
हरिभक्तिविहीनाश्च महाहङ्कारसंयुताः।
स्वप्नसंसारता धूर्त्ताः शठाश्च साधुनिन्दकाः॥
पुनन्ति सर्व्वतीर्थानि येषां स्नानावगाहनात्।
येषाञ्च पादरजसा पूता पादोदकाम्बुभी॥
येषां सन्दर्शनं सर्व्वं देवा वाञ्छन्ति भारते।
सर्व्वेषां परमो लाभो वैष्णवानां समागमः॥
न ह्यम्बयानि तीर्थानि न देवा मृच्छिलामयाः।
ते पुनन्त्युरुकालेन विष्णुभक्ताः क्षणादहो!॥
सौतिरुवाच।
महालक्ष्मीवचः श्रुत्वा लक्ष्मीकान्तश्च सस्मितः।
निगूढतत्त्वं कथितुमुद्यमश्चक्रमे॥
श्रीनारायण उवाच।
भक्तानां लक्षणं लक्ष्मि! गूढं श्रुतिपुराणयोः।
पुण्यस्वरूपं पापघ्नं सुखदं भक्तिमुक्तिदम्।
सारभूतं गोपनीयं न वक्तव्यं खलेषु च॥
गुरवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रविश्यति।
वेदान्तवेदवेदाङ्गास्तं प्रवित्रं वदन्ति हि॥
पुरुषाणां शतं पूर्व्वं पूतं तज्जन्मभावतः।
स्वर्गस्थं नरकस्थं वा मुक्तिमाप्नोति तत्क्षणात्॥
ये केचिदत्र वा जन्म लब्धं येषु च जन्तुषु।
जीवन्मुक्तास्ते च पूता यान्ति काले हरेः पदम्॥
भक्तियुक्तो मत्पूजानियुक्तो मद्गुणान्वितः।
मद्गुणश्रावणीयश्च मन्निविष्टश्च सत्तमः॥
सगद्गदः साश्रुनेत्रः स्वात्मविस्मृत एव च।
न वाञ्छन्ति सुखं मुक्तिं सालोक्यादिचतुष्टयीम्॥
ब्रह्मत्वममरत्वं वा तद्वाञ्छा मम सेवने।
इन्द्रत्वञ्च मनुत्वञ्च देवत्वञ्च सुदुर्लभम्॥
स्वर्गराज्यादिभोगञ्च स्वप्ने च नहि वाञ्छति।
ब्रह्मज्ञानि विनश्यन्ति देवा ब्रह्मादयस्तथा।
कल्याणभक्तियुक्तञ्च मद्भक्तो न प्रणश्यति।
भ्रमन्ति भारते भक्ता लब्ध्वा जन्म सुदुर्लभम्॥
तेऽपि यान्ति महीं पूत्वा नवं तीर्थं ममालयम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५ अध्यायः॥
अपि च।
"रतिः कृष्णकथायाञ्च यस्याश्रुपुलकोद्गमः।
मनो निमग्नं यस्यैव स भक्तः कथितो बुधैः॥
पुत्रदारादिकं सर्व्वं जानाति श्रीहरेरपि।
आत्मना मनसा वाचा स भक्तः कथितो बुधैः॥
दृश्यन्ति सर्व्वभूतेषु सर्व्वं कृष्णमयं जगत्।
यो जानाति महाज्ञानी स भक्तो वैष्णवोत्तमः॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः॥
भगवद्भक्ता यथा, तत्रैव ३ अध्याये।
मद्भक्ताश्चैव निःशङ्काः कर्म्मनिर्म्मूलकारकाः।
नाहं मृत्युश्च भक्तानां संहारे नित्यदेहिनाम्॥
भक्ता ममानुगा नित्यं मत्प्रादानततत्पराः।
अहं भक्तान्तिके नित्यं तेषां रक्षणहेतवे॥
सर्व्वे नश्यन्ति ब्रह्माण्डे प्रभवन्ति पुनः पुनः।
न मे भक्ताः प्रणश्यन्ति निःशङ्काश्च निरापदः॥
हरिभक्तिमाहात्म्यं यथा,—
द्विजानां हरिभक्तानां प्रभावो दुर्लभः श्रुतौ।
येषां पादाब्जरजसा सद्यः पूता वसुन्धरा॥
तेषाञ्च पादचिह्नं यत्तीर्थं तत् परिकीर्त्तितम्।
तेषाञ्च सम्दर्शनेन तीर्थपापं प्रणश्यति॥
आलिङ्गनात् सदाजापात्तेषामुच्छिष्टभोजनात्।
दर्शनात् सम्दर्शनाच्चैव सर्व्वपापात् प्रमुच्यते॥
भ्रमन्ति सर्व्वतीर्थानां यत् पुण्यं स्नानतो भवेत्।
हरिदासस्य विप्रस्य तत् पुण्यं दर्शनाज्जगेत्॥
इति तत्रैव २१ अध्यायः॥
त्रिविधभक्तलक्षणं यथा,—
भक्तानां त्रिविधानाञ्च लक्षणं श्रूयतामिति।
कृष्णश्रवारतो भक्तो मनामगुणकीर्त्तिषु॥
मनो निवेश्यैवात्मा संसारसुखकारणम्।
दास्यं विना न हीच्छन्ति सालोक्यादिचतुष्टयम्॥
नैव निर्व्वाणमुक्तिञ्च सुधापानमभीप्सितम्।
ध्यायते मत्पदाम्भोजं पूजयेद्भक्तिभावतः॥
श्रीहेतुः किं तस्य देवः सङ्कल्परहितस्य च।
सर्व्वसिद्धिं न वाञ्छन्ति तेऽणिमादिकमीप्सितम्॥

ब्रह्मत्वममरत्वं वा सुरत्वं सुखकारणम्।
वाञ्छन्ति निश्चलां भक्तिं मदीयामतुलामपि॥
स्त्रीपुंविभेदो नास्त्येवं सर्व्वजीवेषु भिन्नता।
तेषां सिद्धेश्वराणाञ्च प्रवराणां व्रजेश्वर!॥
क्षुत्पिपासादिकां निद्रां लोभमोहादिकं रिपुम्।
त्यक्त्वा दिवानिशं माञ्च ध्यायते च दिगम्बरः॥
स मद्भक्तोत्तमो नन्द! श्रूयतां मध्यमादिकम्॥"
"नासक्तः कर्म्मसु यदौ पूर्व्वप्राक्तनतः शुचिः॥
करोति सततञ्चैव पूर्व्वकर्म्मनिकृन्तनम्।
न करोत्यपरं वलात् सङ्कल्परहितञ्च यः॥
सर्व्वं कृष्णस्य यत्किञ्चिन्नाहं कर्त्ता च कर्म्मणः।
कर्म्मणा मनसा वाचा सततं चिन्तयेदिति॥
न्यूनभक्तश्च तत्पूनः स च प्राकृतिकः स्मृतौ।
यमं वा यमदूतं वा स्वप्नेन च न पश्यति॥
पुरुषाणां सहस्रञ्च पूर्व्वं भक्तः समुद्धरेत्।
पुंसां शतं मध्यमश्च तच्चतुर्थञ्च प्राकृतः॥
भक्तश्च त्रिविधस्तात! कथितश्च तवाज्ञया॥"
इति तत्रैव ८४ अध्यायः॥

कृष्णभक्तशरीरे तीर्थादीनि यथा,—
"पृथिव्यां यानि तीर्थानि पुण्यान्यपि च जाह्नवि!।
मद्भक्तानां शरीरेषु सन्ति पूतेषु सन्ततम्॥
मद्भक्तपादरजसा सद्यः पूता वसुन्धरा।
सद्यः पूतानि तीर्थानि सद्यः पूतं जगत्तथा॥
मन्मन्त्रोपासका विप्रा ये मदुच्छिष्टभोजिनः।
मामेव नित्यं ध्यायन्ते ते मत्प्राणाधिकाः प्रियाः।
तदुपस्पर्शमात्रेण पूतो वायुश्च पावकः।
कलेर्दोषसहस्राणि मद्भक्ताः सन्ति भूतले॥
एकवर्णा भविष्यन्ति मद्भक्तेषु गतेषु च।
मद्भक्तशून्या पृथिवी कलिग्रस्ता भविष्यति॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२८ अः॥

भगवद्भक्तमाहात्म्यं यथा,—
"संस्मृतः कीर्त्तितो वापि दृष्टः स्पृष्टोऽपि वा प्रिये!।
पुनाति भगवद्भक्तचाण्डालोऽपि यदृच्छया॥"
इति वाराहे उपरिभागे प्रबोधिनीमाहात्म्यम्॥

हरिभक्तकर्त्तव्यानि यथा,—
"हरेश्चरितमीशस्य सर्व्वलोकेषु कीर्त्तनम्।
वैष्णवेषु च कार्त्स्न्येन भक्तः कुर्य्यादहर्निशम्॥
दासीदासांश्च यत्किञ्चित् स्वकीयं वस्तु चालनः।
कृष्णभक्तस्य गार्हस्थ्यं सर्व्वं कृष्णे निवेदनम्॥"
भक्तस्य लक्षणान्तरं यथा,—
"प्रेम्णा संजातया भक्त्या तनुसुत्पुलकाञ्चनः।
विभर्त्तीलौकिकं भक्तो वदेद्धसति रृत्यति॥
परमानन्दयुक्तोऽसौ क्वचिद्गायति नन्दति।
क्रन्दत्यच्युतभावेन गद्गदेन पुनः पुनः॥
अनुशीलयति भजेत् गोविन्दमनुमोदते।
तरेदेवं विष्णुमायां दुस्तरां सुनिमोहिनीम्॥
सर्व्वेश्वरब्रह्मणा यो भजेदीशं सनातनम्।
स तत्त्ववादी भक्तश्च सर्व्वभूतसुहृत्तमः॥"
इति पाद्मोत्तरखण्डे १०१ अध्यायः॥*॥

भक्तत्यागे दोषो यथा,—
"ब्रह्महत्या गुरोर्घातो गोवधः स्त्रीवधस्तथा।
तुल्यमेभिर्महापापं भक्तत्यागादुदाहृतम्॥
भजन्तं भक्तमत्यन्यमदुष्टं त्यजतः सुखम्।
नेह नामुत्र पश्यामि तस्मात् शक्र! दिवं व्रज॥"
इति मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्यानम्॥
(कृतविभागः। यथा, लीलावत्याम्।
"भक्तो हरः शुध्यति यद्गुणः स्यात्॥")

भक्तकरः, पुं, (भक्तं भजनं करोतीति। कृ+टः।) कृत्रिमधूपः। यथा, गन्धचन्द्रिकायाम्।
"एकधूपे भक्तकरो गिरिः स्यात् समगन्धकः॥"
भक्तकारके त्रि॥

भक्तकारः, त्रि, (भक्तमन्नं करोतीति। कृ+"कर्म्मण्यण्।"३। २। १। इत्यण्।) पाचकः। भक्तमन्नं करोति पचति यः। तत्पर्य्यायः। क्षुद्रः २ औदनिकः ३ गुणः ४ भक्ष्यंकारः ५ सूपकारः ६ सूपः ७ आरालिकः ८ वल्लवः ९। इति हेमचन्द्रः॥

भक्तता, स्त्री, भक्तत्वम्। भक्तस्य भाव इत्यर्थे (तल्) तप्रत्ययेन निष्पन्ना॥

भक्ततूर्य्य, क्ली, (भक्तस्य तद्भोजनकालस्यावेदकं यद्वा भक्ते तद्भोजनकाले वादनीयत्वात्तूर्य्यम्।) भोजनकाले वादनीयतूर्य्यम्। तत्पर्य्यायः। शृणमानेम २। इति त्रिकाण्डशेषः॥

भक्तदासः, पुं, (भक्तेनान्नमात्रेण दासः।) पञ्चदशदासान्तर्गतदासविशेषः। यथा,—
"भक्तदासश्च विज्ञेयस्तथैव वडवाकृतः।
सभिक्षेऽपि भक्तेनाङ्गीकृतदासः। इति दायक्रमसंग्रहः॥ (यथा, मनौ। ८। ४१५।
"ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ।
पैत्रिको दण्डदासश्च सप्तैते दासयोनयः॥")

भक्तमण्ड, पुं, क्ली, (भक्तस्यान्नस्य मण्डः।) अन्नायरसः। भातेर माड़ इति भाषा। तत्पर्य्यायः। मासरः २ आचामः ३ निःस्रावः ४। इत्यमरः॥ (भक्तस्य भजनशीलस्य मण्डोभूषणम्।)
पिच्छा ५। इति जटाधरः॥

भक्तिः, स्त्री, (भज्यते इति। भज+क्तिन्।) विभागः। सेवा। इति मेदिनी। ते, ३६॥
गौणवृत्तिः। भक्ती। (अनुरागविशेषः। पूज्येष्वनुरागो भक्तिरित्युपदेशः॥ ईश्वरे परानुरक्तिः।
"अथातो भक्तिजिज्ञासा सा परानुरक्तिरीश्वरे।" इति शाण्डिल्यसूत्रम्॥ उपासना॥ परमेश्वरविषये परमप्रेम। उपास्याकाराकारितचित्तवृत्त्याद्यवृत्तिरूपा परिपक्वनिदिध्यासनाख्या श्रवणमननाभ्यासफलभूता अनुरक्तिः॥
"नहीश्वरात्परं किञ्चित्।" इति बुद्धिपूर्व्विका चित्तवृत्तिः। सा च परमप्रीत्यधीना॥ यथा, विष्णुपुराणे। १। २०। १८-१९।
"नाथ! योनिसहस्रेषु येषु येषु व्रजाम्यहम्।
तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि।
या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु॥"
"हे अच्युत! त्वयि मे अच्युता ऐकान्तिकी भक्तिरस्तु। एकान्तभक्तिः परमप्रीत्यधीनेति तां प्रीतिं प्रार्थयते येति यादृशी प्रीतिर्विषयेषु आसक्तानां सा तादृशी प्रीतिर्मे हृदयात् मापसर्पतु मापयातु हृदये सदा तिष्ठत्वित्यर्थः॥"
इति तट्टीकायां श्रीधरस्वामी॥ चन्दनादिभिर्लिङ्गादिरचना। यथा, रघौ। १३। ५५।
क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पंक्तिः।
अन्यत्र कालागुरुदत्तपत्रा
भक्तिर्भुवश्चन्दनकल्पितेव॥")

अङ्गा। इति हेमचन्द्रः॥ (भक्तिविवरणं यथा,—
"भज इत्येष वै धातुः सेवायां परिकीर्त्तितः।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी॥
इति गारुड़े २३१ अध्यायः॥*॥

अथ श्रीमद्भक्तिलक्षणं तृतीये श्रीकापिलेये।
"देवानां गुणलिङ्गानामानुश्रविककर्म्मणाम्।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या॥
अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी॥
अथ विशेषलक्षणानि। श्रीगौतमीयतन्त्रे।
"देवताया च मन्त्रे च तथा मन्त्रप्रदे गुरौ।
भक्तिरष्टविधा यस्य तस्य स्याः प्रसीदति॥
तद्भक्तजनवात्सल्यं पूजायाश्चानुमोदनम्।
सुमना अर्च्चयेन्नित्यं तदर्थे दम्भवर्जनम्॥
तत्कथाश्रवणे रागस्तदर्थे चाङ्गविक्रिया।
तदनुस्मरणं नित्यं यत्स्मरान्नोपजीवति॥
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते।
स मुनिः सत्यवादी च कीर्त्तिमान् स भवेन्नरः॥"
सप्तमस्कन्धे श्रीप्रह्लादोक्तौ।
"श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्।
अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्॥"
तत्रैव श्रीनारदयुधिष्ठिरसंवादे।
"श्रवणं कीर्त्तनञ्चास्य स्मरणं महतां गतेः।
सेवेज्यावनतिर्दास्यं सख्यमात्मनिवेदनम्॥"
पाद्मे कार्त्तिकमाहात्म्ये श्रीसत्यभामाकृष्णसंवादे।
"श्रवणं कीर्त्तनं पूजा सर्व्वकर्म्मार्पणं स्तुतिः।
परिचर्य्या नमस्कारः प्रेम स्वात्मार्पणं हरौ॥"
तत्रैवोत्तरखण्डे शिवपार्व्वतीसंवादे।
"आद्यन्तु वैष्णवं प्रोक्तं शङ्खचक्राङ्कनं हरेः।
धारणञ्चोर्द्धपुण्ड्राणां तन्नामाक्षरधारणम्॥
अर्च्चनञ्च जपो ध्यानं तन्नामस्मरणं तथा।
कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम्।
तत्प्रादोदकसेवा च तन्निवेदितभोजनम्॥
तदीयानाञ्च संसेवा द्वादशैतानि सत्तमा।
तुलसीरोपणं विष्णोर्दैवदेवस्य शार्ङ्गिणः॥
भक्तिः षोढ़शधा प्रोक्ता भवबन्धविमुक्तये॥"
इति च।

किञ्च।
"दर्शनं भगवन्मूर्त्तेः स्पर्शनं तस्य सेवनम्।

आघ्राणं धूपशेषादेर्निर्माल्यस्य च धारणम् ।
नृत्यं भगवदग्रे च तथा वीणादिवादनम् ।
लीलाद्यभिनयः श्रीभागवतसेवनम् ।
पञ्चाङ्गमालादिधृतिरेकादश्यादिजागरः ।
प्रासादरचनाद्यन्यज्ज्ञेयं श्राद्धानुसारतः ।
लिखिता भगवद्धर्म्मा भक्तानां लक्षणानि च ।
तानि ज्ञेयानि सर्व्वाणि भक्तैर्वै लक्षणानि च ।
तेषु ज्ञेयानि गौणानि मुख्यानि च विवेकिभिः ।
बहिरङ्गान्तरङ्गाणि प्रेमसिद्धौ च तानि
यत् ॥
भेदास्तु विविधा भक्तेर्भक्तभावादिभेदतः ।
मुक्ताफलादिग्रन्थेभ्यो ज्ञेयास्तल्लिखनेरलम् ॥
प्रेमभक्तौ च सिद्धायां सर्व्वेऽर्थाः सेवकाः स्वयम् ॥
भगवांस्तातिवश्यः स्यात्तल्लिखतेऽस्याः सुल-
क्षणम् ॥"

अथ प्रेमभक्तिलक्षणम् । नारदपञ्चरात्रे ।
"अनन्यममता विष्णौ ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्म ! प्रह्लादोद्धवनारदैः ॥
प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यतः परम् ।
सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम् ॥
चिह्नानि प्रेमसम्पत्तेर्बाह्यान्याभ्यन्तराणि च ।
कियन्त्युल्लिखितान्यस्या महिमैव विलिख्यते ।"
अथ प्रेमसम्पत्तिचिह्नानि सप्तमस्कन्धे श्रीप्रह्लाद-
स्यं वाक्यानुशासने ।
"निशम्य कर्म्माणि गुणानतुल्यान्
वीर्य्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति रौति नृत्यते च ॥
यदा ग्रहग्रस्त इव क्वचिद्धसत्या-
क्रन्दति ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे ! जगत्पते !
नारायणेत्यात्ममतिर्गतत्रपः ॥
तदा पुमान् मुक्तसमस्तबन्धन-
स्तद्भावभावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥"
एकादशे च श्रीकविर्योगेश्वरोत्तरे ।
"दृष्ट्वा सुभद्राणि रथाङ्गपाणे-
र्जन्मानि कर्म्माणि च यानि लोके ।
गीतानि नामानि तदर्थकानि
गायन् विलज्जो विचरेदसङ्गः ॥
एवव्रतः स्वप्रियनामकीर्त्या
जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गाय-
त्युन्मादवन्नृत्यति लोकबाह्यः ॥"
तत्रैव श्रीप्रबुद्धयोगेश्वरोत्तरे ।
"स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।
भक्त्या संजातया भक्त्या बिभ्रत्पुलकां तनुम् ॥
क्वचिद्रुदन्त्यच्युतचिन्तया क्वचि-
द्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं
भवन्ति तूष्णीं परमेत्य निर्वृताः ॥
श्रीभगवद्दुद्धवसंवादे च ।
"कथं विना रोमहर्षं द्रवता चेतसा विना ।
विनानन्दाश्रुकलया शुद्ध्येद्भक्त्या विनाशयः ॥
वाग्गद्गदा द्रवते यस्य चित्तं
रोदित्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥
यथोक्तभक्तयश्चैतो तु भगवच्चरणाम्बुजम् ।
प्रारब्धागतभावेन तत्सक्तभीतिन्नमाश्रयेत् ॥"
इति हरिभक्तिविलासे ११ विलासः ॥
अपि च । उत्तमभक्तेर्लक्षणं यथा,—
"अन्याभिलाषिताशून्यं ज्ञानकर्म्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥
तथा नारदपञ्चरात्रे ।
"सर्व्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्म्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ॥"
श्रीभागवतस्य द्वितीयस्कन्धे च ।
"अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ।
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ।
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ॥"
इति ॥
सा उत्तमा भक्तिः षड्विधा यथा,—
"क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा ।
सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा ॥"
तत्रास्याः क्लेशघ्नत्वम् ।
"क्लेशास्तु पापं तद्बीजमविद्या चेति ते त्रिधा ॥"
शुभदत्वं यथा,—
"शुभानि प्रीयन्ते सर्व्वजगतामनुरक्तता ।
सद्गुणाः सुखमित्यादीन्याख्यातानि मनी-
षिभिः ॥"
मोक्षलघुताकृद्यथा,—
"मनागेव प्ररूढायां हृदये भगवद्रतौ ।
पुरुषार्थास्तु चत्वारस्तृणायन्ते समन्ततः ॥"
सुदुर्लभा यथा,—
"साधनौघैरनासङ्गैरलभ्या सुचिरादपि ।
हरिणा चाश्वदेयेति दिधा सा स्यात् सुदुर्लभा ॥"
सान्द्रानन्दविशेषात्मा यथा,—
"ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः ।
नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि ॥"
श्रीकृष्णाकर्षणी यथा ।
"ज्ञात्वा हरिर्मे भक्तोऽयमियवर्गसमन्वितम् ।
भक्तिर्वशीकरोतीति श्रीकृष्णाकर्षणी च सा ॥"
सा उत्तमा भक्तिस्त्रिधा यथा,—
"सा भक्तिः साधनं भावः प्रेमा चेति त्रिधो-
दिता ॥"
साधनभक्तिर्यथा,—
"श्रुतिसाध्या भवेत् साध्यभावा सा साधनाभिधा ।
नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता ॥"
भावभक्तिर्यथा,—
"शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक् ।
रुचिभिश्चित्तमाद्रुत्य कृदसौ भाव उच्यते ॥"
प्रेमभक्तिर्यथा,—
"सम्यङ्मसृणितस्वान्तो ममत्वातिशयाङ्कितः ।
भावः स एव साद्रात्मा बुधैः प्रेमा निगद्यते ॥"
इति भक्तिरसामृतसिन्धौ पूर्व्वविभागः ॥
भक्तिमान् [न्] त्रि. (भक्तिरस्यास्तीति । भक्ति+
"तदस्यास्त्यस्मिन्निति मतुप् ।" ५ । २ । ९४ ।
इति मतुप् ।) भक्तियुक्तः । यथा,—
"गुणवान् पुत्रवान् श्रीमान् कीर्त्तिमान् भक्ति-
मान् भवेत् ।
ऐहिके परमैश्वर्यमन्ते गाणपदं व्रजेत् ॥"
इति ब्राह्मवीतन्नाम्नगर्तमहाकालभैरवस्तोत्रम् ॥
अपि च ।
"अन्येऽपि ये विकर्म्मस्था: शूद्राद्या वीचजातयः ।
भक्तिमन्तः प्रयुञ्जन्ते कालेन मयि सम्मताः ॥"
इति कौर्म्मे ७ अध्यायः ॥
भक्तियोगः, पुं, (भक्तेर्योगः भक्त्या यो योग इति
वा ।) परमेश्वरे भजनसम्बन्धः । यथा,—
"भक्तियोगप्रकाशाय लोकस्यानुग्रहाय च ।
सन्यासाश्रममाश्रित्य ज्ञानचैतन्यनामधृक् ॥"
इति चैतन्यभागवतम् ॥
अपि च ।
"वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकम् ॥"
इति श्रीभागवते १ स्कन्धे २ अध्यायः ॥
(भक्तियोग उच्यते । यथा, गीतायाम् । १२ ।
१-२ । १४-२० ।
"एवं सततयुक्ता ये भक्तास्त्वां पर्य्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥
श्रीभगवानुवाच ।
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ॥१४॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्व्वारम्भपरित्यागी यो मे भक्तः स मे
प्रियः ॥ १६ ॥
यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे
प्रियः ॥ १७ ॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्ज्जितः ॥१८॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो
नरः ॥ १९ ॥
ये तु धर्म्मामृतमिदं यथोक्तं पर्य्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे
प्रियाः ॥" २० ॥
भक्तिरसः, पुं, भक्तिरेव रसः । यथा,-
"विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
स्वादत्वं हृदि भक्तानामानीता श्रवणादिभिः ।

एषा ह्यचरतिः स्थायीभावा भक्तिरसो भवेत् ।"
इति भक्तिरसामृतसिन्धुः ॥

भक्तिजः, पुं, (भक्तिं भङ्गीं जनयतीति । जन + कः ।) साधुघोटकः । यथा,—
प्रभुभक्ता भक्तिजाश्च कुलीनेषु कुलोत्कटाः ।
इति शब्दचन्द्रिका ॥
भक्तिदातरि त्रि ॥

भक्ष क भक्षे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क भक्षयति । इति दुर्गादासः ॥

भक्ष ञ भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ० सक०-सेट् ।) ञ भक्षति भक्षते । इति दुर्गादासः ॥

भक्षकः, त्रि, (भक्षयतीति । भक्ष + "ण्वुल्तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) खादकः । भक्षणपरः । तत्पर्य्यायः । घस्मरः २ अक्षरः ३ । इत्यमरः । ३ । १ । १२० ॥ (यथा, हितोपदेशे । १ । १३५ ।
"भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं महत् ।
प्रसंगात्पाशबद्धोऽसौ रुरुः काकेन रक्षितः ॥")

भक्षटकः, पुं, (भक्ष + अटन् । ततः संज्ञायां कन् ।) क्षुद्रगोक्षुरकः । इति राजनिर्घण्टः ॥

भक्षणं, क्ली, (भक्ष + भावे ल्युट् ।) द्रवेतरद्रव्यग्रासाधःकरणम् । तत्पर्य्यायः । न्यादः २ खादनम् ३ खादनम् ४ अशनम् ५ निघसः ६ वल्भनम् ७ अभ्यवहारः ८ जग्धिः ९ जक्षणं १० जेहः ११ प्रत्यवसानम् १२ घसिः १३ आहारः १४ प्राशनम् १५ अवद्यादम् १६ विघासम् १७ भोजनम् १८ जेमनम् १९ अदनम् २० । इति हेमचन्द्रः ॥ द्रव्यविशेषस्य भक्षणविधौ यथा, कर्म्मलोचने ।
"गृध्रगृध्राकं हयामांसं करेण मथितं दधि ।
तर्ज्जन्या दन्तधावञ्च सद्यो गोमांसभक्षणम् ॥"

भक्षणीयं, त्रि, (भक्ष + अनीयर्) भक्ष्यद्रव्यम् । भक्षणयोग्यम् । इति भक्षधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नम् । इति व्याकरणम् ॥ (यथा, पञ्चतन्त्रे । ४ । २५ । "तन्न भेतव्यम् । त्वद्भक्षणेन भक्षणीयास्ते दायादाः ।") तत्स्थापनविधिर्यथा, पाकराजेश्वरे ।
"पुरस्तादिमलं पात्रं सुविस्तीर्णं मनोरमम् ।
तत्र भक्ष्यं परिण्यस्तं मध्यभागे सुसंयुतम् ॥
सूपं सर्पिः पयः शाकं पिष्टमन्नन्तु मत्स्यकम् ।
स्थापयेद्दक्षिणे पार्श्वे शुक्लान्नस्य यथाक्रमम् ॥
प्रवेहाद्याः द्रवाः सर्व्वे पानीयं पानकं पयः ।
चोष्यं सव्यानकं लेह्यं सव्यपार्श्वे निधापयेत् ॥
सर्व्वान् इक्षुविकारांश्च पक्वान्नं पायसं दधि ।
पुरतः स्थापयेद्भोक्तुर्दयोः पंक्तेश्च मध्यतः ॥"

भक्ष(क्ष्य)पत्रा, क्ली, (भक्षं वा भक्ष्यं भक्षणीयं पत्रमस्याः ।) नागवल्ली । इति राजनिर्घण्टः ॥ (गुडादिविरचितरस्या नागवल्लीशब्दे ज्ञातव्या ।)

भक्षितं, त्रि, (भक्षते स्मेति । भक्ष + कर्म्मणि क्तः ।) ज्ञातभक्षणवस्तु । (यथा, हितोपदेशे । १ ।
"भक्षितेनापि भवता नाहारो मम पुष्कलः ॥")
तत्पर्य्यायः । चर्व्वितम् २ लिप्तम् ३ प्रत्यवसितम् ४ गिलितम् ५ खादितम् ६ ज्ञातम् ७ अभ्यवहृतम् ८ अन्नम् ९ जग्धम् १० अत्तम् ११ ग्लस्तम् १२ अशितम् १३ भुक्तम् १४ । इत्यमरः । ३ । २ । ११० ॥ जक्षितम् १५ । इति शब्दरत्नावली ॥

भक्ष्यं, त्रि, (भक्षयते इति । भक्ष + ण्यत् ।) भक्षितव्यम् । भक्षणीयम् । यथा । 'प्रतिपदि कुष्माण्डं न भक्ष्यम् । दशम्यां कलम्बी न भक्ष्या ।' इति स्मृतिसर्व्वस्वम् ॥ अपि च, हितोपदेशे ।
"मासमेकं नरो याति द्वौ मासौ नगभूकरौ ।
अहिरेकदिनं याति अद्य भक्ष्यो धनुर्गुणः ॥"
(भक्ष्यद्रव्याणि तेषां गुणादिकञ्च यथा,—
"वक्ष्याम्यतःपरं भक्ष्यान् रसवीर्य्यविपाकतः ।
भक्ष्याः क्षीरकृतावल्या वृष्या हृद्याः सुगन्धिनः ॥
अदाहिनः पुष्टिकराः दीपनाः पित्तनाशनाः ॥
तेषां प्राग्वकरा हृद्या घृतपूराः कफावहाः ।
वातपित्तहरा वृष्या गुरवो रक्तमांसजाः ॥
वृंहणा गौड़िकाभक्ष्या गुरवोऽनिलनाशनाः ।
अदाहिनः पित्तहराः शुक्रलाः कफवर्द्धनाः ॥
मधुमस्तकसंयावाः पूपा क्षीरे विशेषतः ।
गुरवो वृंहणाश्चैव मोदकास्तु सुदुर्ज्जराः ॥
रोचनो दीपनः स्वर्य्यः पित्तघ्नः पवनापहः ।
गुरुर्घृतमण्डश्चैव सक्तकः प्राग्वदुच्यते ॥
हृद्यः सुगन्धिर्मधुरः स्निग्धः कफकरो गुरुः ।
वातापहस्तृप्तिकरो बल्यो विष्यन्दनः स्मृतः ॥
वृंहणा वातपित्तघ्ना भक्ष्या बल्यास्तु सामिताः ।
हृद्याः पथ्यतमास्तेषां लघवः फेनकादयः ॥
सुन्नादिवेष्टवाराद्यां पूर्व्वा विष्टम्भिनो मताः ।
वेसवारे: सर्पिषिते: सम्पूर्णा गुरवः स्मृताः ॥
पालला: श्लेष्मजनना: शुष्कुल्याः कफपित्तलाः ।
वीर्य्योष्णाः पैष्टिका भक्ष्याः कफपित्तप्रकोपणाः ॥
विदाहिनो नातिबला गुरवश्च विशेषतः ।
वेदला लघवो भक्ष्याः कषायाश्छर्द्दिमारुताः ॥
विष्टम्भिनः पित्तसमाः श्लेष्मला भिन्नवर्च्चसः ।
बल्या वृष्यास्तु गुरवो विज्ञेया माषसाधिताः ॥
कूर्च्चिका विकृता भक्ष्या गुरवो नातिपित्तलाः ।
विरूढकृतता भक्ष्या गुरवोऽनिलपित्तलाः ॥
विदाहोत्क्लेशजनना रूक्षा दृष्टिप्रदूषणाः ।
हृद्याः सुगन्धिनो वृष्या लघवो घृतपाचिताः ॥
वातपित्तहरावल्या वर्च्चोदृष्टिप्रसादनाः ।
विदाहिनस्तैलकृता गुरवः कटुपाकिनः ॥
उष्णा मारुतदृष्टिघ्नाः पित्तलाक्षकप्रदूषणाः ।
फलमांसैक्षुविकृतितिलमाषोपसंस्कृताः ॥
भक्ष्या बल्यास्तु गुरवो वृंहणा हृदयप्रियाः ।
कपालाङ्गारपक्वास्तु लघवो वातकोपनाः ॥
सुपक्वास्तनवश्चापि भूयिष्ठं लघवो मताः ।
सक्तिलाटादयो भक्ष्या गुरवः कफवर्द्धनाः ॥"
"आम्रान्वितमसंकीर्णं शुचिकार्य्यं महानसम् ।
तत्राप्तैर्गुणसम्पन्नमन्नं भक्ष्यं सुसंस्कृतम् ।
शुचौ देशे सुसंगुप्तं सुपस्थापयेद्भिषक् ॥"
"घृतं कार्य्यायसे देयं पेया देया तु राजते ॥

फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्दैवतेषु च ।
परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत् ॥
प्रदद्यादि रसांश्चैव राजतेषूपहारयेत् ।
कट्वराणि खड़ांश्चैव सर्व्वान् ग्रैवेषु दापयेत् ॥
काचस्फटिकपात्रेषु शीतलेषु शुभेषु च ।
दद्याद्दैदूर्य्यपात्रेषु रागषाड़वसङ्कुलान् ॥
पुरस्तादिमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेशांश्च सुसंस्कृतान् ॥
फलानि सर्व्वभक्ष्यांश्च परिशुष्कानि यानि च ।
तानि दक्षिणपार्श्वे तु शुक्लान्नस्योपकल्पयेत् ॥
प्रदद्यादि रसांश्चैव पानीयं पानकं पयः ।
खड़ान् यूषांश्च पेयांश्च सर्व्वे पार्श्वे प्रदापयेत् ॥
सर्व्वान् गुड़विकारांश्च रागषाड़वसङ्कुलान् ।
पुरस्तात् स्थापयेत् प्राज्ञो दयोरपि च मध्यतः ॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

भक्ष्यकारः, त्रि, (भक्ष्यं भक्ष्यद्रव्यं करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) पिष्टकविक्रयजीवी । पिष्टकशिल्पी । इतिभरतः ॥ तत्पर्य्यायः । आपूपिकः २ कान्दविकः ३ । इत्यमरः । २ । ९ । २८ ॥ पूपिकः ४ पूपविक्रयी ५ मोदकादिविक्रयी ६ । इति शब्दरत्नावली ॥

भक्ष्याभक्ष्यं, क्ली, (भक्ष्यमभक्ष्यञ्च ।) खाद्याखाद्यद्रव्यम् । यथा,—
"भक्ष्याभक्ष्याण्यनेकानि ब्राह्मणस्य विशेषतः ।
अत्र गृहा यथा ब्रूयुस्तथा कार्य्यविनिर्णयः ॥"
इत्येकादशीतत्त्वे गरुडवचनम् ॥ * ॥
नारद उवाच ।
"भक्ष्यं किंवाप्यभक्ष्यञ्च द्विजानां गृहिणां प्रभो ! ।
यतीनां वैष्णवानाञ्च विधवाब्रह्मचारिणाम् ॥
किं कर्त्तव्यमकर्त्तव्यमभोज्यं भोज्यमेव च ।
सर्व्वं कथय सर्व्वज्ञ ! सर्व्वेश ! सर्व्वकारण ! ॥"
श्रीमहेश्वर उवाच ।
"कश्चित्पक्षी विप्रश्च निराहारी चिरं मुनिः ।
कश्चित् समीरणाहारी फलाहारी च कश्चन ॥
अन्नाहारी यथा लोके गृही च गृहिणीयुतः ।
येषामिच्छा च या ब्रह्मन् ! रुचीनां विविधा गतिः ॥
हविष्यान्नं ब्राह्मणानां प्रशस्तं गृहिणां सदा ।
नारायणोच्छिष्टमिष्टमनिवेद्यमभक्ष्यकम् ॥
अन्नं विष्ठा जलं मूत्रं यद्विष्णोरनिवेदनम् ।
विष्णुसूत्रं सर्व्वपापोत्तमन्नञ्च हरिवासरे ॥
ब्राह्मणः कामतोऽश्नन्च यो भुङ्क्ते हरिवासरे ।
त्रैलोक्यजनितं पापं सोऽपि भुङ्क्ते न संशयः ॥
न भोक्तव्यं न भोक्तव्यं न भोक्तव्यञ्च नारद ! ।
गृहिभिर्ब्राह्मणैरन्नं संप्राप्ते हरिवासरे ॥
गृही गृहेच्च प्राप्तश्च ब्राह्मणो ज्ञानदुर्ब्बलः ।
प्रयाति कालसूत्रञ्च भुक्त्वा च हरिवासरे ॥
क्रमिभिः ग्रासमानेच्च भक्षितस्तच्च तिष्ठति ।
विष्णुसूत्रभक्षणं कृत्वा यावदिन्द्राश्चतुर्दश ॥
जन्माष्टमीदिने रामनवमीदिवसे हरेः ।
शिवरात्रौ च यो भुङ्क्ते सोऽपि ह्निग्रुपातकी ॥

उपवासासमर्थश्चेत् फलमूलजलं पिबेत् ।
नष्टे शरीरे स भवेदन्यथा चात्मघातकः ॥
सकृद्भुङ्क्ते हविष्यान्नं विष्णोर्नैवेद्यमेव च ।
न भवेत् प्रत्यवायी स चोपवासफलं लभेत् ॥
एकादश्यामनाहारो यद्दी विप्राश्च भारत ! ।
ते च तिष्ठन्ति वैकुण्ठे यावदै ब्रह्मणो वयः ॥
यद्दिनां ग्रैवशाक्तानामिदमुक्तञ्च नारद ! ।
विष्णवतो वैष्णवानां यतीनां ब्रह्मचारिणाम् ॥
नित्यं नैवेद्यभोजी च श्रीकृष्णस्य च वैष्णवः ।
नित्यं व्रतोपवासानां जीवन्मुक्तो लभेत् फलम् ॥
वाञ्छन्ति तस्य संस्पर्शं तीर्थानि सर्वदेवताः ।
आलापं दर्शनञ्चैव सर्वपापप्रणाशनम् ॥
हविष्यमन्नं पृथुकं शुद्धं देशविशेषके ।
गव्यन्तप्तञ्च विप्राणां भक्षणे च निवेदने ॥
अभक्ष्यञ्च यतीनाञ्च विधवानाञ्च ब्रह्मचारिणाम् ।
ताम्बूलञ्च यथा ब्रह्मन् ! तथैते वस्तुनी ध्रुवम् ॥
ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ।
तप्तखिन्नञ्च विप्रेन्द्र ! गोमांससदृशं ध्रुवम् ॥
सर्वेषां ब्राह्मणानाञ्च अभक्ष्यं प्रथमं नारद ! ।
यदुक्तं सामवेदे च हरिणा चाङ्गिरःक्रमे ॥
ताम्रपात्रे पयःपानं उच्छिष्टे घृतभोजनम् ।
दुग्धं लवणसार्द्धञ्च सद्यो गोमांसभक्षणम् ॥
नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु ।
ऐक्यं ताम्रपात्रस्थं सुरातुल्यं न संशयः ॥
उत्थाय वामहस्तेन यस्तोयं पिबति द्विजः ।
सुरापीती स विज्ञेयः सर्वधर्मैर्बहिष्कृतः ॥
अनिवेद्यं हरेरन्नं भक्षयेच्च नित्यशः ।
पीतशेषं जलञ्चैव गोमांससदृशं सुने ! ॥
वार्ताकुफलञ्चैव गोमांसं कार्त्तिके स्मृतम् ।
माघे च मूलकञ्चैव कलमी शयने तथा ॥
श्वेतवर्णञ्च तालञ्च मद्यरं मत्स्य एव च ।
सर्वेषां ब्राह्मणानाञ्च त्याज्यञ्च सर्वदेशतः ॥
मत्स्यांश्च कामतो भुक्त्वा चोपवासंचरेद्यं वसेत् ।
प्रायश्चित्तं ततः कृत्वा शुद्धिमाप्नोति ब्राह्मणः ॥
प्रतिपत्सु च कुष्माण्डमभक्ष्यमर्षणान्नम् ।
द्वितीयायाञ्च दुष्टस्त्रीभोजनो न स्मरेद्धरिम् ॥
अभक्ष्यञ्च पटोलञ्च शत्रुवृद्धिकरं परम् ।
तृतीयायाञ्चतुर्थ्याञ्च मूलकं धनणाशकम् ॥
कलङ्कारञ्चैव पञ्चम्यां बिल्वभक्षणम् ।
तिर्यग्योनिं प्रापयेत्तु षष्ठ्याञ्च निम्बभक्षणम् ॥
रोगवृद्धिकरञ्चैव सप्तम्यां तालभक्षणम् ।
नारिकेलफलं भक्ष्यमष्टम्यां वृद्धिनाशनम् ॥
तुम्बी नवम्यां गोमांसं दशम्याञ्च कलम्बिका ।
एकादश्यां तथा ग्रिम्बी द्वादश्यां पूतिका तथा ॥
त्रयोदश्यान्तु वार्त्ताकीभक्षणं पुत्रनाशनम् ।
चतुर्दश्यां मांसभक्षं महापापकरं परम् ॥
पञ्चदश्यां तथा मांसमभक्ष्यं यद्दिनां सुने ! ।
यद्दिनां प्रोक्षितं मांसं भक्षमन्यदिने दिने ॥
मांसञ्च रक्तशाकञ्च कांस्यपात्रे च भोजनम् ।
निषिद्धं शयने चैव कूर्ममांसञ्च प्रोक्षितम् ॥
रात्रौ च दधिभक्षञ्च शयनं सन्ध्ययोर्दिने ।
रजस्वलावीरान्नञ्च पुंश्चलीनामभक्षणम् ॥
शूद्राणां यानकानाञ्च शूद्रश्राद्धान्नमेव च ।
अभक्ष्याणाञ्च विप्रर्षे ! यदन्नं वृषलीपतेः ॥
ब्रह्मन् ! वार्द्धुषिकान्नञ्च गणकानामभक्ष्यकम् ।
अग्रदानीद्विजातीनाञ्च चिकित्सकारकस्य च ।
हस्ताचिवाहरी तैलमग्राह्यञ्चाप्यभक्ष्यकम् ।
मद्ये च्छगे भाद्रपदे मांसं गोमांसतुल्यकम् ।"
इति ब्रह्मवैवर्ते ब्रह्मखण्डे २७ अध्यायः प्राच्ये खण्डे ३१ अध्यायश्च ।

नारद उवाच ।

"वर्ज्यानाञ्च चतुर्णाञ्च भक्ष्याभक्ष्यञ्च साम्प्रतम् ।
विपाकं कर्म्मणाञ्चैव सर्वेषां प्राणिनामपि ॥
ब्रूहि मे महाभाग ! कारणानाञ्च कारण ! ।
त्वत्तोऽन्यं कञ्च पृच्छामि नितान्तं सन्त-
मीश्वर ! ॥

श्रीभगवानुवाच ।

भक्ष्याभक्ष्यं चतुर्णाञ्च वर्णानाञ्च यथोचितम् ।
वेदोक्तं श्रूयतां तात ! सावधानं निगामय ॥
पयः पाश्चे पयः पानं गव्यं सिद्धान्नमेव च ।
शर्करादिकं मधु गुडं नारिकेलोदकं तथा ॥
फलं मूलञ्च यत्किञ्चिदभक्ष्यं मनुरब्रवीत् ।
दुग्धान्नं तप्तसौवीरमभक्ष्यं ब्रह्मणा मतम् ॥
नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु ।
गव्यञ्च ताम्रपात्रस्थं सर्वं मद्यं घृतं विना ।
ताम्रपात्रे पयःपानमुच्छिष्टे घृतभोजनम् ।
दुग्धं लवणञ्चैव सद्यो गोमांसभक्षणम् ॥
अभक्ष्यं मधुमिश्रञ्च घृतं तैलं गुडं तथा ।
आर्द्रकं गुडसंयुक्तमभक्ष्यं श्रुतिसम्मतम् ॥
पीतशेषं जलञ्चैव माघे च मूलकं तथा ।
द्विर्भोजनञ्च दिवसे सन्ध्ययोर्भोजनं तथा ॥
भक्ष्यञ्च रात्रिशेषे च ध्रुवं प्राज्ञः परित्यजेत् ।
पानीयं पायसं चूतं घृतं लवणमेव च ।
खण्डिकं लवणञ्चैव क्षीरं तक्रं तथा मधु ।
हस्तादुच्छ्रयगृहीतञ्च सद्यो गोमांसभक्षणम् ।
कर्पूरं रौप्यपात्रस्थमभक्ष्यं श्रुतिसम्मतम् ।
परिवेशनकारी चेद्भोक्तारं स्पृशते यदि ॥
अभक्ष्यञ्च तदन्नञ्च सर्वेषामेव सम्मतम् ।
नकुलानां गजकानां महिषाणाञ्च पक्षिणाम् ।
सर्पाणां शूकराणाञ्च गर्दभानां विशेषतः ।
मार्जाराणां शृगालानां कुक्कुराणां व्रजेश्वर ! ॥
व्याघ्राणामपि सिंहानां त्याज्यं मांसं वृथा सदा ।
जलौकसाञ्च नक्राणां गोधिकानां तथैव च ।
मण्डूकानां कर्कटीनां चञ्चुकानाञ्च निश्चितम् ।
गवाञ्च चमरीणाञ्च कलौ मांसमभक्ष्यकम् ॥
हस्तिनां घोटकानाञ्च वृथामेव च रक्षसाम् ।
दंशञ्च मशकञ्चैव मक्षिका च पिपीलिका ॥
सर्वेषाञ्च निषिद्धानां लोके वेदे व्रजेश्वर ! ।
वानराणां भल्लुकानां शरभाणां तथैव च ॥
निषिद्धं मृगजाभीनां गर्दभानाञ्च मांसकम् ।
अभक्ष्यं महिषाणाञ्च दुग्धं दधि घृतं तथा ॥
खण्डिकञ्च तथा चक्रं विप्राणां नवनीतकम् ।
मांसमुक्तैः सवर्णकं तस्य दुग्धादिकं तथा ॥
वर्णानाञ्च चतुर्णाञ्चाप्यभक्ष्यञ्च श्रुतौ श्रुतम् ।
अभक्ष्यमाद्यैकमेव सर्वेषाञ्च रवेर्दिने ॥
पर्य्युषितं जलञ्चान्नं विप्राणां दुग्धमेव च ।
वर्णानाञ्च चतुर्णाञ्चावीरान्नस्य च भक्षणम् ॥
तदन्नञ्च सुरातुल्यं गोमांसाधिकमेव च ।
अवीरान्नञ्च यो भुङ्क्ते ब्राह्मणो ज्ञानदुर्ब्बलः ।
पितृदेवार्चनं तस्य निष्फलं मनुरब्रवीत् ॥
ब्राह्मणानां वैष्णवानामभक्ष्यं मत्स्यमेव च ।
इतरेषामभक्ष्यञ्च पञ्चपर्व्वसु निश्चितम् ॥
पितृदेवार्चनेषे च भक्ष्यं मांसं न दूषितम् ।
पञ्चपर्व्वसु त्याज्यं सर्वेषां मनुरब्रवीत् ॥
असंस्कृतञ्च लवणं तैलञ्चाभक्ष्यमेव च ।
भक्ष्यं पवित्रं सर्वेषां यज्ञने वह्निसंस्कृतम् ॥
एकहस्ते धृतं तोयमभक्ष्यं सर्वसम्मतम् ।
आविलं कृमियुक्तञ्चापरिशुद्धन्त्वनिर्म्मलम् ॥
अभक्ष्यं ब्राह्मणानाञ्च वैष्णवानां विशेषतः ।
अनिवेद्यं हरेरेव यतीनां ब्रह्मचारिणाम् ॥
पिपीलिकाभिश्रितञ्च मधु गव्यं गुडं तथा ।
यत्किञ्चिद्वस्तु वा तात ! न भक्ष्यञ्च श्रुतौ श्रुतम् ॥
पक्षिभक्ष्यं कीटभक्ष्यं शुद्धं पक्वफलन्तथा ।
काकभक्ष्यमभक्ष्यञ्च सर्वेषां ब्रह्मणेव च ।
घृतपक्वं तैलपक्वं सिद्धान्नं शूद्रसंस्कृतम् ।
अभक्ष्यं ब्राह्मणानाञ्च शूद्रभक्षं पिपीटकम् ॥
सर्वेषामशुचीनाञ्च जलमग्नं परित्यजेत् ।
अशौचान्नात् परदिने शुद्धमेव न संशयः ॥
विपाकः कर्म्मणामेव दुष्करः श्रुतिसम्मतः ।
भक्ष्याभक्ष्यञ्च कथितं यथाज्ञानं व्रजेश्वर ! ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे पञ्चाध्यायः ॥
"भक्ष्याभक्ष्यञ्च ते ग्रिय्य ! वेदितव्यं तदन्तरे ।
करीरस्य वधः श्रस्तः फलान्यौदुम्बरस्य च ॥
सद्यो भक्षी भवेत्तेन अभक्ष्या पूतिवासिका ।
न भक्षयीयं वाराहं मांसं मत्स्यस्य सर्व्वशः ॥
अभक्ष्या ब्राह्मणैर्ह्येते दीक्षितैर्हि न संशयः ॥"
इति वाराहे ब्राह्मणदीक्षाप्रकरणनामाध्यायः ॥

भक्ष्याजाडः, स्त्री, (भक्ष्या भक्षार्हा अजाडः ।) राजाजाडः । इति राजनिर्घण्टः ॥

भगं, क्ली, पुं, (भज्यते अनेनाग्निः सेवते इतदाश्रित्येव कन्दर्पं सेवते इति भावः । भजसेवायाम् + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । "खनो च च ।" ३।३।१२५। चितकरत्वमन्यतोऽप्ययमिति विज्ञापनार्थम् इति वृत्तिकृद्भट्टोजीदीक्षितः ।) स्त्रीचिह्नम् । तत्पर्य्यायः । योनिः २ । इत्यमरः ।२।६।७६। वराङ्गम् ३ उपस्थः ४ सुरतमन्दिरम् ५ । इति राजनिर्घण्टः ॥ (भजन्त्यनेनेति भगो मेढ्रनम् । भजन्त्यस्मिन्निति भगं योनिः । अत्र भगशब्देन द्वयमपि कथ्यते । इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥

"त्वष्टा दक्षस्तितिर्विष्णुः सोमः सूर्य्यस्तथाश्विनौ ।
भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम् ॥"
इति वामटे शारीरस्थाने प्रथमोऽध्यायः ॥)
रतिगृहम् ६ जन्मवर्त्म ७ अधरम् ८ अवाचीदेशः ९ प्रकृतिः १० अपथम् ११ सरकूपः १२

अग्रदेशः १३ प्रकृतिः १४ पृथ्वी १५ संसारमार्गः १६ गृहम् १७ स्मरागारम् १८ स्मरध्वजम् १९ रतक्षेत्रम् २० रतिकुहरम् २१ कलत्रम् २२ अधः २३। इति शब्दरत्नावली। तस्य लक्षणम्। यथा,—

"विस्तीर्णञ्च गभीरञ्च द्विविधं भगलक्षणम्।"

तद्गुणा यथा,—

"कूर्म्मपृष्ठं गजस्कन्धं पद्मगन्धं सुकोमलम्।
अकोमलं सुविस्तीर्णं पच्यते च भगोत्तमाः॥"

तद्दोषा यथा,—

"घृतलं निम्बमुण्डाग्रं गोजिह्वासदृशं परम्।
इत्युक्तं कामशास्त्रज्ञैर्भगदोषचतुष्टयम्॥
विस्तीर्णं सुतलं योन्यं गभीरे वंशबीजकम्।"

इति रतिमञ्जरी॥

तस्य शुभाशुभलक्षणम्। यथा,—

"शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः।
वामोन्नतस्तु कन्याजः पुत्रजो दक्षिणोन्नतः॥
आखुरोमा गूढ़मणिः खाश्विदः संहतः पृथुः।
तुङ्गः कमलवर्णाभः शुभोऽत्यल्पलाञ्छितिः॥
कुरङ्गखुरूपो यश्चुल्लिकोदरसन्निभः।
रोमशो विवृतास्यश्च ह्रस्वनासोऽतिदुर्भगः॥
शङ्खावर्त्तो भगो यस्याः सा गर्भमिह नेच्छति।
चिपिटः कर्पराकारः किङ्करीपदृशो भगः॥
वंशपत्रेतसपत्राभो गजरोमोच्चनासिकः।
विकटः कुटिलाकारो लम्बगल्लस्तथाशुभः॥"

इति स्कान्दे काशीखण्डे ३७ अध्यायः॥

श्रीः। वीर्य्यम्। इच्छा। ज्ञानम्। वैराग्यम्। कीर्त्तिः। माहात्म्यम्। ऐश्वर्य्यम्। (यथा, भागवते। २। ७। ६।

"यदृवेदसूत्पथगतं हि नवाक्यवच्च-
निष्प्रत्यूहपौरुषभगं निरये पतन्तम्॥"

"निष्प्रत्यूहं दृढं पौरुषं भगमैश्वर्य्यञ्च यस्य।" इति तट्टीकायां स्वामी॥) यत्नः। धर्म्मः। मोक्षः। इति मेदिनी। गे, १४॥ पुंसां गुदसुष्कमध्यभागः। इति राजनिर्घण्टः॥ श्रीः। यशः। सौभाग्यम्। (यथा, भागवते। २। १०। १०।

"यस्य राष्ट्रे प्रजाः सर्व्वास्त्रय्यस्यन्ते साध्व्यः साधुभिः।
तस्य मत्तस्य नश्यन्ति कीर्त्तिरायुर्भगो गतिः॥"

"भगो भाग्यम्।" इति तट्टीकायां स्वामी॥) कान्तिः। सूर्य्यः। ग्रहभेदविशेषः। चन्द्रः। इत्यनेकार्थध्वनिमञ्जरी॥ पूर्व्वफल्गुनीनक्षत्रम्। यथा, ज्योतिस्तत्त्वे।

"अक्षतामाषयुक्ताश्च भगे सर्पिस्तदुत्तरे॥"

भगः पुं, (भज्यते इति। भजसेवायां+"पुंसि संज्ञायां घ प्रायेण।" ३। ३। ११८। इति घ। "खनो घ च।" ३। ३। १२५। इति वितुकरणाद् वा घ।) रविः। इति मेदिनी॥ गे, १४। क्लीवेऽप्ययम्। यथा,—

"ज्ञानवैराग्ययोर्योनौ भगमाहुर्बुधा बुधे।"

इति रुद्रः॥

(भजनीये, त्रि। यथा, ऋग्वेदे। १। ३६। ५।

"इन्द्रो भगो वाजदा अस्य गावः
प्रजायन्ते दक्षिणा अस्य पूर्वीः॥"

"भगः सर्व्वैर्भजनीयः स इन्द्रः।" इति तद्भाष्ये सायणः॥ द्वादशादित्यभेदः। यथा, ऋग्वेदे। २। २७। १।

"इमा गिर आदित्येभ्यो घृतस्नूः
सनाद्राजभ्यो जुह्वा जुहोमि।
शृणोतु मित्रो अर्य्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः॥"

यथा च महाभारते। १। ६५। १५-१६।

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्तंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः॥"

रुद्रांशो वीरभद्रोऽस्य भगस्य दक्षयज्ञे नेत्रे उत्पाटितवान्। यथा, भागवते। ४। ५। १८।

"भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि।
उज्जहार सदस्योऽक्ष्णा यः शपन्तमसूसुचत्॥"

ऐश्वर्य्यादिषट्कम्। यदुक्तम्।

"ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥"

भोगाख्यदलम्। यथा, भागवते।२।१६।२६।

"प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः।
गाम्भीर्य्यं स्थैर्य्यमास्तिक्यं कीर्त्तिमानोऽनहंकृतिः॥"

"भगः भोगाख्यदलम्।" इति तट्टीकायां श्रीधरस्वामी॥ स्थूलमङ्गलाभिमानी। यथा, रामायणे। ३। १२। १८।

"विष्णोः स्थानं महेन्द्रस्य स्थानञ्चैव विवस्वतः।
सोमस्थानं भगस्थानं स्थानं कौबेरमेव च॥"

"भगः स्थूलमङ्गलाभिमानी।" इति तट्टीकायां रामानुजः॥)

भगणः, पुं, (भानां नक्षत्राणां गणः समूहः।) नक्षत्रसमूहः। शीघ्रगामिनां ग्रहाणामल्पेन कालेन मन्दगामिनां ग्रहाणां महता कालेन पूर्व्वगत्या पातानां पश्चिमगत्या परिवर्त्तनेनाश्विन्यादिरेवत्यन्तनक्षत्रभोगकालः। षष्टिविकलाभिः कला षष्टिकलाभिर्भागस्त्रिंशद्भागैराशिर्द्वादशराशिभिर्भगः। यथा,—

"शीघ्रगस्याल्पयाल्पेन कालेन महताल्पगः।
तेषान्तु परिवर्त्तेन यौक्ष्यन्ते भगवः स्मृतः॥
विकलानां कलाषष्ट्या तत्षष्ट्या भाग उच्यते।
तत्त्रिंशता भवेद्राशिर्भगाश्चो द्वादशैव ते॥
युगे सूर्य्यशुक्राणां स्वचतुष्करदार्णवाः।
४३२०००।
कुजार्किगुरुशीघ्राणां भगणाः पूर्व्वयायिनाम्॥
इन्दो रसाग्निचित्रीषुसप्तभूधरभागवाः।
५७७५३३३६।
दस्रचाष्टरसाङ्काब्धिलोचनानि कुजस्य तु
२२६६८३२॥
बुधशीघ्रस्य भूत्यर्त्तुखाद्रिचाङ्कगजेन्दवः।
१७६३७०६०।

दृष्टश्रुतैः खदस्राब्धिवेदषड्वह्नयस्तथा
३६४३२०॥
सितशीघ्रस्य षट्सप्तत्रियमाब्धिखभूधराः।
७०२२३७६।
शून्येभुजङ्गषट्पक्षरसवेदनिशाकराः १४६५६८॥
चन्द्रोच्चस्याग्निभूत्याब्धिवसुसर्पार्णवा
४८८२०३ युगे।
वामं पातस्य सर्पाग्नियमाब्धिग्निखिदस्काः
२३२२३८॥
इति सूर्य्यसिद्धान्तः॥*॥

अपि च। ग्रहाणां मन्दोच्चानां चलोच्चानां ग्रहपातानाञ्च भगणान् ज्ञेषट्केनाह। अर्कशुक्रबुधपर्य्यया विधेरङ्क कोटिगुणिता रदाब्धयः। ४३२०००००० एत एव शनिजीवभूसुतां कीर्त्तिताश्च गणकैश्चलोच्चजाः॥ १॥

खाब्धिखाब्धिभगगनामरेन्द्रियच्याधरादिविषया
५७७५३३०००० द्विमद्युतेः।
युग्मयुग्मशरनागलोचनद्यालवस्त्रवयमाग्निगोऽ-
ब्जः २२६६८२८५२२॥ २॥
सिन्धुसिन्धुरनवाष्टगोऽङ्कषट्चाङ्कसप्तशशिनो
१७६३६६६८६८४ शशीजाः।
पक्षपक्षयुगषट्कलोचनद्व्यब्धिषड्गुणमिता
३६४३२२६४५५ गुरोर्मताः॥ ३॥
दिनन्दवेदाङ्कगजाग्निलोचनद्विभूत्यशैलाः
७०२२३८६४६२ सितशीघ्रपर्य्यायाः।
भुजङ्गनन्दद्विनगाङ्कवाणषट्कृतेन्दवः
सूर्य्यसुतस्य पर्य्यया १४६५६७२६८॥ ४॥
खाब्धयोऽष्टाग्निगजेषुदिग्वियद्विपाब्धयो
४८०१०५८५८ ह्रदायमा २६२ रदाब्धयः३३२।
शरेन्दिभाः५५५ज्ञाश्चरसाः६५३कुसागराः४१
स्युः पूर्व्वगत्या तरणेर्ग्रहस्य ते॥ ५॥
गजार्द्धिभर्गैश्चिरदाग्निन:२१२३१११६८कुभद्र-
साग्निनः२६७ कुद्विशरा: ५२१ क्रमर्क्षवः ६३।
त्रिनन्दनागा ८६३ युगकुज्ञरेदवो ५८७
निशाकराद्यस्तगपातपर्य्यायाः॥ ६॥"

इति सिद्धान्तशिरोमणौ॥७॥

ग्रहाणां पूर्व्वगमनेन कल्पे एते पर्य्यायाः। तथा मन्दोच्चानाञ्च प्राग्गत्या एतावन्तः। पातानां पश्चिमगत्या एतावन्तो भवन्ति। अत्रोपपत्तिः सा तु तद्भाषाकुग्रन्थेन ततश्चेदसंस्थानग्रन्थेन सुतगोलेनैव श्रोतुं शक्यते नान्येन। ग्रहमन्दशीघ्रपाताः स्वस्वमार्गेषु गच्छन्त एतावतः पर्य्यायान् कल्पे कुर्व्वन्तीत्यत्रागम एव प्रमाणम्। इति तट्टीका॥

भगदत्तः, पुं, (भगमैश्वर्य्यं दत्तमस्मै इति।) नरकराजस्य ज्येष्ठपुत्रः। स तु प्राग्ज्योतिषपुराधिपः। यथा,

"ऋतुमत्यान्तु जायायां कालेन नरकः क्रमात्।
भगदत्तं महाशौर्य्यं मदवन्तं सुमालिनम्॥
चतुरो जनयामास पुत्रांस्तांश्च क्षितेः सुतः॥"

श्रीभगवानुवाच।

"भारावतरणे देवि! नरकस्य वधः पुरा।
त्वयैव प्रार्थितो यस्मात् तेनायौ निहतो मया॥

पालयिष्येऽस्य सन्तानं देवि ! लङ्घनादहम् ।
प्राग्ज्योतिषेऽभिषेक्ष्यामि नगरं भगदत्तकम् ॥
पृथिव्यां नारदेनैव सहितः केशवस्तदा ।
भगदत्तं भौमसुतं प्राग्ज्योतिषपुरोत्तमे ।
अभिषिच्य तदा भूपं पुरमध्ये न्यवेशयत् ।"

इति कालिकापुराणे ३६ अध्यायः ॥

(यथा च महाभारते । २ । २६ । ८ ॥
"स तानपि महेष्वासान् विजित्य भरतर्षभ ! ।
तैरेव सहितैः सर्व्वैः प्राग्ज्योतिषमुपाद्रवत् ॥"
तत्र राजामहाराजासीद्भगदत्तो विशाम्पते ! ।
तेनासीत् सुमहद्युद्धं पाण्डवस्य महात्मनः ॥")

भगदैवतं, क्ली, (भगो योनिर्दैवतं देवता यस्य ।) पूर्व्वफल्गुनीनक्षत्रम् । तत्तु हस्तसतैर्भनक्षत्रम् । यथा, ज्योतिस्तत्त्वे ।

"विप्राक्षाजलतोयानि वैद्यर्क्षं भगदैवतम् ।
पुष्या पौष्णो यमः सर्पो ऋक्षभान्यर्कतः क्रमात् ॥"

भगन्दरः, पुं, (भगं गुह्यसुष्कमधस्थानं दारयतीति । "ड + खिच् + पूः सर्व्वयोदारिसहोः ।" ३ । २ । ४१ । इत्यत्र । "भगे च दारेरिति वक्तव्यम् ।" इति काशिकोक्तेः खच् । "खचि ह्रस्वः ।" ६ । ४ । ९४ । इति ह्रस्वः । समूच ।) अपानदेशे व्रणरोगविशेषः । तस्य रूपमाह । "गुदस्य द्व्यङ्गुले क्षेत्रे पार्श्वतः पिडकाऽन्तिके । भिन्नो भगन्दरो ज्ञेयः स च पञ्चविधो भवेत् ॥" अन्तिके पीडाकृत् । पञ्चविधः वातकफैपित्तिक-श्लैष्मिकसान्निपातिकभेदात् ॥ भगन्दर-शब्दस्य निरुक्तिमाह भोजः ।

"भगं परिसमन्ताद्यो गुदवर्त्मो तथैव च ।
भगवद्दारयेद्यस्मात्तस्मादेष भगन्दरः ॥"

भजन्त्यनेनेति भगं मेहनम् । भजन्त्यस्मिन्निति भगं योनिः । अत्र भगशब्देन द्वयमपि कथ्यते । भगवत् योनिवत् । पूर्व्वरूपादीनि यथा,—

"कटीकपालनिस्तोददाहकण्डूरुजादयः ।
भवन्ति पूर्व्वरूपाणि भविष्यति भगन्दरे ॥"

कटीकपालमत्र कटीफलकम् । वातिकं घृतयोनिकसंज्ञं भगन्दरमाह ।

"कषायरूक्षैरतिकोपितोऽनिल-
स्तपानदेशे पिडकां करोति याम् ।
उपेक्षणात् पाकमुपैति दारुणं
रुजाञ्च भिन्नारुणफेनवाहिनीम् ॥
तत्रागमो मूत्रपुरीषरेतसां
व्रणैरनेकैः घृतयोनिकं वदेत् ।

दारुणं अतिदारणात्, व्रणैरनेकैः क्षुद्रसुखैः । घृतयोनिकशब्दनी तत्तुल्यम् । पैत्तिकमुष्ट्रग्रीव-संज्ञमाह ।

"प्रकोपणैः पित्तमतिप्रकोपितं
करोति रक्तां पिडकां गुदे गताम् ।
तदाशुपाकाधिकपूतिवाहिनीं
भगन्दरञ्चोष्ट्रशिरोधरं वदेत् ॥"

आशुपाकाधिकपूतिवाहिनीम् । शीघ्रपाकाम् उग्रदुर्गन्धवाहिनीञ्च । तदा तं भगन्दरं उष्ट्र-ग्रिरोधर उष्ट्रग्रीवसंज्ञं वदेत् । उष्ट्रग्रीव-संज्ञञ्च । पिडकाकालीनवक्रतयोष्ट्रग्रीवाकार-त्वेन ॥ ॥ श्लैष्मिकपरिस्रावित्वमाह ।

"कण्डूयनो घनस्रावी कठिनो मन्दवेदनः ।
श्वेतावभासः कफजः परिस्रावी भगन्दरः ॥"

कठिनः पिडकावस्थायां परिस्रावी निरन्तरं स्रवन्यधीनः ॥ ॥ सान्निपातिकशम्बूकावर्त्त-संज्ञमाह ।

"बहुवर्णरुजास्रावाः पिडका गोस्तनोपमाः ।
शम्बूकावर्त्तवन्नाड्यो शम्बूकावर्त्तको मतः ॥"

बहुवर्णरुजास्रावाः बहुशब्दो वर्णादिभिः प्रत्येकं सम्बध्यते । नाड्यो स्रावमार्गः ॥ ॥ शम्बूकमुखमार्गसंज्ञमाह ।

"चतुरङ्गतिः पायुगताङ्गिवर्द्धते
क्षुपेक्षणात् क्षुः क्षमयो विदार्यते ।
प्रकुर्व्वते मार्गमनेकधा नृणां-
मतैस्तमुखमार्गभगन्दरं वदेत् ॥
चतुरङ्गतिः कण्टकादिना नखेन
कण्डूयनादिना वाभिघातात् ।

मतिः स्रावः उन्मार्गभगन्दरम् । एतस्य क्षमि-क्षतमार्गैः पूरीषादिनिर्गमादुन्मार्गसंज्ञा ॥"

कष्टसाध्यमसाध्यत्वाह ।

"घोराः साधयितुं दुःखाः सर्व्व एव भगन्दराः ।
तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च विशेषतः ॥
वातमूत्रपुरीषाणि शुक्रञ्च क्षमयत्यधः ।
भगन्दरात् स्रवन्त्यन्नं नाशयन्ति तमातुरम् ॥"

अथ भगन्दरस्य चिकित्सा । यथा,—

"अथास्य पिडकामेव तथा यत्नादुपाचरेत् ।
शुद्धासृक्सुतिसेकाद्यैर्यथा पाकं न गच्छति ।
पुनर्नवाम्लताम्रौषीपिप्पलीवदरैः कृतः ।
लेपाय पिडकावस्थे कल्कः श्लक्ष्णो भगन्दरे ॥
पयःपिष्टैस्तिलारिष्टमधुकैः शीतलैः कृतः ।
लेपो भगन्दरे श्लक्ष्णः पैत्तिके वेदनावति ॥"

अरिष्टो निम्बः ॥

"सुमनायाश्च पत्राणि गुडूची बिल्वमेवकम् ।
सैन्धवं तक्रसंपिष्टं लेपाद्धन्ति भगन्दरम् ॥"

सुमना जातिश्चल्ला पत्रम् ।

"पिडकानामपक्वानामपतर्पणपूर्व्वकम् ।
कर्म्म कुर्य्यादिरेकान्तं भिन्नानां व्रणवत् क्रिया ॥
निम्बार्कक्षीरसिन्धूत्थपुराणघृतनक्तकैः ।
सिद्धमभ्यञ्जने तैलं भगन्दरहरं परम् ॥"

पुरो गुग्गुलुः । अभ्यङ्गनक्तकाः करवीर-पत्राणि । निम्बादितैलम् ॥ ॥

"त्रिफलापुरलक्षाणां त्रिपञ्चाग्नेर्कयोगिता ।
गुटिका शोथगुल्मार्शोभगन्दरवतां हिता ॥"

नवचार्षिको गुग्गुलुः ॥ ॥

"शस्त्रक्रियायामपि कथिता शस्त्रसाध्ये भगन्दरे ।
सा च तेनैव कर्त्तव्या शस्त्रशास्त्रमवेति यः ॥
यायामं मैथुनं युद्धं दृष्टयानं गुरूणि च ।
रूक्षव्रणेऽपि यत्नेन वर्जयेद्वत्सरं नरः ॥"

इति भावप्रकाशे भगन्दराधिकारः ॥

अपि च ।

"लङ्घनं स्वेदनं लेपविस्रावणविरेचनैः ।
रक्तमोक्षादिभिः शीघ्रं गुदजां पिडकां जयेत् ॥
तथा यत्नं भिषक् कुर्य्याद्यथा पाकं नियच्छति ।
अपक्वं वाथ पक्वं वा जलौकापातनं हितम् ॥
तदभावे तु शस्त्रेणाप्याशिद्दं रक्तस्य मोक्षणम् ॥"

वटपलाशकाश्मर्य्यगुडूच्यः सपुनर्नवाः ।
पिष्ट्वा तु पिडकारम्भे लेपः शस्तो भगन्दरे ॥
आमावस्थाक्रिया प्रोक्ता पक्वावस्थाक्रियोच्यते ।
शुद्धस्यापाटलाद्यारवद्विदाहादिकं क्रमम् ।
विधाय व्रणवत् कार्य्यं यथा दोषो यथाबलम् ॥
क्षुत्क्षर्कदुग्धदार्व्योभिर्वर्त्तिं कृत्वा भगन्दरे ।
दद्यात् सर्व्वगुरीरस्या नाड्यैर्हन्यात् प्रयोगराट् ॥

तिलाभयायोधमरिष्टपत्रं
निम्बा वचा कुष्ठमगारधूमः ।
भगन्दरे नाशुपदंशयोक्ष
दुष्टव्रणे शोधनरोपणोऽयम् ॥
मुनोऽस्यिदृष्टं त्रिफलारसेन
विड्लाङ्गलास्थि त्वथवा विलेपनात् ।
चिरप्रभूतं व्रणरोगदुष्टं
भगन्दरं नाशुमुपैति नूनम् ॥ ॥

जम्बूकमांसं शुष्कीत प्रकारैर्भक्षणादिभिः ॥"

प्रगालमांसभक्षणं खाद्यम् । अथवा गृध्रक-मांसभक्षणं खाद्यम् ॥

"त्रिकटु त्रिफला मुस्तं विड्भृङ्गान्तश्चित्रकम् ।
शृङ्गेला पिप्पलीमूलं दृष्ट्वा सुरदारु च ॥
तुम्बुरुं पुष्करं चव्यं विश्वाला रजनीद्वयम् ।
विडं सौवर्चलक्षारौ सैन्धवं गजपिप्पली ॥
यावन्त्येतानि चूर्णानि तावद्गुग्गुलुगुग्गुलुः ।
कोलप्रमाणां गुटिकां खादयेन्मधुना सह ॥
भगन्दरं श्वासकासं चयं जीर्णज्वरोदरम् ।
नाड्यादुव्रणनाडव्रणोन्मादाश्मरीक्रमौ ॥
मेढ्रान्तर्बहिरुद्रोगमूलं शीघ्रमेव च ।
सप्तविंशतिको हन्ति गुग्गुलुः सर्व्वरोगहा ॥"

क्षुद्रोगमूलमित्यत्र क्षुत्पार्श्वमूलमित्यपि पाठः ॥

सप्तविंशतिगुग्गुलुः ॥ ॥

"चित्रकार्कौ त्रिवृत्पाठौ सप्तपूतयमारकौ ।
सुधा वचा जाङ्गलिका हरितालं सुवर्चलाम् ॥
ज्योतिष्मतीञ्च संचूर्ण्य तैलं वैद्यो विपाचयेत् ।
एतद्विस्फोटनं नाम तैलमुक्तं भगन्दरे ॥
शोधनं रोपणञ्चैव सुवर्णकरणं स्मृतम् ।"

विस्फोटनतैलम् ॥ ॥

"क्षतस्य द्विगुणेन गुडवलिना कल्कापयोभि-
र्युतं
पिष्ट्वा ताम्रमयं समस्ततुलितं पात्रं विधायोपरि ।
स्वेदं यामयुगं सभस्मपिठरे जम्बूजलैः समधा
सार्द्धं तत्पुटपेतु भगन्दरहरो गुग्गुलोस्तिता
स्यादिति ॥"

जम्बूजलैरित्यत्र निम्बूजलैरिति च पाठः । भगन्दरहरो रसः ॥ ॥

"गुडक्षतं समं ग्राह्यं क्षतनागं सतुत्थकम् ।
जीरकं सैन्धवं तुल्यं तिक्तकोशातकीद्रवैः ॥

पिट्टा तल्लेपनाद्धन्ति भक्षणाच्च भगन्दरम्।
रसः कालाग्निरुद्रोऽयं गुग्गुलं गुग्गुलिङ्गवेत्॥"
कालाग्निरुद्रो रसः॥ *॥
इति शारदीपिकायां भगन्दरचिकित्साध्यायः॥
अपि च। गारुडे १८८ अध्याये।
"गुग्गुलुं त्रिफलायुक्तं पीत्वा नश्येत् भगन्दरः॥"
(अस्य सकारणलक्षणचिकित्सितं यथा,—
क्रिम्यस्थि सूक्ष्मलक्षणनयवाय-
प्रवाहणान्युत्कटकाक्षदृष्टेः।
गुदस्य पाके पिडका भृशार्त्तिः
पक्वप्रभिन्ना तु भगन्दरः स्यात्॥
विरेचनक्षेपणपाटनञ्च
विशुद्धमार्गस्य च तैलदाहः।
स्यात् क्षारसूत्रेण सुपाचितेन
छिन्नस्य चास्य व्रणवच्चिकित्सा॥'
इति चरके चिकित्सास्थाने सप्तदशोऽध्याये॥)
भगभक्षकः, पुं. (भगं योनिस्रावमाश्रित्य भक्षयति जीविकां निर्व्वाहयतीति। भक्ष+खुञ्।) कुक्कुरौ। इति महाभारते दानधर्म्मः॥ कोट्टना इति भाषा। तस्यान्नभक्षणनिषेधो यथा,—
"यो वान्धवैः परित्यक्तः साधुभिर्ब्राह्मणैरपि।
कुक्कुरौ यच्च तस्यान्नं शुक्रा चान्नायणश्चरेत्॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः॥
भगवती, स्त्री, (भगः ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥" इत्युक्तलक्षणयुक्तं षड्ऐश्वर्य्यमस्यास्तीति। भग+"तदस्यास्त्यस्मिन्निति मतुप्।" ५।२।९४। इति मतुप्। मस्य वः।
"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुवादयः॥"
इति काशिकोक्तेर्नित्ययोगेऽत्र मतुप्प्रत्ययः। ततः स्त्रियां ङीप्।) पूज्या। गौरी। इति मेदिनी। ते, २१४। (सा च प्रकृतिरूपिणी महामाया देवी। यथा, मार्कण्डेये।८१।४२।
"ज्ञानिनामपि चेतांसि देवी भगवती हि सा।
बलादाकृष्य मोहाय महामाया प्रयच्छति॥")
सरस्वती। यथाह पौराणिकाः।
"सा मां पातु सरस्वती भगवती निःशेष-
जाड्यापहा॥"
गङ्गा। यथा, शङ्कराचार्य्यकृतगङ्गास्तोत्रे।
"भगवति! भवजीवामौलिमाले तवाम्भः-
कणमणुपरिमाणं प्राणिनो ये स्पृशन्ति॥"
तस्याः स्वरूपं यथा,—
"यथा नित्यो हि भगवान् नित्या भगवती तथा।
स्वमायया तिरोभूता तत्रैवे प्राकृते लये॥
आब्रह्मस्तम्बपर्य्यन्तं सर्व्वं मिथ्येव क्षत्रिमम्।
दुर्गा सत्यस्वरूपा सा प्रकृतिर्भगवान् यथा॥
सिद्धेश्वर्य्यादिकं सर्व्वं यस्यामस्ति युगे युगे।
सिद्धादिके भगे श्रेयस्त्वेन भगवती स्मृता॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः॥
अपि च।
"सेवते या सुरैः सर्व्वैराद्यैव भजते यतः।
धातुर्भजेति सेवायां भगवत्येव सा स्मृता॥"
इति देवीपुराणे ४५ अध्यायः॥
तस्याः प्रतिमाविशेषस्य पूजने फलविशेषो यथा,
ब्रह्मोवाच।
"शृणु तस्याः सुराधत्व! आराधनविधिं परम्।
यथा सा तोषिता पूर्व्वं गृहराद्यैः फलेप्सुभिः॥
कर्म्मयज्ञेन देवेश! तथा त्वमपि पूजय।
शम्भुः पूजयते देवीं मन्त्रशक्तिमयीं शुभाम्॥
अक्षमालाकरो नित्यं तेनासौ विबुधेश्वरः।
अहं श्रौतमयीं देवीं यजामि सुरसत्तम!॥
तेन ब्रह्मत्वमेवेदं मया प्राप्तं सुदुर्लभम्।
रुद्रनीलमयीं देवीं विष्णुरर्च्चयते तदा॥
विष्णुत्वं प्राप्तवांस्तेन अद्भुतैकं सनातनम्।
देवीं हेममयीं कान्तां धनदोऽर्च्चयते सदा॥
तेनासौ धनदो देवो धनेशत्वमवाप्तवान्।
विश्वेदेवा महात्मानो रौप्यां देवीं मनोहराम्॥
यजन्ति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः।
वायुः पूजयते भक्त्या देवीं पित्तलसम्भवाम्॥
वायुत्वं तेन ततः प्राप्तमनौपम्यं गुणावहम्।
वसवः कांसिकां देवीं पूजयन्ते विधानतः।
प्राप्नुवन्तो महात्मानो वसुत्वं सुमहोदयम्॥
अश्विनौ पार्थिवां देवीं पूजयन्तौ विधानतः।
तेन तावश्विनौ देवौ दिव्यदेहं गतायुषौ॥
स्फाटिकां श्रोभनां देवीं वरुणोऽर्च्चयते सदा।
वरुणत्वं हि संप्राप्तं तेन ऋद्ध्या समन्वितम्॥
देवीमन्नमयीं पुण्यामग्नियेंजति भावितः।
अग्नित्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम्॥
ताम्रां देवीं सदाकालं भक्त्या देवो दिवाकरः।
अर्च्चते तत्र संप्राप्तं तेन सूर्य्यत्वमुत्तमम्॥
सुक्ताश्रौतमयीं देवीं सोमः पूजयते सदा।
तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम्॥
प्रवालकमयीं देवीं यजन्ते पन्नगोत्तमाः।
तेन नागास्तु भोगाढ्याः प्रयान्त्येते परं पदम्॥
लक्षायसमयीं देवीं पूजयन्त्यसुरोत्तमाः।
राक्षसाश्च महात्मानस्तेऽमितविक्रमाः॥
त्रपुसीसमयीं देवीं पिशाचाः पूजयन्ति ताम्।
तेन ऋद्धिबलोपेताः प्रयान्ति परमं पदम्॥
त्रैलोक्यां सदा देवीं यजन्ते गुह्यकादयः।
तेन भोगबलोपेताः प्रयान्तीश्वरमन्दिरम्॥
वज्रलौहमयीं देवीं यजन्ते मातरः सदा।
माढत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमं पदम्॥
एवं देवाः सगन्धर्व्वाः पिशाचोरगराक्षसाः।
पूजयन्ते सदाकालं चर्च्चिकां सुरनायिकाम्॥
तथा त्वमपि देवेन्द्र! यदीच्छसि परां गतिम्।
श्रियां मणिमयीं पुण्यां लभसे मनसेप्सितान्॥
कामान् सुरवराधत्व! कामिकैः पूजितैः सदा।
ददाति सर्व्वलोकानां चिन्तामण्यिर्यथा शिवा॥"
इत्यादौ देवीपुराणे द्रव्यविधिपूजामाहात्म्ये १८ अध्यायः॥ तस्मै गृहदानस्य फलं यथा,—
ईश्वर उवाच।
"देवा गृह्णन्तु यः शुक्लरात्रौ यत्नं शोभनम्।
सर्व्वोपकरणैर्युक्तं सकपाटार्गलान्वितम्॥
तस्मिन् वसन्ति ध्रुवं छत्रं वितानं दर्पणानि च।
दत्त्वा सुरवर्यगादि नित्यं सङ्गीतकानि च॥
देवीशास्त्रार्थवेत्तारं पूजनं भवने शुभम्।
एवं प्रवर्त्तते यस्तु तस्य पुण्यफलं शृणु॥
दशपूर्व्वापरांस्तात! आत्मनश्चैकविंशतिम्।
उद्धृत्य च कुलं पापाद्ब्रह्मलोके महीयते॥
गच्छते भगवती यत्र परा परमपूजिता।
तत्र कल्पान्तरं यावद्भुक्त्वा भोगान् मनो-
रमान्॥
पुनः कालादिहायातः पृथिव्यामेकराड्भवेत्।
सम्पत्त्वावाप्तसोपेतः श्रीमान् पुरपरिच्छदः॥
पुनर्देवा द्विजातीनां तद्भक्तानां प्रियो भवेत्।
कन्यासम्भूतको नित्यं देवीशास्त्रार्थपारगः।
लभते परसद्भावं तदन्ते शिवतां व्रजेत्॥
देवा गृह्णन्तु यः शुक्ल! सम्पार्ज्जयति नित्यशः।
स भवेद्बलवान् सौख्यसर्व्वसम्पत्तिसंयुतः॥
तदागच्छेच्छिवालोकं सर्व्वकालफलप्रदम्।
देवा गृह्णन्तु यः शुक्ल! गोमयेनानुलेपयेत्॥
स्त्रियो वा यदि वा पुंसः षण्मासन्तु निरन्त-
रम्।
स तमेवेप्सितान् कामान् देवा लोकञ्च
गच्छति।"
इत्यादौ देवीपुराणे ४२ अध्यायः॥
भगवद्भक्तः, पुं, (भगवतो भगवत्या वा भक्तः।) श्रीकृष्णभक्तियुक्तः। अथ भगवद्भक्तानां लक्षणानि। सामान्यतः जैन्ने।
"विष्णुरेव हि यस्यैव देवता वैष्णवः स्मृतः॥"
अथ विशेषः।
"व्रतकर्म्मशुभज्ञानभोगजन्मादिमत्स्वपि।
श्रैवेष्वपि च लक्ष्यस्य भक्ताः सन्ति तथा तथा॥"
तत्र व्रतेषु मध्ये भगवद्भक्तिहेतुव्रतपरता भगवद्भक्तलक्षणम्। तथा च स्कान्दे श्रीमार्कण्डेय-भगीरथसंवादे।
"दशमीश्रेयसंयुक्तं दिनं वैष्णवसत्तमम्।
सुपास्यते महीपाल! ते वै भागवता नराः॥
प्राप्यालस्ये न चाश्नन्ति दिनं प्राप्य हरेर्नराः।
कुर्व्वन्ति जागरं रात्रौ सदा भागवता हि ते॥
उपोष्य द्वादशीं गृह्णन्ति रात्रौ जागरसंयुताम्।
अन्यानु साधयेद्यस्तु स वै भागवतो नरः॥
भक्तिर्न विच्युता येषां न च्युतानि व्रतानि च।
सुप्रियः श्रीपतिर्येषां ते सुभागवता नराः॥"
कस्मिंश्चि भगवदर्पणादिना तदाज्ञाभङ्गा वा भक्तिहेतुसदाचारपरता तत्रैव।
"धर्म्मार्थं जीवितं येषां सन्तानार्थञ्च मैथुनम्।
पचनं विप्रसत्कार्थं श्रेयाङ्गे वैष्णवा नराः॥
अध्वगन्तु पथि श्रान्तं क्षुधेऽन्नञ्च गृहागतम्।
योऽतिथिं पूजयेद्भक्त्या वैष्णवः स न संशयः॥
सदाचाररताः स्निग्धाः सर्व्वभूतानुकम्पकाः।
शुभयत्नरताः शान्ता ये सदा भागवता हि ते॥"

पाद्मे वैशाखमाहात्म्ये श्रीनारदाम्बरीषसंवादे। यथा,—
"जीवितं यस्य धर्म्मार्थं धर्म्मो हर्य्यर्थमेव च।
अहोरात्रादि पुण्यार्थं तं मन्ये वैष्णवं जनम्॥"
लैङ्गे च।
"विष्णुभक्तिसमायुक्तान् श्रौतस्मार्त्तप्रवर्त्तकान्।
प्रीतो भवति यो दृष्ट्वा वैष्णवोऽसौ प्रकीर्त्तितः॥"
गुणवत्तु भक्तिहेतुरूपाणुत्वादिसद्गुणग्रहीतता तत्रैव। यथा,—
"परदुःखेनात्मदुःखं मन्यन्ते ये नृपोत्तम!।
भगवद्धर्म्मनिरतास्ते नरा वैष्णवा नृप!॥"
भागवतदशमीयस्कन्धे श्रीकपिलदेवभूतिसंवादे। यथा,—
"तितिक्षवः कारुणिकाः सुहृदः सर्व्वदेहिनाम्।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः॥"
पञ्चमस्कन्धे ऋषभदेवस्य पुत्रानुशासने। यथा,
"महत्सेवां द्वारमाहुर्विमुक्ते-
स्तमोद्वारं योषितां सङ्गिसङ्गम्।
महान्तस्ते समचित्ताः प्रशान्ता
विमन्यवः सुहृदः साधवो ये॥"
एकादशस्कन्धे श्रीभगवदुद्धवप्रश्नोत्तरे। यथा,—
"कृपालुरकृतद्रोहस्तितिक्षुः सर्व्वदेहिनाम्।
सत्यसारोऽनवद्यात्मा समः सर्व्वोपकारकः॥
कामाद्यनभितधीर्दान्तो मृदुः शुचिरकिञ्चनः।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः॥
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः।
अमानी मानदः कल्पो मैत्रः कारुणिकः कविः॥"
विष्णुपुराणे यमदूतसंवादे। यथा,—
"न चलति निजवर्णधर्म्मतो यः
सममतिरात्मसुहृद्विपक्षपक्षे।
न हरति न चलति किञ्चिदुच्चैः
स्थिरमनसं तमवेहि विष्णुभक्तम्॥"
ज्ञानिनि भक्तिहेतुज्ञानवत्ता एकादशे। यथा,—
"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा।
सर्व्वभूतसमः शान्तः स वै भागवतोत्तमः॥
त्रयाणामेकभावेन यो भक्तः कुरुतेऽचलाम्।
श्रद्धया मत्परो नित्यं स भक्तिमान् मतो मम॥
भक्तिः पुनातु मन्निष्ठा श्वपाकानपि सम्भवात्।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम्॥
त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान् दिवि देवभोगान्॥
ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्म्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥
येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्व्वकम्॥
अहं हि सर्व्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते॥
यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्॥
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्म्मबन्धनैः।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि॥
समोऽहं सर्व्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्॥
अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥
क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति॥
मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥"
तत्रैव। यथा,—
"न यस्य जन्मकर्म्मभ्यां न वर्णाश्रमजातिभिः।
सज्जतेऽस्मिन्नहंभावो देहे वै स हरेः प्रियः॥
भावाः कथञ्चिदुत्पन्नाः ज्ञानाभासस्य मानिताः।
भक्तिनिष्ठापकाः प्रोक्तास्तदा श्रुतमतोदिताः॥"
निष्ठापकाः परिपाकं प्रापकाः॥ *॥
ग्रन्थेषु श्रीग्रन्थवत्ताभेदकता दृष्टान्तादीये।
"ग्रन्थे च परमेशाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः॥"
इति॥*॥
"अन्यच्च तेषां भगवच्छास्त्रार्थपरतादिकम्।
साक्षाद्भक्तात्मकं सुखं लक्ष्यं लिख्यतेऽधुना॥"
श्रीभागवतशास्त्रपरता स्कान्दे।
"येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ।
पूजयन्ति च ये नित्यं ते सुभागवता नराः॥
येषां भागवतं शास्त्रं जीवितादधिकं भवेत्।
महाभागवताः श्रेष्ठा विष्णुना कथिता नराः॥"
वैष्णवसम्माननिष्ठा लैङ्गे।
"विष्णुभक्तमथायातं यो दृष्ट्वा सुसुखप्रियः।
प्रणामादि करोत्येव वासुदेवे यथा तथा।
स वै भक्त इति ज्ञेयः स पुनाति जगत्त्रयम्॥
ऊर्द्ध्वाचरा गिरः श्रुत्वन् तथा भागवतेरिताः।
प्रणामपूर्व्वं चलन्ता यो वदेद्वै वैष्णवो हि सः॥
भोजनाच्छादनं सर्व्वं यथाशक्त्या ददाति यः।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः॥"
गारुडे।
"येन सर्व्वात्मना विष्णुभक्त्या भावो निवेशितः।
वैष्णवेषु कृतात्मत्वात्स महाभागवतो हि सः॥*॥
श्रीतुलसीसेवानिष्ठा दृष्टान्तादीये श्रीभगवन्मार्कण्डेयसंवादे।
"तुलसीकाननं दृष्ट्वा ये नमस्कुर्व्वते नराः।
तत्काष्ठाङ्कितकर्णा ये ते वै भागवतोत्तमाः॥
तुलसीगन्धमाघ्राय सन्तोषं कुर्व्वते तु ये।
तन्मूलमृत्तृतं येषु ते वै भागवतोत्तमाः॥"*॥
श्रीभगवतः कथापरता दृष्टान्तादीये श्रीभगवन्मार्कण्डेयसंवादे।
"मत्कथाश्रवणे येषां वर्त्तते सात्त्विकी मतिः।
तदस्तरि सुभक्ताश्च ते वै भागवतोत्तमाः॥"
स्कान्दे श्रीभगवद्दर्व्वासंवादे।
"मत्कथां कुरुते यस्तु मत्कथाश्च शृणोति यः।
स्मृयते मत्कथायाश्च स वै भागवतोत्तमः॥"
तृतीयस्कन्धे तत्रैव।
"मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च।
तप्यन्ति विविधास्तापा नैषां मद्गतचेतसः॥"*॥
नामपरता दृष्टान्तादीये तत्रैव। यथा,—
"मन्नामश्रवणासक्तास्ते वै भागवतोत्तमाः॥
येऽभिनन्दन्ति नामानि हरेः शृण्वन्ति हर्षिताः।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः॥"
तत्रैवान्यत्र।
"अन्येषामुदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः।
हरिनामपरा ये च ते वै भागवतोत्तमाः॥"
स्मरणपरता। तत्र स्वधर्म्मनिष्ठया रागद्वेषादिनिवृत्त्या स्मरणं श्रीविष्णुपुराणे यमदूतसंवादे।
"न चलति खलेः श्रीभगवत्पदार-
विन्दे सितमनास्तमवेहि विष्णुभक्तम्।
कलिकलुषमलेन यस्य नात्मा
विमलमतेर्मलिनीकृतस्तमेनम्।
मनसि कृतजनार्द्दनं मनुष्यं
सततमवेहि हरेरतीव भक्तम्॥
कनकमपि रहस्यवेद्य बुद्ध्या
लशमिव यः समवैति वै परस्वम्।
भवति च भगवत्यनन्यचेताः
पुरुषवरं तमवेहि विष्णुभक्तम्॥
स्फटिकगिरिनिभालमस्तु कृष्ण-
मनसि वृथा कृ च मत्सरादिदोषः।
न हि तुहिनमयूखरश्मिपुञ्जे
भवति कृताग्निजनदोषिणः प्रतापः॥
विमलमतिरमत्सरः प्रशान्तः शुचि-
चरितोऽखिलसत्त्वमित्रभूतः।
प्रियहितवचनोऽनुमानमायो
वसति सदा हृदि तस्य वासुदेवः॥
वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः।
क्षितिरसमतिरन्यमात्मनोऽन्तः
कथयति चारुतयैव शास्त्रपोतः॥
अन्यविजयेन वैराग्यादिना च स्मरणं श्रीहरियोगेश्वरोत्तरे।
"देहेन्द्रियप्राणमनोधियां यो
जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः।
संसारधर्म्मैरविमुह्यमानः
स्मृत्या हरेर्भागवतप्रधानः॥
त्रिभुवनविभवहेतवेऽप्यकुण्ठ-
स्मृतिरजितात्मसुरादिभिर्विचाल्यात्।
न चलति भगवत्पदारविन्दा-
ल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः॥
भगवत उरुविक्रमाङ्घ्रिशाखा-
नखमणिचन्द्रिकया निरस्ततापे।
हृदि कथमुपसीदतां पुनः स
प्रभवति चन्द्र इवोदितेऽर्कतापः॥"
पूजापरता स्कान्दे तत्रैव।
"येऽर्चयन्ति सदा विष्णुं सर्व्वेशं वरदं हरिम्।
देहिनः पुण्यकर्म्माणः सदा भागवता हि ते॥"
लैङ्गे।
"विष्णुद्वेषे शुभान्येव करोति क्लेशसंयुतः।
प्रतिमाञ्च हरेर्नित्यं पूजयेत् प्रयतात्मवान्॥
विष्णुभक्तः स विज्ञेयः कर्म्मणा मनसा गिरा।
नारायणपरो नित्यं भूप! भागवतो हि सः॥"
वैष्णवधर्म्मनिष्ठतादि पाद्मोत्तरखण्डे।
"तापादिपञ्चसंस्कारी सर्व्वेष्याकर्म्मकारकः।
अर्थपञ्चकविद्विप्रो महाभागवतो हि सः॥"
तापः तप्तमुद्राधारणं तदादिपञ्चसंस्कारयुक्तः।
पञ्चसंस्काराश्च तत्रैवोक्ताः। [इति॥
"तापः पुण्ड्रस्तथा नाम मन्त्रो यागस्तु पञ्चमः॥"

अस्यार्थः। नाम श्रीकृष्णदासेत्यादि। मन्त्रः श्रीगुरोः सकाशात् मन्त्रग्रहणम्। यागः होमपूर्वकयथाविधिदीक्षाग्रहणमित्यर्थः। नव इज्याकर्म्माणि पूजासम्बन्धिकृत्यानि अथवादीनि पाद्मोक्तार्चनादीनि वा सर्व्वेषां तेषां पूजाङ्गत्वात्। तानि च तत्रैवोक्तानि। यथा,—

"अर्चनं मन्त्रपठनं यागयोगौ महात्मनः।
नामसङ्कीर्त्तनं सेवा तच्चिह्नैरङ्कनं तथा।
तदीयाराधनं चर्य्या नवधा भिद्यते शुभे!॥"

अर्थपञ्चकं चत्वारो वत्वारो धर्म्मादयः पुरुषार्थाः पञ्चमपुरुषार्थश्च भक्तिः। यद्वा पञ्चतत्त्वानि अनात्मात्मपरमात्मपरमेश्वरतङ्कत्तानां याथार्थ्यानि। इति तट्टीका॥ * ॥

एकान्तिता गारुडे।

"एकान्तेन सदा विष्णौ यस्याहैवे परायणाः।
तस्मादेकान्तिनः प्रोक्तास्तङ्कागवतचेतसः॥"

तदविज्ञानेनानन्यपरता एकादशे उद्धवप्रश्नोत्तरे।

"ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि
यादृशः।
भजन्त्यनन्यभावेन ते वै भागवता मताः॥"

भागवते। ११। ३। ५०।

"न कामकर्म्मबीजानां यस्य चेतसि सम्भवः।
वासुदेवैकनिलयः स वै भागवतोत्तमः॥"

सा च एकान्तिता चतुर्द्धा। तत्र धर्म्मानादरेण श्रीमदुद्धवप्रश्नोत्तर एव।

"अज्ञायैवं गुणान् दोषान् मयादिष्टानपि
स्वकान्।
धर्म्मान् सन्त्यज्य यः सर्व्वान् मां भजेत् स च
सत्तमः॥"

गीतायाञ्च।

सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्व्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥

यदा यस्यानुयह्णाति भगवानात्मभावितः।
स जहाति मतिं लोके वेदे च परिनिष्ठताम्॥"

अन्यसर्व्वनिरपेक्षता भागवते श्रीमद्भगवदुद्धवसंवादे ऐलोपाख्याने।

"सन्तोऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः।
निर्म्ममा निरहङ्कारा निर्द्वन्द्वा निष्परिग्रहाः॥"

तत्रैव तृतीये श्रीकपिलदेवभूतिसंवादे।

"त एते साधवः साध्वि! सर्व्वसङ्गविवर्ज्जिताः।
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते॥"

विघ्नाकुलत्वेऽपि मनोरतिपरता स्कान्दे।

"यस्य हृच्छ्मशानस्थापि कैशवे रमते मनः।
न विघ्नता च भक्तिर्वै स वै भागवतो नरः।
आपङ्गतस्य यस्येह भक्तिरव्यभिचारिणी।
नान्यत्र रमते चित्तं स वै भागवतो नरः॥"

प्रेमैकपरता च भागवते पञ्चमस्कन्धे श्रीऋषभदेवस्य पुत्रानुशासने।

"ये वा मयीश कृतसौहृदार्था
जनेषु देहम्भरवार्त्तिकेषु।
गृहेषु जायात्मजरातिमत्सु
न प्रीतियुक्ता यावदर्थाश्च लोके॥"

राति मित्रं धनं वा।

"त्रिधा प्रेमैकपरता प्रेम्नः स्यात्तारतम्यतः।
उत्तमा मध्यमा चासौ कनिष्ठा चेति भेदतः॥"

तत्रोत्तमा यथा एकादशे हरियोगेश्वरोत्तरे।

"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
खेष्टदेवस्य भावं यः सर्व्वभूतेषु पश्यति।
भावयन्ति च तान्यस्मिन्नित्यर्थः सम्मतः सताम्॥"

तृतीये श्रीकपिलदेवभूतिसंवादे।

"मय्यनन्येन भावेन भक्तिं कुर्व्वन्ति ये दृढाम्।
मत्कृते त्यक्तकर्म्माणस्त्यक्तस्वजनबान्धवाः॥"

एकादशे श्रीहरियोगेश्वरोत्तरे च।

"विलसति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः।
प्रणयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः॥"

तत्रैव मध्यममाह हरियोगेश्वरोक्तावेव।

"ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥"

कनिष्ठता तत्रैव।

"अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥"

अश्रद्धया पूजनं प्रेमबोधकं भक्त इत्यपि।

प्रेमणो हि करणात्तु स्वलं भक्तानपेक्षणात्॥
लक्षणानि च वान्यत्र भक्तैर्लक्षणानि तान्यपि।
वन्दनादीनि विद्यन्ते येषु भागवता हि ते॥
एतानि लक्षणानीत्थं गौणमुख्यादिभेदतः।
ऊह्यानि लक्षणान्येवं विवेच्यानि परात्मपि॥
दुर्ल्लक्षलक्षवन्तः सुदुर्ल्लभा बहवो जनाः।
दिवा हि मणयो यद्वत् न वर्त्तन्ते इतस्ततः॥"

अतएवोक्तं मोक्षधर्म्मे नारदीये।

जायमानं हि पुरुषं यं पश्येन्मधुसूदनः।
सात्त्विकः स तु विज्ञेयो भवेन्मोक्षार्थनिश्चयः॥"

इति श्रीहरिभक्तिविलासे १० विलासः॥

भगवान्, [त्] (भगः "ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥" इत्युक्तलक्षणं षड्ऐश्वर्य्यमस्यस्तीति। भग + नित्ययोगे मतुप् मस्य वः।) पुं बुद्धः। इत्यमरः। १। १। १३॥ श्रीकृष्णः। यथा,—

"भगवानपि ता रात्रीः शारदोत्फुल्लमल्लिकाः।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः॥"

इति श्रीभागवते १० स्कन्धे २९ अध्यायः॥

पूज्ये च। इति मेदिनी। भगव्रतस्वरूपं यथा,

"मनुरप्याह वेदार्थं स्मृत्वा यज्ञनिसत्तम!।
तदेतत् श्रूयतामत्र संबन्धे गदतो मम॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥
द्वे विद्ये वेदितव्ये वै इति चाथर्ब्वणी श्रुतिः।
परया लक्षरप्राप्तिर्ह्यक्षेदादिमयापरा॥
यत्तदग्राह्यमजरमचिन्त्यमजमव्ययम्।
अनिर्द्देश्यमरूपञ्च पाणिपादादिसंयुतम्॥
विभुं सर्व्वगतं नित्यं भूतयोनिमकारणम्।
व्याप्यव्याप्तं यतः सर्व्वं तं वै पश्यन्ति सूरयः॥
तद्ब्रह्म ततु परं धाम तद्ध्येयं मोक्षकाङ्क्षिणा।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्।
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः॥
वाचको भगवच्छब्दस्तस्याद्यस्याक्षरात्मनः।
एवं निगदितार्थस्य स तत्त्वं तस्य तत्त्वतः॥
ज्ञायते येन तज्ज्ञाने परमव्ययमीश्वरम्॥
अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज!।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः।
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते।
मैत्रेय! भगवच्छब्दः सर्व्वकारणकारणे॥
संभर्त्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः।
तेनागमयिता स्रष्टा गकारार्थस्तथा शृणु!॥
ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥
वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि।
स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः॥
एवमेव महाबाहो! भगवानिति सत्तम!।
परमब्रह्मभूतस्य वासुदेवस्य नान्यगः॥
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः।
शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारतः॥
उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति॥
ज्ञानशक्तिबलैश्वर्य्यवीर्य्यतेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥"

इति विष्णुपुराणे ६ अंशे ५ अध्यायः॥

अपि च।

"परमात्मा च भगवान् विश्वक्सेनो जनार्द्दनः।
तच्छक्तिमान् भागवतो नाम्नापुरुषैर्हि गीयते॥
भगवच्छासनानान्तु भगवच्छासनप्रियः।
भगवच्छक्तिमाख्याय वत्स! भागवतो भव॥
भगवान् भूतभव्येशो भूतादिप्रभवोऽव्ययः।
भावेन तं भजस्वैनं भवभङ्गकरं हरिम्॥
भजस्व भावेन विभुं भगवन्तं भवेश्वरम्।
ततो भागवतो भूत्वा भवत्यन्तात् प्रमोक्ष्यसि॥"

इत्याद्ये वह्निपुराणे वैष्णवक्रियायोगे यमानुशासनो नामाध्यायः॥ अन्यच्च।

"महतां क्षुद्रजन्तूनां सर्व्वेषां जीविनां सदा।
सदा पाता च भ्राता च भगवान् करुणानिधिः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २५ अध्यायः॥

षड्ऐश्वर्य्यान्वितः। स च परमेश्वरः। तन्नामविशेषस्य सेवनं यथा,—

"अथ श्रीभगवन्नाम सदा सेवेत सर्व्वतः।
तस्माद्धात्राद्य विख्यातं सङ्क्षेपेणाद्य लिख्यते॥
अथ श्रीभगवन्नामविशेषस्य च सेवनम्।
ऋषिभिः कृपयादिष्टं तत्तत्कामहतात्मनाम्॥"

अथकामविशेषेण श्रीभगवन्नामविशेषसेवामाहात्म्यम्। तत्र पापक्षयार्थं कौर्म्मे। यथा,—

"श्रीशब्दपूर्व्वं जयशब्दपूर्व्वं
जयद्वयादुत्तरतस्तथा हि।
त्रिः सप्तकृत्वो नरसिंहनाम
जप्तं निहन्यादपि विप्रहत्याम्॥"

महाभयनिवारणार्थं तत्रैव ।
"श्रीपूर्वो नरसिंहो द्विर्ज्यादुत्तरतस्तु सः ।
त्रिःसप्तकलो जप्तस्तु महाभयनिवारणः ।"
कालविशेषे तु मङ्गलार्थं विष्णुधर्म्मोत्तरे श्रीमार्कण्डेयवज्रसंवादे ।
"पुरुषं वामदेवञ्च तथा सङ्कर्षणं विभुम् ।
प्रद्युम्नमनिरुद्धञ्च क्रमादर्च्चेषु कीर्त्तयेत् ।"
अर्च्चेषु संवत्सरादिषु पञ्चसु ।
"बलभद्रं तथा शक्रं कीर्त्तयेदयनद्वये ।
माधवं पुष्करीकाक्षं तथा वै भोगशायिनम् ।
पद्मनाभं हृषीकेशं तथा देवं त्रिविक्रमम् ।
क्रमेण राजशार्दूल ! वसन्तादिषु कीर्त्तयेत् ।
विष्णुञ्च मधुहन्तारं तथा देवं त्रिविक्रमम् ।
वामनं श्रीधरञ्चैव हृषीकेशं तथैव च ।
दामोदरं पद्मनाभं केशवञ्च यदूत्तमम् ।
नारायणं माधवञ्च गोविन्दञ्च तथा क्रमात् ॥
वैशाखादिषु च मासेषु देवदेवमनुस्मरेत् ।
प्रद्युम्नमनिरुद्धञ्च पक्षयोः शुक्लयोः ॥
सर्व्वः शर्व्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
आदित्यादिषु वारेषु क्रमादेवमनुस्मरेत् ॥
विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतभृद् भूतकृद् भावो भूतात्मा भूतभावनः ॥
अयक्तः पुष्करीकाक्षो विश्वकर्म्मा शुचिश्रवाः ।
सम्भवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः ॥
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
अग्राह्यः शाश्वतो धाता शास्त्रैतान्यनुस्मरेत् ॥
देवदेवस्य नामानि शक्तिकादिषु यादव ! ।
ब्रह्माणं श्रीपतिं विष्णुं कपिलं श्रीधरं प्रभुम् ॥
दामोदरं हृषीकेशं गोविन्दं मधुसूदनम् ।
भूधरं गदिनं देवं शार्ङ्गिणं पद्मिनं तथा ॥
चक्रिणञ्च महाराज ! प्रथमादिषु संस्मरेत् ।"
प्रथमादिषु प्रतिपदादिषु ।
"सर्व्वं वा सर्व्वदा नाम देवदेवस्य यादव ! ॥
नामानि सर्व्वाणि जनार्द्दनस्य
कालश्च सर्व्वः पुरुषप्रवीरः ।
तस्मात् सदा सर्व्वगतस्य नाम
यात्यं यथेष्टं वरदस्य राजन् ! ॥"
विविधकामसिद्धये च प्रजस्योक्तौ ।
"कामः कामप्रदः कान्तः कामपालस्तथा हरिः ।
आनन्दो माधवश्चैव कामसंसिद्धये जपेत् ॥
रामः परशुरामश्च नृसिंहो विष्णुरेव च ।
विक्रमश्चैवमादीनि जप्यान्यरिजिगीषुभिः ॥
विद्याभ्यस्यता नित्यं जप्यः पुरुषोत्तमः ।
दामोदरं वन्धगतो नित्यमेव जपेन्नरः ॥
केशवं पुष्करीकाक्षमनिशं हि तथा जपेत् ।
नेत्ररोगासु सर्व्वासु हृषीकेशं भवेषु च ॥
अच्युतश्चाष्टतश्चैव जपेदौषधकर्म्मणि ।
संग्रामाभिमुखो गच्छन् संस्मरेद्विजयं हरिम् ॥
चक्रिणं गदिनञ्चैव शार्ङ्गिणं खड्गिनं तथा ।
क्षेमार्थी प्रवसन्नित्यं दिक्षु प्राच्यादिषु स्मरेत् ॥
अजितश्चाधिपश्चैव सर्व्वं सर्व्वेश्वरं तथा ।
संस्मरेत् पुरुषो भक्त्या व्यवहारेषु सर्व्वदा ॥
नारायणं सर्व्वकालं स्तुतप्रस्खलनादिषु ।
यज्ञनद्यत्रपीडासु देववाधासु सर्व्वतः ॥
दस्युवैरिनिषेधेषु व्याघ्रसिंहादिसङ्कटे ।
अन्धकारे तमस्तीव्रे नरसिंहमनुस्मरेत् ॥
अग्निदाहे समुत्पन्ने संस्मरेज्ज्वलशायिनम् ।
गरुडध्वजानुस्मरणादविषवीर्य्यं व्यपोहति ॥
स्नाने देवार्च्चने होमे प्रणिपाते प्रदक्षिणे ।
कीर्त्तयेद्भगवन्नाम वासुदेवेति तत्परः ॥
स्खापने वित्तधान्यादेरपव्यये च दुष्टजे ।
कुर्व्वीत तन्मना भूत्वा अनन्ताच्युतकीर्त्तनम् ॥
नारायणं शार्ङ्गधरं श्रीधरं पुरुषोत्तमम् ।
वामनं खड्गिनञ्चैव दुष्टस्वप्ने सदा स्मरेत् ॥
महार्णवादौ पर्य्यङ्कशायिनञ्च नरः स्मरेत् ।
बलभद्रं सङ्कर्षणं सर्व्वकर्म्मसु संस्मरेत् ॥
जगत्पतिमपत्यार्थं स्तुवन् भक्त्या न सीदति ।
श्रीप्राप्तौ सर्व्वाभ्युदयिके कर्म्मण्यासु प्रकीर्त्तयेत् ॥
अरिष्टेषु क्षयेषेषु विघ्नोकेषु सदा जपेत् ।
मरुत्प्रपातात्रिजलबन्धनादिषु स्मरेत्तु ॥
स्वतन्त्रपरतन्त्रेषु वासुदेवं जपेद्बुधः ।
सर्व्वार्थशक्तियुक्तस्य देवदेवस्य चक्रिणः ॥
यथाभिरोचते नाम तत् सर्व्वार्थेषु कीर्त्तयेत् ।
सर्व्वार्थसिद्धिमाप्नोति नान्यमेकार्थता यतः ॥
सर्व्वाण्येतानि नामानि परस्य ब्रह्मणो हरेः ।"
एवं विष्णुधर्म्मोत्तरे च मार्कण्डेयवज्रसंवादे ।
किञ्च ।
"कूर्म्मं वराहं मत्स्यं वा जलप्रतरणे स्मरेत् ।
भाजिष्णुमग्निजनने जपेन्नाम त्वखण्डितम् ॥
गरुडध्वजानुस्मरणादापदो मुच्यते नरः ।
ज्वरशुष्कशिरोरोगविषवीर्य्यञ्च शाम्यति ॥
बलभद्रन्तु युद्धार्थी शस्त्रारम्भे हलायुधम् ।
उत्तारणं वाणिज्यार्थी राममभ्युदये नृप ! ॥
माङ्गल्यं मङ्गलं विष्णुं माङ्गल्येषु च कीर्त्तयेत् ।
उत्तिष्ठन् कीर्त्तयेद्विष्णुं प्रस्वपन् माधवं नरः ॥
भोजने चैव गोविन्दं सर्व्वत्र मधुसूदनम् ।"
तत्रैवान्यत्र ।
"औषधे चिन्तयेद्विष्णुं भोजने च जनार्द्दनम् ।
शयने पद्मनाभञ्च मैथुने च प्रजापतिम् ।
संग्रामे चक्रिणं क्रुद्धं स्यानभंगे त्रिविक्रमम् ।
नारायणं विषोत्सर्गे श्रीधरं प्रियसङ्गमे ॥
जलमध्ये वराहञ्च पावके जलशायिनम् ।
कानने नरसिंहञ्च पर्व्वते रघुनन्दनम् ॥
दुःस्वप्ने स्मर गोविन्दं विपद्दौ मधुसूदनम् ।
मायासु वामनं देवं सर्व्वकार्य्येषु माधवम् ।"
किञ्च ।
"कीर्त्तयेद्वासुदेवञ्च अनुक्तेष्वपि यादव ! ।
कार्य्यारम्भे तथा राजन् ! यथेष्टं नाम कीर्त्तयेत् ॥
सर्व्वाणि नामानि हि तस्य राजन् !
सर्व्वार्थसिद्धौ तु भवन्ति पुंसः ।
तस्मादयथेष्टं खलु शस्यनाम
सर्व्वेषु कार्य्येषु जपेत भक्त्या ।"
इति श्रीहरिभक्तिविलासे ११ विलासः ॥

भगवद्प्रीकारित्वम् । यथा, महाभारते भगवद्वाक्यम् ।
"ऋणमेतत् प्रवृद्धं मे हृदयान्नापसर्पति ।
यद्गोविन्देति चुक्रोश कृष्णे ! मां दूरवासिनम् ॥"
आदिपुराणे श्रीकृष्णार्जुनसंवादे ।
"गीत्वा तु मम नामानि नर्त्तयेन्मम सन्निधौ ।
इदं ब्रवीमि ते सत्यं क्रीतोऽहं तेन चार्जुन ! ॥
गीत्वा च मम नामानि रुदन्ति मम सन्निधौ ।
तेषामहं परिक्रीतो नान्यक्रीतो जनार्द्दनः ॥"
एवं श्रुत्वा च मम नामानीत्यादि ॥ विष्णुधर्म्मे प्रह्लादेन ।
"जितं तेन जितं तेन जितं तेनेति निश्चितम् ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥"
इति तत्रैव ११ विलासः ॥
भगवत्सान्निध्यलक्षणानि यथा । हयशीर्षे ।
"तस्मिन्नेव मुहूर्त्ते तु हर्षो वा भयमेव च ।
चक्षुर्भ्रमो विभ्रमो वा त्रासो वा जायते यदि ॥
यामोहः परमोहो वा स्खलितं परमं तथा ।
अश्रुतानां श्रुतिर्वा स्यात् गात्राणां वाथ
वेपथुः ॥'
यामोहो मौढ्यविशेषः । परमोहो मूर्च्छा ।
"वैराग्यं नेत्रयोर्वा स्याद्दर्पः कन्दर्प एव वा ।
परमो विस्मयो वाथ दिशो वा भ्रूयते ध्वनिः ॥
दिव्यवादित्रघोषो वा गन्धर्व्वनगरस्य वा ।
दर्शनं जायते काले तस्मिन् सुरगणार्चितम् ॥
नरा नार्य्योऽथ दृश्यन्ते गायन्तोऽथय हर्षिताः ।
नन्दितूर्य्यरवो वापि श्रूयते छन्दसां ध्वनिः ॥
दिव्यगन्धा रसा वापि एकस्यापि भवन्ति हि ।
लिङ्गैरेतैर्विजानीयात् तत्र सन्निहितं हरिम् ॥
प्रभा चैव विशेषेण ज्वलतीव च दृश्यते ।
स्फुरन्तीव च दृश्यते प्रतिमा च विशेषतः ॥
स्फुरन्निव जनः कश्चित् स्वयमाग इव क्वचित् ।
वीक्ष्यमाणो जनस्तत्र प्रहृष्ट इव लक्ष्यते ॥
एतैस्तु लक्षणैर्ज्ञेयस्तत्र सन्निहितो हरिः ।
विशेषादथवा पश्येच्छक्रचापोपमं क्वचित् ॥
हविं वज्रप्रभां पश्येत् पद्मरागप्रभां यथा ।
सौदामिनीप्रभां पश्येत् प्रतिमायां क्वचिद्यदि ॥
एतैर्लिङ्गैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः ।
बधिरा इव केचित्तु मूका इव तथापरे ।
विभ्रान्ता इव केचिच्च जड़ा इव तथापरे ॥
धावन्त इव केचित्तु पतन्त इव चापरे ।
गृह्णन्त इव चाप्यन्ये मत्ता इव तथा यदि ।
चित्रस्था इव केचित्तु विवशा इव केचन ।
भवन्ति तत्र चोन्मत्ताः प्रमत्ता इव चापरे ।
लिङ्गैरेतैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः ।"
इति श्रीहरिभक्तिविलासे ३६ विलासः ॥
(शिवः । यथा, महाभारते । १३ । १७।१९७।
"निवेदनः सुखाजातः सुगन्धारो महाधनुः ।
गन्धपाली च भगवान् उत्थानः सर्व्वकर्म्मणाम् ।")

भगलं, क्ली, (भजति सुखदुःखादिकं कर्म्मजन्यमनेनेति भज्यते अनेनेति वा । भज + "भीयु-

कणिभ्यां कालनिति।" उणा० ३।७६। बाहुलकाद् भजेरपीति उज्ज्वलदत्तः; इति कालन्। नङ्कादित्वात् कुत्वञ्च।) वृकरोटिः। यथा। भगालं नरमस्तकम्। इति कश्चित् जटाधरः॥ भगस्य महादेवस्य अलं भूषणमिति युतपत्तिः॥

भगाली, [न्] पुं, (भगालं वृकपालं भूषणत्वेनास्त्यस्येति इनिः।) शिवः। इति त्रिकाण्डशेषः॥ (चण्डीकान्तो भगाली च। इति उज्ज्वलदत्तधृतो राजशेखरश्च।)

भगिनी, स्त्री, सहोदरा। तत्पर्य्यायः। स्वसा २। इत्यमरः॥२।६।२६॥ भगं यत्र; पित्रादितो ह्यदाने विद्यतेऽस्या इति इनिप्रत्ययेन भगिनी। इति तट्टीकायां भरतः॥ (भगं योनिरस्या अस्तीति। भग+इनिः ङीप्।) स्त्रीमात्रम्। यथा,—

"परिव्रज्या च वामाक्षी भगिनी प्रकृतिर्नरी॥"
इति शब्दचन्द्रिका॥

भगिनीपतिः, पुं, (भगिन्याः पतिः।) स्वस्रीभर्त्ता। तत्पर्य्यायः। आवुत्तः २ भाम्मः १। यथा,—

"भगिनीपतिरावुत्तो भावो विद्वानथावुकः॥"
इति नाममालावमरः॥२।७।१२॥

"अहो भगिन्यहो भाम! मया वां बत पाप्मना।
पुरुषाद इवापत्यं सुहृदोर्हिंसितः सुताः॥"
इति श्रीभागवते १० स्कन्धे ४ अध्यायः॥

भगीरथः, पुं, (भं ज्योतिष्कमण्डलं गीर्वाङ्मयं तत्र रथ इन्द्रियाणि रथ इवास्य।) दिलीपराजपुत्रः। कपिलशापेन भस्मीभूतानामधःपतितानां पितॄणामुद्धरणायानेन मर्त्यलोके गङ्गा आनीता। यथा, मात्स्ये १२ अध्यायः।

"असमञ्जसस्तनयो ह्यंशुमान्नाम विश्रुतः।
तस्य पुत्रो दिलीपस्तु दिलीपात्तु भगीरथः॥
येन भागीरथी गङ्गा तपः कृत्वावतारिता।
भगीरथस्य तनयो नाभाग इति विश्रुतः॥"

भगोः, पुं, हे भगवन्!। इति सुग्धबोधव्याकरणम्। संक्षिप्तसारश्च॥ (सम्बोधनवाचकावमौ॥)

भगोलः, पुं, (भानां नक्षत्राणां गोलः। नक्षत्रसमूहेन विरचितः गोलाकारः पदार्थ इत्यर्थः।) भपञ्जरम्। नक्षत्रचक्रम्। यथा। इदानीं भगोलमाह।

"याम्योत्तरक्षितिजवत् सुदृढं विधाया-
दाधारवृत्तयुगलं ध्रुवयष्टिबद्धम्।
षष्ठाङ्कमत्र सममण्डलवत्तृतीयं
नाड्याह्वयञ्च विषुवद्वलयं तदेव॥"

यथा खगोले क्षितिजं याम्योत्तरञ्च तदाकारमपरमाधारवृत्तद्वयं ध्रुवयष्टिञ्च कृत्वा तदुपरि अन्यत्तृतीयं सममण्डलाकारं घटीषष्ट्या चाङ्कितं कार्य्यं तन्नाड़ीवृत्तं विषुवत् वृत्तसंज्ञम्॥*॥

इदानीं क्रान्तिवृत्तमाह।

"क्रान्तिवृत्तं ग्रहाङ्कं विधेयं भ-
मध्य भागुश्च भार्द्धे कुभा भागुतः।
क्रान्तिपातः प्रतीपं तथा प्रस्फुटा
क्षेपपातश्च तत्स्थानकान्यूह्येत्॥

अथान्यत्तत्प्रमाणमेव वृत्तं कृत्वा तत्र मेषादीन् प्रकल्प्य द्वादशराश्योऽङ्काः॥"

तत्क्रान्तिवृत्तसंज्ञम्। तस्मिन् वृत्ते रविर्भ्रमति तथा रवेर्भोर्द्धान्तरे भूभा च। तथा तत्र क्रान्तिपातो मेषादिर्विलोमं भ्रमति। तथा ग्रहाणां विक्षेपपाताः प्रस्फुटा विलोमं भ्रमन्ति। अतः क्रान्तिपातादीनि स्थानानि तत्राङ्कानि। इदानीं क्रान्तिवृत्तनिवेशमाह।

"क्रान्तिपाते च पाताङ्कषट्कान्तरे
नाड़िकावृत्तखं विद्ध्यादिदम्।
पाततः प्राक् त्रिभे सिद्धभागैरुदग्
दक्षिणे तेन भागैर्विभागेऽपरे॥"

क्रान्तिपातचिह्नात् षड्भेऽन्तरेऽन्यचिह्नं कार्य्यम्। ते चिह्ने नाड़ीवृत्तेन संसक्ते कृत्वा पातचिह्नादयतः त्रिभेऽन्तरे नाड़ीवृत्ताङ्कागचतुर्विंशत्या उत्तरतो यथा भवति। अपरभागे त्रिभेऽन्तरे दक्षिणतस्तैर्भागैर्यथा भवति तथा कर्त्तव्यात्॥*॥ इदानीं विमण्डलमाह।

"नाड़िकामण्डले क्रान्तिवृत्तं यथा
क्रान्तिवृत्ते तथा क्षेपवृत्तं न्यसेत्।
क्षेपवृत्तन्तु राश्यङ्कितं तच्च च
क्षेपपातेषु चिह्नानि कृत्तोक्तवत्॥
क्रान्तिवृत्तस्य विक्षेपवृत्तस्य च
क्षेपपाते सषड्भे च कृत्वा युतिम्।
क्षेपपातागतः स्फुटश्च त्रिभे
क्षेपभागैः स्फुटैः सौम्ययाम्ये न्यसेत्॥
ग्रीष्मकर्णेन भक्ताच्छिन्ना गुणाः
स्युः परक्षेपभागा ग्रहाणां स्फुटाः।
क्षेपवृत्तानि यस्यां विदध्यात् पृथक्
स्वस्वदृक्तुल्यभमण्डलेन्दूर्ध्वगा यहाः॥"

अस्य श्लोकस्य समयस्य व्याख्यानम्। यथा क्रान्तिवृत्तं पृथक् कृतं एवं विमण्डलमपि राश्यङ्कं पृथक् पृथक् कृत्वा तत्र मेषादेर्यत्तं स्फुटक्षेपपातं दत्त्वायं चिह्नं कार्य्यम्। अथ क्रान्तिवृत्तस्य विमण्डलस्य च क्षेपपातचिह्नयोः सम्पातं कृत्वा तस्मात् षड्भेऽन्तरे अन्यच्च सम्पातं कृत्वा क्षेपपातागतस्त्रिभेऽन्तरे क्रान्तिवृत्तादुत्तरतः स्फुटैः क्षेपभागैः पृष्ठतश्च त्रिभेऽन्तरे तैरेव भागैर्दक्षिणतः स्थिरं कृत्वा विमण्डलं निवेशनीयम्। अथ पठिता ये विक्षेपभागास्ते छिन्ना गुणाः ग्रीष्मकर्णेन भक्ताः स्फुटा ज्ञेयाः॥*॥ अथानुपातः। यदि कर्णाग्रं एतावदन्तरं तर्हि छिन्नाग्रे कियदिति। यतो भगोले छिन्नैव व्यासार्द्धम्। एवं चन्द्रादीनां षट् विमण्डलानि कार्य्याणि। स्वविमण्डले ग्रहा भ्रमयन्ति। इदानीं क्रान्तिं विक्षेपञ्चाह।

"नाड़िका मण्डला तिर्यगन्तरापमः
क्रान्तिवृत्तावधिः क्रान्तिवृत्ताक्षरः।
क्षेपवृत्तावधितिर्यगेव स्फुटो
नाड़िकावृत्तखेटान्तराले ऽपमः।
क्रान्तिवृत्ते स्फुटग्रहस्थानं तस्य
नाड़ीवृत्तादयत्तिर्यगन्तरं सा क्रान्तिः॥

अथ विमण्डले च यद्ग्रहस्थानं तस्य क्रान्तिवृत्तात् यत्तिर्यगन्तरं स विक्षेपः। अथ विमण्डलस्थग्रहस्य नाड़ीवृत्तादयत्तिर्यगन्तरं सा स्फुटा क्रान्तिः॥*॥ इदानीं क्रान्तिपातमाह। विषुवत्क्रान्तिवलययोः संपातः क्रान्तिपातः स्यात्। तद्गताः सौरोक्ता यत्ता अयुतत्रयं कल्पे॥ अयनचलनं यदुक्तं सुशालादेः स एवायम्। तत्पक्षे तद्गताः कल्पे गोऽङ्गर्तुनन्दगोचन्द्राः १९९६६६॥ तत् सञ्जातं पातं क्षिप्त्वा खेटेऽपमः साध्यः। क्रान्तिवशात्तत्तरसुदग्याक्षरदलसमापमे ततः क्षेप्याः। क्रान्त्यर्द्धपातः क्रान्तिपातः। पातो नामसम्पातः कयोः विषुवत्क्रान्तिवलययोः। नहि तयोर्मेषादावेव सम्पातः। किन्तु तस्यापि चलनमस्ति। ये अयनचलनभागाः प्रसिद्धास्त एव विलोमगस्य क्रान्तिपातस्य भागाः। मेषादेः पृष्ठतस्तावद्भागान्तरे क्रान्तिवृत्ते विषुवद्वृत्तं लग्नमित्यर्थः। नहि क्रान्तिपातोऽस्तीति वक्तुं न शक्यते। प्रत्यक्षेण तस्योपलब्धत्वात्। उपलब्धिप्रकारमग्रे वक्ष्यति। स कथं ब्रह्मगुप्तादिभिर्निपुणैरपि नोक्त इति चेत्। तदा स्वल्पत्वात्तैर्नोपलब्धः। इदानीं बहुत्वात् साम्प्रतैरुपलब्धः। अतएव तस्य गतिरस्तीत्यवगतम्। यद्येवमप्युपलब्धोऽपि सौरसिद्धान्तोक्तत्वादागमप्रामाण्येन भगणपरिधादिवत् कथं तैर्नोक्तः। सत्यम्। अत्र गणितस्कन्धे उपपत्तिमानेवागमः प्रमाणम्। तर्हि मन्दोच्चपातभगणा आगमप्रामाण्येनैव कथं तैरुक्ता इति न वक्तव्यम्। यतो ग्रहाणां मन्दफलाभावस्थानानि प्रत्यक्षेणैवोपलभ्यन्ते तान्येव मन्दोच्चस्थानानि यान्येव विक्षेपाभावस्थानि तान्येव पातस्थानानि किन्तु तेषां गतिरस्ति नास्ति वेति सन्दिग्धम्। तत्र मन्दोच्चपातानां गतिरस्ति। चन्द्रमन्दोच्चपातवदित्यनुमानेन सिद्धा। सा च कियती तदुच्यते। यैर्भगणैरुपलक्षितस्थानानि तानि ग्रहितेनागच्छन्ति। तद्गणसमवा वार्षिकी दैनन्दिनी वा गतिर्ज्ञेया। नैवम्। यदन्यैरपि भगणैस्तान्येवस्थानानि आगच्छन्ति। तदा कतरस्यागतेः प्रामाण्यम्। सत्यम् तर्हि साम्प्रतोपलब्ध्यनुसारिणी काप्यागतिरङ्गीकर्त्तव्या। यदा पुनर्महता कालेन महदन्तरं भविष्यति तदा महामतिमन्तो ब्रह्मगुप्तादीनां समानधर्मिण एव उत्पत्स्यन्ते। तदुपलब्ध्यनुसारिणीं गतिमुररीकृत्य ग्राह्याणि चाकरिष्यन्ति। अतएवायं गणितस्कन्धो महामतिमद्भिर्दृष्टः सन् अनादृतश्चेत् कालेऽपि स्खलनं न याति। अतोऽस्य क्रान्तिपातस्य भगणाः कल्पेऽयुतत्रयं तावत् सूर्य्यसिद्धान्तोक्ताः। तथा सुशालादेर्यदयनचलनमुक्तं स एव क्रान्तिपातः। ते गोऽङ्गर्तुनन्दगोचन्द्रा उत्पद्यन्ते। अथ च ते वा ये वा भगणा भवन्तु। यदा वेधैर्ग्रहा निपुणैरुपलभ्यन्ते तदा स एव क्रान्ति-

पात इत्यर्थः। तं विलोमं क्रान्तिपातं ग्रहे प्रक्षिप्य क्रान्तिः साध्या। इदानीं विक्षेपपातानाह। एवं क्रान्तिविमण्डलसम्पातात् क्षेपपाताः स्युः। चन्द्रादीनां यस्याः क्षेपानयने तु ते योज्याः।

"मन्दस्फुटो द्राक् प्रतिमण्डले स्वे
ग्रहो भ्रमत्यत्र च तस्य पातः।
पातेन युक्ता गणितागतेन
मन्दस्फुटात् खेचरतः ग्रहोऽस्मात्॥
पातोऽथवा शीघ्रफलं विलोमं
कृत्वा स्फुटाख्येन युताच्छरोत्थः।
चन्द्रस्य कक्षावलये हि पातः
स्फुटाद्विधोर्मध्यमपातयुक्तात्॥"

तथा क्रान्तिवृत्तविमण्डलयोः सम्पातः क्षेपपातः। तं ग्रहे प्रक्षिप्य क्षेपः साध्यः। एतदुक्तं भवति क्रान्तिपातः प्रसिद्धः। यथा तं ग्रहे प्रक्षिप्य क्रान्तिः साध्यत एव क्षेपपातं ग्रहे प्रक्षिप्य क्षेपः साध्य इत्यर्थः। अथ विक्षेपपातो मन्दस्फुटे यत् प्रक्षिप्यते तत्कारयन्नाह। मन्दस्फुटो द्राक् प्रतिमण्डल इत्यादि। यतः शीघ्रप्रतिमण्डले मण्डलस्फुटगत्या ग्रहो भ्रमति तत्र च वृत्ते पातः। अतो गणितागतपातं मन्दस्फुटे प्रक्षिप्य क्षेपः साध्यते। शेषं स्पष्टार्थम्॥ * ॥ इदानीं शुक्रक्रयोर्विशेषमाह।

"ये चात्र पातभगणाः कथिता भृग्वोः
ते शीघ्रकेन्द्रभगणैरधिका यतः स्युः।
स्वल्पाः सुखार्थसुदिताश्चलकेन्द्रयुक्तौ
पातौ तयोः पतितचक्रभवौ विधेयौ॥
चलाद्विशीघ्रः किल केन्द्रसिद्धये
केन्द्रे सपाते द्युचरस्तु योज्यः।
अतश्चलात् पातयुताद् भृग्वोः
सधीभिरादौ ग्रहसिद्धिरुक्ता॥"
"स्फुटोनशीघ्रोच्चयुतौ स्फुटौ तयोः
पातौ भगोले स्फुट एव पातः॥"

ननु शुक्रक्रयोः शीघ्रोच्चपातयुतिं केन्द्रं कृत्वा यो विक्षेप आनीतः स शीघ्रोच्चस्थान एव भवितुमर्हति न ग्रहस्थाने। यतो ग्रहोऽत्यन्त वर्तते। अत इदमनुपपन्नमिव प्रतिभाति। तथा ब्रह्मसिद्धान्तभाष्ये। शुक्रक्रयोः शीघ्रोच्चस्थाने यावान् विक्षेपस्तावानेव यत्नतश्चस्यापि ग्रहस्य भवत्युपलब्धिरेव वासना। नान्यत् कारणं वक्तुं शक्यत इति चतुर्वेदे नाप्यनध्यवसायोऽत्र कृतः। अत्रोच्यते। बेशङ्क शुक्रक्रयोः पातभगणाः पठितास्ते शीघ्रकेन्द्रभगणैर्युताः सन्तस्तद्भगणा भवन्ति। तथा च माधवीये सिद्धान्तचूडामणौ पठिताः। अतोऽल्पभगणभवः पातः स्वशीघ्रकेन्द्रेण युतः कार्यः। शीघ्रोच्चादृग्ग्रहे शोधिते शीघ्रकेन्द्रं तस्मिन् स पाते क्षेपकेन्द्रकरणार्थं ग्रहः क्षेप्यः। अतस्तुल्यशोधक्षेपकयोः नाशे कृते शीघ्रोच्चपातयोग एवावशिष्यत इत्युपपन्नम्। किंच। मन्दस्फुटोनं शीघ्रोच्चं प्रतिमण्डले चलकेन्द्रं तत्पाते क्षेपं युज्यते। एवं कृते सति क्षेपकेन्द्रं मन्दफलेनान्तरितं स्यात्। तदशुद्धतम्। इतरकेन्द्रस्यानुपपत्तेः। अतो मन्दफलं पाते यस्तं देयम्। यतोऽनुपातसिद्धं चलकेन्द्रं मध्योनं शीघ्रोच्चं भवति। यत्तु भगोले क्रान्तिवृत्तं तत् कक्षावृत्तं तत्र यद्विमण्डलं तत्र स्फुटग्रहः। ततस्फुटपातयोगो हि विक्षेपकेन्द्रं अतः स्फुटपातस्थाने सम्पातं कृत्वा ततस्तिभेऽन्तरे स्फुटीकृते परमक्षेपांशैः प्राग्वदुत्तरे दक्षिणे च विन्यस्यम्। तथा न्यस्ते विमण्डले स्फुटग्रहस्थाने विक्षेपः स्फुटविक्षेपेण गणितागतेन तुल्यो दृश्यते नान्यथेत्यर्थः॥ * ॥ इदानीं ग्रहगोले विशेषमाह।

"ग्रहस्य गोले कथितापमण्डलं
प्रकल्प्य कक्षावलयं यथोदितम्।
निबध्य शीघ्रप्रतिवृत्तमस्मिन्
विमण्डलं तत्र पठितैः परांशैः॥
मध्योऽत्र पातौ द्युचरस्य भृग्वोः
स्वशीघ्रकेन्द्रेण युतौ तु योज्याः॥"

भगोल एव तावद्ग्रहगोलः कल्प्यः तत्र स्फुट एव पातः। अथ यदि तदन्तर्ग्रहगोलोऽन्यो निबध्यते तदा तत्र यथोक्तविधिवद्वृत्तं क्रान्तिवृत्तस्य वद्धा कक्षामण्डलं प्रकल्प्य तत्र क्षेप्यकोक्तविधिना शीघ्रप्रतिमण्डलं वद्धा तत्र प्रतिमण्डले गणितागतपातं मेषादेर्विलोमं गणयित्वा तत्र चिह्नं कार्यम्। अथ त्रिज्या व्यासार्द्धमेवान्यद्वृत्तं राशयङ्कं विमण्डलाख्यं कृत्वा तत्रापि मेषादेर्यत्र पाताग्रे चिह्नं कृत्वा प्रतिमण्डलविमण्डलयोः सम्पातचिह्ने प्रथमं सम्पातम्। ततो भार्द्धान्तरे द्वितीयं कृत्वा पातादृजुतश्च तिभेऽन्तरे परमविक्षेपांशैः पठितैः प्रतिवृत्तादुत्तरे दक्षिणे च विमण्डलं न्यस्यम्। तत्र मन्दस्फुटगत्या पारमार्थिको ग्रहो भ्रमति। अतो मेषादेरनुलोममन्दस्फुटो विमण्डले देयः। स तत्रस्थः प्रतिमण्डलात् यावतान्तरेण विक्षिप्तस्तावान् ततुप्रदेशे विक्षेपः। यतो वृत्तसंपातस्थे ग्रहे विक्षेपाभावः त्रिभेऽन्तरे परमो विक्षेपो मध्येऽनुपातेन। अतो वृत्तसम्पातग्रहयोरन्तरं ज्ञेयम्। तदन्तरं पातग्रहयोगे कृते भवति। पातस्य विलोमगत्वात्। संयोगः शरार्थं केन्द्रम्। यदि त्रिज्यातुल्यया केन्द्रज्यया परमशरस्तदाभीष्टयानया क इति फलं प्रतिमण्डलविमण्डलयोस्त्रिभेऽन्तरं स्यात्। विमण्डलस्थग्रहाद्भूमध्यगं सूत्रं तद्भूमध्यग्रहान्तरं स च शीघ्रकर्णः। यदि भूमध्यात् कर्णाग्रे एतावान् विक्षेपस्तदा त्रिज्याग्रे कियानिति द्वितीयत्रैराशिकम्। आद्ये त्रिज्या हरो द्वितीये गुणः। तयोर्नाशे कृते केन्द्रज्यायाः परमशरगुणायाः कर्णो हरः फलं कक्षावृत्तसूत्रयोस्त्रिभेऽन्तरं स्फुटशरः॥ * ॥ इदानीमहोरात्रवृत्तमाह। ईप्सितक्रान्तितुल्योऽन्तरे सञ्चेतो नाडिकाख्यादहोरात्रवृत्ताक्षयं तत्र वद्धा। घटीगाश्च यद्याद्दृश्येदस्य विष्कम्भखण्डं द्युजीवा मता। नाडीवृत्तादुत्तरतो दक्षिणतो वा सर्वत्रैवक्रान्तितुल्यान्तरे यद्वृत्तं निबध्यते तदहोरात्रवृत्तं तेन वृत्तेन तस्मिन् दिने रविर्भमतीत्यर्थः। तस्य वृत्तस्य व्यासार्द्धं द्युज्या॥ * ॥ इदानीमन्यदाह। अथ कल्प्या मेषाद्या द्युक्रमोत्क्रमं क्रान्तिपाताद्भात् एषा मेषादीनां द्युरात्रवृत्तानि बध्नीयात्। नाडीवृत्तोभयतस्त्रीणि त्रीणि क्रमोत्क्रमाणि। क्रान्तिपातादारभ्य त्रिंशत्त्रिंशद्भिर्भागैरन्यान् मेषादीन् प्रकल्प्य तत्रैषूक्तवदहोरात्रवृत्तानि बध्नीयात्। तानि च नाडीवृत्तोभयतस्त्रीणि त्रीणि भवन्ति। तान्येव क्रमोत्क्रमतः सायनांशार्कस्य द्वादशराशीनाम्॥ * ॥ इदानीमस्योपसंहारः। एष भगोलः कथितः खेचरगोलोऽयमेव विज्ञेयः। इति सिद्धान्तशिरोमणौ॥

भग्नं, त्रि, (भञ्ज्+क्तः। संघाद् विश्लिष्टत्वात् तथात्वम्।) पराजितम्। इति हेमचन्द्रः॥ त्रुटितम्। चूर्णितम्। भाङ्गा इति भाषा। यथा, भट्टिः।

"चिरकालोषितं जीर्णं कौटनिष्कुषितं धनुः।
किं चित्रं यदि रामेण भग्नं क्षत्रियकान्तिके॥"

भग्नं, क्ली, (भज्यते आमर्द्यते विश्लिष्यते इति। भञ्ज+क्तः) रोगविशेषः। अथ भग्नाधिकारः। तत्र भग्नस्य भेदमाह।

"भग्नं समासाद्विविधं हुताश!
काण्डे च सन्धावपि तच्च सन्धौ।
उत्पिष्टविश्लिष्टविवर्तितानि
तिर्यग्गतं चिन्नमधश्च षड्धा॥"

भग्नमत्र भावार्थे क्तप्रत्ययेन भग्नं भङ्गः स चात्र विश्लेषोऽभिप्रेतः। तेन भग्नमत्रास्थिविश्लेषलक्षणम्। समासात् संक्षेपात्। हुताश! हे अग्निवेश!। यतश्चरकेऽग्निवेशस्य हुताशेति नामान्तरमुक्तम्। काण्डे सन्धिपर्यन्ते एकखण्डे। अस्थिसन्धौ द्वयोरस्थ्नोः सन्धानस्थाने। तत्र सन्धौ उत्पिष्टादिभेदैः षट्प्रकारं भग्नं भवति। स्वल्पवक्तव्यतेन सन्धिभग्नस्यादौ विवरणम्। उत्पिष्टेत्यादि। अधः अधोभग्नम्॥*॥ सन्धिभग्नस्य सामान्यं लिङ्गमाह।

"प्रसारणाकुञ्चनवर्त्तनोत्था-
रुक्सार्द्गविद्वेषणमेतदुक्तम्।
सामान्यतः सन्धिगतस्य लिङ्ग-
मुत्पिष्टसन्धेः व्ययथुः समन्तात्॥
विशेषतो रात्रिभवा रुजश्च
विश्लिष्टके तौ च रुजा च नित्यम्॥"

वर्त्तनं परिवर्त्तनम्॥*॥ उत्पिष्टस्य लिङ्गमाह। उत्पिष्टसन्धेः उत्पिष्टः द्वाभ्यामस्थिभ्यां पिष्टः सन्धिर्यस्य तस्य। समन्तात् उभयभागद्वयोः। विश्लिष्टमाह विश्लिष्ट इत्यादि। तौ उभयतः श्लोथौ। रुजा च नित्यं सदा रुजाधिका भवतीत्युत्पिष्टादेः॥*॥ विवर्त्तिततिर्यग्गतान्यस्थिभाधीगतानाह।

"विवर्त्तिते पार्श्वरुजञ्च तीव्रा-
स्तिर्य्यग्गते तीव्ररुजो भवन्ति ।
चिप्रेऽतिशूलं विषमञ्च सक्थ्नोः
चिप्रे लघौ रुक् विघटञ्च सन्धेः ॥"

विवर्त्तिते सन्धावसृक्। अस्थिद्वयोपरिवर्त्तिते पार्श्वरुजः सन्धिस्थितास्थिखण्डद्वयपार्श्वयो रुजः। तिर्य्यग्गते सन्धिगते। एकस्मिन्नस्थि सन्धिस्थानं त्यक्त्वा तिर्य्यग्गते चिप्रे सक्थ्नोः ऊरुसन्ध्योः। एकस्मिन्नस्थि परस्मात्स्थ्नि उपरिगते। सक्थ्नोः अतिशूलं तच्च विषमं कदाचिदधिकं कदाचित्कमूनम्। अधःचिप्रे सन्धिगते एकस्मिन्नस्थि अधोगते। रुक् सन्धेर्विघटः विघटनञ्च ॥*॥ काण्डभग्नमाह। भग्नञ्च काण्डे बहुधा प्रयाति विंशेषतो नामभिरेव तुल्यम्। भग्नं काण्डे काण्डविषये बहुधा बहुभिः प्रकारैः प्रयाति। अत्र बहुविधत्वं द्वादशविधत्वं बोद्धव्यम्। बहुविधस्य काण्डभग्नस्य पृथक् लक्षणं नोक्तं किन्तु काण्डनामभिरेव तुल्यत्वम्। कर्कटकादिनामानुरूपमेव लक्षणं किन्तु नामभिरेव बोद्धव्यम् ॥*॥ तान् प्रकारानाह।

"काण्डे त्वतः कर्कटकाश्वकर्णौ
विचूर्णितं पिचितमस्थि क्षुण्णितम्।
काण्डेषु भग्नं क्षतिपातितञ्च
मज्जागतं विस्फुटितञ्च वक्रम् ॥"

छिन्नं द्विधा द्वादशधा च काण्डे। अतः सन्धिभग्नानन्तरं काण्डे काण्डभग्ने तदाह। कर्कटकः अस्थिविश्लेषपूर्व्वको मध्ये प्रोन्नतः पार्श्वयोरवनतः कर्कटतुल्यरूपत्वात् कर्कटः। अश्वकर्णः अश्वकर्णवद्विपुलास्थिनिर्गमादश्वकर्णः। विचूर्णितं चूर्णितमस्थि तच्च शब्दस्पर्शाभ्यां बोद्धव्यम्। पिचितमस्थि निर्यन्त्रितं बहुशोथम्। क्षुण्णितं विश्लिष्टं सम्यक्स्रवम्। काण्डेषु भग्नं काण्डभग्नम्। यद्यपि कर्कटकादि सर्व्वमेव काण्डभग्नं तथापि इयं काण्डभग्नसंज्ञाविशिष्टा। अत्र भग्नं भङ्गः त्रुटिः तेन सर्व्वथा त्रुटितं पृथग्भूतं त्वचि स्थितं यत्र काण्डं तत्काण्डभग्नम्। अतिपातितं अन्येन छित्त्वा पातितमस्थि। मज्जागतं अस्थ्ययवोऽस्थिमध्ये प्रविश्य मज्जानं गतम्। विस्फुटितं स्फोटविदीर्णं वक्रं स्थानं त्यक्त्वा कुब्जीभूतम्। छिन्नं द्विधा एकं विदीर्णं सत् लम्बं अपरं विदीर्य्य द्विधाभूतम्। द्वादशधा च काण्डे। काण्डे च भग्नं द्वादशधेत्यनयः। तच्चोक्तमेव कर्कटकादि ॥*॥ काण्डभग्नस्य सामान्यं लक्षणमाह।

"सस्वाङ्गता शोथरुजातिदृद्धिः
संपीड्यमाने भवतीह शब्दः।
सस्पर्शसहं स्पन्दनतोदशूलं
सर्व्वास्वस्थासु न शुभ्मलाभः ॥"
भग्नस्य काण्डे खलु चिह्नमेतत् ॥"

सस्पर्शसहमिति काण्डभग्नस्य विशेषणं स्पन्दनं नाड़ीनां स्फुरणं शूलं शूलेनेव यथा। रुजा सामान्या पीड़ा। सर्व्वास्वस्थासु शुभ्नासनादिषु ॥ कष्टसाध्यमाह।

"अस्थाग्निनोऽनात्मवतो जन्तोर्वातात्मकस्य च।
उपद्रवैर्वा जुष्टस्य भग्नं कृच्छ्रेण सिध्यति ॥"

अनात्मवतो रोगप्रतीकारे यत्नरहितस्य। वातात्मकस्य च वातप्रकृतेः। उपद्रवैः ज्वराध्मानमोहश्वयथुपुरीषसङ्गादिभिः ॥*॥ असाध्यमाह।

"भिन्नं कपालं कट्यान्तु सन्धिमुक्तं तथा
च्युतम्।
जघनं प्रतिपिष्टञ्च वर्जयेत्सक्थिकितुण्डकं ॥"

कपालं जानुनितम्बसंगश्वतालुशङ्खवङ्क्षणशिरो ऽस्थीनि कपालानि तथा च्युतं तथा चिप्रम्। प्रतिपिष्टं उत्पिष्टम्। पुनरसाध्यमाह।

"असंश्लिष्टकपालञ्च ललाटे चूर्णितञ्च यत्।
भग्नं शुद्धे स्तने दृष्टे शुद्धे मर्म्मणि वर्जयेत् ॥"

असंश्लिष्टकपालमिति भग्नविशेषणम्। स्तने स्तनयोरन्तरे उरसि। मर्म्मणि चूड़स्थाने ॥*॥ अपरमप्यसाध्यमाह।

"सम्यक्संहितमप्यस्थि दुर्न्यासादुरुबन्धनात्।
संक्षोभादापि यद्गच्छेद्विक्रियां तच्च वर्जयेत् ॥"

सम्यक्संहितमपि सम्यग्योजितमपि अस्थि दुर्न्यासात् दुःस्थापनात् संन्यस्तमपि दुरुबन्धनात् सुबद्धमपि संक्षोभात् अभिघातादिना सञ्चलनात् यद्विक्रियां गच्छेत् विकृतं भवति तद्वर्जयेत्। अस्थिविशेषेण भग्नविशेषमाह।

"तरुणास्थीनि नम्यन्ते भिद्यन्ते नलकानि तु।
कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च ॥
तरुणास्थीनि बालकर्णाचिगुदेषु कोमलास्थीनि नम्यन्ते वक्रीभवन्ति। तेनाच वक्रतालक्षणं भग्नम्। नलकानि नलादीनि नाड़ीवत् सरन्ध्रास्थिपर्व्वाणि भिद्यन्ते अस्थ्यन्तरानुप्रवेशादिदीर्य्यन्ते। कपालानि जानुनितम्बसंगश्वतालुशङ्खशिरोऽस्थीनि विभज्यन्ते स्फुटन्ति रुचकानि इत्ताः स्फुटन्ति त्रुटन्ति। अस्थीनि तरुणानलककपालरुचकबलयभेदात् पञ्चविधानि। तच्च रुचकानि चैति। चकाराद्वलयान्यपि त्रुटन्तीति बोद्धव्यम्।

"पाण्योः पार्श्वयुगे पृष्ठे वक्षोजठरपायुषु।
पादयोरपि चास्थीनि बलयानि बभाषिरे ॥"

अथ भग्नस्य चिकित्सा।

"भग्ने लेपाय मञ्जिष्ठामधुकक्वाम्बुपेषितम्।
घृतक्षौद्रयुतोन्मिश्रं घृष्टालिप्टञ्च लेपनम् ॥"

लेपात् पिष्टिकलक्षणेरन्त्रीका फलरसाभ्यां वा। सद्योऽभिघातजनिता रागरुजा शमयत्यपि प्रशाम्यन्ति।

"सघृतक्षौद्रसंहारं लाक्षागोधूममर्ज्जुनम्।
सन्धिभग्नेऽस्थिसभग्ने पिबेत् क्षीरेण वा पुनः ॥"

घृतेन पिबेत् क्षीरेण वेत्यर्थः। अस्थिसंहारः हड़सिंहार इति लोके।

"रसोनामधुलाक्षाभ्यसितांकल्कं समन्ततः।
छिन्नभिन्नच्युतास्थ्नाञ्च सन्धानमचिराद्भवेत् ॥"

सामान्या पीड़ा। सर्व्वास्वस्थासु शुभ्नासनादिषु ॥ कष्टसाध्यमाह।

"अस्थाग्निनोऽनात्मवतो जन्तोर्वातात्मकस्य च।
उपद्रवैर्वा जुष्टस्य भग्नं कृच्छ्रेण सिध्यति ॥"

अनात्मवतो रोगप्रतीकारे यत्नरहितस्य। वातात्मकस्य च वातप्रकृतेः। उपद्रवैः ज्वराध्मानमोहश्वयथुपुरीषसङ्गादिभिः ॥*॥ असाध्यमाह।

"भिन्नं कपालं कट्यान्तु सन्धिमुक्तं तथा
च्युतम्।
जघनं प्रतिपिष्टञ्च वर्जयेत्सक्थिकितुण्डकं ॥"

कपालं जानुनितम्बसंगश्वतालुशङ्खवङ्क्षणशिरो ऽस्थीनि कपालानि तथा च्युतं तथा चिप्रम्। प्रतिपिष्टं उत्पिष्टम्। पुनरसाध्यमाह।

"असंश्लिष्टकपालञ्च ललाटे चूर्णितञ्च यत्।
भग्नं शुद्धे स्तने दृष्टे शुद्धे मर्म्मणि वर्जयेत् ॥"

असंश्लिष्टकपालमिति भग्नविशेषणम्। स्तने स्तनयोरन्तरे उरसि। मर्म्मणि चूड़स्थाने ॥*॥ अपरमप्यसाध्यमाह।

"सम्यक्संहितमप्यस्थि दुर्न्यासादुरुबन्धनात्।
संक्षोभादापि यद्गच्छेद्विक्रियां तच्च वर्जयेत् ॥"

सम्यक्संहितमपि सम्यग्योजितमपि अस्थि दुर्न्यासात् दुःस्थापनात् संन्यस्तमपि दुरुबन्धनात् सुबद्धमपि संक्षोभात् अभिघातादिना सञ्चलनात् यद्विक्रियां गच्छेत् विकृतं भवति तद्वर्जयेत्। अस्थिविशेषेण भग्नविशेषमाह।

"तरुणास्थीनि नम्यन्ते भिद्यन्ते नलकानि तु।
कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च ॥
तरुणास्थीनि बालकर्णाचिगुदेषु कोमलास्थीनि नम्यन्ते वक्रीभवन्ति। तेनाच वक्रतालक्षणं भग्नम्। नलकानि नलादीनि नाड़ीवत् सरन्ध्रास्थिपर्व्वाणि भिद्यन्ते अस्थ्यन्तरानुप्रवेशादिदीर्य्यन्ते। कपालानि जानुनितम्बसंगश्वतालुशङ्खशिरोऽस्थीनि विभज्यन्ते स्फुटन्ति रुचकानि इत्ताः स्फुटन्ति त्रुटन्ति। अस्थीनि तरुणानलककपालरुचकबलयभेदात् पञ्चविधानि। तच्च रुचकानि चैति। चकाराद्वलयान्यपि त्रुटन्तीति बोद्धव्यम्।

"पाण्योः पार्श्वयुगे पृष्ठे वक्षोजठरपायुषु।
पादयोरपि चास्थीनि वलयानि बभाषिरे ॥"

अथ भग्नस्य चिकित्सा।

"भग्ने लेपाय मञ्जिष्ठामधुकक्वाम्बुपेषितम्।
घृतक्षौद्रयुतोन्मिश्रं घृष्टालिप्टञ्च लेपनम् ॥"

लेपात् पिष्टिकलक्षणेरन्त्रीका फलरसाभ्यां वा। सद्योऽभिघातजनिता रागरुजा शमयत्यपि प्रशाम्यन्ति।

"सघृतक्षौद्रसंहारं लाक्षागोधूममर्ज्जुनम्।
सन्धिभग्नेऽस्थिसभग्ने पिबेत् क्षीरेण वा पुनः ॥"

घृतेन पिबेत् क्षीरेण वेत्यर्थः। अस्थिसंहारः हड़सिंहार इति लोके।

"रसोनामधुलाक्षाभ्यसितांकल्कं समन्ततः।
छिन्नभिन्नच्युतास्थ्नाञ्च सन्धानमचिराद्भवेत् ॥"

"लाक्षास्थिसंहृत् ककुभाश्वगन्धा
चूर्णीकृता गोगवला पुरश्च।
संभग्नसुक्तास्थिरुजो निहन्या-
दृज्ञानि कुर्य्यात् कुलिशोपमानि ॥"

अस्थिसंहृत् हड़सिंहार। लाक्षादिगुग्गुलुः ॥
"मांसं मांसरसः क्षीरं सर्पिर्यूषः कलायजः।
हृद्यञ्चान्नपानञ्च देयं भग्नाय जानता ॥
लवणं कटुकं क्षारं मद्यं मैथुनमातपम्।
रूक्षमन्नं श्रमञ्चापि भग्नः सेवेत न क्वचित् ॥"

इति भावप्रकाशे भग्नाधिकारः ॥

(अथास्य निदानं यथा। पतनपीड़नप्रहारा-द्येषणश्वालम्बगदशूनप्रभृतिभिरभिघातविशेषैरनेकविधमस्थ्यां भङ्गमुपदिशन्ति तत्तु भङ्गजातमनुसार्य्यमार्यं द्विविधमेवोत्पद्यते सन्धिसक्थं काण्डभग्नञ्च। इति सुश्रुते निदानस्थाने पञ्चदशेऽध्याये।

अथ भग्नचिकित्सा।

"भग्नाश्चिह्नं नरं दृष्ट्वा तस्य वक्ष्यामि भेष-
जम्।
मणिबन्धे कूर्परे च जानौ भग्ने कटौ तथा ॥
पृष्ठवंशे विभग्ने च साध्यान्येतानि सत्तम ।।
ग्रीवादेशे चेन्द्रवस्तौ रोहिण्यां कूर्परादधः ॥
स्कन्धकूर्परमध्ये च तथा च चिकमध्यतः।
उरसि क्रोड़के चैव विभग्नं तदसाध्यकम् ॥
विभग्नञ्च नरं दृष्ट्वा वेणुखण्डेन बन्धयेत्।
न्यग्रोधनवनीतेनैरण्डपत्रैश्च वेष्टयेत् ॥
उष्णाम्भसा सेचयेच्च वस्त्रेण दृढ़ बन्धयेत्।
ध्वाङ्क्षौणकदग्धानां वल्कलं काङ्क्षिकेन तु ॥
पिष्ट्वा हितः प्रलेपश्च तेन सौख्यं प्रजायते।
खेदयेत्तानि चोष्णेन आवासं कारयेत् पुनः ॥
एवं क्रिया समाप्तौ तु ततो बन्धं विमोचयेत्।
एकाहान्तरिते नापि पूर्ब्ववत्तत् प्रबन्धयेत् ॥
यावदूनिं न बध्नाति तावन्न क्षापयेन्नरम् ॥"

इति हारीते चिकित्सितस्थाने। ५६ अः ॥

अथ पथ्यविधिः।

"घृतास्वसेचनं पङ्क्तप्रदेहो बन्धनक्रिया।
घृतालिप्रियङ्गुगोधूमा यूषो मुद्गसतीलयोः ॥
नवनीतं घृतं क्षीरं तैलं माक्षिको मधु।
पटोलं लशुनं शिग्रु पत्तूरो वाकमूलकम् ॥
द्राक्षा धात्री वकुचश्च लाक्षा यद्यपि तुंहृद्यम्।
ततस्सर्व्वं भिषजा नित्यं देयं भग्नाय जानता ॥"

अथाऽपथ्यविधिः।

"लवणं कटुकं क्षारमन्नं मैथुनमातपम्।
व्यायामञ्च न सेवेत भग्नो रूक्षान्नमेव च ॥"

इत्यायुर्व्वेदपथ्यापथ्यगुणस्य भग्नाधिकारे ॥)

भग्नपादर्क्षं, क्ली, (भग्नपदं ऋक्षम्।) पुष्करास्थ-नक्षत्रषट्कम्। यथा,—

"पुनर्व्वसूत्तराषाढ़ा क्रतिकोत्तरफल्गुनी।
पूर्ब्वभाद्रं विशाखा च वदंते पुष्कराः स्मृताः ॥
भग्नपादर्क्षसंयोगात् द्वितीया द्वादशी यदि।
सप्तमी चार्कमन्दारे जायते नारको ध्रुवम् ॥"

इति ज्योतिस्तत्त्वम् ॥

भग्नपृष्ठः, पुं, (भग्नं पृष्ठमस्मिन् ।) सम्मुखः । इति त्रिकाण्डशेषः । सुटितभेरुदण्डः । यथा,—
"भग्नपृष्ठकटिग्रीवं स्तब्धदृष्टिं हृधोमुखम् ।
कष्टेन लिखितं पुत्रं यत्नेन परिपालयेत् ॥"
इति प्राचीनवाक्यम् ॥
(भग्नं पृष्ठं यस्य । सुटितभेरुदण्डे, त्रि ।)

भग्नसन्धिः, पुं, (भग्नः सन्धिरत्रासाद् वा ।) शरीरस्य सन्धिस्थानभङ्गरोगविशेषः । तस्यौषधं यथा,—
"अभया त्रिफला घोषः सर्व्वैरेभिः समीकृतैः ।
तुल्यो गुग्गुलुना योज्या भग्नसन्धिप्रसारकः ॥"
इति गारुडे १७५ अध्यायः ॥

भग्नसन्धिकं, क्ली, (भग्नो विश्लिष्टः दग्धः सन्धिः संघातोऽत्र ।) घोलम् । इति शब्दचन्द्रिका ।

भग्नात्मा, पुं, (भग्नः क्रमेण हीन आत्मा देहो यस्य । लग्नप्रतिपदादिक्रमेणैकैककलाच्छेदेन भग्नदेहत्वादस्य तथात्वम् ।) चन्द्रः । इति शब्दचन्द्रिका ।

भग्नाग्रः, त्रि, (भग्ना अग्रा यस्य । हताग्रः । दीर्घटङ्काभङ्गयुक्तः । यथा,—
"अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥"
इत्याह्निकतत्त्वम् ॥

भग्नी, स्त्री, (भगिनी । पृषोदरादित्वात् साधुः ।) भगिनी । इति हिरूपकोषः ॥

भङ्कारी, स्त्री, (भमित्यव्यक्तशब्दं करोतीति । कृ + अण् । गौरादित्वात् ङीष् ।) दंशः । इति त्रिकाण्डशेषः ॥

भङ्क्ता, [क्तृ] त्रि, भङ्गकर्त्ता । भनृजधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नः ॥ (यथा, मनौ । ८।२८६।
"प्राकारस्य च भेत्तारं परिखाणाञ्च पूरकम् ।
द्वाराणाञ्चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥"

भङ्गः, पुं, (भज्यते इति । भञ्ज + कर्म्मणि घञ् ।) तरङ्गः । इत्यमरः । १ । १० । ५ ॥ पराजयः । (भनृज् + भावे घञ् ।) भेदः । रोगविशेषः । इति मेदिनी । गे, १३ । (रोगविशेषार्थे यथा,—
"पातघातादिभिर्दैवाद् भङ्गोऽस्थ्नां सन्धयस्थितेः ।
प्रसारणाकुञ्चनयोरशक्तिः सन्धिसुप्तता ॥
इतरस्मिन् भृशं शोफः सर्व्वावस्थासु तिष्ठति ।
अशक्तिश्चेष्टितेऽल्पेऽपि पीड्यमाने सशब्दता ॥
समासादिति भङ्गस्य लक्षणं बहुधा तु तत् ।
भिद्यते भङ्गभेदेन तस्य सर्व्वस्य साधनम् ॥
यथास्वादुपयोगाय तथा तदुपदेक्ष्यते ।
प्राप्यास्थ्युदरि यत्सन्धि सर्व्वं शब्दं करोति यत् ।
यत्रास्थिलेशः प्रविशेन्मध्यमस्थ्नो विदारितः ।
भग्नं यत्राभिघातेन किञ्चिदेवावशेषितम् ॥
उन्नम्यमानं नतवत् यच्च मज्जति मज्जति ।
तद्दुःसाध्यं क्षणाद्रक्तवातलास्थाश्रितामपि ॥
भिन्नं कपालं यत्कृत्वा सन्धिमुक्तं च्युतञ्च यत् ।
जघनं प्रतिपिष्टञ्च भग्नं यत्तद्विवर्ज्जयेत् ।
अन्तश्चिष्टकपालञ्च ललाटं चूर्णितन्तथा ।
यच्च भग्नं भवेच्छ्रोणिः पृष्ठसन्नान्तरे ।
सन्नग्रमितमध्यस्थि दुर्न्यासादुर्निबन्धनात् ॥
संक्षोभादपि यद्गच्छेद्विक्रियां तद्विवर्ज्जयेत् ।
आदितो यच्च दुर्न्यातमस्थिसन्धिरथापि वा ।
तरुणास्थीनि शुष्यन्ति भग्नन्तं नलकानि तु ।
कपालानि विभिद्यन्ते स्फुटन्त्यन्यानि भूयसा ।
अथावनतसुन्नम्यसुन्नतञ्चावपीड्येत् ॥
आच्छेदतिक्षिप्तमधो गतक्षोपरि वर्त्तयेत् ।
आक्षेपोत्पीड्यनोन्नामचर्म्मसंक्षपबन्धने ॥
सन्धीन् शरीरगान् सर्व्वान् चलानप्यचलानपि ।
दृष्ट्वेतैः स्थापनोपायैः सम्यक् संस्थाप्य निश्चलम् ।
पक्वैः प्रभूतसर्पिर्भिर्वेष्टयित्वा सुखैस्ततः ।
कदम्बोदुम्बराश्वत्थसुर्व्वार्ज्जुनपलाशजैः ॥
वंशोद्भवैर्वा पृथुभिस्तुभिः सुनिवेशितैः ।
सुश्लक्ष्णैः सुप्रतिस्तब्धैर्वेल्लकैः शल्कलैरपि ॥
कुशाश्मयैः समं बन्धं पट्टस्योपरि योजयेत् ।
ग्रन्थिविन्न हि बन्धेन सन्धेः स्थैर्य्यं न जायते ।
गाढ़ेनातिरुजादाहपाकश्वयथुसम्भवः ।
शिथिलाद्व्याहतौ धर्म्मे सम्यग्बाध्योपपेद्यते ॥
साधारणे तु पक्षाहाद्भङ्गदोषवशेन वा ।
न्यग्रोधादिकषायेण ततः प्रीतेन सेचयेत् ॥
तं पक्वमूलपक्वेन पयसा तु सवेदनम् ।
सुखोष्णं वावचार्य्यं स्नाप्यक्तसैलं विजानता ॥
विभज्य देशं कालञ्च वातघ्नौषधसंयुतम् ।
प्रतप्तं सेकलेपांश्च विदध्याद्भग्नगृहीतान् ॥
यष्टिक्षीरं च सर्पिष्कं मधुरौषधसाधितम् ।
प्रातः प्रातः पिबेद्भग्नः प्रीतसं नाक्षया युतम् ॥
सन्नस्य तु भग्नस्य व्रणो मधुघृतोत्तरैः ।
कषायैः प्रतिसार्य्योऽथ ग्रोधो भङ्गोदितः क्रमः ॥
लग्नानि व्रणमांसानि प्रलिप्य मधुसर्पिषा ।
सन्दधीत व्रणान् वैद्यो बन्धनैश्चोपपादयेत् ॥
तान् समान् सुस्थितान्ज्ञात्वा फलिनीरोध्र-
कट्फलैः ।
समङ्गाधातकीयुक्तैश्चूर्णितैरवचूर्णयेत् ॥
धातकीरोध्रचूर्णैर्वा रोहन्त्याशु तथा व्रणाः ।
इति भङ्ग उपक्रान्तः स्थिरधातोर्हतौ द्विमे ॥
मांसलस्याल्पदोषस्य सुसाध्यो दारुणोऽन्यथा ।
पूर्व्वमध्यान्तवयसामेकद्वित्रिगुणैः क्रमात् ॥
मासैः स्थैर्य्यं भवेत् सन्धेर्यथोक्तं भजतो विधिम् ।
कटीजङ्घोरुभागानां कपाटघ्नयनं हितम् ॥
यन्त्रणार्थं तथाकीलाः पञ्च कार्य्या भिषग्वरैः ।
जङ्घोर्व्वोः पार्श्वयोर्द्वौ द्वौ तलएकश्च कीलकः ॥
श्रोण्यां वा पृष्ठवंशे वा वक्षस्याशुकयोस्तथा ।
विमोक्षे भग्नसन्धीनां विधिमेवं समाचरेत् ॥
सन्धीञ्छिरविसुप्तांश्च स्निग्धस्विन्नान् मृदूकृतान् ।
उत्क्लेदविधाने वैद्यो न यथास्वं स्थानमाचरेत् ॥
असन्धिभग्ने रूढ़े तु विषमोक्षसाधिते ।
व्यपोह्य भङ्गं यमयेत्ततो भग्नवदाचरेत् ॥
भग्नं नैति यथा पाकं प्रयतेत तथा भिषक् ।
पक्वमांसशिराक्षायुसन्धिः श्लेष्मं न गच्छति ॥
वातव्याधिविनिर्द्दिष्टान् स्नेहान् भग्नस्य
योजयेत् ॥"
इति वाभटे उत्तरस्थाने । २७ अध्यायः ॥)

भङ्गिमा, [न्] पुं, (भङ्ग + बाहुलकात् स्वार्थे इमनिच् ।) भङ्गिः । यथा,—
कौटिल्यम् । भयम् । विच्छित्तिः । इति हेमचन्द्रः ॥ (विच्छित्त्यर्थे व्यवहारो यथा,—
"षड्धातुविभागो वियोगः सजीवापगमः
सप्राणनिरोधः स भङ्गः खलोकस्वभावः । इति
चरके शारीरस्थाने पञ्चमेऽध्याये ॥)
रोगमात्रम् । इति राजनिर्घण्टः ॥ गमनम् ।
जलनिर्गमः । इत्यजयपालः ॥ (नागभेदः ।
यथा, महाभारते । १ । ५७ । ६ ।
"उच्छिखः शरभो भङ्गो विस्रसेजा विरोहणः ॥")

भङ्गवासा, स्त्री, (भङ्गेन वासः सौरभमस्याः ।) हरिद्रा । इति शब्दरत्नावली ॥

भङ्गसाधः, त्रि, (भङ्गं वक्रभावं अनार्ज्जवत्वमित्यर्थः स्यति अवस्यति यत् या क्रिया इति यावत् भङ्गसमर्थयतीति अर्थ + अच् । कौटिल्यव्यवसायक्रियार्थित्वादस्य तथात्वम् ।) कुटिलः । इति हारावली ॥

भङ्गा, स्त्री, (भज्यते इति । भनृज् + "इगुपध ।" ३ । १ । १२१ । इति बाहुलकाद् घञ् टाप् ।) वृक्षविशेषः । तत्पर्य्यायः । मातुलानी २ । इत्यमरः । २।६।२०। (अस्याः पर्य्याया गुणाश्च यथा,
"भङ्गा गजा मातुलानी मादिनी विजया जया ।
भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ।
तीक्ष्णोष्णा पित्तला मोहमन्दवह्निविवर्द्धिनी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
द्वे भङ्गायां भङ्गा काश्मीरेषु खनामख्याता ।
इति सुभूत्यादयः । इति भरतः ॥ एतस्याः फलं कलापरिमाणमिति सर्व्वस्वम् । इति सारसुन्दरी ॥ गृध्राख्यग्रस्थम् । यथा,—
भङ्गा ग्रस्थे गृध्राख्ये । इति सुश्रुतटीकृतः ॥
चित्रता । तेउड़ी इति भाषा । यथा,—
"त्रिभङ्गी रेचनी भङ्गा कलिङ्गा परिपाकिनी ॥"
इति शब्दचन्द्रिका ॥
औषधविशेषः । भाङ् इति हिन्दि इति च भाषा । यथा,—
"त्रैलोक्यविजया भङ्गा विजयेन्द्राग्रजं जया ॥"
इति शब्दचन्द्रिका ॥
अस्या गुणाः विजयाशब्दे द्रष्टव्याः ॥

भङ्गारः, पुं, (भङ्गेन अनिति इति । अन् + अच् ।) मत्स्यविशेषः । भाङ्गन इति भाषा । तत्पर्य्यायः । दीर्घजङ्घलः २ । इति शब्दमाला ॥

भङ्गारी, स्त्री, (भङ्गारी पृषोदरात् साधुः ।) दंशः । इति त्रिकाण्डशेषः ॥

भङ्गिः, स्त्री, (भज्यते इति । भनृज + इन् । नङ्गादित्वात् कुत्वम् ।) विच्छेदः । (यथा, रघौ । १३ । ६८ ।
"यानादवातरदूरमङ्गीतलेन
मार्गेण भङ्गिरचितस्फटिकेन रामः ॥")
कौटिल्यभेदः । इत्यमरभरतौ ॥ विन्यासः । इति कक्षिङ्करः ॥ (भङ्गं करोतीति । भनृज + णिच् + इः ।) कल्लोलः । इत्यरुणदत्तः ॥ भङ्गः । इत्यन्ये । व्याजः । छलनिभः । इति रभसः ॥

"अधरे कज्जलं चारु दृशोस्ताम्बूलरङ्गिमा।
प्राणनाथ! किमेतत्ते वेश्यविश्वासभङ्गिमा॥"
इति काव्यचन्द्रिका॥

भङ्गी, स्त्री, (भङ्गि+ङीप्। आदिकारादिति पक्षे ङीष्।) भङ्गिः। यथा,—

"जानामि मानमलसाङ्गि! वचो विभङ्गीं
भङ्गीप्रतं नयनयोरपि चातुरीञ्च।
आभीरनन्दनसुखाम्बुजसङ्गसंगी
वंशीरवो यदि न मामवशीकरोति॥"
इत्युद्भटः॥

भङ्गुरः, त्रि, (भज्यते स्वयमेवेति। भञ्ज+"भञ्जभासमिदो घुरच्।"३।२।१६१। इति कर्म्मकर्त्तरि घुरच्। चित्वात् कुत्वमिति काशिका। स्वयं भञ्जनशीलः। यथा, भागवते।७।७।४३।

"कामान् कामयते काम्यैर्यदर्थमिह पूरुषः।
स देहस्तु पारक्यो भङ्गुरो यात्युपैति च॥")
कुटिलः। इति जटाधरः॥

भङ्गुरः पुं, (भञ्ज+घुरच्। कुत्वञ्च।) नद्या वङ्कः। इति शब्दमाला। नदीर वाँक इति भाषा॥

भङ्गुरा, स्त्री, (भङ्गुर+टाप्।) अतिविषा। प्रियङ्गुः। इति राजनिर्घण्टः॥ (अतिविषाशब्दे प्रियङ्गुशब्दे चास्य विषयो ज्ञेयः॥)

भङ्गं, क्ली, (भङ्गाया भवनं क्षेत्रमिति। भङ्ग+"विभाषा तिलमाषोमाभङ्गाणुभ्यः।" ५।२।४। इति पक्षे यत्।) भङ्गाक्षेत्रम्। तत्पर्य्यायः। भाङ्गीनम् २। इत्यमरभरतौ॥ (भङ्गमर्हतीति। भङ्ग+दण्डादिलाद् यत्। भङ्गार्हे त्रि॥)

भचक्रं, क्ली, (भानां राशीनां चक्रम्। भानां स्वस्वसंस्थानविशेषैर्विरचितो गोलाकारः पदार्थः।) राशिचक्रम्। यथा,—

"भ्रमावर्त्तो भचक्रोऽस्मिन् ध्रुवो नाभौ व्यवस्थितः।
आराचक्रे त्विन्दुभौमौ शुक्रजीवग्रनैश्चराः॥
राहुः केतुरगस्त्यश्च नक्षत्राण्यथ राशयः।
यदा दिक्षु च अष्टासु मेरोर्भूगोलकोद्भवा॥
छाया भवेत्तदा रात्रिः स्याच्च तद्विरहा-
द्दिनम्।
सूर्य्येन्दोरुपरागस्तु गोलकच्छायया भवेत्॥
अन्योन्ययोस्तयोरेव व्यापयोरेव कारणात्॥
व्यासमोचौ तु जायेते तत्रातः पूर्व्वपश्चिमौ॥
तत्र पुण्यफलाङ्गानि क्रतौ राहोस्तु विष्णुना॥"
इत्यादौ वह्निपुराणे गणभेदनामाध्यायः॥*॥

अथ भचक्रभ्रमणव्यवस्थामाह।

"निरक्षदेशे क्षितिमण्डलोपगौ
ध्रुवौ नरः पश्यति दक्षिणोत्तरौ।
तदाश्रितं खे जलयन्त्रवत् सदा
भ्रमद्भचक्रं निजमस्तकोपरि॥
उदग्दिशं याति यथा यथा नर-
स्तथा तथा खान्नतमुन्नमण्डलम्।
उदग्ध्रुवं पश्यति चोन्नतं क्षिते-
स्तदन्तरे योजनजाः पलांशकाः॥
योजनसंख्या भांशे३६०गुंणिता
कुपरिधिक्षुताष्टहृ० भवन्त्यंशाः।
भूमौ कक्षायां वा भागेभ्यो
योजनानि च यस्तम्॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः॥
(भानां नक्षत्राणां चक्रमितिविग्रहे नक्षत्रचक्रम्। नक्षत्रसमूहश्च॥)

भञ्ज, इक् भासि। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) इक् भञ्जयति। भासि दीप्तौ। इति दुर्गादासः॥

भञ्ज, क पाके। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) क भाजयति। विश्राणने इति प्राचः। विश्राणनं दानम्। इति दुर्गादासः॥

भञ्ज, ञ औ भागसेवयोः। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-अनिट्।) ञ विभञ्जति विभञ्जते धनं भ्राता। औ अभाक्षीत् क्षत्रं साधुः। इति दुर्गादासः॥

भञ्जन [तृ] त्रि, (भञ्जति विभञ्जतीति णा। भञ्ज+ल्युः। ग्रुचादेशः।) भागकर्त्ता। सेवाकर्त्ता। इति भञ्जधातोः कर्त्तरि ल्युलप्रत्ययेन निष्पन्नम्॥

भञ्जनं, क्ली, (भञ्ज+भावे ल्युट्।) भागः। सेवा। इति भञ्जधातोर्भावे अनट्प्रत्ययेन निष्पन्नम्।

"दाराक्षे ये भञ्जनसङ्गाया:
पुत्राक्षे ये तद्भनकाया:।
धनमपि तद्वद्दरिभञ्जनार्थं
नो चेदेतत् सर्व्वं व्यर्थम्॥"
इति मोहमुद्गरः॥

भञ्जमानः, त्रि, (भञ्जते फलमनुबध्नातीति। भञ्ज+"ताच्छील्यवयोवचनशक्तिषु चानश्।" १।२।१२६। इति आनश्। शानच् वा।) न्याय्यम्। न्यायागतन्यायादिः। इत्यमरः। २।८।२४॥ भागकर्त्ता। सेवाकर्त्ता। इति भञ्जधातोः कर्त्तरि शानप्रत्ययेन निष्पन्नम्॥ (सात्वतनृपस्य पुत्रभेदः। यथा, भागवते।९।२४।६।

"पुरुद्वोत्वक्षणो: पुत्रस्त्रय्यारुणस्त्रयः सात्वतस्सुतः।
भजमानो भजिर्दिव्यो देवावृधोऽन्धकः॥")

भञ्जकः, त्रि, (भञ्ज+ण्वुल्।) भञ्जनकर्त्ता। भनक्ति यः इत्यर्थे भनृजधातोः कर्त्तरि ण्वुलप्रत्ययेन निष्पन्नः॥

भञ्जन्, त्रि, वर्त्तमानभञ्जनाश्रयः। इति भनृजधातोः कर्त्तरि शतृप्रत्ययेन निष्पन्नम्॥

भञ्जनं, क्ली, मोटनम्। इति भनृजधातोर्भावे अनट्प्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते। १२।५६।६२।

"यन्त्राणि विविधान्येव क्रियास्तेषाञ्च वर्जिता:।
अवमर्दः प्रतीघातः केतनानाञ्च भञ्जनम्॥")

भञ्जनकः, पुं, (भनक्ति आमर्दयतीति। भञ्ज+ल्युः। ततः स्वार्थे संज्ञायां वा कन्।) सुखरोगविशेषः। तस्य निदानादि यथा,—

"वक्त्रं वक्त्रं भवेद्यस्य दन्तभङ्गश्च जायते।
कफवातक्षतो व्याधिः स भञ्जनकसंज्ञितः॥"
इति माधवकरः॥

भञ्जरः, पुं, (भनक्तीति। भञ्ज+बाहुलकात् अरप्रत्ययः।) देवकुलोद्भूततरुः। तत्पर्य्यायः। काष्ठिमः २। इति त्रिकाण्डशेषः॥

भञ्जा, स्त्री, (भनक्ति भयादिकमिति। भञ्ज+अच्। टाप्।) अन्नपूर्णा। यथा,—

"भीतिहा भयहन्त्री च भावनाबन्धवर्द्धिनी।
भीमाङ्गवासिनी भञ्जा भित्तिसंवित्तिवर्द्धिनी॥"
इति रुद्रयामले सप्तविंशारहस्यम्॥

भट, भृतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) भृतिरिह पोषणम्। कर्म्मण्यल्यामिति गोविन्दभट्टः। भटति भृत्यं स्वामी। इति दुर्गादासः॥

भट म भाषणे। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट् घटादिः।) म भटयति। भाषणं कथनम्। इति दुर्गादासः॥

भटः, पुं, (भज्यते भियते इति। यद्वा भटतीति। भट+अच्।) योद्धा। इत्यमरः। २।८।६१॥ (यथा, भागवते।८।१०।६।

"उद्धै: केचिदिभै: केचिदपरे युयुधुः खरैः।
केचिन्नौरसखैर्भटैरौपिभर्हरिभिर्भटाः॥"
म्लेच्छभेदः। इति हेमचन्द्रः॥ वीरः। (यथा, नैषधे।१।१३२।

"पदे पदे सन्ति भटा रणोद्भटा
न तेषु हिंसारस एव पूर्य्यते।
धिगीदृशं क्ष्मेति नृपते! कुविक्रमं
क्षमापराधे यः क्षमते पतत्रिणि॥")
पामरविशेषः। इति मेदिनी। टे, २४॥ रजनीचरः। इति शब्दरत्नावली॥ वर्णसङ्करविशेषः। यथा,

"वर्द्धकाराङ्गटो जातो माटिक्यां वरवाहकः॥"
इति पराशरपद्धतिः॥

भटा, स्त्री, (भट+टाप्।) इक्ष्वाकुस्त्री। इति रत्नमाला। राखालशूसा इति भाषा॥

भटित्रं, क्ली, (भटति भज्यते देति। भट्+इत्र।) मूलपत्रमांसादि। इत्यमरः। २।६।४५॥ कावाव इति पा स्त्रभाषा॥

भंट्टः, पुं, (भटतीति। भट्+बाहुलकात् तन्।) जातिविशेषः। भाट इति भाषा। तस्योत्पत्तिर्यथा,—

"वैश्यायां शूद्रवीर्य्येण पुमानेको बभूव ह।
स भट्टो वावदूकश्च सर्व्वेषां स्तुतिपाठकः॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः॥

अपि च।

"क्षत्रियाद्विप्रकन्यायां भट्टो जातोऽनुवाचकः॥"
इति युधिष्ठिरपरशुरामसंवादे जातिसङ्करलक्षणम्॥ शिविरान्तिके राज्ञा तस्य वासो देयः। यथा,

"ब्राह्मणं क्षत्रियं वैश्यं सच्छूद्रं गणकं शुभम्।
भट्टं वैद्यं पुण्यकारं स्थापयेत् शिविरान्तिके॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०१ अः॥

भट्टाचार्य्यः, पुं, (भट्टः स्तुतात्मभट्टः। आचार्य्य, उदयनाचार्य्यः तौ तुल्यतया तत्सताभिज्ञत्वेना-

स्यस्येति। अच्।) तुलातभङ्गमतं न्यायग्राह्यम् उदयनाचार्यमतं न्यायग्राह्यम् एतदुभयग्राह्यवेत्ता। एतदुभयमतं जानाति यः इत्यर्थे ठ्येकादिति कारकात् कर्त्तरि अणिता ण्यप्रत्ययेन निष्पन्नः॥

भट्टारः, त्रि, (भटतीति। भट्+क्विप्। भट् चासौ तारश्चेति कर्म्मधारयः। दृष्टोदरादित्वात् साधुः। यद्वा भर्त्तृ स्वामित्वं ऋच्छतीति। अच्।) पूज्यः। इति त्रिकाण्डशेषः॥ (यथा, राजतरङ्गिण्याम्। ७। ८६७।

"नोगसिङ्गारभट्टारप्रभृत्तकलसादयः।
बद्धाय हर्षदेवेन कारागारं प्रवेशिताः॥")

भट्टारकः, पुं, (भट्टार। संज्ञायां कन्।) नाट्योक्तौ राजा। इत्यमरः। १।७।१३॥ देवः। तपोधनः। इति मेदिनी। के, २५०॥ पूज्ये, त्रि। इति जटाधरः॥ (यथा, राजतरङ्गिण्याम्। ६।२४०।

"प्रविश्येषु ततः कोपात् पुरं शुभधरादिषु।
भट्टारकामठेदिह्वा भूयः पुत्तं यसर्ज्जयत्॥")

भट्टारकवारः, पुं, (भट्टारः संज्ञायां कन्। भट्टारकः सूर्य्यः तस्य वारः।) रविवारः। यथा,—

"सखे! खायुनिर्म्मितपाशास्तदद्य भट्टारकवारे कथमेतान् दस्तेः खृजामि॥" इति हितोपदेशे १ परिच्छेदे स्वर्गं प्रति जम्बूकवाक्यम्॥

भट्टिः, पुं, खनामख्यातरामकथाश्रयमहाकाव्यम्। तत्तु बलभीवास्तव्यश्रीस्वामिसुतभट्टमहात्राह्मणमहावैयाकरणेन कृतम्। इति जयमङ्गलकृता तट्टीका॥ एतत् काव्यं भर्त्तृहरिणा कृतमिति भरतमल्लिकेन लिखितम्॥

भट्टिनी, स्त्री, (भट्टृ स्वामित्वमस्या अस्तीति। भट्ट+इनिः+ङीप्।) नाट्योक्तौ अकृताभिषेका राजपत्नी। इत्यमरः। १। ७। १३॥ ब्राह्मणभार्य्या। इति मेदिनी। ने, ३१॥

भड इक् शिवे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्। इदित्।) शिवं कल्याणक्रिया देवेष्वेव। प्रतारणे प्रसिद्धोऽयम्। इक् भक्षयति प्रतारको सुग्धं धनदागाङ्गीकारेण। इति दुर्गादासः॥

भड इ ड वाचि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) परिभाषण इति गोविन्दभट्टः। परिहास इति चतुर्भुजः। इ भक्षयते ड भक्षते विड्गौ लोकः। इति दुर्गादासः॥

भड़ः, पुं, (भड़तीति। भड़ इड परिहासे परिभाषणे वा+अच्।) वर्णसङ्करजातिविशेषः। स तु वैटात् तीव्ररकन्यायां जातः। यथा,—

"वैटस्त्रीवरकन्यायां जनयामास वत्सरान्।
मालं मल्लं मातरञ्च भड़ं कोलञ्च कन्दरम्॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः॥

भण्डिलः, पुं, (भड़तीति। भड़ि+"सलिकल्यनिमहिभड़िभण्डीति।" उणा०। १। ५५। इति इलच्।) शैवकः। शूरः। इत्युणादिकोषः॥

भण्ड ऋ ग्रन्थे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सिक०-सेट्।) ऋ अवीभण्डत् अवभाण्डत्

स चेह वक्तव्यम्। श्रीजयदेवकृतहरिसेवं भणति परमरमणीयम्। इति दुर्गादासः॥

भणितं, त्रि, (भण+क्तः।) ग्रन्थितम्। कथितम्। यथा,—

"श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम्।"
इति गीतगोविन्दः॥

भणितिः, स्त्री, (भण्यते इति। भण+क्तिन्।) वाक्यम्। इति भूरिप्रयोगः चिकाण्डशेषश्च॥ (यथा, राजतरङ्गिण्याम्। ४। ५४।

"नियन्त्रिता यद्भणितिस्तदृग्योदीरणादियम्।
अतिप्रसङ्गभङ्गात्तन्नेयत्तायामिति पुनः॥")

भण्टाकी, स्त्री, (भण्यते भण्यते वा। भट् भर्त्सने भण्ग्रन्थे वा+"पिनाकादयश्च।" उणा०। ४। १५। इति आक। निपात्यते च। गौरादित्वात् ङीष्।) वार्त्ताकी। इत्यमरः। २। ४। ११४॥ दृष्टतृ। इति रत्नमाला॥ (दृष्टान्तकम्। तत्पर्य्यायो यथा,—

"दृष्टान्तकं स्त्री तु वार्त्ताकुर्भण्टाकी भाण्टकापि च॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भण्टुकः, पुं, (भड़तीति। भड़ि-उकन्।) श्लोनाकवृक्षः। इति रत्नमाला॥ कुत्रचित् भण्डुकोऽपि पाठः॥

भण्डः, पुं, (भण्डते इति। भड़ि प्रतारणे+अच्।) अश्लीलभाषी। भाँड़ इति भाषा। इति संक्षिप्तसारोणादिवृत्तिः॥ तत्पर्य्यायः। चाटुपटुः २। इति भूरिप्रयोगः॥

भण्डकः, पुं, (भण्ड+संज्ञायां कन्।) खञ्जनपक्षी। इति जटाधरः॥

भण्डनं, क्ली, (भड़+भावादौ ल्युट्।) खलीकारः। कवचम्। युद्धम्। इति मेदिनी। ने, १००॥

भण्डहासिनी, स्त्री, (भण्डेन खलीकारेण हसति या। हस्+णिनिः। ङीप्।) शणिका। इति शब्दरत्नावली॥

भण्डिः, स्त्री, (भड़ि+इन्।) वीचिः। इति हारावली॥

भण्डिका, स्त्री, मञ्जिष्ठा। इति शब्दरत्नावली॥

भण्डिरः, पुं, (भण्डिल+रलयोरैक्यम्।) शिरीषवृक्षः। यथा। भण्डिलो भण्डिरो नेमीति भरतधृतवाचस्पतिः॥

भण्डिलः, पुं, (भण्डते परिहसतीवेति भाषते इवेति वा। भड़ि+"सलिकल्यनिमहिभड़िभण्डीति।" उणा० १। ५५। इति इलच्।) शिरीषवृक्षः। इत्यमरः। २। ४। ६३॥ (तत्पर्य्यायो यथा,—

"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः।
शुकपुष्पः शुकतरुर्दृढपुष्पः शुकप्रियः॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भण्डिलः, त्रि, (भड़ि+इलच्।) शुभः। दूतः। इत्युणादिकोषः॥ श्लिष्टः। इति संक्षिप्तसारोणादिवृत्तिः॥

भण्डी, स्त्री, (भण्डते इति। भड़ि-इन्।) कृदिकारादिति पक्षे ङीष्।) मञ्जिष्ठा। इत्यमरः। २। ४। ६१॥ (पर्य्यायोऽस्या यथा,—

"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लयपि॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका।
भण्डीतकी गण्डीरी च मञ्जुषा वस्त्ररञ्जिनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

शिरीषवृक्षः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—

"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः।
शुकपुष्पः शुकतरुर्दृढपुष्पः शुकप्रियः॥"
श्वेतत्रिवृता। तत्पर्य्यायो यथा,—

"श्वेतत्रिवृता भण्डी स्यात् त्रिवृता त्रिपुटापि च।
सर्व्वानुभूतिः सरला निशोत्रा रेचनीति च॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भण्डीतकी, स्त्री, (भण्डी सती तकतीति। तक+अच्। गौरादित्वात् ङीष्।) मञ्जिष्ठा। इति भावप्रकाशः॥

भण्डीरः, पुं, (भण्डि+वाहुलकात् ईरन्।) समङ्गिलक्षुपः। तण्डुलीयशाकः। (यथा,—

"तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः।
भण्डीरस्तण्डुली वीजो विषघ्नश्चाल्पमारिषः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

शिरीषवृक्षः। इति राजनिर्घण्टः॥ (वटवृक्षः। यथा, रामायणे। ३। ७५। २४।

"मालतीकुन्दगुल्मेषु भण्डीरैर्निचुलैस्तथा।
अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः॥"
"भण्डीरो वटः।" इति तट्टीकायां रामानुजः।)

भण्डीरलतिका, स्त्री, (भण्डीर इव लतते इति। लतिः सौत्रो धातुः+अच्। स्वार्थे कन्। टाप् अत इत्वम्।) मञ्जिष्ठा। इति राजनिर्घण्टः॥

भण्डीरी, स्त्री, (भण्डीर। गौरादित्वात् ङीष्।) मञ्जिष्ठा। इत्यमरः॥

भण्डीलः, पुं, (भण्डीर। रलयोरैक्यम्।) मञ्जिष्ठा। इति शब्दरत्नावली॥

भण्डूकः, पुं, (भड़ि+ऊक्।) मत्स्यविशेषः। भाङ्गुर इति भाषा। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। दृष्यत्वम्। श्लेष्मकरत्वम्। गुरुत्वम्। विष्टम्भित्वम्। रक्तपित्तहरत्वञ्च। इति भावप्रकाशः॥ श्लोनाकवृक्षः। इति रत्नमाला॥

भद इक् शुभे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इक् भन्दयति शुभं कल्याणक्रिया। इति दुर्गादासः॥

भद इ ड हर्षे। प्रीतौ। शुभे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्-इदित्।) इ भन्दते। ड भन्दते पण्डितः सदा। इति दुर्गादासः॥

भद्न्तः, पुं, (भन्दते इति। भदि कल्याणे+"भन्दैर्नलोपश्च।" उणा० ३। १३०। इति झच्। नलोपश्च।) सौगतादिगुरुः। इति हेमचन्द्रः॥ मायादेवीसुतः। सुतेजः। पूजिते, त्रि। इत्युणा-

दिकोषः ॥ (भदन्तः प्रव्रजितः । इत्युणादौ । ३ । १३० । क्षत्रियाख्यायां उच्चलदत्तः । यथा, कथासरित्सागरे । ४६ । १०८ ।
"तत्रान्विष्य यथावत् तं भद्रदत्तमभिगम्य च ।
प्रतिपद्यापरो भद्रा त्रीणि वर्षाण्यशेषतः ॥")
भद्राकः, पुं, क्ली, (भन्दते इति । भदि + "पिता-कादयश्च ।" उणा० । ४ । १५ । इति आकः । नलोपश्च ।) मङ्गलम् । इत्युणादिकोषः ॥
भद्रं, क्ली, (भन्दते इति । भदि कल्याणे + "ऋजेन्द्राग्रवज्रविप्रकुम्रपुम्रक्षुरक्षुरभद्रोक्षेति ।" उणा० । २ । २८ । इति रन् । निपात्यते च ।) मङ्गलम् । (यथा, ऋग्वेदे । २ । २६ । २ ।
"यजस्व वीर ! प्रविहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये ॥"
यथा च कामन्दकीयनीतिसारे । १३ । १२ ।
"किरीटमणिचित्रेषु मूर्द्धसु चाजयारिषु ।
नाज्ञला विदिषां पादं पुरुषो भद्रमश्नुते ॥")
सुखम् । काञ्चनम् । इति मेदिनी । रे, ७१ ।
भद्रं, क्ली, क्लो, (भदि + रन् निपात्यते च ।) करणविशेषः । इति मेदिनी । रे, ७२ ।
तत्तु विष्टिभद्रात्वेन प्रसिद्धमनुभद्रम् । इति ज्योतिषम् ॥
भद्रः, पुं, (भन्दते इति भदि + रन् निपातितश्च ।) शिवः । खड्गरोटः । वृषभः । कदम्बकः । करिजातिविशेषः । इति मेदिनी । रे, ७० । नवशुक्लावलान्तर्गतजिनभेदः । रामशरः । सुमेरुः । इति हेमचन्द्रः ॥ चुल्लो । इति राजनिर्घण्टः ॥ (चन्दनम् । तत्पर्य्यायो यथा,—
"श्रीखण्डं चन्दनं गन्धो भद्रः श्रीखण्डपर्व्विकः ।
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
साध्यमौलिकायां पङ्क्तिविशेषः । यथा,—
विष्णुगणः खलपिलमूत इन्द्रो गुप्तः पाणी भद्रः ।
इति कृष्णाचार्य्यकारिका ॥ (वसुदेवस्य पुत्रभेदः । यथा, भागवते । ९ । २४ । ३७ ।
"सुभद्रो भद्रबाहुश्च दुर्म्मदो भद्र एव च ।
पौरवाख्यनया क्षेते भूतात्मा दादशाभवन् ॥"
सरोवरविशेषः । यथा, मत्स्यपुराणे ।१२२।३६।
"अरुणोदं मानसञ्च वितोदं भद्रसंज्ञितम् ।
तेषामुपरि चत्वारि सरांसि च वनानि च ॥"
तृतीयमन्वन्तरस्यान्तरे देवगणभेदे बहुवचनान्तोऽयम् । यथा, भागवते । ८ । १ । २४ ।
"वशिष्ठतनयाः सप्त ऋषयः प्रमदादयः ।
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्रजित् ॥"
स्वायम्भुवमन्वन्तरे विष्णोर्दक्षियज्ञगर्भजातसुषितनामकदेवगणभेदः । यथा, भागवते ।४।१।६-७।
"तां कामयानां भगवानुवाह यज्ञस्य पत्नीं सुषितां सुतोषमापन्नोऽजनयद्यादयात्मजान् ॥
तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः ।
इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट् ।"
पर्व्वतविशेषः । यथा, ब्रह्माण्डपुराणे । भुवनकोषे । ४० अध्याये ।
"अरुणः शिखिरौतश्च सको वेदूर्य्यपर्व्वतः ।
कपिलः पिङ्गलो भद्रः सुरसश्च महाचलः ॥"
एकादशद्वापरजातो महेश्वरस्य ऋषिमूर्त्तयवतार विशेषः । यथा, ब्रह्माण्डे । २० अध्याये ।
"एकादशद्वापरे तु व्यासस्तु चित्रदो यदा ।
तदाप्यहं भविष्यामि गङ्गादारे युगान्तिके ॥
भद्रो नाम महातेजास्तापि मम पुत्रकाः ।
भविष्यन्ति महात्मानो सुतपा वेदपारगाः ॥")
भद्रः, त्रि, (भन्दते इति । भदि कल्याणे रन् । निपात्यते च ।) श्रेष्ठः । साधुः । इति मेदिनी । रे, ७२ । (यथा, पञ्चतन्त्रे । १ । २६ ।
"भद्र! कराटक! अयं तावदस्मत्स्वामी पिङ्गलक उदकायहार्थं यमुनाकच्छमवतीर्य स्थितः ॥")
भद्रकं, क्ली, (भद्र + संज्ञायां स्वार्थे वा कन् ।) भद्रमुस्तकम् । इति रत्नमाला ॥ (देवदारुशब्दस्य विषयोऽभिहितः ॥) मनोज्ञे, त्रि । इति त्रिकाण्डशेषः ॥
भद्रकः, पुं, (भद्र + संज्ञायां कन् ।) देवदारुः । इति शब्दरत्नावली ॥
भद्रकराटः, पुं, (भद्रः कराटो यस्य ।) गोक्षुरः । इति राजनिर्घण्टः ॥
भद्रकाली, स्त्री, (भद्रा मङ्गलमयी चासौ काली चेति कर्म्मधारयः । यद्वा, भद्रं कल्याणं काङ्क्षयतीति । भद्र + कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । ङीप् ।) गन्धोली । कात्यायनी । इति मेदिनी । ले, १५८ । तस्या उत्पत्तिर्यथा,—
श्रीशौनक उवाच ।
"ब्रह्मन् त्वं कृपयाऽधुना ! भद्रकाली यथा पुरा ।
प्रादुर्भूता महाभागा महिषेण सदैव तु ।
महिषासुर एवासौ निद्रायां निशि पश्यति ।
खड्गं प्रदर्शयेत् वीरो दानवं घोरदर्शनम् ॥
महामाया भद्रकाली छित्त्वा खड्गेन काश्वरम् ।
पपौ तस्य च रक्तानि आदित्यस्यातिभीषणा ॥
ततः प्रातर्भययुतः स देवो महिषासुरः ।
तामेव पूजयामास सुचिरं सानुरक्तदा ॥
आराधिता तदा देवी महिषेणासुरेण वै ।
प्रादुर्भूता भद्रकाली मुनेः शोकप्रभिर्युता ॥
ततः प्रलभ्य महिषो महामायां जगन्मयीम् ।
उवाचेदं वचो मत्तमन्मिभैस्तिमुतोऽसुरः ॥
महिष उवाच ।
देवि! खड्गेन संछिद्य शोणितानि शिरो मम ।
त्वया भुक्तानि हृष्टानि मया खड्गे सुनिश्चितम् ॥
अवश्यं तत्त्वया कार्य्यं मया प्रार्थं प्रमाक्षतः ।
एतदुधिरपानं मे तत्रैकं देहि मे वरम् ॥
वध्यस्त्वाहं नान्यस्ति संशयः परमेश्वरि ! ।
ममापि तत्र नो दुःखं नियतिः केन लङ्घते ॥
किन्तु त्वयैव सहितः शम्भुराराधितः पुरा ।
मम पित्रा मदर्थेन तातः प्रत्यादहं ततः ॥
मयाप्याराधितः शम्भुः प्राग्भावेऽस्मत्तथा वरः ।
मन्वन्तरत्रयं यावदसुरं राज्यमुत्तमम् ।
अकण्टकं मया भुक्तमनुतापो न विद्यते ॥
कात्यायनेन मुनिना शप्तोऽहं शिष्यकारणात् ।
सौमन्तिनी विनाशं ते करिष्यति न संशयः ॥
पुरा सुरं तपस्यन्तं रौद्राख्यं नाम चोत्तमम् ।
मुनेः कात्यायनाख्यस्य शिष्यं हिमवदन्तिके ॥
दिव्यस्त्रीरूपमतुलं ज्ञात्वाहं कौतुकात्तदा ।
मया संमोहितो विप्रोऽजन्मूढस्तदा तपः ॥
न दूरात् संस्थितेनाहं मुनिना काश्यपेन वा ।
ज्ञात्वा मायां तदा शप्तः शिष्यार्थे क्रोधवह्निना ॥
यस्मात्त्वया मे शिष्योऽयं मोहितस्तपसश्च्युतः ।
ततस्त्वया स्त्रीरूपेण ततस्त्वां स्त्री हनिष्यति ॥
इति मां शप्तवान् पूर्व्वं मुनिः कात्यायनः पुरा ।
तस्य शापस्य कालोऽयमागतः वसुपक्षितः ॥
देवेन्द्रत्वं मया प्राप्तं सुखं त्रिभुवनं समम् ।
किञ्चिन्न श्रोष्यं तत्रास्ति वाञ्छनीयं हि यन्मया ॥
तस्मात्त्वां वै प्रपन्नोऽहं प्रार्थ्यं श्रेयं हि यन्मया ।
तद्देहि देवि दुर्गे ! त्वं भूयस्तुभ्यं नमो नमः ॥
श्रीदेव्युवाच ।
"प्रार्थनीयो वरो यस्ते तं दृष्ट्वा त्वं महासुर ! ।
दास्यामि ते वरं प्रार्थं संशयो नात्र विद्यते ॥"
महिष उवाच ।
"यज्ञभागमहं भोक्तुमिच्छामि त्वत्प्रसादतः ।
यथा यज्ञेषु सर्व्वेषु पूज्योऽहं स्यां तथा कुरु ॥
त्वत्पादसेवां न त्यक्ष्ये यावत् श्वास्यः प्रवर्त्तते ।
एवं वरद्वयं देहि यदि देयो वरो मम ॥"
श्रीदेव्युवाच ।
"यज्ञभागाः सुरेभ्यश्च कल्पिता वै पृथक् पृथक् ।
भागो न विद्यते चान्यो यद्दास्यामि तवासुरा ॥
किन्तु त्वयि मया युद्धे निहते महिषासुर ! ।
नैव त्यक्ष्यसि मत्पादं सतां नात्र संशयः ॥
मम प्रवर्त्तते पूजा यत्र यत्र च तत्र ते ।
पूज्यस्त्वञ्च तत्रैव कायोऽयं तव दानव ! ॥
इति श्रुत्वा वचस्तस्याः प्रत्यूचे महिषासुरः ।
वरं प्रार्थ्येह सुदितः प्रसन्नवदनस्तदा ॥
उवाचैवं ! भद्रकालि ! दुर्गे देवि ! नमोऽस्तु ते ।
प्रभूता शक्तयो देवि ! भवत्याः सकलात्मिकाः ॥
काभिस्ते शक्तिभिः पूज्यो यज्ञेऽहं परमेश्वरि ! ॥
ततः समर्पय यदि मे भवत्येह कृपा ततः ॥"
श्रीदेव्युवाच ।
"यानि नामानि चोक्तानि त्वयेह महिषासुर ! ।
तासु शक्तिषु संस्थः पूज्यो लोके भविष्यति ॥
उवाचैवेति या शक्तिर्भद्रकाली त्वहं पुनः ।
यथा शक्त्या त्वां हनिष्ये वा दुर्गेति प्रकीर्त्तिता ॥
एतासु शक्तिषु सदा पाहलयो दृश्या बुधैः ।
पूज्यो भविष्यसि त्वं वै देवानामपि दानव ॥
आदिष्टस्त्वं उवाचाम्बा त्वं जिघ्रतः पुरा ।
द्वितीयस्त्वं तु भवान् भद्रकाल्या मया हतः ॥
दुर्गारूपेणाधुना त्वां हनिष्यामि सबान्धवम् ।
किन्तु पूर्व्वं न यद्दीतस्त्वं मया पादयोस्तदे ॥
अधुना प्रार्थितवरो यद्दीतः पूर्व्वकायथोः ।
यद्दीतश्च पश्चात्त्वं यज्ञभागोपभुक्तये ॥"
इति कालिकापुराणे ५८ अध्यायः ॥
गङ्गायाः पश्चिमे तीरे यामविशेषश्च ॥

भद्रकाग्री, स्त्री, (भद्राय काग्रते इति। काग्र+ अच्। गौरादित्वात् ङीष्।) भद्रमुस्ता। इति राजनिर्घण्टः॥

भद्रकुम्भः, पुं, (भद्रस्य भद्राय वा कुम्भोऽथवा भद्रः कुम्भः।) पूर्णकुम्भः। इत्यमरः। २। ८। ३२॥

भद्रगन्धिका, स्त्री, (भद्रो गन्धोऽस्यास्तीति। ठन्। टाप्।) मुस्तकम्। इति रत्नमाला॥

भद्रङ्करः, त्रि, (भद्रं करोतीति। कृ+"वाहुलकात् खच्। मुम् च।) मङ्गलकारकः। तत्पर्य्यायः। क्षेमङ्करः २ क्षेमकारः ३ भद्रङ्करः ४ सुभङ्करः ५ अरिष्टतातिः ६ शिवतातिः ७ शुङ्करः ८। इति भूरिप्रयोगः॥

भद्रचूड़ः, पुं, (भद्रा चूड़ास्य।) लङ्गस्थायी। इति शब्दचन्द्रिका। लङ्गाखिल इति भाषा॥

भद्रजः, पुं, (भद्राय जायते इति। जन+ड।) इन्द्रयवः। इति राजनिर्घण्टः॥ (गुणादयोऽस्येन्द्रयवशब्दे ज्ञातव्याः॥)

भद्रतरङ्गी, स्त्री, (भद्रा तरङ्गीव।) कुलकट्वङ्गः। इति राजनिर्घण्टः॥ (तथास्या अन्यतरः पर्य्यायः।

"कुलको भद्रतरङ्गी दृढ़तृप्योऽतिकेसरः।
महा सहा कण्टकाढ्या नीलालिकुल-
सङ्कुला॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

भद्रतुरगं, क्ली, (भद्रा तुरगा यत्र।) जम्बूद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। यथा,—

"माल्यवन्नलधिमध्यवर्त्ति यत्तु भद्रतुरगं
जगुर्बुधाः।"

इति सिद्धान्तशिरोमणौ गोलाध्यायः॥

भद्रदन्तिका, स्त्री, (भद्रा दन्तिका।) दन्तीवृक्षभेदः। भद्रदन्ती इति ख्याता। तत्पर्य्यायः। केशरुहा २ भिषग्भद्रा ३ जयावहा ४ आवर्त्तकी ५ ज्वराङ्गी ६ जयाह्वा ७। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। रेचनत्वम्। क्षमिमूलकुष्ठामदोषतुन्दामयगाग्नित्वञ्च। इति राजनिर्घण्टः॥

भद्रदारु, क्ली, पुं, (भद्रं दारु।) देवदारु। इत्यमरभरतौ॥ सरलकाष्ठम्। इति रत्नमाला॥

भद्रदार्व्यादिकः, पुं, (भद्रदारु आदौ यस्य कप्।) औषधगणविशेषः। यथा। भद्रदारुकुष्ठहरिद्रावरत्रयमेषशृङ्गीबलातिबलानागबलाकच्छुरासल्लकीकुवेराक्षीवीरतरुसहचराभिधान्यवृत्तसादन्यैर-एलाभेदकालर्कैर्गुतावरीपुनर्नवावासुकवसिरकाक्षत्रकभार्गीकाप्यासोद्दालिकालीपत्तूरवदरवत्कोलकुलत्थप्रभृतीनि। इति सुश्रुतसूत्रस्थानस्य संशोधनसंग्रहनीयाध्यायः॥ *॥

अपिच।

"देवदारु हरिद्रे द्वे वरणः कुष्ठमेव च।
महानिम्बं नागबला श्यामला गरलोऽपरः॥
पाटला चात्मगुप्ता च शुण्ठी पाषाणभेदिका।
शृतावरी चार्कमूलं गुडूची गजिकारिका॥
पुनर्नवा च वास्तूकस्तथैवर्षभकागतम्।
गोक्षुरं शूरमूलञ्च कुशमूलं समांशिकम्॥
जलचतुरिंशद्गुणैर्भद्रदार्व्यादिको गणः॥"

इति शब्दचन्द्रिका॥ *॥

एतन्मध्ये चतुर्दशद्रव्याणि न प्राप्यानि॥

भद्रनामा, [न्] पुं, (भद्रं नाम यस्य।) काष्ठकुट्टपक्षी। इति त्रिकाण्डशेषः। काठ्ठोक्रा इति भाषा॥

भद्रनामिका, स्त्री, (भद्रं नामास्याः। कप्। टाप्। अत इत्वम्।) चायन्तीवृक्षः। इति रत्नमाला। वहला इति भाषा॥

भद्रनिधिः, स्त्री, (भद्रा निधयोऽत्र।) महादानविशेषः। यथा,—

ब्रह्म उवाच।

"विधानं ब्रूहि मे ब्रह्मन्! दानस्यास्य महानिधेः।
यथा देव! विशेषेण विष्णोरानन्दकारकम्॥"

ब्रह्मोवाच।

"पुण्यां तिथिं प्राप्य तु पौर्णमास्यां
सोपरागे ग्रहिसूर्ययोर्वा।
चतुर्युगादिव्ययनद्वये वा
प्रबोधने प्रस्वपनेऽथ विष्णोः॥
कुर्य्यादथौडुम्बरमेव कुम्भं
हिरण्यमानेन यथात्मशक्त्या।
तथा पिधानञ्च सुराजतं स्याद्-
हिरण्यभारेण तु पूरयेत्तत्॥
तदर्द्धतोऽर्द्धेन तदर्द्धतो वा
स्वशक्तितः स्वर्णपलैः शतेन।
तदर्द्धमध्येन तु वित्तशक्त्या
पलत्रयादूनमथो न कुर्य्यात्॥
तत्ताम्रभाण्डे कनकं निधेयं
सवज्रनीलोत्तमपद्मरागम्।
सुसूक्तवैदूर्य्यसविद्रुमञ्च
तदाजतं पात्रमधोमुखं स्यात्॥
एवन्तु तं भद्रनिधिं सुविद्वान्
कृत्वासने प्रावरणोपयुक्ते।
कुशोत्तरे दर्पणचामराढ्ये
सपादुकोपानहच्छत्रयुक्तम्॥
तं चौमवस्त्रोत्तमयुग्मयुक्तं
सम्पूजयेन्मन्त्रवरैरयेतम्।
आदौ तु पश्चान्नतमाप्य विष्णुं
संस्थाप्य संसारतरं समर्च्य।
तथेश्वरं पावकमेव हुत्वा
आमन्त्रयेद्भद्रनिधिं ततस्तम्॥
श्रीखण्डकर्पूरसकुङ्कुमेन
पद्माक्षरं नाम श्रियः प्रलिख्य।
नमस्तथोङ्कारयुतञ्च पात्रे
तदाजतेऽप्येवमथार्चयेत्ताम्॥
त्वया समस्तामरसिद्धयक्ष-
विद्याधरेन्द्रोरगकिन्नरेन्द्रैः।
गन्धर्वदिव्याप्सरदानवेन्द्रै-
र्युतं तृतं विश्वमिदं नमस्ते॥
समस्तसंसारकरी त्वमेव
विभोः सदानन्दमयी च माया।
समस्तकल्याणनिधिः समाधि-
र्हरिप्रिये! भद्रनिधे! नमस्ते॥
एवं संपूज्य विधिना ततो विप्रमथार्चयेत्।
किरीटाङ्गदनिष्काद्यैः कुण्डलाङ्गुलिभूषणैः॥
अलंकृत्य हरिं यद्वत् पीताम्बरधरं ततः।
पूजयेदच्युतं ध्यात्वा मन्त्रेणानेन भक्तिमान्॥
भूदेवोऽसि विभो! नित्यं नित्यानन्दमयो हरे!।
हर मे दुष्करं कृच्छ्रं कृपाकर! नमोऽस्तु ते॥
भूदेव! भगवान् भर्ग भवभङ्गकरेश्वर!।
भवभूतिकरो जिष्णो! प्रभविष्णो नमोऽस्तु ते॥
एवं पूज्य हृदि ध्यात्वा तं द्विजं ब्रह्मरूपिणम्।
ततो भद्रनिधिं दद्यान्मन्त्रेणानेन वासव!॥
स्वगोत्रोच्चारणेनादौ विप्रनाम तथात्मनः।
यवदर्भतिलैः सार्द्धसुदकं संपरित्यजेत्॥
पितृसन्तारणार्थाय नित्यानन्दविवृद्धये।
सर्व्वाघौघविघाताय विष्णोर्दानं मया कृतम्॥
तदनेन सरत्नेन धातुत्रययुतेन च।
सचौमाम्बरयुक्तेन सादपादुकेन च॥
सासनेन सच्छत्रेण चामरोपानहेन च।
सदानन्दनिधानेन प्रीयतां विष्णुरीश्वरः॥
एवमुच्चार्य्य तं दद्याद्विजाय हरिरूपिणे।
गोप्येन विधिना दद्याद्धेमसंख्यां न कीर्त्तयेत्॥
प्रकीर्त्तिते कोटियुगायुतं फलं
प्रगोपिते कल्पशतेन संचयः।
इतीयमज्ञो न तु कीर्त्तयेत् सुधी-
र्निधानमध्ये निहितञ्च यद्वसु॥
एवं कृते स्यान्मनुजः कृतात्मा
तपेन्न च स्वामरगं कदाचित्।
प्रयाति विष्णोः पदमक्षयं ततु
शिवात्मकानन्दमयं सदाख्यम्॥"

इत्याद्ये वह्निपुराणे भद्रनिधिदाननामाध्यायः॥

भद्रपदा, स्त्री, (भद्रं पदमस्याम्।) भाद्रपदा। पूर्व्वभाद्रपदोत्तरभाद्रपदानक्षत्रम्। इत्यमरटीकायां रायमुकुटः॥ (यथा, वृहत्संहितायाम्। ८। २।

"नगा तु पवनयाम्या
गलानिपेतामहात् त्रिभाल्लिखः।
गोवीथ्यामन्त्रिण्यः
पौष्णं हे चापि भद्रपदे॥")

भद्रपर्णी, स्त्री, (भद्राणि पर्णान्यस्याः। टाप्।) कटभराद्वृक्षः। इति शब्दमाला॥ (गुणादिकमस्याः कटभराशब्दे विवृतम्॥)

भद्रपर्णी, स्त्री, (भद्राणि पर्णान्यस्याः। गौरादित्वात् ङीष्।) गाम्भारी। इत्यमरः। २। ४। ३६॥ (अस्याः पर्य्यायो यथा,—

"गाम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका।
काश्मिरी काश्मरी हीरा काश्मर्य्यः पीत-
रोहिणी।
छत्रस्था मधुरसा महाकुसुमिकापि च॥")

प्रसारिणी। इति जटाधरः॥ (अस्याः पर्य्यायो यथा.—

"प्रसारणी राजबला भद्रपर्णी प्रतापनी।
सरणी सारणी भद्रा बला चापि कटम्भरा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"प्रसारणी च गन्धाली भद्रपर्णी कटम्भरा॥"
इति वैद्यकरत्नमालायाम्॥
यथा, शतपथब्राह्मणे।३।४।१।१६। इत्यस्य भाष्ये
"काश्मर्य्यो भद्रपर्णी प्रकृतौ प्रलाग्रवैकङ्कता-दीनामेच्छिकत्वादच नियमविधिः॥")

भद्रबलनः, पुं, (भद्रं महद्बलनं बलमस्य।) बलरामः। इति शब्दमाला॥

भद्रमल्लिका, स्त्री, (भद्रा मल्लिका।) गवाक्षी। इति शब्दमाला॥

भद्रसुङ्गः, पुं, (भद्रो सुङ्ग इति कर्म्मधारयः।) सुङ्गभेदः। रामशर इति शरपत इति च भाषा। तत्पर्य्यायः। शरः २ बाणः ३ तेजनः ४ इक्षुवेष्टनः ५। अथ सुङ्गस्य पर्य्यायः। सुङ्गः १ सुङ्गातकः २ बाणः ३ शूलदर्भः ४ सुमेधसः ५। एतद्योर्गुणाः।
"सुङ्गइयन्तु मधुरं तुवरं शिविरं तथा।
दाहदृष्णाविषपांसमूत्रवस्त्यक्षिरोगजित्॥
दोषत्रयहरं दृष्यं मेखलासूपयुज्यते॥"
इति भावप्रकाशः॥

भद्रसुस्कः, पुं, (भद्रो सुस्कः।) नागरसुस्कः। इत्यमरः।२।४।१६०॥ (तत्पर्य्यायो यथा,—
"मेघाख्यं सुस्कं सुस्का गाङ्गेयं भद्रसुस्कम्॥"
इति वैद्यकरत्नमालायाम्॥)

भद्रसुस्का, स्त्री, (भद्रा सुस्का।) नागरसुस्कः। तत्पर्य्यायः। वराही २ गुन्द्रा ३ ग्रन्थिः ४ भद्रकाण्डी ५ कणेरुः ६ क्रोड़ेष्टा ७ कुरुविन्दाख्या ८ सुगन्धिः ९ ग्रन्थिला १० हिमा ११ बल्या १२ राजकणेरुः १३ कच्छोत्या १४ सुस्का १५ अर्णोदः १६ वारिदः १७ अम्भोदः १८ मेघः १९ जीमूतः २० अब्दः २१ नीरदः २२ अभ्रम् २३ घनः २४ गाङ्गेयः २५। अस्या गुणाः। कषायत्वम्। तिक्तत्वम्। शीतत्वम्। पाचनत्वम्। पित्तज्वरकफनाशित्वम्। संग्राहित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"सुस्कं न स्त्रियां सुस्तं चिशु वारिदनामकः।
कुरुविन्दश्च संख्यातोऽपरः क्रोड़कणेरुकः॥
भद्रसुस्कश्च गुन्द्रा च तथा नागरसुस्कः।
सुस्कं कटु हिमं ग्राहि तिक्तं दीपनपाचनम्॥
कषायं कफपित्तासृड्ज्वरारुचिनुदृत्।
अगूपदेशे यज्जातं सुस्कं तत् प्रशस्यते॥
तत्रापि मुनिभिः प्रोक्तं वरं नागरसुस्कम्॥"
इति भावप्रकाशः॥

भद्रयवः, पुं, क्ली, (भद्रः शुभदो यवः।) इन्द्रयवम्। इत्यमरः।२।४।६०॥ (विवरणमस्य इन्द्रयवशब्दे ज्ञातव्यम्॥)

भद्ररेणुः, पुं, (भद्रा रेणवोऽस्य।) ऐरावतहस्ती। इति चिकाण्डशेषः॥

भद्रवत्, क्ली, (भद्रमस्त्यस्मिन्निति। मतुप् मस्य वः।) देवदारु। इति राजनिर्घण्टः॥

भद्रवती, स्त्री, (भद्रं विद्यतेऽस्याम्। भद्र+मतुप्। मस्य वः। ङीप्।) भद्रपर्णी। इति जटाधरः॥ (कटफलः। अस्य पर्य्यायो यथा,—
"कटफलः सोमवल्कश्च कैटर्यः कुम्भिकापि च।
श्रीपर्णी काकुसुदिका भद्रा भद्रवतीति च॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
कल्याणविशिष्टे, त्रि। यथा, महाभारते। ४। २४। १८।
"इमाश्च नः प्रियां वीर! वाचं भद्रवतीं शृणु॥"
श्रीकृष्णस्य नाम्नि तीर्थभेदजाता कन्या। यथा, हरिवंशे। १६०। १०-११।
"मित्रवाहुः सुनीथश्च नाम्नि जिला प्रजाः शृणु।
भद्रकालो भद्रविन्दः कन्या भद्रवती तथा॥"
मधोर्माता। यथा, हरिवंशे। ३६। ३।
"आसीन्मधुरसः पुत्रः पुरुद्वान् पुरुषोत्तमः।
मधुर्जज्ञेऽथ वैदर्भ्यां भद्रवत्यां कुरूद्वह!॥")

भद्रवर्म्मा, [न्] पुं, (भद्रेण दृयाति आत्मानमिति पिनष्टेः। दृ+मनिन्।) नवमल्लिका। इति शब्दचन्द्रिका॥ (विषयोऽस्य नवमल्लिकाशब्दे ज्ञातव्यः॥)

भद्रवला, स्त्री, (भद्रा बला।) लताविशेषः। गन्धभादालिया इति भाषा। तत्पर्य्यायः। सरणा २ प्रसारणी ३ कटम्भरा ४ राजबला ५। इत्यमरः। २। ४। १५३॥ अस्याः पर्य्यायान्तरं गुणाश्च प्रसारिणीशब्दे द्रष्टव्याः॥ बला। इति राजनिर्घण्टः॥

भद्रवल्किका, पुं, (भद्रा वल्किका।) गोपवल्ली। इति रत्नमाला। अनन्तमूल इति भाषा॥

भद्रवल्ली, स्त्री, (भद्रा चासौ वल्ली चेति कर्म्मधारयः।) मल्लिका। माधवीलता। इति राजनिर्घण्टः॥ लताविशेषः। मदनमाली इति हापरमाली इति च भाषा। तत्पर्य्यायः। भ्रातभीरुः २ भूमिमल्का ३ अरुपादिका ४। इति रत्नमाला॥

भद्रश्रेयं, क्ली, (भद्राय श्रीयते श्रयते इति। श्रि+कर्म्मणि घञ्।) चन्दनम्। इति रत्नमाला॥

भद्रश्रीः, पुं, (भद्रा श्रीरस्य।) चन्दनवृक्षः। इत्यमरः। २। ६। १२१॥

भद्रसोमा, स्त्री, (भद्रः सोम इवास्या द्रव इति। टाप्।) गङ्गा। इति शब्दमाला॥ (कुरुवर्षस्थनदीविशेषः। यथा, मार्कण्डेये। ५६। २३।
"तस्मिन् कुलाचलौ वर्षे तन्मध्ये च महानदी।
भद्रसोमा प्रयात्युर्व्वीं पुण्यामलजलौघिनी॥")

भद्रा, स्त्री, (भद्र+अजादित्वात् टाप्।) रात्रा। छाया। सोमनदी। तिथिभेदः। सा तु द्वितीया सप्तमी द्वादशी च॥ प्रसारिणी। (अस्याः पर्य्यायो यथा,—
"प्रसारिणी राजबला भद्रपर्णी प्रतापनी।
सरणी सारणी भद्रा बला चापि कटम्भरा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भद्रा

कटफलम्। अनन्ता। इति मेदिनी। रे, ७१॥ जीवन्ती। अपराजिता। नीली। बला। ग्रामी। वचा। दन्ती। हरिद्रा। श्वेतदूर्व्वा। काश्मरी। (पर्य्यायोऽस्या यथा,—
"श्रीपर्णी काश्मरी भद्रा गाम्भारी गोपभद्रिका।
कुसुदा च सदाभद्रा कटफला क्षुद्रशृन्तिका॥"
इति वैद्यकरत्नमालायाम्॥
चन्द्रसूरः। तत्पर्य्यायो यथा,—
"चन्द्रिका चर्म्महन्त्री च प्रमेहनकारिका।
नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
सारिवाविशेषः। गौः। इति राजनिर्घण्टः॥ काकोलुम्बरिका। इति रत्नमाला॥ (भद्राश्ववर्षस्थनदीभेदः। यथा, मार्कण्डेये। ५६। ७।
"प्रीता शुद्धावती भद्रा चक्रावर्त्तादिका-स्तथा॥")

गङ्गायाश्चित्रश्रोतोऽन्तर्गतश्रोतोविशेषः। तत्तु उत्तरे कुरुवर्षेयगङ्गा। इति पुराणं शब्दमाला च॥ बुद्धशक्तिविशेषः। तत्पर्य्यायः। तारा २ महाश्रीः ३ ओङ्कारा ४ खाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरात्मजा १२ खदूरवासिनी १३ वैश्या १४ नीलसरस्वती १५ ऋद्धिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१। इति चिकाण्डशेषः॥ छायागर्भजाता सूर्य्यकन्या। यथा,—
"यमश्च तु ततस्तस्यां जनयामास भास्करः।
शनैश्चरश्च भद्राश्च छायायाममितद्युतिः॥
तथा च तेजसा विष्णोस्तस्य चक्रमवर्त्तयत्।
तदप्रतिहते युद्धे दानवान्तकिकौर्द्धया।
तद्भगिनी सुखतो भद्रा नियुक्तैवं विगर्हिता॥"
इति वह्निपुराणे वैष्णवतानुकीर्त्तनम्॥
सुभद्रा। यथा,—
"आषाढ़स्य सिते पक्षे द्वितीया पुष्यसंयुता।
तस्यां रथे समारोप्य रामं मां भद्रया सह॥"
इति स्कान्दे भगवद्वाक्यम्॥ *॥
त्रिष्टिभद्रा यथा,—
"एकादश्यां चतुर्थ्यान्तु शेषार्द्धे शुक्लपक्षके।
अष्टमीपौर्णमास्योस्तु पूर्व्वार्द्धे त्रिष्टिसम्भवः॥
कृष्णपक्षे तृतीयाया दशम्याश्च पराह्णतः।
सप्तम्याश्च चतुर्दश्याः पूर्व्वार्द्धे त्रिष्टिरीरिता॥
विहाय विवरोद्राणि त्रिष्टिं सर्व्वत्र वर्जयेत्।
त्रिष्टिशेषे चिदक्षे हि पुक्षे कार्य्यं जयावहम्॥"
कर्म्मप्रकाशे तस्या अङ्गविशेषो यथा,—
"नाभ्यस्तु पञ्चवदनं गलकस्तस्यैका
वक्षो दशैकसहिता नियतं चतस्रः।
नाभिः कटिः षड़थ पुच्छलता च तिस्रो
विष्टेर्द्वयं निगदितोऽङ्गविभाग एवः॥"
अङ्गविशेषे कार्य्यध्वंसादिफलम् यथा,—
"सुखे कार्य्यध्वंसो भवति मरुयश्चाथ गलके
धनस्थानिर्वंशस्तथ कटितटेर्वह्निविजयः।

कलिनांभोदेशे विजयमथ पुष्के च जगदुः
शरीरे भद्रायाः श्रुतमिति फलं सर्व्वसुनयः ॥"
मनुवसुमुनितिथियुगदशशिवगुणसंख्यासु निधिषु पूर्व्वाख्यम्। आयाति विधिरेषा दृष्टे शुभदा पुरस्त्रशुभा ॥ चतुर्दश्यादिषु पूर्व्वायाद्यादिसुखं भवनौत्यर्थः। इति ज्योतिस्तत्त्वम् ॥

भद्राकरणं, क्ली, (भद्र+डाच्। स+ल्युट्।) सुखनम्। इति हेमचन्द्रः ॥

भद्रात्मजः, पुं, (भद्रः हितकर आत्मज इव रक्षाकरत्वात्।) खड्गः। इति त्रिकाण्डशेषः ॥

भद्रारकः पुं, अष्टादशचुलुङ्कीपान्तर्गतद्वीपविशेषः। इति शब्दमाला ॥

भद्रालपत्रिका, स्त्री, (भद्राय अलति पर्य्याप्नोतीति। अल्+अच्। भद्रालं पत्रं यस्याः। कप्। टाप्। अत इत्त्वम्।) गन्धाली। इति शब्दमाला ॥

भद्राली, स्त्री, (भद्र+अल्+अच्। भद्राल+गौरादित्वात् ङीष्।) गन्धाली। इति शब्दमाला ॥

भद्रावर्त्तः, स्त्री, (भद्रमस्या अस्तीति। मतुप्। मस्य वः। संज्ञायां पूर्व्वपदस्य दीर्घः।) कट्फलवृक्षः। इति राजनिर्घण्टः ॥

भद्राश्रयः, पुं, (भद्रस्याश्रयः।) चन्दनम्। इति शब्दचन्द्रिका ॥

भद्राश्वं, क्ली, (भद्रा अश्वा अत्र।) सुमेरु जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः ॥ तद्विवरणं यथा। माल्यवतः पूर्व्वेणार्श्वे पूर्व्वगश्चिका एकयोजनसहस्राणि मानतश्च च भद्राश्वा नाम जनपदाः भद्रशालवनश्च तत्र व्यवस्थितं कालाभ्रवृत्ताः पुरुषाः श्वेताः पद्मवर्णिन्यः स्त्रियः कुसुदवर्णाः दशवर्षसहस्राणि च तेषामायुस्तत्र च पञ्च कुलपर्व्वताः तद्यथा, श्वेतवर्णः मालाख्यको वरुणस्तः त्रिपर्णो नीलश्चेति तद्विनिर्गता वङ्क्षो नद्यस्तदभःस्थितानां देशानां तान्येव नामानि ते च देशाः एताः नदीः पिबन्ति। तद्यथा, सीता सुवाहिनी हंसवती कावेरी सरसा शाखावती इन्द्रनदी अङ्गारवाहिनी हरितोया सोमावर्णा शतहृदा वनमाला वसुमती हंसा पर्णा पन्नगङ्गा धनुश्चुती मणिवप्रा सुरक्तभागा विलासिनी लवणोदा पुण्योदा नागवती शिवा शैवालिनी मणिशटा क्षीरोदा वरुणावती विपुलपदी महानदी हिरण्यस्तम्बवाहा सुरावती वामोदा पताकाश्चेति महानद्यः एताश्च गङ्गासमाः कीर्त्तिताः आजन्मान्तं पापं विनाशयन्ति चुलुनद्यश्च कोटिगुणास्ताश्च वर्षे पिबन्ति ते दशवर्षसहस्रायुषः रुद्रोमाभक्ता इति। इति वाराहे भुवनकोषे रुद्रगीता ॥ अपि च। तथैवेलावृतमपरेण पूर्व्वेण च माल्यवन्तमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः, केतुमालभद्राश्वयोः सीमानं विदधाते। मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिग्गमवष्टम्भगिरय उपकल्पाः। चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्व्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपवितताः शतयोजनपरिणाहाः। ह्रदाश्चत्वारः पयोमधिक्षुरसन्मदजलाः यदुपस्पर्शिन उपदेवगणा योगैश्वर्य्याणि स्वाभाविकानि भरतर्षभ! धारयन्ति। देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति। येष्वमरपरिवृढाः सहसुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति। मन्दरोन्मूलैकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यष्टतकल्पानि निपतन्ति। तेषां विशीर्य्यमाणानां अतिमधुरसुरभिसुगन्धिबहलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणेलावृतमुपप्लावयति। यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवसुगन्धिवातो दशयोजनं समन्तादनुवासयति। एवं जम्बुफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामभिकायनिभानां रसेन जम्बूनदी नाम नदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्पन्दति। तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वायुसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति यदुहवाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयन्ति। यस्तु महाकदम्बः सुपार्श्वपार्श्वनिरूढस्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति यो ह्युपयुञ्जानानां मुखनिर्वासितो वायुः समन्तात् शतयोजनमनुवासयति। एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यम्बरशय्यासनाभरणादयः सर्व्व एव कामदुघा नदाः कुमुदाग्रात् पतन्तस्सप्तोत्तरेणेलावृतमुपयोजयन्ति यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयापमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति यावज्जीवं सुखनिरतिशयमेव कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्गरुचकनिषधसितिवासकपिलशङ्खवैदूर्य्यजारुधिहंसऋषभनागकालञ्जरनीरदादयो गिरयो मेरोः कर्णिकाया इव केशरभूता मूलदेशे परित उपकल्पाः। जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रसुदगायतौ द्विसहस्रमुत्तुङ्गौ भवतः एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृङ्गमकरौ अष्टाभिरेतैः परिष्टतोऽग्निरिव परितश्चकास्ते काञ्चनगिरिः। मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपकल्पां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति तामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽन्तरुपकल्पाः। इति श्रीभागवते ५ स्कन्धे भुवनकोषवर्णने १६ अध्यायः ॥

भद्रासनं, क्ली, (भद्राय लोकहिताय आसनम्।) कृपासनम्। इत्यमरः। २। ८। ३१ ॥ (योगिनामासनविशेषः। यथा, तन्त्रसारे।
"सीवन्याः पार्श्वयोर्न्यस्तदृगुल्फयुग्मं सुनिश्चलम्।
भद्रासनं समुद्दिष्टं योगिभिः परिकल्पितम् ॥")

भद्रेश्वरः, पुं, (भद्रः शुभदत्वात्सावीश्वरश्चेति भद्रात्मकः मङ्गलमय ईश्वरो वेति।) कल्पग्रामस्थशिवः। यथा,—
"उत्तिष्ठ कान्त! गच्छावः कल्पग्रामं सुशोभनम्।
तया सार्द्धं जगामाथ कल्पग्रामं वसुन्धरे! ॥
भद्रेश्वरनिमित्तं हि द्रव्यञ्च कथितं शुभम्।
नित्यञ्च सुक्षते यत्र पाचद्रव्यं समर्पितम् ॥
दृष्ट्वा भद्रेश्वरं देवं चक्रतीर्थफलं लभेत्।
कल्पग्रामाच्छतगुणं चक्रतीर्थं वसुन्धरे! ॥"
इति वाराहे मथुरामाहात्म्ये चक्रतीर्थप्रभावो नामाध्यायः ॥

शिवप्राप्त्यर्थं दुर्गाराधितहिमालयस्थपार्थिवशिवलिङ्गम्। यथा,—
"तवार्थाय गृहीष्यामि महघौन् हिमवद्गृहे।
यच्छेह रुद्रमीहन्त्या त्वमयश्चेश्वरः सुतः।
असौ भद्रेश्वरेत्येवं ख्याते लोके भविष्यति।
देवदानवगन्धर्व्वा यक्षकिम्पुरुषोरगाः ॥
पूजयिष्यन्ति सततं मानवाश्च सुमेधसः ॥
इति वामनपुराणे ३६ अध्याये उमां प्रति शिववाक्यम् ॥ गङ्गायाः पश्चिमतीरे गरिष्ठाख्यामस्योत्तरे पाषाणमयशिवलिङ्गविशेषो यामविशेषश्च ॥

भद्रेला, स्त्री, (भद्रा एला।) स्थूलेला। इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
"एला स्थूला च बहुला एलीका त्रिपुटापि च।
भद्रेला हरेला च चन्द्रबाला च निष्कुटिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भद्रोदनी, स्त्री, (भद्रं उदनिति अनयेति। उद्+अन्+अच्। गौरादित्वात् ङीष्।) वला। बागबला। इति राजनिर्घण्टः ॥
(भन्ज, भो ध भौ भोटने। इति कविकल्पद्रुमः ॥ रुधा०-पर०-सक०-अनिट्। ध, भन्क्ति ॥)

भन्दिलं, क्ली, (भदि+इलच्।) शुभ। इत्यादिकोषः ॥ कम्यः। दूतः। इति संक्षिप्तसारोणादिवृत्तिः ॥

भनुभुकः, पुं, भारतवर्षान्तर्गतदेशविशेषः। यथा,
"सचाश्चत्वार एवापि यामार्या भनुभुकाः
स्मृताः ॥"
इति स्कन्दे कुमारिकाखण्डे वक्त्रेश्वरमाहात्म्यनामाध्यायः ॥

भपञ्जरं, क्ली, (भानां नक्षत्राणां पञ्जरम्।) नक्षत्रचक्रम्। इति सिद्धान्तशिरोमणिः ॥

भपतिः, पुं, (भानां नक्षत्राणां पतिः ।) चन्द्रः । इति हेमचन्द्रः ॥

भस्मः, पुं. (भस्म इत्यव्यक्तशब्देन भातीति । भा + कः ।) मक्षिका । इति शब्दरत्नावली ॥ धूमः । इति त्रिकाण्डशेषः ॥

भस्मरालिका, स्त्री, (भस्मित्यव्यक्तशब्दस्य भरं बाहुल्यमालाति गृह्णातीति । आ + ला + कः । गौरादित्वात् ङीष् । ततः स्वार्थे कन् टाप् पूर्वस्य ह्रस्वत्वम् ।) भङ्गारी । इति त्रिकाण्डशेषः ॥ डाँग्र इति भाषा ॥

भस्मराली, स्त्री, (भस्मित्यव्यक्तशब्दस्य भरमालातीति । आ + ला + कः । गौरादित्वात् ङीष् ।) मक्षिका । इति त्रिकाण्डशेषः ॥

भस्मासुरः, पुं. भगवद्राजविशेषः । तत्पर्य्यायः । ऐणिकः २ । इति हेमचन्द्रः ॥

भयं, क्ली, (भी + "एरच् ।" ३ । ३ । ५६ । इत्यत्र "भयादीनामुपसंख्यानं नपुंसके क्लादिनिवृत्त्यर्थम् ।" इति वार्त्तिकोक्त्या अपादाने अच् ।) विभेत्यस्मात् ततः । इति भरतः ॥ अस्य लक्षणं यथा,

"रौद्रश्रुत्वा तु जनितं चित्तवैक्लव्यदं भयम् ॥"

इति साहित्यदर्पणे ३ परिच्छेदः ।

अपि च । रागविषयस्य विनाशके समुपस्थिते तन्निवारणासामर्थ्यमात्मनो मन्यमानस्य दैन्यात्मकचित्तवृत्तिविशेषो भयम् । इति भगवद्गीतायां २ अध्याये मधुसूदनसरस्वती ॥ अन्यच्च । परतः स्वानिष्टसम्भावना भयम् । यथा । आत्माहिंसीति आत्माधीनत्वेन स्वीयमरणं सम्भावयति । इति २ व्युत्पत्तिवादे गदाधरभट्टाचार्य्यः । तत्पर्य्यायः । दरः २ त्रासः ३ भीतिः ४ भीः ५ साध्वसम् ६ । इत्यमरः । १ । ७ । २१ ॥ उद्वासः ७ साधुसंभवः ८ प्रतिभयम् ९ । इति शब्दरत्नावली ॥ आतङ्कः १० आशङ्का ११ भिया १२ । इति हेमचन्द्रः ॥ आगते भये अभीतवत् स्थातव्यम् । यथा,—

"तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।
उत्पन्नं तु भयं तीव्रं स्थातव्यं तैरभीतवत् ॥"

इति गारुडे नीतिसारे ११५ अध्यायः ॥ कुलकपुष्पम् । घोरे, त्रि । इति मेदिनी । ये, ११ । पुं रोगः । इति राजनिर्घण्टः ॥ (निर्ऋतेः पुत्रभेदः । यथा, महाभारते । १ । ६६ । ५५-५६ ।

"तस्यापि निर्ऋतिर्भार्य्या नैर्ऋता येन राक्षसाः ।
घोरास्तस्याश्च पुत्राः पापकर्म्मरताः सदा ॥
भयो महाभयश्चैव म्रत्युर्भूतान्तकस्तथा ।
न तस्य भार्य्या पुत्रो वा कश्चिदस्यन्तको हि सः ॥")

द्रोणस्य वसोरभिमतिनामिकायां पत्न्यां जातः पुत्रभेदः । यथा, भागवते । ६ । ६ । १२ ।

"द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥"

यवनराजविशेषः । यथा, भागवते ।३।२७।२३।

"ततो विदूतसङ्कल्पा कन्यका यवनेश्वरम् ।
मयोपदिष्टमासाद्य वरं नाथा भयं प्रतिम् ॥")

भयङ्करं, त्रि, (भयं करोतीति । भय + कृ + "मेघर्त्तिभयेषु कृञः ।" ३ । २ । ४३ । इति खच् । मुमच् ।) भयजनकम् । तत्पर्य्यायः । भैरवम् २ दारुणम् ३ भीषणम् ४ भीष्मम् ५ घोरम् ६ भीमम् ७ भयानकम् ८ प्रतिभयम् ९ । इत्यमरः । १ । ७ । २० ॥ भयावहम् १० । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेयपुराणे । १४ । ८६ ।

"एकैर्भयङ्करैः रूपं नित्यमस्योपलभ्यते ॥")

पुं, कुक्कुरपक्षी । इति राजनिर्घण्टः ॥

भयडिण्डिमः, पुं, (भयाय शत्रुभयजननाय डिण्डिमः ।) संग्रामपटहः । इति पुराणम् ॥

भयद्रुतः, त्रि, (द्रु + कर्त्तरि क्तः । भयेन द्रुतः ।) भीत्वा पलायितः । तत्पर्य्यायः । कान्दिशीकः २ । इत्यमरः । ३ । १ । ४२ ॥

भयनाशिनी, स्त्री, (भयं रोगभयं नाशयतीति । भय + नश् + णिच् + णिनिः ।) त्रायमाणा लता । इति राजनिर्घण्टः ॥ भयनाशकर्त्री च ॥

भयभीतः, त्रि, (भयेन भीतः ।) त्रासेनातङ्कितः । यथा, वह्निपुराणे शिविराजोपाख्याने ।

"एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ।
ततो गुरुतरो धर्म्मः कश्चिदन्योऽस्ति खेचर ! ॥

भयभ्रष्टः, त्रि, (भयेन भ्रष्टः ।) भयद्रुतः । इति जटाधरः ॥

भयानकः, पुं, (बिभेत्यस्मादिति । भी + "आनकः प्रीढ़भिः ।" उणा० । ३ । ८२ । इति आनकः ।) व्याघ्रः । राहुः । रसविशेषः । इति मेदिनी । के, २०५ ॥ स तु शृङ्गारादष्टरसान्तर्गतषष्ठरसः । तस्य लक्षणं यथा,—

"भयानको भयस्थायिभावः कालाधिदैवतः ।
स्त्री नीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥
अनुभावोऽत्र वैवर्ण्यं गद्गदस्वरभाषणम् ।
प्रलयस्वेदरोमाञ्चकम्पादिप्रेक्षणादयः ॥
जुगुप्सावेगसंमोहसंत्रासग्लानिदीनताः ।
शङ्कापस्मारसंभ्रान्तिदृत्याद्या व्यभिचारिणः ॥"

उदाहरणं यथा,—

"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ॥"

इति साहित्यदर्पणे ३ परिच्छेदः ॥

भयानकः, त्रि, (भी + आनकः ।) भयङ्करः । इत्यमरः । १ । ७ । २० ॥ (यथा, भगवद्गीतायाम् । ११ । २७ ।

"वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥"

भयापहः, पुं, (भयं अपहन्तीति । हन् + "अन्येभ्योऽपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) राजा । इति त्रिकाण्डशेषः ॥ (भयनाशके, त्रि ।)

भयावहः, त्रि, (आवहतीति । आ + वह + अच् । भयस्यावहः इति ।) भयङ्करः । इति हेमचन्द्रः ॥ (तथा, भगवद्गीतायाम् । ३ । ३५ ।

"श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् ।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः ॥")

भरः, पुं, (भरतीति । भृ + पचाद्यच् ।) अतिशयः । इत्यमरः । १ । २ । ६८ ॥ (यथा, गीतगोविन्दे । ४१ ।

"पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ॥"

भारः । यथा, भागवते । १ । ३ । २३ ।

"एकोनविंशे विंशतिमे वृष्णिषु प्राप्य नामनी ।
रामकृष्णाविति भुवो भगवानहरद्भरम् ॥")

भरणकर्त्तरि, त्रि । (यथा, ऋग्वेदे ।१०।१००।२।

"भराय सु भरत भागमृत्वियं
प्र वायवे शुचिपे क्रन्ददिष्टये ॥"

"भराय सर्व्वेषां पोषकाय ।" इति तद्भाष्ये सायणः ॥ संग्रामः । यथा, ऋग्वेदे ।४।३८।५।

"उत स्मैनं वस्त्रमथिं न तायु-
मनुक्रोशन्ति क्षितयो भरेषु ॥"

"भरेषु संग्रामेषु ।" इति तद्भाष्ये सायणः ॥)

भरटः, पुं, (बिभर्त्तीति । भृ + "जनिदाच्युषृतमदिग्रमिनमिभृञ्भ्य इत्वन्तिति ।" उणा० । ४ । १०४ । इति अटच् ।) कुम्भकारः । इत्युणादिकोषः ॥

भरणं, क्ली, (भियतेऽनेनेति । भृ + करणे ल्युट् ।) वेतनम् । भृतिः । इति मेदिनी । णे, ६८ ॥ (भृ + भावे ल्युट् ।) पोषणम् । यथा,—

"भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।
नरकं पीड़ने चास्य तस्मादृत्यैर्न तं भरेत् ॥"

इति दायभागः ॥

भरतः, पुं, (भरतीति । भृ + क्तु ।) भरणीनक्षत्रम् । इति शब्दरत्नावली ॥

भरणी, स्त्री, (भरण + गौरादित्वात् ङीष् ।) घोषकलता । इति मेदिनी । णी, ६८ ॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतद्वितीयनक्षत्रम् । तत्पर्य्यायः । यमदेवता २ । इति हेमचन्द्रः ॥ सा तारकात्रयमितत्रिकोणाकृतिः । तस्या अधिष्ठात्री देवता यमः । यथा,—

"तारकात्रयमिते त्रिकोणके
मध्यगे दिविषदध्वनो यमे ।
पञ्चतारिगणिताः कुलीरतः
सायकाग्निभुजसंख्यकाः कलाः ॥

इं ३ । ४५ । इति कालिदासकृततिथितत्त्वम् ॥ सा च उग्रगणान्तर्गता । अधोमुखगणान्तर्गता च । विद्यारम्भभूमिखनने प्रशस्ता । इति ज्योतिस्तत्त्वम् । तत्र जातफलम् ।

"सदाप्रकीर्त्तिर्हि महापवादो
नागाधिनोदेच्च विनीतकालः ।
जडे विलासी चपलः खलः स्यात्
प्राक्प्रश्नतो भरणीषु जातः ॥"

इति कोष्ठीप्रदीपः ॥

भरणीभूः, पुं, (भरणी भूरुत्पत्तिस्थानं यस्य।) राहुग्रहः। इति हेमचन्द्रः॥

भरणीयः, त्रि, भरणयोग्यः। पोष्यः। भृधातोः कर्म्मणि अनीयप्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। ५। १५०। १७।
"सर्व्वं भवतु ते राज्यं पञ्च ग्रामान् विसर्ज्जय। अवश्यं भरणीया हि पितुस्ते राजसत्तम!॥")

भरण्डः, पुं, (बिभर्त्तीति। भृ+"अण्डनृतभृञ्भृञ्भृञः।" उणा०। १। १२८। इति अण्डन्।) स्वामी। भूपालः। वृषः। इत्युणादिकोषः॥ भूः। क्षमिः। इति संक्षिप्तसारोणादिवृत्तिः॥

भरण्यं, क्ली, (भरणे साधु।"तत्र साधुः।"४। ४। ९८। इति यत्।) मूल्यम्। वेतनम्। इत्यमरः। २। १०। ३१॥

भरण्यशुक्, त्रि, (भरण्यं वेतनं सुनक्ति इति। भुज्+क्विप्।) कर्म्मकरः। मूल्यं गृहीत्वा कर्म्मकारकः। इत्यमरः। ३। १। १६॥

भरण्या, स्त्री, (भरण्य+अजादित्वात् टाप्।) वेतनम्। इत्यमरटीकायां स्वामी॥

भरण्याकाश.क्ली, (भरण्या आकाश आख्या यस्याः।) पर्व्वपुष्पी। इति शब्दचन्द्रिका॥ रामदूतीति ख्याता॥

भरण्युः, पुं, (कण्ड्वादिगणीयभरण्यधातुः। ततो वाहुलकात् उच्।) शरण्युः। मित्रम्। इति शब्दमाला॥ अग्निः। चन्द्रमाः। ईश्वरः। इति संक्षिप्तसारोणादिवृत्तिः॥

भरतः, पुं, (बिभर्त्ति स्वाङ्गमिति। बिभर्त्ति लोकानिति वा। भृ+"भृञ्जिधारिसहितनिभ्यश्चेति।" उणा० ३। ११०। इति अतच्।) नाट्यशास्त्रम्। मुनिविशेषः। स तु अलङ्कारादिशास्त्रस्य सूत्रकर्त्ता। (भरतस्य अयम्। तस्येदमित्यण्। अथो लुक्।) नटः। रामानुजः। दौष्मन्तिः। इति मेदिनी। ते, १३७-३८॥ शूरवीरः। तन्तुवायः। इति विश्वः॥ क्षेत्रम्। भरताश्रमजः। इति हेमचन्द्रः॥ दुष्मन्तराजपुत्रभरतस्य पर्य्यायः। शाकुन्तलेयः २ दौष्मन्तिः ३ सर्व्वदमनः ४। इति त्रिकाण्डशेषः॥ यस्यत्रिंशच्छतमश्वमेधं क्रतवान्। पश्चाच्चक्रवर्त्तिराज्यं एवमन्यान् नानाविधान् यज्ञानकरोत्। सप्तविंशतिसहस्रवत्सरानेकच्छत्रं राज्यं क्रतवान्। तस्योत्पत्त्यादिर्यथा,—

"दुष्मन्तो मृगयां यातः कण्वाश्रमपदं गतः। तत्रासीनां स्वप्रभया मङ्क्यन्तीं रमामिव॥ विलोक्य सद्यो सुस्राव देवमायामिव स्त्रियम्। बभाषे तां वरारोहां भटैः कतिपयैर्वृतः॥ तद्दर्शनप्रमुदितः संनिवृत्तपरिश्रमः। पप्रच्छ कामसन्तप्तः प्रहसन् श्लक्ष्णया गिरा॥ का त्वं कमलपत्राक्षि! कस्यासि हृदयङ्गमे!। किं चिकीर्षितं त्वत्र भवत्या निर्ज्जने वने॥ अकृत राजन्यतनयां वेत्तारं त्वां समध्वगे!। न हि चेतः पौरवाणामधर्म्मे रमते क्वचित्॥

श्रीशुकउवाच।
विश्वामित्रात्मजेवाहं त्यक्ता मेनकया वने। वेदेनङ्गवान् कण्वो वीर! किं करवाम ते॥ आस्यतां शूरविन्द्राच्च! गृह्यतामर्घ्यञ्च नः। शुश्रूषन्तां सन्ति नीवारा उद्यतां यदि रोचते॥

श्रीदुष्मन्त उवाच।
उपपन्नमिदं सुभ्रु! जातायाः कुशिकान्वये। स्वयं हि वृणुते राज्ञां कन्यका सदृशं वरम्॥ ओमित्युक्ते यथाधर्म्मसुपयेमे शकुन्तलाम्। गान्धर्व्वविधिना राजा देशकालविधानवित्॥ अमोघवीर्य्यो राजर्षिर्महिष्यां वीर्य्यमादधे। श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम्॥ कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः। बद्धा रुरोर्नं तरसा क्रीड़ति स स बालकः॥ तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा। हरेरंशांशसम्भूतं भर्त्तुरन्तिकमागमत्॥ यदा न जग्रहे राजा भार्य्यापुत्रावनिन्दितौ। श्रृण्वतां सर्व्वभूतानां खे वागाहाशरीरिणी॥ माता भस्त्रा पितुः पुत्रो येन जातः स एव सः। भरस्व पुत्रं दुष्मन्त! मावमंस्थाः शकुन्तलाम्॥ रेतोधाः पुत्रो नयति नरदेव! यमक्षयात्। त्वन्चास्य धाता गर्भस्य सत्यमाह शकुन्तला॥ पितर्य्युपरते सोऽपि चक्रवर्त्ती महायशाः। महिमा गीयते तस्य हरेरंशसुवो भुवि॥ चक्रं दक्षिणहस्तेऽस्य पद्मकोषोऽस्य पादयोः। ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड्विभुः॥ पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वाजिभिः। मामतेयं पुरोधाय यमुनामनु च प्रभुः॥ अष्टसप्ततिमेध्याश्वान् ववन्थ प्रददद्वसु। भरतस्य हि दौष्मन्तेरग्निः साचीगुणे चितः॥ सहस्रं बद्धशो यस्मिन् ब्राह्मणा गा विभेजिरे। त्रयस्त्रिंशच्छतं ह्यश्वान् बद्धा विज्ञापयन् नृपान्॥ दौष्मन्तिरत्यगाद्यज्ञायां देवानां गुरुमायया। रुशन्तं शुक्लदतः क्षत्त्रान् हिरण्येन परीवृतान्॥ अदात् कर्म्मणि मघवारे नियुतानि चतुर्दश। भरतस्य महत् कर्म्म न पूर्व्वे नापरे नृपाः॥ नैवापूर्णैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा। किरातहूणान् यवनान् पौण्ड्रान् कङ्कान् खशाञ्कान्॥ अब्रह्मण्यनृपांश्चाहन् म्लेच्छान् दिग्विजये ऽखिलान्। जित्वा पुरासुरा देवान् ये रसौकांसि मेजिरे॥ देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत्। सर्व्वान् कामान् दुदुहतुः प्रजानां तस्य रोदसी॥ समाखिनवसाहस्रीर्दिक्षु चक्रमवर्त्तयत्। स सम्राट् लोकपालाख्यमैश्वर्य्यमधिराट्श्रियम्॥ चक्रवाखलितं प्राणानृन्दयेत्युपरराम ह। तस्यासन् नृप! वैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः॥ अनुरूपाभयात् पुत्रान्नानुरूपा इतीरिते॥"

इति श्रीभागवते ९ स्कन्धे २० अध्यायः॥*॥

ऋषभदेवात् इन्द्रदत्तजयन्त्यां कन्यायां जातशतपुत्रान्तर्गतज्येष्ठपुत्रः। यथा। "अथ ह भगवान् ऋषभदेवः स्वं वर्षं कर्म्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्म्मानुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामभियुञ्जन्नात्मजानामात्मसमानानां शतं जनयामास। येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत् येनेदं वर्षं भारतमिति व्यपदिशन्ति।" इति श्रीभागवते ५ स्कन्धे ४ अध्यायः॥*॥ पावकपुत्रः। यथा,—

"पावनो लौकिको ह्यग्निः प्रथमो ब्रह्मणः सुतः। ब्रह्मोदनामिसंतप्तपुत्रो भरत नाम विश्रुतः॥"

इति मात्स्ये अग्निवंशो नाम ४८ अध्यायः॥

रामानुजभरतस्य जन्म यथा,—

"भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः। साक्षाद्विष्णोश्चतुर्भागः सर्व्वैः समुदितो गुणैः॥"

तस्यानुगतः शत्रुघ्नः। यथा,—

"भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः। प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः॥"

स कुशध्वजकन्यां माण्डवीं परिणीतवान्। यथा,

"भ्राता यवीयान् धर्म्मज्ञ एष राजा कुशध्वजः। अस्य धर्म्मात्मनो राजन्! रूपेणाप्रतिमं भुवि॥ सुताद्वयं नरश्रेष्ठ! पत्न्यर्थे वरयामहे। तमेवमुक्त्वा जनको भरतस्याभ्यभाषत॥ गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन!॥"

स नन्दिग्रामे राज्यं क्रतवान्। यथा,—

"सवल्कलजटाधारी मुनिवेषधरः प्रभुः। नन्दिग्रामेऽवसद्वीरः ससैन्यो भरतस्तदा॥ सबालयजनं क्षत्रं धारयामास स स्वयम्। भरतः प्राशनं सर्व्वं पादुकाभ्यां निवेदयन्॥ ततस्तु भरतः श्रीमानभिषिच्यार्य्यपादुके। तदधीनस्तदा राज्यं कारयामास सर्व्वदा॥"

इति रामायणे बालकाण्डे। १८। ७२। ७३ अध्यायाः। अयोध्याकाण्डे २४ अध्यायश्च॥

तस्य द्वौ पुत्रौ। यथा,—

"भरतस्यात्मजौ वीरौ तक्षः पुष्कल एव च। मातुलेन सुगुप्तौ तु धर्म्मेण सुसमाहितौ॥ भरतस्यागतः श्रुत्वा कुमारौ सबलानुगौ। निहत्य गन्धर्व्वसुतान् वै पुरे निवेशयतः॥"

इति रामायणे उत्तरकाण्डे १०१ अध्यायः॥

भरतखण्डं, क्ली, भारतवर्षान्तर्गतकुमारिकाखण्डम्। यथा,—

"कुमारिकेति विख्याता यस्या नाम्ना प्रकथ्यते। इदं कुमारिकाखण्डं चतुर्व्वर्गफलप्रदम्॥ यथा क्षतावनीयञ्च नानायामादिकल्पना। इदं भरतखण्डञ्च यया सम्यक् प्रकल्पितम्॥"

इति स्कान्दे कुमारिकाखण्डे भूसंस्थितिनामाध्यायः॥

भरतपुत्रकः, पुं, (भरतस्य नाट्यशास्त्रप्रणेतुः पुत्रकः।) नटः। इति हेमचन्द्रः॥

भरतप्रस्थः, स्त्री, (प्रस्थते इति। प्र+स्था+क्विप्। प्रस्थः। भरतस्य प्रस्थः।) कैकयी। इति शब्दरत्नावली॥

भरताग्रजः, पुं, (भरतस्य अग्रजः ।) श्रीरामचन्द्रः । यथा, वोपदेवः ।
"ग्रीते स चित्तग्रयने मम मीनकूर्म-
कोलोऽभवन्नृहरिवामनजामदग्न्याः ।
योऽभूद्भूव भरताग्रजलक्ष्मबुद्धः
कल्की सताच भविता ग्रहरिष्यतेऽरीन् ।"

भरथः, पुं, (बिभर्त्तीति । भृञ्+"भृञश्चित् ।" उणा० ३ । ११५ । इति अथप्रत्ययः । स च चित् ।) लोकपालः । इत्युणादिकोषः ॥

भरद्वाजः, पुं, (द्वाभ्यां जायते इति । जन्+डः । ततः पृषोदरादित्वात् द्वाजः सङ्करः । भियते भरद्भिरिति । भृ+अप् । भरः । भरद्वासौ द्वाजश्चेति कर्म्मधारयः ।) मुनिविशेषः । स च उतथ्यपत्न्यां ममतायां दृहस्पतिवीर्य्याज्जातः । तस्य जन्मविवरणं यथा । "ततोऽस्य वितथे पुत्रजन्मनि पुत्रार्थिने मरुत्सोमयाजिने दीर्घतमसा पार्ष्ण्यापास्ताद्दृहस्पतिवीर्य्यादुतथ्यपत्नी-ममतायामुत्पन्नो भरद्वाजाख्यो नाम पुत्रो मरुद्भिर्दत्तः । अस्यापि नामनिर्व्वचनश्लोकः पठ्यते ।
'मूढ़े भर द्वाजमिमं भर द्वाजं दृहस्पते ! ।
यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ।' इति ।
भरद्वाजश्च तस्य वितथे पुत्रजन्मनि मरुद्भिर्दत्तो वितथसंज्ञामवाप ।"* । अस्य टीका । वितथे व्यर्थे सति । अत्रैवमितिहासः । दृहस्पतेरुत्यजस्योतथ्यस्य ममताख्या पत्नी गर्भिण्यासीत् । तस्यां दृहस्पतिः कामाभिभूतो वीर्य्यं अक्षजत् । तच्च गर्भं प्रविशद्गर्भस्थेन स्थानसङ्कोचभयात् पार्ष्णिप्रहारेणापास्तं बहिः पतितमपि अमोघवीर्य्यतया दृहस्पतेर्भरद्वाजनामपुत्रोऽभूत् । गर्भस्थञ्च दृहस्पतिना तस्मादेवापराधादन्धो भवेति ग्रस्तो दीर्घतमा नामाभवत् । तत्र भरद्वाजनामनिरुक्तिपरः तत्पितोर्विवादकरोऽयं श्लोको देवैः पठितः । हे मूढ़े ममते द्वाजं द्वाभ्यामावाभ्यां जातमिमं पुत्रं त्वं भर रक्ष । एवं दृहस्पतिनोक्तेव ममता तमाह हे दृहस्पते ! द्वाजं द्वाभ्यां जातमिममेकाकिनी किमित्यहं भरिष्यामि । त्वमिमं भरेति परस्परसङ्कातं पुत्रं त्यक्त्वा यस्मात् पितरौ ममतादृहस्पती ततो यातौ । ततो भरद्वाजाख्योऽयम् । पाठान्तरे एवं विवदमानौ । यद्दुःखात् यन्निमित्ताद् दुःखात् पितरौ यातावित्यर्थः । तदेवं ताभ्यां त्यक्तो मरुद्भिर्भृतः । मरुत्सोमाख्येन च यागेनाराधितैर्मरुद्भिस्तस्य वितथे पुत्रजन्मनि सति दत्तत्वाद्वितथसंज्ञाञ्चावाप । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ * ॥ (द्वादशद्वापरेऽसावेव व्यासः । यथा देवीभागवते । १ । ३ । २६ ।
"एकादशेऽथ चित्रयो भरद्वाजस्ततःपरम् ।
त्रयोदशे चान्तरिक्षो धर्म्मस्त्वपि चतुर्दशे ॥"
यथा च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहराः दृष्टा इन्द्रियशक्तिसंक्षयकराः सर्व्वाङ्गपीड़ाकराः ।
धर्म्मार्थाखिलकामसक्तिषु महाविघ्नस्वरूपा बलात्
प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम् ॥
तत्तेषां प्रशमाय कञ्चन विधिञ्चिन्त्यो भवद्भिर्बुधैर्-
योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिं तेऽब्रुवन् ।
त्वं योग्यो भगवन् ! सहस्रनयनं याचस्व लब्धुं क्रमा-
दायुर्व्वेदमधीत्य यं गदभयाक्रुक्ता भकामो वयम् ॥")

पक्षिविशेषः । भारद्र इति भाषा । तत्पर्य्यायः । व्याघ्राटः २ । इत्यमरः । २ । ५ । १५ ॥ भरद्वाजकः ३ । इति शब्दरत्नावली ॥ (गोत्रभेदः । यथा, मनौ ।
"शाङ्खिल्यः काश्यपश्चैव वात्स्यः सावर्णकस्तथा ।
भरद्वाजो गौतमश्च सौकालीनस्तथापरः ॥"
इत्यादि गोत्रशब्दे दृश्यम् । भृ+अच् । भरत्+वाजः । संभियमाणहविर्लक्षणाग्नेये यजमानादौ, त्रि । यथा, ऋग्वेदे । १ । ११६ । १८ ।
"यदयातं दिवोदासाय वर्त्तिर्भरद्वाजायाश्विना हयन्ता ।"
"भरद्वाजाय संभियमाणहविर्लक्षणाग्नाय यजमानाय ।" इति तद्भाष्ये सायनाचार्य्यः ॥)

भरद्वाजकः, पुं, (भरद्वाज+स्वार्थे कन् ।) व्याघ्राटपक्षी । इति शब्दरत्नावली ॥

भरिणी, स्त्री, (भरो बिभर्त्ति हरतीति । भृ+णिनिः । गौरादित्वात् ङीष् । पृषोदरादित्वात् पूर्व्वादीर्घः साधुः ।) हरिद्वर्णः । इत्युणादिकोषः ॥

भरित, त्रि, (हरित । पृषोदरादित्वात् हस्य भः ।) हरिद्वर्णः । इत्युणादिकोषः ॥ पुष्टः । भारयुक्तः । भरोऽस्य जात इत्यर्थे इतप्रत्ययेन निष्पन्नः ॥

भरिमा, [न्] पुं, (भृ+"हृभृधृहनृतृभ्य इमनिच् ।" उणा० ४ । १४० । इति भावे इमनिच् ।) भरत्वम् । इत्युणादिकोषः ॥ (स्त्रियते इति । कुटुम्बः । इत्यञ्जनदत्तः ॥)

भरः, पुं, (भरति बिभर्त्ति जगदिति । भृञ् भरणे+"भृञ्जमीदृचरित्सरितनिधनिमिमसृजिभ्य उः ।" उणा० १ । ७ । इति उः ।) विष्णुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । समुद्रः । स्वामी । इति संक्षिप्तसारोणादिवृत्तिः । स्वर्णम् । शिवः इति । मेदिनी । रे, ६६ ॥

भरजः, पुं, (भेति शब्देन रजतीति । रञ्+कः ।) क्षुद्रशृगालः । इति हेमचन्द्रः ॥

भरटवं, क्ली, (भृ+बाहुलकात् उट । संज्ञायां कन् ।) भक्ष्याभिषम् । इति हेमचन्द्रः ॥

भर्गः, पुं, (भृज्यते कामादिरनेनेति । भृज्+"हलश्च ।" इति घञ् ।) शिवः । इत्यमरः । (यथा, कथासरित्सागरे । १ । ३४ ।
"प्रत्युवाच ततो भर्गः पुरा दक्षप्रजापतेः ।
देवि ! त्वं च तथान्याश्च बह्व्योऽजायन्त कन्यकाः ।
स मह्यं भवतीं प्रादात् धर्म्मादिभ्योऽपरा-
श्च ताः ॥
वीतिहोत्रस्य पुत्रः । यथा, भागवते ।६।१७।६।
"वीतिहोत्रोऽस्य भर्गोऽतो भार्गभूमिरभूदृप ॥")
आदित्यान्तर्गततेजः । यथा,—
"आदित्यान्तर्गतं वर्च्चो भर्गाख्यं तन्मुमुक्षुभिः ।
जन्मदुःखविनाशाय दुःखस्य चिन्तयेच्च ॥
ध्यानेन पुरुषो यच्च दृश्यः सूर्य्यमण्डले ॥"
इत्यादिकृतत्वम् ॥

भर्गः, [स्] क्ली, (भर्जते इति । भृज भर्जने+"अर्त्तिसृधृशॄभ्यः कुच्च ।" उणा० ४ । २१५ । इति असुन् कवर्गान्तादेशः ।) ज्योतिः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, ऋग्वेदे । ३ । ६२ । १० ।
"तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥")

भर्य्यः, पुं, (भृञ्+"ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् । चजोरिति कुत्वम् ।) भर्गः । इत्यमरटीकायां भरतरायमुकुटौ ॥

भर्जनं, क्ली, (भृज्+ल्युट् ।) भृष्टिः । इति शब्दमाला ॥ भाजा इति भाषा ॥

भर्त्तव्यं, त्रि, (भृ+तव्य ।) भरणीयम् । पोषणीयम् । यथा, दायभागटीकाधृतवचनम् ।
"दृष्टौ च मातापितरौ साध्वी भार्य्या सुतः शिशुः ।
अप्यकार्य्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ॥"

भर्त्ता, [र्त्तृ] पुं, (बिभर्त्ति पुष्णाति पालयति धारयतीति वा । भृञ् धारणपोषणयोः+"सृवृभू ।"३ । १ । १३३ । इति तृच् ।) अधिपतिः । (यथा, रघौ । १ । ७४ ।
"सोऽपश्यत् प्रणिधानेन वसतेः स्तम्भकारणम् ।
भावितात्मा सुतो भर्त्तुरर्घेनं प्रत्यबोधयत् ॥")
तत्पर्य्यायः । अधिपः २ ईशः ३ नेता ४ परिवृढः ५ अधिभूः ६ पतिः ७ इन्द्रः ८ स्वामी ९ नाथः १० आर्य्यः ११ प्रभुः १२ ईश्वरः १३ विभुः १४ ईशिता १५ दनः १६ नायकः १७ । इति हेमचन्द्रः ॥ (विष्णुः । प्रपञ्चाधिष्ठानत्वेन भरणात् ॥) धारणे पोषणे च त्रि । इति मेदिनी । ते, ३८ ॥ (यथा, ऋग्वेदे । १० । २२ । ३ ।
"भर्त्ता वचस्य दृक्षो: पिता पुत्रमिव प्रियम् ॥")
विवाहितायाः पतिः । यथा, महाभारते । १ । १०४ । २८ ।
"भार्य्यायां भरद्वाजर्त्ता पालनाच्च पतिः स्मृतः ।
अहं त्वां भरणं कृत्वा जातत्वं वसुतं तदा ।
नित्यकालं ममेत्यार्त्ता न भरेयं महातपः ॥")

भर्तृघ्नी, स्त्री, (भर्त्तारं हन्तीति । हन्+टक् । ङीप् ।) पतिघातिनी । इति महाभारतम् ॥

भर्तृदारकः, पुं, (भर्त्ता म्रियते इति । दॄ आदरे+कर्म्मणि घञ् । ततः स्वार्थे कः ।) नाट्योक्तौ युवराजः । इत्यमरः । १ । ७ । १२ ॥

भर्तृदारिका, स्त्री, (भर्तृदारक+टापि अत इत्वम्।) नाट्योक्तौ राजसुता। इत्यमरः। १। ७। १३॥

भर्तृहरिः, पुं, स्वनामख्यातः काव्यकर्तृराजविशेषः। इति जटाधरः। स च विक्रमादित्यभ्राता॥ (अयमेव गन्धर्वसेनात् दासीगर्भजातः। यथा, राजावल्याम्। ४। १-२।

"अथ कालेन कियता रममाणो महीतले।
दास्यां गन्धर्वसेनस्तु पुत्रमेकमजीजनत्॥
तस्य भर्तृहरीत्येवं नाम चक्रे महामतिः॥")

भर्त्स, क ड च भर्त्सते। इति कविकल्पद्रुमः॥ (पुरा०-आत्म०-उभ० च-सक०-सेट्।) रेफयुक्तः। दन्त्यवर्णाद्योपधः। भर्त्सो भर्त्सनम्। भर्त्सनन्त्वपकारगीरित्यमरः। १। ६। १४॥ क ड, भर्त्सयते खलं राजा। च, भर्त्सयति भर्त्सयते। अयमात्मनेपदीत्यन्ये। कदाचित् परस्मैपदार्थी नकारः। इति दुर्गादासः॥

भर्त्सनं, क्ली, (भर्त्स+ल्युट्।) अपकारगीः। इत्यमरः। १। ६। १४॥ चौरोऽसि त्वां घातयिष्यामि इत्याद्यपकारार्थं वचनम्। इति भरतः॥ तत्पर्य्यायः। कुत्सा २ निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ कुत्सनम् ८ परिवादः ९ परीवादः १० जुगुप्सनम् ११ आक्षेपः १२ अवर्णः १३ निर्वादः १४ अपक्रोशः १५। इति शब्दरत्नावली॥ (भर्त्स+युच्। भर्त्सनाप्यत्रार्थे। यथा, कथासरित्सागरे। ३२। ५३।

"इत्यादि भर्त्सनां श्रुत्वा गच्छद्भिस्तैः समं स च।
विवशः प्रययौ विष्णुदत्तस्तूष्णीं बभूव च॥")

भर्त्सपत्रिका, स्त्री, (भर्त्सयते स्रोतः। भर्त्स+घञ्। भर्त्सं निन्दितं पत्रं यस्याः। कप्। टाप्। अत इत्वम्।) महानीली। इति राजनिर्घण्टः॥ (भर्त्सयपत्रिकापि पाठः॥)

भर्म्म, क्ली, (भ्रियतेऽनेनेति। भृ+बाहुलकात् मन्।) स्वर्णम्। भृतिः। नाभिः। इति हिरूपकोषः॥

भर्म्मन्, [न्] क्ली, (भरति भ्रियते वेति। भृञ्+"सर्व्वधातुभ्यो मनिन्।" उणा० ४।१४४। इति मनिन्।) वेतनम्। इति हेमचन्द्रः॥ स्वर्णम्। धुस्तूरम्। इत्यमरः।२।६।९४॥ नाभिः। इति विश्वः॥ (भरत्वम्। यथा, ऋग्वेदे।१०।८८।९।

"हविष्यान्तमजरं स्वर्विदि दिविस्पृशाहुतं जुष्टमग्नौ।
तस्य भर्म्मणे भुवनाय देवा धर्म्मणे कं स्वधया पप्रथन्त॥"

"भर्म्मणे भरणाय।" इति तद्भाष्ये सायणः॥)

भर्म्मण्या, स्त्री, (भर्म्मणि भरणे साधुरिति। भर्म्मन्+यत्। टाप्।) वेतनम्। इति हेमचन्द्रः॥

भर्भ, हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफोपधः। भर्भति। इति दुर्गादासः॥

भर्व्व, हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) भर्व्वति। अन्तःस्थवान्तोऽयम्। इति दुर्गादासः॥

भल, क ड निरूपणे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ड, भालयते। इति दुर्गादासः॥

भल, ड दानवधनिरूपणेषु। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ड, भलते। इति दुर्गादासः॥

भलता, स्त्री, (भातीति। भा+बाहुलकात् डः। भा चासौ लता चेति कर्म्मधारयः।) राजबला। इति शब्दरत्नावली॥

भलन्दनः, पुं, कान्यकुब्जदेशीयनृपविशेषः। यथा,

"कलावती कान्यकुब्जे बभूवायोनिसम्भवा।
जातिस्मरा महासाध्वी सुन्दरी कमला कला॥
कान्यकुब्जे नृपश्रेष्ठो भलन्दन उरुक्रमः।
उ तां संप्राप योगान्ते यज्ञकुण्डसमुत्थिताम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः॥

भल्ल, ड दानवधनिरूपणेषु। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) लदयान्तः। ड, भल्लते। इति दुर्गादासः॥

भल्लः, पुं, (भल्लते इति। भल्ल+अच्।) भल्लूकः। इत्यमरः। २। ५। ४॥ (देशभेदः। यथा, बृहत्संहितायाम्। १४। ३०।

"ब्रह्मपुरदार्व्वडामर-
वनराज्यकिरातचीनकौलिन्द्राः।
भल्लाप्रलोलजटासुर-
कुनटखसखोषकुक्षिकाख्याः॥")

भल्लः, पुं क्ली, (भल्लते हन्तीति। भल्ल+अच्।) शस्त्रभेदः। इति मेदिनी शब्दमाला च। भाला इति भाषा॥ (यथा महाभारते।१।१४०।६।

"प्रगाढदृढमुष्टिले लाघवे वेधने तथा।
क्षुरनाराचभल्लानां विपाठानाञ्च तत्त्ववित्॥"

अनेन देहविद्धशस्त्रादिकमुद्धरति। यथा,—

"स च शल्योद्धरणकः प्रोच्यते वैद्यकागमे।
नाराचबाणशूलाद्यैर्भल्लैः कुन्तैश्च तोमरैः॥"

इति हारीते प्रथमे स्थाने द्वितीयेऽध्याये॥)

भल्लकः, पुं, (भल्ल+स्वार्थे कन्।) भल्लूकः। इति द्विरूपकोषः॥ (पक्षिभेदः। यथा, भागवते। ३। १०। २३।

"काकगृध्रबकश्येनभासभल्लकबर्हिणः।
हंससारसचक्राङ्ककाकोलूकादयः खगाः॥")

भल्लपुच्छी, स्त्री, (भल्लस्य पुच्छमिव पुच्छं यस्याः।) गवेधुका। इति शब्दचन्द्रिका॥ गोरचतकुला इति ख्याता॥

भल्लाटं, क्ली, अग्निध्वजराजपुरम्। यथा,—

"सेनाजस्तैः परिवृतः कल्किनारायणः प्रभुः।
भल्लाटनगरं प्रायात् खड्गशुक्लसन्निवाहनः॥"

इति कल्किपुराणे।२२ अध्यायः॥

(दक्षसेनस्य पुत्रे, पुं। यथा, हरिवंशे।२०।३२।

"विष्वक्सेनस्य पुत्रोऽभूत् दक्षसेनो महीपतिः।
भल्लाटो तत्कुमारोऽभूद्राधियेन हतः पुरा॥")

भल्लातः, पुं, (भल्लं भल्लास्त्रमिव अतति व्याप्नोति आत्मानं ज्ञापयतीति। अत+अच्।) भल्लातकवृक्षः। इति रत्नमाला॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"भल्लातानामावतञ्चिरं नलचेरीभवतः॥")

भल्लातकः, पुं, (भल्लं इवातनोतीति। अत+कुन्। यद्वा, भल्लात+स्वार्थे कन्।) वृक्षविशेषः। भेला इति भाषा। तत्पर्य्यायः। अरुष्करः २ भल्लातः ३ ग्रीष्मकृत् ४ वह्निनामा ५ वीरतरुः ६ व्रणकृत् ७ भूतनाशनः ८। इति रत्नमाला॥ भल्लातकी ९ अग्निमुखी १० वीरवृक्षः ११। इत्यमरः॥ निर्दहनः १२ तपनः १३ अनलः १४ क्रमिघ्नः १५ शैलबीजः १६ वातारिः १७ स्फोटबीजकः १८ पृथग्बीजः १९ धनुर्वृक्षः २० बीजपादपः २१ वह्निः २२। (यथा सुश्रुते। सूत्रस्थाने। ४६।

"उष्णोदकानुपानन्तु स्नेहानामथ शस्यते।
ऋते भल्लातकस्नेहात् स्नेहास्तौवरकाणया॥")

अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कषायत्वम्। उष्णत्वम्। क्रिमिकफवातोदरानाहमेहदुर्नामनाशित्वञ्च। तत्फलगुणाः। कषायत्वम्। मधुरत्वम्। कोष्णत्वम्। कफार्शिश्रमश्वासानाहविबन्धशूलजठराध्मानक्रिमिनाशित्वञ्च। तन्मज्जगुणाः। विशेषेण दाहश्रमनत्वम्। पित्तापहत्वम्। तर्पणत्वम्। वातारोचकहारित्वम्। दीपिजननत्वम्। पित्तनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च ग्रीष्मकृत्॥
भल्लातकफलं पक्वं स्वादुपाकरसं लघु।
कषायं प्राचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम्॥
मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम्।
कुष्ठार्शोग्रहणीगुल्मप्लीहानाहज्वरक्रमीन्॥
तन्मज्जा मधुरो हृद्यो दृंहणो वातपित्तहा।
वृत्तमारुष्करं स्वादु पित्तघ्नं केश्यमग्निकृत्॥
भल्लातकः कषायोष्णः शुक्रलो मधुरो लघुः।
वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान्॥
हन्ति गुल्मज्वरं चित्रवह्निमान्यक्रमिव्रणान्॥"

इति भावप्रकाशः॥

अन्यच्च।

"भल्लातकफलं स्निग्धं क्रिमिदुर्नामनाशनम्।
दन्त्यञ्चेद्यंकरं ग्राहि कषायं मधुरञ्च तत्॥
भल्लातवृन्तं मधुरं कषायं वातकोपनम्॥"

इति राजवल्लभः॥

भल्लातकी, स्त्री, (भल्लातक+गौरादित्वात् ङीष्।) भल्लातकवृक्षः। इत्यमरः॥

भल्लिका, स्त्री, (भल्ल+अच्। स्वार्थे कन्। टाप्। अत इत्वम्।) भल्लातकः। इति शब्दचन्द्रिका॥

भल्ली, त्रि, (भल्ल+गौरादित्वात् ङीष्।) भल्लातकः। इति शब्दरत्नावली॥ (अस्याः पर्य्यायः।

"भल्लातकं चिरु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः।
तथैवाग्निसुखो भल्लो वीरवृक्षश्च गोफलः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
भल्लुकः, पुं, (भल्लुक+पृषोदरादित्वात् ह्रस्वः।) भालूकः। इत्यमरः॥
भल्लूकः, पुं, (भल्लते इति। भल्ल+"उलूकादयश्च।" उणा० ४। ४१। इति ऊकप्रत्ययेन साधुः।) जन्तुविशेषः। भालूक इति भाषा। तत्पर्य्यायः। ऋक्षः २ भल्लः ३ सशल्यः ४ दुर्धर्षः ५ भल्लुकः ६ एडवृद्धिः ७ द्राघिष्ठः ८ दीर्घकेशः ९ चिरायुः १० दुस्तरः ११ दीर्घदर्शी १२। इति राजनिर्घण्टः॥ भालुकः १३ भालूकः १४ अच्छः १५ भाल्लूकः १६ भौलूकः १७। इति शब्दरत्नावली॥ (यथा, महाभारते। १२। ११६। ६।
"सिंहव्याघ्रगणाः क्रूरा मत्ताश्चैव महागणाः।
द्वीपिनः खड्गभल्लूका ये चान्ये भीमदर्शनाः॥"
कोशस्थप्राणिविशेषः। तद्यथा,—
"शल्लशल्लनखमुक्तिशल्लूकभल्लूकप्रभृतयः कोशस्थाः।" इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)
म्लेच्छजातिप्रभेदः। (यथास्य पर्य्यायः।
"म्लेच्छो नाको भूतपुष्पश्च पूतिवृक्षो सुनिद्रुमः।
दीर्घवृन्तश्च कट्फलो भल्लूकवृक्षोऽरण्यः॥"
इति वैद्यकरत्नमाला॥)
कुक्कुरः। इति राजनिर्घण्टः॥
भवं, क्ली, (भवति भूयते वा। भू+अच् अप् वा।) भवम्। इति राजनिर्घण्टः॥ चालता। इति भाषा॥
भवः, पुं, (भूयते इति। भू+भावे अप्।) जन्म। (यथा, याज्ञवल्क्ये। १। १६४।
"भवो जातिसहस्रेषु प्रियाप्रियविपर्य्ययः॥"
भवत्यस्मादिति। भू+अपादाने अप्। शिवः। इत्यमरः॥ यथा, श्रुतपथब्राह्मणे। ६।१।३।१५।
"तमब्रवीद् भवोऽसीति तद्यदस्य तन्नामाकरोत्पर्जन्यस्तद्रूपमभवत् पर्जन्यो वै भवः॥")
स च जलमूर्त्तिः। यथा,—
"भवाय जलमूर्त्तये नमः।
इति पार्थिवशिवलिङ्गपूजाप्रयोगः॥
(भवति प्रभवत्यनेनेति। भू+अप्।) सोमः। (यथा, महाभारते। १। २२१। २८।
"को हि नाम भवेनार्थी साहसेन समाचरेत्॥"
भवति उत्पद्यतेऽस्मिन्निति। भू+आधारे अप्।) संसारः। (यथा, मार्कण्डेये। १६। ७।
"अनघस्त्वं तथैवेयं देवी सर्व्वभवात्मिका॥")
सत्ता। प्राप्तिः। इति मेदिनी॥
भवकः, पुं, (भवतादिति। भू+ण्वुल्।) आशीर्व्वाचकः। इति संक्षिप्तसारः॥
भवक्षारः, पुं, (भवस्य वनस्य क्षारः क्षंसकारकः।) दावानलः। इति शब्दमाला॥
भवत्, त्रि, (भाति विद्यते इति। भा+क्वतुप्रत्ययः।) पूज्यार्थम्। अत्र भाधातोर्व्वतुप्रत्ययेन निष्पन्नम्। तस्य लिङ्गत्रये रूपम्। भवान्। भवती भवत्। (यथा, मार्कण्डेये देवीमाहात्म्ये। ८५। ५।
"भवतां नाशयिष्यामि तत्तच्चात् परमापदः॥")
वर्त्तमानार्थम्। इति मेदिनी। ते, १३०॥ अत्र भूधातोः शतृप्रत्ययेन निष्पन्नम्। तस्य लिङ्गत्रये रूपं भवन् भवन्ती भवत्॥ (यथा, मनौ। १२। ६७।
"चातुर्व्वर्ण्यं त्रयो लोका चत्वारश्चाश्रमाः पृथक्।
भूतं भवद्भविष्यच्च सर्व्वं वेदात् प्रसिध्यति॥")
भवती, स्त्री, (भवत्+ङीप्।) वाग्भेदः। स तु विषाक्तः। इति शब्दरत्नावली॥ दीप्तिमती। यथा। वाल्मीकिकृतगङ्गास्तोत्रम्।
"स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं
प्रार्थये॥"
भवदारु, क्ली, (भवार्थं भवप्रियं वा दारु।) देवदारुवृक्षः। इति राजनिर्घण्टः॥
भवदीयं, त्रि, (भवत्+"भवतष्ठक्छसौ।" ४।२। ११५। इति छस्।) भवत इदम्। युष्मत्सम्बन्धि। यथा, उद्भटे।
"श्रुत्वातिदूरे भवदीयकीर्त्तिं
कर्णौ च तुष्टौ न च चक्षुषी मे।
इयोर्विवादं परिहर्त्तुमिच्छन्
समागतोऽहं तव दर्शनाय॥"
(यथा, भागवते। ६। १८। ३६।
"वयसा भवदीयेन रंस्ये कतिपयाः समाः॥")
भवनं, क्ली, (भवत्यस्मिन्निति। भू+अधिकरणे ल्युट्।) गृहम्। (यथा, मनौ। ११। १८।
"स लब्धुं तं घटं प्राप्य प्रविश्य भवनं स्वकम्॥"
प्रासादः। यथा, महाभारते। ३।५४।१२।
"देवराजस्य भवनं विविशाते सुपूजितौ॥"
भू+भावे ल्युट्।) भावः। इति मेदिनी॥ (यथा, "नन्दु प्रागसतो घटस्य भवनं दृश्यते॥"
इति तार्किकाः॥)
भवनाग्निगी, स्त्री, (भवं संसारं जन्मादिकं वा नाशयति उत्सारयति नाशयितुं शीलमस्येति वा। नश्+णिच्+णिनिः।) सरयूनदी। इति पुराणम्॥
भवनीयं, त्रि, (भवितुमर्हमिति। भू+अनीयर।) भवितव्यम्। भव्यम्। उत्पत्तार्हम्। इति मुग्धबोधव्याकरणम्॥
भवन्तः, पुं, (भवत्शब्देति। भू+"दृभूवहिवधीति।" उणा० १।१२८। इति झच्। स च विष्णुवति।) कालभेदः। स तु वर्त्तमानः। इत्यमरादिकोषः॥ (भान्ति इति। भा+क्वतु प्रत्ययः।) भवच्छब्दस्य प्रथमाबहुवचनान्तरूपोऽयम्॥ (यथा, महाभारते। ३। ५४। २।
"के वै भवन्तः कस्यार्थे यस्माद्दूतं ह्यचिन्तयः॥")
भवन्तिः, पुं, (भू+"सुवो झिच्।" उणा० १। ५०। इति झिच्।) वर्त्तमानकालः। इत्यमरादिकोषः संक्षिप्तसारोणादिवृत्तिश्च॥
भवभूतिः, पुं, (भवेन शिवेन भूतिरैश्वर्य्यादिकं यस्य भव एव भूतिर्यस्येति वा। श्रीकण्ठाचार्य्यस्यैवास्य विद्योत्पत्तेस्तथात्वम्।) कविविशेषः स च भोजराजस्य पण्डितः। मालतीमाधवादिनाटककर्त्ता च। तत्पर्य्यायः। भूगर्भः २। इति जटाधरः॥ (यथा, राजतरङ्गिण्याम्। ४। १४४।
"कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः॥"
भवस्य महादेवस्य भूतिरिति विग्रहे तु।) महादेवस्य ऐश्वर्य्यञ्च॥
भवरुत्, [द्] स्त्री, (भवे जन्मादिप्रपञ्चे संसारे रोदिति अनेनेति भवे जन्मान्ते रोदित्यनेन वेति। रुद्+क्विप्।) प्रेतपटहः। इति त्रिकाण्डशेषः॥
भवात्मजा, स्त्री, (भवस्य शिवस्य आत्मजेति।) मनसादेवी। इति शब्दमाला॥
भवाडक्, भवाडच्, भवाडग्, [ग्] त्रि, युष्मत्तुल्यः। भवानिव डश्यते य इति युष्मत्पर्य्यायात् भवच्छब्दपूर्व्वकडशधातोः कर्म्मणि क्रमेण क्विप्टक्सक्प्रत्ययेन निष्पन्नः। इति व्याकरणम्॥
भवानी, स्त्री, भवस्य भार्य्या। (भव+"इगुपधज्ञाभवग्रहेति।" ४। १। ४६। इति स्त्रियां ङीष् ततः आनुक् चागम इति।) दुर्गा। इत्यमरः। १।१।३१॥ एतन्नामकारणं यथा,—
"रुद्रो भवः समाख्यातो भवः संसारसागरः।
भवः कामस्तया तृष्टिर्भवानी परिकीर्त्तिता॥"
इति देवीपुराणे ४५ अध्यायः॥
(यथा, हरिवंशे भविष्यपर्व्वणि। १६। ६।
"भवानी तत्र मे देव! परिचर्त्तुं सदाभवत्॥")।
भवानीगुरुः, पुं, (भवान्याः शिवपत्न्या गुरुः पिता।) हिमालयपर्व्वतः। इति हेमचन्द्रः॥
भवाभीरुः, पुं, (भवे अभीरुः।) गुग्गुलुः। इति राजनिर्घण्टः॥
भवाब्धिः, पुं, (भवः अब्धिरिवेत्युपमितसमासः। भव एव अब्धिर्वा।) संसाररूपसमुद्रः। यथा,
"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष! ते चरणारविन्दम्॥"
इति श्रीभागवते ११ स्कन्धे ५ अध्यायः॥
भवायना, स्त्री, (भवः शिव एवायनमाश्रयस्थलमस्याः। शिवशिरसि स्थितत्वादस्यास्तथात्वम्।) गङ्गा। इति शब्दरत्नावली॥ (भवायनीलोके॥)
भविकं, क्ली, (भवः प्रभाव ऐश्वर्य्यादिकमिदमर्थः उत्पाद्यत्वेनास्त्यस्येति ठन्।) मङ्गलम्। तद्वति त्रि। इत्यमरः॥
भवितः, त्रि, (भवो मङ्गलं जातोऽस्येति तारकादित्वात् इतच्।) अतीतोत्पत्तिकः। भूतः। इति जटाधरः॥
भवितव्यं, त्रि, भवनीयम्। भव्यम्। इति भविष्यत्काले कर्म्मणि भावे शक्यार्हप्रेष्यातुज्ञाप्राप्तकालार्थे च भूधातोस्तव्यप्रत्ययेन निष्पन्नम्। इति व्याकरणम्॥ यथा, वह्निपुराणे।

"न भवदृश्यामहं शोच्यो नायं राजापराध्यति।
भवितव्यमनेनैव येनाहं निधनं गतः॥"

भवितव्यता, स्त्री, (भवितव्य+भावे तल्।) भाग्यम्। इति जटाधरः॥ (यथा, कथासरित्सागरे। २७। ८६।

"तन्ममाचक्ष्व तावत् त्वं कथयिष्याम्यहञ्च ते।
यदस्तु कोऽन्यथा कर्त्तुं शक्तो हि भवितव्यताम्॥")

भविता, [ऋ] त्रि, (भू+शीलार्थे तृच्।) भवनशीलः। इति भरतः॥ साधु भवनशीलः। इति सुभूटः। तत्पर्य्यायः। भूष्णुः २ भविष्णुः ३। इत्यमरः॥ (भविष्यदर्थेऽपि तृच्प्रत्ययः स्यात् यथा, मार्कण्डेये। २४। २६।

"नाम्ना भार्य्या भविष्यीति वर्ण्यित्वा मदाकृतिम्।")

भविनः, पुं, (भवाय कार्य्यादिप्रकाशाय इनः सूर्य्यः इव। ततः पृषोदरादित्वात् साधुः।) कार्य्य कर्त्ता। इति त्रिकाण्डशेषः॥

भविलः, पुं, (भू+"सलिकल्यनिमङ्डिभङ्डिभण्डिपिण्डितुण्डिकुकिभूभ्य इलच्।" उणा०। १। ५५। इलच्।) भिक्षुकः। इति त्रिकाण्डशेषः। भयः। इति सिद्धान्तकौमुद्यामुणादिपादः॥

भविष्णुः, त्रि, (भू+"सुवच।" ३।२।१३८। इति इष्णुच्। भवतेर्धातोश्छन्दसि विषये तच्छीलादिषु इष्णुच् प्रत्ययो भवतीति काशिका।) भविता। इत्यमरः॥

भविष्यः, त्रि, (भू+लटः सर्व्वेति शतृशस्ट् च ततो विभाषायां पृषोदरात् तस्य लोपः।) भविष्यत्कालः। इति हेमचन्द्रः॥ (यथा, हरिवंशे। ८१। २८।

"अयं भविष्ये कथितो भविष्यकुशलैर्द्विजैः॥")

पुराणविशेषे, क्ली। यथा,—

"चतुर्दशं भविष्यं स्यात्तथा पञ्चशतानि च॥"

इति श्रीभागवते १२ स्कन्धे १३ अः॥

(फलविशेषे, क्ली॥)

भविष्यत्, त्रि, (भू+लटः शतृशस्ट् च।) कालविशेषः। तस्य लक्षणम्॥ वर्त्तमानप्रागभावप्रतियोगित्वम्। इति सारमञ्जरी॥ वर्त्तमानकालोत्तरकालीनोत्पत्तिकत्वम्। इति शिरोमणिधृतपदार्थटीकाखण्डनम्॥ तत्पर्य्यायः। अनागतम् २ अस्तनम् ३ श्वस्तनम् ४ वर्त्स्यत् ५ वर्त्तिष्यमाणम् ६ आगामि ७ भावि ८। इति राजनिर्घण्टः॥ अद्यतने भव्ये श्वो दूरभव्ये परश्वो। इति सांप्रदायिकः। यथा श्वो भविता वर्षान्तरे भविष्यति। इति दुर्गादासः॥

भव्यं, क्ली, (भवतीति भूयते इति वा। भू+"भव्य गेयेति।" ३। ३। ६८। इति यत्। भव्यादयः शब्दाः कर्त्तरि वा निपात्यन्ते। इति काशिका।) फलविशेषः। चालता इति भाषा॥ तत्पर्य्यायः। भवम् २ भविष्यम् ३ भावनम् ४ वक्रशोधनम् ५ लोमफलम् ६ पिच्छिलबीजम् ७। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। उष्णत्वञ्च। बालस्य तस्य गुणः। वातकफापहत्वम्। पक्वस्य तस्य गुणः। मधुराम्लत्वम्। रुचिकारित्वम्। श्रमशूलहरत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"भव्यं स्वादु कषायाम्लं हृद्यमास्यविशोधनम्।
तदेव पक्वं दोषघ्नं गुरु व्याहि विषापहम्॥"

इति राजवल्लभः॥

अस्थि। इति मेदिनी। ये, ४३॥

भव्यं, त्रि, (भवतीति। भू+कर्म्मणि निपातनात् वा यत्।) शुभम्। (यथा, भागवते। ४। १४। ३०।

"भव्यायां भव्यवाच्यायां तस्यै विदुर! बुबुधुः।")

सत्यम्। योग्यम्। भावि। इति मेदिनी शब्दरत्नावली च॥ (यथा, मार्कण्डेये। ७६। ७।

"भूतभव्यभवन्नाथाः प्रसीदन्तु चेतसः चयं द्विज!॥"

श्रेष्ठम्। यथा, भागवते। १। १५। १७।

"यत्पादपङ्कजभवाय भजन्ति भव्याः।"

"भव्याः श्रेष्ठाः।" इति तट्टीकायां स्वामी॥ प्रसन्नम्। यथा, रामायणे। १। ६२। ७।

"स मे नाथो ह्यनाथस्य भव भव्येन चेतसा।"

भव्येन प्रसन्नेन चेतसेति तट्टीकायां रामानुजः॥)

भव्यः, पुं, (भवति उत्पद्यते भू+निपातनात् कर्म्मणि वा यत्।) कर्म्मरङ्गवृक्षः। इति मेदिनी। ये, ४२॥ रसभेदे, पुं क्ली। इति शब्दरत्नावली॥

भव्या, स्त्री, (भव्य+टाप्।) उमा। गजपिप्पली। इति मेदिनी। ये, ४२॥

भष, कुक्के। भिषुनोक्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अशब्दे अक० भिषुनोक्त्यादौ सक०-सेट्।) कुक्कः कुक्कुरादिकर्त्तृकशब्दः। भवति वा। भषत्यन्यदोषं खलः सूचयतीत्यर्थः। भर्त्सने इति प्राचः। भषति वा पाप्मं शब्देन निर्भर्त्सयतीत्यर्थः। इति रमानाथः। इति दुर्गादासः॥

भषः, पुं, (भषतीति। भष कुक्कुरादि शब्दे+अच्।) कुक्कुरः। इति रत्नमाला॥

भषकः, पुं, स्त्री, (भषतीति। भष+"कृञ् शिल्पिसंज्ञयोरपूर्व्वस्यापि।" उणा० २। ३२। इति कृञ्।) कुक्कुरः। इत्यमरः। २। १०। २२॥

भषणं, क्ली, (भष्+ल्युट्।) कुक्कनम्। कुक्कुरशब्दः। इति हेमचन्द्रः॥

भषा, स्त्री, सर्व्वचौरी। इति रत्नमाला॥

भषी, स्त्री, (भष+स्त्रियां जातित्वात् ङीष्।) शुनी। इति शब्दरत्नावली॥

भस, र लि दुसौ। भर्त्से। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० च सेट्।) र वैदिकः। लि, बभस्ति। इति दुर्गादासः॥

भसत्, क्ली, (बभस्तीति। भस्+"शृदृभसोऽदिः।" उणा० १। १२६। इति अदिः।) काष्ठम्। अश्वमांसम्। अधनम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

भसत्, [द्] स्त्री, (भस+अदिः।) भास्करः। योनिः। इति मेदिनी॥ मांसम्। कारण्डवपक्षी। ध्रुवः। इत्युणादिकोषः॥ कालः। इति त्रिकाण्डशेषः॥

भसनः, पुं, (बभस्तीति। भस्+ल्युः।) भ्रमरः। इति भूरिप्रयोगः॥

भसन्तः, पुं, (बभस्तीति। भस+बाहुलकात् झच्।) कालः। इति त्रिकाण्डशेषः॥

भसितं, क्ली, (भस्+क्तः।) भस्म। इति हेमचन्द्रः॥ (यथा, शिवपुराणे वायुसंहितायाम्। २६। ४१।

"चन्दनं वामदेवाख्ये हरितालञ्च पौरुषे।
ईशाने भसितं केचिदालेपनमितीद्दशम्॥")

भसच्चकः, पुं, (भानां नक्षत्राणां सूचकः।) दैवज्ञः। इति शब्दरत्नावली॥

भस्त्रका, स्त्री, (भस्त्यते इति। भस दीप्तौ+त्रन्+टाप्। भस्त्रा ततः स्वार्थे कन्। "भस्त्रेषाजाग्नेति।" ७।३।४७। इति इत्वं न। आतः स्थाने योऽकारस्तस्य इत्वं न भवति उदीचामाचार्य्याणां मतेन। इति काशिका।) चर्म्मप्रसेविका। इति शब्दरत्नावली॥

भस्त्रा, स्त्री, (भस्त्यतेऽनयेति। भस+"हुयमाशूभसिभ्यस्त्रन्।" उणा० ४। १६७। इति त्रन् अजादित्वात् टाप्।) अग्निदीपकचर्म्मनिर्म्मितयन्त्रविशेषः। भाथी इति याँता इति च भाषा। तत्पर्य्यायः। चर्म्मप्रसेविका २। इत्यमरः। २। १०। ३३॥ चर्म्मप्रसेवकः ३। इति भरतः॥ भस्त्राका ४ भस्त्रका ५ भस्त्री ६। इति शब्दरत्नावली॥ भस्त्रिका ७। इति व्याकरणम्॥ (यथा, भागवते। ६। २०। २१।

"माता भस्त्रा पितुः पुत्रो येन जातः स एव सः।
भरस्व पुत्रं दुष्यन्त! मावमंस्थाः शकुन्तलाम्॥")

भस्त्राका, स्त्री, भस्त्रा। इति शब्दरत्नावली॥

भस्त्री, स्त्री, (भस्त्यतेऽनयेति। भस्+त्रन्। गौरादित्वात् ङीष्।) भस्त्रा। इति शब्दरत्नावली॥

भस्म, [न्] क्ली, (बभस्तीति। भस् भर्त्सदीप्त्योः+"सर्व्वधातुभ्यो मनिन्।" उणा० ४। १४४। इति मनिन्॥ दग्धकाष्ठादिविकारः।) शिवाङ्गभूषणम्। छाइ इति भाषा। यथा,—

"अस्याङ्गभूषणं भस्म विभूतिर्भूतिरस्य तु।"

इति शब्दरत्नावली॥

तद्भस्म कामदेवशरीरजम्। यथा,—

"प्रसीद सर्व्वभूतेश! भक्ता वयमतः सदा।
इति स्म वदतां तेषाममराणां तदानलः।
ललाटचक्षुःसम्भूतो भस्माकार्षीच्चनोभवम्॥
दग्ध्वा कामं तदा वह्निर्ज्वालामालातिदीपितः।
संक्षिप्तिलोऽथ विधिना हरं गन्तुं प्रचक्रमे॥
महादेवोऽथ तद्भस्म मनोभवशरीरजम्।
आदाय सर्व्वगात्रेषु भूतिलेपं तदाकरोत्॥
लेपशेषाणि भस्मानि समादाय तदा हरः।
सगणोऽन्तर्दधे कालीं विहाय विधिसम्मते॥"

इति कालिकापुराणे ४१ अध्यायः॥

भस्मत्रयं सप्तविधस्नानान्तर्गताग्नेयस्नानम्। यथा,—
"आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्।"
इति यामलः॥
शिवपूजायां ललाटे तस्य धारणमावश्यकम्। यथा,—
"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः॥"
इत्याह्निकतत्त्वम्॥
तेन कांस्यशुद्धिर्यथा,—
"अम्लसा हेमरूप्यायः कांस्यं शुध्यति भस्मना।
अम्लेक्षाम्लैश्च रैत्यश्च पुनःपाकेन मृण्मयम्॥"
इति शुद्धितत्त्वम्॥*॥
अक्षरीविकारः। यथा,—
"शर्करासिकतामेही भस्माख्योऽक्षरीवेक्षुतम्।
अक्षर्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना॥"
इति सुश्रुते निदानस्थाने अक्षरीनिदानम्॥
भस्मकं, क्ली, (भस्म+संज्ञायां कन्।) रोगभेदः। भस्मकौट इति ख्यातः। विड्ङ्गः। (यथास्य पर्य्यायः।
"जन्तुघ्नं भस्मकं रेणुः क्रिमिघ्नं चित्रतण्डुलम्।
क्रिमिघ्नञ्च विड्ङ्गञ्च गर्हभं तच्च केवलम्॥"
इति वैद्यकरत्नमालायाम्॥)
कलधौतम्। इति मेदिनी। के, १३३॥*॥
भस्मकस्य निदानसंप्राप्तिपूर्ब्बकं लक्षणमाह।
"कट्वादिरूक्षान्नभुजां नराणां
क्षीणे कफे मारुतपित्तवृद्धौ।
अतिप्रवृद्धः पवनान्वितोऽग्नि-
र्भुक्तं क्षणाद्भस्म करोति यस्मात्।
तस्मादसौ भस्मकसंज्ञकोऽभू-
दुपेक्षितोऽयं पचते च धातून्॥"
भस्मकस्य सोपद्रवमरिष्टमाह।
"लट्वखेदाहमूर्च्छादीन् लक्षयेद्वाह्यग्निसम्भवान्।
पक्वान्नमाशु धात्वादीन् स क्षिप्रं नाशयेद्ध्रुवम्॥"
इति भावप्रकाशः॥
(अत्र तीक्ष्णाग्निशब्दाख्याने विजयेनोक्तम्। तीक्ष्णत्वहेतुना भस्मकस्यावरोधः। अत्यन्ततीक्ष्णाग्निरेव हि भस्मकमित्युच्यते॥ यदुक्तं चरके चिकित्सास्थाने ऊनविंशेऽध्याये। भस्मकचिकित्सामाह।
"नरे क्षीणकफे पित्तं कुपितं मारुतानुगम्।
क्षोभयत्यग्निकस्थाने बलमस्यः प्रयच्छति॥
तथा लब्धबलो देहे विरूक्षे सानिलोऽनलः।
परिभूय पचत्यन्नं तेनान्नादाशु सुक्षुधम्॥
पक्वान्नं सततं धातून् क्षोभितादीन् पचत्यपि।
ततो दौर्ब्बल्यमात्रस्थान् क्षत्युपेक्षेत नरम्॥
भुक्तेऽन्ने लभते शान्तिं जीर्णमात्रे प्रतप्यति॥"
"तमग्निं गुरुस्निग्धशीतमधुरविष्वलैः॥
अन्नपानैर्नयेच्छान्तिं दीप्तमग्निमिवाम्बुभिः।
सहसुंडुरजीर्णेऽपि भोज्यान्यस्योपहारयेत्॥
निरिन्धनोऽन्तरं लब्ध्वा यथेनं न विपादयेत्।
पायसं क्षीरं स्निग्धं पैष्टिकं गुडवेक्षुतम्॥
अद्यात्तथौदकानूपमिषितानि कृतानि च।
मत्स्यान् विशेषतः स्निग्धान् स्थिरतोयचरां-
स्तथा॥
आविकं सघृतं मांसमदाद्यग्निनाप्तम्।"
"पिबेत् शीतामुना सर्पिर्मधुच्छिष्टेन वा युतम्।
गोधूमचूर्णं पयसा ससर्पिष्कं पिबेन्नरः॥
आनूपरसभिङ्गान् वा क्षीरं स्नेहांस्तैलवर्ज्जितान्।
गोधूमचूर्णमन्यं वा अथवित्वा घृतं पिबेत्॥"
"श्यामा चित्रद्विपकं वा पयो दद्याद्विरेचनम्।
अथसक्तं पित्तघ्नान्यैर्यं पायसमतिभोजनम्॥
यत्किञ्चिन्मधुरं मेध्यं श्लेष्मलं गुरुभोजनम्।
तदत्यभिहितं सर्व्वं भुक्त्वा प्रस्वपनं दिवा॥
कफे वृद्धे जिते पित्ते मारुते चानलः समः।
समधातोः पचत्यन्नं पुष्ट्यायुर्बलवृद्धये॥")
भस्मकारः, पुं, (भस्म करोतीति। कृ+"कर्म्मण्यण्।" ३।२।१। इति अण्।) रजकः। इति शब्दमाला॥
भस्मकूटः, पुं, कामरूपस्थपर्व्वतभेदः। यथा,—
"नन्दनात् पूर्व्वभागे तु भस्मकूटो महागिरिः।
यत्र तिष्ठति भूतेशो महादेवो वृषध्वजः॥"
इति कालिकापुराणे ८१ अध्यायः॥
भस्मगन्धा, स्त्री, (भस्मन इव गन्धो यस्याः।) रेणुका। इति भावप्रकाशः॥
भस्मगन्धिका, स्त्री, (भस्मगन्धोऽस्त्यस्या इति। भस्मगन्ध+"अत इनिठनौ।" ५।२।११५५। इति ठन्। टाप्।) रेणुकाकाकगन्धद्रव्यम्। इति जटाधरः॥
भस्मगन्धिनी, स्त्री, (भस्मन इव बाहुल्येन गन्धोऽस्त्यस्या इति। भस्मगन्ध+इनिः। ङीप्।) रेणुकाकाकगन्धद्रव्यम्। इत्यमरः। २।४।१२०॥
भस्मगर्भः, पुं, (भस्म गर्भेऽस्य।) तिनिशवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्य तिनिशशब्दे ज्ञातव्यम्॥)
भस्मगर्भा, स्त्री, (भस्म गर्भेऽस्या इति। टाप्।) कपिलशिंशपा। इत्यमरः। २।४।६३॥ (अस्याः पर्य्यायो यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"शिंशपा पिच्छिला श्यामा कृष्णसारा च सा गुरुः।
कपिला सैव मुनिभिर्भस्मगर्भेति कीर्त्तिता॥")
रेणुकानामगन्धद्रव्यम्। इति जटाधरः॥
भस्मतूलं, क्ली, (भस्म तूलति तूलयति वेति। तूल+क।) ग्रामकूटः। पांशुवर्षणम्। हिमम्। इति मेदिनी। के, १६८॥
भस्मरोहा, स्त्री, (भस्मनि रोहति इति। रुह्+अच्। टाप्।) दग्धाङ्कुरः। इति राजनिर्घण्टः॥
भस्मवेधकः, पुं, (भस्म इव वेधकः।) कर्पूरः। इति शब्दरत्नावली॥
भस्माचलः, पुं, कामरूपस्थपर्व्वतभेदः। यथा,—
"सर्व्वतीर्थजले स्नात्वा सृष्ट्वा चक्रं सवासवम्।
मणिकर्णेश्वरं दृष्ट्वा मुक्तिर्भस्माचलं गते॥"
इति श्रीकालिकापुराणे ८१ अध्यायः॥
भस्माक्षयः, पुं, (भस्म आक्षयते क्षर्हते इति। आ+क्षै+बाहुलकात् घः।) कर्पूरः। इति त्रिकाण्डशेषः॥ (विषयोऽस्य कर्पूरशब्दे ज्ञातव्यः॥)
भा, ल, द्यौः। इति कविकल्पद्रुमः॥ (अदा०-परo-अकo-अनिट्।) ल, भाति। द, भा। इति दुर्गादासः॥
भा, स्त्री, (भा दीप्तौ+"घिद्विदादिभ्योऽङ्।" ३। ३। १०४। इत्यङ्। टाप्।) प्रभा। दीप्तिः। इत्यमरः। १। ४। ३४॥ (यथा, वाजसनेयसंहितायाम्। ३०। १२।
"भाये दार्व्वाहारमिति॥")
भाः, [स्] पुं, (भासते इति। भास दीप्तौ+"भाजभासधुर्विद्युतोर्जिपृकृग्वस्वः क्विप्।" ३। २। १७७। इति क्विप्।) सूर्य्यः। इति त्रिकाण्डशेषः॥ (स्त्री, दीप्तिः। इत्यमरः। १। ४। ३४॥ यथा, ऋग्वेदे। १। ४६। १०।
"अभूद्भु भा उ अंशवे हिरण्यं प्रति सूर्यः॥")
भाकुटः, पुं, (भया दीप्त्या कुटतीति। कुट+क।) मत्स्यविशेषः। भेकुटी इति भाषा॥ अस्य गुणाः। मधुरत्वम्। शीतत्वम्। वृष्यत्वम्। श्लेष्मकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः॥
भाकूटः, पुं, (भायुक्ताः कूटाः शिखराणि यस्य।) पर्व्वतभेदः। मत्स्यभेदः। इति मेदिनी। टे, ५३॥
भाकोषः, पुं, (भानां दीप्तीनां कोष इव।) सूर्य्यः। इति त्रिकाण्डशेषः॥
भाक्तं, त्रि, (भक्तेः गौरवात्तेरागतमिति। भक्ति+अण्।) पारिभाषिकम्। गौणम्। लाक्षणिकम्। औपचारिकम्। यथा। "नन्वेवं परत्र सप्तमे मासि क्रियमाणस्य कथं षाण्मासिकत्वम्। इति चेदुक्तम्।" इति तिथ्यादितत्त्वम्॥ (भक्तस्येदमिति तस्येदमित्यण्।) भक्तसम्बन्धिनि च॥ (भक्तमस्मै दीयते नियुक्तमिति। भक्त+"भक्तादण्यतरस्याम्।" ४। ४। ६८। इति पक्षे ठक्।) अन्नेन पोष्ये च॥)
भाक्तिकः, त्रि, (भक्तमस्मै नियुक्तं दीयते इति। भक्त+"भक्तादण्यतरस्याम्।" ४। ४। ६८। इति पक्षे ठक्।) अन्नेन पोष्यः। भक्तमस्मै दीयते। इति सिद्धान्तकौमुदी॥
भाग, पुं, (भज्यते इति। भज भागसेवयोः+कर्म्मणि घञ्।) अंशः। इत्यमरः। २।६।८६॥ रूप्यार्द्धकः। भाग्यम्। एकदेशः। इति शब्दरत्नावली॥ राशेस्त्रिंशभागैकभागः। यथा,—
"त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते॥"
इति तिथ्यादितत्त्वधृतविष्णुधर्म्मोत्तरवचनम्॥
(भज+भावे घञ्। भजनम्। भगानामैश्वर्य्यानां समूहः इति अण्। ऐश्वर्य्यसमूहः॥)
भागधेयं, क्ली, (भाग एव। भाग+"भागरूपनामभ्यो धेयः।" इति धेयप्रत्ययः। अभिधानान्नपुंसकत्वम्।) भाग्यम्। इत्यमरः। २।४।२८॥

भागधेयः, पुं, (भागेन धीयते इति। धा + कर्म्मणि यत्।) राजकरः। इत्यमरः। २। ८। २७॥ दायादः। इत्यजयपालः॥

भागवतं, क्ली, (भगवतो भगवत्या वेदम्। भगवत् + तस्येदमित्यण्।) अष्टादशपुराणान्तर्गतमहापुराणविशेषः। स च वेदव्यासप्रणीतषट्सप्तत्रिंशत्सहस्रश्लोकसंख्याक-भगवन्माहात्म्यवर्णन-प्रधानको ग्रन्थः। यथोक्तं मत्स्यपुराणे पुराणदानप्रस्तावे।

"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्म्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥
लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम्।
प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदम्॥
अष्टादशसहस्राणि पुराणं तत् प्रकीर्त्तितम्।"

पुराणान्तरे च।

"ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः।
हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा॥
गायत्र्या च समारम्भस्तद्वै भागवतं विदुरिति।"

पद्मपुराणे च अम्बरीषं प्रति गौतमवचनम्॥

"अम्बरीष! शुकप्रोक्तं नित्यं भागवतं शृणु।
पठस्व स्वसुखेनापि यदीच्छसि भवच्छयमिति॥"

इति श्रीभागवतटीकायां श्रीधरस्वामी॥

(तत्र तावत् पुराणेषु भागवतद्वयं प्रसिद्धम्। एकं महापुराणान्तर्गतमपरमुपपुराणान्तर्गतम्। लोकेऽप्युपलब्धो ह्योर्देवीभागवतनाम्ना विष्णुभागवतनाम्ना चास्त्येव। तत्रैकं महापुराणान्तर्गतमन्यदुपपुराणान्तर्गतमित्यपि निर्विवादमेव। तथापि किं देवीभागवतं महापुराणमन्यदुपपुराणमथवा विष्णुभागवतं महापुराणमन्यदुपपुराणमिति संशये केचित् विष्णुभागवतमेव महापुराणमिति वदन्ति। केचित् देवीभागवतमेव महापुराणमिति वदन्ति। तत्र प्रथमपक्षैकदेशिनः केचिदुपपुराणेषु द्वितीयं भागवतं नास्त्येव महापुराणेष्वेवैकं भागवतं प्रसिद्धम्। तच्च विष्णुभागवतमेव न देवीभागवतम्। देवीभागवतन्तु निर्म्मूलमेवेति वदन्ति। द्वितीयपक्षैकदेशिनोऽपि विष्णुभागवतं वोपदेवकृतमिति वदन्ति। वस्तुतस्तूभयोरपि पुराणयोः पुराणमतभेदेन महापुराणत्वमुपपुराणत्वञ्च। ननु महापुराणेष्वेवैकं भागवतं प्रसिद्धम्। नतूपपुराणेषु द्वितीयमस्तीति चेन्न। कूर्म्मगरुडपाद्मादिषूपपुराणेषु द्वितीयस्य सदृपरिगणनात्। तथाहि हेमाद्रौ दानप्रस्तावे कूर्म्मपुराणेऽष्टादशपुराणान्युक्त्वा,—

"अन्यान्युपपुराणानि मुनिभिः कथितानि तु।
आद्यं सनत्कुमारोक्तं नारसिंहमतः परम्॥"

इत्यादि॥

"पराशरोक्तं प्रवरं तथा भागवताह्वयम्।"इति। तथा गारुडे तत्त्वरहस्ये द्वितीयांशे धर्म्मकाण्डे प्रथमाध्याये प्रथमतो महापुराणानां सात्त्विकादिभेदेन विभागमुक्त्वा लघुपुराणानां सात्त्विकादिभेदेन विभागप्रदर्शनपरे ग्रन्थेऽप्युक्तम्।

"पुराणं भागवतं दौर्गं नन्दिप्रोक्तं तथैव च।
पाशुपत्यं रौरुकञ्च भैरवञ्च तथैव च॥"

इति।

तथा ततः पूर्व्वमपि।

"विष्णुधर्म्मोत्तरे चैव तत्र भागवतं तथेति।"

तत्र भागवतं तथेति पाठे तत्र ग्राह्यमित्यर्थः। तदविशेषेणैव चोत्तमत्वं सूचितम्। तथा पाद्मे शुकुनपरीक्षायाम्।

"ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा।"

इत्यादि॥

"तथैव गदितं राम! पुराणं कापिलं तथा।
वाराहं ब्रह्मवैवर्त्तं शुकुनेषु प्रशस्यते।
शैवं भागवतं दौर्गं भविष्योत्तरमेव च।"इति।

तथा पाद्मे भागवतमाहात्म्ये एकोनविंशेऽध्याये उपपुराणेषु।

"शैवमादिपुराणञ्च देवीभागवतं तथा।"इति।

तथा मधुसूदनसरस्वतीकृतसर्व्वशास्त्रार्थसंग्रहेऽप्युपपुराणमध्ये भागवतं परिगणितम्। नागोजीभट्टादिभिश्च धर्म्मशास्त्रग्रन्थेष्वेवमन्यैरपि निबन्धकारैरिति। ननु देवीभागवतस्य।

"तत्र भागवतं पुण्यं पञ्चमं वेदसम्मितम्॥"

इति प्रथमाध्यायस्थवचनेनाष्टादशमहापुराणेषु पञ्चममिदं पुराणमिति स्वस्य महापुराणत्वं बोधयतः कथमन्यपुराणमुपपुराणत्वं बोधयेन्नैवं क्वचिद्दृश्चरमिति चेन्न। नारदीयशिववायव्यादित्यपुराणानां स्वसुखेनान्यसुखेन वा महापुराणत्वेन श्रूयमाणानामन्यपुराणेष्वेवोपपुराणत्वस्य व्यवस्थापनात्। पुराणमतभेदेनैकस्यापि पुराणस्य महापुराणत्वोपपुराणत्वसिद्धा तदिरोधाभावात् पुराणभेदेन मतभेदस्तु बहुशः प्रसिद्धः। वैष्णवपुराणेषु सात्त्विकत्वं शैवपुराणेषु तामसत्वं वैष्णवपुराणमतेन। शैवपुराणेषु सात्त्विकत्वं वैष्णवपुराणेषु तामसत्वम्।

"दश शैवपुराणानि सात्त्विकानि विदुर्बुधाः।
तामसानि च चत्वारि वैष्णवानि प्रचक्षते॥"

इति स्कान्दे।

शैवपुराणमतेनेत्येवं प्रकारेणेति। तथाहि नारदीयस्य पुराणस्य स्वान्तर्गतमहापुराणग्रन्थसङ्ख्या स्वसुखेनैव स्वात्मनो महापुराणत्वं बोधयतः।

"मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
आलिंपाग्निपुराणानि कूस्कंगारुडमेव च॥"

इति वचनेन वक्ष्यमाणसूत्रपुराणवचनेन च महापुराणबहिर्भूतत्वं बोध्यते। आलिंपाग्नीत्यत्राऽऽग्नेयादित्यपुराणं तथा शैवपुराणस्य स्वसुखेन स्वस्य महापुराणत्वं बोधयतो मद्वयं भद्वयमित्येव वचनं तद्बहिर्भूतत्वं बोधयति। ननु वायव्यं पुराणमेव शैवं शिवप्रतिपादकत्वात्तस्य च वचतुष्टयपदेन संग्रहात्तदुदाहरणं न सम्भवतीति चेन्न। सूतसंहितायाम्।

"ब्राह्मञ्च वैष्णवं पाद्मं शैवं भागवतं तथा।
भविष्यं ब्रह्मवैवर्त्तं मार्कण्डेयञ्च वामनम्॥
आग्नेयं वायवं मात्स्यम्।" इति वचनेन शैववायव्यपुराणयोः परस्परं पृथक्त्वेन परिगणनात्। तथा वायव्यपुराणस्य स्ववचनेन स्वस्य महापुराणत्वं बोधयतो वक्ष्यमाणशैवपुराणवचनं महापुराणबहिर्भूतत्वं बोधयति। तथादित्यपुराणस्यापि आलिंपाग्निपुराणानीति क्वचित् पुराणसम्मतपाठेन महापुराणत्वम्। अन्यापलिङ्गकूस्काख्यमिति क्वचित् पुराणसम्मतपाठेन महापुराणबहिर्भूतत्वं यथा चैतेषां चतुर्णां क्वचित् पुराणेषु महापुराणत्वेन क्वचिच्चोपपुराणत्वेन ग्रहणम्। तथा देवीभागवतस्यापि भविष्यतीति को विरोधः। मतभेदेनोभयोरपि वचनयोः प्रमाणत्वात्। ननु अन्यान्युपपुराणानि मुनिभिः कथितानि त्वित्यादिवचनैरुपपुराणानि यावान्यमुनिकथितान्येव सन्ति। देवीभागवतं तु यावत्कृतमेवेति। तस्य कथमुपपुराणेष्वन्तर्भाव इति चेन्न। नारदशैववायव्यादित्यपुराणेषु यावत्कृतत्वेऽपि कस्यचित् पुराणमते उपपुराणत्वदर्शनात्तादृशनियमस्यास्वीकारात् प्रायग्रन्थया सत्त्वाभिप्रायेण तु तद्वचनम्। इत्थं भागवतद्वयस्य महापुराणमध्ये उपपुराणमध्ये च सत्त्वसिद्धौ कस्य पुराणस्य मते किं भागवतं महापुराणान्तर्गतमिति चेदुच्यते। शैवपुराणमते मात्स्यपुराणमते च देवीभागवतमेव महापुराणमिति। तथाहि शैवपुराणे उत्तरखण्डे मध्यमेश्वरमाहात्म्ये शिवाश्वत्थवरेण यावेन पुराणानि प्रणीतानीत्युक्त्वनन्तरं तेषां नामान्यष्टादशोक्त्वा तेषां योगरूढानां नाम्नां निर्व्वचनं तत्रैव कृतम्। तद्यथा,—

"यत्र वक्ता स्वयं तत्रे! ब्रह्मा साक्षाच्चतुर्मुखः।
तस्मादाद्यं समाख्यातं पुराणं प्रथमं मुने!॥"

तत्रे इति मुनिसम्बोधनम्।

"पद्मकल्पस्य माहात्म्यं तत्र यस्मादुदाहृतम्।
तस्मात् पाद्मं समाख्यातं पुराणञ्च द्वितीयकम्॥
पराशरकृतं यत्तु पुराणं विष्णुबोधकम्।
तदेव यावत्कथितं पुत्रपित्रोरभेदतः॥
यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं बहु।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च॥
भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते।
तत्तु भागवतं प्रोक्तं ननु देवीपुराणकम्॥
नारदोक्तं पुराणन्तु नारदीयं प्रचक्षते।
यत्र वक्ताभवत्तत्रे! मार्कण्डेयो महामुनिः॥
मार्कण्डेयपुराणं हि तदाख्यातञ्च सप्तमम्॥
अग्नियोगात्तदाग्नेयं भविष्योक्तैर्भविष्यकम्।
विवर्त्तनाद्ब्रह्मचस्तु ब्रह्मवैवर्त्तमुच्यते॥
लिङ्गस्य चरितोक्तत्वात् पुराणं लिङ्गमुच्यते।
वराहस्य च वाराहं पुराणं द्वादशं शृणु!॥
यत्र स्कन्दः स्वयं वक्ता श्रोता साक्षात्महेश्वरः।
तत्तु स्कान्दं समाख्यातं वामनस्य तु वामनम्॥
कौर्म्मं कूर्म्मस्य चरितं मात्स्यं मत्स्यस्य कीर्त्तितम्।

गरुड़स्तु स्वयं वक्ता यत्तद् गारुड़संज्ञकम् ॥
ब्रह्माण्डचरितोक्तत्वाद् ब्रह्माण्डं परिकीर्त्यते-
तम् ॥"

अत्र क्वचिद्वक्तृसम्बन्धः क्वचिच्छ्रोतृसम्बन्धः क्वचित्प्रतिपाद्यसुख्यदेवताचरितसम्बन्धः। प्रवृत्तिनिमित्तमिति स्पष्टमेव दर्शितम्। तत्र भागवतनाम्नो निर्व्वचनवाक्यमेतत्।

"भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते।
तत्तु भागवतं प्रोक्तं न तु देवीपुराणकम् ॥"

अनेन च वाक्येन भगवत्या इदं भागवतमिति व्युत्पत्त्या ग्रन्थप्रतिपाद्यसुख्यदेवताचरितसम्बन्धः। प्रवृत्तिनिमित्तमिति स्पष्टमेव दर्शितम्। का सा भगवतीत्यपेक्षायामाह दुर्गाया इति। तत्तु भागवतं तु ग्रन्थो निश्चयार्थकः। तदेव भागवतपदवाच्यं प्रोक्तमित्यर्थः। न तु पुराणान्तरमतप्राप्तं विष्णुभागवतं महापुराणान्तर्गतं भागवतमित्यर्थ इति ग्रैवपुराणेन स्वमतं प्रदर्शितम्। कस्मिंश्चेतत् पुराणान्तरमतेन उपपुराणं जानीयात्तत्राह न तु देवीपुराणकमिति। पुराणकमित्यत्र कप्रत्ययोऽल्पार्थकः। अल्पे इति स्मरणात् पुराणकमल्पं पुराणमिति यावत्। देव्याः पुराणकं देवीपुराणकम्। यदिदमुक्तं तद्देव्या उपपुराणं नैवास्तीत्यर्थः। अनेन च वाक्येनान्यस्य महापुराणत्वनिषेधेन स्वाभिप्रेतस्य च उपपुराणत्वनिषेधेन श्रीमद्देवीभागवतस्यैव महापुराणत्वं बोधयति व्यासः। सुखत्वेन भगवतीचरितप्रतिपादकस्य महापुराणमध्ये कस्यचित् पुराणस्यान्यस्याभावात्। ननु नारदादिपुराणवचनबलात् विष्णुभागवतस्य महापुराणान्तर्गतत्वे निर्व्विघ्ने निश्चिते तद्बलात् भागवतद्वयस्य मतभेदेन महापुराणत्वकल्पनापेक्षया यत्किञ्चित् भगवतीचरितस्याभिन्नत्वेन ग्रहणेनानेन वचनेन विष्णुभागवतनाम्न एव निरुक्तिः कृतेति कुतो न कल्प्यते। वर्ण्यते च विष्णुभागवते दशमस्कन्धे किञ्चिदिन्थंवाभिन्नाश्चरितमिति चेन्न। तथा सति मुनेर्विष्णुभागवतविषय एव तात्पर्यसत्त्वे भागवत इदं भागवतमित्येव व्युत्पत्तिं कुर्य्यान्नहि केनचिन्मुनेः ग्रीवस्थिभारः स्थापितो यत् स्वाभिप्रेतां युक्तियुक्तां निरुक्तिं त्यक्त्वा निष्प्रयोजनोऽनभिप्रेतां निरुक्तिं करोति। किञ्च सर्व्वत्रैतद्वचनप्रकरणे

"यत्र पूर्व्वोत्तरे खण्डे ग्रीवस्य चरितं बहु।
ग्रैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च ॥"

इति बहुवचनैर्व्बहुचरितसुख्यचरितसम्बन्धरूपप्रवृत्तिनिमित्तस्यैवाभिप्रेतत्वं मुनेरवधीयते। मतभेदेन पुराणभेदकल्पना तु नाचैव नवीनास्ति। पूर्व्वोक्तयुक्त्या नारदग्रैववायवादित्यपुराणेष्वन्यत्रापि सत्त्वात्। अस्तु वा गौरवं नहि तद्भयात् मुनेस्तात्पर्य्यमन्यथाकर्त्तुं कश्चिदीष्टे। तस्मात् पूर्व्वोक्तं तात्पर्यं विहायान्यतात्पर्य्यकल्पनान्यार्थकरणं महासाहसमेव। ननु लक्षणवाक्यमेतत्। ततश्च दुर्गाचरितं यत्र वर्ण्यते तद्भागवतमित्यर्थः। तच्च न देवीभागवतं भवितुमर्हति। तस्य तल्लक्षणलक्ष्यत्वे न तु देवीपुराणकमिति निषेधविषयत्वेन निषेधविधोः समानविषयत्वापत्तेः। किन्तु विष्णुभागवतमेव। ननु तथाप्येतल्लक्षणमन्यपुराणेष्वतिप्रसक्तमिति चेन्न। यथा वृत्रासुरवधलक्षणमन्यपुराणेषु प्रसक्तमपि यथा लक्षणत्वेन गृहीतम्। तद्वदत्रापि संस्कारादिति चेन्न। पूर्व्वोक्तनिरुक्तिवचनप्रकरणस्यत्वविरोधात्। किञ्च लक्षणवाक्यमेतदितिपक्षेऽप्येतस्य लक्षणस्य महापुराणोद्देश्येनैव सत्त्वादुपपुराणेष्वस्य प्रसक्त्यभावाद्देवीपुराणकालिकापुराणयोरुपपुराणत्वस्य निश्चितत्वात् तत्रैतल्लक्षणस्य प्रसक्तिरेव नास्तीति न तु देवीपुराणकमिति निषेधो व्यर्थ एव स्यात्। तस्मादेव तद्वचनस्य पूर्व्वोक्त एवार्थः। किञ्च लक्षणवाक्यमेतदिति पक्षे यत् किञ्चिच्चरितं गीयते उत यावच्चरितम्। यत्किञ्चिच्चरितस्य सर्व्वमहापुराणेषु सत्त्वाद्देवीपुराणमात्रनिषेधेन न निर्व्वाहः। तस्माद्देवीपुराणस्यैव निषेधस्यारस्याद्यावच्चरितं मुख्यत्वेन भगवतीचरित्रमेव ग्राह्यम्। तदा तव नाभीष्टार्थसिद्धिः। मुख्यत्वेन विष्णुभागवते दुर्गाचरितस्याभावान्नमेव त्वभीष्टार्थसिद्धिः। निषेधविधोः समानविषयकत्वरूपं दूषणन्तु नैव सम्भवति। प्रकरणबलात् तात्पर्य्ये निश्चिते तद्विषयं विहायैव निषेधप्रवृत्तेः। वृत्रासुरवधोपेतलक्षणं तु गायत्र्यारम्भविग्रहमिति न तदतिप्रसक्तं तस्मात् पूर्व्वोक्त एव लक्षणार्थ इति तद्वचनाद्देवीभागवतं महापुराणं न तु विष्णुभागवतमिति ग्रैवपुराणमतम्। अत्र च नियमद्वयस्य पूर्व्वोक्तस्य सत्त्वाद्विष्णुभागवतविषये तथा नियमद्वयाभावादिदं ग्रैवपुराणमतमेव सुखमन्यपुराणमतं लोकदेशीयेति नियमद्वयप्रदर्शकवायसवाक्येन स्पष्टमेव बोधितमिति सुधियो विभावयन्तु। किञ्च।

"ग्रैवमादिपुराणञ्च देवीभागवतं तथा।"

इति प्राञ्चवचनसंवादितया,—

"नवरात्रे तु देवेशि! दौर्गं भागवतं पठेत्।
जपेत् सप्तशतीं चण्डीं नियमेन समाहितः ॥"

इति दुर्गातन्त्रिणीधृतयामलवचनेन तथा,—

"देवीभागवतं नित्यं पठेद्वाऽथ समाहितः।
नवरात्रे विशेषेण श्रीदेवीप्रीतये मुदा ॥"

इति महेशठक्कुरकृतदुर्गाप्रदीपधृतदेवीयामलवचनेन च सप्रमाणस्य देवीभागवतस्य सर्व्वोपपुराणमध्ये एव निवेशात्।

"तत्र भागवतं पुण्यं पञ्चमं वेदसम्मितम्।"

इति प्रथमस्कन्धस्थस्य महापुराणेषु पञ्चममिदं पुराणमित्यर्थकस्य देवीभागवतोक्तवचनस्य निरालम्बनत्वादप्रामाण्यापत्तेः। मन्मते तु तस्य विषयलाभान्नाप्रामाण्यं तद्वचनप्रामाण्यादपि देवीभागवतमेव महापुराणमिति। किञ्च हेमाद्रौ कालिकापुराणे।

"यदिदं कालिकाख्यं तन्मूलं भागवतं स्मृतम्।"

इति वचनं तदपि देवीभागवतस्यैव महापुराणत्वं बोधयति। तथाहि।

"अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते।
विजानीध्वं द्विजश्रेष्ठास्तथा तेभ्यो विनिर्गतम् ॥"

इति मात्स्यवचनेनोपपुराणानां महापुराणमूलकत्वनियमादिदं कालिकापुराणं किमुपपुराणमूलकमित्याकाङ्क्षायां तस्यानिर्व्वचकमिदं वाक्यं यदिदं कालिकाख्यं पुराणं तन्मूलं तस्य मूलं भागवतं विदुरिति हि तस्यार्थो निबन्धकारैर्दर्शितः। यथान्यान्युपपुराणान्येकैकस्मान्महापुराणान्निर्गतानि तद्वदिदं भागवतादुत्पन्नमिति यावत्। तच्च भागवतं न वैष्णवं तन्मूलं भवितुमर्हति। वैष्णवपुराणस्य देवीपुराणमूलकत्वे एव सामञ्जस्यात्। ग्रैवोपपुराणानां ग्रैवेभ्य एव वैष्णवोपपुराणानां वैष्णवेभ्य एवोत्पत्तिदर्शनादिति देवीभागवतमेव तन्मूलमिति तस्य महापुराणत्वं सिद्धम्। यत्र तु क्वचित् क्वचित् महापुराणमूलकत्वमप्रसिद्धं तत्र यथायोग्यमनुमेयमिति। किञ्चादित्यपुराणदृष्ट्यापि देवीभागवतमेव महापुराणम्। तथाहि आदित्यपुराणे रक्तासुरवधप्रस्तावे।

"या जघ्ने महिषं दैत्यं क्रूरं वृत्रासुरं तथा।
साद्य रक्तासुरं हत्वा साराज्यं ते प्रदास्यति ॥"

इति वचनम्। अनेन वचनेन देवीभागवते स्वसम्मतिर्दर्शिता। न हि देवीभागवतातिरिक्तसर्व्वपुराणेषु देवीकृतो वृत्रासुरवधः क्वचिदप्यस्ति। इन्द्रकृतस्यैव तस्य सत्त्वात् केवलं देवीभागवत एव देवीकृतः सोऽस्ति। तदग्रहणेन तु देवीभागवते स्वसम्मतिर्दर्शितेति युक्तमेव। अनन्तरञ्च तत्रैव पुराणदानप्रस्तावे।

"ददाति सूर्य्यभक्ताय यस्तु भागवतं द्विजाः।
सर्व्वपापविनिर्मुक्तः सर्व्वव्याधिविवर्ज्जितः ॥
जीवेद्वर्षशतं साग्रमन्ते वैष्णवतं पदम् ॥"

इति पठितम् ॥

अत्र च स्वसम्मतं भागवतमेव गृहीतुमुचितम्। किञ्चेदं वचनं देवीभागवतपक्षे एव सरसतः सङ्गच्छते। प्रथमस्कन्धे एकादशाद्यध्यायेषु सविस्तरं गायत्रीविधानसहस्रनामादेः कथनात् सूर्य्यस्य गायत्रीदेवतात्वात्। तद्भागवतपक्षे तु वैकुण्ठं गच्छेदित्येव वदेदिति। किञ्च

"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्म्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥"

इति मात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति। वेदे त्रिपदा गायत्रीति गायत्रीलक्षणं श्रूयते। तेन च त्रिपाच्छन्दोऽधिकृत्य यत्र धर्म्मविस्तरो वर्ण्यते तद्भागवतमिति तदर्थः। त्रिपाच्छन्दश्च देवीभागवते प्रथमस्कन्धे।

"सर्व्वचैतन्यरूपां तामाद्यां विद्याञ्च धीमहि।
बुद्धिं या न प्रचोदयात् ॥" इति श्रूयते।

न विष्णुभागवते तच्छन्दोऽस्ति मुख्यार्थसम्भवे गायत्रीपदस्य लक्षणया धीमहीत्यर्थकरणेन विष्णुभागवतपरत्वकल्पनमस्य वचनस्य तु साहसमेव। क्वचित्पुराणेषु यदि तादृग्वाक्येव विष्णुभागवतपराणि वचनानि सन्ति। तत्र गत्यन्तराभावादस्तु लक्षणा। उदासीने मात्स्यवाक्ये तु मुख्यविषयसम्भवे सानचिता। यद्यप्याधुनिकपुस्तकेषु क्वचित्तुरगश्लोकोऽपि दृश्यते तथापि सप्तशत्यां गुप्तवतीटीकाकारादिभिस्त्यक्तश्लोकस्यैव व्याख्यातत्वेन स एव सांप्रदायिकः पाठ इति बोध्यम्। यत्तु गायत्र्यर्थस्य विष्ण्वध्यानं न तु शिवशक्तिसूर्यादिध्यानमित्युक्तं तत्तु नास्तिकत्वमूलकमेव।

"मैत्रेयजीवानां भर्गो वै रुद्रः।" इति श्रुतौ प्रपञ्चसारादिसर्वतन्त्रेषु पुराणादिषु च शिवसूर्यशक्त्यादिरूपार्थस्योक्तत्वाच्च तदुदाहृतमात्स्येयवाक्यन्तु विरोधत्वे नापेक्षं स्यादसति ह्यनुमानमिति न्यायात् स्मारकमेवेति। किञ्च।

"ह्ययग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा।
गायत्र्या च समारम्भस्तद्वै भागवतं विदुः॥"

इति पुराणान्तरवाक्यमपि देवीभागवतस्यैव महापुराणत्वबोधकम्। तथा हि ह्ययग्रीवनामासुरो देवीभागवते प्रथमस्कन्धे प्रसिद्धस्त्रैगोपासिता ब्रह्मप्रतिपादिका विद्या स्त्रीदेवत्यो मन्त्रः। सा विद्या यत्र वर्णते तद्भागवतमित्यर्थः। स दैत्यस्तदुपासिता विद्या चेत्युभयमपि तत्रैव प्रथमस्कन्धे दर्शितम्।

"जपन्नेकाक्षरं मन्त्रं मायाबीजात्मकं मम॥"
इत्यादिना॥

ननु विष्णुभागवते पञ्चमस्कन्धेऽपि ह्ययग्रीवमन्त्रस्य सत्त्वादिदं वचनमुभयभागवतसाधारणमिति चेन्न। नारदीये भारतादितन्त्रादिनिबन्धेषु च।

"मन्त्राः पुंदेवताः प्रोक्ता विद्याः स्त्रीदेवताः स्मृताः॥"

इत्यादिवचनैः स्त्रीदेवत्यमन्त्रेष्वेव विद्यापदप्रयोगो न पुंदेवत्यमन्त्रेष्विति प्रतिपादनात्। क्वचित् पुंदेवत्यमन्त्रे तथाप्रयोगस्तु गौणः। न च गौणार्थमादाय तद्वचनस्य विष्णुभागवतपरत्वं कल्पितुमुचितम्। लक्षणारूपदोषापत्तेः। तस्मान्न तद्वचनमुभयसाधारणमिति देवीभागवतस्यैव महापुराणत्वं बोधयति। किञ्च सारस्वतस्य अस्मिन्नेव मात्स्यवचनादपि देवीभागवतमेव महापुराणम्। अत्र ह्येवं प्रकरणशुद्धिः।

ऋषय ऊचुः।

"पुराणसंख्यामाचक्ष्व सूत! विस्तरतः क्रमात्।"

इति मुनिप्रश्नोत्तरं ब्रह्मणाभिहितं पूर्वं यत्तद्वाक्यं पद्मकल्पवृत्तान्ताश्रयं पाद्मं वराहकल्पवृत्तान्ताश्रयं वैष्णवं श्वेतकल्पवृत्तान्ताश्रयं वायवीयमित्येवं तत्तत्कल्पवृत्तान्ताश्रयाणि पुराणान्युक्त्वा तदुत्तरम्।

"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥" इति।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।
तदृत्तान्तोद्भवं लोके तद्भागवतमिष्यते॥"

इत्युक्त्वा ततोऽन्यान्यपि महापुराणान्येव तत्तत्कल्पवृत्तान्ताश्रयाणि दर्शितानि। पञ्चादुपपुराणकथनार्थमुपभेदान् प्रवक्ष्यामीति प्रतिज्ञाय पद्मपुराणाग्रारम्भं निर्गतमेवं नन्दिसामादित्यसंज्ञकाश्चुक्रा अन्योपपुराण्यपि महापुराणेभ्य एव निर्गतानीति।

"अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते।
विजानीध्वं द्विजश्रेष्ठास्तदा तेभ्यो विनिर्गतम्॥"

इति वचनेन सूतऋषिरुक्तवान्॥ ततः।

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च॥"

इत्यादिना पुराणलक्षणाश्चुक्रा,—

"सात्त्विकेषु च कल्पेषु महात्म्यमधिकं हरेः।
राजसेषु च कल्पेषु माहात्म्यं ब्रह्मणो विदुः।
तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च।
सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते॥"

इति वचनेन पुराणप्रतिपाद्यहरिब्रह्माग्निहरसरस्वतीपितॄणां माहात्म्यसम्बन्धात् कल्पानां सात्त्विकराजसतामसत्वसङ्कीर्णत्वभेदेनासुर्विध्यत्वसूक्तवानिति। तत्र कल्पानां तत्तद्देवतासम्बन्धज्ञानन्तु तत्तत्कल्पाश्रिततत्तत्पुराणप्रतिपाद्यसुखदेवताज्ञानेनैव बोध्यम्। अन्यप्रकारस्य क्वचिदपि पुराणेष्वनुपलम्भात्तथैव सति।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।
तदृत्तान्तोद्भवं लोके तद्भागवतमिष्यते॥"

इति वचनं भागवतस्य लक्षणप्रतिपादकं प्रतिपादितम्। तदर्थस्तु यथा गारुडकल्प इत्यत्र गरुडस्यायं गारुडः। यथा वा वाराहकल्प इत्यत्र वराहस्यायं वाराह इति व्युत्पत्तिः प्रसिद्धा। तद्वदेव सरस्वत्या अयं सारस्वत इति विग्रहः।

"सरस्वत्यास्तथा कल्पो गौरीकल्पस्तथैव च॥"

इति कल्पनामसु सरस्वतीकल्पत्वेनैव कथितत्वाच्च। मत्स्यपुराणे उपन्याधाये।

"सङ्कीर्णेषु सरस्वत्याः पितॄणां कल्प उच्यते॥"

इति वचनेन तथैवोक्तत्वाच्च ब्रह्मविष्णुरुद्राणां कल्पवद्गौरीलक्ष्म्योः कल्पवच्च सरस्वतीकल्पस्यार्थप्राप्तत्वाच्च तादृग्सारस्वतकल्पसम्बन्धिनो ये देवमनुष्यासुरवृत्तान्तस्तोद्भव उत्पत्तिर्यस्मात् तत्पुराणं भागवतं विदुः। तदृत्तान्तप्रदर्शकं यत् पुराणं तद्भागवतसंज्ञकमिति यावत्। अत्र च तत्तद्देवतानामाविर्भावाश्रया ये ये कल्पास्ते तत्तन्नाम्ना व्यवह्रियन्ते। एतच्च तत्तन्नामककल्पाश्रितेषु पुराणेषु तत्तद्देवताया एव मुख्यत्वेनोत्पत्तिप्रदर्शकवाक्यैर्लक्ष्मीकल्पादिकल्पाश्रितकूर्मपुराणादिषु सर्वत्र प्रसिद्धमेव। तथा च मुख्यत्वेन सरस्वत्या आविर्भावप्रतिपादकं पुराणं यत् तद्भागवतमित्यतिरहस्यार्थः। तत्र सारस्वतकल्प इति पदेनैव कल्पस्य सरस्वतीसम्बन्धे बोधिते तस्य सङ्कीर्णत्वं सङ्कीर्णेषु सरस्वत्या इति वचनेनेश्वरप्रेरणां विनापि ग्रहागतमेव। अस्मिंश्च वचने भागवतपदेन विष्णुभागवतस्य ग्रहणं बन्ध्यापुत्रोपममेव। तत्र मुख्यत्वेन सरस्वत्याविर्भावस्यासत्त्वात्। विष्णुभागवते द्वितीयस्कन्धे। "पाद्मं कल्पमथो शृणु।" इति वचनेन स्वमुखेनैव स्वस्य पाद्मकल्पकथाश्रयत्वस्योक्तत्वात्। तद्विरोधाच्च न च पाद्मकल्प एव सारस्वतः। सरस्वान् समुद्रस्साध्यातं कमलं सारस्वतं तस्य कल्प इति व्युत्पत्तेरिति वाच्यम्।

"पद्मकल्पस्य वृत्तान्तं तत्र यस्मादुदाहृतम्।
तस्मात् पाद्मं समाख्यातम्॥"

इति पूर्वोदाहृतशिवपुराणवचनेन।

"एतदेव यदा पाद्मभूद्वैरञ्चयं जगत्।
तदृत्तान्ताश्रयं तद्वत् पाद्ममित्युच्यते बुधैः॥
पाद्मं तत् पञ्चपञ्चाशत्सहस्राणीह कथ्यते॥"

इति मत्स्यपुराणवचनेन।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।"

इति वचनेन च पाद्मकल्पसारस्वतकल्पयोः पृथक्त्वकथनात्। किञ्च सारस्वतकल्पपाद्मकल्पयोरेकत्वे पद्मकल्पस्य प्रतिपादकं पुराणद्वयं पाद्मं भागवतञ्चेत्येव वदेत् किञ्च पद्मकल्पस्य वृत्तान्तमित्यत्राभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुता इति न्यायेन पूर्वं वृद्धव्यारूढं प्रसिद्धं पाद्मग्रन्थं विहायाप्रसिद्धं सारस्वतग्रन्थं पाद्मग्रन्थस्य वाचकं कृत्वा सारस्वतपदघटितकल्पने प्रयोजनाभावः। किञ्च सरस्वत्यास्तथा कल्प इत्यादेः। पूर्वोक्तस्य सारस्वतपदनिरुक्तार्थकस्य वचनसमूहस्य विरोधश्च। न च पाद्मकल्पसारस्वतकल्पयोः पृथक्त्वे चिन्मृत्कल्पेषु मत्स्यपुराणान्तिमाध्याये कीर्तितेषु सारस्वतपदेन पाद्मस्य ग्रहणं न स्यादिति वाच्यम्। प्रभासखण्डे चिन्मृत्कल्पेषु विष्णुजकल्पार्चिकल्पसुपुमान्कल्पानां ग्रहणेऽपि तेषां कल्पानां यथा मात्स्यान्तिमाध्याये न ग्रहणं तथा पाद्मस्यापि न ग्रहणमित्यस्य तुल्यत्वात्। यदि तेषां पर्यायत्वेन कुत्रचिदन्तर्भावः क्रियते तर्ह्यस्यापि कुत्रचिदन्तर्भावोऽस्तु अतएव विष्णुभागवतस्य प्रवन्धटीकाकारेण पिलकल्पे एव पूर्वार्द्धान्ते पद्मस्योद्भवात् पिलकल्पपदेन पाद्मसंग्रहो वेदितव्य इत्युक्तम्। पुराणवत्कथनप्रस्तावे सारस्वतकल्पपाद्मकल्पयोः पृथक्करणेन सारस्वतपदेन पाद्मस्य सर्वथा न ग्रहणम्। वस्तुतस्तु चिन्मृत्कल्पा ब्रह्मणश्चिन्मृत्तिप्रधानाः चिन्मृत्तिषु प्रतिपदादिषूत्पद्यन्ते। भूर्भुवःसुवः भूर्भुवःसुव इत्यादयश्चश्चिन्मृत्कल्पाः। पाद्मादयश्च वायुपुराणोक्ता दिनकल्पा ब्रह्मणः प्रतिदिवसेषूत्पद्यन्ते इति दिनकल्पतिथिकल्पानां सुतरां भेदात्तिथिकल्पेषु दिनकल्पानां पाद्मादीनां न ग्रहणमिति सिद्धान्तः।

यत्तु विष्णुभागवतस्यारम्भतः पाद्मकल्पाश्रयत्वेऽपि क्षीरजकल्पस्यैव सारस्वतकल्पभवत्वेन तस्य च दशमस्कन्धे सत्त्वात्।

"सारस्वतस्य कल्पस्य मध्ये ये सुरनरामराः ।"
इति वचनस्य विष्णुभागवतं विषयोऽस्त्वीत्याहुस्तदसत् । ब्रह्माण्डखण्डस्य सारस्वतकल्पभवत्वप्रतिपादकानां वचनानां निर्मूलत्वात् सम्प्रत्यलेऽपि यस्मिन् पुराणे यस्य कल्पस्य प्रथमतः प्रतिपादनं तत्कल्पप्रतिपादकमेव तत्पुराणमिति नियमः सर्वपुराणे तथा दृष्टत्वात् । तथा च ब्रह्माण्डखण्डस्य दशमस्कन्धे विद्यमानत्वेऽपि प्रथमतस्तत्कथाया अभावात्पाद्मकल्पकथायाः प्रथमतो विद्यमानत्वस्य खेनैवोक्तत्वाच्च । न सारस्वतस्य कल्पस्येति वचनस्य विष्णुभागवतं विषयः । किञ्च ब्रह्माण्डखण्डस्य यथा दशमस्कन्धे कथनं तदा सर्वपुराणेषु तत्कथनं वर्णत एवेति सर्वपुराणानां तद्वचनविषयत्वं स्यात्तथा च सर्वपुराणानि भागवतपदवाच्यानि स्युरस्तु सारस्वतकल्पस्य यत्र प्रथमतः प्रतिपादनं स एव तद्वचनस्य विषयो वक्तव्यस्तदाह्यग्नेयं देवीभागवतमेवास्तीति देवीभागवतमेव तद्विषयो वक्तव्य इति । किञ्च ग्नेयपुराणे उमासंहितायाम् ।

"ब्रह्मणा संस्तुता सेयं मधुकैटभनाशने ।
महाविद्या जगद्धात्री सर्वविद्याधिदेवता ॥
द्वादश्यां फाल्गुनस्यैव शुक्लायां समभून्नृप ! ।"

इति वचनात् फाल्गुनशुक्लद्वादश्यां देव्या उद्भवस्तद्दिने एव सारस्वतकल्पोद्भवस्तदुक्तं हेमाद्रौ कल्पग्राह्यप्रकरणे नागरखण्डे ।

"सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य च ।" इति ॥

तथा च सरस्वत्याः कल्प इत्यर्थकस्य ।
"सारस्वतस्य कल्पस्य मध्ये ये सुरनरामराः ।"
इति वचनस्य सर्वथा देवीभागवतमेव विषयो न विष्णुभागवतमिति बोध्यम् । किञ्च तस्य ग्रहणे तस्य हरिमाहात्म्यप्रतिपादकत्वात् । तदाश्रितकल्पस्य सात्त्विकत्वमेवायास्यति ।

"सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः ।"
इति वचनात् । ततश्च संकीर्णेषु सरस्वत्या इति वचनेन सारस्वतकल्प इति ज्ञात्वा च पारमहंस्यसामग्र्येव कर्तव्या स्यात् । अतो विष्णुभागवतं विहाय देवीभागवतमेवास्य वचनस्य विषयोऽनिच्छतापि वक्तव्यत्वात् सारस्वतस्य कल्पस्येति वचनाद्देवीभागवतमेव महापुराणम् । अस्ति चात्र सरस्वत्याविर्भावप्रतिपादकं वचनम् । तदुक्तं देवीभागवते प्रथमस्कन्धे ।

"तस्यासु सात्त्विकी पुत्री राजसी तामसी तथा ।
महालक्ष्मीः सरस्वती महाकालीति ताः स्त्रियः ।
तासां तिसृणां पुत्रीणां देहाङ्गीकारजश्चयः ।
इत्यर्थश्च समाख्यातः सर्गः शास्त्रविशारदैः ॥"
इति ।

"अम्बरीषशुकप्रोक्तं नित्यं भागवतं शृणु ।"
इति वचनमपि शुकाय प्रोक्तमिति व्युत्पत्त्या देवीभागवतपरमपि सङ्गच्छते । भवति हि देवीभागवतं शुकायैव प्रोक्तं व्यासेनेति । किञ्च
"अष्टादशपुराणानि कृत्वा सत्यवतीसुतः ।
भारताख्यानमखिलं चक्रे तदुपबृंहणम् ॥"
इति मात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति । अष्टादशपुराणोत्तरं भारतस्य जातत्वात् । भारतोत्तरञ्च विष्णुभागवतस्य जातत्वात् । भारतोत्तरकालं निर्व्विण्णो व्यासश्चकारेति विष्णुभागवते एवोक्तत्वात् । ननु

"वेदशाखाः पुराणानि वेदान्तं भारतन्तथा ।
कृत्वा सम्मोहसंमूढोऽभवं राजन् ! मनस्यपि ॥"

इति देवीभागवते तृतीयस्कन्धे एवोक्तत्वात्तत्रापि सविरोधस्तदवस्थ एवेति चेन्न । मन्यते तदानीं ग्रन्थो नैव जातः किन्तु जनमेजयं प्रति एवं वक्ष्यतीति ज्ञानचक्षुषा ज्ञात्वा भारतात् पूर्वमेव देवीभागवतं कृतमित्यर्थस्य कल्पनात् । त्वन्मते तु तथा कल्पयितुं न शक्यते । यतः श्रीकौशिकभागवतोपदेशस्य जायमानत्वात् । उपदेशात् पूर्वं तज्ज्ञानाभावस्यावश्यं कल्पनीयत्वात् । यदि तत्रापि पूर्वं व्यासस्य ज्ञानमस्तीति स्वीक्रियते तदा वक्ष्यमाणः सर्व्वोपर्य्यवादः स्यात् । ततश्च ग्रन्थसारस्यभङ्गप्रसङ्ग इत्यास्तां तावत् । वस्तुतस्तु वेदशाखाः पुराणानीति पाठोऽसङ्गत इति वक्ष्यते तृतीयस्कन्धे तदा न कोऽपि विरोधः । यत्तु पाद्मे भागवतमाहात्म्ये श्रीमद्भागवतकथाश्रवणाय समागतानां परिगणनप्रसङ्गे ।

"वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राणि संहिताः ।
दशसप्तपुराणानि षट्शास्त्राणि समाययुः ॥"
इत्युक्तम् । तत्र व्यासकृतपुराणानामष्टादशत्वादष्टादशेति वक्तव्ये सप्तदशत्वोक्तिः श्रीमद्भागवतस्याष्टादशत्वं गमयति तस्याष्टादशान्तर्गतत्वे देवीभागवतस्याष्टादशान्तर्गतत्वे वाष्टादशानां श्रोतृत्वसम्भवेन श्रोतुमागतानां पुराणानामष्टादशत्वानुपपत्तिर्निर्बीजत्वप्रसङ्गात् । एवं पाद्मे

"सप्तदशपुराणानि कृत्वा सत्यवतीसुतः ।
नाप्नवान्मनसा तोषं भारतेनापि भामिनि ! ॥
चकार संहितामेतां श्रीमद्भागवतीं पराम् ॥"
इति सप्तदशत्वोक्तिः श्रीमद्भागवतस्यैवेतां संहितामिति निर्दिष्टस्याष्टादशत्वं गमयति । देवीभागवतस्याष्टादशत्वेऽष्टादशपुराणानीत्युक्तिर्निर्बीजत्वप्रसङ्गादित्याहुस्तदसत् । तेषामेव वचनैर्विष्णुभागवतस्याष्टादशपुराणान्तर्गतत्वं न सिध्यति । किन्तु देवीभागवतस्यैवेति वाङ्मौधिक्यं कुर्व्वाणो मूलमेव विनाशितवानिति न्याय्यमागतः । तथा हि भारतं व्यासमुखाच्छ्रुत्वा तत्र सन्दिहानः कौतुकिर्मार्कण्डेयं प्रत्यागत्य सन्देहं पृष्टवान् तस्मै मार्कण्डेयो मार्कण्डेयपुराणमुक्तवान् । तदुक्तं मार्कण्डेयपुराणे

"तदिदं भारताख्यानं बहुर्थं श्रुतिविस्तरम् ।
तत्त्वतो ज्ञातुकामोऽहं भगवन्तमुपस्थितः ॥"
इति ।

तथा च भारतोत्तरं मार्कण्डेयपुराणमभवत् । तथैव त्वदुत्तरोत्थैव विष्णुभागवतमपि । तथा च भारतात् पूर्वं षोड्शपुराणान्येव सिद्धानि । तथा च पूर्वोक्तवचनमध्ये षोड्शत्वेव वक्तव्ये सप्तदशोक्तत्वात् । देवीभागवतमेव महापुराणमन्यथा सप्तदशत्वपूर्त्तिर्न स्यात् । तस्मात्तद्वचनप्रामाण्याद्देवीभागवतमेव महापुराणमिति सिध्यति न तु विष्णुभागवतम् । भारतात् पूर्वं सप्तदश मदीयभागवतसहितानि मार्कण्डेयमष्टादशमुभयमतसिद्धमेव विष्णुभागवतस्य भारतोत्तरं जायमानत्वेन तत्सन्धे तस्यावश्यागस्यलाभादित्येवं लापनेनापि दोषाभावादिति सुधियो विभावयन्तु । यत्तु किञ्च पाद्मे ।

"वैष्णवं नारदीयञ्च तथा भागवतं शुभम् ।
गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने ! ।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥"
इत्युक्त्वा च भागवतस्य सात्त्विकत्वमुक्तम् । सात्त्विकेषु पुराणेष्विति कौर्म्मोक्त्या च सात्त्विकपुराणानां विष्णुपरत्वमुक्तम् । अतो विष्णुपरमेव भागवतमष्टादशपुराणान्तर्गतं न तु देवीभागवतमिति । अपि च स्कान्दे प्रभासखण्डे ।

"चतुर्भिर्भगवान् विष्णुर्ब्राह्मा तथा रविः ।
अष्टादशपुराणेषु ग्नेयेषु भगवान् भवः ॥"
इत्युक्तम् । स्कान्दे सौरसंहितायाञ्च ।

"कथ्यते दशभिर्विप्राः पुराणैः परमेश्वरः ।
चतुर्भिर्भगवान् विष्णुर्ब्राह्मा प्रकीर्त्यते ॥
एकेनाग्नेयतेकेन भगवांश्चक्रभास्करः ॥"
इत्युक्तमतोऽपि विष्णुभागवतमष्टादशान्तर्गतं नत्वयदित्याहुस्तदसत् । त्वन्मते मत्स्योक्तसात्त्विकराजसतामससङ्कीर्णपुराणेषु मध्ये यथार्थावस्था पूर्व्ववचनेष्वयोक्ता । सङ्कीर्णपुराणानान्तु गोक्ता । तेषां केषु पुराणेष्वन्तर्भाव इति वद । करिष्यामि कुत्रचिदिति चेन्मम मतेऽपि श्रीभगवत्या विष्णुशक्तित्वाभिमानेन मन्त्राधिष्ठात्रीं देवतां वेदमानो दुर्गां दुर्ब्बोधज्ञानमातुं गुरुश्च इति श्रीक्रमदीपिकोक्तप्रकारेण विष्णुमन्त्राणां दुर्गायाः अधिष्ठातृत्वेन तयोरैक्याद्वा तत्प्रतिपादकभागवतस्य वैष्णववैष्णवान्तर्भावात् । अतएव

"हरिर्ह्यां रविर्ह्यां ह्याभ्यां चक्रौविनायकौ ।
ह्याभ्यां ब्रह्मा समाख्यातः ग्नेयेषु भगवान् ग्नियः ॥"

इति वचनं सङ्गच्छते । वस्तुतस्तु द्वयोरपि भागवतयोरक्षमते प्रमाणत्वात् । विष्णुभागवतपक्षपातिनां वचनानामस्माकं विरोधाभावेन तत्लापने प्रयोजनाभाव एव । तथा च नारदीयादिपुराणमतेन श्रीविष्णुभागवतं महापुराणं तद्वचनानि प्रसिद्धान्येवेति न लिखितानि । देवीभागवतन्तु तन्मते उपपुराणम् । ग्नेव-

मात्स्यपुराणादिमते तु देवीभागवतं महापुराणम्। विष्णुभागवतमथांडुपपुराणमिति सिद्धम्। अत्र केचिद्देवीभागवतस्मतिलेन देवीयानमतत्प्रत्यम्।

"श्रीमद्भागवतं नाम पुराणं वेदसम्मितम्।
पारीक्षितायोपदिष्टं सत्यवत्यङ्गजन्मना॥
तत्र देवयतारांश्च बहवः प्रतिपादिताः॥"

इति।

तथा

"इदं रहस्यचरितं राधोपासनमुत्तमम्।
व्यासाय मम भक्ताय प्रोक्तं पूर्वं मयाद्रिये!॥
मत्तो रहस्यं ग्राह्येव राधामाहात्म्यमुत्तमम्।
एतस्य विस्तरं चक्रे श्रीमद्भागवते तथा॥
गारदे ब्रह्मवैवर्ते लोकानां हितकाम्यया॥"

इति।

सौभाग्यकल्पलतायां संहारभैरवतन्त्रस्थं वचनं लिखन्ति। तत्र परे विवदन्ते। तदुभयमपि गौरवभिया न लिख्यत इति॥ * ॥)

तत्र विष्णुभागवते प्रथमस्कन्धे परिक्षिन्नारदयोरुपाख्यानम्। विप्रशापात् परीक्षितस्य प्रायोपवेशः। शुकपरीक्षितसंवादश्च ॥१॥* ॥ द्वितीयस्कन्धे। योगधारणयोत्क्रान्तिः। नारदाजयोः संवादः। अवतारानुगीतम्। महदादिक्रमेण सृष्टिश्च॥ २॥ * ॥ तृतीयस्कन्धे। विदुरोद्धवसंवादः। क्षत्तृमैत्रेययोः संवादः। पुराणसंहिताप्रश्नः। महापुरुषसंस्थितिः। प्राकृतिकः सर्गः। वैकृतिकः सप्त सर्गाः। ब्रह्मणोऽसम्भूतिः। विराट्पुरुषोत्पत्तिः। कालस्य स्थूलसूक्ष्मस्य गतिः। पाद्मसम्भवः। ऊर्णोर्नाभेश्च उद्गिरणा। हिरण्याक्षवधः। कर्दमोत्पत्तिः सर्गः। स्वायम्भुवमनुः स्त्रीणां आद्या प्रकृतिः। शतरूपा च। कर्दमप्रजापतेर्धर्म्मपत्नीनां सन्ततयः। भगवत्कपिलावतारः। कपिलेन देवहूतिसंवादश्च॥१॥* ॥ चतुर्थस्कन्धे। नवब्रह्मसृष्टयुत्पत्तिः। दक्षयज्ञविनाशनम्। ध्रुवचरितम्। पृथोः प्राचीनबर्हिषश्च चरितम्। नारदस्य संवादश्च॥४॥* ॥ पञ्चमस्कन्धे। प्रियव्रतचरितम्। द्वीपसमुद्रादिवर्णनपुरस्सरम्। ज्योतिश्चक्रस्य संस्थानम्। पातालनरकस्थितिश्च॥ ५॥ * ॥ षष्ठस्कन्धे। दक्षजन्म। ततपुत्रीणां सन्ततिः। यतः देवासुरनरतिर्यङ्मृगखगादयः। त्वाष्ट्रस्य जन्म च॥ ६॥ * ॥ सप्तमस्कन्धे। दितेः पुत्रयोर्निधनम्। प्रह्लादचरितञ्च॥ ७॥ * ॥ अष्टमस्कन्धे। मन्वन्तरानुचरितम्। गजेन्द्रविमोक्षणम्। मन्वन्तरावतारः। हयशीर्षादयोऽवतारः। जगत्पतेः कौर्म्ममात्स्यनारसिंहवामनरूपाणि। क्षीरोदमथनम्। देवासुरयुद्धञ्च॥ ८॥ * ॥ नवमस्कन्धे। राजर्षिवंशानुकीर्त्तनम्। इक्ष्वाकुजन्म तद्वंशः। सुसुन्नवंशः। इलोपाख्यानम्। तारोपाख्यानम्। सूर्य्यवंशानुकथनम्। शशादनृगसौकन्यशर्यातिककुत्स्थखट्वाङ्गमान्धातृसौभरिरामाणां चरितम्। निमेरङ्गपरित्यागः। जनकानां सम्भवः। परशुरामजन्म। भुवो निःक्षत्रीकरणम्। ययातिनहुषभरतशान्तनुततसुतयदूनां वंशानुकीर्त्तनञ्च॥ ९॥ * ॥ दशमस्कन्धे। श्रीकृष्णस्य वसुदेवगृहे जन्म। गोकुले तस्य वृद्धिः। तस्य पूतनापयःपानम्। शकटोच्चाटनम्। तृणावर्त्तवधः। बकवत्सयोर्वधः। अघासुरवधः। धात्रा वत्सपालावगूहनम्। ब्रह्मा सह धेनुकस्य वधः। प्रलम्बवधः। गोपालानां दावाग्नेः परित्राणम्। कालीयदमनम्। महाहेर्नन्दमोचनम्। कन्यानां व्रतचर्य्या। यज्ञपत्नीभ्यः प्रसादः। विप्रार्च्चामनुपालनम्। गोवर्द्धनोद्धारणम्। शक्रसुरभिकर्त्तृककृष्णस्य यज्ञाभिषेकः। रात्रिषु स्त्रीभिः क्रीड़ा। शङ्खचूड़स्य वधः। केशिवधः। अक्रूरागमनम्। रामकृष्णयोर्मथुराप्रस्थानम्। व्रजस्त्रीणां विलापः। मथुरालोकनम्। गजमुष्टिकचाणूरकंसादीनां वधः। सान्दीपनेर्मृतपुत्रानयनम्। उद्धवरामाभ्यां सह हरिद्वा यदुचक्रस्य प्रियकरणम्। जरासन्धसमानीतबहुसैन्यवधः। यवनेन्द्रस्य घातनम्। कुशस्थल्या निवेशनम्। पारिजातहरणम्। रुक्मिणीहरणम्। बाणेन सह युद्धम्। प्रागज्योतिषपतिं हत्वा कन्यानां हरणम्। पौण्ड्रकशाल्वदन्तवक्त्रशम्बरद्विविदपीठमुरपञ्चजनानां माहात्म्यं वधश्च। वाराणस्या दाहः। पाण्डवान् निमित्तीकृत्य भूमेर्भारावतरणञ्च॥ १०॥ * ॥ एकादशस्कन्धे। विप्रशापापदेशेन यदुकुलसंहारः। उद्धवसंवादः। उद्धवाय आत्मविद्याकर्म्मविनिश्चयकथनम्। आत्मयोगानुभावतो मर्त्यपरित्यागश्च॥ ११॥ * ॥ द्वादशस्कन्धे। युगलक्षणवृत्तिः। कलौ नृणामुपप्लवः। चतुर्विधप्रलयः। त्रिविधोत्पत्तिः। परिक्षिदेहत्यागः। व्यासकर्त्तृकग्रन्थाप्रथनम्। मार्कण्डेयस्य सत्कथा। ग्रन्थस्य विन्यासश्च॥१२॥* ॥

इति श्रीभागवते १२ स्कन्धे अनुक्रमणिकाध्यायः॥

भागवतः, त्रि, (भगवान् हरिः भगवती दुर्गा वास्य देवतेति। भगवत्+"तस्य देवता।"४।२।२४। इति अण्।) भगवद्भक्तः। तस्य लक्षणम्। यथा,

"सर्व्वदेवान् परित्यज्य नित्यं भगवदाश्रयः।
एतल्लक्षणसंयुक्तो भागवत उच्यते॥"

इति वह्निपुराणे दूतान् प्रति यमवचनम्॥

स्कन्दे श्रीमार्कण्डेयभगीरथसंवादे।

"द्वादशीशैवसंयुक्तं दिनं वैष्णवबल्लभम्।
शुभासते महीपाल! ते वै भागवता नराः॥
प्राप्यात्मये न चाश्नन्ति दिनं प्राप्य हरेर्नराः।
कुर्व्वन्ति जागरं रात्रौ सदा भागवता हि ते॥
उपोष्य द्वादशीं शुद्धां रात्रौ जागरणान्विताम्।
अश्वमेधं विजुता येषां न च्युतानि व्रतानि च।
सुप्रियः श्रीपतिर्येषां ते स्युर्भागवता नराः॥
सदाचाररताः शिष्टाः सर्व्वभूतानुकम्पकाः।
शुचयस्त्यक्तरागा ये सदा भागवता हि ते॥"

एकादशस्कन्धे।

"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
न यस्य स्वपर इति वित्तेष्वात्मनि वा भिदा।
सर्व्वभूतसमः शान्तः स वै भागवतोत्तमः॥"

हरियोगेश्वरोत्तरे।

"गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न काङ्क्षति।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः॥"

हरद्वारदीये।

"शिवे च परमेशाने विष्णौ च परमात्मनि।
समबुद्धा प्रवर्त्तन्ते ते वै भागवतोत्तमाः॥"

स्कान्दे।

"येषां भागवतं ग्राह्यं सदा तिष्ठति सन्निधौ।
पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः॥
येषां भागवतं ग्राह्यं जीवितादधिकं भवेत्।
महाभागवताः श्रेष्ठा विष्णुना कथिता नराः॥"

लैङ्गे।

"भोजनाच्छादनं सर्व्वं यथाशक्त्या ददाति यः।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः॥"

गारुड़े।

"येन सर्व्वात्मना विष्णुभक्त्या भावो निवेशितः।
वैष्णवेषु ऋतात्मात्माहाभागवतो हि सः॥"

हरद्वारदीये।

"तुलसीकाननं दृष्ट्वा ये नमस्कुर्व्वते नराः।
ततःकाष्ठाङ्कितकर्णा ये ते वै भागवतोत्तमाः॥
तुलसीगन्धमाघ्राय सन्तोषं कुर्व्वते तु ये।
तन्मूलमृद्धृता येन ते वै भागवतोत्तमाः॥
मत्कथाश्रवणे येषां वर्त्तते सात्त्विकी मतिः।
तद्वक्तरि शुभक्ताश्च ते वै भागवतोत्तमाः॥"

स्कान्दे।

"मत्कथां कुरुते यस्तु मत्कथाश्च शृणोति च।
दृश्यते मत्कथायाश्च स वै भागवतोत्तमः॥"

हरद्वारदीये।

"मन्नामश्रवणासक्तास्ते वै भागवतोत्तमाः।
मन्नामस्मरणासक्तास्ते वै भागवतोत्तमाः॥
येऽभिनन्दन्ति नामानि हरेः श्रुत्वान्ति हर्षिताः।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः॥
अन्येषामुदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः।
हरिनामपरा ये च ते वै भागवतोत्तमाः॥"

स्कान्दे।

"येऽर्चयन्ति सदा विष्णुं यज्ञेशं वरदं हरिम्।
देहिनः पुण्यकर्म्माढ्याः सदा भागवता हि ते॥"

लैङ्गे।

"विष्णुक्षेत्रे शुभान्नेन करोति क्षेत्रसंयुतः।
प्रतिमाञ्च हरेर्नित्यं पूजयेत् प्रयतात्मवान्॥
विष्णुभक्तः स विज्ञेयः कर्म्मणा मनसा गिरा।
नारायणपरो नित्यं भूप! भागवतो हि सः॥"

प्राग्नोत्तरखण्डे ।
"तापादिपञ्चसंस्कारी नवेज्याकर्म्मकारकः ।
अर्थपञ्चकविद्विप्रो महाभागवतो हि सः ॥
एकान्तेन सदा विष्णौ यस्यादेवे परायणाः ।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः ॥"
एकादशस्कन्धे ।
"ज्ञानाज्ञानाच्च ये वै मां यावान् यश्चास्मि
यादृशः ।
भजन्त्यनन्यभावेन ते वै भागवता मताः ॥
न कामकर्म्मबीजानां यस्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥"
स्कान्दे ।
"यस्य हृच्छ्मशानस्थापि केशवे रमते मनः ।
न विच्युता च भक्तिर्वै स वै भागवतो नरः ॥
आपन्नस्य यस्येह भक्तिरव्यभिचारिणी ।
नान्यत्र रमते चित्तं स वै भागवतो नरः ॥"
हरियोगेश्वरोत्तरे ।
"विलुम्पति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः ।
प्रणयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः ॥"
मध्यममाह तत्रैव ।
"ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥"
कनिष्ठमाह तत्रैव ।
"अर्च्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥"
इति श्रीहरिभक्तिविलासे १० विलासः ॥
भागिकं, त्रि, (भाग + "भागादृद्यच् ।" ५।१।४६।
इति यत्रे ठन् ।) दृष्टार्थदत्तसुदादि । सुदी
टीका दृष्टादि भावा । यथा । भागो दृष्टादि-
रस्मिन् दीयते भाव्यं भागिकं श्रुतम् । भाग्या
भागिका विंशतिः । इति सिद्धान्तकौमुदी ॥
भागिनेयः, पुं, (भगिन्या अपत्यम् । भगिनी +
"स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।)
भगिनीपुत्रः । तत्पर्य्यायः । स्वस्रीयः २ । अम-
रः । २ । ६ । ३२ ॥ स्वसृयः ३ । इति शब्दरत्ना-
वली ॥ स च सुखप्रतिनिधिः । यथा,—
"ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ
विट्पतिः ।
एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
तस्यावश्यपोष्यत्वम् यथा,—
"पितृव्यगुरुदौहित्रान् भर्त्तुः स्वस्रीयमातुलान् ।
पूजयेत् कन्यपूर्त्ताभ्यां दृष्टादृष्टाधातिधीन् स्त्रियः ॥"
इत्यपुत्रधनाधिकारे दायभागः ॥ * ॥
भागिनेयदत्तककरणं शूद्रस्यैव न तु द्विजानाम् ।
यथा, दत्तकचन्द्रिकायां शौनकवचने ।
"दौहित्रो भागिनेयश्च शूद्रेषु क्रियते सुतः ।
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित् ॥"
तन्मरणे मातुलस्य पत्न्यिश्यग्रौचम् । यथा ।
"पत्नी योनिसम्बन्धे बान्धवेषु तथैव च ।
योनिसम्बन्धे माहेयस्त्रीयपितृव्यस्त्रीयमागिनेयेषु ।
मातुलमरणे भागिनेयस्यापि पत्न्यिश्यग्रौचम् ।"
इति शुद्धितत्त्वम् ॥
भागिनेयी, स्त्री, (भगिनी + ढक् । स्त्रियां ङीप् ।)
भगिन्याः स्त्रीपत्यम् । भाग्यो इति भाषा ।
भगिनीशब्दात् स्त्रीपत्यर्थे स्त्रीये विवाहादीप्-
प्रत्ययनिष्पन्ना । इति शाकरत्नम् ॥
भागीरथी, स्त्री, (भगीरथेयम् । भगीरथ + अण् ।
ङीप् ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥
पृथिव्यां तस्यावतरत्वम् । यथा,—
सूत उवाच ।
"ततो भगीरथो राजा तपः परमदुश्चरम् ।
कृत्वा सन्तोषयामास उमाकान्तं महेश्वरम् ॥
धारयायाचमत्वा तं जगाम ब्रह्मणोऽन्तिकम् ।
ततो भगीरथः प्राह गङ्गां ब्रह्मन् ! विसृज्यताम् ॥
स तच्छ्रुत्वा वचस्तस्य सम्मान्य विबुधप्रियम् ।
गङ्गां प्रस्थापयामास सापतद्ब्रह्मणोऽन्तिकात् ॥
बायुना प्रेर्य्यमाणापि आकाशपथगा नदी ।
विस्तारमाकाशगङ्गेति तत्र संसेविता गणैः ॥
विष्णोः पदं समायाता तस्मादिष्णुपदीति सा ।
पूज्यमाना सुरैः सिद्धैर्मुनिविद्याधरोरगैः ॥
सुरालयमनुप्राप्ता तस्माद्देवनदी तु सा ।
तस्मात् प्रपतिता गङ्गा शम्भोः शिरसि संस्थिता ॥
धृतैकेनैव तेनापि शम्भुना योगमायया ।
दिव्यं वर्षशतं साग्रं पुनराराधितेन वै ॥
मुक्ता भगीरथेनैव मनसश्च विनिर्गता ।
जटाजूटात् प्रपातेन मेरोस्तस्मात्ततोऽगमत् ॥
देवैः परिवृता गङ्गा हेमकूटञ्च पर्व्वतम् ।
मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्व्वतम् ॥
तामायान्तीं तु रोधाय खलीनो नाम दानवः ।
पार्व्वतं रूपमास्थाय वर्षाम्बामु श्रुतेर्द्विजाः ॥
ततो भगीरथो राजाराधयामास कौशिकम् ।
स तुष्टः प्रददौ नागं वाहनं वै भगीरथः ॥
तमारुह्यागमत्तत्र यत्र रुद्धा भगीरथी ।
तेन नागेन तं दैत्यं संविदार्य्य न वञ्चतः ॥
श्रुतधा तां समाधाय मूर्द्धन्यैरावतो गजः ।
महीतलं समापेदे स यावन्नागसाक्षयम् ॥
तस्मादावाटनाद्विप्रा अभून्नागपुरं वरम् ।
प्लावयन्ती महीं गङ्गा जह्नोराश्रममभ्यगात् ॥
तां दृष्ट्वा पपौ सोऽपि प्रहृत्या कुपितो मुनिः ।
जह्नुना नाशितां दृष्ट्वा गङ्गां त्रिपथगां नदीम् ॥
वशीकृत्योदयामास जह्नुं भगीरथो मुनिम् ।
मुमोच कर्णरन्ध्रेण च गङ्गा स दक्षिणेन ताम् ।
एतस्माज्जाह्नवी भूता सुता तस्य मुनेस्तथा ।
ततः सा विविधान् देशान् पर्व्वतांश्च तथा-
श्रमान् ॥
संप्लाव्य वारिणा भूयो जगाम पूर्व्वसागरम् ।
यत्र तत्रोदकं तस्यौ तस्याः पुण्यमभूद्विजाः ।
सुतीर्थं सर्व्वमर्त्यानां तारणं पापनाशनम् ॥
ततः सम्पूरयामास सप्तधा सर्व्वतो दिशम् ।
प्रपन्नं सागरैः सर्व्वं ततः पातालमाविशत् ॥
सागराणां ततोलक्षात् संप्लाव्य वारिणा ततः ।
देवैः संपूज्यमानापि जगाम ब्रह्मणोऽन्तिकम् ॥
जग्मुस्ते सागराः स्वर्गं ब्रह्मणोपहताश्च ये ।
एतत्काम्ये विनिर्दिष्टा गङ्गाया ब्रह्मणा स्वयम् ॥
भवद्भिरनिशं नाम कर्त्तव्यं विघ्ननाशनम् ॥
सूत उवाच ।
एतद्वः कथितं सर्व्वं यथावतरणं दिवः ।
गङ्गायाश्चैव माहात्म्यं श्रूयतां गदतो मम ॥"
इत्यादौ वह्निपुराणे गङ्गावतरणनामाध्यायः ॥
तस्या सुखनामानि यथा,—
वराह उवाच ।
"धर्म्मस्तु द्रवरूपेण ब्रह्मणा निर्म्मितः पुरा ।
यद्दं गङ्गेति विख्याता प्रथमं स्रोतं वसुन्धरे ! ॥
किन्नरोरगसङ्घेषु सुखासुखैः सुविस्तरैः ।
यानि नामानि सुखानि तानि वक्ष्याम्यनुक्रमात् ॥
गङ्गा भागीरथी पुण्या जाह्नवी सुरनिम्नगा ।
विष्णुपादाब्जसम्भूता भ्रमोः शिरसि संस्थिता ॥
सुमेरुशृङ्गसंस्पृष्टा हिमाचलसुताश्रया ।
शृङ्गेन्दुस्रवणा महापातकनाशिनी ॥
नदीश्वरी त्रिपथगा वैष्णवी सुरसम्प्रिया ।
धर्म्मद्रवी भोगवती विन्ध्यपादविदारिणी ॥
क्षमा शान्तिः प्रभाशान्तिः पुण्यदा पूतिका
शिवा ।
महानदी शुभसखी शुभ्रा मकरवाहिनी ॥
ब्रह्महत्यात् परिभ्रष्टा सौम्यरूपातिशोभना ।
मुनिभिः पूजिता सर्व्वैः सर्व्वैर्देवैर्नमस्कृता ॥
महायज्ञमयी देवी मर्त्यानामुपकारिणी ।
सर्व्वत्र दुर्लभा गङ्गा त्रिभिः स्थानैर्विशेषतः ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ।
इदं स्रोत्रं मया ख्यातं पूर्व्वसूक्तं स्वयम्भुवा ।
यः पठेत् प्रातरुत्थाय तस्य नश्यति दुर्गतिः ॥
यत् पापं यौवने बाल्ये कौमारे वार्द्धके च यत् ।
तत् सर्व्वं विलयं याति तोयस्थं लवणं यथा ॥
कीर्त्तिं प्रीतिं महालक्ष्मीमायुरारोग्यसन्ततिम् ।
ददाति जाह्नवी तुष्टा सर्व्वभावेन माधवि ! ॥"
इति वाराहे सर्व्वपापप्रशमनगङ्गास्तवः ॥
अपि च ।
ब्रह्मोवाच ।
"श्रोतुमिच्छामि देवेश ! लक्ष्मीकान्त ! जगत्
प्रभो ! ।
विष्णो ! विष्णुपदीस्रोत्रं पापघ्नं पुण्यकारणम् ॥
श्रीनारायण उवाच ।
शिवसंगीतसंयुक्तं श्रीब्रह्माब्जद्रवोद्भवाम् ।
राधाब्जद्रवसंयुक्तां तां गङ्गां प्रणमाम्यहम् ॥
या जन्मदहरेरादौ च गोलोके रासमण्डले ।
सन्निधाने शुक्लरूपां तां गङ्गां प्रणमाम्यहम् ॥
गोपेगोपीभिराकीर्णैः शुभे राधामहोत्सवे ।
कार्त्तिकीपूर्णिमायां तां गङ्गां प्रणमाम्यहम् ॥
कोटियोजनविस्तीर्णा दैर्घ्ये सप्तगुणा ततः ।
समावृता या गोलोकं तां गङ्गां प्रणमाम्यहम् ॥
पञ्चाशद्योजना या ततो दैर्घ्ये चतुर्गुणा ।
समावृता या वैकुण्ठं तां गङ्गां प्रणमाम्यहम् ॥
विंशद्योजना या ततो दैर्घ्ये चतुर्गुणा ।

आवृता ब्रह्मलोकं या तां गङ्गां प्रणमाम्यहम् ॥
त्रिंशल्लक्षयोजना या दैर्घ्ये पञ्चगुणा ततः ।
आवृता शिवलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये सप्तगुणा ततः ।
आवृता ध्रुवलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये शतगुणा ततः ।
आवृता चन्द्रलोकं या तां गङ्गां प्रणमाम्यहम् ॥
षष्टिसहस्रयोजना या दैर्घ्ये दशगुणा ततः ।
आवृता सूर्य्यलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये च षड्गुणा ततः ।
आवृता सत्यलोकं या तां गङ्गां प्रणमाम्यहम् ॥
दशलक्षयोजना या दैर्घ्ये पञ्चगुणा ततः ।
आवृता या तपोलोकं तां गङ्गां प्रणमाम्यहम् ॥
सहस्रयोजनायामा दैर्घ्ये दशगुणा ततः ।
आवृता जनलोकं या तां गङ्गां प्रणमाम्यहम् ॥
सहस्रयोजनायामा दैर्घ्ये सप्तगुणा ततः ।
आवृता या च कैलासं तां गङ्गां प्रणमाम्यहम् ॥
शतयोजनविस्तीर्णा दैर्घ्ये दशगुणा ततः ।
मन्दाकिनी चेन्द्रलोके तां गङ्गां प्रणमाम्यहम् ॥
पाताले या भोगवती विस्तीर्णदशयोजना ।
ततो दशगुणा दैर्घ्ये तां गङ्गां प्रणमाम्यहम् ॥
क्रोशैकमात्रविस्तीर्णा ततः क्वीणा च कुत्रचित् ।
क्षितौ चालकनन्दा या तां गङ्गां प्रणमाम्यहम् ॥
सत्ये या क्षीरवर्णा च त्रेतायामिन्दुसन्निभा ।
द्वापरे चन्दनाभा च तां गङ्गां प्रणमाम्यहम् ॥
जलप्रभा कलौ या च नान्यत्र पृथिवीतले ।
स्वर्गे च नित्यं क्षीराभा तां गङ्गां प्रणमाम्यहम् ॥
यस्याः प्रभावमतुलं पुराणे च श्रुतौ श्रुतम् ।
या पुण्यदा पापहर्त्री तां गङ्गां प्रणमाम्यहम् ॥
यत्तोयकणिकास्पर्शैः पापिनाञ्च पितामह ! ।
ब्रह्महत्यादिकं पापं कोटिजन्मार्जितं दहेत् ॥
इत्येवं कथितं ब्रह्मन् ! गङ्गापद्यैकविंशतिः ।
स्तोत्ररूपञ्च परमं पापघ्नं पुण्यकारकम् ॥
नित्यं यो हि पठेद्भक्त्या संपूज्य च सुरेश्वरीम् ।
अश्वमेधफलं नित्यं लभते नात्र संशयः ॥
अपुत्रो लभते पुत्रं भार्य्याहीनो लभेत् प्रियाम् ।
रोगात् प्रमुच्यते रोगी बद्धो मुच्येत बन्धनात् ॥
अस्यकीर्त्तिः सुयशा मूर्खो भवति पण्डितः ॥
यः पठेत् प्रातरुत्थाय गङ्गास्तोत्रमिदं शुभम् ॥
शुभं भवेत्तु दुःस्वप्नं गङ्गास्नानफलं लभेत् ॥"

इति गङ्गास्तोत्रम् ॥

नारायण उवाच ।

"भगीरथेनेन स्तोत्रेण स्तुत्वा गङ्गाञ्च नारद ! ।
जगाम तां गृहीत्वा च यत्र तस्याश्च सागराः ।
वैकुण्ठं ते ययुस्तूर्णं गङ्गायाः स्पर्शवायुना ॥
भगीरथेन सानीता तेन भागीरथी स्मृता ।
इत्येवं कथितं सर्व्वं गङ्गोपाख्यानमुत्तमम् ॥
पुण्यदं मोक्षदं सारं किंभूयः श्रोतुमिच्छसि ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे गङ्गोपाख्यानेऽष्टमः ।

भागुरिः, पुं, स्मृतिव्याकरणादिकर्त्तृमुनिविशेषः । तत्पर्य्यायः । भृगुसुम्यक्षः २ । इति जटाधरः ॥ (यथा । "यद्वि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।" इति सिद्धान्तकौमुदी ॥)

भाग्यं, क्ली, (भज्यतेऽनेन इति । भज + "ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् । "चजोः कु घिण्ण्यतोः ।" ७ । ३ । ५२ । इति कुत्वम् ।) प्राक्तनशुभाशुभकर्म्म । तत्पर्य्यायः । दैवम् २ दिष्टम् ३ भागधेयम् ४ नियतिः ५ विधिः ६ । इत्यमरः । १ । ४ । १८ ॥ प्राक्तनकर्म्म ७ भागः ८ भवितव्यता ९ । इति जटाधरः ॥ अदृष्टम् १० । इति शब्दरत्नावली ॥ फलोन्मुखीभूतपूर्व्वदैहिकशुभाशुभं कर्म्म । इति मलमासतत्त्वम् ॥ (यथा,—

"समुद्रमन्थने लेभे हरिर्लक्ष्मीं हरो विषम् ।
भाग्यं फलति सर्व्वत्र न विद्या न च पौरुषम् ॥"

इति प्राचः ॥

उत्तरफल्गुनीनक्षत्रम् । यथा, बृहत्संहितायाम् । १० । १ ।

"अवग्रहानिलहस्तार्द्रा-
भरणीभाग्योपगः सुतोऽर्कस्य ।
प्रचुरसलिलोपगूढां
करोति धात्रीं यदि स्निग्धः ॥"

भागो बृहदादिरस्मिन् दीयते इति । भाग + "भागादृद्यः ।" ५ । १ । ४६ । इति यत् ।) भागिके, त्रि । इति सिद्धान्तकौमुदी ॥ (भागमर्हति । भाग + "दण्डादिभ्यो यत् ।" ५ । १ । ६६ । इति यत् ।) भागार्हम् । (भज + ण्यत् । भजनीयम् ॥)

भाङ्गीनं, त्रि, (भङ्गाया भवनं क्षेत्रमिति । "विभाषा तिलमाषोमाभङ्गाद्यभ्यः ।" ५ । २ । ४ । इति यत्वे खञ् ।) भङ्गाक्षेत्रम् । तत्पर्य्यायः । भाङ्गम् २ । इत्यमरहेमचन्द्रौ ॥ (यथा, शब्दरत्नावल्याम् ।

"एवं माष्यन्तु माषीयं कौद्रवं कोद्रवीयवत् ।
तथा भाङ्गञ्च भाङ्गीनमुन्यमौमीनमित्यपि ॥")

भाज, तृ क पृथक्करणे । इति कविकल्पद्रुमः ॥ (अदन्तपुरा०-परo-सकo-सेटo ।) अवभाजतु धनं भालवर्गः । इति दुर्गादासः ॥

भाजनं, क्ली, (भाज्यते इति । भाज पृथक्करणे + ल्युट् ।) पात्रम् । इत्यमरः । २ । ६ । ३३ ॥ (यथा, महाभारते । १३ । १११ । १०२ ।

"राजतं भाजनं कृत्वा कपोतः संप्रयाचते ॥")

योग्यम् । इति मेदिनी । ने, १०१ ॥ (यथा, कथासरित्सागरे । ३४ । २०५ ।

"तस्माच्छिक्षितात्मा राजा स्यादयुक्तदण्डो विशेषवित् ।
प्रजानुरागादेवं हि स भवेद्भाजनं श्रियः ॥")

"यः संवादयते नित्यं योऽभिवादास्तिवर्त्तते ।
यश्च तप्तो न तपति दृढं सोऽर्थस्य भाजनम् ॥"

इति मत्स्यपुराणम् ॥

आढकपरिमाणम् । इति वैद्यकपरिभाषा ॥

भाजितं, त्रि, (भाज्यते स्मेति । भाज + क्त ।) पृथक्कृतम् । विभक्तम् । इति भाजधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥ (भावे + क्त ।) भागे, क्ली ॥

भाजी, स्त्री, (भाज्यते इति । भाज + कर्म्मणि घञ् । भाज + "नानपदकुरुकगौरश्यलभाजनागेति ।" ४ । १ । ४२ । इति ङीष् ।) व्यञ्जनविशेषः । अन्यत्र भाजा । इति स्त्रीरत्नटीकायां दुर्गादासः ॥

भाज्यं, त्रि, भागार्हम् । भाजनीयम् । इति भाजधातोः कर्म्मणि यप्रत्ययेन निष्पन्नम् ॥

भाटकः, पुं, क्ली, (भटतीति । भट पोषणे + ण्वुल् ।) व्यवहारार्थं दत्तग्रकटादिलभ्यधनम् । इति हलायुधः ॥ भाड़ा इति भाषा ॥ अथ गृहादिभाटकम् ।

"परभूमौ गृहं कृत्वा भाटयित्वा वसेत्तु यः ।
स तद्गृहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम् ॥
स्तोमं विना वसित्वा तु परभूमावनिच्छतः ।
निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात् कथञ्चन ॥"

कात्यायनः ।

"गृहवाप्यादिकादीनि गृहीत्वा भाटकेन यः ।
स्वामिनो नार्पयेद्दूयावत्तावद्दाप्यः स भाटकम् ॥"

यावी परकृता प्रतिष्ठितेति विवेचितम् ।

"हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः ॥
स्वामिनो नार्पयेद्दूयावत् तावद्दाप्यः स भाटकम् ॥"

बृहन्मनुः ।

"यो भाटयित्वा शकटं नीत्वा नान्यत्र गच्छति ।
भाटं न दद्याद्दाप्योऽसावनूढ़स्यापि भाटकम् ॥"

शकटं वृषगोकादिरथपल्यादिकम् । अनूढ़स्यावाहितस्यापि शकटादेः । इति विवादचिन्तामणिः ॥

भाण्डः, पुं, (भण्यतेऽत्रेति । भण + अधिकरणे घञ् ।) नाटकादिदृश्यरूपकान्तर्गतरूपकविशेषः । इति हेमचन्द्रः । २ । १६८ ॥ तस्य लक्षणादि यथा,—

"भाण्डः स्याद्धूर्त्तचरितो नानावस्थान्तरात्मकः ।
एकाङ्क एक एवात्र निपुणः पण्डितो विटः ॥
रङ्गे प्रकाश्यते स्वेनानुभूतमितरेण वा ।
सम्बोधनोक्तिप्रत्युक्ती कुर्य्यादाकाशभाषितैः ॥
सूचयेद्वीरशृङ्गारौ शौर्य्यसौभाग्यवर्णनैः ।
तत्रेतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती ॥
मुखनिर्व्वहणे सन्धी लास्याङ्गानि दशापि च ।
आकाशभाषितरूपं परवचनमपि स्वयमेवानुवदमुत्तरप्रत्युत्तरे कुर्य्यात् । शृङ्गारवीररसौ च सौभाग्यशौर्य्यवर्णया सूचयेत् । प्रायग्रहणात् कौशिक्यपि वृत्तिर्भवति । उदाहरणं लीलामधुकरः ।" इति साहित्यदर्पणे ६ परिच्छेदः ॥

भाण्डं, क्ली, (भण्यते भणति वेति । भण् शब्दे + "जमन्ताड्डः ।" उणा० १ । ११३ । इति डः । ततः प्रज्ञादित्वादण् ।) पात्रम् । (यथा, महाभारते । १३ । ११ । १०२ ।

"कृत्वा तु काञ्चनं भाण्डं क्रमियोनौ प्रजायते ॥")

वणिङ्मूलधनम् । भूषा । अन्यभूषा । इति मेदिनी । डे, २१ ॥ (यथा, महाभारते । ७ । २६ । २३ ।

"विप्रविह्वकुथावल्गाश्चिन्नभाक्षाः पराभवः । सारोहास्तुरगाः पेतुर्मथिताः पार्थमार्गणैः ॥") नष्टभाक्षस्य दण्डादिविधिर्यथा,—

"अराजदैविकं नष्टं भाक्षं दाप्यस्तु वाहकः । प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां क्षतिम् ॥ भाक्षं यसनमागच्छेत् यदि वाहकदोषतः । दाप्यो यत् तच्च नश्येत् देवराजकृताद्भते ॥"

इति मिताक्षरायां नारदः ॥

नदीकूलद्वयमध्यम् । इति हेमचन्द्रः । ४ । ६२ ॥ (भक्षते इति । भक्ष+अच् । भक्षस्य भावः इत्यण् ।) भक्षवृत्तिः । इत्यजयपालः ॥ भाँड़ामि इति भाषा ॥

भाक्षः, पुं, गर्दभाक्षवृक्षः । इति शब्दचन्द्रिका ॥

भाक्षपुटः, पुं, (भाक्षे पुटा यस्य ।) नापितः । इति जटाधरः ॥

भाक्षपुष्पः, पुं, सर्पविशेषः । तत्पर्य्यायः । कौकुटिकन्दलः २ । इति त्रिकाण्डशेषः ॥

भाक्षागारः, पुं, (भाक्षाणां पात्रादीनामागारः ।) गृहविशेषः । भाँड़ार इति भाषा ॥ तत्पर्य्यायः । मन्थरः २ । इति शब्दमाला ॥ (यथा, महाभारते । १२ । ६८ । ५४ ।

"भाक्षागारायुधागारान् योधागारांश्च सर्व्वशः । अश्वागारान् गजागारान् बलाधिकरणानि च ॥")

भाक्षारी, [न्] पुं, (भाक्षारोऽधिकारित्वेनास्त्यस्येति । भाक्षार+इनिः ।) भाक्षाराध्यक्षः । भाँड़ारी इति भाषा । यथा, व्यवहारप्रदीपे ।

"क्षुधितस्तृषितः कामी विद्यार्थी क्षधिकारकः । भाक्षारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत् ॥

भाक्षिः, पुं, (भक्षि+इन् । पृषोदरादित्वात् साधुः ।) नापितस्य क्षुराद्याधारः । भाँड़ि इति भाषा । इति भाक्षिवाहशब्ददर्शनात् ॥

भाक्षिलः, पुं, (भाक्षिरस्त्यस्येति । भाक्षि+लच् ।) नापितः । इति शब्दमाला ॥

भाक्षिवाहः, पुं, (भाक्षिं क्षुराद्याधारं वहतीति । वह+अण् ।) नापितः । इति शब्दमाला ॥

भाक्षीरः, पुं, (भक्ष+ईरच् । पृषोदरादित्वात् साधुः ।) वटवृक्षः । इति जटाधरः ॥ व्रजमण्डलान्तरे षोड़शवटवनमध्ये द्वितीयवटवनम् । यथा,—

"सङ्केतवटमादौ तु भाक्षीराख्यं वटं ह्यथम् ॥"

इति नारायणभट्टकृतव्रजभक्तिविलासः ॥

भातं, क्ली, (भा दीप्तौ+क्तः ।) प्रभातम् । इति शब्दमाला ॥ (भा+भावे क्तः ।) दीप्तिः ॥ तद्वति, त्रि ॥

भातिः, स्त्री, (भा+क्तिन् ।) शोभा । इति राजनिर्घण्टः ॥ (यथा, श्रीमद्भागवते । ८ । १८ । १२ ।

"यत्तद्ध्वपुर्भातिविभूषणायुधै-रव्यक्तचिद्व्यक्तमधारयद्धरिः । बभूव तेनैव स वामनो वटुः संपश्यतोर्दिव्यगतिर्यथा नटः ॥")

भातुः, पुं, (भातीति । भा+"कमिमनिजनिगाभाद्यादिभ्यश्च ।" उणा० १ । ७३ । इति तुः ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ दीप्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भाद्रः, पुं, (भाद्री पौर्णमास्यस्मिन्निति । भाद्री+"सास्मिन् पौर्णमासीति ।" ४ । २ । २१ । इत्यण् ।) भाद्रपदनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासे सः । वैशाखादिद्वादशमासान्तर्गतपञ्चममासः । तत्पर्य्यायः । नभस्यः २ प्रौष्ठपदः ३ भाद्रपदः ४ । इत्यमरः । १ । ४ । ९ ॥ स च द्विविधः । सिंहस्थरविकालः सौरः । १ । सिंहस्थरवारब्धशुक्लप्रतिपदादिदर्शान्तो सुख्यचान्द्रः । कन्याप्रतिपदादिपौर्णमास्यन्तो गौणचान्द्रः । २ । इति मलमासतत्त्वम् ॥ * ॥ तत्र जातफलम् ।

"नभस्यमासे खलु जन्म यस्य धीरो मनोज्ञश्च वराङ्गनानाम् । रिपुप्रमाथी कुटिलोऽतिमर्म्मा प्रपन्नभर्त्ता स भवेत् सहास्यः ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

तत्र गोः प्रसवे नारदः ।

"भानौ सिंहगते चैव यस्य गौः सम्प्रसूयते । मरणं तस्य निर्दिष्टं ऋद्भिर्मासेन संशयः ॥ तत्र शान्तिं प्रवक्ष्यामि येन सम्यग्यते शुभम् । प्रसूता तत्क्षणादेव तां गां विप्राय दापयेत् ॥ ततो होमं प्रकुर्व्वीत घृताक्तैः राजसर्षपैः । आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ॥"

व्याहृतिभिश्चायं होमः ।

"सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ॥"

इति ॥

तथा ।

"सिंहराशौ गते सूर्य्ये गोः प्रसूतिर्यदा भवेत् । पौधे च महिषी सूते दिवैवाश्वतरी तथा । तदानिष्टं भवेत् किञ्चित् तच्छान्त्यै शान्तिकं चरेत् ॥

अस्य वामेतिसूक्तेन तद्विष्णोरिति मन्त्रतः । जुहुयाच्च तिलाज्येन घृतमश्वोत्तराधिकम् ॥ ऋत्विग्भ्यविधानेन जुहुयाच्च तथायुतम् । श्रीसूक्तेन ततः स्नायात् शान्तिसूक्तेन वा पुनः ॥ मध्यरात्रौ निशीथे वा यदा गौः क्रन्दते तदा । याम्ये वास्य यदे वापि शान्तिकं पूर्व्ववद्विधेत् ॥" संक्रमश्चोत्तरश्चोड़शदक्षात्मकपुण्यकालाभ्यन्तरे गोः प्रसवे विप्रसम्प्रदानकगोप्रदानपूर्व्वकशान्तिः कार्य्येति विशेषः । तदतिरिक्तसिंहस्थरवौ गोः प्रसवे शान्तिमात्रं कर्त्तव्यं न गोः प्रदानम् । निर्णयसिन्धुधृतादृश्यतसागरग्रन्थीयवचनजातमीमांसाशुसारादिति ॥ * ॥ अथ भाद्रव्रतम् । तत्र जन्माष्टमीव्रतप्रमाणान्वितत्वेऽनुसन्धेयम् । आवश्यपौर्णमास्यनन्तरितभाद्रकृष्णाष्टम्यां रात्रिमध्ये सकृन्नाष्टमीरोहिणीयोगरूपजयन्तीकामे तत्रैवोपवासः । उभयदिने चेत्तदा परदिने । जयन्त्यकामे तु रोहिणीयुक्ताष्टम्यां उभयदिने रोहिणीयुताष्टमीकामे परदिने । रोहिण्यकामे तु निशीथसमन्विताष्टम्याम् । उभयदिने निशीथसमन्वे तदसमन्वे वा परदिने इति । तत्र प्रयोगः पूर्व्वदिने संयमं विधाय तद्दिने कृतप्रातःस्नानादिराचान्तः । ॐ सूर्य्यः सोम इति पठित्वा ॐ तद्विष्णोः परमं पदमित्यादिमन्त्रेण नारायणं संस्मृत्य ॐ तत् सत् इत्युच्चार्य्य उदङ्मुखो दर्भहस्तस्ताम्रपात्रे कुशतिलजलाद्यादाय ॐ अद्य भाद्रे मासि कृष्णे पक्षे अष्टम्यां तिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा विष्णुलोकप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा श्रीकृष्णजन्माष्टमीव्रतमहं करिष्ये इति संकल्पयेत् । यद्युपवासदिने प्रातः सप्तमी तदाष्टम्यां तिथौ इत्यत्र सप्तम्यां तिथावारभ्य इति वक्तव्यम् । ततः सामगस्तु ॐ देवो वो द्रविणोदा पूर्णां विवष्टासिचं उदासिच्यध्वमुपवा प्रपुञ्जादिदेवो देव ओहते । इति पठेत् । ॐ धर्म्माय धर्म्मेश्वराय धर्म्मपतये धर्म्मसम्भवाय गोविन्दाय नमो नमः । इत्युच्चार्य्य

"ॐ वासुदेव सङ्कर्षण सर्व्वपापप्रशान्तये । उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥ अद्य कृष्णाष्टमीं देवीं नभश्चन्द्ररोहिणीम् । अर्द्धशिलोपवासेन भोक्ष्येऽहमपरेऽहनि ॥ एनसो मोचकामोऽस्मि यज्ञोविघ्नं क्रियोज्झितम् । तन्मे सुक्षतु मां चाहि पतितं शोकसागरे ॥ आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् । तत् प्रणाशय गोविन्द ! प्रसीद पुरुषोत्तम ! ॥"

इति पठेत् ।

तत आह्निकं समाप्यार्द्धरात्रे तत्तत्प्रतिमासं पटादिषु वा आवाहनविसर्জ্জनसहितं ग्रामग्रामे घटादिस्थजले वा आवाहनविसर्জ্জनरहितं पूजयेत् । ततो ध्यानम् ।

"माचापि बालकं सुप्तं पर्य्यङ्के स्तनपायिनम् । श्रीवत्सवक्षःपूर्व्वाङ्गं नीलोत्पलदलच्छविम् ॥"

इति ध्यात्वा श्रीकृष्ण स्वागतं इति पृच्छेत् । इदमासनं ॐ कृष्णाय नमः । इत्यासनं दत्त्वा एतत् पाद्यम् ॐ श्रीकृष्णाय नमः ॐ यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः । इत्युच्चार्य्य इदमर्घ्यम् ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । ततो दधिमधुघृतात्मकं मधुपर्कमानीय एष मधुपर्कः ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । लौकिकषष्ट्यधिकशतत्रयतोलकपरिमितान्यूनं जलमानीय ॐ योगाय योगेश्वराय योगपतये योगसम्भवाय गोविन्दाय नमो नमः । इदं स्नानीयजलम् ॐ श्रीकृष्णाय नमः । इदं वस्त्रं इदमाभरणम् एष गन्धः इदं पुष्पम् एष धूपः एष दीपः इदं नैवेद्यम् ॐ विश्वाय विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नमः । इत्यनेन नैवेद्यं दत्त्वा आचमनीयं दद्यात् आपोशनं देयम् । ततो नमो देव्यै श्रियै नमः । इति मन्त्रेण श्रियं पूजयेत् । ततः स्वयम्भोक्तविधिनायं संख्याप्य हृततिलाभ्याम् । ॐ धर्म्माय धर्म्मेश्वराय धर्म्मपतये धर्म्मसम्भवाय

गोविन्दाय नमो नमः स्वाहा। इत्यग्नेगार्द्धो-त्तरघृतमहाविंशतिमधौ वा जुहुयात्। ततो गुडघृतेन वसोर्धारां भित्तौ दद्यात्। ततो गाङ्गीच्छेदं भावयेत्। ॐ षष्ठै नम इति वसीं पूजयेत्। ततो भगवतः श्रीकृष्णस्य नामकरणान्न-प्राशनचूडाकरणोपनयनोद्वाहसंस्कारान् भाव-येत्। ततः प्रणवादिनमोऽन्तैस्तत्तन्नामभिः पूजयेत्। ॐ देवक्यै नमः एवं वसुदेवाय यशो-दायै नन्दाय रोहिण्यै चण्डिकायै बलदेवाय दत्ताय गर्गाय चतुर्भुजाय इत्यनेन यथाशक्ति पञ्चोपचारैः पूजयेत्। ततः शुक्लेन कुशपुष्प-चन्दनजलान्यादाय भूमौ जानुनी पातयित्वा,

ॐ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव।।
गृहाणार्घ्यं मयादत्तं रोहिण्या सहितो मम॥
ॐ सोमाय सोमेश्वराय सोमपतये सोमसम्भवाय गोविन्दाय नमो नमः। इत्यर्घ्यं दद्यात्। ततः प्रणाममन्त्रौ।

"ॐ ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः।
नमस्ते रोहिणीकान्त! सुधावास नमोऽस्तु ते॥
नमोमण्डलदीपाय शिरोरत्नाय धूर्जटेः।
कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे॥"

ततश्च।

"अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम्।
वासुदेवं हृषीकेशं माधवं मधुसूदनम्॥
वराहं पुष्करीकाक्षं नृसिंहं दैत्यसूदनम्।
दामोदरं पद्मनाभं केशवं गरुडध्वजम्॥
गोविन्दमच्युतं देवमनन्तमपराजितम्।
अधोक्षजं जगद्बीजं स्वर्गस्थित्यन्तकारिणम्॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम्।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम्॥
पीताम्बरधरं नित्यं वनमालाविभूषितम्।
श्रीवत्साङ्कं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिम्।
प्रपद्येऽहं सदा देवं सर्वकामप्रसिद्धये॥"

इति स्तवः॥

ततः प्रणमेत्।

"प्रणमामि सदा देवं वासुदेवं जगत्पतिम्।
त्राहि मां सर्वदेवेश हरे! संसारसागरात्॥"

ततः प्रार्थयेत्।

"ॐ त्राहि मां सर्वप्रापन्न दुःखशोकार्णवाहरे!।
सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे॥
देवकीनन्दन श्रीश हरे संसारसागरात्।
त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाहरे!॥
दुर्गतांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत्।
सोऽहं देवातिदुर्वृत्तस्त्राहि मां दुःखसागरात्॥
पुष्कराच्च निमग्नोऽहं मायाविज्ञानसागरे।
त्राहि मां देवदेवेश! त्वत्तो नान्योऽस्ति रक्षिता॥"

इति प्रार्थयेत्॥

"यद्बाल्ये यच्च कौमारे वार्द्धके यच्च यौवने।
तत् पुण्यं दृढिमाप्नोतु पापं हर हृषीकेश!॥"

इति वदेत्॥

ततो वृत्तगीतवादित्रस्तवैः कालं नयेत्। परदिने प्रातःस्नानादिकं कृत्वा भगवन्तं श्रीकृष्णं यथाविधि संपूज्य दुर्गायाश्च महोत्सवः कार्यः। ततो ब्राह्मणान् भोजयेत् तेभ्यो दक्षिणां दद्यात् सुवर्णादि यत् किञ्चिदिष्टतमं श्रीकृष्णो मे प्रीयतामिति।

"ॐ यं देवं देवकी देवी वसुदेवादजीजनत्।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः॥
सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥
शान्तिरस्तु शिवञ्चास्तु इत्युच्चार्य विसर्जयेत्।"

ततश्चोपवासपरदिने तिथिनक्षत्रयोरवसाने पारणम्। यदा तु महानिशायाः पूर्वमेकतरस्यावसानं अन्यतरस्य महानिशायां तदनन्तरं वा तदेकतरावसाने पारणम्। यदा तु महानिशायासुभयस्थितिः तदा उत्तरवान्ते पारणं कुर्यात्। तत्र मन्त्रः। ॐ सर्वाय सर्वेश्वराय सर्वपतये सर्वसम्भवाय गोविन्दाय नमो नमः। पारणानन्तरन्तु समाप्तनमन्त्रः। ॐ भूताय भूतेश्वराय भूतपतये भूतसम्भवाय गोविन्दाय नमो नमः। इत्यनेन व्रतं समापयेत्॥ *॥

भाद्रशुक्लपञ्चमीमधिकृत्य भविष्योत्तरे।

"तथा भाद्रपदे माघि पञ्चम्यां श्रद्धयान्वितः।
यस्त्वालिख्य नरो भक्त्या लक्ष्मीवर्णादिवर्णकैः।
पूजयेद्गन्धपुष्पैश्च सर्पिर्गुग्गुलुपायसैः॥
तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः।
व्यासप्रसादात् कुलात्तस्य न भयं सर्पतो भवेत्।
तस्मात् सर्वप्रयत्नेन नागान् संपूजयेन्नरः॥
इयमेवाक्षयनागपञ्चमीति वाचस्पतिमिश्राः।
आलेखनागाः कर्कोटकादयः पूर्वलिखिताः।
पूजा च श्रावणपञ्चमीविहितेति बोध्यम्॥ *॥

अथ हरेः पार्श्वपरिवर्तनम्। तत्र द्वादश्यां सन्धिसमये नक्षत्रान्तसम्भवे। व्याभाकासितपक्षेषु शयनावर्तनादिकमिति ब्रह्मपुराणात्। भाद्रशुक्लद्वादश्यां अवश्यमश्वयुक्तायां सन्ध्यासमये द्वादश्यान्तस्याभावे एकादश्यादिषु प्रादोषे तदभावेऽपि द्वादश्यां केवलायां वा कृताह्निकः सायं सन्ध्यायां देवं संपूज्य।

"ॐ वासुदेव जगन्नाथ प्राग्नेयं द्वादशी तव।
पार्श्वेन परिवर्तेस्व सुखं स्वपिहि माधव!॥"

इति प्राञ्जलिः पठेत्॥

"त्वयि सुप्ते जगन्नाथ! जगत् सुप्तं भवेदिति।
प्रबुद्धे त्वयि बुध्येत जगत् सर्वं चराचरम्॥"

इत्यनेन पूजयेत्॥ *॥

अथ सिंहार्के चतुर्थ्यां चन्द्रदर्शनप्रायश्चित्तम्। सिंहार्कमधिकृत्य ब्रह्मपुराणम्।

"नारायणोऽभिशप्तस्तु निशाकरमरीचिषु।
स्थितश्चतुर्थ्यामद्यापि मनुष्यानापतेच्च सः॥
अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्दीक्ष्य मानवः।
पठेच्छ्लोकावाक्यं प्राङ्मुखो वाप्युदङ्मुखः॥"

अभिशप्तो मिथ्यापरीवादविषयीभूतः। सोऽभिशापः अद्यापि मनुष्यान् पतेत्। ततश्च प्राङ्मुख उदङ्मुखो वा कृतनित्यजलाद्यादाय

ॐ अद्येत्यादि सिंहार्कचतुर्थीचन्द्रदर्शनजन्य-पापक्षयकामो धात्रेयीवाक्यमहं पठिष्ये। इति संकल्प्य।

"ॐ सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारक! मा रोदीस्तव ह्येष स्यमन्तकः॥"

इति विष्णुपुराणोक्तं धात्रेयीवाक्यं पठेत्॥*॥

अथानन्तव्रतम्। तच्च यदिने पूर्वाह्णलाभस्तदिने व्रतम्। उभयदिने चेत् परदिने युग्मात्। व्रतानुष्ठानविधिस्तु पञ्चमी ज्ञेयः॥*॥ अथागस्त्यार्घ्यदानम्। प्रमाणन्तु तिथितत्त्वेऽनुसन्धेयम्। सिंहस्थरविकर्कस्थचन्द्रौ सौरमासादरः। कन्यार्क-संक्रान्तिपूर्वदिनत्रयाभ्यन्तरे कृतस्नानादिकृताह्निकस्त्रिलकुशजलान्यादाय ॐ तत् सदित्युच्चार्य ॐ अद्येत्यादि सर्वाभिलषितसिद्धिकामोऽगस्त्य-पूजनमहं करिष्ये इति संकल्प्य ग्रामस्यामे जले वा दक्षिणामुखः एतत् पाद्यम् ॐ अग-स्त्याय नमः। सितपुष्पाक्षतयुक्तं जलं हस्तेन गृहीत्वा इदमर्घ्यम्।

ॐ काशपुष्पप्रतीकाश अग्निमारुतसम्भव।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते॥
ॐ अगस्त्याय नमः। एवमाचमनीयस्नानीय-गन्धपुष्पधूपदीपनैवेद्यादिकं दद्यात्।

ॐ आतापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु॥"

इति प्रार्थयेत्। इति ज्ञेयतत्त्वम्॥

भाद्रपदः, पुं, (भाद्रपदानक्षत्रयुक्ता पौर्णमासी भाद्रपदी सा यत्र मासे सः। भाद्रपदी + अण्।) भाद्रमासः। इत्यमरः। १। ४। १०॥ (यथा,—

"ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः।
तद्यथा। भाद्रपदाश्वयुजौ वर्षाः।" इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥)

भाद्रपदा, स्त्री, पूर्वभाद्रपदानक्षत्रम्। उत्तर-भाद्रपदानक्षत्रम्। तत्पर्य्यायः। प्रौष्ठपदा २। इत्यमरः। १। ३। २२॥

भाद्रमातुरः, पुं, (भद्रमातुरपत्यमिति। भद्रमाद्र + "मातुरुत्संख्यासम्भद्रपूर्व्यायाः।" ४। १। ११५। इति अण्। "उकारादान्तादेशः।" इति काशिका।) सतीतनयः। "सत्यास्तु तनये साम्मा-तुरवद्भाद्रमातुरः।" इति हेमचन्द्रः। ३। २१०॥

भानुः, पुं, (भाति चतुर्दशभुवनेषु स्वप्रभया दीप्यते इति। भा + "दाभाभ्यां नुः।" उणा० १। ११। इति नुः।) सूर्य्यः। (यथा, महा-भारते। ३। ३। २४।

"अनन्तः कपिलो भानुः कामदः सर्वतोमुखः॥"

विष्णुः। यथा, तत्रैव। १३। १४६। २०।

"सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः॥"

प्राधायाः पुत्रभेदः। यथा, तत्रैव। १। ६५। ४८।

"विश्वावसुश्च भानुश्च शुचयो दशमस्तथा।
इत्येता देवगन्धर्वा प्राधायाः परिकीर्त्तिताः॥"

अङ्गिरःऋषेस्तपसः पुत्रभेदः। यथा, तत्रैव। ३। २२०। ८।

"तपसश्च मनुं पुत्रं भानुञ्चाप्यङ्गिराः सृजत्।"
यादवविशेषः। यथा, हरिवंशे। १४७। २।
"कन्यां भानुमतीं नाम भानोर्दुहितरं नृप!।
जहारात्मवधाकाङ्क्षी निकुम्भो नाम दानवः॥")
किरणः। (यथा, ऋग्वेदे। ६। ६४। २।
"भद्रादहश्चउषिया विभास्युत्ते श्रोचिर्भानवो
द्यामपप्रन्॥"
"भानवो रश्मयः।" इति तद्भाष्ये सायणः॥)
अर्कवृक्षः। इत्यमरः। २। ४। ३३॥ प्रभुः।
राजा। इति धरणिः॥ वृत्ताक्षरपिङ्गलविशेषः।
इति हेमचन्द्रः। २। १४॥

भानुः, स्त्री, (भातीति। भा+नुः) भानुमती।
इति शब्दरत्नावली॥ (दक्षकन्याभेदः। यथा,
मत्स्यपुराणे। ५। १५।
"ऋक्षञ्च देवमातृणां प्रजाविस्तरमादितः।
मरुत्वती वसुर्यामी लम्बा भानुरुवन्धती॥")

भानुफला, स्त्री, (भानुरिव दीप्तिमत् फलमस्याः।)
कदली। इति जटाधरः॥

भानुमती, स्त्री, (भानु+मतुप्+ङीप्।) विक्रमादित्यराजपत्नी। यथा,—
"देवगुरोः प्रसादेन जिह्वाग्रे मे सरस्वती।
तेनाहं नृप! जानामि भानुमत्याश्चरितं यथा॥"
इति वररुचिः॥
(शतधन्वस्य दुहिता। सा च अर्जुनपत्नी।
"यथा, महाभारते। १। ९५। १५।
"अर्जुनात्तु खलु शतधन्वदुहितरमुपयेमे भानुमतीं नाम। तस्यामस्य जज्ञे सार्व्वभौमः॥"
अत्रिवंशः प्रथमा सुता। यथा, महाभारते।
३। २१७। ३।
"प्रजासु तासु सर्व्वासु रूपेणाग्र्यतिमाभवत्।
देवी भानुमती नाम प्रथमाङ्गिरसः सुता॥"
यादवभानोः कन्या। यथा, हरिवंशे। १४७।२।
"कन्यां भानुमतीं नाम भानोर्दुहितरं नृप!॥"
दुर्य्योधनपत्नी। यथा, वेणीसंहारनाटके २ अङ्के।
"आर्य्ये! एषा भानुमती देवी पत्युः समरविजयार्थया निर्वर्त्तितगुरुपादवन्दनाद्यप्रभृति आरब्धनियमा बालोद्याने तिष्ठतीति॥"
गङ्गा। यथा, काशीखण्डे। २६। १२६।
"मुक्तिमुक्तिप्रदा मेध्या भक्तस्वर्गापवर्गदा।
भागीरथी भानुमती भाग्यं भोगवती श्रुतिः॥")

भानुमान्, [त्] पुं, (भानवः सन्त्यस्येति। भानु+मतुप्।) सूर्य्यः। इति शब्दरत्नावली॥ (यथा,
कुमारसम्भवे। ३। ६५।
"अथोपनिन्ये गिरिराय गौरी
तपस्विने तान्त्ररुचा करेण।
विशोषितां भानुमतो मयूखै-
र्मन्दाकिनी पुष्करबीजमालाम्॥"
कलिङ्गदेशजनृपतिविशेषः। यथा, महाभारते।
६। ५१। ३३।
"भानुमांस्तु ततो भीमं शरवर्षेण दारयन्।
ननाद बलवन्नादं नादयानो नभस्तलम्॥"
केशिध्वजस्य पुत्रः। यथा, भागवते। ६।१३।२१।
"भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्-
सुतः॥")
दीप्तियुक्ते, त्रि॥ (यथा, महाभारते। १।३०।४७।
"चर्म्माण्यपि च गात्रेषु भानुमन्ति ढृढानि च॥")

भानुवारः, पुं, (भानोर्वारः।) रविवारः। यथा,—
"अमाशास्या दादशी च संक्रान्तिश्च विशेषतः।
एता प्रशस्तास्तिथयो भानुवारस्तथैव च॥
अत्र स्नानं जपो होमो देवतानाञ्च पूजनम्।
उपवासस्तथा दानमेकैकं पावनं स्मृतम्॥"
इति तिथितत्त्वे सम्वर्त्तवचनम्॥

भानेमिः, पुं, (भानां प्रभाचक्राणां नेमिरिव।)
सूर्य्यः। इति त्रिकाण्डशेषः॥

भाम, ड क्रोधे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ड, भामते। इति दुर्गादासः॥

भाम, तृ क कोपने। इति कविकल्पद्रुमः॥ (अदन्त-पुरा०-पर०-अक०-सेट्।) अवभामतृ। इति दुर्गादासः॥

भामः, पुं, (भामनमिति। भाम क्रोधे+घञ्।)
क्रोधः। (यथा, ऋग्वेदे। ५। २। १०।
"मदेचिदस्य प्रसहन्ति भामा
न वरन्ते परिबाधो अदेवीः॥"
"भामाः क्रोधा दीप्तयो वा।" इति तद्भाष्ये सायणः॥ भातीति। भा+"अर्त्तिस्तुसुहुसृधृ-क्ष्मिभ्यो मन्।" उणा०। १। १६६। इति मन्।) सूर्य्यः। (भा+भावे मन्।) दीप्तिः। इति मेदिनी। मे, २१॥ भगिनीपतिः। इति शब्दरत्नावली॥ (यथा, देवीभागवते। ६।१६।३६।
"गुरुं मित्रं तथा भामं पुत्रञ्च भगिनीं तथा।")

भामकः, पुं, (भाम एव। स्वार्थे कन्।) भगिनीपतिः। इति शब्दरत्नावली॥

भामा, स्त्री, (भामते इति। भाम्+अच्+टाप्।)
कोपना स्त्री। इति शब्दरत्नावली॥

भामिनी, स्त्री, (भामते इति। भाम्+णिनिः+ङीप्।) कोपना स्त्री। इत्यमरः। २। ६। ४॥
स्त्रीमात्रम्। इति राजनिर्घण्टः॥ (यथा,
भागवते। ६। १८। ६।
"एकदा दानवेन्द्रस्य सुरभिष्ठा नाम कन्यका।
सखी सहस्रसंयुक्ता गुरुपुत्रा च भामिनी॥"
तुलयनामकगन्धर्व्वस्य दुहिता। यथा, मार्कण्डेयपुराणे। १२८। ७।
"राजपुत्र! सुतेयं मे भामिनी नाम मानिनी।
अभिशापादगस्त्यस्य विद्याजातनयाभवत्॥")

भामिनीविलासः, पुं, (भामिन्या विलासो यत्र।)
जगन्नाथमिश्रपण्डितराजप्रणीतकाव्यग्रन्थविशेषः।
तस्याद्यश्लोकोऽयम्।
"दिग्मन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिष्यः कारुण्याज्जदमसमशीलाः खलु खगाः।
इदानीं लोकेऽस्मिन्नुपमग्निखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन् खगपतिः॥
तस्य पुत्रिका। इति श्रीमत्पण्डितराजजगन्नाथविरचिते भामिनीविलासे प्रास्ताविकः प्रथमो विलासः। शृङ्गारवर्णनं द्वितीयो विलासः। श्रीकृष्णगुणानुवर्णनं तृतीयो विलासश्च॥

भामी, [न्] त्रि, (भामः क्रोधोऽस्त्यस्येति। भाम+"अत इनिठनौ।" ५। २।११५। इति इनि।)
क्रोधी। (तेजस्वी। यथा, ऋग्वेदे। १।७७। २।
"कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः॥"
"भामिने तेजस्विने।" इति तद्भाष्ये सायणः॥)

भारः, पुं, (भ्रियते इति। भृञ् भरणे+"अकर्त्तरि च कारके संज्ञायाम्।" ३। ३। १९। इति घञ्।) विंशतितुलापरिमाणम्। इत्यमरः॥ तत्तु अष्टसहस्रतोलकात्मकमिति यावत्।
बीवधः। यथा,—
"अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति।
सदासन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात्॥"
इति चाणक्यम्॥*॥
विष्णुः। इति मेदिनी। रे, ७२॥ गुरुत्वञ्च॥
(गुरुत्वगुणवद्वस्तु॥)

भारद्वाजः, पुं, उत्तरकुरुदेशजशकुनपक्षी। इति पुराणम्॥

भारतं, क्ली, (भरतान् भरतवंशीयानधिकृत्य कृतो ग्रन्थ इत्यण्। यद्वा, भारं चतुर्व्वेदादिशास्त्रेभ्योऽपि सारांशं तनोतीति। तनु+डः।)
ग्रन्थभेदः। इति मेदिनी। ते, १३८॥ तत्तु व्यासप्रणीतलक्षश्लोकात्मकमहाभारतसंज्ञकेतिहासः। तस्य श्रवणादिफलं यथा,—
"भारतं शृणुयान्नित्यं भारतं परिकीर्त्तयेत्।
भारतं भवने यस्य तस्य हस्तगतो जयः॥
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे सुवहुश्रुताय।
पुण्याच्च भारतकथां शृणुयाच्च नित्यं
तुल्यं फलं भवति तस्य च तस्य चैव॥
नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा।
इदानामुदधिः श्रेष्ठो गौर्वरिष्ठस्तथोदयाम्।
यथेतानीतिहासानां तथा भारतमुच्यते॥
यश्चैनं श्रावयेत् श्राद्धे ब्राह्मणान् पादमन्ततः।
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥
कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते।
भ्रूणहत्याकृतञ्चापि पापं जह्यादसंशयः॥"
इति महाभारतम्॥*॥
तदुत्पत्तिकथा यथा,—
ब्रह्मोवाच।
"भारतं संप्रवक्ष्यामि भारावतरणं भुवः।
चक्रे कृष्णो युध्यमानः पाण्डवादिनिमित्ततः॥
विष्णुनाभ्यब्जजो ब्रह्मा ब्रह्मपुत्रोऽत्रिरुच्यते।
सोमस्ततो बुधस्तस्मादैलस्यान्तु पुरूरवाः॥
तस्मादयुस्तस्य पुत्रोऽभूदययातिर्भरतः कुरुः।
शान्तनुस्तस्य वंशेऽभूद्गङ्गायां शान्तनोः सुतः॥

भीष्मः सर्वगुणैर्युक्तो ब्रह्मवेदविदां वरः ।
शान्तनोः सत्यवत्याञ्च द्वौ पुत्रौ संबभूवतुः ॥
चित्राङ्गदञ्च गन्धर्वः पुत्रं चित्ररथोऽवधीत् ।
अन्यो विचित्रवीर्योऽभूत् काशिराजसुतापतिः ॥
विचित्रवीर्ये स्वर्याते यावात्तत्क्षेत्रतोऽभवत् ।
धृतराष्ट्रोऽम्बिकापुत्रः पाण्डुरम्बालिकासुतः ॥
सुविख्यातान्तु विदुरो गान्धार्यां धृतराष्ट्रतः ।
दुर्योधनप्रधानास्तु शतसंख्या महाबलाः ॥
पाण्डोः कुन्त्याञ्च माद्र्याञ्च पञ्च पुत्राः प्रजज्ञिरे ।
युधिष्ठिरो भीमसेनः अर्जुनो नकुलस्तथा ।
सहदेवश्च पञ्चैते महाबलपराक्रमाः ॥
कुरुपाण्डवयोर्वैरं दैवयोगादभूव ह ।
दुर्योधनेन वीरेण पाण्डवाः सहसंहताः ।
दग्ध्वा जतुगृहे वीरास्ते मुक्ताः सुधियामलाः ॥
ततस्तु एकचक्रायां ब्राह्मणस्य निवेशने ।
विप्रवेशा महात्मानो निहत्य बकराक्षसम् ॥
ततः पाञ्चालविषये द्रौपद्यास्ते स्वयंवरम् ।
विज्ञाय वीर्यशुल्कां तां पाण्डवा उपयेमिरे ॥
द्रोणभीष्मानुमत्या च धृतराष्ट्रः समानयत् ।
अर्द्धं राज्यं ततः प्राप्य इन्द्रप्रस्थे पुरोत्तमे ॥
राजसूयं ततश्चक्रुः सभां कृत्वा मतव्रताः ।
अर्जुनो द्वारवत्याञ्तु सुभद्रां प्राप्तवान् प्रियाम् ।
वासुदेवस्य भगिनीं मित्रं देवकिनन्दनम् ॥
माधवेयं नाम तद्विश्रुतं त्रिषु लोकेषु विश्रुतम् ।
अक्षय्यान् शायकांश्चैव तथाभेद्यञ्च दंशनम् ॥
स तेन धनुषा वीरः पाण्डवो जातवेदसम् ।
तृप्तवद्वितीयो बीभत्सुरतर्पयत वीर्यवान् ॥
कृपान् दिग्विजये जित्वा रत्नान्यादाय वै ददौ ।
युधिष्ठिराय महते भ्रात्रे नीतिविदे सदा ॥
युधिष्ठिरोऽपि धर्मात्मा भ्रातृभिः परिवारितः ।
जितो दुर्योधनेनैव मायाद्यूतेन पापिना ।
कर्कोटः शासनमते स्थितेन शकुनेर्मते ।
अथ द्वादशवर्षाणि वने तेपुर्महत्तपः ॥
सभौज्या द्रौपदीसत्या सुनिष्टब्धाभिसंहताः ।
वसुर्विराटनगरं गुप्तरूपेण संस्थिताः ॥
वर्षमेकं महाप्राज्ञा गोयूहादिमपालयन् ।
ततो ज्ञाताः स्वकं राष्ट्रं प्रार्थयामासुराहताः ॥
पञ्च यामानहं राज्यं वीरा दुर्योधनं नृपम् ।
नाप्नवन्तः कुरुक्षेत्रे युद्धचक्रुर्वलान्विताः ॥
अक्षौहिणीभिर्विंशाभिः सप्तभिः परिवारिताः ।
एकादशभिरद्युग्रास्तेऽपि दुर्योधनादयः ॥
आसीद्युद्धं स्वर्गमार्गे देवासुरबलोपमम् ।
भीष्मः सेनापतिरभूदादौ दौर्योधने बले ॥
पाण्डवानां शिखण्डी च तयोर्युद्धं बभूव ह ।
ब्रह्मशापैर्मेधाचोरं दग्धराजं शराग्निभिः ॥
शिखण्डार्जुनबाणैश्च भीष्मः शरशतैश्चितः ।
उत्तरायणमीक्षाथ ध्यात्वा देवं गदाधरम् ॥
उक्त्वा धर्मान् बहून् वर्षोत्सर्पयित्वा पितॄन् बहून् ।
आगन्दे तु पदे जीनो विमले शुक्लविग्रहे ॥
ततो द्रोणो ययौ योद्धुं धृष्टद्युम्नेन वीर्यवान् ।
दिनानि पञ्च तद्युद्धमासीत् परमदारुणम् ॥
य एते पृथिवीपाला हताः पार्थाग्निसागरे ।
श्लोकमात्राद्य पुत्रेण द्रोणोऽपि स्वर्गमाप्नुयात् ॥
ततः कर्णो ययौ योद्धुमर्जुनेन महात्मना ।
दिनद्वयं महद्युद्धं कृत्वा पार्थाग्निसागरे ॥
निमग्नः सूर्यलोकन्तु ततः प्राप स वीर्यवान् ।
ततः शल्यो ययौ योद्धुं धर्मराजेन धीमता ॥
दिनार्द्धेन हतः शल्यो वाग्वैर्व्वज्रनिभैः ।
दुर्योधनोऽथ वेगेन गदामादाय वीर्यवान् ॥
अभ्यधावत वै भीमं कालान्तकयमोपमम् ।
अथ भीमेन वीरेण गदया विनिपातितः ॥
अश्वत्थामा ततो द्रौणिः सुप्तं सैन्यं ततो निशि ।
जघान बाहुवीर्येण पितुर्वधमनुस्मरन् ॥
धृष्टद्युम्नं जघानाथ द्रौपदेयांश्च वीर्यवान् ।
द्रौपद्यां रोदमानायामब्रवीच्च शिरोमणिम् ।
ऐषीकास्त्रेण तं जित्वा जग्राहार्जुन उत्तमम् ।
युधिष्ठिरः समाश्वास्य स्त्रीजनं शोकसङ्कुलम् ।
ज्ञात्वा सत्यं देवाँश्च पितॄनथ पितामहान् ।
आश्वासितोऽथ भीष्मेण राज्यञ्चैवाकरोन्महत् ।
विष्णुमीजेऽश्वमेधेन विधिवद्दक्षिणावता ।
राज्ये परिष्ठितं स्थाप्य यादवानां विनाशनम् ।
श्रुत्वा तु मौसले राजा जगाम नामसहस्रकम् ।
विष्णोः स्वर्गं जगामाथ भीमाद्यैर्भ्रातृभिर्युतः ॥"

इति गारुडे १५० अध्यायः ॥०॥

वर्षभेदः । इति मेदिनी ॥ स तु जम्बुद्वीपस्य नवमांशगतनवमवर्षः । तद्विवरणं यथा,—
"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने ! ।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् ॥
महेन्द्रो मलयः सह्यः शुक्तिमाञ्ऋक्षपर्व्वतः ।
विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्व्वताः ॥
अतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च ।
तिर्य्यक्त्वं नरकं चापि यान्त्यतः पुरुषा मुने ! ॥
इतः स्वर्गश्च मोक्षश्च मध्यञ्चान्तश्च गम्यते ।
न खल्वन्यत्र मर्त्यानां कर्म्मभूमौ विधीयते ।
भारतस्यास्य वर्षस्य नव भेदान्निबोधत ।
इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गान्धर्व्वस्तथ वारुणः ।
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् ।
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः ।
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः ।
इज्यायुद्धवणिज्याद्यैर्व्वर्त्तयन्तो व्यवस्थिताः ।
शतद्रूचन्द्रभागाद्या हिमवत्पादनिःसृताः ।
वेदस्मृतिमुखाद्याश्च पारियात्रोद्भवा मुने ! ॥
नर्म्मदासुरसाद्याश्च नद्यो विन्ध्यविनिःसृताः ।
तापी पयोष्णी निर्व्विन्ध्याप्रमुखा ऋक्षसम्भवाः ।
गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा ।
सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ।
कृतमाला ताम्रपर्णी प्रमुखा मलयोद्भवाः ।
त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः ।
ऋषिकुल्या कुमार्याद्याः शुक्तिमत्पादसम्भवाः ।
आसां नदीपनद्यश्च सन्त्यन्याश्च सहस्रशः ।
तास्विमे कुरुपाञ्चालमध्यदेशाद्यो जनाः ।
पूर्व्वदेशादिकाश्चैव कामरूपनिवासिनः ।
ओड्राः कलिङ्गा मगधा दाक्षिणात्याश्च सर्व्वशः ।
तथापरान्ताः सौराष्ट्राः शूराभीरास्तथार्बुदाः ।
मारुका मालवाश्चैव पारियात्रनिवासिनः ।
सौवीराः सैन्धवा हूणाः साल्वाः शाकलवासिनः ।
मद्रा रामास्तथाम्बष्ठाः पारसीकादयस्तथा ।
आसां पिबन्ति सलिलं वसन्ति सरितां सदा ।
समीपतो महाभाग ! कुरुपूरुषनाकुलाः ।
चत्वारि भारते वर्षे युगान्यत्र महामुने ! ।
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् ।
तपस्यन्ति यतो मुक्तये चात्र यज्वनः ।
दानानि चात्र दीयन्ते परलोकार्थमादरात् ।
पुरुषैर्यज्ञपुरुषो जम्बुद्वीपे सदेज्यते ।
यज्ञैर्यज्ञपतिर्विष्णुरन्यद्वीपेषु चान्यथा ।
तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! ।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः ।
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ! ।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ।
गायन्ति देवाः किल गीतकानि
धन्यास्तु ये भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ।
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिल्लयं ये त्वमलाः प्रयान्ति ।
जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम् ।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीणाः ।
नववर्षन्तु मैत्रेय ! जम्बुद्वीपमिदं मया ।
तवायोजनविस्तारं संक्षेपात् कथितं तव ॥
जम्बुद्वीपं समाहृत्य लक्षयोजनविस्तरः ।
मैत्रेय ! वलयाकारः स्थितः चारोदधिर्वृतः ॥"

इति श्रीविष्णुपुराणे २ अंशे २ अध्यायः ॥०॥

अस्मिन् वर्षे जन्मकारणं तपःफलञ्च यथा,—
"श्रुतजन्मतपः श्रुत्वा कर्म्मेदं भारते जनैः ।
करोति सफलं जन्म श्रुत्वा हरिकथाद्भुतम् ।
अर्चनं वन्दनं मन्त्रजपः शैवनमेव च ।
स्मरणं कीर्त्तनं ग्रन्थदृग्युक्तश्रवणमीक्षितम् ।
निवेदनं स्वस्य दास्यं नवधा भक्तिलक्षणम् ।
करोति सफलं जन्म श्रुतेतानि च भारते ।"०॥
अस्य पुण्यस्थलत्वं कर्म्मभूमित्वं परिमाणञ्च यथा,—
"कर्म्मणां फलभोगश्च सर्व्वेषां सुरसुन्दरि ! ।
नैव स्वर्गे न पातालेऽन्यद्वीपे श्रुतौ स्मृतम् ।
श्रुत्वा शुभाशुभं कर्म्म पुण्यक्षेत्रे च भारते ।
अन्यत्र तत्फलं भुङ्क्ते कर्म्मी कर्म्मनिबन्धनात् ।

हिमालयादासमुद्रं पुण्यक्षेत्रञ्च भारतम् ।
श्रेष्ठं सर्व्वस्थलानाञ्च सुनीनाञ्च तपःस्थलम् ।
लब्ध्वा तत्र जन्म जीवो वञ्चितो विष्णुमायया ।
ग्रथतु करोति विषयं विहाय सेवनं हरेः ॥
ज्ञात्वा तत्र महत् पुण्यं स्वर्गं गच्छति पुण्यवान् ।
ग्रहीत्वा स्वर्गकन्याञ्च चिरं स्वर्गे प्रमोदते ॥
स्वर्गभागच्छति नरो विहाय मानवीं तनूम् ॥"
इति ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे ।१।५६।
अध्यायौ ॥

भारतः, पुं, (भरतस्य सुनेरयमिति । भरत+अण् ।) नटः । इति जटाधरः ॥ अग्निः । इति त्रिकाण्डशेषः ॥ (भरतस्य गोत्रापत्यमिति । भरत+अण् ।) भरतस्य गोत्रापत्यम् ॥ (यथा, महाभारते । १ । ११ । ७४ ।
"तत्राश्रौषमहं तेतु कर्म्म भीमस्य भारत ! ॥")

भारतवर्ष्ष, क्ली, (भारतं भरतसम्बन्धि वर्षमिति ।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । यथा,—
"हिमाद्रं दक्षिणं वर्षं भरताय ददौ पिता ।
तस्माच्च भारतं वर्षं तस्य नाम्ना महात्मनः ॥"
तस्य नव भागा यथा,—
"भारतस्यास्य वर्षस्य नवभेदान्निबोध मे ।
समुद्रान्तरिता ग्रेयास्ते त्वगम्याः परस्परम् ॥
इन्द्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गान्धर्व्वो वारुणस्तथा ॥
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रं वै द्वीपोऽयं दक्षिणोत्तरात् ॥
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्मृताः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्तःस्थिता द्विज ! ॥
इज्यायुद्धवणिज्याद्यैः कर्म्मभिः शुचिपावनाः ।
तेषां संव्यवहारश्च एभिः कर्म्मभिरिष्यते ॥
स्वर्गापवर्गप्राप्तिश्च पुण्यं पापञ्च वै तथा ।
महेन्द्रो मलयः सह्यः शुक्तिमाञ्ऋक्षपर्व्वतः ।
विन्ध्यश्च पारियात्रश्च सप्तैवात्र कुलाचलाः ।
तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥
विस्तारोच्छ्रयिणो रम्या विपुलाश्चित्रसानवः ।
कोलाहलः सर्व्वशैलो मन्दरो दर्दुरश्चलः ॥
वातन्धमो वैद्युतश्च मैनाकः सरसस्तथा ।
तुङ्गप्रस्थो नामगिरिर्गोधनः पाण्डुरश्चलः ॥
पुष्पवीर्य्यवलौ च देवतोऽर्व्वद एव च ।
ऋष्यमूकः सगोमन्तः कूटशैलः शतस्वरः ॥
श्रीपर्व्वतश्चकोरश्च शतशृङ्गोऽथपर्व्वतः ।
तैर्विमिश्रा जनपदा म्लेच्छाश्चार्य्याश्च भागशः ।
तेः पीयन्ते सरिच्छ्रेष्ठा वाह्याः सम्यङ्निबोध मे ॥
गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथापगा ।
यमुना च शतद्रुश्च वितस्तेरावती कुहूः ॥
गोमती धूतपापा च बाहुदा च दृषद्वती ।
विपाशा देविका वह्नुर्विशाला गण्डकी तथा ।
कौशिकी चापरा विप्र ! हिमवत्पादनिःसृताः ॥
वेदस्मृतिर्वेत्रवती राजिनी सिन्धुरेव च ।
वेणा च ह्यरुणा चैव सवानीरा महो तथा ॥
पारा चर्म्मण्वती भूमी विदिशा वेत्रवत्यपि ।
शिप्रा ह्यवन्ती च तथा पारियात्राश्रयाः स्मृताः ॥
ग्रोघो महानदश्चैव नर्म्मदा सुरसा क्रिया ।
मन्दाकिनी दशार्णा च चित्रकूटा तथापगा ।
चित्रोत्पलाथ तमसा करतोया पिशाचिका ।
तथान्या पिप्पला ग्रोघी विपाशा वञ्जुला नदी ।
सरोरुणा शुक्तिमती मञ्जुली चिदिवा क्रतुः ।
ऋक्षपादप्रसूता वै तथान्या वेगवाहिनी ।
शिप्रा पयोष्णी निर्व्विन्ध्या तापी च निषधावती ।
वेणा वेतरणी चैव शृङ्गीवाली कुमुद्वती ।
तोया चैव महागौरी दुर्गा चान्तःशिवा तथा ।
विन्ध्यपादप्रसूताश्च नद्यः पुण्यजलाः शुभाः ।
गोदावरी भीमरथी कृष्णवर्णा तथापगा ।
तुङ्गभद्रा सुप्रयोगा वाह्या कावेर्य्यथापगा ।
सह्यपादविनिष्क्रान्ता इमाश्चाः सरिदुत्तमाः ।
कृतमाला ताम्रपर्णी पुण्यजातुत्पलावती ।
मलयाद्रिसमुद्भूता नद्यः ग्रोतजलाक्षिमाः ।
पिल्लसोमगिरिकुल्याश्च रुचिरा त्रिदिवालया ।
लाङ्गूलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः ।
ऋषिका च कुमारी च मन्दगा मन्दवाहिनी ।
कृष्णा वलाग्निनी चैव शुक्तिमत्प्रभवाः स्मृताः ।
सर्व्वाः पुण्याः सरस्वत्यः सर्व्वा गङ्गाः समुद्रगाः ।
विन्ध्यस्य मातरः सर्व्वाः सर्व्वाः पापहराः स्मृताः ।
अन्याः सहस्रशश्चोक्ताः क्षुद्रनद्यो द्विजोत्तम ! ।
प्रावृट्कालवहाः सन्ति सर्व्वकालवहाश्च याः ।
मत्स्याः कुमूलाः कुल्याश्च कुन्तलाः काशिकोशलाः ।
अर्ब्बुदाश्च पुलिन्दाश्च समशाश्च दृकैः सह ।
मध्यदेशे जनपदाः प्रायशोऽमी प्रकीर्त्तिताः ।
सह्यस्य चोत्तरेणैव यत्र गोदावरी नदी ।
पृथिव्यामपि तत्ख्याता च प्रदेशो मनोरमः ।
गोवर्द्धनपुरं रम्यं भागवस्य महात्मनः ।
वाटीका वाटधानाश्च आभीराः कालतोयकाः ।
अपरान्ताश्च शूद्राश्च पह्लवाश्चर्म्मखण्डिकाः ।
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ।
शतद्रवा जलित्थाश्च पारदाहारहूणिकाः ।
माठरा रङ्कवतकाः कैकया दशमालिकाः ।
क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ।
काम्बोजा दरदाश्चैव बर्ब्बरा ह्यङ्गलौकिकाः ।
गौरुचैव तुषाराश्च पह्लवा वाह्यतोदराः ।
आत्रेयाः सभरद्वाजाः प्रस्थलाश्च दशेरकाः ।
लम्पकाः सूतकाराश्च चूलिका जाङ्गलैः सह ।
अपधाश्चालिमद्राश्च किरातानाञ्च जातयः ।
तामसा हंसमार्गाश्च काश्मीराश्चाङ्गमालवाः ।
चूलिका क्षुद्रकाश्चैव ऊर्णा दार्व्याश्चैव च ॥*॥
एते देशा क्षुद्रीयास्तु प्राच्यान् देशान्निबोध मे ।
अम्बष्ठाका सुरसका अम्बष्ठगिरिविष्टिगिराः ।
तथा ह्यवन्ता वङ्गेया मलदा मलवर्त्तिकाः ।
अक्षोत्तराः प्रविजया भार्गवाङ्गेयमर्द्दकाः ।
प्राग्ज्योतिषाश्च मद्राश्च विदेहाश्चान्तर्गिरिकाः ।
मल्ला मगधगोमेदाः प्राच्या जनपदाः स्मृताः ॥
अथापरे जनपदा दक्षिणापथवासिनः ।
पाण्ड्याश्च केरलाश्चैव चोलाः कुल्याश्चैव च ॥
सेतुका मूषिकाश्चैव कुमारा वानवासिकाः ।
महाराष्ट्रा माहिषिकाः कलिङ्गाश्चैव सर्व्वशः ॥
आभीराः सह यैषीका आटव्याः शबराश्च ये ।
पुलिन्दा विन्ध्यमौलेया वैदर्भा दण्डकैः सह ॥
पौरिका मौलिकाश्चैव अश्मका भोगवर्द्धनाः ।
तैलिकाः कुन्तला ह्यन्ध्या उद्भिदा गालकारकाः ॥*॥
दाक्षिणात्याश्चिमे देशा अपरान्तान्निबोध मे ।
सौपारकाः कालनदा दुर्गालालीयकैः सह ॥
कारस्करा कोहणङ्गा वानेया राजभद्रकाः ।
तोसलाः कोशलाश्चैव पैपुरा विदिशास्तथा ॥
तुषाराम्बष्ठकाश्चैव पाटवो नैषधैः सह ।
पुलिन्दाश्च सुशीलाश्च क्षपयाश्चामलैः सह ॥
तथा कुरमिलाश्चैव सर्व्वे चैव करस्कराः ।
नासिक्याश्चाथ ये चान्ये ये चैवान्तरनर्म्मदाः ।
भारुकच्छाः समाहेयाः सर्व्वे सारस्वतैः सह ।
कच्छीयाश्च सुराष्ट्राश्च आवन्त्याश्चार्व्बुदैः सह ॥
इत्येते ह्यपरान्ताश्च ह्यथ विन्ध्यनिवासिनः ।
मणलाश्च करूषाश्च मेकलाश्चोत्कलैः सह ।
उत्तमर्णा दशार्णाश्च भोजाः किष्किन्धकैः सह ।
अनूपास्तुण्डिकेराश्च वीरहोत्रा ह्यवन्तयः ।
एते जनपदाः सर्व्वे विन्ध्यपृष्ठनिवासिनः ।
अतो देशान् प्रवक्ष्यामि पर्व्वताश्रयिणश्च ये ॥*॥
गिरिरा हंसमार्गाश्च कुपथास्तङ्गणाः खसाः ।
कुलाः प्रावरकाश्चैव ऊर्णा दर्वाः सधुष्कराः ।
त्रिगर्त्ता मालवाश्चैव किरातास्तामलैः सह ।
शतद्रवेतादिकाश्चात्र चतुर्थंगणतो विधिः ॥*॥
एतत्तु भारतं वर्षं चतुःसंस्थानसंस्थितम् ।
दक्षिणे परतो ह्यस्य पूर्व्वेण च महोदधिः ।
हिमवानुत्तरेणास्य कार्मुकस्य यथा गुणः ।
तदेतद्भारतं वर्षं सर्व्वबीजं द्विजोत्तम ! ।
देवत्वममरेशत्वं देवत्वं मर्त्यता तथा ।
जगत्पञ्चमरचरा योगीश्वरकृत वरीरुपाः ।
स्थावराश्च सर्व्वेषामतो ब्रह्मन् ! शुभाशुभैः ॥
प्रयान्ति कर्म्मभूरेषा ह्यन्यत्रोकेह विद्यते ।
देवानामपि विप्रर्षे ! सदैव मनोरथः ।
अपि मानुषमाधास्यामो देवत्वात् प्रच्युताः क्षितौ ।
मनुष्याः कुरुते तत्तु यन्न ग्रन्थं सुरासुरैः ॥
सकर्म्मनिगडग्रस्तैः सकर्म्मोपग्रोतसुकैः ।
न किञ्चित् क्रियते कर्म्म सुखलेशोपदंशिनैः ॥"
इति श्रीमार्कण्डेयपुराणे भारतखण्डवर्णनं नामाध्यायः ॥ ५७ ॥ * ॥ अपि च ।
"भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः ।
मलयो मङ्गलप्रस्थो मैनाकश्चित्रकूट ऋषभः
कूटकः कोल्लः सह्यो देवगिरिर्ऋष्यमूकः
श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः
शुक्तिमाञ्चगिरिः पारियात्रो गोपतिश्चकूटो
गोवर्द्धनो रैवतकः कज्जभो गौतो गोकामुखः

इन्द्रकीलः कामगिरिरिति चान्ये शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नद्यश्च सप्तशतसंख्याताः। एतासामपो भारतीः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति चक्षुर्वा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णवेणा भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती सिन्धुः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूरोधवती सप्तवती सुषोमा शतद्रुश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः। अस्मिन्नेव वर्षे पुरुषैर्लक्षणाभिः शुक्ललोहितश्यामवर्णेन स्वरबीजेन कर्म्मणा दिव्यमानुषनारकगतयो बद्धा आत्मन आनुपूर्व्येण सर्व्वा एव सर्व्वेषां विधीयन्ते। यथावर्णविधानमपवर्गोऽपि भवति। योऽसौ भगवति सर्व्वभूतात्मनि अनात्म्योऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवे अनन्यनिमित्तभक्तियोगलक्षणो नागगतिनिमित्तविद्याग्रन्थिबन्धनद्वारेण यदा हि महापुरुषपूजायां प्रसङ्गः। एतदेव हि देवा गायन्ति।

"अहो बतेषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्म लब्धं नृषु भारताजिरे
मुकुन्दसेवौपयिकस्पृहा हि नः॥
किं दुष्करैर्नः क्रतुभिस्तपोव्रतै-
र्दानादिभिर्वा द्युजयेन फल्गुना।
न यत्र नारायणपादपङ्कज-
स्मृतिः प्रसक्तातिशयेन्द्रियोत्सवात्॥
क्वायुर्वपुः स्थानजयात् पुनर्भवात्
क्वायुर्वपुर्भारतभूजयो वरः।
क्वेदृग्विधं कर्म्म कृतं मनस्विनः
संन्यस्य संयान्त्यभयं पदं हरेः॥
न यत्र वैकुण्ठकथा सुधापगा
न साधवो भागवतास्तदाश्रयाः।
न यत्र यज्ञेशमखा महोत्सवाः
सुरेशलोकोऽपि न वै स सेव्यताम्॥
प्रायो नृजातिरिह ये च जन्तवो
ज्ञानक्रियाद्रव्यकलापसम्भृताम्।
न चैतदत्यद्भुतमप्रमत्तता
भूयो वनौका इव यान्ति बन्धनम्॥
यैः श्रद्धया वर्हिषि भागशो हवि-
र्निरुप्तमिष्टं विधिमन्त्रवस्तुतः।
एकः परुषनामभिराहुतो मुदा
यज्ञाति पूर्त्तैः स्वयमाशिषां प्रभुः॥
सत्यं दिशत्यर्थितमर्थितो नृणां
नैवार्थदो यत् पुनरर्थिता यतः।
स्वयं विधत्ते भजतामनिच्छता-
मिच्छापिधानं निजपादपल्लवम्॥
यत्र नः स्वर्गसुखावशेषितं
स्विष्टस्य सूक्तस्य कृतस्य शोभनम्।
तेनाजनाभे स्मृतिमज्जन्म नः स्या-
दर्व्वे हरिर्यद्भजतां शं तनोति।

श्रीशुक उवाच। जम्बूद्वीपस्य च राजन्नुपद्वीपानद्यो ह्येक उपदिशन्ति सागरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पिताः। तद्यथा। स्वर्गप्रस्थश्चन्द्रशुक्ल आवर्त्तनो रमणको मन्दहरिणः पाञ्चजन्यः सिंहलो लङ्केति। एवं तव भारतोत्तमजम्बूद्वीपवर्षविभागो यथोपदेशमुपवर्णितः।" इति श्रीभागवते महापुराणे पञ्चम स्कन्धे द्वीपवर्षवर्णनं नाम १९ अध्यायः॥ (विष्णुपुराणे च। २ अंशे ३ अध्याये।
"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तत् भारतं नाम भारती यत्र सन्ततिः॥१॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने!।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्॥"२॥
अपरञ्च।
"अतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै।
तिर्य्यक्त्वं नरकञ्चापि यान्यतः पुरुषा मुने!॥३॥
इतः स्वर्गश्च मोक्षश्च मध्यमन्तश्च गम्यते।
नखल्वन्यत्र मर्त्यानां कर्म्मभूमौ विधीयते॥"५॥
अपि च।
"चत्वारि भारते वर्षे युगान्यत्र महामुने!।
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित्॥१९॥
तपस्यन्ति मुनयो जुह्वते चात्र यज्विनः।
दानानि चात्र दीयन्ते परलोकार्थमादरात्॥"२०॥
"अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने!।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः॥२२॥
अत्र जन्म सहस्राणां सहस्रैरपि सत्तम!।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्॥२३॥
गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात्॥२४॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मभूते।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिंस्तरन्ति यत्समलाः प्रयान्ति॥२५॥
जानीम नैतत् क वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम्।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीनाः॥"२६॥)

भारती, स्त्री, (भृ+अतच्। स्त्रियां ङीप्।) वचनम्। (यथा, कुमारे। ६। ७६।
"तमर्थमिव भारत्या सुतया योक्तुमर्हसि॥")
सरस्वती। (यथा, कालिदासः।
"वीणापुस्तकरञ्जितहस्ते
भगवति भारति देवि! नमस्ते॥")
पक्षिभेदः। वृत्तिभेदः। इति मेदिनी। ते, १३८। यथा,—
"ङङ्कारे कौशिकी वीरे सात्वत्यारभटी पुनः।
रसे रौद्रे च वीभत्से वृत्तिः सर्व्वत्र भारती॥"
भारती वृत्तिस्तु भारती संस्कृतप्रायो वाग्-व्यापारो नराश्रयः। इति साहित्यदर्पणस्य ६ परिच्छेदः॥ ब्राह्मी। इति राजनिर्घण्टः॥ (शङ्कराचार्य्यशिष्यतोटकस्य शिष्याभामन्यतमस्य उपाधिविशेषः। यथा, प्राक्तोटिशिष्याभावधूतप्रकरणे।
"विद्याभारेण सम्पूर्णः सर्व्वभारं परित्यजेत्।
दुःखभारं न जानाति भारती परिकीर्त्तिता॥"
नदीविशेषः। यथा, महाभारते। ३।२२१।२५।
"भारती सुप्रयोगा च कावेरी सुस्रोरा यथा॥")

भारद्वाजं, क्ली, अस्थि। इति हेमचन्द्रः। ३।२८६॥

भारद्वाजः, पुं, (भरद्वाजस्य अपत्यं गोत्रापत्यमिति वा। भरद्वाज+"अतृष्यनाम्न्यर्षे विदादिभ्योऽञ्।" ४।१।१०४। इति अञ्।) द्रोणाचार्य्यः। (यथा, महाभारते। ७।६। २३।
"ततः प्रयाते सहसा भरद्वाजे महारथे।
आर्षभादेव घोरेण वसुधा समकम्पत॥")
ऋषिभेदः। इति मेदिनी। जे, ३४। अगस्त्यसुतिः। इति ग्रन्थरत्नावली॥ मङ्गलग्रहः। इति ग्रहरत्नमालातत्त्वम्॥ वाग्भटपत्नी। दृढ़व्रतिपुत्रः। इति हेमचन्द्रः॥ (देशभेदः। यथा, "शकयवनपर्व्वतभारद्वाजे।" ४। २। १४५। इति स्मृतौ "भारद्वाजग्रन्थोऽपि देशवचन एव नगोत्रग्रन्थः।" इति काशिका॥ भरद्वाजवंशीये, त्रि॥ यथा, महाभारते। १। १२१। ३।
"इति सञ्चिन्त्य गाङ्गेयस्तदा भारतसत्तम!।
द्रोणाय वेदविदुषे भारद्वाजाय धीमते।
पाण्डवान् कौरवांश्चैव ददौ शिष्यान्नरर्षभ!॥")

भारद्वाजी, स्त्री, वनकार्पासी। इति ग्रन्थरत्नावली॥ (नदीभेदः। यथा, महाभारते। ६। ९। २६।
"शोणाच्च पिप्पिलाच्चैव भारद्वाजीञ्च निम्नगाम्।
कौशिकीं निम्नगां शोणां वाहुदामथ चन्द्रमाम्॥")

भारयः, पुं, (भां दीप्तिं रयते प्राप्नोतीति। रय गतौ+पदाद्यच्।) भारद्वाजपक्षी। इति शब्दचन्द्रिका॥ भारइ इति भाषा॥

भारयष्टिः, स्त्री, (भारस्य यष्टिः।) भारवहनदण्डः। बाँक इति भाषा। तत्पर्य्यायः। विहङ्गिका २। इत्यमरः। २। ९०। ३०॥

भारवं, क्ली, (भारं वातीति। भार+वा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) धनुर्गुणः। इति त्रिकाण्डशेषः॥

भारवाहः, पुं, (भारं वहतीति। वह+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) भारिकः। इत्यमरः। २।१०। १५॥ (यथा, महाभारते। ६। १३३। १।
"अन्धस्य पन्था बधिरस्य पन्थाः
स्त्रियाश्च पन्था भारवाहस्य पन्थाः॥")

भारवाही, स्त्री, (भारवाह+गौरादित्वात् ङीष्।) नीली। इति राजनिर्घण्टः॥

भारविः, पुं, कविविशेषः। स च किरातार्जुनीय-नामकग्रन्थकर्त्ता। तत्पर्य्यायः। भ्रातृपुत्रः २। इति त्रिकाण्डशेषः॥ तस्य ग्रन्थस्य प्रथम-श्लोकोऽयम्।

"श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः॥"

भारट्टचः, पुं, काव्यीनामकगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

भारहरः, पुं, (हरतीति। हृ+पदाद्यच्। भारस्य हरः।) भारवाहकः। इति शब्दरत्नावली॥

भारहारः, पुं, (भारं हरतीति। हृ+अण्।) भारवाहकः। इति शब्दरत्नावली॥

भारिः, पुं, (हस्य अरिः। पृषोदरादित्वात् रलोपः।) सिंहः। इति हेमचन्द्रः॥

भारिकः, पुं, (भारोऽस्ति वाह्यतयास्य। "अत इनिठनौ।"५।२।११५। इति ठन्।) भार-वाहकः। भारी इति ख्यातः। तत्पर्य्यायः। भारवाहः २। इत्यमरः। २।१०।१५॥ भारहरः ३ भारहारः ४। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे।३०।५६।

"तत्र चायागताः केचित् तमूचुः काष्ठ-भारिकाः॥")

भारिटः, पुं, पक्षिविशेषः। तत्पर्य्यायः। श्यामचटकः २ श्रेणिरः ३ कलमचटकः ४। इति राजनिर्घण्टः॥

भारी, [न्] पुं,(भारोऽस्त्यस्यास्मिन् वेति। भार+इनिः।) भारवाहकः। इत्यमरटीकायां रमानाथः॥ (यथा, मनौ। २। १३८।

"चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः।
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च॥")

भारयुक्ते, त्रि॥

भारोही, स्त्री, (भारं वहतीति। वह+क्विप्। स्त्रियां ङीप्। ततः ग्रसादावर्णादौ ऊट्।) भारवाहिका। इति सुग्धबोधव्याकरणम्॥

भार्गवः, पुं, (भृगोरपत्यम् तद्गोत्रापत्यमिति। भृगु+अण्।) परशुरामः। शुक्राचार्य्यः। (यथा, महाभारते। १। ६६। ४५।

"तस्मिन्नियुक्ते विधिना योगक्षेमाय भार्गवे।
अन्वसूत्पादयामास पुत्रं भृगुरनिन्दितम्॥")

धन्वी। गजः। इति मेदिनी। वे, ४५॥ भारत-वर्षमध्ये प्राच्यदेशान्तर्गतदेशविशेषः। यथा,—

"ब्रह्मोत्तराः प्रविजया भार्गवा ग्रेयमद्रकाः॥"
इति मार्कण्डेयपुराणम्॥

(कुलालः। यथा, महाभारते।१।१६२।१।

"गत्वा तु तां भार्गवकर्म्मशालां
पार्थौ पृथां प्राप्य महानुभावौ॥"

"भृगुः स्वघटवृत्तिः जीविकार्थं भृगुवा अव-हरतीति भार्गवः, कुलालः।" इति तट्टीकायां नीलकण्ठः। मार्कण्डेयः। यथा, महाभारते। १३। २२। १५।

"इत्युक्त्वा ते जग्मुरात्तशस्त्रोऽमिततेजसः।
पृथिवीकाश्यपाग्न्यादिः प्रलयायच भार्गवः॥"

ग्रौनकः। यथा, महाभारते। १। १८। ६।

"तथेति चाब्रवीद्विष्णुर्ब्रह्मणा सह भार्गवः॥"

भृगुवंश्यैये, त्रि॥ (यथा, महाभारते। ३। ६६। ४१।

"भृगु रामस्य राजेन्द्र! भार्गवस्य च धीमतः॥")

भार्गवप्रियः, पुं, (भार्गवस्य प्रियः।) हीरकः। शुक्राधिष्ठातृदेवताकत्वात्॥

भार्गवी, स्त्री, (भार्गव+ङीप्।) पार्व्वती। (भृगोरपत्यं स्त्री। भृगु+अण्+ङीप्।) लक्ष्मीः। (अस्या भृगुसुतात्वसूक्तं यथा, विष्णु-पुराणे। १। ६। १४६।

"एतत् ते कथितं ब्रह्मन्! यन्मां त्वं परि-पृच्छसि।
क्षीराब्धौ श्रीर्यथा जाता पूर्व्वं भृगुसुता सती॥")

दूर्व्वा। इति मेदिनी। वे, ४५॥ (यथा, वैद्यक-रत्नमालायाम्।

"सहस्रवीर्य्या दूर्व्वा तु मङ्गल्या भार्गवी स्मृता॥")

नीलदूर्व्वा। इति शब्दरत्नावली॥ (यथास्याः पर्य्यायः।

"नीलदूर्व्वा सहस्रान्ता भार्गवी शतपर्व्विका।
शत्यं सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) श्वेतदूर्व्वा। इति राजनिर्घण्टः॥ (भृगुवंश्यौ-क्षौमाजे। यथा, महाभारते। १। ७२। ३१।

"कक्षाधिरायितोऽसीति पृष्टस्तामाह भार्गवीम्।
हतोऽहमिति चाचख्यौ पृष्टो ब्राह्मण-कन्यया॥")

भार्गी, स्त्री, (भृज्+घञ्। भर्गोऽस्त्यस्या इति।) "ज्योत्स्नादिभ्य उपसंख्यानम्।" ५।२।१०३। इत्यस्य वार्त्तिके। इति अण्। ततो ङीप्।) वृक्षविशेषः। वामनहाटी इति भाषा। तत्-पर्य्यायः। गर्दभाण्डी २ पद्मी ३ अङ्गार-वल्लरी ४ ब्राह्मी ५ ब्राह्मण यष्टिः ६ वाल्मारिः ७ भद्रजा ८ पद्मा ९ यष्टिः १० भारद्वी ११ वातारिः १२ कामलिनी १३ सुरूपा १४ अमरेष्टा १५ अक्रमाता १६। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कासश्वास-श्लेष्मव्रणक्रिमिदाहज्वरनाशित्वञ्च। इति राज-निर्घण्टः॥ अन्यत् ब्राह्मयष्टिकाशब्दे द्रष्टव्यम्॥

भारद्वाजी, स्त्री, (भारद्वाजी। पृषोदरादित्वात् साधुः।) भारद्वाजी। वनकार्पासी। इति शब्दरत्नावली॥

भार्य्या, स्त्री, (भरणीया इति। भृ+"ऋहलो-र्ण्यत्।" ३। १। १२४। इति ण्यत्। टाप्। यद्वा भर्या दीप्ता आर्य्या।) वेदविधा-नेनोढा। विधिपूर्व्वकविवाहिता। तत्पर्य्यायः। पत्नी २ पाणिगृहीती ३ द्वितीया ४ सह-धर्म्मिणी ५ जाया ६ दारा ७ सहधर्म्मिणी ८ धर्म्मचारिणी ९ दारः १० कलत्रम् ११ कलत्रकम् १२। इति शब्दरत्नावली। अस्याः प्रशंसा यथा,—

"सा भार्य्या या प्रियं ब्रूयात् स पुत्रो यस्तु जीवति।
स जीवति गुणो यस्य धर्म्मो यस्य स जीवति॥
गुणधर्म्मविहीनो यो निष्फलं तस्य जीवनम्।
सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रियंवदा॥
सा भार्य्या या पतिप्राणा सा भार्य्या या पति-व्रता।
निद्यजाता सुगन्धा च निद्यच प्रियवादिनी॥
अल्पसुक् स्वल्पभाषी च सततं मङ्गलैर्युता।
सततं धर्म्मचतुरा सततच पतिप्रिया॥
सततं प्रियवक्त्री च सततं ऋतुकामिनी।
पितृदेवक्रियायुक्ता सर्व्वसौभाग्यवर्द्धिनी॥
यस्यैतद्गृहे भवेद्भार्य्या देवैरपि न स मानुषः॥"

अस्या दोषा यथा,—

"यस्य भार्य्या विरूपाक्षी कक्षला कलहप्रिया।
उत्तरोत्तरवादा स्यात् सा जरा न जरा जरा॥
यस्य भार्य्याश्रितान्यत्र परवेश्माभिकाङ्क्षिणी।
कुक्रिया अतत्त्वज्ञा च सा जरा न जरा जरा॥"
"यस्य भार्य्या गुणज्ञा च भर्त्तारमनुगामिनी।
अल्पार्थेन तु सन्तुष्टा सा प्रिया न प्रिया प्रिया॥
दृष्टा भार्य्या गृहं मित्रं भृत्याश्चोत्तरदायकाः।
सर्पश्च गृहे वासो मृत्युरेव न संशयः॥
आपत्सु मित्रं जानीयात् युद्धे शूरं धने शुचिम्।
भार्य्याञ्च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम्॥"

इति गारुड़े नीतिसारे १०८।१०९ अध्यायौ॥ (तथा च महाभारते। १। ७४। ३६—४५।

"सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रजावती।
सा भार्य्या या पतिप्राणा सा भार्य्या या पतिव्रता॥
अर्द्धं भार्य्या मनुष्यस्य भार्य्या श्रेष्ठतमः सखा।
भार्य्यामूलं त्रिवर्गस्य भार्य्यामूलं तरिष्यतः॥
भार्य्यावन्तः क्रियावन्तः सभार्य्या गृहमेधिनः।
भार्य्यावन्तः प्रमोदन्ते भार्य्यावन्तः श्रियान्विताः॥
सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः।
पितरो धर्म्मकार्य्येषु भवन्त्यार्त्ताश्च मातरः॥
कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै।
यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः॥
संशरन्तमपि प्रेतं विषमेष्वेकपातिनम्।
भार्य्यैवान्वेति भर्त्तारं सततं या पतिव्रता॥
प्रथमं संस्थिता भार्य्या पतिं प्रेत्य प्रतीक्षते।
पूर्व्वं मृतञ्च भर्त्तारं पश्चात् साध्व्यनुगच्छति॥")

हरस्मृतिरुवाच।

"यस्य नास्ति सती भार्य्या गृहेषु प्रियवादिनी।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥
सुशीला सुन्दरी प्राप्ता गता यस्य गृहोदरात्।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥
भावानुरक्ता वनिता हृता यस्य च शत्रुणा।

अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
दैवेनापहृता यस्य पतिसाध्वी पतिव्रता ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
यस्य माता गृहे नास्ति भार्य्या चाप्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
प्रियाशून्यं गृहं यस्य पूर्वं स्त्रीधनबन्धुभिः ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
भार्य्याशून्या वनसमाः सभार्य्याश्च गृहा गृहाः ।
गृहिणी च गृहं प्रोक्तं न गृहं गृहसुच्यते ।
अशुचिः स्त्रीविहीनश्च देवे पैत्रे च कर्म्मणि ।
यदन्नं कुरुते कर्म्म न तस्य फलभाग्भवेत् ॥
दाहिकाशक्तिहीनश्च यथा मन्दो हुताशनः ।
प्रभाहीनो यथा सूर्य्यः शोभाहीनो यथा शशी ।
शक्तिहीनो यथा जीवो यथात्मा च तनूं विना ।
विनाधारं यथा धैर्य्यो यथेशः प्रकृतिं विना ॥
न च शक्तो यथा यज्ञः फलदां दक्षिणां विना ।
कर्म्मिणे च फलं दातुं सामग्रीमूलमेव च ॥
विना स्वर्गं स्वर्गकारो यथाशक्तः स्वकर्म्मणि ।
यथाशक्तः कुलालश्च मृत्तिकाद्यविधिं विना ॥
तथा गृही न शक्तश्च सन्ततं सर्व्वकर्म्मसु ।
भार्य्यामूलाश्च पुत्राश्च भार्य्यामूला गृहास्तथा ।
भार्य्यामूलं सुखं शश्वद्गृहस्थानां गृहे सदा ।
भार्य्यामूलः सदा हर्षो भार्य्यामूलश्च मङ्गलम् ।
भार्य्यामूलश्च संसारो भार्य्यामूलश्च सौरतम् ।
यथा रथश्च रथिनां गृहिणश्च तथा गृहम् ।
सारथिस्तु यथा तेषां गृहस्थानां तथा प्रिया ।
सर्व्वरत्नप्रधानश्च स्त्रीरत्नं दुष्कुलादपि ।
सा गृहीता गृहस्थेनेत्याह कमलोद्भवः ॥
यथा जलं विना पद्मं पद्मं शोभां विना यथा ।
तथैव च गृहं शश्वद्गृहिणीं गृहिणीं विना ।"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥

तस्या अत्यन्यत्वं यथा,—

"अनपत्यात्च युवतीं कुलजाच्च पतिव्रताम् ।
त्यक्त्वा भवेद्यः सन्यासी ब्रह्मचारी यतीति वा ॥
वाणिज्ये वा प्रवासे वा चिरं दूरं प्रयाति यः ।
तीर्थाय तपसे वापि मोक्षार्थं जन्म खण्डितुम् ।
न मोक्षस्तस्य भवति धर्म्मस्य स्खलनं ध्रुवम् ।
अभिशापेन भार्य्यायाः नरकञ्च परञ्च ।
इहैव च यशोनाश्च इत्याह कमलोद्भवः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११२ अः ॥

बहुभार्य्यस्थैकस्या भजने दोषादि यथा,—

"गदतो यत् श्रुतं पूर्व्वं नारदाय पितुर्मुखे ।
तत्तस्य धर्म्मशास्त्रार्थं तत् शृणुष्व निशापते ! ॥
बहुदारः पुमान् यस्तु रागादेकां भजेत् स्त्रियम् ।
स पापभाक् स्त्रीजितस्य तस्याशौचं सनातनम् ॥
यद्दुःखं जायते स्त्रीणां स्वाम्यसम्भोगजं यथा ।
न तस्य सदृशं दुःखं किञ्चिदन्यद्धि विद्यते ॥
सतीष्टमपतीं जायां यो नेयात् पुरुषाधमः ।
ऋतुघस्रेषु मूढेषु भ्रूणहा स हि जायते ।
भार्य्या स्यादृग्यवदार्त्तेयी तावत् कालं विरोधकम् ।
तस्मात्तु सङ्गमे किञ्चित् विहितञ्चापि नाचरेत् ॥
बहुभार्य्यस्य भार्य्याभाग्दत्तमैथुनगाग्नम् ।
न किञ्चिद्दित्यते कर्म्म श्राद्धेष्वापि यदीरितम् ॥
तोषयेत् सततं भार्य्या विधिवत् पाणिपीड़िताः ।
तासां तुष्टा तु कल्याणमकल्याणमतोऽन्यथा ॥
सन्तुष्टो भार्य्यया भर्त्ता भर्त्ता भार्य्या तथैव च ।
यस्मिन्नेतत्कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥
यया विरुध्यते स्वामी सौभाग्यमदहङ्कया ।
सपत्नीवङ्गमं कर्त्तुं सा स्यादेषा भवान्तरे ॥
इहापि लोके वाग्यत्तमधर्म्मेणापि विन्दति ।
न च पित्रकुलं स्वामिकुलं तस्याः प्रमोदते ॥
विरुध्यमाने पत्यौ यत् सपत्न्या वा प्रवर्त्तिते ।
अतीव दुःखं भवति तदकल्याणलक्षणम् ॥"

इति कालिकापुराणे २० अध्यायः ॥

रजस्वला भार्य्या अत्याज्या । यथा,—

"न घिनोतीह यो दारान् रजसा कलुषीकृतः ।
प्रेतपैत्राहृते कुक्षे रेतसाच पिबत्यसौ ॥
यो जहाति रजः स्नाता पित्र्यं स्नानं तेजसा नरः ।
सोऽज्ञाति फलमप्येवं यो न दद्यादृतुं पुनः ॥
यो बिभर्त्ति स मत्तो वै बहूनां रजसि स्थितः ।
रेतः पिबति तन्मध्ये पितृभ्यो योऽप्यपिण्डदः ॥
यो जहाति हि निर्द्दोषां भार्य्यामेव रजस्वलाम् ।
शुद्धिमान् संहतः क्षत्तगर्भस्य दुरितं वहेत् ॥"

इति वह्निपुराणम् ॥

कालविशेषे तद्गमननिषेधो यथा,—

"न दिवापि स्त्रियं गच्छेत् कदाचिदिच्छयापि च ।
न पर्व्वसु न सन्ध्यासु नार्त्तां न चतुरात्रिषु ॥
नोदक्यां न दिवा गच्छेत् न सगर्भां न व्रतस्थिताम् ।
अभिगच्छेदविद्वान् यस्तदायुःक्षयमेव च ॥
वन्ध्यारमे परित्याज्या नवमे च ऋतप्रजा ।
एकादशे स्त्रीजननी सद्यस्तप्रियवादिनी ॥
न वक्त्रेऽभिगमं कुर्य्यात् पाणिग्राही तु योषितः ।
कुर्य्याच्चेत् पितरस्तस्य पतन्ति रेतसोषुचः ॥
भार्य्याधीनं सुखं पुंसां भार्य्याधीनो धनागमः ।
भार्य्याधीना मखोत्पत्तिर्भार्य्याधीनः सुखोदयः ॥
यत्र भार्य्या गृहं तत्र भार्य्याधीनो गृहे वसेत् ।
न गृहेण गृहस्थः स्यात् भार्य्यया कथ्यते गृही ॥"

इति पराशरस्मृतिः ॥

भार्य्याटः, पुं, (भार्य्यया अटति वर्त्तते इति । अट गतौ + पदाद्यच् ।) अन्यार्थे स्त्रीदासः । इति त्रिकाण्डशेषः ॥

भार्य्याटिकः, पुं, (अट गतौ + भावे घञ् । भार्य्यया अटो गतिर्भ्रमणं वा अस्त्यस्येति । भार्य्याट + ठन् ।) स्त्रीजितः । हरिणविशेषः । इति मेदिनी । के, २०५ । (मुनिविशेषः । इति हेमचन्द्रः ।)

भार्य्यापती, पुं, (भार्य्या च पतिश्च तौ । "राजदन्ताद्दिषत् परम् ।" २ । २ । ३१ । इति साधुः ।) योषित्पती । तिलद्विषचनान्तोऽयं शब्दः । तत्पर्य्यायः । दम्पती २ जम्पती ३ जायापती ४ । इत्यमरः । २ । ६ । ३८ ॥

भार्य्यारः, पुं, (भार्य्यां ऋच्छतीति । ऋ गतौ + उण् ।) मृगभेदः । क्रीड़या परभार्य्यायां पुत्रोत्पादकः । श्लेष्मभेदः । इति मेदिनी । रे, १६२ ॥

भार्य्याहृदयः, पुं, (भार्य्यावत् प्रियो हृदयः ।) पक्षिविशेषः । इति राजनिर्घण्टः ॥

भाल, क्ली, (भाल दीप्तौ + भावे घञ् । भां लाति गृह्णातीति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) भ्रुवोरूर्द्ध्वभागः । कपाल इति भाषा । तत्पर्य्यायः । ललाटम् २ अलिकम् ३ गोधि ४ । इति राजनिर्घण्टः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।

"स्वामिन् भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु
प्राणेश ! त्रुटितं पयोधरतटे हारं पुनर्योजय ॥")

तेजः । इति मेदिनी । ले, ४२ ॥

भालदर्शनं, क्ली, (भाले ललाटे दर्शनमस्येति ।) सिन्दूरम् । इति शब्दचन्द्रिका ॥

भालदृक्, [श्] पुं, (भाले ललाटे दृक् नेत्रं यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११० ॥

भालाङ्कः, पुं, (भालस्येव अङ्को यत्र भावे अङ्को यस्येति वा ।) करपत्रम् । शाकभेदः । रोहितमत्स्यः । महालक्षणसम्पन्नपुरुषः । कच्छपः । हरः । इति मेदिनी । के, १३३ । (भालस्य अङ्कः ।) ललाटचिह्नञ्च ॥

भाललोचनः, पुं, (भाले ललाटे लोचनं नेत्रं यस्य ।) शिवः । इति भालदृक्शब्ददर्शनात् ॥ (यथा, काशीखण्डे । २६ । १३० ।

"भाललोचनभावज्ञा भूतभव्यभवत्प्रभुः ॥")

भालुकः, पुं, (भलते हिनस्ति प्राणिनः इति । भल हिंसायाम् + बाहुलकात् उकः । ततः प्रज्ञाद्यण् ।) भल्लूकः । यथा, भरतधृतकोषान्तरे ।

"भालूको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि भल्लुकः ॥"

भाल्लूकः, पुं, (भलते हिनस्ति जीवानिति । भल + "ऋलूकादयश्च ।" उणा० । ४ । ४१ । इति ऊकः । ततः प्रज्ञाद्यण् ।) भल्लूकः । यथा,—

"भालूको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि भल्लुकः ॥"

इति भरतधृतकोषान्तरम् ॥

भाल्लुकः, पुं, भल्लूकः । इत्यमरटीकायां भरतः ॥

भाल्लूकः, पुं, भल्लूकः । इत्यमरटीकायां भरतः ॥

भावः, पुं, (भावयति चिन्तयति पदार्थानिति । भू + णिच् + पचाद्यच् । भवतीति । भू + "भवतेर्डित्वे वक्तव्यम् ।" इति काशिकोक्तेर्डो वा ।) मानसविकारः । सत्ता । (यथा, श्रीमद्भगवद्गीतायाम् । २ । १६ ।

"नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥")

स्वभावः । अभिप्रायः । (यथा, रामायणे । २ । २ । १८ ।

"तस्य धर्म्मार्थविदुषो भावमाज्ञाय सर्व्वशः ।
ब्राह्मया बलसुखाच्च पौरजानपदैः सह ।")
चेष्टा । आत्मा । जन्म । इत्यमरः ।३।३।२०६ ॥
(चित्तम् । यथा, मनुः । ४ । २२७ ।
"दानधर्म्मं निषेवेत नित्यमैहिकपौर्त्तिकम् ।
परिपुष्टेन भावेन पात्रमासाद्य शक्तितः ॥")
क्रिया । लीला । पदार्थः । (यथा, रघुः ।३।४१।
"अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः ॥")
विभूतिः । बुधः । जन्तुः । इत्यादिः इति मेदिनी ।
वे, २१ । गौरवितः । अभिनयान्तरम् । इति
त्रिकाण्डशेषः ॥ (विषयः । यथा, द्वितीयोपदेशे ।
"अवश्यम्भाविनो भावा भवन्ति महतामपि ।
नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥"
मनोयोगः । यथा मनुः । ६ । ८० ।
"यदा भावेन भवति सर्व्वभावेषु निस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥"
प्रेम । यथा, गीतायाम् । १० । ८ ।
"इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥")
भावार्थैः । (यथा, सुग्धबोधे वोपदेवः ।
"देशाद्यकालभावं वाटेः ।" क्रियान्तरापेक्षि-
क्रियाविशिष्टः तत्र सप्तमी विहिता तथा च
सुग्धबोधटीकायां रामतर्कवागीशः । "यस्य
क्रियया क्रियान्तरमपेक्ष्यते स इह भावः ॥")
योनिः । उपदेशः । इति धरणिः ॥ संसारः ।
रत्नमेकार्थकोषः ॥ नवग्रहाणां ग्रथनादिदाशग्र-
चेष्टाः । यथा,—
"ग्रथनञ्चोपवेशञ्च नेत्रपाणिः प्रकाशनम् ।
गमनं गमनेच्छा च सभायां वसतिस्तथा ॥
आगमनं भोजनञ्च तृप्तलिप्सा च कौतुकम् ।
निद्रा यष्टाहानां भावाश्च दाशधैते प्रकीर्त्तिताः ॥"
भावानयनक्रमो यथा,—
"यद्राशौ विद्यते खेटस्तेन तं परिपूरयेत् ।
पुनरंशेन संपूर्य्य खर्क्षं तत्र नियोजयेत् ॥
जातदर्क्षं तथा लग्नमेकीकृत्य सदा बुधैः ।
रविभा भागहारेण शेषं कार्य्ये नियोजयेत् ॥
अंशेन नवसंख्यया । खर्क्षं यष्टाहानां जन्म-
नक्षत्रम् । तद्यथा,—
"विशाखानलतोयानि वैष्णवं भगदैवतम् ।
पुष्या पौष्णोयम; सर्पो जन्मभान्यर्कतः क्रमात् ॥"
ऋक्षो राशिः । यदा मेषे यष्टस्तदा १ एक-
पूरितयष्टसंख्याङ्कः । यदा वृषे यष्टस्तदा २
द्विपूरितो यष्टसंख्याङ्कः कार्य्यः ॥ * ॥ जाया-
सुतस्थेतुतुङ्गस्वयष्टत्रिकोणस्थानस्थितपापयष्टानां
निद्राग्रथनभावयोः फलम् ।
"निद्रायाञ्च यदा पापो जायास्थाने शुभं वदेत् ।
यदि पापः शुभैर्दृष्टो नाशुभैश्च कदाचन ॥
यदि वा शत्रुगेहौ स्याच्छयने यदि वेक्षितः ।
तदा नारीसमं तस्य नाशो भवति निश्चितम् ॥
शुभाशुभैर्यदा दृष्टः शुभयष्टसमन्वितः ।
नारी च म्रियते तस्य प्रथमा च विशेषतः ॥
सुतस्थाने स्थितः पापो निद्रायां ग्रथनेऽपि वा ।
तदाशुभं भवेत्तस्य नात्र कार्य्या विचारणा ॥
तुङ्गस्थाने स्वगृहे वा त्रिकोणे वा यदा भवेत् ।
अपत्यस्य तदा नाशो जायते नात्र संशयः ॥
शुभयष्टो यदा तत्र क्रूरो वा यदि वेक्षितः ।
तदा प्रथमापत्यस्य नाशो भवति निश्चितम् ॥
म्रियुस्थाने स्थितः पापो निद्रायां ग्रथनेऽपि वा ।
तदात्मनोऽपत्यतः स्यादात्मतोऽपरतोऽपि वा ॥
शुभयष्टो यदा तत्र म्रियुस्थानेऽपि संस्थितः ।
तदा च मरणं तस्य म्रियुस्थाने विशेषतः ॥
पापयष्टेर्यदा दृष्टः शुभो वा शत्रुवीक्षितः ।
तदा तस्य शिरश्छेदो सुनिना परिकीर्त्तितः ॥
एवं क्रमेण बोद्धव्यं यष्टभावे सुबुद्धिना ।
बलाबलविचारेण जायते च शुभाशुभम् ॥
ज्योतिर्विदुषु च सर्व्वेषु परिहारः कृतो मया ।
ग्रथनादिकभावेषु ज्ञातव्योपदेशतः ॥

एकादशे वा दशमालये वा
धनालये वा यदि वा विलग्ने ।
पापेन युक्तो न शुभयष्टयः-
स्तथापि सिद्धिं महतीं वदन्ति ॥"

फलं यथा,—
"मन्दाग्निः पित्तशूली च जायते ग्रथने नरः ।१।
उपवेशे भवेच्छिल्पी श्यामवर्णस्तथा नरः ॥२॥
नेत्रपाणौ भवेत् क्रूरो जलदोषो भवेन्नरः ।३।
पुण्यवान् धार्म्मिकश्चैव धनवांश्च प्रकाशने ॥४॥
गमने च रवेर्जातः क्षयरोगी धनसंयुतः ।
बहुभाषी क्षमी क्रोधी शुभचित्तः सदा
भवेत् ॥ ५ ॥
अल्पभोक्ता शीघ्रगामी दीर्घायुर्दृढवल्गभः ।
शूरः श्रीमान् सुशीलश्च गमनेच्छाभवो नरः ॥६॥
सभायाञ्च रवेर्जातः खलो दाता क्षमी भवेत् ।
दयालुः पण्डितो धीमान् गुणवान् पण्डित-
प्रियः ॥ ७ ॥
आगमने भवेन्मूर्खः कुरूपो धनवान् भवेत् ।८।
भोजने भक्षको मांसशुष्को महाबपुर्बली ॥९॥
तृप्तलिप्सौ सुन्दरो वाग्मी पण्डितस्य गृहा-
धिपः ।१०।
उत्साही च महाभोगी कौतुके च दिवाकरे ॥११॥
दाता भोक्ता प्रियः पुत्रकलत्राणां न संशयः ।
लिङ्गे देहे करे चैव गुदे रोगी तथैव च ।
निद्रायाञ्च भवेद्रोगी क्रोधनो रक्तनेत्रकः ॥१२॥
इति रवेस्तुङ्गादृङ्गे बलाबले वा बोध्यम् ॥*॥
"ग्रथने च विधौ क्रोधी दरिद्रो बहुलम्पटः ।१।
उपवेशे महारोगी धनवांश्च भवेन्नरः ॥ २ ॥
नेत्रपाणौ नेत्ररोगी शीघ्रदृष्टो बहुभाषकः ।
क्रूरः खलोऽतिशूरश्च जायते च विधौ तदा ॥३॥
प्रकाशने निधानार्थं धनवांश्च भवेन्नरः ।
दक्षो बुद्धिमान् दाता च परदारेषु लम्पटः ॥४॥
अरोगी वित्तहा चैव क्रूरकर्म्मा धनान्वितः ।
शिरोरोगी दन्तशूली जायते गमने विधौ ॥५॥
नानामतिर्महाक्रोधी सम्पदी च भवेन्नरः ।
गमनेच्छुविधौ जातो धनहीनो भवेत्तदा ॥६॥
दाता च धार्म्मिकश्चैव राजपात्रो भवेत् सदा ।
सभायाञ्च विधौ नित्यं जायते पुरुषोत्तमः ॥७॥
नित्यक्रोधी महादुःखी भवेदागमने विधौ ।८।
भोजने च भवेद्भुक्षो भक्षकश्च महासुरः ॥९॥
यो जातो तृप्तलिप्सायां शुभवान् धार्म्मिको
भवेत् ।
बहुपात्रो धनी दाता जायते नात्र संशयः ॥१०॥
कौतुके च भवेद्रोगी नानाविद्यासु तत्परः ।
उत्साही च महाक्रोधी जायते च सुनिश्चि-
तम् ॥११॥
निद्रायां दहरोगी स्यात् क्षयरोगयुतान्वितः ।
पुत्रशोकमहादुःखी नित्यं भ्रमति मेदिनीम् ॥१२
इति चन्द्रस्य ॥ * ॥
ग्रथने च कुजे जातो लक्ष्मीवहुकुरङ्गकः ।
चण्डक्रोधी महादक्षः क्षयको जायते नरः ॥१॥
उपवेशे यदा भौमे जायते च नराधमः ।
धनवान् क्रूरकर्म्मा च निष्ठुरो जातिवर्ज्जितः ॥ २॥
नेत्रपाणौ च यो जातः क्षचिरोगी भवेन्नरः ।
पुत्रदारधनैर्युक्तो दारिद्र्येणैव दह्यते ॥ ३ ॥
प्रकाशने कुजे जातो धनवान् पण्डितः सुधीः ।
नारी च म्रियते तस्य प्रथमा च विशेषतः ॥ ४॥
गमने च यदा जातः प्रवासी नित्यदुःखितः ।
शरीरे च भवेद्रोगः कण्डादिकुष्ठदृष्टकः ॥५॥
प्रवासी गमनेच्छायां गुदरोगी भवेच्च सः ।
धनहीनः कुकर्म्मा च जायते क्षितिजस्य च ॥६
सभायाञ्च यदा जातो धार्म्मिको बहुसम्पदः ।
गुणवांश्च महादाता शिरोरोगी भवेद्गुणम् ॥७
कुजस्यागमने नित्यं दुःखी भवति नान्यथा ।
कर्णरोगी पित्तशूली जायते च नराधमः ॥८॥
भोजने भूमिजस्यापि यो जातो मांसभुक्षकः ।
दृष्टक्रोधी महाक्रोधी नित्योत्साही धना-
न्वितः ॥ ९ ॥
कुजस्य तृप्तलिप्सायां यो जातो धनवान् भवेत् ।
दाता भोक्ता सदा मानी राजपात्रो भवेच्च
सः ॥ १० ॥
कौतुके क्षितिजस्यापि जातो भवति पण्डितः ।
नानाधनेन संयुक्तो बहुपुत्रो द्विभार्य्यकः ॥११॥
निद्रायां भूमिपुत्रस्य यो जातो भूक्ष एव सः ।
कलहो बान्धवैः साद्धं शोकक्लेशसमन्वितः ॥१२
इति मङ्गलस्य ॥
"बुधस्य ग्रथने जातो धनवान् क्षुधितः सदा ।
अङ्गच्छेदो भवेदापि स्वल्पो भवति नान्यथा ॥१॥
उपवेशे च यो जातः प्रवासी जायते ध्रुवम् ।
कवितागुणबुद्धियुक्तो गौरवर्णो महाशयः ॥२॥
नेत्रपाणौ च यो जातः क्षीणदारिद्र्यसान्वितः ।
क्षयरोगी विशेषात् स्यात् पुत्रनाशो भवेद्-
ध्रुवम् ॥ ३ ॥
प्रकाशने भवेज्जातो राजपात्रो धनान्वितः ।
नानाधनेन संयुक्तो जायते वेदपारगः ॥ ४ ॥
गमने यो वरो जातः प्रवासी नित्यदुःखितः ।
शरीरे क्षतमाप्नोति नित्यस्वी भवेच्च सः ॥५॥
यो जातो गमनेच्छायां लम्पटो दुष्टचित्तकः ।
स्त्रीवशो दुष्टभार्य्यश्च कामुको बहुभाषकः ॥६॥

भावः

सभायाञ्च बुधे जातो मूर्खो भवति पण्डितः।
धनवान् धार्मिकश्चैव चिररोगी भवेत्तु सः ॥७॥
क्रूरः खलो हतमूर्खः पङ्गुशीलो भवेन्नरः।
बुधस्यागमने नित्यं जायते च नराधमः ॥८॥
भोजने च भवेत् सौख्य धनहीनो भवेन्नरः।
परद्वेषी प्रवासी च शीर्णगात्रश्चथान्वितः ॥९॥
यो जातो गृध्रलिप्सायां धनवान् पण्डितः कविः।
उत्साही च महाहृष्टो भुनक्ति सुख-
मद्भुतम् ॥ १० ॥
कौतुके च यदा जातो भवेत् सर्व्वजनप्रियः।
अर्शोरोगी दृढयुक्तो धनवानल्पशत्रुकः ॥११॥
निद्रायाञ्च यदा जातः सर्व्वदुःखैकपात्रताम्।
नानाक्लेशमवाप्नोति रोगशोकयमत्रयम् ॥१२॥"
इति बुधस्य ॥ * ॥

"धनवान् लम्पटः श्यामः स्थूलो व्रणसमन्वितः।
जीवस्य शयने जातो मानवो नात्र संशयः ॥१॥
उपवेशे गुरोर्जातो बहुभाषी च रोगवान्।
पशुघाती महाग्निस्थो शीपदी रोगसंयुतः ॥२॥
नेत्रपाकी गुरोर्जातः काणरोगी धनी भवेत्।
क्षतादिश्चरणे नित्यं जायते नात्र संशयः ॥३॥
गुरोः प्रकाशे धनवान् लिङ्गगुह्ये व्रणान्वितः।
दन्ती लम्पटपापी च श्यामवर्णो व्रणान्वितः ॥४॥
सर्पभीतो गूढकर्म्मा साहसी गमनोन्मुखे।
परवित्तेन धनवान् पुमान् भवति वाक्पतौ ॥५॥
गुरोश्च गमनेच्छायां जातो भवति मानवः।
शूली धनी प्रवासी च सेवाकर्म्मणि तत्परः ॥६॥
वक्ता दाता च धनवान् राजसेवान्वितो नरः।
शूलरोगी भवेन्नित्यं सभायां वाक्पतौ स्थिते ॥७॥
धार्मिकस्तीर्थविख्यातो धनी चागमने गुरोः।
परदारेषु संलुब्धो जायते नात्र संशयः ॥८॥
भोजने बहुसौख्याढ्यो मांसलुब्धो महासुरः।
कासुकः प्रियवाक्यश्च जायते नात्र संशयः ॥९॥
गृध्रलिप्से गूढो वाग्मी धनवान् सात्त्विकस्तथा।
महदैश्वर्यसंयुक्तो जीवस्य च भवेन्नरः ॥१०॥
कौतुके च गुरोर्जातो धनवान् धार्मिकः सदा।
वृद्धोत्साही महत्सङ्गो भुनक्ति सुखमद्-
भुतम् ॥ ११ ॥
निद्रायाञ्चैव यो जातश्चूरोगी भवेच्च सः।
क्षपणो बहुभागी च दुःखितो भ्रमते
महीम् ॥ ११ ॥"
इति गुरोः ॥ * ॥

"शुक्रस्य शयने जातो लम्पटो बहुभाषकः।
दन्तरोगी महाक्रोधी नीचो भवति निश्चयः ॥१॥
उपवेशे तथा जातो बलवान् दाम्भिकः सदा।
निश्चयवासी रोगी च जायते नीचसंस्थिते ॥२॥
नेत्रपाकी भृगोर्दुःखी रोगशोकसमन्वितः।
धनहीनो महारोगी मानवः स्यान्न संशयः ॥३॥
भृगोः प्रकाशने जातो विद्याधनसमन्वितः।
दाता च धार्मिकश्चैव कीर्त्तिमान् जायते नरः ॥४॥
शुक्रस्य गमने जातः पादस्थले रजान्वितः।
विद्योत्साही महाग्निस्थो भवेत्तीर्थगतो
रतः ॥ ५ ॥

भावः

गमनेच्छौ यदा जातो भ्रातृनाशो भवेद्ध्रुवम्
माता च म्रियते तस्य शैघ्रये व्याधिसंयुतः ॥६॥
सभायाञ्च भृगोर्जातो राजपात्रो महाधनी।
कुलशीलो महादक्षः केवलं शूलरोगवान् ॥७॥
भृगोरागमने जातो दुःखितो बहुलम्पटः।
दद्दरोगी पुत्रशोकी जायते च नराधमः ॥८॥
शुक्रस्य भोजने जातो बलवान् दाम्भिकः सदा।
महाधनी भवेन्नित्यं वाणिज्येन विराजते ॥९॥
यो जातो गृध्रलिप्सायां स वाग्मी जायते ध्रुवम्।
पाण्डित्यं कविता चैव वर्द्धते च दिने दिने ॥
यदि चैव भवेन्नीचे मूर्खो भवति निश्चितम्।
तुङ्गस्थाने विशेषेण राजपात्रो महाधनी ॥
कासुको बहुकान्तश्च परयोषित्प्रियः सदा।
श्यामवर्णस्तथा मानी यान्त्रिको बहुभा-
षकः ॥१०॥
शुक्रस्य कौतुके जातो धनवान् सात्त्विकः सदा।
महाक्षुद्रो महाबन्धुः कौतुकी च भवेत् सदा ॥
बहुपुत्रकलत्रश्च नानासुखसमन्वितः।
नीचे तद्विपरीतः स्यात् दुःखशोकसम-
न्वितः ॥ ११ ॥
निद्रायाञ्च भृगोर्जातो भवेद्रोगी स निश्चितम्।
नित्यक्लेशी महादुःखी जायते नात्र संशयः ॥
जायायाञ्च सुतस्थाने यति निद्रा भृगोर्भवेत्।
तदा सर्व्वविनाशः स्याद्दिष्णुना परिकी-
र्त्तितः ॥१२॥"
इति शुक्रस्य ॥ * ॥

"शयने च शनेर्जातो लम्पटो बहुभाषकः।
गुह्यस्थाने भवेद्रोगी कोष्ठवृद्धिश्च जायते ॥
लभ्यात् सप्ताष्टमे चैव शयनस्थः शनेश्चरः।
तदा नित्यप्रवासी स्याच्छुचयी भवेच्च सः ॥१॥
उपवेशे यदा जातः शीपदी दद्दसंयुतः।
धनहीनो भवेत्तस्य पीड़ा भवति नित्यशः ॥२॥
नेत्रपाकी यदा जातो मूर्खो भवति पण्डितः।
धनवान् धार्मिकश्चैव द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशने च यो जातो राजपात्रो भवेच्च सः।
नानागुणेन गुणवान् धार्मिकः पण्डितः शुचिः।"
मतान्तरे।
जायास्थाने च लग्ने च प्रकाशने यदा शनिः।
तदा सर्व्वविनाशः स्याज्ज्ञातिध्वंसो भवेद्
ध्रुवम् ॥ ४ ॥
गमने च यदा जातः पादस्थले रजान्वितः।
तीर्थे च गतिमान्नित्यं पुत्रदारैर्विवर्ज्जितः ॥५॥
यो जातो गमनेच्छायां शीपदी रोगसंयुतः।
दन्ताघाती महाक्रोधी क्षपणः परनिन्दकः ॥६॥
सभायाञ्च शनेर्जातः पुत्रदारधनैर्युतः।
सर्व्वत्र लभते वित्तं नानारत्नसमन्वितम् ॥७॥
आगमने यदा जातो महाक्रोधी रजान्वितः।
सर्पादिभिश्च संदष्टो भ्रातृनाशो भवेद्ध्रुवम् ॥८॥
भोजने चैव यो जातो मन्दाग्निश्च महानपि।
अर्शोरोगी तथा शूली चक्षुरोगी भवेच्च सः ॥९॥
यो जातो गृध्रलिप्सायां नर्त्तको बहुभाषकः।
जीवतो दुःखितश्चैव प्रवासी परसेवकः ॥१०॥

भावः

कौतुके च शनेर्जातो राजपुत्रो महाशयः।
दाता भोक्ता महादक्षो धार्मिकः पण्डितः
शुचिः ॥ ११ ॥
निद्रायाञ्च शनेर्जातो धनवान् पण्डितः शुचिः।
चक्षुरोगी पित्तशूली द्विभार्य्यो बहुपुत्रकः ॥
विशेषतश्च धर्म्मस्थे कर्म्मस्थे च कदाचन।
यदि दैवाद्भवेन्निद्रा नाशो भवति निश्चितम् ॥
कर्म्मनाशो धर्म्मनाशः क्षुधार्त्तो दुःखितः सदा।
नित्यप्रवासी रोगी च कार्य्यनाशः पदे पदे ॥
स्वमित्रगेहे वह्नौ वा केन्द्रे वा स्वगृहे पुनः।
तदा सर्व्वं विचार्य्यैव वैपरीत्येन चिन्तनम् ॥
जायायाञ्च सुतस्थाने यदि निद्रा भवेत् पुनः।
तदा सर्व्वं शुभं विद्याद्विष्णुना परि-
कीर्त्तितम् ॥ १२ ॥
इति शनेः ॥ * ॥

शयने च यदा राहोर्जन्म यस्य भवेत् पुनः।
तस्य क्षीणो महादुःखं जायते च न संशयः ॥१॥
उपवेशे च यो जातः शीपदी रोगसंयुतः।
बहुहानिर्नरेन्द्रस्य पीड़ा भवति नित्यशः ॥२॥
नेत्रपाकी यदा जातश्चक्षुरोगी भवेद्ध्रुवम्।
सर्पाघाती महाभीतिर्द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशने च यो जातो धनवान् धार्मिकः पुनः।
नित्यप्रवासी चोत्साही सात्त्विको धार्मिकः
शुचिः ॥ ४ ॥
गमने चैव यो जातो नानारोगैर्धनक्षयः।
दन्ताघाती महाक्रोधी पिशुनः परनिन्दकः ॥५॥
यो जातो गमनेच्छायां बहुपुत्रो महाधनः।
पण्डितो गुणवान् दाता जायते च नरोत्तमः ॥६॥
सभायाञ्च यदा जातः क्षपणो धनसंयुतः।
नानागुणेन गुणवान् धार्मिकः पण्डितः
शुचिः ॥ ७ ॥
आगमने च यो जातो लम्पटो बहुभाषकः।
सुहृद्बन्धुविनाशः स्यान्नानाक्लेशश्च जायते ॥८॥
भोजने च महादुष्टो मन्दाग्निश्च रजान्वितः।
क्षपणः कलहाढ्यश्च दुःखितो नित्यसेवकः ॥९॥
यो जातो गृध्रलिप्सायां खञ्जो भवति नान्यथा।
पुत्रनाशो भवेत्तस्य जायानाशो भवेद्ध्रुवम् ॥१०॥
कौतुके च यदा जातो गुर्व्वः सर्व्वैः समन्वितः।
नानाधनेन धनवान् राजसेवासु तत्परः ॥
यदि दैवाद्भवेत्तुङ्गी स्वगृही वा कदाचन।
तदा सर्व्वं वैपरीत्यं जायते च न संशयः ॥११॥
यो जातो राहुनिद्रायां दुःखितः सर्व्वतस्त्यजः।
नानास्थाने गतो वापि धनपुत्रविवर्ज्जितः ॥
जायायाञ्च सुतस्थाने यदि निद्रां विधुन्तुदः।
तदा सर्व्वं वैपरीत्यं शतजायासमन्वितः ॥१२॥
नानाग्रन्थं समालोक्य क्रियते ग्रन्थसंग्रहः।
बलाबलविचारेण युक्त्या सच्चिन्तयेद्बुधः ॥"
इति ग्रहाणां शयनादिद्वादशभावविवेकः
समाप्तः ॥ इति जातरत्नः कोष्ठीप्रदीपश्च ॥
अथ तन्वादिद्वादशभावाः।
ते च नराणां जन्मलग्नाद्यधिकद्वादशस्थानानि।
यथा,—

भावः

"सामर्थ्यं तनु कल्पते सुहृदये वित्तं कुटुम्बं ततो
विक्रान्तिं सहजं तृतीयभवने योधश्च सचिन्तयेत् ।
बन्धुं बाह्यसुखालयानपि ततो धीमन्पुत्रांस्ततः
षष्ठेऽथ व्रतविद्विषौ मदगृहे कामं स्त्रियं वर्त्म च॥
रन्ध्रायुर्व्ययतोऽष्टमे गुरुतपो भाग्यानि चिन्तन्ततो
मानाज्ञास्वदकर्म्मणां दशमभे कुर्य्यात्ततस्त्वन्तगम् ।
प्राप्त्यायावथ चिन्तयेद्व्ययगृहे ऋक्षे तु मन्त्रिव्ययौ
सौम्यस्वामियुतौ च शत्रुरुपचयस्तेषां व्रतिस्त्वन्यथा॥
इति द्वादशभावविवेकः ॥
अरातिव्रजयोः षष्ठे चाष्टमे मृत्युरन्ध्रयोः ।
व्ययस्य द्वादशस्थाने वैपरीत्येन चिन्तनम् ॥"
अरात्यादिभावापवादः ॥
अथ तन्त्रादिद्वादशभावस्थग्रहफलम् ।
"लग्ने सूर्य्येऽस्थिरोगी ग्रन्थिनि बलयुतो रूपवान् वित्तयुक्तो
भौमे यज्ञः सुवाग्मी ग्रन्थधरतनये सर्व्वशास्त्रार्थवेत्ता ।
जीवे दाता पवित्रः सुकविरघ गते भार्गवे मल्लखेलः
शौरौ कण्डूतिगात्रस्त्रसमसि च नियतं वञ्चितो धर्म्महीनः ॥ १ ॥
वित्तेऽर्के चैव रोगी सततगदयुतो रात्रिनाथे धनाढ्यो
भौमे नित्यं प्रवासी क्षधिसुतधनवान् सोमपुत्रे प्रधानः ।
जीवे लक्ष्मीप्रमोदी विलसति भृगुजे दर्पितः स्त्रीनिकेतः
सौरौ दीनोऽति नित्यं तमसि च नियतं चौरिकावित्तजीवी ॥ २ ॥
भ्रातर्य्यर्के सधर्म्मः स भवति नियतं भ्रातृहा रात्रिनाथे
द्विसो भौमेऽनुजानां सपदि वधकरो भूमिकावृत्तिजीवी ।
सौम्ये सत्यस्य हन्ता भवति सुरगुरौ कामदेवस्वरूपः
शुक्रे राज्याधिकारी रविजदनुजयोर्भ्रातृहन्ता धनाढ्यः ॥ ३ ॥
अर्के बन्धौ सुदुःखी स्वजनपरिवृतः प्रीतगौ जानुरोगी
भौमे कृषामवासी भवति ग्रन्थिसुते भ्रातृपुत्रान्वितोऽपि ।
जीवे रत्नोपभोगी त्रिदशरिपुगुरौ सर्व्वसौख्याधिकारी
सौरौ गेहे निवासी भवति ग्रन्थिरिपौ मन्दकर्म्मा कुचेलः ॥ ४ ॥
पुत्रस्थेऽर्के नरोऽसौ प्रथमसुतहतः सिंहराशौ सुपुत्रः
सोमे सर्व्वाधिकारी भवति धरणिजे पुत्रशोकाकुलोऽसौ ।

भावः

सौम्ये सुस्थः सुदेहः प्रचुरधनयुतो देवपूज्ये सुपुत्रः
कन्यायुक्तो हि शुक्रे रविजदनुजयोः पुत्रपौत्रैर्विहीनः ॥ ५ ॥
षष्ठेऽर्के शत्रुहन्ता रिपुगणरहितः शीघ्रचन्द्रे गतायुः
पूर्णे शत्रुघ्न हन्याद्भवति धरणिजे हीनदेहोऽतिदीनः ।
सौम्ये शास्त्रार्थयुक्तस्त्रिदशगुरुपतिगुरौ राज्यसौख्योपभोगी
दैत्याचार्य्येऽतिरोगी रविजदनुजयोः पापयुङ्नित्यदुःखी ॥ ६ ॥
पत्न्यामर्के च जायापतिरतिविसुखी प्रीतरघ्नौ सुपुत्रः
सुस्थो भूयान्नरोऽसौ भवति धरणिजे हीनभार्य्यश्च नूनम् ॥ ७ ॥
सौम्ये सुस्थः सुदेहस्त्रिदशगुरुपतिगुरौ शास्त्रवेत्ता शतायुः ।
शुक्रे पुत्रप्रमोदी रविजदनुजयोर्हीनभार्य्यश्च नूनम् ॥ ७ ॥
मृत्यौ चार्के सदृत्युर्भवति च नियतं प्रीतरघ्नौ गतायुः
भूमेः पुत्रे सुरोगी ग्रन्थधरतनये शूलरोगी विकर्म्मा ।
जीवे तीर्थे च मृत्युर्भवति भृगुसुते धार्म्मिकस्तीर्थगोऽसौ
सौरौ शूली गतायुर्भवति विधुरिपौ वेदसुक्तो गतायुः ॥८॥
धर्म्मे चार्के नरोऽसौ विविधधनयुतः प्रीतगौ पुण्यकर्म्मा
लक्ष्मीवान् पुण्यचेता भवति धरणिजे देववित्तापहारी ।
सौम्ये धर्म्मः सुशीलस्त्रिदशगुरुपतिगुरौ राजतुल्यः सुकर्म्मा
शुक्रे तीर्थानुरागी रविजदनुजयोः पापशीलः सुदुःखी ॥९॥
कर्म्मण्यर्के प्रतापी प्रचुरधनयुतः स्त्रीपदो क्रोधदृष्टिः
सोमे क्षेत्रान्वितोऽसौ विविधधनयुतो भूमिजे बन्धुहीनः ।
नित्योत्साही च सौम्ये प्रचुरधनयुतो देवपूज्येऽभिमानी
दिव्यस्त्रीभोऽपि शुक्रे नृपतिसमधनः सौरिदैत्ये सुखी च ॥१०॥
आये चार्के नरोऽसौ पिठधनसहितः प्रीतगौ चारुशीलो
भौमे नित्यं स रोगी ग्रन्थधरतनये सर्व्वदा क्रोधयुक्तः ।
जीवे श्रीमान् प्रदाता करितुरगपतिर्भार्गवे शास्त्रविज्ञः
क्षत्री रत्नादियुक्तो रविजदनुजयोः क्रूरकर्म्मा कुचेलः ॥११॥

भावः

अर्के संस्थे व्ययेऽसौ पुरधनरहितः सर्व्वरोगी सुदुःखी
सोमे खेदान्वितोऽसौ भवति धरणिजे क्षुत्तरक्तो विदुःखिः ।
सौम्ये धर्म्मार्थकारी दिनकररहिते देवपूज्येऽभिमानी
शुक्रे शास्त्रानुरागी रविजदनुजयोः क्रूरकर्म्मा कुचेलः ॥१२॥
इति ज्योतिस्तत्त्वम् ॥३॥
स्त्रीणां यौवनकाले स्वभावजाद्यविंशत्यलङ्कारान्तर्गताङ्गजप्रथमालङ्कारः । यथा,—
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः ।
अलङ्कारास्तु भावहावहेलाख्योऽङ्गजाः ॥"
तत्र भावः ।
"निर्व्विकारात्मके चित्ते भावः प्रथमविक्रिया ॥"
जन्मतः प्रभृति निर्व्विकारे मनसि उद्बुद्धमात्रो विकारो भावः । यथा,—
"स एव सुरभिः कालः स एव मलयानिलः ।
सैवेयमवला किन्तु मनोऽन्यदिव दृश्यते ॥"
इति साहित्यदर्पणे तृतीयपरिच्छेदः ॥*॥
भावस्य लक्षणान्तरं यथा,—
"शरीरेन्द्रियवर्गस्य विकाराणां विधायकाः ।
भावा विभावजनिताश्चित्तवृत्तेश्च हेतवः ॥
पुराणे नाट्यशास्त्रे च द्वयोस्तु रतिभावयोः ।
समानार्थतया चात्र द्वयमेकेन लक्ष्यते ॥"*॥
पूर्व्वोक्तमानसविकाररूपभावस्य विषयभेदं यथा,
रजःसत्त्वतमोमयश्चित्तविकारो भावः । चित्तवृत्तिविशेषो भाव इत्यन्ये । अतएव मनोविकारो रत्यादिर्भाव उक्तः । भावयति जनयति रसान् भावः घञ् । तथा च भरतः ।
"नानाभिनयसम्बन्धान् भावयन्ति रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाटकोक्तिषु ॥"
भावाश्च त्रिविधाः स्थायिनो व्यभिचारिणः सात्त्विकाश्च । तत्र स्थायिनो यथा,—
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः ॥
व्यभिचारिणो यथा,—
"निर्व्वेदग्लानिशङ्काश्रमतासूयामदभ्रमाः ।
आलस्यञ्चैव दैन्यञ्च चिन्ता मोहो धृतिः स्मृतिः॥
व्रीड़ा चपलता हर्षं आवेगो जड़ता तथा ।
गर्व्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
सुप्तो विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः प्रयान्ति रससंस्थितम् ॥"
सात्त्विका यथा,—
"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मता इति ॥
रत्यादयः स्थायिनोऽष्टौ निर्व्वेदाद्या व्यभिचारिणस्त्रयस्त्रिंशत् स्वेदादयः सात्त्विका अष्टौ चेति ऊनपञ्चाशद्भावाः पञ्चाशद्भावा इत्यन्ये ।
इत्यमरटीकायां भरतः ॥

(प्रधानव्यभिचारिप्रभृतयो भावग्रन्थेनोच्यन्ते। यदुक्तं साहित्यदर्पणे तृतीयपरिच्छेदे।
"व्यभिचारिण: प्रधानानि देवादिविषया रति:। उद्बुद्धमात्र: स्थायी च भाव इत्यभिधीयते॥")
भगवद्भावो यथा,—
"शुद्धसत्त्वविशेषात्मा प्रेमसूर्यांशुसाम्यभाक्।
रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते॥"
इति भक्तिरसामृतसिन्धु:॥७॥

भावक:, पुं, (भाव एव स्वार्थे कन्।) भाव:। मानसो विकार:। इति हलायुध:॥ (भवतीति। भू+कर्त्तरि ण्वुल्।) सत्ताश्रये, त्रि। इति संक्षिप्तसार:॥

भावत:, त्रि, (भवत अयमिति। भवत्+अण्।) भवदीय:। युष्मदस्मद्भवच्छब्दादण्प्रत्ययनिष्पन्न:। इति सिद्धान्तकौमुदी॥

भावतक:, त्रि, (भवतामयमिति। भवत्+"भवतष्ठक्छसौ।" ४।२।११५। इति ठक्।) भवदीय:। भवच्छब्दात् ठक्प्रत्ययनिष्पन्न:। इति सिद्धान्तकौमुदी॥ यथा, भट्टिकाव्यसर्गे।
"भावकं दृष्टवत्क्षेत्रदक्षाक्षधि सुखीवितम्॥"

भावकं क्ली, (भू+ण्वुच्+क्लुट्।) भवनम्। इति राजनिर्घण्ट:॥ चाञ्चल्य इति भाषा॥ (भावे क्लुट्।) भावना। इति मेदिनी। के, २०१॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे।
"सुखदु:खादिभिर्भावैर्भावस्यात्मनो भावनम्॥"
भावयतीति। भू+ण्वुच्+क्लु:। उत्पादके, त्रि। यथा, महाभारते। १। २२४। ४५।
"दृष्ट्वैव च स राजानं शङ्करो लोकभावन:।
उवाच परमप्रीत: श्वेतकिं वृणवस्तमम्॥")

भावना, स्त्री, क्ली, (भू+ण्वुच्+युच्।) ध्यानम्। (यथा, गीतायाम्। २। ६६।
"नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयत: शान्तिरशान्तस्य कुत: सुखम्॥")
पर्य्यालोचनम्। अधिवासनम्। इति मेदिनी। ने, २०१॥ त्रिविधा भावना यथा,—
"त्रिविधा भावना विप्र! विश्वमेतन्निबोध मे।
ब्रह्माख्या कर्म्मसंज्ञा च तथा चैवोभयात्मिका॥
ब्रह्मभावात्मिका ज्ञेया कर्म्मभावात्मिकापरा।
उभयात्मिका तथैवान्या त्रिविधा भावभावना॥
सनन्दनादयो ब्रह्मभावभावनया युता:।
कर्म्मभावनया चान्ये देवाद्या: स्थावराश्चरा:॥
चिरस्थगर्भोदिषु च ब्रह्मकर्म्मात्मिका द्विधा।
बोधाधिकारयुक्तेषु विद्यते भावभावना॥"
इति विष्णुपुराणे ६ अंशे ७ अध्याय:॥
त्रिविधभावनाश्रयजीवात्मकत्वात्तदुपचारेण त्रिविधा भावनेत्युच्यते। एतद्धि हरे: क्षेत्रं रूपम्। अत: पररूपप्राप्त्युपायत्वात् तत्र प्रथमं मन: सन्धत्तमिति भाव:। भावना नाम ज्ञानविशेषजा वासना। तां त्रिविधामपि संक्षामादिशति ब्रह्माख्येति। तामेव विषयभेदेन विविनक्ति ब्रह्मभावात्मिकेति। भावभावना भावो वस्तु तद्विषया भावना त्रिविधा। तत्र वयं ब्रह्मैव भावयाम:। वयं कर्म्मैव कुर्म्म:। वयन्तूभयमिदमनुसन्धत्त इत्येवं त्रिविधा भावना। भावनायुक्तान् जीवानुद्धरति सनन्दनादय इति द्वाभ्याम्। इति तट्टीका॥

भावबोधक:, पुं, (भावस्य रत्यादेर्बोधक: अनुभावक:।)अनुभाव:। इत्यमर:॥२।७।२१॥ भावस्य रत्यादेर्बोधक: कटाक्षो भ्रूक्रियादिरनुभाव:। अनुभाव्यते प्रतीतियोग्यतां नीयते रत्यादिरनेनेति अनुभाव: घञ्। तत्र रतेरनुभावा: लोचनचातुर्य्यभ्रूक्षेपादय:। हासस्य च कपोलाकुञ्चनागोत्तुङ्गनादयोऽनुभावा एवं अन्यत्रानुमन्तव्यम्। किंवा भावानामनुभावयतीति अण् अनुभावो सुखरागादि:। इति तट्टीकायां भरत:॥

भावदत्त:, पुं, (भाव: सत्ता दत्त: प्रदत्तोऽस्यादिति। यद्वा, भाव: वृद्धि: तत्र दत्त: प्रदत्त:।) ब्रह्मा। इति सन्ध्याव्याख्यायां स्मृति:॥

भावाट:, पुं, (भावं भावेन वाटतीति। अट्+अच् अच् वा।) भावक:। साधु:। निवेश्र:। कामुक:। नट:। इति मेदिनी। टे, ५२॥

भावानुगा, स्त्री, (भावं स्वसंपदार्थमनुगच्छतीति। अनु+गम्+ड:। टाप्।) छाया। इति राजनिर्घण्ट:॥ (भक्त्यादिना अनुगते, त्रि॥)

भावालीना, स्त्री, (भावेषु स्वसंपदार्थेषु आलीना।) छाया। इति राजनिर्घण्ट:॥

भावित:, त्रि, (भाव्यते स्मेति। भू+णिच्+क्त:।) वासित:। प्राप्त:। इति मेदिनी। ते, १४०॥ विद्योधित:। (यथा, महाभारते।१३।१६।३८।
"ये चैनं प्रतिपद्यन्ते भक्तियोगेन भाविता:।
तेषामेवात्मनात्मानं दर्शयत्येष कृच्छ्रय:॥")
चिन्तित:। मिश्रित:। भू क्त बुद्धिचिन्तयोर्मिश्रे च इत्यसात् ण्यन्तात् क्तप्रत्ययनिष्पन्नोऽयम्॥ (समर्पित:। यथा, महाभारते। १। ५। ३२।
"एतत् संकुचितं ब्रह्मंस्तापत्रयचिकित्सितम्।
यदीश्वरे भगवति! कर्म्म ब्रह्मणि भावितम्॥"
"भगवति भावितं समर्पितम्।" इति तट्टीकायां श्रीधरस्वामी॥ शिक्षा:। यथा, सुश्रुते चिकित्सितस्थाने। १ अध्याये।
"भक्षातङ्कान् वाग्यतेषु घोरे प्राङ्मुखभाविते॥")

भाविनं, स्त्री, (भवतीति। भू+"भूवादिगृधो णिनन्।" उणा० ४। १००। इति णिनन्।) नैवेद्यम्। स्वर्णमक्षीकाजम्। इत्युज्ज्वलदत्त:॥

भाविनी, स्त्री, स्त्रीविशेष:। इत्यमर:॥ भाव: शृङ्गारचेष्टाविशेषो विद्यतेऽस्या: भाविनी। इति तट्टीकायां भरत:॥ (यथा, हरिवंशे।११०।३६।
"सा हि तस्याभवद्भ्येष्ठा पत्नी ह्यस्य भाविनी।
पतिव्रता गुणोपेता रूपशीलगुणान्विता॥")
स्त्रीमात्रम्। इति राजनिर्घण्ट:॥ (स्वस्य मातृसम्बन्धिनामन्यतमा। यथा, महाभारते। ६। ४६। ११।

"श्रुतवष्ठा श्रुतागन्धा भगनन्दा च भाविनी।
वपुष्मती चन्द्रशीता भद्रकाली च भारत!॥")
वर्त्तमानप्रागभावप्रतियोगिनी च॥

भावी, [न्] त्रि, (भविष्यतीति। भू+"सुयजि।" उणा० ४। ८। इति इनि:। स च ङिद्भवति।) भविष्यत्कालादि:। वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिक:। यथा,—
"वीरप्रतिपदा नाम तव भावी महोत्सव:॥"
इति कार्त्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रति भगवद्वाक्यम्। इति तिथ्यादितत्त्वम्॥

भावुकं, क्ली, (भवतीति। भू+"नपतपदघसिभूधृषेति।"३।२। १५४। इति उकञ्।)मङ्गलम्। (यथा, प्रद्युम्नविजये १ अङ्के।
"शुक्र! सर्व्वत्र कुशलमस्माकम्। अपि भावुकं व: सुराणाम्॥")
तद्वति, त्रि। इत्यमर:। २। ४। २६॥

भावुक:, पुं, (भू+उकञ्।) नाट्योक्तौ भगिनीपति:। इति हेमचन्द्र:॥

भावुक:, त्रि, भवनाश्रय:। भवति य:। इति कर्त्तरि भूधातोर्णुकप्रत्ययेन निष्पन्न:। रसविशेषभावनाचतुर:। इति श्रीधरस्वामी॥ यथा,—
"निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम्।
पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुका:॥"
इति श्रीभागवते। १। १। ३॥
लक्ष्मणपलितप्रियङ्गुस्थूलसुभगाट्यग्रन्थोपपदभूधातोरभूततद्भावार्थे कर्त्तरि वाच्ये सुकञ्प्रत्ययेन सत्यभावुक इत्यादयश्च निष्पन्ना:॥

भाव्यं, क्ली, अवश्यभवितव्यम्। इति भूधातोरवश्यम्भावार्थे भावे ण्यत्प्रत्ययेन निष्पन्नम्। यथा। विप्रेण शुचिना भाव्यम्। इति सुग्धबोधव्याकरणम्॥ प्रयोगदर्शनात् कर्त्तरि च तत्र त्रि। यथा.—
"कृतस्य करणं नास्ति दैवाधिष्ठितकर्म्मण:।
भावीत्यवश्यं यद्भाव्यं तत्र ब्रह्माप्यबाधक:॥"
इति कालिकापुराणे १८ अध्याय:॥

भाष, ङ च वाचि। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ,भाषते। च, अभीभवतु अवभाषतु। इति तट्टीकायां दुर्गादास:॥

भाष्यं, क्ली, (भाष्+भावे ण्यत्।) कथनम्। यथा। "संज्ञापो भाष्यमिष्य:।" इत्यमर:॥ (यथा, सर्व्वदर्शनसंग्रहे। आर्हतदर्शने।
"हास्यशोकभयक्रोधप्रत्याख्यानैर्विरन्तरम्।
आलोच्य भाष्यमाणमि भाषयेत् संयतं व्रतम्॥")

भाषा, स्त्री, (भाष्यते ग्राम्यव्यवहारादिना प्रयुज्यते इति। भाष्+"सुरोच इकः।" ३।३। १०२। इत्यत्यय:। टाप्।) राज्ञीवीशिष:। इति हलायुध:। वाक्यम्। वाग्देवता। तत्पर्य्यायः। ब्राह्मी २ भारती ३ गी: ४ वाक् ५ वाणी ६ सरस्वती ७ व्याहार: ८ उक्ति: ९ लपितम् १० भाषितम् ११ वचनम् १२ वच:

१३। इत्यमरः।२।६।१॥ त्रयोदशं वचने। पूर्ब्बसप्तकं वाग्विधिस्तायां देवतायाञ्च। इति तट्टीकायां भरतः॥ शाक्षीयाद्दशभाषा यथा। संस्कृतम् १ प्राकृता २ उदीची ३ मद्धाराट्टी ४ मागधी ५ मिश्रार्द्धमागधी ६ शकाभीरी ७ अवन्ती ८ द्राविड़ी ९ ओड्रीया १० पाञ्चाला ११ प्राच्या १२ वाह्लीका १३ दक्षिणात्या १४ शाबरी १५ पैशाची १६ चावन्ती १७ गौरसेनी १८। एतासां लक्षणोदाहरणानि प्राकृतलङ्केश्वर-व्याकरणे द्रष्टव्यानि॥

अथ भाषाविभागः।

"पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्।
गौरसेनी प्रयोक्तव्या ताद्दशीनाञ्च योषिताम्॥
आसामेव तु गाथासु मद्धाराट्टीं प्रयोजयेत्।
अजोक्ता मागधी भाषा राजान्तःपुरचारिणाम्॥
चेटानां राजपुत्राणां श्रेष्ठिनाञ्चार्द्धमागधी।
प्राच्या विदूषकादीनां धूर्त्तानां स्यादवन्तिका॥
योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम्।
शकाराणां शकादीनां शाकारीं संप्रयोजयेत्॥
वाह्लीकभाषा दिव्यानां द्राविड़ी द्रविड़ादिषु।
आभीरेषु तथाभीरी चाण्डाली पुक्कसादिषु॥
आभीरी शाबरी चापि काष्ठपत्रोपजीविषु।
तथेवाङ्गारकारादौ पैशाची स्यात् पिशाचवाक्।
चेटीनामप्यनीचानामपि स्यात् गौरसेनिका॥
बालानां वक्त्रकालाच्च नीचयद्यविचारिणाम्।
उन्मत्तानामातुराणां सैव स्यात् संस्कृतं क्वचित्॥
ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपकृतस्य च।
भिक्षुवस्त्रधरादीनां प्राकृतं संप्रयोजयेत्॥
संस्कृतं संप्रयोक्तव्यं लिङ्गिनीषूत्तमासु च।
देवीमल्लिसुतावेश्याप्यपि कैश्चित्तथोदितम्॥
यद्देशो नीचपात्रस्तु तद्देशे तस्य भाषितम्।
कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः॥
योषित्सखीबालवेश्याकितवाक्षरसां तथा।
डेदश्चार्थे प्रदातव्यं संस्कृतच्छायरान्तरा॥
एवासुदाहरणान्याकारेषु बोद्धव्यानि। भाषालक्षणानि भावार्थवं। इति साहित्यदर्पणे ६ परिच्छेदः॥

अथ भाषापादः।

तत्र भाषास्वरूपमाहतुः कात्यायनदण्डिनौ।
"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥
स्वाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः॥
वदा सैवंविधः पक्षः कथितः पूर्ब्बवादिना।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम्॥
प्रतिज्ञा साध्याभिधायिका वाक्। तस्या दोषैः परस्परविरुद्धार्थपदादिभिरयुक्तं साध्यं साधनाङ्गाभिमतं पक्षं विदुः। अन्यथा प्रतिज्ञादोषेण साध्यदोषः स्यात्। अतएवोक्तम्।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता।
असङ्कीर्णेन वक्तव्ये व्यवहारेषु वादिभिः॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्ब्बोक्ते। नारदेनापि।
"वाक्यन्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
तद्वानौ दीयते वादी तर्कस्तामुत्तरो भवेत्॥"
उत्तरो विजयी। यद्यप्यन्यच्च साध्यं तद्विशिष्टधर्म्माधर्म्मी पक्ष इति भेदः तथाप्यत्र वाक्प्रतार्य्यत्वाद्विधर्म्मविशेषविशिष्टतया धर्म्मिबोधधर्म्मपदैरेव साध्यत्वात् साध्यपक्षयोरभेदाभिधानम्। उपसंहारे च एवंविधः पक्ष इति। मिताक्षरायान्तु। भाषा प्रतिज्ञा पक्ष इति नार्थान्तरमित्युक्तम्। भाषार्थस्तूक्ता भाषास्वरूपप्रपञ्चमाह। स्वाक्षर इति। निराकुलः पौर्व्वापर्य्यविपर्य्यासादिशून्यः। तच्च।
"द्यूते च व्यवहारे च प्रश्ने यज्ञकर्म्मणि।
यानि पश्यन्त्युदासीनाः कर्त्ता तानि न पश्यति॥"
इति यज्ञसंग्रहवचनादुदासीनेभ्यो ज्ञाता बोधयेत्॥ *॥ तच्छोधनमाह दक्षस्मृतिः।
"न्यूनाधिकं पूर्ब्बपक्षं तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
तल्लिखनप्रकारमाह व्यासः।
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत्।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत्"
फलकं काष्ठादिपट्टकम्। कात्यायनः।
"पूर्ब्बपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत्।
पाण्डुलेखेन फलके ततः पत्रेऽभिलेखयेत्॥
शोधयेत् पूर्ब्बपक्षन्तु यावन्नोत्तरदर्शनम्।
उत्तरेणावरुद्धस्य लिखितं शोधनं भवेत्॥
अन्यदुक्तं लिखेद्दोषोऽन्यदर्थेप्यर्थिनां यदि।
चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः॥"
स्वभावोक्तमक्लृत्रिमम्। एतच्च खरविशेषादिना लक्षयेत्। अतएव याज्ञवल्क्यः।
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।
भूतमप्यनृतं हीयते व्यवहारतः॥"
भूतं तत्त्वार्थसम्मतम्। नारदः।
"भूतं तत्त्वार्थसम्मतं प्रमादाभिहितं छलम्।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता॥
मनुष्यचित्तवैचित्र्यात् परीक्षा साध्वसाधु वा।
सर्व्वेष्वर्थविवादेषु वाक्छलेनावसीदति॥
पशुस्त्रीभूम्यृणादाने ज्ञाप्योऽप्यर्थान्न हीयते॥"
सर्व्वेष्वर्थविवादेषु प्रमादाभिधानेऽपि नावसीदति। अत्रोदाहरणं पशुस्त्रीत्यादि। अर्थविवादस्यहरणान्युक्तविवादेषु प्रमादाभिधाने प्रकृतार्थादप्यर्थाद्धीयत इति गम्यते। यथाहमनेन शिरसि प्रादेन ताडितः इत्यभिधाय केवलं हस्तेन ताडितः इति वदन्न केवलं दण्ड्यः पराजीयते च। ततश्च त्वं मद्धस्तं धारयसि मत्त ऋणलेन गृहीततावद्धनकलादिति भाषाशरीरम्। एतच्च संस्कृतदेशभाषान्यतरेण यथाबोधं वक्तव्यं लेख्यं वा। मूर्खाणामपि वादिप्रतिवादितादर्शनात्। अतएवाध्यापनेऽपि तथोक्तं विष्णुधर्म्मोत्तरे।

"संस्कृतैः प्राकृतैर्वाक्यैः शिष्यमनुरूपतः।
देशभाषानुपायेन बोधयेत् स गुरुः स्मृतः॥"
इति व्यवहारतत्त्वम्॥

भाषापरिच्छेदः, पुं, विश्वनाथन्यायपञ्चाननकृतन्यायपरिभाषाग्रन्थः। अस्य अयमाद्यश्लोकः।
"नूतनजलधरवपुषे गोपवधूटीदुकूलचौराय।
तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय॥"
तस्यायमन्त्यश्लोकः।
"सोऽयं क इति बुद्धिस्तु यावन्नात्मवलम्बते।
तदेवौषधमित्यादौ सञ्जातौघेऽपि दर्शनात्॥"
अस्य टीका सिद्धान्तसुक्तावली॥

भाषापादः, पुं, (भाषायाः पादः।) चतुष्पद्यवहारान्तर्गतग्रथभपादः। तस्य लक्षणं यथा,—
"अर्थवद्धर्म्मसंयुक्तं परिपूर्णमनाकुलम्।
साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च॥
प्रसिद्धमविरुद्धञ्च निश्चितं साधनक्षमम्।
संक्षिप्तं निखिलार्थञ्च देशकालाविरोधि च॥
वर्षर्त्तुमासपक्षाहोवेलादेशप्रदेशवत्।
स्थानावसरसाध्यास्पजात्याकारवयोयुतम्॥
साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनाम च।
परात्मपूर्ब्बजानेकराजनामभिरङ्कितम्॥
क्षमालिङ्गात्मपौड़ावत्कथिताहर्हृदायकम्।
यदावेदयते राज्ञे तद्भाषेत्यभिधीयते॥"
इति मिताक्षरायां व्यवहाराध्यायः॥
अस्य विवरणं भाषाग्रन्थे द्रष्टव्यम्॥

भाषितं, क्ली, (भाष्यते इति। भाष्+भावे क्तः।) वचनम्। इत्यमरः।१।६।२॥(यथा, मनौ।८।२३।
"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥"
भाष्यते स्मेति। भाष्+कर्म्मणि क्तः।) कथिते त्रि॥ (यथा, कामन्दकीये नीतिसारे।५।२४।
"प्रविश्य साधुरागस्य चित्तं चित्तज्ञसम्मतः।
समर्थयंश्च तत्पक्षं साधु भाषेत भाषितः॥")

भाष्यं, क्ली, (भाष्यते विस्ततया वर्ण्यते इति। भाष्+ण्यत्।) चूर्णिः। इति स्वामी॥ क्षुद्रविवरणग्रन्थः। तस्य लक्षणम्।
"क्षुद्रार्थो वर्ण्यते यत्र पदैः क्षुद्राक्षरादिभिः।
पदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥"
इति लिङ्गादिसंग्रहटीकायां भरतः॥ क्षुद्रोत्तार्थप्रपञ्चनम्। इति हैमचन्द्रः॥ (भाष्यते अनेति। ण्यत्।) एकविंशेः। इति माधवीति मधुरेशः॥ (भाष्+ण्यत्।) कथनीये त्रि।

भाष्यकारः, पुं, (भाष्यं चूर्णिं करोतीति। कृ+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) महाभाष्यकर्त्ता मुनिः। तत्पर्य्यायः। गोनर्दीयः २ पतञ्जलिः ३ चूर्णिकृत् ४। इति त्रिकाण्डशेषः॥
"अहिश्च भाष्यकारश्च कृष्णागौर्यधियावुभौ।
नैव ग्रन्थाम्बुधेः पारं किमन्ये जड़बुद्धयः॥"
इति दुर्गसिंहः॥

भास ऋ ङ भासि। दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ

अशोभत अबभासत्। ङ भासते। इति दुर्गादासः॥

भास्, स्त्री, (भासते इति। भास+"भाजभास-धिषिधुतोर्णिदृकृगृवस्तुः क्विप्।" ३।२।१७७। इति क्विप्।) प्रभा। अस्य शब्दस्य प्रथमान्त-रूपं भाः। इत्यमरः। १। ४। ३४॥ मयूखः। इति मेदिनी। से, ७॥ इच्छा। इति धरणिः॥

भासः, पुं, (भासते इति। भास+भावे घञ्।) दीप्तिः। (यथा, महाभारते। ८। ५८। ३९।

"चन्द्रनक्षत्रभासेव वदनेषाबकुण्डले:।")

(भासन्ते गावोऽत्र। भास+आधारे घञ्।) गोष्ठम्। (भासते दीप्यते इति। भास्+कर्त्तरि अच्।) कुक्कुटः। शुभः। इति विश्वः। खनाम-ख्यातपक्षिविशेषः। तत्पर्य्यायः। ध्वाङ्क्षः २। इति हेमचन्द्रः॥ (यथा, महाभारते। १। १३४। ७०।

"क्षत्रियं भासमारोप्य दृष्ट्वार्थे ग्रिध्विभिः सतम्।
अभिज्ञातं कुमाराणां लक्ष्यभूतमुपादिशत्॥"

पर्व्वतभेदः। यथा, महाभारते। १३।१३।४॥

"हिमवान् पारियात्रश्च सह्यो विन्ध्यस्त्रिकूट-वान्।
ऋक्षो गोलश्च भासश्च कोष्ठवांश्चैव पर्व्वतः॥")

(स्त्रियां ङीप्। प्राधायाः कन्या। यथा, महा-भारते। १। ६५। ३६।

"अनवद्यां मनुं वंश्यामसुरां मार्गणप्रियाम्।
अनूपां सुभगां भासीमिति प्राधा व्यजायत॥")

भास्, [स्,] स्त्री, (भासु+आसस्।) दीप्तिः। इति द्विरूपकोषः॥

भास्वान्, पुं, (भासते इति। भास्+इगुपधज्ञा-दिभासीति।" उणा० ३।१२८। इति क्वन्।) सूर्य्यः। चन्द्रः। इक्षुवादिकोषः॥ भासपक्षी॥ इति मेदिनी। ते, १३६॥ नक्षत्रम्। इति हेमचन्द्रः॥

भास्वान्, त्रि, (भासते इति। भास+क्वन्।) सुन्दराकारः। इति मेदिनी। ते, १३६॥

भास्वती, स्त्री, (भास्वत्। गौरादित्वात् ङीष्।) नक्षत्रम्। इक्षुवादिकोषः॥

भास्वः, पुं, (भास्+बाहुलकादुन्।) सूर्य्यः। इति त्रिकाण्डशेषः॥

भास्वरं, क्ली, (भासते इति। भास्+"भञ्जभास-मिदो घुरच्।" ३। २। १४१। इति घुरच्।) कुठौषधम्। इति जटाधरः॥

भास्वरः, पुं, (भास+घुरच्।) स्फटिकः। इति त्रिकाण्डशेषः॥ वीरः। इति धरणिः। कर्त्तरि घुरप्रत्ययनिष्पन्नत्वेन दीप्तियुक्ते, त्रि॥ (यथा, किरातार्জ্জुनीये। ५। ५।

"मञ्जिमयूखचयांशुकभासुराः
सुरवधूपरिभुक्तजलाशयाः॥")

भास्वरपुष्पा, स्त्री, (भास्वराणि पुष्पाण्यस्याः। टाप्।) हरिकाली। इति राजनिर्घण्टः॥

भास्करं, क्ली, (भाः करोतीति। भास्+कृ+"दिवा-विभानिशाप्रभा भास्करान्नानन्तादीति।" ३।२। २१। इति टः।) सुवर्णम्। इति राजनिर्घण्टः॥

भास्करः, पुं, (भाः करोतीति। भास्+कृ+"दिवा-विभेति। ३। २। २१। इति टः।) सूर्य्यः। (यथा, मनौ। २। ४८।

"प्रतिगृह्येप्सितं दर्भसुपस्थाय च भास्करम्।
प्रदक्षिणं परीत्याग्निं चरेदभ्यर्च्य यथाविधि॥")

अग्निः। इति मेदिनी। रे, १६१॥ वीरः। इति धरणिः॥ अर्कवृक्षः। इति राजनिर्घण्टः॥ भास्कराचार्य्यः। स च सिद्धान्तशिरोमण्यादि-ज्योतिर्ग्रन्थकर्त्ता॥

भास्करप्रियः, पुं, (भास्करस्य प्रियः।) पद्मराग-मणिः। इति केचित्। चुन्नि इति भाषा॥

भास्करेष्टा, स्त्री, (भास्करस्य इष्टा।) आदित्य-भक्ता। इति राजनिर्घण्टः॥

भास्वरं, क्ली, (भासते इति। भास्+"स्फेग्र भासपिसकसो वरच्। ३। २। १७५। इति वरच्।) कुठौषधम्। इति शब्दचन्द्रिका॥

भास्करः, पुं, (भासते इति। भास्+"स्फेग्र भासपिसकसो वरच्।३।२।१७५। इति वरच्।) दिनम्। इति राजनिर्घण्टः॥ सूर्य्यः। इति केचित्। दीप्तियुक्ते, त्रि। इति सुग्धबोध-व्याकरणम्॥ (यथा, महाभारते।१।११।१२।

"स दोषुभं परित्यज्य रूपं विप्रर्षभस्तदा।
स्वं रूपं भास्करं भूयः प्रतिपेदे महाद्युतिः॥"

सूर्य्यस्यानुचरविशेषः। स च भगवता सूर्य्येण तारकासुरवधसाहाय्यार्थं स्कन्दाय दत्तः। यथा, महाभारते। ९। ४५। ३०।

"सुभ्राणो भास्करश्चैव यौ तौ सूर्य्यानुयायिनौ।
तौ सूर्य्यः कार्त्तिकेयाय ददौ प्रीतः प्रतापवान्॥")

भास्वान्, [त्] पुं, (भासः सन्त्यस्येति। भास्+"तदस्यास्त्यस्मिन्निति मतुप्।" ५।२।९४। इति मतुप्। मस्य वः।) सूर्य्यः। (यथा, मार्क-ण्डेयपुराणे। १०१। १६।

"यथा चाराधितो देवा सोऽदित्या कश्यपेन च।
चाराधितेन चोक्तं यत् तेन देवेन भास्वता॥")

अर्कवृक्षः। इत्यमरः॥ दीप्तिः। इति हेमचन्द्रः॥ वीरः। इति मेदिनी॥ दीप्तिविशिष्टे, त्रि॥ (यथा, कुमारसम्भवे। १। २।

"यं सर्व्वलोकः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च
पृथूपदिष्टां दुदुहुर्धरित्रीम्॥"

प्रकाशकः। यथा, मनौ। १। ७०।

"वायोरपि विकुर्व्वाणादीरोचिष्णु तमोनुदम्।
ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणसुच्यते॥"

"भास्वत् प्रकाशकम्।" इति तट्टीकायां कुल्लूक-भट्टः॥)

भिक्ष, ङ लाभार्थशब्दोक्तिक्षिप्रि। इति कवि-कल्पद्रुमः॥ (भ्वा०-आत्म०-याचने द्विक०-लाभे लोभोक्तौ च सक०-क्षिप्रि अक०-सेट्।) अर्थी याचनम्। लोभादुक्तिर्लोभोक्तिः। ङ, भिक्षते भूमिं कृपातुः पण्डितः। लभत इत्यर्थः। भिक्षते दातारं धनं भिक्षुः। याचत इत्यर्थः। भिक्षते

दातारं दीनः। लोभादद्दतीत्यर्थः। भिक्षते जनः। क्षिप्यतीत्यर्थः। इति दुर्गादासः॥

भिक्षा, स्त्री, (भिक्ष याचनादौ+"गुरोश्च हलः।" ३। ३। १०२। इति अः। ततष्टाप्।) लोभ-याचनम्। याच्ञेति भाषा इति च भाषा। तत्पर्य्यायः। याच्ञा २ अर्थना ३ अर्हणा ४। इत्यमरः। ३। २। ४॥ प्रार्थनम् ५ याचना ६। इति शब्दरत्नावली। (तदुक्तम्।

"वाग्मित्वे वसते लक्ष्मीस्तद्वर्द्धे क्षत्रियकर्म्मणि।
तद्वर्द्धे राजसेवायां भिक्षायां नैव नैव च॥")

सेवा। श्रुतिः। इति नानार्थे अमरः॥ भिक्षितवस्तु। इति मेदिनी॥ (सा च यावत्-प्रमाणा। यावन्माना भवेद्विप्रेति ज्ञातातप-वचनात्॥ यथा, मनुः। ३। ६७।

"क्षत्रियेतद्विधिकर्म्मैवमतिथिं पूर्व्वमाशयेत्।
भिक्षाञ्च भिक्षवे दद्याद्विधिवद् ब्रह्मचारिणे॥")

उपनीतस्य भिक्षाविधिर्यथा,—

"भिक्षामाहृत्य गुरवे तस्मै प्रयतो निवेदयेत्।
भवत्पूर्व्वञ्चरेद्भैक्षमुपनीतो द्विजोत्तमः।
भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम्॥
मातरं वा स्वसारं वा मातुर्व्वा भगिनीं निजाम्।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत्॥
सजातीयगृहेष्वेव सार्व्ववर्णिकमेव वा।
भैक्षमाचरणं प्रोक्तं पतितादिविवर्जितम्॥
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु।
ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्॥
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्जयेत्॥
सर्व्वत्रैव चरेद्भैक्षं पूर्व्वोक्तानामसम्भवे।
नियम्य प्रयतो वाचं दिग्दक्षिणमवलोकयन्॥
समाहृत्य तु तद्भैक्षं यावदर्थममायया।
शुक्लीकृत्य प्रयतो नित्यं वाग्यतोऽन्नमाशयेत्॥
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती।
भैक्षेण व्रतिनो हविष्यवासमा स्मृता॥"

इति कूर्म्मपुराणे उपविभागे १२ अध्यायः॥

सायं प्रातर्भिक्षाटनाभावो यथा,—

"कारयित्वा तु कर्म्माणि कारुमन्यान्न वर्त्तयेत्।
सायं प्रातर्गृहद्वारान् भिक्षार्थं नावचारयेत्॥"

इति तत्रैव १५ अध्यायः॥

सा त्रिविधा यथा,—

"हन्तकारमथाप्यं वा भिक्षां वा प्रकृतितो द्विजः।
दद्यादतिथये नित्यं तद्धेतं परमेश्वरम्॥
भिक्षामाहुर्यावमात्रमयन्तस्याचतुर्गुणम्।
पुष्कलं हन्तकारान्तं तच्चतुर्गुणमुच्यते॥
गोदोहमात्रं कालं वै प्रतीक्षेदतिथिः स्वयम्।
अभ्यागतान् यथाशक्ति पूजयेदतिथिं यथा॥
भिक्षां वै भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे।
दद्यादन्नं यथाशक्ति लक्षिभ्यो लोभवर्जितः॥
सर्व्वेषामप्यलाभे तु अन्नं गोभ्यो निवेदयेत्॥"

इति तत्रैव १७ अध्यायः॥

भिक्षाकः, पुं, (भिक्षते इति। भिक्ष+"नन्द्यग्रहिभिक्षकुट्टकुण्टपटः वाकन्।"३।२।१५५। इति वाकन्।) भिक्षुकः। इति सिद्धान्तकौमुदी॥

भिक्षाकी, स्त्री, (भिक्षाक+स्त्रियां ङीष्।) भिक्षुकी। इति सुग्धबोधव्याकरणम्॥

भिक्षाचरः, पुं.स्त्री, (भिक्षां चरतीति। भिक्षा+चर+"भिक्षासेनादायेषु च।" ३।२।१७। इति टः।) भिक्षुकः। इति सिद्धान्तकौमुदी॥ (स्वनामख्यातो भोजनरपतेः पुत्रः। यथा, राजतरङ्गिण्याम्। ८। १७।

"राज्ञां विभवमत्यं यं भोजो हर्षेणपालजः।
जातं श्रुतद्विजपुत्रानन्तरं गुरुभिः शिशुम्।
आयुष्कामेक्षमाणाभ्यभिक्षाचरशिशुम्॥")

भिक्षाटनं, क्ली, (भिक्षार्थमटनं गमनम्।) भिक्षार्थंगमनम्। यथा,—

"अर्द्धं दानववैरिणा गिरिजयाप्यर्द्धं हरस्याहृतं
दैवेत्थं जगतीतले वरहराभावः सदा श्रूयते।
गङ्गा वारिधिमम्बरं शशिकला नागाधिपः
क्ष्मातलं
सर्व्वंसत्त्वमधीश्वरत्वमगमत् त्वां मात्र भिक्षाटनम्॥"

इत्युद्भटः॥

भिक्षाग्निलं, क्ली, (भिक्षाग्निनो भिक्षुकस्य भावः। भिक्षाग्नि+ल।) पैशुन्यम्। इति हारावली॥

भिक्षाशी, [न्] त्रि, (भिक्षां अत्तीति। अद्य+णिनिः।) भिक्षुकः। इत्युणादिकोषः॥ यथा,—

"भिक्षाशी विचरेदयामं वन्ध्येर्दिं न जीवति॥"

इति प्रायश्चित्तविवेकः॥

भिक्षुः, पुं, (भिक्षयत्यसौ। भिक्ष याचने+"सनाशंसभिक्ष उः।" ३।२।१६८। इति उः।) ब्रह्मचार्य्यगार्हस्थ्यवानप्रस्थ्यान्तर्गतचतुर्थाश्रमी। आश्रमशब्दोऽयं धर्म्मेपरो धर्म्मेपरश्च। इति भरतः। तत्पर्य्यायः। परिव्राट् २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५ इत्यमरः।२।७।४२॥ परिव्राजकः ६ पराशरी ७ व्रजकः ८। इति शब्दरत्नावली। तस्य धर्म्मो यथा,—

"भिक्षोर्धर्म्मं प्रवक्ष्यामि तन्निबोधत सत्तमाः।
यथादृष्टेन विधिना सर्व्ववेदसदक्षिणाम्॥
आत्मन्यग्नीन् समारोप्य ब्राह्मणो गृहमुत्सृजेत्।
सर्व्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः॥
सर्व्वारम्भं परित्यज्य भिक्षार्थी ग्राममाश्रयेत्।
अप्रमत्तश्चरेद्भैक्षं सायाह्ने नातिलम्बितः॥
रहिते भिक्षुकैर्ग्रामे याचामात्रमलोलुपः।
भवेत् परमहंसो वा एकदण्डो यमादिवत्॥
सिद्धयोगस्य जपन् देहमन्ततस्त्रिदिवाप्नुयात्।
योगमभ्यस्य मितभुक् परां सिद्धिमवाप्नुयात्॥
दाताऽतिथिप्रियो ज्ञानी गृही स्वर्गेऽपि सुच्यते।"

इति गारुडे १०३ अध्यायः॥ *॥

अपि च।

"चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः।
तस्य स्वरूपं गदतो मम श्रोतुं कृपार्हसि॥
पुत्रदयकलत्रेषु त्यक्तस्नेहो नराधिप!।
चतुर्थमाश्रमस्थानं गच्छेन्निर्द्वन्द्वमत्सरः॥
त्रैवर्गिकांस्त्यजेत् सर्व्वानारम्भानवनीपते!।
भिक्षादिषु समो मैत्रः समस्तेष्वेव जन्तुषु॥
जरायुजाण्डजादीनां वाङ्मनःकर्म्मभिः क्वचित्।
युक्तः कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्जयेत्॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे।
तथा तिष्ठेदृयथा प्रीतिर्द्वेषो वा नास्य जायते॥
प्राणयात्रानिमित्तञ्च यङ्गारे सुक्तवज्जने।
काले प्रशस्तवर्णानां भिक्षार्थं पर्य्यटेद् गृहान्॥
कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये।
सांस्तु दोषान् परित्यज्य परिव्राड्भिर्ममो भवेत्॥
अभयं सर्व्वसत्त्वेभ्यो दत्त्वा यश्चरते मुनिः।
न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित्॥
ज्ञात्वाग्निहोत्रं स्वशरीरसंस्थं
शरीरमग्नौ च सुखे जुहोति।
विप्रस्तु भैक्षोपगतेर्हविर्भि-
श्चितामिना स व्रजति स्म लोकान्॥
मोक्षाश्रमं यश्चरते यथोक्तं
मुनिः सुसङ्क्षिप्तबुद्धियुक्तिः।
अनिन्दनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं व्रजति द्विजातिः॥"

इति विष्णुपुराणे ३ अंशे ६ अध्यायः॥*॥

बुद्धभेदः। इति जटाधरः॥ आवजीचुपः। इति राजनिर्घण्टः॥ कोकिलाद्यः। इति भावप्रकाशः॥

भिक्षुकः, पुं, स्त्री, (भिक्षुरेव। भिक्षु+स्वार्थे कन्। यद्वा, भिक्षते इति। भिक्ष+उक।) भिक्षोपजीवी। तत्पर्य्यायः। मार्गणः २ याचकः ३ वनीयकः ४ याचकः ५। इति जटाधरः। अर्थी ६। इत्यमरः। (यथा, मनुः। ३। २४३।

"ब्राह्मणं भिक्षुकं वापि भोजनार्थंसुपस्थितम्।
ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत्॥"

पारिभाषिकभिक्षुका यथा, अत्रिः।

"ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः।
अध्वगः क्षीणवृत्तिश्च षड्ते भिक्षुकाः स्मृताः॥")

भिक्षुसंघाटी, स्त्री, (भिक्षु सघटते इति। भिक्षु+सम्+घट+अच्। गौरादित्वात् ङीष्।) चीवरम्। इति हेमचन्द्रः॥ यथा, सुश्रुते उत्तरतन्त्रे ३३ अध्याये।

"पुरीषं कौक्कुटं क्लेदांश्चर्म्मसर्पत्वचस्तथा।
जीर्णांश्च भिक्षुसंघाटीं धूपनायोपकल्पयेत्॥")

भिक्षः, पुं, (भक्ष्यते इति। भक्ष्+क्षः। एषोदरादित्वात् साधुः।) भिक्षाक्षुपः। इति राजनिर्घण्टः॥

भिक्षकः, (भिक्ष। स्वार्थे कन्।) भिक्षाक्षुपः। इति राजनिर्घण्टः॥

भिक्षा, स्त्री, (भिक्ष+अजादित्वात् टाप्।) क्षुपविशेषः। भिक्षी इति ख्याता। तत्पर्य्यायः। भिक्षीतक २ भिक्षः ३ भिक्षकः ४ क्षेत्रसम्भवः ५ चतुष्पदः ६ चतुःपुष्पः ७ सुश्राकः ८ अक्षपत्रकः ९ करपर्णः १० तत्तबीजः ११। अस्या गुणाः। अम्लरसत्वम्। उष्णत्वम्। ग्राहित्वम्। रुचिकरत्वञ्च। इति राजनिर्घण्टः॥

भिक्षीतकः, पुं, (भिक्षी सती तकति हसतीति। तक्+अच्।) भिक्षाक्षुपः। इति राजनिर्घण्टः॥

भित्तं, क्ली, (भिद्यते स्मेति। भिद्+क्तः। "भित्तं शकलम्।" ८। २। ५६। इति निपातकारस्य नत्वाभावो निपात्यते।) खण्डम्। इत्यमरः। १। ३। १६॥

भित्तिः, स्त्री, (भिद्यते इति। भिद्+क्तिन्।) शब्दादेर्मृदिष्टकादिमयी इतिः। काँच इति भित इति च ख्याता। तत्पर्य्यायः। कुड्यम् २। इत्यमरः। २। २। ४॥ भित्तिका ३ कुड्यम् ४ कुड्यकम् ५। इति शब्दरत्नावली॥ (यथा, विश्वकर्म्मप्रकाशे। पञ्चमाध्याये।

"मानेनानेन विस्तारो भित्तीनान्तु विधीयते।
पादे पञ्चगुणं कृत्वा भित्तीनासुच्छ्रयो भवेत्॥")

प्रभेदः। सन्धिभागः। अवकाशः। इति विश्वः। प्रदेशः। इति शब्दरत्नावली॥ (यथा, रघौ। ५। ४३।

"अथोपरिष्टाद् भ्रमरैर्भमद्भिः
प्राक् सूचितान्तःसलिलप्रवेशः।
निर्धौतदानामलगण्डभित्तिः
वन्यः सरित्तो गज उन्ममज्ज॥")

भित्तिका, स्त्री, (भिद्यते भिनत्ति वेति। भिदिर विदारणे+"सृतिभिदिजतिभ्यः क्तिन्।" उणा० २। १४०। इति तिकन्। क्तिन् स्वार्थे।) कुड्यम्। इति शब्दरत्नावली॥ पक्षी। इति हेमचन्द्रः॥

भित्तिचौरः, पुं, (चौरयतीति। चुर+अच्। चौर एव स्वार्थे अण्। चौरः। भित्त्या कुड्यादिभेदेन चौरः।) चौरविशेषः। सिँदेल चोर इति भाषा। तत्पर्य्यायः। खानिनः २ कूपखिनः ३। इति शब्दरत्नावली॥

भित्तिपातनः, पुं, (पातयतीति। पत+णिच्। कर्म्मणि स्त्री। भित्तीनां पातनः।) मद्गाम्लवकः। इति राजनिर्घण्टः॥

भित्, [द्] स्त्री, (भिद्यते इति। भिद्+"सृदिरुदिपदिदुहदुहयुजविदभिदेति।" ३। २। ६१। इति क्विप्।) प्रभेदः। इति जटाधरः॥ (भिनत्तीति। भिद्+तच्छीलादिषु "अन्येषोऽपि दृश्यते।" इति क्विप्।) भेदकर्त्तरि त्रि॥ (यथा, ऋग्वेदे। ७। १०४। ८।

"भिनत्पुरो न भिदो अदेवीर्न नमो वधरदेवस्य पीयोः॥")

भिद इर् ओ न ध मिदि। इति कविकल्पद्रुमः॥ (रुधा०-उभ०-सक०-अनिट्।) भित् क्रियद्वयविदारणम्। न ध भिनत्ति भिन्ते कूलं नदी। ओ भेत्ता। इर् अभिदत् अभैत्सीत्। इति दुर्गादासः॥

भिन्दकं, क्ली, (भिनत्तीति । भिद्+"बहुलमन्यत्रापि ।" उणा० २।३७। इति कुन् ।) वज्रम् । खड्गे, पुं । इत्युणादिकोषः ॥

भिन्दा, स्त्री, (भेदनमिति भिद्+"विदृभिदादिभ्योऽङ् ।" ३।३ ।१०४। इति । अङ् । टाप् ।) वल्लादेर्विदारणम् । चेरा इति भाषा । तत्पर्य्यायः । विदरः २ स्फुटनम् ३ । इत्यमरः । ३।२।५॥ धन्याकम् । इति शब्दचन्द्रिका ॥ भेदः । यथा । प्रायश्चित्तस्य पूर्व्वाहृतत्वं वाल्लभिदा तथा । इति प्रायश्चिततत्त्वम् ॥

भिदिः, पुं, (भिनत्तीति । भिद्+"कृगृदृपृकुटिभिदिच्छिदिभ्यश्च ।" उणा०४। १४२ । इति इः । स च कित् ।) वज्रम् । इति हिरूपकोषः ॥

भिदिरं, क्ली, (भिनत्ति विदारयतीति । भिद्+"इषिमदिसुदिखिदिच्छिदिभिदिमन्दीति ।" उणा० १ । ५२ । इति किरच् ।) वज्रम् । इत्यमरटीकायां भरतः चिकाकश्चेषः ॥

भिदुः, पुं, (भिनत्ति विदारयतीति । भिद्+"पृभिदिव्यधिषधिछविब्भ्यः ।" उणा० १ । २४ । इति कुः ।) वज्रम् । इति चिकाकश्चेषः ॥

भिदुरं, क्ली, (भिनत्तीति । भिद्+"विदिभिदिच्छिदेः कुरच् ।"१। २ ।१६२। इति । कुरच् ।) वज्रम् । इत्यमरः । २ । १ । ५० ॥ [च] पुं । इति राजनिर्घण्टः ॥

भिद्यः, पुं, (भिनत्ति कूलमिति । भिद्+"भिद्योद्यौ नदे ।"३ । १ । ११५ । इति क्यप् । निपातितश्च ।) नदः । इति हेमचन्द्रः ॥ सुश्रुतोक्तौषधाकरश्च ॥ (यथा, भट्टौ । ६ । ५६ ।
"सप्तत्तरन्तावथ्यौ नदान् भिद्योद्वासन्निभान् ।
सिध्यतारामिव ख्यातां ग्रवरीमापतुर्वने ॥")

भिन्नः, पुं, क्ली, (भिनत्तीति । भिद् "स्फायितञ्चिवञ्चिप्रक्रिवञ्चिवृश्चिभ्रस्जिदृम्भिपिलपीति ।" उणा० ३ । १३ । इति रक् ।) वज्रम् । इति चिकाकश्चेषः उणादिकोषश्च ॥

भिन्दिपालः, पुं, (भिदि+इन् । भिन्दिं विदारकं पालयतीति पालि+अण् ।) हस्तप्रमाणकाकः । गालिकाकमिति ख्यातम् । इति भरतः ॥ हस्तक्षेप्यसंगुढः । इति स्वामी ॥ तत्पर्य्यायः । खगः २ । इत्यमरः । २ । ८ ।६१॥ (यथा, वैद्यप्रायश्चसंहितायाम् । ३ ।
"भिन्दिपालस्तु वक्राङ्गो नम्रग्रीवो दृढच्छिराः ।
हस्तमात्रोच्छ्रयोपेतः करसम्मितमण्डलः ॥"
भिल्लिवालः भिन्दिवालश्चापि इत्येवं पाठद्वयं दृश्यते ।)

भिन्नः, त्रि, (भिद्यते स्मेति । भिद्+क्तः ।) भेदविशिष्टः । भाङ्गा इति भाषा । तत्पर्य्यायः । दारितः २ । भेदितः ३ । इत्यमरः । ३।१।१००॥ विदारितः ४ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । भविष्यपर्व्वणि । ५३ । १६ ।
"भान्तमुद्भ्रान्तमाविद्धं प्रविद्धं बहुनिःसृतम् ।
आकरं विकरं भिन्नं निर्मर्यादममानुषम् ॥")

सङ्गतः । अन्यः । फुल्लः । इति मेदिनी । ने, १४॥ क्षतरोगविशेषः । तल्लक्षणं यथा,—
"शस्त्रिकुन्तेषु खड्गाग्यविशाखैराशयो हतः ।
यत्किञ्चित् प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते ॥"
आशयः कोष्ठः । तस्यौषधं यथा,—
"छिन्ने भिन्ने तथा विद्धे क्षते वातगतिस्रवेत् ।
रक्तक्षयात्तच्च रजः करोति पवनो भृशम् ॥
स्नेहपानपरीषेकलेपांस्तत्रोपनाहनम् ।
कुर्व्वीत स्नेहबस्तिञ्च मारुतस्यौषधैर्भिषक् ॥
खड्गादिच्छिन्नगात्रस्य ततःकालं पुरीतो व्रणः ।
गाङ्गेरकौम्भलरसैः सद्यः स्यान्नतवेदनः ॥
कषायमधुराः प्रोक्ताः क्रियाः सर्व्वाः प्रयोजयेत् ।
यदो व्रणानां सम्प्राप्तान् पश्चात् पूर्व्वोक्तमाचरेत् ॥
आमाशयस्थे रुधिरे विदध्याद्वमनं नरः ।
तस्मिन् पक्वाशयस्थे तु शोधयीत सविरेचनम् ॥
क्रोधो वंशत्वगेरण्डशरपुङ्खाभिदा क्षतः ।
हिङ्गुसैन्धवसंयुक्तः कोष्णः स्रावयेदसृक् ॥
यवकोलकुलत्थानां निःस्नेहेन रसेन च ।
सुस्नौतान्नं यवागूं वा पिबेत् सैन्धवसंयुताम् ॥
जातीनिम्बपटोलपत्रकटुकादार्व्वीनिशाग्रारिवा
मञ्जिष्ठाभयतिक्ततुत्थमधुकैर्नक्ताह्वबीजैः समैः ।
सर्पिःसिद्धमनेन लक्ष्यवदना मर्म्माश्रिता
सविद्धो गम्भीराः सरुजो व्रणाः सगतिकाः शुध्यन्ति रोहन्ति च ॥
दृढवैद्योपदेशेन पारम्पर्य्योपदेशतः ।
जातोदृष्टे तु संछिन्ने क्षेत्रयं सिक्थकं बुधैः ॥"
जात्यादिदृष्टम् । इति भावप्रकाशः ॥ * ॥
(अथोपाङ्गचिकित्सा ।
"छिन्नं भिन्नं तथा भग्नं क्षतं प्रिच्छितमेवच ॥
दग्धस्तेषां प्रतीकारः प्रोक्तश्चोपाङ्गसंज्ञकः ॥"
इति हारीते प्रथमे स्थाने द्वितीयेऽध्याये ॥)

भिन्नकः, पुं,(भिन्न+संज्ञायां कन् ।) बौद्धः । यथा,
"भिन्नकः क्षपणोऽर्हन्को बौद्धो वैनायिकः स्मृतः ॥"
इति चिकाकश्चेषः ॥
(भिन्न+"अनत्यन्तगतौ क्तात् ।" ५ । ४ । ४ । इति कन् । ईषद् भिन्ने, त्रि ।)

भिन्नगाचिका, स्त्री, (भिन्नं गात्रमस्याः । कप् । टाप् । अत इत्वम् ।) कर्कटी । इति शब्दचन्द्रिका ॥

भिन्नभिन्नात्मा, [न्] पुं, (भिन्नभिन्नो भेदयुक्त आत्मा यस्य ।) चणकः । इति शब्दचन्द्रिका ॥

भिन्नयोजनी, स्त्री, (भिन्नं योजयतीति । युज्+क्विप्+ङिनिः । ङीप् ।) पाषाणभेदकवृक्षः । इति भावप्रकाशः ॥

भिन्नार्थकः, त्रि, (भिन्नोऽर्थो यस्य । कप् ।) अन्यः । इत्यमरः । ३ । १ । ८२ ॥

भिया, स्त्री, (भीयते इति । भी+"विदृभिदादिभ्योऽङ् ।"३। ३ । १०४ । इति अङ् । इयङ् । टाप् ।) भयम् । इति हेमचन्द्रः । २ । ३०१ ॥

भिरिण्टिका, स्त्री, श्वेतगुञ्जा । इति राजनिर्घण्टः ॥

भिल्ल, पुं, (भेलयति भिलत्तीति वा । भिल्+बाहुलकात् । कन् ।) म्लेच्छजातिविशेषः । भील इति भाषा । यथा, हेमचन्द्रे ।
"माला भिल्लाः किरातास्च सर्व्वेऽपि म्लेच्छजातयः ॥"
अपि च ।
"रजकश्चर्म्मकारश्च नटो वरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः ॥"
इति प्रायश्चिततत्त्वम् ॥
स च ब्राह्मणकन्यायां तीवराज्जातः । यथा,—
"पुलिन्दमेदभिल्लाश्च पुल्कसश्च धावकः ।
कुन्दकारो डोखली वा नटपो हस्तिपस्तथा ।
एते वै तीवराज्जाताः कन्यायां ब्राह्मणस्य च ॥"
इति पराशरपद्धतिः ॥

भिल्लगवी, स्त्री, (भिल्लानां गवी ।) गवयी । इति राजनिर्घण्टः ॥

भिल्लतरुः, पुं, (भिल्लप्रियस्तरुः । लोध्रपुष्पेण हि भिल्लादयोऽङ्गभूषणादिकं कुर्व्वन्तीति प्रसिद्धेरस्य तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिल्ली, स्त्री, (भिल्ल+ङीप् । भिल्लानां प्रियत्वादस्यास्तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिष्, रुग्जये । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) भिषक् भेषजं भेषति । इति दुर्गादासः ॥

भिषक्, [ज्] भिषेति रोगी यस्मादिति । भीलि भीत्याम्+"भियः युक् हस्वश्च ।" उणा० १ । १३० । इति अजिः युगागमो ह्रस्वश्च ।) वैद्यः । इत्यमरः । २ । ६ । ५७ ॥ (अस्य प्राशस्त्यादिकं यथा,—
"भिषग्बुभूषुर्मतिमान् व्रतः स्वगुणसम्पदि ।
परं प्रयत्नमातिष्ठेत् प्राणदः स्यादृथा नृणाम् ॥
तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।
स चैव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत् ॥
सम्यक् प्रयोगं सर्व्वेषां सिद्धिराख्यातिकर्म्मणाम् ।
सिद्धिराख्यातिसर्व्वैश्च गुणैर्युक्तं भिषक्तमम् ॥"
इति चरके सूत्रस्थाने प्रथमेऽध्याये ॥
"एतदध्यायमधीत्य च कर्म्माण्यध्यायसुपासितव्यसुभयतो हि भिषग्व्याजार्हो भवति ॥"
यस्तु केवलग्राम्यज्ञः कर्म्मसूपरिनिष्ठितः ।
स सुखव्यातुरम्प्राप्य प्राप्य भीरुरिवाहवम् ॥
यस्तु कर्म्मसु निष्णातो धार्य्याक्षान्यवहिष्कृतः ।
स सतृसु पूजां नाप्नोति वधर्व्याहेति राजतः ॥
उभावेतावनिपुणावसमर्थौ स्वकर्म्मणि ।
अर्हवैद्यधरावेतावेकपक्षाविव द्विजौ ॥
ओषध्योऽभ्युतकल्पास्तु ग्रस्ताग्न्यनिविषोपमाः ।
भवन्त्यज्ञैरुपहृतास्तस्मादेतौ विवर्ज्जयेत् ॥
छेद्यादिष्वनभिज्ञो यः स्नेहादिषु च कर्म्मसु ।
स निहन्ति जनं लोभात् कुवैद्यो नृपदोषतः ॥
यस्तूभयज्ञो मतिमान् स समर्थोऽर्थसाधने ।
आहवे कर्म्मनिर्वोढुं द्विषतः स्वजनो यथा ॥"
इति सुश्रुते सूत्रस्थाने तृतीयेऽध्याये ॥)

दक्षनीयभिषग् यथा,—
"अज्ञातौषधिमज्ञस्तु यश्च वाधेरतत्त्ववित्।
रोगिभ्योऽर्थं समादत्ते स दक्षाच्चौरवद्वधिक्॥"
इति ज्योतिस्तत्त्वम्॥
तस्यान्नस्याभोज्यत्वं यथा,—
"शूद्रान्नं ब्राह्मणो भुक्त्वा तथा रङ्गावतारिणः।
चिकित्सकस्य क्रूरस्य तथा स्त्रीभृतजीविनाम्॥
शौल्किकान्नं स्तुतिकान्नं भुक्त्वा मासं व्रती भवेत्॥"
व्रती यावकेन। तत्र धेनुद्वयम्। इति प्रायश्चित्तविवेकः॥ अपि च।
"पूयचिकित्सकस्यान्नं पुंश्चल्यास्यन्नमिन्द्रियम्।
विष्ठा वार्द्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम्॥"
इति मानवे ४ अध्यायः॥
(घृतधन्वनः क्षत्रजः पुत्रः। यथा, हरिवंशे। १८। ६।
"क्षत्रवर्म्माग्निजस्त्वेषां घृतधन्वा तु मध्यमः।
देवर्क्षत्रावनात् तस्य भिषक्त्वेतरच्च यः॥"
औषधम्। यथा, ऋग्वेदे। १। २४। ६।
"घृतं ते राजन् भिषजः सहस्रसुर्वी
गंभीरा सुमतिष्टे अस्तु॥"
"हे राजन्! वरुण! ते तव घृतं भिषजः सहस्रं व्रणनिवारकाणि घृतसहस्रसंख्याकान्यौषधानि वैद्या वा सन्ति॥" इति तद्भाष्ये सायणः॥)
भिषक्प्रिया, स्त्री, (भिषजः प्रिया।) गुडूची। इति राजनिर्घण्टः॥
(विवृतिरस्या गुडूचीशब्दे ज्ञातव्या॥)
भिषग्जितं, क्ली, (भिषजा जितम्।) औषधम्। इति चिकित्साशेषः॥ (चिकित्सा॥ यथास्य पर्य्यायः।
"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्जितम्॥"
इति वैद्यकरत्नमालायाम्॥)
भिषग्भद्रा, स्त्री, (भिषजि औषधे वैद्ये वा भद्रा शुभदायिका।) भद्रदन्तिका। इति राजनिर्घण्टः॥
भिषङ्मातृ, [ऋ] स्त्री, (भिषजां मातेव।) वासकः। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायः।
"वासको वाजिका वासा भिषङ्मातृ च सिंहिका।
सिंहास्यो वाजिदन्ता स्यादटरूषोऽटरूषकः॥
आटरूषो वृषस्तस्याः सिंहपर्णश्च स स्मृतः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
भिसघटा, स्त्री, (भिसानामन्नं टीकते इति। टीक गतौ+"अन्येभ्योऽपीति डः। ततः पृषोदरादित्वात् साधुः।) दग्धान्नम्। इत्यमरः। २। ६। ४६॥ अस्य रूपान्तरम्। भिसिटा। भिसिटा। भिसिका। इति तट्टीकासारसुन्दरी॥
भिस्सा, स्त्री, (बभस्तीति। भस दीप्तौ+बाहुलकात् सः। कृन्दसि बहुलमितीत्वम्। ब्राह्मण-भिस्सेति भाष्यप्रयोगाल्लोकेऽपि। यद्वा, भेदनमिति भिद्। भिदृ+क्विप्। भिदं स्यतीति। सो+"आतोऽनुपसर्गे कः।" इति कः। पृषोदरादित्वात् साधुः।) अन्नम्। इत्यमरः। २। ६। ४८॥ (अस्याः पर्य्यायो यथा,—
"भक्तमन्नं तथान्नञ्च क्वचित् कूरञ्च कीर्त्तितम्।
ओदनोऽस्त्री स्त्रियां भिस्साद्यौदिवि; पुंसि-
भाषितः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
भिस्सिटा, स्त्री, (भिस्सामन्नं टीकते इति। टीक गतौ+डः। पृषोदरादित्वात् साधुः।) दग्धान्नम्। इत्यमरटीकासारसुन्दरी॥
भी, ग गि भृत्याच्च। इति कविकल्पद्रुमः॥ (क्र्या०-पर०सक०-अनिट्।) ग, भीनाति। गि, भिनाति। भीनः भीनिः। गिनैव क्रादिस्थिद्दौ गयहयं पूरादिविकल्पार्थं चकारात् भीत्याच्च। इति दुर्गादासः॥
भी, नि लि भीत्याम्। इति कविकल्पद्रुमः॥ (ह्वा०-पर०-अक०-अनिट्।) नि, भीतोऽस्ति। लि, विभेति। इति दुर्गादासः॥
भीः, स्त्री, (भी भीत्याम्+सम्पदादित्वात् क्विप्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा, आर्य्यासप्तशत्याम्। ३८०।
"पूर्व्वाधिको ग्रहिष्याम् बहुमानः प्रेमगर्भ-
विश्वासः।
भीरुश्चिकेयं कथयति रागं बालाविभक्तमिव॥")
भीतं, क्ली, (भी लि भीत्याम्+क्तः।) भयम्। भययुक्ते, त्रि। इति मेदिनी। ते, ४०॥ (यथा, मनुः। ७। ६४।
"यस्तु भीतः पराक्रान्तः संग्रामे हन्यते परैः।
भर्त्तुर्यद्दुष्कृतं किञ्चित् तत्सर्व्वं प्रतिपद्यते॥")
भीतिः, स्त्री, (भी+क्तिन्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा, मार्कण्डेये। ८४। १६।
"दुर्गे! स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि॥")
कम्पः। इति विश्वः॥
भीमं, त्रि, (बिभेत्यस्मादिति। भी+"भियः क्रुवा।" उणा० १। १४७। बिभेतेर्मक् धातोर्वा मुगागमश्च। इति मक्।) भयहेतुः। तत्पर्य्यायः। भैरवम् २ दारुणम् ३ भीषणम् ४ भीष्मम् ५ घोरम् ६ भयानकम् ७ भयङ्करम् ८ प्रतिभयम् ९। इत्यमरः। १। ७। २०॥ (यथा, रघुः। १। १६।
"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः॥")
भीमः, पुं, (बिभेत्यस्मादिति। भी+मक्।) भयानकरसः। यथा,—
"भयानको भयस्थायिभावः कालाधिदैवतः।
स्त्री नीचप्रकृतिः श्यामो मतस्तत्त्वविशारदैः॥"
इत्यमरटीकायां भरतः॥
शिवः। (यथा, मार्कण्डेये। ५२। ७।
"भवं सर्व्वं तथेशानं तथा पशुपतिं प्रभुः।
भीमसुग्रं महादेवमुग्रञ्च स पितामहः॥"
विष्णुः। यथा, महाभारते। १३।१४८।५२।
"अतुलः शरभो भीमः समयज्ञो हविर्हरिः॥")
मध्यमपाण्डवः। (यथा, महाभारते। १। १२३। १३।
"तस्माच्चैव महाबाहुर्भीमो भीमपराक्रमः॥"
अस्य विवरणादिकं भीमसेनशब्दे द्रष्टव्यम्॥)
अम्बुवेतसः। इति मेदिनी। मे, २१॥ महादेवस्याष्टमूर्त्यन्तर्गताकाशमूर्त्तिः। यथा। भीमाय आकाशमूर्त्तये नमः। इति तिथ्यादितत्त्वे शिवपूजाप्रयोगः॥ (गन्धर्व्वविशेषः। यथा, महाभारते। १। ६५। ४३।
"भीमश्चित्ररथश्चैव विख्यातः सर्व्वविद्वशी॥"
पुरुवंशीयस्य ईलिनस्य पुत्रः। यथा, तत्रैव। १। ६४। १८।
"ईलिनो जनयामास दुष्मन्तप्रभृतीन् नृपान्।
दुष्मन्तं शूरभीमौ च प्रवसुं वसुमेव च॥")
भीमनादः, पुं, (भीमो भैरवो नादो यस्य।) सिंहः। इति शब्दचन्द्रिका॥ (भीमो नादः शब्दः। इति विग्रहे भयानकशब्दः। यथा, चातकाष्टके। १।
"वातेर्विधूनय विभीषय भीमनादैः
सञ्चूर्णय त्वमथवा करकाभिघातैः।
त्वद्वारिबिन्दुपरिपालितजीवितस्य
नान्या गतिर्भवति वारिद! चातकस्य॥"
भयानकशब्दविशिष्टे, त्रि। यथा, महाभारते। १। १५६। ३१।
"भीमनादं सुतान्त्रोष्ठं तीक्ष्णदंष्ट्रं महा-
रवम्॥")
भीमरथः, पुं, (भीमो भयानको रथोऽस्य।) तामसमनुवंशजातासुरविशेषः। स च कूर्म्मरूपिणा हरिणा हतः। यथा,—
"हरिणा कूर्म्मरूपेण हतो भीमरथोऽसुरः॥"
इति गारुड़े गयामाहात्म्ये ८६ अध्यायः॥
(धृतराष्ट्रस्य पुत्रभेदः। यथा, महाभारते। १। ११७। ९९।
"उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः॥")
भीमरथी, स्त्री, (भीमानामवस्थाविशेषः। यथा,—
"सप्तसप्ततिके वर्षे सप्तमे मासि सप्तमी।
रात्रिर्भीमरथी नाम नराणां दुरतिक्रमा॥"
इति शब्दमाला॥
अपि च।
"सप्तसप्ततिवर्षाणां सप्तमे मासि सप्तमी।
रात्रिर्भीमरथी नाम नराणामतिदुस्तरा।
तामतीत्य नरो योऽसौ दिनानि यानि जीवति॥
क्रतुभिस्तानि तुल्यानि शुचर्गच्छतदक्षिणैः।
गतिः प्रदक्षिणं विष्णोर्जल्पनं मन्त्रभाषणम्।
ध्यानं निद्रा सुधा चान्नं भीमरथ्याः फलश्रुतिः॥"
इति वैद्यकम्॥
नदीभेदः। यथा राजनिर्घण्टे।
"मलापहा भीमरथी च वट्टगा
पथ्या च कृष्णा जलसाम्यगा गुरुः॥"

(इयं हि सप्तपर्वतोद्भवा। यथा, विष्णुपुराणे। २। ३। ११।
"गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा।
सप्तपादोद्भवा नद्यः स्मृताः पापभयापहाः।")

भीमविक्रान्तः, पुं, (भीमश्चासौ विक्रान्तश्चेति।) सिंहः। इति त्रिकाण्डशेषः। भयानकविक्रमविशिष्टे, त्रि।

भीमशासनः, पुं, (भीमं शासनं यस्य।) यमः। इति शब्दरत्नावली।

भीमसेनः, पुं, मध्यमपाण्डवः। स च कुन्तीगर्भे पवनाज्जातः। तत्पर्य्यायः। भीमः २ वीरवेगः ३ वृकोदरः ४ वृकजित ५ कीचकजित् ६ किर्म्मीरजित् ७ जरासन्धजित् ८ हिडिम्बजित् ९ कटप्रमः १० नागबलः ११ गुदाकरः १२। इति शब्दरत्नावली। तस्य जन्मविवरणं यथा,
"धार्मिकस्तं सुतं लब्ध्वा पाण्डुस्तां पुनरब्रवीत्।
प्राप्तुः शास्त्रं बलं ज्येष्ठं बलज्येष्ठं सुतं वृणु॥
ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा।
तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः॥
तमप्यतिबलं जातं वायुवाचाशरीरिणी।
सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत!॥
इदमत्यद्भुतवासोज्झातमात्रे वृकोदरे।
यदङ्कात् पतितो मातुः शिलां गात्रैरचूर्णयत्॥
कुन्ती व्याघ्रभयोद्विग्ना सहसोत्पतिता किल।
नान्वबुध्यत तं सुप्तसुतसङ्गे खे वृकोदरम्॥
वज्रसङ्घनः सोऽथ कुमारो न्यपतद्गिरौ।
पतता तेन शतधा शिला गात्रैर्विचूर्णिता॥"
इति महाभारते आदिपर्व्वणि पाण्डवोत्पत्तिनामाध्यायः॥
(गन्धर्व्वविशेषः। यथा, महाभारते। १।१२३।५२।
भीमसेनोग्रसेनौ च ऊर्णायुरनघस्तथा॥")
कर्पूरभेदः। यथा,—
"पीतासो भीमसेनस्तदनुसितकरः शङ्करा-
भासशृङ्गः
श्रीमुः पिङ्गोऽजसारस्तदनु हिमयुता वायुका
जूटिका च।
पश्चादस्मासुसारस्तदुपरि सहिमः शीतलः
मन्त्रिकाख्या
कर्पूरस्येति भेदा गुणरसमहसा वैसदृश्येन
दृश्याः॥"
इति राजनिर्घण्टः॥

भीमहासं, क्ली, (भीमे ग्रीष्मादौ हासः प्रकाशो यस्य।) इक्षुतृणम्। इति शब्दरत्नावली। वृद्धिर सुता इति भावा। ग्रीष्महासमपि पाठः॥

भीमा, स्त्री, (भी+मक्+स्त्रियां टाप्।) दुर्गा। इति शब्दरत्नावली। रोचनाख्यगन्धद्रव्यम्। इति शब्दचन्द्रिका। कन्या। इति शब्दमाला॥ (नदीविशेषः। तद्यथा,—
"कावेरी वीरवाणी च भीमा चैव प्रयोङ्गिका।
विभावरी विशाला च गौरेयी मदनसवा॥
पाम्बती चापरा नद्यो दक्षिणाद्रिगमा हिमाः॥"
इति वाराहे प्रथमे कांस्य संग्रमेऽध्याये॥)

भीमादेवी, स्त्री, दुर्गा। यथा,—
"पुनरहं यदा भीमं रूपं कृत्वा हिमाचले।
रक्षांसि क्षययिष्यामि मुनीनां त्राणकारणात्॥
तदा मां मुनयः सर्व्वे स्तोष्यन्त्यानम्रमूर्त्तयः।
भीमादेवीति विख्यातं तन्मे नाम भविष्यति॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

भीमैकादशी, स्त्री, (भीमेनोपासिता एकादशी। शाकपार्थिवादित्वात् समासः।) भैमी। सा च माघशुक्लैकादशी। भीमहादशीव्रतेन ख्याता च। यथा,—
मत्स्य उवाच।
"पुरा रथन्तरे कल्पे परिष्टो महात्मना।
मन्दरस्थो महादेवः पितामहो ब्रह्मणा स्वयम्॥
ब्रह्मोवाच।
कथमारोग्यमैश्वर्य्यमनन्तममरेश्वर!।
स्वल्पेन तपसा देव! भवेन्नोऽथ वा नृणाम्॥
किमज्ञातं मया देव! त्वत्प्रसादादधोक्षज!।
स्वल्पकेनापि तपसा महत् फलमिहोच्यते॥
मत्स्य उवाच।
इति पृष्टः स विश्वात्मा ब्रह्मणा लोकभावनः।
उमापतिरुवाचेदं मनसः प्रीतिकारकम्॥
ईश्वर उवाच।
अद्यात्प्रभृत्यतरात् कल्पात् त्रयोविंशतिमो यदा।
वाराहो भविता कल्पस्तस्य मन्वन्तरे शुभे॥
वैवस्वताख्ये संजाते सप्तमे सप्तलोकपृक्।
द्वापरास्यं युगं तस्मिन् सप्तविंशतिमे तदा॥
तस्यान्ते स महानीलो वासुदेवो जगद्गुरुः।
भारावतरणार्थाय विधा विष्णुर्भविष्यति॥
दैपायनो मुनिस्तदद्दौहित्रेयोऽथ केशवः।
कंसादिदर्पमथनः केशवः क्लेशनाशनः॥
पुरी द्वारवती नाम सांप्रतं वा कुशस्थली।
दिव्यानुभावसंयुक्तामधिवासाय प्राङ्गणः॥
तदा ममाज्ञया ब्रह्मन्! करिष्यति जगत्पतिः।
तस्यां कदाचिदासीनः सभायाममितद्युतिः।
भार्य्याभिष्टाभिः साकं भूभृद्भिर्भूरिदक्षिणैः॥
कुदर्शिदेवगन्धर्व्वैरभितः कोटभाङ्गैः।
प्रवृत्तासु पुराणीषु धर्म्मसम्बन्धिनीषु च॥
कथासु भीमसेनेन परिष्टः प्रतापवान्।
त्वया पृष्टस्य धर्म्मस्य रहस्यस्यास्य भेदतः॥
भविता स तदा ब्रह्मन्! कर्त्ता चैव वृकोदरः।
प्रवर्त्तकोऽस्य धर्म्मस्य पाण्डुसूनुर्महाबलः॥
तस्य तीव्रो वृको नाम जठरे ज्वलनाह्वयः।
मया दत्तः स धर्म्मात्मा तेन चासौ वृकोदरः॥
अतीवाग्नाद्बलं चास्य नागायुतबलो महान्।
भविष्यत्यजरः साक्षात् कन्दर्प इव मूर्त्तिमान्॥
धार्म्मिकस्याप्यवृत्तस्य तीव्राग्नित्वादुपोषणे।
इमं क्रतमशेषाणां व्रतानामधिकं व्रतः॥
कथयिष्यति विश्वात्मा वासुदेवो जगद्गुरुः।
अश्वमेधसहस्रेभ्यो वाजपेयशतेन च॥
अग्नेयसहस्रेभ्यो राजसूयशतेन च।
पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलम्॥
भविष्यञ्च भविष्याणां पुराणानां पुरातनम्॥

वासुदेव उवाच।
यद्यदेकादशीं प्राप्य द्वादशीष्वथ भारत!।
अन्येष्वपि दिनर्क्षेषु न भुक्तञ्चानुपोषितम्॥
ततः पुण्यामिमां भीम! तिथिं पापप्रणाशिनीम्।
उपोष्य विधिनानेन गच्छेद्विष्णोः परं पदम्॥
माघमासस्य दशमी यदा शुक्ला भवेत्तदा।
घृतेनाभ्यञ्जनं कृत्वा तिलैः स्नानं समाचरेत्॥
तथैव विष्णुमभ्यर्च्य नमो नारायणाय च।
कृष्णाय पादौ संपूज्य शिरः सर्व्वात्मनेति च॥
वैकुण्ठायेति वै कण्ठं श्रीवत्सधारिणे।
ग्रीष्मे चक्रिणे तद्वद्दिने वरदाय वै॥
सर्व्वे नारायणस्यैव सपूज्या बाहवः क्रमात्।
दामोदरायेत्युदरं मेढ्रं यज्ञधराय वै॥
ऊरू सौभाग्यनाथाय जानुनी भूतधारिणे।
नमो नीलाय वै जङ्घे पादौ विश्वभुजे पुनः॥
नमो देव्यै नमः शान्त्यै नमो लक्ष्म्यै नमः श्रियै।
नमः पुष्ट्यै नमस्तुष्ट्यै हृष्ट्यै हृष्टे तथा ह्रियै॥
नमो विहङ्गनाथाय वायुवेगाय पक्षिणे।
विश्वप्रमाथिने नित्यं गरुडायाभिपूजयेत्॥
एवं सपूज्य गोविन्दमुमापतिविनायकौ।
गन्धैर्माल्यैस्तथा धूपैर्भक्ष्यैर्नानाविधैस्तथा॥
गव्येन पयसा सिद्धां क्षपूरामथ वाग्यतः।
सर्पिषा सह शुक्लां च गत्वा व्रतपतिं बुधः॥
न्यग्रोधोदुम्बराश्वत्थमथवा खादिरं बुधः।
गृहीत्वा प्रावयेद्दन्तानाचान्तः प्रागुदङ्मुखः॥
ब्रूयात् सायन्तनीं कृत्वा सन्ध्यामस्तमिते रवौ।
नमो नारायणायेति त्वामहं शरणं गतः॥
एकादश्यां निराहारः समभ्यर्च्य च केशवम्।
रात्रिञ्च सकलां स्थित्वा स्नानञ्च पयसापि च॥
सर्पिषा विप्रदहनं हुत्वा ब्राह्मणपुङ्गवैः।
सहैव पुण्डरीकाक्ष! द्वादश्यां क्षीरभोजनम्॥
करिष्यामि यतात्माहं निर्विघ्नेनास्तु तच्च मे।
एवमुक्त्वा खपेद्भूमावितिहासकथां पुनः॥
श्रुत्वा प्रभाते संजाते नदीं गत्वा विशाम्पते!।
स्नानं कृत्वा यदा तद्वत् पाषण्डानभिवर्जयेत्॥
उपास्य सन्ध्यां विधिवत् कृत्वा च पितृतर्पणम्।
प्रणम्य च हृषीकेशमममन्त्राभ्यणीश्वरम्॥
यस्य पुरतो भक्त्या मद्यपं कारयेद्बुधः।
दशगव्यमथार्द्धं वा करान् कुर्य्याद्विशाम्पते!॥
चतुर्हस्तां शुभां कुर्य्याद्दीर्घरिक्षिसूदन!।
चतुर्हस्तप्रमाणञ्च विन्यसेत्तच्च तोरणम्॥
आरोप्य कलसं तत्र दिक्पालान् पूजयेत्ततः।
मासमात्रेण संपूर्णमधःशय्याजिने स्थितः॥
तस्य धारान्च शिरसा धारयेत् सकलां निशाम्।
धाराभिर्भूरिभिर्भूरिफलं विदविदो विदुः॥
ग्रसात्तसात् कुरुश्रेष्ठ! धारा धार्य्याः सुव्रतिनः।
तथैव विष्णोः शिरसि क्षीरधाराः प्रपातयेत्॥
अरत्निमात्रं कुक्षञ्च कृत्वा तत्र त्रिमेखलम्।
योनिवक्त्रञ्च तं कृत्वा ब्राह्मणैर्वेदपारगैः॥
तिलांश्च विष्णुदेवत्यैर्मन्त्रैरेकाग्रिवत्तदा।

ह्यत्वा च वेश्मवं सम्यक् चरं गोचीरसंयुतम् ।
निश्यावार्द्रप्रमाणां वै धारामाण्यस्य पातयेत् ।
जलकुम्भान् महावीर ! स्थापयित्वा त्रयोदश ।
अक्षैर्नानाविधैर्धुक्तान् सितवस्त्रैरलङ्कृतान् ।
युतानौदुम्बरैः पात्रैः पञ्चरत्नसमन्वितान् ।
चतुर्भिर्वैकृतैर्होमस्तत्र कार्यः उदङ्मुखैः ।
रुद्रलापैश्चतुर्भिश्च यजुर्वेदपरायणैः ॥
वेदाश्चापि च सामानि चतुरः सामवेदिनः ।
अरिष्टवर्द्धसहितान्यभितः परिपाठयेत् ।
एवं द्वादश तान् विप्रान् वस्त्रमाल्यानुलेपनैः ।
पूजयेद्धूलीयेश्च कटकैर्हेमसञ्चकैः ॥
वाद्यैश्च ग्रथनीयैश्च वित्तशाठ्यविवर्जितः ।
एवं च पातिवाह्या वै गीतमङ्गलनिस्वनैः ।
उपाध्यायस्य च पुनर्दद्याद्गुणं सर्व्वमेव तु ॥ ॥
ततः प्रभाते विमले समुत्थाय त्रयोदश ।
गा वै दद्यात् कुरुश्रेष्ठ ! सौवर्णसुखसंयुताः ॥
पयस्विनीः शीलवतीः कांस्यदोहनसंयुताः ।
रौप्यखुराः सवस्त्राश्च चन्दनेनाभिषेचिताः ॥
तांश्च तेषां ततो भक्त्या भक्ष्यभोज्येन तर्पयेत् ।
ब्राह्मणान् ब्राह्मणांश्च सर्व्वानन्नेनानाविधेस्तथा ।
सुखा चाचारलवणमात्मना च विसर्जयेत् ॥
अनुगम्य प्रदान्यद्दौ पुत्रभार्य्यासमन्वितः ।
प्रीयतामत्र देवेशः केशवः क्लेशनाशनः ॥
शिवस्य हृदये विष्णुर्विष्णोश्च हृदये शिवः ।
यथान्तरं न पश्यामि तथा मे स्वस्ति चायुषः ॥
एवमुच्चार्य्य तान् कुम्भान् गाश्चैव ग्रथनानि च ।
वासांसि चैव सर्व्वेषां गृहाणि प्रापयेद्गृहः ॥
अभावे बहुशय्यानामेकामपि सुसंस्कृताम् ।
शय्यां दद्याद्गुरौ भीम ! सर्व्वोपस्करसंयुताम् ॥
इतिहासपुराणानि वाचयित्वातिवाहयेत् ।
तद्दिनं नरशार्दूल ! य इच्छेद्विपुलां श्रियम् ॥
तस्मात्त्वं सत्त्वमालम्ब्य भीमसेन ! विमत्सरः ।
कुरु व्रतमिदं सम्यक् स्नेहाद्व्यासमीरितम् ।
त्वया कृतमिदं वीर ! त्वन्नाम्ना भविष्यति ।
सा भीमद्वादशी श्लोषा सर्व्वपापहरा शुभा ।
या तु कल्याणिनी नाम पुरा कल्पेषु पठ्यते ॥"

त्वमादिकर्त्ता भव शौकरेऽस्मिन्
कल्पे महावीरवरप्रधान ! ।
यस्याः स्मरणकीर्त्तनमप्यशेषं
विनष्टपापस्त्रिदशाधिपः स्यात् ॥
दृष्ट्वा च यामप्सरसामपीह्या-
वेश्माकृतामप्यभवान्तरेषु ।
आभीरकन्येति कुतूहलेन
देवोऽब्रवीत् संप्रति नाकपृष्ठे ।
जातापि सा वेश्यकुलोद्भवापि
पुलोमकन्या पुरुहूतपत्नी ।
तत्रापि तस्याः परिचारिकेयं
मम प्रिया संप्रति सत्यभामा ॥
स्नातः पुरा मङ्गलमेव तद्व-
त्तेजोमयं देवशरीरमाप ।
अस्याश्च कल्याणतिथौ विधिज्ञान्
सहस्रधारेण सहस्ररश्मिः ॥

इदमेव व्रतं महेन्द्रमुखै-
र्वसुभिश्चैव पुरा सुरादिभिश्च ।
फलमत्र न शक्यतेऽभिवक्तुं
यदि जिह्वाकोटयो मुखे स्युः ॥
कलिकल्मषविदारिणीमनन्ता-
मिति कथयिष्यति यादवेन्द्रसूनुः ।
अपि नरकगतान् पितॄनशेषा-
नलसुहृत्सुमिहैव यः करोति ॥
य इदमनघं शृणोति चातिभक्त्या
परिपठतीह परोपकारहेतोः ।
तिथिमिह सकलार्थभाङ्नरेन्द्र-
स्तव चरणेन स साम्यतामुपैति ।
कल्याणिनी नाम पुरा बभूव
या द्वादशी माघदिनेऽभिपूज्या ।
सा पाण्डुपुत्रेण कृता भविष्य-
त्त्वत्तः पुण्यानघ ! भीमपूर्व्वा ॥"

इति मत्स्यपुराणे भविष्यद्व्रतोद्देशे भीमद्वादशी नाम ६५ अध्यायः ॥

भीरुः, त्रि, (बिभेतीति । भी भये + "भियः क्रुक्रुकनौ ।" उणा० २ । ३१ । इति क्रुः ।) भयशीलः । (यथा, मनौ । ७ । ६२ ।
"तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान् ।
शुचीनाकरकर्म्मान्ते भीरूनन्तर्निवेशने ॥")
तत्पर्य्यायः । चक्षुः २ भीरुकः ३ भीलुकः ४ । इत्यमरः । ३ । १ । २६ ॥ भीलुः ५ । इति शब्दरत्नावली ॥

भीरुः, स्त्री,(बिभेतीति । भी + "भियः क्रुक्रुकनौ ।" उणा० २ । ३१ । इति क्रुः ।) भयशीला स्त्री । भयप्रकृतिका । इत्यमरभरतौ ॥ (यथा, विष्णुपुराणे । १ । १५ । ३१ ।
"सत्यं भीरु ! वदाम्येतत् परिहासोऽथवा शृणु ! ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम् ॥")
शतावरी । इति धरणिः, अमरश्च । (यथा,—
"बहुपुत्री वरा भीरुः शतमूली शतावरी ।
महापुरुषदत्ता च पीवरीन्दीवरी वरी ॥"
इति वैद्यकरत्नमालायाम् ॥)
कण्टकारी । इति शब्दचन्द्रिका । शतपादिका । इति शब्दरत्नावली ॥ अजा । छाया । स्त्री । इति राजनिर्घण्टः ॥

भीरुः, पुं, (बिभेतीति । भी + क्रुः ।) शृगालः । इति शब्दमाला । व्याघ्रः । इति राजनिर्घण्टः ॥ इक्षुभेदः । इति रत्नमाला ॥ अस्य गुणाः । श्लेष्मकारित्वम् । स्वादुत्वम् । अविदाहित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

भीरुकं, क्ली, (भीरु + संज्ञायां कन् ।) वनम् । इति शब्दरत्नावली ॥

भीरुकः, पुं, (भीरु + स्वार्थे संज्ञायां वा कन् ।) पेचकः । इति शब्दरत्नावली ॥ इक्षुभेदः । भीररी इति हिन्दीभाषा ॥ (यथा, सुश्रुते छत्रस्थाने । ४५ अध्याये ।
"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः ।
कान्तारस्त्वप्रसेक्तृश्च काण्डेक्षुः रुचिपत्रकः ॥")

अस्य गुणाः । यथा, भावप्रकाशे ।
"वातपित्तप्रशमनौ मधुरौ रसपाकयोः ।
सुग्रीतौ दृढगुणौ बल्यौ पौण्ड्रको भीरुकस्तथा ॥"

भीरुकः, त्रि,(बिभेतीति । भिभी भये + "भियः क्रुकन् ।" उणा० २ । ३१ । इति क्रुकन् ।) भययुक्तः । इत्यमरः ॥ कातरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भीरुपत्नी, स्त्री,(भीरुरेव पत्नाख्यस्याः । गौरादित्वात् ङीष् ।) शतमूली । इत्यमरः ।२।४।१०१॥

भीरुहृदयः, पुं, (भीरु हृदयमस्य ।) खगः । इति जटाधरः ॥

भीरूः, स्त्री, (भीरु + "ऊडुतः ।" ४ । १ । ६६ । इति ऊङ् ।) भयशीला नारी । इत्यमरटीकायां भरतः ॥

भीलभूषणा, स्त्री, (भूष्यतीति । भूष् + कर्त्तरि ल्युः । टाप् । भीलानां भूषणा ।) गुञ्जा । इति राजनिर्घण्टः ॥

भीलुः, त्रि, (बिभेतीति । भी + लुः ।) भीरुः । भयशीलः । इति शब्दरत्नावली ॥

भीलुकः, पुं, (बिभेतीति । भी + "भियः क्रुक्रुकनौ । ३ । २ । १७४ । इति लुकन् ।) भीरुः । इत्यमरः । ३ । १ । २६ ॥ (यथा, कथासरित्सागरे । ५२ । ५२ ।
"एतद्देवानिमित्तं नः किमन्येनाध्वभीलुक ! ।
यत्नमस्माभिरानीतः काकग्रङ्घी पदे मदे ॥")
भल्लुकः । इति शब्दरत्नावली ॥

भीषणः, पुं, (भीषयते इति । भी + णिच् + "भियो हेतुभये षुक् ।" ७ । ३ । ४० । इति षुक् । भीषिधातुस्ततो नन्द्यादित्वात् ल्युः ।) भयानकरसः । इत्यमरटीकायां भरतः, मेदिनी च ॥ कुङ्कुमकः । कपोतः । हिन्तालः । इति राजनिर्घण्टः ॥ शिवः । इति शब्दरत्नावली । शुक्लकः इति मेदिनी ॥ (भयोत्पादने क्ली, । यथा, महाभारते । १५ । ७ । ४ ।
"यत्नं भेदनञ्चैव शत्रूणां कारयेत्ततः ।
कर्त्तव्यं भीषणञ्चैव युद्धे चैव बलक्षयम् ॥")

भीषणः, त्रि, (भीषयते इति । भी + णिच् + ततो नन्द्यादित्वात् ल्युः । युगागमश्च ।) गाढः । दारुणः । इति मेदिनी । षे, ६८ ॥ (यथा, रघौ । १२ । ४० ॥
"पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः ।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥")

भीष्मं, त्रि, (बिभेत्यस्मादिति । भी + "भियः ष्मुग् वा ।" उणा० । १ । १४७ । इति मक् । वा युगागमश्च ।) भयानकम् । इत्यमरः ।१।७।२०॥ (यथा, श्रुतपथब्राह्मणे । १९ । ६ । १ । ३ ।
"सहोवाच भीष्मं वत भोः पुरुषान् वा ।"
"भीष्मं भयङ्करं ।" इति तद्भाष्ये महीधरः ॥)

भीष्मः, पुं, (बिभेत्यस्मादिति । भी + मक् । ष्मुग् वेति पक्षे षुक् ।) भयानकरसः । इत्यमरटीकायां भरतः ॥ शिवः । राक्षसः । इति हेमचन्द्रः ॥ गाङ्गेयः । स च शान्तनुराज-

चक्रवर्त्तिनो गङ्गायां भार्य्यायां जातः। स परम-धर्म्मात्मा महावीरः। येन पितुर्दाशकन्या-विवाहार्थं पितुराज्यं त्यक्तं, यच्च स्वस्य विवाहं त्यक्त्वा ऊर्द्धरेता जातः। इति श्रीभागवतम्। तस्योत्पत्तिर्यथा,—

"अथ तामप्सरे जाते पुत्रे प्रहसतीमिव।
उवाच राजा दुःखार्त्तः परीक्षन् सुतमात्मनः॥
मा वधीः कासि कस्यासि किञ्च हंसि सुता-मिति।
पुत्रघ्नि! सुमहत् पापं संप्राप्तं ते सुगर्हितं!॥"

स्त्र्युवाच।

"पुत्रकाम! न ते ह्यस्मि पुत्रं पुत्रवतांवर!।
जीवंस्तु मम वासोऽयं यथा स समयः कृतः॥
अहं गङ्गा जह्नुसुता महर्षिगणसेविता।
देवकार्य्यार्थसिद्ध्यर्थमुषिताहं त्वया सह॥
अष्टौ ये वसवो देवा महाभागा महौजसः।
वशिष्ठशापदोषेण मानुषत्वमुपागताः॥
तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते।
मद्विधा मानुषी धात्री लोके नास्ति कदाचन॥
तेवाञ्च जननीहेतोर्मानुषत्वमुपागता।
जनयित्वा वसूनष्टौ जिता लोकास्त्वयाक्षयाः॥
देवानां समयस्त्वेष वसूनां संश्रुतो मया।
जातं जातं मोचयिष्ये जन्मतो मानुषादिति॥
तस्मै शापादिनिर्मुक्ता आपवस्य महात्मनः।
स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महा-व्रतम्॥
एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः।
मत्प्रसूतं विजानीहि गङ्गादत्तमिमं सुतम्॥"

इत्यादिपद्मपुराणे भीष्मोत्पत्तिनाम १००अध्यायः॥

भीष्मजननी, स्त्री, (भीष्मस्य जननी माता।) गङ्गा। इति राजनिर्घण्टः॥

भीष्मपञ्चकं, क्ली, (भीष्मेण कृतमुपदिष्टं वा पञ्चकं एकादश्यादिपूर्णिमान्तपञ्चतिथिकर्त्तव्यम्।) कार्त्तिकशुक्लपक्षीयैकादश्यादिपूर्णिमान्तपञ्च-तिथिकर्त्तव्यव्रतविशेषः। यथा,—

श्रीनारद उवाच।

"भगवन्! यत् त्वया प्रोक्तं भीष्मस्य च दिवं महत्।
माहात्म्यं श्रोतुमिच्छामि तस्य मे कथय प्रभो!॥
कथं स्नानञ्च किं दानं को विधिः कस्य पूजनम्।
किं फलं केन वाकारि तन्मे कथय विस्तरात्॥"

ब्रह्मोवाच।

तद्भीष्मपञ्चकस्येदं माहात्म्यं विधिपूर्ब्बकम्।
वक्ष्यामि फलसंयुक्तं येनेदञ्च कृतं पुरा॥
अयोध्या नगरी या च कलिकल्मषनाशिनी।
वैष्णवी स्वर्गरम्या च कलिकल्मषनाशिनी॥
हस्त्यश्वरथपत्त्याढ्या विष्णुचक्रप्रतिष्ठिता।
तस्यामासीन्नरवरः सूर्य्यवंशोद्भवो सुने!॥
अतिथिर्नाम देवर्षे! धर्म्मात्मा नैकयज्ञकृत्।
तेन दत्तं पुरा राज्ञा कृतं यज्ञमनुत्तमम्॥
भार्य्यया चन्द्रभाविन्या सार्द्धं भीष्मस्य पञ्चकम्।
चिकीर्षुः परिपप्रच्छ वशिष्ठं तद्विधिं द्विज!॥"

वशिष्ठ उवाच।

"शृणु राजन्! प्रवक्ष्यामि व्रतं सौभाग्य-दायकम्।
रहस्यं भीष्मपञ्चाख्यं विष्णुतुष्टिप्रदायकम्॥
कार्त्तिके मासि राजेन्द्र! प्रारभ्यैकादशीतिथिम्।
यावत् पञ्चदशी रम्या भविता चन्द्रपूर्णिता।
पञ्चभीष्ममिति ख्यातं तिथयः पुण्यदाः स्मृताः॥
प्रातःकाले समुत्थाय शौचं कृत्वा यथाविधि।
स्नात्वा सभार्य्यः पुरुषो नद्यादौ विमले जले॥
तर्पयेद्भीष्मवर्म्माणं कुरुवंशपितामहम्।
पितृभिस्तिलयुक्तैश्च जलाञ्जलिभिरुद्धृतैः॥
वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च।
तिलतोयाञ्जलिं तस्मै प्रयच्छेद्भीष्मवर्म्मणे॥
सन्तर्प्य कौरवश्रेष्ठं कुर्य्यादाचमनं ततः।
अर्च्चयित्वा विधानेन चन्दनादिभिरादृतः।
अर्घ्यं दद्यादतन्द्रात्मा च मन्त्रेणानेन भूपते!॥
वसुनामवताराय शान्तनोरात्मजाय च।
अर्घ्यं ददामि भीष्माय आजन्मब्रह्मचारिणे॥
इत्यं समापयेद्व्रतमृषे! भीष्मपञ्चविधिं नरः।
नियमेनोपवासेन पञ्चरात्रेण वा पुनः॥
पयोमूलफलाहारैर्हविष्यान्नाविधेरपि।
नरो वा यदि वा नारी सूक्तपापो दिवं व्रजेत्।
भुक्त्वा स विपुलान् भोगान् कार्त्तिकं न त्यजेद्धि यः।
अतोऽशक्तो नवेत् पञ्चभीष्माख्यं हरिपूजितम्॥
शृणुतेतद्विधानञ्च सौभाग्यं तव चेलया सह।
दम्पती च यथा भोग्यं लब्ध्वा तौ तु महाफलम्॥
स्वल्पायासेन विप्रेन्द्र! कृतं ताभ्यां हि तत् पुरा।
प्राप्तं राज्यं महौजेतां समुद्रवलयान्विताम्॥
प्रभुज्य प्रचुरान् कामान् व्रतकामौ यथा सुने!।
दिव्याम्बराभरणौ तौ दिव्यमाल्यानुलेपितौ॥
दिव्यदेहविमानेन सर्व्वकिन्नरसेवितौ।
अप्सरोगीतवृत्तेन स्तुतौ देवमहर्षिभिः।
सम्प्राप्तौ विष्णुलोकञ्च भीष्मपञ्चव्रताद्मुने!॥"

ब्रह्मोवाच।

"इत्येतत् कथितं वत्स! माहात्म्यं कार्त्तिकोद्भवम्।
भीष्मपञ्चकमाहात्म्यं सेतिहासं पुरातनम्॥
तत् सर्व्वं कुरु विप्रेन्द्र! यदि ते भक्तिरच्युते।
निश्चलः कायमनसा वचसा सुमनीभव॥"

"श्रद्धन्ति मर्त्याश्च पठन्ति ये वै
भूखण्डमध्ये भगवद्गुणान् सुने!।
मतिञ्च लब्ध्वा भगवत्प्रणीयतः
कथासुपेन्द्रस्य पुरं प्रयान्ति॥
कलिमलमपहृत्य प्राणिनो देवदेवं
सुभगसकलभोगान् भोजयित्वा च यान्ति।
हरिपुरममरेशैर्गीतवादैर्विशालै-
र्विहितसकलशोभाशोभयन्तं हरिं ये॥

इतत् कार्त्तिकमाहात्म्यं भक्त्या यः शृणुयान्नरः।
सर्व्वपापविनिर्म्मुक्तः स शुद्धे लभते रतिम्॥"

इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये १३२ अध्यायः॥

अपि च।

"सदा हरेर्व्रतं श्रेष्ठं ततः स्याद्विजायने।
चातुर्म्मास्ये ततस्तस्मात् कार्त्तिके भीष्मपञ्चकम्॥
ततः श्रेष्ठतमं शुक्ल एकादश्यां समाचरेत्।
स्नायात्त्रिकालं पित्रादीन् यवाद्यैरर्च्चयेद्धरिम्॥
यजेज्जौनी घृताद्यैस्तु पञ्चगव्येन वारिभिः।
आपयित्वाथ कर्पूरसुखैश्चैवानुलेपयेत्॥
घृतागुग्गुलधूपं दिनः पञ्चदिनं दहेत्।
नैवेद्यं परमान्नन्तु जपेदष्टोत्तरं शतम्॥
ॐ नमो वासुदेवाय घृतन्नीहितिलोदकम्।
षड्क्षरेण मन्त्रेण स्वाहान्तेन तु होमयेत्॥
प्रथमेऽह्नि हरेः पादौ यजेत् पद्मैर्द्वितीयके।
विल्वपत्रैस्तृतीये तु नाभिं भक्त्या च चापरे॥
स्कन्धौ विल्वैश्चैवाभिष्य पञ्चमेऽह्नि शिरोऽर्च्चयेत्।
मालत्या भूमिशायी स्यान्नोमयं प्राशयेत् क्रमात्॥
क्षीरवृक्षक्षीरदधि च पञ्चमे पञ्चगव्यकम्।
नक्तं कुर्य्यात् पञ्चदशीं व्रती स्याद्भुक्तिमुक्ति-भाक्।"

इति गारुडे भीष्मपञ्चादिव्रतं नाम १२३अध्यायः॥

पञ्चकपञ्चकम्। यथा,—

"आरभ्यैकादशीं पञ्च दिनानि व्रतमाचरेत्।
भगवत् प्रीतये भीष्मपञ्चकं यदि शक्नुयात्॥
तदा श्राद्धीव्रतं पौर्णमास्यां कुर्व्वीत कार्त्तिके।
तथा नवम्यां शुक्लायामथवं नवमीव्रतम्॥
पैतामहादिशब्दाश्च मासोपोषणमेव च।
समर्थः कार्त्तिके कुर्य्यात् ज्ञात्वा पाद्मादितो विधिम्॥"

इति श्रीहरिभक्तिविलासे १६ विलासः॥

भीष्मरत्नं, क्ली, (भीष्मं भयानकं रत्नं दुर्लभत्वात्।) हिमालयोत्तरदेशजातशुक्लवर्णप्रस्तरविशेषः। तस्योत्पत्त्यादि यथा,—

ब्रह्म उवाच।

"हिमवत्युत्तरे देशे वीर्य्यं पतितं सुरद्विषस्य।
सम्प्राप्तमुत्तमानामाकरतां भीष्मरत्नानाम्॥
शुक्लाः शुक्लाजिनिभाः श्लोणाकसन्निभाः प्रभावन्तः।
प्रभवन्ति ततस्तरुजा वज्रनिभा भीष्मपाषाणाः।
हिमादिप्रतिबद्धं सुहृमपि अहया विधत्ते यः।
भीष्मभिदं धीवादिषु स सम्यदं सर्व्वदा लभते॥
गुरुयुक्तस्य तस्येव धारवाम्बुनिपुञ्जव!।
विषाणि तानि नश्यन्ति सर्व्वाण्येव महीतले॥"

विषमागाधवर्त्मसु ये तमरण्यनिवासिनः समी-पेऽपि।
द्वीपिदृक्षशरभकुञ्जरसिंहव्याघ्रादयो हिंस्राः॥
तस्योत्कलितलतिनो भवन्ति भयं न चापि सप्तपदीस्थितम्।
भीष्मभिदंगुणयुक्तः सम्यक् संप्राप्ताकुलिचितयः।
पितृतर्पणे पितॄणां तृप्तिर्वर्षशतावधिको भवति॥
ग्राम्यस्तुदभूतान्यपि सर्पाक्षव्याघ्रवृश्चिक-विषाणि।
सलिलाग्निवैरितस्करभयानि भीमानि नश्यन्ति॥

सैवलवलाहकाभं परुषं पीतप्रभं प्रभाहीनम्।
मलिनद्युतिं विवर्णं दूरात् परिवर्जयेत् प्राज्ञः॥
मूलं प्रकल्प्यमेषां विबुधवरैर्दैग्रकालविज्ञानात्।
दूरे भूतानां बहु किञ्चिन्निकटप्रस्तानाम्॥"
इति गारुडे भौग्नरत्नपरीक्षा नाम ७६ अः॥

भौग्नः, क्ली, (भौग्नं स्रुते प्रसूते इति। स्रु प्रसवे + क्विप्।) गङ्गा। इत्यमरः। १। १०। ३१॥

भौग्नाष्टमी, स्त्री, (भौग्नस्य अष्टमी भौग्नाधिका अष्टमी वा।) माघशुक्लाष्टमी। तत्र भौग्नस्य तर्पणादिकं कर्त्तव्यम्। यथा, भविष्योत्तरे।
"शुक्लाष्टम्यान्तु माघस्य दद्याद्भीष्माय यो जलम्।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति॥"
धवलधृता स्मृतिः।
"अष्टम्यान्तु सिते पक्षे भौग्नाय तु तिलोदकम्।
अन्नञ्च विधिवद्दद्युः सर्व्वे वर्णा द्विजातयः॥"
सर्व्वे वर्णा इत्युपादानात् ब्राह्मणभूद्रयोरप्यधिकारः। द्विजातय इति सम्बोधनम्। स्मृतिरत्नाकरे विष्णुधर्म्मोत्तरम्।
"मध्याह्नव्यापिनी ग्राह्या आद्ये भौग्नाष्टमी तिथिः।
स्नाने च तर्पणे दाने ग्राह्या सूर्य्योदयौ परा॥
यदा कदाचित् कुम्भार्कं गता सूर्य्योदयौ परा।
पूर्व्वस्यामेव कर्त्तव्यं तर्पणं आद्धमेव च॥
यदैकस्मिन् भवेन्नाशि कदाचिच्चाकरौ इयम्।
भौग्नाष्टमी इयं वापि तदा ग्राह्या परा तिथिः॥
ब्राह्मणक्षत्रियवर्णानां यः करोत्यौर्द्धदेहिकम्।
तद्वर्षतमसौ याति इह लोके परत्र च॥"
इति मरीचिवचनन्तु भौग्नव्रतेतरपरम्॥
तथा च स्मृतिः।
"ब्राह्मणाद्यासु ये वर्णा दद्युर्भौग्नाय नो जलम्।
संवत्सरकृतं पुण्यं तत्क्षणादेव नश्यति॥
अत्रवर्षजलदानविधेषु प्रकरणबलादपि ब्राह्मणादिविषय इति श्रीदत्तः। तर्पणमन्त्रस्तु।
"वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च।
अपुत्राय ददाम्येतत् सलिलं भौग्नवर्म्मणे॥
भौग्नः ग्राह्मनवो वीरः सत्यवादी जितेन्द्रियः।
आभिरङ्गिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम्॥"
इत्यर्घ्यमन्त्रः। पुत्रपौत्रोचितामित्यभिधानात् पिण्डकर्म्मणीत्या। ब्राह्मणः पिण्डतर्पणानन्तरं क्षत्रियस्तु तत्पूर्व्वं तर्पयेत्। इति संवत्सरप्रदीपादयः॥ इति तिथ्यादितत्त्वम्॥

सुक्त, त्रि, (सुच् + कर्म्मणि क्तः।) मक्षितम्। इत्यमरः। ३। २। ११॥ (यथा, मनुः। १२।५५।
"पूजितं ह्यशनं नित्यं बलमूर्জ्জञ्च यच्छति।
अपूजितन्तु तद्भुक्तमुभयं नाशयेदिदम्॥"
उपसुक्तम्। यथा, रघुः। ४। ७।
"मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः।
तथाप्यनन्यपूर्व्वेव तस्मिन्नासीद्वसुन्धरा॥"
भावे क्तः।) भक्षणे, क्ली। इति त्रिकाण्डशेषः॥ (यथा, रामायणे। २। ५८। १२।
"आर्षितं ग्रथितं सूक्तं कृतं रामस्य कीर्त्तये।
कौविष्याग्यहविर्भोक्त्रे ययातिरिव साधुना॥")

सुक्तसंसृष्टभितं, त्रि, (आदौ सूक्तं पश्चात् संसृष्टभितं परित्यक्तम्। ज्ञातासुलिप्तवत्समासः।) पूर्व्वं सूक्तं ततः शेषं पश्चात् संसृष्टभितं व्यक्तम्। ततःपर्य्यायः। फेला २। इत्यमरः। २। ६।५६॥ पिक्कम् ३ फेलिः ४। इति भरतधृतरभसः॥

सुक्तिः, स्त्री, (सुच् + क्तिन्।) भोजनम्। इति ग्रन्दरत्नावली॥ भोगः। यथा,—
"सुक्तिस्त्रिपुरुषी सिद्धेदपरेषां न संशयः।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिद्धति॥
आहर्त्ता शोधयेद्सुक्तिमागमञ्चापि संसदि।
ततःसुतो सुक्तिमेवैकां पौत्रादिषु न किञ्चन॥"
इति दायतत्त्वम्॥
(यथा, मनुः। ८। २५२।
"एतैर्विवादान्निर्णीय सीमां राजा विवादयोः।
पूर्व्वभुक्त्या च सततमुदकस्यागमेन च॥")
रविर्भुक्तिर्यथा,—
"सार्द्धसप्तभसे मेषे वसुः सार्द्धो वटे हये।
दशैव मकरे इन्दौ पलानि प्रतिधावरम्।
कुलीरसिंहप्रमदातुलालिकार्म्मुकेषु च।
पलान्येकादश तथा रविभुक्तिं प्रचक्षते॥"
इति ज्योतीरत्नमालायाम्॥
भोगः। दखल इति पारस्यभाषा। स च प्रमाणचतुष्टयान्तर्गतप्रमाणविशेषः। यथा। लिखितात्यभावे दिव्यमाह याज्ञवल्क्यः।
"प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम्।
एषामन्यतमाभावे दिव्यान्यतममुच्यते॥"
इति व्यवहारतत्त्वम्॥
तद्विवरणं यथा। अथ भुक्तिः। तत्र याज्ञवल्क्यः।
"पञ्चमोऽनुगतो हानिर्भूमेर्विंशतिवार्षिकी।
परेण भुज्यमानाया धनस्य दशवार्षिकी॥"
विवादमकुर्वतः समक्षं भूस्वामिनः परेणासपिण्डादिना भुज्यमानाया भूमेर्विंशतिवर्षनिर्वृत्ता खलहानिः। अत्र लोकव्यवहारकर्म्मलाघवगौरवेण सावधेन। यथा च विष्णुधर्म्मोत्तरम्।
"सन्नाद्युपाख्यान्यथ सावधेन
भोक्तव्य यत् स्याद्व्यवहारकर्म्म॥"
तत्रैव।
"सावधे च तथा भोक्तरि विंशतिः सूर्य्योदयाः स्मृताः॥"
इति॥
विशेषयति व्यासः।
"वर्षाणि विंशतिं यस्य भूर्भुक्ता तु परैरिह।
सति राज्ञि समर्थस्य तस्य सेह न सिध्यति॥
समर्थस्य बालत्वादिदोषरहितस्य। धनस्य दशवर्षनिर्वृत्ता खलहानिः। तथा च मनुनारदौ।
"यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी।
भुज्यमानं परैरन्यैर्न स तल्लब्धुमर्हति॥"
यत्किञ्चिद्धनजातं समक्षमेव भोक्तादिभिरेकेन परैर्दशवर्षाणि भुज्यमानं स्वामी तूष्णीं प्रेक्षते मा भुज्यतामिति प्रतिषेधं न करोति नासौ तल्लब्धुं योग्यो भवति तत्र तस्य स्वाम्यं नश्यतीत्यर्थः। गौतमः। अनङ्गापौगण्डधनं दशवर्षसूक्तं परैः सन्निधौ भोक्तुरिति। अङ्गो विकलेन्द्रियः। पौगण्डः पूतोऽनुत्पन्नश्मश्रुर्गण्डः कपोलो यस्य सः। तदाह नारदः—
"बाल आषोडशाद्वर्षात् पौगण्डश्चापि ग्रन्थते॥"
अत्रापौगण्डः प्रकीर्त्तित इति कुल्लूकभट्टेन लिखितम्। तत्पाठेऽपि अपौगण्डस्तु पौगण्ड इति विरूपकोषादविरोधः। तस्माद्व्याजनादिरिव वचनाद्दशवर्षविंशतिवर्षादिकालभोग एव स्वत्वं जनयति। यथा कालप्राप्तिवशेन बीजमङ्कुरं जनयति तरवश्च कुसुममिति। स्वामिना चापरित्यक्तेऽपि ग्राह्योक्तकालीनभोगात् स्वाम्यमन्यस्य भवति। यथा जयेन राज्ञः परराष्ट्रधन इति। एवमेव श्रीकरवालोकनोल्लोकभवदेवभट्टशूलपाणिकुल्लूकभट्टचण्डेश्वरनयवर्द्धमानोपाध्यायप्रभृतयः॥ व्यवहारोऽप्येतादृगेव। एतद्विवृद्धवचनान्यन्यथा व्याख्येयानि। तत्रोपेक्षया स्वत्वहानिं सूत्रा च स्वत्वमाह नारदः—
"सुभ्यमानान् परैरर्थान् यस्मान्नोद्धारुपेक्षते।
समक्षं तिष्ठतोऽप्यस्य तान् सुक्तिः कुरुते वशे॥"
सुक्तमाह हारीतः—
"स्यावरं विंशतिर्भोक्ता सुक्ता हानिमुपेक्षया।"
उपेक्षया क्षमया। तत्कारणञ्च स्वामिनः सुशीलत्वमदीर्घसूत्रदयालुत्वादि। एवञ्च विंशतिवर्षात् पूर्व्वं स्वत्वतिरोधायकवर्षत्रयापगमादौचित्यात् पन्नस्य एव स्वत्वम्। एवं दशवर्षात् पूर्व्वं स्वत्वतिरोधायदोहनप्राजनाद्यौचित्यप्रदुग्धादौ एव स्वत्वम्। तत्तत्कालपरतस्तु भूमौ गवादिधने च स्वत्वमिति। पूर्व्वं तत्तन्नाशकभोगे तु चौर्य्यदोषो भवत्येव॥ ॥ भोगे तु स्वत्वहानिमाधादीनां आवर्णयति पञ्चमोऽनुगत इत्यभिधाय याज्ञवल्क्यः—
"आधिसीमोपनिधिक्षेपजड़वाजनैर्विना।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि॥"
आधिर्बन्धकरणम्। उपनिधिक्षेपः।
वासनस्यमनाख्याय यस्तं यत्रिधौयते॥"
इति नारदोक्तेः॥
वासनस्यं निक्षेपाधारभूतसम्पुटादिस्थम्। यस्तं यत्नादिगुप्तम्। जड़ो बुद्धिविकलः। बालोऽप्राप्तषोड़शवर्षः। उपनिधिः प्रीत्या भोगार्थमर्पितः। ततश्च आधादिभिर्जड़ादिधनैश्च विना अन्यानि धनानि उक्तभोगकालेन स्वामिनो नश्यन्ति एतानि तु स्वामिनो न नश्यन्ति न वा भोक्तुर्भवन्ति ॥॥ मिताक्षरायां स्मृतिः—
"द्वारमार्गक्रियाभोगजलवाह्यादिषु क्रिया।
सुक्तिरेव तु गुर्व्वी स्याद्न दिव्यं न च साक्षिणः॥"

याज्ञवल्क्याः।
"आगमो ह्यधिको भोगादिना पूर्व्वक्रमागतात्।
आगमः कारणं तत्र भुक्तिः स्तोकापि यत्र नो।
आगमस्तु हृतो येन सोऽभियुक्तस्तदुद्धरेत्।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी॥
योऽभियुक्तः परेतः स्यात्तस्य रिक्थो तदुद्धरेत्।
न तत्र कारणं भुक्तिरागमेन विना हृता॥"
भूम्यादावागमः पूर्व्वपुरुषक्रमादागतभोगाद्बलवान्। अतः क्रमागतभोग आगमाद्बलवान्। तथा च दृहस्पतिः—
"अनुमानाद्गुरुः साक्षी साक्षिभ्यो लिखितं गुरु।
अयाचिता त्रिपुरुषी भुक्तिस्तेभ्यो गरीयसी॥"
त्रिपुरुषभोगमाह व्यासः—
"प्रपितामहेन यद्भुक्तं ततपुत्रेण विना च तम्।
नौ विना यस्य पित्रा च तस्य भोगस्त्रिपौरुषः॥
पिता पितामहो यस्य जीवेच्च प्रपितामहः।
तयार्य्या जीवता भोगो विज्ञेयस्त्रैकपूरुषः॥"
आगमोऽपि बलवान् न भवति यत्र स्तोकापि भुक्तिर्नास्ति। तथा च नारदः।
"विद्यमानेऽपि लिखिते जीवत्सक्षिण्यपि च साक्षिषु।
विशेषतः स्थावराणां यत्र भुक्तं न तत् स्थिरम्॥"
इति दीपकलिका॥
यत्र वादिप्रौ स्वस्वागमबलप्रदर्शनौ आगमयोश्च पूर्व्वापरभावो न निर्णीयते तत्र यस्य भुक्तिस्तस्यागमो बलीयान् न तत्यस्येत्यर्थ इति मिताक्षरा। अर्थात् यत्रागमपौर्व्वापर्य्यनिश्चयस्तत्र।
"सर्व्वेष्वेव विवादेषु बलवद्भुत्तरा क्रिया।
आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरा॥"
इति याज्ञवल्क्यवचनान्निर्णयः॥
आगमस्तिति या सम्बन्धगम्यते प्राप्यते स्वं भवति येन क्रयादिना स आगम इति व्यवहारमालिका। आगमः साक्षिपत्रादिकमिति याज्ञवल्क्यदीपकलिका। आगमो धनोपार्জ্জनोपायः क्रयादिरिति मैथिलाः। तत्राग्नेयागभियुक्त आगमकर्त्ता तत्पूर्व्वतनसुहृदेत्तत्पुत्रपौत्रौ नागमसुद्धरेतां किन्तु भुक्तिरेव तत्र प्रमाणम्। विशेषयति दृहस्पतिः।
"आहर्त्ता ग्रोधयेद्भुक्तिमागमस्यापि संसदि।
तत्सुतो भुक्तिमेवैकां पौत्रादिस्तु न किञ्चन॥"
इति मूलपाणिधृतम्॥
तत्पुत्रादौ न किञ्चनेति मैथिलधृतम्। आहर्त्ता अर्জ্জनकर्त्ता। अत्र पुत्रस्य भुक्तिग्रोधनमात्रम्। भुक्तिग्रोधनमाहतुर्व्यासकात्यायनौ।
"आगमो दीर्घकालश्च निश्चिद्रोऽन्यैरबोधितः।
प्रत्यर्थिसन्निधानश्च पश्चाद्भोग इष्यते॥"
प्रमाणमिति शेषः। आगमः क्रयादियुक्तः। एव च भूमिविषयकविंशतिवर्षधनविषयकदशवर्षान्यूनकालभोगपरः। योऽभियुक्त इति यो भोगे क्रियमाणे परेणाभियुक्तः परेतो मृतः स्यान्नागमसुद्धृतवान् तदा तत्पुत्रादिरेव तमुद्धरेत्। तथाह नारदः।
"यथारूढविवादस्य प्रेतस्य व्यवहारिणः।
पुत्रेण सोऽर्थः सम्शोध्यो न तु भोगो निवर्त्तयेत्॥
भोगः केवलभोगः। तथा च स एव। आदौ तु कारणं दानं पश्चाद्भुक्तिस्तु सागमेति। एव स विवादभोगः यद्यन्येतरपरः। तथाविधभोगस्यागमं विनापि प्रामाण्यात्। तथा च व्यासः।
"वर्षाणि विंशतिं भुक्ता स्वामिनाधाहता सती।
भुक्तिः सा पौरुषी भूमेर्दिगुणा तु त्रिपौरुषी॥
त्रिपौरुषी तु त्रिगुणा न तत्रान्वेष्य आगमः॥"
एतद्वचनसमत्वभोगविषयकमिति समत्वविंशतिवर्षभोगविषयकवचनेनाविरुद्धम्। एतादृक्सूत्रयुक्तकाश्य एव कात्यायनः।
"सार्द्धकाले क्रिया भूमेः सागमा भुक्तिरिष्यते।
असार्द्धे त्वागमाभावात् क्रमात्त्रिपुरुषागता॥"
यद्विवर्षैकपुरुषभुक्तौ त्रिपुरुषभुक्तिव्यपदेशस्य फलमाह न तत्रेत्यादि। अतएव नारदः।
"अन्यायेन तु यद्भुक्तं पित्रा पूर्व्वतरैरपि।
न तच्छक्यमपाकर्त्तुं क्रमात्त्रिपुरुषागतम्॥"
अन्यायेनेत्यत्रागममिति मूलपाठिधृतपाठः। तुरुष्यर्थः। पित्रा सह पितरमादा त्रिभिरित्यर्थः। यत्तु।
"अनागमन्तु यो भुङ्क्ते बहूनब्दशतान्यपि।
चौरदण्डेन तं पापं दण्डयेदवनीपतिः॥"
इति दण्डविधायकव्यासवचनं तद्धर्म्मशास्त्राविरोधात् न तुल्यार्थपरम्। तदाह स एव।
"यत्र विप्रतिपत्तिः स्याद्धर्म्मशास्त्रार्थशास्त्रयोः।
अर्थशास्त्रार्थसुद्धृत्य धर्म्मशास्त्रार्थमाचरेत्॥"
एवमेव मूलपाणिः। वस्तुतस्तु अनागममिति दण्डविधायकवचनं स्त्रीधनतरेन्द्रधनपरम्।
"स्त्रीधनञ्च नरेन्द्राणां न कदाचन जीर्य्यते।
अनागमं सुचिरमपि वर्षशतैरपि॥"
इति स्मृतिनिषेधकनारदवचनैकवाक्यत्वात्। यत्र विप्रतिपत्तिः स्यादिति वचनस्याप्येतदुदाहरणम्। यच्चैकस्य जयेऽवधार्य्यमाणे मिश्रलब्धिरपरस्य जयेऽवधार्य्यमाणे धनलब्धिस्तत्र।
"हिरण्यभूमिलाभेभ्यो मिश्रलब्धिर्वरा यतः।
अतो यतेत तत्प्राप्ताविति वेदविदां मतम्॥"
इति याज्ञवल्क्योक्तार्थशास्त्रसुद्धृत्य क्रोधलोभविवर्জ্জित इति धर्म्मशास्त्रमवलम्ब्य व्यवहारं पश्येत्। अतएव।
"सभ्येनावश्यवक्तव्यं धर्म्मार्थसहितं वचः॥"
इति कात्यायनोक्तमिति। भवदेवस्तु व्यासवचनन्तु प्रतिवादिनोऽसन्निधाने पुरुषैकदेशभोगाभिप्रायं त्रैपुरुषिकभोगस्य तत्रापि प्रमाणत्वादित्याहुः॥

अथ भुक्तिस्वत्वापवादः।

तत्र दृहस्पतिः।
"भुक्तिश्चैपुरुषी सिद्धेदपरेषां न संशयः।
अनिहत्ते सपित्र्ये सकुल्यानां न सिद्धति॥
अस्वामिना च यद्भुक्तं यद्धेनाप्यादिकम्।
सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते॥
विवाह्य श्रोत्रियेभुक्तं राज्ञामाज्ञेत्यथैव च।
सुदीर्घेष्वपि कालेन तेषां तत्तु न सिद्धति॥"
आपणो विक्रयस्थानम्। विवाह्यो जामाता।
इति च व्यवहारतत्त्वम्॥
भुक्तिप्रदः, पुं, (भुक्तिं भोगं प्रददातीति। प्र+दा+"आतश्चोपसर्गे।" ३।१।१३६। इति कः।) सुहृत्। इति राजनिर्घण्टः॥ भोगदातरि, त्रि॥
भुग्नः, त्रि, (भुज मोटने+क्तः। "ओदितश्च।" ८।२।४५। इति निष्ठातस्य नः।) रोगादिना कुटिलीकृतः। तत्पर्य्यायः। रुग्नः २। इत्यमरः। ३।१।८१॥ वक्रः। इति भुजधात्वर्थदर्शनात्। (यथा,—
"साम्बुजौ कलुषे रक्ते भुग्ने कुञ्चितपक्ष्मणौ।
अक्षिणी पिञ्जिकापार्श्वस्पर्शपर्य्याकुलभ्रमः॥"
इति वाभटे निदानस्थाने द्वितीयेऽध्याये॥
यथा, च भट्टिः। ११।८।
"पौने भटस्योरसि वीक्ष्य भुग्नां
स्तनुत्वचः पाणिरुहान् सुमथ्या॥")
भुज, ओ भ औ वक्रगे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-अनिट्।) वक्रमिति वक्रं करोतीति नौ रूपम्। ओ, भुग्नः। भ, भुनक्ति भुक्ते वायुः। औ, भोक्ता। इति दुर्गादासः॥
भुज, ध औ आर्জ্জे। भर्জ्जे। इति कविकल्पद्रुमः॥ (रुधा०-पर०-सक०-अनिट्।) ध, भुनक्ति। औ, अभौक्षीत्। आर्জ्जं पालनम् उपभोगश्च तस्मात् पालने परस्मैपदम्। इति बोध्यम्। भुनक्ति पृथिवीं राजा पालयतीत्यर्थः। उपभोगे तु दृष्टो धनो दुःखप्रदानि भुङ्क्ते इति। दिवं मरुत्वानिव भोक्ष्यते महीमिति रघुः। एवं सुखमुपभुङ्क्ते इत्यादि च बोध्यम्। सुभोजने इत्यत्र भक्षणमात्रस्य यद्यपीह उपभोगस्य भक्षणजन्यतृप्तिजनकत्वविवक्षया सिद्धिरिति विद्यानिवासः। इति दुर्गादासः॥
भुजः, पुं स्त्री, (भुजति वक्रो भवतीति। भुज+"इगुपधज्ञेति।" ३।१।१३५। इति कः। यद्वा, भुज्यतेऽनेनेति। भुज+"हलश्चेति।" ३।३।१२१। इति घञ्। इत्यत्र काशिकोक्तेः घञ्।"भुजन्युजौ पाणयुपतापयोः।"७।३।४१। इति घञि गुणाभावः कुत्वाभावश्च निपात्यते।) तत्पर्य्यायः। बाहुः २ प्रवेष्टः ३ दोः ४। इत्यमरः। २।६।८०॥ बाहः ५ बाहा ६ भुजा ७ दोषः ८ दोषा ९। इत्यमरटीकायां भरतः॥ करः १०। इति मेदिनी। जे, १२॥ (यथा, रघुः। २।७४।
"भुजे भुजङ्गेश्वरसन्निकाशे
भूयः स भूमेर्धुरमाससञ्ज॥")
तस्य शुभाशुभलक्षणम् यथा,—
"कक्षा चाप्यदृश्या श्रेष्ठा सुगन्धिर्मृदुरोमिका।
अन्यथा अर्थहीनानामसौ निःस्वस्य रोमशौ॥
निर्म्मांसौ चैव सुपार्श्वौ स्थिरौ च विपुलौ भुजौ।

आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे ॥
निःस्वानां रोमशौ हस्तौ श्रेष्ठौ करिकरप्रभौ ।"
इति गारुडे ६६ अध्यायः ॥
(हस्तिमुखः । यथा, महाभारते ।३।२७।२२।
"नकुलस्तस्य नागस्य समीपपरिवर्त्तिनः ।
सविषाणं भुजं मूले खड्गेन निरकृन्तत ॥")
यष्टयष्टीकरणार्थे राशित्रयादूनकेन्द्रयष्टादिः ।
राशित्रयादधिकनवपर्य्यन्तषड्लवितावग्रेषः ।
नवराशिभ्योऽधिकं चेत् तदा द्वादशराशिभ्यः
शोधयेच्च भुजः स्यात् । यथा,—
"दोस्त्रिभोनं त्रिभोर्द्वि विशेष्यं रसै-
श्चक्रतोऽङ्काधिकं स्याद्भुजोनं त्रिभम् ।
कोटिरेकैकवं त्रिभिः स्यात् पदं
लम्बमन्दोच्चमध्यादयोऽप्येवमा भवेत् ॥"
इति ग्रहलाघवम् ॥
क्षेत्रस्य परिमाणविशेषः । यथा,—
"कोटिश्चतुर्थं यत्र दोर्लम्बं तत्र का श्रुतिः ।
कोटिं दोः कर्णतः कोटिश्रुतिभ्याञ्च भुजं वदे ॥
इष्टो बाहुर्यः स्यात्तत्सङ्ख्यां दिशोत्तरो बाहुः ।
चासे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः ॥
तत्कृत्योर्योगपदं कर्णः दोः कर्णवर्गयोर्विवरात् ।
मूलं कोटिः तच्छ्रुतिकृत्योरन्तरात् पदं बाहुः ॥"
इति लीलावत्यां क्षेत्रव्यवहारः ॥
भुजंकोटरः, पुं, (भुजस्य कोटर इव ।) कक्षः ।
इति हेमचन्द्रः । ५ । २५३ ॥
भुजगः, पुं, (भुजं वक्रं गच्छतीति । गम् + डः । ३ ।
२ । ३८ । इत्यत्र "खच डिद्वाच्यः ।" वार्त्तिकोक्तेः
डित् । ततः टिलोपः ।) सर्पः । इत्यमरः ।
१ । ८ । ६ ॥ (यथा, मेघदूते । ६२ ।
"तस्मिन् हित्वा भुजगवलयं शम्भुना दत्तहस्ता ।
क्रीडाशैले यदि च विचरेत् पादचारेण गौरी ॥")
भुजगदारयः, पुं, (भुजगं दारयतीति । दृ +
णिच् + ल्युः ।) गरुडः । इति राजनिर्घण्टः ॥
भुजगाभोजी, [न्] पुं, (भुजगं आ सम्यक्प्रकारेण
भुङ्क्ते इति । भुजग + आ + भुज + णिनिः ।)
मयूरः । इति राजनिर्घण्टः ॥
भुजगान्तकः, पुं, (भुजगस्य अन्तकः ।) गरुडः ।
इति राजनिर्घण्टः ॥
भुजगाशनः, पुं, (भुजगमश्नातीति । अश + ल्युः ।
भुजगः अशनं यस्येति वा ।) गरुडः । इति
त्रिकाण्डशेषः ॥
भुजङ्गः, पुं, (भुजं वक्रं गच्छतीति । गम + खच् ।
"खच डिद्वाच्य" इति वार्त्तिं डित्त्वपक्षे टिलोपः ।)
सर्पः । (यथा, रघुः । ६ । ७६ ।
"आक्रान्तपूर्व्वमिव सुप्तविषं भुजङ्गं
प्रोवाच कोशलपतिः प्रथमापराद्धः ॥")
खिङ्गः । इत्यमरः । १ । ८ । ६ । मेदिनी च ॥
(क्लीबम् । तदयथा,—
"क्लीबं वषट्च वप्रञ्च योगेष्टं नागनामकम् ॥"
नागनामकम् । नागः भुजङ्ग इत्यादि ।)
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अपरञ्च तदर्थे ।
"त्रिंशद्भागा भुजङ्गस्य गन्धपाषाणपञ्चकम् ॥
सुरतालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनात्त्रयम् ।
अन्यत्सूचीमतं ज्ञातं पक्वं विमलमञ्जनम् ॥"
इति वामटे उत्तरतन्त्रे त्रयोदशोऽध्याये ॥)
भुजङ्गघातिनी, स्त्री, (भुजङ्गं सर्पं तद्विषं वा
हन्तीति । हन + णिनिः । स्त्रियां ङीप् ।)
वृक्षविशेषः । कङ्कालिका इति ख्यातः । तत्-
पर्य्यायः । हरिः २ सर्पाक्षी ३ क्षुत्करी ४
सृहा ५ । इति ग्रन्दचन्द्रिका ॥ सर्पनाशिनी च ॥
भुजङ्गजिह्वा, स्त्री, (भुजङ्गस्य जिह्वेव आकृति-
र्यस्याः ।) महाबला । इति राजनिर्घण्टः ॥
(भुजङ्गस्य जिह्वा ।) सर्परसना च ॥ (विवरण-
मस्या महाबलाशब्दे ज्ञातव्यम् ॥)
भुजङ्गप्रयातं, क्लीबं, (भुजङ्गवत्प्रयातं गतिरिव
भङ्गीमान् ग्रन्दविन्यासो यस्य ।) द्वादशाक्षर-
पादच्छन्दः । यथा, कालिदासकृतश्रुतबोधे ।
"यदाद्यक्षतुर्थैर्लघुभिर्विवृद्धा
तथैवाष्टमं द्वादशेनादशाद्यम् ।
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥"
(अधिकन्तु छन्दःशब्दे ज्ञातव्यम् ।)
भुजङ्गभुक्, [ज्] पुं, (भुजङ्गं भुङ्क्ते इति । भुज् +
क्विप् ।) गरुडः । इति शब्दरत्नावली ॥ मयूरः ।
इत्यमरः । २ । ५ । ३० ॥ (मयूरार्थे पर्य्यायो
यथा,—
"मयूरश्चन्द्रको केकी मेघरावो भुजङ्गभुक् ।
शिखी शिखावलो वर्हो शिखण्डो नीलकण्ठकः ॥
सुकलापाङ्गः कलापी च मेघनादः कलाप्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
भुजङ्गभोजी, [न्] पुं, (भुजङ्गं भुङ्क्ते इति ।
भुज + णिनिः ।) राजसर्पः । इति हेमचन्द्रः ॥
भुजङ्गमः, पुं, (भुज कौटिल्ये + इगुपधेति कः ।
भुजः कुटिलीभवन् गच्छतीति । भुज +
गम् + "गमेः सुपि वाच्यः ।" ३ । १ । ३८८ ।
इत्यस्य वार्त्तिकात् खच् । "खचडिद्वाच्यः ।"इति
डिद्भावे टिलोपाभावः ।) सर्पः । इत्य-
मरः । १ । ८ । ६ । (यथा, रघुः । ६ । ७७ ।
"आरूढमदीनुदधीन् वितौघं
भुजङ्गमानां वसतिं प्रविष्टम् ॥")
शीसके, क्लीबं । इति राजनिर्घण्टः ॥
भुजङ्गलता, स्त्री, (भुजङ्गवत् कुटिला लतेव प्रिया
यस्याः ।) नागवल्ली । इति राजनिर्घण्टः ॥
भुजङ्गहा, [न्] पुं, (भुजङ्गं हन्तीति । हन् +
क्विप् ।) गरुडः । इति त्रिकाण्डशेषः ॥
भुजङ्गाक्षी, स्त्री, (भुजङ्गस्य अक्षीव पृथ्वं यस्याः ।
"अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।
गौरादित्वात् ङीष् ।) राजा । इत्यमरः ।
२ । ४ । ११५ ॥ (राजा भेदनाद इति शब्दे ।
तथास्याः पर्य्यायान्तरम् ।
"नाकुली सरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भुजङ्गाक्षः, पुं, (भुजङ्गस्य अक्षीव अक्षि यस्य ।)
नागकेशरः । इति शब्दमाला सर्पनामके,
त्रि ॥
भुजङ्गशिरः, [स्] क्लीं, (भुजस्य शिर इव ।)
स्कन्धः । इत्यमरः ॥ २ । ६ । ७८ ॥
भुजा, स्त्री, (भुज + टाप् ।) बाहुः । करः । इति
मेदिनी । जे, १३ ॥ (यथा, शिशुपालवधे ।७।७१।
"अविरतकुसुमावचायखेदा
न्निहितभुजालतयैकयोपकण्ठम् ॥")
भुजाकण्टः, पुं, (भुजायाः करस्य कण्ट इव ।)
हस्तनखः । इति हेमचन्द्रः ॥
भुजादलः, पुं, (भुजाया बाहोर्दल इव ।) हस्तः ।
इति त्रिकाण्डशेषः ॥
भुजान्तरं, क्लीं, (भुजयोरन्तरं मध्यम् ।) क्रोड़म् ।
इत्यमरः ।२।६।७७॥ (वक्षः । यथा, रघुः।३।५४।
"दिलीपसूनोः स बृहद्भुजान्तरं
प्रविश्य भीमासुरशोणितोक्षितः ।
पपात नागादिव पूर्व्वभाजुगः
कृतूद्वहेनेव मनुष्यशोणितम् ॥"
भुजस्यान्तरं प्रभेदः ।) हस्तप्रभेदश्च ॥
भुजिः, पुं, (भुनक्ति भुङ्क्ते वा सर्व्वानिति ।
भुज + "भुजेः किच्च ।" उणा० ४ । १४९ । इति
इः । स च कित् । सर्व्वभक्षकत्वादस्य तथा-
त्वम् ।) वह्निः । इत्युणादिकोषः ॥ (भुज + भावे
इः । भोगः । यथा, ऋग्वेदे । ८ । ६१ । ६ ।
"आसवं सवितुर्यथा भगस्येव भुजिं हुवे ।
व्यश्विं सप्तद्रवासपम् ॥"
"सवितुः प्रेरकस्य देवस्य सवं यथा प्रसवमिव
भगस्येव भुजिं भगाख्यस्य देवस्य भोगमिव च
सप्तद्रवासपमश्विं आह्वये आह्वयामि ।" इति
तद्भाष्ये सायनः ॥ * ॥ भोक्तरि, त्रि । यथा,
ऋग्वेदे । ८ । ८ । २ ।
"भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥"
"हे भुजी हविषां भोक्तारौ ।" इति तद्भाष्ये
सायनः ॥)
भुजिष्यः, पुं, (भुङ्क्ते खाम्युच्छिष्टमिति भुज्यते
इति वा भुज + "रुचिभुजिभ्यां किष्यन् ।"
उणा० ४ । १७८ । इति किष्यन् ।) खतन्त्रः ।
इत्यमरः । दासः । इति मेदिनी । षे, ६८ ॥
(यथा, माघे । १५ । ६१ ।
"किमहो नृपाः सममसौभि-
रुपपतिसुतेन यदुभिः ।
वधमभिहत भुजिष्यमसुं
सह चानया स्वविरराजकन्यया ॥")
रोगः । इति संक्षिप्तसारोद्धादिवृत्तिः ॥
भुजिष्या, स्त्री, (भुजिष्य + टाप् ।) दासी ।
(यथा, रघुः । ६ । ५३ ।
"अथाङ्गदाश्लिष्टभुजं भुजिष्या
हेमाङ्गदं नाम कलिङ्गनाथम् ।
आसेदुषीं सादितयूथपर्णं
बालामवालेन्दुसखीं बभाषे ॥")
मल्लिका । इति मेदिनी । ये, ६६ ॥

भुज्युः, पुं, (भुज्यतेऽनेति। भुज भक्षणे + "भुजि स्पृभ्यां युक्त्युकौ।" उणा० ३। २१। इति युक्।) भाजनम्। इत्युणादिकोषः। २। २०३। भाजनम्। (भुङ्क्ते सर्व्वानिति। भुज + कर्त्तरि युक्।) अग्निः। इति संक्षिप्तसारोणादिवृत्तिः॥ (स्वनामख्यातराजविशेषः। यथा, ऋग्वेदे। ४। २७। ४।

"ऋजिप्या ईमिन्द्रावतो न भुज्युं श्येनो जभार दृहतो अधिज्मोः॥"

भुनक्ति पालयतीति। भुज पालने + युक्। रक्षके, त्रि। यथा, ऋग्वेदे। ८। २२। २।

"पूर्व्यामहं सुहवं पुरस्याहं भुज्युं वाजेषु पूर्व्यम्॥"

"भुज्युं भुजपालने सर्व्वस्य रक्षकम्॥" इति तद्भाष्ये सायणः॥)

भुञ्जन्, [तृ] त्रि, (भुज् + शतृ।) भोगकर्त्ता। भुजधातोः शतृप्रत्ययनिष्पन्नोऽयम्॥

भुञ्जानः, पुं, (भुज् + शानच्।) भोगकर्त्ता। यथा,—

"भुञ्जानो वर्द्धयेत् पापमसद्यं संवहि हुवन्॥"

इति प्रायश्चित्ततत्त्वम्॥

(तथा च।

"अग्नितप्तोदकं युक्त्वा भुञ्जानश्चान्तरा पिबेत्॥"

इति सुश्रुते उत्तरस्थाने। ३६ अ, ३।)

भुरिक्, [ज्] स्त्री, (भरति सर्व्वं धरतीति। भृञ् + "भृञ उच्च।" उणा० २। ७२। इति इजिः। धातोरुकारान्तादेशः।) पृथिवी। इत्युणादिकोषः॥ (द्विवचनान्तत्वे। बाहू। द्यावापृथिव्यौ च। यथा, ऋग्वेदे। ४। २। १४।

"रथं न क्रन्तो अपसा भुरिजो ऋतं येमुः सुध्य आशुषाणाः॥"

"भुरिजोः विभृतः कर्म्मकरणसामर्थ्यं पदार्थान् वेति भुरिजौ बाहू तयोः। यद्वा, भुरिजोः देवान् मनुष्यांश्च बिभृत इति भुरिजौ द्यावापृथिव्यौ।" इति तद्भाष्ये सायणः॥)

भुवनं, क्ली, (भवन्त्यस्मिन् भूतानीति। भू + "भूसृधूञ्सृजिभ्यश्छन्दसि।" उणा० २। ८०। इत्यत्र बहुलवचनाद्भाषायामपि प्रयुज्यते।" इत्युज्ज्वलदत्तोक्त्या क्यन्।) जगत्। (यथा, भट्टिः। १। १।

"गुरुर्व्वेरं भुवनहितच्छलेन यं सनातनः पितरमुपागमत् स्वयम्॥")

सलिलम्। गगनम्। जलः। इति मेदिनी। ने, १०२॥ चतुर्दशभुवनानि यथा,—

"चतुर्दशविधं ह्येतद् भूतसर्गं प्रकीर्त्तितम्। भूर्भुवः स्वर्महश्चैव जनश्च तप एव च। सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः। जम्बूः प्लाक्षः कुशः क्रौञ्चः शाल्मलो मेदपुष्करः। सप्तद्वीपाः प्रधानानि क्षुपद्वीपेषु संयुताः॥ लवणः क्षीरसंज्ञश्च घृतोदो दधिसंज्ञकः। सुरोदेक्षुरसोदौ च स्वादूदः सप्तमो भवेत्। चत्वारः सागराः ख्याताः पुष्करिण्यश्च ताः स्मृताः॥ उत्तराः कुरवो रम्यं वर्षं हैमवतं तथा। भद्राश्वं केतुमालञ्च तथा वर्षमिलावृतम्॥ भारतं हरिवर्षञ्च तथा किंपुरुषाह्वयम्। एतान्यष्टौ तु वर्षाणि पुण्यानि कथितानि तु॥ इन्द्रद्युम्नः कसेरुश्च ताम्रवर्णो गभस्तिमान्। नागवीथी तथा सौम्यो गन्धर्व्वो वारुणस्तथा॥ सागराख्यस्तु नवमो भेदभारतवार्षिकः। इदन्तु भारतं वर्षं कर्म्मभूमिरिति स्मृतम्॥ शेषाणि द्वीपवर्षाणि भोगस्थानानि सन्त्यपि। भागीरथी पावनी च इन्दिनी हादिनी तथा॥ सीता वंक्षुश्च सिन्धुश्च सप्त गङ्गाः प्रकीर्त्तिताः। सुप्रभा काञ्चनी चैव विशाला सुमनोह्वया॥ सरस्वतोयनादा च सुवेणुर्विमलोदका। एता गङ्गास्तु विख्याताः सप्त पुण्यप्रदाः शुभाः॥ हिमवान् हेमकूटश्च निषधो नीलपर्व्वतः। श्वेतश्च शृङ्गवाञ्छैलस्तमाच्चत्वारः सप्तमादगः॥ महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि। विन्ध्यश्च पारियात्रश्च कैलासो मन्दरस्तथा॥ लोकालोको महांस्तेषु तथैवोत्तरमानसः। एते विंशतिविख्याताः पर्व्वताः सप्तसंख्यकाः वराः॥ अतलं सुतलञ्चैव वितलञ्च गभस्तिमत्। महातलं रसातलं पातालं सप्तमं स्मृतम्॥ कृष्णभौमं शिलाभौमं पातालं नीलशक्तिकम्। रक्तपीतश्वेतवर्ण्यभौमानि च भवन्त्यपि॥ पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम्। सुविस्तरं तानि कथ्यन्ते भुवनानि चतुर्दश॥"

इति वह्निपुराणम्॥

(भूतजातम्। यथा, ऋग्वेदे। १। १५७। ५।

"युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः।"

तथा च वाजसनेयसंहितायाम्। ६। ५।

"यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म्म साविषत्।" *। भावनम्। यथा, ऋग्वेदे। १०। ८८। १।

"तस्य भर्म्मणे भुवनाय देवा धर्म्मणे कं स्वधया पप्रथन्त॥" *। पुं, सुनिविशेषः। यथा, महाभारते। १३। २६। ८।

"नितम्बभूर्भुवनो धौम्यः शुतानन्दोऽक्षतव्रणः॥")

भुवनको(ग्र)ष, पुं, (भुवनस्य कोष इव।) भूगोलः। (अस्य विवरणं श्रीभागवते पञ्चमस्कन्धे। १६। १७। १८। अध्याये द्रष्टव्यम्॥ तथाच।

"जम्बुप्लक्षशाल्मलकुशक्रौञ्च-शाकपुष्करसंज्ञाः सप्त द्वीपाः। लवणेक्षुसुरासर्पिर्दधिदुग्धस्वच्छोदकसंज्ञैः परिखादिगुणैः।

सप्तसप्तभिर्वलयाकारैस्ते द्वीपाः परिधिष्ठिताः॥ योऽसौ मनुपुत्रः प्रियव्रतो नाम स सप्तद्वीपाधिपतिर्बभूव। तस्य ह्यग्नीध्रादयो दश पुत्रा बभूवुः॥ ते ह्यग्नयः प्रव्रजिताः। अग्निदानां सप्तानां सप्त द्वीपाः पिता दत्ताः। तत्र जम्बुद्वीपाधिपतेराग्नीध्रस्य नव पुत्रा जाताः॥ नाभिः किंपुरुषश्चैव हरिवर्षः इलावृतः। रम्यो हिरण्मयश्चैव कुरुभद्रश्च केतुमान्॥ नववर्षाणि विभज्य पुत्रेभ्यः पित्रा दत्तानि वर्षं प्रविशता। अग्नीध्रोऽयं हिमाह्वयम्। यस्याधिपतिर्नाभिः ऋषभः पुत्रो बभूव॥ ऋषभाद्भरतो भरतेन चिरकालं धर्म्मेण पालितत्वादिदं भारतं वर्षमभूत्। इलावृतस्य मध्ये मेरुः सुवर्णमयचतुरशीतिसहस्राणि योजनानि तस्योच्छ्रायः। षोड्यसहस्रमध्यधस्ताद्वगाढः तद्विगुणो मूलविस्तारः॥ तस्मध्ये ब्रह्मणः पुरी। तस्यामिन्द्रस्य चामरावती। आग्नेय्यामग्नेर्जोवती। याम्यां यमस्य संयमनी। नैर्ऋत्यां निर्ऋतेर्भयंकरी। वारुण्यां वरुणस्य विभावरी। वायव्यां वायोर्गन्धवती। उदीच्यां सोमस्य विभावरीति नववर्षान्वितं जम्बूद्वीपं पुण्यपर्व्वतैः पुण्यनदीभिरन्वितम्॥ किंपुरुषादीन्यष्टवर्षाणि पुण्यवतां भोगस्थानानि साक्षाद्भारतवर्षमेकं कर्म्मभूमिर्ह्यातुर्वर्ण्ययुतम्॥

तत्रैव कर्म्मभिः स्वर्गं क्षीते प्राप्नुवन्ति मानवाः। मुक्तिस्थानञ्चैव निष्कामैः प्राप्यते ज्ञानकर्म्मभिः॥ अधोगतिमितो विप्र! यान्ति ये पापकारिणः। ये पापकारिणस्तान् वै पातालतले नरके कोटिसमन्वितान्॥ अथ सप्तकुलपर्व्वताः कथ्यन्ते। माहेन्द्रः। मलयः शुक्तिमान् ऋक्षवान्। सह्यपर्व्वतः विन्ध्यः पारियात्रः। इत्येते भारते कुलपर्व्वताः॥ नर्म्मदासुरसाऋषिकुल्याभीमरथीकृष्णावेणीतुङ्गभागतास्रपर्णी इत्येताः सप्त नद्यः गङ्गायमुनागोदावरीतुङ्गभद्राकावेरीसरयूरित्येता महानद्यः पापघ्न्यः॥

जम्बुनाम्ना च विख्यातं जम्बुद्वीपमिदं शुभम्। लक्षयोजनविस्तीर्णमिदं श्रेष्ठं तु भारतम्॥ अन्यद्वीपादिपुण्या जनपदाः निष्कामा ये स्वधर्म्मेण हरिमिष्ट्वा यजन्ति ते तत्र निवसन्ति अधिकारक्षयात् मुक्तिं च प्राप्नुवन्ति॥ जम्बाद्याः स्वादूदकान्ताः सप्त पयोधयः। ततः परा हिरण्मयी भूमिः। ततो लोकालोकपर्व्वतः एष भूर्लोकः॥ अस्योपरि अन्तरिक्षलोकः खेचराणां रम्यस्तदूर्ध्वं स्वर्गलोकः॥ स्वर्गस्थानं महापुण्यं प्रोच्यमानं निबोध मे। भारते कृतपुण्यानां देवानामपि चालयम्॥ मध्ये पृथिव्यामद्रीन्द्रो भास्वान् मेरुर्हिरण्मयः। योजनानां सहस्राणि चतुरशीतिसंस्कृतः॥ प्रविष्टः षोड्यधस्ताद्धरण्यां धरणीधरः। तावत्प्रमाणा पृथिवी पूर्व्वतश्च समन्ततः॥ तस्य शृङ्गत्रयं सूर्ध्नि स्वर्गो यत्र प्रतिष्ठितः। नानाद्रुमलताकीर्णं नानापुष्पोपशोभितम्॥ मध्यमं पश्चिमं पूर्व्वं मेरोः शृङ्गाणि वीर्य्यवै। मध्यमं स्फाटिकं शृङ्गं वैदूर्य्यमणिकामयम्॥ इन्द्रनीलमयं पूर्व्वं माणिक्यं पश्चिमं स्मृतम्। योजनानां सहस्राणि नियुतानि चतुर्दश॥ उत्क्रान्तं मध्यमं शृङ्गं स्वर्गो यत्र त्रिविष्टपः। अप्रभान्तरितं शृङ्गं सूर्ध्नि कृत्वातिष्ठितम्।

पूर्व्वसुतरश्मङ्गानां अन्तरं मध्यमस्य च ।
त्रिविष्टपो नाकपृष्ठे तत्रस्था: सन्ति निर्वृता:।२४॥
आनन्दोऽथ प्रमोदश्च स्वर्गशृङ्गे तु मध्यमे ।
श्वेतश्च पौष्टिकश्चैव उपशोभनमन्यौ ॥ २५ ॥
आह्लाद: स्वर्गराजा वै स्वर्गशृङ्गे तु पश्चिमे ।
निर्ममो निरहङ्कार: सौभाग्यज्ञातिनिर्म्मल:॥२६॥
स्वर्गाश्चैव द्विजश्रेष्ठ ! पूर्व्वशृङ्गे समाश्रिता: ।
एकविंशानि स्वर्गा वै निर्दिष्टा मेरुमूर्द्धनि ॥२७॥
अहिंसादानकर्त्तारो यज्ञानां तपसां तथा ।
तत्तेषु निवसन्ति स्म जना: क्रोधविवर्जिता:॥२८॥
जलप्रवेशे चानन्दं प्रमोदं वह्निसाहसे ।
भृगुप्रपाते सौख्यं च रत्नं चैवास्य निर्मलम् ॥२९॥
अनाशके तु संन्यासे स्तुतो गच्छेत्त्रिविष्टपम् ।
क्रतुयाजी नाकपृष्ठं अग्निहोत्री च निर्वृतिम् ॥ ३० ॥
तडागकूपकर्त्ता च लभते पौष्टिकं दिव: ।
सुवर्णदायी सौभाग्यं लभन् स्वर्गतप:फलम् ॥३१॥
शीतकाले महावह्निं प्रज्वालयति यो नर: ।
सर्व्वसत्त्वहितार्थाय स्वर्गं सोष्मरसं लभेत् ॥३२॥
हिरण्यगोप्रदाने हि निरहङ्कारमाप्नुयात् ।
भूमिदानेन शुद्धेन लभते शान्तिकं पदम् ॥३३॥
रौप्यदानेन स्वर्गे तु निर्मलं लभते नर: ।
अश्वदानेन पुण्याढ्यं कन्यादानेन मङ्गलम् ॥३४॥
द्विजेभ्यस्तर्पणं कृत्वा दत्वा वस्त्राणि भक्तित: ।
श्वेतं तु लभते स्वर्गं यत्र गत्वा न शोचते ॥३५॥
कपिलागोप्रदानेन परमार्थे महीयते ।
गोवृषस्य प्रदानेन स्वर्गे मन्मथमाप्नुयात् ॥३६॥
माघमासे सरित्स्नायी तिलधेनुप्रदस्तथा ।
छत्रोपानद्दाता च स्वर्गे यात्युपशोभनम् ॥३७॥
देवतायतनं कृत्वा द्विजसुश्रूषकस्तथा ।
तीर्थयात्रापरश्चैव स्वर्गराज्ये महीयते ॥ ३८ ॥
एकान्नभोजी यो मर्त्यो नक्तभोजी च नित्यश: ।
उपवासी त्रिरात्राद्ये: शान्त: स्वर्गं शुभं लभेत् ॥ २७ ॥
सरित्स्नायी जितक्रोधो ब्रह्मचारी दृढव्रत: ।
निर्मलं स्वर्गमाप्नोति यथाभूतहिते रत: ॥३०॥
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात् ।
येन येन हि भावेन यद्यद्दानं प्रयच्छति ॥३१॥
तत्तत्स्वर्गमवाप्नोति यद्यदिच्छति मानव: ।
चत्वारि अतिदानानि कन्या गौर्भू: सरस्वती॥३२॥
नरकाद्दुस्तरन्त्येते जपवाहनदोहनात् ।
यस्तु सर्व्वाणि दानानि ब्राह्मणेभ्य: प्रयच्छति ॥ ३३ ॥
संप्राप्य न निवर्त्तेत स्वर्गं शान्तमनामयम् ।
शृङ्गे तु पश्चिमे यत्र ब्रह्मा तत्र स्थित: स्वयम्॥३४॥
पूर्व्वशृङ्गे स्वयं विष्णु: मध्ये चैव शिव: स्थित: ।
अत: परं तु विप्रेन्द्र ! स्वर्गाध्वानमिमं शृणु ॥३५॥
विमलं विपुलं शुद्धसुपर्ण्युपरिसंस्थितम् ।
प्रथमे तु कुमारास्तु द्वितीये मातर: स्थिता:॥३६॥
तृतीये सिद्धगन्धर्वा तुर्य्ये विद्याधरा द्विज ॥
पञ्चमे नागराजा च षष्ठे तु विनतासुत: ॥३७॥
सप्तमे दिव्यपितरो धर्म्मराजस्त्वथाष्टमे ।
नवमे तु तथा दक्ष आदित्यो दशमे पथि ॥३८॥
भूर्लोकाच्छतसाहस्राद्दूरे चरति भास्कर: ।
योजनानां सहस्रे द्वे विष्टम्भनसमं तत: ॥ ३९ ॥
त्रिगुणं परिणाहेन सूर्य्यबिम्बं प्रमाणत: ।
सोमपूर्य्यां विभावर्य्यां मध्याह्ने चार्य्यमा यदा ।
महेन्द्रस्यामरावत्यां तदा तिष्ठति भास्कर: ॥५०॥
मध्याह्ने त्वमरावत्यां यदा भवति भास्कर: ।
तदा संयमने याम्ये तत्रोदेति तु प्रहृष्यते ॥५१॥
मेरुं प्रदक्षिणं कुर्व्वन् भात्येव सविता सदा ।
ध्रुवाधारस्तथोत्तिष्ठन् वालिखिल्यादिभि:
स्तुत: ॥ ५२ ॥

इति श्रीनरसिंहपुराणे भूवनकोशे त्रिंशोऽध्याय: ॥ ३० ॥)

भुवन्यु:, पुं, (भवतीति। "कन्युच् त्रिषेच्च।" उणा० ३।५१। इति चकारात् भूधातोरपि कन्युच्।) सूर्य्य:। वह्नि:। चन्द्र:। इति मेदिनी। वे, ६८॥ प्रभु:। इत्युणादिकोष:॥

भुवर्लोक:, पुं, (भुवश्चासौ लोकश्चेति।) भूरादिसप्तलोकान्तर्गतद्वितीयलोक:। यथा,—

"भूमिसूर्य्यान्तरं यच्च सिद्धादिसुनिसेवितम्।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम!॥"

इति विष्णुपुराणे। २ अंशे ७ अध्याय:॥

(यथा च भागवते। २।५।८।

"भूर्लोक: कल्पित: पद्भ्यां भुवर्लोकोऽस्य नाभित:।
हृदा स्वर्लोक उरसा महर्लोको महात्मन:॥")

भुव:, [स्] य, (भवतीति। भू+"भूरञ्जिभ्यां कित्।" उणा० ४।२१६। इति असुन् स च कित्।) आकाश:। इति हेमचन्द्र:॥ (महाव्याहृतिभेद:। यथा, मनु:। २।७६।

"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापति:।
वेदत्रयान्निरदुहत् भूर्भुव: स्वरितीति च॥")

भुवि:, [स्] स्त्री, (भवतीति भवत्यस्मिन् रत्नादीनि वा। भू+"भुव: कित्।" उणा० २।११३। इति इसिन्। स च कित्।) सप्तद्व:। इत्युणादिकोष:॥

भू, सत्तायाम्। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-अक०-सेट्।) सत्ताया द्विविधा। उत्पत्तिर्विद्यमानता च। भवति मनुष्योऽथवा विष्णु:। इति दुर्गादास:॥

भू, क शुद्धिचिन्तयो:। मिश्रणे। इति कविकल्पद्रुम:। (चुरा०-पर०-सक०-सेट्।) क, ह्लादवद्भावयति द्विष: सर्व्वान्। जयोऽर्या:। इति दुर्गादास:॥

भू, क ड प्राप्तौ। इति कविकल्पद्रुम:॥ (चुरा०-आत्म०-सक०-सेट्।) क ड, भावयते। इति दुर्गादास:॥

भू, ञ प्राप्तौ। इति कविकल्पद्रुम:। (भ्वा०-उभ०-सक०-सेट्।) ञ, भवति भवते घनं धीर:। भवत्येव सत्तायां प्राप्तिसम्पन्नजन्मक्षिति भृङ्गम:। भवते दुरितक्षयं यथोक्तक्रतुभिर्भावयते च नाकलोकमिति हलायुध:। केचिदसं

भावात्मनेपदिनं मत्वा प्राप्तौ परस्मैपदं सत्तार्थं स्वैवानेकार्थत्वात् समाधत्ते। इति दुर्गादास:॥

भू, य, (भू+क्विप्।) रसातलम्। इति हेमचन्द्र:॥

भू:, स्त्री, (भवत्यस्मिन्निति। भू+अधिकरणे क्विप्।) पृथिवी। इत्यमर:। २।१।२॥ (यथा, मनु:। ७।६।

"न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम्॥")

यथा च वैद्यकरत्नमालायामस्या: पर्य्याय:।

"भूर्भूमि: पृथिवी पृथ्वी मेदिनी वसुधावनि:।
क्षितिरुर्व्वी मही चौवी आ धरा कुर्वसुन्धरा॥")

स्थानमात्रम्। इति मेदिनी। मे, १॥ (यथा, भागवते। ६।४।३१।

"यच्छक्तयो वदतां वादिनां वै
विवादसंवादसुखो भवन्ति॥"

यज्ञाग्नि:। इति जटाधर:॥

भूक, क्ली, (भवतीति। भू+"स्फायितञ्चिवञ्चिलूषिपूषिभ्य: कक्।" उणा०३।४१। इति कक्।) छिद्रम्। काल:। इति मेदिनी। के, ३०॥

भूक:, पुं, (भू+कक्।) अन्धकार:। इति शब्दमाला॥

भूकदम्ब:, पुं, (भुवि कदम्ब इव।) अलम्बुषवृक्ष:। इति रत्नमाला॥ कोकसीम। इति भाषा॥

भूकदम्बक:, पुं, (भूकदम्ब+संज्ञायां कन्।) यवानी। इति राजनिर्घण्टु:॥ (विष्टतिविशेषोऽस्य यवानीशब्दे ज्ञातव्य:।)

भूकन्द:, पुं, (भुव: पृथिव्या: कन्द इव।) महाश्रावणिका। इति राजनिर्घण्टु:॥ भुलकुड़ी। इति भाषा॥

भूकम्प:, पुं, (भुव: पृथिव्या: कम्प:।) भूमिकम्पनम्। स च अद्भुतविशेष:। यथा, अद्भुतसागरे।

"मेघे दृष्टिक्रमे गज: प्रचलति वासादिभि:
कथ्यते
चापे मौनकुलीरमे च दशमे संक्षं चलेत् कच्छप:।
यूके कुम्भधरे नृसिंहमिथुने कन्याऽन्गे पन्नग-
स्वेषामेकतमो यदि प्रचलति क्षौणी तदा
कम्पते॥

"कच्छपे मरणं ज्ञेयं मरुच्चापि पन्नगे।
सर्व्वत्र सुखदश्चैव पृथिव्यां चलिते गजे॥
प्रथितनरेश्वरमरणं असनाग्न्यम्बुमारुतयो:।
क्षुद्भयमतिवृष्टिभिरपि पीड्यन्ते जनाश्चापि॥
त्रिचतुर्थपञ्चमदिने मासे पक्षे त्रिपञ्चके।
भवति यदा भूकम्प: प्रधानवृषनाशनं कुरुते॥"

स च भूमिजोत्पातविशेष:। यथा,—

"चराचरभयं भौमं भूकम्पमपि भूमिजम्।
जलाशयानां वैक्लव्यं भौमन्तदपि कीर्त्तितम्॥
भौमं जाप्यफलं ज्ञेयं चिरेण परिपच्यते।"

इति ज्योतिस्तत्त्वम्॥

भूकर्व्वुदारक:, पुं, क्षत्रविशेष:। छोटानागपुरा इति हिन्दी भाषा। तत्पर्य्याय:। क्षुत्रसेना-

न्तकः २ भूग्रेलुः ३ लघुग्रेलुः ४ लघुपिच्छिलः५ लघुग्रीतः ६ सूक्ष्मफलः ७ लघुभूतद्रुमः ८ भूकर्न्नुदारः ६। अस्य गुणाः। मधुरत्वम्। क्रमिशूलनाशित्वम्। वातप्रकोपणत्वम्। किञ्चित् ग्रीतत्वम्। सर्व्वमारकत्वञ्च। इति राजनिर्घण्टः॥

भूकलः, पुं, (भुवः पृथिव्याः कलः।) दुर्विनीताश्वः। इति राजनिर्घण्टः॥

भूकश्यपः, पुं, (भुवि पृथिव्यां कश्यप इव भुवः कश्यप इति वा।

"तदस्य कश्यपस्यांशैर्लक्षिता कश्यपोपमः।
वसुदेव इति ख्यातो गोप्ता तिष्ठति भूतले॥"

इति हरिवंशग्रीवचनेनास्य कश्यपांशसम्भूतत्वात् तथात्वम्।) वसुदेवः। इति त्रिकाण्डग्रेषः॥

भूकाकः, पुं, (भुवि ख्यातः काकः।) खल्पकङ्कः। क्रौञ्चः। नीलकपोतः। इति शब्दरत्नावली॥

भूकुक्षी, स्त्री, (भुवि कुक्षीव।) भूपाटली। इति राजनिर्घण्टः॥

भूकुष्माण्डी, स्त्री, (भुवि कुष्माण्डीव।) विदारी। इति राजनिर्घण्टः॥

भूकेग्रः, पुं, (भुवः पृथिव्याः केग्र इव।) ग्रैवलः। वटः। इति मेदिनी। ग्रे, २६॥

भूकेग्रा, स्त्री, (भूकेग्र+टाप्।) राज्ञसी। इति शब्दरत्नावली॥

भूकेग्री, स्त्री, (भूकेग्र+स्त्रियां ङीप्।) अवल्गुजः। इति मेदिनी। ग्रे, २०॥

भूक्षित्, पुं, (भुवं क्षितिं क्षियोतीति+क्षिद्+क्विप्।) शूकरः। इति त्रिकाण्डग्रेषः॥

भूखर्ज्जूरी, स्त्री, (भूसंलग्ना खर्ज्जूरी। शाकपार्थिवादिवत् समासः।) क्षुद्रखर्ज्जूरी। तत्पर्य्यायः। भूयुक्ता २ वसुधाखर्ज्जूरिका ३ भूमिखर्ज्जूरी ४। अस्या गुणाः। मधुरत्वम्। ग्रिग्रिरत्वम्। दाहपित्तहरत्वञ्च। इति राजनिर्घण्टः॥

भूगरं, क्लो, (भुवः पृथिव्या गरम्।) विषम्। इति राजनिर्घण्टः॥

भूगर्भः, पुं, भवभूतिः। स च मालतीमाधवादिनाटककर्त्ता। इति जटाधरः॥ (भूः सर्व्वभूताश्रयभूता पृथ्वी गर्भे कुक्षौ यस्येति। विष्णुः। यथा, महाभारते। १३। १४८। २१।

"हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः॥")

भूगोलः, पुं, (भूर्गोलो मण्डलमिव।) भुवनकोषः। (यदुक्तं सूर्य्यसिद्धान्ते।

"मध्ये समन्तादण्डस्य भूगोलो बोम्नि तिष्ठति।
बिभ्राणः परमां ग्रक्तिं ब्रह्मणो धारणात्मिकाम्॥")

तस्य विवरणम्। यथा,—

"प्रकृतेस्तु महान् जातोऽहङ्कारो महतः पुनः।
तस्माच्चापि ग्रब्दाद्यात् ग्रब्दः सूर्य्योऽथ रूपकम्॥
रसो गन्धश्च पञ्चैव गुणा नाम प्रकीर्त्तिताः।
पञ्चेमानि महाभाग! महाभूतानि संग्रहात्।
तेभ्य एव प्रजातानि सर्व्वाणि गुणवन्ति च॥
भूमिरापस्तथा वायुरग्निराकाग्रमेव च।
गुणोत्तराणि सर्व्वाणि तेषां भूमिः प्रधानतः॥
ग्रब्दः स्पर्ग्रश्च रूपञ्च रसो गन्धश्च पञ्चमः।
भूमावेते गुणाः प्रोक्ता ह्यन्ति परतः क्रमात्॥
चत्वारोऽप्सु गुणा ब्रह्मन्! गन्धस्तत्र न वर्त्तते।
ग्रब्दः स्पर्ग्र रूपञ्च त्रय एव हि तेजसि॥
ग्रब्दः स्पर्ग्रोऽथ वायोस्तु आकाग्रे ग्रब्द एव हि।
एते पञ्च गुणाः प्रोक्ता महाभूतेषु पञ्चसु॥
वर्त्तन्ते सर्व्वभूतेषु येषु लोकाः प्रतिष्ठिताः।
अन्योन्यं नातिवर्त्तन्ते सम्यग्भवति वै तदा॥
यदा तु विषमं भावमाविग्रन्ति परस्परम्।
तदा तेषां विनाग्रः स्याद्देहिनां नान्यथा द्विज!॥
अनुपूर्ब्बं विनग्यन्ति जायन्ते चापि सर्व्वग्रः।
सर्व्वाग्यप्रतिमेयानि तदेषां रूपमैग्वरम्॥
तत्र तत्र हि दृग्यन्ते धातवः पाञ्चभौतिकाः।
तेषां मनुग्यास्तर्केण प्रमाणानि प्रचक्षते॥
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।
प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम्॥"

जम्बूद्वीपं प्रवक्ष्यामि वात्स्यायन महामुने!। परिमण्डलो महाभाग! द्वीपोऽसौ चक्रवत् स्थितः।

नदीगिरिप्रतिच्छन्नो विविधैः पत्तनैरपि॥
वर्षैर्जनपदैर्वृक्षैस्तथा पुण्यफलोपगैः।
लवणेन समुद्रेण समन्तात् परिवारितः॥
प्रागायता महाभाग! वर्द्धते रत्नपर्व्वताः।
अवगाढ़ा उभयतः सागरौ पूर्व्वपग्चिमौ॥
हिमवान् हेमकूटग्च निषधग्च नगोत्तमः।
नीलः ग्वेतः ग्रृङ्गवांग्च रत्नधातुविचित्रिताः॥
अयुतानि योजनानि उच्छ्रायास्तेषु कीर्त्तिताः।
पृथुत्वे च द्विसाहस्रयोजनास्ते च पर्व्वताः॥
तेषामन्तरविष्कम्भे नवसाहस्रयोजनः।
वर्षे वर्षे प्रमाणन्तु वर्षाणि त्रीणि दक्षिणे॥
तत्र पुण्या जनपदास्तेषु वर्षेषु तापस!।
वसन्ति तेषु सर्व्वाणि सत्त्वानि विविधानि च॥
दक्षिणे भारतं वर्षमुत्तरे लवणोदधेः।
कूलादेव महाभाग! तस्य सीमा हिमालयः॥
ततः किंपुरुषं वर्षं हेमकूटादधस्ततः।
हरिवर्षं ततो ज्ञेयं निषधोऽवधिरुच्यते॥
एवमेवोत्तरे त्रीणि वर्षाणि च तपोधन!।
कुरुवर्षं त्विन्दुकूलात् ग्रृङ्गवानवधिः स्मृतः॥
हिरण्मयं ततो वर्षं ग्वेतावधि निगद्यते।
रम्यकग्च ततो वर्षं नीलस्तस्यावधिः स्मृतः॥
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु।
प्रागायतो महाभाग! माल्यवान्नाम पर्व्वतः॥
पग्चिमे तु तयोर्वास्ते पर्व्वतो गन्धमादनः।
पूर्व्वे सहस्रकूलात्तु भद्राग्वं नाम वर्षकम्॥
माल्यवानवधिस्तस्य केतुमालग्च पग्चिमे।
गन्धमादनसीमानं नवसाहस्रयोजनम्॥
परिमण्डलस्तयोर्मध्ये मेरुः कनकपर्व्वतः।
आदित्यतरुणाभासो विधूम इव पावकः॥
लक्षयोजन उच्छ्रायो मूर्द्ध्नि द्वात्रिंग्त एव च।
योजनानां सहस्राणि मूले चापि तु षोड़ग्॥
विस्तृतः स महाभाग! भूमिष्ठं मूलमस्य तु।
प्रविग्यन्तर्भूम्यां वै षोड़ग्यैव सहस्रकम्॥
ऊर्द्धमन्तग्च तिर्य्यक् च लोकानावृत्य तिष्ठति।
तस्य चैलावृतं वर्षं सर्व्वतः परिकीर्त्तितम्॥
विहगः सुमुखो यस्तु सुपर्णस्यात्मजः किल।
स वै विचिन्तयामास सौवर्णान् पग्ये वायसान्॥
मेरुरुत्तममध्यानामवराणाञ्च पक्षिणाम्।
अविग्येषकरो यस्मात्तस्मादेनं त्यजाम्यहम्॥
तमादित्योऽनुपर्य्येति सततं ज्योतिषां वरः।
नक्षत्राग्च ग्रुक्लत्वो वायुश्चैव प्रदक्षिणम्॥
स पर्व्वतो महाभागः! दिव्यपुष्पसमन्वितः।
भवनैरावृतः सर्व्वैर्नानारूपमयैः ग्रुभैः॥
तत्र देवगणा ब्रह्मन्! गन्धर्व्वाप्सरसाः।
अक्षरोगणसंयुक्ताः क्रीड़न्ति सर्व्वदा॥
अवतंसकरास्तस्य मन्दरो मेरुमन्दरः।
सुपार्ग्वः कुसुदश्चेति चतुर्दिक्षु स्थिता द्विज!॥
अयुतयोजनोन्नाहास्तावद्विस्तारसंयुताः।
चतुर्ष्वेतेषु धर्म्मज्ञ! चूतजम्बूकदम्बकाः॥
न्यग्रोधाग्वत्थाः पादपा ब्राह्मणर्षभ!।
सहस्रयोजनोन्नाहास्तावद्विटपविस्तृताः॥
केतुभूताः पर्व्वतानां विग्राला ग्रतयोजनम्।
ह्रदाग्च तत्र चत्वारः पयोमधिक्षुवारिदाः॥
देवोद्यानानि चत्वारि ह्येतैरेवरक्षितानि।
सर्व्वतोभद्रमिश्रञ्च तथा वैभ्राजकं वनम्॥
तेषु देवस्त्रियो नित्यं विहरन्ति सुरैः सह।
गन्धर्व्वाः किन्नराश्चैव तथान्ये सिद्धचारणाः॥
गायन्तो मधुरं दिव्यं स्त्रीभिः क्रीड़न्ति तापस!।
चूतो यो मन्दरोत्सङ्गेऽयुतयोजनसुच्छ्रितः॥
फलान्यष्टतकल्यानि पतन्त्यस्य सुदूरतः।
तेषां विग्ग्र्यमाणानां रसेनाजनि या नदी॥
अरुणोदा नाम सैव वहते मन्दराचलात्।
यच्चलत्सूर्य्यमात्रेण भवानीग्वर्य्योगणाः॥
स्वदेहसौरभेणापि समन्ताद्ग्रयोजनम्।
सुगन्धयन्ति वातेन वात्स्यायन! तदद्भुतम्॥
एवं जम्बूफलानाञ्च पततां मेरुमन्दरे।
हस्तिकायप्रमाणानां रसेनार्द्रा महानदी॥
सैव जम्बूनदी नाम दक्षिणेन इलावृतम्।
तीरयोरुभयोरेव जम्बूरसपरिप्लुता॥
मृत्तिकैव सुवर्णं स्यात् वार्य्यर्कैरग्नायात्।
तत्र जाम्बूनदं हेम नानाभूग्यसंज्ञितम्॥
देवोपदेवगन्धर्व्वा धारयन्ति सह ग्रिया।
यो वै महाकदम्बस्य सुपार्ग्वोपरि तापस!॥
तत्कोटरेभ्यः पञ्चैव मधुधाराः स्रवन्ति वै।
पञ्चायामपरीणाहाः पञ्चिमेन इलावृतम्॥
यासां रसञ्च भुञ्जानाः सुमुखोद्गारवायुना।
सुगन्धयन्ति धर्म्मज्ञ! समन्तात् ग्रतयोजनम्॥
कुसुदाग्रनिरूढो यः ग्रतवल्गो वटो महान्।
स्कन्धेभ्यस्तस्य नद्यस्तु उत्तरेण इलावृतम्॥
पयस्विनीदधिद्रदाग्च मधुस्रवाः।

गुह्यसवेति पञ्चैव यासां रसनिषेवणात् ॥
वलीपलितदौर्गन्ध्यजरादोषो न विद्यते ।
कुरङ्गकुरवः शङ्खः कुसुम्भः शिखरस्तथा ।
वैकङ्कश्च त्रिकूटश्च पर्वतौ रुचकर्षभौ ॥
पतङ्गनिषधौ नागसितिवासत्रिकूटकाः ।
हंसवेदूर्यकपिला द्वौ कालञ्जरजारुधी ॥
गिरयो मूलदेशे तु सुमेरोः परिकल्पिताः ॥
जठरो देवकूटश्च द्वौ नगौ मेरुपूर्वतः ।
अष्टादशसहस्राणि योजनान्युदगायतौ ॥
पृथुतुङ्गौ द्विसाहस्रयोजनं तापसर्षभ ! ।
पवनः पारियात्रश्च मेरोः पश्चिमतः स्थितौ ॥
तथा प्रमाणौ कैलासकरवीरौ तु दक्षिणे ।
प्रागायतावुत्तरेण त्रिशृङ्गमकरौ तथा ॥
अष्टाभिरेतैर्गिरिभिर्भाति काञ्चनपर्वतः ।
मेरोर्मूर्द्धनि विप्राग्र्य ! मध्ये विश्वसृजः पुरी ।
चतुरस्रा शातकौम्भी योजनायतविस्तृता ॥
दिक्पालानां तथा पूर्व्यः पूर्व्वादिषु यथाक्रमम् ।
ब्रह्मपुर्य्याश्चतुर्थेन भागेन परिकल्पिता ।
तत्र ब्रह्मा च रुद्रश्च शक्रश्चापि सुरेश्वरः ।
समेत्य विविधैर्यज्ञैर्यजन्ते भूरिदक्षिणैः ।
तुम्बुरुर्नारदश्चैव विश्वावसुहाहाहूहूः ।
अभिगम्यामरश्रेष्ठं स्तुवन्ति विविधैः स्तवैः ॥
सप्तर्षयो महात्मानः कश्यपश्च प्रजापतिः ।
तत्र गच्छन्ति भद्रं ते सदा पर्व्वणि पर्व्वणि ।
तस्यैव मूर्द्धन्युशना काव्यो दैत्यैर्महीयते ।
तस्य हैमानि रत्नानि तस्मेमे रत्नपर्वताः ।
तस्मात् कुबेरो भगवांश्चतुर्थं भागमश्नुते ।
ततः कलां वित्तस्य मनुष्येभ्यः प्रयच्छति ॥
पार्श्वे तस्योत्तरे दिव्यं सर्व्वर्त्तुकुसुमान्वितम् ।
कर्णिकारवनं रम्यं शिलाजालसमावृतम् ॥
तत्र साक्षान्महादेवो भीमैर्भूतैः समावृतः ।
पार्व्वत्या सह देवेशो रमते भूतभावनः ॥
कर्णिकारमयीं मालां दधदापादलम्बिनीम् ।
तस्य शैलस्य शिखरात् क्षीरधारा महामते ! ।
विश्वरूपा परिमिता भीमनिर्घातनिस्वना ॥
पुण्या पुण्यतमैर्जुष्टा गङ्गा भागीरथी शुभा ।
तां धारयामास तदा दुर्द्धरां पर्व्वतैरपि ॥
शतं वर्षसहस्राणां शिरसैव पिनाकधृक् ।
मेरोस्तु शिखराद्देवी भिद्यमाना चतुर्दिधा ॥
सीता चालकनन्देति चक्षुर्भद्रेति कीर्त्यते ।
सीता तु ब्रह्मसदनात् कैलासादिमहाचलान् ॥
अतिक्रम्य प्रस्रवन्ती गन्धमादनमूर्द्धसु ।
पतित्वा द्विज ! वर्षञ्च भद्राश्वं पुनती क्रमात् ।
प्राच्यां दिशि महाभाग ! प्रविष्टा लवणोदधिम् ॥
माल्यवच्छिखराद्वद्ध्वः पतित्वा केतुमालके ।
प्रतीच्यां दिशि विप्रेन्द्र ! प्रविवेश सरित्पतिम् ।
भद्रा चोत्तरतो मेरुशिखरात् पतिता गिरीन् ।
अतिक्रम्य शृङ्गवतः शृङ्गाद्वेगेन पातुका ।
उत्तरांश्च कुरून् प्राप्य प्रविष्टा लवणार्णवम् ॥
तथैवालकनन्दा च पतन्ती गिरिमूर्द्धसु ।
हिमालयं विनिर्भिद्य भारतं वर्षमेत्य च ।
लवणाम्बुधिमभ्येति दक्षिणस्यां दिशि द्विज ! ॥

मेरोस्तु पश्चिमे पार्श्वे केतुमाली महामते ! ।
आयुर्दशसहस्राणि वर्षाणां तत्र मानवे ॥
सुवर्णवर्णाश्च नराः स्त्रियश्चाप्सरसोपमाः ।
वीतरोगशोकभया नित्यमानन्दवर्द्धिनः ।
जायन्ते मानवास्तत्र प्रतप्तकनकप्रभाः ॥*॥
गन्धमादनशृङ्गेषु कुबेरः सह राक्षसैः ।
अप्सरोगणगन्धर्व्वैर्मोदते गुह्यकाधिपः ॥
गन्धमादनपार्श्वे तु गरुडश्चैलाः सहस्रशः ।
एकादशसहस्राणि वर्षाणां परमायुषः ॥
तत्र हृष्टा नराः सर्व्वे बलवीर्य्यपराक्रमाः ।
स्त्रियश्चोत्पलपत्राभाः सर्व्वाः सुप्रियदर्शनाः ॥
उत्तराः कुरवश्चैव भारतश्च महामते ! ।
धनुःसंस्थे महाभाग ! दिवर्षे दक्षिणोत्तरे ॥
इलावृतं मध्यमन्तु पञ्चवर्षाणि चैव हि ।
उत्तरोत्तरमेतेभ्यो वर्षमुद्दिश्यते गुणैः ॥
अपरेषु च वर्षेषु सर्व्वेषु भारतं विना ।
आयुःप्रमाणं लोकानां दशवर्षसहस्रकम् ॥
एवमेषा महाभाग ! पृथिवी पर्व्वतैश्चिता ॥"
इति पद्मपुराणे भूमिखण्डे भूगोलवर्णने १२८ अध्यायः ॥

ऋषय ऊचुः ।

"नवस्वेतेषु वर्षेषु भगवान् भूतभावनः ।
अनुग्रहाय लोकानामास्ते मायाविगूहितः ॥
इलावृते तु भगवान् भव एकः सहोमया ।
आस्ते विहारनिरतो नान्यस्तत्र पुमान् द्विज ! ॥
भवानीशापतो ब्रह्मन् ! प्रविशेन्न कदाचन ।
यत्र प्रविष्टो मोहेन सुतो वैवस्वतस्य वै ।
इक्ष्वाकुः स्त्रीभावमापन्नो यस्यां जातः पुरूरवाः ।
तत्र सङ्कर्षणं देवं कलां विष्णोर्महात्मनः ।
भवो भवान्या सहितः स्तौति भक्तिसमन्वितः ।
भद्राश्वे द्विज ! वर्षे तु हयग्रीवाख्यविग्रहः ।
वसते वर्षपुरुषास्तं स्तुवन्ति जगद्गुरुम् ॥*॥
हरिवर्षे तु भगवान्नरसिंहवपुर्धरः ।
स्तूयते दैत्यपतिना प्रह्लादेन महात्मना ॥
केतुमाले च भगवान् कामदेवस्वरूपधान् ।
प्रजापतेर्दुहितृभिः सहैव रमया सदा ॥
स्तूयते परया भक्त्या जगन्मोहनरूपधृक् ॥*॥
रम्यके भगवानास्ते मत्स्यरूपी दयापरः ।
मनुर्वैवस्वतस्तत्र स्तौति भक्त्या कृतैः स्तवैः ॥*॥
हिरण्मये तु भगवानास्ते कूर्म्मतनुं दधत् ।
प्रेताधिराजस्तं स्तौति भक्त्या परमया युतः ॥
कुरुवर्षे च भगवान् वराहः सेव्यते जनैः ।
तं देवी धरणिः स्तौति तद्वर्षपतिभिः सह ॥
वर्षे किंपुरुषे ब्रह्मन् ! भगवानादिपूरुषः ।
सीतया विहरन्नास्ते सततं लक्ष्मणाग्रजः ॥
तत्र किंपुरुषैः सार्द्धं भक्त्या मारुतनन्दनः ।
पार्ष्णिसेनेन च सह स्तौति भक्त्या विभावितः ॥
भारते च तथा वर्षे नरनारायणाह्वयौ ।
नारदः स्तौति भगवान् भगवन्तौ हतानतिः ॥
द्वीपेऽस्मिन् बहवः सन्ति गिरयः सरितस्तथा ।
देशाश्च बहवो ब्रह्मंस्तांस्ते वक्ष्याम्यनुक्रमात् ॥
मेरोरुत्तरतः सर्व्वान् पर्य्यायेण ब्रवीम्यहम् ।

दक्षिणेन तु नीलस्य मेरोः पार्श्वे तथोत्तरे ॥
उत्तराः कुरवो नाम पुण्याः सिद्धनिषेविताः ।
तत्र वृक्षा मधुफला नित्यं पुष्पफलोपगाः ॥
सुगन्धीनि च पुष्पाणि फलानि रसवन्ति च ।
सर्व्वे कामदुघा वृक्षा लताः कामप्रपूरिकाः ॥
अपरे क्षीरिणो नाम तरवो मुनिपुङ्गव ! ।
ये स्रवन्ति सदा क्षीरं रसैरुत्तमसन्निभम् ॥
वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ।
सर्व्वा मणिमयी भूमिः सूक्ष्महाटकवालुका ॥
सर्व्वर्त्तुसुखदा नित्यं पङ्कधूलिवर्जिता ।
स्वर्गभोगावशेषेण जायन्ते तत्र मानवाः ॥
शुक्लाभिजनसम्पन्नाः सर्व्वे चारुसुखाम्बुजाः ।
मिथुनानि च जायन्ते स्त्रियः सुरसुतोपमाः ॥
तेषान्तु क्षीरिणां क्षीरं पिबन्त्यञ्जलसन्निभम् ।
मिथुनं जायते काले समन्ताच्च प्रवर्द्धते ॥
तुल्यरूपगुणोपेतं तुल्यवेषवयस्तथा ।
निरामया निराबाधाः सदानन्दविवर्द्धिनः ॥
एकादशसहस्राणि तत्र वर्षाणि वै नराः ।
जीवन्ति ते महाभाग ! न चान्योन्यं घ्नन्ति च ॥
भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा महाबलाः ।
तान्निर्हरन्तीह मृतान् दरीषु प्रक्षिपन्ति च ॥
उत्तराः कुरवो ब्रह्मन् ! व्याख्यातास्ते समासतः ॥*॥
हिरण्मये रम्यके च एष धर्म्मः प्रकीर्त्तितः ॥
मेरोः पार्श्वमहं पूर्व्वं वक्ष्ये ब्रह्मन् ! यथातथम् ।
भद्राश्वे भद्रश्रवा नाम तत्र ब्रह्मन् ! महीपतिः ॥
भद्रसालवनं यत्र कालाम्रश्च महाद्रुमः ।
कालाम्रो नाम वृक्षोऽसौ सिद्धचारणसेवितः ॥
योजनैकशतोत्सेधो नित्यपुष्पफलः शुभः ।
तत्र ते पुरुषाः श्वेताश्चोयुक्ता महाबलाः ॥
कुसुदाभाः स्त्रियस्तत्र चारुनासाः सुलोचनाः ।
चन्द्राभचारुरूपाश्च पूर्णेन्दुसदृशाननाः ॥
वृत्यगीतकलाभिज्ञाश्चन्द्रगीतलकान्तयः ।
दशवर्षसहस्राणि तत्रायुर्ब्राह्मणर्षभ ! ॥
कालाम्रस्यामृतेनेव नित्यं सुस्थिरयौवनाः ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥
सदर्शनो नाम महान् जम्बूवृक्षः सनातनः ।
सर्व्वकामफलः पुण्यः सिद्धचारणसेवितः ॥
द्वीपख्यातिकरः श्रीमान् सहस्रयोजनोच्छ्रितः ।
अरत्नीनां सहस्रञ्च घृतानि दश पञ्च च ॥
परिणाहस्तु वृक्षस्य रसानां रसभेदिनाम् ।
तस्यादित्यवर्णाश्च जायन्ते तत्र मानवाः ॥*॥
तथा माल्यवतः शृङ्गे ह्यश्यते हयवाहनः ।
नाम्ना सम्वर्त्तको नाम कालाग्निः प्रलयेऽन्तकृत् ॥
तथा माल्यवतः शृङ्गे पूर्व्वे पूर्व्वानुशङ्किकाः ।
योजनानां सहस्राणि पञ्चषष्टिमाल्यवान् द्विज ! ॥
महारजतसङ्काशा जायन्ते तत्र मानवाः ।
ब्रह्मलोकच्युताः सर्व्वे जायन्ते तत्र वै नराः ॥
तपस्यन्ति ते तीव्रं भवन्ति ह्यूर्द्ध्वरेतसः ।
रक्षणार्थन्तु भूतानां न विशन्ति दिवाकरम् ॥
षष्टिस्तानि सहस्राणि षष्टिरेव शतानि च ।
अरुणस्याग्रतो यान्ति परिवार्य्य दिवाकरम् ॥

षष्टिं वर्षसहस्राणि षष्टिमेव शतानि च ।
आदित्यतप्तास्ते सर्वे विशन्ति ग्रहमण्डलम् ।"
इति पाद्मे भूमिखण्डे भूगोले १२६ अध्यायः ॥

शैल उवाच ।

दक्षिणेन तु श्वेतस्य निषधस्योत्तरेण तु ।
वर्षं रमणकं नाम जायन्ते तत्र मानवाः ॥
शुक्लाभिजनसम्पन्नाः सर्वे सुप्रियदर्शनाः ।
दशवर्षसहस्राणि शतानि दश पञ्च च ।
जीवन्ति ते महाभाग ! नित्यं मुदितमानसाः ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥
वर्षं हिरण्मयं नाम तत्र हैमवती नदी ।
तत्र चायं महाभाग ! पक्षिराट् पतगोत्तमः ॥
यक्षानुगाश्च बहवो धनिनश्च महाबलाः ।
एकादशसहस्राणि वर्षाणां ते महामते ! ॥
आयुःप्रमाणं जीवन्ति शतानि दश पञ्च च ।
षड्ढाणि च विचित्राणि त्रीण्येव ब्राह्मणर्षभ ! ॥
एकं मणिमयं तत्र द्वितीयं रौक्ममद्भुतम् ।
सर्वरत्नमयश्चैव तृतीयं तत्र शोभते ।
यत्र स्वयम्भुवा देवो नित्यं वसति शाङ्खिली ।
हैमकूटस्तु सुमहान् कैलासो नाम पर्वतः ॥
यत्र वै भगवो राजा गुह्यकैः सह मोदते ।
अध्युत्तरेण कैलासं मैनाकं पर्वतं प्रति ॥
हिरण्यशृङ्गः सुमहान् दिव्यो मणिमयो गिरिः ।
तस्य पार्श्वे महद्दिव्यं शुभकाञ्चनवालुकम् ।
रम्यं विन्दुसरो नाम यत्र राजा भगीरथः ।
दृष्ट्वा पुण्यापगां गङ्गां सुवास बहुलाः समाः ॥
यूपा मणिमयास्तत्र चैत्याश्चापि हिरण्मयाः ।
तत्रेष्ट्वा तु गतः सिद्धिं सहस्राक्षो महायशाः ॥
सदा भूतपतिर्यत्र सर्वलोकैः सनातनः ।
उपास्यते तोयमेतेजा यत्र भूतैः समन्ततः ॥
नरनारायणौ ब्रह्मा मनुः स्थाणुश्च पञ्चमः ।
तत्र दिव्या त्रिपथगा प्रथमन्तु प्रतिष्ठिता ।
ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते ।
वक्षोकसा वा नलिनी पावनी च सरस्वती ॥
जम्बूनदी च सीता च गङ्गा सिन्धुश्च सप्तमी ।
अचिन्त्या दिव्यसङ्घाता प्रभावेण समन्विता ॥
उपासते यत्र सत्रं सहस्रयुगपर्यये ।
ब्रह्माद्यास्ता च भवति तत्र तत्र सरस्वती ।
एता दिव्याः सप्त गङ्गाश्चिषु लोकेषु विश्रुताः ।
रक्षांसि वै हिमवति हैमकूटे तु गुह्यकाः ॥
सर्पा नागाश्च निषधे गोकर्णश्च तपोवनम् ।
देवासुराणां सर्वेषां श्वेतपर्वत उच्यते ।
गन्धर्वा निषधे नित्यं नीले ब्रह्मर्षयस्तथा ।
शृङ्गवांश्च महाभाग ! देवानां प्रतिसञ्चरः ।
एतेषामि महाभाग ! सप्त वर्षाण्यनुक्रमात् ॥
भूतान्यपि निविष्टानि गतिमन्ति ध्रुवाणि च ।
तेषान्तद्विर्विधा ज्ञेया देवमानुषी ।
अग्रज्या परिसंख्यातुं अशेषा तु बृहस्पतेः ॥
इलावृते तु भगवान् भवान्या सह मोदते ।
इत्येतानौ वर्षाणि कथितानि तवानघ ! ॥
कर्मक्षेत्रं महापुण्यं भारतं शृणु सांप्रतम् ।
प्रियमिन्द्रस्य देवस्य मनोर्वैवस्वतस्य च ।
पृथोस्तु ब्रह्मन् ! वैण्यस्य तथेक्ष्वाकोर्महात्मनः ।
ययातेरम्बरीषस्य मान्धातुर्नहुषस्य च ।
तथैव मुचुकुन्दस्य शिबेरौशीनरस्य च ।
सोमकस्य च राजर्षेर्गाधेश्चैव महात्मनः ॥
ऋषभस्य तथैलस्य दिलीपस्य महात्मनः ।
कुशिकस्य च धर्मज्ञ ! नृगस्य नृपतेस्तथा ।
अन्येषाञ्च महाभाग ! क्षत्रियाणां बलीयसाम् ॥
शृणु मे गदतो ब्रह्मन् ! सर्वपापप्रणाशनम् ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ।
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥
तेषां सहस्रशो ब्रह्मन् ! गिरयस्तु समीपतः ।
धातुचित्राः सत्त्ववन्तो महाश्चित्रसानवः ।
आर्या म्लेच्छाश्च धर्मज्ञ ! तैर्मिश्राः पुरुषा द्विज ! ।
नदीं पिबन्ति विपुलां गङ्गां सिन्धुं सरस्वतीम् ।
शतद्रुं चन्द्रभागाश्च विपाशां शूलवालुकाम् ।
गोदावरीं नर्मदाश्च यमुनाश्च महानदीम् ।
दृषद्वतीं विपाशाश्च वाहुदां सरितामराम् ।
नदीं वेत्रवतीञ्चैव पयोष्णीं देविकामपि ।
वेदस्मृतिं वेदवतीं चित्रसेनाश्च निम्नगाम् ।
करीषिणीं चित्रवहां कृष्णवेणां सुपुण्यदाम् ॥
इरावतीं वितस्ताश्च त्रिदिवामिक्षुलां क्षमिम् ।
शोमतीं धूतपापाश्च निचितां लोहितावतीम् ।
कौशिकीं त्रिदिवां क्षय्यां सरयूञ्च महानदीम् ।
धर्मज्ञतीं वेत्रवतीं चन्दनाश्च महानदीम् ।
रक्षसां शतकुम्भाश्च हस्तिसोमां दिशन्तथा ।
शरावतीं पयोष्णीञ्च वाजिनीं पुरमालिनीम् ।
पूर्णाभिरामां वीराश्च वापीं शीतवलीमपि ।
पलाशिनीं पापहरां सुप्रयोगां महामते ! ॥
कावेरीचुलुकाश्चापि वेण्वां भीमरथीमपि ।
रक्षसां शतकुम्भाश्च कृष्णचीरां महानदीम् ।
पलाशिनीं पापहरां हेमां शतवतीं तथा ।
मदन्तीं प्रवरां मेलां महेन्द्रां पाटलावतीम् ।
पुरावतीमशुद्धाश्च कृष्णधारां महानदीम् ।
सदानीरामधृष्याश्च तथा चीरवतीमपि ॥
करीषिणीमग्निजीश्च विपुलां सचिरण्वतीम् ।
सदाकान्तां शिवाश्चैव पञ्चमीञ्च महानदीम् ।
विद्यां वीरकराश्चापि विश्वामित्रां कपिञ्जलाम् ।
वसुं सुवस्त्रां गौरीश्च कुवेरामम्बुवाहिनीम् ॥
रथचित्रां ज्योतिरथां तुङ्गवेणां महानदीम् ।
वेलन्दीं पिञ्जलाञ्चैव तुङ्गवेणां महानदीम् ।
विदिशां कृष्णवेणाश्च हविःस्रावां महापगाम् ।
सन्ध्यां समासां वेदाश्च भारद्वाजीञ्च निम्नगाम् ।
शीघ्राञ्च पिच्छिलाञ्चैव कौशिकीं निम्नगामपि ।
दुर्गां मन्दाकिनीञ्चैव ब्रह्ममेध्यां दृषद्वतीम् ॥
परोक्षामथ रोहीञ्च सामान्यां वरजामसिम् ।
सरस्वतीं तपसां दानीं पर्णाञ्चाश्च महानदीम् ।
मालवीं दृषभां भासां ब्रह्ममेध्यां दृषद्वतीम् ।
एताश्चान्याश्च बह्वो वै महानद्यो द्विजर्षभ ! ॥
सदा निरामया ह्यास्ता मन्दगा मन्दवाहिनी ।
चित्रोपला चित्ररथा दुर्गापि पापहारिणी ॥
ब्रह्माणी च महागौरी कोशा चापि महानदी ।
शुक्तिमती मगङ्गा च मङ्गला वाहिनी तथा ॥
कुमारी ऋषिकुल्या च नदी मन्दाकिनी तथा ।
सुवर्णा च तथा गङ्गा मारिषा च सरस्वती ॥
लौहित्यं करतोया च तथैव हृषकाख्या ।
विश्वस्य मातरश्चेताः सर्वाश्चैव महाफलाः ॥
तथा नद्यस्त्रिकाशाः शतशश्च सहस्रशः ।
इत्येताः सरितो ब्रह्मन् ! समाख्यातास्तवानघ ॥
वक्ष्यामि पर्वतांश्चापि भारते सन्ति ये द्विज ! ।
मलयो मङ्गलप्रस्थो मैनाकश्च त्रिकूटकः ॥
ऋषभः कूटकः कोलः सह्यो देवगिरिस्तथा ।
श्रीशैलो ऋष्यमूकश्च शुक्तिमांश्च एव च ॥
द्रोणश्च पारियात्रश्च रैवतः ककुभस्तथा ।
गोवर्धनश्चित्रकूटो नीलो गोकर्ण एव च ॥
कोकामुख इन्द्रकीलस्तथा कामगिरिर्द्विज ! ।
अतःपरं जनपदान् वक्ष्यामि द्विजसत्तम ! ॥
विख्याताः कुरुपाञ्चालाः शाल्वा मात्स्येय-जाङ्गलाः ।
मत्स्याः कुशट्टा मौद्गल्या भोजाः सिन्धुकुलिन्दकाः ॥
शूरसेनाः पुलिन्दाश्च कुन्तयः कोशिकोशलाः ।
पाञ्चालाः कौशलाश्चैव बोधा मालास्तथैव च ॥
चेदिमत्स्यकरूषाश्च नैकपृष्ठा युगन्धराः ।
उत्तमाश्च दशार्णाश्च काशयोऽपरकाशयः ॥
कुन्तयोऽवन्तयश्चैव मलजा विजयास्तथा ।
आधिराज्याः सकुट्टाश्च चक्रवक्रातयः शुकाः ॥
मानवाश्चोपवाहाश्च यक्षलोमान एव च ।
वाटीका गाटधानाश्च शुकुलाग्रसैन्धवकाः ॥
मल्लाः शुरेयाः प्रहारा मल्लिकाः शुक्तिकास्तथा ।
अपरान्ताः परान्ताश्च आभीराः काशतोयकाः ॥
अटवीशिखराश्चैव मेरुभूताश्च मारिष ! ।
उपविष्याश्चुविष्याश्च जङ्गलाः कुरुवर्णकाः ॥
कुट्टाः परान्ता मार्देया मागधा मानवच्चटाः ।
अन्ध्राश्च बहवो ब्रह्मन् ! कथाः सामुद्र-निष्कुटाः ॥
बहिर्गिर्योऽङ्गमलदा अन्तर्गिर्यश्चैव च ।
सप्तोत्तराः प्रावृषेयाः सुदेष्णा वासुकास्तथा ॥
शुका निषादा निषधा भार्गवाश्च द्विजर्षभ ! ।
पुक्का भोगाः किराताश्च तथैवानर्तनैर्ऋताः ॥
तीरग्रहाः शूरसेनाः कुन्तलाः कुशलास्तथा ।
तिलभावा मसावाश्च गान्धारा दर्शकास्तथा ॥
काश्मीराः सिन्धुसौवीरा दत्रिका कन्यकागजाः ।
अभीसाहा कुलूताश्च मधुमत्ताः कुकुन्दकाः ॥
रत्नवक्त्राश्च धर्मज्ञ ! सौचला वाटिकास्तथा ।
दर्वीवीरा लता दर्वाः सुदामानः सुमल्लिकाः ॥
वनायवो दशाः पार्श्वरोमाणः कृष्णिकास्तथा ।
रत्नवक्त्राश्च धर्मज्ञ ! वाट्यामरथोरगाः ॥
रन्ध्राः करीषकाश्चापि कुलिन्दोपत्यकास्तथा ।
कच्छा गोपालकच्छाश्च सरिका वागयासिकाः ॥
किराता बर्बराः सिद्धाः पार्वतीयाश्च मारिष ॥

ओड्रश्चेक्षाः सवैरिन्ध्रा वैदेहास्ताम्रलिप्तकाः ॥
तथापरे जनपदा दक्षिणा ब्राह्मणर्षभ ! ॥
द्रविड़ाः केरला: प्राच्या विकल्पन्ध्रकास्तथा ॥
कोवेट्टकास्तथा चोलाः सौह्रदा मलका मलाः ॥
ध्वजिन्युत्सवसंकेता कोङ्कवेकूटमालवाः ॥
दण्डकाः कोरकाः प्राच्याः कुकुराङ्गार-
मारिकाः ॥
तथैव विन्ध्यचूलिकाश्चित्राश्चाः साल्वसेनयः ॥
समङ्गाः कवकाश्चैव तथैवापरवर्णकाः ॥
सूपकाश्चनवालाश्च पुलिन्दा वर्ब्बरैः सह ॥
सुनिवाटाः शिवाटाश्च सरा वेगवशास्तथा ॥
विदर्भा ऋषिकाः काकणनाश्च ब्राह्मणर्षभ ! ॥
यवनाश्च शकाम्भोजाश्चञ्चनाः परतञ्चनाः ॥
सह्यदहाः कुलत्थाश्च दारुणा म्लेच्छजातयः ॥
उत्तराश्चापरे म्लेच्छा हूणाः पारसिकैः सह ॥
तथैव च मलाचीना दशार्णा दशमालिकाः ॥
अङ्गवङ्गकलिङ्गाश्च मगधा गिरिगह्वराः ॥
खासीकाश्चान्तचाराश्च वैश्यशूद्रकुलानि च ॥
शूद्राभीराश्च दरदा ये चान्ये म्लेच्छभूमयः ॥
आत्रेयाश्च भरद्वाजास्तथैव स्तनपोषकाः ॥
द्वैधकाश्च कलिङ्गाश्च किरातानाश्च जातयः ॥
तोमरा हन्यमानाश्च तथैव करभञ्जकाः ॥
एते चान्ये जनपदाः प्राच्योदीच्यास्तथैव च ॥
उद्देशेन मया देशाश्चैव संकीर्त्तिता द्विज ! ॥
वर्षं तु भारतं ब्रह्मन् ! त्रिवर्गस्य फलं भवेत् ॥
दुह्यते कामधुक्चेतुर्भूमिः सम्यगनुष्ठिता ॥
तस्मिन् शुभाशुभं कर्म्म यथोक्तफलदं नृणाम् ॥
अन्यानि यानि वर्षाणि भूमिखण्डानि तानि वै ॥
भारते विहितं कर्म्म यागध्यानादिलक्षणम् ॥
फलं जनयते सम्यक् विकर्म्म नरकाण्यपि ॥
तत्र सिद्धा नरा ब्रह्मन् ! तपसाराधनेन च ॥
प्रयान्ति परमं लोकमपवर्गञ्च मारिष ! ॥
कृतं त्रेता द्वापरञ्च कलिश्च ब्राह्मणर्षभ ! ॥
भारते तु क्रमेणैवं भवन्ति हि युगानि वै ॥
चत्वारि च सहस्राणि वर्षाणां ब्राह्मणर्षभ ! ॥
आयुःसंख्या कृतयुगे संख्याता भारते द्विज ! ॥
त्रीण्येव तु सहस्राणि त्रेतायां भारते नृणाम् ॥
द्वे सहस्रे द्वापरे तु शतमेकं कलौ स्मृतम् ॥
तत्रापि च स्थितिर्नास्ति कलौ ब्राह्मणसत्तम ! ॥
गर्भस्थाश्च म्रियन्ते च तथा जाता म्रियन्ति च ॥
महाबला महासत्त्वा ज्ञानिनो धर्म्मतत्परा: ॥
तपस्विनो ध्याननिष्ठा: कृते जायन्ति मानवा: ॥
त्रेतायां सर्ब्ववर्णाश्च स्वधर्म्मनिरता: सदा ।
द्वापरे च महाभाग ! क्रूराश्च परहिंसका: ॥
लुब्धाश्चाकृतिकाश्चैव क्रोधना दुष्कृते रता: ।
कलौ खलु भविष्यन्ति भारते तापस ! प्रजा: ॥
सर्ब्वेषामपि वर्षाणां भारतं प्रवरं द्विज ! ॥
सिध्यन्ति मानवा ह्यत्र हरिभक्तिपरायणा: ॥
प्रायो भागवता: सर्ब्वे भारते द्विजसत्तम ! ॥
नानारूपाणि तीर्थानि फलदानि नृणामपि ॥
जम्बूद्वीपो मया प्रोक्तो लक्षयोजनविस्तृत: ।
समानेन प्रमाणेन वेष्टितो लवणाम्भसा ॥

अष्टावत्र उपद्वीपा मुनिभि: परिकीर्त्तिता: ।
सिन्धुमध्ये महाभाग ! नानाविधजनाश्रिता: ॥
नामानि तेषां वक्ष्यामि शृणु वात्स्यायन
द्विज ! ॥
सगरस्य सुतैरश्वान्वेषणे परिसो महीम् ॥
खनद्भि: कल्पिता विप्र ! द्वीपा अष्टौ महार्णवे ।
स्वर्णप्रस्थश्चन्द्रशुक्ल: सिंहलावर्णकौ यथा ॥
प्रवालश्चस्तथा मन्दहरिणो रमणकाह्वय: ।
लङ्केति कथिता विप्र ! जम्बुद्वीपस्य तेऽन्तरा ॥"
इति पाद्मे भूमिखण्डे भूगोलवर्णने १३०
अध्याय: ॥ * ॥

ऋषय ऊचु: ।
"प्लक्षद्वीपं प्रवक्ष्यामि शृणु वात्स्यायन द्विज ! ।
यस्मान्नं जम्बुद्वीपस्य तथैव लवणोदधे: ॥
ततो द्विगुणमानोऽसौ प्लक्षद्वीपो महामते ! ।
जम्बुद्वीपस्य च यथा वेष्टनं लवणाम्भसा ॥
समानेन प्रमाणेन पुर: परिखया यथा ।
परिखाया उपवनं यथा भवति वेष्टनम् ॥
प्लक्षद्वीपस्तथैवासौ संवेष्ट्य लवणोदधिम् ।
द्विजत्रयोजनायामो वर्णते द्विजसत्तम ! ॥
तत्र जम्बूप्रमाणोऽस्ति द्वीपख्यातिकरस्तरु: ।
प्लक्षो नाम महाभाग ! स्वर्णवर्णोऽग्निधाम च ॥
तत्र वर्षाणि सप्तैव शुभानं यवसं शिवम् ।
अन्नताश्चमप्राज्ञानि क्रमादभयमित्यपि ॥
सप्तैव सीमागिरयो नद्य: सप्त च कीर्त्तिता: ।
मणिकूटो वज्रकूटो ज्योतिष्मानिन्द्रसेनक: ॥
हिरण्यष्ठीवो मेघमाल: सुपर्ण: सेतुशैलका ।
अरुणपृष्ठा चैव सावित्रप्रसिवसी तथा ॥
सत्यम्भरा सुप्रभा च वात्स्यायन ! घृतम्भरा ।
एता: सप्त महानद्यो दर्शनादेव पावना: ॥
वर्णानां ब्राह्मणादीनां तत्र नामान्यनुक्रमात् ।
हंसश्चैव पतङ्गश्चोर्द्धायनश्च तृतीयक: ॥
सत्याङ्गश्च चतुर्थो वै सर्ब्वे धर्म्मार्थकोविदा: ।
अन्ये च पर्ब्वतास्तत्र नद्यश्चैव महाफला: ॥
प्राजायतो महाभाग ! मलयो नाम पर्ब्वत: ।
ततो मेघा: प्रवर्षन्ति प्रभवन्ति च सर्ब्वत: ॥
तत: परेण विप्रेन्द्र ! जलधारस्तु पर्ब्वत: ।
तस्माद्दृश्यन्ति वै तोयं वासव: पृथिवीक्षते ॥
वर्षासु हि ततो दृष्टिस्तत: शस्यसमुद्भव: ।
रैवतो नाम तत्राथ गिरिर्यत्र प्रतिष्ठित: ॥
रैवती नाम नक्षत्रं दृश्यते दिवि मोदिता ।
उत्तरेण तु तस्याथ श्यामो नाम गिरिर्महान् ॥
प्रांशु: श्रीमान्महामेघप्रभयोज्ज्वलविग्रह: ।
यस्य श्रिया श्यामवर्णा: प्रजास्तत्र महामते ! ॥
अत:परं महाभाग ! दुर्गो नाम महागिरि: ।
केशरी केशरयुतो यस्माद्दात: प्रवर्त्तते ॥
प्लक्षो नाम महाद्वीपो यत्र पूज्यस्तु शङ्कर: ।
तत्र गच्छन्ति सिद्धाश्च चारणा देवतानि च ॥
धार्म्मिकाश्च प्रजा ब्रह्मन् ! जरामृत्युविवर्ज्जिता: ।
दीर्घायुष: सत्यपरा वर्त्तन्ते भोगवर्द्धिता: ॥
नद्यश्चात्र महापुण्या गङ्गा च बहुधा मता ।
महानदी मणिजला सीताखी वेधिका तथा ।

भूगोलः

सप्तमार्गा घृतान्धेर्वं नद्य: संख्या न शक्यते ॥
तत्र पुण्या जनपदाश्चत्वारो लोकसम्मता: ॥
मगाश्च मगकाश्चैव मानसा मन्दगास्तथा ॥
मगा ब्राह्मणभूयिष्ठा: स्वकर्म्मनिरता द्विज ! ॥
मगेषु तु राजन्या धार्म्मिका: सर्ब्वकामदा: ।
मानसे च महाभाग ! वैश्यधर्म्मनिषेविण: ॥
मन्दगेषु तथा शूद्रा: शूरा धर्म्मार्थनिश्चिता: ॥
न तत्र राजा विप्रेन्द्र ! न दण्डो न च दण्डिता ।
स्वधर्म्मेणैव ते सर्ब्वे रक्षन्ति च परस्परम् ॥*॥
प्लक्षद्वीपसमानेन सप्तैवेक्षु वृतो बहि: ।
इक्षुरसजलेनैव नानारत्नवता द्विज ! ॥
शाल्मलोऽपि तथा द्वीप: प्लक्षादिगुणमानत: ।
चतुर्लक्षयोजनेन सुरोदेनावृतो महान् ॥
यत्र वै शाल्मली नाम द्विजत्रयोजनोच्छ्रिता ।
द्वीपख्यातिकरो वृक्ष: सुपर्णेन कृतालय: ॥
तत्र वर्षाणि सप्तैव कथ्यन्तेऽत्र सुरोचनम् ।
सौमनस्यं रमणकं देववर्षमिति क्रमात् ॥
पारिभाद्रमाप्यायनमभिज्ञातमिति द्विज ! ॥
सेतुशैलाश्च सप्तैव सुरस: घृतशृङ्गक: ॥
वामदेवश्च कुन्दश्च कुसुद: पुष्पवर्षक: ।
सहस्रुतिरिति ब्रह्मन् ! नद्य: सप्तैव कीर्त्तिता: ॥
अनुमति: सिनीवाली नन्दा राका सरस्वती ।
रजनी च कुहूश्चैव महानद्य: सुपुण्यदा: ॥
तत्र विप्रादयो वर्णा: क्रमान्नामानि बिभ्रति ।
आद्य: श्रुतधरो वर्ग्यस्ततो वीर्य्यधर: स्मृत: ।
वसुन्धरस्तृतीयस्तु चतुर्थस्तु इषुन्धर: ।
सर्ब्वे ते सोममात्मानं भगवन्तं यजन्ति हि ॥
सुरोदं परिवेष्ट्योऽथ ततो द्विगुणमानक: ॥*॥
कुशद्वीपो घृतोदेन समानेनावृतो द्विज ! ॥
कुशस्तम्बो महांस्तत्र द्वीपख्यातिं करोति च ।
ज्वाज्वल्यमानो दीप्तेन्द्र महाज्वलनराग्निवत् ॥
तत्र वर्षाणि सप्तैव समानानि प्रमाणत: ।
वसुदानं दृढरुचिर्नाभिगुप्तं महामते ! ॥
सत्यव्रतं विप्रनाम देवनामेति सप्तमम् ।
सप्तैव सीमागिरय: कीर्त्तिता द्विजसत्तम ! ॥
वभ्रुश्चैव चतु:शृङ्ग: कपिलश्चित्रकूटक: ।
देवानीक ऊर्द्धरोमा द्रविणश्चेति सप्तम: ॥
महानद्यश्च तत्रैव सर्ब्वपापप्रणाशना: ।
रसकुल्या मधुकुल्या मित्रविन्दा च मानद ! ॥
श्रुतविन्दा देवगर्भा मन्त्रमाला घृतच्युता ।
तत्र विप्रादयो वर्णा नामान्तरभृतो द्विज ! ॥
कुशल: प्रथमो वर्ष: कोविदस्तूदितीयक: ।
अतिसुन्दरस्तृतीयस्तु चतुर्थ: कुलक: स्मृत: ॥
ते सर्ब्वे ज्ञानसम्पन्ना जातवेदस्वरूपिण: ।
भजन्ते भगवन्तं वै कर्म्मकौशलयाजिन: ॥*॥
घृतोदाश्च तथा द्वीपो द्विगुण: क्रौञ्चसंज्ञक: ।
क्षीरोदेन समानेन वेष्टितो ब्राह्मणर्षभ ! ॥
क्रौञ्चो नाम गिरिर्यत्र द्वीपख्यातिकरो महान् ।
महासेनप्रहाराभिहतच्छिन्नो महामते ! ॥
क्षीरोदेनाभिपिक्तश्च सततं वीचिसञ्चयै: ।
वर्षाणि तत्र सप्तैव तेषां नामानि मे शृणु ॥
आद्यो मधुरहो मेघपृष्ठश्चापि वनस्पति: ।

लोहितार्णः सुधामा च भाजिष्ठश्चापि सप्तमः।
गिरयश्चापि सप्तैव वर्षसीमाकरा द्विज!।
शुक्लोऽथ वर्द्धमानश्च भोजन उपवर्हणः।
नन्दनो नन्दनश्चैव सर्वतोभद्र इत्यपि।
सप्त तत्र महानद्यः पावना ब्राह्मसत्तम!।
अभया चान्दतोया च ह्यप्रिरूपवती तथा।
तीर्थवत्यार्यका शुक्ला पवित्रवत्यपि स्मृता।
विप्रादयस्तथा वर्णाः स्थाता नामान्तरेण तु।
पुष्करः प्रथमो वर्षो द्वितीयो ऋषभः स्मृतः।
तृतीयो द्रविणो नाम देवसंज्ञश्चतुर्थकः।
मूर्त्तिं जलमयीं विष्णोर्ध्यायन्ति च यजन्ति च॥*॥
एवं परस्तात् क्षीरोदात् शाकद्वीपो द्विजसत्तम!।
आयामेन च विस्तीर्णो द्वात्रिंशल्लक्षयोजनः।
दधिमण्डोदकेनैव समानेन स सिन्धुना।
परीतो भाति तत्रापि शाको नाम महीरुहः॥
द्वीपस्थातिकरः श्रीमान् वासयन् द्वीपमेव तम्।
वर्षाणि तत्र सप्तैव पुरोजवमनोजवौ।
धूम्रानीको वेपमानो विधाधारश्च सप्तमः।
बहुरूपश्चित्ररैभो गिरयोऽपि च सप्त वै।
ईशान उरुशृङ्गश्च बलभद्रो महानसः।
शतकेशवनामा च सहस्रस्रोत एव च।
देवपालोऽपि सप्तैते वर्षसीमप्रवर्षकाः।
तत्र सप्तैव विख्याता आयुर्ह्यप्यनघा द्विज!॥
सहस्रस्मृतिः पचनदी निर्ऋतिरपराजिता।
विख्यातोभयसृष्टिश्च महापुण्या महाफलाः॥
विप्रादयस्तथा वर्णा स्थाता नामान्तरेण तु।
आद्यो ऋतव्रतो नाम तनः सत्यव्रतः स्मृतः॥
दानव्रतानुव्रतौ च तृतीयश्च चतुर्थकः।
भगवन्तं वायुरूपं भजन्ते च यजन्ति च॥*॥
तथैव दधिमण्डोदात् परस्तात् पुष्करो महान्।
द्विगुणेन प्रमाणेन द्वीपः स्वादूदकेन तु।
परिवीतः समानेन सिन्धुना ब्राह्मसत्तम!।
यत्र पुष्करमत्युच्चं ज्वलज्ज्वलनसन्निभम्॥
द्वीपस्थातिकरं यत्रसहस्रायुतशोभितम्।
यदाकुरायतं विप्रहंसस्य प्रजापतेः॥
द्वीपमध्येऽवधिगिरिरेक एव महामते!।
स मानसोत्तरो नाम प्राकार इव वेष्टकः॥
तस्य पूर्वापरौ पार्श्वौ देवर्षे! तत्र सारिष!।
सिन्धोर्विष्टम्भकौ गिरेर्विष्टम्भकौ परम्॥
रमणकं धातकश्च दे वर्षे नामतः स्मृते।
मानं तस्य गिरेर्विप्रायुतयोजनसुच्छ्रितम्॥
तावदेव संधायामस्तस्योपरि पुराणि च।
चत्वारि लोकपालानामिन्द्रादीनां द्विजसत्तम!॥
यः परिक्रममाणस्य मेरुं विप्र! दिवस्पतेः।
मूर्द्धा विभर्त्ति ग्रहेन्द्राणां सम्वत्सरात्मकम्॥
अध्यासते च ह्यौ पार्श्वौ प्रजानस्य महाबलाः।
तत्र संज्ञान्तरं नास्ति वर्णानां ब्राह्मसत्तम!॥
स्वादूदकस्य परतो लोकालोकाचलो महान्।
लोकस्य चाप्यलोकस्य मध्ये गिरिवरः स्थितः॥
प्राकार इव संवेष्ट्य लोकान् सर्वान्व्यवस्थितः॥
लोकालोकाचलो नाम तेनासौ परिकीर्त्तितः॥
मानसोत्तरमेर्व्योस्तु अन्तरे यावती मही।
तावती काञ्चनी भूमिर्लोकालोकात्परे द्विज!॥
यत्र प्रविष्टितं वस्तु कथञ्चिन्नोपलभ्यते।
सौवर्णी कान्तिरुद्दीप्ता सर्ववर्णप्रमाथिनी।
अतः सर्वाणि सत्त्वानि तां भूमिं वर्जयन्ति हि।
लोकालोको गिरिर्यस्तु लोकान्ते वर्त्तते महान्॥
आदृणोति स तेजांसि सूर्य्यादीनामपि द्विज!।
समतिक्रम्य ज्योतींषि चमस्ते न प्रवर्त्तितुम्॥
तावद्व्याहवान् ब्रह्मन्यायामेन च तादृशः।
आयामविस्तरे पृथ्वी पञ्चाशत्कोटियोजना॥
तस्याश्चतुर्थभागोऽयं लोकालोकाचलो गिरिः।
तस्योपरिष्टाच्चत्वारो गजेन्द्राः सुमहाबलाः॥
नियुक्ता ब्रह्मणा भूमिं करैरालम्ब्य संस्थिताः।
भगवानपि तत्रैव विष्वक्सेनादिभिर्वृतः॥
पार्श्वदप्रवरैर्ब्रह्मन्! सुरैर्बहुभिरच्युतैः।
धारयन् जगतीमास्ते आकल्पमपि मारिष!॥
योऽन्तर्विस्तार एतस्या भूभ्यास्ते परिवर्त्तितः।
तावती भूरलोकाख्या सान्द्रसप्तमसावृता॥
ततो योगेश्वरगतिर्योगिनां प्राप्यसत्तमम्।
स्थानं भगवतः साक्षात् श्वेतद्वीप इतीर्य्यते॥
इति ते कथितं ब्रह्मन्! भूगोलस्योपवर्णनम्॥

व्यास उवाच।

य इदं शृणुयात् स्तुत! भूगोलस्यानुवर्णनम्।
प्रदक्षिणीकृता तेन सप्तैलवनकानना।
ससागरा च सद्वीपा सवर्षा च वसुन्धरा॥
इति श्रीपद्मपुराणे भूमिखण्डे भूगोलवर्णनं नाम १११ अध्यायः॥*॥ ज्योतिश्चक्राख्यभूगोलम्॥ यथा,—

"सिद्धिं साध्यसुपैति यत्सरयतः क्षिप्रं प्रसादात्तथा
यस्याश्चिन्पदाखण्डलतिरयं चालिल्यलीला-
यती।
वृत्तज्ञो सुखरङ्गेव स्तुतिनां स्वाङ्कारती
भारती
तं तोष प्रविधत्य गोलममलं बालावबोधं
कुरु॥"

गोलग्रन्थकथने कारणमाह।

'मध्याह्नं क्षुदहं यदत्र गणितं तस्योपपत्तिं विना
प्रौढिं प्रौढसभासु नैति गणको निःसंशयो न स्वयम्।
गोले सा विमला करामलकवत् प्रत्यक्षतो दृश्यते
तस्मादस्युपपत्तिबोधविषये गोलप्रबन्धोद्यतः॥'

अथ गोलप्रशंसया गोलानभिज्ञगणकोपहासमाह।

'भोज्यं यथा सर्वरसं विनाज्यं
राज्यं यथा राजविवर्जितञ्च।
सभा न भातीव सुवक्तृहीना
गोलानभिज्ञो गणकस्तथैव॥

वादी व्याकरणं विनैव विदुषां श्रुत्यः प्रविष्टः सभां
जल्पन्नल्पमतिः सभायां पटुवटुभूभङ्गवक्रो-
क्तिभिः।
द्रोतः सन्नुपहासमेति गणको गोलानभिज्ञ-
स्तथा
ज्योतिर्विन्नु सदसि प्रगल्भगणकप्रत्यग्रपद्धो-
क्तिभिः॥'

अथ गोलस्वरूपमाह।

'दृष्टान्त एवावनिभगणादीनां
संस्थानमानप्रतिपादनार्थम्।
गोलः स्मृतः सैव विशेष एव
प्राग्नेरतः स्याद्गणितेन गम्यः॥'

अथ गणितप्रशंसामाह।

'ज्योतिःशास्त्रफलं पुराणगणकैरादेश इत्युच्यते
नूनं लग्नबलाश्रितः पुनरयं तत्सद्गणेटाश्रयम्।
तं गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न
ज्ञायते
तस्मात् यो गणितं न वेत्ति स कथं गोलादिकं
ज्ञास्यति।'

अथ ज्योतिषशास्त्रश्रवणाधिकारिलक्षणमाह।

'द्विविधगणितसूक्ष्मं यस्य मस्तिष्कसंस्थं
तदवगमननिष्ठः ग्रन्थशास्त्रे पटिष्ठः।
यदि भवति तदेदं ज्योतिषं भूरिभेदं
प्रपठितुमधिकारी सोऽन्यथा नाधिकारी॥'

व्याकरणवर्णनमाह।

'यो वेद वेदवदनं सदनं हि सत्यग-
ब्राह्मं सवेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी॥'

अथ गोलग्रन्थस्य प्रवृत्त्यर्थमन्योक्तप्रकारेणाह।

'गोलं श्रोतुं तव यदि मतिर्भास्करीयं शृणु त्वं
गोलं संक्षिप्तं न च बहु तथा विस्तरः शास्त्र-
तस्यम्।
लीलागम्यः सुललितपदः प्रत्ययस्तु स यस्मा-
दिदन्! विद्वत्सदसि पठतां पक्षितोक्तिं शृणोति॥'

अथ भूसंस्थानं प्रश्नश्लोकद्वयेन आह।

'भ्रमद्भचक्रचक्रान्तर्गगने गगनेचरैः।
धृता धृता धरा केन येन नेयमियादधः॥
किमाकारा कियन्माना नानाशास्त्रविचार-
णात्।
कौतुकद्वीपकुलाद्रीन्द्रसप्तसैन्धुस्थितीर्यताम्॥'

अथ यद्दस्फुटीकरणोपपत्तिप्रश्नं श्लोकद्वयेनाह।

'संक्षिप्तो द्युगणादृयुगादिभगणैः खेटोऽनु-
पातेन यः
स्यात्तस्यास्फुटता कथं कथमभूत् स्पष्टीकृति-
र्नैकधा।
किं देशान्तरसूत्रमान्तरमहो वाक्षान्तरं किञ्चरं
किञ्चोच्चन्तु चलञ्च तद्दिदं कस्मात्! पातः
स्मृतः॥
किं केन्द्रं किमु केन्द्रजं किमु चलं किम्वाचलं
तत्फलं
कस्मात्तत्सहितः कुतश्च रहितः खेटस्फुटो
जायते।

किं दृक् कर्म्म तयोदयास्तसमये देवा विदध्युर्बुधाः
सर्व्वं मे विमलं वदामलमलं गोलं विजानासि चेत् ॥'

अथ जिष्णुब्रह्मोदितदिनमानभेदप्रश्नं श्लोकद्वयेनाह।

'मद्दृङ्मः किमहो रजनी तनु-
र्दिनमभौ गणकोत्तरगोलगे।
वद तनुर्दिवसो महती निशा
वद विचक्षण! दक्षिणदिग्गते ॥
भवति किं द्युनिशं द्युनिवासिनां
द्युमणिवर्षमितश्च सुरद्विषाम्।
पिब्रतु किं ध्रुवमासमितं तथा
युगसहस्रयुगं हुविशस्य किम् ॥'

अथ राश्युदयमानकालभेदप्रश्नमाह।

'भवलयस्य किलार्कलवाः समाः
किमसमैः समयैः खलु राशयः।
सपदयान्युदयं किमु गोलवि-
न्नविषयेष्वखिलेष्वपि ते समाः ॥'

अथ द्युभाकुज्यादिसंस्थानप्रश्नं वृत्तार्द्धेनाह।

'द्युज्याकुज्यापमसमगरायाश्चलभादिकानां
विद्वन्! गोले वियति हि यथा दर्शय क्षेत्र संस्थाम् ॥'

अथ चन्द्रार्कग्रहयोः दिक्कालभेदाद्युपपत्तिप्रश्नान् श्लोकोत्तरार्द्धेनाह।

'तिथ्यन्ते चेत् यह उडुपतेः किन्न भानोस्तदानीं
इन्दोः प्राच्यां भवति हि रवेः प्रग्रहः किं प्रतीच्याम् ॥'

लम्बनं वद किं का च नतिमतिमतां वर!।
ततुसंस्कृतिलिप्तौ वाक्षे किं ते सिद्धे कुतः कुतः ॥'

अथ भूकक्षोन्नतौ चन्द्रस्य शुक्रस्य च ग्रहयुद्धप्रश्नमाह।

'शुक्रस्य दिङ्नराज एष महसो हान्याः कुतस्तः कुतः
सदृक्तत्वमतोऽप्यहो भ्रमवशाद्दोषातिवक्रादिव।
संप्राप्याथ पुनस्त्रयीतनुमतस्तस्याश्रये नैव किं
शुक्रस्य क्रमशस्त्रयेव महसो दृष्टेरिति सदृक्तताम् ॥'

अथ प्रथमप्रश्नस्य पृथिवीसंस्थानोपपत्तेरुत्तरं विश्वसृजादिसर्गे पृथिव्यादीनां तत्त्वानामादितत्त्वं निखिलजगज्जननैकबीजं परं ब्रह्म मनसा प्रविचार्यादौ तावत् तत्त्रयमाह।

'यस्मात् क्षुब्धप्रकृतिपुरुषाभ्यां महानस्य गर्भे-
ऽहं कारोऽभूत् खकणिखिलनोर्थस्ततः संहतेश्च।
ब्रह्माण्डं यच्चतुरगमहीपृष्ठनिष्ठो विरिञ्चि-
र्विश्वं ग्रस्यत् क्षणति परमं ब्रह्म तत्तत्त्वमाद्यम् ॥'

अथ भूमेः स्वरूपमाह।

भूमेः पिण्डः ग्रहाक्षभ्रकविरविकुजेज्याकिं-
नक्षत्रकक्षा
वृत्तैर्वृत्तो वृतःसन्नदनिलसलिलव्योमतेजो-
मयोऽयम्।

नान्याधारः खशक्त्या वियति च नियतं तिष्ठतीहास्य पृष्ठे
लिप्तं विश्वच्च ग्रस्यत् सदनुजमनुजादिव्यदैवं समन्तात् ॥
सर्व्वतः पर्व्वतारामग्रामचैत्यद्रुमेचितः।
कदम्बकुसुमग्रन्थिः केसरप्रकरैरिव ॥'

अथ पुराणेषु भूमेराधारपरम्परा या पठिता तां निराकुर्वन्नाह।

मूर्त्तो धर्त्ता चेद्धरित्र्याश्चदन्य-
स्तस्याप्यन्योऽप्येवमज्ञानवस्था।
अन्त्ये कल्प्या चेत् स्वशक्तिः किमाद्ये
किं नो भूमिः साद्धसर्त्तेश्च सृष्टेः ॥'

अथ कथमियं भूमेः खशक्तिरित्याशङ्कां परिहरन्नाह।

'यथोल्लताकांचनलयोश्च प्रीतता
विधौ द्युतिः के कठिनत्वमग्रनि।
मरुच्चलो भूरचला स्वभावतो
यतो विचित्राः खलु वस्तुशक्तयः ॥
आकृष्टशक्तिश्च मही तया यत्
स्वस्थं गुरुं स्वाभिमुखं स्वशक्त्या।
आकृष्यते तत् पततीव भाति
समे समन्तात् कुरियं कुतः खे ॥'

अथ बौद्धानां युक्तिमाह।

'भपञ्जरस्य भ्रमतोवलोका-
दाधारशून्या कुरितिप्रतीतिः।
स्वस्थं न दृष्टं गुरु च क्षमातः
खेऽधः प्रयातीति वदन्ति बौद्धाः ॥
द्वौ द्वौ रवीन्दू भगणौ च तद्व-
देकान्तरौ तावुदयं व्रजेताम्।
यदस्तवन्नेवमनर्थवादान्
ब्रवीम्यतस्तान् प्रतियुक्तियुक्तम् ॥'

अथ तेषां युक्तिभङ्गमाह।

'भूः खेऽधः खलु यातीति बुद्धिर्बौद्ध! सुधा कथम्।
यातायातच्च दृष्टापि खेयत् चित्रं गुरु चितिम्॥'

अथ जिनानां युक्तिभङ्गमाह।

'किं गण्यं तव वेगुण्यं देगुण्यं यो वृथात्मथाः।
भार्केन्दूनां विलोक्याङ्गा ध्रुवमत्स्यपरिभ्रमम् ॥'

भूगोलस्य समतां निराकर्त्तुमाह।

'यदि समा सुकरोदरसन्निभा
भगवती धरणी तरणिः क्षितेः।
उपरि दूरगतोऽपि परिभ्रमन्
किमु नरैरमरैरिव नेक्षते ॥
यदि निम्नाजनकः कनकाचलः
किमु तदन्तरगः स न दृश्यते।
उदगयं नतु मेरुरयं नुमान्
कथमुदेति स दक्षिणभागतः ॥'

अथ प्रत्यक्षविरोधशङ्कां निरस्यन्नाह।

'समो यतः स्यात् परिधिः शतांशः
पृथ्वी च पृथ्वी नितरां तनीयान्।
नरश्च ततृष्ठगतस्य तस्मा
त्समेव तस्य प्रतिभात्यतः सा ॥'

खोलस्य भूपरिधिप्रमाणस्य उपपत्तिमाह।

'पुराब्दरं चेद्दिवसोत्तरं स्यात्
तदत्तविश्वेबलवेत्तदा किम्।
चक्रांशकैरित्यनुपातयुक्त्या
युक्तं निरुक्तं परिधेः प्रमाणम् ॥'

तदेव दृढीकुर्व्वन्नाह।

'निरक्षदेशात् क्षितियोऽक्षभागै-
र्भवेद्दवन्ती गणितेन यस्मात्।
तदन्तरं षोडशसंगुणं स्याद्
भमानमस्माद्वद किं तदुक्तम् ॥
यद्भोन्नतित्रयहृतित्रयहतोदयास्त-
च्छायादिकं परिधिना घटतेऽसुना हि।
नान्येन तेन जगदुक्तमहीप्रमाण-
प्रामाण्यमन्वयबुना यतिरेकतश्च ॥'

अथ भूगोलपुरनिवेशमाह।

'लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये बडवानलञ्च ॥
कुरुक्षपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति।
वसन्ति मेरौ सुरसिद्धसंघा
और्व्वे च सर्व्वे नरकाः सदैत्याः ॥
यो यत्र तिष्ठत्यवनीतलस्य-
मात्मानमस्या उपरिस्थितञ्च।
स मन्यतेऽतः कुचतुर्थसंस्था
मिथश्च ते तिर्य्यगिवामनन्ति ॥
अधःशिरस्का कुदलान्तरस्था
च्छाया मनुष्या इव नीरतीरे।
अनाकुलास्तीर्य्यगधःस्थिताश्च
तिष्ठन्ति ते तत्र वयं यथात्र ॥'

अथ द्वीपानां समुद्राणाञ्च संस्थानमाह।

'भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बूद्वीपं प्राहुराचार्य्यवर्य्याः।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराज्यम्बुधीनां निवेशः ॥
लवणजलधिरादौ दुग्धसिन्धुश्च तस्मा-
दन्नः शन्तरश्चिः श्रीश्च यस्माद्बभूव।
महितरजपद्मः पद्मजन्मादिदेवै-
र्वसति सकलवासो वासुदेवश्च यत्र ॥
दध्नो घृतस्येक्षुरसस्य तस्मा-
न्मद्यस्य च स्वादुजलस्य चान्तः।
स्वादूदकान्तर्वडवानलोऽयौ
पाताललोकाः पृथिवीपुटानि ॥
चतुष्कषा मणिगर्भाशुसप्तप्रकाशा
एतेषु सासुरगणाः फणिनो वसन्ति।
दीप्यन्ति दिक्षरमणीरमणीयदेहैः
सिद्धाश्च तत्र हि लसत्कनकावभासैः ॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च।
द्वयोर्द्वयोरन्तरमेकमेकं
सप्तद्वयोर्दीपमुदाहरन्ति ॥'

अथ जम्बुद्वीपमध्ये गिरिनिवेशप्रवेश नवखण्डान्याह ।

'लङ्कादेशाद्विमगिरिरुदक् हेमकूटश्च तस्मात्
तस्माच्चान्यो निषध इति ते सिन्धुपर्यन्त-
दैर्घ्याः ।
एवं सिद्धादुदगपि पुरात् मद्भवक्षुल्लहैमा-
वर्षाख्येषां जगुरिह बुधा अन्तरे हैमवादीन् ॥
'भारतवर्षमिदं ह्युदगस्मात्
किम्पुरुषवर्षमतो हरिवर्षम् ।
सिद्धपुराच्च तथा कुरु तस्माद्-
विद्धि हिरण्मयरम्यकवर्षे ॥
माल्यवांश्च यमकोटिपत्तनाद्-
रोमकाच्च किल गन्धमादनः ।
नीलशैलनिषधावधी च तौ
अन्तरालमनयोरिलावृतम् ॥
माल्यवज्जलधिमध्यवर्ति
यत्तत् भद्रतुरगं जगुर्बुधाः ।
गन्धशैलजलराशिमध्यगं
केतुमालकमिला कलाविदः ॥
निषधगोलसुगन्धसुमाल्य-
केरलमिलावृतमाल्यभावभौ ।
अमरकेलिकुलाय समाकुलं
रुचिरकाञ्चनचित्रमहीतलम् ॥'

अथ मेरुसंस्थानमाह ।

'इह हि मेरुगिरिः किल मध्यगः
कनकरत्नमयस्त्रिदशालयः ।
द्वयजन्मकुपद्मजकर्णिके-
केति च पुराणविदः समवर्णयन् ॥
विष्कम्भशैलाः खलु मन्दरोऽस्य
सुगन्धशैलो विपुलः सुपार्श्वः ।
तेषु क्रमात् सन्ति च केतुजृम्भाः
कदम्बजम्बूवटपिप्पलाख्याः ॥
जम्बूफलामलगलद्रसतः प्रवृत्ता
जाम्बूनदीरसयुता नदभूत् सुवर्णम् ।
जाम्बूनदं हि तदतः सुरसिद्धसंघाः
ग्रस्यत् पिबन्त्यतपानपराद्सुखास्ते ॥
वनं तथा चित्ररथं विचित्रं
तैम्बारुरोनन्दननन्दनञ्च ।
भ्रुवाश्रयं यत् भ्रुतिलक्षं सुराणां
भ्राजिष्णु वैभ्राजमिति प्रसिद्धम् ॥
सरांस्यथैतेष्वरुणञ्च मानसं
महाह्रदं श्वेतजलं यथाक्रमम ।
सरःसु रामारमणश्रमालसाः
सुरा रमन्ते जलकेलिलालसाः ॥
सदत्नकाञ्चनमयं शिखरचयञ्च
मेरौ सुरारिकपुरारिपुराणि तेषु ।
तेषामधः श्रुतमखस्खलनान्नकानां
रत्नोल्बणानिलभ्रमीभ्रपुराणि चाष्टौ ॥'

तत्र अन्यविशेषमाह ।

'विष्णुपदीविष्णुपदात् पतिता मेरौ चतुर्द्धासीत्
विष्कम्भाचलमस्तकप्रस्तसरः संगता गता
वियति ।
सीताख्या भद्राश्वं सालकनन्दा च भारतं वर्षम्
चक्षुश्च केतुमालं भद्राख्या चोत्तरान् कुरून्
याता ॥
या कल्पिताभिलषिता हरा शृङ्गवगाहिता
पीता ।
उक्ता स्मृता स्तुता वा पुनाति बहुधापि पापिनः
पुरुषान् ॥
यां चलिते दलिताखिलबन्धो
गच्छति बलगति तत्पिशुसंघः ।
प्राप्ततटो विजिताम्लकदूतो
याति नरो निरयात् सुरलोकम् ॥'

अथ भारतवर्षमध्ये नव खण्डानि सप्त कुलाचलांश्चाह ।

'ऐन्द्रं कसेरुसकलं किल ताम्रपर्ण-
मन्यन्नभस्तिमदतश्च कुमारिकाख्यम् ।
नागञ्च सौम्यमिह वारुणमन्यखण्डं
गान्धर्वसंज्ञमिति भारतवर्षमध्ये ॥
वर्षव्यवस्थितिरिहैव कुमारिकाख्ये
शैलेषु चान्यजनका निवसन्ति सर्वे ।
माहेन्द्रशुक्तिमलयर्क्षकपारिपात्राः
सह्याः सविन्ध्य इह सप्त कुलाचलाख्याः ॥'

अथ लोकव्यवस्थामाह ।

'भूर्लोकाख्यो दक्षिणे यत्र देशा-
दस्मात् सौम्योऽयं भुवः खञ्च मेरुः ।
लभ्यः पुण्यैः खे मरुद्भिः स्वाञ्जनोऽतो-
ऽनल्पानल्पैः खेचरैः सङ्गमन्यः ॥'

दिग्व्यवस्थामाह ।

'लङ्कापुरेऽर्कस्य यदोदयः स्या-
त्तदा दिनार्द्धं यमकोटिपूर्य्याम् ।
अधस्ततः सिद्धपुरेऽस्तकालः
स्यादोमके रात्रिदलं तदेव ॥
यत्रोदितोऽर्कः किल तत्र पूर्व्वा
तत्रापरा यत्र गतः स चास्तम् ।
तन्मत्स्यतोऽन्ये च ततोऽखिलाना-
मुदक्स्थितो मेरुरिति प्रसिद्धम् ॥'

अथ विशेषमाह ।

'अधोऽन्वियिन्याः कुचतुर्थभागे
प्राच्यां दिशि स्यादयमकोटिरेव ।
ततश्च पश्चान्न भवेदवन्ती
लङ्केव तस्या ककुभि प्रतीच्याम् ॥
तथैव सर्वत्र यतो हि यत् स्यात्
प्राच्यां ततस्तन्न भवेत् प्रतीच्याम् ।
निरक्षदेशादितरत्र तस्मात्
प्राचीप्रतीच्यौ च विचित्रसंज्ञे ॥'

अथ भचक्रभ्रमणव्यवस्थामाह ।

'निरक्षदेशे क्षितिमण्डलोपगौ
ध्रुवौ नरः पश्यति दक्षिणोत्तरौ ।
तदाश्रितं खे जलयन्त्रवत्तथा
भमद्भचक्रं निजमस्तकोपरि ।
उदग्दिशं याति यथा यथा नर-
स्तथा तथा खान्नतनक्षत्रमण्डलम् ।
उदग्ध्रुवं पश्यति चोन्नतं क्षिते-
स्तदन्तरे योजनजाः पलांशकाः ॥
योजनसंख्या भांशै३६०र्गुणिता
कुपरिधिर्भुता ४८४७ भवन्त्यंशाः ।
भूमौ कक्षायां वा
भागेभ्यो योजनानि च यस्तम् ॥'

अथ देवदैत्यानां ध्रुवर्क्षसंस्थानमाह ।

'सौम्यं ध्रुवं मेरुगताः क्षमध्ये
याम्यञ्च दैत्या निजमस्तकोर्द्धे ।
सव्यापसव्यं भ्रमदभचक्रं
विलोकयन्ति क्षितिजप्रसक्तम् ॥'

उत्तरगोले क्षितिजादूर्द्धं परितो भ्रमन्तमाह-
त्यम् ।

सव्यं त्रिदशाः सततं पश्यन्त्यसुरा अपसव्यं
याम्ये ॥

इन्द्रान्तमारोहति यैः क्रमेण
तैरेव तृप्तैरवरोहती नः ।
यत्रैव दृष्टः प्रथमं स दंडे-
स्तत्रैव तिष्ठन्न विलोक्यते किम् ॥
दिनं सुराणामयनं यदुत्तरं
निशेतरत् सांहितिकैः प्रकीर्त्तितम् ।
दिनोन्मुखैरर्कै दिनमेव तन्मतं
निशा तथा तत्फलकीर्त्तनाय वै ॥
विधूर्द्धभागे पितरो वसन्तः
स्वाधःसुधादीधितिमामनन्ति ।
पश्यन्ति तेऽर्कै निजमस्तकोर्द्धे
दर्शे यतोऽस्मादयुगलं तदेषाम् ॥
कृष्णे दले पक्षदलेऽभ्युदेति
शुक्लेऽस्तमेत्य तत एव सिद्धम् ।
भाद्वांन्तरत्वान्न विधोरधःस्थं
तस्मान्निशीथः खलु पौर्णमास्याम् ॥
यदतिदूरगतो हृदिवः क्षितेः
सततमाप्रलयं रविमीक्षते ।
भवति तावदयं ग्रयितस्य तद्-
युगसहस्रयुगं द्युनिशं विधेः ॥'

अथ भूपरिधिमानं प्राक्थितमपि विशेषार्थ-
माह ।

'प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्गनन्दा-
ब्धय ४९४७
स्तद्व्यासः कुभुजङ्गपायकभुवः सिद्धांशके
९
नाधिकः । १५८१।२४
एष्टचैवफलं यथा युगगुणचिंशच्छराद्रयो
७८५१०३॥
भूमेः कन्दुकजालवत् कुपरिधिव्यासाहतेः
प्रस्फुटम् ॥'

भूपृष्ठफलस्य लक्षोक्तस्य दूषणमाह ।

'दृष्टं कन्दुकपृष्ठजालवदिलागोले फलं क्षिप्तं
ललेनास्य शतांशकोऽपि न भवेदृष्यस्तृफलं
वास्तवम् ।
तत् प्रत्यक्षविरुद्धसुद्धतमिदं नैवास्तु वा चास्तु वा
हे प्रौढ़ा गणका विचारयत तन्मध्यस्थबुद्ध्या
भृशम् ॥

अथ सदृयुक्तिमाह ।
'यत् परिधिर्हविष्कर्म वृत्तं ज्ञात्वा किलांशुकम् ।
तेनार्हं छाद्यते गोलः किञ्चिदस्यच्च शिष्यते ॥
गोलक्षेत्रफलाद्यस्मादस्यक्षेत्रफलं यतः ।
सार्द्धद्विगुणितासन्नं तावदेवापरे दले ॥
एवं षष्ठगुणात् क्षेत्रफलात् पृष्ठफलं खलु ।
नाधिकं जायते तेन परिधिघ्नं कुतः कृतम् ॥
वृत्तक्षेत्रफलं यस्मात् परिधिघ्नं न युक्तिमत् ।
दुष्टत्वाद्गणितस्यास्य दुष्टं भूपृष्ठजं फलम् ॥"
अथान्यथा प्रतिपाद्यते ।
'गोलस्य परिधिः कल्प्यो वेदघ्न्यामितेर्मितः ।
सुखदृग्नगरेखाभिर्यद्दामलके स्थितः ॥
ढक्षघ्नो वृषकास्त्रहृत् प्रागुक्तपरिधिर्मितात् ।
ऊर्द्धाधःक्षतरेखाभिर्गोले षष्ठान् प्रकल्पयेत् ॥
तत्रैकषष्ठक्षेत्रफलं खखेः प्रसाध्यते ।
सर्व्वत्रैवं त्रिभज्यार्द्धहीनं त्रिज्यार्द्धभाजितम् ॥
एवं षष्ठफलं तत् स्याद्गोलाभासमं यतः ।
परिधेरासघातोऽतो गोलपृष्ठफलं स्फुटम् ॥'
अथ भूमेः प्रलयभेदान् प्रलयञ्चाह ।
'ब्रह्मविधैरहि भुवः समन्तात्
स्याद्योजनं भूभवभूतिपूर्व्वैः ।
ब्राह्म्यं लयं योजनमात्रशेषे-
र्नाग्नेर्भुवः प्राकृतिकोऽखिलायाः ॥
दिने दिने यन्म्रियते हि भूते-
र्दैनन्दिनं तं प्रलयं वदन्ति ।
ब्राह्मं लयं ब्रह्मदिनान्तकाले
भूतानि यद्ब्रह्मतनुं व्रजन्ति ॥
ब्रह्मात्यये यत् प्रकृतिं प्रयान्ति
सर्व्वाण्यतः प्राकृतिकं स्मृतीज्याः ।
लीनान्यतः कर्म्मपुटान्तरत्वात्
पृथक् क्रियन्ते प्रकृतेर्विकारैः ॥
ज्ञानाग्निदग्धाखिलपुण्यपापा
मनः समाधाय हरौ परेशे ।
यद्योगिनो यान्ति निवृत्तिमस्मा-
दात्यन्तिकं चेति लयश्चतुर्द्धा ॥'
अथ ब्रह्माण्डगोलमाह ।
'भूभूधरश्चिदग्रदानवमानवाद्या
ये याश्च धिष्ण्यगगनेचरचक्रकक्षाः ।
लोकत्रयस्थितिरुपर्य्यपरिप्रदिष्टा
ब्रह्माण्डभाण्डजठरे तदिदं समस्तम् ॥"
अथान्योदित ब्रह्माण्डमानं पूर्व्वोक्तमपि प्रसङ्गादनुवदति सा ।
कोटिघ्नैर्नवनन्दषट्कनखभूभूभृद्भुजङ्गेन्दुभि-
र्ज्योतिःशास्त्रविदो वदन्ति नभसः कक्षामिमां योजनैः ।
१८०१२०६६२०००००००० ।
तद्ब्रह्माण्डकटाहसम्पुटतटे केचिज्जगुर्वेदनं
केचित् प्रोचुरदश्चदश्चकगिरिं पौराणिकाः सूरयः ॥

करतलकलितामलक-
वदमलं सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहत-
तमसो नभसः परिधिरुदितस्तैः ॥

ब्रह्माण्डमेतन्मितमस्तु नो वा
कल्पे ग्रहः क्रामति योजनानि ।
यावन्ति पूर्व्वैरिह तत्प्रमाणं
प्रोक्तं खकक्षाख्यमिदं मतं नः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशः समाप्तः ॥

भूच्छायं, क्ली, क्ली, (भुवश्छाया । "विभाषासेनासुराच्छायानिशानाम् ।" २ । ४ । २५ । इति ततपुरुषे विभाषया नपुंसकम् । छायावाचकस्तु केवलं क्लीवत्वं) अन्धकारः । इति शब्दमाला ॥

भूजन्तुः, पुं, (भुवो जन्तुरिव ।) उपरसविशेषः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य भूनागशब्दे द्रष्टव्यः ॥)

भूजम्बूः, क्ली, (भूवो जम्बूरिव सादृश्यात्) विकङ्कतफलम् । गोधूमः । इति मेदिनी । वे, १४ ॥ भूमिजम्बूः । इति राजनिर्घण्टः ॥

भूतं, क्ली, (भू + क्तः ।) युक्तम् । न्यायः । आदिः । पृथिव्यप्तेजोवायाकाशपञ्चकम् । (यथा, मनुः । १२ । १४ ।
"तासुभौ भूतसम्पृक्तौ महान् क्षेत्रज्ञ एव च ॥
उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः ॥"
"स च त्रिविधो वैकारिकस्तैजसो भूतादिरिति । भूतादेरपि तैजससहायात्तन्मात्राण्येव पञ्चतन्मात्राण्युत्पद्यन्ते । तद्यथा । शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति । तेषां विशेषाः शब्दस्पर्शरूपरसगन्धास्तेभ्यो भूतानि योमानिलानलजलोर्व्वयः ।" इति सुश्रुते शारीरस्थाने प्रथमेऽध्याये ।)
ऋतम् । सत्यम् । इत्यमरभरतौ ॥ पिशाचादिः । (यथा, श्रीभागवते । १ । १४ । २९ ।
"एषा घोरतमा वेला घोराणां घोरदर्शना ।
चरन्ति यस्यां भूतानि भूतेशानुचराणि ह ॥")
जन्तुः । इति मेदिनीशब्दरत्नावल्यौ ॥ (यथा, मनुः । ६ । ८ ।
"स्वाध्याये नित्ययुक्तः स्यादान्तो मैत्रः समाहितः ।
दाता नित्यमनादाता सर्व्वभूतानुकम्पकः ॥"
स्थावरजङ्गमात्मकं द्रव्यम् । यथा, मनुः । ८ । २०६ ।
"रक्षन् धर्म्मञ्च भूतानि राजा वध्यांश्च घातयन् ।
यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ॥")
वस्तुतत्त्वम् । यथा,—
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥
छलं प्रमादाभिहितम् । निरस्य परित्यज्य । भूतेन वस्तुतत्त्वानुसरणेन । व्यवहारान्नयेदन्नृपः । यस्माद्भूतमपि वस्तुतत्त्वमपि अनुपन्यस्तमनभिहितं हीयते हानिमुपगच्छति व्यवहारतो व्यवहारेण साक्ष्यादिभिः । तस्माद्भूतानुसरणं कर्त्तव्यम् । यथार्थिप्रत्यर्थिनौ सत्यमेव वदतस्तथा सभ्येन सभापतिना यतितव्यं सामादिभिरुपायैस्तथा सति साक्ष्यादिनैरपेक्ष्येणैव निर्णयो भवतीति ॥ अथ सर्व्वथापि भूतानुसरणं न शक्यते कर्त्तुं तथा सति साक्ष्यादिभिर्निर्णयः कार्य्य इत्यनुकल्पः । यथोक्तम् । भूतस्फुलानुसारित्वाद्विगतिः समुदाहृता । भूतन्तत्त्वार्थयुक्तं यत् प्रमादाभिहितं छलमिति ॥ तत्र भूतानुसारी व्यवहारो मुख्यः । छलानुसारी त्वनुकल्पः । इति मिताक्षरायां व्यवहाराध्यायः ॥

भूतं, त्रि, (भावते स्मेति । "आदृगमहनजनः किकिनौ लिट् च ।" ३ । २ । १७१ । इति भावे क्तः । भू + क्तः । भूतिरस्यस्येति वा । अर्शआदित्वात् अच् । अभवदिति वा । भुवो गत्यर्थ इति । भूतार्थे कर्त्तरि क्तः ।) प्राप्तः । जन्तुः । (यथा, ऋग्वेदे । १ । २० । ६ ।
"धिया चक्रे वरेण्यो भूतानां गर्भमादधे ॥"
यथा च चरके शारीरस्थाने तृतीयेऽध्याये ॥
"भूतानाञ्चतुर्व्विधा योनिर्जरायुण्डस्वेदोद्भिदः ।")
अतीतम् । (यथा, कथासरित्सागरे । १ । २४ ।
"भूतं भवद् भविष्यद् वा किं तत् स्यात् जगति प्रिये ।
भवती यन्न जानीयादिति ग्रन्थोऽप्युवाच ताम् ॥")
वृत्तम् । (यथा, सुश्रुते चिकित्सितस्थाने । १० अध्याये ।
"गोग्रहद्भूतानां वा यवानां ग्रहणं कारयित्वा ।")
सत्यम् । सद्ग्रहम् । इत्यमरभरतौ ॥ प्राप्तम् । (यथा, महाभारते । १३ । ९४ । १५ ।
"यद् ब्राह्मणसुखात् प्राप्तं प्रतिगृह्णन्ति वै वचः ।
भूतात्मानो महात्मानस्ते न यान्ति पराभवम् ॥")
"भूतः प्राप्तो वशीकृत आत्मा चित्तं यैस्ते ॥"
इति तट्टीकायां नीलकण्ठः ।) सत्यम् । इति मेदिनीशब्दरत्नावल्यौ ॥ (यथा शाकुन्तले । प्रथमाङ्के । "सूत्रधारः । सम्यक्तम् । आर्ये ! कथयामि ते भूतार्थम् ।") भूतकालस्य पर्य्यायो यथा । वृत्तम् २ अतीतम् ३ क्षुण्णम् ४ निर्भृतम् ५ गतम् ६ । इति राजनिर्घण्टः ॥ उत्तरपदस्य एव भूतशब्दः समार्थ इति शाब्दिकाः । यथा देवभूतोऽयम् । इति भरतः ॥ (उत्तरपदस्य भूतशब्दः स्वरूपार्थोऽपि । यथा, मनुः । १ । ५ ।
"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः ॥")

भूतः, पुं, (भू + कर्त्तरि क्तः ।) देवयोनिविशेषः । स च अधोमुखोर्द्धमुखादिः पिशाचभेदो ब्रह्मकुचरो बालग्रहः । इत्यमरभरतौ ॥ (यथा, मार्कण्डेयपुराणे । ५१ । ५३ ।
"विचित्रेष्वनुभावेषु बालकानान्तु शान्तये ॥")
कुमारः । इति मेदिनी । ते, ४१ ॥ योगीन्द्रः । इति शब्दरत्नावली ॥ क्षुद्रचतुर्द्दशी । इति चिकाण्डशेषः ॥ * ॥ भूतनाशकौषधम् । यथा,
"श्वेतापराजितामूलं शिरीषं तण्डुलवारिणा ।
तेन नश्यन्ति दानं स्याद्भूतदृष्टस्य विद्रवम् ॥

भूतघ्नी

अगस्त्यपुष्पनस्यो वै समरीचच भूतहृत्।
भृङ्गराजस्वरसे वै हिङ्गु निम्बपत्राणि वै यवाः।
गौरसर्षप एभिः स्यात्क्षेपो भूतहरः स्मृतः॥
गोरोचना मरीचानि पिप्पली सैन्धवं मधु।
अञ्जनं स्मृतमेभिः स्याद् यक्षभूतहरं शिव!॥
अपि च।
"वचा त्रिकटुकश्चैव करञ्जं देवदारु च।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम्॥
प्रियङ्गुनिम्बचित्रकुगोमत्रैश्चावचूर्णितम्।
नस्यमालेपनञ्चैव स्नानमुद्वर्तनं तथा॥
अपस्मारविषोन्मादग्रहबालग्रहेश्वरापहम्।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम्॥"
इति गारुडे १९२। १९६ अध्यायः॥
शृङ्गभूता यथा,—
"हते वराहरूपेण भर्गमासाद्य ते गताः।
चतुर्भागाः स्वयं भूत्वा भूतं कर्म्मेति वै जगुः॥
भूतत्वमभवत्तेषां चतुर्भागगतां तदा।
वचनात् पद्मजातस्य भूतग्रामास्ततो मताः॥
दो लोकविदितः पूर्व्वं भूतग्रामश्चतुर्विधः।
यतस्तेभ्योऽधिका यस्मैस्तद्भूतग्राम उच्यते॥
इति वः सर्व्वमाख्यातं भूताः शृङ्गगता यथा।"
इति कालिकापुराणे २६ अध्यायः॥
(वसुदेवस्य पौरवीगर्भजातस्य दादशपुत्राणां ज्येष्ठतमः। यथा, भागवते। ९। २४। ३७।
"पौरव्यामात्मजा ह्येते भूताद्या द्वादशाभवन्॥")
भूतकेशः, पुं, (भूतस्य केश इव।) स्वनामख्यातक्षुपम्। तत्पर्य्यायः। गोलोमी २। इत्यमरः। २। १०। १११॥ भूतकेशी ३ अल्पकेशी ४ केशी ५। इति रत्नमाला। भूतानां केश इव भूतकेशः स्त्रीत्वमिति केचित्। स्त्री चेत्तत्रे। अथ द्योर्भूतकेशी गोलोमी भूतकेशिकेति वाचस्पतिः। इति भरतः।
भूतकेशी, स्त्री, (भूतकेश+गौरादित्वात् ङीष्।) भूतकेशः। इति रत्नमाला॥ (यथा, सुश्रुते उत्तरतन्त्रे। ६० अध्याये।
"गोलोमी चाजलोमी च भूतकेशी जटा तथा॥")
श्रीपालिका। गोलसिन्दूरः। इति राजनिर्घण्टः॥
भूतक्रान्तिः, स्त्री, (भूतानां क्रान्तिः।) भूतावेशः। इति राजनिर्घण्टः॥
भूतगन्धा, स्त्री, (भूतः महेशं विष्णुमपि प्रकटितोगन्धोऽस्याः।) सुरागामगन्धद्रव्यम्। इति जटाधरः॥
भूतघ्नः, पुं, (भूतं हन्तीति। हन्+टक्।) उष्टः। इति हेमचन्द्रः॥ लशुनः। भूजंटश्चः। इति राजनिर्घण्टः॥ भूतनाशके त्रि॥ (यथा, तन्त्रसारे।
"भूतघ्नेषु विकोशे क्षेविंदुता क्रूरचेतसः।
भूतप्रेतपिशाचाश्च वेतालाः भैरवादयः।")
भूतघ्नी, स्त्री, (भूतं हन्तीति। हन्+टक्+ङीप।) तुलसी। इति राजनिर्घण्टः॥ शुण्ठिका। इति रत्नमाला॥

भूतच

भूतचतुर्दशी, स्त्री, (भूतप्रिया भूतोद्देशे क्रिया कर्म्मता वा चतुर्दशी। मध्यपदलोपी समासः।) कार्त्तिकशुक्लचतुर्दशी। सा एव यमचतुर्दशी। तत्तुल्यं यथा, पाद्मे।
"चतुर्दश्यां धर्म्मराजपूजा कार्य्या प्रयत्नतः।
स्नानमावश्यकं कार्य्यं नरैर्नरकभीरुभिः॥
अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः।
तस्यास्त्रिकभवो धर्म्मो नश्यत्येव न संशयः॥"
स्कान्दे च तत्रैव।
"कार्त्तिके कृष्णपक्षे तु चतुर्दश्यां विधूदये।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः॥
किञ्च पाद्मे तत्रैव।
"ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः।
जीवत्पितापि न कुर्य्यात्तं तर्पणं यमभीरुयोः॥
यज्ञोपवीतिना कार्य्यं प्राचीनावीतिना तथा॥
देवत्वञ्च पितृत्वञ्च यमस्यास्ते द्विरूपता।
नक्तं यमचतुर्दश्यां यः कुर्य्याच्छिवसन्निधौ।
न तं ऋतुशतेनापि प्राप्यते पुण्यमीदृशम्॥
कुमारीवटुकान् पूज्य तथा श्वेतपोषणान्।
राजसूयफलं तेन प्राप्यते नात्र संशयः॥
कार्त्तिके भौमवारेण चित्रा श्रृङ्गा चतुर्दशी।
तस्यां भूतेशमभ्यर्च्य गच्छेच्छिवपुरं नरः॥
किञ्च।
अमावास्यास्तचतुर्दश्याः प्रदोषे दीपदानतः।
यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नरः॥"
इति श्रीहरिभक्तिविलासः॥
अपि च। लेङ्गे।
"कार्त्तिके कृष्णपक्षे च चतुर्दश्यां दिनोदये।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः॥
अपामार्गपल्लवञ्च भ्रामयेच्छिरसोपरि।
ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः॥
नरकाय प्रदातव्यो दीपः संपूज्य देवताः।
नरकाय नरकनिवृत्तये।
अर्थोऽभिधेयो वै वस्तु प्रयोजननिवृत्तिषु॥
इति निवृत्तावपि तादर्थ्ये इत्यनेन चतुर्थीविधानात्। अपामार्गश्चामलमन्त्रः।
प्रीतलोष्ठसमायुक्तसकण्टकदलान्वित।
हर पापमपामार्ग! भ्राम्यमाणः पुनः पुनः॥
ततः प्रदोषसमये दीपान् दद्यात् प्रयत्नतः।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च॥
भविष्ये।
कार्त्तिके भौमवारे च चित्रा श्रृङ्गा चतुर्दशी।
तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवम्॥
यां कांचित् सरितं प्राप्य कृष्णपक्षे चतुर्दशीम्,
यमुनायां विशेषेण नियतस्तर्पयेदृषभान्।
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च।
औदुम्बराय दध्नाय नीलाय परमेष्ठिने।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः॥
एकैकस्य तिलैर्मिश्रांञ्जलीन् दद्याज्जलाञ्जलीन्।
सम्वत्सरकृतं पापं ततक्षणादेव नश्यति॥"

भूतभा

आचारादत्रचतुर्दश्यामकभक्ष्यं कर्त्तव्यम्। तत्र निर्णयोऽन्ततम्।
"ओलं केसुकवास्तुकं सरघपं कालञ्च निम्बं जयां
ग्राजिलीं हिलमोचिकाञ्च पटुकं ग्रौलफं
गुडूचीमथा।
भण्टाकीं सुनिषण्णकं शिवदिने खादन्ति ये
मानवाः
प्रेतत्वं न च यान्ति कार्त्तिकदिने कृष्णे च भूते
तिथौ॥"
जयां जयन्तीं पटुकं पटोलं ग्रौलफं गुलफा इति ख्यातम्। सुनिषण्णकं सुवल्लिया इति ख्यातम्। इति तिथ्यादितत्त्वम्॥
भूतजटा, स्त्री, (भूतस्य जटेव तत्सदृशत्वात्।) जटामांसी। इति शब्दमाला॥ (पर्य्यायो यथा,
"जटामांसी भूतजटा जटिला च तपस्विनी।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
गन्धमांसी। इति राजनिर्घण्टः॥
भूतद्रावी, [न्] पुं, (भूतान् पिशाचान् द्रावयतीति। द्रु+णिच्+णिनिः।) भूताङ्कुशवृक्षः। रक्तकरवीरः। इति राजनिर्घण्टः॥
भूतद्रुमः, पुं, (भूतप्रियो द्रुमः।) श्वेतान्तकवृक्षः। इति राजनिर्घण्टः॥
भूतधात्री, स्त्री, (भूतानि धरतीति। धृ+क्तृच्। +ङीप्।) पृथिवी। इति त्रिकाण्डशेषः॥ (यथा, बृहत्संहितायाम्। ८। ३०।
"निष्पन्नशालीक्षुयवादिशस्या
भयैर्विमुक्तासुपशान्तवैराम्।
संवृद्धलोकां कलिदोषमुक्तां
चक्रं तदा शास्ति च भूतधात्रीम्॥")
भूतनाथः, पुं, (भूतानां नाथः।) शिवः। इति शब्दरत्नावली॥ (यथा, रघुः। २। ५८।
"तद्भूतनाथानुग! नार्हसि त्वं॥")
भूतनायिका, स्त्री, (भूतानां नायिका नियामिका।) दुर्गा। इति हेमचन्द्रः॥
भूतनाशनं, क्ली, (भूतानि प्राणिजातानि नाशयन्ति अनेनेति। नश+णिच्+ल्युट्।) रक्तार्जुनम्। इति राजनिर्घण्टः॥
भूतनाशनः, पुं, (भूतान् नाशयतीति। नश+णिच्+ल्युः।) भल्लातकः। इति रत्नमाला॥ सर्षपः। इति राजनिर्घण्टः॥
भूतपत्री, स्त्री, (भूत इव छत्रं पत्रं यस्याः। ङीष्।) तुलसी। इति राजनिर्घण्टः॥
भूतपुष्पः, पुं, (भूतयुक्तं प्राणिविशिष्टं पुष्पं यस्य।) श्लेष्मातकवृक्षः। इति रत्नमाला॥
भूतपूर्णिमा, स्त्री, (भूतानां पूर्णिमा।) आश्विनी पूर्णिमा। तत्पर्य्यायः। शारदी २ कौमुदी ३ अश्वयुजी ४ श्रुतपर्व्वा ५ रङ्गभूतिः ६ कोजागरा ७। इति शब्दरत्नावली॥
भूतब्रह्मा, [न्] पुं, (भूतात्मनो ब्रह्मा ब्राह्मणः।) देवलः। इति शब्दमाला॥
भूतभावनः, पुं, (भूतानि क्षित्यादीनि भावयति जनयतीति। भू+णिच्+ल्युः।) विष्णुः॥

(यथा, महाभारते। १३। १४६। १४।
"भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः॥"
महादेवः। यथा, महाभारते।१३।१७।३३।
"अभिवाद्यो महाकर्म्मा तपस्वी भूतभावनः॥")
वटुकभैरवः। इति विश्वसारतन्त्रोक्तं तस्याष्टोत्तरशतनामान्तर्गतनाम॥ (भूतानि भावयति पालयतीति। भूतपालके, त्रि। इति श्रीधरस्वामी॥ यथा गीतायाम्। ६। ५।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥")
भूतभृत्, पुं,(भूतानि बिभर्त्तीति। भृ+क्विप्। तुगागमश्च) विष्णुः। यथा, महाभारते।१३।१४६।१४।
भूतकृत् भूतभृद्भावो भूतात्मा भूतभावनः। इति तस्य सहस्रनामस्तोत्रम्॥ (भूतधारके, त्रि। यथा, गीतायाम्। ६। ५।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥")
भूतमारी, स्त्री, (भूतानि मारयतीति। भूत+मृ+णिच्+णिनिः।) चौड़ानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥
भूतयज्ञः, पुं, (भूतार्थो यज्ञः। भूतानि काकादिप्राणिजातानि तान्युद्दिश्य यो यज्ञ इति वा नित्यं गार्हस्थ्यकरणीय पञ्चयज्ञेषु यज्ञभेदः।)
भूतबलिः। ते तु पञ्चमहायज्ञान्तर्गतबलिवैश्वदेवकर्म्मणी। यथा, भूतेभ्यो बलिहरणं भूतयज्ञः। इति हारीतसूत्रम्॥ अस्यानुष्ठानं बलिशब्दे द्रष्टव्यम्। (यथा, मनुः। ४। २१।
"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत्॥")
भूतलिका, स्त्री, (भूतलं पृथ्वीतलं आधारत्वेन अस्त्यस्या इति। भूतल+ठन् टाप्।) पृक्का। इति राजनिर्घण्टः॥
भूतवासः, पुं, (भूतानां वासो यत्र।) कलिद्रुमः। इत्यमरः। २। ४। ५८॥ (तथा च पर्य्यायः।
"विभीतकस्त्रिफलिङ्गः स्यान्नाक्षः कर्षफलस्तु सः।
कलिद्रुमो भूतवासस्तथा कलियुगालयः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमेभागे॥
महादेवः। यथा, हरिवंशे उत्तरभविष्ये। १५। ३३।
"भूतवास! नमस्तुभ्यं सर्व्ववास! नमोऽस्तुते॥")
भूतविक्रिया, स्त्री, (भूतानामिव विक्रियास्याम्।) अपस्मार रोगः। इति राजनिर्घण्टः॥
भूतवृक्षः, पुं, (भूतप्रियो वृक्षः।) प्लाक्षोटवृक्षः। प्लक्षनाकवृक्षः। इति मेदिनी। वे, ५६॥
भूतवेणी, स्त्री, (भूतानामिव वेणीरस्याः। गौरादित्वात् ङीष्।) श्वेतवेणीफालिका। इत्यमरः। २। ४। ७१॥ (विशेषोऽस्याः श्वेतवेणीफालिकाशब्दे द्रष्टव्यः॥)
भूतशुद्धिः, स्त्री, (भूतानां देहारम्भकपृथिव्यादिपञ्चभूतानां शुद्धिः शोधनम्।) पूजादौ बीजविशेषद्वारावामकुक्षिस्थितपापपुरुषदहनपूर्ब्बकशरीरशोधनम्। तत्प्रयोगो यथा। रमिति जलधारया वह्निप्राकारं विचिन्त्य खाङ्गे उत्तानौ करौ कृत्वा सोऽहमिति जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारस्थकुलकुण्डलिन्या सह सुषुम्नावर्त्मना मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाख्यषट्चक्राणि भित्त्वा शिरोऽवस्थिताधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्य तत्रैव पृथिव्यप्तेजोवायुाकाशगन्धरसरूपस्पर्शशब्दनासिकाजिह्वाचक्षुस्त्वक्श्रोत्र वाक्पाणिपादपायूपस्थप्रकृतिमनोबुद्ध्यहङ्काररूपचतुर्विंशतितत्त्वानि जीवानि विभाव्य यमिति वायुबीजं धूम्रवर्णं वामनासापुटे विचिन्त्य तस्य षोड़शवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा वामकुक्षिस्थतत्तद्वर्णपापपुरुषेण सह देहं संशोष्य तस्य दक्षिणनासापुटे रमिति वह्निबीजं रक्तवर्णं ध्यात्वा तस्य षोड़शवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा पापपुरुषेण सह देहं मूलाधारोत्थितवह्निना दग्ध्वा तस्य दक्षिणद्वारजपेन वामनासया भस्मना सह वायुं रेचयेत्। ठमिति चन्द्रबीजं शुक्लवर्णं वामनासायां ध्यात्वा तस्य षोड़शवारजपेन ललाटे चन्द्रं नीत्वा नासापुटौ धृत्वा वमिति वरुणबीजस्य चतुःषष्टिवारजपेन तस्माल्ललाटस्थचन्द्रादमृतेनसुधया मातृकावर्णात्मिकया समस्तदेहं विरचय्य लमिति पृथ्वीबीजस्य दक्षिणद्वारजपेन देहं सुदृढं विचिन्त्य दक्षिणेन वायुं रेचयेत्। मात्रासंख्या वा।*।
तदुक्तं गौतमीये।
"सुषुम्नावर्त्मना सोऽहमिति मन्त्रेण योजयेत्।
सहस्रारे शिवस्थाने परमात्मनि देशिकः॥
धूम्रवर्णं ततो वायुबीजं षड्विन्दुलाञ्छितम्।
पूरयेद्दिड़या वायुं सुधीः षोड़शमात्रया॥
मात्रया तु चतुःषष्ट्या कुम्भयेच्च सुषुम्नया।
द्वात्रिंशन्मात्रया मन्त्री रेचयेत् पिङ्गलाख्यया॥
पूरयेदनया चैव सञ्चिन्त्य नीलमारुतम्।
रक्तवर्णं वह्निबीजं त्रिकोणं स्वस्तिकान्वितम्॥
तेन पूरकयोगेन मात्रया षोड़शाख्यया।
चतुःषष्ट्या मात्रया च निर्दहेत् कुम्भकेन च।
वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम्।
ब्रह्महत्याग्निरूपञ्च स्वर्णस्तेयभुजद्वयम्॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम्।
ततसंसर्गि पदद्वन्द्वमङ्गप्रत्यङ्गपातकम्॥
उपपातकरोमाणं रक्तश्मश्रु विलोचनम्।
खड्गचर्म्मधरं क्रुद्धमेवं कृत्वा विचिन्तयेत्॥
मूलाधारोत्थितेनैव वह्निना निर्दहेच्च तम्।
एवं संदह्य परितो द्वात्रिंशन्मात्रया ततः॥
भस्मना सहितं मन्त्री रेचयेद्दिड़या पुनः।
वामनाद्यां चन्द्रबीजं कुन्देन्दुद्युतसप्रभम्॥
भावेन्द्ररात्रे संयोज्य ततः षोड़शमात्रया।
सुषुम्नया चतुःषष्टिमात्रया लोपबीजकम्॥
ध्यात्वाऽमृतमयीं वृष्टिं पद्माग्रहर्षरूपिणीम्।
तया देहं विचिन्त्यैवं मनसा पिङ्गलाध्वना॥
द्वात्रिंशन्मात्रया मन्त्री लं बीजेन दृढं नयेत्।
स्वस्थाने हंसमन्त्रेण पुनरेनेव वर्त्मना॥
जीवं तत्रानि चानीय स्वस्थाने स्थापयेत्ततः।
इति कृत्वा भूतशुद्धिं मातृकान्यासमाचरेत्॥*
संक्षेपभूतशुद्धिर्यथा। पुरश्चरणचन्द्रिकायाम्।
"अथवान्यप्रकारेण भूतशुद्धिर्विधीयते।
धर्म्मैकन्दसमुद्भूतं ज्ञानमालासुशोभनम्॥
ऐश्वर्य्याष्टदलोपेतं परं वैराग्यकर्णिकम्।
स्वीयहृत्कमले ध्यायेत् प्रणवेन विकासितम्॥
कृत्वा तत्कर्णिकासंस्थं प्रदीपकलिकानिभम्।
जीवात्मानं हृदि ध्यात्वा मूले सञ्चिन्त्य कुण्डलीम्।
सुषुम्नावर्त्मनात्मानं परमात्मनि योजयेत्॥"
इति तन्त्रसारः॥
भूतसञ्चारः, पुं, (भूतस्य सञ्चारः।) भूतोन्मादरोगः। तत्पर्य्यायः। आवेशः २ भूतक्रान्तिः ३ ग्रहागमः। इति राजनिर्घण्टः॥
भूतसञ्चारी, [न्] पुं, (भूतेषु सञ्चरति इति भूत+सम्+चर णिनिः।) दावानलः। इति शब्दमाला॥
भूतसर्गः, पुं, (सृज्यते इति। सृज+भावे घञ्। भूतानां सर्गः।) भूतसृष्टिः। (यथा, मार्कण्डेयपुराणे। ४७। ३१।
"प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः।
तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते।")
"ब्राह्मं प्रजापतीयञ्च सौम्यमैन्द्रन्तथैव च।
गान्धर्व्वमथ कौबेरं रक्षःपैशाचमासुरम्॥
स्थावरं पाशवं मार्गं सार्पं प्राकृतिकन्तथा।
चतुर्दशविधं ह्येतद्भूतसर्गं प्रकीर्त्तितम्॥"
इति वह्निपुराणोक्तं कौबेरसर्गभेदम्॥
भूतसारः, पुं, (भूतः गतः सारो यस्य।) प्लक्षनाकप्रभेदः। इति राजनिर्घण्टः॥
भूतहन्त्री, स्त्री, (भूतानि हन्तीति हन+क्तृच्+ङीप्।) वन्याकर्कोटकी। नीलदूर्व्वा। इति राजनिर्घण्टः॥
भूतहरः, पुं, (भूतानि हरतीति हृ+अच्।) गुग्गुलुः। इति राजनिर्घण्टः॥
भूतहारि, [न्] क्ली, (भूतानि हरतीति हृ+णिनिः।) देवदारु। इति राजनिर्घण्टः॥
भूता, स्त्री, (भूत+टाप्।) लज्जावतीवृक्षः। यथा, स्कान्दे।
"ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै।
पूजितानि भवन्तीह भूतायां पार्व्वति क्षते॥"
अपि च।
"शिवरात्रिव्रते भूतां कामवित्तां विवर्ज्जयेत्॥"
इति तिथ्यादितत्त्वम्॥
भूताङ्कुशः, पुं, (भूतानामङ्कुश इव निवारकत्वात्।) स्वनामख्यातवृक्षः। तत्पर्य्यायः। चवकः २ क्षुरकः ३ तीक्ष्णः ४ क्रूरः ५ चमः ६ रागोद्दीपनसंज्ञः ७ भूतद्रावी ८ ग्रहाङ्कुशः ९। अस्य गुणाः। तीव्रगन्धत्वम्। उत्कटत्वम्। उष्णत्वम्। कटुत्वम्। भूतग्रहादिदोषघ्नत्वम्। वातवातनिरुन्नत्वञ्च। इति राजनिर्घण्टः॥

भूतात्मा, [त्] पुं, (भूतानामात्मा ।) देहः । (यथा, मनुसंहितायाम् । १२ । १२ ।
"यः करोति तु कर्म्माणि स भूतात्मोच्यते बुधैः ।"
"यः पुनरेष व्यापारान् करोति शरीराख्यः स पृथिव्यादिभूतारब्धत्वात् भूतात्मेति पण्डितैरुच्यते ।" इति तट्टीकायां कुल्लूकभट्टः ।)
परमेष्ठी । इति मेदिनी । ने, २०० । शिवः । युद्धम् । इति शब्दरत्नावली । विष्णुः । यथा,
"भूतकृत् भूतभृत् भावो भूतात्मा भूतभावनः ।"
इति महाभारते दानधर्म्मः ।
(जीवात्मा । यथा, मनुसंहितायाम् । ५ । १०६ ।
"अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ।"
यथा च तत्रैव शारीरस्थाने प्रथमेऽध्याये ।
तस्मिंश्चरमसंन्यासे समूलाः सर्व्ववेदनाः ।
समग्रा ज्ञानविज्ञाना निवर्त्तिं यान्त्यशेषतः ।
अतःपरं ब्रह्मभूतो भूतात्मा नोपलभ्यते ।
निःसत्त्वः सर्व्वभावेभ्यश्चिह्नं यस्य न विद्यते ।
गतिर्ब्रह्मविदां ब्रह्म तत्राचरमलक्षणम् ।
ज्ञानं ब्रह्मविदाचात्र नाशक्यज्ञातुमर्हतीति ।")
भूतारिः, क्ली, (भूतानां अरिः तन्निवारकत्वात् अभिधानात् क्लीवत्वम् ।) हिङ्गु । इति राजनिर्घण्टः ।
भूतार्त्तः, त्रि, (भूतेन ऋतः) भूताविष्टः । इति हैमचन्द्रः । ३ । १५५ ।
भूताली, स्त्री, (भूतानामालीव) भूपाटली । सुपली । इति राजनिर्घण्टः ।
भूतावासः, पुं, (भूतानामावासः) विभीतकवृक्षः । इति राजनिर्घण्टः । विष्णुः । यथा,—
"भूतावासो वासुदेवः सर्व्वासुनिलयो लयः ।"
इति महाभारते दानधर्म्मः । (शरीरम् । यथा, मनुसंहितायाम् । ६ । ७७ ।
"जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ।"
आखोटः । तत्पर्य्यायो यथा,—
"आखोटः पीतकनको भूतावासः खरच्छदः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
भूताविष्टः, त्रि, (भूतेन आविष्टः) पिशाचग्रस्तः । तन्नाशकचक्रम् यथा,—
"पञ्चरेखाः समुल्लिख्य तिर्य्यगूर्द्धमधो लिखेत् ।
पदानि षड्दशाप्याद्य लेखेमाद्ये सुनौ त्रयम् ।
नवमे सप्त दद्यात्तु वार्त्तं पञ्चदशे तथा ।
द्वितीयेऽष्टादशे षट् दिग्रि द्वौ चौद्दशे स्मृतिः ।
एकादिना समं श्रेयमिच्छार्द्धं चिकोलके ।
तदा द्वाविंशदादिः स्यात्तुर्य्यस्थेषु सर्व्वतः ।
दशैनाड्यारभ्य तत्तासां शुभं स्यादेषु कर्म्मसु ।
द्वाविंशत् प्रसवे नार्य्याश्चतुर्विंशत्प्रमे नृणाम् ।
भूताविष्टेषु पञ्चाग्रनृस्तनापत्यासु वै शुभम् ।
दासप्रतिस्तु वन्ध्यायां चतुःषष्टौ रणाभ्वनि ।
विषे विंशौ धान्यकीटेष्वष्टाविंशतिरेव च ।
चतुरष्टौ च राजानां रोदने परिकीर्त्तिता ।"
इति ज्योतिस्तत्त्वम् ।

१	८	१८	२३
२०	२१	३	६
७	२	२४	१७
२२	१६	५	४
५०	५०	५०	५०

भूताविष्टः, त्रि, (भूतेन आविष्टः ।) भूतक्रान्तः । भूतादिना रोगग्रस्तः । (यथा,—
"भूताविष्टेषु पञ्चाग्रनृस्तनापत्यासु वै शुतम् ।"
इत्यादि ज्योतिस्तत्त्वम् । भूतविशेषाणामावेशसमयाः । यथा,—
"देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि ।
गन्धर्व्वाः प्रायशोऽह्न्यां यक्षाश्च प्रतिपद्यथ ।
क्षणपक्षे च पितरः पक्षस्यामपि चोरगाः ।
रक्षांसि निशि पैशाचाश्चतुर्दश्यां विशन्ति च ।
दर्पकादीन् यथाच्छाया प्रीतोऽयं प्राणिनो यथा ।
खमग्निं भास्करार्च्चिश्च यथा देहश्च देहभृत् ।
विशन्ति च न दह्यन्ते ग्रहस्तद्वच्छरीरिणम् ।"
इति सुश्रुते उत्तरतन्त्रे षष्टितमेऽध्याये ।)
भूतावेशः, पुं, (भूतानामावेशः) भूतसञ्चारः । भूते पाओया इति भाषा । अस्य पर्य्यायआवेशशब्दे द्रष्टव्यः ।
भूतिः, स्त्री, (भवत्यनयेति । भू + "क्तिच्क्तौ च संज्ञायाम् ।" ३ । ३ । १७४ । इति क्तिच् ।) महादेवस्य अङ्गिमाद्यष्टप्रकारवैभवम् । इत्यमरः । १ । १ । ३८ । ग्रन्थभुतभस्म । इत्यमरटीकायां भरतः । भस्म । (यथा, शिशुपालवधे । १ । ४ ।
"त्वयं चकोतृक्षिप्तगजेन्द्रक्षत्तिना
स्फुटोपमं भूतिसितेन शृङ्गिणा ।")
सम्पत्तिः । (उत्तरोत्तरवृद्धिः । यथा, भगवद्गीतायाम् । १८ । ७४ ।
"यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः ।
तत्र श्रीर्व्विजयो भूतिर्ध्रुवा नीतिर्म्मतिर्म्मम ।")
हस्तिहङ्कारः । इति मेदिनी ते, ७० । (हस्तिहङ्कारोऽत्र गजमङ्गलम् । यथा, मेघदूते । १६ ।
"रेवां द्रक्षस्यपलविषमे विन्ध्यपादे विशीर्णां ।
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ।")
जातिः । इति विश्वः । (पिशाचभेदः । यथा, मार्कण्डेयपुराणे । ६६ । ३३ ।
"विष्णो विश्वसुगाराध्यो धर्म्मो धन्यः शुभाननः ।
भूतिदो भूतिकृद् भूतिः पितॄणां ये गया नव ।"
लक्ष्मीः । यथा, भागवते । ४ । १ । ४ ।
"यस्यायोः पुरुषः साक्षाद् विष्णुर्यज्ञस्वरूपधृक् ।
या स्त्री सा दक्षिणा भूतेरंशभूतानपायिनी ।"
भूतेर्लक्ष्म्याः । इति तट्टीकायां श्रीधरस्वामी ।) दृढिनामौषधम् । रोहिषतृणम् । भूतृणम् । इति राजनिर्घण्टः । (भवनमिति । भू + क्तिन्) उत्पत्तिः । सत्ता । इति भूधातोर्भावे क्तिप्रत्ययेन निष्पन्नम् ।
भूतिकं, क्ली, (भू + क्तिच् । संज्ञायां कन् ।) भूतिम्बः । कत्तृणम् । इत्यमरः । ३ । ३ । ८ । कटफलम् । यमानी । धनसारः । इति हेमचन्द्रः ।
भूतिकः, पुं, (भूति । संज्ञायां कन् ।) यमानी । इति रत्नमालाराजनिर्घण्टौ ।
भूतिकामः, पुं, (भूतिं कामयते इति । कम् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) राजमन्त्री । दृढस्रतिः । इति केचित् । ऐश्वर्य्याभिलाषिणि, त्रि । यथा । वायव्यं श्वेतमालभेत भूतिकामः । इत्यधिकरणमालायां द्वितीयपादे काम्यपशुकाण्डे विध्यर्थवादबोधिका श्रुतिः ।
भूतिकीलः, पुं, (भूतेः भस्मादिसम्पत्तेः कील इव जलदत्वात् ।) भूखातः । इति शब्दमाला । खाना इति भाषा ।
भूतिगर्भः, पुं, (भूतिः कवित्वसम्पत्तिर्गर्भेऽन्तर्यस्य । यद्वा भूतिशब्द उपाधिनाऽत्रोऽन्तर्यस्य ।) भवभूतिकविः । इति भूरिप्रयोगः ।
भूतिनिधानं, क्ली, (निधीयतेऽस्मिन्निति । नि + धा + अधिकरणे + ल्युट् । ततः भूत्या निधानमिति, षष्ठीसमासः ।) धनिष्ठानक्षत्रम् । इति जटाधरः ।
भूतिमान्, [त्] त्रि, ऐश्वर्य्ययुक्तः । भूतिरस्त्यस्य । इत्यर्थे मतुप्प्रत्ययेन निष्पन्नः । (यथा, महाभारते । ३ । २०३ । ४३ ।
"आयुष्मान् भूतिमांश्चैव श्रुता भवति पण्डितः ।")
भूतीकं, क्ली, (भूतिक । पृषोदरात् साधुः ।) भूनिम्बः । यमानी । भूस्तृणम् । कत्तृणम् । इति मेदिनी । के, १३५ । (यथा, सुश्रुते उत्तरतन्त्रे । ३६ अध्याये ।
"वर्षा पर्पटकं मुस्तं भूतीकमथ कट्फलम् ।"
यथा च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कत्तृणं रोहिषं देवजग्धं सौगन्धिकञ्चथा ।
भूतीकं धामपौरेय ग्रामकं धूमगन्धिकम् ।")
भूतृणं, क्ली, (शुक्लभूम् ।) गन्धतृणम् । गन्धखड़ इति भाषा । तत्पर्य्यायः । गन्धखेड़म् २ रौहिषम् ३ गोमयप्रियम् ४ । इति रत्नमाला । पटम् ५ रामकर्पूरम् ६ सत्तृणम् ७ ग्रैरम् ८ ग्रामकम् ९ धामकम् १० पौरम् ११ देवजग्धकम् । इति रत्नमालान्तरम् । (यथास्य पर्य्यायः ।
"गुच्छबीजन्तु भूतीकं सुगन्धं जनुकप्रियम् ।
भूतृणन्तु भवेच्छ्वा मालाढ्यकमित्यपि ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
भूतृणः, पुं, (शुक्लभूम् ।) भूस्तृणम् । सुगन्ध रोहिष इति परिमलदगन्धनि च अस्यदेशे प्रसिद्धः । तत्पर्य्यायः । रोहिषः २ भूतिः ३ भूतिकः ४ कुटुम्बकः ५ माखाढ्यः ६ समाजम्भी ७ छत्रः ८ अतिच्छत्रकः ९ गुच्छबीजः १० सुगन्धः ११ गुच्छालः १२ पुंस्त्वविग्रहः १३ वधिरः १४ अतिगन्धः १५ शूद्रकरोहः १६ करेरुकः १७ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । वातसन्मूहभूतग्रहावेशग्रहारुचिविषदोषनाशित्वञ्च । इति राजनिर्घण्टः ।

भूतेशः, पुं, (भूतानां प्राण्यादीनां प्रमथादीनां वाऽप्यहाद्वाच्च ईशः।) शिवः। इत्यमरः। १।१।३३॥ (यथा, राजतरङ्गिण्याम्। १।१०७।

"म्लेच्छैः सम्भादिते देशे स तदुच्छित्तये नृपः।
तपः सन्तोषितश्लेभे भूतेशात् सुकृती सुतम्॥")

भूत्तमं, क्ली, (भुवि उत्तमम्।) सुवर्णम्। इति हेमचन्द्रः। ४।१०॥

भूदरीभवा, स्त्री, (भूदर्य्यां भूविले भवतीति। भू+अच्। टाप्।) आखुपर्णी। इति भावप्रकाशः॥

भूदारः, पुं, (भुवं दारयतीति। दृ+कर्म्मण्यण्। ३।२।१। इत्यण्।) शूकरः। इत्यमरः। २।५।२॥

भूदेवः, पुं, (भुवो भुवि वा देवः।) ब्राह्मणः। इत्यमरः। १।७।४॥

भूधनः, पुं, राजा। भूरेव धनं यस्य सः। इति केचित्॥

भूधरः, पुं, (धरतीति। धृ+पचाद्यच्। भुवां धरः इति षष्ठीसमासः।) पर्व्वतः। इति हेमचन्द्रः॥ (यथा, मार्कण्डेयपुराणे। ५७।११।

"तेषां सहस्रशस्यान्ये भूधरा ये समीपगाः॥")

यन्नभेदः। यथा,—

"जलकच्छपपातालदोलाभूधरवायुकाः।
वकाद्या वन्नभेदाः स्युर्वान्त्याद्याश्च नखकाः॥"

इति ग्रन्थचन्द्रिका॥

(यथाच्च जयद्रथः।

"द्विपलं गुडकस्तस्य कृताईं गन्धकन्तथा।
कन्यालोरेच संमर्द्द्य दिनमेकं निरन्तरम्॥
वट्टा तद्भूधरे यत्ने दिनैकं मारयेत् पुटे॥"

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥

शिवः। यथा, महाभारते।१३।१४।१५१।

"भूधरो नागमौञ्जी च नागकुण्डलकुण्डली॥"

वृक्षः। यथा, भागवते। ३।१३।४०।

"दंष्ट्राग्रकोट्या भगवंस्त्वया धृता
विराजते भूधर! भूः सभूधरा।
यथा वनान्निःसरतो दता धृता
मतङ्गजेन्द्रस्य सपत्रपद्मिनी॥")

भूधात्री, स्त्री, (भूलक्ष्मा धात्री।) भूम्यामलकी। इति राजनिर्घण्टः॥ (यथास्य गुणाः।

"भूधात्री वातलातिक्ता कषाया मधुरा हिमा।
पित्तासृक्कासपित्तास्रकफकण्डूक्षतप्रणुत्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वटुकभैरवः। इति विश्वसारतन्त्रे तस्य ध्यानमन्त्रोक्तम्॥

भूधरः, पुं, (भुवं धरतीति। धृ+मूलविभुजादित्वात्। ३।२।५। इत्यस्य वार्त्तिकोक्त्या कः।) पर्व्वतः। इति हेमचन्द्रः। ४।६३॥

भूनागः, पुं, उपरसविशेषः। तत्पर्य्यायः। क्षितिनागः २ भूजन्तुः ३ रक्तजन्तुकः ४ क्षितिजः ५ क्षितिजन्तुः ६ रक्तसुक्तकः ७। अस्य गुणाः। वज्रमारकत्वम्। नानाविज्ञानकारकत्वम्। रसजारजत्वम्। तत्सत्त्वस्य विषापहत्वञ्च। इति राजनिर्घण्टः॥

भूनिम्बः, पुं, क्षुपविशेषः। चिराता इति भाषा। (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये।

"मधूकभूनिम्बयष्टिका इति समभागाः कल्कः स्यात्।")

तत्पर्य्यायः। अनार्य्यतिक्तः २ किरातः ३ रामसेनकः ४ किराततिक्तः ५ हैमः ६ काण्डतिक्तः ७ किरातकः ८। इति राजनिर्घण्टः॥ कटुतिक्तः ९। इति भावप्रकाशः॥ (तथा चास्य पर्य्यायान्तरम्। वैद्यकरत्नमालायाम्।

"किराततिक्तं कैरातं भूनिम्बः काण्डतिक्तकः॥")

अस्य गुणाः। वातिकत्वम्। तिक्तत्वम्। कफपित्तज्वरापहत्वम्। व्रणसंरोपणत्वम्। पथ्यत्वम्। कुष्ठकण्डूतिप्रशोफनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"किरातकोऽन्यो नेपालः सोऽर्द्धतिक्तो ज्वरान्तकः।
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः॥
सन्निपातज्वरश्वासकफपित्तास्रदाहजित्।
कासप्लीहवणाकुष्ठज्वरव्रणतृष्णाप्रणुत्॥"

इति भावप्रकाशः॥

अस्य गुणपर्य्यायान्तरे किराततिक्तग्रन्थे द्रष्टव्ये॥

भूनीपः, पुं, (भूमिलग्नो नीपः। शाकपार्थिवादित्वात् समासः।) भूमिकदम्बः। इति राजनिर्घण्टः॥

भूनेता, [तृ] पुं, (भुवो नेता नायकः।) राजा। इति केचित्॥

भूपः, पुं, (भुवं पाति रक्षतीति। पा+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) राजा। इत्यमरः। २।८।१॥ अर्घजोमेव प्रजादण्डकरणे तस्य पापं यथा।

"अर्घजोभेन यो भूपः प्रजादण्डं करोति च।
वृश्चिकानाञ्च कुर्ब्बे स तल्लोमाब्दं वसेद्ध्रुवम्॥
ततो वृश्चिकजातिञ्च सप्तजन्मसु भारते।
ततो नरश्चाङ्गहीनो व्याधी मुह्यो भवेन्नरः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

भूपतिः, पुं, (भुवः पतिः।) वटुकभैरवः। यथा,

"भूधरो भूधराधीशो भूपतिर्भूधरात्मकः।"

इति विश्वसारतन्त्रोक्तभैरवसहस्रनामस्तोत्रम्॥

राजा। यथा,—

भूपत्नी यस्य पत्नी च तु भवति कथं भूपतौ रामचन्द्रः।

इति रामायणी केकयीवाक्यम्॥

क्षत्रभौमम्। इति राजनिर्घण्टः॥

भूपदः, पुं, (भुवि पदानि मूलान्यस्य।) वृक्षः। इति ग्रन्थचन्द्रिका॥

भूपदी, स्त्री, (भुवि पदं यस्याः। गौरादित्वात् ङीष्।) मल्लिका। इत्यमरः। २।४।७०॥ (यथास्याः पर्य्यायः।

"मल्लिका मदयन्ती च शीतभीरुश्च भूपदी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भूपलाशः, पुं, (भुवि पलाशमस्य।) वृक्षभेदः। विशाली इति भाषा। यथा,—

"अश्वोड्कः सुकक्षश्च भूपलाशो विशल्यकृत्।"

इति रत्नमाला॥

भूपाटली, स्त्री, (भुवि जाता पाटलीव।) वृक्षविशेषः। भूपातालि इति बेनवादवी इति च हिन्दीभाषा। तत्पर्य्यायः। भूकुम्भी २ भूतालौ ३ रक्तपुष्पिका ४। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। पारदे प्रयोजकत्वञ्च। इति राजनिर्घण्टः॥

भूपालः, पुं, (भुवं पालयतीति। पालि रक्षणे+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) राजा। इति शब्दमाला॥ (यथा, मार्कण्डेये।१८।६।

"यदर्थं याचते युक्तं तदनिष्यादयन् वृथा।
पण्यानां द्वादशं भागं भूपालाय बलिं जनः॥"

सोमपालस्य पुत्रः। यथा, राजतरङ्गिण्याम्। ८।३४६५।

"सोमपालात्मजो भूयाद् भूपालः प्राक्ततक्षया॥")

भूपत्नी, स्त्री, (भुवः पत्नी।) सीता। इति शब्दरत्नावली॥ [रामचन्द्रः॥"

("भूपत्नी यस्य पत्नी च भवतु कथं भूपतौ इति रामायणम्॥)

भूपेष्टः, पुं, (भूपानामिष्टः।) राजादनीवृक्षः। इति राजनिर्घण्टः॥

भूभर्त्ता, [र्तृ] पुं, (भुवो भर्त्ता। "राजकादिभिश्च।" २।२।६। इति षष्ठीसमासः।) पृथिवीपतिः। इति सिद्धान्तकौमुद्यां तत्पुरुषसमासः॥ (यथा, राजतरङ्गिण्याम्।३।२६१।

"तस्मिन्नहनि भूभर्त्रा श्लोकानिःशेषतागिरम्॥")

भूसुक्, [क्] पुं, (भुवं सुनक्ति भोजयतीति। सुच्+"सत्सूद्विषेति।" ३।२।६१। इति क्विप्।) राजा। इति शब्दार्णवः॥ (यथा, कामन्दकीयनीतिसारे। ४।६१।

"सापसाराणि दुर्गाणि सुखं सारूपजाङ्गलाः।
निवासाय प्रशस्यन्ते भूसुरां भूतिमिच्छताम्॥")

भूभृत्, पुं, (भुवं बिभर्त्तीति। भृ+क्विप्।) "दृक्षस्य पितिक्षति तुक्।" ६।१।७१। इति तुगागमश्च।) राजा। (यथा, रघौ। ११।८१।

"तेन भूमिनिहितैककोटि तत्
कार्म्मुकञ्च बलिनाधिरोपितम्।
विश्वभस्य रिपुरास भूभृताम्
धूमशेष इव धूमकेतनः॥")

पर्व्वतः। इति मेदिनी। ते, १४०॥ (यथा, कुमारसम्भवे। ६।१।

"अथ विश्वात्मने गौरी सन्दिदेश शिवः सखीम्।
दासा मे भूभृता नाथः प्रमाणीक्रियतामिति॥")

भूमयी, स्त्री, (भू+मयट्+ङीप्।) छाया। सा तु सूर्य्यपत्नी। इति त्रिकाण्डशेषः॥ मृदात्मके, त्रि॥

भूमा, [न्] पुं, बहुत्वम्। यथा। "भूयोभूम-भूयिष्ठाः।" बहोरोयस्मिन् इष्ठान्तस्य एते निपात्यन्ते। इति सुग्धबोधव्याकरणम्। ईय-सोर्यसु ईयस्यादौ बहोर्भूरादेशः। ईयस्मिन्नो-रादिलोपः। इष्ठे यकारागमश्च निपात्यन्ते। अतिशयेन बहुः भूयान्। बहोर्भावः भूमा। अतिशयेन बहुः भूयिष्ठः। इति तट्टीकायां दुर्गादासः। बहुत्वविशिष्टः। तत्र वाच्यलिङ्गः। यथा। भूयः भूम। इति प्रभूतशब्दपर्य्याये अमरटीकायां रमानाथः। ॥*॥ विराट्पुरुषः। यथा। "यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति स भूमा यो भूमा तदमृतम्।" इत्यादि श्रुतिभ्यो ब्रह्मलिङ्गं सत्यमुद्दिश्य प्रति-भाति। इति वेदान्तसारटीका॥

भूमिः, स्त्री, (भवन्ति भूतान्यस्यामिति। भू+ "भुवः किति।" उणा० ४। ४५। इति मिः। स च कित्।) पृथिवी। स्थानमात्रम्। इति मेदिनी। मे, २२॥ (यथास्या पर्य्यायः।

"भूर्भूमिः पृथिवी पृथ्वी मेदिनी वसुधावनिः। क्षितिरुर्वी मही गौर्वी क्ष्मा धरा कुर्वसुन्धरा॥"

इति वैद्यकरत्नमालायाम्॥)

जिह्वा। इति संक्षिप्तसारोणादिवृत्तिः॥ योगिनामवस्थाविशेषः। यथा,—

"निरुद्धे चेतसि पुरा सविकल्पसमाधिना। विविकल्पसमाधिस्तु भवेदत्र त्रिभूमिकः॥ व्युत्तिष्ठते यतस्त्वाद्ये द्वितीये परबोधितः। अन्ते व्युत्तिष्ठते नैव सदा भवति तन्मयः॥ एवं प्राग्भूमिसिद्धावप्युत्तरोत्तरभूमये। विधेया भगवद्भक्तिर्विना सा न सिध्यति॥"

इति गीतागूढार्थदीपिकायां मधुसूदनसरस्वती॥

भूमेः पर्य्यायादयः पृथिवीशब्दे दृश्याः। अस्या गुणाः।

"भूमेः स्थैर्यं गुरुत्वञ्च काठिन्यं प्रसवार्थता। गन्धो गुरुत्वं शक्तिश्च संघातः स्थापना धृतिः॥"

इति महाभारते मोक्षधर्म्मे॥

अस्यार्थः। स्थैर्य्यमचाञ्चल्यम् १। गुरुत्वं पतन-प्रतियोगी गुणः २। काठिन्यम् ३। प्रसवार्थता धान्याद्युत्पत्तिसदर्थता ४। गन्धः ५। गुरुत्वं पिण्डपुष्टिः ६। शक्तिः गन्धग्रहणसामर्थ्यम् ७। संघातः शिरावयवत्वम् ८। स्थापना मनुष्या-द्याश्रयम् ९। धृतिः पाञ्चभौतिके मनसि यो धृत्यंशः। इति तट्टीका॥*॥

भूमिदानमाहात्म्यम् यथा,—

"सर्व्वेषामेव दानानां भूमिदानमनुत्तमम्। यो ददाति महीं राजन्! विप्रायाकिञ्चनाय वै॥ अक्षुण्णमाचमथवा स भवेत् पृथिवीपतिः। न भूमिदानसदृशं पवित्रमिह विद्यते॥ भूमिं यः प्रतिगृह्णाति भूमिं यश्च प्रयच्छति। उभौ तौ पुण्यमापन्नौ नियतं स्वर्गगामिनौ॥ यत्किञ्चिद्भूमिदानन्तु सर्व्वदानोत्तमोत्तमम्। महीपते! नरः स्त्रीऽपि भूमिदो भूमिमाप्नुयात्॥ भूमिदानसमं दानं नास्त्यत्र पृथिवीतले।

तस्मादल्पमलक्षेत्र शक्तिसक्तिसुखप्रदम्॥ यथा तथा प्रकारेण भूमिदाता तु भूमिपः। सुखी स्यात् सर्व्वकालेषु चान्ते स्वर्गमवाप्नुयात्॥ इदमल्पतरं वापि भूमिदानं महत्तमम्। यः कश्चिद्ब्राह्मणे दत्त्वा भवतीह महीपतिः॥ सर्व्वथा सर्व्वदा देया धरित्री ब्राह्मणस्य तु। प्राणान्तेनैव न क्वापि हरणीया जनैरपि॥ कृत्वा खातादिकं कर्म्म विप्रभूमिं नरो बलात्। करोति यदि राजेन्द्र! तत् सर्व्वं निष्फलं भवेत्॥ ब्राह्मणाद्दानमग्रहं विनानुज्ञाच्च पार्थिव!। तथा तत्परितोषञ्च तत्तन्मूल्यादिकं विना॥ विप्रभूमौ भूसुरोऽपि देयं नैव तथाध्वरम्। हरिद्रु तथारामप्रासादमण्डपं गृहम्॥ खातादिखननं सेतुबन्धनं भवनं गवाम्। सधान्यफलमूलादिग्राह्यादिक्षेत्रमेव च॥ पद्माम्रवपनं पुष्पोद्यानं दृक्षादिरोपणम्। सवटाश्वत्थतुलसीधात्रीबिल्वादिरोपणम्॥ नित्यं नैमित्तिकं काम्यं स्नानसन्ध्यादिकं तथा। मन्त्रयज्ञं तथेष्टादिकमेतत्तु चाधरम्॥ श्रीकृष्णसेवनं भक्तभक्तिषोढ़ाग्रपूर्व्वकम्। का कथा चेतरेषान्तु न कुर्य्यात् पारमार्थिकः॥ यः कर्म्मफलकामेप्सुर्न करोत्यत्र कर्म्म च। कुरुते मत्ततामोहादज्ञानाद्वा भ्रमादितः। नृपते! कुर्वतामेतत् सर्व्वं स्यान्निष्फलं ध्रुवम्॥ यद्भूमिरथवा तस्य संपूर्णं फलमेव च। अतो लोके हि धर्म्मात्मा ज्ञानी च सर्व्वधर्म्म-वित्॥ विवेकी धर्म्मशास्त्रज्ञः पुराणागमवेदवित्। वेदान्तज्ञो मुनिः साधुः कार्य्यादिदं महीपते!। न कुर्य्याद्भूमिहरणं ब्राह्मणीहरणक्षमम्॥"

इति पाद्मोत्तरखण्डे ३६ अध्यायः॥*॥

अपि च। इक्ष्वाकुः।

"यदि वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः। उच्छेत्ता चानुमन्ता च तावन्ति नरके वसेत्॥

तथा।

भूमिं दत्त्वा तु यः पश्चं कुर्य्याच्चक्राकृतालिकम्। अनाच्छेद्यमनाहार्य्यं दानमेतत्तु तद्विदुः॥

महाभारते।

अपि पापकृतो राज्ञः प्रतिगृह्णन्ति साधवः। पृथिवीं मान्यदिच्छन्ति पावनीं जननीं यथा॥ नामाक्षरं प्रियदत्तेति गुप्तं देयं सनातनम्। दाने वाप्यथवादाने नामाक्षरं परमं प्रियम्॥"

दानादानकाले यत् प्रियदत्ता नामाक्षरं परमं प्रियमित्युक्तं तेन प्रियदत्तामित्युच्चार्य्य दातव्या प्रतिग्रहीतव्या च। भूमेः पूजायां दानवाक्ये च प्रियदत्तेति विशेषणम्। भूमिर्विष्णुदैवताका। षष्टिवर्षसहस्रावच्छिन्नस्वर्गवासः फलम्। प्रति-ग्रहे तद्भूमेः प्रदक्षिणमात्रम्। भूमेरसन्निधाने तासुद्दिश्य प्रदक्षिणम्। इति शुद्धितत्त्वम्॥*॥ आर्द्राद्यपादगे रवौ भूमौ रजोयुक्ता भवति तत्कार्य्ये पाठादिनिषेधो यथा ज्योतिषे।

"रजोयुक् क्ष्मा ऋतुमती पृथ्वी। ज्योतिषे। यस्मिन् वारे सहस्रांशुर्यत्कार्य्ये मिथुनं व्रजेत्। अम्बुवाची भवेन्नित्यं पुनस्तत्कालवारयोः॥"

मत्स्यसूक्ते।

"धरण्याश्चतुमत्वाच्च भूमिकर्म्मे तथैव च। अन्तरागमने चैव विद्या नैव पठेद्बुधः॥"

इति तिथ्यादितत्त्वम्॥*॥

"न खाध्यायं वषट्कारं न देवपितृपूजनम्। हलानां योजनञ्चैव बीजानां वपनं तथा॥ दिनत्रयं न कुर्व्वीत यावत् पृथ्वी रजस्वला। यतिनो व्रतिनश्चैव विधवा च द्विजस्तथा॥ अम्बुवाचीदिनेनैव पाकं कृत्वा न भक्षयेत्। स्वपाकं परपाकं वा अम्बुवाचीदिने तथा॥ भक्षयं नैव कुर्वीत चाण्डालान्नसमं स्मृतम्॥"

इति राजमार्त्तण्डः॥

अम्बुवाची भूमिमाह देवलः।

'सा चमेध्या मलिना दृष्टा एतन्निदर्शनमत्र भवति।' अत्रामेध्या यथा,—

"प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः। चाण्डालैरुषितं यत्र यत्र विन्यस्यते मृतः॥ विण्मूत्रोपहतं यत्तु कुणपो यत्र दृश्यते। एवं कश्मलभूयिष्ठा भूरमेध्येति लक्ष्यते॥"

कुणपः शवः। दुष्टा यथा,—

"कृमिकीटपदङ्गैर्पैर्दूषिता यत्र मेदिनी। ब्रह्मापकर्षणैः क्षिप्रैर्वान्तैश्च दुरितं व्रजेत्॥"

ब्रह्मा वनीभूतश्लेष्मा। मलिना यथा,—

"नखदन्ततनूजलकृतुषां सुरोमलेः। भक्षपङ्कलवैर्वापि प्रच्छन्ना मलिना भवेत्॥"

तासाञ्च शुद्धिमाह।

"दहनं खननं भूमेरुपलेपनवापने। पर्य्यन्तवर्त्मचैव शौचं पञ्चविधं स्मृतम्॥"

वापनं स्वदन्तैरेव पूरणम्। अमेध्याया-श्चतुष्कं पञ्चकं वा। दुष्टायाः द्विकं त्रिकं वा। मलिनायाः दहनादीनामेकैका शोधनमाह देवलः।

"पृथ्वी वा चतुरो वा भूरमेध्या विशुध्यति। द्विधा दुष्टा त्रिधा वापि शुध्यते मलिनैकधा॥"

अन्यप्रकारमाह मनुः।

"सम्मार्জनेनाङ्गनेन सेकेनोल्लेखनेन च। गवाञ्च परिवासेन भूमिः शुद्धाति पञ्चधा॥"

सम्मार्জनं झाड्यादिनयनम्। अङ्गनं गोमये-नोपलेपनम्। सेको जलेन प्रक्षालनम्। उल्लि-खनं तक्षणम्। परिवासो गवोपस्थापनम्। अत्र सेकपरिवासयोर्नित्यं प्रस्थापनविषयत्वम्। अन्येषामेमेध्यलिप्तविषयत्वम्। ब्रह्मपुराणे।

"ग्रामाद्दक्षगतं त्यक्त्वा नगराच्च चतुर्गुणम्। भूमेः सर्व्वत्र शुद्धिः स्यादृजवे नो विद्यते॥ दक्षं चतुर्हस्तः। नगरं महायामः। इति गोपालपक्षाननतत्त्वशुद्धिनिर्णयः॥*॥ भूमौ वर्ण-लेखनादिनिषेधो यथा,—

"न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तके लिखेत्।

न सुक्ता पुस्तकं स्थाप्यं न सुक्तमाहरेत्तु तत्॥
भूकम्पे ग्रहणे चैव अक्षरं वाथ पुस्तकम्।
भूरगौ तिष्ठति देवेशि! जन्मजन्मसु मूर्खता।
तदा भवति देवेशि! तस्मात्तत् परिवर्जयेत्॥"
इति योगिनीतन्त्रे तृतीयभागे ७ पटलः॥

भूमिकदम्बः, पुं, (भूमिजातः कदम्बः। प्राकपार्थिवादिवत् समासः।) कदम्बविशेषः। तत्पर्य्यायः। भूनीपः २ भूमिजः ३ भृङ्गवल्लभः ४ जलपुष्पः ५ वृत्तपुष्पः ६ विषक्तः ७ ब्रह्मदारकः ८। अस्य गुणाः यथा, राजनिर्घण्टे।
"त्रिकदम्बाः कटूष्णाश्च तृष्णा दोषहरा हिमाः।
कषायतिक्ताः पित्तघ्ना वीर्य्यवृद्धिकराः पराः॥"

भूमिका, स्त्री, (भूमिरिव कायतीति। कै+कः। स्त्रियां टाप्। यद्वा। भूमिरेव स्वार्थे कन्। टाप्।) रचना। वेशान्तरपरिग्रहः। इति मेदिनी॥
पाकारादि नाम्नोऽधिक्षेपाक्षेपेष्वास्तु भूमिकाः।
इति हेमचन्द्रः॥

भूमिः। भूमिरेव भूमिका स्वार्थे कप्रत्ययेन निष्पन्ना। इति आकरग्रन्थः॥ वेदान्तमते चित्तस्यावस्थाविशेषः। यथा। क्षिप्तं मूढं विक्षिप्तं एकाग्रं निरुद्धं इति पञ्चभूमयः। आसुरसम्भवलोकग्राह्यदेहवासनासु वर्त्तमानं चित्तं क्षिप्तभूमिका। १। निद्रातन्द्रादियुक्तं चित्तं मूढभूमिका। २। कदाचिद्ज्ञानयुक्तं चित्तं विक्षिप्तादिग्रस्ततया विक्षिप्तभूमिका। ३। तत्र क्षिप्तमूढयोः समाधिलग्नत्वेव नास्ति विक्षिप्ते तु समाधिलग्नत्वा तदितरत् भूमित्रयं समाधिः। एकाग्रे मनसि सम्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्म्मबन्धनानि शथयति निरोधमभिमुखीकरोतीति सः प्रज्ञानो योग एकाग्रभूमिका। ४। सर्व्ववृत्तिनिरोधरूपा संप्रज्ञातसमाधिर्निरुद्धभूमिका। ५। इति वेदान्तसंज्ञानिरूपणग्रन्थः॥

भूमिखर्ज्जूरिका, स्त्री, (भूमिजाता खर्ज्जूरिका।) क्षुद्रखर्ज्जूरी। तत्पर्य्यायः। खादी २ दुरारोहा ३ मृदुच्छदा ४। अस्या भेदाः गुणाश्च।
"भूमिखर्ज्जूरिका खादी दुरारोहा मृदुच्छदा।
अथ स्वल्पफला काककर्कटी खादुमस्तका।
पिण्डखर्ज्जूरिका ज्ञेया सा देशे पश्चिमे भवेत्।
खर्ज्जूरी गोस्तनाकारा पराद्वीपादिहागता।
जायन्ते पश्चिमे देशे सा क्षोदोरेति कीर्त्तिता॥
खर्ज्जूरीजितयं प्रीतं मधुरं रसपाकयोः।
स्निग्धं रुचिकरं हृद्यं बलवर्णकरं गुरु॥
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भिशुक्रदम्।
कोष्ठमारुतजल्लघ्यं वाह्यवातकफापहम्॥
ज्वराभिघातक्षुत्तृष्णाकाश्वासक्लमवारणम्।
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत्॥
महतीभ्यां गुणैरल्पा खल्पखर्ज्जूरिका स्मृता।
खर्ज्जूरीजलतोयन्तु मदपित्तकरं भवेत्।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत्॥"
इति भावप्रकाशः॥

भूमिखर्ज्जूरी, स्त्री, (भूमिजाता खर्ज्जूरी।) भूमिखर्ज्जूरिका। इति राजनिर्घण्टः। अस्या गुणपर्य्यायाः भूखर्ज्जूरीशब्दे द्रष्टव्याः॥

भूमिचम्पकः, पुं, (भूमिजातश्चम्पकः।) पुष्पवृक्षविशेषः। भूँइचाँपा इति भाषा। तत्पर्य्यायः। ताम्रपुष्पः २ सन्धिबन्धः ३ दृढपः ४। इति शब्दचन्द्रिका॥ अस्य मूलं व्रणपाककारकम्॥

भूमिजं, क्ली, (भूमेर्जायते इति। जन्+डः।) गौरसुवर्णम्। इति राजनिर्घण्टः॥

भूमिजः, पुं, (भूमेः पृथिव्या जायते इति। जन्+कः।) मङ्गलग्रहः। नरकराजः। इति मेदिनी। जे, २७॥ भूमिकदम्बः। मनुष्यः। इति राजनिर्घण्टः॥ (भूमिजाते, त्रि। यथा, विष्णुधर्म्मोत्तरे।
"चरस्थिरभवं भौमं भूकम्पमपि भूमिजम्॥")

भूमिजगुग्गुलुः, पुं, (भूमिजो गुग्गुलुः।) आग्नापुरगुग्गुलुः। तत्पर्य्यायः। दैत्यभेदजः २ दुर्गाकः ३ आग्नापुरसम्भवः ४ मञ्जारः ५ मेदजः ६ महिषासुरसम्भवः ७। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। कफवातनाशित्वम्। उमाप्रियत्वम्। भूतघ्नत्वम्। मेध्यत्वम्। सौरभ्यदत्वञ्च। इति राजनिर्घण्टः॥

भूमिजम्बुः, स्त्री, (भूमिजाता जम्बुः।) क्षुद्रजम्बुः। तत्पर्य्यायः नादेयिका २ नादेयी ३ भूजम्बुः ४ भूमिजम्बुका ५। इति शब्दरत्नावली॥ काकजम्बुः ६ प्रीतपल्लवा ७। इति रत्नमाला॥ नादेयिका च नादेयी भूजम्बुर्भूमिजम्बुका। भूमिजम्बुजतायां स्यात् केचित्तु भूमिचम्पके॥ इति शब्दरत्नावली॥

भूमिजम्बूः, स्त्री, (भूमिजाता जम्बूरिति मध्यपदलोपी समासः।) भूजम्बुः। क्षुद्रजम्बुः। तत्पर्य्यायः। दृक्षफला २ भृङ्गवल्लभा ३ दृक्षा ४ भूजम्बुः ५ भ्रमरेष्टा ६ पिकभक्षा ७ काष्ठजम्बूः ८। अस्या गुणाः। कषायत्वम्। मधुरत्वम्। श्लेष्मपित्तनाशित्वम्। रुच्यत्वम्। संग्राहित्वम्। हृत्कण्ठदोषनाशित्वम्। वीर्य्यपुष्टिदत्वञ्च। इति राजनिर्घण्टः॥

भूमिजम्बुका, स्त्री, (भूमिजम्बू+स्वार्थे कन्। टाप्।) भूमिजम्बुः। इत्यमरः। २। ४। १८॥

भूमिजा, स्त्री, (भूमेर्जायते इति। जन्+डः। टाप्) सीता। इति त्रिकाण्डशेषः मेदिनी च। जे, २७॥

भूमिजीवी, [न्] पुं, (भूम्या तत्कर्षणादिना जीवतीति। जीव्+णिनिः।) वैश्यः। इति शब्दरत्नावली॥

भूमिदेवः, पुं, (भूमौ देव इव भूम्या देवो वा।) ब्राह्मणः। इति हलायुधः॥ (यथा, किरातार्জ্জুनीये। १। ६।
"अथ क्रियाः कामदुघाः क्रतूनां
सदाग्नयः सम्यति भूमिदेवाः।
आसंदतैरक्षि जगत्सु जातं
त्वय्यागते यद्बहुमानपात्रम्॥")

भूमिपः, पुं, (भूमिं पाति रक्षतीति। पा+"आतोऽनुपसर्गे कः।"३। २। ३। इति कः।) राजा। इति जटाधरः॥ (यथा, महाभारते। १। १००। ८।
"वीतशोकभयाबाधाः सुखसुप्तविबोधनाः।
यतिं भारतगोप्तारं समपद्यन्त भूमिपाः॥")

भूमिपत्रः, पुं, (भूमेः पत्र इव यस्य।) वाताश्वः। इति हारावली॥

भूमिपिशाचः, पुं, (भूमौ पिशाच इव तद्वदातिमत्त्वात्।) तालवृक्षः। इति हारावली॥ (विवरणेऽस्य तालवृक्षशब्दे ज्ञेयः॥)

भूमिमण्डः, पुं, (भूमिं मण्डयति भूषयतीति। मडि+अण्।) अट्टपादिका। इति रत्नमाला॥ मदनशालीति ह्रापरमाली इति च भाषा॥

भूमिमण्डपभूषणा, स्त्री, (भूमिमण्डपं भूषयतीति। भूष+ल्युः+टाप्।) माधवीलता। इति राजनिर्घण्टः॥

भूमिरञ्जकः, पुं, (रञ्जतीति। रञ्ज+ण्वुल्। भूमेः रञ्जकः। गमनकाले भूमेरुपरि पादाप्रदानात् तथात्वम्।) वाताश्वः। इति भूरिप्रयोगः॥

भूमिलाभः, पुं, (भूमेर्लाभोऽत्र।) क्षत्रुः। इति भूरिप्रयोगः॥ (भूमेर्लाभः।) भूमिप्राप्तिश्च॥

भूमिलेपनं, क्ली, (भूमिर्लिप्यतेऽनेनेति। लिप्+ल्युट्।) गोमयम्। इति हेमचन्द्रः। ४। ३३८॥ (भूमेर्लेपनम्) भूमेर्लेपश्च॥

भूमिवर्द्धनः, पुं, क्ली, (भूमिर्वर्द्धतेऽनेनेति। वृध्+णिच्+ल्युट्। स्त्रीत्वपार्थक्यांशप्रदानेन भूमेर्वर्द्धनादस्य तथात्वम्।) ग्रवः। इति हेमचन्द्रः॥

भूमिसम्भवा, स्त्री, (भूमेः सम्भव उत्पत्तिर्यस्याः।) सीता। इति जटाधरः॥

भूमिसृक्, [ज्] पुं, (भूमिं सृजतीति। सृज्+"सृजो ऽदृक्के क्विन्।"३।२।५८। इति क्विन्।) मानुषः। वैश्यः। इति मेदिनी। जे, ३८॥ चौरविशेषः। अन्धः। खड्गः। इति शब्दरत्नावली॥

भूमी, स्त्री, (भूमिः। "इदितश्च।" इति ङीष्।) भूमिः। इति भरतहृदयकोषः॥

भूमीन्द्रः, पुं, (भूम्यामिन्द्र इव। भूमेः इन्द्र ईश्वरो वा।) राजा। इति शब्दरत्नावली॥

भूमीरुहः, पुं, (भूम्यां रोहतीति। रुह+कः।) वृक्षः। यथा,—
"दीर्घोत्तापयुता यथा विरहिणीश्वासास्तथा वासरा
यामिन्यश्च यथा कुलवधूदृष्टिः सरोषा प्रिये!।
छाया वाञ्छतमा नवोढ़वनितावाक्येव भूमीरुहा
निष्यन्दाः सुचिरादृयथा मिलितयोर्यूनोर्मिथो दृष्टयः॥"
इत्युद्भटः श्लोकः॥

भूमीसहः, पुं, (भूमेः सहते उत्पद्यते इति सह+अच्। वृक्षविशेषः। भूरसह इति

हिन्दी भाषा। तत्पर्य्यायः। हारदातुः २ वरदातुः ३ खरच्छदः ४। अस्य गुणाः। ग्रिग्रिरत्वम्। रक्तपित्तप्रसादनत्वञ्च। इति भावप्रकाशः॥

भूम्यामलकी, स्त्री, (भूमिजन्या आमलकी शाकपार्थिवादित्वात् समासः) क्षुपविशेषः। भूँइ आमला इति भाषा। तत्पर्य्यायः। बहुपुत्री २ जड़ा ३ अधस्था ४ तालिः ५ तामलकी ६ अजटा ७ क्षुद्रफला ८ क्षेत्रामलकी ९। इति रत्नमाला॥ वितुन्नकः १० झटा ११ अमला १२ अजझटा १३ ताली १४ ग्रिवा १५। इत्यमरः। २।४।१२७॥ झाटा १६ मेला १७ झाटामला १८ अमलाजझटा १९। इत्यमरटीकायां भरतः॥ भूम्यामलकिका २० ग्रिवामलकी २१ बहुपुत्रा २२ बहुफला २३ बहुबीर्य्या २४ भूधात्री २५। अस्या गुणाः। वातकारित्वम्। तिक्तत्वम्। कषायत्वम्। मधुरत्वम्। हिमत्वम्। पिपासाकासपित्तास्रक्कफमारुतनाशित्वञ्च। इति भावप्रकाशः॥

भूम्यामली, स्त्री, (भूम्या आमलते आत्मानं धारयतीति। आ+मल्+अच्।) भूम्यामलकी। अरनेली इति हिन्दी भाषा। भूँइ आमला इति वङ्गभाषा। तत्पर्य्यायः। तमाली २ तालीं ३ तमालिका ४ उच्चटा ५ दृढ़पादी ६ वितुन्ना ७ वितुन्निका ८ भूधात्री ९ चारटी १० दृष्यां ११ विघन्नी १२ बहुपत्रिका १३ बहुबीर्य्या १४ अहिभयदा १५ विश्वपर्णी १६ हिमालया १७ अजझटा १८ वीरा १९। अस्या गुणाः। कषायत्वम्। अम्लत्वम्। पित्तमेहदाहनाशित्वम्। ग्रिग्रिरत्वम्। मूत्ररोधाश्मिनाशनत्वञ्च। इति राजनिर्घण्टः॥

भूम्याच्छुल्यं, क्ली, (भूमिमाच्छादयतीति। आ+छुल्+कः। ततः यत्।) क्षुपविशेषः। भूँइतखड़ इति हिन्दी भाषा। तत्पर्य्यायः। कुशकेतु २ मार्कवीयम् ३ महौषधम् ४। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। ज्वरकुष्ठामविषनाशित्वञ्च। इति राजनिर्घण्टः॥

भूयः, [स्] अ, (भुवे भावाय यस्यति यतते इति। भू+यस्+क्विप्।) पुनरर्थम्। इति ग्रन्दरत्नावली॥ (यथा, विष्णुपुराणे १।१।२७।
"यच्चोक्तं यच्च नोक्तं मयात्र परमेश्वर!।
तत् सर्व्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः॥"

भूयान्, [स्] त्रि, (अयमनयोरतिशयेन बहुरिति बहु+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५।३।५७। इति ईयसुन्। "बहोर्लोपोभू च बहोः।" ६।४।१५८। इतीयसुन ईलोपः भूरादेशश्च।) बहुतरः। इति मेदिनी। से, ६०॥ (यथा, मनुसंहितायाम् ।२।१३७।
"पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च।"

भूयिष्ठं, त्रि, (अयमेषामतिशयेन बहुरिति। बहु+इष्ठन्। "इष्ठस्य यिट् च।" ६।४।१५८। इति यिड़ागमो बहोः स्थाने भूरादेशश्च।) प्रचुरः। इत्यमरः।३।१।६३॥ (यथा, ऋग्वेदे। ८।८५।३।
"इन्द्रस्य वच आयासो निमिश्ल इन्द्रस्य बाहोर्भूयिष्ठमोजः॥")

भूयुक्ता, स्त्री, (भुवा+युक्ता।) भूमिखर्ज्जुरी। इति राजनिर्घण्टः॥

भूरि, क्ली, (भवति भूयते वेति। भू+"अदिग्रदिभूशुभिभ्यः क्रिन्।" उणा०।४।६५। इति क्रिन्।) स्वर्णम्। इत्यमरः। १।१।६३॥

भूरिः, पुं, (भवतीति। भू+"अदिग्रदिभूशुभिभ्यः।" उणा० ४।६५। इति क्रिन्।) विष्णुः। ब्रह्मा। ग्रिवः। इति मेदिनी। रे, ७३॥ वासवः। इति ग्रन्दरत्नावली॥ (सोमदत्तस्य पुत्रभेदः। यथा, महाभारते। १।१८७।१४।
"कौरवः सोमदत्तश्च पुत्राश्चास्य महारथाः।
समवेताख्यः शूरा भूरिर्भूरिश्रवाः शलः॥")
प्रचुरे, त्रि। इत्यमरः।३।१।६३॥ (यथा, ऋग्वेदे। ७।४।२।
"संयोवनायुवते शुचिदन्भूरि
चिदन्नासमिदत्ति वद्यः॥")

भूरिक्, [च्] स्त्री, (भरति सर्व्वं धरतीति भृञ्। भृञ उच्च।" उणा० २। ७२। इति इञिः स च कित् धातोरुकारान्तादेशश्च। पृषोदरादित्वात् साधुः।) पृथिवी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

भूरिगन्धा, स्त्री, (भूरिः प्रचुरो गन्धोऽस्याः। ततष्टाप्।) पुरागामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ (गन्धाढ्यायाञ्च, त्रि॥)

भूरिगमः, पुं, (भूरिभिर्भारैर्गच्छतीति। भूरि+गम+"अर्हडढनिधिगमश्च।" ३।३।५८। इति अप्।) गर्हभः। इति राजनिर्घण्टः॥

भूरिदावा, [न्] पुं, भूरि ददाति यः। (भूरि+दा+वनिप्। प्रचुरदाता। इति सुग्धबोधव्याकरणम्॥ (यथा, ऋग्वेदे। २।२७।१०।
"माहं मघोनो वरुणप्रियस्य भूरिदाव्नः
आविदं शूनमापेः॥")

भूरिदुग्धा, स्त्री, (भूरीणि दुग्धानि निर्यासा यस्याः।) वृश्चिकाली। इति राजनिर्घण्टः॥ (गुणाद्योऽस्या वृश्चिकालीशब्दे ज्ञातव्याः॥)

भूरिपत्रः, पुं, (भूरीणि पत्राण्यस्य।) उखर्ज्जवृक्षः। इति राजनिर्घण्टः॥

भूरिपलितदा, स्त्री, (भूरि पलितं केशपाकं दायति शोधयति इति दैप्+कः। टाप्।) पाण्डुरपत्री। इति राजनिर्घण्टः॥

भूरिपुष्पा, स्त्री, (भूरीणि पुष्पाण्यस्याः।) शतपुष्पा। इति राजनिर्घण्टः॥

भूरिप्रेमा, [न्] पुं, (भूरिः प्रेमा प्रेयत्वं यस्य।) चक्रवाकः। इति राजनिर्घण्टः॥

भूरिफेना, स्त्री, (भूरयः फेना यस्याः।) सप्तलाक्षः। इत्यमरः। २। ४। १४३॥ चामारकसा इति भाषा॥

भूरिबला, स्त्री, (भूरि बलं यस्याः।) अतिबला। इति राजनिर्घण्टः॥

भूरिमल्ली, स्त्री, (भूरि मलते इति। मल+अच् ङीष्।) अम्लवेता। इति राजनिर्घण्टः॥

भूरिमायः, पुं, स्त्री, (भूरी माया यस्य।) शृगालः। इत्यमरः। २।५।५॥

भूरिशः, [स्] अ, बहुशः। बहुत्वार्थात् कार्य्यस् वेति कारकभूरिशब्दात् चप्रसुप्रत्ययनिष्पन्नोऽयं शब्दः। इति सुग्धबोधव्याकरणम्॥ (भूरीणि भूरीणि इति वीप्सायां शस्। (यथा, महानिर्व्वाणतन्त्रे। १।५२।
"बहुपद्मासनादीनि गदितान्यपि भूरिशः॥")

भूरिश्रवाः, [स्] पुं, (भूरि अवो यशादिजनितं यशो यस्य सः। चन्द्रवंशीयसोमदत्तराजपुत्रः। यथा, महाभारते। १।१८७।१४।
"समवेताख्यः शूराः भूरिर्भूरिश्रवाः शलः॥")
स तु अर्জ্জুनसात्यकिभ्यां हतः। इति महाभारतम्॥ (बहुयशोविशिष्टे, त्रि॥)

भूरुक्षी, स्त्री, (भुवं पृथिवीं रुणद्धि भुवि रोहतीति वा। भू+"रुध+वा रुह+कः, पृषोदरादित्वात् नकार ककारौ गौरादित्वात् ङीष्।) श्रीहस्तिनी वृक्षः। इत्यमरः।२।४।५६॥ (भूरुक्षीति च सर्व्वानन्दः।) हातिशुंड़ा इति भाषा॥

भूरुह, पुं, (भुवि रोहति प्रादुर्भवतीति भू+रुह+कः।) वृक्षः। इति ग्रन्दमाला॥ (यथा, माघे। ७।५०।
"इदमिदमिति भूरुहाम्पसूनैः।")

भूर्জ, पुं, (ऊर्জ+घञ्। भूः ऊर्জो बलं यस्य। भुवि ऊर्জ्यते इति भू+ऊर्জ+अच् वा।) स्वनामख्यातवृक्षविशेषः। भोजपत्र इति हिन्दीभाषा। (यथा, रघौ। ४।७३।
"भूर्জेषु मर्म्मरीभूताः कीचकध्वनिहेतवः।")
तत्पर्य्यायः। वल्कद्रुमः २ भुर्জः ३ सुपत्रकः ४ भूर्জपत्रकः ५ चित्रलक् ६ विद्रुपत्रः ७ रक्षापत्रः ८ विचित्रकः ९ भूतघ्नः १० स्फुटमत्रः ११ ग्रैवेयकस्थः १२। इति राजनिर्घण्टः॥ भूर्জपत्रः १३ चर्म्मी १४ बहुलवल्कलः १५। इति भावप्रकाशः॥ छत्रपत्रः १६ ग्रिवः १७ स्थिरच्छदः १८। इति रत्नमाला॥ स्फुटलक् १९। इत्यमरः।२।४।३६। पत्रपुष्पकः २०। इति भरतधृतमधुः॥ भुर्जः २१ बहुपटः २२ बहुत्वक्कः २३ स्फुटत्वचः २४। इति भरतधृतस्वामी॥ अस्य गुणाः। वलकारित्वम्। कफरक्तनाशित्वञ्च। इति राजवल्लभः॥ कटुत्वम्। कषायत्वम्। उष्णत्वम्। भूतरक्षाकरत्वम्। त्रिदोषघ्नमगलत्वम्। पथ्यत्वम्। दुष्टकौटिल्यनाशित्वञ्च। इति राजनिर्घण्टः॥ कर्ब्बरोगपित्तरक्तसमेदविषहरत्वञ्च। इति भावप्रकाशः॥ (यथा, वाभटे शरीरस्थाने प्रथमेऽध्याये॥
"भूर्जलाङ्गलिकीतुम्बीसर्षपैककुलत्थजैः।
पृथक् द्वाभ्यां समस्तैर्वा योनिवेदनधूपनम्॥")

भूर्जकण्टकः, पुं, वंशसङ्कुरजातिविशेषः। इति जटाधरः॥ (यथा, मनौ। १०। २१।
"ब्राह्मात्तु जायते विप्रात् प्रायात्मा भूर्जकण्टकः॥")

भूर्जपत्रः, पुं, (भुवि ऊर्ज्जखलेभ्यः उपदेवजातिभ्यः पत्राण्यस्य।) भूर्ज्जवृक्षः। इति रत्नमाला॥ (यथा, रामायणे। २। ६४। २४।
"कुशस्यागरपुन्नागभूर्जपत्रोत्तरच्छदान्॥")
तथा चास्य पर्य्यायः।
"भूर्जपत्रः स्रुतो भूर्जचर्म्मी बहुलवल्कलः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

भूर्तिः, स्त्री, (बिभर्त्ति सर्व्वमिति। भृ+"हृषिवृधि-पाणिचूर्णिभूर्णिः।"उणा० ४। ५२। इति निः निपातनादूत्वञ्च।) पृथिवी। मरुभूमिः। इत्यु-णादिकोषः॥ (भर्त्ता। यथा, ऋग्वेदे। ७।८७।२।
"आत्मा ते वातो रज आनवीनोत्-
पशुर्न भूर्णिर्यवसे सवान्॥"
"भूर्णिर्भर्त्तरि।" इति तद्भाष्ये सायणः॥)

भूर्लोकः, पुं, (भूः संज्ञको लोकः। प्राकपार्थिवादि-वत् समासः।) अन्तरीक्षादधो लोकः। मर्त्य-लोकः। तस्य लक्षणं यथा,—
"यादृगम्बच्च यत्किञ्चित् वस्तुस्ति पृथिवीमयम्।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः॥"
इति विष्णुपुराणे। २ अंशे ५ अध्यायः॥
चरणसञ्चारयोग्यं गिरिग्रिखरादि यावत् तावदुत्सेधो भूर्लोक इत्यर्थः। विस्तारो मयोदितः सर्व्वतो लोकालोकावधिः पञ्चविंशतिकोटि-प्रमाणः। इति तट्टीकायां स्वामी॥ अस्य विव-रणं तत्रैव द्वितीयादिचतुर्थाध्यायेषु भूगोल-ग्रन्थे च द्रष्टव्यम्॥ (यथा, भागवते। २। ५। ३८।
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः॥")

भूलया, स्त्री, (भुवि लया।) शुक्लपुष्पी। इति राजनिर्घण्टः॥

भूलता, स्त्री, (भुवि लता इव।) किंशुलुकः। इति हेमचन्द्रः। ४। २६६॥

भूवदरी, स्त्री, (भूलया वदरी प्राकपार्थिवादिवत् समासः।) क्षुद्रकोली। झड़वेर इति हिन्दी-भाषा। तत्पर्य्यायः। क्षितिवदरी २ वल्लीवदरी ३ वदरवल्ली ४ बहुफलिका ५ लघुवदरी ६ वदरफली ७ क्षुद्रवदरी ८। अस्या गुणाः। मधुराम्लत्वम्। कफवातविकारहारित्वम्। पथ्यत्वम्। दीपनत्वम्। याचनत्वम्। किञ्चित् पित्तास्रकारित्वम्। रुच्यत्वञ्च। इति राज-निर्घण्टः॥

भूशयः, पुं, (भुवि शेते इति। भू+शीङ्+"अधिकरणे शेतेः।"३। २। १५। इति अच्।) नकुलगोधादिः। एतेषां मांसगुणाः। गुरुत्वम्। उष्णत्वम्। मधुरत्वम्। स्निग्धत्वम्। वायुनाशि-त्वम्। शुक्रकारित्वञ्च। इति राजवल्लभः॥ विष्णुः। यथा,—
"भूशयो भूषणो भूतिर्विशोकः शोकनाशनः॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम्॥

भूशेलुः, पुं, (भुवि ख्याता शेलुः प्राकपार्थिवादि-वत् समासः।) भूकर्ब्बुदारकः। इति राज-निर्घण्टः॥

भूष किं भूषणे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) किं भूषयति भूषति हारो जनम्। इति दुर्गादासः॥

भूषणं, क्ली, (भूष्यते अनेनेति। भूष+करणे ल्युट्।) अलङ्कारः। इति हेमचन्द्रः। ३। ३१३॥ (यथा, चाणक्यसंग्रहे। ८।
"नक्षत्रभूषणं चन्द्रो नारीणां भूषणं पतिः॥")
देवदेवभूषणादि यथा,—
"भोग्यभूषोत्तमं नित्यं भूषणानि ब्रवीषु मे।
किरीटञ्च शिरोरत्नं कुण्डलञ्च जलाटिका॥
तालपत्रञ्च हारञ्च ग्रैवेयकमधोर्म्मिका।
प्रालम्बिका रत्नसूत्रसप्तशृङ्गोऽथ मालिका॥
पार्श्वद्योतो नखद्योतो ह्यङ्गुलीच्छादकस्तथा।
कटिसूत्रं माणवको ग्रहतारा जलन्तिका॥
अङ्गदो बाहुवलयः शिखाभूषणमिङ्किका।
प्रागण्डबन्धं तदूर्ध्वाङ्गं नाभिपूरोऽथ मालिका॥
सप्तको ग्रहसूत्रञ्च दन्तपत्रञ्च वर्णकः।
ऊरुसूत्रञ्च नीवी च सुदिवङ्गं प्रकीर्त्तितम्॥
पादाङ्गदं हंसकञ्च नूपुरं क्षुद्रघण्टिका।
सुखपङ्क्तिमिति प्रोक्ता अलङ्काराः सुशोभनाः॥
चत्वारिंशदमी प्रोक्ता लोके वेदे च सौखदाः।
अलङ्काराः प्रदानेन चतुर्व्वर्गप्रदायकाः॥
एतेषां पूजनं कृत्वा प्रदद्यादिष्टसिद्धये।
तेषां देवतसञ्चार्य्य पूजयेत्तु विचक्षणः॥
शिरोगतानि चादद्यात् सौवर्णानि तु सर्व्वदा।
चूड़ारत्नादिकानीह भूषणानि तु भैरव!॥
ग्रैवेयकादि हंसान्तं सौवर्णं राजतञ्च वा।
निवेदयेत्तु देवेभ्यो नान्यतेजससम्भवम्॥
रौतिवङ्गादिसंजातं पात्रोपकरणादिकम्।
दद्यादायसवर्जन्तु भूषणं न कदाचन॥
घण्टाचामरकुम्भादि पात्रोपकरणादिकम्।
तदूर्द्धभूषणान्तरे दद्याद् यस्मात्तदुपभूषणम्॥
सर्व्वं ताम्रमयं दद्यादृयत्किञ्चिद्भूषणादिकम्।
सर्व्वत्र सर्व्वतत्ताम्रमर्घ्यपात्रे ततोऽधिकम्॥
पूजार्घ्यपात्रं नैवेद्याधारपात्रञ्च पानकम्।
औड़ुम्बरं सदा विद्धि प्रीतिदं तोयदं तदा॥
ताम्रे देवाः प्रमोदन्ते ताम्रे देवाः सदा स्थिताः।
सर्व्वप्रीतिकरं ताम्रं तस्मात्ताम्रं प्रयोजयेत्॥
स्रोपयोगे नरः कुर्य्याद्देवानामपि भैरव!।
ग्रीवोर्द्ध्वदेशे रौप्यन्तु न कदाचिच्च भूषणम्॥
प्रावारः पानपात्रञ्च गेरुकं गृहमेव च।
पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम्॥
अयोमयन्तते कांस्यन्तते यद्भूषणं भवेत्।
स्वर्णरौप्यस्य चाभावे लघ्वकाये नियोजयेत्॥
एतेषां भूषणादीनां यद्दातुं शक्यते नरैः।
तत्तद्दद्यात् सम्भवे तु सर्व्वमेव प्रदापयेत्॥

भूषितः, त्रि, (भूष+क्तः।) अलङ्कृतः। इत्य-मरः। २। ६। १००॥ (यथा, भट्टिः। ६। ७३।
"भृङ्गालीकोकिलकुहुभिर्वांशनैः पश्य सञ्चाय॥
रौचनैर्भूषितां पम्यामस्माकं हृदयाविधम्॥")

भृकुः, त्रि, (भू+गत्वम्।) भवनशीलः। तत्पर्य्यायः। भविष्णुः २ भविता ३। इत्यमरः। ३। १। २६॥ साधुभवनशीलः। इति तट्टीकायां रायमुकुटः॥ (यथा, मनौ। ४। १३५।

"क्षत्रियं चैव सर्पं च ब्राह्मणञ्च बहुश्रुतम्। नावमन्येत वै भूष्णुः क्षत्रञ्चापि कदाचन॥"

"भूष्णुः, वनाद्युरादिना वर्द्धनशीलः।" इति तट्टीकायां कुल्लूकभट्टः॥)

भूसुतः, पुं, (भुवः पृथिव्याः सुतः।) मङ्गलग्रहः। इति शब्दमाला॥ (यथा, ज्योतिर्विद्वान्ते। २। ५५।

"महत्ताम्रोत्रपरिधिः सप्तमे भृगुभूसुतौ॥")

सीतायाम् स्त्री॥

भूसृजं, क्ली, (भूसयं दलं सृजतीति वा। पारस्करादित्वात् सुट्।) भूदलम्। इत्यमरः। २। ५। १६०॥ (यथा, मनौ। ६। १४॥

"वर्जयेन्मधुमांसञ्च भौमानि कवकानि च। भूसृजं श्लेष्मकञ्चैव ऐश्वातकफलानि च॥")

अस्य पर्य्यायगुणा यथा,—

"गुञ्जबीजञ्च भूतीकं सुगन्धं गोमयप्रियम्। भूसृजञ्च भवेच्छत्रा मालाढ्यकमित्यपि॥
भूसृजं कटुकं तिक्तं तीक्ष्णोष्णं दोषपं लघु।
विदाहि दीपनं रूक्षमनेत्र्यं सुखशोधनम्। अर्शसं वहुविट्कञ्च पित्तरक्तप्रदूषणम्॥"

इति भावप्रकाशः॥

भूसृक्, [ज्] पुं, (भुवं सृजतीति सृज्+क्विप्।) मनुष्यः। इति हेमचन्द्रः। ३। १॥

भूस्वर्गः, पुं, (भुवि स्वर्ग इव अमरलोकधारणात्।) सुमेरुपर्व्वतः। इति जटाधरः॥

भृञ, भृति पुष्टौ। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-अनिट्। जि-क्रया०-उभ०-सक०-अनिट्।) भृतिर्भरणं पुष्टिः पोषणम्। जि च "बिभर्त्ति ग्रन्थिनं ग्रन्थुर्बिभृते जनकः सुतम्। टु भरथुः। डु भृञिमम्। आदिपक्षे भृतिः पूरणम्। ञ भरति कुक्षिमङ्गिनः। भरते। इति दुर्गादासः॥

भृकुंसः, पुं, (कुसि+अच्। कुसौ भावदीपनम्। एषोदरादित्वात् सस्य लत्वम्। भुवा कुसौ भावप्रकाश इङ्गितज्ञापनं यस्य। निपातनात् सम्प्रसारणम्।) भुकुंसः। स्त्रीवेशधारी नटपुरुषः। इत्यमरटीकायां रमानाथः॥

भृकुंसः, पुं, (पुरादौ पट पुटेऽदादि दृक्कोक्तः कुसिर्भाषार्थः। स्त्रीवेशं धारयित्वा भुवः कुसनं प्रकाशनमिति संज्ञालादुकारस्य अकारः। दृक्कश्च वा। कुसि+अच्। यद्वा भुवा कुंस इङ्गितप्रकाशो यस्य। निपातनात् सम्प्रसारणम्।) भुवंसः। स्त्रीवेशधारी नटपुरुषः। इत्यमरटीकायां रमानाथः॥

भृकुंसकः, पुं, (भृकुंस एवेति स्वार्थे कन्।) भुकुंसः। इति शब्दरत्नावली॥

भृकुटिः, स्त्री, (कुट कौटिल्ये इति कुट+इन्। भ्रुवः कुटिः कौटिल्यं निपातनात् वा सम्प्रसारणम्।) भ्रूकुटिः। यथा,—

"रचितभ्रुकुटिवक्त्रं नन्दिना द्वारि रुद्रे।"

इति भरतधृतहरविलासः॥

भृकुटी, स्त्री, (भृकुटि। ङीकारादिति ङीष्।) भ्रूकुटिः। इत्यमरटीकायां भरतः॥ भृकुटीकुटिलाननौ। इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

भृगुः, पुं, (तपसा भृज्यते पक्वतमादिभिर्वेति। भ्रस्ज+"ग्रधिब्रध्नादिभ्रसृजां सम्प्रसारणं सलोपश्च।" उणा० १। २६। इति कुः सम्प्रसारणं सलोपः, ग्रधादित्वात् कुत्वञ्च। यद्वा भृज्यतीति क्विप्। भृक् ज्वाला तया सहोत्पन्न इति उः।) सुनिविशेषः। स तु ब्रह्मणश्चर्षो जातः। (यथास्योत्पत्तिर्नामनिरुक्तिञ्च महाभारते। १३। ८५। १०५—१०६।

"पुरुषा वपुषा युक्ता: स्वेः स्वेः प्रसवधर्मणेः। भृशत्वेव भृगुः पूर्व्वमङ्गरेभ्योऽङ्गिराभवत्॥ अङ्गारसंज्ञयाचैव कविरित्यपरोऽभवत्। सह ज्वालाभिरुत्पन्नो भृगुस्तस्माद् भृगुः स्मृतः॥")

अस्य भार्य्या कर्दमसुनिकन्या ख्यातिः। पुत्रः धाता विधाता च। कन्या श्रीः। इति श्रीभागवतम्। अपि च।

सूत उवाच।

"कथितस्ते यदा सर्गः पृष्टः सूत त्वयाधुना। भृगुसर्गात् प्रभृत्येव सर्गो नः कथ्यतां पुनः॥"

सूत उवाच।

भृगोः ख्यात्यां सुतृप्तन्ना श्रीः पूर्व्वसुदधेः पुनः।
तथा धाता विधाता च तस्यां जातौ भृगोः सुतौ॥
आयतिर्नियतिश्चैव मेरुकन्ये महाप्रभोः।
धातुर्विधातुस्ते भार्य्ये मयोर्जातौ सुतावुभौ॥
प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः।
ततो वेदशिरा जज्ञे प्राणस्य द्युतिमान् सुतः॥
ततो वंशो सुनिश्रेष्ठा विस्तरं भार्गवो गतः।
इत्याद्ये वह्निपुराणे वरसर्गनामाध्यायः॥७॥

शिवः। शुक्रग्रहः। इति मेदिनी। गे, १५॥ साधुः। यमदग्निः। इति हेमचन्द्रः॥ अरण्यवासकथाप्रसिद्धगिरिपार्श्वोच्चदेशः। निरवलम्बनपर्व्वतादिपार्श्वः। आरुरुहे इति स्वातम्। यस्मात् यतने अवस्थानक्रियाविशेषो नास्ति। अतएव भृगुपतनमित्यादिप्रयोगो दृश्यते। इति भरतः॥ तत्पर्य्यायः। प्रपातः २ अवटः ३। इत्यमरः। २। ३। ४॥ दरद् ४। इति जटाधरः॥ पतनस्थानम् ५। इति शब्दरत्नावली॥

भृगुपतिः, पुं, (भृगूणां तद्वंशीयानां पतिः।) परशुरामः। इति शब्दरत्नावली॥ (यथा, गीतगोविन्दे। १। १०।

"केशवधृतभृगुपतिरूप! जय जगदीश! हरे!॥
तथा च मेघदूते। १। ५६।
"हंसद्वारं भृगुपतियशो वर्त्म यत् क्रौञ्चरन्ध्रम्।")

भृगुसुतः, पुं, (भृगोः सुतः।) शुक्रः। इति शब्दरत्नावली॥ परशुरामश्च॥

भृगुजापतिः, पुं, परशुरामः। इति शब्दरत्नावली॥ भृगूणाम्यतिरित्यपि पाठः॥

भृङ्ग, क्ली, (बिभर्त्तीति। डु-भृञ् भरणे। "भृञः कित् डुट् च।" उणा० १। १२४। इति गन्। स च कित् डुड्भागमश्च।) लवणम्। गुड़लवण इति ख्यातम्। इत्यमरः। २। ५। १६॥ (यथा,—

"लक्पचञ्च वराङ्गं स्याद्भृङ्गञ्चेत्यपि घोटकम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) अभ्रकम्। इति राजनिर्घण्टः॥

भृङ्गः, पुं, (बिभर्त्यनुरागमिति। भृञ्+"भृञः कित् डुट् च।" उणा० १। १२४। इति गन्। स च कित् डुट् च।) भ्रमरः। कलिङ्गपक्षी। इत्यमरः। २। ५। १६। झिल्ली इति भाषा॥ (अस्य पर्य्यायाः धूम्याटशब्दे द्रष्टव्याः।) अस्य मांसगुणाः। मधुरत्वम्। स्निग्धत्वम्। कफशुक्रविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ विङ्गः। भृङ्गराजः। इति मेदिनी गे, १५॥ (यथास्य पर्य्यायः।

"भृङ्गराजः केशराजो भृङ्गः पत्रङ्ग मार्कवम्॥"

इति वैद्यकरत्नमालायाम्॥

तथा च पर्य्यायान्तरम्।

"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च। अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) भृङ्गारः। भृङ्गरोलः। इति शब्दरत्नावली॥

भृङ्गकः, पुं, (भृङ्ग। संज्ञायां कन्।) राजवासनवृक्षः। यथा,—

"अथ भृङ्गो भृङ्गराजो भृङ्गको राजवासनः॥"

इति शब्दरत्नावली॥

भृङ्गजं, क्ली, (भृङ्ग इव जायत इति। जन+डः।) अगुरु। इति राजमाला॥ (गुणाः अस्यागुरुशब्दे विहिताः॥)

भृङ्गजा, स्त्री, (भृङ्गज+स्त्रियां टाप्।) भार्गी। इति राजनिर्घण्टः॥

भृङ्गपर्णिका, स्त्री, (भृङ्ग इव काल्यात् भृङ्गवर्णं पर्णमस्याः इति ङीष्। ततः स्वार्थे कन् टाप्। अत इत्वञ्च। ईकारस्य ह्रस्वत्वम्।) सप्तला। इति शब्दचन्द्रिका॥

भृङ्गप्रिया, स्त्री, (भृङ्गाणां प्रिया। प्रपुरन्ध्रादित्वात्।) माधवीलता। इति राजनिर्घण्टः॥

भृङ्गमूलिका, स्त्री, (भृङ्गस्य भृङ्गराजस्येव मूलमस्याः कः। अजातित्वचत्वात् टाप्। कापि अत इत्वञ्च।) भृङ्गराजः। इति राजनिर्घण्टः॥

भङ्गरजः, पुं, (भङ्गात् रञ्जयतीति अन्तर्भूतण्यर्थाद् रञ्जोऽच्। एषोदरादित्वात् न लोपः।) भङ्गराजः। इति भावप्रकाशः॥ (यथा,—

"भङ्गरजनिशलोत्पलग्रारि-
जौहपुरोवसमन्वितकारि॥"

इति वैद्यकचक्रपाणिदत्तसंग्रहे क्षुद्राधिकारे॥)

भङ्गरजा, [ङ्] पुं, (रञ्जयतीति। अन्तर्भूतण्यर्थात्। रञ्जे "सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्। ततो "रञ्जेश्च।" ६।४।२६। इति यलोपः। ततो भङ्गाच्चौ रजाः रञ्जकः। अथवा भङ्ग इव शुभ्रवर्णं रजः परागोऽस्य।) भङ्गराजः। इत्यमरटीकायां भरतः॥

भङ्गराजः, पुं, (भङ्गइव राजते इति। भङ्ग+राज्+अच्। ब्रह्मारेश भङ्गवत् केशशुक्लीकरत्वात्तथात्वम्।) क्षुपविशेषः। केसरिया इति वङ्गभाषा। भेंगरिया इति हिन्दीभाषा। तत्पर्य्यायः। केशराजः २ भृङ्गः ३ यमदूतः ४ मार्कवः ५। इति रत्नमाला। भृङ्गाजः ६ केशरञ्जनः ७ पिङ्गप्रियः ८ अङ्गारकः ९ केश्यः १० कुन्तलवर्द्धनः ११। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। चक्षुष्यत्वम्। केशरञ्जनत्वम्। कफामयोपशमित्वमग्नित्वम्। तत्र नीलो रसायनः। इति राजनिर्घण्टः॥ अपि च।

"भङ्गराजो भङ्गरजः मार्कवो भृङ्ग एव च।
भृङ्गारकः केशराजो भृङ्गारः केशरञ्जनः॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत्।
केश्यश्चक्ष्यः कृमिश्वासकासश्लीपामयापहृत्।
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्ति-
जित्॥"

इति भावप्रकाशः॥

पक्षिविशेषः। (यथा, महाभारते। ३।१०८।७। शकुनेश्च विचित्राङ्गैः कूजद्भिर्विविधा गिरः।
भृङ्गराजेलया हंसैर्दात्यूहैर्जलकुक्कुटैः॥") भ्रमरः। इति मेदिनी। जे, ३४॥ वज्रभेदः। इति धरणिः॥

भृङ्गरिटिः, पुं, (भृङ्ग इव रटति इति। भृङ्ग+रट+इन्। एषोदरादित्वादिकारागमः।) ग्रीवद्वारपालः। इति भूरिप्रयोगः॥

भृङ्गरीटः, पुं, (भृङ्गरिटि। एषोदरात् ईत्वम्।) ग्रीवद्वारपालः। इति भूरिप्रयोगः॥

भृङ्गरोलः, पुं, (भृङ्ग इव रौति। भृङ्ग+रु+बाहुलकात् ओलच्। अस्य भृङ्गवृक्षाग्रन्थत्वात्तथात्वम्।) कीटविशेषः। भौमरुल इति भाषा। तत्पर्य्यायः। विषखञ्जा २ वरोलः ३ ह्रस्वषट्पदः ४। इति त्रिकाण्डशेषः॥

भृङ्गवल्लभः, पुं, (भृङ्गाणां वल्लभः प्रियः।) धाराकदम्बः। भूमिकदम्बः। इति राजनिर्घण्टः॥

भृङ्गवल्लभा, स्त्री, (भृङ्गाणां वल्लभा।) भूमिजम्बूः। इति राजनिर्घण्टः॥

भृङ्गसोदरः, पुं, (भृङ्गाणां सोदरस्तुल्यः।) केशराजः। इति त्रिकाण्डशेषः॥

भृङ्गागन्धा, स्त्री, (भृङ्गाऽऽमागन्धो यस्याः षष्ठी तत्पुरुषः। भृङ्गाणां आगन्धा आगन्धकारी वा।) यूथिका। इति राजनिर्घण्टः॥

भृङ्गाभीरुः, पुं, (भृङ्गाणां अभीरुः प्रियः। मधु बाहुल्यात्।) आम्रवृक्षः। इति राजनिर्घण्टः॥ तत्सुकुलफलयोः क्ली॥

भृङ्गारं, क्ली, (कुभृञ् धारणपोषणयोरिति। भृ+"भृङ्गारभृङ्गारौ।" उणा० ३। १२६। इति आरन् निपातनात् गुम् गुक् च।) जलपात्रम्। सुवर्णम्। इति राजनिर्घण्टः॥

भृङ्गारः, पुं, (भृ+आरन् गुम् गुक् च। अथवा "भृङ्गं जलमियर्त्तीनेनेति।" भृङ्ग+ऋ+करणे घञ्। ह्रस्वमरटीकायां रघुनाथः॥ सर्व्वघटितवारिपात्रम्। (यथा मार्कण्डेयपुराणे। ८२०३।
"नाद्य पश्यामि ते हस्तं भृङ्गारमथवा पुनः॥")
तत्पर्य्यायः। कचकाचुका २ ह्रस्वमरः॥ गुडुकः ३ गडुकः ४। इति शब्दरत्नावली। भृङ्गराजः। इति घटाधरः। अथ भृङ्गारोद्देशः।
"राज्ञोऽभिषेकपात्रं यद्भृङ्गार इति तन्मतम्।
तदुक्तं तस्य मानमालतिचापि चारुधा॥
सौवर्णं राजतं भौमं ताम्रं स्फाटिकमेव च।
चान्दनं जौहनं प्राज्ञैमेतदष्टविधं मतम्॥
भागुदिङ्मवसप्तारुद्रलोकसुरोन्मिताः।
अष्टावरौ समाख्याता आयामपरिणाहयोः॥
द्विचतुर्वाजवेदाब्धिनागसप्तास्तदुत्तिता।
यथाक्रमं वसुद्विरुमादित्वादिदृग्रा भुवाम्॥
पद्मरागलया वज्रं वैदूर्य्यमौक्तिकलया।
नीलं मारकतेनैव तुल्या च वज्र कीर्त्तिता॥
भृङ्गारवक्त्रे व्याख्या न भौमो मध्यमर्हति।
कामदं लक्षणायं वापि सर्व्वेषामुपयुज्यते॥
कामदस्तु त्रितीयानां लक्षणं सार्व्वयोनिकम्।
शुद्धपद्मेक्षुकारं प्रवरं विन्यसेत् क्रमात्॥
चतुर्विधानां भूषाणां चारुः सर्व्वत्र शस्यते।
श्वेतं रक्तं तथा पीतं कृष्णं चन्दनमुच्यते॥
एतेषां बलिजे सेकचतुर्थो स्नाग्रहीक्षुणाम्॥
मक्षी पद्मच नीलच तथा कृष्णापराजिता।
एषां पुष्पाणि केशेषु चतुर्जातिमहीक्षुणाम्॥
हीरकं पद्मरागच वैदूर्य्यं नीलमेव च।
चत्वारो मध्यमे धेयाश्चतुर्थो सेचनाभिधे॥
इत्थं विधिज्ञ यः कुर्य्यात् नृपतिः सेकमालभन्।
स चिरायुर्भवेद्भोगी इतोऽन्यत्रान्यथाचरन्॥"

इति युक्तिकल्पतरौ भृङ्गारोद्देशः॥

भृङ्गारिः, स्त्री, (भृङ्गं भृङ्गवर्णमच्छतीति। ऋ+इन्।) केविकापुष्पम्। इति राजनिर्घण्टः॥

भृङ्गारिका, स्त्री, (भृङ्ग+ऋ+"कर्म्मण्यण्" ३। २। १। इति अण्। भृङ्गारः ततः कन्। टाप् अत इत्वच्।) झिल्लिका। यथा,—

"झिल्लीका झिल्लिका वर्षकरी भृङ्गारिका
च सा।"

इति हेमचन्द्रः। ४। ८२॥

भृङ्गारी, स्त्री, (भृङ्गमिवर्त्तिं रूपेणानुकरोति "कर्म्मण्यण्।" ३।२। १। इति अण्। भृङ्गारः+ङीष्। रस्य लत्वे भृङ्गाली च।) झिल्ली रत्नमरः। २। ५। २८॥

भृङ्गाङ्कः, पुं, (भृङ्गमाङ्कयते लक्षयते इति। आ+कै+कः।) जीवकः। भृङ्गराजः। इति राजनिर्घण्टः॥ (विवृतिरस्य जीवकभृङ्गराजग्रन्थयोर्ज्ञातव्या॥

भृङ्गाङ्का, स्त्री, (भृङ्गमाङ्कयते लक्षयते। भृङ्ग+आ+कै+कः स्त्रियां टाप्।) भ्रमरच्छली। इति राजनिर्घण्टः॥

भृङ्गिः, पुं, (बिभर्त्तीति। भृ+बाहुलकात् गिक् डुट् च।) भृङ्गी। यथा,—

"प्राप्ता गङ्गाधिपत्यं तं ज्ञात्वा भृङ्गिरिति
स्मृतः।"

इति वामनपुराणे ४५ अध्यायः॥

भृङ्गिणी, स्त्री, (भृङ्गवत् वर्णो अस्या अस्तीति इनिः। ङीप्।) वटीवृक्षः। इति राजनिर्घण्टः॥

भृङ्गी, स्त्री, (भृ+गक्+डुट्+गौरादित्वात् ङीष्।) अतिविषा। इति राजनिर्घण्टः॥

भृङ्गी, [न्] पुं, (भृङ्गः भृङ्गवदर्णोऽस्यास्तीति। इनिः।) वटवृक्षः। इति राजनिर्घण्टः॥ शिवद्वारपालविशेषः। तत्पर्य्यायः। भृङ्गरिटिः २ भृङ्गरीटः ३ शूलः ४ नाड़ीदेहः ५ अस्थिविग्रहः ६। इति त्रिकाण्डशेषः॥ भृङ्गरिटिः ७। इति भूरिप्रयोगः॥ तस्य जन्मकारणं यथा,—

ईश्वर उवाच।

"रतिमात्रेण गौर्याश्च मत्पुत्रः संभविष्यति।
महामैथुनसंत्यागात् स्यादपुत्री च पार्व्वती॥
तस्मादद्यतु देवानां वचनाद्ब्रह्मणस्तथा।
अस्मे महामैथुनन्तु किम्बैकं करुतामराः!॥
येन मे सुमहत्तेजो महामैथुनकारणम्।
धार्य्यं तेजस्विनं देवमानयन्त्वमरास्तु तम्॥
यो निष्कम्पो निर्व्विकारो भूत्वा तेजः यहीष्यति।
तस्मै वदतु चिदग्राख्यस्मै तेजः शरीरजम्॥"

श्रीपार्व्व उवाच।

"इत्यभ्यर्थ्यच शूला देवा ब्रह्मपुरोगमाः।
हरतेजोग्रहायाथ वीतिहोत्रं ययुर्मुदा॥
अथ ब्रह्माब्रवीन्मन्त्रं तथानुज्ञाप्य पावकम्।
सेन्द्रा देवगणाः सर्व्वे हरब्रह्मपुरिदं वचः॥"

श्रीदेवा ऊचुः।

"एष वैश्वानरः श्रीमान् भूरितेजोमयो बली।
महामैथुनयोज्यन्तु त्वत्तेजः संग्रहीष्यति॥
इत्युक्ता त्रिदशाः सर्व्वे वीतिहोत्रं पुरःस्थितम्।
तस्मै निदेशयामासुः शम्भवे सर्व्वहेतवे॥
ततः षड्वक्त्रं स्वं रेतो वाहिते दहनानने।
उत्सर्ज्ज महावाहुमहामैथुनकारणम्॥
अग्रासुरस्यमानस्य तेजसः शुभ्रभद्भूतः।
अणुद्वयमतिस्वच्छं गिरिप्रस्थे पपात ह॥
तयोः कारणयोः सद्यः सम्भूतौ शुक्लरात्मजौ।
एको भृङ्गसमः श्यामो भिन्नाञ्जननिभोऽपरः॥
भृङ्गी तस्य तदा ब्रह्मा नाम भृङ्गीति चाकरोत्।

महाज्येष्ठरूपस्य महाकालेति लोकभृत्।
ततस्तौ जानयामास भृङ्गिरः प्रमथोत्करैः।
अपर्णया चापि तथा क्रमात्तावभिवर्द्धितौ।
प्रदत्तौ तौ महात्मानौ हरोमाप्रतिपालितौ।
क्रमान्नयेशौ हत्वा तौ हरौ हारि न्ययोजयत्॥"

इति कालिकापुराणे ४५ अध्यायः॥

तस्य वानरमुखत्वकारणं तच्छापेन हरपार्श्वे स्त्रीत्वापिमनुष्यजन्मभयहरं यथा,—

"यदा सा जन्मने याता गौरी हरहरान्तिकम्।
तदा भृङ्गिमहाकालौ द्वाःस्थौ हारि प्रतिष्ठितौ।
नन्दीवसाने सा देवी सुरवधूभिरन्वगा।
निःसृता रतिसङ्केतगृहाया जलजानना॥
तां निःसरन्तीं सहसा तथाभूतामनिन्दिताम्।
अयोग्यां वीक्षितुं चान्यैर्वञ्चयन्तौ प्रियम्॥
ददर्शतुर्महात्मानौ नातिह्रस्वात्ममानसौ।
भृङ्गी चापि महाकालः प्राप्तकालञ्च कोपतः॥
दृष्ट्वा तौ मातरं दीनौ तदा भूतावधीसुखौ।
चिन्ताच्च जग्मतुस्तीव्रां निर्गच्छन्तुरुत्तमम्॥
तौ पश्यन्तौ तदा देवी ददर्श हिमवत्सुता।
चुकोप च तदापर्णा वाक्यञ्चेतदुवाच ह॥
एवम्भूतान्तु मां कस्मादसम्भाषमपश्यताम्।
भवन्तौ तनयौ शुद्धौ क्रीमर्य्यादाविवर्जितौ॥
तस्मादिमाममर्य्यादां भवन्तौ निरपत्रपौ।
अकुर्व्वतां ततो भूयाद्भवतोर्जन्म मानुषे॥
मानुषीं योनिमासाद्य ममावेक्षणदोषतः।
भविष्यतो भवन्तौ तु ग्राखाङ्गसुखौ भुवि॥
तौ प्राप्तदुःखौ तु तदा विमनस्कौ हरात्मजौ।
शापं तस्या न सेहाते श्रोचतुश्चेदमद्रिजाम्॥
नियोजितौ यथा हारि महेशेन त्वया सह।
तथा नियोगं कुर्व्वन्तौ तिष्ठावो हारि संयतौ।
दहात्निःसरणं गेहात्तवैव न हि युज्यते॥
तस्मात्तत्र प्रतीकारं भद्रे मातरनिन्दिते!!
त्वं मानुषी चिरौ भूया हरो भवतु मानुषः॥
मानुषस्य हरस्यापि जायायां हरतेजसा।
भवत्यामपि मानुष्या भविष्यावस्तथोदरे॥
अथ काले यतीते तु सर्व्वज्ञो वृषभध्वजः।
तद्भावि कर्म्म ज्ञात्वैव मानुषो ह्यभवत् स्वयम्॥
ब्रह्मणो दक्षिणाङ्गुष्ठाद्यो ब्रह्मसुतोऽभवत्।
अदितिस्तत्सुता जाता ततः पूषाऽभवोऽभवत्॥
पूष्णः पुत्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः।
यस्य तुल्यो नृपो भूमौ न भूतो न भविष्यति॥
स पुत्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः।
शैवे वयसि संप्राप्ते भार्य्याभिस्त्रिभिः सह॥
पौष्यः परमया भक्त्या ब्रह्माणं पर्य्यतोषयत्।
तस्य प्रसन्नो भगवान् ब्रह्मा लोकपितामहः॥

ब्रह्मोवाच।

वृणु पौष्य! यथा भावी पुत्रस्तव कुलोद्वहः।
तदहं ते वदिष्यामि भार्य्याभिस्तत् समाचर॥
इदं फलं गृहाण त्वं मया दत्तं नृपोत्तम!।
अत्रीर्य्यं बहुवे काले प्राप्तेऽपि सुरसं वदा॥
फलमेतत् समादाय यावत् संवत्सरद्वयम्।
आराधय महादेवं सुप्रसन्नो भविष्यति॥
यथा संभाषते भर्गः फलमेतत्तथा भवान्।
करिष्यति फलं राजन्! भार्य्याभिस्त्रिभिः सह॥
इत्युक्त्वा प्रययौ ब्रह्मा राजापि सह भीरुभिः।
हरं यष्टुं समारेभे भक्त्या परमया युतः॥
स तु वर्षद्वयेऽतीते महादेवो जगत्पतिः।
पौष्यस्य नृपतेः सम्यक् प्रसादार्थमिहाद्रये॥
ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः।
ब्रह्मदत्तफलं हस्ते हत्वेदं तमुवाच ह॥

ईश्वर उवाच।

इदं फलं ब्रह्मदत्तं विभज्य नृपते! त्रिधा।
भोजयेस्ताः स्वजायास्तं प्रहृष्टः सुसमानसः॥
एकस्या जठरे श्रीर्मे भार्य्यायास्ते भविष्यति।
अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति॥
अधो नाभ्यास्तु यो भागः सोऽपरस्यां भविष्यति॥
ततः खण्डत्रयं भूप! यथास्यानं पृथक् पृथक्।
योजयिष्यति पश्चात्ते पुत्र एको भविष्यति॥
ततः फले स्वयं देवः प्रविवेश वृषध्वजः।
ततश्चखाद तत् फलं भूतं त्रिभागं स्वयमेव हि।
ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम्॥
तत् फलं नृपशार्दूल! गर्भाद्याप्याहिताः शुभाः।
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत॥
खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम्।
तच्च खण्डत्रयं पौष्यो यथास्यानं नियोज्य च॥
एकं पिण्डं चकाराशु तत्र पुत्रो व्यजायत।
तस्य श्रीर्मे तदा राजन्! सहजेन्द्रकला शुभा॥
तस्य नामाकरोद्राजा ब्राह्मणैः खेः पुरोहितैः।
चन्द्रशेखर इत्येवं कान्त्या चन्द्रसमप्रभः॥
एवं तिसृणामम्बानां गर्भे जातो यतो हरः।
अतस्त्र्यम्बकनामाभूत् प्रथितो देवलोकयोः॥"

इति कालिकापुराणे ४६ अध्यायः॥

"अवतीर्णे महादेवे पौष्यजायासु स्वेच्छया।
मानुषेण प्रमाणेन तेन सम्तुसरद्वये।
गिरिजापि ककुत्स्थस्य राज्ञो भार्य्यास्वजायत॥
"इक्ष्वाकुवंशजो राजा ककुत्स्थो नाम धार्म्मिकः।
तस्य भार्य्या महाभागा भर्गदेवस्य पुत्रिका।
सा मनोज्ञाधिनी नाम्ना पूजिता पतिवल्लभा।
पुत्री न विद्यते तस्यास्तदर्थं सा गृहान्तरे।
निर्भृतं स्वस्थितं कृत्वा चण्डिकां समपूजयत्॥
पूज्यमाना महादेवी चण्डिका राजभार्य्यया।
पार्व्वत्यपि स्वयं तस्या गर्भे काले विवेश ह॥
सा मनोज्ञाधिनी देवी सुषुवे तनयां शुभाम्।
तां दृष्ट्वा हारसंयुक्तां श्रुरज्ञीतूकोपमां शुभाम्॥
ककुत्स्थो भार्य्यया सार्द्धमत्यन्तमुदितोऽभवत्॥
तेनैव हारचिह्नेन तस्यां तारावतीति वै।
नाम्नाकरोत् पिता काले यथोक्ते नृपसत्तम!॥
तस्यास्तु यौवनोद्भेदं दृष्ट्वा राजा सुतेः सह।
ककुत्स्थः कारयामास समयेऽथ स्वयम्वरम्।
स्वयं सा पार्व्वती देवी वव्रे च चन्द्रशेखरम्॥
इति स्वयं महादेवो मानुषीं योनिमाश्रितः।
पार्व्वती च स्वयं जाता नरयोनावनिन्दिता॥
यथा भृङ्गी महाकाल एतयोरभवत् सुतः।
तथा त्वं शृणु राजेन्द्र! कथयामि वसुन्धरम्॥
अथोमया समं देवो विपता चन्द्रशेखरः।
आजगाम तदा गच्छन् प्रासादं प्रतितं नृप!॥
ददर्शेऽथ चरन्तीं तासमायाः सदृशीं सुखैः।
सर्व्वलक्षणसम्पूर्णां माधवस्येव माधवीम्॥
तां दृष्ट्वा जगदद्देवीं गौरीं वृषभकेतनः।
इयं ते मानुषी मूर्त्तिः प्रिये! तारावतीति या॥
भृङ्गी महाकालयोस्ते जन्मने विहिता स्वयम्।
त्वत्तो त्वगन्यकान्तोऽहं नान्यां गन्तुमिहोत्सहे॥
त्वमिदानीं स्वयञ्चास्यां मूर्त्तौ प्रविश भाविनि!॥
तत उत्पादयिष्यामि महाकालञ्च भृङ्गिणम्॥

श्रीदेव्युवाच।

ममैव मानुषी मूर्त्तिरियं वृषभकेतन!॥
विशामि तेऽत्र वचनादुत्पाद्य सुतद्वयम्॥
प्रविवेश ततो देवी स्वयं तारावतीतनौ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः॥
ततः सापर्णयाविष्टा देवी तारावती सती।
कामयानं महादेवं स्वयमेवाभवन्मुदा॥
कामावसाने तस्यान्तु सद्योजातं सुतद्वयम्।
अभवत् नृपशार्दूल! तथा ग्राखाङ्गगाननम्॥
ततस्तयोर्नाम चक्रे नारदो वचनात् नृप!।
ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः॥
वेतालसदृशः क्षुद्रो वेताल्योऽभूत्तथापरः।
इति चक्रे तयोर्नाम देवर्षिर्ब्रह्मणः सुतः॥
अन्यांश्च सर्व्वसंस्कारान्नारदो मुनिसत्तमः।
चकार क्रमशो वाक्याच्चन्द्रशेखरभूभृतः॥"

इति कालिकापुराणे ४७। ४८। ४९ अध्यायेभ्यः संकलितम्॥ तस्य जन्मनः प्रकारान्तरं यथा,

वेण उवाच।

प्रपद्ये देवमीशानं त्वामजं चन्द्रभूषणम्।
महादेवं महात्मानं विश्वस्य जगतः पतिम्॥
अथेनमब्रवीद्देवश्चतुर्लोकाधिपतिर्भवः।
आश्वासनकरञ्चास्य वाक्यविद्वाक्यसत्तमम्॥
अहो तुष्टोऽस्मि ते राजन्! स्तवेनानेन सुव्रत!।
वृणुष्व किमभीष्टं मत्समीपे वक्ष्यसि॥
उक्तिला सुचिरं कालं मम गात्रोद्भवः पुनः।
असुरो ह्यन्धको नाम भविष्यसि सुरान्तकृत्॥
हिरण्याक्षवधे जन्म प्राप्य दृष्टिं गमिष्यसि।
पूर्व्वाधर्म्मेण घोरेण वेदनिन्दाकृतेन च॥
साभिलाषो जगन्मातुर्भविष्यसि यदा तदा।
देहं भूवेन हत्वा ते पातयिष्यामि साध्विमम्॥
तथाप्यकल्मषो भूतः स्मृत्वा मां भक्तितः पुनः।
प्राप्स्यसि गणाधिपत्यं त्वं नाम्ना भृङ्गिरिति स्मृतः।
मत्सन्निधाने स्थित्वा त्वं ततः सिद्धिं गमिष्यसि॥"

ततः कालान्तरे अन्धकासुरस्यावान्तरं महादेववाक्यम् यथा,—

"सिद्धोऽसि दानवपते! परितुष्टोऽस्मि तेऽन्धक!।
वरं वरय भद्रं ते यमिच्छसि विनाम्बिकाम्॥

अन्धक उवाच ।
अम्बिका जननी मह्यं भगवांस्त्र्यम्बकः पिता ।
वन्दामि चरणौ मातुर्वन्दनीया ममाम्बिका ॥
वरदोऽसि वरेशान ! तदेयातु विलयं मम ।
शारीरं मानसं वाग्जं दुष्कृतं दुर्विचिन्तितम् ॥
तथा मे दानवो भावो क्षपयातु महेश्वर ! ।
स्थिरा स्यात्तव भक्तिस्तु वरमेतं प्रयच्छ मे ॥
महेश्वर उवाच ।
एवं भवतु दैत्येन्द्र ! पापं ते यातु संक्षयम् ।
मुक्तोऽसि दैत्यभावाच्च भक्त्या गणपतिर्भव ॥
इत्येवमुक्त्वा वरदः शूलाग्रादवतार्य तम् ।
निर्माल्य निजहस्तेन चक्रे निर्व्रणमन्धकम् ॥
ततः खड्गहतो देवान् ब्रह्मादीनानुधाव सः ।
ते निर्जरमहात्मानो नमस्यन्तस्त्रिलोचनम् ॥
गणान् स नन्दी चाहूय सन्निवेश्य तदग्रतः ।
भङ्गियं दर्शयामास ह्यवन्नेवोन्मकेति हि ॥
ते दृष्ट्वा दानवपतिं संशुष्कपिशितं रिपुम् ।
गणाधिपत्यमापन्नं प्रणम्यंसुर्वृषध्वजम् ।"
इति वामनपुराणे ।४४।४५।६७ अध्यायेभ्यः संकलितम् ॥

भङ्गीफलः, पुं, (भङ्गाः अतिविषायाः फलमिव फलं यस्य ।) आम्रातकवृक्षः । इति राजनिर्घण्टः ॥

भङ्गीशः, पुं, (भङ्गिर्भङ्गेर्वा ईशः ।) महादेवः । इति शब्दरत्नावली ॥

भङ्गेरिटिः, पुं, (भङ्गे भङ्गविषये रिटति । अभिलषतीति । भङ्गे + रिट् कर्मणि इः । अलुक् समासः ।) भङ्गी । इति त्रिकाण्डशेषः ॥

भङ्गेरा, स्त्री, (भङ्गाख्यामिदा ।) घृतकुमारी । भार्गी । तरुणी । काकजङ्घा । इति राजनिर्घण्टः ॥

भज ट्टे ड भर्जने । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) भर्जनं पाकविशेषः । ट्टे भक्तः । ड भर्जते तरुणान् जनः । इति दुर्गादासः ॥

भञ्जनः, पुं, (भज्यन्ते तरुणादयोऽस्मिन्निति । भस्ज् + "भूसृधृभस्जिभ्यश्छन्दसि ।" उणा० २ । ८० । इति ल्युन् ।) अम्बरीषः । इति उणादिकोषः । भाजना खोला इति भाषा ॥

भक्तः, त्रि, भरणीयः । इत्याङ्किकतत्त्वम् । पुनः । इति भृञातोः कर्मणि क्तप्रत्ययेन निष्पन्नम् ॥

भक्तकः, पुं, (म्रियते इति । भृ + कर्मणि क्तः । ततः स्वार्थे कन् । यद्वा, भक्तेन वेतनेन उपजीवतीति कन् ।) वेतनोपजीविकर्मकरः । तत्पर्य्यायः । भृतिभुक् २ कर्मकरः ३ वैतनिकः ४ । इत्यमरः । २।१०। १५ ॥ (यथा, मनौ ।१।१५६।
"भृतकाध्यापको यश्च भृताध्यापितस्तथा ।")

भृतिः, स्त्री, (म्रियते अनयेति । भृ + क्तिन् ।) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ मूल्यम् । भरणम् । इति मेदिनी । ते, ४२ । भृतिर्वेतनं क्षतकर्मभ्यो दत्तम् । तत्तु सप्तविधदत्तान्तर्गतदत्तविशेषः । यथा नारदेन च । दत्तं सप्तविधं प्रोक्तमदत्तं षोढ़शात्मकमिति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतम् ।
"पश्यन्मूल्यं भृतिसुद्धा स्नेहात् प्रत्युपकारतः ।
स्त्रीशुल्काद्युग्रहार्थञ्च दत्तं दानविदो विदुः ॥"
इति मिताक्षरा ॥

भृतिभुक्, [ज्] पुं, (भृत्या सुङ्क्ते उपजीवतीत्यर्थः । भुज् + कर्मणि क्विप् ।) भृतकः । इत्यमरः । २ । १० । १५ ॥

भृत्यः, पुं, (म्रियते इति । भृ + "भृञोऽसंज्ञायाम् ।" ३ । १ । ११२ । इति क्यप् । "हृस्वस्य पिति कृति तुक् ।" ६ । १ । ७१ । इति तुगागमश्च ।) दासः । इत्यमरः । २ । १० । १७ ॥ (तथास्य पर्य्यायान्तरम् ।
"परिकर्म्मा परिचरः सहायः परिचारकः ।
प्रेष्यो भव्य उपस्थाता सेवकोऽभिधवोऽनुगः ॥"
इति वैद्यकरत्नमालायाम् ॥)
तस्य लक्षणं यथा,—
स्कन्द उवाच ।
"भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ।
नियोक्तव्या यथार्थेषु त्रिविधेष्वेव कर्म्मसु ॥
भृत्यपरीक्षणं वक्ष्ये यस्य यस्य हि यो गुणः ।
तस्मिन्नं संप्रवक्ष्यामि यदुयदा कथितानि च ॥
यथा चतुर्भिः कनकं परीक्ष्यते
तुलाघर्षच्छेदनतापनेन ।
तथा चतुर्भिर्भृतकः परीक्ष्यते
श्रुतेन शीलेन कुलेन कर्म्मणा ।"
कुलशीलगुणोपेतः सत्यधर्म्मपरायणः ।
रूपेण सुप्रसन्नश्च राज्ञाध्यक्षो विधीयते ॥
मूल्यरूपपरीक्षाज्ञश्चित्रज्ञपरीक्षकः ।
बलाबलपरिज्ञाता सेनाध्यक्षो विधीयते ॥
इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी प्रमाथी च प्रतीहारः स उच्यते ॥
मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः ।
सर्व्वशास्त्रसमालोकी क्षिप्रं साधुः स लेखकः ॥
बुद्धिमान् मतिमांश्चैव परचित्तोपलक्षकः ।
क्रूरो यथोक्तवादी च एष दूतो विधीयते ॥
समस्तशस्त्रशास्त्रज्ञः पण्डितोऽथ जितेन्द्रियः ।
शौर्य्यधैर्य्यगुणोपेतो धर्म्माध्यक्षो विधीयते ॥
पितृपैतामहो दक्षः शास्त्रज्ञः सत्यवाचकः ।
शौचयुक्तः सदाचारी सूपकारः स उच्यते ॥
आयुर्व्वेदज्ञताभ्यासः सर्व्वज्ञः प्रियदर्शनः ।
आर्य्यशीलगुणोपेतो वैद्य एष विधीयते ॥
वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्व्वादपरो नित्यमेष राजपुरोहितः ॥
इति गारुड़े ११२ अध्यायः ॥

भृत्या, स्त्री, (म्रियतेऽनया भरणमिति वा । भृ + "संज्ञायां समजनिषदनिपतमनविदषुञ् शीङ् भृञिभ्यः ।" ३ । ३ । ९९ । इति क्यप् । स्त्रियां टाप् ।) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ (भरणक्रिया । यथा, ऋग्वेदे । १ । ८४ । १६ ।
"आसन्निषून् हृत्सु शोमयो भूत्यै
एषां भृत्यान्यधस्त जीवात् ॥")

भृमिः, पुं, (भ्रमति भ्राम्यति वेति । भ्रम् + "भ्रमेः संप्रसारणञ्च ।" उणा० ४।१२० । इति इन् कित् सम्प्रसारणञ्च ।) वायुविशेषः । घूरणा वातास इति भाषा । जलादिभ्रमणम् । इत्युणादिकोषः ॥ (त्रि, कर्म्मनिर्व्वाहकः । यथा, ऋग्वेदे । १ । ३२ । १६ ।
"आपिः पिता प्रमतिः सोम्यानां
भृमिरस्यृषिकृन्मर्त्तानाम् ॥"
"भृमिर्भ्रामकः कर्म्मनिर्व्वाहक इत्यर्थः ।" इति तद्भाष्ये सायणः ॥ भ्रमणशीलः । यथा, ऋग्वेदे । १ । ६२ । २ ।
"इमा उ वां भृमयो मन्यमाना
युवावते न तुज्या अभूवन् ॥"
"भृमयः भ्रमणशीलाः ॥" इति तद्भाष्ये सायणः ॥ वीणाविशेषे स्त्री । यथा, ऋग्वेदे ।२।३४।१ ।
"अयमो न शुशुचाना ऋतीषिञो भृमिं धमन्तो अपगा अरक्षत ॥"
"यद्वा, भृम्याख्यो वीणाविशेषस्तं धमन्तो वादयन्तः ॥" इति तद्भाष्ये सायणः ॥)

भृग्, दृर् य उ अधःपते । इति कविकल्पद्रुमः ॥ (दिवा०-परः०-अकः०-सेट् ।) दृर् अभृग्रत् अभृग्रीत् । पृषादित्वान्नित्य ड इत्यन्ये । य भृग्रति भृग्रत्यरिपताकिनीति हलायुधः ॥ ड भर्ग्रिता भृङ्गा । इति । दुर्गादासः ॥

भृग्रं, त्रि, (भृग्रति प्राप्नुवन्नेव वर्द्धते इति भृग्र + कः ।) अतिशयः । तद्वति, त्रि । इत्यमरः । १ । ७० ॥ (यथा, भारवौ । १९ । ३६ ।
"भृग्रमाराधने यत्नः खाराधस्य महत्तम ॥"
भृग्रम्, य, (भृग्र + कः ।) प्रकर्षार्थः । सुष्ठुरर्थः । शोभनम् । इति शब्दरत्नावली ॥

भृत्, [द्] पुं, धावाग्नः । इति शब्दरत्नावली ॥

भृष्टः, त्रि, (भ्रस्ज् + कर्म्मणि क्तः ।) अजोपसेकं विना पक्वः । इति हेमचन्द्रः ॥ भाजा इति भाषा ॥

भृष्टकुलः, पुं, (भृष्टश्चासौ तरुणश्चेति कर्म्मधारयः ।) भर्जनविशिष्टधान्यनिकरः । चाल भाजा इति भाषा ॥ अस्य गुणाः ।
"सुगन्धिः कफपित्तघ्नः पित्तघ्नो भृष्टकुलः ॥"
इति राजवल्लभः ॥

भृष्टयवः, पुं, (भृष्टश्चासौ यवश्चेति ।) भर्जनविशिष्टयवः । यव भाजा इति भाषा । तत्पर्य्यायः । धानाः २ । इत्यमरः ॥ बाहुकम् २ । इति शब्दचन्द्रिका ॥ अस्य गुणा धानाशब्दे द्रष्टव्याः ॥

भृष्टान्नं, क्ली, (भृष्टं अन्नम् ।) भृष्टतण्डुलः । सुड़ि इति भाषा । तत्पर्य्यायः । कुड़वम् २ व्याघम् ३ । इति शब्दचन्द्रिका ॥

भृष्टिः, स्त्री, (भ्रस्ज् + भावे क्तिन् ।) भर्जनम् । भृष्यवाटिका । इति मेदिनी । टे, २५ ॥

भृ गि भृतौ । भृञि । भर्त्तरि । इति कविकल्पद्रुमः ॥ (क्रया०-परः०-सकः० सेट् ।) गि भृणाति भूर्णः । भूर्णिः । भृञि भर्त्तरि । इति दुर्गादासः ॥

भेक:, पुं, (बिभेति इति। भी + "इण्भीकापाशल्यतीति।" उणा०। ३। ४३। इति कन्। जन्तुविशेषः। बाङ् इति भाषा। तत्पर्य्यायः। मण्डूकः २ वर्षाभूः ३ शालूरः ४ प्लवः ५ दर्दुरः ६। इत्यमरः।१।१०।२४॥ वृष्टिभूः ७ शालूरः ८। इति तट्टीका॥ प्लवङ्गमः ९ प्लङ्गः १० प्लवगः ११ प्लक्षः १२ नन्दनः १३ गूढपर्वा: १४ अजिह्मः १५ जिह्ममोदनः १६। इति शब्दरत्नावली॥ नन्दकः १७ क्षतालयः १८ रेकः १९। इति त्रिकाण्डशेषः॥ मण्डः २० हरिः २१ सुमुखः २२। क्वचित् पुस्तके लूलकोऽपि पाठः। शालूकः २३ कटुरवः २४। अस्य मांसगुणाः। सद्योबलकरत्वम्। अमदोषदाहश्रमहरत्वञ्च हृद्यत्वं नाग्निदत्वञ्च। इति राजनिर्घण्टः॥ मेघः। इति मेदिनी। के, ३०। (यथा, आर्य्यासप्तशत्याम्। ४५१।
"संहृतेऽम्भोदुधिर्वेदाधनद्यो न भेकमपि॥")

भेकटः, पुं, (भेक इव टलति। भेक + टल + डः।) मत्स्यभेदः। यथा। तुल्यौ भेकटवेकटौ। इति त्रिरूपकोषः॥

भेकवि:, पुं, मत्स्यविशेषः। भाङ्गन इति भाषा। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। दोषत्वम्। श्लेष्मकरत्वम्। गुरुत्वञ्च। इति राजवल्लभः। भेकजिः। इति च पाठः॥

भेकपर्णी, स्त्री, (भेकाक्षति पर्णमस्याः ङीष्।) मण्डूकपर्णी। इति केचित्॥ (यथा,—
"तत्सर्व्वं कन्यकादावेर्भेदयेद्भावयेत्तथा।
भेकपर्णीरसेनैव गुञ्जाद्वयवटीं हिताम्॥"
इति वैद्यकरत्नसारसंग्रहे ज्वरातीसारगदाधिकारे॥)

भेकसुक् [क्] पुं, (भेकं सृजति इति। सृज् + क्विप्। सर्पः। इति त्रिकाण्डशेषः॥

भेकी, स्त्री, (भेक + "जातेरस्त्रीविषयादयोपधात्।" ४। १। ६३। इति ङीष्।) भेकप्रिया। तत्पर्य्यायः। झिल्ली २ गण्डुपदी ३ वर्षाभ्वी ४ इत्यमरः। १। १०। २४॥ अन्येऽपीवन्तभेकपर्य्याया एतद्वाचकाः। मण्डूकपर्णीदृष्टः। इति रत्नमाला॥ (यथास्याः पर्य्यायान्तरम्।
"भेकी मण्डूकपर्णी च मण्डूकी मूलपर्णयेपि॥"
इति रत्नमालायाम्॥)

भेड:, पुं, (भी + बाहुलकात् डः। अस्येत्त्वम् न गुणत्वं च।) मेषः। इति हेमचन्द्रः।४।३४३। अस्य भाषा भेड़ा॥

भेड़ी, स्त्री, (भेड़ + ङीष्।) भेड़भार्य्या। अवी। अस्या दुग्धगुणाः।
"आविकं लवणं स्वादु स्निग्धोष्णाम्लरसप्रियत्।
अल्पं तर्पणं केश्यं शुक्रपित्तकफप्रदम्॥
गुल्मकासेऽनिलोद्भूते केवले चानिले वरम्॥"
इति भावप्रकाशः॥

भेत्ता, [त्तृ] त्रि, (भिनत्तीति। भिद् + तृच्।) भेदकर्त्ता। यथा, रघुवंशे।
"कृष्णाजघाणिविच्छेद्यः सेतुभेत्ता समीपतः॥"

भेदः, पुं, (भिद् + घञ्।) शत्रुवशीकरणोपायचतुष्टयान्तर्गततृतीयोपायः। तत्पर्य्यायः। उपजापः २। इत्यमरः। २। ८। २१॥ परतो विश्लेष आत्मसात् करणं भेदः। इति भरतः॥ तद्विशेषो यथा,—
मत्स्य उवाच।
"परस्परन्तु ये दुष्टाः क्रुद्धा भीतावमानिताः।
तेषां भेदं प्रयुञ्जीत भेदसाध्या हि ते मताः॥
ये तु नैवेह दोषेण परस्माद्भापि बिभ्यति।
ते तु तद्दोषपातेन भेदनीया अभूतं ततः॥
आत्मीयां दर्शयेदार्द्धां परस्माद्दर्शयेद्भयम्।
एवं हि दर्शयेद्विज्ञान् यथावद्दृश्यमानयेत्॥
संहता हि विना भेदं शक्रेणापि सुदुःसहाः।
भेदमेव प्रशंसन्ति तस्मान्नयविशारदाः॥
सुखेनाभ्ययेद्भेदं परसुखेन च।
परीक्ष्य साधु मन्येत भेदं परसुखाकृतम्॥
भेदाः सकार्य्यसुद्दिश्य कृष्णलैर्ये हि भेदिताः।
भेदितास्ते विनिर्द्दिष्टा नैव राजार्थवादिभिः॥
अन्तःकोपो बहिःकोपो यत्र स्यातां महीक्षिताम्।
अन्तःकोपो महांस्तत्र नाशकः पृथिवीक्षिताम्॥
सामन्तकोपो वाहस्तु कोपः प्रोक्तो मनीषिभिः।
महिषीयुवराजाभ्यां तथा सेनापतेर्नृप!॥
अमात्यमन्त्रिणाश्चैव राजपुत्रास्तथैव च।
अन्तःकोपो विनिर्द्दिष्टो दारुणः पृथिवीक्षिताम्॥
बाह्यकोपे समुत्पन्ने सुमहत्यपि पार्थिवः।
सुहृत्तस्तु महाभाग! क्षीप्रमेव जयी भवेत्॥
अपि शक्रसमो राजा अन्तःकोपेन नश्यति।
सोऽन्तःकोपः प्रयत्नेन तस्माद्रक्ष्यो हितैषिता॥
परतः कोपमुत्पाद्य भेदेन विजिगीषुणा।
ज्ञातीनां भेदनं कार्य्यं परेषां विजिगीषुणा॥
रक्षणैव प्रयत्नेन ज्ञातिभेदस्तथात्मनः।
ज्ञातयः परितप्यन्ते सततं परितप्य यम्॥
तथापि तेषां कर्त्तव्यं सुगम्भीरेण चेतसा।
यदयं दानमानाभ्यां भेदस्तेभ्यो भयङ्करः॥
न ज्ञातिरनुयुङ्क्ते न ज्ञातिर्दण्डमिच्छति।
ज्ञातिभिर्भेदनीयास्तु रिपवस्तेन पार्थिवैः॥
भिन्ना हि शत्रवा रिपवः प्रभूताः
स्वल्पेन सैन्येन निहन्तुमाशौ।
सुसंहतानां हि ततस्तु भेदः
कार्य्यो रिपूणां नयशास्त्रविद्भिः॥"
इति मात्स्ये राजधर्म्मे २२२ अध्यायः॥

भेदः। विशेषः। विदारणम्। इति मेदिनी। दे, १२॥ (तथा च कामन्दकीये। १५। १६।
"पुरञ्च पक्षाञ्च यदा समर्थै-
स्तदाभियायान्नहते पक्षाय।
पुनः प्रसक्तैर्विगुणैरुपेतः
प्राप्नोति तीव्रं खलु पार्ष्णिभेदम्॥")

विरेकः। यथा, हारीतसंहितायाम्।
"काशे धूमस्तुषायां बलवति मरुते खेदभेदोपवासा
वह्नेर्मान्द्ये च पित्तं सपिशितमशितं वारिपानं कफर्त्तौ॥"

भेदकः, त्रि, (भिद् + ण्वुल्।) विदारकः। यथा, मनौ। ६। २८५।)
("संक्रमध्वजयष्टीनां प्रतिमानाञ्च भेदकः।'
प्रतिकुर्य्याच्च तत् सर्व्वं पञ्च दद्याच्छतानि च॥"
विरेचकौषधादिः। (विरेचकौषधार्थे विषयो यथा,
"नवज्वरे च ये योगा भेदकाः परिकीर्त्तिताः।
ते तथैव प्रयोक्तव्या वीक्ष्य देहमलादिकम्॥"
इति वैद्यकरत्नसारसंग्रहे विरेकाधिकारे॥)
पृथक्कारकः। यथा। "भेदयति अन्यपदार्थं पृथक् करोतीति भेदकं नाम्ना शिवः गोत्रेण गार्ग्यः।" इति कारकटीकायां दुर्गादासः॥
अपि च।
"भेद्यभेदकयोः शिष्टं समन्वोऽन्योन्यमिष्यते।
द्विष्ठो यद्यपि सम्बन्धः षष्ठ्यतुपपत्तिस्तु भेदकात्।"
इति कलापटीकायां भरतमल्लिकारिकायाम्॥
("सामान्यस्य भेदको विशेषः प्रकारः।" इति च ५। ३। ६६। इत्यस्य। काशिकावृत्तिः॥)

भेदनं, क्ली, (भिद्यतेऽनेनेति भिद् + ल्युट्।) छेदनम्। इति राजनिर्घण्टः॥ विदारणम्। इति भिदधातोर्भावेऽनट् प्रत्ययेन निष्पन्नम्॥ (भेदकारके, त्रि॥ यथा,भागवते।३। २६। २।
"यदाहुर्वैशये तत् ते हृदयग्रन्थिभेदनम्।
"अहङ्कारनिवर्त्तनमिति स्वामिव्याख्यानम्॥"
विरेचनकारके च। यथा च सुश्रुते।१।१८८।१४॥
सर्व्वं पित्तकरं मद्यमम्लं दीपनरोचनम्।
भेदनं कफवातघ्नं छर्द्यां वस्तिविशोधनम्॥")

भेदनः, पुं, ("भिद्यतेऽनेनेति।" भिद् + ल्युट्।) अश्ववेतसः। (भिनत्ति भूमिमिति। ल्युः॥ शूकरः। इति राजनिर्घण्टः॥

भेदितः, त्रि, (भिद् + णिच् + कर्म्मणि क्तः।) भिन्नः। दारितः। इत्यमरः। ३। १। १००॥

भेदी, [न्] पुं, (भेत्तुं शीलमस्येति। भिद् + णिनिः।) अश्ववेतसः। इति राजनिर्घण्टः॥ (गुणादयोऽस्याश्ववेतसशब्दे विज्ञेयाः॥)
भेदकैरेरि तद्विशिष्टे च त्रि॥ (यथा भागवते। ३। १५। ३३।
"द्युतुपादितं क्षुवरभेदि भयं यतोऽस्य॥")

भेदुरं, क्ली, (भिदुर + एषोदरादित्वात् साधुः।) भिदुरम्। वज्रम्। इति त्रिरूपकोषः॥

भेरः, पुं, (बिभेत्यस्मादिति। भी + अच्भेरायचेति। उणा०। २। २८। इति रन्।) पटहः। भेरी। दुन्दुभिः। इति संक्षिप्तसारोणादिवृत्तिः॥

भेरिः, स्त्री, (बिभ्यति शत्रवोऽस्या इति। भी + "बहुलाद्यच्च।" उणा०।४।४६। इति क्रिन्। बाहुलकाद् गुणः।) दुन्दुभिः। तत्पर्य्यायः। आनकः २ दुन्दुभिः ३। इत्यमरः। २।७।६॥ भेरी ४ आनकदुन्दुभिः ५ आनकदुन्दुभी ६। इति तट्टीकायां भरतः॥ (यथा, "ततो भेरिवेणुवीणाशङ्खदर्दुरतालपटहझल्लरीकाहलादिभेदेन शब्दा अनेकविधाः।" इति पञ्चतन्त्रे प्रथमतन्त्रम्॥)

भेरी, स्त्री, (बिभर्ति शत्रवोऽस्या इति। भी+क्विन्। ह्रस्वादिकारादिति पक्षे ङीप्।) भेरी। इत्यमरटीकायां भरतः॥

वराह उवाच।

"भेरीशब्दमजत्वा तु यस्तु भां प्रतिबोधयेत्। बधिरो जायते भूमे! जन्मैकञ्च न संशयः॥ तस्य वक्ष्यामि सुश्रोणि! प्रायश्चित्तं मम प्रियम्। किल्बिषाद् येन सुध्येत भेरीताडनमोहितः॥ यस्य कस्यचिन्मासस्य शुक्लपक्षे तु द्वादशीम्। आकाशशयनं कृत्वा शीघ्रं सुध्येत किल्बिषात्॥ य एतेन विधानेन वसुधे! कर्म्म कारयेत्। अपराधं न गच्छेत मम लोकाय गच्छति॥"

इति वराहपुराणे भेरीताडनापराधप्रायश्चित्तम्॥

(यथा च, सुश्रुते। २। २७६। ६।

"एतेन भैर्यः पटहाश्च दिग्धा नानद्यमाना विषमाशु हन्युः॥")

भेरुण्डं, क्ली, गर्भधारणम्। भवानके, त्रि। इति शब्दरत्नावली॥

भेरुण्डा, स्त्री, (भेरुण्ड+टाप्।) देवताविशेषः। यक्षिणीभेदः। इति मेदिनी। डे, ३४॥ या देवता काली। यथा,—

"त्रिकोणनिलया नित्या परमान्तरङ्गिता। महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी॥"

इति कालीकुलसर्ब्बस्वे श्रीशिवपरशुरामसंवादे आद्यायाः षड्नामस्तोत्रम्॥

भेर्त्तं, त्रि, (भी+"अर्त्तेरुन्नायवर्त्तेति।" उणा०२। २८। इति रन् रस्य लत्वम्।) भीतः। भ्रर्त्तः। इति मेदिनी। डे, ४३॥ पचनः। इति शब्दरत्नावली॥

भेलः, पुं; (भी+रन् लत्वम्।) ज्वरः। सन्निपातभेदः। इति मेदिनी। डे, ४३॥ भेलकम्। इति संक्षिप्तसारोणादिवृत्तिः॥

भेलकः, पुं, क्ली, (भेल+स्वार्थे कन्।) गव्यादितरत्नसाधनवस्तु। भेला इति भाषा। तत्पर्य्यायः। ज्वरः २ कोलः ३ उडुपम् ४ उडुपम् ५ तरलः ६ तारलः ७ तारकः ८। इति शब्दरत्नावली॥ तरीवः ९। इति जटाधरः॥

भेव, ऋ न भये। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्।) ऋ अबिभेवत्। न भेवति बिभेवे। इति दुर्गादासः॥

भेषजं, क्ली, (भिषजोवैद्यस्येदमिति। भिषज्+तस्येदम्। यद्वा, भेषं रोगं जयतीति। जि+डः। औषधम्। इत्यमरः। २। ६। ५०॥ ("अस्ति भेषजोजलाषः।" इति ऋक्संहितायां। २। ३३। ७।) अथ भेषजभक्षणसमयाः।

"भेषज्यमभ्यवहरेत् प्रभाते प्रायशो बुधः। कषायांस्तु विशेषेण तत्र भेदस्तु दर्शितः॥ ज्ञेयः पञ्चविधः कालो भेषज्यग्रहणे नृणाम्। किञ्चित् सूर्य्योदये जाते तथा दिवसभोजने। सायम्भोजने च सङ्क्षामपि तथा निशि॥"

तत्र प्रथमः कालः।

'प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः। लेखनार्थे च भैषज्यं प्रभाते नात्रमाहरेत्॥'

अथ द्वितीयः कालः।

'भैषज्यं विगुणेऽपाने भोजनार्थे प्रशस्यते। अरुचौ चित्तभोज्येच्छ मित्रं रुचिरमाहरेत्॥ समानवाते विगुणे मन्देऽग्नौ वह्निदीपनम्। दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक्॥ व्यानकोपे तु भैषज्यं भोजनान्ते समाहरेत्। हिक्काचोपक्रमेष्वेषु पूर्व्वमन्ते च भोजनात्॥'

अथ तृतीयः कालः।

'उदाने कुपिते वाते स्वरभङ्गादिकारिणि। व्यायामादिकं देयं भैषज्यं साध्यभोजने॥ प्राणे प्रदुष्टे साध्यस्य भुक्तस्यान्ते प्रदीयते। औषधं प्रायशो धीरैः कालोऽयं स्यात् त्रितीयकः॥'

अथ चतुर्थः कालः।

सङ्कुर्सङ्कुच कट्कर्हिहिक्काश्वासगदेषु च। सान्नञ्च भेषजं दद्यादिति कालचतुर्थकः॥'

अथ पञ्चमः कालः।

'कण्ठेऽग्नौ विकारेषु लेखने दृंहणे तथा। पाचने ग्रथने देयमनन्नं भेषजं निशि॥'

इति पञ्चमः कालः॥

निरन्नस्य भेषजस्य गुणमाह।

'वीर्य्याधिकं भवति भेषजमन्नहीनं हन्यात्तदामयमसंशयमाशु चैव। तद्वालवृद्धयुवतीन्द्रुदुभिच्च पीतं स्यानिं परां नयति चाशु बलक्षयञ्च॥'

सान्नस्य भेषजस्य गुणमाह।

'शीघ्रं विपाकसुपपत्तिबलं न हिंसा-दन्नाहृतं न च सुदुर्व्वेदनाग्निरेति। एतद्धितं स्थविरबालबलाङ्गनाभ्यः प्राग्भोजनादृयदग्रितं किल तच्च तद्वत्॥'

तद्वत् अन्नाहृतवत् भेषजमिति शेषः।

'औषधञ्चेद् भुक्तं भोजनञ्चेद् यदौषधं पीतम्। न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च॥ पीतमिक्षुपयश्चक्षम्। जीर्णादि च।

'अशुनोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णासुमनः कुतः। लघुत्वमिन्द्रियोद्गारशुद्धिर्जीर्णौषधाकृतिः॥ क्षमो दाहोऽङ्गसदनं भ्रममूर्च्छाश्चिरोद्भवः। अरतिर्वेगहानिश्च सावशेषौषधाकृतिः॥'

अथ भेषजभक्षणविधिमाह धन्वन्तरिः।

'देवान् गुरूंस्तथा विप्रान् पूजयित्वा प्रयत्न च। आश्विनञ्च समादाय श्रद्धया भेषजं भजेत्॥ रसायनमिवर्षीणां देवानामिव चाऽमृतम्। सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते॥ ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः। ऋषयः औषधिग्रामा भूमिदेवाश्च पान्तु वः॥'

इत्याद्याग्नेयः॥

'औषधं हेमरजतमृद्भाजनपरिस्थितम्। पिबेदात्मजलस्थाये प्रसन्नवदनेक्षणः॥ प्रशान्तरूपविश्वास्थ पीत्वा पात्रमधोमुखम्। निःक्षिप्याचम्य सलिलं ताम्बूलादुपयोजयेत्॥'

अथ भेषजानां विधानानि।

'खरश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ। ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम्॥'

तत्रादौ खरविधिः।

'आहृतात्तृड्बलाज्ञात्रात् द्रवात् क्षुद्बलात् समुद्भवे।

यन्त्रनिष्पीड़ितो यश्च खरसो रस उच्यते॥'

अथ कल्कविधिः।

'द्रव्यमार्द्रं स्निग्धमिष्टं शुष्कं वा सजलं भवेत्। प्रक्षिप्य गालयेद्यन्त्रे तज्ज्ञानं कर्षसम्मितम्॥ कल्के मधु घृतं तैलं देयं द्विगुणमात्रया। सितां गुड़ं समं दद्याद्द्रवा देयाश्चतुर्गुणाः॥'

अथ क्वाथविधिः।

'पानीयं षोड़शगुणं क्षुद्रे द्रव्यपले क्षिपेत्। स्नृत्पात्रे क्वाथयेद्व्याह्नमष्टमांशावशेषितम्॥ कर्षादौ तु पलं यावद्द्यात् षोड़शिकं जलम्॥'

षोड़शिकं षोड़शगुणम्॥ *॥

अथ हिमविधिः।

'क्षुद्रं द्रव्यपलं सम्यक् बड़भिर्नीरपलैः प्लुतम्। निशोषितं हिमः स स्यात्तथा शीतकषायकः॥'

अथ फाण्टविधिः।

'क्षुद्रद्रव्यपले सम्यक् जलसप्तकं विनिःक्षिपेत्। स्नृत्पात्रे कुड़वोन्मानं ततस्तु स्रावयेत् पुटात्॥ स स्यात् चूर्णद्रवः फाण्टस्तन्मानं द्विपलोन्मितम्। शीतं सितां गुड़ादींस्तु कर्षमात्रान् विनिःक्षिपेत्॥'*॥

अथ तक्रकल्कविधिः।

'कल्कितं तक्रकल्पं जलेऽर्द्धगुणिते क्षिपेत्। भावयित्वा जलं याह्यं देयं सर्व्वत्र कर्म्मसु॥'

अथ मन्थविधिः।

'जले चतुर्व्यले शीते क्षुद्रं द्रव्यपलं क्षिपेत्। स्नृत्पात्रे मन्थयेत् सम्यक् तत्क्वाथं द्विगुणं पिबेत्॥'

अथ चूर्णविधिः।

'अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम्। तत् स्याच्चूर्णं रजःशोदसत्तासारकर्षसम्मितम्॥ चूर्णे गुड़ः सितो देयः शर्करा द्विगुणा मता। चूर्णेषु भर्जितं क्षिप्तु देयं नोत्क्लेदजनकं हि॥'

अथ भावनाविधिः।

'द्रवेण यावता सम्यक् चूर्णं सर्व्वं प्लुतं भवेत्। भावनायाः प्रमाणन्तु चूर्णे प्रोक्तं भिषग्वरैः॥'

अथ पुटपाकविधिः।

'पुटपक्वस्य कल्कस्य खरसो यज्जते यतः। अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया॥ पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्च्चसा। लेपश्च द्व्यङ्गुलं स्थूलं कुर्य्याद्वाङ्गुष्ठमात्रकम्॥ काम्भरीवटजम्बादिपत्रैर्वेष्टनसुत्तमम्। पलमात्रो रसो याह्यः कर्षमात्रं मधु क्षिपेत्॥ कल्कचूर्णद्रवाद्यास्तु देयाः कौशमिता बुधैः॥'

अथोष्णोदकविधिः।

'अष्टमेनाग्नेयेन चतुर्थेनार्द्धकेन वा।

अथवा क्वाथनेनैव सिद्धमुष्णोदकं वदेत् ।'
अथ क्षीरपाकविधिः ।
'क्षीरमष्टगुणं द्रव्यात् क्षीरान्नीरं चतुर्गुणम् ।
क्षीरावशेषं तत्पीतं मूलमामोद्भवं जयेत् ।'
अथावलेहविधिः ।
'क्वाथादेयेत् पुनः पाकात् घनत्वं सा रसक्रिया ।
सोऽवलेह्य लेढ्यश्च तन्मात्रा स्यात् पलो-
न्मिता ।'
अथ वटिकाविधिः ।
'वटिका अथ कथ्यन्ते तन्नामवटिका वटी ।
मोदको गुटिका पिण्डी गुडो वर्त्तिस्तथोच्यते ॥
लेह्यवत् साध्यते वह्नौ गुडो वा शर्करापि वा ।
गुग्गुलुर्मात्रा क्षिप्तेत्र चूर्णं तन्निर्मिता वटी ॥'
अथ सन्धानविधिः ।
'द्रव्येषु चिरकालस्थं द्रव्यं यत् सन्धितं भवेत् ।
आसवारिष्टभेदैस्तत् प्रोच्यते भैषजोचितम् ॥'
अथ धातूनां शोधनमारणविधिः । तत्र शोधनविधिः ।
'पत्तलीकृत्य पत्राणि लेप्यो वह्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां क्वाथे तु त्रिधा त्रिधा ।
एवं लेप्यः परेषाञ्च धातूनां शोधनं भवेत् ।'*॥
अथ स्वर्णस्य मारणविधिः ।
'स्वर्णस्य द्विगुणं सूतमम्लेन सह मर्दयेत् ।
तन्मोलकसमं गन्धं निदध्यादधरोत्तरम् ॥
गोलकञ्च ततो रुद्ध्वा सरावद्वयसंपुटे ।
त्रिंशदुपलैर्दद्यात् पुटान्येवं चतुर्दश ।
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ॥"
अथ स्नेहपानविधिः ।
स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा ।
मज्जा च तत्र पिबेत्तत्तैः किञ्चिदभ्युदिते रवौ ॥
अथ पञ्चकर्माणि ।
प्रथमं वमनं पश्चाद्विरेकश्चानुवासनम् ।
एतानि पञ्च कर्म्माणि निरूहैश्चोत्तरं तथा ॥
अथ फलवर्त्तिविधिः ।
घृताभ्यक्ते गुदे क्षिप्ता श्लक्ष्णा खड्गसन्निभा ।
मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता ॥
अथ नस्यग्रहणविधिः ।
नस्यं तत् कथ्यते धीरैर्नासाग्राद्यं यदौषधम् ।
लावणं नस्यकर्म्मेति तस्य नाम द्वयं मतम् ॥
अथ धूमपानविधिः ।
धूमस्तु षड्विधः प्रोक्तः शमनो दृंहणस्तथा ।
रेचनः कासहा चैव वामनो व्रणधूपनः ॥
अथ गण्डूषकवलप्रतिसारणविधिः ।
तत्र गण्डूषः ।
स्नेहक्षीरकषायादिद्रवैः सम्पूर्णमाननम् ।
आपूर्य स्थीयते तावद्विधिर्गण्डूषधारणे ॥
अथ कवलः ।
वातपित्तकफघ्नस्य द्रव्यस्य कवलं मुखे ।
अर्द्धे निःक्षिप्य संचर्व्य निष्ठीवेत् कवले विधिः ॥
अथ प्रतिसारणम् ।
दन्तजिह्वासुखानां यच्चूर्णकल्कावलेहकैः ।
घृतेर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ॥
अथ स्नेहविधिः ।
स्नेहश्चतुर्विधः प्रोक्तस्तासामोण्यस्नेहसंज्ञितः ।
उपनाह्यो द्रवः स्नेहः सर्व्वे वातादिनिहारिणः ॥
अथ कर्णपूरणविधिः ।
स्नेहयेत् कर्णदेशस्तु किञ्चित्तु पार्श्वशायिनः ।
सप्ते स्नेहे रसेरक्ते कोष्ठे श्रोत्रं प्रपूरयेत् ॥
कर्णश्च पूरितं रक्षेच्छतं पञ्चशतानि वा ।
सहस्रं वापि मात्राणां श्रोत्रकच्छशिरोगदैः ॥
रसाद्यैः पूरणं कर्णे भोजनात् प्राक् प्रशस्यते ।
तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते ॥*॥
अथालेपविधिः ।
अथालेपस्य नामानि लेपश्चेपनलिम्पयः ।
दोषघ्नो विविधा वर्ण्यः स च लेपस्त्रिधा मतः ।
न रात्रौ लेपनं कुर्य्यात् शुष्यमाणं न धारयेत् ॥
अथ शोणितस्रावणविधिः ।
शोणितं स्रावयेच्छस्त्रैरामयं प्रसमीक्ष्य च ।
प्रस्थं प्रस्थार्द्धमथवा प्रस्थार्द्धार्द्धमथापि वा ॥
शरत्कालेऽथवा स्वभावेन शोणितं स्रावयेन्नरः ।
लग्नदोषग्रन्थिशोथाद्या न स्युरुधिरपातनात् ॥
अथाक्षोतनविधिः ।
क्षौद्रसौवर्चलक्षेद्रविन्दूनां यत्तु पातनम् ।
द्वाङ्गुलोन्मीलिते नेत्रे प्रोक्तमाक्षोतनं हितम् ॥
अथ विडालकविधिः ।
विडालको बहिर्लेपो नेत्रे पक्ष्मविवर्द्धनः ।
तस्य मात्रा परिज्ञेया मुखालेपविधानवत् ॥
अथ तर्पणविधिः ।
वातातपरजोहीने देशेऽनुत्तानशायिनः ।
आधारौ माषचूर्णेन क्लिन्नेन परिमण्डितौ ॥
समौ दृढावसम्बाधौ कर्त्तव्यौ नेत्रकोषयोः ।
पूरयेद्घृतमण्डेन विलीनेन सुखोदके ॥
अथाञ्जनविधिः ।
"अथ सम्यग्दोषस्य प्राग्रूपमञ्जनमाचरेत् ।
अञ्जनं क्रियते नेत्रे तद्द्रव्यैश्चाञ्जनं मतम् ॥
अथ प्रत्यञ्जनविधिः ।
गतदोषमपेताश्रु प्रपश्यत् सम्यगम्बसा ।
प्रक्षाल्याक्षि यथादोषं कार्य्यं प्रत्यञ्जनं ततः ॥
इति भावप्रकाशः ॥*॥
अथ भेषजकरणभक्षणदिनम् । तत्र तिथयः विहिताभिन्नाः शोभनाः । वाराः रविसोमगुरुशुक्रहस्तित्रिपुष्याणाम् । नक्षत्राणि पूर्व्वफल्गुनीपूर्व्वाषाढापूर्व्वभाद्रपद्मघाभरण्यश्लेषाविशाखाद्रांभिन्नानि । जन्मर्क्षञ्च निषिद्धम् ।
"लग्नानि मिथुनकन्याधनुर्मीनसंज्ञकानि ।
तत्र गुरुबुधचन्द्रशुक्रेषु सत्सु प्रशस्तानि ॥"
इति ज्योतिषतत्त्वम् ॥
(करणं पुनर्भेषजम् । भेषजं नाम तत् यदुपकरणाय उपकल्पते भिषजो धातुसाम्याभिनिर्वृत्तौ प्रयतमानस्य विशेषतश्चोपायात्तेभ्यः । तद्विविधं यथाश्रयभेदात् दैवव्यपाश्रयं युक्तिव्यपाश्रयञ्च । तत्र दैवव्यपाश्रयं मन्त्रौषधमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादि । युक्तिव्यपाश्रयं संशोधनोपशमने चेष्टाश्च द्वयपराः । एतच्चैव भेषजमङ्गभेदादपि द्विविधं द्रव्यभूतमद्रव्यभूतञ्च, तत्र यद्द्रव्यभूतं तदुपायाभिधुतम् । उपायो नाम भयदर्शनविस्मापनचोभणहर्षणभर्त्सनवधबन्धस्वप्नसंगादिरसर्त्तौ भावः यथोक्ताः सिद्धुपार्श्वाच्च । यत्तु द्रव्यभूतं तदमनादिषु योगसुपैति । तस्मादौषधं परीक्ष्य, इदमेवं प्रकृत्या एवंगुणमेवंप्रभावमस्मिन् देशे जातमस्मिन् ऋतौ एवं गृहीतमेवं निहितमेवमुपस्कृतमनया मात्रया युक्तमस्मिन् ऋतौ एवंविधस्य पुरुषस्यैतावन्तञ्चोषमपकर्षयति उपशमयति वा अन्यदपि चैवंविधं भेषजमभूत्तथानेनानेन वा विशेषेण युक्तमिति ।
इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)
भेषजाङ्गं, क्ली, (भेषजस्य औषधस्य अङ्गमवयवइव ।) अनुपानम् । इति शब्दचन्द्रिका ॥
भैक्षं, क्ली, (भिक्षायां समूह इति । भिक्षा+भिक्षादिभ्योऽण् ।" ४ । २ । ७८ । इत्यण् ।) भिक्षासमूहः । इत्यमरः । २ । ७ । ४७ ॥ अपि च ।
"भिक्षाशनमनुद्योगात् प्राक्तनाप्यनिमन्त्रितम् ।
यथोचितन्तु तद्भैक्षं भोक्तव्यं मनुरब्रवीत् ॥"
इति प्रायश्चित्ततत्त्वधृतोशनसो वचनम् ॥
(भिक्षैव स्वार्थे अण् । भिक्षा । भिक्षाभवे भिक्षालब्धे वा त्रि॥)
भैक्षजीविका, स्त्री, (भैक्षेण जीविका ।) भिक्षया जीवनोपायः । तत्पर्य्यायः । भैक्षेण्यम् २ । इति त्रिकाण्डशेषः ॥
भैक्षभुक् [ज्] त्रि, भैक्षाशी । भिक्षाशी । भैक्षं भुङ्क्ते यः । इति कर्म्मरि क्विप्प्रत्ययेन । निष्पन्नं ॥ (यथा, महाभारते १३ । ३६ । ३ ।
"गुरुणा समनुज्ञातो भुञ्जितान्नमकुत्सयन् ।
द्विरह्नभैक्षभुक् चापि स्यान्नासन्नविहारवान् ॥")
भैमी, स्त्री, (भीमेनोपासिता भीमस्य इयं वेति । भीम+अण् ङीप् ।) भीमैकादशी । यथा, अथ भैमी । विष्णुधर्म्मोत्तरे ।
"नक्षत्रर्क्षे शुक्लधरे माघे मासि प्रजापते ! ।
एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः ।
द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते ॥
तिलस्नायी तिलोदर्त्ती तिलहोमी तिलोदकी ।
तिलस्य दाता भोक्ता च षट्तिली नावसीदति ॥"
मत्स्यपुराणे ।
"यस्तस्यां चतुरश्रायां द्वादश्यामथ भारत ! ।
अन्येष्वपि दिनेष्वेव न भुक्तवत्सुपोषितुम् ॥
ततः पुण्यामिमां भौमतिथिं पापप्रणाशिनीम् ।
उपोष्य विधिनानेन गच्छ विष्णोः परं पदम् ॥
भौमतिथिं भैमीसंज्ञां स्नातां एकादशीम् ॥
इत्येकादशीतत्त्वम् ॥*॥

अपि च।

पितामह उवाच।

"माघमासे शुक्लपक्षे सूर्यवारेण युता पुरा।
एकादशी तथा चैषा भीमेन समुपोषिता॥
आश्चर्यन्तु व्रतं श्रुत्वा पितॄणामनृणो भवेत्।
भीमदादशीति विख्याता प्राणिनां पुण्यवर्द्धिनी॥
नक्षत्रेण विनाप्येषा ब्रह्महत्यादि नाशयेत्।
विनिहन्ति महापापं कुनृपो विषयं यथा।
कुपुत्रस्तु कुलं यद्वत् कुभार्य्या च पतिं यथा।
अधर्मश्च यथा धर्म्मं कुमन्त्री च यथा नृपम्।
अज्ञानेन यथा ज्ञानं शौचाच्छाशौचता यथा।
अश्रद्धया यथा श्राद्धं यत्नश्चेवाकृतैर्यथा॥
हिमं यथोष्णमादत्तादनर्घ्यार्घसञ्चयः।
यथा प्रकीर्णनाद्दानं तपो वै विषयाद्यथा॥
अग्निहोत्रं यथा पुत्रो गावो दूरगतैर्यथा।
क्रोधेन च यथा श्राद्धं यथा वित्तमवर्द्धनात्॥
यथा दमोऽनाज्ञानं पक्षाघाच्च यतव्रता।
तथैव पापनाशाय प्रोक्तेयं द्वादशी शुभा।
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
युगपद्यानि जातानि नहि हन्ति विपुष्करम्॥
न चापि नैमिषक्षेत्रं कुरुक्षेत्रं प्रभासकम्।
कालिन्दी यमुना गङ्गा न रेवा न सरस्वती॥
न चैव सर्व्वतीर्थानि एकादश्याः समानि च।
न दानं न जपो होमो न चान्यत्सुव्रतं क्वचित्॥
एकतः पृथिवीदानमेकतो हरिवासरः।
ततोऽप्येका महापुण्या ह्यमेकादशी परा॥
अस्मिन् वराहवपुषः श्रुत्वा देहन्तु हाटकम्।
घटोपरि नवे पात्रे स्थित्वा वै ताम्रभाजने॥
सर्व्वबीजन्तु ते विप्राः सितवस्त्रावगुण्ठिते।
सहिरण्यप्रदीपाढ्ये स्थित्वा पूजां प्रयत्नतः॥
वराहाय नमः पादौ क्रोडाकृतये नमः कटिम्।
नाभिं गम्भीरघोषाय उरःग्रीवन्तु धारिणे॥
बाहुं सहस्रशिरसे ग्रीवां सर्व्वेश्वराय च।
मुखं सर्व्वात्मने पूज्य ललाटं प्रभवाय च॥
केशान् शतमयूखाय पूज्या देवस्य चक्रिणः॥
विधिना पूजयित्वा तु स्थित्वा जागरणं निशि।
श्रुत्वा पुराणं देवस्य मात्स्यात्प्रतिपादकम्॥
प्रातर्विप्राय दत्त्वा तु याचकाय शुभाय च।
कनककोड़सहितं सन्निवेद्य परिच्छदम्॥
पश्चात्तु पारणं कुर्य्यान्नातिह्रस्वः सुसंवृतः।
एवं स्थित्वा नरो विप्रा न भूयः स्तनपो भवेत्॥
उपोष्यैकादशीं पुण्यां सुप्यते वै ऋजव्रयात्।
मनोऽभिलषितावाप्तिः स्थित्वा सर्व्वव्रतादिकम्।"

इति गारुड़े एकादशीमाहात्म्ये १२० अध्यायः॥ (भौमस्य राज्ञः अपत्यं अण् स्त्री। भौमराजनन्दिनी दमयन्ती। यथा, महाभारते। ३। ६३। ११।

"नादिश्यत् सा नृपसुता भैमी तत्राथ कस्यचित्।")

भैरवं, त्रि, (भीरोरिदं वासुदत्। भीरु + अण्।) भयानकम्। इत्यमरः। १। ७। २०। (यथा, महाभारते। १। १६३। २७।

"सत्येन च कटीदेशे यस्य वासवि पाण्डवः।
तद्रक्षो द्विगुणं चक्रे रवन्तं भैरवं रवम्॥")

अस्य पर्य्यायाः भयङ्करशब्दे द्रष्टव्याः॥

भैरवः, पुं, (भीर्भयङ्करो रवो यस्य। इति भीरव। ततः स्वार्थे अण्।) शङ्करः। इति मेदिनी। वे ३६॥ भयानकरसः। इत्यमरटीकायां भरतः॥ नदविशेषः। इति शब्दरत्नावली। रागभेदः। इति हेमचन्द्रः॥ अथ भैरवावतारसृष्टिपत्तिर्यथा,

"हैमाधिपः समुत्पन्न हरोरसि गदां क्षिपत्।
संक्षिप्तस्तु महायोगी सर्व्वाधारः प्रजापतिः॥
गदापातच्छतादभूरि क्षतधारक्षयापतत्।
पूर्व्वधारासमुद्भूतो भैरवोऽग्निसमप्रभः॥
विद्याराजेति विख्यातः पद्ममालाविभूषितः।
तथा दक्षिणधारोत्थो भैरवः प्रेतमास्थितः॥
कामराजेति विख्यातः शङ्खाङ्कनसमप्रभः।
नागराजेति विख्यातश्चक्रमालाविभूषितः॥
क्षतजाद्धिराज्जातो भैरवः शूलभूषितः।
सच्चन्द्रराजेति विख्यात इन्द्रायुधसमप्रभः॥
भूयिष्ठाद्धिराज्जातो भैरवः फलभूषितः।
ख्यातो लक्षितराजेति शोभाङ्कनसमप्रभः॥
ततोऽभूद्वेदराजेति भैरवः क्षतजाद्यथ।
उग्रराजो बभूवाथ क्षतजाद्भैरवोऽपरः॥
एवं हि पञ्चरूपोऽसौ कथ्यते भैरवो मुने!।
विप्रराजोऽथमः प्रोक्तो भैरवाष्टकमुच्यते॥"

इति वामनपुराणे अन्धकासुरप्रदाने भैरवप्रादुर्भावे ६० अध्यायः॥ *॥

शारदीयदुर्गापूजायां अष्टौ पूज्यभैरवा यथा,

"आदौ महाभैरवश्च संहारभैरवं तथा।
असिताङ्गभैरवश्च रुरुं भैरवमेव च।
ततः कालं भैरवश्च क्रोधभैरवमेव च।
ताम्रचूड़ं चन्द्रचूड़ं अन्ते च भैरवद्वयम्॥
एतान् संपूज्य मध्ये च नवशक्तीश्च पूजयेत्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे दुर्गोपाख्याने ६१ अध्यायः॥

ताम्रचूड़चन्द्रचूड़योः स्थाने कपालभैरवरुद्रभैरवौ ज्ञेयौ। इति तत्रैव गणपतिखण्डे ४१ अध्यायः॥* अपि च।

"असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः॥"

इति तन्त्रसारः॥*॥

शिवगणाधिपभैरवो यथा,—

"नन्दी भृङ्गी महाकालो वेतालो भैरवस्तथा।
अङ्गं भूत्वा महेशस्य पीतभीतास्तपोधनाः॥
यैर्मानुषवपुरीरेव प्राप्तिरे तपसो बलात्।
गणानामाधिपत्यन्तु ते जानन्ति हरं परम्॥"

इति कालिकापुराणे ४३ अध्यायः॥*॥

करवीरपुरराजचन्द्रशेखरपत्नीतारावतीगर्भे महादेवाज्ञातपुत्रः। स च पुरा भृङ्गी बभूव पार्व्वतीशापात् वानरमुखो भूत्वा भैरव इति नाम्ना ख्यातः। यथा,—

"प्रविवेश ततो देवी स्वयं तारावतीतनौ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः॥
कामावसाने तस्यान्तु सद्यो जातं सुतद्वयम्।
अभवन्नृपशार्दूल! तथा श्राद्धान्नगानम्॥
ततस्तयोर्नाम चक्रे नारदो वचनान्नृप!।
ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः।
वेतालसदृशः श्रेष्ठो वेतालोऽभूत्तथापरः॥"

इति कालिकापुराणे ४६ अध्यायः॥*॥

अपि च।

"योऽसौ भृङ्गी हरसुतो महाकालोऽपि भर्गजः।
तावेव गौरीशापेन सम्भूय नरयोनिजौ॥
वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि।
यथा भृङ्गिमहाकालावुत्पन्नौ प्राक् तथा शृणु।
योऽसौ महाभैरवाख्यः सकायः शरभो हरः।
भैरवः पृथगेवायं गणाध्यक्षो हरात्मजः॥"

इति कालिकापुराणे ४५ अध्यायः॥*॥

दुर्जयाख्यगिरिस्थभैरवो यथा,—

"तन्मध्ये भैरवो देवो भर्गसङ्गमसम्भवः।
दुर्जयाख्ये वरगिरौ स्वर्गसोपमभूमिगः॥
योऽसौ शरभरूपस्य मधस्तस्तादभैरवः।
स एव भैरवाख्योऽयं पञ्चवक्त्रस्य मन्त्रकैः।
संपूज्य तत्र मतिमान् स याति शिवलोकताम्॥"

इति कालिकापुराणे ८१ अध्यायः॥*॥

भैरवस्य मन्त्रो यथा,—

"केवलः सपरो हार्दिः वह्निखरसमन्वितः।
चन्द्रबिन्दुसमायुक्तं हृदयोक्तस्य बीजकम्॥
भैरवं पाण्डुनाथन्तु वनमालिस्वरूपिणम्।
वाराहेण तु बीजेन पूजयेत्तु विधानतः॥
सपरौ द्वावनुस्वारविसर्गाभ्यां समन्वितौ।
महाभैरवमन्त्रोऽयं भैरवं तेन पूजयेत्॥"

इति कालिकापुराणे ६२ अध्यायः॥*॥

अस्य ध्यानं यथा,—

"भैरवः पाण्डुनाथश्च रक्तगौरश्चतुर्भुजः।
गदां पद्मञ्च शूलञ्च चक्रञ्चापि करेण च।
विश्वदेवाः पुरोभागे पूज्योऽयं विष्णुरूपधृक्॥"

इति तत्रैव ६० अध्यायः॥*॥

अस्य गायत्री यथा,—

"महाभैरव विद्महे कैलिरूपाय धीमहि।
तन्नः कामो भैरवस्तु देवी नित्यं प्रचोदयात्॥
एषा भैरवरूपस्य गायत्री मे प्रतिष्ठिता।
यस्यैरमांसमद्यादिभोजनाय मया श्रुतः॥
महाभैरवरूपोऽयं तथा क्षौरतिवल्लभे।
अयन्तु वाम्यभावेन पूज्यो मद्यादिभिः सदा॥"

इति कालिकापुराणे ७७ अध्यायः॥

अथ महाविद्यादीनां भैरवनिरूपणं यथा,—

शिव उवाच।

"शृणु पार्व्वङ्गि शुभगे! कालिकायास्तु भैरवम्।
महाकालं दक्षिणायां दक्षभागे प्रपूजयेत्॥
महाकालेन वै सार्द्धं दक्षिणा रमते सदा।
तारायाः पश्चिमे भागे अक्षोभ्यं परिपूजयेत्॥
समुद्रमथने देवि! कालकूटं समुत्थितम्।
सर्व्वे देवाः सदाराश्च महाक्षोभमवाप्नुयुः॥
क्षोभादरक्षितं यस्मात् पीतं पात्राच्छलं विषम्
अतएव महेशानि! अक्षोभ्यः परिकीर्त्तितः॥

तेन सार्द्धं महामाया तारिणी रमते सदा।
महात्रिपुरसुन्दर्य्या दक्षिणे पूजयेत् शिवम्॥
पञ्चवक्त्रं त्रिनेत्रञ्च प्रतिवक्त्रे सुरेश्वरि!।
तेन सार्द्धं महादेवी सदा कामकुतूहला॥
अतएव महेशानि! पञ्चमीति प्रकीर्त्तिता।
श्रीमद्भुवनसुन्दर्य्या दक्षिणे त्र्यम्बकं यजेत्॥
स्वर्गे मर्त्ये च पाताले या चाद्या भुवनेश्वरी।
एतया रमते तेन त्र्यम्बकस्तेन कथ्यते॥
सप्तस्विह समाख्यातः सर्व्वतन्त्रे प्रपूजितः।
भैरव्या दक्षिणे भागे दक्षिणामूर्त्तिसंज्ञकम्॥
पूजयेत् परयत्नेन पञ्चवक्त्रं तमेव हि।
छिन्नमस्तादक्षिणांशे कबन्धं पूजयेत् शिवम्॥
कबन्धपूजनाद्देवि! सर्व्वसिद्धीश्वरो भवेत्।
धूमावती महाविद्या विधवारूपधारिणी॥
बगलाया दक्षभागे एकवक्त्रं प्रपूजयेत्।
महारुद्रेति विख्यातं जगत्संहारकारकम्॥
मातङ्गीदक्षिणांशे च मतङ्गं पूजयेत् शिवम्।
तमेव दक्षिणामूर्त्तिं जगदानन्दकारकम्॥
कमलाया दक्षिणांशे विष्णुरूपं सदाशिवम्।
पूजयेत् परमेशानि! स सिद्धो नात्र संशयः॥
पूजयेदन्नपूर्णाया दक्षिणांशे च रूपकम्।
महामोक्षप्रदं देवं दशवक्त्रं महेश्वरम्॥
दुर्गाया दक्षिणे देशे नारदं परिपूजयेत्॥
नकारः स्वर्गिकर्णश्च दकारः पालकः सदा।
रेफः संहाररूपस्तान्नारदः परिकीर्त्तितः॥
अन्यासु सर्व्वविद्यासु ऋषयः परिकीर्त्तिताः॥
स एव तस्या भर्त्ता च दक्षभागे प्रपूजयेत्॥"

इति तोड़लतन्त्रप्रथमपटले॥

(भैरवकल्पविषयः। यथा, कालिकापुराणे।
पञ्चास्यः कच्छपाख्यश्च मत्स्यश्च नवधा स्मृताः।
महिषो गोधिका गावस्त्रागो वभ्रुश्च शूकरः।
खड्गश्च छत्रसारश्च गोधिका शरभो हरिः।
शार्दूलश्च नरश्चैव खगाश्चरुधिरन्तथा॥
चण्डिकाभैरवादीनां बलयः परिकीर्त्तिताः।
बलिभिः साध्यते मुक्तिर्बलिभिः साध्यते दिवम्॥)

अथ भैरवरागस्य विवरणम्। इदमुच्यते षड्-रागमध्ये प्रथमरागः। महादेवसुखान्निर्गतः। अस्य जातिः औडवः। अर्थात् धैवतनिषाद-वर्ज्जमान्यारमध्यममिति मतङ्गेरमिलितः। अस्य वादी धैवतस्वरः। प्रहरान्ते प्रातःकालः अस्य गानसमयः। रागमालायाम् अस्याकारः महादेवाकारवत्। अर्थात् सुन्दर-सन्न्यासी। भस्मदिग्धितवदनः। जटामस्तकः। जटापतद्गङ्गाजलः। कण्ठभूषितहरः। ललाटार्द्धचन्द्रः। त्रिनेत्रः। सर्पवेष्टितस्कन्धबाहुः। भालतिलकः। स्कन्धस्थहस्तिचर्म्मा। अथवा दीपिचर्म्मोपविष्टः। गजमुखमालः। त्रिशूल-हस्तः। अथवा सम्मुखप्रोथितत्रिशूलः। पार्श्वेऽष्टहस्तः। अस्य रागिण्यः षट्। यथा। भैरवी वैराटी मधुमाधवी सिन्धवी बङ्गाली च। अस्याश्चौ पुत्राः। यथा। हर्षः तिलकः पुरीयः माधवः हृद्दः बलनेष्टः मधुः पञ्चमश्च। कल्लिनाथमते तु भैरवश्चतुर्थरागः। अस्य रागिण्यः षट्। यथा। भैरवी गुज्जरी भाषा वेलावली कर्णाटी रगतंसा बङ्गहंसीति च केचित्। एतन्मते पूर्व्ववत् अष्टौ पुत्राः। किन्तु तिलकपुरीयपञ्चमस्थाने देवग्राखलिलित-मालकौशिकविलावला लिखिताः। सोमेश्वर-मतेऽपि रागिण्यः षट्। यथा। भैरवी गुज्जरी रेवा गुर्ज्जकली बङ्गाली बहुली च। तन्मते रागिण्या सहास्य गानसमयो यामार्द्धं। भरतमते तु अस्य रागिण्यः पञ्च यथा। मधु-माधवी ललिता वरारी वाहाकली भैरवी च। तन्मतेऽपि अस्याष्टौ पुत्राः। यथा देवग्राखः ललितः हर्षः विलावलः माधवः बङ्गालः वैभाषः पञ्चमश्च। एवामष्टौ भार्य्या यथा। हृद्दा वेलावली सोरठी क्रभारी अन्दाही बहुलगुज्जरी पटमञ्जरी भिरवी च। इति सङ्गीत-शास्त्रम्॥ * ॥ मतान्तरे भैरवरागस्य भार्य्या यथा। भैरवी बङ्गाली वरारी मधुमा मधु-माधवी सिन्धवी च। तत्पुत्रा यथा। कोशकः अजयपालः श्यामः खरतापः शुद्धः छोलश्च। तत्पुत्रवध्वो यथा। अष्टौ रेवा बहुला सोहिनी रम्भेली हृद्दा च। अत्र श्लोभा इति साधुः पाठः। इति नारदपुराणम्।
(नागभेदः। यथा, महाभारते।१।५७।१६।
"भैरवो मुखवेदाङ्गः पिशङ्गश्चोग्रपारकः।")

भैरवी, स्त्री, (भैरव+ङीप्।) चासुङ्गा। यथा,
"चासुङ्गा चर्चिका चर्म्मसुङ्गा मार्जारकर्णिका।
कर्णमोटी महागन्धा भैरवी च कपालिनी॥"

इति हेमचन्द्रः।२।१२०॥

भैरवीविशेषा यथा। त्रिपुरभैरवी १ सम्पत्-प्रदा भैरवी २ कौलेशभैरवी ३ सकलसिद्धिदा भैरवी ४ भयविध्वंसिनी भैरवी ५ चैतन्यभैरवी ६ कामेश्वरी भैरवी ७ षट्कूटा भैरवी ८ नित्या भैरवी ९ रुद्रभैरवी १० सुवेनेश्वरी भैरवी ११ त्रिपुरबाला भैरवी १२ नवकूटा भैरवी १३ अन्नपूर्णा भैरवी १४। आसां मन्त्रा यथा,—

अथ त्रिपुरभैरवी।

"वियद्भृगुस्तुताग्र्यो भौतिको विन्दुशेखरः।
वियत्तदादिकेन्द्राग्निस्थितं वामाक्षिविन्दुमत्॥
आकाशभृगुवह्निस्थो मनुः सर्गेन्दुखड्गवान्।
पञ्चकूटात्मिका विद्या देवा त्रिपुरभैरवी॥"

अथ सम्पत्प्रदा भैरवी।

यथासौ त्रिपुरा बाला तथा त्रिपुरभैरवी।
सम्पत्प्रदा नाम तस्याः प्रत्यङ्गनिर्म्मलमानसे॥
शिवचन्द्रौ वह्निसंस्थौ वाग्भवं तदनन्तरम्।
कामराजं तथा देवि! शिवचन्द्रान्वितं ततः॥
पृथ्वीबीजान्तवह्न्यार्द्धं तार्त्तीयं ब्रह्म वल्लभे!।
शक्तिबीजे महेशानि! शिवचन्द्रौ नियोजयेत्॥
कुमार्य्याः परमेशानि! त्रिधा सर्व्वमनु र्वेदवसु।
त्रिपुरा भैरवी देवी महासम्पत्प्रदा प्रिये!॥२॥

अथ कौलेशभैरवी।

सम्पत्प्रदाभैरवीवद्विद्धि कौलेशभैरवीम्।
हसाद्या सैव देवेशि! त्रिषु बीजेषु पार्व्वति!।
इयन्तु सहराद्या स्यात् पूजाध्यानादिकं तथा॥३॥

अथ सकलसिद्धिदा भैरवी।

एतस्या एव विद्याया आद्यन्ते रेफवर्जिते।
तदेयं परमेशानि! नाम्ना सकलसिद्धिदा।
सम्पत्प्रदाभैरवीवत् ध्यानपूजादिकं तथा॥४॥

अथ भयविध्वंसिनी भैरवी।

सम्पत्प्रदा भैरवी आद्यन्ते रेफरहिता चेत्तदा भयविध्वंसिनी भैरवी भवति। दक्षिणामूर्त्तौ तथादर्शनात्। पूजादिकन्तु सम्पत्प्रदावत्॥५॥

अथ चैतन्यभैरवी।

"वाग्भवं बीजसञ्चार्य्य जीवप्राणसमन्वितम्।
सकला भुवनेशानी द्वितीयं बीजसङ्गतम्।
जीवं प्राणं वह्निसंस्थं शक्तिरसमन्वितम्।
विसर्गाढ्यं महेशानि! विद्या त्रैलोक्यमोहका।"

ऋष्यादिन्यासः। शिरसि दक्षिणामूर्त्तये ऋषये नमः। मुखे पङ्क्तिच्छन्दसे नमः। हृदि चैतन्यभैरवे देवतायै नमः॥६॥

अथ कामेश्वरी भैरवी।

"कामेश्वरी च रुद्रार्द्धा पूर्व्वसिंहासने स्थिता।
एतस्या एव विद्याया बीजत्रयमुदाहृतम्।
तदन्ते परमेशानि! निजक्लिन्ने महद्वये।
एतस्या एव तार्त्तीयं रुद्रार्द्धा परमेश्वरि!॥७॥

अथ षट्कूटा भैरवी।

डाकिनी राकिणी बीजे लाकिनी काकिनी-युगम्।
शाकिनी हाकिनी बीजे आद्यन्ते सुरसुन्दरि!॥
आद्यमेकारसंयुक्तमन्यदीकारमण्डितम्।
शक्तिरान्वितं देवि! तार्त्तीयं बीजमालिखेत्।
विन्दुनादकलाक्रान्तं त्रितयं शूलसम्भवे!॥८॥

अथ नित्या भैरवी।

एतस्या एव विद्यायाः षड्वर्णान् क्रमशः स्थितान्।
विपरीतान् वद प्रौढ़े! विद्येयं भोगमोक्षदा।
न्यासपूजादिकं सर्व्वमस्याः पूर्व्ववदाचरेत्॥९॥

अथ रुद्रभैरवी।

शिवचन्द्रौ मादनार्णं पार्श्वं वह्निसमन्वितम्।
शक्तिभिन्नं विन्दुनादकलाढ्यं वाग्भवं प्रिये!॥
सम्पत्प्रदाया भैरव्याः कामराजं तदेव हि।
सदाशिवस्य बीजन्तु महाशिंहासनस्य च।
एषा विद्या महेशानि! वर्णितुं नैव शक्यते॥१०

अथ सुवेनेश्वरी भैरवी।

हसाद्यं वाग्भवाद्यं हसकान्तं सुरेश्वरि!।
भूबीजं भुवनेशानी द्वितीयं बीजसङ्गतम्।
शिवचन्द्रौ महेशानि! सुवेनेशी च भैरवी॥११॥

अथ त्रिपुरबाला भैरवी।

अधरो विन्दुनादाद्यं ब्रह्मेन्द्रस्थः शशी युतः।
द्वितीयं भृगुसंस्थो मनुस्तार्त्तीयमीरितम्।
एषा बालेति विख्याता त्रैलोक्यवशकारिणी॥१२

अथ नवकूटा बाला।

बालाबीजत्रयं देवि! कूटत्रयं नवाक्षरी।
वियत्कूटत्रयं देवि! भैरव्या नवकूटकम्॥१३॥

अथान्नपूर्णा भैरवी ।
प्रथमं सुवनेग्राणि ! श्रीबीजं कामबीजकम् ।
हृदन्ते भगवत्यन्ते माहेश्वरिपदं ततः ।
अन्नपूर्णे ठयुगलं विद्येयं विंशदक्षरी ॥ १४ ॥"
इति तन्त्रसारे भैरवीमन्त्रपरिच्छेदः ॥ रागिणी-विशेषः । सा च भैरवरागस्य पत्नी । यथा,—
"भैरवी कौशिकी चैव भाषा वेलावली तथा ।
वङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभाः ॥"
मतान्तरे मालवरागस्य पत्नी । यथा,—
धानसी मालसी चैव रामकीरी च सिन्धुड़ा ।
आशावरी भैरवी च मालवस्य प्रिया इमाः ॥"
अस्या ध्यानं यथा,—
"सरोवरस्था स्फटिकस्य मन्दिरे
सरोरुहैः शृङ्गरमर्चयन्ती ।
तालप्रयोगप्रतिबद्धगीति-
र्भैरोतनूर्नारद भैरवीयम् ॥"
अस्या गानसमयः पूर्वाह्णकालः । यथा,—
"विभावा ललिता चैव कामोदी पटमञ्जरी ।
रामकीरी रामकेली वेलोयारी च गुज्जरी ॥
देशकारी च सुभगा पञ्चमी च गड़ा तुड़ी ।
भैरवी चाथ कौमारी रागिण्यो दश पञ्च च ।
एताः पूर्वाह्णकाले तु गीयन्ते गायनोत्तमैः ॥"
इति सङ्गीतदामोदरः ॥ ॰ ॥
इगमस्ते एषा सम्पूर्णजातिः । अस्याः सप्तस्वरविन्यासक्रमः मध्यमपञ्चमधैवतनिषादषड़-जर्षभगान्धाराः । अस्या ग्रहं मध्यमस्वरः । ग्रहतारौ प्रभाते अस्या गानसमयः । राग-माताया अस्याः स्वरूपम् । अष्टवर्षा । सुरूपा । सुनेत्रा । विस्तारवदना । पिङ्गल-केशा । कोमलाङ्गी । रक्तवर्णा । श्वेतवसना । गजमौक्तिकचम्पकमाला । प्रफुल्लपद्मयुक्तपर्वत-गुहायां शिवपूजापरायणा । तत्र मञ्जीर-वादका गायन्ति च ॥ ॰ ॥ कल्लिनाथसोमे-श्वरभरतमतेष्वेवम् ॥

भेषजं, क्ली, (भेषजमेव संज्ञायां स्वार्थे वा अण् ।) लावकपक्षी । इति जटाधरः । भेषजच ।

भैषज्यं, क्ली, (भेषजमेवेति । भेषज + "अगस्ता-वसयेतिहभेषजात् ञ्याः ।" ५ । ४ । २३ । इति ञ्याः ।) औषधम् । इत्यमरः । २ । ६ । ५० ॥
(अस्य पर्य्यायो यथा,—
"भैषज्यं भेषजञ्चायुर्दमगदमौषधम् ॥"
इति वैद्यकरत्नमालायाम् ॥
"तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।"
इति चरके सूत्रस्थाने द्वितीयेऽध्याये ॥)

भोः, [स्] अ, (भातीति । भा + बाहुलकाद् डोसिः ।) सम्बोधनम् । तत्पर्य्यायः । प्याट् २ पाट् ३ अङ्ग ४ हे ५ है ६ । इत्यमरः ।३।७।२७ हंहो ७ हुम् ८ हो ९ अरे १० अये ११ अयि १२ । इति भरतः ॥ (यथा, मार्कण्डेये । ३ । ५२ ।
"भो भो विप्रेन्द्र ! बुध्यस्व बुद्ध्या बोधं बुधा-
लोक ! ।")
प्रश्नः । विषादः । इति शब्दरत्नावली ॥

भोक्तव्यं, त्रि, (भुज + कर्म्मणि तव्यत् ।) भोज-नीयम् । भोज्यम् । यथा,—
"यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ।"
इति तिथ्यादितत्त्वम् ॥
"अलाबू वर्त्तुलाकारा वार्त्ताकी दुग्धवर्द्धिका ।
प्राणान्तेऽपि न भोक्तव्या दुग्धवर्णा कलम्बिका॥"
इति कर्म्मलोचनस्य ॥
(कर्म्मजन्ये अनुभवनीये । यथा च देवीभाग-वते । ११ । ७ । २८ ।
"प्रारब्धं किल भोक्तव्यं शुभं वाप्यथवा शुभम् ।
उद्यमस्तद्वधे नित्यं कारयत्येव सर्व्वथा ॥")

भोक्ता, [क्तृ] त्रि, (भुज् + कर्त्तरि तृच् ।) भोजनकर्त्ता । यथा,—
"यज्ञेश्वरो हृषीकेश-
भोक्ताव्ययात्मा हरिरीश्वरोऽत्र ।"
इति आह्निकप्रयोगतत्त्वम् ॥
सुखादिभोगकर्त्ता यथा,—
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
अथ भोक्तुर्लक्षणं यथा, पाकरात्रेश्वरे ।
"स्नातः सुधौतलघुसुन्दरशुक्लवासा-
स्ताम्बूलधौतचरणः सह पुत्रमित्रैः ।
सभ्यो प्रसन्नहृदयो रसपाकवेद्यां
भोक्ता विशेच्च सततं हि सहात्मवेद्यैः ॥
मृदुतूलमये स्थूले चारुवस्त्रावगुण्ठिते ।
आसने प्राङ्मुखो भोक्तोपविशेद्दाप्युदङ्मुखः ॥"
(भोजनकर्त्तरि यथा,—
"यदा कारणमासाद्य भोक्तृणां छन्दतोऽपि वा ।
अनेकव्ययोगित्वाच्छास्त्रतस्तान् विनिर्दिशेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥
"भोक्तारं विजने रम्ये निःसम्बाधे शुभे शुचौ ।
सुगन्धिपुष्परचिते रम्ये देशेऽथ भोजयेत् ॥"
इति च तत्रैव तदध्याये ॥
यथा च सांख्यशास्त्रे भोक्ता भोगकर्त्ता पुरुषः । सति भोगज्ञाने भोक्तृज्ञानं भवतीति तल्लक्षण-माह । "चिदवसानो भोगः ।" इति सांख्यसूत्रम् । १ । १०४ । पुरुषस्वरूपे चैतन्ये पर्य्यवसानं यस्येताडृशो भोगः चिद्विरित्यर्थः । राज्ञो भृत्यवर्गः यथा, स्वामिने भोग्यजातमर्पयति, तथा, इन्द्रियाणि विषयजातं स्वस्वग्रहा गृहीत्वा अन्तःकरण-प्रतिबिम्बिताय पुरुषाय अर्पयन्ति, स च पुरुषः प्रतिबिम्बग्रहणमात्रेण विषयजातं भुङ्क्ते प्रकाशयतीत्यर्थः । पुरुषस्य भोगः प्रतिबिम्बा-दानमात्रं अन्येषान्तु पुरुषादिः । ईदृशः परि-णामरूपो भोगः पुरुषे निषिध्यते । "बुद्धे र्भोग इवात्मनि ।" इत्यादिभिरिति । एतादृक् तया पुरुषः भोगकर्त्ता वा भोक्ता ।" इति तद्भाष्ये विज्ञानभिक्षुः ॥
भोक्ता [क्तृ] पुं, (भुङ्क्ते जीवरूपेणेति, भुनक्ति पालयतीति वा भुज + ष्टच् ।) विष्णुः । यथा,—
"भाजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥
भर्त्ता । इति हेमचन्द्रः । ३ । ८१ ॥

भोगः, पुं, (भुज्यतेऽसौ इति । भुज + घञ् ।) सुखम् । स्त्र्यादिभृतिः । पर्य्यस्त्रीभृतिः भांड़िः । आदिना हस्त्यश्वादिकर्म्मकराणाञ्च भृतिः । सर्पस्य फटा । सर्पशरीरम् । इत्यमर-भरतौ । ३ । ३ । २३ । (यथा, रघौ । २१ । ५६ ।
"लक्ष्यते स्म तदनन्तरं रविः
वह्निभीमपरिवेषमण्डलः ।
वैनतेयश्रमितस्य भोगिनः
भोगवेष्टित इव च्युतो मणिः ॥")
धनम् । (यथा, ऋग्वेदे । ३ । ३४ । ६ ।
"हिरण्ययसुतभोगं ससान हतो दस्यून् प्रार्य्यं वर्णमावत् ॥"
"हिरण्ययं सुवर्णमयं भोगं धनम् ॥" इति तद्भाष्ये सायणः ॥) ग्रहम् । (यथासुस्निग्धेव मन्ये । "भोगशब्दव्याख्याने सुष्यतेऽस्मिन्निति भोगो ग्रहं वा ससान अर्थिभ्यो ददौ ।" इति सायणः ॥) पालनम् । अभ्यवहारः । इति मेदिनी । गे, २६ । सर्पः । देहः । मानम् । इति शब्दरत्नावली ॥॰॥ पुण्यपापफलननियोग्य-कालः । यथा,—
"अतीतानागतो भोगो नाशः पञ्चदश स्मृतः ॥"
इति तिथ्यादितत्त्वे संक्रान्तिप्रकरणम् ॥
(पुरम् । यथा, ऋग्वेदे । ५ । २६ । ६ ।
"नव यदस्य नवतिञ्च भोगान्
साकं वज्रेण मघवा विवृश्चत् ।"
भोगान् पुराणि । इति तद्भाष्ये सायणः ।)
भूम्यादीनां भोगो यथा । त्रिपुरवधोपगमाद्य व्यासः ।
"प्रपितामहेन यद्दत्तं तत्पुत्रेण विना च तत् ।
तौ विना यस्य पित्रा च तस्य भागस्त्रिपौरुषः ॥
पिता पितामहो यस्य जीवेच्च प्रपितामहः ।
तयोर्यो जीवतां भोगो विज्ञेयस्त्रैकपूरुषः ॥
नारदः ।
तथारूढविवादस्य प्रेतस्य व्यवहारिणः ।
पुत्रेण सोऽर्थः संग्राह्यो न तं भोगो विवर्द्धयेत् ॥"
इति व्यवहारतत्त्वम् ॥
विभवभेदः । यथा,—
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
(व्यूहभेदः । यथा, कामन्दकीयनीतिसारे । १६ । अध्याये । ४१ । ४८ । ५४ । श्लोकेषु ।
"यदि स्याद्रूपवात्तुल्यं तदा व्यूहः प्रकीर्त्तितः ।
मण्डलोऽसंहतो भोगो दण्डस्त्वेति मनीषिभिः ।
गोमूत्रिका हि सञ्चारी प्रकटो मकरस्तथा ।
भोगभेदाः समाख्याताश्चत्वारः परिपन्थकाः ॥
असंहतास्तु बहवो व्यूहा भोगव्यूहाश्च षड्विधा ॥")

भोगगृहं, क्ली, (भोगार्थं गृहम्।) वासगृहम्। यथा,—
"वासागारं भोगगृहं कन्यापत्राटनिष्कुटाः।"
इति हैमचन्द्रः॥

भोगदेहः, पुं, (भोगहेतुको भोगसाधको वा देहः।) स्वर्गनरकभोगार्थं सूक्ष्मशरीरम्। यथा,—
"क्षते सपिण्डीकरणे नरः संवत्सरात् परम्।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते॥"
इति श्राद्धतत्त्वम्॥

अपि च।
"अद्य देहविवरणं कथयामि यथागमम्।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम्।
देहिनां देहजीवस्य सृष्टिः स्थितिविधौ परम्॥
पृथिव्यादिपञ्चभूतैर्यो देहो निर्म्मितो भवेत्।
स क्षत्रिमो नश्वरश्च भस्मसाच्च भवेदिह॥
दृङ्मात्रप्रमाणश्च यो जीवपुरुषः स्मृतः।
बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे॥
स देहो न भवेद्यस्य ज्वलदग्नौ यमालये।
जले न नष्टो देही वा प्रहारे सुचिरे क्षते॥
न शस्त्रे च न चाग्नेये च न तीक्ष्णकण्टके तथा।
तप्तभ्रवे तप्तलोहे तप्तपाषाण एव च॥
प्रतप्तप्रतिमाश्लेषेष्वत्यूर्द्धपतनेऽपि च।
न च दग्धो न भग्नश्च शुष्यति सन्तापमेव च।
कथितं देहवृत्तान्तकारणञ्च यथागमम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २६ अध्यायः॥

भोगपालः, पुं, (भोगं भोगसाधनमन्नादिकं पालयतीति। भोग+पालि+अण्।) अश्वरक्षकः। इति शब्दमाला। भोगरक्षके त्रि॥

भोगपिप्पाचिका, स्त्री, (भोगे पिप्पाचिका इव, तदवलग्नत्वात्।) क्षुधा। इति हारावली॥

भोगभूमिः, स्त्री, (भोगार्थमेव भूमिः।) सुखस्थानम्। भारतवर्षातिरिक्तवर्षम्। यथा,—
"तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने!।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः॥"
इति विष्णुपुराणे २ अंशे ३ अध्यायः॥

भोगवती, स्त्री, (भोगः सर्पशरीरं भूत्वा अस्त्यस्या इति। भोग+मतुप् मस्य वः। "आर्ङ्गवाद्यश्च ङीन्।" ४।१।७१। इति ङीन्।) पातालगङ्गा। नागपुरी। इति मेदिनी। ते, २१४। (नागपत्नी। यथा महाभारते। १।२०२।३२।
"नच भोगवतीं मध्ये न गन्धर्व्वीं न मानुषीम्।" गङ्गा। यथा, च काशीखण्डे। २६।१२८॥
"भद्रा भोगवती भद्रा भवानी भूतभाविनी।" तीर्थभेदः। यथा, महाभारते। ३।८५।७५॥
"तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः।")

भोगवान्, [त्] पुं, (भोगः फणः कायो वा भूत्वा अस्त्यस्येति। भोग+मतुप् मस्य च वत्वम्।) सर्पः। इति मेदिनी। ते, २१४। ज्ञानम्। ज्ञानम्। इति त्रिकाण्डशेषः॥ भोगविशिष्टे त्रि॥

भोगसद्म, [न्] क्ली, (भोगार्थं उपभोगार्थं सद्म।) वासगृहम्। यथा,—
"गर्भागारं वासगृहं भोगसद्मापवाधकम्।"
इति शब्दरत्नावली॥

भोगार्ह्य, क्ली, (भोगाय अर्ह्यते इति अर्ह+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) धान्यम्। इति राजनिर्घण्टः॥

भोगावली, स्त्री, (भोगानां आवली श्रेणिर्यस्याम्।) स्तुतिपाठकस्य स्तुतिः। इति जटाधरः॥ (यथा माघे। ५। ६०।
"भोगावलीः कलगिरोऽवसरेषु पेतुः।"
भोगावली प्रबन्धान्। इति तट्टीकायां मल्लिनाथः॥) नागपुरी। इति हैमचन्द्रः॥

भोगावासः, पुं, (आवसत्यस्मिन् इति। आ+वस+अधिकरणे घञ्। भोगार्थो वा आवासः।) वासगृहम्। इति हारावली॥

भोगिकः, पुं, (भोगे अश्वभोगे नियुक्त इति। भोग+वाहुलकात् ठन्।) अश्वरक्षकः। इति शब्दमाला॥

भोगिकान्तः, पुं, (भोगिनां कान्तः प्रियः।) वायुः। इति त्रिकाण्डशेषः॥

भोगिनी, स्त्री, (भोगः अस्या अस्तीति। भोग+इनिः। ङीप्।) महिषीभिन्नस्त्रीपत्नी। इत्यमरः। २। ६। ५॥

भोगिवल्लभं, क्ली, (भोगिनां वल्लभं प्रियम्।) चन्दनम्। इति राजनिर्घण्टः॥

भोगी, [न्] पुं, (भोगोऽस्यास्तीति। भोग+इनिः।) सर्पः। इत्यमरः। १। ७। ८। (यथा, विष्णुपुराणे। १। ३। २३।
"एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः।
भोगिशय्यागतः शेते त्रैलोक्यग्रासहृंहितः॥"
भोगयुक्तः। यथा, आर्य्यासप्तशत्याम्। ४१४।
"भवतानिङ्गि भुजङ्गी जातः किल भोगिचक्रवर्त्ती त्वम्॥")
ग्रामपालः। नृपः। इति मेदिनी। ने, १०२। नागपतिः। इति विश्वः॥ श्रेयोहस्तिकरः। इति हैमचन्द्रः॥

भोगीन्द्रः, पुं, (भोगिनामिन्द्रः।) अनन्तदेवः। इति शब्दरत्नावली॥

भोगीशः, पुं, (भोगिनामीशः।) अनन्तदेवः। इति शब्दरत्नावली॥

भोग्यं, क्ली, (भुज+ण्यत्।) धनम्। धान्यम्। इति राजनिर्घण्टः॥ भोगमर्हतीति। भोग+यत्। भोगार्हे त्रि॥ (यथा, कामन्दकीये। ५।८१।
"यथा रज्ज्वै निपुणं ग्रथ्नं कण्टकिशाखया।
फलाय लुनुतः कार्य्यस्तद्वद्भोग्यमिदं जगत्।")
आधिभेदः। यथाह नारदः।
"विश्रम्भहेतू द्वावत्र प्रतिभूराधिरेव च।
अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः॥
कृतकालोपनेयश्च यावद्देयोऽतथा परः।
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च॥"
गोप्यो रक्षणीयः। भोग्यस्तार्थः फलभोग्यपदे द्रष्टव्यः। तद्यथा,—
"काले कालकृतो नश्येत् फलभोग्यो न नश्यति।"
फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति। इति मिताक्षरायां व्यवहाराध्यायः॥

भोग्या, स्त्री, (भुज+कर्म्मणि ण्यत् टाप्।) वेश्या। इति राजनिर्घण्टः॥ भोग्या भूः। इति वोपदेवः॥ (तत्र चि।)

भोजः, पुं, (भोजस्येदमिति। भोज+"तस्येदम्।" ४। ३। १२०। इत्यण्। अणो लोपः।) स्वनामख्यातदेशः। भोजपुर इति भाषा। तत्पर्य्यायः। भोजकटः २। इति शब्दरत्नावली॥ धारानगरस्य राजविशेषः। तस्य वृत्तान्तो यथा। धारानामनगर्य्यां सिन्धुलसंज्ञो राजा आसीत्। तस्य राज्ञी सावित्री, तयोर्वृद्धावस्थायां भोजनामपुत्रो जातः। स यदा पञ्चवर्षवयस्कस्तदा तत्पिता आत्ममरणकालं विदित्वा भ्रात्रे मुञ्जाय राज्यं ददौ, तदुत्सङ्गे भोजञ्च समोच। ततो राज्ञि परलोकं प्राप्ते कियत्कालानन्तरं सभायां कश्चिदुदरम्भरिर्ज्योतिर्विदागत्य मुञ्जं प्राह राजन्! भोजस्य भाग्योदयं वक्तुं विरिञ्चिरपि न समर्थः कोऽहं वराक उदरम्भरिर्ब्राह्मणः तथापि वदामि भोजमितः प्रेषय। ततो राजाज्ञया भोजेऽध्ययनशालां प्राप्ते आह यथा,—
"पञ्चाग्रतृपञ्चवर्षाणि सप्तमासा दिनत्रयम्।
भोगराजेन भोक्तव्यं सप्तकं दक्षिणापथम्॥"
इति श्रुत्वा मुञ्जराजोऽचिन्तयत्, यदि राजलक्ष्मीर्भोजं गमिष्यति ततोऽहं जीवन्नपि मृतः। ततो राजा मन्त्रयित्वा वङ्गालाधीश्वरं महाबलं वत्सराजमाकृष्य निर्जने तं प्राह, वत्सराज! त्वया भोजलक्ष्मीभुवनेश्वरीविपिने क्षन्तव्यः। वत्सराजः भोजकुमारोपाध्यायमाकृष्य प्राह, विप्र! भोजमानय। ततो विदितवृत्तान्तो भोजः कुपितः प्राह, आः पाप! राज्ञः कुमारं वञ्चितुं तव का शक्तिः, ततो वामकरमाकृष्य कामादाय भोजेन भाजदेशे क्षतो वत्सराजः प्राह, भोजकुमार! वयं राजादेशकारिणः। इत्युक्त्वा वधार्थं बलात् वत्सराजेन निशायां विपिनं भोजे नीते वत्सराजस्य भ्राता भोजञ्च वधोद्यमसमये।
"एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्व्वमन्यच्च गच्छति॥"
इत्युक्त्वा निशम्य वत्सराजो वैराग्यमापन्नो भोजं क्षमस्वेत्युक्त्वा प्रणम्य तं रथे निवेश्य राजधानीमागत्य भूमिगृहान्तरे भोजं रक्षित्वा छत्रिमं भोजमस्तकं कारयित्वा राजसभामागत्य नत्वा प्राह श्रीमता यदादिष्टं तन्मया कृतम्। राजपुत्रवधं श्रुत्वा राजा तं प्राह वत्सराज! पुत्रेण सङ्ग्रामद्वारावसरे किमपि उक्तम्। वत्सराजः प्राह देव! किमपि प्रश्नं प्रेषितमस्ति तदिदं गृहाण शिरश्च दर्शयति। ततो भोजमस्तकं दृष्ट्वा राजा रुरोद।

"मान्धातेति महीपतिः कृतयुगेऽलङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः कासौ दशास्या न्तकः।
अन्ये चापि युधिष्ठिरप्रभृतयो याताः दिवं भूपते!
नैकेनापि समं गता वसुमती मन्ये त्वया यास्यति।"

इति भोजप्रबन्धश्लोकं पठित्वा पपात च। ततो राजा पण्डितमानीय मया पुत्रो हतः प्रायश्चित्तमुपदिशेति उवाच। ततस्ते ऊचुः राजन्! सवासा वह्निमाविश। ततो राज्ञो वह्निप्रवेशे निश्चिते सति तद्वार्तां श्रुत्वा कृपकुमार-मागत्य वत्सराजो बुद्धिसागरं प्राह तात! मया भोजो न मारितः बुद्धिसागरश्च तस्य कर्णे किमपि कथयति। ततो वत्सराजो निष्क्रान्तः। ततस्तमुद्भूतेन साक्षान्महेश्वर इव एकः कापालिक आगतः। तं वीक्ष्य बुद्धिसागरः प्राह योगिन्! कुत आगम्यते कापालिके त्वयि जगच्चमत्कारी कलाविशेषश्चौषधिविशेषो वा अस्ति। ततो राजाप्याह मया सहसा हतं पुत्रं रक्ष। कापालिकः प्राह राजन्! मा भैषीः पुत्रस्ते नाथप्रसादेन न मरिष्यति प्रातस्तव गृहं स्वयमेव समेष्यति परं श्मशानभूमौ बुद्धिसागर-मन्त्रिणा सह होमद्रव्यं प्रेषय। कापालिकेन यदुक्तं तत् सर्वं राज्ञा सम्पाद्य बुद्धिसागरः प्रेषितः ततश्च राज्ञी गूढतया वत्सराजगृहात् भोजस्तच्च नदीपुलिनं नीतः योगिना भोजकु-मारो जीवित इति किमद्यापि सर्वतोऽप्य-जायत। ततः पौरामात्यैः परिवृतो भोजो राजभवनमागतः। ततस्तमालिङ्ग्य रुदन्तं सङ्कं निवार्य भोजः स्तौति। ततो राजा लज्जावनतग्रीवः सन् निजसिंहासने भोजमुप-वेश्य राज्यं दत्त्वा वनं गतः। ततो सङ्के वनं प्राप्ते बुद्धिसागरं सुखामात्यं विधाय भोजः स्वयं राज्यसुखं बुभुजे। ततो राजसभायां सहसमो बुधवरा दिग्भ्य समागमुः ततो राजा अमात्यमाह।

"लक्षं महाकवेर्देयं तदर्धं विबुधस्य च।
देयं याज्ञकवेर्वत्स! तस्याप्यर्धं त्वयाऽहम्।"

इति॥

ततः क्रमेण वररुचिसुबन्धुबाणामररामदेवहरि-वंशगङ्गाधरकलिङ्गकर्पूरविनायकमदनविद्याविनोद कोकिलतत्रेन्द्रप्रमुखाः सर्वज्ञाश्चाविचक्षणाः सर्वज्ञा इव राजसभामहर्निशमलंकुर्वन्ति। कियत्कालानन्तरं कालिदासकवौ समागते तेन सार्धं राज्ञः परमा प्रीतिरजायत। अन्ये विद्वांसः कालिदासं वैद्यालभ्यटं विदित्वा सर्व-भावेन वैरचक्रुः न कश्चित् सभायां सूयति न कोऽपि वदति। किन्तु भोजनृपतिस्तेन सार्धं परमप्रीतो बभूव। अन्येषां पण्डितानामाग-मनं तेषां पद्यानि समस्यापूरणानि तेभ्यो बहुलवस्त्रदानादिवर्णनञ्च यत्रयोदशपर्यन्त-मस्ति। तद्ग्रन्थविस्तरभयात् न लिखितम्। इति भोजप्रबन्धपुस्तकात् सङ्कलितम्॥* ऐन्द्र-जालिकविद्यां भोजविद्यां वदन्ति॥

भोजकटः, पुं, भोजदेशः। इति शब्दरत्नावली॥ (रुक्मिनिर्मिते पुरे, क्ली। यथा, विष्णुपुराणे। ५। २६। १३।

"इत्युक्तेन परित्यक्ता क्रव्यादाक्षिरकर्मणा।
रुक्मी भोजकटं नाम पुरं कृत्वावसत्तदा॥")

भोजनं, क्ली, (भुज्+"ल्युट् च।" ३। ३।११५। इति भावे ल्युट्।) भक्षणम्। कठिनद्रव्यस्य गलाधःकरणम्। तत्पर्य्यायः। जग्धः २ जेमनम् ३ क्षेपः ४ आहारः ५ निघसः ६ न्यादः ७। इत्यमरः।२। ६। ५५॥ जगनम् ८ विघसः ९। इति तट्टीका। अभ्यवहारः १० प्रत्यवसानम् ११ अशनम् १२ खादनम् १३ गिरः १४। इति राजनिर्घण्टः॥*॥

अथ भोजनगुणविधानादि।

"भोजनाग्रे सदा पथ्यं सिन्धाकण्ठविशोधनम्।
अग्निसन्दीपनं स्निग्धं लवणार्द्रकभक्षणम्॥
आयुष्टते गुरुं रोगा न्यूनुर्नो विदाहिनु।
आरोग्यं कटुतिक्तेषु बलं मांसे पयःसु च।
अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम्॥
घृताद्दशगुणं तैलं मद्यान्न च भक्षणात्।
आहारः प्रीणनः सद्यो बलकृद्देहधारणः॥*॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते
उदङ्मुखः॥

कुक्षेरन्नेन भागौ द्वावेकं पानेन पूरयेत्।
वायोः सञ्चारणार्थञ्च चतुर्थमवशेषयेत्॥
दग्धे चावगते चान्नं सौचैनैवाहरेन्नरः।
कुर्य्यादनिर्गतं तद्धि सुखस्यानिष्टमन्वताम्॥
सुक्ता पाणितलं दृष्ट्वा चक्षुषोर्यदि दीयते।
अचिरेणैव तद्दारि विभिराणि व्यपोहति॥
सुक्त्वाचम्य करं वामं दत्त्वा कुक्षौ ततः पठेत्।
भुक्तं महेन्द्रहस्तेन वैश्वानरसुखेन च॥
गरुडस्य च कण्ठेन समुद्रस्य च वह्निना।
वातापिर्भोजितो येन प्रीतो येन महोदधिः॥
यन्मया खादितं पीतं तदगस्त्यो जरिष्यति।
पठित्वैतत् सुखासीनः सम्यं तिष्ठेदनाकुलः॥
सुक्त्वा पादशतं गत्वा वामपार्श्वेन संविशेत्।
एवं ह्यधोगतं चान्नं सुखं तिष्ठति जीर्य्यति॥
सुक्तोपविशतस्तुन्दं वृद्धयानस्य वपुर्भवेत्।
आयुश्चंक्रममाणस्य मृत्युर्धावति धावतः॥"

इति राजवल्लभः॥*॥

अपि च।

"ततो भोजनवेलायां कुर्य्यान्मङ्गलदर्शनम्।
तस्य प्रदक्षिणं नित्यमायुर्धर्म्मविवर्द्धनम्॥
लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥
पादुकारोहणं कुर्य्यात् पूर्वं भोजनतः परम्।
पादरोगहरं दृष्यं चक्षुष्यं वायुषे हितम्॥*॥
शरीरे जायते नित्यं वाञ्छा नृणां चतुर्विधा।
बुभुक्षा च पिपासा च सुप्तसा सुरतस्पृहा॥
भोजनेच्छाविघातात् स्यादङ्गमर्दोऽरुचिः श्रमः।
तन्द्रा लोचनदौर्ब्बल्यं धातुदाहो बलक्षयः॥
विघातेन पिपासायाः शोषः कण्ठास्यशोषभेवेत्।
श्रवणस्यावरोधश्च रक्तशोषो हृदि व्यथा॥
निद्राविघाततो जृम्भा शिरोलोचनगौरवम्।
अङ्गमर्दश्लथा तन्द्रा स्यादन्नापाक एव च॥
बुभुक्षितो न योऽश्नाति तस्याहारेच्छनश्यात्।
मन्दीभवति कायाग्निर्यया चाग्निर्विनश्यति॥
आहारं पचति ग्निखी दोषानाहारः पचति।
दोषक्षये च धातून् पचति धातुक्षये प्राणान्॥
आहारः प्रीणनः सद्यो बलकृद्देहधारणः।
स्वल्पायुःशक्तिवर्णौजःसत्त्वशोभाविवर्द्धनः॥
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम्।
विचार्य्य दोषकालादीन् कालयोरुभयोरपि॥"

उभयोः कालयोः प्रातः सायच्च। तथा च।

"सायं प्रातर्मुनिभ्यामशनं श्रुतिबोधितम्।
नान्तरा भोजनङ्कुर्य्यादग्निहोत्रसमो विधिः॥"

प्रातः प्रथमयामात् उपरि द्वितीययामात् अर्व्वाक्। तथा च।

"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत्।
याममध्ये रसोत्पत्तिर्यामयुग्मादबलक्षयः॥"

अन्यच्च।

"क्षुत् सम्भवति पक्वेषु रसदोषमवेक्ष्य च।
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः॥"

रसादीनां पाकं ज्ञातुमाह।

"उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः।
लघुता क्षुत्पिपासा च यदा कालः स भोजने॥"

स्थानमाह।

"आहारं विजने कुर्य्यान्निहारमपि सर्व्वदा।
उभाभ्यां लङ्घ्यते स्नातुः प्रकाम्रे हीयते
श्रिया॥

निहारो मलमूत्रोत्सर्गः। अन्यच्च।

"आहारनिहारविहारयोगाः
सदैव सद्भिर्विजने विधेया इति॥"*॥

भोजने येषां दृष्टिर्निवारणीया तानाह।

"हीनदीनक्षुधार्त्तानां पापपङ्केरोगिणाम्।
कुक्कुटादिशुनां दृष्टिर्भोजने नैव शोभना॥"

येषां दृष्टिः शुभदा तानाह।

"पिप्पलासुकृद्देवापापघ्नदृङ्नवर्द्धिनाम्।
सारसस्य चकोरस्य भोजने दृष्टिरुत्तमा॥"

कथञ्चित्तदृष्टदृष्टिपाते तद्दोषशान्तये ब्रह्मा-दीन् स्मरेत्। तद्यथा,—

"अन्नं ब्रह्म रसो विष्णुर्भोक्ता देवो महेश्वरः।
इति सञ्चिन्त्य सुज्ञानो दृष्टिदोषो न बाधते॥
अञ्जनागर्भसम्भूतं कुमारं ब्रह्मचारिणम्।
दृष्टिदोषविनाशाय हनूमन्तं स्मराम्यहम्॥"

भोजनमाह।

"दोषघ्नदृष्टदृष्टिघ्नं पथ्यं हैमं भोजनभाजनम्।
रौप्यं भवति चक्षुष्यं पित्तघ्नं कफवातघ्नम्॥

कांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रणाशनम् ।
पैत्तलं वातलघ्नत्वसुखं कृमिकफप्रणुत् ॥
आयसे कान्तपात्रे च भोजनं मिश्रिकारकम् ।
ग्रीषपाण्डुहरं बल्यं कामलापहमुत्तमम् ॥
ग्रैलजे रत्नमये पात्रे भोजनं शीतवारणम् ।
दारुजन्ये विशेषेण रुचिदं श्लेष्मकारि च ॥
पात्रं पत्रमयं रुच्यं दीपनं विषपापनुत् ॥
जलपात्रन्तु ताम्रस्य तदभावे स्फटो हितम् ॥
पवित्रं घृतलं पात्रं घटितं स्फटिकेन यत् ।
काचेन रचितं तद्वत्तथा वैदूर्यसम्भवम् ॥ ७ ॥
भोजनार्थे सदा पथ्यं लवणार्द्रकभक्षणम् ।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम् ॥"
लवणं सैन्धवं ग्रेयम् । आर्द्रकन्तु कटुकमपि न पित्तविरोधि मधुरपाकित्वात् ॥
"अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं रसम् ।
मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान् ॥
फलान्यादौ समश्नीयात् दाडिमादीनि बुद्धिमान् ॥
विना मोचाफलं तद्वदर्जुनीया च कर्कटी ॥
मृणालबिसशालूककन्देक्षुप्रभृतीन्यपि ।
पूर्वमेव हि भोज्यानि न तु भुक्ता कदाचन ॥
गुरु पिष्टमयं द्रव्यं तण्डुलान् पृथुकानपि ।
न जातु भुक्तवान् खादेन्मात्रां खादेद्बुभुक्षितः ॥
घृतपूर्वं समश्नीयात् कठिनं प्राक् ततो मृदु ।
अन्ते पुनर्घृताद्यौ तु बलारोग्ये न मुञ्चति ॥"
अयमर्थः । प्राक् घृतपूर्वं कठिनं समश्नीयात् । यथा काश्मीरादिवासिनः प्रथमं सर्वजनाः घृतपूर्वां रोटिकां भुञ्जते । ततो मृदुसूपूपादिकमोदनं भुञ्जते । अन्ते पुनर्घृताद्यौ भोजनान्ते दधितक्रदुग्धादि भुञ्जते ।
"यदृतं खादुतरं तद्धि विदध्यादुत्तरोत्तरम् ।
भुक्ता यत् प्रार्थ्यते भूयस्तदुक्तं खादु भोजनम् ॥"
खादन्नस्य गुणमाह ।
"सौमनस्यं बलं पुष्टिस्तृप्तिं रसनसुखम् ।
खादु सञ्जनयत्यन्नमस्वादु च विपर्ययम् ॥
अतुष्यान्नं बलं हन्ति घृतं शुष्कञ्च दुर्जरम् ।
अतिस्निग्धं स्रोतोरुक्तिकृत् हि भोजनम् ॥
अतिदृताग्निसाहारो गुणान् दोषान्न विन्दति ।
भोज्यं घृतमदृष्यञ्च स्नाहिलम्बितमन्नतः ॥"
गुरु त्रिविधं तन्निवारयन्नाह ।
"मन्दानलो नरो द्रव्यं मात्रागुरु विवर्जयेत् ।
स्वभावतश्च गुरु यत्तथा संस्कारतो गुरु ।
मात्रागुरुस्तु तत्रादिमांसादिः प्रकृतेर्गुरुः ।
संस्कारगुरु पिष्टान्नं घृतलिप्तमुपस्कृतम् ॥७॥
आहारं षड्विधं चूष्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्यादृथोत्तरम् ॥"
चूष्यं इक्षुदाडिमादि । पेयं पानकशर्करोदकादि । लेह्यं रसालाक्षुधितादि । क्षुधिता कटी इति लोके । भोज्यं भक्तसूपादि । भक्ष्यं लड्डुकमण्डकादि । चर्व्यं चिपिटचणकादि ।
स्वभावगुरुसंस्कारगुरुणोः स्वभावलघुनश्च भक्ष्यस्य भोजनपरिमाणमाह ।
"गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते ।"
अयमर्थः । माषपिष्टान्नादिभिरर्द्धं सौहित्यं कर्त्तव्यं सुश्रुतादिभिः स्वाभाविक्या मात्रया तृप्तिः कर्त्तव्येत्यर्थः ।
"द्रवो द्रवोत्तरस्यापि न मात्रागुरुरिष्यते ।"
द्रवः पेयादि । द्रवोत्तरः तक्राद्यधिक ओदनादिर्मात्रातोऽधिकोऽपि मात्रागुरुर्न मन्तव्यः । पेयस्य सर्वतो लघुत्वात् । उक्तञ्च सुश्रुतेन । पेयलेह्याद्यभक्ष्याणां गुरु विद्यादयथोत्तरमिति । पेयं पय आदि । लेह्यं रसालादि । अन्नं ओदनरुक्षादि । भक्ष्यं मोदकादि ।
"द्रवाद्यामपि शुष्कन्तु सम्यगेवोपपद्यते ।
विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति ॥"
अयमर्थः । शुष्कमपि स्रोतोरोधकरमपि द्रवाद्यं सम्यक् पाकं याति । केवलस्य शुष्कस्यान्नस्य दोषमाह । विशुष्कमन्नमित्यादि ॥ अपक्वं तत् किं भवतीत्यपेक्षायामाह ।
"पिण्डीकृतमसंक्लिन्नं विदाहमुपगच्छति ।"
पिण्डीकृतं अष्ठीलावद्भूतम् । असंक्लिन्नं असम्यगार्द्रम् । विदाहमुपगच्छति विदग्धं भवतीत्यर्थः । शुष्कादीनां वैगुण्यमाह ।
"शुष्कं विरूक्षं विष्टम्भि वह्निव्यापादमावहेत् ।"
शुष्क चिपिटादि । विरूक्षं चौरमत्स्यादि । विष्टम्भि चणकमसूरादि वह्निमान्द्यं कुर्य्यात् ।
"न भुक्ता न रहश्चित्वा न निशायां न वा वदन् ।
न जलान्तरितान्न हिः शुष्कान्नाद्यान्न केवलान् ॥
पुनर्द्रवं पृथक् पानं सामिषं पयसा निशि ।
दग्धच्छेदनमुष्णञ्च सप्त भुक्तेषु वर्ज्जयेत् ॥"
विषमाशनस्य लक्षणमाह ।
"बहुस्तोकमकाले वा स्नेहं तद्विषमाशनम् ।"
बहुलाल्पस्य भक्षितस्य दोषमाह ।
"आलस्यगौरवाटोपशब्दांश्च कुरुतेऽधिकम् ।
हीनमात्रं तनोः कार्श्यं करोति च बलक्षयम् ॥"
अधिकं अन्नम् । अकाले भुक्तस्य दोषमाह ।
"अप्राप्तकालो भुञ्जानोऽत्यसमर्थतनुर्नरः ।
तांस्तान् व्याधीनवाप्नोति मरणञ्चाधिगच्छति ॥"
अप्राप्तकालः कालादतिप्राक् भुञ्जानोऽसमर्थशरीरो भवति । तथा सति तांस्तान् व्याधीन् शिरोव्यथाविसूचिकाजसकविलम्बिकादीन् प्राप्नोति । तेषामाधिक्ये मरणमपि प्राप्नोतीत्यर्थः ।
"कालेऽतीतेऽथवो जीर्णेऽजुनाप्यहते जने ।
क्षुद्देहिपक्षते सुक्तं न स्वाद्वोकुं पुनः क्षुधा ॥
क्षुधेभागद्वयं भोज्यैस्तृतीयं वारि पूरयेत् ।
वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत् ॥
रसेनान्नस्य रसना ग्रथमेनोपतर्पिता ।
न तथा खादुमाप्नोति ततः सैन्धवमुत्तरा ॥
अल्पस्वुपानान्न विपद्यतेऽन्न-
मनम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्द्धनाय
मुहुर्मुहुर्वारि पिबेदभूरि ॥
भुक्तस्यादौ जलं पीतं कार्श्यमन्दाग्निदोषकृत् ।
मध्येऽग्निदीपनं श्रेष्ठमन्ते स्थौल्यकफप्रदम् ॥"
अन्यच्च ।
"समस्थूलकृशा भुक्तमध्यान्तप्रथमाम्बुपाः ।"
इति वाग्भटः । भुक्तं भोजनम् ।
"तृषितस्तु न चाश्नीयात् क्षुधितो न पिबेज्जलम् ।
तृषितस्तु भवेद्दुर्ब्बलो क्षुधितस्तु बलोदरो ॥"
ननु श्रिष्टा भोजनान्ते दुग्धं पिबन्ति तत् कथमुचितम् । यतस्त्रिधा विभक्तस्य भोजनकालस्य प्रथमो भागो वातस्य द्वितीयः पित्तस्य तृतीयः कफस्य । अतएवाह ।
"अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं रसम् ।
मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान् ॥"
अस्यायमभिप्रायः । भोजने पूर्वं भुक्तो मधुरो रसो वृद्धिप्राप्तस्य वातपित्तयोः शमको भवति ।
"भोजनमध्ये भुक्ताम्ललवणौ
पित्ताग्नये च वह्निवृद्धिं कुरुतः ।
भोजनान्तसमये भुक्ताः कटुतिक्त-
कषाया रसा कफं शमयन्तीति ।"
अतो भोजनावसानसमयस्य कफकालत्वात्तत्र कथं श्लेष्मजनकं दुग्धं प्राप्तमुचितं भवति । यत उक्तम् ।
"दुग्धं खादुरसं स्निग्धमोजस्यं धातुवर्द्धनम् ।
वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलमिति ॥"
उच्यते ।
"विदाहीन्यन्नपानानि यानि भुक्ते हि मानवः ।
तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् ॥"
अतएव ब्रह्मपुराणे ।
"कुर्य्यान्न क्षीरान्नमाहारं श्रध्यन्नं न कदाचनेति ॥
लवणाम्लकटून्यानि विदाहीन्यति यानि तु ।
तद्दोषं हर्त्तुमाहारं मधुरेण समापयेत् ॥"
भोजनावसानसमये दुग्धादिमधुरभोजनेनैव वर्द्धितकफो लवणाम्लकटुभोजनजनितां पित्तस्य वृद्धिं नाशयति पित्तवृद्धिनाशनेन कफस्यापि वृद्धिरपचीणा भवति क्षीणकफवृद्धिरग्निमान्द्यादीन् व्याधीन् उत्पादयितुं न शक्नोति ॥
"एवं भुक्ता समाचामेत् रुच्यद्रव्यपूर्वकम् ।
भोजने दन्तलग्नानि निर्हृत्याचमनञ्चरेत् ॥
दन्तलग्ननिर्हार्य्यं लेपं मन्येत दन्तवत् ।
न तत्र बहुशः कुर्य्यादयत्नं निर्हरणं प्रति ॥
आचम्य जलयुक्ताभ्यां पाणिभ्यां चक्षुषी स्पृशेत् ।
भुक्ता पाणितले दृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिरादि व्यपोहति ॥
भुक्ता च संसरेन्नित्यमगस्त्यादीन् सुखावहान् ।
विष्णुरात्मा तथैवान्नं परिणामस्थ वै यथा ।
सत्येन तेन यद्भुक्तं जीर्य्यत्वन्नमिदं तथा ॥
अगस्तिरग्निर्वडवानलश्च
भुक्तं ममान्नं जरयत्वशेषम् ।
सुखञ्च मे तत् परिणामसम्भवं
यच्छत्वरोगं मम चारदेहे ॥
अङ्गारकमगस्तिञ्च पावकं शर्म्मशिन्नौ ।
यश्चैतान् संस्मरेन्नित्यं भुक्तं तस्याशु जीर्य्यति ॥

रत्नुवार्धं खड्क्षेन परिमाप्यं नधोदरम्।
अनायासप्रदायीनि कुर्य्यात् कर्म्माण्यतन्द्रितः॥"
अतन्द्रितः प्राग्यतिश्चेन्न तु सुप्यात्। सुक्त-
मात्रस्य तु खप्राग्नन्दाग्निः कुपितः कफ इति
वचनात्।
"जीर्णेऽन्ने वर्द्धते वायुर्विदग्धे पित्तमेधते।
सुक्तमात्रे कफश्चापि क्रमोऽयं भोजनोपरि॥"
विदग्धे किञ्चिदूपके पित्तमेधते किञ्चिदूपके कफः॥
सुक्तमात्रे संजातकफस्य प्रतीकारमाह।
"धूमेनापोह्य वृक्षैर्वा कषायकटुतिक्तकैः॥
पूगकर्पूरकस्तूरी लवङ्गसुमनःफलैः।
फलैः कटुकषायैर्वा सुखवेद्यकारिभिः।
ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः॥"
धूमेन अगुर्व्वादिधूमेन। अपोह्य कफं दूरी-
कृत्य। कषायकटुतिक्तकैः फलैः कर्पूरकस्तूरी-
लवङ्गादिभिः। पूगैः क्रमुकैः। सुमनःफलैः
जातीफलैः॥ फलैः एलाहरीतक्यादिफलैः।
"रते सुप्तोत्थिते स्नाते सुक्ते वान्ते च सङ्गरे।
सभायां विदुषां राज्ञां कुर्य्यात्ताम्बूलभक्षणम्॥
सुक्ता घृतपदौ गच्छेच्छनैस्तेन तु जायते।
अन्नसंघातसंश्लिष्टं ग्रीवाजानुकटीसुखम्॥
सुक्तोपविष्टसुप्तं ग्रयानस्थ तु पुष्टता।
आयुश्चंक्रममाणस्य मृत्युर्धावति धावतः॥"
चंक्रममाणस्य पदप्रतं प्रनैर्गच्छतः॥ * ॥
"श्वासागदौ सनुत्तानस्तान् हि: पार्श्वे तु दक्षिणे।
ततस्तद्विगुणान् वामे पश्चात् सुप्यात् यथासुखम्।
दामदिग्यामनाडी दामेऽर्कोऽस्ति अन्नूनाम्।
तस्मात्तु वामपार्श्वे ग्रथीत सुक्तप्रपाकार्थम्॥
भिदोवह्निमदौ ब्रह्मा तूलौ वातनवायहा।
भूम्या डंडौ दृश्या काष्ठपट्टौ तु वातुला॥"
इति भावप्रकाशः॥ * ॥
अन्यत्र।
"स्नातो यथावत् कृत्वा च देवर्षिपितृतर्पणम्।
प्रशस्तरत्नपाणिस्तु सुक्षीत प्रयतो गृही॥
हते अग्नौ हुते ब्रह्मौ शुद्धवस्त्रधरो नृप!।
दत्त्वातिथिभ्यो विप्रेभ्यो गुरुभ्यः संश्रिताय तु॥
पुण्यगन्धधरः ग्रस्तमाल्यधारी नरेश्वर!।
नैकवस्त्रधरोऽधार्द्रपाणिपादो नरेश्वर!॥
विसुङ्मुखः प्रीतो सुक्षीत न विदङ्मुखः।
प्राङ्मुखोदङ्मुखो वापि न चैवान्यमना नरः॥"
"अन्नं प्रशस्तं पथ्यं च प्रोक्षितं प्रोक्षणोदकैः।
न कुत्सितान्नतश्चैव जुगुप्सावदसंस्कृतम्॥
दत्त्वा तु भक्तं शिष्येभ्यः क्षुधितेभ्यस्तथा गृही।
प्रशस्तशुङ्मपात्रेण सुक्षीताकुपितो नृप!॥
नासन्दीसंस्थिते पात्रे नादेशे च नरेश्वर!।
नाकाले नातिसङ्कीर्णे दत्त्वाग्रञ्च नरोऽग्नये॥
आसन्दी दारुमयविष्टरी।
"मन्त्राभिमन्त्रितं ग्रस्तं न च पर्य्युषितं नृप!।
अन्यत्र बलमासेभ्यः ग्रक्तुग्राकादिकान्तथा॥
तण्डुलरितकेभ्यश्च गुडपक्वेभ्य एव च।
सुक्षीतोद्धृतमात्राणि न कदाचिन्नरेश्वर!॥"
हरितकेभ्यः अपक्वेलादिभ्यः॥
"नाग्नेयं पुरुषोऽश्नीयादन्यत्र जगतीपते!।
मध्वनुद्धिसर्पिर्भ्यः ग्रक्तुभ्यश्च विवेकवान्॥
अश्नीयात्तन्मयो भूत्वा पूर्व्वन्तु मधुरं रसम्।
लवणाम्ले तथा मध्ये कटुतिक्तादिकांस्ततः॥
प्राक् द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाग्रनम्।
अन्ते पुनर्द्रवाग्री तु बलारोग्ये न सुच्यति।
अनिन्द्यं भक्षयेदित्थं वाग्यतोऽन्नमकुत्सयन्।
पथ्यासं महामौनं प्राणाद्याप्यायनादि तत्।
सुक्ता सम्यगथाचम्य प्राङ्मुखोदङ्मुखोऽपि वा।
यथावत् पुनराचामेत् पाणी प्रक्षाल्य मूलतः॥
स्वस्थः प्रशान्तचित्तश्च कृतासनपरिग्रहः।
अभीष्टदेवताश्चाच कुर्व्वीत स्मरणं नरः॥
अविराय्याययत्नन्नं पार्थिवं पवनेरितः।
दत्तावकाशं नभसा जरयत्वस्तु मे सुखम्॥
अन्नं बलाय मे भूमेरपामय्यनिलस्य च।
भवत्वेततपरिणतौ ममास्त्वाहतं सुखम्॥
प्राणापानसमानानामुदानव्यानयोस्तथा।
अन्नं पुष्टिकरञ्चास्तु ममास्त्वाहतं सुखम्॥
अगस्तिरग्निर्वडवानलश्च
सुक्तं मयान्नं जरयत्वशेषम्।
सुखञ्च मे तत्परिणामसम्भवं
यच्छत्वरोगं मम चास्तु देहे॥
विष्णुः समस्तेन्द्रियदेवदेहि-
प्रधानभूतो भगवान् यथैकः।
सत्येन तेनान्नमशेषमेत-
दारोग्यदं मे परिणाममेतु॥
विष्णुरुक्ता तथैवान्नं परिणामञ्च वै तथा।
सत्येन तेन मे सुक्तं जीर्य्यतन्नमिदं तथा॥
रत्नुवार्धं खड्क्षेन परिमाप्य तथोदरम्।
अनायासप्रदायीनि कुर्य्यात् कर्म्माण्यतन्द्रितः॥
सच्छास्त्रादिविनोदेन सन्मार्गाद्यविरोधिना।
दिनं नयेत्ततः सन्ध्यासुपतिष्ठेत् समाहितः॥"
इति विष्णुपुराणे ३ अंशे ११ अध्यायः॥ * ॥
अपरञ्च।
"सुक्षीत प्रयतो नित्यं वाग्यतोऽनन्यमानसः।
मैत्रेय वर्ज्जयेन्नित्यं नैकान्नादी भवेद्व्रती॥
मैत्रेय वृत्तिनो वृत्तिरुपवाससमा स्मृता।
पूजयेदन्नं नित्यमद्याच्चैनदकुत्सयन्॥
दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्व्वशः।
अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम्।
अपुण्यं लोकविद्विष्टं तस्मात्तत् परिवर्जयेत्॥
प्राङ्मुखोऽन्नानि सुक्षीत सूर्य्याभिमुख एव वा।
नाद्यादुदङ्मुखो नित्यं विधिरेष सनातनः॥
प्रक्षाल्य पाणी पादौ च सुञ्जानो द्विरुपस्पृशेत्।
शुचौ देशे समासीनो सुक्ता च द्विरुपस्पृशेत्॥
नाश्नीयाद्धार्य्यया सार्द्धं नैनामीक्षेत मेहतीम्।
न भक्षयेदभक्ष्याणि नापेयं वा पिबेद्विजः॥"
अभक्ष्यान्तु भक्षग्रन्थे द्रष्टव्यम्॥ * ॥
"सुक्षीत वस्त्रभिः सार्द्धं वाग्यतोऽन्नमकुत्सयन्।
अहत्वा तु द्विजः पञ्च महायज्ञान् द्विजोत्तम!।
सुक्षीत वेदश्रुत्वा तिर्य्यग्योनिं स गच्छति॥
वेदाभ्यासोऽन्वहं ग्रक्ता महायज्ञक्रियाक्षया।
नाग्नयस्त्याग्नु पापानि देवानामर्च्चनन्तथा॥
यो मोहादथवालस्यादहत्वा देवतार्च्चनम्।
सुङ्क्ते स याति नरकान् सूकरेष्वभिजायते॥
तस्मात् सर्व्वप्रयत्नेन हत्वा कर्म्माणि वै द्विजः।
सुक्षीत स्वजनैः सार्द्धं स याति परमां गतिम्॥"
इति कौर्म्मे उपविभागे १७ अध्यायः॥ * ॥

व्यास उवाच।

"प्राङ्मुखोऽन्नानि सुक्षीत सूर्य्याभिमुख एव वा।
आसीनस्त्वासने शुद्धे भूम्यां पादौ निधाय तु॥
आयुष्यं प्राङ्मुखो सुङ्क्ते यशस्यं दक्षिणामुखः॥
श्रियं प्रत्यङ्मुखो सुङ्क्ते ऋतं सुङ्क्ते उदङ्मुखः॥
पक्षार्द्धौ भोजनं कुर्य्याङ्भौ पात्रं निधाय तु।
उपवासेन तत्तुल्यं मनुराह प्रजापतिः॥
उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वै करौ।
आचम्यार्द्रानभोऽक्रोधः पक्षार्द्धौ भोजनञ्चरेत्॥
महाव्याहृतिकं भिन्नं परिधायोदकेन तु।
अन्तर्जानुकरणमसीत्यापोऽशानक्रियाञ्चरेत्॥
खाहाप्रणवसंयुक्तां प्राणापानाहुतिन्ततः।
अपानाय ततः क्षत्वा व्यानाय तदनन्तरम्॥
उदानाय ततः कुर्य्यात् समानायेति पञ्चमीम्।
विज्ञाय तत्त्वमेतेषां जुहुयादात्मनि द्विजः॥
शेषमन्नं यथोक्तञ्च सुक्षीत व्यञ्जनैर्युतम्।
ध्यात्वा तन्मनसा देवमात्मानं वै प्रजापतिम्॥
अन्तर्जानुकरणमसीत्युपरिष्टादपः पिबेत्।
आचान्तः पुनराचामेदायं गौरीतिमन्त्रतः॥
हृदयं वा शिरोवाच्य सर्व्वपापप्रणाशिनीम्।
प्राणानां ग्रन्थिरसीत्यन्नमेहृदयन्ततः॥
आचम्याङ्गुष्ठमात्रेति पादाङ्गुष्ठेन दक्षिणे।
निःसावयेद्वक्त्रजलं मूर्द्धहस्तः समाहितः॥
हुत्वान्नमन्त्रकं कुर्य्यात् सन्ध्यायामिति मन्त्रतः।
अथाचरेच्च स्वात्मानं योजयेद्ब्राह्मणोऽति हि॥
सर्व्वेषामेव योगानामात्मयोगः परः स्मृतः।
योऽनेन विधिना कुर्य्यात् स याति ब्रह्मणः
क्षयम्॥
यज्ञोपवीती सुक्षीत सुगन्धालङ्कृतो नरः।
सायं प्रातर्नान्तरा वै सन्ध्यायान्तु विशेषतः॥
नाद्यात् सूर्य्यग्रहात् पूर्व्वमह्नि सायं ग्रशिग्रहात्।
ग्रहकाले तु नाश्नीयात् स्नात्वाश्नीयात्तु सुक्तयोः।
सुक्ते ग्रशिनि सुक्षीत यदि न स्याच्चहानिग्रा॥
असुक्तयोरन्तं गतयोः स्नात्वा दृष्ट्वा परेऽहनि।
नाश्नीयात् प्रेतमाशानामन्नदायेव दुर्म्मतिः॥
नायज्ञशिष्टादन्यद्वा न क्रुद्धो नान्यमानसः॥
आत्मार्थं भोजनं यस्य परार्थं यस्य मैथुनम्।
वृत्त्यर्थं यस्य चाधीतं निष्फलं तस्य जीवितम्॥
यदूसुङ्क्ते वेष्टितशिरा यच्च सुङ्क्ते उदङ्मुखः।
सोपानत्कश्च यद्सुङ्क्ते सर्व्वं विद्यात्तदासुरम्॥
नार्द्धरात्रे न मध्याह्ने नाजीर्णे नार्द्रवस्त्रभृक्।
न च भिन्नासनगतो न शयानः स्थितोऽपि वा॥
न भिन्नभाजने चैव न भूम्यां न च पाणिषु।
भोक्तव्यो घृतमादद्यान्न मूर्द्धानं स्पृशेदपि॥
न ब्रह्म कीर्त्तयेदापि न निःशेषं न भार्य्यया।
नान्धकारे च नाकाशे न च देवालयादिषु॥

नैकवस्त्रस्तु भुञ्जीत न च यानस्थितोऽपि वा ।
न पादुकानुगतो वा न हसन् विलपन्न हि ॥
भुक्त्वैवं सुखमास्थाय तदन्नं परिणामयेत् ॥"

इति कूर्म उपविभागे १८ अध्यायः ॥ * ॥

अपरञ्च ।

"दत्त्वा च हुत्वा पितृदेवताभ्यो
भृत्वातिथीन् भृत्यजनावशिष्टम् ।
तुष्टः शुचिः श्रद्दधानोऽन्नमिष्टं
तस्यान्तं स्यात् स पुमान् सुनक्ति ॥
सायं प्रातर्मुनिभ्यामप्यग्नं देवनिर्मितम् ।
वैदिके लौकिकेऽग्नौ तु प्रत्यक्षे जाठरे तथा ॥
उपलिप्ते समे देशे शुचिः श्रद्धासमन्वितः ।
पात्रेष्वर्घादिरूपेषु पुत्राग्निध्यादिभिर्वृतः ॥
ससंस्कृतं हितं स्निग्धं भुञ्जीतान्नमकुत्सयन् ।
यवगोधूमशाल्यान्नं मांसशाकादिभिर्युतम् ॥
कटूम्ललवणैस्तिक्तैर्व्यञ्जनैस्तु सुगन्धिभिः ।
भक्ष्यप्रकारान् विविधान् कन्दमूलफलानि च ॥
पात्रं भूमौ प्रतिष्ठाप्य योऽश्नुते वाग्यतः शुचिः ।
भोजने भोजने चैव चिराच्चषलमश्नुते ॥
धार्येण धारयेद्विप्रः पवित्रं दक्षिणे करे ।
भुञ्जानस्तु विशेषेण अन्नदोषैर्न लिप्यते ॥
यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा ।
भ्रमन्ति केवलमन्नस्य मण्डलस्य विवर्जनात् ॥
आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः ।
मण्डलान्युपजीवन्ति तस्मात् कुर्वीत मण्डलम् ॥
चतुष्कोणं द्विजायस्य त्रिकोणं क्षत्रियस्य तु ।
द्विकोणाकृति वैश्यस्य शूद्रस्य वर्तुलं सदा ॥
न लौहे रजसे पात्रे भिन्नेऽश्नीयात् कटेऽम्बरे ।
आपः पुनन्तिमन्त्रेण सुधात्वौर्ध्वं समासनम् ॥"

ध्रुवा द्यौरित्युपविश्य पात्रं प्रक्षाल्य मूर्द्धानं दिवोऽरतिमितिपात्रमभिमन्त्र्य भूम्याऽऽसायनेति भूमौ पात्रं प्रतिष्ठापयेत् । आहृतवासाः शुक्लवासा वा पवित्रात्मा शान्तात्मा प्राङ्मुख आसीनः पाणौ प्रक्षाल्य दृग्घोतारन्निगदेति ध्यायेदयक्तं पुरुषम् । तत ओजोऽसीत्यन्नमादित्यमन्त्रं प्रतिपत्तयेत् । ओजोसीत्यादिना प्रतिगृह्य अहमन्नमग्निरन्नीत्यृग्भ्यामभिमन्त्रयेत् । उदुत्तमेत्यूर्ध्वं जाठराग्निमन्तरस्थं प्रबोधयेत् । भूतपतये नमः भुवनपतये नमः भूतानां पतये नमः इति नमस्कारान्ते बलित्रयं भूमौ दद्यात् । अथाचैवात्मानं चिन्तयेत् ।

"प्राणस्य हृदयं स्थानमपानस्य गुदं स्मृतम् ।
समानो नाभिदेशे तु उदानः कण्ठमाश्रितः ॥
पञ्चमः स तु विज्ञेयो व्यानः सर्वाङ्गसन्धिषु ।
राजीवसदृशः प्राणो हृदये नित्यसंस्थितः ॥
तस्याधस्तादपानस्तु स वै गोक्षीरसन्निभः ।
नाभ्या मध्ये समानस्तु विद्युज्ज्वालासमप्रभः ॥
प्राणस्योपर्युदानस्तु इन्द्रनीलसमप्रभः ।
उभाभ्यामथ पार्श्वाभ्यामथवाप्येकपार्श्वया ।
अशून्यं पात्रं कुर्वीत एवं हानिर्न जायते ॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुख ! ।
त्वं यज्ञस्त्वं वषट्कारस्त्वं विष्णो ! परमं पदम् ॥"

अमृतोपस्तरणमसीत्यपः सृष्ट्योपस्थाय वाचं नियच्छेत् । यस्तं महाव्याहृतिभिरग्निः प्रदक्षिणं परिक्षिप्य सर्वेण पाणिना पात्रमविसृजन्नन्नोपस्तरणमसीति पुरस्तादपः पीत्वा पञ्चभिस्तैः प्राणाहुतीर्जुहोति । प्राणे निविशोऽन्तं जुहोमि ग्रिवोमाविशाप्रदाहाय प्राणाय स्वाहा । अपाने निविशोऽन्तं जुहोमि ग्रिवोमाविशाप्रदाहायापानाय स्वाहा । व्याने निविशोऽन्तं जुहोमि ग्रिवोमाविशाप्रदाहाय समानाय स्वाहा । इति तूष्णीं भूयो व्रतयेत् । प्रजापतिं मनसा ध्यायेत् ॥ * ॥ प्राणाय स्वाहेति प्राणस्तृप्यति । प्राणे हुयते चक्षुस्तृप्यति । चक्षुषि हुयते आदित्यस्तृप्यति । आदित्ये हुयते द्यौस्तृप्यति । दिवि हुयन्त्यां यत्किञ्चिद्द्यौरादित्यश्चाधितिष्ठतस्तृप्यति तस्मादुहुत्रिं अनुहुयति । व्यानाय स्वाहेति व्यानस्तृप्यति । व्याने हुयते श्रोत्रं हुयते । श्रोत्रे हुयते चन्द्रमास्तृप्यति । चन्द्रमसि हुयते दिशस्तृप्यन्ति । दिक्षु हुयन्तीषु यत्किञ्चिद्दिशः खं चन्द्रमाश्चाधितिष्ठन्ति । तत्तृप्यति तस्मादुहुत्रिं अनुहुयति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति । अपानाय स्वाहेत्यपानस्तृप्यति । अपाने हुयते वाक् हुयते । वाचि हुयन्त्यां अग्निस्तृप्यति । अग्नौ हुयते पृथिवी हुयते । पृथिव्यां हुयन्त्यां यत्किञ्चित् पृथिवी वाग्निश्चाधितिष्ठतस्तृप्यति तस्मादुहुत्रिं अनुहुयति । हुयते प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति । समानाय स्वाहा इति समानस्तृप्यति । समाने हुयते मनस्तृप्यति । मनसि हुयते पर्जन्यस्तृप्यति । पर्जन्ये हुयते विद्युत्तृप्यति । विद्युति हुयन्त्यां यत्किञ्चिद्विद्युत्पर्जन्यश्चाधितिष्ठतस्तृप्यति तस्मादुहुत्रिं अनुहुयति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति । उदानाय स्वाहेति उदानस्तृप्यति । उदाने हुयते वायुस्तृप्यति । वायौ हुयते आकाशस्तृप्यति । आकाशे हुयते यत्किञ्चिद्वायुराकाशश्चाधितिष्ठतस्तृप्यति । तस्मादुहुत्रिं अनुहुयति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ * ॥

"भुक्तेऽग्ने केचित् काङ्क्षन्ति भुक्तेग्रे सुचि चिपेत् ।
केचित काङ्क्षन्त्यनाजीवाः केचित् कर्म्मवशानुगाः ॥
भुञ्जन्तु मम चोत्सृष्टं पात्रे वाथ सुचि स्थिते ।
अन्ततापिधानमसीत्युपरिष्टात् पयः पिबेत् ॥
अहि पूर्व्वोपरिष्टाच्च वस्त्रं प्राणस्य निर्गमेत् ।
भुक्त्वा पीत्वा च यः कश्चित् शून्यं पात्रं वसुत्सृजेत् ॥
स पुनः क्षुत्पिपासार्त्तो भवेज्जन्मनि जन्मनि ।
अन्ततापिधानमसीत्युपरिष्टादपः पिबेत् ॥"

अपः पीत्वाचान्तः प्राणस्यानग्निः सृजति । प्राणानां ग्रन्थिरसीति हृदयमालभ्य जपति । प्राणानां ग्रन्थिरसि इति प्राणदेशम् । विष्णोर्जठरमसीतिनाभिदेशम् । यो देवानामधिपतीति पुनरपि हृदयदेशमालभ्य जपति । सावित्रीचानुभाष्य चिरायो रसानां रसभुक् तन्नात्मा कर्म्मभिः प्रीयतां विश्वभुगिति ध्यायेदयक्तं पुरुषम् ॥ * ॥

"आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिद्ध्यन्ति नेषां सिद्धिरनश्नताम् ॥
गृहस्थो ब्रह्मचारी च योऽन्नमन्नं तपश्चरेत् ।
प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः ॥
अन्तराप्रातराशञ्च सायमाशन्नथैव च ।
सदोपवासी भवति यो न भुङ्क्ते कदाचन ॥
प्राणाग्निहोत्रमन्त्राणां निरूढे भोजने जपेत् ।
वैश्वानरीयमन्त्रांस्तु द्रव्यालाभेन तर्पयेत् ॥
यथाहि नलमेवैकमग्निप्रोतं प्रदूयते ।
तद्वत् सर्व्वाणि पापानि निर्दहत्यात्मयाजिनः ॥
यथेह क्षुधिता बाला मातरं पर्य्युपासते ।
एवं सर्व्वाणि भूतानि अग्निहोत्रमुपासते ॥"

इति ॥ * ॥

"भोजनस्य निषेधन्तु प्रवक्ष्याम्यनुपूर्व्वशः ।
नोच्छिष्टो भक्षयेत् किञ्चिन्न गच्छन् वा कदाचन ॥
खट्वारूढो न भुञ्जीत न पाणिस्थं कदाचन ।
चन्द्रसूर्य्योपरागे च यस्तावे चन्द्रसूर्य्ययोः ॥
गोब्राह्मणोपवासेन न वाजीर्णे तु भोजने ।
निशीथे नैकवासास्तु न लम्बोच्छिष्टभाजने ॥
न रात्रौ तिलसम्बद्धं दधि भुक्त्वान्न माक्षिकम् ।
कोविदारवटाश्वत्थफलानि न कदाचन ॥
चणकञ्च कौसुम्भं करमर्दितञ्च यद्दधि ।
वेदा वहिः पुरोडाशं तुल्यं गोमांसभक्षणे ।
नोच्छिष्टेन हुतं आज्यं भुक्त्वान् वापदुगतोऽपि सन् ।
पलाण्डुं लशुनं वापि भुञ्जंस्तत्पापमाप्नुयात् ॥
नागाद्रेसुखपाणिस्तु चन्द्रतारार्कमीक्षयेत् ।
भुञ्जन् कुर्व्वन् खमूर्द्धानं सृष्टेर्ब्रह्म न कीर्त्तयेत् ॥
नार्द्रवासाः शिरःस्नानः सोपानत्को निराशनः ।
प्रयाणः प्रौढपादश्च स्नात्वा चैवाबलक्रियम् ॥
नाश्नीयान्न पिबेच्चैव स्नात्वा पर्य्यङ्किकां नरः ।
पादप्रसारणं स्नात्वा न च वेष्टितमस्तकः ॥
न च आद्धस्य यच्छिष्टं यच्चे पर्य्युषितञ्च यत् ।
दम्पत्योर्भुक्तशेषन्तु न भुञ्जीत कदाचन ॥
नातिचरितमश्नीयात् भुक्त्वा शेषं विवर्जयेत् ।
न भक्षयेत्तु निःशेषमन्यच्च दधिसर्पिषोः ॥
पयसो मधुशुक्तानां तिलानामोदनस्य च ।
न चैको मिश्रमश्नीयान्न बहूनाञ्च पश्यताम् ॥
बहवस्तु न भुञ्जन्ति तथा चैकस्य पश्यतः ।
ओष्ठौ च न लिहेत् पाणिं नाङ्गुलिं पात्रमेव च ॥
शून्यालयेऽग्निशालायां देवागारे तथैव च ।
आयुर्निरस्यते तस्य भिक्षेकस्य बुभुक्षतः ॥
अदत्त्वा गोऽग्निविप्रेभ्यः कुमारायानुयायिने ।
एकोऽन्नं भिक्षमश्नाति ततोऽन्यो नाश्नुयात्फलम् ॥

यश्चैकपङ्क्त्यां विषमं ददाति
क्षेत्राद्भयाद्वा यदि वार्थहेतोः ।
वेदेषु दृष्टान्यभिसृत्य गीतां
तां ब्रह्महत्यां सुनयो वदन्ति ॥

एकपङ्क्त्युपविष्टानां दुष्कृतानां दुरात्मनाम् ।
सर्वेषां तत्फलं तावद्यावत् पङ्क्तिर्न भिद्यते ॥
एवं यो ब्राह्मणो भुङ्क्ते सन्ध्यां पित्रदेवताः ।
स हि कुले समुद्धृत्य ब्रह्मसायुज्यमाप्नुयात् ॥"

इति वह्निपुराणे भोजनविधानम् ॥ * ॥

त्रिविधभोजनं यथा,—

"उच्छिष्टमवशिष्टं वा पर्य्युषितमभोजितम् ।
भक्तानां भोजनं विष्णोर्नैवेद्यं सात्त्विकं मतम् ॥
इन्द्रियप्रीतिजननं शुक्रशोणितवर्द्धनम् ।
भोजनं राजसं शुद्धमायुरारोग्यवर्द्धनम् ॥
अतः परं तामसानां कट्वम्लोष्णाविदाहिकम् ।
पूतिपर्य्युषितं ज्ञेयं भोजनं तामसप्रियम् ॥"

इति कल्किपुराणे २५ अध्यायः ॥ * ॥

श्राद्धादिषु निमन्त्रितस्यान्यत्र भोजने दोषो यथा,—

"निमन्त्रितोऽन्यतो भुङ्क्ते श्राद्धे देवे सपैतृके ।
स द्विजो नरके वासं लभते नात्र संशयः ॥"

देवतादिष्वभुक्तवत्सु भोजने दोषा यथा,—

"देवताग्निमर्त्येषु महत्सु ब्राह्मणेषु च ।
अभुक्तवत्सु येऽश्नन्ति बालपित्रग्निमारुषु ॥
दुष्टास्ते पूयनिचये निपात्यन्तेऽधमाधमाः ।
सूचीमुखाश्च जायन्ते क्षुधार्त्ताः किरिविग्रहाः ॥"

"एकपङ्क्त्युपविष्टाश्च समुत्थाय प्रयान्ति ये ।
विड्भोजनं राजसेन्द्र ! नरकन्ते प्रयान्ति हि ॥
एकस्यार्थप्रयातस्य तथान्यस्यार्थितं नराः ।
असंविभज्य भुञ्जन्ति ते यान्ति श्लेष्मभोजनम् ॥
पायसं क्षुरकं मांसं दृषा भुक्तञ्च यैर्नरैः ।
तेषामयोगुडास्थाना विष्ण्मन्ते वह्नेऽद्भुताः ॥"

इति वामनपुराणे १२ अध्यायः ॥ * ॥

औषधातिरिक्तकिञ्चिद्भोजनवतो नित्यनैमित्तिक-क्रियानिषेधो यथा,—

"द्रव्ये भुक्ते त्वजीर्णे च नैव भुक्ता च किञ्चन ।
कर्म्म कुर्य्यान्नरो नित्यं ऋतुकं ऋतुके तथा ॥
पत्रं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम् ।
क्वथादिपिण्यत्वन्तच्च फलं भुक्ता न चाचरेत् ॥
जलस्यापि नरश्रेष्ठ ! भोजनाद्वैषजादृते ।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा ॥"

इति कालिकापुराणे ५४ अध्यायः ॥

भोजने पाकविधौ दिङ्नियमो यथा,—

"पूर्ब्बाग्राभिमुखो भूत्वा उत्तराग्राभिमुखेन वा ।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्ज्जयेत् ॥
अपराग्राभिमुखे पक्त्वा अन्नताम्रं विजानीहि ।
पूर्ब्बाभिमुखो धर्म्मकामः श्रीकहानिञ्च दक्षिणे ॥
श्रीकामश्चोत्तराभिमुखे पतिकामश्च पश्चिमे ।
ऐशान्याभिमुखे पक्त्वा दरिद्रो जायते नरः ॥"

पाकपात्रनिरूपणं यथा,—

"यदा तु आयसे पात्रे पक्त्वा अश्नाति वै द्विजः ।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते ॥
ताम्रे पक्त्वा चतुर्थांनिर्मलौ भवति वै क्षयः ।
पित्तघ्यां पक्वमन्नञ्च पित्तघ्नेन यशस्विनि ! ॥
पुष्करीकस्य यज्ञस्य लभते फलमीप्सितम् ।
वातुलेन तु यत् पक्वं भग्निष्या च कनिष्ठया ।
असगोत्रेण यत् पक्वं श्रोत्रियं तदपि स्मृतम् ॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वं तथैव च ।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत् ॥"

पाककाष्ठनिरूपणं यथा,—

"उडुम्बरेण काष्ठेन कदम्बस्य दलेन च ।
शालेन करमर्दैन उदरावर्त्तकेन च ॥
पक्वान्नं नैव भुञ्जीत भुक्ता रात्रिमुपावसेत् ॥"

निषिद्धान्नं यथा,—

"गर्हितान्नमवीरान्नं भुक्ता चान्द्रायणञ्चरेत् ।
अपत्नी या तु वनिता नाश्नीयादेव तद्गृहे ॥
शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि ।
कालचक्रातकस्यैव वचवारणकस्य च ॥
मेरण्डशाल्मलैर्वापि पक्वान्नं गर्हितं स्मृतम् ॥"

पाकपात्रत्यागकालो यथा,—

"यदा न्यूनयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथाष्टासु तत्पात्रं विसृजेद् गृही ॥
धनुःपाके तथा सिंहे मीने चैव वरानने ! ।
यः कुर्य्याद्भोजनं देवि ! क्षुरकेणैव विशुद्ध्यति ॥"

पाकार्थजलदानं यथा,—

"एकदा तु जलं दद्याद् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत् ॥"

भोजनस्थानादि यथा,—

"उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वाग्यतः ।
प्राङ्मुखोऽन्नानि भुञ्जीत शुचिः पीठमवस्थितः ॥"

पीठनिरूपणं यथा,—

"साङ्गुष्ठे चतुष्कोणे सहकारविनिर्म्मिते ।
चामभद्रदारुमये प्रादेशोच्छ्रायसंयुते ॥
वरुणासने भवेद्वृद्धिर्भद्रके श्रियमाप्नुयात् ।
चामे धनवृद्धिः स्याद्वर्द्धमानवृद्धिस्तु भद्रके ।
प्रालासने कपीरुके किंशुके मरणं भवेत् ॥"

भोजने दोषनिरूपणं यथा,—

"घृतदीप्ता यज्ञफलं तैले धेनुफलं लभेत् ॥"

भोजने चाण्डालादिदृष्टिनिषेधो यथा,—

"यदा भोजनकाले तु चाण्डालैः पतितैस्तथा ।
श्वकुक्कुटवराहैश्च म्लेच्छैश्च अन्त्यजैरपि ।
अन्नं वाप्यथ पानं वा दृष्टमात्रं परित्यजेत् ॥"

"रजस्वलायाः संस्पृष्टीर्वाचं श्रुत्वा प्रमादतः ।
व्रतस्थो वर्ज्जयेद्देवि ! अन्नं प्रोक्षणञ्चरेत् ॥
देवालये तथा तीर्थे सिद्धक्षेत्रे च शङ्करि ! ।
ब्राह्मणानां समाजे तु श्रुत्वा क्रतुफलं लभेत् ॥
आचान्तो भोजनं कुर्य्यादनामायां हिरण्ययुक् ।
सुवर्णेन सृग्घोदन्नं तदन्नमाप्तं विदुः ॥
रजःस्पृष्टं यदन्नञ्च भुक्ता भवति किल्बिषी ।
पौष्यकैण सृग्घोदन्नमन्नं विष्ठासमं भवेत् ॥
वैदूर्य्येण माणिक्येन स्फटिकेन सृग्घोदपि ।
सुवर्णेन संसृग्घोदन्नं तदन्नं शुचितामियात् ॥"

भोजने दिङ्नियमो यथा,—

"आयुष्यं प्राङ्मुखो भुङ्क्ते रात्रौ चैव उदङ्मुखः ।
यशस्वी दक्षिणे चैव पश्चिमे तु विवर्ज्जयेत् ॥"

भोजने मङ्गलानि यथा,—

"मङ्गलं भोजने काले चतुष्कोणं द्विजस्य च ।
क्षत्रियस्य भवेद्वृत्तं वैश्यस्य कूर्म्मपृष्ठकम् ।
स्त्रीशूद्राणां भवेद्वृत्तं शकटाकारमेव वा ॥"

अथ भोजनकालः ।

"सायं प्रातर्द्विजातीनामशनं श्रुतिनिर्म्मितम् ।
नित्यमह्नि तमस्विन्यां सार्द्धप्रहरयामतः ॥
रात्रौ यामत्रयात्ते च सन्ध्ययोर्न कदाचन ।
अकालभोजनं ज्ञात्वा प्राणायामेन शुद्ध्यति ।
अहोरात्रेण सन्ध्यायां भुक्ता कृच्छ्रं समाचरेत् ॥"

मोदकादिभक्षणानन्तरमन्नभोजनविधिर्यथा,—

मोदकं कदलञ्च गव्याढ्यं घृतसंयुतम् ।
पुनः पुनर्भोजने च पुनरन्नं न दुष्यति ।
त्रिसन्ध्यं भुक्तवान् यस्तु न स खार्थं द्विजः क्वचित् ॥
भुक्ता रात्रिमुपगमे कृच्छ्रेणैकेन शुद्ध्यति ॥
कोलं हरिद्रा सौवीरं मरीचं जातिकोषकम् ।
यश्चिपर्णादिकं सर्व्वं गन्धद्रव्यं तथौषधिः ।
प्रशस्तमेयामामान्नं खिन्नस्यापि न दुष्यति ॥
कुटुम्बभरणार्थाय पाकं पश्चान्निवेदयेत् ।
वैश्वदेवान्नमुद्धृत्य भोजयेन्न विचारयेत् ॥
नाश्नीयात् केवलं रात्रौ विल्वक्षेत्र तथा दधि ।
अक्षेन क्षणगुक्षेन काष्ठखण्डेन वह्निना ॥
पङ्क्तिभेदं ततः कुर्य्यात् पश्चाद्भुञ्जीत वाग्यतः ।
हस्तदत्तं यदन्नञ्च शूद्रादत्तं न भक्षयेत् ॥
घृततैलञ्च लवणं पानीयं पायसं दधि ।
रविवारे तथा षष्ठ्यां भौमवारे दिनत्रये ।
पर्व्वकाले च द्वादश्यां द्विजस्त्रिक्तं न भक्षयेत् ॥
न वामेन पिबेत्तोयं न रसं तक्रमेव च ।
मेकाखुश्विशुमार्ज्जारैस्त्रिधा पारावतैरपि ॥
कलविङ्कैः पन्नगैश्च पाके सृष्टैरपि सुन्दरि ! ।
गोधया वनमार्ज्जारैः पाकं न विसृजेत् क्वचित् ॥
स्वर्णरौप्यमये पात्रे पाषाणे ब्रह्मपात्रके ।
सकृद्भुक्ता तु देवेशि ! पराकस्य फलं लभेत् ॥
पूर्ब्बाह्णे स्वर्णपात्रे च भोजनं यः समाचरेत् ।
पुष्करीकस्य यज्ञस्य लभते फलमीप्सितम् ॥
स्वर्णपात्रे पश्चिमायां उत्तराभिमुखेन वा ।
तदन्नं शूकरं मांसं भुक्ता चान्द्रायणञ्चरेत् ॥
सर्व्वकामः स्वर्णपात्रे यशस्वी स्वर्परेषु च ।
पद्मपत्रे भवेत् पुष्टिर्विद्याग्नौ तु पुण्यवान् ॥
क्षयी भवति ताम्रे च काचपात्रे दरिद्रता ।
चूतपत्रे भवेदायुः कदले कीर्त्तिमाप्नुयात् ॥
मधुपत्रे च रोगः स्याद्वटपत्रे तु वैष्णवः ।
शालपत्रे भवेत्कामी पनसे चैव स्वर्गतिः ।
निम्बपत्रे प्ररोहे च पुनः संस्कारमर्हति ॥"

इति मत्स्यसूक्ततन्त्रे ४२ पटलः ॥

अथ सूत्युक्तभोजनविधिः । बहिःप्रक्षालित-पाणिपादवदनो रक्तपाणिर्द्विवासा द्विराचान्तो गोमयोपलिप्ते प्राप्ते देशे शुद्धः शुद्धनीचासनोपविष्टो धर्म्मवृद्धिकामः प्राङ्मुख उदङ्मुखो वा यशस्कामो जीवत्पितृमातृकेतरो दक्षिणामुखो धनकामः प्रत्यङ्मुखो भूमिसृष्टदक्षिणपाद आसनारूढसव्यपादोऽन्तर्जानुकरो दक्षि-

गदिक्कृतपानीयपात्री दक्षिणावर्त्तेन चतुष्कोणमण्डलं कृत्वा लोहनाम्नष्टखभवादिदुष्टभयकांक्षकदस्यादिपक्षष्टडपद्मपलाशपत्रेतरपात्रं विधाय प्रक्षाल्य पं आत्मानं मार्जयेत् दक्षिणक्रमेण जलेन वेष्टयित्वा तदुपरि लोहेतरपात्रान्तरेण हस्ताभ्यां प्रतिबिम्बितरमन्नादिकं स्थापयित्वा अन्नं दृष्ट्वा प्रहृष्येत्। अस्माकं नित्यमेवास्तु इत्यभिलष्य संप्रोक्ष्य आचाराचमनुष्कोणमण्डलाभ्यन्तरे जलनिखितचक्रोपरि ॐ नारायणाय नम इत्यन्नं सजलं मध्ये दद्यात्। तत्पार्श्वे ॐ भुवः पतये स्वाहा ॐ भुवनपतये स्वाहा ॐ भूतानां पतये स्वाहा। इति बलिचतुष्टयं दद्यात्। तदिदं सोपकरणमन्नं ॐ विष्वक्सेनाय नम इत्युच्चार्य तदग्रे किंचित् ॐ विष्वक्सेनाय नम इति दत्वा अन्नोपरि विष्णुनिर्माल्यतुलसीपत्रं प्रक्षिप्य विष्णुपादोदकं पुरा न गृहीतमेदानीम्।

"ॐ कृष्ण कृष्ण महाबाहो भक्तानामार्त्तिनाशन !।
सर्वपापप्रशमनं पादोदकं प्रयच्छ मे॥"

इति गृहीत्वा इष्टदेवतानामपरैरितं श्रुत्वा स्वयं विरच्यार्घं वा ॐ अमृतोपस्तरणमसि स्वाहा इत्यनेन पीत्वा।

"ॐ अकालमृत्युहरणं सर्व्वव्याधिविनाशनम्।
विष्णोः पादोदकं पुण्यं शिरसा धारयाम्यहम्॥"

इत्यनेन पादोदकार्घं शिरसि दद्यात्।

"ॐ उच्छिष्टभोजिनस्तस्य वयमुच्छिष्टकाङ्क्षिणः।
येन लोलावलोकेन हिरण्याक्षो निपातितः॥"

इत्युक्त्वा अङ्गुष्ठानामिकाभ्यां घृतमुत्तमोक्षमन्नमादाय महामौनी साङ्गुष्ठसर्व्वाङ्गुलिभिर्वा ॐ प्राणाय स्वाहा इत्यनेन मुखे दत्वा यदन्नच्छिन्नं तन्निगिरेत्। एवं ॐ अपानाय स्वाहा ॐ समानाय स्वाहा ॐ उदानाय स्वाहा ॐ व्यानाय स्वाहा। ततो वीर्य्यकामो मौनी सङ्गीत। ततः प्रथमं द्रवयुक्तमधुरं मध्ये कठिनाम्ललवणानि अन्ते द्रवयुक्तकटतिक्तानि यथालाभं क्षीरान्नं साङ्गुष्ठैर्दक्षकरसर्व्वाङ्गुलिभिः अनतिलग्नं सङ्गीत। पञ्चादधिकं जलादिकं न पातव्यम्। जलक्षीरदधिघृतमधुशाकशुक्तमांसेतरद्रव्याणां ग्रासं रचयितव्यम्। भोजने संपूर्णे तु मांसभोजने करं प्रक्षाल्य तदभोजने तु करमप्रक्षाल्यैव सान्नेन हस्तेन जलं गृहीत्वा ॐ अमृतापिधानमसि स्वाहा इति जलमन्नं गृहीत्वा सान्नं तज्जलग्रासं ॐ रौरवेऽपुण्यनिलये पद्मार्ब्बुदनिवासिनाम्। उच्छिष्टभागिनामन्नमक्षय्यमुपतिष्ठतामिति भूमौ निक्षिपेत्। भोजनकाले तु विड्डालकर्म्मकस्यार्घ्यत्यागः। विड्डालकर्म्मकस्यार्घे न दोषः। ततः स्थानान्तरं न गच्छेत्। पराङ्मुख दक्षिणमुखहस्तेषमपनीय लवणादिना निक्षारधर्म्मयोग्यं दन्तेभ्यो गृहीतरसक्षयं रक्तपातक्षतादिकं विना अपनयेत्। यत्ने कृते यदि न निःसरति तदा न दोषः।

ततो निद्राञ्च संजृम्भ्य जलाङ्गुष्ठेर्मुखाभ्यन्तरं संप्रोक्ष्य पादौ पादौ च प्रक्षाल्य आचम्य एव भूमौ पादौ दत्वा हिराचम्य सूक्तं तुलसीपत्रादिदा संप्रोक्ष्य दक्षिणमादाङ्गुष्ठे दक्षिणहस्तेन--

"ॐ अङ्गुष्ठमात्रपुरुषो ह्यङ्गुष्ठस्य समाश्रितः।
ईशः सर्व्वस्य जगतः प्रभुः प्रीयातु विश्वधृक्॥"

इति मन्त्रेण जलं दद्यात्। ततो मह्यीमार्ज्जनाभावे अशुचित्वादविलम्बमेव भोजनपात्रमुद्धृत्य तत् स्थानं उच्छिष्टमपनीय गोमयोदकाभ्यां संमृज्य सिञ्चेत्। सुखः प्रशान्तचित्त आसने उपविश्याभीष्टदेवतानाम स्मृत्वा—

"ॐ अग्निरापोऽन्नमन्नं पार्थिवं पवनेरितः।
दत्तावकाशो नभसा जरयत्वसु मे सुखम्॥
अन्नं बलाय मे भूमेरपामग्नेर्निलस्य च।
भवत्वेतत्परिणतौ ममाख्याहतं सुखम्॥
प्राणापानसमानानामुदानव्यानयोस्तथा।
अन्नं तुष्टिकरं चास्तु ममाख्याहतं सुखम्॥
अगस्तिरग्निर्व्वडवानलश्च
सुक्तं ममान्नं जरयत्वशेषम्।
सुखं ममैतत्परिणाममस्तमयं
यच्छत्वरोगं मम चास्तु देहे॥
विष्णुः समस्तेन्द्रियदेहदेहि-
प्रधानभूतो भगवान् यथैकः।
सत्येन तेनान्नमशेषमेत-
दारोग्यदं मे परिणाममेतु॥

विष्णुरन्ता तथैवान्नं परिणामञ्च वै मम।
सत्येन तेन मद्भुक्तं वीर्य्यमन्नमिदं तथा॥"

इत्युच्चार्य वामहस्तेनोदरं परिस्पृशेत्। ततः पादप्रक्षालनावशेषं वामपार्श्वेन किंचित्पानं ग्रहीतव्यम्। ततस्ताम्बूलादि मुखवास्यं भोक्तव्यम्। इत्याह्निकाचारे प्रथमयामार्द्धं समाप्तम्॥ ॥ अथ भोजनादिदानफलम्।

"भोजनाच्छादनं दत्वा दत्वा पीयूषदौ द्विज !।
स स्वर्गलोकं संभुज्य सर्व्वकामोऽत्र जायते॥
विद्या भक्ष्या प्रयच्छेद्यः परंब्रह्मक्षयौ विशेत्।
विद्यार्थिने च विप्राय यो दद्याद्भोजनं नरः॥
अन्नं प्राणो जलं प्राणः प्राणश्चौषधमुच्यते।
तस्मादौषधदानेन दत्ताः स्युरसवो द्विजाः॥
इति पराशरस्मृतिः॥

भोजने प्रतिषेधो यथा,—

"ताम्रपात्रे पयःपानमुच्छिष्टे घृतभोजनम्।
दुग्धे च लवणं दद्यात् सद्यो गोमांसभक्षणम्॥
यः शूद्रेण समाकृष्टो भोजनं कुरुते द्विजः।
सुरापश्च स विज्ञेयः सर्व्वधर्म्मबहिष्कृतः॥
स्नानं रजकतीर्थेषु भोजनं गणिकालये।
ग्रहणं पूर्व्वपादे च ब्रह्महत्या दिने दिने॥"
इति कर्म्मलोचनम्॥

अथ शिशूनां प्रथमान्नभोजनदिनादि। यथा, यमः।

"ततोऽन्नप्राशनं मासि षष्ठे कार्य्यं यथाविधि।
अथवे वाथ कर्त्तव्यं वर्षेवं मङ्गलं कुले॥"

षष्ठ इति सुखः कथ्यः प्रागुक्तन्यायात्। कथ
चिन्तामणौ।

"अन्नस्य प्राशनं प्रोक्तं मासि षष्ठेऽथमे वुधैः।
स्त्रीणान्तु पञ्चमे मासि सप्तमे प्रजगौ मुनिः॥
द्वादशीमप्यमीनन्दारिक्तासु पञ्चपर्व्वसु।
बलमायुर्यशो हन्यात् शिशूनामन्नभोजनम्॥"

सुजनवल्लभीमे।

"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वै
तिथौ
सौम्यादित्यसितेन्द्रजीववित्तसे पक्षे च शुक्लेतरे
प्राजेशादितिपौष्णवैष्णवयुगे हस्तादिपञ्चोत्तरै
रामेथाप्यतिपित्रभेच्च नितरामन्नादिभक्षे
शुभम्॥"

युगैरिति प्राजेशादौ प्रत्येकं सम्बध्यते अन्ना
निशाद्विहस्तं विवर्जयेत्।

"वृषद्वन्द्वधनुर्मीनकन्यालक्षेऽन्नभक्षणम्।
त्रिकोणाष्टकयूकान्त्यगृहा यद्यत्तथा फलम्॥
दुष्टः ग्रहगुरौ लग्नात् षष्ठाष्टस्थेऽन्नभक्षणे॥"

मार्कण्डेयपुराणम्।

"देवतापुरतस्तस्य पितुरङ्गगतस्य च।
अलङ्कृतस्य दातव्यमन्नं प्राशे च काञ्चने॥
मध्याह्नव्यक्तकोपेतं प्राशयेत् पायसन्ततः।
तत्प्राशनमनुसङ्गे मातुर्वालनु तं त्यजेत्॥
देवायतोऽथ विन्यस्य शिल्पभाञ्जानि सर्व्वशः
प्राक्षाणि चैव शस्त्राणि ततः पश्चेत्तु बालकम्
प्रथमं यत् स्पृशेद्बालः शिल्पभाञ्जं स्वयं तथा।
जीविका तस्य बालस्य तेनैव तु भविष्यति॥"

सोमवारे दीर्घमाह भोजराजः।

"वाचालो बलवान् दिने दिवपतेरल्पदीप्रा-
नलो
देही दीनकृताशनः शिशिरगौ क्षीणे कृशा
प्रौढितः।
शीघ्रे भोगसुखोदयी प्रथमशुक्रीघ्रे चिराद्
सुखी
शुक्रे सौख्यबलान्वितोऽतिसुभगो मन्दे च
मन्दानलः॥"
इति ज्योतिस्तत्त्वम्॥

तद्वैदिकपर्य्यायाः। आचयति १ भर्वति २ वभक्ति ३ वेति ४ वेवेष्टि ५ अधिघ्यन् ६ वष्टति भसथः ८ वक्ष्यामः ९ करति १०। इति दशाग्नि कर्म्माङ्गः। इति वेदनिघण्टौ २ अध्यायः॥

(तथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।

"वक्ष्यामः परं कृत्स्नमाहारस्योपकल्पनाम्
घृतं कार्ष्ण्यायसे देयं पेया देया तु राजते॥
फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्दैदलेषु च।
परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत्॥
प्रदराणि रसांश्चैव राजतेषूपहारयेत्।
कङ्गराणि खड्गांश्चैव सर्व्वान् ग्रैवेयु दापयेत्॥
दद्यात्ताम्रमये पात्रे सुशीतं सुव्रतं पयः।
मार्त्तीकं पानकं मद्यं स्फटिकेषु प्रदापयेत्॥
काचस्फटिकपात्रेषु शीतेषु शुभेषु च।
दद्याद्दैदूर्य्यपात्रेषु रागषाड्वसङ्कान॥

पुरस्तादिमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेशांश्च सुसंस्कृतान् ॥
फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च ।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥
प्रदद्यादपि रसांश्चैव पाणीयं पानकं पयः ।
खड्डान् यूषांश्च पेयांश्च सर्व्वे पार्श्वे प्रदापयेत् ॥
सर्व्वान् गुडविकारांश्च रागषाड्वसंकृतान् ।
पुरस्तात् स्थापयेत्प्राज्ञो हयोरपि च मथतः ॥
इदं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।
भोक्तारं विजने रम्ये निःसम्बाधे सुखे शुचौ ॥
सुगन्धिपुष्परचिते समे देशेऽथ भोजयेत् ।
पूर्व्वं मधुरमश्नीयान्मध्येऽम्ललवणौ रसौ ॥
पश्चाच्छेषान् रसान् वैद्यो भोजनेष्ववचारयेत् ।
आदौ फलानि भुञ्जीत दाड़िमादीनि बुद्धिमान् ॥
ततः पेयांस्ततो भोज्यान् भक्ष्यांश्चिर्वासतःपरम् ।
घनपूर्व्वं समश्नीयात् केचिदाहुर्विपर्य्ययम् ॥
आदावन्ते च मध्ये च भोजनस्य तु भक्षते ।
अतीवायतयामास्तु क्षपा येष्वृतुषु क्षताः ॥
तेषु तत्प्रत्यनीकार्द्धा भुञ्जीत प्रातरेव तु ।
येषु चापि भवेयुश्च दिवसा भृशमायताः ॥
तेषु तत्कालविहितमपराह्णे प्रशस्यते ।
रजन्यो दिवसाश्चैव येषु चापि समाः क्षताः ॥
क्षपासममहोरात्रं तेषु भुञ्जीत भोजनम् ।
तस्मात् सुसंस्कृतं युक्त्या दोषैरेतैर्विवर्ज्जितम् ।
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम् ॥"

भोजनपात्रं, क्ली, (भोजनस्य पात्रम् ।) भक्ष्यद्रव्याधारः । यथा,—

"तिष्ठन्ति यत्र नवकाञ्चननिर्म्मितानि
श्रेणीकृतानि परितस्तु कटोरकाणि ।
राकाप्रभाङ्कनवमण्डलभास्करं यत्
तौर्णोष्टनां रजतनिर्म्मितथालकं स्यात् ॥
यद्योर्द्धप्रतिमादर्शिकांस्यमादर्शवत् शुचि ।
पात्रं दृढं सुविस्तीर्णं स्त्रीणामत्यन्तदुर्लभम् ॥
पत्रावली भवति वा नृपभोजनाय
निर्लन्तुजालरहितामलवारिधौता ।
पालाशभूरुहदलैरचिता मनोज्ञा
ताडिद्विपर्णकगणैः परिवेष्टिता च ॥"

इति पाकरत्नेश्वरः ॥

भोजपतिः, पुं. (भोजानां भोजवंशीयानां पतिः ।) कंसराजः । यथा,—

"मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराड़विदुषां तत्त्वं परं योगिनां
वृष्णीनां परदेवतेति विदितो रङ्गंगतः साग्रजः ॥"

इति श्रीभागवते १०स्कन्धे ४३ अध्याये २७ श्लोकः ॥

भोजपुरं, क्ली, (भोजस्य भोजराजस्य पुरम् ।) स्वनामख्यातदेशः ।

"आजिरभूद्भोजपुरे साकमसुरवरैः ।
हरे रेवापारे सबलो नूनं ते लघीयांसः ॥"

इति विदग्धमुखमण्डनम् ॥

भोजयिता, [तृ] त्रि, (भुज् + णिच् + कर्त्तरि तृच् ।) भोजनकारयिता । भोगप्रयोजकः । यथा,

"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्याये ॥

भोजाधिपः, पुं, (भोजस्य अधिपः ।) कंसराजः । इति शब्दरत्नावली ॥

भोज्यं, त्रि, (भुज्यते इति । भुज् + कर्म्मणि + ण्यत् । "भोज्यं भक्ष्ये ।" ७ । ३ । ६९ । इति निपातनात् न कुत्वम्) भोजनीयद्रव्यम् । यथा,

"भोज्यं भोजनशक्तिश्च रतिशक्तिर्वरा स्त्रियः ।
विभवो दानशक्तिश्च नाल्पस्य तपसः फलम् ॥"

इति चाणक्ये ५१ श्लोकः ॥

अपि च ।

"आहारं षड्विधं चूष्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्व्यं गुरु विद्यादृथोत्तरम् ॥"

चूष्यं इक्षुदण्डादि । पेयं पानकशर्करोदकादि । लेह्यं रसालाकथितादि । भोज्यं भक्तसूपादि । भक्ष्यं लड्डुकमण्डकादि । चर्व्व्यं चिपिटचणकादि । इति भावप्रकाशः ॥ (पितॄणां तृप्त्यर्थं देये अन्नादौ च ॥)

भोज्यदानस्येतिकर्त्तव्यता यथा । ॐ अद्येत्यादि कृतैतत्सघृतसवस्त्रोपकरणामान्नभोज्यमर्च्चितं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । ततो दक्षिणा । ॐ अद्येत्यादि कृतैतत्सघृतसवस्त्रोपकरणामान्नभोज्यदानकर्म्मणः साङ्गतार्थं दक्षिणामिदं काञ्चनमूल्यं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । कृतैतत्सघृतसवस्त्रोपकरणामान्नभोज्यदानकर्म्माच्छिद्रमस्तु । इति आह्निकप्रयोगतत्त्वम् ॥

भोज्यसम्भवः, पुं, (सम्भवत्यस्मादिति सम्भव उत्पत्तिकारणम् । भोज्यं सम्भवोऽस्य ।) शरीरस्थरसधातुः । इति शब्दचन्द्रिका ॥

भोटाङ्गः, पुं, (भोटस्याङ्गातिरङ्गस्य ।) देशविशेषः । इति शब्दरत्नावली । भोटान् इति भाषा ॥ (भोटाङ्गोऽपि पाठः ॥)

भोभो, व, सम्बोधनम् । इति हलायुधः ॥ (यथा, महाभाष्टके । १ । १४ ।

"भोभो सुवज्र ! तरुपल्लवलोलजिह्व ! ॥")

भोलानाथः, पुं, शिवः । यथा,—

"ब्रह्मणो वचनं श्रुत्वा भोलानाथः कृपानिधिः ।
संहृत्य तां महाज्वालां सगणोऽन्तरगाच्छुने ॥"

इति श्रीशिवपुराणोत्तरखण्डे तुङ्गिवामदेवसंवादे वाराणसीमाहात्म्ये पञ्चक्रोशीयात्रायां महाकालगणोत्पत्तिर्नाम २५ अध्यायः ॥ * ॥

पुस्तकान्तरे भोलानाथ इत्यत्र महादेव इति पाठः ॥

भौलिः, पुं, उष्ट्रः । इति त्रिकाण्डशेषः ॥

भौतः, पुं, (भूतानि प्राणिनोऽधिकृत्य प्रवृत्तः । भूत + अण् ।) भूतयज्ञः । बलिकर्म्म । यथा,—

"होमो देवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

इत्याह्निकतत्त्वम् ॥ देवलः । इति शब्दमाला ॥ (भिक्षादिभ्योऽण् । भूतसङ्घः । तस्येदमित्यण् ।) भूतसम्बन्धिनि, त्रि ॥

भौतिकं, क्ली, (भूतानां विकार इति ठक् ।) सुक्ता । इति राजनिर्घण्टः ॥ त्रि, भूतसम्बन्धि ॥ (भूतानि चित्यादीनि तद्विकारश्च गोघटवृक्षादयः ।

"आहङ्कारिकसृष्टेर्न भौतिकानि ।" इति । २ । २० । सांख्यसूत्रम् ॥ सृष्टिविशेषश्च । तथाच । "ईश्वरकृष्णकृतसांख्यकारिकायाम् । अष्ट विकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति । मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥ अत्र च सर्गे चैतन्योत्कर्षापकर्षविशेषात् तारतम्यम् । यथा, तत्रैव । ऊर्द्धं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः । मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्य्यन्तः ॥

भौतिकः, पुं, महादेवः । इति त्रिकाण्डशेषः ॥ (उपद्रवः । व्याध्यादिः । चक्षुरादि । शरीरादि ॥ (भूतेषु महदादिचित्यन्तेषु आत्मबुद्ध्या उपासकाः भौतिकाः । बौद्धविशेषाः ।

"भौतिकास्तु शून्यं पूर्णं सहसत्त्वाभिमानिकाः ॥"

इति पातञ्जलयोगसूत्रव्यासभाष्यटीकायां वाचस्पतिमिश्रधृतवचनम् । १ । १६ ॥)

भौती, स्त्री, (भूतानां भूतयोनीनामियमिति । भूत + अण् । ङीप् । तस्यां भूतानामधिकारित्वविद्यमानत्वात्तथात्वम् ।) रात्रिः । इति हेमचन्द्रः । १४२ ॥

भौत्यः, पुं. (भूतेरपत्यं पुमान् । भूतिः + अपत्यार्थे ष्यञ् ।) भूतिसुनिपुत्रश्चतुर्थो मनुः । यथा,—

मार्कण्डेय उवाच ।

"अतः परन्तु भौत्यस्य त्वसुतृप्तिं निशामय ।
देवावृधोंस्तथा पुत्रांस्तथैव वसुधाधिपान् ॥
बभूवाङ्गिरसः पुत्रो भूतिर्नाम्नातिकोपनः ।
तस्य भ्राता सुवर्चोभूद् यज्ञे तेन निमन्त्रितः ॥
ययासुः शान्तिनामानं शिष्यमाह महामुनिः ।
यदीदृशं सदाचारसुदारं सुनिसत्तमम् ॥

भूतिरुवाच ।

अहं यज्ञं गमिष्यामि भ्रातुः शान्ते ! सुवर्चसः ।
तेनाद्भुतस्त्वया चेह यत् कर्त्तव्यं ब्रवीतु तत् ॥
अतिजागरणं वह्नेस्त्वया कार्य्यं ममाश्रमे ।
तथा तथाप्रमत्तेन यथाग्निर्न शमं व्रजेत् ।
इत्याज्ञप्ते तथेत्युक्तः स तु शिष्येण शान्तिना ।
जगाम यज्ञं तं भ्रातुराहूतः सन् यवीयसा ॥
प्रशान्तस्तावदनलो योऽसौ भूतिपरिग्रहः ।
तं दृष्ट्वा सोऽनलं शान्तं शान्तिरत्यन्तदुःखितः ।
भौतश्च भूतैर्बहुधा चिन्तयन् स महामुनिः ॥

भौत्यः

मार्कण्डेय उवाच ।
बहुधैवं विचिन्त्यासौ भीतस्तस्य तदा गुरोः ।
ययौ मतिमतां श्रेष्ठः शरणं जातवेदसम् ॥
स चकार ततः स्तोत्रं सप्तार्चेर्यतमानसः ।
भूत्वैकचित्तो मेदिन्यां न्यस्तजानुः कृताञ्जलिः ॥
स एवं संस्तुतस्तेन भगवान् हव्यवाहनः ।
ज्वालामालाकुलततुस्तस्यासीदयतो मुने ! ॥
परितुष्टोऽस्मि ते विप्र ! भक्त्या यत्ते स्तुतिः कृता ।
वरं ददामि भवतः प्रार्थितं यत्तवेप्सितम् ॥
भगवन् ! कृतकृत्योऽस्मि यत्त्वां पश्यामि रूपिणम् ।
तथापि भक्तिनम्रस्य भगवन् ! श्रूयतां मम ॥
ममापराधात् संत्रस्तं यत्तेऽधिष्ठं विभावसो ! ।
तत्त्वयाधिष्ठितं सोऽत्र पूर्ववत् पश्यतां द्विजः ॥
तथाप्यदपि मे देव ! प्रसादं कुरुषे यदि ।
पुत्रो विश्रिष्टो भवतु निरपत्यस्य मे गुरोः ॥
यथा च मैत्रीं तनये स करिष्यति मे गुरुः ।
तथा समस्तमस्त्वेतु भवत्वस्य मनो ह्यदु ॥
अग्निरुवाच ।
गुरोरर्थं त्वया ब्रह्मन् ! याचितं यदरङ्गयम् ।
नात्मार्थं तेन मे प्रीतिस्तथ्यतीव महामुने ! ॥
भविष्यत्येतदखिलं गुरोर्यत् प्रार्थितं त्वया ।
मैत्री समक्षभूतेषु पुत्रस्तस्य भविष्यति ॥
मन्वन्तराधिपः पुत्रो भौत्यो नाम भविष्यति ।
महाबलो महावीर्यो महाप्राज्ञो गुरोस्तव ॥
इत्युक्त्वा भगवानग्निः पश्यतस्तस्य वै मुने ! ।
बभूवादर्शनः सद्यः प्रदीपो निर्वृतो यथा ॥
एतस्मिन्नन्तरे सोऽपि गुरुस्तस्य महात्मनः ।
भ्रातुर्यवीयसो यज्ञादाजगाम समाश्रमम् ॥
तस्यागतस्य शिष्योऽसौ चक्रे पादाभिवन्दनम् ।
गृहीतासनपूजञ्च तमाह स तदा गुरुः ॥
वत्सातिस्नेहतस्त्वयि मे तथाग्नेष्वपि जन्तुषु ।
न वैम्नि किमिदं लक्षेदृत्तमेतत् कथयाशु मे ॥
ततः स ज्ञात्वितत् सर्वमाचार्याय महात्मने ।
अग्निगाथादिकं विप्र ! समाचष्ट यथातथम् ॥
सञ्चुत्वा स परिष्वज्य स्नेहार्द्रनयनो गुरुः ।
शिष्याय ददौ वेदान् साङ्गोपाङ्गान् महात्मने ॥
भौत्यो नाम मनुस्तस्य पुत्रो भूतिरजायत ।
तस्य मन्वन्तरे देवाद्यान् भूपांश्च मे शृणु ॥
भविष्यस्य भविष्यांस्तु गदतो मम विस्तरात् ।
देवेन्द्रो यत्र भविता तस्य विख्यातकर्मणः ॥
चाक्षुषाश्च वसिष्ठाश्च पवित्रा भानिरास्तथा ।
रजोधिकाश्च ह्यते पञ्च देवगणाः स्मृताः ॥
शुचिरिन्द्रस्तथा तेषां निदर्शनानं भविष्यति ।
महाबलो महावीर्यः सर्वैरिन्द्रगुणैर्युतः ॥
अग्नीध्रबाहुधिवाहुश्च शुचिर्युक्तोऽथ माधवः ।
शुक्रो धृतश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥
गुरुर्गभीरो ब्रह्मश्च भरद्वाजस्य एव च ।
स्त्रीमानी च प्रवीरश्च विष्णुः संक्रन्दनस्तथा ॥
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः ।
चतुर्दशं मयैतत्ते मन्वन्तरमुदाहृतम् ॥"
इति मार्कण्डेयपुराणे मन्वन्तरानुवर्णनंनामाध्यायः ॥

भौमिकः

भौमः, पुं, (भूमेरपत्यं । भूमि + शिवादित्वादण् ।) मङ्गलग्रहः । (यथा, हरिवंशे । १२० । १४ ।
"ताभ्यां पुरवरं भौमोऽकारयन्नभि-
पर्वतम् ॥")
तत्रेदमित्यण् । भूमिभवे, त्रि । इति मेदिनी । मे, ९२ । (यथा, महाभारते । १ । १९६ । २० ।
"भौमेन प्राविशद्भूमिं पार्वतेनाभवद्गिरिः ।
अन्तर्धानेन चाक्षेण पुनरन्तर्हितोऽभवत् ॥")
अमरः । इति धरणिः ॥ रक्तपुनर्नवा । इति राजनिर्घण्टः ॥
भौमजलं, क्ली, (भूमि + अण् ।) भूमिसम्बन्धि-सलिलम् । तत् त्रिविधं यथा,—
"भौममम्भो निगदितं प्रथमं त्रिविधं बुधैः ।
जाङ्गलं परमानूपं ततः साधारणं क्रमात् ॥"
तेषां लक्षणानि गुणाश्च ।
"अल्पोदकोल्पवृक्षञ्च पित्तरक्तामयान्वितः ।
देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ॥
मिश्रं चिह्नैस्तु यो देशः स हि साधारणः स्मृतः ।
तस्मिन् देशे यदुदकं तत्तु साधारणं स्मृतम् ॥
जाङ्गलं सलिलं रूक्षं लवणं लघु तत्तनु ।
वह्निकृत् कफहृत् पथ्यं विकारान् कुरुते बहून् ॥
आनूपं वार्य्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु ।
वह्निकृत् कफकृन्नित्यं विकारान् कुरुते बहून् ॥
साधारणन्तु मधुरं दीपनं शीतलं लघु ।
तर्पणं रोचनं हृद्यादाहदोषक्षयप्रणुत् ॥"
अथ भौमानामेव नादेयादीनां लक्षणानि गुणाश्च । तत्र नादेयस्य लक्षणं गुणाश्च ।
"नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ।
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ।
अनभिष्यन्दि विशदं कटुकं कफपित्तहृत् ॥
नद्यः शीघ्रवहा लघ्वः सर्व्वा याश्चामलौदकाः ।
गुर्व्वयः शैवलसंछन्ना मन्दगाः कलुषाश्च याः ॥
नदीसरस्तडागस्थं कूपप्रस्रवजादिजे ।
उदके देशभेदेन गुणान् दोषांश्च लक्षयेत् ॥"
इति भावप्रकाशः ॥
भौमनः, पुं, (व्यादिसर्गे भवतीति भू + कर्त्तरि मन् । भूमा ब्रह्मा । तस्यापत्यम् । अण् । मनन्तत्वात् न टेर्लोपः ।) विश्वकर्म्मा । इति पुराणम् ॥ (यथा, महाभारते । १।२२६ । १२ ।
"सवर्ण्णं यं सुतपसा भौमनो भुवनप्रभुः ।
प्रजापतिरनिर्देश्यं यस्य रूपं रवेरिव ॥"
भौमरत्नं, क्ली, (भूमौ जातं । भूमि + अण् । तादृशं रत्नम् ।) प्रवालम् । इति राजनिर्घण्टः ॥
भौमिकः, त्रि, भूम्यधिकारी । भूमिमधिकरोति यः । इत्यर्थे ठिकप्रत्ययेन निष्पन्नः ॥ (भूमिस्थितः । यथा, मनौ । ५ । १४२ ।
"क्षुध्यन्ति विन्दवः पादौ य आचामयतः परान् ।
भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥")
भौमी, स्त्री, (भूम्यां जाता । भूमिः + अण् + स्त्रीत्वात् ङीप् ।) सीता । इति शब्दरत्नावली ॥
भौरिकः, पुं, (भूरि सुवर्णमधिकरोतीति ठक ।) कनकाध्यक्षः । इत्यमरः । २ । ७ ॥
भ्राश्, ऋ ञ ट ड भासि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ अवभ्राश्यत् । ञ भ्रेशे बभ्राशे । ट भ्राश्यटुः । ड भ्राशते । इति दुर्गादासः ॥
भ्राश्, य ड भासि । इति कविकल्पद्रुमः ॥ (दिवा० आत्म०-अक०-सेट् ।) य ड भ्राश्यते । इति दुर्गादासः ॥
भ्रास, ऋ ञ ड ट भासि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्० ।) ऋ अवभ्रासत् । ञ भ्रेसे बभ्रासे । ड भ्रासते । ट भ्रासयुः । इति दुर्गादासः ॥
भ्रास, य ड भासि । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-सेट् ।) य ड भ्रास्यते । इति दुर्गादासः ॥
भ्यस, ड भये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) अन्तःस्थाद्ययुक्तः । ड भ्यसते । इति दुर्गादासः ॥
भ्रंशः, पुं, (भ्रंशु + भावे घञ् ।) अधःपतनम् । यथा । श्रेयो भ्रंशो यथोचितात् । इत्यमरः । २ । १८६ । २३ ॥ यथोचितात् यथाप्राप्तात् भ्रंशोऽधःपतनम् । इति श्रेयश्शब्दटीकायां भरतः ॥ (यथा, कामन्दकीये नीतिसारे ।२।३६।
"उद्देजनादधर्म्मस्तु तस्माद् भ्रंशो महीपतेः ॥"
नाशः । यथा, हरिवंशे । ४६ । २५ ।
"शाखाभङ्गोऽकस्मात्
वृक्षाणां निर्हेतोर्द्रव्योद्योगम् ।
हसने देशभ्रंशं
रुदिते च व्याधिबाहुल्यम् ॥")
भ्रकुंशः, पुं, (भ्रुवा कुंशो भाषणं यस्य । पृषोदरादित्वात् तस्य शः ।) स्त्रीवेशधारी नर्त्तकपुरुषः । इत्यमरटीकायाम् ॥ (अस्य विशेषो भकुंसशब्दे द्रष्टव्यः ॥)
भ्रकुंसः, पुं, (भ्रुवा कुंसो भाषणं शोभा वा यस्य सः ।६। ३ । ६१ । इत्यस्य "भ्रकुंसादीनामकारो भवतीति वक्तव्यम् ।" इति वार्त्तिकोक्त्या उकारस्यात्वम् ।) स्त्रीवेशधारी नर्त्तकपुरुषः । तत्पर्य्यायः । भुकुंसः २ भूकुंसः ३ । इत्यमरः १।७४४। भ्रकुंसः ४ भ्रकुंशः५ । इति तट्टीका ॥
भ्रकुटिः, स्त्री, (भ्रुवोः कुटिः कौटिल्यम् । "भ्रुकुंसादीनामकारो भवतीति वक्तव्यम्।" ६।३।६१ । इत्यस्य वार्त्तिकोक्त्या । उकारस्यात्वम् ।) क्रोधादिना भ्रुवः कौटिल्यम् । इत्यमरः ।१।७ । ३७ ॥ अस्या रूपान्तराणि । भ्रुकुटिः । भ्रूकुटिः । भृकुटिः । भ्रुकुटी । भ्रुकुटी । (यथा, माघे ।१५।८।
"भ्रुकुटीकठोरितललाटमाननम् ")
भ्रूकुटी । भृकुटी । इति भरतः ॥

भ्रम, गृम्ब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफयुक्तः। भ्रमति। इति दुर्गादासः॥

भ्रमृग्, इर् ब उ अधःपते। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) अभ्रंशति। इर् अभ्रंशत्। अभ्रंशीत्॥

भ्रमृग्, ह उ ड अधःपते। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०सेट्।) ह अभ्रंशत्। उ अंशिला अभ्रा। ड अंशते। इति दुर्गादासः॥

भ्रम, इर् चाले। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) इर् अभ्रमत् अभ्रमीत्। इति दुर्गादासः॥

भ्रम, भ ब चाले। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) भ य भाम्यति। इति दुर्गादासः॥

भ्रम, उ अ क चाले। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) उ भ्रमित्वा भाम्भा। अ भ्रामः भ्रमः। ज्वलादित्वात्प्रत्ययेऽपि जनवध इत्यादिना इत्वे भ्रम इत्येव। तेन ज्वलादावस्य पाठो निष्फल इति धातुप्रदीपादयः। वस्तुतस्तु। ज्वलादिपाठसामर्थ्यान्न इत्वः। ब भ्रेमतुः बभ्रमतुः। य भ्राम्यति। भ्रमति। चाल इह पादविहरणम्।

"न जाने को हेतुर्भ्रमति विपिने भिक्षुक इव।"

भ्रेमुः श्लोकत्रयात् भीमादित्वाच्च गत्यर्थविवक्षया सकर्मकत्वम्। इति दुर्गादासः॥

भ्रमः, पुं, (भ्रम अनवस्थाने इति। भ्रम+भावे घञ्।) मिथ्याज्ञानम्। (यथा, राजतरङ्गिण्याम्। ३। ४२३।

"देवो जगाद तं भद्र! कोऽयं ते मनसि भ्रमः॥")

तत्पर्य्यायः। भ्रान्तिः २ मिथ्यामतिः ३। इत्यमरः। १। ५। ४। अनुनिर्गमः। कुन्दः। (यथा, रघौ। ६। ३२।

"अवन्तिनाथोऽयमुदग्रबाहु-
र्विशालवक्षास्तनुवृत्तमध्यः।
आरोप्य चक्रभ्रममुच्चतेजाः
त्वष्टेव यत्नोल्लिखितो विभाति॥"

"चक्रभ्रमं चक्राकारभ्रमोत्पत्तिजनयत्नम्।
भ्रमोऽनुनिर्गमे भ्रान्तौ कुन्दाख्ये शिल्पियन्त्रके॥"

इति तट्टीकायां मल्लिनाथः॥)

भ्रमणम्। इति मेदिनी। मे, २०॥ (यथा, कथासरित्सागरे। २०। ४६।

"एवं श्लोकत्रयं यच्च जगत् तं भ्रमाय वणिक्-
सुतम्।")

न्यायमते भ्रमस्य नामान्तरं अप्रमा। भ्रमोद्विविधः। विपर्य्यासः संशयश्च। आद्यो यथा। देहे आत्मबुद्धिः। शुक्तादौ पीततामतिः। सा निश्चयरूपा। द्वितीयो यथा। किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः॥

तदभावप्रकारा धीस्तत्प्रकारा तु निश्चयः।
स संशयो भवेद् यत्र धीरेकत्राभावभावयोः॥
साधारणधर्म्मस्य ज्ञानं संशयकारणम्।
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्॥
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः।"

इति भाषापरिच्छेदः। १२७—१३२॥

(भ्रमणशीले, त्रि॥ यथा, ऋग्वेदे। ६। ६। ४।

"अधभ्रमस्य उर्ज्जिया विभाति
यातयमानो अधिसानुपृश्निः॥"

"भ्रमो भ्रमणशीलो ज्वालासमूहः॥" इति तद्भाष्ये सायणः॥ रोगविशेषः। तद्यथा,—

"मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः।
चक्रवद्भ्रमतो गात्रं भूमौ पतति सर्व्वदा।
भ्रमरोग इति ज्ञेयो रजःपित्तानिलात्मकः॥"

इति वैद्यकमाधवनिदानरत्नविनिश्चये मूर्च्छाधिकारे॥ तथाचास्य चिकित्सा॥

"घृताक्तरी बलामूलब्राह्याश्विहं पयः पिबेत्।
सर्पिः भ्रमनाशाय शीलं वाप्यालकस्य च॥
पिबेदुरालभाक्काथं सघृतं भ्रमशान्तये।
त्रिफलायाः प्रयोगो वा प्रयोगः पयसोऽपि वा॥

इति वैद्यकचक्रपाणिसंग्रहे मूर्च्छाधिकारे॥)

भ्रमणं, क्ली, (भ्रम+भावे ल्युट्।) गमनविशेषः। पर्य्यटनम्। (यथा, भाषापरिच्छेदे। ७।

"भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च॥"

पुनःपुनर्गमनम्। यथा, देवीभागवते। १।१४।४६॥

"संसारेऽस्मिन्महाघोरे भ्रमणं नभचक्रवत्॥"

तथाच, कामन्दकीये। १४। २४।

"नवाग्निधूमसंरोधो दिङ्मोहो भ्रमणानि च॥"

"भ्रमणानि दिग्भ्रमात् दुर्गमप्रदेशेषु चंक्रमणानि।"

भ्रमत्यस्मिन्नेनेति वा। भ्रम+ल्युट्।) मण्डलम्। यथा, सूर्य्यसिद्धान्ते। १२। ७६।

"कालेनाल्पेन भ्रमणं सुस्क्ष्मेऽल्पभ्रमणाश्रितः।
यद्वत् कालेन महता मण्डले महति भ्रमन्॥"

अल्पभ्रमणं स्वल्पपरिधिमण्डलमानमित्यर्थः। उत्तरपदे मण्डले महतीति दर्शनात्॥)

हस्त्यश्वरथदोलादिद्वारा भ्रमणगुणः। वातकोपनत्वम्। अङ्गसौष्ठवकरत्वम्। बलाग्निविवर्द्धनत्वञ्च। इति राजवल्लभः॥

भ्रमणी, स्त्री, (भ्राम्यति अनयेति भ्रम+करणे ल्युट्। ङीप्।) कारण्डिका। अधोगितुः क्रीड़ार्थाः। इति मेदिनी। णे, ६६॥

भ्रमत्कुटी, स्त्री, (भ्रमन्ती चलन्ती कुटी क्षुद्रगृहमिव।) ललाटम्। तत्पर्य्यायः। कावारी २ जङ्गलकुटी। इति त्रिकाण्डशेषः॥

भ्रमरः, पुं, (भ्रमति प्रतिकुसुममिति॥ अर्त्तिकमीत्यादिना। "उणा० ३।१३२। इति अरः।) कीटविशेषः। (यथा, रघुवंशे। ८। ३८।

"भ्रमरैः कुसुमानुसारिभिः।")

तत्पर्य्यायः। मधुव्रतः२ मधुकरः३ मधुलिट् ४ मधुपः५ अलीः६ द्विरेफः७ पुष्पलिट् ८ भृङ्गः ९ षट्पदः१० अलिः११। इत्यमरः। २।५।२६॥ कलालापः१२ श्रिलीमुखः१३ पुष्पलयः१४ मधुव्रतः १५ द्विपः १६ भसरः १७ चञ्चरीकः १८ सुकाण्डी१९ मधुलोलुपः२० इन्दिन्दिरः२१ मधुमारकः२२। इति राजनिर्घण्टः॥ मधुपरः २३ लम्बः२४ पुष्पकीटः२५ मधुसूदनः२६ भृङ्गराजः २७ मधुव्रतौ २८ रेणुवासः २९। इति शब्दरत्नावली॥ कामुकः। इति मेदिनी। रे, १६२॥

भ्रमरकः, पुं, (भ्रमर इवेति भ्रमर+"इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) ललाटलम्बितचूर्णकुन्तलः। इत्यमरः। २। ६६॥ (स्वार्थे कन्। भृङ्गः। बालभ्रमिकः। इति। मेदिनी। के, २०४॥ अस्य भ्रमः। इति विश्वः॥

भ्रमरकीटः, पुं, (भ्रमर इव कीटः।) कीटविशेषः। कुमरे पोका इति भाषा॥ यथा,—

"जीवन्मुक्तिस्तु तद्विद्वान् पूर्व्वोपाधिगुणांस्त्यजेत्।
सच्चिदानन्दधर्म्मत्वाद्भजेद्भ्रमरकीटवत्॥"

इत्यात्मबोधः॥

भ्रमरच्छली, स्त्री, (भ्रमरान् छलयतीति। छल+अच्। गौरादित्वात् ङीष्।) लताविशेषः। तत्पर्य्यायः। भृङ्गाह्वा २ भ्रमरा ३ भृङ्गपुत्रिका ४। अस्या गुणाः। यथा, राजनिर्घण्टे।

"भृङ्गच्छली च कटुका तिक्ता दीपनरोचनी।"

भ्रमरप्रियः, पुं, (भ्रमरस्य प्रियः।) धाराकदम्बः। इति रत्नमाला॥

भ्रमरमारी, स्त्री, (भ्रमरान् मारयति गन्धोत्कर्षेण व्याकुलयतीति। मृ+णिच्+अण्। गौरादित्वात् ङीष्।) मालवदेशप्रसिद्धपुष्पवृक्षविशेषः। तत्पर्य्यायः। भ्रमरारिः २ भृङ्गारिः ३ भृङ्गमारी ४ मांसपुष्पिका ५ कुठारिः ६ भ्रमरी ७ वल्लिलता ८। अस्या गुणाः। तिक्तत्वम्। पित्तश्लेष्मज्वरनाशित्वम्। ग्रीष्मकृच्छ्रातिकुष्ठव्रणदोषत्रिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

भ्रमरा, स्त्री, (भ्रमर+अजादित्वात् टाप्।) भ्रमरच्छली। इति राजनिर्घण्टः॥

भ्रमरातिथिः, पुं, (भ्रमरः अतिथिरभ्यागतो यस्य।) चम्पकः। इति राजनिर्घण्टः॥

भ्रमरानन्दः, पुं, (मधुवाहुल्यात् भ्रमराणामानन्दो यस्मात् सः।) वकुलः। अतिमुक्तकः। रक्ताम्लानः। इति राजनिर्घण्टः॥

भ्रमरालकः, पुं, (भ्रमर इव अलति भूषयतीति। अल+ण्वुल्।) ललाटस्थितचूर्णकुन्तलः। तत्पर्य्यायः। भ्रमरकः २ कुरलः ३। इति हेमचन्द्रः। ३। २३३॥

भ्रमरी, स्त्री, (भ्रमर+ङीष्।) जतुका। पुत्रदात्री। षट्पदी। इति राजनिर्घण्टः॥

भ्रमरेष्टः, पुं, (भ्रमराणामिष्टः।) श्योनाकप्रभेदः। इति राजनिर्घण्टः॥

भ्रमरेष्टा, स्त्री, (भ्रमराणामिष्टा।) भार्गी। भूमिजम्बूः। इति राजनिर्घण्टः॥

भ्रमरोत्सवा, स्त्री, (भ्रमराणां उत्सवः प्रमोदो यस्याः।) माधवी। इति राजनिर्घण्टः॥

भ्रमासक्तः, पुं, (भ्रमे भ्रमणे आसक्तः युक्तः।) शुक्लमार्जकः। इति हेमचन्द्रः। ३। ५८०॥

भ्रमिः, स्त्री, (भ्रम+बाहुलकात् इः।) भ्रमणम्। तत्पर्य्यायः। भ्रमः २। इत्यमरः।३।२।६॥ भ्रमी ३। इति भरतः॥ (मण्डलाकारगतिः ४। तथाच नैषधचरिते। १। ७३।

"अचीकरच्चारुदृशेन या भ्रमी-
र्निजातपत्रस्य तलस्थले नलः।")

मण्डलाकारसैन्यरचना। यथा,—

"वीरान् सहस्रशो दृष्ट्वा भ्रमिभिः पर्य्यवस्थितान्।
लवो लवेन सन्धाय शरान् रोषप्रपूरितः॥
भ्रमिराद्या सहस्रेण द्वितीयायुतसङ्ख्या।
तृतीयायुतयुग्मेन तुरीयायुतषट्कभिः॥
पञ्चमी लक्षयोधानां षष्ठी योधायुताधिकैः।
सप्तमी लक्षयुग्मेन सप्तभिर्भ्रमिभिर्युतान्॥
मध्ये लवो भ्रमियान्तः सञ्चरन् वह्निवत्तदा।
दाहयामास सर्व्वान् वै सैनिकान् भ्रमिकारकान्॥"

इति पाद्मे पातालखण्डे ६१ अध्यायः॥

भ्रमी, [न्] त्रि, (भ्रम+इनि।) भ्रमविशिष्टः। भ्रमो विद्यते अस्येति अर्श्वर्थे इनिप्रत्ययेन निष्पन्नः॥

भ्रंश य उ अधःपतने। इति कविकल्पद्रुमः॥ (दिवां-पर०-अक०-सेट्।) य भ्रश्यति। उ भ्रंशित्वा भ्रष्ट्वा। इति दुर्गादासः॥

भ्रष्टं, त्रि, (भ्रंश्+कर्त्तरि+क्तः।) च्युतम्। अस्य पर्य्यायो गलितशब्दे द्रष्टव्यः॥

"अर्थाद्भ्रष्टस्तीर्थयात्रान्तु गच्छेत्
सत्याद्भ्रष्टो रौरवं वै व्रजेच्च।
योगभ्रष्टः सत्यधृतिञ्च गच्छेत्
राज्याद्भ्रष्टो नरकं वै व्रजेच्च॥"

इति गारुडे नीतिसारे १०६ अध्यायः॥

भ्रस्ज, औ ञ भ्रू पाके। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-अनिट्।) रेफयुक्तादिदन्त्योपधः। क्विपि संयोगादिलोपे भृट्। पाक इह भर्ज्जनम्। भ्रस्ज भृज्जति भृज्जते मत्स्यं सूपकारः। औ अभार्क्षीत्। इति दुर्गादासः॥

भ्राज, ङ ञ क्ष टु भाषि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्,।) रेफयुक्तः। ङ भ्राजते ग्र अभ्राजे। अनुदन्त्यत्वात् संयोगादिलोप्याकारस्याप्येत्वम्। क्ष अविभ्रजत् अबभ्राजत्। टु भ्राजयुः। इति दुर्गादासः॥

भ्राजकं, क्ली, (भ्राज्+"खुल् तृचौ।" ३। १। १३३। इति खुल्।) पित्तम्। इति शब्दचन्द्रिका॥

भ्राजिष्णुः, त्रि, (भ्राज्+इष्णुच्।) अलङ्कारादिना दीप्तियुक्तः। इत्यमरः। २। ६। १०९॥ (यथा, भागवते। २। ६। १२।

"भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः॥"

विष्णौ, पुं। यथा, तस्य सहस्रनामस्तोत्रे।

भ्रातरौ, पुं, (भ्राता च भगिनी च। भ्रातृस्वसोरित्यादिना एकशेषः।) भ्रातृभगिन्यौ। नित्यद्विवचनान्तोऽयम्। इत्यमरः। २। ६। ३६॥

भ्राता, [तृ] पुं, (भ्राजते इति। भ्राज+"नप्तृनेष्टृत्वष्टृहोतृपोतृप्रशास्तृदातृधातृभ्राता च।" उणा०। २। ६६। इति तृन्। निपात्यते च।) एकगर्भजातः। "भाइ" इति भाषा। तत्पर्य्यायः। सहोदरः २ समानोदर्य्यः ३ सोदर्य्यः ४ सगर्भः ५ सहजः ६ सोदरः ७। इति हेमचन्द्रः॥ पितरि मृते ज्येष्ठभ्रातुः पितृतुल्यत्वम्। यथा,—

"ज्येष्ठो भ्राता पितृतुल्यो मृते पितरि पौत्रक!।
सर्व्वेषां स पिता हि स्यात् सर्व्वेषामनुपालकः॥
कनिष्ठस्तेषु सर्व्वेषु समत्वेनानुवर्त्तते।
समीपभोगजीवेषु यथैव तनयस्तथा॥"

इति गारुडे २१४ अध्यायः॥

तस्य भार्य्याहरणे तस्मै दायादाने च दोषो यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्याये।

"भ्रातृजायापहारी च मातृगामी भवेन्नरः।
ब्रह्महत्यासहस्रञ्च लभते नात्रसंशयः॥
स याति कुम्भीपाकञ्च यावच्चन्द्रदिवाकरौ।
तस्मादुत्तीर्य्य पापी च विष्ठायां जायते कृमिः॥
वर्षकोटिसहस्राणि तत्र स्थित्वा च यातकी।
ततो भवेच्छतपापी वर्षकोटिसहस्रकम्॥
पुंश्चलीयोनिगर्भे च कृमिश्चैव पुरन्दर!।
शूकरः कोटिसहस्राणि शुनजन्मानि कुक्कुरः।
भ्रातृजायापहरणात् शुनजन्मानि शूकरः॥"

"यो ददाति न दायञ्च कनिष्ठो दुर्ब्बलाय च।
स याति कुम्भीपाकञ्च यावच्चन्द्रदिवाकरौ॥

भ्रातुरन्वेषणे भ्राता न गच्छेत्। यथा,—

नारद उवाच।

"हे धर्म्मज्ञ महाबाहो! प्रजा यूयं करिष्यथ।
इदमद्यो न जानीते यत्तो भवतां श्रूयतामिदम्॥
बालिशा बत यूयं ये नाज्ञा जानीत वै सुतः।
अन्तरूर्द्धमधश्चैव कथं सृक्ष्यथ वै प्रजाः॥
ऊर्द्धं तिर्य्यगधश्चैव यदाप्रतिहता गतिः।
तदा कस्माद्भुवो नाशं सर्व्वे द्रक्ष्यथ बालिशाः॥
ते तु तद्वचनं श्रुत्वा प्रयाताः सर्व्वतो दिशम्।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः॥
इत्यमेवाथ नष्टेषु दक्षः प्राचेतसः पुनः।
वैरिण्यामथ पुत्राणां सहस्रमसृजद्विभुः॥
विवर्द्धयिषवस्ते तु सर्वजाश्चाः प्रजाः पुनः।
पूर्व्वोक्तं वचनं ब्रह्मन्नारदेन प्रचोदिताः॥
अन्योन्यमूचुस्ते सर्व्वे सम्यगाह महामुनिः।
भ्रातॄणां पदवीं चैव गन्तव्या नात्र संशयः॥
ज्ञात्वा प्रमाणं पृथ्वास्तु प्रजाः सृक्ष्यामहे पुनः।
तेऽपि तेनैव मार्गेण प्रयाताः सर्व्वतो दिशम्।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः॥
ततः प्रभृति वै भ्राता भ्रातुरन्वेषणे द्विज!।
प्रयातो नश्यति तथा तत्र कार्य्यं विजानता॥"

इति विष्णुपुराणे १ अंशे १६ अध्यायः॥

अपि च, मात्स्ये ५ अध्याये।

"ततः प्रभृति न भ्रातुः कनीयान् मार्गमिच्छति।
अन्विष्य दुःखमाप्नोति तेन तं परिवर्जयेत्॥"

ज्येष्ठभ्रात्रादेर्गुरुत्वं यथा,—

"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः।
मातुलः श्वशुरश्चाता मातामहपितामहौ।
बन्धुर्ज्येष्ठः पितृश्चैव पुंस्येते गुरवः स्मृताः॥"

इति कौर्म्मे उपविभागे ११ अध्यायः॥

विभक्तानां तेषां धर्म्मवृद्ध्यर्थं यथा,—

व्यासः।

"भ्रातॄणां जीवतोः पित्रोः सहवासो विधीयते।
तदभावे विभक्तानां धर्म्मस्तेषां विवर्द्धते॥
भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्म्मणा।
स निर्भाज्यः स्वकादंशात् किञ्चिद्दत्त्वोपजीवनम्॥"

ज्येष्ठभ्रातृप्रशंसा यथा,—

"विभ्रत्यादृश्चतः सर्व्वान् ज्येष्ठो भ्राता यथा पिता।
भ्राता शक्तः कनिष्ठो वा शक्तापेक्षा कुले स्थितिः॥
कुटुम्बार्थेषु चोद्युक्तस्तत् कार्य्यं कुरुते तु यः।
स भ्रातृभिर्दृढतरो ग्रासाच्छादनवाहनैः॥
अन्योन्यमेषो भ्रातॄणां सुहृदां वा बलोत्कट!।
भवत्यानन्दजननो दृष्टेषु नात्र संशयः॥"*॥

भ्रातृसंस्कारस्यावश्यकत्वम्। यथा, नारदः।

"येषान्तु न कृताः पित्रा संस्कारविधयः क्रमात्।
कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात्॥
अविद्यमाने पित्र्यं स्वांश्चादद्युर्व्व वा पुनः।
अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्व्वसंस्कृतैः॥"

विभक्तानां तेषां साक्षित्वादि यथा,—

"साक्षित्वं प्रतिभाव्यञ्च दानं ग्रहणमेव च।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम्॥"

इति दायतत्त्वम्॥

भ्रातृकः, त्रि, (भ्रातुरागत इति। भ्रातृ+"अतइञ्।" ४। २। ७८। इति ठञ्। भ्रातुरागतधनादि।) भ्रातृयोग्यः। इति सिद्धान्तकौमुदी॥

भ्रातृजः, पुं, (भ्रातुः सहोदरात् जायते इति। जन्+"पञ्चम्यामजातौ।" ३।२।९८। इति डः।) भ्रातुरपत्यम्। तत्पर्य्यायः। भ्रात्रीयः २। इत्यमरः। २। ६। ३६॥ भ्रातृव्यः ३ भ्रातृपुत्रः ४। इति शब्दरत्नावली॥ (स्त्रियां टाप्। भ्रातृजा। भ्रातुर्व्युत्रयाम्॥)

भ्रातृजाया, स्त्री, (भ्रातुर्जाया।) भ्रातृभार्य्या। (यथा, मेघदूते। १। १०।

"अथापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।")

तत्पर्य्यायः। प्रजावती २। इत्यमरः।२।६।३०॥

भ्रातृद्वितीया, स्त्री, (भ्रातृमङ्गलार्था भ्रातृभोजनार्था वा द्वितीया इति मध्यपदलोपी कर्म्मधारयः।) कार्त्तिकशुक्लद्वितीया। तद्विवरणं यथा। यमद्वितीया तु प्रतिपद्युता याह्ये-

युक्तं निर्णयान्तादौ। यमद्वितीया मध्याह्न-व्यापिनी पूर्व्वविद्धा चेति हेमाद्रिः। अत्र विशेषो हेमाद्रौ स्कान्दे।

"कार्त्तिके शुक्लद्वितीयायामपराह्णेऽर्चयेत् यमम्। स्नानं कृत्वा भानुजायां यमलोकं न पश्यति॥ कार्त्तिके शुक्लद्वितीयां पूजितस्तर्पितो यमः। वेदितः किन्नरैर्दृष्टस्ते यच्छति वाञ्छितम्॥"

तथा भविष्ये।

"प्रथमा श्रावणे मासि तथा भाद्रपदेऽपरा। तृतीयाश्वयुजे मासि चतुर्थी कार्त्तिके भवेत्॥ श्रावणे कजुवा नाम तथा भाद्रे च गौर्म्मता। आश्विने प्रेतसंचारा कार्त्तिके यात्यका मता॥" इत्युक्त्वा प्रथमायां व्रतं द्वितीयायां वरस्वती-पूजा तृतीयायां आर्द्रसङ्गा चतुर्थ्यामुक्तम्। "कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर!। यमो यमुनया पूर्व्वं भोजितः स्वगृहेऽर्चितः॥ अतो यमद्वितीयेयं भुवि लोकेषु विश्रुता। अस्यां निजगृहे विप्र! न भोक्तव्यं ततो नरैः॥ स्वसृहस्तेन भगिनीहस्तात् भोक्तव्यं पुष्टिवर्द्धनम्। दानानि च प्रदेयानि भगिनीभ्यो विधानतः॥ स्वर्णालङ्कारवस्त्रान्नपूजासत्कारभोजनैः। सर्व्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः॥ प्रतिपन्ना माताभगिन्य इति हेमाद्रिः॥ पितृव्यभगिनीहस्तात् प्रथमायां युधिष्ठिर!। मातुलस्य सुताहस्तात् द्वितीयायां तथा नृप!॥ पितुर्ज्येष्ठात्: स्वसुः कर्त्ते तृतीयायां तथोः करात्। चतुर्थ्यां सहजायाश्च भगिन्या हस्ततः परम्। सर्व्वासु भगिनीहस्तात् भोक्तव्यं बलवर्द्धनम्॥

यस्यां तिथौ यमुनया यमराजदेवः
सम्भोजितः प्रतिजगत्सुखसौहृदेन।
तस्यां स्वसुः करतलादिह यो मनुष्यः
प्राप्नोति रत्नसुखधान्यमनुत्तमं सः॥

गौड़ास्तु।

यमञ्च चित्रगुप्तञ्च यमदूतांश्च पूजयेत्। अर्घ्यञ्चात्र प्रदातव्यो यमाय सहजाहवे:॥ मन्त्रस्तु।

एह्येहि मार्त्तण्डज! पाशहस्त!
यमान्तकालोकधरामरेश!।
भ्रातृद्वितीयातनुदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते॥

भ्रातस्तवानुजाताहं सुदृष्टं भक्तमिश्रं शुभम्। प्रीतये यमराजस्य यमुनाया विशेषतः॥" ज्येष्ठाग्रजातेति वदेदिति स्मार्त्ताः॥ इत्यन्न-दानमित्याहुः। ब्रह्मवैवर्त्तपुराणेऽपि।

"या तु भोजयते नारी भ्रातरं युगके तिथौ। अर्चयेच्चापि ताम्बूलैर्न सा वैधव्यमाप्नुयात्॥ भ्रातुरायुःक्षयो राजन्! न भवेत्तस्य कर्हिचित्॥"

इति निर्णयसिन्धौ २ परिच्छेदः॥

भ्रातृपत्नी, स्त्री, (भ्रातापतिर्यस्या इति भ्रातृ: पत्नीति वा। ऋन्नेभ्यो ङीप्। इति ङीप्। ततः+"निष्ठं सपत्नादिषु।" इति नान्तादेशः।) भ्रातृजाया। इति शब्दरत्नावली॥

भ्रातृपुत्रः, पुं, स्त्री, (भ्रातुः पुत्रः।) भ्रातृजः। इति शब्दरत्नावली। भाइपो इति भाषा॥

भ्रातृभगिन्यौ, स्त्री, (भ्राता च भगिनी च। इति इतरेतरद्वन्द्वसमासः।) भ्रातरौ। द्विवचनान्तोऽयम्। इत्यमरः। २। ६। ३६॥

भ्रातृव्यः, पुं, (भ्रातुरपत्यमिति। "भ्रातुर्व्यच्च।" ४। १। १४४। इति यत्।) भ्रातृपुत्रः। (यथा, राजतरङ्गिण्याम्। ८। २८४२।

"जयराजानुजं राज्ञा यशोराजं निवेशितम्। तत्सुतेनावचस्कन्द भ्रातृव्यं राजकाभिधः॥"

भ्रातृ+"यत् सपत्ने।" ४। १। १४५। इति यत्।) शत्रुः। इति हेमचन्द्रः॥ (यथा, भागवते। ५। ११। १७।

"भ्रातृव्यमेतं ममदभ्रवीर्य-
मुपेक्षयाधेधितमप्रमत्तः॥"

"तस्मात् भ्रातृव्यम् शत्रुम्।" इति तट्टीकायां स्वामी॥)

भ्रातृश्वशुरः पुं, (पत्युर्ज्येष्ठभ्राता श्वशुर इव पूज्यत्वात्।) पतिज्येष्ठभ्राता। भाशुर इति भाषा। तत्पर्य्यायः। श्वशुरकः २। इति शब्दरत्नावली॥ (भ्रातुः श्वशुरः।) भ्रातुःपत्न्याः पिता च॥

भ्रात्रीयः, पुं, (भ्रातुरपत्यं पुमानिति। भ्रातृ+"भ्रातुर्व्यच्च।" ४। १। १४४। इत्यत्र 'चकाराच्छच।' इति काशिकोक्तेः छः।) भ्रातृपुत्रः। इत्यमरः। २। ६। ३६॥ भ्रातृसंबन्धिनि, त्रि॥

भ्रान्तः, त्रि, भ्रमयुक्तः। भ्रान्तिविशिष्टः। (अतौन्द्रियमिन्द्रियं भ्रान्तानामधिष्ठाने।" इति सांख्यसूत्रम्। २। ९३॥)

भ्रमधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः॥ भ्रमणे, क्लो। यथा, वाभटपशुपतिभ्यां याख्यातम्।

"भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित् फलम्।"

भ्रान्तः, पुं, (भ्रम्+कर्त्तरि क्तः। "अनुनासिक-स्येति। ६। ४। १५। इति दीर्घः।) राज-धूस्तूरः। मत्तधत्तूरः। इति राजनिर्घण्टः॥

भ्रान्तिः, स्त्री, (भ्रम्+क्तिन्। "अनुनासिकस्य क्विझलोः क्ङिति।६। ४। १५। इति दीर्घः।) भ्रमः। इत्यमरः। १। ५। ४॥

("युक्तिहीनप्रकाशत्वाद् भ्रान्तेर्नास्ति लक्षणम्। यदि स्याल्लक्षणं किञ्चिद्भ्रान्तिरेव न सिध्यति॥" इति तार्किकाः॥)

सा तु त्रयाणां षष्ठमासे जायते। यथा,—

"यावत्सांसिद्धिके तु संप्राप्ते भ्रान्तिः संजायते यतः। भ्रान्तिचरानि हरणि पञ्चरूपाण्यतः पुरा॥"

इति ज्योतिस्तत्त्वम्॥

भ्रमणम्। इति मेदिनी॥ अनवस्थितिः। इति विश्वः॥

भ्रान्तिहरः, पुं, (भ्रान्तिं हरतीति। हृ+कर्त्तरि अच्।) मन्त्री। इति शब्दमाला॥ भ्रम-नाशके, त्रि॥

भ्रामकः, पुं, (भ्रामयति भ्रमं जनयतीति। भ्रम्+णिच्। "ण्वुल् तृचौ।" ३। १। १३३। इति ण्वुल्।) धूस्तूरः। धूर्त्तः। सूर्य्यावर्त्तः। प्रस्तरभेदः। इति मेदिनी। के, १३३॥ पुस्तक पातर इति भाषा। भ्रमजनके, त्रि॥

भ्रामरं, क्ली, (भ्रमरैः कृतं सम्भृतमिति। भ्रमर +"क्षुद्राभ्रमरवटरपादपादण्।" ४। ३। ११८। इति अण्।) मधु। इति मेदिनी। रे, १६१॥ तत्तु भ्रमरजमधु। तस्य गुणाः। पिच्छिलत्वम्। रूक्षत्वम्। मधुरत्वम्। सुखजाठराग्नित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"पैच्छिल्यात् स्वादु भूयस्त्वात् भ्रामरं गुरु कौर्त्तितम्।"

इति राजवल्लभः।

अन्यच्च।

"किञ्चित् रूक्षैः प्रसिद्धेभ्यः षट्पदेभ्योऽलिभि-श्चितम्। निर्म्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम्॥ भ्रामरं रक्तपित्तघ्नं व्रणजाड्यकरं गुरु। स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं हिमम्॥"

इति भावप्रकाशः॥

वृत्तविशेषः। तत्पर्य्यायः। रासः २ मण्डल-वृत्तम् ३ हल्लीसम् ४। इति शब्दमाला॥ भ्रमरसम्बन्धिनि त्रि। यथा,—

"तदहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम्।"

इति देवीमाहात्म्यम्॥

(यथा च हारीते प्रथमे स्थाने एकादशेऽध्याये। मध्वर्थे लक्षणं गुणाश्च।

"घ्रीतं कषायं मधुरं लघु स्यात् सन्दीपनं लेखनमेव शस्तम्। संशोधनन्तु व्रणशोधनञ्च संरोपणं हृद्यतमञ्च वल्यम्॥ जिरोगणाग्र्यं कुरुते च पुष्टिं कासे क्षये वा क्षतजे च हर्द्दी। हिक्काभ्रमे शोषसपीनसानां रक्तप्रमेहे च तथातिसारे॥ रक्तातिसारे च सरक्तपित्ते क्षयोद्भवे पार्श्वगदेऽपि शस्तम्। नेत्रामये वा ग्रहजीगदे वा विषे प्रशस्तं भ्रमरैर्निषेवितं यत्॥ भ्रामरं सघनं ज्ञात्वा भूयिष्ठं मधुरञ्च यत्। रूक्षं विशेषतो ज्ञेयं घ्रीतलं लघुलेखनम्॥")

भ्रामरः पुं, (भ्रामयति लोहमिति। भ्रामि+ "अर्त्तिकमिभ्रमिदेवीति।" उणा० ३। १३२। इति अरः। वाहुलकात् दीर्घश्च।) प्रस्तरभेदः। मेदिनी। रे, १६१॥ पुस्तक पातर इति भाषा॥ (अपस्मारयोगः। इति भ्रामरी त्रि। यथा, मनौ। ३। १६१। [स्त्रिया॥"

"भ्रामरी गण्डमाली च श्वित्रार्त्तो पिशुन-

"भ्रामरी अपस्मारी।" इति तट्टीकायां मेधा-तिथिः॥)

भ्रामरी, स्त्री, (भ्रमरस्यायं भ्रामरो भ्रमरवद्-वर्त्तः। सोऽस्या अस्तीति। अर्शं आद्यच्।

ङीप्।) पार्व्वती। इति त्रिकाण्डशेषः॥ यथा, मार्कण्डेये। ९१। ४७-४९।
"यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति।
तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम्॥
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम्।
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्व्वतः॥"

भ्राश्, ऋ ड ग्र टु भाशि। इति कविकल्पद्रुमः॥
भ्राश्, य ड } (भ्वा०-आत्म०-अक०-सेट्। द्वितीयस्तु दिवा०-आत्म०-अक०-सेट्।) य ड भ्राश्यते। ऋ अवभ्राशृत्। स्वमते अनयोर्भ्राड् इत्यविकल्पनेऽपि सप्तमस्वरानुबन्धोऽन्येषामनुरोधात्। ग भ्रेशे वभ्राशे। टु भ्राशयुः। ड भ्राशते। भाशि दीप्तौ। इति दुर्गादासः॥

भ्रार्द्धं, क्ली, (भ्रस्ज+घञ्।) आकाशम्। अमरीषम्। इति संक्षिप्तसारोणादिवृत्तिः॥

भ्रार्ष्टृः, पुं, (भ्रस्ज्यते अचेति। भ्रस्ज+"भ्रस्जिगमिनमिहनिविद्यशृभ्यां ट्रक्च।" उणा०। ४। १५६। इति। ट्रन्।) यत्र कलायचणकादिकं भृज्यते सः। भाजना खोला इति ख्यातः। (यथा, नैषधचरिते। ३। १२८।
"रौद्रे चक्षुषि तज्जितस्तनुमनुभ्राष्टं च यच्चिक्षिपे॥"
"अनुभ्राष्टं भर्ज्जनपात्रसदृशेन।" इति तट्टीका।)
तत्पर्य्यायः। अमरीषम्२। इत्यमरः।२।६।३०॥

भ्राष, ऋ ड ग्र टु } भाषि। इति कविकल्पद्रुमः॥
भ्राष, य ड } भ्वा०-आत्म०-अक०-सेट्। द्वितीयस्तु दिवा०-आत्म०-अक०-सेट्।) य ड भ्राष्यते। ड भ्राषते। ऋ अवभ्राषत्। ग भ्रेषे वभ्राषे। टु भ्राषयुः। इति दुर्गादासः॥

भ्रुकुंसः, पुं, (भ्रुकुंसः। भ्रुकुंसः। भ्रूकुंसः। भ्रकुंसः। इति रूपचतुष्टयम्। "चुरादौ पठ्यते।दि-दक्षके कुसिर्भाषार्थः। यः स्त्रीवेषं धारयित्वा भ्रुवः कुंसयतीति। ईरच् प्रत्ययः। ह्रस्वश्च वा। इति अमरटीकायां रघुनाथचक्रवर्त्ती॥) स्त्रीवेषधारिनर्त्तकपुरुषः। इत्यमरः।१।७।११॥

भ्रुकुटिः, स्त्री, (भ्रुवः कुटि कौटिल्यमिति षष्ठीसमासः। अभ्रुकुंसादीवामिति वा ह्रस्वः।) क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः। १। ७। ३०॥ (यथा, महाभारते।७। ७६२। वक्त्रं च भ्रुकुटिं वक्त्रे क्रोधस्य परिलक्षणम्॥")

भ्रकुटी, स्त्री, (भ्रुकुटि। ह्रस्वादिकारादिति पक्षे ङीप्।) क्रोधादिना भ्रवः कौटिल्यम्। इत्यमरः। १। ७। ३०॥ (यथा, माघे। १५। ६।
"भ्रुकुटीकटोरितललाटमाननम्॥")

भ्रूः, स्त्री, (भ्राम्यति नेत्रोपरि इति। भ्रम्+"भ्रमेश्च डूः।" उणा० २। ६८। इति डूः।) दृग्भ्यामर्द्धभागः। तत्पर्य्यायः। चिल्लिका २ नयनोर्द्धभागरोमराजी३। इति राजनिर्घण्टः॥ तल्लक्षणम् यथा, गारुडे ६६ अध्याये।
"विशालोन्नता सुस्निग्धा दरिद्रा विषमभ्रुवः।
धनी दीर्घा संसक्तभ्रूर्बालेन्दून्नतसभ्रुवः।
आज्ञा निस्वस्य खड्गभ्रूर्मध्याच्च विनतभ्रुवः॥"

अत्र षट्चक्रान्तर्गताज्ञाख्यचक्रमस्ति। तत्तु हक्षवर्णद्वययुक्तद्विदलपद्माकारम्। तन्मध्ये मनस्तिष्ठति। यथा,—
"आज्ञानामाम्बुजं तद्विमकरसदृशं ध्यानधामप्रकाशं
हक्षाभ्यां वै कलाभ्यां प्रविलसितवपुर्नेत्रपत्रं सुशुभ्रम्।
तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना
विद्यां मुद्रां कपालं डमरुजपवटीं बिभ्रती शुद्धचित्ता॥
एतत्पद्मान्तराले विवसति च मनः सूक्ष्मरूपं प्रसिद्धम्॥"

इति श्रीतत्त्वचिन्तामणौ षष्ठप्रकाशः॥
(विषयोऽस्या यथा,—
"भ्रुवोर्वा यदि वा मूर्द्ध्नि सीमन्तावर्त्तकान् बहून्।
अपूर्व्वानक्षतान् वक्त्रान् दृष्ट्वा मरणमादिशेत्॥
ग्राहमेते न जीवन्ति लक्षणैर्नातुरा नराः।
अरोगाणां पुनर्क्षेतन् षड्रात्रं परमुच्यते॥"

इति चरके इन्द्रियस्थाने अष्टमेऽध्याये॥
कर्णनेत्रनासाभ्रूक्षांसगण्डकक्षस्तनवृषणपार्श्वस्फिग्जानुबाहूरुप्रभृतयो द्वे द्वे विंशतिरङ्गुलयः। इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)

भ्रुकुंसः, पुं, (भ्रु+कुंस+अच्।) स्त्रीवेशधारी नर्त्तकपुरुषः। इत्यमरः। १। ७। ११।

भ्रूकुटिः, स्त्री, (भ्रुवः कुटिः कौटिल्यम्। क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः॥

भ्रूण, क ड आह्वाविध्वङ्क्षयोः। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) रेफयुक्तषष्ठस्वरी। क ड भ्रूणयते भद्रं लोकः। आह्वाविषयं करोतीत्यर्थः। इति दुर्गादासः॥

भ्रूणः, पुं, (भ्रूण्यते आह्वास्यते इति। भ्रूण+घञ्।) बालकः। स्त्रीगर्भः। इत्यमरः २।६।३६॥ (स्त्रीवमपि। यथा, ऋग्वेदे। १०। १५५। २।
"पत्नी इतच्चत्तासुतः सर्व्वाभूणान्धारुधी॥")
अथ गर्भाधानदिनम्। रजोदर्शनावधिषोड़शदिनपर्य्यन्तं ऋतुकालः। तत्राद्याश्चतस्रो निषाः परित्यज्य चतुर्दश्यष्टमी अमावास्या पूर्णिमा सूर्य्यसंक्रान्तिः पर्व्वाण्येतानि परित्यज्य च अन्यासु रात्रिषु चन्द्रादिशोभने काले भार्य्यामुपगच्छेत्। युग्मरात्रिषु गमने पुत्रो भवेत्। अयुग्मरात्रिषुगमने कन्या भवेत्। तत्र प्रशस्तनक्षत्राणि पुष्यः हस्ता मृगशिरा आर्द्रा पुनर्व्वसुः पूर्व्वाषाढ़ा उत्तराषाढ़ा अवणा पूर्व्वभाद्रपदोत्तरभाद्रपत्। तत्र निषिद्धनक्षत्राणि। ज्येष्ठाश्लेषा मघा मूला रेवती कृत्तिकाश्विनी उत्तरफल्गुनी। तत्र तिथयः नन्दा भद्राः प्रशस्ताः। रिक्ता निषिद्धाः। तत्र रविमङ्गलदृक्स्थतियाराः प्रशस्ताः। इति समयप्रदीपः॥

भ्रूणहत्या, स्त्री, (हननं हत्या। हन्+भावे क्यप्। भ्रूणस्य हत्या इति षष्ठीसमासः।) गर्भस्थबालकहननम्। यथा,—
"त्रिविवाहं कृतं येन न करोति चतुर्थकम्।
कुलानि पातयेत् सप्त भ्रूणहत्याव्रतञ्चरेत्॥"

इत्युद्वाहतत्त्वम्॥

भ्रूणहा, [न्] त्रि, (भ्रूणं हन्तीति। भ्रूण+हन्+"ब्रह्मभ्रूणवृत्रेषु।" ३। २। ८७। इति क्विप्।) गर्भस्थबालकहन्ता। भ्रूणं हन्ति इति भ्रूणघ्नोपपदहनधातोरुपपदेन निष्पन्नः। इति संक्षिप्तसारव्याकरणम्॥ (यथा, महाभारते। १। ८३। ९४।
"ऋतुं वै याचमानाया न ददाति पुमान्वृथा।
भ्रूणहेत्युच्यते ब्रह्मन्! स इह ब्रह्मवादिभिः॥")
तस्य प्रायश्चित्तम्। तत्र पुंस्त्वेन ज्ञाते पुंवधप्रायश्चित्तम्। स्त्रीत्वेन ज्ञाते स्त्रीवधप्रायश्चित्तम्। अविज्ञाते तु पुंवधप्रायश्चित्तमाह मनुः।
"हत्वा गर्भमविज्ञातमेतदेव व्रतञ्चरेत्।
गर्भहा च यथावर्णं तथात्रेयीनिरुद्दिशः॥"

इति प्रायश्चित्तविवेकः॥
(ब्रह्महन्ता। यथा, मनुः। ८। ३९०।
"अन्नादेर्भ्रूणहा मार्ष्टि पत्नी भार्य्यापचारिणी॥"
"भ्रूणहा ब्रह्महा।" इति तट्टीकायां मेधातिथिः॥)

भ्रूभङ्गः, पुं, (भ्रुवो भङ्गः।) भ्रुवः कौटिल्यम्। यथा,
"क्षुद्राः सन्त्रासमेते विजहति हरयो भिन्नगण्डेभकुम्भा
न्यग्रहैर्हेषमाणा लघुमपि दधति परममी श्रायकाणि।
यत्नादेतैर्विमुक्तं क्षितिधरकुहरं सौमित्रे तिष्ठ पात्रं क्षमपि नहि वयं गन्तुमेवं मृगेभ्यः
किञ्चिद्भ्रूभङ्गलीलानियमितसलिलं रामभद्रं भजामि॥"

इति काव्यप्रकाशः॥

भ्रेष, ऋ ड भाषि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) रेफयुक्तः। ऋ अविभ्रेषत्। ड विभ्रेषे। इति दुर्गादासः॥

भ्रेष, ऋ ग चले। भये। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्।) रेफयुक्तः। ऋ अविभ्रेषत्। ग भ्रेषति भ्रेषते धर्म्मात् खलः। विभ्रेषे। इति दुर्गादासः॥

भ्रेषः, पुं, (भ्रेष् चलने+भावे घञ्।) तथाच यथोचितादृभ्रंशः। इत्यमरः॥ (यथा, शौनकीयभाष्ये। १।१२। "आसमाप्तिभ्रेषात्।" इति।) चलनम्। इति भ्रेषधात्वर्थसंग्रहात्॥

भ्रेषणं, क्ली, (भ्रेष्+भावे ल्युट्।) चलनम् इति भ्रेषधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम्॥

भ्रक्ष, ग भक्षणे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) अन्तःस्थलक्षीयोपधः। ग भ्रक्षति भ्रक्षते। लस्थाने सप्तमस्वर इति दुर्गासिंहः। इति दुर्गादासः॥

म

म मकारः। स तु पञ्चविंशतितमव्यञ्जनवर्णः। अस्योच्चारणस्थानमोष्ठः। इति व्याकरणम्॥ ("उपूपध्मानीयानामोष्ठौ।" इति सिद्धान्तकौमुदी॥) अस्य स्वरूपं यथा,—
"मकारं शृणु चार्वङ्गि! स्वयं परमकुण्डली। तरुणादित्यसङ्काशं चतुर्वर्गप्रदायकम्॥ पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा।"
इति कामधेनुतन्त्रम्॥
(वङ्गीयाक्षरैः) अस्य लेखनप्रकारः। यथा,—
"ऊर्द्ध्वः क्रमतो रेखा वामे वक्रा तु कुण्डली। पुनश्चाधोगता सैव तत ऊर्द्धगता पुनः। ब्रह्मा शम्भुश्च विष्णुश्च क्रमशस्तासु तिष्ठति॥"
अस्य ध्यानं यथा,—
"कृष्णां दशभुजां भीमां पीतलोहितलोचनाम्। कृष्णाम्बरधरां नित्यां धर्म्मकामार्थमोक्षदाम्। एवं ध्यात्वा मकारन्तु तन्मन्त्रं दशधा जपेत्॥"
तत्प्रणाममन्त्रो यथा,—
"त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा। आत्मादितत्त्वसंयुक्तं हृदिस्थं प्रणमाम्यहम्॥"
इति वर्णोद्धारतन्त्रम्॥
तस्य नामानि।
"मः कालो क्षेप्तिः कालो महाकालो महान्तकः। वैकुण्ठो वसुधा चन्द्री रविः पुरुषराजकः॥ कालभद्रो जया मेधा विश्वदा दीप्तसंज्ञकः। जठरश्च क्षमा मानं लक्ष्मीर्मांतोयबन्धनौ॥ विषं शिवो महावीरः शुचिप्रभा जनेश्वरः। प्रमत्तः प्रियश्च रुद्रः सर्व्वाङ्गो वह्निमण्डलम्। मातङ्गमालिनी बिन्दुः श्रवणा भरणो वियत्॥"३६॥
इति तन्त्रोक्तवर्णाभिधानम्॥
मः, पुं, (माति निर्म्माति जगदिति। मा+कः।) शिवः। चन्द्रमाः। ब्रह्मा। इत्येकाक्षरकोषः॥ यमः। समयः। विषम्। मधुसूदनः। इति मेदिनी। मे, १॥
मक, इ ङ भूवे। गतौ। इति कविकल्पद्रमः॥ (भ्वा०-आत्म०-सक०-सेट्।) इ मङ्कते। ङ मङ्कते हारो जनम्। गत्यर्थोऽप्ययमिति रामः। इति दुर्गादासः॥
मकरः, पुं, (क्रमातीति। क हिंसायाम्। क+अच्। ततः मनुष्याणां करः हिंसकः। यद्वा, सुखं किरतीति। सुख+कृ+कः। उभयत्रापि पृषोदरादित्वात् साधुः। इति अमरटीकायां रघुनाथचक्रवर्त्ती।) जलजन्तुविशेषः। इत्यमरः। १। १०। २०॥ (यादिनां गणान्तर्गतो जलजन्तुविशेषः।
"कुम्भीरकूर्म्मनक्राश्च गोधामकरशुक्तयः। शङ्खकः शिशुमारश्चेत्यादयः यादिनः स्मृताः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे। यथास्य गुणाः।

"मत्स्यानां मकरः श्रेष्ठो दीपनो वातनाशनः। रुचिप्रदः शुक्रकरो व्याही चोष्णविकारहा। मूत्राश्मरीणां शमनो गुल्मातीसारनाशनः॥"
इति हारीते प्रथमस्थाने एकादशोऽध्याये॥)
मकर इति गङ्गाया वाहनत्वेन ख्यातः। इति सारसुन्दरी। यथा। सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रामित्यादि स्तुयुक्तगङ्गाध्यानम्॥ स च कामदेवस्य ध्वजचिह्नम्। मकरध्वज इत्यमरकोषदर्शनात्। मेषादिद्वादशराश्यन्तर्गतो दशमराशिः। तत्पर्य्यायः। आकोकेरः २। अस्य अधिष्ठातृदेवता शृगालमकरः। उत्तराषाढ़ायाः शेषपादत्रयं श्रवणासमुदायः धनिष्ठायाः पूर्व्वार्द्धं एतन्नवपादेन भवति। स च पृष्ठोदयः भूमिराशिः अर्द्धशब्दकरः दक्षिणदिक्स्वामी पिङ्गलवर्णः रूक्षः भूमिचारी शीतलस्वभावः अल्पसन्तानः अल्पस्त्रीसङ्गः वातप्रकृतिः वैश्यवर्णः शूद्राङ्गश्च। अस्य जातस्य फलम्। सदानन्दः। पिष्टमाषभक्तः श्रवणामकरजातस्तु बहुविवाहः। इति जातकादयः॥ अथ, रवियुक्तमकरजातफलम्।
"सदाटनो मित्रगणो विपत्तौ प्रयाति नूनं धनवर्ज्जितः स्यात्। यद्युच्चराशिर्मकरोपगः स्यात् प्रकृतिकाये स तु भाग्यहीनः॥"
अथ चन्द्रयुक्तमकरजातफलम्।
"कलितशीतभयः किल शीतवितमरुषा सहितो मदनातुरः। निजकुलोत्तमहृत्तिकरः परं हिमकरे मकरे पुरुषो भवेत्॥"
अथ मङ्गलयुक्तमकरजातफलम्।
"पराक्रमप्राप्तवरः प्रतिष्ठः सदङ्गनाप्राप्तिवराङ्गनः स्यात्। श्रिया समेतो मकरे महीजे प्रकृतिकाये कुलपालकश्च॥"
अथ बुधयुक्तमकरजातफलम्।
"रिपुभयेन युतः कुमतिर्नरः सरविहीनगरः परकर्म्मठः। मकरगे सति शीतकरात्मजे यसगतः स गतः पुरुषो भवेत्॥"
अथ गुर्व्वाश्रितमकरजातफलम्।
"न मनोरथसिद्धिसुपैति नरो वचसामधिपे मकरोपगते। भवयुक् कुमतिः परकर्म्मरतो बहुतोषयुतो मदनापहृतः॥"
अथ शुक्राश्रितमकरजातफलम्।
"अतिरतिर्जनने जननेः वृथा व्ययभयं लभृता बहुचिन्तया। भृगुसुते मृगराशिगते सदा कविजने विजनेऽपि मतिर्भवेत्॥"
अथ शनिश्रयुक्तमकरजातफलम्।
"मकरोपगतः खलु भानुसुतः कृपया सहितो वृषमानयुतः।

वरगन्धविभूषणभूषितगात्र-स्तरुणीरमणः पटुजनेषु॥"
इति कोष्ठीप्रदीपः॥
(यूथभेदः। यथा, कामन्दकीये नीतिसारे। १८। ४८।
"यायाद्व्यूहेन महता मकरेण पुरो भये॥")
मकरकुण्डलं, क्ली, (कुण्डलम् मकर इवेत्युपमितसमासः।) मकराकृतिकर्णभूषणम्। यथा,
"वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभः। महाकिरीटकटकः स्फुरन्मकरकुण्डलः॥"
इति श्रीभागवते ६स्कन्धे ४अध्यायः १० श्लोकः॥ स्फुरती मकरकुण्डले यस्य सः। इति तट्टीकायां श्रीधरस्वामी॥
मकरकेतनः, पुं, (मकरेण चिह्नितं केतनं ध्वजो यस्य।) कन्दर्पः। इति मेदिनीकेतनशब्दटीकायां भरतेन सङ्कलितम्॥
मकरध्वजः, पुं, (मकरेण चिह्नितो ध्वजो यस्य।) कामदेवः। इत्यमरः। १। १। ९०॥ (यथा, माघे। ३। ६१।
"शरीरिणा नैव शरेण यत्न निगृह्यते मकरध्वजेन॥")
रससिन्दूरविशेषः। तस्य नामान्तरं चन्द्रोदयः। तस्य करणप्रकारो यथा,—
"पलं त्वेकं खर्ब्बरं रसेन्द्रं पलार्द्धकं षोड्शगन्धकस्य। शोधेः सुकार्पासभवप्रसूनैः सर्व्वं विमर्द्याथ कुमारिकाद्भिः॥ ततः काचकुम्भे निहितं सुगाढ़ं ऋतुकर्पटैस्तद्विवस्त्रयञ्च। पचेत् क्रमाच्चौ सिकताख्ययन्त्रे ततो रसः पल्लवरागरम्यम्॥ नियस्य चैतस्य पलं पलानि चत्वारि कर्पूररजस्तथैव। जातीपलं शोधयमिश्रपुष्पं कस्तूरिकायाः दृढ़ शाण एकः॥ चन्द्रोदयोऽयं कथितोऽस्य मात्रा शुक्लोऽद्विवह्नीदलमध्यवर्त्ती॥"
अस्य भूजाः।
"मदोन्मदानां प्रमदाशतानां गर्व्वाधिकत्वं क्षयमत्यकार्क्षीत्। ग्रस्तं घनीभूतमतीव दुग्धं ह्रदूनि मांसानि समक्षकाणि। मांसानि मिष्टानि भवन्ति पथ्यमानन्दहार्य्यौषधराजि चाद्य॥
बलीपलितनाशनस्तनुभृतां वयस्तम्भनः समस्तगदखण्डनः प्रचुरयोगपद्धानगः। गृहेषु रसराड़यं भवति यस्य चन्द्रोदयः स पञ्चशरदर्पितो मृगदृशां भवेद्वल्लभः॥"
इत्यस्य पूर्व्वं लवङ्गम्। उक्तपरिमाणलवङ्गसमलक्षणम्। दाक्षिणात्याः श्वेतकार्पासपुष्पमेव गृह्णन्ति। पाश्चात्याः निर्द्दग्धतत्पुष्पभेव यावदार्द्रत्वं मर्द्दयन्ति। उभयथैव निष्पत्तेरदोषः।

तथैवेति सर्व्वत्रान्वयः ।*। घ्राख्यान्तराद्विशेषो लिख्यते ।

"रतिकाले रतान्ते च पुनः सेवी रसोत्तमः ।
स्थावरं जङ्गमविषं जङ्गमं विषवारि वा ।
न विकाराय भवति साधकेन्द्रस्य वत्सरात् ।
रत्नुङ्गयो यथाभ्यासात् रत्नुं जयति देहिनः ।
तथाय साधकेन्द्रस्य जरामरणनाशनः ।"

घ्राख्यान्तरे मकरद्वजो नाम । इति चन्द्रोदयः । इति रसेन्द्रचिन्तामणिः ॥

मकरन्दः, पुं, (मकरमपि अन्दति बध्नाति धारयतीति वा । अदि बन्धने + अच् ततः पृषोदरादित्वात् साधुः ।) पुष्परसः । इत्यमरः । २ । ४ । १० ॥ (यथा, रघौ । ४ । ८८ ॥

"प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥")

कुन्दपुष्पवृक्षः । किञ्जल्के क्ली । इति राजनिर्घण्टः ॥

मकरन्दवती, स्त्री, (मकरन्दस्तत्सम्बन्धोऽस्या अस्तीति । मकरन्द + मतुप् । मस्य वः ङीप् ।) पाटलापुष्पम् । इति शब्दचन्द्रिका । मधुविशिष्टे त्रि ॥

मकरव्यूहः, पुं, (मकरः मकराकारः व्यूहः ।) मकराकारसैन्यविन्यासः । इति महाभारतम् ॥

मकराकरः, पुं, (मकराणामाकरः । षष्ठीतत्पुरुषः ।) समुद्रः । इति हेमचन्द्रः । १०७४ ॥ (यथा, कथासरित्सागरे । ४३ । १३७ ।

"मकराकरसुलङ्घ्य प्राप तत्तीरवर्त्ति सः ॥")

मकराकारः, पुं, (मकरस्येवाकारो यस्य ।) बहुयन्त्रः । इति शब्दचन्द्रिका । कोंटाकरञ्ज । इति भाषा ॥ मकरमत्स्याकृतिश्च ॥

मकराङ्कः, पुं, (मकरस्येवाकारोऽङ्कश्चिह्नं यस्य ।) कामदेवः । (मकरो अङ्कोऽस्य ।) समुद्रः । इत्यजयपालः ॥

मकरालयः, पुं (आलीयते अस्मिन्निति आलयः । मकराणामालयः ।) समुद्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १३ । ७६ । १२ ॥

"ततस्तं वारणं क्रुद्धं शरजालेन पाण्डवः ।
निवारयामास तदा वेलेव मकरालयम् ॥")

मकरी, [न्] पुं, समुद्रः । मकरोऽस्यास्तीति-युक्तत्वा इन्प्रत्ययनिष्पन्नोऽयम् ॥

मकुटं, क्ली, (मङ्कते अनेनेति । मकि भूषणे + बाहुलकात् उटः । आगमशास्त्रस्यानित्यत्वात् न नुम् ।) सुकुटम् । इति भरतधृतद्विरूपकोषः ॥

मकुतिः, स्त्री, (मकि + उतिः । पृषोदरादित्वात् साधुः ।) मूत्रग्रासनम् । इति त्रिकाण्डशेषः ॥

मकुरः, पुं, (मङ्कते इति । मकि + "मकुर दर्दुरौ ।" उणा० । १ । ४१ । इति उरच् ।) कुलालदण्डः । वकुलः । कोरकः । आदर्शः । इति हेमचन्द्रः । ३ । ३४८ ॥

मकुलः, पुं, क्ली, (मङ्कते भूषयति वृक्षम् । मकि + बाहुलकादुलच् ।) वकुलः । मकुलः । इति शब्दरत्नावली ॥

मकुष्कः, पुं, (मकि भूषायां + उः । पृषोदरादित्वात् साधुर्मङ्कुः । मङ्कुं भूषां स्कति प्रतिष्ठतीति । स्कै + पचाद्यच् ।) वनजातसुरः । मोठ इति हिन्दी भाषा ॥ सुगानि इति बङ्गभाषा । तत्पर्य्यायः । मयष्टः २ वनसुरः ३ क्षुमीलकः ४ अन्धतः ५ अरण्यसुरः ६ वल्लीसुरः ७ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । रक्तपित्तज्वरदाहहरत्वम् । पथ्यत्वम् । रुचिकारित्वम् । सर्व्वदोषजयकारित्वञ्च । इति राजनिर्घण्टः ॥

"मकुष्टो वातलो याही कफपित्तहरो लघुः ।
वह्निजिन्मधुरः पाके क्षमिक्षयज्वरनाशनः ॥"

इति भावप्रकाशः ॥

मकुष्ठः, पुं, (मङ्कते मङ्कति इति वा । बाहुलकात् उः मकुः । तिष्ठतीति स्थाः + कः स्थः । मकुः आसौ स्थश्चेति मकुष्ठः । पूर्व्वपदादिति । ८ । ३ । १०६ । षत्वम् ।) ब्रीहिभेदः । मन्थरे त्रि । इति मेदिनी । ठे, १६ ।

"मकुष्ठो वनसुरः स्याम्मकुष्टकसकुष्टकौ ।
(ब्रीहिभेदार्थे यथा, पर्य्यायो गुणाश्च ।
मकुष्ठो वातलो याही कफपित्तहरो लघुः ।
वह्निजिन्मधुरः पाके क्षमिक्षयज्वरनाशनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मकुष्टकः, पुं, (मकुष्ट + स्वार्थे कन् ।) वनसुरः । इति भरतः ॥ (तथाच पर्य्यायाः ॥

मकुष्ठो वनसुरः स्याम्मकुष्टकसकुष्टकौ ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ अस्य गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अः ।

"मकुष्टकाः क्षमिकराः कलायाः प्रवुराभिलाः ॥")

मकूलकः, पुं, (मकि मण्डने + पिच्छादित्वादूलच् बाहुलकादनुषङ्गलोपः । स्वार्थे कन् ।" इत्यमरटीकायां रघुनाथः ।) सुकूलकः । इत्यौषधः । इत्यमरटीकायां रमानाथः ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"लघुर्दन्ती विशल्या च स्वादुदुग्धपर्णयपि ।
तथैरण्डफला श्रीवा श्लेष्मघण्टा सुवप्रिया ।
वाराह्यौ चैव कथिता निकुम्भश्च मकूलकः ॥")

मक्ष, ङ गतौ । इति कविकल्पद्रुमः । (भ्वा० आत्म० सक० सेट् ।) कोपघः । ङ मक्षते । इति दुर्गादासः ॥

मक्षकः, पुं, (मक्षं गमनं आत्यन्तिकगतिं मरणं जाति आदत्ते योजयतीत्यर्थः । ला + कः पृषोदरादित्वकारागमे साधुः ।) शूलरोगविशेषः । यथा,

"क्षतायां क्षुच्छिरोवस्तिशूलं मक्षकसंज्ञितम् ।
यवक्षारं पिबेत्तत्र मस्तुनोष्णोदकेन वा ॥"

इति चक्रपाणिदत्तः ॥

मक्षुकं, क्ली, (मक्ष् + उकच् ।) घ्रिजाजतु । इति शब्दरत्नावली ॥

(विवरणमस्य घ्रिजाजतुशब्दे ज्ञातव्यम् ॥)

मक्षोलः, पुं, खटिका । यथा,—

"मक्षोलो वर्ब्बरेखा च कठिनी ककखटी खटी ।
इति शैलवर्गे त्रिकाण्डशेषः ॥

मख, रोषे । संघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) मखति । इति दुर्गादासः ॥

मखः, पुं, (मख् + घञ् ।) खद्योताच्छादनम् । इति हारावली ॥ क्रोधः । समूहः । इति पूर्व्वोक्तधात्वर्थदर्शनात् ॥

मखवीर्य्यः, पुं, (मखं निबिडं वीर्य्यमस्य ।) प्रियालवृक्षः । इति राजनिर्घण्टः ॥

मक्षिका, स्त्री, (मक्षति भक्षयते इति । मक्ष + "इगिमक्षिभ्यां सिकन् ।" उणा० । ४ । १५३ । इति सिकन् ।) कीटविशेषः । माछि इति भाषा ॥ (यथा, भागवते । ५ । १४ । ४२ ।

"आर्षभस्येह राजर्षेर्मनसापि महात्मनः ।
नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥")

तत्पर्य्यायः । मक्षीका २ भस्मः ३ माक्षिका४ गन्धलोलुपा ५ पतङ्गिका ६ पत्तिका ७ । इति शब्दरत्नावली ॥ अण्डतोत्पन्ना ८ वमनीया ९ पलदुषा १० । इति राजनिर्घण्टः ॥ नीला मक्षिका वर्व्वरा ११ । इत्यमरः । २ । ५ । २६ ॥ तन्नाशकधूपो यथा,—

"त्रिफलार्जुनपुष्पाणि भल्लातकशिरीषकम् ।
जाम्बवास्थरसश्चैव विड्गश्चैव गुग्गुलुः ।
एतैर्धूपैर्मक्षिकाणां मशकानां विनाशनम् ॥"

इति गारुडे १८१ अध्यायः ॥

मक्षिकामलं, क्ली, (मक्षिकाणां मधुमक्षिकाणां मलम् ।) सिक्थकम् । इति राजनिर्घण्टः ॥ (विशेषोऽस्य सिक्थशब्दे ज्ञेयः ॥)

मक्षीका, स्त्री, (मक्षिका । पृषोदरात् दीर्घः ।) मक्षिका । इति राजनिर्घण्टः ॥ (रोगविशेषेऽस्या अरिष्टत्वं यथा,—

"ज्ञाताशुचिप्रगात्रेऽपि यस्मिन् यस्मिन्
मक्षिकाः ।
स प्रमेहेण संसर्गं प्राप्यते नैव हन्यते ॥"

इति चरके इन्द्रियस्थाने प्रथमेऽध्याये ॥)

मख, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मखति ॥

मख, ङ सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ङ मखते इति दुर्गादासः ॥

मखः, पुं, (मखन्ति गच्छन्ति देवा अत्रेति । मख सर्पणे + "इगुपध ।" ३।१।१३० । इति कप् । संज्ञापूर्व्वकत्वान्न वृद्धिः । यदा, पुंसीति षः ।) यज्ञः । इत्यमरः । २ । ७ । १९ ॥ यथा, देवीभागवते । १ । १६ । २३ ।

"त्वत्तो मखं पूर्व्वं करिष्यामि तवापि वै ।"

मखघातः, [क्र] पुं, (घायते रक्षतीति कर्म्मणि क्त । मखस्य घातः । विश्वामित्रमखरक्षणात्तथात्वम् ।) रामः । यथा,—

"रावणारिर्मखघाता सीतायाः पतिरित्यपि ।"

इति शब्दरत्नावली ॥

मखवह्निः, पुं, (मखस्य वह्निः मखाराध्यो वह्निरिति यावत् ।) यज्ञाग्निः । इति जटाधरः ॥

मखानलः, पुं, (मखस्य अनलः मखसाध्योऽनल इत्यर्थः।) यज्ञाग्निः। तत्पर्य्यायः। महावीरः २। इति त्रिकाण्डशेषः॥

मखान्नं, क्ली, (मखे मखकाले भोज्यमन्नम्।) खाद्यबीजभेदः। माखाना इति भाषा॥ तत्पर्य्यायः। पद्मबीजाभम् २ यानीयफलम् ३।

"मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्दिशेत्।"

इति भावप्रकाशः॥

मखासुहृत्, [द्] पुं, शिवः। मखस्य दक्षयज्ञस्य असुहृत् प्रभुः नाशक इत्यर्थः। इति हेमचन्द्रः। २००॥

मग इ सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर० सक०-सेट्।) इ, मङ्गति। इति दुर्गादासः॥

मगधः, पुं, (मगि+अच्। एषोदरादित्वान्निष्पन्नः। मगं दोषं दधाति। धा+"आतोऽनुपसर्गे।" ३।२।३। इति कः। यद्वा, कर्कादिमगध+अच्।) कीकटदेशः। अधुना बेहाराख्यदेशस्य दक्षिण भागः। तद्देशस्थे पुं भूम्नि। इति शब्दरत्नावली॥ (यथा, महाभारते। ८। ४५। ४८।

"दक्षिणाश्च मगधाः प्रेषितास्तत्र कोशलाः।
अर्द्धोक्ताः कुरुपाञ्चालाः शाल्वाः सत्स्यास्तु शाल्वनाः॥")

बन्दी। इति हेमचन्द्रः। ७६५॥

मगधा, स्त्री, (मगधस्तन्नामा देशः उत्पत्तिस्थानत्वेनास्त्यस्या इत्यर्शं आदिभ्योऽच्। स्त्रियां टाप्।) पिप्पली। इति राजनिर्घण्टः॥ (यथा, सुश्रुते कल्पस्थाने एकादशाध्याये।

"फलं दृष्ट्वा मगधोद्भवानामादाय कल्कं फलपाककाले।")

मगधदेशजाते त्रि॥

मग्नः, त्रि, (मस्ज्+क्तः। "ओदितश्च।" ८।२।४५। इति निष्ठातकारस्य नत्वम्। "स्कोः संयोगाद्योरन्ते च।" ८। २। २९। इति सलोपः। चोः कुत्वञ्च।) स्नातः। जलान्तःप्रविष्टः। डोबा इति भाषा॥ (यथा, देवीभागवते। १।६।२५।

"केन दृष्टं कथं जातं मयावायां जले स्थितौ॥")

मग्नत्रयातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः॥

मघ, इ ङ भूषे। कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक० सेट्।) इ, मङ्घते। इति दुर्गादासः॥

मघ, इ ङ कैतवाध्यार्थयोः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-द्यूतक्रीड़ादौ अक०-गतौ निन्दायां आरम्भे च सक०-सेट्।) कैतवमिह कितवक्रिया अक्षक्रीड़नादिः। इ मङ्घते ङ मङ्घते अक्षैः कितवः। अध्यर्थो गतिनिन्दारम्भजवः। कैतवजवयोरेवायमिति केचित्। इति दुर्गादासः॥

मघः, पुं, (मघि+अच्। एषोदरात् साधुः।) द्वीपविशेषः। इति मेदिनी। घे, ४॥ देशविशेषः। स तु भगनामकस्वेच्छानां स्थानम्॥ पुष्पविशेषे क्ली। इति शब्दरत्नावली॥ (क्लीं मंहनीयं धनम्। यथा, ऋग्वेदे। ७। २१।७।

"इन्द्रो मघानि दयते विवस्वतोऽहं वाजस्य गोमतः शतस्य दातुः।")

"मघानि मंहनीयानि धनानि।") इति तद्भाष्ये सायणः।)

मघवती, स्त्री, (मघवत्+ङीप्। इन्द्राणी। इति मुग्धबोधव्याकरणम्॥

मघवा, [न्] पुं, (मह्यते पूज्यते इति। मह पूजायाम्। "अनुदात्तेत्। पूषन् भ्रौहनिति।" उणा०। २। १५८। इति कनिन्। निपातनात् हस्य घः अवुगागमश्च।) इन्द्रः। इत्यमरः। १। १। ४४॥ (यथा, रघौ। १। २६।

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्॥")

जिनानां द्वादशचक्रवर्त्तिनामन्तर्गतचक्रवर्त्तिविशेषः। इति हेमचन्द्रः॥ (सप्तमद्वापरस्य व्यासः। यथा, देवीभागवते। १। ३। २८।

"मघवा सप्तमे प्राप्ते वशिष्ठस्त्वष्टमे स्मृतः।")

मघवान्, [न्] पुं, (मघवत्। "मघवा बहुलम्।" ६। ४। १२८। इति पक्षे ङ-आदेशः। ऋदित्।) इन्द्रः। इत्यमरटीकायां रमानाथः। व्याकरणञ्च॥ (यथा, महाभारते। ३।४५।१०।

"एको वै रचिता चैव त्रिदिवं मघवानिव॥")

एनोः पुत्रभेदः। यथा, मात्स्ये। ६। १८।

"मरीचिर्मघवांश्चैव एरागर्भश्चिराश्चथा।")

मघा, स्त्री, (मह्+घः। ह्रस्वत्वम्।) औषधविशेषः। इति धरणिः॥ अस्मिन्नादिसप्तविंशनक्षत्रान्तर्गतदशमनक्षत्रम्। तत्तु लाङ्गलाकृति पञ्चतारात्मकम्। यद्दाक्षति। इति केचित्। अस्याधिष्ठातृदेवता पितृगणः। यथा,—

"लाङ्गलाकृतिनि पञ्चतारके
चापकेऽग्नि पितृभे शिरोगते।
नीलनीरदविनिन्दितोचने!
दक्षिकादिगलितं कलाशतम्॥१।४०॥"

इति कालिदासकृततराचिलग्ननिरूपणम्॥

तत्र जातफलम्।

कठोरचित्तः पिशुनाशुभक्त-
स्तीव्रस्वभावस्त्वनवद्यविद्यः।
चेज्जन्मभं यस्य मघानघः स्या-
ज्जातिः सदारातिविनाशदक्षा॥"

इति कोष्ठीप्रदीपः॥

मघाशब्दो बहुवचनान्तोऽपि दृश्यते। यथा,—

"क्षणपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः।
यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते॥

अपि च।

नवोदके नवान्ने च ग्रहप्रच्छादने यथा।
पितरः सृष्टयन्त्यन्नमष्टकासु मघासु च॥"

इति तिथ्यादितत्त्वम्॥

एकवचनान्तप्रयोगो यथा,—

"मघायां पिण्डदानेन ज्येष्ठपुत्रो विनश्यति।"

इति मलमासतत्त्वम्॥

(अस्यां श्राद्धिजननेऽरिष्टत्वं यथा,—

"मघा भरणीहस्तेषु मूले वा श्वरितोऽपि वै।
म्रियमाणपते सोऽपि नात्र कार्य्या विचारणा॥
"नवरात्रं तथाश्लेषा मघास्वेति यमालयम्॥"

इति हारीते द्वितीये स्थाने चतुर्थेऽध्याये॥)

मघात्रयोदशी, स्त्री, (मघा दशमनक्षत्रम्। मघायुक्ता त्रयोदशी। इति मध्यपदलोपी कर्म्मधारयः।) मघानक्षत्रयुक्तभाद्रकृष्णत्रयोदशी। यथा। प्रौष्ठपदे हे कृष्णत्रयोदश्यां मघायुक्तायां यन्निषिद्धयत्किञ्चिद्दर्शेन श्राद्धमावश्यकम्। ग्रहणादिविधिवाक्येषु नक्षत्रविशिष्टश्रुतेः। ततश्च केवलत्रयोदशी केवलमघा श्राद्धार्थवादा अपि कुतुपविशिष्टविधिप्राप्तकर्म्मणो नित्यत्वबोधका न तु केवलविध्यन्तरकल्पका गौरवात्। तथा च गुरुः।

"प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम्।
प्राप्य श्राद्धं हि कर्त्तव्यं मधुना पायसेन च॥"

मनुः।

"यत्किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्।
तदप्यक्षयमेव स्याद्वर्षासु च मघासु च॥"

विष्णुधर्म्मोत्तरे।

"प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी।
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः॥"

शातातपः।

"पितरः सृष्टयन्त्यन्नमष्टकासु मघासु च।
तस्माद्दद्यात् सदोद्युक्तो विद्वत्सु ब्राह्मणेषु च॥"

अन्नमात्रश्रुतेः मनुवचने यत्किञ्चित् श्रुतेश्च गुरूक्तपायसः फलातिशयार्थः गुणविशेषे फलविशेषः स्यादिति न्यायात्। उक्तं विष्णुधर्म्मोत्तरे।

"मघायुक्ता च तत्रापि ग्रस्ता राजंस्त्रयोदशी।
तत्राप्ययं भवेत् श्राद्धं मधुना पायसेन च॥
तत्र अक्षयकृष्णपक्षे। अत्र यत् श्राद्धं तन्मधुयोगेन वा अक्षयं भवेत्। अतएव मनुवचने यत्किञ्चिन्मधुना मिश्रमित्यनेन मधुमात्रयुक्तत्वमुक्तम्। अतोऽत्र सुतरां शूद्रस्याधिकारः॥*॥ अत्र गजच्छायायोगे फलातिशयः। तथा कृत्यचिन्तामणौ स्मृतिः।

"कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः।
यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते॥"

करे हस्तनक्षत्रे। कन्यादशमांशोपरि सपादत्रयोविंशांशः इति यावत्॥*॥ अविभक्तानामप्यत्र पृथक् श्राद्धमावश्यकम्। यथा, श्राद्धचिन्तामणौ स्मृतिः।

"विभक्ता अविभक्ता वा कुर्युः श्राद्धमहैविकम्।
मघासु च ततोऽन्यत्र नाधिकारः पृथक्क्रिया॥"

अदैविकं प्रत्याब्दिकैकोद्दिष्टम्। अन्यच्च क्षय-प्रचारौ नाधिकारः न नित्याधिकारः सपिण्डीकरणान्तानि यानि श्राद्धानि षोड़श। पृथङ्-नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचिदित्यत्रापिना समुच्चितस्यापृथग्द्रव्यस्य पुंसः सपिण्डी-करणान्तानीति विशेषवचनात्तदुत्तरश्राद्धानां पृथक्त्वमपि प्रतीयते। * । मघात्रयोदशी-निमित्तके श्राद्धे पुत्रवता पिण्डा न देयाः।

"भौमङ्गीं तिथिमासाद्य यावच्चन्द्रार्कसङ्गमम्।
तत्रापि महती पूजा कर्त्तव्या पितृदैवते।
श्राद्धे पिण्डप्रदानन्तु ज्येष्ठपुत्री विवर्जयेत्।"

इति देवीपुराणात्। भौमङ्गी पञ्चमी। चन्द्रार्क-सङ्गमोऽमावास्या। पितृदैवते श्राद्धे मघायाम्।

ज्ञातातपः।

"पिण्डनिर्वापरहितं यत्तु श्राद्धं विधीयते।
सक्षारावनलोपोऽत्र विकिरस्तु न दृश्यते॥
अक्षय्यं दत्तिका खत्ति सौमनस्यं यथाक्षिति।

इति तिथ्यादितत्त्वम्॥

मघाभः, पुं, (मघायां भवः।) शुक्रग्रहः। इति हेमचन्द्रः॥ मघाभूच्चजाते त्रि॥

मघाभूः, पुं, (मघायां मघासमीपस्थपूर्व्वफल्गुन्यां भवतीति भू+क्विप्।) शुक्राचार्य्यः। इति त्रिकाण्डशेषः॥

मघी, स्त्री, (मघा तदाख्यनक्षत्रं उत्पत्तिकारणत्वेनास्त्यस्या इति। मघा+अर्शआद्यच्। गौरा-दित्वात् ङीष्।) धान्यभेदः। इति मेदिनी। घे, ३॥

मघोनी, स्त्री, (मघोनः पत्नीति। मघवन्+स्त्रियां ङीष्। वकारस्य च सम्प्रसारणम्।) इन्द्राणी। इति मुग्धबोधव्याकरणम्॥

मङ्कुरः, पुं, (मङ्कयति भूषयतीति। मकि+बाहु-लकादुरच्।) सुकुरः। इत्यमरटीकायां भरतः॥

मङ्क्ता, [क्तृ] त्रि, (मज्जति स्नाति इति। मस्ज्+तृच्। "मसृजिनशोर्झलि।" ७। १। ६०। इति नुम्।) स्नानकर्त्ता। इति मस्जधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नम्।

मङ्गः, पुं, (मङ्गति सर्पतीति मगि+अच्।) नौकाग्निः। इति हेमचन्द्रः॥

मङ्गलं, क्ली, (मङ्गति हितार्थं सर्पति मङ्गति दुरदृष्टमनेनासादेति। मगि+"मङ्गेरलच्।" उणा० ५। ७०। इत्यलच्।) अभिप्रेतार्थ-सिद्धिः। इति तिथ्यादितत्त्वम्॥ तद्वति, त्रि। इत्यमरः॥ यथा, रामायणे। २। २३। ३०।

"मङ्गलैरभिषिक्तश्च तत्र त्वं यास्यसे भव॥"

तत्पर्य्यायः। भाव्यकम् २ भव्यम् ३ कल्याणम् ४ भविकम् ५ शुभम् ६। क्षेमम् ७ प्रशस्तम् ८ भद्रम् ९ स्वस्तेयसम् १० शिवम् ११ अरिष्टम् १२ कुशलम् १३ रिष्टम् १४ मद्रम् १५ शस्तम् १६। इति शब्दरत्नावली॥ (यथा, भागवते। ५। १४। ३४।

"मङ्गलाय च लोकानां क्षेमाय च भवाय च।"

"कल्याणं मङ्गलं क्षेमं भद्रं शिवं शुभम्।
इति वैद्यकरत्नमालायाम्॥

गृध्रखरगजगोधा रासभो भृङ्गराजो
मुखरपिककपोतो पोतकी शूकरी वा।
तदनु विहगराजो मङ्गलाग्र्यंसिनः स्यु-
र्वदति शुकुनवेत्ता वामतो निर्गमे वः॥"

इति हारीते द्वितीयस्थाने सप्तमेऽध्याये।)

सर्व्वार्थरत्नम्। इति मेदिनी। ले, १२०॥*॥

मङ्गललक्षणं यथा,—

"प्रशस्ताचरणं नित्यमप्रशस्तविवर्জ্জনम्।
एतद्धि मङ्गलं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः॥"

इत्येकादशीतत्त्वम्॥*॥

मङ्गलजनकद्रव्याणि। यथा,—

"पूर्णकुम्भं द्विजं वेश्यां शुक्लधान्यञ्च दर्पणम्।
दध्याज्यं मधु लाजञ्च पुष्पं दूर्व्वाक्षतं सितम्॥
दृषं गजेन्द्रं तुरगं ज्वलदग्निं सुवर्णकम्।
पर्णञ्च परिपक्वानि फलानि विविधानि च॥
पतिपुत्रवतीं नारीं प्रदीपं मणिमुत्तमम्।
शुक्लां प्रसूनमालाञ्च सद्योमांसञ्च चन्दनम्॥
ददर्शैतानि वस्तूनि मङ्गलानि पुरो सुने!।
श्वगालं नकुलं चाशं शूर्पं वामे शुभावहम्॥
राजहंसं मयूरञ्च खञ्जनञ्च शुकं पिकम्।
पारावतं शङ्खचिल्लं चक्रवाकञ्च मङ्गलम्॥
क्षत्रसारञ्च सुरभीं चमरीं श्वेतचामरम्।
धेनुं वत्सप्रयुक्ताञ्च पताकां दधिधे शुभाम्॥
नानाप्रकारवाद्यञ्च शुश्राव मङ्गलध्वनिम्।
हरिशब्दस्य सङ्गीतं घण्टाशङ्खध्वनिन्तथा।
दृष्ट्वा श्रुत्वा स जगाम हर्षेण तात! मन्दिरम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकागमनं नाम १६ अध्यायः॥*॥ अपि च।

"ददर्श वर्त्मन्येवञ्च मङ्गलार्हं शुभप्रदम्।
वाञ्छाफलप्रदं रम्यं पुरो मङ्गलसूचकम्॥
वामे शूर्पं श्रियां पूर्णकुम्भं नकुलमेव च।
पतिपुत्रवतीं साध्वीं दिव्याभरणभूषिताम्॥
शुक्लपुष्पञ्च माल्यञ्च धान्यञ्च खञ्जनं शुभम्।
दधिधे ज्वलदग्निञ्च विप्रञ्च वृषभं गजम्॥
वत्सप्रयुक्तां धेनुञ्च श्वेताश्वं राजहंसकम्।
वेश्याञ्च पुष्पमालाञ्च पताकां दधि यावकम्॥
मणिं सुवर्णं रजतं मुक्तामाणिक्यमौक्तिकम्।
सद्योमांसं चन्दनञ्च माध्वीकं घृतमुत्तमम्॥
क्षत्रसारं फलं लाजान् स्निग्धान्नं दर्पणन्तथा।
विचित्रितं विश्वालञ्च सुदीप्तां प्रतिमान्तथा॥
शुभं ददर्श देवं तं पक्षवक्त्रं त्रिलोचनम्।
शुक्लस्फटिकसङ्काशं नागराजैर्विराजितम्॥
शुक्लोत्पलं पद्मवनं शुक्लचित्रञ्च कोरकम्।
मार्জ্জारं पर्व्वतं मेघं मयूरशुकसारसम्॥
शुक्लकोकिलवाद्यानां ध्वनिं शुश्राव मङ्गलम्।
विचित्रं क्षत्रसङ्गीतं हरिशब्दं जयध्वनिम्॥
एवंभूतं शुभं दृष्ट्वा श्रुत्वा प्रहृष्टमानसः।
प्रविवेश हरिं स्मृत्वा पुण्यं वृन्दावनं वनम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७० अध्यायः॥

अन्यच्च।

"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥
एतानि शुभतां पद्मिन्नमस्येदर्घयेत्ततः।
प्रदक्षिणन्तु कुर्व्वीत तथा चायुर्न हीयते॥
दूर्व्वा दधि सर्पिरथोदकुम्भं
धेनुं सवत्सां वृषभं सुवर्णम्।
रत्नोमयं स्वस्तिकमक्षतानि
लाजा मधु ब्राह्मणकन्यकाश्च॥
श्वेतानि पुष्पाणि तथा शुभोक्ष
हुताशनं चन्दनमर्कबिम्बम्।
व्याघ्रत्वचञ्च समालभेत
ततश्च कुर्य्याद्विजजातिधर्म्मम्॥"

इति मत्स्यसूक्तमहातन्त्रे ४३ पटलः॥

वर्णभेदे मङ्गलशब्दभेदो यथा,—

"ब्राह्मणान् कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु॥"

इति कौर्म्मे उपविभागे ११ अध्यायः॥

मङ्गलः, पुं, (मगि+"मङ्गेरलच्।" उणा० ५। ७०। इति अलच्।) ग्रहविशेषः। सत्त्व-व्यायः। अङ्गारकः २ भौमः ३ कुजः ४ भक्तः ५ महीसुतः ६ वक्रार्किः ७ लोहिताङ्गः ८ खोन्मुखः ९ ऋणान्तकः १०। इति शब्दरत्नावली॥ आर ११ क्रूरदृक् १२ आवनेयः १३। इति ज्योतिष तत्त्वम्॥ स च रक्तगौरमिश्रितवर्णः। दक्षिण-दिक्पुरुषचत्रियजातिसामवेदतमोगुणतिक्त-रसमेषराशिप्रवालावन्तिदेशानामधिपतिः। मेषवाहनः। चतुरङ्गुलप्रमाणः। आरक्तमाल्य-वसनः। भरद्वाजमुनिसन्तानः। चतुर्भुजः। शक्तिवराभयगदाधारी। सर्व्वाभिमुखः। अस्याधिदेवता कार्त्तिकेयः। प्रत्यधिदेवता पृथिवी। स तु पित्तप्रकृतिः। युवा। क्रूरः। वनचारी। मध्याह्नकाले प्रबलः। गैरिकादि-धातुस्वामी। चतुष्पदानां प्रभुः। चतुष्कोणा-कृतिः। सुवर्णकारादीनां स्वामी। ज्वलित-भूमिचारी। किञ्चिदङ्गहीनः। कटुरसप्रियः। ताम्रवर्णरक्तद्रव्यस्वामी च। इति ग्रहयागतत्त्व-लघुजातकादयः॥*॥ अस्योत्पत्तिर्यथा,—

"उपेन्द्रबीजात् पृथ्व्यान्तु मङ्गलः समजायत।
वसुन्धरायां बलवान् तन्मे व्याख्यातुमर्हसि॥

सौतिरुवाच।

उपेन्द्ररूपमालोक्य कामार्त्ता च वसुन्धरा।
विधाय सुन्दरी वेश्मचत्ता प्रौढ़यौवना॥
सज्जिता तस्य तल्पे च सहसा वसुपस्थिता।
सुरम्यां मालतीमालां ददौ तस्मै वरानना॥
उपेन्द्रस्तज्जनो ज्ञात्वा कामी मन्मथपीड़ितः।
नानाप्रकारशृङ्गारं चकार च तया सह॥
तदङ्गसङ्गमासक्ता मूर्च्छां प्राप सती तदा।
मृतेव निद्रिता वासौ वीर्य्याधानरते हरौ॥
विहाय तत्र रहसि जगाम पुरुषोत्तमः।
उन्मथ्यौ पथि गच्छन्तौ बोधयामास तां सुने!।
सा च पप्रच्छ वृत्तान्तं कथयामास भूस्व ताम्
वीर्य्यं समरयं कर्त्तुं सा चाग्रहा च दुर्बला।
प्रवालसागरे त्यक्त्वा वीर्य्यन्यासं चकार सा।

तेन प्रवालवर्णश्च कुमारः समजायत ।
तेजसा सूर्यसदृशो नारायणसुतो महान् ॥"
इति ब्रह्मवैवर्तपुराणे, ६ अध्यायः ॥
अपि च ।
"ततोऽङ्गारकलोको हि वसत्यत्र महीसुतः ।
उत्पत्तिश्चास्य वक्ष्यामि यथायं भूसुतोऽभवत् ॥
पुरा हि भ्रमतो विष्णोः स्वेदबिन्दुः पपात ह ।
महांस्ततः कुमारोऽसौ लोहिताङ्गो महीतलात् ॥
जातः स्वेदेन मेदिन्या वर्द्धितः पृथिवीपते ! ।
तपसाराध्य ब्रह्माणं ग्रहत्वमुपसेदिवान् ।"
इति पाद्मे स्वर्गखण्डे १२ अध्यायः ॥
अपरञ्च ।
"पुरा दक्षविनाशाय कुपितस्य त्रिशूलिनः ।
अपतद्भीमवक्त्रस्य स्वेदबिन्दुर्ललाटजः ॥
भित्त्वा समस्तपातालानदहत् सप्त सागरान् ।
अनेकवक्त्रनयनो ज्वलज्ज्वलनभीषणः ॥
वीरभद्र इति ख्यातः करपादायुतैर्युतः ।
कृत्वा स यज्ञमथनं पुनर्भूतलसम्भवः ॥
त्रिजगन्निर्दहन् भूयः शिवेन विनिवारितः ।
कृतं त्वया वीरभद्र ! दक्षयज्ञविनाशनम् ॥
इदानीमलमेतेन लोकदाहेन कर्म्मणा ।
शान्तिप्रदानात् सर्व्वेषां ग्रहाणां प्रथमो भव ॥
प्रेक्षिष्यन्ति जनाः पूजां करिष्यन्ति मतं मम ।
अङ्गारक इति ख्यातिं गमिष्यसि धरात्मज ! ॥
देवलोके द्वितीयश्च तव रूपं भविष्यति ।
ये च त्वां पूजयिष्यन्ति चतुर्थ्यां त्वह्नि नराः ।
रूपमारोग्यमैश्वर्य्यं तेषामनन्तं भविष्यति ॥
एवमुक्तस्तदा शान्तिमगमत् कामरूपधृक् ।
संजातस्तत्क्षणाद्राजन् ! ग्रहत्वमगमत् पुनः ॥"
इति मत्स्यपुराणे अङ्गारकव्रतं नाम ६८ अः ॥
कल्पभेदे अन्धकासुरवधकाले तस्योत्पत्तिर्यथा,
"यो भूम्यां न्यपतद्विप्र ! स्वेदबिन्दुः शिवानलात् ।
तस्मादङ्गारपुञ्जाभो बालकः समजायत ॥
स बालस्तृषितोऽत्यर्थं पपौ रुधिरमात्मकम् ।
कन्था चोत्स्वेदसंजाता साऽखिललिलिहेऽद्भुता ॥
ततस्तामाह बालार्कप्रभां भैरवमूर्त्तिमान् ।
ग्रहत्वं वरदो लोकश्रेयोऽर्थाय वचो महत् ॥
त्वां पूजयिष्यन्ति सुरा ऋषयः पितरस्तथा ।
यक्षविद्याधराश्चैव मानवाश्च शुभङ्करि ! ॥
त्वां स्तोष्यन्ति सदा देवि ! बलिपुष्पोत्करैः करैः ।
चर्चिकेति शुभं नाम यस्माद्रुधिरचर्चिता ॥
इत्येवमुक्ता वरदेन चर्चिका
भूत्वानुयाता हरिचर्म्मवासिनी ।
महीं समन्ताद्विचचार सुन्दरी
स्खलं गता, शैङ्गलमाद्यमुत्तमम् ॥
तस्यां गतायां वरदः कुजस्य
प्रादाद्वरं सर्व्ववरोत्तमं यतः ।
ग्रहाधिपत्यं जगतः शुभाशुभं
भविष्यति त्वद्ग्रहं महात्मनाम्॥
इति वामनपुराणे ६७ अध्यायः ॥

अस्य स्तोत्रं यथा,—
"धरणीगर्भसंभूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम् ।"
इति वासोक्तनवग्रहस्तोत्रान्तर्गतम् ॥
ऋणपरिशोधनार्थस्तोत्रं यथा,—
"मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रदः ।
स्थिरासनो महाकायः सर्व्वकर्म्मविरोधकः ॥
रोहितो लोहिताक्षश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूमिजो भूमिनन्दनः ॥
अङ्गारको यमश्चैव सर्व्वरोगापहारकः ।
वृष्टिकर्त्ता च हर्त्ता च सर्व्वकामफलप्रदः ॥
एतानि कुजनामानि प्रातरुत्थाय यः पठेत् ।
ऋणं न जायते तस्य धनमाप्नोति पुष्कलम् ॥
रक्तपुष्पैश्च गन्धैश्च धूपदीपादिभिस्तथा ।
मङ्गलं पूजयेद्यस्तु मङ्गलेऽहनि सर्व्वदा ॥
ऋणरेखाः प्रकर्त्तव्या अङ्गारेण सदा बुधैः ।
प्रोच्छ्येद्वामपादेन ऋणं तस्य विनश्यति ॥
मङ्गलाय नमस्तुभ्यं नमस्ते ऋणहारिणे ।
पुत्रपौत्रप्रदात्रे च मङ्गलाय नमो नमः ॥
ऋणार्त्तो ह्यहमस्यर्थं ऋणं कुरु मे विभो ! ।
एतत् कृत्वा न सन्देहो ऋणं हत्वा धनी भवेत् ।
इति स्कन्दपुराणम् ॥ * ॥
मङ्गलवारे जातस्य फलं यथा,—
"उग्रः प्रतापी क्षितिपालमन्त्री
रणप्रियो वक्रवचाः सरोषः ।
सञ्चान्वितः शूरगणप्रणेता
कुजस्य वारे प्रभवो मनुष्यः ॥"
इति कोष्ठीप्रदीपः ॥
मङ्गलचण्डिका, स्त्री, (मङ्गला मङ्गलदायिका चासौ चण्डिका चेति । यद्वा, रक्तौ मङ्गला प्रलये चण्डिका । अथवा मङ्गले चण्डिका दुर्गा ।) मङ्गलचण्डी । यथा, कालिकापुराणे ।
"वैद्या ललितकान्ताख्या देवी मङ्गलचण्डिका ।
वरदाभयहस्ता च द्विभुजा गौरदेहिका ॥
रक्तपद्मासनस्था च रक्तकुण्डलमण्डिता ।
रक्तकौषेयवस्त्रा च स्मितवक्त्रा शुभानना ॥
नवयौवनसम्पन्ना सर्व्वाङ्गी ललितप्रभा ।
उमया भाषितं मन्त्रं यत् पूर्व्वमेकमक्षरम् ।
मन्त्रमस्यास्तु तज्ज्ञेयं तेन देवीं प्रपूजयेत् ॥"
एकमक्षरं शक्तिबीजरूपम् ।
"अष्टम्याञ्च नवम्याञ्च पूजा कार्य्या विशेषतः ।
पटेषु प्रतिमायां वा घटे मङ्गलचण्डिकाम् ॥
यः पूजयेद्गौरिदेहे शुभदुर्व्वाक्षतैः शुभाम् ।
सततं साधकः सोऽपि काममिष्टमवाप्नुयात् ॥ * ॥
मङ्गलवारे कृष्णाष्टमीचतुर्दश्यौ चेत् पुण्यतरे भवतः । यथा,—
"शनैश्चरस्य वारेण वारेणाङ्गारकस्य च ।
कृष्णाष्टमीचतुर्दश्यौ पुण्यात् पुण्यतरे स्मृते ॥ * ॥
मङ्गलवारे शुक्ला चतुर्थी चेदत्यया भवति । यथा,—
"सोमवारेऽप्यमावास्या आदित्यादे च सप्तमी ।
चतुर्थ्यङ्गारके वारे त्वष्टमी च दृङ्मतौ ॥
अत्र यत् क्रियते पापमथवा धर्म्मसञ्चयः ।
षष्टिवर्षसहस्राणि प्रतिजन्म तदक्षयम् ॥"
इति तिथ्यादितत्त्वम् ॥
मङ्गलचण्डी, स्त्री, (मङ्गला चासौ चण्डी चेति यद्वा, देवानां सुखादिभक्तानां मङ्गलाय दुर्गेवासुरादिमारणे चण्डी अत्यन्तकोपना । मङ्गलचण्डी दक्षेति वा । अथवा रक्तौ मङ्गला प्रलये चण्डी । भागवतेऽस्या नामनिरुक्तिर्यथा,—
"रक्तौ मङ्गलरूपा च संहारे कोपरूपिणी ।
तेन मङ्गलचण्डी सा पण्डितैः परिकीर्त्तिता ।")
दुर्गा । यथा,—
नारायण उवाच ।
"कथितं वष्ठ्याख्यानं ब्रह्मपुत्र ! यथागमम् ।
देवी मङ्गलचण्डी या तदाख्यानं निशामय ॥
तस्याः पूजादिकं सर्व्वं धर्म्मवक्त्रेण यच्छ्रुतम् ।
श्रुतिसम्मतमेवेदं सर्व्वेषां विदुषामपि ॥
दत्त्वायां वर्णते चण्डी कल्याणेषु च मङ्गलम् ।
मङ्गलेषु च या दत्ता सा च मङ्गलचण्डिका ॥
पूज्यायां वर्णते चण्डी मङ्गलेऽपि महीसुतः ।
मङ्गलाभीष्टदेवी या सा वा मङ्गलचण्डिका ॥
मङ्गलो मनुवंशश्च सप्तद्वीपधरापतिः ।
तस्य पूज्याभीष्टदेवी तेन मङ्गलचण्डिका ॥
मूर्त्तिभेदेन सा दुर्गा मूलप्रकृतिरीश्वरी ।
कृपारूपातिप्रत्यक्षा योषिताभिष्टदेवता ॥
प्रथमे पूजिता सा च शङ्करेण पुरः पुरा ।
त्रिपुरस्य वधे घोरे विष्णुना प्रेरितेन च ॥
ब्रह्मन् ! ब्रह्मोपदेशेन दुर्गग्रस्तेन सङ्कटे ।
आकाशात् पतिते याने देवैश्च पातिते रुषा ॥
ब्रह्मविष्णूपदिष्टश्च दुर्गां तुष्टाव शङ्करः ।
सा च मङ्गलचण्डी च बभूव रूपमेदतः ॥
उवाच पुरतः शम्भोर्भयं नास्तीति ते विभो ! ।
भगवान् वृषरूपश्च सर्व्वेषश्च बभूव ह ॥
युवशक्तिस्वरूपाहं भविष्यामि तदाज्ञया ।
मयासुना च हरिणा सहायेन वृषध्वज ! ॥
जहि दैत्यञ्च शत्रुञ्च सुराणां पदघातकम् ।
इत्युक्त्वान्तर्हिता देवी शम्भोः शक्तिर्बभूव सा ॥
विष्णुदत्तेन शूलेन जघान तमुमापतिः ।
मुनीन्द्र ! पतिते दैत्ये सर्व्वे देवा महर्षयः ॥
तुष्टुवुः शङ्करं देवं भक्तिनम्रात्मकन्धराः ।
सद्यः शिरसि शम्भोश्च पुष्पवृष्टिर्बभूव च ।
ब्रह्मा विष्णुश्च सन्तुष्टो ददौ तस्मै शुभाशिषम् ॥
ब्रह्मविष्णूपदिष्टश्च सुरान्तः शङ्करः शुचिः ।
पूजयामास तां शक्तिं देवीं मङ्गलचण्डिकाम् ॥
पाद्यार्घ्याचमनीयैश्च बलिभिर्विविधैरपि ।
पुष्पचन्दनवेद्यैर्भक्ष्यैर्नानाविधैर्मुने ! ॥
क्षीरैर्मधुभिश्च सर्पिषैर्गन्धैर्मांसातिभक्ष्यैः ।
वस्त्रालङ्कारमाल्यैश्च पायसैः पिष्टकैरपि ॥
मधुभिश्च सुधाभिश्च पक्वैर्नानाविधैः फलैः ।
संगीतैर्नर्त्तनैर्वाद्यैरुत्सवैः कृष्णकीर्त्तनैः ॥
ध्यात्वा माध्यन्दिनोक्तेन ध्यानेन भक्तिपूर्व्वकम् ।
ददौ ह्यखिलमूलेन मन्त्रेणैव च नारद ! ॥

ॐ ह्रीं श्रीं क्लीं सर्व्वपूज्ये देवि मङ्गलचण्डिके।
हुं हुं फट् स्वाहेत्येवचाप्येकविंशाक्षरो मनुः॥
पूज्यः कल्पतरुश्चैव भक्तानां सर्व्वकामदः।
दशलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम्।
मन्त्रसिद्धिर्भवेद्यस्य स विष्णुः सर्व्वकामदः॥
ध्यानञ्च श्रूयतां ब्रह्मन्! वेदोक्तं सर्व्वसम्मतम्॥
देवीं षोड़शवर्षीयां शश्वत्सुस्थिरयौवनाम्।
सर्व्वरूपगुणाढ्याञ्च कोमलाङ्गीं मनोहराम्॥
श्वेतचम्पकवर्णाभां चन्द्रकोटिसमप्रभाम्।
वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम्॥
बिभ्रतीं कबरीभारं मल्लिकामाल्यभूषितम्।
बिम्बोष्ठीं सुदतीं शुद्धां शश्वत्पद्मनिभाननाम्॥
ईषद्धास्यप्रसन्नास्यां सुनीलोत्पललोचनाम्।
जगद्धात्रीञ्च दात्रीञ्च सर्व्वेभ्यः सर्व्वसम्पदाम्।
संसारसागरे घोरे पोतरूपां वरां भजे॥
देव्याश्च ध्यानमित्येवं स्तवनं श्रूयतां मुने!।
प्रयातः सङ्कटग्रस्तो येन तुष्टाव शङ्करः॥

श्रीशङ्कर उवाच।

रक्ष रक्ष जगन्मातर्देवि मङ्गलचण्डिके!।
हारिके विपदां राशिं हर्षमङ्गलदायिके!॥
हर्षमङ्गलदक्षे च हर्षमङ्गलचण्डिके!।
शुभे मङ्गलदक्षे च शुभे मङ्गलचण्डिके!॥
मङ्गले मङ्गलार्हे च सर्व्वमङ्गलमङ्गले!।
सतां मङ्गलदे देवि! सर्व्वेषां मङ्गलालये!॥
पूज्ये! मङ्गलवारे च मङ्गलाभीष्टदेवते!।
पूज्ये मङ्गलभूपस्य मनुवंशस्य सन्ततम्॥
मङ्गलाधिष्ठातृदेवि! मङ्गलानाञ्च मङ्गले!।
संसारमङ्गलाधारे मोक्षमङ्गलदायिनि!॥
सारे च मङ्गलाधारे पारे च सर्व्वकर्म्मणाम्।
प्रतिमङ्गलवारे च पूज्ये च मङ्गलप्रदे!॥
स्तोत्रेणानेन शम्भुश्च स्तुत्वा मङ्गलचण्डिकाम्।
प्रतिमङ्गलवारे च पूजां कृत्वा यतः शिवः॥
देव्याश्च मङ्गलं स्तोत्रं यः शृणोति समाहितः।
तन्मङ्गलं भवेत् शश्वन्न भवेत्तदमङ्गलम्॥
प्रथमे पूजिता देवी शिवेन सर्व्वमङ्गला।
द्वितीये पूजिता देवी मङ्गलेन नृपेण च॥
तृतीये पूजिता भद्रा मङ्गलेन नृपेण च।
चतुर्थे मङ्गले वारे सुन्दरीभिश्च पूजिता॥
मङ्गले मङ्गलाकाङ्क्षैर्नरैर्मङ्गलचण्डिका।
पूजिता प्रतिविश्वेषु विश्वेशपूजिता सदा॥
ततः सर्व्वत्र संपूज्या सा बभूव सुरेश्वरी।
देवादिभिश्च मुनिभिर्मनुभिर्मानवैर्मुने!॥
वर्द्धते ततपुत्रपौत्रो मङ्गलञ्च दिने दिने॥"
इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारायणनारदीये मङ्गलचण्डिकोपाख्यानं ततस्तोत्रकथनं नाम ४१ अध्यायः॥

मङ्गलच्छायः, पुं, (मङ्गला मङ्गलजनिका छायास्य।) सप्तपर्णः। इति राजनिर्घण्टः॥

मङ्गलनीराजनं, क्ली, (मङ्गलं मङ्गलकरं मङ्गलाय वा नीराजनम्।) ब्राह्मसुहूर्त्तकर्त्तव्य भगवदारात्रिकम्। मङ्गल आरती इति भाषा॥ यथा,—

"पटित्वाथ प्रियान् शोकान् महावादित्र-
निःस्वनैः।
प्रभोर्नीराजनं कुर्य्यान्मङ्गलाख्यं जगद्धितम्॥
नीराजनन्त्विदं सर्व्वैः कर्त्तव्यं शुचिविग्रहैः।
परमश्रद्धयोत्थाय दृष्ट्वा च सदा नरैः॥
स्त्रीणां पुंसाञ्च सर्व्वेषामेतत् सर्व्वेष्टपूरकम्।
समस्तदेव्यदारिद्र्यदुरितादुपशान्तिकृत्॥"
इति श्रीहरिभक्तिविलासे १ विलासः॥

मङ्गलपाठकः, पुं, (पठतीति। पठ+ण्वुल्। मङ्गलस्य पाठकः।) वन्दी। इति हेमचन्द्रः। ७। ६७॥ (यथा, वेणीसंहारनाटके। १, अङ्के 'आः पाप! दुरात्मन्! इयमङ्गलपाठक!।'

मङ्गलप्रदा, स्त्री, (मङ्गलं प्रददातीति। प्र+दा+"आतश्चोपसर्गे।" ३।१।१३६। इति कः। टाप्।) हरिद्रा। इति केचित्॥ मङ्गलदातरि त्रि॥

मङ्गला, स्त्री, (मङ्गलमस्या अस्तीति। मङ्गल+अर्श आद्यच्। टाप्।) पार्व्वती। शुक्लदूर्व्वा। पतिव्रता। इति शब्दरत्नावली॥ करञ्जभेदः। इति शब्दचन्द्रिका॥ दुर्गाहर्ड्डाद्यष्टविशेषः। इति हेमचन्द्रः॥ हरिद्रा। नीलदूर्व्वा। इति राजनिर्घण्टः॥

मङ्गलागुरु, क्ली, (मङ्गलञ्च तत् अगुरु चेति। नित्यकर्म्मधारयः।) अगुरुचतुष्टयान्तर्गतागुरुविशेषः। यथा, राजनिर्घण्टः।
"मङ्गल्या मल्लिकागन्धा मङ्गलागुरुवाचकाः।
मङ्गल्या गुरुगिरिरा मन्थाढ्या योगवाहिका॥"

मङ्गल्यं, क्ली, (मङ्गलाय साधु इति। मङ्गल+"तत्र साधुः।" ४।४।९८। इति यत्।) दधि। इति मेदिनी। ये, १०१॥ चन्दनम्। मङ्गल्यागुरु। स्वर्णम्। सिन्दूरम्। इति राजनिर्घण्टः॥

मङ्गल्यं, त्रि, (मङ्गलाय साधु। मङ्गल+यत्।) शिवकरम्। इति मेदिनी। ये, १०१॥ (यथा, उत्तरचरिते। ७ अङ्के।
"पापभ्यश्च पुनाति वर्द्धयति च श्रेयांसि येयं कथा।
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च॥"
यथाच, महाभारते। १।१।२४।
मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम्।
नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम्॥")
रुचिरम्। इति हेमचन्द्रः॥ साधुः। इति धरणिः॥

मङ्गल्यः, पुं, (मङ्गलाय साधुः। मङ्गल+"तत्र साधुः।" ४।४।९८। इति यत्।) न्यायमाणा। अश्वत्थः। बिल्वः। मस्करकः। इति मेदिनी। ये, १००॥ जीवकः। नारिकेलः। कपित्थः। रोहितकवृक्षः। इति राजनिर्घण्टः॥ (जीव इति ख्यातः शाकविशेषः। तत्पर्य्यायो यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मङ्गल्यकः, पुं, (मङ्गल्य+संज्ञायां कन्। यद्वा मङ्गलस्य मङ्गलग्रहस्य प्रियः इति यत्। ततः स्वार्थे कन्।) मस्करः। इत्यमरः। २।६। १७॥ (तथास्य पर्य्यायः।
"मङ्गल्यको मस्करः स्यान्मङ्गल्या च मस्करिका।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मङ्गल्यकुसुमा, स्त्री, (मङ्गल्यानि कुसुमानि यस्याः।) शङ्खपुष्पी। इति भावप्रकाशः॥

मङ्गल्यनामधेया, स्त्री, (मङ्गलं मङ्गलजनकं नामधेयं यस्याः।) जीवन्ती। इति जटाधरः॥

मङ्गल्या, स्त्री, (मङ्गलाय साधुरिति यत्। टाप्।) मल्लिकागन्धद्रव्यागुरु। इत्यमरः। २।६।१२७॥ श्रमी। अधःपुष्पी। मिसी। शुक्लवचा। रोचना। इति मेदिनी। ये, १००॥ प्रियङ्गुः। शङ्खपुष्पी। इति हेमचन्द्रः॥ माषपर्णी। जीवन्ती। ऋद्धिः। वचा। हरिद्रा। चीड़ा। इति राजनिर्घण्टः॥ दूर्व्वा। इति रत्नमाला॥ दुर्गा। यथा,—
"शोभनानि च श्रेष्ठानि या देवी ददते हरे।
भक्तानामार्त्तिहरणी मङ्गल्या तेन सा स्मृता॥"
इति देवीपुराणे ४४ अध्यायः॥
(वचार्थे पर्य्यायो यथा,—
"तीक्ष्णोग्रगन्धा जटिला मङ्गल्या विजया वचा।
षड्ग्रन्थोग्रा च रुचोग्री सिता हैमवती तु सा॥"
मिसीशब्दार्थे यथा,— [मिसी॥"
"अवाक्पुष्पी च हृद्या स्यान्मङ्गल्या मधुरा हैमपुष्पी। तत्पर्य्यायो यथा,—
"अवाक्पुष्पी लघुःपुष्पी मङ्गल्यामरपुष्पिका॥"
इति च वैद्यकरत्नमालायाम्॥
रोचनार्थे पर्य्यायो यथा,—
"गोरोचना तु मङ्गल्या वन्द्या गौरी च रोचना।"
श्रमार्थे पर्य्यायो यथा,—
"श्रमी शुक्लफला तुङ्गा कैग्रहस्त्री फला शिवा।
मङ्गल्या च तथा लक्ष्मीः श्रमीरः साल्विका स्मृता॥"
मस्करः। तत्पर्य्यायो यथा,—
"मङ्गल्यको मस्करः स्यान्मङ्गल्या च मस्करिका।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मङ्गिनी, स्त्री, (मङ्गो नौश्चिरस्तदस्या अस्तीति इनिः ङीप् च।) नौका। इति हेमचन्द्रः॥

मङ्गुनं, क्ली, (मङ्गल्यमेनेति। मङ्ग+ल्युट्।) अङ्गारचूर्णम्। इति हारावली। १६८॥

मङ्गु, य, भव्यतीति। मस्ज्+बहुलवचनात् सुः।) "मस्जिनशोर्झलि।" ७।१।६०। इति नुम्। "स्कोः संयोगाद्योरन्ते च।" ८।२। २६। इति सलोपः।) दृतम्! इत्यमरः। ३। ४।२। (यथा, माघे। ५।३०।
"यद्वल्गिनः कटकटाहतटाग्रिमङ्गी-
मङ्गुष्पति परितः पटलैरलीनाम्॥")
श्लक्ष्णार्थम्। इति मेदिनी। अथये। ये, ७६॥

मञ्जुलं, क्ली, (मञ्जु । पृषोदरादित्वात् साधुः ।) जङ्गलाग्रम् । इति त्रिकाण्डशेषः ॥

मच, ट ङ उच्छ्रायदृत्यर्चाभाःसु । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-दृतौ अर्चायाञ्च सक०-दीप्तौ उच्छ्रीभावे च अक०-सेट् ।) ट मच्यते । ङ मचते । उच्छ्राय उच्छ्रीभावः । इति दुर्गादासः ॥

मच, ङ च कल्कने । दम्भे । ग्राव्णे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-दम्भे ग्राव्णे च । अक०-कल्कने-सक०-सेट् ।) कल्कनमिति कल्कं करोतीति णौ रूपं चूर्णीकरणमित्यर्थः । ङ मचते तण्डुलं गिला चकारात् मचि ङ । इति दुर्गादासः ॥

मचर्चिका, स्त्री, (मं ग्रभुं चर्चतीवेति । चर्च् + ण्वुल् । टाप् । अत इत्वम् । वस्तुतस्तु रूढोऽयं शब्दः ।) प्रग्रसम् । इत्यमरः ।२।४।२७॥ (यथा, प्रग्रसो ब्राह्मणो ब्राह्मणमचर्चिका । "प्रग्रंसावचनेच्च । २ । १ । ६६ । इति समासः ।)

मच्छः, पुं, (माद्यति सलिलेनेति । मद् + क्विप् । तथा सन् ग्रीते इति । ग्री + डः ।) मत्स्यः । इति शब्दरत्नावली ॥

मज्जज्ञत्, क्ली, (मज्जानं करोतीति । ज्ञ + क्विप् । तुगागमश्च ।) अस्थि । इति हेमचन्द्रः ॥

मज्जनं, क्ली, (मस्ज् + ल्युट् ।) स्नानम् । इति जटाधरः ॥ (यथा, राजतरङ्गिण्याम् ।३।४०। जाह्नवीमज्जनप्रीतिं न जानन्ति मरुस्थिताः॥") मज्जा । इति शब्दचन्द्रिका ॥

मज्जसम्भवं, क्ली, (मज्जा सम्भव उत्पत्तिस्थानं यस्य ।) शुक्रम् । इति हेमचन्द्रः ॥

मज्जा, [न्] पुं, (मज्जति अस्थिष्विति । मस्ज् + "अन् उपधन् पूषन् ग्रीहन् क्लेदन् स्नेहन् मज्जन्निन्यादि ।" उणा० । १।१५८ । इति कनिन् निपात्यते च ।) पृषादेरुत्तमस्थिरभागः । सार इति ख्यातः । इत्यमरभरतौ ॥ फलमज्जगुणो यथा,—

"यस्य यस्य फलस्येह वीर्य्यं भवति यादृशम् ।
तस्य तस्यैव वीर्य्यस्य मज्जानमभिनिर्दिशेत् ॥"

इति राजवल्लभः ॥

अस्थिमध्यस्थस्नेहविशेषः । तत्पर्य्यायः । कौशिकः २ शुक्रकरः ३ अस्थिस्नेहः ४ अस्थिसम्भवः ५ । इति हेमचन्द्रः । ६।१६ ॥ अस्थिसारः६ तेजः ७ बीजम् ८ अस्थिजम् ९ जीवनम् १० देहसारः ११ । इति राजनिर्घण्टः ॥ अथ मज्जस्वरूपमाह ।

"अस्थि यत् स्नायिना पक्वं तस्य सारो द्रवो घनः ।
यः स्नेहवत् पृथग्भूतः स मज्जेत्यभिधीयते ॥"

अथ मज्जस्थानमाह ।

"स्थूलास्थिषु विशेषेण मज्जा तिष्ठत्यन्तरे स्थितः ।"

इति भावप्रकाशः ॥

अस्य गुणाः ।

"बलशुक्ररसश्लेष्ममेदोमज्जविवर्द्धनः ।
मज्जा विशेषतोऽस्थ्नाञ्च बलकृत् स्नेहने हितः ॥"

इति चरकः ॥

मज्जाशब्द आवन्त्योऽपि । यथा । शृणातसीमूलकशिग्रुबिल्वे प्रियालमज्जासहितेक्षिते च सुश्रुतः ॥ इयमेवाह त्रिकाण्डे भागुरिः ॥

"लज्जावदाजवन्मज्जा मांसवाराक्षिसारयोः ।"

इत्यमरटीकायां भरतः ॥

मज्जा, स्त्री, (मज्जतीति । मस्ज् + अच् । अजादित्वात् टाप् ।) अक्षिसारः । इत्यमरटीकायां भरतः ॥ अस्य गुणाः । वातनाशित्वम् । बलपित्तकफप्रदत्वम् । मांसतुल्यगन्धरूपत्वञ्च । कुम्भीरमहिषमज्जागुणाः । मधुरत्वम् । हृद्यत्वम् । बल्यत्वञ्च । मज्जसत्त्वगुणौ यथा । ग्रैत्यम् । उष्णत्वञ्च । इति राजवल्लभः ॥

मज्जातः, पुं, (मज्जाया जायते इति । जन् + डः ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥

मज्जारसः, पुं, (मज्जाया रसः ।) शुक्रम् । इति राजनिर्घण्टः ॥

मज्जासारं, क्ली, (मज्जायां सारो यस्य ।) जातीफलम् । इति राजनिर्घण्टः ॥

मञ्जूषा, स्त्री, (मञ्जन्ति द्रव्याण्यत्र । मस्ज् + ऊषन् । टाप् निपा० ।) मञ्जूषा । इत्यमरटीकायां रामसुकुटः ॥

मञ्चः, पुं, (मञ्चति । उच्छ्रीभवतीति । मञ्चि + घञ् ।) खट्वा । इत्यमरः । २ । ७ । १३८ ॥ कर्षवंशः । माचा इति भाषा ॥ इति हारावली ॥ उच्चमञ्चपविशेषः । यथा,—

"दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम् ।
दृष्ट्वा वामनं दृष्ट्वा पुनर्जन्म न विद्यते ॥"

इति पुराणम् ॥

मञ्चकः, पुं, (मञ्च + स्वार्थे कन् ।) खट्वा । इति हेमचन्द्रः । ६ । ८३ ॥ (यथा, कथासरित्सागरे । २७। ६१ ।

"वारिधानी तु कुम्भश्च मार्ज्जनी मञ्चकस्तथा ।
अहञ्च मत्पतिश्चेति युग्मत्रितयमेव नौ ॥")

इन्द्रकोषः । उच्चमञ्चपः । इति त्रिकाण्डशेषः ॥

मञ्चकाश्रयः, पुं, (मञ्चक: खट्वादिराश्रयो यस्य ।) मत्कुणः । इति राजनिर्घण्टः ॥

मञ्चमण्डपः, पुं, (मञ्चो मण्डप इव ।) शुश्रूषार्थकुटिरम् । टं इति भाषा ॥ तत्पर्य्यायः । कुटङ्गः । इति हारावली ॥

मञ्जरं, क्ली, (मञ्जयति दीप्यते इति । मस्ज् + अरप्रत्ययः ।) मुक्ता । तिलकवृक्षः । वल्ली । इति शब्दरत्नावली ॥

मञ्जरिः, स्त्री, वल्लरिः । इत्यमरः । २ । ४ । १६ ॥ वल्लते ह्लादयति तरुं वल्लरिः वलभि वल्ल ड ङीतौ गाङ्वीति अरिः । मञ्जु मनोज्ञतां राततीति मञ्जरिः पूर्ब्बेव डिः मनीषादित्वादुकारस्य अकारः याच्ञोणादीति ईपि मञ्जरी वल्लरी च । वल्लरिमञ्जरिर्द्वयोरिति शाब्दिकः ॥ वल्लिर्मुञ्जिश्च ।

"मञ्जरिमञ्जरी मञ्जिर्मञ्जरं त्रिषु वल्लरी ।
वल्लरं त्रिषु वल्लिश्च वल्लरिः पचनालिका ॥"

इति हेमचन्द्रः ॥

लतामात्रेऽपि वल्लरिः । अतो बाहुवल्लरीति प्रयोग इति मुकुटोदयः ॥ वल्लरीमञ्जर्योर्भेदमाहुः । यथा अभिनवनिर्गता आयता सुकुमारा सकुसुमा अकुसुमा च मञ्जरिः । यथा चूतमञ्जरिः कदलीमञ्जरिः । वल्लरिः पुनरिरभूतापि । यथा तालमञ्जरिः गुवाकवल्लरिरिति हृयमेव नदे चिरन्तनैरुपैति क्षणसाङ्गौ । इति भरतः ॥

मञ्जरी, स्त्री, (मञ्जरि । ह्रस्वादिकारादिति पक्षे ङीष् ।) मुक्ता । तिलकवृक्षः । लता । इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम् । १ । २०७ ।

"निर्गते मञ्जरीकुञ्जादपश्यत् पुरतस्ततः ।
कर्णे नीलनिचोलिन्यौ स कैचिच्चारुलोचने ॥")

मञ्जरिः । इत्यमरटीकायां भरतः ॥ (यथा, आर्य्यासप्तशत्याम् । ५३३ ।

"पापीकच्छे वासः कण्टकवृतयः सजागरा भ्रमराः ।
केतकविटप किमेतैर्नन्वु वारय मञ्जरीगन्धम् ॥")

तुलसी । इति राजनिर्घण्टः ॥

मञ्जरीनम्रः, पुं, (मञ्जर्य्यां मञ्जर्य्यवस्थायामपि नम्रः ।) वेतसवृक्षः । इति राजनिर्घण्टः ॥

मञ्जा, स्त्री, (मज्ज + पचाद्यच् । टाप् ।) छागी । इति त्रिकाण्डशेषः ॥ मञ्जरी । इति हेमचन्द्रः । ११ । २२ ॥

मञ्जिः, पुं, (मज्ज + इन् ।) मञ्जरी । इति त्रिकाण्डशेषः ॥

मञ्जिका, स्त्री, (मञ्जयतीति । मञ्ज + ण्वुल् । टाप् । अत इत्वञ्च ।) वेश्या । इति हारावली ॥

मञ्जिफला, स्त्री, (मञ्जिर्मञ्जरी फलेऽस्याः ।) कदली । इति त्रिकाण्डशेषः ॥

मञ्जिष्ठा, स्त्री, (अतिशयेनेयं मञ्जिमती । मञ्जिमती + इष्ठः । मतुपो लोपः स्त्रियां टाप् ।) स्वनामख्यातरक्तवर्णलताविशेषः । मजीट इति हिन्दी भाषा । तत्पर्य्यायः । विकसा २ जिङ्गी ३ समङ्गा ४ कालमेषिका ५ मण्डूकपर्णी ६ भण्डीरी ७ भण्डी ८ योजनवल्ली ९ । इत्यमरः । २ । ४ । ६० ॥ कालमेघी १० काला ११ जिङ्गः १२ भण्डिरी १३ भण्डिका १४ भण्डिः १५ । इति शब्दरत्नावली ॥ हरिणी १६ रक्ता १७ गौरी १८ योजनवल्लिका १९ वप्रा २० रोहिणी २१ चित्रलता २२ चित्रा २३ चित्राङ्गी २४ जननी २५ विजया २६ मञ्जूषा २७ रक्तयष्टिका २८ चक्रिणी २९ रागाढ्या ३० कालभाषिका ३१ अरुणा ३२ ज्वरघ्नी ३३ कृष्णा ३४ नागकुमारिका ३५ भण्डीरलतिका ३६ रागाङ्गी ३७ वस्त्रभूषणा ३८ । (यथा-यान्तरं यथा —

"मञ्जिष्ठा विकसा जिङ्गी काला योजनपर्ण्यपि ।

ताम्रवल्ली चित्रपर्णी कान्तारी रक्तयष्टिका ।"
इति रत्नमाला ।)
अस्या गुणाः । मधुरत्वम् । कषायत्वम् । उष्णत्वम् । गुरुत्वम् । व्रणमेहज्वरश्लेष्मविषनेत्रामयनाशित्वञ्च । सा चतुर्विधा । चोलः१ योजनी२ कौन्ती ३ सिंहली च ४ । इति राजनिर्घण्टः ॥ कण्ठस्वरभङ्गघोषनाशित्वम् । वर्णाधिकारित्वञ्च । इति राजवल्लभः । अपि च ।
"मञ्जिष्ठा मधुरा तिक्ता कषाया सर्ववर्णकृत् ।
गुरुरुष्णा विषश्लेष्मा व्रणयोन्यर्शकर्णरुक् ।
रक्तातिसारकुष्ठासाविसर्पव्रणमेहनुत् ॥"
इति भावप्रकाशः ॥
मञ्जी, स्त्री, (मञ्जयति दीप्यते इति । मञ्ज + इन् । ऋदिकारादिति ङीष् ।) मञ्जरी । इति हेमचन्द्रः त्रिकाण्डशेषश्च ॥
मञ्जीरः, पुं, क्ली, (मञ्जति मधुरं शब्दायते । इति मनुज् ध्वनौ सौत्रधातुः + वाहुलकात् इरन् ।) नूपुरः । इत्यमरः । २ । १०६ ॥ मञ्जीरोऽस्त्री स नूपुरः । इति रभसः । (यथा, गीतगोविन्दे । ५ । ११ ।
"सुखरमधीरं त्यज मञ्जीरं
रिपुमिव केलिषु लोलम् ॥")
मञ्जीरः, पुं, (मञ्ज + ईरन् ।) मन्थानदण्डरज्जुबन्धनार्थस्तम्भः । तत्पर्य्यायः । विष्कम्भः २ कटरः २ । इति हेमचन्द्रः ॥
मञ्जु, त्रि. (मञ्जतीति । मञ्ज ध्वनौ सौत्रधातुः ।) "मृगयाट्यञ्ज ।" उणा० । १ । ३८ । इति कुः ।) मनोज्ञम् । इत्यमरः । ३ । १ । ५२ । (यथा, पद्मपुराणे । १ ।
"यत्रा मेघं झटिति यमुनामञ्जुकुञ्जं जगाम ॥")
मञ्जुकेशः, [न्] पुं, (मञ्जवो मनोहराः केशाः सन्त्यस्य । इनि ।) श्रीकृष्णः । इति हलायुधः ॥ सुन्दरकेशविशिष्टे त्रि ॥
मञ्जुगमना, स्त्री, (मञ्जु मनोहरं गमनं यस्याः । स्त्रियां टाप् ।) हंसी । इति राजनिर्घण्टः ॥ सुन्दरगामिनि त्रि ॥
मञ्जुघोषः, पुं, (मञ्जुर्मनोहरो घोषः शब्दोऽस्य ।) बुद्धविशेषः । इति त्रिकाण्डशेषः । अस्य मन्त्रादि यथा,—
"आद्यौषमिरधंसो संसारार्णवतारकः ।
औमङ्कुशोऽयं जयति साधकानां सुखावहः ॥"
तन्त्रागमोत्तरे ।
"माल्कादि समुद्धृत्य वह्निबीजं समुद्धरेत् ।
वामांसं कूर्मसंयुक्तं ततो मेषेण्युद्धरेत् ॥
मोदनञ्च ततः कुर्य्यात् वामनेत्रेन्दुसंयुतम् ।
वक्त्रगो मनुः प्रोक्तो मञ्जुघोषस्य शम्भुना ॥
दक्षस्तु दीपनी प्रोक्ता मूलमन्त्रस्तु कथ्यते ।
अकुण्ठं शक्तिबीजञ्च रमाबीजं ततः प्रिये ! ॥
बीजत्रयात्मको मन्त्रो वाग्बीजद्वान्तनायुतः ।
शक्तिबीजं रमाबीजं कामबीजं तथा प्रिये ! ॥
विद्या शुतिधरी प्रोक्ता एषा वर्णत्रयात्मिका ।
एकारो वह्निमारूढो वालनेत्रेन्दुभूषितः ।
प्रोक्ता सार्व्वज्ञविद्येयं एकवर्णात्मिका प्रिये ! ॥
सिद्धः साध्यः सुसिद्धो वा साधकस्य रिपुस्य वा ।
तदा मन्त्रो भवेद्ध्रुवा शुभदो बुद्धिदो भवेत् ॥
मध्याह्ने सलिले चैव भोजने भाजने तथा ।
गोमये तु यहिर्देशे मैथुने रमणीकुचे ॥
गोष्ठे च निम्ब गोसुखे यत्नं कमरसन्निभम् ।
विलिख्य मन्त्रवर्णांश्च त्रिशू ऊर्द्धे अधस्तथा ।
लिखेच्चन्द्रलेखया प्रयत्नात् साधकोत्तमः ।
उच्चाटने लिखेद्दण्डं गोचर्म्मणि विशेषतः ।
सलिले विजयी नित्यं भजने च महेश्वरः ॥
गोमये वावदूकः स्याद्गोष्ठे सर्व्वज्ञतां व्रजेत् ।
कुपे श्रुतिधरो नित्यं गोसुखे च महाकविः ॥
गोमयं वदरीमूलं चन्दनं पांशुमेव च ।
एकीकृत्याष्टधा जप्ता तिलकं धारयेत् सदा ॥
नमस्कृत्य वरं श्रेष्ठं प्रार्थयेद्भक्तितत्परः ।
वरं प्राप्य च तस्माद्वै विहरेत्तु यथासुखम् ॥
नान्यदेवार्चनं स्नानं प्रणवोच्चारणं न तु ।
वल्कलेन दलानां शोधनं लवणेन वा ॥
रात्रिवासो न सुप्तेत न शुचिः स्यात् कदाचन ।
एवं ज्ञात्वा प्रयत्नेन ज्ञात्वा गुरुसुखात् सुधीः ॥
मासैकेन कवीन्द्रः स्यात् द्विमासेनैव ईश्वरः ।
त्रिभिर्मासैर्भवेज्ज्ञानी सर्व्वशास्त्रविशारदः ॥
पुत्रार्थी लभते पुत्रं धनार्थी विपुलं धनम् ।
आतुरारोग्यकामस्तु सर्व्वान् कामानवाप्नुयात् ॥
ततः करान्न्यासौ ।
त्रां त्रीं अङ्गुष्ठाभ्यां नमः । इत्यादि एवं हृदयादिषु । तथा च तन्त्रे ।
"सप्तमैको वकेशश्च द्वौ वर्णौ कथितौ प्रिये ! ।
षड्दीर्घभाग्भ्यामेताभ्यां षड्ङ्गानि समाचरेत् ॥
सप्तमः चकारः वकेशः शकारः ॥* ध्यानम् ।
"शशधरमिव शुभ्रं खड्गपुस्ताङ्कपाणिं
सुरुचिरमतिशान्तं पञ्चचूडं कुमारम् ।
पृथुतरवरसुखं पद्मपर्य्यायताक्षं
कुमतिदहनदक्षं मञ्जुघोषं नमामि ।
पीठपूजां ततः कुर्य्यादाधाराद्यादिशक्तितः ।
भूतप्रेतादिभिः कुर्य्यात् पीठासनमनन्तरम् ॥
शालग्रामे नमः पाद्यं वुद्धिकर्त्रे तथाचमम् ।
आचमनाय गन्धः स्यादर्घ्यं स्याद् यज्ञपाय वै ॥
सर्व्वसिद्धिप्रदायेति पुष्पं दद्यादिचक्षवः ।
कुन्दपुष्पं समादाय भैरवान् पूजयेत्ततः ॥
असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥
ततो धूपादिकं दत्त्वा प्रसूनानि विसर्जयेत् ।
तैः पुष्पैः पूजयेद्दूतौ यक्षिणीश्च विशेषतः ॥
सुरारिसुन्दरी चैव मनोहारिण्यनन्तरम् ।
कनकावती तथा कामेश्वरी च रतिकर्य्यच ॥
पद्मिनी च नटी चैव अनुरागिण्यनन्तरम् ।
पूज्या एतास्तु योगिन्यो वृत्तेखाबीजपूर्व्विकाः ॥
एवं संपूज्य दैवैयं लक्षषट्कं जपेन्मनुम् ।
एतत्कुन्दपुष्पेच्च एकादशशतानि च ॥
जुहुयादेधिते वह्नौ कान्तारे पिल्वपेशसि ।
एवं सिद्धमनुर्मन्त्री महायोगीश्वरो भवेत् ।"
इति तन्त्रसारः ॥
प्रकारान्तरं कुक्कुटादितन्त्रे द्रष्टव्यम् ॥
मञ्जुपाठकः, पुं, (मञ्जु मनोहरं पठतीति पठ + ण्वुल् ।) शुकपक्षी । इति राजनिर्घण्टः ॥ सुन्दरपाठकर्त्तरि त्रि ॥
मञ्जुप्राणः, पुं, (मञ्जवः प्राणाः यस्य । सर्व्वव्यापकतया महाप्राणत्वादस्य तथात्वम् ।) ब्रह्मा । इति जटाधरः ॥
मञ्जुभद्रः, पुं, (मञ्जु मनोहरं भद्रं मङ्गलं यस्य ।) जिनविशेषः । तत्पर्य्यायः । मञ्जुश्रीः २ ज्ञानदर्पणः ३ मञ्जुघोषः ४ कुमारः ५ अष्टारचक्रवान् ६ स्थिरचक्रः ७ वज्रधरः ८ प्रज्ञाकायः ९ वादिराट् १० नीलोत्पलदलः ११ महाराजः १२ नीलः १३ शार्दूलवाहनः १४ धियाम्पतिः १५ पूर्व्वजिनः १६ खड्गी १७ दक्षी १८ विभूषणः १९ बालव्रतः २० पञ्चचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४ । इति त्रिकाण्डशेषः ॥
मञ्जुलं, क्ली, (मञ्जु मञ्जुत्वमस्यस्तीति । "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति मञ्जुशब्दात् लच् ।) जलाशयम् । निकुञ्जम् । इति मेदिनी । ले, ९ । २२ । ॥ शबलः । इति विश्वः ॥
मञ्जुलः, पुं, (मञ्जु मञ्जुत्वमस्यास्तीति । मञ्जु + सिध्मादित्वात् लच् ।) जलकुक्कुटपक्षी । इति मेदिनी । १ । २२ ॥ सुन्दरे त्रि । इत्यमरः । ३ । १ । ५२ ॥ (यथा, कालिकापुराणे ४८अध्याये ।
"मञ्जुलं यौवनोद्रेकं प्राप श्रीरिव माधवे ।"
नदीभेदे स्त्री । यथा, महाभारते । ६ । ८ । ३४ ।
"चित्रोपलां चित्ररथां मञ्जुलां वाहिनीं तथा ।")
मञ्जुश्रीः, पुं, (मञ्जुर्मनोहरा श्रीः शोभा यस्य ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥
मञ्जुषा, स्त्री, (मञ्जूषा । पृषोदरादित्वात् ह्रस्वः ।) मञ्जूषा । पेटरा इति भाषा । यथा,—
"मञ्जुषापि च मञ्जूषा पेटा च पेटिकेऽपि ।"
इति शब्दरत्नावली ॥
मञ्जूषा, स्त्री (मज्जति द्रव्यमस्मिन् । "मसिजेर्नुम् च ।" उणा० । ४ । ७७ । इति मस्ज् + ऊषन् । नुम् च स चाचोऽन्त्यात् परः । ततो जश्त्वचुत्वे मध्यमस्य लोपात् साधुः ।) पिटकः । इत्यमरः । २ । १० । ३० ॥ (यथा, देवीभागवते । २ । ६ । ३३ ।
"मञ्जुषायां सुतं कृत्वा सुप्तवन्ती वाक्यमब्रवीत् ॥")
पाषाणः । इत्युणादिकोषः ॥ मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (मञ्जिष्ठार्थे पर्य्यायो यथा,—
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मञ्जूकपर्णी भण्डीरी भण्डी योजनवल्लयपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वरुणत्विषी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मट, वाटे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) सौत्रधातुरयमः । अस्य प्रयोगः । मटहः । इति दुर्गादासः ॥

मटची, स्त्री, (मटनं मटः। मट् अवसादे + भावे अप् मटः चीयते प्रचीयते एभिरिति। मट + चि + बाहुलकात् डिः। मटचिः। ततः स्त्रियां ङीष्।) सर्व्वेषामवसादकत्वा दस्यास्तथात्वम्।) रक्तवर्णक्षुद्रपक्षिविशेषः। पाषाणहृदयः। यथा, गोविन्दभाष्यधृत-च्छान्दोग्ये। १। १०। १॥ ("मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्हे चाक्रायण इभ्यग्रामे प्रद्राणक उवास॥ इति।)

मटस्फटिः, पुं, (मटं अवसादं स्फटति निरा करोति। स्फट् + इः।) दर्पारम्भः। इति जटा-धरः॥

मठ्कं, क्ली, (मठति वसत्यत्रेति। मठ + अप्। पृषोदरादित्वात् टागमे साधुः। मठः। मठस्य कं शिरः।) यज्ञस्य शिरोभागः। इति केचित्। मटका इति भाषा॥

मठ, वासमर्द्दयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-वासे अक०-मर्द्दने सक०-सेट्।) मठति। वासो निवासः। मर्द्दः केचिन्न मन्यते। इति दुर्गादासः॥

मठ, ट ड आधाने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ट मठ्यते। आधानं स्थापनम्। औत्के इत्यत्र आख्यातम्। इति दुर्गादासः॥

मठः, पुं, (छात्रादिनिलयः। इत्यमरः। २। २। ८॥ मठन्ति वसन्ति छात्रादयोऽत्र मठः। मठ वासमर्द्दयोः अल्। छत्रशीला विद्यार्थिनश्छात्राः। छत्रेण गुरुसेवा लक्ष्यते गुरुदोषच्छादनात् छत्रं तच्छी-लत्वात् छात्रः विकारसंधेति ष्यञ्। आदिना यतिब्रह्मचर्य्यकादीनां ग्रहः। छात्रादीनां निलयो गृहं छात्रादिनिलयः। अर्थकथनमेतत्। नामाप्येतदिति केचित्। छात्रशाला प्रतिश्रय-श्चात्रैव। इति भरतः॥ गन्धीरथः। इति हारा-वली॥ * ॥ अथ मठादिप्रतिष्ठाप्रयोगः।

यदि तद्दिने प्रतिमादिप्रतिष्ठा क्रियते तदा तत्रैव वृद्धिश्राद्धादिकं विधाय देवप्रतिष्ठातत्त्वोक्त-विधिना देवप्रतिष्ठां विधायगृहप्रतिष्ठा कर्त्तव्या। यदिगृहप्रतिष्ठामात्रं तदा प्रातः कृतनित्यक्रियः प्रक्षालितपाणिपाद आचान्तः प्राङ्मुख उदङ्-मुखो वा कृतयुक्तासने उपविश्य ब्राह्मणत्रयं गन्धादिना परितोष्य अस्मिन् विष्णुवेश्मप्रतिष्ठा-कर्म्मणि ॐ पुण्याहं भवन्तोऽधिब्रुवन्तु इति त्रिः आवयेत्। ॐ पुण्याहमिति त्रिरुक्ते अस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणि ॐ स्वस्ति भवन्तोऽधि-ब्रुवन्तु इति त्रिः आवयेत्। ॐ स्वस्तीति त्रिरुक्ते अस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणि ॐ ऋद्धिं भवन्तोऽधिब्रुवन्तु इति त्रिः आवयेत्। ॐ ऋद्धा तामिति त्रिर्वदेयुः। यजुर्व्वेदिनां ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पति-र्दधातु। इत्यनेनाचतान् क्षिपेत्। सामगानान्तु। ॐ अस्तु सोमोऽयं सुतः। पिबन्तस्य मरुतः। उतस्वराजो अश्विना। अस्तु सोमोऽयं सुतः। पिबन्तस्य मरुतो हार। उतस्वराजो वा हार नो हार। इति गीयमानेनाचतान् क्षिपेत्। गानाग्रन्तौ त्रिधा ऋचं वाचयेत्। ततः।

"सूर्य्यः सोमो यमः कालः सर्व्वे भूताग्रहः क्षमा। प्रवनो दिक्पतिर्भूमिराकाशं खचरामराः।
ब्राह्मं ब्राह्मणमाख्याय कल्पध्वमिह सन्निधिम्॥"

इति पठित्वा। ततः ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। इति विष्णुं स्मृत्वा नारायणं नमस्कृत्य ॐ तत् सदित्यु-च्चार्य्य कृतैतद्यजनफलपुण्यायायादाय ॐ अद्या-मुकेमासि अमुकपक्षेऽमुकतिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा एतत्पञ्चकाष्ठादिमयवैश्मपर-माणुसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गलोकसहित-तत्कामः श्रीविष्णुप्रीतिकामो विष्णुलोकप्राप्ति-कामो वा विष्णुवेश्मप्रतिष्ठामहं करिष्ये। इति संकल्पयेत् इष्टकादिमये तु एतदिष्टकादिमय-वैश्मपरमाणुसमसंख्यकवर्षसहस्रदग्धगुरुकाला-वच्छिन्नस्वर्गलोकसहितत्वकाम इति विशेषः। पाषाणवैश्मनि तु तद्दग्धगुरुकालावच्छिन्नस्वर्ग-लोकेति विशेषः। देवतान्तरगृहप्रतिष्ठायान्तु तदूहेन प्रयोगः॥ * ॥ ततः संकल्पसूक्तं पठेत्। सामवेदोक्तं तदृयथा ॐ देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम्। उद्दासिच्यध्वमुपवा पृणध्वमादिद्वो देव ओहते॥ यजुर्व्वेदोक्तं यथा,—

"ॐ यज्ञायतो दूरमुदेतु देवं
तदुसुप्तस्य तथैवेति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं
तन्मे मनः शिवसङ्कल्पमस्तु॥"

ततः सप्तव्याधिपगौर्य्यादिषोडशमातृकापूजा-वसोर्धारासम्पातनायुष्यमन्त्रजपाभ्युदयिकश्रा-द्धानि कर्म्माणि॥ * ॥ आयुष्यमन्त्रो यथा। ॐ आयुर्विश्वायुर्विश्वं विश्वमायुरसि। मह्यं प्रजान्त्वा-रोग्यायुर्विश्वं विश्वमायुरसि। मह्यं प्रजान्त्वा-रोग्यायुर्दत्तं जीवेम शरदो वयन्तं॥ ॐ आयुषो मे पवस्व वर्चसो मे पवस्व विदुः पृथिव्या दिवो जनित्र्या अग्नेर्व्यापोऽधः चरन्ती सोमोऽहोदृगाय ममायुषे मम ब्रह्मवर्च-साय यजमानस्यैधा अमुकस्य राय्याय॥ * ॥ तत्र विष्णुवेश्मप्रतिष्ठाभ्युदयार्थमिति वाक्ये विशेषः। एवमन्यत्रेऽपि। ततः उत्तराभि-मुखं ब्राह्मणमुपवेश्य ततसमीपे आसनमानीय प्राङ्मुखो यजमानः प्राञ्जलिर्वदेत्। ॐ साधु भवानास्ताम्। ॐ साध्वहमासे इति प्रतिवचनं दत्त्वा तदासने उदङ्मुख उपविशति। ततो यजमानः ॐ अर्च्चयिष्यामो भवन्तं इति वदेत्। ॐ अर्च्चयेति प्रतिवचनम्। ततो गन्धपुष्पताम्बूला-लङ्कारैरभ्यर्च्च दक्षिणं जानु कृत्वा ॐ अद्येत्यादि अमुकगोत्रममुकप्रवरममुकदेवशर्म्माणं भवन्तं अस्मिन् सङ्कल्पितविष्णुवेश्मप्रतिष्ठा-कर्म्माङ्गभूतहोमकर्म्मणि ब्रह्मकर्म्मकरणाय गन्ध-पुष्पताम्बूलालङ्कारवस्त्रैरहं वृणे। ॐ वृतोऽस्मीति प्रतिवचनम्। यथाविहितं ब्रह्मकर्म्म कुरु। ॐ यथाज्ञानं करवाणीति प्रतिवचनम्। स्वयं होमासामर्थ्ये होतुर्वरणमपि तथैव कार्य्यम्। तन्त्रधारकत्वेन आचार्य्यस्यापि तथैव कार्य्यम्। ब्रह्मत्वेन सदस्यस्यापि। गुरोर्वरणे तु संकल्पितेऽस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणीति वक्तव्यम्॥ * ॥ ततो यजमानः गुरोः पादौ धृत्वा पठेत्।

"नारायणस्वरूपस्त्वं संसारात्त्राहि मां प्रभो!। त्वत्प्रसादात् गुरो! यज्ञं प्राप्नोमि यज्ञयोदि-तम्॥
त्राहि नाथ! प्रपन्नं मां भीतं संसारसाग-रात्। देवतास्थापने त्वद्य मम शान्तिं कुरु प्रभो!॥"

ततो गुरुः।

ॐ उत्तिष्ठ वत्स भद्रन्ते मत्प्रसादात्त्वयानघ!। प्राप्तव्यं धर्म्मकामार्थैर्दुष्प्रापं यत् सुरासुरैः॥*॥

ततो गुरुः।

ॐ पावमानीः स्वस्त्ययनीः सुदुघा हि घृत-श्चुतः। ऋषिभिः सम्भृतो रसो ब्राह्मणे स्वस्तं हितम्॥

इति पावमानीसूक्तम्॥

"असपत्नं पुरस्तान्नः शिवं दक्षिणतः कृधि। अभयं शतं पश्चात् भद्रमुत्तरतो गृहे॥"

इति शान्तिसूक्तम्॥

ॐ रक्षोहणो बलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो बलगहनोऽवनयामि वैष्णवान् रक्षो-हणो बलगहनोऽवस्तृणामि वैष्णवान्। रक्षो-हणौ बलगहनावुपदधामि वैष्णवौ। रक्षोहणौ बलगहनौ पर्य्यूहामि वैष्णवमसि वैष्णवाः स्थः। इति रक्षासूक्तम्। इति पठित्वा।

"वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः। अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः॥
विनायका विघ्नकरा महोग्रा
यज्ञद्विषो ये पितृमातृगणाश्च।
सिद्धार्थकैर्वैष्णवसम्भवैस्ते-
मया निरस्ता विदिशः प्रयान्तु॥"

इति श्वेतसर्षपान् विकीर्य्य स्रुचं स्रुवमाज्यं प्रोक्षणं प्रणीतां प्रोक्षणीं संस्कृत्य॥ * ॥ तच्छोधनमन्त्रा यथा। ॐ तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।

इति गोमूत्रम्।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्व्वभूतानां तामिहोपह्वये श्रियम्॥

इति गोमयम्।

ॐ आप्यायस्व स मे तु ते विश्वतः सोमवृष्ण्यं भवावाजस्य सङ्गथे।

इति दुग्धम्।

ॐ दधिक्रावो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत् प्रणआयूंषि तारिषत्॥

इति दधि।

ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियन्देवानामनाधृष्टं देवयजनमसि ॥

इति घृतम् ।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तमादद्दे। इति कुशोदकम् ॥ ॐ देवा वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम्। जुषेन यूप आप्यते प्रयाजो अग्निरग्निना। इति मन्त्रेण वेदौ संप्रोक्ष्य पञ्च घटान् घटस्थापनक्रमेण संस्थाप्य ॥ * ॥ घटस्थापनमन्त्रा यथा। सामगानाम्। ॐ महिन्नीयामवोस्तुद्युं मित्रस्यार्य्यम्नः दुराधर्षं वरुणस्य। इति भूमेः। ॐ धानावन्तं करम्भिणमपूपवन्तमुक्थिनं इन्द्र प्रातर्जुषस्व नः। इति धान्यस्य। ॐ आविग्ं कलसं सुतो विश्वा अर्षन्नभिश्रिय इन्दरिन्द्राय धीयते। इति कलसस्य।

"ॐ अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भव। पर्क्षे वनस्पते त्वा वृ त्वा च सूदयतां रयिं ॥"

इति पल्लवस्य।

ॐ आपोमित्रावरुणा घृतेर्गव्यूतिमुक्षतं मध्वा रजाँसि सुक्रतु। इति जलस्य। ॐ इन्द्रन्नरो नेमधिता हवन्ते यत्पार्या युनयते धियस्ताः शूरो वृषताम्रवसश्च काम आगोमतिव्रजे भजात्वन्नः। इति फलस्य। ॐ सिन्धोरुच्छ्वासे पतयन्तमुक्षं हिरण्यपावाः पशुमाशु गिभूते। इति सिन्दूरस्य। ॐ त्वावतः पुरुवसो वयमिन्द्र प्रणेतः सादिषन्तहरीणाम्। इति शिरीकरणस्य। ॐ पवमानो अजीजनद्दिवश्चित्रं न तायुम्। ज्योतिर्विश्वस्य भुवनस्य गोपाः। इमं नः यज्ञं दिवि देवेषु धेहि। इति पुष्पस्य ॥*॥ यजुषाम्। ॐ भूरसि भूतधृत्तिरसि विश्वस्य भूतस्य धाया विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ पृथिवीं दृग्ंह पृथिवीं मा हिग्ंसीः। इतिभूमेः। ॐ धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञियम्। इति धान्यस्य। ॐ आजिघ्रकलसम्मह्या त्वा विशन्त्विन्दवः पुनरूर्जा निवर्त्तस्व सहसं धुक्षोरुधारा पयस्वतीमाविशताद्रयिं। इति घटस्य। ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थः वरुणस्य ऋत सदन्यसि वरुणस्य ऋत सदनमसि वरुणस्य ऋत सदनमासीद। इति जलस्य। ॐ धन्वनागा धन्वना जित्र्ययेम धन्वना तीव्राः समदो जयेम। धनुःशत्रोरपकामं कृणोतु धन्वना सर्व्वाः प्रदिशो जयेम। इति पल्लवस्य। ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः।

इति फलस्य।

"ॐ सर्व्वतीर्थमयं वारि सर्व्वदेवसमन्वितम्। इमं घटं समारुह्य तिष्ठ देवगणैः सह ॥"

इति जलं दद्यात्। ॐ स्थिरो भव विष्णुरूप आशुर्भव वाजिन्वन् पृथुर्भव सुषदस्त्वमग्ने पुरीषवाहनः। इति शिरीकरणस्य। ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः। पतयन्ति यह्वा घृतस्य धारा अरुषीव वाजी काष्ठा भिन्दन्नूर्म्मिभिः पिन्वमानः इति सिन्दूरस्य। ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपं अश्विनौ व्यात्तं इष्टम्मनीषाण सर्व्वलोकं मनीषाण। इति पुष्पस्य ॥*॥ ततः फलपुष्पयुतं वितानम्। ॐ विमान एष दिवो मध्य आस्त आपप्रिवान्रोदसी अन्तरीयते। सविखाचीरभिचष्टे घृताचीरन्तरा पूर्व्वमपरञ्च केतुम्। सामगानान्तु। ॐ ऊर्ज्ज ऊषु न ऊतये तिष्ठा देवो न सविता ऊर्ज्जो वाजस्य सनिता यदञ्जिभिर्व्वाघद्भिर्विह्वयामहे। इति मन्त्रेण वप्तीयात्। * ।

"ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम। इति मन्त्रेण मण्डलमध्ये सुवर्णपद्मं दत्त्वा स्वर्णघृतधारया दलान्युत्कीर्य्य मण्डलमध्ये राजतीं प्रतिमां ॐ सुवर्णावर्णां पृथिवीं द्यामनेहसं सुगन्धिमाद्यमदितिं सुप्रणितिम्। देवीं नावं स्वरित्रामानसमनवद्यां मारुहे मासत्यये। इति मन्त्रेण निःक्षिप्य घटेषु देवान् पूजयेत्। * । प्रथमघटे गणेशं सूर्य्यं द्वितीयघटे शिवं दुर्गां तृतीयघटे विष्णुं लक्ष्मीं सरस्वतीं चतुर्थे अग्निं वास्तुपुरुषं क्षेत्रपालान् कार्त्तिकेयमश्विनीकुमारौ पञ्चमे यक्षान् लोकपालांश्च खैः खैर्मन्त्रैरावाह्य पूजयेत्। *। ततो गुरुर्देवं प्रतिमायां आवाहयामेवा यथोक्तविधिना स्नापयेत्।

"ॐ भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥"

इति मन्त्रेण निवेश्य ॐ एतोन्विन्द्रग्ंस्तवाम शुद्धं शुद्धेन साम्ना। शुद्धै रक्तैर्वा वृषणा संशुद्ध आशीर्वान्ममत्तु। इति मन्त्रेण शुद्धोदकेन स्नापयेत्। ॐ घृतवतीति घृतेनाभ्यज्य। ॐ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्तधामभिः। इति मरुत्पूर्णेनोद्वर्त्त्य। ॐ सप्त ते अग्ने समिधः सप्तजिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि सप्त होत्राः सप्तधा त्वा यजन्ति। सप्त योनीरापृणस्वा घृतेन। इति उष्णोदकेन स्नापयेत्। ॐ हृषदादिव सुतुचानः खिन्नः स्नातो मलादिव पूतं पवित्रेणेव वाज्यमापः शुन्धन्तु मैनसः इति चन्दनेनानुलिप्य ॐ आपोहिष्ठामयो भुवः स्थान ऊर्ज्जे दधातन। महेरणाय चक्षसे। इति नदीतोयेन स्नापयेत्। ॐ अग्नो देवीरभिष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः। इति तीर्थोदकेन स्नापयित्वा गायत्र्या गन्धयुक्तजलेन स्नापयेत्। ॐ हिरण्यवर्णाः शुचयः पावकाः यासु जातः कश्यपो यास्विन्द्रः। अग्नीया गर्भमदधिरे विरूपास्तान् आपः शग्ंस्योना भवन्तु। इति पञ्चरत्निकया। ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमग्ं सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया

इति मन्त्रेण सिकताजलेन। ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। इति वल्मीकतोयेन। ॐ या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु। तासामस्मिन्नासनेऽच्छिद्रं शर्म्म यच्छत। इति सर्व्वौषधिजलेन। ॐ यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे। प्रप्रवयमृतञ्जातवेदसं प्रियं मित्रन्नशंसिषम्। इति कषायमुक्तजलेन। पञ्चगव्येन क्षैः क्षेमंकरैः सेचयेत्। ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाम्। पयस्वतीः प्रदिशः सन्तु मह्यं सम्मा सृजामि पयसा घृतेन सम्मा सृजन्त्वपः। इति पञ्चगव्येन। ॐ तस्मादृयज्ञात् सर्व्वहुतः ऋचः सामानि जज्ञिरे। छन्दाग्ंसि जज्ञिरे तस्मादृयजुस्तस्मादजायत। इति पञ्चामृतेन। ॐ याः फलिनीर्याति फलोदकेन। ॐ सहस्रशीर्षेति वक्ष्यमाणमन्त्रेण सहस्रधारया। ॐ एतोन्विन्द्रमिति पूर्व्वोक्तमन्त्रेण तुलसीचन्दनयुक्तजलेन। ॐ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्। मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु। इत्यनेन वेदादि चतुष्टयेन। तद्यथा ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम्। १। ॐ इषेत्वोर्ज्जेत्वा वायवस्थदेवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्म्मणे।२। ॐ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि।३। ॐ शन्नो देवीरभिष्टये शन्नो भवन्तु पीतये शंयोरभिस्रवन्तु नः। ४। वक्ष्यमाणपुरुषसूक्तेन च एकाशीतिघटैः स्नापयेत्। अशक्तौ अष्टाविंशतिघटैरष्टघटैर्वा स्नापयित्वा धौतवाससा जलमपनीय यथोपचारैः संपूज्य मण्डले आधारशक्त्यादीनि पूजयेत्। *। ॐ आधारशक्तये नमः। एवं सर्व्वत्र प्रणवादिनमोऽन्तेन। प्रकृत्यै कूर्म्माय अनन्ताय पृथिव्यै क्षीरसमुद्राय रत्नद्वीपाय रत्नोज्ज्वलसहितमहामणिमण्डपाय कल्पवृक्षाय रत्नवेदिकायै रत्नसिंहासनाय। आग्नेय्यां धर्म्माय नैर्ऋत्यां ज्ञानाय वायव्यां वैराग्याय ऐशान्यां ऐश्वर्य्याय पूर्व्वस्यां अधर्म्माय पश्चिमायां अवैराग्याय उत्तरस्यां अनैश्वर्य्याय। मध्ये अं अर्कमण्डलाय उं सोममण्डलाय मं वह्निमण्डलाय। सं सत्वाय रं रजसे तं तमसे। आं आत्मने अं अन्तरात्मने पं परमात्मने ह्रीं ज्ञानात्मने। पूर्व्वादिक्रमेण प्रादक्षिण्येन ॐ विमलायै नमः। एवं उत्कर्षिण्यै ज्ञानायै क्रियायै योगायै प्रह्वै सत्यायै ईशानायै। कर्णिकायां अनुग्रहायै। कर्णिकोपरि ॐ नमो भगवते विष्णवे सर्व्वभूतात्मने वासुदेवाय सर्व्वात्मसंयोगयोगपीठात्मने नमः। * ॥ ततो मण्डले देवं संस्थाप्य पौराणिकमन्त्रेण पुरुषसूक्तेन वा षोढ़ोपचारैः पूजयेत्। तद्यथा। ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं सर्व्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम्।१।

सर्वतः स्थाने विश्वतो वृत्वा स्थाने सृष्ट्वा इत्यपि पाठः। इति पठित्वा भगवन् विष्णो इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इह सन्निरुद्धस्व मम पूजां गृहाण। ततो यथाविधासनमानीय वमिति वरुणबीजेनार्घाम्भसा संप्रोक्ष्यासनमभ्यर्च्य ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति २। इति पठित्वा इदमसुकासनं ॐ नमो भगवते वासुदेवाय श्रीविष्णवे नमः। एवं सर्वत्र दाने। ॐ भगवन् विष्णो स्वागतम्। इति स्वागतप्रश्नः। ततस्ताम्रपात्रस्थं पद्मशङ्खामाकदूर्वापरान्वितादियुक्तं जलं गृहीत्वा ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ३। इति पठित्वा इदं पाद्यं पूर्ववन्मूलेन पादयोर्दद्यात्। ततो गन्ध-पुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वायुक्तजलं गृहादिपात्रे कृत्वा ॐ त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वङ्व्यक्रामत् साशनानशने अभि ४॥ ततः स्थाने तस्मादित्यपि पाठः। इति पठित्वा साममगानामिदमर्घमन्त्रेणामेध्यः अर्घः इति शिरसि दद्यात्। जातीलवङ्गकक्कोलयुक्तं केवलं वा पात्रस्थं जलं गृहीत्वा ॐ ततो विराडजायत विराजोऽधिपूरुषः स जातोऽत्यरिच्यत पश्चाद्भूमिमथो पुरः ५॥ इति पठित्वा इदमाचमनीयं ॐ नमो भगवते वासुदेवाय श्रीविष्णवे स्वधा इति दद्यात्। ततः कांस्यपात्रस्थं दधिमधुघृतात्मकं कांस्येन पिहितं मधुपर्कं गृहीत्वा ॐ तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यं पशूंस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ६॥ इति पठित्वा एष मधुपर्कः ॐ नमो भगवते वासुदेवाय श्रीविष्णवे स्वाहा इति दद्यात्। ततः पूर्ववन्मन्त्रं पठित्वा पुनराचमनीयञ्च दद्यात्। कर्पूरवासितजलं गृहीत्वा ॐ तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ७॥ इति पठित्वा इदं स्नानीयजलं मूलेन दद्यात्। पूर्ववत् पुनराचमनीयं दत्त्वा वस्त्रं गृहीत्वा ॐ तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ८॥ इति पठित्वा इदं वस्त्रं मूलेन दद्यात्। एवमुत्तरीयवस्त्रं यज्ञोपवीतं पूर्ववदाचमनीयं दत्त्वा आभरणं गृहीत्वा ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः। तेन देवा अयजन्त साध्या ऋषयश्च ये ९॥ इति पठित्वा मूलेन दद्यात्। ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते १०। ऋग्वेदस्याश्वलायनशाखायान्तु मुखं किमस्य कौ बाहू कावूरू पादा उच्येते इति भेदः। इति पठित्वा मूलेन गन्धं दद्यात्। ॐ ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ११॥ इति पठित्वा मूलेन पुष्पं दद्यात्। ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत १२॥ मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत इति च पाठः। इति पठित्वा मूलेन धूपं दद्यात्। ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् १३॥ इति पठित्वा मूलेन दीपं दद्यात्। ततो नैवेद्योपरि मत्स्यमुद्रया मूलमन्त्रं दशधा जप्त्वाभ्यर्च्य धेनुमुद्रां प्रदर्श्य ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः १४॥ इति पठित्वा नैवेद्यं मूलेन दद्यात्। ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् १५॥ इति पठित्वा कर्पूरादिवासितं पानीयं ताम्बूलं पुनराचमनीयं दर्पणञ्च दद्यात्। ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः स चन्त यत्र पूर्वे साध्याः सन्ति देवाः १६। इति पठित्वा अञ्जलित्रयं पुष्पं दत्त्वा आवरणानि संपूज्य मूलमन्त्रं यथाशक्ति जप्त्वा प्रणमेत्। *। ऋग्वेदस्याश्वलायनशाखायान्तु यत्पुरुषेण हविषा इत्यादिना स्नानीयं ६ तं यज्ञं बर्हिषीत्यादिना वस्त्रं ७ तस्मात् यज्ञात् सर्वहुतः संभृतमित्यादिना यज्ञोपवीतम् ८ तस्मात् यज्ञात् सर्वहुत ऋचः सामानीत्यादिना चन्दनम् ९ तस्मादश्वा अजायन्त इत्यादिना पुष्पं १० यत्पुरुषं व्यदधुरित्यादिना धूपम् ११ ब्राह्मणोऽस्य मुखमासीदित्यादिना दीपम् १२ चन्द्रमा मनसो जात इत्यादिना नैवेद्यम् १३ नाभ्या आसीदन्तरिक्षमित्यादिना ताम्बूलम् १४ सप्तास्यासन् परिधय इत्यादिना नीराजनम् १५ इति भेदः अन्यत् समानम्। *। ततो गुरुः कुरुपश्चिमे उपविश्य कुम्भे स्थण्डिले वा ब्राह्मविधिना तदज्ञाने स्वयञ्जोक्तविधिना साङ्गसनामानमग्निं संस्थाप्य ब्रह्मस्थापनानन्तरं अभिषेकार्थं ऐशान्यां नवमत्रणमध्यामं बहिर्दध्यक्षतभूषितं घृताभ्यक्तमधोधोऽङ्कुरप्रच्छदपल्लवच्छन्नसुखं फलवस्त्रयुतं अन्तःक्षिप्तपञ्चरत्नं निर्मलजलपूर्णं दृढकलसं अक्षतानासुपरि ॐ आजिघ्र कलशमित्यादिमन्त्रेण स्थापयेत्। तत्र वरुणस्योत्तमानमसीति वरुणं न्यसेत्।

"ॐ गङ्गाद्याः सरितः सर्वाः समुद्राश्च सरांसि च।
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः॥"

इति तीर्थानि च न्यसेत्। तत्रैव कलसे अश्वस्थानाद्गजस्थानात् वल्मीकात् सङ्गमात् ह्रदात्। गोकुलात् रथ्याया आनीय सप्त मृदः क्षिपेत्॥ सर्वौषधीश्च। *॥ ततश्चरुश्रपणं कुर्यात्। अग्नेरुत्तरे हस्तमात्रविस्तारायां प्रादेशपरिमितोड्डमरनिर्मितदर्व्यां सार्द्धाङ्गुष्ठविस्ताराग्रप्रादेशपरिमितोड्डमरनिर्मितमेचकं चरुस्थालीः आज्यस्थाली उदूखलमुसले सुवं पूर्णाहोमार्थं सुवं समिधं आज्यादीनि उदगग्राणि प्राचं प्राचं विनियोगक्रमेणासादयति। संस्थाप्य यवान् व्रीहीन् वा तदभावे तण्डुलान् मूर्ध्ने निधाय। सामगः। ॐ विष्णवे त्वा जुष्टं निर्वपामि। इति यवादिप्रस्तुतिमेकां चरुस्थाल्यां हृत्वा उदूखलमध्ये स्थापयेत्। यजुर्वेदी तु ॐ विष्णवे त्वा जुष्टं गृह्णामि ॐ विष्णवे त्वा जुष्टं निर्वपामि चमसस्रुजलेन ॐ विष्णवे त्वा जुष्टं प्रोक्षामीति त्रयं कुर्यात्। ऋग्वेदी तु ॐ विष्णवे त्वा जुष्टं निर्वपामि ॐ विष्णवे त्वा जुष्टं प्रोक्षामीति निर्वापप्रोक्षणमात्रम्। यस्य यद्गृहप्रतिष्ठा तस्यादौ जुह्वग्रहणम्। एवं सर्वत्र। एवमग्यादिषु। ॐ अग्नये त्वा जुष्टं निर्वपामि एवं वायवे सूर्याय द्विः विष्णवे द्विः अग्नये वायवे पुनरग्नये वरुणाय पुनरपि अग्नये सूर्याय प्रजापतये अन्तरीक्षाय द्यावे ब्रह्मणे पृथिव्यै महाराजाय सोमाय इन्द्राय अग्नये यमाय नैर्ऋताय वरुणाय वायवे कुबेराय ईशानाय ब्रह्मणे अनन्ताय आदित्याय सोमाय मङ्गलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतुभ्य इत्यं नवचिंशद्वृत प्रस्तरीः स्थापयेत्। हिरण्मूर्धा उपरिक्षतदक्षिणवामसुष्टिभ्यां सुवेणावहत्य मूर्ध्नेण प्रस्फोटयेत्। एवमपरवारद्वयमवहत्य मूर्ध्नेण प्रस्फोटयेत्। तथा कर्तव्यं यथा वारत्रयेण तण्डुलनिष्पत्तिर्भवति। तदशक्तौ संस्कारमात्रार्थं तण्डुलेष्वेवम्। ततस्तण्डुलान् त्रिः प्रक्षाल्य चरुस्थाल्यामामन्त्रकं हृत्वोत्तरार्धं पवित्रं निःक्षिप्य तत्र तण्डुलान् निधाय कपिलाया दुग्धं निःक्षिप्य तदभावे अन्यधेनोर्दुग्धं निःक्षिप्य दर्व्या प्रागादिप्रदक्षिणमीषदूर्ध्वमवघट्टयंस्तथा पचेत् यथा दाहकाठिन्यातिग्लेयिल्यमस्कगालनरहितोऽन्तरुष्मपक्वश्चरुर्भवति स्वलदुल्लुकेन स्थालीमध्यं चरुं दृष्ट्वा ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततमित्यनेन मन्त्रेण ओमित्यनेन च घृतेन सिक्त्वा दर्व्या दक्षिणावर्तेन संमिश्रयेत्। ततोऽग्नेरुत्तरतोऽवतार्य पुनर्दर्वयुल्लुकेन स्थालीमध्यं दृष्ट्वा पुनर्घृतेनाभिधारयेत्। ततः पर्युक्षणान्तां कुशण्डिकां समाप्य सामगस्तु काम्यकर्माङ्गत्वेन तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्मश्च सत्यञ्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु। इति जप्त्वा विरूपाक्षजपं कुर्यात्। ततः प्रकृते कर्मणि।

"ॐ पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोरुकः।
छागास्यः साक्षसूत्रोऽग्निः सप्तार्चिः शक्तिधारकः॥"

इत्यादित्यपुराणीयं ध्यात्वा विष्णुवेश्मप्रतिष्ठाकर्मणि अयं लं साङ्गसनामाग्नीति नाम कृत्वावाह्य संपूज्य प्रादेशप्रमाणां घृताक्तां समिधं

तूष्णीमग्नौ हुत्वा मेक्षणेन चरुं गृहीत्वा ॐ तद्विष्णोरित्यादिस्विष्टान्तेन जुहुयात् सर्वत्र सामगानां मन्त्रान्ते देवतोद्देशो नास्ति। अग्नेर्वा इदं विष्णवे इति। ॐ भूः स्वाहा इदमग्नये ॐ भुवः स्वाहा इदं वायवे ॐ स्वः स्वाहा इदं सूर्याय ॐ भूर्भुवः स्वः तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् स्वाहा इदं सूर्याय। ॐ तद्विप्रासो विपन्यवो जाग्वांसः समिन्धते विष्णोर्यत् परमं पदं स्वाहा इदं विष्णवे। ॐ विष्णोस्तच्चक्षुरुत विष्णवे सुषो विष्णवे बाहुरुत विष्णवेऽत्तात् संबाहुभ्यां धमति संपतत्रैर्द्यावा भूमी जनयन् देव एकः स्वाहा इदं विष्णवे। ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमं स्वाहा इदमग्नये। ॐ इषेत्वोर्जेत्वा वायवस्थदेवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे स्वाहा इदं वायवे। ॐ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि स्वाहा इदमग्नये। ॐ अग्नो देवीरभीष्टये अग्नो भवन्तु पीतये संयोरभिस्रवन्तु नः स्वाहा इदं वरुणाय। ॐ भूरग्नये स्वाहा ॐ सूर्याय स्वाहा ॐ प्रजापतये स्वाहा ॐ अन्तरीक्षाय स्वाहा ॐ द्यौः स्वाहा ॐ ब्रह्मणे स्वाहा ॐ पृथिव्यै स्वाहा ॐ मरुद्राजाय स्वाहा एष्वपि सामगेतरैस्तत्तद्देवतोद्देशः पश्चात् कार्यः। ॐ सोमं राजानं वरुणमग्निमन्वारभामहे आदित्यं विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिं स्वाहा इदं सोमाय ॥ * ॥ ततो दिक्पालहोमः। ॐ त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रं हुवेम शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय। ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं अस्य यज्ञस्य सुक्रतुं स्वाहा इदमग्नये। ॐ नाके सुपर्णमुपयत् पतन्तं हृदाविनन्तो अभ्यचक्षत त्वा हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्यं स्वाहा इदं यमाय। ॐ वैत्या हि निर्ऋतीनां वज्रहस्तः परिवृतः अहरहः सिन्धुपरिपदामिव स्वाहा इदं निर्ऋतये। ॐ घृतवती भुवनानामभिश्रियोर्व्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा स्वाहा इदं वरुणाय। ॐ वात आवातु भेषजं शम्भुमयो सुनो हृदे प्रण आयूंषि तारिषत् स्वाहा इदं वायवे। ॐ सोमं राजानं वरुणमग्निमन्वारभामहे आदित्यं विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिं स्वाहा इदं सोमाय। ॐ अभित्वा शूरनोनुमोदुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः स्वाहा इदमीशानाय। ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः। सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा इदं ब्रह्मणे। ॐ वर्ष्मोर्ध्वं मघवानसुक्ष्यामिन्द्रं गिरो बृहतीरभ्यनूषत वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जवमानं दिवे दिवे स्वाहा। इदमिन्द्राय। इति सामगो जुहुयात्। तत्तद्देवतोद्देशस्तु न कर्तव्यः। तत्तद्देवताप्रकाशनाय च देवताविशेषा उक्ताः ॥*॥ यजुर्वेदी तु। ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रं हुवेम शक्रं पुरुहूतमिन्द्रꣳ स्वस्तिनो मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय। ॐ वैश्वानरो न ऊतय आप्रयातु परावतः अग्निरुक्थेन वाहसा उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा स्वाहा इदमग्नये। ॐ असियमोऽस्यादित्योऽव्रन्नसि त्वितो गुप्तेन व्रतेन असि सोमेन समयाविष्टक्त आहुस्ते बाधि दिवि बन्धनानि स्वाहा इदं यमाय। ॐ यस्ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविचृतं तन्ते विषाम्यायुषो न मध्यादथैतं पित्तमद्धि प्रसूतः। नमो भूत्वै एदच्चकारस्वाहा। इदं निर्ऋतये। शाखान्तरे तु ॐ यस्ते देवी निर्ऋतिराबबन्ध दाम ग्रीवा स्वविच अर्भं इदन्ते तदियामायुषो न मध्यादथा जीवः पितुमद्विप्रसूत स्वाहा इदं निर्ऋतये। ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थः वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनी मासीद स्वाहा इदं वरुणाय। ॐ वातो वावो मनो वा गन्धर्वाः सप्तविंशतिस्तेऽग्ने समयुजꣳस्तेऽस्मिन् यवमादधुः स्वाहा इदं वायवे। ॐ कुविदङ्गयवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्वं वियूय इदे हैषां कृणुहि भोजनानि ये बर्हिषो नमो उक्तिं न जग्मुः स्वाहा इदं कुवेराय। ॐ तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयं पूषा नो यथा वेद सामसदृधे रक्षिता पायुरदब्धस्वस्तये स्वाहा इदमीशानाय। ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमत सुरुचो वेन आवः सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा इदं ब्रह्मणे। ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु येऽन्तरीक्षे ये दिवि तेभ्यः सर्पेभ्यो नम स्वाहा इदमनन्ताय ॥*॥ ततो नवग्रहहोमः। ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यं भवावाजस्य सङ्गथे स्वाहा। ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं अपाꣳ रेताꣳसि जिन्वति स्वाहा। ॐ अग्ने विवस्वदुषस श्चित्रं राधोऽमर्त्य आदामुषे जातवेदो वहा त्वमद्या देवां उषर्बुधः स्वाहा। ॐ बृहस्पते परिदीया रथेन रक्षोहा मित्रां अपबाधमानः प्रभञ्जन्त्सेना प्रमृणो युधा यजन्नस्माकमेधि विता रथानां स्वाहा। ॐ शुक्रन्तेऽन्यद्यजतं अन्यदियुरूपे अहनी द्यौरिवासि विश्वा हि माया अवसि स्वधावन् भ्रातर्त्वे पूषन्निह रातिरस्तु स्वाहा। ॐ अग्नो देवीरभीष्टये अग्नो भवन्तु पीतये संयोरभिस्रवन्तु नः स्वाहा। ॐ कयानश्चित्र आभुव दूती सदा वृधः सखा कया शचिष्ठया वृता स्वाहा। ॐ केतुं कृन्नःकेतवे पेशो मर्या अपेशसे समुषद्भिरजायथाः स्वाहा। यजुर्वेदी तु। ॐ आकृष्णेनेत्यादि इदं सूर्याय। ॐ इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठाय इममसुमसुष्य पुत्रमसुष्याः पुत्रमस्यै विशे स्वाहा। इदं सोमाय। ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं अपाꣳ रेताꣳसि जिन्वति स्वाहा। इदं मङ्गलाय। ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳसृजेथामयश्च। अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत स्वाहा। इदं बुधाय। ॐ बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं स्वाहा। इदं बृहस्पतये। ॐ प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि स्वामादयस्व सहसस्पुत्र मग्ने स्वाहा। इदमग्नये। ॐ शन्नो देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। इदमापोभ्यः। ॐ शं नो देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। इदं वरुणाय। ॐ शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः स्वाहा। इदं मित्रादिभ्यः। ॐ शं नो वातः पवतां शं नस्तपतु सूर्यः शं नः कनिक्रदद्देवः पर्जन्यो अभि वर्षतु स्वाहा। इदं वायवे। ॐ शं नो देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। इदं वरुणाय। ॐ शं

ऋत प्रजात तदस्मासु द्रविणं धेहि चित्रꣳ स्वाहा। इदं इन्द्रायनये। ॐ अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धसः। इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा। इदं शुक्राय। ॐ अग्नो देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। इदं अग्नेश्वराय। ॐ काष्ठात् काष्ठात् परो, हन्ती परुषः परुषः परि एवानो दूर्वे प्रतनु सहस्रेण शतेन च स्वाहा। इदं राद्रवे। ॐ केतुं कृन्वन्नकेतवे पेशो मर्या अपेशसे समुषद्भिरजायथाः स्वाहा। इदं केतुभ्यः। ऋग्वेदी तु एभिरेव मन्त्रैर्जुहुयात्॥ *॥ ततो मेक्षणमस्त्रौ प्रक्षिपेत्। एवं चरुहोमं समाप्य चरुणैवेशदिग्भ्यो बलिन्दद्यात्। तद्यथा। एष पायसबलिः ॐ प्राच्ये दिशे नमः। एवमाग्नेय्यै अवाच्ये निर्ऋत्यै प्रतीच्ये वायव्ये उदीच्ये ऐशान्यै ऊर्ध्वदिशे अधोदिशे॥ *॥ ततो घृताक्तपलाशसमिधा अष्टोत्तरशतं जुहुयादनेन मन्त्रेण। ॐ तद्विष्णोरित्यादि स्वाहा इदं विष्णवे। ततः पूर्वोक्तेश्चरुहोममन्त्रैस्तद्देवताभ्यः सुवेणाज्याहुतीर्जुहुयात्। तत आज्येन पुरुषसूक्तमवभिमन्त्रैः सामगो जुहुयात्। यथा। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं स मूढमस्य पांसुरे स्वाहा। १। ॐ प्रत्यस्य विष्णो अरुषस्य नूनहः प्रवोचं विदथा जातवेदसः। वैश्वानराय मतिर्नव्यसि शुचिः सोम इव पवते चारुरग्नये स्वाहा। २। ॐ प्रकाव्यसुषमेव जुवाणो देवो देवानां जनिमा विवक्ति महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभि रेतसा स्वाहा। ३। ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं सर्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलं स्वाहा। ४। ॐ त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वं व्यक्रामत् साशनानशने अभि स्वाहा। ५। ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति स्वाहा। ६। ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि स्वाहा। ७। ॐ ततो विराड्जायत विराजो अधिपूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः स्वाहा। ८। ॐ कयानश्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता स्वाहा। ९। *। यजुर्वेदी तु। षोढ्योपचारपूर्वोक्तपुरुषसूक्तषोढ्यमन्त्रैराज्येन षोढ्याहुतीर्जुहुयात्। ऋग्वेदिनामप्येवम्॥ *॥ तत आज्यमिश्रितान् तिलान् गृहीत्वा ॐ इरावतो धेनुमतो हि भूतं सूयवसिनी मनवे दशस्या व्यस्भ्ना रोदसी विष्णुरेतेराधत्त पृथिवीमभितो मयूखैः स्वाहा। इदं विष्णवे। इति सप्तत जुहुयात्। ॐ ब्रह्माद्यायिभ्यः स्वाहा। ॐ विष्णुद्यायिभ्यः स्वाहा। ॐ इंद्राणाद्यायिभ्यः स्वाहा। एवं पूर्वोक्तैर्नवग्रहमन्त्रैर्दशदिक्पालमन्त्रैश्च सप्तत सप्तत जुहुयात्। एवं पर्वतेभ्यः स्वाहा। ॐ नदीभ्यः स्वाहा। ॐ सप्तसमुद्रेभ्यः स्वाहा। एवं तिलहोमं समाप्य सुवेण महाव्याहृतिभिराज्यं जुहुयात्। *। तत प्रायश्चित्तहोमसङ्ख्यं हुत्वा ॐ अग्नेत्वं विधुनामासीति नाम हुत्वा आवाह्य पूजयित्वा परिभाषासिद्धं स्वशाखोक्तं प्रायश्चित्तहोमादि हुत्वा पूर्णाहुतीं नवनामानमग्निं पूजयित्वा घृतपूर्णस्रुचा उत्थाय यजमानेनान्वारब्धः ॐ तद्विष्णोः परममित्यादि वौषट् इत्युच्चार्य पूर्णाहुतित्रयं दद्यात्। तत आचारात् ऐशान्यां दृष्ट्वा त्वं प्रीतिमा भव इत्युच्चार्य दुग्धादि क्षिप्त्वा सुवस्थभङ्गान ॐ कश्यपस्य त्र्यायुषं इति शिरसि। ॐ यमदग्नेः त्र्यायुषं कण्ठे। ॐ यद्देवानां त्र्यायुषं बाहुमूलयोः। ॐ तन्नोऽस्तु त्र्यायुषं हृदि। अन्यत्कर्तृकल्पे तु तन्नोऽस्तु त्र्यायुषमिति विशेषः। ततो यजमानः पञ्चगव्यं चरुशेषञ्च प्राश्य घ्रात्वा वा पूर्वमाचार्यादिकां दक्षिणां ब्रह्मणे दद्यात् ततो हेमयुक्तं सवस्त्रतिलपात्रं अक्षतगवीं तन्मूल्यं वा एतद्धोमकर्मप्रतिष्ठार्थमाचार्याय दद्यात्। अन्यद्धोऽपत्ये होत्रे दद्यात्। एतत्कृतकर्मणा प्रीयतां भगवान् विष्णुरिति विष्णवे समर्पयेत्।*। ततः प्रासादसम्मुखे ॐ उत्तिष्ठ ब्रह्मणस्पते देवा यज्ञन्तस्ते मही उपप्रयन्तु मरुतः सुदानव इन्द्रः प्रातुर्हवासचा इतिमन्त्रेण देवतामानीय विष्णुयज्ञस्य सम्मुखे गरुडं शिवयज्ञस्य वृषं दुर्गायज्ञस्य सिंहं स्थापयेत्। ततो गन्धमाल्यवस्त्रादिना स्थपतिं परितोष्य ॐ इदं विष्णुर्विचक्रमे इत्यादि पठित्वा ॐ चक्राय नमः इति चक्रं संपूज्य गर्भोपरि यथायोग्यं चक्रादिकं विन्यस्य यदि वक्ष्यमाणाद्य यद्वाराद्युरुपं तोरणं विधाय यद्वारुरूपघण्टाचामरकिङ्किणीजालवर्हिपत्रोपेतं सवस्त्रयष्टिसमेतं ध्वजं यद्वेशगानीये वायुकोणे वा स्थापयेत्। *। ततो विष्वं क्षेत्रयामादौ यथार्हं गृहसमीपे नीत्वा पञ्चविंशतिघटेनारिकेलोदकैः पञ्चगव्यपञ्चपल्लवैः कौशोदकैः स्नानं कारयित्वा षोढ्योपचारादिभिः पूजयेत्। वक्ष्यमाणमन्त्राणां पौराणिकलेन शूद्राणामप्यधिकारः। अर्घ्यपात्राम्भसा प्रोक्षितं आसनं गृहीत्वा इदमासनं ॐ सर्वात्मायामिति देव सर्वबीजमयं ततम्। आत्मज्ञाय परं शुद्धमासनं कल्पयाम्यहम्॥ ॐ विष्णवे नमः इति मूलेन दद्यात् १। ततः स्नानाञ्जलिः। "ॐ यस्य दर्शनमिच्छन्ति देवाः स्वार्थेरधिहये। तस्मै ते परमेशाय स्वागतं स्वागतञ्च मे॥ कृतार्थोऽनुगृहीतोऽस्मि सफलं जीवितं मम। आगतो देवदेवेश! सुस्वागतमिदं वपुः॥" विष्णो स्वागतमिति स्वागतप्रश्नः २। ताम्रपात्रस्थं ग्रामाकदूर्वाभृङ्गापराजितादूक्षजलं गृहीत्वा। "ॐ यदभक्तिलेशसम्पर्कात् परमानन्दसम्भवः। तस्मै ते चरणाम्भाय पाद्यं शुद्धाय कल्पये॥" इत्युच्चार्य मूलेन पादयोर्दद्यात् ३। इदमासनमितीव मन्त्रस्य पूर्वमेतत् पाद्यमिति प्रयोज्यमेवमुत्तरत्र यथायोग्यमूह्यम्। गन्धपुष्पाक्षततुलसीयुक्तगन्धसलिलं अर्घ्यं गृहस्थं गृहीत्वा।

"ॐ तापत्रयहरं दिव्यं परमानन्दलक्षणम्। तापत्रयविनिर्मुक्तं तवार्घ्यं कल्पयाम्यहम्॥" इति मूलेन शिरसि दद्यात् ४। आतीक्ष्णवङ्गकक्कोलयुक्तं केवलं वा जलं गृहीत्वा।

"ॐ देवानामपि देवाय देवानां देवतात्मने। आचामं कल्पयामीश शुद्धानां शुद्धिहेतवे॥" इति मूलेन दद्यात् ५। कांस्यस्थं दधिमधुघृतात्मकं कांस्यपिहितं मधुपर्कं गृहीत्वा।

"ॐ सर्वकल्मषहीनाय परिपूर्णसुखात्मने। मधुपर्कमिमं देव कल्पयामि प्रसीद मे॥" इति मूलेन दद्यात् ६। पुनराचमनीयं गृहीत्वा।

"ॐ उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रतः। शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम्॥" इति मूलेन दद्यात् ७। लौकिकषट्त्रिंशदधिकशततत्त्वतोलकान्यूनं तौर्यत्रिकं गृहीत्वा।

"ॐ परमानन्दबोधाब्धिनिमग्ननिजमूर्तये। साङ्गोपाङ्गमिदं स्नानं कल्पयाम्यहमीश ते॥" ॐ तद्विष्णोरिति मूलेन दद्यात् ८। पूर्ववदीत्वा पुनराचमनीयञ्च दद्यात्। अर्घ्याम्भसा प्रोक्षितं वस्त्रं गृहीत्वा।

"ॐ मायाचित्रपटच्छन्ननिजगुह्योरुतेजसे। निरावरणविज्ञाय वाससे कल्पयाम्यहम्॥" इति मूलेन दद्यात् ९। उत्तरीयवस्त्रं गृहीत्वा।

"ॐ यमाश्रित्य महामाया जगत्संमोहिनी सदा। तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम्॥" इति मूलेन दद्यात् १०। ततः पूर्ववत् पुनराचमनीयञ्च दद्यात्। सुवर्णाभरणमर्घ्याम्भसा प्रोक्ष्य।

"ॐ स्वभावसुन्दराङ्गाय नानाशक्त्याश्रयाय ते। भूषणानि विचित्राणि कल्पयाम्यहमीश्वर॥" इति मूलेन दद्यात् ११। प्रोक्षितं गन्धं गृहीत्वा।

"ॐ परमानन्दसौरभ्यपरिपूर्णदिगन्तर। गृहाण परमं गन्धं कृपया परमेश्वर॥" इति मूलेन दद्यात् १२। ततदेवताप्रियपुष्पमादाय।

"ॐ तुरीयवनसम्भूतं नानागुणमनोहरम्। आनन्दसौरभं पुष्पं गृह्यतां परमेश्वर॥" इति मूलेन दद्यात् १३। धूपं प्रोक्ष्य घण्टां संपूज्य।

"ॐ वनस्पतिरसो दिव्यो गन्धाढ्यः सुमनोहरः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥" इत्युच्चार्य वामहस्तेन घण्टां वादयन् मूलेन दद्यात् १४। ततो घृतादिप्रदीपमादाय।

"ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः।

सवाह्याभ्यन्तरं ज्योतिरीपोऽयं प्रतिगृह्यताम्॥"
इति मूलेन दद्यात् १३। प्रोक्षितशालाविधनेवेद्योपरि मत्स्यमुद्रया मूलं दृष्ट्वा जलाभ्यर्च्य धेनुमुद्रयामृतीकृत्य।
"ॐ सत्पात्रसिद्धं सुरविर्विधानेकभक्ष्यकम्।
निवेदयामि देवेश सानुगाय गृहाण तत्॥"
इति मूलेन दद्यात् १५। जलमादाय।
"ॐ समस्तदेवदेवेश सर्व्वतृप्तिकरं परम्।
अखण्डानन्दसम्पूर्णं गृहाण जलमुत्तमम्॥"
इति मूलेन दद्यात् १५। पूर्व्ववत् पुनराचमनीयञ्च। ताम्बूलं गृहीत्वा।
"ॐ ताम्बूलं देवदेवेश कर्पूरादिसुवासितम्।
कल्पयामि तवेशान वदनाम्भोजभूषणम्॥"
इति मूलेन दद्यात् १५। ततस्तत्तद्देवतानमस्कारमन्ते वन्दनं कुर्य्यात्। १६। उपचारद्रव्याधारदाने साधारणेनोल्लेखः पृथग्वा तद्दानम्। *। तत ॐ विष्णवे नमः इति त्रिः संपूज्य चतुष्टानितानतोरणयुक्तं वस्त्रादिच्छादितं वेश्म प्रोक्ष्य ॐ विष्णवे नमः इति त्रिः संपूज्य ॐ तद्विष्णोरित्यनेन विष्णुं स्मृत्वा ॐ तत् सदित्युच्चार्य वामहस्तेन धृत्वा कुशतिलजलान्यादाय अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा मद्दापातकादिदुरितक्षयकामो विष्णुप्रीतिकामो वा विष्णुवेश्मनि इमं भवनं विष्णुदेवतं विष्णवे तुभ्यमहं सम्प्रददे। इत्युत्सृज्य एतत्प्रतिष्ठार्थं दक्षिणां विष्णवे दद्यात्। पश्चादाचार्य्यादौ प्रतिपत्तिः। ततो गरुडस्तम्भं समारोप्य ॐ सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरो गायत्री चक्षुर्बृहद्रथन्तरे पक्षौ। स्तोम आत्मा छन्दांस्यङ्गानि यजूंषि नाम साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वःपते। यजुर्वेदी तु। ॐ सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुस्तोम आत्मा साम ते तनूर्वामदेवं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दांस्यङ्गानि धिष्ण्याः शफाः यजूंषि नाम। सुपर्णोऽसि गरुत्मान्दिवं गच्छ सुरः पत इति पठित्वा। ॐ गरुडाय नम इति त्रिःसंपूज्य ॐ नमस्ते पतगश्रेष्ठ पन्नगान्तकर प्रभो। त्वत्प्रसादान्महाबाहो मोदेयं दिवि देववत्। यथा त्वं संपुटकरः सततं नतकन्धरः। तथैव पुरतो विष्णोस्तत्प्रसादाद्भवान्यहम्। इति पुटाञ्जलिः प्रार्थयेत्। *। ततः पिण्डप्रदीपादिना निर्म्मञ्छनं कुर्य्यात्। ततो विप्रान्भूनाथाञ्छेभ्यो भोज्यानि दद्यात्। दीनानाथबलप्रबन्धिरेभ्यो यथाशक्ति दद्यात्। ततः प्रीयतां पुष्करीकाक्षसर्व्वयज्ञेश्वरो हरिः। तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्॥ ततो वृत्तगीतवादित्रनिखनमर्द्दोत्सवं श्रुत्वा अच्छिद्रावधारणं श्रुत्वा वैगुण्यसमाधानार्थं तद्विष्णोरिति विष्णुं स्मरेत्। *। एवं ब्रह्मादिमठादिप्रतिष्ठायां आसनादिकन्तु तत्तन्मन्त्रं विहाय केवलं प्रणवादिनमोऽन्तेन तत्तन्नाम्ना दत्त्वा यथायोग्यं तत्तत्कर्म्मणैवं समापयेत्। *। एवं गोपथादि प्रतिष्ठायां तत्तत्समीपे वेदिकां कृत्वा तत्तत्फलकामो विष्णुप्रीतिकामो वा तत्तत्प्रतिष्ठां करिष्ये इति सङ्कल्प्य दक्षिणाहारादिकं विधाय प्रागुक्तविधिनाग्निस्थापनादि एतत्कर्म्मणा प्रीयतां भगवान् विष्णुरित्यन्तं कर्म्म कृत्वा कूपादिवत् सर्व्वभूतेभ्य उत्सृज्य दक्षिणां दद्यात्। *। नियमव्रतादिप्रतिष्ठायान्तु विष्णुरित्यन्तं कर्म्म कृत्वा व्रतानुष्ठानं कृत्वा दक्षिणादिकं कुर्य्यात्। *। ततो घटस्थजलेन यजमानमभिषिञ्चेत्। तद्यथा,—
"ॐ सुराश्चामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते॥
आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतस्तथा।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः पुष्टिश्च मातरः।
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः॥
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः।
ऋषयो मुनयो गावो देवमातर एव च॥
देवपत्न्योऽप्सरा नागा दैत्याश्चाप्सरसां गणाः।
अस्त्राणि सर्व्वशस्त्राणि राजानो वाहनानि च॥
ओषधानि विचित्राणि कालस्यावयवाश्च ये।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एतास्त्वामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये॥"*॥

इति मठादिप्रतिष्ठाप्रयोगतत्त्वं समाप्तम्॥

(प्रकरणाद्यवस्तुविशेषः। अस्य पाकप्रकारो यथा,
"समिता मर्द्दयेदन्यजलेनापि च सन्नयेत्।
तस्मात्तु वटिकां कृत्वा पचेत् सर्पिषि गौरसम्॥
एला लवङ्गकर्पूरमरीचाद्यैरलङ्कृते।
मज्जयित्वा सितापाके ततस्तञ्च समुद्धरेत्॥
अयमुत्कारः संसिद्धो मठ इत्यभिधीयते॥"
[सन्नयेन्मर्द्दयेत्] तथास्य गुणाः॥
"मठस्तु दृंहणो दृष्यो बल्यः समधुरो गुरुः।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मठरः, पुं, (मन्यते मनुतेऽवबुध्यते इत्यर्थः। मन + "वचिमनिभ्यां किच्च।" उणा० ५। ३६। इति अरच् कित् टेरित्वादेशः।) मुनिविशेषः। इत्युणादिकोषः॥ (श्रौक्षः। मठरो मुनिश्रौक्षयोरित्युज्ज्वलदत्तः॥)

मठ ष्ठ क मोदे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) ष्ठ मठयति। इति दुर्गादासः॥

मठ ष्ठ कि भूषे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) मठयति मठति ते मारो जनम्। ष्ठ मठयते। इति दुर्गादासः॥

मठ ष्ठ ड विभागे। वेष्टे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ष्ठ मठयते ड मठते। इति दुर्गादासः॥

मठकः, पु. (मठयति भूषयति क्षेत्रमिति। मठि + "कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि।" उणा० २। ३२। इति कुन्। एषोदरादित्वान्नलोपः।) शुक्लभेदः। मेडुया इति भाषा। इति जटाधरः॥

मठुकः, पुं, वाद्यविशेषः। इत्यमरः। १। ७। ८॥ घुघूक इति ख्यातः। विपुलो डमरुर्मठुरिति कोषः॥ मठ् इति रौति इति मठुः पूर्व्ववद्रौतेर्डुः मनीषादित्वाद्वेरुत्वम्। मज्जन्ति ध्वन्दा अत्रेति मज्जेर्णिगतो वा। इति भरतः॥

मठुकः, पुं, (मठुरेवेति मठु + स्वार्थे कन्।) मठुवाद्यम्। इति त्रिकाण्डशेषः॥

मठ ठूचे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) मठति। ठूचेऽवस्रंसने। इति दुर्गादासः॥

मठि, पुं, स्त्री, (मठ + "सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इतीन्।) अश्वजातिः।

मणिक

(यथा, रघौ । १ । ४ ।
"मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः।")
मुक्तादिकम् । तत्पर्य्यायः । रत्नम् २ मणी ३ । इत्यमरः । २ । ६ । ६३ । (तथाचास्य पर्य्यायः ।
"रत्नं स्त्रीवे मणिः पुंसि क्लियामपि निगद्यते ।
तत्तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
अस्य गुणाः ।
"मणिरत्नं परं प्रीतं कषायं स्वादु शैखनम् ।
चक्षुष्यं धारणात्तच्च पाण्डालक्ष्मीविनाशनम् ॥"
इति राजवल्लभः ॥
(तथाचास्य गुणाः ।
"मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादयः ।
चक्षुष्या मणयः प्रीता शैखना विषरुग्दराः ।
पवित्रा धारणायाच्च पाण्डालक्ष्मीमलापहाः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ।)
अजायाः कण्ठस्थितस्तनः । लिङ्गाग्रम् । अलिञ्जरः । इति मेदिनी । २४ । योन्यवयवः । इति शब्दरत्नावली । नागविशेषः । इति जटाधरः ॥ मणिबन्धः । इति हेमचन्द्रः ॥ (मुनिभेदः । यथा, महाभारते । २ । ११ । २२ ।
"अत्रितो देवलश्चैव जैगिषव्यश्च तत्त्ववित् ।
ऋषभो वितमूश्च महावीर्य्यस्तथा मणिः ॥")
मणिकं, क्ली, (मणिरेवेति मणि + "स्वार्थादिभ्यः कन् ।" ५ । ४ । २६ । इति स्वार्थे कन् । अलिञ्जरः । इत्यमरः । २ । ६ । ३१ । (यथा, मात्स्ये । १ । २१ ।
"स तमादाय मणिकं प्राक्षिपच्छजलाशये ।
वज्रम् ॥")
मणिकर्णः, पुं, कामरूपस्थशिवलिङ्गभेदः । यथा,
"भस्मकूटस्य चैशान्यां मणिकूटो महागिरिः ।
मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गकः ॥
स चतुर्योजनात्मकस्तु मणिकर्ण इतीरितः ।
सद्योजातस्य मन्त्रेण पूजितव्यः सदा शिवः ॥"
इति कालिकापुराणे ८१ अध्यायः ॥
मणिकर्णिका, स्त्री, (कर्णे भवा इति । कर्ण + "कर्णललाटात् कनलङ्कारे ।" ४ । ३ । ६५ । इति कन् । टाप् । अकारस्य इत्वम् ।) मणिमयी कर्णिका शाकपार्थिवादिवत् समासः । सा विद्यते यत्रेति वा । विष्णोस्तपस्याप्रचयदर्शनात् विस्मिततया शिवस्य मणिमयकुण्डलपतनादस्यास्तथात्वम् ।) काशीस्थतीर्थविशेषः । तदुत्पत्तिर्यथा । विष्णुं प्रति शिववाक्यम् ।
"त्वदीयस्यास्य तपसो महोपचयदर्शनात् ।
यन्मयान्दोलितो मौलिरहिश्रवणभूषणः ॥
तदान्दोलनतः कर्णात् पपात मणिकर्णिका ।
मणिभिः खचिता रम्या ततोऽस्तु मणिकर्णिका ॥
चक्रपुष्करिणीतीर्थं पुरा ख्यातमिदं शुभम् ।
त्वया चक्रेण खननाच्चक्रचक्रगदाधर ॥
मम कर्णात् पपातेयं यदा च मणिकर्णिका ।
तदा प्रभृति लोकेऽत्र ख्यातास्तु मणिकर्णिका ॥

मणिका

श्रीविष्णुरुवाच ।
मुक्ताकुण्डलपातेन तवादितनयाप्रियम् ।
तीर्थानां परमं तीर्थं मुक्तिक्षेत्रमिहास्तु वै ॥
काशीतोऽत्र यतो ज्योतिस्तदनाख्येयमीश्वर ! ।
अतो नामापरञ्चास्तु काशीति प्रथितं विभो ! ॥
अन्यं वरं वरे देव ! देवः सोऽप्यविचारितम् ।
स ते परोपकारार्थं जगदत्रामरे शिव ! ॥
आत्रह्मस्तम्बपर्य्यन्तं यत्किञ्चिज्जन्तुसंज्ञितम् ।
चतुर्ष्वं भूतग्रामेषु काश्यां तन्मुक्तिमाप्नुयात् ॥
तस्मिंस्तीर्थवरे शम्भो ! मणिश्रवणभूषणे ।
सन्ध्यां स्नानं जपं होमं वेदाध्ययनमुत्तमम् ॥
तर्पणं पिण्डदानञ्च देवतानाञ्च पूजनम् ।
गोभूतिलहिरण्यास्थदीपान्नाम्बरभूषणम् ॥
कन्यादानं प्रयत्नेन सप्तजन्मार्जनैकधः ।
व्रतोत्सर्गं तथोत्सर्गं लिङ्गादिस्थापनं तथा ॥
करोति यो महाप्राज्ञो ज्ञात्वायुः क्षणभङ्गुरम् ।
विपत्तिं विपुलाञ्चापि सम्पत्तिमतिभङ्गुराम् ॥
अत्रया मुक्तिरेकास्तु विपाकस्तस्य कर्म्मजः ।
अन्यच्चापि शुभं कर्म्म यद्दत्तं श्रद्धया हुतम् ॥
विनात्मघातमीशान त्यक्त्वा प्रायोपवेशनम् ।
नैःश्रेयसः श्रियो हेतुस्तदस्तु जगदीश्वर ! ॥
नाशुद्धोऽपि नाश्नाति ज्ञात्वा कालान्तरेऽपि यत् ।
तदिहाश्नातमेतु नस्त्रेधा ! त्वदनुग्रहात् ॥
तव प्रसादात्तस्येह सर्व्वमश्नातमस्तु तत् ।
यदस्ति यद्भविष्यच्च यद्भूतञ्च सदाशिव ! ॥
तस्मादेतच्च सर्व्वस्मात् क्षेत्रमस्तु शुभोदयम् ।"
इति काशीखण्डे मणिकर्णिकाख्यानं नाम २६ अध्यायः ॥
मणिकर्णीश्वरः, पुं, (मणिकर्णो मणिकर्ण्यो वा ईश्वरः ।) काशीस्थशिवलिङ्गविशेषः । यथा,—
"ओङ्कारं प्रथमं पश्चेत् मत्स्योदर्य्यां ततो-ऽनकः ।
त्रिपिण्डमहादेवं ततो वै क्षत्तिवासकम् ॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गङ्गेशं कामेश्वरं ततः ॥
विश्वकर्म्मेश्वरञ्चार्थं मणिकर्णीश्वरं ततः ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्चयेत् ॥
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः ।"
इति काशीखण्डे १०० अध्यायः ॥
मणिकर्णेश्वरः, पुं, (मणिकर्णस्यादाख्य ईश्वरः ।) कामरूपस्थशिवलिङ्गविशेषः । यथा,—
"सर्व्वतीर्थजले स्नात्वा दृष्ट्वा चन्द्रं सवासवम् ।
मणिकर्णेश्वरं दृष्ट्वा मुक्तिर्भस्माचलं गते ॥"
इति कालिकापुराणे ८१ अध्यायः ॥
मणिकाननं, क्ली, (मणीनां काननमिव । बहुमणिधारणादस्य तथात्वम् ।) कण्ठः । इति शब्दरत्नावली ॥ रत्नवनञ्च ॥
मणिकारः, पुं, (मणिं करोतीति । कृ + अण् ।) मणिनिर्म्मितालङ्कारादिकर्त्ता । जौहरि इति भाषा । तत्पर्य्यायः । वैकटिकः २ । इति हेमचन्द्रः ॥ न्यायचिन्तामणिकर्त्ता च ॥

मणिकूट

मणिकूटः, पुं, (मणयः मणिमयानि कूटानि शिखराणि यस्य सः ।) कामरूपस्थपर्व्वतभेदः । यथा,—
"भस्मकूटस्य चैशान्यां मणिकूटो महागिरिः ।
मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गकः ॥"
इति कालिकापुराणे ८१ अध्यायः ॥
"मणिकूटस्याथ गिरेर्गन्धमादनकस्य च ।
मध्ये स्रवति लोहित्यो ब्रह्मपुत्रः समाश्रितः ॥
हत्वा ज्वरं तथा विष्णुस्तत्र वासमथाकरोत् ।
नरदेवासुरादीनां यथा भवति वै हितम् ॥
ज्वरेणापीड़िततनुर्ज्वरं हत्वा महासुरम् ।
सर्व्वलोकहितार्थाय सोऽगदस्नानमाचरत् ॥
अगदस्नानसंभूतं संजातश्च महासरः ।
तस्य स्वयं नाम चक्रे हयग्रीवोऽपुनर्भवम् ॥
न पुनर्जायते यस्मात् ततः स्नात्वा नरोत्तमः ।
अपुनर्भवसंज्ञं तत् सरस्तु परिकीर्त्तितम् ॥
मणिकूटाचले विष्णुर्हयग्रीवस्वरूपधृक् ।
स च धामप्रमाणेन विस्तारेणैव संस्थितः ॥"
इति कालिकापुराणे ८० अध्यायः ॥
मणिखनिः, पुं. (मणीनां खनिः ।) मणेराकरः । यथा । मणेः खनिः ॥ इति शुभ्बोधाकरद्रुमः ॥
मणिग्रीवः, पुं, (मणयो ग्रीवायां कन्धरायां यस्य ।) कुबेरपुत्रः । इति शब्दरत्नावली । रत्नकन्धरे च ॥ (यथा, ऋग्वेदे । १ । १२२ । १४ ।
"हिरण्यकर्णं मणिग्रीवमर्व्वाञ्चो
विश्वे अदिरवस्यन्तु देवाः ॥"
"मणिग्रीवं रत्नाद्युपेतकण्ठम् ।" इति तद्भाष्ये सायणः ॥)
मणिच्छिद्रा, स्त्री, (मणेरिव छिद्रमस्याम् ।) मेदानामौषधम् । ऋषभाख्यौषधम् । इति मेदिनी । रे, २६० ॥ (तथास्याः सलक्षणपर्य्यायः ।
"महामेदाभिधो ज्ञेयो मेदालक्षणमुच्यते ।
शुक्लकन्दो नखच्छेद्यो मेदोधातुमिव स्रवेत् ॥
यः स मेदेति विज्ञेयो जिह्वासातत्परैर्जनैः ।
शुक्लपर्णी मणिच्छिद्रा मेदा मेदोभवाश्वरा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मणितं, क्ली, (मण् + भावे क्तः । मैथुनकालीनवाक्यम् । "स्खलितमणितादि सुरते ।" इति साहित्यदर्पणे ।) तत्पर्य्यायः । रतकूजितम् २ । इति हेमचन्द्रः ॥ (यथा, शिशुपालवधे । १० । ७५ ।
"शीत्कृतानि मणितं करणोक्तिः
स्विन्नमुक्तमलमर्थवचांसि ॥")
मणितारकः, पुं, (मणिरिव दीप्तिमती तारका यस्य ।) सारसपक्षी । इति राजनिघण्टः ॥
मणिद्वीपः, पुं. क्ली, (मणिप्रचुरो द्वीपः ।) क्षीरसमुद्रमध्ये पद्मरागादिमणिमयान्तरीपः । स च त्रिपुरसुन्दरीवासस्थानम् । यथा,—
"सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिसरे
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिवपर्य्यङ्कनिलयां
भजन्ति त्वां धन्याः कति चन चिदानन्दलहरीम् ॥"
इत्यानन्दलहरी ॥

मण्डरी, स्त्री, (मण्डयति भूषयतीति। मण्ड+अरप्रत्ययः। स्त्रियां ङीप्।) घुर्घुरी। इति हारावली॥

मण्डलं, क्ली, (मण्डयति भूषयतीति। मण्ड+"कलत्रपत्र।" उणा०। १।१०६। इति कलः।) चक्रसूर्य्ययोर्वेष्टिर्व्वेष्टनम्। चक्रसूर्य्ययोरुत्पातचक्रम्। यथा,—

"वातेन मण्डलीभूता: सूर्य्याचन्द्रमसो: करा:।
मालाभा योन्नि तन्मन्ते परिवेष: प्रकीर्त्तित:॥"

इति साहसाङ्क:॥

तत्पर्य्याय:। परिवेष:२ परिधि:३ उपसूर्य्यकम्४। इत्यमर:। १।३।५२॥ परिवेष: मङ्ख्यान्तोऽपि। यथा,—

"पुंलिङ्ग: परिवेष: स्यात् परिधौ परिवेषणे।"

इति मङ्ख्यान्ते रुद्र:॥

सूर्य्यमुपगतं उपसूर्य्यं स्वार्थे क: उपसूर्य्यकम्। चक्रपक्षे उपसूर्य्यमिव उपसूर्य्यकं स्वार्थे क:। इति भरत:॥ *॥ चक्रवालम्। इत्यमर:। २। ३।६॥ तत्तु मण्डलाकारेण परिगतं समूहमात्रम्। मण्डलाकारादिकसमूह:। इति माधवी॥ चक्रस्येव वालो वलनमस्य चक्रवालं वलेर्घञि वाल: मनीषादित्वात् ङीष्। किंवा चक्रेण चक्राकारेण वाट्यते चक्रवाट् वाटृ आप्तावे अल्। इति भरत:॥ *॥ कोष्ठरोग:। द्वादशराजकम्। इति मेदिनी। १ ले, २१॥ (उक्तञ्च तद्विवरणं कामन्दकीये नीतिसारे। ८।१—२२।

"उपेत: कोषदण्डाभ्यां सामात्य: सह मन्त्रिभि:।
दुर्गस्थश्चिन्तयेत्तासु मण्डलं मण्डलाधिप:।
यथौ विराजते राजा विमृद्ध मण्डले चरन्।
अगृह्य मण्डले सर्पन् शीर्य्यते रथचक्रवत्॥
रोचते सर्व्वभूतेभ्य: शशीवासकमण्डल:।
सम्पूर्णमण्डलस्तस्माद्विजिगीषु: सदा भवेत्॥
अमात्यराष्ट्रदुर्गाणि कोषो दण्डश्च पञ्चम:।
एता: प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृता:॥
एता: पञ्च तथा मित्रं सप्तम: पृथिवीपति:।
सप्तप्रकृतिकं राज्यमित्यत्राप्त इहस्थित:॥
सम्यग्रक्षन्ति प्रकृतिभिर्मन्त्रीत्याह: क्षतश्रम:।
तत्तुमेवलशीलश्च विजिगीषुरिति स्मृत:॥
कौलीनं वृद्धसेवित्वसुत्साह: स्खलनक्षिता।
चित्रज्ञता बुद्धिमत्त्वं प्रागल्भ्यं सत्यवादिता॥
अदोषदर्शनाश्चौर्य्यं प्रश्रय: स्वप्रधानता।
देशकालज्ञता दाक्ष्यं सर्व्वक्लेशसहिष्णुता॥
सर्व्वविज्ञानिता दाक्ष्यं सदा संवृतमन्त्रता।
अविसंवादिता धैर्य्यं भक्तिज्ञत्वं कृतज्ञता॥
शूरलागवसत्त्वसम्पन्नमविलम्बोपलम्भ:।
स्वकर्म्मैकदृशाज्ञत्वं क्षतिज्ञं दीर्घदर्शिता॥
क्षितिरक्षित्वं धर्म्मित्वमक्रूरपरिवारता।
प्रकृतिस्फीतता चेति विजिगीषुगुणा: स्मृता:॥
सर्व्वैर्गुणैर्विहीनोऽपि स राजा य: प्रतापवान्।
प्रतापयुक्ता ह्यन्ति परान् सिंहा मृगानिव॥
प्रतापसिद्धौ नृपति: प्राप्नोति महतीं श्रियम्।
तस्मादुत्थानयोगेन प्रतापं जनयेत्परम्॥
एकार्थाभिनिवेशित्वमविलम्बयसूचते।
दारुणस्तु स्मृत: शूरो विजिगीषुगुणान्वित:॥
लुब्ध: क्रूरोऽलसोऽसत्य: प्रमादी भीरुरस्थिर:।
मूढो योधावमन्ता च सुखकेन्दो रिपु: स्मृत:॥
अरिर्मित्रमरेर्मित्रं मित्रमित्रमत:परम्।
तथारिमित्रमित्रञ्च विजिगीषो: पुर: स्थिता:॥
पार्ष्ण्याद: स्मृत: पश्चादाक्रन्दस्तदनन्तरम्।
आसारावनयोश्चैव विजिगीषोस्तु मण्डलम्॥
अरेस्तु विजिगीषोस्तु मध्यमो भूम्यनन्तर:।
अनुग्रहे संहतयो: समर्थो यस्तयोर्वधे॥
मण्डलन्ते हि चैतेषामुदासीनो बलाधिक:।
अनुग्रहे संहतानां यस्तानाञ्च वधे प्रभु:॥
मूलप्रकृतयस्त्वेताश्चतस्र: परिकीर्त्तिता:।
आहैव मन्त्रकुशलश्चतुष्कं मण्डलं मय:॥
विजिगीषुररिर्मित्रं पार्ष्ण्याद्दोऽथ मध्यम:।
उदासीन: पुलोमेन्द्रौ षट्कं मण्डलमूचतु:॥
उदासीनो मध्यमश्च विजिगीषोस्तु मण्डलम्।
उग्रना मण्डलमिदं प्राह द्वादशराजकम्।") देश:। स च देश: समन्ताद्विंशतियोजनं यत्तावद्योजनं वा। इति केचित्। गोलम्। इत्यनेकार्थकोष:॥ चक्रम्। इति त्रिकाण्डशेष:॥ संघात:। इति हेमचन्द्र:॥ नखाघात:। इति शब्दमाला॥ ध्वनिनां स्थानपथकालगतस्थितिविशेष:। यथा,—

"मण्डलाकारपादाभ्यां मण्डलं स्थानमीरितम्।"

इति शब्दरत्नावली॥

यावनखाख्यगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ वृत्तविशेष:। यथा,—

"तिर्य्यग्वृत्तिश्च एक: स्याद्योगोऽन्यावृत्तिरेव च।
मण्डलं सर्व्वतोवृत्ति: पृथग्वृत्तिरसंहत:।"

इति भरतधृतकामन्दकि:॥

(अस्य पुंस्त्वमपि। यथा, महाभारते। ६। ७८। २०।

"भौम्येव धार्त्तराष्ट्राणां वृत: प्रत्यहसद्बलै:।
मण्डल: समहाबाहुर्दूर्म्मोऽमित्रचातिगम्॥"

यथा च, कामन्दकीये। १६। ४९।

"मण्डलोऽसंहतो भोगो दण्डचेति मनीषिभि:॥")

ग्रहादीनां मण्डलसंस्थानं तत्परिमाणञ्च यथा,

"सर्व्वेषान्तु ग्रहाणां वै अधस्ताच्चरते रवि:।
रवेरधस्ताच्छुक्र: सोम: सोमान्नचक्रमण्डलम्॥
नक्षत्रेभ्यो बुधस्तूर्द्ध बुधादूर्द्धन्तु भार्गव:।
तस्मादङ्गारकश्चोर्द्ध तस्य चोर्द्ध गुरुस्मृत:॥
तस्मात् शनैश्चरश्चोर्द्ध तस्योर्द्धन्तु सप्तमण्डलम्।
ऋषयश्च ध्रुवश्चोर्द्धमाकाशं त्रिदिवं ध्रुवे।
आदित्यविजयो राहु: कदाचित् सोममार्गत:॥
सूर्य्यमण्डलसंस्थस्तु निर्ग्रहं केतु: प्रवर्त्तते।
नवयोजनसहस्राणि विस्तारो भास्करस्य तु॥
विस्तारात्त्रिगुणश्चास्य परिणाहे तु मण्डलम्।
द्विगुण: सूर्य्यविस्तारादिस्तार: परिगत:॥

दिगुणं मण्डलस्यास्य यथैव सवितुस्तथा।
चन्द्रत: षोड्शो भागो भार्गवस्य विधीयते॥
भार्गवात् पादहीनस्तु विज्ञेयो वै बृहस्पति:।
बृहस्पते: पादहीनौ शक्रसौरावुदाहृतौ॥
विस्तारमण्डलाभ्यान्तु पादहीनस्तयोर्बुध:।
बुधतुल्यानि ऋक्षाणि सर्व्वे ग्रहगणा यानि तु॥
योजनार्द्धप्रमाणानि तेभ्यो ह्रस्वं न विद्यते।
राहु: सूर्य्यप्रमाणस्तु कदाचित् सोमसम्मित:।
तस्मात् षड्प्रमाणस्तु केतुरुक्तनियत: स्मृत:॥"

इति देवीपुराणे ग्रहगतिनामाध्याय:॥

क्षत्रियमण्डलविधिर्यथा,—

"चतुर्हस्तं समारभ्य यावद्दण्डशतं भवेत्।
मण्डलं तत्र कर्त्तव्यमत ऊर्द्धं न कारयेत्॥
विमलं विजयं भद्रं विभातं शुभदं शिवम्।
वर्द्धमानञ्च दैवञ्च लताख्यं कामदायकम्॥
स्वस्तिकाख्यञ्च द्विदशं इति मण्डला:॥
सितादिहरितान्ताश्च रजा: कार्य्या: सुशोभना:।
प्रालिश्वटिककौसुम्भरजनीहरिपञ्चजा:॥
मन्त्रिविट्सरागाश्च भक्तना अभिमन्त्रिता:।
सितसर्षपधूपाढ्या रजा: क्षत्वा तु पातयेत्॥
अक्षरात्रं न्यसेन्मन्त्री सम्भवेति पदं पि वा।
समोत्थानं शुभं क्षत्वा गोमयेनोपलेपितम्॥
चन्दनागुरुकर्पूरगोदधूपाधिवासितम्।
भूभागं सुमितं क्षित्वं पूर्व्वपश्चिमकोत्तरम्॥
याम्यं स्वस्तिकमस्याङ्गै: सर्व्वैर्मांङ्गल्यपञ्चकै:।
पद्मपत्राष्टकं मध्ये द्विगुणं त्रिगुणं पि वा॥
दाराणि समसूत्राणि कर्त्तिकाकेशरोज्ज्वलम्।
पद्मं तथावशेषाणि स्वस्तिकान्युत्पलानि च॥
यथाबलमदृश्यन्तु रज:पातं समाचरेत्।
मध्यमानामिकाङ्गुष्ठैरपरिद्राव्यचेष्टया॥
अधोदृक्खाङ्गुलिं क्षत्वा पातयेत्तु विचक्षण:।
समा रेखा तु कर्त्तव्याविच्छिन्ना पृथिवर्ज्जिता॥
अङ्गुलपर्व्वनेपुण्या समा कार्य्या विजानता।
संसक्तं विषमं स्थूलं विच्छिन्नं ज्वरादितम्॥
पर्य्यस्तसर्पितं दृश्यमाखिखेन्न कदाचन।
संसक्ते कलहं विद्याद्व्यरेखे तु विग्रहम्॥
अतिस्थाने भवेद्व्याधिर्निम्ने पीडा विमिश्रिते।
विन्दुभिर्भयमाप्नोति शुभपक्षान्न संशय:॥
क्षयायाचार्थहानि: स्यात् विच्छिन्ने मरणं ध्रुवम्।
वियोगात्तु भवेत्तस्य दृष्टद्वयसुतस्य वा॥
अविदित्वा लिखेद्दृश्यन्तु मण्डलन्तु यथेच्छया।
सर्व्वदोषानवाप्नोति ये दोषा: पूर्व्वभाषिता:॥"

इति देवीपुराणे पुण्याभिषेकक्षित्तानामाध्याय:॥

सूर्य्यमण्डले देवानां स्थितिर्यथा,—

"अर्च्चयन् पूजयन् देवं जपंश्च रविमण्डले।
आदित्यमण्डले देवं ध्यात्वा विष्णुसुपैति तम्॥"

भोजनमण्डलं यथा,—

"यातुधाना: पिशाचाश्च असुरा राक्षसास्तथा।
घ्नन्ति केवलमन्नस्य मण्डलस्य विवर्ज्जनात्॥
आदित्या वसवो रुद्रा ब्रह्मा चैव पितामह:।
मण्डलान्युपजीवन्ति तस्मात् कुर्व्वन्ति मण्डलम्॥

चतुःकोणं द्विजाग्रस्य त्रिकोणं क्षत्रियस्य तु। द्विकोणाकृति वैश्यस्य शूद्रस्य वर्त्तुलं सदा॥" इत्याद्ये वह्निपुराणे आह्निकतपोनामाध्यायः॥

मण्डलं, क्ली, विम्बम्। इत्यमरः। २।३।१५॥ हे चक्रस्य शरीरे उपचारादाह्लिस्य च। वेत्ति शोभते विम्बः दीपकान्तिगत्यादौ वाच्यति विम्बः। विम्बति भाति विम्बः। यौगोऽयमिति स्वामी। मण्डयति मण्डं नाशयति अलः स्त्रियां नदादित्वात् मण्डली च। इति भरतः॥

मण्डलः, पुं, (मण्डं लाति गृह्णातीति। ला+कः।) कुक्कुरः। इति मेदिनी। ले, १२१॥ सर्पविशेषः। इति विश्वः॥ (देहस्याष्टप्रकारसन्ध्यन्तर्गतसन्धिविशेषः। "त एते सन्धयोऽष्टविधाः। कोरोदूखल-सामुद्ग-प्रतर-तुन्नसेवनीवायसतुण्ड-मण्डल-गुडावर्त्ताः।" 'कक्षकुद्वनेचक्षोमनाड़ीषु मण्डलाः।' इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)

मण्डलकं, क्ली, (मण्डल। स्वार्थे कन्।) विम्बम्। कुष्ठभेदः। दर्पणम्। इति मेदिनी। के, २०७। मण्डलाकारयूपः। इति जटाधरः॥

मण्डलकः, पुं, (मण्डल। स्वार्थे कन्।) कुक्कुरः। इति धरणिः॥

मण्डलकृतं, क्ली, (मण्डलेन मण्डलाकारेण प्रवर्त्तितं कृतमिति नित्यसमासः।) मण्डलाकारकृतम्। तत्पर्य्यायः। हल्लीषः २॥ इति शब्दमाला॥

मण्डलपुच्छिका, स्त्री, (मण्डलं मण्डलाकारं पुच्छं यस्याः। कन्। टाप्। अत इत्वञ्च।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या रक्तपुनर्नवाशब्दे ज्ञातव्याः॥)

मण्डलाग्रः, पुं, (मण्डलं गोलाकारं अग्रं यस्य।) खड्गः। इत्यमरः। २।८।८६॥ (यथा, सुश्रुते सूत्रस्थाने अष्टमेऽध्याये। तत्र मण्डलाग्रकरपत्रं छातां छेदने लेखने च।)

मण्डलाचितं, क्ली, (मण्डलवदाचरितमिति। मण्डल+क्यङ्। दीर्घः। मण्डलाय नामधातुः क्तः।) वर्त्तुलम्। इति शब्दरत्नावली॥

मण्डलाधीशः, पुं, (मण्डलस्य अधीशः।) मण्डलेश्वरः। तत्पर्य्यायः। मध्यमः २। इति हेमचन्द्रः॥

मण्डली, [न्] पुं, (मण्डलं कुण्डलं कुण्डलाकारेण शरीरवेष्टनमस्त्यस्येति। मण्डल+इनिः।) सर्पः। इति त्रिकाण्डशेषः॥ विड़ालः। इति शब्दमाला॥ चातकः। इति हेमचन्द्रः॥ खट्टाग्र इति भाषा॥ षटपदः। गोनाग्रसर्पः। इति राजनिर्घण्टः॥

मण्डली, स्त्री, (मण्डलमस्त्यस्या इति। अर्श आद्यच्। गौरादित्वात् ङीष्।) दूर्व्वा। इति शब्दरत्नावली॥ (स्त्री, गुडूची॥ तत्पर्य्यायो यथा, "गुडूची मधुपर्णी स्यादमृतात्तवल्लरी। छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च। जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली। चक्रलक्षणिकाधीरा विश्वल्या च रसायनी॥ चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मण्डलेशः, पुं, (मण्डलस्य ईशः।) मण्डलेश्वरः। तत्पर्य्यायः। एकजन्मा २ मध्यपट्टः ३। इति त्रिकाण्डशेषः॥

मण्डलेश्वरः, पुं, (मण्डलस्य ईश्वरः।) भूम्येकदेशाधिपः। अन्यो भूम्येकदेशाधिपो मण्डलेश्वरः स्यात् मण्डलस्य अरिमित्रादिरूपस्य देशस्य ईश्वरो मण्डलेश्वरः। एकदेशाधिप इत्यर्थः। स्यान्मण्डलं द्वादशराजके च देशे च विम्बे च कदम्बके च। इति विश्वः॥ इत्यमरटीकायां भरतः॥ तस्य लक्षणान्तरम्।

"चतुर्योजनपर्य्यन्तमधिकारं नृपस्य च। यो राजा तत्कृतगुणः स एव मण्डलेश्वरः॥" इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः॥

मण्डहारकः, पुं, (मण्डं हरति आहरति हृञ्हरतीति। हृ+"खुलृचौ।" ३।१।१३३। इति खुल्। सुरासम्पादनार्थं मण्डस्यहरादस्य तथात्वम्।) शौण्डिकः। इत्यमरः। २।२।१०॥

मण्डा, स्त्री, (मण्डः कारणत्वेनास्त्यस्या इति अर्शआदिभ्योऽच्। टाप्।) सुरा। इति हारावली॥ (मण्डयतीति। मण्डि+अच्। टाप्।) आमलकी। इति मेदिनी। डे, २२॥

मण्डितः, पुं, बौद्धगणाधिपविशेषः। इति हेमचन्द्रः। (मण्डि+कर्म्मणि क्तः।) भूषिते त्रि। इत्यमरः। ६।२।१००॥ (यथा, गीतगोविन्दे। २।७।

"मणिमयमकरमनोहर-कुण्डलमण्डितगण्डसुदारम्।")

मण्डूकः, पुं, (मण्डयति भूषयति जलाशयमिति मण्डि+"शृमण्डिभ्यामकच्" उणा०४।४२। इति ऊकच्।) भेकः। इत्यमरः। १।१०। २४॥ (यथा, मनुः। ४।१२६।

"पशुमण्डूकमार्জ्जारनखसर्पनकुलाखुभिः। अन्तरागमने विद्यादध्यायमहर्निशम्॥"

भेकार्थे पर्य्यायो गुणाश्च यथा,—

"मण्डूकः प्लवगो भेको वर्षाभूर्दर्दुरो हरिः। मण्डूकः शीतलो वातपित्तजो वलकारकः॥" इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

मण्डूकपर्णः, पुं, (मण्डूकाकृति पर्णमस्य। यद्वा, मण्डूक इवोत्तानोदरं पर्णमस्य।) शाकभेदः। इत्यमरः। ३।२।५६॥ (तथाचास्य पर्य्यायः॥

"शाकः शाकटकङ्कटुण्डुकः। मण्डूकपर्णपर्णीशुकनासकुटमटाः॥ दीर्घवृन्तोरुचापि एषुगुल्मः कटम्भरः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

शाकभेदः। इति मेदिनी। णे, १२५॥

मण्डूकपर्णी, स्त्री, (मण्डूकपर्ण। गौरादित्वात् ङीष्।) मञ्जिष्ठा॥ (यथास्या पर्य्यायः।

"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लयपि॥ रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका। भण्डीतकी च गण्डीरी मञ्जुषा वस्त्ररञ्जनी॥")

ब्राह्मणी इति मेदिनी। णी, ११५॥ आदित्यभक्ता। इति राजनिर्घण्टः॥ ओषधिविशेषः। घुलकुड़ी इति भाषा। तत्पर्य्यायः। भेकी २ मण्डूकी ३ मण्डपर्णी ४। इति रत्नमाला॥ मण्डूकपर्णिका ५। अस्या गुणाः। मण्डूकपर्णिका लघ्वी स्वादुपाका रसा हिमा। (महौषधार्थे पर्य्यायान्तरं यथा,—

"मण्डूकपर्णी माण्डूकी ताण्डूली दिव्या महौषधी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

तथाचास्या गुणाः॥

कषाया तु हिमा पित्ते स्वादुपाकरसा हिमा। लघ्वी मण्डूकपर्णी तु मण्डूकीव हिका मता॥

इति सुश्रुते सूत्रस्थाने ४६ अध्याये।)

पाठान्तरम्। मण्डूकपर्णिका लघ्वी रूक्षा वातविबन्धनुत्। इति राजवल्लभः॥

मण्डूकमाता, [ऋ] स्त्री, (मण्डूकस्य मातेव मण्डूकपोषकत्वादस्यास्तथात्वम्।) ब्राह्मी। इति राजनिर्घण्टः॥ भेकमाता च॥

मण्डूका, स्त्री, (मण्डूक+स्त्रियां टाप्।) मञ्जिष्ठा। यथा, शब्दमालायाम्।

"मण्डूका च जला यष्टिर्हेमपुष्पी च भण्डिरी।"

मण्डूकी, स्त्री, (मण्डूक+स्त्रियां ङीष्।) मण्डूकपर्णी। इति मेदिनी। के, १३०॥ आदित्यभक्ता। ब्राह्मी। इति राजनिर्घण्टः॥ क्षुपविशेषः। इति रत्नमाला॥ घुलकुड़ी। इति भाषा॥ वृत्तयोषित्। इति शब्दरत्नावली॥

मण्डूरं, क्ली, पुं, लौहमलम्। तत्पर्य्यायः। शिल्पजम् २। इत्यमरः। २।६।६८॥ सिंहानं ३। सिंहाणं ४। मण्डते लोहं वेष्टते अथिदाढे लोहादिभक्षते वा मण्डयति भृष्यति औषधत्वादौगिणमिति वा मण्डूरं कि मण्डि भूषे भण्डि ह विभाषे वेष्टे वाच्यति ऊरः। इति तट्टीकायां भरतः॥ अस्य गुणः। लौहगुणतुल्यः। शतवर्षोर्द्ध मण्डूरसुत्तमम्। अशीतिवर्षीयं मध्यमम्। षष्टिवर्षीयमधमम्। अतो भूतं विषतुल्यम्। यथा,—

"यल्लोहं यद्गुणं प्रोक्तं तत्किट्टेष्वपि तद्गुणम्। घृतोर्द्धसुत्तमं किट्टं मध्यमाशीतिवार्षिकम्॥ अधमं षष्टिवर्षीयं ततो हीनं विषोपमम्॥"

इति रसेन्द्रचिन्तामणिः॥

(तथा चास्य पर्य्यायान्तरम्। मण्डूरं लोहजं किट्टम्। इति वैद्यकरत्नमालायाम्॥ अस्य उत्पत्तिर्गन्धाश्च यथा,—

"आयमानस्य लोहस्य मलं मण्डूरमुच्यते ।
लोहसिंहानिका किट्टी सिंहाणश्च निगद्यते ॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"ये गुणा मारिते सूते ते गुणा सुरकिट्टके ।
तस्मात् सर्व्वत्र मण्डूरं रोगघ्नान्ये प्रयोजयेत् ॥"
अथास्य मारणविधिर्यथा,—
"दग्धाश्चकाष्ठैर्मलमायसस्तु
गोमूत्रनिर्व्यापितमष्टवारान् ।
विचूर्ण्य लौहं मधुनाचरेच्च
कुम्भाऽयं पाण्डुगदं निहन्ति ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे आरग्वधारणाधिकारे ॥)

मण्डोदकं, क्ली, (मण्ड इव उदकमस्य मण्डमिश्रितसुदकमत्रेति वा ।) चित्ररागः । विचित्रवर्णः । आतपेयम् । आलिन्यना । इति मेदिनी । के, २०७॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"तस्य पिष्टस्य भागांश्चौन् किण्वभागविमिश्रितान् ।
मण्डोदकार्थे कार्य्यश्च दद्यात् तत्सर्व्वमेकतः ॥")

मत् य अनङ्मदम् । अत्वं त्वं भवति लङ्घवति अनङ्मदं मङ्घवतीति संक्षिप्तसारव्याकरणम् ॥ असच्छब्दाद्विप्रत्यये कृते तस्मिन्नि असच्छब्दस्य महादेशान्निष्पन्नम् । इति तट्टीकायां गोयीचन्द्रः ॥

मतं, क्ली, (मन्+भावे क्तः ।) सम्मतम् । तत्पर्य्यायः । छन्दः २ अभिप्रायः ३ आकूतम् ४ भावः ५ आशयः ६ । इति हेमचन्द्रः ॥

मतः, त्रि, (मन्+कर्म्मणि क्तः ।) सम्मतः । ज्ञातः । इति मेदिनी । ते, ३२ ॥ (यथा, रघौ । २ । ५७ ।
"किमप्यहिंस्रस्तव चेन्मतोऽहं
यज्ञःशरीरे भव मे दयालुः ॥")
अर्चितः । इति हेमचन्द्रः ॥

मतङ्गः, पुं, (माद्यति मादयत्यनेन वेति । मद्+"मदोऽनुपसर्गे ।" इत्युणादिकोष टीकोक्तसूत्रादङ्गच् । दस्य तः ।) मुनिभेदः । (यथा, रघौ । ५ । ५३ ।
"मतङ्गशापादवलेपमूला-
दवाप्यवाप्तिं मतङ्गजत्वम् ॥")
मेघः । इत्युणादिकोषः । १ । २७ ॥

मतङ्गजः, पुं, (मतङ्गः मेघ इव जायते तज्ज्ञानसुनेर्जातो वेति । जन+ड ।) हस्ती । इत्यमरः । २ । ८ । ३३ ॥ (यथा, कामन्दकीये नीतिसारे । १५ । ७ ।
"योग्ये प्रभूतास्त्रबलेन यायात्
निर्वासनार्थं करिणां यथा तु ।
ऋतेऽम्भसो यौगपतात् प्रतापात्
भवन्ति कुम्भानि मतङ्गजानाम् ॥")

मतल्लिका, स्त्री, प्रशस्तम् । इत्यमरः । १ । ४ । २७ ॥

मतिः, स्त्री, (मन्यतेऽनयेति । मन्+क्तिन् ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, देवीभागवते । १ । २७ । २६ ।
"मतिस्तु द्विविधा लोके युक्तायुक्तेति सर्व्वथा ।")
इच्छा । स्तुतिः । इति मेदिनी । ते, ४१ ॥ आर्य्यम् । शाकभेदः । इत्यजयपालः ॥ * ॥
"विप्रेन्द्र ! का प्रशंसेयं जन्म ते ब्रह्ममानसे ।
यस्य यत्र कुले जन्म तन्मतिस्तादृशी भवेत् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः ॥
मतिकरौषधम् । यथा,—
"पाठा हे जीरके कुष्ठमञ्जगन्धाजमोदकम् ।
वचा चिकटुकश्चैव लवणं चूर्णसुत्तमम् ॥
ब्राह्मीरसेभावितञ्च सर्पिर्मधुसमन्वितम् ।
सप्ताहं भक्षितं कुर्य्यान्मेधार्थे मतिं पराम् ॥"
इति गारुडे १९८ अध्यायः ॥

मतिदा, स्त्री, (मतिं ददातीति । दा+कः ।) ज्योतिष्मती । ग्रिण्टड़ीवृक्षः । इति राजनिर्घण्टः ॥ (मतिदातरि, त्रि ।)

मतिभ्रमः, पुं, (मतेर्बुद्धेर्भ्रमः ।) बुद्धिभ्रंशः । ("अस्थान एवास्य मतिभ्रमः ।" इति पातञ्जलयोगसूत्रभाष्ये वेदव्यासः ॥) तत्पर्य्यायः । भ्रमः २ मिथ्यामतिः ३ भ्रान्तिः ४ । इति शब्दरत्नावली ॥

मतिभ्रान्तिः, स्त्री, (मतेर्बुद्धेर्भ्रान्तिः ।) बुद्धिभ्रंशः । तत्पर्य्यायः । भ्रमः २ मिथ्यामतिः ३ भ्रान्तिः ४ । इति शब्दरत्नावली ॥

मतिविभ्रंशः, पुं, (मतेर्बुद्धेर्विभ्रंशः ।) उन्मादरोगः । इति राजनिर्घण्टः ॥

मतिमत्, त्रि, (अयमनयोरयमेषामतिशयेन मतिमान् वेति । मतिमत्+इष्ठन् । मतुपो लोपः ।) अतिशयबुद्धिमान् । इति शब्दबोधाकरकल्पद्रुमः ॥

मत्कः, पुं, (माद्यतीति । मद्+क्विप् । ततः स्वार्थे कन् ।) मत्कुणः । इति शब्दमाला ॥ (मम अयम् । अस्मद् शब्दादिदमर्थे कन् । मदादेशश्च ।) मत्सम्बन्धिनि त्रि । इति व्याकरणम् ॥ (यथा, भट्टिः । ३ । ३२ ।
"नेतन्मतं मत्कमिति ब्रुवाणः
सङ्क्रन्दनोऽसौ न्यपतान्न्यषत्त ॥")

मत्कुणः, पुं, (माद्यतीति । मद्+क्विप् कुत्सितः कुण् + क । ततः । मत्वासौ कुणश्चेति ।) कीटविशेषः । ढारपोका इति भाषा ॥ तत्पर्य्यायः । रक्तपायी २ रक्ताङ्गः ३ मत्कुणाश्रयः ४ । इति राजनिर्घण्टः ॥ उद्दंशः ५ । (यथा, शिशुपालवधे । १४ । ६८ ।
"मत्कुणादिव पुरा परिम्लवौ
सिन्धुराजशयने निवेदुषः ।
मक्षतः स्म मधुकैटभौ विभोर्-
यस्य नेत्रसुखविघ्नतां क्षणम् ॥")
निर्निषादश्वरः । निःसम्पुरुषः । माकुन्दा इति भाषा ॥ नारिकेलः । इति मेदिनी । ले, ७० । अङ्गनाङ्गम् । इति हेमचन्द्रः । ४ । २७५ ॥

मत्कुणा, स्त्री, अजातलोमभगम् । इति शब्दरत्नावली ॥

मत्कुणारिः, पुं, (मत्कुणस्य अरिः । मत्कुणनाशकत्वादस्य तथात्वम् ।) इन्द्राग्नयः । सिद्धि इति भाषा । इति शब्दमाला ॥
(विष्टरिरस्य इन्द्राग्नशब्दे विवृता ।)

मत्तः, पुं, (माद्यतीति । मद्+कर्त्तरि क्तः ।) धत्तूरवृक्षः । मातुलोवाला इति भाषा ॥ तत्पर्य्यायः । प्रमिन्नः २ गर्व्वितः ३ । इत्यमरः । २ । ८ । ३६ ॥ मत्तङ्गः ४ धत्तूरकः ५ । इति शब्दरत्नावली ॥ धुस्तूरः । कोकिलः । महिषः । इति राजनिर्घण्टः ॥

मत्तः, त्रि, मत्ततावित्यिष्टः । सुरापाने विकलज्ञानः करणः । तत्पर्य्यायः । शौण्डः २ उत्कटः ३ धीवः ४ । इत्यमरः । ३ । १ । २६ ॥ मदोद्धतः ५ । इति जटाधरः ॥ (यथा, देवीभागवते । २ । ८ । ४ ।
"ते पीत्वा मदिरां मत्ताः कृत्वा युद्धं परस्परम् ।"
यथाच माघवल्लतरुविनिर्णये मद्यव्यवहाराधिकारे ।
"मद्येन मत्तः पुरुषो मदेन ।")
क्षुब्धः । मदीभिर्य्यत्नि हर्षे क्तः । इत्यमरभरतौ ॥ अविवेकी । (यथा रामायणे । १ । ४४ । १० । "बलान्मत्तो महाबलः ।"
"मत्तोऽविवेकी ।" इति तट्टीकायां रामानुजः ॥)

मत्तकाशिनी, स्त्री, उत्तमस्त्री । इत्यमरः । २ । ६ । ४ ॥ मत्त इव चौर इव कसति गच्छति मत्तकाशिनी कस ञ मतौ यङ्लुगन्तात् णिनि । ङीप्मध्या । मत्तेव काशते भाति मत्तकाशिनी तालव्यमध्यापि । इति भरतः ॥ (यथा, महाभारते । ९ । २७ । ३६ ।
"न तासां सदृशीं मन्ये त्वामहं मत्तकाशिनि ! ।")

मत्तकोशः, पुं, (मत्तः सन् कोशो वारक इव ।) हस्ती । इति शब्दमाला ॥

मत्तरः, पुं, ममाधिकः । मत्तोऽतिशयः । अस्मच्छब्दात् इतरप्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

मत्तवारणं, क्ली, (मत्तं वारयतीति । वृ+णिच् ल्युट् ।) प्रासादवीथीनां वरण्डः । कोठार बाराण्डा इति भाषा ॥ (यथा, कुमारसम्भवे ।८ ।
"दिवाधराधरभूरिव राजति मत्तवारणोपेता ॥"
"प्रासादवीथीनां वरण्डकः ।" इति तट्टीका ॥)
अपाश्रयः । प्राङ्गणावरणम् । इति हेमचन्द्रः । ४ । ७८ । विश्वञ्च ॥ प्रासादवीथीनां कुब्जदृष्टतिः । कुन्दृष्टश्चरति इति च पाठः । इति मेदिनी । थे, ११४ ॥ पुरःचूर्व्वः । इति शब्दमाला ॥

मत्तवारणः, पुं, (वार्य्यते संयम्यते मद्यकादिभिः इति वारणः । वृ+णिच् कर्म्मणि ल्युट् । मत्तश्चासौ वारणश्चेति ।) प्रक्षिप्तकटङ्करः । मत्तहस्ती । इति मेदिनी । णे, ११४ । हेमचन्द्रश्च । ४ । ७८ ॥

मत्ता, स्त्री, (माद्यति मादयतीति । अन्तर्भूतण्यर्थान्मदधातोः + क्तः + स्त्रियां टाप् ।) मदिरा ।

इति राजनिर्घण्टः ॥ (षड्क्यन्तर्गतः दशाक्षरः छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्याम् ।

"ज्ञेया मत्ता भसजगरुहा ।"

अधिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥)

मत्तालम्बः, पुं, (आलम्बते असावित्यालम्बः । आ + लम्ब + कर्म्मणि घञ् । मत्तस्यालम्बः आश्रयः ।) प्राङ्गनावरणम् । तत्पर्य्यायः । अपाश्रयः २ प्रग्रीवः ३ मत्तवारणम् ४ । इति हेमचन्द्रः । ४ । ७८ ॥

मत्तेभगमना, स्त्री, (मत्तेभस्य गमनमिव गमनं यस्याः ।) स्त्रीविशेषः । मत्तगजगामिनी । इति हेमचन्द्रः । ३ । १७० ॥

मत्यं, क्ली, (मतं ज्ञानं तस्य करणमिति । मत + "मतजनहलात् करणजल्पकर्षेषु ।" ४ । ४ । ६७ । इति यत् । हृदयस्य चैतन्यस्य समीकरणादिसाधनफलकम् । यथा, ताण्ड्यमहाब्राह्मणे । २ । ६ । २ ।

"भ्रातृव्यवान्यतीत यथा सन्नाशितेन मत्येन ।
मतीकरोत्येवं पाप्मानं भ्रातृव्यं प्रणुदते ॥"

"मत्यं नाम हृदयस्य चैतन्यस्य समीकरणादिसाधनफलकम् ।" इति तद्भाष्ये सायणः ।)

दात्रादीनां सृष्टिः । तत्पर्य्यायः । वरटः २ । इति हेमचन्द्रः । ३ । ५५६ ॥

मत्र, ङ ड क गुप्तौ । इति कविकल्पद्रुमः ॥ (चुरा० आत्म० - सक० - सेट् ।) दन्त्यवर्गाद्योपधः । ङ क ड इति ध्रुवं मत्रयते वृषोऽयमिति सरारिः ॥ मत्र इत्यनेनैवेदसिद्धौ इदनुबन्धो वेदेषूच्चारणभेदार्थः । इति दुर्गादासः ॥

मत्सः, पुं, (माद्यतीति । मद् + बाहुलकात् सन् ।) मत्स्यः । इत्युणादिकोषः ॥

मत्सगरटः, पुं, (मत्स्यानां गरटोऽत्र पृषोदरादित्वात् साधुः ।) अञ्जनविशेषः । मत्स्यघण्ट इति ख्यातः । तत्पर्य्यायः । गलग्रहः २ । इति शब्दचन्द्रिका ॥

मत्सरः, पुं, (मदते इति मद् + "क्षधृमदिभ्यः कित् ।" उणा० । ३ । ७३ । इति सरन् । स च कित् । यद्वा । मदा सरतीति अमरटीका ।) अन्यशुभद्वेषः । इत्यमरः । ३ । ३ । १७२ ॥ (यथा, कथासरित्सागरे । ४२ । ६५ ।

"ग्रीष्मान्ताङ्क्षयामास द्वितीयमपि तत्फलम् ।
निसर्गसिद्धो नारीणां सपत्नीषु हि मत्सरः ॥")

क्रोधः । इति मेदिनी । रे, १६३ ॥

मत्सरः, त्रि, (माद्यतीति । मद् हर्षे + "क्षधृमदिभ्यः कित् ।" उणा० । ३ । ७३ । इति सरन् । स च कित् ।) असह्यपरसम्पत्तिः । मात्सर्य्ययुक्तः । (यथा, महानिर्व्वाणतन्त्रे । १ । २६ ।

"न मत्सरा नातिरुषा नातिलुब्धा न कामुकाः ।")

कृपणः । इत्यमरमेदिनीकरौ ॥ आत्मधिक्कारविशेषः । यथा, —

"निन्दन्ति मां सदा लोका धिगस्तु मम जीवनम् ।
इत्यात्मनि भवेद्यस्तु धिक्कारः स च मत्सरः ॥"

इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥

मत्सरा, स्त्री, (मद् + सरन् । स्त्रियां टाप् ।) मक्षिका । इति मेदिनी । रे, १६३ ।

मत्सरी, [न्] त्रि (मत्सरोऽन्यशुभद्वेषोऽस्यास्तीति मत्सरः + इनिः ।) अन्यशुभद्वेषी । तत्पर्य्यायः । कर्णेजपः २ दुर्ज्जनः ३ पिशुनः ४ सूचकः ५ नीचः ६ द्विजिह्वः ७ खलः ८ । इति हेमचन्द्रः ॥ (यथा, मनौ । २ । २०१ ।

"परिभोक्ता क्षमिर्भवति कीटो भवति मत्सरी ॥")

मत्स्यः, पुं स्त्री, (माद्यन्ति लोका अनेनेति । मद् + "ऋतन्यञ्जीति ।" उणा० । ४ । २ इति स्यन् ।) खनामख्यातजलजन्तुः । माछ इति भाषा ॥ तत्पर्य्यायः । पृथुरोमा २ झषः ३ मीनः ४ वैसारिणः ५ अण्डजः ६ विसारः ७ शुक्लकी ८ । इत्यमरः । १ । १० । १७ ॥ शल्की ९ झषः १० आत्माग्री ११ संवरः १२ शूकः १३ जलेशयः १४ कण्टकी १५ शल्की १६ मत्स्यः १७ अनिमिषः १८ । इति शब्दरत्नावली ॥ शुङ्गी १९ । इति जटाधरः ॥ तस्य गुणाः । दृंहणत्वम् । गुरुत्वम् । शुक्रवर्द्धनत्वम् । बल्यत्वम् । स्निग्धत्वम् । उष्णत्वम् । मधुरत्वम् । कफपित्तकरत्वम् । वायामाध्वरतदीप्ताग्नीनां पूजितत्वम् । वातरोगघ्नत्वञ्च ॥ * ॥ दृढमत्स्यगुणाः । गुरुत्वम् । शुक्रलत्वम् । मलबहुकारित्वञ्च ॥ * ॥ क्षुद्रमत्स्यगुणाः । लघुत्वम् । ग्राहित्वम् । ग्रहणीरोगे हितत्वञ्च ॥ * ॥ क्षमामत्स्यगुणाः । लघुत्वम् । स्निग्धत्वम् । वातघ्नत्वम् । वह्निवर्द्धनत्वञ्च ॥ * ॥ पाण्डरमत्स्यगुणाः । दोषलत्वम् । स्निग्धत्वम् । गुरुत्वम् । मलभेदित्वञ्च ॥ * ॥ कथितमत्स्यस्य अर्थात् पूतिमत्स्यस्य गुणः । दोषलत्वम् ॥ * ॥ शुष्कमत्स्यगुणौ । विष्टम्भित्वम् । दुर्ज्जरत्वञ्च ॥ * ॥ लवणभावितमत्स्यगुणाः । कफपित्तकरत्वम् । सारकत्वम् ॥ सामुद्रमत्स्यगुणाः । लघुत्वम् । वृष्यत्वम् । मधुरत्वम् । स्वल्पमलकारित्वञ्च ।

"सामुद्रा गुरवो वृष्याः स्निग्धोष्णा वातनाशनाः ।"

इति पाठान्तरम् ॥ * ॥

(तथास्य पर्य्यायाः गुणाश्च ।

"मत्स्यो मीनो विकारश्च उभौ वैसारिणोऽण्डजः ।
शुक्लः पृथुरोमा च ष सुदर्शन इत्यपि ॥
रोहितास्तु ये जीवास्ते मत्स्याः परिकीर्त्तिताः ।
मत्स्याः स्निग्धोष्णमधुरा गुरवः कफपित्तलाः ॥
वातघ्ना दृंहणा वृष्या रोचका बलवर्द्धनाः ।
मद्यवायासक्तानां दीप्ताग्नीनाञ्च पूजिताः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

"मत्स्या रोहितपाठीनकूर्म्मकुम्भीरकर्कटाः ।
शुक्तिशुक्लोदशम्बूकशफरीवर्म्मिचन्द्रिकाः ॥
चुलूकीनक्रमकरशिशुमारतिमिङ्गिलाः ।
राजीवाः चिलिचिमाद्याश्च ॥"

इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥

मत्स्यास्तु द्विविधा नादेयाः सामुद्राश्च । तत्र नादेयाः । रोहित-पाठीन-पाटला-राजीव-वर्म्मिगोमत्स्य-शृङ्गमत्स्य-वागुल्लार-सरल-सहस्र दंष्ट्रप्रभृतयो नादेयाः ॥

"नादेया मधुरा मत्स्या गुरवो मारुतापहाः ।
रक्तपित्तकराश्चोष्णा वृष्याः स्निग्धाल्पवर्च्चसः ॥
कषायानुरसस्तेषां शृङ्गमत्स्यो बालभोजनाः ।
सुरसड़ागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः ।
महाह्रदेषु बलिनः स्वल्पोऽभ्यस्बलाः स्मृताः ।"

तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः ॥

"सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः ।
उष्णावातहरा वृष्या वर्च्चस्याः श्लेष्मवर्द्धनाः ॥
बलावहा विशेषेण मांसाश्रित्वात् ससुद्रजाः ।
तेषामप्यनिलघ्नत्वाच्चौराट्यकौप्यौ गुणोत्तरौ ॥
स्निग्धत्वात् स्वादुपाकत्वात् तयोर्वाप्या गुणोत्तराः ।
नादेया गुरवो मध्ये यस्मात् पुच्छास्यचारिणः ।
सरसड़ागजानान्तु विशेषेण गुरौ लघु ॥
अदूरगोचरा यस्मात्तस्मादुत्तरोदधिजाः ।
किञ्चिन्मुक्ता गुरोर्देशमत्यर्थं गुरवस्तु ते ॥
अधस्तद्गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः ।
उरो विचरणात्तेषां पूर्व्वमङ्गं लघु स्मृतम् ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

नादेयमत्स्यगुणाः । श्लेष्मलत्वम् । वृष्यत्वम् । मधुरत्वम् । अल्पमलभेदकत्वञ्च ॥ * ॥ सरसड़ागभवमत्स्यगुणौ । स्निग्धत्वम् । स्वादुरसत्वम् ॥ * ॥ महाह्रदभवमत्स्याः बलिनः । अल्पजलभवाः अबलाः ॥ * ॥ दग्धमत्स्यगुणाः । गुरुत्वम् । वृष्यत्वम् । दृंहणत्वम् । बलवर्द्धनत्वञ्च ॥ तैललवणयुक्तदग्धमत्स्यगुणाः । क्षीणशुक्रभग्नर्ज्जरितनित्यस्त्रीसेवित्वक्षीणतेजसां हितकारित्वञ्च ॥ * ॥ पलाण्डवेष्टितकर्दमलेपितोङ्गार-दग्धसलवणवेशवारपुरस्कृतसार्द्धककटुतैलसन्तोलितमत्स्यगुणाः । स्वादुत्वम् । कफवातहरत्वम् । शुक्रलत्वम् । बलवर्द्धनत्वञ्च ॥ * ॥ शाकमत्स्याख्यव्यञ्जनगुणाः । हृद्यत्वम् । वृष्यत्वम् । पुष्टिदत्वञ्च ॥ मत्स्यघण्टगुणाः । बलकरत्वम् । वातहरत्वम् । अतिशुक्रयरोचनत्वञ्च ॥ शिरसि खड्गकेशधारिमत्स्यगुणाः । सुखप्रियत्वम् । हृद्यत्वम् । पुंस्त्वघातकत्वञ्च । इति राजवल्लभः ॥ * ॥ अपि च ।

"निःशल्का निन्दिता मत्स्याः सर्व्वे शल्कयुता हिताः ।
वपुःस्थैर्य्यकरा वीर्य्यबलपुष्टिविवर्द्धनाः ॥
हृदकुल्याजलजर्भरतड़ागवापीजलेषु ये मत्स्याः ।
तेऽतिजड़ा नादेया यथोत्तरं लघुतरास्तु नादेयाः ॥
क्षाराम्बुमत्स्या गुरवो विदाहिनो
विष्टम्भदास्ते लवणार्णवादिजाः ।
नानाश्रिताः स्वादुजलस्थिता अपि
ज्ञेया जड़ास्तेऽपि तथाश्रिता इमे ॥"

इति राजनिर्घण्टः ॥

अथ क्षुद्रमत्स्यगुणाः ।
"क्षुद्रमत्स्याः स्वादुरसा दोषत्रयविनाशनाः ।
लघुपाका रुचिकराः सर्व्वदा ते हिता मताः ।
अथातिक्षुद्रमत्स्यगुणाः ।
अतिक्षुद्राः पुंस्त्वहरा रुच्याः कासानिलापहाः ।
अथ मत्स्याण्डगुणाः ।
मत्स्यगर्भो भृशं हृद्यः स्निग्धः पुष्टिकरो गुरुः ।
कफमेदप्रदो बल्यो वातनिघ्नोऽग्निवर्द्धनः ॥
अथ शुष्कमत्स्यगुणाः ।
शुष्कमत्स्या न बल्याः स्युर्दुर्जरा विदुषन्मिन ॥
अथ दध्यमत्स्यगुणाः ।
दध्यमत्स्यो गुरुः श्रेष्ठः पुष्टिशुक्रबलप्रदः ॥
अथ कूपजादिमत्स्यगुणाः ।
कूपमत्स्याः शुक्रनद्यकुलशैलविवर्द्धनाः ।
सरोजा मधुराः स्निग्धा बल्या वातविनाशनाः ॥
नादेया दृंहणा मत्स्या गुरवोऽनिलनाशनाः ।
रक्तपित्तकरा रुच्याः स्निग्धोष्णाः स्वल्पवर्चसः ॥
चौड्राः पित्तहराः स्निग्धा मधुरा लघवो हिमाः ।
ताड़ागा गुरवो रुच्याः श्लैष्मला बलशुक्रदाः ।
ताड़ागवन्निर्झरजा वल्गुमैत्तिङ्करोः ॥
अथ ऋतुविशेषे मत्स्यविशेषगुणाः ।
हेमन्ते कूपजा मत्स्याः शिशिरे सारसा हिताः ।
वसन्ते ते तु नादेया ग्रीष्मे चौड्रसमुद्भवाः ।
तड़ागजाता वर्षासु तास्वपथ्या नदीभवाः ।
निर्झराः शरदि श्रेष्ठा विशेषोऽयमुदाहृतः ॥"
इति भावप्रकाशः ॥

मत्स्योत्पत्तिकारणं यथा,—
"ततस्तु मित्रावरुणौ भ्रातरौ ब्रह्मचारिणौ ।
तनु देशं गतौ देवौ विचरन्तौ यदृच्छया ।
तावप्सु तत्र तदा दृष्ट्वा उर्व्वशीं तु वराप्सरः ।
क्षरन्तौ सहितावाभिः सखीभिः सा वरानना ॥
गायन्ती च हसन्ती च विस्रब्धा निर्जने वने ॥
गौरी कमलगर्भाभा स्निग्धश्यामशिरोरुहा ।
पद्मपत्रविशालाक्षी रक्तोष्ठी मृदुभाषिणी ॥
शुद्धशुद्धेन्दुधवलैर्दन्तैरविरलैः समैः ।
सुभ्रूः सुनासा सुमुखी सुललाटा मनस्विनी ॥
सिंहवत् सूक्ष्ममध्याङ्गी पीनोरुजघनस्तनी ।
मधुरालापचतुरा सुमधा चारुहासिनी ॥
रक्तोत्पलकरा तन्वी सुपदी विनयान्विता ।
पूर्णचन्द्रनिभा वामा मत्तद्विरदगामिनी ॥
दृष्ट्वा तस्यास्तु तद्रूपं तौ देवौ विस्मयं गतौ ।
यस्या हास्येन लास्येन स्मितेन ललितेन च ॥
मृदुना वायुना चैव शीतानिलसुगन्धिना ।
मत्तभ्रमरगीतेन पुंस्कोकिलरुतेन च ॥
सुखरेण हि गीतेन उर्व्वश्या मधुरेण च ।
दृष्टितौ च कटाक्षेण स्खलन्तुस्तावुभावपि ॥
तत्त्रिधा पतितं रेतः कमलेऽथ स्थले जले ।
कमलेऽथ वसिष्ठस्तु जातो हि मुनिसत्तमः ॥
स्थले स्वगस्त्यः सम्भूतो जले मत्स्यो महामते ! ॥"
इति नारसिंहपुराणे ६ अध्यायः ॥

मत्स्यभक्षणनिषेधो यथा,—
"यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्यादः सर्व्वमांसादस्तस्मान्मत्स्यान् विवर्ज्जयेत् ॥
इति मानवे ५ अध्यायः ॥
जलस्थलचरा ये च प्राणिनस्तान् घृतानपि ।
न भक्षेन्मानवो ज्ञानी हत्वा तेषां भवेन्न हि ॥
हत्वा हत्वा तु मत्स्यादौ सर्व्वेषां यो विशेषतः ।
मांसादः प्राणिनां सोऽपि तस्मान्मत्स्यं परित्यजेत् ॥"
इति पाद्मोत्तरखण्डे १०५ अध्यायः ॥
वर्जनीयमत्स्या यथा,—
"शृणु देवि ! प्रवक्ष्यामि मांसभेदान्निबोध मे ।
नादेयं तिलकमठं पशुशृङ्गिणमेव च ।
गोमीनं चक्रशुक्लं वड़ालं राघवं तथा ।
वामीनं शलकर्णं च सचक्रं पेङ्गमेव च ।
भूविलेशानिरुद्धं च गार्ङ्गेयानि विवर्ज्जयेत् ॥"
इति मत्स्यसूक्तमहातन्त्रम् ॥
रविवारे मत्स्यभक्षणनिषेधो यथा,—
"आमिषं रक्तशाकञ्च यो भुङ्क्ते च रवेर्दिने ।
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते ॥"
इति भविष्यपुराणम् ॥
"माषमामिषमांसञ्च मसूरं निम्बपत्रकम् ।
भक्षयेद् यो रवेर्वारे सप्तजन्मान्यपुत्रकः ॥"
इति तिथ्यादितत्त्वम् ॥
कार्त्तिके मत्स्यभक्षणनिषेधो यथा,—
"न मात्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि ।
चण्डालो जायते राजन् ! कार्त्तिके मांसभक्षणात् ॥"
इति नारदीयपुराणम् ॥
माघवैशाखयोर्हविष्यव्रतचर्य्याविधानात् मत्स्यभक्षणं नितरां निषिद्धमिति ह्यत्यन्तदर्शनात् ॥
जन्मतिथौ मत्स्यभक्षणनिषेधो यथा,—
"आमिषं कलहं हिंसां वर्ज्जयेद्धौ विवर्जयेत् ॥"
अपि च ।
"शुङ्क्ते यस्तु निरामिषं स हि भवेच्छ्मान्तरे पण्डितः ॥"
इति तिथ्यादितत्त्वम् ॥
श्वेतस्य मत्स्यभक्षणनिषेधो यथा,—
"क्व मद्यं क्व शिवे भक्तिः क्व मांसं क्व शिवार्च्चनम् ।
मत्स्यमांसरतानां वै दूरे तिष्ठति शङ्करः ॥"
इति काशीखण्डम् ॥
मा भक्षं नैवेद्यार्थे भक्षेऽन्यस्मिन्निमौचीरं वर्जयेत् । पञ्चनखमत्स्यवराहमांसानि च । इत्याह्निकतत्त्वधृतविष्णुसूत्रम् ॥ * ॥ विन्ध्यपर्व्वतस्य पश्चिमे मत्स्यभक्षणनिषेधो यथा,—
"विन्ध्यस्य पश्चिमे भागे मत्स्यभुक् पतितो नरः ।"
इति पुराणम् ॥
कामतो मत्स्यभक्षणप्रायश्चित्तं यथा,—
"मत्स्यांस्तु कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ॥"
अज्ञानतस्तदर्द्धम् । इति प्रायश्चित्तविवेकः ॥
मत्स्यभक्षणप्रतिप्रसवो यथा,—
"मत्स्यान् सशल्कान् शुक्लीत मांसं रौरवमेव च ।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा ॥
सफरं सिंहतुण्डञ्च तथा पाठीन-रोहितौ ।
मत्स्यास्त्वेते मनुर्हृद्या भक्षणाय तपोधनैः ॥
प्रोक्षितं भक्षयेदेषां मांसञ्च द्विजकाम्यया ।
यथाविधिनियुक्तस्तु प्राणानामपि चात्यये ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥
अपि च ।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः ॥"
इति मानवे ५ अध्यायः ॥
"अनिवेद्य न भोक्तव्यं मत्स्यं मांसञ्च यद्भवेत् ।
अन्नं विष्ठा पयो मूत्रं यद्विष्णोरनिवेदितम् ॥"
इत्याह्निकतत्त्वम् ॥
प्रेताद्धे मत्स्यदानविधिर्यथा,—
"सपिण्डीकरणं यावत् प्रेतश्राद्धन्तु षोड़शम् ।
एकादशेनैव कर्त्तव्यं सामिषेण द्विजातिभिः ॥"
इति श्राद्धतत्त्वधृतकामधेनुवचनम् ॥

मत्स्यः, पुं, (जलं प्राप्य माद्यतीति मद् + "ऋत्यक्ष्वीति ।" उणा० । ४।२ । इति स्यन् ।) मीनविशेषः । विराटदेशः । नारायणः । इति हेमचन्द्रः । ४।४०१ । देशविशेषे बहुवचनान्तः । इति मेदिनी । ये, ४५ । द्वादशराशिः । यथा,
"मत्स्यौ घटौ तृमिथुनं सगदं सवीणम् ।"
इत्यादि ज्योतिस्तत्त्वम् ॥
अष्टादशपुराणान्तर्गतपुराणविशेषः । (मत्स्यरूपेणावतीर्णेन भगवता उक्तत्वात् अस्य तदाख्या ।) यथा,—
"पुण्यं पवित्रमायुष्यमिदानीं शृणुत द्विजाः ।
मात्स्यं पुराणमखिलं यज्जगाद गदाधरः ॥"
इति मत्स्यपुराणे १ अध्यायः ॥
दशावतारान्तर्गतप्रथमावतारः । यथा,—
सूत उवाच ।
"पुरा राजा मनुर्नाम चीर्णवान् विपुलं तपः ।
पुत्रे राज्यं समारोप्य क्षमावान् रविनन्दनः ॥
मलयस्यैकदेशे तु सर्व्वाश्रमगुणसंयुतः ।
समदुःखसुखो वीरः प्राप्तवान् योगमुत्तमम् ॥
बभूव वरदस्यास्य वर्षायुतशते गते ।
वरं हृषीक्ष प्रोवाच प्रीतः स कमलासनः ॥
एवमुक्तोऽब्रवीद्राजा प्रणम्य स पितामहम् ।
एकमेवाहमिच्छामि त्वत्तो वरमनुत्तमम् ॥
भूतग्रामस्य सर्व्वस्य स्थावरस्य चरस्य च ।
भविता रात्र्यहे यानं प्रलये समुपस्थिते ॥
एवमस्त्विति विश्वात्मा तत्रैवान्तरधीयत ।
पुण्यदृष्टिश्च महती खात् पपात सुरार्पिता ॥
कदाचिदाश्रमे तस्य कुर्व्वतः पितृतर्पणम् ।
पपात पाणावुपरि शफरी जलसंयुता ॥
दृष्ट्वा तच्छफरीरूपं स दयालुर्महीपतिः ।
रक्षणायाकरोदृयत्नं स तस्मिन् करकोदरे ॥
अहोरात्रेण चैकेन षोड़शाङ्गुलविस्तृतः ।
सोऽभवन्मत्स्यरूपेण पाहि पाहीति चाब्रवीत् ॥
स तमादाय सलिलं प्राक्षिपज्जलचारिणम् ।
तत्रापि चैकरात्रेण हस्तत्रयमवर्द्धत ॥

पुनः प्राहार्त्तनादेन सहसाकिरणात्मजम् ।
स मत्स्यः पाहि पाहीति त्वामहं शरणं गतः ॥
ततः स कूपे तं मत्स्यं प्राहिणोद्दविनन्दनः ।
यदा न माति तत्रापि कूपे मत्स्यः सरोवरे ॥
क्षिप्तोऽसौ हृष्टनामागात् पुनर्योजनसम्मितः ।
तत्राप्याह पुनर्दीनः पाहि पाहि नृपोत्तमम् ॥
ततः स मनुना क्षिप्तो गङ्गायामप्यवर्द्धत ।
यदा तदा ससर्ज्जे तं प्राच्चिपन्नदिनीपतिः ॥
यदा ससर्ज्जमखिलं व्याप्यासौ ससपस्थितः ।
तदा प्राह मनुर्भीतः कोऽपि त्वमसुरेश्वरः ॥
अथवा वासुदेवस्त्वमन्य ईदृक् कथं भवेत् ।
योजनायुतविंशत्या कस्य तुल्यं भवेद्वपुः ॥
ज्ञातस्त्वं मत्स्यरूपेण मां खेदयसि केशव ! ।
हृषीकेश ! जगन्नाथ ! जगद्धाम ! नमोऽस्तु ते ॥
एवमुक्तः स भगवान् मत्स्यरूपी जनार्द्दनः ।
साधु साध्विति चोवाच सम्यक् ज्ञातस्त्वयानघ ! ॥
अचिरेणैव कालेन मेदिनी मेदिनीपते ! ।
भविष्यति जले मग्ना सप्तैलवनकानना ॥
गौरियं सर्व्वदेवानां निकायेन विनिर्म्मिता ।
महाजीवनिकायस्य रक्षणार्थं महीपते ! ॥
खेदाद्भवोद्भिजो ये वै ये च जीवा जरायुजाः ।
अस्यां निधाय सर्व्वांस्तानगाधान् पाहि सुव्रत ! ॥
युगान्तवाताभिहता यदा भवति नौर्नृप ! ।
शृङ्गेऽस्मिन् मम राजेन्द्र ! तदेमां संयमिष्यसि ॥
ततो व्यतीते सर्व्वस्मिन् स्थावरस्य चरस्य च ।
प्रजापतित्वं भविता जगतः पृथिवीपते ! ॥
एवं कृतयुगस्यादौ सर्व्वज्ञो धृतिमान् नृपः ।
मन्वन्तराधिपश्चैव देवपूज्यो भविष्यसि ॥"
इति मत्स्यपुराणे मनुविष्णुसंवादे प्रथमे सर्गे प्रथमोऽध्यायः ॥ विस्तारस्तु श्रीभागवते ८ स्कन्धे २४ अध्याये द्रष्टव्यः ॥*॥ तस्य मन्त्रध्यानपूजादि यथा,—

गुरुरुवाच ।
"एक एवाभवन्मत्स्यावतारः कल्प आदिमे ।
तस्य मन्त्रं प्रवक्ष्यामि सुक्तिमुक्तिप्रदायकम् ॥
तारो नमो भगवते मं मत्स्याय रमां वदेत् ।
द्वादशाक्षरमन्त्रोऽयं सुनिर्म्मला समीरितः ॥
गायत्री च्छन्द उदितं देवता मीनविग्रहः ।
भगवान् मूर्त्तरीनाथो बीजं श्रीपल्लवोज्ज्वलम् ॥
नाभ्यधो रोहितसम आकण्ठश्च नराकृतिः ।
चतुर्भामवपुर्बाहुः शङ्खचक्रगदाधरः ॥
मूर्द्धा मत्स्यमुखो मूर्द्धा लक्ष्मीवक्षोविराजितः ।
पद्मचिह्नितसर्व्वाङ्गः सुन्दरश्चारुलोचनः ॥
जपेदृद्वादशसाहस्रं त्रिमध्वाक्तैस्तिलैर्हुनेत् ।
प्रत्यहं तद्दशांशेन वैशाखे कार्त्तिके तथा ।
माघे च मार्गशीर्षे च हविष्याशी जितेन्द्रियः ॥
आरभ्य भाद्रबहुलमष्टं वा द्वादशाहकम् ।
लक्ष्मीमनुं जपेन्नित्यमिदमापि कलाशतम् ॥
तथैव होमः कर्त्तव्यस्तथान्यदिवसेषु तु ।
तर्पयेद्वादशशतं तिलतण्डुलचन्दनैः ॥
आज्यप्लुता शृताशी च तर्पयेच्च तथा श्रियम् ।
रक्तोत्पलैर्वा पद्मैर्वा मालत्यादैः सुगन्धिभिः ।
एवं कृते वर्षमेकं मन्त्रसिद्धिः प्रजायते ॥
नित्यं द्वादशविप्रांश्च श्रीरूपाच्च सुवासिनीम् ।
भोजयेत् पूजनञ्चास्य चरेत्तौ याशयेत् सदा ॥
षट्पञ्चकर्णिकायाञ्च श्रीयुतं देवमर्च्चयेत् ।
षट्पत्रेषु षडङ्गानि यजेदूर्द्धाद्यचतुर्दले ॥
मत्स्यं कूर्मं मकरं कूर्म्मं शिशुमारञ्च पूर्व्वतः ।
तद्दलेऽष्टदले पूज्याः शाराद्याः सप्त सिन्धवः ॥
तद्दलेऽष्टदले पूज्या वासुक्याद्याः फणीश्वराः ।
तस्य बाह्ये शक्रदले रत्नानि तु चतुर्दश ॥
समुद्रजानि पूज्यानि लक्ष्मीकौस्तुभकानि च ।
गङ्गाद्याः षोड़श ततो महानद्यः प्रपूजयेत् ॥
ततश्चाष्टदले वेदानुपवेदसमन्वितान् ।
दिग्गीर्णांश्च तदस्त्राणि नवावरणपूजनम् ।
एवं सिद्धमनुर्मन्त्री जायते सिद्धिभाजनम् ॥
एतदुक्तग्रहं मन्त्रं जपेदष्टोत्तरं शतम् ।
तदृदेवतादिने सिद्धः पुस्तकादेव जायते ॥
अकुण्ठितप्रयोगेषु न पुनस्तस्य संस्कृतिः ।
एतत्पक्षविता मन्त्रा मम सिद्ध्यन्ति पार्व्वति ! ॥
एतत्संपुटिताः सर्व्वे वैदिकाः सिद्धिदाः कलौ ।
अनेन यजिता जप्ताः कल्पेऽप्युक्तसिद्धिदाः ॥"
इति मेरुतन्त्रे २६ प्रकाशः ॥

मत्स्यकरण्डिका, स्त्री, (मत्स्यस्य करण्डिकेव) मत्स्यरक्षणपात्रम् । खालुइ इति भाषा । तत्पर्य्यायः । मत्स्यधानी २ कुवेणी ३ । इति जटाधरः ॥

मत्स्यगन्धा, स्त्री, (मत्स्यस्येव गन्धो यस्याः । छान्दसादित्वाभावः ।) जाङ्गलीवृक्षः । स च जलपिप्पली । इति जटाधरः राजनिर्घण्टश्च ॥ व्यासमाता । (अस्या उत्पत्तिकथा यथा, एकदा चेदीश्वरो वसुराजः पितृगणनियोजितो मृगयेर्थुवनं गत्वा स्वपत्नीं गिरिकां ऋतुस्नातां स्मरन् आस्ते । इत्यवसरे कामोद्दीपकवसन्तवायुना प्रेर्य्यमाणस्य तस्य रेतः प्रस्कन्द । ततस्तद्दीर्य्यं स्वपत्नीपुटे स्थापितवान् । एतत् दृष्ट्वा न स्खलितमिति निश्चित्य अभिमन्त्र्य च तत् स्वपालित-श्येनेन प्रियायै प्रेषयामास । तदादाय उड्डीयमानस्य अन्येन च श्येनेन सह विहायसि युध्यतस्तस्य पतात् भ्रष्टं कालिन्दीजले पतितं वीर्य्यम् । अथ तत्रैतः ब्रह्मशापात्मत्स्यरूपिणी अद्रिका नाम्नी काचिदप्सरा भक्षितवती धीवरास्तु तां पूर्णगर्भां मत्स्यीं बबन्धुः । ततस्तेषु तस्या उदरात् एकां स्त्रियमेकञ्च पुरुषमसूजन्तुः । तयोस्तु पुरुषो मत्स्यो नाम राजा, सा कन्या च मत्स्यगन्धेति ख्यातासीत् । हरिवंश । तत्पर्य्यायो यथा,—
"तन्मत्स्ये प्रथमं फलं मत्स्यसदृशं विसगन्धंद्वितीयमत्स्यफलसदृशं मत्स्यगन्धं तयोर्नामानि ।
"हरिवंशे पुण्यवल्ली च परामत्स्यफला मता ।
मत्स्यगन्धा श्रीहट्टली विश्वम्नी श्वाङ्गनाग्निनी ॥"
मत्स्याक्षी ॥ तत्पर्य्यायो यथा,—
"मत्स्याक्षी वाटिका मत्स्यगन्धा मत्स्याशनीति च ।"

जलपिप्पल्यर्थे पर्य्यायो यथा,—
"जलपिप्पल्यभिहिता शारदी शकलादनी ।
मत्स्याशनी मत्स्यगन्धा जाङ्गलीत्यपि कीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

मत्स्यघण्टः, पुं, (मत्स्यानां घण्टः विभिन्नार्थं यत्र सः ।) स्वनामख्यातमत्स्यबन्धनम् । तत्पर्य्यायः । गलग्रहः २ । इति शब्दचन्द्रिका ॥

मत्स्यजालं, क्ली, (मत्स्यधारणार्थं जालं शाकपार्थिववत् समासः ।) आनायः । इति हेमचन्द्रः । ३ । ५६३ । माछधरा जाल इतिभाषा ॥

मत्स्यखण्डिका, स्त्री, (मद्यं मधुररसं स्यन्दते इति । स्यन्द + खुल् + टाप् । अत इत्वञ्च । पृषोदरादित्वात् साधुः । शर्कराविशेषः । मिछिरि इति भाषा । यथा,—
"नवीकाफाणितगुड़खण्डमत्स्यण्डिकासिताः ।
निर्म्मला लघवो ज्ञेयाः शीतवीर्य्या यथोत्तरम् ।
यथा यथेषां वैमल्यं भवेच्छैत्यं तथा तथा ॥"
इति राजवल्लभः ॥
राव इति हिन्दीभाषा । तस्य लक्षणं यथा,—
"इक्षोरसो यः संपक्वो घनः किञ्चिद्द्रवान्वितः ।
मन्दं यत् स्यन्दते यस्मान्मत्स्यण्डीति निगद्यते ॥"
अस्य गुणाः ।
"मत्स्यण्डी मेदिनी बल्या लघ्वी पित्तानिलापहा ।
मधुरा दृंहणी तृप्या रक्तदोषापहा स्मृता ॥"
इति भावप्रकाशः ॥

मत्स्यण्डी, स्त्री, खण्डविकारः । इत्यमरः । २ । ६ । ४३ ॥ इक्षुविशेषस्य रसपाके खण्डयोग्ये सारभूते या गुड़िकाकारा जायते सा मत्स्यण्डी । खण्डशालूकं मिछिरि इति ख्याते नवात् इति ख्यातापि मत्स्यण्डीति केचित् । मत्स्याण्डाकारत्वात् मत्स्यण्डी मनीषादित्वादसुक् नदादित्वादीप् मत्स्यमनिति मत्स्यण्डी अत्र प्राचां डः इत्यन्ये । मद्यं स्यन्दते मत्स्यण्डीति केचित् । इति भरतः ॥ (यथास्या लक्षणं गुणाश्च ॥
राबकाकव खण्डराव इति लोके ।
"इक्षो रसो यः सम्पक्वो घनः किञ्चिद्द्रवान्वितः ।
मन्दं यत् स्यन्दते यस्मात्तन्मत्स्यण्डी निगद्यते ॥
मत्स्यण्डी मेदिनी बल्या लघ्वी पित्तानिलापहा ।
मधुरा दृंहणी तृप्या रक्तदोषापहा स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

मत्स्यधानी, स्त्री, (मत्स्या धीयन्ते यत्रेति मत्स्य + धान + ल्युट् ङीप् ।) मत्स्यरक्षार्थपात्रम् । खारयी इति खालुइ इति च भाषा । तत्पर्य्यायः । कुवेणी २ । इत्यमरः । १ । १० । १६ ॥ मत्स्यकरण्डिका ३ खारयिका ४ मत्स्यबन्धनी ५ कुवेणिः ६ कुवेणा ७ कुपिनी ८ कुपिनिः ९ । इतिभरतः ॥ सा खल्वा चेत् कुपिनी भवेत् इति शब्दरत्नावली ॥

मत्स्यनाशकः, पुं, (नाशयतीति नश् + णिच् + ण्वुल्। मत्स्यानां नाशकः। सदैव मत्स्यभक्षकतयास्य तथात्वम्।) कुररपक्षी। इति भूरिप्रयोगः॥ मत्स्यनाशकर्त्तरि त्रि॥

मत्स्यनाशनः, पुं, (नाशयतीति नश् + णिच् ल्युः। मत्स्यस्य नाशनः।) कुररपक्षी। इति हेमचन्द्रः। ४। ४०१॥

मत्स्यपित्ता, स्त्री, (कटुरोहिणी। इत्यमरः। २। ४। ८६॥ (तथा चास्याः पर्य्यायाः।

"कट्वी तु कटुका तिक्ता शकुलादनी कटुभरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटु-
रोहिणी॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

मत्स्यबन्धी, [न्] पुं, (मत्स्यान् बन्धुं धर्त्तुं शीलमस्य। मत्स्य + बन्ध + इनिः।) धीवरः। यथा,

"कैवर्त्तो धीवरो दासो मत्स्यबन्धी च जालिकः॥"

इति हलायुधः॥

("अथान्येद्युरुत्थैर्यमकिङ्करार्भैर्मत्स्यबन्धिभिः
प्रभात आगत्य जालैराच्छादितो ह्रदः।"

इति पञ्चतन्त्रे। ५। २६।)

मत्स्यबन्धिनी, स्त्री, (मत्स्यबन्धिन् + स्त्रियां ङीप्।) मत्स्यधानी। इति हलायुधः॥

मत्स्यरङ्गः, पुं, (मत्स्यरङ्ग। पृषोदरादित्वात् साधुः।) मत्स्यरङ्गपक्षी। इति भूरिप्रयोगः॥

मत्स्यरङ्गः, पुं, (मत्स्यान् रङ्गति भक्षणार्थं तत्समीपं गच्छतीति। मत्स्य + रगि + अच्।) पक्षिविशेषः। माछराङ्गा इति भाषा। (यथा,

"त्रिभुवनविदितो हा मत्स्यरङ्गे कलङ्कः॥"

इत्युद्भटः॥)

तत्पर्य्यायः। भास्याशी २ जलमद्गुः ३ मत्स्यीचकः ४। इति हारावली॥ मत्स्याशनः ५ मीनरङ्गुः ६ मत्स्यरङ्गः ७ सुपिचकः ८। इति शब्दरत्नावली॥

मत्स्यराजः, पुं, (मत्स्येषु राजा श्रेष्ठः समासान्तरच्।) रोहितमत्स्यः। इति त्रिकाण्डशेषः॥ विराटराजः।

("तस्य तद्वचनं श्रुत्वा मत्स्यराजः प्रतापवान्।"

इति महाभारते। ४। ६८। २१।)

मत्स्यविन्ना, स्त्री, कटुका। इति वैद्यकम्॥

मत्स्यवेधनं, क्ली, (मत्स्योविध्यतेऽनेनेति मत्स्य + विध + करणे ल्युट्। मत्स्यानां वेधनमिति वा।) वड़िशम्। इत्यमरः। १। १०। १६॥

मत्स्यवेधनी, स्त्री, (मत्स्यवेधन + ङीप्।) मद्गुपक्षी। इति जटाधरः॥ वड़िशम्। इति शब्दरत्नावली॥

मत्स्यसन्तानिकः, पुं, (मत्स्यानां सन्तानिकाच।) मत्स्यभक्षणविशेषः। यथा,—

"दग्धोऽङ्गारे सलवणो वेशवारेरुपस्कृतः।
सार्द्रकः कटुतैलेन मत्स्यसन्तानिको भवेत्॥"

इति शब्दचन्द्रिका॥

मत्स्याक्षी, स्त्री, (मत्स्यानां अक्षीणीव अक्षीणि पुष्परूपाणि चक्षूंषि यस्याः। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्।" ५। ४। ७३। इति षच् ङीष् च।) ब्राह्मी। इत्यमरः। २। ४। १३०॥ सा च सोमलतायाम्। ब्राह्मीशाके इति कैश्चित्। इति भरतः॥ यथा,

"ब्राह्मी वयस्या मत्स्याक्षी मीनाक्षी सोमवल्लरी।
मत्स्याक्षी शिखिरा रुद्रा ब्रह्मदोषघ्नयापहा॥"

इति राजनिर्घण्टः॥

गण्डदूर्ब्बा। इति राजनिर्घण्टः॥

छिलमोचिका। ब्राह्मीशाकः। इति रत्नमाला॥

(गण्डदूर्ब्बार्थे पर्य्यायो यथा,—

"गण्डदूर्ब्बा तु गण्डाली मत्स्याक्षी शकुलाचकः॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

मत्स्यादनी॥ तत्पर्य्यायो गुणाश्च यथा। मछेखी छकमछरी आइतिच। इति लोके।

"मत्स्याक्षी वाङ्किका मत्स्यगन्धा मत्स्यादनीति च।
मत्स्याक्षी ग्राहिणी शीता कुष्ठपित्तकफास्रजित्॥
लघुस्तिक्ता कषाया च स्वादी कटुविपाकिनी।"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

मत्स्याङ्गी, स्त्री, (मत्स्यानां अङ्गमिवाङ्गं यस्याः।) छिलमोचिका। इति त्रिकाण्डशेषः॥

मत्स्यादनी, स्त्री, (मत्स्यैरद्यते इति मत्स्य + अद + ल्युट् गौरादित्वात् ङीष्।) जलपिप्पली। इति राजनिर्घण्टः॥ (तथा च पर्य्यायः॥

"जलपिप्ल्यभिहिता शारदी शकुलादनी।
मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता॥"

मत्स्याक्षी। मछेखी इति लोके॥ तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।

"मत्स्याक्षी वाङ्किकामत्स्यगन्धा मत्स्यादनीति च।")

मत्स्याशनः, पुं, (मत्स्यानश्नातीति मत्स्य + अश + ल्युः।) मत्स्यरङ्गपक्षी। इति त्रिकाण्डशेषः॥ मत्स्यभक्षके त्रि॥

मत्स्यौ, स्त्री, (मत्स्य + जाते ङीष्।) स्त्रीमत्स्यजातिः। इति सुग्धबोधव्याकरणम्॥

मत्स्योदरी, स्त्री, (मत्स्यस्य उदरं उत्पत्तिस्थानं यस्याः। मत्स्यगर्भे जातत्वादस्यास्तथात्वम्।) सत्यवती सा च व्यासमाता। इति जटाधरः॥ (यथा देवीभागवते। २। १। ३८।

"कालिका यमुना दृष्टा तरसा जालजीविने।
नाम्ना कालीति विख्याता तथा मत्स्योदरीति च॥")

(मत्स्या उदरे गर्भे यस्याः।) काश्मीरस्थतीर्थविशेषः॥ यथा,—

"कैलासाद्रेः समायाता सप्तकोटिमिता प्रभो!।
दुर्गाणि तैः कृतानीह सप्तस्वर्गसमानि च॥
सद्वाराणि सयन्त्राणि कवाटविकटानि च।
कोटिकोटिभटान्यानि सर्व्वास्त्रैसहितान्यपि॥
ततः शैलं महादुर्गं तैः काश्मीपरितः कृतम्।
परिखा निर्मलालिन्दा मत्स्योदर्य्या जलाविला॥
मत्स्योदरी द्विधा जाता बहिरन्तश्चरा पुनः।
तस्य तीर्थं महत् ख्यातं मिलितं गाङ्गवारिणि॥
यदा संहारमार्गेण गङ्गाम्भः प्रसरेदिह
तदा मत्स्योदरीतीर्थं लभ्यते पुण्यगौरवात्॥
सूर्य्याचन्द्रमसोः पर्व्व तदा कोटिगुणं भवेत्।
सर्व्वपर्व्वाणि तत्रैव सर्व्वतीर्थानि तत्र वै।
तत्रैव सर्व्वलिङ्गानि गङ्गा मत्स्योदरी यतः॥
मत्स्योदर्य्यान्तु ये स्नाता यत्र कुत्रापि मानवाः।
कृतपिण्डप्रदानास्ते न मातुरुदरेशयाः॥
अविमुक्तमिदं क्षेत्रं मत्स्याकारत्वमाप्नुयात्।
परितः स्वर्धुनीवारि संसारे परिवीक्षते॥
मत्स्योदर्य्यां कृतस्नाना ये नरास्ते नरोत्तमाः।
कृतापि बहुपापानि नेक्षन्ते भास्करेः पुरीम्॥
किं स्नात्वा बहुतीर्थेषु किं तप्त्वा दुष्करं तपः।
यदि मत्स्योदरीं स्नाता कुतो गर्भभयं ततः॥
यत्र यत्र हि लिङ्गानि देवैर्यक्षकृतान्यपि।
तत्र मत्स्योदरीं प्राप्य मुक्तालो मोक्षभाजनम्॥
सन्ति तीर्थान्यनेकानि भूर्भुवःस्वर्गतान्यपि।
न समानि परं तानि कोऽप्येतेनापि निश्चितम्॥
इत्थं तीर्थं कृतं तेन विभो! कैलासवासिना।
गणाधिपेन सुमहत् सुमहोदरकर्म्मणा॥"

इति काश्मीखण्डे ६६ अध्यायः॥

मथ ह कुत्से। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-वधे-सक०-क्षेपे अक०-सेट्।) ह मन्यते। कुत्सो वधक्षेपौ। इति दुर्गादासः॥

मथ ज ए गाहे। इति कविकल्पद्रुमः॥ भ्वा०-पर०सक०-सेट्।) ज मन्थः मथः। ए अमथीत्। इति दुर्गादासः॥

मथनं, क्ली, (मथ्यते इति मथ + भावे ल्युट्।) विलोड़नम्। मचोया इति भाषा। यथा,—

"क्वाहं मन्दमतिः क्वेदं मथनं क्षीरवारिधेः।
किं तत्र परमाणुर्वै यत्र मज्जति मन्दरः॥"

इति भागवते। १।१।१। टीकायां श्रीधरस्वामी॥ अस्त्र विशेषः। यथा, हरिवंशे। २३६।१०।

"ऐषीकमस्त्रमैन्द्रञ्च आग्नेयं शैलिरं तथा।
वायव्यं मथनं नाम कापालमथ किङ्करम्॥")

मथनः, पुं, (मथति रोगानिति मथ + कर्त्तरि ल्युः।) गणिकारिकावृक्षः। इति रत्नमाला॥ (मथनकारके, त्रि। कैश्चिन्मथनसुखमथन्यादिदर्शनात्।)

मथितं, क्ली, (मथ + क्तः।) निर्जलघोलम्। इत्यमरः। २। ९। ५३॥ यथा, वृहत्संहितायाम्। ५०। २६।

"चारे कदल्यामथितेन युक्ते
दिनोषिते पायितमाशयं यत्॥")

अस्य गुणाः। कफपित्तनाशकत्वम्। रोचनत्वम्। धातुपुष्टिदत्वञ्च। इति राजवल्लभः॥ विलोड़िते, त्रि॥ (तथा च पर्य्यायान्तरं प्रकारान्तरञ्च यथा,—

"घोलन्तु मथितं तक्रमुदश्विच्छिक्किकापि च।

ससरं निर्म्मलं घोलं मथितन्त्वसरोदकम् ॥
तक्रं पादनलं प्रोक्तमुदास्वित्तर्द्धवारिकम् ।
कुक्षिका सारहीना स्यात् स्वच्छा प्रचुर-
वारिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
"ससरं निर्जलं घोलं मथितं सरवर्ज्जितम् ।"
इति च हारीते प्रथमस्थाने अष्टमेऽध्याये ॥)
मथुरा, स्त्री, (मथ्यते पापराशिर्यया इति । मथ +
"मन्दिवाशीत्यादि ।" उणा० । १ । ३६ ।
इति उरच् ।) स्वनामख्यातपुरी । अधुना
आगरा इति ख्यातस्याग्रवणस्य नगरम् ।
(यथा, रघौ । ६ । ४८ ।
"यस्यावरोधस्तनचन्दनानां
प्रक्षालनाद्वारिविहारकाले ।
कलिन्दकन्या मथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति ॥")
तत्पर्य्यायः । मधुपन्नम् २ । इति त्रिकाण्डशेषः ॥
मधुपुरी ३ मधुरा ४ । इति शब्दरत्नावली ॥
सा च मोक्षदायकतीर्थम् । यथा,—
"अयोध्या मथुरा माया काशी काञ्ची अव-
न्तिका ।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः ॥
अयोध्या रामनगरी मथुरा कृष्णपालिता ।
एतास्तु पृथिवीमध्ये न गण्यन्ते कदाचन ॥
श्रीरामधनुरग्रस्था अयोध्या सा महापुरी ।
मथुरा केशवोत्तुङ्गसुदर्शनविधारिता ॥"
इत्यादिभूतशुद्धितन्त्रम् ॥*॥
तत्र विष्णुदर्शनमाहात्म्यं यथा,
"यज्ञेश्वरयुगादश्यां स्नात्वा वै यमुनाजले ।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम् ॥
यमुनासलिले स्नातः पुरुषो मुनिसत्तम ! ।
ज्येष्ठामूलामले पक्षे द्वादश्यामुपवासकृत् ॥
समभ्यर्च्चाच्युतं सम्यक् मथुरायां समाहितः ।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम् ॥
कश्चिदस्मत्कुले जातः कालिन्दीसलिलाप्लुतः ।
अर्च्चयिष्यति गोविन्दं मथुरायामुपोषितः ॥
ज्येष्ठामूलसिते पक्षे येनैवं वयमप्युत ।
परान्दृष्ट्विमवाग्राम्मस्तारिताः सकुलोद्भवैः ॥"
इति विष्णुपुराणे ६ अंशे ८ अध्यायः ॥*॥
तस्या माहात्म्यं यथा,—
वराह उवाच ।
"न विद्यते च पाताले नान्तरीक्षे न मानुषे ।
समत्वं मथुरायाः हि प्रियं मम वसुन्धरे ! ॥"
स्तत उवाच ।
"तच्छ्रुत्वा वचनं तस्य प्रणम्य शिरसा तदा ।
पुण्यानां परमं पुण्यं पृथ्वी वचनमब्रवीत् ॥
पृथिव्युवाच ।
पुष्करं नैमिषं चैव पुरी वाराणसी तथा ।
एता हित्वा महाभाग ! मथुरां किं प्रशंससि ॥
वराह उवाच ।
शृणु कार्त्स्न्येन वसुधे ! कथ्यमानं मयानघे ! ।
मथुरेति च विख्यातं नास्ति चैवं परं मम ।

सा रम्या च सुशस्ता च जन्मभूमिः प्रिया मम ॥
शृणु देवि ! यथा स्तौमि मथुरां पापहारि-
णीम् ।
तन्निवासी नरो याति मोक्षं नास्त्यत्र संशयः ॥
महामाघ्यां प्रयागे तु यत् फलं लभते नरः ।
तत् फलं लभते देवि ! मथुरायां दिने दिने ॥
कार्त्तिक्यान्चैव यत् पुण्यं पुष्करे तु वसुन्धरे ! ।
तत् फलं लभते देवि ! मथुरायां दिने दिने ॥
पूर्णे वर्षसहस्रे तु वाराणस्यान्तु यत् फलम् ।
तत् फलं लभते देवि ! मथुरायां त्रयेण हि ॥
मथुरान्च परित्यज्य योऽन्यत्र कुरुते रतिम् ।
मूढो भ्रमति संसारे मोहितो मायया मम ॥
यः शृणोति वरारोहे ! माथुरं मम मङ्गलम् ।
अन्येनोच्चारितं शृंवन् सोऽपि पापैः प्रमुच्यते ॥
पृथिव्यां यानि तीर्थानि आसमुद्रसरांसि च ।
मथुरायां गमिष्यन्ति सप्त चैव जनार्द्दने ॥
मथुरां समनुप्राप्य आर्द्रं स्नात्वा यथाविधि ।
स्वर्गं यान्तीह पितरो यावत् स्थित्यग्रजन्मनः ॥
ये वसन्ति महाभागे ! मथुरामितरे जनाः ।
तेऽपि यान्ति परां सिद्धिं मत्प्रसादान्न संशयः ॥
कुलाम्बके शौकरवे मथुरायां विशेषतः ।
विना सांख्येन योगेन मुच्यते नात्र संशयः ॥
मथुरायां महापुर्य्यां ये वसन्ति शुचिव्रताः ।
बलिभिश्चाप्रदातारो ये वा ते नरविग्रहाः ॥
भविष्यामि वरारोहे ! द्वापरे युगसंस्थिते ।
ययातिभूपवंशाच्च क्षत्रियः कुलकर्द्दनः ॥
भविष्यामि वरारोहे ! मथुरायां न संशयः ।
मूर्त्तिं चतुर्व्विधां स्नात्वा स्थास्यामि ऋषिभिः
स्तुतः ॥
स्थास्यामि वत्सरशतं युद्धेषु कृतनिश्चयः ।
एका चन्दनसङ्काशा द्वितीया कनकप्रभा ॥
अशोकसदृशा चान्या अन्या चोत्पलसन्निभा ।
तत्र गुह्यानि नामानि भविष्यन्ति मम प्रिये ! ॥
पुण्यानि च पवित्राणि संसारोच्छेदनानि च ।
यत्राहं घातयिष्यामि द्वात्रिंशति वसुन्धरे ! ॥
दैत्यान् घोरान् महाभागे ! कंसादीन् घोर-
दर्शनान् ।
यमुना यत्र सुवहा नित्यं सन्निहिता ध्रुवम् ॥
वैवस्वतस्वसा रम्या यमुना यत्र विश्रुता ।
तां नदीं यमुनां गङ्गां प्रयागे सङ्गविश्रुताम् ॥
गङ्गाशतगुणा पुण्या मथुरे मम मण्डले ।
यमुना विश्रुता देवि ! नात्र कार्य्या विचारणा ॥
तत्र तीर्थानि गुह्यानि भविष्यन्ति ममानघे ! ।
येषु स्नानपरो देवि ! मम लोके महीयते ॥
अथात्र सुचते प्राणान् मम कर्म्मपरायणः ।
न जायते स मर्त्येषु जायते च चतुर्भुजः ॥
अविमुक्ते नरः स्नातो मुक्तिं प्राप्नोत्यसंशयम् ।
तथात्र सुचते प्राणान्मम लोकं स गच्छति ।
विश्रान्तिसंज्ञकं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
यस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
सर्व्वतीर्थेषु यत् स्नानं सर्व्वतीर्थेषु यत् फलम् ।
तत् फलं लभते देवि ! दृष्ट्वा देवं गतश्रमम् ॥

न च यज्ञैर्न तपसा न ध्यानैर्न च संयमैः ।
तत् फलं लभते देवि ! स्नातो विश्रान्तिसंज्ञके ॥
कालञ्जयन्तु वसुधे ! यः पश्यति गतश्रमम् ।
स्नात्वा प्रदक्षिणं देवं तु विष्णुलोकं स गच्छति ॥
अस्ति चान्यत् परं गुह्यं सर्व्वसंसारमोचनम् ।
यस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
प्रयागं नाम तीर्थन्तु देवानामपि दुर्लभम् ।
तस्मिन् स्नातो नरो देवि ! अग्निष्टोमफलं लभेत् ॥
इन्द्रलोकं समासाद्य नरो वै तत्र मोदते ।
अथात्र सुचते प्राणान् मम लोकं स गच्छति ॥
तथा कनखलं तीर्थं नाम गुह्यं परं मम ।
स्नानमात्रेण तत्रापि नाकपृष्ठे स मोदते ॥
अस्ति चैवं परं गुह्यं तिन्दुकं नाम नामतः ।
तस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
अस्मिंस्तीर्थे पुरावृत्तं तच्छृणुष्व वसुन्धरे ! ।
प्राग्वालविषये देवि ! काम्पिल्यश्च पुरोत्तमम् ॥
धनधान्यसमायुक्तं ब्रह्मदत्तेन पालितम् ।
तस्मिंस्तु वसते देवि ! तिन्दुको नाम नामतः ॥
तस्मिंस्तु वसतस्तस्य नाप्रियस्य पुरोत्तमे ।
कालेन महता तस्य कुटुम्बः क्षयमागतः ॥
क्षीणे कुटुम्बे तु तदा सुभृशं दुःखपीड़ितः ।
सर्व्वसङ्गपरित्यागी यो गच्छन् मथुरापुरीम् ।
ब्राह्मणावसथे सोऽपि वसमानो वसुन्धरे ! ॥
तत्र कर्म्मगृहं स्नात्वा स्नात्वैव यमुनां नदीम् ।
तत्र दानञ्च कुरुते नित्यकालं दृढव्रतः ॥
ततः कालेन महता पक्वं समुपागतः ।
तस्य तीर्थप्रभावेण जातोऽसौ ब्राह्मणोत्तमः ॥
तस्मिन् वरारुहे देवि ! ब्राह्मणो योगिनां वरः ।
जातिस्मरो महाप्राज्ञो विष्णुभक्तो वसुन्धरे ! ॥
तस्य तीर्थप्रभावेण प्राप्ता मुक्तिः सुदुर्लभा ॥
ततः परं सूर्य्यतीर्थं सर्व्वपापप्रमोचनम् ।
वैरोचनेन बलिना सूर्य्यस्त्वाराधितः पुरा ॥
भरद्वाजेन बलिना धनकामेन वै पुरा ।
ऊर्द्ध्वबाहुर्निराहारस्तप्तवानुत्तमं तपः ॥
साग्रं संवत्सरं देवि ! ततः काममवाप्नुयात् ।
तस्य प्रसन्नो भगवान् तुमुणिः प्रत्यभाषत ॥
किं कारणं बले ! ब्रूहि तप्यसे महत्तपः ॥"
बलिरुवाच ।
"भरद्वाजोऽस्मि देवेश ! पाताले निवसाम्यहम् ।
वित्तेनापि विहीनस्य कुटुम्बभरणं कुतः ॥
सुकुटात्तस्य वै सूर्य्यो ददौ चिन्तामणिं ततः ।
चिन्तामणिं समासाद्य पातालमगमत्तदा ॥
तस्मिंस्तीर्थे नरः स्नात्वा सर्व्वपापैः प्रमुच्यते ।
तत्रापि सुचते प्राणान् मम लोकं स गच्छति ॥
आदित्येऽहनि संक्रान्तौ ग्रहणे चन्द्रसूर्य्ययोः ।
तस्मिन् स्नातो नरो देवि ! राजसूयफलं लभेत् ॥
यत्र ध्रुवेण सन्तप्तं इच्छया परमं तपः ।
अत्र वै स्नानमात्रेण ध्रुवलोके महीयते ॥
तत्रापि सुचते प्राणान् मम लोके महीयते ।
ध्रुवतीर्थे च वसुधे यः श्राद्धं कुरुते नरः ।
पितॄंस्तारयते सर्व्वान् पितृपक्षे विशेषतः ॥
दक्षिणे ध्रुवतीर्थस्य तीर्थराजं प्रकीर्त्तितम् ।

तस्मिन् स्नातो नरो देवि ! मम लोके महीयते।
तस्माच्च सुचते प्राज्ञाम्मम लोकं स गच्छति॥
तस्मिंस्ते महादेवि ! ऋषितीर्थे परं मम।
तत्र स्नातो नरो देवि ! ऋषिलोकं प्रपद्यते॥
अथात्र सुचते प्राज्ञाम्मम लोके महीयते।
दक्षिणे ऋषितीर्थस्य मोक्षतीर्थे परं मम॥
स्नानमात्रेण वसुधे ! मोक्षं प्राप्नोति मानवः।
तस्माच्च सुचते प्राज्ञात् मम लोके महीयते॥
तत्रैव कोटितीर्थे हि तीर्थानामपि दुर्लभम्।
तत्र स्नानेन दानेन मम लोके महीयते॥
कोटितीर्थे नरः स्नातः सप्तार्च्ये पितृदेवताः।
तारिताः पितरस्तेन तथैव प्रपितामहाः॥
कोटितीर्थे नरः स्नातो ब्रह्मलोके महीयते।
तत्रैव वायुतीर्थन्तु पितृणामपि दुर्लभम्॥
पिण्डं दद्यात्तु वसुधे ! पितृलोकं स गच्छति।
गयापिण्डप्रदानेन यत् फलं लभते नरः॥
ततः फलं लभते देवि ! त्र्येके दानात् संशयः।
द्वादशैतानि तीर्थानि देवानां दुर्लभानि च॥
स्नानं दानं जपो होमः सहस्रगुणितं भवेत्।
एषां स्मरणमात्रेण सर्वपापैः प्रमुच्यते॥
श्रुत्वा तीर्थस्य माहात्म्यं सर्वान् कामानवाप्नुयात्॥"

इत्यादि वराहपुराणे मथुरातीर्थप्रभाव:॥*॥
इतः प्रभृति समर्पिग्राध्यायेषु मथुरामाहात्म्यं ज्ञेयम्॥

मथुरेशः, पुं, (मथुरायाः ईशः।) श्रीकृष्णः। इति शब्दरत्नावली॥

मथुरा, स्त्री, (मथ्+बाहुलकात् उरः टाप्।) मथुरा। इति त्रिरूपकोषः॥

मद ए॰ड॰ स्वप्ने। जाड्ये। मदे। मोदे। स्तुतौ। गतौ। इति कविकल्पद्रुमः॥ (भ्वा॰-आत्म॰-स्वप्ने जाड्ये मद मोदे अक॰-स्तुतौ गतौ च सक॰-सेट्।) मन्यते। ड मन्यते जनः स्वपिति जड़ो भवति माद्यति मोदते स्तौति गच्छति वा इत्यर्थः। इति दुर्गादासः॥

मद, ईं भ य ईर् णि हर्षे। इति कविकल्पद्रुमः॥ (दिवा॰-पर॰-अक॰ सेट्।) ईं णि मत्तोऽस्ति। भ य माद्यति। ईर् अमदत् अमादीत्। अस्मात् पुषादित्वात् णिच् ड इत्यर्थे। इति दुर्गादासः॥

मद, क ड क्षीरयोगे। इति कविकल्पद्रुमः॥ (चुरा॰-आत्म॰-सक॰-सेट्।) क ड मनो माद्यते यस्य ग्राह्याभ्याचरणायात्। इति दुर्गादासः॥

मद, म गर्वे। स्नेपने। इति कविकल्पद्रुमः॥ (भ्वा॰-पर॰-अक॰-सेट्।) गर्वोऽहङ्कारः। स्नेपनं दैन्यम्। म मदयति नीचं सम्पत्तिः। मदयति शूरं शूरः। इति दुर्गादासः॥

मदः, पुं, (मदयतीति। मद्+अच्।) हस्तिगण्डजलम्। (यथा, भारवौ। २। १८।
"मदविलुलितमूलैर्गाधिपः
करिभिरर्तयते स्वयं हतैः।")

तत्पर्य्यायः। दानम् २। (मद्यते इति। मद्+"मदोऽनुपसर्गे।" ३। ३। ६०। इति अप्।) हर्षः। (यथा, ऋग्वेदे। १। ४। २।
"उप नः सवनागहि सोमपाः पिब गोदा इदेवतो मदः॥" "मदो हर्षः।" इति तद्भाष्ये सायनः।) तत्पर्य्यायः। आमोदः २। (अमरः। ३। २। १२।) रेतः। कस्तूरी। (पर्य्यायो यथा,—
"नखगन्धाभिमृगमदो मदः कस्तूरिकाख्यश्च॥"
इति वैद्यकरत्नमालायाम्॥
रोगविशेषः। उन्मादस्य प्रथमावस्थायां यथा,
"स चाप्रबुद्धस्तरुणो मदसंज्ञां बिभर्त्ति च।"
इति माधवकृतनिदानविषये उन्मादाधिकारे॥
विशेषोऽस्य यथा—
यदा तु रक्तवाहीनि रससंज्ञावहानि च।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता मलाः॥
मलिनाहारशीलस्य रजोमोहाहृतात्मनः।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा॥
मदमूर्च्छायसंन्यासास्तेषां विद्याद्विचक्षणः।
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु॥
दुर्बलस्तेषु स्यात् यदा वायुः प्रपद्यते।
मनो विक्षोभयन् जन्तोः संज्ञां संमोहयेत्तदा॥
पित्तमेवं कफश्चैवं मनो विक्षोभयन् पृथक्।
संज्ञां नयत्याकुलतां विशेषाच्च वक्ष्यते॥
स्खलत्प्रलपितामर्षचलत्स्खलितचेष्टितम्।
विद्यात् मदमदाविष्टं रूक्षश्यावारुणाक्षितिम्॥
सक्रोधपरुषाभाषं संप्रहारकलप्रियम्।
विद्यात् पित्तमदाविष्टं रक्तपीतासिताक्षितिम्॥
स्खलत्सम्बन्धवचनं तन्द्रालस्यसमन्वितम्।
विद्यात् कफमदाविष्टं पाण्डुं प्रध्यानतत्परम्॥
सर्व्वाण्येतानि रूपाणि सन्निपातजते मदे।
जायन्ते शीघ्रमाशु मदो मद्यमदात्ययः॥
यच्च मद्यमदः प्रोक्तो विषजो रौधिरश्च यः।
सर्व्व एते मदास्तेषु वातपित्तकफाश्रयात्॥"
इति चरके सूत्रस्थाने चतुर्व्विंशेऽध्याये॥)
गर्व्वः। इति मेदिनी। दे, १२॥ (यथा, भारवौ। २। ४८।
"मदमानसमुद्धतं नृपं
न विवृक्षन्ति नियमेन मङ्गता॥")
मद्यम्। शौण्यम्। मत्ततेति यावत्। इति हेमचन्द्रः। २। २२६॥ (यथा, मनौ। ७। ४७।
"मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः॥")
"तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥")
नदः। कल्याणवस्तु। इति धरणिः॥*॥
मदलक्षणं यथा,—
"अहं महात्मा धनवान् मत्तुल्यः कोऽस्ति भूतले।
इति यज्जायते चित्तं मदः प्रोक्तः स कोविदैः॥"
इति गारुडे क्रियायोगसारे १६ अध्यायः॥
तस्य उत्पत्तिर्यथा।
"दुर्हर्षोद्भवः समभवदहङ्कारादभून्मदः।"
इति मात्स्ये ३ अध्यायः॥
(दानवभेदः। यथा, हरिवंशे। ३। ८६।
"अखिलोमा सकेशी च शुष्टच बलको मदः॥"

मदकटः, पुं, (मदं कटति प्रकटयतीति। कट्+अच्।) वकः। धाँड़ इति भाषा। यथा रट्चरो रट्वरौ गोपतिः वको हयो मदकटो हलः। इति हेमचन्द्रः। ४। ३२५॥

मदकलः, पुं, (मदेन कलोऽव्यक्तमधुरध्वनिर्यस्य।) मत्तहस्ती। तत्पर्य्यायः। मदोत्कटः २। (अमरः। २। ८। ३५॥ अव्यक्तप्रलापी। इति शब्दरत्नावली॥ मदाव्यक्तवाचिनि त्रि। इति मेदिनी। ले, १५८॥ (यथा, उत्तरचरिते २अङ्के
"मदकलमयूरकेकाकृष्टविभिरवकीर्णानि।")

मदगन्धः, पुं, (मदस्य दानस्येव गन्धोऽस्य।) सप्तच्छदवृक्षः। इति राजनिर्घण्टः॥ (विवरणम् सप्तच्छदशब्दे द्रष्टव्यम्।)

मदगन्धा, स्त्री, (मदः मादनः गन्धोऽस्याः।) मदिरा। अतसी। इति राजनिर्घण्टः॥

मदनी, स्त्री, (मदं मत्ततां हन्तीति। मद्+हन्+टक् ङीप्।) पूतिका। इति जटाधरः॥

मदनः, पुं, (मदयतीति। मद्+णिच् ल्युः।) कामदेवः। (अमरः। १। १। २६॥
तस्य नाम्नां व्युत्पत्तिर्यथा। ऋषय ऊचुः।
"यस्मात् प्रमथ्य चेतस्तं जातोऽसाकं तथा विधेः।
तस्मान्मदनतामेत्य त्वं लोके गेयो भविष्यसि॥
जगत्सु कामरूपस्त्वत्समो न हि विद्यते।
अतस्त्वं कामनाम्नापि ख्यातो भव मनोभव!॥
मदनान्मदनाख्यस्त्वं ग्रन्थोदंयात् सदर्पकः।
तथा कन्दर्पनाम्नापि लोके ख्यातो भविष्यसि॥"
इति कालिकापुराणे २ अध्यायः॥
ब्रह्मवैवर्त्तोत्पत्तिर्यथा,—
"प्रहृष्टमानसः पुत्रं कन्यैकाच्च ससर्ज्ज ह।
हृष्टस्य कामिनः पुत्रः कामदेवो बभूव ह॥
कन्या षोड़शवर्षीया रत्नभूषणभूषिता॥
उवाच पुत्रं स विधिः सदीनं पुरतः स्थितम्।
दुर्निवार्य्यं मत्कलार्थं स्वात्मारामं मनोहरम्॥
ब्रह्मोवाच।
स्त्रीपुंसोः क्रीड़नार्थाय सदा त्वच्च विनिर्म्मितः।
हृदि योगेन सर्व्वेषामधिष्ठानं करिष्यसि॥
सम्मोहनं सप्तदेवीजं स्त्रम्भितकारणम्।
उन्मत्तबीजं ज्वलनं ग्रन्थचेतनहारकम्॥
प्रयत्नेतान्मया दत्तान् सर्व्वान् सम्मोहनं कुरु।
दुर्निवार्य्यो मम वराद्भव वत्स! भवेश्च॥
वाक्यात्स्वेवसृजा च प्रहृष्टश्च जगद्विधिः।
दृष्ट्वा वाचं दुहितरं वरं दातुं समुद्यतः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३५ अध्यायः॥
(योगाचार्य्यरूपः शिवस्यावतारविशेषः। यथा, शिवपुराणे वायुसंहितायाम्। २। १०। १—२।
श्रीकृष्ण उवाच।
"युगावर्त्तेषु सर्व्वेषु योगाचार्य्यस्त्वलेन तु।
अवतारांश्च सर्व्वत्र शिष्यांश्च भगवन्! वद॥"
उपमन्युरुवाच।
"श्वेतः सुतारो मदनः सुहोत्रः कंक एव च॥"
महादेवः। मदयति भक्तानां मनः इति

मद+ल्युः। मनसि आनन्दजनकत्वादस्य तथात्वम्। यथा, महाभारते। १३। १७। ६६।
"उन्मादो मदनः कामो रूपत्योऽर्थकरो यशः॥"
मत्तता। वरारोहाणां कामिनीनां भावविशेषः इति यावत्। यथा, महाभारते। १। ४६। १३।
"सौधुपानेन चाल्पेन तुष्टाय मदनेन च। विलासनेन विविधैः प्रेक्षणीयतराभवत्॥")
वसन्तः। धुस्तूरः। सिक्थकम्। इति मेदिनी। मे। १०३॥ वृक्षभेदः। मयना इति भाषा। तत्पर्य्यायः। पिण्डकः२ सुषुकन्दः३ कण्टकी४। इति रत्नमाला॥ पिक्कीतकः ५। (तथाचास्य पर्य्यायान्तरं गुणाश्च।
"मदनः हृद्यनः पिण्डो नटः पिक्कीतकस्तथा। करहाटो मरुवकः ग्रल्यको विषपुष्पकः॥
मदनो मधुरस्तिक्तो वीर्य्योष्णो लेखनो लघुः। वान्तिहृद्विषदोषहरः प्रतिश्यायव्रणापहः॥
रूक्षः कुष्ठकफानाहश्लीपगुल्मव्रणापहः॥"
धुस्तूरार्थे पर्य्यायो यथा,—
"धत्तूरधूर्तधुस्तूरा उन्मत्तः कनकाह्वयः। देवतातिवल्लभो महामोहः शिवप्रियः॥
मातुलो मदनश्चास्य फले मातुलपुत्रकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मरुवकः६ मदनः७ करहाटकः८ ग्रल्यः९। इत्यमरः। २। ४। ५२—५३॥ अमरः। इति जटाधरः॥ माघः। इति हेमचन्द्रः॥ खदिरवृक्षः। इति शब्दचन्द्रिका॥ महोठवृक्षः। बकुलवृक्षः। वृक्षविशेषः। मयनाफल इति भाषा। तत्पर्य्यायः। ग्रल्यः२ कैटर्य्यः३ पिण्डः४ धाराफलः५ तगरः६ करहाटः७ पिक्कीतकः८ मदनः९ मरुवकः१०। अस्य गुणाः। वमिकारकत्वम्। तिक्तत्वम्। उष्णवीर्य्यत्वम्। लेखनत्वम्। लघुत्वम्। रूक्षत्वम्। कुष्ठकफानाहश्लीपगुल्मव्रणापहत्वञ्च। इति राजनिर्घण्टः॥ आलिङ्गनविशेषः। तल्लक्षणम्। नायको नायिकायाः कण्ठे हस्तं दत्त्वा द्वितीयहस्तं तस्या मध्यदेशे दत्त्वा यदाश्लिषति। इति कामशास्त्रम्॥ ("अथ मयनम्।" मम् इति भाषा।
"मयनन्तु मधूच्छिष्टं मधुश्रेष्ठञ्च सिक्थकम्। मध्याधारो मदनकं मधूषितमपि स्मृतम्॥
मदनं स्नदुसुस्निग्धं भूतघ्नं व्रणरोपणम्। भयसन्तापलहातकुष्ठवीसर्पदोषजित्॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥ मक्षलिसर्पान्तर्गतसर्पविशेषः॥ "ग्रिसुको मदनः पालिन्दिरः इत्यादि।" इति सुश्रुते कल्पस्थाने चतुर्थोऽध्याये॥)
मदनकः, पुं, (मदयतीति मद+णिच्+ल्युः स्वार्थे कः।) दमनकवृक्षः। इति रत्नमाला॥ (सिक्थकार्थे क्ली। तत्पर्य्यायो यथा,—
"मयनन्तु मधूच्छिष्टं मधुश्रेष्ठञ्च सिक्थकम्। मध्याधारो मदनकं मधूषितमपि स्मृतम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
मदनकाकुरवः, पुं, (मदनेन हेतुना काकुः कामजन्यो विक्लवो रवः अस्फुटध्वनिर्यस्य।) पारावतः। इति राजनिर्घण्टः॥
मदनगोपालः, पुं, (मदनश्चासौ गोपालश्चेति। भक्तचित्तोन्मादकारित्वादस्य तथात्वम्।) श्रीकृष्णः। यथा,—
"वन्दे मदनगोपालं केशोराकारमद्भुतम्।"
इति पाद्मे पातालखण्डे ६ अध्यायः॥
मदनचतुर्दशी, स्त्री, (मदनोत्सवात्मिका चतुर्दशी।) चैत्रशुक्लचतुर्दशी। यथा। अथ मदनचतुर्दशी तत्र मदनस्य पूजा कार्य्या। स्कन्दपुराणसौरागमयोः।
"मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्दशी। प्रोक्ता मदनभङ्गीति सिद्धिदा तु महीतले॥
पूजयिष्यन्ति ये मर्त्यास्तदङ्गभवपङ्कजैः। ते यान्ति परमं स्थानं मदनस्य प्रभावतः॥
चैत्रे मासि चतुर्दश्यां मदनस्य महोत्सवः। जुगुप्सितोक्तिभिस्तत्र गीतवाद्यादिभिर्नृणाम्। भगवांस्तुष्यते कामः पुत्रपौत्रसमृद्धिदः॥
वलिं प्रति भगवद्वाक्यम्।
न मानयन्ति ये पर्व्व मदनं मानवाधमाः। तेषां पुण्यं फलं दत्तं मया ते चैत्रमासिकम्॥
देवलः।
चैत्रशुक्लचतुर्दश्यां यः स्नायाच्छिवसन्निधौ। पिण्डाचलं न तस्य स्यात् गङ्गायाश्च विशेषतः॥"
इति तिथितत्त्वम्॥
मदनत्रयोदशी, स्त्री, (मदनपूजार्था त्रयोदशी।) चैत्रशुक्लत्रयोदशी। तत्र मदनस्य व्रतं कर्त्तव्यम्। यथा भविष्ये।
"चैत्रशुक्लत्रयोदश्यां मदनं दमनात्मकम्। स्नात्वा संपूज्य विधिवद्वीजयेद्व्यजनेन तु॥
तत्र सन्तुष्यतः कामः पुत्रपौत्रविवर्द्धनः। कामदेवस्त्रयोदश्यां पूजनीयो यथाविधि। रतिप्रीतिसमायुक्तो ह्यशोकमञ्जरीयुतः॥"
दमनो दमनकटवृक्षः। सन्तुष्यतः प्रीयतः। कामदेवश्चात्मा।
"चापेक्षुधृक् कामदेवो रूपवान् विश्वमोहनः।"
तत्र स्तुतिमन्त्रः।
"पुष्पधन्वन्! नमस्तेऽस्तु नमस्ते मीनकेतन!। सुनीनां लोकपालानां धैर्य्यच्युतिकृते नमः॥
माधवात्मज! कन्दर्प! स्मरारे! रतिप्रिय!।
नमस्तुभ्यं जिताशेषभुवनाय मनोभुवे॥
आधयो मम नश्यन्तु व्याधयश्च शरीरजाः। सम्पत्तयोऽभीष्टं मे सन्तु मे स्थिराः॥
नमो माराय कामाय देवदेवस्य मूर्त्तये। ब्रह्मविष्णुशिवेन्द्राणां मनःक्षोभकराय च॥
एवं यः कुरुते पूजामनङ्गस्य महात्मनः। भवन्ति नापदस्तस्य तस्मिन्वर्षे कदाचन॥"
इति तिथितत्त्वम्॥
मदनद्वादशी, स्त्री, (मदनपूजाविधिर्यस्यां द्वादशी।) चैत्रशुक्लद्वादशी। अत्र मदनव्रतं कार्य्यम्। यथा,
ऋषय ऊचुः।
"श्रोतुमिच्छामहे सूत! मदनद्वादशीव्रतम्। सुतानेकोनपञ्चाशत् येन लेभे दितिः पुनः॥
सूत उवाच।
यद्वशिष्ठादिभिः पूर्व्वं दितेः कथितमुत्तमम्। विस्तरेणैतदेवेदं मत्सकाशान्निबोधत॥
चैत्रे मासि सिते पक्षे द्वादश्यां नियतव्रतः। स्थापयेदग्रतः कुम्भं सितवस्त्रैलपूरितम्॥
नानाफलयुतं तद्वदिक्षुदण्डसमन्वितम्। सितवस्त्रयुगच्छन्नं सितचन्दनचर्चितम्॥
नानाभक्ष्यफलोपेतं सहिरण्यञ्च शक्तितः। ताम्रपात्रं शुभोपेतं तस्योपरि निवेदयेत्॥
तस्मादुपरि कामस्य कदलीदलसंस्थितम्। कुर्य्याच्छर्करयोपेतां रतिं तस्य च वामतः॥
गन्धधूपं ततो दद्यात् गीतवाद्यञ्च कारयेत्। तदभावे कथां कुर्य्यात् कामदेवयवोर्नरः॥
कामनामा हरेर्बाहुः स्थापयेद् गुडवारिणा। शुक्लपुष्पाक्षततिलैरर्चयेन्मधुसूदनम्॥
कामाय पादौ संपूज्य जंघे सौभाग्यदाय च। ऊरू शराय इति पुनर्मेढ्राय इति वै कटिम्॥
खड्गोदराय इत्युदरं अनङ्गायेत्युरो हरेः। सुखं पुष्पसुखायेति बाहू पञ्चशराय वै॥
नमः सर्व्वात्मने मौलिमर्चयेदिति केशवम्। ततः प्रभाते तं कुम्भं ब्राह्मणाय निवेदयेत्॥
ब्राह्मणान् भोजयेच्छक्त्या स्वयञ्च लवणाहते। शुक्लाय दक्षिणां दद्यादिमं मन्त्रमुदीरयेत्॥
प्रीयतामत्र भगवान् कामरूपी जनार्द्दनः। हृदये सर्व्वभूतानामानन्दो यो विधीयते॥
अनेन विधिना सर्व्वे मासि मासि समाचरेत्। उपवासी त्रयोदश्यामर्चयेद् विष्णुमव्ययम्॥
फलमेकञ्च संप्राश्य द्वादश्यां भूतले स्वपेत्। ततस्त्रयोदशे मासि घृतं धेनुसमन्वितम्॥
शय्यां दद्यादनङ्गाय सर्व्वोपस्करसंयुताम्। काञ्चनं कामदेवञ्च शुक्लां गाञ्च पयस्विनीम्॥
वासोभिर्भूषणाद्यैश्च पूज्य शक्त्या विभूषयेत्। शय्यां गवादिकं दद्यात् प्रीयतामित्युदीरयेत्॥
होमं शुक्लैस्तिलैः कुर्य्यात् कामनामानि कीर्त्तयन्। गव्येन सर्पिषा चैव पायसेन च धर्म्मवित्॥
विप्रेभ्यो भोजनं दद्याद्दक्षिणाञ्चाविचारितः। इक्षुदण्डानथो दद्यात् पुष्पमालाञ्च शक्तितः॥
यः कुर्य्यादिधिनानेन मदनद्वादशीमिमाम्। सर्व्वपापविनिर्म्मुक्तः प्राप्नोति हरिसाम्यताम्। इह लोके वरान् पुत्रान् सौभाग्यञ्च समश्नुते॥"
इति मत्स्यपुराणे ७ अध्यायः॥
मदनपाठकः, पुं, (मदनं तद्द्वीपकं पठतीति। पठ+ण्वुल्। खरेण कामोद्दीपनात्तथात्वम्।) कोकिलः। इति राजनिर्घण्टः॥
मदनमोहनः पुं, (मदन उन्मादकश्चासौ मोहनश्चेति कर्म्मधारयः। मुह्+णिच् ल्युः।) श्रीकृष्णः। यथा,—

"वन्दे मदनगोपालं केशोराकारमद्भुतम्।
यमाहुर्यौवनोद्भिन्ने श्रीमन्मदनमोहनम्॥"
इति पाद्मे पातालखण्डे ६ अध्यायः॥

मदनशलाका, स्त्री, (मदनोद्दीपिका शलाकेव। अस्याः कामोद्दीपकत्वात्तथात्वम्।) कामोद्दीपकौषधम्। सारिकापक्षी। इति मेदिनी। के, २३५। कोकिला। इति शब्दरत्नावली॥

मदनसारिका, स्त्री, (मदनोद्दीपनाय सारिका।) पक्षिभेदः। सालिक् इति भाषा॥ तत्पर्य्यायः। शलाका २ सारिका ३ चित्रलोचना ४ कुण्डपी ५। इति जटाधरः॥

मदना, स्त्री, (मदयति मत्ततां जनयतीति। मद्+णिच्+ल्युः। यद्वा, माद्यति अनया। मद्+ल्युट्। स्त्रियां टाप्।) सुरा। इति हेमचन्द्रः। ३। ५६७॥

मदनाङ्कुशः, पुं, (मदनस्य कामस्य अङ्कुश इव।) लिङ्गम्। इति त्रिकाण्डशेषः॥ नखम्। इति कामाङ्कुशशब्ददर्शनात्। यथा,—
"कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे।"
इति श्रुतबोधे कालिदासः॥

मदनाग्यकः, पुं, (मदनं उन्मादकं अग्र्यं शिरोभागो यस्य।) कोद्रवः। इति राजनिर्घण्टः॥ (विवरणमस्य कोद्रवशब्दे ज्ञातव्यम्॥)

मदनायुधः, पुं, (मदनस्यायुधः।) भगम्। इति शब्दचन्द्रिका॥

मदनायुषः, पुं, (मदनस्यायुर्जीवनं इव समासान्तोऽच्। निपातनात् साधुः।) कामवर्द्धकत्वात्तथात्वम्। कामवर्द्धिचुपः। इति राजनिर्घण्टः॥

मदनालयः, पुं, (आलीयतेऽस्मिन्निति आ+ली+अधिकरणे अच्। मदनस्यालयः।) षष्ठीसमासः।) भगम्। मदनपर्य्यायकशब्दोत्तरग्रहपर्य्यायकशब्देन भगस्योक्तत्वात्। यथा,—
"स्वपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो
पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव
मनुम्॥"
इति कर्पूरस्तवः॥
जन्मलयावधिसप्तमस्थानम्। तत्तु जायास्थानम्। यथा,—
"सूर्य्यात्मजान् क्रियतृषश्चगजीकुलीरान्त्यभूदिवङ्गीन्द्रयतिथिशरान् सप्तविंशांश्च विंशान्।
अंशानेतान् वदति यवनज्ञान्यतुङ्गान् सुतुङ्गान्
तानेवांशान् मदनभवनेष्वाह नीचान् सुनीचान्॥"
इति दीपिकायां मदनभवनशब्ददर्शनात्॥

मदनावस्था, स्त्री, (मदनस्यावस्था।) कामावस्था। सा तु उद्वेगरूपा। विरह इति यावत्। यथा। ततः प्रविशति मदनावस्थो राजा निःश्वस्य।
"जाने तपसो वीर्यं सा बाला प्रार्थयतीति मे
विदितम्।
न च निम्बादिव सलिलं निर्वर्तते मे ततो हृदयम्॥"
इत्यभिज्ञानशाकुन्तले ३ अङ्कः॥ मदनावस्य इति राज्ञोऽत्र उद्वेगरूपा पञ्चमी कामावस्था। यदाह भरतः। उद्वेगः पञ्चमः प्रोक्त इति। सचिन्तमिति केनोपायेन मम शकुन्तलालाभो भविष्यति। इति तट्टीका॥

मदनी, स्त्री, (माद्यति अनया इति। मद्+करणे ल्युट्। स्त्रियां ङीप्।) सुरा। इति हारावली॥ कस्तूरी। अतिसुरक्तकः। इति राजनिर्घण्टः॥

मदनेच्छाफलः, पुं, (मदनेच्छां फलति जनयतीति अच्।) बहुरसालः। इति राजनिर्घण्टः॥

मदनोत्सवः, पुं, (मदनाय उत्सवः।) उत्सवविशेषः। होलाका इति ख्याता। तत्पर्य्यायः। सुवसन्तकः २। इति हारावली॥

मदनोत्सवा, स्त्री, (मदनाय उत्सवो यस्याः।) स्वर्गवेश्या। इति शब्दरत्नावली॥

मदप्रयोगः, पुं, (मदस्य प्रयोगः।) करिणां मदोद्गमः। तत्पर्य्यायः। यक्षारमरः। इति त्रिकाण्डशेषः॥

मदभञ्जिनी, स्त्री, (मदं उन्मत्ततां भनक्ति दूरीकरोतीति। मद+भनज्+"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।" ३। १। १३४। इति णिनिः। स्त्रियां ङीप्।) घृतमण्डली। इति शब्दचन्द्रिका॥ (गुणादयोऽस्याः घृतमण्डीशब्दे ज्ञातव्याः॥)

मदयन्तिका, स्त्री, (मदयन्ती+ततः कन् टाप्। पूर्ब्बह्रस्वश्च।) मल्लिका। इति शब्दरत्नावली॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये।
"त्रिफलात्वक् त्रिकटुका सुरसा मदयन्तिका।
वायस्थारगवधानाश्च तुलां कुर्य्यात् पृथक् पृथक्॥")

मदयन्ती, स्त्री, (मद्+झच्+ङीप्।) वनमल्लिका। इति रत्नमाला॥ काटमल्लिका इति भाषा॥ मल्लिका। इतिराजनिर्घण्टः॥ (तथाचास्याः पर्य्यायो यथा,—
"मल्लिका मदयन्ती च शीतभीरुश्च भूपदी।"
इतिभावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"मदयन्त्यङ्गिजः काश्यस्तद्वत् समधुशर्करः।"
इति च वैद्यकचक्रपाणिसंग्रहे रक्तपित्ताधिकारे॥)

मदयित्नु, स्त्री, (मदयतीति। मद्+णिच्।
"स्त्रनिहृधिषुधिगृदिसदिभ्यो ऽइत्नुच्।" उणा० ३। २६। इति इत्नुच्। "अयामन्ताक्षाय्येत्नुष्णुहः।" ६। ४। ५५। इति ऐरयादेशः।) मद्यम्। इति मेदिनी। ने, २०२॥

मदयित्नुः, पुं, (मदयतीति। मद्+णिच्। "स्त्रनीति।" उणा०। २। २६। इति इत्नुच्। ऐरयादेशश्च।) कामदेवः। औषिकः। इति शब्दरत्नावली॥ मदयुक्तः। इति मेदिनी। ने, २०२॥ मेघः। इति त्रिकाण्डशेषः॥

मदविह्वलः, पुं, (मदेन विह्वलश्चलितमनाः।) मत्तहस्ती। इति शब्दचन्द्रिका॥

मदशाकः, पुं, (मदकरः शाकोऽस्य।) उपोदकी। इति राजनिर्घण्टः॥

मदसारः, पुं, (मदं सारयति दूरीकरोति। इति मद+सृ+णिच्+अण्।) तूलवृक्षः। इति राजनिर्घण्टः॥

मदहस्तिनी, स्त्री, (मदेन हस्तिनीव।) महाकरञ्जः। इति राजनिर्घण्टः॥

मदहेतुः, पुं, (मदस्य हेतुः कारणम्।) धातकी। इति वैद्यकम्। मत्तताकारणञ्च। (मदरोगस्य हेतुः यथा,—
"यदा तु रक्तवाहीनि रससंज्ञावहानि च।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता मलाः॥
मलिनाहारशीलस्य रजोमोहावृतात्मनः।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा॥
मदमूर्च्छाः संन्यासास्तेषां विद्याद्विचक्षणः।
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु॥"
इति चरके सूत्रस्थाने चतुर्विंशेऽध्याये॥)

मदस्थलं, क्ली, (मदस्य स्थलम्।) मदस्थानम्। यथा, शब्दरत्नावली।
"अवदंशः सुरापानं शुक्तापानं मदस्थलम्।"

मदस्थानं, क्ली, (मदस्य स्थानम्।) मद्यपानस्थानम्। तत्पर्य्यायः। शुक्तापानम्२। इत्यमरः।२।१०।४९।

मदाढ्यः, पुं, (मदेन मदजनकरसेन ताड्यते खातेन आढ्यः युक्तः।) तालवृक्षः। इति राजनिर्घण्टः॥ (गुणादिविवृतिरस्य तालशब्दे ज्ञातव्या॥) मदयुक्ते, त्रि।

मदाढ्या, स्त्री, (मदेन आढ्या।) लोहितभिण्टी। इति शब्दचन्द्रिका॥

मदातङ्कः, पुं, (मदजनितः आतङ्कः रोगः।) मदात्ययरोगः। इति राजनिर्घण्टः॥

मदात्ययः, पुं, (मदेन अत्ययो नाशोऽस्मुखताच्च।) मद्यपानादिजन्यरोगविशेषः। तत्पर्य्यायः। मदातङ्कः२ व्यापन्नात्ययः३ मदव्याधिः४ मदः५। इति राजनिर्घण्टः॥ अथ मदात्ययादीनां निदानान्याह।
"विषस्य ये गुणा दृष्टाः सन्निपातप्रकोपनाः।
त एव मद्ये दृश्यन्ते विषे तु बलवत्तराः॥
तस्मादविधिपीतेन तथा मात्राधिकेन च।
युक्तेन चाहितैरन्नैरकाले सेवितेन च॥
मद्येन खलु जायन्ते मदात्ययसुखा गदाः॥"
अविधिप्रयुक्तं मद्यं विकारान्तरमप्युत्पादयतीत्याह।
"निभक्तमेकान्तत एव मद्यं
निषेव्यमाणं मनुजेन नित्यम्।
उत्पादयेत् कष्टतमान् विकारा-
नुत्पादयेच्चापि शरीरभेदम्॥
एकान्ततो नैरन्तर्य्येण विकारान् मदात्ययादीन्।
शरीरस्य भेदं नाशम्॥*॥ मदात्ययादीनां हेत्वन्तरमप्याह।

"क्रुद्धेन भीतेन पिपासितेन
शोकाभितप्तेन कृशेन चापि ।
कार्यश्रमाराध्वपरिक्षतेन
वेगावरोधाभिहतेन चापि ॥
अत्यन्तरूक्षावततोदरेण
साजीर्णसुप्तेन तथावशेन ।
उन्नाभितप्तेन च सेव्यमानं
करोति मद्यं विविधान् विकारान् ॥"

तानेव विकारान् विदृणोति ।

"पानात्ययं परमदं पानाजीर्णमथापि वा ॥"

पानविकारान् विदृणोति ।

"पानविभ्रमसुप्तस्य तेषां वक्ष्यामि लक्षणम् ।"

तत्र मदात्ययस्य सामान्यं लक्षणमाह ।

"शरीरदुःखं बलवत् प्रमोहो हृदयव्यथा ।
अरुचिः प्रततं हृल्लासः क्लमः शीतोपलक्षणः ॥
शिरःपार्श्वास्थिसन्धीनां वेदना विद्यते यथा ।
जायतेऽतिबलात् तृष्णा स्फुरणं वेपनं श्रमः ॥
उरोविबन्धः कासश्च श्वासो हिक्का प्रजागरः ।
शरीरकम्पः कर्चाचिसुखरोगाश्चिकग्रहः ॥
छर्दिर्विड्भेदावृत्तक्लेदो वातपित्तकफात्मकः ।
भ्रमः प्रलापो रूपाणामसतां चैव दर्शनम् ॥
लब्धभक्षततापर्वपांसुभिश्चावपूरितम् ।
प्रधर्षणं विहङ्गैश्च भ्रान्तचेताः स मन्यते ॥
आकुलानामग्रस्तानां स्वप्नानां दर्शनानि च ।
मदात्ययस्य रूपाणि सर्व्वाण्येतानि लक्षयेत् ॥"

अथ मदात्ययस्य वातिकस्य निदानमाह ।

"स्त्रीभाराभयभाराध्वकर्म्मभिर्योऽतिकर्षितः ।
रूक्षाल्पप्रमिताशी च यः पिबत्यतिमात्रया ॥
रूक्षं परिक्षतं मद्यं निशि निद्रां निहन्ति च ।
करोति तस्य तच्छीघ्रं वातप्रायं मदात्ययम् ॥"

तत् मद्यम् । * । अथ तस्य लक्षणमाह ।

"हिक्काश्वासशिरःकम्पपार्श्वमूलप्रजागरैः ।
विद्याद्वातकृतप्रायं वातप्रायं मदात्ययम् ॥"

अथ पैत्तिकस्य निदानमाह ।

"तीक्ष्णोष्णं मद्यमद्यश्च योऽतिमात्रं निषेवते ।
अम्लोष्णतीक्ष्णभोजी च क्रोधनोऽत्यातपप्रियः ।
तस्योपजायते तीव्रः पित्तप्रायो मदात्ययः ॥"

अथ तस्य लक्षणमाह ।

"तृष्णादाहज्वरक्लेदमोहातीसारविभ्रमैः ।
विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम् ॥"

अथ श्लैष्मिकस्य मदात्ययस्य निदानमाह ।

"मधुरस्निग्धगुर्वाशी यः पिबत्यतिमात्रया ।
अव्यायामदिवास्वप्नश्लेष्माश्यनसुखे रतः ।
मदात्ययं कफप्रायं स नरो लभते ध्रुवम् ॥"

अथ तस्य लक्षणमाह ।

"छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः ।
विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम् ॥"

अथ सान्निपातिकस्य मदात्ययस्य निदानं लक्षणञ्चाह ।

"त्रिदोषहेतुभिः सर्व्वैः सर्व्वैर्लिङ्गैर्मदात्ययः ॥"

अथ परमदमाह ।

"शैत्योष्ण्ययोरङ्गयुक्ता विरसास्रता च
विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च ।
लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा
स्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥"

तन्द्रिस्तन्द्रा । * । पानाजीर्णमाह ।

"आध्मानसुप्तमथवोद्गिरणं विदाहः
पाने त्वजीर्णमुपगच्छति लक्षयानि ।"

उद्गिरणं वान्तिः उद्गारो वा । पीयत इति पानं मद्यम् । * । पानविभ्रममाह ।

"कृष्णाश्वतोदकफसंस्रवकण्ठधूम-
मूर्च्छाविमोहज्वरगुरोरुजनप्रदेहाः ।
द्वेषः सुरान्नविकृतेषु च तेषु तेषु
तं पानविभ्रमसुखन्त्यखिलेषु धीराः ॥"

कण्ठधूमः कण्ठादूमनिर्गम इव । प्रदेहः कफेन लिप्तास्यता । द्वेषः सुरान्नविकृतेषु सुराविकारेषु अन्नविकारेषु च द्वेषः ।

अखिलेषु मद्यविकारेषु । * । असाध्यान् मदात्ययादीनां लक्षणमाह ।

"दीप्तोत्तरोष्ठमतिपीतमसन्दाहं
तैलप्रभास्यमतिपानहतं त्यजेच्च ।
जिह्वोष्ठदन्तमसितस्त्रवधापि नीलं
पीतं च यस्य नयने रुधिरप्रभे च ॥
हिक्का ज्वरो वमथुवेपथुपार्श्वमूलाः
कासश्रमावपि च पानहतं त्यजेत्तम् ॥"

अथ मदात्ययादीनां चिकित्सा ।

"मदोत्थानानु रोगाणां मद्यमेव हि भेषजम् ।
यथा दहनदग्धानां दहनस्वेदनं हितं ।
मिथ्यातिहीनमद्येन यो व्याधिरुपजायते ।
समेनैव निपीतेन मद्येन स हि शाम्यति ॥
बीजपूरकदाडिमकोलदाडिमसंयुतम् ।
यवानीहपुषाजाजीशुद्धवेरावचूर्णितम् ॥
सक्षौद्रैः शुक्तभिर्युक्तमवदंशैश्चिरोत्थितम् ।
दद्यात् सलवणं मद्यं पैत्तिकं वातशान्तये ॥
मद्यं सौवर्चलशोषयुक्तं किञ्चिज्जलान्वितम् ।
जीर्णमद्याय दातव्यं वातपानात्ययापहम् ॥
चव्यं सौवर्चलं हिङ्गु पूरकं विश्वदीप्यकम् ।
चूर्णं मद्येन पातव्यं पानात्ययरुजापहम् ॥
लावतित्तिरिदक्षाणां रसेन शिखिनामपि ।
पक्षिणां शृगमत्स्यानामानूपानां तथोदनैः ॥
स्निग्धोष्णलवणाम्लेन वेसवारेण भुक्तवते ।
स्निग्धैर्गोधूमिकैरन्नैर्वातमद्यात्ययं जयेत् ॥
नारीणां यौवनोन्मत्तां निर्दयैरुपगूहनैः ।
श्रोण्यूरुकुचभारैश्च संरोधोच्छ्वासखप्रदैः ॥
शयनाच्छादनैरुष्णैरुष्णोद्यान्तर्गृहैः सुखैः ।
उत्पन्नो मारुतात् शीघ्रं प्रशाम्यति मदात्ययः ॥

पित्तपानात्यये योज्याः सर्व्वतश्च क्रिया हिमाः ।
सितामाक्षिकसंयुक्तं मद्यमर्द्धोदकं पिबेत् ॥
मद्यं खर्ज्जूरमृद्वीकापरूषकरसैर्युतम् ।
सदाडिमरसं शीतं शुक्तभिश्चावचूर्णितम् ॥
सशर्करं वा माध्वीकं संयुक्तमधवापरम् ।
दद्यात् बहूदकं काले पातुं पित्तमदात्यये ॥

शुष्कान् कपिञ्जलानेणान् लावानसितपुच्छकान् ।
मधुराम्लान् प्रयुञ्जीत भोजने शालियष्टिकान् ॥
पटोलयूषमिश्रं वा छागलं कल्पयेद्रसम् ।
सतीलं सुद्रमिश्रं वा दाडिमामलकान्वितम् ॥
द्राक्षामलकखर्ज्जूरपरूषकरसेन च ।
कल्पयेत् तर्पणान् यूषान् रसांश्च विविधान्मतान् ॥
शीतानि चान्नपानानि शीतगृह्यासनानि च ।
शीतवातजलस्पर्शाः शीतान्युपवनानि च ॥
सौमपद्मोत्पलानाञ्च मणीनां मौक्तिकस्य च ।
चन्दनोदकशीतानां सुधांशुशीतलाः ॥
रूक्षतर्पणसंयुक्तं यवानीशोषसंयुतम् ।
यवगोधूमकं चान्नं रूक्षयूषेण भोजयेत् ॥
कुलत्थानाञ्च शुष्काणां मूलकानां रसेन वा ।
प्रभूतकटुसंयुक्तं यावान्नं वा प्रदापयेत् ॥
छागमांसरसं रूक्षमन्नं वा जाङ्गलं रसम् ।
शोषयूषं मनागम्लं पिबेत् कफमदात्यये ॥
स्थाल्यामथ कपाले वा भृष्टं क्षत्वा तु नीरसम् ।
कट्फलवर्गं मांसं खादेत् कफमदात्यये ॥
पाचकद्रव्ययुक्तेन मद्येनोल्लेखनं मतम् ।
मदात्यये कफोद्भूते लङ्घनञ्च यथाबलम् ॥
यदिदं कर्म्म निर्दिष्टं वातपित्तकफान् प्रति ।
सर्व्वेषु सर्व्वमेवैतत् प्रयोक्तव्यं चिकित्सकैः ॥"

इति भावप्रकाशः ॥

गरुडपुराणोक्तमदात्ययनिदानादिकं तत्रैव १६० अध्याये द्रष्टव्यम् ॥ (तथाचास्य सकारणलक्षणचिकित्सादिकं यथा,—

"हालाहलाहिसदृशं भजते वियोगात्
सेयं न ह्रियमशुभैः कथितं मुनीन्द्रैः ।
लज्जा वमिः श्रवणमोहनदाहलज्जा
संजायतेऽतिसरणं विकलेन्द्रियत्वम् ॥
ये नित्यसेवनादुष्टा मद्यस्य मनुजा भृशम् ।
विषमाहारसदृशी सुरा मोहनकारिणी ॥
यथा विषं प्राणहरं वियोगाद्
योगेन तच्चाप्यहितं वदन्ति ।
तथा सुरा योगयुता हिता स्या-
दयोगतश्चारभतेऽतिकष्टम् ॥
क्षुधातुरे लङ्घनाक्रान्ते सुरा वा भोजनं विना ।
न च क्षीणैर्विना भक्ता विनाहारातिपानकम् ॥
अत्यग्नेरप्यजीर्णेऽपि सुरा पीता रजाकरी ।
यस्य प्रलपनञ्चापि न च वातमदात्ययः ।
दाहमूर्च्छातिसारश्च ज्वरः पित्तमदात्यये ॥
छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवम् ।
शीतता च प्रतिश्याय: कफजे च मदात्यये ।
त्रिषु दोषेषु समता लिङ्गैर्येषामुपक्रमः ।
स त्रिदोषसमुद्भूतो मदमूर्च्छा भिषग्वर ! ॥
वमनञ्च प्रशस्तञ्च निद्रासंसेवनं पुनः ।
क्षारं हितं पयःपानं भोजने सगुडं दधि ॥
मस्तुखड्डं सखर्ज्जूरं मृद्वीका दाडिमाम्बिका ।
आमला च परूषञ्च लेह्यो हन्ति मदात्ययम् ॥
द्राक्षामलकखर्ज्जूरपरूषकरसेन वा ।
कल्कयेत् पयसा तत्तु पानं सर्व्वमदात्यये ॥

पथ्या क्वाथेन संयुक्तं पयःपानं मदात्यये ।"

इति मदात्ययचिकित्सा ॥

अथ पूगीफलमदात्ययचिकित्सारभ्यते ।

"पूगीफलमदे कम्पो मोहो मूर्च्छा भ्रमस्तमः ।
प्रलेपो विधुरत्वञ्च लालास्रावश्च जायते ॥
भ्रमक्लमपरीतत्वं विज्ञेयं पूगमूर्च्छिते ।
मानवो लक्षणैरेभिर्ज्ञेयः पूगविमूर्च्छितः ॥
तस्य घृतं जलं पीतं वस्तिघातहितं भवेत् ।
शर्करामक्षिके देया सुरा वा शर्करान्विता ॥
कोद्रवाणां भवेन्मूर्च्छा देयं क्षीरं सुशीतलम् ।
धुस्तूरकमदे देयं शर्करासहितं दधि ॥
फलिनी करवीरश्च मोहिनी मदयन्तिका ।
अन्येषामपि कन्दानां वमनञ्चाशु कारयेत् ॥
पाययेत् शर्करायुक्तं क्षीरं वा दधि शर्कराम् ।"

इति श्रीमहर्षिभेलविरचिते हारीतोत्तरे चतुर्थस्थाने मदात्ययचिकित्सानाम सप्तदशोऽध्यायः ॥)

मदाम्बातः, पुं, (मदाय मत्ततोद्रेकाय आम्बायते वाद्यते स्तेति । आ + म्बा + कर्म्मणि क्तः ।) गजघण्टा । इति हारावली । २०४ । हातीर उपरेर घण्टा इति भाषा ॥

मदाम्बरः, पुं, (मदो दानवारि अम्बरमिवाच्छादकत्वात् ।) मत्तहस्ती । इति त्रिकाण्डशेषः ॥

मदारः, पुं, (माद्यति मत्तो भवतीति । मद् + "अङ्गिमदिमन्दिभ्य आरन् ।" उणा० । ३ । १३४ । इति आरन् ।) हस्ती । धूर्त्तः । इति विश्वः ॥ शूकरः । कासुकः । गन्धभेदः । मत्तहस्ती । वृक्षभेदः । इत्युणादिकोषः ॥

मदार्म्भेदः, पुं, (मदार्म्भं मदजन्यं अर्म्भं नेत्ररोगविशेषं दलतीति । दा + कः ।) पलक्रमत्स्यः । इति त्रिकाण्डशेषः ॥

मदालापी, [न्] पुं, (मदेन मत्ततया आलपतीति । आ + लप् + णिनिः ।) कोकिलः । इतिशब्दमालाः ॥

मदाङ्कः, पुं, (मदो मदजमद आङ्काख्या यस्य । बहुः ।) कस्तूरी । इति त्रिकाण्डशेषः ॥ (कस्तूरीशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

मदिरः, पुं, (मद् + किरच् ।) रक्तखदिरः । इति शब्दचन्द्रिका ॥ मदकरे, त्रि । यथा, ऋग्वेदे । ५ । ४१ । ११ ।

"य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु ॥"

"मदिरं मदकरं मधु ।" इति तद्भाष्ये सायणः ।)

मदिरा, स्त्री (माद्यतीति । मद् + किरच् । अजादित्वात् टाप् ।) मत्तलक्षनः । इति शब्दरत्नावली ॥ (यथा, श्राद्धतत्त्वे । ३ । ५ ।

"यदि मदिरायतनयनां
तामधिरुह्य प्रहरतीति ।"

माद्यत्यनयेति । मद् + "इषि मदीति । उणा० । १ । ५२ । इति किरच् ।) मादकद्रव्यविशेषः । मद् इति भाषा ॥ (यथा,—

"हिक्का-श्वास-प्रतिश्याय-कास वर्च्चोग्रहारुचौ ।
वन्ध्यागदविबन्धेषु वातघ्नी मदिरा हिता ॥"

इति चरके सूत्रस्थाने २७ अध्यायः ॥ यथाच भावप्रकाशे । ४ । २४ ।

"मीता मोहमयीं प्रमोदमदिरासुन्मत्तभूतं जगत् ।")

तत्पर्य्यायः । सुरा २ हलिप्रिया ३ हाला ४ परिस्रुत् ५ वरुणात्मजा ६ गन्धोत्तमा ७ प्रसन्ना ८ हरा ९ कादम्बरी १० परिस्रुता ११ कश्यम् १२ मद्यम् १३ । इत्यमरः । २ । १० । ४० ॥ मानिका १४ । इति शब्दरत्नावली ॥ कपिञ्जी १५ गन्धमादनी १६ माधवी १७ कर्त्तोयम् १८ मदः १९ कापिशायनम् २० । इति जटाधरः ॥ वारुणी २१ मत्ता २२ सीता २३ चपला २४ कामिनी २५ प्रिया २६ मदगन्धा २७ माध्वीकम् २८ मधुरा २९ सन्धानम् ३० आसवः ३१ अन्नता ३२ वीरा ३३ मेधावी ३४ मदनी ३५ सुप्रतिभा ३६ मनोज्ञा ३७ विधाता ३८ मोदिनी ३९ हली ४० गुणारिष्टम् ४१ सरकः ४२ मधूलिका ४३ मदोत्कटा ४४ महानन्दा ४५ । इति राजनिर्घण्टः ॥ सीधुः ४६ मैरेयम् ४७ वलवल्लभा ४८ । इति भावप्रकाशः ॥ कारवम् ४९ । तत्त्वम् ५० इति कैवल्यतन्त्रम् ॥ मदिरा ५१ परिस्रुता ५२ कल्यम् ५३ स्वादुरसा ५४ शूका ५५ हारकूरम् ५६ माहौकम् ५७ मदना ५८ देवहूता ५९ कापिशम् ६० अश्विना ६१ । इति हेमचन्द्रः । ३ । ५६६ ॥ सा द्वादशविधा यथा,—

"माध्वीकं पानसं द्राक्षं खार्জ্জूरं तालमैक्षवम् ।
मैरेयं माक्षिकं टाङ्कं मधूकं नारिकेलजम् ।
सुखमन्नविकारोत्थं मद्यानि द्वादशैव च ॥"

इति जटाधरः ॥

अस्याः सामान्यगुणाः । सुमधुरत्वम् । कफमारुतनाशनत्वम् । लघुत्वम् । पुष्टिकरत्वम् । हृद्यत्वम् । शारकत्वम् । मदावहत्वञ्च ॥ ॥ धातकीरसगुडादिकृता मदिरा गौडी । तद्गुणा यथा । तीक्ष्णत्वम् । उष्णत्वम् । मधुरत्वम् । वातवह्निघ्नत्वम् । पित्तबलकारित्वम् । दीपनत्वम् । पथ्यत्वम् । कान्तिदृष्टिकारित्वञ्च ॥ पुष्पद्रवादिमधुसारमयी मदिरा माध्वी । तद्गुणा यथा । मधुरत्वम् । नातिशुक्लत्वम् । पित्तवातनाशित्वम् । पाण्डुकामलगुल्मार्शःप्रमेहशूलनत्वञ्च ॥ ॥ विविधधान्यजाता मदिरा पैष्टी । तद्गुणा यथा । कटुत्वम् । अम्लत्वम् । तीक्ष्णत्वम् । गौडीसमत्वम् । वातहरत्वम् । कफकरत्वम् । ईषत्पित्तकरत्वम् । मोहनत्वञ्च ॥ तालादिरसनिर्य्यासकृता मदिरा सैन्धी हाला च । तद्गुणा यथा । शीतलत्वम् । कषायत्वम् । अम्लत्वम् । पित्तहरत्वम् । वातदाहत्वञ्च ॥ ॥ सर्व्वद्रव्यदृष्टनिर्य्यासरूपमदिरागुणाः । शीतलत्वम् । गुरुत्वम् । मोहनत्वम् । बलत्वम् । हृद्यत्वम् । हृद्यासन्तापनाशकत्वञ्च ॥ ॥ नानाद्रव्यकदम्बकृता मदिरा कादम्बरी । तद्गुणा यथा । सुमधुरत्वम् । पित्तश्लेष्महरत्वम् । मदकारित्वञ्च ॥ ॥ ऐक्षवमदिरागुणाः । स्निग्धत्वम् । मदोत्कटत्वञ्च ॥ ॥ यवधान्यकृतमदिरागुणाः । गुरुत्वम् । विष्टम्भदायकत्वञ्च ॥ शर्करामातकीतोयकृतमदिरागुणाः । शीतत्वम् । मनोहरत्वञ्च ॥ ॥ शार्करमद्यगुणाः । हृद्यत्वम् । दीपनत्वम् । मोहनत्वञ्च । इति नानामद्यगुणाः ॥ ॥ ऋतुविशेषे पेयमदिरा यथा,

"गौड़ी तु शिशिरे पेया पैष्टी हेमन्तवर्षयोः ।
शरद्ग्रीष्मवसन्तेषु माध्वी शस्ता न चान्यथा ॥
कादम्बरीशर्करजादिमद्यं
सुशीतलं हृद्यकरं मदाढ्यम् ।
माध्वीसमं स्यात् श्लथदृष्टजातं
मद्यं सुशीतं गुरु तर्पणञ्च ॥

अन्यथा कुरुते पानं मद्यं सन्तापशोषदम् ।
अम्लदोषमदात्ययादिकारकं मूर्च्छनञ्च यत् ॥"

नवजीर्णमद्ययोर्गुणाः ।

"मद्यं नवं सर्व्वविकारहेतुः
सर्व्वन्तु वातादिकदोषदायि ।
जीर्णन्तु सर्व्वं सकलामयघ्नं
धूर्त्तप्रदं हृद्यकरञ्च दीपनम् ॥"

अन्यच्च ।

"पर्य्युषितमद्यमेलनमम्लं वा पिच्छिलं विगन्धं वा ।
दोषावहमविशेषान्मद्यं हृद्यं विवर्ज्जयेत् ॥
मद्यप्रयोगं कुर्व्वन्ति शूद्रादिषु महर्षिषु ।
द्विजेष्विभिषु न शस्तं यद्यप्युच्चीवयेत् स्तवम् ॥"

इति मद्यवर्ज्यावर्ज्ये ॥ ॥

"अन्ये द्वादशधा मद्यभेदानाहुर्मनीषिणः ।
उक्तस्यान्तर्भवन्तीति नान्येषां पृथगीरितम् ॥"

इति राजनिर्घण्टे मद्यप्रकरणम् ॥

अथ मतान्तरे मद्यस्य लक्षणं गुणाश्च ।

"पेयं यन्मादकैर्लोकैस्तन्मद्यमभिधीयते ।
यथारिष्टं सुरा सीधुरासवाद्यमनेकधा ॥
मद्यं सर्व्वं भवेदुष्णं पित्तकृत् वातनाशनम् ।
भेदनं शीघ्रपाकञ्च रूक्षं कफहरं परम् ॥
अम्लञ्च दीपनं रुच्यं पाचनं चाशुकारि च ।
तीक्ष्णं रूक्षञ्च विशदं व्यवायि च विकाशि च ॥"

अथारिष्टलक्षणं गुणाश्च ।

"पक्वौषधाम्बुसिद्धं यन्मद्यं तत् स्यादरिष्टकम् ।"

अरिष्टं मद्यमिति लोके । यथा, द्राक्षारिष्टम् । दशमूलारिष्टम् । बब्बूलारिष्टमिति ।

"अरिष्टं लघुपाकेन सर्व्वं तच्च गुणाधिकम् ।
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥"

अथ सुराया लक्षणं गुणाश्च ।

"शालिषष्टिकपिष्टादिकृतं मद्यं सुरा स्मृता ।
सुरा गुर्व्वी बलघ्न्यपुष्टिभेदःकफप्रदा ।
याहिनी शोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् ॥"

अथ सुराभेदो वारुणी तस्या लक्षणं गुणाश्च ।

"पुनर्नवाग्निलापिप्पलीभिर्विहिता वारुणी स्मृता ।
संहितेक्षालखर्জ্জूररसैर्या सापि वारुणी ॥
सुरावद्गारुणी लघ्वी पीनसाध्मानमूलनुत् ॥"

सुरातो भेदार्थं लक्ष्यते ॥ ॥

अथ सीधुद्वयस्य लक्षणं गुणाश्च ।

"इक्षोः पक्वे रसे सिद्धः सीधुः पक्वरसश्च सः ।

आमेक्षीरेव यः सीधुः स च शीतरसः स्मृतः ॥ सीधुः पक्वरसः श्रेष्ठः खरामिवलवर्गकृत् । वातपित्तकरो दृष्टः स्नेहनो रोचनो हरेत् ॥ विबन्धमेदःश्लेष्मार्शःश्लीपोदरकफामयान् । तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ॥" अथासवस्य लक्षणं गुणाश्च । "यदपक्वौषधामुभ्यां सिद्धं मद्यं स आसवः । आसवस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥" अथ नवपुराणमद्यगुणाः । "मद्यं नवमभिष्यन्दि विदोषजननं सरम् । अकृच्छ्रं दृंहणं दाहि दुर्गन्धं विशदं गुरु ॥ जीर्णं तदेव रोचिष्णु क्षमिस्नेहानिलापहम् । कृच्छ्रं सृजति गुणवल्लघुस्नेहविशोधनम् ॥" अथ सात्विकानां मद्यं पिबतां चेष्टाविशेषाः । सात्विके गीतहास्यादि राजसे साहसादिकम् । तामसे निष्कर्मशीलं निद्राश्च मदिराचरेत् ॥" आचरेत् कुर्य्यात् । "विधिना मात्रया काले हितैरन्नैर्यथाबलम् । प्रकृतौ यः पिबेन्मद्यं तस्य स्यादमृतं यथा ॥ किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम् । अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतम् ॥" अथ मद्यगन्धनाशनोपायः । "सुस्नेहबालगद्जीरकधान्यकैला- यष्ट्याह्वयैर्न सदृशं वाचमभिजनक्ति । स्वाभाविकं सुखजसृज्भवति पूतिगन्धं गन्धश्च मद्यलशुनादिभवश्च नूनम् ॥" इति भावप्रकाशः ॥ अपि च । "प्रकृत्या मद्यमनुष्यमन्धस्योक्तं विपाकतः । सर्व्वसामान्यतस्तस्य विशेष उपदेक्ष्यते ॥ क्षुद्राणां सक्तसूत्राणां यवश्यश्र्वोविकारिणाम् । सुरा प्रशस्ता वातेषु रक्तपित्तक्षयेषु च ॥ प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी । शूलप्रवाहिकाटोपकफवातार्शसां हिता ॥" जगलो व्याहिरूक्षोष्णः श्लेष्मघ्नो भक्तपाचनः । श्लेष्मार्शोमेहगण्डीदोषान् हन्त्यरिष्टः कफामयान्॥" अरिष्टो मद्यविशेषः ॥ "प्रायशोऽभिनवं मद्यं गुरु दोषलमीरितम् । स्रोतसां श्लेष्मणं जीर्णं दीपनं लघु रोचनम् ॥ हर्षणं प्रीणनं बल्यं मद्यं शोकश्रमापहम् । प्रागल्भ्यप्रतिभापुष्टिवीर्य्यतुष्टिस्मरप्रदम् ॥" इति राजवल्लभः ॥ अन्यत् मद्यशब्दे द्रष्टव्यम् ॥ (वसुदेवपत्नी । यथा, श्रीमद्भागवते । ९ । २४ । ४५ । "पौरवी रोहिणी भद्रा मदिरा रोचना इला । देवकीप्रसुखाश्चासन् पत्न्या आनकदुन्दुभेः ॥") मदिराक्षी, स्त्री, (मदिरे इव अक्षिणी यस्याः इति अक्षि + "अक्ष्णोऽदर्शनात् ।" ५।४।७६ । इति अच् । स्त्रियां ङीप् ।) मत्तलोचना । यथा,— "अविदितसुखदुःखं निर्गुणं वस्तु किञ्चि- ज्जड़मतिरिह कश्चिन्मोच इत्याचचक्षे। मम तु मतमनङ्गक्षेरतारल्यघूर्ण- न्मदकलमदिराक्षीनीविमोक्षो हि मोक्षः ॥" इत्युद्भटः ॥ (पुं, विराटराजस्य भ्राता । यथा, महाभारते । ४ । ३० । ११—१२ । सवर्णावसगर्भन्तु कवचं तप्तकाञ्चनम् । विराटस्य प्रियो भ्राता शतानीकोऽभ्यहारयत् ॥ सर्व्वपारशवं वर्म्म कल्याणपटलं दृढम् । शतानीकादवरजो मदिराक्षोऽभ्यहारयत् ॥) मदिराग्रहं, क्ली, (मदिरायाः गृहम् ।) मद्यस्य गृहम् । मद्यसन्धानगृहम् । तत्पर्य्यायः । गञ्जा२ इत्यमरः । २ । २ । ८ ॥ गुञ्जा ३ । यथा,— "भाण्डागारे विदुर्गञ्जं खनौ खञ्जा सुराग्रहे । मद्यभाण्डे स्मृता गुञ्जा गुञ्जा स्यात् काक- कुक्षिका ॥" इति भरतधृतहलायुधचन्द्रः ॥ मदिरासखः, पुं, (मदिरायाः सखा सगन्धत्वादिति। मदिरा + सखि + "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) आम्रवृक्षः । इति जटाधरः ॥ मदिरा, स्त्री, (मदोऽस्या अस्तीति। मद् + इनिः। इयमतिग्रन्थेन मादनीति । इष्ठन् । इनोलोपः।) मदिरा । इति हेमचन्द्रः । ३ । ५६६ ॥ मदी, स्त्री, (मृद्नाति चूर्णीकरोति क्षारक्षेत्र- लोष्टादिकमिति । मृद्-इन् । क्षादिकारादिति पक्षे ङीष् । पृषोदरादित्वात् साधुः ।) चषक- वस्तु । इति नानार्थे हेमचन्द्रः ॥ क्षपकवस्तु । इति वैश्यवर्गे जटाधरः ॥ मदीयं, त्रि, मम इदम् । आमार इति भाषा ॥ अस्मच्छब्दादीयप्रत्यये एकवचनार्थे मदादेशेन निष्पन्नमिदम् । इति सुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्सागरे । २८ । ६० । "हे देवतास्पर्शेन मदीयेनेव भूपतिः ॥") मदोत्कटः, पुं, (मदेन दानवारिणा उत्कटः ।) मत्तहस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, महाभारते । ३ । ६५ । ८ । "ते तान् ग्राम्यगजान् दृष्ट्वा सर्व्वे वनगजास्तदा। समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ॥") मदोत्कटा, स्त्री, (मदेन मत्ततया उत्कटः उद्भटो जनः अस्याः । स्त्रियां टाप् ।) मदिरा । इति राजनिर्घण्टः ॥ (मदेन मद्यादिना उत्- कटः । मदोन्मत्ते, त्रि ।) मदोद्धतः, त्रि, (मदेन मत्ततया उद्धतः ।) मत्तः । इति जटाधरः ॥ (यथा, वेणीसंहारे १ अङ्के । "सत्यपत्या मधुरगिरः प्रसादिताशा मदोद्धता- रम्भाः ॥") मदोद्या, स्त्री, (मदेन उद्या ।) नारी । इति शब्द माला ॥ (मदोद्धते, त्रि । यथा, रघौ । ४।२२। "मदोद्याः करिणस्तस्य सरितां कुलसुहृदाः ।") मद्गुः, पुं, (मज्जतीति। मस्ज + "भृञ्मृशीतृ- चरित्वरितघनिनिमिमसृजिभ्य उः।" उणा० । १ । ७ । इति उः ।) पक्षिविशेषः । इत्यमरः । २ । ५ । ३४ ॥ पानकौड़ि इति भाषा । अस्य मांसगुणाः । वायुनाशित्वम् । स्निग्ध- त्वम् । भेदकत्वम् । शुक्रकारित्वम् । रक्तपित्त- नाशित्वम् । शीतत्वञ्च । इति राजवल्लभः ॥ (पर्य्यन्नगभेदः । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ॥ "मद्गुमधिकदृष्टग्राहिका वकुग्रपूतिघासवागर- प्रभृतयः पर्य्यन्नगाः ॥") मद्गुरः, पुं, (माद्यति जलं प्राप्य हृष्यतीति। मद् + "मद्गुरादयश्च।" उणा० । १ । ४२ । इति उरच् निपातितश्च ।) मत्स्यविशेषः । इत्यमरः । १ । १० । १६ ॥ मागुर इति भाषा । (यथा । ललितविस्तरे । ३२० । ७ । "अमणो गौतमः श्यामको वत भो अमणो गौतमो मद्गुरच्छविः ।") अस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् । संग्रा- हित्वम् । शुक्लत्वम् । गुरुत्वञ्च । इति राज- वल्लभः ॥ (यथाच भावप्रकाशपूर्व्वखण्डे द्वितीय- भागे । "मद्गुरो वातकृद्ग्राही दृष्यः कफकरो लघुः ॥" वर्णग्रङ्करजातिविशेषः । यथा, महाभारते । १३ । २५।८३ । "निषादं शूद्रगुरुं सूते दासं नावोपजीविनम् ।" "मद्गून् मीनविशेषान् राति आदत्ते इति रा + कः । तम् ।" इति तट्टीकायां नीलकण्ठः ।) मद्गुरकः, पुं, (मद्गुरः + स्वार्थे कन् ।) मद्- गुरमत्स्यः । इति शब्दरत्नावली ॥ मद्गुरकी, स्त्री, (मद्गौ पक्षिविशेषे रसो यस्याः ङीप् ।) मद्गौ मत्स्यः । इति शब्दरत्नावली ॥ मद्यं, क्ली, (माद्यति जनोऽनेन । मद् + "गदमद- यमस्त्रानुपसर्गे ।" ३ । १ । १०० । इति करणे यत् ।) सुरा । इत्यमरः । २ । १० । ४० ॥ (यथा, साहित्यदर्पणे । "भिक्षो ! मांसनिषेवणं प्रकुरुषे किं तेन मद्यं विना मद्यञ्चापि तव प्रियं प्रियमहो वाराङ्गनाभिः सह । वेश्याप्यर्थरतिः कुतस्तव धनं द्यूतेन चौर्य्येण वा, एतावानपि संग्रहोऽस्ति भवतो नश्यस्य कान्त्या मतिः ॥") अस्य गुणपर्य्यायौ मदिराशब्दे द्रष्टव्यौ ॥ * ॥ तत् द्वादशविधं यथा पुलस्त्यः । "द्राक्षमाधूकं खार्ज्जूरं तालमैक्षवम् । माध्वीकं टाङ्कमाध्वीकं मैरेयं नारिकेलजम् ॥ समानानि विजानीयान्मद्यान्येकादशैव तु । द्वादशस्तु सुरा मद्यं सर्व्वेषामधमं स्मृतम् ॥" अनेन एकादशानां सुरात्वं निषेधयति मद्यशब्दो मदहेतुद्रव्यवचनः । अस्मादेव वचनात् तत्तु मद्यमात्रं सुराशब्दार्थः । यथा हारीतः । "गौड़ीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समा- चरेत्।

तप्तकृच्छ्रं पराकश्च चान्द्रायणमनुक्रमात् ।"
त्रयाणां सुरात्वे क्रमेण प्रायश्चित्तत्रयं न स्यात्।
तथा भविष्ये ।
"सुरा तु पैष्टी सख्योक्ता न तस्याक्षितरे समे।"
पैष्टीति तण्डुलविकारमात्रोपलक्षणं इतरे गौड़ीमाध्वौ अतोऽन्नविकार एव सुराशब्दस्य सख्यात् त्रिविधा सुरेति गौड़ीमाध्व्योर्गौण-सुरात्वज्ञापनार्थम्। तेन एतत्पानेऽपि महा-पातकत्वमतिदिशति यथैका तथा सर्वा इति पैष्टयां पूर्वप्रसिद्धिं दर्शयति। यथा पैष्टी सुरा तथा सर्वा गौड़ी माध्वी चेति पूर्ववचनोक्ता तु पैष्टी दृष्टान्तत्वेनात्र दर्शिता। न पातव्या द्विजोत्तमैरिति ब्राह्मणैरित्यर्थः। चैवर्णिकपरत्वे उत्तमपदानर्थक्यात् बहुवचनानर्थक्यपरी-हारार्थंसत्तमप्रातिपदिकानर्थक्यमयुक्तं अतो ब्राह्मणस्य त्रिविधैव सुरा महापातकहेतुः। क्षत्रियवैश्ययोस्तु सुरा वै मलमन्नानामिति वचनेन पैष्टेयैव इति स्थितम्। अतएव।
"एका माध्वी च गौड़ी च पैष्टी च त्रिविधा सुरा।
द्विजातिभिर्न पातव्या कदाचिदपि कर्हिचित्॥"
इति यमवचने द्विजातिपदं ब्राह्मणपरमेव।
अत एव द्विविधसुरापाने न क्षत्रियादीनां महापातकम्॥*॥ तावदस्तु। दोषाभावमेवाह दृढ्यान्नवल्क्याः।
"कामादपि हि राजन्यो वैश्यो वापि कथञ्चन।
मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते॥"
तदेवं पैष्टीनिषेधस्त्रैवर्णिकानां गौड़ीमाध्वीनि-षेधस्तु ब्राह्मणानामेव॥*॥ तञ्जातेः स्त्रीणा-मपि सुरापाननिषेधः। यथा भविष्ये।
"तस्मान्न पेयं विप्रेण सुरा मद्यं कथञ्चन।
ब्राह्मण्यापि न पेया वै सुरा पापभयावहा॥"
"या ब्राह्मणी सुरापी स्यान्
न तां देवाः पतिलोकं नयन्ति॥"
इति श्रुतिः॥
"पतत्यर्द्धशरीरेण भार्या यस्य सुरां पिबेत्।
पतितार्द्धशरीरस्य निष्कृतिर्नोपपद्यते॥"
न चैवं क्षत्रियवैश्यस्त्रीणामनिषेधः। ब्राह्मणी-पदस्य निषिद्धसुरापानकर्तृभार्योपलक्षणत्वात्-भार्या यस्य सुरां पिबेदिति सामान्यश्रवणाच्च। पानञ्च द्रवीभूतस्याभ्यवहारः। स च कण्ठदेशा-दधोनयनं न तु वक्त्रमात्रप्रवेशः। निष्ठीवनार्थं कपोलधारणे पानशब्दप्रयोगात्। यथोक्तम्।
"जिघ्रन्नहि सुरां कश्चित् पिबतीत्यभिधीयते।
यावन्न क्रियते वक्त्रे गण्डूषस्य प्रवेशनम्॥
अत्र गण्डूषप्रमाणं अविवक्षितम्। गण्डूषा-र्द्धपानेऽपि लोके पानशब्दप्रयोगात्। अतएव मुखप्रवेशनं अत्राविवक्षितं किन्तु मुखप्रवेशे कण्ठादधोनयनं भवति अतस्तदेवोपकल्पयति। अतएव ओष्ठमात्रलेपे न पाननिष्पत्तिः। अत-स्तत्रोत्तमाङ्गस्पर्शप्रायश्चित्तम्॥*॥
अथ सुरापानप्रायश्चित्तम्। तत्र मनुः।
"सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्।
तया स काये निर्दग्धे मुच्यते किल्बिषात्ततः॥
गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा।
पयो घृतं वामरवात् गोसकृद्गयमेव वा॥"
अग्निवर्णां अग्निसमस्पर्शां। पयो घृतं गोरेव आदावन्ते च गोः कीर्तनात्। मोहशब्दोऽत्र दुष्टिपरः। देवलः। सुरापाने ब्राह्मणो रूप्य-ताम्रसीसकानामन्यतममग्निकल्पं पीत्वा शरीर-त्यागात् पूयते। रूप्यादयोऽत्र द्रवीभूताः पीत्वेति निर्देशात्। स्वयमग्निकल्पत्वेऽपि सुखे सेचनीया। यथा गौतमः। सुरापस्य ब्राह्मणस्य उष्णामासिञ्चेयुः सुरामासे मृत। शुध्येत। अतएव न सेचकानां वधो विहितत्वात् स्वयं पान इव। एतच्च मरणप्रायश्चित्तं कामकृते। यथा, दक्षस्मृतिः।
"सुरापाने कामकृते ज्वलन्तीं तां विनिःक्षिपेत्।
सुखे स हि विनिर्दग्धो मृतः शुद्धिमवाप्नुयात्॥"
कथञ्चिदिति सकृदित्यर्थः। अङ्गिराः।
सुरापानं सकृत् कृत्वा योऽग्निवर्णां सुरां पिबेत्।
स पावयेदथात्मानमिह लोके परत्र च॥"
भविष्ये।
"मतिपूर्वं सुरापाने प्राजापत्यसुदाहृतम्।
पैष्टीपाने तु ऋषिभिर्नेतरासां कथञ्चन॥
शुद्ध्यनापि महाबाहो! प्रायश्चित्तमुदाहृतम्।
सुरायाः कामतः पाने सख्यायाः प्राजनाग्नयम्॥"
पुनःपुनःपैष्टीविषयलाभिधानम्। त्रिविधा सुरा सुरा इति भ्रमनिरासार्थम्। कथञ्चन सकृ-दित्यर्थः॥*॥ इतरासां असुरात्वाद् गौड़ी-माध्वीप्रभृतीनां ज्ञानतः सकृत्पाने मरणान्तिकं न भवति गौड़ीमाध्व्योस्तु ज्ञानतोऽभ्यासपाने गौड़ीमाध्व्योरतिरिक्तायास्त्वसुरायाः अत्यन्ता-भ्यासपाने मरणमुक्तं भविष्ये।
"गौड़ीमाध्व्योस्तथाभ्यासे प्राजापत्यसुदा-हृतम्।
अभ्यासे त्वसुरायास्तु तामेवाग्निनिभां पिबेत्॥"
तथेति ज्ञानत इत्यर्थः। अतएव।
"असकृत् ज्ञानतः पीत्वा वारुणीं पतति द्विजः।
मरणं तस्य निर्दिष्टं प्रायश्चित्तं विधीयते॥"
इति यमवचनमपि एतद्विषयमेव अभ्यासे मरणविधानात् द्वितीयवार एव मरणं कार्यम्। गौड़ीमाध्व्योः कामतः सकृत्पाने भविष्ये।
"असुरामद्यपाने तु कृते विप्रस्तु कामतः।
चान्द्रायणं समभ्यस्येत् शुद्धिकामः स शुद्धये॥
यद्यस्मिन्नेव विषये मानवीयं प्रकल्पयेत्।
कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि॥
सुरापानापनुत्यर्थं बालवासा जटी ध्वजी।"
पिण्याकं खलिम्॥*॥ उक्तसुरापानं आय-सेन पात्रेण इत्याह यमः।
"आयसे भाजने तप्तां ब्राह्मणीं वारुणीं पिबेत्॥"
गोवालचीरवाससा ततः कर्तव्यं आह उशनाः।
गोवालचीरवासाः सुरापः सुरामग्निवर्णां पीत्वा पूतो भवति॥*॥ अज्ञानतः सकृत्-पेष्टीपाने ब्राह्मणस्य द्वादशवार्षिकम्। यथा ब्रह्महत्याव्रतानुष्ठानो यमः।
"चरेतामेतदेवौभौ सुरापव्रतचर्यया।
सगोत्रादूषकश्चैव सुवर्णस्तेयकृन्नरः॥"*॥
भविष्ये।
"अकामतः सुरां पीत्वा पैष्टीं मतकुलव्रतः।
कृच्छ्रातिकृच्छ्रौ कृत्वा वै पुनःसंस्कारतः शुचिः॥
कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि।
सुरापानापनुत्यर्थं बालवासा जटी ध्वजी॥"
सुरापानमात्रापनेयरोगस्य रोगिणोऽज्ञानतः पानविषयमिदं इत्युक्तं भविष्ये। यथा,—
"तथास्निग्धे विषये वाग्निष्टं परिकीर्तितम्।
यदि रोगैर्भवेद्दुःखी नेतरस्य कदाचन॥
कृच्छ्राच्च सुरश्रेष्ठ! तप्तकृच्छ्र उदाहृतः।"
कृच्छ्रातिकृच्छ्रावित्यत्र कृच्छ्रपदं न प्राजाप-त्यपरं किन्तु तप्तकृच्छ्रपरम्॥*॥ अज्ञानतो गौड़ीमाध्व्योः सकृत्पाने उक्तं भविष्यपुराणे।
"सकृत् पीत्वा तथा गौड़ीमज्ञानात् सुरसत्तम!।
कृच्छ्रातिकृच्छ्रौ विहितौ तप्तप्राजनमेव च॥"
अज्ञानाभ्यासे तत्रैवोक्तम्।
"गौड़ीमज्ञानतः पीत्वा ब्राह्मणो ब्राह्मणप्रिय!।
तप्तकृच्छ्रन्तु वै कृत्वा पुनःसंस्कारतः शुचिः॥
माध्वीं पीत्वा महाबाहो! अज्ञानाद् द्वि-जसत्तमः।
शुद्ध्येत तप्तकृच्छ्रेण विकल्पोऽभ्यासजात्तथा॥
रेतोमूत्रपुरीषाणां गौड़ीमाध्व्योश्च प्राश्ने।
क्रमादष्टशुविष्ठानां संस्काराच्छुद्धिरिष्यते॥"
प्राजापत्यके च पादहानेरसम्भवात् क्षत्रिय-वैश्ययोरपि यथोक्तं मरणान्तिकं प्रायश्चित्तमेव। द्वादशवार्षिकादौ पादपादहानिरभक्ष्यभक्षणे क्षत्रियादीनां द्वादशवर्षत्वात्।
"विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम्।
वैश्येऽर्द्धं पादशेषन्तु शूद्रजातिषु दृश्यते॥"
पानसादिमद्यपाने तु कामनाकृतानेकसमया-भ्यासे प्राजापत्यं युक्तं ब्राह्मणस्य कामनया सकृत्कृते तु पराशरः।
"अगम्यागमने चैव मद्यगोमांसभक्षणे।
शुद्ध्यै चान्द्रायणं कुर्यात् नदीं गत्वा समुद्रगाम्॥
चान्द्रायणे ततश्चीर्णे कुर्यादब्राह्मणभोजनम्।
अनड्वत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम्॥"
अकामतः सकृत्पाने विष्णुः।
"पीत्वा प्रमादतो मद्यमतिकृच्छ्रं चरेद्विजः।
कारयेत् पुनःसंस्कारं भक्ष्या विप्रांश्च भोजयेत्॥"
कामतोऽकामतश्चाभ्यासे व्रतादृत्तिमाह यमः।
"गोव्रतद्विहितः कृच्छ्रश्चान्द्रायणमथापि वा।
अभ्यासे तु तयोर्भूयस्ततः शुद्धिमवाप्नुयात्॥"
अपर्युषितपानसाद्येकादशविधमद्यपाने चिरा-चम्। पानसं द्राक्षमाधूकमित्यादभिधाय पुलस्त्यः।
"प्राचेतृटङ्कखर्जूरयवसादेव यो रसः।
सद्योजातन्तु तं पीत्वा ब्राह्मणः शुद्ध्येत् द्विजो-त्तमः।"

प्रयोजकादीनां पादपादहानिर्दण्डया। बाल-वृद्धस्त्रीणामर्द्धादिकं प्रायश्चित्तम्। इति प्रायश्चित्तविवेकः॥ *॥ अथ पुराणे ब्राह्मणस्य मद्यपानादिनिषेधो यथा,—

"अपेयञ्चाप्यपेयञ्च तथैवास्पृश्यमेव च।
द्विजातीनामनालोच्यं नित्यं मद्यमिति स्थितम्॥
तस्मात् सर्व्वं प्रयत्नेन मद्यं नित्यं विवर्ज्जयेत्।
पीत्वा पतति कर्म्मभ्यस्तस्माच्चो द्विजोत्तमः॥
भक्षयित्वाप्यभक्ष्याणि पीत्वापेयान्यपि द्विजः।
नाधिकारी भवेत्तावद्यावत्तन्न जहात्यधः॥
तस्मात् परिहरेन्नित्यमभक्ष्याणि प्रयत्नतः।
अपेयानि च विप्रो वै पीत्वा तदृयाति रौरवम्॥"

इति श्रीकूर्म्मपुराणे उपविभागे १६ अध्यायः॥

मद्यस्य विष्णोरुपसर्गेण दोषादि यथा,—

वराह उवाच।

"मद्यं पीत्वा वरारोहे! यस्तु मामुपसर्पति।
तत्र दोषं प्रवक्ष्यामि शृणु सुन्दरि! तत्त्वतः॥
दत्त्वा वर्षसहस्राणि दरिद्रो जायते पुनः।
ततो भवेत् स पूतात्मा सङ्कल्पञ्च न संशयः॥
यस्तु भागवतो भूत्वा कामरागेण मोहितः।
दीक्षितो पिबते मद्यं प्रायश्चित्तं न विद्यते॥
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे!।
अग्निवर्णां सुरां पीत्वा तेन सुध्यते किल्बिषात्॥
एवमेवापराधानि येन सुध्यन्ति किल्बिषात्।
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
न स लिप्यति पापेन संसारञ्च न गच्छति॥

इति वराहपुराणे मद्यपानापराधप्रायश्चित्तम्॥

अपि च।

"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम्।
सुहृद्ब्राह्मण्यहिंसाद्यैः प्राजापत्येन भूमिपः।
वैश्यः सान्तपनाच्छूद्रः पञ्चाहोभिर्विशुद्ध्यति॥"

इति गारुड़े २२ अध्यायः॥

एतद्गौड़ीमाध्व्योः कामतः सकृत्पानविषयमिति प्रायश्चित्तविवेकदर्शनात्॥*॥ द्विजस्य पूजादौ मद्यदानविध्यनुकल्पनिषेधा यथा,—

"मदिरां दृष्टतो दद्यात् अन्यत् पानन्तु वामतः।
अवघ्रं विहितं यत्र मद्यं तत्र द्विजः पुनः॥
नारिकेलजलं कांस्ये ताम्रे च विहरेन्मधु।
नापद्यपि द्विजो मद्यं कदाचित् विहरेदपि॥
ऋते पुण्याहवादुक्ताद्यज्ञनाडा विशेषतः।
राजपुत्रस्तथा मन्त्रैः सचिवः सौत्रिकादयः॥
दद्युर्नरबलिं भूपसन्मत्या विभवाय च।
भूपालानुमते मद्यं दत्त्वा पापमवाप्नुयात्॥"

इति कालिकापुराणे ६६ अध्यायः॥

अथ ब्राह्मणस्य मद्यपाननिषेधकशुक्रशापो यथा,

वैशम्पायन उवाच।

"सुरापानादधर्मान् प्राप्य विद्वान्
संज्ञानाशं प्राप्य चैवातिघोरम्।
दृष्ट्वा कचश्चापि तथाभिरूपं
पीतं तथा सुरया मोहितेन॥
समभ्युत्थाय महानुभाव-
स्तदोशना विप्रहितं चिकीर्षुः।
काव्यः स्वयं वाक्यमिदं जगाद
सुरापानं प्रति वै जातशङ्कः॥
यो ब्राह्मणोऽद्यप्रभृतीह कश्चित्
मोहात् सुरां पास्यति मन्दबुद्धिः।
अपेतधर्म्मो ब्रह्महा चैव स स्या-
दस्मिंल्लोके गर्हितः स्यात् परे च।
मया चेमां विप्रधर्म्मोक्तसीमां
मर्य्यादां वै स्थापितां सर्व्वलोके।
सन्तो विप्राः शुश्रुवांसो गुरूणां
दैवा लोकाश्चोपशृण्वन्तु सर्व्वे॥"

इति महाभारते आदिपर्व्वणि ७६ अध्यायः॥

अथ तन्त्रे मद्यपाननिषेधो यथा,—

"नारिकेलञ्च खार्ज्जूरं पानसञ्च तथैव च।
ऐक्षवं मधुकं टाङ्कं तालञ्चैव च माक्षिकम्॥
द्राक्षन्तु दशमं ज्ञेयं गौड़ं चैकादशं स्मृतम्।
पैष्टन्तु द्वादशं प्रोक्तं सर्व्वेषामधमं स्मृतम्॥
मध्यमं मधुजं गौड़ं श्रेष्ठमौत्तममिष्यते।
एतत् द्वादशकं मद्यं न पातव्यं द्विजैः क्वचित्।
क्षत्रियादिः पिबेत् सर्व्वं पैष्टीमेकान्तु वर्ज्जयेत्॥
सुरां पीत्वा द्विजो मोहात् कामात् तक्रादि-
मिश्रिताम्।
त्रैवार्षिकं व्रतं कुर्य्यादौषधिभिश्रे तु वार्षिकम्॥
तक्रादिमिश्रितां किञ्चित् सुरां पीत्वा ह्यकामतः।
कृच्छ्राब्दपादमुद्दिश्य पुनः संस्कारमर्हति॥
सुखप्रवेशमात्रन्तु प्रायश्चित्ताईमाचरेत्।
अनुपनीतो देवेशि! व्रतं त्रैवार्षिकं चरेत्॥
चतुर्थकालाहारी स्यादूर्द्धरेतस्यमथापि वा।
आ पञ्च वर्षं वृद्धं वा ज्ञानादर्द्धं विनिर्दिशेत्॥
शूद्रस्य च विशेषेण अतिकृच्छ्रद्वयं चरेत्।
स्वजातिसाधिते तस्मिन् तदर्द्धं व्रतमाचरेत्॥
पैष्टीपाने ब्राह्मणस्य मरणान्तिकमुच्यते।
माध्वीगौड़ीसुरापाने द्वादशाब्दं विधीयते॥
इतरेषान्तु पानेन शुद्धिचान्द्रायणेन तु।
राजन्यवैश्ययोश्चापि गौड़ी माध्वी न शस्यते।
मोहात् क्षत्रञ्च वैश्यञ्च पीत्वा कृच्छ्रद्वयं चरेत्॥
शूद्रोऽपि गौड़ीं पैष्टीञ्च न पिबेद्धीनसंस्कृताम्।
कामात् पीत्वा सुरां विप्रो मरणान्तिकमाचरेत्॥
चरेच्चान्द्रायणं ज्ञानात् क्षत्रियो वैश्य एव च।
पैष्टीपाने तु शूद्रस्य प्राजापत्यं विनिर्दिशेत्॥
ज्ञानादभ्यासयोगे तु चान्द्रायणशतं स्मृतम्।
नारिकेलं तथा ज्ञानादिप्यचान्द्रायणेन तु।
क्षत्रियश्चैव वैश्यश्च प्राजापत्येन शुध्यति॥
अपक्वं पनसञ्चैव आम्रञ्च बदरं तथा।
स्थापयित्वा घटे नित्यं दद्यादामपयःपलम्॥
त्रैलोक्यविजयाचैव मातुलङ्गं तथैव च।
समेऽहनि ततो दद्यात् सन्धानात् सत्वमीरितम्॥
दधि मधु घृतञ्चापि माक्षिकं तिक्तकं तथा।
अनुपाने तु देवेशि! द्राक्षमद्यं सुनिश्चितम्॥
विड़ङ्गं शालवो मूलं————————।
मधुना सह संस्थाप्य श्रेष्ठपाकं समाचरेत्॥
पिप्पलीलवणं दत्त्वा मधुना मद्यमीरितम्।
पानसं पक्वखर्ज्जूरं आर्द्रं सोमलतारसम्।
एकीकृत्यासिसन्धानात् खार्ज्जूरं मद्यमीरितम्॥
पक्वतालं दन्तिशाकं कक्कुभञ्च तथैव च।
एतैरेव सुसन्धानात् तालमद्यं प्रकीर्त्तितम्॥
इक्षुदण्डं मरीचञ्च बदरञ्च तथा दधि।
श्रेष्ठे तु लवणं दत्त्वा इक्षु मद्यं प्रकीर्त्तितम्॥
नवं मधु तथा बिल्वं पक्वं शर्करया सह।
सन्धानाज्जायते मद्यं माध्वीकं श्रुतो रसम्॥
घृतावरी टङ्कमूलं लक्ष्मणं पद्ममेव च।
मधुना सह सन्धानात् टङ्कमाध्वीकमीरितम्॥
मालूरमूलं बदरी शर्करा च तथैव च।
एषामेकत्र सन्धानात् मैरेयं मद्यमीरितम्॥
इक्षुलिका पक्वधात्री नारिकेलजलन्तथा।
कदलीफलसन्धानान्मद्यं तन्नारिकेलजम्॥
दधि त्रैलोक्यविजया तथैव च करीकणा।
गुड़ेन सह सन्धानात् गौड़ीमद्यं प्रकीर्त्तितम्॥
शुष्कलीमर्द्दसिद्धान्नपुष्पोदकसमन्वितम्।
वह्नौ सन्तापयेत् किञ्चित् स्थापयित्वा दिनद्वयम्॥
श्रेष्ठेऽहनि तु संप्राप्ते जीवनं तत्र निःक्षिपेत्।
शृङ्गवेरं मरीचञ्च मातुलङ्गं तथैव च।
एतेषामेव सन्धानात् पैष्टीमद्यं प्रकीर्त्तितम्॥"

इति श्रीमत्स्यसूक्ते महातन्त्रे चतुर्विंशतिसाहस्रे १६ पटलः॥*॥ अपि च।

"सिद्धमन्त्री भवेद्वीरो न वीरो मद्यपानतः।
कलौ तु भारते वर्षे लोका भारतवासिनः॥
यदे यदे सुरां पीत्वा वर्त्तन्ते भ्रष्टा भवन्ति हि॥"

इति उत्पत्तितन्त्रे ६४ पटलः॥*॥

"दिव्यवीरमयो भावः कलौ नास्ति कदाचन।
केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्॥"

इति महानिर्व्वाणतन्त्रम्॥*॥

श्रीक्रमे।

"न दद्याद् ब्राह्मणो मद्यं महादेवै कथञ्चन।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत्॥

भैरवतन्त्रे।

"नारिकेलोदकं कांस्ये ताम्रे गव्यं तथा मधु।
राजन्यवैश्ययोर्देयं न द्विजस्य कदाचन॥
एवं प्रदानमात्रेण हीनायुर्ब्राह्मणो भवेत्।

इति आगमतत्त्वविलासः॥*॥

स्मृतौ कलौ मद्यपानादिनिषेधो यथा, याज्ञवल्क्यादीपकलिकायां ब्रह्मपुराणम्।

"नरास्थमेधौ मद्यञ्च कलौ वर्ज्या द्विजातिभिः॥"

निषेधविषयं स्मरयति उशनाः। "मद्यमदेयमपेयमनिर्य्यांस्यम्।" अनिर्य्यांस्यमस्वीकार्य्यमिति कल्पतरुः॥ कालिकापुराणेऽपि।

"खगाजरुधिरं दत्त्वा आत्मदेह्यामवाप्नुयात्।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते॥"

स्मृतिः।

"ताम्रे पेचुरसो मद्यं पयसा यवचूर्णकम्।
गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना॥
अतो मद्यप्रतिनिधिदानमपि न युक्तम्। इति तिथ्यादितत्त्वम्॥*॥ मद्यतुल्यं यथा,—

"नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु।

गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना ।"
इति कर्म्मलोचनः । ॥ ॥
अथ मद्यपानात् तुष्यर्थं कौलानां मद्यपानविधि-
र्लिख्यते ।
"कुलाचाररतो वीरः कुलसङ्गी सदा भवेत् ।
मन्दिरासेवनं कुर्य्यात् सोमपानं महेश्वरि ! ॥
सर्व्वथा कुरुते देवि ! वीरश्चोद्धतमानसः ।
दिव्यन्तु देवताप्रायश्चन्दनागुरुचेयने ॥
रक्तचन्दनगन्धेन सुदिग्धो नात्र संशयः ।
भस्माङ्गधूसरो वीर उन्मत्तवद्विचेष्टितः ॥
सुरापानरतो नित्यं बलिपूजापरायणः ।
नरश्चागश्च महिषो मेषः शूकर एव च ॥
गृध्रकः गृध्रको गोधा खड्गी कूर्म्मो दशस्
स्मृताः ।
वानरश्च खरश्चैव गजाश्वादिविहङ्गमाः ॥
इत्यादेस्तु बलेर्दाने: पूजयेत् खेटदेवताम् ।
नित्यं नैमित्तिकं काम्यं प्रकुर्य्याच्च दिने दिने ॥
कुलवारे कुलर्क्षे च तिथौ च कुलके तथा ।
भैरवाः कथितं चक्रं संस्थाप्य पूर्ब्ववत् प्रिये ! ॥
सुरार्च्चां शोधनं कुर्य्यादृयथावत् परमेश्वरि ! ॥
प्रवृत्ते भैरवीचक्रे सर्व्वे वर्णा द्विजोत्तमाः ।
निवृत्ते भैरवीचक्रे सर्व्वे वर्णाः पृथक् पृथक् ॥
विजयाद्यानुकल्पञ्च द्विजो दद्यादृयुगे युगे ॥"
इति उत्पत्तितन्त्रे ६३ पटलः ॥
"द्रव्याभावे चानुकल्पैः पूजयेत् परदेवताम् ।
सुराभावे च गोक्षीरं द्विजो दद्यादृयुगे युगे ॥"
इति निरुत्तरतन्त्रे ५ पटलः ॥॥
"असंस्कृतां सुरां पीत्वा ब्राह्मणो ब्रह्महा
भवेत् ।
संस्कृतान्तु सुरां पीत्वा ब्राह्मणो ज्वलदग्निवत् ॥
सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत् सुराम् ।
अन्यत्र कामतः पीत्वा ब्राह्मण्यादेव हीयते ॥"
इति उत्पत्तितन्त्रम् ॥ ॥
"ब्राह्मणस्य महामोक्षं मद्यपाने प्रियंवदे ! ।
ब्राह्मणः परमेशानि ! यदि पानादिकं चरेत् ।
तत्क्षणात् शिवरूपोऽसौ सत्यं सत्यं हि शैलजे ! ॥
लोये लोयं यथा लीनं तेजसं तेजसे यथा ।
घटे भग्ने यथाकाशं वायौ वायुर्यथा प्रिये ! ॥
तथैव मद्यपानेन ब्राह्मणो ब्रह्मणि प्रिये ।
लीयते नात्र सन्देहः परमात्मनि शैलजे ! ॥
मायुष्यादिमहामोक्षं निवृत्तं क्षत्रियादिषु ।
मद्यपानं विना देवि ! तत्त्वज्ञानं न लभ्यते ॥
अतएव हि विप्रस्तु मद्यपानं समाचरेत् ॥
वेदमातामपेनैव ब्राह्मणो नहि शैलजे ! ।
ब्रह्मज्ञानं यदा देवि ! तदा ब्राह्मण उच्यते ॥
देवानामन्नतं ब्रह्म तदेव लौकिकी सुरा ।
सुरत्वं भोगमात्रेण सुरा तेन प्रकीर्त्तिता ॥
मन्त्रत्रयं सदा प्राप्य ब्रह्मशापादिमोचनम् ।
प्रकुर्य्यात्तु हि येनैव तदा ब्रह्ममयी सुरा ॥
हविरारोपमात्रेण यद्वह्नौ शो यथा भवेत् ।
शापमोचनमात्रेण सुरा मुक्तिप्रदायिनी ।
अतएव हि देवेशि ! ब्राह्मणः पानमाचरेत् ॥
स ब्राह्मणः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः ।
बहु किं कथ्यते देवि ! स एव निर्गुणात्मकः ॥
मुक्तिमार्गमिदं देवि ! गोप्यं पशुजनैः ।
प्रकाशात् सिद्धिहानिः स्यात् निन्दनीयो न
चान्यथा ॥"
इति मालतीमाधवतन्त्रे ३ पटलः ॥॥
"कुलस्त्रीसेवनं कुर्य्यात् सर्व्वथा परमेश्वरि ! ।
रमते युवतीं रम्यां कामोन्मत्तविलासिनीम् ॥
नटीं कापालिकां वेश्यां हलिपानां वराङ्गनाम् ।
शूद्राणीं म्लेच्छरमणीं यवनीं परमेश्वरि ! ॥
मालतीयोनिविचारोऽस्ति मालतीयोनिं विना
प्रिये ! ।
कुलाचारपरो वीरः कुलपूजापरायणः ॥
भगलिङ्गसमायोगादाद्यन्तं जपमाचरेत् ।
निश्चलन्तु भवेच्चित्तं कोटिसूर्य्यग्रहैश्च किम् ॥
चले चित्ते भवेद्यावन्निश्चलं निश्चलं यथा ।
ध्रुवाणां साधनं देवि ! लताया साधनन्तथा ॥
चितायाः साधनं देवि ! सिद्धिरस्ति कलौ युगे ॥
इत्युत्पत्तितन्त्रम् ॥
कालिकातारिणीदीक्षां गृहीत्वा मद्यसेवनम् ।
न करोति नरो यस्तु स कलौ पतितो भवेत् ॥
वैदिके तान्त्रिके चैव जपहोमविहिष्कृतः ।
अब्राह्मणः स एवोक्तः स एव म्लेच्छनायकः ॥
शुनीमूत्रसमं तस्य तर्पणं यत् पितृष्वपि ।
काकीतारामनुं प्राप्य वीराचारं करोति न ॥
शूद्रत्वं तच्छरीरेण प्राप्नुयात् स न चान्यथा ॥
इति कामाख्यातन्त्रे ५ पटलः ॥
मद्यशोधनप्रकारो यथा । शिव उवाच ।
शृणु पार्व्वति ! वक्ष्यामि तेषां वै शोधनक्रियाम् ।
पद्मासनेन संविश्य करपुटं समाचरेत् ।
वामे गुरून्नमस्कृत्य दक्षिणे गणपतिं स्मरेत् ।
मध्ये देवीं नमस्कृत्य प्राणायामत्रयञ्चरेत् ।
शरीरे मालतीं न्यस्य ऋष्यादिन्यासमाचरेत् ।
सकल्पोक्तविधानेन षडङ्गन्यासमाचरेत् ॥
पश्चाद्भूमौ त्रिकोणं वा षट्कोणं वा महे-
श्वरि ! ।
विलिख्य मण्डलं शुद्धं तस्योपरि घटं न्यसेत् ॥
बहुधा शोधनं कृत्वा षट्कारेण पुनः पुनः ।
ततस्तस्मिन् कारणन्तु मूलेनैव च स्थापयेत् ।
मालतीकार्य्येण देवेशि ! विपरीतेन चैव हि ।
पुनः फट्कारमन्त्रेण शोधनं कारयेत् सुधीः ॥
ततो वियच्छक्तिबीजं चतुर्दशस्वरान्वितम् ।
नादबिन्दुयुतं कृत्वा तस्योपरि घृतं जपेत् ॥
ततो मूलं जपेन्मन्त्रं मायाबीजं ततः परम् ।
धेनुं योनिं मालिनीञ्च त्रिखण्डं मीनसंज्ञकम् ।
दर्शयित्वा वरारोहे ! घटं धृत्वा पठेन्मनुम् ॥
ॐ एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ।
कचोद्भवं ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥
ॐ सूर्य्यमण्डलसम्भूते वरुणालयसम्भवे ।
अमृतबीजमये देवि ! शुक्रशापादिमुच्यताम् ॥
ॐ वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि ।
तेन सत्येन ते देवि ! ब्रह्महत्यां व्यपोहतु ॥
ततः षड्भयुक्तञ्च वकारं विन्दुसंयुतम् ।
एवं सकारकञ्चापि वर्णाश्चरसमन्वितम् ॥
जप्त्वा मन्त्री ततो ध्यायेत् स्वमन्त्रं कुलसुन्दरि ! ।
आनन्दभैरवं ध्यायेदृयथा तन्त्रानुसारतः ॥
रक्तवर्णं चतुर्बाहुं त्रिनेत्रं वरदं शिवम् ।
जटाजूटधरं देवं वासुकीकल्पभूषितम् ॥
डमरुञ्च कपालञ्च सुशूलं पाशसुत्तमम् ।
धारिणं तं यजेद्देवं व्याघ्रचर्म्माम्बरं शिवम् ॥
एवं ध्यात्वा महेशानि ! तस्य मध्ये प्रपूजयेत् ।
मायाबीजं ततो दुं फट्मन्त्रेणानेन संस्थजेत् ॥
ततस्तस्मिन्महेशानि ! आनन्दभैरवीं स्मरेत् ।
आनन्दभैरवीं देवीं वराभयलसत्कराम् ॥
घोररूपां वरारोहां त्रिनेत्रां रक्तवाससम् ।
रक्तवर्णां महारौद्रीं सहस्रभैरवान्विताम् ॥
ब्रह्मविष्णुमहेशाद्यैः स्तूयमानां शिवां भजे ।
इति ध्यात्वा महेशानि ! तेनैव मनुना यजेत् ॥
तयोरैक्यं विभाव्यैव गायत्रीं दशधा जपेत् ।
भैरवं हृल्लकञ्चोक्त्वा विन्दुढे सदनन्तरम् ॥
सुधादेवे ततः पश्चाद्धोमहीति ततो वदेत् ।
तन्नो देवी ततः पश्चात्दन्ते च प्रचोदयात् ॥
इति ते कथिता देवी गायत्री परमाक्षरी ।
तस्याः स्मरणमात्रेण द्रव्यशुद्धिश्च जायते ।
तस्य प्रसादादीशोऽहं सत्यं सत्यं न संशयः ।
तस्य मध्ये मूलमन्त्रं विन्यदग्धेलिखेत् सुधीः ।
रक्तवस्त्रेण संपूज्य सुधां वस्त्रेण गोपयेत् ॥॥
धर्म्मार्थकाममोक्षाणां विद्यायाश्च प्राप्तिः ।
सर्व्वेषां कारणं यस्मात् कारणं परिकीर्त्तितम् ॥
अस्माकञ्च महेशानि ! शरीरकारणं हि तत् ।
त्वत्प्रसादोऽहं वीरेशि ! वीरकार्य्यप्रसादतः ॥
निर्व्विकारेण देवेशि ! निर्व्विकल्पेन चेतसा ।
सेव्यमानं कुलं भद्रे ! मुक्तिमुक्तिप्रदायकम् ॥
निर्व्विकल्पो महेशानि ! मुक्तिभागी न संशयः ।
सविकल्पो वरारोहे ! रौरवं याति निश्चितम् ॥"
इति कैवल्यतन्त्रे २ पटलः ॥
(वैद्यकोक्तदोषादि यथा,—
"तीक्ष्णोष्णरूक्षसूक्ष्माम्लं व्यवायाशुकरं लघु ।
विकाशि विशदं मद्यमोजसोऽस्माद्विपर्य्ययः ॥
तीक्ष्णादयो विषेऽप्युक्ताश्चित्तोपप्लाविनो गुणाः ।
जीवितान्ताय जायन्ते विषे तूत्कर्षवृत्तिनः ॥
तीक्ष्णादिभिर्गुणैर्मद्यं मन्दादीनोजसो गुणान् ।
दशभिर्दशसंख्यैश्च चेतो नयति विक्रियाम् ॥
आद्ये मदे द्वितीये स प्रमादायतने स्थितः ।
दुर्व्विकल्पवृतो मूढः सुखमित्यधिसुप्यते ॥
मध्यमोत्तमयोः सत्त्वं प्राप्य राजसतामसः ।
निरङ्कुश इव व्याली न किञ्चिन्नाचरेज्जडः ॥
इयं भूमिरवद्यानां दौःशील्यस्यैदमास्पदम् ।
एकोऽयं बहुमार्गाया दुर्गतेर्दैशिकः परम् ॥
निखेः ध्रुवच्छेते लतीये तु मदे स्थितः ।
मरणादपि पापात्मा गतः पापतरां दशाम् ॥
धर्म्माधर्म्मसुखं दुःखमर्थानर्थं हिताहितम् ।
यदासक्तो न जानाति कथं तत्क्षीलयेदृबुधः ।
मदे मोहो भयं शोकः क्रोधो मत्सर्य्य संक्षितः ।

सोन्मादमदमूर्च्छायाः सापस्मारापतानकाः ॥
यत्रैकः क्षुतिविभंशस्तच्च सर्व्वमसाधु यत् ।
अयुक्तियुक्तमन्नं हि व्याधये मरणाय वा ॥
मद्यं त्रिवर्गधीधैर्य्यलज्जादेरपि नाशनम् ।
नाति माद्यन्ति बलिनः कृताहारा महाशनाः ॥
स्निग्धाः सत्त्ववयोयुक्ता मद्यनित्यास्तदन्वयाः ।
मेदःकफाधिकामन्दवातपित्ता दृढाशयाः ॥
विपर्य्ययेऽतिमाद्यन्ति विश्रब्धाः कुपिताश्च ये ।
मद्येन चान्नरूपेण साजीर्णे बहु नाति च ॥"
इति वाभटे निदानस्थाने षष्ठेऽध्याये ॥)
एतानि श्रुतिस्मृतिविरुद्धत्वान्नौषधार्थानि भिषग्भिः कदाचिदपि नाचरणीयानि ॥

मद्यद्रुमः, पुं, (मद्योत्पादको द्रुमः ।) माड़रवृक्षः । इति राजनिर्घण्टः ॥

मद्यपङ्कः, पुं, (मद्यानां पङ्क इव ।) सुराकल्कः । मेया इति भाषा ॥ तत्पर्य्यायः । मेदकः २ अगलः ३ । इति हेमचन्द्रः । ३ । ५६८ ॥

मद्यपाश्रनं, क्ली, (मद्यपैरश्यते भुज्यते इति । अश् + कर्म्मणि ल्युट् ।) पानरुचकभक्ष्यम् । तत्पर्य्यायः । उपदंशः २ अवदंश ३ चक्ष्यम् ४ । इति हेमचन्द्रः । ३ । १७१ ॥

मद्यपुष्पा, स्त्री, (मद्यानि मदसाधनानि पुष्पाण्यस्याः ।) धातकी । इति राजनिर्घण्टः ॥ (गुणादिविवृतिरस्या धातकीशब्दे ज्ञातव्या ॥)

मद्यमण्डः, पुं, (मद्यस्य मण्डः ।) मद्यफेनः । तत्पर्य्यायः । कारोत्तमः २ । इति हेमचन्द्रः । ३ । ५६६ ॥ कारोत्तरः ३ सुरामण्डः ४ । इत्यमरः । २ । १० । ४३ ॥

मद्यवासिनी, स्त्री, (मद्यानामिव वासो गन्धोऽस्या अस्तीति । इनिः ङीष् ।) धातकीवृक्षः । इति रत्नमालाराजनिर्घण्टौ ॥

मद्यबीजं, क्ली, (मद्यस्य बीजम् ।) नागाह्वयजतसुराबीजम् । तत्पर्य्यायः । किण्वम् २ नमकः ३ नमकुः ४ । इति हेमचन्द्रः । ३ । ५६६ । वाखर इति भाषा ॥

मद्यसन्धानं, क्ली, (मद्यस्य सन्धानसुत्पादनार्थं आयोजनम् ।) सुरासञ्जीकरणम् । वंशाङ्कुरफलादीन् बहुकालं सन्धाय यत् क्रियते तत् । तत्पर्य्यायः । आसुतिः २ आसवः ३ अभिषवः ४ । इति हेमचन्द्रः । ३ । ५६६ ॥

मधामोदः, पुं, (मद्यस्येवामोदो गन्धो यस्य ।) वकुलवृक्षः । इति राजनिर्घण्टः ॥

मद्रः, पुं, (मन्दते इति । मदि मोदादौ + "स्फायि तञ्चीति ।" उणा० २ । १३ । इति रक् ।) देशविशेषः । हर्षः । इत्युणादिकोषः ॥ तद्देशविवरणं यथा,—
"वैराटपाञ्चाययोर्मध्ये पूर्व्वदक्षिणमेव तु ।
मद्रदेशः समाख्यातो माद्रीहा तत्र तिष्ठति ॥"
इति भक्तिसङ्गमतन्त्रे ७ पटलः ॥
(भद्रे, क्ली । यथा, चतुर्थी चाग्निस्याद्युग्मं मद्रभद्रकुलसुखार्थहृते: । २ । १ । ७१ । इत्यत्र मुग्धे। मद्रं देवदत्तस्यभूयात् । इति काग्निका ।

मद्रभद्रयोः पर्य्यायत्वादन्यतरो न पठनीयः । इति सिद्धान्तकौमुदी च ॥)

मद्रकः, त्रि, (मद्रेषु जातं इति । मद्र + "मद्रवृष्योः कन् ।" ४ । २ । १३१ । इति कन् ।) मद्रदेशभवः । इति सिद्धान्तकौमुदी ॥ (देशभेदः । यथा, मत्स्यपुराणे । ११३ । ४१ ॥
"गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ॥")

मद्रकारः, त्रि, (मद्रं करोतीति । क्त + "क्षेमप्रियमद्रेऽण् च ।" ३ । २ । ४४ । इति प्रत्ये अण् ।) मद्रङ्करः । यथा क्षेमप्रियमद्रात् कुर्व्वेति मुग्धबोधव्याकरणम् ॥

मद्रङ्करः, त्रि, (मद्रं भद्रं करोतीति । क्त + "क्षेमप्रियमद्रेऽण् च ।" ३ । २ । ४४ । इति चकारात् खच् । सुम् च ।) मङ्गलकारकः । यथा क्षेमङ्करोऽरिष्टतातिः स्याद्भद्रङ्करश्च सुङ्करौ । इति त्रिकाण्डशेषः ॥

मद्रसुता, स्त्री, (मद्रस्य सुता ।) मद्रराजकन्या । सा पाण्डुराजस्य द्वितीया भार्य्या नकुलसहदेवजननी च । इति शब्दरत्नावली ॥

मद्रर्गीयः, मद्रर्गीयः, मद्रर्ग्यः, } त्रि, (मद्रर्गेस्वायमिति । "अश्वद्रे यत् खावन्यतरस्याम् ।" ४ । ३ । ६४ । इतिक्रमेण खञ्यतुप्रत्ययाः ।) मद्रर्गसम्बन्धी । इति सिद्धान्तकौमुदी ॥

मद्रा, [न्] पुं, (माद्यतीति । मद् + "स्रामदिपद्यर्त्तिपृधृक्रमिभ्यो वनिप् ।" उणा० ४ । ११२ । इति वनिप् ।) शिवः । इति सिद्धान्तकौमुदीधृतोणादिवृत्तिः ॥ (मदनशीले, त्रि । यथा, ऋग्वेदे । ८ । ८१ । १६ ।
"इन्द्राय मद्वने सुतं परिष्टोभन्तु नो गिरः ॥")
"मद्वने मदनशीलाय ।" इति तद्भाष्ये सायणः ॥

मधु, क्ली, (मन्यन्ते विशेषेण जानन्ति जना यस्मिन् । मन् + "फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च ।" उणा० १ । १६ । इति उः धश्चान्तादेशः । मद्यम् । (यथा, आर्य्यासप्तशत्याम् । ४२५ ।
"मधुमदवीतव्रीड़ा यथा यथा जपति सम्मुखं बाला ॥")
क्षीरम् । जलम् । इति विश्वः हेमचन्द्रश्च ॥ रसभेदः । मधुररसः इति यावत् । इति शब्दरत्नावली ॥ पुष्परसः । फुलेर मौ इति भाषा ॥ तत्पर्य्यायः । मकरन्दः २ । इत्यमरः । २ । ४ । १०१ ॥ मरन्दः ३ मरन्दकः ४ । इति शब्दरत्नावली ॥ क्षुद्राभिर्मक्षिकाभिः कृतम् । मौ इति भाषा । क्षौद्रम् २ माक्षिकम् ३ । इत्यमरः । २ । ९ । १०३ ॥ माक्षीकम् ४ कुसुमासवम् ५ पुष्पासवम् ६ पवित्रम् ७ पित्र्यम् ८ पुष्परसाढ्यम् ९ । इति राजनिर्घण्टः ॥ माध्वीकम् १० सारघम् ११ मक्षिकावान्तम् १२ वरटीवान्तम् १३ भृङ्गवान्तम् १४ पुष्परसोद्भवम् १५ । इति भावप्रकाशः ॥ (तस्य पर्य्यायः ।
"मधु पुष्परसं क्षौद्रं मकरन्दश्च माक्षिकम् ॥"
इति वैद्यकरत्नमालायाम् ॥

मधु तु मधुरं कषायानुरसं रूक्षं शीतमग्निदीपनं वर्ण्यं वल्यं लघु सुकुमारं लेखनं हृद्यं सन्धानं शोधनं रोपणं वाजीकरणं संग्राहि चक्षुःप्रसादनं सूक्ष्ममार्गानुसारि पित्तश्लेष्ममेदोमेहहिक्काश्वासकासातिसारच्छर्द्दिकृमिविषप्रशमनं क्षतादिदोषप्रशमनञ्च तच्च लघुत्वात् कफघ्नं पेच्छिल्याभ्राष्ट्र्यात् कषायभावाच्च वातपित्तघ्नम् ।
"दृङ्नाड्यौ मधु नवं नातिश्लेष्मकरं सरम् ।
मेदःस्थौल्यापहं ग्राहि पुराणमतिलेखनम् ॥
दोषत्रयहरं पक्वमामघ्नं त्रिदोषकृत् ।
तदयुक्तं विविधैर्योगैर्निहन्यादामवान् बहून् ॥
नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु ॥"
तच्च नानाद्रव्यरसगुणवीर्य्यविपाकविरुद्धानां पुष्परसानां सविषमक्षिकासम्भवत्वाद्यथोपचारम् ।
"उष्णैर्विरुध्यते सर्व्वं विषान्नवयतया मधु ।
उष्णार्त्तसुप्तरुग्णैर्वा तं निहन्ति यथा विषम् ॥
तत् सौकुमार्य्याच्च तथैव शीत्या-
न्नानौषधीनां रससम्भवाच्च ।
उष्णैर्विरुध्येत विशेषतश्च
तथान्तरीक्षेण जलेन चापि ॥
उष्णेन मधु संयुक्तं वमनेष्ववचारितम् ।
व्यपाकादनवस्थानान्न विरुध्येत पूर्व्ववत् ॥
मध्यमात् परतस्त्वन्यदामं कटु न विद्यते ।
विरुद्धोपक्रमत्वात्तु सर्व्वं हन्ति यथा विषम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)
अस्य सामान्यगुणाः । शीतत्वम् । गुरुत्वम् । स्वादुत्वम् । त्रिदोषघ्नत्वाग्नित्वम् । कषायानुरसत्वम् । रूक्षत्वम् । चक्षुष्यत्वम् । श्वासकासनाशित्वञ्च ॥ * ॥ तदष्टविधं यथा । पौत्तिकम् १ भ्रामरम् २ क्षौद्रम् ३ माक्षिकम् ४ छात्रम् ५ अर्घ्यम् ६ औद्दालकम् ७ दालम् ८ । एतेषां लक्षणानि यथा,—
"पिङ्गला मक्षिका ज्ञेया महत्यल्पा च सा द्विधा ।
महती पुत्तिकानाम्नी खल्वा क्षुद्रेति कथ्यते ॥
मध्यमा मक्षिका नीला माक्षिकेत्यभिधीयते ।
पुत्तिकाभ्रमरक्षुद्रमक्षिकासम्भवं मधु ॥
पौत्तिकाद्युच्यते क्षौद्रं वरटीच्छत्रसम्भवम् ।
तपोवने जरत्कारोरर्घ्यं मधुतरुद्भवम् ॥
औद्दालकन्तु वल्मीककारिकीटविनिर्म्मितम् ।
दालमित्यभिनिर्द्दिष्टं वृक्षकोटरकीटजम् ॥"
एतेषां वर्णा यथा,—
"माक्षिकं तैलवर्णं स्यात् क्षतवर्णन्तु पौत्तिकम् ।
क्षौद्रं कपिलवर्णं स्याच्छुक्लं भ्रामरमुच्यते ॥"
एतेषां गुणा यथा,—
पौत्तिकं तेषु वीर्य्याढ्यं कषायानुरसान्वयात् ।
वातरक्तपित्तकफेषु विशाहि मधूत्तमम् ॥
"पेच्छिल्यात् स्वादुभूयस्त्वाद् भ्रामरं गुरु कीर्त्तितम् ।
क्षौद्रं विशेषतो ज्ञेयं शीतलं लघु लेखनम् ॥
तस्माल्लघुतरं रूक्षं माक्षिकं प्रवरं स्मृतम् ।

श्वासादिषु च रोगेषु प्रशस्तं तद्विशेषतः ॥
क्षौद्रं स्निग्धकफहरं रक्तपित्तहरं गुरु ।
अक्ष्यं चक्षुष्यमायुष्यं कफपित्तामवातजित् ॥
औद्दालकं कषायोष्णं कटुकुष्ठविषापहम् ।
दालं कफहरं रूक्षं दीपनं कृद्विमेहजुत् ॥
उष्णसृष्टाग्निसृष्टं च हन्यान्मधु विषान्वयात् ।
मधुशुक्तेर्विरुध्यन्ते वर्ज्ययित्वार्द्रसंज्ञितम् ॥"
उक्तैः रौद्रैः करकैः उष्णं मधु उष्णार्तं रौद्रपीड़ितं जनं विषान्वयात् विषतुल्यत्वात् हन्यात् ॥ * ॥ नवपुराणमधुगुणाः ।
"दृंहणीयं मधु नवं वातश्लेष्महरं परम् ।
पुराणं लघु संग्राहि निर्दोषं स्थौल्यनाशनम् ॥
दोषत्रयहरं पक्वमामगन्धं त्रिदोषजुत् ॥"
अत्र केचिन्मधुनोऽग्निसंयोगाभावात् कालपक्वतामाहुः ॥ * ॥ मधुजातशर्करागुणाः ।
"मधुजा शर्करा रूक्षा हृद्याच्छर्दितिसारजित्।"
इति राजवल्लभे मधुवर्गः ॥ * ॥
अपि च ।
"माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं क्षात्रकं तथा ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥
नानापुष्परसाहाराः कपिला वनमक्षिकाः ।
याः क्षुद्राक्षाभिरुत्पन्नं मधु माक्षिकमुच्यते ॥
ये स्निग्धाञ्जनगोलाभाः पुष्पासवपरायणाः ।
भ्रमरैर्जनितं तेषु भ्रामरं मधु भण्यते ॥
पिङ्गला मक्षिकाः क्षुद्राः क्षुद्रा इति हि विश्रुताः ।
ताभिरुत्पादितं वस्तु तत् क्षौद्रं मधु कथ्यते ॥
महत्यो मक्षिकाः पिङ्गाः पुत्तिका इति कीर्त्तिताः ।
तज्जातं मधु धौमद्भिः पौत्तिकं वसुदाहृतम् ॥
क्षुद्राकारास्तु पटलं सरघाः पीतपिङ्गलाः ।
ये कुर्वन्ति तदुत्पन्नं मधु क्षात्रकमीरितम् ॥
मक्षिकाक्षौद्रसदृशा याः पीताः षट्पदसन्निभाः ।
तदुद्भूतं वदन्त्यार्द्रं तदार्द्रं मधु भण्यते ॥
उद्दालाः कपिलाः कोटा भूमेरुद्दलनाः स्मृताः ।
वल्मीकान्तस्तदुत्पन्नमौद्दालकमुदीर्यते ॥
इक्षुनीलदलाकाराः क्षुद्राश्चिन्वन्ति मक्षिकाः ।
यदृक्षकोटरान्तस्थं मधु दालमिदं क्रमात् ॥
इत्येतस्याष्टधा भेदैरुत्पत्तिः कथिता क्रमात् ।
अथ वक्ष्याम्यहं लेषां वर्णवीर्यादिकं क्रमात् ॥"
तद्यथा,—
माक्षिकं तैलवर्णं स्यात् श्वेतं भ्रामरमुच्यते ।
क्षौद्रन्तु कपिलाभासं पौत्तिकं घृतसन्निभम् ॥
आपीतवर्णं क्षात्रं स्यात् पिङ्गलार्घ्यनामकम् ।
औद्दालं सर्वसादृश्यमापीतं दालमुच्यते ॥
माक्षिकं मधुरं रूक्षं लघु श्वासादिदोषजुत् ।
भ्रामरं स्निग्धं रूक्षं मधुरं सुखजाग्र्यजित् ॥
क्षौद्रन्तु ग्रीतं चक्षुष्यं स्निग्धं पित्तवातहृत् ।
पौत्तिकं मधु रूक्षोष्णं क्षय्यसृक्पित्तदाहजुत् ॥
स्निग्धमेहकफग्निञ्च विद्याच्छ्रात्रं गुणोत्तरम् ।
अर्घ्यं मक्षतिचक्षुष्यं कफपित्तादिदोषजुत् ॥
औद्दालकन्तु कुष्ठादिदोषघ्नं सर्वसिद्धिदम् ।
दालं कटु कषायाढ्यं मधुरं पित्तदायि च ॥
नवं मधु भवेत् स्थौल्यं नातिश्लेष्महरं परम् ।
देहस्थौल्यापहं याहि पुराणं मधु लेखनम् ॥
पक्वं दोषत्रयघ्नं मधु विविधरुजाजाद्यजिज्ञा-
मयादि-
ध्वंसं धत्ते च रुच्यं बलमतिपुष्टिदं वीर्यवृद्धिं
विधत्ते ।
आमश्लेष्मामगुल्मामयपवनरुजापित्तदाहा-
स्रदोष-
नाशं नूनं विशोषं जनयति नयति ध्वंसमप्यक्ष-
रुग्भिः ॥
व्रणशोधनसन्धाने व्रणसंरोपणादिषु ।
साधारण्यान्मधु हितं तत्तुल्या मधुशर्करा: ॥
उष्णं सहोष्णं काले वा स्वयमुष्णमथापि वा ।
आमं मधु मनुष्याणां विषवत्तापदायकम् ॥
कीटकादियुतमम्लदूषितं
यच्च पर्युषितकं मधु स्मृतं ।
कण्ठकोटरगतञ्च मेचकं
तच्च गेहजनितञ्च दोषजुत् ॥
दष्टं निहत्य यदुपात्तमपास्य दंशं-
स्तादृग्विधं मधु रसायनयोगयोग्यम् ।
छिन्नागुदाङ्कुरविशोषकपत्रवादि-
दोषापहं भवति दोषदमन्यथा चेत् ॥
माध्वी सिता मधूत्पन्ना मधुजा मधुशर्करा ।
माक्षीकशर्करा चैषा क्षौद्रजा क्षौद्रशर्करा ॥
यद्गुणं यन्मधु प्रोक्तं तद्गुणास्तस्य शर्करा: ।
विशेषाल्लघुत्वा च तर्पणं क्षौद्रदेहिनाम् ॥"
इति राजनिर्घण्टः ॥*॥*॥
मतान्तरे मधुगुणाः ।
"मधु शीतं लघु स्वादु रूक्षं याहि विलेखनम् ।
चक्षुष्यं दीपनं स्वर्यं व्रणशोधनरोपणम् ॥
सौकुमार्यकरं श्लक्ष्णं परं स्रोतोविशोधनम् ।
कषायानुरसं क्षारि प्रसादजनकं परम् ॥
वक्ष्यं मेधाकरं हृद्यं विषदं रोचनं हरेत् ।
कुष्ठार्शःकासपित्तासकफमेहक्लमक्रिमीन् ।
श्वेदस्रश्वासमिन्वासहिक्कातीसारविड्ग्रहान् ।
दाहश्चतच्चयांस्तु योगवाह्यप्यवासलम् ॥"*॥
अथ मधुभेदाः ।
"माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं क्षात्रमित्यपि ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥"*॥
अथ तेषां लक्षणानि गुणाश्च । तत्र माक्षिकस्य ।
"मक्षिकाः पिङ्गवर्णास्तु महत्यो मधुमक्षिकाः ।
ताभिः कृतं तैलवर्णं माक्षिकं तत् प्रचक्षते ।
माक्षिकं मधुरं श्रेष्ठं नेत्रामयहरं लघु ।
कामलार्शःक्षतश्वासकासक्षयविनाशनम् ॥"*॥
अथ भ्रामरस्य ।
"किञ्चित् रूक्षैः प्रसिद्धेभ्यः पुष्पेभ्यः अलिभिश्चितम् ।
निर्म्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥
भ्रामरं रक्तपित्तघ्नं मूत्रजाश्यकरं गुरु ।
स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं हिमम् ॥*॥"
अथ क्षौद्रस्य ।
"मक्षिकाः कपिलाः क्षुद्राः क्षुद्राक्षास्तत्कृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत् ॥
गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ॥"
अथ पौत्तिकस्य ।
"याः क्षुद्राः मक्षिकोपमा लघुतराः प्रायो महापिप्पिलं
वृक्षाणां तरुकोटरान्तरगताः पुष्पासवं कुर्वते ।
तास्तज्जैरिह पुत्तिका निगदितास्ताभिः कृतं सर्पिषा
तुल्यं यन्मधु तद्गुणैश्चरचनैः संकीर्त्तितं पौत्तिकम् ॥
पौत्तिकं मधु रूक्षोष्णं पित्तदाहासवातजित् ।
विदाहि मेहहृच्छूलं गुल्मार्शःक्षतशोषि च ॥"
अथ क्षात्रस्य ।
"वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्वन्ति हृत्रकाकारं तज्जं क्षात्रं मधु स्मृतम् ॥
क्षात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्लेष्मरक्तपित्तप्रमेहजित् ।
भ्रमहृल्लोमहर्षघ्नं तर्पणञ्च गुणाधिकम् ॥"
अथार्घ्यस्य ।
"मधूकवृक्षा निर्यासं जरत्काष्ठांशमोद्भवाः ।
सवन्यार्घ्यं तदा ख्यातं श्वेतकं मालवे पुनः ॥
तीक्ष्णतुक्तास्तु याः पीता मक्षिकाः षट्पदोपमाः ।
अर्घ्यास्तास्तत्कृतं यत्तदार्घ्यमित्यपरे जगुः ॥
आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके तिक्तञ्च बलपुष्टिकृत् ॥"*॥
अथौद्दालकस्य ।
"प्रायो वल्मीकमध्यस्थाः कपिलाः स्वल्पकोटकाः ।
कुर्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु ॥
औद्दालकं रुचिकरं स्वर्यं कुष्ठविषापहम् ।
कषायमधुरञ्चैव कटुपाकञ्च पित्तजित् ॥"*॥
अथ दालस्य ।
"संसृष्टं पतितं पुष्पात् यत्तु पद्मोपरि स्थितम् ।
मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ॥
दालं मधु लघु प्रोक्तं दीपनीयं कफापहम् ।
कषायानुरसं रूक्षं रुच्यं कृद्विषमेहजित् ॥
अधिकं मधुरं स्निग्धं दृंहणं गुरुभारिकम् ॥"
लघु पाके । गुरुभारिकं तुलितम् ॥ * ॥ अथ नवपुराणमधुगुणाः ।
"नवं मधु भवेत् पुष्टेः नातिश्लेष्महरं परम् ।
पुराणं ग्राहकं रूक्षं मेदोघ्नमतिलेखनम् ॥
मधुनः शर्करायाश्च गुणेष्वपि विशेषतः ।
एकसंवत्सरेऽतीते पुराणत्वं स्मृतं बुधैः ॥"
अथ मधुनः शीतस्य गुणाधिक्यसुख्यतायाः निषेधः ।
"विषपुष्पादपि रसं सविषा भ्रमरादयः ।
गृहीत्वा मधु कुर्वन्ति तच्छीतं गुणवन्मधु ॥

विप्रान्वयात्तद्ज्ञान्तु द्वयेगोष्णेन वा सह ।
उष्णार्त्तस्योष्णकाले च स्मृतं विषसमं मधु ॥"
इति भावप्रकाशः ॥

मधुः, पुं, (मन्+उ । नस्य धः ।) मधुद्रमः । मौलशाक इति भाषा ॥ वसन्तर्तुः । (यथा, कुमारसम्भवे । ३ । २७ ।
"निवेशयामास मधुर्द्विरेफान्
नामाक्षराणीव मनोभवस्य ॥")
दैत्यभेदः । (यथा, देवीभागवते । १ । ६ । १५ ।
"मधुश्च कुपितस्तत्र हरिणा सह संयुगे ॥")
इमं हत्वा विष्णुर्मधुसूदनोऽभूत् ॥ चैत्रमासः । इति मेदिनी । धे, १२ ॥ (यथा, रघुः । ११ । ७ ।
"रेजतुर्गतिवक्रात् प्रवर्त्तिनौ
भास्करस्य मधुमाधवाविव ॥")
अश्वोकवृक्षः । इति हेमचन्द्रः । २ । १५३ ॥ यष्टिमधु । इति शब्दरत्नावली ॥ असुरविशेषः । (यथा, भागवते । ६ । ११ । १४ ।
"शतघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ।
हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥")
स च शत्रुघ्नेन हतः । यस्य नाम्ना मथुरा मधुपुरीति ख्याता ॥

मधुः, स्त्री, (मन्+उ । नस्य धः ।) जीवन्तीवृक्षः । इत्यमरः । २ । ४ । १४२ ॥

मधुकं, क्ली, (मध्नातीति । मधु+"संज्ञायां च ।" ५ । ३ । ६८ । इति कन् । यद्वा, मधु मधुरं कायतीति । के+कः ।) यष्टिमधुकाः । इत्यमरः । २ । ४ । १०६ ॥ (यथास्य पर्य्यायः ।
"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका ।
यष्टिमधु स्थलेजाता जलजातिरसा पुरा ॥"
इति वैद्यकरत्नमालायाम् ॥)
वपुः । इति हेमचन्द्रः ॥

मधुकः, पुं, (मधु मधुरं कायतीति । के+कः ।) वन्दिभेदः । यष्ट्याह्वः । विहगान्तरः । इति विश्वः ॥

मधुकण्ठः, पुं, (मधुर्मधुरः कण्ठः कण्ठस्वरो यस्य ।) कोकिलः । इति त्रिकाण्डशेषः ॥

मधुकरः, पुं, (करोति सञ्चिनोतीति । कृ+अच् । मधुनः करः ।) भ्रमरः । इत्यमरः । २ । ५ । २६ ॥ (यथा, श्रीमद्भागवते । ४ । १८ । २ ।
"सज्जेत सारमादत्ते यथा मधुकरो बुधः ॥")
कामी । इति धरणिः ॥ भृङ्गराजवृक्षः । इति शब्दमाला ॥

मधुकर्कटिका, स्त्री, (मधुर्मधुरा कर्कटिकेव ।) मधुरजम्बीरविशेषः । मउकट्टी इति भाषा । तत्पर्य्यायः । कुष्माण्डी २ । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्या गुणाश्च यथा,—
"बीजपूरोऽमरः प्रोक्तो मधुरो मधुकर्कटी ।
मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः ।
रक्तपित्तक्षयश्वासकासहिक्काभ्रमापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मधुखर्ज्जूरिका । इति राजनिर्घण्टः ॥

मधुकर्कटी, स्त्री, (मधुर्मधुरा कर्कटी) मधुबीजपूरः । इति राजनिर्घण्टः ॥

मधुका, स्त्री, (मधुक+टाप् ।) मधुयष्टिका । इत्यमरः । २ । ४ । १०६ ॥ मधुपर्णीवृक्षः । इति मेदिनी । के, १३५ ॥ कृष्णवर्णकङ्कुनी । इति हेमचन्द्रः । ४ । २४३ ॥

मधुकुक्कुटिका, स्त्री, (मधुः मधुरा कुक्कुटीव ।
मधुकुक्कुटी, मधुकुक्कुट+स्त्रियां ङीष् । स्वार्थे कन् । स्त्रियां टाप् । पूर्व्वस्य ह्रस्वत्वञ्च ।) जम्बीरविशेषः । मधुर इति मधूर इति च भाषा । तत्पर्य्यायः । मातुलुङ्गा २ सुगन्धा ३ गिरिजा ४ पूतिपुष्पिका ५ अम्लम्बा ६ देवदूती ७ । इति रत्नमाला ॥ अस्या गुणाः । शीतत्वम् । स्वादुत्वम् । गुरुत्वम् । स्निग्धत्वम् । वातपित्तविनाशित्वञ्च । इति राजवल्लभः ॥

मधुकृत्, पुं, (मधु करोति सञ्चिनोतीति । कृ+क्विप् तुगागमश्च ।) भ्रमरः । इति हेमचन्द्रः ॥ (यथा, छान्दोग्योपनिषदि । ३ । १ । २ ।
"अथ योऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूंष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अन्वता आपः ॥")

मधुकैटभः, पुं, (मधुनः पुष्परसस्य के शिरसि अग्रभागे भटति गच्छतीति । भट्+कर्त्तरि अच् ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

मधुकैटभौ, पुं, (मधुश्च कैटभश्च तौ । इतरेतरद्वन्द्वः ।) असुरविशेषौ । तयोरुत्पत्त्यादि यथा,
"दैनन्दिने तु प्रलये प्रसुप्ते गरुडध्वजे ।
तस्य श्रवणविड्जातावसुरौ मधुकैटभौ ॥
कूर्म्मपृष्ठगता पृथ्वी विलीनेवाभवज्जलैः ।
तां विज्ञायाथ योगनिद्रा महामाया श्लोकयत् ॥
तां वै दृढतरां कर्त्तुं पृथ्वीं प्रति तदेश्वरी ।
उपायं चिन्तयामास कथं पृथ्वी भवेद्दृढा ॥
इदानीमाप्यवत् पृथ्वी प्रवृत्ता कोमला जलैः ।
सृष्टिकाले जनान् बोढुं कथं शक्ता भविष्यति ॥
इति सञ्चिन्त्य सा माता जगतां सृष्टिकारिणी ।
उपगम्य तदा विष्णुमाससाद सुनिद्रितम् ॥
तनु सुप्तं समासाद्य जगन्नाथं जगत्पतिम् ।
वामहस्तकनिष्ठाग्रं तस्य कर्णे न्यवेशयत् ॥
निवेश्य नखराग्रेण प्रौढ्या श्रवणं मलम् ।
चूर्णीचकार सा देवी योगनिद्रा जगत्प्रसूः ॥
तत्कर्णमलचूर्णेभ्यो मधुनामासुरोऽभवत् ।
ततो दक्षिणहस्तस्य कनिष्ठाग्रेण दक्षिणे ॥
कर्णे न्यवेशयद्देवी तस्मादप्युद्धृतं मलम् ।
तत्रापि क्षोदयामास करशाखाग्रजेन तु ॥
ततोऽभूत् कैटभो नाम बलवानसुरो महान् ॥
उत्पन्नः स च पानार्थं यस्मान् मुमुचिवान्मधु ।
अतस्तस्य महादेवी मधुनामाकरोत्तदा ॥
उत्पन्नः कीटवद्भाति महामायाकरे यतः ।
अतस्तं कैटभाख्यञ्च स्वयं देवी तदाकरोत् ॥
तावुवाच महामाया युध्यतां हरिणा सह ।
युवानौ अद्यवैवाद्य भवन्तौ निहनिष्यति ॥
यदा युवां प्रभावैर्यै र्यावां विष्णो ! वधान तौ ।
तदैवायं युवां हन्ता नान्यथा हरिरेष्यथ ॥
महामायामोहितौ तौ विष्णुगात्रे तदा मुहुः ।

भ्रममाणौ ददृशतुर्नाभिपद्मस्थितं विधिम् ॥
तमूचतुस्तौ धातारं हनिष्यावोऽद्य नामितम्
त्वं जागरय वैकुण्ठं यदि जीवितुमिच्छसि ॥
ततो ब्रह्मा महामायां योगनिद्रां जगत्प्रसूम् ।
प्रसादयामास तदा स्तुतिभिर्नतिभिर्मिथा ॥
चिरं स्तुताथ सा देवी ब्रह्मणा जगदात्मना ।
प्रसन्नाभवदत्यर्थमुवाच च तथा विधिम् ॥
किमर्थं संस्तुता चाहं किं करिष्याम्यहं तव ।
तद्वद त्वं महाभाग ! करिष्याम्यहमद्य ते ॥
ततस्तेन महामाया प्रोक्ता धात्रा महात्मना ।
प्रबोधय जगन्नाथं यावन्नो मां हनिष्यतः ।
संमोहयैतौ दुर्द्धर्षावसुरौ मधुकैटभौ ॥
इत्युक्ता सा तदा देवी ब्रह्मणा जगदात्मना ।
बोधयामास वैकुण्ठं मोहयामास तौ तदा ॥
ततः प्रबुद्धः क्रुष्णः स ददर्शं भयशालिनम् ।
ब्रह्माणं तौ तदा घोरावसुरौ मधुकैटभौ ॥
ततस्ताभ्यां स युयुधे ह्यसराभ्यां जनार्द्दनः ।
नाशकद् बाधितुं वीरावसुरौ मधुकैटभौ ॥
अनन्तोऽपि फणाग्रेण तान्नो धर्त्तुं क्षमोऽभवत् ।
युध्यमानान्महावीरान् वैकुण्ठमधुकैटभान् ॥
अथ ब्रह्मा शिलारूपां स्थितिप्रक्रिं तदाकरोत् ।
अर्द्धयोजनविस्तीर्णां सार्द्धयोजनमायताम् ॥
तस्यां शिलायां वैकुण्ठो युयुधे नृपसत्तम ! ।
सह ताभ्यां शिला सा तु प्रविवेश जलान्तरम् ॥
तस्यान्तु शक्त्या मायायां लोयेषु युयुधे हरिः ।
पञ्चवर्षसहस्राणि बाहुयुद्धेर्निरन्तरम् ॥
यदा नैवाशकद्धन्तुं तौ विष्णुर्जगतां पतिः ।
परां चिन्तां तदावाप विधातापि भयान्वितः ॥
ततस्तावेव तं विष्णुमूचतुर्ब्बलदर्पितौ ।
पुनः पुनस्तौ गर्জन्तौ महामायाविमोहितौ ॥
तुष्टौ स्वस्तन्नियुद्धेन वरं वरय माधव ! ।
तवेष्टं संप्रदास्यावः सत्यमेतदराधुना ॥
तयोस्तद्वचनं श्रुत्वा भगवान् गरुडध्वजः ।
उवाच तौ युवां वध्यौ भवेतां मे महाबलौ ।
इति देहि वरं मह्यं दातव्यं यदि विद्यते ॥
तौ तदा प्राह युद्धस्तो योग्यो नौ शोभनो वधः ।
तत्रावां जहि नौ यत्र तोयं सम्प्रति विद्यते ॥
तयोस्तद्वचनं श्रुत्वा माधवो जगतां पतिः ।
ब्रह्माणं माह शीघ्रेण प्राहेदञ्चात्मसंज्ञया ॥
ब्रह्मशक्तिशिलां शीघ्रमुद्धृत्य धीयतां यथा ।
तत्र स्थित्वा महाधारे हनिष्यामि महाबलौ ॥
ततो ब्रह्मा ह्यहञ्चैव उद्धार शिलान्तु ताम् ॥
तस्या मध्ये पूर्व्वभागे ह्यहं पर्व्वतरूपधृक् ।
ऊर्द्धं स्थित्वा शिलां भित्त्वा प्रविवेश रसातलम् ॥
शैलाग्रामभवत् कूर्म्मः पर्व्वताग्रहीत शिलाम् ।
वायव्याश्च तथानन्तो नैर्ऋत्याश्च सुरेश्वरी ॥
महामाया जगद्धात्री शैलरूपधारिणी ।
आग्नेयाश्च स्वयं विष्णुरैरूपेण संस्थितः ॥
ब्रह्मशक्तिशिलां रुद्धन् भगवान् परमेश्वरः ।
मध्ये ब्रह्मा त्वहञ्चैव वराहश्च तथापरः ॥
ततो वराहपृष्ठस्य चरमे जगतां पतिः ।
स्थित्वा शिलामवष्टभ्य ब्रह्मशक्तिमधोगताम् ॥

वामे खञ्जघने यत्नादारोप्य शिरसी तयोः।
जगदाधारभूतः स सर्व्वयत्नेन संयुतः॥
सर्व्वैर्बलैः समाक्रम्य चिच्छेद स पृथक् पृथक्।
मधुकैटभयोः सम्यक् वीरयोः पृथिवीपते॥
तस्य चाक्रम्य संस्थानादृच्छक्तिरधोगता।
म्रियमाणापि देवैर्यैर्बलादपि सुदुर्मुखैः॥
ततस्तयोस्तु मृतयोः शरीरे जगतां पतिः।
मक्षशक्तिं समुद्धृत्य यथावत्स्थां प्रयत्नतः।
उद्धृतायां पृथिव्यान्तु तयोर्मेदोविलेपनैः।
सुदृढामकरोत् पृथ्वीं क्लेदितां तोयराशिभिः॥
मेदोविलेपिता यस्माद् गीयते मेदिनीति सा।
अद्यापि पृथिवी देवी देवमातुश्वरा यसे॥"

इति कालिकापुराणे ६१ अध्यायः॥
(अनयोर्नामनिरुक्तिर्यथा, महाभारते। १२। ३४०। २४—२६।
"सत्वस्थः परमेष्ठी स ततो भूतगणान् सृजन्।
पूर्व्वमेव च पद्मस्य पत्रे सूर्य्यांशुसप्रभे॥
नारायणकृतौ बिन्दू अपामास्तां गुणोत्तरौ।
तावपश्यत् स भगवाननादिनिधनोऽच्युतः॥
एकस्तत्राभवद्विन्दुर्मेध्याभो रुचिरप्रभः।
स तामसो मधुर्नामस्तस्मात् नारायणात्मजः।
कठिनस्वपरो विन्दुः कैटभो राजसस्तु सः॥")

मधुकोषः, पुं, (मध्वर्थं कृतः कोषः मध्वाधारः कोषो वा।) मधुमक्षिकाकृतकोषः॥ मौचाक् इति भाषा। तत्पर्य्यायः। मधुक्रमः२। इत्यमरः। २। १०। ४१॥ मधुकोषः। इति शब्दचन्द्रिका॥

मधुक्रमः, पुं, (मधुनः क्रमः।) पुनः पुनर्मधुपानक्रमः। तत्पर्य्यायः। मधुवारः २। इत्यमरः। २। १०। ४१॥ मधुकोषः। इति शब्दचन्द्रिका॥

मधुक्षीरः, पुं, (मधुवत् क्षीरं निर्य्यासोऽस्य।) खर्ज्जूरवृक्षः। इति शब्दरत्नावली॥

मधुखर्ज्जूरिका, स्त्री, (मधुर्मधुरा खर्ज्जूरी। ततः कन् टाप्। पूर्व्वस्य ह्रस्वत्वम्।) खर्ज्जूरविशेषः। तत्पर्य्यायः। मधुकर्कटिका २ कोलकर्कटिका ३ कण्टकिनी ४ मधुफलिका ५ माध्वीमधुरा ६ मधुरखर्ज्जूरी ७ मधुखर्ज्जूरी ८। अस्या गुणाः। मधुरत्वम्। दृष्यत्वम्। सन्तापपित्तभ्रान्तिकारित्वम्। अग्निदीप्तत्वम्। अल्पकफकृत्वम्। बहुवीर्य्यविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥

मधुगायनः, पुं, (मधु गायतीति। गै+"ण्युट् च।" ३। १। १४७। इति ण्युट्। यद्वा, मधौ वसन्ते गायन इति सप्तमीसमासः।) कोकिलः। इति राजनिर्घण्टः॥

मधुगुञ्जनः, पुं, (मधु मधुरं गुञ्जनमस्य। पवनेरितगुञ्जकफलशब्दस्यास्य मधुरत्वात् तथात्वम्।) भ्रोभाञ्जनवृक्षः। इति शब्दमाला॥

मधुघोषः, पुं, (मधुर्मधुरो घोषो यस्य।) कोकिलः। इति शब्दमाला॥

मधुच्छदा, स्त्री, (मधुः मधुरश्छदः पर्णमस्याः। यद्वा मधु छादयति रसाधिक्येन पराभवतीति छद+क्विप्। धः। धे ह्रस्वश्च।) मयूरशिखा। इति भावप्रकाशः। (तथास्या गुणाः।
"नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित्।"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

मधुजं, क्ली, (मधुनो जातम् इति। जन्+डः।) शिक्थकम्। इति राजनिर्घण्टः॥

मधुजम्भीरः, पुं, (मधुर्मधुरो जम्भीरः।) मधुरजम्भीरः। इति राजनिर्घण्टः॥

मधुजा, स्त्री, (मधोः मधुमेदसो जाता प्रादुर्भूता इति। जन्+डः टाप्।) पृथिवी। इति शब्दचन्द्रिका॥ (मधुनो जायते सा इति। जन+ड।) सिता। तत्पर्य्यायः। महाश्वेता २। इति चिकाण्डशेषः॥

मधुजित्, पुं, (मधुं मधुनामानं दैत्यं जितवानिति। जि+क्विप्। तुगागमश्च।) विष्णुः। इति शब्दरत्नावली॥ (यथा, देवीभागवते। १।५।६२।
"शिवे! किं वा ज्ञात्वा विविदिषसि शक्तिं मधुजितः॥")

मधुतृणं, क्ली, (मधुरं तृणम्।) इक्षुः। इति चिकाण्डशेषः॥ (गुणादयोऽस्य इक्षुशब्दे ज्ञातव्याः॥)

मधुतृणः, पुं, (मधुर्मधुरस्तृणः।) इक्षुः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—
"महारसोऽसिपत्रः स्याच्छतपुष्पो मधुतृणः।
इक्षुर्वंशकशान्तारभिरुपौण्ड्रादिभेदवान्॥"
इति वैद्यकरत्नमालायाम्॥
"इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूरिरसोऽपि च।
गुडमूलोऽसिपत्रश्च तथा मधुतृणः स्मृतः॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

मधुत्रयं, क्ली, (मधूनां मधुरद्रव्याणां त्रयम्।) मधुरत्रयम्। इति राजनिर्घण्टः॥ (मधुघृतसितात्रयम्॥)

मधुदीपः, पुं, (मधौ वसन्ते दीप्यत इति। दीप्+कः।) कामदेवः। इति हेमचन्द्रः। २। १४१॥

मधुदूतः, पुं, (मधोर्वसन्तस्य दूत इव। वसन्तागमनात् प्रागस्य सुकुलोद्गमदर्शनात् तथात्वम्।) आम्रवृक्षः। इति चिकाण्डशेषः॥ (तथास्य पर्य्यायः।
"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मधुदूती, स्त्री, (मधोर्वसन्तस्य दूतीव।) पाटलावृक्षः। इति भावप्रकाशः॥ (पर्य्यायादि विवरणमस्याः पाटलाशब्दे द्रष्टव्यम्॥)

मधुद्रः, पुं, (मधुने द्राति पुष्पात् पुष्पं गच्छतीति। द्रा+कः।) भ्रमरः। इति चिकाण्डशेषः॥

मधुद्रवः, पुं, (मधुर्मधुरो द्रवो निर्य्यासोऽस्य।) रक्तशिग्रुः। इति शब्दरत्नावली॥

मधुद्रुमः, पुं, (मध्वर्थं मद्यार्थं मधूत्पादको वा द्रुमः। तत् पुष्पेभ्यो मद्यसम्भवादस्य तथात्वम्।) वृक्षविशेषः। मौलशाल्ह इति भाषा॥ तत्पर्य्यायः। मधूकः २ गुडपुष्पः ३। इत्यमरः। २। ४। २०॥ (पर्य्यायान्तरमस्य यथा, वैद्यकरत्नमालायाम्।
"मधुपुष्पो मधूकश्च गुडपुष्पो मधुद्रुमः॥")

मधुधातुः, पुं, (मधुना तत्पर्य्यायनाम्ना प्रसिद्धो धातुः।) माक्षिकम्। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।
"स्वर्णमाक्षिकमाख्यातं तापीजं मधुमाक्षिकम्।
ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृतः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मधुधूलिः, स्त्री, (मधुर्मधुरा धूलिरिव।) खड्डः। इति हेमचन्द्रः। ३। ६॥ खाँड् इति भाषा॥

मधुधेनुः, स्त्री, (मधुरचिता धेनुः।) दानार्थं मध्वादिनिर्म्मितसवत्सा गौः। यथा,—
होतोवाच।
"मधुधेनुं प्रवक्ष्यामि सर्व्वपातकनाशिनीम्।
अनुलिप्ते महीपृष्ठे क्षौमाजिनकुशोत्तरे॥
धेनुं मधुमयीं कृत्वा संपूर्णां घटधोरणीम्।
चतुर्थेन तथांशेन वत्सकं परिकल्पयेत्॥
सौवर्य्यन्तु सुखं कृत्वा षडङ्गाढ्यगुरुचन्दनैः।
पृष्ठं ताम्रमयं कृत्वा साक्षां षड्मयीं तथा॥
पदानिक्षुमयान् कृत्वा सितकम्बलकम्बलाम्।
सुखं गुडमयं कृत्वा जिह्वां शर्करया तथा।
ओष्ठौ पुष्पमयौ तस्या दन्ताः फलमयाः स्मृताः।
दर्भरोमधरा देवी रौप्यशृङ्गविभूषिता॥
प्रशस्तपत्रश्रवणा प्रमाणात् परिकल्पतः।
सर्व्वलक्षणसंयुक्ता सप्रधान्यान्विता तथा॥
पत्वारि तिलपात्राणि चतुर्दिक्षपि स्थापयेत्।
छादितां वस्त्रयुग्मेन घण्टाभरणभूषिताम्।
कांस्योपदोहनां कृत्वा गन्धपुष्पैस्तु धूपिताम्॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये।
संक्रान्त्यासुपरागे च सर्व्वकालं यदृच्छया॥
द्रव्यराशयसम्पत्तिं दृष्ट्वा तान्तु प्रदापयेत्।
ब्राह्मणाय दरिद्राय श्रोत्रियायाहिताग्नये॥
आर्य्यावर्त्ते वसुत्पन्ने वेदवेदाङ्गपारगे।
ताडयाय प्रदातव्या मधुधेनुर्नरोत्तम!॥
पुष्कदेशोपविष्टस्तु गन्धधूपादिपूजिताम्।
आच्छाद्य वस्त्रयुग्मेन सुद्रिकाकार्पपत्रकैः॥
स्वशक्त्या दक्षिणां दत्त्वा वित्तशाठ्यविवर्जितः।
जलपूर्व्वन्तु कर्त्तव्यं पश्चादानं समर्पयेत्॥
रसज्ञा सर्व्वदेवानां सर्व्वभूतहिते रता।
प्रीयन्तां पितृदेवाश्च मधुधेनो! नमोऽस्तु ते॥
एवमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत्।
अहं यच्छामि त्वां देवि! कुटुम्बार्थे विशेषतः।
कामं कामदुघे कामां मधुधेनो! नमोऽस्तु ते॥
मधुवातेतिमन्त्रेण दद्यादाशु त्रिकेऽपि तु।
दत्त्वा धेनुं महाराज! क्षुरकोपानहौ तथा॥
एवं यः कुरुते भक्त्या मधुधेनुं नराधिप!।
दत्त्वा दानं पायसेन मधुना च दिनं नयेत्॥
ब्राह्मणोऽपि चिरात्तस्तु मधुपायससंयुतम्।
एवं कृते तु यत् पुण्यं तन्निबोध नराधिप!॥
यत्र नद्यो मधुवहा यत्र पायसकर्दमाः।

ऋषयो मुनयः सिद्धास्तत्र गच्छन्ति धेनुदाः ॥
तत्र भोगानथो भुक्त्वा ब्रह्मलोके स तिष्ठति ।
क्रीड़ित्वा सुचिरं कालं पुनर्मर्त्यमुपागतः ।
स शुक्रो विपुलान् भोगान् विष्णुलोकं स
गच्छति ॥
दशपूर्व्वान् दशपरानात्मानञ्चैकविंशतिम् ।
नयते विष्णुसाय्युं मधुधेनुप्रसादतः ॥
य इदं शृणुयाच्छ्रद्धा श्रावयेदापि मानवः ।
सर्व्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥"
इत्यादि वराहपुराणे श्वेतोपाख्याने मधु-
धेनुमाहात्म्यम् ॥

मधुनालिकेरकः, पुं, (मधुर्मधुरो नारिकेलः स्वार्थे कन् । रलयोरैक्यात् रस्य लत्वं लस्य च रत्वम् ।) मधुनारिकेलः । एरनारिकेल इति कोकणे प्रसिद्धम् । मोहोनारल इति च ख्यातम् । तत्-पर्य्यायः । माध्वीकफलः २ मधुफलः ३ अधि-तनफलः ४ माक्षिकफलः ५ मृदुफलः ६ बहु-कूर्चः ७ दृढफलः ८ । अस्य गुणाः । मधु-रत्वम् । स्निग्धत्वम् । दाहशान्तिपित्तहारि-त्वम् । बलपुष्टिश्रेष्ठकान्तिकारित्वम् । वीर्य्य-विवर्द्धनत्वम् । रुच्यत्वञ्च । अपि च ।
"माध्वीकं नारिकेरं फलमतिमधुरं दुर्ज्जरं
जन्तुकारि
स्निग्धं वातातिसारभ्रमश्रमनमथ ध्वंसनं
वह्निदीप्तेः ।
आमश्लेष्मप्रकोपं जनयति कुरुते पाण्डुकान्तिं
बलञ्च
स्थैर्य्यं देहस्य धत्ते वनमदनकलावर्द्धनं पित्त-
नाशम् ॥"
इति राजनिर्घण्टः ॥

मधुनी, स्त्री, क्षुपविशेषः । माकड़ छाता इति माकड़ चाउली इति च भाषा ॥ तत्पर्य्यायः । हस्तमञ्जा २ वायसोली ३ सुमञ्जला ४ । इति रत्नमाला ॥

मधुनेता, [तृ] पुं, (मधु नयति पुष्पेभ्यः संग्रहा-तीति । नी + तृच् ।) भ्रमरः । इति शब्द-चन्द्रिका ॥

मधुपः, पुं, (मधु पिबतीति । पा + कः ।) भ्रमरः । इत्यमरः । २ । ५ । २६ ॥ (यथा, राजतर-ङ्गिण्याम् । ३ । ४०६ ।
"गव्यूतिमात्रमासन्ने देवौधामनि धैर्य्यवान् ।
धुन्वन् करार्भा मधुपान् धावति स्म स धीरधीः ॥"
मधु जलं पातीति । पा + कः । वारिरक्षके, त्रि । यथा, ऋग्वेदे । ५ । ३२ । ८ ।
"यं चिदर्घं मधुपं भृयानमसिञ्चं वज्रं मह्या-
दृष्यः ।"
"मधुपं मधुनोऽम्भसः पातारं पालयितारम् ।"
इति तद्भाष्ये सायनः ॥ मधुपानकर्मरि च, त्रि । यथा, ऋग्वेदे । १ । १८० । २ ।
"खसा यदूवां विश्वगूर्त्तीभराति वाजायेट्टे मधु-
पाविषे च ।" "हे मधुमौ मधुरस्य सोमरसस्य पातारौ ।" इति तद्भाष्ये सायनः ॥)

मधुपर्क, क्लो, (दृप् + घञ् । मधुना पर्को योगो-ऽत्र ।) दधिसंयुक्तमधु । तत्पर्य्यायः । महोदयः २ । इति हेमचन्द्रः । ३ । ६६० ॥ अपि च ।
"मधुपर्के दधिमधुघृतमपिहितं कांस्येनेति ।
अपिहितमाच्छादितम् ।" इत्येकादशीतत्त्वे-
कात्यायनसूत्रम् ॥

मधुपर्कः, पुं, (दृचौ + घञ् । मधुना पर्कः सम्पर्को यस्य मधुना संयोजनात् तथात्वम् ।) षोड़शोपचारपूजान्तर्गतषष्ठोपचारः । तस्य प्रमाणं यथा,—
"दधि सर्पिर्ज्वलं क्षौद्रं सितेताभिस्तु पञ्चभिः ।
प्रोच्यते मधुपर्कस्तु सर्व्वदेवौघतुष्टये ॥
जलन्तु सर्व्वतः स्वर्ण्यं सिता दधि हुतं समम् ।
सर्व्वेषामधिकं क्षौद्रं मधुपर्के प्रयोजयेत् ॥
तद्वत्तात् कांस्यपात्रेण रौक्मपात्रेण वा ।
ज्योतिष्टोमाश्वमेधादौ पूर्त्ते चैत्ते प्रपूजने ॥
मधुपर्कः प्रतिष्ठोऽयं सर्व्वदेवौघतुष्टिदः ।
धर्म्मार्थकाममोक्षाणां साधकः परिकीर्त्तितः ॥
मधुपर्कः सौख्यभोग्यतुष्टिपुष्टिप्रदायकः ॥"
इति कालिकापुराणे ६० अध्यायः ॥
अपि च ।
"आज्यं दधिमधुमिश्रं मधुपर्के विदुर्बुधाः ॥"
इति तन्त्रसारः ॥
तद्दाने सुद्रा यथा,—
"संयुक्तागामिकाङ्गुष्ठा तिस्रोऽन्याः संप्र-
सारिताः ।
मधुपर्के च सा मुद्रा विद्वद्भिः परिकीर्त्तिता ॥"
इति हरिभक्तिविलासः ॥

मधुपर्णिका, स्त्री, (मध्विव हितं पर्णमस्याः । ततः स्वार्थे कन् टाप् । अत इत्वञ्च ।) गम्भारीवृक्षः । (अस्याः पर्य्यायो यथा,—
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
काश्मरी काश्मरी हीरा काश्मर्य्यः पीत-
रोहिणी ॥
छत्रच्छत्ता मधुरसा महाकुसुमिकापि च ॥")
गौलीवृक्षः । इत्यमरः । २ । ४ । ३५ ॥ (अस्याः पर्य्यायो यथा,—
"गौली तु गौलिनी तूली कालडोला च
गौलिका ।
रक्षनी श्रीफली तुच्छा श्यामोला मधुपर्णिका ॥
क्षीतका कालकेशी च गौलपुष्पा च सा
स्मृता ॥")
वराहकान्ता । इति शब्दचन्द्रिका ॥ गुडूची । सुदर्शना । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते शारीरस्थाने १० अध्याये ।
"एत्रिपर्णी बलाशिग्रुसुवर्चला मधुपर्णिका ॥"
अस्याः पर्य्यायो यथा,—
"सुदर्शना सोमवल्ली चक्राङ्गा मधुपर्णिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुपर्णी, स्त्री, (मधु इव हितं पर्ण यस्याः । गौरादित्वात् ङीष् ।) गुडूची । इत्यमरः । २ । ४ । ८४ ॥ (अस्याः पर्य्यायो रत्नमालायां यथा,
"वत्सादनी छिन्नरुहा मधुपर्ण्यमृतामरा ।
कुण्डल्यमृतवल्ली च गुडूची चक्रलक्षणा ॥")
गम्भारीवृक्षः । नीलीवृक्षः । इति मेदिनी । ने, १०५ ॥ मधुकौणपूरः । इति राजनिर्घण्टः ॥ (विकङ्कतवृक्षः । तत्पर्य्यायो यथा,—
"विकङ्कतः खाडुकण्टः शृङ्गदारु मधुपर्ण्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुपाका, स्त्री, (पाकेन मधुर्मधुरा । राजदन्ता-दित्वात् पूर्व्वनिपातः । टाप् ।) वड़सुला । इति राजनिर्घण्टः ॥

मधुपायी, [न्] पुं,(मधु पिबतीति । पा + णिनिः । ततः "आतोयुक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) भ्रमरः । इत्यमरटीकायां रामा-श्रमः ॥ मधुपानकर्मरि, त्रि ॥

मधुपालिका, स्त्री, (मधु पालयतीति । पालि + ण्वुल् । टाप् । अत इत्वम् ।) गम्भारी । इति शब्दमाला ॥ (विषयोऽस्या गम्भारीशब्दे द्रष्टव्यः ॥)

मधुपीलुः, पुं, (मधुर्मधुरः पीलुः ।) महापीलुः । इति राजनिर्घण्टः ॥

मधुपुरी, स्त्री, (मधोरुत्पन्नो दैत्यस्य पुरी ।) मथुरा । इति शब्दरत्नावली ॥ (यथा, भाग-वते । ७ । १४ । ३१ ।
"नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ।
वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥")

मधुपुष्पः, पुं, (मधुप्रसूनानि पुष्पाण्यस्य ।) मधु-द्रुमः । इति रत्नमाला ॥ (मधूकः । तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
"मधूको गुड़पुष्पः स्यान्मधुपुष्पो मधुद्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽप्य मधूलकः ॥")
स्थिरीवृक्षः । अशोकवृक्षः । वकुलवृक्षः । इति राजनिर्घण्टः ॥

मधुपुष्पा, स्त्री, (मधुपुष्प + स्त्रियां टाप् ।) दन्ती-वृक्षः । नागदन्तीवृक्षः । इति राजनिर्घण्टः ॥

मधुप्रियः, पुं, (मधु मद्यं प्रियमस्य ।) बलरामः । इति त्रिकाण्डशेषः ॥ भूमिजम्बुः । यथा,—
"नादेयी स्त्री नागरङ्गस्वक्सुगन्धो मधुप्रियः ॥"
इति जटाधरः ॥ (मद्यप्रिये, त्रि ॥)

मधुफलः, पुं, (मधु मधुरं फलमस्य । यद्वा, मधु मद्यं फलादु यस्य ।) मधुनारिकेलः । इति राजनिर्घण्टः ॥ विकङ्कतवृक्षः । इति शब्द-चन्द्रिका ॥ (मधुरफलविशिष्टे, त्रि ॥)

मधुफलिका, स्त्री, (मधु मधुरं फलं यस्याः । मधुफल + संज्ञायां कन् । टाप् । अत इत्वञ्च ।) मधुखर्ज्जूरिका । इति राजनिर्घण्टः ॥ (गुणा-दयोऽस्या मधुखर्ज्जूरिकाशब्दे ज्ञातव्याः ॥)

मधुबहुला, स्त्री, (मधुना मद्येन वा बहुला ।) वासन्तीलता । इति राजनिर्घण्टः ॥

मधुभित्, [द्] पुं, (मधुं तन्नामानं दैत्यं भिनत्ति नाशयतीति । भिद् + क्विप् । तुगागमश्च ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, भाग-वते । ४ । २६ । ४० ।

"तस्मिन् महत्सुखरिता मधुभिश्चरित्र-
पीयूषशेषसरितः परितः स्रवन्ति ॥")

मधुमक्षिका, स्त्री, (मधुसञ्चायिका मक्षिका।) कौटविशेषः। मौमाछी इति भाषा। तत्पर्य्यायः। सरघा २। इत्यमरः। २। ५। २६॥

मधुमज्जा, [न्] पुं, (मधुर्मधुरो मज्जा यस्य।) आखोटवृक्षः। इति राजनिर्घण्टः॥

मधुमती, स्त्री, (मधुर्मधुररसोऽस्त्यस्येति मतुप्। ङीप्।) काश्मरीवृक्षः। नदीविशेषः। तस्या जलगुणाः। यथा, राजनिर्घण्टे।

"चन्द्रभागागुणसाम्यं जलं
किञ्च माधुमतनाग्निदीपनम्॥"

उपास्त्रनायिकाविशेषः। यथा,—

"तथा मधुमती सिद्धिर्जायते नात्र संशयः।
देवचेटी घृतघृतं तस्य वश्या भवन्ति ह॥
स्वर्गे मर्त्ये च पाताले स यत्र गन्तुमिच्छति।
तत्रैव चेटिकाः सर्व्वा नयन्ति नात्र संशयः॥"

इति कङ्कालसदीपिकायां ३ पटलः॥

(छन्दोभेदः। अस्या लक्षणं यथा, छन्दोमञ्जर्य्याम्। २। १।

"ननगि मधुमती।" अधिकं छन्दःशब्दे द्रष्टव्यम्॥ समाधिसिद्धिभेदः। यथा, सर्व्वदर्शनसंग्रहे पातञ्जलदर्शने। "तत्र मधुमती नामाभ्यासवैराग्यादिवशादपास्तरजस्तमोवेगशमसुखप्रकाशमयसत्त्वभावनयानवद्यवैशारद्यविद्योतनरूपऋतम्भरप्रज्ञाख्या समाधिसिद्धिः॥ गङ्गा। यथा, काशीखण्डे। २६। १३३।

"महोदया मधुमती महापुण्या सुखाकरी॥"

दनुकुपुत्रदैत्यभस्य भार्य्या सा च मधोर्दैत्यस्य सुता। यथा, हरिवंशे। ६३। १२—१३।

"आसीद्राजा मनोर्वंशे श्रीमानिक्ष्वाकुसम्भवः।
दैत्यश्च इति विख्यातो महेन्द्रसमविक्रमः॥
तस्यासीद्दयिता भार्य्या मधोर्दैत्यस्य वै सुता।
देवी मधुमती नाम यथेन्द्रस्य शची तथा॥"

मधुरसविशिष्टे, त्रि। यथा, ऋग्वेदे। ७।६८।३।

"स्वाद्यायशसायातमश्विभ्यामुदस्यसिधिं मधुमन्तं
पिबाथः॥")

मधुमथनः, पुं, (मधुं तन्नामानं दैत्यं मथ्नातीति। मन्थ + ल्यु।) विष्णुः। इति हलायुधः॥ (यथा, भागवते। ६। ६। ३६।

"सर्व्वात्मनि निरतनिर्भृतमनसः कथमुह वा
एते मधुमथन! पुनः स्वार्थकुशला स्वात्मप्रियसुहृदः साधवस्त्वच्चरणाम्बुजासेवां विसृजन्ति
न यत्र पुनरयं संसारपर्य्यावर्त्तः॥")

मधुमल्ली, स्त्री, (मधुप्रधाना मल्ली।) मालती। इति शब्दमाला॥

मधुमस्तकं, क्ली, (मधुर्मधुररसः मस्तके उपरिभागे यस्य।) पिष्टकविशेषः। यथा,—

"मधुतैलघृतैर्मध्ये वेष्टिताः समिताश्च याः।
मधुमस्तकमुद्दिष्टं तस्याख्यापरिमार्जनम्॥"

इति शब्दचन्द्रिका॥

अस्य गुणाः पिष्टशब्दे द्रष्टव्याः॥

मधुनाध्वीकं, क्ली, (मधु माधुर्य्ययुक्तं माध्वीकम्।) मद्यम्। इत्यमरटीकायां भरतः॥

मधुमारकः, पुं, (मधूनां मारकः। भक्षकत्वात्तथात्वम्य।) भ्रमरः। इति राजनिर्घण्टः॥

मधुमूलं, क्ली, (मधु मधुरं मूलम्।) आलुकम्। इति शब्दचन्द्रिका। मौ आलु इति भाषा॥

मधुयष्टिः, स्त्री, (मधुर्मधुरा यष्टिः।) इक्षुः। इति शब्दचन्द्रिका॥

मधुयष्टिका, स्त्री, (मधुर्मधुरा यष्टिः। ततः कन् टाप्।) यष्टिमधु। तत्पर्य्यायः। मधुकम् २ क्लीतकम् ३ यष्टिमधुका ४। इत्यमरः। २। ४। १०६॥ मधुयष्टी ५। इति भरतः॥ (तथास्याः पर्य्यायान्तरम्।

"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका।
यष्टिमधु खले जाता जलजातिरसा पुरा॥"

इति वैद्यकरत्नमालायाम्॥)

मधुयष्टी, स्त्री, (मधुयष्टि + ऋदिकारादिति प्रत्ये ङीष्।) मधुयष्टिका। इति शब्दमाला॥

मधुरं, क्ली, (मधु + रः।) वङ्गम्। इति राजनिर्घण्टः॥ विषम्। इति मेदिनी। रे, १६५॥ (वङ्गशब्दे विषशब्दे च विवरणमस्य ज्ञातव्यम्॥)

मधुरः, पुं, (मधु माधुर्य्यं रातीति। रा + कः। यद्वा, मधुमाधुर्य्यमस्यास्तीति। "ऊषसुषिमुष्कमधो रः।"५।२।१०७। इति रः।) मिश्ररसः। इत्यमरः। १। ५। ६॥ स च इक्ष्वादौ लक्ष्यते। तत्पर्य्यायः। गौल्यः २। इति राजनिर्घण्टः॥ रसज्येष्ठः ३ गुल्यः ४ स्वादुः ५ मधूलकः ६। इति हेमचन्द्रः। ६।२४॥ तस्य गुणाः। प्रीणनत्वम्। बल्यत्वम्। हृंहणत्वम्। वायुपित्तनाशित्वम्। रसायनत्वम्। गुरुत्वम्। स्निग्धत्वम्। चक्षुष्यत्वम्। तर्पणत्वम्। सरत्वञ्च। अन्यच।

"रसो मधुरकः शीतो धातुस्तन्यबलप्रदः।
चक्षुष्यो वातपित्तघ्नः कुर्य्यात् स्थौल्यकफक्रमौ॥
सोऽतियुक्तो ज्वरश्वासगलगण्डादिरोगकृत्॥"

इति राजवल्लभः॥

अपि च।

"मधुरस्तु रसश्चिनोति केशान्
वपुषः स्थैर्य्यबलौजोवीर्य्यदायी।
अतिसेवनतः प्रमेहशोथ-
जड़तामाद्यसुखान् करोति दोषान्॥"

इति राजनिर्घण्टः॥

(यथा च वाभटे सूत्रस्थाने दशमेऽध्याये॥

"रसानामिति सूत्राणि कर्म्माणि मधुरो रसः।
आजन्मसात्म्यात् कुरुते धातूनां प्रबलं बलम्।
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम्॥
प्रशस्तो हृंहणो कण्ठ्यः स्तन्यसन्धानकृद्गुरुः।
आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः॥
कुरुतेऽल्पपयोयोगे समेदःकफजान् गदान्।
स्थौल्यालस्यसदसन्यासमेहगण्डार्बुदादिकान्॥"

अपिच।

"तत्र मधुरो रसः शरीरसात्म्याद्रसरुधिरमांसमेदोऽस्थिमज्जौजः शुक्राभिवर्द्धन आयुष्यः षड़िन्द्रियप्रसादनो बलवर्णकरः पित्तविषमारुतघ्नस्तृष्णाप्रशमनः त्वच्यः केश्यः कण्ठ्यः प्रीणनो जीवनस्तर्पणः स्नेहनः स्थैर्य्यकरः क्षीणक्षतसन्धानकरः घ्राणमुखकण्ठोष्ठतालुप्रह्लादनो दाहमूर्च्छाप्रशमनः षट्पदपिपीलिकानामिष्टतमः स्निग्धः शीतो गुरुश्च।

स एवंगुणोऽप्येक एवाद्यर्थसुपयुज्यमानः स्थौल्यं माईवमालस्यमतिस्वप्नं गौरवमनग्निाभिषादमेदोबल्यमास्यकण्ठमांसाभिवृद्धिं श्वासकासप्रतिश्यायालसकगलगण्डार्बुदगण्डमालाश्लीपदगलशोफवस्तिक्लेदमेदोगुदोपलेपाख्यामयानभिष्यन्दिवैप्रभृतीन् कफजान् विकारानुपजनयति।

"स्नेहनयोगनाद्यादमार्द्दवैरुपलभ्यते।
सुखस्त्री मधुरश्चास्यं आप्लवेच्छिम्यतीव च॥"

इति चरके सूत्रस्थाने २६ अध्याये॥)

जीवकः। रक्तशिग्रुः। राजाम्रः। रक्तेक्षुः। गुडः। प्रालिः। इति च राजनिर्घण्टः॥ (बीजपूरविशेषः। तत्पर्य्यायो यथा,—

"बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

स्कन्दस्यसैनिकभेदः। यथा महाभारते। ६। ४५। ६६।

"मधुरः सुप्रसादश्च किरीटी च महाबलः॥")

मधुरः, त्रि, (मधु माधुर्य्यमस्यास्तीति। "ऊषसुषिमुष्कमधो रः।" ५। २। १०७। इति रः।) मधुररसविशिष्टः। स्वादुः। (यथा, हितोपदेशे। १। ७६।

"न धर्म्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः॥")

प्रियः। इति मेदिनी। रे, १६५॥ पारिभाषिकमधुराणि यथा। विदग्धोक्तिः। प्रियाधरकुचादिः। स्त्री। स्त्रियः। वाक्योक्तिः। इति कविकल्पलता॥

मधुरकः, पुं, (मधुर + संज्ञायां कन्।) जीवकवृक्षः। इत्यमरः। २। ४। १३२॥ (यथा, सुश्रुते चिकित्सितस्थाने ४ अध्याये।

"विषचेन्मधुरकप्रतीवापम्॥")

मधुरकण्टका, स्त्री, (मधुराः कण्टका यस्याः।) मत्स्यविशेषः। तत्पर्य्यायः। कञ्जली २ कञ्जला ३ अनला ४ माध्वी ५। इति शब्दरत्नावली॥

मधुरजम्बीरः, पुं, (मधुरो जम्बीरः। नित्यकर्म्मधारयः।) मधुजम्बीरः। तत्पर्य्यायः। मधुजम्भः २ मधुजम्भलः ३ रसाढ्यः ४ शुक्रकरः ५ पित्तघ्नः ६। अस्य गुणाः। मधुरत्वम्। शीतशीतत्वम्। कफपित्तशोफश्रमनाशित्वञ्च। इति राजनिर्घण्टः॥

मधुरत्वचः, पुं, (मधुरा त्वचा यस्य।) धववृक्षः। इति त्रिकाण्डशेषः॥ (गुणादयोऽस्य धवशब्दे ज्ञातव्याः॥)

मधुरत्रयं, क्ली, (मधुराणां त्रयम् ।) सिता माक्षिकं सर्पिश्च । इति राजनिर्घण्टः ॥

मधुरत्रिफला, स्त्री, (मधुरा त्रिफला ।) द्राक्षाफलं काश्मर्य्यफलं खर्ज्जूरीफलञ्च । इति राजनिर्घण्टः ॥

मधुरनिस्वना, स्त्री, (मधुरो निस्वनो यस्याः ।) मधुरस्वरयुक्ता नारी । इति त्रिकाण्डशेषः ॥

मधुरफलः, पुं, (मधुरं फलमस्य ।) राजबदरः । इति राजनिर्घण्टः ॥

मधुरवल्ली, स्त्री, (मधुरा वल्लीति नित्यकर्म्मधारयः ।) मधुबीजपूरः । इति राजनिर्घण्टः ॥

मधुरसः, पुं, (मधुर्मधुरो रसोऽस्य ।) इक्षुः । इति शब्दमाला ॥ तालः । इति राजनिर्घण्टः ॥

मधुरसा, स्त्री, (मधुर्मधुरो रसो यस्याः ।) मूर्व्वा । इत्यमरः । २।४। ८३ ॥ (अस्याः पर्य्यायो यथा, "तेजनी पिलुनी देवी तिक्तवल्ली पृथक्त्वचा । मधुश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च ॥" इति वैद्यकरत्नमालायाम् ॥ "मूर्व्वा मधुरसा देवी मोरटा तेजनी सुवा । मधुलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥" इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) द्राक्षा ॥ (तत्पर्य्यायो यथा,— "द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च । गोस्तनी हारहूरा च गोस्तनी चापि कीर्त्तिता ॥" इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) दुग्धिका । इति मेदिनी । से, ६० ॥ गम्भारी । इति भावप्रकाशः ॥

मधुरस्रवा, स्त्री, (मधुरस्य मधुररसस्य स्रवो यस्याः ।) पिण्डखर्ज्जूरी । इति राजनिर्घण्टः ॥

मधुरा, स्त्री, (मधुर+टाप् ।) घृतपुष्पा । (अस्याः पर्य्यायो यथा,— "घृतपुष्पा घृताढ्या च मधुरा कारवी मिसिः । अतिलम्बी सितच्छत्रा संहिता क्षत्रिकापि च । क्षत्रा श्रालेयश्रालोनौ मिश्रेया मधुरा मिसिः ॥" इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) मिश्रेया । मथुरानगरी । मधुकर्कटिका । मेदा । मधूली । मधुयष्टिका । इति मेदिनी । रे, १६४ ॥ काकोली । घृतावरी । हृद्यगन्धा । पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥

मधुराम्लकः, पुं, (मधुरश्चासौ अम्लश्चेति नित्यकर्म्मधारयः । ततः स्वार्थे कन् ।) आम्रातकः । इति शब्दचन्द्रिका ॥

मधुराम्लफलः, पुं, (मधुरं मिष्टं आम्लवत् फलं यस्य ।) रेवतः । तत्पर्य्यायः । चारः २ । इति रत्नमाला ॥

मधुरालापा, स्त्री, (मधुरः श्रुतिसुखकरः आलापः शब्दो यस्याः ।) शारिका । इति राजनिर्घण्टः ॥

मधुरालाबुनी, स्त्री, (अलाबू+बाहुलकात् नक् । पृषोदरादित्वात् इस्वः ङीष् च । ततः मधुरा चासौ अलाबुनी चेति नित्यकर्म्मधारयः ।) राजालाबुः । इति राजनिर्घण्टः ॥

मधुरिका, स्त्री, (मधुर+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च ।) क्षुपविशेषः । मौरी इति भाषा । तत्पर्य्यायः । श्रालेयः २ श्रीतशिवः ३ क्षत्रा ४ मिश्रेया ५ मिश्रेया ६ । इत्यमरः । २।४।९०५ ॥ सालेयः ७ मिसिः ८ मिसी ९ मिश्रिः १० । इति तट्टीका ॥ अवाक्पुष्पी ११ मङ्गल्या १२ मधुरा १३ । इति रत्नमाला ॥ मधुरी १४ । इति शब्दरत्नावली ॥ अस्या गुणाः । रोचकत्वम् । शुक्रकारित्वम् । दाहरक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥

मधुरिपुः, पुं, (मधोरसुरविशेषस्य रिपुर्नाशकत्वात् ।) विष्णुः । इत्यमरः । १ । १ । २० ॥ (यथा गीतगोविन्दे । २ । ६ ।

"श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ॥)

मधुरेणुः, पुं, (मधुर्मधुरो रेणुरस्य ।) कटभीवृक्षः । इति राजनिर्घण्टः ॥

मधुरोदकः, पुं, (मधुराणि उदकानि यस्य ।) जलसमुद्रः । स तु स्वादूदकमयः पुष्करद्वीपवेष्टितः सप्तसमुद्राणां शेषसमुद्रः । इति जटाधरः ॥

मधुलं, क्ली, (मधु पुष्परसादिकं लाति स्वकारणत्वेन गृह्णातीति । ला+कः ।) मद्यम् । इति शब्दचन्द्रिका ॥ (निर्विषीकर्त्र्यां मधुविद्यायां स्त्री । यथा, ऋग्वेदे । १ । १६९ । १० ।

"सोचिष्मुनमरातिनो वयं मरामारे अस्य योजनं हरिष्ठामधुलामधुला चकार ॥"

"हे विष ! त्वा त्वां मधु अन्नवत् चकार विषस्य विषभावं दूरेऽपनोद्याष्टतीचकारेति रषेव मधुला मधुदात्री निर्विषीकर्त्री मधुविद्या यद्वेतदादित्यस्य मण्डले विषयोजनं तेन चाष्टतीकरणं यदस्ति एवा मधुविद्या ॥" इति तद्भाष्ये सायणः ॥)

मधुलग्नः, पुं, (मधुर्मधुररसो लग्नोऽत्र ।) रक्तशोभाञ्जनः । इति रत्नमाला ॥

मधुलता, स्त्री, (मधुप्रधाना लतेति मध्यलोपी कर्म्मधारयसमासः ।) मूलीशाकम् । इति राजनिर्घण्टः ॥

मधुलिका, स्त्री, (मधुल+संज्ञायां कन् । टाप् अत इत्वञ्च ।) राजिका । इति राजनिर्घण्टः ॥ (विवृतिरस्या राजिका शब्दे ज्ञातव्या ॥ स्कन्धानुचरमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । १६ ।

"पृथुवक्त्रा मधुलिका मधुकुम्भा तथैव च ॥")

मधुलिट्, [ह्] पुं, (मधु लेढि आस्वादयतीति । लिह्+क्विप् ।) भ्रमरः । इत्यमरः । २ । ५ । २६ ॥ (यथा, रघुवंशे । ६ । २६ ।

"मधुलिड्भिः मधुदानविशारदा कुरवका रवकारयतां ययुः ॥")

मधुलेही, [न्] पुं, (मधु लेढ्रीति । मधु+लिह्+णिनिः ।) भ्रमरः । इति शब्दरत्नावली ॥ (यथा, भट्टिकाव्ये । २ । ७ ।

"इत्थावधानं मधुलेहिगीतौ प्रशान्तचेष्टं हरिणं निषांसुः ॥")

मधुलोलुपः, पुं, (मधुनि लोलुपः ।) भ्रमरः । इति राजनिर्घण्टः ॥

मधुवनं, क्ली, (मधुना तन्नाम्ना देत्येन कृतं वनम् । मध्यपदलोपी कर्म्मधारयः ।) मथुरायां वनविशेषः । यथा, श्रीभागवते ४ । ८ । ४२ ।

"तत्तात ! गच्छ भद्रं ते यमुनायास्तटं शुचि । पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥"

(मधुप्रधानं वनमिति ।) किष्किन्धायां सुग्रीवस्य वनविशेषः । इति रामायणे किष्किन्धाकाण्डम् ॥ (यथा, महाभारते । ३ । २८१ । २७ ।

"वालिना रक्षितं यत्तत् स्फीतं मधुवनं महत् । त्वया च प्लवगश्रेष्ठ ! तद्वुभुक्षे पवनात्मज ॥")

मधुवनः, पुं, (मधौ वनति शब्दायते इति । वन+अच् ।) कोकिलः । इति शब्दचन्द्रिका ॥

मधुवल्ली, स्त्री, (मधुप्रधाना वल्ली ।) यष्टीमधु । क्लीतनकम् । इति राजनिर्घण्टः ॥ (कारवेल्लकम् । तत्पर्य्यायो यथा,— "तोयवल्ली राजवल्ली मधुवल्ली कारवेल्लकम् ॥" इति वैद्यकरत्नमालायाम् ॥)

मधुवारः, पुं, (मधुनो मद्यस्य वारः समयः पर्य्यायो वा ।) मधुक्रमः । इत्यमरः । २।४०।४१॥ स च पुनः पुनर्मद्यपानपरिपाटी । इति तट्टीकायां भरतः ॥

मधुबीजः, पुं, (मधु मधुरं बीजं यस्य ।) दाड़िमः । इति राजनिर्घण्टः ॥ (गुणादिविवरणमस्य दाड़िमशब्दे द्रष्टव्यम् ॥)

मधुबीजपूरः, पुं, (मधूनां मधुपूर्णानां बीजानां पूरः समूहो यत्र ।) मधुकर्कटिका । मीठा बिजौरा इति हिन्दी भाषा । तत्पर्य्यायः । मधुपर्णी २ मधुरकर्कटी ३ मधुरवल्ली ४ मधुकर्कटी ५ मधुरफला ६ महाफला ७ वह्निमाना ८ । अस्य गुणाः । मधुरत्वम् । स्निग्धिरत्वम् । दाहनाशित्वम् । त्रिदोषशमनत्वम् । रुच्यत्वम् । पथ्यत्वम् । गुरुत्वम् । दुर्ज्जरत्वञ्च । इति राजनिर्घण्टः ॥

मधुव्रतः, पुं, (मधु मधुसञ्चयो व्रतं व्रतमिव सततानुशीलनीयं यस्य । यद्वा, मधु व्रणयति नियतं शब्दयति इति । व्रण+अच् ।) भ्रमरः । इत्यमरः । २।५।३६ ॥ (यथा, भागवते । ३।२८।२८ ।

"मालां मधुव्रतवरूथगिरोपघुष्टाम् ॥"

मधवर्थे व्रतं कर्म्म यस्य । उदकार्थकर्म्मणि, त्रि । यथा, ऋग्वेदे । ६ । ७० । ५ ।

"मधुनो द्यावापृथिवी मिमिक्षतां मधुश्चुता मधुदुघे मधुव्रते ॥"

"मधुव्रते उदकार्थकर्म्मणी ।" इति तद्भाष्ये सायणः ॥)

मधुशर्करा, स्त्री, (मधुजाता शर्करा ।) मधुजातशर्करा । सिताखण्ड इति भाषा ॥ यथा,—

"माध्वी सिता मधूत्पन्ना मधुजा मधुशर्करा।
माक्षीकशर्करा चैवा क्षौद्रजा क्षौद्रशर्करा॥
यद्गुणं यन्मधु प्रोक्तं तद्गुणा तस्य शर्करा।
विशेषाद्दृष्टया च तर्पणं क्षौद्रदेहिनाम्॥"
इति राजनिर्घण्टः॥
("मधुशर्करा पुनर्ग्रहणीसारहरी रूक्षाहृद्या ग्राहिणी प्रज्ञादात्री कषायमधुरा मधुरविपाका च।"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये॥)

मधुशाखः, पुं, (मधुर्माधुर्ययुक्ता शाखा यस्य।) मधुशोलः। इति शब्दचन्द्रिका॥ (मधुरशाखाविशिष्टे, त्रि। यथा, वाजसनेयसंहितायाम्। २८। २०। "मधुशाखः सुपिप्पलः।"
"मधुरा रसवती शाखा यस्य।"
इति तद्भाष्ये महीधरः॥)

मधुश्रिगुः, पुं, (मधुप्रधानः श्रिगुः।) रक्तशोभाञ्जनवृक्षः। इत्यमरः। २। ४। ३१॥ (अलिना। इति ख्यातः। यथा, सुश्रुते।१।१७। "वरुणार्जुनशिग्रुमधुश्रिगुतर्कारीत्यादि।"
तत्पर्यायो यथा,—
"सुरसा खादुगन्धा स्यान्मधुश्रिगुः शोभाञ्जनः॥"
इति वैद्यकरत्नमालायाम्॥
तद्गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"मधुश्रिगुः सरक्षितः शोफघ्नो दीपनः कटुः।")

मधुश्रेयं, क्ली, (मधुनः श्रेयो यत्र।) श्रिक्यकम्। इति राजनिर्घण्टः॥

मधुश्रेणी, स्त्री, (मधूनां मधुररसानां श्रेणिर्यत्र।) मूर्वा। इत्यमरः। २।४।८३॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"मूर्व्वा मधुरसा देवी मोरटा तेजनी सुता।
मधुलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि॥")

मधुस्रावा, स्त्री, (मधुर्मधुरः स्रावोऽस्याः।) जीवन्तीवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्या जीवन्तीशब्दे ज्ञातव्यम्॥)

मधुस्रोतः, पुं, (मधु मकरन्दं स्रौतीति निःस्रिपतीति। स्रु+रगुपधलक्षणात् कः। पृषोदरादित्वाद्वस्य लत्वम्।) मधूकवृक्षः। इत्यमरः। २। ४। २८॥ (अस्य पर्य्यायो यथा,—
"मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुद्रुमः।
वानप्रस्थो मधुष्ठीलो जलजेऽथ मधूलकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

मधुसखः, पुं, (मधोर्वसन्तस्य सखा इति। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) कामदेवः। इति हलायुधः॥

मधुसारथिः, पुं, (मधुर्वसन्तः सारथिर्यस्य।) कामदेवः। इति त्रिकाण्डशेषः॥

मधुसिक्थकः, पुं, (सिञ्चतीति सिक्थं स्रावः, स्वार्थे कन्, मधु मधुमयं सिक्थकं यस्य।) स्थावरविषभेदः। इति हेमचन्द्रः। ४। २६४॥

मधुसूदनः, [न्] पुं, (मधोर्वसन्तस्य सूदनः।) कामदेवः। इति केचित्॥

मधुसूदनः, पुं, (मधु पुष्परसं सूदयति भक्षयतीति। सूद+क्विप्+ल्युः।) भ्रमरः। इति जटाधरः॥ (मधुं तन्नामानमसुरं सूदयति नाशयतीति। सूद+क्विप्+ल्युः।) श्रीकृष्णः। इत्यमरटीकायां भरतः॥ (पञ्चदश्यां एकः शिरश्लोको यथा, छन्दोमञ्जर्य्याम्। १९। १।
"वनेषु कृत्वा सुरभिप्रचारं
प्रकामसुप्तो मधुवासरेषु।
गायन् कलं क्रीडति पद्मिनीषु
मधूनि पीत्वा मधुसूदनोऽसौ॥")
श्रीकृष्णपक्षे व्युत्पत्तिर्यथा,—
"सूदनं मधुदैत्यस्य यस्मात् स मधुसूदनः।
इति सन्तो वदन्तीह वेदैर्भिन्नार्थमीप्सितम्॥
मधु क्षौद्रञ्च माध्वीके कृतकर्म्मशुभाशुभे।
भक्तानां कर्म्मबाधाञ्च सूदनं मधुसूदनः॥
परिणामाशुभं कर्म्म भक्तानां मधुरं मधु।
करोति सूदनं यो हि स एव मधुसूदनः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११०अध्यायः॥
तस्य स्मरणफलम्।
"महाविपत्तौ संसारे यः स्मरेन्मधुसूदनम्।
विपत्तौ तस्य सम्पत्तिर्भवेदित्याह शङ्करः॥"
तत्रैव प्रकृतिखण्डे ३४ अध्यायः॥
(सरस्वत्युपनामकः कविविशेषः। यथा, श्रीमद्भगवद्गीताटीकायाम्। "व्याख्यातं भगवत्पदैः प्रतिपदं श्रीशङ्कराख्यैः पुनर्व्विस्पष्टं मधुसूदनेन सुधिया सच्छास्त्रसिद्धेन यत्।" अयं हि अद्वैतसिद्धिप्रस्थानभेदभगवद्गीताटीकामहिम्नस्तवटीकासिद्धान्तबिन्दुटीकादयनेकग्रन्थकर्त्ता॥)

मधुस्रवः, पुं, (मधूनां मकरन्दानां स्रवः सरणं यस्मादिति।) मधूकवृक्षः। मोरटलता। इति राजनिर्घण्टः॥

मधुस्रवा, स्त्री, (मधुनः स्रावो यस्याः।) मधुयष्टिका। इति जटाधरः॥ जीवन्ती। इति शब्दचन्द्रिका॥ (अस्याः पर्य्यायो यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा।
मङ्गल्यनामधेया च ग्राम्यश्रेष्ठा पयस्विनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मूर्व्वा। हंसपदी। इति राजनिर्घण्टः॥

मधुस्रवः, [स्] पुं, (मधूनि स्रवति निःस्रिपतीति। स्रु+कर्त्तरि असुन्।) मधूकवृक्षः। इति जटाधरः॥

मधुस्वरः, पुं, (मधुर्मनोहरः स्वरो ध्वनिर्यस्य।) कोकिलः। इति शब्दरत्नावली॥

मधुहा, [न्] पुं, (मधुं तन्नामानमसुरं हन्तीति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥ (मधु हन्तीति। हन्+क्विप्। मधुनाम्नि, त्रि। यथा, महाभारते। १। ११। ६८।
"सर्व्वथा संहतैरेव दुर्ब्बलैर्बलवानपि।
अभिभूयते हन्तुं मधुहा भ्रमरैरिव॥"
प्रसह्यजातिप्राबल्यविशेषः॥ यथा,—
"शकुनी भासकुररश्येनोलूककुलिङ्गकाः।
धूमिका मधुहा चेति प्रसह्या दशपक्षिणः॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)

मधूकं, क्ली, (मह्यतीति। मह्+"ऊलूकादयश्च।" उणा॰ ४। ४१। इति ऊकः निपातितश्च।) यष्टिमधु। इति राजनिर्घण्टः॥ (गुणादयोऽस्य यष्टिमधुशब्दे विज्ञेयाः॥)

मधूकः, पुं, (मह्यते मन्यते वेति। मह्+मन् वा+"ऊलूकादयश्च।" उणा॰ ४। ४१। इति ऊकप्रत्ययो निपातितश्च।) वृक्षविशेषः। महुल इति मौल इति महुआ इति च भाषा॥ तत्पर्य्यायः। गुडपुष्पः २ मधुद्रुमः ३ वानप्रस्थः ४ मधुष्ठीलः ५। इत्यमरः। २। ४। २८॥ मधूकः ६ मधुः ७ मधुपुष्पः ८। इति शब्दरत्नावली॥ मधुस्रवः ९। इति जटाधरः॥ मधुवृक्षः १० रोधपुष्पः ११ माधवः १२। (यथा, महाभारते। १५। २५। ११।
"चित्राङ्गदा चैव नरेन्द्रकन्या
येषा सवर्णाग्र्यमधूकपुष्पैः॥")
अस्य गुणाः। मधुरत्वम्। शीतत्वम्। पित्तदाहश्रमापहत्वम्। वातलत्वम्। जन्तुदोषघ्नत्वम्। वीर्य्यपुष्टिविवर्द्धनत्वञ्च। अस्य पुष्पगुणाः। मधुरत्वम्। वृद्यत्वम्। हिमत्वम्। पित्तविदाहकारित्वञ्च। अस्य फलगुणाः। वातामयपित्तनाशित्वम्। श्रेयं मधूकद्वयमेवमेतत्। इति राजनिर्घण्टः॥ अपि च।
"मधूकपुष्पं मधुरं शीतलं गुरु वृंहणम्।
बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम्॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तजुत्।
अक्षव्यं हन्ति तृष्णादाहश्वासक्षतक्षयान्॥"
इति भावप्रकाशः॥
अपरञ्च।
"मधूकपुष्पवाद्यं तर्पणं वृंहणं परम्।
मधूकस्य फलं पक्वं वातपित्तप्रणाशनम्॥"
तस्याभ्यङ्गात्फलगुणवत्। यथा,—
"यस्य यस्य फलस्यैव वीर्य्यं भवति यादृशम्।
तस्य तस्यैव वीर्य्येण ज्ञानमभिनिर्दिशेत्॥"
तस्य त्वग्गुणाः।
"मधूकं रक्तपित्तघ्नं व्रणशोधनरोपणम्॥"
इति राजवल्लभः॥

मधूच्छिष्टं, क्ली, (मधुनः उच्छिष्टमवशिष्टम्।) मधुवशिष्टम्। मोम इति भाषा॥ (यथा, दक्षसंहितायाम्। १६। २५।
"ग्रैवेयकमांसीतगरकुष्ठरससैन्धवादिवल्लीजम्।
मधुररसमधूच्छिष्टानि चोरकश्चेति जीवस्य॥")
तत्पर्य्यायः। सिक्थकम् २। इत्यमरः। २। ६। १०७॥ श्रिक्थकम् ३ श्रिक्थम् ४। इति शब्दरत्नावली॥

मधूत्थितं, क्ली, (मधुनः उत्थितम्।) सिक्थकम्। इति राजनिर्घण्टः॥

मधूत्सवः, पुं, (मधोश्चैत्रस्य उत्सवो यत्र ।) चैत्री पूर्णिमा । इति जटाधरः ॥ (यथाभिज्ञानशाकुन्तले । ६ ।
"कञ्चुकी । प्रविश्य । सक्लोधम् । भो तावदनालक्षे ! देवेन प्रतिषिद्धेऽपि मधूत्सवे चूतकलिकाभङ्गमारभसे ॥")

मधूपन्नं, क्ली, (मधोस्तन्नाम्नो दैत्यस्य उपन्नः आश्रयः । अभिधानात् क्लीवत्वम् ।) मथुरा । इति हेमचन्द्रः । ४ । ४४ ॥

मधूपन्नः, पुं, (मधोस्तन्नाम्नो दैत्यस्य उपन्नः आश्रयः ।) मथुरा । इति जटाधरः ॥ (यथा, रघुवंशे । १५ । १५ ।
"स च प्राप मधूपन्नं कुम्भीनस्याच्च कुक्षिजः ।
वनात् करमिवादाय सत्वराग्निसुपस्थितः ॥")

मधूलः, पुं, (मधु उरति प्राप्नोतीति । मधु+उर गतौ औणादिकधातुः+कः । रस्य लत्वम् ।) जलजगिरिजमधूकवृक्षौ । इति जटाधरः ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"गौरग्राको मधूलोऽन्यो गिरिजः खल्वपत्रकः ॥")

मधूलकः, पुं, (मधूल+स्वार्थे कन् ।) जलजमधूकवृक्षः । तत्पर्य्यायः । दीर्घपत्रकः २ । इति जटाधरः ॥ गौरग्राकः ३ मधूलः ४ खल्वपत्रकः ५ । इति रत्नमाला ॥
"स्याच्चमधूके तु जलजे गिरिजेऽपि मधूलकः ॥"
इति शब्दरत्नावली ॥
(पर्य्यायान्तरस्य यथा,—
"मधूको गुडपुष्पः स्याच्चमधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽपि मधूलकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अस्य गुणाः । मधूकगुणतुल्याः । मधुररसः । इति हेमचन्द्रः । ६ । २४ ॥ (क्लीवलिङ्गेऽपि दृश्यते । यथा, अथर्व्ववेदे । १ । ३४ । २ ।
"जिह्वाया अग्रे मधु मे जिह्वामूले मधूलकम् ॥")

तद्वति, त्रि ॥

मधूलिका, स्त्री, (मधूल+कन् । स्त्रियां टाप् अत इत्वञ्च ।) मूर्व्वा । इत्यमरः । २ । ४ । ८४ ॥ (अस्याः पर्य्यायो यथा,—
"मूर्व्वा मधुरसा देवी मोरटा तेजनी सुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
यष्टीमधु । तत्पर्य्यायो यथा,—
"यष्टीमधु तथा यष्टी मधुकं क्लीतकन्तथा ।
अन्यत्क्लीतनकन्तत्तु भवेत्तोये मधूलिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधूली, स्त्री, (मधूल+गौरादित्वात् ङीष् ।) क्लीतनकम् । मधुकर्कटी । आम्रः । इति राजनिर्घण्टः ॥

मध्यं, क्ली, (मन्यते इति । मन्+"अन्नादयश्च ।" उणा० ४ । १९१ । इति यक्प्रत्ययेन निपातितः ।) दशान्तसंख्या । घृतसागरसंख्या । इति हेमचन्द्रः ॥ (यथा, महाभारते । २ । ६१ । ४ ।
"मध्यञ्चैव परार्द्धञ्च सपरञ्चात्र पठ्यताम् ॥")

अवसानम् । तत्पर्य्यायः । विरामः २ । इति चिकाण्डशेषः ॥ मन्दत्वशीघ्रत्वोभयेतरत्वयुक्तकृत्यविषयकगमनविशेषः । इति भरतः ॥ लयविशेषः । इति मधुः ॥ मध्यमावृत्तिः । इति साङ्गः ॥ यथा, अमरे । २ । ६ । ७६ ।
"विलम्बितं द्रुतं मध्यं तत्त्रयोद्यो घनं क्रमात् ॥"

मध्यः, पुं, क्ली, (मन्+यक् । नस्य च धः ।) देहमध्यभागः । भाजा इति भाषा ॥ तत्पर्य्यायः । मध्यमम् २ अवलग्नम् ३ । इत्यमरः । २ । ६ । ७६ ॥ विलग्नम् ४ । इति मेदिनी । मे, ४४ ॥ (यथा,भट्टिकाव्ये । ३ । १६ ।
"दधाना बलिभं मध्यं कर्णजाहविलोचना ॥"
मध्यभागमात्रम् । यथा, मनुः । ४ । ३० ।
"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥"
"आयुष्कालस्य मध्यभावस्याविशेषः कालः । षोड़शसप्तत्योरन्तरे मध्यं वयसस्तस्य विकल्पो वृद्धिर्धातवं सम्पूर्णता हानिरिति । तत्रार्विंशतेर्वृद्धिरार्विंशतो यौवनमाचत्वारिंशतः सर्व्वधातिन्द्रियबलवीर्य्यसम्पूर्णता । अत ऊर्द्धमीषत् परिहानिर्यावत् सप्ततिरिति ॥" इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

मध्यः, पुं, (मन्+यक् । नस्य धः ।) यज्ञस्रुक्साधकाङ्गविशेषः । स च अङ्गजातदेशान्तरादिसंस्काररहिताङ्गरूपग्रहः । इति ज्योतिषम् ॥

मध्यः, त्रि, (मन्यते इति । मन्+यक् । नस्य च धः ।) न्याय्यः । अन्तरः । अधमः । इति शब्दरत्नावली ॥ मध्यमः । यथा,—
"उत्तमाधममध्यानि बुद्ध्वा कार्य्याणि पार्थिवः ।
उत्तमाधममध्येषु पुरुषेषु नियोजयेत् ॥"
इति मात्स्ये ८६ अध्यायः ॥

मध्यगन्धः, पुं, (मध्ये फलाभ्यन्तरे गन्धोऽस्य ।) आम्रवृक्षः । इति शब्दचन्द्रिका ॥

मध्यतः, [स्] अ, (मध्य+तसिल् ।) मध्यात् । मध्ये । इति सिद्धान्तकौमुदी ॥ स्यादेः स्याने तसादयो ये आदेशास्तेषामदन्तत्वमथयत्वमिति प्राचः । तेन कुतः कुतः आगतं कौतस्कुतम् । इत्यत्राथयत्वात् टिलोपः । इति दुर्गादासः ॥

मध्यदेशः, पुं, (मध्यश्चासौ देशश्चेति ।) देशविशेषः । तत्पर्य्यायः । मध्यमः २ । इत्यमरः ॥ तस्य सीमा यथा, मनुः । २ । २१ ।
"हिमवद्विन्ध्ययोर्मध्यं यः प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः ॥"
विनशनं तीर्थभेदः । मां ध्यायति स्मरतीति कैयटः मद्भावो दकारवानिति साङ्गे । मनो धरतीति यप्रत्यये नस्य धे सति चतुर्थमात्रवानिति रूपरत्नाकरः । इति तद्धीकार्य्यां भरतः ॥

मध्यदेशः, त्रि, (मध्यदेशे भवः इति यत् ।) मध्यदेशोद्भवः । यथा, वामनपुराणे १३ अः ॥
"शुकाश्चैव संसक्ता मध्यदेशा जनास्त्विमे ॥"

मध्यन्दिनः, पुं, (दिनस्य मध्यं राजदन्तादित्वात् मध्यशब्दस्य पूर्व्वनिपातः । एषोदरादित्वात् नकारागमः । मध्यन्दिनं पुष्पविकासकलेनास्यास्तीति । अच् ।) वन्यकदृक्षः । इति राजनिर्घण्टः ॥ (मध्याह्ने, क्ली, यथा, मनुः । ४ । १५२ ।
"मध्यन्दिनेऽर्द्धरात्रे च आर्द्रं शुष्का च सामिषम् ॥")

मध्यपञ्चमूलकं, क्ली, (मध्यं मध्यमं पञ्चमूलकम् ।) पञ्चमूलपाचनविशेषः । यथा,—
"बला पुनर्नवैरण्डरुषपर्णीद्वयेन तु ।
एकत्र योजितैरेव स्यान्मध्यं पञ्चमूलकम् ॥"
इति राजनिर्घण्टः ॥

मध्यमं, पुं, क्ली, (मध्ये भवः । मध्य+"मध्याच्चः ।" ४ । ३ । ८ । इति मः ।) देहमध्यभागः । इत्यमरः । २ । ६ । ७६ ॥

मध्यमः, पुं, (मध्ये भवः । मध्य+मः ।) सप्तस्वराणां मध्ये पञ्चमस्वरः । इत्यमरः ।१। ७ । १ ॥ गानशास्त्रमते चतुर्थस्वरः । स तु क्रौञ्चस्वरतुल्यः । अस्योच्चारणस्थानं वक्षः । वाक्करणमते अधरः । अयं विप्रवर्णः । अस्य संज्ञा अन्तरः । अर्थात्तच्चतुःस्वरमिलितः । तस्य तानाश्चतुर्विंशतिः तेषां प्रत्येकं द्वाविंशद्भेदेन ७६८ ताना भवन्ति । इति संगीतशास्त्रम् ॥ उपपतिभेदः । तस्य लक्षणम् । प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं यज्ञाति स मध्यमः । यथा,—
"आस्यं यद्यपि हास्यवर्जितमिदं लास्येन हीनं वचो
नेत्रे शोणसरोजकान्तिरुचिरे क्षामे च खं स्रीयते ।
मालायाः करणोऽयमे मकरिकारम्भः कुचाभोगयो-
र्धूपः कुन्तलधोरणीषु सुतनोः सायन्तनो दृश्यते ॥"
इति रसमञ्जरी ॥

मध्यदेशः । इत्यमरः । यज्ञार्थां सामयिकसंज्ञाविशेषः । यथा,—
"त्र्युत्तरचक्रहतो दिनसञ्चयः
क्र ह हतो भगवादिफलं यदः ।
दशगिरिः पुरमध्यमभास्करे
क्षितिजसन्निधिगे सति मध्यमः ॥"
इति सिद्धान्तशिरोमणिः ॥

रागभेदः । रागभेदः । इति धरणिः ॥

मध्यमः, त्रि, (मध्ये भवः । मध्य+"मध्याच्चः ।४। ३ । ८ । इति मः ।) मध्यभवः । इति मेदिनी । मे, ४६ ॥ (यथा, मनौ । ६ । ११२ ।
"ततोऽर्द्धं मध्यमस्य स्यात् तुरीयन्तु यवीयसः ॥")
तत्पर्य्यायः । माध्यमम् २ मध्यमीयम् ३ माध्यन्दिनम् ४ । इति हेमचन्द्रः ॥ (वयोमध्यसमयः ।
"वयश्चतुर्व्विधं प्रोक्तं मध्यमाधमसुत्तमम् ।
हीनञ्च हारीत शृण्व तानि वक्ष्यामि साम्प्रतम् ॥

पथिश्रान्तः श्रमश्लोणः बालश्रीः सुकुमारकः।
एतेषां मध्यमा संज्ञा प्रोच्यते वैद्यकागमे।
मध्यमः सप्ततिं यावत् परतो वृद्ध उच्यते॥"
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये॥
"बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीच्य योजयेत्॥"
इति च सुश्रुते सूत्रस्थाने ३५ अध्याये॥)

मध्यमपाण्डवः, पुं, (मध्यमश्चासौ पाण्डवश्चेति। तस्य पूर्व्वापरयोर्द्वयोर्द्वयोर्मध्यवर्त्तित्वात्तथात्वम्।) अर्জ্জुनः। इति जटाधरः॥ (यथा, किरातार्জ্জुनीये। १। ४६। श्लोकस्य टीकायां मल्लिनाथः।
"नेता मध्यमपाण्डवो भगवतो नारायण-
स्यांशजः॥")

मध्यमलोकः, पुं, (मध्यमश्चासौ लोकश्चेति कर्म्मधारयः।) पृथिवी। इति त्रिकाण्डशेषः॥ (यथा, रघुः। २। १६।
"तां देवता पित्रतिथिक्रियार्था-
मन्वक् ययौ मध्यमलोकपालः॥"
"मध्यमलोकपालः भूपालः।" इति तट्टीकायां मल्लिनाथः॥)

मध्यमभृतकः, पुं, (मध्यमश्चासौ भृतकश्चेति।) कृषीवलभृतकः। लवाण इति भाषा॥ यथा,—
"उत्तमश्चायुधीयोऽच मध्यमस्तु कृषीवलः।
अधमो भारवाही स्यादित्येष त्रिविधो भृतः॥"
इति मिताक्षरा॥

मध्यमसंग्रहः पुं, (मध्यमश्चासौ संग्रहश्चेति।) स्त्रीसंग्रहणास्त्रविवादविशेषः। स तु गन्धमाल्यवस्त्रभूषादिप्रेरणरूपः। यथा। प्रथमसाहसादिरूपप्राप्त्यर्थं त्रेधा तत्स्वरूपं व्यासेन विवृतम्।
"त्रिविधं तत् समाख्यातं प्रथमं मध्यमोत्तमम्।
व्यदेशकालभाषाभिर्निर्जने च परस्त्रियाः।
कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतम्॥
प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम्।
प्रच्छादनस्यान्नपानैर्मध्यमं समुदाहृतम्॥
सहासनं विविक्तेषु परस्परमपाश्रयः।
केशाकेशिग्रहश्चैव सम्यक् संग्रहणं स्मृतम्॥"
इति मिताक्षरायां स्त्रीसंग्रहणप्रकरणम्॥

मध्यमसाहसं, क्ली, (सहसा क्रियमाणं कृतं वा। सहसा+अण्। मध्यमश्च तत् साहसञ्चेति।) बलदर्पितेन वासःपञ्चत्रपानादीनामङ्गाच्छेदोपमर्दादिरूपं सहसा क्रियमाणं कर्म्म। यथा,
"फलमूलोदकादीनां चैवोपकरणस्य च।
भङ्गाच्छेदोपमर्दाभ्यां प्रथमं साहसं स्मृतम्॥
वासःपञ्चत्रपानानां दृढोपकरणस्य च।
एतेनैव प्रकारेण मध्यमं साहसं स्मृतम्॥"
इति मिताक्षरा॥

मध्यमसाहसः, पुं, (मध्यमश्चासौ साहसश्चेति।) दण्डविशेषः। स तु पञ्चशतपणरूपः। यथा,—
"पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः।
मध्यमं पञ्च विज्ञेयः सहस्रन्त्वेव चोत्तमः॥
लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्व्वन्तु साहसम्।
भयाद्वा मध्यमौ दण्डौ मैत्रात् पूर्व्वं चतुर्गुणम्॥"
इति मानवे साक्षिप्रकरणे ८ अध्यायः॥

मध्यमा, स्त्री, (मध्यम+टाप्।) हरिद्रावृक्षा नारी। कर्णिका। अङ्गुलिभेदः। त्रयाक्षरच्छन्दः। इति मेदिनी। मे, ५०॥ हृदयोत्थितबुद्धियुतनादरूपवर्णः। यथा, अलङ्कारकौस्तुभे॥
"पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्य-
माख्यः॥"
स्त्रीयाद्यन्तर्गतनायिकाभेदः। तस्या लक्षणम्। हिताहितकारिण्यपि प्रियतमे हिताहितकारिणी या सा। अस्यास्तु व्यवहारानुसारिणी चेष्टा। इति रसमञ्जरी॥ (जन्तुभेदः। तत्पर्य्यायो यथा,—
"क्षुद्रक्षणफलाजम्बुर्दीर्घपत्रा च मध्यमा॥"
इति वैद्यकरत्नमालायाम्॥)

मध्यमिका, स्त्री, (मध्यमैव। कन् टापि अत इत्वञ्च।) हरिद्रावृक्षा नारी। इति रत्नावली॥

मध्यमीयं, त्रि, (मध्यमे भवं मध्यमस्येदं वेति। "गहादिभ्यश्च।" ४। २। १३८। इति छः।) मध्यमम्। इति हेमचन्द्रः। ६। ८६॥

मध्यमेश्वरः, पुं, (मध्यमस्य स्थानस्य ईश्वरः।) काशीस्थशिवलिङ्गविशेषः। यथा,—
"धन्यास्तु खलु ते विप्रा मन्दाकिन्यां कृतोदकाः।
अर्च्चयन्ति महादेवं मध्यमेश्वरमीश्वरम्॥
स्नानं दानं तपः आद्धं पिण्डनिर्व्वापणं तिल।
एकैकशः कृतं विप्रा पुनन्त्यासप्तमं कुलम्॥
सन्निहित्या अपस्तृश्य राहुग्रस्ते निशाकरे।
यत् फलं लभते मर्त्यस्तस्माद्गुणं तिल॥
एवमुक्त्वा महायोगी मध्यमे शूलिके प्रभुः।
उवास सुचिरं कालं पूजयन् वै महेश्वरम्॥"
इति कौर्म्मे ३१ अध्यायः॥

मध्ययवः, पुं, (मध्ये मध्यमो यवः।) षट्त्रिंशत्सर्षपपरिमाणम्। इति केचित्॥

मध्यरात्रः, पुं, (मध्यं रात्रेः "पूर्व्वापराधरेति।" २। २। १। इति समासः। "अहःसर्व्वैकेति।" इति ५। ४। ८७। समासान्तोऽच् पुंवच्च।) निशीथः। अर्द्धरात्रः। इति हलायुधः॥ (यथा मनौ। ४। १०६।
"उदके मध्यरात्रे च विण्मूत्रस्य विसर्জ্জने।
उच्छिष्टः आद्धभुक् चैव मनसापि न चिन्त-
येत्॥")

मध्यलोकः, पुं, (मध्यश्चासौ लोकश्चेति।) पृथिवी। मर्त्यलोक इति यावत्। वस्यमाणग्रन्थार्थदर्शनात्॥

मध्यलोकेशः, पुं, (मध्यलोकानां मर्त्यानां ईशः।) राजा। इति हेमचन्द्रः। ३। ३५३॥

मध्यस्थः, त्रि, (मध्ये वादिप्रतिवादिनोरन्तरे तिष्ठतीति। स्था+कः।) मध्यस्थायी। तत्पर्य्यायः। निहरः २। इति त्रिकाण्डशेषः॥ (यथा कथासरित्सागरे। १०। १६१।
"निषिद्धवत्या मध्यस्थान्दस्यूनानन्दपूर्णया।
स श्रीदत्तसखा साकं तन्मन्दिरमथाविशत्॥"
यथा च भागवते। ६। १६। ५।
"वस्तुन्यत्यरिमध्यस्थमित्रोदासीनविद्विषः।
सर्व्व एव हि सर्व्वेषां भवन्ति क्रमशो मिथः॥")
उभयपक्षहीनः। यथा,—
"श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पाण्डवैः।
तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल॥"
इति श्रीभागवते १० स्कन्धे ७८ अध्यायः॥
स्वार्थाविरोधेन परार्थघटकः। यथाह प्राज्ञः।
"ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य
बाधेन ये
मध्यस्थाः परकीयकार्य्यकुशलाः स्वार्थाविरो-
धेन ये।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय
हन्यते
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानी-
महे॥"

मध्यस्थलं, क्ली, (मध्यं स्थलम्। शरीरमध्यवर्त्तित्वात्तथात्वम्।) कटिदेशः। यथा,—
"कुचौ मरिचसन्निभौ सुरजमध्यमध्यस्थली।
अहो तिमिरमञ्जरी सहचरी नरीनृत्यते॥"
इत्युद्भटः॥

मध्या, स्त्री, (मध्य+टाप्।) मध्यमाङ्गुलिः। इति हेमचन्द्रः॥ नायिकाविशेषः। अस्या लक्षणम्। समानलज्जामदना। एषैव चातिप्रश्रयादतिविश्रब्धवोढा॥ अस्याश्चेष्टा। सागसि प्रेयसि धैर्य्ये वक्रोक्तिरधैर्य्ये परुषवाक्। यथा,—
"स्वापे प्रियाननविलोकनहानिरेव
स्वापच्युतौ प्रियकरग्रहणप्रसङ्गः।
इत्थं शरीरहसखौ परिचिन्तयन्ती
स्वापं विधातुमपि हातुमपि प्रपेदे॥"
मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे। धीरा अधीरा धीराधीरा चेति। इति रसमञ्जरी॥

मध्याङ्गः, पुं, (मध्यं अहः समासान्तः टच्। "अह्नोऽह्न एतेभ्यः।" ५। ४। ८८। इत्यह्नादेशः पुंवच्च।) अह्नोऽहमसुकृन्नाम्नकमध्यभागः। स च कुतपकालस्य संज्ञाविशेषः। यथा,—
"अह्नो सुकृन्नो विख्याता दश पञ्च च सर्व्वदा।
तत्राष्टमो सुकृन्नो यः सः कालः कुतपः स्मृतः।
मध्याह्ने सर्व्वदा यस्मान्नदीभवति भास्करः।
तस्मादनन्तफलदस्तत्रारम्भो विधीयते॥
मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलम्।
रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः॥
पापं कृतमसितमित्याहुरस्य सन्तापकारिणः।
अहार्यते यतस्तस्मात् कुतपा इति संस्मृताः॥"
इति मत्स्यपुराणे आद्धकल्पे २२ अध्यायः॥
त्रिधाविभक्तदिनमध्यभागः। स च दशदण्डात् परं दशदण्डरूपः। इति श्रुत्युक्तः अमरोक्तश्च॥ पञ्चधाविभक्तदिनतृतीयभागः। स तु द्वादश-

दक्षात् परषड्दक्षात्मकः । इति स्मार्तैधृतमत्स्य-पुराणम् ॥ एष नियमस्त्रिंशद्मुहूर्तदिनाभिप्रायेण न्यूनाधिके न्यूनाधिककालो ज्ञेयः ॥* मध्याह्न-स्नानं यथा,—

"ततो मध्याह्नसमये स्नानार्थं मृदमाहरेत् ।
पुण्यास्तं कुशगुल्मिन्यां गोमयं शुष्कमेव च ॥
नदीषु देवखातेषु तडागेषु सरित्सु च ।
स्नानं समाचरेन्नित्यं गर्भप्रस्रवणेषु च ॥
परकीयनिपानेषु न स्नायाद्वै कदाचन ।
पञ्च पिण्डान् समुद्धृत्य स्नायाद्वा सम्भवे पुनः ॥
मृदेकया शिरः पञ्च द्वाभ्यां नाभेस्तथोपरि ।
अधश्च तिसृभिः कार्य्यं पादौ षड्भिस्तथैव च ॥
मृत्तिका च समुद्दिष्टा स्नानार्थमलकमानिका ।
गोमयस्य प्रमाणन्तत्तेनाङ्गं लेपयेत्ततः ॥
लेपयित्वाथ तीरस्थस्तन्निमज्जनमेव मन्त्रतः ।
प्रक्षाल्याचम्य विधिवत्ततः स्नायात् समाहितः ॥
अभिमन्त्र्य जलं मन्त्रैस्तन्निमज्जैर्वारुणैः शुभैः ।
भावपूतहृदयस्तं ध्यायन् वै विष्णुमव्ययम् ॥
आपो नारायणोद्भूतास्ता एवास्यायनं पुनः ।
तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः ॥
प्रेक्ष्य ॐकारमादित्यं त्रिर्निमज्ज्योज्जलाशये ।
पुनः पुनरथाचामेत् मन्त्रेणानेन मन्त्रवित् ॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ।
त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम् ॥
दिवारं वा शिरश्चस्पृशेत् व्याहृतिप्रणवान्विताम् ।
सावित्रीं वा जपेद्विद्वांस्तथा वैवाघमर्षणम् ॥
ततः सम्मार्ज्जनं कुर्य्यादापोहिष्ठादिमयो भुवः ।
इदमापः प्रवहत व्याहृतिभिस्तथैव च ॥
ततोऽभिमन्त्र्य तत् तीर्थमापोहिष्ठादिमन्त्रकैः ।
अन्तर्ज्जले त्रिरावर्त्त्य सर्व्वपापात् प्रमुच्यते ॥
अपः पाणौ समादाय जघ्रा वै मार्ज्जने कृते ।
विश्वस्य मूर्द्धं तत्तोयं मुच्यते सर्व्वपातकैः ॥
यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः ।
तथाघमर्षणं सूक्तं सर्व्वपापापनोदनम् ॥
अथोपतिष्ठेदादित्यं मूर्द्धं पुण्यान्विताञ्जलिम् ।
प्रदक्षिणालोकयन्देवमदृश्यं वैदिकैः परम् ॥
उद्वयं चित्रं देवानामित्यादिभिरनन्यधीः ।
हंसः शुचिषदेतेन सावित्र्या च विशेषतः ॥
अन्यैश्च वैदिकैर्मन्त्रैः सौरैः पापप्रणाशनैः ।
सावित्रीं वै जपेत् पश्चान्नयज्ञः स वै स्मृतः ॥
विविधानि पवित्राणि गुह्यविद्यास्तथैव च ।
व्रतदध्यमथर्व्वशिरः सौरमन्त्राश्च मृत्तिकाः ॥
प्राक्कूलेषु समासीनः कुशेषु प्राङ्मुखः शुचिः ।
तिष्ठंश्चैदीच्यमाशोऽर्कं जाप्यं कुर्य्यात् समाहितः ॥
स्फाटिकेक्ष्वाकुरुद्राक्षपुत्रजीवसमुद्भवैः ।
कार्षैका अक्षमाला वा उत्तरादुत्तमा स्मृता ॥
जपकाले न भाषेत नान्यानि प्रेक्षयेद्बुधः ।
न कन्ययेच्छिरोयोवान्दन्तानेव प्रकाशयेत् ॥
गुह्यका राक्षसाः सिद्धा हरन्ति प्रसभमन्यतः ।
एकान्तेषु शुभे देशे तस्माज्जाप्यं समाचरेत् ॥
चण्डालाग्र्यौचपतितान् दृष्ट्वाचम्य पुनर्जपेत् ।
तैरेव भाषणं कृत्वा स्नात्वा चैव जपेद्बुधः ॥
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने ।
सौरान् मन्त्रान् यजुर्वेदे वै पावमानीस्तु
कामतः ॥
यदि स्यात् क्लिन्नवासो वै वारिमध्यगतो जपेत् ।
अन्यथा तु शुचौ भूम्यां दर्भेषु सुसमाहितः ॥
प्रदक्षिणं समाकृत्य नमस्कृत्वा ततः स्थितौ ।
आचम्य च यथाशास्त्रं गत्वा स्वाध्यायमाच-
रेत् ॥
ततः सन्तर्पयेद्देवानृषीन् पितृगणान् क्रमात् ।
आदावोङ्कारसुच्चार्य्य नमोऽन्ते तर्पयामि च ॥
देवान् ब्रह्मऋषींश्चैव तर्पयेदुत्तरोदकैः ।
तिलोदकैः पितॄन् भक्त्या स्वस्वगोत्रविधानतः ॥
अन्वारब्धेन सव्येन पाणिना दक्षिणेन च ।
देवर्षीस्तर्पयेद्धीमानुदकाञ्जलिभिः पितॄन् ॥
यज्ञोपवीती देवानां निवीती ऋषितर्पणम् ।
प्राचीनावीती पित्र्यं तु स्वेन तीर्थेन भावतः ॥
नापीद्ध स्नानवस्त्रं वै समाचम्य च वाग्यतः ।
स्वैर्मन्त्रैरर्घयेद्देवान् पुष्पैः पत्रैरथाम्बुभिः ॥
ब्रह्माणं शङ्करं सूर्य्यं तथैव मधुसूदनम् ।
अन्यांश्चाभिमतान् देवान् भक्त्या चाक्रोधनो-
ऽत्वरः ॥
प्रदद्यादाय पुष्पाणि सूक्तेन पुरुषेण तु ।
आपो वा देवताः सर्व्वास्तेन सम्यक् समर्चिताः ॥
नमस्कारेण पुष्पाणि विन्यसेद्वै पृथक् पृथक् ।
न विष्णुराधनात् पुण्यं विद्यते कर्म्म वैदिकम् ।
तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम् ॥
तद्विष्णोरितिमन्त्रेण सूक्तेन पुरुषेण तु ।
नैताभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्व्वपि ॥
निवेदयेत् स्वमात्मानं विष्णावमलतेजसि ।
तदात्मा तन्मनाः प्राप्तस्तद्विष्णोरितिमन्त्रतः ॥
अथवा देवमीशानं भगवन्तं सनातनम् ॥
आराधयेन्महादेवं भावपूतो महेश्वरम् ॥
मन्त्रेण रुद्रगायत्र्या प्रणवेनाथ वा पुनः ।
ईशानेनाथवा रुद्रैस्त्र्यम्बकेण समाहितः ॥
पुष्पैः पत्रैरथाक्षैश्च चन्दनाद्यैर्महेश्वरम् ।
अघोरमः शिवायेति मन्त्रेणानेन योजयेत् ॥
नमस्कुर्य्यान्महादेवन्तं सत्यमितीश्वरम् ।
निवेद्यात्म स्वात्मानं यो ब्रह्मत्वमितीश्वरे ॥
प्रदक्षिणं द्विजः कुर्य्यात् पञ्च ब्राह्मण्य वै जपन् ।
ध्यायेत्तं देवमीशानं सोममध्यगतं शिवम् ॥
अथावलोकयेदर्कं हंसः शुचिषदित्यृचा ।
कुर्य्यात् पञ्च महायज्ञान् यद्वं कृत्वा समाहितः ॥
देवयज्ञं पितृयज्ञं ऋषियज्ञं तथैव च ।
मानुष्यं ब्रह्मयज्ञश्च पञ्चयज्ञान् प्रचक्षते ॥
यदि स्यात् तर्पणादर्वाक् ब्रह्मयज्ञः कृतो न हि ।
कृत्वा मनुष्ययज्ञं वै ततः स्वाध्यायमाचरेत् ।
अग्नेः पश्चिमतो देशे भूतयज्ञान्त एव वा ।
कुशासनसमासीनः कुशपाणिः समाहितः ॥
ग्रासाग्नौ लौकिकाग्नौ वा जले भूम्यामथापि
वा ।
वैश्वदेवनिमित्तं वै देवयज्ञः स वै स्मृतः ॥
यदि स्याल्लौकिके पक्वं ततोऽन्नं तत्र हूयते ।
ग्रासाग्नौ तत्र देवानां विधिरेव सनातनः ॥
देवेभ्यश्च हुतान्नाद्यात् शेषान् भूतबलिं हरेत् ।
भूतयज्ञः स वै श्रेयो भूतिदः सर्व्वदेहिनाम् ॥
स्वभ्यश्च स्वपचेभ्यश्च वयोभ्यो नित्यमेव च ।
दद्याद्भुवौ बलिं तत्र पक्षिभ्योऽथ द्विजोत्तमः ॥
सायं चान्नस्य सिद्धस्य कुर्य्यादेवमतन्द्रितः ।
भूतयज्ञः स्वयं नित्यं सायं प्रातर्विधीयते ॥
एकन्तु भोजयेद्विप्रं पितृनुद्दिश्य सत्तमम् ।
अथवायं यथाशक्ति किञ्चिदन्नं समाहितः ।
वेदतत्त्वार्थविदुषे द्विजाये वोपपादयेत् ॥
पूजयेदतिथिं नित्यं नमस्येदर्घयेद्दिजम् ।
मनोवाक्कर्म्मभिः शान्तमागतं स्वगृहन्तु तम् ॥
हन्तकारमथाग्र्यं वा भिक्षां वा शक्तितो द्विजः ।
दद्यादतिथये नित्यं वृद्धा तं परमेश्वरम् ॥
भिक्षामाहुर्म्मासमात्रमग्र्यं स्यात् तच्चतुर्गुणम् ।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते ॥
गोदोहमात्रं कालं वै प्रतीक्षेतातिथिः स्वयम् ।
अभ्यागतान् यथाशक्ति पूजयेदतिथिं यथा ॥
भिक्षां वै भिक्षवे दद्याद्विधिवद् ब्रह्मचारिणे ।
दद्यादन्नं यथाशक्ति लब्धेभ्यो लोभवर्ज्जितः ॥
सर्व्वेषामप्यलाभे तु अन्नं गोभ्यो निवेदयत् ।
भुञ्जीत बन्धुभिः सार्द्धं वाग्यतोऽन्नमकुत्सयन् ॥
अकृत्वा तु द्विजः पञ्च महायज्ञान् द्विजोत्तमाः ।
भुञ्जीत चेत् सुमूढात्मा तिर्य्यग्योनिं स
गच्छति ॥
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमाः ।
नाशयन्त्याशु पापानि देवानामर्चनं तथा ॥
यो मोहादथवालस्यादकृत्वा देवतार्चनम् ।
भुङ्क्ते स याति नरकान् शूकरेष्वभिजायते ॥
तस्मात् सर्व्वप्रयत्नेन कृत्वा कर्म्माणि वै द्विजः ।
भुञ्जीत स्वजनैः सार्द्धं स याति परमां गतिम् ॥"

इति कौर्म्मे उपविभागे १७ अध्यायः ॥

अत्र भोजनविधिर्भोजनशब्दे द्रष्टव्यः ॥

मध्वज्जः, (मधुं तत्सर्य्यायं अलतीति । अल् + अच् । संज्ञापूर्व्वकत्वात् वृद्ध्यभावः ।) मधुकारः । इति शब्दचन्द्रिका ।

मध्वाशु, क्ली, (मधु मधुरं आशु । मधुवच्छिद्रत्वात्तथात्वम् ।) मूलविशेषः । मौ आलु इति भाषा । अस्य गुणाः । रक्तपित्तनाशित्वम् । गुरुत्वम् । स्वादुत्वम् । शीतत्वम् । स्तन्यशुक्रकारित्वञ्च । इति राजवल्लभः ॥

मध्वालुकं, क्ली, (मध्वालु + स्वार्थे कन् ।) कन्दविशेषः । इति शब्दचन्द्रिका । मौ आलु इति भाषा ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "विदारीकन्दशतावरीविसन्धालम्बशृङ्गाटक-कशेरुकपिप्पलीकमध्वालुकहस्त्यालुककाष्ठा-लुकशृङ्गालुकरक्तालुकेन्दीवरोत्पलकन्द-प्रभृतीनि ॥")

मध्वासवः, पुं, (मधु मधूकपुष्पैरासवेन क्रत आसवः ।) मधूकपुष्पक्रतमद्यम् । तत्पर्य्यायः ।

माधवकः २ मधु ३ माध्वीकम् ४। इत्यमरः। २। २०।४१॥ (यथा, सुश्रुते २।४५ अध्याये। "सुखप्रियः स्थिरमदो विभ्रमोऽनिलनाशनः। मधु मध्यासवक्लेदी मेहकुष्ठविषापहः॥" विवरणमस्य माध्वीकशब्दे ज्ञातव्यम्॥)

मध्यासवनिकः, पुं. (मध्यासवनसुत्पादयत्वेनास्त्यस्येति। मध्यासवन+ठन्।) शौण्डिकः। इति शब्दमाला॥

मधिजा, स्त्री, (मधु ईजते प्राप्नोति कारणत्वेनेति। ईज+कः। पृषोदरादित्वात् ह्रस्वः।) मदिरा। इति हेमचन्द्रः।३।५६७॥ (गुणादिविषयोऽस्या मदिराशब्दे ज्ञातव्यः॥)

मन, अर्च्चे। गर्व्वे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-गर्व्वे अक०-सेट्।) मनति। इति दुर्गादासः॥

मन, क ड गर्व्वके। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-अक०-स्तम्भने सक०-सेट्।) क ड, मानयते। गर्व्वकोऽहङ्कारः। मनस्तम्भने। इति प्राचः। मानयते शत्रुं बली स्तभ्नातीत्यर्थः। इति रमानाथः। इति दुर्गादासः॥

मन, तृ क धृतौ। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट्।) दन्त्यनोपधः। मनयति। इति दुर्गादासः॥

मन, द ड बोधे। इति कविकल्पद्रुमः॥ (तना०-आत्म०-सक०-सेट्।) द ड, मनुते। इति दुर्गादासः॥

मन, घ औ ड बोधे। इति कविकल्पद्रुमः॥ (दिवा-आत्म०-सक०-अनिट्।) घ ड, मन्यते। औ, अमंस्त। इति दुर्गादासः॥

मनआपः, चि, (आप्नोतीति। आप्+अच्। मनस आपः।) मनोज्ञः। इति त्रिकाण्डशेषः॥

मनः, पुं, (मन्यते सुरभित्वादिगुणेन आद्रियत इति। मन्+घः।) जटामांसी। इति शब्दचन्द्रिका॥

मनः, [स्] क्ली, (मन्यते बुध्यतेऽनेनेति। मन्+ "सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) लिङ्गशरीरावयवविशेषः। यथा। सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि। अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्म्मेन्द्रियपञ्चकं वायुपञ्चकमेति। मनो नाम सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिः। मनस्तु कर्म्मेन्द्रियैः सहितं सत् मनोमयकोशो भवति। इति वेदान्तसारः॥ ज्ञानेन्द्रियविशेषः। तत्तु बुद्धीन्द्रियाणां वशी प्रधानं श्रीकृष्णविभूतिश्च। यथा,—

"इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥"

इति भगवद्गीता॥

तच्च गर्भस्थस्य सप्तमे मासि जायते। इति सुश्रुतः॥ ("पञ्चमे मनः प्रतिबुद्धतरं भवति।" इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ॥४॥)

तत्पर्य्यायः। चित्तम् २ चेतः ३ हृदयम् ४ स्वान्तम् ५ हृत् ६ मानसम् ७। इत्यमरः। १। ४। ३१॥ अनङ्गकम् ८ अङ्गम् ९। इति शब्दरत्नावली॥ अपि च।

"मनो महान् मतिर्ब्रह्मा पूर्णुद्भिः ख्यातीश्वरः।
प्रज्ञा संवित् चितिश्चैव स्मृतिश्च परिपठ्यते।
पर्य्यायवाचकाः शब्दा मनसः परिकीर्त्तिताः॥"

इति महाभारते मोक्षधर्म्मे॥ * ॥

न्यायमते अस्य गुणाः। परत्वम्। अपरत्वम्। संख्या। परिमितिः। पृथक्त्वम्। संयोगः। विभागः। वेगश्च। मनोग्राह्याणि यथा। सुखम्। दुःखम्। इच्छा। द्वेषः। मतिः। यत्नश्च। इदं परमाणुस्वरूपम्। शिरोमणिमते वायवीयपरमाणुरूपम्। यथा,—

"परापरत्वं संख्याद्याः पञ्च वेगश्च मानसे।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषौ मतिः कृतिः॥
अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते॥"

इति भाषापरिच्छेदः॥

जन्यज्ञानसामान्यं प्रति लङ्घनीयोगः कारणम्। यथा, तत्रैव।

"लक्ष्यो योगो मनसा ज्ञानकारणम्॥"

तस्य नवगुणा यथा,—

"धैर्य्योपपत्तिर्व्यक्तिश्च विसर्गः कल्पना क्षमा।
सदसद्ग्राहिता चैव मनसो नव वै गुणाः॥"

इति मोक्षधर्म्मः॥

अस्य व्याख्या। धैर्य्यम् १ उपपत्तिः ऊहापोहकौशलम् २ व्यक्तिः स्मरणम् ३ विसर्गः विपरीतसर्गो भ्रान्तिः ४ कल्पना मनोरथवृत्तिः ५ क्षमा ६ सत् वैराग्यादि ७ असत् रागद्वेषादि८ ग्राहिता अस्थिरत्वम् ९। इति तट्टीका॥ * ॥

अस्य चातुर्विध्यं यथा,—

"मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्।
संशयो निश्चयो गर्व्वः स्मरणं विषया अमी॥"

इति वेदान्तः॥

तस्य अध्यात्मत्वादि यथा,—

"अध्यात्मं मन इत्याहुः पञ्चभूतात्मधारकम्।
अधिभूतञ्च सङ्कल्पश्चन्द्रमाश्चाधिदैवतम्॥"

इति महाभारते आश्वमेधिकपर्व्व॥

तस्य स्वरूपं यथा,—

"अनिरूप्यमदृश्यञ्च ज्ञानभेदं मनः स्मृतम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥

तस्य प्राशस्त्याप्राशस्त्यानुमापकानि यथा,—

"जनानां हृदयं सद्यः सुव्यक्तं वचनेन वै।
शिशौ कलत्रे कन्यायां दौहित्रे बान्धवेऽपि च॥
पुत्रे पौत्रे च वत्सेऽपि प्रतापे यशसि श्रियाम्।
बुद्धौ वारिणि विद्यायां ज्ञायते हृदयं नृणाम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः॥

तस्य बन्धमोक्षहेतुत्वं यथा,—

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धस्य विषयासङ्गि मुक्तेर्निर्विषयं तथा॥"

इति विष्णुपुराणे ६ अंशे ७ अध्यायः॥

("अतीन्द्रियं पुनर्मनः सत्त्वसंज्ञकं चेत्याहुरेके तदर्थात्मसम्पदायत्तत्वेन। चेष्टाप्रत्ययभूतमिन्द्रियाणाम्। स्वार्थेन्द्रियार्थसङ्कल्पाभिचरणाच्चानेकमेकस्मिन् पुरुषे सत्त्वरजस्तमः सत्त्वगुणयोगाच्च नानानेकत्वं नानेकं लोककालमनेकेषु प्रवर्त्तते॥ तस्मान्नैककालाः सर्व्वेन्द्रियप्रवृत्तिः। यद्गुणश्चाभीक्ष्णं पुरुषमनुवर्त्तते सत्त्वं ततस्तत्त्वमेवोपदिशन्ति ऋषयो बाहुल्यानुप्रयोगात्॥ मनःपूर्वाश्चेन्द्रियाणामर्थग्रहणसमर्थानि भवन्ति॥"

"मनस्तु चिन्त्यमर्थः। तत्र मनसो बुद्धेश्च त एव समानातिहीनमिथ्यायोगाः प्रकृतिविकृतिहेतवो भवन्ति॥" इति चरके सूत्रस्थाने अष्टमेऽध्याये॥

"लक्ष्यं मनसो ज्ञानस्याभावो भाव एव वा।
सति ह्यात्मेन्द्रियार्थानां सन्निकर्षे च वर्त्तते॥
वेष्टयत्यात्मनो ज्ञानं सान्निध्यात्तच्च वर्त्तते।
अणुत्वमथ चैकत्वं द्वौ गुणौ मनसः स्मृतौ॥
चिन्त्यविचार्य्यमूह्यञ्च ध्येयं सङ्कल्प्यमेव च।
यत्किञ्चिन्मनसो ज्ञेयं तत् सर्व्वं ह्यर्थसंज्ञकम्॥
इन्द्रियाभिग्रहः कर्म्म मनसस्तस्य निग्रहः।
ऊहो विचारश्च ततः परं बुद्धिः प्रवर्त्तते॥
इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते।
कल्प्यते मनसाप्यूहं गुणतो दोषतो यथा॥
जायते विषये तत्र या बुद्धिर्निश्चयात्मिका।
अवस्यते तथा वक्तुं कर्त्तुं वा बुद्धिपूर्व्वकम्॥
या यदिन्द्रियमाश्रित्य जन्तोर्बुद्धिः प्रवर्त्तते।
याति सा तेन निर्देश्यं मनसा च मनोभवा॥
बुद्धीन्द्रियमनोर्थानां विद्याद् योगधरं परम्॥"

इति चरके शारीरस्थाने प्रथमेऽध्याये॥

सत्त्वगुणयुक्तस्य मनसो गुणा यथा,—

"आस्तिक्यं प्रविभज्य भोजनमनुत्तापञ्च तथ्यं वचो
मेधाबुद्धिधृतिक्षमाश्च करुणा ज्ञानञ्च निर्हेतुकम्।
कर्म्मानिन्दितमस्पृहञ्च विनयो धर्म्मः सदेवादरो
देते सत्त्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः॥"

अस्ति धर्म्ममोक्षपरलोकादिकमिति बुद्ध्या परतोऽप्यास्तिकस्तस्य भाव आस्तिक्यं अनुत्तापः अक्रोधः धृतिः भूतप्रेतसारक्रोधलोभाद्यावेशराहित्यं ज्ञानमात्मज्ञानम्। निर्हेतुकता कपटाभावः कर्म्म अनिन्दितं अस्पृहं निष्कामं च। रजोगुणयुक्तस्य मनसो गुणा यथा,—

"क्रोधस्ताड़नशीलता च बहुलं दुःखं सुखेच्छाधिका
दम्भः कामुकताप्यलीकवचनं चाधीरता हर्षृतिः।
ऐश्वर्य्यादभिमानितातिप्रणयितानन्दोऽधिकश्चाटनं
प्रख्याता हि रजोगुणेन सहितस्यैते गुणाश्चेतसः॥"

अलीकवचनं मिथ्याकथनं अटनं पृथ्वीपरिभ्रमणम्। अथ तमोगुणयुक्तस्य मनसो गुणा यथा.—

"नास्तिक्यं सुविषन्नतातिशयितालस्यञ्च दुष्टा मतिः
प्रीतिर्निन्दितकर्म्मशर्म्मणि सदा निद्रालुताहर्निशम्।
अज्ञानं किल सर्व्वतोऽपि सततं क्रोधान्धता मूढ़ता
प्रख्याता हि तमोगुणेन सहितस्येते गुणाश्चेतसः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥*॥

सर्व्वे सान्ता अदन्ताश्चेति प्रमाणात् अकारान्तमनशब्दोऽप्यस्ति। यथा, उत्तरगीतायाम्। १३ अध्याये।

"मनस्यं मनमध्यस्थं मध्यस्थं मनवर्ज्जितम्।
मनसा मनमालोक्य स्वयं सिद्धन्ति योगिनः॥")

मन:शिल:, पुं, (मनो मानसं शिलति आकर्षति खगन्धेनेति। शिल+कः।) मन:शिला। यथा,

"टङ्कैर्मन:शिलगुहैरविदार्य्यमाणा॥"

इत्यमरटीकायां भरतः॥

मन:शिला, स्त्री, (मन: शिलति आदत्ते आकर्षति गन्धेनेति। शिल+कः। स्त्रियां टाप्। यद्वा, मन:प्रसादिका शिला धातुविशेषः।) रक्तवर्णधातुविशेषः। मनछल इति भाषा॥ (यथा, कुमारे। १। ५५।

"मन:शिलाविच्छुरिता निषेदुः
शैलेयनद्धेषु शिलातलेषु॥")

सा तु लक्ष्मीवीर्य्यम्। इति वैद्यकम्॥ तत्पर्य्यायः। कुनटी२ मनोज्ञा३ नागजिह्विका ४। इत्यमरः। २। ६। १०८॥ नेपाली ५ शिला ६। इति रत्नमाला॥ मनोज्ञा ७ नेपालिका ८ मनोगुप्ता ९ कल्याणिका १० रोगघ्नी ११। इति राजनिर्घण्टः॥ गोला १२ दिव्यौषधिः १३। इति भावप्रकाशः॥ अस्या गुणाः। कटुत्वम्। स्निग्धत्वम्। लेखनत्वम्। विषभूताविषभयोन्मादनाग्नित्वम्। वह्निकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च। तिक्तत्वम्। कफनाशित्वम्। सारकत्वम्। कृमिहारित्वम्। कुष्ठज्वरपाण्डुकासश्वासनाशित्वम्। शुक्रमङ्गलकारित्वञ्च। इति राजवल्लभः॥ अन्यच्च।

"मन:शिला गुरुर्म्मेध्या सरोष्णा लेखनी कटुः।
तिक्ता स्निग्धा विषश्वासकासभूतकफापहा॥
मन:शिला मन्दबलं करोति
जन्तुं ध्रुवं शोधनमन्तरेण।
मलानुबन्धं किल मूच्छरोधं
सशूकरं शूकगदञ्च कुर्य्यात्॥"

इति भावप्रकाशः॥

(अस्याः पर्य्यायः शोधनं गुणाश्च यथा.—

"मन:शिला च नेपाली शिलाख्या नागजिह्विका।
मनोज्ञा कुनटी गोली करञ्जी करवीरिका॥
मनोज्ञा शोधनपुष्पाभा ग्रस्यते सर्व्वकर्म्मसु॥"
"जयन्ती भृङ्गराजोत्थै रक्तागस्त्यरसैः शिला॥
दोलायन्त्रे दिनं पाच्या यामं क्वाथस्य मूच्छके।
चालवेदारनालेन सर्व्वरोगेषु योजयेत्॥"

मतान्तरे मन:शिलाशुद्धिर्यथा.—

"अगस्त्यपत्रतोयेन भाविता सप्तवासरम्।
भृङ्गवेररसैर्वापि विशुध्यति मन:शिला।
कटुः स्निग्धा शिला तिक्ता कफघ्नी लेखनी सरा।
भूतावेशभयं हन्ति कासश्वासहरा शुभा॥"

इति वैद्यकरसेन्द्रसारसंग्रहे आरग्वधादिकारे॥)

मनन, क्ली, (मन्यत इति। मन्+ल्युट्।) श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभिः अनवरतमनुचिन्तनम्। इति वेदान्तसारः॥ बोधनम्। (यथा, गायत्रीतन्त्रे। १। ४।

"मननात् पापतस्त्राति मननात् स्वर्गमश्नुते।
मननात् मोक्षमाप्नोति चतुर्व्वर्गमयो भवेत्॥")

धारणम्। इति मनधात्वर्थदर्शनात्। बुद्धिः। इति राजनिर्घण्टः॥

मनसा, स्त्री, (मन: भक्ताभीष्टपूरणाय मननं अस्त्यस्या इति। मनस्+अर्श आदित्वात्। ततष्टाप्। यद्वा, मनं मननमहङ्कारमिति यावत् स्यति नाशयतीति। सो+कः।) देवीविशेषः। तत्पर्य्यायः। कद्रुः २ मनसादेवी ३ विषहरी ४। इति जटाधरः॥ अस्याः प्रणाममन्त्रः।

"आस्तीकस्य मुनेर्म्माता भगिनी वासुकेस्तथा।
जरत्कारुमुनेः पत्नी मनसादेवि! नमोऽस्तु ते॥"

इति तस्याः पूजायामुक्तिः॥

तस्या नाम्नां व्युत्पत्तिर्यथा,—

श्रीनारायण उवाच।

"शृणुष्व मनसाख्यानं यत् श्रुतं धर्म्मवक्त्रतः।
कन्या सा च भगवती कश्यपस्य च मानसी॥
तेनेयं मनसादेवी मनसा या च दीव्यति।
मनसा ध्यायते या वा परमात्मानमीश्वरी॥
तेन सा मनसादेवी योगेन तेन दीव्यति।
आत्मारामा च सा देवी वैष्णवी सिद्धयोगिनी॥
चिक्षेप च तपस्तप्त्वा कृष्णस्य परमात्मनः।
जरत्कारुशरीरञ्च दृष्ट्वा यत् स्खलितेश्वरः॥
गोपीपतिर्नाम चक्रे जरत्कारुरिति प्रभुः।
वाञ्छितञ्च ददौ तस्यै कृपया च कृपानिधिः॥
पूजाञ्च कारयामास चकार च पुनः पुनः।
स्वर्गे च नागलोके च पृथिव्यां ब्रह्मलोकतः॥
भूयं जगत्सु गौरी सा सुन्दरी च मनोहरा।
जगद्गौरीति विख्याता तेन सा पूजिता सती॥
शिवशिष्या च सा देवी तेन शैवीति कीर्त्तिता।
विष्णुभक्तातीव श्रद्धावैष्णवी तेन नारद!॥
नागानां प्रागरक्षित्री यज्ञे जन्मेजयस्य च।
नागेश्वरीति विख्याता सा नागभगिनीति च॥
विषं संहर्त्तुमीशा सा तेन विषहरीति सा।
सिद्धं योगं हरात् प्राप तेनासिद्धयोगिनी।
महाज्ञानञ्च गोप्यञ्च मृतसञ्जीवनीं पराम्।
महाज्ञानयुतां तान्च प्रवदन्ति मनीषिणः॥
आस्तीकस्य मुनीन्द्रस्य माता सा च तपस्विनः॥
आस्तीकमाता विख्याता जगत्सु सुप्रतिष्ठिता॥
प्रिया मुनेर्जरत्कारोर्म्मुनीन्द्रस्य महात्मनः।
योगिनो विश्वपूज्यस्य जरत्कारुप्रिया ततः॥
जरत्कारुर्जगद्गौरी मनसा सिद्धयोगिनी।
वैष्णवी नागभगिनी शैवी नागेश्वरी तथा॥
जरत्कारुप्रियास्तीकमाता विषहरीति च।
महाज्ञानयुता चैव सा देवी विश्वपूजिता॥
द्वादशैतानि नामानि पूजाकाले च यः पठेत्।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च॥
नागभीते च शयने नागग्रस्ते च मन्दिरे।
नागक्षते महादुर्गे नागवेष्टितविग्रहे।
इदं स्तोत्रं पठित्वा तु सुच्यते नात्र संशयः।
नित्यं पठेद् यस्तं दृष्ट्वा नागवर्गः पलायते॥
दशलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम्।
स्तोत्रसिद्धिर्भवेद्यस्य स विषं भोक्तुमीश्वरः॥
नागौघभूषणं कृत्वा स भवेन्नागवाहनः।
नागासनो नागतल्पो महासिद्धोभवेन्नरः॥"

इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारायणनारदीये मनसोपाख्याने मनसास्तोत्रं नाम पञ्चचत्वारिंशत्तमोऽध्यायः॥*॥ तस्याः पूजामन्त्रादि यथा,—

श्रीनारायण उवाच।

"पूजाविधानं स्तोत्रञ्च शृणुष्व मुनिपुङ्गव!।
ध्यानञ्च सामवेदोक्तं देवीपूजाविधानकम्॥
श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम्।
वह्निशुद्धांशुकाधानां नागयज्ञोपवीतिनीम्॥
महाज्ञानयुताञ्चैव प्रवरां ज्ञानिनां सतीम्।
सिद्धाधिष्ठातृदेवीञ्च सिद्धां सिद्धिप्रदां भजे॥
इति ध्यात्वा तु तां देवीं मूलेनैव प्रपूजयेत्।
नैवेद्यैर्विविधैर्दीपैः पुष्पधूपानुलेपनैः॥
मूलमन्त्रञ्च वेदोक्तो भक्तानां वाञ्छितप्रदः।
मुने! कल्पतरुर्नाम सुसिद्धो द्वादशाक्षरः॥
ॐ ह्रीं श्रीं क्लीं ऐं मनसादेव्यै स्वाहेति कीर्त्तितः।
पञ्चलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम्॥
मन्त्रसिद्धिर्भवेद्यस्य स सिद्धो जगतीतले।
सुधासमं विषं तस्य धन्वन्तरिसमो भवेत्॥
ब्रह्मन्नाषाढ़संक्रान्त्यां कुहौ श्राद्धात्सु यत्नतः।
आवाह्य देवीमेतां पूजयेद् यो हि भक्तितः॥
पञ्चम्यां मनसाख्यायां देव्यै दद्याच्च यो बलिम्।
धनवान् पुत्रवांश्चैव कीर्त्तिमांश्च भवेद्ध्रुवम्॥
पूजाविधानं कथितं तदाख्यानं निशामय।
कथयामि महाभाग! यत् श्रुतं धर्म्मवक्त्रतः॥"

तस्या जन्मकारणं यथा.—

"पुरा नागभयाक्रान्ता बभूवुर्म्मानवा भुवि।
यान् यान् स्पृशन्ति नागाश्च ते न जीवन्ति नारद!॥
मन्त्रांश्च सहजे भीतः कश्यपः ब्रह्मणार्थितः।
वेदवीजानुसारेण चोपदेशेन ब्रह्मणः॥

मन्त्राधिष्ठातृदेवीनां मनसां सत्त्वे ततः।
तपसा मनसा तेन बभूव मनसा च सा॥"
तस्यास्तपस्यादि यथा,—
"कुमारी सा च सम्भूय जगाम शङ्करालयम्।
भक्त्या संपूज्य कैलासे तुष्टाव चन्द्रशेखरम्॥
दिव्यं वर्षसहस्रञ्च तं सिषेवे सुनेः सुता।
आशुतोषो महेशश्च तां च तुष्टो बभूव ह॥
महाज्ञानं ददौ तस्यै पाठयामास सामं च।
कृष्णमन्त्रं कल्पतरुं ददावष्टाक्षरं सुने!॥
लक्ष्मीमाया कामबीजं ङेऽन्तं कृष्णपदन्तथा।
त्रैलोक्यमङ्गलं नाम कवचं पूजनक्रमम्॥
सर्वपूज्यञ्च स्तवनं ध्यानं भुवनपावनम्।
पुरश्चर्याक्रमञ्चापि वेदोक्तं सर्वसम्मतम्॥
प्राप्या मृत्युञ्जयाज्ज्ञानं परं मृत्युञ्जयं सती।
जगाम तपसे साध्वी पुष्करं शङ्कराज्ञया॥
त्रियुगञ्च तपस्तप्त्वा कृष्णस्य परमात्मनः।
सिद्धा बभूव सा देवी ददर्श पुरतः प्रभुम्॥
दृष्ट्वा कृष्णाङ्गजां बालां च कृपया च कृपानिधिः।
पूजाञ्च कारयामास चकार च स्वयं हरिः॥
वरञ्च प्रददौ तस्यै पूजिता त्वं भवे भव।
वरं दत्त्वा च कल्याण्यै सर्वज्ञत्वादधे विभुः॥
प्रथमे पूजिता सा च कृष्णेन परमात्मना।
द्वितीये शङ्करेणैव कश्यपेन सुरेण च॥
मनुना मुनिना चैव नागेन मानवादिना।
बभूव पूजिता सा च त्रिषु लोकेषु सुव्रता॥"
तस्या विवाहः स्वामिकर्तृकन्यादानञ्च यथा,—
"जरत्कारुमुनीन्द्राय कश्यपस्तां ददौ पुरा।
अयाचितो मुनिश्रेष्ठो जग्राह ब्रह्मणाज्ञया॥
लब्धोदाहं महायोगी विश्रान्तस्तपसा चिरम्।
सुषुप्ताय देव्या जघने वटमूले च पुष्करे॥
निद्रां जगाम च मुनिः स्मृत्वा निद्रेशमीश्वरम्।
जगामास्तं दिनकरः सायंकाल उपस्थितः॥
संचिन्त्य मनसा तत्र मनसा सा प्रतिष्ठिता।
धर्मलोपभयेनैव चकारालोचनं सती॥
अकृत्वा पश्चिमां सन्ध्यां नित्यामेव द्विजन्मनाम्।
ब्रह्महत्यादिकं पापं लभिष्यति पतिर्मम॥
गोपतिष्ठति यः पूर्वां गोपास्ते यस्तु पश्चिमाम्।
स च स्वाशुचिनित्यं ब्रह्महत्यादिकं लभेत्॥
वेदोक्तमपि संचिन्त्य बोधयामास तं मुनिम्।
स च बुद्ध्वा मुनिश्रेष्ठस्तुकोप तां दृष्ट्वा मुनिः॥

जरत्कारुरुवाच।

कथं मे सुव्रते! साध्वि! निद्राभङ्गः कृतस्त्वया।
अधर्मं व्रतादिकं तस्या या भर्तुश्चापकारिणी॥
तपश्चानशनञ्चैव व्रतं दानादिकञ्च यत्।
भर्तुरप्रियकारिण्याः सर्वं भवति निष्फलम्॥
यया प्रियः पूजितश्च श्रीकृष्णः पूजितस्तया।
पतिव्रताव्रतार्थञ्च पतिरूपी हरिः स्वयम्॥
सर्वदानं सर्वयज्ञः सर्वतीर्थनिषेवणम्।
सर्वं व्रतं तपः सर्वसुपवासादिकञ्च यत्॥
सर्वधर्मश्च सत्यञ्च सर्वदेवप्रपूजनम्।
तत्सर्वं स्वामिसेवायाः कलां नार्हन्ति षोड-
शीम्॥
सुपुण्ये भारते वर्षे पतिसेवां करोति या।
वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः
शतम्॥
विप्रियं कुरुते भर्तुर्विप्रियं वदति प्रियम्।
असत्कुलप्रजाता या तत्फलं श्रूयतां सति!॥
कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ।
ततो भवति चाण्डाली पतिपुत्रविवर्जिता॥
इत्युक्त्वा च मुनिश्रेष्ठो बभूव स्फुरिताधरः।
चकम्पे मनसा साध्वी भयेनोवाच तं पतिम्॥

मनसोवाच।

सन्ध्यालोपभयेनैव निद्राभङ्गः कृतस्त्वया।
क्षमस्व मां महाभाग! दुष्टायाः मम सुव्रत!॥
भर्तुराहारनिद्राणां यश्च भङ्गं करोति च।
स व्रजेत् कालसूत्रञ्च स्वामिनश्च विशेषतः॥
इत्युक्त्वा मनसादेवी स्वामिनश्चरणाम्बुजे।
पपात भक्त्या भीता च रुरोद च पुनः पुनः॥
कुपितञ्च मुनिं दृष्ट्वा श्रीसूर्यः शमुपाययौ।
तत्राजगाम भगवान् सन्ध्यया सह नारद!॥
तत्रागत्य मुनिश्रेष्ठस्तुवाच भास्करः स्वयम्।
विनयेन च भीतश्च तया सह यथोचितम्॥

श्रीसूर्य उवाच।

सूर्यास्तसमयं दृष्ट्वा धर्मलोपभयेन च।
बोधयामास त्वां विप्र! नाहमस्तं गतस्तदा॥
क्षमस्व भगवन्! ब्रह्मन्! शमुं नोचितं सुने!॥
ब्राह्मणानाञ्च हृदयं नवनीतसमं तथा।
तेषां क्रोधार्द्रं क्रोधश्च ततो भस्म भवेज्जगत्॥
पुनः सृष्टुं द्विजः शक्तो न तेजस्वी द्विजात्
परः।
ब्राह्मणो ब्रह्मणो वंशः प्रज्वलन् ब्रह्मतेजसा॥
श्रीकृष्णं भावयेन्नित्यं ब्रह्मज्योतिः सनातनम्।
सूर्यस्य वचनं श्रुत्वा द्विजः शान्तो बभूव ह॥
सूर्यो जगाम स्वस्थानं गृहीत्वा ब्राह्मणाशिषम्।
तत्याज मनसां विप्रः प्रतिज्ञापालनाय च॥
रुदन्ती शोकयुक्ता च हृदयेन विदूयता।
सा सस्मार गुरुं शम्भुमिष्टदेवं हरिं विधिम्॥
कश्यपं जन्मदातारं विपत्तौ भयकर्षिता।
तत्राजगाम भगवान् गोपीशः शम्भुरेव च॥
विधिश्च कश्यपश्चैव मनसा परिचिन्तितः॥
दृष्ट्वा विप्रोऽभीष्टदेवं निर्गुणं प्रकृतेः परम्।
तुष्टाव परया भक्त्या प्रणनाम मुहुर्मुहुः॥
नमश्चकार शम्भुञ्च ब्रह्माणं कश्यपन्तदा।
कथमागमनं देवा इति प्रश्नं चकार सः॥
ब्रह्मा तद्वचनं श्रुत्वा सहसा समयोचितम्।
ससुवाच नमस्कृत्य हृषीकेशपदाम्बुजम्॥

ब्रह्मोवाच।

यदि त्यक्ता धर्मपत्नी धर्मिष्ठा मनसा सती।
कुरुष्वास्यां सुतोत्पत्तिं स्वधर्मपालनाय वै॥
यतो वा ब्रह्मचारी वा भिक्षुर्ब्रह्मचरोऽपि वा।
जायायाञ्च सुतोत्पत्तिं कृत्वा पश्चात् त्यजेच्छुने!॥
अकृत्वा तु सुतोत्पत्तिं वैरागी यस्त्यजेत् प्रियाम्।
स वेत्तपस्तत्पुण्यञ्च चाजन्माद्य यथा जलम्॥"
तस्याः पुत्रोत्पत्तिर्यथा,—
"ब्रह्मणो वचनं श्रुत्वा जरत्कारुर्मुनीश्वरः।
चकार तत्राभिस्मर्यं योगेन मन्त्रपूर्वकम्॥
तस्मै शुभाशिषं दत्त्वा ययुर्देवा मुदान्विताः।
मुदान्विता च मनसा जरत्कारुर्मुदान्वितः॥
सुनेः करस्पर्शमात्रात् सद्यो गर्भो बभूव ह।
मनसाया मुनिश्रेष्ठ! मुनिश्रेष्ठ उवाच ताम्॥"

जरत्कारुरुवाच।

गर्भेणानेन मनसे! तव पुत्रो भविष्यति।
जितेन्द्रियाणां प्रवरो धार्मिको वैष्णवाग्रणीः॥
तेजस्वी च तपस्वी च यशस्वी च गुणान्वितः।
वरो वेदविदाञ्चैव ज्ञानिनां योगिनामपि॥
स च पुत्रो विष्णुभक्तो धार्मिकः कुलसुन्दरेः।
तरन्ति पितरः सर्वे यज्जन्मप्रभावतो सदा॥
पतिव्रता सुशीला या सा प्रिया प्रियवादिनी।
धर्मिष्ठपुत्रमाता च कुलजा कुलपालिका॥
हरिभक्तिप्रदो बन्धुस्त्रिषु तत्सुखप्रदम्।
यो बन्धच्छिन्न स च पिता हरेर्वर्त्म प्रदर्शकः॥
सा गर्भधारिणी या च गर्भवासविमोचनी।
विष्णुमन्त्रप्रदाता च स गुरुर्विष्णुभक्तिदः॥
गुरुश्च ज्ञानदाता च तज्ज्ञानं कृष्णभावनम्।
आब्रह्मस्तम्बपर्यन्तं यतो विश्वं चराचरम्॥
आविर्भूतं तिरोभूतं किं वा ज्ञानं सदप्यतः।
वेदज्ञं योगजं यदृग्यत्तत्सारं हरिसेवनम्॥
तत्त्वानां सारभूतञ्च हरिरन्यद्विडम्बनम्।
दत्तं ज्ञानं मया तुभ्यं स स्वामी ज्ञानदो हि यः।
ज्ञानात् प्रमुच्यते बन्धात् स रिपुर्यो हि बन्धदः॥
विष्णुभक्तियुतं ज्ञानं न ददाति हि यो गुरुः।
स रिपुः शिष्यघाती च यो हि बन्धान्न मोचयेत्॥
जननीगर्भजात् क्लेशाद् यमताडनजात्तथा।
न मोचयेद् यः स कथं गुरुस्तातो हि बान्धवः॥
परमानन्दरूपञ्च कृष्णमार्गमनश्वरम्।
न दर्शयेद् यः स कथं कीदृशो बान्धवो गृहाम्॥
भज साध्वि! परं ब्रह्माच्युतं कृष्णञ्च निर्गुणम्।
निर्मूलञ्च पुरा कर्म भवेद् यत्सेवया ध्रुवम्॥
मया क्षणेन त्यक्ता त्वं देवि! मम प्रिये!।
क्षमायुतानां साध्वीनां सत्त्वात् क्रोधो न विद्यते॥
पुष्करं तपसे यामि गच्छ देवि! यथासुखम्।
श्रीकृष्णचरणाम्भोजध्यानविच्छेदकातरः॥
धनादिषु स्त्रियां प्रीतिः प्रवृत्तिवर्त्म गच्छताम्।
श्रीकृष्णचरणाम्भोजे निवृत्तानां मनोरथाः॥
जरत्कारुवचः श्रुत्वा मनसा शोककातरा।
सा साश्रुनेत्रा विनयाद्उवाच प्राणवल्लभम्॥

मनसोवाच।

दोषेणार्द्धं त्वया त्यक्ता निद्राभङ्गेन ते प्रभो।
यत्र स्मरसि तां बन्धो! तत्र मामागमिष्यसि॥
बन्धुभेदः क्लेशतमः पुत्रभेदस्ततः परः।
प्राणेशभेदः प्राणानां विच्छेदात् सर्वतः परः॥
पतिः पतिव्रतानान्तु शतपुत्राधिकः स्मृतः।
सर्वस्मात्तु प्रियः स्त्रीणां प्रियस्नेहोऽयते बुधैः॥
पुत्रे यथैकपुत्राणां वैष्णवानां यथा हरौ।
नेत्रे यथैकनेत्राणां दयितानां यथा जने॥
क्षुधितानां यथान्ने च कामुकानां यथाङ्गनाम्।

यथा परस्त्रे चौराणां यथा जारे कुयोषितम् ॥
विदुषाञ्च यथा ग्राम्ये वाणिज्ये वणिजां यथा ।
तथा शुम्भस्य कान्ते साध्वीनां योषितां प्रभो ! ॥
इत्युक्त्वा मनसा देवी पपात स्वामिनः पदे ।
स्तवं चकार क्रोडे तां कृपया स कृपानिधिः ॥
नेत्रोदकेन मनसां स्नापयामास तां मुनिः ।
साश्रुणा च मुनेः क्रोडं सिषेच भेदकातरा ॥
तदा ज्ञानेन तौ द्वौ च विप्रौकौ च बभूवतुः ।
सारं सारं पदाम्भोजं कृष्णस्य परमात्मनः ॥
जगाम तपसे विप्रः स्वकान्तां सुप्रबोध्य च ।
जगाम मनसा शम्भोः कैलासं मन्दिरं गुरोः ॥
पार्वती बोधयामास मनसां शोककर्षिताम् ।
शिवस्यातीव ज्ञानेन शिवेन च शिवालये ॥
सुप्रशस्तदिने साध्वी सुषुवे मङ्गलक्षणे ।
नारायणांशं पुत्रञ्च ज्ञानिनां योगिनां गुरुम् ॥
गर्भस्थितो महाज्ञानं श्रुत्वा शङ्करवक्त्रतः ।
स बभूव च योगीन्द्रो योगिनां ज्ञानिनां गुरुः ॥
जातकं कारयामास वाचयामास मङ्गलम् ।
वेदांश्च पाठयामास शिवाय च शिवः शिशोः ॥
रत्नचित्रकोटिलक्षञ्च ब्राह्मणेभ्यो ददौ शिवः ।
पार्वती च गवां लक्षं रत्नानि विविधानि च ॥
शम्भुश्च चतुरो वेदान् वेदाङ्गानीतराणि च ।
बालकं पाठयामास ज्ञानं मृत्युञ्जयं परम् ॥
भक्तिरस्ति स्वकान्ते यामीश्वरे देवे गुरौ हरौ ।
यस्याश्च तेन सुतपुत्रो बभूवास्तीक एव च ॥
जगाम तपसे विष्णोः पुष्करं शङ्कराज्ञया ।
संप्राप्य च महामन्त्रं तपश्च परमात्मनः ॥
दिव्यं वर्षत्रिलक्षञ्च तपस्तप्त्वा तपोधनः ।
आजगाम महायोगी नमस्कर्तुं शिवं प्रभुम् ॥
शङ्करश्च नमस्कृत्य श्रुत्वा च बालकं पुरः ।
सा चाजगाम मनसा कश्यपस्याश्रमं पितुः ॥
तां सपुत्रां सुतां दृष्ट्वा सुदं प्राप प्रजापतिः ।
शतलक्षञ्च रत्नानां ब्राह्मणेभ्यो ददौ मुने ! ॥
ब्राह्मणान् भोजयामास सोऽसंख्यान् श्रेयसे शिवोः ।
अदितिश्च दितिश्चाग्र्या सुदं प्रापुः परन्तथा ॥
सा सपुत्रा च सुचिरं तस्थौ तातालये तदा ।
तदीयं पुनराख्यानं वक्ष्यामि तन्निशामय ॥"
तस्या माहात्म्यं यथा,—
"अथाभिमन्युतनये ब्रह्मशापः परोचिते ।
बभूव सहसा ब्रह्मन् ! देवदीर्घेण कर्मणा ॥
सप्ताहे समतीते तु तक्षकस्त्वाञ्च भोक्ष्यति ।
शशाप ब्रह्मणो नृपतिं कौशिक्याञ्च जलेन च ॥
राजा श्रुत्वा तत्प्रवृत्तिं गङ्गादारं जगाम सः ।
तत्र तस्थौ च सप्ताहं शुश्राव धर्मसंहिताम् ॥
सप्ताहे समतीते तु गच्छन्तं तक्षकं पथि ।
धन्वन्तरिरूपं भोक्तुं ददर्श गारुडो नृपम् ॥
तयोर्बभूव संवादः सुप्रीतिश्च परस्परम् ।
धन्वन्तरिर्मणिं प्राप तक्षकः स्वेच्छया ददौ ॥
स ययौ तं गृहीत्वा च तुष्टः प्रहृष्टमानसः ।
तक्षको भक्षयामास नृपञ्च मन्त्रकल्पितम् ॥
राजा जगाम वैकुण्ठं सारं सारं हरिं गुरुम् ।
सत्कारं कारयामास पितुर्जन्मेजयः शुचा ॥
राजा चकार यज्ञञ्च सर्पसत्रं ततो मुने ! ।
प्राणांस्तत्याज सर्पाणां समूहो ब्रह्मतेजसा ॥
स तक्षकञ्च भीतञ्च महेन्द्रं शरणं ययौ ।
सेन्द्रञ्च तक्षकं हन्तुं विप्रवर्गः समुद्यतः ॥
अथ देवाश्च मुनयश्चाययुर्मनसान्तिकम् ।
तानुत्थाय महेन्द्रश्च भयकातरविह्वलः ॥
तत आस्तीक आगत्य यज्ञञ्च मातुराज्ञया ।
महेन्द्रतक्षकप्राणान् ययाचे भूमिपं वरम् ॥
ददौ वरं नृपश्रेष्ठः कृपया ब्राह्मणाज्ञया ।
यज्ञं समाप्य विप्रेभ्यो दक्षिणाञ्च ददौ सुदा ॥
विप्राश्च मुनयो देवा गत्वा च मनसान्तिकम् ।
मनसां पूजयामासुस्तुष्टुवुश्च पृथक् पृथक् ॥
शक्रः सम्भृतसम्भारो भक्तियुक्तः सदा शुचिः ।
मनसां पूजयामास तुष्टाव परमादरम् ॥
दत्त्वा षोड़शोपचारं बलिञ्च तत्प्रियं तदा ।
प्रददौ परितुष्टश्च ब्रह्मविष्णुशिवाज्ञया ॥
संपूज्य मनसादेवीं प्रययुः स्वालयञ्च ते ।
इत्येवं कथितं सर्वं किं भूयः श्रोतुमिच्छसि ॥"
इन्द्रकृतमनसापूजास्तोत्रे यथा,—
नारद उवाच ।
"केन तुष्टाव स्तोत्रेण महेन्द्रो मनसां सतीम् ।
पूजाविधिक्रमं तस्याः श्रोतुमिच्छामि तत्त्वतः ॥
श्रीनारायण उवाच ।
स्नातः शुचिराचान्तो भूत्वा धौते च वाससी ।
रत्नसिंहासने देवीं वासयामास भक्तितः ॥
स्वर्गगङ्गाजलेनैव बहुकुम्भस्थितेन च ।
स्नापयामास मनसां महेन्द्रो वेदमन्त्रतः ॥
वाससी वासयामास वह्निशुद्धे मनोहरे ।
सर्वाङ्गे चन्दनं दत्त्वा पाद्यार्घ्यं भक्तिसंयुतः ॥
गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम् ।
संपूज्यादौ देवषट्कं पूजयामास तां सतीम् ॥
ॐ ह्रीं श्रीं मनसादेव्यै स्वाहेत्येवञ्च मन्त्रतः ।
दशाक्षरेण मूलेन ददौ सर्वं यथोचितम् ॥
दत्त्वा षोड़शोपचारं दुर्लभं दुर्लभां हरिः ।
भक्त्या च पूजयामास ब्रह्मणा प्रेरितो मुदा ॥
वाद्यं नानाप्रकारञ्च वादयामास तत्र वै ।
बभूव पुष्पवृष्टिश्च नभसो मनसोपरि ॥
देवविप्राज्ञया तत्र ब्रह्मविष्णुशिवाज्ञया ।
तुष्टाव साश्रुनेत्रश्च पुलकाञ्चितविग्रहः ॥
महेन्द्र उवाच ।
देवि ! त्वां स्तोतुमिच्छामि साध्वीनां प्रवरां वराम् ।
परात्पराञ्च परमां नहि स्तोतुं क्षमोऽधुना ॥
स्तोत्राणां लक्षणं वेदे स्वभावाख्यानतत्परम् ।
न क्षमः प्रकृतं वक्तुं गुणानां तव सुव्रते ! ॥
शुद्धसत्त्वस्वरूपा त्वं कोपहिंसाविवर्जिता ।
न च श्रमो मुनिस्तेन त्वत्कया च त्वया यतः ॥
त्वं मया पूजिता साध्वी जननी च यथादितिः ।
दयारूपा च भगिनी क्षमारूपा यथा प्रसूः ॥
त्वया मे रक्षिताः प्राणाः पुत्रदाराः सुरेश्वरि ! ।
अहं करोमि त्वां पूज्यां प्रीतिश्च वर्द्धते मम ।
नित्या यद्यपि पूज्या त्वं भवेश्च जगदम्बिके ! ।
तथापि तव पूजाञ्च वर्द्धयामि न सर्वतः ॥
ये त्वामाषाढ़संक्रान्त्यां पूजयिष्यन्ति भक्तितः ।
पञ्चम्यां मनसाख्यायामीशां त्वां वा दिने दिने ॥
पुत्रपौत्रादयस्तेषां वर्द्धन्ते च धनानि च ।
यशस्विनः कीर्तिमन्तो विद्यावन्तो गुणान्विताः ॥
ये त्वां न पूजयिष्यन्ति निन्दन्त्यज्ञानतो जनाः ।
लक्ष्मीहीना भविष्यन्ति तेषां नागभयं सदा ॥
त्वं स्वयं स्वर्गलक्ष्मीश्च वैकुण्ठे कमलालया ।
नारायणांशो भगवान् जरत्कारुर्मुनीश्वरः ॥
तपसा तेजसा त्वाञ्च मनसा सृष्टवे पिता ।
अस्माकं रक्षणायैव तेन त्वं मनसाभिधा ॥
मनसा देवितुं शक्ता स्वात्मना सिद्धयोगिनी ।
तेन त्वं मनसादेवी पूजिता वन्दिता भवे ॥
यां भक्त्या मनसा देवाः पूजयन्त्यनिशं मुदम् ।
तेन त्वां मनसां देवीं प्रवदन्ति पुराविदः ॥
सत्त्वरूपा च देवि ! त्वं शश्वत्सत्त्वनिषेवया ।
यो हि यद्भावयेन्नित्यं स तत् प्राप्नोति तत्समः ॥
इत्यञ्च मनसां श्रुत्वा गृहीत्वा भगिनीञ्च तां ।
प्रजगाम स्वभवनं भूषावासःपरिच्छदाम् ॥
पुत्रेण सार्द्धं सा देवी चिरं तस्थौ पितुर्गृहे ।
भालभिः पूजिता शश्वन्मान्या वन्द्या च सर्वतः ॥
गोलोकात् सुरभी ब्रह्मन् ! तत्रागत्य सुपूजिताम् ।
तां स्नापयित्वा क्षीरेण पूजयामास सादरम् ॥
ज्ञानञ्च कथयामास गोप्यं सर्वसुदुर्लभम् ।
तया देव्या पूजिता सा स्वर्लोकञ्च पुनर्ययौ ॥
इदं स्तोत्रं पुण्यबीजं तां संपूज्य च यः पठेत् ।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च ॥
विषं भवेत् सुधातुल्यं सिद्धस्तोत्रो यदा भवेत् ।
पञ्चलक्षजपेनैव सिद्धस्तोत्रो भवेन्नरः ।
सर्पग्रासी भवेत् सोऽपि निश्चितं सर्पवाहनः ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ४६ अध्यायः ॥
धन्वन्तरिकृतमनसाध्यानपूजादि यथा,—
धन्वन्तरिरुवाच ।
"इहागच्छ जगद्गौरि ! गृहाण मम पूजनम् ।
पूज्या त्वं विश्वलोकेषु परा कश्यपकन्यके ! ॥
त्वया जितं जगत् सर्वं देवि ! विष्णुस्वरूपया ।
तेन तेऽस्त्रप्रयोगश्च न कृतो रणभूमिषु ॥
इत्युक्त्वा संयतो भूत्वा भक्तिनम्रात्मकन्धरः ।
गृहीत्वा शुक्लकुसुमं ध्यानं कर्तुं समुद्यतः ॥
चारुचम्पकवर्णाभां सर्वाङ्गसुमनोहराम् ।
ईषद्धास्यप्रसन्नास्यां श्रोभितां सूक्ष्मवाससा ॥
कबरीभारशोभाढ्यां रत्नाभरणभूषिताम् ।
सर्वाभयप्रदां देवीं भक्तानुग्रहकातराम् ॥
सर्वविद्याप्रदां शान्तां सर्वविद्याविशारदाम् ॥
नागेन्द्रवाहिनीं देवीं भजे नागेश्वरीं पराम् ॥
ध्यात्वैवं कुसुमं दत्त्वा नानाद्रव्यसमन्वितम् ।
दत्त्वा षोड़शोपचारं पूजयामास तां प्रिये ! ॥
स्तोत्रञ्चकार भक्त्या च पुलकाञ्चितविग्रहः ।
पुटाञ्जलियुतो भूत्वा भक्तिनम्रात्मकन्धरः ॥*॥

धन्वन्तरिरुवाच ।
नमः सिद्धिस्वरूपायै सिद्धिदायै नमो नमः ।
नमः कश्यपकन्यायै वरदायै नमो नमः ॥
नमः शङ्करकन्यायै शङ्कराये नमो नमः ।
नमस्ते नागवाहिन्यै नागेश्वर्यै नमो नमः ॥
नमो नागभगिन्यै च योगिन्यै च नमो नमः ।
नमोऽस्तीकजनन्यै च जनन्यै जगतां नमः ॥
नमो जरत्कारुजाये जरत्कारुस्थिये नमः ॥
नमश्चिरं तपस्विन्यै सुखदायै नमो नमः ।
नमस्तपःस्वरूपायै फलदायै नमो नमः ॥
सुशीलायै च साध्व्यै च शान्तायै ते नमो नमः ॥
इत्येवमुक्त्वा भक्त्या च प्रणनाम प्रयत्नतः ॥
तुष्टा देवी वरं दत्त्वा सत्वरं स्वालयं ययौ ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे धन्वन्तरिदर्प-भङ्गमनसाविजयो नाम ५१ अध्यायः ॥ * ॥
(कामरूपस्थितनदीविशेषः । यथा, कालिका-पुराणे । ७४ । ३३ ।
"ततस्तु मनसा नाम नदी पुण्यतमा परा ।
चरित्वा मनसाख्या तु हरबिन्दवतारिता ॥
वैशाखं सकलं मासं यस्यां स्नात्वा नरोत्तमः ।
विष्णुलोकमवाप्नोति ततो मोक्षमवाप्नुयात् ॥")

मनसादेवी, स्त्री, (मनसा चासौ देवी चेति । यद्वा, मनसा दीव्यतीति । दिव् + अच् । ङीप् । "मनसः संज्ञायाम् ।" ६ । ३ । ४ । इति विभक्त्यलुक् च ।) मनसा । इति जटाधरः ॥ (यथा, ब्रह्मवैवर्ते प्रकृतिखण्डे ४६ । ११८ ।
"सम्पूज्य मनसादेवीं प्रययुः स्वालयञ्च ते ॥")
अस्या विवरणं मनसाशब्दे द्रष्टव्यम् ॥

मनसिजः, पुं, (मनसि जायत इति । जन् + डः । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इत्यलुक् ।) कामदेवः । इत्यमरः । १ । १ । २० ॥ (यथा, श्राकुन्तले द्वितीयाङ्के ।
"कामं प्रिया न सुलभा मनस्तु तच्चापदर्शना-
न्यासि ।
अकृतार्थेऽपि मनसिजे रतिसुभगप्रार्थना
कुरुते ॥")
मनोजाते, त्रि ॥

मनसिशयः, पुं, (मनसि शेते इति । शी + "अधिकरणे शेतेः ।" ३ । २ । १५ । इति अच् । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इत्यलुक् ।) कामदेवः । इति हलायुधः ॥

मनस्कारः, पुं, (मनसि मनसो वा कारो निश्चय इति । यद्वा, कृ + भावे घञ् । मनसः कारो-विकारः करणमिति वा ।) मनसः सुखादिः । तत्पर्य्यायः । चित्ताभोगः २ । इत्यमरः । १ । ५ । ५ ॥ हे मनसः सुखादौ तत्परत्वे एकस्मिन् विषये मनसः पुनः पुनः प्रवृत्तिराभोगः । आभोगस्तात्पर्य्यमिति सर्व्वानन्दः । स्थैर्य-मित्यन्ये । व्यापार इत्यपरे । वाञ्छितवस्तु-प्राप्त्या चित्तस्य निराकाङ्क्षता । आभोगः परिपूर्णतेति परे । अनागतचिन्तनादिरूपो मनस्कार इत्यपरे । मनसो मनसि वा कारो निश्चयो मनस्कारः सेतु कथेति सः । मनसि करणं मनसि कारः इत्यपि दृश्यते अत्र बाहु-ल्यात् सप्तम्या अलुक् । इति तट्टीकायां भरतः ॥

मनस्तापः, पुं, (मनसः तापः पीड़ा ।) मनः-पीड़ा । यथा, गारुड़े २११ अध्याये ।
"मनस्तापं न कुर्व्वीत आपदं प्राप्य पार्थिवः ।
समबुद्धिः प्रसन्नात्मा सुखदुःखे समो भवेत् ॥"
अनुतापः । यथा, प्रायश्चित्ततत्त्वे ।
"ब्राह्मणेन यदा देवात् छिन्नं यज्ञोपवीतकम् ।
मनस्तापेन शुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ॥"

मनस्तालः, पुं (तल्यत इति । तल प्रतिष्ठायाम् + घञ् । मनसि तालः प्रतिष्ठा यस्य ।) दुर्गायाः सिंहः । इति त्रिकाण्डशेषः ॥ (हरितालः । तत्र स्त्रीत्वमपि । यथा, वैद्यकरत्नमालायाम् ।
"हरितालं मनस्तालं वर्षकं नटभूषणम् ॥")

मनस्यं, त्रि, (मने मनसि वा तिष्ठतीति । स्था + कः । पक्षे विसर्गस्य लोपः ।) मनोऽवच्छिन्नम् । अन्तःकरणस्थितम् । यथा,—
"मनस्यं मनमध्यस्थं मध्यस्थं मनवर्ज्जितम् ।
मनसा मनमालोक्य स्वयं सिद्धन्ति योगिनः ॥"
इति श्रीमदुत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्জ্জুनसंवादे ब्रह्मनिरूपणं नाम १ अध्यायः ॥ "ताडृग्ब्रह्मापरोक्षेण मुच्यते इत्याह मनस्यमित्यादि । मनस्यं मनोऽव-च्छिन्नम् । मनमध्यस्थं मनःसाक्षीभूतम् । मध्यस्थं सर्व्वसाक्षीभूतम् । मनवर्জ্জितं सङ्कल्पविक-ल्पादिरहितम् । मनमनोबोधात्मकम् । तदेवं मनसा परिशुद्धान्तःकरणेन । आलोक्य तद् गोचरापरोक्षचरमवृत्तिं लब्ध्वा । योगिनः ज्ञानिनः । स्वयमेव सिद्धन्ति निवृत्ताविद्यका मुक्ता भवन्तीत्यर्थः ।" इति श्रीमदुत्तरगीतायाः सुबोधिन्यां टीकायां श्रीगौड़पादाचार्य्यविर-चितायां १ अध्यायः ॥ * ॥ सर्व्वे सान्ता अदन्ता इति प्रमाणादत्र मनशब्दोऽकारान्तः । मनःस्थितम् । यथा,—
"आजन्मं मन्मनस्यं यदपि मम मनोमन्थतः
क्वापि नाभूत्
तत्ते पुण्यप्रतापादिह यदि सतः सिद्धमाभूत्
सुखेन ॥"
इत्युद्भटः ॥

मनस्विनी, स्त्री, (प्रशस्तं मनोऽस्यास्याः इति । मनस् + विनि । ङीप् ।) प्रशस्तमनाः स्त्री । यथा, कुमारसम्भवे । ३ । ३२ ।
"मनस्विनीमानविघातदक्षं
तदेव जातं वचनं स्मरस्य ॥"
रुक्मिणी पत्नी । यथा, मार्कण्डेयपुराणे ५२ । १७ ।
"प्राग्जन्मैव रुक्मिणश्च पिता मम महाबलः ।
मनस्विन्यामहं तस्मात् पुत्रो वेदशिरा मम ॥"
प्रजापतिपत्नी । सा च सोमस्य वसोर्जननी । यथा, महाभारते । १ । ६६ । १६ ।
"धूम्राश्वास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा ।
चन्द्रमास्तु मनस्विन्याः श्यामायाः श्यामलस्तथा ॥")

मनस्वी, [न्] पुं, (प्रशस्तं मनोऽस्यस्येति । मनस् + विनिः ।) प्रथमः । इति राजनिर्घण्टः ॥ प्रशस्तमनोयुक्ते, त्रि । यथा,—
"मनस्विगर्हितः पन्थाः समारोढुमसाम्प्रतम् ॥"
इति कारकटीकायां दुर्गादासः ॥

मनाक्, अ, (मन्यते इति । मन ज्ञाने + बाहुल-कात् आक्प्रत्ययः ।) अल्पम् । इत्यमरः । ३ । ४ । ८ ॥ (यथा, भागवते । १ । १० । ३५ ।
"मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् ।
आगतांस्तान् भार्गवोपागाच्छान्तवाड्यो मनाग्-
विभुः ॥")
मन्दः । इति मेदिनी । अव्यय-के, ११ ॥

मनाका, स्त्री, (मन्यत इति । मन + "बलाका-दयश्च ।" उणा० ४ । २४ । इत्याकः । टाप् ।) हस्तिनी । इत्युणादिकोषः ॥

मनाकारं, क्ली, (मनाक् यथा तथा करोतीति । कृ + अच् ।) मङ्गल्या । मल्लिकागन्धयुक्तागुरु । इति शब्दचन्द्रिका । (मनाक् अल्पस्य करः ।) इक्षुकारके, त्रि ॥

मनायी, स्त्री, (मनोः पत्नीति । मनु + "मनोरौ वा ।" ४ । १ । ३८ । इति ङीप् उदारेकारश्च ।) मनोः पत्नी । इति जटाधरः ॥

मनावी, स्त्री, (मनोः स्त्री । मनु + "मनोरौ वा ।" ४ । १ । ३८ । इति ङीप् औकारश्चान्तादेशः ।) मनुपत्नी । इति सुग्धबोधव्याकरणम् । (यथा, शतपथब्राह्मणे । १ । १ । ४ । १६ ।
"सा मनोरेव जायां मनावीं प्रविवेश ॥")

मनित, त्रि, (मन बोधे + क्तः ।) ज्ञातम् । इत्य-मरः । ३ । १ । १० ॥

मनीकं, क्ली, (मन्यते श्लोभार्थमादियते इति । मन + "अलीकादयश्च ।" उणा० ४ । २५ । इति कीकन्प्रत्ययेन निपातनात् साधु ।) अञ्जन-म् । इत्युणादिकोषः ॥

मनीषा, स्त्री, (ईष् + अः । टाप् । मनस ईषा गमनम् । "शृकन्द्वादिषु पररूपं वाच्यम् ।" १ । १ । ६४ । इत्यस्य वार्त्तिकोक्त्या साधुः ।) बुद्धिः । इत्यमरः । १ । ७ । ५ ॥ (यथा, ऋग्वेदे । १ । ५४ । ८ ।
"असमं क्षत्रमसमा मनीषा ॥"
स्तुतिः । यथा, ऋग्वेदे । ५ । ८३ । १० ।
"उत प्रजाभ्योऽविदो मनीषाम् ॥"
"मनीषां स्तुतिमविद प्राप्तवानसि ॥" इति तद्भाष्ये सायणः ॥)

मनीषी, [न्] पुं, (मनीषा अस्त्यस्येति । मनीषा + श्रोत्रादित्वात् इनिः ।) पण्डितः । इत्यमरः । २ । ७ । ५ ॥ (यथा च मनौ । १ । १७ ।
"यस्मूर्त्तयवयवाः सूक्ष्मास्तस्मिन्मात्राश्रयन्ति षट् ।
तस्माच्छरीरमित्याहुस्तस्य मूर्त्तिं मनीषिणः ॥")
बुद्धियुक्ते, त्रि ॥ (यथा, ऋग्वेदे । १ । १६४ । ४५ ।
"चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ॥"
"मनीषिणो मेधाविनः ।" इति तद्भाष्ये सायणः ॥)

मनुः, स्त्री, (मन्+"गृसृस्निहीति।" उणा० १।११। इति उः।) एका। इति राजनिर्घण्टः॥ (मनोः पत्नीति। मनु+"मनोरौ वा।"४।१।३८। इत्यत्र "वा यङ्हीन इत्यपि विकल्प्यते। तेन चैरूप्यं भवति। मनोः स्त्री मनायी मनावी मनुः।" इति काशिकोक्तेः पक्षे ङीवभावः।) मनुपत्नी। इति लिङ्गादिसंग्रहे अमरः॥

मनुः, पुं, (मन्यते इति। मन+"गृसृस्निहीति।" उणा० १।११। इति उः।) ब्रह्मणः पुत्रः। स च प्रजापतिर्धर्मशास्त्रवक्ता च। इति लिङ्गादिसंग्रहे अमरः॥ मनुष्यः। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८।४७।४।
"मनोर्विश्वस्य धीदिम आदित्याराय दृशते-
ऽनेहसो वरुतय: सुऋतयो वरुतय:॥"
"मनोः मनुष्यस्य।" इति तद्भाष्ये सायनः॥) त्रिभेदः। इति त्रिकाण्डशेषः॥ मन्तः। इति जटाधरः॥ (यथा, गौतमीयतन्त्रे। ७।५।
"गोहिरण्यकवस्त्राद्यैस्तोषयेद् गुरुमात्मनः।
यथा ददाति सन्तुष्टः प्रसन्नवदनो मनुम्॥"*॥) प्रतिकल्पे चतुर्दश मनवो भवन्ति तेषां नामानि यथा। स्वायम्भुवः १ स्वारोचिषः २ उत्तमः ३ तामसः ४ रैवतः ५ चाक्षुषः ६ एते गताः। वैवस्वतः ७। वर्त्तमानोऽयम्। सावर्णिः ८ दक्षसावर्णिः ९ ब्रह्मसावर्णिः १० धर्म्मसावर्णिः ११ रुद्रसावर्णिः १२ देवसावर्णिः १३ इन्द्रसावर्णिः १४ एते भविष्यन्ति। इति श्रीभागवते ८ स्कन्धे १ अध्यायः॥ *॥

एतेषामुत्पत्तिर्यथा,—
"आद्यो मनुर्ब्रह्मपुत्रः शतरूपापतिर्व्रती।
धर्म्मिष्ठानां वरिष्ठश्च गरिष्ठो मनुषु प्रभुः॥
स्वायम्भुवः शम्भुशिष्यो विष्णुव्रतपरायणः।
जीवन्मुक्तो महाज्ञानी भवतः प्रपितामहः॥
संप्राप ह्लादात्सच्च गोलोकञ्च जगाम सः।
दृष्ट्वा सुतं स्वपुत्रञ्च प्रहृष्टश्च प्रजापतिः॥
तुष्टाव शङ्करं तुष्टः सस्रजे मनुमन्यकम्।
स च स्वयम्भूपुत्रश्च पुरः स्वायम्भुवो मनुः॥
स्वारोचिषो मनुश्चैव द्वितीयो वह्निनन्दनः।
राजा बदान्यो धर्म्मिष्ठः स्वायम्भुवसमो महान्॥
प्रियव्रतसुतावन्यौ द्वौ मनू धर्म्मिणां वरौ।
तौ ह्लादौ चतुर्थौ च वैष्णवौ तामसोत्तमौ॥
तौ च शङ्करशिष्यौ च कृष्णभक्तिपरायणौ।
धर्म्मिष्ठानां वरिष्ठश्च रैवतः पञ्चमो मनुः॥
षष्ठश्च चाक्षुषो ज्ञेयो विष्णुभक्तिपरायणः।
आदित्यदेवः सूर्य्यसुतो वैष्णवः सप्तमो मनुः॥
सावर्णिः सूर्य्यतनयो वैष्णवो मनुरष्टमः।
नवमो दक्षसावर्णिर्विष्णुव्रतपरायणः॥
दशमो ब्रह्मसावर्णिर्ब्रह्मज्ञानविशारदः।
तस्य धर्म्मसावर्णिर्मनुरेकादशः स्मृतः॥
धर्म्मिष्ठश्च वरिष्ठश्च वैष्णवानां सदा व्रती।
ज्ञानी च रुद्रसावर्णिर्मनुश्च द्वादशः स्मृतः॥
धर्म्मात्मा देवसावर्णिर्मनुरेव त्रयोदशः।
चतुर्दशो महाज्ञानी चेन्द्रसावर्णिरेव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः॥

अपि च। स्वायम्भुवः १। स च गायत्र्यां ब्रह्मणो जातः। अस्य पुत्राः दश। अग्निधः। अग्निबाहुः। रिपुञ्जयः। सवनः। ज्योतिष्मान्। द्युतिमान्। हव्यः। मेधाः। मेधातिथिः। वसुश्च। स्वारोचिषः २। अस्य पुत्राश्चत्वारः। नभः। नभस्यः। प्रहस्तिः। भावनश्च। औत्तमिः ३। अस्य पुत्राः दश। ईषः। ऊर्ज्जः। भूर्ज्जः। शुचिः। शुक्रः। मधुः। माधवः। नभस्यः। नभः। सहश्च। तामसः ४। अस्य पुत्रा दश। अकल्मषः। तपोधन्वी। तपोमूलः। तपोधनः। तपोरतिः। तपस्यः। तपोद्युतिः। परन्तपः। तपोभागी। तपोयोगी च। रैवतः ५। तस्य पुत्राः दश। अरण्यः। तत्त्वदर्शी। वित्तवान्। हव्यपः। कपिः। सुक्तः। निरुत्सुकः। सत्यः। निर्म्मोहः। प्रकाशकश्च। चाक्षुषः ६। स च ध्रुवपौत्रात् रिपुञ्जयात् ब्रह्मदौहित्र्यां वीरण्यकन्यायां वैरिण्यां जातः। तस्य भार्य्या नड्वला। तस्य पुत्राः दश। उरुः। पुरुः। शतद्युम्नः। तपस्वी। सत्यवाक्। कविः। अग्निष्टुप्। अतिरात्रः। सुद्युम्नः। अभिमन्युश्च। वैवस्वतः ७। स च सूर्य्यात् संज्ञायां जातः। तस्य पुत्राः दश। इलः। इक्ष्वाकुः। कुशनाभः। अरिष्टः। धृष्टः। नरिष्यन्तः। करूषः। शर्य्यातिः। पृषध्रः। नाभागश्च। सावर्णिः ८। स च सूर्य्यात् छायायां जातः। तस्य पुत्राः दश। धृतिः। वरीयान्। यवसः। सुवर्णः। हविः। चरिष्णुः। ऊर्ध्वः। सुमतिः। वसुः। शुभ्रश्च। रौप्यः ९। असौ दक्षेः प्रजापतेः पुत्रः। भौम्यः १०। असौ भूतिनामकप्रजापतेः पुत्रः। मेरुसावर्णिः ११। असौ ब्रह्मणः पुत्रः। ऋतुः १२। ऋतुधामा १३। विष्वक्सेनः १४। इति मात्स्ये नवमाध्यायावधि एकविंशत्यध्यायपर्य्यन्तम्॥ क्रमशस्तेषां विवरणानि यथा, १स्वायम्भुवः। यथा, मार्कण्डेये ५१ अध्याये॥
"मनोः स्वायम्भुवस्यासन् दश पुत्रास्तु तत्समाः।
यैरियं पृथिवी सर्व्वा सप्तद्वीपा सपर्व्वता।
ससमुद्रा करवती प्रतिवर्षं निवेशिता॥"
२ स्वारोचिषः। यथा, तत्रैव ६० अध्याये।

मार्कण्डेय उवाच।
"ततः स्वारोचिषं नत्वा द्युतिमन्तं प्रजापतिम्।
मनुश्चकार भगवांस्तस्य मन्वन्तरं प्रभुः॥
तत्रान्तरे तु ये देवा सुनयस्तत्सुताश्च ये।
भौपाला: क्रौष्टुके! ये तान् गदतस्तं निबोधत॥
देवाः पारावतास्तत्र तत्रैव तुषिता द्विज!।
स्वारोचिषेऽन्तरे चेन्द्रो विपश्चिदिति विश्रुतः॥
ऊर्ज्जस्तम्भस्तथा प्राणो दत्तोलिर्ऋषभस्तथा।
निश्चरश्चार्वरीरांश्च तत्र सप्तर्षयोऽभवन्॥
चैत्र-किंपुरुषाद्याश्च सुतास्तस्य महात्मनः।
सप्तासन् सुमहावीर्याः पृथिवीपरिपालकाः॥
तस्य मन्वन्तरं यावत्तावत्सङ्ग्रविस्तरे।
भुक्तेयमवनिः सर्व्वा द्वितीयं वै तदन्तरम्॥
स्वरोचिषस्तु चरितं जन्म स्वारोचिषस्य च।
निगृह्य शृण्वते पापैः श्रद्दधानो हि मानवः॥"
अस्मान्मध्यवरखं तत्रैव ६१ अध्यायमारभ्य ६६ अध्यायपर्य्यन्तं द्रष्टव्यम्। ३ औत्तमः। यथा, तत्रैव ७३ अध्याये।

मार्कण्डेय उवाच।
"मन्वन्तरे तृतीयेऽस्मिन् औत्तमस्य प्रजापतेः।
देवानिन्द्रर्षीन् भूपान् निबोध गदतो मम॥
सुधामानस्तथा देवा यथानामानुकारिणः।
सत्याश्च हरितोयोऽन्यस्त्रिदशानां तथा गणः॥
तृतीये तु गणे देवाः शिवाख्या मुनिसत्तम!।
शिवाः स्वरूपतस्ते तु श्रुताः पापप्रणाशनाः॥
प्रतर्दनाश्च गणो देवानां मुनिसत्तम!।
चतुर्थस्तत्र कथित औत्तमस्यान्तरे मनोः॥
वशवर्त्तिन: पञ्चमेऽपि देवास्तत्र गणे द्विज!।
यथाख्यातस्वरूपास्तु सर्व एव महामुने!॥
एते देवगणाः पञ्च स्मृता यज्ञभुजस्तथा।
मन्वन्तरे मनुश्रेष्ठे सर्वे द्वादशका गणाः॥
तेषामिन्द्रो महाभागस्तस्मिन्वै स गुरुर्भवेत्।
शतं क्रतूनामाहृत्य सुशान्तिर्नाम नामतः॥
यस्योपसर्गनाशाय नामाक्षरविभूषिता।
अद्यापि मानवैर्गाथा गीयते तु महीतले॥
सुशान्तिर्देवराट् कान्तः सुशान्तिं स प्रयच्छति।
सहितः शिवसत्याद्यैस्तथैव वशवर्त्तिनः॥
अजः परशुचिर्हव्यो महाबलपराक्रमाः।
पुत्रास्तस्य मनोरासन् विख्यातास्त्रिदशोपमाः॥
ततस्तस्मिन्नवैर्भूमिः पालिताभूत्सरेश्वरैः।
यावन्मन्वन्तरं तस्य मनोरुत्तमतेजसः॥
चतुर्युगानां संख्याता साधिका ह्येकसप्ततिः।
कृतत्रेतादिसंज्ञानां यान्युक्तानि युगे मया॥
स्वतेजसा हि तपसो वशिष्ठस्य महात्मनः।
तनयाश्चान्तरे तस्मिन् सप्त सप्तर्षयोऽभवन्॥
तृतीयेतत्कथितं तव मन्वन्तरं मया॥"
अस्मान्मध्यवरखं तत्रैव ६८ अध्यायमारभ्य ७२ अध्यायपर्य्यन्तं द्रष्टव्यम्॥ ४ तामसः। यथा, तत्रैव ७४ अध्याये।
"तामसाख्यो मनुरभूत्तस्य मन्वन्तरं शृणु।
ये देवा यत्पतिर्यश्च देवेन्द्रो ये तथर्षयः।
ये पुत्राश्च मनोस्तस्य पृथिवीपरिपालकाः॥
सत्यास्तथार्द्ध सुधियः सुरूपा हरयस्तथा।
एते देवगणास्तत्र सप्तविंशतिका मुने!॥
महाबलो महावीर्यः शतयज्ञोपलक्षितः।
शिखिरिन्द्रस्तथा तेषां देवानामभवद्विभुः॥
ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निश्च वेलकस्तथा।
पीवरश्च तथा ब्रह्मन्! सप्त सप्तर्षयोऽभवन्॥
नरः क्षान्तिः शान्तदान्तादयस्तथा।
पुत्रास्तु तामसस्यासन् राजानः सुमहाबलाः॥"
अस्मान्मध्यवरखं तत्रैव द्रष्टव्यम्॥ ५ रैवतः। यथा, तत्रैव ७५ अध्याये।

मार्कण्डेय उवाच ।
"तामादाय ततो भूपः स्वमेव नगरं ययौ ।
तस्मादजायत सुतो रेवत्यां रैवतो मनुः ॥
समेतः सकलैर्धर्म्मैर्मानवैरपराजितः ।
विज्ञातासिलशास्त्रार्थो वेदविद्यार्थशास्त्रवित् ॥
तस्य मन्वन्तरे देवान् सुनिदेवेन्द्रपार्थिवान् ।
कथ्यमानान्मया ब्रह्मन् ! निबोध सुसमाहितः ॥
सुमेधसस्तत्र देवास्तथा भूपतयो द्विज ! ।
वैकुण्ठचामिताभश्च चतुर्दश्य चतुर्दश ॥
तेषां देवगणानान्तु चतुर्णामपि चेश्वर ! ।
नाम्ना विभुरभूदिन्द्रः शतयज्ञोपलक्षकः ॥
हिरण्यलोमा वेदश्रीरूर्द्धबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ॥
वशिष्ठश्च महाभागो वेदवेदान्तपारगः ।
एते सप्तर्षयश्चासन् रैवतस्यान्तरे मनोः ॥
बलबन्धुर्महावीर्यः सुयज्ञस्तथापरः ।
सत्यकाद्यास्तथैवासन् रैवतस्य मनोः सुताः ॥
रैवतान्तास्तु मनवः कथिता ये मया तव ।
स्वायम्भुवाश्रया ह्येते स्वारोचिषमृते मनुम् ॥"
अस्मान्यद्विवरणं तत्रैव द्रष्टव्यम् ॥ ६ चाक्षुषः ।
यथा, तत्रैव ७६ अध्याये ।
"तस्य मन्वन्तरेशस्य येऽन्तरत्रिदशा द्विज ! ।
ये चर्षयस्तथैवेन्द्रो ये सुताश्चास्य तान् शृणु ॥
आर्या नाम सुराश्चत्र तेषामेकोऽष्टको गणः ।
प्रख्यातकर्म्मणां विप्र ! यज्ञे हव्यभुजामयम् ।
प्रख्यातबलवीर्याणां प्रभामण्डलदुर्द्धराम् ।
द्वितीयश्च प्रसूताख्यो देवानामष्टको गणः ॥
तथैवाष्टक एवान्यो भव्याख्यो देवतागणः ।
चतुर्थश्च गणस्तत्र यूथगाख्यस्तथाष्टकः ॥
खेचरसंज्ञास्तथैवान्ये तत्र मन्वन्तरे द्विज ! ।
यज्ञे च गन्धे देवास्तत्संज्ञा ह्यन्तताग्निगः ॥
घृतं क्रतूनामाहृत्य यस्तेषामधिपोऽभवत् ।
मनोजवस्तथेवेन्द्रः संख्यातो यज्ञभागभुक् ॥
सुमेधा विरजाश्चैव हविष्मानुन्नतो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥
उरुपृथुप्रततद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥"
अस्मान्यद्विवरणं तत्रैवाध्याये द्रष्टव्यम् ॥ ७ वैवस्वतः । यथा तत्रैव ७६ अध्याये ।
मार्कण्डेय उवाच ।
"आदित्या वसवो रुद्रा साध्या विश्वे मरुद्गणाः ।
भृगवोऽङ्गिरसश्चाग्नी यत्र देवगणाः स्मृताः ॥
आदित्या वसवो रुद्रा विज्ञेया कश्यपात्मजाः ।
साध्याश्च वसवो विश्वे धर्म्मपुत्रगणाश्चयः ॥
भृगोस्तु भृगवो देवाः पुत्रा ह्यङ्गिरसः सुताः ।
इत्य वर्गश्च मारीचो विज्ञेयः साम्प्रताधिपः ॥
ऊर्ज्जस्वी नाम चैवेन्द्रो महात्मा यज्ञभागभुक् ।
अतीतानागता ये च वर्त्तन्ते साम्प्रतश्च ये ॥
सर्वे ते त्रिदशेन्द्रास्तु विज्ञेयास्तुल्यलक्षणाः ।
उद्यमाद्याः कुलिशिनः सर्व एव पुरन्दराः ॥
मथनन्तो दृषाः सर्वे ह्यङ्गिरो गणगामिनः ।
ते मृतकतवः सर्वे भूताभिभवतेजसः ॥
धर्म्मात्मजैः कारणैः शुद्धेराधिपत्यगुणान्वितैः ।
भूतभव्यभवन्नाथाः श्रूयन्तां चैतत् त्रयं द्विज ! ॥
भूर्लोकोऽयं स्मृता भूमिरन्तरीक्षं दिवः स्मृतम् ।
दिवाख्यश्च तथा स्वर्गस्त्रैलोक्यमिति गद्यते ॥
अत्रिश्चैव वशिष्ठश्च काश्यपश्च महामुनिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ॥
तथैव पुत्रो भगवान्दृषीकस्य महात्मनः ।
जमदग्निस्तु सप्तैते सुनयोऽत्र तथान्तरे ॥
ईक्ष्वाकुनाभगश्चैव धृष्टशर्म्मातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभागो दिष्ट एव च ॥
करूषश्च पृषध्रश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्राः प्रकीर्त्तिताः ॥
वैवस्वतमिदं ब्रह्मन् ! कथितन्ते मयान्तरम् ।
अस्मिन् श्रुते नरः सद्यः पठिते चैव सत्तम ! ।
मुच्यते पातकैः सर्व्वैः पुण्यञ्च महदश्नुते ॥"
अस्मान्यद्विवरणं ७७-७८ अध्याययोर्द्रष्टव्यम् ॥
८ सावर्णिः । यथा, तत्रैव ८० अध्याये ।
मार्कण्डेय उवाच ।
"कथितस्तव सावर्णिश्छायासंज्ञासुतश्च यः ।
पूर्व्वजस्य मनोस्तुल्यः स मनुर्भविताष्टमः ॥
रामो व्यासो गालवश्च दीप्तिमान् कृप एव च ।
ऋष्यशृङ्गस्तथा द्रोणिश्चत्र सप्तर्षयोऽभवन् ॥
सुतपाश्चामिताभाश्च मुख्याश्चैव त्रिधा सुराः ।
विंशकः कथिताश्चैषां त्रयाणां त्रिगुणो गणः ॥
तपस्तपश्च शुक्रश्च द्युतिर्ज्योतिः प्रभाकरः ।
प्रभासो दयितो धर्म्मस्तेजोरश्मिश्च वक्तृषु ॥
इत्यादिकस्तु सुतपा देवानां विंशको गणः ।
प्रसूतिसुतिभासाद्यस्तथान्यो विंशको गणः ॥
सुराश्चामिताभानान्तु तृतीयमपि मे शृणु ।
दमी शान्तो ऋतः सोमो विख्याद्याश्चैव विंशतिः ॥
मुख्या ह्येते समाख्याता देवा मन्वन्तराधिपाः ।
मारीचस्यैव ते पुत्राः काश्यपस्य प्रजापतेः ॥
भविष्याश्च भविष्यन्ति सावर्ण्यस्यान्तरे मनोः ।
तेषामिन्द्रो भविष्यस्तु बलिर्वैरोचनिर्म्मुने ! ।
पाताल आस्ते योऽद्यापि दैत्यः समयबन्धनः ।
विरजाश्चार्ववीरश्च निर्म्मोहः सत्यवाक् कृतिः ॥
विष्वाद्याश्चैव तनयाः सावर्ण्यस्य मनोर्नृपाः ॥"
अस्मान्यद्विवरणं तत्रैव ८१-९२ अध्यायेषु द्रष्टव्यम् ॥ ९ दक्षसावर्णिः । यथा, तत्रैव ९४ अध्याये ।
"दक्षपुत्रश्च सावर्णो भावी यो नवमो मनुः ।
कथयामि मनोस्तस्य ये देवा सुनयो नृपाः ॥
मारामरीचिगर्भाश्च सुधर्म्माश्चतथा सुराः ।
एते त्रिधा भविष्यन्ति सर्व्वे द्वादशका गणाः ॥
तेषामिन्द्रो भविष्यस्तु सदृक्षाख्यो महाबलः ।
साम्प्रतं कार्त्तिकेयो यो वह्निपुत्रः षडाननः ॥
अद्भुतो नाम शक्रोऽसौ भावी तस्यान्तरे मनोः ।
मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा ॥
सप्तर्षयोऽन्य सबलस्तस्याख्यो हव्यवाहनः ।
धृतकेतुर्वसुश्चैव पञ्चहस्तो निरामयः ।
एषुश्रवास्तथार्चिष्मान् भूयस्विन्नो दृढव्रतः ॥
एते नृपसुतास्तस्य दक्षपुत्रस्य वै नृपाः ॥"
१० ब्रह्मसावर्णिः । यथा, तत्रैव ९४ अध्याये ।
"मनोस्तु दशमस्यान्यच्छृणु मन्वन्तरं द्विज ! ॥
मन्वन्तरे च दशमे ब्रह्मपुत्रस्य धीमतः ।
सुखासीना निरुद्वाश्च त्रिःप्रकाराः सुराः स्मृताः ।
शतसंख्या हि ते देवा भविष्या भाविनो मनोः ।
यत् प्राणिनां शतं भावि तद्देवानां तदा शतम् ॥
शान्तिरिन्द्रस्तथा भावी सर्व्वैरिन्द्रगुणैर्युतः ।
सप्तर्षींस्तान् निबोध त्वं ये भविष्यन्ति वै तदा ॥
आपोमूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च ।
नाभागोऽप्रतिमश्चैव वाग्मिष्ठश्चैव सप्तमः ॥
सुचेचश्चोत्तमौजाश्च भूमिसेनश्च वीर्य्यवान् ।
शतानीकोऽथ दृषभो ज्ञानमित्रो जयद्रथः ॥
भूरिद्युम्नः सुपर्व्वा च तस्यैते तनया मनोः ॥"
११ धर्म्मसावर्णिः । यथा, तत्रैव ।
"भविष्या धर्म्मपुत्रस्य सावर्ण्यस्यान्तरं शृणु ॥
विहङ्गमाः कामगाश्च निर्म्माणरतयस्तथा ।
त्रिःप्रकारा भविष्यन्ति एकैकस्त्रिंशतो गणाः ॥
मासतुर्दिवसा ये तु निर्म्माणपतयस्तु ते ।
विहङ्गमा रात्रयोऽथ मौहूर्त्ताः कामगा गणाः ॥
इन्द्रो वृषाख्यो भविता तेषां प्रख्यातविक्रमः ।
हविष्मांश्च वरिष्ठश्च ऋतिरन्यस्तथारुणिः ॥
निश्चरश्चानघश्चैव विहिष्मान्यो महामुनिः ।
सप्तर्षयोऽन्तरे तस्मिन्नग्निदेवश्च सप्तमः ॥
सर्व्वत्रगः सुधर्म्मा च देवानीकः पुरुद्रुहः ।
हेमधन्वा दृढायुश्च भाविनस्तत्सुता नृपाः ॥"
१२ रुद्रसावर्णिः । यथा, तत्रैव ।
"द्वादशे रुद्रपुत्रस्य प्राप्ते मन्वन्तरे मनोः ।
सावर्ण्यस्य ये देवा सुनयश्च शृणुष्व तान् ॥
सुधर्म्माणः सुमनसो हरिता रोहितास्तथा ।
सुवर्णाश्च सुरास्तत्र पञ्चैते दशका गणाः ॥
तेषामिन्द्रस्तु विज्ञेय ऋतधामा महाबलः ।
सर्व्वैरिन्द्रगुणैर्युक्तः सप्तर्षींश्चापि मे शृणु ॥
द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः ।
तपोरतिस्तथैवान्यः सप्तमस्तु तपोधृतिः ॥
देववानुपदेवश्च देवश्रेष्ठो विदूरथः ।
मित्रवान् मित्रविन्दश्च भाविनस्तत्सुता नृपाः ॥"
१३ रौच्यः । यथा, तत्रैव ।
"त्रयोदशस्य पर्य्याये रौच्याख्यस्य मनोः सुताः ।
सप्तर्षींश्च नृपांश्चैव गदतो मे निशामय ॥
सुधर्म्माणः सुरास्तत्र सुकर्म्माणस्तथापरे ।
सुशर्म्माणः सुरा ह्येते समस्ता सुनिसत्तम ! ॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः ।
भविष्यानथ सप्तर्षीन् गदतो मे निशामय ॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः ।
निर्म्मोहः सुतपाश्चान्यो निष्कम्पश्च सप्तमः ॥
चित्रसेनो विचित्रश्च नयतिर्नयभेयो दृढः ।
सुनेत्रः चित्रबुद्धिश्च सुव्रतश्चैव तत्सुताः ॥"
१४ भौत्यः । यथा, तत्रैव १०० अध्याये ।
"भौत्यो नाम मनुस्तस्य पुत्रो भूतेरजायत ।
तस्य मन्वन्तरे देवाञ्छृणु भूपांश्च मे शृणु ॥

मनुः

भविष्यस्य भविष्यांस्तु गदतो मम विस्तरात्।
देवेन्द्रो यश्च भविता तस्य विख्यातकर्मणः॥
चाक्षुषाश्च कनिष्ठाश्च यविष्ठा भानिराक्षया।
भाराट्काश्च इत्येते पञ्च देवगणाः स्मृताः॥
अपरिश्रमदा तेषां त्रिदशानां भविष्यति।
महाबलो महावीर्यः सर्व्वैरिन्द्रगुणैर्यतः॥
अयोनिश्चायिवाहुश्च शुचिर्मुक्तोऽथ माधवः।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः॥
गुरुर्गभीरो ब्रध्नश्च भरतोऽनुयदक्षया।
क्षोमाणी च प्रतीरश्च विष्णुः संक्रन्दनस्तथा॥
तेजस्वी सुबलश्चैव भौत्यस्तैते मनोः सुताः।
चतुर्दशैव मयैतत्ते मन्वन्तरमुदाहृतम्॥"
मन्वन्तरकथाश्रवणफलमाह तत्रैव १००अध्याये।
"श्रुत्वा मन्वन्तराख्यानं क्रमेण मुनिसत्तम!।
पुण्यमाप्नोति मनुजस्तथाचीर्णाच्च सन्ततिम्॥
श्रुत्वा मन्वन्तरं पूर्व्वं धर्ममाप्नोति मानवः।
स्वारोचिषस्य श्रवणात् सर्व्वकामानवाप्नुते॥
औत्तमेर्धनमाप्नोति ज्ञानञ्चाप्नोति तामसे।
रैवते च श्रुते बुद्धिं सुरूपां विन्दते स्त्रियम्॥
आरोग्यञ्चाक्षुषे पुंसां श्रुते वैवस्वते बलम्।
गुणवत्पुत्रपौत्रन्तु सूर्य्यसावर्णिके श्रुते॥
माहात्म्यं ब्रह्मसावर्णे धर्मसावर्णिके शुभम्।
मतिमाप्नोति मनुजो रुद्रसावर्णिके जयम्॥
प्राप्तिश्रेष्ठो गुणैर्युक्तो दक्षसावर्णिके श्रुते।
निश्चायतबलरिवलं रौच्यं श्रुत्वा नरोत्तम!॥
देवप्रसादमाप्नोति भौत्ये मन्वन्तरे श्रुते।
तथाग्निष्ठोत्रं पुत्रांश्च गुणयुक्तानवाप्नुते॥
सर्व्वाण्यनुक्रमादृक्ष ऋक्षोति मुनिसत्तम!।
मन्वन्तराणि तस्यापि श्रूयतां फलमुत्तमम्॥
तत्र देवावृधोनिन्द्राज्जनूंस्तत्तनयान्नृपान्।
वंशांश्च श्रुत्वा सर्व्वेभ्यः पापेभ्यो विप्रमुच्यते॥
देवर्षीन्द्रकृपाचार्य्ये ये तन्मन्वन्तराधिपाः।
ते प्रीयन्ते तथा प्रीताः प्रयच्छन्ति शुभां मतिम्॥
ततः शुभां मतिं प्राप्य श्रुत्वा कर्म्म तथा शुभम्।
शुभां गतिमवाप्नोति यावद्भिन्नाश्चतुर्दश॥
सर्व्वे स्युर्ऋतवः चेन्द्रा सर्व्वे सौम्याश्चथा ग्रहाः।
भवन्त्यसंशयं श्रुत्वा क्रमान्मन्वन्तरस्थितिम्॥"*॥
विष्णुः। यथा, महाभारते। १३। १४६।१६।
"विश्वकर्म्मा मनुस्त्वष्टा त्वविष्ठो त्वविरोध्रुवः॥"
मननप्रधानो विद्वान्। यथा, वाजसनेयसंहितायाम्। १५। ४६।
"तस्मिन्नहं निदधे नाकेऽग्निं यमाहुर्मनवस्त्रीबंबर्हिषम्॥"
"मनवः मननप्रधाना विद्वांसः॥" इति तट्टीकायां महीधरः॥*॥ अन्तःकरणम्। यथा, भागवते। ६। १। २५।
"देहोऽसवोऽक्षा मनवो भूतमात्रा
नात्मानमन्यच्च विदुः परं यत्॥"
"मनवोऽन्तःकरणानि।" इति तट्टीकायां श्रीधरः॥
क्षुपान्वस्य पुत्रभेदः। यथा, भागवते। ६। ६। २०।
"क्षुपान्वोऽपि वै भार्य्यायां धूमकेतुमजीजनत्।
विषस्यायां वेदशिरः देवलं वयुनं मनुम्॥")

मनुष्यः

मनुजः, पुं, (मनोर्जात इति। जन्+डः।) मनुष्यः। इत्यमरः। २। ६। १॥ (यथा, विष्णुपुराणे। १। ६। १०।
"स्वर्गापवर्गौ मानुष्यात् प्राप्नुवन्ति नरा सुने!।
यथाभिरुचितं स्थानं तद्यान्ति मनुजा द्विज!॥")
मनुजी, स्त्री, (मनुज+गौरादित्वात् ङीष्।) मानुषी। इति जटाधरः॥ (टाप् इत्येके। यथा, हरिवंशे। १७६। २१।
"विद्याधराणां नारीषु साध्वीषु मनुजासु च॥")
मनुभूः, पुं, (मनौर्भवतीति। भू+क्विप्। मनुभूरुत्पत्तिस्थानं यस्येति वा।) मनुष्यः। इति शब्दचन्द्रिका॥
मनुराट्, [ज्] पुं, (मनुः मानव इव राजते इति। राज्+क्विप्।) मनुष्यवदाचारवत्त्वादस्य तथात्वम्।) कुवेरः। इति त्रिकाण्डशेषः॥
मनुषी, स्त्री, (मनुष्यस्य स्त्री। मनुष्य+"हयगवयमनुष्यमत्स्यानामप्रतिषेधः।" ४। १। ६१। इत्यस्य वार्त्तिकोक्त्या ङीष्। "हलस्तद्धितस्य।" ६। ४। १५०। इति यलोपः।) मानुषी। इति शब्दरत्नावली॥
मनुष्यः, पुं, (मनोरपत्यमिति। मनु+"मनोर्जातावञ्यतौ षुक्च।" ४। १। १६१। इति यत् षुगागमश्च।) मनोरपत्यम्। तत्पर्य्यायः। मानुषः २ मर्त्यः ३ मनुजः ४ मानवः ५ नरः ६। इत्यमरः। २। ६। १॥ भूमिजः ७ द्विपदः ८ चेतनः ९ भूक्षयः १०। इति राजनिर्घण्टः॥ मनुः १९ पञ्चजनः १२ पुरुषः १३ पूरुषः १४ पुमान् १५ नरा १६। इति शब्दरत्नावली। मर्त्यः १७ विट् १८। इति जटाधरः॥*॥ (यथा, मनुः। १। ४३।
"रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः॥")
स तु अर्व्वाक्स्रोतो ब्रह्मणो नवमः सर्ग एकविधश्च। यथा,—
"अर्व्वाक्स्रोतस्तु नवमः चात्तरेकविधो नृणाम्।
रजोऽधिकाः कर्म्मपरा दुःखे च सुखमानिनः॥"
इति श्रीभागवते। ३। १०। २४।
अपि च।
"तस्यापि ध्यायतः सर्गं सत्वाभिध्यायिनस्ततः।
प्रादुर्बभूव चाव्यक्तादर्व्वाक्स्रोतस्तु साधकः॥
यस्मादर्व्वाक् प्रवर्त्तन्ते ततोऽर्व्वाक्स्रोतसस्तु ते।
ते च प्रकाशबहुलास्तमोद्भिक्तरजोऽधिकाः॥
तस्मात्ते दुःखबहुला भूयो भूयश्च कारिणः।
प्रकाशा बहिरन्तश्च मनुष्याः साधकास्तु ते॥"
इति वह्निपुराणे सर्गकथननामाध्यायः॥*॥
मनुष्यजन्मसुक्तिकारणं यथा,—
"विमुक्तिहेतुकाया तु नरयोनिः स्मृतात्मनाम्।
नासुष्यन्ति हि संसारे विभ्रान्तमनसो गताः॥
जीवा मानुष्यतां मर्त्ये जन्मनामयुतैरपि।
तदीडक् दुर्लभं प्राप्य मुक्तिद्वारं विचेतसः॥
पतन्ति भूयः संसारे विष्णुमायाविमोहिताः।

मनोज

सदुस्तरापि दुःसाध्या माया ब्रह्मस्य मोहिनी॥"
इति तत्रैव मुक्तिप्रतनामाध्यायः॥७॥
"मनुष्याणां पिता माता भ्राता च श्रीहरिर्यथा।
विशेषतो मनुष्याणां पिता माता जनार्द्दनः।
भ्राता च सर्व्वजीवानां वात्सल्यगुणसागरः॥"
इति पाद्मोत्तरखण्डे ७८ अध्यायः॥*॥
स त्रिविधो यथा,—
"यजन्ते सात्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥"
इति श्रीभगवद्गीतायां १७ अध्यायः॥
"ऊर्द्धं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः॥"
इति तत्रैव १४ अध्यायः॥
(स्तुतिकारकः। यथा, ऋग्वेदे। १। १४८। ४।
"होता मनुष्यो न दक्षः॥"
"मनुष्यो लौकिको वन्दी दातारं प्रभुं बहुविधया स्तुत्या स्तौति।" इति तद्भाष्ये सायणः॥
मनुष्यसम्बन्धी। यथा, ऋग्वेदे। १। ६२। ११।
"प्रमिनती मनुष्या युगानि॥"
"मनुष्या मनुष्याणां सम्बन्धीनि युगानि कृतत्रेतादीनि प्रमिनती स्वागमनागमनाभ्यां प्रक्षेपेण हिंसन्ती।" इति तद्भाष्ये सायणः॥ मनुष्यहितः। यथा, ऋग्वेदे। २। १८। १।
"दशारिचो मनुष्यः स्वर्षाः॥"
"मनुष्यो मनुष्याणां हितः स्वर्षाः स्वर्गस्य दाता।" इति तद्भाष्ये सायणः॥)
मनुष्यधर्म्मा, [न्] पुं, (मनुष्यस्येव धर्म्मः आचारो यस्य। "धर्म्मादनिच् केवलात्।" ५। ४। १२४। इति समासान्तोऽनिच्।) कुवेरः। इत्यमरः। २। ६। १॥
मनुष्ययज्ञः, पुं, (मनुष्येभ्यो मनुष्यार्थं यो यज्ञः।) अतिथिपूजनम्। इति शब्दरत्नावली॥ (यथा, शतपथब्राह्मणे। ११। ५। ६। १।
"तान्येव महासत्राणि भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति॥")
मनुष्यी, स्त्री, (मनुष्य+गौरादित्वात् ङीष्। योषिद्भप्रतिषेधे "हयगवयमनुष्यमत्स्यानामप्रतिषेधः।" इति ङीषि यलोपाभावः।) मानुषजातिः। तत्पर्य्यायः। मानुषी २ नारी ३ मानवी ४। इति शब्दरत्नावली। मर्त्या ५ मनुजी ६ नरी ७। इति जटाधरः॥
मनोगुप्ता, स्त्री, (मनसा मनःशब्देन गुप्तेव।) मनःशिला। इत्यमरः। २। ६। १०८॥
मनोजन्मा, [न्] पुं, (मनसो जन्म यस्य।) कन्दर्पः। इति त्रिकाण्डशेषः॥
मनोजवः, पुं, (मनस इव जवोऽस्य। एकदेशे सर्व्वगामित्वात् तथात्वम्।) विष्णुः। यथा, महाभारते दानधर्म्मे सहस्रनामस्तोत्रम्। १३। १४६। ८७।
"मनोजवस्तीर्थकरो वसुरेता वसुप्रदः॥"
(मनसश्चित्तस्य जवः।) मनसो वेगः। इति व्याकरणम्॥ (अनिलपत्न्याः श्रिवायाः पुत्रः। यथा, हरिवंशे। ३। ४२।

"अनिलस्य शिवा भार्य्या यस्याः पुत्रो मनोजवः ॥")
रुद्रस्य पुत्रभेदः। यथा, मार्कण्डेये। ५२। ११।
"अग्नेश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ॥"
तीर्थभेदः। यथा, महाभारते। ३। ८३। ८५।
"मनोजवे नरः स्नात्वा गोसहस्रफलं लभेत् ॥"
यज्ञभन्वन्तरेन्द्रः। यथा, मार्कण्डेये। ७६।५६।
"मनोजवस्तथैवेन्द्रः संज्ञातो यज्ञभागभुक् ॥"
मेधातिथेः पुत्रभेदः। यथा, भागवते। ५। २०। २५। "तस्य प्रियव्रत एवाधिपतिर्नाम्ना मेधातिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफचित्राधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश ॥")
मनोजवः, त्रि, (मनो जवं देगवदृश्यत्वेन। यद्वा, मनो जवति पितायमिति ज्ञात्वा धावत्यस्मिन् इति। जु सौत्रधातुः + अच्।) पितृतुल्यः। तत्पर्य्यायः। पितृसन्निभः ७। इत्यमरः। ३।२।१३॥ अतिशयवेगवान्। (यथा. मार्कण्डेये। २१। ८।
"तमन्वधावद्वेगेन तुरगोऽपि मनोजवः ॥")
मनोजवसः, त्रि, (मनो जवत्यस्मिन्। जु + बाहुलकात् असच्।) पितृसन्निभः। इत्यमरटीकायां स्वामी। ३। १। १३॥
मनोजवा, स्त्री, (मनो जवत्यनेति। जु + अच् टाप्।) अग्निजिह्वाभेदः। इति जटाधरः॥ (गुणादिविवृतिरस्या अग्निजिह्वाशब्दे ज्ञातव्या॥ वह्निजिह्वाविशेषः। यथा, मार्कण्डेये। ६६।५४।
"मनोजवा च या जिह्वा लघिमा गुणलक्षणा।
तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात् ॥"
स्कन्दस्य मातृगणभेदः। यथा, महाभारते। ६। ६६। १६।
"मनोजवा कङ्कटिनी प्रघसा पूतना तथा ॥"
क्रौञ्चद्वीपस्य नदीविशेषः। यथा, मात्स्ये। १२१। ८०।
"गौरी कुमुदती चैव सन्ध्या रात्रिर्मनोजवा॥"
मन इव जवो यस्याः। वेगविशिष्टायां स्त्रियाम्। यथा, महाभारते। १। १५६। १८।
"अहःसु विहरानेन यथाकामं मनोजवा ॥")
मनोजवृद्धिः, पुं, (मनोजस्य कामस्य वृद्धिर्यस्मात्।) कामवृद्धिवृषः। इति राजनिर्घण्टः॥
मनोज्ञं, क्ली, (मनो जानाति ज्ञापयति तोषयतीति। अन्तर्भूतण्यर्थे ज्ञा + कः।) सरलकाष्ठम्। इति रत्नमाला॥
मनोज्ञं, त्रि, (मनसा जानातीति। ज्ञा + कः। यद्वा, मनः ज्ञापयति तोषयतीति। अन्तर्भूतण्यर्थेऽधारणो कः।) मनोहरम्। तत्पर्य्यायः। सुन्दरम् २ रुचिरम् ३ चारु ४ सुषमम् ५ साधु ६ शोभनम् ७ कान्तम् ८ मनोरमम् ९ रुच्यम् १० मञ्जु ११ मञ्जुलम् १२। इत्यमरः। ३। १। ५२॥ मनोहरम् १३ वन्यु-
रम् १४ वन्यूरम् १५ पेशलम् १६ पेचलम् १७ सुमनम् १८ वामम् १९ अभिरामम् २० नन्दितम् २१। इति शब्दरत्नावली॥ (यथा, सुश्रुते। १। ४६। अध्याये।
"मनोज्ञं शुचि गात्रज्ञं प्रत्यग्रमग्र्यं हितम्।
पूर्वं मधुरमश्नीयात् मध्येऽम्ललवणौ रसौ ॥")
मनोज्ञा, स्त्री, (मनोज्ञ + स्त्रियां टाप्।) मनःशिला। इति रत्नमाला॥ (यथा, सुश्रुते उत्तरतन्त्रे त्रयोदशाध्याये।
"स्निग्धं मनोज्ञाकाशीसयोषाञ्जनकसैन्धवैः ॥")
राजपुत्री। इति जटाधरः॥ वन्ध्याकर्कोटकी। आवर्त्तकी। मूलजीरकः। जातौ। मदिरा। इति राजनिर्घण्टः॥
मनोभवः, पुं, (मनसः मनसि वा भवतीति। भू + अच्। मनसः भव उत्पत्तिर्यस्मिन्निति वा।) कन्दर्पः। इति हलायुधः॥ (यथा, मार्कण्डेये। १८। ४१।
"ते तां दृष्ट्वायतौ दैत्याः साभिलाषा मनोभवम्।
न शेकुरुद्धतं धैर्य्यान्मनसा वोढुमातुराः ॥"
मनोजन्मे, त्रि। यथा, भागवते। ६। १५।२४।
"दह्यमाना विनार्थेन न दह्यन्ते मनोभवाः।
कर्म्मभिर्ध्यायतो नाना कर्म्माणि मनसोऽभवन् ॥")
मनोभूः, पुं, (मनसः मनसि वा भवतीति। भू + क्विप्।) कामदेवः। इति शब्दरत्नावली॥ (यथा, कलाविलासे। १। ३३।
"श्यामा शुशुभे शुशिना तया मनोभूर्मधूत्सवस्तेन।
मदमुदितमानसानां तेनापि न्यगीदृशां लीला ॥")
मनोयोनिः, पुं, (मन एव योनिरुत्पत्तिस्थानमस्य।) कामदेवः। इति हेमचन्द्रः। २।१४२॥
मनोरथः, पुं, (मनसः रथ इव। मन एव रथोऽत्रेति वा) इच्छा। इत्यमरः। १। ७। २०॥ (यथा, रघौ। ११। ५६।
"इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः।
कपयश्चेरुरार्तस्य रामस्येव मनोरथाः ॥"
कविविशेषः। यथा, राजतरङ्गिण्याम्। ४।५६६।
"मनोरथः शुद्धदन्तश्चटकः सन्धिमांस्तथा।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥")
मनोरमं, त्रि, (मनो रमयतीति। रम् + णिच् + अच्।) मनोज्ञम्। इत्यमरः। ३। १। ५२॥ (यथा, सुश्रुते। १। ४६। अध्याये॥
"पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे।
स्रदः स्रपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥")
मनोरमा, स्त्री, (मनोरम + स्त्रियां टाप्।) गोरोचना। इति राजनिर्घण्टः॥ बुद्धिशक्तिविशेषः। तत्पर्य्यायः। तारा २ महाश्रीः ३ श्रीद्वारा ४ स्वाहा ५ श्रीः ६ तारिणी ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वैष्णवी १४ नीलसरस्वती १५ ग्रहिणी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥ (इन्दीवराख्यविद्याधरस्य कन्या। यथा च मार्कण्डेये। ६२। १३।
"अहमिन्दीवराख्यस्य सुता विद्याधरस्य वै।
नाम्ना मनोरमा जाता सुतायां मनसन्धनः ॥"
सप्तसरस्वतीनामेकतमा। यथा, महाभारते। ६। ३८। ४।
"सुप्रभा काञ्चनाक्षी च विशाला च मनोरमा।
सरस्वती चौघवती सुरेणुर्विमलोदका ॥"
तथा च तत्रैव। ६। ३८। २४—२५।
"उद्दालकेन यजता पूर्वं ध्याता सरस्वती।
आजगाम सरित्श्रेष्ठा तं देशमविकारतः ॥
पूज्यमाना मुनिगणैर्नक्तलाजनिषेवणैः।
मनोरमेति विख्याता सा हि तैर्मनसाकृता ॥"
छन्दोविशेषः। तल्लक्षणमुदाहरणञ्च यथा, छन्दोमञ्जर्य्याम्।
"नरजगैर्भवेन्मनोरमा।"
"तरणिजातटे विहारिणी व्रजविलासिनी
विलासतः।
सुररिपोस्तनुः पुनातु वः सुकृतप्राजिनां मनोरमा ॥")
मनोहतः, त्रि, (मनसा मनसि वा हतः।) प्रतिहतः। इत्यमरः। ३। १। ४९॥
मनोहरं, त्रि, (हरतीति। हृ + अच्। मनसो हरमिति।) मनोज्ञम्। इति शब्दरत्नावली॥ (यथा, मनौ। २। ३३।
"स्त्रीणां सुखोपभोगं च विश्वार्थं मनोहरम्॥")
यथा च मार्कण्डेये। ११२। ३।
"स ददर्श तदा तत्र होमधेनुं मनोहराम्॥")
कुन्दवृक्षे, पुं। सुवर्णे, क्ली। इति राजनिर्घण्टः॥
मनोहरा, स्त्री, (मनोहर + टाप्।) जातौ। स्वर्णयूथी। इति राजनिर्घण्टः॥ (धरस्य वसोः पत्नी। यथा, विष्णुपुराणे। १। १५। ११४।
"मनोहरायाः शिखिरः प्रायोऽथ वरुणस्तथा॥"
अप्सरोविशेषः। यथा, महाभारते। १३।१६।४५।
"मनोहरा सुकेशी च सुमुखी हासिनी प्रभा॥")
मनोहर्षा, [र्षन्] त्रि, (मनो हरतीति। हृ + क्विप्।) मनोहरकर्त्ता। यथा,—
"यजनं तेऽपनेष्यामि त्रिलोक्यां यदि भाष्यते।
तमानेष्ये वरं यज्ञे मनोहर्षा तमादिश ॥"
इति श्रीभागवते १० स्कन्धे ६२ अध्यायः॥
मनोहारि, [न्] त्रि, (मनो हरति मनो हर्त्तुं शीलमस्येति वा। हृ + णिनिः।) मनोहरम्। इत्यमरटीकायां स्वामी। तथाहि।
"गाङ्गं वारि मनोहारि मुरारिचरणच्युतम्।
त्रिपुरारिशिरश्चारि पापहारि पुनातु माम् ॥"
इति वाल्मीकिरामायणगङ्गास्तोत्रम्॥
मनोहा, स्त्री, (मनः हयति आहयत्यनेति। हृ + "आतोऽनुपसर्गे कः।" ३।२।३। इति कः। टाप्।) मनःशिला। इत्यमरः। २। ९। १०८॥ (अस्याः पर्य्यायो यथा,—

"मनःशिला मनोगुप्ता मनोज्ञा नागजिह्विका।
नेपाली कुनटी गोला शिला दिव्यौषधिः स्मृता॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

मन्तव्य, त्रि, (मन्यते इति। मन+तव्य।) मननीयम्। भावयम्। यथा। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।" इत्यादि छान्दोग्योपनिषत्।

मन्ता, [न्तृ] त्रि, (मन्यते जानातीति। मन+"बहुलमन्यत्रापि।" उणा० २।६५। इति तृच्।) विद्वान्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (मननकर्त्ता। यथा। "स हि हेतुः कारणं निमित्तमक्षरं कर्त्ता मन्ता वेदिता बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्म्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यः गुणी यद्यस्मात् प्राधान्यमयत्नं जीवो यः प्रकृतिक्षेत्रज्ञवान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मा चेति।" इति चरके शारीरस्थाने चतुर्थेऽध्याये॥)

मन्तुः, पुं, (मन्यते इति। मन+"कमिमनिजनिगाभायाहिभ्यश्च।" उणा०। १। ७३। इति तुन्।) अपराधः। (यथा, नैषधचरिते। ६।११०।
"सतीव्रतेस्तीव्रमिमन्तु मन्तु-
मन्तर्वरं वच्मि मार्ज्जितास्रि॥")

मनुष्यः। प्रजापतिः। इति मेदिनी। ते, ४३॥

द्वाविंशत्यपराधा यथा। भगवद्भक्तानां क्षत्रियविद्वान्नभोजनम् १ अनिषिद्धदिने एकघावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं कृत्वा अस्नात्वा विष्णोरुपसर्पणम् ३ रक्तं नरं स्पृष्ट्वा अस्नात्वा विष्णुकर्म्मकरणम् ४ रजस्वलां स्पृष्ट्वा अस्नात्वा विष्णुगृहप्रवेशनम् ५ मानवं शवं स्पृष्ट्वा अस्नात्वा विष्णुसन्निधाववस्थानम् ६ विष्णुं स्पृशतः पापुवायुप्रयोगः ७ विष्णोः कर्म्म कुर्व्वतः पुरीषत्यागः ८ विष्णुग्राह्यमनाहृत्य ग्राह्यान्तरप्रशंसा ९ अतिमलिनं वासः परिधाय विष्णुकर्म्माचरणम् १० अविधानेनाचम्य विष्णोरुपस्पर्शनम् ११ विष्णोरपराधं कृत्वा विष्णोरुपसर्पणम् १२ क्रुद्धस्य विष्णुस्पर्शनम् १३ निषिद्धपुष्पेण विष्णोरर्च्चनम् १४ रक्तं वासः परिधाय विष्णोरुपसर्पणम् १५ अन्धकारे दीपेन विना विष्णोः स्पर्शनम् १६ क्षौमं वस्त्रं परिधाय विष्णोः कर्म्माचरणम् १७ वायसोद्धृतवस्त्रं परिधाय विष्णोः कर्म्माचरणम् १८ विष्णवे कुक्कुरोच्छिष्टदानम् १९ वराहमांसं भुक्त्वा विष्णोरुपसर्पणम् २० जालपादशरारिमांसं भुक्त्वा विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा हस्तमप्रक्षाल्य विष्णोः स्पर्शनं कर्म्मचिरणं वा २२ श्वश्रूगानं गत्वा अस्नात्वा विष्णोरुपसर्पणम् २३ पिण्याकं भुक्त्वा विष्णोरुपसर्पणम् २४ विष्णवे वराहमांसनिवेदनम् २५ मद्यमादाय स्पृष्ट्वा पीत्वा वा विष्णुगृहप्रवेशनम् २६ परकीयेणाशुचिना वा वस्त्रेण परिहितेन विष्णुकर्म्माचरणम् २७ विष्णवे नवान्नमप्रदाय तद्भोजनम् २८ गन्धपुष्पे अप्रदाय धूपदीपदानम् २९ उपानद्भ्यामारुह्य विष्णुस्थानप्रवेशनम् ३० भेरीशब्देन विना विष्णोः प्रबोधनम् ३१ अनीर्द्धे सति विष्णोरुपसर्पणम् ३२। एतदनुपलक्षणं तथा च नरसिंहपुराणे।
"अपराधसहस्राणि अपराधशतानि च।
पक्षेनैकेन देवेशः क्षमते भैलयार्चितः॥"
इत्यादिकाचारतत्त्वे चतुर्थयामार्द्धकृत्यम्॥
अपि च।
वराह उवाच।
"शुक्रा तु परकीयान्नं ततपरस्त्रिवर्जनः।
प्रथमश्चापराधोऽयं धर्म्मविघ्नाय वै भवेत्॥
अशुक्रा दन्तकाष्ठानि यस्तु मांसमपसर्पति।
द्वितीयश्चापराधस्तु कर्म्मविघ्नाय विद्यते॥
गत्वा मैथुनसंयोगे योऽनु मां स्पृशते नरः।
तृतीयमपराधन्तु कल्पयामि वसुन्धरे!॥
स्पृष्ट्वा रजस्वलां नारीमस्नातं यः प्रपद्यते।
चतुर्थमपराधन्तु दृष्टे नैव क्षमाम्यहम्॥
स्पृष्ट्वा तु मृतकञ्चैव असंस्कारकृतन्तु वै।
पञ्चमश्चापराधश्च न क्षमामि वसुन्धरे!॥
स्पृष्ट्वा तु मृतकं यस्तु नाचम्य स्पृशते तु माम्।
षष्ठकश्चापराधन्तु न क्षमामि वसुन्धरे!॥
मामेवार्च्चनकाले तु पुरीषं यस्य गच्छति।
सप्तमश्चापराधन्तु कल्पयामि वसुन्धरे!॥
यस्तु नीलेन वस्त्रेण प्राशितो मां प्रपद्यते।
अष्टमश्चापराधन्तु कल्पयामि वसुन्धरे!॥
मामेवार्च्चनकाले तु यस्त्वसत्यं प्रभाषते।
नवमश्चापराधन्तु न रोचामि वसुन्धरे!॥
अविधानेन मां स्पृष्ट्वा यस्तु मां प्रतिपद्यते।
दशमश्चापराधन्तु मम चाप्रियकारकम्॥
क्रुद्धस्तन्यानि कर्म्माणि कुरुते कर्म्मकारकः।
एकादशापराधन्तु कल्पयामि वसुन्धरे!॥
अकर्म्मण्यानि पुण्यानि यस्तु मासुपकल्पयेत्।
द्वादशश्चापराधन्तु कल्पयामि वसुन्धरे!॥
यस्तु रक्तेन वस्त्रेण कौसुम्भेनोपगच्छति।
त्रयोदशापराधन्तु कल्पयामि वसुन्धरे!॥
अन्तकालेऽपि मां देवि! यः स्पृशेत कदाचन।
चतुर्दशापराधन्तु कल्पयामि वसुन्धरे!॥
यस्तु क्षौमेन वस्त्रेण मम कर्म्माणि कारयेत्।
पञ्चदशापराधन्तु कल्पयामि वरानने!॥
अधौतेन च वस्त्रेण यस्तु मासुपकल्पते।
षोडशस्त्वपराधानां कल्पयामि वरानने!॥
स्वयमश्नन्तु यो दद्यादन्नाद्यं च माधवि!।
सप्तदशापराधन्तु कल्पयामि वसुन्धरे!॥
यस्तु मत्स्यानि मांसानि भक्षयित्वा वरानने!।
अष्टादशापराधानि अनुजानामि माधवि!॥
जालपादं भक्षयित्वा यस्तु मासुपसर्पति।
एकोनविंशापराधं प्रतिजानामि सुन्दरि!॥
यस्तु मे दीपकं स्पृष्ट्वा यो मां स्पृशति माधवि!।
विंशकश्चापराधानां कल्पयामि वरानने॥
श्वश्रूगानं यस्तु वै गत्वा यो मामेवाभिगच्छति।
एकविंशापराधानि कल्पयामि वसुन्धरे!॥
पिण्याकं भक्षयित्वा तु यो मामेवोपचक्रमे।
द्वाविंशत्यपराधानां तान्यहं वोपकल्पये॥
यस्तु वाराहमांसानि प्राप्तेनोपपादयेत्।
अपराधं त्रयोविंशं कल्पयामि वसुन्धरे!॥
सुरां पीत्वापि यो मर्त्यः कदाचिदुपसर्पति।
अपराधं चतुर्विंशं कल्पयामि वसुन्धरे!!॥
यः कुसुम्भञ्च मे शाकं भक्षयित्वोपचक्रमे।
अपराधं पञ्चविंशं कल्पयामि वसुन्धरे!॥
परप्रावरणेनैव यस्तु मासुपसर्पति।
अपराधेषु षड्विंशं कल्पयामि वरानने!॥
नवान्नं यस्तु भक्षेत न स देवान् पितॄन् यजेत्॥
सप्तविंशापराधानि कल्पयामि गुणान्विते!॥
उपानद्भ्यौ च प्रपदे तथा मे वोपचक्रमे।
अष्टाविंशापराधानि कल्पयामि गुणान्विते!॥
शरीरं मक्षयित्वा तु यो मामाप्नोति माधवि!।
एकोनत्रिंशमपराधं स स्वर्गेषु न गच्छति॥
अलीर्द्धेन समाविष्टो यस्तु मामभिगच्छति।
त्रिंशकश्चापराधानां कल्पयामि वसुन्धरे!॥
गन्धपुष्पाण्यदत्त्वा तु यस्तु धूपं प्रयच्छति।
एकत्रिंशापराधन्तु कल्पयामि यशस्विनि!॥
विना मैथ्यादिशब्देन द्वारस्योद्घाटनं मम।
महापराधं विदुस्तं द्वात्रिंशापराधकम्॥"
इति वाराहे द्वात्रिंशदपराधाध्यायः॥

(त्रि, ज्ञाता। यथा, ऋग्वेदे। १०। ६३। ८।
"य ईङ्खिरे भुवनस्य प्रचेतसो
विश्वस्य स्थातुर्जगतश्च मन्तवः।")
"मन्तवः सर्व्वस्य वेदितारः।" इति तद्भाष्ये सायणः॥ मननीयः। यथा, ऋग्वेदे। १। १५२। १।
"युवोरच्छिद्रा मन्तवोह सर्गाः।"
"मन्तवोह मननीयाश्च।" इति सायणः॥)

मन्त्रः, पुं, (मन्त्र्यते गुप्तं परिभाष्यते इति। मंत्रि गुप्तभाषणे+घञ्। यद्वा, मन्त्रयते गुप्तं भाषते इति। मंत्रि गुप्तभाषणे+अच्।) वेदभेदः। स च मन्त्रस्वरूपभागः॥ (यथा, ऋग्वेदे। ६०। ४। ७४।
"प्रनूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्॥"
यथा च मनुः। २। १६।
"निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित्॥"
तत्तात्पुत्रमन्त्रभागश्च। यथा, मनौ। ७।२१०।
"सुपरीक्षितमन्त्राद्यमन्त्रैर्विक्षापयेत्॥")

गुप्तिवादः। स तु रहसि कर्त्तव्यावधारणं मन्त्रणेति ख्यातम्। इत्यमरभरतौ॥ परामर्शः। मन्त्रणा। (यथा, माघे। २। २६।
"मन्त्रो योध इवाधीरः सर्व्वाङ्गैः संहतैरपि।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया॥")

अङ्गादिभ्यो मन्त्रणायङ्गस्य निषेधो यथा,—
"अङ्गाङ्गहीना बधिराः कुयोनिषु रताश्च ये।
तेषां मन्त्रो न सुखदः प्रोक्तः कविभिरेव च॥
कामुकानां जड़ानाञ्च स्त्रीजितानां तथैव च।
श्वशुरस्य गृहे नित्यं जामातां कर्म्मकारकः।

तस्यापि न भवेन्मन्त्रः कार्य्यसिद्धौ कदाचन ।"
इति जैमिनिभारते आश्वमेधिकपर्व्वणि २ अः ।
अन्यत् मन्त्रशब्दे द्रष्टव्यम् । * । देवादीनां साधनम् । इति मेदिनी । रे, ७४ ।
"तन्मन्त्राद्यषड्वर्णं यत् तृतीयाद्यगोचरम् ।
रहस्यालोचनं मन्त्रो रहस्यमनुषड्वरम् ।"
इति हेमचन्द्रः ।
मन्त्रव्याख्याप्रदेकनवतृषयो यथा,—
"एते मन्त्रकृतः सर्व्वे कृतघ्नस्तु निबोधत ।
भृगुः काश्यः प्रचेताश्च दधीचो ह्यात्मवानपि ।
और्व्वोऽथ जमदग्निश्च विदः शारद्वतस्तथा ।
आर्ष्टिषेणो ह्यश्वश्च वीतहव्यः सवेधसः ।
वेणः पृथुर्हैहयादो वत्सभ्रो यत्सशौनकः ।
एकोनविंशतिर्ह्येते भृगवो मन्त्रकृत्तमाः ॥१६॥
अङ्गिरा वैधसश्चैव भरद्वाजो नभात्मकः ।
तथा ह्यगधरो गर्ग्गः सितः सुव्रतिरेव च ॥
युवनीतश्च मान्धाता अम्बरीषस्तथैव च ।
युवनाश्वः पुरुकुत्सः सुमदद्युः सदस्यवान् ॥
अजमीढो ह्यदार्श्यश्च तक्षकः कपिरेव च ।
पृषदश्वो विरूपश्च कक्षसेवाथ सुव्रतः ॥
उतथ्यश्च शरद्वांश्च तथा वाजिश्रवा अपि ।
अयस्योऽथ सुचित्तिश्च वामदेवस्तथैव च ।
औशिजो ह्यङ्गपुत्रश्च ऋषिर्दीर्घतपा अपि ।
काक्षीवांश्च जयन्त्यिंशत् स्मृता ह्याङ्गिरसा वराः ॥ ३३ ॥
एते मन्त्रकृतः सर्व्वे काश्यपांस्तु निबोधत ।
काश्यपः सदवत्सारो निध्रुवो वैद्य एव च ।
असितो देवलश्चैव वर्द्धते ब्रह्मवादिनः ॥ ६ ॥
अविवेद्दक्षसश्चैव त्रावार्च्योऽथ गविष्ठिरः ।
वर्षागतको ऋषिः सिद्धस्तथा पूर्व्वातिथिश्च यः ॥
ह्येते त्र्यार्षेयाः प्रोक्ता मन्त्रकृतस्तु सप्तर्षयः ॥४॥
वग्निश्चैव ग्नस्तिश्च तृतीयश्च पराशरः ।
ततस्तु इन्द्रप्रमतिः पञ्चमस्तु भवद्वसुः ॥
ग्रहस्तु मित्रावरुणिः सप्तमः कुच्छिसस्तथा ।
ह्येते सप्त विज्ञेया वाग्निष्ठा ब्रह्मवादिनः ॥७॥
विश्वामित्रश्च गाथेयो देवरातस्तथोद्दलः ।
तथा विद्वान् मधुच्छन्दो ऋषिश्चान्योऽघमर्षणः ॥
अष्टको लोहितश्चैव भूतकीलश्च तावुभौ ।
देवश्रवा देवरातः पुराणश्च धनञ्जयः ॥
शिशिरश्च महातेजाः शालङ्कायन एव च ।
त्रयोदशैते विज्ञेया ब्रह्मिष्ठाः कौशिका वराः ॥१३॥
अगस्त्योऽथ दृढच्युत इन्द्रवाहुस्तथैव च ।
ब्रह्मिष्ठागस्त्यो ह्येते त्रयः परमकीर्त्तयः ॥ १ ॥
मनुर्वैवस्वतश्चैव इलो राजा पुरूरवाः ।
क्षत्रियाणां वरा ह्येते विज्ञेया मनुवादिनः ॥१॥
भगन्दश्चैव भल्लश्च वत्सश्चैव ते त्रयः ।
एते मन्त्रकृतो ज्ञेया वैश्यानां प्रवराः स्मृताः ॥२
इत्येकनवतिः प्रोक्ता मन्त्रा येषु बहिष्कृताः ।
ब्राह्मणाः क्षत्रिया वैश्या ऋषिपुत्रास्तथा स्मृताः ।
ऋषीणाञ्च सुता ह्येते ऋषिपुत्राः श्रुतर्षयः ।"
इति मात्स्ये १२१ अध्यायः ॥
ब्रह्ममन्त्रमाहात्म्यं यथा,—
"तावन्निबद्धः संसारकारागारे विधेर्जनः ।
न यावत् ब्रह्ममन्त्रञ्च प्राप्नोति गुरुवक्त्रतः ॥
ब्रह्मकर्म्मभोगरूपनिगड़ोच्छेदकारणम् ।
मायाजालोच्छेदकरमाद्यापाद्यनिश्चलनम् ॥
गोलोकमार्गसोपानं निस्तारबीजकारणम् ।
भक्तद्रुरूपञ्च नित्यं दृढमनश्वरम् ॥
सारञ्च सर्व्वतपसां योगानाञ्च तथैव च ।
सिद्धीनां वेदपाठानां व्रतादीनाञ्च निश्चितम् ॥
दानानां तीर्थस्नानानां यज्ञादीनां पुरन्दर ! ।
जपानामुपवासानामित्याह कमलोद्भवः ॥
पुंसां जन्मं पितृणाञ्च मृतं मातामहस्य च ।
पूर्व्वं परञ्च ततसंख्यं पितरं मातरं गुरुम् ।
सहोदरं कलत्रञ्च बन्धुं शिष्यञ्च किङ्करम् ।
सश्वशुरञ्च श्वश्रूं च कन्याञ्च ततसुतम् ।
आत्मानञ्च सतीर्थ्यञ्च गुरुपत्नीं गुरोः सुतम् ।
उद्धरेद्दशवान् भक्तो मन्त्रग्रहणमात्रतः ॥
मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः ।
तत्सद्यः पूतलोकैश्च सद्यः पूता वसुन्धरा ॥
अनेकजन्मपर्य्यन्तं दीक्षाहीनो भवेन्नरः ।
तदान्यदेवमन्त्रञ्च लभते पुण्यगौरवतः ॥ * ॥
सप्तजन्मोपदेवानां ज्ञात्वा सेवां स्वकर्म्मणः ।
लभते च स्वमन्त्रं साक्षिणः सर्व्वकर्म्मणाम् ॥
जन्मत्रयं भास्करश्च निसेव्य मानवः शुचिः ।
लभेद्दशगुणं मन्त्रञ्च सर्व्वविघ्नहरं परम् ॥
जन्मत्रयं तं निसेव्य निर्व्विघ्नश्च भवेन्नरः ।
विघ्नेशस्य प्रसादेन दिव्यज्ञानं लभेन्नरः ॥
तदा ज्ञानप्रदीपेन समालोक्य महामतिः ।
अज्ञानान्धतमो हित्वा महामायां भजेन्नरः ॥
विष्णुमायाञ्च प्रकृतिं दुर्गां दुर्गतिनाशिनीम् ।
सिद्धिदां सिद्धिरूपाञ्च परमां सिद्धयोगिनीम् ॥
वार्णीरूपाञ्च पद्माञ्च भद्रां लक्ष्मीप्रियात्मिकाम् ।
नानारूपां तां निसेव्य जन्मनां शतकं नरः ॥
तत्प्रसादाद्भवेत् ज्ञानी ज्ञानानन्दं ततो भजेत् ।
लक्ष्मीज्ञानाधिदेवञ्च महाज्ञानं सनातनम् ।
शिवं शिवस्वरूपञ्च शिवदं शिवकारणम् ।
परमानन्दरूपञ्च परमानन्ददायिनम् ।
सुखदं मोक्षदञ्चैव दातारं सर्व्वसम्पदाम् ।
अमरत्वप्रदञ्चैव दीर्घायुष्टप्रदं परम् ।
इन्द्रत्वञ्च मनुत्वञ्च दातुं शक्तञ्च लीलया ।
राजेन्द्रत्वप्रदञ्चैव ज्ञानदं हरिभक्तिदम् ।
जन्मत्रयं समाराध्य चाशुतोषप्रसादतः ।
सर्व्वदस्य वरेणैव निर्म्मलं ज्ञानमालभेत् ।
निर्म्मलज्ञानदीपेन सुप्रदीपेन तत्त्ववित् ।
ब्रह्मादिस्तम्बपर्य्यन्तं सर्व्वं मिथ्येव पश्यति ॥
दयानिधेः प्रसादेन शङ्करस्य महात्मनः ।
वरदस्य वरेणैव हरिभक्तिं लभेत् ध्रुवम् ।
तदा तद्भक्तसंसर्गात् ब्रह्ममन्त्रं लभेत् ध्रुवम् ।
तदा निवृत्तिमाप्नोति सारात्सारां परात्पराम् ॥
यत्र देहे लभेन्मन्त्रं तद्देहावधि भारते ।
तत् प्राच्यभौतिकं त्यक्त्वा बिभर्त्ति दिव्यरूपकम् ॥
करोति दास्यं गोलोके वैकुण्ठे वा हरेः पदे ।
परमानन्दसंयुक्तो मोहादिषु विवर्ज्जितः ॥
न विद्यते पुनर्जन्म पुनरागमनं सुर ! ।
पुनश्च न पिबेत् चीरं हत्वा मातृस्तनं परम् ॥
विष्णुमन्त्रोपासकानां गङ्गादितीर्थसेविनाम् ।
स्वधर्म्मिणाञ्च भिक्षूणां पुनर्जन्म न विद्यते ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३१ अध्यायः ॥
शिवमन्त्रा यथा,—
"प्रथमं प्रणवं तस्मात् ततोऽनुध्यानगोचरम् ।
ततः क्रमेण पूजायाः क्रमाद्दित्तं नरेश्वरौ ॥
समस्तानां स्वराद्यानु दीर्घाः शेषाः सबिन्दुकाः ।
ऋ ऋ क् ऋ्याः सार्द्धचन्द्रा उपान्ते नाभि-
संहिताः ॥
एभिः पञ्चाक्षरैर्मन्त्रैः पञ्चवक्त्रस्य कीर्त्तितः ।
क्रमात् सद्यादिहृदयैरङ्गैरङ्गयुतैरपि ॥
प्रासादस्तु भवेत् शेषः पञ्चमन्त्राः प्रकीर्त्तिताः ।
एकैकेन तथैवैकं वक्त्रं मन्त्रेण पूजयेत् ॥
एवं समुदितं ज्ञात्वा पञ्चभिर्वा प्रपूजयेत् ।
प्रासादेनाथवा पञ्चवक्त्रं देवं प्रपूजयेत् ।
सद्यादिषु मन्त्रेषु प्रासादस्तु प्रशस्यते ॥
शम्भोः प्रसादनेनैव यस्मादुक्तस्तु मन्त्रकः ।
तेन प्रासादसंज्ञोऽयं कथ्यते मुनिपुङ्गवैः ।
तस्मात् सर्व्वेषु मन्त्रेषु प्रासादः प्रीतिदः प्रभोः ॥
आमोदकारकः शम्भोर्मन्त्रः सद्यद उच्यते ।
मनःप्रपूरकश्चापि सन्दोहः परिकीर्त्तितः ॥
आकर्षको भवेन्मादो गुरुत्वात्तौरवाख्यः ।
एतद्ब्रह्मं समस्तञ्च मन्त्रं शम्भोः प्रकीर्त्तितम् ॥
पञ्चाक्षरञ्च यन्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
युवां तेनैव मन्त्रेण आराधय तमीश्वरम् ॥"
इति कालिकापुराणे ५० अध्याये वेताल-भैरवौ प्रति वह्निवाक्यम् ॥ * ॥
मन्त्रस्य त्रिविधजपो यथा,—
"वाचिकश्च उपांशुश्च मानसश्च त्रिधा स्मृतः ।
त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः ॥
यदुच्चनीचस्वरितैः स्वरशब्दवदक्षरैः ।
मन्त्रमुच्चारयेद्वाक्यं जपयज्ञः स वाचिकः ॥
शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयन् ।
किञ्चित् शब्दं स्वयं विद्याद्रुपांशुः स जपः स्मृतः ॥
धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात् पदम् ।
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः ॥
तेन स्वरादिसुयुक्तवर्णोच्चारवान् वाचिकः ।
स्वयंशब्दश्रवणमात्रयोग्यकिञ्चिच्छब्दवानुपांशुः ॥
जिह्वोष्ठचालनमन्तरेण वर्णानुसन्धात्मको-
मानसः ॥"*॥
वाचिकेऽप्युक्तेर्जपनिषेधमाह शङ्खः ।
"नोच्चैर्जपं बुधः कुर्य्यात् सावित्र्यास्तु विशेषतः ॥"
योगियाज्ञवल्क्यः ।
"न चंक्रमन् न विक्षिपन् न पार्श्वमवलोकयन् ।
नोपाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा ॥
न यदा पादमाक्रम्य न वै बहिः करौ क्षिपेत् ।
नैवंविधं जपं कुर्य्यात् न च संध्यावयेज्जपम् ॥
उत्तिष्ठन् वीक्षमाणोऽर्कमासीनः प्राङ्मुखो
जपेत् ।
प्राक् कुशेष्वेवमासीनो वसानो वाससी शुभे ॥"

मन्त्रः

वृद्धमनुः ।
"यदि स्यात् क्लिन्नवासा वै वारिमध्यगतो जपेत्।
अन्यथा तु शुचौ भूम्यां कुशोपरि समाहितः ॥"
व्यासः ।
"जपकाले न भावेत व्रतहोमादिकेषु च ।
एतेष्वेवावशूत्तस्तु यद्यागच्छेत् द्विजोत्तमः ।
अभिवाद्य ततो विप्रं योगक्षेमञ्च कीर्तयेत् ॥"
योगियाज्ञवल्क्याः ।
"यदि वाग्यमलोपः स्यात् जपादिषु कदाचन ।
व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम् ॥"
गौतमः ।
"क्रोधं मोहं क्षुतं निद्रां निष्ठीवनविजृम्भितम् ।
दर्शनं वनितानाञ्च वर्जयेज्जपकर्मणि ।
आचामेत् सम्यगे चैतां स्मरेद्विष्णुं सुरार्चितम्॥"
बौधायनः ।
"नाभेरधस्च संस्पर्शं कर्मकाले विवर्जयेत् ॥"
इत्याह्निकाचारतत्त्वम् ॥ * ॥

मन्त्रशब्दस्य व्युत्पत्तिर्यथा,—
"मननात्त्रायते यस्मात्तस्मान्मन्त्रः प्रकी-
र्त्तितः ॥"
मन्त्रदोषरहितानां दोषो यथा, मत्स्यसूक्ते ।
"अदीक्षितानां मर्त्यानां दोषं शृणु वरानने ! ।
अन्नं विष्ठासमं तस्य जलं मूत्रसमं स्मृतम् ।
तत्कृतं तस्य वा श्राद्धं सर्व्वं याति ह्यधो-
गतिम् ॥"
शूद्रस्य मन्त्रविशेषनिषेधमाह तत्रै ।
"प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्व्वथा ।
आत्ममन्त्रं गुरोर्मन्त्रं मन्त्रं राजपसंज्ञकम् ॥
स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्विजः ।
शूद्रो नियमाप्नोति ब्राह्मणो याद्यधोगतिम् ॥"
स्मृतिरपि ।
"सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति ।
सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि
जानीयात् स न्तोऽधो गच्छति ।"
विशेषमाह वाराहीये ।
"गोपालस्य मनुर्देयो महेशस्य तु पादवे ।
तत्पत्न्याश्चापि सूर्य्यस्य गणेशस्य मनुस्तथा ॥
एवं दीक्षाधिकारी स्यादन्यथा पापभाग्-
भवेत् ॥"
मन्त्रदीक्षाप्रशंसा यथा, गोविन्दार्च्चनदीपे ।
"अदीक्षितस्य मरणे प्रेतत्वं न च मुच्यते ॥"
नवरत्नेश्वरे ।
"सर्व्वासामपि दीक्षाणां मुक्तिः फलमखण्डितम्।
अविरोधात्त्रवर्त्तेव प्रासङ्गिकमथ भक्तयः ॥"
तथा ।
"उपपातकलक्षाणि महापातककोटयः ।
क्षणाद्दहति देवेशि ! दीक्षा हि विधिना कृता॥"
अशौचशुद्धिमन्त्रं दीक्षेत ।
"खवारराशिकोडागमशुद्धिं भजेन्मनूम् ॥"
वाराहीये ।
"ताराचक्रं राशिचक्रं नामचक्रं तथैव च ।
अत्र चैतु सशुद्धो मन्त्रो नान्यचक्रं विचारयेत् ॥"
इति प्राधान्यतया बोध्यम् ॥

तथा च ।
"धनिमन्त्रन्तु यज्ञीयादशुद्धत्वेन च ।"
इत्यादिदर्शनात्तत्तच्चक्रविचारस्य आवश्यकत्वात् प्रथमं तन्निरूप्यते । सिद्धसारस्वते ।
"तत्र वृश्चिंहाकैवराहाणां प्रासादप्रवरस्य च ।
सपिङ्गाचरमन्त्राणां सिद्धादीन्नैव शोधयेत् ॥
खप्नलब्धे स्त्रिया दत्ते मालामन्त्रे च जाचरे ।
वैदिकेषु च मन्त्रेषु सिद्धादीन्नैव शोधयेत् ॥"
मालामन्त्रस्तु वाराहीये ।
"विंशत्यक्षराधिका मन्त्रा मालामन्त्राश्च कीर्त्तिताः ।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥
हंसस्याष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च ।
एकत्रिंशदादिवीजस्य सिद्धादीन्नैव शोधयेत् ॥
तथा । एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य मार्ष्टति ! ।
वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥"
तथा चासुरीतन्त्रे ।
"काली तारा महाविद्या षोढ़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः॥
नात्र सिद्धादिचक्राणि न नक्षत्रविचारणा ।
कालादिशोधनं नास्ति न चाग्निवादिदूषणम् ॥
सिद्धविद्यातया नात्र युगसेवापरिश्रमः ।
नास्ति किञ्चिन्महादेवि ! दुःखसाध्यं कदाचन ॥"
एथिवां पूर्व्वफलप्रदा महाविद्या । यथा,
मालिनीविजये ।
"अथ वक्ष्याम्यहं या या महाविद्या महीतले ।
दोषजालैरसंस्पृष्टास्ताः सर्व्वा हि फलैः सह ।
काली तारा महादुर्गा त्वरिता छिन्नमस्तका ।
वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्या वासली बाला मातङ्गी शूलवासिनी ।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धमन्त्रतया नात्र युगसेवापरिश्रमः
तथा चैता महाविद्याः कलिदोषान् बाधिताः॥"
इत्यादिवचनादेषु विचारो नास्ति । वस्तुतस्तु इदं प्रशंसापरम् । सर्व्वत्र विचारस्यावश्यकत्वम् । दुरदृष्टवशात् कदाचिदेरिमन्त्रस्य खप्नादौ प्राप्तौ तत्तद्दोषस्य दुष्टत्वात् । इति तु वाम्यदायिकाः ॥ * ॥ मन्त्रोद्धारार्थंषट्चक्रप्रमाणानि चक्रग्रन्थे द्रष्टव्यानि । तेषां लेखनप्रकारो यथा,

कुलाकुलचक्रम् ।

वायुः	अग्निः	भूमिः	जलम्	आकाशः
अ आ	ऋ ॠ	उ ऊ	ऋ ॠ	ऌ ॡ
इ	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म
य	र	ल	व	श
ष	स	ह	क्ष	ज्ञ
वायुः	अग्निः	भूमिः	जलम्	आकाशः

अकथहचक्रम् ।

अ क च ट	उ ड प	आ ख ए	ऊ च य
ओ ऽ व	ल भ म	औ ठ श	ख ज य
ई त ग	ऋ ज भ	ए ग ध	ऋ ह व
अः त स	ऐ ठ ल	अं ब ब	ए ट र

अकड़मचक्रम् ।



राशिचक्रम् ।



नक्षत्रचक्रम् ।

अ आ १ देवः	इ २ मानुषः	ई उ ऊ ३ राक्षसः	ऋ ॠ ऌ ॡ ४ मानुषः	ए ५ देवः	ऐ ६ मानुषः	ओ औ ७ देवः	क ८ देवः	ख ग ९ राक्षसः
घ ङ १० राक्षसः	च ११ मानुषः	छ ज १२ मानुषः	झ ञ १३ देवः	ट ठ १४ राक्षसः	ड १५ देवः	ढ ण १६ राक्षसः	त थ द १७ देवः	ध १८ राक्षसः
न प फ १९ राक्षसः	ब २० मानुषः	भ २१ मानुषः	म २२ देवः	य र २३ राक्षसः	ल २४ राक्षसः	व ग्र २५ मानुषः	श ष ह २६ मानुषः	अं अः ऊ च २७ देवः

अधिपतिचक्रम् ।

१	१	१	०	१	४	४	०	०	०	१
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ	ए	ऐ	ओ	औ	अं	अः
क	ख	ग	च	ड	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
ब	भ	म	य	र	ल	व	ग्र	ष	स	ह
२	२	५	०	०	२	१	०	४	४	१

देवताभेदे चक्रविचारस्यावश्यकत्वमाह वाराहीतन्त्रे यामलादौ च ।
"तारशुद्धिर्वैष्णवानां कोलशुद्धिः शिवस्य च ।
राशिशुद्धिस्तथैवोक्ता गोपालैकदृमः स्मृतः ॥
एकदृमो वामने च गणेशे च तथैव च ।
कोलचक्रं वराहस्य महाशक्त्याः कुलाकुलम् ॥
नामादिचक्रे सर्व्वेषां भूतचक्रे तथैव च ।
त्रैपुरं तारचक्रे तु शुद्धमन्त्रं जपेद्बुधः ॥"
तथा ।
"वैष्णवं राशिसंशुद्धं शैवञ्चैकदृमं स्मृतम् ।
कालिकायाश्च तारायास्तारचक्रं शुभावहम् ॥
चक्रिकायास्तारकोष्ठे गोपालैकदृमः स्मृतः ।
हरचक्रे सर्व्वमन्त्रं धनाधिक्ये न चाश्रयेत् ॥
ऋणाधिक्ये शुभं विद्यात् धनाधिक्ये च नो विधिम् ।
दोषान् संशोध्य गृह्णीयान्मध्यदेशोद्भवस्य च ॥
मन्त्रस्तूभयफलोऽप्यशुभो धनी च
तुल्यं यदा समफलः कथितो मुनीन्द्रैः ॥"
अन्यत्रापि ।
"शून्ये स्त्रीमवाप्नोति धने च विफलं भवेत् ।
ऋणे च प्राप्तिमात्रेण सर्व्वसिद्धिस्तु जायते ॥"
अथ मन्त्राणां दश संस्काराः । गौतमीये ।
"जननं जीवनं पश्चात् ताडनं बोधनन्तथा ।
अथाभिषेको विमलीकरणाप्यायने पुनः ॥
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ।
स्वयंदिपाचे संलिख्य मालकायन्त्रसुत्तमम् ।
काश्मीरचन्दनेनापि भक्तिना वाथ सुव्रत ! ॥
काश्मीरं शक्तिसंस्कारे चन्दनं वैष्णवे मनौ ।
शैवे भस्म समाख्यातं मालकायन्त्रलेखने ॥
मन्त्राणां मालकायन्त्रादुद्धारो जननं स्मृतम् ।
पंक्तिक्रमेण विधिना मुनिभिश्चैव निश्चितम् ॥१॥
योमेन्दो रसनार्णकर्णिकमचां दन्दैः स्फुरत् कैशरं
वर्गोल्लासिवसुच्छदं वसुमतीगेहेन संवेष्टितम् ।
आशाखण्डित शान्तलाञ्छनयुता शौभीपुरे-
णावृतं
यन्त्रं वर्णतनोः परं निगदितं सौभाग्यसम्पत्-
करम् ॥"
यन्त्रस्य दिक्षु वं विदिक्षु ठं लिखेत् । तथा च गौतमीये ।
"कादिमान्ताः पञ्चवर्गा दिक्षु पूर्व्वादितो न्यसेत् ।
यादिवान्ताः प्रादिहान्ता लक्षमीशे प्रविन्यसेत् ॥
चतुरस्रं चतुर्द्वारं दिक्षु वं ठं विदिक्षु च ॥"
इति मालकायन्त्रम् ॥
"प्रणवान्तरितान् कृत्वा मन्त्रवर्णान् जपेत् सुधीः ।
प्रत्येकं प्लुतवारन्तु जीवनन्तदुदाहृतम् ॥ २ ॥
मन्त्रवर्णान् समालिख्य ताडयेच्चन्दनाम्भसा ।
प्रत्येकं वायुबीजेन पूर्व्ववत्ताडनं मतम् ॥ ३ ॥
विलिख्य मन्त्रवर्णांस्तु प्रस्तरैः करवीरजैः ।
तन्मन्त्रवर्णसंख्याकैर्हन्याद्दैवेन बोधनम् ॥" ४ ॥
"तत्तन्मन्त्रोक्तविधिना अभिषेकः प्रकीर्त्तितः ।"
तन्त्रान्तरे ।
"मन्त्रस्य चासुकं वर्णमभिषिञ्चामि हृद्गतम् ।"
इति वचनात् प्रत्येकमभिषिञ्चेत् ।
"अश्वत्थपल्लवैः सिञ्चेत् मन्त्री मन्त्रार्णसंख्यया ॥५॥
सञ्चिन्त्य मनसा मन्त्रं सुधामूलमधस्तनः ।
ज्योतिर्मन्त्रेण विधिवत् दहेन्मन्त्रत्रयं यती ॥
तारं व्योमाग्निमनुयुक् दक्षी ज्योतिर्मनुर्मतः ॥"
तारं प्रणवः व्योम हकारः अग्नी रेफः मनुरौकारः दक्षी अनुस्वारः ॥ ६ ॥
"स्वर्णेन कृशतोयेन पुष्पतोयेन वा तथा ।
तेन मन्त्रेण विधिवदाप्यायनविधिः स्मृतः ॥७॥
मन्त्रेण वारिणा मन्त्रं तर्पयं तर्पयं मतम् ।
मधुना शक्तिमन्त्रेषु वैष्णवे चेन्दुमण्डले ॥
शैवे घृतेन दुग्धेन तर्पणं सम्यगीरितम् ॥"
अभिषेकेऽपि तथा ॥ ८ ॥
"तारमायारमायोगो मनोर्दीपनमुच्यते ॥ ९ ॥
जप्यमानस्य मन्त्रस्य गोपनं स्वप्रकाशनम् ॥१०॥
संस्कारा दश संप्रोक्ताः सर्व्वतन्त्रेषु गोपिताः ।
यान् कृत्वा सम्प्रदायेन मन्त्री वाञ्छितमाप्नुयात् ॥"
मलत्रयमिति आनवं मायिकं कार्म्मणञ्च ।
प्रपञ्चसारे ।
"मायिकं नाम योगोत्थं पौरुषं कार्म्मजं मलम् ।
आनवं तद्द्वयं प्रोक्तं निषिद्धं सज्जलत्रयम् ॥"
न नवं अनवं तस्य भावः आनवं तद्बलमित्यर्थः ।
तारमायारमायोग इति । तारमायारमाबीजपुटितं मन्त्रमष्टोत्तरशतं जपेत् इत्यर्थः ।
तथा च विश्वसारे ।
"तारमायारमाबीजपुटितेन मनुं जपेत् ।
शतमष्टोत्तरञ्चैव दीपयेत् साधकोत्तमः ॥" * ॥
अथ दुर्गामन्त्रः ।
"अथ दुर्गामनुं वक्ष्ये दृष्टादृष्टफलप्रदम् ।
मायादिः कर्णविन्दाढ्यो भूयोऽसौ सर्गवान् भवेत् ॥
पञ्चान्तकः प्रतिष्ठावान् मारुतो भौतिकासनः ।
तारादिहृदयान्तोऽयं मन्त्रो वसुशरात्मकः ॥"
अदिर्हकारः । कर्ण उकारः । पञ्चान्तको गकारः । प्रतिष्ठा आकारः । मारुतो यकारः । भौतिक ऐकारः । ॐ ह्रीं दुं दुर्गायै नमः ॥*॥
अथ विष्णुमन्त्रः ।
"तारं नमःपदं ब्रूयात् नरौ दीर्घसमन्वितौ ।
प्रवनो वायमन्तोऽयं प्रोक्तो वसुशरः परः ॥"
ॐ नमो नारायणाय ॥ * ॥ अथ शिवमन्त्रः ।
"सान्तमौकारसंयुक्तं विन्दुभूषितमस्तकम् ।
प्रासादाख्यो मनुः प्रोक्तो भक्तानां कामदो मनुः ॥"
हौं ॥ * ॥ अथ गणेशमन्त्रः ।
"पञ्चान्तकं शक्तिधरं बीजं गणपतेर्विदुः ॥"
पञ्चान्तको गकारः । मँ ॥*॥ अथ सूर्यमन्त्रः ।
"तारो हृदिर्भृगुः पञ्चादामकर्णविभूषितः ।
वह्निासनो मरुत्तोयः वनेत्रोऽद्रिस्थपश्चिमः ॥
अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतः परः ॥"
ॐ ह्रीं सूर्य्य आदित्य ॥ * ॥

पञ्चदेवतानामेक एको मन्त्रो लिखितः । एतासामन्यासाद्यान्यमन्त्रा ग्रन्थविस्तारभयान्न लिखिताः ॥ कलावागमोक्तमन्त्रजपविधिर्यथा,—
"आगमोक्तविधानेन कलौ मन्त्रं जपेत् सुधीः ।
नहि देवाः प्रसीदन्ति कलौ चान्यविधानतः ॥"
तथा ।
"कृते श्रुत्युक्तमार्गः स्यात् त्रेतायां स्मृतिसम्भवः ।
द्वापरे तु पुराणोक्तः कलावागमसम्भवः ॥
मन्त्राणां देवताः प्रोक्ता देवता गुरुरूपिणी ।
तेषां भिदा न कर्त्तव्या यदीच्छेच्छुभमात्मनः ॥"
पित्रादितो मन्त्रग्रहणनिषेधो यथा,—
"पितुर्मन्त्रं न गृह्णीयात् तथा मातामहस्य च ।
सोदरस्य कनिष्ठस्य वैरियुक्ताश्रितस्य च ॥
न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम् ।
न पुत्रञ्च तथा भ्राता भ्रातरं न च दीक्षयेत् ॥
सिद्धमन्त्रो यदि पतिस्तदा पत्नीं च दीक्षयेत् ।
मुक्तिस्तेन वरारोहे ! न च सा कल्पक भवेत् ॥"
तथा गणेशविमर्षिण्याम् ।
"यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः ।
विविक्ताश्रमिणां दीक्षा न सा कल्याणदायिका ॥"
इत्यादिनिषेधवचनादेभ्यो मन्त्रं न गृह्णीयादित्यर्थः । इति तन्त्रसारः ॥ (ज्वरादिनाशकमन्त्रो यथा,—
"वानराक्षतिमालिख्य खटिकाभिः पुनः पुनः ।
गन्धपुष्पाक्षतैर्धूपैरर्चयेद्विधिवत् वरः ॥
मन्त्रः ।
ॐ ह्रां ह्रीं श्रीं सुग्रीवाय महाबलपराक्रमाय सूर्य्यपुत्राय अमिततेजसे ऐकाहिक-द्याहिक-त्र्याहिक-चातुर्थिक-महाज्वर-भूतज्वर-भयज्वर-शोकज्वर-क्रोधज्वर-वेलाज्वर-प्रभृतिज्वराणां दह दह हन हन पच पच अवतर अवतर किलिकिलि वानरराजज्वराणां बन्ध बन्ध ह्रां ह्रीं हूं फट् स्वाहा ।" इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ॥)

मन्त्रकृत्, पुं, (मन्त्रं कृतवान् । मन्त्र + कृ + क्विप् । तुगागमश्च ।) मन्त्री । मन्त्रणाकारकः । इति सिद्धान्तकौमुदी ॥ (दौत्यकारी । यथा, श्रीमद्भागवते । ३ । १ । २ ।
"यदा अयं मन्त्रकृद्वो भगवानखिलेश्वरः ।
पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसात्कृतम् ॥"
"मन्त्रकृत् दौत्यकर्म्मा सन् ।" इति तट्टीकायां श्रीधरस्वामी ॥*॥ त्रि, मन्त्रप्रयोगकारी । यथा, रघुवंशे । १ । ६१ ।
"तव मन्त्रकृतो मन्त्रैर्दूरात् प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥"
"मन्त्रकृतः मन्त्राणां स्रष्टुः प्रयोक्तुर्वा ।" इति तट्टीकायां मल्लिनाथः ॥)

मन्त्रगर्ब्भकः, पुं, (मन्त्रप्रधानो गर्ब्भकः मध्यपदलोपी कर्म्मधारयः ।) विद्या । इति हारावली । १९६ ॥

मन्त्रगूढः, पुं, (मन्त्रे मन्त्रणाविषये गूढः गुप्तः ।) चरः । इति शब्दरत्नावली ।

मन्त्रगृहं, क्ली, (मन्त्रस्य मन्त्रणायाः गृहम् ।) मन्त्रणागारम् । (यथा, महाभारते । १५ । ५ । २९ ।

"सुसंवृत्तं मन्त्रगृहं स्यात् चारस्य मन्त्रयेः ।
अरण्ये निःशलाके वा न च रात्रौ कथञ्चन ।")

मन्त्रजा, स्त्री, (मन्त्रात् जायते इति । मन्त्र + जन् + डः । टाप् ।) मन्त्रशक्तिः । इति पुराणम् ।

मन्त्रजिह्वः, पुं, (मन्त्र एव जिह्वा यस्य ।) अग्निः । इति हेमचन्द्रः । १ । १६५ । (यथा, माघः । २ । ९०७ ।

"अन्तर्तं नाम यत् सन्तो मन्त्रजिह्वेषु जुह्वति ।
शोभैव मन्दरक्षुब्धक्षुभितामोघिवर्जना ।")

मन्त्रज्ञः, पुं, (मन्त्रं जानातीति । मन्त्र + ज्ञा + कः ।) चरः । इति हलायुधः । मन्त्रज्ञातरि, त्रि । (यथा, मनुसंहितायाम् । ८ । ३ ।

"अवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम् ।")

मन्त्रणं, क्ली, (मन्त्र + ल्युट् ।) मन्त्रणा । मन्त्र-धातोर्भावे अनट्प्रत्ययेन निष्पन्नम् । (यथा, मार्कण्डेयपुराणे । ५० । ८७ ।

"अवस्करे मन्त्रणञ्च यच्चैतदुपजल्पितम् ।")

मन्त्रणा, स्त्री, (मन्त्र + भावे युच् । टाप् ।) रहसि कर्त्तव्यावधारणम् । इति मन्त्रशब्द-टीकायां भरतः । मन्त्रः । यथा,—

"वादी मूकति रङ्कति क्षितिपतिर्वैद्यागरः प्रौढति
क्रोधी ध्यायति दुर्जनः सुजनति क्षिप्राशुगः खञ्जति ।
गर्व्वी खर्व्वति सर्व्वविच्च जड़ति त्वन्मन्त्रणा-यन्त्रितः
श्रीगित्ये वगलामुखि ! प्रतिदिनं कल्याणि तुभ्यं नमः ।"

इति तन्त्रसारे वगलाखण्डम् । * ।

मन्त्रणायां वर्जनीयानि यथा,—

"मन्त्रे पञ्चाङ्गताशक्तिषाड्गुण्योपायसिद्धयः ।
उदयास्त्रिगुणीयाश्च स्त्रैर्योन्नत्यादिसिद्धयः ।"

इति कविकल्पलता । * ।

अशक्तियादिदूषितमन्त्रणायां दोषो यथा,—

"षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णश्च धार्य्यते ।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्येको न बुध्यते ।"

इति गारुड़े ११४ अध्यायः ।

राज्ञा विद्यादिगुणयुक्तविप्रा मन्त्रिणः कार्य्याः । यथा,—

"मन्त्रिणस्तु नृपः कुर्य्यात् विप्रान् विद्याविशारदान् ।
विगृह्यञ्च कुलीनांश्च धर्म्मार्थकुशलाञ्छुचून् ॥
मन्त्रयेत्तैः समं काले गात्यर्थं बहुभिश्चरेत् ।
एकैकेनैव कर्त्तव्यं मन्त्रस्य तु विनिश्चयम् ॥
सर्व्वैश्चैव समस्तैश्च बाह्यस्य नृपतेः ।
स्वयं दृष्ट्वा मन्त्रयेत् स्थूल आत्मस्थ मन्त्रयेत् ॥
अरण्ये निःशलाके वा न यामिन्यां कदाचन ।
प्रियैर्मूढैर्ब्राह्मणैश्च पक्षान् शुक्लान् वेशा-रिकाश्रया ॥
वर्जयेन्मन्त्रगेहेषु मनुष्याशुद्धतांस्तथा ।
दूषणं मन्त्रभेदेषु कृपाणां यत्र जायते ॥
न तत् सम्यक् समाधातुं दक्षैर्नृपगुरैरपि ॥"

इति कालिकापुराणे ८५ अध्यायः ॥

अथ मन्त्रनिर्णयः ।

"मन्त्रमूलं यतो राज्यं ततो मन्त्रं सुरक्षितम् ।
कुर्य्यान्नाना सदा मन्त्रान् कर्म्मणामाफलोदयात् ॥
अर्थानर्थौ हि यत्नोभौ संश्रयेत परीक्षते ।
स मन्त्र इति विज्ञेयः श्रेयाश्च खलु विक्षमाः ॥
एकमेव विषं हन्ति मूर्खमेकञ्च वध्यते ।
सराष्ट्रं सप्रदं हन्ति राजानं मन्त्रविप्लवः ॥
करिष्यन् न प्रभाषेत कृतान्येव तु दर्शयेत् ।
धर्म्मार्थकामकार्य्याणि कृतो मन्त्रो न भिद्यते ॥
गिरिपृष्ठमुपारुह्य प्रासादं वा रहोगतः ।
स्वपथे निःशलाके वा तत्र मन्त्रो विधीयते ॥
तत्र साम प्रयोक्तव्यं कार्य्येषु गुरुवत्सुखपि ।
दानं लुब्धेऽपि भेदश्च शङ्कितेष्वपि निश्चयः ॥
जड़मूकान्धबधिरान् तिर्य्यग्योनीन् वयोऽधि-कान् ।
स्त्रीम्लेच्छव्याधितव्यङ्गान् मन्त्रकाले निवेषयेत् ।
इति सम्यतः प्रोक्तो राजनीतिरियं मया ।
यन्निवर्गाविरुद्धं स्याद्राजनीतिस्तदुच्यते ॥"

इति युक्तिकल्पतरौ नीतियुक्तिः ॥

मन्त्रतः, [स्] अ, (मन्त्रादिति । मन्त्र + "पञ्चम्यास्तसिल् ।" ५ । ३ । ७ । इति पञ्चमी-स्थाने तसिल् ।) मन्त्रात् । इति सिद्धान्त-कौमुदी ।

मन्त्रदः, पुं, (मन्त्रं ददातीति । मन्त्र + दा + कः ।) शिष्यकर्म्मे तदिष्टदेवमन्त्रप्रदानकर्त्ता । मन्त्र-दाता गुरुः । यथा,—

"परापरगुरूणाञ्च निर्णयं शृणु पार्व्वति ! ।
आदौ सर्व्वत्र देवेशि ! मन्त्रदः परमो गुरुः ।
परापरगुरुस्त्वं हि परमेष्ठी त्वहं गुरुः ॥"

इति हरहृदीयतन्त्रे २ पटलः । * ।

तत्पित्रादीनामपि परमगुरुत्वादिर्यथा,—

"मानवस्य मदेशानि ! सङ्क्षेपान्निगदामि ते ।
गुरुः परमगुरुश्चैव परापरगुरुस्तथा ।
स्वगुरुः परमेशानि ! साक्षाद्ब्रह्म न संशयः ॥
तत्पिता परमगुरुः स्वयं विष्णुः स्थितौ सदा ।
तत्पिता परापरगुरुर्मदेश्वरसमः सदा ॥"

इति श्यामानन्दतरङ्गिण्यां दक्षिणमूर्त्ति-तन्त्रम् ।

मन्त्रदाता, [तृ] त्रि, (मन्त्रं ददातीति । मन्त्र + दा + तृच् ।) मन्त्रदानकर्त्ता । गुरुः । यथा,—

"सर्व्वेषाञ्च गुरुश्चाद्य जन्मदाता परो गुरुः ।
पितुः शतगुणे माता पूज्या वन्द्या गरीयसी ॥
विद्यादाता मन्त्रदाता ज्ञानदो हरिभक्तिदः ।
पूज्यो वन्द्यश्च सेव्यश्च मातुः शतगुणैर्गुरुः ॥
मन्त्रसूत्रीरयोनैव गुरुरित्युच्यते बुधैः ।
अन्यो वन्द्यो गुरुरयमन्यश्चारोपितो गुरुः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
अदीक्षितस्य मूर्खस्य निष्कृतिर्नास्ति निश्चितम् ।
सर्व्वकर्म्मक्षमर्हस्य नरके तत्पशोः स्थितिः ॥
जन्मदातान्नदाता वा माताग्नि गुरवस्तथा ।
पारं कर्त्तुं न शक्तास्ते घोरे संसारसागरे ॥
विद्यामन्त्रप्रदाता निपुणः पारकर्म्मणि ।
न शक्तः शिवशक्तुर्मीश्वरश्चेश्वरोऽपरः ॥
गुरुर्विष्णुर्गुरुर्ब्रह्मा गुरुर्देवो महेश्वरः ।
गुरुर्धर्म्मो गुरुः श्रेष्ठः सर्व्वात्मा निर्गुणो गुरुः ॥
सर्व्वतीर्थाश्रमश्चैव सर्व्वदेवाश्रयो गुरुः ।
सर्व्ववेदस्वरूपश्च गुरुरूपी हरिः स्वयम् ॥
अभीष्टदेवे रुष्टे च गुरुः शक्तो हि रक्षितुम् ।
गुरौ रुष्टेऽभीष्टदेवो नहि शक्तश्च रक्षितुम् ॥
सर्व्वे ग्रहाश्च यं रुष्टा यं रुष्टा देवताश्चया ।
तमेव रुष्टो भवति गुरुरेव हि देवतः ॥
न गुरोश्च प्रियश्चात्मा न गुरोश्च प्रियः सुतः ।
धनं प्रियं न च गुरोर्न च भार्य्या प्रिया तथा ।
न गुरोश्च परो धर्म्मो न गुरोश्च परन्तपः ।
न गुरोश्च परं सत्यं न पुण्यञ्च गुरोः परम् ॥
गुरोः परो न त्राता च नहि बन्धुर्गुरोः परः ।
देवो राजा च त्राता च प्रियाताश्च सदा गुरुः ॥
यावत् शक्तो दातुमन्नं तावत् त्राता तदन्नदः ।
गुरुः त्राता च प्रियाता प्रति जन्मनि जन्मनि ॥
मन्त्रो विद्यागुरुर्देवः सर्व्वजन्तो यथा पतिः ।
प्रतिजन्मनिबन्धेन सर्व्वेषामुपरि स्थितः ॥
पिता गुरुश्च बन्धुश्च यत्र जन्मनि जन्मनः ।
गुरवोऽन्ये तथा माता गुरुश्च प्रतिजन्मनि ।"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे प्रथौक्षतगुरु-स्तोत्रकथनं नाम ५६ अध्यायः । अपि च ।

"मान्यः पूज्यश्च सर्व्वेभ्यः सर्व्वेषां जनको भवेत् ।
अहो यस्य प्रसादेन सर्व्वान् पश्यति मानवः ॥
जनको जन्मदाता च रक्षकश्च पिता कृताम् ।
ततो विस्तीर्य्यकरणात् कलया स प्रजापतिः ॥
पितुः शतगुणैर्माता गौरवाद्भर्त्तृधारणात् ।
वन्द्या पूज्या च मान्या च प्रसूरूपा वसुन्धरा ॥
मातुः शतगुणैर्वन्द्यः पूज्यो मान्योऽन्नदायकः ।
यद्दिना नश्वरो देहो विष्णुश्च कलयान्नदः ॥
अन्नदातुः शतगुणोऽभीष्टदेवः परः स्मृतः ।
गुरुस्तस्माच्छतगुणो विद्यामन्त्रप्रदायकः ॥
अज्ञानतिमिराच्छन्नं ज्ञानदीपेन चक्षुषा ।
यः सर्व्वार्थं दर्शयति ततूपरः कोऽपि बान्धवः ॥
गुरुदत्तेन मन्त्रेण तपसेष्टसुखं लभेत् ।
सर्व्वज्ञत्वं सर्व्वसिद्धिं ततूपरः कोऽपि बान्धवः ॥
सर्व्वे जयति सर्व्वत्र विद्यया गुरुदत्तया ।
तस्मात् पूज्यो हि जगति को वा बन्धुस्ततोऽधिकः ॥
विद्यान्धो वा धनान्धो वा यो मूढो न भजेद्-गुरुम् ।
ब्रह्महत्यादिभिः पापैः स लिप्तो नात्र संशयः ॥

दरिद्रं पतितं क्षुद्रं नर-वृद्धाचरेद्गुरुम् ।
सोऽशुचिस्तीर्थलाभोऽपि नाधिकारी च कर्म्मसु॥
पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कापट्यात् स महापातकी
शिव ! ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म गुरुर्भास्करूपधृक् ॥
गुरुश्चन्द्रस्तथेन्द्रश्च वायुश्च वरुणोऽनलः ।
सर्व्वरूपो हि भगवान् परमात्मा स्वयं गुरुः ॥
नास्ति वेदात् परं शास्त्रं नहि ज्ञानात् परः
सुरः ।
नास्ति गङ्गासमं तीर्थं न पुण्यं तुलसीपरम् ॥
नास्ति क्षमावती भूमेः पुत्त्रान्नास्ति परः प्रियः ।
न च देवात् परा शक्तिर्व्रतं नैकादशीं विना ॥
शालग्रामात्परो यज्ञो न क्षेत्रं भारतात् परम् ।
परं पुण्यस्थलानाञ्च पुण्यं वृन्दावनं यथा ॥
मोक्षदानां यथा काशी वेष्णवानां यथा शिवः ।
न पार्व्वतीपरा साध्वी न गणेशात् परो वशी ॥
न च विद्यासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ।
विद्यादातुः पुत्रदारौ तत्समौ नात्र संशयः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४४
अध्यायः ॥

मन्त्रदीधितिः, पुं, (मन्त्रेण दीधितिर्दीप्तिर्यस्य ।) वह्निः । इति त्रिकाण्डशेषः ॥

मन्त्रपूतः, त्रि, (मन्त्रेण पूतः ।) मन्त्रेण पवित्रीकृतः । यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये । ८६ । ३६ ।
"ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥"

मन्त्रपूतात्मा, [त्मन्] पुं, (मन्त्रेण पूतः आत्मा यस्य ।) गरुडः । इति धरणिः ॥

मन्त्रवित्, [द्] (पुं, मन्त्रं षडङ्गमन्त्रार्थं वेत्तीति । विद् + क्विप् ।) चरः । इति हेमचन्द्रः । ३ । ३६७ ॥ (यथा, महाभारते । ५ । १६३ । ५ ।
"एतत् श्रुत्वा द्रुपदो यज्ञसेनः
सर्व्वं तत्त्वं मन्त्रविद्भ्यो निवेद्य ।
मन्त्रं राजा मन्त्रयामास राजन् !
यथायुक्तं रक्षणे वै प्रजानाम् ॥")
मन्त्रज्ञातरि, त्रि ॥ (यथा, छान्दोग्योपनिषदि । ७ । १ । ३ ।
"सोऽहं भगवतो मन्त्रविदेवास्मि ॥"
मन्त्रं वेदार्थं वेत्तीति । विद् + क्विप् । वेदार्थवित् । यथा, मनौ । ३ । १३१ ।
"सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते ।
एकस्तान् मन्त्रवित् प्रीतः सर्व्वानर्हति धर्म्मतः ॥")
मन्त्रस्रुक्, [ग्] त्रि, (मन्त्रेण स्रुग्गृह्णाति । "सृगोऽदृके क्विन् ।" ३ । २ । ५८ । इति क्विन् ।) मन्त्रकरणकस्रुग्ग्रहणं । इति सिद्धान्तकौमुदी ॥

मन्त्रितः, त्रि, मन्त्रेण संस्कृतः । अभिमन्त्रितः । मन्त्रोऽस्य जातः । इति मन्त्रिशब्दात् क्तप्रत्ययेन मन्त्रशब्दात् इतप्रत्ययेन च निष्पन्नः ॥ (यथा, निबन्धे ।
"शिष्यं खलकृतं वेद्यासपार्श्वमुपवेशयेत् ।
मन्त्रितं प्रोक्षणीतोयैः घ्राणिकुम्भजलैस्तथा ।
मूलमन्त्रेणाष्टशतं मन्त्रितैरभिषेचयेत् ॥")

मन्त्री, [न्] पुं. (मन्त्रो गुप्तभाषणमस्यास्ति । मन्त्र + इनिः । यद्वा, मन्त्रयते इति । मन्त्र + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति णिनिः ।) मन्त्रणातत्कर्त्तृव्यनिश्चयकर्त्ता । तत्पर्य्यायः । धीसचिवः २ अमात्यः ३ । इत्यमरः । २ । ८ । ४ ॥ सचिवः ४ धीसखः ५. सामवायिकः ६ । इति हेमचन्द्रः । ३ । ३८३ ॥ तस्य लक्षणं यथा,—
"मन्त्री भक्तः शुचिः शूरोऽनुद्धतो बुद्धिमान् क्षमी ।
आन्वीक्षिक्यादिकुशलः परिच्छेदी सुदेशजः ॥"
इति कविकल्पलता ॥
"बहुभिर्मन्त्रयेत् कामं राजा मन्त्रं पृथक् पृथक् ।
मन्त्रिणामपि नो कुर्य्यान्मन्त्री मन्त्रप्रकाशनम् ॥
न क्वचित् कस्य विश्वासो भवतीह सदा नृणाम् ।
निश्चयश्च सदा मन्त्रे कार्य्य एकेन सूरिणा ॥
भवेद्धा निश्चयाद्वाप्तिः परबुद्ध्यनुजीवनात् ।
एकस्येव महीभर्त्तुर्भूयः कार्य्यो विनिश्चयः ॥"
इति मत्स्यपुराणे १८८ अध्यायः ॥

मन्थ, कृत्थे । गाहे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मन्थति । कुत्थः केचिन्न मन्थते । इति दुर्गादासः ॥

मन्थ, ग गाहे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) गाहो विलोड़नम् । ग, मथाति दधि वल्लवी । रथं ममन्थ सहसयम् । इति दुर्गादासः ॥

मन्थः, पुं, (मथ्यतेऽनेन । मन्थ + करणे घञ् ।) मन्थदण्डकः । इत्यमरः । २ । ६ । ७४ ॥ (यथा, महाभारते । १२ । ३४३ । ११ ।
"आमथ्य मतिमन्थेन ज्ञानोदधिमनुत्तमम् ।
नवनीतं तथा दृष्ट्वा मलयाच्चन्दनं यथा ॥"
मथ्यते विलोड्यते इति । मन्थ + कर्म्मणि घञ् ।) सक्तवः । (मथ्नाति स्वकरेण त्रिभुवनं पौरुषयतीति । मन्थ + अच् ।) दिवाकरः । इति मेदिनी । थे, ११ । सक्तवो यथा,—
"सक्तुभिः सर्पिषाभ्यक्तैः शीतवारिपरिप्लुतैः ।
नात्यच्छो नातिसान्द्रश्च मन्थ इत्यभिधीयते ॥"
इति राजनिर्घण्टः ॥
पेयविशेषः । तस्य विधिर्यथा,—
"जले चतुर्थ्यले प्रीते क्षुद्रं द्रव्यं पलं क्षिपेत् ।
दृतपात्रे मन्थयेत् सम्यक् तस्माच्च द्विपलं पिबेत् ॥"
क्षुद्रं चूर्णीकृतम् । मन्थयेत् कदीयात् । इति भावप्रकाशः ॥ (मन्थ + भावे घञ् ।) मारणम् । इति त्रिकाण्डशेषः ॥ नेत्रमलम् । इति धरणिः ॥ नेत्रामयः । इति विश्वः ॥ अंशुः । इति शब्दरत्नावली ॥ कुत्थनम् । विलोड़नम् । इति मन्थधात्वर्थदर्शनात् । (यथा, रघौ । १० । ३ ।
"अतिश्रुतप्रत्ययपेशलस्तया स चिरं नृपः ।
प्राङ्मन्थादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥")

मन्थजं, क्ली, (मन्थेन मन्थनेन जायते इति । जन् + डः ।) नवनीतम् । इति रत्नमाला ॥ (विवरणमस्य नवनीतशब्दे ज्ञातव्यम् ॥)

मन्थदण्डकः, पुं. (मन्थाय मन्थनाय यो दण्डः । ततः स्वार्थे कन् ।) मन्थानदण्डः । छाँचुनी इति घोलमौनी इति खड़ेन् इति च भाषा ॥ तत्पर्य्यायः । वैणाखः २ मन्थः ३ मन्थानः ४ मन्थाः ५ । इत्यमरः । २ । ६ । ७४ ॥ करदण्डकः ६ मन्थनः ७ भक्काटः ८ । इति शब्दरत्नावली ॥ तक्काटः ९ । इति जटाधरः ॥

मन्थनं, क्ली, (मन्थ + ल्युट् ।) विलोड़नम् । कुत्थनम् । इति मन्थधात्वर्थे भावे अनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते ।१। १८ । ६० ।
"चिरारब्धमिदञ्चापि सागरस्यापि मन्थनम् ॥")

मन्थनः, पुं, (मथ्नात्यनेनेति । मन्थ + करणे ल्युट् । यद्वा, मथ्नातीति । मन्थ + ल्युः ।) मन्थानदण्डः । इति शब्दरत्नावली ॥ (यथा, हरिवंशे ।८२।३६।
"गोभिश्च समकीर्णासु व्रजनिर्य्याणभूमिषु ।
मन्थनावर्त्तपूर्णेषु गर्त्तरेषु नदत्सु च ॥")

मन्थनघटी, स्त्री, (अल्पो घटः । अल्पार्थे ङीष् । मन्थनार्था मन्थनस्य वा घटी ।) दधिमन्थनपात्रम् । यथा,—
"कलसी मन्थनघटी मन्थनी चापि गर्गरी ॥"
इति जटाधरः ॥

मन्थरं, क्ली, (मन्थति क्लेशयतीति । मन्थ + बाहुलकात् अरन् ।) कुसुम्भी । इति मेदिनी । रे, १६८॥

मन्थरः, पुं, (मन्थ + बाहुलकात् अरन् ।) कोषः ॥ फलम् । बाधः । मन्थानः । इति मेदिनी । रे, १६८ ॥ क्षुद्रकः । इति विश्वः ॥ मन्दगामियोद्धा । इति क्षत्रियवर्गे अमरः । २ । ८ । ७२ । कोपः । इत्यजयः ॥

मन्थरः, त्रि, (मन्थति पादाविति । मथि + अरन् ।) मन्दः । (यथा, साहित्यदर्पणे ।३।६८
"दत्ते सालसमन्थरं भुवि पदं निर्याति नाल्पैः पुरात् ॥")
पृथुः । वक्रः । इति मेदिनी । रे, १६८ ॥ (निम्नः । यथा, आर्य्यासप्तशत्याम् । ६८८ ।
"राज्याभिषेकसलिलप्लावितमौलेः कथासु लक्ष्मस्य ।
गर्व्वभरमन्थराक्षी पश्यति पदपङ्कजं राधा ॥")
जड़ः । इति शब्दरत्नावली ॥ नीचः । इति हेमचन्द्रः । ६ । ६५ ॥ (मन्दगामी । इति हेमचन्द्रः । ३ । १५६ ॥)

मन्थरा, स्त्री, (मन्थर + स्त्रियां टाप् ।) कैकेय्या दासी । यथा,—
"रामाभिषेके विघ्नार्थं यत्तस्य ब्रह्मवाक्यतः ।
मन्थरां प्रविशत्यादौ कैकेयीञ्च ततः परम् ॥"
इत्यध्यात्मरामायणे अयोध्याकाण्डे २ अध्यायः॥

मन्थरः, पुं, (मन्थ + बाहुलकात् अरः ।) चामरवातः । तत्पर्य्यायः । कुठेरः २ । इति त्रिकाण्डशेषः ॥

मन्थशैलः, पुं, (मन्थाय समुद्रमन्थनाय कल्पितः शैलः ।) मन्दरपर्व्वतः । इति जटाधरः ॥

मन्था, स्त्री, (मथ्यते इति । मन्थ + घञ् । ततः स्त्रियां टाप् ।) मेथिका । इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशे पूर्व्वखण्डे ।

"वल्लरी चन्द्रिका मन्था भित्रपुष्पा च केरली ॥")

मन्थः, [घिन्] पुं, (मन्थ + "मन्थः ।" उणा० ४ । ११ । इति इनिः । स च कित् ।) मन्थाभदण्डः । इत्यमरः । २ । ६ । ७४ ॥ (यथा, किरातार्জ্জुनीये । ४ । १६ ।

"सुदुः प्रयुक्तेषु मथां विवर्त्तनै-
र्नदत्सु कुम्भेषु चदङ्गमन्थरम् ॥")

मन्थानः, पुं, (मथ्यते अनेनेति । मन्थ + बाहुलकात् आनच् ।) मन्थदण्डकः । इत्यमरः । २ । ६ । ७४ ॥ (यथा, देवीभागवते । १ । २० । २५ ।

"मन्थानारणिसंयोगान्मन्थनाच्च समुद्भवः ।
पावकस्य यथा तद्वत् कथं मे स्यात् सुतोद्भवः ॥")

आरम्बधः ॥ इति राजनिर्घण्टः ॥ (समुद्रमन्थनदण्डकत्वादस्य तथात्वम् । मन्दरपर्व्वतः । यथा, रामायणे । १ । ४५ । २० ।

"प्रविवेशाथ पातालं मन्थानः पर्व्वतोत्तमः ॥"

महादेवः । यथा, महाभारते । १३ । १७ । १२८ ।

"मन्थानो बहुलो वायुः सकलः सर्व्वलोचनः ॥")

मन्थानकः, पुं, (मन्थान एवेति । "एवे प्रतिज्ञातौ ।" ५ । ३ । ८६ । इति कन् ।) लशभेदः । तत्पर्य्यायः । हरितः २ कटुकन्दः ३ लशाड्ढिपः ४ । अस्य गुणाः । स्निग्धत्वम् । दोषघ्नीत्वं प्रियत्वम् । मधुरत्वम् । बहुवीर्य्यत्वञ्च । इति राजनिर्घण्टः ॥

मन्थिनी, स्त्री, (मन्थो मन्थनमस्त्यस्याम् । मन्थ + इनिः । ङीप् ।) दधिमन्थनपात्रम् । तत्पर्य्यायः । गर्गरी २ कलशी ३ । इति हेमचन्द्रः । ४ । ८८ ॥

मन्थोदधिः, पुं, (मथ्यतेऽसौ । मन्थ + कर्म्मणि घञ् । मन्थश्चासौ उदधिश्चेति । मन्थाय उदधिरिति वा ।) क्षीरसमुद्रः । इति केचित् ॥

मन्दः, पुं, (मन्दते इति । मदि + अच् ।) शनिः । (यथा, ज्योतिषे ।

"शुक्रेन्दुबुधजीवानां वाराः सर्व्वत्र शोभनाः ।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि ॥")

म्लेच्छजातिविशेषः । इति मेदिनी । दे, १३ ॥ यमः । इति चिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । १२ । १५५ ।

"तत्र मन्दमिवालोक्य साभिप्रायः स मां नृपः ।
पप्रच्छ रे किमीदृक्त्वं सञ्जातः कथयेति मे ॥")

प्रलयः । इत्यजयः ॥ (जठरानलविशेषः । यथा, हारीते चिकित्सितस्थाने ६ अध्याये ।

"तीक्ष्णः पित्ताधिकत्वेन जायते जठराग्निकः ।
वातश्लेष्माधिकत्वेन जायते मन्दसंज्ञकः ॥")

मन्दः, त्रि, (मदि + अच् ।) अतीक्ष्णः । मन्दः । (यथा, रघुवंशे । १ । ३ ।

"मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ॥")

खेदः । अभाग्यः । रोगी । अल्पः । इति मेदिनी । दे, १३ ॥ (यथा, मेघदूते । १ । ४ ।

"मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम् ॥"

आलसः । यथा, श्रीमद्भागवते । १ । १ । १० ।

"प्रायेणाल्पायुषः सभ्य ! कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥"

"मन्दाः आलसाः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

मदरतः । खलः । इति हेमचन्द्रः । ३ । ४८ ॥

मन्दगः, त्रि, (मन्दं अल्पं गच्छतीति । गम् + डः ।) मन्दगामी । यथा,—

"मन्दगाश्च शनिश्चाग्निदृष्टपङ्गुजलस्त्रियः ॥"

इति कविकल्पलता ॥

(पुं. शाकद्वीपस्थजनपदभेदः । यथा, महाभारते । ६ । ११ । ३३ ।

"तत्र पुण्या जनपदाश्चत्वारो लोकसम्मताः ।
मगास्त्र मशकाश्चैव मानसा मन्दगास्तथा ॥")

मन्दगामी, [न्] त्रि, (मन्दं गच्छतीति । गम् + णिनिः ।) मन्दगमनशीलः । तत्पर्य्यायः । मन्थरः २ । इत्यमरः । २ । ८ । ७२ ॥ खेरगामी ३ मन्दः ४ । इति शब्दरत्नावली ॥

मन्दजननी, स्त्री, (मन्दस्य शनेर्জ্জननी माता ।) शनैश्चरमाता । सूर्य्यपत्नी । इति चिकाण्डशेषः ॥

मन्दटः, पुं, (मन्दमटतीति । अट् + अच् । शकन्ध्वादित्वात् साधुः ।) पारिभद्रवृक्षः । इति शब्दरत्नावली ॥

मन्दता, स्त्री, (मन्दस्य भावः । मन्द + भावार्थे तल् । स्त्रियां टाप् ।) आलस्यम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते शारीरस्थाने ।

"दुर्म्मेधस्त्वं मन्दता च स्वप्ने मैथुनशीलता ।
निराकरिष्णुता चैव विज्ञेया याम्यवा गुणाः ॥")

मन्दत्वम् । (यथा, चन्द्रालोके । ५ । १ ।

"उच्चैरस्यति मन्दतामरसतामिति ॥"

चौर्य्यता । यथा, साहित्यदर्पणे । ३ । ६८ ।

"मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्भीमतां
दूरं यात्युदरञ्च रोमलतिका नेत्राञ्जवं धावति ॥")

मन्दनं, क्ली, (मन्दते स्तौति अनेन । मन्द् + "हृषृदृजिमन्दिनिधाञः क्युः । उणा० २ । ८१ । इति करणे क्युः ।) स्तोत्रम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

मन्दरः, पुं, (मन्द् + बाहुलकात् अरः ।) मन्थशैलः । (यथा, महाभारते । १ । १८ । १३ ।

"मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम् ॥")

मन्दारपादपः । इति मेदिनी । रे, १६६ ॥ स्वर्गः । हारभेदः । इति हेमचन्द्रः । ४ । ६६ ॥ सुस्वरः । इति शब्दरत्नावली ॥ (कुशद्वीपस्थपर्व्वतविशेषः । यथा, माघे । १२१ । ६१ ।

"मन्दरः सेव विज्ञेयः सर्व्वधातुमयः शुभः ।
मन्द इत्येष यो धातुरपार्थे प्रकाशकः ॥
अर्थं विदारणात् चैव मन्दरः स निगद्यते ॥")

मन्दरः, त्रि, (मन्द् + अरः ।) बहुलः । मन्दः । इति मेदिनी । रे, १६६ ॥

मन्दसानः, पुं, (मन्दते स्तुत्यादिकं प्राप्नोतीति मन्द् + "अर्त्तिलूधूसूखनसहिचर्त्तियजिराजिभ्यः कित् ।" उणा० २ । ८७ । इति असानच् ।) अग्निः । प्राणः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ निद्रा । इत्युणादिकोषः ॥ (त्रि, मोदमानः । यथा, ऋग्वेदे । १ । १०० । १४ ।

"मन्दसानो मरुत्वान् ।"

"मन्दसानो मोदमानः सन् ॥" इति तद्भाष्ये सायणः ॥)

मन्दसानुः, पुं, (मन्दं मन्दतां सनोति ददातीति । मन्द + सन् + बाहुलकात् उण् ।) स्वप्नः । जीवः । इति संक्षिप्तसारोणादिवृत्तिः ॥

मन्दा, स्त्री, (मन्द् + स्त्रियां टाप् ।) संक्रान्तिविशेषः । सा उत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदारोहिणीनक्षत्रेषु रविसंक्रान्तिर्यदा भवति । तस्याः सन्निहितदक्षत्रयस्य पुण्यतमत्वम् । यथा,—

"मन्दा मन्दाकिनी धांची घोरा चैव महोदरी ।
राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप ! ॥
मन्दा ध्रुवेषु विज्ञेया नन्दौ मन्दाकिनी तथा ।
क्षिप्रे धांचीं विजानीयादुग्रे घोरा प्रकीर्त्तिता ॥
चरेष्वेषोदरी ज्ञेया क्रूरेऽर्क्षेषु तु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रेऽर्क्षेषु संक्रमः ॥"

इत्येतेष्वेवादृग्रक्षेषु संक्रान्तिषु ध्रुवादिनक्षत्रयोगात् मन्दादिरूपतया सप्तधा भिन्नासु चित्रतःपक्षसप्ताष्टनवद्वादश एव च । क्रमेण घटिका श्वेतास्तु पुण्यं पारमार्थिकमिति देवीपुराण एव चित्रचतुरादिघटिकानां पुण्यत्वसूक्तम् । इति तिथ्यादितत्त्वम् ॥

मन्दार्कं, क्ली, (मन्दाते स्तूयते इति । मन्द् + बाहुलकात् आकः ।) स्तवनम् । इत्युणादिकोषः ॥ (स्रोतः । इत्युज्ज्वलदत्तः । ४ । १३ ॥)

मन्दाकिनी, स्त्री, (मन्दाकानि स्रोतांसि सन्त्यस्याः इति । मन्दाक + इनिः । यद्वा, "मन्दमकितुं शीलमस्याः । इनिः । यद्वा, मन्दान्नाः सरसः अकति गच्छतीति । नयनानन्दः ।" इत्यमरटीकायां रघुनाथचक्रवर्त्ती ।) स्वर्गगङ्गा । तत्पर्य्यायः । वियद्गङ्गा २ स्वर्नदी ३ सुरदीर्घिका ४ । इत्यमरः । १ । १ । ५२ ॥ स्वर्गङ्गा ५ देवभूतिः ६ स्वर्णपद्मा ७ सुरेश्वरी ८ । इति शब्दरत्नावली ॥ (यथा, नैषधचरिते । ६ । ८२ ।

"मन्दाकिनीनन्दनयोर्विहारे
देवे भवद्देवरि माधवे वा ।")

तस्या विवरणं यथा,—

"प्रधानधारा या स्वर्गे सा च मन्दाकिनी स्मृता।
योजनायुतविस्तीर्णा प्रस्थेन योजना स्मृता॥
क्षीरतुल्यजला शुभ्रदलबुत्पन्नतरङ्गिणी।
वैकुण्ठाद्ब्रह्मलोकञ्च ततः स्वर्गं समागता॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे जाह्नवी-जन्मप्रस्तावे ३४ अध्यायः॥*॥ संक्रान्ति-विशेषः। अस्य प्रमाणं मन्दाग्निशब्दे द्रष्टव्यम्॥
(चित्रकूटस्थनदीविशेषः। यथा, महाभारते। ३। ८५। ५८।
"ततो गिरिवरश्रेष्ठं चित्रकूटं विगाह्यते।
मन्दाकिनीं समासाद्य सर्व्वपापप्रणाशिनीम्॥"
द्वारकास्थनदीविशेषः। यथा, महाभारते। हरिवंशपर्व्वणि। १५५। २२।
"वैदूर्य्यपत्रैर्जलजैस्तथा मन्दाकिनी नदी।
भाति पुष्करिणी रम्या पूर्व्वस्यां दिशि भारत!॥"
छन्दोविशेषः। यथा, छन्दोमञ्जर्य्याम्।
"न न र र-घटिता तु मन्दाकिनी॥"
उदाहरणादिकन्तु छन्दःशब्दे द्रष्टव्यम्॥)

मन्दाक्रान्ता, स्त्री, (मन्दं यथा तथा आक्रान्ता।) छन्दोविशेषः। यथा,—
"चत्वारः प्राक् सुतनु गुरवो ह्यौ दशैकादशौ चे-च्छुद्धौ वर्णौ तदनु कुसुदाम्नोदिनि! द्वादशान्त्यौ।
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते! विरामो मन्दाक्रान्तां प्रवरकवयस्तत्र तां संगिरन्ते॥"
इति श्रुतबोधः॥
(अस्याक्रान्ता। यथा,—
"मन्दाक्रान्ता वितरति रसं नेक्षुयष्टिः समग्रम्॥"
इत्युद्भटः॥)

मन्दाक्षं, क्ली,(मन्दे सङ्कुचिते अक्षिणी नेत्रे यस्मात्। "अक्ष्णोऽदर्शनात्।"५। ४। ७६। इति समासान्तः अच्।) लज्जा। इत्यमरः। १।७।२३॥
(यथा, नैषधचरिते। ३। ६१।
"मन्दाक्षमन्दाक्षरसप्रसक्ता
तस्यां समाकुञ्चितपक्ष्मणापि हंसः।
तच्छंसिते किञ्चन संशयालु-
र्गिरा सुधाम्भोजमयं युयोज॥")

मन्दाग्निः, पुं, (मन्दः पाचनासमर्थोऽग्निरवग्नि-र्येति।) कफद्वाराप्यजठरानलः। तस्य निदा-नादि यथा,—
"मन्दस्त्वग्निरथ विषमः समश्चेति चतुर्व्विधः।
कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः॥
विषमो वातजान् रोगान्तीक्ष्णः पित्तसमुद्भ-वान्।
करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान्॥
समो समाग्निरुचितां मात्रां सम्यग्विपच्यते।
अल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः।
कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते॥"
इति माधवकरः॥*॥

तस्यौषधं यथा,—

"चित्रकस्याष्टभागानि शूरणस्य च षोड्श।
शुण्ठ्याश्चत्वारि भागानि मरीचानां द्वयं तथा॥
पिप्पली पिप्पलीमूलं विड्ङ्गानां चतुष्टयम्।
अष्टौ सुनलिभागाश्च त्रिफलायाश्चतुष्टयम्॥
द्विगुणेन गुडेनैषां मोदकानि हि कारयेत्।
तद्भक्षणमजीर्णं हि प्राक्षुरोगञ्च कामलाम्।
अतिश्रोणितमन्दाग्निप्लीहाद्यञ्च निवारयेत्॥"
इति गारुडे १८८ अध्यायः॥*॥

अथ जठराग्निविकाराधिकारः। तत्र सन्नि-दानपूर्व्वकान् उदराग्निविकारानाह।
"कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः।
मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्व्विधः॥"
तत्र मन्दस्याग्नेर्लक्षणमाह।
"स्वल्पापि नैव मन्दाग्नेर्मात्रा सुक्तापि पच्यते।
हृद्दिदाहः प्रसेकः स्याच्छिरोगौरवजाठरम्॥"
मन्दाग्निजन्यान् विकारानाह।
"मन्दोऽग्निर्देहिनां कुर्य्याद्विकारान् कफसम्भ-वान्॥"*॥

अथ चिकित्सा।
"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुडेन वा।
सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी॥१॥
गुडेन शुण्ठीमथवोपकुल्यां
पथ्याष्टतीयामथ दाडिमं वा।
आमेष्वजीर्णेषु गुडामयेषु
वर्च्चोविबन्धेषु च नित्यमद्यात्॥२॥
योषं दन्ति चित्रचित्रं क्षाराम्लं विचूर्णितम्।
तच्चूर्णं गुडसंमिश्रं भक्षयेत् प्रातरुत्थितः॥
एतद्गुडाष्टकं नाम बलवर्णाग्निवर्द्धनम्।
ग्रीवोदावर्त्तशूलघ्नं प्लीहपाण्डामयापहम्॥"
सर्व्वचूर्णसमो गुडो देयः। गुडाष्टकम्॥३॥
"दहनाजमोदसैन्धवनागरमरिचानि चाम्ल-वेतसकम्।
सप्ताहादग्निकरं पाण्डुरोगाग्निघ्नं परमम्॥"*॥
वैश्वानरः चारः।
"सामुद्रलवणं व्याघ्रमरटकर्षमितं बुधैः।
सौवर्चलं पञ्चकर्षं विड्सैन्धवधान्यकम्॥
पिप्पली पिप्पलीमूलं पत्रकं क्षाराजीरकम्।
ताक्षीरं केशरं चव्यमम्लवेतसकं तथा।
द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्-बुधः॥५॥
मरिचं जीरकं विश्वमेकैकं कर्षमात्रकम्।
दाडिमं स्याच्चतुष्कर्षं त्वगेले वाष्टकर्षके।
एतच्चूर्णीकृतं सर्व्वं लवणं भास्कराभिधम्॥
भक्षयेच्छ्लक्ष्णमानं तत् तक्रमस्तुकाक्षिकैः।
वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षयम्॥
अर्शांसि ग्रहणीं कुष्ठं विबन्धञ्च भगन्दरम्।
शूलं ग्रीथं श्वासकासावामदोषञ्च हृद्रुजम्॥
अश्मरीं शर्करां चापि पाण्डुरोगं ह्लमीनपि।
मन्दाग्निं नाशयेदेतद्दीपनं पाचनं परम्॥
हिताय सर्व्वलोकानां भास्करेणेतदीरितम्।
हन्यात् सर्व्वाण्यजीर्णानि सुक्तमात्रमसंशयम्॥

निम्बुरसादिकं दत्त्वा गुटिकामप्येके कुर्व्वन्ति॥६॥
टङ्कणं रसगन्धौ च समं भागं त्रयं विषात्।
कर्षैः सर्ज्जिकाक्षारो मागधी विश्वभेषजम्॥
एषां पृथक् पृथक् कर्षमात्रं वसुभागमिङ्गोद्भवम्।
जम्बीराम्लैर्दिनं पृष्टं भवेदग्निकुमारकः॥
विशुचीशूलवातादिवह्निमान्द्यप्रशान्तये॥"
चारो यवक्षारः। अग्निकुमारो रसो विष्ण आद्यजीर्णे॥७॥
"पारदान्तलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितम्।
तत्र जातिफलमर्द्धभागिकं
तिन्तिड़ीफलरसेन मर्द्दितम्॥
वह्निमान्द्यदधवक्त्रनाशनो
रामबाण इति विश्रुतो रसः।
संग्रहग्रहणिकुम्भकर्णकं
सामवातखरदूषणञ्जयेत्॥
दीयते तु चणकानुमानतः
सद्य एव जठराग्निदीपनः।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः॥"८॥
पारदभागः १ विषभागः १ लवङ्गभागः १ गन्धकभागः १ मरिचभागः २ जातीफलभागः १०। रामबाणो रसोऽजीर्णे। इति भाव-प्रकाशः॥ (विवरणमस्य यथा,—
"अग्निश्चतुर्व्विधः प्रोक्तः समो विषमतीक्ष्णकः।
मन्दश्चादपरः प्रोक्तः प्रायश्चिह्नानि साम्यतम्॥
वातपित्तकफे साम्यात् समत्वं जायतेऽनलः।
तैरेव विषमं प्राप्ते विषमो जायतेऽनलः॥
तीक्ष्णः पित्ताधिकत्वेन जायते जठराग्निकः।
वातश्लेष्माधिकत्वेन जायते मन्दसंज्ञकः॥"
इति हारीते चिकित्सितस्थाने षष्ठेऽध्याये॥
"अग्निमन्थं पिबेदुष्णं हिङ्गुसौवर्चलान्वितम्।
विषमोऽपि समस्तेन मन्दो दीप्येत पावकः॥"
"सिन्धूत्थहिङ्गुत्रिफलाश्यमानी-
योवेगुड़ाग्नेर्गुड़िकां प्रकुर्य्यात्।
तैर्भक्षितैस्तृन्निमवाप्नुवन्ना
भुञ्जीत मन्दाग्निरपि प्रभूतम्॥"
इति वैद्यकचक्रपाणिसंग्रहेऽग्निमान्द्याधिकारे॥
मन्दः अग्निर्यस्येति। अल्पाग्निविशिष्टे, त्रि। यथा, मार्कण्डेये। १५। १३६।
"सोऽजीर्णव्याधिदुःखार्त्तो मन्दाग्निः संप्र-जायते।
परनिन्दा कृतघ्नत्वं परमस्मावहन्नम॥")

मन्दायुः, [स्] त्रि, (मन्दमल्पमायुर्यस्य।) अल्पायुः। यथा, श्रीभागवते। १। १६। १०।
"मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै।
निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्म्मभिः॥"

मन्दारः, पुं, (मन्यते स्तूयते प्रशस्यते वेति। मदि +"अङ्गिमदिमन्दिभ्य आरन्।" उणा० ३। १३४। इति आरन्।) स्वर्गीयपञ्चवृक्षान्त-र्गतदेवतरुविशेषः। यथा, अमरकोषे। १।१।५३।
"पञ्चैते देवतरवो मन्दारः पारिजातकः।

सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्॥"
(यथा, अभिज्ञानशाकुन्तले ७ अङ्के।
"अन्तर्गतप्रार्थनमन्तिकस्थं
जयन्तमुद्दीप्य ऋतक्रतिन।
आनन्दयत्वीहरिचन्दनाङ्गा
मन्दार-माला हरिणा पिनद्धा॥")
पारिभद्रवृक्षः। पालिता मादार इति भाषा।
यथा, अमरकोषे। २। ४। २६।
"पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः॥"
आकन्दवृक्षः। आकन्द इति भाषा। यथा,—
"अर्काकन्दसुकाक्षोतगणरूपविकीरणाः।
मन्दारार्कपर्णेश्च शुक्लेऽलर्कप्रतापसौ॥"
इत्यमरः। २। ४। ८१॥
दुष्टः। धूर्तः। इति मेदिनी। रे, १६०॥
लोध्रविशेषः। यथा,—
वराह उवाच।
"शृणु सुन्दरि! यत्नेन यस्मात् त्वं परिपृच्छसि।
कथयिष्यामि ते गुह्यं मन्दारस्य महाक्रियाम्॥
क्रीड़मानोऽहमाकाशे तत्र दृष्ट्वा मन्दारपुष्पितम्।
मन्दारपुष्पमादाय मनोज्ञं न्यस्य वै क्षुदि॥
तत्रैकादशशृङ्गाणि निःसृतानि गिरौ धरे।
विन्ध्ये च मत्प्रभावेन मन्दारस्य महाद्रुमः॥
स्थितोऽहं तत्र सुश्रोणि! भक्तानुग्रहकाम्यया।
दृश्यनीयतमं स्थानं मनोज्ञं तु शिलातलम्॥
यत्र तिष्ठाम्यहं देवि! मन्दारद्रुममास्थितः।
विस्मयं शृणु सुश्रोणि! मन्दारेऽस्मिन् द्रुमे तथा॥
द्वादश्याञ्च चतुर्दश्यां स पुष्यति द्रुमोत्तमः।
तत्र मध्याह्नवेलायां वीक्षमाणो जनैस्ततः।
ततोऽन्यदिनमासाद्य दृश्यते न कदाचन॥
तस्मिन् मन्दारकुञ्जे तु एकभक्तोषितो नरः।
स्नानं करोति शुद्धात्मा स गच्छेत् परमां
गतिम्॥
अथ प्राणान् प्रमुञ्चेत कुञ्जे मन्दारसंस्थिते।
तपः कृत्वा वरारोहे! मम लोकाय गच्छति॥
तस्य चोत्तरपार्श्वे तु प्रापणं नाम तं गिरिम्।
तिस्रोधाराः पतन्त्यत्र दक्षिणां दिशमाश्रिताः॥
स्नानकुञ्जमिति ख्यातं तस्मिन् चैत्रे परं मम।
दक्षिणे पतते धारा अवते चोत्तरासुखम्॥
तत्र स्नातो वरारोहे! एकरात्रोषितो नरः।
मोदते दक्षिणे शृङ्गे तस्मिन् मेरौ शिलोच्चये॥
तत्राथ सृजते प्राणान् मम कर्म्मपरायणः।
सर्व्वं सङ्गं परित्यज्य मम लोकं प्रपद्यते॥
नाकपृष्ठं समासाद्य मोदते देवतैः सह।
तत्रापि सृजते प्राणान् कृतकृत्यः सुनिश्चितः।
तारयित्वा कुलं सर्व्वं मम लोकं प्रपद्यते॥
तस्य दक्षिणपूर्व्वेण समश्रोतो वराङ्गने!।
पतते विन्ध्यशृङ्गेषु अगाधश्च महाह्रदः॥
तत्र स्नानन्तु यः कुर्य्यादेकभक्तोषितो नरः।
मोदते पूर्व्वपार्श्वे तु तस्मिन्मेरौ शिलोच्चये॥
अथात्र सृजते प्राणान् मम चित्तव्यवस्थितः।
छित्त्वा वै सर्व्वसंसारं मम लोकाय गच्छति॥
मन्दारस्य तु पूर्व्वेण गुह्यं कोटरसंस्थितम्।
यत्र धारा पतत्येका सुबलेन समन्विता॥
तत्र स्नानं प्रकुर्व्वीत पञ्चभक्तोषितो नरः।
मोदते पूर्व्वपार्श्वे तु तस्मिन् मेरौ शिलोच्चये॥
तत्राथ सृजते प्राणान् कृत्वा कर्म्म सुदुष्करम्।
मेरुशृङ्गं समुत्सृज्य मम लोकञ्च गच्छति॥
तस्य दक्षिणपार्श्वे तु गुह्यं विन्ध्यविनिःसृतम्।
पञ्च धाराः पतन्त्यत्र सुबलेन समन्विताः॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः।
मोदते दक्षिणे शृङ्गे महामेरौ शिलोच्चये॥
अथात्र सृजते प्राणान् कृत्वा कर्म्म सुदुष्करम्।
मेरुशृङ्गं परित्यज्य मम लोकं प्रपद्यते॥
दक्षिणे पश्चिमे भागे मन्दारस्य यशस्विनि!।
तत्र धारा पतत्येका आदित्यसमतेजसा॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः।
मोदते पश्चिमे भागे ध्रुवो यत्र प्रवर्त्तते॥
अथात्र सृजते प्राणान् मम कर्म्मव्यवस्थितः।
सर्व्वपापविनिर्मुक्तो मम लोके च मोदते॥
तस्य पश्चिमपार्श्वे तु गुह्यं देवसमन्वितम्।
चक्रावर्त्त इति ख्यातमगाधश्च महाह्रदः॥
स्नानं करोति यस्तत्र पञ्चभक्तोषितो नरः।
मोदते सर्व्वशृङ्गेषु स्वच्छन्दगमनालयः॥
अथ वै सृजते प्राणान् चक्रावर्त्ते महायशाः।
शृङ्गान् सर्व्वान् परित्यज्य मोदते मम सन्निधौ॥
देहं वायवयमाश्रित्य तस्मिन् विन्ध्यशिलोच्चये।
तिस्रो धाराः पतन्त्यत्र सुबलाङ्गतयः शुभाः।
तत्र स्नानं प्रकुर्व्वीत मम चित्तव्यवस्थितः।
मोदते सर्व्वशृङ्गेषु एकचित्तसमाश्रितः।
तथात्र सृजते प्राणांश्चास्मिन् गुह्ये यशस्विनि!।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति॥
तस्य त्रिक्रोशमात्रेण दक्षिणां दिशमाश्रितः।
गुह्यं गम्भीरकं नाम अगाधश्च महाह्रदम्॥
तत्र स्नानन्तु कुर्व्वीत अष्टभक्तोषितो नरः।
मोदते सर्व्वद्वीपेषु सर्व्वत्र गमनालयः॥
अथैव सृजते प्राणान् मम कर्म्मव्यवस्थितः।
सर्व्वद्वीपान् परित्यज्य मम लोकं प्रपद्यते॥
तस्य पश्चिमपार्श्वे तु गुह्यं मे परमं महत्।
सप्त धाराः पतन्त्यत्र अगाधश्च महाह्रदः॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः।
मोदते शुक्रलोकन्तु स्वच्छन्दगमनालयः॥
अथ वै सृजते प्राणान् स्वकर्म्मपरिनिष्ठितः।
सर्व्वसङ्गं परित्यज्य मम लोकं प्रपद्यते॥
मण्डलं तस्य क्षेत्रस्य कथ्यमानं मया शृणु।
स्वमन्त्रपञ्चकञ्चैव मन्दारस्य गिरौ मम॥
तत्र तिष्ठामि सुश्रोणि! विन्ध्यस्य गिरिमूर्द्धनि।
मन्दारे परमं गुह्यं तस्मिन् गुह्यशिलोच्चये॥
दक्षिणे संस्थितं चक्रं वामे स्थाने च वै गदा।
लाङ्गलं सुबलञ्चैव शृङ्गं तिष्ठति चाग्रतः॥
य एतत् शृणुयान्नित्यं गुह्यं मन्दारसंहितम्।
तस्य चैव प्रियार्थाय मम भक्तसुखावहम्॥
एतन्न जानते कश्चिन्मम मायाविमोहितः।
सुपक्व भागवतान् शुद्धान् ये च वाराहसंश्रितान्॥"

इत्यादि वाराहपुराणे भगवच्छास्त्रे मन्दारगुह्यवर्णनं नामाध्यायः॥

मन्दास्यं, क्ली, (मन्दं आस्यमस्यादिति।) लज्जा। इति शब्दरत्नावली॥

मन्दिकुक्कुरः, पुं, मत्स्यविशेषः। इति भूरिप्रयोगः॥ अत्यत्रापरे मल्लिकुक्कुरोऽपि पाठः॥

मन्दिरं, क्ली, (मन्यते शुध्यतेऽत्र मन्यते स्तूयते इति वा। मदि ङ स्वप्ने स्तुतौ + "इषि मदिमुदीति।" उणा० १।१५२। इति किरच्।) गृहम्। इत्यमरः। २। २। ५॥ "मन्यते शुध्यतेऽत्र मन्दिरम्। मदि ङ स्वप्ने जाड्ये मदे मोदे स्तुतौ गतौ गान्त्रीति ईरः। नगरं मन्दिरं पुरमिति पुंनपुंसकयोरुदयेन पठ्यते। स्त्रियां मन्दिरा च प्रयोगश्च मन्दिरायाश्चरावानिति मधुसूकुटादयः।" इति तट्टीकायां भरतः॥*॥

अथ भगवन्मन्दिरनिर्म्माणमाहात्म्यम्।

"यः कारयेन्मन्दिरं केशवस्य
पुण्यांल्लोकान् स जयेच्छाश्वतान् वै।
दत्त्वावासान् पुण्यफलाभिपन्नान्
भोगान् सुरक्ते कामतः प्रार्थनीयान्॥
आसप्तमं पितृकुलं तथा मातृकुलं नरः।
तारयेदात्मना सार्द्धं विष्णोर्मन्दिरकारकः॥
ऋषयश्च पितरो देवगाथा गायन्ति योगिनः।
पुरतो यदुसिंहस्य स्वनवस्य तपस्विनः॥
अपि नः स्वकुले कश्चिद्विष्णुभक्तो भविष्यति।
हरिमन्दिरकर्त्ता यो भविष्यति सुचिव्रतः॥"
इति वामने ग्रैषाध्यायः॥*॥

अपि च। अग्निपुराणे।

"ये ध्यायन्ति सदा बुद्ध्या करिष्यामो हरेर्गृहम्।
तेषां विलीयते पापं पूर्व्वजन्मशतोद्भवम॥"

किञ्च।

"समतीतं भविष्यञ्च कुलानामयुतं नरः।
विष्णुलोकं नयत्याशु कारयेद्धा हरेर्गृहम्॥"

किञ्च।

"लक्षेणाथ सहस्रेण शतेनार्द्धेन वा हरेः।
तुल्यं फलं समाख्यातमिहैश्वरदरिद्रयोः॥"

विष्णुधर्म्मोत्तरे तृतीयकाण्डे।

"कृत्वा वासगृहं तस्य देवस्य परमेष्ठिनः।
राजसूयाश्वमेधानां फलेन सह युज्यते॥
प्रासादे दक्षमये पुण्यं मयैतत् कथितं द्विजाः
तस्माद्दारुमये पुण्यं कृते शतगुणं भवेत्॥
ततो दशगुणं पुण्यं तथा शैलमये भवेत्।
ततो दशगुणं लौहे ताम्रे शतगुणं ततः॥
सहस्रगुणितं रौप्ये तस्मात् फलमवाप्नुते।
ततः शतसहस्रं वै सौवर्णे द्विजसत्तमाः॥
अनन्तं फलमाप्नोति रत्नचित्रे मनोहरे॥"

स्कान्दे।

"आरम्भे कृष्णधिष्ण्यस्य सप्तजन्मनि यत् कृतम्।
पापं विलयमाप्नोति नरकादुद्धरेत् पितॄन्॥
प्रासादपादे कृष्णस्य यावत्तिष्ठन्ति रेणुकाः।

तावद्वर्षसहस्राणि वसते विष्णुसद्मनि ॥
प्रासादे क्षणदेवस्य चित्रकर्म्म करोति यः ।
वसते विष्णुलोके तु यावत्तिष्ठन्ति सागराः ॥"
नारसिंहे ।
"यः कुर्य्याच्छोभनं वेश्म नरसिंहस्य भक्तिमान् ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोकमवाप्नुयात् ॥"
हयशीर्षे ।
"देवागारं करोमीति मनसा यस्तु चिन्तयेत् ।
तस्य कायगतं पापं तदह्ना विप्र ! नश्यति ।
कृते तु किं पुनस्तस्य प्रासादे विधिनैव तु ॥
अष्टैश्वर्यसमायुक्तं यः कुर्य्याद्वेश्मवं गृहम् ।
न तस्य फलसम्पत्तिर्व्वक्तुं शक्यते केनचित् ॥
अनेनैवानुमेयन्तु फलं प्रासादविस्तरात् ।
मरणञ्च व्रजेन्मर्त्यो यः कृत्वा प्रथमेष्टकाम् ॥
स समग्रस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥"
विष्णुरहस्ये ।
"बाल्ये च क्रीड़माना ये पांशुभिर्भवनं हरेः ।
वासुदेवस्य कुर्व्वन्ति तेऽपि तल्लोकगामिनः ॥"
आदिपुराणे ।
"लेपनाच्छादनैश्चैव यः करोति पुनर्नरः ।
देवस्यायतनं कृत्वा न भवेत् कीटजं भयम् ॥"
अथ मन्दिरनिर्म्माणकालः । मात्स्ये ।
"चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्येष्ठे स्वं तथैव च ॥
आषाढ़े भृत्यरत्नानि पशुवर्ग्गमवाप्नुयात् ।
श्रावणे मित्रलाभन्तु हानिं भाद्रपदे तथा ॥
पत्नीनाशश्चाश्वयुजे कार्त्तिके धनधान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करजं भयम् ॥
लाभन्तु बहुशो विद्यादग्निं माघे विनिर्द्दिशेत् ॥
काञ्चनं फाल्गुने पुत्रानिति कालबलं स्मृतम् ।
अश्विनी रोहिणी मूलमुत्तरा-त्रयमैन्द्रवम् ॥
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ।
आदित्यभौमवर्ज्जञ्च सर्व्वे वाराः शुभावहाः ॥
वज्रव्याघातमूलानि यतीपातातिगण्डके ।
विष्कम्भगण्डपरिघान् वर्ज्ज्यं योगेषु कारयेत् ॥
श्वेतमैत्रे च माहेन्द्रे गान्धर्व्वाभिजिदौहिणे ।
तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत् ॥
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायं प्रकर्त्तव्यमन्यत्र परिवर्ज्जयेत् ॥"
हयशीर्षे ।
"वास्तुकर्म्म न चारभ्यं वर्षाकाले विजानता ।
कृष्णपक्षे त्रिभागान्ते शुक्लपादौ द्वितीयके ॥
चतुर्थी नवमी वर्ज्ज्या तिथिश्चापि चतुर्दशी ।
भौमस्य तु दिनं वर्ज्ज्यं करणं विष्टिसंज्ञितम् ॥
चित्यन्तरीक्षदिग्दोषैर्व्यालैर्भयपीड़ितम् ।
उपसृष्टं ग्रहैर्भग्नं यतिघ्नतहतं तथा ॥
चन्द्रताराबलोपेते च कार्य्यं कर्म्म विजानता ।
ध्रुवाणि चात्र भस्तानि नैर्ऋतं शुक्रदैवतम् ॥
पुष्यं पौष्णञ्च सावित्रं वायव्यं वैष्णवं तथा ।
स्थिरांशे च स्थिरे लग्ने कर्त्तुश्चोपचयात्मके ॥
केन्द्रे सौम्यग्रहो यस्य त्रिकोणे तु सुरोत्तम ! ।
पापश्चोपचयस्थाने तदा कार्य्यं समारभेदिति ॥"

अथ प्रासादस्थानम् । हयशीर्षे ।
"पूर्व्वं देवकुलं पश्चाच्च प्रासादं खण्डकन्तथा ।
समं वाप्यधिकं वापि न कर्त्तव्यं विजानता ॥
उभयोर्द्विगुणां सीमां त्यक्त्वा चोच्छ्रायसंमिताम् ।
प्रासादं कारयेदन्यं नोभयं पण्डितो बुधः ॥"*॥
अथ स्थानशोधनानि । देवीपुराणे ।
"देवो विष्णुस्तथा रुद्रो ब्रह्माद्याः सुरसत्तमाः ।
प्रतिष्ठाप्याः शुभे स्थाने अन्यथा ते भयावहाः ॥
गन्धर्व्वादिलक्षणा धात्री गन्धखादेन या भवेत् ।
वर्णेन च सुरश्रेष्ठ ! सा मही सर्व्वकामदा ॥"
मात्स्ये ।
"पूर्व्वं भूमिं परीक्षेत पश्चात् वास्तुं प्रकल्पयेत् ।
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ॥
विप्रादेः प्रस्थते भूमिरतः कार्य्यं परीक्षणम् ।
विप्राणां मधुरास्वादा कषाया क्षत्रियस्य च ॥
कषाये कटुता तद्वद्वैश्यमूद्रेषु प्रस्थते ।
अरत्निमात्रे वै गर्त्ते खनुलिप्ते च सर्व्वतः ॥
पूरयेत्सामग्ररावस्थं कृत्वा वर्त्तिचतुष्टयम् ।
ज्वालयेद्भूपरीचार्थं पूर्णे तत् सर्व्वदिङ्मुखम् ॥
दीप्ता पूर्व्वादि यद्वीर्याद्वर्णानामनुपूर्व्वशः ।
वास्तुः सम्महिको नाम दीप्यते सर्व्वतस्तु यः ॥
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।
अरत्निमात्रकं गर्त्तं परीक्ष्यं खातपूरणे ॥
अधिके श्रियमाप्नोति न्यूने हानिं समे समम् ।
कालकृष्टेष्वथो देशे सर्व्वबीजानि रोपयेत् ॥
विपच्यन्तेऽराजेय यत्र रोहन्ति तान्यपि ।
ज्येष्ठा मध्या कनिष्ठा भूर्व्वर्ज्जनीयेतरा सदा ॥"
हयशीर्षे ।
"सुरभीणां रतिर्यत्र सवत्सानां दृषैः सह ।
सुन्दरीणां रतिर्यत्र पुरुषैः सह सत्तम ! ॥
राज्ञां पूर्व्वं गृहं यस्यामन्यासां यच्चिनां तथा ।
काश्मीरचन्दनामोदा कर्पूरागुरुगन्धिनी ॥
कमलोत्पलगन्धा च जातीचम्पकगन्धिनी ।
पाटलामल्लिकागन्धा नागकेशरगन्धिनी ॥
दधिक्षीराज्यगन्धा च मदिरासवगन्धिनी ।
सुगन्धिस्नेहिगन्धा च शुभद्रव्यखना च या ॥
सर्व्वेषां वर्णिनां भूमिः सर्व्वसाधारणा मता ।
दुर्गन्धा दुःखना या च नानावर्णा च दुर्भगा ॥
वृत्तार्द्धचन्द्रसदृशा विस्तारादद्विगुणायता ।
विवर्णा वर्णहीना च वक्रा शुचिसुखी तथा ॥
द्विवर्णा सूर्पसदृशी गोमुखी च चिकोलिका ।
वड़वा मूलसदृशी दन्तिपृष्ठोपमा च या ॥
सरीसृपसमा या च दिङ्मुखा शकटाकृतिः ।
एवं प्रकारा या भूमिर्व्वर्ज्या यत्नेन देशिकैः ॥"
किञ्च ।
"प्रासादस्य विशेषेण प्रोक्ता भूमिश्चतुर्व्विधा ।
सुपद्मा भद्रिका पूर्णा धूम्रा रागिण्यथापरा ॥
तिलकैर्नारिकेलैश्च बहिःकाष्ठैश्च शोभिता ।
पद्मेन्दीवरसंयुक्ता सा सुपद्मेति विश्रुता ॥
नदीसमुद्रायतनतीर्थपर्य्यन्तशोभिता ।
पुष्पवृक्षसमाकीर्णा चीरवृक्षोपशोभिता ॥
वनोद्यानलतागुल्मफुल्लसम्बसमावृता ।
यज्ञीयवृक्षसुक्षेत्रयुक्ता भद्रेति कीर्त्तिता ॥
बकुलाशोकबहुला तथा म्लक्षाम्रलोहिते: ।
माधवीवेष्टिता या च सुन्नग्रिग्धावकोदवैः ।
सूकधान्यैश्च पुन्नागैरिपार्श्वगता च या ।
तोयैश्च खण्डकं यस्यां सा पूर्णा परिकीर्त्तिता ॥
विल्वार्कस्नुहिपीलूनां वनैर्य्या परितो वृता ।
सशर्करा च कठिना युक्ता कण्टकिभिर्द्रुमैः ॥
गृध्रगोमायुकाकानां श्येनानां या कुलाकुलैः ।
धूम्रेति कीर्त्तिता सा तु तां यत्नात् परिवर्ज्जयेत् ॥
ततो भूमिं परीक्षेत पूर्व्वोदक्प्लवनां शुभाम् ।
असङ्कटां तथाच्छन्नामक्षतोयां परिप्लुताम् ॥
संपूर्य्यमाणे खाते तु तथाधिकन्तदं शुभाम् ।
कुसुम्भसदृशं वर्णं यस्यां न म्लानिरुच्यते ॥
न निर्व्वाति तथा दीपस्तोयं स्नेहं न शोषयते ।
श्वेतारुणा पीतकृष्णा विप्रादीनां प्रशस्यते ॥
आढ्यसन्नम्यमानां तुल्यगन्धा तु या भवेत् ।
मधुरा च कषाया च अम्ला च कटुका च या ॥
कृष्णैः शरैस्तथा काशैः दूर्व्वाभिर्या च संवृता ।
तस्यां पुण्येऽथ नक्षत्रे कुर्य्याद्भूमिपरिग्रहम् ॥"
अथ भूमिपरिग्रहः । तत्रैव ।
"प्राकारसीमापर्य्यन्तं ततो भूतबलिं हरेत् ।
मांसं हरिद्राचूर्णञ्च सलाजदधिशक्तवः ॥
एभिर्भूतबलिं दत्त्वा क्षत्रमष्टाचरेत्तु ।
पातयित्वा ततः शङ्कूनष्टदिक्षु निवेशयेत् ॥
राक्षसाश्चापि भूताश्च ये चात्रोच्छिष्टभूतले ।
ते सर्व्वे अपगच्छन्तु स्थानं कुर्य्यामहं हरेः ॥
इत्युक्त्वाप्य भूतादीन् तां भूमिं परिशोधयेत् ।
आदित्यादित्यहाराश्च लोकपालैः समं क्षती ॥
आर्य्यमिष्टविधानेन ततो वै होममाचरेत् ।
चतुर्हस्तं ततः कुर्य्याद्भूलमण्डलं देशिकः ॥
दद्यात् पूर्णाहुतिं पश्चाद्वौषट्कृत्तेन देशिकः ।
वृषभौ कपिलौ यज्ञे सवर्णौ वा विचक्षणः ।
योजनार्थं हलस्यैव ग्रहीयादनोद्भवम् ॥
प्राङ्मुखं योज्य मन्त्रज्ञो वस्त्रालङ्कारभूषितः ।
आसनीं यष्टिमादाय द्वादशाक्षरविद्यया ॥
संमर्द्दनं समीकृत्य शुभबीजानि वापयेत् ।
संप्राप्ते शुभकाले तु गोभिस्तत् खादयेद्बुधः ।
पुनस्तं कर्षयित्वा तु समीकृत्य गृहं गुरुः ॥"
मात्स्ये च ।
"हीनाधिकां गतां वास्तोः सर्व्वतः परिवर्ज्जयेत् ।
नगरग्रामदेशेषु सर्व्वत्रैव विवर्ज्जयेत् ॥"* ॥
अथ दिक्साधनम् । हयशीर्षे ।
"बाह्यवास्तु समं कृत्वा चतुरस्रं समन्ततः ।
भूमिं तोयसमां कृत्वा दर्पणोदरसन्निभाम् ॥
द्वादशाङ्गुलमानेन चार्द्धे वारांस्तु भ्रामयेत् ।
मध्ये सुनिश्चलं शङ्कुं स्थाप्य च्छायां निरीक्षयेत् ॥
प्रवेशे निष्क्रमे तस्यां शङ्कुच्छायां निरूपयेत् ।
वेधवे विमले योग्नि शङ्कुना साधयेद्दिशम् ॥
ग्रहसन्तयोरेवमादित्यात् साधयेद्दिशम् ।
प्राचीं वा पुष्पवेधेन चित्रामन्तरेण वा ॥

उदीचीं ध्रुववेधेन मध्ययोगेन चोन्नयेत् ।
चतुरस्रां शिलां यस्य दृषदं वा सुशोभनाम् ॥
चतुर्दिक्षु निवेश्याथ स्रुवचिह्नन्तु कारयेत् ।
एवं कृत्वा स्रुवचिह्नं ब्राह्मणांस्तत्र भोजयेत् ।
वेदज्ञान् पायसेनान्नान् दारग्रहैव समाहितः ॥"
अथ ग्रहोद्धरणम् । मात्स्ये ।
"यद्गारभेति कर्कृतिः स्वाग्नेयं यत्र जायते ।
ग्रहस्तत्पतनेत्तत्र प्रासादे भवनेऽथवा ।
सग्रहं भयदं यस्मादग्रहं भयनाशनम् ॥"
हयशीर्षे ।
"आदित्येद्वास्तुनः ग्रहं यद्दिशोऽङ्गविकारतः ।
ग्रहणो दृश्यते वापि यस्य वा श्रूयते ध्वनिः ।
कीर्त्यते यस्य वै नाम ग्रहं तस्य विनिर्दिशेत् ॥"
अथ वास्तुमण्डलम् । मात्स्ये ।
"पञ्चगव्यौषधिजलैः परीक्षित्वावसेचयेत् ।
एकाशीतिपदं कुर्याद्रेखाभिः कनकेन तु ॥
पञ्चाशेषेण चालिख्य सूत्रैर्बाह्यांश्च सर्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ॥
सर्ववास्तुविभागेषु विज्ञेया नवका नव ।
एकाशीतिपदं ज्ञात्वा वास्तुवित् सर्ववास्तुषु ॥
पदस्थान् पूजयेद्देवान् त्रिंशत् पञ्चदशैव च ।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्यास्तान्ते जयोदश ।
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोध मे ।
ईशकोणादिषु सुरान् पूजयेच्च विधानतः ॥
शिखी चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः ।
सूर्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगाः पितृगणास्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोषपापौ च रोगोऽहिर्मुख्य एव च ॥
भल्लाटः सोमसूर्य्यौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु सदन्तश्च सुरान् शृणु ॥
ईशानादिचतुष्कोणे संस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ॥
मध्ये नवपदो ब्रह्मा तस्यार्द्धौ च समीपगाः ।
सर्वानेकोत्तरान् विद्यात् पूर्व्वादीन्नामतः शृणु ॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ॥
अष्टमञ्चापवत्सञ्च परितो ब्रह्मणः स्मृताः ।
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्वतः ।
आपश्चैवापवत्सश्च पर्ज्जन्योऽग्निर्दितिस्तथा ॥
पदिकाश्च वर्गोऽयमेवं कोणेष्वप्येवतः ।
तस्मध्ये तु बहिर्व्विंशद्द्विपदास्ते तु सर्वतः ॥
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्वतः ॥
वंशानिदानीं वक्ष्यामि रज्जूरपि पृथक् पृथक् ।
यामं यावत्तथा रोगात् पितृभ्यः शिखिनस्तथा ॥
सुखाद्भृशं तथा शोषाद्दितिं यावदेव तु ।
सुग्रीवाददितिं यावत् भृङ्गात् पर्ज्जन्यमेव च ॥
एते वंशाः समाख्याताः क्वचिदन्यत्र एव तु ।
एतेषां यस्तु सम्पातः पदमर्ध्वं समं तथा ॥
समं चैतत् समाख्यातं त्रिमूलं कोणगञ्च यत् ।
स्तम्भासेषु वक्ष्यामि तुलाविधिषु सर्व्वदा ॥
कीलोत्तरशेषधारादि वर्ज्जयेद्यत्नतो नरः ।
सर्वत्र वास्तुनिर्द्देशः पितृवंशोत्तरायतः ॥
मूर्द्धन्यग्निः समाविष्टो मुखे चापः समाश्रितः ।
पृथ्वीधरोऽर्य्यमा चैव स्तनयोस्तावधिष्ठितौ ॥
वक्षःस्थले चापवत्सः पूजनीयः सदा बुधैः ।
नेत्रयोर्द्दितिपर्ज्जन्यौ श्रोत्रे दितिजयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ तु पूजनीयौ प्रयत्नतः ।
सूर्य्यः सोमाद्यस्तद्दाहौ पञ्च च पञ्च च ॥
रुद्रश्च राजयक्ष्मा च वामहस्तं समाश्रितौ ।
सावित्रः सविता तद्वद्दक्षिणमाश्रितौ ।
विवस्वानथ मित्रश्च जठरे संश्रयस्थितौ ।
पूषा च वितथश्चैव दक्षपार्श्वे समाश्रितौ ।
तथैवासुरशोषौ च वामपार्श्वे समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वद्वितथः सयमश्रुतः ॥
ऊर्व्वोऽर्य्यमाभ्युपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्मृगसुग्रीवौ स्फिक्स्थौ दौवारिको भृगः ॥
जयः शक्तस्तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये तु स पूज्यते ॥
चतुःषष्टिपदो वास्तु प्रासादे ब्रह्मणः स्मृतः ।
ब्रह्मा चतुष्पदस्तद्वत् कोणेष्वेकपदास्तथा ॥
बहिःकोणेषु चाष्टौ तु सार्द्धांशोभयतः स्मृताः ।
त्रिंशत्तिर्द्विपदास्त्वेवं चतुःषष्टिपदे स्मृतः ॥"*॥
हयशीर्षे ।
"बास्तुकं स्रुवयेत् प्राज्ञः श्वेताम्बरधरः शुचिः ।
श्वेतगन्धानुलिप्ताङ्गः सर्व्वालङ्कारभूषितः ॥
चतुःषष्टिं तु प्रासादे एकाशीतिं गृहे सदा ।
चतुरस्रीकृते क्षेत्रे अष्टधोभयभाजिते ॥
कोणरेखां ततो दत्त्वा सूत्रभागांस्तु कल्पयेत् ।
शिवः कोणार्द्धतो ज्ञेयः पर्ज्जन्यः पदसंस्थितः ॥
द्विपदस्थो जयो ज्ञेयः सुरेशश्चैकपादिकः ।
भास्करस्तु पदे ज्ञेयो द्विपदः सत्य इष्यते ॥
भृशः पदस्थो विज्ञेयो व्योमश्चैव पदार्द्धगः ।
हुताशनः पदार्द्धश्च पूषा च पदसंस्थितः ॥
वितथो द्विपदस्थश्च पदैकश्च यमक्षतः ।
वैवस्वतः पदैकस्थो गन्धर्व्वो द्विपदस्थितः ॥
भृङ्गश्चैकपदो ज्ञेयो मृगश्चार्द्धपदे स्थितः ।
पितरश्चार्द्धतो ज्ञेयाः पदे दौवारिकस्तथा ॥
सुग्रीवश्च पदे ज्ञेयो शेषस्य पुष्पदन्तकः ।
यादसाम्पतिरेकस्थो असुरस्तु हि संस्थितः ॥
शोषश्चैकपदे ज्ञेयो रुद्रोग इति पापः इष्यते ।
रोगश्चार्द्धपदे ज्ञेयो नागश्चापि पदे स्थितः ॥
मुख्यश्च द्विपदे ज्ञेयो भल्लाटः पदसंस्थितः ।
यक्षेश्वरः पदे ज्ञेयो नागस्तु द्विपदे स्थितः ।
पदस्था श्रीमहादेवी अदितिश्चार्द्धसंस्थिता ।
आपो ज्ञेयास्तु पदगा बली द्विपदसंस्थितः ॥
चतुष्पदस्थो विज्ञेयस्तथैमा पूर्व्वमध्यगः ।
सविता तु पदे ज्ञेयः सावित्री च पदे स्थिता ॥
ततो विवस्वान् विज्ञेयश्चतुष्पदपदे स्थितः ।
इन्द्रश्चन्द्रो जयश्चैव एकैके संश्रयस्थिताः ॥
मित्रश्चतुष्पदस्थश्च पश्चिमे तु व्यवस्थितः ॥
रुद्रः पदैकसंस्थो वै यक्ष्मा वैकपदे स्थितः ।
धराधरश्च विज्ञेयो ह्युत्तरे च चतुष्पदः ।
चतुर्मुखश्चतुष्कस्थो मध्ये ज्ञेयः प्रजापतिः ॥"
अथ वास्तुपूजा । मात्स्ये ।
"अथातः संप्रवक्ष्यामि प्रासादविधिनिर्णयम् ।
वास्तौ परीक्षिते सम्यग्वास्तुदेवविचक्षणः ॥
वास्तूपशमनं कुर्य्यात् पूर्व्वमेव विचक्षणः ।
एकाशीतिपदं लिख्य वास्तुमध्ये तु पिष्टकैः ॥
होमखिमेखले कार्य्ये कुण्डे हस्तप्रमाणके ।
यवैः क्षौद्रतिलैस्तद्वत् समिद्भिः क्षीरवृक्षजैः ॥
पालाशैः खादिरैर्व्वापि मार्गोदुम्बरसम्भवैः ।
कुशदूर्व्वामयैर्व्वापि मधुसर्पिःसमन्वितैः ॥
कार्य्यस्तु पञ्चभिर्व्विल्वैर्व्विल्वबीजैरथापि वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुदेवे बलिं हरेत् ॥
तद्वद्विघ्नेशनैर्ऋत्यमिदं दद्यात् क्रमेण तु ।
ईशकोणे घृतान्नन्तु शिखिने विनिवेदयेत् ॥
ओदनं सफलं दद्यात् पर्ज्जन्याय घृतान्वितम् ।
जयन्ताय ध्वजं पीतं पैष्टं कूष्माण्डञ्च संन्यसेत् ॥
इन्द्राय पञ्च रत्नानि पैष्टकं कुलिशं तथा ।
वितानञ्च सूर्य्याय धूम्रं रक्तं तथैव च ॥
सत्याय घृतगोधूमं मत्स्यान् दद्याद्भृशाय च ।
गृध्रकुलीं चान्तरीक्षाय दद्याच्छ्रुचं वायवे ॥
पूषे लाजास्तु दातव्या वितथे पायसं दधि ।
गृहक्षताय मध्वन्नं यमाय पिण्डितौदनम् ॥
गन्धौदनञ्च गन्धर्व्वे भृङ्गे मेघस्य शृङ्गकम् ।
मृगाय यावकं दद्यात् पितृभ्यः क्षपुरा मता ॥
दौवारिके दन्तकाष्ठं पैष्टं क्षौमं बलिं तथा ।
सुग्रीवे पूपकं दद्यात् पुष्पदन्ताय पायसम् ॥
कुशस्तम्बेन सहितं दद्यात् पद्मञ्च वारुणे ।
पैष्टं हिरण्मयं दद्यादसुराय सुरा मता ॥
घृतौदनं च शोषाय गोधां वै पापयक्ष्मणे ।
घृतलड्डुकांश्च रोगाय नागे पुष्पं फलान्वितम् ॥
सर्पिर्मुखाय दातव्यं मुद्गौदनमतः परम् ।
भल्लाटाय ततो दद्यात् सोमाय घृतपायसम् ॥
सर्पाय पैष्टं शालूकमदित्ये लोपिकास्तथा ।
दित्ये तु पूरिकां दद्यात् इत्येवं बाह्यतो बलिम् ॥
क्षीरभाजाय दातव्यमापवत्साय वै दधि ।
सवित्रे लड्डुकान् दद्यात् समरीचान् कृशौदनम् ।
सवितुर्गुडपूपांश्च जयाय घृतचन्दनम् ।
विवस्वते तथा दद्यात् रक्तचन्दनपायसम् ॥
हरितालौदनं दद्यादिन्द्राय घृतसंयुतम् ।
घृतौदनञ्च मित्राय रुद्राय घृतपायसम् ॥
आमं पक्वं तथा मांसं देयं स्याद्राजयक्ष्मणे ।
पृथ्वीधराय मांसानि कुम्माण्डाय च दापयेत् ॥
सशर्करान्नं संदद्यादर्य्यम्णे सर्वतः क्रमात् ।
नमस्कारान्तयुक्तेन मन्त्रेण पुनरेव च ॥
पञ्चगव्यं ततश्चैव तिलाज्यसहविप्लवान् ।
भक्ष्यं भोज्यञ्च विविधं ब्रह्मणे विनिवेदयेत् ॥

एवं सम्पूजिता देवाः शान्तिं कुर्वन्ति ते सदा।
सुरेभ्यः काञ्चनं दद्याद्ब्रह्मणे गां पयस्विनीम् ॥
राक्षसीनां बलिर्देयः अपि याडक् तथा शृणु।
मांसौदनं घृतं पद्मं किंशरं हविषान्वितम्।
ईशानभागमाश्रित्य चरवे विनिवेदयेत् ॥
दध्योदनं सरुधिरमस्थिखण्डैश्च संयुतम्।
पीतरक्तबलिं दद्यात् पूतना या तु राक्षसी ॥
वायवे पापराक्षस्यै मत्स्यमांससुरासवम्।
पायसं वापि दातव्यं स्नानाच्चा सर्वतः क्रमात्।
नमस्कारान्तयुक्तेन प्रणवाद्येन सर्वतः ॥"* ॥
ततः सर्वौषधिस्नानं यजमानस्य कारयेत्।
द्विजांस्तु पूजयेद्भक्त्या ये चान्ये गृहमागताः ॥
एतद्राक्षसपशमनं श्रुत्वा कर्म समारभेत्।
प्रासादभवनोद्यानप्रारम्भे परिवर्तने ॥
परवेश्मप्रवेशेषु सर्वदोषापनुत्तये।
इति वास्तूपशमनं श्रुत्वा सूत्रेण वेष्टयेत् ॥
रज्जोन्नयनमानेन सूत्रेण भवनादिकम्।
मृत्यमङ्गलवाद्येन कुर्याद्ब्राह्मणवाचनम् ॥
अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः।
गृहे वायतने कुर्यान्न स दुःखमवाप्नुयात् ॥
न च व्याधिभयं तस्य न च वस्वधनक्षयः।
जीवेद्वर्षशतं स्वर्गे कल्पमेकं वसेन्नरः ॥" * ॥
इयग्रीवपञ्चरात्रे।
"एवं प्रशस्य काष्ठानि रजसापूर्य देशिकः।
एतेषामेव देवानां बलिं दद्यात्तु कामिकम् ॥
ईशानाय प्रदातव्यं पायसं मधुना सह।
पर्जन्याय जलं देयं पुष्पगन्धादिवासितम् ॥
जयन्ताय प्रदातव्या पताका पीतवर्णिका।
सुरेशाय च रत्नानि भास्कराय घृतं तथा ॥
धूम्रकं पीतवर्णं वा सत्यै दद्याद्विशानकम्।
दद्याद्भृशे पश्चिमांसं व्योमाय लवणयुते ॥
पूष्णे धानाः सलाजास्तु सुवर्णे वितथे तथा।
गृहक्षताय मध्यान्नं यमाय पिण्डितौदनम् ॥
गन्धं गन्धर्वदेवाय भृङ्गे दद्यात्तु शाकुनम्।
मृगे तिलयवांश्चैव पितृभ्यः क्षीरं तथा।
दौवारिके दन्तकाष्ठं सुग्रीवे यावकं तथा।
पुष्पदन्ते कुशा देया वरुणे पद्मसुत्पलम् ॥
असुरायैवं देयं रक्षं ग्रीवे घृतौदनम्।
यवास्तु देयाः पापाय रोगाय घृतमक्तकम् ॥
नागाय नागपुष्पाणि भल्लान् मुख्याय दापयेत्।
चित्रौदनञ्च भल्लाटे सोमाय मधुपायसम् ॥
नागाय चापि शालूकं अग्नये सरसपायसम्।
अदितये पूरिका देया क्षीरं चाङ्गो ददेद्बलिम् ॥
दधि क्षीरं चापवत्से अर्यम्णे लड्डुकं बलिम्।
कृशोदकं सवित्रे च सावित्रे गुडपूर्वकम् ॥
विवस्वते रक्तपुष्पं रक्तचन्दनमेव च।
हरिद्रान्नं तथेन्द्राय साव्यामन्तु जयाय च ॥
घृतपूरन्तु मित्राय रुद्राय गुडपायसम्।
आमपक्वानि मांसानि प्रदद्याद्राजयक्ष्मणे ॥
एष्वीधरायाममांसं खड्गिमांसं बलिं हरेत्।
साक्षतं सलिलञ्चैव पक्वान्नं तथा चरुम् ॥
कृशान्ते गन्धं तथा पुष्पं ब्रह्मस्थाने निवेदयेत्।
आममांसं पूर्वभागे सर्वस्कन्धे तुषोदकम् ॥
सितपद्मं घृतं मांसं विदार्यै चाग्निकोणके।
कुम्भं वा पूपकं मांसमर्यमण्येव दक्षिणे ॥
पिण्डक्षेव तथा रक्तं पूतनायै नैर्ऋते तथा।
सार्द्धमांसं प्रदातव्यं जृम्भकायेव पश्चिमे ॥
अग्निखण्डेन सहितं रक्तपिण्डेन मिश्रितम्।
प्रदेयं पापराक्षस्यै वायव्यां मांसमेव च ॥
उत्तरे पिलिपिच्छायै वाजं रक्तं बलिं हरेत्।
वाराहे छागमांसानि ऐशान्यां दिशि दापयेत् ॥
ततो भूतगणानान्तु राक्षसानां सुरोत्तम !।
पिशाचानां गणानान्तु बलिर्देयस्तु कामिकः ॥
एतान् वा पूजयेत् सर्वान् कृशपुष्पाक्षतैर्बुधः।
एवं संपूजिता देवाः शान्तिपुष्टिप्रदा नृणाम् ॥
अपूजिता विहिंसन्ति कारकं स्थापकं तथा।
तस्मादेतांस्तु संपूज्य गन्धपुष्पैर्मनोहरैः।
प्रासादं कारयेद्विद्वान् गृहं वा सुरसत्तम !॥"
अथ प्रासादमूलारम्भः। तत्रैव।
"ब्रह्मस्थाने ततः कुर्याद्वास्तुदेवस्य पूजनम्।
श्रियः संपूजनं कुर्यात् तुलसीकेशगजस्य च ॥
पूजनन्तु ततः कुर्याद्वासुदेवगजस्य च।
गन्धाद्यैः पुष्पनैवेद्यधूपदीपैः सुरोत्तम !॥
ततः संपूजयेत्तस्मिन् सर्वलोकधरां महीम्।
सरूपां प्रमदारूपां विद्याभरणभूषिताम् ॥
ध्यात्वा समर्चयेद्देवीं परितुष्टां क्षितागनाम्।
ततः प्रणम्य विज्ञाप्य तन्मयत्वेन चिन्तयेत् ॥
ततः खनाममन्त्रेण सर्वदेवमयं परम्।
ध्यात्वा समर्चयेत्तत्र यत्तद्वास्तुमयं नरः ॥
ब्रह्मस्थाने ततो विद्वान् कुर्यादाधारमच्युते:।
तस्मिन् संस्थापयेत् कुम्भं वर्द्धन्या सह पूजितम् ॥
हेमं वा राजतं वापि ह्यथवा ह्यदं नवम्।
सर्वबीजौषधीयुक्तं सुवर्णरत्नसान्वितम् ॥
रत्नगर्भं सुसंपूर्णं वस्त्रपूतेन वारिणा।
प्रशस्तपल्लवोपेतं श्वेतचन्दनचर्चितम् ॥
पुष्पैः सुमालितं कृत्वा गन्धपुष्पैर्विधूपितम्।
आवृतेन च शुक्लेन वस्त्रयुग्मेन वेष्टितम् ॥
ब्रह्मस्थाने ततो मन्त्री कलसं स्थाप्य पूजयेत्।
तस्मिंश्चतुर्मुखं देवं प्रणेशं मन्त्रविग्रहम् ॥
गन्धपुष्पैश्च नैवेद्यैः पूजयेत् सुमनोहरैः।
ततो मण्डलवाह्ये तु प्राच्यां वा प्राङ्मुखस्थितः ॥
आचार्यो यज्ञ संभारान् यज्ञादींस्तर्पयेत् सुरान्।
घृतेस्तोयैर्यवैर्मन्त्रैर्ब्रह्मादींस्तर्पयेत्ततः ॥
प्रणेशं तर्पयेद्विद्वानाहुतीनां शतेन च।
इतरान् दशभिर्देवानाहुतिभिः प्रतर्पयेत् ॥
दद्यात् पूर्णाहुतिं पश्चात् वौषडन्तेन मन्त्रवित्।
तत्र प्रणम्य विज्ञाप्य क्षमा वै स्खलितवाचनम् ॥
प्रशस्य कर्करीं सम्यक्शुक्लवस्त्रं प्रदक्षिणम्।
सूत्रमार्गेण दिव्येन तोयधारान्तु भ्रामयेत् ॥
पूर्ववत्तेन मार्गेण सूत्रबीजानि भ्रामयेत्।
सुशोभनं शुभं स्थानं तथा खातस्य कारयेत् ॥
ततो गर्तं खनेन्मध्ये हस्तमात्रप्रमाणकम्।
चतुरङ्गुलमानं तदधः खन्यात् सुसम्मितम् ॥
गोमयेनोपलिप्याथ चन्दनेन च भूषयेत्।
मध्ये दत्वा तु पुष्पाणि शुक्लान्यक्षतमेव च ॥
आचार्यः प्राङ्मुखो भूत्वा ध्यायेद्देवं चतुर्भुजम्।
तूर्यमङ्गलघोषेण ब्रह्मघोषरवेण च ॥
अर्घं दद्यात् सुरश्रेष्ठ ! कुम्भतोयेन मन्त्रवित्।
प्रशस्य कर्करीं तावच्छुभं प्रपूरयेज्जलैः ॥
सर्वरत्नसमाकीर्णैर्विमलैः सुसुगन्धिभिः।
तस्मिन् शुक्लानि पुष्पाणि प्रक्षिपेदीमिति स्मरन् ॥
तदावर्तं परीक्षेत वेदाद्यैगाक्षतं क्षिपेत्।
शुभं स्याद्दक्षिणावर्ते ह्यशुभं वामे भवेत्ततः ॥
मौनैः शालियवादीनां तं गर्तं पूरयेद्बुधः।
वस्त्रनाभिः पवित्राभिर्मृद्भिर्गर्तं प्रपूरयेत् ॥
एवं पुण्याद्यविधिना चार्घ्यदानं सुरोत्तम !।
सुवर्णं गां वस्त्रयुगमाचार्याय निवेदयेत् ॥
कालज्ञस्थपतौ पूज्यौ वेद्यवान् शक्तितोऽर्चयेत्।
ब्राह्मणान् भोजयित्वा च गेयवृद्यादि कारयेत् ॥
ततस्तं खातयेद्यत्नाच्छालान्तं यावदेव तु।
पुरुषाधः क्षितं शल्यं न गृहे दोषदं भवेत् ॥
प्रासादे दोषदं शल्यं भवेद्द्यावच्छलान्तिकम्।
तस्मात् प्रासादिकी भूमिः शोध्या यावच्छलान्तिकम् ॥
शिवानां कर्करान्तं वा यावद्वा भूः कुमारिका।
आकोचतां समीक्षेत्य ततो योगं समाचरेत्॥"
किञ्च।
"पूरयेत् खातकं यत्नात् पादं पादं यथाक्रमम्।
आवाहुलं क्षत्तिकया खस्तिकं वेष्टिकादिभिः ॥
सिक्त्वा सिक्त्वा तु तोयेन कलसैः काञ्चनादिभिः।
आकोटनं ततः कुर्यात् सुदृढैर्मुद्गरैः ॥
पादोनं पूरयेत् खातं सुधमं चैव कारयेत्।
देशिकः पञ्चगव्येन तां भूमिं प्रोक्षयेद्बुधः ॥
सुवर्णरोचिर्गर्भेण घृतपल्लवशोभिना।
तीर्थतोयसुपूर्णेन खर्जतालमयेन वा ॥
सेचयेदभिजप्तेन वारिणा कलसेन तु।
ततः शुद्धा भवेद्भूमिर्दोषयुक्तापि या भवेत् ॥"
अथ शिलान्यासं माह्ये।
"आदावेवं समासेन शिलान्यासमुत्तमम्।
शिलान्यासविधानञ्च प्रोच्यते तदनन्तरम्।
शिला वास्तेदका वापि ततो लक्षणान्विताः।
प्रासादादौ विधानेन न्यसेत्ता सुमनोहराः ॥
चतुरस्राः समाः श्लक्ष्णा समन्ताद्य वेष्टकाः।
शिलारूपाः स्मृता विद्वा नन्दाद्याश्चेष्टकाह्विकाः ॥
संपूर्णाः सुतलाः स्निग्धाः सुधमा लक्षणान्विताः।
कृशदूर्वाङ्किता धन्याः सर्वलक्षणभास्वराः ॥
साङ्कुशाक्षोरगोपेताः कूर्ममत्स्यफलान्विताः।
दर्पणा हस्तिवज्राङ्काः प्रशस्तत्रयलाञ्छिताः ॥
शस्तपद्मिन्यगाङ्काश्च दयाङ्काः सर्वदा हिताः।

स्वस्तिका वेदिका शुक्ला नन्द्यावर्तैकलाञ्छिता:॥
पद्मादिलक्षणोपेता: शिला: सर्व्वार्थसिद्धिदा:।
तथा गोवाजिपादाङ्का: शिला धन्या: सुखावहा:॥
क्रव्यादन्तगपादाङ्का न ग्रस्ता: प्रक्षिगस्तथा।
दिङ्मूढा दिग्विहीनाश्च दीर्घह्रस्वा: क्षतान्विता:॥
विवर्णा: स्फुटिता भग्ना: संख्याप्ता लक्षणच्युता:।
प्रशस्तपार्श्वरूपाङ्का: प्रशस्तद्रव्यलाञ्छिता:॥
यथोक्तलक्षणोपेता: शिला नित्यहितावहा:॥"
अथ इष्टकालक्षणम्। तत्रैव।
"इष्टकानां समासेन लक्षणं शृणु साम्प्रतम्।
एकवर्णा: सुपक्वाश्च सुप्रमाणा मनोरमा:॥
नन्द्यादयश्चेष्टका: कार्य्याश्चतुरस्रा: सुसंमिता:।
अस्याङ्गारान्विता नेष्टा: क्षताक्षर्णा: सभग्नकरा:॥
मन्दपक्वा विषमाश्च बहुदिग्भाश्च वर्ज्जिता:।
भग्नाश्च विषमा हीना वर्ज्जनीया: प्रयत्नत:॥"
इयग्रीवपञ्चरात्रे।
"इष्टकानां प्रमाणञ्च लक्षणं साम्प्रतं शृणु।
सुतला लक्षणोपेता द्वादशाङ्गुलसम्मिता:॥
सुविस्तारविभागेन नेपुण्येन च सम्मिता:।
सुपक्वा: सुप्रमाणाश्चा एकवर्णा मनोहरा:।
विमला इष्टका: कार्य्याश्चतुरस्रा: सुसम्मिता:।
छिन्नकर्णाश्चाग्रग्रस्ता: पार्श्विपादविवर्ज्जिता:॥
सभग्नकैरा: क्षतवर्णा अस्याङ्गारचिताश्च या:।
विवर्णा मन्दपक्वाश्च या: फीना: पिच्छिकाश्च या:॥
हीनाश्च विषमा भग्ना जर्ज्जराश्च विवर्ज्जिता:॥"
अथ शिलादिन्यासव्यवस्था। मात्स्ये।
"शिलान्यासस्तु कर्त्तव्य: प्रासादे तु शिलामये।
इष्टकानान्तु विन्यास: प्रासादे चेष्टकामये॥
शैलजे शैलज: पीठ ऐष्टिके ऐष्टिक: स्मृत:।
शिलान्यासादिको भद्रे स्थलपादो विधीयते॥"
इयग्रीवपञ्चरात्रे।
"कर्त्तव्यश्चेष्टकान्यास: प्रासादे चेष्टकामये।
शैले शिलानां विन्यास: कार्य्ये कर्करा क्षिपेत्॥
कृत्वा शिलादिन्यासे च प्राक्शिलाभ्यधिवासनम्।
इष्टकानां प्रतिष्ठाञ्च गर्भाधानञ्च कारयेत्।
गुरवे दक्षिणां दत्त्वा पीठबन्धञ्च साधयेत्।
स्वयं श्रीहयग्रीवेण प्रोक्तस्तद्विधि: स्फुटम्॥"
अथ पीठबन्धनम्। हयग्रीवे।
"पीठबन्धं तत: कुर्य्यान्महाप्रासादमानत:।
पीठोत्तमं चोच्छ्रयेण प्रासादस्योर्द्धमानत:॥
पादहीनं मध्यमं स्यात् कन्यसं चार्द्धमानत:।
उत्तमं वासुदेवस्य कुर्य्यात् पीठं विचक्षण:॥
अथ प्रासादलक्षणानि। मात्स्ये।
एवं वास्तुबलिं कृत्वा भजेत् षोड़शभागिकम्।
तस्य मध्ये चतुर्भिस्तु भागैर्गर्भञ्च कारयेत्॥
भागद्वादशकं तत्र भित्तार्थं परिकल्पयेत्।
चतुर्भागेन भित्तीनामुच्छाय: स्यात् प्रमाणत:॥
द्विगुण: शिखरोच्छ्रायो भित्तुच्छ्रायात् प्रमाणत:।
शिखरार्द्धस्य चार्द्धेन विधेया तु प्रदक्षिणा॥
चतुर्दिक्षु तदा ज्ञेयो निर्गमस्तु तथा बुधै:।
गर्भसूत्रदयं भागो विस्तारो मण्डपस्य तु॥
आयत: स्यात्त्रिभिर्भागैर्भद्रयुक्त: सुशोभन:।
पञ्चभागेन संभज्य गर्भमानं विचक्षण:॥
भागमेकं गृहीत्वा तु प्राग्ग्रीवं कल्पयेद्बुध:।
गर्भसूत्रसमो भागादग्रतो मुखमण्डप:।
एतत् सामान्यमुद्दिष्टं प्रासादस्येह लक्षणम्॥
किञ्च।
मेरुमन्दरकैलासकुम्भसिंहगजास्तथा।
विमानच्छन्दकस्तद्वत्क्षीद्दशोऽथ नगाधिप:॥
वलभिच्छन्दकस्तद्वद्वृत्तज: सर्व्वभद्रक:।
गजश्च नन्दनश्चैव नन्दिवर्द्धन एव च॥
हंसो वृष: सुपर्णश्च पद्मकोऽथ वसुन्धरक:।
प्रासादा नामत: प्रोक्ता विभागं शृणुत द्विजा:॥
शतसूत्रञ्चतुर्द्वारो भूमिकाषोड़शोच्छ्रित:।
नानाविचित्रशिखरो मेरुप्रासाद उच्यते॥
मन्दरो द्वादश: प्रोक्त: कैलासो दशभूमिक:।
विमानच्छन्दकस्तद्वदनेकशिखरानन:॥
स चाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्द्धन:।
विंशाष्टकसमायुक्तो नन्दन: ससुदाहृत:॥
षोड़शाष्टकसंयुक्तो नानारूपसमन्वित:।
अनेकशिखरस्तद्वत् सर्व्वतोभद्र उच्यते॥
चन्द्रशालसमोपेतो विज्ञेय: पञ्चभूमिक:।
वलभिच्छन्दकस्तद्वच्छुकनासाद्यन्वित:॥
वृषस्योच्छ्रयतस्तुल्यो मण्डलाश्चिविवर्ज्जित:।
सिंह: सिंहगतिर्ज्ञेयो नगो नगसमस्तथा॥
कुम्भ: कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रय:।
अङ्गुलीपुटसंस्थानपञ्चाष्टकविभूषित:॥
षोड़शास्र: समन्तात्तु विज्ञेय: स ससुन्दक:।
पार्श्वयोश्चन्द्रशालस्य उच्छ्राया भूमिकाद्वयम्॥
षोड़शास्र: स विज्ञेयो विचित्रशिखर: शुभ:।
नगराजस्तु विख्यातश्चन्द्रशालाविभूषित:॥
प्राग्ग्रीवेण विशालेन भूमिकासु षड़न्वित:।
अनेकचन्द्रशालस्तु गज: प्रासाद उच्यते॥
पर्य्यन्तगृहराजो वै गरुड़ो नाम नामत:।
सप्तभूम्युच्छ्रयस्तद्वच्चन्द्रशालात्रयान्वित:॥
भूमिकाषड़्गीतिस्तु वास्तुत: सर्व्वतो भवेत्।
तथान्यो गरुड़स्तद्वदुच्छ्रायाद्दशभूमिक:॥
पद्मक: षोड़शास्रस्तु भूमिद्वयसमन्वित:।
पद्मतुल्यप्रमाणेन श्रीवृक्षक इति स्मृत:॥
पञ्चाष्टकक्षिभूमिस्तु गर्भे हस्तचतुष्टयम्।
वृषो भवति नाम्ना य: प्रासाद: सर्व्वकामिक:॥
सप्तारौ पञ्चकाश्चैव प्रासादा ये मयोदिता:।
सिंहस्य ते समा ज्ञेया ये चान्ये ततप्रमाणत:॥
चन्द्रशालै: समोपेता: सर्व्वे प्राग्ग्रीवसंयुता:।
ऐष्टका दारवाश्चैव शैला वा स्यु: सुतोरणा:॥
मेरु: पञ्चाग्रहस्त: स्यात् मन्दर: पञ्चहीनक:।
चत्वारिंशत्तु कैलासचतुस्त्रिंशद्विमानक:॥
नन्दिवर्द्धनकस्तद्वद्द्वात्रिंशत् वसुदाहृत:।
त्रिंशता नन्दन: प्रोक्त: सर्व्वतोभद्रकस्तथा॥
वर्त्तुल: पद्मकश्चैव त्रिंशद्धस्त उदाहृत:।
नग: सिंहश्च कुम्भश्च वलभिच्छन्दकस्तथा॥
एते षोड़शहस्ता: स्युश्चत्वारो देववल्लभा:।
श्रीवृक्षो नगराजश्च ससुन्दकगजौ तथा॥
एते द्वादशहस्ता: स्युरेतेषां हंसक: समृ:।
गरुड़ोऽष्टकरो ज्ञेयो वृषो दश उदाहृत:॥
एवमेते प्रमाणेन कर्त्तव्या: शुभलक्षणा:।
यत्तराजसनागानां मात्रहस्त: प्रशस्यते॥
तथा मेर्व्वादय: सप्त व्यष्टलिङ्गे सुखावहा:।
श्रीवृक्षकादयश्चाष्टौ मध्यमस्य उदाहृता:॥
तथा हंसादय: पञ्च कन्यसे सुमता मता:॥"
हयग्रीवपञ्चरात्रे।
"प्रासादं संप्रवक्ष्यामि सर्व्वसाधारणं शृणु।
चतुरस्रीकृतं क्षेत्रं भवेत् षोड़शधा पुन:॥
मध्ये तस्य चतुर्भिस्तु कुर्य्यादार्यसमन्वितम्।
द्वादशैव तु भागानि भित्त्यर्थं परिकल्पयेत्॥
जङ्घोच्छ्रायन्तु कुर्व्वीत चतुर्भागेन चायतम्।
जङ्घयोर्द्विगुणोच्छ्रायं मञ्चर्य्या: कल्पयेद्बुध:॥
चतुर्भागेन मञ्चर्य्या: कार्य्या सम्यक् प्रदक्षिणा।
तन्मानं निर्गमं कार्य्यमुभयो: पार्श्वयो: समम्॥
शिखरेण समं कार्य्यमग्रे जगति विस्तरम्।
त्रिगुणेनापि कर्त्तव्यं यथाशोभानुरूपत:॥
विस्तरं मण्डपस्याग्रे गर्भसूत्रद्वयेन तु।
दैर्घ्यात् पादाधिकं कुर्य्यान्मध्ये स्तम्भैर्विभूषितम्॥
प्रासादगर्भमानं वा कुर्व्वीत सुखमण्डपम्।
एकाशीतिपदैर्वास्तुं यद्वा मण्डपमारभेत्॥
शुकाद्यदारि विन्यासे पादान्तस्थान् यजेत् सुरान्।
तथा प्राकारविन्यासे यजेद्वास्त्रिंशदन्तगान्॥
सर्व्वसाधारणश्चैतत् प्रासादस्य तु लक्षणम्।
मानेन प्रतिमाया वा प्रासादमपरं शृणु॥
प्रतिमाया: प्रमाणेन कर्त्तव्या पिच्छिका शुभा।
गर्भस्तु पिच्छिकार्द्धेन गर्भमानास्तु भित्तय:॥
भित्तेरायाममानेन उच्छ्रायन्तु प्रकल्पयेत्।
भित्तुच्छ्रायात्तद्विगुणं शिखरं कल्पयेद्गुरु!॥
शिखरस्य तु तुर्य्येण भ्रमणं परिकल्पयेत्॥
शिखरस्य चतुर्थेन अग्रतो मुखमण्डपम्।
अष्टकांशेन गर्भस्य रथकानान्तु निर्गम:॥
परिधेर्गुणभागेन रथकांश्च कल्पयेत्।
तत्तृतीयेन वा कुर्य्यात्रयकानान्तु निर्गमम्॥
वासत्रयं स्थापनीयं रथकत्रितये सदा।
शिखरार्थञ्च रत्नानि विनिपातयेत्॥
शिखरस्यार्द्धभागस्थं सिंहं तत्र च कारयेत्।
शुकनासां शिरोऽग्रे मध्यसन्धौ विवर्ज्जयेत्॥
अपरे च तथा पार्श्वे तद्वत् रत्नं निधापयेत्॥
तदर्द्धन्तु भवेदंशं: कण्ठे श्यामलसारवान्।
स्कन्धभन्तु कर्त्तव्यं विकरालं तथैव च।
ऊर्द्धन्तु वेदिकामानात् कलसं परिकल्पयेत्॥"
किञ्च।
"गरुडन्तं तथा कुर्य्यादुपरिष्टाच्चतुर्गुणम्

कुर्याद्दिक्प्रतिमायामान् दिक्षु चाष्टासु चोपरि ॥
महावराहमैन्द्र्यान्तु नरसिंहन्तु दक्षिणे ।
प्रतीच्यां श्रीधरं देवमुदीच्यां हयशीर्षकम् ॥
आग्नेय्यां वामदेव्यञ्च नैर्ऋते राममेव च ।
वामनञ्चैव वायव्यां वासुदेवमथापरे ॥" *॥
किञ्च ।
"पूर्व्वभूमौ तु शयनं द्वितीये चासनं भवेत् ।
स्थानमेव तृतीये तु चतुर्थे यानमेव च ॥
पञ्चमे योगनिद्रा तु षष्ठे भोगासनं भवेत् ।
स्थानं योगसमायुक्तं सप्तमे परिकल्पयेत् ॥
नागाश्ववाहकैर्यक्षात् पत्रवल्ल्यादिभूषितम् ।
नानाप्रकारपुष्पाद्यैर्यथाशोभं प्रकल्पयेत् ॥
कनिष्ठमध्यश्रेष्ठानां प्रासादानां यथाक्रमम् ।
वसुभागा च ऋत्विग्भिः प्रदेया रचना बुधैः ॥
द्वारस्य चाष्टमे युक्ते नवमे दशमे तथा ।
ललाटवेधो नैवं स्यादायस्य ह्रस्व वाप्यतम् ॥
यावद्भिस्तैरभिप्रेतः प्रासादकर्तृभानच ! ।
तावद्भिरङ्गुलैरार्यो वसुभागेन वा भवेत् ॥
एकस्मिन् भवो ज्ञेयो द्विस्मिन् वैदिका मता ।
दशभूम्यन्तरे नित्यं चतुस्तम्भं प्रकल्पयेत् ॥"*॥
अथ मण्डपलक्षणविधेयः । मातृस्वे ।
"अथातः सम्प्रवक्ष्यामि मण्डपानान्तु लक्षणम् ।
मण्डपान् प्रवरान् वक्ष्ये प्रासादस्याग्रतः पतः ॥
विविधा मण्डपाः कार्य्या व्येहमध्यकनीयसः ।
नामतस्तान् प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः ! ॥
पुष्यकः पुष्यभद्रश्च सुहृत्तो नन्दनन्दनः ।
कौशल्यो वृद्धिसञ्ज्ञौर्व्वो राजभद्रो जयावहः ॥
श्रीवृक्षो विजयश्चैव वास्तुजीर्ण्णः शृतिं धरः ।
यज्ञभद्रो विशालश्च संज्ञितः शत्रुमर्द्दनः ।
भागपक्षो नन्दनश्च मानवो मानभद्रकः ।
सुग्रीवो हर्षवंशश्च कर्ब्बिकारः पदार्द्धकः ॥
सिंहश्च श्यामभद्रश्च सुभद्रश्च तथैव च ।
सप्तविंशतिर्व्याख्याता लक्षणं शृणुत द्विजाः ॥
स्तम्भा यत्र चतुःषष्टिः पुष्यकः स उदाहृतः ।
द्वाषष्टिः पुष्यभद्रस्तु षष्टिः सुहृत्त उच्यते ॥
अष्टपञ्चाशत्कस्तम्भः कथ्यते नन्दनन्दनः ।
कौशल्यः षट्पञ्चाशच्चतुःपञ्चाशता पुनः ॥
वृद्धा तु वृद्धिसञ्ज्ञौर्व्वो द्विहीनो राजभद्रकः ।
जयावहस्तु पञ्चाशत्श्रीवृक्षस्तु द्विहीनकः ॥
विजयस्तद्विहीनः स्यात् वास्तुसञ्ज्ञौर्व्वकस्तथा ।
द्वाभ्यामेव शृतीयेत ततः शृतिधरोऽपरः ॥
चत्वारिंशद्दयज्ञभद्रो द्विहीनोऽथ विशालकः ।
षट्त्रिंशदेव संज्ञितो द्विहीनः शत्रुमर्द्दनः ॥
द्वात्रिंशद्भागपक्षस्तु त्रिंशता नन्दनः स्मृतः ।
अष्टाविंशज्ज्ञानवस्तु मानभद्रो द्विहीनकः ॥
चतुर्व्विंशस्तु सुग्रीवो द्वाविंशद्भर्ब्बको मतः ।
विंशतिः कर्ब्बिकारः स्याद्दशाग्रः पदार्द्धकः ।
सिंहो भवेद्विहीनश्च श्यामभद्रो द्विहीनकः ॥
सुभद्रस्तु तथा प्रोक्तो द्वादशस्तम्भसंयुतः ।
मण्डपाः कथिता ह्येते यथावल्लक्षणान्विताः ।
त्रिकोणं वृत्तमर्द्धेन्दुमष्टकोणं द्विरष्टकम् ॥
चतुष्कोणञ्च कर्त्तव्यं संस्थानं मण्डपस्य तु ।
राज्यञ्च विजयञ्चैवमायुर्व्वर्द्धनमेव च ॥
पुत्रलाभः श्रियः पुष्टिश्चासादिषु भवेत् क्रमात् ।
एवन्तु शुभदाः प्रोक्ता अन्यथा तु भयावहाः ॥"
अथ तत्र द्वारनिर्णयः । हयशीर्षपञ्चरात्रे ।
"ग्राममध्ये च पूर्व्वे च प्रत्यग्द्वारं प्रकल्पयेत् ।
विदिग्भासु च सर्व्वासु तथा प्रत्यङ्मुखं भवेत् ॥
दक्षिणे चोत्तरे चैव पश्चिमे प्राङ्मुखं भवेत् ॥"
किञ्च ।
"विस्तारादिगुणं द्वारं कर्त्तव्यन्तु सुशोभनम् ।
जातरूपं सरजतं तद्दुदुम्बरेर्द्धतम् ॥
औदुम्बरोर्द्धतः स्वर्णं दत्त्वा शाखां न्यसेद्बुधः ।
तूर्य्यमङ्गलघोषेण ब्राह्मणान् स्वस्तिवाच्य च ।
द्वारस्य च चतुर्थांशे कार्य्यौ चण्डप्रचण्डकौ ।
दक्षहस्तौ तु कर्त्तव्यौ विष्वक्सेनोपमावुभौ ।
शाखोर्द्ध्वं न्यस्य रत्नानि न्यसेदूर्द्धसुदुम्बरम् ।
तस्य मध्ये स्थिता देवी साक्षाल्लक्ष्मीः सुरेश्वरी ।
कर्त्तव्या दिग्गजैः सा तु स्नाप्यमाना घटैर्न तु ।
शाखोदुम्बरकौ कार्य्यौ पत्रवल्ल्यादिभूषितौ ।
एकशाखं त्रिशाखं वा षट्शाखं द्वारमिष्यते ।
नवशाखञ्च कुर्व्वीत अतः ऊर्द्धं न कारयेत् ।
विष्णुवतारूपाद्यैः शाखां रत्नैन भूषयेत् ॥"
मातृस्वे ।
"चतुःषष्टिपदं कृत्वा मध्ये द्वारं प्रकल्पयेत् ।
विस्तारादिगुणोच्छ्रायस्त्रिभागा कटिर्भवेत् ॥
विस्तारार्द्धो भवेद्गर्भो भित्तयोऽन्याः समन्ततः ।
गर्भपादेन विस्तीर्णौ द्वारं द्विगुणमाथतम् ॥
उच्छ्रायात् पादविस्तीर्णा शाखा तद्दुदुम्बरः ।
विस्तारपादप्रतिमं बाहुल्यं शाखयोः स्मृतम् ॥
त्रिपञ्चसप्तनवभिः शाखाभिर्द्वारमिष्यते ।
कनिष्ठं मध्यमं ज्येष्ठं यथायोगं प्रकल्पयेत् ॥
अङ्गुलानां शतं सार्द्धं चत्वारिंशद्भिरुत्तमम् ।
धन्यसुत्तममायुष्यं धनधान्यदमेव च ॥
शतं चाशीतिसहितं वास्तुनिर्गमनं भवेत् ।
अधिकं दशभिस्तद्वत्तथा षोड्शभिः शतम् ॥
शतमानं द्वितीयन्तु भवत्यशीतिभिस्तथा ।
दशद्वाराणि चैतानि क्रमेणोक्तानि सर्व्वदा ॥
अन्यानि वर्ज्जनीयानि मानसोद्वेगदानि तु ।
द्वारवेधन्तु यत्नेन सर्व्वास्वासु वर्ज्जयेत् ॥
वृक्षकोणाच्च भूदारात् स्तम्भकूपध्वजादपि ।
कुल्याम्बुभेद्य वा विद्धं न द्वारं शुभदं भवेत् ॥
शल्यञ्च दुर्गतिश्चैव प्रवासः क्षुद्भयं तथा ।
दौर्भाग्यं वन्धनं रोगो दारिद्र्यं कलहं तथा ।
विरोधश्चार्थनाशश्च सर्व्वं वेधे भवेत् क्रमात् ॥"
अथ प्राकारादिनिर्णयः । हयशीर्षपञ्चरात्रे ।
"प्रासादस्य चतुर्भागैः प्राकारस्योच्छ्रयो भवेत् ।
पञ्चहस्तस्य देवस्य एकहस्ता तु पीठिका ॥
तस्मात्तु द्विगुणः प्रोक्तस्तथा गरुडमण्डपः ।
एकहस्तादि कुर्व्वीत त्रिंशद्धस्तान्तमेव च ॥"
अथ वृक्षरोपणविधेयः । मातृस्वे ।
"पूर्व्वेण पनसो वृक्षः क्षीरवृक्षास्तु दक्षिणे ।
पश्चिमेन शमं श्रेष्ठं पशोत्पलविभूषितम् ॥
उत्तरेण नलेस्तालेः शुभा स्यात् पुष्पवाटिका
सर्व्वतस्तु जलं श्रेष्ठं स्थिरमस्थिरमेव च ॥
सर्व्वतश्चापि कर्त्तव्यं परिखावलयादिकम् ।
याम्ये तपोवनस्थानमुत्तरे माल्यकाग्रहम् ॥
महानसं तथाग्नेये नैर्ऋते तु विनायकः ।
वारुणे श्रीनिवासश्च वायवे गृहमालिका ॥
उत्तरे यज्ञशाला तु निर्म्माल्यस्थानमुत्तरे ।
वारुणे सोमदेवत्वे बलिनिर्व्वपणं स्मृतम् ॥
पुरतो गरुडस्थानं तथान्येषां यथोचितम् ।
एवमायतनं कुर्य्याच्छुभमण्डपसंयुतम् ॥
वप्रप्राकारकसतोरणचित्रयुक्तं
नित्योत्सवप्रमुदितैर्जनैः सार्द्धम् ।
यः कारयेत् सुरगृहं विविधध्वजाढ्यं
श्रीस्तं न मुञ्चति सदा दिति पूज्यते च ॥"
अथ जीर्णोद्धारः । विष्णुधर्म्मे तृतीयकाण्डे ।
"यस्य राज्ञस्तु विषये देवेशः क्षीर्य्यते ।
तस्य सीदति तद्राज्यं देवेशस्य यथा तथा ॥
ज्ञात्वा जीर्णस्य संस्कारं तथा देवेशवेश्मनः ।
द्विगुणं फलमाप्नोति नात्र कार्य्या विचारणा ॥"
विष्णुरहस्ये ।
"पतितस्य च यः कर्त्ता पतमानस्य रक्षिता ।
विष्णोरायतनस्येह स नरो विष्णुलोकभाक् ॥"
अग्निपुराणे ।
"पतितं पतमानन्तु तथार्द्धस्फुटितं नरः ।
समुद्धृत्य धरेर्धाम द्विगुणं फलमाप्नुयात् ॥"
देवीपुराणे ।
"मूलाच्छतगुणं पुण्यं प्राप्नुयाज्जीर्णकारकः ।
तस्मात् सर्व्वप्रयत्नेन जीर्णोद्धारमाचरेत् ॥"
हयशीर्षपञ्चरात्रे ।
"वापीकूपतडागानां सुरधान्नां तथागच ! ।
प्रतिमानां सभानाञ्च संस्कर्त्ता यो नरो भुवि ।
पुण्यं शतगुणं तस्य भवेन्मूलान्न संशयः ॥
प्रतिष्ठाया विधिः कार्य्यस्तथा मन्दिरनिर्म्मिते ।
प्रायः श्रीहयशीर्षोक्तैरनुसारेण वेद्यवैः ॥
देवालयप्रतिष्ठा च ख्याता तल्लिखनेन किम् ।
श्रीनृसिंह्यापनेनैव संपूर्णा सा विशेषतः ॥"

इति श्रीहरिभक्तिविलासे २० विलासः ॥

मन्दिरं, क्ली. पुं. (मन्दन्ति मोदन्ते लोका यत्र । मदि + "इषिमदिमुदीति ।" उणा० १ । ५२ । इति किरच् ।) नगरम् । इति मेदिनी । रे, १६७ ॥ पुंलिङ्गोऽप्ययं शब्दः । यथा । नगरं मन्दिरं पुरमिति पुंनपुंसकयोरत्रैव पठ्यते । इत्यमरटीकायां भरतः ॥ (अथवाऽनुपधिमभागः । यथा, अथर्ववेदके । २ । २१ ।
"अधरे च ततो जातु निर्हिंतं शास्त्रकोविदैः ।
मन्दिरं पश्चिमो भागः कलाची जानुनोरधिमः ॥")

मन्दिरः, पुं, (मदि + किरच् ।) वसुधः । इति मेदिनी । रे, १६७ । जानुपश्चाद्भागः । इति हेमचन्द्रः । ३ । २०८ ॥

मन्दिरपशुः, पुं, (मन्दिरचरः मन्दिरपालितो वा पशुः । मध्यपदलोपी कर्म्मधारयः ।) विडालः । इति शब्दचन्द्रिका ॥

मन्दिरा, स्त्री, (मन्दिर + स्त्रियां टाप् ।) मन्दिरम् । यथा, मन्दिरायाखरावाप्तिति मधुसूक्तटाद्यः ॥

मन्दुरा, स्त्री, (मन्दन्ते स्वपन्ति मोदन्ते वा अश्वा यत्र । मन्द् + "मन्दिवाग्रिमथीति ।" उणा० १ । ३६ । इति उरच् । स्त्रियां टाप् ।) वाजिशाला । इत्यमरः । २ । २ । ७ । (यथा, नैषधचरिते । १ । ५७ ।

"उपाहरन्नम्रमनल्पचञ्चले:
चुराचले: शोभितमन्दुरोदरम् ॥")

ग्रयनीयार्थेषस्तु । इति मेदिनी । रे, २०० ॥ माडुर इति भाषा ॥

मन्दोदरी, स्त्री, (मन्दं उदरं यस्याः । स्त्रियां ङीष् ।) रावणमहिषी । सा तु मयदानवकन्या । इति रामायणम् ॥ (यथा, महाभारते । ३ । २८० । १६ ।

"भार्य्या मे भव सुश्रोणि ! यथा मन्दोदरी तथा ॥"

कुमारानुचरमातृगणभेदः । यथा, महाभारते । ६ । ४६ । १० ।

"मन्दोदरी तुहुण्डी च कोटरा मेघवाहिनी ॥")

मन्दोदरीशः, पुं, (मन्दोदर्याः ईशः पतिः ।) रावणः । इति त्रिकाण्डशेषः ॥

मन्दोदरीसुतः, पुं, (मन्दोदर्याः सुतः ।) इन्द्रजित् । इति जटाधरः ॥

मन्दोष्णं, क्ली, (मन्दं अल्पं च तदुष्णञ्चेति ।) ईषदुष्णम् । तद्वति, त्रि : इत्यमरः । १ । ४ । २५ ॥

मन्त्रः, पुं, (मन्यते बुध्यते अनेन । मन्द् + "स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् ।) गम्भीरध्वनिः । इत्यमरः । १ । ७ । २ ॥ (यथा, मेघदूते । १०० ।

"मन्त्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥")

वाद्यविशेषः । तत्पर्य्यायः । मधुः २ भद्रकः ३ । इति शब्दरत्नावली ॥ (त्रि, हृष्टः । यथा, ऋग्वेदे । १ । ५ । ७ ।

"होता मन्द्रो वरेण्यः ॥"

"मन्द्रो हृष्टः ।" इति तद्भाष्ये सायणः ॥ मादनशीलः । यथा, ऋग्वेदे । १ । १४४ । ७ ।

"अग्ने ! सुखस्य प्रतिहर्य्यतश्चो
मन्द्र स्वधावक्षतजात सुक्रतो ॥"

"मन्द्र ! मादनशील ! ।" इति तद्भाष्ये सायणः ॥)

मन्मथः, पुं, (मनो मथ्नाति विकरोतीति । मन्थ् + पचाद्यच् । एषोदरादित्वात् साधुः । अस्य नामनिरुक्तिर्यथा, ब्रह्मवैवर्ते । १ । ४ । ७ ।

"मनो मथ्नाति सर्व्वेषां पञ्चबाणेन कामिनाम् ।
तन्नाम मन्मथस्तेन प्रवदन्ति मनीषिणः ॥")

कामदेवः । (यथा, नैषधचरिते । ८ । २६ ।

"न मन्मथस्त्वं स हि नास्मिमूर्त्तिः ॥")

कपित्थवृक्षः । इत्यमरः । १ । ४ । २१ ॥ कामचिन्ता । इति मेदिनी । थे, २२ ॥ * ॥ कामदेवस्योत्पत्तिर्यथा,—

"एवं चिन्तयतस्तस्य ब्रह्मणो सुनिसत्तमाः ।
मनसः पुरुषो वह्निगुरात्रिर्भूतो विनिःसृतः ॥
काञ्चनीपूर्णपीताभः पीनोन्नतसुनासिकः ।
सुवृत्तोरुकटीजङ्घो नीलावक्षितकेशकः ॥
लम्बभ्रूयुगलो लोलः पूर्णचन्द्रनिभाननः ।
कपाटविस्तीर्णवक्षा रोमराजीविराजितः ॥
शुभमातङ्गकरवत्पीनसुलम्बबाहुकः ।
आरक्तपाणिचरणनखपादकरोद्भवः ॥
चौडमध्यश्चारुदन्तः प्रमत्तगजकन्धरः ।
प्रफुल्लपद्मपत्राक्षः केशरत्नायतेक्षणः ॥
कम्बुग्रीवो मीनकेतुः प्रांशुर्मेकरवाहनः ।
पञ्चपुष्पायुधो योगी पुष्पकोदण्डमण्डितः ॥
कान्तः कटाक्षपातेन रामायत्नयनद्वयम् ।
सुगन्धिमारुताभ्यासं भृङ्गाररवसेवितम् ॥
वीक्ष्य तं तादृशं दक्षप्रमुखा मानसाश्च ते ।
मरीच्याद्या दश ततो विस्मयाविष्टचेतसः ॥
औत्सुक्यं परमं जग्मुरापुर्म्मैकारिकं मनः ।
स चापि वेधसं वीक्ष्य सस्मारं जगतां पतिम् ।
प्रणम्य पुरुषः प्राह विनयानतकन्धरः ॥

श्रीपुरुष उवाच ।

किं करिष्याम्यहं कर्म्म ब्रह्मंस्तत्र नियोजय ।
मानार्थे पुरुषो यस्मादुचिते शोभिते विधे ॥
अभिधानञ्च यद्योग्यं स्थानं पत्नी च या मम ।
तन्मे कुरुष्व लोकेश ! स्रष्टा त्वं जगतां यतः ॥

मार्कण्डेय उवाच ।

एवं तस्य वचः श्रुत्वा पुरुषस्य महात्मनः ।
स्वयं न किञ्चित् प्रोवाच स्वसृष्टावपि विस्मितः ॥
ततो मनः सुसंयम्य सम्यगुत्कृष्य विस्मयम् ।
उवाच पुरुषं ब्रह्मा तत्कर्म्मोद्दीपनावहम् ॥

ब्रह्मोवाच ।

अनेन चारुरूपेण पुष्पबाणेन पञ्चभिः ।
मोहयन् पुरुषांश्चैव कुरु सृष्टिं सनातनीम् ॥
न देवा न च गन्धर्व्वा न किन्नरमहोरगाः ।
नासुरा न च दैत्या वा न विद्याधरराक्षसाः ॥
न यक्षा न पिशाचाश्च न भूता न विनायकाः ।
न गुह्यका न सिद्धाश्च न मनुष्या न पक्षिणः ॥
पशवो न मृगाः कीटाः पतङ्गा जलजाश्च ये ।
न ते सर्व्वे भविष्यन्ति न लक्ष्या ये मरस्य ते ॥
अहं वा वासुदेवो वा स्थाणुर्वा पुरुषोत्तम ! ।
भविष्यामस्तव वशे किमन्यैः प्राणधारिभिः ॥
प्रच्छन्नरूपो जन्तूनां प्रविशन् हृदये सदा ।
सुखहेतुः स्वयं भूत्वा कुरु सृष्टिं सनातनीम् ॥
ऋतुपुष्पवाणस्त्वं सदा सुखं सख्यं मनोरस्तु च ।
सर्व्वेषां प्राणिनां नित्यं मदमोदकरो भवान् ॥
इति ते कर्म्म कथितं सृष्टिप्रावर्त्तकं पुनः ।
नामानि च वदिष्यामि यत्ते योग्यं भविष्यति ॥

मार्कण्डेय उवाच ।

इत्युक्त्वा सुरश्रेष्ठो मानसानां सुखानि च ।
आलोक्य चासने पद्मे स्वपविष्टोऽभवत् क्षणात् ॥"

इति कालिकापुराणे कामप्रादुर्भावो नाम १ अध्यायः ॥

मार्कण्डेय उवाच ।

"ततस्ते मुनयः सर्व्वे तदभिप्रायवेदिनः ।
चक्रुस्तदुचितं नाम मरीच्यत्रिसुखात्तदा ॥
सुखावलोकनादेव ज्ञात्वा दक्षात्तमन्यतः ।
दक्षादयश्च सस्मारः स्थानं पत्नीश्च ते ददुः ॥
ततो निश्चित्य नामानि मरीच्यत्रिसुखा द्विजाः ।
ऊचुः सङ्गतमेतत्ते पुरुषाय द्विजोत्तमाः ॥

ऋषय ऊचुः ।

यस्मात् प्रमथ्य चेतस्तं जातोऽस्माकं तथा विधिः ।
तस्मान्मन्मथनामा त्वं लोके ख्यातो भविष्यसि ॥
जगत्सु कामरूपस्त्वं त्वत्समो न हि विद्यते ।
अतस्त्वं कामनाम्नापि ख्यातो भव मनोभव ! ॥
मदनान्मदनाख्यस्त्वं शम्भोर्दर्पात् सदर्पकः ।
तथा कन्दर्पनाम्नापि लोके ख्यातो भविष्यसि ॥
त्वदाशुगानां यद्दीप्तं तद्दीप्तं न भविष्यति ।
वैष्णवाग्नेय रौद्राणां ब्रह्मास्त्राणाच्च तादृशम् ॥
स्वर्गो मर्त्यश्च पातालं ब्रह्मलोकः सनातनः ।
अवस्थानानि सर्व्वाणि सर्व्वव्यापी भवान् यतः ॥
किंवा चापि विशेषेण सामान्ये नास्ति ते समः ।
यत्र यत्र भवेत् प्राणी ग्राह्यग्राहकवोऽथवा ॥
तत्र तत्र तव स्थानमस्त्वब्रह्मसदोदयम् ।
दक्षोऽयं भवतः पत्नीं स्वयं दास्यति शोभनाम् ॥"

इति कालिकापुराणे २ अध्यायः ॥

मन्मथानन्दः, पुं, (मन्मथं आनन्दयतीति । आ + नन्द् + णिच् + पचाद्यच् । कामवर्द्धकत्वादस्य तथात्वम् ।) महाराजभूतः । इति राजनिर्घण्टः ॥

मन्मथालयः, पुं, (मन्मथस्य आलय इव । कामवर्द्धकत्वादेवास्य तथात्वम् ।) आम्रः । इति राजनिर्घण्टः ॥

मन्मनः, पुं, गद्गदध्वनिः । इति त्रिकाण्डशेषः ॥ (दम्पत्योः कथनविशेषः । यथा, चिन्तामणिधृतवचनम् ।

"सुरते कर्म्मसङ्गे तु निजदेशीयभाषया ।
दम्पत्योः कथनं यत्तु मन्मनं तं विदुर्बुधाः ॥")

मन्या, स्त्री, (मन्यते ज्ञायते स्वभावुःखादिकमनया । मन् + करणे क्यप् । स्त्रियां टाप् ।) ग्रीवायाः पश्चात् शिरा । इत्यमरः । २ । ६ । ६५ ॥ (यथा, सुश्रुते उत्तरतन्त्रे २५ अध्यायः ।

"दीर्घासु दुष्टास्रय एव मन्या
संपीड्य घाटां सुरुजां सुतीव्राम् ।
कुर्व्वन्ति सास्रिभुवमग्रहदैर्घ्यं
स्थितिं करोत्याशु विशेषतस्तु ॥")

मन्याका, स्त्री, (मन्येवेति । मन्या + स्वार्थे कन् । स्त्रियां टाप् । सुकन्याक इति वत् न विभाषया ह्रस्वः ।) मन्या । इति शब्दरत्नावली ॥

मन्युः, पुं, (मन्यते ज्ञायतेऽसौ । मन + "यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणा० ३ । २० । इति युच् ।) क्रोधः । (यथा, भट्टिकाव्ये । ६ । ३० ।

"मन्युर्मन्ये ममास्त्रमीद्दिषादोरुभदुद्यतिम् ॥")

दैवम्। क्रतुः। (यथा, राजतरङ्गिण्याम्। २। १७४।
"आदिवैभूवाभिमन्युः श्रुतमन्युरिवापरः।")
क्रोधः। इत्यमरः। ३। ३। १५३। (यथा, महाभारते। १। ७६। ५।
"यः सञ्चारयते मन्युं योऽतिवादांस्तितिक्षते।
यश्च तप्तो न तपति दृढं सोऽर्थस्य भाजनम्।")
अहङ्कारः। इति शब्दरत्नावली। (क्रोधाभिमानिदेवः। यथा, ऋग्वेदे। १०। ८३। १।
"यस्ते मन्यो! विधन्नय सायक
सह ओजः पुष्यति विश्वमानुषक्।"
वितथपुत्रः। यथा, भागवते। ६। २१। १।
"वितथस्य सुतान् मन्योर्दृढत्रुच्छो व्यजायत।"
रुद्रदेवः। यथा, भागवते। ४। ५। ५।
"आत्मन्न एव कुपितेन मन्युना
स देवदेवः परिचक्रमे विभुम्।")
मन्वन्तरं, क्ली, (मनोरन्तरमस्मिन्निति।) दिव्यानां युगानामेकसप्ततिः। इत्यमरः। १। ४। २२। देवमानेनैकसप्ततियुगानि मन्वन्तरमुच्यते मनोरन्तरमवकाशोऽधिवा अस्मिन्निति मन्वन्तरम्।
"एवं चतुर्युगाख्यानां साधिका ह्येकसप्ततिः।
इतत्रेतादियुक्तानां मनोरन्तरमुच्यते।"
इति विष्णुपुराणम्।
मनवः स्वायम्भुवादयस्तेषामन्तरमवकाशोऽधिवा मन्वन्तरमिति वा। एकसप्ततिरिति यद्यपि गणनया अहर्युगेनाधिका।
"दैविकानां युगानान्तु सहस्रं ब्रह्मणो दिनम्।
मन्वन्तरं तथैवैकं तस्य भागाश्चतुर्दश।"
तत्किञ्चिदधिका दिव्ययुगानामेकसप्ततिरिति नामविधाने सर्व्वग्रन्थानायैरुक्तत्वात् तथापि अल्पत्वादिह नोक्तम्। मन्वन्तरस्य संख्यातवर्षाणि यथा,—
"त्रिंशल्लोकस्य वर्षाणां मानुषेण द्विजोत्तमाः।
सप्तषष्टिसहस्राणि नियुतान्यधिकानि तु।
त्रिंशतिस्तु सहस्राणि कालो यः साधिकां विना।
मन्वन्तरस्य संख्येया किञ्चिदूनिन् कथिता दिवाः।"
एतदङ्का यथा, ३०६,७२०,०००। एवं चतुर्दशमन्वन्तरैरहर्दिनम्। युगानि यथा त्रैलोक्यसारे।
"पूर्व्वं कृतयुगं नाम ततस्त्रेता विधीयते।
द्वापरस्य कलिश्चैव युगान्येतानि सुव्रताः।"
युगमानानि यथा,—
"चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम्।
दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः।"
इति।
अन्यत्र च।
"चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्।
तस्य तावती सन्ध्या सन्ध्यांशश्च तथाविधः।
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च।"
इति।
अस्यार्थः। देवमाने सत्यस्य वर्षाणि ४०००
चतुःसहस्राणि सन्ध्यावर्षाणि ४०० चत्वारि शतानि सन्ध्यांशवर्षाणि ४०० चत्वारि शतानि। एवं देवमाने सत्यस्य वर्षाणि अष्टशताधिकचतुःसहस्राणि ४८०० एवं त्रेतायाः षट्शताधिकत्रिसहस्रं ३६०० एवं द्वापरस्य चतुःशताधिकं द्विसहस्रम् २४०० एवं कलेः शतद्वयाधिकमेकसहस्रम् १२०० समुदायेन द्वादशसहस्राणि १२०००। मानुषमानेन सत्यादीनां मानं यथा, ज्योतिषि।
"वसुनिधिमैत्रा ऋतुरन्ध्रमासा
वेदा रसाद्री सुजवद्विवेदाः।
एतानि मूल्यच्यतवाङ्कितानि
युगाब्दसंख्याः परिकीर्त्तितानि।"
एतदङ्कैर्ज्ञाते सत्यस्य यथा, १,७२८,०००। त्रेतायाः यथा, १,२९६,०००। द्वापरस्य यथा, ८६४,०००। कलेर्यथा, ४३२,००० । समुदायेन ४,३२०,०००। अपरं ब्राह्मवर्षादिमानं बाहुल्यभिया नोक्तम्। इति तट्टीकायां भरतः।
अपि च। ब्रह्मणो दिनमध्ये चतुर्दशमन्वन्तराणि भवन्ति। एको मनुर्यावदधिकारी भवति स कालो मन्वन्तरसंज्ञको भवति। तत्र मनूनां नामानि। प्रथमः स्वायम्भुवो मनुः। द्वितीयः स्वारोचिषो मनुः। तृतीय उत्तमो मनुः। चतुर्थस्तामसो मनुः। पञ्चमो रैवतो मनुः। षष्ठश्चाक्षुषो मनुः। सप्तमो वैवस्वतो मनुः। वर्त्तमानोऽयम्। अष्टमः सावर्णिर्मनुः। नवमो दक्षसावर्णिर्मनुः। दशमो ब्रह्मसावर्णिर्मनुः। एकादशो धर्म्मसावर्णिर्मनुः। द्वादशो रुद्रसावर्णिर्मनुः। त्रयोदशो देवसावर्णिर्मनुः। चतुर्दश इन्द्रसावर्णिर्मनुः। प्रतिमन्वन्तरं भगवदवतारेऽवगच्छन्निमनुमनुपुत्रादयः पृथक् पृथगभवन्ति। यथा। स्वायम्भुवे मन्वन्तरे यज्ञोऽवतारः स एवेन्द्रः। यमादयो देवाः। मरीचिप्रभृतयः सप्तर्षयः। स्वायम्भुवो मनुः। प्रियव्रतोत्तानपादौ मनुपुत्रौ। १। स्वारोचिषे विभुरवतारः। रोचन इन्द्रः। देवाश्चैत्रिताद्याः। ऊर्ज्जस्तम्बादयः सप्तर्षयः। अग्निबाहुः स्वारोचिषो मनुः। द्युमत्सुषेणरोचिष्मत्प्रमुखा मनुपुत्राः। २। उत्तमे सत्यसेनोऽवतारः। सत्यजिदिन्द्रः। सत्यवेदश्रुतभद्रादयो देवाः। वसिष्ठसुताः सप्तर्षयः प्रमदादयः। प्रियव्रतसुत उत्तमो मनुः। यज्ञसङ्ख्ययज्ञहोत्राद्याश्चत्वारः सुताः। ३। तामसे हरिरवतारः। त्रिशिख इन्द्रः। वैधृतादयो देवाः। ज्योतिर्द्धामादयः सप्तर्षयः। तामसो मनुः। ख्यातिनरादयश्चत्वारः सुताः। ४। रैवते विष्णुरवतारः। विभुरिन्द्रः। भूतरयादयो देवाः। हिरण्यरोमादयः सप्तर्षयः। रैवतो मनुः। बलिबन्ध्वादयश्चत्वारः सुताः। ५। चाक्षुषे अजितोऽवतारः। मन्त्रद्रुम इन्द्रः। आप्यादयो देवाः। हविष्मदीरकादयः सप्तर्षयः। चाक्षुषो मनुः। पुरुषसम्भवादयश्चत्वारः सुताः। ६। वैवस्वते वामनोऽवतारः। पुरन्दर इन्द्रः। आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणा अश्विनावृभ इत्याद्या देवाः। कश्यपोऽत्रिर्वसिष्ठो विश्वामित्रो गौतमो जमदग्निर्भरद्वाज एते सप्तर्षयः। वैवस्वतो मनुः। इक्ष्वाकुः शुनः शर्य्यातिः दृष्टः धृष्टः करूषकः नरिष्यन्तः पृषध्रः नाभागः कविः एते मनुपुत्रा इत्र। ७। अथ भविष्यानि। सावर्णिके सार्व्वभौमोऽवतारः। बलिरिन्द्रः। सुतपसो विरजा अमृतप्रभा देवाः। गालवः दीप्तिमान् परशुरामः अश्वत्थामा कृपः ऋष्यशृङ्गः व्यासः एते सप्तर्षयः। सावर्णिर्मनुः। निर्म्मोकविरजस्काद्याश्चत्वारः सुताः। ८। दक्षसावर्णिके ऋषभोऽवतारः। अद्भुत इन्द्रः। पारमरीचिगर्भाद्या देवाः। द्युतिमदाद्याः सप्तर्षयः। दक्षसावर्णिर्मनुः। भूतकेतुर्दीप्तिकेत्वाद्याश्चत्वारः सुताः। ९। ब्रह्मसावर्णिके विष्वक्सेनोऽवतारः। शम्भुरिन्द्रः। सुरसेनविशङ्काद्या देवाः। हविष्मदाद्याः सप्तर्षयः। ब्रह्मसावर्णिर्मनुः। भूरिषेणाद्याश्चत्वारः सुताः। १०। धर्म्मसावर्णिके धर्म्मसेतुरवतारः। वैधृत इन्द्रः। विहङ्गमकामगमाद्या देवाः। अरुणादयः सप्तर्षयः। धर्म्मसावर्णिर्मनुः। सत्यधर्म्मादयश्चत्वारः सुताः। ११। रुद्रसावर्णिके। सुधामाख्योऽवतारः। ऋतधामा इन्द्रः। हरितादयो देवाः। तपोमूर्त्यादयः सप्तर्षयः। रुद्रसावर्णिर्मनुः। देववानुपदेवादयश्चत्वारः सुताः। १२। देवसावर्णिके योगेश्वरोऽवतारः। दिवस्पतिरिन्द्रः। सुकर्म्मसूत्राद्या देवाः। निर्म्मोकतत्त्वदर्शाद्याः सप्तर्षयः। देवसावर्णिर्मनुः। चित्रसेनविचित्राद्याश्चत्वारः सुताः। १३। इन्द्रसावर्णिके बृहद्भानुरवतारः। शुचिरिन्द्रः। यविष्ठचारुसेनादयो देवाः। अग्निबाह्वादयः सप्तर्षयः। इन्द्रसावर्णिर्मनुः। उरुगम्भीरबुद्ध्याद्याश्चत्वारः सुताः। १४। अथैतेषां कर्म्मोच्यते। इन्द्रो देवराट् यथावर्षं च। मनुरादौ पृथिव्यां राजा भवति ततः पुत्रपौत्रादयो मन्वन्तरसमाप्तिपर्य्यन्तं राजानो भवन्ति। देवताः प्रजानां यज्ञादिकर्म्मसुदाक्षतृप्तिं प्रयच्छन्ति। सप्तर्षयो धर्म्मशास्त्राणि प्रकाशयन्ति। भगवदवतारा एतान् स्वस्वकर्म्मणि विनोदयन्ति देवराजवादीन् धर्म्मद्रुहो घ्नन्ति च। चतुर्दशमन्वन्तरैरेकञ्च एकं दिनं भवति तन्मध्यमानवैरब्दः। त्रिंशदब्दैरेकञ्च एको मासो भवति। इति श्रीभागवतमतम्। ७। अन्यच।
"त्रयेणचापि चत्वारि भवेत् कलियुगं क्रमे।
द्वात्रिंशत्या सहस्रेषु सहितान्यपि संख्यया।
चतुःशतसहस्राणि सप्तषष्टिश्च संख्यया।
वर्षाणां द्वापरं प्रोक्तं युगं पूर्व्वविदृग्गतम्।
त्रेता द्वादशसाहस्राणि वर्षाणां परिकीर्त्तिता।
नवत्या सहस्रेषु संयुक्तानि भवन्ति हि।
इत्र चत्र च वर्षाणां वर्षाणाञ्च कृतं युगम्।

सहस्रैरट्ठविंशत्या संयुतान्यपि संख्यया ।
त्रिंशत्चारिंशच्चाणि सहस्राणि च विंशतिः ।
मानुषैश्च प्रमाणैश्च भवेत् चातुर्युगं क्रमात् ॥
सप्तषष्टिश्च लक्षाणि त्रिंशत्कोट्यस्तथैव च ।
विंशतिश्च सहस्राणि मन्वन्तरमिहोच्यते ॥
चतुर्युगैकसप्तत्या मन्वन्तरमिति स्मृतिः ।
कल्पो मन्वन्तरैरेभिश्चतुर्दशभिरुच्यते ॥
कोट्यो द्वादश षट्त्रिंशल्लक्षाणि तु भवन्ति च ।
अष्टाशीतिसहस्राणि जीवेत् स्वायम्भुवो मनुः ॥"
इति वह्निपुराणम् ॥

अपरच्च ।

मार्कण्डेय उवाच ।

"मन्वन्तरं मनोः कालो यावत् पालयते प्रजाः ।
एको मनुः स कालस्तु मन्वन्तरमिति स्मृतम् ॥
तदेकसप्ततियुगैर्देवानामिह जायते ।
तैश्चतुर्दशभिः कल्पो दिनमेकन्तु वेधसः ॥"
इति कालिकापुराणे २७ अध्यायः ॥

अन्यदपि ।

"मन्वन्तराण्यशेषाणि श्रोतुमिच्छाम्यनुक्रमात् ।
मन्वन्तराधिपांश्चैव शुक्रदेवपुरोगमान् ।
भवता कथितानेतान् श्रोतुमिच्छाम्यहं गुरो ! ॥

श्रीपराशर उवाच ।

अतीतानागतानीह यानि मन्वन्तराणि वै ।
तान्यहं भवतः सम्यक् कथयामि समासतः ॥
स्वायम्भुवो मनुः पूर्व्वं मनुः स्वारोचिषस्तथा ।
औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा ।
वर्त्तते मनवोऽतीताः साम्प्रतन्तु रवेः सुतः ।
वैवस्वतोऽयं तस्यैतत् सप्तमं वर्त्ततेऽन्तरम् ॥
स्वायम्भुवन्तु कथितं कल्पादावन्तरं मया ।
देवास्तत्रर्षयश्चैव यथावत् कथिता मया ॥ १ ॥
अतः ऊर्द्धं प्रवक्ष्यामि मनोः स्वारोचिषस्य तु ।
मन्वन्तराधिपान् सम्यग्देवर्षींस्तत्सुतांस्तथा ॥
पारावताः सतुषिता देवाः स्वारोचिषेऽन्तरे ।
विपश्चित्तश्च देवेन्द्रो मैत्रेयासीन्महाबलः ॥
ओजस्तम्भस्तथा प्राणो दत्तोलिर्ऋषभस्तथा ।
विश्वरार्व्वरीवांश्च तत्र सप्तर्षयोऽभवन् ॥
चैत्रकिंपुरुषाद्याश्च सुताः स्वारोचिषस्य तु ।
द्वितीयमेतदाख्यातमन्तरं ब्रह्मणो मुने ॥२॥
तृतीयेऽप्यन्तरे ब्रह्मन्नौत्तमिर्नाम यो मनुः ।
सुशान्तिर्नाम तस्येन्द्रो मैत्रेयाभूत् सुरेश्वरः ॥
सुधामानस्तथा सत्याः शिवाश्चाथ प्रतर्दनाः ।
वशवर्त्तिनश्च पञ्चैते गणा द्वादशकाः स्मृताः ॥
वशिष्ठतनयाश्चात्र सप्त सप्तर्षयोऽभवन् ।
अजः परशुदिव्याद्याश्चौत्तमिमनोः सुताः ॥३॥
तामसस्यान्तरे देवाः सरूपा हरयस्तथा ।
सत्याश्च सुधियश्चैव सप्तविंशतिका गणाः ॥
शिखिरिन्नस्तथा चासीच्छतयज्ञोपलक्षणः ।
सप्तर्षयश्च ये तत्र तेषां नामानि मे शृणु ॥
ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽथाग्निवनक-
स्तथा ।
पीवरश्चैत्थो ह्येते सप्त तत्रापि चान्तरे ॥
वरः ख्यातिः शान्तभयो नामृतश्चाक्षुषस्तथा ।
पुत्रास्तु तामसस्यासन् राजानः सुमहा-
बलाः ॥ ४ ॥
पञ्चमे चापि मैत्रेय ! रैवतो नाम नामतः ।
मनुर्विप्रश्च तत्रेन्द्रो देवाश्चैवान्तरे शृणु ॥
अमिताभा भूतरया वैकुण्ठाश्च सुमेधसः ।
एते देवगणास्तत्र चतुर्दश चतुर्दश ॥
हिरण्यरोमा वेदश्रीरूर्द्धबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्ज्जन्यश्च महामुनिः ।
एते सप्तर्षयो विप्र ! तत्रासन् रैवतान्तरे ॥
बलबन्धुः सुसम्भाव्यः सत्यकामाश्च तत्सुताः ।
नरेन्द्राः सुमहावीर्य्या बभूवुर्मुनिसत्तम ! ॥
स्वारोचिषश्चौत्तमिस्तु तामसो रैवतस्तथा ।
प्रियव्रतान्वया ह्येते चत्वारो मनवः स्मृताः ॥
विष्णुमाराध्य तपसा स राजर्षिः प्रियव्रतः ।
मन्वन्तराधिपानेतान् लब्धवानात्मवंशजान् ॥५॥
षष्ठे मन्वन्तरे चासीच्चाक्षुषाख्यस्तदा मनुः ।
मनोजवस्तथैवेन्द्रो देवानपि निबोध मे ।
आर्य्याः प्रसूता भव्याश्च पृथुगाश्च दिवौकसः ।
महाद्युभाषा वेखाश्च पञ्चैतेऽप्यृभवो गणाः ॥
सुमेधा विरजाश्चैव हविष्मानुत्तमो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥
ऊरुः पूरुः शतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥६॥
विवस्वतः सुतो विप्र ! श्राद्धदेवो महाद्युतिः ।
मनुः स वर्त्तते धीमान् साम्प्रतं सप्तमेऽन्तरे ॥
आदित्यवसुरुद्राद्या देवाश्चात्र महामुने ! ।
पुरन्दरश्चैवात्र मैत्रेय ! त्रिदशेश्वरः ॥
वशिष्ठः कश्यपोऽथात्रिर्जमदग्निः सगौतमः ।
विश्वामित्रभरद्वाजौ सप्त सप्तर्षयोऽत्र च ॥
इक्ष्वाकुश्चैव नाभागो धृष्टः शर्य्यातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभ उद्दिष्ट एव च ॥
करूषश्च पृषध्रश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्रास्तु धार्म्मिकाः ॥७॥
विष्णुशक्तिरनौपम्या सर्व्वोत्तिक्ता स्थितौ स्थिता ।
मन्वन्तरेष्वशेषेषु देवसैनाधितिष्ठति ॥
अंशेन तस्य यज्ञोऽसौ जज्ञे स्वायम्भुवेऽन्तरे ।
आकूत्यां मानसो देव उत्पन्नः प्रथमेऽन्तरे ॥
ततः पुनः स वै देवः प्राप्ते स्वारोचिषेऽन्तरे ।
तुषितायां वसुत्यन्नो ह्यजितस्तुषितैः सह ।
औत्तमेरन्तरे चापि तुषितस्तु पुनः स वै ।
सत्यायामभवत् सत्यः सत्यैः सह सुरोत्तमैः ॥
तामसस्यान्तरे चैव संप्राप्ते पुनरेव हि ।
हर्य्यायां हरिभिः सार्द्धं हरिरेव बभूव ह ॥
रैवतेऽप्यन्तरे देवः सम्भूत्यां मानसोऽभवत् ।
सम्भूतो राजसैः सार्द्धं देवैर्देववरो हरिः ॥
चाक्षुषे चान्तरे देवो वैकुण्ठः पुरुषोत्तमः ।
विकुण्ठायामसौ जज्ञे वैकुण्ठैः देवतैः सह ।
मन्वन्तरे तु संप्राप्ते तथा वैवस्वते द्विजः ।
वामनः कश्यपाद्विष्णुरदित्यां संबभूव ह ।
त्रिभिः क्रमैरिमान् लोकान् जित्वा येन महा-
त्मना ।
पुरन्दराय त्रैलोक्यं दत्तं निहतकण्टकम् ।

एवेतास्तनवस्तस्य सप्तमन्वन्तरेषु वै ।
सप्तस्वेवाभवन् विप्र ! याभिः संरक्षिताः प्रजाः ॥
यस्यादिष्टमिदं सर्व्वं तस्य ब्रह्मात्मनो महात्मनः ।
तस्मात् संप्रोच्यते विष्णुर्विशेर्धातोः प्रवेशनात् ॥
सर्व्वे च देवा मनवः समस्ताः
सप्तर्षयो ये मनुसूनवश्च ।
इन्द्रश्च यो यश्चिदंशभूतो
विष्णोरंशेनास्तु विभूतयस्ताः ॥"
इति विष्णुपुराणे ३ अंशे मन्वन्तराख्यानं नाम
१ अध्यायः ॥ * ॥

श्रीमैत्रेय उवाच ।

श्रोक्तान्येतानि भवता सप्त मन्वन्तराणि वै ।
भविष्याण्यपि विप्रर्षे ! ममाख्यातुं त्वमर्हसि ॥

श्रीपराशर उवाच ।

"छायासंज्ञासुतो योऽसौ द्वितीयः कथितो
मनुः ।
पूर्व्वजस्य सवर्णोऽस्य सावर्णिस्तेन कथ्यते ॥
तस्य मन्वन्तरं ज्ञेयं सावर्णिकमथोत्तमम् ।
तच्छृणुष्व महाभाग ! भविष्यं कथयामि ते ॥
सावर्णिस्तु मनुर्योऽसौ मैत्रेय ! भविता ततः ।
सुतपाश्चामिताभाश्च मुख्याश्चापि तदा सुराः ॥
तेषां गणस्तु देवानामेकैको विंशकः स्मृतः ।
सप्तर्षीनपि वक्ष्यामि भविष्यानथ सप्त च ॥
दीप्तिमान् गालवो रामः कृपो द्रौणिस्तथापरः ।
ऋष्यशृङ्गश्च सप्तमः ॥
विष्णुप्रसादादनघः पाताळान्तरगोचरः ।
विरोचनसुतस्त्वेषां बलिरिन्द्रो भविष्यति ॥
विरजाश्चार्व्वरीवांश्च निर्मोहाद्याश्चथापरे ।
सावर्णस्य मनोः पुत्रा भविष्यन्ति नरेश्वराः ॥८॥
नवमो दक्षसावर्णिर्मैत्रेय ! भविता मनुः ।
पारा मरीचिगर्भाश्च सुधर्म्माणस्तथा दिवः ।
भविष्यन्ति तदा देवा एकैको द्वादशो गणः ।
तेषामिन्द्रो महावीर्य्यो भविष्यत्यद्भुतो द्विज ! ॥
सवनो द्युतिमान् हव्यो वसुर्मेधातिथिस्तथा ।
ज्योतिष्मान् सप्तमः सत्यश्चैते च महर्षयः ॥
धृतिकेतुर्दीप्तिकेतुः पञ्चहस्तो निरामयः ।
पृथुश्रवाद्याश्च तथा दक्षसावर्णिकात्मजाः ॥९॥
दशमो ब्रह्मसावर्णिर्भविष्यति सुने ! मनुः ।
सुधामानोऽभिरुद्राश्च श्रुतसंज्ञास्तथा सुराः ॥
तेषामिन्द्रश्च भविता शान्तिर्नाम महाबलः ।
सप्तर्षयो भविष्यन्ति ये तदा तान् शृणुष्व च ॥
हविष्मान् सुकृतिः सत्यो ज्योतिर्मूर्त्तिस्तथापरः ।
नाभागो प्रतिमौजाश्च सत्यकेतुस्तथैव च ॥
सुक्षेत्रश्चोत्तमौजाश्च भूरिषेणादयो दश ।
ब्रह्मसावर्णिपुत्राश्च रक्षिष्यन्ति वसुन्धराम् ॥१०॥
एकादशश्च भविता धर्म्मसावर्णिको मनुः ।
विहङ्गमाः कामगमा निर्म्माणरतयस्तथा ॥
गणास्तेते तदा मुख्या देवानां हि भविष्यताम् ।
एकैकस्त्रिंशकस्त्वेषां गणश्चेन्द्रश्च वै दमः ॥
निरस्त्राश्चित्रसेनाश्च वपुष्मान् हविषाकविः ।
हविष्मानघश्चैव भाषा सप्तर्षयस्तथा ॥
सर्व्वत्रगः सर्व्वधर्म्मा देवानीकादयस्तथा ।

भविष्यन्ति मनोस्तस्य तनयाः पृथिवीश्वराः॥११॥
रुद्रपुत्रस्तु सावर्णिर्भविता द्वादशो मनुः।
ऋतधामा च तत्रेन्द्रो भविता श्रृणु मे सुरान्।
हरिता लोहिता देवास्तथा सुमनसो द्विज!।
सुकर्म्माणः सुरापाश्च दशका: पञ्च वै गणाः॥
तपस्वी सुतपाश्चैव तपोमूर्त्तिस्तपोरतिः।
तपोधृतिर्दुरितघ्नाश्च सप्तमस्तु तपोधनः॥
देववानुपदेवश्च देवश्रेष्ठादयस्तथा।
भविष्यन्ति मनोस्तस्य महावीर्य्याः सुता
नृपाः॥१२॥
त्रयोदशो रौच्यनामा भविष्यति सुने! मनुः।
सुत्रामणिः सुकर्म्माणः सुधर्म्माणस्तथापरः॥
त्रयस्त्रिंशद्विभेदास्ते देवानां ये तु वै गणाः।
दिवस्पतिर्महावीर्य्यस्तेषामिन्द्रो भविष्यति॥
निर्मोहस्तत्त्वदर्शी च निष्कम्पो निरुतसुकः।
धृतिमानव्ययश्चान्यः सप्तमः सुतपा मुनिः॥
सप्तैवास्मिन्मे तस्य पुत्रानपि निबोध मे।
चित्रसेनविचित्राद्या भविष्यन्ति महौजसः॥१३॥
भौत्यस्तुर्दशश्चात्र मैत्रेय! भविता मनुः।
शुचिरिन्द्रः सुरगणास्तत्र पञ्च श्रृणुष्व तान्॥
चाक्षुषश्च पवित्राश्च कनिष्ठा भ्राजिनस्तथा।
वाताधृद्धाश्च वै देवाः सप्तधैनपि मे श्रृणु॥
अग्निबाहुः शुचिः शुक्रो मागधोऽथौध्र एव च।
युक्तस्तथाजितश्चान्यो मनुपुत्रास्तत: श्रृणु॥
उरुगम्भीरबुद्ध्याद्या मनोस्तस्य सुता नृपाः।
कथिता मुनिशार्दूल! पालयिष्यन्ति मेदिनीम्॥१४॥
चतुर्युगान्ते वेदानां जायते किल विप्लवः।
प्रवर्त्तन्ति तदा तेन सप्तर्षय इति श्रुतिः॥
क्षते क्षते क्षतेर्विप्र! प्रथिता जायते मनुः।
देवा यज्ञसुतस्ते तु यावन्मन्वन्तरन्तु तत्॥
भवन्ति ये मनोः पुत्रा यावन्मन्वन्तरं हि ते:।
तदन्वयोद्भवैश्चैव तावद्भूः परिपाल्यते॥
मनुः सप्तर्षयो देवा भूपालाश्च मनोः सुताः।
मन्वन्तरे भवन्त्येते श्रुक्त्रेवाधिकारिणः॥
चतुर्दशभिरेतैस्तु गतैर्मन्वन्तरैर्द्विज!।
सहस्रयुगपर्य्यन्तः कल्पो निःशेष उच्यते।
तावत्प्रमाणा च निशा ततो भवति सत्तम!॥"
इति विष्णुपुराणे १ अंशे २ अध्यायः॥*॥

मन्वन्तरशब्दस्य यथा,—
"श्रुते मन्वन्तरे पूर्व्वे धर्म्ममाप्नोति मानवः।
खारोत्तिषस्य श्रवणात् सर्व्वान् कामानवाप्नुयात्॥
औत्तमे धनमाप्नोति ज्ञानञ्चाप्नोति तामसे।
रैवते च श्रुते बुद्धिं सुरूपां विन्दते स्त्रियम्॥
आरोग्यञ्चाक्षुषे पुंसां श्रुते वैवस्वते बलम्।
गुरुवत् पुत्रपौत्राञ्च सूर्य्यसावर्णिके श्रुते॥
माहात्म्यं ब्रह्मसावर्णेर्धर्म्मसावर्णिके शुभाम्।
मतिमाप्नोति मनुजो रुद्रसावर्णिके जयम्॥
जातिस्मरो गुरोर्भक्तो दक्षसावर्णिके श्रुते।
विश्रुतयशस्त्वरिवलं रौच्यं श्रुत्वा मनूत्तमम्॥
दिव्यप्रासादमाप्नोति भौत्ये मन्वन्तरे श्रुते।
तथाविदीप्तिं पुत्रांश्च गुणयुक्तानवाप्नुते॥
सर्व्वाण्यशुक्रमादृत्य श्रृणोति मुनिसत्तम!।
मन्वन्तराणि तस्यापि श्रूयतां फलमुत्तमम्॥
तत्र देवानृषीन् विप्राम्नृपुंस्तत्तनयान् नृपान्।
इन्द्रांश्च श्रुत्वा सर्व्वेभ्यः पापेभ्यो विप्रमुच्यते॥
देवेन्द्रविभृपाद्याश्चे ये तन्मन्वन्तराधिपाः।
ते प्रीयन्तां तथा प्रीताः प्रयच्छन्ति शुभां मतिम्॥
ततः शुभां मतिं प्राप्य ज्ञात्वा कर्म्म तथा शुभम्।
शुभां गतिमवाप्नोति यावदिन्द्राश्चतुर्दश॥
सर्व्वे स्युर्ऋतवः सौम्याः सर्व्वे सौम्यास्तथा
ग्रहाः।
भवन्त्यसंशयं श्रुत्वा क्रमान्मन्वन्तरस्थितिम्॥"
इति मार्कण्डेयपुराणे मन्वन्तरानुवर्णनं नामाध्यायः॥

मयटः, पुं, (मयुष्कः। पृषोदरादित्वात् साधुः।) वनसुद्गः। इत्यमरटीकायां भरतः।२।६।२७॥

मयटकः, पुं, (मयट एव। मयट+स्वार्थे कन्।) वनसुद्गः। इत्यमरटीकायां भरतः।२।६।२७॥

मयुष्कः, पुं, (मयुष्कः। पृषोदरादित्वात् साधुः।) वनसुद्गः। इत्यमरटीकायां भरतः।२।६।२७॥

मभ्र, गतौ। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) ओष्ठ्यवर्गचतुर्थोपधः। मभ्रति। इति दुर्गादासः॥

मम, ष, मदीयम्। आमार इति भाषा। यथा,
"ममत्वं मम राज्यस्य राज्याङ्गेष्वखिलेष्वपि।
जानतोऽपि यथाश्वस्य किमेतन्मुनिसत्तम!॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
"तेषु असदीयत्वं जानतोऽपि मम यथाश्वस्य अश्वस्वेव राज्याद्यिषु ममत्वमेतत् किं किं निबन्धनमित्यर्थः।" इति तट्टीकायां नागोजीभट्टः॥
अस्माद्यत्नेन स्वप्रमाणं ममत्वशब्दे द्रष्टव्यम्। अस्मच्छब्दस्य षष्ठ्येकवचनान्तस्येदं रूपं तत्पदं त्रिषु लिङ्गेषु बोद्धव्यम्॥

ममता, स्त्री, (मम+भावे तल्। टाप्।) दर्पः। अभिमानः। इति हेमचन्द्रः। २। २३१॥
ममत्वम्। यथा,—
"तथापि ममतावर्त्ते मोहगर्त्ते निपातिताः॥"
इति देवीमाहात्म्यम्॥
(उतथ्यपत्नी। सा तु दीर्घतमोमाता। यथा, ऋग्वेदे। ६। १०। २।
"ओमं यमस्ये ममतेव भूर्णं
हतं न शुचि मनयः पवन्ते॥"
"ममता नाम ब्रह्मवादिनी दीर्घतमसो माता।" इति तद्भाष्ये सायनः।)

ममतायुक्तः, पुं, (ममतया युक्तः।) लुब्धः। इति शब्दमाला॥ अभिमानादिविशिष्टे, त्रि॥

ममत्वं, क्ली, (मम+भावे त्व।) मदीयत्वम्। यथा, मार्कण्डेयपुराणे।
"दुःखायतनभूतो हि ममत्वाकलनो ग्रहो॥"
क्लेशः। यथा,—
"क्षोभश्चित्तस्य तदा तत्र ममत्वाद्यहचेतनः।"
इति देवीमाहात्म्यम्॥
"ममत्वेन क्लेशेन आत्मदा चेतना मतिर्यस्य।
ममेति यद्यान्तरूपमव्ययं तस्य भावः ममत्वम्॥"
इति तट्टीकायां काश्मीरामः॥

ममायपतालः, पुं, (मयति बध्नाति जनानिति। मय बन्धने+"मयतेर्यलोपो मश्चापतुट् चालः।" उणा० ५। ५०। इति आलप्रत्ययः। धातोर्यलोपः मकारश्चान्तस्य प्रत्ययस्यापतुड़ागमश्च।) विषयः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

मय, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, मयते। इति दुर्गादासः॥

मयः, पुं, (मयते इतं गच्छतीति। मय्+पचाद्यच्।) उद्गः। इत्यमरः।२।८।७५॥ अन्धतरः। दानवविशेषः। स तु दैत्यानां शिल्पी। इति मेदिनी। ये, ४४॥ (अयं हि युधिष्ठिरस्य राज्ञः सभां विरचितवान्। यथा, शिशुपालवधे। २३। ५०।
"उपनीय विभूसरसो मवेन या
मखिदारुचारु किल वार्षपर्व्वणम्।
विदधेऽवधूतसुरसङ्गसम्पदं
सपुयाससदृत् सपदि संसदं स ताम्॥")
तस्य सम्भाषणानि यथा, वह्निपुराणे।
"मयस्य जाता दैमायाः पुत्राः सप्त महाबलाः।
मायावी दुन्दुभिश्चैव तृणच्च महिषस्तथा।
वालिका वज्रकन्या च कन्या मन्दोदरी तथा॥"
(सुखम्। त्रि, गन्ता। यथा, वाजसनेयसंहितायाम्। २२। १६।
"इषोऽस्यूर्ज्जोऽसि मयोऽस्यूर्ज्जसि।" "मयोऽसि मयते गच्छति मयः मय गतौ पचाद्यच्। यद्वा मय इति सुखनाम सुखरूपोऽसि।" इति तद्भाष्ये महीधरः॥)

मयटः, पुं, (मयते गच्छत्यनेनेति। मय+"शुकादिभ्योऽटन्।" उणा० ४। ८१। इति अटन्।) लब्धयुक्तद्रव्यः। इति हारावली॥ इलन्तश्चेत् तद्भार्य्ये प्रागुर्म्भार्य्ये च मयट् इति प्रत्ययो भवति॥

मयटकः, पुं, (मयुष्कः। पृषोदरादित्वात् साधुः।) वनसुद्गः। इत्यमरटीकायां भरतः॥

मया, स्त्री, (मयते गच्छति रोगोऽनया। मय+कः। स्त्रियां टाप्।) चिकित्सा। इति शब्दचन्द्रिका॥ त्रि, तृतीयैकवचनान्तास्मच्छब्दस्य रूपम्॥ (यथा, हितोपदेशे। १। २२१।
"इहैव दृष्टानि मयैव तानि
जन्मान्तराण्येव दयान्तराणि॥")

मयी, स्त्री, (मय+"मृयोमादिति।" ४। १। ४८। इति ङीष्।) मयस्य स्त्रीजातिः। उद्गी। इति व्याकरणम्॥

मयुः, पुं,(मयङ् गतौ+व्युङ्गादित्वात् कुः। इत्यमरटीकायां रघुनाथः॥ यद्वा, मिनोति सुशब्दं करोतीति। मि+"शब्दशीङ्चरितुसरितनिधनिमिमसृजिभ्य उः।" उणा०१।७। इति उः।)

किन्नरः। इत्यमरः। १।१।७४॥ नगः। इति मेदिनी। मे, ४१॥ (यथा, वाजसनेयसंहितायाम्। १२। ४०।
"मयुं पशुं मेधमग्ने! जुषस्व
तेन चिन्वानस्तन्वो निषीद।"
"मयुं पशुं तुरङ्गवदनं किम्पुरुषं पशुं मयुं छागलगं वा जुषस्व।" इति तद्भाष्ये महीधरः॥)
मयुराजः, पुं, (मयूणां किन्नराणां राजा। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्।) कुबेरः। इति शब्दरत्नावली॥
मयूरकः, पुं, (मयून् नगान् लसति श्लेषयतीति। लस्+अच्। मयम्।) वनशूरः। इत्यमरटीका॥
मयूखः, पुं, (मायथन् गगनं प्रमाययन् ओखति गच्छतीति। एषोदरादिः। इत्यमरटीकायां रघुनाथः। यद्वा, माति परिमातीव। मा+"माङ लखो मय च।" उणा० ५। २५। इति लखः। मयादेशश्च।) किरणः। (यथा, महाभारते। ३। ११। ३१।
"यद्वज्जहतधा राजन्! मयूखानिव भास्करः॥")
दीप्तिः। ज्वाला। इत्यमरः। १। ४। ३१॥ (यथा, रघौ। २। ३६।
"अथान्धकारं गिरिगह्वराणां
दंष्ट्रामयूखैः प्रकलानि कुर्वन्।
भूयः स भूतेश्वरपार्श्ववर्त्ती
किंचिद्विहस्यार्थपतिं बभाषे॥")
शोभा। इति मेदिनी। खे, ११॥ नीलः। इत्यजयः॥ (पर्वतः। यथा, ऋग्वेदे। ७।११।३।
"दाधर्ष पृथिवीमभितो मयूखैः॥"
"मयूखैः पर्वतैः।" इति तद्भाष्ये सायणः॥)
मयूरः, पुं, (मयुरिव राति ग्रन्थायते इति। रा+कः। एषोदरादित्वात् साधुः। यद्वा, मीनाति हन्ति सर्पानिति। मी+"मीनातेरूरन्।" उणा० १।६८। इति ऊरन्।) खनामख्यातपक्षिविशेषः। तत्पर्य्यायः। बर्हिणः २ बर्ही ३ नीलकण्ठः ४ शुभ्रशुक् ५ शिखावलः ६ शिखी ७ केकी ८ मेघनादानुलासकः ९। इत्यमरः। २। ५।३०॥ प्रचलाकी १० चन्द्रकी ११ सितापाङ्गः १२। इति शब्दरत्नावली॥ भानौ १३ मेघानन्दी १४ कलापी १५ शिखण्डी १६ चित्रपिच्छिकः १७ शुभ्रभोगी १८ मेघनादानुलासकः १९। तस्य प्रभावस्य विचित्रताकारणं यथा,—
"प्रविष्टायां श्रुताग्नौ वेदवत्यां च रावणः।
पुष्पकेनु समारुह्य परिचक्राम मेदिनीम्॥
ततो मरुत्तं नृपतिं यजन्तं सह दैवतैः।
उशीरबीजमासाद्य ददर्श स तु रावणः॥
संवर्त्तो नाम ब्रह्मर्षिः साक्षाद्भ्राता बृहस्पतेः।
यागयामास धर्मेज्ञः सर्वैर्देवगणैर्वृतः॥
दृष्ट्वा देवास्तु तद्यज्ञं वरदानेन दुर्जयम्।
तिर्यग्योनिं समाविश्यास्तस्य धर्षणमीरयन्॥
ततो मयूरः संवृत्तो धर्मेराजस्तु वायसः।
लक्षणाद्यो धनाध्यक्षो हंसश्च वरुणोऽभवत्॥" इत्यादि॥
"इत्युक्तवानवीदिन्द्रो मयूरं नीलबर्हिणम्।
प्रीतोऽस्मि तव धर्मेज्ञ! सुखगाह्नि न ते भयम्॥
इदं नेत्रसहस्रन्तु यत्तवार्हे भविष्यति।
वर्षमासे मयि सदा प्राप्तासे प्रीतिलक्षणम्॥
एवमिन्द्रो वरं प्रादान्मयूरस्य सुरेश्वरः।
नीलाः किल पुरा वर्हा मयूराणां नराधिप!॥
सुराधिपादरं प्राप्य गताः सर्व्वे विचित्रताम्॥"
इत्यन्तं वाल्मीकीये रामायणे उत्तरकाण्डे १८ सर्गः॥ अस्य मांसगुणाः।
"मयूरः श्रीजनेत्राग्निमेधावर्द्धकरायुषाम्।
हितो वह्नौ गुरुष्णो वातघ्नः शुक्रमांसदः॥
हेमन्तकाले शिशिरे वसन्ते
सेवेत हि मायूरमृतौ मांसम्।
उष्णो हि वह्निं विषभोजनेच्छ
वर्षाशरद्ग्रीष्मसुखेष्वपथ्यः॥"
इति राजनिर्घण्टः॥
एतन्मांसमेरक्ततैलभृतं विषतुल्यम्। इति राजवल्लभः॥* मयूरशिखाक्षुपः। तत्पर्य्यायः। खराश्वा २ कारवी ३ दीप्यः ४ लोचमस्तकः५। इत्यमरः। २। ४। १११॥ अपामार्गः। इति मेदिनी। रे, १६६॥ (यथा, सुश्रुते चिकित्सितस्थाने २३ अः। "पिप्पलीपिप्पलीमूलं चव्यचित्रकमयूरवर्षाभूचिल्वं वा क्षीरं पिबेत्॥" असुरविशेषः। यथा, महाभारते।१।६७।१६।
"मयूर इति विख्यातः श्रीमान् वसु महासुरः।
स विश्व इति विख्यातो बभूव पृथिवीपतिः॥"
सुमेरोरुत्तरवर्त्ती पर्व्वतविशेषः। यथा, मार्कण्डेये। ५५। १२।
"सर्वशृङ्गो ग्रातशृङ्गो पुष्पको मेघपर्व्वतः।
विरजाश्चो वराहाद्रिर्मयूरो दावधिस्तथा॥"
कविविशेषः। स च मयूरभट्ट इति लोके प्रसिद्धः। अयं खलु बाणभट्टस्य श्वशुरः। उज्जयिन्यां हर्षभोजसभीपतेः सभायामासीदिति मातृगुप्ताचार्यप्रणीतभक्तामरस्तोत्रटीकारम्भे क्षेमेन्द्रप्रणीतप्रबन्धचिन्तामणौ च वस्तुपलभ्यते। प्रबन्धचिन्तामणौ बाणभट्टो मयूरस्य भगिनीपतिरासीदित्युक्तमस्ति। अथ च।
"अहो प्रभावो वाग्देव्या यन्मातङ्गदिवाकरः।
श्रीहर्षस्याभवत् सभ्यः समो बाणमयूरयोः॥"
इति श्रार्ङ्गधरपद्धतिप्रसिद्धराजशेखरपद्येनापि बाणमयूरयोः समकालत्वं प्रतीयते।
अयं हि कुष्ठरोगग्रस्तः सूर्य्यमाराधयामास। सूर्य्यशतकं नाम स्तोत्रमस्य प्रणीय ततः सम्यक् निष्कृतिमवाप। सूर्य्यशतकस्यान्तिमः श्लोको यथा,—
"श्लोका लोकस्य भूयुः शतमिति रचिता
श्रीमयूरेण भक्त्या
युक्तश्चैतान् पठेद् यः सकलमपि पुमान् सर्व्वपापैर्विमुक्तः।
आरोग्यं सत्कवित्वं मतिमतुलबलं कान्तिमायुः-प्रकर्षं
विद्यामैश्वर्य्यमर्थं सुखमपि लभते सोऽत्र सूर्य्य-प्रसादात्॥")
मयूरकं, क्ली, (मयूरः मयूरस्यीवेव प्रतिकृतिरिति। मयूर+"संज्ञायां प्रतिकृतौ।" ५। ३। ९६। इति कन्। अस्य मयूरकस्कान्तितुल्यद्युतित्वात्तथात्वम्।) अञ्जनविशेषः। तुतिया इति भाषा। तत्पर्य्यायः। तुत्थाञ्जनम् २ शिखिग्रीवम् ३ वितुन्नकम् ४। इत्यमरः। २। ६। १०१॥ (यथा, भावप्रकाशे। १।
"तुल्यं वितुन्नकं चापि शिखिग्रीवं मयूरकम्॥")
मयूरकः, पुं, (मयूर+स्वार्थे कन्।) अपामार्गः। इत्यमरः। २। ६। १०१॥ (यथा, सुश्रुते सूत्रस्थाने। ३६। १६।
"मयूरको राजवृक्षो निम्बः कोशातकी तिक्ता॥")
तुत्थकम्। (स्वार्थे कन्।) मयूरः। इति विश्वः॥ मयूरशिखा। इति जटाधरः॥
मयूरग्रीवकं, क्ली, (मयूरस्य ग्रीवाया इव कम्बरस्य वर्णोऽस्य वर्णो यस्य। बहुव्रीहौ कन्। ह्रस्वश्च।) तुत्थम्। इति राजनिर्घण्टः॥
मयूरचटकः, पुं, (मयूर इव चटकः।) यवकुक्कुटः। इति हारावली॥ ६०॥
मयूरचूड़ं, क्ली, (मयूरस्येव चूड़ा अग्रभागो यस्य तत्।) स्त्रौवेयकम्। इति राजनिर्घण्टः॥
मयूरचूड़ा, स्त्री, (मयूरस्य चूड़ेव चूड़ा शिखा यस्याः।) मयूरशिखा। इति वैद्यकम्॥
मयूरजङ्घः, पुं, (मयूरस्य जङ्घेव जङ्घा यस्य।) श्योनाकः। इति राजनिर्घण्टः॥
मयूरतुत्थं, क्ली, (मयूर इव तुत्थम्। मयूरवर्णत्वादस्य तथात्वम्।) तुत्थम्। इति राजनिर्घण्टः॥
मयूरपदकं, क्ली, (मयूरस्येव पदकं स्थानम्। नखाघातः। यथा, शब्दमालायाम्।
"तथाकैरकोजौ च नखाघाते तु तक्षणम्।
मयूरपदकं बाणनखकोत्खलपत्रके॥")
मयूरविदला, स्त्री, (मयूरान् विशेषेण दलति खण्डयादिशोभया तिरस्करोतीति। वि+दल+अच्। स्त्रियां टाप्।) अम्लवेतसः। इति वैद्यकम्॥
मयूरशिखा, स्त्री, (मयूरस्य शिखेव शिखा अग्रं यस्याः।) खनामख्यातक्षुपविशेषः। तत्पर्य्यायः। बर्हिपूड़ा २ शिखिनी ३ शिखावती ४ सुशिखा ५ शिखा ६ शिखावजा ७ केकिशिखा ८। अस्या गुणाः। रसे खादुत्वम्। व्रणशोफकृमिदोषनाशित्वम्। वह्निकर्म्मसु श्रेष्ठत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"मयूरशिखा प्रोक्ता चक्षुष्याऽग्निमेधवर्द्धदा।
गोजकर्णशिखा सञ्जी पित्तश्लेष्मातिसारजित्॥"
इति भावप्रकाशः॥

मयूरिका, स्त्री, (मयूरवत् वर्णोऽस्त्यस्याः । मयूर + ठन् । टाप् ।) अम्लवेतसः । इति राजनिर्घण्टः ॥

मयूरी, स्त्री, (मयूर + स्त्रियां ङीप् ।) मयूरस्त्रीजातिः । इति शाकरत्नं लिङ्गादिसंग्रहश्च ॥ (यथा, उत्तररामचरिते । ३ । ८ ।

"किमयत्नेऽपि निसर्गे कृतरम्येऽपि तव मयीडशौ । स्तनयित्नोर्मयूरीव चकितोत्कण्ठिता स्थिता ॥")

मरकः, पुं, (म्रियन्ते जना यस्मात् । मृ + अपादाने अप् । ततः स्वार्थे संज्ञायां वा कन् । यद्वा, मृ + भावे अप् । मरो मरणमिति शब्देन कायति शब्दायते इति । के + कः ।) मारिः । इति हेमचन्द्रः । २ । २३६ ॥ मड़क इति भाषा । तत्पर्य्यायः । मारी २ मारकः ३ । इति जटाधरः ॥ (यथा, कामन्दकीयनीतिसारे । १३ । २० ।

"हुताशनो जलं व्याधिर्दुर्भिक्षो मरकस्तथा । इति पञ्चविधं दैवं व्यसनं मानुषं परम् ॥")

तस्य कारणादि यथा,—

"यावन्मार्तण्डरुग्णेऽपि धनुषि भ्रूशे मज्जिते वाप्ति नार्य्यां तावद्दुर्भिक्षपीड़ा भवति च मरकं संश्रयं यान्ति लोकाः । हाहाकारा तथोर्व्वी मनुजभयकरी फेरवावेव भीमैः शून्यग्रामा भवेयुर्नरपतिरहिता भूरिकष्टाश्च माला ॥

वक्रं करोति रविजो धरजीसुतो वा मूलर्क्षहस्तमघरेवतिमेचमेषु । छत्रोपभङ्गपतनानि च सैनिकानां सर्व्वत्र लोकमरकं जलधौतदेशः ॥

मांसास्थीनि समादाय श्मशानादृश्यधवायसाः । श्वा श्वगालोऽथवा मध्ये पुरस्य प्रविशन्ति चेत् ॥ विकिरन्ति गृहादौ च श्मशानं सा मही भवेत् ।

चौरेऽह्यते लोकः परचक्रसमागमः ॥ संग्रामश्च महाघोरो दुर्भिक्षं मरकस्तथा । अद्भुतानि प्रदृश्यन्ते तस्य देशस्य विप्लवः ॥"

इति ज्योतिस्तत्त्वम् ॥

अपि च ।

"सार्षेऽग्न्यभिधे गैरिकरूपे च युद्धानि । दूर्वाकाशश्यामे हारिद्रे चापि निर्दिष्टेन मरकम् ॥"

इति यन्त्रप्रकरणे तिथ्यादितत्त्वम् ॥

अन्यदपि ।

"रवाविन्दौ गजारूढ़ा शून्यङ्गारे तुरङ्गमे । नौकया गुरुशुक्राभ्यां दोलया बुधवासरे ॥ गजे च जलदा देवी छत्रभङ्गस्तुरङ्गमे । नौकायां शस्यवृद्धिः स्यात् दोलायां मरकं भवेत् ॥"

इति पञ्जिकाप्रवेशफलकथने ज्योतिषम् ॥ * ॥

अस्य शान्तिः । देवीमाहात्म्यपाठः । वटुकभैरवस्तवपाठः । तुलस्या विष्णुपूजनञ्च । यथा,

"उपसर्गानशेषांस्तु महामारीसमुद्भवान् । तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥"

इति मार्कण्डेयपुराणम् ॥

"मारीभये राजभये तथा चौराग्निजे भये । औत्पातिके महाघोरे तथा दुःस्वप्नदर्शने । बन्धने च तथा घोरे पठेत् श्लोकं समाहितः ॥"

इति विश्वसारोद्धारतन्त्रे आपदुद्धारकस्तवः ॥

"महयज्ञैः शान्तिकैश्च किं क्रियन्ति नरा द्विज ! ॥ महाशान्तिकरः श्रीमांस्तुलस्या पूजितो हरिः ॥ उत्पातान् दारुणान् पुंसां दुर्निमित्तान्यशेषतः । तुलस्या पूजितो भक्त्या महाशान्तिकरो हरिः ॥"

अत्र ब्रह्मपुराणीयो मन्त्रः ।

"ॐ नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहेति ।"

इति ज्योतिस्तत्त्वम् ॥

(जातिविशेषः । यथा, मार्कण्डेये । ५८ । ५१ ।

"दार्व्वादा मरकाश्चैव कुरटाश्चान्ध्रदारकाः । एकपादाः खशा घोराः खर्गभोजनवल्काः ॥")

मरकतं, क्ली, (मरकं मारिभयं तरत्यनेन । तॄ + क्तः । यद्वा, मरकं मरणं तनोतीति । लोभान्मरणमनाद्रत्य तस्मिन् रत्ने प्रवर्त्तते इति मरकतमिति स्मरन्तीति वृद्धाः । इत्यमरटीकायां भरतः ।) हरिदर्णमणिविशेषः । पान्ना इति भाषा । तस्य देवता बुधः । इति ज्योतिषम् ॥ तत्पर्य्यायः । गारुत्मतम् २ अश्मगर्भम् ३ हरिन्मणिः ४ । इत्यमरः । २ । ६ । ९३ । मरकतम् ५ राजनीलम् ६ गरुड़ाङ्कितम् ७ । इति शब्दरत्नावली । रौहिणेयम् ८ सौपर्णम् ९ गरुड़ोन्नीलम् १० बुधरत्नम् ११ अश्मगर्भजम् १२ गरुत्मारिः १३ वापवोलम् १४ गारुड़म् १५ । कुत्रचित् पुस्तके गरुड़ोन्नीलस्थाने गरुड़ोत्तीर्णं वापवोलस्थाने वाप्रवालं इति च पाठः ॥ अस्य गुणाः । विषघ्नत्वम् । गर्भरोगघ्नत्वम् । रसे मधुरत्वम् । आमपित्तहरत्वम् । कषत्वम् । पुष्टिदत्वम् । भूतनाशकत्वञ्च ॥ * ॥ अस्य लक्षणम् ।

"स्वच्छञ्च गुरु सच्छायं स्निग्धं गात्रञ्च माईवसमेतम् । अयत्नं बहुरङ्गं यद्गारी मरकतं शुभं विद्यात् ॥"

तस्य कुलत्वम् ।

"भृङ्गैरिलकलिलरूक्षं मलिनं लघुहीनकान्ति कल्माषम् । त्रासयुतं विद्यताङ्गं मरकतममरोऽपि गोपयुञ्जीत ॥" * ॥

तस्य परीक्षा ।

"यच्छेदवज्रशिखिखिग्धाश्मलहरिकाचैश्च बाधच्छेदैः खद्योतेन च वालकीरवपुषा शुकेरीवपुष्पेण च । छायाभिः समतां दधाति तदिदं निर्दिष्टमष्टात्मकं जात्यं यत्तपनातपेष्वपरितो गारुत्मतं रक्षयेत् ॥"

इति राजनिर्घण्टः ॥ * ॥

अन्यान्तरे तस्य परीक्षादि यथा,—

सूत उवाच ।

"दानवाधिपतेः पित्तमादाय सुरगाधिपः । द्विधा कुर्व्वन्निव क्षोभ सत्वरं वासुकिर्ययौ ॥ स तदा खग्निरोरत्नप्रभादीप्ते नभोऽम्बुधौ । राजतः स महानेकः खड्गसेतुरिवाबभौ ॥ ततः पतनिपातेन संक्षरन्निव रोदसी । गरुत्मान् पन्नगेन्द्रस्य प्रहर्त्तुमुपचक्रमे ॥

सहसैव समोच्च तत् फणीन्द्रः सुरसाद्युक्ततुरङ्गपादपायाम् । नलिकावनगन्धवासितायां वरमाणिक्यगिरेरुपत्यकायाम् ॥ तस्य प्रपातसमनन्तरकालमेव तद्वद्वरालयमतीत्य रमासमीपे । स्थानं क्षितेरुपयोनिधितीरलेखं ततृप्तयाम्बरकताकरतां जगाम ॥ तत्रैव किञ्चित् पततस्तु पित्ता दुत्पत्य जग्राह ततो गरुत्मान् । मूर्च्छापरीतः सहसैव चोग्रारन्ध्रद्वयेन प्रसुमोच सर्व्वम् ॥

तत्राकठोरशुककक्षशिरीषपुष्पखद्योतदृक्षचरशाल्मलिशैवलानाम् । कञ्जारशस्यकशुनङ्गशुजाश्च पत्रप्राप्तास्त्रिधा मरकताः शुभदा भवन्ति ॥

तद्यत्र भोगीन्द्रसुता विसृष्टं पपात पित्तं दितिजाधिपस्य । तस्माकरस्थातितरां स देशो दुःखोपलभ्यश्च शुचेश्च युक्तः ॥

तस्मिन्मरकतस्थाने यत्किञ्चिदुपजायते । तत्सर्व्वं विषरोगाणां प्रशमाय प्रकीर्त्यते ॥ सर्व्वमन्त्रौषधिगर्व्वेण यत्नं चिकित्सितुम् । महाहिदंष्ट्राप्रभवं विषन्तस्तेन शाम्यति ॥ अन्यमप्याकरे तत्र यद्दोषैरुपवर्ण्यितम् । जायते तत् पवित्राणामुत्तमं परिकीर्त्तितम् ॥ अत्यन्तहरितवर्णं कोमलमर्चिस्निमेदनटिलञ्च । काचनपूर्व्वस्थान्तःपूर्व्वमिव लक्ष्यते यच्च ॥ युक्तं संस्थानगुणैः समरागं गौरवेण विहीनम् । सवितुः करसंस्पर्शाच्छुरयति सर्व्वाश्रमं दीप्त्या ॥ छिन्ना च हरितभावं यस्मात्स्निग्धिनिहिता भवेद्दीप्तिः । अचिरप्रभाप्रभाहतनवशाद्वलसन्निभा भाति ॥ यच्च मनसः प्रसादं विदधाति निरीक्षितमतिमात्रम् । तन्मरकतं महागुणमिति रत्नविदां मनोदृत्तिः ॥ यस्तु भास्करसंस्पर्शात् दृश्यत्यन्तो महामणिः । रक्षयेदात्मपादेन्तु महामरकतं हि तत् ॥ चतुर्धा जातिभेदस्तु महामरकते मतौ । छायाभेदेन विज्ञेया चतुर्वर्णस्य लक्षणैः ॥" *॥

अथ छाया।
"भवेदष्टविधच्छाया मणेर्मरकतस्य च।
बर्हिपुच्छसमाभासा वासपत्रसमापरा॥
हरिकोचनिभा चान्या तथा ग्रैवालसन्निभा।
खद्योतदृष्टसंकाशा बालकीरसमा तथा॥
नवग्राद्दलसच्छाया ग्रिरीषकुसुमोपमा।
एवमष्टौ समाख्याताश्छाया मरकताश्रयाः॥
छायाभिर्यैर्युतमेताभिः श्रेष्ठं मरकतं भवेत्।
पद्मरागगतः स्वच्छो जलबिन्दुर्यथा भवेत्।
तथा मरकतच्छाया श्यामला हरितामला॥"
अथ दोषगुणाः।
"दोषाः सप्त भवन्त्यस्य गुणाः पञ्चविधो मतः।
स्निग्धं रूक्षमियुक्तं याधिस्तस्य धृते भवेत्॥
विस्फोटः स्यात् सपिड़के तत्र ग्रस्तहतिर्भवेत्।
सपाषाणे भवेद्दिग्धो मरकते धृते॥
विच्छायं मरकतं प्राहुर्वाधते न तु धार्य्यते।
शर्करं कर्करायुक्तं पुत्रशोकप्रदं धृतम्॥
जठरं कान्तिहीनन्तु दंष्ट्रिवह्निभयावहम्।
कुल्माषवर्णं धवलं ततो मृत्युभयं भवेत्॥
इति दोषाः समाख्याता वक्ष्येऽस्योऽथ महा-
गुणाः।
निर्मलं कथितं स्वच्छं गुरु स्यादगुरुतायुतम्॥
स्निग्धं रूक्षविनिर्मुक्तमरजस्कमरेणुकम्।
सरागं रागबहुलं मणेः पञ्च गुणा मताः॥
एतैर्युक्तं मरकतं सर्व्वपापभयापहम्।
गजवाजिरथान्दत्त्वा विप्रेभ्यो विक्रराहि मे॥
तत् फलं समवाप्नोति गृहे मरकते धृते।
धनधान्यादिकरणे तथा सैन्यक्रियाविधौ॥
विषरोगोपशमने कर्म्मस्वाथर्व्वणेषु च।
ग्रस्यते मुनिभिर्यस्मादयं मरकतो मणिः॥"
तथा च।
"स्वच्छता गुरुता कान्तिः स्निग्धत्वं पित्तकार-
कम्।
हरिद्भिरङ्गकत्वेव सप्त मरकते गुणाः॥"
अथ कृत्रिमाकृत्रिमपरीक्षा।
"कृत्रिमत्वं सहजत्वं दृश्यते सूरिभिः क्वचित्।
घर्षयेत् प्रस्तरे वक्त्रकाचस्तस्मादिपद्यते॥
लेखयेल्लौहभङ्गेन चूर्णनाथ विलेपयेत्।
सहजः कान्तिमाप्नोति कृत्रिमो मलिनायते॥
वर्णस्यातिबहुत्वात् यस्मान्तः स्वच्छकिरण-
परिघातम्।
साम्रस्निग्धविसृतं कोमलदूर्वाप्रभादिसमकान्ति।
चलोज्ज्वलया कान्त्या सान्द्राकारं विभासया
भाति।
तदपि गुरुत्वं ग्रामाप्नोति हि वाढग्नौ पूर्व्वम्॥
सकलकठोरं मलिनं रूक्षं पाषाणकर्करोपेतम्।
दिग्धच्छ श्लिलाजतुना मरकतमेवंविधं विगुणम्॥
यत्तन्त्रिशेषितं रत्नमन्यन्मरकताश्रयेत्।
श्रेयस्कामैर्न सद्ग्राह्यं क्रेतव्यं वा कथञ्चन॥
भल्लातकपुत्रिका च तद्वर्णसमयोगतः।
मणेर्मरकतस्येते लक्षणीया विजातयः॥
क्षौमेण वाससा हृदा दीप्तिं त्यजति पुत्रिका।
लाघवेनैव काचस्य ग्रक्ष्या कर्त्तुं विभावना॥
कस्यचिदनेकरूपैर्मरकतमनुगच्छतोऽपि गुण-
वर्ज्जैः।
भल्लातकस्य निर्ज्ञेतुर्वैग्रद्यमुपैति वर्ज्जस्य॥
वक्ष्यामि सूक्ताः सन्त्यन्ये ये च केचिद्विजातयः।
तेषामप्रतिबद्धानां भा भवत्यूर्द्धगामिनी॥
ऋतुत्वाचैव केषाञ्चित्कथञ्चिदुपजायते।
तिर्य्यगालोक्यमानानां सत्त्वमेव प्रकाशते॥
स्नानाचमनजप्येषु रत्नमन्त्रक्रियाविधौ।
दर्दङ्गिर्गोद्विरण्यानि कुर्व्वद्भिः साधकानि च॥
देवपित्रातिथेयेषु गुरुसंपूजनेषु च।
बाधमानेषु विषमैर्दोषजातैर्विशेषतः॥
दोषैर्हीनं गुणैर्युक्तं काचनप्रतियोजितम्।
संग्रामे विचरद्भिश्च धार्य्यं मरकतं बुधैः॥"
अथ मूल्यम्।
"तुलया पद्मरागस्य यन्मूल्यमुपजायते।
लभतेऽभ्यधिकं तस्मात् गुणैर्मरकतं स्मृतम्॥
तथा च पद्मरागाणां दोषैर्मूल्यं प्रलीयते।
ततोऽस्याप्यधिका हानिर्दोषैर्मरकते भवेत्॥
गुणपिण्डसमायुक्ते हरितश्यामभास्वरे।
मूल्यं द्वादशकं प्रोक्तं जातिभेदेन सूरिभिः॥
यवैकेन धृतं पञ्चसहस्रं दितये ययौ।
त्रिभिस्त्रैव सहस्रे द्वे चतुर्भिश्च चतुर्गुणम्॥"
इति गारुड़े मरकतपरीक्षा ७१ अध्यायः
युक्तिकल्पतरुश्च।

मरकतपत्री, स्त्री, (मरकतमिव पत्रं यस्याः। ङीप्। तद्वर्णवाहुल्यादेवास्यास्तथात्वम्।) पाची। इति राजनिर्घण्टः॥

मरकतं, क्ली, (मरकतम्। पृषोदरादित्वात् साधुः।) मरकतमणिः। इति शब्दरत्नावली॥

मरङ्ग, क्ली, (म्रियतेऽनेनेति। मृ+करणे ल्युट्।) वत्सनाभः। इति राजनिर्घण्टः॥ (भावे ल्युट्।) विजातीयात्ममनःसंयोगभ्रंसः। इति न्याय-मतम्। तत्पर्य्यायः। प्रपत्ता २ कालधर्म्मः ३ दक्षान्तः ४ प्रलयः ५ अन्वयः ६ अन्तः ७ नाशः ८ मृत्युः ९ निधनम् १०। इत्यमरः। २। ८। ११६॥ भूमिलाभः ११ निपातः १२ आत्यन्तिकम् १३ मृतिः १४। इति शब्दरत्ना-वली। कीर्त्तिशेषः १५ महानिद्रा १६ महा-प्रयाणम् १७ संज्ञानम् १८। इति जटाधरः॥

मरणदुःखाद्याह।
"मरणे यानि दुःखानि प्राप्नोति ग्रस्त जन्तुषु।
अयमीवाङ्घ्रिहस्तोऽथ वायुना वेपथुना नरः॥
सुदुर्ज्ञानि परवशो सुदुर्ज्ञानवलान्वितः।
हिरण्यधान्यतनयभार्य्याभृत्यग्रहादिषु।
एते कथं भविष्यन्तीत्यतीवममताकुलः॥
मर्म्मभिर्म्मर्म्महारोगैः क्रकचैरिव दारुणैः।
शरैरिवान्तकस्योग्रैश्छिद्यमानासुबन्धनः॥
विवर्त्तमानतारात्रिहस्तप्रदो सहुः क्षिपन्।
संग्रुथ्यमाणतालोष्ठपुटो घुरघुरायते॥
निरुद्धकण्ठो दीर्घोष्णैरुदानश्वासपीड़ितः।
तापेन महता यातसृजा चार्त्तस्वरा क्षुधा॥
क्लेशादुत्क्रान्तिमाप्नोति यान्यकिङ्करपीड़ितः।
ततश्च यातनादेहं क्लेशेन प्रतिपद्यते।
एतान्यन्यानि चोग्राणि दुःखानि मरणे
नृणाम्॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः॥ *॥
सुखमरणआवश्यकविधौ यथा,—
"अग्नौ न निक्षिपेदग्निं नाङ्गैः प्रग्रमयेत्तथा।
सुखमरणमार्त्तिं वा न स्वयं आवयेत् परान्॥"
इति कौर्म्मे उपविभागे ९५ अध्यायः॥*॥
अथ धार्म्मिकमरणलक्षणम्।
सोमशर्म्मोवाच।
"धन्यो हि कीदृशो मृत्युर्जन्म चैव वदस्व मे।
उभयोर्लक्षणं कान्ते! त्वमेवं हि वदस्व मे॥
सुमतीवाच।
सत्यं शौचं क्षमा शान्तिस्तीर्थं पुण्यादिकं तथा
धर्म्मश्च पालितं येन तस्य मृत्युं वदाम्यहम्॥
रोगो न जायते तस्य न च पीड़ा कलेवरे।
न श्रमो वै नच ग्लानिर्न च खेदो भ्रमस्तथा॥
दिव्यरूपधरा भूत्वा गन्धर्व्वा ग्राक्षयास्तथा।
वेदपाठसमायुक्ता गतिज्ञानविशारदाः॥
तस्य पार्श्वं समायान्ति स्तुतिं कुर्व्वन्ति चादु-
लाम्।
सुखी हि आसने युक्तो देवपूजारतः किल॥
तीर्थेच लभते प्राज्ञः स्नानार्थं धर्म्मतत्परः।
अग्न्यागारे च गोष्ठे च देवतायतनेषु च॥
आरामे च तड़ागे च यत्राश्वत्थो वटस्तथा।
ग्रक्षदर्भं समाश्रित्य श्रीवृक्षन्तु तथा पुनः॥
अश्वस्थानं समाश्रित्य गजस्थानं ततो नरः।
अशोकं चूतवृक्षञ्च समाश्रित्य यदा स्थितः॥
सन्निधिं ग्राक्षयागाच्च राजवेश्मगतोऽपि वा।
रम्यभूमिं समाश्रित्य पुरा यत्र मृता भटाः॥
मृत्युस्थानानि पुण्यानि केवलं धर्म्मकारणम्।
गोग्रहन्तु समं प्राप्य तथा समरमूर्द्धनम्॥
शुद्धधर्म्मकरो नित्यं धर्म्मतो धर्म्मवत्सलः।
एवं स्थानं समाप्नोति यदा मृत्यु समाश्रितः॥
मातरं पश्यते पुण्यं पितरञ्च नरोत्तमम्।
भ्रातरं श्रेयसा युक्तमन्यं स्वजनबान्धवम्॥
वन्दिजनं तथा पुण्यं स्तूयमानं पुनः पुनः।
प्रापितं नैव पश्येत मातृपित्रादिकं पुनः॥
गीतं गायन्ति गन्धर्व्वाः स्तुवन्ति स्तावकाः सुखैः।
मन्त्रपाठैस्तथा विप्रा माता स्नेहेन पूजयेत्॥
पिता स्वजनवर्गञ्च धर्म्मात्मानं महामतिम्।
एवंभूताः समाख्याताः पुण्यस्थानानि ते
विभो!।
प्रत्यक्षान् पश्यते भूतान् ग्राक्षयस्नेहसमाविष्टान्॥
न च खेदेन मोहेन क्लेशरक्तेन वै वत॥
धर्म्मराजो महाप्राज्ञो दूरात्तन्तु समाक्षयेत्।
एहीहि त्वं महाभाग! यत्र धर्म्मः स तिष्ठति॥
तस्य मोहो न च भ्रान्तिर्न ग्लानिर्न च
विक्रिया।
जायते नात्र सन्देहः प्रसन्नात्मा प्रतिष्ठते॥
ग्रानविज्ञानसम्पन्नः स्वरूपेवं जनार्द्दनम्।

तेन सार्द्धं प्रयात्येवं सन्तुष्टो हृष्टमानसः ।
दग्धमद्वारमाश्रित्य आत्मा तस्य हि गच्छति ।
शिविका तस्य चायाति सुवर्णं सुमनोहरम् ।
विमानेरेव वाह्येव वायोर्वेगेन चोत्तमः ।
कृत्वेह प्रियमार्येण चामरव्यजनेक्षया ।
ध्रीयमानः स धर्मात्मा पुण्येरेव समन्ततः ।
गीयमानस्तु धर्मात्मा स्तूयमानस्तु पण्डितैः ।
वन्दिभिश्चामरैर्दिव्यैर्नानावेदपारगैः ।
साधुभिः स्तूयमानस्तु सर्वसौख्यसमन्वितः ।
यशोदानप्रभावेन फलमाप्नोति तत्र सः ।
आरामवाटिकामध्ये स प्रयाति सुखेन वै ।
अप्सरोभिः समाकीर्णो दिव्याभिर्मङ्गलैर्युतः ।
देवेषु स्तूयमानस्तु धर्मराजं प्रपश्यति ।
देवाश्च धर्मसंयुक्ता जगुः सांसुख्यमेव ते ।
एह्येहि त्वं महाभाग ! भुङ्क्ष्व भोगान्मनोरमान् ।
एवं संपश्यते धर्मं सौम्यरूपं महामतिः ।
अस्य पुण्यस्य भावेन भुङ्क्ते स्वर्गमनुत्तमम् ।
भोगक्षयात् स धर्मात्मा पुनर्जन्म प्रयाति च ।
विप्रधर्मप्रसादात् स कुलं पुण्यं प्रयाति च ।
ब्राह्मणस्य सुपुण्यस्य क्षत्रियस्य तथैव च ।
धनाढ्यस्य सुपुण्यस्य वैश्यस्य च महामते ! ।
धर्मेण मोदते भद्रं पुनः पुण्यं करोति सः ।"
इति श्रीपद्मपुराणे भूमिखण्डे सुमनोपाख्याने २५ अध्यायः । * ।

अथ पापिनां मरणवर्णनम् ।

सोमशर्मोवाच ।

"पापिनां मरणं भद्रे ! कीदृशैर्वर्त्मभिर्युतम् ।
तन्मे त्वं विस्तराद्ब्रूहि यदि जानासि भाविनि ! ।

सुमनोवाच ।

शृणुतामभिधास्यामि तस्मात् स्थिरात् श्रुतं मया ।
पापिनां मरणं कान्त ! याहग्रं क्लिष्टमेव च ।
महापातकिनाचैव स्थानमेषां वदाम्यहम् ।
निष्प्रामेध्यसंक्लेदैर्भूमिं पापसमन्विताम् ।
स तां प्राप्य दुरात्मा प्राणान् दुःखेन मुञ्चति ।
चाण्डालभूमिं संप्राप्य मरणं याति दुःखितः ।
गर्हाभाचरितां भूमिं वैश्यागारं समाश्रितः ।
मद्यपानगृहं गत्वा नैघृण्यमुपगच्छति ।
अस्थिचर्मनखैः पूर्णामाश्रितां पापकिल्बिषैः ।
तामवाप्य स दुरात्मा नष्टुं प्राप्नोति निश्चितम् ।
अन्यां पापसमाचारां प्राप्य नष्टुं स गच्छति ।
अथ चेष्टां प्रवक्ष्यामि दूतानां प्रिय ! निश्चिताम् ।
भैरवान् दारुणान् घोरान्तिक्ष्णाञ्छोदरान् ।
पिङ्गाक्षान् पीतनीलांश्च अतिश्मश्रूञ्छोदरान् ।
अलुचांश्च करालांश्च शुष्कमांसत्वचोपमान् ।
रौद्रदंष्ट्राकरालांश्च सिंहास्यान् सर्पहस्तकान् ।
स तान् दृष्ट्वा प्रकम्पेत खिद्येत च मुहुर्मुहुः ।
शिवासंवादवद्घोरान्महारावान्महामते ! ।
सूचन्ति दूतकाः सर्वे कर्मभूमे तु तस्य हि ।
गवे प्राग्प्रवहाक्षे कक्षे वह्वाक्षचोरके ।
समाक्रम्य नयन्त्येते हाहेति रुदतो मुहुः ।
स्त्रियमाणस्य या चेष्टा तामेव प्रवदाम्यहम् ।
परद्रव्यापहरणं परभार्याविडम्बनम् ।
ऋणं परस्य सर्वस्वं गृहीतं वेत्तु पापिभिः ।
पुनर्नैव प्रदत्तं हि लोभाक्षादविमोहितैः ।
अन्यदेव महापापं कृतमित्यहमेव च ।
कल्मषाण्यानि ते सर्वे म्रियमाणस्य तस्य च ।
यानि कानि च पापानि पूर्वमेव कृतानि च ।
आयान्ति कल्मषं हि महापापस्य नान्यथा ।
दुःखमुत्पाद्यन्ते कर्षवन्त्येन दारुणम् ।
पीड़ाभिर्दारुणाभिश्च कण्ठो घुरघुरायते ।
रोदते कम्पते श्लथं मातरं पितरं पुनः ।
स्मरति भ्रातरं तत्र भार्यां पुत्रं पुनः पुनः ।
पुनर्विस्मरणं याति महापापेन मोहितः ।
तस्य प्राणा न गच्छन्ति बहुपीड़ासमाकुलाः ।
पतते कम्पते चैव मूर्च्छते च पुनः पुनः ।
एवं पीड़ासमायुक्तो दुःखं भुङ्क्तेऽतिमोहितः ।
तस्य प्राणा मुहुःखेन महाकष्टैः प्रचालितः ।
अपारं मार्गमाश्रित्य प्रयन्ति ते ।
एवंप्राया दुरात्मानो लोभमोहसमन्विताः ।
नीयन्ते च महाभूतैश्चेष्टां दुःखं वदाम्यहम् ।"
इति पाद्मे भूमिखण्डे सुमनोपाख्याने पापिमरणं नाम १६ अध्यायः । * ।

पापिनां यमालयगमननानायोनिप्राप्तिविवरणं यथा,—

सुमनोवाच ।

"अङ्गारसञ्चये मार्गे क्षप्यमाणो हि नीयते ।
दह्यमानः स दुरात्मा चेष्टमानः पुनः पुनः ।
यत्रातपो महातीव्रो द्वादशादित्यतापितः ।
नीयते तेन मार्गेण सन्तप्तः क्षुत्परिप्लुतः ।
पर्वतेष्विव दुर्गेषु छायाहीनेषु दुर्मतिः ।
नीयते तेन मार्गेण क्षुधाक्षाद्यादिपीड़ितः ।
स दूतैर्हन्यमानस्तु पदा दण्डैः परश्वधैः ।
कशाभिश्चाग्निवर्णाभिस्तप्तकैः दूतकैः ।
ततः शीतमये मार्गे वायुना सेव्यते पुनः ।
तेन शीतेन दुःखी स भूत्वा याति न संशयः ।
आक्षेपमाणो दूतैस्तु नानादुःखेन नीयते ।
एवं पापी स दुरात्मा देवब्राह्मणनिन्दकः ।
सर्वपापसमायुक्तो नीयते यमकिङ्करैः ।
यमं पश्यति दुरात्मा क्षयाञ्जनचयोपमम् ।
तमुग्रं दारुणं भीमं यमदूतैः समावृतम् ।
सर्वव्याधिसमाकीर्णं चित्रगुप्तसमन्वितम् ।
आरूढमहिषं देवं धर्मराजं द्विजोत्तम ! ।
दंष्ट्राकरालमत्युग्रं वक्त्रं कालसन्निभम् ।
पीतवासं महाहस्तं रक्तगन्धानुलेपनम् ।
रक्तमालाञ्चितामूर्धं गदाहस्तं भयङ्करम् ।
एवंविधं महाकायं यमं पश्यति दुर्मतिः ।
तं दृष्ट्वा समनुप्राप्तं सर्वधर्मैर्बहिष्कृतम् ।
यमः पश्यति तं दुष्टं पापिष्ठं धर्मैकण्टकम् ।
ज्ञातयेत्तु महादुःखैः पीड़ाभिर्दारुणैरैः ।
यावद्युगसहस्राणां तावत् कालं प्रपच्यते ।
नानागरलदेशेषु पच्यते च पुनः पुनः ।
नरकेषु प्रयात्येवं कृमिकीटेषु पापकृत् ।
अमेध्ये पच्यते नित्यं हाहाभूतो विचेतनः ।
मरणेचैव पापात्मा एवं याति सुनिश्चितम् ।
एवं पापस्य सम्भोगं भुङ्क्ते चैव सुदुर्मतिः ।
पुनर्जन्म प्रवक्ष्यामि यासु योनिषु जायते ।
स्थावरीं समनुप्राप्य भुञ्जते पातकं पुनः ।
वाप्यो भवति दुरात्मा राक्षसं याति वै पुनः ।
मार्जारगृध्रीकरीं योनिं सर्पयोनिमथैव च ।
नानाभेदासु सर्वासु तिर्यक्षु च पुनः पुनः ।
पापपक्षिषु संजाति अन्यासु गर्हितासु च ।
चाण्डालभिल्लजातिषु पुलिन्दीं याति पापकृत् ।
एतत्ते सर्वमाख्यातं पापिनां जन्म चैव हि ।
पापपुण्यसमाचारस्तवाग्रे कथितो मया ।"
इति पाद्मे भूमिखण्डे सुमनोपाख्याने पापपुण्यविवेको नाम १७ अध्यायः । * ।

ग्राह्यग्राहिलाख्यानं मरणफलम् । यथा,—

राजान ऊचुः ।

"युवां नारायणस्याग्रे कक्षे: चमूरतां गतौ ।
वयं कृपा इमे लोका ऋषयो ब्राह्मणाश्च ये ।
प्रेक्ष्य भक्तिविनम्रं वां हरौ विस्मितमानसाः ।
पृच्छामस्वामियं भक्तिः कथं लब्धा परमात्मनः ।
कस्य वा शिक्षिता राजन् ! किं वा नैवर्णिकी तव ।
श्रोतुमिच्छामहे राजन् ! त्रिजगज्जनपावनीम् ।
कथां भागवतीं तस्याः संसाराग्निनाशिनीम् ।

ग्राह्यिज्ञ उवाच ।

स्त्रीपुंसोरावयोर्यूयं श्रद्धतामोघविक्रमाः ।
इत्तं यज्ञक्रमैर्दिस्रुतिं तद्भक्तिजन्यानाम् ।
पुरा युगसहस्रान्ते यज्ञोऽहं पूतिमांसभुक् ।
यज्ञीयं मे प्रियारण्ये क्षतजोर्वी वनस्पतौ ।
चकार कामं सर्वत्र वनोपवनसंकुले ।
स्रुतानां पूतिपलले: प्राणिनां दृप्तिकल्पके ।
एकदा शुष्यक: क्रूरो जुलोभ पिशिताग्निनौ ।
आवां वीक्ष्य यदि पुरं यज्ञं तत्राप्ययोजयत् ।
तं वीक्ष्य जातविभ्रान्तौ क्षुधया परिपीड़िनौ ।
स्त्रीपुंसौ पतितौ तत्र मांसशोणितचेतसौ ।
वह्वावां वीक्ष्य शिक्षा हर्षादामत्य शुष्यक: ।
जग्राह कक्षे तरसा चञ्चुघातपीड़ितः ।
आवां यज्ञीला मक्षत्रा: शिक्षायां वनिताप्तिके ।
मक्षिष्यं पूर्वयामास शुष्यक: पिशिताशन: ।
चक्राङ्कितशिलाचक्राण्यरवाप्ति ततक्षतात् ।
ज्योतिर्मयविमानेन सद्यो भूत्वा चतुर्भुजौ ।
प्राप्तौ वैकुण्ठनिलयं सर्वलोकनमस्कृतम् ।
ततः स्थित्वा युगशतं ब्रह्मणो लोकमागतौ ।
ब्रह्मलोके पञ्चशतं युगानामुपभुज्य वै ।
देवलोके कालयशात्तं युगचतुःशतम् ।
ततो भुवि कृपाक्षात्तं बहुवत्सरं स्मरन् ।
हरेरनुग्रहं लोके ग्राह्यग्राहिलाभवम् ।
जातिस्मरत्वं सम्प्राप्ता: किं तस्या: कथयाम्यहम् ।

यज्जलस्पर्शमात्रेण माहात्म्यं महदद्भुतम् ॥
चक्राङ्कितशिलास्पर्शमरणस्वेदजं फलम् ।
न जाने वासुदेवस्य सेवया किं भविष्यति ॥"
इति कल्किपुराणे २५ अध्यायः ॥ * ॥
मरणजनकवस्तूनि यथा,—
"अग्निराप: स्त्रियो मूर्खः सर्पा राजकुलानि च ।
नित्यं परोपसेव्यानि सद्यः प्राणहराणि षट् ॥"
इति गारुडे ११४ अध्यायः ॥
("मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
ग्रीवसः स्तब्धता मोहः शुक्रस्य तु विशेषतः ॥"
इति माधवकरस्तरङ्गिणिधृते ज्वराधिकारे ॥
"अपानः कर्षति प्राणं प्राणोऽपानन्तु कर्षति ।
ग्रन्थिनी तु यदा भिन्ना तदैव मरणं ध्रुवम् ॥"
इति वैद्यकम् ॥)
मरतः, पुं, (मृ मृतौ + "भृञ्मृङ्घ्रियजीति ।" उणा० ३ । ११० । इति अतच् ।) मरणम् । इत्युणादिकोषः ॥
मरन्दः, पुं, (मरं मरणं ददाति खण्डयति भ्रमराणां जीवनहेतुत्वात् । दो + कः । यद्वा, मकरन्दः । पृषोदरादित्वात् साधुः ।) मकरन्दः । इति शब्दरत्नावली ॥ (यथा,—
"माकन्दमुकुलस्यन्दि मरन्दस्यन्दिमन्दिरे ।
केलितल्पे सुकुन्देन कुन्दवृन्देन मण्डिता ॥"
इति ज्ञानावली ॥)
मरन्दकः, पुं, (मरन्दः । स्वार्थे कन् ।) मकरन्दः । इति शब्दरत्नावली ॥
मराकाली, स्त्री, (मरं मरणदुःखं अकति प्राप्नोत्यनेनेति । अक् + करणे घञ् । स इव अलति पर्य्याप्नोतीति । अल् + अच् । गौरादित्वात् ङीष् ।) दक्षिकाली । इति रत्नमाला । विछाटी इति भाषा ॥ (विछुतिरस्या दक्षिकालीशब्दे ज्ञातव्या ॥)
मरारः, पुं, (मरं मरणमलति निवारयतीति । अल + अण् । लस्य रत्वम् ।) शुक्लरक्तशस्यम् । इति जटाधरः । मराइ इति भाषा ॥
मरालः, पुं, (मृ + आलच् ।) राजहंसः । इति जटाधरः ॥ (यथा, नैषधे । ६ । ७२ ।
"भैमीसभीपे स निरीक्ष्य यत्र
ताम्बूलनाम्बूनदहंसलक्ष्मीम् ।
क्षतप्रियादूत्यमहोपकार-
मरालमोहद्रढिमानमूहे ॥")
कज्जलम् । कारण्डवः । तुरङ्गमः । वारिवाहः । दाड़िमीविपिनम् । खलः । इति शब्दरत्नावली ॥ मद्धवे, त्रि । इति त्रिकाण्डशेषः ॥
मरालकः, पुं, (मराल इव प्रतिकृतिरिति । मराल + कन् ।) कलहंसः । इति राजनिर्घण्टः ॥
मरिचं, क्ली, (म्रियते नश्यति श्लेष्मादिकमनेनेति । मृ + बाहुलकात् इचः ।) कक्कोलकम् । खनामख्यातवर्त्तुलाकारकटुद्रव्यविशेषः । तत्पर्य्यायः । पवित्रम् २ ग्रामम् ३ कोलम् ४ वल्लीजम् ५ जवनम् ६ यवनेष्टम् ७ वृत्तफलम् ८ ग्राकाङ्गम् ९ धर्म्मपत्तनम् १० कटुकम् ११ शिरोवृत्तम् १२ वीरम् १३ कफविरोधि १४ रुचम् १५ सर्व्वहितम् १६ क्षाणम् १७ वेल्लजम् १८ । (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये ।
"पिप्पलीमरिचशृङ्गवेराणि त्रिकटुकम् ॥")
अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । लघुत्वम् । श्लेष्मविनाशनत्वम् । समीरकृमिकुष्ठोदरहरत्वम् । रुचिकारकत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"मरिचं वेल्लजं क्षाणमूषणं धर्म्मपत्तनम् ।
मरिचं कटुकं तीक्ष्णं दीपनं कफवातजित् ॥
उष्णं पित्तहरं रूक्षं श्वासशूलक्षमीन् हरेत् ।
तदार्द्रं मधुरं पाके गात्युष्णं कटुकं गुरु ॥
किञ्चित्तीक्ष्णगुणं श्लेष्मप्रसेकि स्यादपित्तलम् ॥"
इति भावप्रकाशः ॥
(अपि च ।
"स्वादुपाकाद्रमरिचं गुरुश्लेष्मप्रसेकि च ।
कटूष्णं लघु सच्छुष्कमशुष्कं कफवातजित् ॥
गात्युष्णं नातिपित्तघ्नं वीर्य्यतो मरिचं सितम् ।
गुणवन्मरिचेभ्यश्च चक्षुष्यञ्च विशेषतः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
मरिचः, पुं, (म्रियते नश्यतीति । मृ + इचः ।) मरुवकवृक्षः । इति राजनिर्घण्टः ॥
मरिचपञ्चकः, पुं, (मरिचस्य पञ्चानीव पञ्चानि यस्येति । बहुव्रीहौ कः ।) सरलवृक्षः । इति राजनिर्घण्टः ॥
मरिमा, [न्] पुं, (म्रियते इति । मृ + "जनिमृङ्भ्यामिमनिन् ।" उणा० ३ । १४८ । इति इमनिन् ।) मृत्युः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
मरीचं, क्ली, (मृ + बाहुलकात् ईचः ।) खनामख्यातकटुद्रव्यविशेषः । तत्पर्य्यायः । वेल्लजम् २ कोलकम् ३ क्षाणम् ४ ऊषणम् ५ धर्म्मपत्तनम् ६ । इत्यमरः । २ । ६ । ३६ ॥ मरिचम् ७ ग्रामम् ८ वरिष्ठम् ९ । इति जटाधरः ॥ आर्द्रस्य तस्य गुणाः । पाके स्वादुत्वम् । गुरुत्वम् । श्लेष्मप्रसेकित्वञ्च । शुष्कस्य तस्य गुणाः । रूक्षत्वम् । अग्निदत्वम् । रूक्षत्वम् । कटुत्वम् । उष्णत्वम् । लघुत्वम् । शुक्रनाशित्वञ्च । इति राजवल्लभः ॥ अन्यत् मरिचशब्दे द्रष्टव्यम् ॥
मरीचिः, पुं, (म्रियते पापराशिर्यस्मिन्निति । मृ + "ऋकृमृगमिभ्यामीचिः ।" उणा० ४ । ७० । इति ईचिः । तपःप्रभावादस्य तथात्वम् ।) मुनिविशेषः । स तु ब्रह्मणो ज्येष्ठमानसपुत्रः । अस्य भार्य्या कर्द्दमसुनिकन्या कला, पुत्रः कश्यपः पूर्णिमासच्च । इति श्रीभागवतम् ॥ (अस्य भार्य्या सम्भूतिरिति नान्नापि ख्याता । यथा, मार्कण्डेये । ५२ । १६ ।
"पत्नी मरीचेः सम्भूतिः पौर्णमासमसूयत ॥")
ऋषिः । इति हेमचन्द्रः ॥ (दनुपुत्रः । यथा, हरिवंशे । ३ । ८२ ।
"मरीचिर्मेघवांश्चैव इरा शक्रगिरा इकः ॥"
मरुद्गणानामन्यतमः । यथा, श्रीभगवद्गीतायाम् । १० । २१ ।
"मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥"
प्रियव्रतवंशीयस्य सम्राजः पुत्रः । यथा, श्रीमद्भागवते । ५ । १५ । १४—१५ । "चिच्चरघादूर्णायां सम्राड्जनिष्ट । ततः उत्कलायां मरीचिर्मरीचेर्बिन्दुमत्यां बिन्दुमानुदपद्यत । तस्मात् सरघायां मधुनामाभवत् ॥")
मरीचिः, पुं, स्त्री, (म्रियन्ते नश्यन्ति क्षुद्रजन्तवस्तमांसि वानेन । मृ + ईचिः ।) किरणः । इत्यमरः । १ । ४ । ३३ ॥ (यथा, रघौ । १३ । ४ ।
"गर्भं दधत्यर्कमरीचयोऽस्माद्
विवृद्धिमत्राप्नुवते वसूनि ॥"
यथा च ।
"मरीचीनसतो मेघान् मेघान् वाप्यसतोऽम्बरे ।
विद्युतो वा विना मेघैः पश्यन् मरणमृच्छति ॥"
इति चरके इन्द्रियस्थाने चतुर्थेऽध्याये ॥)
षट्त्रसरेणुपरिमाणम् । इति वैद्यकपरिभाषा ॥ (स्त्री, म्रियन्ते इव देवा यद्गर्भनादिति । मृ + ईचिः । अक्षरोविशेषः । यथा, महाभारते । १ । १२३ । ५६ ।
"मरीचिः शुचिका चैव विद्युद्वर्णा तिलोत्तमा ।
अम्बिका लक्षणा क्षेमा देवी रम्भा मनोरमा ॥"
म्रियते वारिभ्रमेण जीवा यस्याः । मृ + अपादाने ईचिः । मरीचिका । यथा, कथासरित्सागरे । ५७ । ६१ ।
"वेश्याप्रेम्णि सद्भावो यदस्मिन् बुध्यते त्वया ।
सर्व्वं भवति किं जातु जलं मरुमरीचिषु ॥")
मरीचिका, स्त्री, (मरीचिरेव । स्वार्थे कन् । टाप् ।) मृगतृष्णा । इत्यमरः । १ । ४ । ३५ ॥ (यथा, प्रबोधचन्द्रोदये । १ । १ ।
"मध्याह्नार्कमरीचिकास्विव पयःपूरो यदज्ञानतः ॥")
"मरीचिरिव मरीचिका स्वार्थे संघे इत्यादिना स्वार्थे कः । ग्रीष्मे मरुदेशसिकतादावर्ककराः प्रतिफलिताः दूरस्थानां जलत्वेनाभान्ति तद्वाचिका मृगतृष्णेति टीकाकारः । उत्कटरविरश्मिजन्यचित्तविभ्रमजालं मरीचिका । दूरशून्ये यन्मयूखैर्जलमिव दृश्यते इत्यपरे ।" इति भरतः ॥
मरुः, पुं, (म्रियतेऽस्मिन्निति । मृ + "भृञ्मृङ्घ्रीति ।" उणा० १ । ७ । इति उः ।) निर्जलदेशः । (यथा, महाभारते । १३ । १५४ । २७ ।
"अदग्धा गच्छ भीरु ! त्वं सरस्वति ! मरून् प्रति ॥")
पर्व्वतः । इत्यमरः । ३ । ३ । १६२ ॥ यथा महाभारते । ५ । ६३ । १८ ।
"तत्रापश्याम वै सर्व्वे मधु पीतममाक्षिकम् ।
मरुप्रपाते विषमे निविष्टं कुम्भसम्मितम् ॥"
दशेरकदेशः । तत्पर्य्यायः । धन्वा २ । इत्यमरः । २ । १ । ५ ॥ यथा, हेमचन्द्रः ।
"ग्राम्यासु कारकुचीया मरवस्तु दशेरकाः ॥"

मरुत्कक्षः। इति भावप्रकाशः॥ (निमिवंशीयदर्भ्यपुत्रः। यथा, श्रीमद्भागवते। ९। १३। १५।
"तस्माद्दृढरथस्तस्य महावीर्यः सुदृतृपिता।
सुधृतेर्धृष्टकेतुर्वै हर्य्यश्वोऽथ मरुत्ततः॥")
सूर्य्यवंशीयभाविराजविशेषः। तस्य विवरणं यथा,—
"रामात् कुशोऽभूदतिथिस्ततोऽभून्निषधाग्रभः।
तस्मादभूत पुण्डरीकः क्षेमधन्वाभवत्ततः॥
देवानीकस्ततो हीनः पारिपात्रोऽथ हीनतः।
बलाहकस्ततोऽर्कस्य रजनाभस्ततोऽभवत्॥
खगणाद्विधृतस्तस्माद्धिरण्यो नाभसंज्ञितः।
ततः पुष्पार्णवस्तस्मान्मुदृगलोऽथाग्निवर्णकः॥
तस्मात् प्रतीघोऽभवत् पुत्रः पिता मेऽतुलविक्रमः।
तस्मात्मरुं मां कैवीह बुधश्चापि सुमित्रकम्॥
कलापग्राममासाद्य विद्धि सत्तपसि स्थितम्।
तवावतारं विज्ञाय आसात् सत्यवतीसुतात्॥
प्रतीक्ष्य कालं लक्षाब्दं कालप्राप्तस्ववान्तिकम्।
कल्किरुवाच।
मरो! त्वामभिवेत्स्यामि निजायोध्यापुरेऽधुना।
हत्वा म्लेच्छान्धर्म्मिष्ठान् प्रजाभूतविहिंसकान्॥
विप्राखयूपभूपालस्तनयां विनयान्विताम्।
विवाहे रुचिरापाङ्गीं सुन्दरीं त्वां प्रदास्यति॥"
इति कल्किपुराणे १८ अध्यायः॥
(वसुनामन्यतमः। यथा, हरिवंशे। १६६।४७।
"वासवानुगता देवी जनयामास वै सुतान्।
मरुं वै प्रथमं देवं द्वितीयं ध्रुवमव्ययम्॥")
मरुजः, पुं, (मरौ निर्जलदेशे जायते इति। जन्+डः।) नखीनामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ (वंशाङ्कुरे, क्ली। तत्पर्य्यायो यथा,
"करीरं मरुजं फलम् ————।"
इति वैद्यकरत्नमालायाम्॥)
मरुद्देशजाते, त्रि॥
मरुजा, स्त्री, (मरुज+स्त्रियां टाप्।) म्लेच्छीरः। इति राजनिर्घण्टः॥
मरुटा, स्त्री, उच्चललाटयुक्तस्त्री। इति शब्दरत्नावली॥
मरुड़ा, स्त्री, उच्चललाटा नारी। इति त्रिकाण्डशेषः॥
मरुतः, पुं, (म्रियन्ते प्राणिनो यदभावादिति। मृ+बाहुलकात् उत।) वायुः। (यथा, अभिज्ञानशाकुन्तले।
"तदेनां सुखमरुतेन विशूदां करवाणि॥")
देवः। इति भरतधृतत्र्याङ्कः॥ घण्टापाटलिवृक्षः। इति शब्दचन्द्रिका॥
मरुत्, पुं, (म्रियते प्राणी यस्माभावादिति। मृ+"म्रियेरुतिः।" उणा० १। ६४। इति उत्।) वायुः। इत्यमरः। १। १। ६५॥ (यथा, नैषधचरिते। २। ५१।
"भग्नतापभृता मया भवान्
मरुदासादि तुषारसायकान्॥")
मरुवकः। इति भावप्रकाशः॥ (अस्य गुणा यथा,—
"मरुदग्निप्रदो हृद्यस्तीक्ष्णोष्णपित्तलो लघुः।
वृश्चिकादिविषश्लेष्मवातकुष्ठक्रिमिप्रणुत्।
कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
देवः। (यथा, रघुः। १२। १०१।
"मरुतां पश्यतां तस्य गिरीणां पततामपि।
मनो नातिबिभेत्यासं पुनः सन्धानशङ्किनाम्॥"
साध्यविशेषः। यथा, हरिवंशे। १६६। ४५।
"धर्म्माल्लक्ष्म्यामजनयत् कामः साध्या साध्यान्
व्यजायत।
प्रभवं वसनञ्चैव मनीषाणं सरभौ तथा।
अरण्यं मरुतञ्चैव विश्वावसुबलधुवौ॥")
भक्तवत्सलदेवताविशेषः। यथा,—
"भ्रातॄणां प्राथमं भ्राता योऽतिशेते धर्म्मवित्।
स पुण्यबन्धुः पुरुषो मरद्भिः सह मोदते॥"
इति श्रीभागवते ६ स्कन्धे ५ अध्यायः॥
"प्रायणं प्रलम्बस्य गमनम्। पुण्यमेव बन्धुर्यस्य मरद्भिर्भक्तवत्सलैर्देवैः।" इति तट्टीकायां श्रीधरस्वामी॥ (हिरण्यम्। इति निघण्टुः। १। २॥ ऋत्विक्। इति तत्रैव। ३। १८॥) ग्रन्थिपर्ण्णे, क्ली। इति मेदिनी। ते, १४३॥
एकार्य्यां, स्त्री। इति शब्दरत्नावली॥
मरुत्करः, पुं, (करोतीति। कृ+अच्। मरतोऽपानवायोः करः।) राजमाषः। इति शब्दचन्द्रिका॥ (मरुत्कारिणि, त्रि। यथा,—
"कषायमधुराः शीताः कटुपाका मरुत्कराः।
बहुमूत्रपुरीषाश्च पित्तश्लेष्महरास्तथा॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)
मरुत्क्रिया, स्त्री, (मरुतः क्रिया।) अपानोत्सर्गः। वातकर्म्म इति ख्यातः। इति कैचित्॥
मरुत्तः, पुं, (मरदस्यस्येति। मरुत्+"तप्पर्व्वमरद्भ्याम्।" ५। २।१२२। इत्यत्र काशिकोक्त्या तप्।) चन्द्रवंशीयराजविशेषः। स च अवीक्षिद्राजपुत्रः। यथा—
क्रोष्टुकिरुवाच।
"अवीक्षितस्य नृपतेर्मरुत्तस्य महात्मनः।
श्रोतुमिच्छामि चरितं श्रूयते योऽतिचेष्टितः॥
चक्रवर्त्ती महाभागः शूरः शान्तो महामतिः।
धर्म्मेविद्धर्म्मकृच्चैव सम्यक् पालयिता भुवः॥
मार्कण्डेय उवाच।
स पित्रा समनुज्ञातो राज्यं प्राप्य पितामहात्।
धर्म्मतः पालयामास प्रजाः पुत्रानिवौरसान्॥
इयाज सुमहायज्ञान् यथावत् प्राप्यदक्षिणान्।
ऋत्विक्पुरोहितादेश्याद्यनिर्वेशो महीपतिः॥
तस्याप्रतिहतं चक्रमासीद्दीप्तेषु सप्तसु।
गतयश्चाप्यविच्छिन्नाः स्वःपातालजलादिषु॥"
इति मार्कण्डेयपुराणे १०३ अध्यायः॥
(यदुवंशीयः करन्धमपुत्रः। यथा, श्रीमद्भागवते। ९। २३। १७।
"त्रिभानुस्तत्सुतोऽस्यापि करन्धम उदारधीः।
मरुत्तस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत॥"
शिबेर्युवराजपुत्रः। यथा, महाभारते। हरिवंशपर्व्वणि। ३६। ७।
"शिबेर्युरभवत् पुत्र उशतः शुचितामनः।
मरुत्तस्तस्य तनयो राजर्षिरभवन्नृप!॥")
मरुत्तकः, पुं, (मरुदिव तकति हसतीति। तक् हासे+अच्।) मरुवकः। इति भावप्रकाशः॥
मरुत्पथः, पुं, (मरुतां पन्थाः। "ऋक्पूरब्धूः पथामानक्षे।" ५। ४। ७४। इत्यः।) आकाशम्। इति हेमचन्द्रः॥
मरुत्पालः, पुं, (मरुतो देवान् पालयतीति। पालि+अच्। देवराजत्वादस्य तथात्वम्।) इन्द्रः। इति केचित्॥
मरुत्पुत्रः, पुं, (मरुतो वायोः पुत्रः।) भीमसेनः। इति हेमचन्द्रः। ७०७॥ (अस्य मरुत्पुत्रत्वे विवरणम्। यथा। पुरा किल पाण्डुर्नाम महीपतिर्मृगयार्थं वनं गत्वा ब्राह्मणमेकं मृगरूपधारिणं हरिण्यां रममाणं काममोहितं जघान। ततस्तेनाभिशप्तो निजपत्नीं रन्तुमसौ न शक्तः। अथ मन्त्रशक्तिं कुन्ती पुत्रकामस्य स्वभर्त्तुः पाण्डुराजस्यानुज्ञया इन्द्रादीन् देवानाकृष्य तैरन्वरंसीत्। तेषां मरुतो भीमसेनो जात इति पौराणिकी वार्त्तात्रानुसन्धेया। अस्य विशेषस्तु महाभारते। १।११८—१२३। अध्यायेषु द्रष्टव्यः।) हनूमांश्च॥
मरुत्प्लवः, पुं, (मरुदिव प्लवते द्रुतं गच्छतीति। प्लु+अच्।) सिंहः। इति त्रिकाण्डशेषः॥
मरुत्फलं, क्ली, (मरुतां वायूनां फलमिव।) घनोपलः। इति शब्दमाला॥
मरुत्वान्, [त्] पुं, (मरुतो देवाः पालनीयत्वेन सन्त्यस्य इति। मरुत्+"मध्वादिभ्यश्च।" ४। २। ८६। इति मतुप् मस्य वः। संज्ञायां प्रत्ययवकारे परे न तस्य दः।) इन्द्रः। इत्यमरः। १। १। ४४॥ (यथा, रघौ। ३। ४।
"दिवं मरुत्वानिव भोक्ष्यते भुवं
दिगन्तविश्रान्तरथो हि तत्सुतः॥"
धर्म्मपुत्रदेवगणभेदः। यथा, महाभारते। १२। २०७। २३।
"धर्म्मस्य वसवः पुत्रा रुद्राश्चामिततेजसः।
विश्वे देवाश्च साध्याश्च मरुत्वन्तश्च भारत!॥"
मरुज्जनकत्वेनास्यास्तीति। मतुप्। मस्य वः।) हनूमान्। इति शब्दरत्नावली॥ (वायुविशिष्टे, त्रि। सर्व्वोदाहरणं यथा, भट्टौ। १०। २६।
"बभौ मरुत्वान् विलसत् ससुद्रो
बभौ मरुत्वान् विलसत् ससुद्रः।
बभौ मरुत्वान् विलसत् ससुद्रो
बभौ मरुत्वान् विलसत् ससुद्रः॥"
स्त्री, दक्षस्य प्रचेतसः कन्या। सैव धर्म्मस्य पत्नी। यथा, भागवते। ६। ६। ४।

"भानुर्नभाकुद्यामिर्विश्वा साधा मरुत्वती।
वसुर्मूर्त्ता संकल्पा धर्म्मपत्न्यः सुतान्
यज्ञ॥")

मरुत्सखः, पुं, (मरुतां देवानां सखा। "राजाहः सखिभ्यष्टच्।" ५।४।९१। इति टच्।) इन्द्रः। इति धरणिः। (मरुतो वायोः सखा।) अग्निः। वायुसख इत्यमरदर्पणात्॥ (वायुसखे, त्रि। यथा, रघौ। ११।३।

"तावदाशु विदधे मरुत्सखैः
सा सपुष्पजलवर्षिभिर्घनैः॥")

मरुदान्दोलः, पुं, (मरुत् वायुरान्दोल्यतेऽनेनेति। आङ्+दोल+करणे घञ्।) धत्तूरम्। इति शब्दमाला॥

मरुदिष्टः, पुं, (मरुतां देवनामिष्टः प्रियः।) गुग्गुलुः। इति राजनिर्घण्टः॥ (विशेषोऽस्य गुग्गुलुशब्दे व्याख्यातः॥)

मरुद्रजं, क्ली, (मरुत्सु वायुषु भ्रमः प्रकाशो। नभसि वायुवशाच्चलितत्वादस्य तथात्वम्।) वाततूलम्। बुड़ीर सुता इति भाषा। यथा,—

"ग्रीष्महासं वंशकर्षं वाततूलं मरुद्रजम्॥"
इति हारावली। २३॥

मरुद्भवा, स्त्री, (मरुद्वायुर्भव उत्पत्तिकारणं यस्याः।) ताम्रमूलालुः। इति रत्नमाला। खिराइ इति भाषा॥

मरुद्रथः, पुं, (मरुद्वायू रथौ यानमिवास्य। ऊर्द्धौ स्त्रोकं वियति बहुतरं गच्छतीति तथात्वम्।) अश्वः। इति त्रिकाण्डशेषः॥ देवरथः। इति हेमचन्द्रः। ३। ४१६॥

मरुद्रुमः, पुं, (मरोर्निर्ज्जलदेशस्य द्रुमः। मरुजातो द्रुमो वा।) विट्खदिरः। इति रत्नमाला॥

मरुद्वर्त्म, क्ली, (मरुतां वायूनां देवानां वा वर्त्म पन्थाः।) आकाशम्। इति त्रिकाण्डशेषः॥

मरुद्वाहः, पुं, (मरुता वायुना उह्यतेऽसौ इति। वह+कर्म्मणि घञ्। यद्वा, मरुद्वायुर्वह इव यस्य।) धूमः। इति त्रिकाण्डशेषः॥ अग्निः। इति शब्दमाला॥

मरुद्विषः, पुं, (मरौ निर्ज्जलदेशे द्विषो द्वेष्टीव।) उष्ट्रः। इति त्रिकाण्डशेषः॥

मरुन्माला, स्त्री, (मरुद्भिर्मन्यते धार्य्यते इति। मन धारणे+कर्म्मणि घञ्। टाप्।) एक्का। इत्यमरः। २।४।१३३॥ पिड़िंशाक इति भाषा॥ (पर्य्यायोऽस्य यथा,—

"सूक्ष्मैकाष्ठकवाक्षी देवी मरुन्माला लता लघुः।
सप्तदान्ता वधूः कोटिवर्षा खड्गापिकेत्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मरुप्रियः, पुं, (मरुर्निर्ज्जलदेशः प्रियोऽस्य।) उष्ट्रः। इति हेमचन्द्रः। ४। ३१६॥

मरुभूः, स्त्री, (मरुर्निर्ज्जला भूर्भूमिः।) दाक्षेरकदेशः। इति त्रिकाण्डशेषः॥ मारवोयार इति भाषा॥ निर्ज्जलभूमिश्च॥

मरुभूरुहः, पुं, (मरुभुवि रोहति जायते इति। रुह्+"रुग्रुपधज्ञाप्रीकिरः कः।" ३।२।१७५। इति कः।) करीरवृक्षः। इति भावप्रकाशः॥ मरुभूमिजाते, त्रि॥ (यथा, आर्य्यासप्तशत्याम्। ६०६।

"सतृष्णो मरुभूरुह इव जीवनमात्रमाश्रास्यम्॥")

मरुलः, पुं, (म्रियते जलं विनेति। मृ+उलः।) कारण्डवपक्षी। इति हेमचन्द्रः। ४। ४०७॥

मरुवः, पुं, (मरुं निर्ज्जलदेशं वाति प्राप्नोतीति। वा+कः।) वृक्षविशेषः। मरुया इति गागदाना इति च भाषा॥ तत्पर्य्यायः। खरपत्रः २ गन्धपत्रः ३ फणिज्झकः ४ बहुवीर्य्यः ५ शीतलकः ६ सुराहः ७ समीरणः ८ जम्बीरः ९ प्रस्थकुसुमः १० मरुवकः ११ आजम्बसुरभिपत्रः १२ मरिचः १३। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कृमिकुष्ठविड्वन्ताध्मानशूलमान्द्यत्वगदोषनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"मरुवको मरुवको मरुत्सरुरपि स्मृतः।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः॥
मरुदग्निप्रदो वृष्यस्तिक्तोष्णः पित्तलो लघुः।
कृच्छ्रिकादिविषश्लेष्मवातकृच्छ्रमिप्रणुत्।
कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः॥"
इति भावप्रकाशः॥

मरुवकः, पुं, (मरुव+स्वार्थे इवार्थे वा कन्।) कण्टकिवृक्षविशेषः। मयना इति भाषा। तत्पर्य्यायः। पिण्डीतकः २ श्वसनः ३ करहाटकः ४ गुल्फः ५ मदनः ६। (पर्य्यायान्तरं यथा,—

"मदनश्छर्दनः पिण्डो नटः पिण्डीतकस्तथा।
करहाटो मरुवकः गुल्फको विषपुष्पकः॥")
स्वल्पपत्रतुलसी। तत्पर्य्यायः। समीरणः २ प्रस्थपुष्पः ३ फणिज्झकः ४ जम्बीरः ५। इत्यमरः।२। ४। ७६॥ (एतत्पर्य्यायो यथा,—

"मरुत्सको मरुवको मरुत्सरुरपि स्मृतः।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
जम्बीरभेदः। इत्यमरटीकायां भरतः॥ पुष्पवृक्षविशेषः। मरुयापुल इति भाषा। तत्पर्य्यायः। शुक्लपुष्पः २ तिलकः ३ कुलकः ४। क्षुपविशेषः। नागदाना इति भाषा। तत्पर्य्यायः। खरपत्रः २ गन्धपत्रः ३। इति रत्नमाला॥ आम्रः। राहुः। भयानके, त्रि। इति जटाधरः॥

मरुसम्भवं, क्ली, (मरुः सम्भव उत्पत्तिस्थानमस्य।) चाङ्गेर्य्यमूलकम्। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा,—

"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम्।
शालमर्कटकं विप्रं शालेयं मरुसम्भवम्॥
चाङ्गेर्य्यमूलकं तीक्ष्णं तथा मूलकपोतिका।
नेपालमूलकञ्चान्यत् तद्भवेन्नवदन्तवत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मरुसम्भवा, स्त्री, (मरौ सम्भवो यस्याः। टाप्।) महेन्द्रवारुणी। क्षुद्रदुरालभा। इति राजनिर्घण्टः॥

मरुस्था, स्त्री, (मरौ तिष्ठतीति। स्था+कः। स्त्रियां टाप्।) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥

मरूकः, पुं, (म्रियते इवेति। मृ+"मृकन्निभ्यामूकोकञौ।" उणा० ४। १६। इति ऊकः। भयप्रौढत्वादस्य तथात्वम्।) मृगविशेषः। इत्युणादिकोषः॥ मयूरः। घण्टी। इति संक्षिप्तसारोणादिवृत्तिः॥

मरूद्भवा, स्त्री, (मरौ धन्वप्रदेशे उद्भवतीति। उत्+भू+अच्। स्त्रियां टाप्।) कार्पासी। यवासः। क्षुद्रखदिरः। इति राजनिर्घण्टः॥

मरोलिः, पुं, (मरौ निर्ज्जलदेशे लीयते म्रियते इति। मर+ली+इन्। पृषोदरादित्वात् साधुः।) मकरः। यथा,—

"जलरूपस्तु मकरो मरोलिरसिदंष्ट्रकः॥"
इति चिकाण्डशेषः॥

मरोलिकः, पुं, (मरोलि+स्वार्थे कन्।) मकरः। इति शब्दरत्नावली॥

मर्क, सर्पे। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मर्कटः। इति दुर्गादासः॥

मर्कः, पुं, (मर्कति चेष्टते इति। मर्क्+"इषियुधीकापाशल्यतिमर्च्छिभ्यः कन्।" उणा० ३। ४३। इति कन्। यद्वा, मर्कति सर्पतीति। मर्क+अच्।) देहः। वायुः। इत्युणादिकोषः॥ (शुकपुत्रः। यथा, वाजसनेयसंहितायाम्। ७। १६।

"उपयामगृहीतोऽसि मर्काय त्वा॥"
"मर्कः शुकपुत्रोऽसुरपुरोहितः।" इति तद्भाष्ये महीधरः॥) वानरः। इति शब्दरत्नावली॥ (यथा, श्रीमद्भागवते। १०। ८। २६।

"मर्कान् भोक्ष्यन् विभजति स यैर्म्राति भाण्डं भिनत्ति॥"
"मर्कान् मर्कटान्।" इति तट्टीकायां श्रीधरस्वामी॥ त्रि, मार्ज्जयिता। यथा, ऋग्वेदे। १०। २७। २०।

"क्षत्रस्य मर्क उपरो बभूवान्॥"
"मर्को मार्ज्जयिता।" इति तद्भाष्ये सायणः॥)

मर्कटः, पुं, (मर्क+स्वार्थे संज्ञायां वा कन्।) गलगण्डपक्षी। इति शब्दरत्नावली॥ हाड़गिल् इति भाषा॥

मर्कटः, पुं, (मर्कति गच्छतीति। मर्क+"शृकाडिभ्योऽटन्।" उणा० ४। ८१। इति अटन्।) वानरः। इत्यमरः। २। ५। ३॥
(यथा, वाजसनेयसंहितायाम्। २४। ३०।
"यमाय क्षत्रो मनुष्यराजाय मर्कटः॥")
ऊर्णनाभः। (यथा आर्य्यासप्तशत्याम्। ३२२।
"अयसुदृष्टहीतवदिग्रः कर्कट इव मर्कटः
पुरतः॥"

"मर्कटो लूता ।" इति राटीका ।) स्थावरविषभेदः । इति हेमचन्द्रः । गलेगण्डपक्षी । इति चिकाण्डशेषः । हाड़गिल इति भाषा ।

मर्कटकः, पुं, (मर्कट + स्वार्थे संज्ञायां वा कन् ।) वानरः । लूता । ग्रन्थभेदः । इति मेदिनी । के, २०८ । (यथा, विष्णुपुराणे । १ । ६ । २५ ।

"श्यामाकाश्चैव नीवारा अणिलाः सगवेधुकाः ।
तथा वेणुयवाः प्रोक्तास्तृन् मर्कटका मुने ! ।")

मत्स्यभेदः । दैत्यः । इति शब्दरत्नावली ।

मर्कटतिन्दुकः, पुं, (मर्कटप्रियतिन्दुकः । मध्यपदलोपी कर्म्मधारयः ।) कपीतुः । इति भावप्रकाशः ।

मर्कटपिप्पली, स्त्री, (मर्कटस्य पिप्पलीव ।) अपामार्गः । इति राजनिर्घण्टः । (विवरणमस्या अपामार्गशब्दे ज्ञातव्यम् ।)

मर्कटप्रियः, पुं, (मर्कटस्य प्रियः ।) चीरदृक्षः । इति शब्दमाला ।

मर्कटवासः, पुं, (मर्कटः जर्गंगाभस्तस्य वासः आवासस्थानम् ।) लूतातन्तुः । माकड़ग्यारजाल इति भाषा । तत्पर्य्यायः । आम्नायन्यः २ । इति शब्दरत्नावली ।

मर्कटश्रोणिः, स्त्री, (मर्कटस्य श्रोणिमिव तदर्थलादेवास्य तथात्वम् ।) हिङ्गुलम् । इति रत्नमाला । (यथा, वैद्यकरत्नमालायाम् ।

"रक्तं मर्कटश्रोणिश्च हिङ्गुलं दरदो रसः ।")

मर्कटास्यं, क्ली, (मर्कटस्य आस्यमिव तदर्थलादेवास्य तथात्वम् ।) ताम्रम् । इति हेमचन्द्रः । ४ । १०६ । (मर्कटस्यास्यम् ।) वानरमुखम् । (मर्कटस्यास्यमिवास्यं यस्य ।) वानरमुखे, त्रि ।

मर्कटी, स्त्री, (मर्कति वायुवेगेन इतस्ततो गच्छतीति । मर्क + अटन् । स्त्रियां ङीप् ।) कपिकच्छुः । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"कपिकच्छूरात्मगुप्ता वृष्या प्रोक्ता च मर्कटी ।
अजरा कण्डुरा बल्या दुःस्पर्शा प्राहवायवी ।
जाङ्गली शूकशिम्बी च सैव प्रोक्ता महर्षिभिः ।")

अपामार्गः । (यथा,—

"अपामार्गस्तु शिखरी क्षुधःशल्यो मयूरकः ।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।) अजमोदा । इति राजनिर्घण्टः । (यथा, सुश्रुते उत्तरतन्त्रे । ३३ । ५ ।

"कुष्ठटीं मर्कटीं शिम्बीमनन्तामपि धारयेत् ।
मांसमांसं तथा पक्वं श्रोणितञ्च चतुष्पथे ।")

करञ्जभेदः । इत्यमरः । २ । ४ । ८० । माकड़ा करञ्जा इति भाषा । (यथास्याः पर्य्यायो भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।

"उदकीर्य्यस्तृतीयोऽन्यः कण्टकन्या हस्तिवारुणी ।
मर्कटी वायसी चापि करञ्जी करभञ्जिका ।"

मर्कट + ङीष् ।) वानरी च ।

मर्कटेन्द्रः, पुं, (मर्कटे खगविशेषे इन्द्रवत् ।) काकतिन्दुकवृक्षः । यथा,—

"काकेन्द्रः कुलकः काकपीलुकः काकतिन्दुके ।
मर्कटेन्द्रः सिन्धुपुत्रौ द्वावेतौ तत्र कीर्त्तितौ ।"

इति शब्दचन्द्रिका ।

मर्करः, स्त्री, (मर्कति गच्छतीति । मर्क + बाहुलकात् अरः ।) भृङ्गराजः । इति शब्दरत्नावली । (गुणादयोऽस्य भृङ्गराजशब्दे ज्ञातव्याः ।)

मर्करा, स्त्री, (मर्करः + स्त्रियां टाप् ।) दरी । भाङ्गम् । सुरङ्गा । निष्फला स्त्री । इति विश्वः ।

मर्क्ष, क गर्व्वे । सौत्रोऽयं धातुः । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) तालव्यवर्गप्रथमान्तः । मर्कः । इति दुर्गादासः ।

मर्ज्जूः, स्त्री, (मृज्यते इति । मृज् शुद्धौ + "मृजेर्ज्जूश्च ।" उणा० १ । ८१ । इति ऊः । गुणश्च ।) शुद्धिः । इति मेदिनी । जे, १६ ।

मर्ज्जूः, पुं, (मार्ष्टि शोधयति वसनमिति । मृज् + ऊः ।) रजकः । इति हेमचन्द्रः । पीठमर्दः । इति शब्दरत्नावली ।

मर्त्तः, पुं, (म्रियतेऽसौ इति । मृ + "इसिमृगिति ।" उणा० ३ । ८६ । इति तन् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । (यथा, मार्कण्डेये । १०० । १८ ।

"पौर्णमास्यामसावस्यां पर्व्वस्वन्येषु प्रस्रवः ।
समेव संस्रुतो मर्त्तैर्भविता पापनाशनः ।")

मारणकः । इति संक्षिप्तसारोणादिवृत्तिः । (म्रियतेऽत्रेति । भूलोकः । इत्युज्ज्वलदत्तः । ३ । ८६ ।)

मर्त्यः, पुं, (म्रियतेऽसौ इति । मर्त्तो भूलोकस्तत्र भवः । मर्त्त + यत् । यद्वा, मर्त्त एव यदित्यमरटीकायां भरतः ।) मनुष्यः । इत्यमरः । २ । ६ । १ । (यथा, ब्रह्मवैवर्त्ते । २ । १ । २६ ।

"गृहे च गृहलक्ष्मीश्च मर्त्यानां गृहिणां तथा ।")

मध्यमलोकः । इति जटाधरः । (क्ली, शरीरम् । यथा, भागवते । ३ । ३१ । ३१ ।

"तस्मात्सदूर्ध्वगविप्लुतमार्त्यं मर्त्यमभूत् सरित् ।")

मर्द्दनं, क्ली, (मृद् + भावे ल्युट् ।) अङ्गमर्द्दनम् । माटेपा इति भाषा । तत्पर्य्यायः । संवाहनम् २ । इत्यमरः । २ । २ । २२ । सलनम् ३ । इति शब्दरत्नावली । (यथा, "यतु पुनर्वैद्यैः सर्व्वेगात्राभ्यङ्गस्वेदप्रदेहपरिषेकोन्मर्द्दनादिरामयान् प्रमार्ष्टि तद्वैद्यैः परिमार्ज्जनम् ।" इति चरके सूत्रस्थाने ११ अध्यायः ।) अस्य गुणाः । श्रमहरत्वम् । निद्राशुक्रसुखप्रदत्वम् । मांसरक्तत्वक्प्रसन्नकारित्वम् । वायुकफनाशित्वञ्च । इति राजवल्लभः । चूर्ण्णनम् । इति मेदश्चातुर्य्यदर्शनात् । (कर्त्तनम् । यथा, भागवते । ३ । ३ । २ ।

"तेषां मैरेयदोषेण विषमीकृतचेतसाम् ।
निघ्नतां रक्षसां वासौ वेणूनामिव मर्द्दनम् ।"

मृद् + ल्युः । मर्द्दनकारके, त्रि । यथा, महाभारते । १३ । १४ । ३०२ ।

"दक्षे क्षितिसहस्राणां मर्द्दनं त्रिदशेश्वरम् ।")

मर्द्दलः, पुं, (मर्द्दं मर्द्दनं जातीति । ला + कः ।) वाद्यविशेषः । इत्यमरः । १ । ७ । ८ । मादल इति भाषा । तत्पर्य्यायः । गुरुः २ । इति शब्दरत्नावली । (यथा, महाभारते । ८ । ४४ । १६ ।

"दर्दुराणकशङ्खानां मर्द्दलानाञ्च निस्वनैः ।
खरोष्ट्राश्वतरैश्चैव मत्ता यास्यामहे सुखम् ।")

मर्द्दितं, त्रि, (मृद् + कर्म्मणि क्तः ।) ग्रन्थितम् । इति विश्वप्रकाशवर्गटीकायां भरतः । चूर्ण्णितम् । यथा,—

"तिन्तिड़ीपल्लवैर्युक्तं मर्द्दितं
रामठान्वितं विस्रुतो रसः ।"

इति भावप्रकाशः ।

मर्म्म, गत्याम् । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) मर्म्मति । इति दुर्गादासः ।

मर्म्मं, [न्] क्ली, (मृ + "सर्व्वधातुभ्यो मनिन् ।" उणा० ४ । १४४ । इति मनिन् ।) स्वरूपम् । तत्त्वम् । यथा, वैद्यके । २ । ६ ।

"न्यायेन न विगीयते नृपैः
रपि धर्म्मागममर्म्मपारगैः ।
सारसुन्दर ! मां यदत्रज
स्तव धर्म्मः सदयो दयोज्ज्वलः ।"

सन्धिस्थानम् । इति लिङ्गादिसंग्रहे अमरभरतौ । जीवस्थानम् । इति राजनिर्घण्टः ।*।

अथ मर्म्माणि ।

"सन्निपातः शिराखायुसन्धिमांसास्रिसम्भवः ।
मर्म्माणि तेषु तिष्ठन्ति प्राणाः खलु विशेषतः ।
सप्तोत्तरं शतं सन्ति देहे मर्म्माणि देहिनाम् ।
तान्येकादश मांसे स्युरष्टावस्थिषु सन्ति हि ।
सन्धीनां विंशतिस्तानि स्नायूनां नवविंशतिः ।
चत्वारिंशत्तथैकञ्च शिरामर्म्माणि तत्र तु ।
द्वाविंशतिः सक्थियुगे तावत्स्वेव भुजद्वये ।
द्वादशोरसि कुक्षौ च पृष्ठदेशे चतुर्दश ।
ग्रीवायां जर्द्धभागे तु सप्तविंशत्प्रकीर्त्तितानि हि ।
मर्म्माणि तानि सन्ति षड्विधा भवन्ति ।
तान्याह ।
सद्यःप्राणहराणि स्युर्मर्म्माण्येकोनविंशतिः ।
मर्म्मदेशाश्रयाण्यन्यानि स्युः कालान्तरमारकाः ।
चत्वारिंशच्च चत्वारि वैकल्यं जनयन्ति हि ।
मर्म्माहतं रुजाकारि विशल्यघ्नं त्रिधा मतम् ।
ललाटकाध्यधिपतिः शङ्खौ कण्ठसिरागुदम् ।
हृदयं बस्तिनाभी च सद्यो घ्नन्ति हतानि चेत् ।
ललाटकादीनि त्रीण्यूर्द्धाधश्चिबुकाक्षान्तरेकानां शिरासन्धीनां शिरसो मध्ये संयोगस्थानं तानि चत्वारि शिरामर्म्माणि चतुरङ्गुलप्रमाणानि हतानि सन्ति सद्योमारकाणि । अधिपतिः । मस्तकस्याभ्यन्तरे सन्धिशिरयोः सन्निपात उपरिष्टाद्रोमावर्त्तः स एक; सन्धिमर्म्मेदं अर्द्धाङ्गुलप्रमाणं सद्योमारकम् । शङ्खौ भ्रुवोरन्तोपरि कर्णललाटमध्ये ते द्वे अस्थिमर्म्मणी अर्द्धाङ्गुले सद्योमारके । कण्ठशिराः मातृकाः ग्रीवाया उभयपार्श्वयोश्चतस्रश्चतस्रः शिरास्ता अष्टौ शिरामर्म्माणि चतुरङ्गुलानि सद्योमार-

काणि। गुदं प्रसिद्धमेकं मांसमर्म्म चतुरङ्गुलं सद्योमारकम्। हृदयं स्तनयोर्मध्यमामाशयद्वारमेकं शिरामर्म्म चतुरङ्गुलं सद्योमारकम्। वस्तिः नाभिष्ठकटीमुष्कगुदवङ्क्षणसेफसां मध्ये वस्तिस्तनूत्वक् एकद्वारो ह्यधोमुखः स्नायुमर्म्मेदं चतुरङ्गुलं सद्योमारकम्। नाभिः प्रसिद्धा। सिरामर्म्मेदं चतुरङ्गुलं सद्योमारकम्॥ वक्षोमर्म्माणि सीमन्तास्तनशिप्रेन्द्रबस्तयः। हृत्पार्श्वौ पार्श्वसन्धी कटीकतरुणे च ये। नितम्बाविति चैतानि कालान्तरहराणि तु॥ वक्षोमर्म्माणि स्तनमूलस्तनरोहितापलापाप-स्तम्भाः स्तनमूले स्तनयोरधस्ताद्द्वङ्गुलं यावत् दे शिरामर्म्मणी द्व्यङ्गुले कफपूर्णकोष्ठतया कालान्तरमारके। स्तनरोहिते स्तनयोरुपरि द्व्यङ्गुलं यावत् दे मांसमर्म्मणी रक्तपूरितकोष्ठतया कालान्तरमारके। अपलापौ अंसकूटयोरधस्तात् पार्श्वयोरुपरि द्वौ शिरामर्म्मणी अर्द्धाङ्गुले रक्तेन पूयताङ्गते न कालान्तरमारके। अपस्तम्भौ उरस उभयतो नाड्यौ वातपूर्णकोष्ठतया कासश्वासाभ्यां कालान्तरमारके। सीमन्ताः शिरसि पञ्च सन्धयः सन्धिमर्म्माणि चतुरङ्गुलानि उच्चादभयचित्तविनाशैः कालान्तरमारकानि। तलानि मध्याङ्गुलिमनुरुध्य हस्तमध्यं तलं एषमपरस्य हस्तस्य पादयोश्च चत्वारि तलानि मांसमर्म्माण्यर्द्धाङ्गुलानि रुजाभिः कालान्तरमारकाणि। विप्राणि अङ्गुष्ठाङ्गुलीमध्यं विप्रं तच्च हस्तयोर्दे पादयोर्द्वे एवंचत्वारि स्नायुमर्म्माण्यर्द्धाङ्गुलान्याक्षेपकेण कालान्तरमारकाणि। इन्द्रबस्तयः प्रकोष्ठयोर्मध्ये दे जङ्घयोर्मध्ये दे एवं चत्वारि मांसमर्म्माणि द्व्यङ्गुलानि शोणितक्षयेण कालान्तरमारकाणि। हृत्पार्श्वौ स्तनमूलादुभयतः एकवर्षं यावत् शिरामर्म्मणी अर्द्धाङ्गुले शोणितातिप्रवृत्तिनिमित्तैरुपद्रवैः कालान्तरमारके। पार्श्वसन्धी जघनपार्श्वयोः सन्धी शिरामर्म्मणी अर्द्धाङ्गुले शोणितपूर्णकोष्ठतया कालान्तरमारके। कटीकतरुणे त्रिकसन्निधाने उभयतः श्रोणिकाण्डे लघ्वीक्त्वास्नायी अस्थिमर्म्मणी अर्द्धाङ्गुले शोणितक्षयात् पाण्डुविवर्णरूपं कृत्वा कालान्तरमारके। नितम्बौ प्रसिद्धौ। दे अस्थिमर्म्मणी अर्द्धाङ्गुले अधःकायशोषेण दौर्ब्बल्येन च कालान्तरमारके॥ * ॥

लोहितार्द्राणिजानून्वींकूर्चौविटपकूर्पराः।
कुकुन्दरे कक्षधरे विधुरे सक्थिकाटिके॥
अंसांसफलकापाङ्गा नीले मन्ये पणी तथा।
वैकल्यकारकाण्यर्द्धाङ्गुलावर्त्तौ द्वौ तथैव च॥

लोहितार्द्राणि जानून्वींकूर्चसन्धेर्लोहितार्द्रं तच्च दे बाह्वोर्दे जानून्वींरेवं तानि चत्वारि शिरामर्म्माण्यर्द्धाङ्गुलानि वैकल्यकारकाणि तत्र शोणितक्षयेण पक्षाघातः सक्थिसादो वा। आशयः जानुन ऊर्द्वसुभयोः पार्श्वयोर्द्व्यङ्गुला एकस्मिन् जानुनि दे अपरस्मिन् दे एवं चतस्रः स्नायुमर्म्माण्यर्द्धाङ्गुला वैकल्यकर्यः तत्र शोथाभिवृद्धिः सक्थिस्तम्भश्च। जानुनी जङ्घोव्योः सन्धी सन्धिमर्म्मणी द्व्यङ्गुले वैकल्यकरे। तत्र खञ्जता। ऊर्व्योः दे ऊर्व्योर्मध्ये दे प्रगण्डयोर्म्मध्ये एवं चतस्रः शिरामर्म्माण्येकाङ्गुला वैकल्यकर्यः तत्र शोणितक्षयात् सक्थिशोषः। कूर्चौ: पादयोरङ्गुष्ठाङ्गुल्योर्म्मध्ये तयोरूर्द्धमध्व एवं चत्वारः। स्नायुमर्म्माणि वैकल्यकराणि तत्र पादयोर्भग्नवेपने भवतः। विटपे दे वङ्क्षणवृषणयोर्म्मध्ये स्नायुमर्म्मणी एकाङ्गुले वैकल्यकरे तत्र वाङ्मार्गस्यशुक्रता वा। कूर्परौ कफोण्यौ तौ द्वौ सन्धिमर्म्मणी द्व्यङ्गुलौ वैकल्यकरौ तत्र बाहुमध्ये सङ्कोचः। कुकुन्दरे नितम्बकूपके दे सन्धिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र सक्थ्याक्षानमधःकाये चेष्टोपघातश्च। कक्षधरे वक्षःकक्ष्योर्म्मध्ये दे स्नायुमर्म्मणी एकाङ्गुले वैकल्यकरे तत्र पक्षाघातः। विधुरे कर्यष्ठसोऽधःसंश्रिते किञ्चिन्निम्नाकारे दे स्नायुमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र वाधिर्य्यम्। सक्थिकाटिके शिरोग्रीवयोरुभयतः सन्धी दे सन्धिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र शिरःकम्पः। अंसौ स्कन्धौ स्नायुमर्म्मणी अर्द्धाङ्गुलौ वैकल्यकरौ तत्र बाहुस्तम्भः। अंसफलके एष्ठोपरि एष्ठवंश्यसुभयतस्त्रिकसन्धी यीवाया अंसशयस्य च संयोगो यत्र तत्त्रिकं अस्थिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र बाह्वोः शून्यता शोफश्च। अपाङ्गौ नेत्रयोरन्तौ शिरामर्म्मणी अर्द्धाङ्गुलौ वैकल्यकरौ तत्रान्धं दृष्ट्युपघातो वा। नीले मन्ये च कण्ठनाड्योरुभयतश्चतसो धमन्यो द्वे नीले दे मन्ये तत्र एका नीला एका मन्या एकस्मिन् पार्श्वे। अन्या मन्या अन्या नीला अपरस्मिन् पार्श्वे। द्वे द्वे शिरामर्म्मणी द्व्यङ्गुले द्व्यङ्गुले वैकल्यकरे तत्र मूकता विप्लुतस्वरता रसाग्राहिता च। पणे घ्राणमार्गसुभयतः अभ्यन्तरे शिरामर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र गन्धाज्ञानम्। आवर्त्तौ भ्रुवोरुपरि स्निग्धयोः सन्धिमर्म्मणी अर्द्धाङ्गुलौ वैकल्यकरौ तत्राप्यान्ध्यं दृष्ट्युपघातो वा॥ * ॥

गुल्फौ द्वौ मणिबन्धौ द्वौ तथा कूर्चशिरांसि च।
रुजाकराणि जानीयादष्टावेतानि बुद्धिमान्॥

गुल्फौ घुटिके सन्धिमर्म्मणी द्व्यङ्गुलौ रुजाकरौ तत्र रुजा पादस्तम्भः खञ्जता वा। मणिबन्धौ हस्तप्रकोष्ठसन्धी सन्धिमर्म्मणी द्व्यङ्गुलौ रुजाकरौ तत्र हस्तयोः क्रियाराहित्यम्। कूर्चशिरांसि गुल्फसन्धेरध उभयतः एकस्मिन् पादे दे दे च द्वितीये एवं चत्वारि स्नायुमर्म्माण्येकाङ्गुलानि रुजाकराणि तत्र रुजा शोफश्च॥ * ॥ विशल्यघ्नानि।

उत्क्षेपौ स्थपनी चैव विशल्यघ्नं त्रिकं मतम्।
उत्क्षेपौ शङ्खयोरुपरि केशान्तं यावत् स्नायुमर्म्मणी अर्द्धाङ्गुलौ तयोर्विद्धयोः सशल्यो जीवेत् पाकात् पतितशल्यो वा उद्धृतशल्यस्तु म्रियेत अतएव विशल्यमुद्धृतशल्यं हन्तीति विशल्यघ्नं मर्म्म। स्थपनी एका भ्रुवोर्मध्ये सिरामर्म्मेदमर्द्धाङ्गुलं विशल्यघ्नम्।

सद्यराचान्तरे हन्युः सद्यः प्राणहराणि हि।
कालान्तरप्राणहरं पक्षे मासे च मारकम्॥
सद्यःप्राणहरं चान्ते विद्धं कालेन मारयेत्।
कालान्तरप्राणहरमर्म्म विद्धन्तु दुःखदम्॥
अन्ते मर्म्मसमीपे।

मर्म्माण्यधिष्ठाय हि ये विकारा
मृत्युं प्रयच्छन्ति नृणां विधानात्।
प्रायेण ते दुष्कृततमा भवन्ति
वैद्येन यत्नैरपि साध्यमानाः॥"

इति भावप्रकाशः॥ * ॥

मर्म्मसम्बन्धनिषेधो यथा,—

"परक्षेत्रे गां चरन्तीं न वारयेत् कस्यचित्।
न संवसेत् खलैः सार्द्धं न कं वै मर्म्मणि स्पृशेत्॥"

इति कूर्म्मपुराणे उपविभागे १५ अध्यायः॥

("सप्तोत्तरं मर्म्मशतम्। तानि मर्म्माणि पञ्चालकानि। तद्यथा मांसमर्म्माणि। सिरामर्म्माणि। स्नायुमर्म्माणि। अस्थिमर्म्माणि। सन्धिमर्म्माणि चेति। न खलु मांससिरास्नायुस्थिसन्धिव्यतिरेकेणान्यानि मर्म्माणि भवन्ति यस्मान्नोपलभ्यन्ते॥ तत्रैकादशमांसमर्म्माणि। एकचत्वारिंशत्सिरामर्म्माणि। सप्तदश स्नायुमर्म्माणि। अष्टावस्थिमर्म्माणि। विंशतिः सन्धिमर्म्माणि। तदेतत् सप्तोत्तरं मर्म्मशतम्॥" इति सुश्रुते शारीरस्थाने षष्ठेऽध्याये॥)

मर्म्मकीलः, पुं, (मर्म्म कीलति विध्यतीति। कील + कः।) यदा, मर्म्मणि गूढविषये कीलः शङ्कुरिव।) भर्त्सा। इति जटाधरः॥

मर्म्मज्ञः, त्रि, (मर्म्म तत्त्वं जानातीति। ज्ञा + कः।) मर्म्मवित्। तत्त्वज्ञः। मर्म्म स्वरूपं सन्धिस्थानं वा तज्जानाति यः सः॥ (यथा, महाभारते। ७। ३५। २०।

"तेषामापततां वीरः श्रोत्रं पूर्णमधो दृढम्।
विप्राणो व्यधीद्बाणान्मर्म्मज्ञो मर्म्मभेदिभिः॥")

मर्म्मरः, पुं, (मर्म्म तत्त्वं मर्म्मव्यक्तशब्दं वा राति ददाति। रा + कः।) वक्षस्य पत्रस्य च ध्वनिः। इत्यमरः। १। ७। २३॥ मड़मड़ शब्द इति भाषा॥ (यथा, रघुवंशे। ४। ५६।

"अभ्यभूयत वाहानां चरतां गात्रघट्टितैः।
मर्म्मरः पवनोद्धूतराजताजीवनध्वनिः॥")

मर्म्मरी, स्त्री, (मर्म्मर + गौरादित्वात् ङीष्।) पीतदारु। दारुहरिद्रा इति ख्याता। इति मेदिनी। रे, २०॥

मर्म्मरीकः, पुं, (म्रियत इवासाविति। मृ + "फर्फरीकादयश्च।" उणा० ४। २०। इति ईकन् प्रत्ययेन निपातनात् साधुः।) दीनः। इत्युणादिकोषः॥

मर्म्मवित्, [द्] पुं, (मर्म्म वेत्तीति । विद्+क्विप् ।) मर्म्मज्ञः । तत्पर्य्यायः । कार्पटिकः २ । इति त्रिकाण्डशेषः ॥ मर्म्मिकः ३ मर्म्मवेदी ४ । इति जटाधरः ॥ (यथा, कथासरित्सागरे । ६२ । ६० ।
"वञ्चनासक्ततोऽवादीद्रक्षोऽयं परमर्म्मवित् ॥")

मर्म्मवेदी, [न्]पुं, (मर्म्म वेत्तीति । विद्+णिनिः ।) मर्म्मवित् । तत्त्वज्ञः । इति जटाधरः ॥

मर्म्मसृक्, [ष्] त्रि, (मर्म्म सृजतीति । सृज्+ "सृजोऽनुदके क्विन् ।" ३ । २ । ५८ । इति क्विन् ।) मर्म्मपीड़कः । तत्पर्य्यायः । अरुन्तुदः २ । इत्यमरः । ३ । १ । ८३ ॥ यथकः ३ । इति हेमचन्द्रः । ६ । १६५ ॥

मर्म्मविद्,] [घ्] त्रि, (मर्म्म विध्यतीति । मर्म्म
मर्म्मविध्] +व्यध्+क्विप् । "ग्रहिज्येति ।" ६ । १ । १६ । इति सम्प्रसारणम् । "नहि-वृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।" ६ । ३ । ११६ । इति दीर्घत्वम् ।) सन्धिस्थानवेधकर्त्ता । मर्म्मज्ञः । यथा, भट्टिकाव्ये । ५ । ५२ ।
"चिरं क्लिश्नित्वा मर्म्मविद्रामो विलुभितध्रुवम् ।
ध्रुव्दायमानमवात्सीद्भयदं चलदाचरम् ॥"
"मर्म्माणि विध्यतीति क्विप् जिः वीरुधो धड्-क्वाविति दीर्घनिर्देशात् क्वचित् क्विबन्ते पूर्व्व-पदस्यापि दीर्घत्वं स्यादिति रूपितं आड्पूर्व्वस्य रूपं वा मर्म्माविध् मर्म्मज्ञो वा वेत्ति रूपम् ।" इति तट्टीकायां भरतः ॥

मर्म्मिकः, त्रि, (मर्म्म वेत्तीति । मर्म्म+ठक् ।) मर्म्मवित् । इति जटाधरः ॥

मर्य्या, य, (म्रियतेऽवश्यिष्यतेऽत्र । मृ+यत् । टाप् ।) सीमा । इति मर्य्यादाशब्दटीकायां रायमुकुटः ॥

मर्य्यादकः, त्रि, मर्य्यादाकर्त्ता । मर्य्यादां करोतीति कर्म्मणि ण्वुले कादिति कप्रत्यये केऽकः खो हेतु वेति आकारस्य ह्रस्वे निष्पन्नोऽयं शब्दः ॥

मर्य्यादा, स्त्री, (मर्य्या+दा+अङ् । न्याय्यपथ-स्थितिः । (यथा, महाभारते । १५ । २२ । २५ ।
"मर्य्यादायां स्थितो धर्म्मः शमश्चैवास्य तत्प्र-शमम् ॥")

तत्पर्य्यायः । संस्था २ धारणा ३ स्थितिः ४ । इत्यमरः । २ । ८ । २६ ॥ "पर्य्यादीयते मर्य्यादा पर्य्याङ्पूर्व्वात् दाञो ङः निपातनात् पस्य मः ।" इति तट्टीकायां भरतः ॥ "मर्य्येति सीमार्थे अव्ययं तत्र दीयते मर्य्यादेति स्वामी ।" इति रायमुकुटः ॥ "म्रियन्तेऽत्रेति मर्य्या तां ददा-तीति मर्य्यादा ।" इति सारसुन्दरी ॥ सीमा । इति जटाधरः ॥ कूलम् । इति हेमचन्द्रः । ४ । १४३ ॥ (यथा, प्रबोधचन्द्रोदये । १ । ६ ।
"कल्पान्तवातसंक्षोभलङ्घितार्णवभूभृतः ।
स्वैर्य्यप्रसादमर्य्यादास्त एव हि महोदधेः ॥"
देवातिथेः पत्नी । यथा, महाभारते । १ । ६५ । २३ । [नाम ॥")
"देवातिथिः खलु वैदेहीमुपयेमे मर्य्यादां

मर्य्यादागिरिः पुं. (मर्य्यादा सीमा तज्ज्ञापको गिरिः ।) कुलाचलः । वर्षसीमापर्व्वतः । यथा ।
"उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादा-गिरयः प्रागायताः । उभयतः चारोदावधयो द्विसहस्रयोजनोत्पथ एकैकशः पूर्व्वस्मात् पूर्व्व-स्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्ये एव इसन्ति । एवं दक्षिणेनेलावृतं निषधो हेम-कूटो हिमालय इति प्रागायता यथा नीलादयः । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुष-भारतानां यथासंख्यम् । तथेलावृतमपरेण पूर्व्वेण च माल्यवन्मन्दरमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते ।" इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥

मर्व्व, पूर्त्तौ । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मर्व्वति पयसा कुम्भं चेटी । इति दुर्गादासः ॥

मर्ष, पुं, क्षान्तिः । ऋषधातोर्भावे घञ् प्रत्य-येन निष्पन्नः ॥ (यथा, किरातार्জ্জुनीये । १ । ३३ ।
"अ-मर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ॥")

मर्षणं, क्ली, (मृष्+ल्युट्) क्षमा । ऋषधातो-र्भावे अनट्प्रत्ययेन निष्पन्नम् ॥ (धर्षणम् । यथा, महाभारते । ३ । ३१३ । २६ ।
"न चाप्यधर्म्मे न सुहृद्विभेदने
परस्वहारे परदारमर्षणे ।
कदर्य्यभावे च रमेन्मनः सदा
वृणा सदाख्यानमिदं विजानताम् ॥"
मर्षयतीति । ऋष्+णिच्+ल्युः । मर्षके, त्रि । यथा, श्रीमद्भागवते । ४ । ७ । ५८ ।
"इदं पवित्रं परमीशचेष्टितं
यशस्यमायुस्यमघौघमर्षणम् ॥")

मर्षितः, त्रि, क्षमायुक्तः । क्षान्तिविशिष्टः । ऋष-धातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥ (यथा, श्रीमद्भागवते । १ । ७ । ५१ ।
"तत्राहमर्षितो भीमस्तस्य श्रेयान् वधः स्मृतः ।
न भर्त्तुर्नात्मनश्चार्थे योऽहन् सुप्तान् शिशून् वृथा ॥")

भावे क्तः, क्ली । (मर्षणम् ॥)

मर्षितवान्, त्रि, क्षान्तः । ऋषधातोः कर्म्मणि क्तवतुप्रत्ययेन निष्पन्नः ॥

मल, ङ धृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ मलते । इति दुर्गादासः ॥

मलः, पुं, क्ली, (मृज्यते शोध्यते इति । मृज्+ "मृजेरिलोपश्च ।" उणा० १ । १०६ । इति अलच् टिलोपश्च । यद्वा, मलते धारयति व्याध्यादिदोषगन्धमिति । मल+अच् ।) पापम् । (यथा, मनुः । २ । १०२ ।
"पश्चिमान्तु समाधीनो मलं हन्ति दिवाकृतम् ॥"
"दिवाकृतं पापं निहन्ति ।" इति तट्टीकायां कुल्लूकभट्टः ॥ * ॥) विट् । (यथा, मनुः । ४ । २२० ।
"पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम् ।
विष्ठा वार्द्धुषिकस्यान्नं ग्राम्यसूकरिणो मलम् ॥"
"विष्ठा मलमेकमेव च ।" इति तद्व्याख्ये मेधा-तिथिः ॥) किट्टम् । इत्यमरः । २ । ६ । ६५ ॥ (यथा, अभिज्ञानशकुन्तले । ६ ।
"छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा ॥")
"पापं किल्बिषम् । विट् । विष्ठा । किट्टं कलङ्को मलूरादि खेदादि च क्लीव मलः ।
'वसा शुक्रमसृङ्मज्जा मूत्रं विट्कर्णविण्मुखाः ।
श्लेष्मास्रदूषिका स्वेदो दादशैते वृथा मलाः ॥'
इति स्मृतिः ।" इति तट्टीकायां भरतः ॥ कर्पू-रम् । इति शब्दचन्द्रिका ॥ वातपित्तकफाः ।
यथा,—
"सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः ।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ॥"
इति माधवकरः ॥
(पारिभाषिकमलं यथा, महाभारते । ८ । ४५ । २३ ।
"क्षत्रियस्य मलं भैक्षं ब्राह्मणस्यानृतं मलम् ।
मलं पृथिव्या वाहीकाः स्त्रीणां मदस्रियो मलम् ॥")

मलघ्नः, पुं, (मलं हन्तीति । हन्+टक् ।) शालमली-वृक्षः । इति राजनिर्घण्टः ॥ मलनाशके, त्रि ॥

मलघ्नी, स्त्री, (मलघ्न+स्त्रियां ङीष् ।) नाग-दमनी । इति राजनिर्घण्टः ॥

मलजं, क्ली, (मलाज्जायते इति । जन्+डः ।) पूयः । इति शब्दचन्द्रिका ॥ मलोद्भवे, त्रि ॥

मलदूषितं, त्रि, (मलेन दूषितम् ।) मलिनम् । इत्यमरः । ३ । १ । ५५ ॥

मलद्रावी, [न्] पुं, (मलं विष्ठां द्रावयति चाल-यतीति । द्रु+णिच्+णिनिः ।) जयपालः । इति राजनिर्घण्टः ॥

मलनं, क्ली, (मलयते मर्द्यते इति । मल+ल्युट् ।) मर्द्दनम् । इति मेदिनी । ने, १०४ ॥

मलनः, पुं, (मलते धारयति दृष्टितापौ । मल धृतौ+ल्युः ।) पटवासः । इति मेदिनी । ने, १०४ । ताँतु इति भाषा ॥

मलपूः, स्त्री, (मलात् पापात् पुनातीति । पू+क्विप् ।) काकोदुम्बरिका । इत्यमरः । २ । ४ । ६१ ॥ (यथा, भावप्रकाशे ।
"विभीतकलं मलपूनटानां
क्वाथेन कृत्वा गुडसंयुतेन ॥")

मलभुक्, [ज्] पुं, (मलं भुङ्क्ते इति । भुज्+क्विप् ।) काकः । इति शब्दरत्नावली ॥

मलभेदिनी, स्त्री, (मलं भिनत्तीति । भिद्+णिनिः । स्त्रियां ङीप् ।) कटुका । इति राज-निर्घण्टः ॥

मलमासः, पुं, (मलो मलिनश्चासौ मासश्चेति कर्म्मधारयः ।) अधिकमासः । तत्पर्य्यायः ।

मलिम्लुच: २ अधिमास: ३ असंक्रान्तमास: ४ नपुंसक: ५। तस्य लक्षणं यथा। रविसंक्रान्त्यभावविशिष्टचान्द्रमासत्वं मलमासत्वम्। इति श्राद्धविवेकटीकायां श्रीलक्ष्मणभट्टालङ्कार:॥ अपि च। ज्योतिषे।

"अमावास्यादयं यत्र रविसंक्रान्तिवर्ज्जितम्। मलमास: स विज्ञेयो विष्णु: स्वपिति कर्कटे॥ अमावास्यादयम् अमावास्यादयान्त्यक्षणद्वयम्। रविसंक्रान्तिभ्यां रविक्रियोत्पत्तिरूपोत्तरसंयोगरूपाभ्यां यथाक्रमं वर्ज्जितं तेन दर्शादयान्त्यक्षणद्वयपूर्व्वापरयोरेव रवे: क्रियोत्पत्युत्तरसंयोगाभ्यां यथाक्रमं योगेनाधिमास:। संक्रान्तेरेकत्वे क्रियोत्पत्तिरपरत्वे पूर्व्वसंयोगनाश: उत्तरसंयोगोत्पत्तिश्चेति क्षणद्वयवृत्तित्वमिति मीमांसकसिद्धान्तात्। यच्चापरिशिष्टज्योति:पराशरौ।

रविणा लङ्घितो मासश्चान्द्र: ख्यातो मलिम्लुच:।
तत्र यद्विहितं कर्म्म उत्तरे मासि कारयेत्॥

पराशर:।

पञ्चदशेऽपि संक्रान्तिर्यदि न स्यात् सितासिते।
तदा तन्मासविहितमुत्तरे मासि कारयेत्॥

अत्र लक्षणसंक्रमश्च रवेस्तदा भवति यदा तन्मासतत्पूर्व्वमासान्त्यक्षणयोरेकराश्यवस्थितस्य रवेस्तन्मासानन्तरमेव राश्यन्तरसंयोग: तत्रैकराशिस्थितस्य मासद्वयापनमात्रं तथात्वे चतुर्दशामेकराशौ संक्रान्तस्य प्रतिपत्प्रथमक्षणेऽपरराशौ तत्परराशौ च द्वितीयायां प्रतिपदि वा रवे: संयोगेऽपरस्यापि मलमासता स्यात् अतएव ज्योतिषे।

अमावास्यापरिच्छिन्नं रविसंक्रान्तिवर्ज्जितम्।
मलमासं विजानीयाद्विहितं सर्व्वकर्म्मसु॥
तस्यार्कौ दर्शकस्यैकराशौ दर्शत्रयातिग:॥

अत्रैकराशिस्थार्कस्य दर्शत्रयातिगत्वसूक्तम्॥

एतच्च पूर्व्वोपदर्शितयोर्मासयो: पूर्व्वस्यैव सम्भवति न परस्य॥ मलमासकारश्चन्द्र ज्योतिषे।

दिवसस्य हरार्कस्य षष्टिभागगतौ तत:।
करीलेऽमहरन्दर्शं तयैवैकश्च चन्द्रमा:॥
एवमर्द्धर्तुतीयानामब्दानामधिमासकम्।
शीघ्रे जनयत: पूर्व्वं पञ्चाब्दान्ते तु पश्चिमम्॥

तेन दिवसस्य तिथे: षष्टिभागं दग्धमेकं रविर्हरति छिनत्ति उत्तरे छिदमित्यभिधानात्। ततश्च ऋतौ मासद्वये षष्टिभागाष्टच्छेदादृक्तिथेश्छेदमाकर्षन्नं करोति। एवं चन्द्रोऽपि। एवमुक्तक्रमेण वर्षे द्वादशतिथ्यात्मककाला कर्षादर्द्धर्तुतीयानामब्दानामन्ते अर्द्धर्तुतीयं येषां ते तथा शीघ्रे माधवादिद्वयके पूर्व्वं माधवादित्रिकपतितं पञ्चाब्दान्ते तु पश्चिमं माधवादित्रिकपतितं मलमासं चन्द्रार्कौ जनयत:। शीघ्रे माधवादिद्वयके इति यदुक्तं तत् चक्रमाह मिहिर:।

माधवादिषु षट्केषु मासि दर्शत्रयं यदा।
द्विराषाढ: स विज्ञेय: श्रौते तु श्रावणेऽच्युत:॥
द्विराषाढो द्विराषाढादि:। श्रावणे सौरश्रावणे। तथा च ज्योतिषे।

मिथुनस्थो यदा भानुरमावास्यादयं स्पृशेत्।
द्विराषाढ: स विज्ञेय: विष्णु: स्वपिति कर्कटे॥
अमावास्यादयं तदन्त्यक्षणद्वयं स्पृशेत् संयुग्भावात् न तन्मध्ये राश्यन्तरसंयोग इत्यर्थ:॥ ॥ ननु कर्कटादित्रिके अधिमासपाते ततपूर्व्वं मिथुन एव हरिशयनं तत् कथं माधवादिषट्कमासे कर्कटे तत्। तत्राह राजमार्त्तण्ड:।

कन्यासिंहकुलीरेषु यदा दर्शत्रयं भवेत्।
आगामिनि तदा वर्षे कुलीरे माधव: स्वपेत्॥
माधवादित्रिकस्यावश्यादित्रिकाधिमासविवेचनमप्येतदर्थम्। इदन्तु सार्द्धवर्षद्वयाधिमासपालमौचित्यक्रमादुक्तं ऋषितिथीनां द्वासवाङ्कैश्च एकत्रयधिकन्यूनदर्शनादुक्तकालन्यूनाधिककालेऽपि मलमासो भवतीति समयप्रकाशग्रन्थे। वस्तुतस्तु वैपरीत्यं यतो न्यूनदग्धतिथे: प्राथिकत्वे तत्र तिथिक्षयस्य भटित्युपलभ्यमानत्वात् लक्षणकालेन तिथ्यन्तरसम्बन्धात् शीघ्रं रविसङ्क्रमप्रतीते: शीघ्रमेव मलमासो भवतीति अधिकदग्धतिथे: प्राथिकत्वे तत्र तिथिक्षयस्य भटित्युपलभ्यमानत्वेनाधिकेनैव कालेन तिथ्यन्तरसम्बन्धात् विलम्बेनैव रविसङ्क्रमप्रतीतेश्चिरेणैव मलमासो भवतीति। तथा च विष्णुधर्म्मोत्तरम्।

सौरसंवत्सरस्यान्ते मासेन ग्रहिलेन तु।
एकादशातिरिक्तानि दिनानि भृगुनन्दन!॥
समाहृत्य चाष्टमासे तस्मान्मासोऽतिरिच्यते।
स चाधिमासक: प्रोक्त: कालज्ञैर्म्मासु गर्हित:॥

इदन्तु नियतमेकस्मादधिमासात्तृतीयाब्दे अधिमासान्तरमिति। यद्यपि।

यां तिथिं समनुप्राप्य तुला गच्छति भास्कर:।
तस्यैव सर्व्वसंक्रान्तिर्यावत्कर्म्मेदं न गच्छति॥

इति राजमार्त्तण्डवचनात्तुलादिवर्ज्जासु तिथिह्रासाभावार्द्धं द्वादशतिथिह्रासोपपत्तावपि।

मध्ये विष्णुतोर्भानुर्यान्यद्दानि तु वर्द्धयेत्।
ते: सम्भूयाधिको मास: पतत्येव त्रयोदश:॥

इति यज्ञपरिशिष्टवाक्ये विष्णुतोर्म्मेषतुलासंक्रान्त्योर्म्मध्ये मेषादिवर्ज्जासु एव तिथिह्रासा। अङ्गौवने मेषादिवर्ज्जासु मन्दसूक्ष्मा सप्तदिनद्वित्रिसुलादौ शीघ्रसूक्ष्मा दिनद्वयह्रास इति। तथा च ज्योति:ग्रन्थम्।

मेषादीनामष्टवर्ज्यं वर्ज्या सप्ताष्टचक्रकम्।
तुलादीनामष्टसप्तचन्द्रकन्तु लिखेत् पृथक्।
चन्द्र एक:। अङ्कस्य वामा गतिरित्यङ्कविदां समयात् क्रमेण अङ्का बोध्या:। तेन दिनद्वित्रिक्रमक्षयाभ्यां मेषादिषट्क एव एकादशातिथिह्रास:। एवञ्च।

मतेऽब्दहृतिये सार्द्धे पञ्चपञ्चे दिनद्वये।
दिवसस्याष्टमे भागे पतत्येकोऽधिमासक:॥

इति राजमार्त्तण्डोक्त: सप्तदशदिनाधिकाष्टमासाधिकवर्षद्वये अधिमास:। स सौरे मासि सप्तदशदिनोत्तरं चान्द्रमासलक्षणासम्भवात् सावनमानेन ज्ञेय:। तथा च विष्णुधर्म्मोत्तरप्रथमकाण्डम्।

सौरेणाब्देन मानेन यदा भवति भार्गव!।
सावनेन च मानेन दिनषट्कं प्रपूर्य्यते॥
सौरसंवत्सरे दिनषट्काधिक: सावनसंवत्सरो भवतीति। सौरमासाष्टकाधिकवर्षद्वये सप्तदश दिनानि वर्द्धन्ते सावनक्रमेणेति पूर्व्वोक्तविष्णुधर्म्मोत्तरोक्तसमानविषयतास्येति।""ज्योतिषे।

दर्शानां फाल्गुनादीनां प्रायो माघस्य च क्वचित्।
नपुंसकत्वं भवति न पौषस्य कदाचन॥

नपुंसकत्वं मलमासत्वम्। तथा चोक्तम्।

असंक्रान्तो हि यो मास: कदाचित्तिथिवर्द्धित:।
कालान्तरात् समायाति स नपुंसक उच्यते॥

ग्राह्यिज्योऽपि।

प्रायशो न शुभ: सौम्यो ज्येष्ठाषाढकक्षया।
मध्यमौ चैत्रवैशाखावधिकोऽन्य: सुभिक्षत:॥
सौम्यो मार्गशीर्ष:। अधिकोऽधिमास:।"॥

"तदयं संक्षेप:। शुक्लप्रतिपदादिरमावास्यान्तो रविलङ्घितो मासो मलमास:। स च माधवादौ औत्सर्गिक: कदाचित् कार्त्तिकादावपि। अयञ्चाभिप्रेतत्वं माधवादि कार्त्तिकादिषट्कयोरपि तत्तत्क्षययोगे माधवादावेव तुलादिषट्क एवोभयमासे तत्तत्क्षययोगे पूर्व्व एव। आश्विनवैशाखयोस्तत्तत्क्षययोगे पर एव. मलमास: तदभिप्रेतस्तु भागुलङ्घित:। मलमासे आषाढादिर्द्वितम्। भागुलङ्घिते तु नेतदिति विस्तर:॥

मलमासे निषिद्धानि यथा, काठकग्रन्थम्।

चूड़ां मौञ्जीबन्धनञ्च अग्न्याधेयं महालयम्।
राजाभिषेकं काम्यञ्च न कुर्य्यादधिमासके॥
चूड़ां मौञ्जीबन्धनञ्च अग्न्याधेयं महालयम्।
राजाभिषेकं काम्यञ्च न कुर्य्याद्भानु-
सङ्क्रान्ते॥

महालयं कन्याकेभागम्। भौमपराक्रमेऽपि।

अधिमासे दिनपाते क्षयभे रवौ भागुलङ्घिते मासि।
चक्रिणि सुप्ते कुर्य्यान्नो माङ्गल्यं विवाहश्च॥

दिनपाते दिनक्षये।

अधिमासे विवाहं यात्रां चूड़ां तथोपनयनादि।
कुर्य्यान्न सावकाशं माङ्गल्यं न तु विशेषेण्याम्। इति॥

अत्र विवाहादिकीर्त्तनं निरवकाशत्वेऽपि निषेधार्थम्। अन्यथा सावकाशमित्यनेनैव सिद्धे:। सावकाशश्च सम्भवत्कालानन्तरं कर्म्म यतो निरवकाशस्यानन्यगतिकस्य प्रतिप्रसवोऽर्थात् क्वचित्। तथा च मलमासाधिकारे काठकग्रन्थम्।

कालेऽनन्यगतिं नित्यां कुर्यान्नैमित्तिकीं क्रियाम् ॥"
इति मलमासतत्त्वम् ॥*॥

अपि च।
"अग्न्याधानं प्रतिष्ठाञ्च यज्ञदानव्रतानि च।
देवव्रतव्रतोत्सर्गचूडाकरणमेखलाः।
माङ्गल्यमभिषेकञ्च मलमासे विवर्ज्जयेत् ॥"
इति गारुड़े १२८ अध्यायः ॥*॥

अथ मलमासकर्त्तव्यव्रतादि। "चातुर्मास्यव्रतमाषाढ़ादुज्झेखेन विहितं तदप्यारब्धं आवणादिमलमासेऽपि कर्त्तव्यं आषाढ़ादिप्रतिदिनकर्त्तव्यत्वेन निरवकाशात्।
'वष्ठ्या तु दिवसैर्मासः कथितो बादरायणैः ॥'
इति ज्योतिःशास्त्रे पितामहेन एकमासत्वाभिधानाच्च। यथ।
'संवत्सरन्तु यः पूर्णमेकभक्तेन तिष्ठति।'
इत्यादौ माघाद्युल्लिखितसंवत्सरव्रतमारब्धं तन्मलमासेऽपि कर्त्तव्यम्।
'क्वचित्त्रयोदशमासाः संवत्सर इति श्रुतेः ॥'
यच्च प्रतिमासविहितं नमाघाद्युज्झेखेन तन्मलमासेऽपि कर्त्तव्यम्। तथा च रम्भाव्रतीयाव्रते शिवरहस्यम्।
'मासे मलिम्लुचेऽप्येवं यजेद्देवीं सगङ्गराम्।
किन्तु नोद्यापनं कार्य्यमित्याह भगवान् शिवः ॥'
उद्यापनं प्रतिष्ठा। व्रतारम्भोऽपि निषिद्धः। पूर्व्वोक्तकाश्यपवचनात्। ज्येष्ठादिमासविशेषविहितं सावित्रीव्रतादिकन्तु सावकाशत्वान्मलमासे न कार्य्यम्। किन्तु प्रकृत एव ज्येष्ठादौ कर्त्तव्यमिति। हरिवंशः।
'नित्यनैमित्तिके कुर्य्यात् प्रयतः सन् मलिम्लुचे।
तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च ॥'
नित्यमहरहः पुरस्कारविहितं स्नानसन्ध्यापञ्चमहायज्ञादि काम्यमपि तथाविधं संकल्पितं यत्किञ्चिद्द्रव्यदानाग्निवपूजादि। उक्तं भविष्ये।
'कुर्य्यात् प्रात्यहिकं कर्म्म प्रयतः सन् मलिम्लुचे।
नैमित्तिकञ्च कुर्व्वीत सावकाशं न यत्नवेत् ॥'
कालमाधवीये मत्स्यपुराणम्।
'वर्षे चाहरहः श्राद्धं दानञ्च प्रतिवासरम्।
गोभूतिलहिरण्यानां मासेऽपि स्यान्मलिम्लुचे ॥'
काठकयज्ञपरिशिष्टम्।
'प्रकृतं मलमासात् प्राक् यत् कर्म्म न समापितम्।
आगते मलमासेऽपि ततु समाप्यमसंशयम् ॥'
ब्रह्मसिद्धान्ते।
'आरब्धं कर्म्म यत्किञ्चित्तत्कार्य्यं हि मलिम्लुचे ॥'
नैमित्तिकं मासवत्सरदिवसादिविशेषनियमशून्यावश्यकर्त्तव्यकाद्याचित्कनिमित्तोत्पन्नम्॥
जातकर्म्मादयोऽपि मलमासे कार्य्यम्।
'जातकर्म्मान्त्यकर्म्माणि नवश्राद्धं तथैव च।
मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोड़श ॥
चन्द्रसूर्य्यग्रहे स्नानं दानश्राद्धक्रियादिकम्।
कार्य्यं तन्मलमासेऽपि नित्यं नैमित्तिकं तथा ॥'
स्मृतेः।
'श्राद्धजातकर्मादीनि ये च संस्कारमाश्रिताः।
मलिम्लुचेऽपि कर्त्तव्याः काम्या दृष्टेच वर्ज्जयेत्।'
संस्कारा अन्नप्राशननिष्क्रमणादयः। इति माधवाचार्य्यः। अन्त्यकर्म्मादि वहनदहनोदकदानपिण्डदानास्थिसञ्चयादीनि। नवश्राद्धम्।
'चतुर्थे पञ्चमे चैव नवमैकादशे तथा।
यदन्नं दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥'
इति यमोक्तम्॥
अत्र चतुर्थाद्दादियहणं मरणदिनावधीति। बालग्रहभूतग्रहनराधिपप्रबलग्रभुदुःस्वरोगाभिघाद्भुतदुःस्वप्नग्रहदौस्थ्यादिनिमित्तं शान्तिकर्म्मापि मलमासेऽपि कर्त्तव्यम्। विष्णुना शान्तिस्वस्ययनैर्दैवोपघातान् शमयेत् परचक्रोपघातांश्च इत्युक्तम्।" इति मलमासतत्त्वम्॥

मलयः, पुं, (मलते धरति चन्दनादिकमिति। मल्+"वलिमलितनिभ्यः कयन्।" उणा० ४। ६६। इति कयन्।) खनामख्यातपर्व्वतः। तत्पर्य्यायः। आषाढ़ः २ दक्षिणाचलः ३। इति हेमचन्द्रः।४। ६५॥ चन्दनाद्रिः ४ मलयाचलः ५। इति शब्दरत्नावली॥ (स च सह्यकुलाचलान्तर्गतः। यथा, मार्कण्डेये। ५७। १०—११।
"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः।
विन्ध्यश्च पारियात्रश्च सप्तैवाच कुलाचलाः॥")
श्लेष्मातकम्। देशविशेषः। (यथा, मात्स्ये। ११३। ४४।
"अङ्गा वङ्गा मगधका अन्तर्गिरिबहिर्गिरी।
ततः प्रवङ्गमातङ्गमलयामलवर्त्तिकाः॥")
आरामः। इति मेदिनी। ये, ६६॥ नन्दनवनम्। इति धरणिः॥ अष्टादशोपद्वीपान्तर्गतद्वीपविशेषः। इति शब्दमाला॥ ऋषभदेवस्य शतपुत्रान्तर्गतपञ्चमपुत्रः। (यथा, श्रीभागवते। ५। ४। १०। "तमनु कुशावर्त्त इलावर्त्तो ब्रह्मवर्त्तो मलयः केतुर्भद्रसेन इन्द्रस्पृग् विदर्भः कीकट इति नवनवतिप्रधानाः॥"
गरुड़वंशीयानामन्यतमः। यथा, महाभारते। ५। १०१। १४।
"सुस्वरो मधुपर्कश्च हेमवर्णस्तथैव च।
मलयो मातरिश्वा च निशाकरदिवाकरौ॥")

मलयगन्धिनी, स्त्री, (मलयस्य गन्धः अस्त्यस्याः। मलयगन्ध+इनिः। स्त्रियां ङीप्।) उमासखीविशेषः। इति शब्दमाला॥

मलयजं, पुं, क्ली, (मलयात् जायते इति। जन्+डः।) चन्दनम्। इत्यमरः। २। ६। १३१॥ (यथा, गीतगोविन्दे। ३। ११।
"हृदि विषलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः॥
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग! कुधा किमु धावसि॥")

मलयजाते, त्रि। यथा, महाभारते। १। २७। ६।
"उत्पतद्भिरिवाकाशं दृष्टैर्मलयजैरपि॥")
यथा च।
"राहुं मलयजं मूलं पैठीनं द्वादशाङ्गुलम्।
स्नानं लघ्वाम्बरं सिंहासनं ध्यात्वा तथाऽऽचमेत्॥"
इति गरुड़पुराणतत्त्वम्॥

मलया, स्त्री, (मल+कयन्। टाप्।) निशुता। इति मेदिनी। ये, ६६॥

मलयाचलः, पुं, (मलयश्चासावचलश्चेति।) मलयपर्व्वतः। इति शब्दरत्नावली॥ (यथा, सुश्रुते उत्तरतन्त्रे। ४० अध्याये।
"पुन्नागनागकरवीरलतोपकारे
तस्मिन् गृहे कमलरेणुरजो गृणीत।
यत्राहतानिलविकम्पितपुष्पदान्नि
हैमन्तिकान्यहिमवन्मलयाचलानाम्॥")

मलयानिलः, पुं, (मलयस्यानिलः।) वसन्तकालीनवायुः। तत्पर्य्यायः। वासन्तः २। इति त्रिकाण्डशेषः॥ (यथा, साहित्यदर्पणे। ३।१२६।
"स एव सुरभिः कालः स एव मलयानिलः।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते॥")

मलयूः, स्त्री, (मलयूः। पृषोदरादित्वात् पस्य यत्वम्।) मलपूः। इति शब्दरत्नावली॥

मलयोद्भवं, क्ली, (मलयः उद्भव उत्पत्तिकारणं यस्य।) चन्दनम्। इति राजनिर्घण्टः॥

मलविनाशिनी, स्त्री, (मलं विनाशयतीति। वि+नश्+णिच्+णिनिः। स्त्रियां ङीप्।) शुद्धपुण्ड्री। इति राजनिर्घण्टः॥

मलहन्ता, [न्] पुं, (मलं हन्तीति। हन्+ल्टच्।) शालमलीवृक्षः। इति राजनिर्घण्टः॥

मला, स्त्री, (मल+अच्। टाप्।) भूम्यामलकी। इति शब्दचन्द्रिका॥

मलाकर्षी, [न्] पुं, (मलं विष्ठां आकर्षति स्थानात् स्थानान्तरं नयतीति। आ+कृष्+णिनिः।) वर्द्धिकः। इति शब्दमाला। हाड़ि इति भाषा॥

मलाका, स्त्री, (मलेन मनोमालिन्येन अकति कुटिलं गच्छतीति। अक्+अच्। स्त्रियां टाप्।) कामिनी। दूतिका। इति संक्षिप्तसारोद्धारटीकायां दुर्गादासः॥

मलापकर्षणं, क्ली, (अप+कृष्+भावे ल्युट्। मलस्यापकर्षणम्।) पापमोचनम्। मलदूरीकरणम्। इति केचित्॥

मलापहा, स्त्री, (मलमपहन्तीति। अप+हन्+डः। स्त्रियां टाप्।) नदीविशेषः। यथा,—
"मलापहा भीमरथी च वङ्गा
यथा च लक्ष्मा जलसाध्यगा गुरोः।
मलापहाबकृमयोक्षयापि
पथं लघु खादुतरं सुकान्तिदम्॥"
इति राजनिर्घण्टः॥

मलावहं, क्ली, (मलं आवहतीति। आ+वह्+अच्।) नवविधपापान्तर्गतपापविशेषः। यथा, मानवे। ११। ७१।

"कृमिकीटवयोहत्या मद्यानुगतभोजनम्।
फलैधःकुसुमस्तेयमधैर्यञ्च मलावहम्॥"

मलारिः, पुं, (मलस्यारिर्नाशको रेचकत्वात्।) सर्जक्षारः। इति राजनिर्घण्टः॥

मलिनं, त्रि, (मलते धारयतीति। मल+"बहुलमन्यत्रापि।" उणा० २। ४६। इति इनच्। यद्वा, "ज्योत्स्नातमिस्रेति।" ५। २। ११४। इत्यत्र। "मलशब्दादिनञ्श्रीमसचौ प्रत्ययौ निपात्येते।" इति काशिकोक्त्या इनच्।) मलयुक्तवस्तु। तत्पर्य्यायः। मलीमसम् २ कश्मलम् ३ मलदूषितम् ४। इत्यमरः। ३। १। ५५॥ (यथा, महानिर्व्वाणतन्त्रे। १। ४३।

"परस्त्रीहरणे पापग्रहाभयविवर्ज्जिताः।
निर्धना मलिना दीना दरिद्राश्चिररोगिणः॥")

दूषितभृ। (यथा, आर्य्यासप्तशत्याम्। ४०२।

"परपट इव रजकीभिर्मलिनो मुक्तापि निर्दयं ताभिः।
अर्थ्यसहायेन विना जघन्य! मुक्तोऽसि कुलटाभिः॥")

क्लान्तम्। इति मेदिनी। ने, १०४॥ नित्यनैमित्तिकक्रियात्यागी। इति मार्कण्डेयपुराणम्॥ (निकृष्टम्। यथा, शिशुपालवधे। ६। २३।

"द्युतिमय्यहीदृग्वहगो जवः
प्रकटीभवन्ति मलिनाश्रयतः॥"

"मलिनाश्रयतः निकृष्टाश्रयत्वात्।" इति तट्टीकायां मल्लिनाथः॥)

मलिनं, क्ली, (मलते धरति दोषमिति। मल+इनच्।) घीलम्। इति शब्दचन्द्रिका॥ दोषः। इति हेमचन्द्रः॥ टङ्गणः। इति राजनिर्घण्टः॥

मलिनसखः, पुं, (मलिनं सखमस्यभागो यस्य।) अग्निः। गोलाङ्गुलः। इति मेदिनी। खे, १८॥ प्रेतः। इति हेमचन्द्रः॥

मलिनसुखः, त्रि, (मलिनं दूषितं सुखं यस्य।) क्रूरः। खलः। इति मेदिनी। खे, १८। हेमचन्द्रश्च॥ ज्ञानवदनश्च॥

मलिनाम्बु, क्ली, (मलिनं क्लान्तवर्णं अम्बु।) मसी। इति हेमचन्द्रः। ३। ४८॥

मलिनाश्यः, त्रि, (मलिनं दूषितमाश्यं यस्य।) खलः। इति शब्दमाला॥

मलिनी, स्त्री, (मलमस्या अस्तीति। मल+इनिः। स्त्रियां ङीप्।) रजस्वला नारी। इत्यमरः। २। ६। २०॥

मलिम्लुचः, पुं, (मली मलं म्लोचतीति। म्लुच् इर् गत्याम्+कः।) मलमासः। यथा,—

"तमतिक्रम्य तु रविर्यदा गच्छेत् कथञ्चन।
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्रक्लमः स्मृतः॥
यदा तं दशमान्तमासमतिक्रम्य तत्पूर्व्वमासान्त्यचरमवृत्तिराश्रित्यः सन् सूर्य्योऽतिवाह्य गच्छेत् मासान्तरे राश्यन्तरसंयोगं गच्छेत् तदा आद्योऽतिक्रान्तमासो मलिम्लुचो ज्ञेयः। मली मलं म्लोचति गच्छतीति मलिम्लुचः। द्वितीयस्तु प्रक्लमः गुडः कर्म्माहत्वात्।" इति मलमासतत्त्वम्॥ अग्निः। चौरः। इति मेदिनी। चे, २१॥ (यथा, माघे। १६। ५२।

"प्रहितः प्रघनाय माधवा-
नहमाकारयितुं महौजसा।
न परेषु महौजसश्चला-
दपकुर्व्वन्ति मलिम्लुचा इव॥")

वायुः। इति शब्दमाला॥ (पक्षयज्ञपरिभ्रष्टः। इति हेमचन्द्रः। ३। ५२२॥)

मलिष्ठा, स्त्री, (अतिशयेन मलिनी। मलिनी+इष्ठः। स्त्रियां टाप्।) रजस्वला नारी। इति चिकित्साशब्दः॥

मलीमसं, क्ली, (मलमस्यास्तीति। मल+ईमसच्। प्रत्ययेन निपातितः।) लौहम्। पुष्पकासीसम्। इति मेदिनी। से, ५६॥

मलीमसः, त्रि, (मलमस्यास्तीति। मल+ईमसच्। निपात्यते।) मलिनः। इत्यमरः। ३। १। ५५॥ (यथा, माघे। १। ३८।

"उपप्लुतं पातुमदो महीरुहै-
स्त्वमेव विश्वम्भर! विश्वमीक्षिषे।
ऋते रवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः॥"

क्लान्तवर्णः। यथा, श्रीकण्ठचरिते। ६। ३८।

"मलीमसश्रीर्मधुपानसक्तो
भेजे लता: पुष्पवतीः स्फुटं यः।
स एव चेत्रेण वत द्विरेफः
पुष्पेपुराज्ये विहितः पुरोधाः॥")

मलूकः, पुं, (मल+बाहुलकात् ऊकः।) कृमिविशेषः। इत्युणादिकोषः॥

मल्ल, ड धृतौ। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० सक० सेट्।) ड, मल्लते। इति दुर्गादासः॥

मल्लः, पुं, (मल्लते धरति बलमिति। मल्ल+अच्।) बाहुयोधी। इत्यमरभरतौ। माल इति भाषा॥ (यथा, श्रीमद्भागवते। १०। ४३। १७।

"मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान्॥")

वर्णसङ्करजातिविशेषः। माला इति भाषा। स च ब्राह्मण्यात् क्षत्रियात् सवर्णायां जातः। इति मानवे १० अध्यायः॥ स च वैटात् तीवरकन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ तन्तुवाय्यां कुन्दकाराज्जातः। इति पराशरपद्धतिः॥ पाचम्। कपोलम्। मत्स्यभेदः। इति मेदिनी। ले, ४४॥ देशविशेषः। यथा,—

"दशार्णा नवराष्ट्रश्च मल्लाः शाल्वा युगन्धराः॥"

इति विराटपर्व्वणि १ अध्यायः॥

मल्लकः, पुं, (मल्ल इव। मल्ल+कन्। ह्रस्वादस्य तथात्वम्। यद्वा, मल्ल धारणे+खुल्।) दन्तः। इति हेमचन्द्रः। ३। २८३॥ (ब्राह्मणविशेषः। यथा, राजतरङ्गिण्याम्। ८। ७३२०।

"विलोक्य वैकल्पदशौ बद्धौ तौ स्वामिनौ तथा।
कृतासिधेनुरुत्सृष्टौ द्विजन्मा मल्लकाभिधः॥")

मल्लकः, पुं, स्त्री, (मल्लते धारयति प्रदीपमिति। मल्ल+खुल्।) दीपाधारः। नारिकेलफलाद्यवयवजपात्रविशेषः। माला इति भाषा। स्त्रियां मल्लिका। इत्यमरभरतौ॥ प्रदीपः। इति मधुरेशः॥

मल्लजं, क्ली, (मल्ले तदाख्यदेशे जायते इति। जन्+डः।) मरिचम्। इति शब्दार्थः॥

मल्लतूर्य्यं, क्ली, (मल्लैर्वाद्यमानं तूर्य्यम्। मल्लाय तूर्य्यमिति वा।) वाद्यविशेषः। तत्पर्य्यायः। महाखनः २। इति चिकित्साशब्दः॥

मल्लनागः, पुं, (नागो हस्तीव मल्लः। पूर्व्वनिपातः।) वात्स्यायनमुनिः। (मल्लो बलीयान् नागः।) अभ्रमातङ्गः। इति मेदिनी। गे, ५७॥ (मल्लो नाग इव।) लेखकारः। इति शब्दरत्नावली॥ कामशास्त्रविशेषः। इति धरणिः॥

मल्लभूः, स्त्री, (मल्लानां भूर्भूमिः।) मल्लभूमिः। इति शब्दार्थः॥

मल्लभूमिः, स्त्री, (मल्लानां भूमिः स्थानम्।) मल्लक्रीड़ास्थानम्। तत्पर्य्यायः। अक्षवाटः २ रङ्गभूमिः ३ रङ्गस्थली ४। इति शब्दरत्नावली॥ मल्लभूः ५ अक्षपाटः ६। इति शब्दार्थः॥ देशविशेषश्च॥ (यथा,—

"अयःपात्रे पयःपानं शालपत्रे च भोजनम्।
शयनं तालपत्रे च मल्लभूमेरियं गतिः॥"

इत्युद्भटः॥)

मल्लयाचा, स्त्री, (मल्लानां याचा।) मल्लानां युद्धार्थयाचा। तत्पर्य्यायः। माल्लवी २। इति हारावली॥

मल्लयुद्धं, क्ली, (मल्लानां युद्धम्।) मल्लानां संग्रामः। तत्पर्य्यायः। नियुद्धम् २ बाहुयुद्धम् ३। इति शब्दरत्नावली॥ तत्प्रकारा यथा,—

"अथ स्कन्देन तं मल्लं योधयामास मत्स्यराट्।
योध्यमानस्ततो भीमो दुःखेनैवाकरोन्मतिम्॥
नहि शक्नोति विहतं प्रत्याख्यातुं नराधिपम्।
ततः स पुरुषव्याघ्रः शार्दूलशिथिलस्मरन्॥
प्रविवेश महारङ्गं विराटमभिपूजयन्।
बबन्ध कक्षां कौन्तेयस्ततः संहर्षयन् जनान्।
ततस्तं वृत्तसङ्काशं भीमो मल्लं समाक्षयत्॥
जीमूतं नाम तं मल्लं तत्र ख्यातविक्रमम्।
तावुभौ सुमहोत्साहावुभौ तीव्रपराक्रमौ॥
मत्ताविव महाकायौ वारणौ षष्टिहायनौ।
ततस्तौ नरशार्दूलौ बाहुयुद्धे समीयतुः॥
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ।
आसीत् सुभीमः सम्पातो वज्रपर्व्वतयोरिव॥१०॥
उभौ परमसंहृष्टौ बलेनातिबलावुभौ।
अन्योन्यमन्तरप्रेप्सू परस्परजयैषिणौ॥
उभौ परमसंहृष्टौ मत्ताविव महागजौ।
कृतप्रतिकृतेश्चिक्षेपाङ्गुलिञ्च सकृत्टैः॥ ११॥
सन्निपातावधूतेन प्रमाथोन्मथनेन च।
चेपणैर्मुष्टिभिश्चैव वराहोद्धूननिस्वनैः॥
तलैर्वज्रनिपातैश्च प्रहारैरभिघातैश्च च।
शूलाकानखपातैश्च पादोद्धूतैश्च दारुणैः॥

जानुभिश्चाग्रनिर्घातैः शिरोभिश्चावघट्टितैः ।
तद्युद्धमभवद्घोरमग्रस्थं बाहुतेजसा ॥
बलप्राणैन शूराणां समाजोत्सवसन्निधौ ।
अरज्यत जनः सर्व्वः सोत्कृष्टनिनदोत्थितः ।
बलिनो संयुगे राजन् ! इन्द्रवासवयोरिव ।
प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः ॥
आकर्षतामथान्योन्यं जानुभिश्चाभिजघ्नतुः ॥१२॥
ततः शब्देन महता भर्त्सयन्तौ परस्परम् ।
वृषोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ ॥
बाहुभिः समसज्जेतामायसैः परिघैरिव ।
चकर्ष दोर्भ्यामुत्पाट्य भीमो मल्लममित्रहा ॥
विनदन्तमभिक्रोशन् शार्दूल इव वारणम् ।
तमुन्नम्य महाबाहुर्भ्रामयामास वीर्य्यवान् ॥
ततो मल्लाश्च मत्याश्च विस्मयं चक्रिरे परम् ।
भ्रामयित्वा शतगुणं गतसत्त्वमचेतनम् ।
प्रत्यर्पयन्महाबाहुर्भैमं भुवि वृकोदरः ॥१३॥
तस्मिन् विनिहते मल्ले जीमूते लोकविश्रुते ।
विराटः परमं हर्षमगच्छद्भ्रान्धवैः सह ॥
स ह्यर्थात् प्रददौ वित्तं बहु राजा महामनाः ॥"
इति विराटपर्व्वणि १२ अध्यायः ॥
अस्य टीका यथा ।"दुःखेन स्वप्रकटनराज्ञाज्ञालङ्घनद्वन्द्वेन । विहतं लोकसमत्वम् । शार्दूलश्चिंहः सिंह इव व्याघ्र इव वा श्रिथिलः सावश्रः । स्यात् सिंहेऽपि च शार्दूल इति दर्शनात् । कक्षां कक्ष्यम् । सम्पातः संघर्षः ॥ १० ॥ सकट्टे: कट्टट: करचर्षणम् ; किण: कट्ठा इति प्रसिद्धः । क्षतप्रतिक्षतैः परप्रयुक्तिप्रतिक्षतैः । चिचेर्षिचिचैर्ब्भैरिति श्रीधरः ॥ ११ ॥ सन्निपातैस्तादि । एते मल्लानां शिक्षाविशेषाः । सन्निपातैः परस्परसंघातैरवधूतैर्वेहत्सदृशभुजाघातैः प्रमाथैः पातयित्वा पेषणैः । उन्मथनैः अन्तरीक्षे भुजाभ्यां मथनैः । क्षेपणैः क्षणात् प्रक्षेपणैः । बद्धाङ्गुलिकरो मुष्टिः ।
'अवाङ्मुखं स्कन्धगतं भ्रामयित्वा तथैव यः ।
क्षिप्तस्य शब्दः स भवेद्वराहोद्धूतनिस्वनः ॥
तर्जन्यङ्गुष्ठमध्येन प्रसारितकरो हि यः ।
संप्रहारस्तलाख्यस्तु संग्रहो वक्ष्यमिष्यते ॥'
अर्द्धचन्द्रतुल्यमल्लसुष्टिर्वक्ष्यमित्यर्थः ।
'प्रसृताङ्गुलिहस्तेन प्रहृतिः प्रहृतिः स्मृता ।
द्विगुणीकृतबाहुर्यस्तदीयार्थं यथाबलम् ॥
प्रहारः सप्रलोका स्यात् प्रादोद्धूतः प्रदाहृतम् ॥'
जानुभिश्चाग्रनिर्घातैः पाषाणघोषसदृग्ध्वनिभिः करजैर्न्यवघट्टनानि तैः । बलप्राणैन बलोत्कर्षेण । सोत्कृष्टनिनदोत्थितः उत्क्रोशननिनदोत्थानसहितः । प्रकर्षणं बाहुसंसक्तानयनं प्रकृष्टाकर्षणं तदेवाकर्षणमीषत्सम्मुखानयनम् । अभ्याकर्षः समन्ततः कर्षणम् । विकर्षणं पश्चात् नयनं तदेव विपरीतकर्षणमुच्यते उपसर्गभेदादर्थभेदोऽपीति ॥ १२ ॥ शतगुणं शतवारम् ॥ १३ ॥" इत्यर्जुनमिश्रकृतभारतार्थदीपिका ॥

मल्ला, स्त्री, (मल्लते धारयति विलासादिकमिति । मल्ल धारणे + अच् । स्त्रियां टाप् ।) नारी । पत्रवल्ली । मल्लिका । इति शब्दरत्नावली ॥ (लोठनराजपत्नी । यथा, राजतरङ्गिण्याम् । ८ । १६९० ।
"तमेव पुत्रा ग्रीष्मान्ते ग्रीष्मशङ्कुहताशया ।
ततः प्रपेदे प्रलयं मल्ला लोठनवल्लभा ॥")
मल्लारः, पुं, (मल्लं भ्रक्षति प्राप्नोतीति । भ्रक्ष + अण् ।) रागविशेषः । स तु षण्णां रागाणां मध्ये द्वितीयः । यथा,—
"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरागस्तस्य पश्चाद्वै वसन्तस्तदनन्तरम् ॥
हिन्दोलश्चाथ कर्णाट एते रागाः प्रकीर्त्तिताः ॥"
अस्य षट्रागिण्यो यथा,—
"वेलावली पूरवी च कानड़ा माधवी तथा ।
कोड़ा केदारिका चैव मल्लारस्य प्रिया इमाः ॥"
अस्य गानसमयः ।
"मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा ॥"
अस्य स्वरूपं यथा,—
"शुक्लावदातं मलिनं दधानः
प्रलम्बकर्णः कुसुमेन्दुवर्णः ।
कौपीनवासाः सविहारचारी
मल्लारराग: शुचिशान्तमूर्त्तिः ॥"
इति सङ्गीतदामोदरः ॥
(तथा च सङ्गीतदर्पणे रागाध्याये ।
"भैरवः पञ्चमो नाटो मल्लारो गौड़मालवः ।
देशाख्येति षड़्रागाः प्रोच्यते लोकविश्रुताः ॥"
"मेघमल्लारिका मालकौशिकः षटमल्लरी ।
आद्यावरीति विज्ञेया रागा मल्लारसंभवाः ॥"
इति रागार्णवमतम् ॥)
मल्लारी, स्त्री. (मल्लार + ङीप् ।) वसन्तरागस्य रागिणी । यथा,—
"आन्दोलिता च देशाख्या जोगा प्रथम-
मल्लरी ।
मल्लारी चेति रागिण्यो वसन्तस्य सदानुगाः ॥"
इति सङ्गीतदामोदरः ॥
मेघरागस्य रागिणी । इति हलायुधः ॥
(अस्या उदाहरणादिकं यथा संगीतदर्पणे ।
"मल्लारी सपहीना स्यात् ग्रहांशन्यासधैवता ।
औड़वा पौवरीयुक्ता वर्षासु सुखदा सदा ॥"
ध नि रि ग म ध । अस्या ध्यानं यथा,—
"गौरी लज्जा कोकिलकण्ठनादा
गीतच्छेदैर्नाम्नपतिं स्मरन्ती ।
आदाय वीणां मलिना रुदन्ती
मल्लारिका यौवनदूनचित्ता ॥")
मल्लिः, पुं, (मल्लते धारयति विज्ञानमिति । मल्ल + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) चतुर्विंशतितीर्थङ्कराणां मध्ये ऊनविंशतितीर्थङ्करः । इति हेमचन्द्रः ॥ १ । २८ ॥
मल्लिः, स्त्री, (मल्ल + इन् ।) मल्लिका । इति शब्दरत्नावली ॥

मल्लिकः, पुं, (मल्लते धार्य्यतेऽसौ । मल्ल + इन् । स्वार्थे कन् ।) मल्लिनचञ्चुचरणयुक्तहंसः । मल्लिनैः किञ्चिद्धूसरवर्णैराजोहितैश्चञ्चुचरणैरुपलक्षितः शुक्लहंसः । इत्यमरभरतौ ॥ वृक्षासुपाधिविशेषश्च । (यथा, भरतमल्लिकः । तथा च भट्टिकाव्यटीकायां मल्लिनाथधृतश्लोकः ।
"नत्वा गुरुरमलगौराङ्गमल्लिकामलः ।
भट्टिटीकां प्रकुरुते भरतो सुग्धबोधिनीम् ॥")
मल्लिका, स्त्री, (मल्लिरेवेति । मल्लि + स्वार्थे कन् । स्त्रियां टाप् । यद्वा, मल्लिर्हंस इव शुक्लत्वात् । मल्लि + इवार्थे कन् ।) स्वनामख्यातपुष्पवृक्षः । बेलफुल इति भाषा ॥ (यथा, काव्यादर्शे । २ ।
"मल्लिकासुकुले चक्षि ! भाति शुङ्गन्मधुव्रतः ।
प्रयाणे पञ्चबाणस्य ध्वजमापूरयन्निव ॥")
तत्पर्य्यायः । ह्रस्वशूम्यम् २ भूपदी ३ शुक्लभीरुः ४ । इत्यमरः । २ । ४ । ६६ ॥ ह्रस्वशूम्बा ५ शुक्लभीरुः ६ । इति भरतः ॥ भद्रवल्ली ७ गौरी ८ वनचन्द्रिका ९ प्रिया १० सौम्या ११ नारीष्टा १२ गिरिजा १३ सिता १४ मल्ली १५ मदयन्ती १६ चन्द्रिका १७ मोदिनी १८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । चक्षुष्यत्वम् । सुखपाककुष्ठविस्फोटकृमिविषव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफनाशित्वम् । इति राजवल्लभः ॥ उष्णत्वम् । लघुत्वम् । दृष्यत्वम् । वातपित्तास्रदग्ध्राध्रुचिनाशित्वञ्च । इति भावप्रकाशः ॥ * ॥
अस्या उत्पत्तिर्यथा,—
"विचरन्तं तदा भूयो मदेशं कुसुमायुधः ।
आरात् स्खलायतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमग्रतो दृष्ट्वा क्रोधाद् भ्रातृहणा हरः ।
स्मरमालोकयामास शिखायाश्चरणान्तिकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् ! पादादारभ्य कृत्स्नशः ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्सस्रंस धनुः श्रेष्ठं तज्जगामाथ पञ्चधा ॥
यदाधीज्यदिवर्त्म तद्धनुष्टं महाप्रभम् ।
स च कल्पतरुर्ज्ञातः सप्तजन्माष्टौ गुणाकृतिः ॥
नाहस्थानं शुभाकारं यदासीद्दग्धभूषितम् ।
तज्जातं केशवारण्यं बकुलं नामतो नगैः ॥
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजविभूषिता ॥
नाहोपरि तथा सुरौ स्थानं चक्रमजिप्रभम् ।
पद्मगुल्माभवज्जाती प्रभाङ्कुरिकशोज्ज्वला ॥
ऊर्द्धं सुरा अधः कक्षाः स्थानं विद्रुमभूषितम् ।
तस्माद्द्रुपटा मल्ली सञ्जाता विविधा सुने ! ॥"
इति वामनपुराणे ६ अध्यायः ॥
मल्यविशेषः । ऋतुप्राप्तभेदः । इति मेदिनी । कं, १३७ ॥ पानपात्रम् । इति हेमचन्द्रः ॥
मल्लिकाक्षः, पुं, (मल्लिकापुष्पमिव अक्षिणी यस्येति । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ ।

इति अच्।) मलिनचक्षुश्चरञ्जयुक्तहंस:। इति हेमचन्द्र:। ।४।१६२॥ शुक्लवर्णवेष्टितचक्षुर्द्वययुक्तहय:। इति हलायुध:॥ (यथा, हरिवंशे। २४१। २५—२६।

"मल्लिकाद्यान् विरूपाद्यान् क्रौञ्चवर्णान् मनोजवान्।
अश्वसैन्यं महावाहुस्तदप्रतिमपौरुष:।
निर्बलयामास बली गदया भीमविक्रम:॥")

मल्लिकाक्ष:, पुं, मलिनचक्षुश्चरञ्जयुक्तहंस:। इत्यमरटीका॥ ते सिता हंसा मलिनै: किञ्चिद्धूसरवर्णैराजोद्दितैश्चक्षुश्चरञ्जैश्चिता मल्लिकाक्षा मल्लिकानामान:। मल मल्ल ड धृतौ लात्। मालतीति इक:। मल्लिकी हंसभेदे स्यात्तत्रभूम्नन्तु मल्लिका। इति रुद्र:। शुक्लाङ्गत्वान्मल्लिकापुष्पमिव अक्षि येषां ते मल्लिकाक्षा इति स्वामी। इति भरत:॥ (यथा, उत्तररामचरिते। १। २६।

"एतस्मिन् मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुटदरदक्षपुष्करोका:।
वाप्याम्भ:परिपतनोद्गमान्तराले
संदृष्टा: कुवलयिनो सुखी विभागा:॥")

मल्लिकाक्षा, स्त्री, (मल्लिकेति आख्या यस्या:।) त्रिपुरमालीपुष्पम्। तत्पर्य्याय:। मोदिनी २ वटपत्रा ३ मोहना ४। इति रत्नमाला।

मल्लिकागन्धं, क्ली, (मल्लिकाया इव गन्धो यस्य।) मङ्गलागुरु। इति राजनिर्घण्टः॥

मल्लिकापुष्प:, पुं, (मल्लिकाया पुष्पमिव पुष्पं यस्य।) कुटजवृक्ष:। इति राजनिर्घण्ट:॥ करञ्जवृक्ष:। इति हेमचन्द्र:। करञ्जा देखु इति भाषा। खनामख्यातपुष्पवृक्षश्च॥

मल्लिगन्धि, स्त्री, (मल्लेरिव गन्धो यस्य तत्।) "उपमानाच्च।" ५।४।१३८। इति ङीप्रादेश:।) अगुरु। इति शब्दचन्द्रिका॥

मल्लिपत्रं, क्ली, (मल्ले: पत्रमिव पत्रं यस्य।) कृष्णाक:। इति त्रिकाण्डशेष:॥

मल्ली, स्त्री, (मल्लि+ऋदिकारादिति पक्षे ङीष्।) मल्लिका। इति राजनिर्घण्ट: शब्दरत्नावली च॥ (यथा, राजेन्द्रकर्णपूरे। ४६।

"किं राकेन्दुकरच्छटाभिरुदितं किं मौक्तिकैरुद्गतं
किं मल्लीमुकुलै: स्फुटं विकसितं किं मालतीकुड्मलै:॥")

मल्लीकर:, त्रि, (अमल्लमपि आत्मानं मल्लमिव करोतीति। मल्ल+अच्।) चौर:। इति शब्दरत्नावली॥

मल्ल:, पुं, (मल्लते भयं धारयतीति। मल्ल+बाहुलकात् उ:।) भालुक:। इति शब्दचन्द्रिका॥

मव, नहे। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-सक०-सेट्।) नही बन्धनम्। मवति चौरं लोक:। इति दुर्गादास:॥

मवित:, त्रि, (मव+कर्म्मणि क्त:।) बद्ध:। इत्यमरटीकायां स्वामी॥

मश, वधे। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-सक०-सेट्।) मशति चौरं राजा। यदयाल्लोऽयमिलेकै। इति दुर्गादास:॥

मश्र, ध्वनौ। कोपे। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-अक०-सेट्।) मश्रति मश्रक:। इति दुर्गादास:॥

मश्रक:, पुं, (मश्रति ध्वनतीति। मश्र+अच्। संज्ञायां कन्।) कीटविशेष:। मशा इति भाषा॥ तत्पर्य्याय:। वज्रतुण्ड: २ क्षुद्रास्य: ३ क्षुद्रमक्षिक: ४ रात्रिजागरक: ५। इति राजनिर्घण्ट:॥ (यथा, श्रीमद्भागवते।३। ३१। २७।

"तुदन्त्यमत्कुणं दंशा मशका मत्कुणादय:।
रुदन्तं विगतज्ञानं क्षमय: क्षमिकं यथा॥")

तन्नाशकधूपो यथा,—

"त्रिफलार्क्कनृपुष्पाणि भल्लातकशिरीषकम्।
लाक्षासर्जरसश्चैव विड्भङ्गश्चेव गुग्गुलु:।
एतैर्धूपैर्मशिकाणां मशकानां विनाशनम्॥"
इति गारुड़े १८१ अध्याय:॥

चर्म्मभेद:। स तु खनामख्यातचर्म्मनिर्म्मितस्नेहादिपात्रम्। रोगविशेष:। माशा इति हिन्दी। आँचिल इति वङ्गभाषा॥ इति शब्दरत्नावली॥ * ॥ मशकरोगमाह।

"अवेदनं स्थिरश्चैव यस्तु गात्रे प्रदृश्यते।
माषवत् श्लक्ष्णसुस्रावं मलिनं मशकं विदुः॥"
स्थिरं अचलम्। अस्य चिकित्सा यथा,—
"चर्म्मकीलं जतुमणिं मशकाख्यं तिलकालकान्।
उत्पाट्य शस्त्रेण दहेत् क्षारान्निभ्यामशेषत:॥"
इति भावप्रकाश:॥

अपि च

"लघुनागानु चूर्णस्य चर्षो मशकनाशन:।"
इति गारुड़े १७५ अध्याय:॥

मशकी, [न्] पुं, (मशका: सन्त्यस्यामिति। मशक+इनि:।) उदुम्बरवृक्ष:। इति हेमचन्द्र:। ४। १६८॥

मशकरी, स्त्री, (मशं मशकं हरतीति। कृ+"हरतेरुतिसनेश्च।" ३। २। ६। इति अच्। स्त्रियां ङीष्।) मशकनिवारकप्रावरणविशेष:। मशारि इति भाषा॥ चतुष्की २। इति जटाधर:॥

मशुन:, पुं, (मे समये शयति वर्त्तते इति। शि+बहुलवचनात् नक्। तत: निपातित:।) कुक्कुर:। इति शब्दमाला॥

मष, वधे। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-सक०-सेट्।) मषति। इति दुर्गादास:॥

मषिकूपी, स्त्री, (मषे: कूप इव। मषिकूप+अर्थे ङीष्।) मस्याधार:। इति हेमचन्द्र:॥ ३। १४८॥

मषिधानं, क्ली, (धीयतेऽस्मिन्निति। धा+अधिकरणे ल्युट्। मषेर्धानं स्थानम्।) मस्याधार:। इति हेमचन्द्र:। ३। १४८॥

मषीलेखदल:, पुं, (मषीभिर्लेख्यं लेखनयोग्यं दलं यस्य।) श्रीतालवृक्ष:। इति राजनिर्घण्ट:॥

मस, इर् य इं परिणामे। परिणामे। इति कविकल्पद्रुम:॥ (दिवा०-पर०-सक०-सेट्। निष्ठायामनिट्।) इर्, अमसत् अमासीत् अमसीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यर्थे। य, मस्यति धार्य्यं गृही। परिमातीत्यर्थ:। इं, मस्त:। परिणामं कस्यचिदनुरोधात्। इति दुर्गादास:॥

मसक:, पुं, (मस्यते परिमीयतेऽसौ। मस+कर्म्मणि घ:। अल्पार्थे कन्।) क्षुद्ररोगविशेष:। माषा इति लोके प्रसिद्ध:। तल्लक्षणं यथा,—

"अवेदनं स्थिरश्चैव यस्तु गात्रे प्रदृश्यते।
माषवत् श्लक्ष्णसुस्रावं मलिनं मसकं विदुः॥"
अवेदनं वेदनारहितम्। स्थिरम् अचलम्॥ तच्चिकित्सा यथा,—
"चर्म्मकीलं जतुमणिं मसकाख्यं तिलकालकान्।
उत्पाट्य शस्त्रेण दहेत् क्षारान्निभ्यामशेषत:॥"
इति भावप्रकाश:॥

मसनं, क्ली, (मस्यते इति। मस्+ल्युट्।) सोमराजीवृक्ष:। इति शब्दचन्द्रिका॥

मसरा, स्त्री, (मस्+बाहुलकात् अरच्। स्त्रियां टाप्।) मसूर:। इति जटाधर:॥

मसार:, पुं, (मस्+भावे घञ्। मसं परिमाणं ऋच्छतीति। ऋ+अण्।) इक्षुनीरमक्षि:। इति शब्दरत्नावली॥ (यथा, नैषधचरिते। ६। १०४।

"चकास्ति बिन्दुच्युतकातिचातुरी-
घनासुबिन्दुस्तिकैनवात्तव।
मसारतारापि! मसारमालगा
तनोषि संसारमसंशयं यत:॥")

मसारक:, पुं, (मसार+स्वार्थे कन्।) इक्षुनीरमक्षि:। इति शब्दरत्नावली॥

मसि:, स्त्री, पुं, (मस्यते परिणमते इति। मस्+"सर्व्वधातुभ्य इन्।" उणा० ४। ११०। इति इन्।) लिपिप्रयोजना। लेखनद्रव्यम्। इत्यमरटीकायां भरत:॥ तत्पर्य्याय:। मसिजलम् २ पत्राङ्गनम् ३। इति त्रिकाण्डशेष:॥ मेला ४ काली ५ अञ्जनम् ६ मसी ७। इति शब्दरत्नावली॥ रञ्जनी ८। इति स्वामी॥ मलिनाम्बु ९ मषी १०। इति हेमचन्द्र:। ३। १४८॥ श्लेष्मालिकाङ्गलम्। इति रुद्र: शब्दरत्नावली च॥

मसिका, स्त्री, श्लेष्मालिका। इति शब्दरत्नावली॥ मलिका इति ग्रन्थान्तरे पाठ:॥

मसिधानं, क्ली, (मसेर्धानं आधार:।) मस्याधार:। इति शब्दरत्नावली॥

मसिधानी, स्त्री, (मंसेर्धानी।) मस्याधार:। दोयात इति भाषा॥ तत्पर्य्याय:। मसिमषि: २ मेलाम्बु: ३ वर्णकूपिका ४ मेलागन्धा ५ मेलाम्बु ६ मसिधानम्७। इति शब्दरत्नावली॥ मसिकूपी ८। इति हेमचन्द्र:॥ मसिकूपिका ९। इति जटाधर:॥

मसिनं, क्ली, (मस्यते परिमीयते गण्यतयेति। मस् + "बहुलमन्यत्रापि।" उणा० २। ४६। इति इनच्।) सपिण्डकम् २। इत्युणादिकोषः॥

मसिपण्यः, पुं, (मसिः कालो पण्यमस्य।) लेखकः। इति त्रिकाण्डशेषः॥

मसिप्रसूः, स्त्री, (मसिं प्रकर्षेण सूते उद्गिरतीति। प्र + सू + क्विप्।) मस्याधारः। इति हारावली॥ लेखनी। इति केचित्॥

मसिभाण्डः, स्त्री, (मस्याधारो भाण्डिरिवेति।) मस्याधारः। इति शब्दरत्नावली॥

मसिवर्द्धनं, क्ली, (मसिं वर्द्धयतीति। वृध् + णिच् + ल्युः।) रसगन्धः। इति त्रिकाण्डशेषः॥

मसी, स्त्री, (मसि + ङीदिकारादिति ङीष्।) कालो। (यथा, नैषधचरिते। ८। ६१।

"त्वदास्य निर्य्यन्मदलीकदुर्यशो-
मसीमयं सन्निपिरूपभागिव।")

शेफालिकाशब्दान्तम्। इति शब्दरत्नावली॥

मसीजलं, क्ली, (मस्या जलम्। राहोः शिर इतिवत् अभेदे षष्ठी।) मसी। कालो। इति त्रिकाण्डशेषः॥

मसीधानी, स्त्री, (मस्या धानी पात्रम्।) मस्याधारः। इति त्रिकाण्डशेषः॥

मसीना, स्त्री, (मस् + "बहुलमन्यत्रापि।" उणा० २। ४६। इति। इनच्। पृषोदरादित्वाद्दीर्घः। स्त्रियां टाप्।) खनामख्यातगन्धम्। यथा, शब्दचन्द्रिकायाम्।

"मसीना चतसी चिङ्गा सुमोमामालिका
मिता॥"

मसुरः, पुं, (मस्यते परिमीयतेऽसौ। मस् + "मसेरुरन्।" उणा० १। ४४। इति। उरन्।) मसूरकलायः। इति त्रिकाण्डशेषः॥

मसुरा, स्त्री, (मस्यति पण्यत्वेन परिच्छिनत्तीति। मस् + उरन्। स्त्रियां टाप्।) वेश्या। द्रौहिप्रभेदः। इति मेदिनी। रे, २०१॥

मसूरः, पुं स्त्री, (मस्यते परिमीयतेऽसौ। मस् + "मसेरूरन्।" उणा० ५। ३। इति ऊरन्।) द्रौहिभेदः। मसुरी कलाइ इति भाषा॥ (अस्याधिपतिर्मंगराशिः। यथा, बृहत्संहितायाम्। ४१। २।

"वस्त्राविकक्रतुपानां
मसूरगोधूमराजकयवानाम्।
क्षत्रसम्भवौषधीनां
कनकस्य च कीर्त्तितो मेषः॥")

तत्पर्य्यायः। मङ्गल्यकः२। रक्तमरः।२।६।१७॥ मसूरः३ द्रौहिकाचनः४। इति त्रिकाण्डशेषः॥ मसूरा ५ मसुरा ६। इति मेदिनी। रे, २०१॥ रागदालिः७ मङ्गल्यः८ पृथुबीजकः९ शूरः१० कल्याणबीजः११ गुरुबीजः१२ मसूरकः१३। इति राजनिर्घण्टः॥ मङ्गल्या१४ मसूरिका१५। इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। शीतत्वम्। संग्राहित्वम्। कफपित्तनाशित्वम्। वातामयकरत्वम्। मूत्रशुक्रहरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ असृहरत्वम्। रूक्षत्वम्। ज्वरनाशित्वञ्च। इति भावप्रकाशः॥ तस्य यूषगुणाः। संग्राहित्वम्। स्वादुपाकित्वम्। प्रमेहपित्तश्लेष्मज्वरातीसारनाशित्वञ्च। इति राजनिर्घण्टः॥

मसूरकः, पुं, (मसूर इव प्रतिकृतिरिति। मसूर + कन्। संज्ञायां कन् वा।) उपवर्हविशेषः। गोल बालिश इति भाषा। तत्पर्य्यायः। चतुरः२ चातुरः३ अङ्केलिः४ चक्रगण्डुः५। इति शब्दरत्नावली॥ (स्त्रीत्वेऽपि दृश्यते। यथा, बृहत्संहितायाम्। ४३। ४३।

"अष्टाश्रि नीलरक्तं
तृतीयमिन्द्रेण भूषणं दत्तम्।
असितं यमस्य तुर्यं
मसूरकं कान्तिमदधच्छतु॥")

मसूरविदला, स्त्री, (मसूरस्येव विशिर्यं दलमस्याः। स्त्रियां टाप्।) क्षत्रचिटत्। इत्यमरः। २। ४। १०६॥ (यथा, राजतरङ्गिण्याम्। ६। १८७।

"मसूरविदलाकारतूलालिप्तकलेवरः।
पौषे चान्द्रे चतुस्त्रिंशे नवमेऽब्दे सिते गतः॥")
श्यामलता। इति रत्नमाला॥

मसूरा, स्त्री, (मस्यति परिच्छिनत्तीति। मस् + ऊरन्। स्त्रियां टाप्।) वेश्या। मसूरकलायः। इति मेदिनी। रे, २०१॥

मसूरिका, स्त्री, (मसूरेव। मसूरा + कन्। स्त्रियां टाप्। अत इत्वञ्च।) कुष्ठनी। इति शब्दमाला॥ * ॥ वसन्तरोगः। तस्योत्पादनक्रिया टीका इति ख्याता। सा तु गोसनज-नरमाजन-मसूरिकापूयेन भवति। यथा,—

"धेनुस्तन्यमसूरिका नराणाञ्च मसूरिका।
तज्जं वा दुग्धजाच्च ग्रन्थान्तेन गृहीतवान्॥
दाहज्वरे च ग्रन्थाभि रक्तोत्पत्तिकराणि च।
तज्जं रक्तमिति स्फोटकज्वरसम्भवम्॥"

इति धन्वन्तरिशतग्रन्थेयग्रन्थः॥

तत्पर्य्यायः। पारोगः२ रक्तपटी३ मसूरी४। इति शब्दरत्नावली॥ * ॥ अथ मसूरिकाधिकारः। "तत्र मसूरिकाविप्रलक्षणनिदानपूर्ब्बिका संप्राप्तिमाह।

'कट्फलवचसारविबद्धाध्यशनाशनैः।
दुष्टिभिष्यावशाकाद्यैः प्रदुष्टपवनोदकैः॥
कुद्धयद्दिचवाचापि देशे दोषाः समुद्भवाः।
जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गताः॥
मसूराकृतिसंस्थानाः पिड़काः क्षुमंसूरिकाः॥'

कट्फलं वचसारो विबद्धाध्यशनाशनैः। कट्फलादिविबद्धान्नाभाशनैः। अथ च अध्यशनाशनं अधिकमशनं अध्यशनम्। दुष्टिभिष्यावशाकाद्यैः। आद्यशब्दान्मध्वालुकादिभिः। प्रदुष्टपवनोदकैः सविषकुसुमादिसंसर्गात् कुद्धयद्दिचवाचापि देशे देशे कुद्धयद्दा राहुग्रनैर्ऋदाद्यस्तेषामीचवाद्दृष्टैः यस्मिन् देशे कुद्धयद्दृष्टिः तत्रापि मसूरिकोत्पत्तिरित्यर्थः। मसूराकृतिसंस्थानाः मसूरस्य या आकृतिस्तद्वत्संस्थानमात्रतियांसां ताः॥ * ॥ अथ पूर्व्वरूपमाह।

'तासां पूर्व्वं ज्वरः कण्डूर्गात्रभङ्गोऽरतिर्भ्रमः।
त्वचि शोफः सवैवर्ण्यो नेत्ररागस्तथैव च॥'

वातजामाह।

'स्फोटाः क्षारोद्गा रूक्षास्तीव्रवेदनयान्विताः।
कठिनाश्चिरपाकाश्च भवन्त्यनिलसम्भवाः॥
'सन्ध्यस्थिपर्व्वणां भेदः कासः कम्पोऽरतिर्भ्रमः।
शोफस्ताम्रोष्ठनिष्ठीवो दाहस्तृष्णारुचिस्तथा।
सुखपाकोऽचिपाकश्च ज्वरस्तीव्रः सुदारुणः॥'

रक्तजामाह।

'रक्तजायां भवन्त्येते विकाराः पित्तलक्षणाः॥'

अथ कफजामाह।

'श्वेताः स्निग्धाः श्लथं स्थूलाः कण्डुरा मन्दवेदनाः।
मसूरिकाः कफोद्भूताश्चिरपाकाः प्रकीर्त्तिताः॥
कफप्रसेकः क्लोमाग्निशिरोरुग्गात्रगौरवम्।
कृच्छ्रात् सारुचिनिद्रा तन्द्रालस्यसमन्विताः॥'

सान्निपातिकीमाह।

'नीलाग्निपिटिकाभिर्वा मध्ये निम्ना मसूरजाः।
पूतिस्रावाश्चिरं पाकाः प्रभूताः सर्व्वदोषजाः॥'

सप्तधातुगतामाह।

'मसूरिकाक्षयं प्राप्ताश्चोदुम्बरसन्निभाः।
क्षयन्त्येते भिन्नाश्चोयं स्रवन्ति च॥'

क्षयं प्राप्ताः क्षयशब्देनाच रस उच्यते रसाश्रयत्वात्॥ * ॥ रक्तजामाह।

'रक्तजा लोहिताकाराः श्लैष्मपाकास्तुलत्वचः।
साध्या नात्यर्थदुष्टासु भिन्ना रक्तं स्रवन्ति च॥'

साध्या रक्तजा इत्यर्थः। नात्यर्थदुष्टासु अत्यर्थदुष्टश्लोणिताः पुनर्न साध्याः किन्तु कष्टसाध्याः॥ * ॥ मांसजामाह।

'मांसजाः कठिनाः स्निग्धाश्चिरपाकास्तुलत्वचः।
गात्रशूलान्वितं कण्डूर्ज्वरादाहबलयान्विताः॥'

मेदोजामाह।

'मेदोजा मण्डलाकारा ग्रन्थवः किञ्चिदुन्नताः।
घोरज्वरपरीताश्च स्थूलाः स्निग्धाः सवेदनाः।
सम्मोहारतिसन्तापाः कञ्चिदाभोविनिस्रवेत्॥'

अस्थिमज्जागते प्राह।

'क्षुद्रा गात्रसमा रूक्षाश्चिपिटाः किञ्चिदुन्नताः।
मज्जस्था भ्रंशसम्मोहवेदनारतिसंयुताः॥
भ्रमरीणेव विद्वानि कुर्व्वन्त्यस्थीनि सर्व्वतः।
छिन्दन्ति सन्धीधामानि प्राणानाशु हरन्ति ताः॥'

गात्रसमाः गात्रतुल्यवर्णाः। चिपिटाः चिपिटाकाराः। मज्जास्थाश्चेमा अस्थ्नोऽपि यद्यं

तदाधारत्वात्। अतएवाग्रे भ्रमरेणेव विद्वानि कुर्वन्त्यस्रोनि सर्व्वत इति। मर्म्मधामानि मर्म्मस्थानानि ॥ * ॥ शुक्रगतामाह।

'पक्वाभाः पिड़काः स्निग्धाः श्लक्ष्णाश्चार्त्यर्थवेदनाः।
स्तम्भितारतिसम्मोहदाहोन्मादसमन्विताः॥
शुक्रगाया मसूर्य्यास्तु लक्षणानि भवन्ति हि।
निर्द्दिष्टं केवलं चिह्नं जीवनन्तु न दह्यते॥'

पक्वाभाः पक्वाकाराः न तु पक्वाः। श्लक्ष्णाः कोमलाः। निर्द्दिष्टं केवलं चिह्नं लक्षणाश्चिकित्सा युक्ता यतो जीवनं न दह्यते। सन्नाप्येता दोषहेतुं विना न भवन्ति। दोषमन्तरेण रसादिदुष्टैरभावादित्यत आह।

'दोषमिश्रास्तु सन्नेता दहत्या दोषलक्षणैः॥'

चर्म्मजामाह।

'कण्डूरोधारुचीस्तन्द्रा प्रलापारतिसंयुताः।
दुश्चिकित्साः सदुःखिताः पिड़काश्चर्म्मसंश्रिताः॥'

रोमान्तिकामाह।

'रोमकूपोन्नतिसमा रागिण्यः कफपित्तजाः।
कासारोचकसंयुक्ता रोमान्तिज्वरपूर्व्विकाः॥'

साध्याः प्राह।

'त्वग्गता रक्तगाश्चैव पित्तजाः श्लेष्मजास्तथा।
श्लेष्मपित्तकृताश्चैव सुखसाध्या मसूरिकाः।
रमा विनापि क्रियया प्रशाम्यन्ति ग्रहीरिताम्॥'

त्वग्गता रक्तगताः ॥*॥ कष्टसाध्यतमाः प्राह।

'वातजा वातपित्तोत्था वातश्लेष्मकृताश्च याः।
कष्टसाध्यतमाख्यास्तु यत्नादेता उपाचरेत्॥'

असाध्याः प्राह।

'असाध्याः सन्निपातोत्थास्तासां वक्ष्यामि लक्षणम्।
प्रवालसदृशाः काश्चित् काश्चिन्मुक्तोपमा।
लोहजालसमाः काश्चिदतसीपलसन्निभाः॥
आसां बहुविधा वर्णा जायन्ते दोषभेदतः॥'

प्रवालसदृशा रक्तादि। आसां प्रवालजम्बुफललोहगुटिकातसीफलसादृश्यं वर्णेन। अनुक्तवर्णसंग्रहार्थमाह। आसां बहुविधा वर्णा इति ॥ * ॥ अपराश्चासाध्याः प्राह।

'कासो हिक्का प्रमोहश्च ज्वरस्तीव्रः सदारुजः।
प्रलापारतिमूर्च्छाश्च लक्षणा दारुणेतिपूर्व्वता॥'

दारुणस्थाने दौर्ब्बल्य इति च पाठः।

'सुखेन प्रस्रवेद्रक्तं तथा ग्रासेन चक्षुषा।
कण्ठे घुर्घुरकं कृत्वा श्वसित्यत्यर्थदारुणम्॥
मसूरिकाभिभूतस्य यस्येतानि भिषग्वरैः।
लक्षणानीह दृश्यन्ते न दद्यात्तत्र भेषजम्॥'

मसूरिकाक्षरिष्टमाह।

'मसूरिकाभिभूतो यो भृशं ग्रासेन निश्वसेत्।
स भृशं त्यजति प्राणान् दह्यमानो वायुदूषितः॥'

वायुदूषितः अपतानकादिवातव्याधिदूषितः॥

मसूरिकाहेतुकं श्लेष्मविशेषमाह।

'मसूरिकान्ते श्लेष्मः स्यात् कूपरे मञ्जिबन्धके।
तथांघ्रिपल्लके वापि दुश्चिकित्सः सुदारुणः॥'

दुश्चिकित्सः कष्टसाध्यः। दुःशब्दोऽत्र निषेधे तेनासाध्य इत्येके।

'काश्चिद्विनापि यत्नेन सिध्यन्त्यासु मसूरिकाः।
इतराः कृच्छ्रतराः काश्चित् काश्चित् सिध्यन्ति वा नवा॥
काश्चिन्नैव तु सिध्यन्ति साध्यमानाः प्रयत्नतः॥'

अथ मसूरिकायाश्चिकित्सा।

'मसूरिकायां कुशलो लेपनादिक्रियां हितां।
पित्तश्लेष्मविसर्पोक्तक्रियां चात्र प्रयुञ्जते॥
श्वेतचन्दनकल्कोक्तं हिलमोचीभवं द्रवम्।
पिबेन्मसूरिकारम्भे नैव वा केवलं रसम्॥'

हिलमोचिका शाकविशेषः। हुरहुर इति लोके।

'हे पञ्चमूल्यौ राजा च धात्रीशीरं दुरालभा।
साग्रन्तं धान्यकं मुस्तं जयेद्दातमसूरिकाम्॥
मञ्जिष्ठा बहुपात्रन्यग्रोधोडुम्बरत्वचः।
वातजायां मसूर्य्यां स्यात् प्रलेपः सघृतो हितः॥'

बहुपादटः।

'गुडूची मधुकं द्राक्षा मोरटं दाड़िमैः सह।
पाककाले प्रदातव्यं भेषजं गुड़संयुतम्॥
तेन कुप्यति नो वायुः पाकं यान्ति मसूरिकाः।
मसूरिकासु सञ्जीत शालीन् सक्षान् मसूरकान्॥
रसं मधुरमेवात्र सैन्धवक्षाव्यमात्रकम्।
पटोलमूलं क्वथितं मोरटं सुरसं तथा॥'

पटोलमूलं क्वथितमित्यत्र पटोलं क्वथितञ्चेति वा पाठः।

'आदावेव मसूर्य्यासु पित्तजायां प्रयोजयेत्।
निम्बपर्पटकः पाठा पटोलश्चन्दनद्वयम्।
उशीरं कटुका धात्री तथा वासा दुरालभा।
एषां पानं शुभं शीतसुप्तमं शर्करान्वितम्।
मसूर्य्यां पित्तजायास्तु प्रयोक्तव्यं विजानता॥
दाहे ज्वरे विसर्पे च त्रये पित्ताधिकेऽपि च।
मसूर्य्यो रक्तजा नाशं यान्ति शोणितमोक्षणैः॥
वासासुस्तकभूनिम्बत्रिफलेन्द्रयवासकम्।
पटोलारिष्टकं वापि क्वाथयित्वा समाक्षिकम्।
पिबेत्तेन प्रशाम्यन्ति मसूर्य्यः कफसम्भवाः॥'

इन्द्रः इन्द्रयवः ॥ * ॥

'ग्रिरीषोडुम्बरत्वग्भ्यां खदिरारिष्टजैर्जलैः।
कफोत्थासु मसूरीषु लेपः पित्तोत्थितासु च॥'*॥

निम्बपर्पटकः पाठा पटोलः कटुरोहिणी।
चन्दने द्वे उशीरञ्च धात्री वासा दुरालभा॥
एष निम्बादिकः क्वाथः पीतः शर्करयान्वितः।
मसूरीं सर्व्वथा हन्ति ज्वरवीसर्पसंयुताम्॥*॥

उत्थिता प्रविशेद्दृया च तां पुनर्व्याकृतो नयेत्।
काञ्चनारत्वचः क्वाथक्षाय्यचूर्णावचूर्णितः॥'

क्षाय्यं सुवर्णमाक्षिकम्।

'धात्रीफलं समधुकं कथितं मधुसंयुतम्।
मुखे कण्ठे व्रणे जाते गण्डूषार्थे प्रशस्यते॥*॥
अक्ष्णोः सेकं प्रशंसन्ति गवेधुमधुकाम्बुना।
गवेधुर्गवेधुका। गवदुया इति लोके।
मधुकं त्रिफला लक्ष्मा दार्व्वी त्वक् शीलसुन्दरम्।
उशीरलोध्रमञ्जिष्ठा प्रलेपाद्योतने हिताः।
नश्यन्त्यनेन दृगजाता मसूर्य्यो न भवन्ति च॥
प्रलेपं चक्षुषोर्दद्याद्दुष्टारस्य वस्त्रले।
पचवल्कलचूर्णेन क्षौद्रीमवधूनयेत्।
भक्षणा कैश्चिदिच्छन्ति कैश्चिन्नोमयरेणुना॥
सुखवीपत्रनिर्य्यासं हरिद्रापूर्णसंयुतम्।
रोमजज्वरसंयुक्तव्रणानां ग्राणाये पिबेत्॥
निर्य्यासं द्रवम्॥ * ॥ अथ मसूरिकाभेदस्य शीतलाया अधिकारः। तत्र शीतलाया रूपमाह।

'देवी शीतलयाक्रान्ता मसूर्य्येव हि शीतला।
ज्वर एव तथा भूताधिष्ठितो विषमज्वरः।
सा च सप्तविधा ख्याता तासां भेदान् प्रचक्षते॥
ज्वरपूर्व्वा दहत्स्फोटैः शीतला दहती भवेत्।
सप्ताहान्निःसरत्येषा सप्ताहात् पूर्व्वतां व्रजेत्॥
ततस्तृतीये सप्ताहे शुष्यति स्खलति स्वयम्।
तासां मध्ये यदा काचित् पाकं गत्वा स्फुटं स्रवेत्॥
तत्रावधूनं कुर्य्यादनगोमयभस्मना।
निम्बसत्यत्रशाखाभिर्मक्षिकामपसारयेत्॥
जलञ्च शीतलं दद्यात् ज्वरेऽपि न तु दापयेत्।
स्थापयेत्तं स्थले पूते रम्ये रहसि शीतले॥
नाग्निः संस्पृशेत्तन्तु न च तस्यान्तिकं व्रजेत्।
यौ दोषिणो गात्र भेषजं योजयन्ति हि॥
केचित् प्रयोजयन्त्येवं मतमेषामथ शृणु॥ * ॥
ये शीतलेन सलिलेन विधिज्ञ सम्यक्
चिक्वाजबीजसहितां रजनीं पिबन्ति।
तेषां भवन्ति न कदाचिदपीह देहे
पीड़ाकरा जगति शीतलिका विकाराः॥
मोचारसेन सहितं सितचन्दनेन
वासारसेन मधुकं मधुकेन वाथ।
आदौ पिबन्ति सुमनाःखरसेन मिश्रं
ते नाप्नुवन्ति सुधि शीतलिकाविकारान्॥'

मोचारसेन कदलीस्तम्भजेन। मधुकेन वाथ अथवा मधुना। आदौ पूर्व्वरूपे ज्वरागमनमात्रे। सुमनाःखरसेन जातीपत्ररसेन।

'शीतलासु क्रिया कार्य्या शीतला रक्तया सह।
वह्नीयान्निम्बपत्राणि परितो भवनान्तरे॥
कदाचिदपि नो कार्य्यसुच्छिष्टस्य प्रवेशनम्।
स्फोटेष्वधिकदाहेषु रजारेणूत्करो हितः॥
तेन ते शीघ्रमायान्ति प्रपाकं न भजन्ति च।
रजारेणूत्करः शुष्कगोमयभस्मचूर्णतः॥
चन्दनं वासको मुस्तं गुडूची द्राक्षया सह।
एषां शीतकषायस्तु शीतलाज्वरनाशनः॥'

शीतकषायो हिमः।

'जपहोमोपहारेश्च दानस्वस्ययनार्चनैः।
विप्रगोशुभ्रगौरीणां पूजनैस्तां शमं नयेत्॥
श्लोकञ्च शीतलादेव्याः पठेत् शीतलिनोऽन्तिके।
ब्राह्मणः श्रद्धया युक्तस्तेन शाम्यति शीतला॥

स्कन्द उवाच।

भगवन्! देवदेवेश! शीतलायाः स्तवं शुभम्।
वक्तुमर्हस्यशेषेण विस्फोटकभयापहम्॥

ईश्वर उवाच ।
नमामि शीतलां देवीं रासभस्थां दिगम्बरीम्।
मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम् ॥
वन्देऽहं शीतलां देवीं सर्वरोगभयापहाम्।
यामासाद्य निवर्त्तेत विस्फोटकभयं महत् ॥
शीतले शीतले चेति यो ब्रूयाद्दाहपीड़ितः।
विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति ॥
यस्त्वामुदकमध्ये तु ध्रुत्वा संपूजयेन्नरः।
विस्फोटकभयं घोरं कुले तस्य न जायते ॥
शीतले ज्वरदग्धस्य पूतिगन्धगतस्य च।
प्रनष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधम् ॥
शीतले तनुजान् रोगान् नृणां हरसि दुस्तरान्।
विस्फोटकविशीर्णानां त्वमेकाऽमृतवर्षिणी ॥
गलगण्डग्रहा रोगा ये चान्ये दारुणा नृणाम्।
त्वदनुध्यानमात्रेण शीतले यान्ति ते क्षयम् ॥
न मन्त्रो नौषधं किञ्चित् पापरोगस्य विद्यते।
त्वमेका शीतले ! धात्री नान्यां पश्यामि देवताम् ॥
त्वगालतनुसदृशीं नाभिहृन्मध्यसंस्थिताम्।
यस्त्वां विचिन्तयेद्देवीं तस्य मृत्युर्न जायते ॥
अष्टकं शीतलादेव्या यः पठेन्मानवः सदा।
विस्फोटकभयं घोरं कुले तस्य न जायते ॥
श्रोतव्यं पठितव्यञ्च नरैर्भक्तिसमन्वितैः।
उपसर्गविनाशाय परं स्वस्त्ययनं महत् ॥
शीतलाष्टकमेतद्धि न देयं यस्य कस्यचित्।
दातव्यं हि सदा तस्मै भक्तिश्रद्धान्वितो हि यः ॥'

इति श्रीस्कन्दपुराणे काशीखण्डे शीतलाष्टकस्तोत्रं समाप्तम् ॥" इति भावप्रकाशे मध्यखण्डे चतुर्थो भागः ॥

मस्करिका, स्त्री, मशहरी । मशारि इति भाषा । यथा—
"दंशांश्च मशकांश्चैव वर्षाकाले निवारयेत्।
मस्करिकाभिः प्राकृत्य मत्स्यशायिनमच्युतम् ॥"
इति पाद्मे क्रियायोगसारे १२ अध्यायः ॥

मस्करी, स्त्री, (मस्कर + स्त्रियां ङीष् ।) पापरोगः । इति मेदिनी । रे, २०१ ॥ स तु वसन्तरोग इति प्रसिद्धः । चित्रतृ । रक्तचित्रतृ । इति राजनिर्घण्टः ॥

मस्ण, त्रि, (सन्द्यते दीप्यते इति । मस्ज दीप्तौ + इगुपधेति कः । पृषोदरादित्वात् साधुः ।) अकर्कशम् । स्निग्धम् । इति मेदिनी । णे, ७० ॥ (यथा, रघुवंशटीकायां मल्लिनाथः ।
"करुणामस्णैः कटाक्षपातैः
कुरु मामम्ब ! कृतार्थसार्थवाहम् ॥")

मस्णा, स्त्री, (मस्ण + स्त्रियां टाप् ।) उमा । इति मेदिनी । णे, ७० । मसीना इति भाषा ॥

मस्क, ड गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) दन्त्यमध्य इति दुर्गादासः । क्विप संयोगादेर्लोपे मक् । मस्ङन्त्यमध्य इत्येके । क्विप संयोगान्तलोपे मट् । ड, मस्कते । इति दुर्गादासः ॥

मस्करः, पुं, (मस्कते गच्छत्यनेनेति । मस्क + बाहुलकादरः । यद्वा, मकर + "मस्करमस्करिणौ वेणुपरिव्राजकयोः ।" ६ । १ । १५४ । इति सुट् निपात्यते । इति काशिका ।) वंशः । इत्यमरः । २ । ४ । १६१ ॥ रन्ध्रवंशः । इति राजनिर्घण्टः ॥

मस्करी, [न्] पुं, (मस्कते इतस्ततो गच्छत्यनेनेति । मस्क + बाहुलकादरः । मस्करो दण्डः सोऽस्यस्येति । मस्कर + इनिः । यद्वा, मा कर्त्तुं कर्म निषिद्धं शीलमस्य । "मस्करमस्करिणौ वेणुपरिव्राजकयोः ।" ६ । १ । १५४ । इति इनिर्निपात्यते ।) भिक्षुः । इत्यमरः । २ । ७ । ४७ ॥ (यथा, भट्टिकाव्ये । ५ । ६३ ।
"अधीयन्नात्मविद्विद्यां धारयन् मस्करिव्रतम् ।
वदन् वज्रकुलिशस्फोटं भूत्वैषच विलोकयन् ॥") चन्द्रः । इति शब्दचन्द्रिका ॥

मसृज, ओ शु टु ओ स्नाने । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-अनिट् ।) दन्त्यमध्यः क्विप संयोगादिलोपे मक् । ओ, मम्सः । शु, मज्जती मज्जन्ती । टु, मज्ज्युः । अमाङ्क्षीत् । स्नायतेऽनेनेति स्नानमिह जलान्तःप्रवेशः । मज्जति प्रसरो जले । इति दुर्गादासः ॥

मस्त, क्ली, (मस्यते परिमीयते । मस् परिमाणे + क्तः ।) मस्तकम् । इति द्विरूपकोषः ॥ (यथा, अमरटीकायां मनुष्यवर्गे । ६५ । रघुनाथचक्रवर्त्तिधृतश्लोकः ॥
"दक्षकमण्डलुमण्डितहस्तः
सुललिततिलकविभूषितमस्तः ॥")

मस्तकः, पुं, क्ली, (मस्यते परिमीयते । मस् + "इष्यशिभ्यां तकन् ।" उणा० ३ । १४८ । इत्यत्र । "बाहुलकात् मस्यतेरपि तकन् ।" इत्युज्ज्वलदत्तोक्त्या तकन् ।) प्रधानाङ्गम् । माथा इति भाषा ॥ (यथा, मार्कण्डेयपुराणे । १४ । ७८ ।
"बिभर्त्ति क्लेशमवाप्नोति सोऽप्येवं शिरसा शिलाम् ।
क्षुत्क्षामोऽहर्निशं भारपीड़ायधित-मस्तकः ॥")

तत्पर्य्यायः । उत्तमाङ्गम् २ शिरः ३ शीर्षम् ४ मूर्द्धा ५ । इत्यमरः । २ । ६ । ६४ ॥ सुक्षम् ६ शिरम् ७ । इति शब्दरत्नावली ॥ वराङ्गम् ८ । इति जटाधरः ॥ कम् ९ पुष्कम् १० मौलिः ११ कपालम् १२ केशभूः १३ । इति राजनिर्घण्टः ॥ (मस्तम् १४ । इति द्विरूपकोषः ।) तस्य शुभाशुभलक्षणं यथा,—
"कृताकारैः शिरोभिस्तु नृपा निम्नशिरा धनी ।
चिपिटेश्च पितुर्मृत्युर्गर्वाढ्याः परिमस्कले: ॥
घटमुण्डा पापरुचिर्धनाढ्यः परिवर्ज्जितः ॥"
इति गारुड़े ६६ अध्यायः ॥

मस्तके अधोमुखसहस्रदलकमलमस्ति तत् कर्णिकायां परमात्मा तिष्ठति । यथा । खाङ्गे उत्तानौ करौ कृत्वा सोऽहमिति जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारस्थकुलकुण्डलिन्या सह सुसम्भावनया मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाख्यषट्चक्राणि भित्त्वा शिरोऽवस्थितसाधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्येत्यादि तन्त्रसारः ॥ तथा च ।
"सुसम्भावनया सोऽहमिति मन्त्रेण योजयेत् ।
सहस्रारे शिरःस्थाने परमात्मनि देशिकः ॥"
इति गौतमीयतन्त्रम् ॥

मस्तकक्लेदः, पुं, (मस्तकस्य क्लेदः ।) शिरोमज्जा । यथा,—
"गोदन्तु मस्तकक्लेदो मस्तिष्को मस्तुलुङ्गकः ॥"
इति हेमचन्द्रः । ३ । २८६ ॥

मस्तकाख्यः, पुं, (मस्तकमिति आख्या यस्य ।) वृक्षशिरः । इति शब्दचन्द्रिका ॥

मस्तदारु, क्ली, (मस्तं मस्तकमिव उच्चं दारु ।) देवदारु । इति भावप्रकाशः ॥

मस्तमूलकं, क्ली, (मूलमेव मूलकं स्वार्थे कन् । मस्तस्य मूलकम् ।) शिरोऽधः । इति शब्दचन्द्रिका । घाड़ इति भाषा ॥

मस्तिष्कं, क्ली, (मस्तं मस्तकं स्यति खाधारत्वेन प्राप्नोतीति । ष्यञ गतौ + कः । पृषोदरादित्वात् साधुः ।) मस्तकभवघृताकारक्लेदः । मगज इति पारस्यभाषा ॥ तत्पर्य्यायः । गोर्दम २ । इत्यमरः । ३ । ६ । ६५ ॥ गोदम् २ मस्तकक्लेदः ४ मस्तुलुङ्गकः ५ । इति हेमचन्द्रः । ३ । २८६ ॥ (यथा, ऋग्वेदे । १० । १६३ । १ ।
"यच्छीर्षण्यं मस्तिष्काज्जिह्वाया विदहामि ते ॥")

मस्तु, क्ली, (मस्यति परिणमतीति । मस् + "सितनिगमिमसिसक्त्यविधाभ्यः कुञ्चिभ्यस्तुन् ।" उणा० १ । ७० । इति तुन् ।) दधिभवमण्डम् । दधिर मात् इति भाषा ॥ इत्यमरः २ । ६ । ६४ ॥ दधिजलम् । द्विगुणदारियुतं दधि । अस्य गुणाः ।
"उष्णाम्बु वह्निपित्तदं श्रमहरं बल्यं कषायं सरं शुक्लिक्ष्वेदकरं त्रयोदरगदप्लीहार्शसां नाशनम् ।
श्रोतःशुद्धिकरं कफानिलहरं विष्मूत्रशूलापहं पाण्डुश्वासविकारगुल्मशमनं मस्तु प्रशस्तं लघु ॥'
इति राजनिर्घण्टः ॥

अपिच ।
"मस्तु श्रमहरं स्वल्पं लघु शुक्राभिलाषजृत् ।
श्रोतोविशोधनं ग्राहि कफहृल्लाघवापहम् ॥
अरुच्यं प्रीणनं शीघ्रं भनक्ति मलसंग्रहम् ॥"
इति भावप्रकाशः ॥

मस्तुलुङ्गः, पुं, (मस्तु इव लिङ्गं सादृश्यमस्य । पृषोदरादित्वात् इकारस्य उकारः ।) मस्तिष्कम् । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते सूत्रस्थाने २३ अध्याये । "भिन्ने वा शिरःकपाले यत्र मस्तुलुङ्गदर्शनं चिरोपलिङ्गप्रादुर्भावः कायश्वासौ वा यस्येति ॥")

महक्कः, पुं, (मस्तुलुङ्गक+स्वार्थे कन्।) मस्तिष्कम्। इति हेमचन्द्रः। ३। २८६॥

मह, पूजे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) महति। इति दुर्गादासः॥

मह, इ क लिधि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इ क, मंहयति। लिधि दीप्तौ। इति दुर्गादासः॥

मह, इ ड वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) इ, मंह्यते। ड, मंहते। इति दुर्गादासः॥

मह, त् क पूजे। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट्।) महयति। इति दुर्गादासः॥

महः, पुं, (मह्यते पूज्यतेऽसौ इति। मह+"पुंसि संज्ञायां घः प्रायेण।" ३। ३। ११८। इति घः। मह+अच् इत्युणादिसूत्रात्।४।१८८।) उत्सवः। इत्यमरः। १। ७। १८८॥ (यथा, माघे। ६। १६।

"न खलु दूरगतोऽप्यतिवर्तते
महमसाविति बन्धुतयोदितैः॥"

महते पूज्यते इति।) तेजः। इति मेदिनी। हे, ७॥ यज्ञः। इति शब्दरत्नावली॥ (यथा, हरिवंशे। ७१। १८।

"तस्मात् प्राहुर्षि राजानः सर्व्वे शक्रं सदा युताः।
महैः सुरेशमर्चन्ति वयमन्ये च मानवाः॥")

महिषः। इति हेमचन्द्रः॥ (त्रि, महत्। यथा, ऋग्वेदे। १०। ६१। ८।

"महे दक्षते नाभ्यं त्वत्।"

"महे महति।" इति तद्भाष्ये सायणः॥)

महः, [स्] क्ली, (मह्यते पूज्यतेऽसौ इति। मह+"सर्व्वधातुभ्योऽसुन्।" उणा० ४।१८८। इति असुन्।) उत्सवः। (मह्यते पूज्यते इति। मह+असुन्।) तेजः। इति मेदिनी। से, ३०॥ (यथा, रघुटीकारम्भे मल्लिनाथः।

"अन्तरायतिमिरोपशान्तये
शान्तपावनमचिन्त्यवैभवम्।
तं नरं वपुषि कुञ्जरं मुखे
मन्महे किमपि तुन्दिलं महः॥"

मह्यन्ते पूज्यन्ते देवादयोऽसौ इति। मह+असुन्।) यज्ञः। इति शब्दरत्नावली॥ (उदकम्। इति निघण्टुः।१।१२॥ पूज्यमाने, त्रि। यथा, वाजसनेयसंहितायाम्। २०। ६।

"जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराट् भामः॥"

"वाक् वागिन्द्रियं महः पूज्यमानास्तु।" इति तद्भाष्ये महीधरः॥ महति। यथा, ऋग्वेदे। ८। २३। १६।

"महो राये तमुत्वा समिधीमहि।" "महो महते राये धनाय।" इति तद्भाष्ये सायणः॥)

महकः, पुं, (महः कायति प्रकाशयतीति। महस्+कै+कः। पृषोदरादित्वात् साधुः।) बकुलामोदः। इति जटाधरः॥

महत्, क्ली, (मह+अति। निपातितश्च।) राज्यम्। इति मेदिनी। ते, १४०॥ (यथा, छान्दोग्योपनिषदि। ५। २। ४।

"अथ यदि महच्चिरमिवेदमावास्यायां दीक्षिता मौनमास्या रात्रौ इत्यादि॥" ब्रह्म। यथा, महाभारते। ३। ३१२। ४४।

"श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत्॥"

उदकम्। इति निघण्टुः। १। १२॥)

महत्, त्रि, (मह्यते पूज्यतेऽसौ इति। मह+"वर्षमाने पृषद्बृहन्महज्जगच्छतवच्च।" उणा० २। ८४। इति अतिः निपात्यते।) महान्। महती। बहुः। इति मेदिनी। ते, १४०॥ तत्पर्य्यायः। विप्रकृष्टम् २ पृथु ३ बृहत् ४ विशालम् ५ पृथुलम् ६ बहुम् ७ उरु ८। विपुलम् ९। इत्यमरः। २। १। ६०॥ पुलम् १० विक्लीबम् ११। इति शब्दरत्नावली॥ (यथा, रघौ। १२। ४०।

"तस्मिन् रामप्रतीतृक्षुर्वने महति रक्षसाम्॥")

तद्वैदिकपर्य्यायः। ब्रध्नः २ ऋभ्वः ३ बृहत् ४ उक्षितः५ तवसः ६ तविषः७ महिषः ८ अभ्वः ९ ऋभुक्षाः१० उक्षा११ विहायाः १२ यक्षः१३ ववक्षिथ १४ विवक्षसे १५ अभ्रगः१६ माहिनः १७ गभीरः १८ कक्षुहः १९ रभसः २० राधन्२१ विरप्शी२२ अद्भुतम्२३ वंहिष्ठः२४ बर्हिषत् २५। इति पञ्चविंशतिर्मन्त्रनामानि। इति वेदनिघण्टौ ३ अध्यायः॥ *॥ (प्रकृतेराद्योविकारः। यथा, सांख्यसूत्रम्। १। ६१।

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारः॥" इति॥) महच्छब्दस्य शुक्लादिशब्दविशेषाणां पूर्व्वं प्रयोगनिषेधो यथा,—

"शुक्ले तैले तथा मांसे वेद्ये ज्योतिष्टिके द्विजे। यात्रायां पथि निद्रायां महच्छब्दो न दीयते॥"

इति भट्टिप्रथमसर्गीयचतुर्थश्लोकटीकायां भरतः॥

महती, स्त्री, (महत्+ङीष्।) वल्लकीभेदः। इति मेदिनी। ते, १४०॥ नारदशिक्षा। बृहत्प्रमाणा। इत्यमरटीकायां भरतः॥ (यथा, शिशुपालवधे। १। १०।

"स्फुटीभवदृश्यमविग्रहत्वङ्गा-
मवेक्ष्य मार्गं महतीं सहोर्मुकुः॥")

बृहती। वार्त्ताकी। इति राजनिर्घण्टः॥ (कुशद्वीपस्थनदीविशेषः। यथा, मात्स्ये। ११३। ७४।

"महती सप्तमी प्रोक्ता पुनश्चैवा वृतिः स्मृता।
अन्याश्चाभ्योऽपि सञ्जाता ग्रतश्चोऽथ सहस्रशः॥"

पारिपात्रनिर्गतनदीविशेषः। यथा, मात्स्ये। ११३। २३—२४।

"वर्णाशा चन्दना चैव कावेरी महती तथा।
पारा चर्म्मण्वती पुण्या विदुषा वेणुमत्यपि।
शिप्रा स्रवन्ती कुन्ती च पारिपात्राश्रिताः स्मृताः॥")

महतीदादशी, स्त्री, (महतीति ख्याता द्वादशी।) श्रवणद्वादशी। यथा,—

"मासि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता।
महती द्वादशी ज्ञेया उपवासे महाफला॥"

इति गारुडे १३१ अध्यायः॥

महत्तत्त्वं, क्ली, (महच्च तत् तत्त्वञ्चेति।) चतुर्विंशतितत्त्वान्तर्गतद्वितीयतत्त्वम्। तच्च प्रकृतेरुत्पन्नम्। समष्टिबुद्धिस्वरूपम्। तत्पर्य्यायः। यथा,—

"महानात्मा मतिर्ब्रह्मा पुराणः पुरुषः पुमान्।
बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृतिः स्मृतिः।
पर्य्यायवाचकैः शब्दैर्महत्तत्त्वं विभाव्यते।
तं ज्ञात्वा ब्राह्मणो विद्वान् प्रमोहं नाधिगच्छति॥"

इति महाभारते आश्वमेधिकपर्व्व॥

अपि च।

"एका मूर्त्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः।
सविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते॥
महानिति यतः ख्यातिर्लोकानां जायते सदा।
अहङ्कारश्च महतो जायते मानवर्द्धनः॥"

इति मात्स्ये २ अध्यायः॥

महत्तरः, पुं, क्ली, (अयमनयोरतिशयेन महान्। महत्+तरप्।) शूद्रः। यथा,—

"शूद्रः स्यात् पादजो दासो ग्रामकूटो महत्तरः।"

इति त्रिकाण्डशेषः॥

(यथा, कथासरित्सागरे। ५। ३४।

"केनायं रचितोऽनेति सोऽपृच्छच्च महत्तरान्।
ते च न्यवेदयंस्तस्मै कर्त्तारं तिलकस्य माम्॥")

अतिशयमहति, त्रि॥ (यथा, महाभारते। ७। १६६। ५६।

"ददर्श शूरान् दुर्दर्शं सर्व्वदेवैरभिष्टुतम्।
अणीयांसमणुभ्यश्च बृहद्भ्यश्च महत्तरम्॥")

महत्त्वं, क्ली, (महत्+त्व।) महतो भावः। यथा, भावापरिच्छेदे।

"महत्त्वं बहुविधे हेतुरिन्द्रियं करणं मतम्॥"

"महत्त्वं बहुविध इति। द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणम्। द्रव्यसमवेतानां गुणकर्म्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन। द्रव्यसमवेतसमवेतानां रूपत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणम्।" इति सिद्धान्तमुक्तावली॥ (श्रेष्ठत्वम्। यथा, रामायणे। १। १। १०१।

"जनश्च शूद्रोऽपि महत्त्वमीयात्॥"

"महत्त्वं श्रेष्ठत्वम्।" इति तट्टीका।)

महर्लोकः, पुं, (महश्चासौ लोकश्चेति। कर्म्मधारयः।) भूरादिसप्तलोकान्तर्गतचतुर्थलोकः। यथा,—

"भूर्भुवः स्वर्महश्चैव जनश्च तप एव च।
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः॥
चतुर्मुखदिनस्यान्ते जगदेतच्चराचरम्॥

तदा हि दह्यते सर्व्वं त्रैलोक्यं भूर्भुवादिकम्।
जनं प्रयान्ति तापार्त्ता महर्लोकनिवासिनः॥"
इति वह्निपुराणम्॥
"चतुर्थे तु महर्लोके तिष्ठन्ते कल्पवासिनः॥"
इति देवीपुराणम्॥

महर्षभी, स्त्री, (महती चासौ ऋषभी चेति कर्म्मधारयः।) कपिकच्छुः। इति राजनिर्घण्टः॥

महर्षिः, पुं, (महांश्चासौ ऋषिश्चेति।) शासादिः। इति त्रिकाण्डशेषः॥ अस्य व्युत्पत्त्यादिर्यथा,—
"ऋषिर्हिंसागतौ धातुर्ब्रह्मविद्यासत्यतपःश्रुतेः।
एष सन्निश्चयो यस्माद् ब्राह्मणश्च ततस्त्वृषिः॥
विवृत्तिसमकालन्तु ब्रह्मा चक्रिन्द्रियक्षयम्।
ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः॥
गत्यर्थाद्ऋषतेर्धातोर्नामनिर्वृतिकारणम्।
यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता॥
तेनेश्वराः स्वयम्भूता ब्रह्मणो मानसाः सुताः।
विवर्द्धमानैस्तैर्ब्रह्मा महान् परिगतः परः॥
यस्मादृषिः परत्वेन महांस्तस्माच्चमहर्षयः।
ईश्वराणां सुतास्तेषां मानसाश्चौरसाश्च वै॥
ऋषयस्तत्परत्वेन भूतादिऋषयस्ततः।
ऋषिपुत्रा ऋषीकास्तु मैथुनाङ्गभेसम्भवात्॥
परत्वेनर्षयस्ते वै भूतादिऋषिकास्ततः।
ऋषीकायां सुता ये वै विज्ञेया ऋषिपुत्रकाः॥
श्रुत्वा ऋषं परत्वेन नाम तस्मात् श्रुतर्षयः।
अयत्नात्मा महानात्माहङ्कारात्मा तथैव च॥
भूतात्मा चेन्द्रियात्मा च तैषान्तु ज्ञानसुच्यते।
इत्येवन्द्विजात्यस्तु पञ्च तान् नामभिः ऋग्रु॥
भृगुर्म्मरीचिरत्रिश्च अङ्गिराः पुलहः क्रतुः।
मनुर्दक्षो वशिष्ठश्च पुलस्त्यश्चेति ते दश॥
ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः।
परत्वेनर्षयस्तस्माद्भूतास्तस्माच्चमहर्षयः॥"
इति मात्स्ये १२० अध्यायः॥

महल्लकः, पुं, (महत्तः क्षीरवाहिरूपान् विपुलान् भारान्लाति गृह्णातीति। ला+ "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः। ततः स्वार्थे कन्। यद्वा, महान्तं चरित्रगुणं लक्ति आस्वादयतीति। लक् आस्वादने+ अच्।) अन्तःपुररक्षकः। तत्पर्य्यायः। सौविदल्लः२ कञ्चुकी३ स्थापत्यः४ सौविदः५ विदाङ्गः६। इति जटाधरः॥ सौविदल्लकः७ अन्तर्वंशिकः८। इति शब्दरत्नावली॥

महल्लिकः, पुं, (महान्तं चरित्रगुणं लिखतीवेति। महत्+लिख+कः। पृषोदरादित्वात् साधुः।) अन्तःपुररक्षकः। खोजा इति भाषा॥ तस्य लक्षणं यथा,—
"शुष्कशून्योऽनपत्ये यः क्लीबभावो महल्लिकः॥"
इति शब्दमाला॥

महसं, क्ली, (महत्यते पूज्यतेऽनेनेति। मह+ "अत्रविचमितमिनमीति।" उणा० ३।११७। इति असच्।) ज्ञानम्। प्रकारः। इत्युणादिकोषः॥

महा, स्त्री, (महत्यते पूज्यते इति। मह+घ। स्त्रियां टाप्।) गोपवल्ली। इति शब्दचन्द्रिका। गोरचनाकुलिया इति भाषा॥ क्षीरबली। इति शब्दरत्नावली॥

महाकच्छः, पुं, (महान् विपुलः कच्छो जलप्रायदेशोऽस्य।) समुद्रः। वरुणः। इति मेदिनी। छे, ६॥ पर्व्वतः। इति शब्दरत्नावली॥

महाकण्टकिनी, स्त्री, (महती चासौ कण्टकिनी चेति।) विम्बसारकम्। इति शब्दचन्द्रिका। फणिमनसा इति भाषा॥

महाकन्दः, पुं, (महांश्चासौ कन्दश्चेति।) रसोनकः। इत्यमरः। २। ४। १४८॥ मूलकम्। इति शब्दरत्नावली॥ पाण्डवमूलकम्। रक्तलशुनम्। राजपलाण्डुः। इति राजनिर्घण्टः॥

महाकपित्थः, पुं, (महांश्चासौ कपित्थश्चेति।) विल्ववृक्षः। इति त्रिकाण्डशेषः॥

महाकरञ्जः, पुं, (महांश्चासौ करञ्जश्चेति।) करञ्जविशेषः। बड़ करञ्जा इति भाषा॥ तत्पर्य्यायः। षड्ग्रन्था२ हस्तिचारिणी३ उदकीर्य्यः४ विषघ्नी५ काकघ्नी६ मदहस्तिनी७ शारङ्गेष्टा८ मधुमती९ रसायनी१० हस्तिरोहणकः११ हस्तिकरञ्जकः१२ सुमनाः१३ काकभाक्षी१४ मधुमत्ता१५। अस्य गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। कटुत्वम्। विषकफकृमिचर्च्चिकाकुष्ठवातव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

महाकर्णिकारः, पुं, (महांश्चासौ कर्णिकारश्चेति।) आरग्वधः। इति राजनिर्घण्टः॥

महाकायः, पुं, (महान् कायोऽस्य।) नन्दी। स च शिवद्वारपालः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। १३। १५०। २४।
"नन्दीश्वरो महाकायो यामजीवृषभध्वजः॥") हस्ती। इति केचित्॥ (महान् कायः शरीरमिति।) दृढ़तु शरीरम्। तद्वति, त्रि॥ (यथा, महाभारते। १। १५६। ३९।
"महाजवं महाकायं महामायमरिन्दमम्॥"
स्त्रियां टाप्। कुमारानुचरमातृगणविशेषः। यथा, महाभारते। ९। ४६। २४।
"रोहितार्द्धी महाकाया हरिपिङ्गा च भूमिप!॥")

महाकार्त्तिकी, स्त्री, (महती चासौ कार्त्तिकी चेति।) रौहिणीनक्षत्रयुक्ता कार्त्तिकीपूर्णिमा। यथा,—
"प्राजापत्यं यदा ऋक्षं तथैतस्यां नराधिप!।
सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभा॥"
इति पाद्मे २ खण्डे ३ अध्यायः॥

महाकालः, पुं, (महांश्चासौ कालश्चेति।) विष्णुस्वरूपाखण्डदण्डायमानसमयः। यथा। कालो घटयतु महाकालत्वात्। इति सिद्धान्तलक्षणम्॥ महादेवः। (तन्निरुक्तिर्यथा महानिर्व्वाणतन्त्रे। ४। ३९।
"कलनात् सर्व्वभूतानां महाकालः प्रकीर्त्तितः।
महाकालस्य कलनात् तस्माद्या कालिका परा॥")
प्रमथगणविशेषः। इति मेदिनी। ले, १५६॥ (उज्जयिनीस्थशिवलिङ्गविशेषः। यथा, कथासरित्सागरे। ९१। ३१—३२।
"अस्तीहोज्जयिनी नाम नगरी भूषणं भुवः।
हसन्तीव सुधाधौतैः प्रासादैरमरावतीम्॥
यस्यां वसति विश्वेशो महाकालवपुः स्वयम्।
ग्रथितीकृतकैलासनिवासव्यसनो हरः॥"
तीर्थविशेषः। यथा, महाभारते। ३।८२।४७।
"महाकालं ततो गच्छेत् नियतो नियताशनः।
कोटितीर्थसपक्षञ्च हयमेधफलं लभेत्॥")
लताविशेषः। माकाल इति भाषा॥ तत्पर्य्यायः। उष्टकालः२ किम्पाकः३ काकमर्द्दकः४। इति रत्नमाला॥ काकमर्द्दः५ देवदालिका६ दाला७ दालिका८ जलङ्गः९ घोषकाङ्क्षतिः१०। इति राजनिर्घण्टः॥ (यथा,
"अन्तर्मलिनदेहेन बहिराङ्गादकारिणा।
महाकालफलेनेव कः खलेन न वञ्चितः॥"
इत्युद्भटः॥)
शिवपुत्रविशेषः। तस्य जन्मवृत्तान्तं यथा,—
श्रीदेवा ऊचुः।
"एष वैश्वानरः श्रीमान् भूरितेजोमयो बली।
महामैथुनवीजन्तु तस्मिन् संग्रहीष्यति॥
इत्युक्ता ऋषयः सर्व्वे वीतिहोत्रं पुरःस्थितम्।
तस्मै निरेभ्ययामासुः सम्भवे सर्व्वहेतवे॥
ततः षड्ढं खं रेतो वादिते दहनानने।
उत्पस्पर्ज्ज महाबाहुर्महामैथुनकारकम्॥
अग्यावृतद्रव्यमानस्य तेजसः शुभ्रभद्भुतः।
अष्टद्वयमतिस्वल्पं गिरिप्रस्थे पपात ह॥
तयोः कारणयोः सद्यः संभूतौ शुङ्गरात्मजौ।
एको भृङ्गसमः श्यामो भिन्नाञ्जननिभोऽपरः॥
भृङ्गी तस्य तदा ब्रह्मा नाम भृङ्गीति चाकरोत्।
महाशब्दैकरूपस्य महाकालेति लोकभृत्॥
ततस्तौ पालयामास शुङ्गरः प्रमथोत्करैः।
अपर्णया चापि तथा क्रमात्तावभिवर्द्धितौ॥
प्रदृष्टौ तौ महात्मानौ हरोमाप्रतिपालितौ।
क्रमाद्गणेशौ ज्ञात्वा तौ हरो हरि मखोऽजयत्॥"
इति कालिकापुराणे ४५ अध्यायः॥
तस्य वानरमुखकारत्वं जन्मान्तरञ्च यथा,—
"अथैकदोमया सार्द्धं निगूढ़े रतिमन्दिरे।
नर्म्मोत्करोन्महादेवो मोदयुक्तो रतिप्रियः॥
यदा सा नर्म्मणे याता गौरी शरदरान्तिकम्।
तदा भृङ्गिमहाकालौ द्वास्थौ हरि प्रतिष्ठितौ॥
नर्म्मावसाने सा देवी सुक्तधर्म्मिलबन्धना।
ग्रन्थिहीनगलद्गात्रा वल्कमालम्ब्य पाणिना॥
अस्तव्यस्तपरीधाना पुष्पैराकुलितालिभिः।
विलुप्तकुङ्कुमा दष्टव्रणच्छदविभ्रमा॥
निःश्वसा रतिसङ्क्लान्तमालाया अलकानना।
ईश्वराधूर्जयता निचिता स्वेदबिन्दुभिः॥

तां निःसरन्तीं सहसा तथाभूतामनिन्दिताम् ।
अयोन्यां वीक्षितुं चान्यैर्दुर्धर्षजनते प्रियम् ॥
दृष्ट्वातुमेहात्मानौ नातिहृष्टात्ममानसौ ।
भृङ्गी चापि महाकालः प्राप्तकालश्च कोपतः ॥
दृष्ट्वा तौ भ्रातरं दीनौ तदा भूतावधोमुखौ ।
चिन्ताच्याजमतुल्यौजां निग्रन्थसतुरुत्तमम् ॥
तौ चक्रन्तां तदा देवी ददर्श हिमवत्सुता ।
चुकोप च तदापर्णा वाक्यचैतदुवाच ह ॥
एवंभूतानु मां कस्मादसम्बन्धामपश्यताम् ।
भवन्तौ तनयौ शुद्धौ ह्रीमर्यादाविवर्जितौ ॥
तस्मादिमाममर्यादां भवन्तौ निरपत्रपौ ।
अकुर्वातां ततो भूयाद्भवतोर्जन्म मानुषे ॥
मानुषीं योनिमासाद्य मातुरीक्षणदोषतः ।
भविष्यतो भवन्तौ तु ग्राखाच्छगमुखौ भुवि ॥
इति ताडुमया ग्रस्तौ हरपुत्रौ महामतौ ॥"
"अथोमया समं देवो वियता चन्द्रशेखरः ।
आजगाम तदा गच्छन् प्रासादं प्रति तं नृप ! ॥
दृष्ट्वैव चरणौ तासुमायाः सदृशौ गुरोः ।
सर्वलक्षणसम्पूर्णां माधवस्येव माधवीम् ॥
तां दृष्ट्वा त्यगदद्देवीं गौरीं वृषभकेतनः ।
स्मितप्रसन्नवदनः प्रहसन्निव भाविनीम् ॥

ईश्वर उवाच ।

इयं ते मानुषी मूर्तिः प्रिये तारावतीति या ।
भृङ्गीमहाकालयोस्ते जन्मने विहिता स्वयम् ॥
त्वत्तो ज्ञानन्यकाम्भोऽहं गाम्बा गन्तुमिहोत्सहे ।
त्वमिदानीं स्वयं चाम्बां मूर्त्या प्रविश्य
भाविनि ! ॥
तत उत्पादयिष्यामि महाकालञ्च भृङ्गिणम् ॥

श्रीदेव्युवाच ।

ममैव मानुषी मूर्तिरियं वृषभकेतन ! ।
विद्यामि तेऽहं वचनादुत्पाद्य सुतद्वयम् ॥
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः ॥
ततः सापर्णयाविष्टा देवी तारावती सती ।
कामयानं महादेवं स्वयमेवाभजन्मुदा ॥
तस्मिन् काले ऽभवद्गर्भः कापाली चास्थिमाल्य-
धृक् ।
कामावसाने तस्यान्तु सद्यो जातं सुतद्वयम् ।
अभवन्नृपग्राहूँल ! तथा ग्राखाच्छगाननम् ॥"
इति कालिकापुराणे ४६—४६ अध्यायाः ॥
बाणासुरस्य महाकालत्वं यथा,—

ऋषय ऊचुः ।

"कथितो भवता सर्गः संग्रया अपि ग्रातिताः ।
त्वत्प्रसादाच्छभाग ! कृतकृत्या वयं गुरो ! ॥
भूयश्च श्रोतुमिच्छामो वयमेतद्द्विजोत्तम ! ।
कोऽन्यो भृङ्गी महाकालो जातौ वेतालभैरवौ ॥
वेतालश्च महाकालं भैरवं भृङ्गिणं तथा ।
ब्रूहि मे द्विजग्राहूँल ! कथमेषां चतुष्टयम् ॥

मार्कण्डेय उवाच ।

भवं गते महाकाले मातृषण्ढे च भृङ्गिणि ।
वेतालभैरवाख्ये च तथाभूते द्विजोत्तमाः ॥
वरलब्धे च वेताले भैरवे तेन संगते ।
अन्धकं तपसा युक्तं भृङ्गिणञ्चाकरोद्धरः ॥
अन्धकस्तु हरं पूर्वं विरुध्यापदमागतः ।
पश्चाद्धरं समाराध्य पुत्रोऽभूत्तस्य सोऽसुरः ॥
भृङ्गिस्नेहाद्भृङ्गिणं तं संग्रया चाकरोद्धरः ।
स्नेहेन तु महाकालं बाणं बलिसुतं हरः ॥
विष्णुना च्छिन्नबाहुं तं महाकालमथाकरोत् ।
एवं मुनिवरास्तेषां संजातश्च चतुष्टयम् ॥
वेतालो भैरवो भृङ्गी महाकालेत्यनुक्रमात् ॥"
इति कालिकापुराणे ५५ अध्यायः ॥*॥
तस्य ध्यानादि यथा,—
"महाकालं यजेद्देव्या दक्षिणे धूम्रवर्णकम् ।
बिभ्रतं दण्डखट्वाङ्गौ दंष्ट्राभीममुखं शिशुम् ॥
व्याघ्रचर्माहृतकटिं तुन्दिलं रक्तवाससम् ।
त्रिनेत्रमूर्द्धकेशञ्च मुण्डमालाविभूषितम् ॥
जटाभारलसच्चन्द्रखण्डमुग्रं ज्वलन्निभम् ॥
तथा च कुमारीकल्पे ।
देव्यास्तु दक्षिणे भागे महाकालं प्रपूजयेत् ।
हुं क्ष्रौं यां रां लां वां क्रौं महाकालभैरव
सर्वविघ्नान्नाशय नाशय क्ष्रौं श्रीं फट् स्वाहा ।
इत्यनेन पाद्यादिभिराराध्य चिरूपंयित्वा मूलेन
देवीं पञ्चोपचारैः पूजयेत् । तथा च काली-
तन्त्रे ।
महाकालं यजेद्दयत्नात् पञ्चाद्देवीं प्रपूजयेत् ।
कालीकल्पे ।
कवचं क्ष्रौं समुद्धृत्य यां रां लां वाञ्च क्रोन्ततः ।
महाकालभैरवेति सर्वविघ्नान्नाशयेति च ॥
नाशयेति पुनः प्रोच्य मायां लक्ष्मीं समुद्धरेत् ।
फट् स्वाहया समायुक्तो मन्त्रः सर्वार्थसाधकः ॥"
इति तन्त्रसारः ॥

महाकाली, स्त्री, (महाकाल + पत्न्यर्थे ङीष् ।)
महाकालस्य पत्नी । सा तु पञ्चवक्त्रादशभुज-
कालीविशेषः । इति तन्त्रम् ॥ (इयमेव पराशक्तेस्तामसी शक्तिः । यथा, देवीभागवते १।२।२०।
"तस्यास्तु सात्त्विकी शक्तिः राजसी तामसी
तथा ।
महालक्ष्मीः सरस्वती महाकालीति ताः
स्त्रियः ॥")
अथ महाकालीमन्त्रः ।
"ॐ फ्रें फ्रें क्रों क्रों श्मशान हूं फट् स्वाहा । श्मशानभैरवीमन्त्रेण यावत् क्रूरकर्म्मणि प्रयोगः कर्त्तव्यः । अथ महाकालीमन्त्रप्रयोगः । तत्र न्यासशुद्ध्यादिकं न कर्त्तव्यम् । तथा च ।
न्यासशुद्ध्यादिकं किञ्चिन्नात्र कार्य्या विचारणा ।
स्नात्वातोयेन संपूर्णे स्नानकुम्भेन कालिकाम् ॥
पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रत्रिलोचनाम् ।
शूलिकाशूलधनुर्बाणखड्गखेटवराभयान् ॥
दधानदशभुजैर्देवीं बिभ्राणां भूरिभूषणाम् ।
ध्यात्वैवं साधकः साध्यं साधयेन्मनसेप्सितम् ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथा चैन्द्री चामुण्डा चण्डिका-
ष्टमी ।
पूर्व्वादीशानपर्य्यन्तं कुम्भस्थाने स्थिता इमाः ॥
तत्र क्रमः । देवीं ध्यात्वा यथाविधुपचारैश्च संपूज्य ब्राह्म्यादयश्शक्तीः पूर्व्वादिक्रमेण पूजयेत् । तथा ।
नामोच्चारणसंरब्धं वह्नौ प्रज्वलितेऽम्बरे ।
जुहुयादेरिणां शुद्धौ देवीमन्त्रं जपंस्तथा ॥
समिधः पिशुमद्दस्य तथा विभीतकाद्विकाः ।
गृहधूमग्रगन्धास्थिविभीताङ्गारहोमतः ॥
सप्ताहाद्देरिणं हन्ति कालिकामन्त्रयोगतः ।
उच्चाटनं चापराह्णे सन्ध्यायां मारणं तथा ॥
दक्षिणस्यां दिशि स्थित्वा ग्रामादेर्दक्षिणा-
सुखः ॥"
इति तन्त्रसारः ॥
जिनानां चतुर्विंशतिशासनदेवतान्तर्गतदेवी-
विशेषः । इति हेमचन्द्रः ॥ * ॥

महाकाव्यं, क्ली, (महच्च तत्काव्यञ्चेति ।) काव्य-
ग्राखविशेषः । तत्पर्य्यायः । सर्गबन्धः २ । इति
त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा,—
"सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सदंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥
अङ्गानि सर्व्वेऽपि रसाः सर्व्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तमन्यदा सज्जनाश्रयम् ॥
चत्वारस्तत्र वर्गाः स्युस्तेष्वेकञ्च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ॥
क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्त्तनम् ।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ॥
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।
सन्ध्यासूर्य्येन्दुरजनीप्रदोषध्वान्तवासराः ॥
प्रातर्मध्याह्नमृगयाशैलर्त्तुवनसागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ॥
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य सर्गोपादेयकथया सर्गनाम तु ॥"
इति साहित्यदर्पणे ६ परिच्छेदः ॥ * ॥
महाकाव्यग्रन्था यथा, कालिदासकृतकुमार-
सम्भवरघुवंशग्रभृतयः । भर्त्तृहरिकृतभट्टि-
काव्यम् । भारविकृतकिरातार्জ্জुनीयम् । श्रीहर्ष-
कृतनैषधीयचरितम् । माघकृतशिशुपालवध-
क्वेत्यादयः ॥

महाकुसुदा, स्त्री, (महती चासौ कुसुदा चेति ।)
काश्मरी । इति राजनिर्घण्टः ॥

महाकुम्भी, स्त्री, (महती चासौ कुम्भी चेति ।)
कटफलः । इति राजनिर्घण्टः ॥

महाकुलः, त्रि, (महत् कुलं वंशोऽस्य ।) उत्तम-
कुलजातः । तत्पर्य्यायः । कुलीनः २ आर्य्यः ३
सभ्यः ४ सज्जनः ५ साधुः ६ । इत्यमरः । २ ।
७ । ३ ॥ कुलजः ७ अभिजातः ८ कौलेयकः ९

जात्यः १०। इति हेमचन्द्रः। ३। १६६॥
महाकुलः ११ कौलेयः १२ कोलेयकः १३। इत्यमरटीका॥ कुलजः १४ साधुजः १५ कुलश्रेष्ठः १६। इति शब्दरत्नावली॥ (यथा, सुश्रुतसंहितायाम्। १७। ४।
"भेदे दृष्टिविनाशो भेदः सुहृदां महाकुलानाञ्च॥"
क्ली, उत्तमं कुलम्। यथा, राजतरङ्गिण्याम्। ३। ६१।
"द्वयोराजोकितं चित्रं जन्मैकस्मिन् महाकुले॥")
महाकुलीनः, त्रि, (महाकुलस्य अपत्यम्। महाकुल+"महाकुलादञ्खञौ।" ४।१।१४१। इति यत्रे खः।) महाकुलः। यथा,—
"महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम।
पितुः प्रियहरो भर्त्ता चेमकारस्तपस्विनाम्॥"
इति भट्टिः। ५। ७७ श्लोकः॥
(स्त्रियां टाप्। यथा, रामायणे।२।२८।३।
"सीते! महाकुलीनासि धर्म्मे च निरता सदा॥")
महाकुष्ठं, क्ली, (महच्च तत् कुष्ठञ्चेति।) दृढतकुष्ठरोगः। तत् सप्तविधं यथा,—
"पूर्व्वत्रिकं तथा सिध्मं ततः काकणकं तथा।
पुण्डरीकञ्चर्ज्जिह्वे तु महाकुष्ठानि सप्त च॥
पूर्व्वत्रिकं कपालोदुम्बरमण्डलाख्यम्। सिध्मशब्दोऽकारान्तो नपुंसकलिङ्गः। ननु कथं सिध्मस्य महाकुष्ठेषु गणना सुश्रुतेन क्षुद्रकुष्ठेष्वुक्तत्वात्। उच्यते। त्वङ्मात्रगता सिध्मपुष्पिका सुश्रुतेन च क्षुद्रकुष्ठेषूक्ता धातुषु प्रविष्टन्तु सिध्मं महाकुष्ठमेव। एवंविधस्य सिध्मस्य चरकेण महाकुष्ठेषु दर्शितत्वात्। एषां महाकुष्ठत्वञ्च श्रीघ्रसुत्तरोत्तरधात्ववगाहनात् उत्तरोत्तरदोषजन्यत्वात् चिकित्साबाहुल्याच्च।" इति भावप्रकाशः॥ (एषां चिकित्सा क्षुद्रकुष्ठशब्दे द्रष्टव्या॥)
महाकूपः, पुं, (महांश्चासौ कूपश्चेति।) दृढतकूपः। तत्पर्य्यायः। अरघट्टः २। इति जटाधरः॥
महाकुलः, पुं, (महत् कुलमस्य।) महाकुलः। सत्कुलः। इति द्विरूपकोषः।
महाकोशफला, स्त्री, (महान् कोशः फले यस्याः।) देवदाली लता। इति राजनिर्घण्टः॥
महाकोशातकी, स्त्री, (महती चासौ कोशातकी चेति।) हस्तिघोषा। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—
"महाकोशातकी प्रोक्ता हस्तिघोषा महाफला।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
महागदः, पुं, (महांश्चासौ गदश्चेति।) ज्वरः। इति राजनिर्घण्टः॥ (महारोगः। यथा, सुश्रुते। १। ३३ अध्याये।
"वातव्याधिः प्रमेहश्च कुष्ठमर्शो भगन्दरः।
अश्मरी मूढगर्भश्च तथैवोदरमष्टमम्।
अष्टावेते प्रकृत्यैव दुश्चिकित्सा महागदाः॥"
औषधविशेषः। यथा, सुश्रुते कल्पस्थाने ५ अध्याये।
"एषोऽगदो हन्ति विषं प्रयुक्तः
पानाञ्जनाभ्यञ्जननस्ययोगैः।
अवार्य्यवीर्य्यां विषवेगहन्ता
महागदो नाम महाप्रभावः॥"
महती गदाश्चेतिविग्रहे महागदाविशिष्टे, त्रि। यथा, श्रीमद्भागवते। ३। १८। ६।
"परानुषक्तं तपनीयपक्वं
महागदं काञ्चनचित्रदंशम्।
मन्मोक्षणभीक्ष्णं प्रतुदन्तं दुरुक्तैः
प्रचण्डमन्युः प्रहसंस्तं बभाषे॥")
महागन्धः, पुं, (महान् गन्धोऽस्य।) कुटजवृक्षः। इति राजनिर्घण्टः॥ जलवेतसः। इति शब्दचन्द्रिका॥
महागन्धा, स्त्री, (महान् गन्धो यस्याः। स्त्रियां टाप्।) नागबला। केविकापुष्पम्। इति राजनिर्घण्टः॥ वासुका। यथा, हेमचन्द्रः।२।१२०।
"वासुका चर्च्चिका चर्म्मसुखा मार्ज्जारकर्णिका।
कर्णमोटी महागन्धा भैरवी च कपालिनी॥"
महागवः, पुं, (महांश्चासौ गौश्चेति। "गोरतद्धितलुकि।" ५।४।९२। इति समासान्तटच्। गोसदृशत्वादस्य तथात्वम्।) गवयः। यथा,—
"वनगौर्गवयः प्रोक्तो वलभो महागवः॥"
इति राजनिर्घण्टः॥
महागिरिः, पुं, (महान् गिरिरुदाख्योपाधिर्यस्य। यद्वा, महान् गिरिरिव।) बौद्धभेदः। यथा—
"महागिरिः सुहस्त्याद्या वज्रान्ता दशपूर्व्विणः॥"
इति हेमचन्द्रः। १। ३४॥
महान् गिरिः पर्व्वतः।) दृढतपर्व्वतश्च॥ (यथा, महाभारते। ३। ११०। १५।
"नातप्ततपसा शक्यो द्रष्टुमेष महागिरिः।
आरोढुं वापि कौन्तेय! तस्मान्नियतवाग्भव॥"
दानविशेषः। यथा, हरिवंशे। ३। ८६।
"सूक्ष्मश्चैव निचन्द्रश्च उर्जनाभो महागिरिः॥")
महागुरुः, पुं, (महांश्चासौ गुरुश्चेति।) अतिगुरुः। स च पुरुषस्य पिता माता आचार्य्यश्च। स्त्रियाः पतिः। अदत्तकन्यायाः पिता माता च। यथा। त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिताचार्य्यश्चेति। इति विष्णुसूक्तम्॥ प्रभुर्महागुरुत्वमाह रामायणे।
"नातो विशिष्टं पश्यामि बान्धवं वै कुलस्त्रियाः।
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव च॥"
भ्राताताप्यः।
"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः।
पतिरेको गुरुः स्त्रीणां सर्व्वाभ्यागत गुरुः॥"
एकपदेन दत्तस्त्रीणां पितृमातृव्यादृत्तिः॥ * ॥
सपिण्डमरणं प्रकृत्य आश्वलायनः। चिराचमनारलवणान्नाग्निः स्नुहादग्धराजं महागुरुषु। आचार्य्यञ्च उपनीय ददद्वेदमाचार्य्यः स उदाहृतः। इति याज्ञवल्क्योक्तः। तस्मरणे चिराचाग्नौचित्येन नैतावद्दिनियमः॥ आश्वलायनः। नैतस्यां रात्रावन्नं पचेयुः। अन्नं न पचेयुरित्यनेनोपवासः सूचितः। अघसस्मरे चाहमनश्नन्त आसीरन् इति वक्ष्यमाणवचनात्। अघसस्मरः कटादिः। अष्टाराजवर्णं चारन्तिकादिलक्षणलक्षितं तत्तु सैन्धवं साम्भरि च। इति शुद्धितत्त्वम्॥ * ॥ महागुरुमरणे संवत्सरपर्य्यन्तं निषिद्धकर्म्माणि यथा, कर्म्मलोचने।
"महागुरुनिपाते च कार्य्यं किञ्चिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मचर्य्यञ्च यावत् पूर्णो न वत्सरः॥
अन्यश्राद्धं परान्नञ्च गन्धं माल्यञ्च मैथुनम्।
वर्ज्जयेद्गुरुपाते च यावत् पूर्णो न वत्सरः॥
तीर्थयात्रां विवाहञ्चाधानं तर्पणन्तथा।
संवत्सरं न कुर्व्वीत महागुरुनिपातने॥"
अपि च।
"विप्रोषितः शिखापूर्णां प्रकृतपिण्डको द्विजः।
यावत्संवत्सरपर्य्यन्तं मनसापि न चाचरेत्॥
महागुरुनिपाते तु कार्य्यं किञ्चिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मचर्य्यञ्च श्राद्धं देवयुतञ्च यत्॥"
इति कालिकापुराणे ५७ अध्यायः॥
महागुल्मा, स्त्री, (महान् गुल्मो यस्याः।) सोमवल्ली। इति राजनिर्घण्टः॥
महागुहा, स्त्री, (महती गुहा यस्याः।) पृश्निपर्णी। इति राजनिर्घण्टः॥
महागोधूमः, पुं, (माहांश्चासौ गोधूमश्चेति।) दृढतगोधूमः। बड़ गम इति भाषा। यथा,—
"गोधूमः सुमनोऽपि स्यान्निविधः स च कीर्त्तितः।
महागोधूम इत्याख्यः पश्चाद्देशात् स चागतः॥
मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा।
निःशूको दीर्घगोधूमः कथितस्त्वतिसञ्ज्ञकः॥
गोधूमो मधुरः शीतो वातपित्तहरो गुरुः।
कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत्परः॥
जीवनो बृंहणो वर्ण्यो ब्रण्यो रुच्यः स्थिरत्वकृत्॥"
कफप्रदो नवीनो ननु पुराणः। पुराणत्वञ्च गोधूमचौदनाङ्कुलशूलभुगिति वाग्भटेन वसन्ते गृहीतत्वात्।
"मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः।
शुक्ला बृंहणी पथ्या तद्वन्नद्यसुखाः स्मृताः॥"
इति भावप्रकाशः॥

महाग्रीवः, पुं, (महती दीर्घा ग्रीवा कन्धरा यस्य।) उष्ट्रः। इति राजनिर्घण्टः॥ (शिवः। यथा, महाभारते। १३। १७। ८६।
"महागलो महाकुक्षिर्महाग्रीवः प्रभाग-भाक्॥"
शिवानुचरभूतविशेषः। यथा, हरिवंशे भविष्यपर्व्वणि। १४। ३।
"कङ्कोदरो महाग्रीवः स्थूलजिह्वो द्विबाहुकः।
पार्श्वबक्त्रः सिंहमुख उन्नतांसो महाहनुः॥"
देवविशेषः। यथा, मार्कण्डेये। ५८। १७।
"बाह्वग्रीवा महाग्रीवा स्थेपुरा प्रस्थु-धारिणः॥")
हृद्दग्रीवायुक्ते, त्रि॥

महाघासः, पुं, महतो देशस्य महता भूमेर्वा-घासः। इति सुग्धबोधव्याकरणटीकायां दुर्गा-दासः॥

महाचूर्णा, स्त्री, (महती चूर्णा शरीरभ्रमणं यस्याः।) सुरा। इति शब्दचन्द्रिका॥ (महती-चासौ चूर्णा चेति।) अतिशयभ्रमिश्च॥

महाघोरः, त्रि, (महांश्चासौ घोरश्चेति।) अतिशयभयानकः। यथा, शुद्धितत्त्वे।
"यमद्वारे महाघोरे तप्ता वैतरणी नदी।
तान्त तर्तुं ददान्येनां तस्यां वैतरणीञ्च गाम्॥"

महाघोषं, स्त्री, (महान् घोषः कोलाहलो यस्मिन्।) हट्टम्। इति मेदिनी। षे, ५६॥ हृद्दच्छब्दयुक्ते, त्रि॥ यथा, महाभारते। १। २२१। ११।
"तेषां श्रुत्वा सभापालो भेरीं सान्नाहिकीं तथा। समाजग्ने महाघोषां जाम्बूनदपरिष्कृताम्॥")

महाघोषः, पुं. (महांश्चासौ घोषश्चेति।) अतिघोषशब्दः। इति मेदिनी। षे, ५६॥

महाघोषा, स्त्री, (महान् घोषो यस्याः। टाप्।) कर्कटशृङ्गी। इति मेदिनी। षे, ५६॥ कुन्दुरुकी। इति शब्दचन्द्रिका॥

महाङ्गः, पुं, (महान्ति दीर्घाणि अङ्गान्यस्य।) उष्ट्रः। इत्यमरः। २। ९। ७५॥ गोक्षुरकः। रक्तचित्रकः। इति राजनिर्घण्टः॥ हृद्दव-यवयुक्ते, त्रि॥ (यथा, महाभारते। १३। १७। ८३।
"खड्गिदः खड्गिभावश्च भागी भागकरो लघुः। उत्सङ्गश्च महाङ्गश्च महागर्भपरायणः॥")

महाचक्षुः, स्त्री, (महती चक्षुरयमस्याः।) शाक-विशेषः। तत्पर्य्यायः। हृद्दचक्षुः २ विशारिः ३ शुक्लचक्षुका ४ स्थूलचक्षुः ५ दीर्घपत्री ६ दिव्य-गन्धा ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कषायत्वम्। मलशोधनत्वम्। शुक्लशूलो-दरार्शोऽग्निविषनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ पुं, हृद्दचक्षुयुक्तपक्षी च॥

महाचण्डः, पुं, (महांश्चासौ चण्डश्चेति।) यम-भृत्यः। इति हेमचन्द्रिकाशब्दशेषौ॥ प्रचण्डे, त्रि॥

महाच्छदः, पुं, (महान् छदः पत्रमस्य।) देव-ताड़वृक्षः। इति रत्नमाला॥ हृद्दत्पत्रञ्च॥

महाच्छायः, पुं, (महती छायास्य।) वटवृक्षः। इति राजनिर्घण्टः॥ हृद्दच्छायायुक्ते, त्रि॥

महाच्छिद्रा, स्त्री, (महच्छिद्रमस्याः।) महामेदा। इति राजनिर्घण्टः॥ हृद्दच्छिद्रयुक्ते, त्रि॥

महाजः, पुं, (महांश्चासौ अजश्चेति।) हृद्द-च्छागः। (महतो जायत इति। महत्+जन्+कर्म्मणि डः। पृषोदरादित्वात् साधुः।) महाकुलोद्भवे, त्रि॥

महाजटा, स्त्री, (महती जटास्याः।) रुद्रजटा। इति राजनिर्घण्टः॥ (महती जटा।) हृद्द-ज्जटा च॥

महाजनः, पुं, (महांश्चासौ जनश्चेति।) साधुः। यथा, महाभारते। ३। ३१२। ११२।
"वेदा विभिन्नाः स्मृतयो विभिन्ना नासौ मुनिर्यस्य मतं न भिन्नम्। धर्म्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः॥"
मन्वादिः। यथा,—
"प्रायेण वेद तदिदं न महाजनोऽयं देवा विमोहितमतिर्बत मायया नः। त्वय्यूढजीवितमतिर्मधुपुष्पितायां वैतानिके महति कर्म्मणि युज्यमानः॥"
इति श्रीभागवते षष्ठस्कन्धे अजामिलोपाख्याने यमवाक्योपाख्याने श्रीधरस्वामी॥ (धनी। यथा, रुद्रकटिके। १।
"सङ्गं नैव हि कश्चिदस्य कुरुते सम्भाष्यते नादरात्
संप्राप्तो गृहसत्कदेषु धनिनां सावज्ञमालोक्यते।
दूरादेवमहाजनस्य विहरत्यल्पच्छदो लज्जया मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम्॥")

महाजवः, पुं. (महान् जवो वेगो यस्य।) गवयः। श्रीकारी रुरुः। इति राजनिर्घण्टः। अति-वेगयुक्ते, त्रि॥ (यथा, श्रीमद्भागवते। ७। ८। २८।
"लब्धाङ्गहाशं खरमुत्खनोल्बणं निमीलिताक्षं जगृहे महाजवः॥"
स्त्री, कुमारानुचरमातृविशेषः। यथा, महा-भारते। ९। ४६। २२।
"ग्रहोलूकमुखी लम्बा खरजङ्घा महाजवा॥")

महाजम्बुः, स्त्री, (महती चासौ जम्बूश्चेति।) हृद्दम्बुवृक्षः। यथा,—
"महाजम्बुर्महापत्रा राजजम्बूर्हृदत्फला॥"
इति रत्नमाला॥

महाजम्भूः, स्त्री, (महती चासौ जम्भूश्चेति।) हृद्दम्बुः। तत्पर्य्यायः। राजजम्भुः २ स्वर्ण-माता ३ महाफला ४ पिकप्रिया ५ कोकिलेष्टा ६ महानीला ७ हृद्दत्फला ८। अस्य गुणाः। उष्णत्वम्। मधुररसत्वम्। कषायत्वम्। श्रम-हरत्वम्। भ्रान्तित्वास्यजड़िमनाशित्वम्। स्वर-करत्वम्। विशदत्वम्। श्लेष्मघ्नत्वम्। भ्रमातीसारार्शिनिवर्हकत्वम्। श्वसितकफकास-प्रशमनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"पक्षेन्द्रः कथितो नन्दो राजजम्बुर्महाफला। तथा सुरभिपत्रा च महाजम्बूरपि स्मृता॥ राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम्॥"
इति भावप्रकाशः॥

महाजातिः, स्त्री, (महती जातिरस्या इति। यद्वा, महती जातिरिव तदाकृतित्वात्।) वासन्ती लता। इति राजनिर्घण्टः॥ (महती जातिरिति।) श्रेष्ठवर्णेच॥

महाजातीयः, त्रि, (महत्+"प्रकारवचने जातीयर्।" ५। ३। ६९। इति जातीयर्। ततः। "आन् महतः समानाधिकरणजातीय-ययोः।" ६। ३। ४६। इति महतः आकारादेशः।) महतः प्रकारः। इति व्याकरणम्॥

महाजाली, स्त्री, (जालयति आच्छादयतीति। जाल आच्छादने+पचाद्यच्। स्त्रियां ङीष्। ततः। महती चासौ जाली चेति। यद्वा, महांश्चासौ जालश्चेति स अस्या अस्ति अर्श आद्यच् ततः ङीष्। इत्यमरटीकायां रभसः।) पीतवर्णघोषा। इत्यमरः। २। ४। १९०॥ राजकोशातकी। इति राजनिर्घण्टः॥ हृद्द-ज्जालवाहके, त्रि॥

महाज्येष्ठी, स्त्री, (महती चासौ ज्येष्ठी चेति।) नक्षत्रविशेषादियुक्तज्येष्ठीपूर्णिमा। सा पञ्चधा। यथा, ब्रह्मपुराणे।
"ऐन्द्रे गुरुः शुक्री चैव प्राजापत्ये रविस्तथा। पूर्णिमा गुरुवारेण महाज्येष्ठी प्रकीर्त्तिता॥ ऐन्द्रे ज्येष्ठायां प्राजापत्ये रोहिण्याम्॥ २॥ विना गुरुवारेणापि।
ऐन्द्रे गुरुः शुक्री चैव प्राजापत्ये रविस्तथा। पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्त्तिता॥ २॥ अनुराधास्थगुरावपि।
ऐन्द्रे मैत्रे यदा जीवस्तत्पक्षदशके रविः। पूर्णिमा शुक्रचन्द्रेण महाज्येष्ठी प्रकीर्त्तिता॥ ३॥ अनुराधास्थे चन्द्रेऽपि। याज्ञभूतिः।
ऐन्द्रर्क्षे तथवा मैत्रे गुरुचन्द्रौ यदा स्थितौ। पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्त्तिता॥ ४॥ राजमार्त्तण्डे।
ज्येष्ठे संवत्सरे चैव ज्येष्ठमासस्य पूर्णिमा। ज्येष्ठाभेन समायुक्ता महाज्येष्ठी प्रकीर्त्तिता॥ ५॥ ज्येष्ठसंवत्सरश्च।
ज्येष्ठामूलोपगे जीवे वर्षं स्यात् शक्रदैवतम्। इति विष्णुधर्म्मोत्तरोक्तो व्यासः।
न तु संवत्सरादिपञ्चकान्तर्गतवर्षविशेषः। ज्येष्ठ इति वर्षविशेषकस्य वैयर्थ्यापत्तेः। संवत्सरे यदि स्यादिति पाठः काल्पनिकः॥ * ॥
महाज्येष्ठायान्तु यः पश्येत् पुरुषः पुरुषोत्तमम्। विष्णुलोकमवाप्नोति मोक्षं गङ्गाम्बुमज्जनात्॥"
इति तिथ्यादितत्त्वम्॥

महाज्योतिष्मती, स्त्री, (महती चासौ ज्योतिष्मती चेति।) लताविशेषः। बड़ी मालकङ्गनी इति हिन्दी भाषा। तत्पर्य्यायः। तेजोवती २ बहु-रसा ३ कनकप्रभा ४ तीक्ष्णा ५ सुवर्णकुली ६

लवणा ७ अग्निदीप्ता ८ तेजस्विनी ९ सुरलता १० अग्निकला ११ अग्निगर्भा १२ कङ्कनी १३ ग्रैलसुता १४ सुतेला १५ सुवेगा १६ वायसी १७ तीव्रा १८ काकाक्षी १९ वायसादनी २० गौर्जता २१ श्रीलता २२ सौम्या २३ ब्राह्मी २४ लवङ्गकिंशुका २५ पारावतपदी २६ पीता २७ पीततैला २८ यज्ञस्त्रिनी २९ मेध्या ३० मेधावती ३१ धीरा ३२। अस्या गुणाः। तिक्तंतरत्वम्। रूक्षत्वम्। किञ्चित्कटुत्वम्। वातकफापहत्वम्। दाहप्रदत्वम्। दीपनत्वम्। मेधाप्रज्ञाकारित्वञ्च। इति राजनिर्घण्टः॥

महाज्वालः, पुं, (महती ज्वाला शिखास्य।) होमाग्निः। इति हेमचन्द्रः। ३।५००॥ (नरकविशेषः। यथा, विष्णुपुराणे। २। ६। १२।

"स्तुवा सुतावापि गत्वा महाज्वाले निपात्यते॥"

महादेवः। यथा, महाभारते। १३। १७। ८२।

"अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः॥")

महाज्वाला, स्त्री, (महती ज्वाला दीप्तिर्यस्याः।) जिनानां विद्याधरीविशेषः। इति हेमचन्द्रः। ३।५००॥ (महती ज्वाला।) दहदग्निशिखा च॥

महाढ्यः, पुं, (महान् आढ्यः शोभासम्पन्नः।) कदम्बः। इति राजनिर्घण्टः॥ (महाढ्यः।) अतिशयधनवति, त्रि॥ (यथा, कथासरित्सागरे। २५। ११८।

"ततः प्रभृति चैतस्यां वाराणस्यामुवास सः। अभ्यर्थितो महाढ्यस्य तस्यैव वणिजो गृहे॥")

महातमःप्रभा, स्त्री, (महती तमसां प्रभा प्रकाशोऽस्याम्।) नरकविशेषः। स चातिशयान्धकारमयः। यथा, हेमचन्द्रः। ५। ३।

"घनोदधिघनवाततनुवातनभःस्थिताः।
रत्नशर्कराबालुकापङ्कधूमतमःप्रभाः॥
महातमःप्रभा वेत्यधोऽधो नरकभूमयः॥"

महातरुः, पुं, (महांश्चासौ तरुश्चेति।) खुदीदृक्षः। इति हेमचन्द्रः। ४। २०६॥ (महाकवेः कालिदासस्य खुदीदृक्षमुद्दिश्य वक्रोक्तिप्रयोगो यथा,—

"तरवः पारिजाताद्याः खुदीदृक्षो महातरुः॥")

दहदृक्षश्च॥

महातलं, क्ली, (महच्च तत्तलञ्चेति।) पातालविशेषः। यथा, शब्दमालायाम्।

"अतलं वितलञ्चैव नितलञ्च तलातलम्।
महातलञ्च सुतलं सप्तमञ्च रसातलम्॥"

(यथा च श्रीमद्भागवते। २। १। २६।

"पातालमेतस्य हि पादमूलं
पठन्ति पार्ष्णिप्रपदे रसातलम्।
महातलं विश्वसृजोऽथ गुल्फौ
तलातलं वै पुरुषस्य जङ्घे॥")

महातारा, स्त्री, (तारयति संसारादिति। तॄ+बिच्+अच्। स्त्रियां टाप्। ततो महती तारेति कर्म्मधारयः।) जिनानां देवीविशेषः। तत्पर्य्यायः। तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरा १२ आत्मजा १३ खदूरवासिनी १४ भद्रा १५ वेश्या १६ नीलसरस्वती १७ शुद्धिनी १८ वसुधारा १९ धनंददा २० त्रिलोचना २१ लोचना २२। इति हेमचन्द्रः॥

महातालौ, स्त्री, (महान् अनेकस्तालो यत्र। स्त्रियां ङीष्।) आवर्त्तकी इति राजनिर्घण्टः॥

महातिक्तः, पुं, (महानतिशयस्तिक्तस्तिक्तरसो यत्र।) महानिम्बः। इति राजनिर्घण्टः॥ अतिशयतिक्तरसयुक्ते, त्रि॥

महातिक्ता, स्त्री, (महती गुरुतरा तिक्ता।) यवतिक्ता। इति राजनिर्घण्टः॥ (यथा, गोविन्दविद्यारदकृततमेघ्यरत्नावल्याम्।

"आयु जिह्वी महातिक्ता विश्वाशा क्षुपिपत्रकम्॥")

पाठा। इति शब्दचन्द्रिका॥

महातीक्ष्णा, स्त्री, (महती तीक्ष्णा।) भल्लातकवृक्षः। इति राजनिर्घण्टः॥ अतिशयतीक्ष्णे, त्रि॥

महातेजः, [स्] क्ली, (महदतिशयं तेजोऽस्य।) पारदः। इति राजनिर्घण्टः॥

महातेजाः, [स्] पुं, (महदतिशयं तेजो बलमस्य।) कार्त्तिकेयः। इति हलायुधः। अग्निः। इति शब्दचन्द्रिका॥ (महादेवः। यथा, महाभारते। १३। १७। ५६।

"उग्रतेजा महातेजा जग्धो विजयकालवित्॥")

अतिशयतेजस्विनि, त्रि॥ (यथा, मनुः। १। ६२।

"खारोचिषश्चौत्तमिश्च तामसो रैवतस्तथा।
चाक्षुषश्च महातेजा विश्वसृत्सुत एव च॥")

महात्मा, [न्] त्रि, (महानात्मा स्वभावोऽस्य।) उत्तमस्वभावयुक्तः। (यथा, कामन्दकीयनीतिसारे। १। ११।

"महावाताहतव्याप्तिमेघमालातिपेलवैः।
कथं नाम महात्मानो म्रियन्ते विषयारिभिः॥")

तत्पर्य्यायः। महेच्छः २ उच्चैः ३ उदारः ४ उदात्तः ५ उदीर्णः ६ महाशयः ७ महामनाः ८। इति हेमचन्द्रः। ३। २१॥ (पुं, परमात्मा। यथा, मनुः। १। ५४।

"युगपत्तु प्रलीयन्ते यदा तस्मिन् महात्मनि।
तदायं सर्व्वभूतात्मा सुखं स्वपिति निर्वृतः॥"

"तस्मिन् परमात्मनि।" इति तट्टीकायां कुल्लूकः॥ महत्तत्त्वम्। यथा, श्रीमद्भागवते। ६। ७। २५।

"मनः पृथिव्यां तामद्भिस्तेजसापोऽनिलेन तत्।
खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि॥"

"महात्मनि महत्तत्त्वे।" इति तट्टीकायां श्रीधरस्वामी॥ पिङ्गलविशेषः। यथा, मार्कण्डेये। ६६। ४६।

"महान् महात्मा महितो महिमावान् महाबलः॥"

महादेवः। यथा, महाभारते। १३। १७। ३४।

"महारूपो महाकायो वृषरूपो महायशाः।
महात्मा सर्व्वभूतात्मा विश्वरूपो महाहनुः॥")

महादक्षः, पुं, (महान् दक्षस्ताडनसाधनमस्य।) यमदूतभेदः। इति ब्रह्मवैवर्त्तपुराणे ५६ अध्यायः॥ (महान् दक्षः।) दहदक्षश्च॥ (यथा, महाभारते। ५। १६४। ३०।

"यस्याज्ञानन्न स मन्दात्मा मासमौपयमर्हति।
तस्मात्तस्मै महादक्षो धार्य्यः स्यादिति मे मतिः॥")

महादन्तः, पुं, (महांश्चासौ दन्तश्चेति।) गजदन्तः। तत्पर्य्यायः। ऐरावतः २। इति त्रिकाण्डशेषः॥ दहदन्तमात्रञ्च॥ (महादेवः। यथा, महाभारते। १३। १७। ८७।

"महादन्तो महादंष्ट्रो महाजिह्वो महामुखः॥"

महान् दन्तोऽस्य।) तद्वति, त्रि॥

महादानं, क्ली, (महच्च तद्दानञ्चेति।) श्रेष्ठदानम्। तत्तु तुलापुरुषादिषोड़शप्रकारम्। यथा, मत्स्यपुराणे।

"अथातः संप्रवक्ष्यामि महादानस्य लक्षणम्॥"

इत्यभिधाय।

"आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञितम्।
हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम्॥
कल्पपादपदानञ्च गोसहस्रन्तु पञ्चमम्।
हिरण्यकामधेनुञ्च हिरण्याश्वस्तथैव च॥
पञ्चलाङ्गलकं तद्वद्धरादानन्तथैव च।
हिरण्याश्वरथञ्चाद्यं महाहिरण्यरथस्तथा॥
द्वादशं विष्णुचक्रञ्च ततः कल्पलतात्मकम्।
सप्तसागरदानञ्च रत्नधेनुस्तथैव च॥
महाभूतघटश्चैतद् षोड़शः परिकीर्त्तितः॥"*॥

अत्र सामान्यलक्षणम्। कृष्णलपाङ्कदानं महादानम्। विनायकादिपञ्चाग्रदेवताहोमाङ्गकं वा। तथा मत्स्यपुराणम्।

"विनायकादित्यहलोकपाल-
वस्वष्टकादित्यमरुद्गणानाम्।
ब्रह्माच्युतेशानहरस्तुतीनां
स्वमन्त्रतो होमचतुर्थ्यं स्यात्॥
जप्यानि सूक्तानि तथैव चैषा-
मनुक्रमेणापि यथास्वरूपम्॥"

इत्यादिना कृष्णलपञ्चोनरूप्याङ्गयोर्विधानं प्रत्येकं षोड़शतुलापुरुषप्रधानाभ्युद्दिश्योक्तं ततु महादानत्वेनोद्दिश्येति। अतो नेतरेतराश्रयः। न तु कृष्णलपञ्चैतिकसैवतायोगिर्म्मलिकनीयलक्षणम्। अचलदानेऽपि गतत्वात्। एवञ्च।

"कनकाश्वतिला गावो दासी रथमहीगृहाः।
कन्या च कपिला धेनुर्म्महादानानि वै दश॥"

इति कूर्म्मपुराणोक्तदानपदं गौणम्॥ अन्यथा बहुयुक्तिकल्पनापत्तेः कनकदानादि-

साधारणानुगतैकरूपाभावाच्च । अतो न वैपरीत्यमिति ।

"सर्वेषामेव दानानामेकजन्मानुगं फलम् ॥"

इति मलमासतत्त्वम् ॥

महादारु, क्ली, (महत् दारु अस्य ।) देवदारु ।

इति जटाधरः ॥ (महत् दारु ।) दृढत्वात् काष्ठञ्च ॥

महादेवः, पुं, (महांश्चासौ देवश्चेति । यद्वा, महतां देवादीनां देवः ।) शिवः । इत्यमरः । १ । १ । ३४ ॥ अष्टमूर्त्यन्तर्गतसोममूर्त्तिरयम् । यथा, महादेवाय सोममूर्त्तये नमः । इति शिवपूजापद्धतिः ॥ ७ ॥ अस्य व्युत्पत्तिर्यथा—

"ब्रह्मादीनां सुराणाञ्च मुनीनां ब्रह्मवादिनाम् ।
तेषाञ्च महतां देवो महादेवः प्रकीर्त्तितः ॥
महती पूजिता विश्वे मूलप्रकृतिरीश्वरी ।
तस्या देवः पूजितश्च महादेवः स च स्मृतः ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५३ अध्यायः ॥

तस्य पञ्चवक्त्रत्वत्रिनेत्रत्वकारणं यथा,—

"अतीव कमनीयाङ्गं विष्णोरप्यमसुन्दरम् ।
अहो निर्व्वचनीयञ्च दृष्ट्वा रूपमनुत्तमम् ।
न बभूव विलक्षश्च लोचनाभ्यां त्रिलोचनः ॥
पञ्चास्यमित्यरहित इति मत्वा समानसे ।
भक्तुद्रेकान्महाभक्तो ररोद प्रेमविह्वलः ॥
सहस्रवदनोऽनन्तो भाग्यवांश्च चतुर्मुखः ।
बहुभिर्लोचनैर्दृष्ट्वा तुतोष बहुभिर्मुखैः ॥
पश्यामि किं वा किं स्तौमि संप्राप्य नाथ-
मीदृशम् ।
आस्येकेन लोचनाभ्यां चतुर्भ्यां स पुनः पुनः ॥
स्मरणे कुर्व्वतोदं शङ्करे च तपस्विनि ।
तद्बभूव चतुर्व्वक्त्रं पूर्व्वेण सह पञ्चमम् ॥
एकैकवक्त्रं शुशुभे लोचनैश्च त्रिभिस्त्रिभिः ।
बभूव तेन तन्नाम पञ्चवक्त्रस्त्रिलोचनः ॥
चर्म्मापि शुक्लरूपाणि तस्य ब्रह्मस्वरूपिणः ।
सर्व्वं रजस्तम इति तस्य हेतुं निशामय ॥
ब्रह्मणेन ब्रह्मा ब्रह्मभुः पञ्चानं पाति च शास्ति-
कान् ।
राजसेन राजसिकान् तामसेन च तामसान् ॥
चक्षुषस्तामसात् पश्चात् ललाटस्याहरस्य च ।
संहारकाले संहर्त्तुरधिराविर्भवेत् क्रुधा ॥
कोटितालप्रमाणश्च सूर्य्यकोटिसमप्रभः ।
जेजिह्वानो दीर्घदृश्यस्त्रैलोक्यं दग्धुमीश्वरः ॥"

तस्य भस्मधारणकारणं यथा,—

"विभूतिराजः स विभुः सतीचित्तारभञ्जनः ।
धत्ते तस्या अस्थिमालां प्रेमभावेन भक्त्या च ॥
स्वात्मारामो यद्यपीशस्तथापि पूर्णमब्दकम् ।
सतीशून्यं यज्ञशाला च भ्रान्त्वा भ्रान्त्वा ररोद ह ॥
प्रत्यङ्गाङ्गञ्च तस्याश्च पपात यत्र यत्र च ।
सिद्धपीठञ्च तत्र बभूव मन्त्रसिद्धिदात् ।
तदा शवाशयेशश्च ज्ञात्वा वक्षसि शङ्करः ।
पपात मूर्च्छितो भूत्वा सिद्धयोगे च राधिके ! ॥
तदा गत्वा महेशानं ज्ञात्वा क्रोडे प्रबोध्य च ।
अदर्द्द दियतायाश्च तस्यै शोकहरं परम् ॥
तदा शिवश्च शम्भुः स्वलोकञ्च जगाम ह ।
सूर्य्यान्तरेण कालेन तां संप्राप प्रियां सतीम् ॥"

तस्य दिगम्बरत्वजटाधारित्वकारणं यथा,—

"दिग्वस्त्रधारी योगेन नेच्छारहितो पटे विभोः ।
जटास्तपस्याकालीना धत्तेऽद्यापि विवेकतः ॥
न चेच्छा केशसंस्कारे स्वाङ्गवेशेन योगिनः ।
समता चन्दने पङ्के लोष्ट्रे रत्ने मणीश्वरे ॥"

तस्य नागभूषणत्वत्रिपथवाहनत्वकारणं यथा,—

"गरुडदेविषो नागाः शङ्करं शरणं ययुः ।
बिभर्त्ति कृपया स्वाङ्गे तानेव शरणागतान् ।
वाहनं वृषरूपोऽहमन्यत्तं वोढुमक्षमः ।
त्रिपुरस्य वधे पूर्व्वं मत्कर्णांशसमुद्भवः ॥"

तस्य धुस्तूरपुष्पबिल्वपत्रप्रियत्वव्याघ्रचर्म्मधारित्व-श्मशानस्थायित्वकारणं यथा,—

"पारिजातादिकं पुष्पं सुगन्धिचन्दनादिकम् ।
मयि संन्यस्य तेष्वेव प्रीतिर्नास्ति कदाचन ॥
धुस्तूरे तत् सदा प्रीतिर्बिल्वपत्रानुलेपने ।
गन्धहीने प्रस्तरे च योगेष्टे व्याघ्रचर्म्मणि ॥
दिव्यलोके दिव्यतल्पे जनतायां न तन्मनः ।
श्मशानेऽतीवरहसि ध्यायते मामहर्निशम् ॥"

तस्य महिमादि यथा,—

"व्याब्रह्मस्तम्बपर्य्यन्तं स्वप्नवन्मन्यते शिवः ।
ममानिर्व्वचनीयेऽच रूपे तन्मयमानसम् ॥
ब्रह्मणः पतनेनापि मूलपाणेः क्षयो भवेत् ।
तस्यायुषः प्रमाणञ्च नाहं जानामि का श्रुतिः ॥
ज्ञानं ह्यत्युत्थितं मूलं धत्ते मत्तेजसा समम् ।
विना मया न कश्चित्तं शङ्करं जेतुमीश्वरः ॥
शङ्करः परमात्मा मे प्राणेभ्योऽपि परः शिवः ।
चाम्बके मन्मनः शश्वन्न प्रियो मे भवात् परः ॥
न संवसामि गोलोके वैकुण्ठे तव वक्षसि ।
सदाशिवस्य हृदये निवहः प्रेमपाशतः ॥
स्रष्टुं शक्तो हि नष्टुञ्च भ्रूभङ्गलीलया हि यः ।
ब्रह्माण्डनिकरं योगान्न योगी शङ्करात् परः ॥
दिव्यज्ञानेन यः स्रष्टुं नष्टुं भ्रूभङ्गलीलया ।
ह्यत्युत्कालादिकं शक्तो न ज्ञानी शङ्करात् परः ॥
मम भक्तिश्च दास्यञ्च मुक्तिश्च सर्व्वसम्पदम् ।
सर्व्वसिद्धिं दातुमीशो न दाता शङ्करात् परः ॥
पञ्चवक्त्रेण मन्नाम यशो गायत्यहर्निशम् ।
मद्रूपं ध्यायते शश्वन्न भक्तः शङ्करात् परः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३६ अध्यायः ॥

शिवनैवेद्यभक्षणदोषकारणादिकं यथा,—

राधिकोवाच ।

"एतद्भूतस्य च विभोः सर्व्वेशस्य महात्मनः ।
न श्रुतं कथमुच्छिष्टं ब्रूहि सन्देहभञ्जन ! ॥

श्रीकृष्ण उवाच ।

शृणु देवि ! प्रवक्ष्येऽहमितिहासं पुरातनम् ।
पापिनश्चानां दहने ज्वलदग्निशिखोपमम् ॥
सनत्कुमारो वैकुण्ठमेकदा च जगाम ह ।
ददर्श्य सुप्तवन्तञ्च नाथं नारायणं हरिः ॥
तुतोष गूढैः स्तोत्रैश्च प्रणम्य भक्तितो सदा ।
अवशेषं ददौ तस्मै सन्तुष्टो भक्तवत्सलः ॥
प्राप्तमात्रेण तत्रैव भुक्तं तेनापि किञ्चन ।
किञ्चिदरक्तं वस्तूनां भक्षणाय च दुर्लभम् ।
विद्याश्रमे च तद्दत्तं गुरवे मूलपाणिने ।
भक्त्युद्रेकाच्च तत् सर्व्वं भुक्तञ्च प्राप्तिमात्रतः ॥
शुक्रा सुदुर्लभं वस्तु ननर्त्त प्रेमविह्वलः ।
पपात डमरुर्हस्तात् शृङ्गञ्च व्याघ्रचर्म्म च ॥
स्वयं निपत्य पश्चाच्च रुदन्मूर्च्छामवाप च ।
एतस्मिन्नन्तरे देवी दुर्गा दुर्गतिनाशिनी ॥
सुदा जगाम शीघ्रं तत्प्रसन्नवदनेक्षणा ।
रुदन्तं मूर्च्छितं दृष्ट्वा निपतन्तञ्च भक्तितः ।
प्रहस्य वाणी पप्रच्छ कुमारं मूलपाणिनः ॥
सर्व्वं तां कथयामास कुमारः संपुटाञ्जलिः ।
श्रुत्वा चुकोप सा देवी शिवं प्रस्फुरिताधरा ॥
श्रुत्वा मनोहरं स्तोत्रं न शशाप शिवं शिवा ।
दुष्टं चक्रे तदुच्छिष्टमभक्ष्यं विदुषामपि ॥
सुचिरञ्च तपस्तप्त्वा मया लब्धस्त्वमीश्वरः ।
त्वया विष्णोः प्रसादेन वाञ्छितार्हं कथं विभो ! ॥
यतो न दत्तं नैवेद्यं विष्णोर्मन्त्रं त्वयाधुना ।
अतो मत्तो गृहाणेतत् फलमेव महेश्वर ! ॥
अद्य प्रभृति ये लोका नैवेद्यं भुञ्जते तव ।
ते जन्मैकं सारमेया भविष्यन्त्येव भारते ॥
इत्युक्त्वा पार्व्वती मानाद्ररोद पुरतो विभोः ।
दृष्टिः पपात तत्कण्ठे नीलकण्ठो बभूव सः ॥
अपूर्व्वं तव नैवेद्यं जन्मन्यत्युत्तराहरम् ।
कृतं दुष्टं यतस्तस्मात् पश्य देहं त्यजामि च ॥
लिङ्गोपरि च यद्दत्तं तदेवाग्राह्यमीश्वर ! ।
सुपवित्रं भवेत्तच्च विष्णोर्नैवेद्यमिश्रितम् ॥
इत्येवं कथितं सर्व्वं त्वया दृष्टं सुरेश्वरि ! ।
अभिशप्तं शङ्करस्य निर्म्माल्यं येन हेतुना ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३७ अध्यायः ॥

तस्यावतारा यथा,—

सूत उवाच ।

"वेदव्यासावताराणि द्वापरे कथितानि तु ।
महादेवावताराणि कलौ शृणुत सुव्रताः ॥
आदौ कलियुगे श्वेते देवदेवो महाद्युतिः ।
नाशाय हिताय विप्राणामभूदेवस्तदन्तरे ॥
हिमवच्छिखरे रम्ये शुभे पर्व्वतोत्तमे ।
तस्य शिष्याः शिखायुक्ता बभूवुरमितप्रभाः ॥
श्वेतः श्वेतशिखश्चैव श्वेताश्वः श्वेतलोहितः ।
चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः ॥
सुभावो दमनश्चाथ सुहोत्रः कङ्कणस्तथा ।
लोकाक्षिश्च योगीन्द्रो जैगीषव्यस्तु सप्तमे ॥
अष्टमे दधिवाहुः स्यान्नवमे ऋषभः प्रभुः ।
शृगुस्तु दशमे प्रोक्तस्तस्मादुग्रपरः स्मृतः ॥
द्वादशेऽत्रिः समाख्यातो बाली चाथ त्रयोदशे ।
चतुर्दशे गौतमस्तु वेदशीर्षा ततः परम् ॥
गोकर्णश्चाभवत्तस्माद्गुहावासः शिखण्डाय ।
जटामाल्यश्च हासश्च दारुको लाङ्गली क्रमात् ॥
श्वेतस्तथा परः शूली सिद्धो सुखी च ये क्रमात् ।
सद्भिष्णुः सोमशर्म्मा च कुलीशो वाग्मिसे प्रभुः ॥
वैवस्वतेऽन्तरे शम्भोरवतारास्त्रिशूलिनः ।
अष्टाविंशतिविख्याता ह्यत्र कलियुगे प्रभोः ।
तीर्थकार्य्यावतारः स्याद्वैशो नकुलीश्वरः ॥"

इति कौर्म्मे ५० अध्यायः ॥*॥

तस्याष्टषष्टिनामानि क्षेत्राणि च यथा,—
मनुरुवाच ।
"मन्दरस्थं महादेवं ब्रह्मा पृच्छति शङ्करम् ।
केषु केषु च स्थानेषु द्रष्टव्योऽसि मया प्रभो ! ॥
ईश्वर उवाच ।
वाराणस्यां महादेवं प्रयागे तु महेश्वरम् ।
नैमिषे देवदेवञ्च गयायां प्रपितामहम् ॥
कुरुक्षेत्रे विदुः ख्याञ्च प्रभासे अग्निभूषणम् ।
पुष्करे तु अपोगर्भं विश्वञ्च विमलेश्वरे ॥
अट्टहासे महानादं महेन्द्रे तु महाव्रतम् ।
उज्जयिन्यां महाकालमाकोटे तु महोत्कटम् ॥
शङ्कुकर्णे महातेजं गोकर्णे च महाबलम् ।
भैरवे भैरवाकारं भवं वस्त्रापदे विदुः ॥
उर्यं कनखले चैव भद्रकर्णह्रदे शिवम् ।
देवदारुवने दिव्यं चण्डीशं मध्यमङ्गले ॥
ऊर्द्धरेतं त्वरण्डे तु सकलाक्षं कपर्द्दिनम् ।
क्षत्तिवासमेकाम्रे रुद्रं ताम्रातिकेश्वरे ॥
कालञ्जरे नीलकण्ठं श्रीकण्ठं मण्डलेश्वरे ।
ध्यानं सिद्धेश्वरे योगी गायत्रीचोत्तरेश्वरे ॥
विजयं नाम काश्मीरे जयन्तं मरुकेश्वरे ।
हरिश्चन्द्रे हरिश्चैव पुरिश्चन्द्रे तु शङ्करम् ॥
जटावासेश्वरे विद्यां सौम्यं कुलटकेश्वरे ।
भूतेश्वरे भस्मगात्रं जलशिङ्गे जलेश्वरम् ॥
भिक्षुकं कर्णिकायान्तु वाराहं विन्ध्यपर्व्वते ।
ताम्रं पश्चिमसन्ध्यायां विरजायां त्रिलोचनम् ॥
इन्द्रेश्वरे त्रिशूलन्तु श्रीशैले त्रिपुरान्तकम् ।
जलशिङ्गे विदुः कालिं कापालिं करवीरके ॥
दीप्तचक्रेश्वरे वेदं नेपाले पशुपतिं पतिम् ।
श्रीकारारोहणे कूटं देविकायासुमापतिम् ॥
गङ्गायां सागरे त्वमरमोङ्कारममरकण्टके ।
सप्तगोदावरे भीमं स्वयम्भुं नकुलेश्वरे ॥
कर्णिकारे गणाध्यक्षं कैलासे च गणाधिपम् ।
हेमकूटे विरूपाक्षं भूभुवं गन्धमादने ।
सिद्धेश्वरन्तु आकाशे पाताले चट्टकेश्वरम् ॥
अष्टषष्टिञ्च नामानि देवदेवस्य धीमतः ।
पुराणे चोपगीतानि ब्राह्मणस्य स्वयम्भुवा ॥
यः पठेत् प्रातरुत्थाय स्नातो वा यदि वा शुचिः ।
मुच्यते सर्व्वपापेभ्यः शिवलोकं स गच्छति ॥"
इत्याद्ये देवीपुराणे अष्टषष्टिनामानि महादेवस्य ॥*॥ तस्य द्वादशनामस्तोत्रम् ।
"प्रथमस्तु महादेवो द्वितीयस्तु महेश्वरः ।
तृतीयः शङ्करो ज्ञेयश्चतुर्थो वृषभध्वजः ॥
पञ्चमः क्षत्तिवासाश्च षष्ठः कामाङ्गनाशनः ।
सप्तमो देवदेवेशः श्रीकण्ठश्चाष्टमः स्मृतः ॥
ईश्वरो नवमो ज्ञेयो दशमः पार्व्वतीपतिः ।
रुद्र एकादशश्चैव द्वादशः शिव उच्यते ॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
क्षतघ्नश्चैव गोघ्नश्च ब्रह्महा गुरुतल्पगः ॥
स्त्रीबालघातकश्चैव सुरापो वृषलीपतिः ।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकं स गच्छति ॥"
इति स्कन्दपुराणम् ॥*॥

तन्नामोच्चारणफलं यथा,—
"कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
सद्यः प्रलयमायान्ति महादेवेति कीर्त्तनात् ॥
महादेव महादेव महादेवेति वादिनम् ।
वृतघ्नं गौरिव गौरीशो धावन्तमनुधावति ॥"
इति पुराणम् ॥*॥
तस्य प्रणाममन्त्रः ।
"नमस्ते त्वां महादेव ! लोकानां गुरुमीश्वरम् ।
पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम् ॥"
इति श्रीभागवतम् ॥
"महादेवं महात्मानं महायोगिनमीश्वरम् ।
महापापहरं देवं मकाराय नमो नमः ॥"
इति तन्त्रम् ॥*॥
तस्य कालरूपवर्णनं यथा,—
नारद उवाच ।
"कालरूपी त्वया ख्यातः शम्भुर्गगनगोचरे ।
लक्षयञ्च स्वरूपञ्च सर्व्वं व्याख्यातुमर्हसि ॥
पुलस्त्य उवाच ।
स्वरूपं त्रिपुरघ्नस्य वह्निर्य्ये कालरूपिणः ।
अश्विनी भरणी चैव कृत्तिका प्रथमांशकम् ॥
मेषकं हि विजानीयात् कुजक्षेत्रमुदाहृतम् ।
आग्नेयांशात्रयो ब्रह्मन् ! प्राजापत्यं कवेर्गृहम् ॥
सौम्यार्द्धं दक्षनामेदं वदनं परिकीर्त्तितम् ।
मृगार्द्धमार्द्रादित्यांशात्रयः सौम्यगृहन्त्विदम् ॥
मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिनः ।
आदित्यांशञ्च पुष्यञ्च अश्लेषा अग्निनो गृहम् ॥
राशिः कर्कटको नाम पार्श्वेन खविलासिनः ।
पित्र्यर्क्षं भगदेवत्यं उत्तरांशञ्च केशरी ॥
हृत्पद्मक्षेत्रं विभोर्ब्रह्मन् हृदयं परिकीर्त्तितम् ।
उत्तरांशात्रयः पाणिश्चित्रार्द्धं कन्यका त्विदम् ॥
सोमपुत्रस्य सद्मेतत् द्वितीयं जठरं विभोः ।
चित्रांशद्वितयं स्वाती विशाखायांशकत्रयम् ॥
द्वितीयं शुक्रसदनं तुलानाभिरुदाहृतम् ।
विशाखांशमनुराधा ज्येष्ठा भौमगृहं त्विदम् ॥
द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः ।
मूलं पूर्व्वोत्तरांशञ्च देवाचार्य्यगृहं धनुः ॥
ऊरुयुगलमीशस्य अमर्षे ! प्रगीयते ।
उत्तरांशात्रयो ऋक्षं श्रवणं मकरो सुने ! ॥
धनिष्ठार्द्धं शतभिक्षेत्रं जानुनी परिकीर्त्तिते ।
धनिष्ठार्द्धं शतभिषा प्रोष्ठपद्यांशकत्रयम् ॥
सौरं सद्मापरमिदं कुम्भो जङ्घे च विश्रुते ।
प्रोष्ठपद्यांशमेकन्तु उत्तरा रेवती तथा ॥
द्वितीयं जीवसदनं मीनस्तु चरणावुभौ ॥
एवं ज्ञात्वा कालरूपं त्रिनेत्रो
यज्ञं क्रोधान्मार्गणैराजघान ।
विद्युच्चापौ वेदनादुद्विपुक्तः
खे सन्तस्थौ तारकाभिश्चिताङ्गः ॥"
इति वामनपुराणे ५ अध्यायः ॥
महादेवी, स्त्री, (महादेवस्य पत्नीति । पत्न्यर्थे ङीष् । यद्वा, महती चासौ देवी चेति ।) दुर्गा । यथा,
"अपर्णा स्यान्महादेवी गिरिजा मेनकात्मजा ।"
इति हलायुधः ॥

तस्या उत्पत्तिर्यथा,—
"पूज्यते या सुरैः सर्व्वैर्महादेवीव प्रभावतः ।
धातुर्मह इति पूजायां महादेवी ततः स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
राज्ञी । पाटराजी इति भाषा । तत्पर्य्यायः । महिषी २ भट्टार्हा ३ भट्टदेवी ४ । इति राजनिर्घण्टः ॥ (यथा, कथासरित्सागरे । ५ । ७६ ।
"अलिखत् स महादेवीं योगनन्दश्च तं पटे ।
सजीवमिव तच्चित्रं वाक्चेष्टारहितं त्वभूत् ॥")
महादेव्यः, पुं, (महांश्चासौ देवश्चेति ।) औषधविशेषः । यथा,—
"चतुर्दशस्य भौमस्य ग्रहस्य पुत्रान्नवोमम ।"
इत्युपक्रम्य ।
"शुचिरिन्दो महादेवो रिपुर्हन्ता हरिः स्वयम् ॥"
इति गारुडे ७८ अध्यायः ॥
महाद्रावकः, पुं, (द्रावयति रोगानिति । द्रु + णिच् + ण्वुल् । महांश्चासौ द्रावकश्चेति ।) औषधविशेषः । द्रावक इति भाषा । यथा,—
"यवक्षारस्य भागौ द्वौ स्फटिकारेक्षयो मताः ।
एकीकृत्य प्रपिष्यापि मूत्रैर्बल्वतरोर्भवैः ॥
शुष्कं कृत्वा क्षिपेत् पात्रे सैसके वस्त्रलेपिते ।
अन्यसौसकपात्रन्तु द्विमुखं मेलयेद्बुधः ॥
दृढवेधोपदेशेन पचेत् पात्रस्यमौषधम् ।
ततो ज्वालाधतः स्राव्यं पात्रान्तं जभते रसम् ॥
ततो रसं विनिष्कृष्य स्थापयेत् स्निग्धभाजने ।
लवङ्गेन वटीं कुर्य्यादथवा ऋततालकैः ॥
प्लीहादिशूलरोगेषु दापयेत् रक्तिकां भिषक् ।
द्रवीकरोति रोगञ्च महाद्रावकसंज्ञकः ॥
क्षित्रे च दद्रुरोगे च प्रलेपं द्रावकस्य च ।
वह्निवज्जलनं तस्य दधि दत्त्वा प्रलेपयेत् ॥"*॥
अपि च ।
"दृषच्चित्रमपामार्गं चित्रा कृष्णाकणाधिका ।
खुरी तालस्य पुष्पञ्च वर्षाभूर्ज्जैतसं तथा ॥
एतेषां चारमाहृत्य लिम्बाकखरसेन च ।
चालयित्वा चारतोयं वस्त्रपूतञ्च कारयेत् ॥
पक्वातपेन संशोष्य स्राव्यं तद्द्रवशोचितम् ।
एतस्य द्विपलं स्राव्यं यवक्षारपलद्वयम् ॥
स्फटिकारिपलञ्चैव नरसारपलं तथा ।
पलार्द्धं सैन्धवं स्राव्यं टङ्कणं तोलकद्वयम् ॥
कासीसं तोलकञ्चैव सुस्राग्रञ्च तोलकम् ।
दारमोचं कर्षकञ्च तोलं वसुप्रपेणकम् ॥
सर्व्वमेकत्र संचूर्ण्य वकयन्त्रेण साधयेत् ।
महाद्रावकमेतद्धि योज्यञ्च रसकर्म्मणि ।
हन्ति गुल्मादिकान् रोगान् यकृत्प्लीहोदराणि च ॥" * ॥
इति भैषज्यरत्नावली ॥
(तथापरञ्च ।
"शुद्धं काञ्चनमाक्षिकं मृदुतरं कांस्याभिधेयन्तथा
सिन्यूत्थं विमलं रसाञ्जनवरं फेनं स्रवन्तीपतेः ।

चारौ सर्ज्जिकसम्भवौ सुविमलौ भागाक्ष-
मौषां समाः
समानां सदृशस्तु टङ्कणमिह क्षारौ तृसारः
स्मृतः ॥
तत्तुल्या स्फटिकारिका त्रिसदृशः शुद्धो यव-
क्षाग्रजः
कार्ग्रीग्रन्थितयं यवाग्रजसमं सर्व्वं
न्यसेत् ।
पात्रे काचमये नदम्बरहते सोऽयं महाद्रावको
नो वक्तुं प्रभवेदसुष्य नितरां सम्यग्गुणं भूतले ॥
एतल्लवणचतुष्टयं त्रिवेदथो शुक्ष्मा लवङ्गेन वा
तत्पश्चात् परिवासितं बहुगुणं ताम्बूलकं
भक्षयेत् ।
प्रासङ्गात् कथयामि ते शृणु गुणान् कांश्चि-
त्तथान्यान् परान्
निःशेषं विनिहन्ति तानि चिरजान्यष्टौदराणि
ध्रुवम् ॥
गुल्मं पाण्डुकलीमकं सुकठिनामष्ठीलिकां
कामलां
मन्दाग्निं विषमाग्नितां बहुविधान् ग्रोथांश्च
शूलान्यपि ॥"*॥

इति वैद्यककषायसंग्रहे ग्रीहाधिकारे ॥)

महाद्रुमः, पुं, (महांश्चासौ द्रुमश्चेति ।) अश्वत्थवृक्षः । इति शब्दचन्द्रिका ॥ हरिद्रुवर्णश्च ॥ (यथा, हरिवंशे । २२३ । ७२ ।

"चकोराः शतपत्राश्च मत्तकोकिलसारसाः ।
पुष्पितान् फलितांश्चैव संपतन्ति महाद्रुमान् ॥"

प्राक्कद्रौपपतेर्भेदस्य सप्तमः पुत्रः । यथा, मार्कण्डेये । ५३ । २१ ।

"अलदश्च कुमारश्च सुकुमारो मनोवकः ।
कृष्णोत्तरोऽथ मेधावी सप्तमस्तु महाद्रुमः ॥")

महाद्रोणा, स्त्री, (महती चासौ द्रोणा चेति ।) वृक्षविशेषः । बड़ी द्रोणपुष्पी इति हिन्दी भाषा । तत्पर्य्यायः । देवकुसुमा २ दिव्यपुष्पा ३ महाद्रोणी ४ देवी ५ काञ्ची ६ देवद्रोणा ७ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । मेध्यत्वम् । भूतार्त्तिवातकफापित्तमान्द्यनाशित्वम् । वृष्या पारदशोधनत्वञ्च । इति राजनिर्घण्टः ॥

महाद्रोणी, स्त्री, (महती चासौ द्रोणी चेति ।) महाद्रोणाक्षुपः । इति राजनिर्घण्टः ॥

महाद्वन्द्वः, पुं, (महान् द्वन्द्वः कोलाहलो यत्र ।) युद्धस्थानम् । इति शब्दरत्नावली । अतिग्रथकलहश्च ॥

महाधनं, क्ली, (महत् अनेकं धनं मूल्यत्वेनास्य ।) बहुमूल्यवस्त्रम् । इत्यमरः । २ । ६ । ११३ ॥ सुवर्णम् । सिक्थकम् । इति हेमचन्द्रः ॥ क्षौमः । इति शब्दरत्नावली ॥ (महद्भिरेकं धनमस्मात् । संग्रामः । इति त्रिकाण्डशेषः । २ । १७ । यथा, ऋग्वेदे । ८ । ६४ । १२ ।

"मा नो अस्मिन्महाधने परावर्गभारभृद्
यथा ॥"

"महाधने संग्रामे ।" इति तट्टीकायां सायणः ॥ महच्च तद्धनञ्चेति । प्रभूतधनम् । यथा, ऋग्वेदे । १ । ७ । ५ ।

"इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे ॥"

"महाधने प्रभूतधननिमित्तम् ।" इति तट्टीकायां सायणः ॥ बहुलार्थे, त्रि । यथा, किरातार्জ্জुनीये । १ । ३८ ।

"पुराधिरूढं शयनं महाधनं
विबोधसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य संशयी
जहासि निद्रामशिवः शिवारुतैः ॥")

अतिशयधनयुक्ते, त्रि ॥

महाधातुः, पुं, (महांश्चासौ धातुश्चेति ।) स्वर्णम् । इति शब्दचन्द्रिका ॥

महाध्वनिकः, पुं, (अध्वनि गच्छतीति । अध्वन् + ठक् । महांश्चासौ आध्वनिकश्चेति ।) पुण्यार्थं हिमालयावधिकमहापथगमनेन सम्पादितमरकः । यथा, "भ्रूवधिजलसंग्रामदेशान्तरस्थसंन्यासानशनाग्निमहाध्वनिकानामुदकक्रिया कार्य्या सदःशौचं भवतीति ।" इति शुद्धितत्त्वधृतसुमन्तुसूत्रम् ॥

महान्, [त्] त्रि, (मह्यते पूज्यते वेति । मह + "वर्द्धमाने पृषद्बृहन्महज्जगच्छतवच ।" उणा० २ । ८४ । इति अतिः । निपात्यते ।) बृहत् । इत्यमरः । ३ । १ । ६० । (यथा, मनौ । ८ । २८६ ।

"प्राक्शतेषु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु ॥")

अस्य पर्य्यायः महच्छब्दे द्रष्टव्यः ॥

महान्, पुं, (मह्यते सेव्यते आश्रीयते गमनायेति । मह + अतिः ।) उद्गः । इति राजनिर्घण्टः ॥ दुर्गा । यथा,—

"महान् यात्र स्थिता सर्व्वं महा वा प्रकृतिर्मता ।
स्मृतिः संसारबाहुल्यं नियतौ च नियामता ॥"

इति देवीपुराणे ४५ अध्यायः ॥

महत्तत्त्वम् । यथा —

"सविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते ।
महानिति यतः ख्यातिर्लोकानां जायते सदा ॥"

इति मात्स्ये २ अध्यायः ॥

(महादेवः । यथा, महाभारते । १३ । १७ । १२ ।

"अग्नी शूलधरे खड्गी पट्टिशी चायुधी महान् ॥")

महच्छब्दप्रयोगनिषेधो यथा,—

"मृडे तेले तथा मांसे वेद्ये ज्योतिषिके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥"

इति भट्टिप्रथमसर्गीयचतुर्थश्लोकटीकायां भरतः ॥

महानटः, पुं, (महांश्चासौ नटो नर्त्तकश्चेति । उद्भटनर्त्तकत्वादस्य तथात्वम् ।) शिवः । इति त्रिकाण्डशेषः ॥

महानदी, स्त्री, (महती चासौ नदी चेति ।) पुरुषोत्तमक्षेत्रान्तर्गतकटकस्रोतस्तरदेशस्थनदीविशेषः । तस्या नामान्तरं चित्रोत्पला । यथा, "नदी तत्र महापुण्या विन्ध्यपादविनिर्गता ।
चित्रोत्पलेति विख्याता सर्व्वपापहरा शुभा ॥
चित्रोत्पला महानदी ।" इति पुरुषोत्तमतत्त्वम् ॥ गङ्गा । यथा,—

"अमुजममुनि जातं
जातु न जायते अमुजादमु ।
सुरहर ! तव विपरीतं
पादाम्बजान्महानदी जाता ॥"

इत्युद्भटः ॥

महानन्दः, पुं, (महानासौ नन्दश्च ।) मुक्तिः । इति हलायुधः ॥ (महान् आनन्दः ।) अतिग्रथाह्लादश्च ॥ (वृषतिविशेषः । यथा, मार्कण्डेये । १३४ । ४० ।

"इत्युक्त्वा तान् महीपालान् महानन्दसुखान्
बली ।
अथाब्रवीत्तदा सर्व्वान् महारिदमनो दमः ॥"

वेणुविशेषः । यथा, सङ्गीतदामोदरे ।

"महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा ।
चत्वार उत्तरवंश्या मातङ्गमुनिसम्मताः ॥")

महानन्दा, स्त्री, (महानासौ नन्दीश्चेति ।) सुरा । इति राजनिर्घण्टः ॥ माघशुक्ला नवमी । यथा, भविष्ये ।

"माघमासस्य या शुक्ला नवमी लोकपूजिता ।
महानन्देति सा प्रोक्ता सदानन्दकरी नृणाम् ॥
स्नानं दानं जपो होमो देवार्च्चनमुपोषणम् ।
सर्व्वं तदक्षयं प्रोक्तं यदस्यां क्रियते नरैः ॥"

इति तिथ्यादितत्त्वम् ॥

नदीविशेषः । सा पद्माया विनिःसृता रामपुराख्यग्रामात् पश्चिमत उत्तरदिग्गता ॥ (दक्षिणदेशीयो नदीभेदः । यथा, महाभारते । २३ । २५ । ४३ ।

"पुनरावर्त्तनन्दाश्च महानन्दाश्च सेव्य वै ।
नन्दने सेवते दान्तस्त्रिरात्रोभिरहिंसकः ॥")

महानन्दिः, पुं, (आ सम्यक् नन्दतीति । आ + नन्द् + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् । ततः । महानासौ नन्दिश्चेति ।) नन्दिवर्द्धनराजपुत्रः । यथा,—

"चत्वारिंशत्तथा भाव्यो राजा वै नन्दिवर्द्धनः ।
चत्वारिंशत्तथैवेह महानन्दिर्भविष्यति ॥
महानन्दिसुतश्चापि शूद्रायां कलिकांशजः ।
उत्पत्स्यते महापद्मः सर्व्वक्षत्रान्तको नृपः ॥
ततः प्रभृति राजानो भविष्याः शूद्रयोनयः ।
एकराट् स महापद्म एकच्छत्रो भविष्यति ॥"

इति मत्स्यपुराणे २७६ अध्यायः ॥

अपि च ।

"महानन्दिसुतः शूद्रागर्भोद्भवोऽतिबुधो महापद्मानन्दः परशुराम इवापरोऽखिलक्षत्रियान्तकारी भविता ततः प्रभृति शूद्रा भूपाला भविष्यन्ति । तेन महानन्दिपर्य्यन्तं क्षत्रिय आसीत् ।" इति शुद्धितत्त्वधृतविष्णुपुराणम् ॥

महानरकः, पुं, (महानतिशयवतानरकाणां समूहः ।) अतिशयनानाप्रकारयातनास्थानम् । इति पुराणम् ॥ (यथा, मनुः । ४ । ८८ ।

"तामिस्रमन्धतामिस्रं महारौरवरौरवौ।
नरकं कालसूत्रञ्च महानरकमेव च॥")

महानलः, पुं, (महांश्चासौ नलश्चेति।) देवनलः। इति राजनिर्घण्टः॥ (महांश्चासौ अनलश्चेति।) इहदग्निश्च॥

महानवमी, स्त्री, (महती चासौ नवमी चेति।) आश्विनशुक्लनवमी। यथा,—

श्रीभगवानुवाच।

"दुर्गातस्त्रेव मन्त्रेण कुर्य्युर्दुर्गामहोत्सवम्।
महानवम्यां प्रददि बलिदानं नृपादयः॥
आश्विने शुक्लपक्षस्य भवेद्या अष्टमी तिथिः।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा॥
ततोऽनु नवमी या स्यात् सा महानवमी स्मृता।
सा तिथिः सर्व्वलोकानां पूजनीया शिवाप्रिया॥"

इति कालिकापुराणे ५७ अध्यायः॥

अपि च।

"प्रावृट्काले विशेषेण आश्विने शुक्लमीदृशे च।
महाशब्दो नवम्यान्तु लोके ख्यातिं गमिष्यति॥"

इति तिथ्यादितत्त्वम्॥

महानसं, क्ली, (महच्च तत् अनञ्चेति। +"अनोऽप्रायःसरसां जातिसंज्ञयोः।" ५। ४। ६४। इति संज्ञायां टच्। "आन्महतः समानाधिकरणजातीययोः।" ६। ३। ४६। इति महत आकारादेशः।) रन्धनगृहम्। तत्पर्य्यायः। रसवती २ पाकस्थानम् ३। इत्यमरः। २। ६। २७॥ (तथास्य लक्षणं यथा,—

"प्रशस्तदिग्देशगतं शुचिभाजं महच्छुचि।
सजालकं गवाक्षाढ्यमालम्बर्गनिवेशितम्॥
विकृष्णलक्ष्मसंस्कारं सवितानं कृतार्चनम्।
वरौचितस्त्रीपुरुषं भवेद्वापि महानसम्॥
तत्राध्यक्षं नियुञ्जीत प्रायो वैद्यगुणान्वितम्।
शुचयो दक्षिणा दान्ता विनीताः प्रियदर्शनाः॥
सविभक्ताः सुमनसो नीचकेशनखाः स्थिराः।
स्नाता दृढं संयमिनः कृतोष्णीषाः सुसंवृताः॥
तस्य चाज्ञा विधेयाः स्युर्विविधाः परिकर्म्मिणः।
आहारस्थितयश्चापि भवन्ति प्राणिनो यतः॥
तस्मान्महानसे वैद्यः प्रमादरहितो भवेत्।
माहानसिकवीर्य्यज्ञः सौपौदनिकपौषिकः॥
भवेयुर्वैद्यवशगा ये चाप्यन्ये तु केचन।")

इति सुश्रुते कल्पस्थाने प्रथमेऽध्याये॥)

तद्विवरणं यथा,—

"आग्नेय्यां दिशि कर्त्तव्यमावासस्य महानसम्।
गवाक्षजालमार्गाय मृद्भिस्तुषप्लेपितम्॥
शुक्लौ तत्र प्रकर्त्तव्या पूर्व्वपश्चिममायता।
मृक्षयादीनि भाण्डानि स्थालितानि च वारिणा॥
तेषु यत् पच्यते द्रव्यं गुणवत् सर्व्वसम्मतम्।
मृद्भावे पचेल्लोहे चतुरङ्गोविकारजित्॥
कांस्यजे पाचितं यद्धि तद्धितं मतिदं शुचि।
यच्च ताम्रमये सिद्धं न रुच्यं तत्पित्तकृत्॥
सौवर्णे राजते पात्रमाढ्यभूमिभृतां गृहे।
तत्पात्रं सर्व्वदोषघ्नं श्रियश्चोत्सवदायकम्॥
अथ महानसोपयोग्योपकरणानि।
"वस्तूनि भोजनार्हाणि विविधानि पृथक् पृथक्।
सर्व्वाणि गुणयुक्तानि स्थापितानि महानसे॥
दारुपात्रमार्জ্জनी वाढ़ा पूतहड्डी सुकूर्चिका।
कर्षणी वेणवं पात्रं जलपूर्णखलिञ्जरः॥
वह्निसंजननो न्यायः कुद्दालं सुकुठारकः।
दारुखण्डानि शुष्काणि हस्तमात्राणि चैव नम्॥
अजीर्णान्यतिस्थूलान्यजन्तून्यमलानि च।
तिलयुक्तानि पीठो सुषलं चाप्यदूषणम्॥
सुपर्णोदूखिला दर्व्वी चतुरस्रावपट्टिका।
संदंशकन्तु युगलं वस्त्रखण्डचतुष्टयम्॥
नालिका क्षुरिका चैव सुशूलं सुकटाहकम्।
वह्निसञ्चालनार्थाय दर्व्वी दीर्घा सुलोहजा॥
तन्दूरभर्भरी सावा तप्रकं दृढ़वेष्टनी।
इत्यादि वस्तुजातं हि युज्यते च महानसे॥"

इति पाकराजेश्वरः॥

तत्र रक्षणीया जना यथा,—

"क्षुद्रशास्त्रविधानज्ञाः परामेद्याः कुलोद्गताः।
सर्व्वे महानसे धार्य्या सुप्रकेशनखा जनाः॥"

इति मात्स्ये १८६ अध्यायः॥

महानसोऽपि पुंसि। इत्यमरटीकायां रमानाथः॥

महानाटकं, क्ली, (महच्च तत् नाटकञ्चेति।) नाटकविशेषः। तस्य लक्षणं यथा,—

"एतदेव यदा सर्व्वैः पताकास्थानकैर्युतम्।
अङ्कैश्च दशभिर्वीरा महानाटकमुच्यते॥
एतदेव नाटकम्। यथा, बालरामायणम्।"

इति साहित्यदर्पणः॥ खनामख्यातहनूमन्नञ्चितरामचरितग्रन्थविशेषः। यथा,—

"एष श्रीहनूमता विरचिते श्रीमन्महानाटके
वीरश्रीयुतरामचन्द्रचरिते प्रत्युद्भटे विक्रमैः।
मिश्रश्रीमधुसूदनेन कविना सन्दर्भ्य सञ्जीवते
स्वर्गारोहणनामकोऽत्र नवमो यातोऽङ्क एवेत्यसौ॥"

इति तस्यान्तिमः श्लोकः॥

महानाड़ी, स्त्री, (महती चासौ नाड़ी चेति।) कक्करा। इति राजनिर्घण्टः॥ (विवरणमस्याः कक्कराशब्दे द्रष्टव्यम्॥)

महानादः, पुं, (महान् नादोऽस्य।) हस्ती। वर्षुकमेघः। (महांश्चासौ नादश्चेति।) महाशब्दः। इति मेदिनी। दे, ५१॥ (यथा, महाभारते। ५। ६६। २।

"इदमङ्गिः समं प्राप्ता ये केचिद्भुवनङ्गमाः।
प्रविशन्तो महानादं नदन्ति भयपीड़िताः॥")

सिंहः। कर्षः। इति हेमचन्द्रः॥ उष्ट्रः। गृध्रः। इति राजनिर्घण्टः॥ काहलवाद्यम्। इति हारावली॥ (महादेवः। यथा, महाभारते। १३। १७। ४८।

"निशाचरः प्रेतचारी भूतचारी महेश्वरः।
कालयोगी महानादः सर्व्वकामश्चतुष्पथः॥"

महाशब्दयुक्ते, त्रि। यथा, रामायणे। ४। ४०। ३८।

"तत्तूर्य्यनादमेव प्रतिमं महोरगनिषेवितम्।
अभिगम्य महानादं तीर्थेनैव महोदधिम्॥")

महानिद्रा, स्त्री, (महती सुदीर्घा चासौ निद्रा चेति।) मरणम्। इति जटाधरः॥

महानिम्बः, पुं, (महांश्चासौ निम्बश्चेति।) निम्बवृक्षविशेषः। घोड़ा निम इति भाषा। तत्पर्य्यायः। कैटर्य्यः २ पवनेष्टः ३ पार्व्वतः ४। इति रत्नमाला॥ (यथा,—

"स्तनस्तनाभनागश्च स्वर्णं तुल्यं प्रकल्पयेत्।
महानिम्बस्य चूर्णन्तु चतुर्भिः समभाहरेत्।
मधुना वेष्टयेन्नाभं लालामेहप्रशान्तये॥"

इति वैद्यकरत्नेन्द्रसारसंग्रहे प्रमेहाधिकारे॥)

अस्य गुणाः। परमग्निदीप्तिकरम्। कषायत्वम्। अम्लत्वम्। शीतलत्वञ्च। इति राजवल्लभः॥ (तथास्य पर्य्यायान्तरं गुणाश्च।

"महानिम्बः स्तुतीक्ष्णैका रम्यको विषतिक्तकः।
कैरातसुरिनिम्बश्च कार्म्मुको जीव इत्यपि॥
महानिम्बो हिमो रूक्षश्चक्षुष्यो ग्राही कषायकः।
कफपित्तश्रमच्छर्दिकृमिकुष्ठज्वरक्षयित्।
प्रमेहवातगुल्मार्शो स्त्रीकाविषनाशनः॥")

महानिशा, स्त्री, (महती घोरा निशा।) निशामध्यभागः। तत्पर्य्यायः। निशार्द्धः २ निशीथः ३। इति हेमचन्द्रः। २। ५६॥*॥

स्मृत्युक्तमहानिशा सार्द्धप्रहरोपरि प्रहरद्वयम्।

"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्।
तत्र स्नानं न कुर्व्वीत कामनैमित्तिकादृते॥"

इति रघुनन्दनभट्टाचार्य्यधृतवचनात्।

महानिशापरकालस्य गाढ़ीचतुष्टयस्य परदिनादिलेन तदानीं पूर्व्वदिवसीयभोजनाद्ययपत्तेः। तद्दिनजलोपपत्तेश्चेति तिथितत्त्वीयलिखनस्वरसाच्च॥*॥ तत्र भक्षणनिषेधो यथा,—

"वस्तुदूर्ध्वे यतौते तु रात्रावेव महानिशा।
लभते ब्रह्महत्यां च तत्र शुद्धा च नारद!॥
गोमांसविण्मूत्रसमं ताम्बूलञ्च फलं जलम्।
पुंसामभक्ष्यं शुद्धायामोदनस्यापि का कथा॥"

इति ब्रह्मवैवर्त्तपुराणम्॥

तत्र पारणनिषेधो यथा,—

"न रात्रौ पारणं कुर्य्याद्वते वै रोहिणीव्रतात्।
निशायां पारणं कुर्य्याद्भुक्त्वेयित्वा महानिशाम्॥
महानिशायां प्राप्तायां तिथिभागं यदा भवेत्।
ततोऽर्द्धमपि सुश्रोणि! पारणं कुरुते व्रती॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः॥

देवोक्ता महानिशा रात्रिमध्यमरूढ़द्वयात्मिका। सा द्वितीयप्रहरार्द्धदण्डतृतीयप्रहर-

प्रथमदक्षरूपा। तस्या शिवलिङ्गोद्भवो यथा,
"माघशुक्लचतुर्दश्यामादिदेवो महानिशि।
शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः॥"
अत्र।
"महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः॥"
इति देवलोक्ता महानिशा॥
घटिका दक्षरूपा। इति तिथ्यादितत्त्वम्॥
तान्त्रिकमहानिशा यथा, तन्त्रसारे।
"गते तु प्रथमे यामे तृतीयप्रहरावधि।
महानिशायां जप्तव्यं रात्रिशेषे जपेन्न तु॥"
अपि च।
"निशा तु परमेशानि! सूर्य्ये चास्तमुपागते।
प्रहरे च गते रात्रौ घटिके द्वे परे च ये।
महानिशा समाख्याता ततश्चातिमहानिशा॥
अर्द्धरात्रे गते देवि! पशुभावेन पूजयेत्।
दक्षदक्षे तु या पूजा तत् सर्व्वमक्षयं भवेत्॥
वक्षःक्रोडे महेशानि! तत् सर्व्वमन्त्रतोपमम्।
सप्तमक्रोडगे देवि! सर्व्वं चीरोपमं भवेत्॥
अष्टमक्रोडगे देवि! ब्रह्मतुल्यं न संशयः।
अतःपरं महेशानि! शिवतुल्यो न संशयः॥
एतत् सर्व्वं महेशानि! पशुभावे मयोदितम्।
दिव्यवीरमते देवि! तत्त्वज्ञानेन पूजयेत्॥
पञ्चतत्त्वं समानीय यदि पूजापरो भवेत्।
कालाकालं महेशानि! विचारं तत्र वर्ज्जयेत्॥
अर्द्धरात्रगते देवि! कुलपूजा प्रकीर्त्तिता।
भवेत्तत्त्वानुरूपेण सर्व्वं पूजादिकञ्चरेत्॥
अतिरहस्येन देवेशि! तव स्नाने प्रकाशितम्।
पशोरग्रे कदाचिद्वै प्रकाशं नैव कारयेत्॥"
इति गुप्तसाधनतन्त्रे ६ पटलः॥

महानीचः, पुं, (महानतिशयो नीचः।) रजकः। इति शब्दमाला॥ अतिशयहीनवर्णश्च॥

महानीलः, पुं, (महान् नीलः नीलवर्णः।) भृङ्गराजः। नागविशेषः। मणिविशेषः। इति मेदिनी। ले, १६१॥ (यथा; शिशुपालवधे। १। १६।
"महामहानीलशिलारुचः पुरो
निषेदिवान् कंसरुषः स विष्टरे॥"
"सिंहलस्थाकराद्भूता महानीलास्तु ते स्मृताः॥
इति भगवानगस्त्यः॥" इति तट्टीकायां मल्लिनाथः॥) तस्य लक्षणं यथा,—
"यस्तु वर्णस्य भूयस्त्वात् चीरे शुक्लगुणे स्थितः।
नीलतां तनुयात् सर्व्वं महानीलः स उच्यते॥"
इति गारुडे ७२ अध्यायः॥
(गुग्गुलुजातिभेदः। तद्यथा,—
"महिषाक्षो महानीलः कुसुदः पद्म इत्यपि।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः॥
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः।
महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
सुमेरोर्दक्षिणपार्श्वस्थपर्व्वतविशेषः। यथा, मार्कण्डेये। ५५। ४।

"शुक्लतार्क्षकसुक्षत्र कुक्षीरोऽथ सुकक्षवान्।
मणिग्रैलोऽथ दृषवान् महानीलो भवाचलः॥")
महानीला, स्त्री, (महती चासौ नीला नीलवर्णा चेति।) महाजम्बूः। इति राजनिर्घण्टः॥ (विशेषोऽस्य महाजम्बूशब्दे विज्ञेयः॥)
महानीली, स्त्री. (नील+"नीलाद्दोषधौ।" ४। १। ४२। इति वार्त्तिकोक्त्या ङीष्। ततः। महती चासौ नीली चेति।) नीलापराजिता। दक्षनीली। तत्पर्य्यायः। अमरा २ जनिनीलिका ३ तुत्था ४ श्रीफलिका ५ मेला ६ केशार्हा ७ भर्तृसपत्निका ८। अस्या गुणाः। गुणाढ्यत्वम्। रङ्गश्रेष्ठत्वम्। सुवर्णदात्रत्वम्। नीलिकामपेक्ष्य सर्व्वकर्म्मसु सगुणत्वम्। इति राजनिर्घण्टः॥
महानुभावः, त्रि, (महाननुभावो माहात्म्यमस्य।) महाप्रभावः। यथा,—
"सुव्रती पुण्यवान् धन्यो धर्म्मी च धर्म्मवानपि।
महाप्रभो महेच्छः स्यान्महानुभाव इत्यपि॥"
इति शब्दरत्नावली॥
(महात्मा। यथा, शिशुपालवधे। २। १७।
"ग्रहीतुमार्य्यान् परिचर्य्यया सुहु-
र्महानुभावा हि नितान्तमर्थिनः॥")
महान्तः, पुं, (महत्+प्रथमाबहुवचनरूपम्।) नवधाभक्तियुक्तलक्षणभक्ताः। ते शिवशैवधर्म्मादयः। यथा,—
"शिवः शैवश्च धर्म्मश्च ब्रह्मा विष्णुर्महान् विराट्।
सनत्कुमारः कपिलः सनकश्च सनन्दनः॥
धौम्यः पञ्चशिखो दक्षो नारदश्च सनातनः।
भृगुर्मरीचिर्दुर्वासाः कश्यपः पुलहोऽङ्गिराः॥
मेधसो लोमशः शुक्रो वशिष्ठः क्रतुरेव च।
दक्षस्मृतिः कर्दमश्च प्रक्रिरचिः पराशरः॥
मार्कण्डेयो बलिश्चैव प्रह्लादश्च गणेश्वरः।
यमः सूर्य्यश्च वरुणो वायुश्चन्द्रो हुताशनः॥
अक्रूपार उलूकश्च गाङ्गेयश्च वायुजः।
नरो नारायणः कूर्म्मो दत्तात्रेयो विभीषणः॥
नवधाभक्तियुक्ताश्च लक्षणस्य परमात्मनः।
एते महान्तो धर्म्मिष्ठा भक्तानां प्रवरास्तथा॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६० अध्यायः॥
महापञ्चमूलं, क्ली, (पञ्चानां बिल्वादिमूलानां समाहारः। ततः महच्च तत् पञ्चमूलञ्चेति।) दशत् पञ्चमूलम्। तद्यथा,—
"बिल्वोऽग्निमन्थः श्योनाकः काश्मर्य्यः पाटला तथा।
सर्व्वेषु मिलितेष्वेतेः स्यान्महापञ्चमूलकम्॥"
इति राजनिर्घण्टः॥
(यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये।
"विनिर्गमार्थं वायोश्च खादयेच्च सुदुर्मुहुः।
चीरं महापञ्चमूलं शशिकां चाम्लवर्ज्जिताम्॥")
महापञ्चविषं, क्ली, (पञ्चानां विषाणां समाहारः। ततो महच्च तत् पञ्चविषञ्चेति।) दशत्विषपञ्चकम्। तद्यथा,—
"अहिश्च कालकूटश्च सुक्तको वत्सनाभकः।
शृङ्गकश्चेति योगोऽयं महापञ्चविषाभिधः॥"
इति राजनिर्घण्टः॥
महापत्रा, स्त्री, (महान्ति पत्राण्यस्याः।) महाजम्बूः। इति रत्नमाला॥ दशत्पर्य्युक्तेः त्रि॥
महापथः, पुं, (महांश्चासौ पन्थाश्चेति। "आन्महत इति।" ६।३।४६। इति महत आकारादेशः। "ऋक् पूरब्धूःपथामानक्षे।" ५।४।७४। इति समासान्तोऽकारः।) प्रधानपथः। तत्पर्य्यायः। चतुष्पथः २ संसरणम् ३ श्रीपथः ४ राजवर्त्म ५ उपनिष्क्रमणम् ६ उपनिष्करम् ७। इति हेमचन्द्रः। ४। ५३॥ (यथा, रामायणे। २। ८०। १६।
"पताका शोभिताः सर्व्वे सुनिर्म्मितमहापथाः॥"
यथा च महाभारते। ५। ६४। २०।
"संमृष्टसंसिक्तरजः प्रतिपेदे महापथम्॥"
सत्पथः। "यात्रायां पथि निद्रायां महच्छब्दो न दीयते।" इत्यस्य प्रतिप्रसूतार्थत्वात् तथात्वम्। यथा, कथासरित्सागरे। २। ४३।
"तच्छोकादिन्द्रदत्तस्य पिता यातो महापथम्॥"
सुषुम्णा। यथा, हठयोगप्रदीपिकायाम्। ३। ४।
"सुषुम्णा शून्यपदवी ब्रह्मरन्ध्रं महापथः।
महत्पदं तालुमूलं मध्यमार्गश्चेत्येकवाचकाः॥")
महापथगमः, पुं, (महापथस्य महापथे वा गमः गमनम्।) मरणम्। इति जटाधरः॥
महापद्मः, पुं, (महत् पद्मं तालुस्थं चिह्नं शिरसि यस्य।) अष्टनागान्तर्गतनागभेदः। तत्पर्य्यायः। अतिशुक्लः २ दशबिन्दुकमस्तकः ३। इति हेमचन्द्रः। ४। ३०५॥ (यथा, हरिवंशे। ३। ११२।
"ऐरावतो महापद्मः कम्बलाश्वतरावुभौ॥"
दर्व्वीकरान्तर्गतसर्पविशेषः। तद् यथा। "लक्षणसर्पो महालक्ष्मः लक्षोदरः श्वेतकपोतो महाकोपोतो बलाहको महासर्पः शुक्लपालो लोहितास्यो गवेधुकः परिसर्पः खड्गफणः कर्कुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः पुष्करीको भुजगटीमुखो विष्किरः पुष्पाभिकर्णो गिरिसर्पः ऋजुसर्पः श्वेतोदरो महाशिरा अजगरः आशीविष इति॥" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये॥) कुबेरस्य नवनिधन्तर्गतनिधिविशेषः। इति जटाधरः॥ (यथा, मार्कण्डेये। ६४। १५।
"यस्या वत्से! प्रभावेण विद्यायास्तां ग्रहाम्यहम्।
पद्मिनी नाम विद्येयं महापद्माभिपूजिता॥"
पुरभेदः। यथा, महाभारते। १२। ६५३। १।
"आसीत् किल नरश्रेष्ठ! महापद्मे पुरोत्तमे।
गङ्गाया दक्षिणे तीरे कश्चिद्विप्रः समाहितः॥"
दैत्यभेदः। यथा, हरिवंशे। २३२। ६।
"महापद्मो निकुम्भश्च पूर्णकुम्भश्च वीर्य्यवान्॥"
हस्तिभेदः। यथा, महाभारते। ६। ६१। ५१।

"तस्य चान्येऽपि दिग्नागा वसुधरसुयायिनः। अञ्जनो वामनश्चैव महापद्मश्च सुप्रभः॥") क्ली, लक्षकोटिसंख्या॥ इति लीलावती॥ (यथा, महाभारते। २। ६१। ३।

"अयुतं प्रयुतं चैव पद्मं खर्व्वमथार्ब्बुदम्। शङ्खश्चैव महापद्मं निखर्व्वं कोटिरेव च॥") शुक्लपद्मम्। इति रत्नमाला॥

महापातकं, क्ली, (महच्चतिशयितं पातकम्।) पापविशेषः। तत्तु पञ्चविधम्। यथा,—

"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः। महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥"

इति मानवे ११ अध्यायः॥

"महापातकजं चिह्नं सप्तजन्मसु जायते। बाधते व्याधिरूपेण तस्य क्षुत्क्षादिभिः समः॥"

इति प्रायश्चितपीयूषकर्म्मविपाकः॥

"तुलाभरणमेषेषु प्रातःस्नानं विधीयते। हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम्॥"

इति मलमासतत्त्वम्॥

"क्षयेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते। भस्मीभवन्ति राजेन्द्र! महापातककोटयः॥"

इति पुराणम्॥

महापातकी, [न्] त्रि, (महापातकमस्त्यस्येति। महापातक+इनिः।) पञ्चप्रकारमहापातकयुक्तः। स च पतितः। यथा,—

"महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः। पतितानां न दाहः स्यान्नान्वीर्द्धिर्नास्थिसञ्चयः॥ न चाश्रुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित्। एतानि पतितानान्तु यः करोति विमोहितः॥ तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा॥"

इति शुद्धितत्त्वधृतविष्णुपुराणवचनम्॥

पारिभाषिकमहापातकी यथा,—

"स्तेयप्राग्वप्रतिष्ठाच्च नीचैर्यो प्रतिमां द्विज!। दुर्गां च प्रथमेदृश्यस्तु स महापातकी स्मृतः॥"

इति देवीपुराणे व्यासनारदसंवादः॥

अपि च।

"पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम्। यो न पुष्णाति कापत्यात् स महापातकी स्मृत!॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः॥ (यथा च महानिर्व्वाणतन्त्रे। ३।६२।

"जातिभेदो न कर्त्तव्यः प्रसादे परमात्मनः। योऽशुद्धबुद्धिं कुरुते स महापातकी भवेत्॥")

महापापं, क्ली, (महच्च तत् पापञ्चेति।) महापातकम्। यथा,—

"महापापेषु सर्व्वं स्यात् तदर्द्धन्तूपपातके। दद्यात् पापेषु षष्ठांशं ज्ञात्वा व्याधिबलाबलम्॥"

इति मलमासतत्त्वम्॥

महापारेवतं, क्ली, (महच्च तत् पारेवतञ्चेति।) वलट्यविशेषः। बड़ा पारेवत इति हिन्दी भाषा। तत्पर्य्यायः। खर्व्वपारेवतम् २ खाञ्जाबिजम् ३ खारिकम् ४ रक्तरेवतकम् ५ दृढतुण्डम् ६ द्वीपजम् ७ द्वीपखर्ज्जूरम् ८। अस्य गुणाः। मधुरत्वम्। बलकारित्वम्। पुष्टिवर्द्धनत्वम्। दृष्यत्वम्। सूक्ष्मांशमन्नत्वम्। पारेवतादधिकगुणत्वञ्च। इति राजनिर्घण्टः॥

महापाशः, पुं, (महान् पाशोऽस्य।) यमदूतविशेषः। इति दृहद्धर्म्मपुराणे ५६ अध्यायः॥ (महांश्चासौ पाशश्चेति।) दृहत्पाशश्च॥

महापाशकः, पुं, (पशति बाधते निराकरोति परकालेश्वरादिकमिति। पश्+खुल्। ततः महांश्चासौ पाशकश्चेति।) बुद्धभिक्षुकः। तत्पर्य्यायः। चैलुकः २ आमशेरः ३ प्रव्रजितः ४ गोमीनः ५। इति त्रिकाण्डशेषः॥ (महोपासक इति पाठः कुत्रचित् दृश्यते॥)

महापिण्डीतकः, पुं, (पिण्डीं तनोतीति। तन्+डः संज्ञायां कन्। ततः महांश्चासौ पिण्डीतकश्चेति। पिण्डाकारफलत्वादस्य तथात्वम्।) क्षुद्रवर्णमहामदनवृक्षः। तत्पर्य्यायः। वारादः २। अस्य गुणाः। श्रेष्ठत्वम्। कटुतिक्तरसान्वितत्वम्। लघुत्वम्। कफपित्तदोषप्रकाशमायश्छोधनत्वञ्च। इति राजनिर्घण्टः॥

महापिण्डीतरः, पुं, (महांश्चासौ पिण्डीतरश्चेति।) वृक्षविशेषः। पेढ़िरा इति हिन्दी भाषा। तत्पर्य्यायः। श्वेतपिण्डीतकः २ करहाटः ३ क्षुरः ४ शुक्लकोषतरुः ५ शरः ६ पिण्डीतरः ७। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। त्रिदोषशमनत्वम्। चर्म्मरोगापहत्वम्। विशेषात् रक्तदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

महापीलुः, पुं, (पीलति प्रतिदृश्यते विषपित्तादिकमिति। पील+"नृगयादयश्च।" उणा० १।३८। इति कुः। ततो महान् पीलुरिति कर्म्मधारयः।) पीलुवृक्षविशेषः। तत्पर्य्यायः। दृहत्पीलुः २ महाफलः ३ राजपीलुः ४ महावृक्षः ५ मधुपीलुः ६। अस्य फलगुणाः। मधुरत्वम्। दृष्यत्वम्। विषनाशित्वम्। पित्तप्रशमनत्वम्। रुच्यत्वम्। आमघ्नत्वम्। दीपनीयकत्वञ्च। इति राजनिर्घण्टः॥

महापुराणं, क्ली, (महच्च तत् पुराणञ्चेति।) एकादशलक्षणयुक्तव्यासप्रणीताष्टादशग्रन्थकपुराणविशेषः। तस्य लक्षणं यथा,—

"सर्गश्चापि विसर्गश्च स्थितिस्तेषाञ्च पालनम्। कर्म्मणां वासना वार्त्ता गतूनाञ्च क्रमेण च॥ वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम्। उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक्। दशाधिकं लक्षमञ्च महतां परिकीर्त्तितम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अध्यायः॥ (अष्टादशमहापुराणानां विशेषविवरणलक्षणादिकं पुराणशब्दे द्रष्टव्यम्॥)

महापुरुषः, पुं, (महांश्चासौ पुरुषश्चेति।) श्रेष्ठनरः। (यथा, श्रीमद्भागवते। ६। १२।२०।

"भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीम्। यद्विद्यायासुरं भावं महापुरुषतां गतः॥")

नारायणः। यथा,—

"श्रीयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्। भृत्तार्त्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष! ते चरणारविन्दम्॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम्। मायामृगं दयितयेप्सितमन्वधाव-द्वन्दे महापुरुष! ते चरणारविन्दम्॥"

इत्याङ्किकतत्त्वधृतश्रीभागवतम्॥

महापुरुषदन्ती, स्त्री, (महापुरुषस्य दन्ता इव मूलानि यस्याः।) शतमूली। इति रत्नमाला॥ (विवरणमस्याः शतमूलीशब्दे ज्ञातव्यम्॥)

महापुरुषदन्तिका, स्त्री, (महापुरुषदन्ता+स्वार्थे कन्। स्त्रियां टाप् अत इत्वञ्च।) महाशतावरी। इति राजनिर्घण्टः॥

महापुष्पा, स्त्री, (महत् प्रशस्तं पुष्पमस्याः। स्त्रियां टाप्।) अपराजिता। इति शब्दचन्द्रिका॥ (यथा, सुश्रुते उत्तरतन्त्रे ५४ अध्याये।

"दर्भपुष्पा महापुष्पा प्रसूनाक्षिपिटाक्षयाः॥"

महापुष्पविशिष्टे, त्रि॥)

महापृष्ठः, पुं, (महत् विपुलं पृष्ठमस्य।) उष्ट्रः। इति राजनिर्घण्टः॥ त्रि, दृहत्पृष्ठश्च॥

महाप्रकृतिः, स्त्री, (महती श्रेष्ठा प्रकृतिर्जगन्मूलकारणम्।) दुर्गा। यथा,—

"चितिश्चैतन्यभावाद्या चेतना वा चितिः स्मृता। महान् व्याप्य स्थिता सर्व्वं महा वा प्रकृतिर्मता॥"

इति देवीपुराणे ४५ अध्यायः॥

महाप्रभः, त्रि, महती प्रभा यस्येति। अतिशयदीप्तियुक्तः। (यथा, हरिवंशे भविष्यपर्व्वणि। २६। ९२।

"ततश्चक्रं महाघोरं सहस्रारं महाप्रभम्॥")

महाप्रभा, स्त्री, (महती चासौ प्रभा चेति।) महती दीप्तिः। यथा; महाप्रभात्वाच्छिन्नाभावोऽन्धकारः। इति सामान्यलक्षणायां जगदीशः॥

महाप्रभुः, पुं, (महांश्चासौ प्रभुश्चेति।) परमेश्वरः। यथा,—

"वन्देऽनन्ताद्भुतैश्वर्य्यं श्रीचैतन्यं महाप्रभुम्। नीचोऽपि यत्प्रसादात् स्यात् सदाचारप्रवर्त्तकः॥"

इति हरिभक्तिविलासे २ विलासः॥

"अनन्तमद्भुतञ्चावितर्क्यं ऐश्वर्यं प्रभावो यस्य तं यतो महाप्रभुं परमेश्वरम्।" इति तट्टीकायां जीवगोस्वामी॥ श्रीचैतन्यः। यथा,—

"सोऽयं नीलगिरीश्वरः सविभवो यात्रा च सा गुण्डिचा

ते ते दिग्विदिगागताः सुव्रतिनस्तास्ता दिदृक्षार्तयः।
आरामस्त एव नन्दनवनश्रीर्मा तिरस्कारिणः।
सर्व्वाण्येव महाप्रभुं वत विना शून्यानि मन्या-महे॥"
इति चैतन्यचन्द्रोदयनाटकम्॥

महाप्रलयः, पुं, (महांश्चासौ प्रलयो जगता-मवसानश्चेति।) त्रिलोकनाशः। तत्पर्य्यायः। संहारः २। इति हलायुधः॥ तस्य विवरणं यथा,—

श्रीमार्कण्डेय उवाच।
"मन्वन्तरं मनोः कालो यावत् पालयते प्रजाः।
एको मनुः स कालस्तु मन्वन्तरमिति स्मृतम्।
तदेकसप्ततियुगैर्देवानामिह जायते।
नैश्चतुर्भिः कल्पो दिनमेकन्तु वेधसः॥
दिनान्ते वेधसो जाते सुषुप्सा तस्य जायते।
योगनिद्रा महामाया समायाति पितामहम्॥
नाभिपद्मं प्रविश्याथ विष्णोरमिततेजसः।
सुखं स शेते भगवान् ब्रह्मा लोकपितामहः॥
ततो विष्णुः स्वयं भूत्वा रुद्ररूपी जनार्द्दनः।
पूर्ब्ववन्नाशयामास स सर्व्वं भुवनत्रयम्॥
वायुना वह्निना सर्व्वं दाहयामास वै यथा।
महाप्रलयकालेषु तथा सर्व्वं जगत्त्रयम्॥
जनं यान्ति प्रतापार्त्ता महर्लोकनिवासिनः।
त्रैलोक्यं दाहयामास पीड़िता दारुणाग्निना॥
ततः कालान्तकैर्मेघैर्नानावर्णैर्महाघनैः।
सप्तत्याद्य महावृष्टिमापूर्य्य भुवनत्रयम्॥
चलत्तरङ्गैस्तोयौघैराप्लवस्थानसङ्गतैः।
निधाय जठरे लोकानिमांस्त्रीन् स जनार्द्दनः॥
नागपर्य्यङ्कशयने शेते स परमेश्वरः।
शयानं नाभिकमले ब्रह्माणं स जगत्प्रभुः॥
संस्थाप्य चैनिमाल्लोकान् दग्ध्वा दग्ध्वा श्रिया सह।
शेते स भोगिशय्यायां ब्रह्मा नारायणात्मकः॥
योगनिद्रावशं यातस्त्रैलोक्यग्रासहर्षितः।
त्रैलोक्यमखिलं दग्धं यदा कालाग्निना तदा।
जलम्तः पृथिवीं त्यक्त्वा विष्णोरन्तिकमागतः।
तेन त्यक्ता तु पृथिवी चपलाचादधो गता।
पतिता कूर्म्मपृष्ठे तु विशीर्णेव तदाभवत्॥
कूर्म्मोऽपि महतो यत्नाच्चलन्तीं पृथिवीं जले।
ब्रह्माण्डं पञ्जिराक्रम्य पृष्ठे दधे धरां तदा॥
ब्रह्माण्डखण्डसंयोगाच्चूर्णिता पृथिवी भवेत्।
इति तां परिजग्राह कूर्म्मरूपी जनार्द्दनः॥
चलच्चलौघसंसर्गाच्चलन्त्या धरया तदा।
कूर्म्मपृष्ठं बहुतरैर्वरूथैर्वितती कृतम्॥
अनन्तस्तत्र गत्वा तु यत्र क्षीरोदसागरः।
तत्र स्थं श्रिया युक्तं सुषुप्सन्तं जनार्द्दनम्॥
कमठः प्रथया दर्भे त्रैलोक्यग्रासहर्षितम्।
पूर्ब्बं कृतं वितत्योर्द्ध्वं यज्ञं कृत्वा महाबलः।
विष्णुमाच्छादयामास शेषाख्यः परमेश्वरः॥
तस्योपधानमकरोदनन्तो दक्षिणां भुजाम्।
उत्तरां बाहयोश्चक्रे उपाधानं महाबलः॥

तालवृन्तं तदा चक्रे स शेषः पश्चिमां भुजाम्।
स्वयन्तु वीजयामास शेषरूपी जनार्द्दनम्॥
शङ्खं चक्रं नन्दकासिमिषुधी हे महाबलः।
ऐशानयाथ भगया स दधे गरुड़ं तदा॥
गदां पद्मञ्च शार्ङ्गञ्च तथैव विविधायुधम्।
यानि चान्यानि तस्यासन्नायेया भगया दधौ॥
एवं कृत्वा स्वकं कार्य्यं शयनीयं तदा हरेः।
पृथ्वीमधरकायेन मयामाक्रम्य चाम्भसि॥
त्रैलोक्यग्रासहर्षितं बलश्लोकं जनार्द्दनम्।
सोपासङ्गजगद्बीजं जगत्कारणकारणम्॥
नित्यानन्दं वेदमयं ब्रह्मण्यं परमेश्वरम्।
जगत्कारणकर्त्तारं जगत्कारणकारणम्॥
भूतभव्यभवन्नाथं परापरपतिं हरिम्।
दधार शिरसानन्तः स्वयमेव स्वकां तनूम्॥
एवं ब्रह्मदिनस्थेव प्रमाणेन निशां हरिः।
सन्ध्याञ्च समधिप्राप्य शेते नारायणोऽव्ययः॥
यस्मादयन्तु प्रलयो ब्रह्मणः स्याद्दिने दिने।
तस्माद्दैनन्दिनमिति ख्यापयन्ति पुराविदः॥
अतीतायां निशायान्तु ब्रह्मा लोकपितामहः।
त्यक्त्वा निशां ससृक्षुस्तु स पुनः सृष्टये तिष्ठ॥"
इति कालिकापुराणे २७ अध्यायः॥

ज्ञायमते जन्यभावानधिकरणकालः। स च चरमध्वंसरूपः॥

महाप्रसादः, पुं, (महांश्चासौ प्रसादश्चेति।) विष्णुनैवेद्यादिः। यथा,—
"पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषतः।
महाप्रसाद इत्युक्ता याच्ञं विष्णोः प्रयत्नतः॥"
इत्येकादशीतत्त्वधृतमत्स्यसूक्तवचनम्॥
श्रीजगन्नाथस्य महाप्रसादमाहात्म्यं जगन्नाथ-शब्दे द्रष्टव्यम्। अतिशयप्रसन्नता च। (महान् प्रसादोऽस्य। शिवः। यथा, महाभारते। १३। १७। १३६।
"महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः॥")

महाप्रस्थानगमनं, क्ली, (प्रस्थीयते अस्मिन्निति। प्र+स्था+ल्युट्। महत् प्रस्थानं महापथः। तत्र गमनम्।) महापथगमनम्। तत्तु मरणो-द्देशेन हिमालयपर्य्यन्तप्रयाणम्। तच्च कलौ निषिद्धम्। यथा, देवीपुराणे।
"सप्तप्रयाणास्वीकारः कमण्डलुविधारणम्।
द्विजानामसवर्णासु कन्यासूपयमस्तथा॥
देवरेण सुतोत्पत्तिर्म्मधुपर्के पशोर्व्वधः।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा॥
दत्तायाश्चैव कन्यायाः पुनर्दानं वरस्य च।
दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ॥
महाप्रस्थानगमनं गोमेधश्च तथा मखम्।
इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनी-षिणः॥"
इत्युद्वाहतत्त्वम्॥

महाप्राणः, पुं, (महान्तो दीर्घकालस्थायिनः प्राणा यस्य सः।) दीर्घकाकः। इति राज-निर्घण्टः॥ वर्णविशेषः। स च। ख घ ङ झ ढ ठ थ ध फ भ ह व स ह रूपः। यथा,—

"वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमौ य र ल वाश्चाल्पप्राणाः। अन्ये महाप्राणा इत्यर्थः।" इति सिद्धान्तकौमुदी॥ (महाबले, त्रि। यथा, श्रीमद्भागवते। ६। ११। ६।
"एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून्।
अनदत् सुमहाप्राणो येन लोका विचेतसः॥")

महाफलः, पुं, (महत् पूजादौ प्रशस्तं पूण्यं वा फलमस्य।) विल्वतरुः। इति रत्नमाला॥ (महच्च तत् फलञ्चेति।) बृहत्फले, क्ली॥ (यथा, मनौ। ३। १२८।
"श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः।
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम्॥")

महाफला, स्त्री, (महत् फलं आरोग्यादिकं यस्याः।) इन्द्रवारुणी। इति जटाधरः॥ (अस्याः पर्य्यायो भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।
"ऐन्द्री इन्द्रवारुणी चित्रा गवाक्षी च गवादनी।
वारुणी च पराप्युक्ता सा विशाला महाफला॥
श्वेतपुष्पा रुगाक्षी च रुग्गैर्वारुद्गादनी॥"
राजजम्बूः। तत्पर्य्यायो यथा, तत्रैव।
"फलेन्द्राकथितानन्दो राजजम्बूर्महाफला॥"
कटुतुम्बी। तत्पर्य्यायो यथा, तत्रैव।
"इक्ष्वाकुः कटुतुम्बी स्यात् सा तुम्बी च महा-फला॥"
महाकोशातकी। तत्पर्य्यायो यथा, तत्रैव।
"महाकोशातकी प्रोक्ता हस्तिघोषा महा-फला।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः॥")

महाफेणा, स्त्री, (महती फेणा।) हिङ्गीरः। इति शब्दचन्द्रिका॥

महाबलं, क्ली, (महदतिशयितं बलं सामर्थ्यमस्मात्। महत् बलमस्येति वा।) सीसकम्। इति हेमचन्द्रः॥ (तथास्य पर्य्यायः।
"नागं महाबलं चीनं पिटं योगेष्टसीसकम्॥"
इति वैद्यकरत्नमालायाम्॥)

महाबलः, पुं, (महदुत्कृष्टं बलं ऐश्वर्य्यं यस्य।) वृद्धः। इति त्रिकाण्डशेषः॥ (पिटगवविशेषः। यथा, मार्कण्डेये। ६६। ४६।
"महान् महात्मा महितो महिमावान् महा-बलः।
गवाः पञ्च तथैवैते पितॄणां पावनावनाः॥")
वायुः। बलीयसि, त्रि। इति हेमचन्द्रः। ४। १०३॥ (यथा, रामायणे। १। १। ३४।
"नियुज्यमानो राज्याय नेक्ष्वाक्वाद्यं महाबलः।
स जगाम वनं वीरो रामपादप्रसादकः॥")

महाबला, स्त्री, (महद्बलमस्याः।) बलाभेदः। पीतवाह्यालकः। तत्पर्य्यायः। ऋष्यप्रोक्ता २ अतिबला ३ पीतपुष्पी ४। इति रत्नमाला॥ (अस्याः पर्य्यायो यथा,—
"वाह्या वाह्यालिका वाह्या सैव वाह्यालकापिच।
महाबला पीतपुष्पा सहदेवी च सा स्मृता॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

(तथास्या गुणाः ।
"हरेर्महाबला लक्ष्मीर्भवेदातानुलोमनी ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
महाबोधिः, पुं, (बुध्यते सर्व्वं जानातीति । बुध् + "सर्व्वधातुभ्य इन्" उणा० ४ । ११७ । इति इन् । ततो महांश्चासौ बोधिश्चेति ।) बुद्धः । इति हेमचन्द्रः । २ । १४६ ॥
महाब्राह्मणः, पुं, (महान्तिश्चयनिन्दितः ब्राह्मणः । "वैद्ये ज्योतिषिके द्विजे ।" इति निषेधवचनसत्त्वादेवास्य तथात्वम् ।) निन्दितब्राह्मणः । इति पाणिनिव्याकरणम् ॥
अस्मिन् देशे अयं अयदानित्वेन प्रसिद्धः ॥
(यथा, रत्नकटिके १ अङ्के ।
"विटः । महाब्राह्मण ! मर्षय मर्षय ॥")
महाभटः, पुं, (महांश्चासौ भटश्चेति ।) अतिशूरयोद्धा । यथा,—
"तदोजसा दैत्यमहाभटार्पितं
चकासदन्तः ख उदीर्णदीधितिः ।
चक्रेण चिच्छेद निशातनेमिना
हरिर्यथा तार्क्ष्यपतत्त्रसूत्रितम् ॥"
इति श्रीभागवते ३ स्कन्धे १६ अध्याये ॥
महाभद्रा, स्त्री, (महत् भद्रं मङ्गलं यस्याः ।) गङ्गा । इति शब्दमाला । काश्मरी । इति राजनिर्घण्टः ॥ (मेरोरुत्तरपार्श्वस्थसरोवरे, स्त्री । यथा, मार्कण्डेये । ५५ । ३ ।
"अरुणोदं सरः पूर्व्वं मानसं दक्षिणे तथा ।
शीतोदं पश्चिमे मेरोर्महाभद्रं तथोत्तरे ॥")
महाभारतं, क्ली, (महत् भारतम् । यद्वा, महान्तं भारं तनोतीति । महाभार + तन् + डः ।) व्यासप्रणीतेतिहासग्राह्यम् । तन्नामकारणं यथा,—
"एकतश्चतुरो वेदा भारतञ्चैतदेकतः ।
पुरा किल सुरैः सर्व्वैः समस्य तुलया धृतम् ॥
चतुर्भ्यः सरहस्येभ्यो वेदेभ्योऽभ्यधिकं यदा ।
तदाप्रभृति लोकेऽस्मिन् महाभारतमुच्यते ॥
महत्त्वाद्भारतत्वाच्च महाभारतमुच्यते ॥"
इति महाभारते आदिपर्व्व ॥*॥
लोकविशेषेषु तस्य श्लोकसंख्या वाचकाश्च यथा,
"चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम् ।
तिंशच्छतसहस्रञ्च देवलोके प्रतिष्ठितम् ॥
पित्र्ये पञ्चदश प्रोक्तं रक्षोयक्षे चतुर्दश ।
एकं शतसहस्रन्तु मानुषेषु प्रतिष्ठितम् ॥
नारदोऽश्रावयद्देवानसितो देवलः पितॄन् ।
गन्धर्व्वयक्षरक्षांसि आवयामास वै शुकः ॥
अस्मिंस्तु मानुषे लोके वैशम्पायन उक्तवान् ॥"
इति महाभारते १ पर्व्वणि अनुक्रमणिकाध्यायः ॥*॥ तच्च शतपर्व्वाणि तेष्वष्टादश सुखानि यथा,—
"आदिसभाविपिनानि विराट-
प्रोद्यमभीष्मगुरूणि च कर्णः ।
शल्यकसौप्तिकपर्व्व तथा स्त्री-
शान्त्यनुशासितुरङ्गममेधाः ॥
आश्रममौषलयात्रिकनाकाः
पर्व्वणि पर्व्वणि नाम विशेषाः ॥
इति भारतटीका ॥*॥
हरिवंशसहितोनविंशतिपर्व्वणामन्तर्भूतशतपर्व्वविभागस्तेषामध्यायश्लोकसंख्या च यथा,—
१ आदिपर्व्वणि १६ पर्व्वाणि २२० अध्यायाः ८६४ श्लोकाः ॥ २ सभापर्व्वणि ६ पर्व्वाणि ७८ अध्यायाः २५११ श्लोकाः ॥ ३ आरण्यकपर्व्वणि १६ पर्व्वाणि २६६ अध्यायाः ११६६४ श्लोकाः ॥ ४ विराटपर्व्वणि ४ पर्व्वाणि ६७ अध्यायाः २०५० श्लोकाः ॥ ५ उद्योगपर्व्वणि ११ पर्व्वाणि १८६ अध्यायाः ६६२८ श्लोकाः ॥ ६ भीष्मपर्व्वणि ५ पर्व्वाणि ११७ अध्यायाः ५८८४ श्लोकाः ॥ ७ द्रोणपर्व्वणि ८ पर्व्वाणि १७० अध्यायाः ६६०६ श्लोकाः ॥ ८ कर्णपर्व्वणि १ पर्व्व ६६ अध्यायाः ४६६४ श्लोकाः ॥ ६ शल्यपर्व्वणि ४ पर्व्वाणि ५६ अध्यायाः ३२२० श्लोकाः ॥ १० सौप्तिकपर्व्वणि ३ पर्व्वाणि १८ अध्यायाः ८७० श्लोकाः ॥ ११ स्त्रीपर्व्वणि ५ पर्व्वाणि २७ अध्यायाः ७७५ श्लोकाः ॥ १२ शान्तिपर्व्वणि ४ पर्व्वाणि ३३६ अध्यायाः १४७३२ श्लोकाः ॥ १३ अनुशासनपर्व्वणि १ पर्व्व १४६ अध्यायाः ८००० श्लोकाः ॥ १४ अश्वमेधपर्व्वणि २ पर्व्वणी १०१ अध्यायाः ३३२० श्लोकाः ॥ १५ आश्रमवासपर्व्वणि ३ पर्व्वाणि ४२ अध्यायाः १५०६ श्लोकाः ॥ १६ मौषलपर्व्वणि १ पर्व्व ८ अध्यायाः ३०० श्लोकाः ॥ १७ महाप्रास्थानिकपर्व्वणि १ पर्व्व ३ अध्यायाः ३२० श्लोकाः ॥ १८ स्वर्गपर्व्वणि १ पर्व्व ५ अध्यायाः २०० श्लोकाः । १६ हरिवंशे आर्य्यपर्व्वणि १ पर्व्व २४४ अध्यायाः १२००० श्लोकाः ॥ हरिवंशे भविष्यपौष्करप्रादुर्भावे १ पर्व्व ११२ अध्यायाः ३४४८ श्लोकाः ॥ इति महाभारते आदिपर्व्वणि पर्व्वसंग्रहनामकः २ अध्यायः ॥*॥
तच्छ्रवणविधादि यथा,—
जनमेजय उवाच ।
"भगवन् ! केन विधिना श्रोतव्यं भारतं बुधैः ।
फलं किं के च देवाश्च पूज्या वै पारणेऽत्र ह ॥
देयं समाप्ते भगवन् ! किञ्च पर्व्वणि पर्व्वणि ।
वाचकः कीदृशश्चात्र एतद्यज्ञं ब्रवीहि मे ॥*॥
वैशम्पायन उवाच ।
शृणु राजन् ! विधिमिमं फलं यच्चापि भारतात् ।
शुताङ्गवति राजेन्द्र ! यत्त्वं मामनुपृच्छसि ॥
दिवि देवा महीपाल ! क्रीड़ार्थमवनिं गताः ।
श्रुत्वा कार्य्यमिदञ्चैव ततश्च दिवमागताः ॥
हन्त यत्ते प्रवक्ष्यामि तच्छृणुष्व समाहितः ।
ऋषीणां देवतानाञ्च सम्भवं वसुधातले ॥
अत्र रुद्रास्तथा साध्या विश्वेदेवाश्च शाश्वताः ।
आदित्या अश्विनौ देवौ लोकपाला महर्षयः ॥
गुह्यकाश्च सगन्धर्व्वा नागा विद्याधरास्तथा ।
सिद्धा धर्म्मः स्वयम्भुश्च मुनिः कात्यायनो वरः ॥
गिरयः सागरा नद्यस्तथैवाप्सरसां गणाः ।
ग्रहाः संवत्सरश्चैव अयनान्यृतवस्तथा ॥
स्थावरं जङ्गमञ्चैव जगत् सर्व्वं सुरासुरम् ।
भारते भरतश्रेष्ठ ! एकस्मिन्नेव दृश्यते ॥
तेषां श्रुत्वा प्रतिष्ठानं नामकर्म्मानुकीर्त्तनात् ।
हत्वापि पातकं घोरं सद्यो मुच्येत मानवः ॥*॥
इतिहासमिमं श्रुत्वा यथावदनुपूर्व्वशः ।
संयतात्मा शुचिर्भूत्वा पारं गत्वा च भारत ! ॥
तेषां आह्वानि देयानि श्रुत्वा भारत ! भारतम् ।
ब्राह्मणेभ्यो यथान्यायं भक्त्या च भरतर्षभ ! ॥
महादानानि देयानि रत्नानि विविधानि च ।
गावः कांस्योपदोहाश्च कन्याश्चैव स्वलङ्कृताः ॥
सर्व्वकामगुणोपेता यानानि विविधानि च ।
भवनानि विचित्राणि भूमिर्व्वासांसि काञ्चनम् ॥
वाहनानि च देयानि हया मत्ताश्च वारणाः ।
शयनं शिबिकाश्चैव स्यन्दनाश्च स्वलङ्कृताः ॥
यद्यदृष्टे वरं किञ्चित् यद्यदिष्टं महद्गुरु ।
तत्तद्देयं द्विजातिभ्य आत्मा दारास्च सूनवः ॥
श्रद्धया परया दत्तं क्रमशस्तस्य पारगः ।
शुक्लितः सुमना हृष्टः शुश्रूषुरविकत्थनः ॥*॥
सत्यार्ज्जवरतो दान्तः शुचिः शौचसमन्वितः ।
श्रद्दधानो जितक्रोधो यथा सिध्यति तच्छृणु ॥
शुचिः शीलान्विताचारः शुक्लवासा जितेन्द्रियः ।
संस्कृतः सर्व्वशास्त्रज्ञः श्रद्दधानोऽनसूयकः ॥
रूपवान् शुभगो दान्तः सत्यवादी जितेन्द्रियः ।
दानमानसहीतश्च कार्य्यो भवति वाचकः ॥
अविलम्बमनायस्तमदृतं धीरमध्वितम् ।
असंसक्ताक्षरपदं रसभावसमन्वितम् ॥
विरहिवर्णसंयुक्तमहस्थानसमन्वितम् ।
वाचयेद्वाचकः स्वस्थः स्वासीनः सुसमाहितः ॥
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
ईदृग्वाङ्मानसाद्राजन् ! शुत्वा भारतं भारतम् ।
नियमस्थः शुचिः श्रोता श्रद्दधन् स फलमश्नुते ॥
पारणं प्रथमं प्राप्य द्विजान् कामैश्च तर्पयन् ।
अग्निष्टोमस्य यागस्य फलं वै लभते नरः ॥
अश्वरोगसमायुक्तं विमानं लभते महत् ।
प्रहृष्टः स तु देवैश्च दिवं याति समाहितः ॥
द्वितीयं पारणं प्राप्य अतिरात्रफलं लभेत् ।
सर्व्वरत्नमयं दिव्यं विमानमधिरोहति ॥
दिव्यमाल्याम्बरधरो दिव्यगन्धविभूषितः ।
दिव्याङ्गदधरो नित्यं देवलोके महीयते ॥
तृतीयं पारणं प्राप्य द्वादशाहफलं लभेत् ।
वसत्यमरराजो वर्षाणामयुतानि दिवि ॥
चतुर्थे वाजपेयस्य पञ्चमे द्विगुणं फलम् ।
उदितादित्यसङ्काशं ज्वलन्तमनलोपमम् ॥
विमानं विबुधैः सार्द्धमारुह्य दिवि गच्छति ।
वर्षायुतानि भवने शक्रस्य दिवि मोदते ॥
षष्ठे द्विगुणमश्नीह सप्तमे त्रिगुणं फलम् ।
कैलासशिखराकारं वैदूर्य्यमयवेदिकम् ॥
परिक्षिप्तञ्च बहुधा मणिविद्रुमभूषितम् ।
विमानं समधिष्ठाय कामगं साप्सरोगणम् ॥

सर्व्वान् लोकान् विचरते द्वितीय इव भास्करः ।
अश्वमेधे राजसूयस्य पारणे लभते फलम् ॥
चन्द्रादयनिभं रम्यं विमानमधिरोहति ।
चन्द्ररश्मिप्रतीकाशैर्हयैर्युक्तं मनोजवैः ॥
सेव्यमानो वरस्त्रीणां चन्द्रात् कान्तनरैर्म्मखे ।
मेखलानां निनादेन नूपुराणाञ्च निस्वनैः ॥
अङ्के परमनारीणां सुखसुप्तो विबुध्यते ।
नवमे क्रतुराजस्य वाजिमेधस्य भारत ! ॥
काञ्चनस्तम्भनिर्य्यूहं वैदूर्य्यकृतवेदिकम् ।
जाम्बूनदमयैर्द्दिव्यैर्गवाक्षैः सर्व्वतो वृतम् ॥
सेवितं चामरैः सङ्घैर्गन्धर्व्वैर्दिवि चारिभिः ।
विमानं समधिष्ठाय श्रिया परमया ज्वलन् ॥
दिव्यमाल्याम्बरधरो दिव्यचन्दनरूषितः ।
मोदते देवतैः सार्द्धं दिवि देव इवापरः ॥
दशमं पारणं प्राप्य द्विजातीनभिवन्द्य च ।
किङ्किणीजालनिर्घोषं पताकाध्वजशोभितम् ॥
वसुदैविकसंकाशं वैदूर्य्यमणितोरणम् ।
हेमजालपरिक्षिप्तं प्रवालबृहतीसुखम् ॥
गन्धर्व्वैर्गीतकुशलैरप्सरोभिश्च शोभितम् ।
विमानं सुकृतावासं सुखेनैवोपपद्यते ॥
सुकुटेनार्कवर्णेन जाम्बूनदविभूषिणा ।
दिव्यचन्दनदिग्धाङ्गो दिव्यमाल्यविभूषितः ।
दिव्यान् लोकान् विचरति दिव्यैर्भोगैः समन्वितः ।
विबुधानां प्रसादेन श्रिया परमया युतः ॥
अथ वर्षशतान्तेव स्वर्गलोके महीयते ॥
अथ गन्धर्व्वसहितः सहस्राण्येकविंशतिम् ।
पुरन्दरपुरे रम्ये शक्रेण सह मोदते ॥
दिव्ययानविमानेषु लोकेषु विविधेषु च ।
दिव्यनारीगणाकीर्णां निवसत्यमरो यथा ॥
ततः सूर्य्यस्य भवने चन्द्रस्य भवने तथा ।
ग्रहस्य भवने राजन् ! विख्यायति सलोकताम् ॥
एवमेतन्महाराज ! नात्र कार्य्या विचारणा ।
अश्वमेधेन वै भाग्यमेवमाह गुरुर्मम ॥*॥
लेखकस्य तु दातव्यं मनसा यद्यदिच्छति ।
हस्त्यश्वरथयानानि वाहनञ्च विशेषतः ॥
कटकं कुण्डलञ्चैव ब्रह्मसूत्रं तथापरम् ।
वस्त्रञ्चैव विचित्रञ्च गन्धञ्चैव विशेषतः ।
देववत् पूजयेत्तन्तु विष्णुलोकमवाप्नुयात् ॥*॥
अतः परं प्रवक्ष्यामि यानि देयानि भारते ।
वाच्यमाने तु विप्रेभ्यो राजन् ! पर्व्वणि पर्व्वणि ॥
दानं देयञ्च सत्त्वञ्च माहात्म्यं भरतर्षभ ! ।
धर्म्मवृत्तिञ्च विज्ञाय क्षत्रियाणां नराधिप ! ॥
स्वस्तिवाच्य द्विजानादौ ततः कार्य्यं प्रवर्त्तते ।
समाप्ते पर्व्वणि ततः स्वशक्त्या पूजयेत् द्विजान् ॥
आदौ तु वाचकन्तत्र वस्त्रगन्धसमन्वितम् ।
विधिवद्भोजयेद्राजन् ! मधु पायससुत्तमम् ॥
ततो मूलफलप्रायं पायसं मधुसर्पिषा ।
आत्मानं भोजयेद्राजन् ! दद्यात्चैव गुडौदनम् ॥
अपूपशष्कुलीश्च मोदकैश्च समन्वितम् ।
समाप्तेषु च राजेन्द्र ! हविष्यं भोजयेद् द्विजान् ॥
आरण्यकैर्मूलफलैस्तर्पयेत्तु द्विजोत्तमान् ।
अरण्यपर्व्वचाप्याद्य जलकुम्भान् प्रदापयेत् ॥
तर्पणानि च सर्व्वाणि रम्यमूलफलानि च ॥
सर्व्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत् ।
विराटपर्व्वणि तथा वासांसि विविधानि च ॥
उद्योगे भरतश्रेष्ठ ! सर्व्वकामगुणान्वितम् ।
भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलङ्कृतान् ॥
भीष्मपर्व्वणि राजेन्द्र ! दत्त्वा यानमनुत्तमम् ।
ततः सर्व्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ॥
द्रोणपर्व्वणि विप्रेभ्यो भोजनं परमार्चितम् ।
शूराश्च देया राजेन्द्र ! शाल्यान्नसिवरास्तथा ॥
कर्णपर्व्वण्यपि तथा भोजनं सार्व्वकामिकम् ।
विप्रेभ्यः संस्कृतं सम्यक् दद्यात् संयतमानसः ॥
शल्यपर्व्वणि राजेन्द्र ! मोदकैः सगुडौदनैः ।
अपूपैस्तर्पणैश्चैव सर्व्वमन्नं प्रदापयेत् ॥
गदापर्व्वण्यपि तथा सूपमिश्रं प्रदापयेत् ।
स्त्रीपर्व्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् ।
घृतौदनं पुरस्कृत्य ऐषीकै दापयेत् पुनः ॥
ततः सर्व्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ।
शान्तिपर्व्वण्यपि तथा हविष्यं भोजयेद् द्विजान् ॥
आश्वमेधिकमासाद्य भोजनं सार्व्वकामिकम् ।
तथाश्रमनिवासे तु हविष्यभोजयेत् द्विजान् ॥
मौषले सर्व्वगुणिकं गन्धमाल्यानुलेपनम् ।
महाप्रास्थानिके तद्वत् सर्व्वकामगुणान्वितम् ॥
स्वर्गपर्व्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ।
हरिवंशे पर्व्वणि च पायसं तत्र भोजयेत् ॥
पारणे पारणे राजन् ! यथावद्भरतर्षभ ! ।
समाप्य सर्व्वाः प्रयतः संहिताः शास्त्रकोविदः ॥*॥
शुभे देशे निवेश्याथ चौमवस्त्राभिसंवृताः ।
शुक्लाम्बरधरः स्रग्वी शुचिर्भूत्वा स्वलङ्कृतः ॥
अर्चयेत यथान्यायं गन्धमाल्यैः पृथक् पृथक् ।
संहितापुस्तकान् राजन् ! प्रयतः सुसमाहितः ॥
भक्ष्यैर्भोज्यैश्च पेयैश्च कामैश्च विविधैः शुभैः ।
हिरण्यञ्च सुवर्णञ्च दक्षिणामथ दापयेत् ॥
देवताः कीर्त्तयेत् सर्व्वा नरनारायणौ तथा ।
ततो गन्धैश्च माल्यैश्च स्वलंकृत्य द्विजोत्तमान् ॥
तर्पयेद्विविधैः कामैर्दानैश्चोच्चावचैस्तथा ।
अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः ॥
प्राप्नुयाच्च क्रतुफलं तथा पर्व्वणि पर्व्वणि ।
वाचको भरतश्रेष्ठ ! यत्नाच्चरपदस्करः ॥
भविष्यं श्रावयेद्विद्वान् भारतं भरतर्षभ ! ।
सुक्तवत्सु द्विजेन्द्रेषु यथावत् संप्रदापयेत् ॥
वाचकं भरतश्रेष्ठ ! भोजयित्वा स्वलङ्कृतम् ।
वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा ॥
ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्व्वदेवताः ॥*॥
ततो हि वरणं कार्य्यं द्विजानां भरतर्षभ ! ॥
सर्व्वकामैर्यथान्यायं साधुभिश्च पृथग्विधैः ।
इत्येष विधिरुद्दिष्टो मया ते द्विपदां वर ! ॥
अश्वमेधेन वै भाग्यं यस्मात् त्वं परिपृच्छसि ।
भारतश्रवणाद्राजा पारणे च नृपोत्तम ! ॥
सदा यत्नवता भाव्यं श्रोतव्यं तु परमिच्छता ॥*॥
भारतं श्रद्दधानेन भारतं परिकीर्त्तयेत् ।
भारतं भवने यस्य तस्य हस्तगतो जयः ॥
भारतं परमं पुण्यं भारते विविधाः कथाः ।
भारतं सेवते देवैर्भारतं परमं पदम् ॥
भारतं सर्व्वशास्त्राणामुत्तमं भरतर्षभ ! ।
भारतात् प्रायते मोक्षस्तस्मादेतदुवीमि ते ॥
महाभारतमाख्यानं चिंतिं गाञ्च सरस्वतीम् ।
ब्राह्मणान् केशवञ्चैव कीर्त्तयन्नावसीदति ॥
वेदे रामायणे पुण्ये भारते भरतर्षभ ! ।
आदौ चान्ते च मध्ये च हरिः सर्व्वत्र गीयते ॥
यत्र विष्णुकथा दिव्याः श्रुतयश्च सनातनाः ।
तच्छ्रोतव्यं मनुष्येण परं पदमिहेच्छता ॥
एतत् पवित्रं परममेतन्मङ्गलमिदर्शनम् ।
एतत् सर्व्वगुणोपेतं श्रोतव्यं भूतिमिच्छता ॥"
इति महाभारते हरिवंशे सर्व्वपर्व्वानुकीर्त्तनम् ॥*॥ त्रिषष्टिवर्णसंयुक्तमित्यत्र त्रिषष्टिवर्णाः । अ इ उ ऋ ऌ इति ह्रस्वपञ्चकम् । आ ई ऊ ॠ ॡ इति दीर्घपञ्चकम् । आ ई ऊ ॠ ॡ इति प्लुतपञ्चकम् । ए ओ ऐ औ च दीर्घाः । प्लुतत्वेनापरचतुष्टयम् । अं अः क+पर्य इति चत्वारः । ऋ ॡ इति अचसंज्ञकौ द्वौ । अनुनासिकश्चैकः । तथा कादिमावसानाः पञ्चविंशतिवर्णाः । अन्तःस्थाश्चत्वारः । उष्मचतुष्टयमिति त्रिषष्टिः । इति ॥*॥ वर्णानां किलाष्टौ स्थानानि भवन्ति तानि यथा,—
"उरः कण्ठः शिरस्तालु जिह्वादन्तौष्ठनासिकाः ।
अष्टौ स्थानानि वर्णानां ये विदुस्ते हि पाठकाः ॥"*॥
पारणं यथा,—
"भारतं प्लुतपर्व्वोक्तं मुनिना तत्त्वदर्शिना ।
पर्व्वभिर्दशभिश्चैषां पर्व्वणां पारणं स्मृतम् ॥"
इति विक्रमादित्यः ॥
"द्यूतान्तं प्रथमं प्रोक्तं द्वितीयं वनवासिकम् ।
उद्योगान्तं तृतीयन्तु भीष्मान्तञ्च तुरीयकम् ॥
पञ्चमं द्रोणपर्व्वान्तं कर्णान्तं पारणं ततः ।
विशोकान्तं सप्तमन्तु शान्तिपर्व्वान्तमष्टमम् ॥
नवमं स्वर्गपर्व्वान्तमाश्वमेधान्तमतः परम् ॥"
इति च भारतटीकायां अर्জुनमिश्रः ॥
(अन्यत्सर्व्वं भारतशब्दे द्रष्टव्यम् ।)
महाभीता, स्त्री, (महत्यधिका भीतेव ।) लज्जानुत्पन्नः । यथा, ग्रन्थचन्द्रिकायाम् ।
"सर्व्वलज्जा महाभीता वह्निनी च महौषधिः ॥"
(महानतिशयो भीतः ।) अतिशयभययुक्ते, त्रि ॥
महाभीमः, स्त्री, (महानतिशयो भीमः । भीषणाकृतित्वात् शिवांशसम्भूतत्वाच्च तथात्वम् ।) शान्तनुराजः । इति जटाधरः ॥ भङ्गिनामकशिवपदारपालः । इति त्रिकाण्डशेषः ॥ अतिशयभयानके, त्रि ॥

महाभीरुः, पुं, (महानतिशयो भीरुः ।) गोपालिकाख्यकीटविशेषः । इति हेमचन्द्रः । ४ । २३४ ॥ अतिभयशीले, त्रि ॥

महाभीष्मः, पुं, (महानतिशयो भीष्मः ।) प्रान्तनुराजः । इति त्रिकाण्डशेषः ॥

महाभूतं, क्ली, (महत् भूतम् । पञ्चतन्मात्रेभ्यः स्थौल्यादस्य तथात्वम् ।) पृथिव्यादिपञ्चभूतम् । यथा,—

"महाभूतानि पञ्चैव खानिलाग्न्यम्बुभूमिभिः ॥"
इति ग्रन्थचन्द्रिका ॥

(अस्य विषय उत्पत्तिश्च यथा,—

"तन्मात्रेभ्यो वियदाद्यवह्निवायुवसुन्धराः ।
एतानि पञ्च जायन्ते महाभूतानि तत्क्रमात् ॥"

एकोत्तरपरिवृद्ध्या वियदादयो जायन्त इत्यर्थः । तद्यथा । शब्दतन्मात्राच्छब्दगुणं वियज्जायते । शब्दतन्मात्रसहितात् स्पर्शतन्मात्राच्छब्दस्पर्शगुणो वायुर्ज्जायते । शब्दतन्मात्रस्पर्शतन्मात्रसहितात् रूपतन्मात्राच्छब्दस्पर्शरूपगुणो वह्निर्ज्जायते । शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्रसहिताद्रसतन्मात्राच्छब्दस्पर्शरूपरसगुणं वारिजायते । शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रसहिताद्गन्धतन्मात्राच्छब्दस्पर्शरूपरसगन्धगुणा वसुन्धरा जायते ।" इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥" "माल्यादयोऽप्यस्य महाभूतविकारा एव तत्रास्याकाशात्मकं शब्दः श्रोत्रं लाघवं सौक्ष्म्यं विवेकश्च । वायात्मकं स्पर्शः स्पर्शनञ्च रौक्ष्यं प्रेरणं धातुयूहनं चेष्टाश्च प्राणित्यं । अग्न्यात्मकं रूपं दर्शनं प्रकाशः पक्तिरौष्ण्यञ्च । अब्बात्मकं रसो रसनं स्नैह्यं मार्द्दवं क्लेदः क्लेदश्च । पृथिव्यात्मको गन्धः घ्राणं गौरवं स्थैर्य्यं स्थितिश्च ।" इति चरके शारीरस्थाने चतुर्थेऽध्याये ॥ सिद्धादयः महाप्राणिनः । यथा, महाभारते । १ । ११६ । ४८ ।

"रक्ष्यमाणो महाभूतैः सिद्धैश्च परमर्षिभिः ॥")

महाभृङ्गः, पुं, (महांश्चासौ भृङ्गश्चेति ।) नीलभृङ्गराजः । इति राजनिर्घण्टः ॥

महाभैरवः, पुं, (महान् भैरवः ।) शरभरूपी हरः । यथा,—

"योऽसौ महाभैरवाख्यः सकायः शरभो हरः ।
भैरवः पृथगेवायं गणाध्यक्षो हरात्मजः ॥"
इति कालिकापुराणे ४६ अध्यायः ॥

(क्ली, विद्याविशेषः । तथा च प्रबोधचन्द्रोदये । ३ । २४ । "तन्महाभैरवीं विद्यां धर्म्मसङ्कटयोराहरणाय प्रस्थापयामः ॥")

महाभोगा, स्त्री, (महान् आभोगः परिपूर्णतास्याः । यद्वा, महान् भोगः सुखरूपमस्याः ।) दुर्गा । यथा, देवीपुराणे ४५ अध्यायः ।

"महार्थसाधनी देवी महाभोगा ततः स्मृता ॥"

(महानाभोगो विशालतास्य । महाविशालताविशिष्टे, त्रि । यथा, कथासरित्सागरे । १७ । १०६ ।

"ततस्तत्र महाभोगं सच्छायस्कन्धसुन्दरम् ।
गुरुचन्द्रो ददर्शासावेकं न्यग्रोधपादपम् ॥")

महामक्षूकः, पुं, (महान् मक्षूकः ।) पीतमक्षूकः । इति राजनिर्घण्टः । सोनावेङ् इति भाषा ॥

महामतिः, त्रि, (महती मतिर्यस्य ।) अतिबुद्धिमान् । यथा,—

"किमेतन्नाभिजानासि जानन्नपि महामते ! ।
यत् प्रेमप्रवणचित्तं विगुणेष्वपि बन्धुषु ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

महामदः, पुं, (महान् मदोयस्य ।) मत्तहस्ती । इति शब्दरत्नावली ॥ (महान् मदः ।) अतिशयहर्षः । अतिशयमत्तता च । तद्युक्ते, त्रि ॥

महामनाः, [स्] त्रि, (महत् प्रशस्तं मनो यस्य ।) महाशयः । यथा,—

"महेच्छे तुङ्गटोदारोदात्तोदीर्णमहाशयाः ।
महामना महात्मा च————॥"
इति हेमचन्द्रः । ३ । ३१ ॥

(यथा, ऋग्वेदे । १० । १०३ । ६ ।

"इन्द्रस्य दृष्णो वरुणस्य राज्ञ
आदित्यानां मरुतां उग्रमः ।
महामनसां भुवनच्यवानां
घोषो देवानां जयतामुदस्थात् ॥"

"महामनसां उदारमनसाम् ।" इति तद्भाष्ये सायनः ॥ महाशालपुत्रः । यथा, हरिवंशे । ३१ । २० ।

"महामना नाम सुतो महाशालस्य धार्म्मिकः ॥")

महामहावारुणी, स्त्री, (महती चासौ महावारुणी चेति ।) गङ्गास्नानस्य योगविशेषः । स तु शनिवारशतभिषानक्षत्रशुभयोगयुक्तगौणचान्द्रचैत्रकृष्णत्रयोदशीरूपः । यथा,—

"शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलसुद्धरेत् ॥"
इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥

महामांसं, क्ली, (महद् गर्हितं मांसम् । अत्र मांसशब्दस्य पूर्ब्बप्रयुक्ततया महच्छब्दस्य गर्हितार्थत्वम् ।

"गृध्रे तैले तथा मांसे वैद्ये ज्योतिषके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥"
इति स्मरणात् ।)

नरादिपिशितम् । यथा,—

"अश्व्यां रुधिरैर्म्मांसैर्म्महामांसैः सुगन्धिभिः ।
पूजयेद्दुर्जातीयैर्व्वलिभिर्भोजनैः शिवाम् ॥"
इति तिथ्यादितत्त्वधृतकालिकापुराणम् ॥

अन्यच्च ।

"गोनरेभाश्वमहिषवराहोष्ट्रोरगोद्भवम् ।
महामांसाष्टकं देवि ! देवताप्रीतिकारकम् ॥"
इति कौलावलीदीपिका ॥

महामात्रः, पुं, (महती मात्रा मर्य्यादागरिमार्घं यस्य ।) प्रधानः । इत्यमरः । २ । ८ । ५ ॥ सेनापत्यादिषु महती मात्रा धनं परिच्छदो वा येषां ते तथा । इति तट्टीकायां भरतः ॥ (यथा, रामायणे । २ । ३६ । १८ ।

"तत्र वृद्धो महामात्रः सिद्धार्थो नाम नामतः ।
शुचिर्बहुमतो राज्ञः कैकेयीमिदमब्रवीत् ॥"
सम्बद्धः । (यथा, महाभारते । २ । ३१ । ६० ।
"राज्ञे भोजकटस्थाय महामात्राय धीमते ॥")
अमात्यः । (यथा, कामन्दकीये । ६ । ६६ ।
"दूषिते हि महामात्रे रिपुरुद्योऽपि धीमता ।
स्वपक्षे यस्य विश्वास इत्थंभूतश्च निश्चयः ॥")
हस्तियकाधिपः । इति मेदिनी । रे, १६० ।
(यथा च कथासरित्सागरे । १३ । १० ।
"इहत्यश्च महामात्रो हिरण्येङ्गितवित्तदा ।
मद्येन चीवतां नेयो नैतच्चेतयते यथा ॥"
महादेवः । यथा, महाभारते । १३ । १७ । ८५ ।
"महाम्बष्ठा महामात्रो महानेत्रो निग्राहकः ॥")

महामात्री, स्त्री, (महामात्र । ङीष् ।) आचार्य्यपत्नी । इति जटाधरः ॥ महामात्रपत्नी च ॥

महामानसी, स्त्री, (महत् मानसं भक्तान् प्रति सदयं चेतो यस्याः ।) जिनानां विद्यादेवी भेदः । इति हेमचन्द्रः । २ । १५४ ॥

महामाया, स्त्री, (अघटनघटनापटीयस्त्वेन विश्वप्रपञ्चतीतिसाधनं माया । महती चासौ माया चेति । यद्वा, महती माया विश्वनिर्म्माणशक्तिर्यस्याः सा ।) दुर्गा । इति शब्दरत्नावली ॥ तस्याः स्वरूपं यथा,—

"गर्भान्तर्ज्ञानसम्पन्नं प्रेरितं स्मृतिमारुतैः ।
उत्पन्नं ज्ञानरहितं कुरुते या निरन्तरम् ॥
पूर्ब्बातिपूर्ब्बसंबन्धसंस्कारेण नियोज्य च ।
आहारादौ ततो मोहं ममत्वं ज्ञानसंयुतम् ॥
क्रोधोपरोधलोभेषु क्षिप्त्वा क्षिप्त्वा पुनः पुनः ।
पश्चात् कामे नियोज्याशु क्षिप्त्वायुक्तमहन्निशम् ॥
आमोदयुक्तं व्यसनासक्तं जन्तुं करोति या ।
महामायेति सा प्रोक्ता तेन सा जगदीश्वरी ॥"
इति कालिकापुराणे ६ अध्यायः ॥

(यथा च देवीभागते । १ । ६ । ४० ।
"नमो देवि ! महामाये ! सृष्टिसंहारकारिणि ! ॥"
गङ्गादेवी । यथा, काशीखण्डे । ५६ । १३६ ।
"महाविद्या महामाया महामेधा महास्मृतिः ।
महामोहा महारात्रिर्दारुणा च महाधमः ॥")

महती माया च ॥ (यथा, मार्कण्डेये । ८१ । ४१ ।
"महामाया हरेश्चैतत् तया सम्मोह्यते जगत् ॥")

महामायी, स्त्री, (महती मायास्य । स्त्रियां ङीष् ।) दुर्गा । इति शब्दरत्नावली ॥

महामारी, स्त्री, (महतः दुर्दान्तान् दानवादीन् मारयति इति । मृङ् + णिच् + अण् । ङीष् ।) महाकाली । यथा,—

"यावत् तयैतत् सकलं ब्रह्माण्डं मनुजेश्वर ! ।
महाकाल्या महाकाले महामारीस्वरूपया ॥
सैव काले महामारी सैव सृष्टिर्भवत्यजा ।
स्थितिं करोति भूतानां सैव काले सनातनी ॥"
इति मार्कण्डेयपुराणम् ॥

(म्रियन्ते प्राणिनो यस्या इति। मृङ्+घञ्। ङीष्। महती मारी।) अतिमृत्युमरकञ्च॥

महामायः, पुं, (महांश्चासौ मायश्चेति।) राजमाषः। इति शब्दचन्द्रिका॥ (यथा, सुश्रुते सूत्रस्थाने २१ अध्याये। "माषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धक्षीरापायसेक्षुविकारानूपौदकमांसवसासंस्कारजाङ्गलकृशरकशल्याटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते॥" तथास्य पर्य्यायो गुणाश्च। "राजमाषो महामाषश्चपलश्चवनः स्मृतः। श्वेतो रक्तस्तथाताम्रस्त्रिविधः स प्रकीर्त्तितः॥ यो महांस्तेषु भवति स एवोक्तो गुणाधिकः॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महासुखः, पुं, (महत् सुखमस्य।) कुम्भीरः। इति हेमचन्द्रः। ४। ४१६॥ (महत् सुखम्।) ब्रह्मसुखे, क्ली। (यथा, ब्रह्मवैवर्त्तसंहितायाम्। ६७। ५४।

"यद्यं सौख्यं संवृतममलं ब्रह्मणं समेत्य भूपानाम्।
विपरीतं क्लेशयुतं महासुखं दुर्भगानाञ्च॥"

महत् सुखं यस्य।) तद्वति, त्रि॥ (महादेवः। यथा, महाभारते। १३। १७। ८७।

"महादेवो महादंष्ट्रो महाजिह्वः महासुखः॥"

सिन्धुराजस्य सैनिकभेदः। यथा, महाभारते। ७। २७०। १६।

"सकुलस्त्वभिसन्धाय क्षेमङ्करमहासुखौ।
उभावुभयसैन्यानां शरवर्षैरवर्षताम्॥")

महासुनिः, पुं, (महांश्चासौ मुनिश्चेति।) अगस्त्यः। वृद्धः। इति शब्दरत्नावली॥ क्षपाचार्य्यः। कालः। रत्नत्रयपालः॥ व्यासः। (श्रीनारायणः।) यथा, श्रीभागवते। २।१।२।

"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किंवापरैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥

(महासुनिः श्रीनारायणः। इति तट्टीकायां श्रीधरः।) तुलसीवृक्षः। इति राजनिर्घण्टः॥

महासुनि, क्ली, (महान् सुनिरिवेति। सर्व्वोपकारित्वात्तथात्वम्। अभिधानात् क्लीवत्वम्।) औषधम्। इति शब्दरत्नावली॥ धान्याकम्। इति जटाधरः॥

महास्थूणा, [न्] पुं, (महान् स्थूणा यस्य। आपत्वात् तथात्वम्।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ ह्रस्वस्थूणकयुक्ते, त्रि॥

महास्थूलः, पुं, (महत् स्थूलं मूलं यस्य।) राजयष्टाह्वः। इति राजनिर्घण्टः॥ (छिलिंछिघटः॥ यथास्य पर्य्यायः।

"छिलिंछिघटो महास्थूलः पातालगरुडाह्वयः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महास्नेहं, क्ली, महार्घम्। बहुमूल्यम्। महच्च तन्मूल्यं चेति कर्म्मधारयसमासनिष्पन्नम्। (महन् मूल्यं यस्य।) तद्युक्ते, त्रि॥

महास्मृतिकः, पुं, (महान् स्मृतिकः।) ह्रस्वदुन्दुरः। तत्पर्य्यायः। मूषी २ विघ्नेशवाहनः ३ महाङ्गः ४ ग्रन्थमारी ५ भूफलः ६ भित्तिपातनः ७। इति राजनिर्घण्टः॥

महाहन्तः, पुं, (महान् हन्तः पशुः।) हस्ती। इति हेमचन्द्रः। ४।२८३॥ शरभः। इति राजनिर्घण्टः॥

महाह्लुञ्जयः, पुं, (महाह्लुं यमं जयतीति। जि+खच् सुम् च।) शिवस्य मन्त्रविशेषः। यथा,—

देव्युवाच।

"यदि मे महती प्रीतिस्त्वयास्ति कुलभैरव!।
कथयस्व विशेषेण महाह्लुञ्जयाभिधम्॥

भैरव उवाच।

शृणु देवि! प्रवक्ष्यामि महाह्लुञ्जयाभिधम्।
आयुर्वृद्धिकरं पुंसां ह्यल्पोद्दालुकरं परम्॥
यस्य विज्ञानमात्रेण चिरजीवी निरामयः।
नित्यमदृश्यतं जन्तुं ह्लुं ह्लुपदं नयेत्॥"

इति ह्लुञ्जयतन्त्रम्॥

महामेघः, पुं, (महान् मेघ इव।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ (महान् मेघः।) अतिशयमेघश्च॥ (यथा, महाभारते। १२। ११०। ४।

"महामेघनिभं दृष्ट्वा स भीतो ह्यभवत् गजः॥"

क्षत्रियराजविशेषः। यथा, महाभारते। ७। ४७। १५।

"शृङ्गध्वजं चन्द्रकेतुं महामेघं सुवर्चसम्।
सूर्य्यभासञ्च पञ्चैतान् हत्वा विव्याध सौबलम्॥")

महामेदः, पुं, (मेदयति स्निग्धीकरोतीति। मिद्+घिञ्+अच्। महान् मेदः।) अष्टवर्गे प्रसिद्धौषधविशेषः। तत्पर्य्यायः। पुरोऽग्रवः २। इति रत्नमाला॥ ह्रस्वमेदश्च॥

महामेदा, स्त्री, (मेदयतीति। मिद्+घिञ्+यञ्। टाप्। महती मेदा।) अष्टवर्गे प्रसिद्धौषधविशेषः॥ तत्पर्य्यायः। वसुच्छिद्रा २ जीवनी ३ पांशुरागिणी ४ देवेष्टा ५ सुरामेदा ६ दिव्या ७ देवमणिः ८ देवगन्धा ९ महाच्छिद्रा १० इत्याद्यौ ११। अस्याः गुणाः। स्निग्धत्वम्। रूक्षत्वम्। कफपित्तरक्तहिकारित्वम्। दाहासपित्तज्वरवातज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ * ॥ अथ मेदमहामेदयोरुत्पत्तिलक्षणनामगुणाः।

"महामेदाभिधः कन्दो मोरङ्गादौ प्रजायते।
महामेदा वनौमेदा स्यादित्युक्तं मुनीश्वरैः॥
शुक्लाङ्कनिभः कन्दो लताजातः स पाण्डुरः।
महामेदाभिधो ज्ञेयो मेदालक्षणसूचयते॥
शुक्लकन्दो नखच्छेद्यो मेदो धातुरिव स्रवेत्।
यः स मेदेति विज्ञेया जिज्ञासाततपरैर्जनैः॥
स्वल्पपर्व्वा मक्षिच्छिद्रा मेदा मेदोभवाभवा।
महामेदा वसुच्छिद्रा त्रिदन्ती देवतामणिः॥
मेदायुगं गुरु स्वादु दृष्यं स्नायकपापहम्।
दृङ्नाशं शीतलं पित्तरक्तवातज्वरप्रणुत्॥"

इति भावप्रकाशः॥

महामैत्रः, पुं, (मित्रस्य भावः। मित्र+अण्। मैत्रम्। महद्भिः सह महद्वा हृदि मैत्रमस्येति।) बुद्धभेदः। इति हेमचन्द्रः।२।१४६॥

महामोहः, पुं. (मोहः भ्रान्तिज्ञानम्। अतथाभूते वस्तुनि तथात्वज्ञानमित्यर्थः। महान् मोहः।) भोगेच्छारूपाज्ञानम्। इति केचित्॥ संसारमूलकारणरागरूपमोहः। (महान् मोहो यस्मादिति च।) महामोहजनककामराजबीजम्। इति षष्ठीप्रथममाहात्म्यटीकायां नागोजीभट्टः॥ अपि च।

"ससर्ज्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत्।
महामोहश्च मोहश्च तमश्चाज्ञानतापहः॥"

इति श्रीभागवते ३ स्कन्धे १२ अध्यायः॥

अथ इति ब्रह्मा स्वसृष्टौ प्रथममविद्याख्यां सससर्ज्ज तत्र तमो नाम स्वरूपाग्रकाशः। मोहो देहाद्यहंबुद्धिः। महामोहो भोगेच्छा। तामिस्रः तत्प्रतिघाते क्रोधः। अन्धतामिस्रः तन्नाशे अहमेव हतोऽस्मीति बुद्धिः। तदेवोक्तं वैद्यके।

"तमोऽविवेको मोहः स्यादन्तःकरणविभ्रमः।
महामोहश्च विज्ञेयो ग्राम्यभोगसुखेषणा॥
मरणं ह्यन्धतामिस्रं तामिस्रं क्रोध उच्यते।
अविद्या पञ्चपर्व्वा या प्रादुर्भूता महात्मनः॥"

इति तट्टीकायां श्रीधरस्वामी॥

महार्घ्यं, क्ली, (महत् अर्घ्यं अर्घरसयुक्तम्। यद्वा, महान् अर्घ्यः अर्घरसो यस्मिन्।) तिन्तिड़ीकम्। इति जटाधरः॥ (अत्यर्घरसविशिष्टे, त्रि॥)

महायज्वा, पुं, (यज्वते पूजयति इति। यज्+अच्। महान् यज्वा।) अर्हदुपासकविशेषः। इति हेमचन्द्रः। २। ४१॥

महायज्ञः, पुं. (महान् यज्ञः।) वेदपाठादिरूपपञ्चप्रकारयज्ञः। यथा,—

"पाठो होमश्चातिथीनां सपर्य्या तर्पणं बलिः।
एतैः पञ्च महायज्ञा ब्रह्मयज्ञादिनामकैः॥"

इत्यमरः। २। ७।१४॥

अपि च।

"दिवो भौमस्तथा प्रेतो मानुषो ब्राह्म एव च।
एते पञ्च महायज्ञा ब्रह्मणा निर्म्मिताः पुरा॥
ब्राह्मणानां हितार्थाय इतरेषाञ्च तत्सुताः।
इतरेषान्तु वर्णानां ब्राह्मणैः कारिताः शुभाः॥
एवं ज्ञात्वा नरो सुक्ष्मासाद्दरिचि! विशुध्यति।
अन्यथा श्रौत्रयोरेते एकैके नगपक्षिणः॥
मन्तव्या दारुभोक्तृणां महामांसन्तु तत् स्मृतम्॥"

इति वराहपुराणम्॥

(यथा च मनौ। २। ७८।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥")

महायग्रस्कः, त्रि, (महत् यग्रो यस्य। "ग्रेषाद्विभाषा।" ५।४।१५४। इति समासान्त कप्प्रत्ययः।) अतिग्रययग्रोविशिष्टः। इति पाणिनिव्याकरणम्॥

महायग्राः, [स्] पुं, (महत् यग्रो यस्य विभाषा ग्रहणात् न कप्।) भूताद्दिग्रेषः। इति हेमचन्द्रः। १।५०॥ (ग्रिवः। यथा, महाभारते। १३। १७। ३४।

"महारूपो महाकायो वृषरूपो महायग्राः॥")

स्त्री, स्कन्दमाढग्रगणविग्रेषः। यथा, महाभारते। ६। ४६। २८।

"यग्रुदा वित्तदा चैव सुखदा च महायग्राः॥")

अतिग्रययग्रोयुक्ते, त्रि॥ (यथा, महाभारते। ३। ४२। ४९।

"एवं स संक्रमंस्तत्र स्वर्गलोके महायग्राः।
ततो ददर्ग्र ग्रक्रस्य पुरीन्नाममरावतीम्॥")

महारजतं, क्ली, (महच्च तद्रजतञ्चेति।) सुवर्णम्। (यथा, मार्कण्डेये। ६०। ४।

"महारजतसङ्काग्रा जायन्ते तत्र मानवाः॥")

धुस्तूरः। इत्यमरः। २।६।६५॥ दृहद्रौप्यञ्च॥

महारजनं, क्ली, (रज्यतेऽनेनेति। रञ्ज+करणे ल्युट्। ततः। "अनिदितामिति।" ६।४।२४। इत्यत्र "रजकरजनरजःक्षपसंख्यानं कर्त्तव्यम्।" इति काग्रिकोक्त्या नलोपः। महच्च तद्रजनञ्चेति कर्म्मधारयः।) कुसुम्भपुष्पम्। इत्यमरः। २। ६। १०६॥ स्वर्णम्। इति मेदिनी। ने, २४४॥

महारण्यं, क्ली, (महत् अरण्यम्।) दृहद्वनम्। (यथा, रामायणे। ३। ९। १।

"प्रविग्र्य तु महारण्यं दण्डकारण्यमात्मवान्।
रामो ददर्ग्र दुर्द्धर्षस्तापसाग्रममण्डलम्॥")

तत्पर्य्यायः। अरण्यानी २। इत्यमरः। २।४।१॥ कान्तारः ३। इति जटाधरः॥

महारथः, पुं, (रमन्ते लोका यस्मिन्निति। रम+"हनिकुषिनीरमिकाग्रिभ्यःक्थन्।" उणा॰ २। २। इति क्थन्। महांश्चासौ रथश्चेति।) ग्रिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३। १७। १२९॥ (महान् रथोऽस्य।) अयुतधन्विभिः ग्रूरास्त्रग्रस्त्रनिपुणयोद्धा। यथा, "एको दग्रसहस्राणि योधयेद्यस्तु धन्विनाम्। अस्त्रग्रस्त्रप्रवीणग्च महारथ इति स्मृतः॥"

इति भगवद्गीताटीकायां ग्रीधरस्वामी॥

(महान् रथः।) दृहद्रथग्च। (यथा, महाभारते। ३। ४२। १७।

"नातप्ततपसा साध्य एष दिवो महारथः॥")

राजविग्रेषः। यथा, मार्कण्डेये। ११८। २६।

"महारथस्य वीग्रिष्टः पुरोधाभून्महीभृतः॥")

महारम्भं, क्ली, (महान् आरम्भो प्रस्तुतकरणे यत्नो यस्य।) गड्डलवणम्। इति राजनिर्घण्टः॥ (महारम्भविशिष्टे, त्रि। यथा, कामन्दकीये। ४। ५४।

"स्वामीज्यो भूगुणैर्युक्तः सारूपः पर्व्वताग्रयः।
ग्रूद्रकारुवणिक्प्रायो महारम्भबलो बलः॥")

महारसं, क्ली, (महान् अधिको रसोऽस्य। रुचिप्रदत्वात् तथात्वम्।) काञ्जिकम्। इति जटाधरः॥ (गुणादयोऽस्य काञ्जिकग्रब्दे द्रष्टव्याः।

महारसविग्रिष्टे, त्रि। यथा, महाभारते। ३। १११। १४।

"तान्यृष्यग्रृङ्गस्य महारसानि
भग्नं सुरूपाणि रुचिं दृढञ्च॥")

महारसः, पुं, (महानतिमिष्टो रसोऽस्य।) खर्ज्जूरः। कोषकारः। कग्रेरु। इति मेदिनी। से, ५६॥ इक्षुः। इति जटाधरः॥ (अस्यपर्य्यायो यथा,—

"महारसोऽसिपत्रः स्यान्मधुलग्रपुष्पो मधुद्रुमः।
इक्षुर्वंग्रककाण्डारभीरुपौण्ड्रादिभेदवान्॥"

इति वैद्यकरत्नमालायाम्॥

(महान् रसः धातुद्रवः।) पारदः। इति राजनिर्घण्टः॥ (यथास्य पर्य्यायः।

"पारदो रसधातुश्च रसेन्द्रश्च महारसः।
चपलः ग्रिववीर्य्यश्च रसः सूतः ग्रिवाक्ष्यः॥"

इति भावप्रकाग्रस्य पूर्व्वखण्डे प्रथमे भागे॥)

महारसाष्टकं, क्ली, (महारसानां अष्टकम्।) अष्टधातुविग्रेषः। यथा,—

"दरदः पारदः सस्यो वैक्रान्तं कान्तमभ्रकम्।
माक्षिकं विमलञ्चेति स्युरेतेऽष्टौ महारसाः॥"

इति राजनिर्घण्टः॥

महाराजः, पुं, (महांश्चासौ राजा प्रभावविग्रेषवानिति।) पूर्व्वजनविग्रेषः। (महत्या दीप्त्या राजतेऽसौ ग्रोभत इति। राज्+क्विप्।) नखः। इति हेमचन्द्रः। ३।२५८। (महान् राजा। सर्व्वत्र "राजाहःसखिभ्यष्टच्।५।४।९१। इति समासान्तष्टच्।) श्रेष्ठराजः। यथा,—

"अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित्।
इति सत्यं महाराज! बद्धोऽस्म्यर्थेन कौरवैः॥"

इति महाभारते उद्योगपर्व्व॥

महाराजकः, पुं, (राजते इति। राज+ण्वुल्। महांश्चासौ राजकश्चेति।) महाराजिकगणः। इत्यमरटीकायां रामाश्रमः॥

महाराजचूतः, पुं, (महता मिष्टादिगुणेन राजते आद्रियते। इत्यच् ततः कर्म्मधारयः।) उत्तमाम्रः। तत्पर्य्यायः। महाराजाम्रकः२ स्थूलाम्रः३ मध्यधानन्दः४ कट्टः५ नीलकपित्थकः६ कामायुधः७ कामफलः८ राजपुत्रः९ कृपालुकः१० महाराजफलः११ कामः१२ महाचूतः१३। कोमलस्य तस्य गुणाः। कटुत्वम्। अम्लत्वम्। पित्तदाहदाढत्वच्। सुपक्वस्य तस्य गुणाः। स्वादुत्वम्। मधुरत्वम्। पुष्टिवीर्य्यबलप्रदत्वच्। इति राजनिर्घण्टः॥

महाराजद्रुमः, पुं, (महाराजोऽतिग्रेष्ठो द्रुमः।) आरग्वधः। इति राजनिर्घण्टः॥ (गुणादिविग्रेषोऽस्यारग्वधग्रब्दे ज्ञातव्यः॥)

महाराजिकः, पुं, (महती राजिः पङ्क्तिरस्य "ग्रेषाद्विभाषा।" ५।४।१५४। इति कप्।) गणदेवताविग्रेषः। स तु विंग्रत्यधिकगणत्रयसंख्यकः। इत्यमरभरतौ। १।९।१०॥

महाराजोपचारः, पुं, (महाराजार्थं उपचारः। महाराजानामुपचारो वा।) राजार्हपूजोपकरणम्। तद्यथा,—

"ततश्च चामरच्छत्रपादुकादीन् परानपि।
महाराजोपचारांश्च दत्त्वादर्ग्रं प्रदर्ग्रयेत्॥"

विष्णुधर्म्मोत्तरे।

"यथादेग्रं यथाकालं राजलिङ्गं सुरालये।
दत्त्वा भवति राजैव नात्र कार्य्या विचारणा॥"

तत्र चामरमाहात्म्यं विष्णुधर्म्मोत्तरे।

'तथा चामरदानेन ग्रीमान् भवति भूतले।
सुग्यते च तथा पापैः स्वर्गलोकञ्च गच्छति॥'

छत्रस्य तत्रैव।

'छत्रं बहुशुलाकञ्च भृङ्गारीवज्रसंयुतम्।
दिव्यवस्त्रैश्च संयुक्तं हेमदण्डसमन्वितम्॥
यः प्रयच्छति लक्ष्मीश्च छत्रच्छायातिवृंतः।
प्रार्थ्यते सोऽमरैः सर्व्वैः क्रीड़ते पितृभिः सह॥'

तत्रैवान्यत्र।

'राजा भवति लोकेऽस्मिन् छत्रं दत्त्वा द्विजोत्तमाः।
नाप्नोति रिपुजं दुःखं संग्रामे रिपुनिर्ज्जये॥'

'उपानत्संप्रदानेन विमानमधिरोहति।
यत्रेष्टं तेन लोकेषु विचरत्यमरप्रभः॥'

ध्वजस्य तत्रैव।

'लोकेषु ध्वजभूतः स्याद्दत्त्वा विष्णोर्वरं ध्वजम्।
शक्रलोकमवाप्नोति बहुनन्दगणावृतः॥'

किञ्च।

'युक्तं पीतपताकाभिर्निर्वेद्य गरुड़ध्वजम्।
केग्रवाय द्विजग्रेष्ठाः शक्रलोके महीयते॥
यत्प्रासादे ध्वजारोपमाहात्म्यं लिखितं पुरा।
तदत्राप्यखिलं ज्ञेयं तत्राचत्वमिदन्तथा॥'

किञ्च। भविष्ये।

'विष्णोर्ध्वजे तु सौवर्णदण्डं कुर्य्यादिचक्षणः।
पताका चापि पीता स्यात् गरुड़स्य समीपगा॥'

व्यजनस्य। विष्णुधर्म्मोत्तरे।

'तालवृन्तप्रदानेन निर्वृतिं प्राप्नुयात् पराम्॥'

वितानस्य तत्रैव।

'वितानकप्रदानेन सर्व्वपापैः प्रमुच्यते।
परां निर्वृतिमाप्नोति यत्र यत्राभिजायते॥'

खड्गादीनाम्।

'दत्त्वा निस्त्रिंग्रकान् सुखान् ग्रत्रुभिर्नाभिभूयते।
दत्त्वा तदव्रणं सुखमग्र्याधेयपदं लभेत्॥'

किञ्च।

'पतद्ग्रहं तथा दत्त्वा शुभगस्त्वमिजायते।
पादपीठप्रदानेन स्थानं सर्व्वत्र विन्दति॥'

'दर्पणस्य प्रदानेन रूपवान् दर्पवान् भवेत्।
मार्ज्जयित्वा तथा तस्य सुभगस्त्वमिजायते॥
यत्किञ्चिद्देवदेवाय दद्याद्भक्तिसमन्वितः।
तदेवाक्षयमाप्नोति स्वर्गलोकं स गच्छति॥'

किञ्च। वामनपुराणे ग्रीबलिं प्रति प्रह्लादोक्तौ।

'श्रद्धानेभक्तिपरैर्यान्नुद्दिग्र्य जनार्दनम्।
बलिदानानि दीयन्ते अक्षयाणि विदुर्बुधाः॥

अत्रापि केचिदिच्छन्ति दत्त्वा पुष्पाञ्जलित्रयम्।
पूर्व्वोक्ता दश शङ्खाद्या मुद्राः सन्दर्शयेदिति॥"
इति श्रीहरिभक्तिविलासे ८ विलासः॥

महारात्रिः, स्त्री, (महत्यां प्रलयावस्थायां रातिः आत्मस्वरूपं ददाति सृष्टयुन्मुखा सर्व्वान् जीवान् आत्मस्वरूपेणावस्थापयति जायते पञ्चपर्व्वलक्षणाया अविद्यायाः सकाशात् रक्षतीति। मह+रा+क।) ब्रह्मलयोपलक्षिता महाप्रलयरात्रिः। इति चण्डीटीकायां नागोजीभट्टः॥ महत ईश्वरस्य रात्रिः। ब्रह्मसर्ग्गोपलक्षिता रात्रिरित्यर्थः। इति देवीमाहात्म्यटीकायां विद्याविनोदः॥ अपि च।

"ब्रह्मणश्च निपाते च महाकल्पो भवेन्नृप!।
प्रकीर्त्तिता महारात्रिः सा एव च पुरातनैः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५ अध्यायः॥
(दुर्गा। यथा च मार्कण्डेये। ८१। २०।

"महारात्रि! महाविद्ये! नारायणि! नमोऽस्तु ते॥")

अर्द्धरात्रात् परं मुहूर्त्तद्वयम्। यथा,—

"अर्द्धरात्रात् परं यच्च मुहूर्त्तद्वयमुच्यते।
सा महारात्रिरुदिता तद्दत्तमक्षयं भवेत्॥"
इति तत्त्वम्॥

आश्विनशुक्लाष्टमी। नवरात्रम्। यथा,—

"शुक्लाष्टमी चाश्विनस्य नवरात्रं तु तस्य वै।
महारात्रिर्महेशानि! कालरात्रिं शृणु प्रिये!॥"
इति शक्तिसङ्गमतन्त्रम्॥

महाराष्ट्रः, पुं, (महान् भूयान् प्रशस्तो वा राष्ट्रः। महत् राष्ट्रं यस्येति वा।) देशविशेषः। मारहाट्टा इति भाषा॥ यथा,—

"नैर्ऋते द्रविडानर्म्महाराष्ट्राञ्च रैवतः।
जवनः पञ्चवः सिन्धुः पारसीकादयो मताः॥"
इति ज्योतिषतत्त्वे कूर्म्मचक्रम्॥

महाराष्ट्री, स्त्री, (महाराष्ट्रस्तद्देश उत्पत्तिस्थानत्वेनास्त्यस्या इति अच्। गौरादित्वात् ङीष्।) जलपिप्पली। इति राजनिर्घण्टः॥ शाकभेदः। मारोटी इति भाषा। अस्या गुणः। कफवायुनाशित्वम्। इति राजवल्लभः॥ (विषयोऽस्या यथा,—

"जयन्ती सुखिरी वाया दहती च गुडूचिका।
महाराष्ट्री जम्बुरसेत्यथा नीलोत्पलद्रवैः॥"
इति वैद्यकरत्नसारसंग्रहे शूलाधिकारे पञ्चालकरसे। महाराष्ट्राणामियमिति। महाराष्ट्र। अण् ङीप्।) अष्टादशभाषान्तर्गतभाषाविशेषः। यथा, साहित्यदर्पणे ६ परिच्छेदे।

"आसामेव तु गद्यानां महाराष्ट्री प्रयोजयेत्।
अन्योक्ता मागधी भाषा राजान्तःपुरचारिणाम्॥"

महारिष्टः, पुं, (महान् अरिष्टः।) महानिम्बविशेषः। तत्पर्य्यायः। कैटर्य्यः २ रामठः ३ रमठः ४ गिरिनिम्बः ५ शुक्लसालः ६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कषायत्वम्। शीतलत्वम्। लघुत्वम्। सन्तापशोथकुष्ठासृक्पित्तविषापहत्वञ्च। इति राजनिर्घण्टः॥

महारुद्रः, पुं, (रुद्राणां महान् स्वयं ईश्वर इत्यर्थः इति महारुद्रः।) महादेवः। यथा,—

"महाकाल्या महाकालश्चण्डकाकारूपतः।
मायया च्छादितात्मा च तस्मध्ये समभागतः॥
महारुद्रः स एवात्मा महाविष्णुः स एव हि॥"
इति निर्व्वाणतन्त्रम्॥

महारूपः, पुं, (महत् महत्त्वादिरूपमस्य।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३। १७। ३४॥ (महद्रूपं यस्य।) अतिशयरूपयुक्ते, त्रि॥

महारूपकं, क्ली, (महत् रूपकं यत्र।) नाटकम्। इति चिकाण्डशेषः॥

महारोगः, पुं, (महान् घोरानिष्टकारकः रोगः। यद्वा, महा उन्मान्तरीक्षभुक्तावग्रिष्टातिशयपातकेन जनितः रोगः।) पापरोगः। स चाष्टविधो यथा। उन्मादः १ त्वग्दोषः २ राजयक्ष्मा ३ श्वासः ४ मधुमेहः ५ भगन्दरः ६ उदरः ७ अश्मरी ८। इति शुद्धितत्त्वे नारदः॥ (यथा च आश्वलायने। २। ७। १७।

"महारोगेण वाभितप्तः प्राग्वीयादन्यतरां गतिं गच्छति॥"

"महारोगेण क्षयकुष्ठादिनेति" तट्टीकायां गार्य्यनारायणः॥ विषयोऽस्य यथा,—

"महारोगातके कासे ज्वरे श्वासातिसारके॥"
अस्य व्याख्यायां यथा,—
"वातव्याध्यश्मरीकुष्ठमेदोदरभगन्दराः।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्त्तिताः॥"
इति वैद्यकरत्नसारसंग्रहे यक्ष्मणि रत्नगर्भोद्भवटीका॥)

महारोगी, [न्] पुं, (महा रोगः क्षयादिरस्यस्येति। महारोग+इनिः। महारोगयुक्तः। यथा,—

"क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यथेष्टाचरणस्याहुर्म्मरणान्तमशौचकम्॥"
इति शुद्धितत्त्वधृतकूर्म्मपुराणवचनम्॥

महारोमा, [न्] पुं, (महान्ति रोमाणि दृष्ट्यादिरूपाणि विराटरूपे यस्य।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३। १७। ८८॥ (महान्ति रोमाण्यस्य।) दृढरोमयुक्ते, त्रि॥ (क्षतिरातस्य पुत्रविशेषः। यथा, भागवते। ६। १३। १७।

"मरोः प्रतीपकस्तस्माच्छतरथो यतः।
देवमीढस्य पुत्रो विश्रुतोऽथ महाधृतिः॥
क्षतिरातस्ततस्तस्माम्महारोमा च तत्सुतः॥")

महारौरवः, पुं, (रुरूणामयं इति। रुरु+अण्। महान् रौरवः। तत्र गता जीवाः क्रव्यन्नामकैरुरुभिः पीड्यन्ते अत एवास्य तथात्वम्।) नरकविशेषः। इत्यमरः। १। ६। १॥ महान् रौद्रो रवोऽत्र महारौरवः मनीषादित्वात् ब्रह्मोपः। इति भरतः॥ अपि च।

"महारौरवसंज्ञन्तु अधोऽर्द्धं ताम्रसंपुटम्।
धम्यते खदिराङ्गारैर्गुरुदारापनायकः॥
देवद्रव्यापहारी च पच्यते कालमक्षयम्॥"
इति वह्निपुराणे पापनाशनतृषदानाध्यायः॥

महार्घ, त्रि, (महान् अधिकः अर्घो मूल्यमस्य।) महामूल्यम्। इति मेदिनी॥ घे, १०। (यथा, कथासरित्सागरे। १२। १४५।

"ततस्तस्मै महार्घाणि रत्नानि सुबहूनि च।
विभीषणो ददौ स मथुरां गन्तुमिच्छते॥")

महार्घः, पुं, (महान् अर्घो मूल्यमादरो वास्य।) लावकपक्षी। इति विश्वः॥

महार्णवः, पुं, (महान् सुविशालः अर्णवः।) महासमुद्रः। यथा,—

"आचूर्णितो वा वातेन स्थितः पोते महार्णवे॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
(महान् अर्णव इव। प्रसादादिगुणबाहुल्यात् तथात्वम्।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ (कूर्म्मरूपिभगवन्नारायणस्य दत्तपदोद्भवः जनपदः। यथा, मार्कण्डेये। ५८। ३२।

"सौराष्ट्रा दरदाश्चैव दाविड़ाश्च महार्णवाः।
एते जनपदाः पादे स्थिता वै दक्षिणेऽपरे॥")

महार्द्धः, पुं, (महान् विपुलोऽर्द्धोऽस्य।) वृक्षविशेषः। इति शब्दचन्द्रिका। महाजा इति भाषा॥

महार्द्रकं, क्ली, (महत् आर्द्रकम्।) वनार्द्रकम्। अस्य गुणाः। अग्निदीपनत्वम्। धारकत्वम्। रूक्षत्वम्। वायुकफनाशित्वञ्च। इति राजवल्लभः॥

महार्बुदं क्ली, (महत् अर्बुदम्।) दशार्बुदम्। शतकोटिसंख्या। इति ज्योतिषम्॥

महार्हं, क्ली, (महान् अर्हः मूल्यं मर्य्यादा वास्य।) श्वेतचन्दनम्। इति राजनिर्घण्टः॥ (महामूल्यवति, त्रि। यथा, महाभारते। १। २१०। २६।

"महार्हाभरणोपेतौ विरजोऽम्बरधारिणौ॥")

महापूजायोग्यम्। यथा, रामायणे। १। ६६। १०।

"यस्माङ्गार्थिनो भागान् नाकल्पयत मे सुराः।
वराङ्गानि महार्हाणि धनुषा शातयामि वः॥"
"महार्हाणि महापूजायोग्यानि।" इति तट्टीकायां रामानुजः॥)

महालयः, पुं, (महतां जनानामालयः। महान् आलय इति वा।) विहारः। (महतां योगिप्रभृतीनामालयः।) तीर्थः। (महदादीनां लयो यस्मिन्।) परमात्मा। इति मेदिनी। ये, १२५॥ सौराश्विनीयकृष्णपक्षः। यथा, भविष्ये।

"येयं दीपान्विता राजन्! ख्याता पञ्चदशी भुवि।
तस्यां दत्तान्न चेद्दत्तं पितॄणां वै महालये॥"
महालये कन्यागतापरपक्षे। इति तिथ्यादितत्त्वम्॥

महालक्ष्मीः, स्त्री, (महती लक्ष्मीः।) राधा। नारायणशक्तिः। यथा,—

"यन्मायया मोहिताश्च ब्रह्मविष्णुशिवादयः।

वैष्णवास्तां महालक्ष्मीं परां राधां वदन्ति ते ॥
यद्दक्षांङ्गा महालक्ष्मीः प्रिया नारायणस्य च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥
अथ महालक्ष्मीमन्त्रः ।
"तारो वाग्भवं माया रमाकामः हृसौ-
र्ज्जगत्प्रसूत्यै नमः ॥"
तथा च ।
"वाग्भवं शम्भुवनिता रमा मकरकेतनः ।
तार्त्तीयश्च जगत्मात्रीं वह्निजीवसमुज्ज्वलः ॥
अर्धोशाढ्यो भृगुस्थेन्दुमन्त्रोऽयं दशवाक्षरः ।
महालक्ष्म्याः समुद्दिष्टस्तारादः सर्व्वसिद्धिदः ॥"
तस्या ध्यानं यथा, तन्त्रसारे ।
"बालार्कद्युतिमिन्दुखण्डविलसत्कोटीरहारो-
ज्ज्वलां
रत्नाकल्पविभूषितां कुचनतां शाले: करैर्बिभ्रतीम् ।
पद्मौ कौसुभरत्नमप्यविरतं संबिभ्रतीं वल्लितां
फुल्लाम्भोरुहलोचनत्रययुतां ध्यायेत् परा-
मम्बिकाम् ॥"
(अस्या बीजम् । ॐ ऐं ह्रीं श्रीं क्लीं हृसौं जगत्प्रसूत्यै नमः ।)
महालिकटभी, स्त्री, (महान्तः अलयः । तेषां कटभी आश्रयभूतवृक्षः ।) श्वेतकिंशुकवृक्षः । इति राजनिर्घण्टः ॥
महालिङ्गः, पुं, (महान् पूज्यतमो विपुलो वा लिङ्गोऽस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (यथा, राजतरङ्गिण्याम् । २ । १३० ।
"अकरोत् स महाहर्म्यैर्महालिङ्गैर्महाद्रिवत् ।
महाचित्रैर्महत्तीं महामाहेश्वरो महीम् ॥"
महत् वृहल्लिङ्गमस्य ।) वृहल्लिङ्गयुक्तश्च ॥
महालीलसरस्वती, स्त्री, (लीलया सरस्वती । महती लीलसरस्वतीति कर्म्मधारयः ।) तारा-विशेषः ।
"लीलया वाक्प्रदा चेति तेन लीलसरस्वती ।
तारास्वरहिता चाद्या महालीलसरस्वती ॥"
इति तन्त्रसारः ॥
महालोधः, पुं, (महान् लोध्रः ।) लोध्रविशेषः । इति रत्नमाला । पाटियालोध इति भाषा ॥
महालोलः, पुं, (महदतिशयं लोलं लौल्यमस्य ।) काकः । इति राजनिर्घण्टः ॥ अतिचञ्चले, त्रि ॥
महालोहं, क्ली, (महत् अतिशयगुणवत् लोहम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥
महावनं, क्ली, (महत् विपुलं वनम् ।) वृहद्वनम् । तत्पर्य्यायः । अरण्यानी २ महारण्यम्३ महाटवी४ । इति राजनिर्घण्टः ॥(यथा, रामायणे ।
"निरस्ताः पथि धावन्ति त्रयस्ते यन्महावने ॥")
वृन्दावनस्थचतुरशीतिवनान्तर्गतवनविशेषश्च ॥
महावपः, पुं, (महती वपा यस्य । यद्वा, महान्तं धातुस्थौल्यादिकं वपतीति । वप + अच् ।) महामेदः । इति शब्दचन्द्रिका ॥
महावराः, स्त्री, (ह्रियते असौ देवादिभिरिति । वृ + अच् । टाप् । महती वरा ।) दूर्व्वा । इति शब्दरत्नावली ॥
महावराहः, पुं, (महानीश्वरोऽपि सन् वराहः । महांश्चासौ वराहश्चेति वा ।) वराहरूपी भगवान् । यथा,—
"महावराहो गोविन्दः सुषेणः कनकाङ्गदी ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (राजविशेषः ।यथा, कथासरित्सागरे ।५२।६२।
"अस्ति सूरपुरं नाम यथार्थं नगरं भुवि ।
महावराह इत्यासीद्राजा तत्रातिदुर्म्मदः ॥")
महावरोहः, पुं, (महान् अवरोहः शिफानां अधोऽवतरणं यस्य ।) अश्वत्थः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य शब्दग्रन्थे ज्ञातव्यः ॥)
महावल्ली, स्त्री, (महती चासौ वल्ली चेति ।) माधवीलता । इति शब्दचन्द्रिका ॥ (उत्तमा लता च । यथा, कथासरित्सागरे । ३३ । ८५ ।
"उपायरससंसिक्ता देशकालोपबृंहिता ।
सेयं नीतिमहावल्ली किं नाम न फलेत् फलम्॥")
महावसः, पुं, (महती वसा वपास्य । वृक्षः ।) शिशुमारः । इति हेमचन्द्रः । ४ । ४१६ ॥
महावक्षाः, [स्] पुं, (महत् वक्षः विराड्देहेऽस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १७ । ८६ ॥ (महत् वक्षोऽस्य ।) वृहद्वक्षोयुक्ते, त्रि ॥
महावाक्यं, क्ली, (महत् वाक्यम् ।) योग्यताकाङ्क्षासत्तियुक्तवाक्यसमूहः । इति साहित्यदर्पणः । २ । २ ॥ न्यायमते तु । खघटकानेकनामलभ्यताद्यर्थकम् । प्रकृत्यर्थमात्रावच्छिन्नप्रत्ययार्थबोधं प्रत्ययार्थयोग्यवाक्यं वा । इति शब्दशक्तिप्रकाशिका ॥ (महत् महदर्थप्रकाशकं वाक्यम् ।) तत्त्वमसीति आदिवाक्यम् । प्रतिष्ठादावुत्सर्गवाक्यञ्च ॥
महावारुणी, स्त्री, (वरुणो देवतास्याः । वरुण + अण् । ङीप् । महती वारुणी ।) गङ्गास्नानस्य योगविशेषः । स तु शनिवारशतभिषानक्षत्रयुक्तगौणचान्द्रचैत्रकृष्णत्रयोदशीरूपः । यथा,—
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशते: समा ॥
शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहैः समा ॥"
इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥
महाविद्या, स्त्री, (विद्यते ज्ञायते इति । विद् + क्यप् । टाप् । महती विद्या ज्ञानं तत्त्वसाक्षात्कारो वा यस्याः ।) देवीविशेषः । सा दशधा । यथा चासुखातन्त्रे ।
"काली तारा महाविद्या षोड़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः॥
नात्र सिद्धादिचक्रादि न नक्षत्रविचारणा ।
कालादिशोधनं नास्ति न चामित्रादिदूषणम् ॥
सिद्धविद्यातया नात्र युगसेवापरिश्रमः ।
नास्ति किञ्चिन्महादेवि ! दुःखसाध्यं कथञ्चन॥"
मालिनीविजये ।
"अथ वक्ष्याम्यहं या या महाविद्या महीतले ।
दोषजालैरसंस्पृष्टाः सर्व्वा हि फलैः सह ॥
काली तारा महादुर्गा त्वरिता छिन्नमस्तका ।
वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्या वासली बाला मातङ्गी शैलवासिनी ।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धमन्त्रतया नात्र युगसेवापरिश्रमः ।
अथ चैता महाविद्याः कलिदोषान्न बाधिताः॥"
इति तन्त्रसारः ॥ * ॥
तासां दशावतारत्वं यथा,—
"प्रकृतिर्विष्णुरूपा च पुंरूपश्च महेश्वरः ।
एवं प्रकृतिभेदेन भेदास्तु प्रकृतेर्दश ॥
कृष्णरूपा कालिका स्यात् रामरूपा च तारिणी ।
बगला कूर्म्मरूपिः स्याच्छीनो धूमावती भवेत् ॥
छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी ।
सुन्दरी वामदेवः स्यादामनो भुवनेश्वरी ॥
कमला बौद्धरूपा स्यात् दुर्गा स्यात् कल्किरूपिणी ।
स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम् ।
स्वयञ्च भगवान् कृष्णः कालीरूपो भवेद्व्रजे ॥"
इति मुण्डमालातन्त्रम् ॥
(गङ्गा । यथा, काशीखण्डे । २६ । १३६ ।
"महाविद्या महामाया महामेधा महौषधम् ॥")
महाविराट्, [ज्] पुं, (विशेषेण राजते प्रकाशते । इति । वि + राज् + क्विप् । महांश्चासौ विराट् चेति ।) महाविष्णुः । यथा,—
सुनिरुवाच ।
"विश्वानां गोलोकं राजन् ! विस्तृतञ्च नभःसमम् ।
शून्यन्नित्यं डिम्बरूपं श्रीकृष्णोच्छ्वाससम्भवम् ॥
जलेन परिपूर्णञ्च कृष्णस्य मुखबिन्दुना ।
दुग्धाम्बुसदृशाकारं परिश्रान्तस्य क्रीड़तः ॥
प्रकृत्या सह युक्तेन कलया निजया नृप ! ।
तत्राधारो महद्विष्णोर्विश्वाधारस्य विस्तृतः ॥
प्रकृतीगर्भसंभूतडिम्बोद्भूतस्य भूमिप ! ।
सुविस्तृते जलाधारे शून्यानञ्च महान् विराट् ॥
राधेश्वरस्य कृष्णस्य गोड़शांशः प्रकीर्त्तितः ।
दूर्व्वादलश्यामरूपः सस्मितश्च चतुर्भुजः ।
वनमालाधरः श्रीमान् शोभितः पीतवाससा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥
महाविलं, क्ली, (महच्च तत् विलञ्चेति ।) आकाशम् । इति जटाधरः ॥ वृहच्छिद्रञ्च ॥
महाविषः, पुं, (महत् अत्युत्कटं विषमस्य ।) द्विमुखसर्पः । यथा,—
"महाविषः कालसर्पो राजाहिर्द्विमुखोरगः ।"
इति जटाधरः ॥

(महाविषविशिष्टे, त्रि। यथा, सुश्रुते कल्पस्थाने ८ अध्याये।
"त्रिविधा दष्टिकाः मन्दमध्यमहाविषाः।"
(महद् विषम्। महाविषे, क्ली। यथा, सुश्रुते कल्पस्थाने २ अध्याये।
"महाविषेण हृदये यस्यिमूलोद्गमौ भृशम्॥")

महाविषुवं, क्ली, (विषु साम्यमर्हत्यर्थेति। विषु+ "वयकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम्।" ५। २। १०६। इत्यस्य वार्त्तिकात् वप्रत्ययः। महच्च तत् विषुवच्चेति। अस्मिन् समये दिवारात्रयोः समत्वात्तथात्वम्।) मेषसंक्रान्तिः। यथा,—
"महाविषुवमाख्यातं ज्ञातिभिश्चेष्टचिन्तितम्॥"
इति शब्दरत्नावली॥
तस्मिन् मन्दरनिम्नपत्रहयभक्षणम्। यथा, ज्ञत्वचिन्तामणौ।
"मन्दरं निम्नपत्राभ्यां योऽत्ति मेषगते रवौ।
अपि रोषान्वितस्तस्य तक्षकः किं करिष्यति॥"
तत्र शक्रादिदानं यथा,—
"मेषादौ शक्रवो देया वारिपूर्णा च गर्गरी॥"
वारिपूर्णघटदानमन्त्रादि यथा,—
"एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः॥
वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने।
ददाति सुरराजेन्द्र! स याति परमां गतिम्॥"
महार्णवे।
"यो ददाति हि मेषादौ शक्तून्नघटान्वितान्।
पितृन्तृप्तिञ्च विप्रेभ्यः सर्व्वपापैः प्रमुच्यते॥"
तत्र छत्रपादुकादानं यथा,
"विप्रेभ्यः पादुकाच्छत्रं पितृभ्यो विष्णवे शुभम्।"
पितृभ्यः पितृन्तृप्तिश्चेत्यर्थः। इति तिथ्यादितत्त्वम्॥

महाविष्णुचक्रं, क्ली, (महाविष्णुस्य चक्रम्।) नक्षत्रघटितनराकारचक्रम्। यथा,
"मूर्द्धि वक्त्रे सुखे त्रीणि हृदये पञ्च विन्यसेत्।
चितयं हस्तपादेषु महाविष्णुवभक्रमात्॥
मस्तके भूपतेः सौख्यं वदने पटुता खले।
हृदये च धनाढ्यत्वमर्थप्राप्तिर्दक्षिणे करे॥
वामे करे महद्दुःखं सुखं पादे च दक्षिणे।
भ्रमणं वामपादे च कथितं विष्णुवत्फलम्॥"
इति ज्योतिषतत्त्वम्॥

महाविष्णुः, पुं, (महांश्चासौ विष्णुः सर्व्वव्यापकत्वेति।) महाविराट्। यथा। 'यस्य जले कोटिकोटिब्रह्माण्डानि महाविष्णुरोमकूपगतानि तस्या विरजायाः परिखाभूतायाः उपरि महार्षेकुण्ठलोकः। तस्योर्द्धभागे गोलोकः। तस्य नाथः कृष्णो देवलोकः स परिवारेण वर्त्तते। इति भागवतान्ततन्त्रिका। स च श्रीकृष्णस्य कलाविशेषः। यथा,—
"विष्णुर्महान् स इह यस्य कलाविशेषो
गोविन्दमादिपुरुषं तमहं भजामि॥"
इति भागवतान्ततपूर्व्वखण्डः॥

महावीचिः, पुं, (न विद्यते वीचिः सुखं यत्र। महानवीचिरत्र।) नरकविशेषः। यथा, मनुः।
"नरकं कालसूत्रञ्च महानरकमेव च।
सञ्जीवनं महावीचिं तपनं संप्रतापनम्॥"
यातीति पूर्व्ववचनस्यमनुवर्त्तते।
"महावीचिर्यत्र महाकल्लोलेन तु नीयते॥"
इति प्रायश्चित्तविवेकः॥

महावीर्य्यं, क्ली, (वीर्य्याय साधु इति यत्। महत् वीर्य्यम्।) विटपम्। तन्तु शब्दरत्नावल्यां रम्। इति हेमचन्द्रः॥

महावीरः, पुं, (वीन् पक्षिण ईरयतीति। ईर+कः। ततो महांश्चासौ वीरश्चेति।) गरुडः। वीरयतीति। वीर+कः। महान् वीर इति कर्म्मधारयः। शूरः। सिंहः। मखानलः। (स च मनुपुत्रविशेषः। यथा, श्रीभागवते। ५।१२५।
"अग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतो-
घृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति॥")
वक्षः। श्वेततुरङ्गः। सन्धानपक्षी। इति मेदिनी। रे, २८६॥ अन्तिमजिनः। (अयमेव सिद्धार्थस्य त्रिशलागर्भजातः पुत्रः। तद्विवरणं यथा, अरिष्टनेमिपुराणान्तर्गतजैनहरिवंशे।
"सर्व्वार्थश्रीमतीजन्मा तस्मिन् सर्व्वार्थदर्शनः।
सिद्धार्थोऽभवदर्काभो भूपः सिद्धार्थपौरुषः॥
यत्र याति धरित्रीयमभूदेकत्रदोषिणी।
धर्म्मार्थिन्योऽपि यत्राक्तपरलोकभयाः प्रजाः॥
कस्तस्य तानू गुणानुद्यानरस्तुलयितुं क्षमः।
वर्द्धमानगुरुत्वं यैः प्रापितः स नराधिपः॥
उग्रैः कुलादिसम्भूता सहजस्नेहवाहिनी।
महिषी श्रीसमुद्रस्य तस्यासीत् प्रियकारिणी॥
पीतश्चेटकराजस्य यास्याः सप्तशरीरिजाः।
अतिस्नेहाकुलश्चक्रुस्त्राखाद्या प्रियकारिणी॥
कन्यां योजयितुं शक्तस्त्रिशलां गुणवर्णने।
या स्वपुण्यैर्महावीरप्रसवाय नियोजिता॥
सर्व्वतोऽथ नमन्तीषु सर्व्वासु सुरकोटिषु।
प्रभावान्निपतन्तीषु नभसो वसुवृष्टिषु॥
वीरेऽवतरति त्रातुं धरित्रीमसुधारिणः।
तीर्थेनाच्युतकल्पेन्द्रैः पुष्पोत्तरविमानतः॥
सा तं षोडशसुस्वप्नदर्शनोत्सवपूर्व्वकम्।
ददर्श गर्भेश्वरं गर्भे श्रीवीरं प्रियकारिणी॥
पञ्चसप्ततिवर्षाष्टमासमासार्द्धसेवकः।
चतुर्थेषु तदा कालो दुःखमः सुखमोत्तरः॥
आषाढ़शुक्लषष्ठ्यान्तु गर्भावतरणेऽर्हतः।
उत्तराफाल्गुनीनीड़सुहृराजद्विजश्रितः॥
दिक्कुमारीकृताभिख्यां द्योतिमूर्त्तिर्घनस्तनीम्।
प्रच्छन्नो भासयन्गर्भस्थां रविः प्राहर्यं यथा॥
नवमासेष्वतीतेषु स जिनोऽर्द्धदिनेषु च।
उत्तराफाल्गुनीष्विन्दौ वर्त्तमानेऽजनि प्रभुः॥
ततोऽन्यजिनमाहात्म्याद्भुतपीठकिरीटकाः।
प्रयीसुरवधिज्ञाततदृत्तान्ताः सुरेश्वराः॥
शक्रमेरौहरिध्वानघण्टानिर्घोषघोषणम्।
समाकर्ण्य सुरास्तूर्णं घूर्णितार्णवराविणः॥
सप्तानीकमहाभेदाः सज्जीकाः कृतभूषणाः।
सेन्द्राश्चतुर्णिकायास्ते प्रापुः कुण्डपुरं पुरम्॥
त्रिःपरीत्य पुरं देवाः पुरन्दरपुरःसराः।
जिनमिन्द्रसुखं देवं तद्गुरुं च ववन्दिरे॥
मातुः शिशुं विज्ञत्याऽन्यं सुप्तायाः सुरमायया।
इन्द्राणी प्रणता नीत्वा जिनेन्द्रं हरये ददौ॥
गृहीत्वा करयुग्माभ्यां तमभ्यर्च्य चिरं हरिः।
चक्रे नेत्रसहस्रोरुपुष्करीकवनार्चितम्॥
ततश्चन्द्रावदातागमिन्द्रस्तुङ्गमतङ्गजम्।
अद्रौघमिव हैमाद्रेर्मुक्ताघो मदनिर्झरम्॥
गण्डस्थलमदामोदभ्रमद्भ्रमरमण्डलम्।
तमिवाधित्यकावस्थतमालवनमण्डितम्॥
कर्णान्तरततासक्तरक्तचामरसंहतिम्।
तं यथाधित्यकाधीनरक्ताशोकमहाद्रुमम्॥
सुवर्णरज्ज्वया चार्या परिवेष्टितविग्रहम्।
तमेव च यथोपात्तकृतकनकमेखलम्॥
अनेकरदसंदृब्धनृत्यसङ्गीतशोभितम्।
तमिवोत्तुङ्गशृङ्गाग्यनृत्यन्नायतसुराङ्गनम्॥
सुवृत्तदीर्घसञ्चारिकररुद्धदिगन्तरम्।
तमिवात्यायतस्थूलस्फुरद्भोगभुजङ्गमम्॥
ऐरावतमधिरूढस्त्रीतधवलातपवारणम्।
तमिवोर्द्धस्थिताभ्यर्णसम्पूर्णशशिमण्डलम्॥
चामरेन्द्रभुजोत्क्षिप्तचलचामरहारिणम्।
तं यथा चमरीक्षिप्तबालव्यजनवीजितम्॥
ऐरावतं समारोप्य जिनेन्द्रं तस्य मर्द्धनम्।
देवैः सह गतः प्राप मन्दरं स पुरन्दरः॥
तं पाण्डुकवने रम्ये मन्दरस्य जिनं हरेः।
पाण्डुकायां प्रसिद्धायां शिलायां सिंहविष्टरे॥
संस्थाप्य विबुधानीतक्षीरसागरवारिभिः।
शातकुम्भमयैः कुम्भैरभिषिच्य समं सुरैः॥
वस्त्रालङ्कारमालाद्यैरलङ्कृत्य कृतस्तुतिः।
आनीयमातुरुत्सङ्गे जिनं कृत्वा कृतोचितः॥
सिद्धार्थप्रियकारिण्योः सममानन्ददायकम्।
वर्द्धमानाख्यया स्तुत्वा स देवो वासवोऽगमत्॥
मासान् पञ्चदशाजस्रमुन्नधारा दिने दिने।
याः पूर्व्वमापतंस्ताभिस्तर्पितोऽर्थी जनोऽखिलः॥
वर्द्धमानः सुरैः सेव्यो वृद्धिं स यथा यथा।
पिप्लवन्त्रिलोकानामनुरागस्तथा तथा॥
सुरासुरनराधीशमौलिमालार्चितक्रमः।
त्रिंशद्वर्षप्रमाणोऽभूद्वीरो भोगैः परिष्कृतः॥
शुद्धदृष्टं न भोगेषु चित्तं तस्य चिरं स्थिरम्।
कुटिलेषु यथा सिंहनखरन्ध्रेषु मौक्तिकम्॥
प्राप्तचित्तं कदाचित्तं स्वयं बुद्धमबोधयत्।
नत्वा सारस्वतादित्यसुखालोकान्तिकाः सुराः॥
सौधर्म्माद्यैः सुरेरेत्य कृतोऽभिषवपूजनः।
आरुह्य शिबिकां दिव्यामुह्यमानां सुरेश्वरैः॥
उत्तराफाल्गुनीष्वेव वर्त्तमाने निशाकरे।
कृष्णस्य मार्गशीर्षस्य दशम्यामगमद्वनम्॥
अपनीय ततोः सर्व्वं वस्त्रमाल्यादिभूषणम्।
पञ्चमुष्टिभिरुद्धृत्य मूर्द्धजानभवन् मुनिः॥
केशङ्कृत्वासहस्राढ्यं जिनस्य भ्रमरासितम्।

प्रतिगृह्य सुराधीशो निदधौ दुग्धवारिधौ ॥
इन्द्रनीलचयेनेव चित्रितेनेन्द्रेण चात्मभात् ।
जिनेन्द्रकेशपुञ्जेन रक्षितः क्षीरसागरः ॥
जननिष्क्रमणं दृष्ट्वा तुष्टाः सर्व्वे नरामराः ।
कृत्वा तृतीयकल्याणपूजाञ्चक्रुर्यथोचितम् ॥
मनःपर्य्ययपर्य्यन्तचतुर्ज्ञानमहेक्षणः ।
तपो द्वादशवर्षाणि चकार द्वादशात्मकम् ॥
विहरन्नथ नाथोऽसौ गुरुग्रामपरिग्रहः ।
ऋजुकूलापगाकूले जृम्भिकग्राममीयिवान् ॥
तत्रातापनयोगस्थः श्यामाभ्यासशिलातले ।
वैशाखशुक्लपक्षस्य दशम्यां षष्ठमाश्रितः ॥
उत्तराफाल्गुनीं प्राप्ते शुक्लध्यानी निशाकरे ।
निहत्य घातिसङ्घातं केवलज्ञानमाप्तवान् ॥
केवलस्य प्रभावेण सहसा चलितासनाः ।
आगत्य महिमां चक्रुस्तस्य सर्व्वे सुरासुराः ॥
षट्षष्टिदिवसान् भूयो मौनेन विहरन् विभुः ।
आजगाम जगत्ख्यातं जिनो राजगृहं पुरम् ॥
आरुरोह गिरिं तत्र विपुलं विपुलश्रियम् ।
प्रबोधार्थं स लोकानां भानुमानुदयं यथा ॥
ततः प्रवृद्धशान्तेरापतद्भिरितस्ततः ।
जगत्सुरासुरैर्व्याप्ति जिनेन्द्रस्य गुणैरिव ॥
सौधर्म्मादेस्तदा देवैः परीतोऽभात् स भूधरः ।
नाभेयाधिष्ठितः पूर्व्वं यथाष्टापदपर्व्वतः ॥
चतुराशासुखद्वारस्थितद्वादशगोपुरम् ।
कृतं रत्नमयं देवैः प्राकारवलयत्रयम् ॥
जाते योजनविस्तीर्णे गुरगे समवादिके ।
विभागा द्वादशाभासन्नभःस्फाटिकभित्तयः ॥
प्रातिहार्य्यैर्युतोऽशोकाभिधवृक्षाद्भुतेः ।
तत्र देवैर्वृतोऽभासीच्छिनच्चन्द्र इव ग्रहैः ॥
इन्द्राग्निवायुभूत्याख्याः कौण्डिन्याख्याश्च पण्डिताः ।
इन्द्रनोदनयायाताः समवस्थानमर्हतः ॥
प्रत्येकं सहिताः सर्व्वे शिष्याणां पञ्चभिः शतैः ।
त्यक्ताम्बरादिसम्बन्धाः संयमं प्रतिपेदिरे ॥
सुता चेटकराजस्य कुमारी चन्दना तदा ।
धौतैकाम्बरसंवीतायार्याणां पुरःसरी ॥
श्रेणिकोऽपि च संप्राप्तः सेनया चतुरङ्गया ।
सिंहासनोपविष्टं तं प्रणनाम जिनेश्वरम् ॥
कृतचामरभृङ्गारैः कलसध्वजदर्पणैः ।
व्यजनैः सुप्रतीकैश्च प्रसिद्धैरष्टमङ्गलैः ॥
स्वजाचक्रद्रुकूलाजगजसिंहवृषध्वजैः ।
गरुडध्वजसंयुक्तैरष्टभेदैर्महाध्वजैः ॥
मानस्तम्भैस्तथास्रूपैश्चतुर्भिश्च महावनैः ।
वाप्यम्भोरुहखण्डैश्च वल्लीवनलताग्रहैः ॥
तैस्तैर्देवैः कृतैः सर्व्वैरन्यैश्चातिप्रयत्नतः ।
यथा स्थानस्थितैर्जैनी समवस्थानभूरभूत् ॥
अर्धेन्दोरिव शुक्राद्या निशस्य गुरुभिर्वृताः ।
साधवोऽभाञ्जिनस्यान्ते जातरूपाङ्गविग्रहाः ॥
ततः कल्पनिवासिन्यो देव्यः कल्पलताभुजः ।
मेरोरिव जिनस्यान्ते ता बभुर्भोगभूमयः ॥
ततोऽलङ्कृतनारीभिरार्यिकाततिराबभौ ।
स्फुरद्विद्युद्भिराश्लिष्टा शारदीव घनावली ॥
ज्योतिर्देवस्त्रियो तत्र रेजुरुज्ज्वलमूर्तयः ।
तारातारा इव संक्रान्ताः समवस्थानसागरे ॥
कान्तायन्तरदेवानां ततस्तत्र विरेजिरे ।
करकुट्मलहारिण्यः साक्षादिव वनश्रियः ॥
ततो नागकुमारादिदेवो नागफणोज्ज्वलाः ।
नागलोकसमायाता नागवल्ल इवा बभुः ॥
ततोऽग्निकुमाराद्याः देवाः पातालवासिनः ।
ज्वलितोज्ज्वलवेषास्ते दशभेदा बभासिरे ॥
ततः किन्नरगन्धर्व्वयक्षकिंपुरुषादयः ।
षोढ़शार्द्धविकल्पास्ते व्यन्तराश्च चकासिरे ॥
सप्तकौर्यकनक्षत्रसूर्य्याचन्द्रमसोर्ग्रहाः ।
पञ्चभेदास्तदानल्पवपुषो ज्योतिषो बभुः ॥
मौलिकुण्डलकेयूरप्रालम्बकटिसूत्रिणः ।
हारिणः कल्पवृक्षाभास्ततोऽभान् कल्पवासिनः ॥
सपुत्रानमितानेकविद्याधरपुरःसराः ।
व्यधीदम्भानुषा नानाभाषावेषग्रहच्छलतः ॥
ततो हि नकुलेभेन्द्रहर्य्यश्वमहिषादयः ।
जिनानुभावसम्भूतविश्वाद्याः स्वामिनो बभुः ॥
इति द्वादशभेदेषु परीतिं विनुतिं नतिम् ।
गणेषु प्रथमं कृत्वा स्थितेषु परितो जिनम् ॥
प्रत्यक्षीकृतविश्वार्थं क्षतदोषत्रयक्षयम् ।
जिनेन्द्रं गौतमोऽपृच्छत्तीर्थार्थं पापनाशनम् ॥
स दिव्यध्वनिना विश्वसंशयच्छेदिना जिनः ।
द्रुह्यभिव्यक्तिधीरेण योजनान्तरयायिना ॥
श्रावणस्यासिते पक्षे नक्षत्रेऽभिजिते प्रभुः ।
प्रतिपद्यह्नि पूर्व्वाह्णे शासनार्थमुदाहरत् ॥
आचाराङ्गस्य तत्त्वार्थं तथा सूत्रकृतस्य च ।
जगाद भगवान् वीरः संस्थानसमवाययोः ॥
व्याख्या प्रज्ञप्तिहृदयं ज्ञाताधर्म्मकथास्थितम् ।
श्रावकाध्ययनस्यार्थमन्तकृद्दशगोचरम् ॥
अनुत्तरदशस्यार्थं प्रश्नव्याकरणस्य च ।
तथा विपाकसूत्रस्य पवित्रार्थं ततः परम् ॥
त्रिषष्टिः त्रिशती यत्र दृष्टीनामभिधीयते ।
दृष्टिवादस्य तस्यार्थं पञ्चभेदस्य सर्व्वदृक् ॥
जगाद जगतां नाथः प्रथमं परिकर्म्मणः ।
सूत्रस्याद्यानुयोगस्य तथा पूर्व्वगतस्य च ॥
उत्पादपूर्व्वपूर्व्वस्य परमार्थं ततः परम् ।
अग्रायणीयपूर्व्वार्थमग्रवीरभवद्विदाम् ॥
वीर्यप्रवादपूर्व्वार्थमस्तिनास्तिप्रवादजम् ।
ज्ञानसत्प्रवादार्थमात्मकर्म्मप्रवादयोः ॥
प्रत्याख्यानस्य विद्यानुवादकल्याणपूर्व्वयोः ।
प्राणावायस्य पूर्व्वस्य तत्त्वार्थं तदनन्तरम् ॥
क्रियाविशालपूर्व्वस्य विशालार्थमशेषवित् ।
लोकबिन्दुसारार्थं चूलिकार्थं सवस्तुकम् ॥
अङ्गप्रविष्टतत्त्वाय प्रतिपाद्य जिनेश्वरः ।
अङ्गबाह्यमवोचत्तत्प्रतिपाद्यार्थरूपतः ॥
सामायिकं यथार्थाख्यं स चतुर्विंशतिस्तवम् ।
वन्दनाच्च ततः पूर्त्ता प्रतिक्रमणमेव च ॥
वैनयिकं विनेयेभ्यः क्षतिकर्म्म ततोऽवदत् ।
दशवैकालिकां पृथ्वीमुत्तराध्ययनं तथा ॥
तं कल्पव्यवहारञ्च कल्पाकल्पं * * *
कल्पञ्च पुण्डरीकञ्च सुमहापुण्डरीकम् ॥
तथा निषद्यकां प्राह प्रायश्चित्तोपवर्णनम् ।
जगत्त्रयगुरुः प्राह प्रतिपाद्यं हितोद्यतः ॥
मत्पादे केवलं तस्य स्वरूपं विषयं फलम् ।
अपरोक्षपरोक्षस्य ज्ञानस्योवाच संख्यया ॥
मार्गणास्थानभेदैश्च गुणस्थानविकल्पनैः ।
जीवस्थानप्रभेदैश्च जीवद्रव्यमुपादिशत् ॥
सत्संख्याद्यानुयोगैश्च सन्नामादेः किमादिभिः ।
द्रव्यं स्वलक्षणैर्भिन्नं पुद्गलादिविलक्षणम् ॥
द्विविधं कर्म्मबन्धञ्च सहेतुं सुखदुःखदम् ।
मोक्षं मोक्षस्य हेतुञ्च फलं चाष्टगुणात्मकम् ॥
बन्धमोक्षफलं यत्र मुच्यते तत्त्रिधाक्षतम् ।
अन्तःस्थितं जगौ लोकमलोकञ्च बहिःस्थितम् ॥
अथ सप्तर्द्धिसम्पन्नं श्रुतार्थं जिनभाषितम् ।
द्वादशाङ्गश्रुतं स्कन्धं सोपाङ्गं गौतमो यथात् ॥
त्रैलोक्यं संसदि स्फूर्जं जिनार्कवचनांशुभिः ।
मुक्तमोहमहानिद्रं सुप्तोत्थितमिवाबभौ ॥
जिनभाषाधरस्यास्यमन्तरेण विजृम्भिता ।
तिर्य्यग्देवमनुष्याणां दृष्टिमोहमनीनशत् ॥
ततो जिनोक्ततत्त्वार्थमार्गश्रद्धा च लक्षणम् ।
शङ्काकाङ्क्षादिनिर्दाताद्यकलङ्कविगमोज्ज्वलम् ॥
सम्यग्दर्शनसद्रत्नं ज्ञानालङ्कारनायकम् ।
स्वकर्णेन्द्रदयेष्वेकं पिनद्धमखिलाङ्गिभिः ॥
कायेन्द्रियगुणस्थानजीवस्थानकुलायुषाम् ।
भेदाद्यो निर्व्यलीकस्यांश्च निरूप्यागमचक्षुषा ॥
क्रियासु स्थानपूर्व्वासु वधादिपरिवर्ज्जनम् ।
यस्यां जीवनिकायानामहिंसाव्रं महाव्रतम् ॥
चतुर्गोचरजीवौघान् परिरक्ष्य यतेर्यतः ।
ईर्य्यासमितिराद्या सा व्रतशुद्धिकरी मता ॥
त्यक्त्वा कार्कश्यपारुष्यं यतेर्यत्नवतः सदा ।
भाषणं धर्म्मकार्य्येषु भाषासमितिरिष्यते ॥
पिण्डशुद्धिविधानेन शरीरस्थितये तु यत् ।
आहारग्रहणं साध्वादेषणा समितिर्यतेः ॥
निक्षेपणं यदा दानमौचित्या योग्यवस्तुनः ।
समितिः सा तु विज्ञेया निक्षेपादाननामिका ॥
शरीरान्तर्म्मलत्यागे प्रगतासु सुभूमिषु ।
यत्नात्समितिरेषा तु प्रतिष्ठापनिका मता ॥
एवं समितयः पञ्च गोप्यास्त्रिस्रस्तु गुप्तयः ।
वाङ्मनःकाययोगानां शुद्धरूपाः प्रवृत्तयः ॥
चित्तेन्द्रियनिरोधश्च षड्रावश्यकसत्क्रियाः ।
शौचस्नानैकभक्तञ्च स्थितशुक्तिरचेलता ॥
भूमिशय्याव्रतं दन्तमलमार्ज्जनवर्ज्जनम् ।
तपः संयमचारित्रं परीषहजयः परः ॥
अनुप्रेक्षाश्च धर्म्मस्य क्षमादिदशलक्षणः ।
ज्ञानदर्शनचारित्रतपोविनयसेवनम् ॥
इति अवश्यधर्म्मोऽयं कर्म्मनिर्म्मोचहेतुकः ।
सुरासुरनराध्यक्षं जिनोक्तं तदा नराः ॥
संसारभीरवः शुद्धजातिरूपकुलादयः ।
सर्व्वसङ्गविनिर्मुक्ताः प्रव्रज्यां प्रतिपेदिरे ॥
सम्यग्दर्शनसंशुद्धा शुद्धैकवसनावृताः ।
सङ्घस्थो दधुः शुद्धा नार्य्यश्चार्य्यिकाव्रतम् ॥
पञ्चधाणुव्रतं केचित् त्रिविधञ्च गुणव्रतम् ।

ग्रिव्याव्रतं चतुर्भेदं तत्र स्त्रीपुरुषा दधुः ॥
निर्ग्रन्थोऽपि यथाशक्ति नियमेष्ववतस्थिरे ।
देवाः सद्दर्शनज्ञानजिनपूजासु रेमिरे ॥
श्रेणिकेन तु यत् पूर्वं वङ्कारण्यपरग्रहात् ।
परस्मिन्निरयारम्भं नारकायुरुपार्जितम् ॥
तत्तु क्षायिकसम्यक्त्वात् स्थितिं प्रथमचित्तौ ।
प्रापद् वर्षसहस्रागामग्रीतिं चतुरुत्तराम् ॥
क्वयस्त्रिंशत् सहस्राः क्व क्व चैषमपरास्थितिः ।
अहो क्षायिकसम्यक्त्वप्रभावोऽयमनुत्तरः ॥
अक्रूरो वारिषेणो यो यो भयः स तथापरे ।
कुमारा मातरश्चैषां पराक्षान्तःपुरस्त्रियः ॥
सम्यक्त्वं श्रीलघद्वारं प्रौषधं जिनपूजनम् ।
प्रतिपद्य विनेमुस्ते जिनेन्द्रं त्रिजगद्गुरुम् ॥
ततः प्रणम्य देवेन्द्रा जिनेन्द्रं स्तोत्रपूर्वकम् ।
यथायथं ययुर्युक्ता निजवर्गैर्निजास्पदम् ॥
श्रेणिकोऽपि गुणश्रेणीसुखकैरभिरूढवान् ।
अभिष्टुत्य जिनं नत्वा प्रविष्टसुरधीपुरम् ॥
निःसरद्भिश्चिरग्रह्यि सभा जैनी जनोर्मिभिः ।
क्षुब्धाभ क्षुभितैर्वेला नदीपूरैरिवाम्बुधिः ॥
आकीर्णमेव तैर्भक्त्या सभामण्डलमर्हतः ।
स्तूयते वा कदा स्तौति भानुभिर्भानुमण्डलम् ॥
नोदयास्तमितं तत्र ज्ञायते ब्रह्ममण्डलम् ।
धर्मचक्रप्रभाचक्रप्रभामण्डलरोचिषाम् ॥
तत्र तीर्थकरः कुर्वन् प्रत्यहं धर्मदेशनम् ।
सेवितः श्रेणिकेनास्त न हि क्षत्रियवर्गजा ॥
गौतमस्य समाम्नाय तदा तदुपदेशतः ।
सर्व्वानुयोगमार्गेषु प्रवीणः स नृपोऽभवत् ॥
ततो जिनग्रहैस्तुङ्गैराज्ञा राजगृहं पुरम् ।
क्षतमन्तर्बहिर्याप्रमणसं महिमोत्सवैः ॥
क्षतः सामन्तसंघातैर्महामन्त्रिपुरोहितैः ।
प्रजाभिर्जनगेहाढ्यो मगधो विषयोऽखिलः ॥
पुरेषु ग्रामघोषेषु पर्व्वतायें क्षटक्षत ।
नदीतटवनान्तेषु तदा दृक्षजिनावली ॥
तिग्मत्विषेव मद्दोदये विघटयन्मोहान्धकारोन्नतिं
प्रागदेशप्रजया विधाय मगधादेशं प्रबुद्धप्रजम् ।
तद्भूत्या पृथुदेशमध्यमगमन्मध्यन्दिनश्रीधरं
मिथ्याज्ञानहिमान्तक्षञ्जिनरविर्बोधप्रभा-
मण्डलः ॥")
कोकिलः । इति हेमचन्द्रः ॥ धनुर्धरः । इति शब्दरत्नावली ॥ एकवीरस्तुष्टः । इति राजनिर्घण्टः । लक्ष्मणः । यथा,—
"लक्ष्मणश्च महावीरं पतितं रणभूतले ॥"
अङ्गदादिः । यथा,—
"अङ्गदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणम् ॥"
इति तत्त्वसारे हनूमत्स्तवः ॥
हनूमान् स्वयमपि महावीरत्वेन प्रसिद्धः ॥
महावीरा, स्त्री, (महावीर + टाप् ।) क्षीरकाकोली । इति रत्नमाला ।
महावीर्य्यः, पुं, (महत् विस्तृतं विपुलं वीर्य्यमस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ (महत् वीर्य्यं तपोबलमस्य ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥ वाराहीकन्दः । इति राजनिर्घण्टः ॥ (वितथस्य पुत्रभेदः । यथा, भागवते । ६ । २१ । १ ।
"वितथस्य सुतास्मन्योर्दृढवत्तो जयस्ततः ।
महावीर्य्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥")
अतिशयबलयुक्ते, त्रि ॥ (यथा, महाभारते । ५ । १७१ । ४६ ।
"ततः क्षिप्त्वा महावीर्य्यो भीष्मः शान्तनवो नृपान् ।
अधिक्षिप्य महातेजास्त्रिभिः कन्या जहार सः ॥"
विराजः पुत्रः । यथा, विष्णुपुराणे । २ । १ । १६ ।
"नरो यस्य तनयस्तत्पुत्रोऽभूद्विराट् ततः ।
तस्य पुत्रो महावीर्य्यो धीमांस्तस्मादजायत ॥")
महावीर्य्या, स्त्री, (महत् वीर्य्यमस्याः टाप् ।) संज्ञा। सा च सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥ वनकार्पासी । इति शब्दरत्नावली ॥ महाशतावरी । इति राजनिर्घण्टः ॥
महावृहती, स्त्री, (महती वृहती ।) वार्त्ताकी । इति त्रिकाण्डशेषः ॥
महावृक्षः, पुं, (महान् वृक्षः ।) क्षुद्रीवृक्षः । इति हलायुधः ॥ (यथास्य पर्य्यायः ।
"वचवृक्षो महावृक्षः क्षुद्री क्षुद्र सुधा गुडा ॥"
यथा, सुश्रुते क्षत्रस्थाने ४४ अध्याये ।
"महावृक्षपयःपीतैर्यवागूरुक्षुद्रैः कृता ।
पीता विरोचयत्याशु गुडूचीत्कारिका कृता ॥")
वृहद्वृक्षश्च ॥
महावेगः, पुं, (महान् अभीघो दुर्व्वारो वा वेगो यस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (महान् वेगः ।) अतिजवः । (महान् वेगोऽस्य ।) तद्युक्ते, त्रि । (यथा, महाभारते । १ । १५५ । १२ ।
"विकर्षन्तौ महावेगौ गर्ज्जमानौ परस्परम् ।
पश्य त्वं युधि विक्रान्तावेतौ च नररात्रसौ ॥")
महाव्याधिः, पुं, (महांश्चासौ व्याधिश्चेति ।) महारोगः । स तु कुष्ठादिः । यथा,—
"सर्व्वव्याधिविनिर्मुक्तो महाव्याधिर्विमुच्यते ।
पठनात् संप्रयत्नेन जीवन्मुक्तो भवेन्नरः ॥"
इति ब्रह्मयामले गायत्रीकवचम् ॥
महाव्याहृतिः, स्त्री, (महती चासौ व्याहृतिश्चेति ।) प्रणवसहितायुक्तव्याहृतित्रयम् । यथा । ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा । इति भवदेवभट्टः । (यथा, मनौ । २ । ८१ ।
"ओङ्कारपूर्व्विकास्तिस्रः महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥")
महाव्रणं, क्ली, (महच्च तद्व्रणञ्चेति ।) दुष्टव्रणम् । गांजी वा इति भाषा । यथा,—
"कृष्णात् सप्तदशाङ्गुलं तथाष्टादशकं प्रिये ! ।
महाव्रणविमोचाय विंशाङ्गुलं पठेन्नरः ॥"
इति तिथ्यादितत्त्वधृतवाराहीतन्त्रवचनम् ॥
महाव्रतं, क्ली, (महच्च तद्व्रतञ्चेति ।) द्वादशवार्षिकव्रतम् । यथा । 'तेन वधकालादूर्द्धं विंशत्यधिकव्रतस्य यावदवशिष्टं तावत्परिमाणमहाव्रतानुरूपा धेनवो दातव्याः ।' इति प्रायश्चित्तविवेके भवदेवभट्टमतम् ॥ व्रतकालीनदुर्गापूजनम् । यथा,—
"महाव्रतं महापुण्यं व्रतैरादैरनुष्ठितम् ।
कर्त्तव्यं सुरराजेन्द्र ! देवीभक्तिसमन्वितैः ॥"
इति तिथ्यादितत्त्वधृतदेवीपुराणवचनम् ॥
व्रतोद्यापनकालीनमाघस्नानम् । यथा,—
"वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेत्ततः ॥
दिवाकर ! जगन्नाथ ! प्रभाकर ! नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम् ॥"
इति मलमासतत्त्वधृतपद्मपुराणवचनम् ॥
(महाव्रतधारिणि, त्रि । यथा, महाभारते । १३ । ५४ । २१ ।
"ततोऽब्रवीन्न वनोद्देशे पुनरेव ददर्श तम् ।
कौशल्यां दृश्यां समासीनं जपमानं महाव्रतम् ॥")
महाव्रती, [न्] पुं, (महाव्रतं योगनियमानुष्ठानादिकमस्यास्तीति । व्रत + इनिः ।) शिवः । इति हेमचन्द्रः । २ । १११ ॥ उरुरुटः । इति त्रिकाण्डशेषः ॥ महाव्रतयुक्ते, त्रि ॥ (यथा, कथासरित्सागरे । ३७ । ५६ ।
"इतश्चुत्वापि सावज्ञास्ते महव्रतिनरूढा ।
ऊचुर्निश्चयदत्तं ते चत्वारः सहयायिनः ॥")
महाशक्तिः, पुं, (महत्यः शक्तयः मातृगणादयो महद्वा सामर्थ्यञ्च यस्य ।) कार्त्तिकेयः । इति शब्दमाला ॥ (महती शक्तिः ।) अतिशयपराक्रमः । महतीशक्तिरस्य तद्युक्ते, त्रि ॥
महाशङ्खः, पुं, (महान् शङ्ख इव दृश्यत्वात् ।) मानुषास्थि । संख्याविशेषः । स च दशनिखर्व्वः । ललाटम् । इति मेदिनी । खे, १६ ॥ (महान् महार्हः शङ्खः ।) निधिविशेषः । इति विश्वः ॥ कर्णनेत्रयोर्मध्यगतास्थि । यथा,—
"कर्णनेत्रान्तरालास्थि महाशङ्खः प्रकीर्त्तितः ।"
तस्य मालया जपविधिर्यथा,—
"महाशङ्खमयी माला नीलसारखते विधौ ।
तूलताटास्थिखण्डेन रचिता जपमालिका ॥
महाशङ्खमयी माला तारादिद्याजपे प्रिये ! ।"
इति तन्त्रसारधृतसुरुद्रमालातन्त्रम् ॥
(महान् शङ्खः ।) वृहच्छङ्खः । यथा,—
"पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ।"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥
(सर्पभेदः । यथा, भागवते । ५ । २४ । ३१ ।
"ततोऽधस्तात् पातालेषु नागलोकपतयोवासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति ।")
महाशठः, पुं, राजधत्तूरः । इति राजनिर्घण्टः ॥ (महांश्चासौ शठश्चेति ।) अतिधूर्त्ते, त्रि ॥
महाशल्यपुष्पिका, स्त्री, (अस्यं पुष्पं इति अस्यार्थे ङीष् । ततः स्वार्थे कन् स्त्रियां टाप् पूर्व्वस्य ह्रस्वश्च । शल्यस्येव पुष्पिका यस्याः । महतीचासौ शल्यपुष्पिका चेति ।) वृहच्छल्यपुष्पी ।

तत्पर्य्यायः। दृत्तपर्णी २ श्वेतपुष्पा ३ महासिता ४ महाश्वेतषष्टी ५ महाश्वेता ६। अस्या गुणाः। कषायत्वम्। उष्णत्वम्। ग्रस्तत्वम्। रसनियामकत्वम्। कुतूहलमोहनत्वम्भवादिषु प्रोक्तत्वञ्च। इति राजनिर्घण्टः॥

महाश्रुता, स्त्री, (महत् श्रुतञ्च मूलानि यस्याः। टाप्।) महाश्रुतावरी। इति राजनिर्घण्टः॥

महाश्रुतावरी, स्त्री, (महती चासौ श्रुतावरी चेति।) दृहच्छ्रुतावरी। तत्पर्य्यायः। श्रुतवीर्य्या २ सहस्रवीर्य्या ३ सुरसा ४ महापुरुषदन्तिका ५ वीरा ६ तुङ्गिनी ७ बहुपुत्रिका ८ ऊर्द्धकण्टी ९ महावीर्य्या १० फणिजिह्वा ११ महाश्रुता १२ सुवीर्य्या १३। अस्या गुणाः। वश्यत्वम्। मधुरत्वम्। पित्तनाशित्वम्। हिमत्वम्। मेहकफवातघ्नत्वम्। तिक्तत्वम्। श्रेष्ठत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

तत्पर्य्यायगुणाः।

"महाश्रुतावरी लघ्वी श्रुतस्मृद्धिकण्टिका।
सहस्रवीर्य्याहिरुच ऋष्यप्रोक्ता महोदरी॥
महाश्रुतावरी मेध्या कृद्या दृश्या रसायनी।
श्रुतवीर्य्या निहन्त्यशोंग्रहणीनयनामयान्॥"

इति भावप्रकाशः॥

महाशयः, त्रि, महान् आशयोऽभिप्रायो मनो वा यस्य सः। इति भरतः॥ तत्पर्य्यायः। मदेच्छः २। इत्यमरः। ३। १। ३॥ महाशुभावः ३। इति शब्दरत्नावली॥ उदात्तः ४ महामनाः ५। इति जटाधरः॥ उद्भटः ६ उदारः ७ उदीर्णः ८ महात्मा ९। इति हेमचन्द्रः। ३। १३१॥ (यथा, कथासरित्सागरे। ७२। १२८।

"देवात्मबुद्धः शुश्राव स वराही महाशयः॥"

महान् आशयो जलानामाधारः।) समुद्रे, पुं। इति शब्दरत्नावली॥

महाशया, स्त्री, (महती चासौ शया चेति।) राजशया। इति हेमचन्द्रः। ३। ३८०॥ दृहच्छया च॥

महाशरः, पुं, (महांश्चासौ शरश्चेति।) स्थूलशरः। इति राजनिर्घण्टः॥

महाशल्कः, पुं, (महान् दृढत्वं शल्को यस्य।) चिङ्गटमत्स्यः। इति हारावली। १८७॥ (यथा, मनुः। ३। २७२।

"कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्पन्ते सुन्यन्नानि च सर्व्वशः॥"

(महान् शल्कः।) दृढच्छल्कश्च। तद्युक्ते, त्रि॥

महाशाकं, क्ली, (महच्च तत् शाकञ्च।) दृढच्छाकविशेषः। इति केचित्॥

महाशाखा, स्त्री, (महती शाखा यस्याः।) नागबला। इति राजनिर्घण्टः॥

महाशालिः, पुं, (महांश्चासौ शालिश्च।) स्थूलशालिः। इति राजनिर्घण्टः॥ तत्पर्य्यायः। सुगन्धिकः २। इति हेमचन्द्रः। ३। २७५॥ (स च धान्यविशेषः। तद्यथा,—

"रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः।
सुगन्धकः कर्दमको महाशालिश्च दूषकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महाशिवः, पुं, (महांश्चासौ शिवकल्याणरूपी च।) महादेवः। यथा,—

"रत्नसिंहासनस्थञ्च महाभूषणभूषितम्।
महाशिवं शिवकरं शिवबीजं शिवाश्रयम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे २९ अध्यायः॥

महाशीता, स्त्री, (महत्यधिका शीता शीतवीर्य्या।) शतमूली। इति शब्दचन्द्रिका॥ (महत् शीतं शीतगुणोऽस्य।) अतिशीतवीर्य्ययुक्ते, त्रि॥

महाशुक्तिः, स्त्री, (महती शुक्तिः। शुक्ताकारत्वेनास्या महत्वम्।) शुक्तामाता। सा च शुक्तिः। इति राजनिर्घण्टः॥ (महती स्थूलाशुक्तिः।) दृहच्छुक्तिश्च॥

महाशुक्ला, स्त्री, (महती चासौ शुक्ला शुक्लवर्णा च।) सरस्वती। इति भूरिप्रयोगः॥ अतिशुक्लवर्णयुक्ते, त्रि॥

महाशुभ्रं, क्ली, (महान् शुभ्रो वर्णोऽस्य।) रजतम्। इति राजनिर्घण्टः॥ अतिशुभ्रवर्णयुक्ते, त्रि॥

महाशूद्रः, पुं, (महान् शूद्रः।) आभीरः। इति महाशूद्रीशब्ददर्शनात्॥

महाशूद्री, स्त्री, (महाशूद्रस्य भार्य्या इति। "अजाद्यतष्टाप्।" ४। १। ४। इत्यत्र। "महत्पूर्व्वस्य प्रतिषेधः।" इति काशिकोक्त्या पुंयोगलक्षणा ङीष्।) आभीरी। इत्यमरः। २। ६। १३॥

महाशौण्डी, स्त्री, (महती चासौ शौण्डी च।) श्वेतकिणिहीवृक्षः। इति राजनिर्घण्टः॥

महाश्मशानं, क्ली, (महच्च तत् श्मशानञ्च। अत्र हि जीवानां मरणे सकलकर्म्मनाशतः पुनर्जन्ममरणाद्यभावादस्यातथात्वम्।) काशी। इति काशीखण्डम्॥

महाश्यामा, स्त्री, (महती चासौ श्यामा च।) श्यामालता। इति रत्नमाला॥ शिंशपावृक्षः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये। "श्यामामहाश्यामाबहुलौबादि॥" वृक्षपादिदृक्षः। तत्पर्य्यायो यथा, गारुडे २०८ अध्याये॥)

"कण्टकाख्या महाश्यामा वृक्षपादीति
वक्ष्यते॥"

महाश्रमणः, पुं, (महान् श्रेष्ठश्चासौ श्रमणो बौद्धभिक्षुश्चेति।) बुद्धविशेषः। स च श्राव्यमुनिः। तत्पर्य्यायः। सर्व्वार्थसिद्धः २ कुलिशासनः ३ गोपेन्द्रः ४। इति हेमचन्द्रः॥

महाश्रावणिका, स्त्री, (महती चासौ श्रावणिका च।) क्षुपविशेषः। बड़ घुलकुड़ी इति भाषा। तत्पर्य्यायः। महासुखी २ लोचनी ३ कदम्बपुष्पी ४ विकचा ५ क्रोड़ा ६ चोड़ा ७ पलङ्कषा ८ नदीकदम्बः ९ सुखाख्या १० महासुखनिका ११ माता १२ स्थविरा १३ लोचनी १४ भूकदम्बः १५ अलम्बुषा १६। अस्या गुणाः। उष्णत्वम्। तिक्तत्वम्। ईषन्मधुरत्वम्। वायुश्रमनत्वम्। स्वरशुद्धत्वम्। रेचनत्वम्। हेमशुद्धत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

तत्पर्य्यायगुणाः।

"सुखी भिक्षुरपि प्रोक्तः श्रावणी च तपोधना।
अवलाढा सुखिलिका तथा श्रवणपूर्विका॥
महाश्रावणिकाख्या तु सा स्मृता भूकदम्बिका।
कदम्बपुष्पिका च स्यादन्यथा तु तपस्विनी॥
सुखिलिका कटुः पाके वीर्य्योष्णा मधुरा लघुः।
मेध्या गण्डापचीकुष्ठकृमिमेदोगुदार्त्तिहृत्॥
श्लीपदारुष्यपस्मारशीर्षमेदोगुदार्त्तिहृत्।
महासुखी च सुखी च गुणैरुक्ता महर्षिभिः॥"

इति भावप्रकाशः॥

महाश्रीः, स्त्री, (महती श्रीरिव।) बृहच्छक्तिविशेषः। तत्पर्य्यायः। तारा २ ओङ्कारा ३ स्वाहा ४ श्रीः ५ मनोरमा ६ तारिणी ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वैष्णवी १४ नीलसरस्वती १५ ग्रन्थिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥

महाश्वेता, स्त्री, (महत्यतिशया श्वेता। महान् श्वेतो वर्णो यस्या वा।) सरस्वती। इति त्रिकाण्डशेषः॥ क्षणभूमिकुष्माण्डः। तत्पर्य्यायः। क्षीरविदारी २ ऋक्षगन्धिका ३। इत्यमरः। २। ४। १९०॥ क्षीरविदारिका ४ क्षीरवल्ली ५ क्षीरकन्दा ६। इति जटाधरः॥ क्षीरिका ७। इति शब्दरत्नावली॥ श्वेताम्बरान्विता। इति रत्नमाला॥ (पर्य्यायोऽस्या यथा,—

"गिरिकर्णी महाश्वेता स्थूलपुष्पा सिता
क्वचित्॥"

इति वैद्यकरत्नमालायाम्॥)

सिता। तत्पर्य्यायः। मधुजा २। इति त्रिकाण्डशेषः॥ श्वेतकिणिहीवृक्षः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—

"कटभी किणिही श्वेता महाश्वेता च
रोहिणी॥")

दुर्गा। यथा, देवीपुराणे ४५ अध्याये।

"श्वेतं शुक्लं शिवस्थानं यस्माच्चैव समागता।
महाभावसमुत्पन्ना महाश्वेता ततः स्मृता॥"

(किम्पुरुषवर्षस्थितहंसनामकगन्धर्वराजस्य गौरीगर्भोत्पन्ना कन्या। तत्कथा कादम्बर्य्यां विस्तरशो दृश्या॥)

महाषष्ठी, स्त्री, (महती चासौ षष्ठी च। महामङ्गलदात्री षष्ठी वा।) दुर्गा। यथा, ॐ दुं दुं दुं दुर्गे दुर्गे त्राय त्राय हन हन दह दह मथ मथ मर्दय मर्दय सर्व्वदुष्टान् महाषष्ठीरूपेण बालकं रक्ष रक्ष चिरजीविनं कुरु कुरु श्रीं ह्रीं हूं फट् स्वाहा।" इति योगिनीतन्त्रे महाषष्ठीकवचम्॥

महाष्टमी, स्त्री, (महत्या महादेया अष्टमी। महती अष्टमीति वा।) आश्विनशुक्लाष्टमी। यथा,—
"आश्विने शुक्लपक्षस्य भवेद्या अष्टमी तिथिः।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा॥"
इति कालिकापुराणे ५६ अध्यायः॥
तस्यां पूजाविधिः पुत्रवत उपवासनिषेधश्च यथा,—
"अष्टम्यां रुधिरैर्मांसैर्मेषामांसैः सुगन्धिभिः।
पूजयेद्बहुजातीयैर्बलिभिर्भोजनैः शिवाम्॥
सिन्दूरैः पट्टवासैश्च नानाविधविलेपनैः।
पुष्पैरनेकजातीयैः फलैर्बहुविधैरपि॥
उपवासं महाष्टम्यां पुत्रवान्न समाचरेत्।
यथा तथैव पूजात्मा ह्यसौ देवीं प्रपूजयेत्॥
पूजयित्वा महाष्टम्यां नवम्यां बलिभिस्तथा।
विसर्जयेद्द्वयोर्मध्ये अथवा सावरोत्सवैः॥"
इति तन्त्रेण ६० अध्यायः॥
तत्राहोराजपूजा। यथा,—
"कन्यासंस्थे रवौ शुक्लाष्टम्यां प्रपूजयेत्।
सोपवासो निशार्द्धे तु महाविभवविस्तरैः॥
पूजां समारभेद्या तत्र्जे वारेऽपि वा।
पशुघातश्च कर्त्तव्यो गवालम्भवदत्तथा॥"
इति देवीपुराणवचने बालरूपदेव्या पूर्व्वाषाढ़ोच्यते। इति तिथ्यादितत्त्वम्॥

महाषड्जः, पुं, (महानतिशयः षड्जो विषयः कुदेहवत्त्वात्। यद्वा, महतो हिमाद्रेर्महादेवस्य वा आषड्जः निकटवर्त्ती।) कुबेरः। इति शब्दमाला॥ (महदतीवाषड्जः) अतिनिकटश्च॥

महासपरः, पुं, (महांश्चासौ सपरश्च।) वृक्षविशेषः। अस्य गुणाः। यथा,—
"महासपरसंज्ञस्तु तिक्तः पित्तकफापहः।
श्रमश्रिरो मधुरो रुच्यो वातसाधारणः स्मृतः॥"
इति भावप्रकाशः॥

महासमङ्गा, स्त्री, (महती चासौ समङ्गा च।) वृक्षविशेषः। कमदिया इति हिन्दीभाषा। तत्पर्य्यायः। ओदनिका २ ओदनाह्वया ३ दृढा ४ दृढा ५ दृढबला ६ चञ्चुला ७ सुजङ्घिका ८ प्रीतपाकिनी ९ प्रीतिबला १० प्रीताबला ११ बलोत्तरा १२ बला १३ खरशिखरी १४ बालजिह्वा १५। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। दोषत्रयनाशित्वम्। वृक्षा वृद्धा प्रयोगे ज्वरदाहनाशित्वञ्च। इति राजनिर्घण्टः॥

महासर्जः, पुं, (महांश्चासौ सर्जश्च।) धनसः। असनवृक्षः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।
"अजकर्णो वनेसर्जो महासर्जोऽसनस्तु सः॥")

महासहः, पुं, (सहते इति। सह + अच्। महान् सहः।) कुजकवृक्षः। इति राजनिर्घण्टः॥ (बालपुष्प इति गौड़ादौ प्रसिद्धः। यथास्य पर्य्यायः।
"अम्लातोऽम्लाटनः प्रोक्तस्तथाम्लातक इत्यपि।
कुरण्टको वर्षपुष्पः स एवोक्तो महासहः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महासहा, स्त्री, (महासह + स्त्रियां टाप्।) माषपर्णी। (पर्य्यायोऽस्या यथा,—
"सिंहपुच्छी ऋषिप्रोक्ता माषपर्णी महासहा।
क्षुण्णपर्णा च काम्बोजी माषुलोमशपर्णिनी॥"
इति वैद्यकरत्नमालायाम्॥
पर्य्यायान्तरं यथा,—
"माषपर्णी सूर्य्यपर्णी काम्बोजी हयपुच्छिका।
माषुलोमशपर्णी च क्षुण्णपर्णा महासहा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
अम्लानवृक्षः। इत्यमरः। २। ४। ७३। (कुजकः। तत्पर्य्यायो यथा,—
"कुजको भद्रतरुणी दृढपुष्पोऽतिकेसरः।
महासहा करण्टाढ्या नीलालिकुलसङ्कुला॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महासान्तपनं, क्ली, (महत् सान्तपनम्।) व्रतविशेषः। यथा। अथ महासान्तपनम्। तच्च द्वादशाध्यसान्तपनमुक्तं याज्ञवल्क्यः।
"पृथक्सान्तपनैर्न्यूनैः षड्भिः सोपवासकैः।
सप्ताहेनैव लक्ष्योऽयं महासान्तपनः स्मृतः॥"
एतत् सप्ताहसाध्यम्। जाबालः।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकैकं क्रमशोऽश्नीयादहोरात्रमभोजनम्॥
कृच्छ्रः सान्तपनो नाम सर्व्वपापप्रणाशनः।
एकैकमेतदेवं हि चिरात्रसुपयोजयेत्॥
त्र्याहश्चोपवसेदन्त्यं महासान्तपने विधिः॥"
एतत् सप्ताहसाध्यसान्तपनमुक्तं एकविंशतिदिनसाध्यं महासान्तपनमुक्तम्। महासान्तपनं धेनुषट्कदानसमम्। जाबालोक्तमहासान्तपनस्य एकविंशतिदिनसाध्यत्वेन सप्ताहसाध्यसान्तपनात् त्रिगुणत्वान्महासान्तपने धेनुषट्कं देयम्। इति प्रायश्चित्तविवेकः॥

महासारः, पुं, (महान् सारः स्थिरांशो यस्य।) दृढखदिरः। इति राजनिर्घण्टः॥

महासाहसं, क्ली, (महच्च तत् साहसञ्च।) अतिबलात्कारकृतकार्य्यम्। अतिभयदकः। इति साहसशब्दार्थे मेदिनी। से, ४५॥ (महत् साहसमत्र।) अतिदुष्कृतकर्म्मे। अतिभयदेयः। इति साहसशब्दार्थे हेमचन्द्रः। ३। ४००॥

महासाहसिकः, त्रि, (महानतिशयः साहसिकः।) चौरः। इति केचित्॥ अतिसाहसयुक्तश्च। बलपूर्व्वापहारकः। यथा,—
"चाटतस्करदुर्वृत्तमहासाहसिकादिभिः।
पीड्यमानाः प्रजा रक्षेत् कायस्थेभ्य विशेषतः॥"
इति याज्ञवल्क्यवचनम्॥
चाटाः प्रतारकाः। विश्वास्य ये परधनमपहरन्ति। प्रच्छन्नापहारिणः तस्कराः। दुर्वृत्ताः इन्द्रजालिककितवादयः। सहो बलं सहसा बलेन कृतं साहसं महच्च तत् साहसञ्च महासाहसं तेन वर्त्तन्त इति महासाहसिकाः प्रसह्यापहारिणः। इति मिताक्षरायामाचाराध्यायः १॥

महासिंहः, पुं, (महान् सिंह इव।) शरभः। इति राजनिर्घण्टः॥ (महांश्चासौ सिंहश्च।) दृढतसिंहः। स च देवीवाहनम्। यथा,—
"उत्थाय च महासिंहं देवी चण्डमधावत।"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

महासुखं, क्ली, (महत् सुखमस्मिन्।) ब्रह्मरन्ध्रः। इति त्रिकाण्डशेषः॥ (महच्च तत् सुखञ्च। अतिशयानन्दः। महत् सुखमस्य तद्वति, त्रि॥)

महासुखः, पुं, (महत् सुखं ईश्वरानन्दोऽस्य अस्माद् वा।) बुद्धः। इति त्रिकाण्डशेषः॥

महासुगन्धा, स्त्री, (महान् सुगन्धोऽस्याः।) गन्धनाकुली। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। उत्तरतन्त्रे २६ अध्याये।
"महासुगन्धामधवा पालिन्दीचाम्बष्ठपैठिताम्।
प्रीतांश्चात्र परीक्षेत प्रदेहानत्र योजयेत्॥")
अतिसुगन्धयुक्ते त्रि॥

महास्फूर्जा, स्त्री, (महदतीव स्फूर्जा।) वासुका। इति राजनिर्घण्टः॥ अतिशयस्फूर्ज्जे, त्रि॥

महासेनः, पुं, (महती सेना यस्य।) कार्त्तिकेयः। इत्यमरः। १। १। ४१॥ (यथा अनर्घराघवे। ४। ३२।
"महासेनो यस्य प्रमदयमदंष्ट्रासहचरैः
शरैर्मुक्तो जीवन्दिरिव शरजन्मा समभवत्।
दमाच्च चक्राणां भुजवनमहादुर्गविषमा
मयं वीरो वारानजयदुपविंशान् वसुमतीम्॥"
महती सेना अनुचरोऽस्य।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ महासेनापतिः। इति मेदिनी। ने, २०१॥ (यथा महाभारते। ५। १६१। ११।
"स च राजा दशार्णेषु महासेनोति सुदुर्जयः।
हिरण्यवर्मा दुर्द्धर्षो महासेनो महामनाः॥")
वृक्षाद्यैतृपिल्लविशेषः। इति हेमचन्द्रः। राजविशेषः। यथा, कथासरित्सागरे। १११। ३४॥
"जयसेनस्य तस्याथ पुत्रोऽप्रतिमदोर्बलः।
बभूवतुल्यो महासेननामा वृषतिकुञ्जरः॥")

महास्कन्धा, स्त्री, (महान् स्कन्धः शाखावधिभागो यस्याः।) जम्बुवृक्षः। इति राजनिर्घण्टः॥ (महान् स्कन्धोऽस्य॥) दृढतस्कन्धयुक्ते त्रि॥

महास्थली, स्त्री, (स्थल + "जानपदकुण्डगोणीत्यादि।" ४। १। ४२। इति ङीष्। महती स्थली।) पृथिवी। इति शब्दमाला॥ श्रेष्ठस्थानञ्च॥

महास्नायुः, पुं, (महती स्नायुः अस्थिबन्धनरज्जुः।) कङ्करा। इति हेमचन्द्रः। ३। २६५॥

महास्रग्वी, [न्] पुं, (महती स्रक् अस्थिमाला। सा अस्त्यस्येति विनिः।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३। १७। १३४॥

महास्वनः, पुं, (महान् स्वनः शब्दो यस्य। मङ्गतूर्य्यम्। इति त्रिकाण्डशेषः॥ (महान् स्वनः।) दृढशब्दः। तद्युक्ते, त्रि॥ (यथा, महाभारते। ५। १५। ५।

"यमश्चैव कौन्तेयो हृष्टश्चैव पाण्डवः।
अनन्तश्चासौ सोमाश्चास्त्रिमर्यक्प्रेक्षी महाबलः॥")

महादनुः, पुं, (महती दनुर्यस्य।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३।१७। १२४। हृद्दनुयुक्ते, त्रि। (सर्पविशेषः। यथा, महाभारते। १। ५७। १०।
सुदंष्ट्रः शिशुरोमा च सुरोमा च महाहनुः।
एते तक्षकजा नागाः प्रविष्टा हयवाहनम्॥")

महाहविः, [स्] क्ली, (महत् सुप्रशस्तं हविः।) गव्यघृतम्। यथा,
"गव्यायामथवा पिण्डं खड्गमांसं महाहविः।
कालशाकं तिलाज्यं वा शूकरं मांसलप्रये॥"
इति मार्कण्डेयपुराणे आह्निकसूत्रः॥
(तदात्मतया सर्वं जगत् हूयतेऽस्मिन्। यद्वा, महान्ति हवींषि आज्यपुरोडाशादिरूपाण्यस्य।) विष्णुः। इति महाभारते तस्य सहस्रनामस्तोत्रम्। (महान्तिहवींष्यत्र। हृद्दूयागविशेषः। यथा, शतपथब्राह्मणे। २। ५। ३। २०।
"अथातो महाहविष एव तद् यथा महाहविषस्तथो तस्य॥"
"याकमेधेषु प्रधानभूताया महाहविराख्याया इष्टेरारम्भं प्रतिजानीते अथात इति।" इति तद्भाष्यम्॥")

महाहासः, पुं, (महानुच्चैर्हासः।) अट्टहासः। इति शब्दरत्नावली॥

महाहिगन्धा, स्त्री, (अहेर्गन्धो वेव ईषद्धिंसारूपः सम्यक्कोऽस्यस्यामिति। गन्ध+अर्श आदित्वादच् टाप् च। महती अहिगन्धा।) गन्धनाकुली। इति राजनिर्घण्टः॥

महाहिक्का, स्त्री, (महती चासौ हिक्का च।) कपिकच्छुः। इति शब्दमाला। अतिहिक्कायां त्रि॥

महिः, स्त्री, (मह्यते इति। मह पूजायां अदन्तः पुरादिः+"सर्वधातुभ्य इन्।" उणा० ४। १९७। इति इन्।) पृथिवी। इति शब्दमाला॥ (महत्। यथा, ऋग्वेदे। २। २४। १४।
"सखो मन्यर्महि कर्म करिष्यतः॥"
"महि महत् कर्म करिष्यतः।" इति तद्भाष्ये सायणः॥ महिमा। यथा, भागवते। ८। ८।४।
"तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः।
दन्तैश्चतुर्भिः श्वेताद्रेर्हरन् भगवतो महिम्॥"
"महिं महिमानम्।" इति तट्टीकायां श्रीधरः॥ महत्तत्त्वम्। यथा, भागवते। २। १। ३५।
"विज्ञानशक्तिं महिमामनन्ति॥"
"महिं महत्तत्त्वम्।" इति तट्टीकायां श्रीधरः॥)

महिका, स्त्री, (मह+"कुन्मिण्डिसंज्ञयोरपूर्वस्यापि।" उणा० २।३२। इति कुन् टाप्। अत इत्वम्।) हिमम्। इत्यमरः। १। ३। १८

महितं, त्रि, (मह्यते स्मेति। मह पूजायाम्+"मतिबुद्धिपूजार्थेभ्यश्च।" ३। २। १८८। इति क्तः।) पूजितम्। यथा, भट्टिः। १०। २।
रक्षपक्षितोऽप्याविबुधारिपुरे
कलहं स रामसहितः कृतवान्।
व्यलदग्धिरावणयहच्च बलात्
कलहंसरामसहितः कृतवान्॥"
(पित्तगन्धविशेषः। यथा, मार्कण्डेये। ६६। ४६।
"महात्मा महिला महिमावान्महाबलः।
गङ्गाः पञ्च तथैवेते पितृणां पावनाश्चराः॥"
स्त्रियां टाप्। नदीभेदः। यथा, महाभारते। ६। ६। २१।
"नीवारां महितामापि सुप्रयोगां जनाधिप!॥")

महिमं, क्ली, (महति मह्यते वा। मह पूजायां+"महेरिमन् च।" उणा० २। ५६। इति इमनिच्। ततः "टेः।" ६। ४। १५५। इति टिलोपः।) ऐश्वर्यम्। इत्यमरः। (पूजनीये, त्रि। यथा, ऋग्वेदे। ६। २६। ८।
"वयं ते ऽस्यामिन्द्र! दुच्छुनौ सखायः स्याम महिन! प्रेष्ठाः।"
"हे महिन पूजनीय इन्द्र!।" इति तद्भाष्ये सायणः॥)

महिमा, [न्] पुं, (महतो भावः। महत्+"पृथ्वादिभ्य इमनिज् वा।" ५।१।१२२। इति इमनिच्। ततः "टेः।" ६। ४। १५५। इति टिलोपः।) ऐश्वर्याद्यैश्वर्यान्तर्गतैश्वर्यविशेषः। इति हेमचन्द्रः। २। ११६॥ स च महत्त्वं येन चतुर्दश भुवनान्यश्नोदरे वर्त्तन्ते। इत्यमरटीकायां भरतः। (तदुक्तं यथा,—
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता॥"
माहात्म्यम्। यथा, भागवते। ८। ५। १३।
"त्वया संकथ्यमानेन महिम्ना सात्वतां पतेः।
नाति प्रीयति मे चित्तं सुचिरं तापतापितम्।")
उत्कर्षः। यथा, पुराणम्।
"अधोऽधः पश्यतः कस्य महिमा नोपजायते।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति॥"
(मन्त्रिविशेषस्य सुतः। यथा, राजतरङ्गिण्याम्। ६। २२०।
"सम्भूय चक्रुर्देराज्यं महिम्नः पञ्चमाश्रितः।")

महिरः, पुं, (मह्यते पूज्यत इति। मह+"सलिकल्यनिमहीति।" उणा०। १। ५५। इति इलच्। तस्य रत्वम्।) कर्पूरः। इति त्रिकाण्डशेषः॥

महिला, स्त्री, (मह्यत इति। मह पूजायाम्+"सलिकल्यनिमहीति।" उणा०। १। ५५। इति इलच् टाप्।) क्षौमवस्त्रम्। प्रियङ्गुलता। इत्यमरः। २। ६। २॥ रेणुकानामकगन्धद्रव्यम्। इति राजनिर्घण्टः॥ मदमत्ता स्त्री। इति शब्दरत्नावली॥

महिलाक्षया, स्त्री, (महिला इत्याक्षयो यस्याः।) प्रियङ्गुलता। इत्यमरः। २।४। ५५। (यथास्याः पर्य्यायः।
"प्रियङ्गुः फलिनी कान्ता लता च महिलाक्षया।
गुन्द्रा गुन्द्रफला श्यामा विश्वक्सेनाङ्गनाप्रिया॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

महिषः, पुं, (मंहति पूजयति देवाननेनेति। मह+"अधिमहीडिषच्।" उणा०। १। १६। इति टिषच्।) खनामख्यातपशुविशेषः। तत्पर्य्यायः। वृषायः २ वाहद्विषन् ३ कासरः ४ वैरिभः ५। इत्यमरः। २। ५। ४। यमवाहनः ६ विषच्वरन् ७ वंशभीरुः ८ रजस्वलः ९। इति शब्दरत्नावली॥ आनूपः १० रक्ताक्षः ११ अम्बारिः १२। इति जटाधरः॥ क्रोधी १३ कलुषः १४ मत्तः १५ विषाणी १६ गवली १७ बली १८। तस्य परीक्षा यथा,—
"विपक्षे हयसङ्काशं कुरुते येन हेतुना।
भारं वहति वा दूरं महियोऽसौ निरूप्यते॥
ब्रह्मक्षत्रियविट्शूद्रान्त्यजभेदेन पञ्चधा॥"
तद्यथा।
'भृङ्गं क्षत्रा: पवित्राश्च हृद्दृष्यघोणकाः।
वडाग्निनो मारकाश्च महिषा ब्रह्मजातयः॥१॥
केकराः कामलाः स्थूला भृङ्गं कुहाश्च मारकाः।
वडाग्निनो बहुबला महिषाः क्षत्रजातयः॥२॥
श्यामाङ्गाः शीघ्रशृङ्गाश्च सुकुड्डा भारवाहिनः।
अमारका बहुबला महिषा वैश्यजातयः॥३॥
चीणाः चीणबलाः चीणशृङ्गघोणाश्च ये।
अल्पाग्निनो भारसहा महिषाः शूद्रजातयः॥४॥
सर्वदा जलमिच्छन्ति येऽल्पसत्त्वा महौजसः।
भारसहाः कृष्णशृङ्गाश्च तैक्ष्ण्यबला महिषा
मताः॥५॥
एवं दोषा गुणा वापि दृष्ट्वा ज्ञात्वेदृशः।
पोषश्चापि संस्कारं दृष्ट्वा तथा मतम्॥"
इति युक्तिकल्पतरुः॥
वनमहिषमांसगुणाः। दोषकारित्वम्। लघुत्वम्। दीपनत्वम्। बलदायित्वञ्च॥ ग्रामीणमहिषमांसगुणाः। स्निग्धत्वम्। मलिनकरत्वम्। पित्तहरत्वञ्च। इति राजनिर्घण्टः॥ तर्पणत्वम्। स्निग्धत्वम्। उष्णत्वम्। मधुरत्वम्। गुरुत्वम्। निद्रापुंस्त्वस्तन्यबहुत्वम्। मांसदार्ढ्यबलत्वञ्च। इति राजवल्लभः॥ अपि च।
"महिषो घोटकारिः स्यात् कासरश्च रजस्वलः।
पीवस्कन्धः क्षुद्रकायो वृषायो यमवाहनः॥
महिषस्यामिषं स्वादु स्निग्धोष्णं वातनाशनम्।
निद्राशुक्रबलस्तन्यतदूरीकरं गुरु॥
दृष्यञ्च हृद्विरुग्नञ्च वातपित्तास्रनाशनम्।"
इति भावप्रकाशः॥
शस्त्रधारिक्षत्रजातिविशेषः॥ स च पुरा क्षत्रिय आसीत् सगरदोलेनास्य वेदयागादावनधिकारो वैश्यात्वं धर्म्मेणाश्च लतः। यथा, हरिवंशे।
"सगरस्तां प्रतिज्ञाय गुरोर्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशात्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्।
यवनानां शिरः सर्वं काम्बोजानां तथैव च॥
पारदा मुक्तकेशाश्च पह्लवा: शस्त्रधारिणः।

महिष

निःस्वाध्यायवषट्काराः सतासेन महात्मना ।
ग्रका अवनकाम्बोजाः पारदाः पह्लवास्तथा ।
कोलिसर्पाः समहिषा दार्व्याभीराः सकेरलाः ।
वशिष्ठवचनाद्राजन् ! सगरेण महात्मना ।"
इति प्रायश्चित्ततत्त्वम् । * ।

अहेर्हननविशेषः । इति हेमचन्द्रः । ३ । ३४० ।

महिषासुरः । यथा, मार्कण्डेये । ८२ । १-२ ।

"महिषेऽसुराजामधिपे देवानाञ्च पुरन्दरे ।
तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ।
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः ।"

(देवगजभेदः । यथा, निरुक्ते । ७ । २६ । "अपासुपल्ले महिषा अयभ्रन् विशो राजानमुपतस्थुरैन्द्रियम् ।" महिषाः माध्यमिका देवगणाः । अथवा महिषाः त एव "महान्तः ।" इति तट्टीकायाम् दुर्गाचार्यः ॥ कुशद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ५६ ।

"ह्रस्तु पर्व्वतस्तत्र महिषो मेघसन्निभः ।"

अग्निविशेषः । यथा, तत्रैव । १२१ । ६० ।

"तस्मिन् सोऽग्निर्निवसति महिषो नाम योऽप्सुजः ।"

कुशद्वीपस्य वर्षविशेषः । यथा, तत्रैव । १२१ । ६८ ।

"महिषं महिषस्थापि पुनश्चापि प्रभाकरम् ।"

कृताभिषेकः भूपालः ।

'कृताभिषेके भूपाले कुलाये महिषः स्मृतः ।'

रत्नमरटीकायां रुद्रः । देशभेदः । यथा, बृहत्संहितायाम् । ६ । १० ।

"भरद्वाजीपूर्वं मल्लसन्धवपतुष्कं सभिचकरमाद्यम् ।
वङ्गाङ्गमहिषवाल्हिककलिङ्गदेशेषु भयजनमम् ।"

अनुजादस्य पुत्रभेदः । यथा, भागवते । ६ । १८ । १६ ।

"अनुजादस्य कर्णायां वाल्हलो महिषस्तथा ।"

साध्यपुत्रः । यथा, हरिवंशे । १६६ । ४५ ।

"महिषश्च तनूजश्च विख्यातमनसावपि ।")

महिषकन्दः, पुं, (महिषाख्यया प्रसिद्धः कन्दः ।) महाकन्दविशेषः । तत्पर्य्यायः । शुभ्राशुः २ शुक्लाफलकन्दः ३ शुक्लकन्दः ४ महिषीकन्दः ५ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयापहत्वम् । सुखजाग्रद्धरत्वम् । रुच्यत्वम् । अग्निसन्दीपकरत्वञ्च । इति राजनिर्घण्टः ।

महिषघ्नी, स्त्री, (महिषं महिषासुरं हन्तीति । हन्+बाहुलकात् टक् । ङीप् ।) दुर्गा । यथा, दुर्गास्तवप्रस्तावे ।

"महिषघ्नि ! महामाये चामुण्डे मुण्डमालिनि ! ।
आयुरारोग्यविजयं देहि देवि ! नमोऽस्तुते ।"

अपि च । देवीपुराणे ।

"सिंहमारुह्य कल्पान्ते निहतो महिषो यथा ।
महिषघ्नी ततो देवी ख्याता वै सिंहवाहिनी ।"

महिषा

महिषध्वजः, पुं, (महिषी ध्वजचिह्नं वाहनत्वेन यस्य ।) यमः । अहर्दिनेशः । इति हेमचन्द्रः । २ । ६६ ।

महिषमर्द्दिनी, स्त्री, (महिषं महिषाख्यमसुरं मृद्नातीति । मृद्+णिनिः । ङीप् ।) दुर्गा । इति शब्दरत्नावली । अस्या मन्त्रा यथा, शारदायाम् ।

"भान्तं वियत् वसवयं श्वेतो मर्द्दिनि उदयम् ।
अष्टाक्षरी समाख्याता विद्या महिषमर्द्दिनी ।"

नारायणीतन्त्रे ।

"विषं हि मन्त्रा कालोऽग्निरिन्दिरेशो निष्टहयम् ।"

विषं मकारः । हि स्वरूपम् । मन्त्रा षकारः । कालो मकारः । अग्नी रेफः । अर्द्रेहकारः । इश इति वचनादिकारयुक्तो दकारः । अयं मन्त्रसारादिर्मायादिः कामादिर्वाग्भवादिर्बधूबीजादिः कवचादिश्च नवाक्षरः । तथा च विश्वसारे ।

"प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत् सुधीः ।
बधूबीजादिकां वापि कवचाद्यां जपेत्तथा ।
सर्व्वकार्य्येषु सर्व्वत्र कामाद्यां प्रजपेत् सुधीः ।
वाग्भवाद्यां जपेत्तान्तु देवीं वाक्यविशुद्धये ॥
अस्या ध्यानम् । गारुडोपलसन्निभां मणिमयकुण्डलमण्डितां नौमि भालविलोचनां महिषीमहासुनिषेदुषीम् । प्रकटचक्रलपाशखेटकवाणकार्मुकशूलकान् तर्ज्जनीमपि बिभ्रतीं निजबाहुभिः प्रणिधेश्वराम् । इति तन्त्रसारः ॥

महिषवल्ली, स्त्री, (महिषशब्दवाच्या वल्ली । प्राकपार्थिवादिवत् समासः ।) लताविशेषः । छिरहिट्टी इति हिन्दी भाषा । तत्पर्य्यायः । सौम्या २ प्रतिसोमा ३ अन्तर्वल्लिका ४ खरशाखा ५ । अस्या गुणः । रसवीर्य्यविपाके सोमवल्लीसमत्वम् । इति राजनिर्घण्टः ।

महिषवाहनः, पुं, (महिषो वाहनं यस्य ।) यमः । इति शब्दरत्नावली ।

महिषासुरः, पुं, (महिष एव महिषाख्यो वा असुरः ।) रम्भासुरपुत्रः । तस्य उत्पत्तिर्यथा,—

श्रीऔर्व्व उवाच

"आराधितो महादेवो रम्भेण सुरवैरिणा ।
चिरेण च च सुप्रीतस्तपसा तस्य शङ्करः ।
अथ तुष्टो महादेवः प्रत्यक्षं रम्भमुक्तवान् ।
प्रीतोऽस्मि ते वरं रम्भ ! वरयस्व यथेप्सितम् ।
एवमुक्तः प्रत्युवाच रम्भस्तं चन्द्रशेखरम् ।
अपुत्रोऽहं महादेव ! यदि ते मय्यनुग्रहः ।
मम जन्मनये पुत्रो भवान् भवतु शङ्कर ! ।
अवध्यः सर्व्वभूतानां जेता च त्रिदिवौकसाम् ।
चिरायुश्च यशस्वी च लक्ष्मीवान् सत्यसङ्गरः ।
एवमुक्तस्तु देवेन प्रत्युवाच दनुध्वजः ।
भवत्येतदाप्स्यसे भविष्यामि सुतस्तव ।
इत्युक्त्वा च महादेवस्तत्रैवान्तरधीयत ।
रम्भोऽपि यातः स्वस्थानं दर्गोत्पुञ्जविलोपनः ॥

महिषा

पथि गच्छन् स रम्भोऽथ ददर्शे महिषीं शुभाम् ।
त्रिहायणीं चित्रवर्णां सुन्दरीं ऋतुशालिनीम् ॥
स तां दृष्ट्वाथ महिषीं रम्भः कामेन मोहितः ।
दोर्भ्यां गृहीत्वा च तदा चकार सुरतोत्सवम् ॥
तयोः प्रवृत्ते सुरते सा तदा तस्य तेजसा ।
दधार महिषी गर्भं तदाभून्महिषासुरः ॥
तस्यां खाङ्गेषु गिरिशसुतपुत्रत्वमवाप्तवान् ।
वरुधे स तदा वाग्भिः शुक्लपक्षे यथा शशी ॥"

तस्य योगिध्यानं यथा,—

"तन्तु कात्यायनसुनिः प्रणम्यान् महिषासुरम् ।
दुर्जयं वीक्ष्य शिष्यार्थे शिष्यानुग्रहकारकः ॥
कात्यायनेन प्रणतं तं विज्ञाय महिषासुरम् ।
प्राह प्रणयपूर्व्वन्तु चण्डिकां चन्द्रशेखरः ॥

ईश्वर उवाच ।

"देवि ! कात्यायनेनापि प्रणतोऽयं महिषासुरः ।
योगिहिनाशकर्त्रीति भवितेति जगन्मयि ! ।
निःसंशयन्तवैवाद्य भविष्यति न संशयः ॥
मदीयो माहिषः कायस्तया देवि ! जगन्मयि ! ।
हन्तव्यः सततं योगयुक्तः पूर्व्वं परोऽपि च ॥
हरिहरिरिरूपेण त्वां वोढुमत्रमोऽधुना ।
ममायं माहिषः कायस्तव वोढा भविष्यति ॥
इति पूर्व्वं महादेवो देवीं प्रार्थितवान् पुरा ।
तेन देवी महादेवं जघ्राह महिषासुरम् ॥
चिरु जन्मसु पुत्रोऽभूत् रम्भस्य भगवान् शिवः ।
लक्ष्मित्वयं स रम्भोऽपि रम्भ एव व्यजायत ॥
असुरस्ताडयक्षेपे तपः परमदारुणम् ।
तथैवाराधितः शम्भुः पुत्रार्थे प्रददौ वरम् ॥
तथैव महिषीं मेले प्रथमं सुरताय सः ।
तस्यां तथाभवद्वीरो दानवो महिषासुरः ।
तथैव शप्ते भगवान् मुनिः कात्यायनस्तु तम् ॥
इति प्रवृत्ते पूर्व्वस्मिन् परस्मिन् स तु जन्मनि ।
महिषः पूजयित्वाथ देवीं वरमयाचत ॥
तृतीये जन्मनि वरं प्राप्य कल्पानुशेषतः ।
नेह मे जन्म भवितेत्येवं वरमयाचत ॥
तेन देवीप्रदत्तेऽस्मिन्नुत्पन्नोऽसुरोऽधुना ।
नोत्पत्तिरपि तस्यास्ति संवर्त्तीस्तान् वदून् नृप ! ॥
एवं देवीप्रसादेन महादेवाङ्गसम्भवः ।
परामवाप सततं प्रतिपत्तिं महासुरः ॥
इति ते कथितं राजन् ! यथा च महिषासुरः ।
देवीपादतलं प्राप्य यथा सोऽद्यापि मोदते ॥"

इति कालिकापुराणे ५६ अध्यायः । * ॥

अपि च ।

नारद उवाच ।

"कथाभौ महिषो नाम रक्तबीजादभूत् कथे ।
कालौ कात्यायनी नाम या जघ्ने महिषासुरम् ।
एतान् विस्तरतस्तात ! यथावद्वक्तुमर्हसि ॥"

पुलस्त्य उवाच ।
"शृणुष्व संप्रवक्ष्यामि कथां पापप्रणाशिनीम् ।
सर्व्वदा वरदा दुर्गा सेयं कात्यायनी मुने ! ॥
सुरासुरवरौ रौद्रौ जगत्क्षोभकरावुभौ ।
रम्भश्चैव करम्भश्च दानवौ सुमहाबलौ ॥
तावपुत्रौ च देवर्षे ! पुत्रार्थे तेपतुस्तपः ।
वह्नुवर्षंगणान् देवौ स्थितौ पञ्चनदे जले ॥
तत्रैको जलमध्यस्थो द्वितीयोऽग्निपञ्चमौ ।
करम्भश्चैव रम्भश्च यज्ञं मानवटं प्रति ॥
एकं निमग्नं सलिले याहरूपेण वासवः ।
चरणाभ्यां समादाय निजघान यथेच्छया ॥
ततो भ्रातरि नष्टे च रम्भः कोपपरिप्लुतः ।
बद्ध्वौ स्वशीर्षं संछिद्य होतुमैच्छन्महाबलः ॥
ततः प्रगृह्य केशेषु खड्गञ्च रविसंप्रभम् ।
छेत्तुकामो निजं शीर्षं वह्निना प्रतिषेधितः ॥
उत्तिष्ठासुर ! मा मैवं नाशयात्मानमात्मना ।
दुस्तरा परवध्यापि स्ववध्याप्यतिदुस्तरा ॥
यच्च प्रार्थयसे वीर ! तद्दास्यामि यथेप्सितम् ।
मा स्त्रियश्च हतस्येह नष्टा भवति वै कथा ॥
ततोऽब्रवीद्वचो रम्भो वरं चैनमदाधि हि ।
त्रैलोक्यविजयी पुत्रः स्यान्मे त्वत्तेजसाधिकः ॥
अजेयो देवतैः सर्व्वैः पुंभिर्हित्वैव पावक ! ।
महाबलो वायुरिव कामरूपी ह्यताक्षवित् ॥
तं प्रोवाच कविर्ब्रह्मन् ! बाढ़मेवं भविष्यति ।
यस्यां चित्तं समालम्बि करिष्यसि ततोऽसुर ! ॥
इत्येवमुक्तो देवेन वह्निना दानवो ययौ ।
यद्दुं मुनिवटं यान्तं यत्रैव परिवारितम् ॥
तेषां पद्मनिधिश्चात्र वसते नाग्नचेतनः ।
गवाञ्च महिषाञ्चाश्वा गावोऽजाविपरिप्लुताः ॥
तान् दृष्ट्वैव तदा चक्रे भावं दानवपार्थिवः ।
महिष्यां रूपयुक्तायां जिघायस्यां तपोधन ! ॥
समागच्छच्च देवेन्द्रं कामयन्ती तरस्विनी ।
स चाभिगमनं चक्रे भवितव्यप्रचोदितः ॥
तस्यां समभवद्रम्भस्तां प्रगृह्याथ दानवः ।
पातालं प्रविवेशाथ ततः स्वभवनं गतः ॥
दृष्ट्वञ्च दानवैः सर्व्वैः परित्यक्तञ्च बन्धुभिः ।
अकार्य्यं कारयित्वैवं भूयो मानवटं गतः ॥
सापि तेनैव पतिना महिषी चारुदर्शना ।
समं जगाम तत्पुण्यं यज्ञमण्डलमुत्तमम् ॥
ततस्तु वसतस्तस्य ग्रामा सा सुहवे मुने ! ।
अजीजनत् सुतं शुभं महिषं कामरूपिणम् ॥"
इति वामनपुराणे १७ अध्यायः ॥ ७ ॥

अथच । धरण्युवाच ।
"या सा माया ग्ररीरात्तु ब्रह्मणोऽव्यक्तजन्मनः ।
गायत्र्याश्च भुजा भूत्वा चैत्रासुरमयोधयत् ॥
सैव नन्दाभवद्देवी देवकार्य्यचिकीर्षया ।
महिषाख्यासुरवधं कुर्व्वती ब्रह्मणेरिता ॥
वैष्णव्या च हतो देव ! कथमेतद्धि संशयः ॥
वराह उवाच ।
इयं जगद्धिता देवी गङ्गा ग्रङ्गरसुप्रिया ।
कचित् किञ्चित् भवेदृत्तं सपदं वेद सर्व्वचित् ।
स्वायम्भुवे हतो दैत्यो वैष्णव्या मन्दरे गिरौ ।
महिषाख्योऽपरः पश्चात् स वै चैत्रासुरः पुनः ।
बन्ध्या निहतो विन्ध्ये महाबलपराक्रमः ॥
अथवा ज्ञानशक्तिः सा महिषोऽज्ञान-
मूर्त्तिमान् ।
अज्ञानं ज्ञानसाध्यन्तु भवतीति न संशयः ॥
मूर्त्तिपक्षे चैतिहासमर्म्मज्ञै रेकवबुद्धि ।
ख्यायते वेदवाक्येषु दृष्ट सा वेदवादिभिः ॥"
इति वराहपुराणम् ॥

महिषासुरसम्भवः, पुं, (महिषासुरात् तत्तेजसः सम्भवतीति । सम् + भू + अच् ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ।

महिषासुरहन्त्री, स्त्री, (हन् + ट्रच् + ङीप् । महिषासुरस्य हन्त्री ।) दुर्गा । यथा,—
"महिषासुरहन्त्र्याश्च प्रतिष्ठा दक्षिणायने ।"
इति प्रतिष्ठातत्त्वधृतपद्मपुराणवचनम् ॥

महिषाक्षः, पुं, (महिषस्य अक्षीवेति । "अक्ष्णोऽदर्शनात् ।"५।४।७६। इति समासान्तोऽच् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
"जटायुः कालनिर्य्यासः कौग्गिको गुग्गुलुः पुरः ।
देवधूपः सर्व्वसहो महिषाक्षः पलङ्कषा ॥"
इति वैद्यकरत्नमालायाम् ॥
अस्य व्यवहारविधयो यथा,—
"महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ ।
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ॥
कदाचिन्महिषाक्षश्च यतः कैश्चिन्नृणामपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महिषाक्षकः, पुं, (महिषाक्ष । स्वार्थे कन् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥

महिषी, स्त्री, (महिषस्य ज्ञताभिषेकस्य नृपस्य पत्नी । "पुंयोगादाख्यायाम् ।" ४ । १ । ४८ । इति ङीप् ।) ज्ञताभिषेका राजपत्नी । इत्यमरः । २ । ६ । ५ ॥ (यथा, रघौ । २ । २५ ।
"इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥")
रेरिण्वी । औषधिभेदः । इति मेदिनी । वे, ३३ ॥

महिष्ययोचित् । तत्पर्य्यायः । मन्दगमना २ महाचौरा ३ पयस्विनी ४ सुलापक्रान्ता ५ कतुवा ६ तुरङ्गदिवसी ७ ॥ अस्याः चौरगुणाः । मधुरत्वम् । विपाके शीतलत्वम् । गुरुत्वम् । बलपुष्टिप्रदत्वम् । दृष्यत्वम् । पित्तदाहास्रनाशित्वञ्च ।
"माहिषं मधुरं गव्यात् स्निग्धं शुक्रकरं गुरु ।
निद्राकरमभिष्यन्दि क्षुधाधिक्यकरं हिमम् ॥
तस्या दधिगुणाः । मधुरत्वम् । स्निग्धत्वम् । श्लेष्मकारित्वम् । रक्तपित्तनाशित्वम् । बलास-वर्द्धनत्वम् । बल्यत्वम् । श्रमघ्नत्वम् । शोधनत्वञ्च ।
"माहिषं दधि सस्निग्धं श्लेष्मलं वातपित्तहृत् ।
स्वादुपाकमभिष्यन्दि दृष्यं गुर्व्वसदूषकम् ॥७॥"
अस्या नवनीतगुणाः । कषायत्वम् । मधुररसत्वम् । शीतत्वम् । दृष्यत्वम् । बल्यत्वम् । स्निग्धत्वम् । पित्तघ्नत्वम् । तुन्दघ्नत्वञ्च ।
"नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ।
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥"
अस्या घृतगुणाः । उत्तमत्वम् । धृतिकरत्वम् । सुखदत्वम् । कान्तिकृत्त्वम् । वातश्लेष्मनाशित्वम् । बलकरत्वम् । वर्णप्रदाने उत्तमत्वम् । दुर्नाम-ग्रहजोविकारशमनत्वम् । मन्दानलोद्दीपनत्वम् । चक्षुष्यत्वम् । गव्यतो न श्रेष्ठत्वम् । हृद्यत्वम् । मनोहारित्वञ्च ।
"माहिषन्तु घृतं स्वादु पित्तरक्तानिलापहम् ।
शीतलं श्लेष्मलं दृष्यं गुरु स्वादु विपच्यते ॥"
इति भावप्रकाशः ॥ ७ ॥

अस्या क्षत्रगुणाः । आमाहशोगुल्मदोष-नाशित्वम् । कटुत्वम् । उष्णत्वम् । कुष्ठ-कण्डूतिशूलोदररोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ (अस्या दुग्धगुणाश्च यथा, चरके सूत्रस्थाने २७ अध्याये ।
"महिषीणां गुरुतरं गव्याच्छीततरं पयः ।
स्नेहानूनमनिद्राय हितमत्ययये च तत् ॥"

महिषीप्रिया, स्त्री, (महिषीणां प्रिया ।) शूलीलताम् । इति राजनिर्घण्टः ॥

मही, स्त्री, (मह्यते इति । मह् + अच् । मह + "गौरादिभ्यश्च । ४ । १ । ४१ । इति ङीष् । यद्वा, मह्यि । ह्रस्वादिकारादिति ङीष् ।) पृथिवी । इत्यमरः । २ । १ । १ । (यथा विष्णुपुराणे । १ । ४ । २६ ।
"उत्तिष्ठतस्तस्य जलार्द्रकुक्षे
र्मेदावराहस्य मही विधार्य ।
विधुन्वतो वेदमयं शरीरं
रोमान्तरस्था मुनयो स्तुवन्ति ॥")
नदीविशेषः । सा च मालवदेशे वर्त्तते । इति मेदिनी । हे, । ७ । तज्जलगुणाः ।
"महीजलन्तु सुखादु वह्नं पित्तहरं गुरु ।"
इति राजनिर्घण्टः ॥
गौः । इति जटाधरः । छिलमोचिका । इति त्रिकाण्डशेषः ॥ (लोकः । यथा, ऋग्वेदे । १ । ५६ । २ ।
"तिसो महीरुपरास्तेषु ।")
"महीः लोकाः ।" इति तद्भाष्ये सायणः ॥)

महीक्षित्, पुं, (मह्यां क्षयते ईष्टे । क्षि + क्विप् । तुक् च ।) राजा । इत्यमरः । २ । ८ । १ ॥ (यथा, महाभारते । ७ । ४४ । २४ ॥
"रथचर्य्याक्षमायाभिर्मोहयित्वा परन्तपः ।
विभेद शतधा राजन् ! शरीराणि महीक्षिताम् ॥")

महीजं, क्ली, (मह्यां जायते इति । जन + ड: ।) आर्द्रकम् । इति राजनिर्घण्टः ॥ भूमिजाते । त्रि ॥ (यथा, महाभारते ।६।८७।१-३ ।
"आर्द्राणां महीजानां सिन्धुजानाञ्च सर्व्वशः ।

वानायुजानां शुभ्राणां तथा पर्व्वतवासिनाम्। वाल्हिनां बहुभिः संख्ये समन्तात् पर्य्यवारयन्॥")

महीजः, पुं, (मह्यां जातः। जन+डः।) मङ्गलग्रहः। यथा, समयप्रदीपे।

"रवौ रसाब्धी सितगौ दृयाब्धी
दृयं महीजे विधुजे शराष्टौ।
गुरौ शराष्टौ भृगुजे दृतीयं
शनौ रसाब्धन्मिति चपायाम्॥"

महीध्रः, पुं, (महीं धरतीति। धृ+कः।) पर्व्वतः। इत्यमरः। २। ३। १॥ (यथा, श्रीभागवते। २। ७। ३२।

"गौर्यैर्मेखे प्रतिहते व्रजविप्लवाय
देवेऽभिवर्षति पशून् कृपया रिरक्षुः।
धर्त्ताऽच्छिलीन्ध्रमिव सप्तदिनानि सप्त-
वर्षो महीध्रमनघैककरे सलीलम्॥"

महीं धरति उद्धरतीति। धृ+कः। महेरुत्वं। यथा, तत्रैव। ३। १३। २६।

"उत्तुङ्गपिङ्गखचरः कठोरः
सटा विधुन्वन् खररोमशत्वक्।
खुराहताभ्रः सितदंष्ट्र ईक्षा-
ज्योतिर्बभासे भगवान् महीध्रः॥"

"महीध्रः पृथिवा उद्धर्त्ता।" इति तट्टीकायां स्वामी।)

महीपालः, पुं, (महीं पालयतीति। पाल+अण्।) राजा। यथा, मार्कण्डेयपुराणे। ८८। ६१।

"स पपात महीपृष्ठे शस्त्रसंघसमाहतः।
नीरक्तश्च महीपाल! रक्तबीजो महासुरः॥"
(राजविशेषः। यथा, कथासरित्सागरे। ५६। ७।

"चन्द्रस्वामिन्! महीपालो गत्वा कार्य्यः
सुतस्त्वया।
राजा भूत्वाचिरं यस्मात् पालयिष्यत्यसौ
महीम्॥")

महीप्राचीरं, क्ली, (मह्याः प्राचीरमिव। सर्व्वदिक्षु स्थितत्वात्तथात्वम्।) समुद्रः। इति त्रिकाण्डशेषः॥

महीभृत्, पुं, (महीं बिभर्त्ति धरतीति। भृ+क्विप्। "हृस्वस्य पिति कृति तुक्।" ६। १। ७१। इति तुगागमश्च।) पर्व्वतः। यथा, कुमारसम्भवे। १। २७।

"महीभृतः पुत्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिम्।
अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा॥"

(महीं बिभर्त्ति पालयतीति। भृ+क्विप्।) राजा। यथा, मार्कण्डेयपुराणे। ८१। १३।

"ये ममानुगता नित्यं प्रसादधनभोजनैः।
अनुवृत्तिं ध्रुवं तेऽद्य कुर्व्वन्त्वद्यमहीभृताम्॥"

महीमयः, त्रि, (मह्या विकारोऽवयवो वेति। मही+मयट्।) मृत्तिकानिर्म्मितः। यथा,—मार्कण्डेयपुराणे। ६३। ७।

"तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्त्तिं
महीमयीम्।
अर्हणाभ्यक्षतुस्तस्याः पुष्पधूपार्च्चितर्षभैः॥"

महीरुहः, पुं, (मह्यां रोहति जायत इति। रुह+कः।) वृक्षः। इत्यमरः। २। ४। ५। (यथा, विष्णुपुराणे। १। १५। १।

"तपश्चरन्तु पृथिवीं प्रचेतःसु महीरुहाः।
अरण्यमाश्रमावर्त्तबन्धवाय प्रजाक्षयः॥")

शाकवृक्षः। इति राजनिर्घण्टः॥

महीलता, स्त्री, (मह्या लतेव।) किण्वुलुकः। इत्यमरः। १। १०। २१॥ (विशेषोऽस्याः किण्वुलुकशब्दे ज्ञातव्यः॥)

महीसुतः, पुं, (मह्याः सुतः।) मङ्गलः। इत्यमरः। १। ३। २५॥ (यथा, हरिवंशे। १०४। १४।

"रिपुगदकौपभयानि पञ्चमे
तनयसुताच शुचो महीसुते।
द्युतिरपि नास्य चिरं भवेत् स्थिरा
शिरसि कपेरिव मालती कृता॥")

महेच्छः, पुं, (महती इच्छा यस्य। इषश्च सामासिकः।) महाशयः। इत्यमरः। ३। १। ३॥ (यथा, हरिवंशे। १६। ६८।

"प्रत्यक्षधनिमहेच्छव्यवसायपराक्रमोपेतः॥")

महेन्द्रः, पुं, (महांश्चासाविन्द्रश्च ऐश्वर्य्यवानित्यर्थः।) विष्णुः। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ शक्रः। (यथा, भागवते। ६। १२। ६।

"क्षयव्यसुदृपाकरणं महेन्द्रमिदमब्रवीत्॥")

जम्बुद्वीपस्य पर्व्वतविशेषः। इति मेदिनी। रे, २००। (स च सप्तकुलाचलानामन्यतमः। यथा, मार्कण्डेये। ५७। १०।

"महेन्द्रो मलयः सह्यः सुक्तिमाञ्ऋक्षपर्व्वतः।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः॥")

महेन्द्रकदली, स्त्री, (महेन्द्रसम्भवा तद्वर्णा वा कदली।) कदलीभेदः। इति राजनिर्घण्टः॥

महेन्द्रनगरी, स्त्री, (महेन्द्रस्य नगरी।) अमरावती। इति शब्दरत्नावली॥

महेन्द्रवारुणी, स्त्री, (महेन्द्रवरुणयोरियं प्रियत्वात्। अण्। ङीष्।) लताविशेषः। बड़ माकाल इति भाषा। तत्पर्य्यायः। चित्रवल्ली २ महाफला ३ महेन्द्री ४ चित्रफला ५ अपुषी ६ अपुषा ७ आत्मरक्षा ८ विशाला ९ दीर्घवल्ली १० महत्फला ११ महेन्द्रवारुणी १२ इन्द्रफला १३ इन्द्रवारुणी १४ सौम्या १५ गजचिर्भिटा १६ चित्रदेवी १७ धनुःश्रेणी १८ शाखकर्णी १९ मरुसम्भवा २०। अस्या गुणाः। इन्द्रवारुणीगुणभागित्वम्। रसे वीर्य्ये विपाके च किञ्चिद्गुणाधिक्यत्वञ्च। इति राजनिर्घण्टः॥

महेन्द्राणी, स्त्री, (महेन्द्रस्य भार्य्येति। महेन्द्र। "पुंयोगादाख्यायाम्।" ४। १। ४८। इति ङीष्। "इन्द्रवरुणेति।" ४। १। ४९। इति आनुगागमः।) इन्द्रभार्य्या। इति शब्दरत्नावली॥ (यथा, महाभारते। १। ४१। १२।

"ततः सुदूर्नीलमवानेरावतशिरोगतः।
आजगाम महेन्द्राख्यो शक्रः सुरगणैर्वृतः॥")

महेरणा, स्त्री, (महत् ईरणं प्रेरणमस्याः। यद्वा, महं गजोत्सवमीरयतीति। ईर+क्विप्। टाप्।) शक्रकीटपः। इत्यमरः। २। ४। १४॥ महेरुणा इत्यपि पाठः। इत्यमरटीकायां भरतः॥ (यथास्याः पर्य्यायः।

"शक्रकी गजभक्ष्या च सुवहा सुरभीरुहा।
महेरणा कुन्दुरुकी वल्लकी च बहुसवा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महेला, स्त्री, (मह्यते पूज्यत इति। मह+"सलिकल्यनिमहीति।" उणा०। १। ५५। इति इलच्। पृषोदरादित्वादिकारस्येकारः। यद्वा, महस्योत्सवस्य इला भूमिः।) नारी। इति शब्दरत्नावली॥ (यथा, नलोदये। २। ५८।

"ससम्भ्रममहेलाभिस्फुरित-
गुणाभिस्तत्क्षणं महेलाभि
श्रीः प्रवरमहेलाभिस्तथैव
युवपंक्तिभिः परमहेलाभिः॥")

महेलिका, स्त्री, (महेल+स्वार्थे कन्। टाप्। अकारस्येत्वम्।) नारी। इति शब्दरत्नावली॥

महेशः, पुं, (महान् ईशः।) शिवः। इति शब्दरत्नावली॥ (यथा, शिवस्थानम्।

"श्वायेन्नित्यं महेशं रजतगिरिनिभं चारु-
चन्द्रावतंसम्॥")

महेशबन्धुः, पुं, (महेशो बध्यते बध्नीक्रियते येन लक्ष्मीस्तनजन्मत्वात्।) श्रीफलवृक्षः। इति शब्दचन्द्रिका॥

महेश्वरः, पुं, (महांश्चासावीश्वरश्च कर्त्तुमकर्त्तुमन्यथाकर्त्तुं वा समर्थः। यद्वा, महत्या महामायया ईश्वरः।) शिवः। इत्यमरः। १। १। ३२॥ अस्य व्युत्पत्तिर्यथा,—

"विश्वस्थानाच्च सर्व्वेषां महतामीश्वरः स्वयम्।
महेश्वरश्च तेनेमं प्रवदन्ति मनीषिणः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५३ अध्यायः॥

अस्य विवाहस्मरणफलं यथा,—

"महेश्वरसमायुक्तमीदृशं यः स्मरेत् सुधा।
सततं तस्य कल्याणं वाञ्छितञ्च भविष्यति॥"
इति कालिकापुराणे शिवविवाहे ४१ अध्यायः॥

(परमेश्वरः। तदुक्तं न्यायशास्त्रे।

"वायोर्नवैकादश तैजसो गुहा
जलक्षितिप्राणभृतां चतुर्दश।
दिक्कालयोः पञ्च षडेव चाम्बरे
महेश्वरोऽहौ मनसस्त्वथैव च॥"

महान् ईश्वरः प्रजानां प्रभुः। ऐश्वर्य्ययुक्तो राजा। यथा, महाभारते। १। २२८। २६।

"ततः प्रक्रोशतिर्यक्कुञ्जिरप्राणां महेश्वरः।
पाकरं गजमास्थाय तावुभौ समुपाद्रवत्॥")

महेश्वरकरच्युता, स्त्री, (महेश्वरस्य करात् च्युता।) करतोया नदी। इति केचित्। गौरीविवाहसमये शङ्करकरगलितसंप्रदानतोयप्रभवत्वात्

करस्य तोयं विद्यतेऽनेति करतोया। इत्यमर-टीकायां भरतश्च ॥

महेश्वरी, स्त्री, (महेश्वरस्य स्त्री। महेश्वर+ङीष्। महती चासौ ईश्वरी महदादीनां नियन्त्रीति वा।) महेश्वरपत्नी। यथा,—

"ऐं पातु दक्षनेत्रं मे ह्रीं पातु वामलोचनम्।
श्रीं पातु दक्षकर्णं मे त्रिवर्गात्मा महेश्वरी॥"

इति तन्त्रसारे सुवनेश्वरीकवचम्॥

अपराजिता। इति शब्दचन्द्रिका। कांस्यम्। इति हेमचन्द्रः। ४। ११४॥ राजरीतिः। इति राजनिर्घण्टः॥

महैरण्डः, पुं, (महांश्चासावैरण्डश्च।) स्थूलैरण्डः। इति राजनिर्घण्टः॥

महैला, स्त्री, (महती चासावेला च।) स्थूलेला। इति राजनिर्घण्टः॥ (गुणादिविषयोऽस्याः स्थूलेलाशब्दे द्रष्टव्यः॥)

महोक्षः, पुं, (महान् उक्षा। "अचतुरविचतुरेति।"५। ४। ७७। इति समासान्तः अच्। निपातितश्च।) वृषभः। इत्यमरः। २। ८। ६१॥ तत्पर्य्यायः। वृषभः २ वृषः ३ पुङ्गवः ४ बली ५ गोनाथः ६ ऋषभः ७ गोपियः ८ उक्षा ९ गोपतिः १०। इति राजनिर्घण्टः॥ (यथा, कथासरित्सागरे। ६०। ६६।

"महोक्षः स त्वया दृष्टः संस्तवश्च कृतो यदि।
तदिहानय तं युक्त्या तावत् पश्यामि कौतुकम्॥")

महोटिका, स्त्री, (महान्तः पत्रेभ्यः स्थूला उटाः पत्राण्यस्याः। ततः स्वार्थे कन्। टाप्। अकारस्येत्वम्।) वृक्षती। इति राजनिर्घण्टः॥

महोटी, स्त्री, (महान्त उटाः पत्राणि यस्याः।) वृक्षती। इति भावप्रकाशः॥ वृक्षदुत्पलञ्च॥

महोत्क, स्त्री, (महान् उत्कः दर्शनोत्सुको लोको यस्याः।) विद्युत्। इति केचित्॥

महोत्पलं, क्ली, (महच्च तत् उत्पलञ्च।) पद्मम्। सारसपक्षी। इत्यमरः। १। १०। ६६॥

महोत्सवः, पुं, (महांश्चासावुत्सवश्च।) अतिशयसुखजनककर्म्म। यथा,—

"सर्व्वेषु जन्मदिवसे स्नातैर्मङ्गलपाणिभिः।
गुरुदेवाग्निविप्राच्च पूजनीयाः प्रयत्नतः॥
स्नपयेच्च पितरौ तथा देवप्रजापतिः।
प्रतिसंवत्सरस्यैव कर्त्तव्यश्च महोत्सवः॥"

इति तिथ्यादितत्त्वे ब्रह्मपुराणवचनम्॥

अपि च। कालिकापुराणे ६६ अध्याये।

"दुर्गातन्त्रेण मन्त्रेण कुर्य्याद्दुर्गामहोत्सवम्।
महानवम्यां शरदि बलिदानं कृपादयः॥"

महोत्साहः, त्रि, (महान् उत्साहो यस्य।) अतिशयोत्साहयुक्तः। (यथा, महाभारते। ५। ५१। १।

"सर्व्व एते महोत्साहा ये त्वया परिकीर्त्तिताः।
एकतस्त्वेव ते सर्व्वे समेता भीम एकतः॥")

तत्पर्य्यायः। महोद्यमः २। इत्यमरः। ३। १। ३॥ (विष्णुः। यथा, महाभारते। १३। १४८। ३१।

"अतीन्द्रियो महामायो महोत्साहो महाबलः॥")

महोत्साहः, पुं, (महान् उत्साहो यस्य।) राज्याङ्गप्राग्नराजपुरुषः। यथा,—

"सम्यग्नस्तु प्रकृतिभिर्महोत्साहः कृतश्रमः॥"

इति शब्दमाला॥

अतिशयोद्यमश्च॥

महोदधिः, पुं, (महांश्चासावुदधिश्च।) समुद्रः। यथा, महानाटके।

"लङ्घा दग्धा वनं भग्नं लक्षितश्च महोदधिः।
यत् क्षतं रामदूतेन स रामः किं करिष्यति॥"

महोदयं, क्ली, (महान् उदय उन्नतिर्यस्मिन्।) पुरविशेषः। तत्पर्य्यायः। कान्यकुब्जम् २ कन्याकुब्जम् ३ गाधिपुरम् ४ कौशम्बम् ५ कुशस्थलम् ६। इति हेमचन्द्रः॥

महोदयः, पुं, (महान् उदयः समुन्नतिर्यस्मिन्।) कान्यकुब्जदेशः। आधिपत्यम्। (महान् उदय उत्कर्षो यस्मिन्।) अपवर्गः। इति मेदिनी। ये, १२६॥ (महान् उदय उत्कर्षो यस्य।) स्वामी। इति हेमचन्द्रः। ३। ४६०॥ (महान् उदयः फलं यस्मिन् यस्माद्वा। महाफले, त्रि। यथा, मनौ। ७। ५५।

"अपि यत् सुकरं कर्म्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम्॥"

"महोदयं महाफलम्।" इति तट्टीकायां कुल्लूकभट्टः॥)

महोदया, स्त्री, (महान्तुदयो यस्याः। टाप्।) नागबला। इति राजनिर्घण्टः॥

महोदरी, स्त्री, महागुदावरी। इति भावप्रकाशः॥ (महत् उदरमस्याः।) वृक्षदुदरयुक्ते, त्रि॥ (महच्च तदुदरञ्च। वृक्षदुदरे, क्ली। यथा, श्रीभागवते। ६। ७। १७।

"पितरं वरुणस्यस्तं श्रुत्वा जातमहोदरम्।
रोचिषो ग्राममेयाय तस्मिन्नः प्रत्यवेधत॥"

पुं, नागविशेषः। यथा, महाभारते। १। ३५। १६।

"कर्कोराकर्करौ नागौ कुक्षोदरमहोदरौ॥"

दानवविशेषः। यथा, तत्रैव। १। ६५। २५।

"एकपादेकचक्रश्च विरूपाक्षमहोदरौ॥"

धृतराष्ट्रस्य पुत्रविशेषः। यथा, तत्रैव। १। ६७। ६७।

"सेनापतिः सुषेणश्च कुक्षोदरमहोदरौ।")

महोद्यमः, त्रि, (महान् उद्यमो यस्य।) महोत्साहः। इत्यमरः। ३। १। ३। (यथा, राजतरङ्गिण्याम्। ५। १४९।

"अथ निर्जित्य दायादांल्लब्ध्वा लक्ष्मीं चिरोज्झिताम्।
निष्पृहिर्दिग्विजयं कर्त्तुं श्रीमानासीन्महोद्यमः॥"

महाद्युद्यमः।) अतिशयोद्योगे, पुं॥

महोन्नतः, पुं, (महानतिशय उन्नतः।) तालवृक्षः। इति भावप्रकाशः॥ अत्युन्नतियुक्ते, त्रि॥

महोन्नतिः, स्त्री, (महती चासावुन्नतिश्च।) अतिशयवृद्धिः। यथा,—

"भूयात्ते महदैश्वर्य्यं पुत्रादीनां महोन्नतिः।
अबाधिना शरीरेण चिरं जीव सुखी भव॥"

इत्युद्भटः॥

महोन्मदः, पुं, (महानतिशय उन्मदः।) मत्स्यविशेषः। पसुद इति भाषा। यथा,—

"राजमीवच्चिचफलः फलकी च महोन्मदः॥"

इति शब्दरत्नावली॥

अत्युन्मत्ते त्रि॥

महोरगं, क्ली, (महान् उरग इव।) तगरमूलम्। इति रत्नमाला॥

महोरगः, पुं, (महांश्चासावुरगश्च।) सर्पगणविशेषः। इति हेमचन्द्रः। २। ४॥ दृक्षत्सर्पमात्रञ्च॥ (यथा, भागवते। ८। १०। ४७।

"महोरगाः समुत्तेतुः दन्दशूकाः सदंशिकाः॥")

महोल्का, स्त्री, (महती चासावुल्का च।) उल्काविशेषः। यथा,—

"विद्युन्निर्घातनिर्घातमहोल्कानाञ्च संभवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥
महोल्कानाञ्च संभवे इतस्ततोऽनेकमहोल्कानां सन्निपाते। उल्कालक्षणमाह वृद्धगर्गः।
"वृक्षच्छिखा च लक्ष्याग्रा रक्तनीलशिखोज्ज्वला।
पौरुषी च प्रमाणेन उल्का नानाविधा स्मृता॥"

इति तिथ्यादितत्त्वम्॥

महौजाः, [स्] त्रि, अतितेजोयुक्तः। महदोजो यस्येतिविग्रहे बहुव्रीहौ प्रथमैकवचने असोरधाविधिनेन दीर्घे कृते महौजा इतिपदं निष्पन्नम्॥ (यथा, मनौ। १। ६१।

"स्वायम्भुवस्यास्य मनोः षड्वंश्या मनवोऽपरे।
सृष्टवन्तः प्रजाः स्वाः स्वा महात्मानो महौजसः॥"

दानवेयपुत्रासुरविशेषः। यथा, महाभारते। १। ६७। ५१।

"पञ्चमस्तु बभूवेषां प्रवरो यो महासुरः।
महौजा इति विख्यातो बभूवेह परन्तपः॥")

महौषधं, क्ली, (महत् औषधम्।) भूम्याकूष्माण्डम्। शुण्ठी। (पर्य्यायो यथा,—

"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम्
जयं कटुभद्रञ्च शृङ्गवेरं महौषधम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लशुनम्। (पर्य्यायो यथा,—

"लशुनस्तु रसोनः स्याद्दुग्यगन्धो महौषधम्।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) वाराहीकन्दः। वत्सनाभः। इति राजनिर्घण्टः॥ पिप्पली। इति शब्दचन्द्रिका॥ अतिविषा। इत्यमरः। २। ४। ३८॥ (महाभेषजम्। यथा, कथासरित्सागरे। ६६। १६।

"स्वभर्त्तुः प्रेम तैर्यच्च महासत्त्वान्महौषधैः।
चिकित्सां कारयामासुर्नोत्सस्रुच सदन्तिकात्॥")

महौषधिः, स्त्री, (महती चौषधिः।) दूर्व्वा। लज्जालुचुपः। इति शब्दचन्द्रिका॥ महाज्ञानीयद्रव्यविशेषः। यथा,—
"सहदेवी तथा ब्राह्मी बला चातिबला तथा।
शङ्खपुष्पी तथा सिंही अष्टमी च सुवर्चला॥
महौषधगणं प्रोक्तं महाज्ञाने नियोजयेत्॥"
इति गोविन्दानन्दधृतमत्स्यपुराणवचनम्॥
अपिच।
"एष्टिपर्णी श्यामलता भृङ्गराजः घृतावरी।
गुडूची सहदेवी च महौषधिगणः स्मृतः॥"
इति शब्दचन्द्रिका॥
श्रेष्ठौषधिश्च। (यथा, महाभारते।३।२८८।६।
"विशल्यौ चापि सुग्रीवः चक्षुषैतौ चकार ह।
विशल्यया महौषध्या दिव्यमन्त्रप्रयुक्तया॥"
सञ्जीवनी। यथा, रघौ। १२। ६१।
"इष्टा विचिन्वता तेन लङ्कायां राक्षसेश्वरी।
जानकीविषवल्लीभिः परीतेव महौषधिः॥"
"महौषधीः सञ्जीवनी लतेव।"इति तट्टीकायां मल्लिनाथः॥)

महौषधी, स्त्री, (महौषधि+ङीप्।) श्वेतकण्टकारी। ब्राह्मी। (पर्य्यायोऽस्या यथा,—
"ब्राह्मी कपोतवङ्का च सोमवल्ली सरस्वती।
मण्डूकपर्णी माण्डूकी लाङ्गली दिव्या महौषधी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
कटुका। अतिविषा। इति राजनिर्घण्टः॥
हिलमोचिका। इति त्रिकाण्डशेषः॥

मा ङ य माने। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) ङ य मायते। इति दुर्गादासः॥

मा ङ लि शब्दे। माने। इति कविकल्पद्रुमः॥ (ङा०-आत्म०-सक०-अनिट्।) ङ लि मिमीते। श्रुत्वा धर्म्मं मिमीते यः। इति हलायुधः॥ इति तट्टीकायां दुर्गादासः॥

मा ल माने। इति कविकल्पद्रुमः॥ (अदा०-पर०-सक०-अनिट्।) ल माति भूमिं नवेन राजा।
न मान्ति मानिनो यस्य यशश्चिभुवनोदरे॥"
इति हलायुधः॥ इति दुर्गादासः॥

मा, ष (मा+क्विप्।) वारुणम्। (यथा रामायणे। १। २। १५।
"मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः॥")
विष्णुः। इति मेदिनी। अव्ययवर्गे, ४६॥

मा, स्त्री, (मा+क्विप्। यद्वा, मा+क। तस्य टाप्।) लक्ष्मीः। इति मेदिनी। मे, १॥
माता। (यथा, साहित्यदर्पणे। १० म।
"मारमा सुषमा चारुरुचा मारवधूतमा।
मान्तधूर्जटिमावासा सा वामा मेऽस्तु मा रमा॥")
मानम्। इत्येकाक्षरकोषः शब्दरत्नावली च॥

मा, } त्रि, (अस्मद्+द्वितीयैकवचने। "त्वा मौ द्वितीयायाः।" ८। १। २१।
मां } इति मामित्यस्य स्थाने विकल्पेन मादेशः।)
मदीया कर्म्मता। आमाके इति भाषा॥ अस्मच्छब्दात् द्वितीयैकवचनविषयं पदम्। इति व्याकरणम्॥ (यथा, देवीभागवते। १। ५। ६६।
"सिन्धोः पुत्र्यां रोहिता किं त्वमद्धे!
कस्मादेनां प्रेक्षसे नाथहीनाम्।
चिन्तयन्ती खाग्रजातापराधो
युत्थाप्यैनं मोदितां मां कुरुष्व॥")

मांसं, क्ली, (मन्यते इति। मनज्ञाने+"मनेर्दीर्घश्च।"उणा० २। ६४। इति सः दीर्घश्च।) रक्तजधातुविशेषः। मास् इति भाषा॥ स तु गर्भस्थबालकस्याष्टमिमांसेभवति। इति सुखबोधः॥ भागवतमते चतुर्भिर्मासैर्भवति। तत्पर्य्यायः। पिण्डितम्२ तरसम् ३ पललम् ४ क्रव्यम् ५ आमिषम् ६ पलम् ७। इत्यमरः।२।६।४३॥ असृजम् ८ जाङ्गलम् ९ कौरम् १०। सर्व्वमांसगुणाः। वातनाशित्वम्। दृष्यत्वम्। बल्यत्वम्। रुच्यत्वम्। हंहण्यत्वम्। देशस्थानसात्म्यसंस्काराभावैर्भूयो नानारूपत्वञ्च॥ *॥ प्रसहभूशयानूपवारिजवारिचारिमांसगुणाः। गुरुत्वम्। उष्णत्वम्। मधुरत्वम्। स्निग्धत्वम्। वातघ्नत्वम्। शुक्रवर्द्धनत्वञ्च॥ *॥ विष्किरप्रतुदजाङ्गलमांसगुणाः। लघुत्वम्। शीतत्वम्। मधुरत्वम्। कषायत्वम्। दृष्यं हितत्वञ्च॥*॥ अङ्गविशेषमांसगुणाः।
'एकदेहेऽपि पूर्व्वार्द्धं रुग्णायां पक्षिणां परम्।
सर्व्वेषाञ्च शिरस्कन्धपक्षीदरमसद्गुदम्॥
पादपुच्छान्तमस्निग्धसुष्कक्रोडाश्च मेहनाः।
धातवः श्रोणितादाश्च गुरवः स्युर्यथोत्तरम्॥'
प्रशस्ताप्रशस्तमांसं यथा,—
'वयस्थं निर्विषं सद्योहतं मांसं प्रशस्यते॥
हतञ्च व्याधितं वृद्धं बालं विषेहतम्।
अगोचरहतं व्याडदंशितं मांसमुत्सृजेत्॥'
अष्टविधा मांसयोनिर्व्यथा। प्रसहाः १ प्रसह्यभक्षणात् क्रूररक्षोनादयः। भूशयाः २ बिलशायित्वात् नकुलगोधादयः। आनूपाः ३ खड्गमहिषवराहादयः। जलजाः४ कुम्भीरादयः। जलेचराः ५ हंसबकप्रभृतयः। जाङ्गलाः ६ हरिच्छागादयः। विष्किराः ७ विकीर्य्यचरणात् तित्तिरमयूरकुक्कुटादयः। प्रतुदाः ८ प्रतुद्यचरणात् कपोतपारावतादयः। इति राजनिर्घण्टः॥ *॥ अपि च।
'मांसं वातहरं सर्व्वं हंहण्यं बलपुष्टिकृत्।
प्रीणनं गुरु स्निग्धञ्च मधुरं रसपाकयोः॥' *॥
अथ तद्भेदाः।
'मांसवर्गो द्विधा श्रेयो जाङ्गलानूपभेदतः॥'
तत्र जाङ्गलस्य लक्षणं गुणाश्च।
'मांसवर्गोऽत्र जङ्गाला विलस्थाश्च गुहाशयाः।
तथा पक्षिगणा ज्ञेया विष्किराः प्रतुदा अपि॥
प्रसह्या अथ च ग्राम्या अष्टौ जाङ्गलजातयः।
जाङ्गला मधुरा रूक्षास्तुवरा लघवस्तथा॥
बल्याश्च हंहणा दृष्या दीपना दोषहारिणः।
मृदवो मिग्धिनश्चैव गन्धस्तादृंते तथा॥
वाधिर्य्यमरुचिं कृच्छ्रप्रमेहश्वासजान् गदान्।
क्षीपदं गलगण्डञ्च नाशयन्त्यनिलामयान्॥'*॥
अथानूपस्य लक्षणं गुणाश्च।
'कूलेचराः प्लवाश्चापि कोशस्थाः पादिनस्तथा।
मत्स्या एते समाख्याताः षड्धानूपजातयः॥
आनूपा मधुराः स्निग्धा गुरवो बृंहणाः सदा।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशम्॥
तथाभिष्यन्दिनश्चैव हि प्रायोऽपथ्यतमाः स्मृताः॥'*॥
अथ जाङ्गलानां गणना विशिष्टा गुणाश्च।
'हरिणैणकुरङ्गर्क्ष्यैणेयतन्द्रुशमराः।
राजीवोऽपि च सृक्वी चैलाद्या जाङ्गलसंज्ञकाः॥
हरिन्नाम्नवर्णः स्यादेणः शस्यः प्रकीर्त्तितः।
कुरङ्गः ऐणसाम्यः स्याद्धरिन्नाम्नतिको महान्॥
ऋष्यो नीलाङ्गको लोके सरोरुरिति कीर्त्तितः।
एणसन्नबिन्दुः स्याद्धरिणात् किञ्चिदल्पकः॥
न्यङ्कुर्बहुविषाणोऽथ शमरो गवयो महान्।
राजीवस्तु रुरो ज्ञेयो राजीभिः परितो वृतः॥
यो रुरुः शृङ्गहीनः स्यात् स सृक्वीति निगद्यते।
जङ्गालाः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः॥'
अथ विलेशयानां गणना गुणाश्च।
'गोधाशशशशुजङ्गाखुशल्लकद्याद्या विलेशयाः।
विलेशया वातहरा मधुरा रसपाकयोः।
हंहणा बहुविण्मूत्रा बीर्य्योल्बा अपि कीर्त्तिताः॥
अथ गुहाशयानां गणना गुणाश्च।
'सिंहव्याघ्रर्क्षतरक्षुद्वीपिनस्तथा।
बभ्रुजम्बुकमार्জ্জারा द्व्याद्यास्तु गुहाशयाः॥
स्थूलपुच्छो रक्तनेत्रो बभ्रुभेदः सनाकुलः।
गुहाशया वातहरा गुरूष्णमधुराश्च ते।
स्निग्धा बल्या हिता नित्यं नेत्रगुह्यविकारिणाम्॥'
अथ पर्णेन्दगानां गणना गुणाश्च।
'वर्णीकोष्टचमार्জ্জारष्टचमर्कटिकादयः।
एते पर्णेन्दगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः॥
स्मृताः पर्णेन्दगा दृष्याश्चक्षुष्या ग्रोविशे हिताः।
श्वासार्शःकासगुल्मनाः कृच्छ्रमूत्रपुरीषकाः॥'
अथ विष्किराणां गणना गुणाश्च।
'वर्षाकालाविकिरकपिञ्जलकतित्तिराः।
कुलिङ्गकुक्कुटाद्याश्च विष्किराः सप्तदाहृताः॥
विकीर्य्य भक्ष्यन्त्येते यस्मात् तस्माद्धि विष्किराः।
कपिञ्जला इति प्राज्ञैः कथिता गौरतित्तिराः॥
विष्किरा मधुराः प्रीताः कषायाः कटुपाकिनः।
बल्या दृष्याक्षिदोषघ्नाः पथ्यास्ते लघवः स्मृताः॥'
अथ प्रतुदानां गणना गुणाश्च।
'कालकण्ठकहारीतकपोतशुकपत्रकाः।
सारिका खञ्जरीटश्च पिकाद्याः प्रतुदाः स्मृताः॥
प्रतुद्य भक्ष्यन्त्येते तुण्डेन प्रतुदास्ततः।

कपोतो धवलः पाण्डुः घृतपक्वो दृढच्छुकः ।
प्रतुदा मधुराः पित्तकफघ्नास्तु वरा हिमाः ।
लघवो बहुवर्चस्काः किञ्चिद्वातकराः स्मृताः ॥'
अथ प्रसहानां गणना गुणाश्च ।
'काको गृध्र उलूकश्च चिल्लश्च श्येनघातकः ।
चाषो भासश्च कुरर इत्याद्याः प्रसहाः स्मृताः ।
प्रसहाः क्रौञ्चिता एते प्रसह्याच्छिद्य भक्षणात् ।
प्रसहाः खलु वीर्य्योष्णाः वसामांसं भक्षयन्ति ये ॥
ते ग्रीवभस्मकोन्मादैः शुक्रदौर्बल्यमाप्नुयुः ।
ग्रध्रघातकस्थाने घृतघातकोऽपि पाठः । वाज
इति लोके ॥*॥ अथ ग्राम्याणां गणना गुणाश्च ।
'छागमेषवराश्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः ।
ग्राम्या वातहराः सर्व्वे दीपनाः कफपित्तलाः ।
मधुरा रसपाकाभ्यां दृंहणा बलवर्द्धनाः ॥'
अथ कूलेचराणां गणना गुणाश्च ।
'खुलापगगवयारोहचमरीवारणादयः ।
एते कूलेचराः प्रोक्ता यतः कूले चरन्त्यमी ॥
कूलेचरा मरुत्पित्तहरा दृष्या बलावहाः ।
मधुराः शीतलाः स्निग्धा गुरवः श्लेष्मवर्द्धनाः ॥'
अथ प्लवानां गणना गुणाश्च ।
'हंससारसकाचाग्र्यबकक्रौञ्चसरारिकाः ।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः ।
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः ॥
स्थूला कठोरा दृष्टा च यस्याच्चुपरिस्थिता ।
गुटिका चक्षुषश्चापि ज्ञेया नन्दीमुखीति सा ॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥'
अथ कोशस्थानां गणना गुणाश्च ।
'शुक्तः शुक्तनखाश्चापि शुक्तिशम्बूककर्कटाः ।
जीवा एवम्विधाश्चान्ये कोशस्थाः परिकीर्त्तिताः ॥
कोशस्था मधुराः स्निग्धाः पित्तवातहरा हिमाः ।
दृंहणा बहुवर्चस्काः दृष्याश्च बलवर्द्धनाः ॥'
अथ पादिनां गणना गुणाश्च ।
'कुम्भीरकूर्म्मनक्राश्च गोधाकरग्रुकरराः ।
घण्टिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः ॥
पादिनोऽपि च ये ते तु कोशस्थानां गुणैः समाः ॥'
इति भावप्रकाशः ॥

अन्यच्च ।
मांसं वातहरं दृष्यं दृंहणं बलवर्द्धनम् ।
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयोः ॥'
तस्योत्पत्तिस्थानभेदविधं यथा,—
'प्रसह्य भक्ष्यन्तयते प्रसहास्तेन कीर्त्तिताः ।
भूम्यां बिलाद्यां विलाद्यानूपोऽनूपसंश्रयात् ॥
जले निवासाज्जलजा जले चर्य्याज्जलेचराः ।
स्थलजा जाङ्गलाः प्रोक्ता स्थलाजङ्गलचारिणः ॥
विकीर्य्य विष्किराश्चैव प्रतुद प्रतुदास्तथा ।
योनिरष्टविधा ज्ञेया मांसानां संप्रकीर्त्तिता ॥'
'प्रसहा भूम्यानूपवारिजा वारिचारिणः ।
गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः ॥
लावाद्यो वैष्किरो वर्गः प्रतुदा जाङ्गला मृगाः ।
लघवः शीतमधुराः सकषाया हिता गुणाः ॥'
अथ मांसयूषगुणाः ।
'रसो मांसस्य चक्षुष्यो दृंहणः प्राणवर्द्धनः ।
तृप्तो वातविकारघ्नः क्षतौजःस्वरवर्द्धनः ।
भग्नविश्लिष्टसन्धीनां क्षतानां व्रणिनां हितः ॥'
अथ तैलपक्वमांसगुणाः ।
'मांसं यत्तैलसंसिद्धं वीर्य्योष्णं पित्तलं कटु ।
अग्निसन्दीपनं रुच्यं दृष्टिशुक् पुष्टिशुद्गुरु ॥'
घृतपक्वमांसगुणाः ।
'मांसन्तु घृतसंसिद्धं दृष्टिदं पुष्टिशुक्रदम् ।
प्रीणनं सर्व्वधातूनां विशेषान्मुखशोषिणाम् ॥'
परिशुष्कप्रदिग्धमांसयोर्लक्षणं गुणाश्च ।
मांसं बहुघृते भृष्टं सिक्थं चोष्णाम्बुना मृदुः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ॥
परिशुष्कं स्थिरं स्निग्धं हर्षणं प्रीणनं गुरु ।
पित्तघ्नं बलमेधाग्निमांसौजःशुक्रवर्द्धनम् ॥
तदेव घनतक्राढ्यं प्रदिग्धं सल्लिशातकम् ।
प्रदिग्धं बलमांसाग्निवर्द्धनं वातपित्तजित् ॥'
शूलिकापक्वमांसगुणाः ।
'मांसन्तु शूलिकाप्रोतमङ्गारेषु विपाचितम् ।
ज्ञेयं गुरुतरं वृष्यं दीप्ताग्नीनां सदा हितम् ॥'
वेशवारमांसस्य लक्षणं गुणाश्च ।
'निरस्थि पिण्डितं पिष्टं सिद्धं गुडघृतान्वितम् ।
क्षाममरिचसंयुक्तं वेशवार इति स्मृतम् ॥
वेशवारो गुरुः स्निग्धो बलोपचयवर्द्धनः ।
द्रव्येण येन येनेह यज्ञनं मत्स्यमांसयोः ।
तस्य तस्य तयोक्तेतद्गुणदोषैर्व्विभावयेत् ॥'
एकत्र सर्व्वमांसभक्षणदोषो यथा,—
'एकत्र सर्व्वमांसानि विरुध्यन्ते परस्परम् ॥'
मांसस्य गुरुत्वं यथा,—
'अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ।
घृतादष्टगुणं तैलं मद्यान्न च भक्षणात् ॥'
इति राजवल्लभः ॥

वर्ज्जनीयमांसानि यथा,—
'क्रव्यादपक्षिदात्यूहशुकमांसानि वर्जयेत् ।
सारसैकशफान् हंसान् बलाकावकटिट्टिभान् ॥
कुररं जालपादञ्च खञ्जरीटञ्च गृद्धिजान् ।
चासान् मात्स्यान् रक्तपादान् जग्ध्वा वै
कामतो नरः ॥
वत्सरं कामतो जग्ध्वा सोपवासस्त्रिरहं वसेत् ।'
इति गारुडे ६६ अध्यायः ॥
मांसभक्षणे दोषो यथा,—
'लोभात् स्वभक्षणार्थाय जीवितं हन्ति यो नरः ।
मज्जाकुक्षौ वसेत् सोऽपि तद्लोमो लक्षवर्षकम् ॥
ततो भवेत् स ग्रध्रको मीनश्च सप्तजन्मसु ।
ह्यादश्यञ्च कर्म्मभ्यस्ततः शुद्धिं लभेद्ध्रुवम् ॥'
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
अपि च ।
'बलाकं हंसदात्यूहं कलविङ्कं शुकं तथा ।
कुररञ्च चकोरञ्च जालपादञ्च कोकिलम् ॥
चाषञ्च खञ्जरीटञ्च श्येनं गृध्रं तथैव च ।
उलूकं चक्रवाकञ्च भासं पारावतन्त्यपि ॥
कपोतं टिटिकञ्चैव शामटिट्टिभमेव च ।
सिंहव्याघ्रञ्च मार्ज्जारं श्वानं शूकरमेव च ॥
शृगालं मर्कटञ्चैव गर्दभञ्च न भक्षयेत् ।
न भक्षयेत् सर्व्वसत्त्वान् पक्षिणोऽन्यान् वने-
चरान् ॥
जलेचरान् स्थलेचरान् प्राणिनश्चति धारणा ॥'
इति कूर्म्मपुराणे उपविभागे १६ अध्यायः ॥
अन्यच्च ।
'नाद्याद्विधिना मांसं विधिज्ञो नापदि द्विजः ।
जग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽवशः ॥
न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः ।
यादृशं भवति प्रेत्य वृथामांसानि खादतः ॥
कुर्य्यादृतपशुं साङ्गं कुर्य्यात् पिष्टपशुं तथा ।
न त्वेव तु वृथा हन्तुं पशुमिच्छेत् कदाचन ॥
यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्ज्जयेत् ॥
समुत्पत्तिञ्च मांसस्य वधबन्धौ च देहिनाम् ।
प्रसमीक्ष्य निवर्त्तेत सर्व्वमांसस्य भक्षणात् ॥
न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् ।
स लोकप्रियतां याति व्याधिभिश्च न पीड्यते ॥
स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति ।
अनभ्यर्च्च पितॄन् देवान् ततोऽन्यो नास्त्य-
पुण्यकृत् ॥
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥
फलमूलाशनैर्मेध्यैर्मुन्यन्नानाञ्च भोजनैः ।
न तत्फलमवाप्नोति यन्मांसपरिवर्ज्जनात् ॥
मांसभक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥
यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्वाद्यः सर्व्वमांसादस्तस्मान्मत्स्यान् विव-
र्ज्जयेत् ॥'
इति मानवे ५ अध्यायः ॥
अन्यच्च । श्रीभागवतपञ्चमस्कन्धगद्यम् । 'ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते । याश्च स्त्रियो वृथामधून् खादन्ति तांश्च ताश्च ते पशवो इह निहता यमसदने यातयन्तो रुशोगणाः । ग्रौनिका इव सुधितिना वदायाद्यक् पिबन्तीति ॥'
ब्रह्मपुराणम् ।
'पशूनां मार्य्यमाणस्य न मांसं भक्षयेत् क्वचित् ।
दृष्टमांसं गर्भशुद्ध्यां शुष्कमांसमथापि वा ॥'
महाभारतम् ।
'रोगार्त्तोऽभ्यर्थितो वापि यो मांसं नाद्या-
लोलुपः ।
फलमाप्नोत्ययज्ञेन सोऽश्वमेधशतस्य च ॥'
नन्दिपुराणम् ।
'यश्चोपदेशं कुरुते परस्य तु महात्मनः ।
मांसस्य वर्ज्जनफलं सोऽमांसादफलं लभेत् ॥'
भविष्यपुराणम् ।
'आमिषं रक्तगात्रञ्च यो भुङ्क्ते च रवेर्दिने
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते ॥'

विष्णुपुराणम् ।
चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥
स्त्रीतैलमांससंभोगी पर्व्वस्वेतेषु यै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः ॥'
इति तिथ्यादितत्त्वम् ॥
अथ मांसभक्षणविधिः ।
'श्राद्धे देवान् पितॄन् प्रार्च्य खादन् मांसं
न दोषभाक् ।
वसेत् स नरके घोरे दिनानि पशुरोमभिः ॥
सम्मितानि दुराचारो यो हन्त्यविधिना पशून् ।
मांसं संभक्ष्य संप्राप्य कामान् याति ततो
हरिम् ।'
इति गारुडे ६६ अध्यायः ॥
अपि च ।
'गोधा कूर्म्मः शशः खड्गौ ग्राम्यकश्चेति
सप्तमाः ।
भक्ष्यान् पञ्चनखान्नित्यं मनुराह प्रजापतिः ॥
मत्स्यान् सशल्कान् भुञ्जीत मांसं रौरवमेव च ।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा ॥
मायूरं तैत्तिरञ्चैव कपोतञ्च कपिञ्जलम् ।
वार्ध्राणसं वकं भक्ष्यं नीलपक्षं पराजिताः ॥
सपरः सिंहतुण्डश्च तथा पाठीनरोहितौ ।
मत्स्यान्येते समुद्दिष्टा भक्षणाय तपोधनैः ॥
प्रोक्षितं भक्षयेद्वां मांसञ्च द्विजकाम्यया ।
यथाविधिनियुक्तञ्च प्राणानामपि चात्यये ॥
भक्षयन्नपि मांसानि नियोगाद्यज्ञकारणात् ।
औषधार्थमशक्तौ वा नियोगादयत्नकारणात् ॥
आमन्त्रितस्तु यः श्राद्धे देवे वा मांसमुत्सृजेत् ।
यावन्ति पशुरोमाणि तावतो नरकान् व्रजेत् ॥
इति कूर्म्मपुराणे उपविभागे १६ अध्यायः ॥
अपि च ।
'मांसखातः प्रवक्ष्यामि विधिं भक्षणवर्ज्जने ।
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानाञ्च काम्यया ॥
यथाविधिनियुक्तन्तु प्राणानामेव चात्यये ।
प्राणस्यान्नमिदं सर्व्वं प्रजापतिरकल्पयत् ॥
स्थावरं जङ्गमञ्चैव सर्व्वं प्राणस्य भोजनम् ।
चराणामन्नमचरा दंष्ट्रिणामप्यदंष्ट्रिणः ॥
अहस्ताश्च सहस्तानां शूराश्चैव भीरवः ।
नास्ता दुष्यत्यदन्नाद्यान् प्राणिनोऽहन्यहन्यपि ॥
धात्रैव सृष्टा खाद्याश्च प्राणिनोत्तार एव च ।
यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः ॥
अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते ।
क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा ।
देवान् पितॄनर्चयित्वा खादन् मांसं न दुष्यति ॥
नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम् ॥
न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥'
इति मानवे ५ अध्यायः ॥ * ॥
देवीपुराणम् ।
'अष्टमीं समुपोष्यैव नवम्यामपरेऽहनि ।
मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमम् ।
तेनैव विधिनाश्नन्तु स्वयं भुञ्जीत नान्यथा ॥'
याज्ञवल्क्यः ।
'प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया ।
देवान् पितॄन् समभ्यर्च्य खादन् मांसं न
दोषभाक् ॥'
यमः ।
'भक्षयेत् प्रोक्षितं मांसं सकृत् ब्राह्मणकाम्यया ।
दैवे नियुक्तः श्राद्धे वा नियमे च विवर्ज्जयेत् ॥'
इति तिथ्यादितत्त्वम् ॥ * ॥
भाल्लाभिर्यं यथा,—
'गोवर्ज्यामामिषं क्षीरं फले जम्बीरमामिषम् ।
आमिषं रक्तशाकञ्च सर्व्वञ्च दधमामिषम् ॥'
गोवर्ज्यामामिषं क्षीरमित्यत्र पचाद्यामामिषं
पर्व्वमिति च पाठः । इति कर्म्मलोचनः ॥
(अस्योत्पत्तिर्यथा,—
'रसाद्रक्तं ततो मांसं मांसान् मेदः प्रजायते ॥'
इति सुश्रुते सूत्रस्थाने १४ अध्याये ॥)
मांसः, पुं. (मन + सः । दीर्घश्च ।) कालः । कीटः । इति शब्दरत्नावली ॥ (वर्ज्यसूकरजाति
विशेषः । यथा, महाभारते । १३ । ४८ । २२ ।
"चतुरो भागधो हन्ति क्रूराज्ञायोपजीविनः ।
मांसं खादुकरं चौद्रं सौगन्धमिति विश्रुतम् ॥")
मांसकारि, क्ली, (मांसं करोतीति । कृ + णिनिः ।)
रक्तम् । इति हेमचन्द्रः । ३ । २८६ ॥
मांसच्छदा, स्त्री, (मांस इव छदः पर्णमस्याः ।
तद्परिलोमोत्पत्तिरस्यास्तथात्वम् ।) मांसरोहिणीविशेषः । तत्पर्य्यायः । मांसी २ मांसरोही ३ रसायनी ४ सुलोमा ५ लोमकरिणी
६ । इति राजनिर्घण्टः ॥
मांसज, क्ली, (मांसाज्जायते इति । जन् + डः ।)
मेदः । इति हेमचन्द्रः । ३ । १८८ ॥ (मांसजाते, त्रि ॥)
मांसतेजः, [स्] क्ली, (मांसात् तेजोऽस्य ।)
मेदः । इति हेमचन्द्रः । ३ । १८८ ॥
मांसदलनः, पुं, (मांसं श्लीहानमकं दलति छिन्नीकरोतीति । दल + ल्युः ।) श्लीहन्नृत्यः । इति
शब्दचन्द्रिका ॥
मांसद्रावी, [न्] पुं, (मांसं द्रावयति श्लिथिलीकरोतीति । द्रु + णिच् + णिनिः ।) अम्लवेतसः ।
इति राजनिर्घण्टः ॥ (विशेषोऽम्लवेतसशब्दे द्रष्टव्यः ॥)
मांसपचनं, क्ली, (मांसस्य पचनम् ।) मांसपाकः ।
तस्य रूपान्तरं मांसाकः । इति भाकरत्नम् ॥
मांसपेशी, स्त्री, (मांसस्य पेशी ।) गर्भस्थावयवविशेषः । यथा,—
"वृद्बुदः सप्तरात्रेण मांसपेशी भवेत्ततः ।
द्विसप्ताहात् भवेत् पेशी रक्तमांसचिता दृढा ॥
बीजस्थेवाङ्कुराः पेश्यः पञ्चविंशतिरात्रतः ॥"
इति सुश्रुतः ॥ * ॥
अथ मांसस्य पेशीराह ।
यथार्थसुक्षणा युक्तो वायुः श्रोतांसि दारयेत् ।
अनुप्रविश्य पिण्डितं पेशीर्निर्भजते तथा ॥"
यथार्थं यथाप्रयोजनम् ॥ * ॥ मांसपेशीनां
संख्यामाह ।
"मांसपेश्यः समाख्याता शतं पञ्चशतानि च ।
तासां शतानि चत्वारि ग्राख्यासु कथितान्यथ ॥
कोष्ठे षडुत्तरा षष्टिः कथिता मुनिपुङ्गवैः ।
ग्रीवाया ऊर्द्धगास्वासु चतुस्त्रिंशत् प्रकीर्त्तिताः ॥"
ताः ग्राखागताः प्राह । एकैकस्यां पादाङ्गुल्यां
तिस्रस्तिस्रस्ताः पञ्चदश १५ पादाग्रे दश १०
पादोपरिकूर्चसन्निविष्टा दश १० गुल्फतलयोर्दश १० गुल्फजानुनोः अन्तरे विंशतिः २०
जानुनि पञ्च ५ ऊरौ विंशतिः २० वंक्षणे
दश १० एवमेकस्मिन् सक्थिनि शतम् १००
भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ ।
अथ कोष्ठगताः प्राह । गुदे तिस्रः ग्रैवस्त्रेका १ सेवन्यामेका १ वृषणयोर्द्वे २ स्फिचोः
पञ्च पञ्च ५ । ५ वङ्क्षणसन्धिषु द्वे २ उदरे पञ्च५
नाभौ एका १ एष्ठोदंसन्निविष्टा उभयतः पञ्च
पञ्च दीर्घाः ५ । ५ पार्श्वयोः षट् ६ वक्षसि
दश १० अंसकांसौ प्रति समन्तात् सप्त ७ ।
अंसकौ अंसुया इति लोके । अंसौ स्कन्धौ ।
हृदि द्वे २ यकृति द्वे २ क्लोम्नि द्वे २ उरसि
द्वे २ । * ॥ अथ ग्रीवोद्भवा आह । ग्रीवायां
चतस्रः ४ हन्वोरधो ८ कण्ठमणौ षष्टिकायामिति यावत् एका १ गले एका १ तालुनि
द्वे २ जिह्वायामेका १ ओष्ठयोर्द्वे २ नासायां
द्वे ललाटे चतस्रः ४ शिरस्येका १ एवं मांसपेश्यः पञ्चशतानि भवन्ति । * ॥
"स्त्रीणामपि भवन्त्येताः किन्तु विंशतिसत्तराः ।
गर्भाशये गर्भमार्गे योनौ च स्तनयोरपि ॥"
एताः पञ्चशतानि मांसपेश्यः । अधिका
विंशतिर्यथा । गर्भाशये तिस्रः ३ गर्भच्छदसंश्रिताः । शुक्रार्त्तवप्रवेशिन्यौ तिस्रः ३ योनावभ्यन्तरतो मुखाश्रिते प्रवृते द्वे २ योनावेव
बहिर्निर्गतमोतःपार्श्वद्वयश्रिते वर्त्तते योनिकर्णिके इति यावत् द्वे २ स्तनयोः पञ्च पञ्च
५ । ५ यौवने तासां वृद्धिर्भवति ।
"पुंसां मेढ्रः पुरस्तात् याः प्रोक्ता मेहनसुष्कजाः ।
स्त्रीणामाहत्य तिष्ठन्ति फलमन्तर्गतं हि ताः ॥"
अस्यायमर्थः । पुंसां मेहनसुष्कयोश्च याश्चिकी
मांसपेश्यः पूर्व्वमुक्ताः स्त्रीणां मेहनसुष्काभावात् फलं गर्भाशयं आहृत्य तिष्ठन्ति । गर्भदासक्वास । स्त्रीणां मांसपेश्यस्त्रिभिर्हीनानि
पञ्चशतानि । तथा च भोजः ।
"पञ्चपेशीशतान्येव स्त्रीणामुक्तं विदां भूमिप ! ।
अतश्च तिस्रो हीयन्ते स्त्रीणां ग्रैवसिकाः सुष्कयोः ॥
अथ मांसपेशीनां कर्म्माण्याह ।
"शिरास्नायुसन्धिपर्व्वाणि सन्धयस्तु शरीरिणाम् ।
पेशीभिः सहितान्येव बलवन्ति भवन्ति हि ॥"
इति भावप्रकाशः ॥

(यथा, महाभारते । १ । ११५ । १२ ।
"ततो जग्धे मांसपेश्यौ लोहाग्नीवेव संहता ।")
मांसफला, स्त्री, (मांसमिव फलमस्याः ।) वार्त्ताकी। इति राजनिर्घण्टः ॥
मांसभक्षः, त्रि, (मांसं भक्षयतीति । भक्ष + "कर्म्मण्यण् ।"३।२।१ इत्यण् ।) मांसभक्षण-कर्त्ता। मांसं भक्षयतीति छात्रवक्षिति कर्त्तरि वक्प्रत्ययेन निष्पन्नः ॥ (दानवविशेषः । यथा, हरिवंशे भविष्यपर्व्वणि । २३२ । ६ ।
"मांसपो मांसभक्षश्च वेगवान् केतुमाञ्छिखिः ॥")
मांसमासा, स्त्री, माषपर्णी । इति राजनिर्घण्टः ॥
मांसरोहिणी, स्त्री, (मांसं रोपयतीति । रुह + णिच् + णिनिः । ङीप् । न पुक् ।) सुगन्धिद्रव्यभेदः। तत्पर्य्यायः । अस्थिरुहा २ वृत्ता ३ चर्म्मकषा ४ वसा ५ विकषा ६ मांसरोही ७ । अस्या गुणाः । वृष्यत्वम् । सारकत्वम् । दोषत्रयनाशित्वञ्च । इति राजनिर्घण्टः ॥ (तथाचास्याः पर्य्यायो गुणाश्च ।
"मांसरोहिण्यतिरुहा वृत्ता चर्म्मकरी छगा । प्रहारवल्ली विकषा वीरवल्यपि कथ्यते ॥ स्नाय्वस्थिरोहिणी वृष्या सरा दोषत्रयापहा ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मांसलं, क्ली, (मांसं तद्वत् पुष्टिकरो गुणोऽस्य-स्यास्मिन् वा । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ६७ । इति लच् ।) काव्यस्य गौड़ीरीत्य-न्तर्गतस्य ओजोगुणस्याङ्गविशेषः । यथा,—
"ओजः समासभूयस्त्वं मांसलं पदडम्बरम् ॥" इति काव्यचन्द्रिका ॥
मांसलः, त्रि, (अतिशयेन मांसमस्यास्तीति । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ५७ । इति लच् ।) बलवान् । इत्यमरः । ३ । ६ । ४४ । स्थूलः । यथा, गारुड़े ६६ अध्याये ।
"निखाश्च वटुरेखाः स्युर्निर्द्वयाश्चिबुके छगे । मांसलेच घनोपेतैरवक्रैरधरैर्नृपाः ॥"
(मांसयुक्तः । यथा, वृहत्संहितायाम् । ६८ । २८ ।
"हृदयं सशुक्लतं दृष्ट्वा न वेपनं मांसलञ्च तृप्तीनाम् ॥"
अतिबहुलः । यथा, नैषधे । ६ । २० ।
"हृदस्य हंसावलिमांसलश्रियो बलाकयेव प्रबला विडम्बना ॥")
मांसलफला, स्त्री, (मांसलं फलमस्याः ।) वृन्ताकी। इति राजनिर्घण्टः ॥
मांसविक्रयी, [न्] त्रि, (मांसविक्रयोऽस्यास्तीति । मांसविक्रयेण जीवति वेति इनिः ।) आमिष-विक्रयकर्त्ता । इति हलायुधः ॥ तत्पर्य्यायः । वैतंसिकः २ कौटिकः ३ मांसिकः ४ । इत्य-मरः । २ । ९० । १४ ॥ शौनिकः ५ । इति जटाधरः ॥ कौटकिकः ६ । इति शब्दरत्ना-वली ॥ (यथा मनौ । ३ । १५१ ।
"चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा । विप्रेषेण च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः ॥")
मांससारः, पुं, (मांसस्य सारः ।) मेदः । इति राज-निर्घण्टः ॥ (मांसेष्वपि सारो बलं यस्य । सबल-स्थूलकायः । यथा, वृहत्संहितायाम् ।६८।९००।
"उपचितदेहो विद्वान् धनी सुरूपश्च मांस-सारो यः ।
सङ्गात इति च सुश्लिष्टसन्धितासुखभुजो ज्ञेयाः ॥")
मांसस्नेहः, पुं, (मांसानां स्नेहः ।) मेदः । इति राजनिर्घण्टः ॥
मांसहासा, स्त्री, (मांसेन हासः प्रकाशो यस्याः ।) चर्म्म । इति शब्दरत्नावली ॥
मांसाष्टका, स्त्री, (मांसेन सम्पाद्या अष्टका । मांसप्रधाना अष्टका वा ।) गौणचान्द्रमाघ-कृष्णाष्टमी । तत्र मांसोपकरणकश्राद्धमावश्य-कम् । यथा : अथाष्टकाश्राद्धम् ।
"पित्राद्यानाय स्थले खुरदत्ताक्षिस्रव च ।
कृष्णपक्षे तिस्रोऽष्टा हि पूर्व्वा चैन्द्री विभाषते ॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेवकी ।
आद्या पूर्वैः सदा कार्य्या मांसैरन्या भवेत्तथा ॥
ग्राकैः कार्य्या तृतीया स्यादेष द्रव्यगतो विधिः ॥"
मूले प्रधानस्थाने । अमावास्या हि श्राद्धस्य प्रधानकालः तदहरिति यावत् । ऐन्द्री सावे-रिन्द्रदेवताकयागसम्बन्धात् । एवं प्राजापत्या वैश्वदेवकी च । मांसैः पशोः । तथा च गोभिलः । यद्युवाच्यतरसंभारः स्यात् तदा पशुनैव कुर्य्यादिति । यद्युवेति निपातसमुदायो यद्यर्थे । पशुरपि छाग एव । छागोऽनादेशे पशुरिति गोतमात् । न च सैव्या ऊर्द्धं अष्टम्यां गौरिति गोभिलसूत्रेण गवोपदेशात् कथमनु-पदिष्टमिति वाच्यम् । तदसम्भवे पशुने-त्यनेन यः पशुरुपदिष्टस्तस्य विशेषतोऽनुप-दिष्टत्वात् । वस्तुतस्तु हरिवंशे नगोऽपि विहितः ।
"इत्याकुस्तु विकृत्तिं वै अष्टकायामथादिशत् ।
मांसमानय श्राद्धाय नगं हत्वा महाबल ! ।'
इत्यादिना नगमांसबोधनात् । पक्षभावे स्थाली-पाकेन । यथा, गोभिलः । अपि वा स्थाली-पाकं कुर्व्वीतेति । तदिधानन्तु ।
"स्थालीपाकं पशुस्थाने कुर्य्यादग्न्याधानकल्पिकम् ।
अपवेत्तं सवृतसायास्तरुण्या गोः पयस्तु ।"
इति छन्दोगपरिशिष्टीयं ग्राह्यम् । अन्विति ओदनपरोः पश्चात् । अतएव ।
"पितरः सूदयन्त्यन्नमष्टकासु मघासु च ।
तस्माद्व्यात् सदा युक्तो विदतृसु ग्राह्यवेषु च ।"
इति ग्रातातपेनोक्तम् । तस्मादन्नं प्रधानं पूपादिकन्तु उपकरणत्वेन भक्तानामावश्यकं सदेति अवगात् । इति श्राद्धतत्त्वम् ॥
मांसिकः, पुं, (मांसाय प्रभवति "तस्मै प्रभवति सत्तापादिभ्यः ।"५। १। १०१ । इति । मांस + ठञ् । मांसेन जीवतीति ठञ् वा । मांसं पण्य-मस्य ।"तदस्य पण्यम् ।"४।४ । ५९ । इति ठक् वा । अथवा, मांसं नियुक्तमस्मै दीयते । इति "आवशामांसौदनाट्टिठन् ।"४। ४ । ६७ । इति टिठन् ।) मांसविक्रयी । इत्यमरः ।२।९०।१४॥
मांसिनी, स्त्री, (मांसवत् पदार्थोऽस्यास्तीति । इनिः । ङीप् ।) जटामांसी । इति राज-निर्घण्टः ॥
मांसी, स्त्री, (मांसवत् पदार्थोऽस्यास्तीति । मांस + अर्शआदित्वादच् । गौरादित्वात् ङीष् ।) जटामांसी । कक्कोली । इति मेदिनी । डे, ८ । मांसच्छदा । इति राजनिर्घण्टः ॥ (यथा, वैद्यकरत्नमालायाम् ।
"नलदं नलिनी पेवी मांसी जटा जटी ।")
मांसेष्टा, स्त्री, (मांसमिष्टं प्रियमस्याः ।) वल्गुला । इति राजनिर्घण्टः ॥
माकन्दः, पुं, (मातीति । मा + किप् । माः परि-मितः सुघटितः कन्द इव फलमस्य ।) आम्र-वृक्षः । इति मेदिनी । दे, ३८ ॥ (यथा, गीतगोविन्दे ।
"माकन्द ! क्रन्द कान्ताधर ! धरयितरं गच्छ यच्छन्ति यावद् भावं भृङ्गारसारस्वतमिह जयदेवस्य विश्व-वचांसि ॥"
तस्य पर्य्यायः ।
"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः । कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
माकन्दी, स्त्री, (माकन्द + ङीष् ।) आमलकी । नगरभेदः । इति मेदिनी । दे, ३८ ॥ (यथा, महाभारते । ५ । ७२ । १५ ।
"————————पञ्चयामा वृता मया । अविस्थलं वृकस्थलं माकन्दीं वारणावतम् । अवसानञ्च गोविन्द ! कचिदेवान्न पञ्चमम् ॥")
पीतचन्दनम् । इति शब्दमाला ॥ माद्राक्षी इति माङ्गनी इति च हिन्दी भाषा । तत्-पर्य्यायः । वहुमूली २ मादनी ३ गन्धमूलिका ४ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । मधु-रत्वम् । दीपनत्वम् । वृष्यत्वम् । अस्रवात-कारित्वम् । पथ्यत्वम् । वर्षासु न क्षितावधिक-त्वञ्च । एका विशदमूली च श्यामला च तथा-परा । इति राजनिर्घण्टः ॥
माकरी, स्त्री, (मकरयुक्ता पौर्णमास्यत्रेति । मकर + अण् + ङीष् ।) माघशुक्लसप्तमी । अत्र स्नानादिविधिर्यथा । भविष्ये ।
"सूर्य्यग्रहसतुल्या हि शुक्ला माघस्य सप्तमी । अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥ माघे मासि सिते पक्षे सप्तमी कोटिभास्करा । दद्यात् स्नानार्घदानाभ्यामायुरारोग्यसम्पदः ॥ अरुणोदयवेलायां शुक्ला माघस्य सप्तमी । गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥" कोटिभास्करा कोटिसप्तमीतुल्या सप्तम्या भास्करदेवताकत्वात् । सूर्य्यग्रहणफलं स्नान-जम् । सन्निहिते बुद्धिरस्मरङ्गेतिन्यायात् । तेन बहुशतसूर्य्यग्रहणकालीनगङ्गास्नानजन्य-फलसमफलमत्र ज्ञेयम् ॥ * ॥ स्नानपरिपाटी

माघ कल्पकल्पलतायां विष्णुः सप्तवदरपत्राणि सप्तार्कपत्राणि च शिरसि निधाय,—
"ॐ यदद्यजन्मजनितं पापं मया सप्तसु जन्मसु।
तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी॥"
इत्युच्चार्य स्नायादिति शेषः। रोकं छिद्रम्। तिथिकल्पस्य पौर्णमासान्तमासाङ्गत्वात् माकरीपदं मकरार्कारब्धचान्द्रमासीयतिथिपरम्। तिथिकल्पे च लक्ष्मादिं व्रते शुक्लादिमेव च। विवाहादौ च सौरादिं मासं कल्पे विनिर्दिशेदिति ब्रह्मपुराणात् मन्वन्तरादिकल्पेन तथा युक्तत्वाच्च। यथा, मत्स्यपुराणम्।
"यस्मान्मन्वन्तरादौ तु रथमापूर्दिवाकरः।
माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी॥
अरुणोदयवेलायां तस्यां स्नानं महाफलम्।"
अतएव नारसिंहे रथाख्यायामित्युक्तम्॥ * ॥
अर्घ्यदानपरिपाटी यथा,—
"सकर्पत्रैः सवदरैर्दूर्वाक्षतसचन्दनैः।
अष्टाङ्गविधिनार्घ्यं दद्यादादित्यतुष्टये।
अष्टाङ्गमर्घ्यमापूर्य भानोर्मूर्द्ध्नि निवेदयेत्॥
अर्घ्यमन्त्रस्तु।
जगन्नी सर्वभूतानां सप्तमी सप्तसप्तिके।
सप्तव्याहृतिके देवि नमस्ते रविमण्डले॥
प्रणाममन्त्रस्तु।
सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन।
सप्तव्याहृत नमस्तुभ्यं नमोऽनन्ताय वेधसे॥"
इति तिथ्यादितत्त्वम्॥ * ॥
तस्यां सूर्य्यमुद्दिश्य रथयात्राफलं यथा,—
"माघमासस्य सप्तम्यां देवं ग्रामपुरं नराः।
रथयात्रां प्रकुर्वन्ति सर्वपापविवर्जिताः॥
गच्छन्ति तत्पदं शान्तं सूर्य्यमण्डलभेदकम्।
एतत्ते कथितं देवि! सामग्र्यापसमुद्भवम्।
पापप्रशमनाख्यानं महापातकनाशनम्॥"
इति वराहपुराणम्॥

माघ, ट मृष्टि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ट माङ्गति गमध्यपाठेनैवेदमिदं दन्त्यवन्तो वेदेषूच्चारणभेदार्थं। इति दुर्गादासः॥

माक्षिकं, क्ली, (मक्षिकाभिः कृतम्। मक्षिका+"संज्ञायाम्।" ४। ३। ११७। इति ठक्।) मधु। इत्यमरः। २। ९। १०७॥ नीलवर्णमध्यममक्षिकाकृततैलवर्णमधु। अस्य गुणाः। चौद्राज्जघुतरत्वम्। रूक्षत्वम्। श्रेष्ठत्वम्। श्वासादिरोगे विशेषतः प्रशस्तत्वञ्च। इति राजवल्लभः॥ धातुविशेषः। धातुमाखी इति हिन्दीभाषा। तद्विविधम्। स्वर्णमाक्षिकं रौप्यमाक्षिकञ्च। तत्पर्य्यायः। माक्षीकम् २ पीतकम् ३ धातुमाक्षिकम् ४ ताप्यिच्छम् ५ ताप्यकम् ६ ताप्यम् ७ आपीतम् ८ पीतमाक्षिकम् ९ आवर्त्तम् १० मधुधातुः ११ चौद्रधातुः १२ माक्षिकधातुः १३। इति राजनिर्घण्टः॥ कदम्बः १४ चक्रनाम १५ व्रजनामकम् १६। इति हेमचन्द्रः। ४। १२०॥

अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। अम्लत्वम्। कफभ्रमकुष्ठासमूर्च्छार्त्तिश्वासकासविषापहत्वञ्च।
"माक्षिकं द्विविधं प्रोक्तं हैमाङ्गारमाक्षिकम्।
भिन्नवर्णविशेषत्वान्नवधीर्य्यादिकं पृथक्॥
तारपादादिके तारमाक्षिकञ्च प्रशस्यते।
देहे हैमाभकं श्रेष्ठं रोगकुष्ठबलपुष्टिदम्॥"
इति राजनिर्घण्टः॥
अपि च।
"लेखनो माक्षिको धातुः सुवर्णरजतद्युतिः।
जराजित् पाण्डुरोगघ्नः क्षयकुष्ठज्वरापहः॥
मधुरोऽम्लः कटुः पाके किञ्चिदुष्णोऽल्पतोपमः॥"
इति कश्चिन्नाणवल्लभः॥
(उपधातुविशेषः। यथा, सुश्रुते।
"माक्षिकं तुत्थिताभ्रे च नीलाञ्जनशिलालकाः।
रसकक्षेति विज्ञेया इति सप्तोपधातवः॥")
माक्षिकर्ण, क्ली, (माक्षिकात् जातम्। जन+डः।) शिक्थकम्। इति राजनिर्घण्टः॥
माक्षिकफलः, पुं, (माक्षिकवत् मधुरं फलमस्य।) मधुनालिकेरिकः। इति राजनिर्घण्टः॥
माक्षिकाश्रयं, क्ली, (माक्षिकानामाश्रयः। अधिकरणात् क्लीवत्वम्।) शिक्थकम्। इति राजनिर्घण्टः॥
माक्षीकं, क्ली, (मक्षिकाभिः कृतमित्यण्। निपातादीर्घत्वम्।) मधु। इति राजनिर्घण्टः॥ (धातुविशेषः। यथा, कथासरित्सागरे। ७६। ३।
"माक्षीकधातुमधुपारदलोहाचूर्ण-
पथ्याग्निलाजतुविडङ्गहृतानि योऽद्यात्।
सैकानि विंशतिरहानि जरान्वितोऽपि
सोऽप्रौतिकोऽपि रमयत्यबलां युवेव॥")
माक्षीकशर्करा, स्त्री, (माक्षीकरूपता शर्करा शाकपार्थिवादित्वात् समासः।) सितास्वडः। इति राजनिर्घण्टः॥

मागधः, पुं, (मगधस्य तद्देशस्यापत्यम्। "द्व्यञ्मगधकलिङ्गसुरमसादण्।" ४। १। १७०। इति। अण्।) यामिश्रसूतः। इति महाभारतम्॥ वंशक्रमेण महत्त्ववेदिराजाग्रसुतिकारौ। तत्पर्य्यायः। मधुकः २ वन्दी ३ स्तुतिपाठकः ४। इत्यमरभरतौ। २। ८। ६७। तस्योत्पत्तिर्यथा,—
ततोऽस्य दक्षिणं हस्तं ममन्थुस्ते तदा द्विजाः। मथ्यमाने च तत्राभूत् पृथुर्वैण्यः प्रतापवान्॥
तस्य वै जातमात्रस्य यज्ञे पैतामहे शुभे।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामते!॥
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः।
प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ॥
स्तूयतामेष नृपतिः पृथुर्वैण्यः प्रतापवान्।"
स्तुत्यामिति स्तुतिरभिधूयते कथ्यते सोमोऽस्यामिति स्तुतिः सोमाभिषवभूमिस्तस्याम्। सौत्येऽहनि तस्मिन्नेव दिने। इति विष्णुपुराणे १ अंशे ४१ अध्यायस्य टीका च॥

(यथा, महाभारते। १३। ४८। १२।
"वन्दी तु जायते वैश्याम्मागधो वाक्य-
जीवनः।")
वर्णसङ्करजातिविशेषः। (यथा, मानवे। १०। ११।
"क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ॥")
स तु क्षत्रियायां वैश्यान्नातः। भाट् इति ख्यातः। मगधेषु भवो मागधः। खः। इत्यमरभरतौ। २। १०। २। जरासन्धराजः। तथा,—
"मागधो नव च हन्तव्यो भूयः कर्त्ता बलोद्यमम्।"
इति श्रीभागवते १० स्कन्धः॥
शुक्लजीरकः। मगधदेशोद्भवे त्रि। इति मेदिनी। मे, ३४॥ (यथा, महाभारते। ६। ६। ४६।
"अन्ध्राश्च बहवो राजन्नन्तर्गिर्य्यास्तथैव च।
बहिर्गिर्य्याश्च मलदा मागधा मानवाष्टकाः॥")
मागधादेवी, स्त्री, राधिका। यथा,—
"तासान्तु मागधादेवी तप्तचामीकरप्रभा।
वृन्दावनेश्वरी राधा गान्धा धार्त्तधैकारत्वात्॥"
इति पाद्मे पातालखण्डे ६ अध्यायश्लोकार्द्धद्वयम्॥
मागधी, स्त्री, (मागधे जाता। मगध+अण्, ङीष्।) यूथिका। पिप्पली। इत्यमरभेदिनीकरौ। धे,। २३। २। ३। ६६। (वचाख्याः पर्य्यायः।
"पिप्पली च पलाशौल्वी वैदेही मागधी-
कणा।
क्षणोषकृष्णा मगधी कोलास्याचित्रतण्डुला॥"
इति वैद्यकरत्नमालायाम्॥)
चुटिः। गुजराटी एलाचि इति भाषा। इति शब्दचन्द्रिका॥ शर्करा। इति जटाधरः॥ भाषाविशेषः। इति हेमचन्द्रः॥ यथा च साहित्यदर्पणे। ६। १६०।
"अन्योक्ता मागधी भाषा राजामात्यपुरन्ध्रीणाम्॥"
(तद्देशभवे, त्रि। यथा, महाभारते। १। ६५। ४१।
"अनघा खलु मागधीमुपयेमे अप्सरा नाम तस्यामस्य जज्ञे परीक्षित्॥")

माघः, पुं, श्रीदत्तकसूनुशिशुपालवधमहाकाव्यकर्त्ता। इति तदुपज्ञग्रन्थेषूपपुष्पिका॥ खनामख्यातमहाकाव्यम्। यथा,—
पुण्येषु जाती नगरेषु काञ्ची
नारीषु रम्भा पुरुषेषु विष्णुः।
नदीषु गङ्गा नृपतौ च रामः
काव्येषु माघः कविकालिदासः॥"
इति प्राचीनाः॥
वैशाखादिद्वादशमासान्तर्गतदशममासः। मघायुक्ता पौर्णमासी यत्र मासे सः॥ तत्पर्य्यायः। तपाः २। इत्यमरः। ४। २। ४। २५॥ स च त्रिविधः। मकरस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तो मुख्यचान्द्रः १। कुम्भप्रति-

पदादिपौर्वमास्यन्तो गौणचान्द्रः २। मकरस्थरविकः सौरः ३। इति मासमासतत्त्वीयलिखनखरसात्। तत्र जातपलम्।

"विद्याविनीतः खकुलप्रधानः
सदा सदाचारयुतः प्रवीणः।
योगातुरक्तो विषयेष्वसक्तो
माघेऽथ मासे मघवानिवेशः।"

इति कोष्ठीप्रदीपः॥ * ॥

अथ, माघस्नानम्। पाद्मे।

"स्वर्गलोके चिरं वासो येषां मनसि वर्त्तते।
यत्र क्वापि जले तैस्तु स्नातव्यं रुगभास्करे॥"

रुगो रुगास्त्वेन मकरः। तत्स्थे भास्करे। तत्र सङ्कल्पः। अरुणोदयकाले जले मज्जनं कृत्वा आचम्य उत्तराभिमुखः ॐ तत् सदित्युच्चार्य्य कुशकुसुमतिलजलान्यादाय ओमद्य माघे मासि असुकपक्षे असुकतिथावारभ्य मकरस्थरविं यावत् प्रत्यहमसुकगोत्रोऽसुकदेवशर्म्मा स्वर्गलोके चिरकालवासकामो विष्णुप्रीतिकामो वा प्रातःस्नानमहं करिष्ये इति संकल्प्य गङ्गायतिरिक्तजलमात्रेऽपि स्नानं कर्त्तव्यम्। प्रतिदिनसङ्कल्पे तु आरभ्य मकरस्थरविं यावत् प्रत्यहमिति न वक्तव्यं किन्तु माघस्नानन्तरं मकरस्थे रवावित्यधिकं वक्तव्यम्। चान्द्रस्नानवाक्यन्तु वैशाखस्नानेऽनुसन्धेयम्। तत्र सङ्कल्पं कृत्वा यथोक्तविधिना स्नानेति कर्त्तव्यतां विधाय,—

"ॐ दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च।
प्रातःस्नानं करोम्यद्य माघे पापप्रणाशनम्॥
मकरस्थे रवौ माघे गोविन्दाच्युत माधव।
स्नानेनानेन मे देव! यथोक्तफलदो भव॥"

इत्युच्चार्य्य स्नायात्। ततो वासुदेवं हरिं स्नात्वा श्रीधरञ्च स्मरेत्ततः॥

"ॐ दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम्॥"

चान्द्रस्नाने मकरार्कांशस्थकाले मकरस्थे रवावित्यस्य न पाठः। असम्भवेतार्थत्वात्। तीर्थे तु।

"माघमासमिमं पुण्यं स्नास्यहं देव माधव।
तीर्थेस्मिन् जले नित्यं प्रसीद भगवन् हरे॥"

इति पठित्वा दुःखदारिद्र्यनाशायेत्यादिकं पठितव्यम्। गङ्गायान्तु पद्मपुराणे।

"दिने दिने सहस्रन्तु सुवर्णानां विधीयते।
तेन दत्तं हि गङ्गायां यो माघे स्नाति माधव॥"

माघव इति क्वचित् पाठः। एकदा सङ्कल्पे तु प्रतिदिनसहस्रसुवर्णदानजन्यफलसमफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा माघमासं यावत् प्रत्यहं गङ्गायां प्रातःस्नानमहं करिष्ये। इति वाक्ये विशेषः। प्रतिदिनसंकल्पे तु सहस्रसुवर्णदानजन्यफलसमफलप्राप्तिकामो विष्णुप्रीतिकामो वा गङ्गायां प्रातःस्नानमहं करिष्ये इति यथोक्तविधिना स्नानेतिकर्त्तव्यतां विधाय।

"ॐ माघमासमिमं पुण्यं स्नास्यहं देव माधव।
तीर्थेस्मिन् जले नित्यं प्रसीद भगवन् हरे॥
दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च।
प्रातःस्नानं करोम्यद्य माघे पापप्रणाशनम्॥
मकरस्थे रवौ माघे गोविन्दाच्युत माधव।
स्नानेनानेन मे देव यथोक्तफलदो भव॥"

इत्यनेन ध्यात्वा एतत् पाद्यं ॐ सरस्वत्यै नमः। इत्यादिना नैवेद्यान्तेन पूजयेत्। ततः

"ॐ भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः।
वेदवेदाङ्गवेदान्तविद्यास्थानेभ्य एव च स्वाहा॥"

इति ब्रह्मपुराणोक्तेन पुष्पाञ्जलिना त्रिः पूजयेत्। मत्स्यसूक्ते। सरस्वतीं संपूज्य।

"ॐ यथा न देवो भगवान् ब्रह्मा लोकपितामहः।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा॥
वेदाः शास्त्राणि सर्व्वाणि कृत्यगीतादिकञ्च यत्।
न विहीनं त्वया देवि! तथा मे सन्तु सिद्धयः॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः।
एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति!॥"

इति मत्स्यपुराणोक्तैः प्रार्थ्य प्रणमेत्॥ * ॥

"वस्त्रोपवीत ब्रह्मसूत्रञ्च सरस्वत्यै न दापयेत्।
आचारात् पुस्तकञ्च पूजयेत्। ॐ मस्याधाराय नमः। इति मस्याधारं पूजयेत्। ॐ लेखन्यै नमः। इति लेखनीं पूजयेत्॥ * ॥

अथ माघसप्तमी।

तन्नोभयदिने अरुणोदयकाले सप्तमीलाभे पूर्व्वदिने एकदिने तल्लाभे तदिने। अरुणोदयकाले सामान्यतस्तु ॐ अद्येत्यादि सूर्य्यग्रहणकालीनगङ्गास्नानजन्यफलसमफलप्राप्तिकामः आयुरारोग्यसम्पत्कामो वारुणोदयवेलायां स्नानमहं करिष्ये। इति सङ्कल्प्य यथाविधि स्नानेति कर्त्तव्यतां विधाय सप्तवदरपत्राणि सप्तार्कपत्राणि च शिरसि निधाय।

"ॐ यदद्यजन्मजातं पापं मया सप्तसु जन्मसु।
तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी॥"

इत्युच्चार्य स्नायात्। ततो यथाकालं सप्तवदरीफलार्कपत्रघृतिलदूर्व्वाक्षतचन्दनयुक्तजलमादाय ओमद्येत्यादि आयुरारोग्यसम्पत्कामः श्रीसूर्य्यायार्घ्यमहं ददे। इति सङ्कल्प्य 'ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णु तेजसे जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने।' इत्यनन्तरम्।

"ॐ जगन्मौ सर्व्वभूतानां सप्तमी सप्तसप्तिके।
सप्तव्याहृतिके देवि! नमस्ते रविमण्डले॥"

इति पठित्वा इदमर्घ्यं श्रीसूर्य्याय नम इत्यर्घ्यं दत्त्वा।

"ॐ सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन।
सप्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे॥"

इत्यनेन प्रणमेत्। सूर्य्येणापि स्नाने तूष्णीं विधानात् स्नानमन्त्रं विना अर्घ्यप्रणाममन्त्राः पाद्याः पौराणिकत्वात्। गङ्गायान्तु वरुणसूर्य्यग्रहणकालीनगङ्गास्नानजन्यफलसमफलप्राप्तिकामो

गङ्गायां स्नानमहं करिष्ये इति वाक्यं विशेषः। अर्घ्यदानमङ्गं एतत् स्नानादेव माघप्रातः-स्नानं तन्त्रेणैव सिध्यति ॥ * ॥

अथ विधानसप्तमीव्रतम्।

प्रथमतो ब्राह्मणान् स्वस्तिवाच्य ॐ सूर्यः सोम इत्यादि पठित्वा ताम्रादिपात्रे कुशतिलजलान्नादाय ॐ तत् सदित्युच्चार्य ओमद्य माघे मासि शुक्ले पक्षे सप्तम्यामित्यारभ्य प्रतिमासीयशुक्लसप्तम्यां पौषसप्तमीं यावत् आरोग्यसम्पत्कामोऽभीष्टतत्तत्फलकामो वा अर्कार्घादीतरभोजनविच्छित्तिविधानेन सप्तमीव्रतमहं करिष्ये इति सङ्कल्प्य संयमपारणसहितं तत्तन्मासि तत्तन्नियमं कुर्यात्। तत्र माघे अर्कार्घमात्रं भुञ्जीत। फाल्गुने अन्तरीयग्रहीतं कपिलाविड्वयमात्रप्रमाणं तदभावे अन्यगोमयमपीति। चैत्रे मरीचमेकम्। वैशाखे किञ्चिज्जलम्। ज्येष्ठे अपक्वकदलीफलमध्यकणामात्रम्। आषाढे खच्छायद्विगुणसमये यवप्रमाणं कुशमूलम्। श्रावणे नक्तं काले अल्पहविष्यौदनम्। भाद्रे शुद्धोपवासः। आश्विने पञ्चमार्द्धयामे मयूराण्डप्रमाणं हविष्यान्नम्। कार्त्तिके अर्द्धप्रस्तिमात्रं कपिलाक्षीरं तदभावे चीराज्यम्। मार्गशीर्षे प्राङ्मुखो वायुभक्षणम्। पौषे स्वयं हुतम्। तदन्नञ्च।

"ब्राह्मणान्भक्षयेत् भक्त्या गुडक्षीरतिलामिषैः।
विप्राय दक्षिणा देया विभवस्यानुरूपतः॥
अशक्तौ पारणं कुर्यात् कट्फलरहितेन च।
सप्तमाघतिलादीनि हुतशेषं विवर्जयेत्॥
एकस्मिन् भक्षसंयुक्तमर्कतन्त्रानुसारतः॥"

चान्द्रमाघविशेषोल्लेखवत् अनन्तादिव्रतवत्-मलमासेतरे तत्तु कर्त्तव्यम् ॥ * ॥

अथारोग्यसप्तमी।

तत्र पूर्ववत् सप्तम्यादिमारभ्य ऐहिकारोग्यधनधान्यपारलौकिकशुभस्थानप्राप्तिकामः संवत्सरं यावत् आरोग्यसप्तमीव्रतमहं करिष्ये इति सङ्कल्प्य प्रतिमासशुक्लसप्तम्यां ग्रामालयामे घटादिस्थजले वा पूजयेत्। रक्तानुजासनमिति ध्यात्वा एतत् पाद्यं ॐ सूर्याय नम इत्यादिभिः संपूज्य।

"आदित्य भास्कर रवे भागो सूर्य दिवाकर।
प्रभाकर नमस्तेऽस्तु रोगादस्मान् प्रमोचय॥"

इति त्रिःपूजयेत्। एवं संवत्सरे पूर्णे दक्षिणां दद्यात्। ब्राह्मणांश्च भोजयेत्। विशेषमासानुद्देशादभावास्थाव्रतवत् मलमासेऽपि कर्त्तव्यम्॥

अथ भीष्माष्टमी।

अष्टम्यां ब्राह्मणः पितृतर्पणं कृत्वा

"ॐ वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे॥"

इति पितृवत् भीष्मं तर्पयेत्॥ ततः कृताञ्जलिः।

"भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम्॥"

इत्यनेन प्रार्थयेत्। चन्द्रियादिभिः पितृतर्पणात् पूर्वं एतत् कर्त्तव्यम् ॥ * ॥ भैष्म्यामेकादश्यामुपोष्य द्वादश्यां तिलोदकेनमावश्यकं कर्त्तव्यम्। स्नानतर्पणमहादानभोजनादि यथालाभं कुर्यात् ॥ * ॥ माघपौर्णमास्यां युगाद्यावेन पार्व्वणविधिना श्राद्धं कर्त्तव्यम्। अनन्तफलकामनया स्नानदानञ्च कर्त्तव्यम्।

तस्यां दानप्रमाणन्तु तिथितत्त्वेऽनुसन्धेयम्॥

इति ज्योतत्त्वम् ॥*॥*॥

अथ माघस्नानफलम्।

"व्रतदानेस्तपोभिश्च न तथा प्रीयते हरिः।
माघमज्जनमात्रेण यथा प्रीणाति केशवः॥
न समं विद्यते किञ्चित् तेजः सौरेण तेजसा।
तद्वत् स्नानेन माघस्य न समाः क्रतुजाः क्रियाः॥
प्रीतये वासुदेवस्य सर्व्वपापादिशुद्धये।
माघस्नानं प्रकुर्व्वीत स्वर्गलाभाय मानवः॥
किं रक्षितेन देहेन सुपुष्टेन बलीयसा।
अध्रुवेणाशु हेयेन माघस्नानं विना भवेत्॥
मकरस्थे रवौ यो हि न स्नात्यनुदिते रवौ।
कथं पापैः प्रमुच्येत कथं स त्रिदिवं व्रजेत्॥
ब्रह्महा दीर्घरोगी च सुरापो गुरुतल्पगः।
माघस्नायी विपापः स्यात्तत्सङ्गी च पञ्चमः॥
उपपातकानि सर्व्वाणि पातकानि महान्ति च।
भस्मीभवन्ति सर्व्वाणि माघस्नायिनि मानवे॥
पावका इव दीप्यन्ते माघस्नाता नरोत्तमाः।
विमुक्ताः सर्व्वपापेभ्यो मेघेभ्य इव चन्द्रमाः॥
आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्म्मभिः कृतम्।
माघस्नानं दहेत् सर्व्वं पावकः समिधो यथा॥
प्रामादिकञ्च यत् पापं ज्ञानाज्ञानकृतञ्च यत्।
स्नानमात्रेण तत्सर्व्वं मकरस्थे दिवाकरे॥
निष्पापास्त्रिदिवं यान्ति पापिष्ठा यान्ति शुद्धताम्।
सन्देहोऽत्र न कर्त्तव्यो माघस्नाने नराधिप!॥
सर्व्वेऽधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृप!।
सर्व्वेषां स्वर्गदो माघः सर्व्वेषां पापनाशनः॥
एतदेव परो मन्त्रो ह्येतदेव परं तपः।
प्रायश्चित्तं परञ्चैव माघस्नानमनुत्तमम्॥
वृथा जन्मान्तराभ्यासात् माघस्नानमतिर्भवेत्।
अथात्मज्ञानकौशल्यं जन्माभ्यासाद्यथा नृप!॥
संसारकर्दमक्षेपप्रक्षालनविधारदम्।
पावनं पावनानाञ्च माघस्नानं परन्तप!॥
स्नाता माघे च ये राजन्! सर्व्वकामफलप्रदे।
ते तांश्च भुञ्जते लोकांश्चन्द्रसूर्य्यग्रहोपमान्॥"

इति श्रीपद्मपुराणे उत्तरखण्डे ४ अध्यायः॥

माघवती, स्त्री, (मघवान् देवताऽस्याः यद्वा, मघवत इयमिति। मघवत्+अण्। "मघवा बहुलम्।" ६। ४। १२८। इति चादेशः। ङीप्।) पूर्व्वादिक्। इति राजनिर्घण्टः॥

माघवनं, क्ली, इन्द्रसम्बन्धि वस्तु। मघवत इदमित्यर्थे अण्प्रत्ययेन निष्पन्नम्। इति सुग्धबोधव्याकरणम्॥ (मघवत्+अण्। "मघवा बहुलम्।" ६। ४। १२८। इति विकल्पान्नादेशः। त्रि, यथा, माघे। ६। २५।

"वसुधाञ्जनिःस्रुतमिवाहिपतेः
पटलं फलमखिलसहस्रगुणम्।
स्फुरदंशुजालमथ प्रीतरुचः
ककुभं समस्फुरत माघवनीम्॥")

माघी, स्त्री, (मघया युक्तः कालः अस्यां इति। मघा+"नक्षत्रेण युक्तः कालः।" ४। २। ३। इत्यण् ङीप्।) मघायुक्ता पौर्णमासी। यथा,

"पुष्ययुक्ता पौर्णमासी पौषी माघे तु यत्र सा।
नात्रा स पौषो माघाद्याश्चैवमेकादशापरे॥"

इत्यमरः। १। ४। १३॥ माघी पूर्णिमा। यथा, अयोध्याकाण्डे भरतप्रश्ने।

"आषाढी कार्त्तिकी माघी तिथयः पुण्यसम्भवाः।
अप्रदानवतो यान्तु यस्यार्थोऽनुमतो गतः॥"

विष्णुधर्म्मोत्तरे।

"पौर्णमासी तथा माघी श्रावणी च नरोत्तम!।
प्रौष्ठपद्यामतीतायां तथा ह्यश्वयुजस्य च॥
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः॥"

सा च कलियुगाद्या। यथा,—

"अथ भाद्रपदे शुक्ले त्रयोदश्यान्तु द्वापरम्।
माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम्॥"

अस्यां कर्म्मणोऽनन्तफलं यथा, मात्स्ये।

"घृतमिक्षुरसे पुण्यं सहस्रन्तु दिनत्रये।
विष्णवे घृतसाहस्रमा का मा वैष्णवनन्दकम्॥"

आ का मा वेत्तु आषाढीकार्त्तिकीमाघीवैशाखीषु। इति तिथ्यादितत्त्वम्॥ माघ्यां मघायोगाभावे सिंहस्थगुरावकालप्रतिप्रसवो यथा, ज्ञातातपः।

"माघ्यां यदि मघा नास्ति सिंहे गुरुरकारणम्॥"

राजमार्त्तण्डे दक्षः।

"गुरौ हरिस्थे न विवाहमाहुः
हारीतगर्गप्रमुखा मुनीन्द्राः।
यदा न माघी मघसंयुता स्यात्
तदा च कन्योद्वहनं वदन्ति॥"

इत्यत्र माघ्यां मघायोगाभावेऽपि श्रुतिवेधादिमघास्थेऽपि गुरौ भवति विवाहस्तु गुरोर्मेषापरित्यागादेव। इति मलमासतत्त्वम्॥

माघोनी, स्त्री, (मघवान् देवताऽस्याः। मघोन इयमिति वा। इति मघवन्+अण् ङीप्।) पूर्व्वा दिक्। इति राजनिर्घण्टः॥ (इन्द्रसम्बन्धिनि, त्रि। यथा, ऋग्वेदे। १०। ६६। २।

"मरुद्गणे वृजने मन्म धीमहि
माघोने यज्ञे जनयन्त सूरयः॥"

"माघोने मघवत इन्द्रस्य सम्बन्धिनि मरुद्गणे।" इति तद्भाष्ये सायणः॥)

माघ्यं, क्ली, (माघे जातमिति। माघ+"तत्र जातः। ४। ३। २५। इति यत्।) कुन्दपुष्पम्। इत्यमरः। २। ४। ७३॥

माङ्गल्यं, त्रि, (मङ्गलाय हितमिति। मङ्गल+ष्यञ्।) मङ्गलाय हितम्। यथा, राजमार्त्तण्डे।

"माङ्गल्येषु विवाहेषु कन्यासंवरणेषु च।
दश माघाः प्रशस्यन्ते चैत्रपौषविवर्जिताः॥"

इत्युद्वाहतत्त्वम्॥

अपि च। भीमपराक्रमे।

"अधिमासे दिनपाते धनुषि रवौ भानुलङ्घिते मासि।
चक्रिणि सुप्ते कुर्य्यान्न माङ्गल्यं विवाहञ्च॥"

इति मलमासतत्त्वम्॥

(मङ्गलस्य भावः। "मङ्गलेरलच्।" उक्षा० ५। ७०। इत्यस्य वृत्तौ "भावे ष्यञि माङ्गल्यम्।" इत्युज्ज्वलदत्तः॥)

माङ्गल्यार्हा, स्त्री, (माङ्गल्यस्य अर्हा।) आयमाषा लता। इति राजनिर्घण्टः॥

माचः, पुं, (मा अश्नुतीति। अनुच+कः।) पन्थाः। इति शब्दरत्नावली॥

माचलः, पुं, (मा चलति भोगमदत्वाचिरेऽत्रैव स्थानं न सुचलतीति। चल+अच्।) ग्रहः। रोगः। (मा चलति स्वच्छन्दं न प्रसरतीति। चल+अच्।) वन्दी। चौरः। इति शब्दरत्नावली॥ मेदिन्यां ग्रहस्थाने माच इति पाठः॥

माचिका, स्त्री, (मा अश्नुते चतादिकं लक्षा न गच्छतीति। अनुच+कः। ततः कन्। टाप्। अत इत्वम्।) मचिका। इति त्रिकाण्डशेषः॥ अम्लता। इति राजनिर्घण्टः॥

माचिरं, व (मा चिरम्।) शीघ्रम्। यथा,—

"अथाब्रवीन्नदा मत्स्यस्तापत्यान् प्रहसन् शनैः।
अस्मिन् हिमवतः शृङ्गे नावं बध्नीत मा चिरम्॥"

इति वनपर्व्वणि मात्स्योपाख्यानम्॥

माचीपत्रं, क्ली, शूरपर्णम्। इति राजनिर्घण्टः॥

माजलः, पुं, (मा जलमित्यभिप्रायोऽस्य। वर्षवारिभोऽस्य पक्षयोर्भारणङ्त्वात् तथात्वम्।) चातकपक्षी। यथा, शब्दचन्द्रिकायाम्।

"माजलश्चातकः कुञ्जो विहारो विन्दुरेचकः।"

माञ्जिष्ठं, क्ली, (मञ्जिष्ठया रक्तम्। "तेन रक्तं रागात्।" ४। २। १। इत्यण्।) लोहितवर्णः। (यथा, हरिवंशे। ३०। १२।

"कक्षावबधुकपिलाविचित्रमाञ्जिष्ठहरितशबलाभाः।"

तद्वति, त्रि। इति हेमचन्द्रः॥

माटाल्लकः, पुं, (माटाल्ल आत्मः। ततः कन्।) वृक्षभेदः। यथा,—

"वल्लकी कर्कटीर्व्वारुः सेटुमाटाल्लकौ समौ।"

इति भूरिप्रयोगः॥

माठरः, पुं, सूर्य्यपार्श्वपरिवर्त्तिविशेषः। यथा,—

"माठरः पिङ्गलो दण्डश्चक्षांग्रोः पार्श्वपार्श्विकाः।"

इत्यमरः। १। ३। ३१॥

मठति निवसति सूर्य्यसमीपे माठरः मठ वासमहेयोः नान्नीति अरण् मठरस्यापत्यं माठर इति स्वामी॥ पिङ्गलवर्णत्वात् पिङ्गलः। दण्डकारित्वाद्दण्डः। इति स्वामी॥ परितः पार्श्वे वर्त्तन्ते पारिपार्श्विकाः। ठचे कादिति ष्विकः। सूर्य्यः कारणिकत्वाद्देवानां वरं दास्यतीति धिया इन्द्रादयोऽष्टादशनामान्तरेण प्रच्छन्ना अस्य पार्श्वेषु स्थिताः। अत्र प्राधान्यान्नयो ऽभिहिताः। अत्र माठरनामा यमः। पिङ्गलनामा वह्निः। दण्डनामा शक्रः। तथाचागमः।

"तत्र शक्रो वामपार्श्वे दण्डाख्यो दण्डनायकः।
वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो नामतश्च सः॥
यमोऽपि दक्षिणे पार्श्वे ख्यातो माठरसंज्ञकः।"

एवमपरे हरगुह्यादयः कुक्षावपरपार्श्वादिसंज्ञकाः। पूर्व्वद्वारादिषु स्थिताः। इति तट्टीकायां भरतः॥ व्यासः। इति मेदिनी। रे, २०३। विप्रः। इति हेमचन्द्रः। ३। ५१०॥ औष्ट्रिकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

माड़ः, पुं, वृक्षविशेषः। माड़वेनौ इति लोकख्ये प्रसिद्धः। तत्पर्य्यायः। माड़ाह्वः २ दीर्घः ३ ध्वजदृश्यः ४ वितानकः ५ मद्यद्रुमः ६। अस्य गुणाः। मोहकारित्वम्। श्रमहरत्वम्। क्षेत्रकारकत्वञ्च। इति राजनिर्घण्टः॥

माड़वः, पुं, वर्णसङ्करजातिविशेषः। यथा,—

"लेटक्यां वरकन्यायां जनयामास वत्सराट्।
मालं मल्लं माड़वञ्च भड़ं कोलञ्च कन्दरम्॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १०। अध्यायः॥ पुस्तकान्तरे माड़वस्थाने मातर इति पाठः। कन्दरस्थाने कलन्दर इति पाठः॥

माड्डुकः, पुं, (मड्डुकवादनं शिल्पमस्येति। "मड्डुकझर्झराभ्यां वुन्यतरस्याम्।" ४। ४। ५६। इति अण्।) माड्डुकिकः। मड्डुवादकः। इति सिद्धान्तकौमुदी॥

माणिः, स्त्री, (माहतीति। माह+"अन्येभ्योऽपि दृश्यन्ते।" उक्षा० ४। १०५। इति क्विन्।) देशभेदः। पत्रशिरा। इति रत्नकोषः॥ दन्तभेदः। इति केचित्। रत्नमरटीकायां भरतः॥ पत्रभङ्गम्। दैन्यप्रकाशनम्। इति मेदिनी। णे, २। शब्दरत्नावली च॥ माणिर्दैन्यं पत्रशिरायां नपुंसकमिति भट्टे। इति हेमचन्द्रः। ३। १६०॥

माणी, स्त्री, (माणि+ङीप्रादिकारादिति ङीष।) दन्तशिरा। इति शब्दरत्नावली॥

माणवकं, क्ली, (मीयते पूर्य्यते परिमीयते वेति। माण माङ्वा+वन्। स्वार्थे कन्। निपातनात्साधुत्वम्।) कन्दविशेषः। माणकपु इति भाषा। अस्य गुणाः। स्वादुत्वम्। शीतत्वम्। गुरुत्वम्। श्लेष्मदत्वम्। कटुत्वञ्च। इति राजवल्लभः॥ यथा, सुश्रुते सूत्रस्थाने ३६ अध्याये।

"माणवकं स्वादु शीतञ्च गुरु चापि प्रकीर्त्तितम्॥")

माणवकः, पुं, (माण्+वन्। ततः कन् निपातनात्साधुत्वञ्च।) खनामख्यातवृक्षः। माणवकपुगाह्व इति भाषा। तत्पर्य्यायः। खलपत्रः २ इति रत्नमाला॥ माणः ३ दृढच्छदः ४ वृत्तपत्रः ५। इति केचित्॥ (यथा, सुश्रुते सूत्रस्थाने ४०अध्यायः।

"स्थूलशूरणमाणकप्रभृतयः॥")

माणवः, पुं, (मनोरपत्यं पुमान्। मनु+अण्+विवक्षायां अण्।

"अपत्ये कृतसिते गृहे मनोरौतृसर्गिकः स्मृतः।
नकारस्य च गृह्यस्तेन सिद्धति माणवः॥"

४। १। १६१। इत्यत्र काशिका सूत्रवृत्तिः।) मनुष्यः। बालकः। इति शब्दरत्नावली॥ षोड़शयष्टिकहारः। इति हेमचन्द्रः। ३। ३२४। ४॥

माणवकः, पुं, (अण्यो भागवः। "अण्ये।" ५। ३। ८५। इति कन्।) बालकः। स च षोड़शवर्षपर्य्यन्तप्रथमवयस्कः॥ (यथा, श्रीभागवते। ८। १६। ३२।

"एष ते स्थानमैश्वर्यं श्रियं तेजोयशः स्मृतम्।
दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः॥"

माणवको बालः स इव।) हारभेदः। स तु विंशतियष्टिकः। विंशतिहार इति भाषा। इत्यमरभरतौ। २। ६। १०६॥ (हरिवंशितामते तु षोड़शयष्टिको हारः। यथा, तत्रैव। ८१। ३३।

"द्वात्रिंशता गुच्छो विंशत्या कीर्त्तितोऽर्द्धगुच्छाख्यः।
षोड़शभिर्माणवको द्वादशभिश्चार्द्धमाणवकः॥")

कुपुरुषः। इति मेदिनी। के, २०६॥ धट्टः। इति हेमचन्द्रः॥

माणवीनं, त्रि, माणवसम्बन्धि। माणवस्येदमित्यर्थे खीनप्रत्ययेन निष्पन्नम्॥ (माणवाय हितं। "माणवचरकाभ्यां खञ्।" ५। १। ११। इति माणव+खञ्।)

माणवं, क्ली, शिशुसमूहः। इत्यमरः। २। २। ३१॥ माणवानां समूहो माणवं विकारसंघेति व्याः। माणवो बालः शृङ्गमध्यः दन्तमध्य इत्येके। इति तट्टीकायां भरतः॥ (माणवानां समूहः। "ब्राह्मणमाणववाड़वाद् यञ्।" ४। २। ४२। इति यञ्।)

माणिका, स्त्री, (माणक+टाप् अकारस्येत्वम्।) अष्टपलपरिमाणम्। इति शब्दमाला॥

माणिक्यं, क्ली, (मणिप्रकारः। मणि"+स्वार्थादिभ्यः प्रकारवचने कन्।" ५। ३। ३। इति प्रज्ञायां कन्। ततो मणिकमेवेति। मणिक+"रात्तुर्व्वादीनामुपसंख्यानम्।" ५। १। १२७। इति वार्त्तिकबलात् ष्यञ्।) रत्नविशेषः। माणिक इति भाषा। तत्पर्य्यायः। शोणरत्नम् २ रत्नराट् ३ रविरत्नकम् ४ अङ्गारी ५ रक्तमाणिक्यम् ६ तरुणम् ७ रत्नभानुकम् ८ रागयुक् ९ पद्मरागः १० रत्नम् ११ शोणोपलः १२ सौगन्धिकम् १३ लोहितकम् १४ कुरुविन्दम् १५। अस्य गुणाः। मधुरत्वम्।

स्निग्धत्वम्। वातपित्तनाशित्वम्। रत्नप्रयोगे प्रधानत्वम्। परं रसायनकारित्वञ्च। तस्य लक्षणं यथा,—

"स्निग्धं गुरुगात्रयुतं दीप्तं स्वच्छं समाङ्गञ्च सरङ्गञ्च।"

इति जात्यमाणिक्यं कल्याणं धारणात् कुरुते। तस्य दोषो यथा,—

"द्विच्छायमभिप्रिष्टं कर्कशं ग्रावकरिणं भिन्नं धूम्रञ्च।
विरूपं रागविमलं लघुमाणिक्यं न धारयेद्धीमान्।"

तस्य चतुर्विधा जातिर्यथा।

"तत्रक्तं यदि पद्मरागमथ तत्पीतातिरक्तं द्विधा। जानीयात् कुरुविन्दकं यदरुणं स्यादेषु सौगन्धिकम्। तन्नीलं यदि नीलगन्धिकमिति श्रेयं चतुर्धा बुधैः माणिक्यं कथयन्ति वैद्यविकलं रागेण जात्यं जगुः॥

इति राजनिर्घण्टः॥ ७॥

मतान्तरे तस्य दोषा यथा,—

"माणिक्यस्य समाख्याता अष्टौ दोषा मुनीश्वरैः। द्विच्छायञ्च विरूपञ्च सम्भेदः कर्करस्तथा॥ अग्रोभनं कोकिलञ्च जलं धूम्राभिधञ्च वै। गुणाश्चत्वार आख्याताश्छायाः षोडश कीर्त्तिताः॥"

छायास्तु पूर्व्वोक्ता एव तासु पद्मरागग्रन्थे द्रष्टव्याः।

"छायाद्वितयसमन्वाद्विच्छायं वस्तुनाग्रहम्। द्विरूपं द्विपदं तेन माणिक्येन पराभवः॥ सम्भेदो भिन्नमित्युक्तं ग्रस्तघातविधायकम्। कर्करं कर्करायुक्तं पशुवस्तुविनाशहृत्॥ दुग्धेनेव समाक्लिन्नमघनीपुटसन्निभम्। अग्रोभनं वसुद्दिष्टं माणिक्यं बहुदुःखदम्॥ मधुबिन्दुसमच्छायं कोकिलं परिकीर्त्तितम्। आयुर्लक्ष्मीयशो हन्ति सदोषं तन्न धारयेत्॥ रागहीनं जलं प्रोक्तं धनधान्यापवादहृत्। धूम्रं धूमसमाकारं वैद्युतं भयमावहेत्॥"

तथा।

"ग्रोभाहितयवन्तो ये मण्यः क्षतिकारकाः। उभयत्र पदं येषां तेन च स्यात् पराभवः॥ भिन्नेन युद्धे नृणां स्यात् कर्करग्रस्तनाग्रहृत्। दुग्धेनेव समाक्लिन्नः पुटके वस्तु सम्भवेत्॥ दुःखदृत् च समाख्यातो न वृषे रत्नयोजकः। मधुबिन्दुसमा ग्रोभा कोकिलानां प्रकीर्त्तिता। तेषाञ्च बहुभेदाः स्युर्न ते धार्य्याः कदाचन॥"

अथ गुणाः।

"गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता।"

तथा च।

"वर्णाधिक्यं गुरुत्वञ्च स्निग्धता च तथाच्छता। अर्चिश्मत्ता महत्ता च मणीनां गुणसंग्रहः॥"

फलम्।

"ये कर्कराश्छिन्नमयोऽवदिग्धाः प्रभाविमुक्ताः परया विवर्णाः।
न ते प्रशस्ता मणयो भवन्ति समाश्रितो जातिगुणैः समस्तैः॥
दोषोपदृष्टं मणिमप्रबोधाद् बिभर्त्ति यः कञ्चन कञ्चिदेकम्।
तं बन्धुदुःखामयबन्धुवित्त-नाशादयो दोषगणा भजन्ते॥
सपत्नमध्येऽपि कृताधिवासं प्रमादतोऽपि वपुषि धार्य्यमाणम्।
न पद्मरागस्य महागुणस्य भर्त्तारमापत् वसुपेति काचित्॥
दोषोपसर्गप्रभवाश्च ये ते नोपद्रवास्तं समभिद्रवन्ति।
गुणैः वसुस्थैः सकलैरुपेतं यः पद्मरागं प्रयतो बिभर्त्ति॥
बालार्ककरसंस्पर्शात् यः स्निग्धां लोहितां वमेत्।
रक्तयेदाश्रमं वापि स महागुण उच्यते॥
दुग्धे घृतगुणे स्निग्धो रक्तयेद्यः समन्ततः।
वमेच्छिखां लोहितां वा पद्मरागः स उत्तमः॥
अन्धकारे महाघोरे यो न्यस्तः सन् महामणिः।
प्रकाशयति खद्योभः स श्रेष्ठः पद्मरागकः॥
पद्मकोषे तु यो न्यस्तो विकाशयति सत्वरात्।
पद्मरागवरो ज्ञेय देवानामपि दुर्लभः॥
सर्व्वारिष्टप्रशमनः सर्व्वसम्पत्तिदायकः।
चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम्॥
यो मणिर्द्धत्ते दूराच्चन्द्रदयिसमच्छविः।
वंशकान्तिः स विज्ञेयः सर्व्वसम्पत्तिदायकः॥
पद्मरागप्रभाजालैः सम्पृक्तोऽपि सकलः खलु वल्गे।
वर्णयेद्यमति वा करजालं उत्तरोत्तरमहागुणिनस्ते॥
नीलीरसं दुग्धरसं जलं वा ये रञ्जयन्ति द्विगुणप्रमाणम्।
ते ते यथापूर्व्वमतिप्रशस्ताः सौभाग्यसम्पत्तिविधानदायकाः॥
गुञ्जाफलप्रमाणस्तु दग्धसप्तिगुञ्जकात्।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः॥
क्रोडुकोलफलाकारो द्वादशाद्यन्तिगुञ्जकात्।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः॥
बदरीफलतुल्यो यः खदिरद्वयसमासकः।
तथा धात्रीफलचिंशद्गुरुविंशतिद्वयमासकः॥
तथाक्षफलतुल्यो यो वह्निपक्वैकमासकः।
ताम्बूलफलमानो यश्चतुस्त्रिंशत्कतोलकः।
बिल्वीफलसमाकारो वसुषड्द्वयतोलकः॥
अतःपरं प्रमाणेन मानेन च न लभ्यते।
यदि लभ्येत पुण्येन तदा सिद्धिमवाप्नुयात्॥
केचिच्चारतराः सन्ति जात्यानां प्रतिरूपकाः।
विजातयः प्रयत्नेन सिद्धास्तो मूल्यमाहरेत्॥
काङ्कुलकाः सिंहलदेशोत्पन्नसुक्तमालीयाः।
श्रीपर्व्वताश्च षड्गा विजातयः पद्मरागाणाम्॥
तुषोपसङ्गाद्दलनाभिधानं मणिः स्वभावादपि तुल्यरूपः।
कार्य्यान्तथा सिंहलदेशजातं सुक्ताभिधानं नभसः स्वभावात्।
श्रीपर्व्वकं दीप्तिनिराकृतित्वा-द्विजातिलिङ्गाश्रयभेद एषः॥७॥"

तथा च।

"स्नेहप्रदेहो मृदुता लघुत्वं विजातिलिङ्गं खलु सार्व्वजन्यम्।
यः श्यामिकां पुष्यति पद्मरागो यो वा तुषाग्नाभिव चूर्णमध्यः॥
स्नेहप्रदिग्धो न च यो विभाति यो वा प्रमृज्यः प्रजहाति दीप्तिम्।
आक्रान्तमूर्द्धा च तथाङ्गुलिभ्यां यः कालिकां पार्श्वगतां बिभर्त्ति॥
संप्राप्य ताम्रोऽपि कथं खदत्तं बिभर्त्ति यः सर्व्वगुणानतीव।
तुल्यप्रमाणस्य च तुल्यजाते-र्यो वा गुरुत्वेन भवेन्न तुल्यः।
प्राप्यापि नानाकरदेशजातं ज्ञात्वा बुधो जातिगुणेन लक्षेत्।
अग्रावघृष्टिं सहते न लोलायां परिघर्षयेत्।
दृष्ट्वा योऽत्यन्तशोभावान् परिमार्ष्टुं न मुञ्चति॥
स ज्ञेयः शुद्धजातिस्तु ज्ञेयाज्ञेये विजातयः।
खजातकं संमुखेन विलिखेद्वा परस्परम्॥
वज्रं वा कुरुविन्दं वा विमुञ्चान्योन्यकेन चेत्।
न व्रणं लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः॥
गुणोपपन्नेन सहावबन्धो मणिस्वजातो विगुणेन जातः।
सुखं न कुर्य्यादपि कौस्तुभेन विद्वान् विजातिं न भयाद्बुभूषेत्॥
चण्डाल एकोऽपि यथाभिजातान् समेत्य दूरान्नृपतीन् यजात्।
तथा मणीन् भूरिगुणोपपन्नान् ग्रस्तोऽतिविद्रावयितुं विजातः॥"

अथ मूल्यम्।

"बालार्काभिमुखं क्षत्वा दर्पणे धारयेन्मणिम्।
तत्र कान्तिविभागेन च्छायाभागं विनिर्द्दिशेत्॥
वज्रस्य यत्तण्डुलसंख्ययोक्तं मूल्यं समुन्नापितगौरवस्य।
तत् पद्मरागस्य गुणान्वितस्य स्यान्मासकाख्यातुलितस्य मूल्यम्॥
यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम्।
तावन्मूल्यं तथा गुह्ये कुरुविन्दे विधीयते॥
सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम्।
तावन्मूल्यं चतुर्थांशहीनं स्यादे सुगन्धिके॥
यावन्मूल्यं समाख्यातं वैश्यवर्णे च सूरिभिः।
तावन्मूल्यचतुर्थांशं हीयते शूद्रजन्मनि॥
पद्मरागः यदं यस्तु धत्ते लाक्षारसप्रभः।
कार्षापणसहस्राणि चिंशन्मूल्यं लभेत सः॥
रक्तगोपकसङ्काशः कर्षत्रयधृतो मणिः।
द्वात्रिंशतिसहस्राणि तस्य मूल्यं विनिर्द्दिशेत्॥
एकोनो यूयते यस्तु जवाकुसुमसन्निभः।

कार्षापणसहस्राणि तस्य मूल्यं चतुर्दश ॥
बालादित्यद्युतिनिभः कर्षे यस्तु प्रतुष्यते ।
कार्षापणशतानान्तु मूल्यं षष्टिः प्रकीर्त्तितम् ॥
यस्तु दाडिमपुष्पाभः कर्षार्द्धेन तु सम्मितः ।
कार्षापणशतानान्तु विंशतिर्मूल्यमादिशेत् ॥
चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः ।
मूल्यं तस्य विधातव्यं दशभिः शतपञ्चकम् ॥
द्विमाषको यस्तु गुञ्जैः सर्व्वैरेव समन्वितः ।
तस्य मूल्यं विधातव्यं दिशतं तत्त्ववेदिभिः ॥
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
शतैकसम्मितं वाच्यं मूल्यं रत्नविचक्षणैः ॥
अतो न्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।
सर्व्वद्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत् ॥
कार्षापणः समाख्यातः पुराणहयसम्मितः ।
अन्ये कुसुम्भपानीयमञ्जिष्ठोदकसन्निभाः ॥
काषाया इति विख्याताः स्फटिकप्रभवाश्च ते ।
तेषां दोषो गुणो वापि पद्मरागवदादिशेत् ॥
मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा ।
ब्रह्मक्षत्रियवैश्यान्त्यास्चतुर्धा ये प्रकीर्त्तिताः ॥
चतुर्विधैर्नृपतिभिर्धार्य्याः सम्यक्तिहेतवे ।
अतोऽन्यथा धृतः कुर्य्यादोगशोकभयत्रयम् ॥"
इति युक्तिकल्पतरुः ॥
(यथा, कथासरित्सागरे । २६ । ४४ ।
"सोऽपि प्राप्तस्तदाचीभाभिक्यस्तम्भाभास्करम् ।
सौवर्य्यभित्ति सङ्केतकेतनं सम्ददर्शिव ॥"
कदलीविशेषः । तदृयथा,—
"माणिक्यमत्तान्तिचम्पकाद्या
भेदाः कदल्या बहवोऽपि सन्ति ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

माणिक्या, स्त्री, (माणिक्य + टाप् ।) ज्येष्ठी । तत्पर्य्यायः । सुबली २ यवगोधिका ३ यवगोलिका ४ भित्तिका ५ पल्ली ६ कुब्जमतस्थः ७ यवोलिका ८ । इति हेमचन्द्रः । ४ । ३६४ ॥

माणिबन्धं, क्ली, (मणिबन्धे गिरौ भवम् । मणिबन्ध + अण् ।) सैन्धवलवणम् । इत्यमरटीकायां स्वामी ॥

माणिमन्थं, क्ली, (मणिमन्थगिरौ भवम् । मणिमन्थ + अण् ।) सिन्धुलवणम् । इत्यमरः । २।९।४। (अस्य पर्य्यायः । [जम् ।"
"सैन्धवोऽस्त्री शीतशिवं माणिमन्थञ्च सिन्धु-
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

मातङ्गः, पुं, (मतङ्गस्येदं । मतङ्गस्यापत्यं पुमान् वा । मतङ्ग + अण् ।) हस्ती । इत्यमरः । ३।३। २९ ॥ (यथा, रामायणे । १ । ६ । २३ ।
"विन्ध्यपर्व्वतजैर्मत्तैः पूर्व्वा हैमवतैरपि ।
मदान्वितैरतिबलैर्मातङ्गैः पर्व्वतोपमैः ॥")
अश्वत्थवृक्षः । किरातजातिविशेषः । इति तट्टीकायां मथुरेशः ॥ श्वपचः । इति मेदिनी । गे, ४० ॥ (यथा, कथासरित्सागरे । ७३ । २ ।
"सुदूरमन्वगायातं कार्य्याय ज्ञातसंविदम् ।
सखा दुर्गेपिशाचेन मातङ्गपतिना युतम् ॥")
अर्हदुपासकविशेषः । इति हेमचन्द्रः । ४।२८३।

मातङ्गमकरः, पुं, (मातङ्गाकारो मकरः ।) महामत्स्यभेदः । इति राजनिर्घण्टः ॥

मातङ्गी, स्त्री, (मतङ्गस्य मुनेरपत्यं स्त्री । मातङ्ग + अण् ङीष् ।) दशमहाविद्यान्तर्गतनवमविद्या । अथ मातङ्गीमन्त्रः । वामकेश्वरतन्त्रे ।
"अथ वक्ष्ये महादेवीं मातङ्गीं सर्व्वसिद्धिदाम् ।
अस्योपासनमात्रेण वाक्सिद्धिं लभते ध्रुवम् ॥
प्रणवञ्च ततो मायां कामबीजञ्च कूर्चकम् ।
मातङ्गी ङेयुता चास्त्रं वह्निजायावधिर्मनुः ॥
ऋषिः स्याद्विश्वामित्रोऽस्या विराट् छन्दः प्रकीर्त्तितम् ।
मातङ्गीदेवता देवी सर्व्वसिद्धिप्रदायिनी ॥
अङ्गन्यासकरन्यासौ कुर्य्यान्मन्त्री समाहितः ।
षट्कोणाष्टदलं पद्मं लिखेदुयन्त्रं मनोरमम् ।
तत्र पूजा प्रकर्त्तव्या जवापुष्पैश्च मन्त्रवित् ॥
अष्टपत्रीश्वाष्टदले पूजयेत् सुसमाहितः ।
रतिः प्रीतिर्मनोभवा क्रिया श्रद्धा च शक्तयः ॥
अनङ्गकुसुमानङ्गमदना मदनातुरा ।
दलाष्टशक्तीः संपूज्य उपचारसमन्वितः ॥
ततो देवीं परां ध्यायेत् साधकः स्थिरमानसः ॥
श्यामाङ्गीं शशिशेखरां त्रिनयनां रत्नसिंहासनस्थिताम् ।
वेदैर्बाहुदण्डैरक्षिखेटकपाशाङ्कुशधराम् ॥
एवं ध्यात्वा महादेवीं गन्धपुष्पैर्मनोरमैः ।
नैवेद्यन्तु महादेव्यै पायसं शर्करान्वितम् ॥
पुरश्चरणकाले तु षट्सहस्रं मनुं जपेत् ।
तद्दशांशं हुनेदाज्यैः शर्करामधुभिः सह ॥
ब्रह्मवृक्षोद्भवैः कोष्ठे साधकः शक्तिभिः सह ।
एवं पुरस्क्रियां कृत्वा प्रयोगविधिमाचरेत् ॥
चतुष्पथे श्मशाने वा कलामध्ये च मान्त्रिकः ।
मन्त्रं मांसं पायसञ्च दद्याद्भूपञ्च गुग्गुलुम् ॥
रात्रियोगेन कर्त्तव्यं सदा पूर्व्वस्थ साधकः ।
एवं प्रयोगमात्रेण कविता जायते ध्रुवम् ॥
अखिलम्भं जलम्भं वाक्स्तम्भं कारयेत् ध्रुवम् ।
मन्त्री जयति शत्रूंश्च तार्क्ष्यो भोगिकुलं यथा ॥
शास्त्रे वादे कवित्वे च दक्षस्तिरिवापरः ।
अनेनैव विधानेन मातङ्गी सिद्धिदायिनी ॥
नूनं तद्गृहमागत्य कुबेरैर्दीयते वसु ।
विना मन्त्रैर्विना मांसैर्नार्चयेत् परदेवताम् ॥"
इति तन्त्रसारः ॥

मातरपितरौ, पुं, (माता च पिता च । "मातरपितरावुदीचाम् ।" ६ । ३ । २२ । इत्यारडादेशो माऽशब्दस्य निपात्यते ।)तातजनयित्र्यौ । नित्यद्विवचनान्तौ । इत्यमरः । २ । ६ । ३० ॥

मातरिश्वा, पुं, (मातरि अन्तरीक्षे श्वयति वर्द्धते इति । यद्वा, मातरि जनन्यां श्वयति वर्द्धते सद्यस्कत्वादिति । श्वि + "श्वन् उक्षन्निति ।" उणा० १ । १५८ । इति कनिन् । नाम्नि सद्यस्त्वा अलुक् । धातोरिकारलोपश्च निपातितः ।) वायुः । इत्यमरः । २ । ४ ।६४। (यथा, ऋग्वेदे । १ । ८३ । ६ ।
"आत्यं दिवो मातरिश्वाजभारामथ्नादत्यं
परिशंसनो अद्रेः ॥"
"मातरिश्वा वायुः ।" इति तद्भाष्ये सायणः ॥
मातर्य्यन्तरिक्षे श्वसिति चेष्टते इति । श्वस + कनिन् । अयमेदः । यथा, ऋग्वेदे ।३।२६।११।
"तनूनपादुच्यते गर्भ आसुरो
नराशंसो भवति यद्विजायते ।
मातरिश्वा यदमिमीत मातरि
वातस्य सर्गो अभवत् सरीमणि ॥"
"यदाग्नेरग्नीषु गर्भरूपतया वर्त्तते तदा तनूनपान्नामको भवति यदान्तरिक्षे विद्योतते तदा मातरिश्वनामको भवति ।". इति तद्भाष्ये सायणः ॥)

मातलिः, पुं, (मतं ज्ञातीति । ज्ञा + कः । पृषोदरादित्वात् साधुः । मतल + "अत इञ् ।" ४ । १ । ९५ । इतीञ् ।) इन्द्रसारथिः । इत्यमरः ।१।१।३८॥ (यथा, महाभारते । ५ । ६० । ११ ।
"मतस्यिलोकराजस्य मातलिर्नाम सारथिः ।
तस्यैकैव कुले कन्या रूपतो लोकविश्रुता ॥")

माता, [तृ] स्त्री, मान्यते पूज्यते या सा । मान ड पूजायां नान्यति डाट् इति भरतः ॥ (यङ्गा,
"नप्तृनेष्टृत्वष्टृहोतृपोतृप्रशास्तृमास्तृमास्तृपितृदुहितृ ।" उणा० २ । ९९ । इति तृच् । निपातितश्च । खसादित्वादृाम् निषेधः ।) मा इति भाषा । तत्पर्य्यायः । जननी २ प्रसूः ३ जनयी ४ । इत्यमरः । २ । ६ । २९ ॥ सवित्री ५ जनिः ६ जनी ७ जनित्री ८ अम्बा ९ अम्बा १० अम्बिका ११ अम्बालिका १२ । इति शब्दरत्नावली ॥ माऽका १३ । इति जटाधरः ॥ * ॥ षोड़शप्रकारा मातरो यथा,—
"स्तनदात्री गर्भधात्री भक्ष्यदात्री गुरुप्रिया ।
अभीष्टदेवपत्नी च पितुः पत्नी च कन्यका ॥
सगर्भजा या भगिनी पुत्रपत्नी प्रियाप्रसूः ।
मातुर्माता पितुर्माता सोदरस्य प्रिया तथा ॥
मातुः पितुश्च भगिनी मातुलानी तथैव च ।
जगतां वेदविहिता मातरः षोड़श स्मृताः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकेयसंवादे १५ अध्यायः ॥ तस्या गौरवं यथा,—
"जनको जन्मदातृत्वात् पालनाच्च पिता स्मृतः ।
गरीयान् जन्मदातुश्च योऽन्नदाता पिता मुने ! ।
विनान्नान्नेश्वरो देहो न नित्यः पितुरुच्यते ॥
तयोः शतगुणे माता पूज्या मान्या च वन्दिता ।
गर्भधारणपोषाभ्यां सा च ताभ्यां गरीयसी ॥"
इति तत्रैव ४० अध्यायः ॥
अपि च ।
"स गुरुर्यः क्रियाः कृत्वा वेदमन्त्रैः प्रयच्छति ।
उपनीय ददद्वेदमाचार्य्यः स प्रकीर्त्तितः ॥
एकादश उपाध्याया ऋत्विग्यज्ञस्तदुच्यते ।
एते मान्या यथापूर्व्वमेभ्यो माता गरीयसी ॥"
इति गारुड़े ६४ अध्यायः ॥

अन्यच्च ।
"न पितुर्व्रतनं कार्य्यं यथा मातुः सुतेन हि ।
पिता च पतितस्याज्यो न माता सत्सुतेन हि ।
गर्भधारणपोषाद्धि ततो माता गरीयसी ॥
दशपित्रादुपाध्यायो गौरवेणातिरिच्यते ।
तेभ्यः पिता दशभ्यस्तु माता चैव गरीयसी ।
मातृतोऽन्यो न देवोऽस्ति तस्मात् पूज्या सदा सुतैः ॥
मातुश्च यद्धितं किञ्चित् कुरुते भक्तितः पुमान् ।
तद्धर्म्मं हि विजानीयादेवं धर्म्मविदो विदुः ॥"
इति वह्निपुराणम् ॥
अपरञ्च ।
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यो भावयति या सूते येन विद्योपदिश्यते ।
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ॥
आत्मनः सर्व्वयत्नेन प्राणत्यागेन वा पुनः ।
पूजनीया विशेषेण पञ्चैते भूतिमिच्छता ॥
यावत् पिता च माता च द्वावेतौ निर्व्विकारिणौ ।
तावत् सर्व्वं परित्यज्य पुत्रः स्यात्तत्परायणः ॥
पिता माता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि ।
न पुत्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ॥
नास्ति मातृसमं दैवं नास्ति पितृसमो गुरुः ।
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ॥
तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसापि वा ।
न ताभ्यामनुज्ञातो धर्म्ममन्यं समाचरेत् ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥
मातृशब्दस्वभावया मातृतुल्यत्वम् यथा,—
"मातरित्येव शब्देन याच्च संभवते नरः ।
सा मातृतुल्या सततं धर्म्मः साक्षी सतामपि ॥
तया सहितसङ्गारे कालसूत्रं व्रजति सः ।
तत्र घोरे वसत्येव यावद्वै ब्रह्मणो वयः ॥
प्रायश्चित्तं पापिनश्च तस्य नैव श्रुतौ श्रुतम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
शिवस्य परिवारविशेषः । स च असुरमारणे ब्रह्मादीनां खेदनिर्गतत्वात् अष्टशक्तिदेवतारूपो यथा,—
"ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा ।
कौमारी चैव चामुण्डा चर्च्चिकेत्यष्ट मातरः ॥"
सप्तविधोऽपि यथा,—
"ब्राह्मी च वैष्णवी चैन्द्री रौद्री वाराहिकी तथा ।
कौबेरी चैव कौमारी मातरः सप्त कीर्त्तिताः ॥"
इत्यमरटीकायां भरतः ॥
गौर्य्यादिषोडशमातृकाः । यथा,—
"गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह ।
आदौ विनायकः पूज्यो अन्ते च कुलदेवता ॥"
इति आह्निकतत्त्वे वह्निपुराणपरिग्रहम् ॥
वैष्णवपूज्या मातृका यथा,—
"यत्र मातृगणाः पूज्यास्तत्र स्तेताः प्रपूजयेत् ।
सदा भागवती पीठमासी पद्मान्तरङ्गिका ॥
गङ्गाकलिन्दतनयागोपीचन्द्रावलीलता ।
गायत्रीतुलसीवाणीपृथिवीगाश्च वैष्णवीः ॥
श्रीयशोदादेवकूतीदेवकीरोहिणीसखाः ।
श्रीसीता द्रौपदी कुन्ती रुक्मिण्याद्यास्तथा चाष्ट महिषीर्याश्च ता अपि ॥"
इति पाद्मे उत्तरखण्डे ७८ अध्यायः ॥
सप्त मातरो यथा,—
"आदौ माता गुरोः पत्नी ब्राह्मणी राजपत्निका ।
धात्री धात्री तथा पृथ्वी सप्तैता मातरः स्मृताः ॥"
इति कैश्चित् पठितम् ॥
मातृतुल्या यथा ।
"मातृष्वसा मातुलानी पितृष्वस्री पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"
इति दायभागः ॥
गौः । भूमिः । इति मेदिनी । ते, ४२ । (निरुक्ते च ।८।३ । "यदूधस्यं द्रविणेह धत्तादृदाशयो मातुरस्या उपस्थे ।" "मातुः अस्या पृथिव्याः ।" इति तट्टीकायां दुर्गाचार्य्यः ।) विभूतिः । इति शब्दरत्नावली ॥ लक्ष्मीः । इति हेमचन्द्रः । ३।३२१ । रेवती । इत्यजयपालः । आखुकर्णी । इन्द्रवारुणी । महाश्रावणी । जटामांसी । इति राजनिर्घण्टः ॥ परिमाणकर्त्तरि, त्रि । अस्मिन्नर्थे परिमाणार्थमाधातोः कर्त्तरि ष्टनप्रत्ययेन निष्पन्नः । (निर्म्माणकर्त्तरि च, यथा, ऋग्वेदे । २ । ४१ । ७ ।
"अस्रेधन्तो मातुः सवनेषु सद्योमहः ।"
"मातुः दृढिदारेव सकलस्य जगतो निर्म्मातुः ।"
इति तद्भाष्ये सायणः ।)
माता, स्त्री, (मान्यते पूज्यते इति। मान पूजायां + तन् ततश्टापि निपातनात् साधुः ।) जननी । यथा 'विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहम् ।' इति शिवरहस्ये दुर्गास्तवदर्शनात् आवश्योऽयं शब्दः ॥
मातापितरौ, पुं, (माता च पिता च । "आनङ् ऋतोद्वन्द्वे ।" ६ । ३ । २५ । इत्यानङादेशः ।) जननीजनकौ । तत्पर्य्यायः । पितरौ २ मातरपितरौ ३ तातजनयित्र्यौ ४ । इत्यमरभरतौ । २ । ६ । ३० । नित्यद्विवचनान्तोऽयम् । (यथा, मनौ । ३ । १५७ ।
"अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा ।")
मातामहः, पुं, (मातुः पिता । "पितृव्यमातुलमातामहपितामहाः । ४ । २ । ३६ । इति डामहच् निपातितश्च ।) मातुः पिता । इत्यमरः । २ । ६ । ३३ । दौहित्रस्य मातामहसाधर्म्ये यथा,—
"आसीदङ्गो नृपश्रेष्ठो यज्ञयोगी दृढव्रतः ।
यजतः सुमहत्कालादेष एकोऽभवत्ततः ॥
स्त्रियोः कन्या सुनीथा या मातुर्दुःशीलकारणात् ।
क्रूरा बुद्धिरभूत्तस्य जगतोऽस्यापि पीडने ।
तपस्विनां कुले जाता ऋषीणाञ्च यशस्विनाम् ।
सगुणां निर्गुणां वापि याति मातामहीं तनुम् ॥"
इत्यग्निपुराणम् ॥
तन्मरणे त्रिरात्राशौचं यथा । मातामहानां मरणे त्रिरात्रं स्यादशौचकम् । इति शुद्धितत्त्वे कूर्म्मपुराणम् ॥ * ॥ दुहित्रपर्य्यन्ताभावे तस्य श्राद्धे दौहित्रस्याधिकारो यथा,—
"मातामहानां दौहित्राः कुर्व्वन्त्यहनि चापरे ।
ते च तेषां प्रकुर्व्वन्ति द्वितीयेऽहनि सर्व्वदा ॥"
इति शुद्धितत्त्वम् ।
दुहित्रपर्य्यन्ताभावे तस्य धने दौहित्रस्याधिकारो यथा । तदभावे दौहित्रः ।
"पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"
इति मनुवचने पौत्रतुल्याभिधानेन यथा पुत्राभावे पौत्रस्तथा दुहित्राभावे दौहित्रः ।
अतएव गोविन्दराजधृतो विष्णुः ।
अपुत्रपौत्रे संसारे दौहित्रा धनमाप्नुयुः ।
पूर्व्वेषां हि स्वधाकारे पौत्रदौहित्रकाः समाः ॥"
इति दायतत्त्वम् ॥
मातामही, स्त्री, (मातामहस्य पत्नीति ।"पुंयोगादाख्यायाम् ।" ४ । १ । ४८ । इति + ङीष् ।) मातामहपत्नी । मातृमाता । आर इति भाषा । यथा,—
"मातामही मातृमाता मातृतुल्या च पूजिता ।
प्रमातामहीति विज्ञाता प्रमातामहकामिनी ।
वृद्धप्रमातामही ज्ञेया ततपितुः कामिनी तथा ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
तन्मरणे पक्षिण्यशौचं यथा,—
"मातृके श्वशुरे मित्रे गुरौ गुर्व्वङ्गनासु च ।
अशौचं पक्षिणी रात्रिं नृता मातामही यदि ॥"
इति शुद्धितत्त्वम् ।
दुहित्रपर्य्यन्ताभावे तच्छ्राद्धे दौहित्रस्याधिकारो यथा । तदभावे दौहित्रः । प्रायुक्तब्रह्मपुराणे तथादर्शनात् ।
"पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"
इत्यनेन यथा पुत्राभावे पौत्रस्तथा दुहित्राभावे दौहित्रः । इति प्रागेवोक्तत्वात् ।
"मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सप्तैते मातामहस्य च ॥
एतेषाञ्चैव भार्य्याभ्यः स्वसृमातृः पितृस्तथा ।
पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिः ॥"
इति वृद्धशातातपवचनेन मातामहाच्च साक्षाद्दौहित्रेण पिण्डदानश्रुतेः धनाधिकारित्वाच्च ।
इति शुद्धितत्त्वम् । * ॥ तस्या अयौतुकधने पौत्रपर्य्यन्ताभावे दौहित्राधिकारः । यौतुकधने तु पुत्रपर्य्यन्ताभावे दौहित्राधिकारो यथा ।
"दौहित्रोऽपि ह्यनेनैव सन्तारयति पौत्रवत् ।"
इति मनुवचने दौहित्रे पौत्रधर्म्मातिदेशात् पुत्रेण परिणीतदुहितृबाधात् बाधकपुत्रेण बाध्यदुहितृपुत्रबाधस्य न्याय्यत्वात् । इति दायतत्त्वम् । पुत्राभावे दौहित्रोऽधिकारी । पुत्रा-

धिकारात् प्राक्दुहितृधिकारस्मृतेः तद्राधिकाया दुहितुः पुत्रेण बाधपुत्रबाधस्येव न्याय्यत्वात्। इति दायक्रमसंग्रहश्च ॥

मातालो, स्त्री, (मातुः आली। पृषोदरादित्वात् ऋकारलोपः। यद्वा, मातायाः आली।) मातुः सखी। इति शब्दमाला ॥

मातुलः, पुं, (मातुर्भ्राता। "पितृव्यमातुलेति।" ४।२।३६। इति निपात्यते। तत्र "मातुर्डुलच्।" इति वार्त्तिकात् डुलच्।) मातृभ्राता। पितृश्यालकः। इत्यमरः। २। ६। ३१। मामा इति भाषा ॥ तन्मरणे भागिनेयस्य पञ्चिगव्यप्राशनम्। यथा, शुद्धितत्त्वे।

"मातुले पञ्चिगीं रात्रिं प्रियत्वित्वन्यवेक्षु च।" स च भ्रातामहपर्य्यन्तरहितस्य मृतस्य प्रेतक्रियाद्यधिकारी। यथा,—

"मातुलो भागिनेयस्य श्वशुरो मातुलस्य च।" इति श्राद्धतत्त्वीयपाठक्रमात्। इति शुद्धितत्त्वम् ॥ (माद्यते स्वार्थादिना भीयते। मात+बाहुलकात् डुलच्।) व्रीहिभेदः। मदनद्रुमः। (मादयतीति। मद+णिच्+बाहुलकात् उलच् पृषोदरादि० दस्य तकारत्वञ्च।) धुस्तूरः। इति मेदिनी। ले, १२३ ॥ पर्य्यायो यथा,—

"धत्तूरो धूर्त्त धुस्तूरो उन्मत्तः कनकाह्वयः। देवतातिवल्लभो महामोहः शिवप्रियः। मातुलो मदनश्चास्य फले मातुलपुत्रकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ मा विद्यते तुला तुलना यस्य।) सर्षपविशेषः। इति हेमचन्द्रः। ३। २१६ ॥

मातुलकः, पुं, (मातुल+स्वार्थे कन्।) धुस्तूरवृक्षः। इति राजनिर्घण्टः ॥ (मातुलः। यथा, यज्ञतन्त्रे। १। २४१ ॥

"सोऽपि तव मातुलको न समायातः॥")

मातुलपुत्रकः, पुं, (मातुलस्य धुस्तूरस्य पुत्रकः।) धुस्तूरफलम्। इत्यमरः। २। ४। ७८ ॥ (यथास्य पर्य्यायः।

"मातुलो मदनश्चास्य फले मातुलपुत्रकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मातुलतनयः। इति मेदिनी। के, २३५ ॥

मातुला, मातुलानी, स्त्री, (मातुल+टाप्। मातुलस्य स्त्री। "इन्द्रवरुणेति। ४।१। ४८। ङीष् आनुक् च।) मातुलपत्नी। इत्यमरभरतौ। २।६।३०। मामी इति भाषा। तन्मरणे पञ्चिगव्यप्राशनम्। यथा,—

"श्वशुरयोर्भगिन्याञ्च मातुलान्याञ्च मातुले। पित्रोः स्वसरि तद्वच्च पञ्चिगीं चपयेन्नि-शाम्॥"

इति शुद्धितत्त्वम् ॥

मातुलानी, स्त्री, (मा निषेधे तुलां नयति प्राप्नोतीति। नी+क्विप्। ङीष्।) कलायः। भङ्गा। इति मेदिनी। ने, २०३ ॥ (यथास्या पर्य्यायः। भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"भङ्गा गञ्जा मातुलानी मादनी विजया जया॥")

शणः। इति हेमचन्द्रः। ४। २४५ ॥ प्रियङ्गुवृक्षः। इति शब्दचन्द्रिका ॥

मातुलाहिः, पुं, (मा तुलयतेऽसौ इति। तुल+मूलविभुजादित्वात् कः। मातुलश्चासौ अहिश्च।) सर्षपविशेषः। माहुया साप इति पैयुयाटी इति च भाषा। अयं खट्वाकृतिः आयतदेहः दीर्घलाङ्गूलः चतुष्पात्। इति मधुमाधवादयः॥ तत्पर्य्यायः। मातुलधानः २। इत्यमरः। १। ८। ३॥

मातुली, स्त्री, (मातुलस्य स्त्री। "मातुल+इन्द्रवरुणभवेति।" ४।१।४८। इति ङीष् "मातुलोपाध्याययोरानुग् वा।" इति वार्त्तिकोक्तेः पक्षे आनुगभावः।) मातुलपत्नी। इत्यमरः। २। ६। ३०॥ भङ्गा इति शब्दचन्द्रिका ॥

मातुलुङ्गः, पुं, (मा न तुलं गच्छतीति। गम+डः। पृषोदरादित्वात् अकारलोपः समुच।) बीजपूरः। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते उत्तरतन्त्रे ३८ अध्याये।

"केशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम्। शर्करादाडिमाभ्यां वा द्राक्षाखर्ज्जूरयोस्तथा॥"

(तथास्य पर्य्यायः।

"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः। लुङ्गुषः पूरकः पूरो बीजपूर्णोऽम्लकेशरः॥"

इति वैद्यकरत्नमालायाम्।

तथास्य गुणाः।

स्यान्मातुलुङ्गः कफवातहन्ता हन्ता क्रमीणां जठरामयघ्नः। स दोषरक्तादिविकारपित्त-सन्दीपनः शूलविकारहारी॥

श्वासकासारुचिहरं हृद्यान्नं कण्ठशोधनम्। दीपनं लघु रुच्यञ्च मातुलुङ्गमुदाहृतम्॥

लवणिक्ता दुर्ज्जरातिं स्यात् क्षमिवातकफा-पहा। स्वादु शीता गुरुः स्निग्धा लवणं वात-पित्तजित्॥

मेध्यं शूलानिलच्छर्द्दिकफारोचकनाशनम्। दीपनं लघु संग्राहि गुल्मार्शोघ्नन्तु केशरम्॥

हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदम्। शूलाजीर्णादिरोगेषु मन्दाग्नौ कफमारुते॥

अरुचिश्वासकासेषु स्वरसोऽस्रोपदिश्यते। रसोऽतिमधुरो हृद्यो वीर्य्यपित्तानिलापहः॥

कफघ्नदुर्ज्जरः पाके मातुलुङ्गस्य कल्ककः। तिक्तं पुष्यन्तु बीजञ्च गुल्मनुत्स्यात्तथाधरम्॥"

इति हारीते प्रथमे स्थाने दशमेऽध्याये॥

"लवणिक्ता कटुका स्निग्धा मातुलुङ्गस्य वातजित्। दृंहणं मधुरं मांसं वातपित्तहरं गुरु॥ लघु तत्केसरं श्वासकासहिक्कामदाद्यपान्। आस्यशोषानिलर्क्षिवन्यच्छर्दिरोचकान्॥ गुल्मोदरार्शः शूलानि मन्दाग्नित्वञ्च नाशयेत्॥"

इति च वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)

मातुलुङ्गकः, पुं, (मातुलुङ्ग+संज्ञायां स्वार्थे वा कन्।) छोलङ्गवृक्षः। तत्पर्य्यायः। फलपूरः २ बीजपूरः ३ रुचकः ४। इत्यमरः। २। ४। ७८ ॥ मातुलुङ्गः ५ सुफलः ६ फलपूरकः ७ लुङ्गुषः ८ पूरकः ९ पूरः १० बीजपूर्णः ११ अम्लकेशरः १२ छोलङ्गः १३। इति रत्नमाला। अस्य गुणाः। हृद्यत्वम्। अन्नत्वम्। लघुत्वम्। अग्निदीपनत्वम्। आध्मानगुल्मार्शोहृद्रोगोदावर्त्तनाशित्वम्। विबन्धहिक्काशूलच्छर्दिरोगे प्रशस्तत्वञ्च। अस्य त्वग्गुणाः। तिक्तत्वम्। दुर्ज्जरत्वम्। कफवातनाशित्वम्। विगतरसत्वञ्च। तन्मांसगुणाः। स्वादुत्वम्। शीतत्वम्। गुरुत्वम्। वायुपित्तनाशित्वञ्च। इति राजवल्लभः ॥

मातुलुङ्गा, स्त्री, (मातुलुङ्ग+टाप्।) मधुकुक्कुटी। यथा,—

"मातुलुङ्गा सुगन्धाख्या गिरिजा पूतिपुष्पिका। अत्यम्बा देवदूती च सा क्वचिन्मधुकुक्कुटी॥"

इति रत्नमाला ॥

मातुलुङ्गिका, स्त्री, (मातुलुङ्ग+संज्ञायां कन्। टाप् अकारस्येत्वम्।) वनबीजपूरः। इति राजनिर्घण्टः ॥

मात्रकच्छिदः, पुं, (मातुः कं शिरश्छिनत्तीति। छिद+कः। पितृादेशात् मात्रशिरश्छेदनादस्य तथात्वम्।) परशुरामः। इति केचित् ॥

मात्रका, स्त्री,(मातेव। मात्र+"इवे प्रतिकृतौ।" ५। ३। ९६। इति कन् टाप्।) धात्रका ॥ (यथा, हृदृतसंहितायाम्। ४३। ६६।

"रज्जूत्सङ्गच्छेदने बालपीड़ा राज्ञो मातुः पीड़नं मात्रकायाः॥"

मातेव। मात्र+स्वार्थे कन्।) माता। देवीभेदः। वर्णमाला। इति मेदिनी। के, १३८॥ करभम्। खरः। उपमाता। इति हेमचन्द्रः। मात्रकागणोत्पत्तिर्यथा,—

"तत्र देवोऽप्यसौ दैत्यं चिक्षेपैनाहनद्भृशम्। तस्माद्धतस्य यद्रक्तमपतद्भूतले किल॥ तन्नान्यका असंख्याता बभूवुरपरे भृशम्। तद्दृष्ट्वा महदाश्चर्यं रुद्रः शूलेऽन्धकं न्यधे॥ गृहीत्वा त्रिशिखाग्रेण ननर्त्त परमेश्वरः। इतरेऽप्यन्धकाः सर्व्वे चक्रेण परमेष्ठिना॥ नारायणेन निहतास्तत्र येऽन्धे समुत्थिताः। अहन्यारासुधारेषु शूलप्रोतस्य चाबलात्॥ अनारतं समुत्तस्थुः खतो रुद्रो रुषान्वितः। तस्य क्रोधेन महता मुखाज्ज्वाला विनिर्ययौ॥ तद्रूपधारिणीं देवीं यान्तीं योगीश्वरीं विदुः। स्वरूपधारिणी चान्या विष्णुनापि विनिर्मिता॥ ब्रह्मणा कार्त्तिकेयेन इन्द्रेण च यमेन च। वाराहेण च देवेन विष्णुना परमेष्ठिना॥ पातालोद्भवरूपं तस्या देया विनिर्ममे। माहेश्वरी च माहेन्द्री इत्येता अष्ट मातरः॥ कारणं यस्य यत् प्रोक्तं चैत्रेणैवाधारितम्॥ शरीरादेव नाना तु तदिदं कीर्त्तितं मया।

कामः क्रोधस्तथा लोभो मदो मोहोऽथ पञ्चमः ॥
मात्सर्यं षष्ठमित्याहुः पैशुन्यं सप्तमं तथा ॥
अनसूयाऽष्टमी ज्ञेया रत्येता अष्ट मातरः ॥
कामं योगीश्वरीं विद्धि क्रोधं माहेश्वरीं तथा ॥
लोभस्तु वैष्णवी प्रोक्ता ब्रह्माणी मद एव च ।
मोहः खलु कौमारी मात्सर्यं चेन्द्रजा विदुः ॥
यामी दण्डधरा देवी पैशुन्यं स्वयमेव च ।
अनसूया वराहाख्या रत्येताः परिकीर्तिताः ॥
कामादिगश्च एवोऽयं शरीरं परिकीर्तितम् ।
जगाद स्मृतिं यथा तथा ते कीर्तितं मया ॥
एताभिर्देवताभिश्च तस्य रक्ते तु शोधिते ।
क्षयं गतासुरी माया स च सिद्धोऽभवत् ॥
एतत्ते सर्वमाख्यातमात्मविद्यान्तरं मया ।
य एतच्छृणुयान्नित्यं मातृणामुद्भवं शुभम् ॥
तस्य ताः सर्वदा रक्षां कुर्वन्त्यमृद्धिदं नृप ! ।
येनैतत् पठ्यते जन्म मातृणां पुरुषोत्तम ! ॥
स धन्यः सर्वदा लोके त्रिलोकञ्च गच्छति ।
तासाञ्च ब्रह्मणा दत्ता अष्टमी तिथिरुत्तमा ॥
एताः संपूजयेद्भक्त्या विद्याहारो वरः सदा ।
तस्य ताः परितुष्टास्तु क्षेमारोग्यं ददन्ति च ॥"
इत्यादि वाराहपुराणे कामादिमातृगणोत्पत्ति-
र्नामाध्यायः ॥ अपि च ।
"ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपेणाम्बिकां ययुः ॥
यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥
हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥
कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥
यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र शटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥
वज्रहस्ता तथैवेन्द्री गजराजोपरिस्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥
ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।
हन्यतामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् ॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिका शक्तिरत्युग्रा शिवाशतनिनादिनी ॥"
इति मार्कण्डेयपुराणम् ॥
मातृवर्गो यथा,—
"गुरोः पत्नी राजपत्नी विप्रपत्नी च या सती ।
पत्नी च भ्रातृसुतयोर्मित्रपत्नी च तत्सखः ॥
श्वश्रूः पितुस्तयोर्भ्रातुः पत्नी श्वश्रूः स्वकस्यका ।
जननी तत्सपत्नी च भगिनी सुरभी तथा ॥
स्वामीष्टसुरपत्नी च धात्री कान्ताप्रदायिका ।
गर्भधात्रीस्वसाम्बी च भयात्रातुश्च कामिनी ॥
एता वेदप्रणीताश्च सर्व्वेषां मातरः स्मृताः ।
एतासपि च सर्व्वासु न्यूनता नास्ति कासु च ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे २५ अध्यायः ॥
षोड़श मातरो यथा,—
"गुरुपत्नी राजपत्नी देवपत्नी तथा वधूः ।
पित्रोः स्वसा शिष्यपत्नी भृत्यपत्नी च मातुली ॥
पितृपत्नी मातृपत्नी श्वश्रूश्च भगिनीसुता ।
गर्भधात्रीष्टदेवी च पुंसः षोड़श मातरः ॥"
इति तत्रैव ५६ अध्यायः ॥
अथ मातृकान्यासः ।
भगवानुवाच ।
"मातृकान्यासमधुना शृणु वेतालभैरव ! ।
येन देवत्वमायाति नरोऽपि विधिवत्तिन वै ॥
वाग्ब्रह्माणीमुखा देव्यो मातृकाः परि-
कीर्तिताः ।
तासां मन्त्राणि सर्व्वाणि अङ्गानि स्वराक्षया ।
चन्द्रबिन्दुप्रयुक्तानि सर्व्वकामप्रदानि च ।
ऋषिस्तु मातृमन्त्राणां ब्रह्मैव परिकीर्तितः ॥
प्रोक्ता छन्दस्तु गायत्री देवता च सरस्वती ।
शरीरशुद्धिप्रमुखसर्व्वकार्यार्थसाधने ॥
विनियोगः समुद्दिष्टो मन्त्राणां न्यूनपूरणे ।
अकारेण समं कादिवर्गो यः प्रथमः स्मृतः ॥
तैश्चन्द्रबिन्दुसंयुक्तैश्चतुर्भिरक्षरैर्वहिः ।
आकारञ्च तथोच्चार्य अङ्गाभ्यां नमस्तथा ।
प्रथमं मातृकामन्त्रमङ्गुष्ठद्वयतो न्यसेत् ॥
परे वर्गाः स्वरैः सार्द्धं ये वाम्ये न्यासकर्म्मणि ।
ते सर्व्वे चन्द्रबिन्दुभ्यां युक्ताः कार्य्यास्तु सर्व्वतः ॥
दीर्घेकारश्च वर्गेण दीर्घेकारान्तगेन तु ।
तर्जन्योर्विन्यसेत् सम्यक् स्वाहान्तेन तु पूर्व्ववत् ॥
दीर्घोकारश्चवर्गेण दीर्घोकारान्तगेन तु ।
मध्यमायुगले सम्यक् वषड्न्तेन विन्यसेत् ॥
एकारादितवर्गान्त ऐकारान्तेन चैव हुम् ।
न्यसेदनामिकायुग्मे नियतं तत्र भैरव ! ॥
ओकारादिपवर्गन्तु औकारान्तेन वेष्टितम् ।
पौषड्न्तं कनिष्ठायां विन्यसेत् कार्य्यसिद्धये ॥
अंकारादियकारादिवर्गेण चान्तकेन च ।
अः दीर्घान्तेन तलयोर्विन्यसेत् पार्ष्णिपृष्ठयोः ॥
वषट्कारं शेषभागे मन्त्रन्यासे नियोजयेत् ।
हृदयादिषडङ्गेषु पूर्व्ववत् क्रमशो न्यसेत् ॥
अङ्गुष्ठाद्युक्तवर्गैस्तु क्रमात् षड्भिस्तथाविधैः ।
पुनस्तथा पादजानुसक्थिगुह्ये तु पार्श्वयोः ।
वक्षो च विन्यसेन्मन्त्रान् क्रमात् पूर्व्ववदक्षरैः ॥
बाह्वोः पाण्योस्तथा कण्ठे नाभौ च जठरे
तथा ।
स्तनयोरपि विन्यासं तथा षड्भिः समाचरेत् ॥
वक्त्रे च चिबुके गण्डे कर्णयोश्च ललाटके ।
अंसे कक्षे च षड्वर्गैः पूर्व्ववद्न्यासमाचरेत् ॥
रोमकूपे व्रणरन्ध्रे गुदे जङ्घायुगे तथा ।
नखेषु पादपार्ष्णीश्च तथा पूर्व्ववदाचरेत् ॥
एवन्तु मातृकान्यासं यः कुर्य्यान्नरसत्तमः ।
स धर्म्मयज्ञे पूजासु पूतो योग्यश्च जायते ॥
नातः परतरं मन्त्रं विद्यते क्वचिदेव हि ।
यः सर्व्वकामदं पुण्यं चतुर्व्वर्गफलप्रदम् ॥
वाग्देवतां हृदि ध्यात्वा मृद्धिं सर्व्वाचराणि
च ॥
त्रिधा च मातृकामन्त्रैः संक्रमेच्च त्रिवेष्टनम् ।
स वाग्मी पण्डितो धीमान् जायते च वरः
कविः ॥
चन्द्रबिन्दुसमायुक्तान् स्वरान् पूर्व्वान् पठेद्बुधः ।
अङ्गानि च सर्व्वाणि केवलानि पठेत्ततः ॥
अकारादिक्षकारान्तान्वर्णान् न्यासेषु पूर्व्वकैः ।
ऋणं करतले गृह्य पठित्वाक्षरसंचकम् ॥
अभिमन्त्र्य तु तत्तोयं प्रथमं पूरकैः पिबेत् ।
कुम्भकेन द्वितीयन्तु तृतीयन्त्वथ रेचकैः ॥
एवं सकृत्त्रिवारन्तु पीत्वा तोयं विचक्षणः ।
द्वाङ्गः पण्डितो भूयात् पुत्रपौत्रसमन्वितः ॥
त्रिसन्ध्यमथ पीत्वैव मातृकामन्त्रमन्त्रितम् ।
तोयं कवित्वमाप्नोति सर्व्वान् कामांस्तथैव च ॥
सततं कुरुते यस्तु मातृकामन्त्रमन्त्रितम् ।
तोयपानं महाभागः पूरकस्तम्भरेचकैः ॥
स सर्व्वकामान् संप्राप्य पुत्रपौत्रसमन्वितान् ।
भूत्वा महाकविर्लोके बलवान् सत्यविक्रमः ॥
सर्व्वत्र वल्लभो भूत्वा चान्ते मोक्षमवाप्नुयात् ।
राजानमथवा राजभार्य्यां पुत्रमथापि वा ॥
वशीकरोति न चिरात् मातृकामन्त्रपालकः ।
न्यासक्रमे क्रमः प्रोक्तो वर्णक्रम इहैव तु ॥
अक्षराणां क्रमेणाथ तोयपानं समाचरेत् ।
ये ये मन्त्रा देवतानान्दीक्षामथ रक्षसाम् ॥
ते मन्त्रा मातृकामन्त्रे नित्यमेव प्रतिष्ठिताः ।
सर्व्वमन्त्रमयश्चायं सर्व्वदेवमयस्तथा ॥
चतुर्व्वर्गप्रदश्चायं मातृकामन्त्र उच्यते ।
इति ते कथितः पुत्र ! मातृकान्यास उत्तमः ॥"
इति श्रीकालिकापुराणे मातृकान्यासः ७६ अः ॥
अथ तस्य प्रयोगः ।
अस्य मातृकामन्त्रस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दो
मातृकासरस्वती देवता हलो बीजानि स्वराः
शक्तयो मातृकान्यासे विनियोगः । शिरसि ॐ
ब्रह्मणे ऋषये नमः । मुखे ॐ गायत्रीच्छन्दसे
नमः । हृदि ॐ मातृकासरस्वत्यै देवतायै
नमः । गुह्ये ॐ वह्निनेत्रेभ्यो बीजेभ्यो नमः ।
पादयोः ॐ स्वरेभ्यः शक्तिभ्यो नमः । तथा च
ज्ञानार्णवे ।
"मातृकां शृणु देवेशि ! न्यसेत् पापनिकृन्त-
नीम् ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्रीच्छन्द उच्यते ॥
देवता मातृकादेवी बीजं ब्रह्मनखत्रयम् ।
शक्तयस्तु स्वरा देवि ! षड्ङ्गन्यासमाचरेत् ॥"
ततः षड्ङ्गन्यासौ । अं कं खं गं घं ङं आं
अङ्गुष्ठाभ्यां नमः । इं चं छं जं झं ञं ईं
तर्जनीभ्यां स्वाहा । उं टं ठं डं ढं णं ऊं
मध्यमाभ्यां वषट् । ऋं तं थं दं धं नं ॠं अना-
मिकाभ्यां हुम् । ऌं पं फं बं भं मं ॡं कनि-
ष्ठाभ्यां वौषट् । एं यं रं लं वं शं षं सं हं ळं

सं अः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। अं कं ५ आं हृदयाय नमः। इत्यादि। तथा च ज्ञानार्णवे।

"अं आं मध्ये कवर्गन्तु इं ईं मध्ये चवर्गकम्।
उं ऊं मध्ये टवर्गन्तु एं ऐं मध्ये तवर्गकम्॥
ओं औं मध्ये पवर्गन्तु बिन्दुयुक्तं न्यसेत् प्रिये!।
अनुस्वारविसर्गान्तैर्यवर्गौ सलचकौ॥
हृदयञ्च शिरो देवि! शिखा कवचकं तथा।
नेत्रमस्त्रं न्यसेद्धीमान् नमः स्वाहा क्रमेण तु॥
वषट् हुं वौषडन्तञ्च षडङ्गं योजयेत् प्रिये!।
षडङ्गोऽयं मातृकायाः सर्व्वपापहरः स्मृतः॥"

अथान्तर्मातृकान्यासः।

अकारादिषोड़शस्वरान् सबिन्दून् षोड़शदलकमले कण्ठस्थले न्यसेत्। ककारादिहादशवर्णान् सबिन्दून् हादशदलकमले हृदये न्यसेत्। डकारादिदशवर्णान् सबिन्दून् दशदलकमले नाभौ न्यसेत्। वकारादिषड्वर्णान् सबिन्दून् षड्दलकमले लिङ्गस्थले न्यसेत्। वकारादिचतुरो वर्णान् सबिन्दून् चतुर्दलकमले मूलाधारे न्यसेत्। हचवर्णद्वयं सबिन्दुं द्विदलपद्मभूमध्ये न्यसेत्। तथा च ज्ञानार्णवे।

"हृदयपद्माम्बुजे कण्ठे स्वरान् षोड़श विन्यसेत्।
हादशच्छदहृत्पद्मे कादीन् हादश विन्यसेत्॥
दशपत्राम्बुजे नाभौ डकारादौन्यसेद्दश।
षट्पत्रमध्ये लिङ्गस्थे वकारादीन्यसेत्तथा षट्॥
आधारे चतुरो वर्णान्यसेद्वादीन् चतुर्दले।
हचौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये!॥"

अगस्त्यसंहितायाम्।

"एकैकवर्णमेकैकपत्रान्ते विन्यसेत् प्रिये!।
एवमन्तः प्रविन्यस्य मनसातो बहिर्न्यसेत्॥"

वैष्णवे तु।

एकैकवर्णसुद्धार्य्य मूलाधाराच्छिरोऽन्तकम्।
नमोऽन्तमिति विन्यास आन्तरः परिकीर्त्तितः॥

अथान्तर्मातृकान्यासो मूलाधारे चतुर्दले।

सुवर्णाभे व श ष स चतुर्व्वर्णविभूषिते॥
षड्दले वैद्युताभिमे स्वाधिष्ठानेऽनलस्थिते।
ब भ मैर्यैश्च लैर्युक्ते वर्णैः षड्भिश्च सुव्रते!॥
मणिपूरे दशदले नीलजीमूतसन्निभे।
डादिषान्तदलैर्युक्ते बिन्दूल्लासितमस्तकैः॥
अनाहते हादशारे प्रवालरुचिसन्निभे।
कादिठान्तदलैर्युक्ते योगिनां हृदयाम्बुजे॥
विशुद्धे षोड़शदले धूम्राभे स्वरभूषिते।
आज्ञाचक्रे तु चन्द्राभे द्विदले हचलाञ्छिते॥
सहस्रारे हिमनिभे सर्व्ववर्णविभूषिते।
अकथादिविरेखात्म ह ल च त्रयभूषिते॥
तस्मधे परविन्दुञ्च क्षद्विस्थितिलयात्मकम्।
एवं समाहितमना ध्यायेन्मायोऽयमान्तरः॥"

ततो वाह्यमातृकान्यासः।

"पञ्चाग्नित्रिपिभिर्विभक्तसुखदोःपञ्चध्वचः स्वर्गभाः
भास्वन्मौलिनिवद्धचन्द्रशकलामापीनतुङ्गस्तनीम्।
सुप्रसन्नमुखं सुधाढ्यकलसं विद्याच हस्ताम्बुजै-
र्विभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये॥"

एवं ध्यात्वा न्यसेत्। तत्राङ्गुलिनियमस्तन्त्रे।

"ललाटेऽनामिकामध्ये विन्यसेन्मुखपङ्कजे।
तर्जनीमध्यमानामा हृदानामे च नेत्रयोः॥
अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः।
मध्यास्तिस्रो गण्डयोश्च मध्यमाद्योष्ठयोर्न्यसेत्॥
अनामां दन्तयोर्न्यस्य मध्यमास्तत्तमाङ्गके।
सुखेऽनामां मध्यमाच हस्तपादे च पार्श्वयोः॥
कनिष्ठानामिकामध्यास्तासु एष्ठे च विन्यसेत्।
ताः सान्तुष्टा नाभिदेशे सर्व्वाः कुक्षौ च विन्यसेत्॥
हृदये च तलं सर्व्वे अंसयोश्च ककुत्स्थले।
हृत्पूर्व्वे हस्तपत्कुक्षि सुखेषु तलमेव च॥
एतास्तु मातृकास्रः क्रमेण परिकीर्त्तिताः।
अन्यासा विन्यसेदृष्यु न्यासः स्यात्तस्य निष्फलः॥"

गौतमीये।

"ललाटमुखहत्तालिमूर्त्तिन्यासेषु गण्डयोः।
ओष्ठदन्तोत्तमाङ्गास्यदोःपत्पृष्ठन्यग्यकेषु च॥
पार्श्वयोः एष्ठतो नाभौ जठरे हृदयेऽसके।
ककुदंसे च हृत्पूर्व्वे पाणिपादयुगे तथा।
जठराननयोर्लिङ्गे मातृकान्यासं यथाक्रमात्॥"

तद्यथा। अं नमो ललाटे। आं नमो मुखवृत्ते। इं ईं चक्षुषोः। उं ऊं कर्णयोः। ऋं ॠं नसोः। ऌं ॡं गण्डयोः। एं ओष्ठे। ऐं अधरे। ओं ऊर्द्ध्वदन्ते औं अधोदन्ते। अं अङ्गरन्ध्रे। अः मुखे। कं दक्षबाहुमूले। खं कुपरे। गं मणिबन्धे। घं अङ्गुलिमूले। ङं अङ्गुल्यग्रे। एवं चं ५ वामबाहुमूलसन्ध्यग्रकेषु। एवं टं ५ दक्षिणपादमूलसन्ध्यग्रकेषु। एवं तं ५ वामपादमूलसन्ध्यग्रकेषु। पं दक्षिणपार्श्वे। फं वामपार्श्वे। बं एष्ठे। भं नाभौ। मं जठरे। यं हृदि। रं दक्षबाहुमूले। लं ककुदि। वं वामबाहुमूले। शं हृदादिदक्षहस्ते। षं हृदादिवामहस्ते। सं हृदादिदक्षपादे। हं हृदादिवामपादे। लं हृदाद्युदरे। क्षं हृदादिमुखे। सर्व्वत्र नमोऽन्तेन न्यसेत्। तथा च।

"ओमाद्यन्तो नमोऽन्तो वा सबिन्दुर्बिन्दुवर्ज्जितः।
पञ्चाग्रदर्भविन्यासः क्रमादुक्तो मनीषिभिः॥"

इति भट्टः॥

अथ संहारमातृकान्यासः।

तस्या ध्यानं यथा,—

"अक्षस्रजं हरिणपोतमुदग्रटङ्कं
विद्याः करैरविरतं दधतीं त्रिनेत्राम्।
अर्द्धेन्दुमौलिमरुणामरविन्दरागां
वर्णेश्वरीं प्रणमत क्षतभारनम्राम्॥"

न्यासस्तु चकाराद्यकारान्तः। यथा चं नमो हृदादिमुखे इत्यादि॥ * ॥ अपरच।

"चतुर्धा मातृका प्रोक्ता केवला विन्दुसंयुता।
सविसर्गा सोभया च रहस्यं ब्रह्म कथ्यते॥
विद्याकरी केवला च शोभया मुक्तिदायिनी।
पुण्यदा सविसर्गा तु सविन्दुर्भुक्तिदायिनी॥"

विष्णुरहस्ये।

वाग्भवाद्या च वाक्सिद्धौ रमाद्या श्रीप्रदृद्धये।
दुर्गेद्याद्या सर्व्वसिद्धौ कामाद्या लोकवश्यदा।
श्रीकृष्णाद्यानिमाद्यास्तेषु सर्व्वमन्त्रः प्रसीदति॥"

श्रीविद्याविषये नवरत्नेश्वरे।

"वाग्भवाद्या नमोऽन्ताश्च न्यस्ता या मातृकाक्षराः।
श्रीविद्याविषये मन्त्री वाग्भवाद्यद्वयसिद्धये॥"

इति तन्त्रसारः॥

(मातृ+"ऋतष्ठन्।"४।३।७८। इति ठन्। त्रि। मातुरागतम्। यथा, महाभारते। ६। ८७। ६७।

"योऽन्वयो मातृकस्तस्य स एनमभिषेदिवान्॥")

मातृकेयटः, पुं, (मातृके कुले यटति पुत्ररूपेण गच्छतीति। यट+अच्।) मातुजः। इति त्रिकाण्डशेषः॥

मातृनन्दनः, पुं, (मातृणां नन्दनः पुत्र आनन्दवर्द्धनो वा। कार्त्तिकेयः। यथा,—

"कथं त्वं कृत्तिकापुत्रसुस्तवान् तं सुरं गुहम्।
कथञ्च पावकिरसौ कथं वा मातृनन्दनः॥"

इत्यादि वाराहपुराणे स्कन्दोत्पत्तिर्नामाध्यायः॥

मातृमण्डलं, क्ली, (मातृणां मण्डलम्।) नेत्रयोर्मध्यम्। तत्तु आसन्नदत्तुर्म्ने पश्यति। यथा, काश्मीरखण्डे ४२ अध्याये।

"अरुन्धतीं ध्रुवञ्चैव विष्णोर्व्योम पदानि च।
आसन्नदत्तुर्म्ने पश्येच्चतुर्थं मातृमण्डलम्॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते।
विष्णोः पदानि भ्रूमध्ये नेत्रयोर्मातृमण्डलम्॥"

(यथा च बृहत्संहितायाम्। "मातृणामपि मातृमण्डलविदो विप्रान् विदुर्नेतरान्॥")

मातृमुखः, पुं, जड़ः। इति हेमचन्द्रः। ३। १६॥

मातृबन्धुः, पुं, (मातुर्बन्धुः।) मातृबान्धवः। यथा। बन्धवस्त्रिविधाः। आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति। यथोक्तम्।

"आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः।
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः॥
पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः॥
मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः॥"

इति मिताक्षरा॥

मातृबान्धवः, पुं, (मातुर्बान्धवः।) मातृबन्धुः। स च मातामहभगिनीपुत्रः। मातामहीभगिनीपुत्रः। मातृमातुलपुत्रश्च। यथा,—

"मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः॥"

इत्युद्वाहतत्त्वम्॥

मातृवाहिनी, स्त्री, (मातरं वहतीति। वह+णिनिः।) वस्त्रगुलापची। इति राजनिर्घण्टः॥

मातृश्वासितः, पुं, (मात्रा श्वासितः । स्नेहाधिक्यात् केवलं मात्रैव श्वासितः न तु पित्राचार्य्यादिभिरिति भावः ।) मूर्खः । इति हेमचन्द्रः । ३ । १६ ॥

मातृश्वसा, स्त्री, (मातुः स्वसा । "मातृपितृभ्यां स्वसा ।" ८ । ३ । ८३ । इति षत्वम् ।) मातृभगिनी । मासी इति भाषा । सा मातृतुल्या यथा,—

"मातृश्वसा मातुलानी पितृव्यस्त्री पितृश्वसा ।
श्वश्रूः पूर्ब्बजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"

इति दायभागः ॥

मातृश्वसेयः, पुं, (मातृश्वसुरपत्यं पुमान् । मातृश्वस्र + "मातृश्वसुश्च ।" ४ । १ । १३४ । इत्यत्र "कृञ्प्रत्ययो ढकिलोपश्च ।" इति काशिकोक्तेः ढक् ।) मातृश्वस्रपुत्रः । मासितुता भाइ इति भाषा । तत्पर्य्यायः । मातृश्वस्रीयः २ । इति हेमचन्द्रः । ३ । २०६ ॥

मातृश्वसेयी, स्त्री, (मातृश्वसुरपत्यं स्त्री । मातृश्वस्र + "मातृश्वसुश्च ।" ४ । १ । १३४ । इति ढक् । ढकिलोपश्च । ङीष् ।) मातृभगिनीकन्या । इत्यमरः । २ । ६ । २५ । मासितुता भगिनी । इति भाषा ॥ (टाबन्तोऽप्यर्यं शब्दः । यथा, महाभारते । ३ । २२३ । ५ ।

("मम मातृश्वसेया त्वं माता दाक्षायणी मम ॥")

मातृश्वस्रीयः, स्त्री, (मातृश्वसुरपत्यं पुमान् । मातृश्वस्र + "मातृश्वसुश्च ।" ४ । १ । १३४ । इति छक् ।) मातृभगिनीपुत्रः । इत्यमरः । २ । ६ । २५ । मासितुता भाइ इति भाषा ॥

मातृश्वस्रीया, स्त्री, (मातृश्वस्रीय + टाप् ।) मातृभगिनीकन्या । इत्यमरः । २ । ६ । २५ । मासितुता भगिनी इति भाषा ॥

मातृसिंही, स्त्री, वासकः । इति शब्दरत्नावली ।

मात्रं, क्ली, (मीयत इति । मा + त्रन् ।) कार्त्स्न्यम् । अवधारणम् । इत्यमरः । ३ । ३ । २७ ॥ कार्त्स्न्ये यथा जीवमात्रं न हिंसेत् । अवधारणे यथा पयोमात्रं भुङ्क्ते । इति तट्टीकायां भरतः ॥

मात्रा, स्त्री, (मीयते अनया । मा + "कृषिमाशुभसिभ्यस्त्रन् ।" उणा० ४ । १६८ । इति त्रन् टाप् ।) परिच्छदः । अक्षः । परिमाणम् । इत्यमरः । ३ । ३ । २७ ॥ परिच्छदो दृश्यश्चादिः । अक्षे यथा । शाकमात्रा । परिमाणे यथा । किं हस्तिमात्रोऽङ्कुशः । इति तट्टीकायां भरतः ॥ (यथा, ऋक्संहितायाम् । ५ । ८ । २ । "अकुलमेकं भवति मात्रा ।") कर्णभूषा । वित्तम् । अवयवः । इति मेदिनी । रे, ७५ ॥ (छन्दसां ह्रस्वदीर्घादिप्रभेदः । यथा, श्रुतबोधे ।

"यस्याः पादे प्रथमे द्वादश मात्रा तथा तृतीयेऽपि ॥")

कालविशेषः । यथा,—

"कालेन यावता पाणिः पर्य्येति जानुमण्डले ।
सा मात्रा कविभिः प्रोक्ता ह्रस्वदीर्घप्लुते मता ॥

इति प्राचीनाः ॥

अपि च ।

"वामजानुनि तद्वत्तभ्रमणं यावता भवेत् ।
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः ॥"

इति तन्त्रसारः ॥

इन्द्रियवृत्तिः । यथा,—

"मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः ।
आगमापायिनो नित्यास्तांस्तितिक्षस्व भारत ॥"

इति भगवद्गीता ॥

"मीयन्ते याभिर्विषयाः मात्रा इन्द्रियवृत्तयः ।"

इति तट्टीकायां श्रीधरस्वामी ॥

इन्द्रियम् । इति पूर्ब्बोक्तश्लोकटीकायां मधुसूदनसरस्वती ॥ अंशः । यथा,—

"न योधिद्भ्यः पृथग्दद्यादवसानदिनादृते ।
स्वभर्तृपिण्डमात्राभ्यस्तन्निरासाय तत् स्मृता ॥"

इति आह्निकतत्त्वम् ॥

(श्लिलोचयः । यथा, ऋग्वेदे । ३ । ४ । ६ । ३ ।

"प्र मात्राभी रिरिचे ।"

"मात्राभिः मीयन्ते परिच्छिद्यन्त इति मात्राः श्लिलोचयाः ।" इति तद्भाष्ये सायनः ॥ शक्तिः । यथा, पञ्चतन्त्रे । १ । ३५६ । "का मात्रा मम हस्तस्थं यो मम प्रस्तुतिं दूषयिष्यति ॥" अवयवः । यथा, मनौ । ७ । ४ ।

"चक्रवित्तेशयोश्चैव मात्रानिर्हृत्य शाश्वतीः ॥"

"मात्रा अवयवाः ।" इति तट्टीकायां मेधातिथिः ॥ रूपम् । यथा, भागवते । २ । ५ । २५ ॥

"तस्य मात्रा गुणः शब्दः ॥" "मात्रा सूक्ष्मं रूपम् ।" इति तट्टीकायां स्वामी ॥)

मात्सर्य्यं, क्ली, (मत्सर + ष्यञ् ।) मत्सरस्य भावः । परशुभदेषः । यथा,—

"मागाधिरायैकतरः प्रमादं
वसन्नसह्याधृषिवेऽपि देशे ।
मात्सर्य्यरागोपहतात्मनां हि
खलन्ति साधुष्वपि मानसानि ॥

इति भारवौ २ अध्यायः ॥

मात्स्यिकः, त्रि, (मत्स्योऽस्य पण्यम् । "तदस्य पण्यम् ।" ४ । ४ । ५१ । इति मत्स्य + ठक् ।) जालिकः । मत्स्यघातकः । इति सिद्धान्तकौमुदी ॥

माद्य इ क्लान्त्यै । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, मान्त्यति । क्लान्त्यो वधक्लेशौ । इति दुर्गादासः ॥

माद्यः, पुं, (मान्त्यति पीड्यते जनः अस्मिन् । माद्य + घञ् । ज्वलादित्वात् णो वा । निपातनात् गुणभावः ।) पन्थाः । इति त्रिकाण्डशेषः ॥ (मद्य + भावे घञ् ।) मत्स्यनम् । इति शब्दरत्नावली ॥

माधुरः, पुं, (मधुरा + अण् ।) मधुरायां आगतः । इति सुग्धबोधव्याकरणम् ॥ (तत्र जात इत्यण् वा । मधुराजातः । यथा, कथासरित्सागरे । ३६ । ७३ ।

"ततः स दृष्टवृत्तान्तश्चक्रे पुरुषोऽब्रवीत् ।
सुभ्रे ! पवनसेनाख्यो वणिक्पुत्रोऽस्मि माथुरः ॥"

अन्येन कृता माथुरेण प्रोक्ता । "तेन प्रोक्तम् ।" ४ । ३ । १०१ । इति अण् ङीप् । माथुरीवृत्तिः । इति व्याकरणम् ॥)

मादः, पुं, (माद्यत इति मद + घञ् । दुमभावः ।) दर्पः । इत्यमरः । ३ । २ । १२ ॥ हर्षः । इति तट्टीकायां भरतः । मत्तता । इति शब्दरत्नावली ॥

मादकः, पुं, (माद्यति वर्षागमे हृष्यतीति । मद + ण्वुल् ।) दात्यूहपक्षी । इति शब्दमाला ॥ (मादयति स्वगुणेन भूतानीति । मद + णिच् ण्वुल् ।) मदकारकत्रये, त्रि ॥ (यथा, देवीभागवते । १ । १४ । ६४ ।

"इन्द्रियाणि महाभाग ! मादकानि मुनिश्चितम् ।
अदारस्य दुरन्तानि पञ्चैव मनसा सह ॥")

मादनं, क्ली, (माद्यति विरहिणः । इति मद + णिच् + ल्युः ।) लवङ्गम् । इति शब्दचन्द्रिका ॥ (मादयतीति मद + णिच् + ल्युः ।) हर्षकारयितरि, त्रि ॥)

मादनः, पुं, (माद्यति चित्तविकारमुत्पादयतीति । मद + णिच् + ल्युः ।) कामदेवः । मदनवृक्षः । धुस्तूरः । इति केचित् ।

मादनी, स्त्री, (मादन + स्त्रियां ङीप् ।) माकन्दी । इति राजनिर्घण्टः ॥ विजया । इति भावप्रकाशः ॥

माडग्नः, त्रि, (अक्षमिव. डग्नत इति । डग्न + "त्यदादिषु डग्नोऽनालोचने कञ्च ।" ३ । २ । ६० । इति कञ् ।) मत्स्यडग्नः । इति व्याकरणम् ॥ (यथा, महाभारते । ७ । १०८ । ८६ ।

"तस्य त्वं पदवीं गच्छ गच्छेयुस्त्वाडग्नो यथा ।
ताडग्नस्येऽग्नि काले माडग्नैरभिचोदितः ॥
कथं नु भार्य्या पार्थानां तव कृष्णा ! सखी विभो ! ।
धृष्टद्युम्नस्य भगिनी सभां ज्ञास्यते माडग्नी ॥")

माद्री, स्त्री, (मद्रे जाता । मद्र + अण् ङीप् । भर्गादित्वात् न प्रत्ययलुक् ।) पाण्डुराजपत्नी । सा नृगीभूतस्य मुनेः शापात् मैथुनरहितस्य स्वामिन आज्ञया अश्विनीकुमाराभ्यां नकुलसहदेवौ जनयामास । इति महाभारतश्रीभागवतमतम् ॥ (यथा, महाभारते । १ । ६७ । १५६ ।

"कुन्ती माद्री च जज्ञाते मतिश्च सुबलात्मजा ।")

अतिविषा । इति राजनिर्घण्टः ॥

माद्रीपतिः, पुं, (माद्र्याः पतिः ।) पाण्डुराजः । इति शब्दरत्नावली ॥

माधवः, पुं, (वसुपुत्रस्य मधोरपत्यं पुमान् । इति मधु + अण् । मा लक्ष्मीस्तस्याः धवः । मायाविद्यायाः धव इति वा ।) विष्णुः । तस्य व्युत्पत्तिर्यथा,—

"मा च ब्रह्मस्वरूपा या मूलप्रकृतिरीश्वरी ।

नारायणीति विख्याता विष्णुमाया सनातनी ॥
महालक्ष्मीस्वरूपा च वेदमाता सरस्वती ।
राधा वसुन्धरा गङ्गा तासां स्वामी च
माधवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥
(यथा, महाभारते । ५ । ७० । ४ ।
"मौनाद्ध्यानाच्च योगाच्च विद्धि भारत !
माधवम् ।")
तन्नाममाहात्म्यं यथा,—
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतो हरिः ।
माधवायेति वै नाम धर्म्मकामार्थमोक्षदम् ॥"
इति वह्निपुराणम् ॥
(मधोर्वसन्तस्यायम् मधूनि मधुमन्ति कुसुमानि अस्मिन् वा । मधु + "मधोर्ञ च ।" ४ । ४ । १२९ । इति अः ।) वैशाखमासः । इत्यमरः । १ । ४ । १६ ॥ (यथा, मार्कण्डेये । ११७।२७ ।
"स तेन सख्या सहितो जगामाम्रवणं वनम् ।
पत्नीभिः स समं रन्तुं माधवे मासि पार्थिव ! ॥"
(मधु + स्वार्थे अण् ।) वसन्तः । इति विश्वः ॥
(यथा, सुश्रुते । १ । १६ । ६ । "मधुमाधवौ वसन्तः ।"
"माधवप्रथमे मासि नभस्यप्रथमे पुनः ॥"
इति चरके सूत्रस्थाने षड्मेऽध्याये ॥
"माधवनभस्यसहस्यानां यथासंख्यं वैशाख-भाद्रपौषाणां सुश्रुतेऽभिहितत्वात् तैषां प्रथमेऽग्रेऽग्रवर्षिणि मासि चैत्रादौ विषय इति निष्कर्षः । इति चरकटीकाकृदभिप्रायः ॥)
मधुकवृक्षः । क्षुद्रसुद्रः । इति राजनिर्घण्टः ॥
(भौत्यमन्वन्तरीयसप्तर्षीणामन्यतम ऋषि-विशेषः । यथा, मार्कण्डेये । १०० । ३१ ।
"अगीध्रश्चामिताङ्गश्च शुचिर्मुक्तोऽथ माधवः ।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥"
सायनाचार्य्यस्य भ्राता । यथा, सायनकृतधातु-वृत्तौ । इति पूर्व्वदक्षिणपश्चिमसप्तद्राधीश्वर-कम्पराजसुतसङ्गमराजमहामन्त्रिणा सायन-पुत्रेण माधवसहोदरेण सायनाचार्य्येण विर-चिता माधवीया धातुवृत्तिः ॥)
माधविका, स्त्री, (माधवी + कन् टाप् । पूर्व्व-ह्रस्वश्च ।) माधवीलता । इत्यमरटीकायां भरतः ॥
माधवी, स्त्री, (मधौ साधुपुष्प्यति । मधु + "कालात् साधुपुष्प्यात्तृप्यश्वमानेषु ।" ४ । ३ । ७३ । इत्यण् । ङीप् ।) स्वनामख्यातपुष्पलता । तत्पर्य्यायः । अतिमुक्तः २ पुष्पकः ३ वासन्ती ४ लता ५ । इत्यमरः । २ । ४ । ७२ ॥ अतिमुक्तकः ६ माधविका ७ माधवीलता ८ । इति तट्टीकायां भरतः ॥ चन्द्रवल्ली ९ सुगन्धा १० भ्रमरोत्सवा ११ भृङ्गप्रिया १२ भद्रलता १३ भूमिमण्डप-भूषणा १४ वसन्तदूती १५ । इति जटाधरः ॥ लतामाधवी १६ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । ९ । १२ । ७ ।
"आम्रेनीपैर्मधूकैश्च माधवीमण्डपावृताम् ।")

अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषाय-त्वम् । मदगन्धित्वम् । पित्तकासव्रणदाहशोष-नाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"माधवी स्यात्तु वासन्ती पुष्पको मण्डकोऽपि च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥
माधवी मधुरा प्रोक्ता लघ्वी दोषत्रयापहा ।"
इति भावप्रकाशः ॥
मिसिः । मधुशर्करा । कुड्डनी । (मधुनो विकार इत्यण् ङीप् ।) मदिरा । इति मेदिनी । वे, ४६—४७ ॥ (यथा, महाभारते । ४। १५ । ३ ।
"अस्ति मे शयनं दिव्यं त्वदर्थमुपकल्पितम् ।
एहि तत्र मया सार्द्धं पिबस्व मधुमाधवीम् ॥"
मांधवस्येयमित्यण् ङीप् । तत्प्रियत्वात्तथात्वम् ।) तुलसी । इति शब्दमाला ॥ (मधौ वसन्ते सेवार्हणीयेति अण् ।) दुर्गा । इति शब्दरत्ना-वली ॥ माधवस्य पत्नी च ॥ (मधुवंशजा कन्या । यथा, महाभारते । १।६५।१२ । 'जनमेजयः खस्रुसुतां नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान् ॥')
माधवीलता, स्त्री, (माधव्याख्या लता ।) स्वनाम-ख्यातपुष्पलता । इत्यमरटीकायां भरतः ॥
माधवेष्टा, स्त्री, (माधवस्य इष्टा ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥
माधवोचितं, क्ली, (माधवस्योचितम् । सुगन्धि-त्वात् तथात्वम् ।) कक्कोलकम् । इति राजनिर्घण्टः ॥ (विशेषोऽस्य कक्कोलशब्दे ज्ञातव्यः ॥)
माधवोद्भवः, पुं, (माधवाद्भवोऽस्य ।) राजा-दनी । इति राजनिर्घण्टः ॥
माधुकः, पुं, वर्णसङ्करजातिविशेषः । इति जटा-धरः ॥ (यथा, महाभारते । १३ । ४८ । २० ।
"मैरेयकश्च वैदेहः सम्भूतेऽथ माधुकम् ॥")
माधुमताः, पुं, (मधुमत्सु भवाः । मधुमत् + "कच्छादिभ्यश्च ।" ४ । २ । १३३ । इत्यण् ।) काश्मीरदेशभवाः । इति हेमचन्द्रः ।४।२४॥
माधुरं, क्ली, (मधु अस्ति अस्य अस्मिन् वेति । मधु + "ऊधसोविसुक्कमधोः रः ।" ५।२।१०७। इति रः । ततः स्वार्थेऽण् ।) मल्लिका । इति त्रिकाण्डशेषः ॥ (मधुरात् सम्भवतीत्यण् ।) मधुरसभवे, त्रि ॥
माधुरी, स्त्री, (माधुर + गौरादित्वात् ङीष् ।) मद्यम् । इति भूरिप्रयोगः ॥ माधुर्य्यम् । यथा,
"तानि सर्व्वसुखानि ते च तरलाः स्निग्धा
दृशोर्विभ्रमा-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां
वक्रिमा ।
सा विम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं
वर्द्धते ॥"
इति गीतगोविन्दे १ सर्गः ॥

माधुर्य्यं, क्ली, (मधुरस्य भावः : मधुर + "वर्ण-दृढादिभ्यः ष्यञ् च ।"५।१।१२३ । इति ष्यञ् ।) मधुरस्य भावः । मधुरत्वम् । इति हेमचन्द्रः । ३ । १७३ । (यथा, सुश्रुते सूत्रस्थाने एका-दशाध्याये ।
"माधुर्य्यं भजतेऽत्यर्थं तीक्ष्णभावं विमुञ्चति ॥")
लावण्यम् । यथा,—
"रूपं किमप्यनिर्व्वाच्यं तनोर्माधुर्य्यमुच्यते ।"
इत्युज्ज्वलनीलमणिः ॥
पाञ्चालीरीतिविग्रहकाव्यगुणः । यथा,—
"मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः ।"
इति साहित्यदर्पणे ६ परिच्छेदः ॥ तस्य लक्षणं यथा, साहित्यदर्पणे ८ परिच्छेदे ।
"चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते ।
सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥
मूर्द्धनि वर्गान्त्यवर्गेण युक्तः ष्टठडढान् विना ।
रणौ लघु च तद्व्यक्तौ वर्णाः कारणतां गताः ॥
अवृत्तिरवृत्तिर्वा मधुरा रचना तथा ।"
(नायिकानामयत्नजोऽलंकारविशेषः । यथा, साहित्यदर्पणे । ३ । १२६ ।
"सङ्क्षोभेष्वप्यनुद्वेगो माधुर्य्यं परिकीर्त्तितम् ।"
सात्त्विकनायकगुणभेदः । यथा, तत्रैव ।३।६१।
"सर्व्वावस्याविशेषेषु माधुर्य्यं रमणीयता ।")
माध्यन्दिनं, त्रि, (मध्ये भवम् । मध्य + "अन्तः-पूर्व्वपदात् ठञ् ।" ४।३।६० । इत्यत्रकाश्रिका सूत्रवृत्तौ "मध्योमध्यं दिनञ् चाद्यात् ।" इति दिनञ् ।) मध्यमम् । इति हेमचन्द्रः । ६ । ६६ ॥ (मध्यन्दिनसम्बन्धि । यथा, ऋग्वेदे । ३ । २८ । ४ ।
"माध्यन्दिने सवने जातवेदः पुरोडाशमिह
कवे ! जुषस्व ।"
"माध्यन्दिने मध्यन्दिनसम्बन्धिनि" तथा "माध्य-न्दिने मध्यं दिनस्येदमित्यर्थे उत्सादित्वादञ् णित्वादादिवृद्धिः णित्वादेवाद्युदात्तत्वम् ।" इति च तद्भाष्ये सायनः ॥ मध्यन्दिनेन प्रोक्ताधीता वा । इत्यण् ङीप् । शुक्लयजुर्व्वेदस्य शाखाभेदः । यथा, आश्वलायनीयश्रौतसूत्रे । ५ । ५ । १६ ।
"पिबा सोममभियमुग्रतर्द इति तिस्रोऽर्द्धर्चेभिः सोमकामं त्वाहुस्तवायं सोमस्तमेवार्द्धर्चाभिराय सोमाः प्र देवो विदाना आ पूर्णो अस्य कलशः खादेति माध्यन्दिनः ।")
माध्यमं, त्रि, (मध्ये भवं । मध्य + "अन्तःपूर्व्वपदाट्-ठञ् ।" ४ । ३ । ६० । इत्यस्य काश्रिकासूत्र-वृत्तौ "मध्यमीयौ च प्रत्ययौ वक्तव्यौ ।" इति मध्यम् ।) मध्ये भवम् । यथा,—
"मध्यमं माध्यमं मध्यमीयं माध्यन्दिनञ्च तत् ।"
इति हेमचन्द्रः । ६ । ६६ ॥
माध्यस्थं, क्ली, (मध्यस्थ + ष्यञ् ।) मध्यस्थस्य भावः । मध्यस्थकर्म्म । यथा, कुमारसम्भवे । १ । ५२ ।
"अयाचितारं नहि देवदेव-
मन्यः सुतां दातुमधीश्वरोऽस्मात् ।

अभ्यर्चनाभङ्गभयेन साधु-
मांधस्यामिष्टेऽप्यवलम्बतेऽर्थे ।"

माध्वकं, क्ली, (माध्वीक। एषोदरादित्वादीकारस्याकारः।) माध्वीकम्। इत्यमरटीकायां भानुदीक्षितः॥

माध्वी, स्त्री, (मधुनो विकारः। मधु+अण्। ङीप्। "अत्यावाक्यावाक्षमाध्वीति।" ६। ४। १७५। अत्रि स्त्रियां यञादेशो निपात्यते।) मद्यम्। इति त्रिकाण्डशेषः। मध्वादिलता सुरा। इति राजनिर्घण्टः॥ (यथा, मनौ। ११। ९५।

"गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।"

मधु मधुररसोऽस्यस्य कण्ठकावच्छेदे अण्। ङीप्।) मधूरकण्टकमतृणः। इति शब्दरत्नावली॥ (मधुमति, त्रि। यथा, ऋग्वेदे। ७। ७१। २।

"दिवागक्तं माध्वी नासीथां नः।"

हे माध्वी! मधुमत्यौ॥ इति तद्भाष्ये सायणः॥ नदीविशेषः। यथा, मात्स्ये। १२०। ७१।

"तेभ्यः प्रान्ता च माध्वी च ते नद्यौ सम्प्रकीर्त्तिते।")

माध्वीकं, क्ली, (माध्वी+स्वार्थे कन्।) मधूकपुष्पजातमद्यम्। तत्पर्य्यायः। मध्वासवः २ माधवकः ३ मधु ४। इत्यमरः। २। १०। ७१॥ मधुमाध्वीकमित्येकं नामेति केचित्। पूर्व्वौ द्वौ पुष्पमद्ये। (यथा, महाभारते। ३। २७७। ३६।

"कथं हि पीत्वा माध्वीकं पीत्वा च मधुमाधवीम्।
लोभं सौवीरके कुर्य्यान्नारी काचिदिति स्मरेत्॥")

परौ द्वौ द्राक्षाविकारे। इति भरतः॥ माद्वीकमिति वा पाठः। इति रमानाथः। माध्वीकस्थाने माध्वकमिति भानुदीक्षितः॥ (मधु। यथा, नैषधे। १६। ३३।

"धयतु नलिने माध्वीकं वा न वाऽभिनवागतः।
कुसुदमकरन्दौघैः कुक्षिम्भरिर्भ्रमरोत्करः।
इह तु लिहते राजीतर्षं रथाङ्गविहङ्गमा
मधु जिनवधूवक्त्राम्भोजेधुनाऽधरनामकम्॥"

"माध्वीकं मकरन्दम्। इति तट्टीकायां नारायणः॥) तत्पर्य्यायो यथा,—

"मधुमाध्वीकमाध्वीकमाधवीद्रवसारघ्यमीरितम्।
मक्षिकावरटीभृङ्गपातपुष्परसोद्भवम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

माध्वीकफलः, पुं, (माध्वीकं मधुमत् फलमस्य।) मधुनालिकेरिकः। इति राजनिर्घण्टः॥

माध्वीमधुरा, स्त्री, (माध्वीमदतश्च मधुरेति।) मधुरखर्ज्जूरिका। इति राजनिर्घण्टः॥

मान, कि अर्च्चे। इति कविकल्पद्रुमः॥ (पुरः-पचे भ्वा०-पर०-सक०-सेट्।) किं मानयति मानति। इति दुर्गादासः॥

मान, ङ विचारे। अर्च्चे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ मीमांसते ग्राह्यं धीरः। अर्च्चायां तिवादयो न स्मरन्ति रमानाथः। इति दुर्गादासः॥

मानं, क्ली, (मीयतेऽनेनेति। मा+करणे ल्युट्।) परिमाणम्। तत्पर्य्यायः। यौतवम् २ द्रवयम् ३ पाथ्यम् ४ पौतवम् ५। तत्तु तुलाकुलिप्रस्थेखिविधं भवति। तत्र तुलाव्यहरणेनोन्मानात्पलसञ्चयते। अङ्गुल्या हस्तादि। प्रस्थेन द्रोणादि। इत्यमरभरतौ।२।६।८५॥ प्रमाणम्। इति मेदिनी। ने, १५॥ यत्र तालो विरमति तत्। तदेव यद्गीयते। तच्चतुर्विधम्। समं विषमं अतीतं अनागतञ्च। इति सङ्गीतशास्त्रम्॥*॥

अथ मानपरिभाषा।

"न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित्।
अतः प्रयोगकार्य्यार्थं मानमत्रोच्यते मया॥
चरकस्य मतं वैद्यैराद्यैर्यस्मान्मतं ततः।
विहाय सर्व्वमानानि मागधं मानमुच्यते॥
त्रसरेणुभिः प्रोक्तस्त्रिंशता परमाणुभिः।
त्रसरेणुस्तु पर्य्यायनाम्ना ध्वंसीति गद्यते॥
जालान्तरगतैः सूर्य्यकरैर्ध्वंसी विलोक्यते।
षड्ध्वंसीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका।
तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः।
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम्॥
षड्भिस्तु रत्तिकाभिः स्यान्माषको हेमधानकौ।
माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते॥
टङ्कः स एव कथितस्तद्द्वयं कोलमुच्यते।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते॥
कोलद्वयन्तु कर्षः स्यात् स प्रोक्तः पाणिमानिकः।
अक्षः पिचुः पाणितलं किञ्चित् पाणिश्च तिन्दुकम्॥
विडालपदकश्चैव तथा शोडशिका मताः।
करमध्यो प्रसृतिः स्यात् सुवर्णं कवलग्रहम्॥
उदुम्बरश्च पर्य्यायैः कर्षं एव निगद्यते।
स्यात् कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा।
शुक्तिभ्याञ्च पलं ज्ञेयं सुष्टिराम्रं चतुर्थिका।
प्रकुञ्चः शोडशौ विल्वं पलमेमात्र कौर्त्तितं॥
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते।
प्रसृतिभ्यामञ्जलिः स्यात् कुडवोऽर्द्धसरावकः॥
अष्टमानञ्च स ज्ञेयः कुडवाभ्याञ्च मानिका।
सरावोऽष्टपलं तदञ्जेयमत्र विचक्षणैः॥
शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढकः।
भाजनं कांस्यपात्रञ्च चतुःषष्टिपलञ्च सः॥
चतुर्भिराढकैर्द्रोणः कलशो नल्वणोमणः।
उन्मानञ्च घटो राशिर्द्रोणाभ्यां परिकीर्त्तितः॥
द्रोणाभ्यां खारिकुम्भौ च चतुःषष्टिशरावकः।
खारीभ्यान्तु भवेद्द्रोणो वाहो गोणी च सा स्मृता॥
द्रोणैश्चतुर्भिः खारी कथिता सूक्ष्मबुद्धिभिः।
चतुःसहस्रपलिका वसवस्त्वधिका च सा॥
पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः।
तुलापलशतं ज्ञेया सर्व्वत्रैवेष निश्चयः॥
माषटङ्कविल्वानि कुडवः प्रस्थमाढकम्।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणाः॥"*॥

मागधपरिभाषायां षड्रत्तिको माषश्चतुर्व्विंशतिरत्तिकश्टङ्कः यश्चतुरत्तिकः कर्षः। अयं चरकसम्मतः॥ सुश्रुतमते। पञ्चरत्तिको माषो विंशतिरत्तिकश्टङ्कोऽशीतिरत्तिकः कर्षः। अयमेव कलिङ्गपरिभाषायामपि। यतस्तत्रापि रत्तिको माषो द्वात्रिंशद्रत्तिकश्टङ्कः। सार्द्धटङ्कद्वयमितः कर्षः।

"गुञ्जादिमानमारभ्य यावत् स्यात् कुडवस्थितिः।
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम्॥
प्रस्थादिमानमारभ्य द्विगुणन्तु द्रवार्द्रयोः।
मानं तथा तुलायास्तु द्विगुणं न क्वचित् स्मृतम्॥
वृद्धवृत्तवेद्यगुलोहादेर्भाण्डं यत्तुरङ्गलम्।
विस्तीर्णञ्च तथोच्चत्वं तन्मानं कुडवं वदेत्॥"

इति मागधमानम्॥*॥

अथ कालिङ्गमानम्।

"यतो मन्दाग्नयो रूक्षा हीनसत्त्वा नराः कलौ।
अतस्तु मात्रा तद्योग्या प्रोच्यते मुनिसम्मता॥
यवो द्वादशभिर्गौरैः सर्षपैः प्रोच्यते बुधैः।
यवद्वयेन गुञ्जा स्यात्तिगुञ्जो वल्ल उच्यते।
माषो गुञ्जाभिरष्टाभिः सम्मितो भवेत् क्वचित्॥
चतुर्भिर्माषकैः शाणः स निष्कस्तु एव च।
शाणानां माषकैः षड्भिः कर्षः स्याद्दशमाषिकः॥
चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः।
चतुःपलैश्च कुडवः प्रस्थाद्याः पूर्व्ववन्मताः॥
स्थितिर्नास्त्येव मात्राया; कालमस्मिं वयो बलम्।
प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत्॥
नाल्पं हन्त्यौषधं व्याधिं यथाम्भोऽल्पं महानलम्।
अतिमात्रञ्च दोषाय यथा ग्रस्ते बहूदकम्॥"

इति मानपरिभाषा। इति भावप्रकाशः॥

मानः, पुं, (मन्यते बुद्ध्यतेऽनेन इति। मन+घञ्।) चित्तसमुन्नतिः। इत्यमरः। १। ७। २२॥ चित्तस्य समुन्नतिरक्षुब्धता मानः। साङ्ख्ये घनाहङ्कर्षेणात्मनि चित्तोन्नतिर्मान इति। मत्यभो नास्तीति मननं मानः। इति तट्टीकायां भरतः॥ (यथा, मनौ। ३। १६३।

"ईर्षं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्जयेत्॥")

आत्मनि पूज्यताबुद्धिः। इति नीलकण्ठः॥ अमुरक्तयोर्दम्पत्योर्भावविशेषः। यथा,—

"दम्पत्योर्भाव एकत्र सतोरप्यनुरक्तयोः।
स्वाभीष्टाश्लेषवीक्षादिनिरोधी मान उच्यते॥"

इत्युज्ज्वलनीलमणिः॥

पूज्यतमः। यथा,—

"अधमाः कल्पमिच्छन्ति सन्धिमिच्छन्ति मध्यमाः।

उत्तमा मानमिच्छन्ति मानो हि महतां धनम्॥
मानो हि मूलमर्थस्य माने म्लाने धनेन किम्।
प्रभ्रष्टमानदर्पस्य किं धनेन किमायुषा॥
अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः।
उत्तमा मानमिच्छन्ति मानो हि महतां
धनम्॥"
इति मात्स्ये ११५ अध्यायः॥

प्रियापराधस्थचिका चेष्टा मानः। स च लघु-मध्यमो गुरुश्चेति। अश्रुपनेयो लघुः। कटा-पनेयो मध्यमः। कटमापनेयो गुरुः। असाध्यस्तु रसाभासः। अपरस्त्रीदर्शनादिजन्मा लघुः। गोत्रस्खलनादिजन्मा मध्यमः। अपर-स्त्रीसम्भोगदर्शनादिजन्मा गुरुः। अन्यथासिद्ध-कृतूत्थाद्यपनेयो लघुः। अन्यथावादग्रपथाद्य-पनेयो मध्यमः। चरणपातभूषणदानाद्यपनेयो गुरुः। अपरस्त्रीदर्शनादिजन्मा यथा,—

"खेदाम्बुभिः क्वचन पिच्छिलमङ्गभूमौ
श्यामोदरि क्वचन कण्टकितत्वकास्ति।
अन्या विलोकयति भाषयति प्रियेऽपि
मानः क्व धास्यति पदं तव तन्न विद्मः॥"

गोत्रस्खलनादिजन्मा यथा,—

"यद्गोत्रस्खलनं तत्तु भ्रमो यदि न मन्यते।
रोमालिवालसंस्पर्शं ग्रथयं तन्वि! कारय॥"

अपरस्त्रीसम्भोगदर्शनादिजन्मा यथा,—

"दयितस्य निरीक्ष्य भालदेशं
चरणाक्तकपिञ्जरं सपत्न्याः।
सुदृशो नयनस्य कौणभागः
स्तुतिसुक्ताः शिखरोपमा बभूवुः॥"
इति रसमञ्जरी॥

ग्रहः। इति मेदिनी। ने, १५॥ (परिच्छेदके, त्रि। यथा, ऋग्वेदे। ७। ८८। ५।

"दृहन्तं मानं वरुण स्वधावः
सहस्रद्वारं जगमा गृहन्तं।"

"मान्यन्तस्मिन् सर्वाणि भूतानि इति मानं सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः।" इति तद्भाष्ये सायनः॥ पुं, मन्त्रः। यथा, ऋग्वेदे। १। १८६। ८।

"अवोचाम निवचनान्यस्मिन्मानस्य स्तुवः
सहसाने अग्नौ।"

"मीयत इति मानो मन्त्रः तस्य स्तुवरयिः मन्त्रेणोत्पद्यमानत्वात् सप्तम्यर्थे प्रथमा।" इति तद्भाष्ये सायनः॥ निर्माता। यथाऽत्रैव। १०। १४४। ५।

"यं ते शुनश्चारमृष्टकं पदाभरदर्वतं मान-
मन्यसः।"

"मानं यागद्वारा निर्मातारम्।" इति तद्भाष्ये सायनः॥)

मानकं, क्ली, पुं, (मानं दृष्टपरिमाणमस्य। "शेषाद्विभाषा।" ५। ४। १५४। इति कप्।) माणकम्। माणकपु इति भाषा।

"कर्षौ तु पिच्छिला प्रोक्ता विस्त्रीत्वपर्यमानके।"
इति शब्दचन्द्रिका॥

"स्थलकन्दो ग्राम्यकन्दः स्थलपद्मस्तु मानकः।"
इति रत्नमाला॥

अस्य गुणाः।

"मानकं स्वादु शीतञ्च गुरु श्लेष्महरं कटु।"
इति राजवल्लभः॥

अपि च।

"मानकः स्नाय्वसृक्पित्त-कफश्रमहरो लघुः॥"
इति भावप्रकाशः॥

(विषयोऽस्य यथा,—

"पुराणं मानकं पिष्ट्वा द्विगुणीकृततण्डुलम्।
साधितं क्षीरतोयाभ्यामभ्यक्तेन पायसन्तु तत्॥
हन्तुं वातोदरं श्लेष्मं ग्रहणीं प्राक्तनामपि।
सिद्धो भिषग्भिराख्यातः प्रयोगोऽयं निरत्ययः॥"
इति वैद्यकचक्रपाणिसंग्रह उदराधिकारे॥)

मानग्रन्थिः, पुं, (मानस्य ग्रन्थिरिव। बाधकत्वात्।) अपराधः। इति हारावली॥ (मानस्य ग्रन्थिः। अभिमानवर्द्धनम्। यथा, छन्दोमञ्जर्याम्। ५। ७।

"केशवस्य शुभगीतिलोकमनोऽहरहारिणी जयति।
गोपीमानग्रन्थेर्विमोचनी दिव्यगायनाचार्य्या॥")

मानधानिका, स्त्री, कर्कटी। इति शब्दमाला॥

माननीयं, त्रि. (मान्यते पूज्यत इति। मान+अनीयर्।) मान्यम्। यथा,—

"मानो मान्योऽपि दृष्टेषु माननीयः सुरा-
सुरैः।
क्षपयामि महादेवीं मानं देहि यदे मम॥"
इति दुर्गोत्सवपद्धतिः॥

मानरज्जु, स्त्री, (मानार्थं समयपरिमाणज्ञापकं रज्जुमस्याम्।) ताम्बी। तांबी। इति भाषा। यथा,—

"यामघोषोऽथ ताम्बी स्यान्मानरज्जु विका-
लिका।"
इति चिकाण्डशेषः॥

मानवः, पुं, (मनोरपत्यम् मनोर्गोत्रापत्यं वा पुमान्। मनु+अण्।) मनोरपत्यम्। मनुष्यः। इत्यमरः। २। ६। १॥ (यथा, महाभारते। १। ७५। १२—१३।

"मनोर्वैवस्वतस्यापि मानवानां ततोऽयं प्रथितोऽभवत्।
ब्रह्मक्षत्रादयस्तस्मान्मनोर्जाताश्च मानवाः॥")

बालः। इति शब्दरत्नावली॥ (मनुना प्रोक्तम्। मनु+अण्॥ उपपुराणविशेषः। यथा, देवी-भागवते। १। ३। १३—१४।

"सनत्कुमारं प्रथमं नारसिंहं ततः परम्।
नारदीयं शिवञ्चैव दौर्वाससमनुत्तमम्।
कापिलं मानवञ्चैव तथा चौशनसं स्मृतम्॥")

मानवर्जितः, त्रि, (मानेन वर्जितः।) मान-रहितः। यथा, महाभारते। ३। ४६। ४८।

"तस्मात् त्वं नर्त्तन! पार्थ! क्लीबमध्ये मान-
वर्जितः।")

नीचः। इति धरणिः॥

मानवी, स्त्री, (मानव+स्त्रीत्वात् ङीप्।) मनुष्य-स्त्रीजातिः। तत्पर्य्यायः। मानुष्यी २ मानुषी ३ नारी ४। इति शब्दरत्नावली॥ (यथा, नैषधे। ६। ४१।

"दिवौकसं कामयते न मानवी
नवीनमाविः तवाननादिदम्।")

शासनदेवताविशेषः। इति हैमचन्द्रः। १।४५॥ स्वायम्भुवमनुकन्या। इति महाभारतम्॥ (यथा, भागवते। ३। २३। ३।

"स वै देवर्षिवर्य्यस्तां मानवीं समनुव्रताम्।")

मानवौघः, पुं, (मानवानां ओघः यस्मिन्।) तारा-विद्यायाः पीठस्य उत्तरे वायव्यादीशपर्य्यन्तं पूज्यगुरुपङ्क्तिविशेषः। यथा। तारावज्रभानु-मत्यम्बजयाम्बविद्याम्महोदर्य्यम्बसुखानन्दनाथ-परानन्दनाथपारिजातानन्दनाथकुबेश्वरानन्द-नाथविरूपाक्षानन्दनाथपर्य्यन्ताः पूज्येत्। एते मानवौघाः। तथा च तन्त्रे।

"अथ तारागुरून् वक्ष्ये दक्षाङ्गुष्ठफलप्रदान्।
ऊर्द्धैकशो वोमकैशो मौलकक्षो दक्षभुजः॥
दिव्यौघाः सिद्धिदा वत्स! सिद्धौघान् शृणु यत्नतः।
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः॥
हरिनाथो मानवौघान् शृणु वक्ष्यामि तद्-
गुरून्।
तारावती भानुमती जयाविद्या महोदरी॥
सुखानन्दः परानन्दः पारिजातः कुबेश्वरः।
विरूपाक्षः पेरवी च कथितं तारिणीकुलम्॥
आनन्दनाथशब्दान्ता गुरवः सर्व्वसिद्धिदाः।
स्त्रियोऽपि गुरुरूपाश्च अन्यान्याः परिकी-
र्त्तिताः॥"
इति तन्त्रसारः॥

मानवं, क्ली, (मानवानां समूहः इति। "ब्राह्मण-माणवकवाडवाद्यण्।" ४। २। ४२। इति यण्।) मानवसमूहः। मानवानां समूहो मानव्यं विकारसंघेति खाः मानवो बालः। ह्रस्वेन्य-मध्यः दन्त्यमध्य इत्येके। इत्यमरटीकायां भरतः॥ (मनोर्गोत्रापत्यं। "मनु+गोत्रादिभ्यो ष्यञ्।" ४। १। १०५। इत्यनेन यञ्। मनु-वंश्यीये, त्रि॥)

मानसं, क्ली, (मन एव। मनसः "ब्रह्मादिभ्यश्च।" ५। ४। ३८। इति स्वार्थे अण्।) मनः। इत्य-मरः। १। ४। ३१॥ (यथा, मार्कण्डेये। १५। ६१।

"यज्ञदानतपांसीह परत्र च न भूतये।
भवन्ति तस्य यस्यार्त्तपरित्राणे न मानसम्॥")

तस्य गुणा यथा,—

"परापरत्वं संख्याद्याः पञ्च वेगश्च मानसे।"
इति भाषापरिच्छेदः॥

(मनसि भवो जातो वा। मनसु+अण्।) मनोभवे, त्रि। यथा, सङ्क्ष्यः कर्म्ममानसम्। इत्यमरः। १। ५। २॥

"विषयेष्वतिसंरागो मानसो मद उच्यते।"
इत्येकादशीतत्त्वम्॥

"अनूढानङ्गपीड़ेव ममेयं मानसी यथा ॥"
इति प्राघः ॥

मानसतापो यथा,—
"कामक्रोधभयद्वेषलोभमोहविषादजः ।
ग्रीकास्रयावमानेर्ष्या मात्सर्य्यादिभयन्तथा ॥
मानसोऽपि द्विजश्रेष्ठ! तापो भवति नैकधा ॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः ॥

त्रिविधमानसकर्म्म । यथा,—
"परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥"
इति तिथ्यादितत्त्वम् ॥

मानसरोगा यथा,—
कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्य-
विषादेर्ष्यास्रयामात्सर्य्यप्रभृतयः । अथवा ।
उन्मादापस्मारमूर्च्छाभ्रमतमःसंन्यासप्रभृतयः ।
इति भावप्रकाशः ॥*॥ (मनसा सङ्कल्पेन कृत-
मित्यण् ।) सरोवरविशेषः । इति मेदिनी ।
से, ३१ । स च कैलासे ब्रह्मणा निर्म्मितः ।
यथा,—
"कैलासस्यापि दुष्कम्पो दानवेन्द्रेण कम्पितः ।
यक्षराक्षसगन्धर्व्वैर्नित्यं सेवितकन्दरः ॥
श्रीमान्मनोहरश्चैव नित्यं पुष्पितपादपः ।
हेमपुष्करसंछन्नं तेन वैखानसं सरः ॥
कम्पितं मानसश्चैव राजहंसनिषेवितम् ॥"
इति महाभारते हरिवंशे नारसिंहे २२८अः॥
अपि च ।
"कैलासपर्व्वते राम! मनसा निर्म्मितं परम् ।
ब्रह्मणा नरशार्दूल! तेनेदं मानसं सरः ॥
तस्मात् सुस्राव सरसः सायोध्यासुपगूहते ।
सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता ।"
इति रामायणे आदिकाण्डे २४ सर्गः ॥*॥
(पुं, नागविशेषः । यथा, महाभारते । १ । ५७ । १६ ।
"अमाहठः कामठकः सुषेणो मानसो जयः ।"
ग्राख्यजीद्वीपस्य वर्षविशेषः । यथा, मात्स्ये ।
५३ । २३ ।
"श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव केतुमान् सप्तमस्तथा ॥"
पुष्करद्वीपस्यपर्व्वतविशेषः । यथा, मात्स्ये ।
"द्वीपार्द्धस्य परिक्षिप्तः पश्चिमे मानसो गिरिः ।")
मानसजपः, पुं, (मानसेन कृतो जपः ।) विद्या
वर्णश्रेण्युच्चारणम् । यथा,
"विद्या वदक्षरश्रेणी वर्णस्वरपदात्मिकाम् ।
उच्चरेदथसंहिद्य मानसः स जपः स्मृतः ॥
तज्जपे नियमो नास्त्येव । तथा च ।
"अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन् स्वप-
न्नपि ।
मन्त्रैकशरणो विद्वान् मनसैव समभ्यसेत् ॥
न दोषो मानसे जाप्ये सर्व्वदेशेऽपि सर्व्वदा ॥"
इति तन्त्रसारः ॥

मानसतीर्थं, क्ली, (मानसं तीर्थमिव । रागाद्य-
भावात् तथात्वम् ।) रागादिरहितं मनः ।
यथा,
सूत उवाच ।
"तीर्थानि कथितान्येवं भौमानि मुनिसत्तम ! ।
मानसानीह तीर्थानि फलदानि विशेषतः ॥
मनो निर्म्मलतीर्थं हि रागादिमलनाशनम् ॥"
इति नारसिंहपुराणे ४६ अध्यायः ॥

मानसपूजा, स्त्री, (मानसकृता पूजा । ग्राक-
पार्थिववत् समासः ।) मनोरचितद्रव्यकरणक-
सपर्य्या । यथा, कृत्यसमर्थे देवीं विभाव्य
कुक्कुलीपात्रसंस्थेन सहस्रारोद्गतेन पाद्यं देवा-
यर्घ्ये दद्यात् । ततो मनस्यार्घ्यं दत्त्वा सहस्र-
दलपद्मभृङ्गारललितपरमान्ततर्पणेन आचम-
नीयं सुखे । पञ्चविंशति तत्त्वेन गन्धञ्च ।
अहिंसां विज्ञानं क्षमां दयां अलोभं अमोहं
अमात्सर्य्यं अमायां ज्ञानहङ्कारं अरागं अद्वेषं
इन्द्रियाणि द्वादश एतानि पुष्पाणि च प्रदाप-
येत् । ततस्तेजोरूपं दीपं वायुरूपं धूपं दद्यात्
अमरं चामरं दर्पणं सूर्य्यं चन्द्रं छत्रं पद्मानु
मेखलां आनन्दं हारमुत्तमं अनाहतध्वनिमयीं
घण्टां निवेदयेत् । ततः सुधारसाम्बुधिं मांस-
पर्व्वतं ब्रह्माण्डपूरितं पायसञ्च दत्त्वा ।
"मनोनर्त्तनसत्तालैः शृङ्गारादिरसोद्भवैः ।
भृत्यैर्गीतैश्च वाद्यैश्च तोषयेत् परमेश्वरीम् ॥"
एवं संपूज्य अभेदेन जपः कार्य्यः । इति तन्त्र-
सारे त्रिपुराप्रकरणम् ॥ * ॥ मानसैर्गुरुपूजा
यथा, नीलतन्त्रे ।
"ततो मानसगन्धाद्यैः पूजयेत् स्वसुहृदया ।
कनिष्ठा पृथिवीतत्त्वं तद्योगाङ्गन्धयोजनम् ।
अङ्गुष्ठो गगनं तत्त्वं तेनैव पुष्पयोजनम् ।
तर्ज्जनी वायुतत्त्वं स्याद्धूपं तेनैव योजयेत् ॥
अनामा जलतत्त्वं स्यात्तेनैव योजयेच्च कम् ।
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधीः ॥
जपं समर्प्य भक्त्या च प्रणमेद्दण्डवद्भुवि ॥"
अपि च ।
"मिथुनं चिन्तयित्वा तु मानसैरुपचारकैः ।
भौतिकैः पूजयेद्विद्वान् सुधामन्त्रसमन्वितैः ॥
भूम्याकाशमरुद्वह्निवारिमन्त्रैः सबिन्दुकैः ।
कनिष्ठाङ्गुलितर्ज्जन्यौ मध्यमानामिके तथा ॥
अङ्गुष्ठेन समायोगान्मुद्राः पञ्च प्रकीर्त्तिताः ।
पृथिव्यात्मकगन्धः स्यादाकाशात्मकपुष्पकम् ॥
धूपो वायुात्मकः प्रोक्तो दीपो वह्न्यात्मकः परः ।
रसात्मकञ्च नैवेद्यं पूजा पञ्चोपचारिका ॥
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधीः ॥"
इत्यन्नदानकल्पः ॥
अन्यच ।
"मानसैरुपचारैश्च संपूज्य कल्पयेन्मुदा ।
गन्धं भूम्यात्मकं दद्याद्भावपुष्पं ततः परम् ॥
धूपं वायुात्मकं देयं तेजसा दीपमेव च ।
नैवेद्यमन्नतं दद्यात् पानीयं वरुणात्मकम् ॥
अमरं सुकुरं दद्याच्चामरं छत्रमेव च ।
तत्तन्मुद्राविधानेन संपूज्यात्मगुरुं जपेत् ॥
यथाशक्ति जपं कृत्वा समाप्य कवचं पठेत् ॥"
इति कङ्कालमालिनीतन्त्रम् ॥

पूजाक्रमस्तु । निजगुरुं ध्यात्वासुकानन्दनाथा-
सुकशक्त्यात्मश्रीपादुकां पूजयामीति मानसै-
र्गन्धाद्यैरुक्तकुसुमैरर्चयेत् । कनिष्ठाभ्यां लं पृथि-
व्यात्मकं गन्धं समर्पयामि नमः । अङ्गुष्ठाभ्यां हं
आकाशात्मकं पुष्पं समर्पयामि नमः । तर्ज्ज-
नीभ्यां यं वायुात्मकं धूपं समर्पयामि नमः ।
मध्यमाभ्यां रं वह्न्यात्मकं दीपं समर्पयामि
नमः । अनामिकाभ्यां वं अमृतात्मकं नैवेद्यं
समर्पयामि नमः । इति कुलमूलावतारकल्प-
सूत्रटीकायां तृतीयकाण्डम् ॥

मानसव्रतं, क्ली, (मानसकृतं व्रतम् । ग्राकपार्थिव-
वत् समासः ।) अहिंसादि । यथा,—
"अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्कता ।
एतानि मानसान्याहुर्व्रतानि तु धराधरे ॥"
इति वराहपुराणम् ॥

मानसालयः, पुं, (मानसे आलयो यस्य ।) हंसः ।
इति राजनिर्घण्टः ॥

मानसिकं, त्रि, (मानस+ठञ् ।) मनोभवम् ।
मानसशब्दात् ष्ठिकप्रत्ययेन निष्पन्नम् ॥ (पुं,
विष्णुः । यथा, महाभारते । १२ । ३६८ । ४ ।
"नमस्ते देवदेवेश! निष्क्रिय!
निर्गुण! मानसिक! नामनामिक!।")

मानसी, स्त्री, (मानस+स्त्रीत्वात् ङीप् ।) विद्या-
देवीविशेषः । इति हेमचन्द्रः । २ । १५ ॥ मनो-
भवा च ॥ (यथा, विष्णुपुराणे । १ । ७ । १ ।
"ततोऽभिध्यायतस्तस्य जज्ञिरे मानसीः प्रजाः ॥")

मानसूत्रं, क्ली, (मानस्य गात्रप्रमाणस्य तन्
मानार्थं वा सूत्रम् ।) स्वर्णादिनिर्म्मितकटि-
सूत्रम् । इति धनञ्जयः । गोट् इति भाषा ॥

मानसौकाः, [स्] पुं, (मानसं सर ओको वासस्थानं
यस्य ।) हंसः । इत्यमरः । २ । ५ । २३ ।
(यथा, महाभारते । ८ । ४१ । १३ ।
"वयं हंसाश्चरामेमां पृथिवीं मानसौकसः ।")

मानिका, स्त्री, (मानयति गर्व्वीकरोतीति । मन+
णिच्+खुल् टाप् अकारस्येत्वञ्च ।) मद्यम् ।
इति शब्दरत्नावली ॥ (माने प्रभवतीति । मान
+ठक् ।) ग्रारावः । इति वैद्यकपरिभाषा ।
शेर इति भाषा ॥

मानिनी, स्त्री, फली वृक्षः । इति मेदिनी । ने,
१०६ (मानं अस्त्यस्याः । मान+इनिः । ङीप् ।
मौनवती च ॥ (यथा, गीतगोविन्दे । ६ । २ ।
"हरिरभिसरति वहति मदुपवने ।
किमपरमधिकसुखं सखि ! भवने ॥
माधवे माकुरु मानिनि ! मानमये ॥"
अभिमानवती च । यथा, कुमारे । ५ । ५६ ।
"इयं महेन्द्रप्रभृतीनधिश्रिय-
श्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्य्यं मदनस्य नियहात्
पिनाकपाणिं पतिमाप्तुमिच्छति ॥"
"मानिनीन्द्राणीप्रभृतीरतिक्रम्य वर्त्तितव्यमित्यभि-
मानवती ।" इति तट्टीकायां मल्लिनाथः ॥)
राज्यवर्द्धनस्य पत्नी । यथा, मार्कण्डेये । १०६ । ९० ।

"विदूरथस्य तनया दाक्षिण्यात्यस्य भूभृतः।
तस्य पत्नी बभूवाथ मानिनी नाम मानिनी ॥")

मानी, [न्]क्ति, (मानोऽस्यास्तीति। मान+इनि:।) मानविशिष्टः। इति मेदिनी। ने, ९०६॥ (यथा, मार्कण्डेये। १२३। २२।
"ततस्ते भूभृतः सर्वे बहुशस्तेन मानिना।
निराकृताः सुनिर्विण्णाः प्रोचुरन्योन्यमाकुलाः॥")
सिंहः। इति राजनिर्घण्टः॥

मानुषः, पुं, (मनोर्जातः। मनु+"मनोर्जातावञ् यतौ लुक् च।" ४।१।१६१। इत्यञ् युगागमश्च।) मनुष्यः। इत्यमरः। २।६।१॥ (यथा, मनौ। ६। २८४।
"चिकित्सकानां सर्वेषां मिथ्याप्रचरतां दमः।
असाधुषु प्रथमो साधुषु तु मध्यमः॥")
मनुष्यसम्बन्धिनि, त्रि। यथा, महाभारते। १३। ६। २०।
"अज्ञात्वा मानुषं कर्म्म यो दैवमनुधावते।
वृथा श्राम्यति संप्राप्य पतिं स्त्रीवमिवाङ्गना॥")

मानुषिकं, त्रि, (मनुष्यस्य भावः कर्म्म वा। मनुष्य+ठञ्।) मनुष्यस्य कर्म्मादि। मनुष्यस्येदमितीदमर्थे ञिकप्रत्ययेन निष्पन्नम्॥

मानुषी, स्त्री, (मानुषस्य स्त्री। मानुष+जातित्वात् ङीष्।) मनुष्यस्त्रीजातिः। यथा,—
मनुष्यो मानुषी नारी मानवी मानुषस्त्रियाम्।
इति शब्दरत्नावली॥
(मनुष्य+अण्+ङीष्।) चिकित्साविशेषः। यथा,—
"आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता।"
इति शब्दचन्द्रिका॥

मानुष्यं, क्ली, (मनुष्यस्य भावः। मनुष्यस्येदमिति वा। मनुष्य+अण्।) मनुष्यस्य भावः। मनुष्यत्वम्। (यथा, भागवते। ४। २१। २८।
"स वञ्चितो बतात्मघ्नः क्षणदेव मघवता सुधिः।
जह्यापवर्ग्यं मानुष्यं विषयेषु विषज्जते॥")
मनुष्यशरीरम्। यथा,—
"मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम्।
यः करोति स संमूढो जलबुद्बुदसन्निभे॥"
इति शुद्धितत्त्वे याज्ञवल्क्यवचनम्॥
(मनुष्यसम्बन्धिनि, त्रि। यथा, महाभारते। १। १५३। ११।
"गच्छ जानीहि के न्वेते शेरते वनमाश्रिताः।
मानुष्यो बलवान् गन्धो घ्राणं तर्पयतीव मे॥")

मानुष्यकं, क्ली, (मनुष्याणां समूहः। मनुष्य+"गोत्रोक्षोष्ट्रोरभ्रेति।" ४।२।३९। इति वुञ्।) मनुष्यसमूहः। इत्यमरः। ३।२। ३३। (मनुष्यस्येदं मानुष+यत्। स्वार्थे कन्। (मनुष्यसम्बन्धिनि, त्रि। यथा, महाभारते। ५। ७७। ८।
"सुमन्त्रितं सुनीतञ्च न्यायतश्चोपपादितम्।
ज्ञातं मानुष्यकं कर्म्म देवेनापि विरुध्यते॥")

मानोन्नकं, क्ली, (मनोन्नस्य भावः कर्म्म वेति। "इदमनोन्नादिभ्यश्च।" ५। १। १३१। इति वुञ्।) मनोन्नता। मनोन्नस्य भाव इत्यर्थे कन् प्रत्ययेन निष्पन्नम्॥

मान्द्यं, क्ली, (मन्दस्य भावः कर्म्म वा। मन्द+"पत्यन्तपुरोहितादिभ्यो यक्।" ५।१।१२८। इति यक्।) रोगः। इति हेमचन्द्रः॥ मन्दता च। (यथा, कथासरित्सागरे। २४। १३५।
"विश्वस्ते च ततस्तस्मिन् पुरोधसि चकार सः।
मान्द्यमन्यतराहारग्रीक्षततनुर्नृपः॥")

मान्धाता, [तृ] पुं, (मां धास्यतीति। धेट्+तृच्।) युवनाश्वराजपुत्रः। तत्पर्य्यायः। युवनाश्वजः २। इति हेमचन्द्रः। १। ३६३। तद्विवरणं यथा। 'तस्मात् प्रसेनजित् ततो युवनाश्वोऽभवत्। तस्य च पुत्रस्यातिनिर्व्वेदात् सुनीतामाश्रममण्डले निवसतः कृपालुभिस्तैर्मुनिभिरपत्योत्पादनायेष्टिः कृता। तस्याश्चार्द्धरात्रे निर्वृत्तायां मन्त्रपूतजलपूर्णकलसं वेद्यीमध्ये निवेश्य ते सुनयः सुषुपुः। सुप्तेषु च तेष्वतीवतृट्परीतः स भूपालस्तमाश्रममण्डलं विवेश। सुषुप्सांश्च तानृषीन् नैवोत्थापयामास। तच्च कलसजलमपरिमेयमाहात्म्यं मन्त्रपूतं पपौ। प्रबुद्धाश्च ऋषयः पप्रच्छुः। केनैतन्मन्त्रपूतं वारि पीतम्। अत्र हि पौते राज्ञोऽस्य युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्रं जनयिष्यति। इत्याकर्ण्य च राजा अजानता मया पीतमित्याह। गर्भञ्च युवनाश्वोदरेऽभवत्। क्रमेण च ववृधे। प्राप्तसमयश्च दक्षिणं कुक्षिमवनीपतेर्निभिद्य निश्चक्राम। न चासौ राजा ममार। जातो नामैष कं धास्यतीति ते सुनयः प्रोचुः। अथाह स्म देवराड्गवीत्। मामयं धास्यति। ततोऽसौ मान्धाता नामतोऽभवत्। वक्त्रे चास्य प्रदेशिनी देवेन्द्रेण न्यस्ता तां पपौ। ताधान्ततमाविर्बभूवाद्वैवेकेन ववर्द्धत। स तु मान्धाता चक्रवर्त्ती सप्तद्वीपां मही मबुभुजे। भवति चात्र श्लोकः।
"यावत् सूर्य्य उदेतिस्म यावच्च प्रतितिष्ठति।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते॥"
मान्धाता ग्रग्रविन्दुदुहितरं बिन्दुमतीमुपयेमे। पुरुकुत्समम्बरीषं सुयुकुन्दञ्च तस्यां पुत्रत्रयमुत्पादयामास। पञ्चाशच्च दुहितरस्तस्यामेव तस्य नृपतेर्जज्ञिरे।" इति विष्णुपुराणे ४ अंशे २ अध्यायः॥

मान्यः, त्रि, (मान्यत इति। मान+कर्म्मणि यत्।) अर्च्यः। तत्पर्य्यायः। पूज्यः २ प्रतीक्ष्यः ३ भगवान् ४ भट्टारकः ५। इति जटाधरः॥ (यथा च मनौ। २। १३६।
"तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ।"
प्रार्थनीयः। यथा, रामायणे। २। ८। १८।
"यथा वै भरतो मान्यस्तथा भूयोऽपि राघवः।
कौशल्यातोऽतिरिक्तञ्च मम सम्भूयते बहु॥"
"मान्यः प्रार्थनीयः श्रेयस्करः। तथा तद्वत्।" इति तट्टीकायां रामानुजः॥)

मान्यस्थानं, क्ली, (मान्यस्य स्थानं।) पूज्यस्थानम्। यथा,—
"वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी।
एतानि मान्यस्थानानि गरीयो यदुयदुत्तरम्॥
पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च।
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः॥"
इति मानवे २ अध्यायः। कौर्म्मे ११ अध्यायेऽप्येवम्॥

माया, स्त्री, (मान्य+स्त्रियां टाप्।) मदम्माता। यथा,—
"अविद्यास्मिता तु माया च मदम्माता च मोहना॥"
इति शब्दमाला॥
पूज्या च॥

मापत्यः, पुं, (मा विद्यतेऽपत्यमस्य।) कामः। इति हेमायुधः॥

मापनः, पुं, (मापयति खर्व्वादिकमनेनेति। मा+णिच्+करणे ल्युट्।) तूलः। इति शब्दचन्द्रिका॥ परिमाणे, क्ली। (स्त्रियामप्यत्र। यथा, महाभारते। १। ५१। १५।
"यस्मिन् देशे च काले च मापनेयं प्रवर्त्तिता॥")

मामकं, त्रि, (ममेदम्। अस्मद्+"तवकममकावेकवचने।" ४। ३। ३। इति अण् ममकादेशश्च।) मदीयम्। इति मेदिनी। के, १३८॥ (यथा, महाभारते। १। १०५। १२।
"ततो मामाह स मुनिर्गर्भस्तृतज्ञ मामकम्॥")
ममतायुक्तः। इति शब्दमाला॥ यथा च महाभारते। ४। ५०। १७।
"अत्र या मामिका बुद्धिः श्रूयतां यदि रोचते॥")

मामकः, पुं, (माम+स्वार्थे कन्।) मातुलः। इति मेदिनी॥ के, १३८॥ ममायं वा ममेदमिति बुद्धियेस्य। कप्।) जघन्यः। इति शब्दमाला॥

मामकीनं, त्रि, (ममेदम्। अस्मद्+"तवकममकावेकवचने।" ४। ३। ३। इति खञ्। ममकादेशश्च।) मदीयम्। ममेदमित्यर्थे कीने क्लीबे किञ्च अस्मद एकत्वाक्षरादेशे अस्य च ममकादेशे ङङौ मामकीनम्। इति दुर्गादासः॥ (यथा, कथासरित्सागरे। १२। १४५।
"एतच्च मे कियत् किं हि न बुद्ध्या साधयाम्यहम्।
प्रज्ञावं मामकीनं च शृणुतां वच्मि वै॥")

मायः, पुं, (माया अस्त्यस्मिन्निति। माया+अर्श आदित्वादच्।) पीताम्बरः। (यथा, महाभारते। १३। २४। ११।
"नमो विश्वाय मायाय चिन्त्याचिन्त्याय वै नमः॥")
(मयस्यापत्यं पुमान्। मय+अण्।) असुरः। इति मेदिनी॥ ये, ३६॥

माया, स्त्री, (मीयते अपरोक्षवत् प्रदर्श्यतेऽनया इति। मा+"माङ्याभ्यां विच्छ्योः यः।" उणा० ४। १०६। इति यः टाप्।) इन्द्रजालादिः

तत्पर्य्यायः। भ्रामरी २। इत्यमरः। २। १०। १९। इन्द्रजालिः ३ कुहकम् ४ कुहकिः ५ भ्रामरिः ६। इति जटाधरः। भ्रामरी ७। इति शब्दरत्नावली। माति विश्वमसौ मनो-वादिः। भ्रमरस्य देवस्य इयं भ्रामरी तेन प्राङ्निर्म्मितत्वात्। इति भरतः। ✱। बुद्धिः। इति मेदिनी। ये, ७६। (मौमिते जानाति संख्यायतयेति। मा+यः टाप्।) लक्ष्मीः। रमा। इति वाचार्थे हेमचन्द्रः। प्रकृतेः। यथा,—

"माया तु प्रकृतेः प्राहुः कुहकेनिर्म्मितेच सा॥"

(ब्रह्मा। यथा, ऋग्वेदे। २। १०। ५।

"अधारयत् पृथिवीं विश्वधायस मरुद्भान् मायया वामवसुः।"

"मायया प्रज्ञया।" इति तद्भाष्ये सायणः।) राज्ञां क्षुद्रोपायविशेषः। यथा,—

"मायोपेक्षेन्द्रजालानि क्षुद्रोपाया रमे जयः॥"

लक्ष्मीः। इति च हेमचन्द्रः। बुद्धमाता। इत्यमरकोषे मायादेवीसुतशब्ददर्शनात्। दुर्गा। यथा,—

"दुर्गे शिवेऽभये माये नारायणि सनातनि। जये मे मङ्गलं देहि नमस्ते सर्व्वमङ्गले।

राजन्! श्रीवचनो माश्च याश्च प्रापणवाचकः। तां प्रापयति या सद्यः सा माया परिकीर्त्तिता॥ माश्च मोहार्थवचनो याश्च प्रापणवाचकः। तं प्रापयति या नित्यं सा माया परिकीर्त्तिता। इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २७ अध्यायः॥

अपि च।

"विचित्रकार्य्यकारित्वा अचिन्तितफलप्रदा। खलेन्द्रजालवल्लोके माया तेन प्रकीर्त्तिता॥"

इति देवीपुराणे ४५ अध्यायः। ✱। विस्तृतप्रपञ्चौतिसाधनं मायम्। इति नागोजी-भट्टः। अघटनघटनपटीयसी माया। इति केचित्। ईश्वरशक्तिः। तस्या नामान्तरं यथा। प्रकृतिः २ अविद्या ३ अज्ञानम् ४ प्रधानम् ५ शक्तिः ६ अजा ७। सृष्टिकाले भगवान् आदौ मायां प्रकाशयामास। सा प्रकृत्यात्मकसत्त्वरजस्तमोगुणमयी। कार्य्यकारणरूपा च। सत्त्वरजस्तमोगुणमयी। तस्याः शक्तिद्वयं आवरणं विक्षेपश्च। तस्या मायाया महत्तत्त्वं जातम्। तस्मादहङ्कारः। तस्मात् पञ्चभूतम्। तस्मात् ब्रह्माण्डम्। इति श्रीभागवतमतम्। (मायास्वरूपम्। यथा च प्रत्यक्षम्। ६। १२९—१४१।

"तत्त्वनिश्चयकामेन न्यायागमविचारिणाम्। एकैव प्रतिपत्तिः स्यात् साध्यत्र स्फुटसुच्यते॥ मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्। अस्यावयवभूतैस्तु व्याप्तं सर्व्वमिदं जगत्। इति श्रुत्यनुसारेण न्यायो विषय ईश्वरे। तथा सत्त्वविरोधः स्यात् स्थावरान्तेष्वदादिनाम्॥ माया चेयं तमोरूपा तापनीये तदीरणात्। अनुभूतिं तत्र मानं प्रतिजज्ञे श्रुतिः स्वयम्॥ अयं मोहात्मकं तत्त्वमनुभावयति श्रुतिः। आब्रह्मस्तम्बपर्य्यन्तमन्यत्तस्य साक्षयोः॥ अचिदात्मघटादीनां यत् स्वरूपं जड़ं हि तत्। यच्च कुड्यीभवेद् बुद्धिः स मोह इति लौकिकाः॥ इत्यं लौकिकदृष्ट्यैतत् सर्व्वैरप्यनुभूयते। युक्तिदृश्या तन्निर्वाच्यं नासदासीदिति श्रुतेः॥ नासदासीद् विभातत्त्वान्नो सदासीच्च बाधनात्। विद्याद्दृश्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः॥ तुच्छानिर्व्वचनीया च वास्तवी चेत्यसौ त्रिधा। ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः॥ अस्य सत्त्वमसत्त्वञ्च जगतो दर्शयत्यसौ। प्रसारयाम सङ्कोचात् यथा चित्रपटस्तथा॥ असतस्त्वा हि माया स्यादप्रतीतेर्न्निगा चितिम्। सतस्त्वापि तथैव स्यादसङ्गस्यान्यथाऽऽप्तेः॥ कूटस्थासङ्गमात्मानं जड़त्वेन करोति सा। चिदाभासस्वरूपेण जीवेशावपि निर्म्ममे॥ कूटस्थमनपाक्षत्य करोति जगदादिकम्। दुर्घटैकविधायिन्यां मायायां का क्षमतृप्तिः॥ द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमक्षणि। मायाया दुर्घटत्वञ्च सतः सिध्यति नान्यथा॥ न वेत्ति मायिनं लोको यावत् तावत्क्षमतृप्तिम्। धत्ते मनसि प्रश्नान्तु मायेवेत्युपशाम्यति॥ प्रसरन्ति हि चोद्यानि जगदस्तुत्वादिषु। न चोदनीयं मायायां तस्माच्चोद्यैकरूपतः॥ चोद्येऽपि यदि चोद्यं स्यात् तच्चोद्ये चोद्यते मया। परिहार्य्यं ततश्चोद्यं न पुनः प्रतिचोद्यताम्॥ विक्षेपैकशरीराया मायायाश्चोद्यरूपतः। अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः॥ मायात्वमेव निश्चेयमिति चेत् तर्हि निश्चितु। लोकप्रसिद्धमायाया लक्षणं यत् तदीक्ष्यताम्॥ न निरूपयितुं शक्या विक्षेपं भावते च या। सा मायेतीन्द्रजालादौ लोकाः सम्प्रतिपेदिरे॥") विष्णुमायास्वरूपं यथा,—

"यामेतां भावसे देव! मम मायेति नित्यशः। का माया कीदृशी विष्णो! किं वा मायेति चोच्यते।

श्रोतुमिच्छामि मायार्थं रहस्यं परमुत्तमम्। ततस्तस्या वचः श्रुत्वा विष्णुर्मायाकरण्डकः। प्रहस्य मधुरं वाक्यं प्रत्युवाच वसुन्धराम्। भूमे! मा पृच्छ मायां मे यस्यां पृच्छसि सादरम्। इयं लोकं किमर्थं तं प्राप्तासि मद्विलोकनात्। अद्यापि मां न जानन्ति ब्रह्मेन्द्राः सपितामहाः॥ मम माया विधात्रीयं! किं पुनस्त्वं वसुन्धरे!॥ यज्जन्यो वर्द्धते यत्र तज्जलेन प्रपूर्य्यते। देशो निर्ज्जलतां याति एषा माया मम प्रिये!॥ सोमोऽपि क्षीयते यत्र यत्र वापि विवर्द्धते। अमायां स न दृश्येत मायेयं मम सुन्दरि!॥ हेमन्ते सलिलं कूपे उष्णं भवति तत्त्वतः। भवेच्च शीतलं ग्रीष्मे मायेयं मम तत्त्वतः॥ पश्चिमां दिशमाश्राय यदस्तं याति भास्करः। उदेति पूर्व्वतः प्रातर्मायेयं मम सुन्दरि!॥ शोणितञ्चैव शुक्रञ्च उभे प्राणिनि संस्थिते। गर्भे च जायते जन्तुर्मम मायैव चोत्तमा॥ जीवः प्रविश्य गर्भे तु सुखदुःखानि विन्दति। जातश्च विस्मरेत् सर्व्वमेषा माया ममोत्तमा॥ आत्मकर्म्माश्रितो जीवो नरसंज्ञो गतस्पृहः। कर्म्मणा नीयतेऽन्यत्र मायेषा मम चोत्तमा॥ शुक्रशोणितसंयोगाज्जायन्ते यदि जन्तवः। अङ्गुल्यश्चरणौ चैव भुजौ शीर्षं कटिस्तथा॥ पृष्ठं तथोदरञ्चैव दन्तौष्ठपुटनासिका। कर्णौ नेत्रकपोलौ च ललाटं जिह्वया सदा॥ एतया मायया युक्ता जायन्ते यदि जन्तवः। तस्यैव जीर्य्यते जन्तोर्भुक्तं पीतञ्च वह्निना। अयञ्च स्रवते जन्तुरेषा माया ममोत्तमा॥ शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः। अन्नात् प्रवर्त्तते जन्तुरेषा माया मम प्रिये!॥ सर्व्वत्तुषु निराकारः स्थावरे जङ्गमे तथा। तत्त्वं न ज्ञायते तस्य मायेषा मम सुन्दरि!॥ आपो विद्यास्तथा भौमा आपो चैव प्रतिष्ठिताः। न च दृष्टिं प्रयान्त्यन्यत्र मायेषा परमा मम॥ दृष्टौ बहूदकाः सर्व्वे पल्वलानि सरांसि च। ग्रीष्मे सर्व्वाणि शुष्यन्ति एतन्मायाबलं मम॥ हिमवच्छिखराज्जाता गङ्गा मन्दाकिनी नदी। गङ्गेसा सा भवेद्गङ्गा मायेषा मम कीर्त्तिता॥ मेघा गर्ज्जन्ति सलिलं जलवात् सलिलार्णवात्। वर्षन्ति मधुरं लोके सर्व्वं मायाबलं मम॥ रोगार्त्ता जन्तवः केचित् भक्षयन्ति महौषधम्। तस्य वीर्य्यं समाश्रित्य मायां तु विद्महाम्यहम्॥ औषधे दीयमाने तु जन्तुः पल्वलमेति यत्। निर्वीर्य्यमौषधं ज्ञात्वा काको भूत्वा हराम्यहम्॥ प्रथमं जायते गर्भः पश्चाज्जायेत वै पुमान्। जायते मध्यमं रूपं ततोऽपि जरया पुनः। तत इन्द्रियनाशश्च एतन्मायाबलं मम॥ एकधीजात् प्रकीर्णादि जायन्ते तानि भूरिशः। तत्राप्यहं विद्महामि मायायोगेन माधवि!॥ लोक एवं विजानाति गरुड़ो वहतेऽच्युतम्। भूत्वा वेगेन गरुड़ो वहाम्यात्मानमात्मना॥ या एता देवताः सर्व्वा यज्ञभागेन तोषिताः। मायामेतामहं ज्ञात्वा तोषयामि दिवौकसः॥ लोकाः सर्व्वे विजानन्ति देवा नित्यं मखाग्निगः। मायामेतामहं ज्ञात्वा यजामि त्रिदशान् सदा॥ सर्व्वोऽपि यजते लोको यशश्च इच्छतीह। मायामाङ्गिरसीं ज्ञात्वा याजयामि दिवौकसः॥ सर्व्वे लोका विजानन्ति वरुणः पाति सागरम्। मायान्तु वारुणीं ज्ञात्वाहं रक्षामि महोदधिम्॥ सर्व्वे लोका विजानन्ति कुबेरोऽयं धनेश्वरः। कुबेरमायामादाय अहं रक्षामि तद्धनम्॥ एवं लोका विजानन्ति इन्द्रः शक्रेण रक्षितः। शाक्रीं मायां समाश्राय मया इन्द्रो निरक्षितः॥ एवं लोका विजानन्ति आदित्यश्च ध्रुवो महान्। मेरुं मायामयं ज्ञात्वा वहाम्यादित्यमेव च॥ एवं चाभावते लोको जगं किमप्यतेऽखिलम्। बहुवासुखमाश्राय पिबामि तदहं जलम्॥ वायुं मायामयं ज्ञात्वा मेघेषु विद्महाम्यहम्। यदिदं भावते लोकः कुबेर्यं तिष्ठते जगत्॥

देवा अपि न जानन्ति अन्तं कुत्र तिष्ठति ।
मम मायानियोगेन तिष्ठते क्षौषधं वने ॥
लोको ह्येवं विजानाति राजा पालयते प्रजाः ।
राजमायामहं ज्ञात्वा पालयामि वसुन्धराम् ॥
ये तु वै द्वादशादित्या उदेष्यन्ति युगक्षये ।
प्रविश्य तानहं भूमे ! मायां लोके दहाम्यहम् ॥
वर्षंच पांशुना भूमिलोकेषु यतते सदा ।
मायां पांशुमयीं कृत्वा पूरयाम्यखिलं जगत् ॥
वर्षते यत्र संवर्त्तो धाराभिर्मुषलाकृति ।
मायां सांवर्त्तकीं कृत्वा पूरयाम्यखिलं जगत् ॥
यत् क्षपामि वरारोहे ! ग्रैवस्योपरि वारिणि ।
अनन्तमायया चाहं धारयामि क्षपामि च ॥
वराहमायामादाय भूमे ! जानामि किञ्च वै ।
देवा यत्र विलीयन्ते सा माया मम कौर्त्तिता ॥
त्वञ्चापि देव्यवीं मायां कृत्वा जानासि किञ्च
तत् ।
धारितासि च सुश्रोणि ! वाराहं सप्तदशैव तु ॥
माया तु मम देवीयं कृत्वा लोकार्त्तवां महीम् ।
मम मायावलं क्षीतदृयेन तिष्ठाम्यहं जले ॥
प्रलयार्त्तिं प्रतं रुद्रं दहामि च हरामि च ।
तेऽपि मायां न जानन्ति मम मायाविमो-
हिताः ॥
अथ पिङ्गलाक्षेव य एते सूर्य्यवर्चसः ।
मायां पिङ्गमयीं क्षीतां ग्रसामि हि च तत्वतः ॥
किन्तु मायेव सुश्रोणि ! अन्यच्च शृणु
सुन्दरि ! ॥"
इति वाराहे मायाचक्रम् ॥*॥
अथ मायास्तोत्रम् ।
शौनक उवाच ।
"अग्निध्वजो महाराजः स्तुत्वा मायां गतः
कुतः ।
का वा मायास्तुतिः सूत ! वद तत्त्वविदांवर ! ।
या त्वत्कथा विष्णुकथा वक्तव्या सा विमुह्यते ॥"
सूत उवाच ।
"शृणुध्वं मुनयः सर्व्वे मार्कण्डेयाय पृच्छते ।
शुकः प्राह विशुद्धात्मा मायास्तवमनुत्तमम् ॥
तत् शृणुध्व प्रवक्ष्यामि यथाधीतं यथाश्रुतम् ।
सर्व्वकामप्रदं नृणां पापतापविनाशनम् ॥"
शुक उवाच ।
"भक्ताटनगरं त्यक्त्वा विष्णुभक्तः अग्निध्वजः ।
आत्मसंसारमोक्षाय मायास्तवमलं जगौ ॥"
अग्निध्वज उवाच ।
"ॐ ह्रींकारां सत्त्वसारां विमुह्यां
ब्रह्मादीनां मातरं वेदबोधाम् ।
तन्वीं स्वाहां भूततन्मात्रकक्ष्यां
वन्दे वन्द्यां देवगन्धर्व्वसिद्धैः ॥
लोकातीतां दैत्यभीतां समीड्यां
भूतैर्भव्यां वासवामासिकार्थैः ।
नानारूपैर्दैवतिर्य्यङ्मनुष्यै-
स्तामाधारां ब्रह्मरूपां नमामि ॥
यस्या भाया चिजगद्भाति भूतै-
र्नं भाव्येतत्तदभावे विधातुः ।
विद्मस्तीतां कालकक्षोलकोलां
नीलापाङ्गीं चिप्रसंसारदुर्गाम् ॥
पूर्व्वां प्राप्यां दैत्यलभ्यां वरण्या-
माद्यां ग्रेवि मध्यतो या विभाति ।
कालो दैवं कर्म्म सोपाधयो ये
तस्यां तास्यां तां विशिष्टां नमामि ॥
भूमौ गन्धो रसताप्सु प्रतिष्ठा
रूपं तेजस्येव वायौ स्पृशत्वम् ।
खे शब्दो वै यद्विदा भाति नाना
तामाद्यां तां विश्वरूपां नमामि ॥
सावित्री त्वं ब्रह्मरूपा भवानी
भूतेशस्य श्रीपतेः श्रीस्वरूपा ।
शची शक्रस्यापि नाकेश्वरस्य
पत्नी श्रेष्ठा भासि माये ! जगत्सु ॥
बाल्ये बाला युवती योवने त्वं
वार्द्धक्ये या स्थविरा कालकल्पा ।
नानाकारैर्योगयोगैश्च धर्म्मो
भक्ष्या वै त्वं कामवन्द्या विभासि ॥
वरेण्या त्वं वरदा लोकसिद्धा
साध्वी धन्या लोकमान्या सुकन्या ।
चण्डी दुर्गा कालिका कालिकाख्या
नानादेशे रूपवेशैर्विभासि ॥
तव चरणसरोजं देवि ! देवादिवन्द्यं
यदि हृदयसरोजे भावयन्तीह भक्ता ।
मुक्तजनमतिशुद्धं हृत्सरोजे स्मरन्ति
श्रुतिगुरुकुहरे वा संश्रुतं धर्म्मसन्यत् ॥
जगयति जगदाद्ये सर्व्वसिद्धिश्च तेषाम् ॥
मायास्तवमिदं पुण्यं शुकदेवेन भाषितम् ।
मार्कण्डेयादयश्चापि सिद्धिं लेभे ग्रग्निध्वजः ॥
लोकासुखे तपस्तप्त्वा हरिं ध्यात्वा वना-
न्तरे ।
सुदर्शनेन निहतो वैकुण्ठग्रहरं ययौ ॥"
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये मायास्तव ऊनत्रिंशोऽध्यायः ॥ (शक्तिः सामर्थ्यं वा ।
यथा, ऋग्वेदे । ४ । ३ । २१ ।
"दासानामिन्द्रो मायया ।"
"मायया स्वकीयया शक्त्या ।" इति तद्भाष्ये
सायणः ॥)
मायाकारः, पुं, (मायां ऐन्द्रजालव्यापारं करोतीति । कृ + अण् ।) ऐन्द्रजालिकः । वाजीकर इति भाषा । तत्पर्य्यायः । प्रातिहारिकः २ । इत्यमरः । २ । १० । ९१ ॥ मायां स्वजजलादौ जलस्थलादिज्ञानं करोतीति मायाकारः पक्ष् । प्रतिहरणं प्रतिहारो घञ् । भावे घञ् स प्रयोजनमस्य प्रातिहारिकः ठिञ्णित्त्वे त्रिरिति वृद्धिः । प्रतिहारक इत्यपि पाठः । तत्र प्रति प्रथमं सुष्ठु मनो नयने च हरति ज्ञाते न किञ्चिदिति प्रतिहारकः ॥ शकान्तात् स्वार्थे ण्वे प्रातिहारकश्च घञि प्रतिहारश्च । इति तट्टीकायां भरतः ।
मायाक्षत्, पुं, (मायां स्वजजलादौ जलस्थलादि ज्ञानं करोति कारयतीति । कृ + क्विप् । तुगागमश्च । करोतिरत्रान्तर्भूतण्यर्थः ।) मायाकारः । यथा,—
"ग्राम्बरी शाम्बरी माया मायाक्षत् भिक्षुके
नटे ।"
इति शब्दरत्नावली ॥
मायाजीवी, [न्] पुं, (मायया इन्द्रजालविद्यया जीवति जीवनयात्रां सम्पादयति इति । जीव + णिनिः ।) प्रातिहारिकः । इति हेमचन्द्रः । ३ । ५८८ ॥
मायातिः, पुं, (मायया सह याति । या, मा यातीति । यात + "अन्यतिभ्यां च ।" उणा० ४ । १२० । इति इन् ।) नरवलिः । यथा,—
"मायातीनाञ्च निर्व्वीतं शृणुष्व सुनिशम्यताम् ।
वक्ष्यान्यथर्व्ववेदोक्तं फलहानिर्यतिक्रमे ।
पिङ्गमाल्यविहीनञ्च युवकं वाधिवर्जितम् ।
विवाहितं दीक्षितञ्च परदारविहीनकम् ।
अजारिकं विशुद्धञ्च सच्छूद्रं मूलकं वरम् ।
तद्वन्मुण्डो धनं दत्त्वा क्रीतं मूल्यातिरेकतः ।
स्नापयित्वा च तं धर्म्मी संपूज्य वस्त्रचन्दनैः ।
माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥
तञ्च वर्षं भ्रामयित्वा परदारेषु यत्नतः ।
वर्षान्ते च सुतृप्तेभ्यो दुर्गायै तं निवेदयेत् ॥
अष्टमीनवमीसन्धौ दद्यान्मायातिमेव च ।
इत्येवं कथितं सर्व्वं बलिदानप्रसङ्गतः ॥
बलिं दत्त्वा च श्रुत्वा च हुत्वा च कवचं बुधः ।
प्रजपेद्दक्षदृग्भूमौ दद्याद्विप्राय दक्षिणाम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १६ अध्यायः ॥
मायादः, पुं, (मायया छलेन धनेनेत्यर्थः अत्ति भक्षयतीति । अद + अण् ।) कुम्भीरः । इति त्रिकाण्डशेषः ॥
मायादेवीसुतः, पुं, (मायादेव्याः सुतः ।) बुद्धः । इत्यमरः । १ । १ । १५ ॥
मायाफलं, क्ली, फलविशेषः । माइफल इति भाषा । तत्पर्य्यायः । मायिफलम् २ मायिकम् ३ छिद्राफलम् ४ मायि ५ । अस्य गुणाः । वातहरत्वम् । कटुत्वम् । उष्णत्वम् । श्लेष्मिश्लेष्मोपक्लेदकृमिकण्डूदाहत्वञ्च । इति राजनिर्घण्टः ॥
मायामोहः, पुं, (मायया मोहयति असुरानिति । मुह + णिच् + अच् । माया च मोहश्च तौ यस्येति वा ।) विष्णुदेहनिर्गतासुरमोहकपुरुषविशेषः । यथा,—
श्रीपराशर उवाच ।
"इत्युक्तो भगवांस्तेभ्यो मायामोहं शरीरतः ।
तदुत्पाद्य ददौ विष्णुः प्राह चेदं सुरोत्तमान् ॥
श्रीभगवानुवाच ।
"मायामोहोऽयमखिलान् दैत्यांस्तान्
मोहयिष्यति ।
ततो वधा भविष्यन्ति वेदमार्गबहिष्कृताः ॥
स्थितौ स्थितस्य मे वधा यावन्तः परिपन्थिनः ।
ब्रह्मणो येऽधिकारस्थ देवदैत्यादिकाः सुराः ॥
तद्गच्छत नभीः कार्य्या मायामोहोऽयमत्यतः ।
गच्छत्वद्योपकाराय भवतां भविता सुराः ॥"

श्रीपराशर उवाच ।
"इत्युक्त्वा प्रक्षिपत्नेनं ययुर्देवा यथागतम् ।
मायामोहोऽपि तैः सार्द्धं ययौ यत्र महासुराः ॥"
इति विष्णुपुराणे ३ अंशे १७ अध्यायः ॥

मायावती, स्त्री, (मायास्त्याऽस्तीति । माया + मतुप् । मस्य वः । उगित्त्वात् ङीप् ।) रतिः । कामपत्नी । इति जटाधरः ॥ तस्या नामकारणं यथा,—

श्रीपराशर उवाच ।
"एतस्मिन्नन्तरे प्राप्तः सह लक्ष्म्या नारदः ।
अन्तःपुरचरीं देवीं रुक्मिणीं प्राह हर्षयन् ॥
एष ते तनयः शुभ्रु ! हृत्वा शम्बरमागतः ।
हतो येनाभवद्बालो भवत्याः सूतिकागृहात् ॥
इयं मायावती भार्य्या तनयस्यास्य ते वती ।
शम्बरस्य च भार्य्येयं शृणुतामत्र कारणम् ॥
मत्प्रसादे तु गते नाशं तदुद्भवपरायणा ।
शम्बरं मोहयामास मायारूपेण रूपिणी ॥
तवायात्युपभोगेषु रूपं मायामयं शुभम् ।
दर्शयामास दैत्यस्य तस्येयं मन्दिरेश्वरी ॥"
इति विष्णुपुराणे ५ अंशे २७ अध्यायः ॥
(विद्याधरीविशेषः । यथा, कथासरित्सागरे । १२ । ३५ ।
"अहं मायावती नाम राजन् ! विद्याधराङ्गना ।
इयन्तं कालमभवं शापदोषेण हस्तिनी ॥"
राजकन्याविशेषः । यथाचैव । ११२ । ११२ ।
"अभूज्जनपसिंहाख्यो राजा राजपुरे पुरा ।
तस्य मायावतीत्यासीद्देवीप्रतिमा सुता ॥")

मायाविकः, त्रि, (मायया वस्त्रं आच्छादनं करोतीति ठन् ।) परप्रतारकः । इति शब्दमाला ॥ (मायारसिक इति वा पाठः ॥)

मायावान्, [त्] पुं, (माया अस्त्यस्य । माया + "अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति पक्षे मतुप् । मस्य वः ।) कंसराजः । इति शब्दरत्नावली ॥ मायायुक्ते, कपटयुक्ते च त्रि । (यथा, ऋग्वेदे । ४ । १६ । ६ ।
"ऋतिभिक्षमिषवो वृष्णबाहवो ग्नि मायावान-
ह्मा दस्युरर्न ।"
"मायावान् कपटवान् ।" इति तद्भाष्ये सायणः ॥)

मायावी, [न्] पुं, (प्रशस्ता मायाकापट्यमस्त्यस्येति । माया + "अस्मायामेधास्रजो विनिः" ५ । २ । १२१ । इति विनिः ।) मायाकारः । तत्पर्य्यायः । अंशकः २ मायी ३ मायिकः ४ ऐन्द्रजालिकः ५ । इति जटाधरः ॥ (यथा, मार्कण्डेये । २२ । ७ ।
"मायावी दानवः सोऽथ सृष्टिरूपं समाश्रितः ।
स प्राह राजपुत्रं तं पूर्ब्बवैरमनुस्मरन् ॥")
विडालः । इति राजनिर्घण्टः ॥ (मोहनशक्तियुक्तः परमात्मा । यथा, पञ्चदश्याम् । ६ । ४ ।
"स्वतश्चिदन्तर्यामी तु मायावी सच्चराचरितः ।
सत्रात्मा मूलरुद्रोऽथ विराड्डित्युच्यते परः ॥")

मायासीता, स्त्री, (मायाकल्पिता सीता ।) योगेन अग्निस्तसीताप्रतिकृतिः । यथा,—

अग्निरुवाच ।
"भगवन् ! श्रूयतां वाक्यं कालेन यदुपस्थितम् ।
सीताहरणकालोऽयं तत्रैव समुपस्थितः ॥
दैवञ्च दुर्निवारञ्च न च दैवात् परं बलम् ।
मत्सख्यं मयि संन्यस्य छाया रक्षान्तिकेऽधुना ॥
दास्यामि सीतां तुभ्यञ्च परीक्षासमये मम ।
दैवैः प्रस्थापितोऽहञ्च न च विघ्नो भुताभ्यन ॥
रामस्तद्वचनं श्रुत्वा न प्रकाश्य च लक्ष्मणम् ।
स्वीचकार च सस्नेहं हृदयेन विदूयता ॥
वह्निर्योगेन सीताया मायासीतां चकार सः ।
तद्रूपगुणसर्व्वाङ्गीं ददौ रामाय नारद ! ॥
सीतां गृहीत्वा स ययौ गोप्यं वक्तुं निषिध्य च ।
लक्ष्मणो नैव बुबुधे गोप्यमन्यस्य का कथा ॥
लङ्कां गत्वा रघुश्रेष्ठो जघान रावणं रणे च ।
सवान्धवं रावणञ्च सीतां संप्राप दुःखिताम् ॥
ताञ्च वह्निपरीक्षाञ्च कारयामास सत्वरम् ।
हुताशस्तञ्च काले च वास्तवीं जानकीं ददौ ॥
उवाच छाया वह्निञ्च रामञ्च विनयान्विता ।
करिष्यामीति किमहं तदुपायं वदस्व मे ॥"
वह्निरुवाच ।
"त्वं गच्छ तपसे देवि ! पुष्करञ्च सुपुण्यदम् ।
लब्ध्वा तपस्या तत्रैव स्वर्गलक्ष्मीर्भविष्यसि ॥
सा च तद्वचनं श्रुत्वा प्रणम्य पुष्करे तपः ।
दिव्यं त्रिलक्षवर्षञ्च स्वर्गलक्ष्मीर्बभूव ह ॥
सा च कालेन तपसा यज्ञकुण्डसमुद्भवा ।
कामिनी पाञ्चवानाञ्च द्रौपदी द्रुपदात्मजा ॥
क्षत्रे युगे वेदवती कुशध्वजसुता शुभा ।
सैतायां रामपत्नी सा सीतेति जनकात्मजा ॥
तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा ।
विज्ञायेति सा प्रोक्ता विद्यमाना युगत्रये ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः ॥

मायासुतः, पुं, (मायायाः मायादेव्याः सुतः ।) बुद्धः । इति हेमचन्द्रः । १ । १५१ ॥

मायिकं, क्ली, (माया मोहनशक्तिः विद्यतेऽस्मिन् । माया + "श्रीह्रादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) मायाफलम् । इति राजनिर्घण्टः ॥ अन्यत्रान्तरे मायिका मात्रका इत्यपि पाठः ॥

मायिकः, पुं, (माया अस्त्यस्य । माया + "श्रीह्रादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) मायाकारः । इति जटाधरः ॥ (यथा, देवीभागवते । ४ । १६ । ४ ।
"यन्मायामोहितश्चाहं सदा वर्त्ते परात्मनः ।
परवान् दारुपात्राक्षो मायिकस्य यथा वशे ॥"
मायाविशिष्टे, त्रि ॥)

मायी, [न्] पुं, (मायाऽस्त्यस्य । माया + "श्रीह्रादिभ्यश्च ।" ५ । २ । ११६ । इति इनिः ।) मायाकारः । तत्पर्य्यायः । धूर्त्तः २ वञ्चकः ३ अंशकः ४ कुहकः ५ काल्पनिकः ६ जालिकः ७ । इति हेमचन्द्रः । १ । ४९ ॥

(मायायुक्ते, त्रि । यथा, कुमारे । २ । ४६ ।
"यज्वभिः सम्भृतं हव्यं वितते ध्वरेषु यः ।
जातवेदोमुखाम्भायी मिषतामाच्छिनत्ति नः ॥"
मायोपाधिके परमेश्वरे च । यथा, पञ्चदश्याम् । ६ । २२६ ।
"मायान्तु प्रकृतिं विद्यान् मायिनन्तु महेश्वरम् ॥")

मायुः, पुं, (मिनोति प्रक्षिपति देहे उष्माणमिति । मिञ् प्रक्षेपणे + "ह्रस्वापाजिमिस्विदिसाध्यशूभ्य उण् ।" उणा० १ । १ । इति उण् । "मीनाति मिनोतिदीङां लपि च ।" ६ । १ । ५० । इत्वात्वम् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) पित्तम् । इत्यमरः । २ । ६ । ९२ ॥ (शब्दः । यथा, ऋग्वेदे । १ । १६४ । २८ ।
"इक्षाणं वर्ष्मभिरावृधानां मिमाति मायुं
पयते पयोभिः ॥"
"मायुं शब्दं मिमाति निर्म्माति करोति ।" इति तद्भाष्ये सायणः । वाक् । इति निरुक्ते । १ । ११ ॥)

मायुराजः, पुं, कुबेरपुत्रः । इति त्रिकाण्डशेषः ॥

मायूरं, क्ली, (मयूराणां समूहः । मयूर + "प्राणिरजतादिभ्योऽञ् ।" ४ । २ । १५४ । इत्यञ् ।) मयूरसमूहः । इत्यमरः । २ । ५ । ४३ ॥ (मयूराणामिदमित्यण् ।) तत्सम्बन्धिनि, त्रि ॥ यथा, महाभारते । १३ । १०४ । ६० ।
"आजं गव्यं तथा मांसं मायूरञ्चैव वर्ज्जयेत् ॥")

मायूरिकः, पुं, (मयूरं हन्ति । मयूर + "पक्षिमत्स्यमृगान् हन्ति ।" ४ । ४ । ३५ । इति ठक् । मयूरव्याधौ । इति सिद्धान्तकौमुदी ॥

मायूरी, स्त्री, अजमोदा । इति राजनिर्घण्टः ॥

मारः, पुं, (मृ + भावे घञ् ।) मृतिः । (यथा, हरिवंशे । ३ । ३१ ।
"शुक्लारक्तदृढत्विषः खड्गो वृषश्च विदी-
प्तिर्भयदः ।")
म्रियन्ते प्राणिनोऽस्मिन् । मृ + घञ् ।) कामदेवः । (यथा, नैषधे । ४ । ७८ ।
"अनुममार न मार ! कथं नु सा
रतिरतिग्रथितापि पतिव्रता ।
विरहिणीव्रतचातनपातकी
दयितयापि तयाजि किमुज्झितः ॥")
विष्णुः । इति मेदिनी । रे, ७६ । (मृ + णिच् + घञ् ।) मारणम् । इति हेमचन्द्रः । २ । ३६ ॥ धुस्तूरः । इति शब्दचन्द्रिका ॥ मारणोत्पत्तिर्यथा,—

मार्कण्डेय उवाच ।
"मनोभवस्य वचनं श्रुत्वाथ चतुरानगः ।
विचक्षुरपि तद्वाक्यं श्रुत्वानुत्साहकारकम् ॥
सर्व्वस्य मोहने ब्रह्मा चिन्ताविष्टोऽभवत्तदा ।
समर्थो मोहितुमिति निश्चित्यास सुदुर्म्मुदः ॥
निश्वासमारुतात्तस्य नानारूपा महाबलाः ।
जाता गत्वा लोलजिह्वा लोलाक्षातिभयङ्कराः ॥
तुरङ्गवदनाः केचित् केचिद्गजमुखास्तथा ।
सिंहव्याघ्रमुखाश्चान्ये शबराद्यखरानना ॥

ऋक्षमार्ज्जारवदनाः शूकरभास्याः शुकाननाः।
श्वगोमायुवक्त्राश्च सरीसृपमुखाः परे॥
गोरूपा गोमुखाः केचित्तथा पक्षिमुखाः परे।
महादीर्घा महाह्रस्वा महास्थूला महाकृशाः॥
पिङ्गाक्षा विरलाक्षाश्च त्र्यक्षैकाक्षा महोदराः।

एककर्णाश्चिकर्णाश्च चतुष्कर्णास्तथापरे।
शूलकर्णा दीर्घकर्णा बहुकर्णा विकर्णकाः।
दीर्घाक्षा स्थूलनेत्राश्च कृशनेत्रा विदृश्यः॥
चतुष्पादाः पञ्चपादाश्चिपादैकपदास्तथा।
द्विपदा दीर्घपादाः स्थूलपादा महापदाः॥
एकहस्ताश्चतुर्हस्ता द्विहस्ताश्चिभुजास्तथा।
विहस्ताश्च विरूपाक्षा गोधिकाकृतयः परे॥
मनुष्याकृतयः केचित् शिशुमारमुखाः परे।
क्रौञ्चाकारा बकाकारा हंससारसरूपिणः॥
तथैव मद्गुरक्रकृकाकमुखास्तथा।
अर्द्धनीला अर्द्धरक्ताः कपिलाः पिङ्गलास्तथा॥
नीलाः शुक्लास्तथा पीता हरिताश्चित्ररूपिणः।
अवाद्यन्त ते शङ्खान् पटहान् परिवादिनः॥
मृदङ्गान् डिण्डिमांश्चैव गोमुखान् पणवांस्तथा।
सर्व्वे जटाभिः पिङ्गाभिस्तुङ्गाभिश्च कराञ्चिताः॥
निरन्तराभिर्विप्रेन्द्रा गणाः स्कन्दगामिनः।
शूलहस्ताः पाशहस्ताः खड्गहस्ता धनुर्द्धराः॥
शक्त्यङ्कुशगदाचाषपट्टिसप्रासपाणयः।
नानायुधा महानादं कुर्व्वन्तस्ते महाबलाः॥
मारय च्छेदयेत्यूचुर्व्वक्त्रैश्च पुरतो गणाः।
तेषान्तु वदतां तत्र मारय च्छेदयेत्युत।
योगनिद्राप्रभावात् स विधिर्वक्तुं प्रचक्रमे॥
अथ ब्रह्माणमाभाष्य तान् दृष्ट्वा मदनो गणान्।
उवाच वारयन् वक्तुं गणानामग्रतः स्मरः॥

मदन उवाच।

किं कर्म्मैते करिष्यन्ति कुत्र स्थास्यन्ति वा विधे!।
किं नामधेया एते वा तत्रैतान् विनियोजय॥
नियुङ्क्ष्वैतान् निजे कृत्ये स्थानं दत्त्वा च नाम च।
श्रुत्वा पश्चान्महामायाप्रभावं कथयस्व मे॥"

मार्कण्डेय उवाच।

"अथ तद्वाक्यमाकर्ण्य सर्व्वलोकपितामहः।
गणान् समदनानाह तेषां कर्म्मादिकं दिशन्॥

ब्रह्मोवाच।

"एते तूत्पन्नमात्रा हि मारयेति वदन्तुवन्।
सङ्कुर्मुहुरतोऽमीषां नाम मारेति जायताम्॥
मारात्मकत्वादेतेते मारा: सन्तु च नामतः।
सदैव विघ्नं जन्तूनां करिष्यन्ति विनायनम्।
तवानुगमनं कर्म्म सङ्गमेषां मनोभव!॥
यत्र यत्र भवान् याता स्वकर्म्मार्थे यदा यदा।
गन्तारस्तत्र तत्रैते साहाय्याय तदा तदा॥
चित्तोद्भ्रान्तिं करिष्यन्ति तदत्यन्तप्रवर्त्तिनाम्।
ज्ञानिनां ज्ञानमार्गञ्च विघ्नयिष्यन्ति सर्व्वदा।
यथा सांसारिकं कर्म्म सर्व्वे कुर्व्वन्ति जन्तवः।
तथा चैते करिष्यन्ति सविघ्नमपि सर्व्वतः॥
इमे स्थास्यन्ति सर्व्वत्र वेगिनः कामरूपिणः।
त्वमेवैषां गणाध्यक्षः पञ्चयज्ञाङ्गभोजिनः।
नित्यक्रियावतां तोयभोगिनोऽपि भवन्त्विमे॥"

इति कालिकापुराणे ६ अध्यायः॥

मारकः, पुं, (म्रियन्ते प्राणिनः यस्मिन् येनेति वा। मृ+घञ्। ततः संज्ञायां कन्।) मरकः। तत्पर्य्यायः। मारिः२ उत्पातः३। इति त्रिकाण्डशेषः॥ पक्षिविशेषः। वाज् इति भाषा। तत्पर्य्यायः। घातिपक्षी २ श्याहकः३। इति भूरिप्रयोगः॥ मारयतीति कर्त्तरि ण्वुल्॥

मारजित्, पुं, (मारं कामं जितवान्। जि+क्विप्। तुगागमः।) बुद्धः। इत्यमरः। १। १। २३॥

मारणं, क्ली, (मार्य्यते इति। मृ+णिच्+भावे ल्युट्।) वधः। इत्यमरः। २। ८। ११४॥ (यथा, मनौ। ५। ३८।

"यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम्।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि॥")

अभिचारविशेषः। यथा,—

"एवन्तु मारणं देवि! विशेषात् कथयामि ते।
स्वाग्नं वह्निसमायुक्तं वामनेत्रविभूषितम्॥
कूर्च्चयुग्मं ततो देवि! असुकं मारय मारय।
चतुर्दशाक्षरो मन्त्रो स्वाहान्तः शत्रुनाशकः॥
खदिराङ्गारमादाय कुलाख्यां विशेषतः।
लेखयेत् पुत्तलीं शत्रुस्वरूपां लौहपत्रके॥
निशायां मस्तके नेत्रे ललाटे हृदये करे।
नाभौ गुह्ये कटौ पृष्ठे क्रमोक्तेन पदद्वये॥
मन्त्रवर्णान् समालिख्य प्रतिष्ठां तत्र कारयेत्।
संहारमुद्रां बद्ध्वा तु ध्यायेद्देवीं जयप्रदाम्॥
दीर्घाकारां क्षयवर्णां सदाङ्गनमस्कृताम्।
वृषस्थयुगलं हस्तं चर्व्वयन्तीं दिगम्बरीम्॥
शत्रुनाशकरीं देवीं ध्यायेत् शत्रुक्षयाय च।
एवं ध्यात्वेष्टिकापूर्व्वैर्व्वामहस्तेन शत्रुरिः॥
ॐशत्रुनाशकर्य्यै नमः इति दत्त्वा महेश्वरि!।
हरिद्रापूर्व्वसहितां धारां दद्यादनेन तु॥
असुकस्य शोणितं पिब पिबेति तत्परम्।
मांसं खादय खादय स्त्रीं नम इति मन्त्रम्॥
मध्याह्ने मध्यरात्रौ तु पूजयित्वा घृताक्तकम्।
जपेदेकादशाहे च रोगः स्यान्नात्र संशयः॥
दक्षाधिकेकविंशाहे म्रियतेऽरिर्न संशयः॥"

अथवान्यप्रकारेण शत्रुक्षयमहं वदे।
पुंगोशकृत् समादाय पूजयेदुच्चारिणा॥
विपरीतक्रमेणैव जपपूजादिकं चरेत्।
महादेवाय नम इति पुंगोशकृत् समाहरेत्॥
शिवाय नम इति मन्त्रेण घटनञ्च समाचरेत्।
पशुपतये नम इति प्राणान् संस्थापयेत्ततः॥
लौहयाम्रे महेशानि! खदिराङ्गारयोगतः।
शत्रुप्रतिकृतिं लिखा तत्र संस्थापयेत् शिवम्॥
ततो ध्यायेन्महारुद्रं ध्यानन्तु सुसमाहितः।
शशोर्द्ध्वशःस्थितं रुद्रं ज्वलदग्निसमप्रभम्॥
वामहस्तधरं खेटं दक्षिणं शूलकर्षणम्।
नरचर्म्माम्बरं देवं महाव्याघ्रादिवेष्टितम्॥
पिनाकधृक् दहागच्छागच्छ दलादिनावाह्य यत्नतः।
मूलमायाये नम इति जापयेत् साधकोत्तमः॥
महेश्वराय नम इति पाद्यादिना प्रपूजयेत्।
ईशानादिक्रमेणैव मूर्त्तिमुद्रक्रमेण च प्रपूजयेत्॥
अग्निकोणादिपर्य्यन्तं पूर्व्वरीत्या महेश्वरि!।
नमः शिवायेति मूलमष्टाविंशति संजपेत्॥
हुँ क्षमस्वेति वामेन करेण तु विसर्ज्जयेत्॥
अजित केशव विष्णो हरे सत्य जनार्द्दन।
हंस नारायण स्वाहा मन्त्रमेव समुच्चरेत्॥
हुँ नमो भगवते वासुदेवाय स्वाहा नम इत्यपि समुच्चरेत्।
एवमेकादशाहेन शत्रुच्छेदनमञ्जसा।
अवश्यं जायते देवि! सत्यं सत्यं त्रिलोचने!॥"

इति योगिनीतन्त्रे पूर्व्वखण्डे ४ पटलः॥

अपि च।

"गवाश्विच गवाश्विच मूत्रनिर्म्माल्यमेव च।
अरेर्यो लिखनेत् द्वारे पचत्यसुपयाति सः॥"

इति गारुडे १८६ अध्यायः॥

मारिः, स्त्री, (मार्य्यते इति। मृ+णिच्+इन्।) मारणम्। वधः। इति मेदिनी। रे, ७७॥ अनर्घ्यः। तत्पर्य्यायः। मारकः२ मरवः३ उत्पातः४। इति त्रिकाण्डशेषः॥

मारिचिकं, त्रि, (मरिच+"संस्कृतम्।" ४।४।३ इति ठक्।) मरिचेन संस्कृतम्। इति सिद्धान्तकौमुदी॥

मारितः, पुं, (मार्य्यते स्माम्रते भक्षीक्रियत इति। मृ+णिच्+कर्म्मणि क्तः।) नरौदनः। भक्षौदनः। यथा, भावप्रकाशे।

"असत्यङ्कारितं स्वर्णं बलं वीर्य्यञ्च नाशयेत्।
करोति रोगान् कृत्स्नांश्च तद्भक्षात् यत्नतस्त्यजेत्॥"

अपि च।

"पूर्व्वं वङ्गसमं तालं शिग्रुबीजेन विमर्द्दयेत्।
ततो गन्धपुटे पक्त्वा पुनरम्लेन मर्द्दयेत्॥
तालेन दशमांशेन यामेकं तत्पुटेत्।
एवं दशपुटैः पक्वं वङ्गं भवति मारितम्॥"

अपरञ्च।

आर्द्रत्वञ्च घनत्वञ्च तेजो गौरवनाशनम्।
यस्यैतानि न दृश्यन्ते तं विद्यान्मृततुल्यकम्॥"

अन्यच्च।

"शुद्धो रसो भवेद्ब्रह्मा मूर्च्छितस्तु जनार्द्दनः।
मारितो रुद्ररूपी स्यात् बद्धः साक्षात् सदाशिवः॥"

इति वैद्यदर्पणः॥

मारियसनवारकः, पुं,(मारिजन्यं व्यसनं तद्वारयतीति। मृ+णिच्+ण्यत्।) राजर्षिविशेषः। यथा,—

"कुमारपालभौमुक्यौ राजर्षिः परमार्हतः।
मृतखमोक्षा धर्म्मात्मा मारियसनवारकः॥"

इति हेमचन्द्रः। ३। ३७०॥

मारिषः, पुं, (मर्षति दोषानिति। मृष+अच्। निपातनात् सिद्धम्। यद्वा, मा रिष्यति हिनस्ति

कश्चिदपीति । रिष + क: ।) गाधोक्तौ श्रेष्ठः । रत्नमरः । १ । ७ । १४ । (क्वचित् पुराणादावपि । यथा, देवीभागवते । १ । ११ । ६५ ।
"साहाय्यं ते करिष्यामि मन्त्रग्रक्षा महामते ! ।
भविता यदि संग्रामस्तव चेन्द्रेण मारिष ! ।"
तथा च महाभारते । ७ । २६ । ९२ ।
"दार्यमाणास्त्रं दृष्ट्वा भगदत्तेन मारिष ! ।")
तण्डुलीयशाकविशेषः । मरसा इति हिन्दी भाषा । तत्पर्य्यायः । कत्वरः २ मार्षिकः ३ । (शाकार्थे पर्य्यायो गुणाश्च यथा । [अथ श्वेतमरसा । लोहितमरसा नवड़ा इति च लोके ।]
"मारिषो वाष्यको मार्षः श्वेतो रक्तश्च स स्मृतः ।
मारिषो मधुरः शीतो विष्मी पित्तनुद्गुरुः ।
वातश्लेष्मकरो रक्तपित्तदुष्टिश्रमप्रणित् ।
रक्तमार्षो गुरुर्नाति सचारो मधुरः सरः ।
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
मारिषा, स्त्री, (मारिष + टाप् ।) दक्षमाता । इति मेदिनी । षे, ४४ । (यथा, मत्स्यपुराणे । ४ । ४६ ।
"सोमकन्याभवत् पत्नी मारिषा नाम विश्रुता ।
तस्यस्तु दक्षमेकं सा पुत्रमप्यजनीजनत् ।"
अस्या जन्मवृत्तान्तो यथा, विष्णुपुराणे । प्रथमांशे १५ अध्याये ।
"कर्दमस्य मुनेः पूर्व्वमासीद्देवविदांवरः ।
सरस्वत्यां गोमतीतीरे स तेपे परमं तपः ।
ततश्चोभाय सुरेन्द्रेण प्रजोत्पाद्या वराङ्गनाः ।
प्रयुक्ता चोभयामास तन्निषं सा शुचिस्मिता ।"
इत्यारभ्य—
"यावदित्थं स विप्रर्षेस्तां ब्रवीति सुमध्यमाम् ।
तावन्नयनतृप्तेदजला सा बभूवातिवेपथुः ।
प्रवेपमानां सततं स्विन्नगात्रजलां सतीम् ।
गच्छ गच्छेति सक्रोधमुवाच मुनिसत्तमः ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।
आकाशगामिनी खेदं ममार्ज्ज तरुपल्लवैः ॥
इत्थादृष्टं ययौ बाला तदाश्रमपदान्तरे ।
निर्माज्जमाना गात्राणि गलत्स्वेदजलानि वै ।
ऋषिणा यत्तदा गर्भस्तस्यां देवे समाहितः ।
निष्क्रगाम स रोमाञ्च खेदरूपी तदङ्गतः ॥
तं दृष्ट्वा जगदुर्गर्भं एकं चक्रे तु मारुतः ।
मया चाप्यायितो गोभिः स तदा वर्द्धते भृशम् ॥
इत्थाग्रगर्भसंभूता मारिषाख्या वराङ्गना ।
तां प्रदास्यन्ति वो दक्षाः कोप एष प्रशाम्यताम् ॥
कण्डोरपत्यमेवं सा दक्षेभ्यश्च समुद्गता ।
ममापत्यं तथा वायोः प्रजोत्पादनया च सा ।"
सूरस्य पत्नी । यथा, भागवते । ६ । २४ । २७ ।
"देवमीढस्य सूरस्य मारिषा नाम पत्न्यभूत् ॥")
मारी, स्त्री, (मारि + ङादिकारादिति पक्षे ङीष् ।) चण्डी । जनपदः । इति मेदिनी । रे, ७६ । माहेश्वरी शक्तिः । यथा,—
"मारी त्रिशूलेन जघान चान्यान्
खड्गाङ्गपातैरपरांश्च कौशिकी ।"
इति वामने ५२ अध्यायः ॥
मारीचः, पुं, (मरीचेरपत्यं पुमान् । मरीचि + अण् ।) राक्षसविशेषः । स च तारकाराक्षसीपुत्रः रावणस्यानुचरः सीताहरणकाले मायामृगरूपोऽसौ श्रीरामेण हतश्च । इति रामायणम् । अस्य विवरणं यथा,—
"एतस्मिन्नन्तरे रामो ददर्श कनकं मृगम् ।
सीता तं प्रेरयामास तदर्थं पतिपूर्व्वकम् ॥
संत्यज्य लक्ष्मणं रामो जानक्या रक्षणे वने ।
स्वयं जगाम तूर्णं तं विधाय शायकेन च ॥
हा लक्ष्मणेति शब्दञ्च कृत्वाथ मायया मृगः ।
प्राणांस्तत्याज सहसा पुरो दृष्ट्वा हरिं स्मरन् ।
मृगदेहं परित्यज्य दिव्यं देहं विधाय च ।
रत्नभित्तिमयायानेन वैकुण्ठं स जगाम ह ।
वैकुण्ठद्वारे द्वार्य्यौ तौ किङ्करौ द्वारपालयोः ।
जयश्च विजयश्चैव बलवांश्चाजिताभिधः ॥
शापेन मृगकादीनां संप्राप्य राक्षसीं तनुम् ।
पुनर्जगाम च द्वारमादौ च द्वारपालयोः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १२ अध्यायः ॥
कश्यपः । यथा,—
"इति संचिन्त्य भगवान् मारीचः कुरुनन्दन ! ।
उवाच किञ्चित् कुपित आत्मानञ्च विगर्हयन् ॥"
इति श्रीभागवते ६ स्कन्धे १८ अध्यायः ॥
(तथा च महाभारते । १३ । ८५ । १०७ ।
मरीचिभ्यो मरीचिस्तु मारीचः कश्यपोऽभवत् ॥")
कङ्कोलकम् । याजकब्राह्मणः । इति मेदिनी । चे, १७ । राजहंसी । इति जटाधरः ॥
मारीची, स्त्री, (मरीचेरियम् । इत्यण् । ङीप् ।) देवताभेदः । इति मेदिनी । चे, १७ । सा तु मायादेवी । तत्पर्य्यायः । त्रिसुखा २ वज्रकालिका ३ विकटा ४ वज्रवाराही ५ गौरी ६ पोत्रिरथा ७ । इति त्रिकाण्डशेषः ॥
मारुकः, पुं, सर्पाण्डः । पत्न्याः । गोमयमण्डलम् । इति मेदिनी । के, ३५ ॥
मारुतः, पुं, (मरुदेव । मरुत् + "प्रज्ञादिभ्यश्च" ५ । ४ । ३८ । इति स्वार्थेऽण् ।) वायुः । इत्यमरः । १ । १ । ६५ ॥ स्त्रियतेऽनेन कुष्ठेन गान्धीति रुट उत् मरुत् मरुदेव मारुतः स्वार्थे अः । इति तट्टीकायां भरतः ॥
(यथा, मनौ । ४ । १२२—१२३ ।
"अतिथिञ्चानभुज्याप्य मारुते वाति वा भृशम् ।
शिरसि च स्थिते गात्राच्छ्रमेण च परिप्लुते ।
सामध्वनावृग्यजुषी नाधीयीत कदाचन ॥)
अस्योत्पत्तिर्यथा,—
कश्यप उवाच ।
"पुत्रस्ते भविता भद्रे ! रुद्रहा देवबान्धवः ।
संवत्सरं व्रतमिदं यद्यसौ धारयिष्यति ॥"
अस्यो यथावत् ।
"संवत्सरं पुंसवनं व्रतमेतदविप्लुतम् ।
धारयिष्यति चेत्तुभ्यं शक्रहा भविता सुतः ॥
बाढ़मित्यभ्युपेत्याथ दितौ राजन् ! महामनाः ।
कश्यपोऽगर्भमाधत्त व्रतचर्य्यो दधार सा ।
माल्यस्यरभिप्रायमिन्द्र आज्ञाय मानद ! ॥
शुश्रूषणेनाश्रमस्थां दितिं पर्य्यचरत् कविः ।
एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ! ॥
प्रेप्सुः पर्य्यचरत् जिष्णो श्चक्रस्येव दृगाकृतिः ।
नाध्यगच्छद्व्रतच्छिद्रं तत्परोऽथ महीपते ! ॥
चिन्ता तीव्रा गतः शक्रः केन मे स्याच्छिवं त्विह ॥
एकदा सा तु सन्ध्यायामुच्छिष्टा व्रतकर्षिता ।
अशुचिर्वाग्यधौताङ्घ्रिः सुष्वाप विधिमोहिता ।
लब्ध्वा तदन्तरं शक्रो निद्रापहृतचेतसः ।
दितेः प्रविश्य उदरं योगेशो योगमायया ॥
चकर्त्त सप्तधा गर्भं वज्रेण कनकप्रभम् ।
रुदन्तं सप्तधैकैकं मा रोदीरिति तान् पुनः ।
तमूचुः प्राञ्जलयो भूत्वा सर्व्वे प्राञ्जलयो नृप ! ॥
किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव ।
मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः ।
अनन्यभावान् पार्षदानात्मनो मरुतां गणान् ।
न ममार दितेर्गर्भः श्रीनिवासानुकम्पया ॥
सजूरिन्द्रेण पप्राथ्रत् देवास्ते मरुतोऽभवन् ।
यशोऽस्य माल्यदोषं ते हरिणा सोमपाः कृताः ॥
दितिरुत्थाय ददृशे कुमारानग्निसप्रभान् ।
इन्द्रेण सहितान्देवी पर्य्यतुष्यदनिन्दिता ॥
अथेन्द्रमाह तातास्मादियानां भयावहम् ।
अपत्यमिच्छन्त्यचरं व्रतमेतं सुदुष्करम् ॥
एकः सङ्कल्पितः पुत्रः सप्तसप्तभवन् कथम् ।
यदि ते विदितं पुत्र ! सत्यं कथय मा मृषा ॥
इन्द्र उवाच ।
अम्ब ! तेऽहं अवसितमुपधार्य्य गतोऽन्तिकम् ।
लब्ध्वान्तरोच्छिन्नं गर्भमर्थबुद्धिर्न धर्म्मेऽक् ॥
क्षत्तो मे सप्तधा गर्भं आसन् सप्त कुमारकाः ।
तेऽपि चैकैकशो दृक्षाः सप्तधा नापि मन्निरे ॥
ततस्तत्परमाश्चर्य्यं वीक्ष्य अवसितं मया ।
महापुरुषपूजायाः सिद्धिः काप्यनुवर्त्तिकी ॥
तदिदं मम दौर्ज्जन्यं बालिशस्य महीयसि ! ।
क्षन्तुमर्हसि मातस्तं दिष्ट्या गर्भो हतोत्थितः ॥
श्रीशुक उवाच ।
इन्द्रस्यैवाभ्यनुज्ञातः शुद्धभावेन तुष्टया ।
मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥"
इति श्रीभागवते ६ स्कन्धे १८ अध्यायः ॥
(जनपदविशेषः । यथा, महाभारते । ६ । ४७ । ४६—५० ।
"मारुता धेनुकाश्चैव तङ्गणाः परतङ्गणाः ।
वाटीकास्तित्तिराश्चैव चोलाः पाण्ड्याश्च भारत ! ॥
एते जनपदा राजन् ! दक्षिणं पक्षमाश्रिताः ॥"
अग्निभेदः । यथा, यजुःसंग्रहपरिशिष्टे । १ । २ ।
"अग्निस्तु मारुतो नाम गर्भाधाने विधीयते ॥"
मरुत्सम्बन्धिनि, त्रि । यथा, ऋग्वेदे । २ । ११ । १४

"राशि त्रये राशि मित्रमस्ते राशि ग्रर्ध इन्द्र मारुतं नः ॥"
"मारुतं मरुतां देवविशां सम्बन्धि ।" इति तद्ब्राह्मे सायणः ॥)
मारुतव्रतं, क्ली, (मारुतस्य व्रतमिव व्रतं नियमोऽस्य ।) राजधर्मविशेषः । यथा,—
"प्रविश्य सर्वभूतानि यथा चरति मारुतः ।
तथा चरेः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ।"
इति मात्स्ये २०० अध्यायः ॥
मारुतात्मजः, पुं, (मारुतस्यात्मजः ।) हनूमान् । इति जटाधरः ॥ (भीमश्च ॥)
मारुतापहः, पुं, (मारुतमपहन्ति । हन + डः ।) वरुणवृक्षः । इति राजनिर्घण्टः ॥ वायुनाशके, त्रि ॥
मारुताशनः, पुं, (मारुतोऽशनमस्य । अन्नादीति । अश + ल्युः । मारुतानां अशनो भक्षकः ।) सर्पः । पवनाशन इत्यमरदर्शनात् । (यथा, महाभारते । ५ । १०६ । १३ ।
"भक्तः प्रयत्न महां वै बाहुभ्यां संप्रतिष्ठतः ।
स्थितः स्थाणुरिवाभ्यासे निश्चेष्टो मारुताशनः ॥")
वायुमात्रभक्षके, त्रि । (कार्त्तिकेयसैनिकविशेषः । यथा, महाभारते । ६ । ४५ । ६० ।
"विद्युताक्षो धनुर्वक्त्रो जाठरो मारुताशनः ॥")
मारुतिः, पुं, (मारुतस्यापत्यं पुमान् । मरुत + "अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) हनूमान् । इति शब्दरत्नावली ॥ (यथा, रघौ । १२ । ६० ।
"प्रहस्तायुपलब्धायां तस्यां सम्पातिदर्शनात् ।
मारुतिः सागरं तीर्त्वा संहारमिव निर्ममे ॥")
भीमसेनः । इति जटाधरः ॥ (यथा, देवीभागवते । २ । ७ । २१ ।
"तच्छ्रुत्वा वचनं भ्रातुर्ज्येष्ठस्यामिततेजसः ।
संग्रहेऽस्य महाबाहुर्मारुतिः कुपितोऽब्रवीत् ॥")
मार्कः, पुं, भृङ्गराजः । इति रत्नमाला ॥
मार्कण्डः, पुं, (ऋकण्डोरपत्यम् । ऋकण्डु + अण् ।) मार्कण्डेयमुनिः । इति शब्दरत्नावली ॥
मार्कण्डिका, स्त्री, लताविशेषः । भूइ खखसा इति हिन्दीभाषा ॥ सा तु काकरोलभेदः । तत्पर्य्यायः । भूमिचरी २ मार्कण्डी ३ ऋदुरेचनी ४ । अस्या गुणाः । कृमिहरत्वम् । ऊर्द्धाधःकायशोधनत्वम् । विषदुर्गन्धकासगुल्मोदरगाग्निमत्त्वञ्च । इति भावप्रकाशः ॥
मार्कण्डीयं, क्ली, भूम्याडुम्बम् । इति राजनिर्घण्टः ॥
मार्कण्डेयः, पुं, (ऋकण्डोरपत्यं । ऋकण्डु + शुभादिभ्यश्च ।"४ । १ । १२६ । इति ढक् ।) ऋकण्डुसुनिपुत्रः । जन्मतिथ्यादौ पूजायां तस्य ध्यानं यथा,
"दिसुजं जटिलं सौम्यं सप्तकल्पं चिरञ्जीविनम् ।
मार्कण्डेयं नरो भक्त्या पूजयेच्च चिरायुषम् ॥"
तस्य प्रार्थनामन्त्रः ।
"चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ! ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ॥
मार्कण्डेय महाभाग ! सप्तकल्पान्तजीवन ! ।
आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव ॥"
इति तिथ्यादितत्त्वम् ॥
तस्योत्पत्त्यादिर्यथा,
मार्कण्डेय उवाच ।
"देवौ धात्रविधातारौ भृगोः ख्यातिरजायत ।
श्रियञ्च देवदेवस्य पत्नी नारायणस्य या ॥
आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः ।
भार्य्ये धात्रविधात्रोस्ते तयोर्जाते सुतावुभौ ॥
प्राणश्चैव मृकण्डुश्च पिता मम महायशाः ।
मनस्विन्यामहं तस्मात् पुत्रो वेदशिरा मम ॥
धूम्रवत्यां समभवत् प्राणस्यापि निबोध मे ॥"
इति श्रीमार्कण्डेयपुराणे रुद्रसर्गाध्यायः ॥
अपि च ।
पुलस्त्य उवाच ।
"अथ ते संप्रवक्ष्यामि मार्कण्डेयोत्पत्तिमुत्तमाम् ।
पुरा कल्पे मुनिः पूर्व्वं मृकण्डुर्नाम विश्रुतः ॥
भृगोः पुत्रो महाभागः सभार्य्यस्तप्यते तपः ।
तस्य पुत्रसदा जातो वसतस्तु वनान्तरे ॥
स पञ्चवर्षको जातो बाल एव गुणान्वितः ।
ज्ञानिना स तदा दृष्टो भ्रमित्वा लघुपराक्रमौ ॥
स्थित्वा स सुचिरं कालं जीवनञ्च ततो दितम् ।
दीर्घं चिन्तापरो ज्ञानी किं वर्षा बालकस्य ॥
दितं खण्डितम् ।
संख्यया चाष्टवर्षाणि जातानीति न्यवेदयत् ।
मृकण्डुनैव सुक्लेशु स ज्ञानी वाक्यमब्रवीत् ॥
मासमायुष पुत्रस्य तेऽवशिष्टं तपोधन ! ।
नैव श्लोकस्थया कार्य्यः सत्यमेतदुदाहृतम् ॥
एतत् श्रुत्वा वचो भौम्य ! ज्ञानिना यदुदाहृतम् ।
व्रतोपनयनं चक्रे बालकस्य पिता तदा ॥
आह चैनं पिता पुत्रमृषिं त्वमभिवादय ।
एवमुक्तः स वै पित्रा ऋषिं भक्त्या ननाम सः ॥
एतस्मिन्नन्तरे तत्र प्रदीप्ताः पावकोपमाः ।
मार्गेणापि समायातास्तेन सप्तर्षयोऽमलाः ॥
बालेन तेन दृष्टास्ते सर्व्वे समभिवादिताः ।
आयुष्मान् भव तैरुक्तः स तदौ दृष्टमेवताम् ॥
उक्तास्ते च पुनर्व्वाणीं प्रहस्य च पुनः पुनः ।
दिनानि पञ्च ते चायुर्ज्ञात्वा भीताभवन् पुनः ॥
तमनूचिय ब्राह्मणा वै गतास्ते ब्रह्मणोऽन्तिकम् ।
प्रतिसृत्य च तं बालं प्रविवेशुः पितामहम् ॥
आयुष्मान् भव इत्याह तेन ब्रह्माभिवादितः ।
चिरायुर्ब्रह्मणा बालः प्रोक्तः स ऋषिसन्निधौ ॥
ततस्ते मुनयः प्रीताः श्रुत्वा वाक्यं पितामहात् ।
पितामहस्तु सप्तर्षीन् दृष्ट्वा प्रोवाच विस्मितान् ॥
कार्य्येण केन वा याताः कोऽयं बालो निवेद्यताम् ।
ततः सप्तर्षयो राजन् ! सर्व्वं तस्मै न्यवेदयन् ॥
भृगोः सुतुर्मृकण्डुस्तु चीर्णायुस्तस्य बालकः ।
अल्पायुस्तत्तस्तस्य ब्रह्मन्नेनास्य मेखला ॥
यज्ञोपवीतं दण्डश्च दत्त्वा तेन प्रबोधितः ।
यं कञ्चित् पश्यसे लोकं भ्रमन्तं भूतले जनम् ॥
तस्याभिवादनं कार्य्यमेवमाह पितामहः ।
तावद्वयमनेनाथ क्षितौ दृष्टाः परिभ्रमन् ॥
एकत्वमार्षम् ।
तीर्थयात्राप्रसङ्गेन दैवयोगात् पितामह ! ।
चिरायुर्भव वै विप्र ! बालैत्यस्माभिरीरितम् ॥
कथं चिरायुः स्याद्विप्रबालकः साम्प्रतं प्रभो ! ।
कथं नाकृतिनो देव ! भवामो भवता वयम् ॥
एवमुक्तस्तदा तेस्तु ब्रह्मा लोकपितामहः ।
ऋतवाचो भविष्याम; सर्व्वे एव वयं स्थिताः ॥
मत्समश्चायुषा बालो मार्कण्डेयो भविष्यति ।
ऋषीणां सुखदश्चासौ मत्सहायो भविष्यति ॥
कल्पस्यादौ तथा चान्ते वृतो मुनिभिरुत्तमैः ।
एवन्ते मुनयो बालं ब्रह्मा लोकपितामहः ।
समोद्य प्रेषयामास भूयोऽप्येवं यरन्तप ! ॥
तीर्थयात्रां गता विप्रा मार्कण्डेयो निजं गृहम् ।
जगाम गत्वा तं विप्रं पितरं स तथाब्रवीत् ॥"
इति प्राग्भार्गवखण्डे ३० अध्यायः ॥
अपरञ्च ।
व्यास उवाच ।
"मार्कण्डेयेन मुनिना यथा मृत्युः पराजितः ।
तथा ते कथयिष्यामि शृणु वत्स ! महामते ! ॥
भृगोः पौत्रो महाभागो बालत्वे च महाद्युतिः ।
वृद्धे वत्सरो बालः पिता तस्य कृतक्रियः ॥
स तस्मिन् वै जातमात्रे आदेशो कश्चिदब्रवीत् ।
वर्षे द्वादशमे पूर्णे मृत्युरस्य भविष्यति ॥
श्रुत्वा तन्मातापितरौ दुःखितौ तौ बभूवतुः ।
तौ दृष्ट्वा दुःखसम्पन्नौ मार्कण्डेयो महामतिः ॥
उवाच वचनं तत्र किमर्थं दुःखमीदृशम् ।
वक्तुमर्हथ दुःखस्य कारणं मम पृच्छतः ॥
कथयामास तत् सर्व्वमादेशो यदुवाच ह ।
तत् श्रुत्वा तौ मुनिः प्राह मातरं पितरं पुनः ॥
पित्रा सार्द्धं त्वया मातर्न कार्य्यं दुःखमल्पकम् ।
अपनेष्यामि मे मृत्युं तपसा नात्र संशयः ॥
यथा चाहं चिरायुः स्यां तथा कुर्य्यामहं तपः ॥
सूत उवाच ।
इत्युक्त्वा तौ समाश्वास्य पितरौ वनमभ्यगात् ।
तत्र विष्णुं प्रतिष्ठाप्य गन्धपुष्पादिभिः क्रमात् ।
पूजयामास देवेशं मार्कण्डेयो महामुनिः ॥
पूजयित्वा हरिं तत्र तपस्तेपे सुदुष्करम् ।
निराहारो मुनिश्रेष्ठ वर्षमेकमतन्द्रितः ॥
मात्रोक्तमरणावधिदिने तत्र महामतिः ।
ज्ञात्वा यथोक्तविधिना स्नात्वा विष्णोरुपार्चनम् ॥
हृदि स्तवेन्द्रियग्रामं विष्णुध्यानपरायणः ।
आसनं स्वस्तिकं बद्ध्वा ज्ञात्वासौ प्राणसंयमम् ॥
ओंकारोच्चारणाद्धोमान् हृदि पद्मं विकाशयन् ।
तन्मध्ये रविसोमाग्निमण्डलानि यथाक्रमम् ॥
कल्पयित्वा हरेः पीठं तस्मिन्नेव समाहितम् ।
पीताम्बरधरं विष्णुं शङ्खचक्रगदाधरम् ॥
ब्रह्मरूपं हरिं ध्यात्वा ततो मधुसूदनम् ।
स्तवेन ध्यायतस्तस्य मार्कण्डेयस्य धीमतः ॥
मनश्चक्रे संस्तवं देवदेवजगत्पतौ ॥

ततो यमालयात्तत्र आगता यमकिङ्कराः ।
पाशहस्तास्तु तं नेतुं विष्णुदूतेषु ते हताः ॥
सुबलैर्दैत्यसाङ्घैस्ते दह्यन्ता पुनः पुनः ।
वयं निहता गच्छामो ऋत्युरेवागमिष्यति ॥
आगत्य खयमेवाथ ऋत्युः पार्श्वे महात्मनः ।
मार्कण्डेयस्य वक्ष्याम विष्णुकिङ्करगह्वया ॥
ते चाप्युद्गम्य सुबलान्यभ्युर्विष्णुकिङ्कराः ।
विष्णाज्ञया हनिष्यामो ऋत्युमस्मेति संस्थिताः ॥
ततो विष्णुर्पितमना मार्कण्डेयो महामतिः ।
तुष्टाव प्रणतो भूत्वा देवदेवं जनार्दनम् ॥
विष्णुनैवोपदिष्टन्तु स्तोत्रं कर्म्म महात्मनः ।
खभावितेन मनसा तेन तुष्टाव माधवम् ॥
ॐ नमो भगवते वासुदेवाय ।
नारायणं सहस्राक्षं पद्मनाभं पुरातनम् ।
प्रपन्नोऽस्मि सुधीकेशं किन्मे ऋत्युः करिष्यति ॥
गोविन्दं पुष्करीकाक्षमनन्तमजमव्ययम् ।
केशवञ्च प्रपन्नोऽस्मि किन्मे ऋत्युः करिष्यति ॥
वासुदेवं जगद्योनिं भानुमन्तमतीन्द्रियम् ।
दामोदरं प्रपन्नोऽस्मि किं मे ऋत्युः करिष्यति ॥
ब्रह्मण्यमक्षरं देवं हृषीकपतिमव्ययम् ।
अधोक्षजं प्रपन्नोऽस्मि किं मे ऋत्युः करिष्यति ॥
वाराहं वामनं विष्णुं नारसिंहं जनार्दनम् ।
माधवञ्च प्रपन्नोऽस्मि किं मे ऋत्युः करिष्यति ॥
पुरुषं पुष्करं बीजं क्षेमबीजं जगत्पतिम् ।
लोकनाथं प्रपन्नोऽस्मि किं मे ऋत्युः करिष्यति ॥
भूतात्मानं महात्मानं यज्ञयोनिमयोनिजम् ।
विश्वरूपं प्रपन्नोऽस्मि किं मे ऋत्युः करिष्यति ॥
सहस्रशिरसं देवं सत्यायत्तं सनातनम् ।
महायोगं प्रपन्नोऽस्मि किं मे ऋत्युः करिष्यति ॥
ऋत्युरीरितमाकर्ण्य स्तोत्रं तत्र महात्मनः ।
अपयातस्ततो ऋत्युर्विष्णुदूतैश्च पीडितः ॥
इति तेन जितो ऋत्युर्मार्कण्डेयेन धीमता ।
प्रसन्ने पुष्करीकाक्षे तृप्तिर्हि नास्ति दुर्लभम् ॥
ऋत्वाख्यमिदं पुण्यं ऋत्युप्रशमनं शुभम् ।
मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह ॥"

श्रीभगवानुवाच ।

"य इदं पठते भक्त्या त्रिकालं नियतः शुचिः ।
नाकाले तस्य ऋत्युः स्यान्नरस्याच्युतचेतसः ॥"

व्यास उवाच ।

"हृत्पद्ममध्ये पुरुषं पुराणं
नारायणं शाश्वतमादिदेवम् ।
सञ्चिन्त्य सूर्य्यादपि राजमानो
ऋत्युं स योगी जितवान्सदैव ॥"

इति नारसिंहपुराणे मार्कण्डेयऋत्युञ्जयो नाम ७ अध्यायः ॥ (मार्कण्डेयेन प्रोक्तम् । मार्कण्डेय + अण् । पुराणविशेषः । यथा, देवीभागवते १ । ३ । १—३ ।

"इदानन्तु संप्रवक्ष्यामि पुराणानि मुनीश्वराः ।" इत्यारभ्य—

तथा ग्रहसहस्रन्तु मार्कण्डेयं महाद्युतम् ॥")

मार्कः मार्कवः } पुं, भृङ्गराजः । इत्यमरः । २ । ४ । १५१ ।
मार्कवः } मर्कति केशरञ्जनार्थं गच्छति मर्कवः ।
मर्कं सर्वं नाशयति अवः निपातनादृद्धिः । मार्कवोऽन्तःस्थचतुर्थोऽन्तः मर्कवृक्षादित्वाद्वा एषोदरादित्वाददागमो दीर्घश्चेति परेण साधितत्वात् । (यथा, सुश्रुते चिकित्सास्थाने १ अ० ।

"स्यान्मार्कवस्य च रसेन निहन्ति तैलं
नाड्यां कफानिलजतामपचीं व्रणांश्च ।")

मार्करो रेफान्त इति केचित् । इति तट्टीकायां भरतः ॥ (अथानयोः पर्य्यायाः यथा,—

"भृङ्गराजः केशराजो भृङ्गः पत्रङ्गमार्कवम् ।
इति वैद्यकरत्नमालायाम् ।

भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एवच ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
मार्करः केशरागश्च भृङ्गराजो निगद्यते ॥"

इति गारुडेऽष्टाधिकद्विशततमेऽध्याये ॥)

मार्ग, क संस्कारे । सर्व्वेषे । इति कविकल्पद्रुमः ॥ (चु०-पर०-सक०-सेट् ।) क मार्गयति । इति दुर्गादासः ॥

मार्ग कि अन्वेषे । इति कविकल्पद्रुमः ॥ (चु०-उभ० भ्वा०-पर०-सक०-सेट् ।) अन्वेषः प्रतिसन्धानम् । कि मार्गयति मार्गति गुरुं गुरौ । मार्गन्तां ते देहभावानित्यात्मनेपदं गजन्नतानित्यत्वात् । इति दुर्गादासः ॥

मार्गः, पुं, (मार्ग्यते संस्क्रियते पादेन ऋत्यते गमनायान्विष्यते इति वा । मार्ग वा ऋज + + घञ् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ तत्परिमाणं यथा,—

"त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः स्मृतः ।
त्रिंशद्धनुर्युगंमार्गः सीमामार्गो दशैव तु ।
धनूंषि दशविस्तीर्णः श्रीमान्राजपथः स्मृतः ।
शतानिरथनागानामश्वानाञ्च सुसञ्चरः ।
धनूंषि चैव चत्वारि ग्राखाख्यास्तु निर्म्मिताः ।
त्रिकराश्चोपरथ्यास्तु द्विकराण्युपरथ्यका ।
ब्रह्मपथश्चतुष्पादश्चिपादश्च महान्तरम् ।
त्रयीपादस्त्रिपादः प्राज्ञंग्रः पादकः स्मृतः ॥
अवकरः परिवारः पादमात्रः समन्ततः ।
प्रावृट्काले तु प्रावृत्ती कर्त्तव्या अन्यथा नहि ॥
इति देवीपुराणे त्रैलोक्याभ्युदये गोपुरद्वारलक्षणाध्यायः ॥" (यथा, महाभारते । ३ । ६० । १७ ।

"एका बालानभिज्ञा च मार्गाणामतथोचिता ।
क्षुत्पिपासापरीताङ्गी दुष्करं यदि जीवति ॥")

गुदम् । तत्पर्य्यायः । पायुः २ तनुरुहः ३ । इति त्रिकाण्डशेषः ॥ अपानम् ४ । इत्यमरः । २ । ६ । ७१ ॥ ऋगमदः । (ऋगस्मिन्दम् । ऋग + अण् । ऋगसम्बन्धिनि, त्रि । यथा, सुश्रुते । शारीरे ३ अ० ।

"मार्गाद्विक्रान्तजङ्घालं सदा वनचरं सुतम् ।"

यथा च मार्कण्डेये । ३२ । १७ ॥

"तद्वर्च्चः सलिलं तात ! सदैव पिटकस्मैञ्जि ।
मार्गमाविकमौष्ट्रञ्च सर्व्वमेकशफञ्च यत् ॥"

(ऋगो ऋगग्निरात्तदृग्युक्ता पौर्व्वमासञ्च ।

ऋग् + अण् ।) मार्गशीर्षमासः । अन्वेषणम् । इति मेदिनी । गे, १७ । ऋगग्निरो नक्षत्रम् । इति हेमचन्द्रः ॥ विष्णुः । इति तस्य सहस्रनाम स्तोत्रम् ॥ (यथा, महाभारते । १३ । १४८ । ५३ ।

"विचरो रोहितो मार्गो हेतुर्दामोदरः सहः ॥")

मार्गकः, पुं, (मार्ग । स्वार्थे कन् ।) अन्वेषणमात्रः । इति ग्रन्दमाला ॥

मार्गणं, क्ली, (मार्ग्यते अन्विष्यत इति । मार्ग + भावे ल्युट् ।) अन्वेषणम् । तत्पर्य्यायः । सन्धोषणम् २ विचयनम् ३ ऋगवा ४ ऋगः ५ इत्यमरः । ३ । २ । ३० ॥ याच्ञा । इति मेदिनी । णे, ७१ । प्रश्नः । इति जटाधरः ॥ (मार्गयतीति । मार्ग + ल्युः ।) याचके, त्रि । इत्यमरः । ३ । १ । ४८ ॥

मार्गणः, पुं, (मार्गयति लक्ष्यमिति । मार्ग + ल्युः ।) शरः । इत्यमरः । २ । ८ । ८७ ॥ यथा, महाभारते । ६ । ११५ । ४३ ।

"ते सर्व्वे दृढ़धन्वानः संयुगेष्वपलायिनः ।
बहुधा भीष्ममार्च्छन्मार्गणैः ॥ शतमार्गणैः ॥
मार्गयति धनाथ दातारमिति । मार्ग + ल्युः ।)
याचकः । इति मेदिनी । णे, ७१ ॥

मार्गणकः, पुं, (मार्गण + स्वार्थे कन् ।) याचकः । इति हलायुधः ॥

मार्गधेनुः, पुं, (मार्गस्य धेनुः परिमाणम् ।) योजनपरिमाणम् । इति ग्रन्दमाला ॥

मार्गधेनुकं, क्ली, (मार्गधेनु + स्वार्थे कन् ।) योजनम् । इति त्रिकाण्डशेषः ॥

मार्गपाली, स्त्री, (मार्गं पालयति हिंस्रेभ्यो रक्षतीति । पाल + अच् । गौरादित्वात् ङीष् ।) स्तम्भः । यथा,

"ततोऽपराह्णसमये पूर्व्वस्यां दिशि नारद ! ।
मार्गपालीं प्रवक्षीयाद्दुर्गस्तम्भे च पादपे ।
कुशकाशमयैर्दिव्यां संस्कारैर्बहुभिर्मुदा ।
भूषयित्वा गजाश्वानङ्कुशग्राहिसंयुताम् ॥
गोदशानू महिषांश्चैव घण्टाभरणभूषितान् ।
भेरीमृदङ्गपटहवादित्रध्वनिनादिताम् ।
तस्याः स्थाने नयेत् सायं ग्रान्तिपाठादिनन्दितः ॥

मार्गपालि नमस्तुभ्यं सर्व्वानन्दप्रवर्द्धिके ।
तवे तव सुखेनाद्य गजा गावः प्रयान्तु मे ॥
राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः ।
मार्गपालीं समालिख्य वार्त्ता: खुश सदेह हि ॥
ततो गावश्च संपूज्या गन्धपुष्पादिभिः क्रमात् ।
आत्मनः श्रेयसे भूप इति पूजां करोति हि ॥
अद्यतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे सर्व्वतः सन्तु गवां मध्ये वसाम्यहम् ॥
या लक्ष्मीर्लोकपालानां धेनुरूपेण संस्थिता ।
घीरं वहति यज्ञार्थे मम पापं व्यपोहतु ॥

या कामधेनुर्भुवने च विष्णो-
र्या कामधेनुर्यमदग्निगेहे ।
या सौरभेयी तु वशिष्ठगेहे
सा कामधेनुर्वरदा ममास्तु ॥

कृत्वेतत् सर्व्वमानन्दाद्यावो देव्यपतेर्बले: ।
पूजां कृत्वा तत: पश्चात् सम्यगुद्यूतं समारभेत् ।"
इति पाद्मे उत्तरखण्डे कार्त्तिकमाहात्म्ये
१२४ अध्याय: ॥

मार्गशिर:, पुं, (मृगशिरानक्षत्रयुक्ता पौर्ण-
मास्यत्र । मृगशिरा + अण् ।) मार्गशीर्ष-
मास: । इति शब्दरत्नावली ॥ (यथा, भाग-
वते । ६ । १६ । २ ।
"शुक्ले मार्गशिरे पक्षे योविंशत्तुरजुत्तया ।
आरभेत व्रतमिदं सर्व्वकामिकमादित: ॥")

मार्गशीर्ष:, पुं, (मार्गशीर्षी + अण् ।) अग्र-
हायणमास: । मृगशीर्षेण युक्ता पौर्णमासी
मार्गशीर्षी तस्मिन् मासे भवति मार्गशीर्ष:
अण् । इत्यमरटीकायां भरत: ॥ तत्पर्य्याय: ।
सहा: २ मार्ग: ३ आग्रहायणिक: ४ । इत्य-
मर: । १ । ४ । १४ ॥ मार्गशिर: ५ सह: ६ ।
इति शब्दरत्नावली ॥ वृश्चिकस्थरविप्रारब्ध-
शुक्लप्रतिपदादिदर्शान्तोऽयं मुख्यचान्द्र: । एता-
दृशमुख्यचान्द्रमासीयपौर्णमास्यन्त: अयं गौण-
चान्द्र: । वृश्चिकराशिरविकोऽयं सौर: । इति
स्मृति: ॥ * ॥ तत्र स्नानफलम् ।
"यस्य प्रकृति: खलु मार्गमासे
तीर्थे प्रवासे सततं मति: स्यात् ।
परोपकारी धृतसाधुवृत्ति:
सद्वृत्तियुक्तो जलनाभिलाषी ॥"
इति कोष्ठीप्रदीप: ॥*॥
(तथास्य विधय: । कार्त्तिकमार्गशीर्षौ द्रष्टव्यौ ।
इति सुधृते सूत्रस्थाने षष्ठेऽध्याये ॥)

अथ मार्गशीर्षकृत्यम् ।

आश्विनशुक्लपक्षे नवान्नश्राद्धाकरणे मार्ग-
शीर्षस्य विंशतिदण्डाधिकत्रयोविंशतिदिनाभ्य-
न्तरे शुक्लपक्षे तत् श्राद्धं कर्त्तव्यम् । तत्र मार्ग-
शीर्षस्य विंशतिदण्डाधिकप्रथमदिनचतुर्दशेषु
कृष्णनिशुक्लवारेतरेषु नन्दारिक्तात्रयोदशीतर-
तिथिषु जन्मभमचन्द्रजन्मतिथिजन्मनक्षत्रत्रय-
पञ्चमतारात्रयेतरेषु पूर्व्वात्रयमघाभरण्यश्लेषा-
र्द्रेतरेषु नक्षत्रेषु श्राद्धं तच्छेषभोजनञ्च कुर्य्यात् ।
श्राद्धानधिकारिणा तु प्रागुक्तकाले देवादिभ्यो
नवान्नं दत्त्वा भोक्तव्यम् । किन्तु अग्नेवाज्ञप्तिका-
ध्येष्टामूलापूर्व्वभाद्रपदकेषु अपि नवान्नभोजनं
न कर्त्तव्यम् । चन्द्रतारात्रयशुद्धौ प्रतीकारमाह
देवल: ।
"कर्म्म कुर्य्यात् फलावाप्त्यै चन्द्रादिग्रीभने बुध: ।
सुखकाले स्थितं सर्व्वं नाम: कालमपेक्षते ॥
चन्द्रे च गुरुं लवणञ्च तारे
तिथावभद्रे सितसर्षपांश्च ।
धान्यञ्च दद्यात् करणेऽथवारे
योगे तिलान् हेममणिञ्च लग्ने ॥
राजमार्त्तण्डे तारामेदाल्लवणपरिमाणमाह ।
"एकत्रिपञ्चसप्त च द्विजाय दद्यात् पलानि
लवणस्य ।
क्रमशो जन्मविपत्प्रत्यरिमरणाख्यतारासु ॥
पलन्तु लौकिकैर्मानै: साष्टरत्तिद्विमाषकम् ।
लोकत्रितयं प्रीयं व्योतिर्गै: स्तुतिसम्मतम् ॥
तत एवं दध्याद्यसंयुक्तं नवं विप्राभिमन्त्रितम् ।
मन्त्रानादेशे गायत्रीति गायत्र्याभिमन्त्रितम् ॥
नवमन्नं ब्राह्मणानुज्ञां गृहीत्वा प्राश्नीयात् ।
नूतनधान्यासम्भवे पुरातनेनापि श्राद्धं कर्त्तव्यम् ।
वृश्चिके शुक्लपक्षे तदकरणे हरिशयनात् पूर्व्वं
मौनधनुस्थरवीतरत्र माघादौ कर्त्तव्यम् ॥ * ॥
वृश्चिकस्थरवौ शुक्लचतुर्दश्यां सौभाग्यकाम:
पाषाणाकारपिष्टकैर्देवीं पूजयेत् तदपि भक्षये-
न्मन्त्रम् ॥*॥ अग्रहायण्यां पौर्णमास्यां पार्व्वण-
विधिना श्राद्धमावश्यकम् ॥*॥ भविष्यपुराणे ।
"रोहिण्या प्रतिपद्युक्ता मार्गे मासि सितेतरा ।
मङ्गायां यदि लभ्येत सूर्य्यग्रहशते: समा ॥"
इति श्राद्धतत्त्वम् ॥
(स्त्रियां आग्रहायणी पूर्णिमा । यथा, मह-
भारते । ३ । ८३ । २६ ।
"मार्गशीर्ष्यामतीतायां पुष्येण प्रयुयुक्षत: ॥")

मार्गिक:, त्रि, (मृगान् हन्तीति । मृग + "प्रत्ति-
मत्स्यमृगान् हन्ति ।"४ । ४ । ३५ । इति ठक् ।)
मृगहन्ता । (मार्गो गम्यतेनास्येति । ठन् ।)
पथिक: । इति सिद्धान्तकौमुदी ॥

मार्गित, त्रि, (मार्ग अन्वेषणे + क्त: ।) अन्वे-
षितम् । इत्यमर: । ३ । १ । १०५ ॥

मार्ग्य, त्रि, (मृज्यते इति । मृज् + "मृजे-
र्विभाषा ।" ३ । १ । ११३ । इति यत् ।
वृद्धिश्च । "चजो: कुघिण्ण्यतो: ।"७ । ३ । ५२ ।
इति कुत्वम् ।) मार्ज्जनीयम् । इति सिद्धान्त-
कौमुदी ॥ (यथा, भट्टिकाव्ये । ६ । ५६ ।
"मन्युरस्य त्वया मार्ग्यो मन्य: श्लोकश्च
तेन ते ।")

अन्वेषणीयश्च ॥

मार्ज्ज क मार्ज्जने । भ्वनौ । इति कविकल्पद्रुम: ॥
(चुरा०-पर०-सक०-सेट् ।) क मार्ज्जयति ।
इति दुर्गादास: ॥

मार्ज्ज:, पुं, (मार्ज्जयति पापमलं प्रक्षाल्य उद्धरति
जनानिति । मार्ज्ज + घिच् + अच् ।) विष्णु: ।
इति हेमचन्द्र: । २ । ४४ ॥ (मार्ज्जयति वसन-
मलमिति । मार्ज्ज + अच् ।) रजक: । इति
शब्दमाला ॥ मार्ज्जनम् । इत्यमरटीकायां
भरत: ॥

मार्ज्जन, क्ली, (मार्ज्जते इति । मार्ज्ज + भावे
ल्युट् ।) प्रोक्षणादिना अङ्गनिर्मलीकरणम् ।
माजा इति भाषा । तत्पर्य्याय: । मार्ष्टि: २
मार्ष्टी ३ मार्ज्जना ४ मृजा ५ । इति शब्द-
रत्नावली ॥ मार्ज्ज: ६ मार्ज्जा ७ । इत्यमर-
टीकायां भरत: ॥ (यथा, श्रीमद्भागवते । ८ ।
४ । १८ ।
"स वै मन: कृष्णपदारविन्दयो
र्वचांसि वैकुण्ठगुणानुवर्णने ।
करौ हरेर्म्मन्दिरमार्ज्जनादिषु
श्रुतिं चकाराच्युतसत्कथोदये ॥")

स्नानकाले शरीरमार्ज्जनगुणा: ।
"दौर्गन्ध्यं गौरवं कण्डूं कच्छुं मलमरोचकम् ।
खेदं वीभत्सतां हन्ति शरीरपरिमार्ज्जनम् ॥
इति राजवल्लभ: ॥

देवीगृहमार्ज्जनफलं यथा,—
"देव्या गृहन्तु य: शुक्र ! संमार्ज्जयति नित्यश: ।
स भवेद्बलवान् सौख्यसर्व्वसम्पत्तिसंयुत: ॥
देव्या गृहन्तु य: शुक्र ! गोमयेनानुलेपयेत् ।
स्त्रियो वा यदि वा पुंस: वरुणासन्नु निरन्तरम् ।
स लभेदीप्सितान् कामान् देव्या लोकञ्च
गच्छति ॥"
इति देवीपुराणे ४२ अध्याय: ॥

अथ भगवन्मन्दिरमार्ज्जनमाहात्म्यम् ।
"नरसिंहगृहे नित्यं य: संमार्ज्जनमाचरेत् ।
समस्तपापनिर्मुक्तो विष्णुलोके स मोदते ॥"
इति नृसिंहपुराणम् ॥
"संमार्ज्जनन्तु य: कुर्य्यात् पुरुष: केशवालये ।
रजस्तमोभ्यां निर्मुक्त: स भवेन्नात्र संशय: ॥
पांशूनां यावतां राजन् ! कुर्य्यात् संमार्ज्जनं
नर: ।
तावन्त्यब्दानि स सुखी नाकमासाद्य मोदते ॥"
इति विष्णुधर्म्मोत्तरम् ॥
"यावत्कानि प्रवाहाणि भूमिसंमार्ज्जने दधु: ।
तावद्वर्षसहस्राणि शाकद्वीपे महीयते ॥
जायते मम भक्तश्च सर्व्वधर्म्मसमन्वित: ।
शुचिर्भागवत: शुद्धो ह्यपराधविवर्ज्जित: ॥
ततो मुक्त्वा सर्व्वभोगान् तीर्त्वा संसारसागरम् ।
शाकद्वीपात् परिभ्रष्ट: स्वर्गलोकं स गच्छति ॥
नन्दनं वनमाश्रित्य मोदते चाप्सरै: सह ।
नन्दनाच्च परिभ्रष्टो मम कर्म्मव्यवस्थित: ।
सर्व्वसङ्गान् परित्यज्य मम लोकन्तु गच्छति ॥"
इति वराहपुराणम् ॥ * ॥

स्नानविशेष: । यथा । आतुरस्नानम् ।
"अग्निरुक्षं भवेत् स्नानं स्नानमुष्णोदकेन तु
कर्म्मिणाम् ।
आर्द्रेण वाससा वापि मार्ज्जनं देहिकं विदु: ॥"
इति आपस्तम्बवचनाच्छिरो विहाय गात्रप्रक्षा-
लनं तदशक्तौ सर्व्वगात्रमार्ज्जनं आर्द्रेण वाससा
कुर्य्यात् । इत्याह्निकाचारतत्त्वम् ॥ * ॥ वैदिक-
सन्ध्योपासनान्तर्गतमार्ज्जनं यथा । छन्दोगपरि-
शिष्टम् ।
"शिरसो मार्ज्जनं कुर्य्यात् कृशै: षोडक-
बिन्दुभि: ।
प्रणवो भूर्भुव: स्वश्च गायत्री च तृतीयिका ।
आद्येवं तृचश्चैव चतुर्थमिति मार्ज्जनम् ॥"
ओङ्कारो भूरादिव्याहृतित्रयं तृतीया च गायत्री
चतुर्थमापोहिष्ठेति ऋक्त्रयम् । इतीदं मार्ज्जनं
मार्ज्जनक्रियाकरणमित्यर्थ: । रामायणम् ।
"शक्तौ मार्ज्जनं कुर्य्यात् पादान्ते वा समाहित: ।
आपोहिष्ठेत्यृचा कार्य्यं मार्ज्जनन्तु कुशोदकै: ॥
प्रतिप्रणवसंयुक्तं क्षिपेन्मूर्द्ध्नि पदे पदे ।
तृचस्यान्तेऽथवा कुर्य्याद्धीमां मतमोङ्कृतम् ॥

आपोहिष्ठेतिसूक्तस्य सिन्धुद्वीप ऋषिः स्मृतः।
आपो वै देवता च्छन्दो गायत्री मार्जनं स्मृतम्॥"
इत्याह्निकाचारतत्त्वम्॥

मार्ज्जनः, पुं, (मार्ज्यतेऽनेनेति। मार्ज्ज+ल्युट्।) लोध्रवृक्षः। इत्यमरः। २। ४। ३३॥ श्वेतलोध्रः। इति भूरिप्रयोगः॥ रक्तलोध्रः। इति स्वामी॥

मार्जना, स्त्री, (मार्ज्यत इति। मार्ज्ज+भावे युच्।) मार्जनम्। इत्यमरः। २। ६। १२१॥ सुरजध्वनिः। इति हेमचन्द्रः। ३। ३००॥

मार्जनी, स्त्री, (मार्ज्यते अनयेति। मार्ज्ज+करणे ल्युट्+स्त्रियां ङीप्।) सम्मार्जनी। झाँटा इति भाषा। यथा,—
"नमामि शीतलां देवीं रासभस्थां दिगम्बरीम्।
मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम्॥"
इति स्कन्दे शीतलास्तोत्रम्॥

मार्जनीयः, त्रि, (मार्ज्यते इति। मृज्+अनीयर्।) मार्जनयोग्यः। मार्ज्यः॥ इति मृजधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नः। अग्निः। शोधनम्। इति संक्षिप्तसारोणादिवृत्तिः॥

मार्जारः, पुं, (मृज्+"कॢज्मृजिभ्यां चित्।" उणा० ३। १३७। इति आरन् चित्। "मृजेर्वृद्धिः।" इत्युज्ज्वलदत्तोक्तेर्वृद्धिश्च।) रक्तचित्रकः। इति राजनिर्घण्टः॥ बिड़ालः। इत्यमरः। २। ५। ६॥ (यथा, महाभारते। ५। १५६। १६।
"मार्ज्जारः किल दुष्टात्मा निश्चेष्टः सर्व्वकर्म्मसु॥")
खट्टाशः। इति हेमचन्द्रः। ४। ३६७॥ *॥

मार्जारस्पर्शने दोषो यथा,—
"अभोज्यशूतिकाषण्ढमार्जारांश्च कुक्कुरान्।
पतितापविद्धचण्डालसूतिहारांश्च धर्म्मविन्।
संस्पृश्य शुध्यते स्नानादुदक्यायामशूकरौ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः॥ *॥

पारिभाषिकमार्जारो यथा,—
"दम्भार्थं जपते यश्च तप्यते यजते तथा।
न परार्थसदृग्वृत्तो मार्जारः परिकीर्त्तितः॥"
तस्यान्नमभोज्यं यथा,—
'अभोज्याः सूतिकाषण्डमार्जाराखुश्वकुक्कुटाः।'
इति वामनपुराणे १५ अध्यायः॥

मार्जारकः, पुं, (मृज्+आरन् ह्रस्वश्च। "संज्ञायां कन्।" ५। ३। १४७। इति कन् च।) मयूरः। इति त्रिकाण्डशेषः॥ (मार्जार+स्वार्थे कन्। बिड़ालः। यथा, महाभारते। १। २३३। २४।
"इमे मार्जारकाः शुक्र! नित्यमुद्वेजयन्ति नः॥")

मार्जारकण्डः, पुं, (मार्जारस्येव कण्डूः कण्डूरो यस्य। यद्वा, मार्जारो मस्तके कण्डो यस्य।) मयूरः। इति शब्दरत्नावली॥

मार्जारकर्णिका, स्त्री, (मार्जारस्य कर्णौ इव कर्णौ यस्याः। स्त्रियां ङीप् स्वार्थे कन्। टाप् पूर्व्वस्य ह्रस्वत्वञ्च।) चासुण्डा। यथा,—
"चासुण्डा चर्चिका चर्म्मसुण्डा मार्जारकर्णिका॥"
इति हेमचन्द्रः॥

मार्जारकर्णी, स्त्री, मार्जारस्येव कर्णावस्याः। ङीप्। चासुण्डा। यथा,—
"मार्जारकर्णी चासुण्डा कर्णमोटिश्च चर्चिका॥"
इति त्रिकाण्डशेषः॥

मार्जारगन्धा, स्त्री, (मार्जारस्येव गन्धोऽस्याः।) सुद्रपर्णीविशेषः। इति रत्नमाला॥

मार्जारगन्धिका, स्त्री, (मार्जारगन्ध। कन्। टाप्। अत इत्वञ्च।) सुद्रपर्णी। इति राजनिर्घण्टः॥ (तथास्याः पर्य्यायः।
"सुद्रपर्णी काकपर्णी सूर्य्यपर्ण्यल्पिका सृका।
काकमुद्गा च सा प्रोक्ता तथा मार्जारगन्धिका॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मार्जारी, स्त्री, (मार्ष्टि शोधयति केशादिकमनया। मृज्+आरन्। स्त्रियां ङीप्।) कस्तूरी। जन्तुविशेषः। गन्धगकुला इति खाटासी इति च भाषा। तत्पर्य्यायः। पूतिका २ पूतिकरः ३ गन्धचेलिका ४। अस्या गुणाः। वान्तिधारकत्वम्। पत्तुष्यत्वम्। कफवातनाशित्वञ्च। इति राजनिर्घण्टः॥

मार्जारीयः, पुं, (मार्ज्जारस्यायम्। मार्जार+"गहादिभ्यश्च।" ४। २। १३८। इति छः।) बिड़ालः। शूद्रः। कायशोधनम्। इति मेदिनी। ये, १२७॥

मार्जालः, पुं, मार्जारः। रलयोरैक्यात्॥

मार्जालीयः, पुं, (मृज्+"स्थाशपिमृजेरालच् वालजालीयपः।" उणा० १। ११५। इति आलीयच्।) बिड़ालः। शूद्रः। कायशोधनम्। इति हेमचन्द्रः॥ (महादेवः। यथा, महाभारते। ३। ३८। ७७।
"ललाटाक्षाय सर्व्वाय मीढुषे शूलपाणये।
पिनाकगोप्त्रे सूर्य्याय मार्जालीयाय वेधसे॥")

मार्जिता, स्त्री, (मार्ज्यते शुध्यते प्राणिनेति। मृज्+णिच्+कर्म्मणि क्तः। स्त्रियां टाप्।) रसाला। इत्यमरः। २। ६। ४४॥ सा तु दधिखण्डमधुसर्पिर्मरिचादिलवणकर्पूरादिवासितसद्भक्ष्यविशेषः। इत्यमरटीकायां भरतः॥ (गुणादयोऽस्या रसालाशब्दे ज्ञातव्याः॥) शोधिते, त्रि॥

मार्त्तण्डः, पुं, (मृतमण्डमसौ अण्डञ्चेति। मृताण्डे भवतीति। मृताण्ड+"तत्र भवः।" ४। ३। ५३। इति अण्।) सूर्य्यः। (तन्निरुक्तिश्च। यथा,—
"अनिष्पन्नेषु गात्रेषु पुत्रं दृष्ट्वा पितात्रवीत्।
आर्त्तण्डं भव माण्डेति मार्त्तण्डस्तेन स स्मृतः॥"
यथा, मार्कण्डेये। ७७। १।
"मार्त्तण्डस्य रवेर्भार्य्या तनया विश्वकर्म्मणः।
संज्ञा नाम महाभाग! तस्यां भानुरजीजनत्॥"
अर्कवृक्षः। इत्यमरः॥ शूकरः। इति मेदिनी। ते, ३५॥ मार्त्तण्डोत्पत्तिर्यथा,—

मार्कण्डेय उवाच।
"एवं सा नियता देवी चक्रे स्तोत्रमहर्निशम्।
निराहारा विवस्वन्तमाराधयितुमुद्यते!॥
ततः कालेन महता भगवांस्तपनो मुने!।
प्रत्यक्षतामगात्तस्या दाक्षायण्या द्विजोत्तम!॥
सा दृष्ट्वा महाकूटं तेजसोऽम्बरसंस्थितम्।
भूमौ च संस्थितं भास्वज्ज्वालामालातिदुर्गमम्॥
तच्च दृष्ट्वा ततो देवी साध्वसं परमं गता।
जगादाद्य! प्रसीदेति न त्वां पश्यामि गोपते!॥
यथा दृष्टवती पूर्व्वमम्बरस्थं सुदुर्गमम्।
संघातं तेजसस्तस्मादिह पश्यामि भूतले॥
प्रसादं कुरु पश्येयं यदूपं ते प्रभाकर!।
भक्तानुकम्पन! विभो! भक्ताहं पाहि मे सुतान्॥"

श्रीमार्कण्डेय उवाच।
"ततः स तेजसस्तस्मादाविर्भूतो विभावसुः।
अदृश्यत तदादित्यस्तप्तताम्रोपमप्रभः॥
अथ तां प्रागतां देवीं तस्य सन्दर्शनागतां शुने!।
प्राह भास्वान् दृष्ट्वेष्टं वरं मत्तो यमिच्छसि॥
प्रणता शिरसा सा च जानुपीडितमेदिनी।
प्रत्युवाच विवस्वन्तं वरं सप्तयस्थितम्॥
देव! प्रसीद पुत्राणां कृतं चिसुवनं मम।
यज्ञभागार्थ दैतेयैर्दानवैश्च बलाधिकैः॥
तन्निमित्तं प्रसादं त्वं कुरुष्व मम गोपते!।
अंशेन तेषां भ्रातृत्वं गत्वा नाशय तद्रिपून्॥
यथा मे तनया भूयो यज्ञभागसुजः प्रभो!।
भवेयुरधिपाश्चैव त्रैलोक्यस्य दिवाकर!॥
तथानुकम्पां पुत्राणां सुप्रसन्नो रवे! मम।
कुरु प्रसन्नार्त्तिहर! स्थितिकर्त्ता त्वमद्य मे॥"

मार्कण्डेय उवाच।
"ततस्तामाह भगवान् भास्करो वारितस्करः।
प्रणतामदितिं विप्र! प्रसादसुमुखो विभुः॥
सहस्रांशेन ते गर्भे सम्भूयाहमशेषतः।
ततपुत्रप्रचूनदिते! नाशयाम्याशु निर्हृता॥
इत्युक्ता भगवान् भास्वानन्तर्द्धानमुपागमत्।
निर्हृता सापि तपसः संप्राप्ताखिलवाञ्छिता॥
ततो रश्मिसहस्रान्तः सुषुम्नाख्यो रवेः करः।
विप्रावतारं संचक्रे देवमातुरथोदरे॥
शुक्लचान्द्रायणादीनि सा चक्रे सुसमाहिता।
शुचिः सत्कारयत्नेन दिवं गर्भमिति द्विज!॥
ततस्तां कश्यपः प्राह किञ्चित्कोपपुरुतात्तरम्।
किं मारयसि गर्भाण्डमिति नित्योपवासिनी॥
सा च तं प्राह गर्भाण्डमेतत् पश्येति कोपना।
न मारितं विपत्त्यां त्वत्तवे यद्वविष्यति॥
इत्युक्ता तं तदा गर्भसुतसंज्ञं सुरारणिः।
जाज्वल्यमानं तेजोभिः प्रत्युवाच न कोपिता॥
तं दृष्ट्वा कश्यपो गर्भसुदग्राकरवर्चसम्।
तुष्टाव प्रणतो भूत्वा ऋग्भिरादाभिरादरात्॥
संस्तूयमानः स तदा गर्भाण्डात् प्रकटोऽभवत्।
पद्मपत्रसवर्णाभस्तेजसा आप्तदिङ्मुखः॥
अथान्तरीक्षादाभाष्य कश्यपं मुनिसत्तमम्।
सतोयमेघगम्भीरा वागुवाचाशरीरिणी॥

मारितश्च यतः प्रोक्तमेतदण्डं त्वयादितिम् ॥
तस्मात्सुने! सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यति ॥
सूर्य्याधिकारञ्च विभुर्जगत्यैव करिष्यति ।
हनिष्यत्यसुरांश्चाय यज्ञभागहरानरीन् ॥
देवा निर्भय इति वचो गगनात् समुपागतम् ।
प्रहर्षमतुलं याता दानवाश्च हतौजसः ॥
ततो युद्धाय देवेयानाजुहाव भृतक्रतुः ।
सह देवैर्मुदायुक्तो दानवाश्च तमाययुः ॥
तेषां युद्धमभूद्घोरं देवानामसुरैः सह ।
शस्त्रास्त्रदीप्तिसन्दीप्तसमस्तभुवनान्तरम् ॥
तस्मिन् युद्धे भगवता मार्त्तण्डेन निरीक्षिताः ।
तेजसा दह्यमानास्तु भस्मीभूता महासुराः ॥
ततः प्रहर्षमतुलं प्रापुः सर्व्वे दिवौकसः ॥
तुष्टुवुस्तेजसां योनिं मार्त्तण्डमदितिस्तथा ॥
स्वाधिकारं ततः प्राप्यर्यज्ञभागांश्च पूर्व्ववत् ।
भगवानपि मार्त्तण्डः स्वाधिकारमथाकरोत् ॥
कदम्बपुष्पवद्भास्वानघचोर्द्धश्च रश्मिभिः ।
दृष्टोऽयमिष्टसङ्घो दृश्ये नातिस्फुटं वपुः ॥"

इति मार्कण्डेयपुराणे सूर्य्यमाहात्म्ये मार्त्तण्डोत्पत्तिनामाध्यायः ॥

मार्त्तण्डवल्लभा, स्त्री, (मार्त्तण्डस्य वल्लभा प्रिया । यद्वा, मार्त्तण्डो वल्लभः प्रियोऽस्याः ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥ सूर्य्यपत्नी च ॥

मार्त्तिकः, पुं, (मृत्तिकाया विकार इति । मृत्तिका+"तस्य विकारः ।" ४ । ३ । १३४ । इति ठक् ।) शरावः । इति शब्दरत्नावली ॥ मृत्तिकानिर्म्मिते, त्रि ॥

मार्द्दङ्गं, क्ली, (मृद् अङ्गमस्य । ततः स्वार्थे अण् ।) पक्वन्नम् । इति हारावली ॥ (मृदङ्गवादनं श्लिष्यमस्येति । अण् ।) मृदङ्गवादके, त्रि ॥

मार्द्दङ्गिकः, त्रि, (मृदङ्गवादनं श्लिष्यमस्य । मृदङ्ग+"श्लिष्यम् ।" ४ । ४ । ५५ । इति ठक् ।) मृदङ्गवादकः । तत्पर्य्यायः । मौरजिकः २ । इत्यमरः । २।१०।९३ ॥ सार्द्धिकः ३ और्द्धिकः ४ । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ६१ । ४६ ।

"विस्मिता मार्द्दङ्गिका आसंश्चस्याघाहा विभीतकाः ।
अन्यत्या नर्त्तकाश्चासन् भरद्वाजस्य तेजसा ॥")

मार्द्दवं, क्ली, (मृदोर्भाव इति । मृदु+"पृथ्वादिभ्य इमनिज् वा ।" ५ । १ । १२२ । इत्यत्र । "वावचनमादेः समावेशार्थम् ।" इति काशिकोक्तेरण् ।) परदुःखप्रदर्शनात् पीड़ाद्युद्भिः । मृदुता । यथा,—

"मार्द्दवं कोमलस्यापि संस्पर्शात्सहतोच्यते ।
उत्तमं मध्यमं प्रोक्तं कनिष्ठमिति तत्त्रिधा ॥"

उत्तमं यथा,—

"अभिनवमालिकामियं साध्वय-
नवर्वणिग्राधिका विभ्रिय्ये ।
न कुसुमपटलं दराऽपि जग्धौ
तदनुभवात्तनुरेव सव्रणाऽभूत् ॥"

मध्यमं यथा,—

"चित्रं धनिष्ठे तनुवाससोऽपि
चीनस्य पीनस्तनि ! सङ्गमेन ।
लिप्तेन तल्लोहितचन्दनेन
मूर्त्तिर्द्विदूना सखि ! लोहितासीत् ॥

कनिष्ठं यथा,—

रससुधाकरे आमोदमामोदन-
मादधानं निजीननीलालकच्चरीकम् ।
स्वयेन पद्मासखपद्ममासीत्
लिखा रवेः कोमलयापि ताम्रम् ॥"

इत्युज्ज्वलनीलमणिः ॥

(अकाठिन्यम् । यथा, रघौ । ८ । ४३ ।

"विललाप सवाष्पगद्गदं
सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्द्दवं
भजते कैव कथा शरीरिषु ॥")

मार्द्दवः, पुं, (मार्द्दवं मृदुत्वमस्यास्तीति । मार्द्दव+अर्शं आद्यच् ।) वर्णसङ्करजातिविशेषः ।

"माधुको मार्द्दवश्चुकारुषा झिण्टिकादयः ।"

इति जटाधरः ॥

मार्घः, पुं, (मृघ्यति क्षमते जनानिति । मृघ्+"इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः । मृघः । ततः । स्वार्थे अण् ।) नाक्षोत्तौ श्रेष्ठः । इति हेमचन्द्रः । २ । २४ ॥ मारिषशाकः । इत्यमरटीकायां भरतः ।

(शाकार्थे पर्य्यायो यथा,—

"मारिषो वाप्यको मार्घः श्वेतो रक्तश्च स स्मृतः ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मार्घिकः, पुं, (मार्घ+ठक् ।) मारिषशाकः । इति राजनिर्घण्टः ॥

मार्ष्टिः, स्त्री, (मृज्+क्तिन् । "मृजेर्वृद्धिः ।" ७ । २ । ११४ । इति वृद्धिश्च ।) मार्জनम् । इत्यमरः । २ । ६ । १२१ ॥ तैलब्रह्मचर्य्यम् । यथा,

"तैलमद्यं यदङ्गेषु न भवेत् बाहुसङ्गतम् ।
सा मार्ष्टिः पृथगभ्यङ्गो मस्तकादौ प्रकीर्त्तितः ॥"

इत्याह्निकतत्त्वम् ॥

माल, क्ली, (माति मानहेतुर्भवतीति । मा+"कृत्रोदरादिवादयश्च ।" उणा० २ । २८ । इति रन् । पृषोदरादित्वादस्य लत्वम् ।) शैलम् । इति मेदिनी ॥ ले, ४५ । (यथा, मेघदूते । १६ ।

"सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥")

कपटम् । वनम् । इति हेमचन्द्रः ॥ (हरितालम् । यथा,—

"हरितालं तालमालं मालं शैलेयभूषणम् ।
पिञ्जरं रोमहरणं तालकं पातमित्यपि ॥"

इति वैद्यकरत्नसारसंग्रहे जारणमारणाद्यधिकारे ।)

मालः, पुं, (मातीति । मा+रन् । रस्य लत्वम् ।) जातिविशेषः । इति मेदिनी ॥ ले, ४५ । स च म्लेच्छजातिः । यथा,— [जातयः ॥"

"माला भिल्लाः किराताश्च सर्व्वेऽपि म्लेच्छ-

(यथा, महाभारते । ६ । ६ । ३६ ।

"तत्रेमे कुरुपाञ्चालाः शाल्वा मात्स्यजाङ्गलाः ।
शूरसेनाः पुलिन्दाश्च योधा मालास्तथैव च ॥")

जनः । इति च हेमचन्द्रः । ३ । ५६८ ॥ देशविशेषः । स च मेदिनीपुरप्रदेशे मालभूमिरिति ख्यातः । विष्णुः । यथा,—

'मां लक्ष्मीं लातीति मालो विष्णुः तं अतति व्याप्नोतीति मालती ।'

इति मालतीशब्दटीकायां भरतः ॥

मालकं, क्ली, (मलते धारयति शोभामिति । मलधारणे+ण्वुल् ।) स्वनामपद्मम् । इति जटाधरः ॥

मालकः, पुं, (मलते धारयत्यूर्ध्वं रोगनाशनेति । मलधारणे+ण्वुल् ।) निम्बवृक्षः । इत्यमरः । २ । ४ । ६२ ॥ (निम्बशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

मालका, स्त्री, (मलते धारयति शोभाम् । मल+ण्वुल् । स्त्रियां टाप् ।) माल्यम् । इति शब्दरत्नावली ॥

मालकौशः, पुं, (मालस्य हरेः कोशात् कण्ठान्निर्गत इति । अण् ।) रागविशेषः । तस्य नामान्तरं कौशिकः । स च हनूमन्मते षड्रागाणां मध्ये द्वितीयरागः । हरस्य हरेर्वा कण्ठान्निर्गतः । अस्य जातिः सम्पूर्णा तत्र सप्त स्वरक्रमः ष ऋ ग म प ध नि । अस्य ग्रहं षड्जस्वरः । ग्रहतौ रात्रिशेषे गानसमयः । रागमालायामस्य स्वरूपम् । पाटलवर्णपुरुषः । नीलपरिच्छदः । यष्टिहस्तः । यौवनमदमत्तः स्त्रीभिः सह हास्यकौतुकान्वितः शुभ्रमस्तकमाल्यगलोऽथवा दृढनसुस्तकामाल्यगलः । अस्य रागिण्यः पञ्च यथा । टोड़ी १ गौरी २ गुणकरी ३ खम्भावती ४ कोकभा ५ । अस्याष्टौ पुत्रा यथा । मारुः १ मेवाड़ः २ वड़हंसः ३ प्रबलः ४ चन्द्रकः ५ नन्दः ६ भ्रमरः ७ खुशरः ८ अत्र मिश्राङ्कोऽपि पाठः । भरतमते तस्य रागिण्यः पञ्च यथा । गौरी १ दयावती २ देवदासी ३ खम्भावती ४ कोकभा ५ । तस्यते अष्टौ पुत्रा यथा । गान्धारः १ शुद्धः २ मकरः ३ चिक्कनः ४ सहानः ५ शुक्लवल्लभः ६ मालीगौरः ७ कामोदः ८ । अष्टपुत्रभार्य्या यथा । धनाश्रीः १ मालश्रीः २ जयतश्रीः ३ सुधोराथी ४ दुर्गा ५ गान्धारी ६ भीमपलाश्री ७ कामोदी ८ । इति सङ्गीतशास्त्रम् ॥

मालचक्रकं, क्ली, (माला समूहः अस्यामस्यस्येति । अण् । आदित्वादच् । स चक्रमिवेति । कन् ।) सकृत्पूरुषपर्य्यन्तिः । इति शब्दचन्द्रिका । माजादचाकि इति भाषा ॥

मालती, स्त्री, (मलते शोभां धारयतीति । मल्+"भृदृशिगमिकमादि ।" उणा० ३ । ११० । इत्यत्र "बाहुलकात् मलतेरतच् । गौरादिनिपातनादुपधाया दीर्घत्वम् ।" इत्युज्ज्वलदत्तोक्तेः अतच् उपधाया दीर्घत्वम् ङीष् च । मां लक्ष्मीं

लातीति मालो विष्णुः तं अततीति । अच् । इत्यमरटीकायां भरतः ॥) खनामख्यात-पुष्पलता । तत्पर्य्यायः । सुमना २ जाति: ३ । इत्यमरः ॥ सुमनाः ४ जाती ५ । इति भरतः ॥ (यथा, शिशुपालवधे । ११ । १७ ।
"क्वलयति मदनाग्निं मालतीनां रजोभिः ।")
अस्या गुणाः । कफपित्तमुखरोगव्रणकृमिकुष्ठ-नाशित्वम् । इति राजवल्लभः ॥ तस्या उत्-पत्तिर्यथा,—

आद्याशक्तिरुवाच ।
'अहमेतत्त्रिधा भिन्ना तिष्ठामि विविधैर्गुणैः ।
गौरी लक्ष्मीः स्वधा चेति रजःसत्त्वतमोगुणैः ॥
तत्र गत्वा तथा कार्य्यं विधास्यन्ते च ता:
सुराः ॥

नारद उवाच ।
इत्युक्तामिति तां वाचमन्तर्द्धानमगाच्छिवः ।
देवानां विस्मयोत्फुल्लनेत्राणाञ्च तदा नृप ! ॥
ततः सर्व्वेऽपि ते देवा गत्वा तदाज्ञयोदिताः ।
गौरीं लक्ष्मीं स्वधाञ्चैव प्रणेतुर्भक्तितत्पराः ॥
तास्तथा तान् सुरान् दृष्ट्वा प्रणतान् भक्तवत्-सलाः ।
बीजानि प्रददुस्तेभ्यो वाक्यानि जगदुस्तथा ॥

देव ऊचुः ।
इमानि देवा बीजानि विष्णुर्यत्रावतिष्ठति ।
निर्व्वपध्वं ततः कार्य्यं भवतां सिद्धिमेष्यति ॥

नारद उवाच ।
ततः प्रहृष्टाः सुरसिद्धसंघाः
प्रगृह्य बीजानि विचिच्चिपुश्च ।
विन्ध्यारिकाभूमितले स यत्र
विष्णुः सदा तिष्ठति सौख्यवृत्तिः ॥

नारद उवाच ।
चिप्तेभ्यस्तत्र बीजेभ्यो वनस्पत्यक्षयोऽभवत् ।
धात्री च मालती चैव तुलसी च नृपोत्तम ! ॥
धात्युद्भवा स्मृता धात्री माधवा मालती स्मृता ।
गौरीभवा च तुलसी रजःसत्त्वतमोगुणाः ॥"
इति पाद्मे उत्तरखण्डे १४६।१५० अध्यायौ ॥*॥
युवती । कात्यमाली । विप्रकन्या । ज्योत्स्ना । निशा । नदीविशेषः । इति हेमचन्द्रः ।४।२१३। (सुवर्चला मालतीत्यर्थः । तत्पर्य्यायो यथा,—
"चण्डकी मालती चौमी रुद्रपत्नी सुवर्चला ।"
पुष्पार्थे पर्य्यायो यथा,—
"मालती सुमना जातिः ।" इत्यमे वैद्यकरत्न-मालायाम् ॥ तथाच ।
जातिर्जाती च सुमना मालती राजपुत्रिका ।
चेतिका क्षुद्रगन्धा च सा पीता स्वर्णजातिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मालतीतीरजः, पुं, (मालती तदाख्या नदी तस्या-स्तीरे जायते इति । जन् + डः ।) टङ्कः । इति हेमचन्द्रः । ४ । १० ॥

मालतीतीरसम्भवं, क्ली, (मालत्या तीरे सम्भवो-ऽस्य ।) श्वेतटङ्कम् । इति राजनिर्घण्टः ॥

मालतीपत्रिका, स्त्री, (मालत्याः पत्रीव । मालती-पत्र + प्रतिकृतौ कन् टाप् अत इत्वम् ।) जातीपत्री । इति राजनिर्घण्टः ॥ (जातीपत्रीशब्दस्य विषयो द्रष्टव्यः ॥)

मालतीफलं, क्ली, (मालत्याः फलम् ।) जातीफलम् । इति राजनिर्घण्टः ॥ (तस्यास्य पर्य्यायः ।
"जातीफलं जातिकोशं मालतीफलमित्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मालयः, पुं, (मा शोभा तस्याः लयः आस्पदम् ।) चन्दनवृक्षः । इति त्रिकाण्डशेषः ॥ मलय-सम्बन्धिनि, त्रि ॥ (यथा, नलोदये । २ । ६७ ।
"तनुच्छटोत्तमालया तया सुवोत्तमालया ।
अहारि प्रीतमालयानिलावधूतमालया ॥"
क्ली, अभिसारस्थानभेदः । यथा, साहित्य-दर्पणे । ३ । अभिसारिकाप्रकरणे ।
"चैत्यं वाटी भगवदालयो दूतीगृहं वनम् ।
मालयश्च श्मशानञ्च नद्यादीनां तटी
तथा ॥")

मालवः, पुं, (मालः उन्नतक्षेत्रमस्त्यत्र । माल + "केशाद्वोऽन्यतरस्याम् ।" ५।२।१०९। इत्यत्र "अन्येभ्योऽपि दृश्यन्ते ।" इति काशिकोक्तेः वप्रत्ययः ।) अवन्तिदेशः । इति हेमचन्द्रः । ४ । २२ ॥ मालवीया इति हिन्दीभाषा ॥ (यथा, मातृके । ११३ । ४४ ॥
"अङ्गा वङ्गा मद्गुरका अन्तर्गिरि बहि-र्गिरी ।
सुह्मोत्तराः प्रविजया मार्गवागेयमालवाः ॥"
मालवेषु जात इत्यण् । तद्देशजे, त्रि ॥)
रागविशेषः । स च षड्रागाणां मध्ये प्रथम-रागः । मतान्तरे भैरवरागोऽयम् । यथा,—
"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरागस्तस्य पश्चाद्वै वसन्तस्तदनन्तरम् ॥
हिन्दोलश्चाथ कर्णाट एते रागाः प्रकी-र्त्तिताः ॥

तस्य स्वरूपं यथा,—
"नितम्बिनीचुम्बितवक्त्रपद्मः
शुकद्युतिः कुण्डलवान् प्रमत्तः ।
सङ्गीतशालां प्रविशन् प्रदोषे
मालाधरो मालवरागराजः ।"
इति सङ्गीतदामोदरः ॥
(मालयां तन्नामिकायां सावित्रीमातरि जातः इत्यण् । अश्वपतेराज्ञो मालव्यां जातः पुत्र गणः । यथा, महाभारते । ३ । २८६ । ५८ ।
"पितुस्च ते पुत्रशतं भविता तव मातरि ।
मालव्यां मालवा नाम ख्याताः पुत्रपौत्रिणः ॥
भ्रातरस्ते भविष्यन्ति स्वत्रियास्त्वदशोपमाः ॥"
स्त्री, नदीविशेषः । यथा, महाभारते । १३ । १६५ । २५ ।
"हिरण्वती वितस्ता च तथा प्रचवती नदी ।
वेदस्मृतिर्वेदवती मालवाधाश्चवत्यपि ॥")

मालविका, स्त्री, (मालवेषु जाता । मालव + ठक् टाप् ।) त्रिवृत् । इति राजनिर्घण्टः ॥

मालसी, स्त्री, (मल + स्वार्थे अण् । मलं स्यति-नाशयति । सो + डः । ङीप् ।) केशपुष्पवृक्षः । यथा,—
'मालसी दुर्गपूज्या च बालाङ्गी केशधारिणी ॥'
इति शब्दचन्द्रिका ॥
रागिणीविशेषः । सा तु मालवरागस्य पत्नी । यथा,—
"धानुषी मालसी रामकिरी च सिन्धुड़ा तथा ।
अश्ववारी भैरवी च मालवस्य प्रिया इमाः ॥"
इति हारीतः ॥
मतान्तरे मेघरागस्य पत्नी । यथा,—
"ललिता मालसी गौड़ी नाटा देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्त्येताः सुमध्यमाः ॥"
तस्याः स्वरूपं यथा,—
"नीलारविन्दस्य दलानि बाला
विधारयन्ती तनुदेहयष्टिः ।
मालूरवृक्षस्य तलं निषण्णा
श्रोणा वृदुमालसिका प्रदिष्टा ॥"
तस्या गानसमयो यथा,—
"इन्द्रोत्थानात् समारभ्य यावदुर्गामहोत्सवम् ।
गेया भवेद्बुधैर्नित्यं मालसी सा मनोहरा ॥"
अपि च ।
"गान्धारी दीपिका चैव कल्याणी पुरवी तथा ।
अश्ववारी कानड़ा च गौरी केदारपाहिड़ा ॥
माधवी मालसी नाटी भूपाली सिन्धुड़ा तथा ।
सायाह्ने रागिणीरेताः प्रगायन्ति चतुर्दश ॥"
इति सङ्गीतदामोदरः ॥

माला, स्त्री, (माति मानहेतुर्भवतीति । मा + "ऋज्रेन्द्राग्रवज्रे ।" उणा० २।२८। इति रन् रस्य लत्वमृट् टाप् च । यद्वा, मां शोभां लाति इति । ला + कः टाप् ।) श्रेणी । तत्पर्य्यायः । राजिः२ लेखा ३ तती ४ वीची ५ आली ६ आवलिः ७ पङ्क्तिः८ धारणी ९ । इति हेमचन्द्रः । ३।३१५। ग्रन्थिं न्यस्तपुष्पदाम । अन्यचाप्युपचारात् ॥ तत्पर्य्यायः । माल्यम् २ स्रक् ३ । इत्यमरः ।२। ६ ।१३५ ॥ मालिका ४ मालाका ५ मालका ६ । इति शब्दरत्नावली ॥ गणनिका ७ गुणा-लिका ८ । इति वराहपुराणम् ॥ सा त्रिविधा यथा,—
"माला तु त्रिविधा देवि ! वर्णाश्चपर्व्वभेदतः ।"
इति मत्स्यसूक्तवचनम् ॥ * ॥
अथ मालानिर्णयः । तत्र करमाला । सनत्-कुमारसंहितायाम् ।
'तर्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात् ॥
तिसोऽङ्गुल्यश्चिपर्व्वाणो मध्यमा चैकपर्व्विका ।
पर्व्वत्रयं मध्यमाया मेरुत्वेनोपकल्पयेत् ॥
क्रममाह ।
अनामामध्यमारभ्य कनिष्ठादित एव च ।
तर्जनीमूलपर्य्यन्तं दशपर्व्वसु संजपेत् ॥
तथा,—
अनामामूलमारभ्य कनिष्ठादित एव च ।
तर्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥

एतद्वचनन्तु अष्टोत्तरशतादिविषयम् ॥ * ॥
शक्तिविषये पुनः । श्रीक्रमे ।
अनामिकाद्यं पर्व्व कनिष्ठादित्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्जनीमूलपर्व्वणि ।
तर्जन्यग्रे तथा मध्ये यो जपेत् स तु पापहृत् ॥
हंसपारमेश्वरे ।
पर्व्वद्वयमनामायाः परिवर्त्तेन वै क्रमात् ।
पर्व्वत्रयं मध्यमायास्तर्जन्येकं समाहरेत् ॥
पर्व्वद्वयन्तु तर्जन्या मेरुं तद्विद्धि पार्व्वति ! ।
शक्तिमाला समाख्याता सर्व्वतन्त्रप्रदीपिका ॥
तथा ।
अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
मध्यमामूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥ * ॥
श्रीविद्यायामयं विशेषः ।
अनामाया मध्यमाया मूलाग्रयञ्च द्वयं द्वयं ।
कनिष्ठायाश्च तर्जन्याश्चयं पर्व्व सुरेश्वरि ! ॥
अनामामध्यमायाश्च मेरुः स्यादुत्तमं शुभम् ।
प्रदक्षिणक्रमाद्देवि ! जपेत्त्रिपुरसुन्दरीम् ॥"
इति यामलवचनात् ॥

सुरूपमालातन्त्रे ।
"अनामिका द्वयं पर्व्वप्रादक्षिण्यक्रमेण तु ।
तर्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता ॥
कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
तर्जनीमूलपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥"
इदमपि अष्टोत्तरशतादिविषयम् ॥ * ॥
अङ्गुलीनैं वियुञ्जीत किञ्चिदाकुञ्चिते तले ।
अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः ॥
अन्यत्रापि ।
अङ्गुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलङ्घने ।
पर्व्वसन्धिषु यज्जप्तं तत्सर्व्वं निष्फलं भवेत् ॥
गणनाविधिमुल्लङ्घ्य यो जपेत्तज्जपं यतः ।
गृह्णन्ति राक्षसास्तेन गणयेत् सर्व्वथा बुधः ॥
तत्राङ्गुलिजपं कुर्व्वन् साङ्गुष्ठाङ्गुलिभिर्जपेत् ।
साङ्गुष्ठेन विना कर्म्म कृतं तदफलं भवेत् ॥
विश्वसारे ।
जपसंख्या तु कर्त्तव्या नासंख्यातं जपेत् सुधीः ।
असंख्याकारकस्यास्य सर्व्वं भवति निष्फलम् ॥
तन्त्रे ।
हृदये हस्तमारोप्य तिर्य्यक् कृत्वा कराङ्गुलीः ।
आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥
इति करमाला ॥ * ॥

जपसंख्यायां निषिद्धद्रव्यमाह यामले ।
नाक्षतैर्हेमपर्व्वैर्वा न धान्येनैव पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसंख्यां न कारयेत् ॥
विहितद्रव्यमाह ।
लाक्षाकुङ्कुमसिन्दूरगोमयञ्च करीषकम् ।
एभिर्निर्म्माय गुटिकां जपसंख्यान्तु कारयेत् ॥
अथ वर्णमाला । सनत्कुमारे ।
क्रमोत्क्रमगतैर्मालामालकार्णैः क्रमेण कैः ।
सबिन्दुकैः साष्टवर्गैरन्तर्यजनकर्म्मणि ॥
आदिकु टुपुयु शषोऽष्टौ वर्गाः प्रकीर्त्तिताः ।
तद्यथा । अकारादिवर्णान् सबिन्दून् प्रत्येकं
कृत्वा शतं संजप्य अकारादीनां वर्णानां
कवर्गादीनाञ्चान्तिमं वर्णं सानुस्वारं कृत्वा पूर्व्व-
सूत्रार्थं शेषाष्टवारमन्त्रजपः कार्य्यः । अनेन
प्रकारेण अष्टोत्तरशतसंख्यो जपो भवति ।
अन्तर्यजनेत्युपलक्षणम् । तथा ।
सबिन्दुं वर्णसूत्रार्थं पश्चात्कृत्वं जपेद्बुधः ।
अकारादिक्षकारान्तं बिन्दुयुक्तं विभाव्य च ।
वर्णमाला समाख्याता अनुलोमविलोमतः ॥
इति नारदवचनात् ।

विश्वुद्धेश्वरे ।
अनुलोमविलोमेन वर्गाष्टकविभेदतः ।
मन्त्रैकान्तरितान् वर्णान् वर्णैकान्तरितान्
मनून् ।
कुर्य्यादर्णमयीं मालां सर्व्वतन्त्रप्रकाशिनीम् ॥*॥
मालिनीविजये रुद्रनियमः ।
अन्तर्विन्दुसभासमानभुजगीस्रोतवर्णोज्ज्वलाम् ।
आरोहप्रतिरोहतः शतमयीं वर्गाष्टकाष्टोत्त-
राम् ॥
इति वर्णमाला ॥ * ॥

अथाक्षमाला । तत्र मालायां मणिनिर्णयः ।
पद्मबीजादिभिर्माला बहिर्यागे प्रशस्यते ।
रुद्राक्षपद्माक्षपुत्रजीवकमौक्तिकैः ॥
स्फाटिकैर्मणिरत्नैश्च सुवर्णैर्विद्रुमैस्तथा ।
राजतैः कुशमूलैश्च शङ्खस्याक्षमालिका ॥*॥
अङ्गुलीगणनादेकं पर्व्वत्रयगुणं भवेत् ।
पुत्रजीवैर्दशगुणं शतं शङ्खैः सहस्रकम् ॥
प्रवालैर्मणिरत्नैश्च दशसाहस्रकं मतम् ।
तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षसम्मितं ॥
पद्माक्षैर्दशलक्षं स्यात् सौवर्णैः कोटिरुच्यते ।
कुशग्रन्थ्या कोटिशतं रुद्राक्षैः स्यादनन्तकम् ॥
सर्व्वैर्विरचिता माला वृथा सुक्तिफलप्रदा ।
कालिकापुराणे ।
रुद्राक्षैर्वा यदि जपेत् रुद्राक्षैः स्फाटिकैस्तथा ।
नान्यमन्त्रे प्रयोक्तव्यं पुत्रजीवादिकञ्च यत् ॥
यद्यन्यत्तु प्रयुञ्जीत मालायां जपकर्म्मणि ।
तस्य कामञ्च मोक्षञ्च न ददाति प्रियङ्करी ॥
सुरूपमालायाम् ।
श्मशानधूस्तुरैर्माला जया धूमावतीविधौ ।
नराङ्गुल्यस्थिभिर्माला ग्रथिता सर्व्वकामदा ॥
नाद्या संग्रथनं कार्य्यं रक्तेन वाससा प्रिये ! ।
सदा गोप्या प्रयत्नेन जनन्या जारवत् प्रिये ! ॥
कामनाविशेषे तु ।
पद्माक्षैर्विहिता माला शत्रूनाशकरी मता ।
कुशग्रन्थिमयी माला सर्व्वपापप्रणाशिनी ॥
पुत्रजीवफलैः कृत्स्ना कुरुते पुत्रसम्पदम् ।
निर्म्मिता रूप्यमणिभिश्चैषमालेप्सितप्रदा ।
प्रवालैर्विहिता माला प्रयच्छेत् विपुलं धनम् ॥
भैरवीविद्यायान्तु वाराहीतन्त्रे ।
सुवर्णमणिभिर्म्मालां स्फाटिकीं शृङ्खनिर्म्मि-
ताम् ।
प्रवालैरेव वा कुर्य्यात् पुत्रजीवं विवर्ज्जयेत् ।
पद्माक्षैर्वेष्णवस्यैव मन्त्रस्य च विशेषतः ॥*॥

चिपुरामन्त्रजपादौ तु रक्तचन्दनबीजादिभि-
रतिप्रशस्ता । तथा च तन्त्रराजे ।
रक्तचन्दनमाला तु भोगदा मोक्षदा भवेत् ॥
तथा ।
वैष्णवे तुलसीमाला गजदन्तैर्न्नजानने ।
चिपुराया जपे शस्ता रुद्राक्षे रक्तचन्दने ॥*॥
कुमारीकल्पे ।
रुद्राक्षैः शक्तिमन्त्रञ्च मन्त्री यः प्रजपेत् प्रिये ! ।
स दुर्गतिमवाप्नोति निष्प्राज्ञस्तस्य तज्जपः ॥
कालिका छिन्नमस्ता च चिपुरा तारिणी तथा ।
एताः सर्व्वा न दुष्यन्ति जपे रुद्राक्षमालया ॥
दिवा नैव प्रजप्तव्यं रुद्राक्षमालयापि च ।
पुरश्चर्य्यादृते चाद्य दूषयन्तु वरानने ! ॥
महाशङ्खमयी माला नीलसारस्वते विधौ ।
शृङ्गलाटास्थिखण्डेन रचिता जपमालिका ॥
महाशङ्खमयी माला ताराविद्याजपे प्रिये ! ।
कर्णनेत्रान्तरालास्थि महाशङ्खः प्रकीर्त्तितः ॥
मणिनियमस्तु सुरूपमालायाम् ।
अन्योन्यसमरूपाणि नातिस्थूलकृशानि च ।
कीटादिभिरदुष्टानि न जीर्णानि नवानि वै ॥
तथा गौतमीये ।
पद्माक्षशङ्खमणिभिर्माला विहिता सर्व्वकर्म्मसु ।
अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता ॥
स्वर्णं मेरुसुखं तत्र कल्पयेच्छुभिसत्तम ! ।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः ॥*॥
चामुण्डातन्त्रे ।
नित्यं जपं करे कुर्य्यात् न तु काम्यमबोधनात् ।
काम्यमपि करे कुर्य्यात् मालाभावेऽपि सुन्दरि ! ॥
तेन मालायाः प्राधान्यम् ॥ * ॥ कामनाभेदे तु
गौतमीये ।
समासेनाक्षसूत्रस्य विधानमिह कथ्यते ।
पञ्चविंशतिभिर्मौक्तं चिंशद्भिर्धनसिद्धये ॥
सर्व्वार्थाः सप्तविंशत्या पञ्चदशभिचारके ।
पञ्चाशद्भिः काम्यसिद्धिः स्यात्तथा चतुरुत्तरैः ।
अष्टोत्तरशतैः सर्व्वसिद्धिरुक्ता मनीषिभिः ॥
अथ मालासंस्कारः । तत्र सनत्कुमारीये ।
'कार्पाससम्भवं सूत्रं धर्म्मकामार्थमोक्षदम् ।
तच्च विप्रेन्द्रकन्याभिर्निर्म्मितंच सुशोभनम् ॥'
यद्वा ।
'शुक्लं रक्तं तथा कृष्णं पट्टसूत्रमथापि वा ।
शान्तिवश्याभिचारेषु मोक्षैश्वर्य्यजयेषु च ॥
शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात् ।
सर्व्वेषामेव वर्णानां रक्तं सर्व्वेप्सितप्रदम् ॥
आभिचारे तथा चैव रक्तं सर्व्वसुसिद्धिदम् ।
त्रिगुणं त्रिगुणीकृत्य ग्रथयेत् ग्रन्थिवर्जितः ॥
एकैकं मालकावर्णं सतारं प्रजपन् सुधीः ।
मणिमादाय सूत्रेण ग्रथयेन्मध्यमध्यतः ॥
ब्रह्मग्रन्थिं विधायेत्थं मेरुञ्च ग्रन्थिसंयुतम् ।
ग्रथयित्वा पुरो मालां ततः संस्कारमारभेत् ॥
कस्यचिन्मते मूलविद्यया ग्रथयेत् । तथा च
एकवीराकल्पे ।
'मालकामन्त्रतो ग्रन्थिं विद्यया वाथ कारयेत् ।

सुवर्णादिगुणैर्वापि ग्रथयेत् साधकोत्तमः ॥
ब्रह्मग्रन्थिं ततो दद्यान्नागपाशमथापि वा ।
कवचेनावगुण्ठ्यात्मानं ध्यानपरायणः ॥
सर्व्वैरेवं ततो मेरुं सूत्रद्वयसमन्वितम् ।
ग्रथयेत्तारयोगेण वधीयात् साधकोत्तमः ।
एवं निष्पाद्य देवेशि ! प्रतिष्ठाञ्च समाचरेत् ॥
गौतमीये ।
'सूत्रे सूत्रञ्च संयोज्य पुच्छे पुच्छं नियोजयेत् ।
गोपुच्छसदृशी माला यद्वा सर्पाकृतिः शुभा ।
एवं निर्म्माय मालां वै शोधयेन्मुनिसत्तमः ॥
अश्वत्थपत्रवत्के पद्माकारन्तु कारयेत् ।
तन्मध्ये स्थापयेन्मालां मालकां मूलमुच्चरन् ।
चालयेत् पञ्चगव्येन सद्योजातेन सज्जलैः ॥'
सद्योजातस्तु ।
'ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।
भवेभवेनादिभवे भजस्व मां भवोद्भवाय नमः॥
चन्दनागुरुकर्पूरैर्वामदेवेन घर्षयेत् ॥'
वामदेवमन्त्रस्तु । ॐ वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्व्वभूतदमनाय नमो मनोन्मनाय नमः ।
धूपयेत्तामघोरेण । अघोरमन्त्रस्तु । अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्व्वतः सर्व्वसर्व्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः । धेनयेत्तत्पुरुषेण तु । तत्पुरुषमन्त्रस्तु । ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ।
'मन्त्रयेत् पञ्चमेनैव प्रत्येकन्तु घृतं घृतम् ।
मेरुञ्च मन्त्रयेच्चैव मनुना च घृतं घृतम् ॥'
मन्त्रस्तु । ॐ ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः शिरो मेऽस्तु सदाशिवोम् । प्रत्येकन्तु सप्तधा सप्तधा ।
इति पा । तथा च तत्रैव ।
'प्रत्येकं मन्त्रयेन्मन्त्री पञ्चमेन सप्तधा सप्तधा ।'
तथा च गौतमीये समुदायमालाभिधानम् ।
'पञ्चमेनैव सूत्रेण घृताप्लुतेन मन्त्रयेत् ।'
इति दर्शनान्मालायां वा घृतजपः ।
तत्रावाह्य यजेद्देवं यथाविभवविस्तरैः ।
मालायाः प्राक्प्रतिष्ठानन्तरं देवतां पूजयेत् ॥
तथा सनत्कुमारे ।
'संस्कृत्यैवं बुधो मालां तत्रामांस्तत्र स्थापयेत् ।
मूलमन्त्रेण तां मालां पूजयेद्द्विजसत्तम ! ॥'
वाराहीतन्त्रे ।
'माले माले महामाये सर्व्वतत्त्वस्वरूपिणि ! ।
चतुर्व्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
मायाबीजादिकां कृत्वा रक्तपुष्पैः समर्चयेत् ॥'
इति प्रक्तिविषये ॥
विष्णुविषये तु रुद्रयामले ।
'वाग्भवञ्च तथा लक्ष्मीमक्षादिमालिकां ततः ।
ऊर्ध्वान्तां हृदयवर्णान्तां मन्त्रेणानेन पूजयेत् ॥
मन्त्रयेन्मूलमन्त्रेण क्रमेणोत्क्रमयोगतः ।
तथैव मातृकावर्णैर्मन्त्रयेत्तान्तु मन्त्रवित् ॥'
योगिनीतन्त्रे ।
'होमकर्म्म ततः कुर्य्याद्देवताभावसिद्धये ।
अष्टोत्तरशतं हुत्वा सम्यातार्च्यं विनिःक्षिपेत् ।
होमकर्म्मण्यशक्तश्चेत् द्विगुणं जपमाचरेत् ॥
नान्यमन्त्रं जपेन्मन्त्री कम्पयेन्न विधूनयेत् ।
कम्पनात् सिद्धिहानिः स्याद्धूनने बहुदुःखदम् ॥
ग्रन्थे जाते भवेद्रोगः करभ्रष्टे विनाशिका ।
छिन्ने सर्व्वं भवेन्मृत्युस्तस्मात्तत्रपरो भवेत् ॥
जपान्ते कर्णदेशे वा उच्चदेशे तथा न्यसेत् ।
त्वं माले सर्व्वभूतानां सर्व्वसिद्धिप्रदा मता ।
तेन सत्येन मे सिद्धिं देहि मातर्नमोऽस्तु ते ।
इत्युक्त्वा परिपूज्याथ गोपयेद्यत्नतो गृही ॥'
मालासंस्कारस्य नित्यतामाह रुद्रयामले ।
'अप्रतिष्ठितमालाभिर्मन्त्रं जपति यो नरः ।
सर्व्वं तद्विफलं विद्यात् कृत्वा भवति देवता ॥'
कामनाभेदे तु अङ्गुलिनियमः । गौतमीये ।
'तर्ज्जन्यङ्गुष्ठयोगेन ग्रन्थिघातनसत्तमम् ।
अङ्गुष्ठमध्यमायोगात् मन्त्रसिद्धिः सुनिश्चिता ॥
अङ्गुष्ठानामिकायोगादुच्चाटोत्सादने मते ।
ज्येष्ठाकनिष्ठायोगेन ग्रन्थिनां नाशनं मतम् ॥'
वैशम्पायनसंहितायाम् ।
'अङ्गुष्ठमध्यमाभ्याञ्च चालयेन्मध्यमध्यतः ।
तर्ज्जन्या न स्पृशेदेनां सुक्तिदो गणनक्रमः ॥
जीर्णे सूत्रे पुनः सूत्रं ग्रथयित्वा घृतं जपेत् ।
प्रमादात् पतिता हस्तात् घृतमष्टोत्तरं जपेत् ॥
जपेन्निधिसंस्पर्शे चालयित्वा यथोदितम् ।
छिन्नेऽप्यष्टोत्तरशतजपः कार्य्यः । करभ्रष्टेऽप्येवमेवोक्तत्वात् ॥* प्रकारान्तरं आयमकल्पद्रुमे ।
'भूतशुद्ध्यादिकां पूजां समाप्य तत्र पूजयेत् ।
गणेशसूर्य्यविष्णूशान् दुर्गामावाह्य मन्त्रवित् ॥
पञ्चगव्ये ततः स्नात्वा ह्यसौमन्त्रेण मन्त्रवित् ।
तस्माद्गृह्य तां मालां स्वर्णपात्रे विधाय च ॥
पयोदधिघृतक्षौद्रशर्करात्रैरनुक्रमात् ।
तोयधूपान्तरैः कृत्वा पञ्चाग्नतविधिं बुधः ॥
क्रमादेवं संस्थाप्य स्थापयेच्छीतले जले ॥
ततश्चन्दनसौगन्धिकसूरीकुङ्कुमादिभिः ।
तामालिप्य ह्यसौमन्त्रमष्टोत्तरशतं जपेत् ॥
तस्यां नवग्रहांश्चैव दिक्पालांश्च प्रपूजयेत् ।
ततः संपूज्य च गुरुं गृह्णीयान्मालिकां शुभाम् ॥
अक्षमालाञ्च सुद्राञ्च गुरोरपि न दर्शयेत् ।
भूतराक्षसवेतालाः सिद्धगन्धर्व्वचारणाः ।
हरन्ति प्रकटं यस्मात्तस्माद्गुप्तं समाचरेत् ॥'
इति अक्षमाला । इति तन्त्रसारः ॥
अपि च ।
'विद्याधराप्सरोयक्षा विबुधासुरराक्षसाः ।
भूतानि किन्नराः सिद्धाः प्रेताश्च चारणादयः ॥
हरन्ति अपफलान्येते यानि तानि च नारद ! ।
अतूर्णी चेद्दहेज्जातु चार्द्रवासादिभिर्जपेत् ॥
तुलसीकाष्ठसम्भवा ।
रुद्राक्षोद्भवनमयी तुलसीकाष्ठसम्भवा ।
हस्ताङ्गुलिमयी हैमी दर्भग्रन्थिमयी तथा ॥
भद्राक्षेन्द्राक्षरुद्राक्षपद्मबीजभवाप्यथ ।
धात्रीपुत्रजीवफलैर्माला या परिकीर्त्तिता ॥
मुक्तामणिमयी रौप्या स्फाटिकी वैदली तथा ।
जपकर्म्मसु सर्व्वेषु चात्तमाला प्रकीर्त्तिता ॥*॥
क्षणमन्त्रजपे माला द्रुन्दारण्यसमुद्भवा ।
नान्या माला अनन्यानां हस्ताङ्गुलिमयीं विना ॥
हैमी मणिमयी माला प्रशस्ता कमलाजपे ।
सरस्वत्या मन्त्रजपे रौप्या मुक्ताविनिर्म्मिता ॥
प्रजापतिजपे माला पुत्रजीवसमुद्भवा ।
पुत्रकामनराणाञ्च सदा पुत्रप्रदा तु सा ॥
राममन्त्रजपे माला पद्मबीजसमुद्भवा ।
धात्रीफलमयी माला विष्णोः कामनया जपे ॥
रुद्राक्षेन्द्राक्षभद्राक्षवृक्षबीजसमुद्भवा ।
महेशमन्त्रमन्त्रजपे श्वेता मालाः फलप्रदाः ॥
कुशग्रन्थिमयी गुह्या गायत्री वैष्णवी जपे ।
स्फाटिकी सर्व्वदेवानामथवा तरणीजपे ।
श्रीहरेरङ्गुलिमयी जपे माला द्विजन्मनाम् ॥'
इति पाद्मोत्तरखण्डे १०८ अध्यायः ॥
अपरञ्च ।
'जपादौ पूजयेन्मालां तोयैरभ्युक्ष्य यत्नतः ।
निधाय मस्तकस्थान्तः सव्यहस्तगताञ्च वा ॥
ॐ मां माले महामाये सर्व्वशक्तिस्वरूपिणि ! ।
चतुर्व्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
पूजयित्वा ततो मालां गृहीत्वा दक्षिणे करे ।
मध्यमाया मध्यभागे वर्ज्जयित्वा तु तर्ज्जनीम् ॥
अनामिकाकनिष्ठाभ्यां युतायां नम्रभावतः ।
स्थापयित्वा तत्र मालामङ्गुष्ठाग्रेण तत्परम् ॥
प्रत्येकं बीजमादाय जपं कुर्य्यात्तु भैरव ! ।
प्रतिवारं पठेन्मन्त्रं शनैरोष्ठं न चालयेत् ॥
मालाबीजन्तु जप्यञ्च स्पृशेन्न हि परस्परम् ।
पूर्व्वजापप्रयुक्तेनैवाङ्गुष्ठाग्रेण भैरव ! ॥
पूर्व्वबीजं जपन् यस्तु परबीजन्तु संस्पृशेत् ।
अङ्गुष्ठेन भवेत्तस्य निष्फलस्तस्य तज्जपः ॥
मालां स्वहृदयासन्नं कृत्वा दक्षिणपाणिना ।
देवीं चिन्तयन् जप्यं कुर्य्यादाभेन न स्पृशेत् ॥
स्फाटिकेन्द्राक्षरुद्राक्षैः पुत्रजीवसमुद्भवैः ।
सुवर्णमणिभिः सम्यक् प्रवालैरथवाब्जकैः ॥
अक्षमाला तु कर्त्तव्या देवी प्रीतिकरा परा ।
जपेदुपांशु सततं कुशग्रन्थ्या तु पाणिना ॥
नानाबीजेषु सर्व्वेषु रुद्राक्षो मत्प्रियात्प्रियः ।
रुद्रप्रीतिकरो यस्मात्तस्माद्रुद्राक्षको बली ॥
प्रवालैरथवा कुर्य्यादष्टाविंशति बीजकैः ।
पञ्चपञ्चगता वापि न न्यूनैर्नाधिकैश्च वा ॥
रुद्राक्षैर्यदि जप्यंत रुद्राक्षैः स्फाटिकैस्तथा ।
नान्यं मध्ये प्रयोक्तव्यं पुत्रजीवादिकञ्च यत् ॥
यदन्यत्तु प्रयुज्येत मालायां जपकर्म्मणि ।
तस्य कामञ्च मोक्षञ्च न ददाति प्रियङ्करी ॥
जन्मान्तरे जायते स वेदवेदाङ्गपारगः ।
मित्रीभावं तदा याति चाब्जालैः पापकर्म्मभिः ॥
एको मेरुस्तत्र देयः सर्व्वेभ्यः शूलसम्भवः ।
आद्यं मूलं ततस्तस्मात् न्यूनं न्यूनतरं तथा ॥
विन्यसेत् क्रमतस्तस्मात् सर्पाकारा हि सा यतः ।
ब्रह्मग्रन्थियुतं कुर्य्यात् प्रतिबीजं यथा स्थितम् ॥

अथवा ग्रन्थिरहितं दृढ़रज्जुसमन्वितम् ।
चिराहृत्याथ मध्येनैवार्द्धावृत्त्याग्रदेशतः ॥
ग्रन्थिः प्रदक्षिणावर्त्तः स ब्रह्मग्रन्थिसंज्ञकः ।
नाम्ना योजयेन्मालां नामन्त्रो योजयेद्बुधः ॥
दृढ़ं सूत्रं नियुञ्जीत जपे च्युयति नो यथा ।
यथा हस्तान्न च्यवते जपतः सक् तथाचरेत् ।
हस्ताच्युतायां विघ्नः स्याच्छिन्नायां मरणं
भवेत् ।
एवं यः कुरुते मालां जप्यं च मयकोदितम् ।
स प्राप्नोतीप्सितं कामं हीने स्यात्तु विपर्य्ययः ॥
अन्यत्रापि जपेन्मालां जप्यं देवमनोहरम् ।
ईदृशं साधकः कुर्य्यात् नान्यथा तु कदाचन ॥
यथाशक्ति जपं कुर्य्यात् संख्यैव प्रयतत्नतः ।
असंख्यातन्तु यज्जप्तं तत् सर्व्वं निष्फलं भवेत् ।
जप्या मालां शिरोदेशे प्राशुस्थानेऽथवा न्यसेत् ॥
इति कालिकापुराणे ५४ अध्यायः ॥*॥

अथ मालादिधारणम् ।
ततः क्षण्णार्पिता माला धारयेत्तुलसीदलैः ।
पद्माक्षैस्तुलसीकाष्ठैः फलैर्धात्र्याश्च निर्म्मिता ॥
धारयेत्तुलसीकाष्ठभूषणानि च वैष्णवः ।
मस्तके कर्णयोर्बाह्वोः करयोश्च यथारुचि ॥*॥

अथ मालाधारणविधिः ।
स्कान्दे ।
संनिवेद्यैव हरये तुलसीकाष्ठसम्भवाम् ।
मालां पश्चात् स्वयं धत्ते स वै भागवतोत्तमः ॥
हरये नार्पयेद्यस्तु तुलसीकाष्ठसम्भवाम् ।
मालां धत्ते स्वयं मूढ़ः स याति नरकं ध्रुवम् ॥
क्षालितां पञ्चगव्येन मूलमन्त्रेण मन्त्रिताम् ।
गायत्र्या चाभिमन्त्र्यो वै मन्त्रितां धूपयेच्च ताम् ।
विधिवत् परया भक्त्या सद्योजातेन पूजयेत् ॥
तुलसीकाष्ठसम्भूते माले कृष्णजनप्रिये ।
बिभर्म्मि त्वामहं कण्ठे कुरु मां कृष्णवल्लभम् ॥
यथा त्वं वल्लभा विष्णोर्नित्यं विष्णुजनप्रिया ।
तथा मां कुरु देवेशि ! नित्यं विष्णुजनप्रियम् ॥
दानेन मा धातुरदितो जासि मां हरिवल्लभे ! ।
भक्तेभ्यश्च समस्तेभ्यस्तेन माला निगद्यसे ॥
एवं संप्रार्थ्य विधिवन्मालां कृष्णस्यार्पिताम् ।
धारयेद्देष्णवो यो वै स गच्छेद्वैष्णवं पदम् ॥"*॥

अथ मालाधारणनित्यता ।
तत्रैव स्कान्दे कार्त्तिकप्रसङ्गे ।
"धात्रीफलकृतां मालां कण्ठस्थां यो वहेन्न हि ।
वैष्णवो न स विज्ञेयो विष्णुपूजारतो यदि ॥"
गारुड़े ।
"धारयन्ति न ये मालां हैतुकाः पापबुद्धयः ।
नरकान्न निवर्त्तन्ते दग्धाः कोपाग्निना हरेः ॥"
अतएव स्कान्दे तत्रैव ।
"न जह्यात्तुलसीमालां धात्रीमालां विशेषतः ।
महापातकसंहर्त्रीं धर्म्मकामार्थदायिनीम् ॥*॥

अथ मालामाहात्म्यम् ।
अगस्त्यसंहितायाम् ।
"निर्म्माल्यतुलसीमालायुक्तो यश्चार्चयेद्धरिम् ।
यद्यत् करोति तत् सर्व्वमनन्तफलदं भवेत् ॥
यः कुर्य्यात्तुलसीकाष्ठैरक्षमालास्वरूपिणीम् ।
कण्ठमालाञ्च यत्नेन धृतं तस्याक्षयं भवेत् ॥"
नारदीये ।
"ये कण्ठलग्नतुलसीनलिनाक्षमाला
ये वा ललाटफलके लसदूर्द्धपुण्ड्राः ।
ये बाहुमूलपरिचिह्नितशङ्खचक्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥"
किञ्च ।
"भुजयुगमपि चिह्नैरङ्कितं यस्य विष्णोः
परमपुरुषनाम्नां कीर्त्तनं यस्य वाचि ।
ऋजुतरमपि पुण्ड्रं मस्तके यस्य कण्ठे
सरसिजमणिमाला यस्य तस्यास्ति दासः ॥"
विष्णुधर्म्मोत्तरे श्रीभगवदुक्तौ ।
"तुलसीकाष्ठमालाञ्च कण्ठस्थां वहते तु यः ।
अप्यशौचोऽप्यनाचारो मामेवेति न संशयः ॥"
स्कान्दे ।
"धात्रीफलकृता माला तुलसीकाष्ठसम्भवा ।
दृश्यते यस्य देहे तु स वै भागवतो नरः ॥
तुलसीदलजां मालां कण्ठस्थां वहते तु यः ।
विष्णूत्तीर्णां विशेषेण स नमस्यो दिवौकसाम् ॥
तुलसीदलजा माला धात्रीफलकृतापि वा ।
ददाति यापिनां मुक्तिं किं पुनर्विष्णुसेविनाम् ॥
तत्रैव कार्त्तिकप्रसङ्गे ।
यः पुनस्तुलसीमालां कृत्वा कण्ठे जनार्द्दनम् ।
पूजयेत् पुण्यमाप्नोति प्रतिपुष्पं गवायुतम् ॥
अयुतसंख्यगोदानफलमित्यर्थः ।
यावत्कुरुते कण्ठग्रा धात्रीमाला नरस्य हि ।
तावत्तस्य शरीरे तु प्रीत्या तुष्यति केशवः ॥
सृष्टेश्च यानि लोमानि धात्रीमाला कलौ
नृणाम् ।
तावद्वर्षसहस्राणि वसते केशवालये ॥
यावद्दिनानि वहते धात्रीमालां कलौ नरः ।
तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत् ॥
मालायुगञ्च यो नित्यं धात्रीतुलसिसम्भवम् ।
वहते कण्ठदेशे च कल्पकोटिं दिवं वसेत् ॥"
तुलसिसम्भवमिति हस्वश्छान्दसः । गारुड़े च
मार्कण्डेयोक्तौ ।
"तुलसीदलजां मालां कृष्णोत्तीर्णां वहेत्तु यः ।
पत्रे पत्रेऽश्वमेधानां दशानां लभते फलम् ॥*॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
फलं यच्छति दैत्यारिः प्रत्यहं द्वारकोद्भवम् ॥
निवेद्य केशवे मालां तुलसीकाष्ठसम्भवाम् ।
वहते यो नरो भक्त्या तस्य वै नास्ति पातकम् ।
सदा प्रीतमनास्तस्य कृष्णो देवकिनन्दनः ॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
प्रायश्चित्तं न तस्यास्ति नाशौचं तस्य विद्यते ।
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
तुलसीकाष्ठसम्भूतं शिरसो बहुभूषणम् ।
बाह्वोः करे च सर्व्वस्य देहे तस्य सदा हरिः ॥
तुलसीकाष्ठमालाभिर्भूषितः पुण्यमाचरेत् ।
पितॄणां देवतानाञ्च कृतं कोटिगुणं कलौ ॥
तुलसीकाष्ठमालान्तु प्रेतराजस्य दूतकाः ।
दृष्ट्वा नश्यन्ति दूरेण वातोद्धूतं यथाऽनलम् ॥
तुलसीकाष्ठमालाभिर्भूषितो भ्रमते यदि ।
दुःस्वप्नं दुर्निमित्तञ्च न भयं ग्रस्यते क्वचित् ॥"
गौतमीये पुरश्चरणप्रसङ्गे ।
"तथामलकसम्भूतैस्तुलसीकाष्ठनिर्म्मितैः ।
इत्यादि ॥*॥ तत्रैव ।
पुष्करीकभवा माला गोपालमनुसिद्धिदा ।
आमलकीभवा माला सर्व्वसिद्धिप्रदा मता ।
तुलसीसम्भवा या तु मोक्षं विन्दतेऽचिरात् ॥
इति हरिभक्तिविलासः ॥*॥*॥

अथ रुद्राक्षमालाधारणफलादि ।
लिङ्गपुराणे ।
विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥
संवर्त्तसरप्रश्नेषे ।
त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोऽपतंस्तु ये ।
अश्रुणो विन्दवस्ते तु रुद्राक्षा अभवन् भुवि ॥
यद्यप्येकादिचतुर्दशमुखरुद्राक्षेषु मन्त्रफल-
विशेषाः सन्ति तथापि सुलभत्वात् पञ्चवक्त्रस्य
फलमन्त्रावभिधीयेते । यथा, स्कान्दे ।
"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥"
इति तिथ्यादितत्त्वम् ॥

मालाकण्टः, पुं, (मालाकाराः कण्टाः कण्टका अस्य ।) अपामार्गः । इति राजनिर्घण्टः ॥
मालाकन्दः, पुं, (माला गण्डमाला नाशकः कन्दः । प्राकपार्थिववत् मध्यपदलोपी ।) मूलविशेषः । तत्पर्य्यायः । आविलकन्दः २ निशिखिदला ३ ग्रन्थिदला ४ पादिकन्दः ५ कन्दलता ६ । अस्य गुणाः । सृतीक्ष्णत्वम् । गण्डमालानाशित्वम् । दीपनत्वम् । गुल्महारित्वम् । वातश्लेष्मापकर्षकारित्वञ्च । इति राजनिर्घण्टः ॥
मालाका, स्त्री, (माला एव । माला + स्वार्थे कन् टाप् ।) माला । इति शब्दरत्नावली ॥
मालाकारः, पुं, (मालां करोतीति । कृ + अण् ।) वर्णसङ्करजातिविशेषः । मालिकः । माली इति ख्यातः । तत्पर्य्यायः । मालिकः २ । इत्यमरः । २ । १० । ५ । मालाकरः ३ पुष्पाजीवी ४ वनार्च्चकः ५ पुष्पलावः ६ । इति जटाधरः ॥ पुष्पलावकः ७ । इति शब्दरत्नावली ॥ स तु शूद्रायां विश्वकर्म्मणो जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ अपि च ।
"तैलिक्यां कर्म्मकाराच्च मालाकारस्य सम्भवः ॥
इति पराशरपद्धतिः ॥
तद्गृहस्थितपुष्पस्य पर्य्युषितदोषाभावो यथा,
"न पर्य्युषितदोषोऽस्ति तुलसीविल्वचम्पके ।
जलजे बकुलेऽगस्त्ये मालाकारगृहेषु च ॥"
इति मेरुतन्त्रे ५ प्रकाशः ॥
(यथा, बृहत्संहितायाम् । १० । ६ ।
"हस्ते नापितचाक्रिक-
चौरभिषक्सूचिकदीपग्राहाः ।

वस्त्रयः कौशूलका मालाकाराश्च पीच्यन्ते॥ स्त्रियां ङीप्। यथा तत्रैव। ७८। ६।
"भिक्षुणिका प्रव्रजिता दासी धात्री कुमारिका रजिका।
मालाकारी दुष्टाङ्गना सखी नापितो दूत्यः।")
मालाग्रन्थिः, पुं, (माल्येव ग्रन्थिरस्य।) मालादूर्वा। इति राजनिर्घण्टः॥
मालाङ्गं, क्ली, (मालाकारं लगम्।) भूलगम्। इति राजनिर्घण्टः॥
मालाङ्गकं, क्ली, (मालाङ्ग। स्वार्थे कन्।) भूलगम्। इत्यमरः।२।४।१६०॥ ई गन्धखड इति ख्याते। मालारूपं लगं मालाङ्गं स्वार्थे कः। भुवस्तृणं भूलगत्वात् भूस्तृणं मनीषादित्वात् साधुः। मालाङ्गकभूस्तृणे। इति क्लीवे। इति सुभूत्यादयः॥ मालाङ्गकभूस्तृणाविति पुंसि पठन्ति केचित्॥ स्वामी तु। क्षुद्रातिक्षुद्रादिभूस्तृणान्तं पर्य्यायमाह यथा,—
"भूस्तृणो रौहिषो भूतिर्भूमिकोऽथ कुटुम्बकः।
मालाङ्गश्च पालग्रस्क्षुद्रातिक्षुद्रकस्तथेति॥"
रामकर्पूरं बहुपत्रकाण्डं कर्पूरसुगन्धि।
इदन्तु गुणपुष्पिकाबहुलकटगन्धं भूलगञ्च भवतीत्यनयोर्भेदः। इति तट्टीकायां भरतः॥ (तथास्य पर्य्यायः।
"गुन्द्रबीजन्तु भूतीकं सुगन्धं जलुकप्रियम्।
भूलगन्तु भवेच्छ्वा मालाङ्गकमित्यपि।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मालादूर्व्वा, स्त्री, (माला इव ग्रन्थियुक्ता दूर्वा।) दूर्व्वाविशेषः। गाठिया दूर्व्वा इति भाषा। तत्पर्य्यायः। वल्लिदूर्व्वा २ अलिदूर्व्वा ३ मालाग्रन्थिः ४ ग्रन्थिला ५ ग्रन्थिदूर्व्वा ६ मूलग्रन्थिः ७ वेल्लनी ८ ग्रन्थिफला ९ रोहत्पर्व्वा १० पर्व्वबली ११ शिवाङ्घ्रा १२। अस्या गुणाः। समधुरत्वम्। तिक्तत्वम्। शिशिरत्वम्। पित्तदोषप्रशमनत्वम्। कफवान्तिव्रणापहत्वञ्च। इति राजनिर्घण्टः॥
मालारिष्टा, स्त्री, पाची। इति राजनिर्घण्टः॥
मालालिका, स्त्री, (माला अलतीति। अल+खुल् टाप् अत इत्वञ्च।) एका। इति राजनिर्घण्टः॥
मालाली, स्त्री, (मालामलति। अल+अच्। ङीप्।) एका। इति राजनिर्घण्टः॥
मालिः, पुं, सुकेशराक्षसपुत्रः। यथा,—
"ग्रामणीनाम गन्धर्व्वो विश्वावसुसमप्रभः।
तस्य देववती नाम द्वितीया श्रीरिवात्मजा॥
त्रिषु लोकेषु विख्याता रूपयौवनशालिनी।
तां सुकेशाय धर्म्मात्मा ददौ रक्षःश्रियं यथा॥
वरदानबलैश्वर्य्यं सा तं प्राप्य पतिं प्रियम्।
आसीद्देववती तुष्टा धनं प्राप्येव निर्धनः॥
स तया सह सन्तुष्टो रराज रजनीचरः।
ततः काले सुकेशस्तु जनयामास राघव!॥
त्रीन् पुत्रान् जनयामास चेसामिसमविक्रमान्।
माल्यवन्तं सुमालिञ्च मालिञ्च बलिनांवरम्॥"
इति श्रीरामायणे उत्तरकाण्डे ५ सर्गः॥
मालिक, पुं, (मालास्य पण्यम्। माला+"तदस्य पण्यम्।" ४।४।५१। इति ठक्। यद्वा, मालाग्रथनं शिल्पमस्येति। "शिल्पम्।" ४।४।५५। इति ठक्।) मालाकारः। इत्यमरः।२।१०।५॥ (यथा,राजतरङ्गिण्याम्।४।१६८।
"निदाघे पुष्पतास्तूलीपर्णादृयत्रातिशीतले।
न्यस्यद्भिर्मालिकैर्दत्तात् सा जीवेद्घाटकादिति॥")
पक्षिभेदः। इति मेदिनी। के, १२६। रङ्कः। इति शब्दरत्नावली॥
मालिका, स्त्री, (मालेव। माला+कन् टाप् अत इत्वञ्च।) सपत्नी। पुत्री। यौवालङ्करणम्। पुष्पमाल्यम्। नदीविशेषः। इति मेदिनी। के, १२६। सुरा। इति हारावली॥ क्षुमा। इति शब्दचन्द्रिका॥
मालिनी, स्त्री, (माला सुरूपमालाऽस्त्यस्याः। माला+"श्रीह्रादिभ्यश्च।" ५।२।१२६। इति इनिः ङीप्।) मालकामेदः। वृत्तभेदः। (मालिन्+ङीष्।) मालिकपत्नी॥ गौरी। चम्पानगरी। (यथा, महाभारते।१२। ५।६—७।
"प्रीत्या ददौ स कर्णाय मालिनीं नगरीमथ।
अङ्गेषु नरशार्दूल! स राजासीत् सपत्नजित्॥
पालयामास चम्पाञ्च कर्णः परबलार्दनः॥")
मन्दाकिनी। नदीभेदः। इति मेदिनी। (यथा, महाभारते। १। ७२। ८।
"जनयामास मुनिर्मेनकायां शकुन्तलाम्।
प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम्।")
अग्निशिखावृक्षः। दुरालभा। इति शब्दचन्द्रिका। स च वृत्तभेदः पञ्चदशाक्षरपादच्छन्दः। यथा,—
"न न म य य युतेयं मालिनी भोगिलोकैः।
नगमदशतयत्तौ पीतकौशेयवासा
शचिरशिखिशिखण्डावद्धधम्मिल्लपाशा।
अतनुनिहितमंसे वंशसत्कांशयन्ती
वृतमधुरिपुलीला मालिनी पातु राधा॥"
इति छन्दोमञ्जरी॥
अप्सरोविशेषः। यथा, कथासरित्सागरे। ४५। ३५२।
"पिङ्गलाच गणाख्याता दशमी केशरावली।
एकादशी मालिनीति नाम्ना कम्बलनन्दिनी॥
स्कन्दमातृणामन्यतमा। सैव शिशुमातृणामन्यतमा। यथात्रैव। १। २२७। १०।
"काकी च हलिमा चैव मालिनी डुंडिला तथा।
आर्य्या पलाला वैमित्रा सप्तैताः शिशुमातरः॥"
मालाग्रथनं शिल्पमस्याः। इनिः। ङीप्। द्रौपद्या नामान्तरम्। यथा, महाभारते। ४। ८। २१।
"मालिनीत्येव मे नाम स्वयं देवि चकार सा।
साहमभ्यागता देवि! सुदेष्णे! त्वन्निवेशनम्॥"
राक्षसीभेदः। सा च विभीषणस्य माता। यथा, महाभारते। ३। २७४। ३—८।
"स राजराजो लङ्कायां निवसन्नरवाहनः।
राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः॥
ताः सदा तं महात्मानं सन्तोषयितुमुद्यताः।
ऋषिं भरतशार्दूल! कृत्यगीतविशारदाः॥
पुण्योत्कटा च राका च मालिनी च विशाम्पते!।
अन्योन्यसदृशा राजन्! श्रेयस्कामा समर्थमाः॥
स तासां भगवांस्तुष्टो महात्मा प्रददौ वरान्।
लोकपालोपमान् पुत्रानेकैकस्या यथेप्सितान्॥
पुण्योत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ।
कुम्भकर्णेन्द्रजिच्चौ बलेनाप्रतिमौ भुवि॥
मालिनी जनयामास पुत्रमेकं विभीषणम्।
राकायां मिथुनं यज्ञे खरः सूर्पणखा तथा॥"
रौप्यमुद्रामाता। यथा, मार्कण्डेये।६८।५—७।
"तथेति तेन सा प्रोक्ता तस्मात्तोयाद्वपुश्चतौ।
उज्जहार ततः कन्यां मालिनीं नाम नामतः॥
नद्याञ्च पुलिने तस्मिन् स ऋषिर्मुनिसत्तमः।
जग्राह पाणिं विधिवत् समागाय्य महासुनीः॥
तस्यां तस्य सुतो जज्ञे महावीर्य्यो महामतिः।
रौप्योऽभवत् पितुर्नाम्ना ख्यातोऽत्र वसुधातले॥"
श्वेतकर्णस्य पत्नी। यथा, हरिवंशे।१८५।७।
"तस्माद्वनगतादृग्भं यादवी प्रत्यपद्यत।
सुचारोर्दुहिता सुभ्रूर्मालिनी भालमालिनी॥")
मालिन्यं, क्ली, (मलिन+"गुण्कुण्कठजिलसेनिरष्ण्यञ्यर्थेषु।" ४।२।८०। इति संज्ञायामित्यत्र ण्यप्रत्ययः।) मलिनत्वम्। मलिनस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥ (यथा, राजतरङ्गिण्याम्। १। १७८।
"भोगयोगेन मालिन्यं नेतुं मध्यगतोऽपि सः।
न शक्यते सदा पङ्केन प्रतिमेन्दुरिवामलः॥")
मालिन्, [न्] पुं, (माला पण्यत्वेनास्त्यस्य। माला+"ह्रीह्रादिभ्यश्च।"५।२।११६। इति इनिः।) मालाकारः। इति मालिनीशब्ददर्शनात्॥ सुकेशराक्षसपुत्रः। यथा,—
"सुकेशपुत्रैर्भगवन्! पितामहवरोद्धतैः।
अहं विष्णुरहं रुद्रो ब्रह्माहं देवराडहम्॥
अहं यमश्च वरुणश्चन्द्रोऽहं रविरप्यहम्।
इति माली सुमाली च माल्यवांश्चैव राक्षसः।
बाधन्ते समरोद्धर्षा ये च तेषां पुरःसराः॥"
इति रामायणे उत्तरकाण्डे ६ सर्गः॥
(अस्त्यस्यमाला अस्त्यस्येतीनिः। सुदादेवः। यथा, महाभारते। १३। १७। ६०।
"बालरूपो गुहावासी गुहो मौली तरङ्गवित्।")
माला अस्त्यस्येतीनिः। मालायुक्ते, त्रि। यथा, रामायणे। २। ५६। ६।
"आदीप्तानिव वैदेहि! सर्व्वतः पुष्पितान्नगान्।
खैः पुष्पैः किंशुकान् पश्य मालिनः शिशिरात्यये॥")
माल्लुः, पुं, (मृ+"चो रच्च लः।" १। ५। इत्यत्र बाहुलकात् लुच्। इत्युज्ज्वलदत्तोक्त्या लुच्।) पक्षलता। नारी। इति मेदिनी। ले, ४५॥

मालुधानः, पुं, (मालु मरुयं विदधातीति। धा + ल्युः।) मातुलाहिः। इत्यमरः। १। ८। ६। मालुया साप इति भाषा॥ अष्टनागान्तर्गत-नागविशेषः। यथा,—
"मालुधानश्चित्रवर्णे महापद्मोऽपि दृश्यते।"
इति हारावली॥
मालुधानी, स्त्री, लताभेदः। इति मेदिनी। ने, २०३॥
मालूकः, पुं, क्षत्त्रजातिकः। इति राजनिर्घण्टः॥
मालूरः, पुं, (मां परेषां दृष्टान्तरायां श्रियं प्रभावं लुनातीति। लूञ् + बाहुलकात् रः।) विल्ववृक्षः। इत्यमरः। २। ४। ३२॥ (यथा, नैषधे। १। ६४।
"स वारनारीकुचसन्निभोपमं
ददर्श मालूरफलं प्रचेलिमम्।")
कपित्थवृक्षः। इति राजनिर्घण्टः॥ (विल्ववृक्षार्थे पर्य्यायो यथा,—
विल्वो महाकपित्थाख्यः श्रीफलो गोहरीतकी।
पूतिवातोऽथ मालूरो मालूरश्च महाफलम्॥"
इति वैद्यकरत्नमालायाम्॥
"विल्वः शाण्डिल्यशैलूषौ मालूरश्रीफलावपि।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे च॥)
मालेया, स्त्री, (मल + ढक् टाप्।) स्थूलेला। इति रत्नमाला॥ (स्थूलेलाशब्देऽस्या विशेषो ज्ञेयः॥)
माल्यं, क्ली, (माल्येव। माला + चतुर्व्वर्णादित्वात् ष्यञ्।) पुष्पम्। पुष्पस्रक्। इति मेदिनी। ये, ४५॥ पुष्पार्थकमाल्यशब्दस्य प्रयोगो यथा,
"यथा चाप्येन माल्येन वासितं तिलसर्षपम्।
न सृजति स्वकं गन्धं तद्वत् सूक्ष्मस्य दर्शनम्॥"
इति महाभारते मोक्षधर्म्मे १०५ अध्यायः॥
मूर्द्धि न्यस्तपुष्पदाम। इत्यमरः। २। ७। ११५॥
अस्य पर्य्यायादिमालाशब्दे द्रष्टव्यः॥ *॥
(पुष्पसमूहे गुणा यथा,—
"दृष्यं सौगन्ध्यमायुष्यं कान्यं पुष्टिबलप्रदम्।
सौमनस्यमलक्ष्मीघ्नं गन्धमाल्यनिषेवणम्॥"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये॥)
माल्यदानफलं यथा,—
"गन्धमाल्यैरलङ्कारैस्तुष्टा दृष्टाश्च नित्यशः।
गन्धमाल्यप्रदा ये तु दाननिश्चयतत्पराः॥
धर्म्मज्ञाः सत्यशीलाश्च सर्व्वदुःखविवर्ज्जिताः।
सुचिरं देवतैः सार्द्धं क्रीडन्ति हि महासने!॥"
इति वह्निपुराणम्॥
अपि च। नारसिंहे।
"जातीपुष्पसहस्रेण यश्चैन्मालां सुशोभनाम्।
वेष्णवो विधिवद्भक्त्या तस्य पुण्यफलं शृणु॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः॥
जातीपुष्पकृतां मालां कर्पूरपटवासिताम्।
निवेद्य देवदेवाय यत्फलं प्राप्नुयान्नरः।
न तद्वर्णयितुं शक्यमपि वर्षशतैरपि॥
स्कान्दे।
मालतीकलिकामालामीषद्विकसितां हरेः।
दत्त्वा शिरसि विप्रेन्द्र! वाजिमेधफलं लभेत्॥
तत्रैव।
मालतीमालया विष्णुः पूजितो येन कार्त्तिके।
पापाचरकृतां मालां पटात् चौरिः प्रमार्ष्टि॥
चौरिर्यमः। विष्णुरत्रैव।
सर्व्वलक्षाधिकं पुण्यं माला कोटिगुणाधिका॥
इति श्रीहरिभक्तिविलासे ७ विलासः॥ *॥
माल्यगलस्य बहिर्गमननिषेधो यथा,—
"बहिर्माल्यं बहिर्गन्धं भार्य्यया सह भोजनम्।
विस्मृत्य वादं कृत्वा वा प्रवेशश्च विवर्जयेत्॥"
इति कूर्म्मपुराणे उपविभागे १५ अध्यायः॥*॥
स्वयं माल्यापकर्षणनिषेधो यथा,—
"नात्मीयात् सान्त्ववेलायां न गच्छेन्नापि संविशेत्।
न चैव प्रलिखेद्भूमिं नात्मनोपहरेत् स्रजम्॥"
इति मानवे ४ अध्यायः॥
न च मालां धृतां स्वयमेवापनयेत्। अर्थादन्येनापनयेदित्युक्तम्। इति कुल्लूकभट्टः॥*॥
केशवाङ्गे माल्यधारणनिषेधो यथा,—
"नहि गर्ह्यकथां कुर्य्यात् बहिर्माल्यं न धारयेत्।
गवाच्च यानं पृष्ठेन सर्व्वथैव विगर्हितम्॥"
इति च मानवे ४ अध्यायः॥
केशकलापादहिर्मालां न धारयेदिति कुल्लूकभट्टः॥*॥ स्वयं माल्यधारणनिषेधो यथा,—
"स्वयं मालां स्वयं पुष्पं स्वयं घृष्ट्वा च चन्दनम्।
नापितस्य गृहे चौरं शक्रादपि हरेत् श्रियम्॥
इति कर्म्मलोचनम्॥*॥
माल्यचन्दनदानविधिर्यथा,—
"आमन्त्रयित्वा यो विप्रान् गन्धमाल्येश्च मानवः।
तर्पयेच्छ्रद्धया युक्तः स मामर्चयते सदा॥"
इति वह्निपुराणम्॥
माल्यपुष्पः, पुं, (माल्याकारापि पुष्पाण्यस्य।) शृङ्गवृक्षः। इति राजनिर्घण्टः॥
माल्यपुष्पिका, स्त्री, (माल्यपुष्प + कन् टाप्। अत इत्वञ्।) शृङ्गपुष्पी। इति राजनिर्घण्टः॥ (गुणादयोऽस्याः शृङ्गपुष्पीशब्दे ज्ञेयाः॥)
माल्यवान्, [त्] पुं, (माल्य + मतुप्। मस्य वः।) पर्व्वतविशेषः। इत्यमरः। २। ३। ३।
माल्यं मालाकारता विद्यतेऽत्र माल्यवान् वतुः।
इति तट्टीकायां भरतः॥ स च केतुमालेलावृतवर्षयोः सीमापर्व्वतः। नीलनिषधपर्व्वतपर्य्यन्तविस्तारः। इति सिद्धान्तशिरोमणिः॥ (यथा, महाभारते। ३। १५८। ३५।
"उपतस्थुर्महाभागा माल्यवन्तं महागिरिम्।")
राक्षसविशेषः। स च सुकेशराक्षसात् ग्रामणीनामकगन्धर्व्वस्य कन्यायां देववत्यां जातः। अस्य भ्राता सुमाली तस्य कन्यायां निकषायां पुलस्त्यपुत्रविश्रवसो रावणो जातः। इति रामायणे उत्तरकाण्डे ५ सर्गः॥ (माल्यविशिष्टे, त्रि। यथा, महाभारते। १। १७१। ३१।
"शिरोरुहेषु जग्राह माल्यवत्सु धनञ्जयः।"
स्त्रियां ङीप्। नदीभेदः। यथा, रामायणे २। ५६। ३५।
"सुरम्यमासाद्य तु चित्रकूटं
नदीञ्च तां माल्यवतीं सुतीर्थाम्।
ततस्त्वरो भ्रातृपत्नीसुतौ च दुःखं पुरविप्रवासात्॥")
माल्यः, पुं, (मल्ल + चातुरर्थिकलात् ष्यञ्।) वर्णसङ्करजातिविशेषः। स च लेटात्तीवरकन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥
माल्यवी, स्त्री, (मल्ल + स्वार्थेऽण्। तस्य स्त्री गमनं यत्र।) मल्लयात्रा। इति हारावली॥
माघ्यन्दिकः, त्रि, (मा इत्याहेति। माघ्यन्द + "प्राग्वहतेष्ठक्।" ४। ४। १। इत्यत्र। "तदाहेति माघ्यन्दादिभ्य उपसंख्यानम्।" इति वार्त्तिकात् ठक्।) निषेधकर्त्ता। तत्पर्य्यायः। प्रतिषेद्धा २। इति त्रिकाण्डशेषः॥
माषः, पुं, (माषस्य फलम्। माष + अण्। "लुप् च।" ४। ३। १४६। इत्यस्य "फलपाकशुषासुपसंख्यानम्।" इति कात्यिकोक्तेरलुप्।) यद्वा, मस + घञ् पृषोदरादित्वात् साधुः।) व्रीहिभेदः। माषकलाइ इति उरिद् इति च भाषा। तत्पर्य्यायः। कुलविन्दः २ धान्यवीरः ३ हयाकरः ४ मांसलः ५ बलाढ्यः ६ पित्रः ७ पित्तभोजनः ८। अस्य गुणाः। स्निग्धत्वम्। बहुमलकरत्वम्। श्लेष्मलत्वम्। स्त्रैणकारित्वम्। अशुक्रवीर्य्यत्वम्। भ्रष्टितिरक्तपित्तप्रकोपणत्वम्। वातहरत्वम्। गुरुत्वम्। बलकरत्वम्। रोचकत्वम्। स्वादुत्वम्। श्रमसुखवतां नराणां नित्यं सेवनीयत्वम्। इति राजनिर्घण्टः॥ अपि च।
"माषो गुरुः स्वादुपाकः स्निग्धो रूक्षोऽनिलापहः।
उष्णः सन्तर्पणो बल्यः शुक्रलो दृंहणः परः॥
भिनत्त्यत्रमलस्नन्धमेदःपित्तकफप्रदः।
गुदकीलार्हितश्वासपक्तिशूलानि नाशयेत्॥"
इति।
कफपित्तकरा माषाः। इति च भावप्रकाशः॥
अन्यच्च।
"माषो बहुमलो दृष्यः स्निग्धोष्णो मधुरो गुरुः।
वातशुद्धहृद्यो बल्यो मेदोमांसकफप्रदः॥"
इति राजवल्लभः॥
माषसूपेन मूलकभक्षणं निषिद्धं यथा,—
"मूलकं माषसूपेन मधुना च न भक्षयेत्॥"
इति च राजवल्लभः॥
चतुर्दश्यां रविवारे च माषभक्षणनिषेधो यथा,
चिररोगी च माषके। इति।
"माषमामिषमांसञ्च मसूरं निम्बपत्रकम्।
भक्षयेद्यो रवेर्वारे सप्तजन्मन्यपुत्रकः॥"
इति च तिथ्यादितत्त्वम्॥*॥
परिमाणविशेषः। माषा इति भाषा। तत्-

पर्य्यायः। माषकः २ मासः ३। इत्यमरभरतौ॥ हेमः ४ धानकः ५। स च मागधमाने सुश्रुतमते ५ गुञ्जापरिमाणम्। चरकमते ६।८ गुञ्जापरिमाणम्। कालिङ्गमाने सुश्रुतमते ५। ७। ८ गुञ्जापरिमाणम्। इति भावप्रकाशः॥ वैद्यकान्तरे १० गुञ्जापरिमाणम्। यथा,—

"गुञ्जाभिर्दशभिर्माषः प्राणो माषचतुष्टयम्।"

इति वैद्यकपरिभाषा॥

(माषार्थे यथा,—

"द्वात्रिंशन्माषकैर्मानं चरकस्य तु तैः पलम्।
चरकार्द्धपलोन्मानं चरके दशरत्तिकैः।
माषैः पलं चतुःषष्ट्या यद्वैद्यैस्तत्तथेरितम्॥"

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे।)

ज्योतिःस्मृतिमते १२ गुञ्जापरिमाणम्। यथा,

"पलं तु लौकिकैर्मानैः सार्द्धरत्तिद्विमाषकम्।
तोलकत्रितयं ज्ञेयं ज्योतिर्ज्ञैः स्मृतिसम्मतम्॥"

इति तिथ्यादितत्त्वधृतवचनेन पलं अर्द्धरत्तिकाधिकमाषद्वयाधिकतोलकत्रयम्। एतेन माषकपरिमाणं द्वादशरत्तिकं भवति॥ * ॥ मर्षः। त्वग्दोषभेदः। इति मेदिनी षे, २१॥

माषकः, पुं, (माषप्रकारः। माष+"शूलादिभ्यः प्रकारवचने कन्।" ५। ३। ३। इति कन्।) माषकः। पञ्चरत्तिकपरिमाणम्। यथा। गुञ्जाः पञ्चाद्यमाषकः। इत्यमरः॥

"द्वयार्द्धगुञ्जं प्रवदन्ति माषं
माषाक्षयैः षोड़शभिश्च कर्षम्॥"

इति लीलावती च॥

"बड़भिस्तु रत्तिकाभिः स्याद्धाषको हेमधानकौ।
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित्॥"

इति भावप्रकाशः॥

(बौद्धविशेषः। तदर्थे विषयो यथा,—

"द्वात्रिंशन्माषकैर्माषः।"

परिमाणार्थे यथा,—

"————————सुश्रुतस्य तु माषकः।
द्वादशभिर्धान्यमाषैश्चतुःषष्ट्या तु तैः पलम्॥"

इत्युभे वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)

माषकलायः, पुं, (माषसंज्ञः कलायः प्राकृतपार्थिववत् समासः।) खनामख्यातशस्यम्। यथा। कलायशब्दो विशेषे सामान्ये च अतएव माषकलाय इत्यादि प्रयोगः। इत्यमरटीकायां भरतः॥

माषपर्णी, स्त्री, (माषस्य पर्णमिव पर्णं यस्याः। ततो ङीष्।) वनमाषः। माषाणी इति भाषा। तत्पर्य्यायः। हयपुच्छी २ कामोजी ३ महासहा ४। इत्यमरः। २।४।१३८॥ सिंहपुच्छी ५ ऋषिप्रोक्ता ६ लक्षणस्था ७ पाण्डुलोमशपर्णिनी ८। इति रत्नमाला॥ आर्द्रमाषा ९ मांसमाषा १० मङ्गल्या ११ हयपुच्छिका १२ हंसमाषा १३ अश्वपुच्छा १४ पाण्डुरा १५ माषपर्णिका १६ कल्याणी १७ वचमूली १८ प्रालिपर्णी १९ विसारिणी २० आत्मोद्भवा २१ बहुफला २२ स्वयम्भूः २३ सुलभा २४ घना २५ सिंहविन्ना २६ विप्राचिका २७। अस्या गुणाः। तिक्तरसत्वम्। दृष्यत्वम्। दाहज्वरापहत्वम्। शुक्रवृद्धिकारित्वम्। बल्यत्वम्। शीतलत्वम्। पुष्टिवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ अपि च भावप्रकाशे।

"माषपर्णी सूर्य्यपर्णी काम्बोजी हयपुच्छिका।
पाण्डुलोमशपर्णी च लक्षणस्था महासहा॥
माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलाश्रुत्।
मधुरा वाद्यिनी शीता वातपित्तज्वरापहा॥"

माषभक्तबलिः, पुं, (माषश्च भक्तञ्च तदयुक्तो बलिः।) माषतण्डुलदधिमिश्रितपूजोपहारविशेषः। अत्र केचित् हरिद्राद्रुतमप्यपि मिश्रयन्ति। यथा। एष माषभक्तबलिः।

"ॐ जय त्वं कालि! सर्व्वेशे सर्व्वभूतसमाहृते।
रक्ष मां निजभूतेभ्यो बलिं गृह्ण शिवप्रिये!॥"
ॐ कालै नमः। प्रार्थनामन्त्रो यथा,—
"ॐ मातर्मातर्ब्बरे दुर्गे सर्व्वकामार्थसाधिनि!।
अनेन बलिदानेन सर्व्वान् कामान् प्रयच्छ मे॥"

इति तन्त्रतत्त्वम्॥

भूतेभ्योऽप्यं बलिर्देयः॥

माषवर्द्धकः, पुं, (माषं वर्द्धयतीति। वृध+णिच् ण्वुल्।) स्वर्णकारः। इति शब्दमाला॥

माषशः, [स्] व, प्रतिमाषम्। माषं माषं ददाति इत्यर्थे शसुप्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुदी॥

माषादः, पुं, (माषमत्तीति। अद+अण्।) कच्छपः। इति शब्दरत्नावली॥ माषभक्षके, त्रि॥

माषीयं, } क्ली, (माषाणां भवनं क्षेत्रम्। माष+
माष्यं, } "विभाषा तिलमाषोमाभङ्गाणुभ्यः।" ५।२।४। इति यत् पक्षे खञ्।) माषक्षेत्रम्। यथा,—

"तिलयवतैलीनवश्माषोमाणुभङ्गाद्विरूपता।"

इत्यमरः॥

यथा तिलस्य क्षेत्रं तिल्यं तैलीनञ्च भवति तथा माषादीनामपि द्विरूपता द्वैरूप्यं भवति। इति तट्टीकायां भरतः॥

मासु, पुं, (माङ+माने "सर्व्वधातुभ्योऽसुन्।" ४।१८८। इत्यसुन्।) चन्द्रः। (यथा, ऋग्वेदे। १०। १२। ७।

"सूर्य्ये ज्योतिरदधुर्मास्यक्तून्
परिद्योतनिं चरतो अजस्रा॥"

"मासि चन्द्रमसि।" इति तद्भाष्ये सायणः॥ मीयतेऽनेनेति। मा+"चन्द्रे मो डित्।" उणा० ४। २२७। इत्यत्र "बाहुलकात् कैवलादपि मोऽसिः।" इत्युज्ज्वलदत्तोक्तेरसिः।) मासः। इति मेदिनी। से, ७॥ अस्य प्रथमैकवचनान्तरूपं माः॥ (यथा, मनौ। २। ३४।

"चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात्।
षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले॥"

मांसे, क्ली। यथा, ऋग्वेदे। ५। २६। ८।

"त्रीणि च्छता महिषाणामघो
मास्क्षीरसश्चि मघवा सोम्यापाः।"

"माः मांसानि।" इति तद्भाष्ये सायणः॥)

मासः, पुं, (मस् परिमाणे+भावे घञ्।) मापपरिमाणम्। इत्यमरटीकायां भरतः। माष इति भाषा॥ (मस्यते परिमीयते असावनेनेति मस्+घञ्।) शुक्लकृष्णपक्षद्वयात्मकः कालः। स च यौगमाषादिद्वादशसंख्यकः। इत्यमरः। १।४।१२॥ माञ्चन्द्रस्यायं मासः। चान्द्रमासस्येयं व्युत्पत्तिः। सौरादिषु तु भस्यते परिमीयतेऽनेनासौ वा मासः। मसिर्य ई परिमाणे घञ्। माः सान्तोऽपि। मासु मासोऽपि दृश्यते। इति हुः। इति भरतः॥*॥ स्मृतिमतेऽपि पौषादिद्वादशसंख्यकः। यथा,—

"चक्रवत् परिवर्त्तन्ते सूर्य्यः कालवशादयतः।
अतः संवत्सरं प्राहुः कर्त्तव्यं मासचिह्नितम्॥
मासचिह्नन्तु कर्त्तव्यं पौषमाघादमेव हि।
यतस्तत्र विधानेन स मासः परिकीर्त्तितः॥"

इति लघुहारीतः॥

कार्त्तिकादिद्वादशसंख्यकोऽपि। यथा,—

"अन्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः।
शेषा मासा द्विभा ज्ञेयाः स्वर्त्तिकादिस्वसंज्ञया॥"

स च चैत्रादिद्वादशसंज्ञकश्च। यथा यक्तं ब्रह्मपुराणम्।

"चैत्रे मासि जगद्ब्रह्मा ससर्ज्ज प्रथमेऽहनि।
शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति॥
प्रवर्त्तयामास तदा कालस्य गणनामपि।
ग्रहानृक्षाणि ऋतून् मासान् वत्सरान् वत्सराधिपान्।
इत्यनेन मासर्त्तुवत्सरादीनां चान्द्रत्वमुक्तम्।
ब्रह्मसिद्धान्तेऽपि।
"चैत्रसितादेरुदयाद्भानोर्व्वर्षर्त्तुमासयुगकल्पाः।
सृष्ट्यादौ लङ्कायामिह प्रवृत्ता दिनैर्व्वत्स।
चैत्रसितादेश्चैत्रशुक्लप्रतिपदस्यामारभ्येत्यर्थः॥
अपि च।
"मीनादिस्थो रविर्यैर्यामारम्भप्रथमचयैः।
भवेत्तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृताः॥"
चान्द्रसावनसौरनाक्षत्रभेदेन स च चतुर्व्विधः।
शुक्लप्रतिपदादिदर्शान्तश्चान्द्रः। तत्र चान्द्रोऽपि द्विविधः। शुक्लप्रतिपदादिदर्शान्तो मुख्यः। कृष्णप्रतिपदादिपौर्णमास्यन्तो गौणः। यत्किञ्चित्तिथ्यात्मकश्चेति द्विविधो गौणः। त्रिंशद्दण्डोरात्रात्मकः सावनः। आदित्यैकराशिभोगावच्छिन्नः सौरः। सप्तविंशतिनक्षत्रावच्छिन्नत्रिंशन्नाक्षत्रदिनात्मकश्च नाक्षत्रः। तथा च ब्रह्मसिद्धान्ते।
"चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः।
एकराशौ रवियावत् कालं मासः स सौरकः॥

सर्व्वेषांपरिवर्त्तेषु नाक्षत्र इति चोच्यते ।"
सूर्य्यसिद्धान्ते ।
"नाड़ीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते ।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा ।
ऐन्दवस्त्रिंशभिस्तद्वत् संक्रान्त्या सौर उच्यते ॥"
तत्त्रिंशता नाक्षत्रदिनत्रिंशता मासो नाक्षत्रमासः । तथा त्रिंशता । * । ज्ञार्क्षमूलपाणिमते सुखचान्द्र एव मासपदग्राह्यः । जीमूतवाहनमते सौर एव ग्राह्यः । चान्द्रप्रमाणं प्रागुक्तम् । सौरप्रमाणन्तु । सौरास्तु माघादयो द्वादश एव श्रौताः । तथा च श्रुतिः । तपस्तपस्यौ ग्रैष्मिराहतुः । मधुश्च माधवश्च वासन्तिकावृतू । शुक्रश्च शुचिश्च शैशिरावृतूः । अथैतद्दक्षिणायनं देवानां दिनम् । नभश्च नभस्यश्च वार्षिकावृतूः । इषश्च ऊर्जश्च शारदावृतूः । सहश्च सहस्यश्च हैमन्तिकावृतूः । अथैतद्दक्षिणायनं देवानां रात्रिरिति । अयनस्य सौरत्वेन तदुत्कटपक्षपक्षादीनामपि सौरत्वेति । अतो भूयसामनुरोधेन वैशाखादयः सौरवाचिनोऽवधार्य्यन्ते । इति मलमासतत्त्वम् ॥ अपि च ।
"मेषस्थिते रवेर्मासो वैशाखोऽम्बुसुखः स्मृतः ।"
इति सङ्केतकौमुदी ॥
अथ कर्म्मविशेषे मासविशेषादिः । तत्र पितामहः ।
"आब्दिके पिण्डदाने च मासश्चान्द्रमसः स्मृतः ।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥"
प्रथमादिपदं याचाग्रहचारपरम् । यत् कर्म्म सूर्य्यभोग्यराश्युल्लेखेन यच्च विशिष्योदगयनादि विहितं तत्परञ्च अयनस्य सौरमासघटितत्वात् । तच्च चूड़ोपनयनादि । द्वितीयादिपदं सप्तर्षितिद्विप्रायश्चित्तायुर्दायाग्नौचगर्भाधानपुंसवनसीमन्तोन्नयननामकरणान्नप्राशनचौलमौञ्जीबन्धनचूड़ादिपरम् । तथा च विष्णुधर्म्मोत्तरे ।
"अध्ययनञ्च ग्रहचारकर्म्म
सौरेण मासेन सदाध्यवस्येत् ।
सप्तार्षयुपास्यान्यथ सावनेन
लौकिञ्च यत् स्याद्व्यवहारकर्म्म ॥"
अध्ययनं अध्यगमनं यात्रेति यावत् । * ॥
अथ सौरादिमासविहितकर्म्माणि ।
"विवाहोत्सवयज्ञेषु सौरं मासं प्रशस्यते ।
पार्व्वणे स्वष्टकाश्राद्धे चान्द्रमिदं तथाब्दिके ॥"
अत्र यज्ञपदमुदगयनादिविहितपशुयागाभिप्रायं पितामहोक्तञ्च विष्णुधर्म्मोत्तरोक्तञ्चपरम् । गर्गः ।
"आयुर्दायविभागञ्च प्रायश्चित्तक्रिया तथा ।
सावनेन तु कर्त्तव्या मन्त्राणामप्युपासना ॥"
सूर्य्यसिद्धान्ते ।
"स्तनादिपरिच्छेदो दिनमासाब्दपात्तथा ।
मध्यमयन्त्रसुक्तिश्च सावनेन प्रकीर्त्तिता ॥"
मध्यमयन्त्रसुक्तिर्ज्योतिर्गणना प्रविद्धा । * ॥

नाक्षत्रमासप्रयोजनं विष्णुधर्म्मोत्तरे ।
"नक्षत्रसत्राण्ययनानि चेन्दो-
र्मासेन कुर्य्याद्गगनात्मकेन ।"
नक्षत्रसत्राणि मासस्याध्वयागविशेषरूपाणि याज्ञिकप्रसिद्धानि । इन्दोरयनानि सोमायनाख्यसत्राणि । इति समयप्रकाशः । एवं जन्मनक्षत्रे ग्रहनिधनभमवारे पर्व्व नाक्षत्रमासेन योग्यत्वात् । यथा, मलमासतत्त्वे ।
"जन्मर्क्षे यदि स्यातां वारौ भौमशनैश्चरौ ।
स मासः कल्मषो नाम मनोदुःखप्रदायकः ॥"
मलमासविवरणं मलमासशब्दे द्रष्टव्यम् । * ॥
अथ मासकृत्यम् ।
"आषाढ़शुक्लैकादश्यां कुर्य्यात् स्नानं महोत्सवम् ।
आषाढ़े च रथं कुर्य्यात् श्रावणे श्रवणाविधिम् ॥
भाद्रे च जन्मदिवसे उपवासपरो भवेत् ।
प्रसुप्तञ्च पार्श्वपरिवर्त्तमाश्विने मासि कारयेत् ।
उत्थानं श्रीहरेः कुर्य्यादन्यथा विघ्नदोहृतम् ।
शुभे चैवाश्विने मासि महामायाञ्च पूजयेत् ॥
कार्त्तिके मासि यत् स्नानं प्रदद्यु देवि वरानने ! ।
सप्तवर्त्तीः प्रमाणेन दीपः स्याच्चतुरङ्गुलः ।
पञ्चान्ते च प्रकर्त्तव्या दीपमाला बलिः शुभा ।
मार्गशीर्षे सिते पक्षे षष्ठीञ्च सितवस्त्रकैः ॥
पूजयेच्चण्डीग्रन्थञ्च तूलवस्त्रैर्विशेषतः ।
पौषे पुण्याभिषेकञ्च वर्ज्जयेच्चन्दनं तथा ।
संक्रान्त्यां माघमासे च साधिवासिततण्डुलान् ।
निवेद्य विष्णवे भक्त्या इमं मन्त्रमुदीरयेत् ॥
जीवनं सर्व्वभूतानां जनकत्वं जगद्गुरो ! ।
तत्त्रायालीनता प्राप्ता त्वयैव जनिता प्रभो ! ॥
कर्पूरागुरुतिक्तत्वचि घृताक्तानि निवेदयेत् ।
ब्राह्मणान् भोजयेद्भक्त्या देवदेवपुरःस्थितान् ॥
अभ्यर्च्च्य भगवद्भक्त्या द्विजांश्च भगवद्धिया ।
एकस्मिन् भोजिते भक्ते कोटिर्भवति भक्तितः ॥
विप्रभोजनमात्रेण यज्ञं साङ्गं भवेद्ध्रुवम् ।
पञ्चम्यां शुक्लपक्षे तु स्नापयित्वा च केशवम् ॥
पूजयेद्गन्धपुष्पाद्यैः पञ्चपल्लवसंस्थितैः ॥
फलगुग्गुलुधूपैश्च विविधैर्वासितैः पटवासितम् ।
कानने रम्यणीये च प्रदीप्तदीपदीपितम् ॥
ब्राह्मैश्चतुर्भिर्गम्भीरनागरङ्गकपूगकम् ।
नारिकेलञ्च धात्रीं च वंशताल्हरीतकीं ॥
अन्यैश्च ऋतुजैश्चैव सर्व्वर्त्तुकुसुमान्वितम् ।
पुष्पैश्च विविधैश्चैव फलपुष्पसमन्वितम् ॥
वितानैः कुसुमोद्यानैर्वारिपूर्णघटैस्तथा ।
चूतशाखोपशाखाभिः शोभितं कदलीदलैः ॥
विशेषतः कलियुगे दोलोत्सवो विधीयते ।
फाल्गुने च चतुर्दश्यामथवा यामसंयुक्ते ॥
अथवा पौर्णमास्यान्तु प्रतिपत्सम्मिलम्भितौ ।
पूजयेद्विधिवद्भक्त्या फलगुग्गुलुधूपैश्चतुर्व्विधैः ॥
सितरक्तैर्गौरपीतैः कर्पूरादिविमिश्रितैः ।
हरिद्राचारयोगाच्च रङ्गरम्यैर्मनोहरैः ॥
अन्यैर्वा रङ्गरम्यैश्च शोभयेत् परमेश्वरम् ।
एकादश्यां समारभ्य पञ्चम्यन्तं समापयेत् ।
प्रभाहानि त्रीण्यहानि क्षुद्रोत्सवो विधीयते ।
दक्षिणाभिमुखं कृत्वा दोलयानं सकिङ्करः ।
इष्ट्वापराधनिचयैर्मुक्तस्ते नात्र संशयः ॥
निक्षिप्य जलमार्द्रे तु मासे माधवसंज्ञिते ।
सौवर्णपात्रे ताम्रे वा रौप्ये वा दृषदयेऽपि वा ॥
तोयस्थं योऽर्चयेद्देवं ग्राहयामासमुद्भवम् ।
प्रलयं सा महाभागे ! तस्य पुण्यं न गण्यते ॥
इमन्तारोपणं कृत्वा श्रीविष्णौ च समर्पयेत् ।
वैशाखी श्रावणी भाद्रे कार्त्तिकञ्च तदर्पणम् ॥
वैशाखे च तृतीयायां जलमध्ये विशेषतः ।
अथवा मण्डपे कुर्य्यात् मण्डले वा दृढ़ेऽथवा ॥
सुगन्धचन्दनेनाङ्गसुपूजाङ्गो दिने दिने ।
यथा प्रयत्नतः कार्य्यः तथाङ्गो नैव पूजितः ॥
चन्दनागुरुकस्तूरीकुङ्कुमरोचना ।
जटामांसी वचा चैव विष्णोर्गन्धाष्टकं तथा ।
एतैर्गन्धयुतैश्चापि हरेरङ्गानि लेपयेत् ॥
दृष्ट्वा तुलसीकाष्ठं कर्पूरागुरुयोगतः ।
अथवा केशरैर्योज्यं हरिचन्दनमुच्यते ॥
अस्मिन् काले तथाभक्त्या ये प्रयच्छन्ति मानवाः ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
सुगन्धिमिश्रितैस्तोयैः स्नापयित्वा जगद्गुरुम् ।
अथवा पुष्पमध्ये च स्नापयेज्जगदीश्वरम् ॥
इन्द्रावनं तत्र कृत्वा उपस्कृतफलानि च ।
विष्णुभक्तेन योग्येन भोजयेत्तदशेषतः ॥
नारिकेलफलं नीरं कोषस्थीकृत्य दापयेत् ।
कण्टाफलञ्च पनसं कोषसङ्कृत्य दीयते ॥
यथा पचेत्तथा इद्धादथवाग्नौ नियोजतः ।
इध्मा विमिश्रितञ्चाज्यं घृतेनाभ्युक्ष्य दापयेत् ॥
पाचितं पिष्टकं धातुरुद्धृत्य घृतेन च ।
तिलैश्च तिलसंमिश्रैः फलं शुद्धञ्च दापयेत् ॥
यदृग्देवात्मनः श्रेयस्तत्तदीशाय कल्पयेत् ।
दत्त्वा नैवेद्यवस्त्रादीनादद्यात् कथञ्चन ।
त्यक्तं विष्णुसुदिश्य तद्भक्तेभ्यो विशेषतः ।
इति ते कथितं किञ्चित् समासेन मयेश्वरि ! ।
गोप्तव्यञ्च प्रयत्नेन स्वयोनिरिव पार्व्वति ! ।"
इति पाद्मे पातालखण्डे १२ अध्यायः ॥

मासकः, पुं, माषकपरिमाणम् । यथा । गुञ्जाः पञ्चाद्यमासकः । इत्यमरः । पञ्चगुञ्जाः स्युराद्याः प्रथमो मासकः । इमगुञ्जापेक्षया आद्यत्वम् । ग्राह्यीयत्वात् सुखो मास इत्यर्थो वा । मस्यते परिमीयतेऽनेन मासः मस्यैं इ परिमाणे परीणामे घञ् स्वार्थे कः मासोऽयं इत्यन्तः । मस भिंसायां मर्हन्त्यान्तस्तस्माद्घञ् तेन माषो मर्हन्त्यान्त इति जिनेन्द्रप्रभृतयः । इत्यमरटीकायां भरतः ।

मासज्ञः, पुं, दाक्षुहपक्षी । इति शब्दरत्नावली । (मासं जानातीति । ज्ञा + कः ।)
मासज्ञातरि, त्रि ।

मासनं, क्ली, सोमराजी । इति शब्दचन्द्रिका ।

मासमानः, पुं, (मासेर्हादशभिर्मानमस्य ।) वत्सरः । इति त्रिकाण्डशेषः । (मासस्य मानम् ।)
माषपरिमाणे, क्ली ।

मासरः, पुं, (मस + शिच् + बाहुलकात् अरन् ।) भक्तसमूहवमण्डः । तत्पर्य्यायः । आचामः २ निस्रावः ३ । इत्यमरः । २ । ६ । ६६ ॥

मासवर्त्तिका, स्त्री, सर्षपौषधिविशेषः । इति शब्दमाला ॥

मासान्तः, पुं, (मासस्यान्तः ।) अमावस्या । यथा,—

पक्षान्ते निष्फला याचा मासान्ते मरणं ध्रुवम् ।
इति समयप्रदीपः ॥

संक्रान्तिदिनम् । यथा,—

"मासान्ते म्रियते कन्या तिथ्यन्ते स्यादपुत्रिणी ।
नक्षत्रान्ते च वैधव्यं विद्यात् मृत्युर्दयोर्भवेत् ॥
मासान्ते दिनमेकन्तु तिथ्यन्ते घटिकाद्वयम् ।
घटिकात्रितयं भान्ते विवाहे परिवर्जयेत् ॥"
इति रत्नमाला ॥

मासिकं, क्ली. (मासे भवम् । मास + "कालाट् ठञ् ।" ४ । ३ । ११ । इति ठञ् ।) प्रेतस्य संवत्सराभ्यन्तरे प्रतिमासीयमृततत्सजातीयतिथिकर्त्तव्यश्राद्धम् । प्रतिमासकर्त्तव्यत्वात्पक्षनिमित्तक श्राद्धम् । तत्पर्य्यायः । अन्वाहार्य्यम् २ । इत्यमरः । २ । ७ । ३१ ॥ मासि भवं मासिकं पार्व्वणश्राद्धं तत्र अन्वाहार्य्यं वर्त्तते । पक्षग्रहे अमावास्यायां देयत्वात् । अनु पश्चादाहार्य्यते अन्वाहार्य्यं हरत्र्यासोरिति ण्यत् स्वार्थे के अन्वाहार्य्यकञ्च । अक्षतसपिण्डीकरणस्य वत्सरान्तरे प्रतिमासं यत् श्राद्धं तच्चान्वाहार्य्यमिति केचित् । इत्यमरटीकायां भरतः ॥ तयोः प्रमाणम् ।

"षाण्मासिकान्दिके श्राद्धे स्यातां पूर्व्वेद्युरेव ते ।
मासिकानि स्वकीये तु दिवसे द्वादशापि च ॥"
इति पैठीनसिः ॥

'पितृणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः ।
तस्मान्नित्यं कर्त्तव्यं प्रयत्नेन प्रयत्नतः ॥'
इति मनुः । ३ । १२३ ॥*॥

मासिककरणस्य अवस्था यथा । पौढच्छचोपानहरहितानि इहलोकं परित्यज्य इत्यादि सर्व्वः सुगन्ध इत्यादि श्रिया देवा इत्यादि वनस्पतिरस इत्यादिमन्त्रचतुष्टयरहितानि च आद्यैकोद्दिष्टवत् मृताहे मृताहे द्वादश मासिकानि कार्य्याणि । एकादशमासाभ्यन्तरे मलमासपाते त्रयोदशमासिकानि । षष्ठमासाभ्यन्तरे मलमासपातेऽपि षष्ठमासिकपूर्व्वतिथावेव प्रथमषाण्मासिकम् । तथा त्रयोदशमासिकस्य पूर्व्वतिथौ द्वितीयषाण्मासिकम् । एवं षाण्मासिकोल्लेखे प्रथमषाण्मासिकद्वितीयषाण्मासिकत्वेनोल्लेखः । एवं मध्ये यत् पतितं तत् तत्रैकादश्यां अमावस्यायां मासिकान्तरतिथौ वा कृत्वा प्रकृतं कर्त्तव्यम् । अग्रौचपतितचेत्तदग्रौचान्ते कर्त्तव्यम् । एकादशाहादिश्राद्धानि कतिचित् कृत्वा यदि मृतस्तदा शेषाण्यन्येनाधिकारिणा समाप्यानि ॥ *॥ अथ मासिकैकोद्दिष्टश्राद्धप्रयोगः । पूर्व्वदिने निरामिषैकभक्तः परदिने स्नानादिकं कृत्वा एकोद्दिष्टश्राद्धविहितकाले भोज्यसूत्रस्थ कुशब्राह्मणं स्थापयित्वा वास्तुपुरुषादि पूजयित्वा भूस्वामिपितृभ्यः श्राद्धाग्रभागं दत्त्वा दक्षिणामुखः अनुज्ञां कुर्य्यात् । यथा अद्यामुके मासि अमुकपक्षे अमुकतिथौ अमुकगोत्रस्य प्रेतस्य अमुकदेवशर्म्मणः प्रथममासिकैकोद्दिष्टश्राद्धं दर्भमयब्राह्मणेऽहं करिष्ये । ॐ कुरुष्वेत्युत्तरम् । ततो गायत्रीं जपेत् । दैवनाभ्य इत्यादि त्रिधा पठेत् । ततः पुष्करीकाग्रं स्रुत्वा मृज्जलेन श्राद्धीयद्रव्यं प्रोक्षयेत् । रक्षार्थसुरकपूर्णपात्रमेकदेशे स्थापयेत् । ततः ॐ अमुकगोत्र प्रेत अमुकदेवशर्म्मन्नेतत्ते दर्भासनं स्वधा । इत्यनेन ब्राह्मणवामपार्श्वे दद्यात् । अपहतेत्यादिना तिलान् विकीर्य्य जलं स्पृष्ट्वा ब्राह्मणाग्रभूमौ कुशपञ्चमेकं पातयित्वा तदुपरि अर्घ्यपात्रं संस्थाप्य ॐ पवित्रास्थ वैष्णव्यौत्यनेनानामिकाच्छिन्नं ॐ विष्णोर्मनसा पूतमसीत्यनेन प्रोक्षितमेकदलं पवित्रं तत्पात्रे निधाय ॐ शन्नोदेवीरित्यादिमन्त्रेण जलं दद्यात् । ततः ॐ तिलोऽसि सोमदेवत्यो गोसवो देवनिर्म्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् प्रीणाहि नः स्वाहा । इत्यनेन तिलान् दत्त्वा गन्धपुष्पादिना अर्घ्यं निर्म्माय कुशान्तरेणाच्छाद्य तत् कुशमुद्घाट्य ब्राह्मणे पवित्रं दत्त्वा जलान्तरञ्च दत्त्वा पुष्पान्तरेण शिरः-प्रभृतिसर्व्वगात्रेभ्यो नम इति संपूज्य ततः पात्रं वामहस्ततले विन्यस्य दक्षिणहस्तेनाच्छाद्य ॐ या दिव्या इति पठित्वा ॐ अमुकगोत्र प्रेतासुकदेवशर्म्मन्नेतत्तेऽर्घ्यं स्वधा । ततः ॐ अमुकगोत्र प्रेतासुकदेवशर्म्मन्नेतानि ते गन्धपुष्पधूपदीपाच्छादनानि स्वधा । इत्युत्सृज्य एष ते गन्धः एतत्ते पुष्पं एष ते धूप एष ते दीपः एतत्ते आच्छादनम् । ततो ब्राह्मणाग्रभूमौ कुशादिकमपनीय नैर्ऋतिमारभ्य दक्षिणाग्रान्तरेखया वामावर्त्तेन जलेन चतुष्कोणमण्डलं कृत्वा तत्र भोजनपात्रं निदध्यात् । तत्र सामिषं सर्व्वमन्नादिकं परिवेश्य ॐ इदं विष्णुरित्यादिमन्त्रेण अन्नादावनखाङ्कुष्ठं निक्षिप्य ॐ अपहतेत्यादिना तिलान् विकीर्य्य ब्राह्मणे जलगण्डूषं दत्त्वा गायत्रीं जप्त्वा अग्रे मधु दत्त्वा तदभावे गुडं दत्त्वा घृतं दत्त्वा ॐ मधुवातेत्यादि मधु मधु मध्विति च पठित्वा अन्नमभिमन्त्र्य प्रोक्ष्य ब्राह्मणे जलगण्डूषं दत्त्वा वामहस्तेनान्नपात्रं धृत्वा ॐ अमुकगोत्र प्रेतासुकदेवशर्म्मन्नेतत्ते सामिषान्नं सोपकरणं स्वधेत्युत्सृजेत् । इदं सामिषान्नं इदं हविः इमा गङ्गायाः आपः एतान्युपकरणानि यथासुखं वाग्यतः सद्य इत्यनेन जलगण्डूषं दद्यात् । ततो गायत्रीं त्रिः सप्तधा ॐ मधुवाता इत्यादि मधु मधु मध्विति ॐ अन्नहीनमित्यादि च पठेत् । कुशब्राह्मणपत्रे पुनर्गायत्र्यादि पठेत् । ॐ यन्नेश्वरो हव्य इत्यादि ॐ योगीश्वरमित्यादि ब्राह्मणवल्क्यश्लोकत्रयं ॐ तद्विष्णोरित्यादि ॐ दुर्य्योधन इत्यादि ॐ युधिष्ठिर इत्यादि सर्व्वं पठेत् । ततो दक्षिणाग्रान् कुशान् भूमौ संस्थाप्य भूमिं प्रोक्ष्य सर्व्वप्रकारमन्नमुद्धृत्य सतिलमेकीकृत्य वारिणाप्लुत्य ॐ अग्निदग्धाश्चेत्यादिमन्त्रद्वयेन कुशोपरि विकिरेत् । ततो हस्तौ प्रक्षाल्याचम्य दक्षिणकर्णं स्पृष्ट्वा वा हरिं स्मृत्वा ब्राह्मणाय जलगण्डूषं दत्त्वा पूर्व्ववद्वाचयित्वा मधुवाता इत्यादिकं मधु मधु मध्विति च जप्त्वा ॐ शेषमन्नं क देयमित्यनुज्ञाप्य ॐ इदाय दीयतामित्युत्तरं गृहीत्वा ॐ पिण्डदानमहं करिष्ये ॐ कुरुष्वेत्युक्ते ब्राह्मणसमक्षे ॐ निरुन्धीत्यादिना नैर्ऋतिमारभ्य दक्षिणाग्ररेखया जलेन वामावर्त्तेन चतुष्कोणमण्डलं कृत्वा पवित्रं वामहस्तादक्षिणहस्तेन गृहीत्वा वामहस्तान्वारब्धदक्षिणपाणिना दक्षिणाग्रां रेखां मण्डलमध्यस्थाने ॐ अपहतेत्यादिनिरुन्धीत्यादिमन्त्राभ्यां कुर्य्यात् । तद्दर्भमुत्तरस्यां दिशि क्षिपेत् । रेखोपरि समूलान् साग्रान् कुशानास्तीर्य्य ॐ देवताभ्य इति पठित्वा ॐ इह प्रेत सौम्य गम्भीरेभिः पथिभिः पूर्व्भिरेभिर्देवयानैः श्रद्धाभं द्रविणेह भद्रं दधिष्वतः सर्व्ववीरं नियच्छ इत्यावाह्य तिलोक्षास्तीर्णकुशेषु विकिरेत् । ततो वामहस्तेन सतिलजलं गृहीत्वा वामहस्तादक्षिणहस्तेन संगृह्य ॐ अमुकगोत्र प्रेतासुकदेवशर्म्मन्नवने निधू स्वधा इत्यनेन दद्यात् ततः आहृत्येषमन्नं सव्यञ्जनं मध्याज्यतिलसंयुक्तं सामिषं गृहीत्वा पिण्डं कृत्वा ॐ मधुवातेत्यादि ऋक्त्रयं अक्षन्नमीमदन्तेत्यादि च पठित्वा विल्वप्रमाणं पिण्डं सतिलं द्विगुणसुमकुशत्रयसहितं वामहस्तस्थितपात्राद्दक्षिणहस्तेन गृहीत्वा ॐ अमुकगोत्र प्रेतासुकदेवशर्म्मन्नेष ते सामिषपिण्डः स्वधा इत्यवनेजनस्थाने वामहस्तान्वारब्धदक्षिणहस्तेन दद्यात् । ततः आचम्य हरिं स्मृत्वा पिण्डपात्रं प्रक्षाल्य वामहस्तादक्षिणहस्तेन गृहीत्वा प्रक्षालितजलं ॐ अमुकगोत्र प्रेतासुकदेवशर्म्मन्नेष ते स्वधा इति पिण्डोपरि दद्यात् । ततः ॐ अत्र प्रेत मादयस्व यथाभागमावृषायस्व इति जप्त्वा वामावर्त्तेनोदङ्मुखो भूत्वा आगमनाच्छ्वासं वृत्वा तेनैव पथा परावर्त्तमानः प्रेतं भास्करमूर्त्तिं ध्यायन् ॐ अमीमदत प्रेत यथा भागमा वृषायिष्ट इति दक्षिणाभिमुखो भवन् जपेत् । ततः श्वासं त्यजेत् । ॐ नमस्ते प्रेत प्रेत नमस्ते इति कृताञ्जलिर्जपेत् । ॐ गृहाः प्रेत देहि इति गृहिणीं पश्येत् । ॐ सदस्ते प्रेत देव इति पिण्डं पश्येत् । ततो नवमनवं वा शुक्लवस्त्रार्द्धमर्द्धं सूत्रं वामहस्तादक्षिणहस्तेन गृहीत्वा ॐ एतद्वः प्रेता वास इति पठित्वा पिण्डोपरि निदध्यात् । ततः ॐ अमुकगोत्र प्रेतासुकदेवशर्म्मन्नेतत्ते वासः स्वधा । इत्यनेनोत्सृजेत् । ततश्चूर्णीं पिण्डं संपूज्य ॐ वसन्तायेत्यादि-

मन्त्रेण वस्तूत्तमस्कुर्य्यात्। तत ॐ सुसंप्रोक्षितमस्तु इति ब्राह्मणाग्रभूमिमासिञ्चेत्। ॐ ग्रिवा आपः सन्तु इति ब्राह्मणे जलं दद्यात्। ॐ सन्त्विति प्रतिवचनम्। ॐ सौमनस्यमस्त्विति पुष्पं ॐ अस्त्विति प्रतिवचनम्। ॐ अक्षतञ्चारिष्टञ्चास्तु इति यवान् दद्यात्। ॐ अस्त्वित्युत्तरम्। ततस्तिलाज्यमधुयुक्तं जलं गृहीत्वा ॐ अमुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणो दत्तमिदमन्नपानादिकमुपतिष्ठताम्। ॐ उपतिष्ठतामिति प्रतिवचनम्। ॐ अघोरः प्रेतोऽस्तु इति वदेत्। ॐ अस्त्विति प्रतिवचनम्। ॐ गोत्रं नो वर्द्धतामिति वदेत्। ॐ वर्द्धतामिति प्रतिवचनम्। ततः पिण्डोपरि सपवित्रकुशानास्तीर्य्य ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिसृतं स्वधास्थ तर्पयत मे पितॄन्मय्येन वारिधारया सिञ्चेत्। ततः ॐ अद्येत्यादि अमुकगोत्रस्य प्रेतस्य अमुकदेवशर्म्मणः क्षतैतत्प्रथममासिकैकोद्दिष्टश्राद्धकर्म्मणः प्रतिष्ठार्थं दक्षिणामिदं रजतं तन्मूल्यं वा विष्णुदैवतं यथा नामगोत्राय ब्राह्मणायाहं ददानीति दद्यात्। ततो दक्षिणां दिशं प्रणम्य वरं याचेत। नात्र प्राज्ञमालभ्य जपेत्। नाग्निः प्रार्थयेदिति प्रचेतोवचनादाग्निं न प्रार्थयेत्। ततः ॐ देवताभ्य इति त्रिः पठेत्। ॐ अभिरम्यतामिति विसर्জ্জনम्। ॐ अभिरतोऽस्मीति प्रतिवचनम्। ॐ आमावास्येति प्रदक्षिणवारिधारया वेष्टयेत् पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जले वा क्षिपेत्। आहीयद्रव्यं ब्राह्मणाय दद्यात् जले वा क्षिपेत्। ततो वामदेयं गायेत् अच्छिद्रावधारणं दीपाच्छादनं विष्णुस्मरणञ्च कुर्य्यात्। एवं प्रकारेण द्वितीयादिमासिकं कर्त्तव्यम्। इति स्मार्त्तभट्टाचार्य्यधृतश्राद्धप्रयोगतत्त्वम्। *। अन्यत् आहशब्दे द्रष्टव्यम्॥

मासिकः, त्रि, मासस्तन्त्री। मासि भव इत्यर्थे ठिक्प्रत्ययेन निष्पन्नः। (यथा, मनौ। ७।१२६।

"पञ्चो देयोऽवहरस्य वहुतृहरस्य वेतनम्।
वाक्षाधिकस्तथाच्छादो धान्यद्रोणस्तु
मासिकः॥")

मासुरी, स्त्री, (मसुर+अण् ङीष्।) क्षमुः। इति हेमचन्द्रः। ३। २२७॥ (माहभव्यौ। यथा, ब्रह्मवैवर्त्ते। १। १०। १४५।

"पिङ्गव्सा पितुर्भव्यौ माहभव्यौ च मासुरौ।")

मास्क, व, (मा च स्क च तयोः समाहारः।) वारत्रम्। तत्पर्य्यायः। मा २ अत्रम् ३। इत्यमरः। ३।३।११। (यथा, रामायणे। २।९२।८२।

"मास्क मे भरतः कार्षीत् प्रेतकृत्यं गतायुषः।")

माह्ह ह्ह न माने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ह्ह अममाहह्ह। ह्हदनुबन्धस्यानेन षष्ठस्वरानुबन्ध इत्केके। न माहह्हति माहह्हते। इति दुर्गादासः॥

माहाकुलः, त्रि, (महाकुलस्यापत्यमिति।) "महाकुलादञ्खञौ।" ४। २। १४१। इति अञ्।) महाकुलोद्भवः। इत्यमरटीकायां रायमुकुटः॥

माहाकुलीनः, त्रि, (महाकुलस्यापत्यमिति। "महाकुलादञ्खञौ।" ४। २। १४१। इति खञ्।) महाकुलोद्भवः। इत्यमरटीकायां रायमुकुटः॥

माहात्म्य, क्ली, (महात्मनो भावः इति। महात्मन्+ष्यञ्।) महात्मता। महिमेति यावत्। यथा, तिथ्यादितत्त्वे।

"माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम्।
पाठस्यास्य जपः प्रोक्तः पठेद्देवीमनाक्षतः॥"

माहानाम्निकः, पुं, ("तदस्य ब्रह्मचर्य्यम्।" ५। १। ६४। इत्यत्र। "माहानाम्न्यादिभ्यः वह्वन्तेभ्य उपसंख्यानम्॥" महानाम्नो नाम विद्यामघवन्।' इत्याद्या ऋचः। तासां ब्रह्मचर्य्यमस्य इति ठञ्। हरदत्तस्तु 'भस्याढे।" इति पुंवद्भावान् माहानाम्निक इत्याह। इति सिद्धान्तकौमुदी।) महानाम्नीऋचावेत्ता ब्राह्मणः। इति कैचित्॥

माहिनं, क्ली, (महते पूज्यते अस्मिन् इति। मह्+"महेरिनच्च।" उणा०। २। ५६। इति इनच्।) राज्यम्। इत्युणादिकोषः॥ (मंहनीये, त्रि। यथा, ऋग्वेदे। ३।३६।८।

"इन्द्र! यत्ते माहिनं दत्रमस्ति।"

"माहिनं मंहनीयम्।" इति तद्भाष्ये सायणः॥ प्रदत्ते च। यथा, तत्रैव। १। ५६। ६।

"इन्द्र! सदनेषु माहिनः।"

"माहिनः प्रदत्तः।" इति तद्भाष्ये सायणः॥)

माहिरः, पुं, (महते पूज्यतेऽसौ। मह्+बाहुलकात् इरच्।) इन्द्रः। इति त्रिकाण्डशेषः॥

माहिषिकः, पुं, (महिष्यै रोचतेऽसौ। महिषी+ठक्।) महिषीपतिः। अभिचारिण्यनुरक्तपतिः॥ यथा,—

"महिषीत्युच्यते नारी या च स्याद्भिचारिणी।
तां दुष्टां कामयत्यः सर्व्वे माहिषिकाः स्मृताः॥"

इति स्कान्दे काशीखण्डम्॥

महिषोपत्नीवौ॥ (महिषी नारी पत्यमस्येति। महिषी+"तदस्य पत्यम्।" ४। १। ५१। इति ठक्।) भगदारोपार्ज्जितस्त्रीधनोपजीवी। यथा,

"महिषीत्युच्यते नार्य्या भगेनोपार्ज्जितं धनम्।
उपजीवति यस्तस्याः सर्व्वे माहिषिकाः स्मृताः॥"

इति विष्णुपुराणे २। ६। १५ श्लोकस्य टीकायां श्रीधरस्वामी॥

माहिष्यः, पुं, (महिष्यां साधुरिति महिषी+ष्यञ्।) वर्णसङ्करजातिविशेषः। स च क्षत्रियाद्वैश्यायां जातः। इत्यमरः। २। १०। ३॥ (यथा, याज्ञवल्क्यसंहितायाम्। १। ९२।

"वैश्यात्तूद्रास्तु राजन्यान् माहिष्योग्रौ सुतौ स्मृतौ॥")

माहेन्द्रः, पुं, (महेन्द्रस्यायम्। महेन्द्र+अण्।) शुभदत्रविशेषः। रव्यादिसप्तवारेषु वायुवरुणयममाहेन्द्राख्यामेकैकदत्रा भवन्ति। तत्र वरुणयमयोर्दत्रौ शुभौ। वायुयमयोर्दत्रावशुभौ। यथा,—

"स्नातं वा व यमा सूर्य्ये मा वा व य कला निधौ।
व य मा वा कुजे त्रेया मा वा व य बुधा शुभे॥
गुरौ वा व य मा त्रेव मा वा व य तथा भृगौ।
सूर्य्यपुत्रे य मा वा व घटीयुग्मं शुभाशुभम्॥
माहेन्द्रे विजयो नित्यं वारुणे च धनागमः।
वायौ च भ्रमते नित्यं यमेऽपि मरणं ध्रुवम्॥")

इति सारसंग्रहः॥

(माहेन्द्रकायपुरुषस्य लक्षणं यथा,—

"माहात्म्यं शौर्य्यमाज्ञा च सततं शास्त्रबुद्धिता।
भृत्यानां भरणञ्चापि माहेन्द्रं कायलक्षणम्॥"

इति सुश्रुते शारीरस्थाने चतुर्थोऽध्याये॥

महेन्द्रो देवतास्येति। महेन्द्र+"महेन्द्राद्घाञौ च।" ४। २। २६। इति अण्। महेन्द्रदेवत्ये, त्रि। यथा, भट्टिकाव्ये। १५।८३।

"अविभ्रन्नतः शस्त्रमैषीकं राक्षसो रणे।
तदप्यस्त्रसदासाद्य माहेन्द्रं जघ्नुरेतरम्॥")

महेन्द्रसम्बन्धिनि च। (यथा, रघौ। १२।८६।

"मातलिस्तस्य माहेन्द्रं स्यन्दनमेत्य तत्क्षणम्॥")

माहेन्द्री, स्त्री, (महेन्द्रस्येयम्। महेन्द्र+अण्। स्त्रियां ङीष्।) इन्द्राणी। इति शब्दरत्नावली॥ गौः। इति राजनिर्घण्टः॥

माहेयः, त्रि, (मही+ढक्) मह्या अपत्यम्। इति सुग्धबोधव्याकरणम्॥ (जनपदभेदे, पुं। यथा, महाभारते। ६। ९। ४८।

"कुट्टाः परान्ता माहेयाः कक्षाः सामुद्रनिष्कुटाः॥")

मङ्गलग्रहः। यथा, समयामृते।

"कफपित्तसमुद्भूतां शिरःपीड़ां भयावहाम्।
माहेयः कुरुते शीघ्रं बुधस्यान्तर्दशां गतः॥")

माहेयी, स्त्री, (मह्याः सुरभ्याः अपत्यमिति। मही+"तद्यादिभ्यो ढक्।" ४। २। ८७। इति ढक्। स्त्रियां ङीष्।) गौः। इत्यमरः। २। ९। ६०॥ (यथा, महाभारते। ४। १६। १०।

"सर्व्वश्वेतेव माहेयी वने जाता चिरायणी।
उपातिष्ठत पाञ्चाली वासितेव महाद्विपम्॥"

अस्याः पर्य्यायो यथा,—

"सुरभिः सौरभेयी च माहेयी गौरुदाहृता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

माहेशी, स्त्री, (महेशस्येयम्। महेश+अण्+स्त्रियां ङीष्।) दुर्गा। यथा,—

"महादेवात् समुत्पन्ना महान्तैरीड्यते यतः।
माहेश्वर्य्या तनुर्यस्या माहेशी तेन सा स्मृता॥"

इति देवीपुराणे ४५ अध्यायः॥

(महेशेन कृतमित्यण्। क्ली, व्याकरणविशेषः। "यान्युच्चारे माहेशाद् वाशो व्याकरणार्णवात्।
तानि किं परतन्त्राणि सन्ति पाणिनिगोत्रभिदे॥"

इत्युक्तेः॥)

माहेश्वरी, स्त्री, (महेश्वरस्येयम् । महेश्वर + अण् । ङीष् ।) यवतिक्ता । इति राजनिर्घण्टः । दुर्गा । (यथा, महाभारते । १४ । ४३ । १४ ।
"भगदेवानुयातायां सर्व्वासां वामलोचना ।
माहेश्वरी महादेवी प्रोच्यते पार्व्वती हि सा ।")
माहेश्वर-भेदः । इति शब्दरत्नावली । (यथा, मन्त्रकोषे । ६ । ॐ ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा ।) विष्णुः । यथा,—
कन्या उवाच ।
"कस्त्वं विभासि कान्त्या कैयं वा नवविप्रभा ।
कोन्वयं भाति वपुषा पङ्कजायतलोचनः ।
निशम्य तासां वचनं हरेश्चरवाहनः ।
व्याजहार महायोगी भूताधिपतिरव्ययः ।
अयं नारायणो गौरी जगन्माता सनातनः ।
विभज्य संस्थितो देवः स्वात्मानं बहुधेश्वरः ।
न मे विदुः परं तत्त्वं देवाद्या न महर्षयः ।
एकोऽयं देवदेवात्मा भवानी विष्णुरेव च ।
अहं हि निष्क्रियः शान्तः केवलो नित्यविग्रहः ।
मामेव केशवं देवमाहुर्देवीमथाम्बिकाम् ।
एष धाता विधाता च कारणं कार्य्यमेव च ।
कर्त्ता कारयिता विष्णुर्भक्तिमुक्तिफलप्रदः ।
भोक्ता पुमानप्रमेयः संहर्त्ता कालरूपधृक् ।
ब्रह्मा धाता वासुदेवो विश्वात्मा विश्वतोमुखः ।
कूटस्थो ह्यक्षरो व्यापी योगी नारायणः स्वयम् ।
तारकः पुरुषो ह्यात्मा केवलं परमं पदम् ।
एषा माहेश्वरी गौरी मम शक्तिर्निरञ्जना ।
श्रान्ता यत्या सदानन्दा परं पदमिति श्रुतिः ।
अस्याः सर्व्वमिदं जातमत्रैव लयमेष्यति ।
एषैव सर्व्वभूतानां गतीनामुत्तमा गतिः ।"
इति कौर्म्मे १४ अध्यायः ।
(पीठस्थानभेदः1 इति देवीभागवते ।७।३०।७२।
माहेश्वरेय क्षत्रम् । महेश्वर + अण् । क्षत्रे । उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १६ ।
"माहेश्वरं भागवतं वाशिष्ठञ्च सविस्तरम् ।
एतान्युपपुराणानि कथितानि महात्मभिः ।"
माहेश्वरसम्बन्धिनि, त्रि । यथा, मार्कण्डेये । १०६ । ७१ ।
"ब्राह्मी माहेश्वरी चैव वैष्णवी चैव ते तनुः ।
त्रिधा यस्य स्वरूपन्तु भानोर्भासान् प्रयोदतु ।")
मि धु ञ न क्षेपे । इति कविकल्पद्रुमः । ('भ्वा०-उभ०-सक०-अनिट् ।) धु मित्रिमम् । ञ न मिनोति मिनुते । इति दुर्गादासः ।
मिच्छ, ग्र वाधे । इति कविकल्पद्रुमः । (तुदा०-पर०-सक०-सेट् ।) ग्र मिच्छति मिच्छन्ति । बाधो विहतिः । इति दुर्गादासः ।
मितः, त्रि, (मा + क्तः "यतिस्तुतिमात्मास्वामित्ति किति ।" ७ । ३ । ४० । इत्याकारस्येकारादेशः ।) परिमितः । ग्रन्थितः । क्षिप्तः । इति माधवतोमिधानोच्च क्तप्रत्ययेन निष्पन्नम् । (यथा, भागवते । ८ । १३ । ३६ ।
"राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते ।
प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्य्ययः ।"
यथा च नैषधचरिते । ६ । ८ ।
"मितञ्च सारञ्च वचो हि वाग्मिता ।")
मितङ्गमः, पुं, स्त्री, (मितं परिमितं गच्छतीति । गम + "प्रियवशेवदः खच् ।" ३ । २ । ३८ । इत्यत्र "खच् प्रकरणे गमेः सुप्युपसंख्यानम् ।" इति काशिकोक्तेः खच् । मुम् च ।) हस्ती । इति सिद्धान्तकौमुदी । परिमितगामिनि, त्रि ।
मितद्रुः, पुं, (मितं द्रवतीति । द्रु + "हरिमितयोर्द्रुवः ।" उणा० १ । ३५ । इति कुः । स च डित् ।) समुद्रः । इति हेमचन्द्रः । ४ । १३६ । (परिमितगतौ, त्रि । यथा, ऋग्वेदे । ४ । ६ । ५ ।
परिज्मना मितद्रवेति होतारमिन्द्रो मधुवचा ऋता वा ।"
"मितद्रुः परिमितगतिः वन् ।" इति तद्ग्राह्ये सायणः । मितमार्गे च । यथा, ऋग्वेदे । १० । ६४ । ६ ।
"तैनो अर्वन्तोऽवनयुतोऽवं विश्वे अरुषासु वाजिनो मितद्रवः ।"
"मितद्रवो मितमार्गाः अध्वानं परिच्छिन्दन्तः ।"
इति तद्ग्राह्ये सायणः ।")
मितम्पचः, त्रि, क्षपणः । इत्यमरः । ३ । २ । ४८ । (मितं परिमितं पचतीति । मित + पच् + "मितनखे च ।" ३ । २ । ३४ । इति खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६३ । इति मुम् च ।) परिमितपाककर्त्ता च ।
मिताशनः, त्रि, परिमितभोजी । मितमत्तीति यः इति युतुपत्ताद् कर्त्तरि (ल्यु) अनप्रत्ययेन निष्पन्नः ।
मितिः, स्त्री, (मीयते इति । मा + भावे क्तिन् ।) मानम् । विज्ञानम् । अवच्छेदः । इति शब्दरत्नावली । (यथा, कुसुमाञ्जलौ । ४६ । ४ ।
"मितिः सम्यक् परिच्छित्तिः ।")
मित्रं, क्ली, (मिनोति मानं करोति इति । "अमिचिमिदिशुसिभ्य क्रः ।" उणा० ४ । १६३ । इति क्रः ।) शुक्रोः परम् । इत्यमरः । २ । ८ । ६ । अतः शुक्रोः परमवस्थितो राजा मित्रं उपकारित्वात् । मेयति स्निह्यतीति चासुसिति त्रः निपातात् गुणाभावः । हितकारं एकतकारश्चेत्येके । इति तट्टीकायां भरतः । अपि च ।
"राजा शुक्रुरिति ख्यात एकार्थाभिनिवेशतः ।
भूम्येकान्तरितो राजा स मित्रं मित्रकार्य्यतः ।"
इति शब्दरत्नावली ।
मित्रं, क्ली, बन्धुः । मिता इति भाषा । तत्पर्य्यायः । सखा २ सुहृत् ३ । इत्यमरः । २ । ८ । १२ । मायति जानाति सर्व्वं मित्रं मी कि गत्यां नान्वीति डित्रः मित्रमजहल्लिङ्गम् । निपातात्तस्य डित्वे हितकारश्च । इति तट्टीकायां भरतः । तच्चतुर्व्विधम् । सहार्थः १ भजमानः २ सहजः ३ कृत्रिमः ४ । इति महाभारते राजधर्म्मः । * । मित्रलोत्पत्तिर्यथा,—
"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणादेव जायन्ते मित्राणि रिपवस्तथा ।"
वर्ज्यमित्रं यथा,—
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम् ।
कुबन्धुञ्च कुदेशञ्च दूरतः परिवर्जयेत् ।
कुमित्रे नास्ति विश्वासः कुराजे नास्ति जीवितम् ।
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं मायामयमरिन्यथा ।"
विश्वस्तस्यैव मित्रत्वं यथा,—
"सा श्रीर्या न मदं कुर्य्यात् स सुखी ह्यायोऽभितः ।
तन्मित्रं यस्य विश्वासः पुरुषः स जितेन्द्रियः ।"
इति गारुड़े १३ । १४ । १५ । अध्यायः ।*।
मित्रप्रशंसादिर्यथा,—
"यस्य मित्रेण संभावो यस्य मित्रेण संस्थितिः ।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् ।
यानि कानि च मित्राणि कर्त्तव्यानि शतानि च ।
पश्य ऋषिकमित्रेण कपोता मुक्तबन्धनाः ।
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ।
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि पण्डितः ।
अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च ।
मूर्खस्य च दिशः शून्याः सर्व्वशून्या दरिद्रता ।"
इति हितोपदेशः ।
मित्रः, पुं, सूर्य्यः । इत्यमरः । १ । ३ । ३० । (यथा, भोः रामायणे । २ । २५ । २२ ।
"स्वस्ति मित्रः सहादित्यैः स्वस्ति रुद्रा दिशन्तु ते ।")
द्वादशादित्यानामन्यतमः । यथा, महाभारते । १ । ६५ । १५ ।
"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।"
मरुतामन्यतमः । यथा, हरिवंशे । १६६ । ५२ ।
"मरुत्वती मरुत्वन्तो देवानजनयत् सुतान् ।
अग्निश्चतुर्हविर्ज्योतिः सावित्रो मित्र एव च ।"
वशिष्ठस्य ऊर्ज्जायांजातः पुत्रभेदः । यथा, भागवते । ४ । १ । ३७ ।
चित्रकेतुः सुरोचिश्च विरजा मित्र एव च ।
उल्बणो वसुभृद्यानो द्युमान् शक्त्यादयोऽपरे ।")
मित्रयुः, त्रि, (मित्रं यातीति । या + "क्याच्छन्दसि ।" ३ । २ । १७० । इति उः ।) मित्रवत्सलः । इति हेमचन्द्रः । ३ । १५३ ।
मित्रयुः, पुं, (मित्रं यातीति । या + "ऋगयादयश्च ।" उणा० १ । ३८ । इति कुः । निपातितश्च ।) लोकयात्रिकः । इत्युणादिकोषः । संज्ञिप्तसारोणादिवृत्तिश्च । (ऋषिभेदः सलोमहर्षणशिष्यः । यथा, विष्णुपुराणे । ३ । ६ । १८ ।
"सुमतिश्चाग्निवर्च्चाश्च मित्रयुः शांशपायनः ।)

मित्रयुद्धं, क्ली, (मित्रेण सह युद्धम्।) सुहृत्संग्रामः। तत्पर्य्यायः। मैत्रेयिका २। इति त्रिकाण्डशेषः॥

मित्रलब्धिः, } क्ली, पुं, (मित्रस्य लब्धिः। यद्वा।
मित्रलाभः, } मित्रस्य लब्धिर्यस्मात्।) सुहृत्प्राप्तिः। यथा, हितोपदेशे।

"मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च॥"

मित्रवत्सलः, त्रि, (मित्रस्य मित्रे वा वत्सलः।) मित्रप्रियः। तत्पर्य्यायः। मित्रयुः २। इति हेमचन्द्रः॥

मित्रग्रीः, [स्] त्रि, (मित्रं ग्राक्षि इति। ग्रास्+"ग्राश्च दृद्ङ्हलोः।" ६। ४। ३४। इत्यत्र "क्वौ च ग्रास इत्वं भवतीति वक्तव्यम्।" इति काशिकोक्तेः क्विप् इत्वं ततो दीर्घश्च।) सुहृच्छ्राद्धा। मित्रं ग्राक्षि यः। इति सुग्धबोधव्याकरणम्॥

मित्रसप्तमी, स्त्री, (मित्राय मित्रजन्मने मित्रस्य वा सप्तमीति समासः।) मार्गशीर्षशुक्लसप्तमी। यथा,—

"अदितेः कश्यपाज्जज्ञे मित्रो नाम दिवाकरः।
मार्गशीर्षस्य मासस्य शुक्ले पक्षे शुभे तिथौ॥
सप्तम्यां तेन सा ख्याता लोकेऽस्मिन् मित्रसप्तमी।
तत्रोपवासः कर्त्तव्यो भक्ष्याण्यथ फलानि वा॥"

इति श्रीगोविन्दानन्दाचार्य्यकृतसंवत्सरकौमुदीधृतभविष्यपुराणवचनम्॥

मित्रा, स्त्री, (मित्र+स्त्रियां टाप्।) सुमित्रा। शत्रुघ्नजननी। इति शब्दरत्नावली॥ (अप्सरोविशेषः। यथा, महाभारते। १३। १६। ४४।

"अलम्बुषा घृताची च मिश्रा चित्राङ्गदा रुचिः॥"

परागरशिष्यमैत्रेयजननी। यथा, श्रीमद्भागवते। ३। ४। ३५।

"कालिन्द्या: कतिभिः सिद्धः अहोभिर्भरतर्षभ!।
यापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः॥")

मिध ऋ ज वधे। मेधायाम्। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ऋ अमिमेधत्। ज मेधति मेधते ग्राम्यार्थे शिष्यः धारयतीत्यर्थः। इति दुर्गादासः॥

मिथः, [स्] अ, (मेथति इति मेथृसङ्गमे असुन्। पृषोदरादित्वात् ह्रस्वः।) अन्योन्यम्। रहः। इत्यमरः। ३।४।२५५॥ (यथा, मनुः। १०।५३।

"अवहारो मिथस्तेषां विवाहः सदृशैः सह॥")

मिथिः, पुं, (मेथते हिनस्ति ग्रन्थकुलं इति। मिथ्+"सर्व्वधातुभ्य इन्।" उणा० ४।११७। इति इन्।) निमिराजपुत्रः। स तु जनकराजः। यथा। अपुत्रस्य तस्य निमेर्भूभुजः शरीरमराजकभीरवस्ते सुतयः अरण्यां ममन्थुः। तत्र च कुमारो जज्ञे। जननाज्जनकसंज्ञां चाशावाप। अभूद्विदेहोऽस्य पितेति वैदेहः। मथनान्मिथिरभूत्। तस्योदावसुः पुत्रोऽभवत्। इति विष्णुपुराणे ४ अंशे ५ अध्यायः॥ (तथाच रामायणे। १। ७१। ४।

"निमिः परमधर्म्मात्मा सर्व्वसत्त्ववतां वरः।
तस्य पुत्रो मिथिर्नाम जनको मिथिपुत्रकः॥")

मिथिला, स्त्री, (मथ्यन्ते ग्रन्थवो यस्याम्। मथ्+"मिथिलादयश्च" उणा० १।५८। इति इलच् अकारस्येत्वं निपात्यते।) स्वनामख्यातनगरी। सा तु जनकराजपुरी। यथा। विदेहा मिथिला प्रोक्ता। इति हलायुधः॥ (यथा, महाभारते। १। ११३। २८।

"ततः कोषं समादाय वाहनानि च भूरिशः।
पाण्डुना मिथिलां गत्वा विदेहाः समरे जिताः॥")

अपिचास्य निरुक्त्यादिकं यथा,—

"गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे!।
विदेहभूः समाख्याता तैरभुक्ताभिधः स तु॥"

इति ग्रन्थिसङ्गमतन्त्रे ७ पटलः। तैरभुक्ता त्रिहुत इति ख्याता। तन्नामकारणं यथा,—

"अराजकभयं नृणां मन्यमाना महर्षयः।
देहं ममन्थुः स्म निमेः कुमारः समजायत॥
जन्मना जनकः सोऽभूद्देहस्तु विदहज्जनः।
मिथिलो मथनाज्जातो मिथिला येन निर्म्मिता॥"

इति श्रीमद्भागवते ९ स्कन्धे १३ अध्यायः॥

अपि च।

"निमेः पुत्रस्तु तत्रैव मिथिर्नाम महान् स्मृतः।
प्रथमं शुभलक्षैर्येन तैरभुक्तस्य पार्श्वतः।
निर्म्मितं स्त्रीयनाम्ना च मिथिलापुरमुत्तमम्॥
पुरीजननसामर्थ्यात् जनकः स च कीर्त्तितः॥"

इति भविष्यपुराणम्॥

मिथुनं, क्ली, (मेथतीति। मिथ्+"शुधिधिभ्रि मिथः कित्।" उणा० ३। ५५। इति उनन् किच्चावाद्गुणाभावश्च।) स्त्रीपुंसयोर्युग्मम्। तत्पर्य्यायः। द्वन्द्वम् २। इत्यमरः। २। ५। ३८॥ (यथा, रामायणे। १। २। १५।

"मानिषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥")

युगलम्। इति तट्टीकायां रामाश्रमः॥ मेषादिद्वादशराश्यन्तर्गततृतीयराशिः। तत्पर्य्यायः। जितुमः २। तच्च द्विपदं याम्यं समसंज्ञकम्। अस्योदयस्य स्थूलमानं षट्पलाधिकपञ्चदण्डाः। इति ज्योतिषतत्त्वम्॥ अस्याधिष्ठातृदेवता गदाधारिपुरुषः वीणाधारिस्त्री च। ऋगग्निरः-प्रेषार्द्धं आदांसमुदायः पुनर्लेखोल्लिपार्दं एतेभवति। तत्तु श्रीवैदेयं पञ्चमदिक्कस्वामिवायुप्रकृतिहरिद्वर्णं वनस्थितं शूद्रवर्णं स्त्रिघं मध्यस्त्रीसङ्गं मध्यमसन्तानञ्च। तच्च जातो जनः रक्तचक्षुः मिष्टभाषी क्षुद्रः वञ्चकः धर्म्मभीतः विनयभाजनञ्च भवति। इति दृष्टजातकादयः॥ अथ मिथुनलग्नजातफलम्।

"मिथुनोदयसंजातो मानी स्वजनवत्सलः।
त्यागी भोगी धनी कामी दीर्घसूत्रोऽरिमर्द्दनः॥"

इति कोष्ठीप्रदीपः॥ *॥

रात्रौ तल्लग्ननिरूपणं यथा,—

"दन्तसंख्यभवने भृगात्मजा-
वन्तमे लसदनन्तमध्यगे।
कोमलाङ्गि! मिथुनोदयात् प्रिये!
कालखानलकलाः प्रियेऽचलन्॥" ५। ६।

इति कालिदासकृतराशिलग्ननिरूपणम्॥

मिथ्या, अ, (मथते इति। मथविलोडने। मेथते हिनस्ति वेति। मथ वा मेथ+क्यप्। निपातनात् साधुः।) असत्यम्। तत्पर्य्यायः। वृथा २ वितथः ३ अनृतम् ४। इति शब्दरत्नावली॥ मिछा इति भाषा॥ (यथा,—

"यदसङ्गासमानं तन्मिथ्या खाम्रगजादिवत्।"

इति सांख्यप्रवचनभाष्यधृतम्॥

सा चाधर्म्मपत्नी। यथा,—

"अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता।
यया विना जगल्लुप्तसृष्टिरूपं विधिनिर्म्मितम्॥
सत्ये चादर्शना या च त्रेतायां छद्मरूपिणी।
अर्द्धावयवरूपा च द्वापरे संवृता भिया॥
कलौ महाप्रमत्ता च सर्व्वत्र व्यापिका बलात्।
कपटेन समं भ्रात्रा भ्रमत्येव गृहे गृहे॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः॥

अपि च।

"अधर्म्मस्य प्रिया रम्या मिथ्या मार्জ্জारलोचना।
तस्याः पुत्रोऽतितेजस्वी दम्भः परमकोपनः॥
स मायायां भगिन्यान्तु लोभं पुत्रञ्च कन्यकाम्।
निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत्॥"

इति कल्किपुराणे १ अध्यायः॥

विषयभेदे मिथ्याभाषणे दोषाभावो यथा,—

ब्रह्मोवाच।

"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन् विवाहकाले।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि॥"

मिथ्याकथने दोषो यथा,—

"दृष्टास्तु साक्षे प्रवदन्ति येऽन्यथा
भवन्ति मिथ्यापतिता नरेन्द्र!।
एकार्थतायान्तु समाहितायां
मिथ्या वदन्तं ह्यनृतं हिनस्ति॥"

ययातिरुवाच।

"राजा प्रमाणं भूतानां स विनश्येन्मृषा वदन्।
अर्थैश्छन्नमपि प्राप्य न मिथ्या कर्त्तुमुत्सहे॥"

इति मात्स्ये ३१ अध्यायः॥

अथासत्याभिधानप्रायश्चित्तम्। तत्र सहसा-सत्यभाषणे कृच्छ्रानुस्मरणं प्रायश्चित्तम्। यथा, विष्णुपुराणम्।

"कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते।
प्रायश्चित्तन्तु तस्येकं कृच्छ्रानुस्मरणं परम्॥"

अत्यन्ताभ्यासे विष्णुः। निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनम्। असत्यभाषणं शूद्रसेवनमित्यपाकीरणं कृत्वा तप्तकृच्छ्रेण शुध्यति। अतिबहुतरकालाभ्यासे मनुः।

"सङ्करापात्रकृत्यासु मासं शोधनमेन्द्रवम्।"

चातुर्वर्ण्यवधे साक्ष्येऽनृतभाषणेऽनुपातकत्वाभावाच्च प्रायश्चित्तमाह याज्ञवल्क्यः।
"वर्णिनां हि वधो यत्र तत्र साक्ष्येऽनृतं वदेत्। तत्पावनाय निर्व्यूढैश्चरेत् सारस्वतो द्विजैः॥"
शूद्रे तु विप्रः। तत्पावनाय कृष्णाजीभिर्द्विजोऽग्निं जुहुयात्। शूद्रस्यैकोद्दिष्टं गोदशकस्य दानं विदध्यात्। विषयविशेषेऽपवादमाह हारीतः। सोमविक्रयकन्याविवाहभयमैथुनबालकसंनयनं गोब्राह्मणहितञ्च कुर्वन् मिथ्या न लिप्यत इति। तथा च यमः।
"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रैरवाक्यं न च मैथुनार्थे।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि॥"
इति प्रायश्चित्तविवेकः॥

मिथ्याचारः, त्रि, (मिथ्या आचारोऽस्य।) कपटाचारः। दाम्भिक इत्यर्थः। इति वक्ष्यमाणशीकटीकायां श्रीधरस्वामी॥ यथा,—
"कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते॥"
इति श्रीभगवद्गीतायां ३ अध्यायः॥

मिथ्याडम्बिः, स्त्री, (मिथ्या च सा डम्बिश्चेति।) कर्म्मफलापवादकज्ञानम्। तत्पर्य्यायः। नास्तिकता २। इत्यमरभरतौ। १। ५। ४॥ असत्यदर्शनञ्च॥

मिथ्याध्यवसितिः, स्त्री, (मिथ्या असत्या च सा अध्यवसितिश्चेति।) मिथ्याध्यवसायः। असत्योत्साहः। इति कैचित्॥

मिथ्यानिरसनं, क्ली, (मिथ्या असत्यं निरस्यते अनेन। निर्+अस्+करणे ल्युट्।) शपथः। इत्यमरटीकायां भरतः॥

मिथ्याभियोगः, पुं, (मिथ्या असत्यमभियोगः।) मिथ्यावादः। यथा मे धारयसीत्यादि मिथ्योद्भावनम्। तत्पर्य्यायः। अभ्याख्यानम् २। इत्यमरभरतौ॥

मिथ्याभिशंसनं, क्ली, (मिथ्या असत्यस्य अभिशंसनं कथनम्।) स्वर्गस्तेयं त्वया कृतमित्यादि मिथ्यादूषणं वाक्यम्। तत्पर्य्यायः। अभिशापः २। इत्यमरभरतौ॥

मिथ्याभिशापः, पुं, (मिथ्या अभिशापः।) मिथ्यापवादः। यथा, भोजराजः।
"शुक्लपक्षे चतुर्थ्यान्तु क्षिपेच्चन्द्रस्य दर्शनम्।
मिथ्याभिशापं कुरुते न पश्येत्तत्र तं ततः॥"
इति तिथ्यादितत्त्वम्॥

मिथ्यामतिः, स्त्री, (मिथ्या चासौ मतिश्चेति।) भ्रान्तिः। इत्यमरः। १। ५। ४॥ असत्यबुद्धिश्च॥

मिथ्यासाक्षी, [न्] त्रि, (मिथ्याभाषी साक्षी साक्षाद्दृष्टा चेति।) कूटसाक्षी। तस्य प्रायश्चित्तप्रकारमाह याज्ञवल्क्यः।
"उक्तेऽपि साक्षिभिः साक्ष्ये यदन्ये गुणवत्तमाः।
द्विगुणा दाप्यया ब्रूयुः कूटाः स्युः पूर्व्वसाक्षिणः॥"
मिथ्यासाक्ष्यकथने दोषमाह याज्ञवल्क्यः।
"ये पातकानां लोका महापातकिनां तथा।
अभिदानाच्च ये लोका ये च स्त्रीबालघातिनाम्॥
एतान् सर्व्वानवाप्नोति यः साक्ष्यमृतं वदेत्।
सुकृतं यत्त्वया किञ्चित् जन्मान्तरशतैः कृतम्।
तत् सर्व्वं तस्य जानीहि यं परानयसे ह्यृणा॥"
इति मिताक्षरा॥

मिथ्योत्तरं, क्ली, (मिथ्या असत्यमुत्तरं।) चतुर्धोत्तरान्तर्गतोत्तरविशेषः। तस्य लक्षणम्।
"अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम्।
मिथ्या तत्तु विजानीयादुत्तरं वचनं बुधाः॥"
इति नारदः॥
तच्चतुर्व्विधम्। मिथ्येतत् १ अहं नाभिजानामि २ मम तत्र न सन्निधिः ३ तत्कालेऽहमजातः ४। यथा, व्यासनारदौ।
"मिथ्येतन्नाभिजानामि मम तत्र न सन्निधिः।
अजातश्चासि तत्काले इति मिथ्या चतुर्व्विधम्॥"
इति व्यवहारतत्त्वम्॥

मिद ए क स्नेहे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) ए क मिन्दयति वर्त्तिका तैलेन। इति दुर्गादासः॥

मिद ए ए य आ स्नेहे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) ए ए अमिदत् अमेदीत्। य इति शायामग्रीलोऽसौ महाकायो न मेदतीति हलायुधः। आ मेदितं मिन्नं तेन। इति दुर्गादासः॥

मिद ए ए ण वधमेधयोः। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ए ए अमिमेदत्। ण मेदति मेदते ग्राम्यार्थं ग्रिथ्यो धारयतीत्यर्थः। मिमिदुः मिमेदुः। इति दुर्गादासः॥

मिद, ए ए आ णि ङ स्नेहे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ए ए अमिदत। णि मिन्नोऽस्मि। ङ मेदते। इति दुर्गादासः॥

मिद, ए क स्नेहे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) क मेदयति वर्त्तिका तैलेन। इति दुर्गादासः॥

मिन्मिन, त्रि, सानुनासिकवाग्विशिष्टः। खोना इति भाषा। तस्य निदानं यथा,—
"आहत्य वायुः सकफो धमनीः शब्दवाहिनीः।
नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान्॥"
इति माधवकरः॥
अक्रियकान् इत्यत्रावचनानिति च पाठः। अवचनात् अवेदयितुं नशू। तेन ईषद्वचनात्। स एव वायुः प्रबलश्चेत्तदा मूकान् अवचनात्। मिन्मिनान् सानुनासिकान्। गद्गदान् स्खलत्पदस्खलनाभिघायिनः करोतीत्यन्वयः। एषां समानकारणत्वेऽपि दुरुत्कर्षादिना अदृष्टवशादेवा भेदो बोद्धव्यः॥*॥ अथ तेषां चिकित्सा।
"प्रस्थं घृतस्य पलिकैः शिग्रुवचालवणक्षातकोलैः।
आजे पयसि विपक्वं सिद्धं सारस्वतं नाम्ना॥
विधिवदुपयुज्यमानं अङ्गगदमूकतां क्षणात् जित्वा।
स्मृतिमतिमेधाप्रतिभाः कुर्य्यात् संस्मरवाग्भवति॥
सारस्वतं घृतम्।
"सहरिद्रा वचा कुष्ठं पिप्पली विश्वभेषजम्।
अजाजी चाजमोदा च यष्टीमधुकसैन्धवम्॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत्।
तच्चूर्णं सर्पिषालोड्य प्रत्यहं भक्षयेन्नरः॥
एकविंशतिरात्रेण भवेच्छ्रुतिधरो नरः।
मेघदुन्दुभिनिर्घोषो मत्तकोकिलनिस्वनः॥"
इति भावप्रकाशस्य द्वितीये भागे मध्यखण्डे वातव्याध्यधिकारे॥

मिल, श्लि ए क श्लिषि। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-अक०-सेट्।) श्लिषि सम्बन्धीभावे। श्लि ए मिलति मिलते लता वृक्षेण। अयं कुटादिरिति कुलचन्द्रः। तेन खालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्। इति जयदेवः। मिलिष्यन्ति।
"महापातकिनः पञ्च मिलितव्यं न तैः सह।"
इति दुर्गादासः॥

मिलितः, त्रि, मिलधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः। श्लिष्टः। सम्बन्धविशिष्टः। युक्तः। (यथा, देवीभागवते। १। ११। ८०।
"पुनर्विवादः सङ्ग्रामो मिलिता देवदानवाः।
युद्धार्थमागतास्ते वा समाजः समजायत॥")

मिव, ए ए सेके। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ए मिम्वति। इति दुर्गादासः॥

मिश्र, श्वनौ। कोपे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) मेश्रति। इति दुर्गादासः॥

मिश्रिः, स्त्री, (मिश्र+इन्।) मधुरिका। शतपुष्पा। इत्यमरटीकायां भरतः॥ जटामांसी। इति शब्दरत्नावली॥

मिश्री, स्त्री, (मिश्रि+ऋदिकारादिति पक्षे ङीष्।) जटामांसी। इति शब्दरत्नावली॥ मधुरिका। इत्यमरटीकायां भरतः॥

मिश्र, त्रि ए क युक्तौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) तालव्यमध्योऽयम्। दन्त्यमध्य इति वर्णदेशनायाम्। युतिः संयोजनम्। मिश्रयति मिश्रापयति हतेनाम्रं लोकः। इति दुर्गादासः॥

मिश्रं, क्ली, (मिश्र+बाहुलकात् रक्।) चायस्यमूलकम्। इति राजनिर्घण्टः॥ मिश्रितम्। यथा,—
"केचिदाहुः क्वचिद्देशे यावत्तु दिनवाटिकाः।
तावदेव त्वनध्यायो न तस्मिन्नहि दिनान्तरे॥"
इति तिथ्यादितत्त्वम्॥

मिश्रः, पुं, (मिश्र + बाहुलकात् रक् ।) गजजातिविशेषः । यथा, —
"भद्रो मन्द्रो मृगो मिश्रश्चतस्रो गजजातयः ।"
इति हेमचन्द्रः । ४ । २८४ ॥
श्रेष्ठः । यथा । गौरवित्याख्यार्थमिश्राः । इति भूरिप्रयोगः ॥ संयुक्ते, त्रि । यथा,—
"कस्त्वं कवरी मिश्रः संपृक्तः खचितः समाः ।
इति हेमचन्द्रः । ६ । १०५ ॥
उग्रादिसप्तमगणान्तर्गतसप्तमगणः । स तु क्षत्त्रिका विप्राख्याभ्यां भवति । इति ज्योतिषतत्त्वम् ॥

मिश्रकं, क्ली, (मिश्र + कन् ।) देवोद्यानम् । इति जटाधरः ॥ औषरलवणम् । इति राजनिर्घण्टः ॥ (मिश्र + स्वुल् । त्रि, मिश्रणकर्त्ता । यथा, मनौ । ११ । ५० ।
"पिशुनः पौतिनाशिकं सूचकः पूतिवक्त्रताम् ।
धान्यचौरोऽङ्गहीनत्वमतिरेक्यन्तु मिश्रकः ।"
तीर्थभेदः । यथा, महाभारते ।३।८३।८२।
"ततो गच्छेत धर्म्मज्ञ ! मिश्रकं लोकविश्रुतम् ।
तत्र तीर्थानि राजेन्द्र ! मिश्रितानि महात्मना ॥")

मिश्रकावर्ण, क्ली, (मिश्रकाणां वनम् । "वनगिर्य्योः संज्ञायां कोटरकिंशुलकादीनाम् ।" ६ । ३ । ११७ । अकारस्याकारः "वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ।" ८ । ४ । ४ । इति णत्वम् ।) इक्षुसोद्यानम् । यथा,—
"नन्दनं कन्दसारं स्यान्मिश्रकावणमित्यपि ।"
इति त्रिकाण्डशेषः ॥

मिश्रजः, पुं, (मिश्रात् भिन्नजातीययोः सम्मेलनात् जात इति । जन + डः ।) खेसरः । इति राजनिर्घण्टः ॥

मिश्रणं, क्ली, मिश्रधातोर्भावेऽनट् (ल्युट्) प्रत्ययेन निष्पन्नम् । संयोजनम् । एकत्रीकरणम् । (यथा, प्रबोधचन्द्रोदये । २ । ५ ।
"तदेतेर्वाङ्मिश्रणमपि गुरुतरदुरितोदयाय ॥")

मिश्रपुष्पा, स्त्री, (मिश्राणि परस्परं संश्लिष्टानि पुष्पाण्यस्याः ।) मेषिका । इति राजनिर्घण्टः ॥

मिश्रवर्ण, क्ली, (मिश्रः मिलितः वर्णोऽस्य ।) कृष्णागुरु । इति राजनिर्घण्टः ॥ नानावर्णयुक्ते, त्रि ॥

मिश्रवर्णफला, स्त्री, (मिश्रवर्णं फलमस्याः ।) धात्रीवृक्षः । इति राजनिर्घण्टः ॥

मिश्रशब्दः, पुं, (मिश्रः मिलितः अश्वरासभयोरिव शब्दोऽस्य ।) खेसरः । इति राजनिर्घण्टः ॥

मिश्रितं, त्रि, (मिश्रः श्रेष्ठत्वमस्य संजातम् । मिश्र + इतच् । यद्वा, मिश्र + क्तः ।) गौरवितम् । इति जटाधरः ॥ मिलितञ्च ॥

मिश्रिता, स्त्री, (मिश्रित + टाप् ।) मन्दादिसप्तधासंक्रान्त्यन्तर्गतसंक्रान्तिविशेषः । यथा,
"मन्दा ध्रुवेषु विज्ञेया रुद्रौ मन्दाकिनी तथा ।
क्षिप्रे ध्वाङ्क्षी विजानीयाद्ग्रे घोरा प्रकीर्त्तिता ॥
चरैर्मनोदरी ज्ञेया क्रूरैर्ज्ञेया तु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रितैस्तु संक्रमे ॥"
इति तिथ्यादितत्त्वम् ॥

मिश्रेया, स्त्री, मधुरिका । इत्यमरः । २।४।१०५ ॥ मौरि इति भाषा ।
"मिश्रेया सुरसा पेया लताहा स्कन्दवल्लना ।"
इति शब्दचन्द्रिका च ॥ शाकविशेषः । शुतपुष्पा । शुशुनी इति भाषा । तत्पर्य्यायः । ताम्रपर्णी २ तामपर्णी ३ मिषिः ४ शालेया ५ पीतशिखा ६ शालीना ७ वनजा ८ अवाक्पुष्पी ९ मधुरिका १० कृष्णा ११ संहितपुष्पिका १२ सुपुष्पा १३ सुरसा १४ बल्या १५ । अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । कटुत्वम् । परमकफहरत्वम् । वातपित्तोत्थदोषत्रीहनत्वमतिविनाशित्वञ्च । इति राजनिर्घण्टः । तत्पर्य्यायगुणाः ।
"शुतपुष्पा शुताङ्गा च मधुरा कारवी मिषिः ।
अतिच्छत्रा सितच्छत्रा संहितच्छत्रिकापि च ॥
कृष्णा शालेयशालिन्यौ मिश्रेया मधुरा मिषिः ।
शुतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः ॥
उष्णा ज्वरानिलश्वासव्रणशूलाक्षिरोगकृत् ।
मिश्रेया तद्गुणा प्रोक्ता विशेषाद्योनिशूलनुत् ॥
अग्निमान्द्यहरी कृष्णा बहुविट्कृमिशूलकृत् ।
रूक्षोष्णा पाचनी कासवमिस्रोष्णानिलान् हरेत् ॥"
इति भावप्रकाशः ॥

मिष उ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) उ मेषित्वा मिष्ट्वा । इति दुर्गादासः ॥

मिष ग्र वर्द्धे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) वर्द्धेः पराभिभवेच्छा । इति बोपदेवः ॥ ग्र मिषति बली बलवन्तम् । इति दुर्गादासः ॥

मिषं, क्ली, (मिष् + कः ।) क्षणम् । इति मेदिनी । षे, २१ ॥ (यथा, नैषधे । १ । ११८ ।
"प्रियासु बालासु रतश्रमासु च
द्विपत्तिं पञ्चत्वितश्च विभ्रतम् ।
स्मरार्त्तिं रागमहीरुहाङ्कुरं
मिषेण चक्षाचरणद्वयस्य च ॥")

मिषः, पुं, (मिष् + कः ।) वर्द्धनम् । इति मेदिनी । षे, २१ ॥ (यथा, कथासरित्सागरे । ६४ । १२५ ।
"इति ध्यायन् मिषं लब्ध्वा तदैवास्फुटया गिरा ।
निर्गत्यैव विरक्तात्मा धनदेवान्तिकं ययौ ॥")

मिषिः, स्त्री, (मिष् + इन् ।) जटामांसी । इति शब्दरत्नावली ॥ मधुरिका । इति शब्दचन्द्रिका ॥ (यथास्य पर्य्यायः ।
"अवाक्पुष्पी च कृष्णा स्यान्मङ्गल्या मधुरा मिषिः ।"
इति वैद्यकरत्नमालायाम् ॥)
शुतपुष्पा । इत्यमरटीकायां भरतः ॥

मिषिका, स्त्री, (मिषि + कन् + टाप् ।) जटामांसी । इति शब्दरत्नावली ॥

मिष्टं, त्रि, सिक्तम् । सर्द्धितम् । इति मिष्धातोः क्तप्रत्ययेन निष्पन्नम् ॥

मिष्टः, पुं, (मिष् + क्तः ।) मधुररसः । यथा,
"मिष्टः कटुश्च मधुरमम्लोऽम्लं पच्यते रसः ।
कटुतिक्तकषायाणां पाकः स्यात् प्रायशः कटुः ॥"
इति भावप्रकाशः ॥
"नूतनसर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥"
इति क्षेमेन्द्रकृतौचित्यविचारचर्च्चायाञ्च ॥

मिष्टपाकः, पुं, (मिष्टेन पाको यस्य ।) शर्करारसपक्वफलादिः । मोरब्बा इति पारस्यभाषा ॥ तदेकप्रकारो यथा । अपक्वाम्रं छिद्रयुक्तं कृत्वा तन्मध्ये शलाकया छिद्रजालकरणान्तरं चूर्णमिश्रितजले दक्षचतुरश्रं क्षारयित्वा जलेन धौतं कुर्य्यात् । ततो जलेन सिक्तं कृत्वा जलत्यागपूर्ब्बकमेकतारबद्धशर्करारसे मधुकरणानन्तरं तापं दद्यात् । रसे घनीभूते अर्द्धदग्धं यावत् तापेन निष्पन्नो भविष्यति । इति पाकराजेश्वरः ॥

मिष्टान्नं, क्ली, (मिष्टमन्नम् ।) मधुरद्रव्यम् । इति हलायुधः ॥ अपि च ।
"मिष्टान्नपानदानाय सततं श्रद्धयान्वितः ।
देवपूजापरो नित्यं न प्रेतो जायते क्वचित् ॥"
इत्यग्निपुराणम् ॥

मिसिः, स्त्री, (मस्यति परिणमतीति + इन् बाहुलकादत इकारः । पक्षे ङीष् ।) मधुरिका । (यथास्य पर्य्यायः ।
"मिसिर्मधुरिका मता ।"
इति शब्दरत्नावली । २०८ पृ० ।) जटामांसी । शुतपुष्पा । इत्यमरभरतौ ॥ (शुतपुष्पार्थे पर्य्यायो यथा,—
"शुतपुष्पा शुताङ्गा च मधुरा कारवी मिषिः ।
अतिछत्री सितच्छत्रा संहितच्छत्रिकापि च ॥
कृष्णा शालेयशालिन्यौ मिश्रेया मधुरा मिषिः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
उशीरी । इति राजनिर्घण्टः ॥ अजमोदा । इति मेदिनी । से, ८ ॥

मिस्त् क युक्तायाम् । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) तालव्यमध्योऽयम् । इत्यमध्य इति वर्ज्जदेशीयनायाम् । युतिः संयोजनम् । मिस्रयति मिस्रापयति क्षुतेनान्नं लोकः । इति दुर्गादासः ॥

मिह औ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० सक०-अनिट् ।) औ अमिक्षत् । इति दुर्गादासः ॥

मिहिका, स्त्री, (मेहति क्षिप्यतीति । मिह + संज्ञायां कुन् टाप् अत इत्वम् ।) नीहारः । इति शब्दरत्नावली ॥ (यथा, नैषधे ।१६।३५ ।
"विगृह्य युवतित्यागे रात्रौ सुप्तं मिहिकारुचम् ।
दिनमणिमग्निं तापे चित्तानिलाच्च वियासति ॥")

मिहिरः, पुं, (मेहयति सेचयति मेघजलेन भूमिमिति। मिह+"इषिमदिसुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिन्दीति।" उणा० १। ५२। इति किरच्।) सूर्य्यः। (यथा, मार्कण्डेये। १०७। ७।

"भव तिमिरासवपानमदात्
भवति विलोडितविग्रहात्।
मिहिर! विभासि यतः सुतरां
त्रिभुवनभावनभानिकरैः॥")

अर्कवृक्षः। इत्यमरः। १। ३। २६॥ वृष्टः। इति मेदिनीशब्दरत्नावली। रे, २०४। मेघः। इति हेमचन्द्रः। २। ११॥ वायुः। चन्द्रः। इति नानार्थरत्नमाला॥ विक्रमादित्यभूपस्य नवरत्नान्तर्गतरत्नविशेषः। यथा,—

"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"

इति नवरत्नम्॥

मिहिराणः, पुं, (मिहिरेणाप्यायतेस्नूयत इति। आण्+घञ्।) शिवः। इति त्रिकाण्डशेषः॥

मी ओ ग ञ वधे। इति कविकल्पद्रुमः॥ (क्रा०-उभ०-सक०-सेट्।) ओ मीनः। ग ञ मीनाति मीनीते। इति दुर्गादासः॥

मी कि गत्याम्। मत्याम्। इति कविकल्पद्रुमः॥ (पुरा०-पक्षे भ्वा०-सक०-अनिट्।) कि मायति मयति। इति दुर्गादासः॥

मी ड य वधे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) ड य मीयते। इति दुर्गादासः॥

मीढ, त्रि, सूक्तितम्। इत्यमरः। ३। १। ६६॥ दे क्तसूत्रोत्सर्गे। मिहौ सिचि सूत्रत् क प्रसावे आभ्यां धात्वर्थोपसंग्रहादकर्मत्वात् कर्त्तरि क्तः। इति भरतः॥

मीढुष्मः, पुं, (मीढुस् तमप्प्रत्ययेन पृषोदरादित्वात् साधुः।) शिवः। यथा,—

"सदा सर्व्वाणि भूतानि! श्रुत्वा मीढुष्मोदितम्।
परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन्॥"

इति श्रीमद्भागवते ४ स्कन्धे ६ अध्यायः॥

"मीढुष्मः शिवस्तेनोक्तम्।" इति तट्टीकायां श्रीधरस्वामी।

मीढ्वान्, [स्] पुं, (मिह सेचने। "हन्याद्वाभ्यां मीढ्वांच।" ६। १। १२। इति छन्दसि क्वसुः। द्वित्वाभावः अनिट्त्वं उपधादीर्घत्वं ढत्वच्च निपात्यते।) शिवः। यथा,—

"ततो मीढ्वांसमामन्त्र्य सुरासोराः सहर्षिभिः।
भूयस्तद्दयितं समीढुषेधसो ययुः॥"

इति श्रीमद्भागवते ४ स्कन्धे ६ अध्यायः॥

"मीढ्वांसं शिवं भीढुषा वेधसा च वर्त्तमानाः।" इति तट्टीकायां श्रीधरस्वामी॥ (वर्धितरि, त्रि। यथा, ऋग्वेदे। २। २४। १।

"यथा नो मीढ्वान् स्तवते सखा तव दृढायते।"

"मीढ्वान् सेक्ता स्तुतेर्वर्षिता।" इति तद्भाष्ये सायणः॥)

मीनः, पुं, (मीयते इति मीञ् हिंसायाम्। "फेनमीनौ।" उणा० ३।३। इति नक् निपातितश्च।) मत्स्यः। इत्यमरः। १। १०। १७॥ (यथा, भागवते। ३। २। ८।

"दुर्भगो बत लोकोऽयं यदवो नितरामपि।
ये संवसन्तो न विदुर्हरिं मीना इवोडुपम्॥")

मेषादिद्वादशराश्यन्तर्गतान्तिमराशिः। तत्पर्य्यायः। अन्त्यभम् २। स च पूर्ब्बभाद्रपदारेवतीसमुदायेन भवति। अस्याधिष्ठातृदेवता श्रीमत्स्यद्वयं स च कौटसंज्ञः। जलजः। सौम्यः। अङ्गना। युग्मः। समः। द्व्यात्मकः। भक्षः। उत्तरदृङ्नाथः। गुरुक्षेत्रम्। दिनात्मकश्च। इति ज्योतिस्तत्त्वम्॥ अपि च। ग्रीवंपृष्ठोदयः। चरणरहितः। कफप्रकृतिः। जलचारी। निःशब्दः। पिङ्गलवर्णः। स्निग्धः। अत्यन्तस्त्रीसङ्गः। बहुसन्तानः। ब्राह्मणवर्णः। शुचाङ्गश्च। तच्च जातः अतिक्रोधनः। शीघ्रगतिः। अशुचिः। कर्म्मभोगी। प्रभुरविवाहश्च भवति। इति बृहज्जातकादयः॥ अपि च।

"मीनलग्ने समुत्पन्नो रत्नकाञ्चनपूरितः।
अल्परोमा महाप्राज्ञो दीर्घकालपरीक्षकः॥"

इति कोष्ठीप्रदीपः॥ *॥

राशौ लग्नत्वनिरूपणं यथा। सूर्य्याकारतारात्रितुरन्ध्रात्मकपूर्ब्बाषाढानक्षत्रे मस्तकोपरि उदिते सति मीनलग्नस्य १। ४६ ऊनपञ्चाशत्पलाधिकैकदण्डो भवति। प्रकारान्तरे। सूर्य्यातिताराचतुरन्ध्रात्मकोत्तराषाढानक्षत्रे मस्तकोपरि उदिते सति मीनलग्नस्य २। १६ षट्त्रिंशत्पलाधिकदण्डद्वयं भवति। यथा,—

"सूर्य्यर्क्षांशैर्नि शिरोगते
चतुस्सारके करिकरोरुवारिभे।
अन्त्यभादन्ततवाधि! निर्गताः
खेचराम्बरयुगाङ्गुलिप्रिकाः॥ दं १।४६।
ग्रीवंभाजिभचतुरन्ध्राङ्गिते
विश्वभे तरणि सूर्य्यकालतौ।
भूतिरस्कृतमनोजकार्मुके!
यान्ति कालतिथिजिप्रिका भवात्॥"

दं २। १६॥

इति कालिदासलघुतरात्रिलग्यनिरूपणम्॥*॥

भगवद्भावतारान्तर्गतप्रथमावतारः। यथा,

"शेते स चित्तप्रयने मम मीन कूर्म्मकोलोऽभवन् वृहरिवामनजामदग्न्याः।
योऽभूद्भूव भरतार्यजलक्षबुद्धः
कल्की सताञ्च भविता प्रहरिष्यतेऽरीन्॥"

इति सुग्धबोधव्याकरणम्।

अस्य विवरणं मत्स्यशब्दे द्रष्टव्यम्॥*॥

विशेषवक्तव्यं कथ्यते।

"प्रकृतिर्विष्णुरूपा च पुंरूपञ्च महेश्वरः।
एवं प्रकृतिभेदेन भेदास्तु प्रकृतेर्दश॥

ख्यरूपा कालिका स्याद्रामरूपा च तारिणी।
वगला कूर्म्ममूर्त्तिः स्याद्धूमो धूमावती भवेत्॥
छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी।
सुन्दरी जामदग्न्याः स्याद्रामनो सुवनेश्वरी॥
कमला बौद्धरूपा स्यात् मातङ्गी कल्किरूपिणी।
स्वयं भगवती काली ख्यास्तु भगवान् स्वयम्॥
स्वयञ्च भगवान् ख्यः कालीरूपो भवेद्व्रजे।"

दुर्गा स्यात् कल्किरूपिणीति पाठान्तरम्।

इति सुरूपमालातन्त्रम्॥

मीनकेतनः, पुं, (मीनः केतने अस्य।) कन्दर्पः। इत्यमरः। १। १। २६॥ (यथा, दशकुमारचरिते। ५।

"अथ मीनकेतनसेनानायकेन।"

मीनगोधिका, स्त्री, (मीनगोधिकानामावासोऽत्र।) जलाशयः। यथा,—

'पक्षलं दीर्घिका वापी यष्टिका मीनगोधिका।'

इति त्रिकाण्डशेषः॥

मीनघाती, [न्] पुं, (मीनं हन्तीति। हन्+णिनिः।) वकः। इति राजनिर्घण्टः॥ मत्स्यघातके, त्रि॥

मीननेत्रा, स्त्री, (मीनस्य नेत्राकारा यस्याः।) गण्डदूर्व्वा। इति राजनिर्घण्टः॥

मीनरः, पुं, (मीनाः भक्षत्वेन सन्त्यस्य। मीन+"वृञ् छण्कठजिलेति।" ४। २। ८०। इति अस्त्यादित्वात् रः।) हारकः। इति त्रिकाण्डशेषः॥ हाङ्गर इति भाषा॥

मीनरङ्गः, पुं, (मीनरङ्ग। पृषोदरादित्वात् साधुः।) मत्स्याशनपक्षी। इति त्रिकाण्डशेषः। माछरांङ्गा इति भाषा॥ क्वचित् पुस्तके मत्स्यरङ्ग इत्यपि पाठः॥

मीना, स्त्री, उषाकन्या। सा तु कश्यपभार्य्या। यथा, वह्निपुराणे।

"उषायास्तु प्रवक्ष्यामि सर्गं पञ्च सुतास्ततः।
मीना मेना तथा हृष्टा अनुहृष्टा तथैव च।
परिहृष्टा च विज्ञेया तासाञ्च शृणुत प्रजाः।"

मीनाक्षी, स्त्री, शर्करा। इति राजनिर्घण्टः। (विशेषोऽस्याः शर्करा शब्दे विधेयः॥)

मीनाम्बोधः, पुं, दर्दुराम्बः। खञ्जनः। इति मेदिनी। धे, १०५॥

मीनालयः, पुं, (मीनानामालयः।) समुद्रः। इति धनञ्जयः॥

मीनाक्षी, स्त्री, (मीनस्यक्षिणी इव अक्षिणी अस्याः।) मत्स्याक्षी। गण्डदूर्व्वा। इति राजनिर्घण्टः॥ कुबेरकन्या। इति पुराणम्॥

मीम ञ शब्दे गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-शब्दे अक०-गतौ सक० पर०-सेट्।) ञ अमिमीमत्। इति दुर्गादासः॥

मीमांसकः, पुं, (मीमांसामधीते वेद वेति। मीमांसा+"ऋमादिभ्यो वुन्।" ४। २। ६१। इति वुन्।) मीमांसाशास्त्रवेत्ता। तत्पर्य्यायः। विद्वान् २। इति जटाधरः॥ मीमांसाशास्त्राध्येता च। (विषयोऽस्य यथा,—

"द्रष्टव्यं तमसोऽपि शोभनधियां मीमांसकानां मतम्।"
छायायास्तमसश्चापि सम्बन्धात्गुणकर्म्मणोः।
द्रष्टव्यं केचिदिच्छन्ति मीमांसकमताश्रयाः॥"
इति वैद्यकरानवक्षभक्षतवादार्थदर्पणे प्रथमश्लोके।)
पूर्व्वमीमांसासूत्रकर्त्ता जैमिनिः। वृत्तिकर्त्ता कुमारिलभट्टः। भाष्यकर्त्ता शबरस्वामी। प्रभाकरः कुमारिलभट्टस्य छात्रः। स एव गुरुत्वेन भण्यते। तन्मतं गुरुमतम् तच्छिष्याः प्राभाकराः। अतएव खार्त्तभट्टाचार्य्येण प्राभाकरैरभिहितमित्युक्तम्। उत्तरमीमांसासूत्रकर्त्ता वेदव्यासः। तस्य भाष्यकर्त्ता शङ्कराचार्य्यः। स च अद्वैतवादी। रामानुजः विशिष्टाद्वैतवादी। माध्वः द्वैतवादी च। (यथा, भक्तिरसामृतसिन्धौ। १। १। ३।
"मीमांसको वडवाग्नेः कठिनामपि कुण्ठयन्नसौ जिह्वाम्॥")

मीमांसा, स्त्री, (मानविचारे+"मान् बधदान् ध्रान्भ्यो दीर्घश्चाभ्यासस्य।"३।१।६। इति सन्। अः टाप्। अभ्यासस्येकारस्य दीर्घश्च।) षड्दर्शनान्तर्गतदर्शनशास्त्रविशेषः। तत्पर्य्यायः। विचारणा २। इति हेमचन्द्रः। २।१६५॥ अस्या अध्याया विंशतिः। तत्र पूर्व्वमीमांसा द्वादशाध्यायात्मिका जैमिनिप्रणीता यज्ञादिकर्म्मकाण्डनिरूपिका। अस्या अन्तर्गतानि लोकव्यवहारनियमार्थं मनुयाज्ञवल्क्यादिभिः बहूनि धर्म्मशास्त्राणि कृतानि। तच्चोत्तरमीमांसा चतुरध्यायात्मिका वेदव्यासप्रणीता ब्रह्मनिरूपिका। अस्या नाम वेदान्तः। अपराध्यायचतुष्टयं शङ्करेणप्रणीतं उपासनाकाण्डं षड्दर्शनबहिर्भूतम्। * । प्रमाणादयः प्रसङ्गात्ता द्वादश पदार्थाः क्रमात् द्वादशानामध्यायानां विषयाः। प्रथमेऽध्याये विध्यर्थवादादिरूपं धर्म्मे प्रमाणं निरूपितम्। १। द्वितीये यागदानादिकर्म्मभेदः। २। तृतीये प्रयाजादीनां दर्शपूर्णमासार्थकत्वेन तच्छेषत्वम्। ३। चतुर्थे गोदोहनस्य पुरुषार्थत्वप्रयुक्ता अनुष्ठानं न तु क्रत्वर्थत्वप्रयुक्तेत्येवमादयः। ४। पञ्चमे क्रमनियतिविधेयत्वादयः। ५। षष्ठे कर्त्तुरधिकारो नान्यादेरित्यादयः। ६। सप्तमे समानमितरच्छेषेण इत्यादि प्रत्यक्षवचनेनाग्निहोत्रादिनान्नानुमितवचनेन च सामान्यतोऽतिदेशः। ७। अष्टमे सोर्य्यं चरुं निर्व्वपेदित्यत्र निर्व्वापस्तङ्कितेन देवतानिर्देशः एकदेवतत्वमौषधद्रव्यकत्वमित्यादिना लिङ्गेनाग्नेयपुरोडाशेतिकर्त्तव्यतान्यस्येत्येवमादिविशेषातिदेशः। ८। नवमे प्रकृतावग्नये युष्टं निर्व्वपामीति पठिते मन्त्रे विकृतौ सौर्य्यचरावग्निपदपरित्यागेन सूर्य्यपदप्रक्षेपेण सूर्य्याय युष्टं निर्व्वपामीत्येवमादिरूहः। ९। दशमे क्रियासु चोदकप्राप्तस्यावघातस्य वितुषीकरणासम्भवेन लोप इत्येवमादिर्बोधः। १०। एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकार इत्यादि तन्त्रम्। ११। द्वादशे प्रधानस्य पशोरुपकाराय अनुष्ठितेन प्रयाजाद्यङ्गेन पशुपुरोडाशेऽप्युपकार इत्यादिप्रसङ्गः। १२। (एतदध्यायप्रतिपाद्यार्थानां विवरणं यथा,—
'प्रथमाध्यायस्य प्रथमे पादे विधिरूपं मानमीरितम्। द्वितीयेऽर्थवादरूपम् अर्थवादो मन्त्रस्याप्युपलक्षकः। तृतीये स्मृतिरूपम्। स्मृतिराचारमप्युपलक्षयति। चतुर्थे उद्भिच्चितादिनामरूपम्। द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेवापूर्व्वबोधकम्। अपूर्व्वसद्भाव इत्यादिकः कर्म्मभेदचिन्तोपयुक्त उपोद्घातो वर्णितः। द्वितीये धातुभेदपुनरुक्त्यादिभिः कर्म्मभेदः। तृतीये रथन्तरादीनां कर्म्मभेदप्रामाण्यापवादः। चतुर्थे नित्यकाम्ययोः प्रयोगयोर्भेदः।
तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारिता। द्वितीये लिङ्गम्। तृतीये वाक्यप्रकरणादि। चतुर्थे निवीतोपवीतादिध्वर्थवादत्वविधित्वादिनिर्णयहेतुः श्रुत्यादेः परस्परविरोधसदसद्भावः। पञ्चमे प्रतिपत्तिकर्म्माणि। षष्ठेऽनारभ्याधीतानि। सप्तमे बहुप्रधानोपकारकप्रयाजादीनि। अष्टमे यावमानानि।
चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूतामिचार्धानयनस्य प्रयोजिकेत्यादि प्रधानप्रयोक्तृत्वं विचारितम्। द्वितीये त्वप्रधानं वत्सापकरणं प्राखाच्छेदे प्रयोजकमित्याद्यप्रधानप्रयोक्तृत्वम्। तृतीये जुहूपर्णमयीत्यादेरपापशोकत्वश्रवणादिफलभावाभावचिन्ता। चतुर्थे राजसूयगतजघन्याङ्गाद्यदूतादिचिन्ता।
पञ्चमाध्यायस्य प्रथमे पादे श्रुत्यर्थपाठादिभिः क्रमो निरूपितः। द्वितीये वाजपेयगतेषु सप्तदशसु पशुष्वेकैकधर्म्मैसमापनमित्यादिक्रमविशेषः। तृतीये पञ्चप्रयाजादीनामावर्त्तनेनैकादशमित्यादिदृष्टिः। अदृष्टयज्ञहविश्चिरण्योरनाहृत्तिरित्यादि दृष्ट्याभावः। चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्ब्बलभावः।
षष्ठाध्यायस्य प्रथमे पादे कर्म्माधिकारः। कर्त्तुरस्त्यन्यादेर्नास्ति स्त्रिया अस्ति। योऽस्ति स च पत्या सहैवेत्यादिनाधिकारी निरूपितः। द्वितीये सत्राधिकारिणां प्रत्येकं सत्रस्य फलम्। दर्शपौर्णमासयोः कर्त्रैक्यनियमः काम्यकर्म्मसमापनीयमित्येवमादयोऽधिकारिधर्म्मा उक्ताः। तृतीये द्रव्यस्य प्रतिनिधिरुक्तः। देवादीनामग्न्यादीनामधिकारित्वाच्च स नास्तीत्यादिनिरूपणम्। चतुर्थे पदार्थलोपनं विचारितम्। अवत्तनाग्नेः सत्यान्वेन यजेत्। इड्याद्यर्थनाग्नेः सति शेषान्नग्राह्यमित्यादिकम्। पञ्चमे कालापराधेन चन्द्रोदये सत्यभ्युदयेष्टिः प्रायश्चित्तम्। ज्योतिष्टोमस्येकादयोदीक्षाः। द्वादशाहस्य द्वादशदीक्षा इत्यादि निरूपितम्। षष्ठे सचाधिकारिण्यस्तुल्यकल्पा एव सचं विप्रस्त्रैवेत्येवमादिकं चिन्तितम्। सप्तमे पित्र्यादिकं न देयम्। महाभूमिर्न देयेत्येवमादिदेयविचारः। अष्टमे लौकिकाग्नावुपनयनहोमः। स्त्रीपतीदिस्तथैवेत्येवमाद्यग्निविचारः कृतः।
सप्तमाध्यायस्य प्रथमे पादे समानमितरच्छेषेणेनेत्यादिप्रत्यक्षवचनातिदेशः। द्वितीये पूर्व्वोक्तातिदेशस्य शेषो विचारितः। तृतीयेऽग्निहोत्रनाम्नातिदेशः। चतुर्थे निर्व्वापौषधद्रव्यादिलिङ्गातिदेशः।
अष्टमाध्यायस्य प्रथमे पादे सप्तेन लिङ्गेनातिदेश्यविशेषः। तद्यथा सौर्य्यचरावतिदेश्यानि निर्व्वापस्तङ्कितेन देवतानिर्देश्य एकदेवतात्वमौषधद्रव्यकत्वमित्यादीनि सप्तान्याग्नेयलिङ्गानि। द्वितीये स्वरूपैर्लिङ्गैरतिदेशः। तद्यथा वाजिने हविःसामान्येन लिङ्गेन पयोविधस्तोऽतिदिश्यते तच्च लिङ्गमसदृशम्। शीघ्रं तदृद्धाग्नुत्पादनात्। तृतीये प्रबलेन लिङ्गेनातिदेशः। तद्यथा। आभिचारिकेष्टावाग्नावैष्णवसारस्वतबार्हस्पत्येषु हविःषु त्रिवृत्त्वेन लिङ्गेन यथाक्रममाग्नेयादिविधस्ते प्राप्ते द्विदेवत्यत्वेन लिङ्गेन प्रथम आग्नावैष्णवे हृतीयस्यापीषोमीयस्य विधस्तोऽतिदिष्टः। प्रबलत्वं द्विदेवत्यत्वम्। शब्दोच्चारणमात्रेण सहसा प्रतिभासात्। क्रमस्तु विलम्बितप्रतीत्या दुर्ब्बलः। चतुर्थे दर्व्विहोमेष्वतिदेशोऽपोह्यते।
नवमाध्यायस्य प्रथमे पादे उपोद्घातपूर्व्वकमूहविचारप्रारम्भः। तत्र प्रयाजादयो धर्म्मा अपूर्व्वप्रयुक्ताः। अवघातमन्त्रादिष्वविवक्षितं व्रीह्यद्यादिस्वरूपं साधनविशेषत्वमात्रं विवक्षितमित्यादिरूपोपोद्घातः। सवित्रस्त्रियपूषण्शब्दानां विकृतिषु नास्त्यूहः। अग्निश्चिदस्त्यूह इत्यादि ऊहविचारारम्भः। द्वितीये सपरिकरः सामोहः। तृतीये मन्त्रोहः। चतुर्थे मन्त्रोहप्रसङ्गापतितो विचारः।
दशमाध्यायस्य प्रथमे पादे बाधहेतुद्वारलोपो निरूपितः। तद्यथा स्वयं हुता वेदिर्भवतीत्यत्र वेदिनिष्पादनरूपस्य द्वारस्य लोपेन निष्पादकानामुलूखलमुसलादीनां बाधः। छाग्नेयेषु वितुषीकरणरूपस्य द्वारस्य लोपेनावघातस्य बाधः। द्वितीये संज्ञोपेणोक्तस्य द्वारलोपस्य बहुभिरुदाहरणैर्विस्तारः। तृतीये बाधकारणं कार्य्यैकत्वम्। तद्यथा प्रकृतौ गवाश्वादिदक्षिणायाः ऋत्विक्परिक्रयः कार्य्यम्। तथा विकृतिरूपे भूनाग्नेयकाण्डे धेनुरूपायाः दक्षिणायास्तदेव कार्य्यम्। ततो धेन्वा गवाश्वादिदक्षिणाविकृतौ चोदकप्राप्ता बाधते। चतुर्थे नक्तञ्चेदिविहिता उपहोमाश्चोदकप्राप्तैर्नारिष्टहोमैः सह समुच्चीयन्ते इत्यादिः समुच्चयः। पञ्चमे बोढृग्रिग्रहः प्रकृतिगामी। स चाग्नेयस्-

प्राप्तादेव ग्रहीतव्य इत्यादिबाधप्रसङ्गागतो यज्ञादिविचारः। षष्ठे सामलक्षणे गेयमित्यादिबाधप्रसङ्गागतः सामविचारः। सप्तमे पश्वङ्गेषु हविर्भेदः। अष्टमेधीयमपूर्व्वकर्म्मेत्यादिबाधप्रसङ्गागतः प्रकीर्णविचारः। अष्टमेनानुयाजेष्विति पर्य्युदासो न सोम इत्यर्थवादो नातिरात्र इति प्रतिषेध इत्यादिबाधोपयुक्तो नञर्थविचारः।

एकादशाध्यायस्य प्रथमे पादे तन्त्रस्योपोद्घातो वर्णितः। द्वितीये तन्त्रावापौ संक्षेपेणोक्तौ। तृतीये तन्त्रसदाचरणबाहुल्येन प्रपञ्चितम्। चतुर्थे तथैवावापः प्रपञ्चितः।

द्वादशाध्यायस्य प्रथमे पादे पशुधर्म्माणां यज्ञपुरोडाशे प्रसङ्गः। सौमिकवेदेरुत्तरकालीनकर्म्मसु प्रसङ्ग इत्यादि विचारः। द्वितीये सवनीयपशोरुत्पत्तित्वम्। न तु सवनीयपुरोडाशानाम्। विकृतिस्तन्त्रिकी न प्रकृतिः। अन्तारम्भणीया विकृतिष्वपि स्यात्। न तु प्रकृतावेवेत्यादिविचारः। तृतीये त्रयवासयोः समुच्चयः। आधारगतानाज्यतुल्यसन्ततत्वादीनां समुच्चय इत्यादिकं प्राधान्येन। यवाग्वोर्व्विकल्प इत्यादिकं समुच्चयापवादत्वेनेत्युभयं चिन्तितम्। चतुर्थे चैत्रावार्द्धत्वाद्याज्यानुवाक्ययोः समुच्चय इत्यादिकं प्राधान्येन। याज्यानुवाक्ययोः समुच्चय इत्यादिकं विकल्पापवादत्वेनेत्युभयं चिन्तितम्। तदेवं द्वादशाध्यायगतेषु षष्टिसंख्यकेषु पादेषु प्रतिपाद्या अर्थाः संग्रहीताः।" इत्यधिकरणमाला॥

उत्तरमीमांसाध्यायपादप्रतिपाद्यार्था यथा,—

"शास्त्रं ब्रह्मविचाराख्यमध्यायाः सुचतुर्व्विधाः।
समन्वयाविरोधौ द्वौ साधनञ्च फलन्तथा॥
समन्वये सदालिङ्गमस्पष्टत्वेऽपि पास्यगम्।
क्षेयगं पदमाद्यञ्च चिन्त्यं पादेऽन्यशुक्रगात्॥
द्वितीये स्मृतितर्काभ्यामविरोधोऽन्यदुक्तया।
भूतभोक्तृश्रुते र्लिङ्गश्रुतेरप्यविरुद्धता॥
तृतीये विरतिस्तत्त्वं पदार्थपरिशोधनम्।
गुणोपसंहृतिर्ज्ञानेष्वहिरङ्गादि साधनम्॥
चतुर्थे जीवतो मुक्तिरुत्क्रान्तिर्गतिरुत्तरा।
ब्रह्मप्राप्तिर्ब्रह्मलोकाविति पादार्थसंग्रहः॥"

इति आसाधिकरणमाला॥ मीमांसादर्शनमतसंग्रहो यथा,—

अथ मैमांसकम्।

"मीमांसको द्विधा कर्म्मब्रह्ममीमांसकः स्मृतः।
वेदान्ती मन्यते ब्रह्म कर्म्म भट्टप्रभाकरौ॥
प्रत्यक्षमनुमानञ्च वेदाख्योपमया सह।
अर्थापत्तिरभावश्च भट्टानां षट्प्रमाण्यसौ॥
प्रभाकरमते पञ्चेत्यन्यभावस्य वर्ज्जनात्।
अद्वैतवादी वेदान्ती प्रमाणन्तु यथातथा॥
सर्व्वमेतदिदं ब्रह्म वेदान्तेऽद्वैतवादिनाम्।
आत्मन्येव लयो मुक्तिर्वैदान्तिकमते मता॥
अकुकर्म्मा सपट्कर्म्मा मूढान्नादिविवर्ज्जकः।
ब्रह्मसूत्री द्विजो भट्टो गृहस्थाश्रमसंस्थितः॥

भगवन्नामधेयास्तु द्विजा वेदान्तदर्शने।
विप्रगेहभुजस्यक्तोपवीता ब्रह्मवादिनः॥
चत्वारो भगवद्भेदाः कुटीचरबहूदकौ।
हंसः परमहंसश्चाधिकोमीषु परः परः॥"

इति जिनदत्तसूतविवेकविलासः। सर्व्वदर्शनसंग्रहश्च जैमिनिमतसंग्रहो यथा। अथातो धर्म्मजिज्ञासा इति प्रथमाधिकरणसूत्रम्। तत्राधिकरणं पञ्चावयवमाचक्षते परीक्षकाः। अस्मिन् सूत्रे स्वाध्यायोऽध्येतव्य इतिश्रुतिवाक्यमाश्रित्य विषयसंशयपूर्व्वपक्षसिद्धान्तनिर्णयरूपपञ्चाङ्गात्मकाधिकरणेन मीमांसाशास्त्रारम्भस्यावश्यकता प्रदर्शिता। मीमांसा हि वेदविचारशास्त्रं तदारम्भो निष्प्रयोजनः स्वाध्यायोऽध्येतव्य इतिश्रुत्या वेदाध्ययनं विहितं तच्च विचारज्ञानात् स्वर्गरूपं फलमत्यल्पमेवाप्नोति सम्भवति न तत्रार्थबोधापेक्षाप्यस्ति असत्याञ्च वेदार्थबोधापेक्षायां तदधीनायाः विचारणाया अपि अनावश्यकत्वात् अथवा यागादिकर्म्मावबोधाय स्वाध्यायोऽध्येतव्यः तस्य चार्थबोधरूपं दृष्टमेवफलं ततश्च दृष्टार्थत्वेन तस्य वैधत्वाभावात् वेदार्थविचारस्यापि तदेकप्रयोजनस्य वैधत्वं नास्तीति तद्विचारशास्त्रमनारम्भणीयम्। स्वाध्यायाध्ययनानन्तरं विचारशास्त्रेऽध्येतव्यतया श्रूयते वेदमधीत्य स्नायादितिविधिबोधितं वेदाध्ययनसमावर्त्तनयोरानन्तर्यं बाधेत तस्मात्तद्विचारशास्त्रमारम्भणीयमितिपूर्व्वपक्षसङ्गाय अध्ययनस्य दृष्टफलकत्वेपि अध्येतव्य इत्यत्र तत्प्रत्ययेन भावनाप्रतिपादनात् अर्थबोधस्य तत्र भाव्यत्वेनान्वयादध्ययनविधेरवघातादिविधिवन्नियमापूर्व्वार्थत्वं। तथाच यथा दर्शपौर्णमासजन्यं परमापूर्व्वमवघातादिजन्यमवान्तरापूर्व्वं कल्पयति तथा समस्तक्रतुजन्यमपूर्व्वजातं क्रतुज्ञानसाधनाध्ययननियमजन्यमपूर्व्वं कल्पयिष्यति। अन्यथा अध्ययनविधेर्वैफल्यं स्यात्। अर्थबोधरूपदृष्टफलस्य सम्भवे विचारणाया न स्वर्गफलकल्पना। इति सिद्धान्तितम्। यथा यागे यवाद्यैर्नखादिनापि वितुषीकरणसम्भवे अवघातविधिना अवघातो नियम्यते तथा अध्ययनविधिना अध्ययनं नियम्यते। तथाच अध्ययनेन च वेदार्थे परिज्ञाते तत्र संशये तन्निर्णयार्थं विचारशास्त्रमवश्यमपेक्षितव्यमिति विचारशास्त्रमारभ्यमीयमेवेति प्रथमाधिकरणनिष्कर्षः एवंरीत्या अधिकरणसहस्रात्मकं कर्म्ममीमांसाशास्त्रं जैमिनिना प्रणीतम्। अस्मिन् शास्त्रे वेदस्यापौरुषेयत्वम्। वर्णानां ककारादीनां नित्यत्वं तत्र सोऽयं क इत्यादिप्रत्यभिज्ञैव प्रमाणं कण्ठताल्वाद्यभिघात एव तदभिव्यञ्जकः। ततश्च वेदस्यापौरुषेयतया निरस्तसमस्तशङ्काकलङ्कुरत्वेन स्वतः सिद्धं धर्म्मे प्रामाण्यमिति सुस्थितम्।

प्रमाज्ञानस्य स्वतःप्रामाण्यम्। विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेतुजन्यत्वं प्रमायाः स्वतस्त्वमिति॥

मौरः, पुं, (मिन्वन्ति प्रक्षिपन्ति नद्यो जलान्यत्रेति। मिव्+"सुचिमिमां दीर्घश्च।" उणा० २। २५। इति क्रन् दीर्घश्च।) समुद्रः। इत्युणादिकोषः॥ पर्य्यन्तैकदेशः। सीमा। पानीयम्। इति संक्षिप्तसारोणादिवृत्तिः॥

मील, ऋ निमेषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ अमिमीलत् अमीमिलत्। मीलति चक्षुः पक्ष्मभिराहतं स्यादित्यर्थः। इति दुर्गादासः॥

मीलं, क्ली, (मीलतीति। मील+कः।) वनम्। इति केचित्॥

मौलनं, क्ली, पक्ष्मभिरावरणम्। मौलधातोर्भावे ल्युट् (ल्युट्) प्रत्ययेन निष्पन्नम्॥

मीलितं, त्रि, (मील+क्तः।) अप्रफुल्लम्। तत्पर्य्यायः। सङ्कुचितम् २ निद्रायम् ३ सुप्तिम् ४। इति हेमचन्द्रः॥ (अलङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ११५।

("मीलितं वस्तुनो गुप्तिः केनचित् तुल्यजातिना।")

मीव, पीवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) मीवति। मीवः, स्थूलीभावः। इति दुर्गादासः॥

मीवरः, त्रि, (मीनाति हिनस्तीति। मीञ्+"क्ष्वेलरच्छत्वरधीवरपीवरमीवरेति।" उणा० १। १। इति वरच् निपातितश्च। अत्रोज्ज्वलेन तु माधातोः वरच् निपातितश्चेत्युक्तं स्व।) हिंसः। इत्युणादिकोषः॥ (मीयते इति। मा+वरच्। निपातितः।) सेनानी। पूज्यः। इति संक्षिप्तसारोणादिवृत्तिः॥

मीवा, स्त्री, (मीनाति हिनस्तीति। मी+"ग्रेवायङ्निङ्गायीवाप्रामीवाः।" उणा० १। १५४। इति वन् निपात्यते च।) उदरस्थभिः। इत्युणादिकोषः॥ वायुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ ग्रीकरः। सारः। इति संक्षिप्तसारोणादिवृत्तिः॥

सुः, पुं, (सव्+बाहुलकात् डुन्। टिलोपश्च।) बन्धनम्। इत्येकाक्षरकोषः॥ महेशः। इति हलायुधः॥

सुकन्दकः, पुं, पलाण्डुः। केचित्तु सुकन्दकस्थाने सुकन्दक इति पठित्वा जवनानां सुदं हर्षं प्रायेण कन्दति आक्रयति कदि आह्वाने रोदने च णकः एषोदरादित्वात् दलुक् सुकन्दक इति व्याचक्षते। इत्यमरटीकायां भरतः॥

सुकुः, पुं, (सुच्+बाहुलकात् कुः। एषोदरादित्वात् साधुः।) सुक्तिः। यथा,—

"सुकुर्मुक्तौ महेशे सुः कुः एथिव्यामशोभने।"

इति दुर्गादासधृतहलायुधचन्द्रः॥

सुकुटं, क्ली, (मकुते मकुयति। मकि+उटन् नलोपश्चेति न्यासः।) स्वनामख्यातशिरोभूषणम्। तत्पर्य्यायः। किरीटम् २। इत्यमरः।

२।६।१०२॥ मौलिः३ कोटीरम् ४ उष्णीषम् ५। इति हेमचन्द्रः। ३।३१४॥ मकुटम् ६ मौलीकः ७ शेखरम् ८ अवतंसः ९ वतंसः १० उत्तंसः ११ उष्णीषकम् १२ कोटीरकम् १३। इति शब्दरत्नावली॥ (यथा, हरिवंशे। ८६। ७०।

"मुकुटचारुतत्रस्य काञ्चनी वलभूषितः।"

तथा च महाभारते। १। ३०। ३८।

"रजांसि मुकुटाग्रेभ्यो मृत्थितानि बबाधिरे।"

टाप्। स्त्री, माढगायविशेषः। यथाह चैव। ६। ४६। २३।

"कालेहिका वामनिका मुकुटा चैव भारत॥")

मुकुटी, स्त्री, अङ्गुलिभोटनम्। इति शब्दरत्नावली॥

मुकुन्दः, पुं, विष्णुः। तस्य व्युत्पत्तिर्यथा,—

"मुकुमव्ययमान्तच्च निर्व्वाणमोक्षवाचकम्।
तद्ददाति च यो देवो मुकुन्दस्तेन कीर्त्तितः॥
मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम्।
यस्तद्ददाति विप्रेभ्यो मुकुन्दस्तेन कीर्त्तितः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥ निधिविशेषः। (यथा, मार्कण्डेये। ६८। ५।

"यत्र पद्ममहापद्मौ तथा मकरकच्छपौ।
मुकुन्दो नन्दकश्चैव नीलः शङ्खोऽष्टमो निधिः॥"

अस्य गुणादिकं निधिशब्दे उक्तम्।) रत्नभेदः। कुन्दुरुः। इति मेदिनी। दे, ३८॥ (यथा च पर्य्यायः।

"कुन्दुरुस्तु मुकुन्दः स्यात् सुमन्त्रः कुन्द इत्यपि।"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) यारदः। इति हेमचन्द्रः। २। १२६॥

मुकुन्दकः, पुं, पलाण्डुः। केचिच्च मुकन्दकस्थाने मुकुन्दक इति पठित्वा जवनानां मुदं कन्दतीति पृषोदरादित्वात् दलुक् कन्देरत उच्चेति व्याचक्षते। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। १। ४६।

"विशोषी तत्र भूयिष्ठं वरुकः ससुकुन्दकः।")

वटिकाभेदेऽपि। यथा, भावप्रकाशे।

"वटिकः घृतपूपश्च प्रमोदकमुकुन्दकौ।
महायटिक इत्याद्याः वटिकाः ससुदाहृताः॥"

मुकुन्दः, पुं, (मोचयति विषयान्तरादुरागमिति। अन्तर्भूतण्यर्थो मुच् + कः। ब्यङ्गादित्वात् कुत्वम्। तं उन्दत्यार्द्रीकरोतीति। उन्द + उच्। पृषोदरादित्वात् साधुः।) कुन्दुरुः। इत्यमरटीकायां मथुरानाथः॥

मुकुम्, व, निर्व्वाणम्। भक्तिरसः। प्रेम। यथा,

"मुकुमव्ययमान्तच्च निर्व्वाणमोक्षवाचकम्।
तद्ददाति च यो देवो मुकुन्दस्तेन कीर्त्तितः॥
मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम्।
यस्तद्ददाति विप्रेभ्यो मुकुन्दस्तेन कीर्त्तितः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अः॥

मुकुरः, पुं, (मक + "मकुरदर्दुरौ।" उणा० १।४१। इत्यत्र। बाहुलकादकारस्थाने उकारः इत्युज्ज्वलदत्तोक्तेः उरच्।) दर्पणः। (यथा, नैषधे। ४।५६।

"कुरु करे गुरुमेकमयोधनं
बहिरितो मुकुरञ्च कुरुष्व मे॥")

वकुलद्रुमः। कुलालदरुः। इति मेदिनी। रे, २०३॥ मल्लिकापुष्पवृक्षः। इति विश्वः॥ (यथा,

सकुरङ्गसुमश्रङ्गानातपत्रं ध्वजं वा
दधिफलमथ नौकामन्नताम्बूलवस्त्रम्।
कमलकलसशङ्खं भूषणं काञ्चनं वा
भवति सकलसिद्धेः श्रेयसे रोगिणश्च॥"

इति हारीते द्वितीयस्थाने द्वितीयेऽध्याये॥) कुलवृक्षः। इति शब्दरत्नावली॥ कोरकः। इति हेमचन्द्रः॥

मुकुलः, पुं, क्ली, (मुचति कलिकात्वम्। मुच् + घुलच्। इति भरतः॥ मुचेरलः। कलमुलचीति कत्वे अकारस्योत्वे मुकुल इति राय॥) ईषद्विकसितकलिका। तत्पर्य्यायः। कुट्मलः २। इत्यमरः। २। ४। १६॥ (यथा, रघौ। ६।३१।

उपहितं शिशिरापगमश्रिया
मुकुलजालमशोभत किंशुके।")

मकुलः३ पौटकोरकः ४। इति शब्दरत्नावली॥ शरीरम्। आत्मा। इति धरणिः॥ (राजपुरुषविशेषः। यथा, राजतरङ्गिण्याम्। ६।२५३।

"इत्थं जयजया राज्ञी तत्त्वज्ञाग्रग्रहीदृषा।
यशोधरं शुभधरं मुकुलञ्च सबान्धवम्॥")

मुकुटः, पुं, वनसूरः। तत्पर्य्यायः। मपटः २। इति रत्नमाला। अस्य गुणाः। शीतलत्वम्। ग्राहित्वम्। कफपित्तव्रणनाशित्वञ्च। इति राजवल्लभः॥

मुकुटकः, पुं, (मुकुं लुकति प्रतिहन्ति। लुक + अच् पृषोदरादित्वात् साधुः।) वनसूरः। सुगाणी इति भाषा। तत्पर्य्यायः। मयटकः २। इत्यमरः। २।६।१७॥ मुकुटः३ मयटः४। इति श्रीधरः॥ मपटकः ५। इत्यन्ये। इति भरतः॥ सन्नटकः ६ मकुटकः ७ मयुटकः ८। इति टीकान्तरम्॥ (तथास्य विवयः॥

"विदलान्नानि वक्ष्यामि शृणु पुत्र! यथाक्रमम्।
यवगोधूमचणका माषासुन्नाढकी तथा॥
मुकुटका कुलत्थाश्च मसुराक्षिपुटास्तथा।
निष्पावकाः कलायाश्च विदलान्नानि कीर्त्तयेत्॥

इति हारीते प्रथमे स्थाने दशमेऽध्याये॥

सुस्नान् मसुरांश्चणकान् कुलत्थान् ससुकुटकान्।
आहारकाले यूषार्थे ज्वरिताय प्रदापयेत्॥"

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)

मुकूलकः, पुं, (मुच् + बाहुलकादूलच् पृषोदरादित्वात् कुलम्। ततः संज्ञायां कन्।) हिन्तालवृक्षः। इत्यमरटीकायां रामाश्रमः॥ (तथास्य पर्य्यायः॥

"चित्रा हन्ती निकुम्भः स्यादुपचित्रा मुकूलकः।
दाक्षायणी विशल्या च सघोडुम्बरपर्णयपि॥

इति वैद्यकरत्नमालायाम्॥

"हन्त्युदुम्बरपर्णी स्यान्निकुम्भोऽथ मुकूलकः।
द्रवन्ती नामतश्चित्रान्यशोधा स्थविकाऽऽख्या

इति चरके कल्पस्थाने द्वादशेऽध्याये॥)

मुक्तः, त्रि, (मुच् + क्तः।) प्राप्तमोचः। मोचितः। इति मेदिनी। ते, ४४॥ नन्दितः। इति शब्दरत्नावली॥ (नृपविशेषः। यथा, राजतरङ्गिण्याम्। ७। १६३५।

"उदयन्यकभृत्यस्य जेलकाख्यस्य तत्त्वजम्।
मुक्तो नामान्तिकं प्राप्तो नृपतेरप्रतामगात्॥"

ऋषिविशेषः। यथा, मार्कण्डेये। १००। ३१।

"अथोर्ध्वबाहुश्च शुचिर्मुक्तोऽथ माधवः।
शुक्रोऽनितश्च सप्तैते तदा सप्तर्षयः स्मृताः॥")

मुक्तकं, क्ली, (मुच्यते स्मेति। मुच् + क्तः। संज्ञायां कन्।) चेपणीयाख्यम्। इति केचित्। (काव्यविशेषः। यथा, साहित्यदर्पणे। ६। २६५।

"वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च॥")

मुक्तकञ्चुकः, पुं, (कञ्चुक एव कञ्चुकः मुक्तः कञ्चुको येन।) अहिरत्यक्तत्वक्सर्पः। तत्पर्य्यायः। निर्मुक्तः २। इत्यमरः। १। ८। ६। उन्मुक्तकञ्चुके, त्रि॥

मुक्तचक्षुः, [स्] पुं, (मुक्तं सर्वतः क्षिप्तं चक्षुर्येन।) सिंहः। इति शब्दमाला॥ मुक्तनेत्रे, त्रि॥

मुक्तरसा, स्त्री, (मुक्तः रसो यस्याः।) राजा। इति रत्नमाला॥ (विवरणमस्या राजशब्दे ज्ञातव्यम्।) व्यक्तरसे, त्रि॥

मुक्ता, स्त्री, (मुच्यते स्म। मोचयते निःसार्य्यते इति वा। मुच् + क्तः। टाप्।) राजा। इति रत्नमाला॥ रत्नविशेषः। मोती इति हिन्दीभाषा। अस्या अधिष्ठात्री देवता चन्द्रः। इति ज्योतिषम्॥ तत्पर्य्यायः। मौक्तिकम् २। इत्यमरः। २। ६। ६३॥ सौम्या३ शौक्तिकेयम् ४ तारम् ५ तारा ६ भौतिकम् ७ मौतिकम् ८ अम्भःसारम् ९ शीतलम् १० नीरजम् ११ नक्षत्रम् १२ इन्दुरत्नम् १३ लक्ष्मीः १४ सुक्तिफलम् १५ बिन्दुफलम् १६ सुक्तिका १७ शौक्तेयकम् १८ शुक्तिमणिः १९ अग्निप्रभम् २० स्वच्छम् २१ हिमम् २२ हिमबलम् २३ सुधांशुभम् २४ सुधांशुरत्नम् २५। लक्ष्मीस्थाने लक्ष्मं अग्निप्रभस्थाने अग्निप्रियं हिमबलस्थाने हेमवतं सुधांशुभस्थाने भूरुहं इति च पाठः। इति राजनिर्घण्टः॥ शौक्तिकम् २६। इति भावप्रकाशः॥ शुक्तिबीजम् २७ हारी २८। इति शब्दरत्नावली॥ कुवलम् २९। इति जटाधरः॥ अस्या गुणाः। सारकत्वम्। शीतलम्। कषायत्वम्। स्वादुत्वम्। लेखनत्वम्। चक्षुष्यत्वञ्च। तद्धारकगुणः। पापालक्ष्मीविनाशित्वम्। इति राजवल्लभः॥ दृष्यत्वम्। बलपुष्टिदत्वञ्च। इति भावप्रकाशः॥ * ॥ अपि च।

"मौक्तिकञ्च मधुरं सुशीतलं
हृद्विरोगशमनं विषापहम्।
राजयक्ष्मपरिकोपनाशनं
स्त्रीषवीर्य्यबलपुष्टिवर्द्धनम्॥"

अस्या लक्षणं यथा,—

"नक्षत्राभं गुरुमत्यन्तसृक्कं
स्निग्धं शूलं निर्मलं निर्व्रणञ्च।

यस्तं धत्ते गौरवं यत्तुलायां
तन्मौक्तिकं मौक्तिकं सौख्यदायि ।"

अस्या दोषलक्षणं यथा,—

"यदिच्छायं मौक्तिकं यच्च काचं
शुक्तिस्थं रक्तनाद्यातिधत्ते ।
मत्स्यास्थ्नं रूक्षसुप्तानलत्वं
नेतद्धार्यं धीमता दोषदायि ।"

अष्टधा मौक्तिकं यथा,—

"मातङ्गोरुमीनपोत्तिग्निरसल्लक्सारशङ्खामुभ-
च्छुक्तीनासुदराच्च मौक्तिकमपि: स्यादं भवत्य-
ष्टधा ।"

मौक्तिकविशेषो यथा,—

"छायापाटलनीलपीतधवलास्तत्रापि सामान्यत:
सप्तानां बहुधो न लक्ष्यिरिति पेच्छौक्तियकं
तूत्तमम् ।"*।

मौक्तिकपरीक्षा यथा,—

"जवत्तारद्योदिनि प्राग्रेऽनगोमूत्रपूरिते
क्षिप्तम् ।
महिंतमपि प्राज्ञीतुषेयेदविज्ञतं तन्मौक्तिकं
जात्यम् ।"
इति राजनिर्घण्ट: । * ।

तदुत्पत्तिस्थानानि यथा,—

"शङ्खो गजश्च क्रोडश्च पक्षी मत्स्यश्च दर्दुर: ।
वेधुरेते समाख्याताश्चत्वारश्चौक्तिकयोनय: ।"
इति भावप्रकाश: । * ।

अथ प्रकारान्तरमुक्तापरीक्षा ।

"द्विपेन्द्रजीमूतवराहशङ्ख-
मत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके-
तेषान्तु शुक्त्युद्भवमेव भूरि ।
वेध्यन्तु शुक्त्युद्भवमेव तेषां
ग्रैवाग्र्यवेध्यानि वदन्ति तज्ज्ञा: ।
मतङ्गजा ये तु विशुद्धवंशा-
स्ते मौक्तिकानां प्रभवा: प्रदिष्टा: ॥
उत्पद्यते मौक्तिकमेषु दत्त-
मापीतवर्णं प्रभया विहीनम् ॥

तत्र गजपरीक्षायां गजजातिभेदेन चतुर्विधा ।
मौक्तिकं तेषु जातं हि चतुर्विधमुदीर्यते ॥
ब्राह्मणं पीतशुक्लन्तु क्षत्रियं पीतरक्तकम् ।
पीतश्यामन्तु वैश्यं स्यात् शूद्रं स्यात् पीत-
नीलकम् ।
काम्बोजकुम्भसम्भूतं धात्रीफलनिभं गुरु ।
अतिपिङ्गरसच्छायं मौक्तिकं मन्ददीधिति ॥
धाराधरेषु जायेत मौक्तिकं जलबिन्दुभि: ।
दुर्लभं तन्मनुष्याणां दैवेक्षात् क्वियतेऽम्बरात् ॥
कुक्कुटाण्डसमं वृत्तं मौक्तिकं निबिड़ं गुरु ।
धनदं भानुसङ्काशं देवयोग्यममानुषम् ।"*।
तथाहि गारुड़े ।

"नाभ्येति मेघप्रभवं धरित्रीं
वियद्गतं तद्विबुधा हरन्ति ।
अर्चि:प्रभानाश्रतदिग्विभाग-
मादित्यवद्:खविभाव्यबिम्बम् ।
तेजस्तिरस्कृत्य हुताशनेन्दु-
नक्षत्रतारायहसम्भवञ्च ।
दिवा यथा दीप्तिकरस्तथैव
तमोऽवगाढ़ास्वपि तन्निशासु ।
विचित्ररत्नद्युतिचारुतोय-
चतु:समुद्रा भवनाभिरामा ।
मह्यं न वा स्यादिति निश्चयो मे
क्षतक्षा मही तस्य सुवर्णपूर्णा ।
हीनोऽपि यस्तत्क्षमते कथञ्चित्
विपाकयोगान्महत: शुभस्य ।
सपत्नहीन: पृथिवीं समग्रां
भुनक्ति तत्तिष्ठति यावदेव ।
न केवलं तच्छुभकृन्नृपस्य
भाग्यै: प्रजानामपि जन्म तस्य ।
तदृयोजनानां परित: शतस्य
सर्व्वंजनर्यान् विसुखीकरोति ।
जलज्योतिर्मरुज्ञानां मेघानां त्रिविधं भवेत् ।
जलाधिकेऽधिकं स्वच्छं कोमलं पुरु कान्ति-
मत् ।
ज्योतिषं कान्तिमद्वृत्तं दुर्निरीक्षं रविप्रभम् ।
कान्तिमत् कोमलं वृत्तं मारुतं विमलं लघु ।
वराहदंष्ट्राप्रभवं वरिष्ठं
तस्येव दंष्ट्राङ्कुरतुल्यवर्णम् ।
क्वचित् कथञ्चित् स भुव: प्रदेशे
प्रजायते शूकरवद्वरिष्ठ: ।
ब्रह्मादिजातिभेदेन वराहोऽपि चतुर्विध:
तेषु जाता भवेन्मुक्ता समासेन चतुर्विधा ।
ब्राह्मण: शुक्लवर्णस्तु शूद्रमन्त्रोऽस्य लक्षते ।
क्षत्रिय: शुक्लरक्तस्तु स्वर्णे कर्कश एव च ।
वैश्य: स्यात् शुक्लपीतस्तु कोमल: कोलसन्निभ:।
शूद्र: स्याच्छुक्लनीलस्तु कर्कश: श्याम एव च।"
तथा च ।
"कोलजं कोलसदृशं तदंष्ट्रासदृशच्छवि ।
अलभ्यं मनुजे रम्यं मौक्तिकं पुण्यवर्ज्जिते: ।*।
ये कम्बव: शार्ङ्गसुखावमर्ष-
पीतस्य शङ्खप्रवरस्य गोत्रे ।
स्याम्मौक्तिकानामिह तेषु जन्म
तल्लक्षणं संप्रति कीर्त्तयाम: ।
स्वयोनिमध्यच्छवितुल्यवर्णं
शुक्लादृढ़हत्कोलफलप्रमाणम् ।
तथा च ।
वर्षोपलसमं दीप्त्या पाण्डुजन्यकुलोद्भवम् ।
कपोताण्डप्रमाणं तदतिकान्ति मनोहरम् ।*।
विशेषो यथा,—
"अश्विन्यादिकनक्षत्रे ये जाता: कम्बव: शुभा: ।
मौक्तिकं तेषु जातं हि सप्तविंशतिभेदभाक् ।
शुक्लाशुक्ला: पीतरक्ता नीला लोहितपिङ्गरा: ।
आकर्चुरा: पाटलाश्च नववर्णा: प्रकीर्त्तिता: ।
महन्मध्यलघून्मानै: सप्तविंशतिधा भवेत् ।
क्रमतस्तेषु विज्ञेयं नक्षत्रेषु मनीषिभि: ।*।
पाठीनपृष्ठस्य समानवर्णं
मीनात् सुवृत्तं लघु नातिसूक्ष्मम् ।
उत्पद्यते वारिचरानने षु
मीनाश्च ते मध्यचरा: पयोधे: ।"
तथा च ।
"शुक्लाफलकायस्थौक्यं मौक्तिकं तिमिजं
लघु ।
पाटलापुष्पसङ्काशमल्पकान्ति सुवर्त्तुलम् ।
वातपित्तकफद्वन्द्वसन्निपातप्रभेदत: ।
सप्त प्रकृतयो मौने सप्तधा तेन मौक्तिकम् ।
अधिष्ठमरुजं वातात् आपीतं रुट् पित्तत: ।
शुक्लं गुरु कफोद्रेकात् वातपित्तानुरुट्दुर्लघु ।
वातश्लेष्मभवं स्थूलं पित्तश्लेष्मजमच्छकम् ।
सर्व्वलिङ्गप्रयोगेण सान्निपातिकमुच्यते ।
एकजा: शुभदा: प्रोक्तास्त्रया वै सान्नि-
पातिका: ।*।
भौमङ्गमं नीलविशुद्धवर्णं
सर्व्वं भवेत् प्रच्छवर्णप्रभम् ।
नितान्तधौतप्रतिकल्पमान-
निस्निग्धधारासमवर्णशोभम् ।
भुजङ्गमास्ते विषवेगदग्धा:
श्रीवासुकेर्व्वंशभवा: पृथिव्याम् ।
क्वचित् कदाचित् खलु पुण्यदेशे
तिष्ठन्ति ते पश्यति तान्मनुष्य: ।
अधिकं वर्त्तुलं रम्यं नीलच्छायं महाद्युति ।
पुण्यहीना न पश्यन्ति वासुके: कुलसम्भवम् ।
शृगालकोलामलकोलगुञ्जा-
फलप्रमाणास्तु चतुर्विधास्ते ।
स्युर्ब्रह्मवाहूद्भववैश्यशूद्र
सर्व्वेषु जाता: प्रवरास्तु सर्व्वे ।
प्राप्यापि रत्नानि धनं श्रियंवा
राजश्रियंवा महतीं दुरापाम् ।
तेजोन्विता: पुण्यवतो भवन्ति
सुक्ताफलस्यास्य विधारणेन ।
विज्ञासया रत्नविनिश्चयज्ञै:
शुभे मुहूर्त्ते प्रयते: प्रयत्नात् ।
रक्षाविधानं समुदाहियाय
हस्मोपविष्टं क्रियते यदा तत् ।
तदा महद्दुन्दुभितूर्यघोषै-
र्घनैर्घनैराश्रियतेऽन्तरीक्षम् ।
न तं भुजङ्गा न तु जातुधाना
न राक्षसा नापि च दुष्टलोका: ।
हिंसन्ति यस्याहिशिर:ससूत्रं
सुक्ताफलं तिष्ठति कोषमध्ये ।
मेकादिष्वपि जायन्ते मत्स्यो ये क्वचित् क्वचित् ।
मौक्तिकं तेषु विज्ञेयं बुधोत्तमै: ।
नक्षत्रमालेव दिवो विभूषा
दन्तावली तस्य महासुरस्य ।
विचित्ररूपेषु विचित्रवर्णा
पय:सु पत्यु: पयसां पपात ।
सम्पूर्णचन्द्रांशुकलापकान्ते-
र्भोगिप्रवेकस्य महागुणस्य ।
तच्छक्तिमत्सुस्थितिमाप बीज-
मासन् पुराण्यन्यभवानि यानि ।

यस्मिन् प्रदेशेऽम्बुनिधौ पपात
सुधाकरस्तामणिरत्नबीजम्।
तस्मिन् पयस्तोयधरावकीर्णे
शुक्तौ स्थितं मौक्तिकतामवाप ॥ * ॥

सैंहलिकपारलौकिक-सौराष्ट्रिकताम्रपर्णपारसवाः।

कौवेरपाण्ड्यविराटसुक्ता इत्याकराश्चतुर्दश।
"स्वातौ स्थिते रवौ मेघैर्ये मुक्ता जलबिन्दवः।
शौर्याः शुक्तिषु जायन्ते तेमुक्ता निर्मलत्विषः॥
स्थूला मध्यास्तथा सूक्ष्मा विरूपमाणगुणाश्रयाः।
स्निग्धमधुरच्छायं मौक्तिकं सिंहलोद्भवम्।
पारलौकिकसम्भूतं मौक्तिकं निविडं गुरु।
सौराष्ट्रिकभवं स्थूलं दृष्टं स्वच्छं सितं घनम्।
ताम्रपर्णभवं ताम्रं पोतं पारसवोद्भवम्।
ईषत् श्यामच रूक्षच कौवेरोद्भवमौक्तिकम्।
पाण्ड्यदेशोद्भवं पाण्डु सितं रूक्षं विराटजम्।
दक्षिणाख्या तु या शुक्तिस्तत्प्रसूतिः सुदुर्लभा।
तत्र जातं सितं स्वच्छं जातीफलसमं वरम्।
छायावद्बहुलं रम्यं निर्दोषं यदि लभ्यते।
अमूल्यं तद्विनिर्दिष्टं रत्नलक्षणकोविदैः।
दुर्लभं कृपयोर्म्यं स्यादल्पभाग्येन लभ्यते।"
अथस्थाह।
"सर्वेषु तस्याकरजा विशेषात्
रूपप्रमाणे च यथेव विद्वान्।
यदि भवन्त्यत्र गुणागुणेषु
सर्वत्र सर्वाङ्गतयो भवन्ति॥

ब्रह्मादिजातिभेदेन मुक्ताश्चोपि चतुर्विधाः।
तासु सर्वासु जातं हि मौक्तिकं स्याच्चतुर्विधम्।
ब्राह्मणस्तु सितः स्वच्छो गुरुः शुक्लः प्रभान्वितः।
आरक्तः क्षत्रियः स्थूलस्तथारुणविभान्वितः।
वैश्यस्त्वापीतवर्णोऽपि स्निग्धः श्वेतः प्रभान्वितः।
शूद्रः शुक्लवपुः रूक्ष्मस्तथा स्थूलोऽसितद्युतिः।

वर्णोपलानां समवर्णशोभं
लक्षसारमध्यप्रभवं प्रदिष्टम्।
ते वेणवो दिव्यजनोपभोग्ये
स्थाने प्ररोहन्ति न सर्वजन्ये॥

वंशजं ग्रन्थिसङ्काशं कक्कोलीफलमात्रकम्।
प्राप्यते बहुभिः पुण्यैस्तच्च वेदमन्त्रतः॥
पञ्चभूतसमुद्रैकादंशे पञ्चविधे भवेत्।
मुक्ता पञ्चविधा तासां यथालक्षणमुच्यते॥
पार्थिवो गुरुवत्सा च तैजसी तैजसा लघुः।
वायवी च मृदुः स्थूला गागनी कोमला लघुः।
आद्याः स्निग्धा भृशं शुक्लाः पञ्चैताः प्रवरा मताः।
आसां धारणमात्रेण व्याधिः कोऽपि न जायते।"*॥

एवमन्यत्रापि।
"गजादिकोलमत्स्यानां शौर्ये मुक्ताफलोद्भवः।
लक्षसारशुक्तिशृङ्गानां गर्भे मुक्ताफलोद्भवः।
धाराधरेषु जायेत मौक्तिकं जलबिन्दुभिः।
जीयन्ते शुक्तिरूपेण गजे पाटलभास्वरम्।
मत्स्ये श्वेतच निस्तेजः फणीन्द्रे नीलभास्वरम्।
हरिच्छ्वेतं तथा वंशे पीतश्वेतच शूकरे।
शृङ्गशुद्भवं श्वेतं सुक्ताफलमनुत्तमम्॥
चतुर्धा मौक्तिके च्छाया पीता च मधुरा सिता।
नीला चेव समाख्याता रत्नतत्त्वपरीक्षके॥
पीता लक्ष्मीप्रदा छाया मधुरा बुद्धिवर्द्धनी।
शुक्ला यशस्करी छाया नीला सौभाग्यदायिनी॥
सिता छाया भवेद्विप्रः क्षत्रियश्चार्करश्मिवान्।
पीतच्छाया भवेद्वैश्यः शूद्रः छायारुचिर्मतः॥*

अथ गुणाः।
सुतारच बहुलच स्वच्छच निर्मलं तथा।
घनं स्निग्धच सच्छायं तथा स्फुटितमेव च।
अष्टौ गुणाः समाख्याता मौक्तिकानामधीश्वरैः॥
तद्यथा,—
तारकाद्युतिसङ्काशं सुतारमिति गद्यते।
सर्वतो वर्तुलं यच्च सुवृत्तं तन्निगद्यते।
स्वच्छं दोषविनिर्मुक्तं निर्मलं मलवर्जितम्।
गुरुत्वं तुलने यस्य तद्घनं मौक्तिकं वरम्।
स्नेहेनैव विलिप्तं यत्तत् स्निग्धमिति गद्यते।
छायासमन्वितं यच्च सच्छायं तन्निगद्यते।
व्रणरेखाविहीनं यत्तत् स्यादस्फुटितं शुभम्।
भाजिष्णु कोमलं कान्तं मनोज्ञं स्फुरतीव च।
ज्वलतीव च सत्त्वानि तनुमद्दारसंश्रितम्।
श्वेतकाचसमाकारं शुभ्रांशुगततयोज्झितम्।
ग्रन्थिराजप्रतिच्छायं मौक्तिकं देवभूषणम्।"*॥
गारुडे।

लक्षसारगजेन्द्रशिरःप्रभूतं
यच्छङ्खजं यच्च वराहजातम्।
प्रायो विपुलानि भवन्ति भासा
ग्रहणानि माङ्गल्यतया तथापि।
प्रमाणवन्नैरवरश्मियुक्तं
सितं सुवृत्तं समलक्षणत्वम्।
अक्षेतुरप्यावहति प्रमोदं
यन्मौक्तिकं तद्गुणवत् प्रदिष्टम्।
एवं समस्तैः गुणोदयैः
यन्मौक्तिकं योगमुपागतं स्यात्।
न तस्य भूमारमनर्घजात
एकोऽपि दोषः समुपैति यद्यः॥

एवं सर्वगुणोपेतं मौक्तिकं येन धार्यते।
तस्यायुर्वर्द्धते लक्ष्मीः सर्वपापं प्रणश्यति।
गुणवद्गुरु यद्देहे मौक्तिकैकं हि तिष्ठति।
चपलापि स्थिरा भूत्वा कमला तत्र तिष्ठति।"
दोषो यथा,—
"चत्वारः स्युर्महादोषाः वक्ष्यमाणाश्च प्रकीर्तिताः।
एवं दश समाख्यातास्तेषां वक्ष्यामि लक्षणम्।
यत्रैकदेशे संलग्नः शुक्तिखण्डो विभाव्यते।
शुक्तिजयः समाख्यातः स दोषः कुलकारकः।
मीनलोचनसङ्काशो दृश्यते मौक्तिके तु यः।
मत्स्याक्षः स तु दोषः स्यात् पुत्रनाशकरो ध्रुवम्।
दीप्तिहीनं गतच्छायं जठरं तद्विदुर्बुधाः।
तस्मिन् संधारिते नृणां जायते नात्र संशयः।
मौक्तिकं विदुमच्छायमतिरक्तं विदुर्बुधाः।
दारिद्र्यजनकं यस्मात् तस्मात्तत् परिवर्जयेत्।
उपर्युपरि तिष्ठन्ति वलयो यत्र मौक्तिके।
चित्रं नाम तल्लोके सौभाग्यक्षयकारकम्।
अदृष्टं मौक्तिकं यच्च चिपिटं यन्निगद्यते।
मौक्तिकं म्रियते येन तस्याकीर्तिर्भवेत् सदा।
त्रिकोणं त्र्यश्रमाख्यातं सौभाग्यक्षयकारकम्।
दीर्घं यत्तत् लम्बं प्रोक्तं प्रज्ञाविध्वंसकारकम्।
निर्भस्मैकतो यच्च लम्बयार्धं तदुच्यते।
सदोषं मौक्तिकं निन्द्यं निरुद्योगकरं हि तत्।
अदृष्टं पिङ्कोपेतं सर्वसम्पत्तिहारकम्॥*॥
यत्र कृत्रिमसन्देहः कश्चिद्भवति मौक्तिके।
उक्ते खलक्षे क्षेत्रे निष्णातैरहार्यैश्च।
व्रीहिभिर्मर्दनीयंवा शुष्कवल्लोपवेष्टितम्।
यत्तु नायाति वैवर्ण्यं विज्ञेयं तदकृत्रिमम्॥*॥
तथा हि।
चिपिटोन्नतभागे तु लवणक्षारसंयुते।
खेदयेद्वह्निना वापि शुष्कवल्लेन वेष्टयेत्।
दृष्टे मौक्तिकमादाय व्रीहिभिश्चोपघर्षयेत्।
कृत्रिमं भङ्गमाप्नोति सहजत्वाति दीप्यते।
कृत्वा पचेत् सुपिहिते शुभदारुभाण्डे
सुक्ताफलं निहितनूतनशुक्तिकाढ्यम्।
स्फोटस्तया प्रविदधीत ततश्च भाण्डात्।
संस्थाप्य धान्यनिचये च तमेकमासम्।
आदाय तत् सकलमेव ततोऽम्लभाण्डं
जम्बीरजातरसयोजनया विपक्वम्।
दृष्टं ततो मृदुतनूत्तमपिच्छमूलैः
कुर्यादृयथेच्छमिह मौक्तिकमाशु विद्वम्।
श्लक्ष्णप्रमत्स्यपुटमध्यगतन्तु कृत्वा
पश्चात् पचेत्तु ततश्च वितानपत्त्या।
दुग्धे ततः प्रयसि तद्विपचेत् सुरायां
पक्वन्ततोऽपि पयसा सुचि चिक्कणेन।
शुद्धं ततो विमलवस्त्रनिघर्षणेन
स्यात् मौक्तिकं विमलसद्गुणकान्तिजालम्॥"
अथ लक्षम्।
"पञ्चभिर्मोचको ज्ञेयो गुञ्जाभिर्मोचकैस्त्रया।
चतुर्भिः ग्राह्यमाख्यातं मोचकैर्भिषिग्वरैः।

एकस्य शुक्तिप्रभवस्य शुद्ध-
सुक्तामयैः ग्राह्यकसम्मितस्य।
मूल्यं सहस्राणि कपर्दकानि
त्रिभिः शतैरभ्यधिकानि पञ्च।
यन्मोचकार्द्धेन ततो विहीनं
चतुःसहस्रं लभतेऽस्य मूल्यम्।
यन्मोचकांस्त्रीन् विभृयाद्गुरुत्वे
द्वे तस्य मूल्यं परमं प्रदिष्टम्।
अर्द्धाधिकद्वौ वहतोऽस्य मूल्यं
त्रिभिः शतैरभ्यधिकं सहस्रम्।
हिमावकोन्मापितगौरवस्य
शतानि चाष्टौ कथितानि मूल्यम्।
अर्द्धाधिकमाषकसम्मितस्य
सपञ्चविंशं चितयं शतानाम्।
यन्मोचकोन्मापितमानमेकं
तस्याधिकं विंशतिभिः शतं स्यात्।

गुञ्जाश्च षड्धारयतः शते द्वे
मूल्यं परं तस्य वदन्ति तज्ज्ञाः ।
गुञ्जाश्चतस्रो विधृतं यवार्ध-
दृष्टं जमीताप्यधिकं विभिन्दा ॥
यतः परं स्याद्धरणप्रमाणं
संख्याविनिर्देशविनिश्चयोक्तिः ।
त्रयोदशानां धरणे धृतानां
द्विकेति नाम प्रवदन्ति तज्ज्ञाः ॥
अध्यर्धमाषाश्च धृतं शतं स्यान्-
मूल्यं गुणेनास्य समन्वितस्य ।
यदि षोडशभिर्भवेत् सुपूर्णं
धरणं तत्प्रवदन्ति दार्विकाख्यम् ॥
अधिकं दशभिः धृतश्च मूल्यं
समवाप्नोत्यपि बालिशस्य हस्तात् ।
यदि विंशतिभिर्भवेत् सुपूर्णं
धरणं मौक्तिकजं वदन्ति तज्ज्ञाः ॥
नवसप्ततिमाप्नुयात् समूल्यं
यदि न स्याद्गुणयुक्ततो विहीनम् ॥
विंशता धरणं पूर्णं शिक्येति परिकीर्त्यते ।
चत्वारिंशत्परं तस्य मूल्यमेव विनिश्चयः ॥
चत्वारिंशत्भवेत् शिक्या विंशन्मूल्यं लभेत सा ।
षष्ट्याप्तु भवेत् सोमस्तस्य मूल्यन्तु विंशतिः ॥
नहिनैकरभीर्षं स्यात्तस्य मूल्यं चतुर्दश ।
अशीतिर्नवतिश्चेति कुर्ष्येति परिकल्प्यते ॥
एकादश स्युर्नव च तयोर्मूल्यमनुक्रमात् ।
शतमष्टांधिकं हे च चूर्णोऽयं परिकीर्तितः ॥
सप्त पञ्च त्रयश्चैव तेषां मूल्यमनुक्रमात् ॥
ग्राह्यात् परं मावकमेकमेकं
यावद्विवर्द्धेत गुणैरपीदम् ।
मूल्येन तावद्विगुणेन योग-
मापोत्यनाद्यविहतेऽपि देशे ॥
सूक्ष्मातिसूक्ष्मोत्तममध्यमानां
यन्मौक्तिकानामिह मूल्यसूत्रम् ।
तज्ज्ञातिमात्रेण न जातु कार्यं
गुणैरहीनस्य हि तत् प्रदिष्टम् ॥
यत्तु चन्द्रांशुसङ्काशमीषद्विम्बफलाकृति ।
स्वल्पजात्या सप्तमं भागमर्हत्तत्वाल्लभेत तत् ॥
पीतकस्य भवेदर्द्धमर्हत्तस्य त्रिभागतः ।
त्रिपञ्चसप्तजातीनां षड्भागं मूल्यमादिशेत् ॥
अर्द्धरूपाणि सस्फोटात् पङ्कचूर्णानि यानि च ।
अमाराणि च यानि स्युः करकाकारवन्ति च ॥
एकदेशप्रभावन्ति सकलाश्रितानि च ।
यानि चातकवर्णानि कांस्यवर्णानि यानि च ॥
मीननेत्रसवर्णानि ग्रन्थिभिः संहतानि च ।
सदोषाणि च यानि स्युस्तेषां मूल्यं पदांशिकम् ॥
अन्यत्र तु ।
सच्छाली प्रोच्यते मुक्ता सा त्रिधा रूपकं भवेत् ।
रूपकैर्दशभिः प्रोक्तः कलञ्जो नाम नामतः ॥
कलञ्जनामकं द्रव्यमेकदेशे निधापयेत् ।
अन्यतो जलबिन्दुन्तु तोलनार्थं विनिःक्षिपेत् ॥
चत्वारि चीणि युग्मं वा तथैकं बहु वा स्थितम् ।
समं कलञ्जमानेन तुलामारोहतः क्रमात् ॥
नवमात् पञ्चमं यावत् कलञ्जेन समं यदा ।
तत्क्रमादुत्तमं ज्ञेयं मौक्तिकं रत्नवेदिभिः ॥
चतुर्दशात् समारभ्य दशसंख्याविधिं क्रमात् ।
कलञ्जस्य समानं वा मौक्तिकं मध्यमं विदुः ॥
आरभ्य विंशतितमात् क्रमात् पञ्चदशावधि ।
जघन्यास्ताः कथिता मुक्ता मूल्यञ्च तदनुक्रमात् ॥
कलञ्जद्वयमानेन यदेकं मौक्तिकं भवेत् ।
न धार्यं नरनाथेस्तु दैवयोग्यममानुषम् ॥
इत्थं विचार्य्य यो मुक्तां परिधत्ते नराधिपः ।
तस्यायुश्च यशो धैर्यं विपरीतमतोऽन्यथा ॥"
इति युक्तिकल्पतरुः ॥
(अघास्याः शोधनम् ।
"खेदयेद्दोलिकायन्ते जयन्त्याः स्वरसेन च ।
मञ्जिमुक्ताप्रवालानि यामैकं शोधनं भवेत् ॥"
इति वैद्यकरत्नसारसंग्रहे जारणमारणाधिकारे ॥) अन्यत् मुक्ताफलशब्दे द्रष्टव्यम् ॥ अथ मुक्ताधारणविधिः ।
"रेवत्यश्विधनिष्ठासु हस्तादित्र च पञ्चसु ।
शुक्लविद्रुमसुक्तानां परिधानं प्रशस्यते ॥"
इति समयप्रदीपः ॥
मुक्ताकलापः, पुं, (मुक्तानां कलापः समूहोऽत्र ।) मुक्ताहारः । यथा,—
"हारो मुक्तात्प्रालम्बलम्बमानावलीलताः ।"
इति हेमचन्द्रः । १ । १२२ ।
(यथा, कुमारसम्भवे । १ । ४२ ।
"कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य
अन्योन्यशोभाजननादुभूव
साधारणो भूषणभूष्यभावः ॥")
मुक्तागारं, क्ली, (मुक्तायाः आगारमिव । मुक्तोत्पादनाधारत्वादस्य तथात्वम् ।) शुक्तिः । इति शब्दचन्द्रिका । मौक्तिकयुक्तश्च ।
मुक्तापुष्पः, पुं, (मुक्ता इव पुष्पाण्यस्य ।) कुन्दवृक्षः । इति राजनिर्घण्टः । (गुणादिविवृतिरस्य कुन्दशब्दे द्रष्टव्या ।)
मुक्ताप्रसूः, स्त्री, (मुक्तां प्रकर्षेण सूते जनयतीति प्र + सू + क्विप् ।) शुक्तिः । इति राजनिर्घण्टः ॥
मुक्ताप्राजन्मः, पुं, (मुक्तानां प्राजन्मः प्रारम्भः ।) मुक्ताहारः । इति हेमचन्द्रः । १ । १२२ ।
मुक्ताफलं, क्ली, (मुक्ताफलमिव ।) कर्पूरम् । (मुक्तेव फलमिव ।) मौक्तिकम् । (यथा, सुग्धबोधटीकायां कारके । तेनार्थादित्यत्र । दुर्गादासधृतम् ।
"मुक्ताफलाय करिणं हरिणं पलाय
सिंहं निहन्ति भुजविक्रमसञ्चयाय ॥")
जवलीफलम् । इति मेदिनी । वे, १६६ ।
(मौक्तिकार्घस्य पर्य्यायः ।
"मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलञ्च तत् ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
यथास्य भक्षाकरणविधिः ।
"मुक्ताफलानि शुद्धानि खल्वे क्षिप्ता पुटेत्रयम् ।
एवं भक्षयतो मात्रां प्रोति————— ॥"
इति वैद्यकरत्नसारसंग्रहे जारणमारणाधिकारे ॥) वोपदेवशतयत्नविशेषः । यथा,—
"मुक्ताफलेन यत्नेन सङ्कागवतमुक्तिना ।
भक्तिस्वात्मगुणा सुग्धमार्कवेयग्निशुक्तिया ॥
विद्रुमेणाग्निशिखेन भिषक्त्रिग्धवस्तुना ।
हेमादिर्वोपदेवेन मुक्ताफलमचीकरत् ॥"
इति तस्य चतुर्थोपान्त्यश्लोकोद्धृतम् ।
अथ मुक्ताफल परीक्षा ।
"द्विपेन्द्रजीमूतवराहशुक्ल-
मत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके
तेषाञ्च शुक्त्युद्भवमेव भूरि ॥
तच्चैव चैकस्य हि मूलमाप्त्या
निविश्यते रत्नपरस्य जातु ।
वैधस्तु शुक्त्युद्भवमेव तेषां
श्रेष्ठाण्यवेष्यानि वदन्ति तज्ज्ञाः ॥
त्वक्सारनागेन्द्रतिमिप्रसूतं
यत् शुक्लजं यच्च वराहजातम् ।
प्रायो विमुक्तानि भवन्ति भास्वा
ग्रस्तानि माङ्गल्यतया तथापि ॥
या मौक्तिकानामिह जातयोऽष्टौ
प्रकीर्त्तिता रत्नविनिश्चयज्ञैः ।
तासूद्भवं तेष्वधमन्यदिष्ट-
मुत्पद्यते यच्च गजेन्द्रकुम्भात् ॥
स्वयोनिमध्यच्छवितुल्यवर्णं
ग्राह्यं द्विहत्कोलफलप्रमाणम् ।
उत्पद्यते वारणकुम्भमध्या-
दापीतवर्णं प्रभया विहीनम् ॥
ये कम्बवः ग्राह्यसुखावमर्द-
पीतस्य शुक्लप्रवरस्य गोत्रे
मतङ्गजाचापि विशुद्धवंश्या-
स्ते मौक्तिकानां प्रभवाः प्रदिष्टाः ॥
पाटीनदृष्टस्य समानवर्णं
मीनात् सुवृत्तं लघुनातिलक्ष्यम् ।
उत्पद्यते वारिचरागनेषु
मत्स्याच्च ते मध्यचराः पयोधेः ॥
वराहदंष्ट्राप्रभवं प्रदिष्टं
तस्यैव दंष्ट्याङ्कुरतुल्यवर्णम् ।
क्वचित् क्वचित् स्यच्च भुवः प्रदेशे
प्रजायते शूकरवद्विशिष्टः ॥
वर्षोपलानां समवर्णशोभं-
त्वक्सारपर्व्वप्रभवम्प्रदिष्टम् ।
ते वैद्यवो दिव्यजनोपभोग्ये
स्थाने प्ररोहन्ति न सार्व्वजन्ये ॥
भौमञ्च मौनविशुद्धवृत्तं
संख्यातलोल्लुञ्चनवर्णशोभम् ।
नितान्तधौतप्रविकल्पमान-
निक्षिप्तधारासमवर्णकान्ति ॥
प्राप्येति रत्नानि महाप्रभाणि
राज्यं श्रियं वा महतीं दुरापाम् ।

पात्रं हि नार्पुण्यजनो भवन्ति
मुक्ताफलस्याहिशिरोभवस्य ॥
जिज्ञासया रत्नधनं विधिज्ञैः
शुभे मुहूर्त्ते प्रयतैः प्रयत्नात् ।
रत्नाविधानं समहद्विधाय
हर्म्यार्पणरिक्षं क्रियते यदा तत् ॥
तदा मघादुद्भिमभ्रघोषै-
र्विद्युल्लतावित्सुरितान्तराजैः ।
पयोधराक्रान्तिविलम्बलम्बै-
र्घनैर्घनैर्व्या त्रियतेऽम्बरीषम् ॥
न तं सुजङ्गा न च जातुधाना
न आधयो नाप्युपसर्गदोषाः ।
हिंसन्ति यस्याहिशिरःसमुत्थं
मुक्ताफलं तिष्ठति पूज्यमानम् ॥
नाभ्येति मेघप्रभवं धरित्रीं
वियद्गतं तद्विबुधा हरन्ति ।
अर्चिःप्रभानाहतदिग्विभाग-
मादित्यवद्दुःखविभाग्यविम्बम् ॥
तेजस्तिरस्कृत्य हुताशनेन्दु-
वज्रताराप्रभवं समग्रम् ।
दिवा यथा दीप्तिकरं तथैव
तमोऽवगाढास्वपि तन्निशासु ।
विचित्ररत्नद्युतिसारतोय-
यतः समुद्राम्बरयोपपन्ना ।
क्षतक्षमा न वा स्यादिति निश्चयो मे
मूल्यं मही तस्य सुवर्णपूर्णा ॥
हीनोऽपि मुक्ताफलभक्तिरस्मिन्
विपाकयोगाज्जनुषः शुभस्य ।
सपत्नहीनां न महीं समग्रां
भुनक्ति तिष्ठति यावदेव ॥
न केवलं तच्छुभलक्षणस्य
भाग्ये प्रजानामपि तस्य जन्म ।
यद्योजनानां परितः सहस्रं
सर्व्वाननर्थान् विमुखीकरोति ॥
नक्षत्रमालेव दिवो विभूषणं
दन्तावली तस्य महासुरस्य ।
विचित्रवर्णेषु विशुद्धवर्णा
पयःसु पत्युः पयसां पपात ॥
सम्पूर्णचन्द्रांशुकलापकान्ते-
र्मेघिप्रवेकस्य महाशुचस्य ।
तच्छुक्तिमप्सु स्थितमाप्रवीज-
मासन् पुराण्यम्बुभवानि यानि ॥
यस्मिन् प्रदेशेऽम्बुनिधौ पपात
सुधारु मुक्तामणिरत्नबीजम् ।
तस्मिन् पयस्योषधरावकीर्णे
शुक्तौ स्थितं मौक्तिकतामवाप ।
सैंहलिकपारलौकिकसौरा-
दिकताम्रपर्णपारसवाः ।
कौवेरपाण्ड्याहाटक-
हैमका इत्याकराख्यटौ ॥
शुक्लुद्भवं नातिनिकृष्टवर्णं
प्रमाणसंस्थानगुणप्रभाभिः ।

उत्पद्यते वह्नेनपारसीक-
यामालालोकान्तरसिंहलेषु ।
चिन्त्या न तस्याकरजा विशेषा
रूपे प्रमाणे च यतेत विद्वान् ।
न च व्यवस्थास्ति गुणागुणेषु
सर्व्वत्र सर्व्वाहतयो वदन्ति ॥
एकस्य शुक्तिप्रभवस्य मुक्ता-
फलस्य ग्राह्यौ वसुमित्तस्य ।
मूल्यं सहस्राणि तु रूपकाणां
त्रिभिः शतैरभ्यधिकानि पञ्च ॥
यन्मापकार्द्धेन ततो विहीनं
तत्पञ्चभागद्वयहीनमूल्यम् ।
यन्मापकांस्त्रीन् विभृयात् सहस्रे
द्वे तस्य मूल्यं परमं प्रदिष्टम् ॥
ऊर्द्धाधिकौ द्वौ पणतोऽस्य मूल्यं
त्रिभिः शतैरभ्यधिकं सहस्रम् ।
द्विमापकोन्मापितगौरवस्य
शतानि चाष्टौ कथितानि मूल्यम् ।
अर्द्धाधिकं मापकसम्मितस्य
सपञ्चविंशत्रितयं शतानाम् ।
गुञ्जाश्च षड् धारयतः शते द्वे
मूल्यं परं तस्य वदन्ति तज्ज्ञाः ॥
अध्यर्द्धसुन्मापशतं शतं स्यात्
मूल्यं शुभैकस्य समन्वितस्य ।
यदि षोढ्यभिर्भवेदूनं
धरणं तत्प्रवदन्ति दार्ष्टिकाख्यम् ॥
अधिकं दशभिः शतैश्च मूल्यं
समवाप्नोत्यपि बालिशस्य हस्तात् ।
द्विगुणैर्दशभिर्भवेदूनं
धरणं तद्वबकं वदन्ति तज्ज्ञाः ॥
नवसप्ततिमाप्नुयात् स्वमूल्यं
यदि न स्यादृजुसम्पदा विहीनम् ॥
अंशता धरणं पूर्वं शिक्षं तस्येति कीर्त्यते ॥
चत्वारिंशद्वैक्षस्याः परं मूल्यं विनिश्चयः ।
चत्वारिंशद्वैक्षिकृथो विंशंमूल्यं जगत सा ॥
षष्टिर्निकरणीयं स्यात्तस्य मूल्यं चतुर्दश ।
अग्रीतिर्नवसिक्षेव कुप्येति परिकीर्त्तिता ।
एकादश स्यान्नव च तयोर्मूल्यमनुक्रमात् ॥
आदाय तत् सकलमेव ततोऽम्बभाजं
जम्बीरजातरसयोजनया विपक्वम् ।
दृष्टं ततो मृदुतनूकृतपिष्टमूले:
कुर्य्यादृषेदमनुमौक्तिकमाशु विद्वम् ॥
श्लक्ष्णप्रमृज्यदृढमध्यगतन्तु ज्ञात्वा
पश्चात् पचेत्तदु ततश्च वितानपत्या ।
दुग्धे ततः पयसि तं विपचेत् सुधार्या
पक्वं ततोऽपि पयसा शुचि चिक्कणेन ॥
शुद्धं ततो विमलवस्त्रनिघर्षणेन
स्यान्मौक्तिकं विपुलसद्गुणकान्तियुक्तम् ।
याड्रिर्जगाद जगतां हि महाप्रभाव-
मिज्यो विदग्धहिततत्परया दयालुः ॥
श्वेतकाचसमं तारं हेमाग्रशतयोजितम् ।
रसमध्ये प्रधार्य्येत मौक्तिकं देहभूषणम् ॥

एवं हि सिंहले देशे कुर्व्वन्ति कुशला जनाः ।
यस्मिन् क्षत्रिमसन्देहः क्वचिद्भवति मौक्तिके ॥
उष्णे सलवणे क्षेत्रे निशां तदासयेच्छुचौ ।
द्रोणिभिर्मर्दनीयं वा शुष्कवल्कोपवेष्टितम् ॥
यत्तु नायाति वैवर्ण्यं क्षिप्तं तदकृत्रिमम् ।
मितं प्रमाणवत् स्निग्धं गुरु स्वच्छं सुनिर्म्मलम् ।
तेजोऽधिकं सुतरत्नं मौक्तिकं गुणवत् स्मृतम् ॥
प्रमाणवद्गौरवरश्मियुक्तं
स्निग्धं सुवृत्तं समरूपवेधम् ।
अक्षेतरच्यावहति प्रमोदं
यन्मौक्तिकं तद्गुणवत् प्रदिष्टम् ॥
एवं समस्तेन गुणोदयेन
यन्मौक्तिकं योगसुपागतं स्यात् ।
न तस्य भर्त्तारमनर्थजात
एकोऽपि कश्चित् समुपैति दोषः ॥"

इति गारुडे ६८ अध्यायः ॥

मुक्तासक्तः, त्रि, (मुक्तञ्च आसक्तश्चेति विशेषणयोर्द्वन्द्वः ।) स्निग्धाक्षिभ्रूः । अस्य प्रयोगो अक्षे शब्दे च प्रायो वर्त्तते । इति हलायुधः ॥

मुक्तालता, स्त्री, (मुक्ताभिर्लतेव ।) मुक्ताहारः । इति हेमचन्द्रः । ३ । ३२२ ॥

मुक्तावली, स्त्री, (मुक्तानां आवल्यत्र) मुक्ताहारः । इत्यमरः । २।६।१०५ ॥ (मुक्तागामावली ।) मौक्तिकमेखली च ॥ (तालविशेषः । यथा, सङ्गीतदामोदरे ।

"खत्रयं सविरामाग्नं नौ पुनः खत्रयं तथा ।
मुनौगः खयुगं गश्च यत्र मुक्तावली तु सा ।")

मुक्तास्फोटः, पुं, (मुक्तानां स्फोटः विकाशोऽत्र ।) शुक्तिः । इत्यमरः । १ । १० । २३ ॥

मुक्तास्फोटा, स्त्री, (मुक्तास्फोट + टाप् ।) शुक्तिः । इति राजनिर्घण्टः ॥

मुक्तिः, स्त्री, (मुच् + भावे क्तिन् ।) आत्यन्तिकदुःखनिवृत्तिः । इति नैयायिकाः । नित्यसुखावाप्तिः । इति वैदान्तिकाः । अशरीरेन्द्रियाभ्यां आत्मनो मुक्तत्वं मुक्तिः । इति भरतः । मोक्षः । तत्पर्य्यायः । कैवल्यम् २ निर्व्वाणम् ३ श्रेयः ४ निःश्रेयसम् ५ अमृतम् ६ मोक्षः ७ अपवर्गः ८ । इत्यमरः । १।५।६ ॥ अपुनर्भवः ९ क्षिरः १० अक्षरम् ११ । इति जटाधरः । सा पञ्चविधा । सार्ष्टिः १ सालोक्यम् २ सारूप्यम् ३ सायुज्यम् ४ निर्व्वाणम् ५ । यथा,—

सार्ष्टिसारूप्यसालोक्यसामीप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥"

इति श्रीभागवतम् ॥

"मुक्तिस्तु त्रिविधा माध्वि! शृणुष्वा सर्व्वसम्मता ।
निर्व्वाणपददात्री च हरिभक्तिप्रदा नृणाम् ॥
हरिभक्तिस्वरूपाश्च मुक्तिं वाञ्छन्ति वैष्णवाः ।
अन्ये निर्व्वाणरूपाश्च मुक्तिमिच्छन्ति माधवः ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २९ अध्यायः ॥

मुक्तिकरयोगो यथा,—

"वक्ष्ये साङ्गमहायोगं मुक्तिमुक्तिकरं परम् ।
सर्व्वपापप्रशमनं भक्त्यानुष्ठितं मया ॥

ममेति मूलं दुःखस्य न ममेति च निर्वृतेः ।
दत्तात्रेयो हैहयाय स्मराह महामतिः ॥
अहमित्यङ्कुरोत्पन्नौ ममेति स्कन्धवान् महान् ।
पुत्रक्षेत्रोपशाखश्च पुत्रदारादिपल्लवः ॥
धनधान्यमहापत्रोऽनेककालेहिं वर्द्धितः ।
पुण्यापुण्यसपुष्पश्च सुखदुःखमहाफलः ।
विधिवत् सुखप्राप्त्यर्थं जातोऽज्ञानमहातरुः ॥
संसाराध्वपरिश्रान्ता येऽत्र च्छायां समाश्रिताः ।
आत्मज्ञानसुशास्त्रीणास्तेषामात्मन्यकं कुतः ॥
येषु सत्सङ्गपाषाणनिघृतेन महातरुः ।
छिन्नो विद्याकुठारेण ते गता लयमीश्वरे ॥
प्राप्य ब्रह्मरसं पीतं नीरूपस्कमकण्टकम् ।
प्राप्नुवन्ति परां प्राप्तां ज्ञाननिर्वृत्तिमेव च ॥
मूर्त्तेन्द्रियमयं मूलं तत्त्वं राजा नचाप्यहम् ।
न तस्मात्रादिकं वाच्या नैवान्तःकरणं तथा ॥
कं वा पश्यसि राजेन्द्र ! प्रधानमिदमावयोः ।
ततः परेऽहि चैतन्यः संजातोऽयं गुणात्मकः ॥
ममको दुःखमाप्तार्थं जातो मत्स्योऽम्भसा यथा ।
एकस्योऽपि पृथग्भावस्तथा चैतन्यतो नृप ! ॥
ज्ञानपूर्वाभियोगोऽतिज्ञानेन सह योगिनः ।
या मुक्तिर्ब्रह्मणा चैवमनैवं पुत्र ! ते गुणैः ।
तदयं यत्र वसतिस्तद्वोध्यं येन जीवति ॥"

इति गारुडे २२० अध्यायः ॥*॥

अपि च ।

"हरिरात्मा न सन्देहो यदा तत् समजायत ।
तदा मुक्तः स संसारी विष्णोरेवात्मतां व्रजेत् ।
नान्यथा मुच्यते जीवो भ्रमन् वै घटियन्त्रवत् ॥
पूर्वकर्मनिबद्धोऽपि सर्व्वयोनिषु नित्यशः ।
कूटस्थः पशुतां याति आत्मज्ञानविवर्जितः ॥
कुर्व्वन्नहं ममेतीदमेवं दुःखाय कल्पते ।
यद्धेतोर्हि यथा कार्य्यं क्रियते वै त्वनीश्वरः ॥
चौराधानादिभिर्यद्वद्भाक्तं तद्ज्ञानसे ।
चन्द्रकान्तमणिर्यद्वद् यद्धीते सोपचात् गुणान् ।
सुखं दुःखं तथा क्षेमं संवरन् नूनमीश्वरः ॥
स्वप्ने यः पुरुषो नित्यमटते कर्म्मबन्धनात् ।
मन्यमानः सुखं दुःखं सोऽप्येव विप्र ! सुप्यते ।
जगन्मुक्तं न हरिः स्वादमुक्ते वर्द्धते सदा ।
तस्माज्जगत्त्रयं विद्यात् ज्ञानं चाधिकमेव च ॥
यत्र तत्र स्थितो ज्ञानी परमात्मरतिं सदा ।
विषयान्तरसक्तो वा याति देहे स्थते हरिम् ॥
न तस्य प्रतिबन्धोऽस्ति यद्यपीहोऽपि लीलया ।
कुरुते भुञ्जते नैव पद्मपत्रमिवाम्भसा ॥
यथा दुर्दिनसंघातं मेघवृन्दैर्यवस्थितम् ।
तद्विच्छुर्निर्मलात्मो ज्ञानी विषयसंज्ञितः ॥
सर्व्वावस्थोऽपि मुच्येत भावयुक्तः परे पदे ।
जीवन्मुक्तः स मुक्तः स्यान्निद्राविरहितस्तु यः ॥
कर्त्ता हर्त्ता च भोक्ता च सर्व्वज्ञः सर्व्वगो हरिः ।
एकं स्वच्छन्दलीलस्य मुक्तिरित्यभिधीयते ॥
जीवमुक्तिमजानन्तो मूर्च्छिताकारविग्रहाः ।
विषसुप्ता इवाभान्ति मूढाचैतन्यवर्जिताः ॥
निर्गुणः स तु विज्ञेयः सुखदुःखमतीतवान् ।
जीवनाग्नौ भवेद्दग्धं तत् सुखं निष्प्रयोजनम् ॥
मृत्पिण्डदण्डवन्मोक्षस्तस्मोक्षस्तु भवेद्दृढा ।
तिष्ठन्ति काष्ठवद्दृश्ये च संविन्मात्रविवर्जिताः ॥
ते च मायोदरे जीना जड़ाम्बुधिरोपमाः ।
आकाशवद्भवेदात्मा विदेहो निष्प्रचेतनः ॥
अयं ह्यनेन मोक्षेण चेतनारहितेन च ।
वरमेव च संसारी विषयासक्तचेतनः ॥
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
सृष्टिमात्रा उभौ पाशौ संसारे संव्यवस्थितः ॥
दृश्यं हि परं ज्ञानं वेदादीनामगोचरः ।
सुखस्य च परं मुक्तं स्वर्गे चैह द्विजोत्तम ! ॥
यत्र वासः परे स्थाने सुखदुःखविवर्जितः ।
केवलं जीवनाग्नेऽयं प्रोक्तज्ञानमजानता ॥
चेतनारहितो ज्ञानमाकाशस्थोऽप्यचेतनः ।
मृत्पिण्डदण्डलोष्टादिशिलापट्टककुड्यवत् ॥
अथ ज्ञानी नरो यद्वत् सुप्तः सुखमश्नुते ।
बोध्यमानः सचेतापि सुखाद्धोद्धुं न मन्यते ॥*॥
कैषा मुक्तिमिदं मोक्षः सुखमत्यन्तकेवलम् ।
तदहं संप्रवक्ष्यामि शृणुष्व मुदतो मम ॥
दुःखानामागमो नास्ति यत्र सौख्यं निरन्तरम् ।
विद्यते तत् परं ब्रह्म योऽध्यानन्दसुखी भवेत् ॥
ब्रह्मज्ञानप्रविष्टाश्च स्वच्छन्दात्मवलान्विताः ।
न तेषां पुनरावृत्तिर्यास्ति विष्णुलयं बुधाः ॥
अस्ति देवो हरिः शान्तः कारणोपायवर्जितः ।
तं ज्ञात्वा तु भवेन्मुक्तिर्नान्यथा कार्य्ययोगिनः ॥
ब्रह्मा विष्णुश्च रुद्रश्च चन्द्रसूर्य्यादयः सुराः ।
न विभक्तिं शरीरस्य यान्ति मुक्तिर्न विद्यते ॥
तस्मादाराधनीयोऽपि संयमेन्द्रियगोचरः ।
विष्णुर्मायापतिर्यो वै यदीच्छेन्मुक्तिमात्मनः ॥
नान्यच्च विद्यातपसो नान्यच्चेन्द्रियनिग्रहात् ।
नान्यच्च सर्व्वसंत्यागात् मोक्षं विन्दति मानवः ॥
तस्माद्धर्म्मसुखो भूत्वा संयज्ञात्मानमात्मना ।
धर्म्मं कुर्य्याद्विधानेन धर्म्मात्मा सुखमेधते ॥
धर्म्मादेवाप्यते देहो दाराः पुत्रा धनं तथा ।
धर्म्मात् स्वर्गश्च मोक्षश्च यदन्यदपि दुर्लभम् ॥
ऋषयो देवगन्धर्वाः स्वधर्म्ममनुगामिनः ।
स्वर्गे तिष्ठन्ति विप्रर्षे ! ततो यास्यन्ति सद्गतिम् ॥
धर्म्ममर्थं च कामं च मोक्षं च ऋषिसत्तम ! ।
समाप्नोति पुमान्नित्यं नारायणपरायणः ॥"

इति वह्निपुराणम् ।

(निरुक्तिर्यथा, सांख्यसूत्रम् । ६ । २० ।
"मुक्तिरन्तरायध्वस्तेर्न परः ।"
यथाच, अष्टावक्रसंहितायाम् । १ । २ ।
"मुक्तिमिच्छसि रे तात ! विषयान् विषवत्त्यज ।
क्षमार्ज्जवदयातोषसत्यं पीयूषवद्भज ॥")

मुक्तिदं, क्ली, (मुक्तिं ददातीति । मुक्ति + दा + कः ।) भगवन्नामविशेषः । यथा,—
"अस्याश्चरच्च वक्ष्यं महासारच्च मुक्तिदम् ।
नानासिद्धिप्रदातारं परं चिन्तामुरङ्गकम् ।
गुह्यात् गुह्यतरं चान्यन्नाम चाष्टाक्षरं परम् ।
मन्त्रं सुखसुचार्थमग्नेयार्थप्रसाधकम् ।
प्राह नारायणायेति नमोऽन्तार्द्धो नियोजितः ।
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतो हरिः ।
माधवायेति वै नाम धर्म्मकामार्थमोक्षदम् ॥"

इति वह्निपुराणम् ।

मुक्तिदातरि, त्रि । (यथा, देवीभागवते १ । २ । १० ।
"तां ध्यात्वा सगुणां मायां मुक्तिदां निर्गुणां तथा ।")

मुक्तिमण्डपः, पुं, (मुक्तिदायकः मण्डपः । यद्वा मुक्तेर्मण्डपः ।) विश्वेश्वरस्य दक्षिणपार्श्वस्थमण्डपः । यथा,—
"निमेषमात्रं स्थितचित्तवृत्ता-
स्तिष्ठन्ति ये दक्षिणमण्डपेऽत्र ।
अनन्यभावा अपि गाढ़मानसा
न ते पुनर्गर्भशयासुपासते ॥"

इति काशीखण्डम् ।

श्रीजगन्नाथमन्दिरदक्षिणपार्श्वस्थमण्डपश्च ।

मुक्तिमुक्तः पुं, (मुक्त्या मोचनेन मुक्तः हीनः ।) शिवकम् । इति रत्नमाला ।

मुखं, क्ली, (खनति विदारयति अन्नादिकमनेन खन्यते विधात्रा सुखमनेति वेति । खन् + "खित्-खनेर्मुट् चोदात्तः ।" उणा० । ५ । २० । इति करणे अप् । स च खित् सङ्गमश्च ।) शरीरावयवविशेषः । स तु सुखविवरम् । (तन्निरुक्तिर्यथा,—
'प्रजाक्षणा यतः खातं तस्मादाहुर्मुखं बुधाः ।'
इत्यमरटीकाधृतम् ।)
कवयस्तु तदुपचिते समुदाये प्रयुञ्जते । इति भरतः । तत्तु गर्भस्थस्य पञ्चमासेर्भवति । इति सुखबोधः । तत्पर्य्यायः । वक्त्रम् २ वदनम् ३ तुण्डम् ४ आननम् ५ लपनम् ६ । इत्यमरः । २ । ६ । ८६ । (यथा, नैषधचरिते ८ । ४४ ।
"सुखं विसृज्य वसितस्य धारया
दृषेव नासापथधावनश्रमः ।")

तस्य स्वरूपं यथा,—
'ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च ।
गलो गलादि सकलं वक्त्राङ्गं सुखमुच्यते ।'

इति भावप्रकाशः ।

रतिक्रियायां स्त्रीसुखस्य कोहात् स्वबालकसुखस्य च पुंसने गुह्यत्वं यथा,—
"मक्षिका सन्तता धारा मार्ज्जारो ब्रह्मविन्दवः ।
स्त्रीसुखं बालकसुखं न दृष्टं मनुरब्रवीत् ।"

इति कर्म्मलोचनम् ॥ * ॥

निःसरणम् । इत्यमरः । २ । १ । १६ ॥ तत्तु यज्ञस्य निष्क्रमणप्रवेशनवर्त्म । इति सर्व्वधराध्यः । यज्ञादिद्वारप्रवेशः । इति स्वामी । यज्ञमण्डपादेः प्रवेशनिर्गमः । इति कोकटः । यज्ञाङ्गादिनिःसरणपथः । इति रमानाथः । इत्यमरटीकायां भरतः ॥ प्रारम्भः । (यथा, रघुवंशे । १ । १ ।
"अथेक्षितं भर्तुरपस्थितोदयं
सखीजनोद्धीक्षणकौतुकीसुखम् ।

निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा दौर्हृदलक्षणं दधौ ।"
"कौसुद्याः सुखं प्रारम्भम् ।" इति तट्टीकायां मल्लिनाथः ।) उपायः ॥ सन्धिविग्रहः ॥ (यथा, दशरूपके । १ । २३ ।
"सुखं बीजसमुत्पत्तिर्नानार्थरसमम्भवा ।
अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ॥")
नाटकादेः प्रारम्भः । इति मेदिनी । खे, ४ ॥ आद्यम् ॥ (यथा, रामायणे । २ । ५० । ७ ।
"अचक्षुर्विषयं प्रायाद् यथाकैः चन्द्रसुखे ॥")
प्रधानम् ॥ (यथा, महाभारते । २ । ३८ । २७—२९ ।
"राजा सुखं मनुष्याणां नदीनां सागरो सुखम् ।
नक्षत्राणां सुखं चन्द्र आदित्यस्तेजसां सुखम् ॥
पर्व्वतानां सुखं मेरुर्गरुडः पततां सुखम् ।
सदेवकेषु लोकेषु भगवान् केशवो सुखम् ॥")
ग्रन्थः । नाटकः । वेदः । इति शब्दरत्नावली ॥ (द्वारम् । यथा, रघुवंशे । १ । २८ ।
"लिपेर्यथावद्ग्रहणेन वाङ्मयं
नदीसुखेनेव समुद्रमाविशत् ॥"
"नद्या सुखं द्वारम् । सुखन्तु वदने सुखारम्भे द्वाराभ्युपाययोरिति यादवः ।" इति तट्टीकायां मल्लिनाथः ॥ अग्रभागः । यथा, हठयोगप्रदीपिकायाम् । ३ । ५ ।
"तस्मात् सर्व्वप्रयत्नेन प्रबोधयितुमीश्वरीम् ।
ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासं समाचरेत् ॥")
सुखः, पुं, डहुः । यथा,—
'लकुचो लिकुचो गुप्तः खगवक्त्रो सुखो डहुः ।'
इति शब्दचन्द्रिका ॥
सुखगन्धकः, पुं, (सुखे गन्धः अस्मात् । कप् ।) पलाण्डुः । इति राजनिर्घण्टः ॥
सुखघण्टा, स्त्री, (सुखे घण्टेव शब्दोऽस्मात् ।) कुलकुलीध्वनिः । इति त्रिकाण्डशेषः ॥
सुखचीरी, स्त्री, (सुखस्य चीरं वस्त्रविशेष इव । सुखचीर + स्वार्थे ङीष् ।) जिह्वा । इति शब्दमाला ॥
सुखजः, पुं, (सुखात् जायते इति । जन् + डः ।) ब्राह्मणः । इति पुराणम् ॥ वक्तजाते त्रि ॥
सुखतीर्थं, त्रि, (सुखस्य इति । सुख + तसिल् । सुखतः । ततः "सुखपार्श्वशब्दाभ्यां तसन्ताभ्यामीयप्रत्ययो वक्तव्यः ।" ४।३।६०। इत्यस्य वार्त्तिकोक्त्या ईयः । "सुखपार्श्वतसोर्जोपच ।" ४ । २ । १३८ । इत्यत्र काशिकोक्तेश्च टिलोपः ।) सुखसम्बन्धि । इति सिद्धान्तकौमुदी ॥
सुखदूषणः, पुं, (सुखं दूष्यते अनेनेति । दुष् + णिच् + करणे ल्युट् ।) पलाण्डुः । इति राजनिर्घण्टः ॥
सुखदूषिका, स्त्री, (सुखं दूषयति विवर्णं करोतीति । दुष् + णिच् + ण्वुल् टाप् अत इत्वञ्च ।) सुखजातक्षुद्ररोगविशेषः । वयसुफोड़ा इति भाषा । तल्लक्षणमाह ।
"ग्राम्यलीकण्टकप्रख्याः कफमारुतपित्तजाः ।
जायन्ते पिड़का यूनां श्वेताल्पा सुखदूषिकाः ।"
प्रख्याः सदृशाः । एता यूनामेव सुखे भवन्ति स्वभावात् ॥ * ॥ अथ तच्चिकित्सा ।
"अङ्गुलस्य चतुर्थांशो सुखे लेपः कनिष्ठकः ।
मध्यमस्तु त्रिभागः स्यादुत्तमोर्द्धाङ्गुलो भवेत् ॥
स्थितिकालोऽपि तस्योक्तो यावत् कण्डूो न शुष्यति ।
शुष्कस्तु गुणहीनः स्यात्तथा दूषयति त्वचम् ॥"
सुखलेपमाह ।
"लोध्रधान्यवचाशैवलाहरिद्रापिड़कापहः ।
तद्वद्गोरोचनायुक्तं मरिचं सुखलेपनम् ॥
सिद्धार्थकवचाजोग्रैः सैन्धवैश्च प्रलेपनम् ।
वमनञ्च निहन्त्याशु पिड़कां यौवनोद्भवाम् ॥
केवलाः पयसा पिष्टाश्चोच्चाः ग्राम्यलिकण्टकाः ।
आलिप्तं नाशमेतेन भवेत् पद्मोपमं सुखम् ॥"
इति भावप्रकाशः ॥
सुखधावनं, क्ली, (सुखस्य धावनं । धावुण् ल्युट् वा ।) आस्यप्रक्षालनम् । सुखधोया इति भाषा । यथा, भावप्रकाशे ।
"पटोलनिम्बखण्डाम्लमालतीवनपल्लवैः ।
पञ्चपल्लवजः श्रेष्ठः कषायो सुखधावने ॥"
सुखधौता, स्त्री, (सुखं धौतं मार्ज्जितमनेनेति । धाव् + कर्म्मणि + क्तः स्त्रियां टाप् ।) ब्राह्मयष्टिका । इति शब्दचन्द्रिका ॥
सुखनिवासिनी, स्त्री, (सुखे निवसति या सा । नि + वस् + णिनिः स्त्रियां ङीप् । वाणीरूपत्वादस्याः सुखवासत्वम् ।) सरस्वती । इति केचित् ॥
सुखनिरीक्षकः, पुं, (सुखं निरीक्षते इति । निर् + ईक्ष् + ण्वुल् । उद्योगं विहायान्यसुखापेक्षित्वेनावस्थानादस्य तथात्वम् ।) आलसः । इति शब्दरत्नावली ॥
सुखपूरणं, क्ली, (सुखं पूर्य्यते अनेनेति । पूर् + करणे ल्युट् ।) गवृधः । इति वैद्यकम् ॥
सुखप्रियः, पुं, (सुखस्य प्रियः ।) नारङ्गः । इति भावप्रकाशः ॥ वक्तरोचके, त्रि ॥ (यथा, सुश्रुते चिकित्सास्थाने ३५ अध्याये ।
"सुखप्रियः स्थिरमदो विज्ञेयोऽनिलनाशकः ।")
सुखभूषणं, क्ली, (सुखं भूषयति रक्षित्वालङ्करोतीति । भूष् + णिच् + ल्युः ।) ताम्बूलम् । इति वैद्यकम् ॥
सुखमर्द्दनकः, पुं, (सुखं मर्द्दयति भूषयतीति । मर्द्द + ल्युः स्वार्थे कन् ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥ आस्यभूषके, त्रि । (सुखमर्द्दनमप्यत्र ॥)
सुखमोदः, पुं, (सुखस्य मोदः हर्षः अस्मात् ।) श्योनाकवृक्षः । इति राजनिर्घण्टः ॥
सुखयन्त्रणं, क्ली, (सुखं अश्वादीनां यन्त्र्यते सङ्कोच्यते येनेति यत्रि सङ्कोचने + करणे ल्युट् ।) कविका । यथा,—
"कवी खजीनं कविका कवियं सुखयन्त्रणम् ।"
इति हेमचन्द्रः । ४ । ३१६ ॥
सुखरः, त्रि, (सुखं अस्यास्तीति । सुख + अच् सुखिसुख्यमधो रः ।" ५ । २ । १०७ । इत्यत्र "रप्रकरणे खसुखकृच्छ्रेभ्य उपसंख्यानम् ।" इति काशिकोक्त्या सर्व्वस्मिन् वक्तव्ये रः । "निन्दितं सुखमस्यास्तीति रः ।"इत्यमरटीका ।) अप्रियवादी । तत्पर्य्यायः । दुर्मुखः २ अवद्यसुखः ३ । इत्यमरः । ३ । १ । ३६ ॥ (यथा,—
"एका भार्य्या प्रकृतिसुखरा पञ्चभा च द्वितीया ।"
इत्युद्भटः ॥
ग्रन्थायमानः । यथा, मृच्छकटिकनाटके १ अङ्के ।
"त्वां क्षपयिष्यति तु माल्यसमृद्धयोऽयं गन्धश्च भीरु ! सुखरांश्च नूपुरांश्च ।"
अव्ययायी । यथा, हितोपदेशे ।
"यदि कार्य्ये विपत्तिः स्यात् सुखरत्वञ्च दृश्यते ।")
सुखरः, पुं, (सुख + रः ।) काकः । ग्रहः । इति राजनिर्घण्टः ॥
सुखरोगः, पुं, (सुखस्य रोगः ।) वक्तामयः । (यथा, मार्कण्डेये । १५ । ३५ ।
"पङ्गुत्वं बधिरः कुष्ठी यक्ष्मणा च प्रपीड़ितः ।
सुखरोगाक्षिरोगैश्च गुदरोगैश्च बाध्यते ॥")
तत्र सुखस्य स्वरूपमाह ।
"ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च ।
गलो गलादि सकलं सम्प्राप्तं सुखसुच्यते ॥"
अथ सुखरोगाणां संख्यामाह ।
'खुरदाबोष्ठयोर्दन्तमूले तु दश षट् तथा ।
दन्तमूलौ रसज्ञायां यच्च खुर्नव तालुनि ।
कण्ठे सप्तादश प्रोक्ताश्चय; सर्व्वसरा; स्मृताः ।
एवं सुखामया; सर्व्वे सप्तषष्टिर्मता बुधैः ॥'
सुखरोगाणां निदानान्याह ।
'अनूपपिशितक्षीरदधिमाषादिसेवनात् ।
सुखमध्ये गदान् कुर्य्युः कुद्धा दोषाः कफोत्तराः ॥'
तत्रौष्ठरोगाः ।
तेषां निदानपूर्ब्बिकां संख्यामाह ।
'पृथग्दोषैः समस्तैश्च रक्तजो मांसजस्तथा ।
मेदोजश्चाभिघातोत्थ एवमष्टौष्ठजा गदाः ॥'
तत्र वातिकस्य लक्षणमाह ।
'कर्कशौ परुषौ स्तब्धौ ह्यरुणौ तीव्रसुप्तिनौ ।
दाल्येते परिपाट्येते ओष्ठौ मारुतकोपतः ॥'
परुषौ रूक्षौ । दाल्येते विदार्य्येते । परिपाट्येते किञ्चिद्विदीर्य्येते ॥ पैत्तिकमाह ।
'पीयेते पिड़काभिस्तु सरक्ताभिः समन्ततः ।
सदाहपाकपिड़कौ पीताभासौ च पित्ततः ॥'
श्लैष्मिकमाह ।
'सवर्णाभिस्तु पीयेते पिड़काभिरवेदनौ ।
कण्डूमन्तौ कफादोष्ठौ पिच्छिलौ श्वेतलौ गुरू ॥'
सान्निपातिकमाह ।
'सकृत् सर्व्वौ सकृत् पीतौ सकृत् श्वेतौ तथैव च ।
सन्निपातेन विज्ञेयावनेकपिड़कान्वितौ ॥'

रक्तजमाह ।
'खर्जूरफलवर्णाभिः पिडकाभिर्निपीड़िनौ ।
रक्तोपसृष्टौ रुधिरं स्रवन्तौ श्लेष्मितप्रभौ ॥'
मांसजमाह ।
'मांसदुष्टौ गुरू स्थूलौ मांसपिण्डवदृश्यतौ ।
जन्तवश्चाच मूर्च्छन्ति नरस्योभयतो मुखात् ॥'
जन्तव: कृमय: । मूर्च्छन्ति वर्द्धन्ते । मुखादुभयत: सकर्णयो: ॥ * ॥ मेदोजमाह ।
'सर्पिर्मेदप्रतीकाशो मेदसा कण्डुरौ गुरू ।
स्वच्छस्फटिकसङ्काशमास्रावं स्रवतो भृशम् ॥'
अभिघातजमाह ।
'चतजाभौ विदीर्य्येते पीड्येते चाभिघातत: ।
मथितौ च समाख्यातावोष्ठौ कण्डूसमन्वितौ ॥'
मथितौ स्फुटितावित्र । अतएव चतजाभौ रुधिराभाविति सङ्गतम् ॥ * ॥ अथौष्ठरोगाणां चिकित्सा ।
'गलदन्तमूलदग्नच्छेद्येषु रोगा: कफास्रभूयिष्ठा: ।
तस्मादेतेष्वसृग्दुधिरं विस्रावयेद्दृढम् ॥
चतुर्विधेन स्नेहेन मधूच्छिष्टयुतेन च ।
वातघ्नैश्चाभ्यञ्जनं कुर्य्यान्नाड़ीस्वेदच बुद्धिमान् ॥'
चतुर्विधेन स्नेहेन तैलघृतवसामज्जरूपेण ।
वेधं शिराणां वमनं विरेकं
तिक्तस्य पानं रसभोजनच ।
ग्रीता: प्रदेहा: परिषेचनच
पित्तोपसृष्टेष्वधरेषु कुर्य्यात् ॥
शिरोविरेचनं धूम: स्वेद: कवल एव च ।
क्षते रक्ते प्रयोक्तव्यं ओष्ठकोपे कफात्मके ॥
मेदोजे स्फोटिते भिन्ने ग्रोधिते कवलो हित: ।
प्रियङ्गु त्रिफला लोध्रं सक्षौद्रं प्रतिसार-
णम् ॥'
प्रतिसारस्य विधिमाह ।
'दन्तजिह्वासुखानां यच्चूर्णकल्कावलेहने: ।
ग्रनैर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ॥
ओष्ठरोगेष्वशेषेषु दृष्ट्वा दोषसुपाचरेत् ।
तेषु व्रणत्वं यातेषु व्रणवत् सुपाचरेत् ॥'
अथ दन्तवेष्टरोगा: । तत्र दन्तवेष्टरोगाणां नामानि संख्याचाह ।
'ग्रीतादो गदित: पूर्व्वं दन्तपुप्पुटकस्तथा ।
दन्तवेष्ट: ग्रेग्निरच्च महाग्रेग्नि एव च ॥
तत: परिदर: प्रोक्तस्ततस्तृण्कुग्र: स्मृत: ।
वैदर्भश्च तत: प्रोक्त: स्वलिवर्द्धन एव च ॥
अधिमांसकनामा च दन्तनाथश्च पञ्च च ।
दन्तविद्रधिरप्यत्र दन्तवेष्टेषु षोड़ग्र ।'
तत्र ग्रीतादस्य लक्षणमाह ।
'ग्रोणितं दन्तवेष्टेभ्यो यत्राकस्मात् प्रवर्त्तते ।
दुर्गन्धीनि सकृष्णानि उत्क्लेदीनि स्फुटानि च ॥
दन्तमांसानि ग्रीर्य्यन्ते पच्यन्ति च परस्परम् ।
ग्रीतादो नाम स व्याधि: कफग्रोणितसम्भव: ॥'
दन्तवेष्टेभ्य: दन्तवेष्टनमांसेभ्य: । अकस्मात् अभिघातं विना ग्रीर्य्यन्ते पतन्ति । पच्यन्ति च परस्परं पाकोन्मुखा मांसानि ग्रोणितं पच्यन्ति ग्रोणितं मांसानि पचति ॥ दन्तपुप्पुटमाह ।
'दन्तयोश्चिबु वा यत्र शयथुर्जायते महान् ।
दन्तपुप्पुटको नाम स व्याधि: कफरक्तज: ॥'
दन्तवेष्टमाह ।
'स्रवन्ति पूयं रुधिरं चला दन्ता भवन्ति च ।
दन्तवेष्ट: स विज्ञेयो दुष्टग्रोणितसम्भव: ॥'
अत्र दन्तमूलानीति कर्त्तृपदमध्याहरणीयम् ॥
ग्रैग्निरमाह ।
'शयथुर्दन्तमूलेषु रुजावान् कफवातज: ।
लालास्रावी कण्डूरच विज्ञेय: ग्रैग्निरो गद: ॥
महाग्रैग्निरमाह ।
'दन्तास्थलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ।
यस्मिन् स सर्व्वजो व्याधिर्महाग्रैग्निरसंज्ञक: ॥'
तालु चाप्यवदीर्य्यते चकारात् दन्तवेष्टौ चाप्यवदीर्य्येते । सन्नराजान् मारकव्याधं यत आह भोज: । महाग्रैग्निर इत्येष सन्नराजान् निह-न्यत्सन् ॥ * ॥ परिदरमाह ।
'दन्तमांसानि ग्रीर्य्यन्ते यस्मिन् स्रवति चाप्यसृक् ।
पित्तासृक्कफजो व्याधिर्ज्ञेय: परिदरो हि स: ॥'
उपकुग्रमाह ।
'वेष्टेषु दाह: पाकश्च ताभ्यां दन्ताश्चलन्ति हि ।
व्याघट्टिता: प्रस्रवन्ति ग्रोणितं मन्दवेदनम् ॥
व्याध्यायते मुते रक्ते मुखं पूति च जायते ।
यस्मिन्नुपकुग्र: स स्यात् पित्तरक्तसमुद्भव: ॥'
व्याघट्टिता: हृष्टा: ॥ * ॥ वैदर्भमाह ।
'दृष्टेषु दन्तमूलेषु संरम्भो जायते महान् ।
चलन्ति च रदा यस्मिन् स वैदर्भोऽभिघातज: ॥'
संरम्भ: ग्रोथ: । चलन्ति चेति चकाराद्दैहगा-दाहपाका: ॥ * ॥ स्वलिवर्द्धनमाह ।
'मारुतेनाधिको दन्तो जायते तीव्रवेदन: ।
स्वलिवर्द्धनसंज्ञोऽसौ संजाते वक् प्रजाय्यति ॥'
सञ्जाते दन्ते ॥ * ॥ अधिमांसकमाह ।
द्वाग्रे पश्चिमे दन्ते महान् ग्रोथो महारुज: ।
जाड्यस्रावी कफस्रतो विज्ञेय: सोऽधिमांसक: ॥
द्वाग्रे द्वनुभवे पश्चिमे दन्ते ॥ * ॥ पञ्चदन्त-नाड़ीराह ।
'दन्तमूलगता नाड्य: पञ्च ग्रेया यथेरिता: ।'
यथेरिता यथा नाड़ीग्रन्थे वातपित्तकफसन्नि-पातागन्तुनिमित्ता: पञ्चनाड्य: कथितास्तथाऽपीत्यर्थ: । * ॥ दन्तविद्रधिमाह ।
'दन्तमांसमलै: सार्द्धं वाय्वाद्यान्न:शयथुर्महान् ।
सदाहरुक् सवैड्डिम: पूयास्रं दन्तविद्रधि: ॥'
दन्तमांसमलै: दन्तवेष्टगतदोषै: । सार्द्धं: सरक्तै-र्द्वैतुभि: ॥* ॥ अथ दन्तवेष्टरोगाणां चिकित्सा ।
'ग्रीतादे क्षतरक्ते तु लोध्रे नागरसर्षपान् ।
निष्काथ्य त्रिफलाचापि कुर्य्याद्गण्डूषधारणम् ॥
'कासीसलोध्रसाम्भानि:त्रिफलासर्ज्जिरुक्षतेजाड्या: ।
एषां चूर्णं मधुयुक् ग्रीतादे पूतिमांसहरम् ॥'
तेजाड्या तेजवल्कल इति लोके ।
'तैलं घृतं वा वातघ्नं ग्रीतादे संप्रशस्यते ।'* ।
'दन्तपुप्पुटके कार्य्यं तरुणे रक्तमोक्षणम् ॥
सपल्लवक्ष: क्षार: सक्षौद्र: प्रतिसारणम् ।

शिरोविरेकश्च हितो नस्यं स्निग्धश्च भोजनम् ॥
विस्राविते दन्तवेष्टे व्रणवत् प्रतिसारयेत् ।
लोध्रपत्तङ्गमधुकलाक्षाचूर्णैर्मधुप्लुते: ॥'
प्रतिसारयेत् अङ्गुल्या घर्षयेत् । पत्तङ्गं पीतकं इति लोके ।
'गण्डूषे क्षौरिणो योज्या: सक्षौद्रक्षतशर्करा: ।
चलदन्तस्थैर्य्यकरं कार्यं वकुलचर्ल्लयम् ॥
भद्रमुस्ताभयाखदिरङ्गारिष्टपक्षवे: ।
गोमूत्रपिष्टैर्गुटिकां छायाशुष्कां प्रकल्पयेत् ॥
तां निधाय मुखे ग्रीथमूलदन्तातुरो नर: ।
नात:परतरं किञ्चिच्चलदन्तस्य भेषजम् ॥'
भद्रमुस्तादिवटिका ।
'तुला धृतं नीलसहाचरस्य
क्षौद्राम्भसा संश्रपयेद्यथावत् ।
ततश्चतुर्भागरसेन तैलं
पचेच्छनैरर्द्धपलप्रमाणै: ॥
कल्कैरनन्ताखदिरारिमेद-
जङ्घाह्वयष्टीमधुकोत्पलानाम् ।
तत्तैलमाश्वेव धृतं सुखेन
स्थैर्य्यं दिजानां विदधाति सद्य: ॥'
नीलसहाचर: नीलपुष्पकटरेया । अनन्ता दुरालभा तदलाभे यवासो ग्राह्य: । अरिमेदो दुर्गन्धखदिर: । सहाचराद्यतैलम् ॥ * ॥
'ग्रैग्निरे क्षतरक्ते तु लोध्रसुस्तारसाञ्जने: ।
सक्षौद्रै: प्रस्रते वेपो गण्डूषे क्षौरिणो हिता: ॥
क्रियां परिदरे कुर्य्याच्छीतादोक्तां विचक्षण: ।
संग्रीथ्योभयत: कार्यं शिरश्चोपकुग्रे तथा ॥
काकोदुम्बरिकापत्रैर्व्रणं विस्रावयेद्भिषक् ।
लवणै: क्षौद्रयुक्तैश्च सक्षौद्रै: परिसारयेत् ॥*॥
'ग्रन्थेर्योत्तरतश्चैव दर्भै: दन्तमूलानि ग्रोधयेत् ।
तत: क्षारं प्रयुञ्जीत क्रिया: सर्व्वाश्च ग्रीतजा: ॥
उद्धृत्याधिकदन्तन्तु ततोऽग्निमवचारयेत् ।
क्रमिदन्तकवच्चाच विधि: कार्य्यो विजानता ॥'
इयं स्वलिवर्द्धनस्य चिकित्सा । * ॥
'छित्त्वाधिमांसं सक्षौद्रैरेतैश्चूर्णैरुपाचरेत् ।
वचातेजोवतीपाठाखर्ज्जिकायावशूकजै: ॥'
तेजोवती तेजवल्कलं स्वर्णजीवन्तीति च ।
'क्षौद्रद्वितीयापिप्पल्य: कवले चात्र कीर्त्तिता: ।
पटोलनिम्बत्रिफलाकषायश्चाच धावने ॥'*॥
'नाड़ीव्रणहरं कर्म्म दन्तनाड़ीषु कारयेत् ।
यद्दन्तमध्ये जायेत नाड़ीदन्तं तदुद्धरेत् ॥
छित्त्वा मांसानि ग्रस्त्रेण यदि नोपरिसो भवेत् ।
उद्धृत्य च दहेच्चापि क्षारेण क्षत्रजनेन वा ॥
भिनत्त्युपेक्षिते दन्ते हनूकाश्चिगतं ध्रुवम् ।
सशल्यं दग्धनं तस्मादुद्धरेद्भिषगस्थि च ॥
उद्धृते तूत्तरे दन्ते ग्रोणितं प्रस्रवेदति ।
रक्ताभिषेकात् पूर्व्वोक्ता घोरा रोगा भवन्ति हि ।
काश: संजायते जन्तुरर्दितं तस्य जायते ।
चलमप्युत्तरं दन्तमतो नैवोद्धरेद् भिषक् ॥
धावनं जातिमदनस्वादुकण्टकखादिरै: ।"
कषायैरितिशेष: ।
कषायैर्जातिमदनकटुका-स्वादुकण्टकै: ।

'मञ्जिष्ठालोध्रखदिरपट्टाङ्केष्वापि यत् कृतम्।
तैलं तत्साधितं तत्र हन्यात् दन्तगतां गतिम्॥'
जात्यादितुष्टयस्य कषायेण मञ्जिष्ठादितुष्टयस्य च कषायेण तैलमिदं पचेत्। जातिः चमेली इति लोके। तस्याः पत्रं ग्राह्यम्। मदनो धुत्तुरस्तस्यापि पत्रमत्र ग्राह्यम्। करञ्जो डहडकटार तस्याः मूलं ग्राह्यम्। स्वादुकण्टकोगोक्षुरः तस्य पञ्चाङ्गं ग्राह्यम्। जात्यादितैलम्॥ * ॥

'विद्यध्युक्तं विधिं युक्तं विदध्याद्दन्तविद्रधौ।
शस्त्रकर्मणि नरस्तत्र कुशलेनैव कारयेत्॥'*॥
अथ दन्तरोगाः। तत्र रोगाणां नामानि संख्यामाह।

'दालनः कथितः पूर्वं कृमिदन्तक एव च।
प्रोक्तो भञ्जनको दन्तहर्षो वै दन्तशर्करा॥
कपालिकाच कथिता ग्रावदन्तक एव च।
करालसंज्ञ इत्यष्टौ दन्तरोगाः प्रकीर्तिताः॥'
तत्र दालनस्य लक्षणमाह।

'दीर्यमाणेष्विव रुजा यत्र दन्तेषु जायते।
दालनो नाम स व्याधिः सदागतिनिमित्तजः॥'
कृमिदन्तकमाह।

'क्षणक्षिप्तचलस्रावी ससंरम्भो महारुजः।
अनिमित्तरुजो वातात् स ज्ञेयः कृमिदन्तकः॥'
ससंरम्भः दन्तमूलशोथयुक्तः। तत्रैव स्रावो बोद्धव्यः। अनिमित्तरुजः अवघट्टनादिनिमित्तं विनैव महारुजावान्॥ * ॥ भञ्जनकमाह।

'वक्रं वक्रं भवेद्यत्र दन्तभङ्गश्च जायते।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञकः॥'
दन्तहर्षमाह।

'शीतरूक्षप्रवाताम्बुसंगमासहा द्विजाः।
यत्र स्युर्वातपित्ताभ्यां दन्तहर्षः स कीर्तितः॥'
दन्तशर्करामाह।

'मलो दन्तगतो यस्तु कफश्चानिलशोषितः।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा॥'
शर्करा सिकता॥ * ॥ कपालिकामाह।

'कपालेष्विव दीर्यन्तेऽस्य दन्तेषु समवेषु च।
कपालिकेति विज्ञेया दन्तच्छित् दन्तशर्करा।'
कपालानि ह्यस्थयघटादिघटकानि तेष्विव। समवेषु दन्तेषु मलसंहितदन्तावयवेषु दीर्यन्तेऽस्य या दन्तशर्करा सा कपालिकेति विज्ञेया। सा कपालिका दन्तच्छित् दन्तनाशिनी॥*॥
ग्रावदन्तकमाह।

'योऽत्यङ्गिश्लेष्मपित्तेन दग्धो दन्तस्त्रयेषतः।
ग्रावतां नीलतां वापि गतः स ग्रावदन्तकः॥'
दग्धः दग्ध इव॥ * ॥ करालमाह।

'शूले शूले प्रकुरुते यत्र दन्ताश्रितोऽनिलः।
करालान् विकटान् दन्तान् स करालो न सिध्यति॥'
करालान् भयानकान्। अयं सुश्रुतेनोक्तः। संग्रहकारेण गृहीतश्च॥*॥ अथ दन्तरोगाणां चिकित्सा।

'तेषां क्षाराग्निं चीरं पृथक् प्रथमितं पचेत्।
द्रव्यैः पलमितैरेतैः क्षाराग्न्यापि चतुर्गुणैः॥
लोध्रकट्फलमञ्जिष्ठापद्मकैरुशकैः।
चन्दनोत्पलयष्ट्याह्वैस्तत्तैलं वदने धृतम्॥'
कट्फलस्थाने पत्तङ्ग इति च पाठः।

'दालनं दन्तचालश्च दन्तमोक्षं कपालिकाम्।
प्रीतादं पूतिवक्त्रञ्च विरुग्णं विरसास्यताम्॥
हन्यादासु गदानेतान् कुर्याद्दन्तानपि स्थिरान्।
क्षाराद्यमिदं तैलं दन्तरोगेषु पूजितम्॥'
क्षाराद्यतैलम्॥ * ॥

'जयेत् विस्रावणैः स्विन्नमचलं कृमिदन्तकम्।
तथावपीड्यैर्व्रातघ्नैः क्षेहगण्डूषधारणैः॥
भद्रदार्व्यादिवर्षाभूवृषैः स्निग्धेश्च भोजनैः।
कृमिदन्तापहं कोष्णं हिङ्गु दन्तान्तरे स्थितम्॥
दृष्टतीभूमिकदम्बीपञ्चाङ्गुलकण्टकारिकाक्वाथैः।
गण्डूषक्षेलयुतः कृमिदन्तकवेदनामथनः॥
नीली वायसजङ्घा कटुतुम्बी मूलमेकैकम्।
सक्षौद्रं दशनविधृतं दशनकृमिपातनं प्राहुः॥
क्षेहानां कवलाः कोष्णाः सर्पिषक्षेहितस्य च।
निर्यूहाद्यानिलघ्नानां दन्तहर्षप्रमर्दनाः॥'
क्षेहितस्य सर्पिषः स्निहता पक्वस्य सर्पिषः कवल इत्यर्थः।

'क्षेहिकोऽत्र हितो धूमो नस्यं क्षेहिकमेव च।
पेया रसा यवाग्वश्च क्षीरसन्तानिकाहृतम्॥
शिरोविरिक्तिसक्तापि क्रमो यश्चानिलापहः।'
अत्र दन्तहर्षे।

'अच्छिद्रं दन्तमूलानि शर्करासुहरेद् भिषक्।
क्षाराग्न्यौ मेधुयुतैस्तत्तां प्रतिसारयेत्॥
दन्तहर्षक्रियां चात्र कुर्यान्निरवशेषतः।
कपालिका ह्यच्छतमा तत्राप्येषा क्रिया हिता।'
अत्र दन्तशर्करायाम्। एषा क्रिया दन्तहर्षक्रिया॥ * ॥

'फलान्यम्लानि शीतानि रूक्षान्नं दन्तधावनम्।
तथातिकठिनं भक्ष्यं दन्तरोगो विवर्जयेत्॥'

अथ शिङ्गारोगाः।

तत्र शिङ्गारोगाणां निदाननामसंख्याः प्राह।

'वातजः पित्तजश्चापि कफजोऽलासंज्ञकः।
उपजिह्विका च गदा शिङ्गायां पञ्च कीर्तिताः॥'
तत्र वातजस्य लक्षणमाह।

'शिङ्गानिलेन स्फुटिता प्रसुप्ता
भवेच्च शाकच्छदनप्रकाशा।'
स्फुटिता मनाग्विदीर्णा। प्रसुप्ता रसानभिज्ञतया सुप्तेव। शाकच्छदनप्रकाशा शाको मरुभूमिजो द्रुमस्तद्वत् कण्टकचिता॥ * ॥ पित्तजमाह।

'पित्तात् सदाहैरुपचीयते च
दीर्घैः सरक्तैरपि कण्टकैश्च॥'
अयं रोगो लोके जली इति ख्यातः॥ * ॥
कफजमाह।

'कफेन गुर्वी बहला चिता च
मांसोच्छ्रयैः श्लाक्ष्णकण्टकाढ्यैः।'
बहला स्थूला। मांसोच्छ्रयैः मांसजकण्टकैः॥
अलासमाह।

'जिह्वातले यः सयथुः प्रगाढः
सोऽलासंज्ञः कफरक्तसर्जिः।
जिह्वां स तु स्तम्भयति प्रसह्य
मूले च जिह्वा शूयमेति पाकम्॥'
प्रगाढः प्रकर्षेण गाढो दारुणः। कफरक्तसर्जिः कफरक्ताभ्यां सर्जितो यस्य कफरक्तज इत्यर्थः। जिह्वास्तम्भेन वायुरुक्तश्च बोद्धव्यः। शूयपाकेन पित्तञ्च। अतस्त्रिदोषोऽयमसाध्यश्चास्य॥*॥
उपजिह्विकामाह।

'जिह्वाग्रमूपश्चयथुर्यदि जिह्वा-
सुत्तान्य जातः कफपित्तयोनिः।
प्रसेककण्डूपरिदाहयुक्तः
प्रकथ्यतेऽसावुपजिह्विकेति॥'
जिह्वाग्ररूपो जिह्वाग्राकृतिः॥ * ॥ अथ जिह्वारोगाणां चिकित्सा।

'जिह्वागतविकाराणां शस्तं शोणितमोक्षणम्।
गुडूचीपिप्पलीनिम्बकवलः कटुभिर्मुखः॥
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक् चिकित्सितम्।
कण्ठजेष्वनिलोत्थेषु तत्कार्यं भिषजा खलु॥
पित्तजे परिदग्धे तु निःसृते दुष्टशोणिते।
प्रतिसारणगण्डूषनस्यानि मधुरं हितम्॥
कण्ठकेषु कफोत्थेषु लिखितेष्वग्रजत्रुषु।
पिप्पल्यादिर्मधुयुतः कार्यस्तु प्रतिसारणः॥
उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत्।
शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत्॥
शोषक्षाराभयावह्निचूर्णमेतत् प्रघर्षणम्।
उपजिह्वाप्रशान्त्यर्थमभिलेखेषु पाचयेत्॥'
अथ तालुरोगाः। तत्र तालुरोगाणां नामानि संख्यामाह।

'गलशुण्डी तुण्डिकेरी तालुशोषः कच्छप एव च।
तालुबुंदश्च कथितो मांससंघात एव च॥
तालुपुप्पुटनामा च तालुशोषस्तथैव च।
तालुपाकश्च कथितास्तालुरोगा अमी नव॥'
तत्र गलशुण्डीलक्षणमाह।

'श्लेष्मास्रगभ्यां तालुमूलात् प्रसूतो
दीर्घः शोथो भासवस्तिप्रकाशः।
श्यावाकाश्वासजुष्टं वदन्ति
वैद्या व्याधिं कण्ठशुण्डीति तज्ज्ञाः॥'
भासवस्तिप्रकाशः वातपूरितचर्मपुटतुल्यः॥*॥
तुण्डिकेरीमाह।

'शोथः स्थूलस्तोददाहप्रपाकी
प्रागुक्ताभ्यां तुण्डिकेरी मता तु।'
प्रागुक्ताभ्यां श्लेष्मास्रगभ्याम्। तुण्डिकेरी वनकार्पासीफलं तत्तुल्येति॥*॥ अधुनमाह।

'शोथस्तन्द्रा लोहितः शोणितोत्थो
श्लेष्मोत्थः सव्वरस्त्रीव्ररुक् च।'
कच्छपमाह।

'कूर्मोन्नतो वेदनोऽग्रौष्ठजन्मा
रोगो ज्ञेयः कच्छपः श्लेष्मणा स्यात्।'
कूर्मोन्नतः मध्ये शोथं प्रान्ते गतः॥ * ॥
तालुबुंदमाह।

'पद्माकारं तालुमध्ये तु शोथं
विद्यादस्रादर्बुदं पित्तलिङ्गम् ।'
पद्माकारं पद्मकर्णिकाकेसरैरिव पार्श्वतो दीर्घ-
मांसाङ्कुरैर्वेष्टितम् ।*। मांससंघातमाह ।
'दुष्टं मांसं श्लेष्मणा नीरुजञ्च
ताम्रन्तस्थं मांससंघातमाह ।'
तालुपुप्पुटमाह ।
'नीरुक् स्रावी कोलमात्रः कफात्मा
मेदोयुक्तः पुप्पुटस्तालुदेशे ।
तालुशोषमाह ।
'शोषोऽत्यर्थं दीर्यते चापि तालु
स्रावो वातात्तालुशोषोऽयमुक्तः ।'
तालुपाकमाह ।
'पित्तं कुर्यात् पाकमत्यर्थघोरं
तालुन्येनं तालुपाकं वदन्ति ।'
अथ तालुरोगाणां चिकित्सा ।
'कुष्ठोषवचाविन्धुकक्षाषाटाम्बवैः सह ।
सर्पीद्रैर्भिषजा कार्यं गलशुण्डीप्रघर्षणम् ।'
अथ: कैवर्तीमोथा गुडूचीति च लोके ।
'अङ्गुष्ठाङ्गुलिसन्दंशेनालभ्य गलशुण्डिकाम् ।
छेदयेन्मण्डलाग्रेण जिह्वोपरि तु संस्थिताम् ।'
मण्डलाग्रेण शस्त्रविशेषेण ।
'अतिच्छेदात् स्रवेद्रक्तं ततो हेतोर्म्रियेत च ।
हीनच्छेदाच्छ्लेष्मणो लालास्रावो भ्रम-
स्तथा ।
तस्मात् वैद्यः प्रयत्नेन दृष्टकर्मा विशारदः ।
गलशुण्डीं तु संछिद्य कुर्यात् प्राज्ञामिमां
क्रियाम् ।
पिप्पलीतिविषाकुष्ठवचामरिचनागरैः ।
क्षौद्रयुक्तैः सलवणैस्तत्तां प्रतिसारयेत् ।
वचामतिविषापाटाराखाकटुकरोहिणीः ।
निष्काथ्य पिचुमर्दञ्च कवलं तत्र कारयेत् ।
तुल्किकैर्मधुघे कूर्मे संघाते तालुपुप्पुटे ।
एष एव विधिः कार्यो विशेषः शस्त्रकर्मणि ।
तालुपाके तु कर्तव्यं विधानं पित्तनाशनम् ।
क्षीरक्षौद्रौ तालुशोषे विधिश्चानिलनाशनः ।'
अथ गलरोगाः । तत्र गलरोगाणां नामानि
संख्याञ्चाह ।
'रोहिणी प्रथमा प्रोक्ता कण्ठशालूक एव च ।
अधिजिह्वश्च वलयोऽलासनामैकविंशकः ।
ततो वृन्दः शुतघ्नी च गिलायुः कण्ठविद्रधिः ।
गलौघः प्रखरश्चैव मांसतानस्तथैव च ।
विदारी कण्ठशेषे तु रोगा अष्टादश स्मृताः ।'
तत्र प्रथमानामपि रोहिणीनां सामान्यसंप्राप्ति-
माह ।
'गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम् ।
गलोपसंरोधकरैस्त्रयाङ्कुरै-
र्निहन्त्यसून् व्याधिरयं हि रोहिणी ।'
अनिलः मूर्च्छितः प्रदुष्टः । पित्तकफौ च
मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः ।
ननु त्रयोऽपि मूर्च्छिताः एकदोषजाया अवि-
वक्षमाणत्वात् ।*। तस्य वातजाया लक्षण-
माह ।
'जिह्वासमन्तादभिवेदनास्तु
मांसाङ्कुराः कण्ठनिरोधनाः स्युः ।
सा रोहिणी वातकृता प्रदिष्टा
वातात्मकोपद्रवगाढ़युक्ता ।'
समन्तात् जिह्वायाः सर्वतः । वातात्मकोपद्रव-
गाढ़युक्ता स्तम्भादिभिरतिशूलेन युक्ता ।*।
पित्तजामाह ।
'क्षिप्रोद्गमाक्षिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्तजाता ।'
श्लेष्मजामाह ।
'श्लोतोनिरोधिन्यपि मन्दपाका
गुर्व्वी स्थिरा सा कफसम्भवा तु ।'
स्रोतोऽत्र कण्ठस्रोतः ।*। सन्निपातजामाह ।
'गम्भीरपाकित्यनिवार्य्यवीर्य्या
विदोषलिङ्गा त्रिभवा भवेत् सा ।'
रक्तजामाह ।
'स्फोटैश्चिता पित्तसमानलिङ्गा
साध्या प्रदिष्टा रुधिरात्मिका तु ।'
रक्तजेतरा संहारकत्वावधिमाह ।
'सद्यश्छिदोषजा हन्ति चाहात् कफसमुद्भवा ।
पक्षाहात् पित्तसंभूता सप्ताहात् पवनोत्थिता ।'
कण्ठशालूकमाह ।
'कोलास्थिमात्रः कफसम्भवो यो
यस्यिर्गले कण्टकशूकभूतः ।
खरः स्थिरः शस्त्रनिपातसाध्य-
स्तं कण्ठशालूकमिति ब्रुवन्ति ।'
कण्टकशूकभूतः कण्टकवच्छूकवच्च वेदनाजनकः ।
अधिजिह्वमाह ।
'जिह्वाश्रयः शयथुः कफात्तु
जिह्वोपरिष्टादधजेव मिश्रात् ।
श्लेष्मोधिजिह्वः खलु रोग एष
विवर्ज्जयेदागतयाकमेनम् ।'
अधजा मिश्रादेवेत्यन्वयः ।*। वलयमाह ।
'वलाग्र एवायतसुन्नतश्च
शोथं करोत्यन्नगतिं निवार्य्य ।
तं सर्व्वथैवाप्रतिवार्य्यवीर्य्यं
विवर्ज्जनीयं वलयं वदन्ति ।'
अलासमाह ।
'गले तु शोथं कुरुतः प्रदुष्टौ
श्लेष्मानिलौ श्वासरुजोपपन्नम् ।
मर्म्मच्छिदं दुस्तरमेतदाहु-
रलाससंज्ञं भिषजो विकारम् ।'
मर्म्मच्छिदं हृदयमर्म्मणि छेदेनैव वेदनाजनकम् ।
एकवृन्दमाह ।
'वृत्तोन्नतोन्नतः शयथुः सदाहः
सकच्छुरोऽपाक्यरुदुर्गुरुश्च ।
नाम्नैकवृन्दः परिकीर्त्यतेऽसौ
व्याधिर्म्बलाग्रः शतजप्रकृतः ।'
अन्तः गलमध्ये । अपाकी ईषत्पाकी । अरुदुः
ईषन्मृदुः ।*। वृन्दमाह ।
'सप्तप्रतं वृन्दमसन्दराहं
तीव्रज्वरं वृन्दसुदाहरन्ति ।
तत्रापि पित्तश्लेष्मजप्रकोपाद्-
विद्यात् सतोदं पवनात्मकन्तु ।'
शुतघ्नीमाह ।
'वर्त्तिर्यथा कण्ठनिरोधिनी तु
चिराति मात्रं पिण्डितं प्ररोहैः ।
अनेकरुक् प्राणहरी विदोषा
ज्ञेया शुतघ्नीसदृशी शुतघ्नी ।'
घना कठिना । अनेकरुक् वातपित्तकफलक्षणोद-
दाहकण्डादियुक्ता । शुतघ्नीसदृशी लौहकण्टक-
संछन्ना शुतघ्नी महती शिला तत्तुल्या यतः
प्राणहरी ।*। गिलायुमाह ।
'यस्यिर्गले त्वामलकास्थिमात्रः
स्थिरोऽत्यरुक् स्यात् कफरक्तमूर्च्छितः ।
संलक्ष्यते सक्तमिवावशिष्य
स शस्त्रसाध्यस्तु गिलायुसंज्ञः ।'
गलविद्रधिमाह ।
'सर्व्वं गलं प्राप्य समुत्थितो यः
शोथो रुजः सन्ति च यत्र सर्व्वाः ।
स सर्व्वदोषैर्गलविद्रधिस्तु
तस्यैव तुल्यः खलु सर्व्वतस्य ।'
गलौघमाह ।
'शोथो महान् यस्तु गलावरोधी
तीव्रज्वरो वायुगतेर्निहन्ता ।
कृष्णेन जातो रुधिरान्वितेन
गले गलौघः परिकीर्त्यतेऽसौ ।'
वायुगतेर्निहन्ता उदानवायुगतिरोधकः ।*।
खरशब्दमाह ।
'यस्याध्मानः श्वसिति प्रसक्तं
भिन्नस्वरः शुष्कविसृक्तकण्ठः ।
कफोपदिग्धेष्वनिलायनेषु
ज्ञेयः स रोगः श्वसनात् खरश्च ।'
ताम्यमानस्तमः पश्यन् । शुष्कविसृक्तकण्ठः
शुष्को विसृक्तोऽस्वाधीनः कण्ठो यस्य सः ।
अस्वाधीनता भुक्तं गिलितुमशक्यत्वात् । अनि-
लायनेषु वायुवर्त्मसु श्वसनात् वातात् ।*।
मांसतानमाह ।
'प्रतानवान् यः शयथुः सकष्टो
गलोपरोधं कुरुते क्रमेण ।
स मांसतानः कथितावलम्बी
प्राणप्रणुत् सर्व्वगतो विकारः ।'
प्रतानवान् विस्तारवान् । सकष्टः अतिशयितं
कष्टं यत्र सः ।*।
विदारीमाह ।
'सदाहनोदं शयथुं सताम्र-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्दहने विदारीं
पार्श्वे विशेषात् स तु येन शेते ।'
पार्श्वे विशेषात् स तु येन शेते स पुरुषो येन
पार्श्वेन विशेषाद्वाहुल्येन शेते तस्मिन् पार्श्वे सा
विदारी भवति इत्यर्थः ।*।

अथ गलरोगाणां चिकित्सा ।
'रोहिणीनाम्नु साध्यानां हितं स्रोतिमोक्ष-
णम् ।
वमनं धूमपानञ्च गण्डूषो नस्यकर्म वा ॥
वातजान्तु हृते रक्ते लवणैः प्रतिसारयेत् ।
सुखोष्णान् स्नेहगण्डूषान् धारयेच्चाप्यभीक्ष्णशः ॥
विस्राव्य पित्तसंभूतां सिताचौद्रप्रियङ्गुभिः ।
घर्षयेत् कवलो द्राक्षापरूषैः कपिलैर्हितः ॥
आगारधूमकटुकैः कफजां प्रतिसारयेत् ॥'
आगारधूम भुस इति लोके । कटुकानि शुण्ठी-
पिप्पलीमरिचानि ।
'श्वेताविड्ङ्गदन्तीषु तैलं सिद्धं ससैन्धवम् ।
नस्यकर्मण्यि हातव्यं कवले च कफोदये ॥'
श्वेता अपराजिता ।
'पित्तवत् साधयेद्दोषो रोहिणीं रक्तसम्भवाम् ।
विस्राव्य कण्डूघ्नालूकं साधयेत्तुण्डिकेरिवत् ॥
एककालं यवान्नं वा भुञ्जीत स्निग्धमक्षणः ।
उपनिह्वकवच्चापि साधयेदधिनिह्वकम् ॥
एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत् ।
एकवृन्दमिव प्रायो वृन्दञ्च समुपाचरेत् ॥
गिलायुञ्चापि यो व्याधिस्तञ्च ग्रन्थेन साधयेत् ।
अमर्म्मस्थं सुसम्पक्वं छेदयेत् गलविद्रधिम् ॥'
अथ सामान्यानां कण्ठरोगाणां चिकित्सा ।
'कण्ठरोगेष्वदष्टमोक्षैस्तीक्ष्णैर्नस्यादिकर्म्मभिः ।
चिकित्सकश्चिकित्सेत् कुशलोऽत्र समाचरेत् ॥
क्वाथं दद्याच्च दार्व्वीत्वङ्निम्बतार्क्ष्यैकलिङ्गकम् ।
हरीतकीकषायो वा हितो माक्षिकसंयुतः ॥
कटुकातिविषादारुपाठासुस्ताकलिङ्गकाः ।
गोमूत्रकथिताः पीताः कण्ठरोगविनाशनाः ॥
वृन्दीकाकटुकाक्षोद्रदार्व्वीत्वक्चित्रफलाघनम् ।
पाठां रसाञ्जनं दारु तैलोक्तेति सुचूर्णितम् ॥
चौद्रयुक्तं विधातव्यं गलरोगे महौषधम् ।
योगाश्चैते त्रयः प्रोक्ता वातपित्तकफापहाः ॥
यवाग्रजं तेजवतीञ्च पाठां
रसाञ्जनं दारु निशां सकृष्णाम् ।
चौद्रेण कुर्य्यात् गुटिकां सुखेन
तां धारयेत् सर्व्वगलामयेषु ।'
अथ समस्तसुखरोगाः । तत्र तेषां निदानं
संख्याञ्चाह ।
'पृथग्दोषैस्त्रयो रोगाः समस्तसुखजाः
स्मृताः ।'
तत्र वातिकस्य लक्षणमाह ।
"स्फोटैः सतोदैर्व्वदनं समन्ता-
द्यत्राचितं सर्व्वसरः सवातात् ॥ *॥
पैत्तिकमाह ।
'रक्तैः सदाहैः पिडकैः सपीतै-
र्यत्राचितं चापि स पित्तकोपात् ।'*॥
श्लैष्मिकमाह ।
'अवेदनैः कण्डुयुतैः सवर्णै
र्यत्राचितं चापि स वै कफेन ।'
अवेदनैः ईषदवेदनैः । यत उक्तं सुश्रुतेन ।
अल्पवेदनैरिति ॥*॥ सुखरोगेष्वसाध्यानाह ।
'ओष्ठप्रकोपे वर्ज्याः स्युर्मांसरक्तविदोषजाः ।
दन्तवेष्टेषु वर्ज्यौ तु चिलिङ्गगतिशौषिरौ ॥'
चिलिङ्गगतिः त्रिदोषजा नाड़ी । महाशौषि-
रञ्च ।
'दन्तेषु च न सिध्यन्ति स्यावदालनभञ्जनाः ।
जिह्वारोगेष्वलासस्तु तालुजेष्ववदन्तथा ॥
खरघ्नो बलयो वृन्दो बलाघ्नः स हि दारुणः ।
गलौघो मांसतानञ्च शतघ्नी रोहिणी गले ॥
असाध्याः कीर्त्तिता ह्येते रोगा दश नवो-
त्तराः ।
तेषु चापि क्रियां वैद्यः प्रत्याख्याय समाचरेत् ॥'
अथ समस्तसुखरोगाणां चिकित्सा ।
'वातात् सर्व्वसरं चूर्णैर्लवणैः प्रतिसारयेत् ।
तैलं वातहरैः सिद्धं हितं कवलनस्ययोः ॥*॥
पित्तात्मके सर्व्वसरे शुद्धकायस्य देहिनः ।
सर्व्वपित्तहरः कार्य्यो विधिर्मधुरशीतलः ॥*॥
प्रतिसारणगण्डूषधूमसंशोधनानि च ।
कफात्मके सर्व्वसरे क्रमं कुर्य्यात् कफापहम् ॥*॥
सुखपाके सिरावेधः स्निग्धस्य विरेचनम् ।
मधुसूक्ष्मघृतक्षौरैः शीतैश्च कवलग्रहः ॥१॥
जातीपत्राम्लताद्राक्षायासदार्व्वीफलत्रिकैः ।
क्वाथः क्षौद्रयुतः शीतो गण्डूषो सुखपाकजुत् ॥२॥
कार्य्यश्च बहुधा सिद्धं जातीपत्रस्य चर्व्वणम् ।
लवणोरुकुठेन्द्रयवचर्व्वणतस्त्वाहात् ।
सुखपाकव्रणक्लेददौर्गन्ध्यसुपशाम्यति ॥३॥
पटोलनिम्बजम्बूत्रमालतीनवपल्लवैः ।
पञ्चपल्लवजः श्रेष्ठः कषायो सुखधावने ॥४॥
पञ्चपल्लवजः क्वाथस्त्रिफलासम्भवोऽथवा ।
सुखपाके प्रयोक्तव्यः सक्षौद्रो सुखधावने ॥५॥
खरसः कथितो दार्व्वा घनीभूतो रसक्रिया ।
सक्षौद्रा सुखरोगाङ्गदोषनाड़ीव्रणापहा ॥६॥
सप्तच्छदोशीरपटोलसुस्त-
हरीतकीतिक्तकरोहिणीभिः ।
यष्ट्याह्वरालदुमचन्दनैश्च
क्वाथं पिबेत् पाकहरं सुखस्य ॥७॥'
राजद्रुमः धनवेहरा इति लोके ।
'तिला नीलोत्पलं सर्पिः शर्करा क्षौरमेव च ।
क्षौद्राभ्यक्तदिग्धकल्कस्य गण्डूषो सुखपाकजुत् ॥८॥
आस्वादिता सकृदपि सुखगन्धं सकलमपनयति ।
लवणीपूरफलजा पवनमवाक्श्च नाशयति ॥९॥
हरिद्रां निम्बपत्राणि मधूकं नीलसुत्पलम् ।
तैलमेभिर्विपक्तव्यं सुखपाकहरं परम् ॥१०॥
यष्टीमधुफलमेकं चिंशुम्रनीलोत्पलस्य तैलस्य ।
प्रस्थं तद्विगुणपयोविधिना पक्वं तु नस्येन ॥
निघ्नि वदनस्य स्रावं शमयति गात्रस्य दोष-
संघातम् ।
कवलग्रहलवणवरं क्रमशोऽभ्यङ्गेन जन्तूनाम् ॥११
इति सुखरोगाधिकारः । इति भावप्रकाशः ॥*॥
अपि च ।
तण्डुलीयकगोचूरमूलं पीतं पयोऽन्वितम् ।
कामलादिहरं प्रोक्तं सुखरोगहरं तथा ॥१२॥
शुष्कमूलकशुण्ठीनां चारो हिङ्गुलनागरम् ।
शुष्कं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
पूरणादस्य तैलस्य क्षमयः कर्णयोः स्थिराः ॥
क्षिप्रं विनाशमायान्ति शृङ्गाङ्कुलतशेखर ! ।
चारतैलमिदं श्रेष्ठं सुखदन्तामयापहम् ॥१३॥"
इति गारुड़े १८८।१६८ अध्यायौ ॥
(तथाचास्य सलक्षणचिकित्सितम् ।
"सुखामये मारुतजे तु शोष-
कार्कश्यरौक्ष्याणि चलारुजश्च ।
क्षय्यारुणं निष्पतनं सुशीतं
प्रसंसनस्यन्दनतोदभेदाः ॥
क्षय्यान्वरस्फोटकतालुदाहा-
धूमायनश्याव्यदरौर्गतश्च ।
पित्तात् समूर्च्छा विविधारुजश्च
वर्णाश्च शुक्लारुणवर्णवर्ज्याः ॥
कण्डूर्गुरुत्वं सितविज्वलत्वं
क्लेदोऽरुचिर्जाड्यकफप्रसेकौ ।
उत्क्लेशमन्दानिलता च तन्द्रा
रुजश्च मन्दाः कफवक्त्ररोगे ॥
सर्व्वाण्यि रूपाणि तु वक्त्ररोगे
भवन्ति यस्मिन् स तु सर्व्वजः स्यात् ।
संख्यानदूष्याकृतिनाममेदा-
श्चैते चतुःषष्टिविधा भवन्ति ॥
शालाक्यतन्त्रे विहितानि तेषां
निमित्तरूपाकृतिभेषजानि ।
यथाप्रदेशन्तु चतुर्व्विधस्य
क्रियां प्रवक्ष्यामि सुखामयस्य ।'
इति सुखरोगः ॥ * ॥
'शुक्लतिक्तकटुक्षौद्रकषायैः कवलग्रहः ।
धूमः प्रधमनं शुद्धिरधश्छर्द्दनलङ्घनम् ।
भोज्यञ्च सुखरोगेषु यथास्वदोषदुष्टिषु ।
पिप्पल्यगुरुदार्व्वीत्वग् यवक्षारो रसाञ्जनम् ॥
पाठां तेजोवतीं पथ्यां समभागं सुचूर्णितम् ।
सुखरोगेषु सर्व्वेषु सक्षौद्रं तद्विधारयेत् ॥
क्षौद्रमाधवमाक्षीकैः श्रेष्ठोऽयं कवलग्रहः ।
तेजोऽह्वामभयामेलां समङ्गां कटुकां घनम् ।
पाठां ज्योतिष्मतीं लोध्रं दार्व्वीं कुष्ठञ्च चूर्णयेत् ।
दन्तानां घर्षणञ्चैव स्रावकण्डूरुलापहम् ।'
'गृहधूमो यवक्षारपाठायोधं रसाञ्जनम् ।
तेजोऽह्वा त्रिफला लोध्रं चित्रकश्चेति चूर्णितम् ॥
सक्षौद्रं धारयेद्देतत् गलरोगविनाशनम् ॥'
इति कालकचूर्णम् ॥*॥
मनःशिला यवक्षारो हरितालं ससैन्धवम् ।
दार्व्वीत्वक् चेति तच्चूर्णं माक्षिकेण समायुतम् ॥
मक्षिकेत घृतमक्षेन कण्ठरोगेषु धारयेत् ।
सुखरोगेषु च श्रेष्ठं पीतकं नामकीर्त्तितम् ॥'
इति पीतकचूर्णम् ॥*॥
'कटुकातिविषापाठा दार्व्वीमुस्तकलिङ्गकाः ।
गोमूत्रकथिताः पेया कण्ठरोगविनाशनाः ॥
स्वरसः कथितो दार्व्वा घनीभूतोरसक्रिया ।
सक्षौद्रमुखरोगास्यदोषनाड़ीव्रणापहा ॥
तालुशोषे त्वलक्ष्यास्ये सर्पिरौत्तरभक्तिकम् ॥

लावणं मधुराः स्निग्धाः प्रीताश्चैव रसा हिताः।
सुखपाके शिराकर्म्म शिरःकायविरेचनम्।
मूत्रतैलघृतक्षौद्रक्षीरैश्च कवलग्रहः।
मन्त्रौषधान्विताभ्यासाः पाठा ग्रहोक्ताजातिपक्षवाः।
कषायतिक्तकाः प्रीताः क्वाथाश्च सुखधावनाः।
तुलां खदिरसारस्य द्विगुणामरिमेदसः।
प्रक्षाल्य जर्ज्जरीकृत्य चतुर्द्रोणेऽम्भसः पचेत्।
द्रोणशेषं कषायन्तं पूता भूयः पचेच्छनैः।
ततस्तस्मिन् घनीभूते चूर्णीकृत्वाऽष्टभागिकम्।
चन्दनं पद्मकोशीरं मञ्जिष्ठा धातकी घनम्।
प्रपुण्डरीकं यष्ट्याह्वत्वगेलापत्रकेशरम्।
लाक्षा रसाञ्जनं मांसी त्रिफला लोध्रबालकम्।
रक्तोत्पलिनीमेलां समङ्गां कट्फलं वचाम्।
यवामगुरुपत्रङ्गैरिकाञ्जनमावपेत्।
लवङ्गनखकङ्कोलजातिकोशान् पलोन्मितान्।
कर्पूरकृष्णवर्षाभूः पुनःप्रीतेऽवतारिते।
ततस्तु गुलिकाः कार्य्याः शुष्काश्चास्येन धारयेत्।
तैलक्षारेण कल्केन कषायेण च साधयेत्।
दन्तानाञ्चलनभ्रंशग्रहीत्यैक्रिमिरोगनुत्।
सुखपाकास्यदौर्गन्ध्यजाड्यारोचकनाशनम्।
स्रावोपतापपैच्छिल्यवैस्वर्य्यगलरोगनुत्।
दन्तास्यगलरोगेषु सर्व्वेषां तत्परायणम्।"

इति खदिरादिगुटिकातैलञ्च। इति सुखरोगचिकित्सा। इति चरके चिकित्सास्थाने २६ अध्यायः॥)

सुखलाङ्गलः, पुं, (सुखं लाङ्गलमिव भूविदारकमस्य।) शूकरः। इति जटाधरः॥

सुखबन्धनं, क्ली, (सुखं प्रारम्भविधयः तस्य बन्धनं संग्रहोऽत्र।) ग्रन्थारम्भे तत्र वक्तव्यकथनम्। तस्य नामान्तरम्। अनुक्रमणिका। भूमिका। इति हरीमञ्जर्य्यां सुखबन्धनाख्यप्रथमस्तवकः। इति तदृग्ग्रन्थकर्तृभट्टादासवैद्येन लिखितम्॥

सुखवल्लभः, पुं, (सुखस्य वल्लभः प्रीतिकरः।) दाडिमवृक्षः। इति शब्दमाला॥ सुखप्रिये, त्रि॥

सुखवाचिका, स्त्री, (सुखं वाचयति श्रोधयतीति। वच्+णिच्+ण्वुल्+स्त्रियां टाप्। अत इत्वं च।) अम्बष्ठा। इति राजनिर्घण्टः॥

सुखवाद्यं, क्ली, (सुखेन वाद्यम्।) वक्त्रनालवाद्यम्। बाँक इति भाषा। इति त्रिकाण्डशेषः॥ सुखस्य मुखेन च वाद्यञ्च। शिवपूजाकाले वम् इति शब्देन गालवाद्यम्। यथा,—

"लिङ्गं विल्वाय विधिवत् विधिवत् पूजयेच्च तम्।
षड्क्षरं जपित्वा वै सुखवाद्यं शुचिस्मिते!॥"

इति लिङ्गार्चनतन्त्रे १५ पटलः॥

अपि च।

"सुखवाद्यं समूलं वि ज्ञात्वा तु परमेश्वरि!।
मालकामन्त्रसहितं सुखवाद्यं सुदुर्लभम्॥
अकारादिक्षकारान्तमनुलोमविलोमतः।
उच्चार्य्य परमेशानि! सुखवाद्यं शुचिस्मिते!॥
सर्व्वेषां वर्णमुच्चार्य्य पञ्चाशन्मालकां प्रिये!।
अनुलोमविलोमेन सर्व्वेषु च वरानने!॥
अनेनैव विधानेन सुखवाद्यं करोति यः।
स सिद्धः सगणः सोऽपि स शिवो नात्र संशयः।
स्वल्पुश्लयोऽहं देवेशि! सुखवाद्यप्रसादतः॥
यस्मिन् काले महेशानि! असुरो बलवान् भवेत्।
तस्मिन् काले महेशानि! सुखवाद्यं करोम्यहम्॥
तत् श्रुत्वा परमेशानि! असुरा राक्षसाश्च ये।
पलायन्ते महेशानि! ततश्चुत्वा परमेश्वरि!॥
ये नरा क्षुधि तिष्ठन्ति सुखवाद्यं विना प्रिये!।
स सर्व्वयातनाभोगी अन्ते कुम्भीरतां व्रजेत्॥"

इति च लिङ्गार्चनतन्त्रे ८ पटलः॥

सुखवासः, पुं, (सुखस्य वासः सौरभ्यमस्मात्।) गन्धद्रव्यम्। इति राजनिर्घण्टः॥

सुखवासनः, पुं, (सुखं वासयतीति। वस्+णिच्+ल्युः।) सुखदृगन्धकारकद्रव्यम्। तत्पर्य्यायः। आमोदी २। इत्यमरः।१।५।११॥ हे सुखवासनवटिकादौ आमोदयुक्तः कर्पूरादिरामोदी इत्। सुखं वासयति सुखवासनः नञ्यादित्वादनः। नागादयरचित एकैकश्च एव वा कर्पूरादिभिर्मुखोपयोग्यसुखवासनवटिरामोदीति सर्व्वस्वम्। शुभवासन इति पाठे शुभं मनोहरं वासनं वासो यस्य केशादेः स आमोदीत्याह्युरितिसुभूतिः। क्षीरस्वामिना तु समाकर्षादिचतुष्टयेन इष्टगन्धादिचतुष्टयेन च पर्य्यायद्वयमाख्यातम्। शब्दार्णवे तु।

"कस्तूरिकायामोदः कर्पूरे सुखवासनः।
बकुले स्यात् परिमलश्चम्पके सुरभिस्तथा।
गन्धा द्विषद्विरप्येते गुणिवृत्तौ त्रिलिङ्गका॥"

इति भरतः॥

सुखविलुण्ठिका, स्त्री, (सुखेन विलुण्ठयतीति। लुण्ठ+णिच् ण्वुल्। स्त्रियां टाप्। अत इत्वं च।) छागी। इति शब्दरत्नावली॥

सुखविष्ठा, स्त्री, (सुखे विष्ठा मलमस्याः।) तैलपायिका। यथा,—

"वल्गुलिका सुखविष्ठा परोक्षी तैलपायिका।"

इति हेमचन्द्रः॥

सुखशूकः, पुं, (सुखं शूकं स्तुर इव तीक्ष्णमस्य।) दुर्मुखः। इति शब्दमाला॥

सुखशुद्धिः, स्त्री, (सुखस्य शुद्धिः।) वक्त्रशोधनम्। यथा, आह्निकतत्त्वे।

"अभावे दन्तकाष्ठानां प्रतिषिद्धदिने तथा।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते॥"

सुखशोधनं, क्ली, (सुखस्य शोधनम्।) लवंगम्। इति राजनिर्घण्टः॥

सुखशोधनः, पुं, (सुखं शोधयत्यनेनेति। शुध्+णिच्+करणे ल्युट्।) कटुरसः। इति हेमचन्द्रः॥

सुखशोधी, [नृ] पुं, (सुखं शोधयतीति। शुध्+णिच्+णिनिः।) जम्बीरः। इति राजनिर्घण्टः॥ (गुणादयोऽस्य जम्बीरशब्दे ज्ञातव्याः।)

सुखष्ठीलः, त्रि, (सुखं ष्ठीवति निरस्यति विसृतं करोतीति भावः। ष्ठीव+दृशुपधत्वात् कः। एषोदरादित्वात् वस्य लत्वम्।) दुर्मुखः। इति शब्दमाला॥

सुखसम्भवः, पुं, (सुखात् सम्भव उत्पत्तिरस्य। ब्राह्मणः। इति हेमचन्द्रः। ३। ४७६॥

सुखसुरं, क्ली, (सुखस्य सुरा इति "विभाषा सेनासुराच्छायाशालानिशानाम्। २।४।२५। इति षष्ठीसमासे सुराशब्दस्य क्लीबत्वम्।) तालसुरा। इति त्रिकाण्डशेषः। ताड़ी इति भाषा॥

सुखस्रावः, पुं, (सु भावे+घञ्। सुखात् स्रावः पतनमस्य।) लाजा। इति राजनिर्घण्टः॥

सुखाग्निः, पुं, (सुखं सुखोऽग्निः।) दावाग्निः। यथा,—

"हेमकैलिर्द्रयोश्चाथ ग्रहाकुः स्याद्दवानलः।
सुखोल्का भूतसञ्चारी सुखाग्निर्भरचक्षरः॥"

इति शब्दमाला॥

ग्रवसुखे दन्तवह्निः। इति लोके। ग्राम्ये तु शिरःस्थाने। यथा,—

"देवाग्निसुखाः सर्व्वे ग्रहीता तु हुताशनम्।
ग्रहीता पाणिना चैव मन्त्रमेतदुदीरयेत्॥
कृत्वा तु दुष्कृतं कर्म्म जानता वाप्यजानता।
स्वल्पुकालवशं प्राप्य नरं पञ्चत्वमागतम्॥
धर्म्माधर्म्मसमायुक्तं लोभमोहसमाहतम्।
दहेयं सर्व्वगात्राणि दिवान् लोकान् स गच्छतु॥
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम्।
ज्वलमानं तथा वह्निं शिरः स्थाने प्रदापयेत्॥
चातुर्व्वर्ण्येषु संस्थानमेवं भवति पुत्रिके!।"

इति शुद्धितत्त्वम्॥

सुखामयः, पुं, (सुखस्यामयः।) सुखरोगः। इति राजनिर्घण्टः॥

सुखार्जकः, पुं, अर्जकः। इति राजनिर्घण्टः॥

सुखाह्वः पुं, (सुखं ह्वयमिवास्य।) कर्कटः। इति त्रिकाण्डशेषः॥

सुखोल्का, स्त्री, (सुखं उल्केव यस्याः।) दावानलः। इति शब्दमाला॥

सुख्यः, पुं, प्रथमः कल्पः। इत्यमरः। २। ७।४०॥ यागादिषु ग्राम्योक्तः प्रथमः कल्पो सुख्यः स्यात्। यथा, व्रीहिभिर्यजेतेत्यादिना उक्तलक्षत्वात् सुखमिव सुख्यः विकारसंघेत्यादिना इवार्थे यः। इति तट्टीकायां भरतः॥

सुख्यः, त्रि, श्रेष्ठः। इत्यमरः। ३। १। ५७॥ (तथास्य वर्ण्यायः।

"प्रधानमुत्तमं रम्यं श्रेष्ठं सुख्यमनुत्तमम्।
वरं वरेण्यं प्रसवं परार्द्ध्यं प्रवरन्तथा॥"

इति वैद्यकरत्नमालायाम्॥

यथा, भागवते। ४। २५। ४८।

"सुखानामपुरस्ताद्दास्तवायणबहूदनौ॥")

सुखसर्गः, पुं, (सुखानां सर्ग इति।) स्थावरसृष्टिः। यथा,—

"सुखसर्गश्चतुर्थस्तु सख्या वै स्थावराः स्मृताः।"

इति वराहपुराणम्॥

सुगूहः, पुं, शालूकपक्षी। इति भूरिप्रयोगः॥

मुग्धः, त्रि, (मुह्+कर्त्तरि क्तः।) मूढः। (यथा, ऋग्वेदे। ५। ४०। ५।
"अत्रैवविद् यथा मुग्धो मुवनान्यदीधयुः॥")
सुन्दरः। इति विश्वः॥ (यथा, मेघदूते। १४।
"इक्षोत्साहक्वकितचकितं मुग्धसिद्धाङ्गनाभिः॥")

मुग्धबोधं, क्ली, (मुग्धः सुन्दरः बोधः ज्ञानं पदपदार्थानां भवत्यस्मात्। यद्वा, मुग्धान् मूढान् अल्पबुद्धीन् जनान् बोधयतीति। मुग्धबोधम्। इति दुर्गादासः। मुग्ध+बुध्+"कर्म्मण्यण्। ३। २। १। इति अण्।) बोपदेवकृतव्याकरणविशेषः। यथास्यान्यश्लोकः।
"मुकुन्दं सच्चिदानन्दं प्रणिपत्य प्रणीयते।
मुग्धबोधं व्याकरणं परोपकृतये मया॥"

मुग्धा, स्त्री, (मुग्ध+टाप्।) नायिकाविशेषः। (सा च नायिका स्वीयापरकीयाभेदेन द्विविधा।) तत्र स्वीयापि त्रिविधा। मुग्धा मध्या प्रगल्भा च। तत्राङ्कुरितयौवना मुग्धा। सा च ज्ञातयौवना अज्ञातयौवना च। सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढा। सैव जातप्रश्रया विश्रब्धनवोढा। अस्याश्चेष्टा क्रिया मनोहरा। कोपे मार्दवं नवविभ्रमे समीहा च॥ मुग्धा यथा।
"आज्ञप्तं किल कामदेवधरणीपालेन काले शुभे
वस्तुं वासुविधिं विधास्यति तनौ तारुण्यमेणीदृशः।
इत्या खञ्जनचातुरी सुखरुचा सौधाकरी
माधुरी
वाचा किञ्च सुधासमुद्रलहरी लावण्यमामन्त्रते॥"*॥

अज्ञातयौवना यथा,—
"वीरात्तीरमुपागता अवयवैः सीत्थि स्फुरन्नेत्रयोः
श्रोत्रे लग्नमिदं किमुत्पलमिति ज्ञातुं करं न्यस्यति।
प्रेम्णालाङ्कुरगह्वया ग्रथ्निसखी रोमावलीं
प्रोञ्छति
आन्तास्तीति मुहुः सखीमविदितश्रोणीभरा
पृच्छति॥"

ज्ञातयौवना यथा,—
"स्वयम्भूः पद्मभुरम्भोजलोचने त्वत्पयोधरः।
नखेन कस्य धन्यस्य चन्द्रचूडो भविष्यति॥"

नवोढा यथा,—
"हस्ते धृतापि शयने विनिवेशितापि
क्रीडे कृतापि यतते बहिरेव गन्तुम्।
जानीमहे नववधूरथ तस्य वश्या
यः पारदं स्थिरयितुं क्षमते करेण॥"

द्वितीया यथा,—
"बलान्नीता पार्श्वं मुखमनुमुखं नैव कुरुते
धुनाना मूर्द्धानं क्षिपति वदनं चुम्बनविधौ।
हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना
नवोढा वोढारं रमयति न सन्तापयति च॥"

विश्रब्धनवोढा यथा,—
"ईरासुकुलितनेत्रपालिनीवी-
नियमितबाहुलतोरुयुग्मबन्धम्।
करकलितकुचस्थलं नवोढा
स्वपिति समीपमुपेत्य कस्य पूनः॥"
इति रसमञ्जरी॥

सुच ह ड } कल्कने। दम्भे। ग्राम्ये। इति कविसुच ड } कल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) द्वौ पञ्चमस्वरितौ। ह सुच्यते। ड सुचते ड मोचयते। इति दुर्गादासः॥

सुच ल्ल ग्र प ञ औ मोचे। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-बन्धनरहितीभावे अक०-अनिट्।) मोचस्त्यागः। ल असुचत्। ग्र प ञ सुचति सुचते धनं दाता। बन्धनरहितीभावे अकर्म्मकोऽयम्। आत्मानात्मुक्तो गजः कर्त्तरि क्तः। एवं पापात्मुक्त इत्यादौ पापबन्धनात्मुक्त इत्यर्थः। इति दुर्गादासः॥

सुच क मोचे। इति कविकल्पद्रुमः॥ (चुरा०-पर० सक०-सेट्।) क मोचयति। मोचस्त्यागः। इति दुर्गादासः॥

सुचिरः, त्रि, (सुचति धनादिकं ददातीति। सुच्+"इषिमदिसुदिक्षिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिसुहिसुचीति।" उणा० १। ५२। किरच्।) दाता। इति त्रिकाण्डशेषः॥

सुचिरः, पुं, (सुच्+किरच्।) धर्म्मः। वायुः। देवता। इति संक्षिप्तसारोणादिवृत्तिः॥

सुचुकुन्दः, पुं, (सुच्+बाहुलकात् कुः। सुचुः कुन्द इवेति। राजदन्तादित्वात् पूर्वनिपातः।) पुष्पवृक्षविशेषः। मेकचन्द इति हिन्दी भाषा। (यथा, राजेन्द्रकर्णपूरे। १०।
"आनन्दं सुचुकुन्दकन्दलि! भज स्वस्थासि वासन्तिके!।")
तत्पर्य्यायः। कुन्दवृक्षः २ चित्रकः ३ प्रतिविष्णुकः ४। इति भावप्रकाशः॥ बहुपुत्रः ५ सदलः ६ हरिवल्लभः ७ सुपुष्पः ८ अर्थार्हः ९ लक्षणकः १० रक्तप्रसवः ११। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कफवातनाशित्वम्। कण्डूकरत्वम्। त्वग्दोषव्रणोपशमनत्वम्। जीर्णज्वरविनाशनत्वञ्च। इति राजनिर्घण्टः॥ शिरःपीड़ापित्तास्रविषनाशित्वम्। इति भावप्रकाशः॥*॥ माधाटराजपुत्रः। इति श्रीभागवतम्। ६। ७। ३८।
(यथा च देवीभागवते। ७। १०। ४।
"तस्यासुतूपादयामास माधाता द्वौ सुतौ नृप!।
पुरुकुत्सं सुविख्यातं सुचुकुन्दं तथापरम्॥")

सुचुटी, स्त्री, अङ्गुलिमोटनम्। आङ्गुलमटकान इति भाषा। यथा,—
"सुचुटी सुकुटी चैव भवेदङ्गुलिमोटने।"
इति शब्दरत्नावली॥

सुटिः। सुठा इति भाषा। यथा,—
"सम्पिण्डिताङ्गुलिः पाणिर्मुष्टिर्मुष्टिस्तु सुचुरपि।"
इति हेमचन्द्रः। १। २६२॥

सुच ह क } क्लाध्वनोः। इति कविकल्पद्रुमः॥
सुज क } (चुरा०-परं०-मार्ज्जने सक०-ध्वनौ अक०-सेट्।) द्वौ पञ्चमस्वरितौ। ह क सुञ्जयति। क मोचयति। इति दुर्गादासः॥

सुचुकः, पुं, (सुचिर+खुल्।) सुञ्चकवृक्षः। इति राजनिर्घण्टः॥

सुञ्जः, पुं, (सुञ्जाते ध्वन्यते अनेन। सुञ्ज+करणे अच्।) ढक्कविशेषः। सुँज इति भाषा। (यथा, पद्मपुराणे। १। ४२।
"यथा सुञ्जादीषिकैवमात्मा युक्ता समुद्भवः।
शरीरत्रितयाहीरैः परं ब्रह्मैव जायते॥")
तत्पर्य्यायः। मौञ्जीलताख्यः २ ब्राह्मण्यः ३ तेजनाह्वयः ४ वाणीरकः ५ सुञ्जनकः ६ शीरी ७ दर्भाह्वयः ८ दूरमूलः ९ डुढुलः १० डुढुमूलः ११ बहुपत्रः १२ रञ्जनः १३ शुचुभङ्गः १४। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। कफपित्तजदोषनाशित्वम्। मूत्रकृच्छ्रे दौर्गन्ध्ये च पावनत्वम्। भूतनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"सुञ्जो सुञ्जातको बाणः स्थूलदर्भः सुमेधसः।
सुञ्जह्वयस्तु मधुरं तुवरं शिशिरं तथा॥
दाहहृत्तृड्विषश्वासमूत्रकृच्छ्रविरोगजित्।
दोषत्रयहरं दृष्यं मेखलासूपयुज्यते॥"
इति भावप्रकाशः॥
शरः। इति रत्नमाला। उपनयनकाले सुञ्जमेखलाधारणविधिर्यथा। अथैनं माणवकमाचार्य्यस्त्रिःप्रदक्षिणं चिरतं सुञ्जमेखलां परिधापयन् मन्त्रद्वयं वाचयति। इति भवदेवभट्टः॥

सुञ्जकेशी, [न्] पुं, (सुञ्जा इव केशाः सन्त्यस्य। इनिः।) विष्णुः। इति हेमचन्द्रः। २। १३१॥

सुञ्जरं, क्ली, (सुञ्जायते प्रचाल्यते इति। सुञ्ज+बाहुलकात् अरन्।) प्रालूकम्। इति शब्दमाला॥

सुञ्जातकः, पुं, (सुञ्जं अतति ततसाडग्रं प्राप्नोतीति। अत+अच्। ततः स्वार्थे कन्।) पुष्पप्राकभेदः। अस्य गुणाः। परं स्वादुत्वम्। दृष्यत्वम्। पित्तानिलापहत्वञ्च। इति राजवल्लभः॥ (यथा, सुश्रुते सूत्रस्थाने ३६ अध्याये।
"हस्तिकर्णसुञ्जातकलाम्बूकप्रभृतीनि।")

सुट ह मर्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पञ्चमस्वरी। ह सुण्टते। मर्दो मर्दनम्। इति दुर्गादासः॥

सुट कि छर्दि। इति कविकल्पद्रुमः॥ (चुरा० पक्षे भ्वा०-अक०-सेट्।) छर्दि वमीकरणे। कि मोटयति तण्डुलं शिला। वस्तु दुर्गश्च मोटतीति हलायुधः॥

सुट शि आक्षेपे च। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) पवर्गद्वितीयादिः। शि सुटति असुठीत् सुमोट। चकारात् छर्दि च। सुटति क्षिपति दर्पे च इति हलायुधः। इति दुर्गादासः॥

मुठ इ ड प्रतायने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-पालने सक०-सेट्।) पवर्गद्वितीयादिः। पञ्चमस्वरी। इ मुण्ठते। ड मुण्डते चौरः। इति दुर्गादासः॥

मुड इ ड छिदि। मर्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पञ्चमस्वरी। इ मुण्डति। छेदइव लोमच्छेद एव। मुण्डति मुण्डं नापितः। लोमरहितं करोतीत्यर्थः। इति दुर्गादासः॥

मुड इ ड मर्दे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) पवर्गद्वितीयादिः। पञ्चमस्वरी। मर्दनमिति मज्जधातोः क्ते रूपं मज्जनमित्यर्थः। इ मुण्डते। ड मुण्डते प्रस्तरो जले। चतुर्भुजस्तु मार्ज्जन इति पठित्वा मार्ज्जनं शुद्धिरिति व्याख्याय मुण्डते जलेन गात्रं लोक इत्युदाहृतवान्। इति दुर्गादासः॥

मुण प्र प्रतिज्ञाने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) प्र मुणति व्रतं लोकः। प्रतिजानातीत्यर्थः। मोचिता। इति दुर्गादासः॥

मुण्डं, क्ली, (मुण्ड्यते उप्यते केशा अस्मात् यद्वा, मुण्डते मज्जतीति। मुण्ड+अच्।) शिरः। इति नपुंसकलिङ्गसंग्रहे अमरः।२। ५। ३७॥ (यथा, मोहमुद्गरे। १५।

"अङ्गं गलितं पलितं मुण्डं
दन्तविहीनं यातं तुण्डम्।
करधृतकम्पितशोभितदण्डं
तदपि न मुञ्चत्याशाभाण्डम्॥"

उपनिषद्विशेषः। तदुक्तं यथा,—

"ईशाकेनकठप्रश्नमुण्डमाण्डुक्यतित्तिरि।
छान्दोग्यं बृहदारण्यमेतरेयं तथा दश॥")

लोहम्। मुण्डायसम्। इति राजनिर्घण्टः॥

मुण्डः, पुं, (मुण्डनं मुण्डः केशापनयनं मुण्डि खण्डने भावे घञ्। ततः अर्शं आद्यच् इत्यमरटीकायां रायमरतौ।) बलिराजस्य सैनिकदैत्यविशेषः॥ (यथा, हरिवंशे भविष्यपर्व्वणि। २३२। ५।

"एकाच एकपान्मुण्डो विद्युदृक्षशतुर्भुजः।"

मुण्डसेनापतिर्दैत्यभेदः। यथा, मार्कण्डेयपुराणे। ८०। २८।

"हे चण्ड! हे मुण्ड! बलैर्बहुभिः परिवारितौ।")

मुण्डमेवावयवतेनास्त्यस्य। अच्।) राहुग्रहः। इति मेदिनी। डे, २२॥ (मुण्डं मुण्डनं जीविकातेनास्त्यस्य। अच्।) नापितः। इति जटाधरः॥ (मुण्डनं स्वभावच्छेदे खण्डनमस्त्यस्य। अच्।) स्वाखुवृक्षः। इति केचित्॥

मुण्डः, पुं, क्ली, (मुण्ड+अच्।) मुण्डा। इति मेदिनी। डे, २२॥

मुण्डः, त्रि, मुण्डितः। इत्यमरः। २। ६। ४८॥ दे मुण्डितमुण्डे। मुडि खण्डने भावे घञि मुण्डो मुण्डनं केशापनयनं तद्योगात् अर्शं आद्यचि मुण्डः पुमान् स्त्रियां मुण्डा। इत्यमरटीकायां भरतः॥ (यथा, महाभारते। १। ११६। ८।

'चरन् भैक्षं मुनिर्मुण्डस्त्यक्ष्यामि महीमिमाम्॥')

मुण्डकं, क्ली, (मुण्डमेवेति मुण्ड+स्वार्थे कन्।) मस्तकम्। (उपनिषद्विशेषश्च॥)

मुण्डकः, पुं, (मुण्डयतीति। मुडि+ण्वुल्।) नापितः। इति हेमचन्द्रः। ३। २३०॥

मुण्डचक्रकः, पुं, (मुण्डित इव चक्रकः।) कलायः। इति राजनिर्घण्टः॥

मुण्डनं, क्ली, (मुण्ड+ल्युट्।) केशच्छेदनम्। तत्पर्य्यायः। भद्रकरणम् २ वपनम् ३ परिवापनम् ४ क्षौरम् ५। इति हेमचन्द्रः।३।५८७॥ (यथा, महाभारते। १२। २३। ४६।

"भ्रातुरस्य हितं वाक्यं शृणु धर्म्मभृतां वर!।
दण्ड एव हि राजेन्द्र! क्षत्रधर्म्मो न मुण्डनम्॥")

मुण्डफलः, पुं, (मुण्डवत् फलमस्य।) नारिकेलवृक्षः। यथा,—

"तथा मुण्डफलश्चापि विश्वामित्रप्रियोऽपि च।"

इति शब्दरत्नावली॥

मुण्डमालिः, पुं, (मुण्डो मुण्डित इव मालिः।) मालिभेदः। तत्पर्य्यायः। मुण्डकः २ निःशूकः ३ अशूककः ४। अस्य गुणाः। त्रिदोषनाशित्वम्। मधुराम्लत्वम्। बलप्रदत्वम्। रुचिकारित्वम्। दीपनत्वम्। पथ्यत्वम्। मुखजाड्यरुजापहत्वञ्च। इति राजनिर्घण्टः॥

मुण्डा, स्त्री, (मुण्ड+स्त्रियां टाप्।) मुण्डीरिका। इति मेदिनी। डे, २२॥ मुण्डिता स्त्री। इत्यमरटीकायां भरतः॥

मुण्डाख्या, स्त्री, (मुण्डेत्याख्यास्याः।) महाश्रावणिका। इति राजनिर्घण्टः॥

मुण्डायसं, क्ली, (मुण्डश्च तत् अयश्चेति। मुण्ड+अयस्+"अनोऽश्मायः सरसां जातिसंज्ञयोः।" ५।४।६४। इति टच्।) लोहम्। इति राजनिर्घण्टः॥

मुण्डितं, क्ली, (मुण्ड्यते स्म मुण्डते इति। मुडि खण्डने+कर्म्मणि क्तः।) लोहम्। इति राजनिर्घण्टः॥ वापितमुण्डे, त्रि। इत्यमरः। ३। १। ८५॥

मुण्डितिका, स्त्री, (मुण्डित+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च।) वृक्षविशेषः। मुण्डीरी इति भाषा। तत्पर्य्यायः। अजमुण्डा २ श्रावणी ३ पलङ्कषा ४ कदम्बपुष्पा ५ अवला ६ भूतघ्नी ७ कुम्भला ८ अरुणा ९। इति रत्नमाला॥

मुण्डी, [न्] पुं, (मुण्डयति केशान् वपति इति। मुण्ड+णिनिः।) नापितः। इत्यमरः। २। १०। १०॥ (योगाचार्य्यविशेषः। यथा, शिवपुराणे वायुसंहितायाम्। २। १०। ५—६॥

'महाकालश्च भृङ्गी च दण्डी मुण्डी स एव च।'

इत्यादावारभ्य।

अष्टाविंशतिसंख्याता योगाचार्य्या युगक्रमात्।'

सम्पादितकेशच्छेदनः। यथा, महाभारते।१३। १४। ३७४।

"दिनेऽष्टमे तु विप्रेण दीक्षितोऽहं यथाविधि।
दण्डी मुण्डी कुशी चीरी धृताक्षो मेखलीकृतः॥")

मुण्डीरिका, स्त्री, (मुण्डि+बाहुलकात् ईरच्। स्त्रियां ङीष् स्वार्थे कन्। स्त्रियां टाप् "केऽण:।" ७।४।१३। इति पूर्व्वस्य ह्रस्वः।) मुण्डितिका। इति जटाधरः॥

मुत्, क्ली, (मोदतेऽनया इति। मुद्+क्विप्।) दृङ्नामौषधम्। इति राजनिर्घण्टः॥

मुद्, [द्] क्ली, (मोदनमिति। मुद्+भावे क्विप्।) हर्षः। इत्यमरः। १। ४। २४॥ (यथा, रघुवंशे। ३। २५।

"उवाच धात्रा प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलिम्।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः॥")

मुद क संसर्गे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क मोदयति दृतेनान्नं लोकः। इति दुर्गादासः॥

मुद ञि ड हर्षे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक० सेट्।) हर्षश्चित्तोत्साहः। ञि मुदितोऽस्ति ड मोदते धनी। इति दुर्गादासः॥

मुदा, स्त्री, (मुद्+घञर्थे क: ततष्टाप्।) हर्षः। यथा। सुखमानन्दश्चमुदा। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। ११६। ३०।

"तं मन्त्रं क्रियमाणं तु मन्त्रिभिस्तैस्तु भूभृता।
ततृपार्श्ववर्त्तिनी कन्या शुश्रावाथ सदावती॥")

मुदितः, त्रि, (मुद्+क्त। यद्वा, मुदा अस्त्र जाता। मुदा+इतच्।) आनन्दितः। यथा,—

"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा।
मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता॥"

इति शुद्धितत्त्वम्॥

आलिङ्गनविशेषः। तस्य लक्षणं यथा। नायिकया नायकस्य वामपार्श्वे उपेत्य वामपादं तस्योरुहयमध्ये स्थापयित्वा उभौ मिलित्वा यदवस्थानम्। इति कामशास्त्रम्॥

मुदिता, स्त्री, (मोदते इति मुद्+सर्व्वधातुभ्य इन् संज्ञापूर्व्वकविधेरनित्यत्वात् गुणाभावः। मुदिः तस्य भावः इति तल्+टाप्।) मुदा। हर्षः। इत्यमरटीकायां मथुरेशः॥ (यथा, प्रातःस्मरणस्तवम्। १। ३१।

"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्॥")

मुदिरः, पुं, (मोदन्ते अनेन प्रजा इति। मुद्+"इषिमदिमुदीति।" उणा० १। ५२। इति किरच्।) मेघः। इत्यमरः।१।३।७। (यथा,—गीतगोविन्दे। २। ३।

"प्रसृरपुरन्दरधनुरनुरञ्जितमेदुरमुदिर-
सुवेशम्।")

कासकः। इति मेदिनी। रे, २०५। भेकः। इति संक्षिप्तसारोणादिवृत्तिः॥

मुद्गः, पुं, (मोदते अनेन इति । मुद्+"मुदिग्रो-र्गंगौ ।" उणा० १ । १२७ । इति गक् ।) पक्षिविशेषः । तत्पर्य्यायः । जलवायसः २ । इति हेमचन्द्रः । ४ । २१८ ॥ ग्रामीधान्यभेदः । मुग इति भाषा । (यथा, मनुः । ६ । १६ ।

"व्रीहयः शालयो मुद्गास्तिलमाषास्तथा यवाः ॥")

तत्पर्य्यायः । सूपश्रेष्ठः २ वर्षाभूः ३ रसोत्तमः ४ सुक्तिप्रदः ५ हयानन्दः ६ सुफलः ७ वाजिभोजनः ८ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । कफपित्तास्रजित्वम् । लघुत्वम् । श्लक्ष्णत्वम् । शीतत्वम् । पाके कटुत्वम् । चक्षुष्यत्वम् । नातिवातलत्वञ्च । तदूषधगुणाः । पित्तश्रमार्त्ति-ग्लमनत्वम् । लघुत्वम् । सन्तापहारित्वम् । अरोचकनाशित्वम् । तत्सैन्धवयुक्तत्वेन रक्त-प्रसादनत्वम् । सर्व्वरोगापहारित्वञ्च । इति राजनिर्घण्टः । अपि च । रूक्षत्वम् । स्वादु-त्वम् । अल्पानिलत्वम् । ज्वरघ्नत्वञ्च । इति भावप्रकाशः ॥* । वनमुद्गगुणाः ।

"सकृच्छः शीतलो ग्राही कफपित्तज्वरापहः ॥"

तद्विशेषो यथा, राजवल्लभे ।

"प्रधाना हरितास्तत्र वन्यमुद्गास्तु मुद्गवत् ।
क्षुद्रमुद्गा महामुद्गा गौरा हरितपीतकाः ।
श्वेता रक्ताश्च निर्द्दिष्टा लघवः पूर्व्वपूर्व्ववत् ॥"

मुद्गपर्णी, स्त्री, (मुद्गस्येव पर्णान्यस्याः मुद्गपर्ण+जातौ ङीष् ।) वनमुद्गः । मुगानी इति भाषा । तत्पर्य्यायः । काकमुद्गा २ सहा ३ । इत्यमरः ॥ क्षुद्रसहा ४ शिम्बी ५ मार्ज्जार-गन्धिका ६ वनजा ७ रिङ्गिणी ८ कृष्णा ९ सर्पपर्णी १० कुरङ्गिका ११ कोशिका १२ वनोद्भवा १३ वनमुद्गा १४ आरण्यमुद्गा १५ वन्या १६ । कुरङ्गिकास्थाने करङ्गिका इति च पाठः । अस्या गुणाः । हिमत्वम् । कास-वातरक्तक्षयपित्तदाहज्वरनाशित्वम् । चक्षुष्य-त्वम् । शुक्रवह्निकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । यथा, भावप्रकाशे ।

"मुद्गपर्णी काकपर्णी सर्पपर्ण्यल्पपर्णिका ।
काकमुद्गा च सा प्रोक्ता तथा मार्ज्जारगन्धिका ॥
मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला ।
चक्षुष्या क्षयशोषघ्नी ग्राहिणी ज्वरदाहजुत् ।
दोषत्रयहरी लघ्वी मुद्गपर्ण्यो मितिसारजुत् ॥"

मुद्गभुक्, [ज्] पुं, (मुद्गं भुंक्ते इति । भुज्+क्विप् ।) घोटकः । इति जटाधरः ॥

मुद्गभोजी, [न्] पुं, (मुद्गं भुंक्ते इति । भुज्+णिनिः ।) अश्वः । इति राजनिर्घण्टः ॥

मुद्गमोदकः, पुं, (मुद्गेन साधितो मोदकः ।) मोदक-विशेषः । मतिचुर इति भाषा । यथा,—

"मुद्गानां धूमसौं सम्यग्घोलयेन्निर्म्मलाम्बुना ।
कटाहस्थघृतस्योर्द्धं भर्ज्जनं स्थापयेत्ततः ॥
धूमसीन्तु द्रवीभूतां प्रक्षिपेत् भर्ज्जनोपरि ।
पतन्ति बिन्दवस्तस्मात्तान् सुपक्वान् समुद्धरेत् ।
सितापाकेन संयोज्य कुर्य्यात् युक्तेन मोदकान् ॥"

अस्य गुणाः । यथा, भावप्रकाशे ।

"सक्षुर्य्याही त्रिदोषघ्नः स्वादुः शीतो रुचिप्रदः ।
चक्षुष्यो ज्वरहृत् बल्यस्तर्पणो मुद्गमोदकः ॥"

मुद्गरः, क्लीं, (मुद्गं आनन्दं गिरति विकिरतीति । गृ+अच् ।) मल्लिकाभेदः । लोहादिभेदने, पुं । इति मेदिनी । रे, २०४ ॥ (यथा, महाभारते । १ । २११ । ३ ।

"गदापट्टिशधारिण्या शूलमुद्गरहस्तया ।
प्रस्थितो सहधर्म्मिण्या महत्या देवसेनया ॥")

मुद्गरः, पुं, (मुद्+गृ+अच् ।) कर्म्मारवृक्षः । पुष्पवृक्षविशेषः । तत्पर्य्यायः । गन्धसारः २ सप्तपत्रः ३ अतिगन्धः ४ गन्धराजः ५ विट-प्रियः ६ प्रियः ७ जनेष्टः ८ नगेष्टः ९ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । सुरभित्वम् । सौख्यदायकत्वम् । मनोज्ञकारित्वम् । मधु-पानन्दकारित्वम् । पित्तप्रकोपनाग्नित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अस्त्रविशेषः । सुगुर इति भाषा । तत्पर्य्यायः । द्रुघणः २ घनः ३ । इत्यमरः ॥ द्रुघनः ४ । इति भरतः । प्रघणः ५ । इति जटाधरः ॥ मुद्गरः कोरकाख्यौ । इति हेमचन्द्रः ॥ (यथा, रघौ । १२ । ७१ ।

"पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः ॥")

मुद्गरकः, पुं, (मुद्गरमिवेति प्रतिकृतौ कन् ।) कर्म्मारः । इति राजनिर्घण्टः । कामरांङ्गा इति भाषा ॥

मुद्गलं, क्लीं, रोहिषतृणम् । इति राजनिर्घण्टः ॥

मुद्गलः, पुं, हर्य्यश्वराजपुत्रः । यथा,—

"सुप्राज्ञेः पुरुजानुः तस्माच्चर्च्चः ततश्च हर्य्यश्वः ।
हर्य्यश्वाच्चुद्गलकृच्छ्रयदृदिश्वयवोगरकाम्पिल्य-संज्ञाः । पञ्चानामेतेषां विषयाणां रक्षणायाज-मीढ इति मत्पुत्रा इति पित्राभिहिता इति पञ्चालाः । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (मुद्गं जातीति । जा+कः । इत्या-दिवृत्तौ उज्ज्वलदत्तः ।) गोत्रकारकमुनि-विशेषः । तस्य भार्य्या इन्द्रसेना । इति पुराणम् । (उपनिषद्विशेषः ।)

मुद्गरः, पुं, वनमुद्गः । इति शब्दरत्नावली ॥

मुद्गरकः, पुं, (मुद्गर+स्वार्थे कन् ।) वनमुद्गः । इत्यमरः । २ । ६ । १७ ॥

मुद्गार्द्रवटः, पुं, (मुद्गेनार्द्रः वटः ।) वटक-विशेषः । आदावड़ा इति भाषा । यथा,—

"मुद्गपिष्टीविरचितान् वटकांस्तैलपाचितान् ।
हस्तेन चूर्णयेत् सम्यक् तल्लिंचूर्णे विनिक्षिपेत् ॥
भृष्टं हिङ्गुार्द्रकं रूक्षं मरिचं जीरकं तथा ।
निम्बूरसं यवानीञ्च युक्त्या सर्व्वं विमिश्रयेत् ॥
मुद्गपिष्टीं पचेत् सम्यक् स्थाल्यामङ्गारकोपरि ।
तस्यान्तु गोलकं कुर्य्यात्तन्मध्ये पूरयं क्षिपेत् ॥
तैले तान् गोलकान् पक्वा क्षपितायां निम-ज्जयेत् ।
गोलकाः पाचके प्रोक्तास्ते चार्द्रकवटा अपि ॥"

अस्य गुणाः । यथा, भावप्रकाशे ।

"मुद्गार्द्रकवटा रूक्षा लघवो बलकारकाः ।
दीपनास्तर्पणाः पथ्यास्त्रिदोषेषु प्रपूजिताः ॥"

मुद्रा, स्त्री, (मोदते अनयेति । मुद्+"स्फायि-तञ्चीत्यादि ।" उणा० २ । १३ । इति रक् अतः टाप् ।) प्रत्ययकारिणी । इति त्रिकाण्ड-शेषः । नामेर मोहर इति भाषा । अङ्गुलि-मुद्रा । इति शब्दरत्नावली । छापेर आङ्गटी इति भाषा । स्वर्णरौप्यादिमुद्रिका च । (यथा, अभिज्ञानशाकुन्तले । २ ।

"इमां मुद्रां त्वदङ्गुल्यौ निवेशयितुं मया ।"

चिह्नम् । यथा, श्रीमद्भागवते । १ । २४ । १७ ।

"ज्ञानविज्ञानयोगेन कर्म्मणामुद्धरन् जटाः ।
हिरण्मयेन पक्षेण पक्षाभ्यां पक्षिराडपतदम्बुजः ॥")

मोहर टाका इत्यादि भाषा । इति लोक-प्रसिद्धिः ॥* । पञ्चधातुनिष्पन्नमेतन्निष्पिष्टेषु । छापार अक्षर इति भाषा । यथा,—

"मुद्राभिः शिल्पलिपिभिर्लेखनिसम्भवा ।
शुल्किकाद्युद्भवप्रायता लिपयः पञ्चधा स्मृताः ।
एताभिर्लिपिभिर्व्याप्ता धरित्री शुभदा हर ! ॥"

इति वाराहीतन्त्रम् ॥

"लेखन्या लिखितं विप्रैर्मुद्राभिरङ्कितञ्च यत् ।
शिल्पादिनिर्म्मितं यच्च पात्रं धार्य्यञ्च सर्व्वदा ॥

इति खड्गमालातन्त्रम् ॥*॥

पञ्चमकारान्तर्गतभक्षद्रव्यविशेषः । यथा,—

"पृथुकास्तण्डुला भृष्टा गोधूमचणकादयः ।
तस्य नाम भवेद्देवि ! मुद्रा मुक्तिप्रदायिनी ॥"

इति निर्व्वाणतन्त्रे ११ पटलः ॥

तस्याः शोधनं यथा,—

"ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः
दिवीव चक्षुराततम् । ॐ तद्विप्रासो विपन्यवो
जागृवांसः समिन्धते विष्णोर्यत् परमं पदम् ।
इति मन्त्राभ्यां शोधनम् । इति खतन्त्रतन्त्रम् ॥
शरीरे धार्य्यभगवदायुधादिचिह्नम् । छाप इति
भाषा । यथा,—

"ततो नारायणीं मुद्रां धारयेत् प्रीतये हरेः ।
मत्स्यकूर्म्मादिचिह्नानि चक्रादीन्यायुधानि च ॥
अथ मुद्राधारणविधिस्तथा स्मृतौ ।
"अङ्कितः शङ्खचक्राभ्यामुभयोर्बाहुमूलयोः ।
समर्च्चयेद्धरिं नित्यं नान्यथा पूजनं भवेत् ॥"

आदिपुराणे ।

"शङ्खचक्रोर्द्धपुण्ड्रादिरहितं ब्राह्मणाधमम् ।
गर्द्दभं तु समारोप्य राजा राष्ट्रात् प्रवासयेत् ॥"

गारुड़े श्रीभगवदुक्तौ ।

"सर्व्वकर्म्माधिकारेषु शुचीनामेव चोदितः ।
शुचित्वञ्च विजानीयाच्छरीरायुधधारणात् ॥"

इति पाद्मे उत्तरखण्डे ।

"शङ्खचक्रादिभिश्चिह्नैर्विप्रः प्रियतमैर्हरेः ।
रहितः सर्व्वधर्म्मेभ्यः प्रच्युतो नरकं व्रजेत् ॥"

श्रुतौ च यजुःकठशाखायाम् ।

"हृतोर्द्धपुण्ड्रः शतचक्रधारी
विष्णुं परं ध्यायति यो महात्मा ।
स्मरेच्च मन्त्रेच्च सदा हृदि स्थितं
परात्परं यन्महतो महान्तम् ॥"

अपरत्रापि च ।
'एभिर्व्रतैस्तु चक्रस्य चिह्नै-
रङ्किता लोके शुभगा भवेम ।'
तद्विष्णोः परमं पदं ये गच्छन्ति लाञ्छिताः ।
इत्यादि ॥
अतएव ब्रह्मपुराणे ।
'शङ्खायुधाङ्कितं दृष्ट्वा धर्म्मागं न करोति यः ।
द्वादशाब्दार्जितं पुण्यं तस्यापहरयोपगच्छति ।'*॥
अथ मुद्राधारणमाहात्म्यम् ।
स्कान्दे श्रीसनत्कुमारमार्कण्डेयसंवादे ।
'यो विष्णुभक्तो विप्रेन्द्र ! शङ्खचक्रादिचिह्नितः ।
स याति विष्णुलोकं वै दाहप्रलयवर्जितम् ।'
तत्रैवान्यत्र ।
'नारायणायुधैर्नित्यं चिह्नितं यस्य विग्रहम् ।
पापकोटिप्रयुक्तस्य तस्य किं कुरुते यमः ॥
शङ्खोद्धारे तु यत् प्रोक्तं वसतां वर्षकोटिभिः ।
तत् फलं लिखिते शङ्खे प्रत्यहं दक्षिणे भुजे ॥
यत् फलं पुष्करे नित्यं पुण्डरीकाक्षदर्शने ।
शङ्खोपरिष्टते पद्मे तत् फलं समवाप्नुयात् ॥
वामे भुजे गदा यस्य लिखिता दृश्यते कलौ ।
गदाधरो गयापुण्यं प्रत्यहं तस्य यच्छति ॥
यत्फलानन्दपुरे प्रोक्तं चक्रस्यामिसमीपतः ।
गदाधरो लिखिते चक्रे तत् फलं शङ्खदर्शने ॥'
श्रीभगवदुक्तौ च ।
'यः पुनः कलिकाले तु मत्पुरीसम्भवां नृदम् ।
मत्स्यकूर्म्मादिकं चिह्नं गृहीत्वा कुरुते नरः ॥
देहे तस्य प्रविष्टोऽहं जानन्ति त्रिदशोत्तमाः ।
तस्य मे नान्तरं किञ्चित् कर्त्तव्यं श्रेय इच्छता ।
ममावतारचिह्नानि दृश्यन्ते यस्य विग्रहे ।
मर्त्यैर्मर्त्यो न विज्ञेयः स नूनं मामकी तनुः ॥
पापं सुव्रतरूपन्तु जायते तस्य देहिनः ।
ममायुधानि यस्याङ्गे लिखितानि कलौ युगे ॥
उभाभ्यामपि चिह्नाभ्यां योऽङ्कितो मत्स्य-
सुद्रया ।
कूर्म्मेणापि स्वकं तेजो निक्षिप्तं तस्य विग्रहे ॥
गृहीत्वा पद्मञ्च गदां रथाङ्गं
मत्स्यञ्च कूर्म्मं रचितं स्वदेहे ।
करोति नित्यं सुव्रतस्य वृद्धिं
पापक्षयं जन्मशतार्जितस्य ॥'
तत्रैव श्रीब्रह्मनारदसंवादे ।
'शङ्खचक्राङ्कवपुषं दुर्भेद्यं देवदानवैः ।
अवध्यं सर्व्वभूतानां शूराणां रणसामपि ॥
लक्ष्मीः सरस्वती दुर्गा सावित्री हरवल्लभा ।
नित्यं तस्य वसेद्देहे यस्य शङ्खाङ्किता तनुः ॥
गङ्गा गया कुरुक्षेत्रं प्रयागं पुष्करादि च ।
नित्यं तस्य सदा तिष्ठेद्यस्य पद्माङ्कितं वपुः ॥
यस्य कौमोदकीचिह्नं भुजे वाथ कलिप्रिय ! ।
प्रत्यहं तत्र द्रष्टव्यो गङ्गासागरसङ्गमः ॥
यस्य करे गदाधस्ताद्रथाङ्गं तिष्ठते यदि ।
लक्ष्मीन सहितं तत्र त्रैलोक्यं सचराचरम् ॥
त्रयोऽग्नयस्त्रयो देवा विष्णोस्त्रीणि पदानि च ।
निवसन्ति सदा तस्य यस्य देहे सुदर्शनम् ॥'
किञ्च ।
'शङ्खायुधाङ्किता मुद्रा यस्य नारायणी करे ।
ऊर्द्धलोकाधिकारी च स श्रेयस्तिदृशां पतिः ॥
शङ्खमुद्राप्रयुक्तस्तु दैवं पित्र्यं करोति यः ।
नित्यं नैमित्तिकं काम्यं प्रत्यहञ्चाक्षयं भवेत् ॥
पीड़यन्ति न तत्रैव ग्रहा ऋक्षाणि राशयः ।
अष्टाक्षराङ्किता मुद्रा यस्य धातुमयी करे ॥'
वाराहे श्रीसनत्कुमारोक्तौ ।
'शङ्खायुधाङ्कितं देहं गोपीचन्दनदृत्तया ।
प्रयागादिषु तीर्थेषु स गत्वा किं करिष्यति ॥
यदा यस्य प्रपश्येत देहं शङ्खादिचिह्नितं ।
तदा तदा जगत्स्वामी तुष्टो हरति पातकम् ॥
भवते यस्य देहे तु अहोरात्रं दिने दिने ।
शङ्खचक्रगदापद्मं लिखितं सोऽच्युतः स्वयम् ॥
नारायणायुधैर्युक्तं कृत्वात्मानं कलौ युगे ।
कुरुते पुण्यकर्म्माणि मेरुतुल्यानि तस्य वै ॥
शङ्खादिनाङ्कितो भक्त्या आर्द्रं यः कुरुते द्विजः ।
विधिहीनन्तु संपूर्णं पितॄणान्तु गयासमम् ॥
यथाग्निर्दहते कर्त्तं वायुना प्रेरितो भृशम् ।
तथा दहन्ति पापानि दृष्ट्वा शङ्खायुधानि वै ॥'
ब्राह्मे श्रीब्रह्मनारदसंवादे ।
'विष्णुनामाङ्किता मुद्रा अष्टाक्षरसमन्विताम् ।
शङ्खादिकायुधैर्युक्तां स्वर्गरूप्यमयीमपि ॥
धत्ते भागवतो यस्तु कलिकाले विशेषतः ।
प्रह्लादस्य समो ज्ञेयो नान्यथा कलिवल्लभ ! ॥'
किञ्च ।
'शङ्काङ्किततनुर्विप्रो मुक्तो यस्य च वेश्मनि ।
तदन्नं स्वयमश्नाति पितृभिः सह केशवः ॥
शङ्खायुधाङ्कितो यस्तु स्नानाने म्रियते यदि ।
प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य नारद ! ॥
शङ्खायुधैः कलौ नित्यं मण्डितं यस्य विग्रहम् ।
तत्राश्रयं प्रकुर्व्वन्ति विबुधा वासवादयः ॥
यः करोति हरेः पूजां शङ्खशङ्काङ्कितो नरः ।
अपराधसहस्राणि नित्यं हरति केशवः ॥
कृत्वा काष्ठमयं बिम्बं शङ्खशङ्खैस्तु चिह्नितम् ।
यो ह्यर्चयति चात्मानं तत्समो नास्ति वैष्णवः ॥
पापरूपतितप्राप्तैर्नास्तिकालापपातकैः ।
न लिप्यते कलिक्लेदैः शङ्खशङ्काङ्कितो नरः ॥'
किञ्च ।
'अष्टाक्षराङ्किता मुद्रा यस्य धातुमयी भवेत् ।
शङ्खपद्मादिभिर्युक्ता पूज्यतेऽसौ सुरासुरैः ॥
धृता नारायणी मुद्रा प्रह्लादेन पुरा कृता ।
विभीषणेन बलिना ध्रुवेण च शुकेन च ॥
मान्धातृणाम्बरीषेण मार्कण्डप्रमुखैर्द्विजैः ।
शङ्खादिचिह्नितैः शस्त्रैर्दग्धे कृत्वा कलिप्रिय ! ॥
आराध्य केशवात् प्राप्तं समीहितफलं महत् ॥'
किञ्च ।
'गोपीचन्दनदृत्तायां लिखितं यस्य विग्रहे ।
शङ्खपद्मादिचक्रं वा तस्य देहे वसेद्धरिः ॥'
तत्रैव श्रीसनत्कुमारोक्तौ ।
'यस्य नारायणी मुद्रा देहे शङ्खादिचिह्नितां ।
धात्रीफलकृता माला तुलसीकाष्ठसम्भवा ॥
द्वादशाक्षरमन्त्रेण नियुक्तानि कलेवरे ।
आयुधानि च विप्रस्य मत्तमः स च वैष्णवः ॥'
किञ्च ।
'यस्य नारायणी मुद्रा देहे शङ्खादिचिह्नितां ।
सर्व्वाङ्गं चिह्नितं यस्य शङ्खेनारायणोद्भवैः ॥
प्रवेशो नास्ति पापस्य कवचं तस्य वैष्णवम् ॥'
अन्यत्र च ।
'एभिर्भागवतैश्चिह्नैः कलिकाले द्विजातयः ।
भवन्ति मर्त्यलोके ते शापानुग्रहकारकाः ॥'*॥
अथ मुद्राधारणविधिः । गौतमीये ।
"ललाटे च गदा कार्य्या हृदि चापः शरः स्मृतः ।
नन्दकश्चैव कुक्षौ तु शङ्खचक्रं भुजद्वये ॥
शङ्खचक्राङ्कितो विप्रः स्नानाने म्रियते यदि ।
प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य गौतम ! ॥
चक्रञ्च दक्षिणे बाहौ शङ्खं वामेऽपि दक्षिणे ।
गदां वामे गदाधस्तात् पुनश्चक्रञ्च धारयेत् ॥
शङ्खोपरि तथा पद्मं पुनः पद्मञ्च दक्षिणे ।
खड्गं वक्षसि चापञ्च शरं शिरसि धारयेत् ॥
इति पञ्चायुधान्यादौ धारयेद्वैष्णवो जनः ।
मत्स्यञ्च दक्षिणे हस्ते कूर्म्मं वामकरे तथा ॥'
तथा चोक्तम् ।
'दक्षिणे तु भुजे विप्रो बिभृयादे सुदर्शनम् ।
मत्स्यं पद्मञ्चापरेऽथ शङ्खं कूर्म्मं गदां तथा ॥
साम्प्रदायिकशिष्टानामाचाराच्च यथारुचि ।
शङ्खचक्रादिचिह्नानि सर्व्वेष्वङ्गेषु धारयेत् ॥
भक्त्या निजेष्टदेवस्य धारयेच्चक्रमान्यपि ।
चक्रशङ्खौ च धार्य्येते संमिश्रावेव केचन ॥'
यत उक्तं ब्रह्मवैवर्त्ते ।
'केवलं नोद्वहेच्छङ्खमादौ चासुरविग्रहम् ।
अतश्चक्रविमिश्रं तं बिभृयाद्वैष्णवः सदा ॥
श्रीगोपीचन्दनेनैवं चक्रादीनि बुधोऽन्वहम् ।
धारयेच्छयनादौ तु तप्तानि किल तानि हि ॥'
अथ चक्रादीनां लक्षणानि ।
'द्वादशारञ्चरन्तु षट्कोणं वलयत्रयसंयुतम् ।
चक्रं स्याद्दक्षिणावर्त्तः शङ्खस्य श्रीहरेः स्मृतः ॥
गदापद्मादिकं लोकसिद्धमेव मतं बुधैः ।
मुद्रा च भगवान्नाम्नाङ्किता याथाचरादिभिः ॥'
इति श्रीहरिभक्तिविलासः ॥ ● ॥
अपि च ।
'यथा मुद्रा प्रीतलाक्षा तथा तप्ता न संशयः ।
तप्तायाः प्रीतलायाश्च विभेदो नैव वर्त्तते ॥
नामचिह्नादिना देहे वह्निना वा नृदङ्कनम् ।
सा दीक्षा प्रोच्यते भूप ! वाह्यानां ज्ञानिना-
मपि ॥
वैष्णवैर्विष्णुभक्तैश्च ब्राह्मणैर्वेदपारगैः ।
सन्मार्य्या सतिला मुद्रा गोपीचन्दनसंयुता ॥'
इति नारदपञ्चरात्रम् ॥
'शङ्खनामाक्षरैर्गात्रमङ्कयेच्चन्दनादिना ।
स लोकपावनो भूत्वा विष्णुलोकमवाप्नुयात् ॥
अग्नितप्तेन चक्रेण ब्राह्मणो बाहुमूलयोः ।
अङ्कयित्वा जपेन्मन्त्रं संसाराज्जीवमाप्नुयात् ॥'
इति पद्मपुराणम् ॥

'तन्नाम्ना चाङ्कितं सर्व्वं वसनं भाजनादिकम् ।'
इति हारीतस्मृतिः ॥ * ॥

देवताविशेषप्रीतिजनिकाङ्गुलिरचना । यथा, मुद्रापदव्युत्पत्तिमाह तन्त्रे ।

'मोदनात् सर्व्वदेवानां द्रावणात् पापसन्ततेः ।
तस्मान्मुद्रेति सा ख्याता सर्व्वकामार्थसाधनी ॥
अथ मुद्राः प्रवक्ष्यामि सर्व्वतन्त्रेषु कल्पिताः ।
याभिर्व्विरचिताभिश्च मोदन्ते मन्त्रदेवताः ॥
अर्च्चने जपकाले च ध्याने काम्ये च कर्म्मणि ।
स्नाने चावाहने ग्रन्थे प्रतिष्ठायाञ्च रक्षणे ॥
नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते ।
स्थाने मुद्राः प्रदर्श्याः स्वलक्षणसलक्षिताः ॥
आवाहनादिका मुद्रा नव साधारणा मताः ।
तथा षड्ङ्गमुद्राश्च सर्व्वमन्त्रेषु योजयेत् ॥
एकोनविंशतिर्म्मुद्रा विष्णोरुक्ता मनीषिभिः ।
शङ्खचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ॥
वनमाला तथा ज्ञानमुद्रा विख्याऽथया तथा ।
गरुडाख्या परा मुद्रा विष्णोः सन्तोषवर्द्धिनी ॥
नारसिंही च वाराही हायग्रीवी धनुस्तथा ।
वाममुद्रा ततः परशुर्ज्जगन्मोहनिका परा ॥
काममुद्रा पराख्याता श्रीवत्सस्य दश मुद्रिकाः ।
लिङ्गयोनित्रिशूलाख्यामालेड्याभीष्टगाऽथयाः ।
खड्गाङ्गा च कपालाख्या डमरुः शिवतोषदाः ॥
सूर्य्यस्येकैव पद्माख्या सप्तमुद्रा गणेशितुः ।
दन्तपाशाङ्कुशा विघ्नपरमूलङ्कुकसंज्ञिताः ।
बीजपूराऽथया मुद्रा विज्ञेया विघ्नपूजने ॥
पाशाङ्कुशवराभीतिखड्गचर्म्मधनुःशराः ।
मौद्गली मुद्रिका दौर्गी मुद्राः शक्तेः प्रियङ्कराः ॥
लक्ष्मीमुद्रार्च्चने लक्ष्म्या वाग्वादिन्याश्च पूजने ।
अक्षमाला तथा वीणाख्याऽपुस्तकमुद्रिकाः ॥
सप्तजिह्वाऽथया मुद्रा विज्ञेया वह्निपूजने ।
मत्स्यमुद्रा च कूर्म्माख्या लेलिहा शुक्रसंज्ञिका ॥
महायोनिरिति ख्याता सर्व्वसिद्धिसमृद्धिदा ।
ग्रन्थार्च्चने महायोनिः श्यामादौ शुक्रमुद्रिका ॥
मत्स्यकूर्म्मलेलिहाख्या मुद्रा साधारणी मता ।
तारार्च्चने विशेषास्तु कथ्यन्ते पञ्च मुद्रिकाः ॥
योनिश्च भूतिनी चैव बीजाख्या देव्यधूमिनी ।
लेलिहानेति संप्रोक्ताः पञ्चमुद्राः प्रकाशिताः ॥
दुर्गाया मुद्रिका ज्ञेयाऽक्षिपुराया प्रपूजने ।
संक्षोभद्रावणाकर्षवश्योन्मादमहाङ्कुशाः ।
खेचरी बीजयोन्याख्या त्रिखण्डा परिकीर्त्तिताः ॥
कुम्भमुद्राभिषेके स्यात् पद्ममुद्रासने तथा ।
कालकर्णी प्रयोक्तव्या विघ्नप्रशमकर्म्मणि ॥
शालिनी च प्रयोक्तव्या जलशोधनकर्म्मणि ।
श्रीगोपालार्च्चने वेणुर्हरेर्नारसिंहिका ॥
वराहस्य च पूजायां वाराहाख्यां प्रयोजयेत् ।
हयग्रीवार्च्चने चैव हायग्रीवीं प्रदर्शयेत् ॥
रामार्च्चने धनुर्ब्बाणमुद्रे परशुरक्षणार्च्चने ।
परशुरामस्य विज्ञेया जगन्मोहनसंज्ञिका ॥
वासुदेवाऽथया ध्याने कुन्तमुद्रा तु रक्षणे ।
सर्व्वत्र प्रार्थने चैव प्रार्थनाख्यां प्रयोजयेत् ॥ * ॥
उद्देश्यातुक्तमादासासुश्चल्ले लक्षणान्यथ ।

हस्ताभ्यामञ्जलिं बद्ध्वानामिकामूलपर्व्वयोः ॥
अङ्गुष्ठौ निक्षिपेत् सेयं मुद्रा त्वावाहनी स्मृता ।१।
अधोमुखौ स्त्रियं चेत् स्यात् स्थापनी मुद्रिका स्मृता ॥ २ ॥

उत्क्षिताङ्गुष्ठमुष्टिस्थसंयोगात् सन्निधापनी ।३।
अन्तःप्रवेशिताङ्गुष्ठा सैव संबोधनी मता ॥४॥
उत्तानसुस्थिरगला संमुखीकरणी मता ।५।
देवताङ्गे षडङ्गानां न्यासः स्यात् सकलीकृतिः ॥६॥
सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्ज्जनी ।
अवगुण्ठनमुद्रेयमभितो भ्रामिता मता ॥ ७ ॥
अन्योन्याभिमुखाश्लिष्टा कनिष्ठानामिका पुनः ।
तथैव तर्ज्जनी मध्या धेनुमुद्रा प्रकीर्त्तिता ॥
अन्तीकरणं कुर्य्यात्तया साधकसत्तमः । ८ ।
अन्योन्यग्रथिताङ्गुष्ठा प्रसारितपराङ्गुली ॥
महामुद्रेयमुदिता परमीकरणे बुधैः ।
प्रयोजयेदिमा मुद्रा देवताज्ञानकर्म्मणि ॥ ९ ॥ *॥

वैष्णवीनान्तु मुद्राणां कथ्यन्ते लक्षणान्यथ ।
वामाङ्गुष्ठन्तु संगृह्य दक्षिणेन तु मुष्टिना ॥
ऊर्ध्वोत्तानं ततो मुष्टिमङ्गुष्ठन्तु प्रसारयेत् ।
वामाङ्गुल्यस्तथाश्लिष्टाः संयुक्ताः स्युः प्रसारिताः ॥
दक्षिणाङ्गुष्ठसंसृष्टा ज्ञेयैषा शङ्खमुद्रिका । १ ।
हस्तौ तु संमुखौ कृत्वा सन्नतग्रोथिताङ्गुली ॥
तलान्तर्मिलिताङ्गुष्ठौ सुसूक्ष्मौ सुप्रसारितौ ।
कनिष्ठाङ्गुष्ठकौ लग्नौ सुदेषा चक्रसंज्ञिका ॥२॥
अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथिताङ्गुली ।
अङ्गुल्यौ मध्यमे भूयः सुलग्ने सुप्रसारिते ॥
गदा मुद्रेयमुदिता विष्णोः सन्तोषवर्द्धिनी । ३ ।
हस्तौ तु संमुखौ कृत्वा सन्नतग्रोथिताङ्गुली ॥
तलान्तर्मिलिताङ्गुष्ठौ कृत्वैषा पद्ममुद्रिका । ४ ।
ओष्ठे वामकराङ्गुष्ठो लग्नस्तस्य कनिष्ठिका ॥
दक्षिणाङ्गुष्ठसंयुक्ता तत्कनिष्ठा प्रसारिता ।
तर्ज्जनीमध्यमानामाः किञ्चित्संकुच्य चालिताः ॥
वेणुमुद्रा भवत्येषा सुग्रहा प्रेयसी हरेः । ५ ।
अन्योन्यदृष्टकरयोर्मध्यमानामिकाङ्गुली ॥
अङ्गुष्ठेन तु बध्नीयात् कनिष्ठामूलसंस्थिते ।
तर्ज्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञिका ॥६॥
अनामाग्रदृष्टसंज्ञा दक्षिणस्य कनिष्ठिका ।
कनिष्ठयान्यया बद्धा तर्ज्जन्या दक्षया तथा ॥
वामानामाग्र बध्नीयात् दक्षिणाङ्गुष्ठमूलके ।
अङ्गुष्ठमध्यमे वामे संयोज्य सरलाः पराः ॥
चतसोऽप्यङ्गसंज्ञा मुद्रा कौस्तुभसंज्ञिका ।७।
सृणेत् कक्षादिपादान्तं तर्ज्जन्याङ्गुष्ठया तथा ॥
करद्वयेन मालावत् मुद्रेयं वनमालिका । ८ ।
तर्ज्जन्यङ्गुष्ठकौ सक्तावग्रतो विन्यसेत् हृदि ॥
वामहस्ताम्बुजं वामनाड्यङ्गुलिं विन्यसेत् ।
ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य प्रेयसी । ९ ॥
अङ्गुष्ठं वामसृक्कस्थमितरकराङ्गुष्ठकेनापि बद्ध्वा
तस्याग्रं पीड़यित्वाङ्गुलिभिरपि च ता वामहस्ताङ्गुलीभिः ।
बद्ध्वा गाढ़ं हृदि न्यापयतु विमलधीर्व्याहरन् मारबीजं

विख्याख्या मुद्रिकेयं स्फुटमिह गदिता गोपनीया विधिज्ञैः ॥ १० ॥

हस्तौ तु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठिके ।
मिथस्तर्ज्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा ॥
मध्यमानामिके हे तु द्वौ प्रसार्य्य चालयेत् ।
एषा गरुडमुद्रा स्याद्विष्णोः सन्तोषवर्द्धिनी ॥११॥
जानुमध्ये करौ कृत्वा चिबुकौष्ठौ समावुभौ ।
हस्तौ तु भूमिसंलग्नौ कम्पमानः पुनः पुनः ॥
सुखं विस्तृतकं कुर्य्यात् लेलिहानाश्च जिह्विकाम् ।
नारसिंही भवेदेषा मुद्रा तत्प्रीतिवर्द्धिनी ॥'

अथवा ।

'अङ्गुष्ठाभ्यान्तु करयोस्तथाक्रम्य कनिष्ठिके ।
अधोमुखीभिः सर्व्वाभिर्म्मुद्रेयं वृहरेर्म्मता ॥ १२ ॥
देवोपरि करं वामं कृत्वोत्तानमधः सुधीः ।
नमयेदिति संप्रोक्ता मुद्रा वाराहसंज्ञिका ॥'

यद्वा ।

'दक्षहस्तोर्द्धसुखं वामहस्तमधोमुखम् ।
अङ्गुल्यग्रन्तु संयुक्तं मुद्रा वाराहसंज्ञिका ॥१३॥
वामहस्ततले दत्वा अङ्गुलीस्तास्वधोमुखीः ।
संरोप्य मध्यमां तासामुन्नम्याधो विकुञ्चयेत् ॥
हयग्रीवप्रिया मुद्रा तन्मूर्त्तेरनुकारिणी ।१४।
वामस्य मध्यमाग्रन्तु तर्ज्जन्यग्रेण योजयेत् ।
अनामिकां कनिष्ठाञ्च तस्याङ्गुष्ठेन पीड़येत् ।
दर्शयेदामके स्कन्धे धनुर्म्मुद्रेयमीरिता । १५ ॥
दक्षमुष्टेस्तु तर्ज्जन्या दीर्घैषा वामसुद्रिका ।'१६।

यद्वा ज्ञानार्ण्णवे ।

'यथा हस्तगतं चापं तथा हस्तं कुरु प्रिये ! ।
चापमुद्रेयमाख्याता वामहस्ते व्यवस्थिता ॥१७॥
यथा हस्तगता बाणास्तथा हस्तं कुरु प्रिये ! ।
बाणमुद्रेयमाख्याता रिपुवर्गनिकृन्तनी ॥१८॥
तले तलन्तु करयोस्तिर्य्यक् संयोज्य चाङ्गुलीः ।
संहताः प्रहताः कुर्य्यात् मुद्रा परशुसंज्ञिका ॥१९
उत्क्षिताङ्गुष्ठमुष्टी द्वे मुद्रा त्रैलोक्यमोहिनी॥२०॥
हस्तौ तु संपुटौ कृत्वा प्रहताङ्गुलिकौ तथा ।
तर्ज्जन्यौ मध्यमाग्रेऽङ्गुष्ठौ मध्यमाश्रितौ ।
काममुद्रेयमुदिता सर्व्वदेवप्रियङ्करी ॥२१॥ *॥

महादेवप्रियाणान्तु कथ्यन्ते लक्षणान्यथ ।
उत्क्षितं दक्षिणाङ्गुष्ठं वामाङ्गुष्ठेन वेष्टयेत् ।
वामाङ्गुलीर्दक्षिणाभिरङ्गुलीभिश्च बन्धयेत् ।
लिङ्गमुद्रेयमाख्याता शिवसान्निध्यकारिणी ॥२२॥
मिथः कनिष्ठिके बद्ध्वा तर्ज्जनीभ्यामनामिके ।
अनामिकोर्द्धसंश्लिष्टदीर्घमध्यमयोरधः ॥
अङ्गुष्ठाग्रहयं न्यस्येत् योनिमुद्रेयमीरिता ।२।
अङ्गुष्ठेन कनिष्ठान्तु बद्ध्वा श्लिष्टाङ्गुलीत्रयम् ॥
प्रसारयेत् त्रिमूलाख्या मुद्रेयं परिकीर्त्तिता ।३
अङ्गुष्ठतर्ज्जन्ययेतु ग्रथयित्वाङ्गुलित्रयम् ॥
प्रसारयेदमाला मुद्रेयं परिकीर्त्तिता । ४ ।
अधःस्थितो दक्षहस्तः प्रहतो वरमुद्रिका ॥५॥
ऊर्द्धोन्नतो वामहस्तः प्रहतोऽभयमुद्रिका ।६। ।
मिलितानामिकाङ्गुष्ठं मध्यमाग्रे नियोजयेत् ॥
श्लिष्टाङ्गुल्युच्छ्रिते कुर्य्यात् शृङ्गमुद्रेयमीरिता ।७
पश्चाङ्गुष्ठो दक्षिणास्तु मिलिता ऊर्द्धतर्जनाः ॥

खट्वाङ्गमुद्रा विख्याता शिवस्यातिप्रिया मता ।८।
पात्रवद्वामहस्तन्तु कृत्वाङ्गे वामके तथा ।
निधायोच्छ्रितवत् कुर्यात् मुद्रा कापालिकी मता । ९ ।
मुष्टिञ्च शिथिलां कृत्वा ईषदुच्छ्रितमध्यमाम् ॥
दक्षिणाङ्गुष्ठमन्त्र्य कर्णदेशे प्रचालयेत् ।
एषा मुद्रा डमरुका सर्वविघ्नविनाशिनी ॥१०॥
तथा गजेन्द्रमुद्राञ्च मुच्यन्ते लक्षणान्यथ ।
उत्तानोर्द्धमुखौ मध्या सरला वङ्कमुष्टिका ।
दन्तमुद्रा समाख्याता सर्वागमविशारदैः ।११।
वामसृष्टेस्तु तर्जन्या दक्षसृष्टेस्तु तर्जनीम् ॥
संयोज्याङ्कुशकायाभ्यां तर्जन्यग्रे खके क्षिपेत् ।
एषा पाशाङ्कया मुद्रा विद्वद्भिः परिकीर्तिता ॥१२॥
कृत्वीच्च मध्यमां कृत्वा तर्जनीमध्यपर्वणि ।
संयोज्याङ्कुचयेत् किञ्चिन्मुद्रेयाङ्कुशसंज्ञिका ॥१३॥
तर्जनीमध्यमानामाकनिष्ठाङ्कुष्ठसृष्टिका ।
अधोमुखी दीर्घरूपा मध्यमा विघ्नसृष्टिका ॥१४॥
परशुमुद्रा ५ निगदिता प्रसिद्धा लङ्कुमुद्रिका ।१६।
बीजपूराङ्कया मुद्रा प्रसिद्धत्वादुपेक्षिता ॥७॥*॥
शाक्तेयीनाञ्च मुद्राणां कथ्यन्ते लक्षणान्यथ ।
पाशा १ कुश २ वरा ३ भीति ४ धनु ५
बाणाः समीरिताः ॥ ६ ॥
कनिष्ठानामिके वङ्का स्वाङ्कुष्ठेनैव दंशतः ।
श्लिष्टाङ्गुली तु प्रक्षते संश्लिष्टे खड्गमुद्रिका ॥७॥
वामहस्तं तथा तिर्यक् कृत्वा चैव प्रसार्य च ।
आकुञ्चिताङ्गुलीः कुर्यात् चर्ममुद्रेयमीरिता ॥८
सृष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणम् ।
कुर्याच्छुसलमुद्रेयं सर्वविघ्नविनाशिनी ॥ ९ ॥
मुष्टिं कृत्वा कराभ्याञ्च वामस्योपरि दक्षिणाम् ।
कृत्वा शिरसि संयोज्य दुर्गा मुद्रेयमीरिता ॥१०॥
चक्रमुद्रां तथा वङ्का मध्यमे द्वे प्रसार्य च ।
कनिष्ठिके तथानीय तदग्रेऽङ्कुष्ठकौ क्षिपेत् ॥
लक्ष्मीमुद्रा परा ह्येषा सर्वसम्पत्प्रदायिनी ॥११॥
बीजावादनवङ्कौ कृत्वा सञ्चालयेच्छिरः ।
वीणामुद्रेयमाख्याता सरस्वत्याः प्रियङ्करी ॥१२॥
वामसृष्टिं खाभिमुखीं कृत्वा पुस्तकमुद्रिका ।१२।
दक्षिणाङ्कुष्ठतर्जन्यावग्रयमे पराङ्मुखीः ॥
प्रसार्य संस्थितोत्ताना एषा आख्यानमुद्रिका ।१३।
श्रीरामस्य सरस्वत्या अत्यन्तप्रेयसी मता ॥*॥
मणिबन्धस्थितौ कृत्वा प्रक्षताङ्गुलिकौ करौ ।
कनिष्ठाङ्कुष्ठयुगले मिलितावन्तः प्रसारयेत् ॥
सप्तजिह्वाख्यमुद्रेयं वैश्वानरप्रियङ्करी ॥१॥ *॥
कनिष्ठाङ्कुष्ठकौ बद्धौ करयोरितरेतरम् ॥
तर्जनी मध्यमागामा संहता शुषवर्जिता ।
मुद्रेषा गालिनी प्रोक्ता ग्रहस्योपरि चालिता ॥
दक्षोङ्कुष्ठं पराङ्कुष्ठे क्षिप्त्वा हस्तद्वयेन तु ।
सावकाशमेकमुष्टिं कुर्यात् सा कुम्भमुद्रिका ॥
सृष्टीरूर्द्धोन्नताङ्कुष्ठौ तर्जन्यग्रे तु विन्यसेत् ।
सर्वरक्षाकरी ह्येषा दन्तमुद्रा प्रकीर्तिता ॥*॥
प्रक्षताङ्गुलिकौ हस्तौ मिथःश्लिष्टौ च संमुखौ ।
कुर्यात् स्वे हृदये सैषा मुद्रा प्रार्थनसंज्ञिका ॥*॥
व्यत्यस्ताञ्जलिमुद्रा स्याद्दासमुद्रेवाङ्कया च सा ।
अङ्कुष्ठावुन्नतौ कृत्वा सृष्टी: संलग्नयोर्द्वयोः ॥
तावेवाभिमुखौ कुर्यात् मुद्रेषा कालकर्षिका ।*।
दक्षिणा निविड़ा मुष्टिर्नासिकार्पिततर्जनी ॥
मुद्रा विघ्नसंज्ञा स्यात् विघ्नयावेशकारिणी ।
मुष्टिरूर्द्धोन्नताङ्कुष्ठा दक्षिणा नादमुद्रिका ।
तर्जन्यङ्कुष्ठसंयोगादग्रतो बिन्दुमुद्रिका । * ।
अधोमुखे वामहस्ते ऊर्द्धांसं दक्षहस्तकम् ।
क्षिप्त्वाङ्गुलीरङ्गुलीभिः संग्रथ्य परिवर्तयेत् ।
एषा संहारमुद्रा स्यात् विसर्जनविधौ स्मृता ।
दक्षपार्श्विपृष्ठदेशे वामपार्श्वितलं न्यसेत् ।
अङ्कुष्ठौ चालयेत् सम्यक् मुद्रेयं मत्स्यरूपिणी ।
वामहस्तस्य तर्जन्यां दक्षिणस्य कनिष्ठया ।
तथा दक्षिणतर्जन्यां वामाङ्कुष्ठेन योजयेत् ॥
उन्नतं दक्षिणाङ्कुष्ठं वामस्य मध्यमादिकाः ।
अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च ।
वामस्य पिप्पलीतीर्थेन मध्यमानामिके तथा ।
अधोमुखे च ते कुर्यात् दक्षिणस्य करस्य च ।
कूर्मपृष्ठसमं कुर्यात् दक्षपार्श्विच सर्वतः ।
कूर्ममुद्रेयमाख्याता देवताध्यानकर्मणि ।'
पृष्ठे क्रोडे । * ।
'अन्तराङ्कुष्ठमुष्टिञ्च कृत्वा वामकरस्य च ।
मध्यमार्थं दक्षिणस्य तथालम्ब्य प्रयत्नतः ॥
मध्यमेनाथ तर्जन्यामङ्कुष्ठाग्रेण योजयेत् ।
दक्षिणं योजयेत् पार्श्विं वामसृष्टौ तु साधकः ॥
दर्शयेद्दक्षिणे भागे मुखमुद्रेयमुच्यते । * ।
तर्जनीमध्यमागामाः समं कुर्यादधोमुखम् ।
अनामायां क्षिपेदृष्टां ऊर्ध्वां कृत्वा कनिष्ठिकाम् ॥
खेलिहा नाम मुद्रेयं जीवन्यासे प्रकीर्तिता ।
तर्जन्यनामिकामध्याकनिष्ठाक्रमयोगतः ।
करयोर्योजयेत्तेव कनिष्ठामूलयोगतः ।
अङ्कुशाग्रे तु निःक्षिप्य महायोनिः प्रकीर्तिता।'
तारायाः योन्यादिमुद्रा—यथा । योनिमुद्रा च
वक्ष्या भूतिनी वक्ष्या बीजाख्यापि ॥
'परिवर्त्य करौ कृत्वा कनिष्ठाङ्गुष्ठमध्यमे ।
अनामायुगलग्राधस्तर्जनीयुगलं पृथक् ॥
अन्योन्यं निविड़ं बद्धाङ्कुशाग्रेनामिके ततः ।
दानवधूमकेत्याख्या मुद्रेषा कथिता प्रिये ! ॥
अस्यास्तु बन्धनाज्जन्तो बन्धनाच्छुच्यते ध्रुवम् ।
वक्त्रं विस्तारितं कृत्वाप्यधो जिह्वाञ्च चालयेत् ।
पार्श्वस्थं सृष्टियुगलं खेलिहानेति कीर्तिता ।'
एषा ताराराधनेऽन्या खेलिहाना वक्ष्या ।
'योगिमायाधरः सेन्दुर्बधूः कूर्चः क्रमाद्विदुः ।
बीजानि योजयन् मन्त्री मुद्रामन्त्रमाचरेत् ॥
तर्जन्यङ्कुष्ठसंयोगादग्रतो बिन्दुमुद्रिका ।
वामकेश्वरतन्त्रोक्ताः प्रकाश्यन्तेऽथ मुद्रिकाः ॥
अथ देवि ! प्रवक्ष्यामि मुद्राः सर्वार्थसिद्धिदाः ।
याभिर्विरचिताभिस्तु सान्निध्यं त्रैपुरं भवेत् ॥
परिवर्त्तौ करौ कृत्वाङ्कुष्ठौ कारयेत् समौ ।
अनामामूलगते कृत्वा तर्जन्यौ कुटिलाकृती ॥
कनिष्ठिके नियुञ्जीत निजस्थाने महेश्वरि ! ।
त्रिखण्डेयं समाख्याता त्रिपुराध्यानकर्मणि ॥
मध्यमामध्यगे कृत्वा कनिष्ठेऽङ्कुशरोधिते ।
तर्जन्यौ दण्डवत् कृत्वा मध्यमोपर्यनामिके ।
एषा च प्रथमा मुद्रा सर्वसंक्षोभकारिणी ॥
एतस्या एव मुद्राया मध्यमे सरले यदा ।
क्रियेते परमेशानि ! सर्वविद्राविणी तदा ॥
मध्यमातर्जनीभ्याञ्च कनिष्ठानामिके समे ।
अङ्कुशाकाररूपाभ्यां मध्यमे परमेश्वरि ! ॥
अङ्कुशौ तु नियुञ्जीत कनिष्ठानामिकोपरि ।
इयमाकर्षिणी मुद्रा चैलोक्याकर्षिणी परा ॥
पुटाकारौ करौ कृत्वा तर्जन्यावङ्कुशाकृती ।
परिवर्त्तक्रमेणैव मध्यमे तदधोगते ॥
क्रमेण देवि ! तेनैव कनिष्ठानामिके तथा ।
संयोज्य निविड़ाः सर्वा अङ्कुशवदग्रतः ॥
मुद्रेयं परमेशानि ! सर्ववश्यकरी मता ।
सम्मुखौ तु करौ कृत्वा मध्यमामध्यगेऽन्यथे ॥
अनामिके तु सरले तद्वद्विस्तर्जनीद्वयम् ।
दण्डाकारौ तदङ्कुशौ मध्यमानमुद्रेयगौ ॥
मुद्रेषोन्मादिनी नाम्ना कर्षिणी सर्वयोषिताम् ।
अस्याख्यनामिकायुग्ममधः कृताङ्कुशाकृती ॥
तर्जन्यावपि तेनैव क्रमेण विनियोजयेत् ।
इयं महाङ्कुशा मुद्रा सर्वकामार्थसाधिनी ॥*॥
सर्वं दक्षिणदेशे तु सर्वदेशे तु दक्षिणम् ।
बाहुं कृत्वा महादेवि ! हस्तौ संपरिवर्त्य च ।
कनिष्ठानामिके देवि ! युक्ते तेन क्रमेण च ।
तर्जनीभ्यां समाक्रान्ते सर्वोर्द्धमपि मध्यमे ॥
अङ्कुशौ तु महेशानि ! सरलावपि कारयेत् ।
इयं सा खेचरी नाम्ना कर्षिणी सर्वयोषिताम् ।
परिवर्त्य करौ कृत्वार्द्धचन्द्राकृती प्रिये ! ।
तर्जन्यङ्कुशयुगलं युगपत् कारयेत्ततः ॥
अधः कनिष्ठावर्द्धे मध्यमे विनियोजयेत् ।
तथैव कुटिले योज्ये सर्वाधस्तादनामिके ।
बीजमुद्रेयमचिरात् सर्वसिद्धिविवर्द्धिनी ।*।
मध्यमे कुटिले कृत्वा तर्जन्युपरिसंस्थिते ।
अनामिके मध्यगते तथैव हि कनिष्ठिके ।
सर्वा एकत्र संयोज्या अङ्कुशपरिपीड़िताः ॥
एषा तु परमा मुद्रा योनिमुद्रेयमीरिता ।*।
एता मुद्रा महेशानि ! त्रिपुराया मयोदिताः ।
पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः ॥
वामहस्तेन सृष्टिन्तु बद्धा कर्णप्रदेशके ।
तर्जनीं सरलां कृत्वा भ्रामयेन्मुखचित्तमः ॥
सौभाग्यदक्षिणी मुद्रा व्यासकाले च सूचिता ।
अन्तरङ्कुशमुद्रा तु निरुध्य तर्जनीमिमाम् ॥
रिपुविद्राविणी मुद्रा व्यासकाले तु सूचिता ।
बद्धा तु योनिमुद्रां वै मध्यमे कुटिले कुरु ॥
अङ्कुशेन तदग्रे तु मुद्रेयं भूतिनी मता ।*।
वामसृष्टिं विधायाथ तर्जनीमध्यमे ततः ॥
प्रसार्य तर्जनीमुद्रा निर्दिष्टा वक्त्रपाणिना ॥'

इति तन्त्रसारे मुद्राप्रकरणं समाप्तम् ॥*॥*॥

अपि च ।

'उक्ताः स्तवनमस्काराः श्रुतं पुरतो युवाम् ।
मुद्राणां परिसंख्यानं स्वरूपञ्च यथाक्रमम् ॥
धेनुञ्च सम्पुटञ्चैव प्राञ्जलिञ्चैवपङ्कजौ ।

नाराचो मुष्टदण्डौ च योनिरर्द्धं तथैव च ॥
वन्दनी च महासुद्रा महायोनिस्तथैव च ।
भगश्च पुटकश्चैव निःशङ्कोऽथार्द्धचन्द्रकः ॥
अङ्कुश्च त्रिमुखश्चैव शङ्खमुद्राथ सुष्टिकः ।
वज्रश्चैव तथा वह्निं सयोनिर्विमलस्तथा ॥
षट्कः शिखरिणी तुङ्गः पृष्ठोऽथ लम्बधेनुकः ॥
संमीलनी च कुक्कुश्च चक्रं मूलं तथैव च ॥
सिंहवक्त्रं गोमुखश्च प्रोन्नामोन्नमनं तथा ।
विम्बं पाशुपतं गुह्यं त्यागोऽथ साधनी तथा ॥
प्रसाधनी धेनुमुद्रा कुक्कुली गूढमेव च ।
त्रिमुखाख्याविवक्त्री च योगो भेदोऽथ मोहनम् ॥
वाणो धनुश्च तूणीरं मुद्रा एतासु सप्तमाः ।
अष्टोत्तरशतं मुद्रा ब्रह्मणा याः प्रकीर्तिताः ॥
तासान्तु पञ्चपञ्चाशदेताः प्राधान्यतः पूजने ।
शेषासु याश्चिपञ्चाशन्मुद्रास्ताः समयेषु च ।
द्रव्यानयनसंकेतनटनादिषु ताः स्मृताः ॥
देवानां चिन्तने योगे ध्याने जप्ये विसर्जने ।
आद्यास्तु पञ्चपञ्चाशन्मुद्रा भैरव ! कीर्तिताः ॥
मुद्रां विना तु यज्जप्यं प्राणायामः सुरार्चनम् ।
योगो ध्यानासने चापि निष्फलानि च भैरव ! ॥
प्रत्येकं लक्षजप्तं तेषां शतं तनयौ युवाम् ॥
दक्षिणामध्यमाग्रेण सव्यहस्तस्य तर्जनीम् ।
योजयेत् सव्यमध्यान्तु तर्जन्या दक्षिणेन वै ॥
तथा दक्षानामिकया वामहस्तकनिष्ठिकाम् ।
अनामिकान्तु वामस्य दक्षिणस्य कनिष्ठया ॥
योजयेद्भक्तिमान् सम्यक् दक्षिणावर्त्तनेन तु ।
धेनुमुद्रा समाख्याता सर्व्वदेवस्य तुष्टिदा ॥९॥
संयोज्य द्वौ तलौ सर्व्वाग्रयङ्कुष्ठाग्राणि हस्तयोः ।
संयोज्य पार्श्वतोऽङ्कुशौ संपुटः प्रोच्यते सुरैः ॥
सर्व्वेषामथ देवानां संपुटः ग्रस्यते सदा ।
ध्यानसंपुटयोगादौ सम्पुटः ग्रस्यते सदा ॥२॥
निकुञ्चयुगलं पार्श्वोः संयोज्यार्द्धेन एव च ।
मध्यशून्यः पुटाकारः प्राञ्जलिः परिकीर्त्तितः ॥३॥
अङ्कुशमन्तरं कृत्वा पार्श्वयोर्मुष्टिं विधाय च ।
संयोज्य विल्ववत्ते तु विल्वमुद्रा प्रकीर्तिता ॥४॥
मध्यिवन्यादाकरभं संयोज्य करयोर्द्वयोः ।
अङ्कुशे चापि संयोज्य तथैव च कनिष्ठिके ॥
तिस्रश्चिस्रो दयोः पार्श्वयोरङ्गुलीर्विरलास्ततः ।
पद्ममुद्रा समाख्याता चतुर्वर्गप्रदा नृणाम् ॥५॥
अङ्कुशाग्रेण तर्जन्याः संयोज्याधोर्द्धरेखया ।
अन्याङ्गुलीस्तथानम्य नाराचः स्यात् प्रसार्य्यते ॥
मम चैव शिवायाश्च प्रीतिदेयं प्रियङ्करी ।
नाराचमुद्रा सततं प्रीत्यै वेतालभैरव ! ॥६॥
अन्तराङ्कुष्ठमुष्टिञ्च कृत्वा वामकरस्य तु ।
मध्यमाभ्यां दक्षिणस्य तथानम्य प्रयत्नतः ॥
मध्याङ्गैनाथ तर्जन्या अङ्कुशाग्रेणियोज्य च ।
दक्षिणं योजयेत् पार्श्वं वाममुष्टौ तु साधकः ॥
दर्शयेद्दक्षिणे भागे मुक्तमुद्रेयमिष्यते ।
इयन्तु गणनाथस्य प्रीतिदा मुद्रिकोत्तमा ॥
सर्व्वेषामपि देवानां तुष्टिदा सर्व्वकर्म्मसु ।७।
अङ्कुशमध्यमादीञ्च सम्यगानम्य तर्जनीम् ॥

प्रसार्य्य दक्षमुद्रेति दक्षिणस्य करस्य तु ।८।
सर्व्वाङ्गुलीषु संयोज्य करयोरुभयोरपि ॥
संवेष्ट्य रज्जुवद्दृष्टे तु पार्श्वोरपि कनिष्ठिके ।
वामस्य वाममूलेन तदग्रं विनियोजयेत् ॥
दक्षस्य मध्यमूलेन तथाग्रं वाममेव च ।
योजयेत् योजनात् पश्चादावर्त्तेन करग्राखिकाः ॥
योन्याकारन्तु तन्मध्यं योनिमुद्रा प्रकीर्तिता ।
कामाख्यायाः पञ्चमूर्त्तेर्दुर्गायाः अपि भैरव ! ॥
प्रीतिदा योनिमुद्रेयं मम कामस्य च प्रिया ।९।
संयुक्ताङ्गुलीः सर्व्वाः प्रसार्य्याङ्गुष्ठपर्व्वणा ।
अग्रेण च कनिष्ठाया अग्रेणापि च योज-
येत् ।
करस्य दक्षिणस्येयमर्द्धयोनिः प्रकीर्तिता ॥१०॥
संपुटं प्राञ्जलिं वापि यदि ग्रीवें नियोजयेत् ।
वन्दनीया समाख्याता मुद्रा विष्णुप्रमोदिनी ॥११॥
सैव चेत् अवकाशक्ता महामुद्रा प्रकीर्तिता ।१२।
दक्षिणाङ्गे तु सा शक्ता वैष्णवी परिकी-
र्तिता ॥ १३ ॥
महायोनिस्तु कथिता वैष्णवीतन्त्रगोचरे ।
द्वयोर्मूले लङ्कुष्ठाग्रमङ्गुलीश्च कनिष्ठयोः ॥
नियोज्य प्रसृतीकृत्य दे पाणी योजयेत् पुनः ।
भगमुद्रा च सा ख्याता लक्ष्मीवाणीग्रिवा-
प्रिया ॥ १४ ॥
सर्व्वाङ्गुलीनामग्रैर्यं दक्षिणस्य करस्य च ।
संयोज्यैकत्र पुरतो निर्देश्यः पुटकः स्मृतः ॥१५॥
कनिष्ठाग्रामिकाङ्गुष्ठाङ्गुलीनां योजयेद्बुधः ।
अग्राग्रयेकत्र मध्यान्तु तर्जनीञ्च प्रसार्य्य वै ॥
कुञ्चीकृत्य करद्वन्द्वं पृथग्ग्रे नियोजयेत् ।
निःशङ्को नाम मुद्रेयं नरसिंहवराहयोः ॥१६॥
कनिष्ठाग्रामिकामध्यामाकुच्य दक्षिणस्य च ।
करस्य तर्जन्यङ्गे प्रसार्य्य क्रियते तु या ॥
सा मुद्रा चार्द्धचन्द्राख्या ग्रहाणां प्रीतिदा-
यिनी । १७।
ऊर्द्धीकृत्य तथाङ्गुष्ठं दक्षिणस्य करस्य च ।
कृत्वा मध्यं तदङ्गुष्ठं वाममुष्टिं तथोर्द्धतः ।
ऊर्द्धाङ्गुष्ठं तथा कुर्य्यादङ्गमुद्रा प्रकीर्तिता ॥१८॥
एतस्या एव मुद्रायाः कनिष्ठादिविमोचतः ।
अष्टौ मुद्राः समाख्याता नाम तासां पृथक्
पृथक् ॥
त्रिमुखश्चैव १९ मुष्टिश्च २० वज्रश्च २१ मावह२२
मेव च ।
विमलश्च २३ घटश्चैव २४ तुङ्गः २५ पृष्ठ २६
स्तथैव च ।
नवानां विष्णुमूर्त्तीनां सार्द्धमङ्गेन मुद्रिकाः ।
क्रमान्नव समाख्याता नायिकानां तथैव च ॥
संयोज्य करयोः पृष्ठे तथावर्त्त्य तु वै समम् ।
प्रसार्य्य तर्जनीयुग्मं संयुक्तं सर्व्वतः पुनः ॥
अङ्कुशौ च तथा शक्तौ ग्रहमुद्रा प्रकीर्तिता ।२७।
उत्तानमञ्जलिं कृत्वा अङ्कुशे दे कनिष्ठयोः ॥
मूले निःक्षिप्य तु करौ संयोज्याथ प्रदर्शयेत् ।
सयोनिरिति सा ख्याता मुद्रा देवौघतुष्टिदा ।२८।
तुष्टिर्दक्षिणहस्तस्य यदोर्द्धाङ्कुष्ठिका भवेत् ।

सा स्यात् शिखरिणी मुद्रा ब्राह्मीसूर्य्यप्रिया
च सा ॥ २९ ॥
अनामिके कनिष्ठे तु संयोज्य ऋजुना पुनः ।
मध्यमातर्जनीनान्तु धेनुमुद्रेव वन्दनम् ॥
सार्द्धधेनुरिति ख्याता चन्द्रप्रीतिविवर्द्धनी ।३०।
करयोरङ्गुलीः सर्व्वाः सर्व्वाग्राण्येकतः स्थिता ॥
नियोज्याङ्गतले चैव तदधोऽपि वियुज्य च ।
अग्रैरग्रं योजयेत्तु मुद्रा सम्मीलनी तु सा ॥३१॥
भौमभूमिसुतौग्राणामियं प्रीतिविवर्द्धनी ।
सर्व्वाङ्गुलीषु संलग्ना दक्षिणस्य करस्य च ॥
कियद्भागं तथान्यस्य तलं कुर्य्यात्तु कुक्कुवत् ।
समाख्याता कुक्कुमुद्रा बुधवाणीग्रिवाप्रिया ॥३२॥
सर्व्वाङ्गुलीनां मध्येषु वामहस्तस्य चाङ्गुलीः ।
प्रसार्य्याङ्कुशयुगलं संयोज्याग्रेण भैरव ! ॥
तदङ्कुशद्वयं कार्य्यं सम्मुखं वितरेत्ततः ।
चक्रमुद्रा समाख्याता गुरुविष्णुग्रिवप्रिया ॥३३॥
अङ्कुशं मध्यमाश्चैव नामयित्वा करस्य च ।
दक्षिणस्यापरास्तिस्रो योजयेदग्रतः पुनः ॥
मूलमुद्रा समाख्याता मम शुक्रगुरुप्रिया । ३४ ।
निकुञ्चीकृत्य तु करौ वामाङ्गुलिगणस्य तु ।
अग्राणि योजयेन्मध्ये तलस्याधश्चहस्ततः ।
अधः कृत्वा वामहस्तं मुद्रा सिंहमुखी
स्मृता ॥ ३५ ॥
इयं प्रीत्यै तु दुर्गायाः सूर्य्यपुत्रस्य चक्रिणः ।
भगमुद्रा कर्णमूले गोमुखाख्या प्रकीर्तिता ॥
मम विष्णोस्तथा राज्ञोः सर्व्वदा प्रीति-
दायिनी । ३६ ।
सुष्टिद्वयमधोत्तानं कृत्वा संयोज्य पार्श्वतः ॥
दक्षिणस्य कनिष्ठादीन् प्रसार्य्य क्रमतः पुनः ।
तथा वामकनिष्ठाभ्यामेकैकेन प्रसारयेत् ॥
अष्टौ मुद्राः समाख्याता नामतः क्रमतः शृणु ।
प्रोन्नामो ३७ नमन ३८ श्चैव विम्बं ३९ पाशु-
पतं ४० तथा ॥
गुह्यं ४१ त्यागः ४२ साधनी ४३ च तथा चैव
प्रसाधनी ४४ ।
आकुञ्च्य करग्राखास्तु दक्षिणाः सा तु मुद्रिका ॥
उग्रमुद्रा समाख्याता स्वहस्तस्य विपर्य्ययात् ।४५।
इन्द्रादिलोकपालानां दश मुद्राः प्रकीर्तिताः ॥
सर्व्वेषामपि देवानां परमप्रीतिवर्द्धनाः ।
अङ्कुशाग्रन्तु तर्जन्या अग्रभागेन योजयेत् ॥
आकुञ्च्य मध्यमाभ्यान्तु दक्षहस्तस्य चाङ्गुलीः ।
दर्शयेत् कुक्कुलाकारं कुक्कुलीशक्तितुष्टिदम् ॥
सर्व्वेषामपि देवानां तथा तुष्टिकरं महत् ।४६।
अङ्कुशतर्जनीमध्या अग्रभागे नियोज्य च ॥
मध्यमाश्च कनिष्ठाश्च आकुञ्च्य दक्षिणे करे ।
त्रिमुखाख्या समाख्याता विश्वेदेवप्रिया सदा ॥
केतोः प्रियेयं सततं मातृणामपि तुष्टिदा ।४७।
तर्जन्यङ्कुष्ठयोरग्रभागौ संयोज्य चाङ्गुलीः ॥
अन्या आकुञ्चयेत् तिस्रः साविवक्त्री प्रकीर्तिता ।
पितृणामथ साध्यानां रुद्राणां विश्वकर्म्मणः ॥
सर्व्वदा प्रीतिजननी अविवक्त्री प्रकीर्तिता ।४८।
पादौ तलाभ्यां संयोज्य तदङ्कुष्ठद्वयं ततः ॥

ऊर्द्धं संयोजयेन्नाभौ अस्योपरि तथाञ्जलिः ।
योगमुद्रा समाख्याता योगिनां तत्त्वदायिनी ॥
सर्व्वेषामपि देवानां पूजने चिन्तने तथा ।
योगमुद्रा समाख्याता तुष्टिप्रीतिकरी सदा ॥४६॥
प्राञ्जलिर्नाम मुद्रा तु उर्द्धाधोभावयोजिताम् ।
विभिद्य दर्शयेद्धस्तौ उर्द्धाग्रः प्रसृतौ कृतौ ॥
भेदमुद्रा समाख्याता मम विष्णोर्विधेः प्रिया ॥५०॥
अङ्गुष्ठे द्वे तु निःक्षिप्य करयोरुभयोस्तले ॥
अग्रेण योजयेत् पश्चात् कनिष्ठायुगलं ततः ।
उभयोर्हस्तयोर्व्वाम्यास्तर्ज्जन्याद्याश्च योजयेत् ॥
अग्राग्रेस्तु पृथक्कृत्य दर्शयेत्तत् कनिष्ठिकाम् ।
मुद्रा सम्मोहनं नाम कामदुर्गारमाप्रिया ॥
सर्व्वेषामपि देवानां मोहनं प्रीतिदं स्मृतम् ॥५१॥
आनम्य सव्यहस्तस्य मध्यमानामिके तथा ॥
तयोः पृष्ठे तु संयोज्य अङ्गुष्ठाग्रं ततः परम् ।
कनिष्ठां तर्ज्जनीञ्चैव अग्रेण योजयेत्ततः ॥
वायुमुद्रा समाख्याता सर्व्वदेवस्य तुष्टिदा ॥५२॥
सर्व्वाङ्गुलीषु सङ्कोच्य अङ्गुष्ठमथ तर्ज्जनीम् ॥
प्रसार्य्य करयोः पश्चादङ्गुष्ठाग्रन्तु योजयेत् ।
अङ्गुष्ठाग्रेण तर्ज्जन्या अग्रेणापि च तर्ज्जनीम् ॥
यथाशक्ति प्रसार्य्यापि धनुर्मुद्रा प्रकीर्त्तिता ॥५३॥
सर्व्वाङ्गुलीनामग्राणि ब्राह्मतीर्थे नियोजयेत् ॥
अनामिकायाः पृष्ठे तु अङ्गुष्ठाग्रं नियोजयेत् ।
भ्रूग्रं तूणीरवत् कृत्वा तेषामन्तस्तु भैरव ! ॥
तूणीरमुद्रा चाख्याता सर्व्वेषां प्रीतिवर्द्धिनी ॥५४॥
मुद्रासु संस्थिता पूजा मुद्रासु परिचिन्तनम् ।
मुद्रासु संस्थिता योगा मुद्रा मोदकरास्मृताः ॥
यदा यदा पूजनेषु चिन्तने ध्यानकर्म्मसु ।
यस्यादौ स्तवने वापि हस्तकृत्यं न विद्यते ।
तदा मुद्रायुतं कुर्य्यादिष्टापूर्त्ते करद्वयम् ।
यत्रकुत्रापि चेच्छक्तो हस्तौ मुद्रासु च क्षमः ।
तदा मुद्रां विधायैव तत्तु कृत्वं समाचरेत् ॥
मुद्रावियुक्तहस्तन्तु क्रियते कर्म्मदैविकम् ।
कृत्वा तन्निष्फलं यस्मात्तस्मान्मुद्रान्वितो भवेत् ॥
विसर्জ্জने तु देवानां यस्य या परिकीर्त्तिता ।
मुद्रां तां पूजनादौ तु तस्य नैव प्रयोजयेत् ॥
विसर्জ্জनान्ते मुद्रां मुद्रायुक्तः समाचरेत् ।
पूजनादि समस्तञ्च कर्म्म दृष्टं विचक्षणैः ॥
ततो मुद्रा परं धाम मुद्रा पुण्यप्रदायिनी ।
देवानां मोददा मुद्रा तस्मान्तां यत्नतश्चरेत् ॥
अर्द्धयोनिर्म्महायोनिर्योनिर्व्रजाक्षी च वैष्णवी ।
मुद्रा विसर्জ্জने प्रोक्ता शिवाद्यिपुरयोः सदा ॥
दुर्गायाः सर्व्वरूपेषु मुद्रा एताः प्रकीर्त्तिताः ।
योनिश्च सम्पुटश्चैव महायोनिस्तथैव च ॥
वर्জ্জयित्वा यस्तभावादुत्तरान्यत्र योजयेत् ।
भवेयुस्तु त्रिपञ्चाग्रदन्या मुद्राः समन्ततः ॥
ता यस्तभावादामाः स्युर्मुद्रा मोदकराः परा ।
एवं वां कथिता मुद्राः पूजने पुण्यतुष्टिदाः ॥"

इति कालिकापुराणे ६५ अध्यायः ॥

मुद्राङ्कितः, त्रि, (मुद्रया अङ्कितः ।) मुद्रया चिह्नितः । छापाकरा मोहरकरा इत्यादि भाषा । यथा,—

"धाता विश्वविरञ्चिमाचरितो देवोऽपि गौरी-
मुखा-
ब्जेषानन्दविघूर्णमाननयनो दत्ताध्वरध्वंसकृत् ।
दैत्यारिः कमलाकपोलमकरीमुद्राङ्कितोरःस्थलः
प्रीतेऽस्मादवितरेषु जन्तुषु पुनः का नाम भ्रान्तेः
कथा ॥"

इति प्रबोधचन्द्रोदयनाटके १ अङ्कः ॥

मुद्रालिपिः, स्त्री, (मुद्रया लिपिः ।) पञ्चधा-लिप्यन्तर्गतलिपिविशेषः । छापार अक्षर इति भाषा । यथा,—

"मुद्रालिपिः स्त्रिग्धलिपिर्लिपिर्लेखनिसम्भवा ।
गुञ्जिकाघुणसम्भूता लिपयः पञ्चधा स्मृताः ।
एताभिर्लिपिभिर्व्याप्ता धरित्री सुभगा हर ! ॥"

इति वाराहीतन्त्रम् ॥

मुद्रिका, स्त्री, (मुद्रा स्वार्थे कन् + स्त्रियां टाप् । पूर्व्वाकारस्य ह्रस्वत्वम् । अत इत्वं च ।) स्वर्ण-रूप्यादिनिर्म्मितमुद्रा । मोहर टाका इत्यादि भाषा । यथा,—

"सौवर्णीं राजतीं ताम्रीमायसीं वा सुशो-
भिताम् ।
सलिलेन सदङ्गानां प्रक्षिपेत् तत्र मुद्रिकाम् ॥"

इति मिताचरायां व्यवहाराध्यायः ॥

मुद्रितं, त्रि, (मुद्रा मुद्रकं अस्य जातेति । मुद्रा इतच् ।) अप्रफुल्लम् । मोदा इति भाषा । तत्पर्य्यायः । सङ्कुचितम् २ निद्रालं ३ मीलितम् ४ । इति हेमचन्द्रः ॥ मुद्राङ्कितञ्च ॥ (परित्यक्तम् । यथा, नैषधचरिते । ५ । १२ ।

"मुद्रितान्यजनसंकथनः सन्
नारदं बलिरिपुः समवादीत् ।")

मुधा, व्य, (मुह्यतीति । मुह् + बाहुलकात् का । पृषोदरादित्वात् ह्रस्वः धः ।) वृथैकम् । इत्यमरः ॥३।४।४॥ (यथा, महाभारते ।१४।३७।४।

"सुधा ज्ञानं सुधा दत्तं सुधा सेवा सुधा श्रमः ।
एवं यो युक्तधर्म्मः स्यात् सोऽमुत्रात्यन्तमश्नुते ॥")

मुनिः, पुं, मनुते जानाति यः । (इति मन् + "मनेरुच ।" उणा० ४ । १२२ । इति इन् + अत उच्च ।) मौनव्रती । इत्यर्थे । इति भरतः ॥ तत्पर्य्यायः । वाचंयमः २ । इत्यमरः ॥३।७।४२॥ मौनी ३ व्रती ४ ऋषिः ५ श्राद्धाङ्गः ६ सत्यवाक् ७ । इति जटाधरः ॥ (यथा, नैषधे ।१।१३३।

"फलेन मूलेन च वारिभूरुहां
मुनेरिवैत्यं मम यस्य वृत्तयः ॥")

तस्य लक्षणं यथा,—

"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥"

इति श्रीभगवद्गीता ॥

तस्य धर्म्मो यथा,—

ब्रह्मोवाच ।

"मुनिभिश्चरिता धर्म्मा उक्ता व्यास ! मया तव ।
यैर्विष्णुस्तुष्यते देवः सुखादियरिभाविकः ॥
तर्पणेन च होमेन सन्ध्यया वन्दनेन च ।
प्राप्यते भगवान् विष्णुर्नैकामार्थमोक्षदः ॥
धर्म्मो विष्णुर्मनो विष्णुः पूजा विष्णुस्तु तर्पणम् ।
होमः सन्ध्या तथा ध्यानं धारणा सकलं
हरिः ॥"

इति गारुडे २२६ अध्यायः ॥

तस्याश्रमे वर्ज्जनीयानि यथा । अतिथिपूजा १ हरिविश्वासः २ हिंसजन्तुशान्तता ३ यज्ञधूमः ४ मुनिसुतः ५ इमसेकः ६ वल्कलः ७ दत्तसः ८ । इति कविकल्पलता ॥

मुनिविशेषाणां ब्रह्मणोऽङ्गविशेषादुत्पत्तिर्यथा,—

"पुलस्त्यो दक्षकर्णाच्च पुलहो वामकर्णतः ।
दक्षनेत्रात्तथात्रिश्च वामनेत्रात् क्रतुः स्वयम् ॥
अरणिर्नासिकारन्ध्रात् अङ्गिराश्च मुखादभूत् ।
भृगुश्च वामपार्श्वाच्च दक्षो दक्षिणपार्श्वतः ॥
छायायाः कर्दमो जातो नाभेः पञ्चशिखस्तथा ।
वक्षसश्चैव बोढुश्च कण्ठदेशाच्च नारदः ॥
मरीचिः स्कन्धदेशाच्च आपस्तम्बस्तथा गलात् ।
वशिष्ठो रसनादेशात् प्रचेता अधरोष्ठतः ॥
हंसश्च वामकुक्षेश्च दक्षकुक्षेर्यतिः स्वयम् ।
सृष्टिं विधातुञ्च विधिश्चकाराज्ञां सुतानपि ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे ८ अध्यायः ॥

गयासुरशरीरे यज्ञार्थं ब्रह्मणो मानसात् हृता मुनयो यथा,—

"ब्रह्मा सम्भृतसम्भारो मानसानृत्विजोऽसृजत् ।
अग्निमुन्मथ्यमन्थन्तं शौनकं जाजलिं भृगुम् ॥
कुसुखिं वेदकौशिक्यं हारीतं कश्यपं क्षयम् ।
गर्गं कौशिकवाशिष्ठौ मुनिं भार्गवमच्यवम् ॥
वृद्धं पाराशरं कण्वं माण्डव्यं श्रुतिकेवलम् ।
श्वेतं सुतारं दमनं सुहोत्रं कक्षमेव च ॥
गौराक्षिञ्च महाबाहुं जेगीषव्यं तथैव च ।
दधिपञ्चसुखं विप्र ! ऋषभं कर्कमेव च ॥
कामायनं गोभिलञ्च मुनिसूयं महाव्रतम् ।
जटामालिनमव्ययं चाटुहासञ्च दारुणम् ॥
आत्रेयञ्चाप्यङ्गिरसमौपमन्युं महाव्रतम् ।
गोकर्णञ्च गुहावासं शिखण्डिनसुमाव्रतम् ॥
सुपालकं गौतमञ्च तथा वेदशिरो व्रतम् ।
एतानन्यांश्च विप्रेन्द्रान् ब्रह्मा लोकपितामहः ।
परिकल्प्याकरोदृत्यागं गयासुरशरीरके ॥"

इति वायुपुराणे गयामाहात्म्यम् ॥

मुनिविशेषनाम्नां व्युत्पत्तिर्यथा,—

"कतिकल्पान्तरेऽतीते ब्रह्मा सृष्टिविधौ पुनः ।
मरीचिमिश्रैर्मुनिभिः सार्द्धं कण्ठाद्बभूव सः ॥
विधेर्नेरदनाच्चैव कण्ठदेशाद्बभूव सः ।
नारदश्चेति विख्यातो मुनीन्द्रस्तेन हेतुना ॥
यः पुत्रश्चेतसो धातुर्बभूव मुनिपुङ्गवः ।
तेन प्रचेता इति तन्नाम चक्रे पितामहः ॥
बभूव धातुर्यः पुत्रः सहसा दक्षयार्चतः ।
सर्व्वकर्म्मसु दक्षश्च तेन दक्षः प्रकीर्त्तितः ॥

मुनिः

वेदेषु कर्दमः ग्रन्थस्थायां वर्णते स्फुटः ।
बभूव कर्दमाद्वालः कर्दमस्तेन कीर्त्तितः ॥
तेजोभेदे मरीचिश्च वेदेषु वर्त्तते स्फुटम् ।
जातः सद्योऽतितेजस्वी मरीचिस्तेन कीर्त्तितः ॥
क्रतुसंघश्च वालेन क्रतो जन्मान्तरेऽधुना ।
ब्रह्मपुत्रोऽपि तन्नाम्ना क्रतुरित्यभिधीयते ॥
प्रधानाङ्गं सुखं धातुस्तती जातश्च बालकः ।
दरस्तेजस्विवचनोऽङ्गिरास्तेन प्रकीर्त्तितः ॥
अतितेजस्विनि भृगुर्व्यक्तते नाम्नि शौनक ! ।
जातः सद्योऽतितेजस्वी भृगुस्तेन प्रकीर्त्तितः ॥
वह्नीभूतश्च ग्निश्च जातः सद्यो हि बालकः ।
अतिप्रियश्च धातुश्च वह्निस्तेन कीर्त्तितः ॥
बालोऽप्यरुणवर्णश्च जातः सद्यो हि तेजसा ।
प्रज्वलन् पूर्व्वतपसा चारुणस्तेन कीर्त्तितः ॥
हंस आत्मा वशी यस्य योगेन योगिनो ध्रुवम् ।
बालः परमयोगीन्द्रस्तेन हंसः प्रकीर्त्तितः ॥
सन्ततं यस्य यत्नश्च तपःसु बालकस्य च ।
प्रकीर्त्तितो यतिस्तेन संयतः सर्व्वकर्म्मसु ॥
पुलस्तपःसु वेदेषु वर्त्तते ह स्फुटोऽपि च ।
स्फुटं तपःस्वरूपश्च पुलहस्तेन कीर्त्तितः ॥
पुलस्तयःसमूहश्च यस्मात्ति पूर्व्वजन्मनाम् ।
तपःसंघः समूहश्च पुलस्त्यस्तेन बालकः ॥
त्रिगुणायां प्रकृत्यां त्रिर्विष्णावश्च प्रवर्त्तते ।
तयोर्भक्तिः समा यस्य तेन बालोऽत्रिरुच्यते ॥
जटाद्यग्निशिखारूपाः पञ्च सन्ति च मस्तके ।
तपस्तेजोभवा यस्य स च पञ्चशिखः स्मृतः ॥
अपान्तरतमे देशे तपस्तेपेऽब्जजन्मनि ।
अपान्तरतमा नाम शिशुस्तेन प्रकीर्त्तितम् ॥
स्वयन्तपः समाप्नोति वाहयेत् प्रापयेत् परान् ।
ऊढुः समर्थस्तपसि वोढुस्तेन प्रकीर्त्तितः ॥
तपस्तेजसा बालो दीप्तिमान् कृतवो सुने ! ।
तपःसु रोचते चित्तं रुचिस्तेन प्रकीर्त्तितः ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २२ अध्यायः ॥

वङ्गसेनतरुः । जिनः । इति मेदिनी । ने, १५ ॥ प्रियालवृक्षः । पलाशवृक्षः । इति हेमचन्द्रः । २ । ७६ ॥ दमनकवृक्षः । इति राजनिर्घण्टः ॥ (स्त्री, दक्षकन्या । सा च कश्यपपत्नीनामन्यतमा । यथा, महाभारते । १।६५।१९-१२ ।

"मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः ।
प्रजज्ञिरे महाभागा दक्षकन्याश्चयोदश ॥
अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा ।
क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः ॥"

अष्टवसन्तर्गतस्य आपनामकस्य वसोः पुत्रे, पुं । यथा, हरिवंशे भविष्यपर्व्वणि । १ । ४० ।

"आपस्य पुत्रो वैतण्ड्यः श्रमः शान्तो मुनिस्तथा ।"

क्रौञ्चद्वीपस्य देशविशेषः । यथा, मत्स्यपुराणे । १२१ । ८३-८५ ।

"क्रौञ्चस्य कुशलो देशो वामनस्य मनोरुगः ।
मनोरुगात् परे चोष्णस्तृतीयोऽपि च उच्यते ॥
उष्णात् परे पावनकः पावनादन्धकारकः ।
अन्धकारकदेशात्तु मुनिदेशस्तथापरः ॥"

(द्युतिमतः पुत्राणामन्यतमः । यथा, मार्कण्डेये । ५३ । २२ ।

"तथा द्युतिमतः सप्तपुत्रास्तांश्च निबोध मे ।
मुनिश्च दुन्दुभिश्चैव सप्तमः परिकीर्त्तितः ॥"

कुरुपुत्रभेदः । यथा, महाभारते ।९।६३।४६॥

"अविक्षितमभिख्यातं तथा चैत्ररथं मुनिम् ॥")

मुनिखर्ज्जूरिका, स्त्री, (मुनिप्रिया खर्ज्जूरिका इति मध्यपदलोपी समासः ।) खर्ज्जूरीप्रभेदः । यथा,

"मुनिखर्ज्जूरिका तन्त्रा राजेष्टा ऋतुसंमिता ॥"

इति राजनिर्घण्टः ॥

मुनिच्छदः, पुं, (मुनयः अच्छादयः सप्त तत्संख्यकाः छदाः पत्राण्यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ (स्त्री । मेथिका । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।

'मेथिका मेथिनी मेथी दीपनी बहुपत्रिका ।'

इत्यादि ।

'कुक्षिका बहुपर्णी च पीतबीजा मुनिच्छदा ।'

इत्यन्तम् ॥)

मुनितरुः, पुं, (मुनेरगस्त्यस्य प्रियः तरुः । इति मध्यपदलोपी समासः ।) वकवृक्षः । इति रत्नमाला ॥

मुनिद्रुमः, पुं, (मुनेरगस्त्यस्य प्रियः द्रुमः । इति मध्यपदलोपी समासः ।) श्लोणाकवृक्षः । इति रत्नमाला ॥ श्लोणाकप्रभेदः । वकवृक्षः । इति राजनिर्घण्टः ॥ (यथा, नैषधचरिते ।१।६६।

"मुनिद्रुमः कोरकितः श्रितिद्युतिर्-
वैनेयसुगोऽमन्यत सिंहिकासुतः ॥"

"मुनिद्रुमः वकवृक्षः ।" इति तट्टीका । अस्य पर्य्यायो यथा,—

"अथागस्त्यो वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"श्लोणाको भूतपुष्पश्च पूतिवृक्षो मुनिद्रुमः ।
दीर्घवृन्तश्च कट्फलो भद्रकटुरगस्त्यकोरुरुः ॥"

इति वैद्यकरत्नमालायाञ्च ॥)

मुनिनिर्म्मितः, पुं, (मुनिना निर्म्मितः ।) डिण्डिमः । यथा, भावप्रकाशे ।

"डिण्डिमो रोमशपलो मुनिनिर्म्मित इत्यपि ।
डिण्डिमो रुचिलतृ भेदी पित्तश्लेष्मापहः स्मृतः ।
सुशीतो वातलो रूक्षो मूत्रजठाग्निकरः ॥"

मुनिपित्तजं, क्ली, (मुनीनां पित्तजमिव ।) ताम्रम् । इति त्रिकाण्डशेषः ॥

मुनिपुङ्गवः, पुं, (मुनिः पुङ्गव इव ।) मुनिश्रेष्ठः । इत्यमरटीका ॥ (यथा, रामायणे ।१।९।१।

"तपःस्वाध्यायनिरतं तपस्वी वाग्विदांवरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥")

मुनिपुत्रः, पुं, (मुनीनां पुत्र इव । मुनिप्रियत्वादस्य तथात्वम् ।) दमनकवृक्षः । इति भावप्रकाशः ॥ ऋषिसुतश्च ॥

मुनिपुत्रकः, पुं, खञ्जनः । इति त्रिकाण्डशेषः ॥ (यथा, तिथितत्त्वे कृत्यविधिप्रकरणे ।

"त्वं योगयुक्तो मुनिपुत्रकस्त्वं
अदृश्यतामेषि शिखोद्गमेन ।
संदृश्यसे प्रावृषि निर्गताथाम्
त्वं खञ्जनाचार्य्यमयो नमस्ते ॥")

मुनिपुष्पं, क्ली, (मुनिद्रुम इति । "ठाजादावूर्द्ध द्वितीयादचः ।"५ । ३ । ८३ । इत्यत्र "विभाषा प्रत्ययेन पूर्व्वोत्तरपदयोर्विभाषालोपो वक्तव्यः ।" इति काशिकोक्तेः द्रुम इत्यस्य लोपे मुनिः तस्य पुष्पम् ।) वकपुष्पम् । (यथा, तिथितत्त्वे ।

"विहाय सर्व्वपुष्पाणि मुनिपुष्पेण केशवम् ।
कार्त्तिके योऽर्चयेद्भक्त्या वाजिमेधफलं लभेत् ॥"

वकवृक्षे, पुं । तत्पर्य्यायो यथा,—

"अथागस्त्यो वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मुनिपुष्पकं, क्ली, (मुनिपुष्प+संज्ञायां कन् ।) वकपुष्पम् । यथा, योगिनीतन्त्रे ।

"विल्वपत्रञ्च माध्यञ्च तमालामलकोदलम् ।
कञ्चारं तुलसीञ्चैव पद्मञ्च मुनिपुष्पकम् ।
एतत् पर्य्युषितं न स्यात् यद्यान्यत् कलिकालकम् ॥"

इत्येकादशपत्रकम् ॥

मुनिपूगः, पुं, (मुनिप्रियः पूगः ।) गुवाकवृक्षः । तत्पर्य्यायः । रामपूगः २ कामीनः ३ सुरेवटः ४ । इति त्रिकाण्डशेषः ॥

मुनिभेषजं, क्ली, (मुनीनां भेषजम् ।) आमलकम् । हरीतकी । लशुनम् । इति मेदिनी । जे, ३६ ।

मुनिव्रतः, पुं, (मुनिरिव व्रतः ।) दृष्टान्तः । स च बुद्धविशेषः । इति हेमचन्द्रः । १ । ५१ ॥

मुनिस्थानं, क्ली, (मुनीनां स्थानम् ।) आश्रमः । इति हेमचन्द्रः । ४ । ६७ ॥

मुनीन्द्रः, पुं, (मुनीनां मननशीलानां योगिनामिन्द्रः श्रेष्ठः ।) बुद्धः । इत्यमरः ।१ । १ । १४ ॥ ऋषिश्रेष्ठश्च ॥ (यथा, कथासरित्सागरे ।७२।१०६।

"पतन्तमेव तस्माच्च पाणिभ्यां स समग्रहीत् ।
मुनीन्द्रः प्रकटीभूय समाश्वास्य जगाद च ॥"

दानवभेदः । यथा, हरिवंशे । २५५ । ५ ।

"हयपर्व्वा विरूपाक्षो मुनीन्द्रश्चन्द्रलोचनः ।")

मुनृच उ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पचमस्वरी । ओदितश्चेति नोपधः । उ सुचिला मुक्ता । इति दुर्गादासः ॥

मुमुक्षुः, पुं,(मोक्तुमिच्छतीति । मुच्+सन्+उः।) मुक्तिमिच्छुः । (यथा, श्रीमद्भगवद्गीतायाम् । ४ । १५ ।

"एवं ज्ञात्वा कृतं कर्म्म पूर्व्वैरपि मुमुक्षुभिः ।
कुरु कर्म्मैव तस्मात्त्वं पूर्व्वैः पूर्व्वतरं कृतम् ॥")

तत्पर्य्यायः । श्रमणः २ यतिः ३ वाचंयमः ४ व्रती ५ साधुः ६ अनगारः ७ ऋषिः ८ मुनिः ९ निर्ग्रन्थः १० भिक्षुः ११ । इति हेमचन्द्रः । २ । ७५ ॥ अथ मुमुक्षुलक्षणम् । मनुः ।

"इह चामुत्र वा काम्यं प्रवृत्तं कर्म्म कीर्त्तते ।
निष्कामं ज्ञानपूर्व्वन्तु निवृत्तमुपदिश्यते ॥

प्रवृत्तं कर्म संसेव्य देवानामेति साष्टिताम्।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै।"
कामनापूर्व्वकं कर्म्म शरीरप्रवृत्तिहेतुत्वात् प्रवृत्तं तदेव कर्म्म कामनारहितं पुनर्ब्रह्मज्ञानाभ्यासपूर्व्वकं संसारनिवृत्तिहेतुत्वात् निवृत्तमुच्यते। साष्टितां समानगतितां ऋषेर्गत्वर्थत्वात् पञ्चभूतान्यत्येति अतिक्रामति मोक्षं प्राप्नोतीत्यर्थः। विष्णुपुराणे च।६।७।९८ विप्रिरुपफलदा काम्या निष्कामाद्याश्च मुक्तिदा। भगवद्गीतापि।
"युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते।"
युक्तः ईश्वराय कर्म्माणि न फलाय इत्येवं समाहितः। फलं त्यक्त्वा कर्म्माणि कुर्व्वन्निति शेषः। शान्तिं मोक्षाख्यां नैष्ठिकीं निष्ठायां भवाम्। सत्त्वशुद्धिः ज्ञानप्राप्तिः सर्व्वकर्म्मसंन्यासः ज्ञाननिष्ठाक्रमेणेति वाक्यशेषः। अयुक्तस्त्वहिर्म्मुखः। कामकारेण कामप्रेरिततया कामतः प्रवृत्तेरिति यावत्। फले सक्तः सन् फलायेदं कर्म्म करोमीत्येवं फले सक्तो नितरां बन्धं प्राप्नोति। तथा च अर्জ্জुनं प्रति भगवद्वाक्यम्।
"मयि सर्व्वाणि कर्म्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः।"
संन्यस्य निःक्षिप्य समर्प्य इति यावत्। अध्यात्मचेतसा विवेकबुद्ध्या ईश्वराय भृत्यवत् करोमि इत्यनया बुद्ध्या निराशीस्त्यक्तकामसङ्कल्पः। अतएव निर्ममः ममतारहितः। विगतज्वरः विगतसन्तापः। यत्तमाह स एव।
"यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत् तपस्यसि कौन्तेय! तत् कुरुष्व मदर्पणम्॥"
विष्णुपुराणम्।
"कर्म्माख्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिन् लयं ये त्वमलाः प्रयान्ति॥"
कर्म्ममहीं भारतवर्षरूपाम्। एकादशस्कन्धे।
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे।
नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः॥"
वेदोक्तमेव कुर्व्वाणो न तु निषिद्धम्। तेन कर्म्मणि क्रियमाणे तस्मिन्नासक्तिरहितस्तत्फलं स्वादेव न तु नैष्कर्म्यरूपा फलसहिरत एवाह निःसङ्गोऽनभिनिवेशवान् ईश्वरेऽर्पितुं न तु फलोद्देशेन। अथ फलस्य श्रुतत्वात् कर्म्मणि कृते फलं भवत्येव इत्याह रोचनार्थेति कर्म्मणि रुच्युत्पादनार्था। अतएव तत्रैव।
"फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्।
श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनम्॥
उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च।
आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु॥
न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि।
कथं युञ्ज्यात् पुनस्तेषु तांस्तमो विशतो बुधः॥
एव व्यवसितं केचिदविज्ञाय कुबुद्धयः।
फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि॥"
इयं फलश्रुतिर्न श्रेयःपरमपुरुषार्थपरा न भवति किन्तु बहिर्म्मुखानां नृणां मोक्षविवक्षया अवान्तरकर्म्मफलैः कर्म्मसु रुच्युत्पादनमात्रं यथा, भैषज्ये औषधे रुच्युत्पादनम्। यथा,—
"पिब निम्बं प्रदास्यामि खण्डं ते खण्डसंयुतम्।
पित्तेनैवमुक्तः पिबति न फलं तावदेव तु॥"
तत्रागदपानस्य न खलु खण्डादिलाभ एव प्रयोजनं किन्त्वारोग्यम्। तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् मोक्षायैव कर्म्माणि विधत्ते। नन्वेवं कर्म्मकाण्डे मोक्षस्य गामपि न श्रूयते कथमेवं व्याख्यायते यथाश्रुतस्यैव घटनात् इत्याह उत्पत्त्येति द्वाभ्याम्। उत्पत्त्या स्वभावत एव कामेषु पश्वादिषु प्राणेषु आयुरिन्द्रियबलवीर्य्यादिषु स्वजनेषु पुत्रदारादिषु अनर्थहेतुषु परिपाकतो दुःखहेतुषु अतस्तान् स्वार्थं परमसुखमविदुषः अजानतः अतो न तान् प्रलोभीभूतान् बुधो वेदो यद्बोधयति तदेव श्रेयः इति विश्वसितान् इत्यर्थः। तान् एवम्भूतान् वृजिनाध्वनि कामवर्त्मनि देवादियोनौ भ्राम्यतः ततः पुनस्तमोभूतवृक्षादियोनिं विशत इति। पशुकाम इति च सुखपुत्रादिकाम इति च कथं पुनस्तेष्वेव कामेषु अयं बुधो वेदो युञ्ज्यात् प्रवर्त्तयेत्। तथा सत्यनाप्तः स्यात् इति भावः। कथं तर्हि कर्म्ममीमांसकाः फलपरतां वदन्ति तत्राह। एवमिति व्यवसितं वेदस्याभिप्रायं अविज्ञाय कुसुमितामवान्तरफलरोचनया रमणीयां परमफलश्रुतिं वदन्ति कुतस्ते कुबुद्धयस्तत्राह हि यस्मात् वेदज्ञा आसादयः न तथा वदन्ति इति। अतएव निष्कामकर्म्मैव आत्मज्ञानार्थतोक्ता यथा,—
"अयमेव क्रियायोगो ज्ञानयोगस्य साधकः।
कर्म्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते॥"
सोऽपि दुरितक्षयद्वारा न साक्षात्। तथा च।
"ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः॥"
तथा स्मृतिः।
"तमेवं वेदार्थवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्य्येण तपसा श्रद्धया दानेन यज्ञेनानाशकेन चेति।"
तं आत्मतत्त्वसाक्षात्कारं अतएव यज्ञादीनां ज्ञानप्रेक्षतया विधार्य्य निष्कामेषु कर्म्मसु प्रवर्त्तते। पण्डितेनापि मूर्खः काम्ये कर्म्मणि न प्रवर्त्तयितव्य इत्याह षष्ठस्कन्धे।
"स्वयं निःश्रेयसं विद्वान्नज्ञाय कर्म्म हि।
न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः॥"
राति ददाति इति समयप्रदीपे श्रीदत्तः॥
"दासीदासमलङ्कारमन्नं षड्रसमम्बरम्।
पुरुषोत्तमतुष्ट्यर्थं प्रदेयं सार्व्वकालिकम्॥
यदृयदिष्टतमं लोके यच्चाप्यप्रियमात्मनः।
तत्तद्धि देयं प्रीत्यर्थं देवदेवस्य चक्रिणः॥"
इदं दानं ब्राह्मणसम्प्रदानकमेव विष्णुप्रीतिमुद्दिश्य एवं सर्व्वत्र दाने। विष्णुप्रीतेः सामान्यतः श्रुतत्वात्। अथ विष्णुप्रीतौ देवताधिकरणन्यायविरोध इति चेन्न स्वर्गवदधिकारिविशेषयत्नेन ततुसत्त्वप्रसाधनात् इत्याहुः। ब्राह्मणसम्प्रदानकत्वे किं मानमिति चेत् वामनपुराणे तत्तन्मासभेदेन तत्तद्दानमभिधाय।
"विष्णुप्रीत्यर्थमेतानि देयानि ब्राह्मणेष्वथ।
देयानि विप्रमुखेभ्यो मधुसूदनतुष्टये॥"
इत्यभिधाय दासीदासमित्यादिवचनद्वयाभिधानात्। तथा च विष्णुधर्म्मोत्तराधिपुराणयोः।
"यत्र यत्र भवेत् प्रीतिर्विषयेभ्यो महामुने!।
तत्तदच्युतसंहृद्यं विप्रेभ्यः प्रतिपादयेत्॥"
विष्णुधर्म्मोत्तरद्वतीयकाण्डे तु विष्णुसंप्रदानकमेव दानं यथा,—
'विष्णोः मुखप्रदानेन वारुणं लोकमाप्नुयात्।' इत्यादिना।
"क्षीरपल्लवसंयुक्तान् फलसान् सुविभूषितान्।
दत्त्वा वै देवदेवाय वाजिमेधफलं लभेत्॥"
इत्यत्तेन तत्तत् फलं तत्तद्दानमभिधायोक्तम्।
"अकामः सात्त्विको लोको यतः किञ्चिदिनिर्वेदयेत्।
तेनैव स्थानमाप्नोति यत्र गत्वा न शोचति॥
धर्म्मवाञ्छिनिका मूढाः फलकामा नराधमाः।
अर्चयन्ति जगन्नाथं ते कामानाप्नुवन्त्युत॥
अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्॥"
तथा।
"यद्भ्यां प्रतीच्छते देवः सकामेन निवेदितम्।
मूढ्यां प्रतीच्छते दत्तमकामेन द्विजोत्तमाः॥"
उक्तवामनपुराणवचने सार्व्वकालिकमित्यनेन मलमासादावपि विष्णुप्रीत्यर्थं देयमिति। इति मलमासतत्त्वम्॥
(तत्र सुसूचतासूदयनानि व्याख्यास्यामः। तत्र लोकदोषदर्शिनो सुसूचोरादित एवाचार्य्याभिगमनं तत्रोपदेशानुष्ठानम्। अमरैरेवोपचर्य्या धर्म्मशास्त्रानुगमनं तदर्थावबोधस्तेनावश्यम्भावेन यथोक्ताः क्रियाः सतासुपासनमसतां परिवर्জ্জनं न सङ्कल्पितुर्জ্জनेन सत्यं सर्व्वभूतहितमप्रियमनलिकाले परीक्ष्य वचनं सर्व्वप्राणिषु आत्मनीवावेक्षा सर्व्वासामसदरत्नमसङ्कल्पनमप्रार्थना अनभिध्यानञ्च स्त्रीणां सर्व्वपरिग्रहत्यागः कौपीनं प्रच्छादनार्थं धातुरागनिवसनं कन्थाशीवनहेतोः क्षौमे पिप्पलकं श्रौचाधानहेतोः जलकुम्भिका दण्डधारणं भक्ष्याचार्य्यार्थं पात्रं प्राणधारणार्थमेककालभक्ष्यो यथोपपन्न एवाभ्यवहारः। श्रमापनयनार्थं श्रीर्षशुष्कपर्णशय्यासरणोपधानं ध्यानहेतोः कायनिबन्धनं वनेष्वनिकेतवासः तन्त्रानिद्रालस्यादिकर्म्मवर्জ্জनं इन्द्रियार्थेष्वनुरागोपतापनियहः सुप्रस्थितगतप्रेक्षिताहारविहारप्रबन्धचेष्टादिकेष्वारम्भेषु स्मृतिपूर्व्विका प्रवृत्तिः सत्कारस्तुतिगर्हावमानक्षमत्वं क्षुत्पिपासायासश्रम-

शीतोष्णवातवर्षासुखदुःखसंस्पर्शसहत्वं शोकदैन्यदंभमदमानलोभरागेर्ष्याभयक्रोधादिभिरसञ्जनं अहङ्कारादिषूपसर्गसंज्ञा लोकपुरुषयोः स्वर्गादिसामान्याधिक्यं कार्यकालात्ययभयं योगारम्भे सततमनिर्वेदः सत्त्वोत्साहोऽपवर्गाय धीधृतिस्मृतिबलाधानं नियमनमिन्द्रियाणां चेतसि चेतस आत्मन्यात्मनश्च धातुमेदेन शरीरावयवसंख्यानं अभीक्ष्णं सर्वं कारणवदुःखमखमनित्यमित्यभ्युपगमः। सर्वप्रवृत्तिषु दुःखसंज्ञा सर्वसंन्यासे सुखमित्यभिनिवेशः एषमार्गोऽपवर्गाय अतोऽन्यथा बध्यते इत्युदयनानि आख्यातानि। इति परके शारीरस्थाने पञ्चमेऽध्याये।)

सुसुचानः, पुं, (सुस्वति जलं इति। सुस्+"सुस्विदिभ्यां कानच्।" उणा०। २। ६१। इति आनच्। कित् सम्बन्धः। मेघः। इति संक्षिप्तसारोणादिवृत्तिः। (सुक्तः। यथा, सन्ध्यामन्त्रे।
"हृषदादिव सुसुचानः स्विन्नः स्नातो मलादिव।"
"स्विन्नो घर्म्मार्क्तो जनो सुसुचानो सुक्तो भवति।" इति तत्र गुणविष्णुटीका।)

सुसूर्षुः त्रि, (मर्त्तुमिच्छुः। मृ+सन्+उः।) आसन्नमृत्युः। (यथा श्रीमद्भागवते। ७।८।११।
"यत्तं त्वं मर्त्तुकामोऽसि योऽतिमात्रं विकत्थसे।
सुसूर्षूणां हि मन्दात्मन्! गदः स्युर्विकृता गिरः॥")

अथ सुसूर्षुलक्षणानि। हारीतः।
'मूढान्नेन तु सक्तेन उदरस्थेन यो मृतः।
स वै खरत्वसूकरत्वं मूढत्वाधिगच्छति।'
मूढान्नं मूढस्वामिकान्नम्। तद्दत्तमपि भोजनकाले तदग्रहावस्थितं यत् तदपि मूढान्नम्। तदाहाङ्गिराः।
'मूढवेश्मनि विप्रेण क्षीरं वा यदि वा दधि।
निष्टप्तेन न भोक्तव्यं मूढान्नं तदपि स्मृतम्॥'
अपिग्रन्थात् साक्षात् तद्दत्तघृततक्रादि न तु तद्दत्तकपर्दकादिना क्रीतमपि। स्वग्रहागते पुनरङ्गिराः।
'यथायतस्ततो ह्यापः शुद्धिं यान्ति नदीं गताः।
मूढादिग्रहदेश्वन्नं प्रविश्य सदा शुचि॥'
प्रविश्य सत्त्वापादकप्रतिग्रहादिना इति शेषः। अतएव पराशरः।
'तावद्भवति मूढान्नं यावन्न स्पृशति द्विजः।
द्विजातिकरसंसृष्टं सर्वं तद्विरुध्यते॥'
स्पृशति प्रतिग्रहाति इति कल्पतरुः। तत्र संप्रोक्ष्य यास्यस्माह विष्णुपुराणम्।
'संप्रोक्षयित्वा मृद्वीयाच्छूद्रान्नं ग्रहमागतम्।'
तत्र पाचान्तरे यास्यमाह अङ्गिराः।
'स्वपात्रे यस्तु विन्यस्तं मूढो यच्छति नित्यशः।
पाचान्तरगतं यास्यं दुर्भं स्वग्रहमागतम्॥'
एतेन स्वग्रहागतस्यैव शुद्धत्वम्।
तदग्रहगतस्य मूढान्नदोषभागित्वं प्रतीयते। ततश्चैतादृगपि सुसूर्षुणा सर्वथा मूढान्नं न भोक्तव्यम्॥*॥

पूजारत्नाकरे।
'ग्रामस्यामन्त्रिता यत्र तत्र सन्निहितो हरिः।
तत्सन्निधौ त्यजेत् प्राणान् याति विष्णोः परं पदम्॥'
लिङ्गपुराणे।
'ग्रामस्यासन्नभीपे तु क्रोशमात्रं समन्ततः।
कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः॥'
कीकटो मगधः॥*॥ वैद्यनाथे आसः।
'तुलसीकानने जन्तोर्यदि मृत्युर्भवेत् क्वचित्।
स निर्भर्त्स्य यमं पापी लीलयैव हरिं विशेत्॥
प्रयागकाशी यस्यास्थे दीयते तुलसीदलम्।
निर्वाणं याति पद्मोद्भ! पापकोटियुतोऽपि सः॥'
कूर्म्मपुराणम्।
'गङ्गायाश्च जले मोक्षो वाराणस्यां जले स्थले।
जले स्थले चान्तरीक्षे गङ्गासागरसङ्गमे॥'
स्कान्दे।
'गङ्गायां त्यजतः प्राणान् कथयामि वरानने!।
कर्णे तत्र परं ब्रह्म ददामि मामकं पदम्॥'
तथा।
'तीरादृगयूतिमात्रन्तु परितः क्षेत्रमुच्यते।
अत्र दानं जपो होमो गङ्गायां नात्र संशयः॥
अत्रस्थास्त्रिदिवं यान्ति ये मृतास्तेऽपुनर्भवाः॥'
गव्यूतिः क्रोशयुगम्। तीर्थचिन्तामणौ ब्रह्मपुराणम्।
'अत्र दूरे समीपे च सहस्रं योजनत्रयम्।
गङ्गायां मरणेनेह नात्र कार्या विचारणा॥'*॥
एवं गङ्गादिमरणेन प्राप्तब्रह्मलोकस्याप्यौर्द्धदेहिकी क्रिया तदधिकारिणा कर्त्तव्या नित्यत्वात्। तथा च श्रीमद्भागवते।
'इत्थं एतं भगवति मनोवाक्कृदृत्तिभिः।
आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत्॥
संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले।
सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये॥
तस्य निर्हरणादीनि संपरेतस्य भार्गव!।
युधिष्ठिरः कारयित्वा सुहृत्तैः दुःखितोऽभवत्॥'
स्वे आत्मनि परमात्मनि आत्मानं स्वीयात्मानं निवेश्य एकीकृत्य स भीष्मः उपारमत् मृत्तिं गतवान्। निष्कले निरुपाधौ ब्रह्मणि संपद्यमानं मिलितं आज्ञाय आगत्य तस्य भीष्मस्य निर्हरणादीनि संस्कारादीनि संपरेतस्य सम्यक् परेतस्य मृतस्यापि। भार्गवेति श्रौनकस्य सम्बोधनम्। एवच एतेषामपि तत्तत्कर्म्मणि तत्तद्वचनोपात्तप्रेतपदस्य पिण्डपदस्य च मन्त्रादिषु यथायथं वाचनिकत्वात् प्रयोगः सङ्गच्छते।
'आसन्नमृत्युना देया गौः सवत्सा च पूर्ब्बवत्।
तदभावे च गौरेका नरकोद्धारणाय वै॥
तदा यदि न शक्नोति दातुं वैतरणीञ्च गाम्।
शक्तोऽन्योऽरुक् तदा दत्त्वा श्रेयो दद्यान्मृतस्य च॥'
पूर्ब्बवद्धेमगवादिना।
अत्र मृतस्य चेति श्रवणात् एकादशाहेऽपि वैतरणीदानाचारः। वनपर्ब्बणि।
'सार्थः प्रवसतो मित्रं भार्या मित्रं गृहे सतः।
आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः॥"
वराहपुराणे।
"यतीपातोऽथ संक्रान्तिस्तथैव ग्रहणं रवेः।
पुण्यकालास्तदा सर्वे यदा मृत्युरुपस्थितः॥
गोभूतिलहिरण्यादि दत्तमक्षयतामियात्॥"
निरवकाशत्वादत्र मलमासादिदोषो नास्ति सूतकमपि न। तथा च शुद्धिरत्नाकरे दक्षः।
"सूक्ष्मकाले त्विदं सर्वं सूतकं परिकीर्त्तितम्।
आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम्॥"
इति शुद्धितत्त्वम्॥

सुर, ञ्च वेष्टने। इति कविकल्पद्रुमः॥ (तुदा०-परः-सकः-सेट्।) पर्वतश्रेष्ठादिः। ञ्च सुरति इत्यं गता। मोरिता। इति दुर्गादासः॥

सुरं क्ली, (सूर्य्यते इति। सुर्+अन्यत्रापीति भावे कः।) वेष्टनम्। इत्यमरटीकायां मथुरेशः॥

सुरः, पुं, (सुरति वेष्टतेऽसौ। सुर्+इगुपधत्वात् कर्त्तरि कः) दैत्यविशेषः। इति मेदिनी। रे, ७७। यं हत्वा विष्णुर्मुरारिनामाभूत्॥ (यथा, श्रीमद्भागवते। ३। १। ११।
"ग्रस्तं दिविदं वार्यं सुरं वल्लवमेव च।
अन्यांश्च दन्तवक्त्रादीनवधीत् कांश्च घातयत्॥")

सुरगङ्गः, पुं, (सुरं वेष्टनमिव गङ्गति रुणद्धि अनेन। गङ्ग+अच्।) वरङ्गः। इति जटाधरः। वर्वक इति भाषा॥

सुरजः, पुं, (सुरात् संवेष्टनात् जायतेऽसौ। सुर+जन+डः।) वृक्षः। इत्यमरः। १। ७। ५॥ (यथा, रामायणे। २। ३८। ४९।
"सुरजपत्रवमेघघोषवद्-
दृग्रथवेश्म बभूव यत् पुरा।
विलपितपरिदेवनाकुलं
व्यसनगतं तदभूत् सदुःखितम्॥")

सुरजफलः, पुं, (सुरजवत् फलमस्य।) पनसवृक्षः। इति त्रिकाण्डशेषः॥

सुरङ्गः, पुं, (सुरेण वेष्टनेन अङ्ग इव गोजातिरिव। अकच्प्रत्ययादिलादकारस्य परूपम्।) सम्यकदेशः। तद्देशस्थे, पुं भूम्नि। इति हेमचन्द्रः। ४। २७॥

सुरन्धला, स्त्री, (सुरं वेष्टनं सेतुं दलति भिनत्ति। दल्+अच्+स्त्रियां टाप्।) नर्म्मदानदी। इति त्रिकाण्डशेषः॥

सुरमर्दनः, पुं, (सुरं तन्नामानमसुरं मर्दयति चूर्णीकरोतीति। मर्द्+ल्युः।) विष्णुः। इति पुराणम्॥

सुरारिपुः, पुं, (सुरस्य रिपुः।) विष्णुः। इति शब्दरत्नावली॥ (यथा, छन्दोमञ्जर्य्याम्। २। ३।
"त्वरितगतिर्जनयुवतिस्तरणिसुता विपिनगता।
सुरारिपुणा रतिगुरुणा सहमिलिता प्रमदमिता।")

सुरला, स्त्री, (सुरं वेष्टनं लाति। ला+कः।) नर्म्मदानदी। इति त्रिकाण्डशेषः॥ (यथा, उत्तररामचरिते। ३। ९। तत; प्रविशति नदीद्वयं

तमसा सुरला च। तमसा। सखि सुरले! किमसि सम्प्राप्तैव। केरलदेशस्था काचिन्नदी। यथा च। रघुर्दयौ। ४। ५५।
"सुरलामारुतोद्भूतमगमत् केतकं रजः।
तदूर्योधवारवाणानामयत्नपटवासताम्॥"
"सुरला नाम केरलदेशेषु काचिन्नदी।" इति तट्टीकायां मल्लिनाथः॥)

सुरली, स्त्री, (सुरं अङ्गुलिवेष्टनं लाति प्राप्नोतीति ला+कः+स्त्रियां ङीष्।) स्वनामख्यातसुषिरवाद्यम्। तत्पर्य्यायः। वंशी २ वंशिका ३ वंशनालिका ४ सानेयिका ५ सानेयी ६ सानिका ७ सुरलालिका ८। श्लेष्मचतुष्टयं सान्निपि। इति शब्दरत्नावली॥ (यथा, राधातन्त्रे। २३।
"वादयन् सुरलीं लग्नः श्रृङ्गं वेणुं तथापरम्।
कात्यायनीं नमस्कृत्य हरिः पद्मदलेक्षणः॥")

सुरलीधरः, पुं, (सुर+अच्। सुरल्याः धरः।) श्रीकृष्णः। इति शब्दरत्नावली॥ (यथा, तत्रैव।
"वैकुण्ठदक्षिणे भागे गोलोकं सर्व्वमोहनम्।
तत्रैव राधिका देवी दक्षिणो सुरलीधरः॥")

सुरहा, [न्] पुं, (सुरं हन्तीति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥

सुरा, स्त्री, (सुरति सौरभेण वेष्टयति। सुर+रुगुपधलात् कः टाप् च।) स्वनामख्यातगन्धद्रव्यम्। (यथा, गरुड़पुराणे। १६०।
"तथा हिक्कां हरेत् पीता सौवर्चलसुतासुरा।"
तत्पर्य्यायः। ताडपत्री २ देवान्नं गन्धकुटी ३ गन्धिनी ५। इत्यमरः। २। ४। १२३॥
(तथास्याः पर्य्यायान्तरं गुणाश्च।
"सुरा गन्धकुटी देवा सुरभिः ग्रामपत्निका।
सुरा तिक्ता हिमा स्वादी लघ्वी पित्तानिलापहा।
ज्वराङ्गभूतरक्तघ्नी कुष्ठकासविनाशिनी।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
तस्या लक्षणं यथा। सुरा पीता वरा प्रोक्ता।
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे॥)
अस्या अनुक्तेषगुणाः। अलक्ष्मीरक्षोज्वरनाशित्वम्। इति राजवल्लभः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ पुराशब्दे द्रष्टव्यौ॥

सुरारिः, पुं, (पुरस्कारिः।) श्रीकृष्णः। अस्य व्युत्पत्तिर्यथा,—
"सुरः क्लेशे च सन्तापे कर्म्मभोगे च कर्म्मिणाम्।
दैत्यभेदेऽप्यरिक्लेशं सुरारिस्तेन कीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥
अस्य स्वरूपं यथा,—
श्रीनारद उवाच।
"कोऽसौ सुरारिर्देवर्षे! देवो यक्षो नु किं नरः।
दैत्यो वा राक्षसो वापि पार्थिवो वा तदुच्यताम्॥"
पुलस्त्य उवाच।
"योऽसौ रजःसत्त्वमायागुणवांश्च तमोमयः।
निर्गुणः सर्व्वगो व्यापी सुरारिर्मधुसूदनः॥"
श्रीनारद उवाच।
"योऽसौ सुर इति ख्यातः कस्य पुत्रश्च गीयते।
कथञ्च निहतः संख्ये विष्णुना तद्वदस्व मे॥"
पुलस्त्य उवाच।
"शृणुष्व कथयिष्यामि सुरासुरनिषूदनम्।
विचित्रमिदमाख्यानं पुण्यं पापप्रणाशनम्॥
कश्यपस्यौरसः पुत्रो सुरो नाम महाबलः।
स ददर्श रथे शुम्भं दितिपुत्रोऽसुरोत्तमः॥
ततः स मरणाद् भीतस्तस्मा वर्षगणान् बहून्।
आराधयामास विभुं ब्रह्माणमपराजितम्॥
ततोऽस्य तुष्टो वरदः प्राह वत्स! वरं वृणु।
स च वव्रे तदा देवो वरमेनं पितामहात्॥
यं यं करतलेनाहं स्पृशेयं समरे विभो!।
स स महत्त्वसंस्पृष्टस्मरोऽपि म्रियतां ध्रुवम्॥
बाढ़मुक्ता स भगवान् ब्रह्मा लोकपितामहः।
ततोऽभ्यगान्महातेजा सुरः सुरगिरिं बली।
जगाम धर्म्मराजानं विजेतुं दण्डपाणिनम्॥"
सुर उवाच।
"यम! प्रजासंयमनान्निवृत्तिं कर्त्तुमर्हसि।
नो चेत्तवाद्य छित्त्वाहं मूर्द्धानं पातये भुवि॥
तमाह धर्म्मराड्वाक्यं यदि मां संयमेच्छवान्।
गोपितासि पुरा सत्यं करिष्ये वचनं तव॥
सुरस्तमाह भवतः कः संयन्ता वदस्व माम्।
अहं तच्च पराजित्य वारयामि न संशयः॥
यमस्तं प्राह मां विष्णुर्देवचक्रगदाधरः।
श्वेतद्वीपनिवासी यः स मां संयमतेऽचयः॥
इत्येव सुरो वचनं दुरन्तमगमन्मुरः॥
तमागतं प्राह सुने! मधुघ्नः
प्राप्तोऽसि केनासुर! कारणेन।
स प्राह युद्धं सह वै त्वयाद्य
तं प्राह भूयः सुरशत्रुहन्ता॥
यदीह मां योद्धुमुपागतोऽसि
ततः कम्पते ते हृदयं किमर्थम्।
ज्वरातुरस्येव सुदुर्मुखत्वं
तत्रैव योतुस्थे सह कातरेण॥
इत्येवमुक्तो मधुसूदनेन
सुरस्तदा खे हृदये सहस्रम्।
कथं तु कम्पेति सुदुस्तरोक्ता
निपातयामास विपन्नबुद्धिः॥
हरिश्च चक्रं गदुलाघवेन
समोच तस्यास्थिरस्तु शत्रोः।
चिच्छेद देवास्तु गतत्रपाभवन्
दैत्यं प्रशंसन्ति च पद्मनाभम्।
ततः प्रविष्टं समुपाजगाम
सुरारिरित्येव हरिर्महात्मा॥"
इति वामने ५७। ५८ अध्यायौ॥ *॥
अनर्घराघवनाटकस्य कर्त्ता। यथा। 'अस्ति मौद्गल्यगोत्रसम्भूतस्य महाकवेर्भट्टश्रीवर्द्धमानात्मजस्य तनुमतीहृदयनन्दनस्य मुरारिनामधेयस्य कवेरनर्घराघवं नाम नाटकं तत्प्रयुञ्जानाः सामाजिकाद्युपासते।' इति तत्प्रस्तावनाटकगद्यम्॥

सुष्ठ या मोहे। उच्छाये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) पदगोत्रेवादिः। इस्वौ। तेन क्विपि राज्ञोप इति क्वौ सुरौ सुरः। आ मूर्च्छितं मूर्त्तं तेन। मोहो ज्ञानरहितीभावः। उच्छायो दृद्धिः। मूर्च्छति रोगी। सुमूर्च्छे संख्ये रामस्य समागमसने इरावति रघुः। इति दुर्गादासः॥

सुर्भिणी, स्त्री, अङ्गारधानिका। इति शब्दचन्द्रिका॥

सुर्मुरः, पुं, तुषाग्निः॥ (यथा, माघे। ६। ६।
"सारङ्गसाङ्गनसुर्मुरचूर्णितां
दधुरिवाम्बरवस्य रजःकणाः।
निपतिताः परितः पथिकव्रजा-
नुपरि ते परितेपुरतो भृशम्॥")
मन्मथः। रविवाजिः। इति मेदिनी। रे, २०५॥
(स्त्रियां टाप्। नदीभेदः। यथा, महाभारते। ३। २२१। २५।
"भारती सुप्रयोगा च कावेरी सुर्मुरा तथा।
तुङ्गवेणा लघुवेणा कपिला सोम एव च॥")

सुर्व्व ईं गर्व्वे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। निडायामनिट्।) आद्यः पञ्चमस्वरी। ऋः सुरौ सुरः। गर्व्वो वन्धनम्। ईं गर्व्वः। इति दुर्गादासः॥

सुल क रोपणे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्। जन्मार्थे भ्वा०-उभ०-अक०-सेट्।) रोपणं आरोपणम्। क मोलयति इत्यं लोकः। गोविन्दभट्टस्तु रोडणे इति पठित्वा रोडणं जन्म इति व्याख्याति। इति दुर्गादासः॥

सुशटी, स्त्री, (सुष+अटन्। पृषोदरादित्वात् साधुः।) खितकक्षुः। इति हेमचन्द्रः॥

सुश्र(ष)लिका, स्त्री, (सुष+"पृषादिभ्यश्चित्।" उणा० १।१०८। इति कलचित् स्यात्। टाप्। ततः संज्ञायां कन्। अकारस्त्रेलम्।) पत्नी। ताडपत्री। तत्पर्य्यायः सुवहा २ ताडपत्रिका ३ गोधापदी ४ हेमपुष्पी ५ भूतालो ६ दीर्घकन्दिका ७ सुवली ८ तालिका ९ तालपत्रिका १०। इति शब्दरत्नावली। अर्शोघ्नी ११। इति जटाधरः॥ अस्या गुणाः। मधुरत्वम्। शीतत्वम्। दृष्यत्वम्। पुष्टिबलप्रदत्वम्। पित्तिजत्वम्। कफदत्वम्। पित्तदाहश्रमहरत्वञ्च।
"सुश्रुती च द्विधा प्रोक्ता श्वेता चापरसंज्ञिका।
श्वेता स्वल्पगुणोपेता अपरा च रसायनी॥"
इति राजनिर्घण्टः॥
"तालपत्री तु विदङ्गिसुंवली परिकीर्त्तिता।
सुवली मधुरा दृष्या वीर्य्योष्णा दृंहणी गुरुः।
तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा॥"
इति भावप्रकाशः॥

सुष वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मोषति। इति दुर्गादासः॥

सुष ग क्षुरणे। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-सेट्।) ग सुष्णाति। इति दुर्गादासः॥

सुष् य ष्र् छिदि। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) छेद इह खण्डनम्। य सुष्यति विपक्षं चतुरः। ष्र् असुषत् अमोषीत् अस्मात् पुषादित्वान्नित्यं ङ इत्यर्थे। इति दुर्गादासः॥

सुषलः, पुं, क्ली, (मोषति सुष्यतेऽनेन वेति। सुष्+"इषादिभ्यश्चित्।" उणा० १।१०८। इति कलच्चित् स्यात्।) अयोऽयम्। इत्यमरटीकायां भरतः॥ दन्त्यमध्योऽपि॥ (यथा, मार्कण्डेये। ११६। १८।

"सुनन्दं नाम सुषलं तदा यन्निर्मितं पुरा। तच्चहार स दुष्टात्मा तेन हन्ति रणे रिपून्॥" विश्वामित्रसुतः। यथा, महाभारते।१३।४।५२।

"बाहुजिर्मुषलश्चैव वचोग्रीवस्तथैव च॥" (तालव्यमध्योऽप्ययम्। "सुष् खण्डने सुषलः।" उणा० १।१०८। इत्यत्रोज्ज्वलदत्तस्तु॥)

सुषली, स्त्री, (सुष्यत इति। सुष्+कलः ङीष्।) तालमूलिका। गृहगोधिका। इति शब्दरत्नावली॥

सुषल्यः, त्रि, (सुषलमर्हतीति। सुषल+"दण्डादिभ्यो यः।"५।१।६६। इति यः।) सुषलवध्यः। इत्यमरटीकायां भरतः॥

सुषा, स्त्री, (सुष्+कः टाप्।) सूषा। इत्यमरटीकायां रायमुकुटः। २।१०।३३। सुची इति भाषा॥

सुषित, त्रि, (सुष्+कर्म्मणि क्तः।) चोरितद्रव्यम्। तत्पर्य्यायः॥ मुषितम् २। इत्यमरः।३।१।८८॥ (वसितः। यथा, भागवते।१।१३।३७।

"नाहं वेद्मि क्वसितं पितृभिः कुलनन्दन!। मातर्वा वा महाबाहो! सुषितोऽस्मि महात्मभिः॥"

"सुषितो वसितोऽस्मि॥" इति तट्टीकायां श्रीधरः॥)

सुष्कः, पुं, (सुष्यति शोषमिति। सुष्+"वृष भूसुषिमृषिभ्यः कक्।" उणा० ३।४१। इति कक्।) अण्डकोषः। इत्यमरः। २।६।६॥ (यथा, वाग्भटे निदानस्थाने नवमे अध्याये॥

"स्थानाच्युतमसृक्तं हि सुष्कयोरन्तरेऽनिलः॥") मोचकवृक्षः। संघातः। इति मेदिनी। के, ३१॥ तस्करः। मांसलः। इति हेमचन्द्रः।३।२०६॥

सुष्ककः, पुं, (सुष्क। संज्ञायां कन्।) वृक्षविशेषः। चण्टापारल इति बङ्गभाषा। मोवा इति हिन्दी भाषा। तत्पर्य्यायः। गोजीव्रः २ भाटलः ३ चण्टापाटलिः ४ मोचः ५। इत्यमरः। २। ४। ३६। मोचकः ६ सुष्कः ७ मोचकः ८ सुचकः ९ गौलिकः १० मेहनः ११ चारटकः १२ पाटली १३ विषापहः १४ चटालः १५ वनवासी १६ सुतीक्ष्णकः १७। इति राजनिर्घण्टः। गोजिह्वः १८ चारमेहः १९ चण्टा २० चण्टाकः २१ भाटः २२। इति शब्दरत्नावली॥ स तु पलाशवत्पर्व्वतश्चः। श्वेतलक्ष्मभेदेन द्विविधः। तस्य गुणाः। कटुत्वम्। तिक्तत्वम्। याहित्वम्। उष्णत्वम्। कफवातकारित्वम्। विषमेदोगुल्मकण्डूवस्तिरोगक्लमिमिश्रुक्रनाशित्वञ्च। इति भावप्रकाशः॥ रेचनत्वम्। पाचनत्वम्। प्लीहोदरार्त्तिनाशित्वञ्च। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। चिकित्सास्थाने। ६ अध्यायः।

"चौर्यं पक्वं तद्धरिद्राद्वयेन हन्यात् कुष्ठं सुष्ककेनापि सर्पिः॥")

सुष्करः, पुं, (प्रशस्तः सुष्कोऽस्त्यस्मिन्। सुष्क+"ऊषसुषिसुष्कसधो रः।"५।२।१०७। इति रः।) प्रलम्बाक्षः। इति हेमचन्द्रः। ३।२२१॥ (यथा, शतपथब्राह्मणे। ३।७।२।८।

"रेतो विकरोति सुष्करो भवत्येव वै प्रजननवितो यत्सुष्करत्वमाप्नुष्करो भवति तं न स॥")

सुष्कमूल्यः, पुं, (सुष्केण मूल्यः।) द्रव्यरहितः। स तु राज्ञोऽल्पपुररक्षकः। खोला इति भाषा। तत्पर्य्यायः। अनुपस्थः २ स्त्रीखभावः ३ महल्लिकः ४। इति शब्दमाला॥

सुष्टिः, पुं,क्ली, (सुष्+क्तिच्।) पलपरिमाणम्। चारि तोला इति भाषा। (वैद्यके आठतोला इति प्रसिद्धिः।

"स्यात् कर्षाभ्यामर्द्धपलं मुक्तिरष्टमिका तथा। मुक्तिभ्याञ्च पलं ज्ञेयं सुष्टिराम्रचतुर्थिका॥"

इति वैद्यकशास्त्रधरे पूर्व्वखण्डे प्रथमेऽध्याये॥

'पलार्द्धं शुक्तिमिच्छन्ति तथाष्टमाषकाक्षिति।'

पलं विद्यात्च सुष्टिः स्यात्————।"

इति गारुडे अष्टाधिकद्विशततमेऽध्याये।) बद्धपाणिः। मुटा इति भाषा। तत्पर्य्यायः। सम्पिण्डिताङ्गुलिपाणिः २ मुष्टुः ३ मुष्टुटी ४। इति हेमचन्द्रः। ३।०६१॥ त्सरुः। इति मेदिनी। टे, २५॥ खड्गेर मुट् इति भाषा। (यथा, महाभारते। १। १६। १७।

"परिवेरायसैर्बाणैः सन्निकर्षे च मुष्टिभिः। निघ्नतां समरेऽन्योन्यं शब्दो दिवमिवास्पृशत्॥")

कुक्षाद्यवभागः। ढुटाक इति भाषा। यथा,—

"अवमुष्टिर्भवेत् कुक्षिः कुक्षयोऽधो च पुष्कलः।"

इति प्रायश्चित्ततत्त्वम्॥

(सुष्+क्तिन्।) मोषणम्। इति सुषधातोरर्थदर्शनात्। प्रहारविशेषः। किल इति भाषा। यथा, मार्कण्डेयपुराणे। ६०। १५—१६।

"चिच्छेदापततस्तस्य सशरं निशितैः शरैः। तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्॥ स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः। देवास्त्रैरापि सा देवी तत्रैवोरस्यताडयत्॥"

पथि क्षुधार्त्तस्य तिलादीनां मुष्टिग्रहणे चौर्य्याभावः। यथा, कौर्म्मे उपविभागे १५ अध्याये।

"तिलमुद्गयवादीनां मुष्टिमात्रा पथि स्थितैः। क्षुधार्त्तैर्नान्यथा विप्र! विधिविद्भिरिति स्थितिः॥" (सुष् क्षेपे+अधिकरणे क्तिन्। ग्रहणोपनकालः। यथा, महाभारते। २। ५। ६५।

"कक्षिग्रहश्च मुष्टिश्च परराष्ट्रे परन्तप!। अविहाय महाराज! निर्हंसि समरे रिपून्॥"

"मुष्टिः ग्रहणानां गोपनकालः दुर्भिक्षमिति यावत्॥" इति तट्टीकायां नीलकण्ठः॥)

मुष्टिकः, पुं, (सुष्यतीति मुष्+क्तिच् संज्ञायां कन्।) कंसराजमल्लविशेषः। इति श्रीमद्भागवतम्। (यथा च हरिवंशे।४१।१६०।

"नागं कुवलयापीडं चाणूरं मुष्टिकं तथा।"

मुष्टिः प्रयोजनमस्य। मुष्टि+कन्।) खर्व्वकारः॥ इति हेमचन्द्रः। ३। ५७२॥

मुष्टिकाख्यकः, पुं, (मुष्टिकस्याख्यकः।) बलदेवः। इति शब्दरत्नावली॥

मुष्टिद्यूतं, क्ली, (मुष्ट्या द्यूतं क्रीड़ितम्।) द्यूतक्रीड़ाविशेषः। पुरसट् खेला इति भाषा। तत्पर्य्यायः। चुलकम् २। इति शब्दमाला॥

मुष्टिन्धयः, पुं, (मुष्टिं धयति पिबति। धेट्+"गाड़ीसुधोच।" ३।२।३०। इति खश्।) "अरट्टिंधदनन्तस्य सुम्।"६।३।६७। इति सुम्।) बालकः। इति चिकाण्डशेषः॥

मुष्टिबन्धः, पुं, मुष्टिबन्धनक्रिया। मुटाबाँधा इति भाषा। तत्पर्य्यायः। संग्राहः २। इत्यमरः। ३।२।१४॥ मुष्टेर्बन्धोऽङ्गुलिविन्यासो मुष्टिबन्धः। मुष्टिना बन्धो दृढ़ग्रहणं संग्राह इत्यपरे। मुष्ट्यामेव संग्रह इत्यन्ये। मुष्टिः क्षियाच्च संग्रह इति दीपान्वितः। इति भरतः॥

मुष्टीमुष्टि, ष, मुष्टामुष्टि। मुष्टिभिर्युद्धिभिः प्रहृत्य यद्युद्धं दृष्टं तत्। किलाकिलि इति भाषा। इति सुग्धबोधव्याकरणम्॥

मुष्टुकः, पुं, (मुष्+बाहुलकात् कुधन्। ततः संज्ञायां कन्।) राजसर्षपः। इति रत्नमाला॥ मष्टक इति वा पाठः॥

मुस ष्य ष्र् छिदि। खण्डने। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) य मुस्यति विपक्षं चतुरः। ष्र् असुषत् अमोषीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यर्थे। इति दुर्गादासः॥

मुसलः, पुं, क्ली, (मुस्यति खण्डयतीति। मुस्+"इषादिभ्यश्चित्।" उणा० १।१०८। कलः चित् स्यात्।)खनामख्याततण्डुलादिकण्डनार्थनिर्म्मितलौहाग्रयष्टिः। तत्पर्य्यायः। अयोऽग्रम् २। इत्यमरः। २। ६। २५॥ मुषलम् ३ खण्डनीदण्डः ४। इति शब्दरत्नावली॥ मुस्यति मुषल मुस यिङ्हिंदि नान्यीति कलः। मुसलो दन्त्यसकारः। एवं मुष्य इङ्हिंदीति मङ्हिंन्यान्नात् कलः मङ्हिंन्यकारश्च। इत्यमरटीकायां भरतः॥ (आयुधविशेषः। तत्प्रकारो यथा, वैद्यन्यायोक्तधनुर्व्वेदे।

"मुसलस्त्रिग्रीवांश्चाः करैः पादैर्विवर्ज्जितः। मूले चान्तेऽतिसमन्वः पातनं पोषणं दृषम्॥") यथा, मनौ। ८। ३१५।

"स्कन्धेनादाय मुसलं जगुड़ं वापि खादिरम्। प्रक्षिपोभयतस्तीक्ष्णामायसं दण्डमेव वा॥")

मुसलामुसलि, ष, मुसलैश्च मुसलैश्च प्रहृत्ययुद्धं दृष्टम्। इति सिद्धान्तकौमुदी॥

सुस्ती, स्त्री, (सुस्त+गौरादित्वात् ङीष्।) तालमूलिका। यष्टगोधिका। इत्यमरः। २। ५। १२।

सुस्वनी, [न्] पुं, (सुस्वनं प्रहरत्यस्येत्याख्यातीति। सुस्वन+इनिः।) बलदेवः। इत्यमरः।१।१।२५॥

सुस्वाः, त्रि, (सुस्वनमर्हतीति। सुस्वन+यः।) सुस्वेन वधः। इत्यमरः। ३। १। ७५॥

सुस्व क संहतौ। इति कविकल्पद्रुमः॥ (चुरा०-उभ०-अक०-सेट्।) पवर्गद्वितीयादिः। क सुस्वयति। इति दुर्गादासः॥

सुस्वः, पुं, (सुस्वयति एकत्र संहतीभवतीति। सुस्व+कः। एकग्रिपायामस्य बहुत्वसम्बन्धतया तथात्वम्।) सुस्वकम्। इति हारावली॥ (यथा हरिवंशसंहितायाम्। ७७। ११।

"भागैश्चतुर्भिः सितपक्षसुस्वाः
श्रीवत्सभागौ नखगुग्गुलू च।
कर्पूरबोधो मधुपिङ्गलोऽयं
कोपच्छदो नाम नरेन्द्रधूपः॥")

सुस्वकः, पुं क्ली, (सुस्व+स्वार्थे कन्।) लवङ्गमूलविशेषः। सुस्वा इति भाषा। तत्पर्य्यायः। कुरुविन्दः २ मेघनामा ३ सुस्वा ४। इत्यमरः। २। ४। १५६॥ सुस्वः ५ राजकसेरुः ६। इति हारावली। मेघाख्यम् ७ गान्धेयम् ८ भद्रसुस्वकम् ९। इति रत्नमाला॥ अथनामकः १० श्रीभद्रा ११ भद्रकः १२ भद्रा १३। इति शब्दरत्नावली। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। वायुनाशित्वम्। आग्निदत्वम्। दीपनत्वञ्च। इति राजवल्लभः॥ अपि च।

"सुस्वकं न स्त्रियां सुस्वं किन्तु वारिदनामकः।
कुरुविन्दश्च स ख्यातोऽपरः कोरकसेरुकः॥
भद्रसुस्वश्च गुन्द्रा च तथा गांगरसुस्वकः।
सुस्वं कटु हिमं वाहि तिक्तं दीपनपाचनम्॥
कषायं कफपित्तास्रकृच्छ्वरारुचिनाशनम्।
अनूपदेशे यज्जातं सुस्वकं तत् प्रशस्यते।
तत्रापि मुनिभिः प्रोक्तं वरं गांगरसुस्वकम्॥"

इति भावप्रकाशः॥

सुस्वकः, पुं, (सुस्वयति संहतीकरोतीति बधिरमिति। सुस्व+कः। ततः संज्ञायां कन्।) स्थावरविषभेदः। इति हेमचन्द्रः। २। २५६॥ (यथा, सुश्रुते कल्पस्थाने। २।

"चत्वारिंशत्सनाभानि सुस्वके द्वे प्रकीर्त्तिते॥")

सुस्वा, स्त्री, (सुस्व+टाप्।) सुस्वकः। इत्यमरः। २। ४। १५६॥ (तस्याख्याः पर्य्यायः।

"मेघाख्यं सुस्वकं सुस्वा गान्धेयं भद्रसुस्वकम्॥"

इति वैद्यकरत्नमालायाम्॥

यथा सुश्रुते कल्पस्थाने। ४४।

"दोषघ्ना यष्टयाह्वपाठारोगाशैःकुष्ठनाशनाः।
शोथं निशातकं सुस्वा विड्गमलकौ तथा॥")

सुस्वादः, पुं, (सुस्वामत्तीति। अद+अच्।) शूकरः। इति शब्दरत्नावली॥

सुस्वाभं, क्ली, (सुस्वेवाभा यस्य।) सुस्वकविशेषः। नागर सुस्वा इति भाषा। तत्पर्य्यायः। कुटन्नटम् २ पुरम् ३ वल्कम् ४ परिपेलवम् ५। इति रत्नमाला॥ (गुणा अस्य कुटन्नटशब्देऽवगताः॥)

सुस्वः, पुं, (सुस्वति खण्डयत्यनेन। सुस्व+बाहुलकात् कुक्।) सुधिः। इति हेमचन्द्रः। ३। २६९॥

सुस्वं, क्ली, सुस्वनम्। सुस्वधातोरौणादिकरक्प्रत्ययेन निष्पन्नम्। २। १३। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (नयनजलमिलुप्तुक्॥)

सुह यउ ल क्ति वैचित्त्ये। इति कविकल्पद्रुमः॥ (दिवा०-परः०-अक०-सेट्। वधादित्वाट्ट्।) वैचित्त्यं ज्ञानरहितोभावः। य, तेन सुह्यति चिराय मे मनः। इति मुरारिः। ज मोहिष्यति मोक्ष्यति। ल असुहत्। णि सुम्बः मुह्योऽस्ति। इति। दुर्गादासः॥

सुहिरः, पुं, (सुह्यति ज्ञानरहितोभवत्यनेन लोकः सुह्यति सभायामिति वा। सुह+"दृविमदीति उषा०।" १। ५२। इति किरच्।) कामः। सर्पः। इति मेदिनी। रे, । २०५॥ (असुह्यः रत्युच्चुलदत्तः॥)

सुहुः, [सु] ब, (सुह+"सुहेः किच्।" उषा० २। १२१। इति उसिः किच्च।) पुनः पुनः। इत्यमरः। ३। ४। १॥ (यथा, पञ्चदश्याम्। ७। १०१।

"खलप्रमादपरोक्षेण दृष्ट्वा पक्षान् खलागरम्।
चिन्तयेदप्रमत्तः सन्नुभावदुदिनं सुहुः॥")

सुहुभांवा, स्त्री, (सुहुः भावा भावश्च।) पुनः पुनःकथनम्। तत्पर्य्यायः। अनुजापः २। इत्यमरः। १। ६। १६॥

सुहूर्णः, पुं क्ली, (हूर्च्छतीति। "अग्निहृसिभ्यः क्तः।" उषा० ३। ८६। इत्यत्र बाहुलकात् हूर्च्छेरपि इति उज्ज्वलदत्तः। सुट्आगमश्च प्राक्। "राजोपः।" ६। ४। २१। इति ह्रस्वैव ह्रस्व लोपः।) द्वादशक्षणपरिमितकालः। इत्यमरः। १। १। ११३॥ घटिकाद्वयम्। इति राजनिर्घण्टः॥ (अस्य विवृतिर्यथा। तत्र क्षणश्चरोचारणमात्रोऽक्षिनिमेषः। पञ्चदशाक्षिनिमेषाः काष्ठा। त्रिंशत्काष्ठाः कलाः। त्रिंशत्कलो मुहूर्त्तः कलाद्यभागश्च। त्रिंशन्मुहूर्त्तमहोरात्रम्। इति सुश्रुते कल्पस्थाने षष्ठेऽध्याये॥) दिनपञ्चदशभागैकभागः। यथा,

"प्रातःकालो मुहूर्त्तोऽस्य सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम्॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् आद्यं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु॥"

इति तिथ्यादितत्त्वधृतवचनम्॥७॥

कर्म्मविशेषे तस्य परिमाणं यथा। नन्वत्रोपवासकालादौ घटिकैकापि या भवेदित्यत्र घटिकापदं दण्डपरं मुहूर्त्तपरं वा स्यात्। आचारभृतचतुर्दण्डात्मकाद्यूनोदयज्ञापके चतस्रो घटिकाः प्रातरुदयः उच्यते इत्यादौ प्रभाते घटिकायुग्मं प्रदोषे घटिकाद्वयम्। दिनवतु सर्व्वकार्य्याण्यत्र कारयेन्न विचारयेदिति कृत्यायुधधृतलिखिष्यमाणत्रियामामिति वचनयोरेकमूलयोश्च उभयत्र प्रयोगदर्शनादिति संग्रहः। अत्रोच्यते। आह्नादावस्तगामिनीति घटिकात्रियामकवचनचतुर्थचरणे पार्व्वण्ययोगतया घटिकायाः सुहूर्त्तात्मकत्वस्यावश्यमङ्गीकारात् तात्पर्य्यलाघवेन व्रतादावपि तथात्वम्।

"घटिकैकाप्यमावास्याप्रतिपत्सु न चेद्दृषदा।
सर्व्वं तदासुरं दानं देवे कर्म्मणि चोदितम्॥"

इति घटिकान्यूने निन्दामभिधाय घटिकात्रयमे कर्म्मार्हेति वक्ष्ये सुहूर्त्तमप्यमावास्याप्रतिपत्सु भवेद्दृषदा। तद्दानसुतरां श्रेयं श्रेयं पूर्व्वं हि पूर्व्ववदित्यनेन सुहूर्त्तलाभे कर्म्मार्हत्वज्ञापनाच्च। तत्रापि सुहूर्त्तः किं तत्तद्दिवारात्रिपञ्चदशांशः उत दण्डद्वयम्। नाद्यः प्रतिदिनदिवारात्र्योर्द्वांसवृद्धिभ्यां तद्भागानामपि न्यूनाधिक्यादिभिन्नदापत्तेः। नापि द्वितीयः दण्डद्वयस्य त्रिंशद्दण्डात्मकदिवारात्रिपञ्चदशांशस्य सुहूर्त्तस्य दण्डद्वयाधिकन्यूनकालानामपि त्रिंशद्दण्डाधिकन्यूनदिवारात्रिपञ्चदशांशानां सुहूर्त्तत्वप्रतिपादनेन विनिगमनाविरहात् किन्त्वन्तरङ्गतया कर्म्माङ्गदिवारात्र्यन्यतरपञ्चदशांशस्य यद्यत्प्रशस्तौ अयनांशक्रमेणोत्तरायणपूर्व्वाह्णदिनमानसपादषड्विंशतिदण्डानां पञ्चदशांशस्य पादोनदण्डद्वयस्य सुहूर्त्तत्वात्तद्विवक्षितक्रियायां तावन्मानकालस्यापि यद्यपि सर्व्वत्र न्यूनकालावच्छेदे आवश्यकतया तस्यैव पादोनदण्डद्वयात्मकस्य सुहूर्त्तस्य यद्यं लाघवात्।

"यदा चतुर्दशीयामं तुरीयमनुपूरयेत्।
अमावास्या शीयमाना तदैव आह्निमश्नुते॥"

इति कात्यायनोक्तस्य चतुर्दशीसम्बन्धिदिनचतुर्थयाममात्रव्याप्तमावास्यायां आह्निविधानस्य मत्स्यपुराणोक्तसुखापराह्णीयसुहूर्त्तावाप्तेन विषयलाभाय पादोनदण्डद्वयात्मकसुहूर्त्तस्यद्यत्वस्यावश्यकत्वाच्च। तादृग्मावास्यायां तदधिकसुखापराह्णसम्भवात्। तत्र च सुखापराह्णीयपादोनदण्डद्वयात्मकदर्शलाभस्तु चत्वारिंशत्पलाधिकत्रयस्त्रिंशद्दण्डात्मकदिवस एव। अत एव ज्ञातैर्भट्टाचार्य्यैरपि यदा चतुर्दशीयाममित्यस्य व्याख्याने तिथ्यादितत्त्वे तथा लिखितम्। न च निरूढलक्षणातो रूढ्यर्थस्यैवलघुत्वात्। तासु त्रिंशत्पलकस्तु सुहूर्त्तो द्वादशात्मिकायाम्। ते तु त्रिंशद्दण्डोरात्र इत्यमरोक्तो द्वादशक्षणात्मकः अहोरात्रत्रिंशांशो दण्डद्वयरूपसुहूर्त्तो लाघवतः सर्व्वानुगततया न्यूनकालावच्छेदको वक्तव्य इति वाच्यं निरूढलक्षणापि शक्तितुल्येति प्राम्दिक्सरत्वात् ज्ञातैर्लक्षणान्तरज्ञेति सन्निहिते दुर्विरन्तरज्ञेतिन्यायाच्च निरूढलक्षणाया एव बलवत्त्वात्। दक्षिणः सपश्चिमक इत्यत्र पश्चिमपदस्य कुक्षिगतकोणोक्तरूढिशक्त्यपेक्षया त्रिंशद्दण्डद्वयगतकालायनोक्तनिरूढलक्षणाया एव। निरूढलक्षणायाः शक्तितुल्यत्वेन रूढ्यर्थस्यैव

ग्रन्थार्थबोधज्ञानं ग्रन्थसम्बन्धज्ञानञ्च विना पदतात्पर्य्यज्ञानानुपपत्तेः पदार्थोपस्थापकत्वात्। सा च निरूढलक्षणा क्वचित्तात्पर्य्यबोधकग्राह्यात् क्वचिच्चार्थप्रयोगतोऽनुमानादपि निर्णीयते। वस्तुतस्तु द्युनिशोः पञ्चदशांशाश्रितस्वल्पोन्नतनिरूढसक्तूर्नपदलक्षया विनिगमनाविरहगौरवाभ्यामेव कुञ्चिता अतोऽल्पन्यूनपादोनदण्डद्वयात्मकसक्तूर्नग्रहणं अग्रह्यमेव। अथात्यल्पन्यूनतया सर्व्वानुगमाय तदग्रहणमिति चेत् अत्यल्पाधिकतया सपाददण्डद्वयात्मकसक्तूर्नस्यैव कुतो न ग्रहणं स्यात् तस्मात्

"प्रभाते घटिकायुग्मं प्रदोषे घटिकाद्वयम्।
दिनवत् सर्व्वकार्य्याणि कारयेन्न विचारयेत्॥"

इति लघुहारीतवचनत्रियामा रजनी प्राहुरित्यत्रोक्तत्वात्पञ्चदशांशः। गाङ्गेयान्तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते इति ब्रह्मवैवर्त्तवचनयोरेकदण्डद्वयात्मककाले घटिकापदनिरूढलक्षणाविरहौ तया पर्य्यायद्वारा कोषोक्तरूढ्या च समञ्जसतः पार्व्वणयोग्यदण्डद्वयात्मककाल एव घटिकापदादुपस्थाप्यते अतः सर्व्वसाधारण्येन न्यूनकालव्यवच्छेदाय सैव ग्राह्या लाघवात्। अतएव यदा चतुर्दश्यीयां तुरीयमनुपूर्य्येदत्र यदा यत्र दिने अमावास्यासुखापरार्द्धोपयोगिदण्डद्वयान्यूनकालव्यापनं यथा स्यात्तथैव चतुर्दश्यीयां तदुक्तद्वितीययाममनुलङ्घ्यैव तत्र प्रदत्त्व चतुर्थयामं पूरयेत् याज्ञवल्क्यः। अन्यथा चतुर्दश्यसक्तूर्त्ताधिकपूरणाभिधानं व्यर्थं स्यात्। एतेनैव दर्शश्राद्धेऽपि सन्ध्यापरार्द्धादरः कार्य्यः। प्रातःकालादिपञ्चधाविभागे कुतपादिसंज्ञायाञ्च दिनमानपञ्चदशांशसक्तूर्नस्यैव ग्रहणम्। तद्बोधकग्राह्यसंवादात्। अत एकोद्दिष्टे दिनमानपञ्चदशांशसक्तूर्त्तो योग्यतया च न्यूनकालव्यवच्छेदको ग्राह्यः। कुतपरौहिण्याप्यतरमाचार्य्याहुर्युक्तेः। एवं विशेषाभिधानात् सुखरात्रौ दण्डमात्रं अष्टास्वेकादशीद्वादश्यीषु च कलाकाष्ठारूपोऽपि प्रतिष्ठादौ तूक्तयुक्त्या स्वयोग्यकाल एव न्यूनकालव्यवच्छेदको ग्राह्यः। ततश्च विशेषकालप्राप्तकर्म्मेतरकर्म्मैव प्रश्नस्नादिकाले स्वयोग्यदण्डद्वयान्यूनकतिथिरेव ग्राह्येत्यनुगतविधिः सर्व्वसामञ्जस्यादिति तत्त्वम्। इति चन्द्रशेखरवाचस्पतिकृतहेतनिर्णयः॥

सुहेरः, पुं, (सुह्यति विचित्तीभवतीति। सुह+"सुहेराद्यः।" उणा० १।६२। इति एरक्।) मूर्खः। इति संक्षिप्तसारोणादिवृत्तिः॥

मूङ बन्धे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) पवर्गपञ्चमादिः। ङ मवते। इति दुर्गादासः॥

मूः, [र्] स्त्री, मूर्च्छा। इति मूर्च्छेधातोर्भावे क्विप्। निस्सन्नम्। इति सुबोधव्याकरणम्॥

मूः, स्त्री, (मवते इति। मव+क्विप्। "ज्वरत्वरस्रिव्यविमवामुपधायाश्च।" ६।४।२०। इति सार्व्वधातुके ऊठ् इत्वादेशः।) वन्धनम्। इति सिद्धान्तकौमुदी॥

मूकः, त्रि, (मवते वध्यतेऽसौ। मव+वाहुलकात् कक्।" उणा० ३।४१। इति उपधायाया वकारस्य ऊठ्।) वाक्यरहितः। गोंगा इति भाषा। तत्पर्य्यायः। अवाक् २। इत्यमरः। ३।२।१३। (यथा, महाभारते। २।५। १२५।

"कञ्चिदन्धांश्च मूकांश्च पङ्गून् व्यङ्गानबान्धवान्।
पितेव पासि धर्म्मज्ञ! तथा प्रव्रजितानपि॥"

अस्योत्पत्तिहेतुर्यथा, गर्भवैकृत्यात्

"गर्भौ वातप्रकोपेण दीर्घेऽहे चावमानिते।
भवेत् कुब्जः कुणिः पङ्गुर्मूको मिमिनमेव च॥"

इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये। रोगत्वेनास्य विषयो यथा,—

"आहत्य वायुः सकफो धमनीः शब्दवाहिनीः।
नरान् करोत्यक्रियकान् मूकमिन्द्रियगद्गदान्॥"

इति च तत्र निदानस्थाने प्रथमेऽध्याये॥)

मूकः, पुं, (मवते वध्यते जातिकैरिति। मव+कक्। पूर्व्ववत्सर्व्वम्।) मत्स्यः। इति त्रिकाण्डशेषः॥ शैलः। इति मेदिनी। के, ३१॥ (दानवभेदः। यथा, महाभारते। १।३६।७०।

"य सन्निकर्षमागम्य पार्थस्याक्लिष्टकर्म्मणः।
मूकं नाम दनोः पुत्रं ददर्शाद्भुतदर्शनम्॥")

दीनः। इति हेमचन्द्रः। ३।२२। (तक्षकपुत्रः। यथा, महाभारते। १।५७।१०।

"शिखी शलकरो मूकः सुकुमारः प्रवेपनः।
सुन्दरः शिशुरोमा च सुरोमा च महाहनुः॥
एते तक्षकजा नागाः प्रविष्टा ह्यग्निवाहनम्।")

मूढः, त्रि, (मूह+क्तः।) मूर्खः। इत्यमरः। ३।१।३८॥ (यथा, पञ्चदश्याम्। ७।१०।

"अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः।
एकीभूय भवेन्मुख्यस्तत्र मूढैः प्रयुज्यते॥")

बालः। तन्त्रितः। इति मेदिनी। ढे, १॥ जड़ः। इति हेमचन्द्रः॥

मूतः, त्रि, (मव मू भवे वा क्तः।) बद्धः। इत्यमरः। ३।१।८५॥ (धान्यरक्षणार्थं तत्समय आधारविशेषः। यथा, शतपथब्राह्मणे। २। ६।२।१७। "तान् द्वयोर्मूतकयोरुपनह्य वेणुयष्ट्यां वा कुपे वोभयत आवध्नीयं परेत्य यदि दृष्टं वा स्याद्युं वा वेणुं वा वल्मीकं वा विन्देत्।" 'यत्र तत्समये आवपने धान्यं बध्यते तन्मूतं मूतमेव मूतकम्। वेणुमय्यां यष्ट्यामुभयतः बद्धा।' इति तद्भाष्ये महीधरः॥)

मूत्र, तृ क प्रस्रावे। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-उभ०-सक०-सेट्।) दीर्घौ। मूत्रयति मूत्रापयति। इति दुर्गादासः॥

मूत्रं, क्ली, (मूत्र्यते इति। मूत्र+घञ्। लोकाश्रयत्वात् क्लीवत्वम्। यद्वा, सुच्यते त्यज्यते इति। मूत्र+"सिविसुचोरुक् च।" उणा० ४।१६२। इति ट्रन् किद्भवति। टेरुकारादेशः।) उपस्थनिर्गतजलम्। तत्पर्य्यायः। प्रस्रावः २। इत्यमरः। २।६।६७॥ मेहनम् ३। इति जटाधरः। गुह्यनिस्यन्दः ४ सवलम् ५ सवः ६। इति राजनिर्घण्टः॥ ७॥ (अस्योत्पत्तिविषयो यथा,—

"आहारस्य रसः सारः सारद्दोनो मलभवः।
शिराभिस्तच्च लं नीतं वस्तौमूत्रत्वमाप्नुयात्॥"

इति पूर्व्वखण्डे चतुर्थेऽध्याये ग्राह्यधरीक्षितम्॥

"वस्तिपूरणविक्लेदलघूत्रम्।"

तथास्य चयदूषितलक्षणं यथा,—

"मूत्रक्षये वस्तिशोथोऽल्पमूत्रता च।"

"मूत्रं सुदुर्गुदुः प्रवृत्तिं वस्तिशोथमाशानद्ध च।"

इति सुश्रुते सूत्रस्थाने पञ्चदशेऽध्याये॥ तथास्य दोषादि विज्ञानस्य परीक्षा लक्षणम्॥

"वातेन पाण्डुरं मूत्रं रक्तनीलञ्च पित्ततः।
रक्तमेव भवेद्रक्तात् धवलं श्लेष्मिलं कफात्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) तस्योत्सर्गविधिर्यथा,—

"दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः।
कुर्य्यान्मूत्रपुरीषे तु रात्रौ दे दक्षिणामुखः॥"

इति गारुडे ८४ अध्यायः॥

अपि च।

"मूत्रोच्चारसमुत्सर्गे दिवा कुर्य्यादुदङ्मुखः।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा॥

इति मनुः। ४। ५०॥

"ज्ञात्वा यज्ञोपवीतन्तु दृढतः कण्ठलम्बितम्।
विण्मूत्रे च यदा कुर्य्याद् यद्वा कर्णे समाहितः॥"

इति यमः॥

यद्वेकवस्त्री यज्ञोपवीतं कर्णे ज्ञात्वा अवगुण्ठित इति। कर्णे दक्षिणकर्णे। इति सांख्यायनः॥

"छायायामन्धकारे वा रात्रावहनि वा द्विजः।
यथासुखमुखः कुर्य्यात् प्राज्ञस्त्वाधमयेषु च॥
न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चिताँ न च पर्व्वते॥
न जीर्णदेवायतने न वल्मीके कदाचन।
न ससत्त्वेषु गर्त्तेषु न गच्छन्नपि संस्थितः॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके।
वायुग्निविप्रादित्यमपः पश्यंस्तथैव गाः॥
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्जनम्॥"

इति मनुः। ४। ४५—४८॥

"आहारनिद्राविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः।
वाग्गुप्तिकार्य्याणि तपस्तथैव
वनाश्रमी गुप्ततमे तु कार्य्ये॥"

इति वशिष्ठः॥

निर्झरो मूत्रपुरीषोत्सर्गः॥ ७॥

"सोमार्य्यार्कानुवायूनां पूज्यानाप्त न संसृशेत्।
कुर्य्यात् जीवनविण्मूत्रसप्तत्सर्गं च पण्डितः॥"

इति विष्णुपुराणम्॥

न च सोपानत्को मूत्रपुरीषे कुर्य्यादिति। इत्यापस्तम्बः।

"करग्रहीतपात्रेण हत्वा मूत्रपुरीषके ।
मूत्रतुल्यन्तु पानीयं पीत्वा चान्द्रायणञ्चरेत् ।"
इति दक्षसंहितायाम् । ❋ ।

ग्रहीतजलपात्रस्य मूत्रोत्सर्गे दोषो यथा,—
"वारिपात्रं करे धृत्वा मूत्रं त्यजति यो नरः ।
सुरापात्रसमं पात्रं तज्जलं मदिरासमम् ।"
इति कर्म्मलोचनम् । ❋ ।

सशब्दमूत्रस्य दोषो यथा,—
"निःस्वाः सशब्दमूत्राः स्युर्नृपा निःशब्दधारया ।
भोगाढ्याः समधरा निःस्वाः स्युर्घट-
सन्निभाः ।"
इति गारुडे ६१ अध्यायः । ❋ ।

"विष्णुक्रान्तान्तमन्त्रेण चौरव्याघ्रादिरक्षणम् ।"
इति तन्त्रेण १८८ अध्यायः । ❋ । अथ गोमूत्रगुणाः । तीक्ष्णत्वम् । उष्णत्वम् । लवणत्वम् । पित्तकारित्वम् । कटुत्वम् । लघुत्वम् । रूक्षत्वम् । कृम्युदरानाहप्लीहार्शोविषकुष्ठगाध्रित्वञ्च । इति राजवल्लभः ।

मूत्रकृच्छ्रं, क्ली, (मूत्रे कृच्छ्रम् । मूत्रजन्यं कृच्छ्रमिति वा ।) रोगविशेषः । तत्पर्य्यायः । मूत्ररोधः २ अश्मरी ३ कृच्छ्रम् ४ । इति राजनिर्घण्टः । ❋ । अथ मूत्रकृच्छ्राधिकारः ।

तत्र मूत्रकृच्छ्रस्य विप्रकृष्टं निदानमाह ।
"व्यायामतीक्ष्णौषधरूक्षमद्य-
प्रसङ्गवृत्यध्वतृषोषितत्वात् ।
आनूपमत्स्याध्यशनादजीर्णात्
स्युर्मूत्रकृच्छ्राणि पृथक् तथाष्टौ ।"

तीक्ष्णौषधं राजिकाशूरणादियुक्तम् । रूक्षेति मद्यविशेषणम् । प्रसङ्गः सततं सेवा । वृत्यं भक्षणम् । निर्जेति द्विविधः पाठः । हतपृष्ठयानात् अश्वादिना गमनात् । आनूपं प्रचुरजलदेशभवं मत्स्यम् । अष्टौ वातिकपैत्तिकश्लैष्मिकसान्निपातिकशल्यजपुरीषजशुक्रजाश्मरी जाति । तस्य संप्राप्तिपूर्ब्बकं लक्षणमाह ।

"पृथक्पृथग्दोषकृतैर्निदानैः
सर्व्वैरथवा कोपमुपेत्य वस्तौ ।
मूत्रस्य मार्गं परिपीड्य बस्तौ
यदा तदा मूत्रयतीह कृच्छ्रात् ।"

तत्र वातिकमाह ।
"तीव्रा रुजो वङ्क्षणबस्तिमेढ्रे
स्वल्पं सदुर्म्मूत्रयतीह वातात् ।"

तीव्रा मारणात्मिका वङ्क्षणादिमेढ्रान्तामन्तराखन्धौ । ❋ । पैत्तिकमाह ।
"पीतं सरक्तं सरुजं सदाहं
कृच्छ्रं सदुर्म्मूत्रयतीह पित्तात् ।"

कृच्छ्रमिति क्रियाविशेषणम् । श्लैष्मिकमाह ।
"वस्तेः सजिङ्गस्य गुरुत्वशोथौ
मूत्रं सपिच्छं कफमूत्रकृच्छ्रे ।"

सपिच्छं पिच्छिलम् । सान्निपातिकमाह ।
सर्व्वाणि रूपाणि च सन्निपातात्
भवन्ति तत् कृच्छ्रतमं हि कृच्छ्रम् ।"

कृच्छ्रं मूत्रकृच्छ्रम् । ❋ । शल्यजमाह ।
"मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु वा ।
मूत्रकृच्छ्रं तदाघाताज्जायते भृशदारुणम् ।
वातकृच्छ्रेण तुल्यानि तस्य लिङ्गानि निर्द्दिशेत् ।"

मूत्रवाहिषु स्रोतःसु । शल्येन कण्टकेन । क्षतेषु सञ्छतीकृतेषु अथवा अभिहतेषु मुद्गरादिभिरभिहतेषु । तदाघातात् मूत्रमार्गाघातात् मूत्रकृच्छ्रं जायते । भृशदारुणं मारकं तस्य शल्यजस्य । ❋ । पुरीषजमाह ।
"शुष्कतस्तु प्रतीघातादायुर्विगुणतां गतः ।
आध्मानं वातशूलञ्च मूत्रकृच्छ्रं करोति च ।"

प्रतीघातात् निरोधात् । विगुणतां दुष्टताम् । शुक्रजमाह ।
"शुक्रदोषैरुपहते मूत्रमार्गे विधारिते ।
सशुक्रं मूत्रयेत् कृच्छ्रादस्तिमेढ्रगसूलवान् ।"

उपहते दूषिते । ❋ । अश्मरीजमाह । अश्मरीहेतुकत्वादपि मूत्रकृच्छ्रसदाहृतम् । सुश्रुतेः शर्करालक्षणमपि मूत्रकृच्छ्रसूत्रमत्र तु तस्य लक्षणसंख्यानिरासार्थमश्मरीशर्करयोः साम्यमाह ।
"अश्मरी शर्करा चैव तुल्यसम्भवलक्षणे ।
विशेषं शर्करायाः श्रृणु कीर्त्तयतो मम ।"

सम्भवः कारणम् ।
"पच्यमानाश्मरी पित्तात्क्षीयमाणा च वायुना ।
विसृतकफसन्धाना चरन्ती शर्करा मता ।"

पित्तेन पच्यमाना मूत्रशुक्रश्लेष्मसंहतिः प्रथमं पित्तेन वह्निकर्म्मणा पच्यमाना । पक्वाद्वातेन शोषिता कफेनाश्लिष्टा अश्मरी । सैव विसृतकफसन्धाना त्यक्तकफाश्लेषा सती शर्करारूपा मूत्रमार्गात् चरन्ती शर्करा मता । एतावता किञ्चिदेव भेदः । ❋ । शर्करायाः उपद्रवानाह ।
"क्षतपीड़ा वेपथुः शूलं कुक्षावभिच दुर्बलः ।
तया भवति मूर्च्छा च मूत्रकृच्छ्रच दारुणम् ।"

शूलं कुक्षाविति च्छेदः । तया शर्करया । ❋ ।
अथ मूत्रकृच्छ्रस्य चिकित्सा ।
"त्रिकण्टकारग्वधदर्भकाश्म-
यवासधान्योशिरिभेदपद्माः ।
पिबन्ति पीता मधुनाश्मरीञ्च
समीपस्थोरपि मूत्रकृच्छ्रम् ।"

त्रिकण्टकादिकाथः । १ ।
"एलाश्मभेदकशिलाजतुगोक्षुराजा-
मेर्व्वारुबीजलवणोत्तमकुङ्कुमानाम् ।
चूर्णानि तण्डुलजले तुलितानि पीत्वा
प्रत्यूषकेतुरयि जीवति मूत्रकृच्छ्री ।"

एलादिचूर्णम् । २ ।
"अथोरजः सक्षपिषं मधुना सह योजितम् ।
मूत्रकृच्छ्रं निहन्त्याशु संवीढ़ं दिवसत्रयात् ।३।
गुर्व्वेण मिश्रितं क्षीरं कटूष्णं कामतः पिबेत् ।
मूत्रकृच्छ्रेषु सर्व्वेषु शर्करायाच्च नित्यशः ।४।
धात्रीरसक्षौद्रयुतं पिबेद्वा
कृच्छ्रे सरक्ते मधुना विमिश्रम् ।
शल्याभिघातोत्थितमूत्रकृच्छ्रे
कार्य्या क्रिया मारुतकृच्छ्रतुल्या ।५।
क्काथो गोक्षुरबीजस्य यवक्षारसमन्वितः ।
पीतः प्रशमयत्येव कृच्छ्रं विड्धारणोत्थितम् ।६।
त्रिफलायाः सुपिष्टायाः कल्कं कोलसमन्वितम् ।
वारिणा लवणीकृत्य पिबेन्मूत्ररुजापहम् ।"७।

कोलं बदरम् ।
गुड़मामलकं दृष्ट्वा भ्रमन्नं तर्पणं प्रियम् ।
पित्तासृग्दाहमूलघ्नं मूत्रकृच्छ्रहरं परम् ।८।
सपादशाणतुलितो यवक्षारः सितायुतः ।
भक्षितो नाशयत्येव मूत्रकृच्छ्रं न संशयः ।९।
क्षाराम्बुसिद्धोपलाकल्कः पीतः कर्म्मभितो नरैः ।
मस्तुना पलमात्रेण मूत्रकृच्छ्रं व्यपोहति ।१०।
समूलगोक्षुरक्काथः सितामाक्षिकसंयुतः ।
नाशयेन्मूत्रकृच्छ्राणि तथैवोष्णसमीरणम् ।"११।

उष्णसमीरणं उष्णवातं मूत्राघातविशेषम् ।
इति भावप्रकाशः । (तथास्य चिकित्साप्रकारान्तरम् ।
"सुगृहीतं जलं कर्षमात्रं स्यात् मूत्रकृच्छ्रहृत् ।
दध्यसुना च संमिश्रमयश्चूर्णं सुखप्रदम् ।
मूत्रकृच्छ्रे यवक्षारचूर्णं हिङ्गुप्रयोजितम् ।
कुष्माण्डच समादाय शर्करासहितं पिबेत् ।
यो हि चिरोत्थसम्भूतमूत्रकृच्छ्रनिवारणः ।"
"आरग्वधफलं मूलं दुरालभा धान्यकगुडूचीवर्षाभूः ।
पाषाणभेदपथ्ये क्काथोऽयं मूत्रकृच्छ्रे स्यात् ।"
इति हारीते चिकित्सितस्थाने २८ अध्याये ।
अथात्र पथ्यानि ।
"अथो यथादोषमयं गवोऽपि
पुरातना लोहितशालयश्च ।
तक्रं पयो दध्यपि गोप्रसूतं
धन्वाभिषं सुद्गरसाः सिता च ।
पुराणकुष्माण्डफलं मटोलं
मद्यार्द्रकं गोक्षुरकः कुमारी ।
गुवाकखर्ज्जूरकनारिकेल-
तालद्रुमाणाञ्च शिरांसि पथ्या ।
तालास्थिमज्जाञ्चपुषं चुटिञ्च
घृतानि प्राणाग्न्यगदानि चापि ।
प्रनीरनीरं हिमवालुका च
सिद्धं पृथक् स्यात् सति मूत्रकृच्छ्रे ।"

अथापथ्यानि ।
"मद्यं श्रमं निधुवनं गजवाजियानं
सर्व्वं विरुद्धमशनं विषमाशनञ्च ।
ताम्बूलमत्स्यलवणार्द्रकतैलभृष्टं
पिण्याकदिङ्गुतिलसर्षपवेगरोधान् ।
माषान् करीरमतितीक्ष्णविदाहिरूक्ष-
मन्नञ्च मूत्रयतुजः सति मूत्रकृच्छ्रे ।"

इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्रकृच्छ्राधिकारे ।)

मूत्रदोषः, पुं, (मूत्रस्य दोषो यस्मात् ।) प्रमेहः । इति राजनिर्घण्टः । (यथा, सुश्रुते । सूत्रस्थाने १८ अः ।
"यवकादिरिवैव गवोऽनिलविनाशनः ।
मूत्रदोषहरो रूक्षः पिपासाघ्नो रुचिप्रदः ।"

मूत्राघातादिः। अस्य चिकित्सा यथा,—
"निर्दिग्धिकायाः स्वरसं पिबेत् कुड़वसम्मितम्।
मूत्रदोषहरं कल्कमधवा क्षौद्रसंयुतम्॥"
"अत ऊर्द्धं प्रवक्ष्यामि मूत्रदोषे क्रमं हितम्।
श्लेष्मदोषोपपन्नानां हितन्तेषु विरेचनम्॥
ततः संशुद्धदेहानां हिताश्चोत्तरबस्तयः॥"
"क्षौद्रार्द्धप्रास्थं दत्त्वा तु पात्रन्तु क्षीरसर्पिषोः।
स्वयङ्गुप्ताफलञ्चैव तथैव क्षुरकस्य च॥
पिप्पलीचूर्णसंयुक्तमर्द्धभागं प्रदापयेत्।
एतदेकध्यमानीय खजेनाभिप्रमन्थयेत्॥
तस्य पाचितलं चूर्णं क्षीद्रं क्षीरं ततः पिबेत्।
एतत्सर्पिः प्रयुञ्जानः शुद्धदेहो नरः सदा॥
मूत्रदोषान् जयेत् सर्व्वानग्नेयोनेः सुदुर्ज्जयान्।
जयेत् शोणितदोषाञ्च वन्ध्या गर्भं लभेत च।
नारी चैतत् प्रयुञ्जाना योनिदोषात् प्रमुच्यते॥"
इत्युत्तरतन्त्रेऽष्टचत्वारिंशेऽध्याये सुश्रुतेनोक्तम्॥)

मूत्रनिरोधः, पुं, (मूत्रस्य निरोधः। यद्वा मूत्रं निरुणद्धीति। रुध्+अच्।) मूत्रप्रतिबन्धकरोगविशेषः। अस्य चिकित्सा यथा,—
"पिष्टं वे मालतीमूलं श्रीग्रकाथे समाहृतम्।
साधितं छागदुग्धेन पीतं शर्करयान्वितम्।
हरेन्मूत्रनिरोधञ्च हरेद्वै पाण्डुशर्करान्॥"
इति गारुड़े १६१ अध्यायः॥
(चिकित्सान्तरं यथा,—
"तैलेन पद्मिनीकन्दं पक्वमोमूत्रमिश्रितम्।
पिबेन्मूत्रनिरोधे तु सद्यो वेदनान्विते॥"
इति हारीते चिकित्सितस्थाने त्रिंशेऽध्याये॥)

मूत्रपतनः, पुं, (मूत्रस्य पतनमस्मात् पुरीषनिरोधकरत्वादस्य सततमूत्रपतनात् तथात्वम्।) गन्धमार्जारः। इति राजनिर्घण्टः॥

मूत्रपुटं, क्ली, (मूत्रस्य पुटम्।) नाभेरधो भागः। यथा,—
"नाभेरधो मूत्रपुटं वस्तिर्मूत्राशयोऽपि च।"
इति हेमचन्द्रः। ३। २७०॥

मूत्रपुटा, स्त्री, (मूत्रं मूत्रवर्द्धनं पुटं परिवेष्टनमस्याः।) कर्कटी। अपुषी। इति राजनिर्घण्टः॥
(कर्कटीत्रपुषीग्रन्थ्योरस्या विषयो ज्ञेयः॥)

मूत्रलं, क्ली, (मूत्रं लाति आदत्ते वर्द्धयतीत्यर्थः। ला+कः।) त्रपुषम्। इति ग्रन्थचन्द्रिका॥
मूत्रवर्द्धके, त्रि॥ (यथा, सुश्रुते। सूत्रस्थाने। ४५ अः।
"जाम्बवो बहुनिस्यन्दस्तुवरो वातकोपनः।
तीक्ष्णः सरासवो वृष्यो मूत्रलः कफवातजित्॥")

मूत्रला, स्त्री, (मूत्रल+टाप्।) कर्कटी। इति त्रिकाण्डशेषः॥ वासुकी। इति राजनिर्घण्टः॥

मूत्राघातः, पुं, (मूत्रस्याघातो निरोधो येन।) प्रस्रावरोधकरोगविशेषः। अथ मूत्राघातस्य विप्रकृष्टं सन्निकृष्टञ्च निदानं संख्याचाह।
"प्रायोमूत्रविघातादैर्जातकुक्षिकादयः।
जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश॥"
मूत्रविघातादेरित्याद्यशब्देन पुरीषशुक्रादिवेगविघातानां ऊर्द्ध्वाश्मनादीनाञ्च ग्रहणम्। मूत्रविघातादेः कुपितैर्दोषैरित्यन्वयः। ननु मूत्रकृच्छ्रमूत्राघातयोः को भेदः। उच्यते। मूत्रकृच्छ्रे कृच्छ्रमधिकं विबन्धोऽल्पः। मूत्राघाते तु विबन्धो बलवान् कृच्छ्रमल्पं इत्यनयोर्भेदः॥*॥
वातकुक्षिकायां निदानं संप्राप्तिं लक्षणञ्चाह।
"रौक्षादिवेगविघाताद्वा वायुर्बस्तौ सवेदनः।
मूत्रभाण्डिं पूरयति विगुणः कुक्षीवृतः॥
मूत्रमल्पाल्पमथवा सरक्तं संप्रवर्त्तते।
वातकुक्षिकां तान्तु आधिं विद्यात् सुदारुणम्॥"
रौक्षात् कायस्य। वेगविघातात् मूत्रादिवेगनिरोधात्। आदिग्रहणात् रौक्षादिभिर्वेगविघातादिभिश्च विगुणो दुष्टः कुक्षीवृतो वायुर्बस्तौ मूत्राशये चरति प्रतिधावति आवहत्वाद्भ्रमञ्चिनोति इत्यर्थः। वातवत्। मूत्रमिति तत्कालमूत्रमल्पमल्पं प्रवर्त्तते। तद्व्याधिं वातकुक्षिकामाहुः। सुदारुणम्। मारणात्मकत्वात्॥ १॥*॥ अष्ठीलामाह।
"आध्मापयन् बस्तिगुदं रुद्धा वातश्लेष्मतां।
कुर्य्यात्तीव्राग्निमष्ठीला मूत्रविस्रावरोधिनीम्॥"
यतः बस्तिगुदं रुद्धा अर्थात् तदन्तर्गतं मूत्रं मलञ्च निरुध्य बस्तिगुदं बस्तिं गुदञ्च आध्मापयन् आध्मानं कुर्व्वन् अष्ठीलां ष्ठीवातुल्यां व्याधिं कुर्य्यात्। बलोन्नतां चलां उन्नताञ्च॥२॥
वातबस्तिमाह।
"वेगं विधारयेद्यस्तु मूत्रस्याक्षुण्णको नरः।
निरुणद्धि सुखं तस्य बस्तेर्वेङ्क्षणतोऽनिलः॥
मूत्रसङ्गो भवेत्तेन बस्तिकुक्षिनिपीड़ितः।
वातबस्तिः स विज्ञेयो व्याधिः कष्टप्रसाधनः॥"
अक्षुण्णो मूर्खः। तस्य पुरुषस्य बस्तिसुखं निरुणद्धि बस्तिगतो वायुः। तेन वायुना मूत्रसङ्गो मूत्रविघातो भवति बस्तिकुक्षिनिपीड़ित इति बस्तौ कुक्षौ च निपीड़ितः संपीड़ितो वायुरिति सम्बन्धः॥३॥ मूत्रातीतमाह।
"चिरं धारयते मूत्रं सरक्तं न प्रवर्त्तते।
मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते॥"
मेहमानस्य मूत्रसृष्टस्य। मन्दं वा अल्पं वा॥ ४॥*॥ मूत्रजठरमाह।
"मूत्रस्य वेगेऽभिहते तदुदावर्त्तहेतुकः।
अपानः कुपितो वायुरुदरं पूरयेदृशम्॥
नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनाम्।
तं मूत्रजठरं विद्यादधोबस्तिनिरोधनम्॥"
तदुदावर्त्तहेतुक इति मूत्रवेगधारणप्रभवोदावर्त्तनिदानमाध्मानं कुर्य्यात्। अधोबस्तिनिरोधनं बस्तेरधोदेशे विबन्धकारकम्॥ ५॥
मूत्रोत्सङ्गमाह।
"बस्तौ वाप्यथवा नाभौ मध्यौ वा यस्य देहिनः।
मूत्रं प्रवृत्तं सज्यते सरक्तं वाथ नीरुजम्।
विगुणानिलजो व्याधिः स मूत्रौत्सङ्गसंज्ञितः॥
नाभे मेढ्रे मध्यौ मेढ्रनाभ्यन्तौ सज्यते निरुजं स्यात् सरक्तं सत् वा प्रवर्त्तते। प्रवाहत इति कण्ठोक्तेन सशब्दं मूत्रपुरीषवातानामधः प्रेरणं प्रवाहणं तेन कुपितेन वायुना वस्त्यादिभेदात् सरक्तं मूत्रं सवेदित्यर्थः॥ ६॥ मूत्रक्षयमाह।
"रूक्षस्य क्षान्तदेहस्य बस्तिस्थौ पित्तमारुतौ।
मूत्रक्षयं सरुग्दाहं जनयेतां तदाक्षयम्॥"
क्षान्तदेहस्य क्षीणदेहस्य तदाक्षयं मूत्रक्षयसंज्ञम्॥ ७॥ मूत्रग्रन्थिमाह।
"अन्तर्बस्तिसुखे दृप्तः शिरोग्रहः सहसा भवेत्।
अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रग्रन्थिः स उच्यते॥"
अन्तर्बस्तिसुखे बस्तिसुखस्याभ्यन्तरे अल्पः क्षुद्रामलकप्रमाणः। नन्वस्य अश्मर्या सह को भेदः। उच्यते। अश्मरी क्रमशः सञ्चयेन स्यादयन्तु सहसा भवेदिति भेदः। अपरो भेदः। अश्मर्यां पित्तादिकं संहन्यते अत्र तु रक्तमेव। यत लक्षं तत्कालान्तरे।
"रक्तं वातकफाद्दुष्टं बस्तिद्वारे सुदारुणम्।
यत्थिं कुर्य्यात् स दृक्चैव क्षयेन्मूत्रं तदाहृतम्॥"८॥ इति॥
मूत्रशुक्रमाह।
"मूत्रितस्य क्षियं यातो वायुना शुक्रसङ्गतम्।
स्थानच्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्त्तते।
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते॥"
मूत्रितस्य मूत्रवेगयुक्तस्य शुक्रं स्थानात् च्युतं पश्चाद्वायुना उन्नतं ऊर्द्धं नीतम्। भस्मोदकप्रतीकाशं भस्मसहितजलसदृशम्॥ ९॥ उष्णवातमाह।
"व्यायामाध्वातपैः पित्तं बस्तिं प्राप्यानिलाहृतम्।
बस्तिं मेढ्रं गुदञ्चैव प्रदहत् सावयेद्यः।
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा।
दृक्चैव पुनर्जन्तोरुष्णवातं वदन्ति तम्॥"
व्यायामादिविरोधित्वेन सौम्यधातुत्वात् तेजोरूपा पित्तवृद्धिः स्यात्ततः कुपितं पित्तं असंवृतं बस्तिं प्राप्य बस्त्यादिकं प्रदहत् मूत्रमधः स्रावयेत्। कीदृशं हारिद्रं अथवा सरक्तं पूयलोहितम्॥ १०॥ मूत्रसादमाह।
"पित्तं क्लेष्मा द्वावपि वा संहन्येतेऽनिलेन चेत्।
दृक्चाल्पं तदा पीतं रक्तं श्वेतं घनं स्रवेत्॥
सरक्तं रोचनाप्रख्यपूर्व्ववर्णं भवेत्ततः।
शुक्लं समस्तवर्णं वा मूत्रसादं वदन्ति हि॥"
संहन्येते घनीक्रियेते। शुक्लं अल्पं समस्तवर्णं उक्तसकलवर्णयुक्तम्॥ ११॥ विड्विघातमाह।
"रूक्षदुर्बलयोर्घातिनोदाहृतं शकृद् यदा।
मूत्रस्रोतोऽनुपवेत्य विट्संस्थं तदा नरः॥
विड्गन्धं मूत्रयेत् दृक्चाविड्विघातं तमादिशेत्॥"
उदाहृतं ऊर्द्धं नीतं विड्गन्धं वा। वाग्भट्टेऽप्ययं योजनीयः॥ १२॥*॥ बस्तिकुक्षिमाह।
"हताग्निजनितायासैरभिघातात् प्रपीड़नात्।
स्रस्यागादस्थिरदृक्तः शूकशिम्बिरिति गर्भवत्॥

मूत्रस्यन्दनदाहार्त्तौ विन्दुविन्दु सवत्यपि।
पीड़ितस्तु रुजेद्वारां संस्रम्भोद्वेगमाप्नुयात्॥
वस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमम्।
पवनप्रबलं प्रायो दुर्निरोधमबुद्धिभिः॥
तस्मिन् पित्तान्विते दाहः मूत्रं मूत्रविवर्णता।
श्लेष्मणा गौरवं शोथो मूत्रं स्निग्धं घनं सितम्॥"
द्रुताध्वलङ्घनं शीघ्रं मार्गशोधनम्। उद्वृत्तः उत्थितः। स्यन्दनं किञ्चिच्चलनम्। घोरं मारकम्। शस्त्रविषोपमं शस्त्रं खड्गादि तद्वच्छीघ्रमारकम्। विषमत्र शरः तद्वत् विलम्बमारकम्। एतावता मारकमवश्यं शीघ्रं विलम्बेन वा॥ १९॥ ●॥ तस्यैवाबाधस्य च लक्षणमाह।
"श्लेष्मरुद्धविलो वस्तिः पित्तोदीर्णो न सिध्यति।
अविभ्रान्तविलः साध्यो न च यः कुण्डलीकृतः॥
स्रावस्तु कुण्डलीभूते दृश्यतेऽतः स्राव एव च॥"
विलं वस्तिमुखरन्ध्रं पित्तोदीर्णः पित्तेनोद्रिक्तः। अविभ्रान्तविलः कफेनाप्रतिविलः यश्चातः कुण्डलीकृतः स साध्यः। एतेन कुण्डलीभूतोऽसाध्यः। कुण्डलीभूतस्य लक्षणमाह। दृढ़त्वादि-कुण्डलीभूतस्यावश्यं। कफेन विलावरोधात्तस्य वातः कुण्डलाकारेण तिष्ठतीत्यर्थः॥ ●॥
अथ मूत्राघातस्य चिकित्सा।
"नलकुशकाशेक्षुबलाकाशं प्रातः सुशीतलं सचितम्।
पिबतो नश्यति नियतं मूत्रयह इत्युवाच कविः॥"
कविः शुक्रः।
"कर्पूररजसा युक्ता वस्त्रवर्त्तिः शनैः शनैः।
मेढ्रमार्गान्तरे न्यस्ता मूत्राघातं व्यपोहति॥
धान्यगोक्षुरकः क्वाथः कल्कश्चिञ्चा हितं हृतम्।
मूत्राघाते मूत्रकृच्छ्रे शुक्रदोषे च दारुणे॥"
धान्यगोक्षुरकं हृतम्।
"मूत्रकृच्छ्रेऽश्मरीरोगे मैथुनं यत् प्रकीर्त्तितम्।
मूत्राघातेषु सर्व्वेषु तत् कुर्य्याद्वैद्यकालवित्॥"
इति मूत्राघताधिकारः। इति भावप्रकाशः॥
मत्स्यपुराणोक्तनिदानं तस्य १६१ अध्याये द्रष्टव्यम्। (तथास्य विषयः।
"वस्तिवस्तिशिरोमेढ्रकटीहृदयपायवः।
एकसम्बन्धिनः प्रोक्ता गुदास्त्रिविवराश्रयाः॥
अधोनाभेरपि वस्तिर्हि मूत्रवाहिशिरायुतः।
पार्श्वेभ्यः पूर्य्यते क्षुद्रैः स्वन्दमानैरगारतम्॥
वेल्लैरेव प्रविश्लेषं दोषाः कुर्व्वन्ति विंशतिम्।
मूत्राघातान् प्रमेहांश्च तस्मान्मेषसमाश्रयान्॥"
इति वाग्भटे निदानस्थाने नवमेऽध्याये॥
अथास्य पथ्यापथ्यानि।
"अभ्यङ्गनस्वेदविरेकवस्ति-
स्वेदावगाहोत्तरवस्तयश्च।
पुरातना लोहितशालयश्च
मांसानि धन्वप्रभवानि मद्यम्॥
तक्रं पयोदध्यपि माधवूर्द्ध
पुराणकुष्माण्डफलं पटोलम्।
महार्द्रकं तालफलास्थिमज्जा
हरीतकीकोमलनारिकेलम्॥
गुवाकखर्ज्जूरकनारिकेल-
तालद्रुमाद्यामपि मस्तकानि।
यथामलं सर्व्वमिदञ्च मूत्रा-
घातातुराणां हितमावहन्ति॥
विरुद्धानि च सर्व्वाणि व्यायामं मार्गशोधनम्।
रूक्षं विदाहिविष्टम्भिव्यायामं वेगधारणम्।
करीरं वमनञ्चापि मूत्राघाती विवर्ज्जयेत्॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्राघताधिकारे॥)
मूत्राशयः, पुं, (मूत्रस्याशयः आधारः।) नाभेरधोदेशः। तत्पर्य्यायः। मूत्रपुटम् २ वस्तिः३। इति हेमचन्द्रः। २।२७०॥ (अथास्य विषयः।
"मूत्राशये वा गुदसञ्चयोत्थ
ग्रोपो रुजा मूत्रविनिग्रहश्च॥"
इति सुश्रुते उत्तरतन्त्रे ५५ अध्यायः॥
यथा च तत्रैव निदानस्थाने ३ अध्याये।
"एकसम्बन्धिनो ह्येते गुदास्त्रिविवरस्थिताः।
मूत्राशयो मलाधारः प्राधान्यतनुसूत्रमम्॥")
मूत्रितः, त्रि, (मूत्रमस्य संजातम्। मूत्र+इतच्। यद्वा मूत्रयतीति मूत्र+क्तः।) जातमूत्रोत्सर्गः। तत्पर्य्यायः। मीढ़ः २। इत्यमरः। ३। १। ६६॥
मूर्खः, पुं, (मुह्+"मुहेः खो मूर च।" उणा० ५।२२। इति ख; धातोः मूरादेशश्च।) मायः। इति चिकाण्डशेषः। गायत्रीरहितः। यथा,
"क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यथेदाचरणस्याहुर्मरणान्तमशौचकम्॥
क्रियाहीनस्य नित्यनैमित्तिककियानभिज्ञस्य।
मूर्खस्य गायत्रीरहितस्य। सार्थगायत्रीरहितस्येति रत्नधरः। महारोगिणः पापरोगाढ्यतमरोगवतः तै च उन्मादस्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः। उदरोऽश्मरीशरौ पापरोगा नारदोक्ताः। यथेदाचरणस्य दूतवेश्माद्यावस्तस्य। इति शुद्धितत्त्वम्॥
मूर्खः, त्रि, (मुह्+खः। मूरादेशः।) मुह्यति यः। तत्पर्य्यायः। अज्ञः २ मूढ़ः ३ यथाजातः ४ वैधेयः ५ बालिशः ६। इत्यमरः। ३।१।७८। तस्य वशीकरणोपायो यथा,—
"मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं
कार्य्येण द्विजमादरेण युवतीं प्रेम्णा गुरुं विनयवान्।
अन्यं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं प्रीत्या कुर्य्याद्वशम्॥"
इति नवरत्नानि॥
"पयःपानं सुजन्तूनां केवलं विषवर्द्धनम्।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये॥"
इति हितोपदेशः॥

मूर्खता, स्त्री, (मूर्खस्य भावः। मूर्ख+"तस्य भावस्त्वतलौ।" ५।१।११९। इति तल् टाप्।) मूर्खत्वम्। यथा,—
"अदाता वंशदोषेण कर्म्मदोषाद्दरिद्रता।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता॥"
इति चाणक्यम्॥
"अरण्ये नारिकेलभक्षणे मूर्खत्वं यथा,—
"कलहो जायते विप्रे तिर्य्यग्योनिश्च निम्बके।
तालेऽधोरोगाः स्यान्नारिकेले च मूर्खता॥"
इति तिथ्यादितत्त्वम्॥
मूर्खभाटकः, पुं, (मूर्खो भाताऽस्येति नित्यं कप्।) मूर्खो भाता यस्य सः। इति सिद्धान्तकौमुदी॥
मूर्च्छना, स्त्री, (मूर्च्छि+युच्। टाप्।) गीताङ्गविशेषः। सा तु ग्रामस्य चतुर्थभागः। तस्या लक्षणं एकविंशतिनामानि च यथा,—
"स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते।
मूर्च्छनामिति तामाहुः कवयो ग्रामसम्भवाम्॥
उत्तरा मध्यमा चित्रा रोहिणी च मतङ्गजा।
सौवीरी हरिणाश्वा च कृष्णमध्यमषड्जमा॥
मतसरी कृष्टमध्या च शुद्धान्ता च कलावती।
तीव्रा रौद्री तथा ब्राह्मी वैष्णवी खेदरी सुरा॥
नादावती विशाला च विशु ग्रामेषु विश्रुताः।
एकविंशतिरित्युक्ता मूर्च्छना चन्द्रमौलिना॥
मूर्च्छनां कलयतो सुरग्रामो-
र्वैणिकाध्वनिविशेषविदाने:।
मूर्च्छना ययुरनङ्गशरौघै-
रङ्गना रतिपतेरिव सेना:॥"
इत्यमरभरतौ॥
इत्थमुक्ते षड्जादिस्वरत ऋषभादिस्वरोत्थाने यत्र स्वरो विरमति सा मूर्च्छना। भरतमते वाद्यस्य गानस्य वा समये यत्र स्वरस्य ग्रामस्य वा कथनं सा मूर्च्छना। सा एकविंशतिप्रकारा। तत्र षड्जग्रामस्य मूर्च्छना उत्तरा १ मध्यमा २ चित्रा ३ रोहिणी ४ मतङ्गजा ५ सौवीरी ६ हरिणाश्वा च ७। मध्यमग्रामस्य मूर्च्छना पञ्चमी १ मत्सरी २ कृष्टमध्या ३ शुद्धा ४ अन्ता ५ कलावती ६ तीव्रा च ७। गान्धारग्रामस्य मूर्च्छना रौद्री १ ब्राह्मी २ वैष्णवी ३ खेदरी ४ सुरा ५ नादावती ६ विशाला च ७। इति सङ्गीतग्रन्थम्॥
मूर्च्छा, स्त्री, (मूर्च्छ्+"गुरोश्च हलः।" ३।३।१०३। इति अः टाप्।) संमोहः। तत्पर्य्यायः। कश्मलम् २ मोहः ३। इत्यमरः। २।८।१०६। मूर्च्छनम् ४। इति शब्दरत्नावली॥ मूर्च्छायाः ५। अथ मूर्च्छाधिकारः। तत्र मूर्च्छाया निदानपूर्व्विकां संप्राप्तिमाह।
"क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः।
वेगाघातादभिघाताद्धीनसत्त्वस्य वा पुनः॥
करण्यायतनेष्वया वाक्लेष्वभ्यन्तरेषु च।
विशिष्यन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः॥"
बहुदोषस्य अधिकदोषस्य। न त्वनेकदोषस्य तदा मूर्च्छा त्रिदोषजैव स्यात् तथवास्तु को

दोषः तत्र। पृथग्दोषजानां मूर्च्छानां वक्ष्यमाणत्वात्। वेगाघातात् मद्यादौ अभिघातात् जगुडादिना हीनसत्त्वस्य सत्त्वसत्त्वगुणस्य अर्थादधिकतमोगुणस्य यत उक्तं मूर्च्छा पित्ततमःप्रावेति करणायतनेषु करणं मनश्चक्षुरायतनेषु स्थानेषु बाह्येषु कर्म्मेन्द्रियेषु। अभ्यन्तरेषु बुद्धीन्द्रियेषु। ● । सामान्यं लक्षणमाह।

"संज्ञावहासु नाड़ीषु पिहितासु निजादिभिः।
तमोऽभ्युपैति सहसा सुखदुःखयोरज्ञतः॥
सुखदुःखयोरज्ञाच्च नरः पतति काष्ठवत्।
मोहो मूर्च्छेति तां प्राहुः सप्तधा सा प्रकीर्तिता॥"

तमोगुणः अज्ञानहेतुः। अभ्युपैति आगच्छति। सुखदुःखयोरज्ञतः सुखदुःखज्ञानाजनकत्वम्। नष्टे सुखदुःखज्ञाने नरः काष्ठवत् पतति तां मोहो मूर्च्छेति प्राहुरित्यन्वयः। मूर्च्छाया मूर्च्छायोऽपि पर्य्यायः। यत उक्तम्।

"संज्ञोपघातो मूर्च्छायो मूर्च्छा स्यान्मूर्च्छनं तथा।
कश्मलं प्रलयो मोहः संज्ञावस्तु कृतोपमः॥"
इति॥

यद्यपि मूर्च्छा विदग्धेति।

"वातादिभिः श्लेष्मणेन मद्येन च विषेण च।
यद्यस्थितासु पित्तन्तु प्रसह्यैवावतिष्ठते॥"
यत उक्तम्। मूर्च्छा पित्ततमःप्रावेति। ● । पूर्वरूपमाह।

"कृतीर्घा जृम्भणं ग्लानिः संज्ञादौर्बल्यमेव च।
वर्त्मनां पूर्वरूपाणि यथास्वं वा विभावयेत्॥"
तत्र वातिकं मूर्च्छामाह।

"श्रौवं वा यदि वा ह्रस्वमाकाशमथवारुजम्।
पश्यंस्तमः प्रविशति श्रौवच्च प्रतिबुध्यते॥
वेपथुश्चाक्षमर्दश्च प्रलापो हृदयस्य च।
वातिके ज्ञानवाक्यहा मूर्च्छायां वातसम्भवे॥"

श्रौवं श्रौवत्वम्। ह्रस्वं कृष्णाभम्। अरुजं अवेदनम्। तमः प्रविशति मूर्च्छेति। ज्ञानवाक्यहा ज्ञानस्य ।●। पैत्तिकमाह।

"रक्तं हरितवर्णं वा पीतं पीतमथापि वा।
पश्यंस्तमः प्रविशति सवेदः प्रतिबुध्यते॥
तृष्णापाकः सवस्तापो रक्तपीताक्षिवेदनः।
सन्निभवर्णः पीताभो मूर्च्छायां पित्तसम्भवे॥"

श्लैष्मिकमाह।

"मेघसङ्काशमाकाशं तमोभिर्वा घनैर्वृतम्।
पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते॥
गुरुभिः प्रावृतैरङ्गैर्यथैवार्द्रेण चर्मणा।
सप्रसेकः सदृक्ष्वासो मूर्च्छायां कफसम्भवे॥"

मेघसङ्काशं मुखमेघसङ्काशमित्यर्थः। यत आह सुश्रुतः।

"कृष्णेन पश्येद्रूपाणि श्वेताभ्रप्रतिमानि तु।"
घनैर्निविडैश्लक्ष्णैः। गुरुभिरङ्गैरुपलक्षितः। सुश्रुतेन मूर्च्छायः षड्विध उक्तः। ● । चरकस्तु सान्निपातिकमपि मूर्च्छायमाह।

"सर्व्वाकृतिः सन्निपाताद्दुरपसार इवागतः।
स जन्तुं पातयत्याशु विना वीभत्सचेष्टितैः॥"

अपसार इव तैल महताभिघातेन यतति चिरेण प्रतिबुध्यते। तद्धि तयोः को भेद इत्यत आह। स सान्निपातिको मूर्च्छायः विना वीभत्सचेष्टितैः फेनवमनदन्तघट्टनाक्षिविप्लवादिभिः विना पातयति। ● । रक्तजाया मूर्च्छाया निदानमाह।

"पृथिव्यम्बुतमोरूपं रक्तगन्धसदन्वयः।
तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः॥"

तमोरूपं तमोबहुलम्। मानवाश्च ये तामसाः न तु सात्त्विका राजसाश्च। अन्येके वदन्ति नैषा युक्तिः समीचीना तद्धि चन्यकादिगन्धेनापि मूर्च्छा प्रसज्येत तथापि गन्धस्य पार्थिवत्वात्। अत आह।

"प्रत्यक्षभाव एवैके यद्दृष्ट्वापि विमुह्यति।"
अन्याह भोजः।

"दर्शनादहिगन्धज्ञान्यथैव प्रमुह्यति।"
रक्तेन मूर्च्छितस्य लक्षणमाह।

"लम्बाङ्गदरिक्तरुजा गूढोच्छ्वासस्तु मूर्च्छितः।"

मद्यजविषजयोर्निदानमाह।

"गुणाक्षीव्रतरत्वेन स्थितासु विषमद्ययोः।
त एव तस्मात्ताभ्यान्तु मोहौ ख्यातौ यथेरितौ॥"

ये गुणा बहुरूक्षासु विशदवयवितीक्ष्णाविकासिव्यवायित्वादिभिर्निर्द्देशैरुक्तादयः। तेजादौ द्रव्ये उक्ताः तीव्राश्च यत्ति त एव गुणाः विषमद्ययोस्तु तीव्रतरत्वेन स्थिताः। तथापि भेदः। त एव मद्ये ह्रस्वत्वे विषे तु बहुतरा इति। ● । मद्यजाया मूर्च्छाया लक्षणमाह।

"मद्येन प्रबलपत्वे नरविभ्रान्तमानसः।
गायन्नि विचिपन् भूमौ जरां यावन्न याति तत्॥"

नरविभ्रान्तमानसः नरं सर्व्वथा स्मृतिहीनं विभ्रान्तं रज्जौ सर्पेणानुक्तं मानसं यस्य सः। जरां जीर्णताम्। तत् मद्यम्। ● । विषजाया लक्षणमाह।

"वेपथुस्वप्नहृद्धाः क्लमश्च विषमूर्च्छिते।
वेदितव्यं तीव्रतरं यथास्वं विषलक्षणम्॥"

विषस्य लक्षणान्यत्रपत्रचोरादिभिरभिहितानि तथा स्वं स्वं लक्षणमुक्तं सौश्रुते लक्षणाने तत्स्वं मद्यापेक्षया तीव्रतरं वेदितव्यम्। नन्वेतानि लक्षणानि सन्निपातोल्बणानामपि मूर्च्छासु न निवारितानि। तत्रापि पित्तस्य प्राधान्यात्।

"सिद्धानि वर्णे मधुरे पर्वणि
सदाहिमा आज्ञजयो रवाच्च।
तथा वसा शोणितमज्जवच्च
मूर्च्छासु पञ्चा: सवतीव्रसङ्गाः॥"

सवतीव्रः स्रवाः।

"शौवमश्वोरुशोरं केसरं श्रोतसारिवा।
पीतं मूर्च्छा मदोद्वेगं छर्दा वा मधुसंयुता।
श्रीतेव तोदेव मुखं मलानं
छर्दाश्च यस्यां मधुगन्धविद्यात्॥

कुर्य्याच्च नासावदनावरोधं
क्षीरं पिबेद्वाप्यथ मानुषीणाम् ॥
द्राक्षासिताधात्रिफलाजवन्ति
कङ्कारनीलोत्पलपद्मवन्ति ।
पिबेत् कषायाणि च शीतलानि
पित्तज्वरं यानि च यापयन्ति ॥
शिरीषवीजगोधूमलाजामरिचसैन्धवैः ।
अञ्जनं स्यात् प्रबोधाय सरसोनशिलाजवैः ॥"
अन्यच्च ।
"अञ्जनं सज्यगारञ्च मधुसिन्धुशिलोषणैः ।
प्रमोहमोहि भवति भाषितं भिषजांवरैः ॥"
शिला मनःशिला । उषणं मरीचम् ।
"मधूकसारसिन्धूत्थवचोषणकणाः समाः ।
चूर्णं पिष्ट्वाम्लसा नस्यं कुर्य्यात् संज्ञाप्रबोधनम् ॥"
अथ रक्तजादीनां मूर्च्छानां चिकित्सा ।
"रक्तजायान्तु मूर्च्छायां हितः शीतक्रियाविधिः ।
मद्यजायां पिबेन्मद्यं निद्रां सेवेत वा सुखम् ।
विषजानां विषघ्नानि भेषजानि प्रयोजयेत् ॥"
अथ संन्यासस्य चिकित्सा ।
"प्रभूतदोषस्तमसोऽतिरेकात्
संमूर्च्छितो नैव विबुध्यते यः ।
संन्यस्तसंज्ञः स हि दुश्चिकित्स्यो
नरो भिषग्भिः परिकीर्त्तितोऽसौ ॥
अञ्जनाम्बवपीड़श्च धूमाः प्रधमनानि च ।
क्षौद्रभिक्षोदनं नस्यं दाहः पीड़ा नखान्तरे ।
सुखं केशलोमाच्च दन्तैर्देशनमेव च ।
आत्मगुप्तावधर्मश्च हितस्तस्य प्रबोधने ॥"
अम्बपीड़ः कल्कीकृतौषधरसस्य नासापुटे दानम् । तस्य संन्यस्तस्य । * । अथ मूर्च्छायां रसः ।
"कषायमधुसंयुक्तं घृतं मूर्च्छायां प्राशयेद् भिषक् ।
शीतसेकावगाहादि सर्व्वाङ्गे पीड़नं हठात् ॥"
घृतं मारितम् ।
"ताम्रचूर्णं समोशीरं केशरं शीतवारिणा ।
पीतं मूर्च्छां हृतं हन्यात् दृषमिन्द्राशनिर्यथा ॥"
ताम्रचूर्णं मारिततास्रचूर्णम् ।७। अथ भ्रमस्य चिकित्सा ।
पिबेदुराक्षमाकाथं सघृतं भ्रमशान्तये ।
यष्याकाथेन संसिद्धं घृतं धात्रीरसेन वा ॥
शुष्कौदुम्बराग्रताक्षीणां साभयानां फलं फलम् ।
गुड़स्य षट् पलान्येषा गुटिका भ्रमनाशिनी ॥
ताम्रं दुरालभाकाथैः पीतमुष्णं घृतसंयुतम् ।
निवारयेद्भ्रमं शीघ्रं तंयथा शम्भुभाषितम् ॥"
अथ तन्द्राया अतिनिद्रायाश्चिकित्सा ।
"तुरङ्गलालालवणोत्तमेन्दु-
मनःशिलामागधिकामधूनि ।
नियोजितान्यक्षि विनिघ्नयेन
तन्द्रां सनिद्रां विनिवारयन्ति ॥"
इन्द्रः कर्पूरम् ।
"सैन्धवं श्वेतमरिचं सर्षपः कुष्ठमेव च ।
वस्त्रसूत्रेण संपिष्टं नस्यं तन्द्रानिवारणम् ॥"
श्वेतमरिचं सियुवीजम् ।
"गुण्ठीकणागस्थिरसोषणानि
नस्येन तन्द्राधिजयोद्यतानि ।
क्षुद्राम्लतापौष्करजागराणि
भागैर्द्विवार्धा ग्रथितानि पानात् ॥"
शिवा हरीतकी । इति मूर्च्छाभ्रमतन्द्रातिनिद्रासंन्यासाधिकारः । इति भावप्रकाशः ।
(अथास्यां पथ्यविधिः ।
"सेकावगाहौ मद्यं सहाराः
शीताः प्रदेहा व्यजनानिलश्च ।
शीतानि पानानि च गन्धवन्ति
धारागृहं शीतमरीचिरोचिः ॥
धूमोऽञ्जनं लाघवमक्षमोक्षो
दाहश्च शुचौपरितोदनानि ।
रोग्यां क्रियानामपि कर्म्मणानि
नखान्तपीड़ा दशनोपदंशः ॥
नासासुखद्वारमरुन्निरोधो
विरेचनच्छर्दनलङ्घनानि ।
क्रोधो भयं दुःखकरी च प्रमा
कथा विचित्रा च मनोहरा च ॥
छायानभोऽम्भःप्रसधौतसर्पि-
र्म्मृदूनि तिक्तानि च लाजमद्यम् ।
जीर्णा यवा लोहितशालयश्च
कौद्रं हविर्मुद्गसतीनयूषाः ॥
धन्वोद्भवा मांसरसाश्च रागाः
सधाश्रवा गव्यपयः सिता च ।
पुराणकृष्णाक्षटलोलमोच-
हरीतकीदाड़िमनागरेक्षम् ॥
मधूकपुष्पाणि च तक्रजीर्य
उपोदिकाशानि जघूनि चापि ।
प्रनीरनीरं शितचन्दनानि
कर्पूरनीरं हिमवालुका च ॥
अत्युच्चगन्धोऽद्भुतदर्शनानि
शीतानि वाद्यान्यपि शीतकटानि ।
श्रमः क्षुतिश्चिन्तनमात्मबोधा-
धैर्य्यैश्च मूर्च्छावति पथ्यवर्गः ।"
अथापथ्यविधिः ।
"ताम्बूलं पत्रशाकानि दन्तधर्षणमातपम् ।
विरुद्धान्नपानानि व्यवायं खेदनं कटुम् ।
क्षुन्निग्रहोर्द्विगरोधं तक्रं मूर्च्छामयी त्यजेत् ॥"
इति वैद्यकपथ्यापथ्यविधौ मूर्च्छाधिकारे ।)
मूर्च्छालः, त्रि, (मूर्च्छा अस्त्यस्येति । "सिध्मादिभ्यश्च ।"५ । २ । ९७ । इति लच् ।) मूर्च्छितः । इत्यमरः । २ । ६ । ६१ ॥
मूर्च्छितः, त्रि, (मूर्च्छास्य संजाता । मूर्च्छा + तारकादित्वात् इतच् ।) मूर्च्छायुक्तः । तत्पर्य्यायः । मूर्त्तः २ मूर्च्छालः ३ । इत्यमरः ।२। ६ । ६१ । (यथा, भट्टौ । ६ । २३ ।
"तथाभ्यषिञ्चन्वारीभि पिष्टभ्यः श्लोकमूर्च्छितः ।")
उच्छ्रयः । मूढ़ः । इति मेदिनी । इङ्गः । इत्यजयः । (यात्रः यथा, रामायणे ।२।११४।१६-२०।
"किं नु खल्वद्य गम्भीरो मूर्च्छितो न निशाम्यते ।
यथापुरमयोध्यायां गीतवादित्रनिस्वनः ॥
वारुणीमदगन्धश्च माल्यगन्धश्च मूर्च्छितः ।
चन्दनागुरुगन्धश्च न प्रवाति समन्ततः ॥")
मूर्त्तः, त्रि, (मूर्च्छ + क्तः ।) वद्धः । इति मूर्त्तश्रब्दटीकायां रायमुकुटः ।
मूर्त्तः, त्रि, (मूर्च्छ + क्तः । "राल्लोपः ।"६।४।२१। इति क्लोपः । "न ध्याख्यापृमूर्च्छिमदाम् ।"८। २ । ५७ । इति निष्ठातकारस्य नत्वाभावः ।)
मूर्च्छितः । इत्यमरः । २ । ६ । ६१ । कठिनः ।
मूर्त्तिमान् । इति मेदिनी । ते, ४५ ॥
न्यायमते पृथिवी जलं तेजः वायुः मनश्च ।
एषां गुणाः । रूपं रसः गन्धः स्पर्शः परत्वं अपरत्वं गुरुत्वम् । स्नेहः वेगश्च । मूर्त्तामूर्त्तसाधारणगुणाः । यथा, भाषापरिच्छेदे ।
संख्या परिमितिः पृथक्त्वं संयोगः विभागश्च ।
(यथा, मार्कण्डेये । २३ । ४७ ।
"यच्चामूर्त्तं यच्च मूर्त्तं समस्तं
यद्वा भूतेष्वेकमेकञ्च किञ्चित् ।
यद्विद्यन्ति ज्ञातवे खेऽन्यतो वा
तत्सम्यन्न तत्खरैर्वक्षनैश्च ॥")
मूर्त्तिः, स्त्री, (मूर्च्छ + क्तिन् । "न ध्याख्येति ।" ८ । २ । ५७ । इत्यत्रान्न तकारस्य नत्वम् ।)
काठिन्यम् । शरीरम् । इत्यमरः । ३ । ३ । ६६ । (यथा, मनौ । १२ । १२० ।
"खं सन्निवेशयेत् खेषु चेष्टनञ्चर्ग्नेऽनिलम् ।
यत्किञ्चिदल्पं तेजः स्वेऽल्पो गाच्च मूर्त्तिषु ॥")
प्रतिमा । इति हेमचन्द्रः । स्वरूपः । यथा,—
"आचार्य्यो ब्रह्मणो मूर्त्तिः पिता मूर्त्तिः प्रजापतेः ।
भ्राता मरुत्पतेर्मूर्त्तिर्म्माता साक्षात् क्षितेस्तनूः ।
दयाया भगिनी मूर्त्तिर्द्धर्म्मस्यात्मातिथिः स्वयम् ।
अग्नेरभ्यागतो मूर्त्तिः सर्व्वभूतानि चात्मनः ॥"
इति श्रीभागवते । ६ । ७ । २६—३० ॥
(ब्रह्मसावर्णिपुत्रविशेषः । यथा, तत्रैव । ८। १३ । २१—२२ ।
"ततस्तता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ।
सुधामा विरुद्धाद्या अयो मूर्त्तिस्तदा द्विजाः ॥")
मूर्त्तिमत्, क्ली, (मूर्त्तिः काठिन्यमस्त्यस्मिन् । मूर्त्ति + मतुप् ।) शरीरम् । इति हेमचन्द्रः ।३।२२७॥
मूर्त्तिमान्, [त्] त्रि, (मूर्त्तिरस्त्यस्मिन् । मूर्त्ति + मतुप् ।) मूर्त्तिविशिष्टः । यथा,—
"मङ्गलानामग्रनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान् ।"
इत्यादि श्रीभागवतम् ॥ (यथा च रघौ ।१२।६४।
"हृदयं स्वयमायातं वैदेह्या इव मूर्त्तिमत् ।"
कुशपुत्रः । यथा, हरिवंशे । २७ । १२ ।
"कुशपुत्रा बभूवुर्हि चत्वारो देववर्चसः ।
कुशिकः कुशनाभश्च कुशाम्बो मूर्त्तिमांस्तथा ॥"
स्त्रियां ङीप् । यथा, महाभारते ।१।१०८।१४ ।
"दर्शयामास तं गङ्गा तदा मूर्त्तिमती स्वयम् ।")

मूर्द्धकः, पुं, (मूर्द्धन्यभिषिक्त इति। मूर्द्धन्+संज्ञायां कन्।) क्षत्रियः। इति शब्दरत्नावली॥
मूर्द्धकर्णी, स्त्री, छत्रम्। इति हारावली॥
मूर्द्धकोलं, क्ली, (मूर्द्ध्नः कोल इव।) छत्रम्। इति त्रिकाण्डशेषः॥
मूर्द्धजः, पुं, (मूर्द्धनि जायते। जन+डः।) केशः। इति जटाधरः॥ (यथा, हरिवंशे। ६८। ८२।
"बहुमूलविषमकपिला
स्थूलस्फुटिताग्रपरुषहस्वाश्च।
अतिकुटिलाश्चातिघनाश्च
मूर्द्धजा वित्तहीनानाम्॥")
मूर्द्धि जाते, त्रि॥
मूर्द्धन्यः, त्रि, (मूर्द्धन्+यत्।) मूर्द्धनि भवः। यथा। ऋवर्णं ट ठ ड ढ र वा मूर्द्धन्याः। इति सुग्धबोधव्याकरणम्॥ (यथा च भागवते। १। ७। ५५।
"अर्जुनः सहसाजाय हरेर्हार्दमथासिना।
मणिं जहार मूर्द्धन्यं द्विजस्य सहमूर्द्धजम्॥")
मूर्द्धपुष्पः, पुं, (मूर्द्धि पुष्पमस्य।) शिरीषवृक्षः। इति शब्दमाला॥ (गुणादयोऽस्य शिरीषशब्दे विधेयाः॥)
मूर्द्धरसः, पुं, (मूर्द्धस्थस्तदुपरिस्थो रसः।) भक्तफेनः। इति शब्दचन्द्रिका॥
मूर्द्धवेष्टनं, क्ली, (मूर्द्ध्नः वेष्टनम्।) उष्णीषः। इति हेमचन्द्रः। २। ११२॥
मूर्द्धा, [न्] पुं, (मूर्ध्नति व्रजति यज्ञेति। मूर्ध्+"अन् उपधन् पूषन्। उणा० १। १५८। इति कनिन्। उकारस्य दीर्घः, वकारस्य धकारश्च।) मस्तकः। इत्यमरः। २। ६। ८५। (यथा, हरिवंशे। ७७। २।
"लोहे पात्रे तक्रलाजान् कोद्रवार्द्धा
शुद्धे पक्वौदनचूर्णेन साकम्।
पिष्टान् खण्डं मूर्द्धि शुक्लाम्बरेण
दत्वा तिष्ठेद्देवयित्वार्कपत्रैः॥")
मूर्द्धाभिषिक्तः, पुं, क्षत्रियः। राजा। इत्यमरः। २। ३। ६१। मूर्द्धन्यभिषिक्तो मूर्द्धाभिषिक्तः राज्यारोपणसमये प्रथमः क्षत्रियो मूर्द्धाभिषिक्तः। तत्प्रभवत्वात् योगतयानभिषिक्तोऽपि मूर्द्धाभिषिक्तः। (यथा, भागवते। ६। १५। ४१।
"राज्ञो मूर्द्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरुः।
तीर्थसंसेवया चांहो ब्रह्मोज्झाश्रुतचेतसः॥")
वर्णसङ्करविशेषः। स तु विप्रात् क्षत्रियायां जातः॥ प्रधानः। इति भरतः॥ मन्त्री। इति मेदिनी। ते, २१२॥
मूर्द्धावसिक्तः, पुं, वर्णसङ्करभेदः। स तु क्षत्रियायां ब्राह्मणेनोत्पादितः। यथा,—
"क्षौम्यनन्तरजातासु द्विजैरुत्पादितान् सुतान्।
सदृशानेव तानाहुर्मात्रदोषविगर्हितान्॥"
इति मानवे १० अध्याये ६ श्लोकः॥ ॰॥
'क्षौम्यिति आहुक्षौम्येन अम्बष्ठकन्यजातीयासु भार्य्यासु द्विजातिभिर्ये उत्पादिताः पुत्राः। यथा। ब्राह्मणेन क्षत्रियायां क्षत्रियेण वैश्यायां वैश्येन शूद्रायाम्। तान् मातृदोषेण जातीयत्वदोषेण च गर्हितान् पितृसदृशान् न तु पितृसजातीयान् मन्वादय आहुः। पितृसदृशग्रहणात् मातृजातेरनुग्रहः पितृजातितो निकृष्टा श्रेयः। एतेषाञ्च नामानि मूर्द्धावसिक्तमाहिष्यकरणाख्यानि वाह्यवल्क्यादिभिरुक्तानि। वृत्तयश्चेषामनुलोमोक्ताः। दण्डाजिनशिक्याक्षसूत्रधारणञ्च मूर्द्धावसिक्तानाम्। वृत्त्यशीतगवाजीवनं शस्त्रास्त्रे च माहिष्याणाम्। द्विजातिशुश्रूषा धनधान्याधिक्यता राजसेवा दुर्गान्तःपुररक्षा च पारशवीयकरणानामिति। इति तट्टीकायां कुल्लूकभट्टः॥
मूर्द्धा, [न्] पुं, (मूर्ध्+कनिन्। वस्य धः दीर्घश्चोकारस्य।) शिरः। यथा,—
मूर्द्धा मूर्द्धा शिरोदेशे पुंसि स्यातामिमौ समौ।
रत्नमालादिकोषः॥
मूर्ध्नी नदे मूर्द्धा मूर्द्धा च। अस्य धरुधरौ।
इति तट्टीका॥ (यथा, देवीभागवते। २। ७। २८।
"दृष्ट्वा वेणीं ततां मूर्द्धि कज्जलं लोचने तथा।
अक्षिं गृहीत्वा तरसा हेम्नाहं नाथवा
सुखम्॥")
मूर्ध्वा, स्त्री, (मूर्ध्नति इति। मूर्ध्+क्वच् टाप्।) लताविशेषः। धनुर्गुणोपयुक्ता सुरगा इति ख्याता। तत्पर्य्यायः। देवी २ मधुरसा ३ मौरटा ४ तेजनी ५ सवा ६ मधूलिका ७ धनुःश्रेणी ८ गोकर्णी ९ गोलुपर्णी १०। इत्यमरः। २। ४। ८३॥ खुरा ११ मूर्व्वी १२। मधुश्रेणी १३ धुरुः १४ श्रेणी १५। इति तट्टीकायां भरतः॥ सुरङ्गिका १६। देवश्रेणी १७ पृथक्पत्रा १८ मधुस्रवा १९ अतिरसा २० गोलुपर्णिका २१ दिव्यलता २२ ज्वलिनी २३ गोपवल्ली २४। अस्या गुणाः। अतितिक्तत्वम्। कषायत्वम्। उष्णत्वम्। कृमिरोगकफवातवमिप्रमेहकुष्ठविषमज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"मूर्व्वा सरा गुरुः स्वादुस्तिक्ता पित्तास्रमेहजित्।
त्रिदोषहृद्व्रणाहृद्रोगकण्डूकुष्ठज्वरापहा॥"
इति भावप्रकाशः॥
(तथास्याः पर्य्यायः।
"तेजनी पिचुनी देवी तिक्तवल्ली पृथक्पत्रा।
धनुःश्रेणी मधुरसा मूर्व्वा निर्दहनीति च॥"
इति वैद्यकरत्नमालायाम्॥
"मूर्व्वा मधुरसा श्रेया तेजनी तिक्तयष्टिका।"
इति गारुडे २०८ अध्याये॥)
मूल क रोपणे। इति कविकल्पद्रुमः॥ (चुरा॰-उभ॰-सक॰-सेट्।) रोपणं रोपणमारोपणम्। क मूलयति वृक्षं लोकः। गोविन्दभट्टस्तु रोहणे इति पठित्वा रोहणं जन्मेति व्याख्याति। इति दुर्गादासः॥
मूल च प्रतिष्ठायाम्। इति कविकल्पद्रुमः॥ (भ्वा॰-उभ॰-अक॰-सेट्।) पक्षे णेरपि दीर्घौ। प्रतिष्ठा स्थितिरिति गोविन्दभट्टः। च मूलति मूलते वृक्षः। अयं परस्मैपदीत्यन्ये। इति दुर्गादासः॥
मूलं, क्ली, (भवते वर्द्धते इत्यादिकमिति। भू+"भूदृशिजनिभ्यः कः।" उणा॰ ४। १०८। इति कः।) शिफा। शिफड़ इति भाषा। तत्पर्य्यायः। ब्रध्नः २ अङ्घ्रिनामकः ३। इत्यमरः। २। ४। १२॥ कन्दः ४ वृक्षः ५। इति शब्दरत्नावली॥ जटा ६। इति जटाधरः॥ (यथा, मनौ। ३। २२०।
"भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च।
शुद्धानि चैव मांसानि पानानि सुरभीणि च॥")
आद्यम्॥ (यथा, महाभारते। १। १६१। ९।
"कुतोमूलमिदं दुःखं ज्ञातुमिच्छामि तत्त्वतः।
विदिताप्यपकर्षेयं ब्रूयश्चेदपकर्षितुम्॥")
नक्षत्रविशेषः॥ (यथा, मार्कण्डेये। ३३। १३।
"कुर्वन्त्याशुराधाद्या जभन्ते चक्रवर्त्तिताम्।
आधिपत्यञ्च श्रविष्ठाद्या मूले चारोग्यसुत्तमम्॥")
निकृष्टः। अन्तिकम्। इति विश्वः॥ (यथा, मार्कण्डेये। ८६। ६।
'जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः।)
मूलवित्तम्। इति भरतधृतमेदिनी॥ (यथा, मनौ। ८। २०२।
"अथ मूलमनाहार्य्यं प्रकाशक्रयशोधितः।
अदण्ड्यो मुच्यते राज्ञा नाहितो लभते धनम्॥")
निजम्। रत्नजयपालः॥ कारणम्। रत्नमालादिकोषः॥ (यथा, ऋग्वेदे। १०। ८७। १०।
"भेषा मूलं यातुधानस्य दृष्व।"
"मूलं पादम्।" इति तद्भाष्ये सायणः॥)
टीकाद्यन्यः। यथा। समानवलेत्यादि मूलम्। इति सम्प्रतिपक्षे गदाधरभट्टाचार्य्यः। मूरत्नम्। इति शब्दचन्द्रिका॥ प्रियङ्गुमूलम्। पुष्करमूलम्। इति राजनिर्घण्टः॥ विशेषमूलस्य अन्वेषणनिषेधो यथा,—
"नदीनाममिधोत्वार्द्धां भारतस्य कुलस्य च।
मूलान्वेषी न कर्त्तव्यो मूलाहीनो न जीयते॥"
इति गारुडे ११६ अध्यायः॥
(कारणम्। यथा, मनौ। ११। ८४॥
"धर्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते।
"मूलं कारणम्।" इति तट्टीकायां कुल्लूकभट्टः॥)
मूलः, त्रि, (मूलतीति। मूलप्रतिष्ठायाम्+कः।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतोनविंशनक्षत्रम्। यथा,—
"हस्ता स्वाती श्रवणा अश्वी मृगशिरो नपुंसि।
स्यात् पुंसि पुनर्वसुपुष्यौ मूलमघ्नी स्त्रियां
श्रेषाः॥"
इति तिथ्यादितत्त्वम्॥
"मूलमादौ शिफायाञ्च निकटे मे तु वाच्यिनाम्॥"
इति शब्दरत्नावली च॥

स तु निर्ऋतिदेवताकः। इति ज्योतिस्तत्त्वम्॥ सिंहपुच्छाकारः। इति सुकुमारचिन्तामणिः॥ ग्रहमूर्त्तिर्नवतारामयश्च। अस्मिन् मस्तकोपर्युदिते मौनसमस्याहौ पशूनि मृतानि भवन्ति। यथा,—

"भौमिभाजि नवतारकाङ्किते
मूलभे सुतनु! ग्रहमूर्त्तिनि।
लिम्पिकाष्टकमराजकुम्भके
निर्जगाम पृथुरोमजन्मतः॥"

इति कालिदासकृतराजविजयनिरूपणम्॥

अस्मिन् नक्षत्रे जातस्य फलम्।

"मूलं विनष्टावयवं सन्मूलं
कुलं दहत्येव वदन्ति सन्तः।
पैदन्यघातः पुरुषा विशेषात्
सौभाग्यमायुश्च कुलाद्रुहिः॥"

इति कोष्ठीप्रदीपः॥

अस्मिन् मांसभक्षणविधौ यथा,—

"चिभाजङ्घास्रावणासु तैलं
चौरं विप्राक्षाप्रतिपत्सु वर्ज्यम्।
मूले मृगे भाद्रपदासु मांसं
योविन्नषाक्षत्तिकसोत्तरासु॥"

इति तिथ्यादितत्त्वम्॥

मूलकं, क्ली, पुं, (मूल+संज्ञायां कन्।) कन्दविशेषः। मूला इति भाषा। तत्पर्य्यायः। राजशुकः २ महाकन्दः ३ हस्तिदन्तकः ४। इति धारावली। गौलकच्छम् ५ मूलाङ्कम् ६ दीर्घमूलकम् ७ अत्र दीर्घपत्रकमपि पाठः। ऋतुचारम् ८ कन्दमूलम् ९ हस्तिदन्तम् १० सितम् ११ ग्रहमूलम् १२ हरिपर्णम् १३ दृढिरम् १४ दीर्घकन्दकम् १५ कुञ्जरचारमूलम् १६। अस्य गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। वटूष्णेनादिदोषघ्नत्वम्। दुर्नामगुल्मकृच्छ्रोदरवातनाशित्वम्। रुचिदत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥ ७॥ अपि च।

"राजमूलकपत्री तु रोचनी वह्निदीपनी।
मूलकं गुरु विष्टम्भि तीक्ष्णमामं त्रिदोषकृत्॥
तदेव स्निग्धसिद्धन्तु पित्तलं कफवातजित्।
शुष्कं त्रिदोषशमनं श्लेष्मघ्नं गरनाशनम्॥
तत्पुष्पं कफपित्तघ्नं तत्पत्रं कफवातजित्।"

इति राजवल्लभः॥

अन्यच्च।

"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम्।
शालामकटकं विद्यात् शाकेयं मरुसम्भवम्॥
पाल्यङ्गमूलकं तीक्ष्णं तथा मूलकपोतिका।
नेपालमूलकञ्चान्यत्तद्भवेद्गन्धवत्तु॥
लघुमूलकसुखं स्याद्दृष्यं लघु च पाचनम्।
दोषत्रयहरं स्वर्यं स्वरश्वासविनाशनम्॥
नासिकाकण्ठरोगघ्नं नयनामयनाशनम्।
मरुत्तदेवरूक्षोष्णं गुरु दोषत्रयप्रदम्॥
स्नेहसिद्धं तदेव स्याद्दोषत्रयविनाशनम्॥"

इति भावप्रकाशः॥

(तथाचास्य गुणाः।

"वातं दोषहरं दृष्टं त्रिदोषं मारुतापहम्।
स्निग्धसिद्धं विशुष्कन्तु मूलकं कफवातजित्॥"

इति चरके सूत्रस्थाने। २७ अध्यायः॥)

सौरमाघे तद्भक्षणे दोषो यथा,—

"मकरे मूलकञ्चैव सिंहे चालावुकन्तथा।
कार्त्तिके सूरणञ्चैव सद्यो गोमांसभक्षणम्॥"

इति कर्म्मलोचनम्॥

पौषेमाघस्नानमाघसप्तम्यः।

"पितॄणां देवतानाञ्च मूलकं नैव दापयेत्।
ददन्नरकमाप्नोति भुङ्क्ते ब्राह्मणो यदि॥
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणं व्रतम्।
अन्यथा याति नरकं यत्नो विट् शूद्र एव च॥
तथा।
"वरं भक्ष्यमभक्ष्यञ्च पिबेद्वा गर्हितञ्च यत्।
वर्ज्जनीयं प्रयत्नेन मूलकं मदिरासमम्॥"

इति मलमासतत्त्वम्॥

मूलकः, पुं, (मूले जातः। मूल+"पूर्व्वाह्णापराह्णार्द्धमूलप्रदोषावस्करादण्वुन्।" ४। ३। २८। इति वुन्।) चतुस्त्रिंशत्तमसंवत्सरविषजातस्थलगतविषभेदः। इति हेमचन्द्रः। ४। २६८॥ (मूलप्रकार इति। मूल+"मूलादिभ्यः प्रकारवचने कन्।" ५। ३। ६। इति कन्। मूलस्वरूपः। यथा, भागवते। ६। ६। ४१।

"नारीकवच इत्युक्तो निःचक्रे मूलकोऽभवत्॥")

मूलकपर्णी, स्त्री, (मूलकस्य पर्णमिव समानखादं पर्णमस्याः। ङीष्।) श्रीभाङ्गनः। इति रत्नमाला॥

मूलकर्म्म, क्ली, (मूलञ्च ततु कर्म्म चेति।) ओषधादिमूलेन यत् आसनोच्चाटनस्तम्भनवशीकरणादिकर्म्म। जो इति ख्यातम्। इति भरतः॥ ढोला इति मुकुटः॥ तत्पर्य्यायः। काम्मेवम् २। इत्यमरः। २। २। ४॥ जलपक्षाग्नदुपपातकान्तर्गतोपपातकविशेषः। यथा,—

"सम्भावरेऽधीकारो महायज्ञप्रवर्त्तनम्।
स्त्रियौषधीनां स्त्राजीवोऽभिचारो मूलकर्म्म च॥"

इति मनुः। ११। ६४॥

"मन्त्रौषधादिना वशीकरणम्।" इति मूलकर्म्मशब्दव्याख्यायां कुल्लूकभट्टः॥

मूलकलता, स्त्री, (मूलकमिव मूलमस्याः।) चीरकण्डुकीवृक्षः। इति रत्नमाला॥

मूलकारः, पुं, (मूलं करोतीति। कृ+कर्म्मण्यण्। इत्यण्।) मूलयन्त्रकर्त्ता। यथा। मायं मूलकारः किन्तु मूलकारः। इति संक्षिप्तसारटीकायां गोयीचन्द्रः॥

मूलकारिका, स्त्री, (मूलकारक+स्त्रियां टाप्। अकारश्लेषम्।) पुत्री। इति धारावली॥ मूलयन्त्रार्थप्रकाशकपद्यम्। मूलघनस्य वृद्धिविशेषश्च॥

मूलकृच्छ्रं, क्ली, (मूलेन तत्रसपानेन कृच्छ्रम्।) एकादशविधपर्णकृच्छ्रव्रतान्तर्गतव्रतविशेषः।

यदा कथितानि दृष्टमूलानि मासं पौषन्ते तदा मूलकृच्छ्रफलं लभते। यथाह मार्कण्डेयः।

"फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः।
श्रीलकृच्छ्रः श्रीफले प्रोक्तः पद्मोत्पलपरस्तथा॥
मासेनामलकैरेवं श्रीलकृच्छ्रमपरं स्मृतम्।
पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्पुष्पकृच्छ्र उच्यते॥
मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु॥"

इति मिताक्षरायां प्रायश्चित्ताध्यायः॥

(पुंस्त्वेऽप्ययं मार्कण्डेयपुराणोक्तत्वात्।)

मूलजं, क्ली, (मूलात् जायते इति। जन+डः।) आर्द्रकम्। इति राजनिर्घण्टः॥ (विशेषोऽस्यार्द्रकशब्दे ज्ञातव्यः॥)

मूलजः, पुं, (मूलाद् जायते। जन+डः।) उत्पलादिः। इति हेमचन्द्रः। ४। २६६॥ मूलोद्भवे त्रि॥

मूलत्रिकोणं, क्ली, (मूलञ्च ततृत्रिकोणञ्चेति।) अर्कादिग्रहाणां राशिरूपग्रहविशेषः। स तु रवेः सिंहः। चन्द्रस्य वृषः। कुजस्य मेषः। बुधस्य कन्या। गुरोर्धनुः। भृगोस्तुला। शनेः कुम्भः। यथा,—

"सिंहो वृषश्च मेषश्च कन्या धन्वी घटो घटः।
अर्कादीनां त्रिकोणानि मूलानि राशयः क्रमात्॥"

अथ मूलत्रिकोणांशव्यवस्था।

"रविभौमजीवभार्गवशनैश्चराणां त्रिकोणभागाः स्युः।
नखरविदिक्तिथिनखरा ज्ञेन्दोर्दिगंशका स्वजात्॥"

इति ज्योतिस्तत्त्वम्॥

मूलदेवः, पुं, (मूलञ्चासौ देवो राजा चेति।) कंसराजः। इति त्रिकाण्डशेषः॥

मूलद्रव्यं, क्ली, (मूलञ्च तद्द्रव्यञ्चेति।) मूलधनम्। इति हेमचन्द्रः। २। ५३३॥

मूलधनं, क्ली, (मूलञ्च तद्धनञ्चेति।) आदिद्रव्यम्। पुँजी इति भाषा। तत्पर्य्यायः। परिणामम् २ जीवी ३। इत्यमरः। २। ६। ८०।

मूलपर्णी, स्त्री, (मूले पर्णमस्याः। ङीष्।) मकूलपर्णी। इति रत्नमाला॥

मूलपुष्करं, क्ली, (मूले पुष्करमस्य। पुष्करमिव मूलमस्येति वा।) पुष्करमूलम्। इति राजनिर्घण्टः॥

मूलप्रोती, स्त्री, (मूलप्रधाना प्रोती।) पूतिकाशाकभेदः। तत्पर्य्यायः। क्षुद्रवल्ली २ प्रोतिका ३ क्षुद्रपोतिका ४ क्षुपोपोदकशाखी ५ वल्लिशाकटपोतिका ६। अस्या गुणाः। त्रिदोषशमनम्। दृष्यत्वम्। बल्यत्वम्। लघुत्वम्। वह्निपुष्टिकारित्वम्। रुच्यत्वम्। जठरानलदीपनत्वञ्च। इति राजनिर्घण्टः॥

मूलप्रकृतिः, स्त्री, (मूला चासौ प्रकृतिश्चेति।) आद्या शक्तिः। यथा,—

"सर्व्वप्रकृता प्रकृतिः श्रीलक्ष्मीः प्रकृतेः परः।
न शक्तः परमेशोऽपि तां शक्तिं प्रकृतिं विना।

सृष्टिं विधातुं मायेशो न सृष्टिर्मायया विना।
सा च लक्ष्मे तिरोभूता सृष्टिसंहारकारके।
आविर्भूता सृष्टिकाले सा च जिह्वा वशेश्वरः॥
कुलालश्च घटं कर्तुं यथाशक्तो न दण्डं विना।
स्वर्णं विना स्वर्णकारः कुण्डलं कर्तुमक्षमः॥
सा शक्तिः सृष्टिकाले च प्रधा पैश्वरेच्छया।
राधा पद्मा च सावित्री दुर्गा देवी सरस्वती॥
प्राणाधिष्ठातृदेवी या तस्यश्च परमात्मनः।
प्राणाधिकप्रियतमा सा राधा परिकीर्तिता॥
ऐश्वर्याधिष्ठातृदेवी सर्वमङ्गलकारिणी।
परमानन्दरूपा च सा लक्ष्मीः परिकीर्तिता॥
विद्याधिष्ठातृदेवी या परमेशस्य दुर्लभा।
वेदशास्त्रयोगमाता सा सावित्री प्रकीर्तिता॥
बुद्ध्याधिष्ठातृदेवी या सर्वशक्तिस्वरूपिणी।
सर्वज्ञानात्मिका सर्वा सा दुर्गा दुर्गनाशिनी॥
वाग्याधिष्ठातृदेवी या ज्ञानज्ञानप्रदा सदा।
शक्यकण्ठोद्भवा या च सा च देवी सरस्वती॥
पञ्चधादौ स्वयं देवी मूलप्रकृतिरीश्वरी।
ततः सृष्टिक्रमेणैव बहुधा कलया च सा॥
योषितः प्रकृतेरंशाः पुमांसः पुरुषस्य च।
मायया सृष्टिकाले च तद्विना न भवेद्भवः॥
सृष्टिश्च प्रतिविश्वे च ब्रह्मन्! ब्रह्मोद्भवा सदा।
याता विष्णुश्च संहर्त्ता शिवः शश्वच्छिवप्रदः॥"
इति ब्रह्मवैवर्तपुराणे गणपतिखण्डे ४० अः॥

मूलफलदः, पुं, (मूले च फलं ददातीति। दा+कः।) पनसवृक्षः। इति राजनिर्घण्टः। (पनसशब्दोऽस्य विषयो ज्ञातव्यः।)

मूलभद्रः, पुं, (मूलञ्चासौ भद्रश्चेति।) कंसराजः। इति त्रिकाण्डशेषः॥

मूलरसः, पुं, (मूले रसोऽस्याः।) मोरटलता। इति रत्नमाला॥

मूलप्राकटः, त्रि, (मूलानां भवनं क्षेत्रम्। मूल+"भवने क्षेत्रे इञादिभ्यः प्राकटप्राकिनौ।" ५। २। २६। इञश्च वार्त्तिकबलात् प्राकटः।) मूलक्षेत्रम्। क्षेत्रवाच्ये प्राकटप्रत्ययेन निष्पन्नम्॥

मूलप्राकिनः, त्रि, (मूल+प्राकिनः।) क्षेत्रवाच्ये प्राकिनप्रत्ययेन निष्पन्नम्॥

मूला, स्त्री, (मूलानि बहुत्वानि सन्त्यस्याः। मूल+अर्शआदिभ्यश्च टाप्।) लताविशेषः। इति राजनिर्घण्टः॥ मूलनक्षत्रम्। इति शब्दरत्नावली॥ (यथा, कालनाथविरचिते ज्ञानार्णवे १ अध्यायः।
"द्वितीया षष्ठीमध्यां कारयेत् भ्रान्तिकर्म्म च।
अश्विनोऽग्नमूलाश्च पुष्या पुनर्वसुस्तथा॥")

मूलाधारः, पुं, (मूलानामाधारः। मूलं प्रधानं आधार इति वा।) गुह्यलिङ्गयोर्मध्ये अङ्गुलिद्वयमितस्थानम्। स तु शरीरस्थषट्कमलानाड्यां मूलस्थानम्। अत्र च ग्रं य शादचतुर्युक्तस्वर्णवर्णचतुर्दलपद्ममस्ति। तन्मध्ये इच्छाज्ञानक्रियास्वरूपत्रिकोणं वर्त्तते। तन्मध्ये कोटिसूर्य्यसमप्रभस्वयम्भुलिङ्गमस्ति। अत्र पृथिवी वर्त्तते। तत्रैव रक्तालक्तवत् सूक्ष्मसार्द्धत्रिवलयाकारस्वयम्भुलिङ्गवेष्टितविद्युत्तुल्यप्रभकुलकुण्डलिनी वर्त्तते। यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम्॥
तद्वाह्ये हेमवर्णाभं वं श वर्णचतुर्दलम्॥"
इति तन्त्रसारः॥
"अथाधारपद्मं सुवर्णाक्षवर्णं
जनाधो गुदोर्द्ध चतुःशोणपद्मम्।
अधोवक्त्रसुदृत्सुवर्णाभवर्णै-
र्वकारादिसान्तैर्युतं वेदवर्णैः॥
असस्मिन् धरायास्तु कोणत्रयञ्च
वसुद्वारि मूलाह्वकैराहृतं तत्।
लसत्पीतवर्णं तडित्कोमलाङ्गं
तदन्तः समास्ते धरायाः स्वबीजम्॥
चतुष्कं वक्त्रदेशे विलसति सततं कर्णिकामध्यसंस्थं
कोणं तन्नेपुराख्यं तडिदिव विलसत् कोमलं कामरूपम्।
कन्दर्पो नाम वायुर्विवसति सततं तस्य मध्ये समन्तात्
जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्य्यप्रकाशः॥
तन्मध्ये लिङ्गरूपी हुतवहकलिलाकोमलः पश्चिमास्यो
ज्ञानध्यानप्रकाशः प्रथमकिशलयाकाररूपः स्वयम्भूः।
भित्वापूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासो
काश्मीराभो विलासी विलसति सरिदावर्त्तरूपः प्रकारः॥
अस्योर्द्धे विद्युतम्बोदरलसत् क्षुधा जगन्मोहिनी
ब्रह्मद्वारमुखं सुखेन मधुरं बाच्छादयन्ती स्वयम्।
ब्रह्मावर्त्तनिभा नवीनचपलाभासा विलासादरा
सुप्ता सर्पसमा शिरोपरिलसत्तृतीयार्द्धवेष्टिता-
ऽतिः॥"
इति श्रीतन्त्रचिन्तामणौ षट्चक्रभेदः॥७॥
तन्त्रान्तरीयाणि यथा, ब्रह्मयामले।
"इडा भगवती गङ्गा पिङ्गला यमुना नदी।
सुषुम्णा नारदी शक्तिस्त्रिवेणी परिकीर्त्तिता॥
तत्र स्नानं प्रकुर्व्वीत सर्व्वपापैः प्रमुच्यते।
इडा भगवती गङ्गा वामनासापुटे स्थिता॥
पिङ्गला यमुना देवी दक्षनासापुटे स्थिता।
मध्यमा नारदी शक्तिः सुषुम्णा ब्रह्मरूपिणी॥
मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम्॥
तद्वाह्ये हेमवर्णाभं वं श वर्णचतुर्दलम्॥
इति तन्त्रसारः॥
"अथाधारपद्मं सुवर्णाक्षवर्णं
जनाधो गुदोर्द्ध चतुःशोणपद्मम्।
अधोवक्त्रसुदृत्सुवर्णाभवर्णै-
र्वकारादिसान्तैर्युतं वेदवर्णैः॥
असस्मिन् धरायास्तु कोणत्रयञ्च
वसुद्वारि मूलाह्वकैराहृतं तत्।
लसत्पीतवर्णं तडित्कोमलाङ्गं
तदन्तः समास्ते धरायाः स्वबीजम्॥
चतुष्कं वक्त्रदेशे विलसति सततं कर्णिकामध्यसंस्थं
कोणं तन्नेपुराख्यं तडिदिव विलसत् कोमलं कामरूपम्।
कन्दर्पो नाम वायुर्विवसति सततं तस्य मध्ये समन्तात्
जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्य्यप्रकाशः॥
तन्मध्ये लिङ्गरूपी हुतवहकलिलाकोमलः पश्चिमास्यो
ज्ञानध्यानप्रकाशः प्रथमकिशलयाकाररूपः स्वयम्भूः।
भित्वापूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासो
काश्मीराभो विलासी विलसति सरिदावर्त्तरूपः प्रकारः॥
अस्योर्द्धे विद्युतम्बोदरलसत् क्षुधा जगन्मोहिनी
ब्रह्मद्वारमुखं सुखेन मधुरं बाच्छादयन्ती स्वयम्।
ब्रह्मावर्त्तनिभा नवीनचपलाभासा विलासादरा
सुप्ता सर्पसमा शिरोपरिलसत्तृतीयार्द्धवेष्टिता-
ऽतिः॥"
इति श्रीतन्त्रचिन्तामणौ षट्चक्रभेदः॥७॥
तन्त्रान्तरीयाणि यथा, ब्रह्मयामले।
"इडा भगवती गङ्गा पिङ्गला यमुना नदी।
सुषुम्णा नारदी शक्तिस्त्रिवेणी परिकीर्त्तिता॥
तत्र स्नानं प्रकुर्व्वीत सर्व्वपापैः प्रमुच्यते।
इडा भगवती गङ्गा वामनासापुटे स्थिता॥
पिङ्गला यमुना देवी दक्षनासापुटे स्थिता।
मध्यमा नारदी शक्तिः सुषुम्णा ब्रह्मरूपिणी॥
मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम्॥
तद्वाह्ये हेमवर्णाभं वं श वर्णचतुर्दलम्॥
इति तन्त्रसारः॥
"अथाधारपद्मं सुवर्णाक्षवर्णं
जनाधो गुदोर्द्ध चतुःशोणपद्मम्।
अधोवक्त्रसुदृत्सुवर्णाभवर्णै-
र्वकारादिसान्तैर्युतं वेदवर्णैः॥
असस्मिन् धरायास्तु कोणत्रयञ्च
वसुद्वारि मूलाह्वकैराहृतं तत्।
लसत्पीतवर्णं तडित्कोमलाङ्गं
तदन्तः समास्ते धरायाः स्वबीजम्॥
चतुष्कं वक्त्रदेशे विलसति सततं कर्णिकामध्यसंस्थं
कोणं तन्नेपुराख्यं तडिदिव विलसत् कोमलं कामरूपम्।
कन्दर्पो नाम वायुर्विवसति सततं तस्य मध्ये समन्तात्
जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्य्यप्रकाशः॥
तन्मध्ये लिङ्गरूपी हुतवहकलिलाकोमलः पश्चिमास्यो
ज्ञानध्यानप्रकाशः प्रथमकिशलयाकाररूपः स्वयम्भूः।
भित्वापूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासो
काश्मीराभो विलासी विलसति सरिदावर्त्तरूपः प्रकारः॥
अस्योर्द्धे विद्युतम्बोदरलसत् क्षुधा जगन्मोहिनी
ब्रह्मद्वारमुखं सुखेन मधुरं बाच्छादयन्ती स्वयम्।
ब्रह्मावर्त्तनिभा नवीनचपलाभासा विलासादरा
सुप्ता सर्पसमा शिरोपरिलसत्तृतीयार्द्धवेष्टिता-
ऽतिः॥"
इति श्रीतन्त्रचिन्तामणौ षट्चक्रभेदः॥७॥
तन्त्रान्तरीयाणि यथा, ब्रह्मयामले।
"इडा भगवती गङ्गा पिङ्गला यमुना नदी।
सुषुम्णा नारदी शक्तिस्त्रिवेणी परिकीर्त्तिता॥
तत्र स्नानं प्रकुर्व्वीत सर्व्वपापैः प्रमुच्यते।
इडा भगवती गङ्गा वामनासापुटे स्थिता॥
पिङ्गला यमुना देवी दक्षनासापुटे स्थिता।
मध्यमा नारदी शक्तिः सुषुम्णा ब्रह्मरूपिणी॥

करोति पापक्षयमेव मुक्तिं
ददाति साक्षादमलार्थपुण्यदा।"
मूलाङ्क, स्त्री, (मूलमाङ्का आख्या यस्य।) मूलकम्। इति राजनिर्घण्टः॥

मूली, [न्] पुं, (मूलमस्यास्तीति। मूल+इनिः।) वृक्षः। इति शब्दचन्द्रिका। (स्त्रियां ङीप्। ओषधिः। यथा, सुश्रुते चिकित्सितस्थाने ३० अध्याये।
"चक्रकामोषधिं विद्याच्चाङ्गेलुनिवारिणीम्।
मूलिनीप्रभृतिभिः पत्रैः सरक्षाशुकशोभनैः॥")

मूली, स्त्री, (मूल+गौरादित्वात् ङीष्।) व्यञ्जनौषधिः। इति त्रिकाण्डशेषः॥ (वृक्षभेदः। यथा, मात्स्ये। ११३। ३१।
"तालपर्णी तथा मूली शरवा विमला तथा॥")

मूलेरः, पुं, (मूलतीति। मूल+"मूलेरादयः।" उणा० १। ६२। इत्यत्र रक्। जटा। इत्युज्ज्वलदत्तः।)

मूल्यं, क्ली, (मूलेन आनाय्यते अभिभूयते मूलेन समं वा इति। मूल+"नौवयोधर्म्मेत्यादिना।" ४। ४। ६१। इति यत्।) पटादीनामुत्पत्तिकारणम्। मूलं मूलेन क्रयविक्रयार्थमिदं छे कादितियः। इति भरतः॥ दर इति दाम इति च भाषा। तत्पर्य्यायः। वक्षः २ अवक्रयः ३। इत्यमरः। २। १०। ३६॥ (यथा मनौ। ८। ३२२।
"यत्राप्रतक्ष्यमधिकं हस्तच्छेदनमिष्यते।
शेषे लेकादशगुणं मूल्यादण्डं प्रकल्पयेत्॥")

मूल्यते अर्प्यते इदम्। माहिना इति भाड़ा इति च भाषा। तत्पर्य्यायः। कर्म्मण्या २ विधा ३ भृता ४ भृतिः ५ भर्म्म ६ वेतनम् ७ भरण्यम् ८ भरणम् ९ निर्ज्जीर्णः १० पण्यः ११। इति च अमरः। २। १०। ३९॥ (यथा, मिताक्षरायाम्।
"मूल्येन यः कर्म्म करोति स भृतकः।")

मूल्यं, त्रि, (मूलं रोपणमर्हतीति। मूल+यत्।) प्रतिष्ठायोग्यः। रोपणयोग्यः। इति मूलधात्वर्थदर्शनात्। (मूलत उत्पाट्यते इति। "मूलमस्याधर्हि।" ४। ४। ८८। इति यत्। मूलतउत्पाटनयोग्ये सुश्रुतादौ॥)

मूष शुक्लभे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वडशरी। यो मूषति परद्रव्यम्। इति हलायुधः॥ हलीलोके। मोषति। इति दुर्गादासः॥

मूषः, पुं-स्त्री, (मोषति अपहरतीति। मूष+इगुपधलक्षणात् कः।) मूषिकः॥ (यथा, पञ्चतन्त्रे। २। २२२। "एष प्रतिभाति ते मूषकराजः।") तैजसावर्त्तनी। इति शब्दरत्नावली॥

मूषकः, पुं-स्त्री, (मूष+स्वार्थे कन्।) उन्दुरः। इति शब्दरत्नावली॥ (यथा, रामायणे। २। ३३। १६।
"रजसाध्वकीर्णानि परिप्लवानि देवते:।
मूषकैः परिधावद्भिरदृष्टैराहृतानि च॥")

मूषककर्णी, स्त्री, (मूषिकस्य कर्णवत् पत्राण्यस्याः। ङीष्।) आखुकर्णी। इति राजनिघण्टः॥

मूषकमारी, स्त्री, (मूषकं उन्दुरं मारयतीति। मृ+णिच्+"कर्म्मण्यण्।" ३।२।१। इति अण्। ङीष्।) सुतश्रेणीवृक्षः। इति राजनिर्घण्टः॥

मूषका, स्त्री, (मूषक+स्त्रियां टाप्। चिमकादित्वात् न अत इत्वम्।) मूषिका। इति शब्दरत्नावली॥

मूषकारातिः, पुं, (मूषकानां अरातिः शातकः।) विड़ालः। इति राजनिर्घण्टः॥ मूषिकारातिः। इति च पाठः॥

मूषा, स्त्री, (मूषति गृह्णातीति। मूष+कः+स्त्रियां टाप्।) स्वर्णाद्यावर्त्तनपात्रम्। मूची इति भाषा॥ (यथा, पद्मदशाम्। ४। २।
"मूषायिलं यथा ताम्रं तन्निभं जायते तथा।
रूपादीन्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम्॥")
तत्पर्य्यायः। तैजसावर्त्तनी २। इत्यमरः। २। १०। ३३॥ मुषा ३ मुषी ४ आवर्त्तनी ५ मूषी ६। इति भरतः॥
"दृढ़ाङ्के तुषैः पूर्णां मध्ये मूषां विधारयेत्।
चिन्नाग्निं सुदयेद्धाङ्कं तद्धाङ्कं पुटमुच्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
मूषिका ७। इति रमानाथः॥ दैवताड़कः। इति शब्दचन्द्रिका॥ मूषिकस्त्रीजातिः। इति शब्दरत्नावली॥ गवाक्षः। यथा,—
"एकविंशादिमूषावहनमितिमहो ब्रूहि मे
भूमिभर्त्तुः
हेर्म्नो रत्नेऽश्मये चतुरविरचिते क्षत्रशालाविशाखे।"
इत्यादि लीलावत्यां श्रेढ़ीव्यवहारः॥

मूषाकर्णी, स्त्री, (मूषायाः कर्णो इव पत्राण्यस्याः।) आखुकर्णी। इति शब्दरत्नावली॥

मूषातूत्थं, क्ली, (मूषाजातं तूत्थम्।) नीलतूत्थम्। तत्पर्य्यायः। कांस्यनीलम् २ हैमतूत्थम् ३ पितुत्रकम् ४। इति हैमचन्द्रः। ४। २१८॥

मूषिकः, पुं. (मूषाति प्रकाशयति। मूष्+"सुषिमूषिभ्यः कित्।" उणा० २। ४२। इति किकन् दीर्घश्च।) जन्तुविशेषः। इन्दुर इति भाषा। (यथा, हितोपदेशे मित्रलाभप्रकरणे। १३१।
"धनेन बलवान् लोभी धनाढ्यवति पण्डितः।
पश्यार्थं मूषिकः पापः स्वजातिसमतां गतः॥")
तत्पर्य्यायः। उन्दुरः २ आखुः ३। इत्यमरः। २। ५। १२॥ मूषः ४ मूषीकः ५ उन्दूरः ६ वभ्रुः ७ दृषः ८ आखनिकः ९ दृष्टः १०। इति शब्दरत्नावली॥ मूषकः ११ पिङ्गः १२ उन्दुरकः १३ नखी १४ खनकः १५ विलकारी १६ ग्राम्यारिः १७ वङ्कुप्रजः १८। अस्य मांसगुणाः।
"अक्षिनकुलगृध्रगोधाभूषकसृक्का विशेषतः कथिताः।
श्वासानिलकाग्रहरं तन्मांसं पित्तदाहकरम्॥
अन्ये विशेषतया ये स्युः केङ्किड़ोन्दुरकादयः।
गर्हितं तस्य मांसञ्च मद्यगौरवदुर्ज्जरम्॥"
इति राजनिर्घण्टः॥
अपि च।
"मूषिको मधुरः स्निग्धो वातघ्नो बलवर्द्धनः।"
इति राजवल्लभः॥
पारिभाषिकमूषिको यथा,—
"बिभर्त्ति यति नैवात्ति न ददाति जुहोति च।
तमाहुरार्षं तस्मान्न भुङ्क्ते क्षुधितोऽपि शुध्यति॥"
इति मार्कण्डेयपुराणीये आचाराध्यायः॥
(जनपदविशेषः। यथा, महाभारते। ६।८।५८।
"द्रविड़ाः केरलाः प्राच्या मूषिका वनवासिकाः॥")

मूषिकपर्णी, स्त्री, (मूषिककर्णवत् पर्णान्यस्याः।) जलजन्तुविशेषः। इँदुरकाँकोवाला इति भाषा। (यथा, चरके विमानस्थाने अष्टमेऽध्याये।
"मूषिकपर्णी वल्लीमूलप्रतानामपल्लवं॥")
तत्पर्य्यायः। चित्रा २ उपचित्रा ३ अम्बोधी ४ ह्रस्वनी ५ समरी ६ दृषा ७ प्रत्यक्श्रेणी ८ सुतश्रेणी ९ रक्षा १०। इत्यमरः। २।४।८८॥ पुत्रश्रेणी ११ आखुपर्णिका १२ दृषपर्णी १३ आखुपर्णी १४ मूषिका १५ पक्षिपत्रिका १६। इति रत्नमाला॥ मूषिपर्णिका १७ सचित्रा १८ मूषीकपर्णी १९ सुकर्णिका २०। इति शब्दरत्नावली॥

मूषिका, स्त्री, (मूषिक+अजादित्वात् टाबित्युज्ज्वलदत्तः।) मूषिकपर्णी। इति रत्नमाला॥ उन्दुरः। इति शब्दरत्नावली॥ मूषा। इत्यमरटीकायां रमानाथः॥ (यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये।
"क्षीरं महापञ्चमूलं मूषिकां चाश्वगन्धिं-
ताम्।")

मूषिकाङ्कः, पुं, (मूषिकः उन्दुरवाहनत्वेन अङ्कः चिह्नमस्य।) गणेशः। इति जटाधरः॥

मूषिकाशनः, पुं, (मूषिकं अशति खवाहनतया प्राप्नोतीति। अशृ+ल्युः।) गणेशः। इति त्रिकाण्डशेषः॥

मूषिकारातिः, पुं,(मूषिकानामरातिः।) विड़ालः। इति राजनिर्घण्टः॥

मूषिकाह्वयः, पुं,(मूषिकस्य आड़ा आड़ा आख्या यस्य।) मूषिकपर्णी। इति जटाधरः॥ (तथास्य पर्य्यायः।
"दन्तुदुरपर्णी खानिकुम्भोऽथ सुमूषकः।
ह्रस्वनीनामसचित्रा अम्बोधा मूषिकाह्वया॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये॥)

मूषिपर्णिका, स्त्री, (मूषिकपर्णी+कन् टाप् अतइत्वम्।) मूषिकपर्णी। इति शब्दरत्नावली॥

मूषी, स्त्री, (मूष+कः। स्त्रियां ङीष्। मूषा। स्वर्णाद्यावर्त्तनपात्रम्। इत्यमरटीकायां भरतः॥ महाम्बिकः। यथा,—
"अन्यो महाम्बिकः स्याम्मूषी विश्वेश्वराह्वयः।
महाङ्गः शुक्लमारी च भूपली भित्तिपातनः॥"
इति राजनिर्घण्टः॥

मूषीकः, पुं, स्त्री, (मोषति इति। मूष+वाहुलकात् ईकन्।) मूषिकः। इति शब्दरत्नावली॥

मूषीककर्णी, स्त्री, (मूषीकस्य कर्णवत् पर्णमस्याः।) मूषिकपर्णी। इति शब्दरत्नावली॥

मूषीका, स्त्री, (मूषीक+टाप्।) उन्दुरः। यथा,
"दीर्घा मूषीका मूषा च मूषीका मूषिकेऽपि।"
इति शब्दरत्नावली॥

मूष्यावकः, त्रि, (मोषति अपहरतीति। मूष+कः चौरजारः। तस्यापत्यम् इति। मूष+फक्। वाहुलकात् हस्वाभावः।) अज्ञातपितृकः। गूढ़ोत्पन्नः। इति केचित्॥

मृ, ड मृ स्तौ। इति कविकल्पद्रुमः॥ (तुदा०-आत्म०-अक०-अनिट्।) म्रृतिः प्राबल्याशः। ड मृ म्रियते प्राणी। डित्त्वेऽप्यस्य ट ड दीर्घे ममिति नियमेन अन्यत्र परस्मैपदम्। ममार मर्त्ता मरिष्यति अमरिष्यत्। इति दुर्गादासः॥

मृकण्डकः, पुं, (मृगस्य कण्डुरिति समासे पृषोदरादित्वात् गलोपः मृकण्डुः मृकण्ड इति केचित्तत्र पठन्ति इत्युज्ज्वलदत्तः। ततः संज्ञायां कन्।) मृकण्डुसुनिः। इति शब्दरत्नावली॥

मृकण्डुः, पुं, (मृगस्य कण्डुरिति समासे पृषोदरादित्वात् गलोपः। इत्युज्ज्वलदत्तः।) मुनिविशेषः। (यथा, मार्कण्डेये। ५२। १६।
"प्राणेभ्यश्च मृकण्डुश्च पिता मम महायशाः।")
तस्य पुत्रो मार्कण्डेयः। यथा,—
"मार्कण्डेयोऽपि मार्कण्डो मृकण्डुश्च मृकण्डकः।"
इति शब्दरत्नावली॥

मृग तृ क ड मार्गणे। (चुरा०-आत्म०-सक०-सेट्।) ड रामो मृगं मृगयते वनवीथिकासु। इति महाभाटकम्। कातन्त्रादौ मृग्य अन्वेषणे इति दिवादिपरस्मैपदी धातुश्च ड इच्छते दुर्गाश्रितोऽनयोरस्यसत्त्वात् अनेनोपेक्षितः। मृग्यन्तः पदपी तथाप्यकरणा बाधा न सूचन्ति माम्। इति तु अकारान्तस्यैव भावे क्विपि अकारलोपे मृगं करोतीति कर्म्मादित्वात् कर्त्तरि घञि साधुम्। इति दुर्गादासः॥

मृगः, पुं, (मृग्यते अन्वेष्यते हन्यादिकं मृग्यते वा इति। मृग्+रगुपधलक्षणात् कर्त्तरि कः।) पशुमात्रम्। (यथा, मनुः। ५। ६।
"आरण्यानाञ्च सर्व्वेषां मृगाणां माहिषं विना।")
मृगशब्दोऽयं महिषपर्य्युदासात् पशुमात्रपरः। इति तट्टीकायां कुल्लूकः।) हरिणविशेषः। नक्षत्रभेदः। (यथा, रघुजातकर्म्मणि।
"अश्विनीभगमृगाख्ये पुष्या पुनर्व्वसुस्वाती।")
अन्वेषणम्। (यथा, साहित्यदर्पणे। ४। १०।
"जनस्थाने क्वापि कनकमृगजन्मान्तिकधिया
वयो वैदेहीति प्रतिपदमुदश्रु प्रलपितम्।

लताजङ्घाभर्त्सवेदनपरिपाटीघटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ।"
कनकस्य सुवर्णस्य मृगे अन्वेषणे । पचे ।
कनकमृगे हेमहरिणे या इच्छा इत्यर्थः ।)
याच्ञा । इति मेदिनी । गे, १८ । मार्गशीर्ष-
मासः । यज्ञविशेषः । इत्यजयपालः । मृग-
नाभिः । इत्यमरटीकायां भरतः । मकर-
राशिः । यथा,—
"मृगकर्कटसंक्रान्तौ दृङ्मूदृग्दक्षिणायने ।
विषुवती तुलामेषे गोलमध्ये तथापरा ।"
इति तिथ्यादितत्त्वम् ।
खनामख्यातपशुविशेषः । मृग्यते अन्विष्यतेऽसौ
याधैः । (यथा, अभिज्ञानशाकुन्तले । १।१० ।
"न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ।")
तत्पर्य्यायः । कुरङ्गः २ वातायुः ३ हरिणः ४
अजिनयोनिः ५ । इत्यमरः । शारङ्गः ६
चारुलोचनः ७ जिनयोनिः ८ कुरङ्गमः ९
ऋष्यः १० ऋक्षः ११ रिष्यः १२ रिष्मः १३
एणः १४ एणकः १५ । इति शब्दरत्नावली ।
स नवविधः । यथा,—
"सम्बरो रोहितो न्यङ्कुः कुरङ्गस्तदृशो वरः ।
एणश्च हरिणश्चेति मृगा नवविधा मताः ॥
पाठान्तरं यथा,—
"सम्बरः रोहितो न्यङ्कुः सम्बरो बभ्रुको वरः ।
शृङ्गेणहरिणश्चेति मृगा नवविधा मताः ॥
हरिणश्चापि विज्ञेयः पञ्चभेदोऽत्र भैरव ! ।
ऋष्यः खड्गो वरश्चैव पृषतश्च मृगस्तथा ।
एते बलिप्रदाने च चर्म्मदाने च कीर्त्तिताः ॥"
इति कालिकापुराणे ६७ अध्यायः ॥ * ॥
अपि च । अथ आङ्गजानां गणना ।
"हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुसम्बराः ।
राजीवोऽपि च सप्तैते चैत्याद्या आङ्गजसंज्ञकाः ॥
हरिणस्तास्रवर्णः स्यादेणः श्यामः प्रकीर्त्तितः ।
कुरङ्गः श्वेतताम्रः स्याद्धरिणाकृतिको महान् ॥
ऋष्यो नीलाङ्गको लोके सरोहरिति कीर्त्तितः ।
पृषतश्चन्द्रबिन्दुः स्याद्धरिणात् कियदल्पकः ॥
न्यङ्कुर्नकुलिवर्णोऽथ भ्रमरो गवयो महान् ।
राजीवस्तु मृगो श्रेष्ठो राजीभिः परितो
वृतः ।
यो मृगः शृङ्गहीनः स्यात् स सृक्कीति निग-
द्यते ॥"
अथ तेषां गुणाः ।
अङ्गजाताः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः ।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥"
इति भावप्रकाशः ॥
अथ मृगपरीक्षा ।
"मृगनाभिं समादातुं कौतुकार्थं तथा पुनः ।
मृगाः पोष्या महीभर्त्रा तेषां वक्ष्यामि,
लक्षणम् ॥
पृथिव्यप्तेजोवायुगगनाख्येऽधिकास्तु पञ्चधा ।
भिद्यन्ते नैकभेदास्तु समस्ता मृगजातयः ॥"
तद्यथा,—
'ये गन्धिनः क्षौद्रशरीरकर्णा-
स्ते पार्थिवा गन्धमृगाः प्रदिष्टाः ।
सर्व्वाङ्गमेधां सुरभिं प्रकामं
पुण्ये प्रदेशे प्रभवन्ति ते तु ॥
ये वै विशाला गुरुदीर्घशृङ्गा
श्यामासलास्तीव्रखुरप्रदेशाः ।
आप्यास्तु ते वै प्रसरन्ति भूरि
सर्व्वत्र देशे प्रभवन्ति चैव ॥
धावन्ति ये वातमिवाम्बरीक्षे
दीर्घास्तु ते वातमृगाः प्रदिष्टाः ।
ते यत्र यत्रैव भवन्ति शृङ्गा-
स्तत्रैव सर्व्वाणि शुभानि सन्ति ॥
लघुप्रमाणा लघुवीर्य्यसत्त्वा
निर्गन्धदेहास्त्वगतिप्रमाणाः ।
ते गागना वेगकरा नराणां
सृष्टा न ते नापि निरीक्षणीयाः ॥
ये लक्ष्यवर्णा गुरुदीर्घशृङ्गाः
क्रुद्धा भयं यान्ति च वायुवेगाः ।
ते तेजसारास्तु तेजसास्तु
पुण्यप्रदेशे प्रभवन्ति ते तु ॥'
भोजोऽप्याह ।
'पार्थिवादिमृगः सर्व्वश्चतुर्जातिर्भवेत् पृथक् ।
सुश्लक्ष्णास्तनुलोमानो ब्राह्मणा मृगजातयः ॥
क्षुद्राः पञ्चरिशृङ्गाश्च क्षत्रिया खरलोमशाः ।
आवर्त्तशृङ्गास्तनवो हरिणा वैश्यजातयः ॥
कुशृङ्गा वाप्यशृङ्गा वा शूद्राः खरतनूरुहाः ।
अश्वानां ये गुणा दोषास्ते ज्ञेया हरिणेष्वपि ॥
तथापि दोषाः पञ्चामी वक्ष्यन्ते हरिणाश्रयाः ।
नेत्रयोरन्तरे यस्य लोमावर्त्ताः स पापकृत् ॥
विषमो विज्ञतौ शृङ्गौ यस्य स त्रैमनाशनः ।
आवर्त्तः पृष्ठतो यस्य आनाभिमभिविन्दति ॥
पश्चार्द्धे यस्य चावर्त्तौ त्वाण्यौ भयकारकौ ।
वर्णनेत्रपदादीनां वैशतादनवाप्तनः ॥'
गार्ग्यः ।
'दोषवन्मृगजातीनां विज्ञातीनामथापि वा ।
दर्शनात् स्पर्शनाच्चैव गन्धादानाच्च पोषणात् ।
भवेयुर्विपदः सर्व्वास्तथा चैवात्मपोषणात् ॥'
शृङ्गोऽपि ।
'हरिणपोषणतो धरणीभुजां
नहि भवेन्मरणव्यपदेशनम् ।
न पविवद्धिरजारिपुजं भयं
तदव तं हरिणं गुणिगं नृप ! ॥'
इति मृगपरीक्षा । इति युक्तिकल्पतरुः ॥
(अस्य गुणविशेषो यथा,—
"दूरे जनान्तनिलया दूरे पानीयगोचराः ।
ये मृगाश्च विहङ्गाश्च तेऽभ्यभिष्यन्दिनो
मताः ॥
अतीवासन्ननिलया समीपोदकगोचराः ।
ये मृगाश्च विहङ्गाश्च महाभिष्यन्दिनस्तु ते ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः ॥)
मृगादिविकारोपशमो यथा,—
गर्ग उवाच ।
"प्रविशन्ति यदा ग्रामारण्या मृगपक्षिणः ।
अरण्यं यान्ति वा ग्राम्याः स्थलं यान्ति
जलौकसः ॥
स्थलजाश्च जलं यान्ति घोरं रासन्ति
निर्भयाः ।
यदा कपोतः प्रविशेत् कथादौ मूर्द्धि नीयते ॥
मधु वा मक्षिकाः कुर्युर्मूलं गृहपतेर्वदेत् ।
मृगपक्षिविकारेषु कुर्य्याद्धोमं सदक्षिणम् ।
देवाः कपोते इति च जप्यथाः पञ्चभिर्द्विजैः ॥
गावश्च देया विधिवत् द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते शान्तिमुपैति पापं
मृगैर्द्विजैर्वा विनिवेदितं यत् ॥"
इति मात्स्ये २११ अध्यायः ॥
चतुर्विधपुरुषमध्ये पुरुषविशेषः । तस्य लक्षणं
यथा,—
वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
रपलमतिसुदेहः शीघ्रवेगो मृगोऽयम् ।
"मृगके पद्मिनी तुरा मृगे तुरा च चित्रिणी ।
हयभे शङ्खिनी तुरा हये तुरा च हस्तिनी ।
पद्मिनीमृगयोर्योनिमेलकौ चतुरङ्गुलौ ।
चित्रिणीमृगयोर्योनिमेलकौ च तथाविधौ ॥"
इति रतिमञ्जरी ।
(अन्वेषा । यथा, ऋग्वेदे । १ । १५४ । २ ।
"मृगो न भीमः कुचरो गिरिष्ठाः ।"
"मृगः अन्वेषा ।" इति तद्भाष्ये सायणः ॥)
मृगक्षीरं, क्ली, मृगीदुग्धम् । तरादौ चेति चकार-
स्यानुक्तसमुच्चयार्थत्वात् मृग्याः क्षीरं मृगक्षीरं
मृग्याः पदं मृगपदं इत्यादिष्वपि पुंवद्भावः ।
इति सुग्धबोधटीकायां दुर्गादासः ॥
मृगगामिनी, स्त्री, (मृग इव गच्छतीति । गम+
णिनिः । ङीप् ।) विहङ्गा । इति राजनिर्घण्टः ॥
मृगसदृशगमनशीला च ॥
मृगधर्म्मजं, क्ली, (मृगधर्म्मात् मृगनाभिधर्म्मात्,
मृगगन्धवत् जायते इत्यर्थः । जन्+डः ।)
जवादिनामकगन्धद्रव्यम् । इति राजनिर्घण्टः ॥
मृगधर्म्मजाति, त्रि ॥
मृगचेटकः, पुं, (मृगान् पशून् चेटयति प्रेरयति
स्वशब्देन राजिभिर्यं ज्ञापयतीति । चिट्+
णिच्+ण्वुल् ।) खट्टाशः । इति शब्दमाला ॥
मृगजालिका, स्त्री, (मृगाणां जालिका ।) मृग-
बन्धनार्थजालम् । तत्पर्य्यायः । वागुरा २ ।
इति हेमचन्द्रः । ३ । ५६२ ॥
मृगजीवनः, पुं, (मृगैः पशुभिः जीवतीति । जीव
+ल्युः ।) व्याधः । इति शब्दरत्नावली ॥
(यथा, महाभारते । ३ । ६३ । २८ ।
"निर्विचेष्टं सुजङ्घं तं विश्वस्तं मृगजीवनः ।")
मृगजा, स्त्री, (मृग+शुच् ।) अमङ्गलद्रव्यस्यान्ने-
वणम् । यथा,—
"संवीक्ष्यं विक्षयं मार्गं मृगजा मृगः ।"
इत्यमरः । ३ । २ । ३० ॥

मृगटट, [ट्] स्त्री, (मृगाणां टट् पिपासा अत्र जलभाषकत्वात्।) मृगतृष्णा। इति शब्द-रत्नावली॥

मृगटषा, स्त्री, (मृगाणां टषा अस्यस्यामिति। अर्श आदित्वात् अच्। टाप्।) मृगतृष्णा। इति शब्दरत्नावली॥ (यथा, कामन्दकिनीतिसारे। १। १२।

"जगन्मृगतृषातुल्यं बोध्येदं चलभङ्गुरम्।
स्वजनैः सङ्गतः कुर्य्यात् धर्म्माय च सुखाय च॥")

मृगतृष्णा, स्त्री, जलाभासत्वात् मृगाणां तृष्णा विद्यतेऽस्याम्। यौ॰ मरुदेशे सिकतादावर्कैकराः प्रतिफलिताः दूरस्थानां जलत्वेनाभान्ति तद्वाचिका। इति टीकाकारः॥ उत्कटरविरश्मिजन्यचित्तविभ्रमजातं मरीचिका। दूरभूम्ये यन्मयूखैर्जलमिव दृश्यते इत्यपरे। इति भरतः॥ तत्पर्य्यायः। मरीचिका २। इत्यमरः। १। ८। १५॥ मृगतृष्णिका १। इति भरतः॥ मृगटट् ४ मृगटषा ५। इति शब्दरत्नावली॥

मृगतृष्णिका, स्त्री, (मृगतृष्णा+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च।) मृगतृष्णा। इत्यमरटीकायां भरतः॥ (यथा, अभिज्ञानशाकुन्तले। ६।

"सोतोवहां पथि निकामजलामतोय
जातः सखे! प्रभवयान् मृगतृष्णिकायाम्॥")

मृगदंशकः, पुं, (मृगान् पशून् दशति। दंश्+ण्वुल्।) कुक्कुरः। इत्यमरः॥

मृगधूर्त्तः, पुं, (मृगेषु पशुषु धूर्त्तः। षष्ठीतत्।) शृगालः। इति संक्षिप्तसारे समासपादः॥

मृगधूर्त्तकः, पुं, (मृगधूर्त्त+स्वार्थे कन्।) शृगालः। इत्यमरः। २। १०। २९॥

मृगनाभिः, पुं, (मृगस्य नाभिः। तदभ्यन्तरे जातत्वात् तथात्वम्।) कस्तूरी। तत्पर्य्यायः।

"मृगनाभिर्मृगमदः कथितस्तु सहस्रभित्।
कस्तूरिका च कस्तूरी बोधसुखा च सा स्मृता॥"

सा त्रिविधा यथा,—

'कामरूपोद्भवा श्रेष्ठा नेपाली मध्यमा भवेत्।
काश्मीरदेशसंभूता कस्तूरी ह्यधमा स्मृता॥'

अस्या गुणाः।

'कस्तूरिका कटुस्तिक्ता चारोष्णा शुक्रला गुरुः।
कफवातविषच्छर्दिग्रीतदौर्गन्ध्यदोषहृत्॥'

इति भावप्रकाशः॥

अन्यत् कस्तूरीशब्दे द्रष्टव्यम्। (तथास्य पर्य्यायान्तरम्।

'मृगनाभिर्मृगमदो मदः कस्तूरिकाञ्जनः।'

इति वैद्यकरत्नमालायाम्॥)

मृगनाभिजा, (स्त्री, मृगनाभेर्जायते। जन्+डः। स्त्रियां ङीष्।) कस्तूरी। यथा,—

"घनसारः सिताभश्च चन्द्रोऽथ मृगनाभिजा।
मृगनाभिर्भृगमदः कस्तूरी गन्धधूल्यपि॥"

इति हेमचन्द्रः। २। ३०७-८॥

मृगनेत्रा, स्त्री, (मृगनेत्र+"नेत्रन्तच्च उपसंख्यानम्।" ५।४।११६। इत्यत्र काशिकोक्तेः अप्।) मृगो मृगशिरा नेता प्रापयिता यस्या रात्रेः सा रात्रिः। इति सुग्धबोधटीकायां दुर्गादासः॥ सा अग्रहायस्य विंशतिदण्डाधिकत्रयोविंशदिनावधिसंक्रान्तिपर्य्यन्तं प्रायः सम्भवति। तत्र नवान्नश्राद्धनिषेधो यथा। ब्रह्मपुराणे।

"हस्तिके शुक्लपक्षे तु नवान्नं भुक्ष्यते बुधैः।
अपरे क्रियमाणं हि धनुर्व्येव कृतं भवेत्॥
धनुषि यत् कृतं श्राद्धं मृगनेत्रासु रात्रिषु।
पितरस्तस्य भुञ्जन्ति नवान्नामिषकाङ्क्षिणः॥"

अपरे कृष्णपक्षे। मृगो नेता प्रापयिता यासां रात्रीणामिति व्युत्पत्त्या नक्षत्रान्नेतुरित्यनेनाद्विधानात्तत्पदं सिद्धम्। ततश्च मृगशिरःपूर्व्वार्द्धेन हस्तिकशुक्लपक्षभागे रात्र्यारम्भाच्चतारिंशद्दण्डाधिकषड्रात्रयो मृगनेत्राः। इति भरतः॥ (मृगस्य नेत्रे इव नेत्रे यस्य। मृग तुल्यनेत्रे, त्रि॥)

मृगपतिः, पुं, (मृगाणां पशूनां पतिः।) सिंहः। इति हेमचन्द्रः॥ (यथा, भागवते। ५।२५।१०।

"यक्षौजा मृगपतिरादेऽनवद्या-
मादातुं खजनमनांसुदारवीर्य्यः।"

'मृगपतिः सिंहः।' इति तट्टीकायां श्रीधरस्वामी॥ कामप्रदश्रेष्ठः। यथा तत्रैव टीकायाम्।

"मृगयन्त इति मृगाः कामप्रदास्तेषां पतिर्मुख्यः॥")

मृगपिप्पुः, पुं, (अपिप्पवते भासते इति। अपि+प्लु+बाहुलकात् संज्ञायां डुः। अपेरलोपश्च। मृगः हरिणः पिप्पुरत्र।) चन्द्रः। इति त्रिकाण्डशेषः॥

मृगप्रियं, क्ली, (मृगाणां प्रियम्।) पर्व्वतहृत्यम्। इति राजनिर्घण्टः॥

मृगबधाजीवः, पुं, (मृगबधेन आजीवतीति। आ+जीव्+अच्।) व्याधः। इत्यमरः। २। १०। २१॥

मृगबन्धनी, स्त्री, (मृगः बध्यते अनयेति। बन्ध+ल्युट्+स्त्रियां ङीष्।) मृगबन्धनार्थजालम्। तत्पर्य्यायः। वागुरा २। इत्यमरः। २। १०। २६॥

मृगभक्षा, स्त्री, (मृगैर्भक्ष्यतेऽसौ। भक्ष+कर्म्मणि अप् टाप्।) जटामांसी। इति राजनिर्घण्टः॥

मृगमदः, पुं, (मृगाः मादयन्ति अनेनेति। मद्+अप्।) कस्तूरी। इत्यमरः। २। ६। १२६। (यथा, छन्दोमञ्जर्य्याम्। २। १५। ४।

"मृगमदतरुचर्चापीतकौषेयवासा
रुचिरशिखिशिखण्डस्रङ्मनोज्ञप्रभाभ्राट्।")

मृगमदवासा, स्त्री, (मृगमदस्येव वासः सौरभोऽस्याः।) कस्तूरीमल्लिका। इति राजनिर्घण्टः॥

मृगया, स्त्री, (मृग्यन्ते पशवोऽस्यां इति। मृग+यिच्। "इच्छा।" ३।३।१०१। इत्यत्र परिचर्य्या परिसर्य्यामृगयाटाट्यानासूपसंख्यानम्। इति वार्त्तिकोक्त्या से यकि शिलोपः। इति सिद्धान्तकौमुदी।) राज्ञां वनेषु मृगहननक्रिया। मृग्यन्ते अन्विष्यन्तेऽस्याम्। शिकार इति भाषा। तत्पर्य्यायः। आच्छोदनम् २ मृगयम् ३ आखेटः ४। इत्यमरः॥ तन्नियमविधिर्यथा,—

"चचार मृगयां तत्र दम्भ आत्तेषुकार्म्मुकः।
विहाय जायामतदर्हां मृगयासनलालसः॥५॥
आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः।
घ्नन्तं निघ्नैर्मृगान् वेषु वनगोचरान्॥६॥
तीर्थेषु श्रुतिदृष्टेषु राजा मेध्यान् पशून् वने।
यावदर्थमलं लुब्धो हन्यादिति नियम्यते॥"७॥

इति श्रीभागवते ४ स्कन्धे २६ अध्यायः॥

आत्मा गृहीता इषवो रागद्वेषादिरूपाः कार्म्मुकञ्च भोगाद्यभिनिवेशरूपं येन। जायां विवेकवतीं बुद्धिं विहाय। अतदर्हां त्यागानर्हाम्। त्यागे हेतुः मृग्यन्ते इति मृगाः विषयाः तेषु व्यसनं भोगासक्तिस्तेन लालसा अतिस्पृहा यस्य॥५॥ वाक्ये रागादिभिः। वनेषु भजनीयदेशेषु। वनगोचरान् भजनीयविषयान्। घ्नन्तं भजनीयदेशादात्मसात् कृतवान्। कथाप्रपञ्चे तु स्पष्टमेव॥ ६। तन्त्वासुरीं वृत्तिमाश्रित्य इति किमिति मृगया निन्द्यते। कथाप्रपञ्चे तावद्राज्ञो विहितैव सा। अध्यात्मप्रपञ्चेऽपि जीवस्य विषयभोगो विहित एव इत्याशङ्क्याह तीर्थेष्विति त्रिभिः। अयं भावः। न हि मृगया विधीयते रागप्राप्तत्वात् किन्तु नियम्यते प्रवृत्तिः सङ्कोच्यते। नियममेव षड्विधं दर्शयति। यदि अलमत्यर्थं लुब्धो रागी सन् हन्यात् तर्हि तीर्थेषु आद्यादिष्वेव तत्रापि श्रुतिदृष्टेषु प्रख्यातेष्वेव न नित्यआद्यादिषु। तत्रापि राज्ञैव। मेध्यानेव। वन एव। यावदुपयोगमेव इति। एवं जीवस्य विषयसेवापि यावदुपयोगं न यथेष्टमिति नियम एव इत्यर्थः॥ ७॥ इति तट्टीकायां श्रीधरस्वामी॥ सा राज्ञां पापाय न स्यात्। यथा,—

"अवलम्बकुलाग्निनो भसा-
न्निजनीडद्रुमपीडिनः खगान्।
अनवद्यदृशार्हिणो मृगान्
मृगयाघाय न भूभृतां मतम्॥"

इति नैषधे २ सर्गे १० श्लोकः॥

सा च कामजव्यसनविशेषः। यथा,—

"मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥"

इति मनुसंहितायाम्॥

मृगयुः, पुं, (मृगं यातीति। मृग+"मृगय्वादयश्च।" उणा॰ १।३८। इति कुः। निपात्यते च।) व्याधः। शृगालः। व्याघ्रः। इति मेदिनी। ये, १०९॥ (यथा, भट्टिकाव्ये। ४। ४४।

"मृगयुमिव मृगोऽथ दक्षिणेभो
दिग्मिव दाहवतीं मरावुदन्यन्।")

मृगरसा, स्त्री, (मृगस्य मृगमांसस्येव रसोऽस्याः। वहदेवी। इति राजनिर्घण्टः॥

मृगराजः, पुं, (मृगाणां पशूनां राजा अधिपतिः। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) सिंहः। इति शब्दरत्नावली॥ (यथा, रघुवंशे। ६। ३।

"शिलाविभङ्गैर्मृगराजशाव-
स्तुङ्गं नगोत्सङ्गमिवारुरोह॥"

व्याघ्रः। यथा, महाभारते। १। १४१। ३४।

"मृगु मे त्वं महाबाहो! यद्वाक्यं मूषिकोऽब्रवीत्।
धिग्बलं मृगराजस्य मयाद्यायं मृगो हतः।")

मृगराट्, [ज्] पुं, (राजते दीप्यतेऽसौ राज्+क्विप्। ततः मृगाणां राट्।) सिंहः। इति शब्दरत्नावली॥ (यथा, शिशुपालवधे। ४।१८।

"पतिते पतङ्गमृगराजि निज-
प्रतिबिम्बरोषित इवाम्बुनिधौ।")

मृगराटिका, स्त्री, (मृग+रट्+ण्वुल्+स्त्रियां टाप् अत इत्वञ्च।) जीवन्ती। इति राजनिर्घण्टः॥

मृगरिपुः, पुं, (मृगाणां रिपुः।) सिंहः। इति हलायुधः॥

मृगरोमजं, त्रि, (मृगाणां रोमभ्यो जायते इति। जन्+डः। पशुलोमजातवस्त्रादि। तत्पर्य्यायः। राङ्कवम् २। इत्यमरः। २। ६। १११॥

मृगलाञ्छनः, पुं, (मृगः लाञ्छनं चिह्नमस्य।) चन्द्रः। इति शब्दरत्नावली॥

मृगवल्लभः, पुं, (मृगाणां वल्लभः प्रियः।) कुन्दरलञ्च। इति राजनिर्घण्टः॥

मृगवाहनः, पुं, (मृगो वाहनमस्येति।) वायुः। इति जटाधरः॥

मृगयं, क्ली, (मृगान् विध्यति अत्र इति। यध्+"अन्येष्वपि दृश्यते।" ३। २। ७८। इति काशिकोक्त्या अधिकरणे डः।) मृगया। इत्यमरः। २। १०। २३॥ (यथा, भाकेण्डेये। १२७। १।

"कदाचिद्राजपुत्रोऽसौ मृगयामचरद्वने।")

मृगशिरः, [स्] क्ली, (मृगस्येव शिरोऽस्य।) सप्तर्षिमृगचक्रान्तर्गतपञ्चमनक्षत्रम्। तत्पर्य्यायः। मृगशीर्षम् २ आग्रहायणी १। इत्यमरः। १। ३। २३॥ (यथा, बृहत्संहितायाम्। १०। ५।

"मृगशिरसि वृत्तसयाजक-
यजमानार्च्चनमध्यदेशाश्च।")

तत्तु विड्राजपदाक्रान्तं तारात्रयात्मकं चन्द्राधिदेवतम्। इति ज्योतिषम्॥ गगनमध्ये तस्योदये कन्यालग्नस्य द्वात्रिंशृत्पलानि गतानि भवन्ति। यथा,—

"भूमिकाग्रनवदाक्रतौ विधौ
योममध्यमिलिते त्रितारके।
शारदेन्दुसखि! कन्यकोदया-
दीक्षणानलकलाः कलावति!॥"

इति कालिदासकृततिथ्यलग्ननिरूपणम्॥

तत्र जातफलम्। यथा,—

"शूरासनाभ्यासरतो विनीतः
सदागुरक्तो गुणिनां गुणेषु।
भक्तानुपक्षेऽहभरेण पूर्णः
सन्मार्गवर्त्ती मृगजन्मभागी॥"

इति कोष्ठीप्रदीपः॥

मृगशिरा, स्त्री, (सर्व्वे सान्ता अकारान्ताश्चेति मृगशिरोऽदन्तः। मृगशिर+टाप्।) मृगशिरोनक्षत्रम्। इति शब्दरत्नावली॥

मृगशिराः, [स्] पुं, (मृगस्येव शिरो यस्य।) मृगशिरोनक्षत्रम्। इत्यमरटीकायां रायमुकुटः॥

मृगशीर्षं, क्ली, (मृगस्य शीर्षमिव शीर्षमस्य।) मृगशिरोनक्षत्रम्। इत्यमरः॥ (यथा, भागवते। ५। २३। ६।

"तथैव मृगशीर्षादीन्युदगयनानि।")

मृगशीर्षः, पुं, (मृगस्येव शिर्षोऽस्य।) मृगशिरोनक्षत्रम्। इति केचित्। इत्यमरटीकायां भरतः॥

मृगशीर्षा, स्त्री, (मृगशीर्ष+टाप्।) मृगशिरोनक्षत्रम्। इति चिकाण्डे घोषालितः। इत्यमरटीकायां भरतः॥ (यथा, बृहत्संहितायाम्। २१। ६।

"मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्ल-
जाताश्च।")

मृगशीर्षा, [न्] पुं, (शीर्षेव मृगस्य शीर्षन् इत्यादेशः। ततो मृगस्येव शीर्षास्य।) मृगशिरोनक्षत्रम्। इति केचित्॥ इत्यमरटीकायां भरतः॥

मृगा, स्त्री, (मृगः मृगमांसतुल्यः रवोऽस्त्यस्याः अर्श आदिभ्योऽच्।) सहदेवौषधता। इति राजनिर्घण्टः॥

मृगाक्षी, स्त्री, (मृगस्येव अक्षि तद्वत्पूर्य्यं अक्षिणी वा अस्याः। अक्षि+"अक्ष्णोऽदर्शनात्।" ५। ४। ७६। इति अच्। स्त्रियां ङीष्।) विप्रियङ्गुः। (यथास्याः पर्य्यायः।

"ऐन्द्री इन्द्रवारुणी चित्रा गवाक्षी च गवादनी।
वारुणी चामराप्युक्ता सा विप्रियङ्गुः महाफला।
श्वेतपुष्पा मृगाक्षी च मृगेक्षारुर्मृगादनी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) मृगलोचनतुल्यनेत्रा स्त्री। इति मेदिनी। षे, ४४॥ (यथा, छन्दोमञ्जर्य्याम्। २। ११। ८।

"वज्रवेद्या सुरारिपुर्भूमि-
र्गोपन्मृगाक्षीशतरतिपूर्त्तिः।
वाञ्छितसिद्धो प्रथितपरश्च
स्यादगुकूला जगति न कस्य॥")

मृगाङ्कः, पुं, (मृगः अङ्को यस्य।) चन्द्रः। (यथा, नैषधचरिते। १। ७८।

"विनिद्रपद्मालिगतालिकेतवात्
मृगाङ्कचूडामणिवर्ण्णनार्ज्जितम्।")

कर्पूरः। इत्यमरः। १। ३। १४॥ वायुः। इति विश्वः॥ मृगचिह्नम्। चन्द्रे तच्चिह्नकारणं यथा,—

"लोकच्छायामयं लक्ष्म तवाङ्के मृगसंस्थितम्।
न विदुः सोमदेवापि ये च नक्षत्रयोगिनः॥"

इति महाभारते हरिवंशः॥

यथा, दर्पणं प्राप्य पराङ्मुखा नयनरश्मयो योवास्यमेव सुखं दर्पणगतमिव पश्यन्ति एवं चन्द्रमण्डलं प्राप्य पराङ्मुखास्ते दूरत्वदोषात् पृथिवीमयत्वरूपामिव चन्द्रमण्डलगतां पश्यन्ति स एव चन्द्रे कलङ्क इत्युपचर्य्यते। इति तट्टीका॥ यन्मारोगस्य औषधविशेषः। यथा,

"क्षारसेन समं हेम मौक्तिकं द्विगुणं भवेत्।
गन्धकस्तु समस्तेन रसपादस्तु टङ्कणः॥
सर्व्वं तद्लोकं कृत्वा कार्ष्णिकेन विशोधयेत्।
भार्ङ्गे लवणपूर्व्वेऽथ पचेद् यामचतुष्टयम्।
मृगाङ्कसंज्ञको ह्येष रोगराजनिकृन्तनः॥"

अपि च।

'रसस्य भस्मनो हेम पिष्टीकृत्य प्रयोजयेत्।
गुञ्जाचतुष्टयाच्यमरिचैर्भक्षयेन्नरः॥'

इति मधुमती॥

(एतन्नामकौषधान्तरं यथा,—

"रसभस्म हेमभस्म तुल्यं गुञ्जाद्वयं द्वयम्।
दोषं बृहत्युपानेन मृगाङ्कोऽयं यथापहः॥"

इति वैद्यकरत्नसारसंग्रहे यक्ष्माधिकारे॥)

मृगाजीवः, पुं, (मृगैः आजीवतीति। जीव्+अण्।) व्याधः। इत्यमरः। २। १०। २१॥

मृगाजिना, स्त्री, (मृगाजात् जायते इति। जन्+डः+स्त्रियां टाप्।) कस्तूरी। इति राजनिर्घण्टः॥ (तथास्या विषयः।

"एते समस्तैरपलप्रमाणै-
राजोद्य सर्व्वे विधिना विपक्वम्।
कर्पूरकाक्षीरमृगाजजातां
चूर्णीकृतानां त्रिपलप्रमाणम्॥"

इति भैषज्यरत्नावलौ वातरोगे मध्यमनारायणतैले॥)

मृगाद्, [द्] पुं, स्त्री, (मृगान् अत्तीति। अद्+क्विप्।) व्याघ्रः। इति केचित्॥

मृगादनः, पुं, (अत्तीति। अद्+ल्युः। मृगस्य अदनः।) क्षुद्रव्याघ्रः। तत्पर्य्यायः। तरक्षुः २। इत्यमरः। २। ५। १॥ तर्क्षुः ३ तरुक्षुः ४ तरक्षकः ५॥ इति शब्दरत्नावली॥ बृहत्कुक्कुराकारे लक्ष्मरेखाचित्रे नेकड़ा इति ख्याते। इति भरतः॥ चीता इति ख्याते। इत्यजुतः॥

मृगादनी, स्त्री, (मृगैरद्यते भुज्यतेऽसौ इति। अद्+कर्म्मणि ल्युट्+स्त्रियां ङीष्।) इन्द्रवारुणी। सहदेवी। मृगेक्षारुः। इति राजनिर्घण्टः॥ (यथा,—

"शिरीषश्च महातिक्ता जरातुम्बी मृगादनी।"

इति गोविन्दविद्याराददृतभैषज्यरत्नावल्याम् कुष्ठचिकित्सायाम्।) क्षुद्रव्याघ्री च॥

मृगान्तकः, पुं, (मृगाणां अन्तकः नाशकः।) चित्रव्याघ्रः। इति राजनिर्घण्टः॥

मृगारातिः, पुं, (मृगाणां अरातिः।) कुक्कुरः। इति शब्दमाला॥ मृगभुक्षुः। यथा,—

"मार्गे मार्गे मृगयति मृगारातिरामे विरामे
श्लोकं श्लोकं गतयति गते लक्ष्मणे लक्ष्मणेन।"

इति महानाटकम्॥

मृगारिः, पुं, (मृगाणामरिः।) सिंहः। व्याघ्रः। इति मेदिनी। रे, २०६॥ कुक्कुरः। रक्तग्रिगुः। इति राजनिर्घण्टः॥

मृगावित्, [ध्] पुं, (मृगान् विध्यति इति। व्यध्+क्विप्। "अन्येषामपि दृश्यते।" ६। ३। १३७। इति दीर्घश्च।) व्याधः। इति जटाधरः॥ (मृगावेधनशीलः। यथा, भट्टिकाव्ये। ५।८२।

"भ्रातरि न्यस्य यातो मां मृगावित् मृगयामसौ।")

मृगितः, त्रि, (मृग+क्तः।) अन्वेषितः। इत्यमरः॥

मृगी, स्त्री, (मृग+जातौ ङीष्।) मृगजातिस्त्री। इति व्याकरणम्॥ (यथाभिज्ञानशाकुन्तले। ६।

"घ्राणेन हरिणीनां हरति मृगीं वामनयनं कण्डूयमानां मृगीम्॥")

अस्या दुग्धगुणाः छागीदुग्धगुणतुल्याः। यथा, 'मृगीणां जाङ्गलीत्यानां अजाक्षीरगुणं पयः।' इति भावप्रकाशः॥

पुलहभार्य्या। सा कश्यपकन्या। तस्या अपत्यं हरिणादि। यथा,—

"क्रोधा च जज्ञिरे कन्या दाक्षायणीवात्मसम्भवाः।
ता भार्य्याः पुलहस्य स्युर्मृगी मन्दा मृगावती॥
भूता च कपिला दंष्ट्रा कशा तिग्मा तथैव च।
श्येना च सरमा चैव सरसा चेति विश्रुताः॥
मृग्यास्तु हरिणाः पुत्रा मृगास्तान्ये प्रकीर्त्तिताः।
ऋक्षवः शरभा ये च पुरवः पृषताश्च ये॥"

इति वह्निपुराणम्॥

त्रयक्षरच्छन्दोविशेषः। यथा। रो मृगी। 'सा मृगीलोचना। राधिका श्रीपतेः॥' इमथा। इति छन्दोमञ्जरी॥ अपस्मारररोगः। इति लोके ख्यातः॥ (होमोक्तमुद्राविशेषः॥)

मृगेक्षणा, स्त्री, (मृगैरीक्ष्यते प्रियत्वात् इति। ईक्ष्+ल्युट्+स्त्रियां टाप्।) मृगेक्षारुः। इति राजनिर्घण्टः॥ मृगनयना स्त्री च॥ (यथा, हरिवंशे। ४८। १४।

"काश्चीकलापनूपुरमुरजवनीदङ्गविप्रितपदाभिः।
श्रीमति मृगेक्षणाभिर्मृदङ्गवल्गुवचनाभिः॥")

मृगेन्द्रः, पुं, (मृगाणामिन्द्रः श्रेष्ठः।) सिंहः। इत्यमरः। २। ५। १॥ (यथा, श्रीमद्भागवते। १। १२। २२।

"मृगेन्द्र इव विक्रान्तो निषेवो हिमवानिव।
तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव॥"

भगवद्विभूतिः। यथा, श्रीमद्भगवद्गीतायाम्। १०। ३०।

"मृगाणाञ्च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्।"

छन्दोविशेषश्च॥)

मृगेन्द्रचटकः, पुं, (मृगेन्द्र इव विक्रमी चटकः।) श्येनपक्षी। इति जटाधरः॥

मृगेन्द्राणी, स्त्री, (मृगेन्द्रेण अश्नुते इति। अश्+घञ्+गौरादित्वात् ङीष्।) वासकः। इति राजनिर्घण्टः॥ (विशेषोऽस्या वासकशब्दे ज्ञातव्यः॥)

मृगेश्वारुः, स्त्री, (मृगस्य प्रिया इश्वारुः।) श्वेतेन्द्रवारुणी। सैंधिनी इति हिन्दीभाषा॥ तत्पर्य्यायः। मृगाक्षी २ श्वेतपुष्पा ३ मृगादनी ४ चित्रवल्ली ५ बहुफली ६ कपिलाक्षी ७ मृगेक्षणा ८ चित्रा ९ चित्रफला १० पृथ्वी ११ विचित्रा १२ मृगचिर्भिटा १३ मरुजा १४ कुम्भिनी १५ देवी १६ कटुफला १७ लघुचिर्भिटा १८। अस्या गुणाः। दुर्ज्जरत्वम्। गुरुत्वम्। मन्दानलकारित्वम्। रक्तपित्तहारित्वञ्च। इति राजनिर्घण्टः॥

मृगेष्टः, पुं, (मृगाणामिष्टः।) सुन्दरदृश्यः। इति राजनिर्घण्टः॥

मृग्यः, त्रि, (मृग्यते अन्विष्यते असौ। मृग्+कर्म्मणि यत्।) मृगितव्यः। अन्वेषणीयः। इति व्याकरणम्॥ (यथा, श्रीमद्भागवते। ७। ७। २३।

"देहस्तु सर्व्वसंघातो जगत्तस्थुरिति द्विधा।
अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन्॥")

मृज ऊ य कि भूषे। शुद्धौ। इति कविकल्पद्रुमः॥ (पुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) ऊ अमार्ज्जीत् अमार्ज्जीत्। य मृज्या। कि मार्ज्जयाञ्चक्रे मार्ज्जयांबभूव मार्ज्जयामास। मार्ज्जयाञ्चेतेहिजान्। यो मार्ज्जयति घ्राणार्थमिति हलायुधः। इति दुर्गादासः॥

मृज ल ऊ य शुद्धौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-सक०-सेट्।) शुद्धिरिह शुद्धीभावः शुद्धीकरणञ्च। ल मार्ष्टि तीर्थोदकैर्नित्यमिति हलायुधः। ऊ अमार्ज्जीत् भक्षतो मलम्। अमार्ज्जीच्चासि पत्रादीनिति भट्टिः। य मृज्या। इति दुर्गादासः॥

मृज्जः, पुं, (मृज्यतेऽसौ। इति मृज्+ज्वलज्वलुटो बहुलमिति कर्म्मणि कः।) वाद्यविशेषः। मादल इति भाषा। यथा। मर्दलो दारुणो मृज्जः। इति शब्दरत्नावली॥

मृज्जा, स्त्री, (मृज्यते इति। मृज्+"घिदृभिदादिभ्योऽङ्।" ३। ३। १०४। इति अङ्+टाप् च।) मार्ज्जनम्। इत्यमरः। २।६।१२१॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये।

"अभ्यङ्गो मार्द्दवकरः कफवातनिरोधनः।
धातूनां पुष्टिजननो मृज्यावर्णबलप्रदः।")

मृज्यं, त्रि, मृज्यते यत् इति। मृज्। "ऋज्येन्द्राग्र०।" ३। १। ११३। इति क्यप्।) मार्ज्यम्। मार्ज्जनीयम्। इति सुग्धबोधव्याकरणम्॥ (यथा, भट्टौ। ६। ५६।

"मन्युरस्य त्वया मार्ग्यो मृज्यः श्लोकश्च तेन ते॥")

मृड़ ग घ्र मोदे। इति कविकल्पद्रुमः॥ (क्रा०-वा तुदा०-अक०-सेट्।) मोद हर्ष हृष्टीकरणम्॥ ग मृड्नाति सरस्वत्या च यः सदेति हलायुधः। घ्र मृड्नति दीनं दाता। अमृड्नित्वा सहस्राक्षमिति भट्टिः। मर्द्दिता। इति दुर्गादासः॥

मृड़ः, पुं, (मृड़ति हृष्यतीति। मृड़्+रगुपधलात् कर्त्तरि कः।) शिवः। इत्यमरः। १। १। २३॥ (यथा, श्रीमद्भागवते। ४। २। ७।

"प्राङ्निषण्णं मृड़ं दृष्ट्वा नात्मन्यन्तर्हृदाहतः।")

मृड़कुणः, पुं, (मृड़्णाति सुखयतीति। मृड़्+"मृड़ः कीकन् कंकणौ।" उणा०। ४। २४। इति कंकणः।) बालकः। इत्युणादिकोषः॥

मृड़ा, स्त्री, (मृड़+टाप् ङीष् च।) दुर्गा। इति हलायुधः॥

मृड़ी, इति हलायुधः॥

मृड़ीकः, पुं, (मृड़तीति। मृड़्+"मृड़ः कीकन् कङ्कणौ।" उणा०। ४। २४। इति कीकन्।) हरिणः॥

मृण, घ्र हिंसे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) मर्ष्टता। इति दुर्गादासः॥

मृणालं, क्ली, पुं, मृण्यते हिंस्यते भक्षणायर्थे यत्। (मृण्+"तमिविशिविडिभ्यिकुलिकपिपलिपच्चिभ्यः कालन्।" उणा०। १। ११७। इति कालन्। षकारादीनां णत्वम्।) मोलाम इति ख्यातम्। इति भरतः॥ (यथा, नैषधचरिते। १। १३७।

"मदर्थसन्देशमृणालमन्थरः
प्रियः कियद्दूर इति त्वयोदिते।")

तत्पर्य्यायः। विसम् २। इत्यमरः। १।१०।४२॥ विश्वम् ३। इति हिरूपकोषः॥ पद्मनालम् ४ मृणाली ५ मृणालिनी ६ पद्मतन्तुः ७ विसिनी ८ नलिनीरुहम् ९। अस्य गुणाः। शिशिरत्वम्। तिक्तत्वम्। कषायत्वम्। पित्तदाहमूत्रकृच्छ्रविकाररक्तवान्तिहरत्वञ्च। इति राजनिर्घण्टः॥ (मृणालकविशेषः। तत्पर्य्यायो यथा,

"पद्मादिकन्दः मृणालं करहाटश्च कथ्यते।
मृणालं मूलं भिसाग्रं लम्बाम्बुकश्च कथ्यते॥"

तथास्य गुणाः। विशार्थे मृणालकार्थे च॥

"मृणालं शीतलं दृष्यं पित्तदाहास्रजिद्गुरु॥
दुर्ज्जरं खादुपाकञ्च स्तन्यानिलकफप्रदम्।
संग्राहि मधुरं रूक्षं मृणालमपि तद्गुणम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मृणालं, क्ली, (मृण+कालन्।) वीरणमूलम्। इति मेदिनी। ले, १२४॥ (अस्य पर्य्यायो यथा,

"मृणालमभयं सेव्यं लामज्जकमुशीरकम्॥"

इति वैद्यकरत्नमालायाम्॥

"स्वादुशीतं मृणालञ्च सेव्यं लामज्जकन्तथा॥"

इति गारुड़े पूर्व्वखण्डे २०८ अ०॥)

मृणालिनी, स्त्री, (मृणालानि अस्याः सन्तीति। मृणाल+"पुष्करादिभ्यो देशे।" ५।२।१३५। इति इनिः। ङीप् च।) पद्मिनी। इति जटाधरः॥ सा तु पद्मयुक्तदेशः पद्मसमूहः पद्मलता च॥ (यथा, रघुवंशे। १६। ७।

"विभर्त्ति चाकारमनिर्दृतानां
मृणालिनी हैममिवोपरागम्।")

ऋणाली, स्त्री, (ऋणाल + गौरादित्वात् ङीष् ।) ऋणालम् । इति राजनिर्घण्टः ॥ (यथा, उत्तरचरिते । १ ।
"परिस्पन्दितऋणालीदुर्बलान्यङ्गकानि
त्वयुरसि मम क्षत्वा यत्र निद्रामवाप्ता ॥")
(अल्पं ऋणालं इति । ऋणाल + अस्यार्थे ङीष् ।) खल्पऋणालजाति: । यथा,—
"साङ्गं चन्दनमङ्गके बलयिता: पाणौ ऋणालीलता: ।
इति राजशेखरः । इत्यमरटीकायां भरतः ॥

ऋणाली, [न्] पुं, (ऋणालमस्यास्तीति । ऋणाल + इनिः ।) पद्मः । इति केचित् ॥

ऋत्, [द्] स्त्री, (ऋदृणाति प्रलये चूर्णयति सृकारादेः क्षीयत इति । ऋद् + कर्त्तरि क्विप् ।) ऋत्तिका । इत्यमरः । २ । १ । ४ । (यथा, मनुसंहितायाम् । ४ । ६६ ।
"ऋतं मां देवतं विप्रं ऋतं मधु चतुष्पथम् ।
प्रदक्षिणानि कुर्व्वीत प्रज्ञातांश्च वनस्पतीन् ॥"
(यथास्या गुणाः ।
"कषाया मारुतं पित्तसुखरा मधुरा कफम् ॥
कोपयेन्मूत्रसादीच्च रौक्ष्यादुक्तञ्च रूक्षयेत् ।
पूरयत्यविपक्वैव स्रोतांसि निरवह्यपि ।
इन्द्रियाणां बलं हत्वा तेजोवीर्य्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥"
इति माधवकरकृतरुग्विनिश्चये पाण्डुरोगाधिकारे ।) तुवरी । इति राजनिर्घण्टः ॥ *॥
ऋत्तिकाशौचं यथा,—
"दिवासन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ।
कुर्य्यात् मूत्रपुरीषे तु रात्रौ वै दक्षिणामुखः ॥
गृहीताग्निश्चोत्थाय ऋद्भिरभ्युक्ष्य तेजसे: ।
गन्धलेपक्षयकरं शौचं कुर्य्यान्महाव्रतः ॥"
इति गारुडे ६४ अध्यायः ॥

ऋतं, क्ली, (ऋ + क्तः ।) याचितम् । इत्यमरः । २ । ६ । ३ ॥ याचनवृत्तिर्मरणमिव दुःखजनकत्वात् ऋतं भावे कर्म्मणि वा क्तः । इति भरतः ॥ मृत्युः । इति हेमचन्द्रः ॥

ऋतं, त्रि, याचितवस्तु । मृतप्रायः । मरा इति भाषा । तत्पर्य्यायः । परासुः २ प्राप्तपञ्चत्वः ३ परेतः ४ प्रेतः ५ संक्षितः ६ प्रमीतः ७ । इत्यमरः । २ । ६ । ३ ॥ कलौ ऋतस्य धन्यत्वं यथा,
"धर्म्मः प्रव्रजितस्त्रपः प्रवसितं सत्यञ्च दूरे गतं
पृथ्वी मन्दफला जनाः कपटिनो लोभे स्थिता ब्राह्मणाः ।
मर्त्याः स्त्रीवशगाः स्त्रियश्च चपला नीचा जना उन्नता
हा कष्टं खलु जीवितं कलियुगे धन्या नरा ये मृताः ॥"
इति गारुडे ११५ अध्यायः ॥
(कार्य्यवशाज्जीवितावस्थायामपि मृतत्वं तद्यथा,—
"चतुर्थे तु मदे प्राप्ते मयदार्व्विव निष्क्रियः ।
कार्य्याकार्य्यविभागज्ञो मृतादप्यधरो मृतः ॥"
इति माधवकरकृतरुग्विनिश्चये पानात्ययाद्यधिकारे । यथा च ।
"उत्तिष्ठोत्तिष्ठ गच्छ त्वं वद मौनं समाचर ।
ये पराधीनतां यान्ति तेऽपि जीवन्ति के मृताः ॥"
इद्भटः ॥)

ऋतकं, क्ली, (ऋत + स्वार्थे कन् ।) अवः । इति हेमचन्द्रः । १ । २२६ ॥ मरणाशौचम् । यथा,
"यदि स्यात् मृतके मृतिर्म्मृतके च मृतिस्तथा ।
त्रीण्येवैव भवेच्छुद्धिरहःत्रीणि द्विराचकम् ॥"
इति शुद्धितत्त्वम् ॥

ऋतकल्पः, त्रि, (ऋत + "ईषदसमाप्तौ कल्पप् । देश्यदेशीयरः ।"५ । ३ । ६७ । इति कल्पप् ।) ऋतप्रायः । ईषदूनो मृतः । इति मृतशब्दादीषदूनार्थे कल्पप्रत्ययेन निष्पन्नम् ॥

ऋतकान्तकः, पुं, (ऋतकस्य अन्तकः नाशको भक्षकत्वात् ।) छागः । इति हारावली ॥

ऋतजीवः, पुं, (ऋतश्चासौ जीवश्चेति नीलजोहितादिवत् विशेषणसमासः ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्य तिलकशब्दे ज्ञातव्यम् ॥)

ऋतऋः, पुं, (ऋतः ऋकः कारणत्वेन यस्य मृगस्यादित्वात् परुरूपम् ।) मृगविशेषः । इति मार्कण्डेयशब्दटीकायां भरतः ॥

ऋतमत्तः, पुं, (ऋतेन मृगयवेन मत्तः । भक्षणाभात् ।) छागः । इति शिवाकाङ्क्षेयः ॥

ऋतमत्तकः, पुं, (ऋतमत्त + स्वार्थे कन् ।) छागः । इति शब्दरत्नावली ॥

ऋतवत्सा, स्त्री, (ऋतो वत्सो यस्याः ।) मृतापत्या । अजीवत्सन्तानेत्यर्थः । गर्भावधिवर्षत्रयं यावत् पुनः पुनर्म्मृतसन्तानेत्यर्थः । अस्या दोषशान्तिर्यथा,—
"सप्तमीजपनं वक्ष्ये सर्व्वलोकहिताय वै ।
जातस्य ऋतवत्साया: सप्तमे मासि नारद ! ।
अथवा शुक्लसप्तम्यामेतत् सर्व्वत्र मृस्यते ।
ग्रहतारावलं लब्ध्वा क्षत्वा वा विप्रवाचनम् ।
बालस्य जन्मनक्षत्रतिथिदेवान् यजेद्बुधः ॥
तद्दृष्टद्वातुरात्मानं क्षत्वं स्नादितरेण च ।
गोमयेनानुलिप्तायां भूमावेकाग्निवत्तदा ॥
तण्डुले रक्तमृत्पात्रं गोक्षीरसंयुतम् ।
निर्व्वपेत् सूर्य्यरूपाभ्यां तन्मन्त्राभ्यां विधानतः ॥
कौर्म्मपेत् सूर्य्यदेवत्यं सप्तर्चेन हुताहुतीः ।
जुहुयाद्वह्मसूक्तेन तदङ्गाय नारद ! ॥
होतव्याः समिधस्तत्रैवार्कपलाशयोः ।
यवक्षतातिलैर्होमः कर्त्तव्योऽष्टमृतं पुनः ॥
व्याहृतिभिरथाज्येन तथैवाष्टमृतं द्विज ! ।
हुत्वा स्नानञ्च कर्त्तव्यमङ्गाङ्गेन च धीमता ॥
विप्रेण वेदविदुषा विधिवद्भर्म्मधारिणा ।
स्थापयित्वातु चतुरः कुम्भान् कोणेषु शोभनान् ॥
पञ्चमञ्च पुनर्म्मध्ये दध्यक्षतविभूषितम् ।
स्थापयेदव्रणं कुम्भं सप्तर्षीनभिमन्त्रितम् ।
सौरेण तीर्थतोयेन पञ्चरत्नसमन्वितम् ॥
सर्व्वान् सर्व्वौषधैर्युक्तान् पञ्चगव्यसमन्वितान् ।
पञ्चरत्नफलैर्युक्तान् वाग्भिरभिवेदयेत् ॥
गजाश्वरथावल्मीकसङ्गमात् ह्रदगोकुलात् ।
राजद्वारप्रदेशाच्च मृदमानीय निःक्षिपेत् ॥
चतुर्व्वपि च कुम्भेषु रत्नगर्भेषु मध्यमम् ।
गृहीत्वा ब्राह्मणस्तत्र सौरान्मन्त्रानुदीरयेत् ॥
सप्तभिरपि नारीभिरव्रणाभिरथोत्तमैः ।
पूजितामिर्यथाशक्त्या माल्यवस्त्रविभूषणैः ।
सविप्राभिश्च कर्त्तव्यं मृतवत्साभिषेचनम् ।
दीर्घायुरस्तु बालोऽयं जीवपुत्रा च भाविनी ॥
आदित्यचन्द्रमाः सार्द्धं ग्रहनक्षत्रमण्डलैः ।
शक्रः सलोकपालो वै ब्रह्मविष्णुमहेश्वराः ।
ऋषयश्चाग्नयो देवाः सदा पान्तु कुमारकम् ॥
मित्रोऽग्निर्मा हुतभुक्षा च बालग्रहाः क्षयित्वा ।
क्रीड़ां कुर्व्वन्तु बालस्य मा मातुर्जनकस्य वै ॥
ततः शुक्लाम्बरधरा कुमारी पतिसंयुता ।
सप्तकं पूजयेद्भक्त्या क्षीरान्नमथ गुरुं पुनः ॥
काञ्चनीञ्च ततः कृत्वा तिलपात्रोपरिस्थिताम् ।
प्रतिमां कूर्म्मराजस्य गुरवे विनिवेदयेत् ॥
वस्त्रकाञ्चनरत्नैर्वैभवैः सहितायसे: ।
पूजयेद्ब्राह्मणं तद्वद्धितयाविवर्द्धितः ॥
शुक्ला च गुरुणा चैवसुकार्य्या मन्त्रसन्ततिः ।
दीर्घायुरस्तु बालोऽयं यावद्वर्षशतं समम् ।
यत्किञ्चिदस्य दुरितं निःक्षिप्तं वडवानले ।
ब्रह्मा रुद्रो वसु स्कन्दो विष्णुर्देवो हुताशनः ।
रक्षन्तु सर्व्वदुष्टेभ्यो वरदाः सन्तु सर्व्वदा ॥
एवमादीनि वाक्यानि वदन्तं पूजयेद्गुरुम् ।
शक्तितः कपिलां दद्यात् प्रणिपत्य विसर्ज्जयेत् ॥
गुरुश्च पुत्रसहितः प्रणम्य रविशङ्करौ ।
हुतशेषं तदाग्नेयादादित्याय नमोऽस्तु ते ॥
इदमेवाङ्गुलोद्देगदुःखश्लेषु शस्यते ।
कर्त्तृजन्मदिनर्क्षाणां देवान् संपूजयेत् सदा ॥
शान्त्यर्थं शुक्लसप्तम्यामेतत् कुर्व्वन्न सीदति ॥
स चानेन विधानेन दीर्घायुरभवत्ततः ।
सप्तवत्सराभायुतं शशास पृथिवीमिमाम् ॥"
इति मात्स्ये ६७ अध्यायः ॥
तल्लक्षणशान्त्यौषधानि यथा,—
"गर्भः संजातमात्रोऽपि पतेत् मासाच्च वत्सरात् ।
म्रियते द्विःत्रिवर्षाद्वा यस्याः सा मृतवत्सिका ॥
तत्र योगं प्रकर्त्तव्यं यथा शङ्करभाषितम् ।
मार्गशीर्षे तथा ज्येष्ठे पूर्णिमायेषिते शुचे ।
नूतनं कलसं पूर्णं पूजयेन्माहकाः सुधीः ॥
शाखाफलसमायुक्तं नवरत्नसमन्वितम् ।
सुवर्णसूत्रिकायुक्तं षट्कोणमण्डले स्थितम् ।
तन्मध्ये पूजयेद्देवीं एकानंशनामविश्रुताम् ॥
गन्धपुष्पाक्षतैर्धूपैर्दीपनैवेद्यसंयुतैः ।
पूजयेद्भक्तिभावेन मद्यमांसैः समत्स्यकैः ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथा चैन्द्री षट्पत्रेषु च मातरः ॥
पूजयेन्मन्त्रपूतेन यैंकारेण नाम विश्रुते ।

दधिभक्तानि पिष्टानि सप्तसङ्ख्यानि कारयेत् ।
षट्सङ्ख्येषु च पत्रेषु माहात्म्यः कथयेत् पृथक् ।
चिह्नेभ्यः सप्तमं पिण्डं शुचिस्थाने बहिः क्षिपेत् ।
तेभ्यस्ते यहमागच्छेच्चक्राये यागमारभेत् ।
कन्यकां योगिनीं वामां भोजयेत् सकुटुम्बकैः ।
दक्षिणां दापयेत्तस्यां देवतायै न चान्यथा ।
विसृज्य देवताधाय नद्यां ततकलशोदकम् ।
शुक्लं दीपयेद्धीमान् सुमेन शुभमादिशेत् ।
विपरीते पुनः कार्ये यागं तत्तु सुसिद्धिदम् ।
प्रतिवर्षमिदं कार्यं दीर्घजीवितमिच्छता ।"
ॐ ह्रीं फें एकान्तीदेवतायै नमः । अनेन मन्त्रेण पूजा जपश्च कार्यः । ॥ ॥

"प्राङ्मुखः क्षत्तिकाक्षेत्रे वन्ध्याकर्कोटकीं हरेत् ।
तत्कन्दं पेषयेत्तोये: कर्षमात्रं सदा पिबेत् ॥
या बीजपूरं द्रवमूलमेकं
चीरेण पक्वं प्रपिबेत् विमिश्रम् ।
ऋतौ निशं या तु पतिं प्रयाति
दीर्घायुषं सा तनयं प्रसूते ॥
मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा बला ।
मेदा पयस्या काकोलीमूलक्षेत्रोद्भवं जलम् ।
अर्कमोदा हरिद्रे द्वे हिङ्गुः कटुकरोहिणी ।
उत्पलं कुसुदं द्राक्षा काकोल्यौ मूलकद्वयम् ।
एतेषां कर्षकैर्भागैर्घृतप्रस्थं विभावयेत् ।
अतावरीरसं क्षीरं इक्षुरसेदं चतुर्गुणम् ।
संपिबेन्नियतं नारी निशं क्षीरं च भक्षयेत् ।
पुत्रान् जनयते नारी मेधाढ्यान् प्रियदर्शनान् ।
या चैवाक्षिरजा स्यात् या नारी जनयेत् ऋतम् ।
अस्यायुश्च जनयेत् या च कन्याः प्रसूयते ।
योनिदोषे रजोदोषे गर्भस्रावे च शस्यते ।
प्रजावर्द्धनमायुष्यं सर्वमङ्गलनिवारणम् ॥
गाव्या दलहतं क्षीरदायुष्यं परिकीर्तितम् ।
गोक्षुरश्च बलाबालं वदन्त्यत्र चिकित्सकाः ॥
जीवन्त्यामुद्भवं क्षीरं तत्र तु दीयते ।
अरण्यगोमयेनाग्नं बहिर्ज्वाला प्रदीयते ॥"
अत्र पयस्या क्षीरयुक्तभूमिकुष्माण्डम् । उत्पलं नीलम् । इति रत्नमालायां ऋतवल्ल्याश्चिकित्सा । ॥ । अन्यच्च । अथ ऋतवल्ल्यासृतजीवनोपायः ।

ईश्वर उवाच ।

"गर्भः संजातमात्रेण पञ्चात् मासाच्च वत्सरात् ।
म्रियते द्विस्त्रिवर्षादिर्यस्याः सा ऋतवत्सका ।
यष्टीलता शुभनक्षत्रे अपामार्गस्य मूलकम् ।
यष्टीलता बलाबालं एकवर्णगवां पयः ।
पीत्वा सा लभते गर्भं दीर्घजीविसुता भवेत् ।
यस्ये कस्ये न दातव्यं नान्यथा शङ्करोदितम् ।
वन्ध्याकर्कोटिकाकन्दं मोचाराजेन पेषयेत् ।
ऋतुकाले तु सप्ताहं दीर्घजीविसुता भवेत् ।
सत्यं सत्यं पुनः सत्यं यथा शङ्करभाषितम् । ॥ ।
मार्गशीर्षेऽथवा ज्येष्ठे पूर्वायां खेपिते रवौ ।
मूलनक्षत्रसंयुक्ते गन्धतोयेन कारयेत् ।
आखापत्रसमायुक्तं नवरत्नसमन्वितम् ।
सुवर्णसूत्रिकायुक्तं षट्कोणमण्डले स्थितम् ।
तन्मध्ये पूजयेद्देवीमेकान्तीनामविश्रुताम् ॥
गन्धपुष्पाक्षतैर्धूपैर्दीपैर्नैवेद्यसंयुतैः ।
अर्घयेद्भक्तिभावेन दुग्धं मांसं तथा मधु ।
वाराही च तथा चेन्द्री ब्राह्मी माहेश्वरी तथा ।
कौमारी वैष्णवी देवी षट्सु कोणेषु मातरः ।
पूजयेन्मन्त्रभावेन दधिपिष्टानि कारयेत् ।
सप्तसङ्ख्याप्रमाणानि षट्सङ्ख्या षट्सु पात्रतः ।
सप्तमन्तु पृथक् कृत्वा शुचिस्थाने विनिक्षिपेत् ॥
तद्भुक्तं यहमागच्छेत् कन्यका षट्कक्षियः ।
भोजयेद्दक्षिणां दत्त्वा प्रणामं कारयेत्ततः ।
विसृज्य क्षेत्रदेवीश्च आद्यां तत्कलशोदकम् ।
शुक्लं दीपयेद्धीमान् सुमेन शुभमादिशेत् ।
विपरीते पुनः कार्ये यागं तावत् सुसिद्धिदम् ।
प्रतिवर्षमिदं कुर्यात् दीर्घजीवितसुतं लभेत् ।
सिद्धियोगमिदं ख्यातं नान्यथा शङ्करोदितम् ।"
अथ मन्त्रः । ॐ परं ब्रह्म परमात्मने अमुकीयदेहे दीर्घजीवितसुतं कुरु कुरु स्वाहा । ॥ ।
अथ काकवन्ध्या । ईश्वर उवाच ।
"पूर्वं पुत्रवती या सा क्वचिद्वन्ध्या भवेद्यदि ।
काकवन्ध्या तु सा ज्ञेया चिकित्सा तत्र कथ्यते ।
विष्णुक्रान्तां समूलान्तु पिष्ट्वा माक्षिकदुग्धके ।
मक्षिकौनवनीतेन ऋतुकाले तु भक्षयेत् ।
एवं सप्तदिनं कुर्यात् पथ्यमुक्तिञ्च पूर्ववत् ।
गर्भं सा लभते नारी काकवन्ध्या सुशोभनम् ।
अपामार्गस्य मूलन्तु आदायेत् पुष्यभास्करे ।
पेषयेच्छक्षिकीक्षीरे पलार्द्धं भक्षयेत् सदा ।
सप्ताहाल्लभते गर्भं काकवन्ध्या चिरायुषम् ।
यस्ये कस्ये न दातव्यं नान्यथा शङ्करोदितम् ।"
अथ मन्त्रः । ॐनमः शक्तिरूपाय अस्या गर्भे पुत्रं कुरु कुरु स्वाहा । १००० जपात् सिद्धिः । इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे वन्ध्यासम्बन्धादीनां पुत्रकरणं नाम चतुरशीतितमः पटलः । अथ त्रिदृश्यर्थे २० पटलः ।

ऋतसञ्जीवनी, स्त्री, (ऋतं ऋतग्रस्तम् जीवयतीति । जीव्+णिच्+ल्युट्+ङीप् च ।) गोरक्षदुग्धा । इति राजनिर्घण्टः ।

ऋतजीवनार्थिका विद्या । यथा । अथ ऋतसञ्जीवनी विद्या ।

"आदौ प्रासादबीजं तदनु ऋतिहरं तारकं चाङ्कतोऽथ
प्रोद्यार्थं त्र्यम्बकं यो जपति च ततः संपुटं चानुलोमम् ।"

ऋतिहरं त्र्याचरन्तल्लक्षयमन्त्रम् । संपुटितमिति अनुलोमक्रमेणैव संपुटमित्यर्थः । तेन ह्रौं ततः प्रणवः ततो यूं सः ततः सप्तव्यवयाहृतिः । मध्ये त्र्यम्बकमन्त्रः । ततो ह्रौं प्रणवः यूं सः ततः सप्तव्यवयाहृतिः । अस्य जपात् सर्वसिद्धिर्भवति ॥॥ अथ शुक्रोपासिता ऋतसञ्जीवनी विद्या । गायत्र्या एकैकपादानन्तरं त्र्यम्बकमन्त्रस्य एकैकपादश्च । ततश्च गायत्र्याः प्रथमपादानन्तरं सुगन्धिं पुष्टिवर्द्धनम् ।
द्वितीयपादानन्तरं उर्वारुकमिव बन्धनात् ।
तृतीयपादानन्तरं मृत्योर्मुक्षीयमाऽमृतात् ।
अस्य ध्यानम् ।
"स्वच्छं स्वच्छारविन्दस्थितसुभयकरे संस्थितौ पूर्णकुम्भौ
हाभ्यामेवाभयाढ्ये जिनकरकमले दौ घटौ नित्यपूर्णौ ।
हाभ्यां दौ च स्रवन्तौ शिरसि शुचिकलां चाप्लुते: स्रावयन्तं
देहं देवो दधानः प्रदिशतु विपुलाकल्पजालः श्रियं वः ॥"
एवं ध्यात्वावाह्य प्रणवादिनमोन्तमन्त्रेण मूलेन पञ्चोपचारैः पूजयेत् । अस्य जपात् सर्वसिद्धिः । इत्यागमतत्त्वविलासः । (तथा च ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे ४५ । ११ ।
"महाज्ञानञ्च गोप्यञ्च ऋतसञ्जीवनीं पराम् ।
महाज्ञानयुतां साध्वीं प्रवदन्ति मनीषिणः ॥"
(स्त्री । यथा, मार्कण्डेये । २४ । ४२ ।
"ततः कुवलयाश्वं तं समाश्वास्य मुनिक्रमः ।
कथयामास ततसर्वं ऋतसञ्जीवनादिकम् ॥)

ऋतस्नातः, त्रि, (स्नातिबन्धादीनामन्यतमस्मिन् ऋते सति ऋतमुद्दिश्य विधिना स्नातः ।) ऋतोद्देशेन स्नातः । तत्पर्य्यायः । अपस्नातः २ । इत्यमरः ।३।१।१६ । ऋतमुद्दिश्य ऋतस्नाने यत्ने । संस्कारार्थं स्नापिते ऋते । इति स्वामी । इति तट्टीकायां भरतः ॥

ऋतस्नानं, क्ली, (ऋतमुद्दिश्य स्नानम् ।) ऋतोद्देशेन स्नानम् । तत्पर्य्यायः । अपस्नानम् २ । इति हेमचन्द्रः । ३ । ३६ ॥

ऋतस्रवोक्षा, [क्ष] पुं, (ऋतवत् स्वराज्यधनादिकं स्रवतीति । स्रु+वाक्षरूपोऽस्त्रियाम् । ३।२ । ६४ । इति पक्षे ट्रच् ।) राजर्षिः । इति हेमचन्द्रः । ३ । ३७० ॥

ऋतामदं, क्ली, (ऋतः नरः आमदः अस्मात् ।) तुत्थम् । इति शब्दचन्द्रिका ॥

ऋतालर्कं, क्ली, (ऋतमाजयति भूषयतीति । अज्+क्विप्+खुञ् ।) आर्द्रकः । इत्यमरः ।२।४।१२१। (तथास्य पर्य्यायः ।
"सौराष्ट्री तुरवी कांची ऋताजकसुराह्वये ।
आर्द्रकी चापि सा ख्याता ऋतुघ्ना च सुरक्षिका ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।)

ऋतिः, स्त्री, (ऋ+क्तिः ।) मरुत्वम् । इति हेमचन्द्रः । २ । २१६ । (यथा, श्रीमद्भागवते । ६ । १४ । ५४ ।
"परे तु जीवत्यपरस्य या ऋति-
र्विपर्ययश्चेत्त्वमसि ध्रुवः परः ॥"
तथास्या विषयः ।
"यो गौरवर्णो विदधाति कार्ष्ण्यं
छायोऽपि गौरत्वमुपैति यच्च ।
तथा ऋतिं याति नरप्रकृत्या
धीरं विकृत्या जडतोऽपि यो वै ॥

यो वैपरीतं अवयेन ग्रन्थं
यश्चाति वा नो ग्रथ्नते स श्रोत्रं ।
स वै मृतिं पश्यति यो न पश्येत्
छायां स्वकीयां धरणीप्रपन्नाम् ।"
इति हारीते द्वितीयेस्थाने तृतीयेऽध्याये ॥)

मृत्करः, पुं, (करोतीति कृ+अच् । मृदां करः । षटादिनिर्म्माढत्वादस्य तथात्वम् ।) कुम्भकारः । इति त्रिकाण्डशेषः ॥

मृत्कांस्यं, क्ली, शरावः । इति त्रिकाण्डशेषः ॥

मृत्किरा, स्त्री, (मृदं किरतीति । कृ+"इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः । "ऋत इद्धातोः ।"७ । १ । १०० । इति इत् ।) घुर्घुरी । इति त्रिकाण्डशेषः । घुर्घुरिया इति भाषा ॥

मृत्खनिनी, स्त्री, चर्म्मकषाटघः । इति शब्दचन्द्रिका ॥

मृत्तार्णं, क्ली, (मृदं तारयति प्रतिष्ठापयतीति । तृ+णिच्+"कर्म्मण्यण् ।"३ । २ । १ । इति अण् ।) आढकी । इति शब्दरत्नावली ॥

मृत्तालकं, क्ली, (मृत्ताल+सैन्ज्ञायां कन् ।) तुवरिका । तुवरिकलायं इति अढ़र इति च ख्यातम् । इत्यमरटीकायां भरतः । शौराष्ट्रमृत्तिका । इति राजनिर्घण्टः ॥

मृत्तिका, स्त्री, (मृदेव इति । मृद्+"मृदस्तिकन् ।" ५।४।३६ । इति स्वार्थे तिकन् । स्त्रियां टाप् ।) तुवरी । इति राजनिर्घण्टः ॥ मृत् । इत्यमरः । २ । १ । ४ ॥ माटी । इति भाषा । तत्पर्य्यायः । मृदा २ क्षितिः ३ । इति भरतः ॥ (अस्या भक्षणात् पाण्डुरोगोत्पत्तिः । तद्यथा, "मृत्तिकादनशीलस्य कृष्यत्यन्यतमो मलः ॥ कषाया मारुतं पित्तं उषरा मधुरा कफम् ॥"
इति माधवकरसंग्रहीतरुग्विनिश्चये पाण्डुरोगाधिकारे । अन्यत् मृत्शब्दे द्रष्टव्यम् ।) स्नानकाले मृत्तिकालेपनविधिर्यथा,—
"मृदा प्रक्षाल्य जिह्मग्रं द्वाभ्यां नाभेस्तथोपरि ।
अथश्च तिसृभिः कार्यं षड्भिः पादौ तथैव च ।
कटिञ्च तिसृभिश्चापि हस्तयोर्दिश्च मृत्तिकाः ।
प्रक्षाल्य कायं हस्तौ च द्विराचम्य यथाविधि ।
ततः संमार्जनं कृत्वा मृदमेवाभिमन्त्रयेत् ॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ! ।
उद्धृतासि वराहेण कृष्णेनाभितबाहुना ।
मृत्तिके हर मे पापं यन्मया पूर्व्वसञ्चितम् ।
मृत्तिके ब्रह्मदत्तासि प्रजया च धनेन च ।
मृत्तिके त्वाञ्च यास्यामि काश्यपेनाभिमन्त्रिताम् ।
मृत्तिके जहि मे पापं यन्मया दुष्कृतं कृतम् ।
त्वया हतेन पापेन ब्रह्मलोकं व्रजाम्यहम् ।"
इति वह्निपुराणम् ॥*॥

शौचार्थमृत्तिकाग्रहणविधिर्यथा,—
"आकृष्य मृत्तिकां कूलाल्लेपगन्धापकर्षणम् ।
कुर्य्यादतन्द्रितः शौचं विशुद्धैरुद्धृतोदकैः ॥
नाहरेत् मृत्तिकां विप्रः पांशुस्थाम्न च कर्द्दमात् ।
न मार्गान्नोषराद्देशाच्छौचशिष्टां परस्य च ।
न देवायतनात् कूपात् गेहान्न च जलात्तथा ।
उपस्पृश्योत्ततो नित्यं पूर्व्वोक्तेन विधानतः ॥"
इति कौर्म्मे उपविभागे १२ अध्यायः ॥
तस्याः परीक्षा मन्दिरशब्दे द्रष्टव्याः ॥

मृत्पत्नी, स्त्री, (मृदि पतनमस्याः । ङीप् ।) कुलौषधम् । इति हारावली ॥

मृत्यु, पुं, (म्रियते अस्मादिति मृ+"मृजिमृङ्भ्यां युक् तुट् च ।" उणा० । ३ । २१ । इति युक् ।) यमः । इति हेमचन्द्रः ॥ कंसः । यथा,—
"प्रत्यर्प्य मृत्यवे पुत्रान् मोचये ह्यपजामिमाम् ।
सुता मे यदि जायेरन् मृत्युर्वा न म्रियेत चेत् ॥"
इति श्रीभागवते १० स्कन्धे १ । ४६ ॥

मृत्युः, पुं,क्ली, प्राणवियोगः । तत्पर्य्यायः । पञ्चता २ कालधर्म्मः ३ दिष्टान्तः ४ प्रलयः ५ अन्ययः ६ अन्तः ७ नाशः ८ मरणम् ९ निधनः १० । इत्यमरः ॥ पञ्चत्वम् ११ मृतम् १२ मृतिः १३ । इति तट्टीकायां रमानाथः ॥ नैधनम् १४ । इति तट्टीकासारसुन्दरी ॥ संख्या १५ कालः १६ परलोकगमः १७ दीर्घनिद्रा १८ निमीलनम् १९ अस्तम् २० अवसानम् २१ । इति हेमचन्द्रः ॥ भूमिशायः २२ निपातः २३ विलयः २४ आत्ययिकम् २५ । इति शब्दरत्नावली ॥ अपव्ययः २६ । (मरणार्थे यथा,—
"जीवस्य यस्य क्षुत्तृष्णे कृच्छ्रैर्निर्हरतैस्तथा ।
न शाम्यतोऽन्नपानेन तस्य मृत्युरुपस्थितः ॥
प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम् ।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः ॥"
इति सुश्रुते शारीरस्थाने ३१ अः ॥
"एकोत्तरं मृत्युशतमथर्व्वाणः प्रचक्षते ।
तत्रैकः कालसंज्ञस्तु शेषास्त्वागन्तवः स्मृताः ॥
दोषागन्तुजमृत्युभ्यो रसमन्त्रविचारदौ ।
रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ ॥"
इति च तत्र तत्रैव स्थाने । ३४ अः ॥)
तत्प्रमाणं यथा,—
"अहमात्मोद्भवानीहां भूतानां सुहृदीश्वरः ।
अहं सर्व्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ॥"
इति श्रीमद्भागवते ११ स्कन्धे । १६ । १० ॥
स तु ब्रह्मणो गुदतो जातः । यथा,—
"पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ! ।
हिंसायाः निर्ऋतेर्मृत्योर्निरयस्य गुदं स्मृतम् ॥"
इति श्रीभागवते २ स्कन्धे ५ अध्यायः ॥
कल्पान्तरे भयात् मायायां जातः । यथा,—
"हिंसा भार्य्या त्वधर्म्मस्य तयोर्जज्ञे तथाऽनृतम् ।
कन्या च निर्ऋतिस्ताभ्यां भयं नरकमेव च ॥
माया च वेदना चैव मिथुनं त्विदमेतयोः ।
भयाज्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् ।
वेदना च सुतश्चापि दुःखं जज्ञेऽथ रौरवात् ॥*॥
अस्यापत्यादि यथा,—
"मृत्योर्व्याधिर्जराशोकस्तृष्णाक्रोधश्च जज्ञिरे ।
दुःखोत्तराः स्मृता ह्येते सर्व्वे चाधर्म्मलक्षणाः ।
नैषां भार्य्यास्ति पुत्रो वा सर्व्वे ते ऊर्द्ध्वरेतसः ॥
निर्ऋतिश्च तथा चाज्ञा मृत्योर्भार्य्याभवन् सुते ॥
अलक्ष्मीर्नाम तस्याश्च मृत्योः पुत्राश्चतुर्दश ।
अलक्ष्मीलक्षका ह्येते मृत्योरादेशकारिणः ।
विनाशकाले च नरान् भजन्त्येते ह्यलम्बुषा तान् ॥
इन्द्रियेषु दशस्वेते तथा मनसि च स्थिताः ।
ते ते नरं स्त्रियं वापि विषये योजयन्ति च ॥
तथेन्द्रियाणि चाक्रम्य रागलोभादिभिर्नरान् ।
योजयन्ति तथा हानिं यान्ति धर्म्मादिभिर्हि ते ॥
अहङ्कारगताश्चार्थे तथार्थे बुद्धिसंस्थिताः ।
विनाशाय नरस्त्रीणां यतन्ते मोहसंज्ञया ॥
एवं स्वधर्म्मयोगेन सर्व्वे चापि भयङ्कराः ॥"
इति मार्कण्डेयपुराणे दुःसङ्गग्रहणं नामाध्यायः ॥ विष्णुपुराणे अष्टमेंऽशे सप्तमोऽध्यायश्च ॥
मृत्युग्रहापकारिद्रव्याणि यथा,—
दत्तात्रेय उवाच ।
"अरिष्टानि महाराज ! शृणु वक्ष्यामि तानि ते ।
येषामालोकनान्मृत्युं निजं जानाति योगवित् ॥
दैवमार्गे ध्रुवं शुक्रं सोमच्छायामरुन्धतीम् ।
यो न पश्येन्न जीवेत् स नरः संवत्सरात् परम् ॥
अरश्मिं बिम्बं सूर्य्यस्य वह्निचेष्टां शुभान्वितम् ।
दृष्ट्वे कादशमासेभ्यो नरो गोर्द्धं स जीवति ॥
वाल्यां मृत्वे पुरीषे वा सुवर्णं रजतं यथा ।
प्रत्यक्षमथवा स्वप्ने जीवितं दशमासिकम् ॥
दृष्ट्वा प्रेतपिशाचादीन् गन्धर्व्वनगराणि च ।
सुवर्णवर्णान् दृष्ट्वा च नव मासान् स जीवति ॥
स्थूलः क्षयः क्षयः स्थूलो योऽक्षादेव जायते ।
प्रक्षतेश्च निवर्त्तेत तस्यायुश्चाष्टमासिकम् ॥
खरं यस्य पदं प्राप्यो पादस्थाग्रेऽथवा भवेत् ।
पांशुकर्द्दमयोर्मध्ये सप्त मासान् स जीवति ॥
कपोतश्यामकाकोला वायसो वापि मूर्द्धनि ।
क्रव्यादो वा खगो क्रौञ्चः वक्षसायुःप्रदर्शकः ॥
दृश्यते काकपक्षौभिः पांशुवर्षेण वा पुनः ।
स्वच्छायायाश्चयथा दृष्ट्वा पञ्च मासान् स जीवति ॥
अग्नौ विद्युतं दृष्ट्वा दक्षिणां दिशमाश्रिताम् ।
पयसीन्द्रधनुर्व्वापि जीवितं द्विमासिकम् ॥
घृते तैले तथादर्शे तोये वा चात्मनस्तनुम् ।
यः पश्येदशिरस्कां वा मासादूर्द्धं न जीवति ॥
यस्य वक्षसमो गन्धो गात्रे ध्रुवसमोऽपि वा ।
तस्यार्द्धमासिकं ज्ञेयं योगिनो नृप ! जीवितम् ॥
यस्य वै स्नातमात्रस्य क्षुत्पादमवगुप्यति ।
पिबतश्च जलं शीघ्रो दशाहं सोऽपि जीवति ॥
स्नग्भितो मारुतो यस्य मर्म्मस्थानानि हन्ति च ।
न कुप्यत्यनुषंसर्गात्तस्य मृत्युरुपस्थितः ॥
ऋक्षवानरयुग्मस्थो गायन् यो दक्षिणां दिशम् ।
स्वप्ने प्रयाति तस्यापि न मृत्युः कालमृच्छति ॥
रक्तस्रजाम्बरधरा गायन्ती हसती च यम् ।
दक्षिणाशां नयेन्नारी स्वप्ने सोऽपि न जीवति ॥
नग्नं क्षपणकं स्वप्ने हसमानं प्रहृष्य वै ।
एवं वा वीक्ष्य वल्गन्तं विद्यान्मृत्युमुपस्थितम् ॥
आमस्तकतलादृश्यं निमग्नं पङ्कसागरे ।
स्वप्ने पश्येत्तथात्मानं नरः सद्यो म्रियेत सः ॥

केशाङ्गारांस्तथा भस्म सुजगं निर्जलां महीम्।
दृष्ट्वा स्वप्ने दशाहेन मृत्युरेकादशेऽहनि।
करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः।
पाशाबैस्ताड़ितः स्वप्ने सद्यो मृत्युं समाप्नुयात्।
सूर्योदये यस्य शिवा क्रोशन्ती याति सम्मुखम्।
विपरीतं परीतं वा स सद्यो मृत्युमृच्छति।
यस्य वै सुप्तमात्रेऽपि हृदयं पीड्यते क्षुधा।
जायते दन्तसंघर्षः स मृतायुरसंशयम्।
दीपादिगन्धं नो वेत्ति भ्रमत्यग्निं तथा निशि।
नात्मानं परमेवस्थं वीक्षते न स जीवति।
भ्रूक्षायुधध्वजैर्राजे दिवा यद्गगनं तथा।
दृष्ट्वा मन्येत संक्षीणमात्मजीवितमात्मवान्।
नासिका वक्रतामेति कर्णयोर्नम्रतोन्नतौ।
नेत्रञ्च वामं स्रवति यस्य तस्यायुरक्षतम्।
आरक्ततामेति सुखं जिह्वा वापि सिता तथा।
तदा प्राज्ञो विजानीयान्मृत्युमासन्नमात्मनः।
उद्वरासनयानेन यः स्वप्ने दक्षिणां दिशम्।
प्रयाति तं विजानीयात् सद्यो मृत्युं नरेश्वर!।
पिधाय कर्णौ निर्घोषं न शृणोत्यात्मसम्भवम्।
नश्यते चक्षुषोर्ज्योतिर्यस्य सोऽपि न जीवति।
प्रतनो यस्य वै गर्त्ते स्वप्ने द्वारं पिधीयते।
न चोत्तिष्ठति यः स्वभात्तदन्तं तस्य जीवितम्।
जह्वौ च दन्तिनं च संप्रतिष्ठा
रक्षा पुनः संपरिवर्तमाना।
सुखस्य चोक्षा शिथिरा च नाभिः
शंसन्ति पुंसामपरं शरीरम्।
स्वप्नेऽग्निं प्रविशेद्दृष्ट्वा न च निष्क्रमते नरः।
जलप्रवेशादपिवा तदन्तं तस्य जीवितम्।
यश्चाभिहन्यते दुष्टैर्भूतैः रात्रावथो दिवा।
स मृत्युं समरात्रान्तात् पुमान्नाप्नोत्यसंशयम्।
स्ववस्त्रमन्नं शुक्लं रक्तं यश्चात्ति चोत्सितम्।
यः पुमान् मृत्युमापन्नं तस्यापि हि विनिर्दिशेत्॥
स्वभावैर्विपरीतान्तु प्रकृतैश्च विपर्ययः।
कथयन्ति मनुष्याणां समाधन्नौ यमान्तकौ।
येषां विनीतः सततं यस्य पूज्यतमा मताः।
तानेव योऽवजानाति तानेव च विनिन्दति।
देवता मार्कण्डेयेदृङ्मान् गुरून् विप्रांश्च निन्दति।
मातापित्रोरसत्कारं जामातृणां करोति यः॥
योगिनां ज्ञानविदुषामन्येषां च महात्मनाम्।
प्राप्तान्तकालः पुरुषस्तद्विद्येयं विचक्षणैः।
योगिना सततं यत्नादरिष्टान्यवलोपते।
संवत्सरान्ते तत्रैव मज्जन्ति दिवानिशम्।
विलोकयति सदा चैव मज्जमद्भिस्तु भीरुवा।"
इति मार्कण्डेयपुराणे अरुकोपाख्याने ४३ अः।
कर्मविशेषान्मृत्युविशेषो यथा,—
"देवानृतानि नोक्तानि प्रीतिभेदः स्तनो नच।
आस्तिकः श्रद्धानश्च न सुखं मृत्युमृच्छति।
आगारदाहिनो दाहं सुखं चानग्निदायिनः।
प्राप्नुवन्ति नराः काले तस्मिन् मृत्यावुपस्थिते।
देवब्राह्मणपूजायां ये रताश्चावसथ्यवः।
दृष्ट्वा ददाना हीमन्तस्ते नराः सुखमृत्यवः।
यो न जामात्र संरम्भान्न देवाद् धर्म्मसुतृप्यते।
यथोक्तकारी सौम्यश्च स सुखं मृत्युमृच्छति।
प्रीतं जयन्तीन्यदाक्षापं चोदकदायिनः।
प्राप्नुवन्ति वेदनां करां ये चान्ये हेयकारिणः।
मोहाज्ञानप्रदातारः प्राप्नुवन्ति महद्भयम्।
कूटसाक्षी मृषावादी यश्चाददुग्राक्षि वै।
ते मोहमृत्यवः सर्व्वे तथान्ये वेदनिन्दकाः।"
इति मार्कण्डेयपुराणे पितापुत्रसंवादे १० अध्यायः। *।
मृत्युकालकर्मसमुद्रजन्तुवधप्रायश्चित्तं यथा,—
"वधेऽपि क्षुद्रजन्तूनां हिंसकानाञ्च यद्भितः।
कार्षापणं ससुतरुण्य मृत्युकाले प्रसूयते।
अहिंसकानां क्षुद्राणां वधे मृतसुतं ध्रुवम्।
प्रायश्चित्तं मृत्युकाले कथितं पद्मयोनिना।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः।
मृत्युसमये भगवदागमनमावश्यकं यथा,—
"अहो सगरवंशेभ्यो निर्व्वाणमुक्तिदायिनी।
वैकुण्ठगामिनां मार्गसोपानरूपिणी वरा।
अतोऽपि मृत्युसमये सतां पुण्यस्वरूपिणाम्।
आदौ यादौ च विन्यस्य सुखे तोयं प्रदीयते।
भगवान्नोपानमारुह्य सन्तो यान्ति ममालयम्।"
इति तत्रैव ३४ अध्यायः। *।
भक्तवतां मृत्योरपरिहार्य्यत्वं यथा,—
"मृत्युर्जन्मवतां वीर! देहेन सह जायते।
अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः।"
इति श्रीभागवते १० स्कन्धे १ अध्यायः।
अपि च।
"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि।"
इति श्रीभगवद्गीता। *।
अकालमृत्युप्रशमनं स्तोत्रं यथा,—
ऋत उवाच।
"स्तोत्रं तत्संप्रवक्ष्यामि मार्कण्डेयेन भाषितम्।
नारायणं सहस्राक्षं पद्मनाभं पुरातनम्।
प्रबलोऽस्मि दुर्बलैकं किं मे मृत्युः करिष्यति॥१॥
गोविन्दं पुष्करीकाक्षमनन्तमजमव्ययम्।
कैशवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥२॥
वासुदेवं जगद्योनिं भानुमन्तमतौजियम्।
दामोदरं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥३॥
ब्रह्मचक्रधरं देवं हृषीकेशमधोक्षजम्।
अधोक्षजं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥४॥
नारसिंहं महाविष्णुं नारसिंहं जनार्द्दनम्।
माधवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥५॥
पुरुषं पुष्करं पुण्यं चेतनीजं जगत्पतिम्।
लोकनाथं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥६॥
सहस्रशीर्षं देवेशं शङ्खचक्रासिधारिणम्।
महायोगं प्रपन्नोऽस्मि किन्नो मृत्युः करिष्यति॥७॥
भूतात्मानं महात्मानं यज्ञयोनिमयोनिजम्।
विश्वरूपं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥८॥
मृत्युदीरितमाकर्ण्य स्तोत्रं तस्य महात्मनः।
अपयातस्ततो मृत्युर्विष्णुदूतैः प्रपीड़ितः।
इति तेन जितो मृत्युर्मार्कण्डेयेन धीमता।
प्रसन्ने पुष्करीकाक्षे दृष्टिं दद्यान्नरस्य हि दुर्लभम्।
मृत्वाऽकमिदं पुण्यं मृत्युप्रशमनं शुभम्।
मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह।
य इदं पठति स्तोत्रं त्रिकालं नियतः शुचिः।
नाकाले तस्य मृत्युः स्यान्नरस्याच्युतचेतसः॥
हृत्पद्ममध्ये पुरुषं पुराणं
नारायणं शाश्वतमादिदेवम्।
विचिन्त्य सूर्य्यादितिराजमानं
मृत्युं स योगी जितवान्सदैव।"
इति गारुड़े २१८ अध्यायः। *।
शुभकर्म्मप्रतिबन्धकमृत्युदा योगा यथा,—
"आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः।
बुधे जया गुरौ रिक्ता शनौ पूर्णा च मृत्युदा।"
अपि च।
"रव्यादिदिवसैर्युक्ता विशाखादिचतुष्टयः।
उत्पाटा मृत्यवः काला अष्टतानि यथाक्रमम्।"
इति ज्योतिस्तत्त्वम्।
मृत्युञ्जयः, पुं, (मृत्युं जितवान्। जि+क्यच्+सुम् च।) शिवः। इत्यमरः। तन्नामकारणं यथा,—
सुयज्ञ उवाच।
"शिवो जीवो निर्गुणो चेत् श्रीकृष्णे प्राकृते लये।
कथं तव गुरोर्नाम मृत्युञ्जय इति श्रुतौ।"
सुतपा उवाच।
"ब्रह्मणोऽन्ते मृत्युकन्या प्रनष्टा जलबिन्दुवत्।
संहर्त्री सर्व्वलोकानां ब्रह्मादीनां नराधिप!।
कतिधा मृत्युकन्यानां ब्रह्मणां कोटिशो लये।
कालेन जीवः प्रभुश्च सत्यरूपी च निर्गुणः।
मृत्युकन्या जिता प्रभुत शिवेन गुरुणा मम।
न मृत्युना जितः प्रभुः कल्पे कल्पे श्रुतौ श्रुतम्।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः।
रोगशान्त्यर्थं तस्य पूजाविधिर्यथा,—
"मृत्युञ्जयं समापूज्य जिष्णुं त्रिभुवनेश्वरम्।
रोगार्त्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात्।
यस्तु संपूजयेद्भक्त्या जिष्णुं मृत्युञ्जयाभिधम्।
यमोऽपि प्रणमेद्भक्त्या किं करिष्यति मानवः।
तस्य पूजाविधिं वक्ष्ये शृणु मत्प्राणवल्लभे!।
जातिमेदे क्षत्रियाणु यद्दीक्षाप्रीतितोजकम्।
निर्म्माय पार्थिवं जिष्णुं कांस्याधारे निवेशयेत्।
पौराणिकेन मन्त्रेण कुर्य्याच्च स्नपनं बुधः।
स्नापयेत् पञ्चगव्येन प्रत्येकस्याष्टतोजकम्।
सहस्रमन्त्रेण प्रत्येकद्रव्येण स्नापयेत् सुधीः।
रोगक्षयकामनया नामगोत्रादिपूर्व्वकम्।
उपविश्यासने विप्रो धृत्वा धौते च वाससी।
रुद्राक्षमालां कण्ठे वै धृत्वा भस्मत्रिपुण्ड्रकम्।
उपचारं षोड़शकं देयं भक्त्या प्रयत्नतः।
सुवर्णस्यासनं देयं तथैवाभरणानि च।
वस्त्रयुग्मं प्रदद्यात्तु परिधेयं यथा भवेत्।
मधुपर्के कांस्यपात्रे दद्याद्भोजनयोग्यकम्।
विल्वपत्रसहस्रञ्च अभयं विनिवेदयेत्।
एवं संपूज्य जिष्णुं जपेन्मन्त्रं सहस्रकम्।
ततो होमं प्रकुर्य्याच्च दक्षिणां ब्राह्मणे ददेत्।

सुवर्णं वा तदर्द्धं वा देवि ! विभवमागतः ।
अङ्गहीना न कर्त्तव्या पूजा चापफलदा यतः ॥
एकविङ्गं समाराध्य फलं स्यादन्यके युगे ।
तत् फलं लभते देवि ! कलौ संख्या चतुर्गुणा ॥
ताम्रपात्रे तु संस्थाप्य अग्नौतितोलकं जलम् ।
तज्जलेनैव देवेशि ! कुर्य्यात् संमार्ज्यं रोगिणम् ॥
त्रिपेद्दीपशिखायाच मन्त्रमुच्चार्य मामकम् ।
एवंविधिविधानेन पूजयेन्मम लिङ्गकम् ॥
बाडगयाडगभवेद्रोगो नाशमेति मयोदितः ।
लाङ्गेन पूजयित्वा च लभते वाञ्छितं फलम् ॥
अङ्गवैकल्यमेवैव वृथा भवति वाचना ।
रोगी प्रमुच्यते सद्यो भोगीव कचुकोज्झितः ॥
यदि मदचने भक्तिस्तदा मुक्तो भवेन्नरः ॥"

इति मृत्युञ्जयतन्त्रम् ॥

(ज्वरनाशकौषधविशेषः । तद्यथा,—
"अयक्तः सिद्धिदः शुद्धो रोगघ्नः कीर्त्तिवर्द्धनः ।
यशःप्रदः शिवः शान्तात् मृत्युञ्जयरसः स्मृतः ॥
विषस्यैकत्तथा भागो मरीचं पिप्पली तथा ।
गन्धकस्य तथा भागो भागः स्याद्वङ्गस्य वै ॥
सर्वेषां समभागः स्यादिङ्गुलन्तु द्विभागकम् ।
चूर्णयेत् खल्वमध्ये तु मुहूर्त्तमात्रं घटीचरेत् ॥
रसचेत् समभागः स्यादिङ्गुलं नेष्यते तदा ।
मृत्युरूपं ज्वरं हन्ति मृत्युञ्जयरसः स्मृतः ॥
मृत्युर्विनिर्जितो यस्मात्तस्मान्मृत्युञ्जयः स्मृतः ।
मधुना वेष्टनं प्रोक्तं सर्वज्वरनिवृत्तये ॥
दध्योदकानुपानेन वातज्वरनिवर्हणः ।
आर्द्रकस्य रसैः पानं दाहजे सन्निपातिके ॥
जम्बीररसयोगेन सर्वज्वरविनाशनः ।
अजाक्षीगुडसंयुक्तो विषमज्वरनाशनः ॥
तीव्रज्वरे महाघोरे पुरुषे यौवनान्विते ।
पूर्णमात्रा प्रदातव्या पूर्णे घटीचतुष्टये ॥
स्त्रीबालवृद्धयोश्चैव अर्द्धमात्राः प्रकीर्त्तिताः ।
नवज्वरे महाघोरे यामैकान्नाशयेद्ध्रुवम् ॥
मध्यज्वरे तथाजीर्णे त्रियामान्नाशयेद्ध्रुवम् ।
सन्नाहात् सन्निपातोत्थं ज्वराजीर्णसंभवं
कम् ॥"

इति मृत्युञ्जयो रसः ॥ इति वैद्यकरसेन्द्रसार-
संग्रहे ज्वराधिकारे ॥ क्ली, ज्ञानविशेषः । यथा,
ब्रह्मवैवर्त्तपुराणे प्रकृतिखण्डे । ३६ । ६५ ।
"घ्रम्भुञ्च चतुरो वेदान् वेदाङ्गानितरांस्तथा ।
वाजकं पाठयामास ज्ञानं मृत्युञ्जयं परम् ॥")

मृत्युनाशकः, पुं, (नाशयतीति । नश् + णिच् +
ण्वुल् । मृत्योर्नाशकः ।) प्रारदः । इति राज-
निर्घण्टः ॥ मरुवकारके, त्रि ।

मृत्युपुष्पः, पुं, (मृत्यवे निजनाशाय पुष्पमस्य । यति
पुष्पोद्गमे अस्य नाशात्तथात्वम् ।) इक्षुः । इति
रत्नमाला ॥

मृत्युफलः, पुं, (मृत्यवे स्वनाशाय फलमस्य ।) महा-
कालफलम् । इति मेदिनी । ले, १४२ ॥

मृत्युफला, स्त्री, (मृत्यवे फलमस्याः ।) कदली ।
इति मेदिनी । ले, १४२ ॥ (कदलीशब्देऽस्या
विवरणं ज्ञातव्यम् ॥)

मृत्युबीजः, पुं, (मृत्यवे स्वनाशाय बीजमस्य ।)
वंशः । इति त्रिकाण्डशेषः ॥

मृत्युभङ्गुरकः, पुं, मरुवकालवादनीयपटहः । यथा,
"भवेत् प्रेतपटहो मृत्युभङ्गुरकश्च सः ।"

इति त्रिकाण्डशेषः ॥

मृत्युभृत्यः, पुं, (मृत्योर्भृत्यः किङ्कर इव । मरण-
हेतुत्वात् ।) रोगः । इति राजनिर्घण्टः ॥

मृत्युवचनः, पुं, (मृत्युं वचयतीति । वचि + ल्युः ।)
शिवः । विश्वदृश्वः । इक्काकः । इति मेदिनी ।
ने, २४५ ॥

मृत्युसुतिः, स्त्री, मृत्यवे सुतिः प्रसवो यस्याः सा ।
कर्कटी । यथा,—
"यथा कर्कटकी गर्भमाधत्ते मृत्युमात्मनः ।"

इति महाभारते विराटपर्व्व ॥

मृत्सा, स्त्री, (प्रशस्ता मृत् इति । मृत् + "सर्व्व
प्रशंसायाम् ।" ५ । ४ । ३० । इति सः । टाप् ।)
प्रशस्तमृत्तिका । इत्यमरः । २ । १ । ४ ॥

मृत्सा, स्त्री, (प्रशस्ता मृत् इति । मृत् + सः ।
टाप् ।) प्रशस्तमृत्तिका । (यथा, श्रीमद्भागवते ।
८ । ६ । १० ।
"त्वमादिरन्तो जगतोऽस्य मध्यम्
घटस्य मृत्स्नेव परः परस्मात् ॥")
काञ्ची । इत्यमरः । २ । १ । ४ । (अस्याः पर्य्यायो
यथा,—
"सौराष्ट्री मार्त्तिकी मृत्सा काञ्ची च पङ्क-
पर्पटी ।"

इति वैद्यकरत्नमालायाम् ॥)

मृत्साभाण्डकः, पुं, (मृत्सानिर्म्मितं भाण्डम् ।
ततः कन् । अभिधानात् पुंस्त्वम् ।) भाण्डविशेषः ।
तत्पर्य्यायः । सुक्तिका २ । इति त्रिकाण्डशेषः ॥

मृद, ग क्षुदि । इति कविकल्पद्रुमः । (क्रयां-
परं०-सकं०-सेट् ।) ग, मृद्नाति ममर्द । क्षुदि
चूर्णीकरणे । इति दुर्गादासः ॥

मृद्, [तृ] स्त्री, (मृद्यते चूर्णीक्रियते इति । मृद् +
कर्म्मणि क्विप् ।) मृत् । मृत्तिका । इत्यमरः ।
२ । १ । ४ । (यथा, मनौ । ४ । ३६ ।
"मृदं गां देवतं विप्रं घृतं मधुचतुष्पथम् ॥")

मृद्गुरः, पुं, हारीतपक्षी । इति हेमचन्द्रः ।
४ । ४०७ ॥

मृदङ्गः, पुं, (मृद्यते आहन्यते असौ इति । मृद् +
"विड्वनिभ्यः क्तिः ।" उणा० १ । १२० । इति
अङ्गच् । सच कित् । यद्वा, मृत् अङ्गमस्येत्यमर-
टीकायां रघुनाथः ।) खनामख्यातवाद्यम् ।
तत्पर्य्यायः । मुरजः २ । इत्यमरः । २ । ७ । ५ ॥
(यथा, शिशुपालवधे । ११ । २ ।
"रजनिविरतिशृङ्खी कामिनीनां भविष्यद्-
विरहविहितनिद्राभङ्गसूचेर्मृदङ्गः ॥")
पटहः । घोषः । इति मेदिनी । गे, ४७ ॥
वंशः । इति शब्दमाला । (मृदङ्गादेर्मङ्गल-
जनकत्वमाह स्मृतिः ।
"रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम् ।
गुरूनग्निं तथा सूर्य्यं प्रातः पश्येत् सदा पुमान् ॥")

अथ मृदङ्गादिविवरणम् ।
"मर्द्दलः खादिरः श्रेष्ठो हीनः स्यादन्यदारुजः ।
रक्तचन्दनजो वाद्यो गभीरध्वनिरुच्यते ॥
सार्द्धहस्तप्रमाणन्तु दैर्घ्यमस्य विधीयते ।
त्रयोदशाङ्गुलं वाममथवा द्वादशाङ्गुलम् ॥
दक्षिणञ्च भवेद्धीनमेकैनाङ्गुलेन वा ।
करभागहृदग्नौ मध्ये चैव पृथुर्भवेत् ॥
वक्षाकीयो भवेदस्यलक्षणकरणं मतम् ।
चर्म्मकाग्निर्म्मितश्चैव मृदङ्गः परिकीर्त्तितः ॥
पातयेत् खरलिं वाद्यवादनार्थञ्च मर्द्दले ।
विभूतिर्गैरिकं भस्म केशूकेन च संयुतम् ॥
यद्वा पिष्टीटकं देयं जौवनीसत्त्वमिश्रितम् ।
सर्व्वमेकत्र पिष्ट्वात्तेन खरलिरुच्यते ॥
वामास्ये पूरिकां दत्त्वा लेपं दद्याच्च दक्षिणे ।
एवं मर्द्दलकः प्रोक्तः सर्व्ववाद्योत्तमो मतः ॥
अस्य संयोगमात्राद्य सर्व्वं वाद्यच शोभते ।
एतदङ्गे चौलकाङ्गे दलमर्द्धाङ्गुलं विदुः ॥ ● ॥
तधि धीतेमिति शेषः । पाढ़वर्णा मृदङ्गजाः ।
धीं धं धिं धिक्टक्टकी तार्कं धं धं धोगं धिधि ॥
खर्भंभिं गं गटं दं धा कुटपाटा मता अमी ।
तधिं धीं धिं तकधी दीं दं धिगुजां ततं तधि ॥
तक तं धं धि दीं तांधि पाढ़खके लयं क्रमः ।"
तथा च यतिमाने पाढ़खकः । द्रगतधेजां
द्रगतधेजां धो धो धिकता धिका धोजां धोजां
तक तता धिका धोता द्रग तता धि धि धिधि
कट तांकट नाधोधिक धोजां धोताद्रगत
तांद्रगत तांद्रगत तांधि । इति यतिमाने पाढ़
खकः ॥ ● ॥
"यतिरोढ़ोऽप्यवच्छेदो गजरो रूपकं ध्रुवम् ।
गजपः सारिगोजौ च नादश्च कथितं तथा ।
प्रहरकं इन्दश्च प्रबन्धा द्वादश स्मृताः ॥"
यथा । धं धात द्रधिकतांख्यां यतिः ॥ ● ॥
ओढ़वाद्यं यथा । धां तधो तधिक तधिक धं
धादं धा धोधि धोधि तत्त तत्तथ धिध धिधिधां
दिधां टटु न किं टटु नकि तद टङ्क तद टङ्क
खवटङ्क खवटङ्क तगि नगि तगि नगि धां धां
धं धं धीं धीं धं ता तथा । इत्योढ़वाद्यम् ॥ ● ॥
अवच्छेदवाद्यं यथा । धं धातः धं धातः धिधि
धिधि दिगधं धं धातः । इत्यवच्छेदवाद्यम् ॥●॥
गजरवाद्यं यथा । धोक टेक नेक धिं डिं गधो
गधोङ्क टेङ्क धोगतकि धिक तकि धिक टेङ्कन
धि धि कट तक धोक तधिकट तकाक तधोग
तङ्कीम् । इत्यधिकतांख्यां गजरः ॥ ● ॥ रूपक-
वाद्यं यथा । तकधिक् तकधिक धवितकि धवि-
तकि धिक धं धातः । इति रूपकवाद्यम् ॥●॥
ध्रुवकवाद्यं यथा । तक तकट धिक धिकट ।
इति त्रिसारवाद्ये ध्रुवकः ॥ ● ॥ गजपो यथा ।
तधिङ्गि धिक तक तधि-गजगं धा धा धिं तथा
टनन । इत्यधिकतांख्यां गजपः ॥ ● ॥ सारिगोजौ
यथा । धोङ्कटेक तक धिक तकधिक् तकधो
टङ्कन टङ्कन धोगक धोः । इति प्रथम-
खकः ॥ ● ॥ टेक धोः धि धोः टेक टेक

दश तगदक धिक तदिदक दं गदं गखो गखोक तक तक धिक तधिक् तधो ठेन घोटेन घटे गल खोगगख खोग खोहट गें टगें खोहटेन। इत्यस्य छन्दनम्। इति वारिगोत्रो। नादो यथा,—

"हांकारत्रितयं पूर्व्वं त्रां धिगिति ततत्रयम्।
हां हां धिक्त्रयं वक्त्र इति नादः प्रचौदितः॥"
इति नादः॥

"हृतं मायवमारब्धं मुहं कूटविनिर्म्मितम्।
सप्तषष्ठमयं वाद्यं कथितं तद्विशोधते॥" ७॥

द्रुतमानत्वात् प्रतितालो यथा। तत्तत तत्तत तक्कि तक्कि दिदं धिगनथो धिगनथो धिक धिक् धिक् धिक धिक नगि नगमि थो थो धि धि धिः हां हां धिक थो थो थो हथो छनगि थो नगिथो थोह थोह डेटि डेटि थोह थोह तटि तटि तटुक गीं गीं धगि धगि तत तथे तत तथे ततत गिडी गडी थोग थोग थों थोगग थोगथो तत्ततो।

"इति सप्तप्रकाराद्याः कथितं वाद्यपद्धिताः।
प्रतितालेन तालेन पादवर्त्तसमासतः॥
गन्धर्व्वपतिना पूर्व्वमुर्व्वशीलास्यकर्म्मणे।
सुखसौरङ्गनार्थाय कथितं प्रकटीकृतम्॥"
प्रहरणं यथा। थोगक्का तद्विका थाग कट गगों दं थोग दिद्विक धिक धिकटेन। इत्यलंकारतालाख्यं प्रहरणम्॥ ७॥

"यत्र विसृज्यते येन छन्दनं तन्निगद्यते।"
यथा,तद्विथो दिम टेन तम्नः। इति छन्दनम्॥ ७॥

महेन्द्रवयोदशाङ्गुलवामसुखो द्वादशाङ्गुलदक्षिणसुखः। सुरजस्तदाद्यङ्गुलवामसुखः सप्तदशाङ्गुलदक्षिणसुखः महेन्द्रसुरजयोरयं भेदः। इति सङ्गीतदामोदरः॥

मृदङ्गफलः, पुं, (मृदङ्गस्तदाकृति फलमस्य।) पनसवृक्षः। इति शब्दरत्नावली॥

मृदङ्गवल्लिनी, स्त्री, (मृदङ्गवत् फलमस्यास्याः। इषिः ङीप् च।) कोशातकी। इति राजनिर्घण्टः॥ (विस्तरोऽस्याः कोशातकीशब्दे ज्ञेयः।)

मृदङ्गी, स्त्री, (मृदङ्गः तदाकारफलमस्यस्या इति। मृदङ्ग+अर्शआद्यच् ङीप् च।) कोशातकी। इति रत्नमाला। घेतघोषा इति भाषा॥

मृदा, स्त्री, (मृद्+टाप्।) मृत्तिका। इति हिरूपकोषः॥

मृदाकरः, पुं, वस्त्रम्। इति शब्दमाला॥

मृदितः, त्रि, मृदधातोः कर्म्मणि क्तः। चूर्णीकृतः। (यथा,—

"चित्रोक्षतोये मृदितः फाण्ट इत्यभिधीयते॥"
इति वैद्यकपरिभाषायाम्॥)

मृदिनी, स्त्री, (मृद्+भावे क्तः। मृदः चूर्णीकरणमस्यस्याः। मृद+इनिः। स्त्रियां ङीप्।) प्रसृतमृत्तिका। इति शब्दचन्द्रिका॥

मृदुः, त्रि, (म्रियते म्रदितुं शक्यते इति। मृद्+"प्रथिम्रदिभ्रसृजां संप्रसारणं सलोपश्च।" उणा० १। २६। इति कुः।) अतीक्ष्णः। कोमलः। इत्यमरः। ३। १। ७८॥ (यथा,—

"मृदौ ज्वरे लघौ देहे प्रथमेह्नि मरुत्सु च।"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)

मृदुकन्थायां स्त्री। इति राजनिर्घण्टः॥ (पुं, नृपञ्जयराजपुत्रः। इति विष्णुपुराणे। ४। २१। ३॥)

मृदुक्षाद्यर्थं, क्ली, (मृदु च तत् क्षाद्यर्थं चेति।) शौचकर्म्म। इति राजनिर्घण्टः॥

मृदुगन्धः, पुं, (मृदूनां गन्धः।) चित्रामुराधाङ्गशिरीरेवतीनक्षत्राणि। यथा। चित्रामित्र मृगाक्षभं मृदुगन्धः। इति ज्योतिस्तत्त्वम्॥

मृदुगमना, स्त्री, (मृदु गमनमस्याः।) हंसी। इति राजनिर्घण्टः॥ मन्दगमना स्त्री च॥

मृदुचर्म्मी, [न्] पुं, (मृदु कोमलं चर्म्म त्वक्। तदस्यास्य। चर्म्म+"श्रीह्रादिभ्यश्च।"५।२।१२। इति इनिः।) भूर्जवृक्षः। इति राजनिर्घण्टः॥ कोमलत्वविशिष्टे, त्रि॥

मृदुच्छदः, पुं, (मृदुः छदः पत्रमस्य।) भूर्जवृक्षः। इति हेमचन्द्रः। ४।२१०॥ गिरिजपीलुवृक्षः। इति जटाधरः॥ कुकुरदुः। श्वेतालः। इति राजनिर्घण्टः॥

मृदुता, स्त्री, (मृदु+तल्+टाप्।) मृदुत्वम्। मृदोर्भावः। इति याकरणम्॥ (यथा, रघौ। ५। ५४॥

"स चानुनीतः प्रणतेन पश्चात्
मया महर्षिर्मृदुतामगच्छत्॥")

मृदुतालः, पुं, (मृदूनि तालफलान्यस्य।) श्वेततालवृक्षः। इति राजनिर्घण्टः॥ कोमलतालश्च॥

मृदुत्वक्, [च्] पुं, भूर्जवृक्षः। इत्यमरः।२।४।४६॥

मृदुत्वचः, पुं, मृदवस्त्वचोऽस्य मृदुत्वक् चान्तः। भूर्जोऽथ भूर्जपत्रः स्यात् मृदुत्वक् पत्रपुष्पकः। इति कोषान्तरमिति मधुः। अदन्तपुंसकत्वचग्रन्थेन आवन्तत्वचाग्रन्थेन वा विग्रहे मृदुत्वचोऽस्योऽपि भूर्जो शुभो बहुपटो बहुत्वक्को मृदुत्वचः। इति स्वामी। इत्यमरटीकायां भरतः॥

मृदुपर्णकं, क्ली, (मृदा मृत्परिणामेन उत् ऊर्द्धं नीयते यत् इति। उत्+नी+डप्रकरणे "अर्त्तेरपि डप्रत्ययः।" ३। २। ४८। इत्यत्र काशिकोक्त्या डः। ततः स्वार्थे कन्।) सुवर्णम्। इति शब्दचन्द्रिका॥

मृदुपत्रः, पुं, (मृदूनि पत्राण्यस्य।) नलः। इति राजनिर्घण्टः॥ कोमलपर्णे, क्ली। तद्वति, त्रि॥

मृदुपत्री, स्त्री, (मृदूनि पत्राणि यस्याः।) चिल्लीशाकम्। इति राजनिर्घण्टः॥

मृदुपर्व्वकः, पुं, (मृदूनि पर्व्वाण्यस्य कप्।) वेत्रः। इति राजनिर्घण्टः॥ कोमलपर्व्वविशिष्टे, त्रि॥

मृदुपुष्पः, पुं, (मृदूनि कोमलानि पुष्पाण्यस्य।) शिरीषवृक्षः। इति रत्नमाला॥ कोमलकुसुमयुक्ते, त्रि॥

मृदुफलः, पुं, (मृदूनि फलान्यस्य।) विकङ्कतः। मधुनालिकेरिकः। विकङ्कटकवृक्षः। इति राजनिर्घण्टः॥ कोमलफलवति, त्रि॥

मृदुलं, क्ली, (मृदु मृदुलमस्यस्य। मृदु+"सिध्मादिभ्यश्च।"५। २। ९७। इति लच्।) जलम्। इति शब्दचन्द्रिका॥ कोमले, त्रि। इत्यमरः। १। १। ७८॥ (यथा, शिशुपालवधे।६। २।

"मृदुलतान्तलतान्तमलोकयत्
स सुरभिं सुरभिं सुमनोभरैः॥")

मृदुलोमकः, पुं, (मृदूनि अल्पसुखानि लोमानि यस्य सः। स्वार्थे कन्।) अजकः। इति हेमचन्द्रः। ४। ३६१॥ कोमलरोमविशिष्टे, त्रि॥

मृदूत्पलं, क्ली, (मृदु कोमलं उत्पलम्।) नीलपद्मम्। इति शब्दचन्द्रिका॥

मृद्वङ्गः, पुं, (मृदं पङ्कं गच्छति कारणत्वेन प्राप्नोतीति। गम्+डः।) मत्स्यभेदः। इति संक्षिप्तसारोणादिवृत्तिः॥

मृद्वङ्गं, क्ली, (मृदु कोमलं अङ्गं यस्य।) वङ्गम्। इति हेमचन्द्रः॥ (मृदु च तदङ्गञ्चेति।) कोमलावयवश्च॥

मृद्वी, स्त्री, (मृदु+"बोतोगुणवचनात्।" ४। १। ४४। इति ङीष्।) कोमलाङ्गी। इति सुश्रुतोक्तयाकरणम्॥ अपि च।

"सद्यः पुरीषपरिसरेषु श्रिरीषमृद्वी
सीता अवाप्तचतुराश्रि पदानि गत्वा।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुषः क्षतवती प्रथमावतारम्॥"
इति महानाटकम्॥

कपिलद्राक्षा। इति राजनिर्घण्टः॥

मृद्वीका, स्त्री, (मृदु+बाहुलकात् ईकन् टाप् च।) द्राक्षा। इत्यमरः। २। ४। १०७॥ (यथा, हरिवंशे। १५। १०।

"जम्बूवेतसवाजीरकदम्बोदुम्बराञ्जनाः।
कौशपूरकमन्दीकाकङ्कोचाः सदाड़िमाः॥")

कपिलद्राक्षा। इति राजनिर्घण्टः॥

मृध, उ न क्षिदि। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्। क्षावेट्।) उ, महिंसा मृद्धा। ण, मर्धति मर्धते। क्षिदि आर्द्रीभावे। इति दुर्गादासः॥

मृध्रं, क्ली, (मर्धते क्षिद्यतीति। मृध्+कः।) युद्धम्। इत्यमरः। २। ८। १०४॥ (यथा, हरिवंशे। १८२। १।

"अपयाते ततो देवे क्षणे चैव महात्मनि।
पुनश्चावर्त्तत मृध्रं परेषां लोमहर्षणम्॥")

मृधा, य, मृषा। इत्यमरटीकासारसुन्दरी॥

मृन्मरः, पुं, (मृत्सु मरः।) पाषाणः। इति त्रिकाण्डशेषः॥

मृग्र, ग्र औ मृग्रि। इति कविकल्पद्रुमः॥ (तुदा०-परं० सक०-अनिट्।) ग्र, मृग्रति। औ, अमार्ग्रीत् अम्राग्रीत् अग्रष्टत्। मृग्रि इति तालव्यान्तस्यैव क्रिपि रूपम्। तेन अनि-

दिरार्थत्वात् सार्थनं प्रतिधानञ्च अस्यार्थः। सार्थने। यथा, रघौ। ३। ६८।

"परान्दृशन् हर्षजडेन पाणिना
तदीयमङ्गं कुलिशव्रणाङ्कितम्।"

प्रतिधाने।

"रामप्रवासे यन्दग्धं नेदं
जनापवादं शमरेन्द्रतुल्यम्।"

कैकयीति भट्टिः।३।७॥

विमर्शं परामर्शः। ऋषि इति ऋर्द्धान्तपाठो ज्ञेयः। तर्हि चमेवार्थः स्यात्। इति दुर्गादासः॥

ऋष, तृ क } क्षान्तौ। इति कविकल्पद्रुमः॥
ऋष, तृ ल } (अदन्त चुरा०-पर०-सक०-सेट्। अन्यत्र, अदन्त भ्वा०-उभ०-सक०-सेट्।) ऋर्द्धनेपयोः। क, ऋषयति। न, ऋषति ऋषते। इति दुर्गादासः॥

ऋष, ड सेचने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्रावेट्।) ड, मर्षिता ऋष्टा। इति दुर्गादासः॥

ऋष, क क्षान्तौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, मर्षयति। अयमात्मनेपदीत्येके। इति दुर्गादासः॥

ऋष, न ड ड क्षान्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-आत्म०-च-सक०-सेट्। क्रावेट्।) न, मर्षति मर्षते। ड, मर्षते। ड, मर्षिता ऋष्टा। अपि गुरुमपराधं मर्षति क्षान्तवानिति ऋजायुधः। इति दुर्गादासः॥

ऋष, ष न क्षान्तौ। इति कविकल्पद्रुमः॥ (दिवा०-उभ०-सक०-सेट्।) ष नृ, ऋष्यति ऋष्यते ममर्ष। इति दुर्गादासः॥

ऋषा, क, (ऋष्यत इति। ऋष्+का।) मिक्षा। इत्यमरः।३।४।२५॥ (यथा, नैषधचरिते।१।६८॥

"ऋषार्थं सादिषे कुतूहला-
ज्जलस्य नाशीरमते विवेनतुः।")

इषा। इति तट्टीकायां भरतसेनः॥

ऋषार्थकं, क्लो, (ऋषा अर्थोऽस्य। बहुव्रीहौ कप्।) अन्नसाधनभावार्थवाचकम्। तत्पर्य्यायः। आहृतम् २। इत्यमरः। १। ६। २१। अन्नसाधनभावार्थे प्रयुक्ते। आहरत्यस्य आहृतं क्तः। ऋषा मिक्षा अर्थोऽस्य ऋषार्थकं इत्य ऋषार्थं यत् सर्व्वथा न घटते। यथा,—

"इत्य वन्यासुतो याति सपुण्यसतगेश्वरः।
कूर्म्मलोमतनूजाभः शुभ्रश्मश्रुजटाधरः इति॥
यावज्जीवमहं मौनी ब्रह्मचारी पिता ममेति।
अस्य चार्यं भेदः मौनित्वं ब्रह्मचारित्वं अन्यत्र सिद्धमेव वन्यासुतत्वं सपुण्यसतगेश्वरत्वमसिद्धमिति। इति भरतः॥

ऋषाध्यायी, [न्] पुं, (ऋषा ध्यायति चिन्तयतीति। ध्यै+णिनिः।) बकः। यथा,—

"बकी बको बकोटश्च तीर्थसेवी च तापसः।
मौनव्रती ऋषाध्यायी निश्चलाङ्गश्च दाम्भिकः॥"

इति राजनिर्घण्टः॥

ऋष्टालकः, पुं. (ऋषा+मिथ्या अचिरस्थायित्वेन सुकुमारोऽलकाल एवेत्यर्थः। अलं अलङ्कारं कायति प्रकाशयतीति। के+कः।) आम्रवृक्षः। इति शब्दचन्द्रिका॥

ऋषावादः, पुं, (ऋषा मिथ्या वादः कथनम्।) मिथ्यावाक्यम्। तत्पर्य्यायः। चङ्गरी २। इति जटाधरः॥ (यथा, महाभारते।३।१८८।१३।

"बहवो नेह राजानः पृथिव्यां मनुजाधिप!।
ऋषावादप्रसक्ताश्च पापाः ऋषावादपरायणाः॥")

ऋषावादी, [न्] त्रि, (ऋषा वदतीति। वद्+णिनिः।) मिथ्यावादकः। तत्पर्य्यायः। ऋषोद्यः। इति शब्दमाला॥ मिथ्याभियोक्ता, च॥

ऋषोद्यं, क्लो,(ऋषा+वद्+"राजसूयसूर्य्यमुद्योद्यकुप्यक्रुधद्रुषद्यपद्याद्याः।"३।१।११४। इति कर्म्मणि क्यप्। निपातितश्च।) मिथ्यावाक्यम्। इति सुग्धबोधव्याकरणम्॥ (यथा, भट्टिकाव्ये। ५।६०।

"ऋषोद्यं प्रवदन्तीं तां सत्यवद्यो रघूत्तमः॥")

ऋषोद्यः, त्रि, मिथ्यावादी। इति शब्दमाला॥

ऋसृं, क्लो. (ऋज+क्तः।) मरिचम्। इति राजनिर्घण्टः॥

ऋष्टः, त्रि, (ऋज+क्त।) प्रोक्षितम्। इत्यमरः। १।४।५६॥ (यथा, हरिवंशे भविष्यपर्व्वणि।

"असुभकरमतोऽन्यथाप्रदिष्टं
स्थितपतितं च करोति ऋष्टमन्नम्॥")

ऋष्टेरकः, पुं, वराहः। मिश्रौ। अतिथिष्टिट्। इति मेदिनी। के, २०६॥

मृ, गि यथे। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-सेट्।) गि, ऋणाति। ऋर्त्तः। ऋत्तिः। इति दुर्गादासः॥

मे, ड प्रतीदाने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-अनिट्।) प्रतीदानं परिवर्त्तः। ड, मयते धान्येन मायं लोकः। इति दुर्गादासः॥

मे, त्रि, मह्यम्। आमाके इति भाषा। मम आमार इतिभाषा। एते अस्मच्छब्दस्य चतुर्थी-षष्ठ्येकवचनाभ्यां निष्पन्ने। इति व्याकरणम्॥

मेकः, पुं, (मे इति कायति शब्दं करोतीति। के शब्दे+कः।) छागः। इति राजनिर्घण्टः॥

मेक(ख)जङ्घजा, स्त्री, (मेक(ख)वः मेखजायुक्तः विम्बमर्म्मतः तस्य जङ्घजा। तस्य पितृदेशात् निःसरतीत्यर्थः।) वर्म्मदात्री। इत्यमरः। २। १०।१२॥

मेक(ख)जात्रिका, स्त्री, (मेक(ख)वात् पितृदेशोपलक्षितात् जर्त्रिका। जन+ड+स्त्रियां टाप्।) वर्म्मदात्री। यथा,—

"रेवेक्षुजा पूर्व्वगङ्गा नर्म्मदा मेकजात्रिका।"

इति हेमचन्द्रः॥

मेक्षणं, क्लो, यज्ञीयपात्रविशेषः। (यथा, आश्वलायनश्रौतसूत्रे।२।६।१२।

"मेक्षणेनादायावदानमन्त्रा जुहुयात्॥")

यथा, मेक्षणादीनाह छन्दोगपरिशिष्टम्।

"इध्मजातीयमिध्माग्रं प्रमाणं मेक्षणं भवेत्।
दृत्तं वार्त्तघ्नं पृथ्वग्रमवदानक्रियाक्षमम्।"

इध्माग्रं प्रमाणम्।

प्रादेशद्वयमिध्माग्रं प्रमाणं परिकल्पितमिति। तदर्हम्। एवेव दर्व्यौ। विशेषस्तु महाव्रते।

"दर्व्यौ द्राक्षणपृथ्वग्रा तुरीयेव तु मेक्षणम्।
सुवोदूखले वार्त्ते खादते सुहवि तथा।"

इति संस्कारतत्त्वम्॥

मेखला, स्त्री, (मीयते प्रक्षिप्यते कायमध्यभागे इति। मि+संज्ञायां खलः गुरुश्च स्त्रियां टाप्। इत्यमरटीकायां भरतसेनः।) स्त्रीकट्याभरणम्। चन्द्रहार भेदः इत्यादि भाषा॥ (यथा, रघुवंशे। ८। ६३।

"असमाप्य विलासमेखलां
किमिदं क्षिप्तरतेव! सुप्यते॥")

तत्पर्य्यायः। काञ्ची २ सप्तकी ३ रसना ४ सारसनम् ५। इत्यमरः।२।६।१०८॥ काञ्चिः ६ रशना ७ कक्षा ८ रसनम् ९ रशनम् १० कक्षा ११ सप्तका १२ सारशनम् १३। इति शब्दरत्नावली। कलापः १४। इति जटाधरः॥ सारसनं स्त्रीकट्यां बन्धयन्त्रणम्। इति हेमी॥ केचित्तु।

"एकयष्टिर्भवेत् काञ्ची मेखला सप्तयष्टिका।
रसना षोडश ग्रेया कलापः पञ्चविंशकः॥"

इति पठन्ति। इह तमेदात् पर्य्यायता। इति भरतः॥ जङ्घादिविन्यस्तम्। इत्यमरः। २। ८। ६०॥ शिञ्जनिका। चर्म्मरज्वादि। सुष्टिदार्ढ्यार्थं उपर्य्यधो बौदनम्। इत्येके। इत्यपि भरतः॥ ७॥ ग्रैवेयकितम्। इति मेदिनी। के, १२५॥ वर्म्मदात्री। इति शब्दरत्नावली॥ पृश्निपर्णी। इति राजनिर्घण्टः॥ ७॥ उपनयनकाले सारशीयसप्तग्रन्थिसंयुक्तब्रह्मसूत्रम्। यथा। अथैनं माउवकमाचार्य्यश्चिः प्रदक्षिणं त्रिरुक्तसप्तग्रन्थिमेखलां परिधापयन् मन्त्रमेनं वाचयति। इति भवदेवभट्टः॥ अपि च। गोभिजः। सप्तकाण्डतास्त्रयो रसनाः। सप्तः शरः। तास्रयः शब्दसङ्ख्या तास्त्री। रसना मेखला। तथा च मनुः।

"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला।
क्षत्रियस्य तु मौर्व्वीया वैश्यस्य शणतान्तवी॥
तृतीयेषु च सर्व्वेषु यथालाभं तु कारयेत्।
सप्तानामि तु कार्य्येषां श्लक्ष्णाश्लक्षणकमेखलाः।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा॥"

इति संस्कारतत्त्वम्॥

अन्यच्च।

"गर्भाष्टमेऽब्दे कर्त्तव्यो ब्राह्मणस्योपनायनः।
दण्डौ च मेखलां कृष्णां ब्रह्मणश्चिनधरो मुनिः॥
मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला।
मौञ्जाभावे कुशैर्नाद्यैस्त्रिभिर्वैकेन च त्रिभिः॥"

इति कौर्म्मे उपविभागे ११ अध्यायः॥

होमकुण्डोपरिस्थदर्भवेष्टनविशेषः। यथा, यज्ञिदर्पणे।

"यावान् कुक्षस्य विस्तारः खननं तावदिष्यते। दक्षैके मेखलास्तिस्रो वेदाग्निनयनागुणाः॥ कुक्षे दक्षिणे ता ग्रेया रसवेदगुणागुणाः। चतुर्दक्षे तु कुक्षे ता वसुतर्कयुगागुणाः॥" मेखला ब्रह्मचारिमेखलावत् कुक्षवेष्टिता दृढ़घटिता ताश्च खातदेशाद्दक्षे एकाङ्गुलिरूपं कक्षं परित्यज्य उच्छ्रायेण विस्तारेण चैतादि क्रमेण वेदाद्यगुणाः एतद्विपरीतास्तत्तन्मानरोक्ता अवधारविरहाः। वेदाश्चत्वारः अयमयस्यः नयने द्वे रसाः षट् गुणास्त्रयः। वसुतर्कयुगानि अष्टषट्चत्वारि। पिङ्गलामतेऽपि। खाता-देकाङ्गुलं त्यक्त्वा मेखलानां विधिर्भवेत्। इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम्। (यज्ञवेदन-क्षत्रम्। यथा, श्रीमद्भागवते। ४। ५। १५। "दक्षयज्ञयज्ञपात्राणि तथैकौशनयाग्नयन्। कुक्षेम्बमन्त्रयन् केचिद्विभिर्वेदिमेखलाः।" "मेखलाः सोमाक्रान्त्राणि।" इति तट्टीकायां श्रीधरस्वामी।)

मेखलकन्यका, स्त्री, (मेखलस्य मेखलोपलक्षितस्य विन्ध्यगिरेः कन्यकेव प्रकृता।) नर्म्मदानदी। इत्यमरटीकायां भरतः॥

मेघः, पुं, (मेहतीति। मिह्+अच्। "न्यङ्क्वा-दीनाञ्च।" ७। ३। ५३। इति कुत्वम्।) मुस्तकः। राक्षसः। इति शब्दरत्नावली। खनामख्यातद्रव्यपदार्थः। मेहति सिञ्चति वः। तत्पर्य्यायः। अब्भम् २ वारिवाहः ३ स्तनयित्नुः ४ बलाहकः ५ धाराधरः ६ जल-धरः ७ तड़ित्वान् ८ वारिदः ९ अम्बुभृत् १० घनः ११ जीमूतः १२ सुदिरः १३ जलमुक् १४ धूमयोनिः १५। इत्यमरः। १। ३। ७। अभ्रम् १६ पयोधरः १७ अम्भोधरः १८ व्योमधूमः १९ घनाघनः २० वायुदावः २१ नभस्वरः २२ कन्धरः २३ कन्धः २४ गौरदः २५ गगनध्वजः २६ वारिमुक् २७ वार्मुक् २८ वनमुक् २९ अब्दः ३० पर्ज्जन्यः ३१ नभोगजः ३२ मदयित्नुः ३३ कदः ३४ कन्दः ३५ गवेडुः ३६ गदाम्बरः ३७ खतमालः ३८ वातरथः ३९ श्वेतनीलः ४० नागः ४१ जलकरङ्कः ४२ वेषकः ४३ मेकः ४४ दर्दुरः ४५। इति शब्द-रत्नावली। अम्बुदः ४६ तोयदः ४७ अम्बुवाहः ४८। इति रत्नमाला। पायोदः ४९ गदाम्बरः ५० गाङ्गवः ५१ वारिमषिः ५२। इति त्रिकाण्ड-शेषः। तद्दिकपर्य्यायाः। अद्रिः १ गोवा २ शैलः ३ वज्रः ४ अश्मः ५ पुरभोजाः ६ बलि-भुजाः ७ अक्ष्मा ८ पर्व्वतः ९ गिरिः १० व्रजः ११ चक्रः १२ वराहः १३ भ्रमरः १४ रौहिणः १५ रैवतः १६ वलिजः १७ उपरः १८ उपलः १९ चमसः २० अद्रिः २१ अभ्रम् २२ बलाहकः २३ मेघः २४ ऋतिः २५ ओदनः २६ वृत्रभिः २७ हरः २८ असुरः २९ कोग्रः ३०। इति त्रिंशन्मेघनामानि। इति वैद्यनिघण्टौ। १। १०॥ (यथा, उत्तररामचरिते। २।

"मेघमालेव यच्चायमारादपि विभाव्यते॥") मेघनायका यथा,—

"त्रिभुते ग्राकवर्षे तु चतुर्भिः श्रोधिते क्रमात्। आवर्त्ते विद्धि सम्वर्त्ते पुष्करं द्रोणमम्बुदम्॥" एषां फलानि।

"आवर्त्तो निर्जलो मेघः सम्वर्त्तश्च बहूदकः। पुष्करो दुष्करजलो द्रोणः सस्यप्रपूरकः॥"

इति ज्योतिस्तत्त्वम्॥

त्रेतायुगे तस्योत्पत्तिर्यथा,—

"अपां सिद्धे प्रतिगते तदा मेघाम्बुना तु वै। मेघैश्चन्नयिष्यन्त्यः प्रवृत्तं वृष्टिसर्ज्जनम्॥ सञ्जदेव तथा वृष्ट्वा संवृत्ते पृथिवीतले। प्राडुरासंस्तदा तासां वृत्ता वै गृहसञ्ज्ञिताः॥ सर्व्वप्रत्युपभोगस्तु तासां तैभ्यः प्रजायते। वर्त्तयिष्यन्ति ते खस्थास्त्रेतायुगसुखे प्रजाः॥"

इति कौर्म्मे २६ अध्यायः॥

प्रलयकालीनमेघा यथा,—

"ततो गजकुलोन्नादास्तडिते: समलङ्कृताः। उत्तिष्ठन्ति घना घोरा: सम्वर्त्तका घनाः॥ केचिन्नीलोत्पलश्यामाः केचित् कुसुमसन्निभाः। धूम्रवर्णास्तथा केचित्तथा पीताः पयोधराः॥ केचिद्रक्ताम्बवर्णाश्च स्थूलाः चारनिभास्तथा। गृध्रकुन्दनिभाश्चान्ये जात्याञ्जननिभाः परे॥ मनःशिलानिभाश्चान्ये कपोतसदृशाः परे। केचिद्रक्ताश्चवर्णाभास्तथान्ये चीरसन्निभाः॥ तथा कर्व्वूरवर्णाभा भिन्नाञ्जननिभास्तथा। इन्द्रगोपनिभाः केचित् हरितालनिभास्तथा॥ काकाण्डकनिभाः केचिदुत्तिष्ठन्ति घना दिवि। केचित् पर्व्वतसङ्काशाः केचिद्गजकुलोपमाः॥ कूटागारनिभाश्चान्ये केचिन्नीलकुलोदहाः। बहुरूपा घोररूपा घोरस्वरनिनादिनः। तदा जलधराः सर्व्वे पूरयन्ति नभस्तलम्॥ ततस्ते जलदा घोरा वारिधा भास्करात्मजाः। सप्तधा संवृतात्मानस्तमिस्रं ग्रसयन्ति च॥ ततस्ते जलदा वर्षं वर्षन्तोऽह महौघवत्। सुघोरमग्निं सर्व्वे नाशयन्ति च पावकम्॥ प्रवृत्तेन तदात्यर्थमम्भसा पूर्य्यते किल। अङ्गिरोभ्रगुभृतलात्तदार्द्रि प्रविप्लवपि॥ नष्टे चाग्नौ वर्षयते: पयोदा जलसम्भवाः। प्लावयन्तोऽथ भुवनं महाजलपरिप्लवे:॥ धाराभिः पूरयन्तोदं घोषमाणाः स्वयम्भुवा। उद्यन्तं सलिलौघेन वेला इव महोदधेः॥ सादिद्वीपा तथा पृथ्वी जलैः संछाद्यते भृशम्। आदित्यरश्मिभिः पीतं जलमम्बरे तिष्ठति॥ पुनः पतति तद्भूमौ पूर्य्यन्ते तेन चार्णवाः॥"

इति कौर्म्मे उपविभागे ४२ अध्यायः॥

मेघस्य उत्पत्तिर्यथा,—

"तेजो ह सर्व्वभूतेभ्य आदत्ते रश्मिभिर्जलम्। वसुधात्वम्भसा योगाद्ग्रसयः प्रवहन्त्यमः॥ ततोऽयनवशात् काले परिवृत्तो दिवाकरः। नियच्छति पयो मेघे शुक्लाशुक्लैर्गभस्तिभिः॥ अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः। सर्व्वभूतहितार्थाय वायुभूताः समन्ततः॥ ततो वर्षति सोऽभ्राणि सर्व्वभूतविवृद्धये। वायव्यं खनितश्चैव विद्युदग्निसमप्रभम्॥ मेदसाशुमिहेत्यातो मेघत्वं यञ्जयन्ति च। भ्रमिष्यन्ति यथा चापस्तदम्भः कवयो विदुः॥" अपि च।

"मेघानां पुनरुत्पत्तौ त्रिविधा योनिरुच्यते। अण्डिजा ब्रह्मजाश्चैव पद्मजाश्च पृथग्विधाः। त्रिधा त्रिधायनास्तेषां वक्ष्यामि वित्तसम्भवम्॥ आग्नेयाः खसनाः प्रोक्तास्तेषां धूमः प्रवर्त्तनम्। जाता दुर्दिनवातार्द्रये सगुणास्ते व्यवस्थिताः॥ महिषाश्च वराहाश्च मत्तमातङ्गरूपिणः। भूत्वा धरणिमभ्येत्य रमन्ते विचरन्ति च॥ जीमूता नाम ते मेघा ये तेभ्यो जीवसम्भवाः। विद्युद्गुणविहीनाश्च जलधारावलम्बिनः॥ ऋद्धुसेका महाकाया आवहस्य च वायुगाः। क्रोशमात्राश्च वर्षन्ति क्रोशार्द्धादपि वा पुनः॥ पर्व्वताग्रनितम्बेषु वर्षन्ति विपिनेषु च॥ बलाका गर्द्दभाश्चैव बलाकागर्भधारिणः। ब्रह्मजा नाम ते मेघा ब्रह्मनिश्वासजम्भवाः॥ द्वितीयं प्रवहं वायुं मेघास्ते तु समाश्रिताः। इतो योजनमात्राश्च सार्द्धार्द्धात् विद्यतादपि॥ दृष्टिसर्गाद्विवर्त्तेषां धारासारः प्रकीर्त्तितः॥ अक्रमेण पचा यच्छिन्नाः पर्व्वतानां महौजसाम्। कामगानां प्रदृप्तानां प्रजानां शिवमिच्छता। पुष्करावर्त्तकाख्ये करयोनेह विश्रुताः॥ नागाख्यपवराश्चैव महाघोरस्वनाश्च ते। कल्पान्तदृष्टेः सृष्टारः सम्वर्त्तायेनियामकाः। वर्षन्ति ते युगान्तेषु त्रितीयास्ते प्रकीर्त्तिताः॥ अनेकरूपसंस्थानाः पूरयन्तो महीं जलैः। वायुं परिवहन्ते सुराश्रिताः कल्पसाधकाः॥ योऽन्यस्याक्षस्य भिन्नस्य प्राक्षतप्रभवस्तदा। यस्मादृक्षा वसुतपन्नचतुर्व्वक्त्राः स्वयम्भुवः। तस्येवाक्षस्य पाला हि सर्व्वे मेघाः प्रकीर्त्तिताः॥ तेषामध्यायनं धूमः सर्व्वेषामविशेषतः। तेषां श्रेष्ठस्तु पर्ज्जन्यश्चतारश्चैव दिग्गजाः॥ गजानां पर्व्वतानाञ्च मेघानां भोगिभिः सह। कुलमेकं पृथग्भूतं योनिरेका जलं स्मृतम्॥ पर्ज्जन्यो दिग्गजाश्चैव हैमन्ते शीतसम्भवाः। तुषारदृष्टिं वर्षन्ति हिमग्रस्तविवृद्धये॥"

इति ब्रह्माण्डे ५८ अध्यायः॥

स्फूरागान्तर्गतरागविशेषः। यथा,—

"भैरवोऽथ वसन्तश्च नटो नारायणस्तथा। श्रीरागो मेघरागश्च वर्द्धते पुरुषाज्ञया॥" तस्य रागिण्यो यथा,—

"ललिता मालसी गौड़ी नाटी देवकिरी तथा। मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः॥" अयं हनूमत्मते षड़रागो ब्रह्मणो मस्तकात् निर्गतः। आकाशाज्जात इति च वदन्ति। अस्य जातिः औड़वः। अर्थात् ग म ध नि ग इति पञ्चस्वरमिलितः। अस्य ग्रहं धैवतस्वरः।

वर्षर्त्तौ रागिणेयी गानसमयः। अस्याकारः। सुन्दरपुरुषः। श्यामवर्णः। उष्णीषवद्धकेशः। आखितखड्गहस्तः। हनूमन्मते अस्य पञ्च रागिण्यो यथा। टङ्का १ मल्लारी २ गुर्ज्जरी ३ भूपाली ४ देशकारी च ५। अस्याष्टपुत्रा यथा। जालन्धरः १ सारः २ नटनारायणः ३ शुद्धरामरः ४ कल्याणः ५ गजधरः ६ गान्धारः ७ सहाना ८। कलानाथमते। अस्य रागिण्यः षट् यथा। वङ्गाली १ मधुरा २ कामोदा ३ धनाश्रीः ४ तीर्थकी ५ देवाली ६। एतन्मतेऽपि अष्टौ पुत्राः किन्तु नटनारायण-शुद्धरामरवल्लाल्याने केदारामारुजभरता ज्ञेयाः। सोमेश्वरमते अस्य षड्रागिण्यो यथा। मल्लारी १ सौरटी २ सावेरी ३ कौशिकी ४ गान्धारी ५ हरशङ्करी ६। एतन्मतेऽपि पुत्राः पूर्ववत्। रागिणीसहितस्यैतन्नामग्रह वर्षर्त्तौ गानसमयः॥ भरतमते तस्य पञ्च रागिण्यो यथा। मल्लारः १ शूलतानी २ देशी ३ रतिवल्लभा ४ कावेरी ५। तन्मते अष्टौ पुत्रा यथा। कलायरः १ वागेश्वरी २ सहाना ३ पुरीया ४ कानरा ५ तिलकः ६ स्तम्भः ७ शुद्धरामरः ८। तन्मते अष्टपुत्राणां भार्य्या यथा। करखाटी १ कादबी २ कदमनाटः ३ पाहारी ४ भाँभः ५ परजः ६ नटमल्लरी ७ शुद्धनटः ८। इति सङ्गीतशास्त्रम्॥

मेघकपः, पुं, (मेघानां कप इव।) करका। इति हारावली। ५८॥

मेघकालः, पुं, (मेघानां कालः समयः।) वर्षर्त्तुः। इति जटाधरः॥ (यथा, हरिवंशे। ८५। ५८।

"स्थलसलिलचराणां व्यथयो मेघकाले।
प्रचुरसलिलदृष्टेः शैवकाले भयाय॥")

मेघचिन्तकः, पुं, (चिन्तयतीति। चिन्ति+ण्वुल्। मेघानां चिन्तकः तस्येव जलपायित्वात्।) चातकपक्षी। इति शब्दचन्द्रिका॥ (मेघ-चिन्तनविशिष्टे, त्रि॥)

मेघज, त्रि, मेघभववस्तु। मेघाज्जायते इति शुतृ-पत्ताया जनधातोः डप्रत्ययेन निष्पन्नम्॥

मेघजालं, क्ली, (मेघानां जालम्।) अभ्रियम्। इति शब्दचन्द्रिका॥

मेघजीवनः, पुं, (मेघो जीवनं जीवनोपायो यस्य।) चातकपक्षी। इति राजनिर्घण्टः॥

मेघज्योतिः, [स्] पुं, (मेघस्य ज्योतिरग्निर्मेघा-दुत्पन्नो ज्योतिर्वा।) वज्राग्निः। तत्पर्य्यायः। हरम्मदः २। इत्यमरः। १।३।१०। मेघस्य ज्योति-रग्निर्मेघज्योतिः। ज्योतिरग्नौ समाख्यातं ज्योतिश्चन्द्रो निगद्यते। इति रत्नि॥ हरया जलेन माद्यति दीप्यते इति हरम्मदः। मेघाग्निर्हि जलेनैव दीप्यते। मदीभिर्यत्नि हर्षे दृ भृ दृ भृ दृ जीति खः खिलयाजिति मनुखौ। अन्योन्य-संघट्टेन मेघाग्निःस्थ यज्ज्योतिर्वृष्टादौ पतति स हरम्मदः। मेघ हरुत्पन्नत्वं तेन वातजो-ऽपीरम्मदः सोऽपि हि हरया जलेन माद्यतीति कौसुरी। मेघाय्यादिरिरम्मद इति शब्दार्णवः। इति तट्टीकायां भरतः॥

मेघडम्बरः, पुं, मेघस्याडम्बरः। मेघगर्जनम्। यथा,—

"अजायुद्धे ऋषिश्राद्धे प्रभाते मेघडम्बरे।
दम्पत्योः कलहे चैव बन्धारम्भे लघुक्रिया॥"

इत्युद्भटः॥

मेघतिमिरं, क्ली, (मेघेन तिमिरं अन्धकारो यत्र।) मेघाच्छन्नदिनम्। इति हलायुधः॥

मेघदीपः, पुं, (मेघजनितो दीप इव।) विद्युत्। इति शब्दमाला॥

मेघनादः, पुं, (मेघं नादयतीति। नद्+णिच्+अच्।) वरुणः। (मेघस्य नाद इव नादो यस्य।) रावणपुत्रः। इति मेदिनी। दे, ५२॥ (यथा, रघौ। १२। ७६।

"गरुत्मतापतद्विघ्नैर्मेघनादाक्षयव्रणः॥"

मेघस्य नादः।) मेघशब्दः। इति हेमचन्द्रः॥ (यथा, महाभारते। १। ७१। ७।

"ते श्रुत्वा रथनिर्घोषं वारणाः शिखिनस्तथा।
प्रत्येदुस्त्रासुखा राजन्! मेघनाद इवोत्-सुकाः॥")

पक्षाग्रहस्तः। इति शब्दचन्द्रिका। तक्षुलीय-शाकः। इति राजनिर्घण्टः॥ (यथा, भाव-प्रकाशे।

"तक्षुलीयो मेघनादः काञ्चेरस्तक्षुलेरकः॥"

अस्य गुणादिकं तक्षुलीयशब्दे द्रष्टव्यम्॥ दानवभेदः। यथा, हरिवंशे। ३३२। ३०।

"सुवाहुर्मेघनादश्च भीमगर्भश्च वीर्य्यवान्॥"

मेघसदृशशब्दविशिष्टे, त्रि। यथा, रामायणे। २। १६। २६।

"मेघनादसमस्वानं मत्तद्विपविभूषितम्॥")

मेघनादजित्, पुं, (मेघनादं जितवानिति। जि+क्विप्।) लक्ष्मणः। इति त्रिकाण्डशेषः॥

मेघनादाशुगासकः, पुं, (मेघनादं अशु लक्ष्मीलक्ष्य लसति क्रीडतीति। लस+ण्वुल्।) मयूरः। इति राजनिर्घण्टः॥

मेघनादाशुगासी, [न्] पुं, (मेघनादमशुगसतीति। लस+णिनि।) मयूरः। इत्यमरः। २। ५। ३०॥

मेघनामा, [न्] पुं, (मेघस्य नाम नाम यस्य।) सुस्तकः। इत्यमरः। २। ४। १५६॥ (पर्य्यायो-ऽस्य यथा,—

"सुस्तको मेघनामा स्यात्।"

इति गारुडे २०८ अध्यायः॥)

मेघनिर्घोषः, पुं, (मेघस्य निर्घोषः।) मेघशब्दः। तत्पर्य्यायः। स्तनितम् २ गर्जितम् ३ रसितम् ४। इत्यमरः। १।३।८॥ ध्वनितम् ५ ह्रादितम् ६। इति भरतः॥ (मेघस्य निर्घोष इव निर्घोषो यस्य। मेघतुल्यशब्दविशिष्टे, त्रि। यथा, महा-भारते। ३। ७३। १९।

"यदि मां मेघनिर्घोषो नोपमच्छति मैथवः।
अद्य चामीकरप्रख्यं प्रवेक्ष्यामि हुताशनम्॥")

मेघपुष्पं, क्ली, (मेघस्य पुष्पमिव।) जलम्। इत्य-मरः। १। १०। ५॥ पिष्टान्नम्। नदीफलम्। इति मेदिनी। पे, २८॥

मेघपुष्पः, पुं, (मेघ इव पुष्पाति प्रकाशते इति। पुष्प विकाशने+घञ्।) शुक्रक्षयः। इति शब्द-रत्नावली॥ श्रीकृष्णाश्वश्च॥ (यथा, महाभारते। ४। ४३। २१।

"तं मन्ये मेघपुष्पस्य जवेन सदृशं हयम्॥")

मेघप्रसवः, पुं, (मेघः प्रसवः उत्पत्तिस्थानमस्य इति।) जलम्। इति राजनिर्घण्टः॥ मेघ-जाते, त्रि॥

मेघभूतिः, पुं, (मेघात् भूतिर्जन्माख्य।) वज्रम्। इति शब्दरत्नावली॥

मेघमालः, पुं, (मेघमाला वर्षर्त्तुरस्त्रेन अस्त्यस्य। अर्श आद्यच्।) रमागर्भजातकल्किदेवपुत्रः। यथा। "तथा रमा चिते पत्नी।" इत्युपक्रम्य। "सा पुत्रं सुषुवे साध्वी मेघमालबलाहकौ। महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ॥" इति कल्किपुराणे ३१ अध्यायः॥ (शाकद्वीपस्यपर्व्वतविशेषः। यथा, भागवते। ५। २०। ४। "सुवर्णो हिरण्यष्ठीवो मेघमाल इति चेतु-शृङ्गाः॥" राक्षसविशेषः। इति रामायणे। ३। २६। ३१॥)

मेघमाला, स्त्री, (मेघानां माला।) मेघश्रेणी। तत्पर्य्यायः। कादम्बिनी २। इत्यमरः। १। २। ८॥ (यथा, उत्तररामचरिते। २।

"मेघमालेव यत्रायमारादपि विभाव्यते।"

स्कन्दमातृगणानामन्यतमा। यथा, महाभारते। ९। ४६। २६।

"एकवक्त्रा मेघरवा मेघमाला विरोचना॥")

मेघयोनिः, पुं, (मेघस्य योनिः उत्पत्तिकारणम्।) धूमः। इति शब्दरत्नावली॥

मेघरागः, पुं, (मेघनामको रागः।) षड्रागान्त-र्गतरागविशेषः। इति हलायुधः॥ (यथा, संगीतदर्पणे रागाध्याये। ३१।

"भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा।
श्रीरागो मेघरागश्च षड्रते पुरुषाङ्गयाः॥")

अस्य विवरणं मेघशब्दे द्रष्टव्यम्॥

मेघवर्त्मा, स्त्री, (मेघस्येव वर्त्मोल्काः। स्त्रियां टाप्।) नीलोत्पलः। इति शब्दचन्द्रिका॥ (मेघतुल्यवर्त्मे, त्रि। यथा, महाभारते। ३। ६६। १५।

"सुकृष्णोत्तरौयेव मेघवर्त्मेव राजता॥")

मेघवर्त्म, [न्] क्ली, (मेघानां वर्त्म पन्थाः।) आकाशम्। इति त्रिकाण्डशेषः॥

मेघवह्निः, पुं, (मेघस्य मेघजन्यो वा वह्निः।) वज्राग्निः। तत्पर्य्यायः। हरम्मदः २। इति हेमचन्द्रः। ४। १६७॥

मेघवाहनः, पुं, (मेघो वाहनमस्य।) इन्द्रः। इत्य-मरः। १। १। ४७। (यथा, शिशुपालवधे। १३। १८।

"अविलम्बितमेतदाप्यतां पवनः
श्रयति स्म मेघमेव मेघवाहनः॥")

मेघवेश्म, [न्] क्ली, (मेघानां वेश्म भवनम् ।) आकाशम् । इति जटाधरः ॥

मेघसारः, पुं, (मेघस्य सार इव ।) पीतकर्पूरः । इति राजनिर्घण्टः ॥

मेघसुहृत्, [द्] पुं, (मेघाः सुहृदो मित्राणि यस्य ।) मयूरः । इति हेमचन्द्रः ॥

मेघस्रुतितोद्भवः, पुं, (मेघस्य स्रुतिताद्भव उत्पत्तिरस्य । नवमेघशब्देनास्य अङ्कुरोत्पत्तेस्तथात्वम् ।) विकङ्कटकवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्य विकङ्कटकशब्दे द्रष्टव्यम् ॥)

मेघाख्यं, क्ली, (मेघस्य आख्या नामास्य ।) मुस्तकम् । इति रत्नमाला ॥

मेघागमः, पुं, (मेघानां आगमोऽत्र ।) वर्षाकालः । इति शब्दरत्नावली ॥ (यथा, घटकर्परकाव्ये ।२।

"नवाम्बुमत्ताः शिखिनो नदन्ति
मेघागमे कुन्दसमानदन्ति ! ॥")

मेघस्यागमनञ्च ॥

मेघानन्दा, स्त्री, (मेघेन आनन्दोऽस्याः ।) वकपुष्पी । इति राजनिर्घण्टः ॥

मेघानन्दी, [न्] पुं, (मेघेन आनन्दतीति । आ+नन्द+णिनिः ।) मयूरः । इति राजनिर्घण्टः ॥

मेघान्तः, पुं, (मेघानां अन्तोऽवसानमत्र ।) शरत्कालः । इति राजनिर्घण्टः ॥

मेघाह्वि, क्ली, (मेघानां अह्नीव ।) करका । इति त्रिकाण्डशेषः ॥

मेघाह्वं, क्ली, (मेघानां आह्वं स्थानम् ।) आकाशम् । इति धनञ्जयः ॥

मेघोदरः, पुं, (मेघस्येव उदरमस्य ।) अर्हत्पिता । इति हेमचन्द्रः ॥

मेचकं, क्ली, (मचति वर्णान्तरेण मिश्रीभवतीति । मच्+"ज्वलादिभ्यः संज्ञायां वुन् ।" उणा० ५। ३५। इति वुन् । ततः "पचिमच्योरिच ।" उणा० ५।३७। इति इत्वे लघूपधगुणः । यद्वा, मच मचि कल्कने+अकन् । मचि परिसृतौ वाऽच्यौ ह्रस्वम् । मेचकः ह्रस्वाक्षीवः स्वादतसीपुष्पसन्निभः । इति शब्दार्णवः । द्युतपत्तिस्तु मचति मिश्रीभवति वर्णान्तरेण इति भरतः । रत्नमरटीकायां रघुनाथचक्रवर्त्ती ।) ओतोऽञ्जनम् । अन्धकारः । इति मेदिनी । के, १४० । नीलाञ्जनम् । इति राजनिर्घण्टः ॥ (यथा,—

"मेचकं मर्दनाञ्जनपिञ्जवदीयतृञ्जकरुचम् ।"

इति माधवकरक्षतदन्तिनिश्चयव्याख्याने ओतोवाराधिकारे विश्वरचितः ॥)

मेचकः, पुं, मयूरचन्द्रकः । श्यामलः । इति मेदिनी । के, १४०॥ (यथा, "मेचकामं आगारधूमाभश्च सवारगन्धकादिभिर्मलकज्जलीद्भवतद्वच्चर्वणेन वर्णो मेचक इति जेज्जटादयः प्राहुः शिखण्डिवत्तया इत्यर्थः ।" इति रत्नविनिश्चयस्य रक्तपित्तव्याख्याने विजयेनोक्तम् ॥) धूमः । मेघः । ओभाञ्जनः । इति शब्दरत्नावली ॥ श्यामलगुणयुक्ते, त्रि । इत्यमरः । १ । ५ । १४ ॥ (यथा, शिशुपालवधे । ६ । २६ ।

"शबलदलमेचकसुचके-
र्नभसि वीक्ष्य नवाम्बुदमम्बरे ॥")

मेचकाभिधा, स्त्री, (मेचकस्याभिधा नामास्याः ।) पातालगरुडौलता । इति राजनिर्घण्टः ॥

मेट्, ऋ उन्नादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ऋ, अमिमेटत् । मेटति जोषः । उन्नादतीत्यर्थः । इति दुर्गादासः ॥

मेटुला, स्त्री, (मेटतीति । मेट् बाहुलकात् उलच् । टाप् च ।) आमलकी । इति शब्दचन्द्रिका ॥

मेठः, पुं, (मेटति उन्नादयतीति । मेट्+अच् । पृषोदरादित्वात् साधुः ।) हस्तिपकः । इति त्रिकाण्डशेषः ॥

मेड, ऋ उन्नादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ऋ, अमिमेडत् । मेडति उन्नादयतीत्यर्थः । इति दुर्गादासः ॥

मेढ्रः, पुं, (मेहत्यनेनेति । मिह सेचने+"दाम्नीशसयुयुजस्तुदसिसिचमिहपतदमहः करणे ।" ३।२।१८२ । इति ष्ट्रन् । ।) शिश्नः । (यथा, मनौ । ८ । २८२ ।

"अवमूत्रयतो मेढ्रमवशृन्धयतो गुदम् ।")

स तु गर्भस्यस्य सप्तभिर्मासैर्भवति । इति सुखबोधः ॥ (यथा, "अवक्षणयनवदनघ्राणगुदमेढ्रादि नवस्रोतांसि नराणां बहिर्मुखान्येतान्येव ।" इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ॥ शिरःपर्य्यन्तं गतायां वचनायां मूलस्थानम् । यथा, पूर्वाभद्रलतषट्पदनिरूपणे । "वचाख्या मेढ्रदेशाच्छिरसि परिगता मध्यमे स्थाप्यजन्मा ।" मेढ्रस्थाप्राप्ततलं जन्मान्तरे कृतस्य महापापस्य चिह्नं कुष्ठविशेषः । यथा, भविष्यपुराणीयमध्यमपर्व्वषष्ठाध्याये ।

"ब्रह्मन् कुष्ठमयं विप्र ! उत्तरोत्तरतो गुरुम् ।
विचर्चिका तु दुश्चर्म्मा चर्मदीयस्तृतीयकः ।
विकर्त्तुर्नखताम्रौ च ह्रस्वश्चैते तथाष्टकम् ।
एषां मध्ये तु यः कुष्ठी गर्हितः सर्व्वकर्म्मसु ।
नवयज्ञसभाग्येषु गच्छेद् भाग्ये तथा नसि ।"

दुश्चर्म्मा अपाटवमेढ्रः इति स्मृतिसंग्रहितारः ॥ पञ्चभूतानां मध्ये एथिवी रजोगुणांशत उत्पन्नो मेढ्रः तथाच वेदान्तपञ्चदश्याम् ।

"रजोंऽशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु ।
वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे ॥"

उपस्थेन्द्रियं नाम उपस्थयतिरिक्तं उपस्थाश्रयं सूत्रशुक्रोतृसर्गशक्तिमदिन्द्रियं इत्यात्मानात्मविवेके ब्रह्मदत्ताचार्य्यः । अस्य लघ्वादिकं शिश्नशब्दे उपस्थशब्दे च द्रष्टव्यम् ॥) मेहः । इत्यमरः । २ । ६ । ८६ ॥ (यथास्य पर्य्यायः ।

"मेढ्रो मेढ्रो हुडो मेह उरभ उरणोऽपि च ।
अविर्द्वित्रिसंवत्सरायुःकथ्यन्ते तद्गुणा अथ ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

मेढ्रशृङ्गी, स्त्री, (मेढ्रस्य शृङ्गमिव शृङ्गमस्याः । गौरादित्वात् ङीष् ।) मेषशृङ्गीवृक्षः । इति रत्नमाला ॥

मेण्ढः, पुं, हस्तिपकः । इति हारावली ॥

मेण्ढ्रः, पुं, हस्तिपकः । इति त्रिकाण्डशेषः ॥

मेण्ढ्रः, पुं, मेषः । इति शब्दरत्नावली ॥

मेथ, न ऋ सङ्गे । वधे । मेधायाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सङ्गे अक०-वधे-मेधायाञ्च सक०-सेट् ।) न, मेथति मेथते धीरो गुञ्जिना सङ्गत इत्यर्थः । ऋ, अमिमेथत् । मिमेथ । इति दुर्गादासः ॥

मेधिः, पुं, (मेथन्ति पशूनेभिरिति । मेथ सङ्गे+"सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) खड्गे पशुबन्धनार्थंयज्ञदारु । मेर काठ इति भाषा । यथा,—

"मेधिर्मेधिः खड्गवाजी खड्गे गोबन्धदारु यत् ।"

इति हेमचन्द्रः ॥१५५८॥

(स्त्री, मेधिका । तत्पर्य्यायो यथा,—

"मेधिका मेधिनी मेधिर्दीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च ज्योतिर्गन्धवला तथा ॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च केरवी ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

क्वचित् मेथीति पाठो दृश्यते ।)

मेधिका, स्त्री, (मेथतीति । मेथ्+ण्वुल् । टापि अत इत्वम् ।) क्षुपविशेषः । मेथिआक इति भाषा । तत्पर्य्यायः । मेधिनी २ मेथी ३ दीपनी ४ बहुपत्रिका ५ बोधिनी ६ गन्धबीजा ७ ज्योतिः८ गन्धवला ९ वल्लरी १० चन्द्रिका ११ मन्था १२ मिश्रपुष्पा १३ केरवी १४ कुचिका १५ बहुपर्णी १६ पीतबीजा १७ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । रक्तपित्तप्रकोपकत्वम् । अरोचकहरत्वम् । दीप्तिकारित्वम् । वातघ्नत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ अथ मेथी वनमेथी । तयोर्नामगुणाः ।

"मेधिका मेधिनी मेथी दीपनी बहुपत्रिका ।
बोधिनी गन्धबीजा च ज्योतिर्गन्धवला तथा ॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च केरवी ।
कुचिका बहुपर्णी च पीतबीजा सुनिष्पावा ॥
मेथिका वातघ्नमनी, श्लेष्मघ्नी ज्वरनाशिनी ।
ततः स्वल्पगुणा वन्या वाजिनां सा तु पूजिता ॥"

इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥

मेथिनी, स्त्री, (मेथतीति । मेथ्+णिनिः । ङीप् ।) मेथिका । इति राजनिर्घण्टः ॥

मेथी, स्त्री, (मेथिः+ऋदिकारादिति पक्षे ङीष् ।) मेथिका । इति राजनिर्घण्टः ॥ (क्लम्भः । यथा, शतपथब्राह्मणे । १ । ५ । १ । २१ ।

"विश्वमे ह्येति मेथीसुपनिह्नुतीतरत्सतो
यद् च माशुषे ॥"

"मेथीं क्लम्भम् ।" इति तद्भाष्यम् ॥)

मेद्, ऋ न वधमेधयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ, अमिमेदत् । न, मेदति मेदते आख्यार्थे शिश्नः धारयतीत्यर्थः । मिमेदुः । इति दुर्गादासः ॥

मेदः, [स्] क्ली, (मेदति स्निह्यतीति । मिद्+"सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८ । इति

असृग् ।) मांसप्रभवधातुविशेषः । तत्पर्य्यायः । वपा २ वसा ३ । इत्यमरः ।२।६।६४॥ मेदः ४ । अकारान्त इति भरतः ॥ अस्य गुणाः । वातनाशित्वम् । बलपित्तकफदाढ्यत्वञ्च । इति राजवल्लभः ॥ अथ मेदसः स्वरूपमाह ।

"यच्चांसं स्वामिना पक्वं तन्मेद इति कथ्यते ।
तदतीव गुरु स्निग्धं बलकार्य्यतिहृंहणम् ॥"

अथ मेदसः स्थानमाह ।

"मेदो हि सर्व्वभूतानामुदरेष्वस्थिषु स्थितम् ।
अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ॥"

इति भावप्रकाशः ॥

रोगविशेषः । तत्र मेदसो विप्रकृष्टं निदानमाह ।

"अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः ।
मधुरोऽम्लरसः प्रायः स्नेहाभ्यासो विवर्द्धयेत् ॥"

अम्लरसः आमद्रवः । तथा च सुश्रुतः ।

आमद्रवाम्लरसो मधुरश्च भवतीति । मेदसोऽतिप्रवृद्धौ वैगुण्यमाह ।

"मेदसाऽवृतमार्गत्वात् पुष्यत्यन्ये न धातवः ।
मेदस्तु क्षीयते तस्मादग्रजः सर्व्वकर्म्मसु ॥"

अन्ये धातवः अस्थ्यादयः शुक्रान्ताः । न पुष्यन्ति न पुष्टा भवन्ति । क्षीयते सञ्चितं भवति वर्द्धत इति यावत् । तस्मात् मेदस्वी सर्व्वकर्म्मसु अग्रजः स्यात् । मेदसः सौकुमार्य्यात् । अपरानपि दोषानाह ।

"क्षुदश्वासह्रषामोहस्वप्नक्लम्यनसादनैः ।
युक्तः क्षुत्क्षेददौर्गन्ध्यैरत्यग्न्योष्ममैथुनः ।
मेदसः क्षेददौर्गन्ध्याज्जायन्ते जन्तवो नरः ॥"

क्लम्यनं उच्छ्वासावरोधः । कण्ठेन घुर्घुर इत्यन्ये । जन्तवः क्रिमयः । मेदसः स्थानमाह ।

"मेदस्तु सर्व्वभूतानामुदरेष्वस्थिषु स्थितम् ।
अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ॥"

मेदस्विनोऽपि वृद्धौ हेतुमाह ।

"मेदसाऽवृतमार्गत्वाद्वायुः कोष्ठे विशेषतः ।
चरन् सञ्चयमभ्यस्यन्नाहारं ग्रीष्मयत्यपि ॥
तस्मात् क्षीयन्ति चरयत्यस्यन्नाहारमप्यति काङ्क्षति ।
विकारान् सोऽनुते घोरान् कांश्चित् कालातिक्रमात् ॥"

सञ्चयति प्रदीपयति । स मेदस्वी आहारं शीघ्रं जरयति पुनर्भोक्तुं काङ्क्षति स दीप्ताग्निः कालयतिक्रमात् भोजनकालातिक्रमात् । कांश्चिद्विकारान् वातपित्तकरान् घोरान् अश्नुते प्राप्नोति । एते वातपित्ते मेदसावरुद्धे विशेषादुपद्रवकरे इत्याह ।

"एतावुपद्रवकरौ विशेषात् पित्तमारुतौ ।
एतौ हि दहतः स्थूलं वनं दावानलो यथा ॥"

एतौ पित्तमारुतौ मेदसा बहुमार्गत्वात् कोष्ठमध्ये प्रवृद्धौ सन्तौ विशेषादुपद्रवकरौ दहतः नाशयेताम् । मेदसोऽतिवृद्धेर्विनाशहेतुमाह ।

"मेदस्यतीवसंवृद्धे सहसैवानिलादयः ।
विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवितम् ॥"

विकारान् प्रमेहपिड़कोष्वरभगन्दरविद्रधिवातरोगानाशयन्तमान् । अतिस्थूलतया वैगुण्यमाह ।

"अतिस्थूलेषु संवृद्धा विसर्पाः सभगन्दराः ।
ज्वरातीसारमेहार्शःप्लीहदा यधिकोदयाः ॥"

अतिस्थूलस्य लक्षणमाह ।

"मेदो मांसातिवृद्धत्वाच्चयस्फिग्गुदरस्तनः ।
अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते ॥"

अयथोपचयोत्साहः न यथा उपचयो मांसोपचयः उत्साहो बलञ्च यस्य सः ॥१॥ अथ मेदस्य चिकित्सा ।

"पुराणाः शालयो मुद्गाः कुलत्थोद्दालकोद्रवाः ।
शेलुना वस्तयश्चापि सेव्या मेदस्विना सदा ॥
अमक्षिकाश्ववाराश्चौद्रजागरणप्रियः ।
हन्त्यवश्यमतिस्थौल्यं यवान्नामाक्षभोजनः ॥
क्षारं वातारिपत्रस्य पिप्पलीयुक्तं पिबेन्नरः ।
सक्षितं भक्तमश्नीन मेदोऽतिनिवृत्तये ॥
गुडूचीत्रिफलाक्वाथः पीतो मेदोहरः क्षतः ।
गुडूचीत्रिफलाक्वाथस्तथा लोहरजोयुतम् ।
चौद्रेण त्रिफलाक्वाथः पीतो मेदहरः परः ॥
प्रातर्मधुयुतं वारि सेवितं स्थौल्यनाशनम् ।
उष्णमम्लस्य मद्यं वा पिबेत् क्षपिततुन्दवेत् ॥
योवायत्रिफलासुस्तविड़ङ्गैर्गुग्गुलुं समम् ।
खादेत् सर्व्वान् जयेद्रोगान्मेदःश्लेष्मामवातजान् ॥
पिप्पली मधुना सेव्या मेदःकफविनाशिनी ॥
धत्तूरपत्तरसेन गाढ़-
सुद्वर्त्तनं स्थौल्यहरं प्रदिष्टम् ॥
वासादलरसो लेपाच्छद्यर्जुनेन संयुतः ।
विल्वपत्तरसो वापि देहदौर्गन्ध्यनाशनः ॥
निम्बपत्तरसः प्रक्षितकक्षादियोनितं जयति ।
दग्धहरिद्रोद्वर्त्तनमचिराच्चिरदेहदौर्गन्ध्यम् ॥
शिरीषलाम्बकदैमलोध्रे-
ङ्गदोषसंखेदहरः प्रघर्षः ।
शरीरदौर्गन्ध्यहरः प्रदेहः
पद्मानुलोध्राभयचन्दनानाम् ॥"

शिरीषस्याम्र पत्रं त्वाम्रं त्वक्सारात् । लाम्बकं सुगन्धिद्रव्यविशेषस्तदभावे उशीरं ग्राह्यम् । दैम नागकेशरम् । अम्बु बालकम् । अभयं उशीरम् ।

"हरीतकीं तु संपिष्य देहसुद्वर्त्तनं नरः ।
पश्चात् स्नानं प्रकुर्व्वीत देहखेदोपशान्तये ॥
वकुलस्य दलैः सम्यक्वारिणा परिपेषितैः ।
देहसुद्वर्त्तनेयेत् पश्चाद्धरीतक्या सुपिष्टया ।
भूय उद्वर्त्तनं कुर्य्यात् पश्चात् स्नानं समाचरेत् ।
प्रखेदान् सुच्यते शीघ्रं मेदोऽतिसमुद्भवात् ॥"

इति मेदोऽधिकारः ॥ इति भावप्रकाशः ॥

(तथास्य विशेषः । यथा,—

"मेदः स्नेहखेदौ दृढ़ं पृथिमानञ्च ॥"

अस्य चीजलक्षणं यथा,—

"मेदः क्षये स्नीहाभिवृद्धिः सन्धिशून्यता रौक्ष्यं मेदुरमांसप्रार्थना च ।" अस्यातिवृद्धिलक्षणं यथा,—

"मेदः स्निग्धाङ्गतासुदरपार्श्ववृद्धिं कासश्वासादीन् दौर्गन्ध्यञ्च ।"

"पूर्व्वः पूर्व्वोऽतिवृद्धत्वादर्द्धयेद्धि परं परम् ।
तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितम् ।"

"क्षपयेदृद्धमेवापि दोषधातुमलान् भिषक् ।
तावद्यावदरोगः स्यान्नरो रोगसमन्वितः ॥"

इति सुश्रुते सूत्रस्थाने १५ अध्यायः ॥

"तृतीया मेदोधरा नाम मेदो हि सर्व्वभूतानामुदरस्थमन्यस्थिषु च महत्सु च मज्जा भवति ॥"

इति तत्रैव शारीरस्थाने ४ अध्याये ॥)

मेदः, पुं, (मेदयति स्निह्यतीति । मिद्+अच् ।) वपा । इति शब्दचन्द्रिका ॥

"दृष्ट्वाकरुक्षमिहरो मलग्नो मेदकुहरा ।"

इति भरतधृतशालिहोत्रः ॥)

म्लेच्छजातिविशेषः । इति जटाधरः ॥ अजमुखा । इति राजनिर्घण्टः ॥ (ऐरावतकुलजो नागविशेषः । यथा, महाभारते ।१।५७।११।

"विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा दृश्यवाहनम् ॥")

मेदकः, पुं, (मिद्+खुल् ।) जगलः । इत्यमरः । २ । १० । ३२ ॥ मेया इति भाषा ॥

मेदजः, पुं, (मेदात् जायते इति । जन्+डः ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥ मेदोभवश्च ॥

मेदःसारा, स्त्री, (मेदः सारोऽस्याः ।) मेदा । इति राजनिर्घण्टः ॥ (विदतिरस्या मेदाशब्दे द्रष्टव्या ॥)

मेदस्कृत्, क्ली, (मेदः करोतीति । मेदस्+क्त+क्विप् ।) मांसम् । इति हेमचन्द्रः ॥

मेदा, स्त्री, (मेदो अस्याः अस्तीति । मेद+अच् । टाप् ।) अष्टवर्गप्रसिद्धौषधिविशेषः । तत्पर्य्यायः । मेदोद्भवा २ जीवनी ३ श्रेष्ठा ४ मज्जिच्छिदा ५ विभावरी ६ । इति रत्नमाला ॥ वसा ७ खल्पपर्णिका ८ मेदःसारा ९ स्नेहवती १० मेदिनी ११ मधुरा १२ स्निग्धा १३ मेधा १४ द्रवा १५ साध्वी १६ शुक्लदा १७ बहुरन्ध्रिका १८ पुरुषदन्तिका १९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । पित्तदाहार्शिःकाश्वराजयक्ष्मज्वरनाशित्वम् । वातदोषकारित्वञ्च । इति राजनिर्घण्टः ॥ तस्य लक्षणं यथा,

"शुक्लकन्दो नखच्छेद्यो मेदो धातुमिव श्रवेत् ।
यः स मेदेति विज्ञेयो जिज्ञासाततृपरैर्जनैः ॥"

मेदामहामेदास्थाने शृतावरी मूली । इति भावप्रकाशः ॥ अस्या विवरणं महामेदाशब्दे द्रष्टव्यम् ॥ (अनुकल्पोऽस्या यथा । "मेदाभावे चाश्वगन्धा ।" इति वैद्यकपरिभाषायाम् ॥)

मेदिनी, स्त्री, (मेदोऽस्या अस्तीति । मेद+इनिः । ङीप् ।) मेदा । काश्मरी । इति राजनिर्घण्टः ॥ पृथिवी । इत्यमरः । २ । १ । ३ ॥ मेदो विद्यतेऽस्यां मेदिनी शान्ताभेदःशब्दादिनलोपश्च निपात्यते इति परे । क्षमते मेदः समानार्थोऽन्यो मेदशब्दोऽस्ति । दृष्टाकरु-

ङमिहरो मलग्नो मेदकुरुहेति ग्राजिहोत्रः। नैकाजादिति इन्। यथा चोक्तम्।
"मधुकैटभयोरासीन्मेदसैव परिप्लुता।
तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः॥"
मेद्यतीति वा मेदिनी इन्निद्या क्विप् मद्गादित्वाच्चिन्। इति तट्टीकायां भरतः॥ (एतन्नामनिरुक्तिर्यथा, देवीभागवते। १। ६। ८३-८४।
"गतप्राणौ तदा जातौ दानवौ मधुकैटभौ।
सागरः सकलो याप्लस्तदा वै मेदसा तयोः॥
मेदिनीति ततो जातं नाम पृथ्व्याः समन्ततः।
अभक्ष्या ऋत्तिका तेन कारणेन सुनीश्वराः॥"
अपि च। तत्रैव। १। ११। ८।
"मधुकैटभयोर्मेदःसंयोगान्मेदिनी स्मृता।
धारणार्थं धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")
तस्या उत्पत्तिर्यथा,—
"भूयतां वसुधाजन्म सर्व्वमङ्गलकारणम्।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम्॥
अहो केचिद्दस्यन्ति मधुकैटभमेदसा।
बभूव वसुधाजन्म तद्विरुद्धमतं शृणु॥
ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा।
आवां वध्यं न यत्रोर्व्वी प्लाव्यतां सलिलेति च॥
तयोर्व्वचनकालेन प्रलयो सा भवेत् स्फुटम्।
ततो बभूव मेदश्च मरुद्भ्यान्तरं तयोः।
मेदिनीति च विख्यातियुक्ता यैरुद्भवं शृणु॥
जलधौतां क्षमां पूर्व्वं वर्द्धतां मेदसा यतः।
कथयामि च तज्जन्म सार्थकं सर्व्वसम्मतम्॥
पुरा श्रुतं यत् श्रुत्युक्तं धर्म्मवक्त्राच्च पुष्करे।
महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम्॥
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम्।
स च प्रविष्टः सर्व्वेषां तस्योर्व्वा विवरेषु च॥
कालेन महता तस्माद्बभूव वसुधा सुते!।
प्रत्येकं प्रतिलोमाच्च भूपेषु सा स्थिरा स्थिता॥
आविर्भूता तिरोभूता सा जले च पुनः पुनः।
आविर्भूता क्षतिकाले तज्जलोपर्य्यवस्थिता।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥"
इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे नारायणनारदसंवादे पृथिव्युपाख्याने ७ अध्यायः॥

मेदिनीदवः, त्रि, (मेदिन्याः दवः।) धूलिः। इति त्रिकाण्डशेषः॥

मेदुरः, त्रि, (मेदति स्निह्यतीति। मिद्+"भृञ्-भाभ्रमिदो डुरच्।"३। २। १६१। इति डुरच्।) अतिस्नेहयुक्तः। तत्पर्य्यायः। स्नात्रस्निग्धः २। दत्यमरः। ३।५।३०॥ (यथा, गीतगोविन्दे।१।५।
"मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे! गृहं प्रापय॥")

मेदुरा, स्त्री, (मेदुर+टाप्।) काकोली। इति राजनिर्घण्टः॥ (गुणादयोऽस्याः काकोलीशब्दे ज्ञेयाः॥)

मेदोजं, क्ली, (मेदसो जायते इति। जन्+डः।) अस्थि। इति राजनिर्घण्टः॥

मेदोजया, स्त्री, (मेदाद्वृद्धोऽस्याः।) मेदा। इति राजनिर्घण्टः॥

मेदोन्वः, पुं, (मेदोवद्वृद्धः अन्वः।) वर्द्धमद्धरजातिभेदः। इति जटाधरः॥ (यथा, मनुः।१०।४८।
"मेदोन्ध्रपुण्ड्रमद्गूनामारण्यपशुहिंसनम्॥"
क्वचित् मेदान्ध्र इत्यपि पाठः॥)

मेदोवती, स्त्री, (मेदोऽस्याः अस्तीति। मेदस्+मतुप्। मस्य वः।) मेदा। इति राजनिर्घण्टः॥ (मेदोविशिष्टे, त्रि॥)

मेध, ङ च वधमेधासङ्गेषु। इति कविकल्पद्रुमः॥ (भ्वा० उभ०-वधे सक०-अन्यत्र अक०-सेट्।)
ऋ, अग्निमेधृत्। न, मेधति मेधते। इति दुर्गादासः॥

मेधः, पुं, (मेध्यते वध्यते पश्वादिरत्रेति। मेध+घञ्।) यज्ञः। इति जटाधरः॥ (यथा, महाभारते। १। १२३। १६।
"ग्रामणीश्च महीपालानेष जित्वा महाबलः।
भ्रातृभिः सहितो वीरश्चोत्तरे मेधानाहरिष्यति॥"
ऋषिः। इति ऋग्वेदे। १०। १००। ६। मन्त्रभाष्ये सायणः॥)

मेधा, स्त्री, (मेधते सङ्गच्छते अस्यामिति। मेध्+"सिद्धिदाभ्योऽङ्।" ३। ३। १०४। टङ्। टाप्।) धारणावती बुद्धिः। इत्यमरः। १।५।१२॥ धारणाशक्तियुक्ता धीर्मेधा मेधते सङ्गच्छतेऽस्यां सर्व्वं बहुश्रुतं विषयीकरोति इति वा मेधा मेधृ-ण सङ्गे मेधार्थात् डेमत्वात् सरोरित्वः। आपबहुश्रुतविषयीकरणं धारणा यद्वशं धारणा बुद्धेर्गुणविशेषः इति। इति भरतः॥ *॥ (यथा, सुश्रुतोपनिषदि। १। २। १।
"ज्ञायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥")
मेधाकरं औषधं यथा,—
"ब्रह्मपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला।
अभया च गुडूची च अष्टरूपकवाङ्घ्रयः।
एतैरष्टसमैर्भागैर्हृतं घृतं विपाचयेत्॥
कल्कार्द्धा रस घृतं द्रव्या च समन्वितम्।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम्॥"
इति गारुडे १८८ अध्यायः॥ *॥
मेधाकरणं यथा। सतताध्ययनम्। तत्त्वज्ञानकथा। भेषजतत्त्वज्ञानावलोकनम्। सद्विद्यार्थसेवा च। इति पुराणम्॥ (दक्षप्रजापतिकन्याविशेषः। यथा,—
"कौशिकस्त्री धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥"
इति वह्निपुराणे गणभेदनामाध्याये॥
धनम्। इति निघण्टुः। २। १०॥ "मिश्र मेधृ सङ्गमे च। चकारात् हिंसामेधयोश्च। मिधिः सङ्गत्यर्थः। इति माधवः। घञ्। सङ्गच्छतेऽनेन सर्व्वं बहुता हिंस्यते वा तदादु चौरादिभिः हन्ति चेत्यर्थकारत्वात् इति भरतमल्लः॥ यद्वा, मतौ बुद्धौ धर्म्मं धार्य्यते। तत्र मतिग्रब्द उपपदे धातोः घञर्थे कविधानम् इति कः। एषोदरादित्वात् मतिग्रब्दस्य मेभावः।" इति तट्टीकायां देवराजयज्वा॥)

मेधाः, [स्] पुं, (मेधते इति। मेध्+असुन्।) स्वायम्भुवमनुपुत्रः। यथा,—
"अग्निश्चाग्निवाहुश्च सवनः सवन एव च।
ज्योतिष्मान् द्युतिमान् हव्यो मेधा मेधातिथिर्वसुः।
स्वायम्भुवस्यास्य मनोर्दशैते पुत्रपञ्चमाः॥"
इति मात्स्ये ९ अध्यायः॥

मेधाकृत्, क्ली, (मेधां करोतीति। कृ+क्विप्।) सितावरशाकम्। इति राजनिर्घण्टः॥ मेधाकारके, त्रि॥

मेधाजित्, पुं, (मेधां जितवानिति। जि+क्विप्।) काश्यायनमुनिः। इति त्रिकाण्डशेषः॥

मेधातिथिः, पुं, (मेधायाः धारणावद्धेरतिथिरिव।) मनुसंहिताटीकाकृत्। इति त्रिकाण्डशेषः। यथा, श्रीभागवते। १। १६। १०।
"मेधातिथिर्देवल आर्ष्टिषेणो
भरद्वाजो गौतमः पिप्पलादः॥"
(प्रियव्रतपुत्रः स च शाकद्वीपाधिपतिः। यथा, श्रीमद्भागवते। ५। २०। २४—२५।
"यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रदीपप्रकाशकः। यस्य ह महासुरभिगन्धस्तद्द्वीपमनुवासयति। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः॥"* यज्ञदग्न्य द्वापरयुगस्य व्यासः। यथा, देवीभागवते। १। ३। ३०।
"मेधातिथिः सप्तदशे व्रती व्यासोऽष्टादशे तथा॥"
प्रजापतेः कर्द्दमस्य पुत्रः। यथा, मार्कण्डेये। ५३। १५।
"अग्निध्रो मेधातिथिश्च वपुष्मांश्च तथापरः॥"
दक्षसावर्णिमन्वन्तरे सप्तर्षीणामेकतमः। यथा, मार्कण्डेये। ६४। ८।
"मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा।
सप्तर्षयोऽमी सवनस्तथान्यो हव्यवाहनः॥"
नदीविशेषे, स्त्री। यथा, महाभारते। ३। २२१। २३।
"चर्म्मण्वती महीं चैव मेधा मेधातिथिस्तथा।
ताम्रावतीं चैत्रवतीं नद्यश्चिक्षोऽथ कौशिकीं॥")

मेधावद्रः, पुं, (मेधया वद्र इव।) कालिदासः। इति त्रिकाण्डशेषः॥

मेधावती, स्त्री, (मेधा देवत्वेन अस्ति अस्याः इति। मेधा+मतुप्। मस्य वः। ङीप्। मेधाबह्वैकलादस्यास्तथात्वम्।) महाज्योतिष्मती। इति राजनिर्घण्टः॥ मेधाविशिष्टा च॥

मेधाविनी, स्त्री, (मेधाऽस्याः अस्तीति। मेधा+"अस्मायामेधास्रजो विनिः।"५। २। १२१। इति विनिः। ततो ङीप्।) ब्रह्मणः पत्नी। इति मेदिनी। ने, २०४॥

मेधावी, [न्] पुं, (मेधाऽस्त्यस्येति। मेधा+"अस्मायामेधास्रजो विनिः।"५। २। १२१। इति

विनि:) शुकपक्षी। इति मेदिनी। ने, २०४॥ मदिरा। इति राजनिर्घण्टः॥ पण्डितः। इति हेमचन्द्रः। ३।६॥ याज्ञिकः। इति त्रिकाण्डशेषः॥ (कस्यचित् ब्राह्मणस्य पुत्रः। यथा, महाभारते, १२। १७५। ३।

"द्विजातेः कस्यचित् पार्थ! स्वाध्यायनिरतस्य वै।
बभूव पुत्रो मेधावी मेधावी नाम नामतः॥")

मेधायुक्ते, त्रि। इति मेदिनी। ने, २०४॥ (यथा, रामायणे। १। ४। ६।

"स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ।
वेदोपबृंहणार्थाय तावध्याहयत प्रभुः॥")

तद्वैदिकपर्य्यायः। विप्रः १ विप्रः २ ऋतयुग्रः ३ धीरः ४ वेनः ५ वेधाः ६ कण्वः ७ ऋषुः ८ नवेदाः ९ कविः १० मनीषी ११ मन्वाता १२ विधाता १३ विप्रः १४ मनश्चित् १५ विपश्चित् १६ विपन्यवः १७ आकेनिपः १८ उशिग्रः १९ कौशाग्रः २० अङ्गातयः २१ मतयः २२ मतुथाः २३ वाघतः २४। इति चतुर्विंशतिर्मेधाविनामानि। इति वैद्यनिघण्टौ। १। १५॥

मेधिः, पुं, (मेध्यते खले क्षाप्यते इति। मेध+"सर्व्वधातुभ्य इन्।" उणा० ४।११९। इति इन्।) खले पशुबन्धनार्थस्थलादेः। इत्यमरः। २। ९। १५। खले धान्यमर्द्दनस्थानमध्ये पशुबन्धननिमित्तं निहितं यद्दारु च मेधिः। मेढ इति ख्यातः। इति भरतः॥ तत्पर्य्यायः। मेधिः १ खलेवाजी २। इति हेमचन्द्रः॥ अस्य स्थापनविधिं तत्र वायौ शुक्लदक्षतो। नक्षत्राणि देवता स्थाती हस्ता मूलं मृगशिरश्च। तत्र जयं स्थिरम्। इति ज्योतिस्तत्त्वम्॥

मेधिरः, त्रि, (मेधामाक्षोति। मेधा+"मेधारथाभ्यामिरनिरचौ वक्तव्यौ।" ५। २। १०९। इति काशिकोक्त्या इरन्।) मेधावी। इति त्रिकाण्डशेषः॥ (यथा, ऋग्वेदे। १। २५। २०।

"त्वं विश्वस्य मेधिर! दिव्यस्य राजसि।"

"हे मेधिर! मेधाविन्! वरुण।" इति तद्भाष्ये सायणः॥ यज्ञवान्। इति विश्वप्रकाशः। यथा, ऋग्वेदे। १०। ९००। ६।

"इन्द्रस्य सुष्टुतिं देवीं यज्ञोभिर्गृणते चरिता मेधिरः कविः।"

"मेधो यज्ञः हविर्वा तद्वान्।" इति तद्भाष्ये सायणः॥)

मेधिष्ठः, त्रि, (अयमेषामतिशयेन मेधावीति। मेधाविन्+"अतिशायने तमबिष्ठनौ।" ५। ३। ५५। इति इष्ठन्। "विन्मतोर्लुक्।" ५। ३। ६५। इति विनो लुक्।) अतिशयमेधायुक्तः। इति व्याकरणम्॥

मेध्यं, त्रि, (मेध्यते इति। मेध्+"ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्। यद्वा, मेधामर्हतीति। मेधा+दण्डादित्वात् यत्।) पवित्रम्। इत्यमरः। १। १। ५५॥ (यथा,—

"ज्ञानेन मेध्यमखिलमेध्यं ज्ञानतो भवेत्।
ब्रह्मज्ञाने सत्युत्पन्ने मेध्यामेध्यं न विद्यते॥"

इति चिन्तामणिधृतवचनम्॥)

"पवित्रः प्रयतः पूत इति ब्रह्मवर्गे प्राग्विधेयमात्र उक्तं इह त्वप्राग्विधेये।" इति भरतः॥

"पूतं मेध्यं पवित्रं स्यादौक्षं प्रयतनिर्मलम्।
निर्ग्रीथं ग्रोथितं स्रष्टं निर्णिक्तमनवस्करम्॥"

इति शब्दरत्नावली॥

(नित्यमेधम्। यथा, मनुः। ५। १२६।

"नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम्।
ब्रह्मचारिगतं भैक्ष्यं नित्यमेध्यमितिस्थितिः॥")

शुचिः। इति मेदिनी। ये, ४०॥ (यथा, अग्निपुराणे। २। १४।

"तत्ताडक् लक्षपूजकोपनयनक्षेत्राद्विरदेविभिर्-
मेध्या वत्सतरी विहस्य बटुभिः सोल्लुण्ठमाल-
भ्यते॥"

मेध्याजनकः। यथा,—

"मण्डूकपर्ण्याः स्वरसः प्रयोज्यः
क्षीरेण यष्टीमधुकस्य चूर्णं।
रसो गुडूच्यास्तु सगुल्फपुष्पाः
कल्कः प्रयोज्यः खलु शुक्लपुष्पाः॥
आयुः प्रदान्यामलकाद्यजादि
बलायिवर्षाभुवर्द्धनानि।
मेध्या विशेषेण च शुक्लपुष्पी।"

इति चरके चिकित्सास्थाने प्रथमेऽध्याये॥)

मेध्यः, पुं, (मेधायै हितः। मेधा+"तुगादिभ्यो यत्।" ५। १। २। इति यत्।) खदिरः। यवः। छागः। इति राजनिर्घण्टः॥

मेध्या, स्त्री, (मेधायै हिता। मेधा+यत्। टाप्।) रक्तवचा। रोचना। इति मेदिनी। ये, ४०॥ केतकी। ज्योतिष्मती। शुक्लपुष्पी। ब्राह्मी। श्वेतवचा। भूमी। मण्डूकी। इति राजनिर्घण्टः॥ (नदीविशेषः। यथा, महाभारते। ३। २२१। २१।

"चर्म्मण्वती महीं चैव मेध्यां मेध्यातिथिस्तथा।")

मेनका, स्त्री, (मन्यते इति। मन्+"मनेराशिषि च।" इति युच्। ततः "नञ्मिन्मीनक्लिन्नेत्तं वक्तव्यम्।" ६। ३। १२०। इत्यत्र काशिकोक्त्या अकारस्य एत्वम्।) सर्व्वेष्टा। इति शब्दरत्नावली। तच्चाः कन्या शुकन्यजा। यथा,—

"विश्वामित्रात्मजेवाहं त्यक्ता मेनकया वने।
वैदेतद्भगवान् कण्वो वीर! किं करवाम ते॥"

इति श्रीभागवते। ९। २०। १९॥

(मेनैव। मेना+स्वार्थे कन्।) उमामाता। यथा,

"ततः प्रीतास्तु पितरस्तां दत्त्वात्मजां शिवाम्।
मेनां देवाय शैलाय हिमवत्ताय वै ददुः॥
तां मेनां हिमवाँल्लब्ध्वा प्रसादाद्देवतेष्वथ।
प्रीतिमानभवच्चापि ररास च यथेच्छया॥
ततो हिमाद्रिः पितृकन्यया समं
सुखं विवेद विषयं यथेप्सितम्।
अजीजनत् सा तनयास्तु मेना
रूपाभियुक्ताः सुरयोषितोपमाः॥

पुलस्त्य उवाच।

मेनायां कन्यकास्तिस्रो जाता रूपगुणान्विताः।
सुनाभ इति विख्यातश्चतुर्थस्तनयोऽभवत्॥
नीलाञ्जनचयप्रख्या नीलेन्दीवरलोचना।
रूपेणाप्रतिमा काली जज्ञे मेनकासुता॥
जातास्ताः कन्यकास्तिस्रः सङ्क्षात् परतो शृणु!।
कर्त्तुं तपः प्रयातास्ता देवास्ता ददृशुः शुभाः॥
ततो गते कन्यके द्वे ज्ञात्वा मेना तपस्विनी।
तपसो वारयामास उमे त्येवाब्रवीच्च सा॥
तदेव माता नामास्याश्चक्रे पितृसुता शुभा।
उमेत्येव हि कन्यायाः सा जगाम तपोवनम्॥"

इति वामने ७३—७५ अध्यायः॥ ०॥

अपि च।

"कथं गिरिसुता काली बभूव जगतां प्रभुः।
दाक्षायणी व्यक्ततनुः कथमाप हरं पतिम्॥"

मार्कण्डेय उवाच।

यदाजजनतुं देवी पूर्व्वं दाक्षायणी सती।
तदैव मनसागच्छन्मेनकां हिमवद्गिरिम्॥
लक्षप्राणा तदा देवी भूता हिमवतः सुता।
शिवाविन्यस्तमनसा सप्तविंशतिवत्सरान्॥
विनाय मेनका देवी परमाऋतिमिच्छती॥
सप्तविंशतिवर्षान्ते जगन्माता जगन्मयी।
सुप्रीता भवदर्थं प्राह प्रत्यक्षतां गता॥

श्रीदेव्युवाच।

यत् प्रार्थितं त्वया देवि! मत्तस्तत् प्रार्थयाधुना।
ततः सा प्रथमं पुत्रमृतं वव्रे यशस्विनी॥
यच्चापि तनयामेनां स्वरूपगुणशालिनीम्।
शुम्भदयानन्दकरीं भुवनत्रयदुर्लभाम्॥
ततो भगवतो प्राह मेनकां तनिषन्निभाम्॥

श्रीदेव्युवाच।

ऋतं पुत्राः संभवन्तु भवत्या वीर्य्यसंयुताः।
सुता च तव देवानां मानुषाणाञ्च रक्षणम्॥
हिताय सर्व्वजगतां भविष्यत्यद्भवेव ते।
एवमुक्त्वा जगद्धात्री तत्रैवान्तरधीयत॥
ततः सा कालिका देवी योगनिद्रा जगन्मयी।
पूर्व्वब्रह्मसतीरूपा जज्ञेऽर्थं मेनकां प्रभो॥
तनयास्वाकृतिरूपेव मेनकाजठरे शिवा।
वसन्तसमये देवी गर्भस्था जगदीश्वरी॥
अहोरात्रौ वसत्यन्ना गर्भेव गर्भिणीजनात्॥"

इति कालिकापुराणे ४० अध्यायः॥

मेनकात्मजा, स्त्री, (मेनकाया आत्मजा।) दुर्गा। इति हेमचन्द्रः॥ (ऋतुपर्णजा। यथा, महाभारते। १। ७२। १९।

"मेनां हिंस्युर्वने यावत् ऋषयो मांसभक्षिणः।
यथैवास्ता तां तत्र ऋतुपर्णा मेनकात्मजाम्॥")

मेनकाप्राणेशः, पुं, (मेनकायाः प्राणेशः पतिः।) हिमालयः। इति हेमचन्द्रः। ३। ६१॥

मेना, स्त्री, (मान्यते पूज्यते इति। मान पूजायाम् "बहुलमन्यत्रापि।" उणा० २। ७६। इति एनप् प्रत्ययेन निपातनात् साधुः।) मेनका। इति भरतश्चिरूपकोषः॥ सा पितृकन्या। यथा,

"तां मानसीं मेरुसखः पितृणां
कन्यां कुलस्य स्थितये स्थितिज्ञः।
मेनां सुतीनामपि माननीया-
मात्मानुरूपां विधिनोपयेमे॥"
इति कुमारसम्भवे। १। १८॥ *॥

यथा च, कौर्म्मे १२ अध्याये।
"अग्निष्वात्ता बर्हिषदो द्विधा तेषां व्यवस्थितिः।
तेभ्यः स्वाहा स्वधा चैव मेना वैतरणी तथा॥"
(स्त्री। यथा, ऋग्वेदे। १। ६२। ७।
"भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः।"
"मेनेति स्त्रीनाम। मेने स्त्रीरूपमापन्ने रोदसी।"
इति तद्भाष्ये सायणः॥ *॥ वृषभस्य कन्या।
यथा, ऋग्वेदे। १। ५१। १३।
"मेना भवो वृषभस्य॥"
"हे इन्द्र! त्वं वृषभस्य एतदाख्यस्य राज्ञो मेना भवः मेनानाम कन्यका भूः।" इति तद्भाष्ये सायणः॥*॥ वाक्। इति निघण्टुः। १। ११॥
"मानपूजायां इलजात् 'बहुलमन्यत्रापि इनच् भवति।' इति वचनादिनच्। बहुलमयङ्लुगात् वलोपः। पूज्यतेऽनया गुर्व्वादिरूपदेग्रवाक्येन पूज्या वा देवतात्वात्।" इति तट्टीकायां देवराजयज्वा॥ *॥ नदीविशेषः। यथा, महाभारते। ६। ६। २३।
"करविणीमचिमतीञ्च कुम्पचीरां महानदीम्।
मरद्वतीं प्रवरां मेनां हेमां धृतवतीं तथा॥")
मेनाजा, स्त्री, (मेनायाः जायते इति। जन्+डः। स्त्रियां टाप्।) पार्व्वती। इति हेमचन्द्रः॥
मेनादः, पुं, (मे इति नादोऽस्य।) विड्वराहः। छागः। मयूरः। इति मेदिनी। दे, ३६॥
मेनाधवः, पुं, (मेनायाः धवः स्वामी।) हिमालयः। इति त्रिकाण्डशेषः॥
मेन्धिका, स्त्री, (मां ग्रीवामिन्धयति प्रकाशयतीति। इन्ध+क्विप्+ख्युल्। टापि अत इत्वम्।) क्षुपविशेषः। इति केचित्। मेहदी इति भाषा॥
मेन्वी, स्त्री, (मां ग्रीवामिन्धयतीति। इन्ध+क्विप्+अच्। गौरादित्वात् ङीष्।) क्षुपविशेषः। इति केचित्। मेहदी इति भाषा॥
मेप, ञ्च ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, मेपते। ञ्च, अमिमेपत्। इति दुर्गादासः॥
मेरक्षः, पुं, विष्णुग्रन्थभेदः। इति हेमचन्द्रः॥
मेरुः, पुं, (मिनोति क्षिपति ज्योतींषि उच्चत्वात् मेरुः। डुमिञ् क्षेपे नान्वीति रुः। इति भरतः॥*॥ (यथा, मात्स्ये।१२१।८।
"देवर्षिगन्धर्व्वयुतः प्रथमो मेरुरुच्यते।
प्रागायतः ससौवर्ण उदयो नाम पर्व्वतः॥")
अपमालायवर्त्तिन्येका माला। यथा,—
"मालामेकैकमादाय सूत्रे सम्यातयेत् सुधीः।
सूत्रे सूत्रन्तु संयोज्य पुच्छे पुच्छन्तु योजयेत्॥
गोपुच्छसदृशी कार्य्यायवा सर्पाकृतिर्भवेत्।
तत्सजातीयमेकार्द्धं मेरुत्वेनाश्रयेत् सुधीः॥"
इत्युत्पत्तितत्त्वे ६० पटलः॥ *॥
करमालायां मेरुर्यथा,—
"तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका।
पर्व्वत्रयं मध्यमाया मेरुत्वे नोपकल्पयेत्॥"
इदन्तु शक्तिभिन्नविषयम्॥ *॥
शक्तिविषये मेरुर्यथा,—
"पर्व्वत्रयमनामायाः परिवर्त्तेन वै क्रमात्।
पर्व्वत्रयं मध्यमायास्तर्ज्जन्येकं समाहरेत्।
पर्व्वत्रयन्तु तर्ज्जन्या मेरुं तद्धि प्रार्व्वति!॥"
श्रीविद्याविषये मेरुर्यथा,—
"अनामामध्यमायाञ्च मूलाग्रन्तु त्रयं त्रयम्।
कनिष्ठायाञ्च तर्ज्जन्याश्चयं पर्व्व सुरेश्वरि!॥
अनामामध्यमायाञ्च मेरुः स्यादितयं शुभम्॥"
तल्लङ्घितजपे दोषो यथा,—
"अङ्गुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलङ्घने।
पर्व्वसन्धिषु यज्जप्तं तत् सर्व्वं निष्फलं भवेत्॥"
इति तन्त्रसारः॥
मेरुकः, पुं, (मिनोति क्षिपति गच्छतीति। मि+रुः। संज्ञायां कन्।) यज्ञधूपः। इति शब्दचन्द्रिका॥ धुना इति भाषा। (मध्यदेशस्य प्रदेशभेदः। यथा, हरिवंशसंहितायाम्। १४। २६।
"ऐणेयान्मेरुकनटराज्यपशुपालकीरकाश्मीराः।
अभिसारदरदतङ्गणकुलूतसैरिन्ध्यवनराष्ट्राः॥")
मेरुसावर्णः, पुं, एकादशमनुः। यथा,—
"ततस्तु मेरुसावर्णो ब्रह्मरुद्रमनुः स्मृतः।
ऋतुश्च ऋतुधामा च विष्वक्सेनो मनुस्तथा॥"
इति मात्स्ये ६ अध्यायः॥
मेलकः, पुं, (मिल्+भावे घञ्। स्वार्थे कन्।) सङ्गः। इत्यमरः। ३। २। २६॥ ("बहुमान्यमेलके बलावलसूत्रम्।" इति। २। १२६। मनुटीकायां कुल्लूकभट्टः॥)
मेलकलवर्ङ्ग, क्ली, (मिलतीति। मिल+ख्युल्।) मेलकं लवङ्गम्।) औषरलवङ्गम्। इति राजनिर्घण्टः॥
मेलना, स्त्री, (मिल्+णिच्+अङ्। टाप्।) मेलकः। मक्षिः। इति मेदिनी। ने, ४६॥ अञ्जनम्। इति हेमचन्द्रः। महानीली। इति राजनिर्घण्टः॥
मेलानन्दा, स्त्री, (मेलया मक्षया आनन्दो यस्याः।) मक्षाधारः। इति हारावली॥
मेलान्धुः, स्त्री, (मेलानां अन्धुः कूपिका।) मक्षाधारः। इति जटाधरः॥
मेलान्धुः, पुं, (मेलेव अन्धु अत्र।) मक्षाधारः। इति शब्दरत्नावली॥
मेव, ञ्च ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ञ्च, अमिमेवत्। ङ, मेवते। इति दुर्गादासः॥

मेषः, पुं, (मिषति अन्योन्यं स्पर्द्धते इति। मिष् स्पर्द्धायाम्+अच्।) पशुविशेषः। मेढ़ा इति मेढ़ा इति च भाषा॥ (यथा, पञ्चतन्त्रे।५।६२।
"मेषेण क्षपकाराणां कलहो यत्र वर्त्तते।
स भविष्यत्यसन्दिग्धं वानराणां भयावहः॥")
तत्पर्य्यायः। मेढ्रः २ उरभ्रः ३ उरणः ४ ऊर्णायुः ५ वृष्णिः ६ एडकः ७। इत्यमरः। २। ६। ७६॥ मेढ्रः ८ हुडुः ९ अङ्गिरणः १० अविः ११ लोमशः १२ वली १३ रोमशः १४ मेडुः १५ मेढ्रकः १६ मेण्टः १७ हुलुः १८। इति शब्दरत्नावली॥ मेण्टकः १९ हुडुः २० संफलः २१। इति हेमचन्द्रः। ४। ३३१॥ अस्य मांसगुणाः। मधुरत्वम्। शीतत्वम्। गुरुत्वम्। विष्टम्भित्वम्। दृंहणत्वञ्च। इति राजनिर्घण्टः॥ अपि च। पित्तश्लेष्मकरत्वम्। कुसुम्भशाकेन सह त्याज्यत्वञ्च। इति राजवल्लभः॥ *॥ लग्नविशेषः। औषधविशेषः। इति मेदिनी। षे, १२१॥ (यथा, सुश्रुते उत्तरतन्त्रे।१७ अध्याये।
"मेषस्य पुष्पैर्मधुकेन संयुतं
तदञ्जनं सर्व्वरुजे प्रयोजयेत्।
क्रियाश्च सर्व्वाः शतपोऽक्षवे हिताः
क्रमः परिव्रायिणि चापि पित्तजित्॥")
राशिविशेषः॥ तत्पर्य्यायः। क्रियः २। (यथा, श्रीमद्भागवते।५।२१।४। "यदा मेषतुलयोर्वर्त्तते तदाहोरात्राणि समानानि भवन्ति। यदा वृषभादिषु पञ्चसु च राशिषु चरति तदाहान्येव वर्द्धन्ते हसति च मासि मासि एकैका घटिका रात्रिषु॥") अस्याधिष्ठात्री देवता पुंमेषः। अश्विनीभरणीकृत्तिकापादैकेन मेषराशिर्भवति। अत्र जातः ईदृशो भवति। ग्रीवदशायां नेत्रदुःखी दयालुः धनी गानसुखी धार्म्मिकः धीरः मत्स्यमांसाशी च। स तु हृष्टोदयः। अस्य वर्णः। आरक्तः पीतश्च। अयं क्रूरः। पित्तोल्बणस्वभावः। कान्तिरहितः। समानाङ्गः। पर्व्वतचारी। पूर्व्वदिगधिपतिः। वैश्यवर्णः। अल्पस्त्रीसङ्गः। अल्पसन्तानः। सुदृढ़ः। अतिरक्षः। इति ज्योतिषम्॥ *॥
रव्याश्रिततद्राशिजातफलं यथा,—
"मेषे दिनेशे पुरुषः सुवेशः
सत्याहसः स्थानृपतेः समानः।
वृद्धा युतः पित्तलता च पीड़ा
वक्षोरुजा वा सततं महौजाः॥"*॥
चन्द्राश्रिततद्राशिजातफलं यथा,—
"स्थिरजनो रहितः स्वजनैर्नरः
सुतयुतः प्रमदाविजितो भवेत्।
अजगते द्विजराज इतीरितं
विसृतयाद्भुतया सहितः श्रिया॥"*॥
तज्जन्मजातफलं यथा,—
"मेषलग्ने समुत्पन्नश्चण्डो मानी धनी शुभः।
क्रोधी स्वजनहन्ता च विक्रमी परवत्सलः॥"
इति कोष्ठीप्रदीपः॥

तस्यस्य स्थूलमानम्। ३। ४७। इति ज्योतिस्तत्त्वम्॥ *॥ चितारकग्रहाक्रान्तिअश्वयानक्षस्य गगनमध्योदये मेषलग्नस्य अष्टादशपलाधिकदण्डैको गतो भवेत्। यथा,—

"तारकाचयमिते ग्रहाक्रान्तौ
केशवे गगनमध्यवर्त्तिनि।
मस्तवारणगतेऽजलग्नतो
निर्ययुर्गजमहीधरिप्रिकाः॥"

महेन्द्राक्रान्तियश्चतारकधनिष्ठानक्षस्य मस्तकोपर्य्युदये मेषलग्नस्य षट्त्रिंशत्पलाधिकदण्डद्वयं गतं स्यात्। यथा,—

"मस्तकोपरि समागते धने
महेन्द्राक्रान्तिनि पञ्चतारके।
यान्ति कान्तिमति मेषलग्नतः
सारसानि रसघस्रलिप्रिकाः॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम्॥

मेषक, पुं, (मिषतीति। मिष्+अच्। संज्ञायां कन्।) जीवग्राकः। राजनिर्घण्टः।

मेषकम्बल, पुं, (मेषलोमनिर्म्मितः कम्बलः। मध्यपदलोपी कर्म्मधारयः।) मेषलोमनिर्म्मितवस्त्रम्। तत्पर्य्यायः। ऊर्णायुः २। इत्यमरः। २। ६। १०॥

मेषलोचन, पुं, (मेषस्य लोचनमिव पुष्पमस्य।) चक्रमर्दः। इति भावप्रकाशः॥ मेषचक्षुस्तुल्यचक्षुषि, त्रि॥

मेषवल्ली, स्त्री, (मेषप्रिया वल्ली।) अजशृङ्गी। इति भावप्रकाशः॥

मेषविषाणिका, स्त्री, (मेषस्य विषाणं शृङ्गमिव प्रतिकृतिरस्याः। विषाण+प्रतिकृतौ कन्। टापि अत इत्वम्।) मेषशृङ्गी। इति रत्नमाला॥

मेषशृङ्ग, पुं, (मेषस्य शृङ्गमिव। तदाकृतित्वात्।) स्थावरविषभेदः। इति हेमचन्द्रः। ४। २६३॥ (यथा, सुश्रुते उत्तरतन्त्रे। १७ अध्याये।

"मेषशृङ्गस्य पुष्पाणि शिरीषधवयोरपि॥")

मेषशृङ्गी, स्त्री, (मेषशृङ्ग+गौरादित्वात् ङीष्।) अजशृङ्गीवृक्षः। मेढ़ाशृङ्गी इति भाषा। (यथा, सुश्रुते। १। ३६।

"मेषशृङ्गी मातुलुङ्गी सुरङ्गीत्यादि॥")

तत्पर्य्यायः। नन्दीवृक्षः २ मेषविषाणिका ३ चक्षुः ४ चक्षुर्व्वर्द्धनम् ५ मेढ्रशृङ्गी ६ शृङ्गहुमा ७। इति रत्नमाला॥ (तथास्याः पर्य्यायो गुणाश्च।

"मेषशृङ्गी विषाणी स्यान्मेषवल्लजशृङ्गिका॥
मेषशृङ्गी रसे तिक्ता वातला श्वासकासजित्।
रूक्षा पाके कटुस्तिक्ता व्रणश्लेष्माक्षिशूलजित्॥
मेषशृङ्गीफलं तिक्तं कुष्ठमेहकफप्रणुत्।
दीपनं भंसनं कासकृमिव्रणविषापहम्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

मेषा, स्त्री, (मिष्यतेऽसौ। मिष्+कर्म्मणि घञ्। टाप्।) त्रुटिः। इति शब्दचन्द्रिका। गुजराटी एलाइच इति भाषा॥

मेषाक्षिकुसुमः, पुं, (मेषाक्षीव अक्षिवत् कुसुमान्यस्य।) चक्रमर्दः। इति रत्नमाला॥

मेषाण्डः, पुं, (मेषस्याण्डमिवाण्डमस्य।) इन्द्रः। इति पुराणम्॥

मेषान्त्री, स्त्री, (मेषस्य अन्त्रमिव अन्त्रं क्षुद्रान्त्रमस्याः।) वल्लान्त्रीवृक्षः। इति राजनिर्घण्टः॥

मेषाम्बुः, पुं, (मेषप्रियः आम्बुः।) वर्षाराट्शः। इति शब्दचन्द्रिका॥

मेषाक्ष्यः, पुं, (मेषस्याक्ष्यः आक्षाख।) चक्रमर्दः। इति राजनिर्घण्टः॥ (विवरणमस्य चक्रमर्दशब्दे ज्ञातव्यम्॥)

मेषिका, स्त्री, (मेषी+स्वार्थे कन्। टाप्। ह्रस्वः।) मेषी। इति शब्दरत्नावली॥

मेषी, स्त्री, (मिष्यते यच्छते अर्थी इति। मिष्+घञ्। ङीष्।) तिनिशवृक्षः। जटामांसी। इति राजनिर्घण्टः॥ मेषशृङ्गीजातिः। भेड़ी। (यथा, वाजसनेयसंहितायाम्। ३। ५६।

"मेषवृषणमसि मेषवृषणाय गवेऽश्वाय पुरुषाय मेषवृषणं सुखं मेषाय मेष्यै॥")

तत्पर्य्यायः। जालकिनी २ अविः ३। इति त्रिकाण्डशेषः॥ एडका ४ मेषिका ५ इति शब्दरत्नावली। क्रुरी ६ रुशा ७ अविजा ८ वेशी ९। इति हेमचन्द्रः। ४। ३३१। अस्या दुग्धगुणाः। मधुरत्वम्। गाढ़त्वम्। स्निग्धत्वम्। कफापहत्वम्। वातामयकरत्वम्। स्थौल्यत्वम्। लोमग्रायाश्चेत् गुरुत्वम्। दृढ़दलत्वञ्च। इति राजनिर्घण्टः॥*॥ अपि च।

"आविकं सवयं स्वादु स्निग्धोष्णं वातनाशनं
प्रणुत्
अहृद्यं तर्पणं केश्यं शुक्रपित्तकफप्रदम्।
गुरुकासैरनिलोद्भूते केवले घानिले वरम्॥

इति भावप्रकाशः॥

अस्या दधिगुणाः। सुस्निग्धत्वम्। कफपित्तकरत्वम्। गुरुत्वम्। वाते रक्तंवाते च पथ्यत्वम्। श्लोपत्रणनाशित्वञ्च॥*॥ अस्या नवनीतगुणाः। स्निग्धगन्धत्वम्। शीतलत्वम्। मेधाहरत्वम्। पुष्टिदत्वम्। स्थौल्यत्वम्। मन्दाग्निदीपनत्वम्। सारकत्वम्। पाके हिमत्वम्। लघुत्वम्। योनिशूले कफे वाते दुर्नाम्नि च हितत्वञ्च। दुर्नाम्नि स्थाने गुदशूले इति पुस्तकान्तरे पाठः॥*॥ तस्या घृतगुणाः। अतीवगौरवात् सुकुमारदेहिनां वर्ज्यत्वम्। वृद्धिपाटवहरत्वम्। बलावहत्वम्। वयसां स्थिरत्वकारित्वञ्च। इति राजनिर्घण्टः॥ तन्मांसगुणाः। यथा, भावप्रकाशे।

"छागमेषवराश्वाद्याः याम्याः प्रोक्ता महर्षिभिः।
ग्राम्या वातहराः सर्व्वे दीपनाः कफपित्तलाः।
मधुरा रसपाकाभ्यां दृंहणा बलवर्द्धनाः॥"

मेस्करं, क्ली, दशमलवम्। यथा,—

"कर्म्मेस्थानञ्च दशमं खं मेस्करमाख्यदम्।"

इति ज्योतिस्तत्त्वम्॥

मेहः, पुं, (मेहति क्षरति शुक्रादिरनेनेति। मिह्+घञ्।) प्रमेहरोगः। इत्यमरः। २। ६। ५६॥ (अस्यौषधं यथा,—

"वङ्गभस्म द्विपलञ्च लेहयेन्मधुना सह।
ततो गुडसमं गव्यं भक्षयेत् कर्षमात्रकम्॥
गुडूचीसत्त्वमथवा शर्करासहितन्तथा।
सर्व्वमेहहरो ज्ञेयो वङ्गावलेह उत्तमः॥"

इति वङ्गावलेहः॥

"भल्लातकं समं कान्तमथकन्तु शिलाजतु।
शुद्धताप्यं शिलाजीर्णं त्रिफलाक्वोठजीरकम्॥
कार्षासमञ्जरीजन्मी समं भार्य्यच भक्षिता।
विंशद्वारं विशोष्याथ मधुयुक्तं लिहेत्ततः॥
मासमात्रं हरेन्मेहं मेघनादरसो महान्॥"

इति मेघनादरसः॥

"रसभस्म समायुक्तं वङ्गभस्म प्रकल्पयेत्।
अस्य मात्रत्रयं हन्ति मेहान् चौद्रसमन्वितम्॥"

इति वङ्गेश्वररसः॥

इति वैद्यकरत्नसारसंग्रहे प्रमेहाधिकारे॥ अन्यत् प्रमेहशब्दे द्रष्टव्यम्॥ *॥ मिहतीति। मिह+अच्।) मेघः। इति शब्दचन्द्रिका॥ प्रस्रावः। इति हेमचन्द्रः। ३। २६७॥ (अभ्राद्यभिसुखं तत्करणे दोषो यथा, मनौ। ४। ५२।

"प्रत्यग्निं प्रतिसूर्य्यञ्च प्रतिसोमोदकद्विजान्।
प्रतिगां प्रतिवातञ्च प्रज्ञा नश्यति मेहतः॥"

"अग्निसूर्य्यचन्द्रजलब्राह्मणगोवायुमभिसुखं मूत्रपुरीषे कुर्व्वतः प्रज्ञा नश्यति।" इति तट्टीकायां कुल्लूकभट्टः॥)

मेहनी, स्त्री, (मेहं हन्तीति। हन्+टक्। ङीष्।) हरिद्रा। इति रत्नमाला॥

मेहनं, क्ली, (मेहति क्षिपति मूत्रमेतसीति। मिह् सेचने+ल्युः।) शिश्नः। इत्यमरः। २। ६। ७६॥ (यथा, ऋग्वेदे। २०। १६३। ५।

"मेहनादनं कारवाक्षोम।"

"मेहनात् मेढ्रात्।" इति तद्भाष्ये सायणः॥ यथा, च सुश्रुते। १। ३५।

"दृश्यानि यस्य पर्व्वाणि सुमहन्त्यपि मेहनम्।
तथोरस्यबलीढ़ानि न च स्यात् पृष्ठमायतम्॥
कर्कशं श्रवणौ स्यातान्नासा चोचा शरीरिणः।
हसतो जल्पतो वापि दन्तमांसं प्रदृश्यते।
प्रेक्षते यश्च विभ्रान्तं स जीवेत् पञ्चविंशतिम्॥")

मूत्रम्। इति मेदिनी। ने, ११०॥ (यथा, सुश्रुते। १। ३२।

"वस्त्रवद्विप्लवन् यश्च भूमौ पतति शस्यते।
शुक्लमेढ्रो भवेच्छ्वेतः प्रज्ञामेहनश्च मनुष्यः॥")

भावेऽनट् प्रत्यये मूत्रोत्सर्गश्च॥

मेहनः, पुं, (मेहति क्षिपति रसमिति। मिह+ल्युः।) शुष्ककटहः। इति राजनिर्घण्टः॥

मेहना, स्त्री, (मेह्यते चार्य्यते शुक्रमस्यामिति। मिह चरणे+क्विप्+अधिकरणे युच्। स्त्रियां टाप्।) महिला। इति केचित्॥ (मेहनीयम्। यथा, ऋग्वेदे। ५। ३६। १।

"यदिन्द्रचित्रमेहनास्ति त्वादातमदिव॥")

मैत्रं, क्ली, (मित्रादागतमिति । यद्वा, मित्रस्येदमिति । मित्र + "तस्येदम् ।" ४।३।१२० । इति अण् ।) अनुराधानक्षत्रम् १७ । यथा,—

"मैत्राद्यपादे खपितीह विष्णु-
र्ब्रह्मायमर्धे परिवर्मते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ।"

इति तिथ्यादितत्त्वम् ॥*॥

(मित्रः सूर्य्यो देवतास्येति । आदित्यलोकः । यथा, महाभारते । १२ । ३१७ । ३ ।

"पायुगोत्रक्रममाचक्षु मैत्रं स्थानमवाप्नुयात् ।
एथिवीं जघनेनाथ ऊरुभ्याञ्च प्रजापतिम् ॥"

यद्वा, मनुः । १२ । ७२ ।

"मैत्राच्चज्योतिकः प्रेती वैश्यो भवति पूयभुक् ॥")

पुरीषोत्सर्गः । यथा,—

"ततः कल्यं समुत्थाय कुर्य्याच्चैत्रं नरेश्वर ! ।
नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ॥
कल्यं उषःकालम् । मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरीषोत्सर्गः ।" इत्याह्निकाचारतत्त्वम् ॥

अपि च ।

"ब्राह्मे मुहूर्त्ते चोत्तिष्ठेत् सुखो रक्षार्थमायुषः ।
शरीरचिन्तां निर्व्वर्त्त्य मैत्रं कर्म्म समाचरेत् ॥"

मैत्रं मलमूत्रोत्सर्गः । इति राजवल्लभः ॥*॥

तत्र निषिद्धस्थानादि यथा,—

"छायाकूपनदीगोष्ठचैत्याम्भःपथिभस्मसु ।
अग्नौ चैव श्मशाने च विण्मूत्रे न समाचरेत् ॥
न गोमये न हरिते वा महाहरिते च ग्राहवे ।
न तिष्ठन् वा न निर्व्वासा न च पर्व्वतमस्तके ॥
न जीर्णदेवायतने न वल्मीके कदाचन ।
न ससत्त्वेषु गर्त्तेषु न गच्छन् वा समाचरेत् ॥
तुषाङ्गारकपालेषु राजमार्गे तथैव च ।
न क्षेत्रे न विले वापि न तीर्थे न चतुष्पथे ॥
नद्यां नदसमीपे वा गोचरे न पराशुचौ ।
न सोपानत्पादुको हि छत्री वा नान्तरीयके ॥
न चैवामिमुखः स्त्रीणां गुरुब्राह्मणयोर्गवाम् ।
न देवदेवालययोरपामपि कदाचन ॥
न ज्योतींषि निरीक्षन् वा न वायुभिमुखो-
ऽथवा ।
प्रत्यादित्यं प्रज्वलनं प्रतिसोमं तथैव च ॥"

इति कौर्म्मे उपविभागे १२ अध्यायः ॥

अस्य विस्तारस्तु पाद्मे उत्तरखण्डे १६० अध्याये द्रष्टव्यः ॥ * ॥ (मित्रस्य भावः । मित्र + अण् । मित्रता । यथा, मनुः । ८ । ११८ ।

"लोभात् मोहात् भयात् मैत्रात् कामात्
क्रोधात् तथैव च ।
अज्ञानात् बालभावाच्च साक्ष्यं वितथमुच्यते ॥")

त्रि, मित्रसम्बन्धी । (यथा, महाभारते । १२ । १४४ । २३ ।

"पितुर्गा ये न भाषन्ते मित्रभेदकरीं गिरम् ।
ऋतं मैत्रञ्च भाषन्ते ते नराः स्वर्गगामिनः ॥"

मित्रताशाली । यथा, श्रीमद्भगवद्गीतायाम् । १२ । १३ ।

"अद्वेष्टा सर्व्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥"

"मित्रभावो मैत्रो मित्रतया वर्त्तते ।" इति श्रीधरस्वामिभाष्यम् । "मैत्रः स्नेहेन कृपालुः ।" इति श्रीधरस्वामी । "मैत्रो मित्रता तद्वान् मैत्रः ।" इति श्रीमधुसूदनसरस्वती ।)

मैत्रः, पुं, ब्राह्मणः । इति त्रिकाण्डशेषः ॥ (यथा, मनुसंहितायाम् । २ । ८७ ।

"अध्येष्यमाणं तु गुरुर्नित्यकालमतन्द्रितः ।
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ॥
शूद्रवैश्यौ तथैवाधीयानौ गुरुमन्तिके ।
अधीष्व भो इत्यृचं ब्रूयातां विरमेति च ॥
ब्राह्मणस्य तु वक्तव्ये अधीष्वेत्यनुपूर्व्वकम् ।
विरामोऽस्त्विति राज्ञोक्तो वैश्यस्य तु पदं स्मरेत् ॥
अकारश्चाप्यकारश्च मकारश्च प्रजापतेः ।
वेदत्रयान्निरदुहद्भूर्भुवःस्वरितीति च ॥
त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ।
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ॥
एतदक्षरमेतां च जपन् व्याहृतिपूर्व्विकाम् ।
सन्ध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ॥
ओङ्कारपूर्व्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥
योऽधीतेऽहन्यहन्येतांस्त्रीणि वर्षाण्यतन्द्रितः ।
स ब्रह्मभूयाय कल्पते स ब्रह्मभूयाय कल्पते ॥
ब्रह्मणो मुखमेवैतत् यदेनमुपसंग्रहः ।
तस्मात् प्रदेशमेतस्य नाधीयीताशुचिः क्वचित् ॥
सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः ।
नायन्त्रितस्त्रिवेदोऽपि सर्व्वाशी सर्व्वविक्रयी ॥
एतैर्विधानं सततं यन्त्रितोऽनलसः शुचिः ।
सावित्रीमप्यधीयानो गुरुं तारयते सदा ॥
सहस्रकृत्वस्त्वभ्यस्य बाह्यमेतत् त्रयं द्विजः ।
महतोऽप्येनसो मासात् त्वचेवाहिर्विमुच्यते ॥
एकाक्षरं परं ब्रह्म प्राणायामाः परन्तपः ।
सावित्र्यास्तु परं नास्ति मौनात् सत्यं विशिष्यते ॥
त्रिपदेयं पुरा ब्रह्मन्नृषीणां परमं तपः ।
ब्रह्मणा समनिर्द्दिष्टा जपन्नेवास्तु तापसः

(मित्रयुवंशोऽवादौ च । यथा, हरिवंशे । १२ । ७७—७८ ।
"अत ऊर्द्धं प्रवक्ष्यामि दिवोदासस्य सन्ततिम् ।
दिवोदासस्य दायादो ब्रह्मर्षिर्मैत्रयुर्नृपः ।
मैत्रायणी ततः शाखा मैत्रेयास्तु ततः स्मृताः ।")
मैत्रेयिका, स्त्री, मित्रयुङ्गम् । इति त्रिकाण्डशेषः । (मित्रयूनां भावः कर्म्म वा । मित्रयु + "गोत्रचरणाच्छाघात्याकारतद्वेतेषु ।" ५ । १ । १२४ । इति ष्वुञ् । ततः "केकयमित्रयुप्रलयानां यादेरियः ।" ७ । ३ । २ । इति इयादेशः । यथा, "मैत्रेयिकया शाखते ।" इति काशिका । ७ । ३ । २ ।)
मैत्र्यं, क्ली, क्लो, (मित्र + ष्यञ् ।) मित्रस्य भावः । मित्रस्य कर्म्म । इत्यमरभरतौ । ३ । ५ । ३६ । (यथा, पञ्चतन्त्रे । ३ । ७० ।
"प्राहुः सामपरं मैत्र्यं जनाः शास्त्रविचक्षणाः ।
मित्रताच पुरस्कृत्य किञ्चिद्वक्ष्यामि तच्छृणु ।")
मैथिली, स्त्री, (मिथिला निवासोऽस्येति । मिथिला + "सोऽस्य निवासः ।" ४ । ३ । ८६ । इति अण् । मैथिलस्यापत्यं स्त्री । मैथिल + ङीष् ।) सीता । इति हेमचन्द्रः । (यथा, भट्टिकाव्ये । २ । ४७ ।
"हिरण्मयी शालभञ्जिकेव भङ्गमा
च्युतादिवः स्वात्सुरिवाचिरप्रभा ।
शशाङ्ककान्तेरधिदेवताऽसति:
सुता ददे तस्य सुताय मैथिली ।"
मिथिलापतिमात्रे, पुं । यथा, महाभारते । १२ । ६६ । ३ ।
"जनको मैथिलो राजा महात्मा सर्व्वतत्त्ववित् ।
योधान् स्वान् दर्शयामास स्वर्गं नरकमेव च ।")
मैथुनं, क्ली, (मिथुने सम्भवतीति । मिथुन + "संभूते ।" ४ । ३ । ४१ । इति अण् । मिथुनस्येदमित्यण् वा ।) अभ्याधानम् । यथा, मनुः
तपौ ।
"असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने ।
मैथुने मिथुनशब्दवाच्ये स्त्रीपुंससाध्ये अभ्याधानपुत्रोत्पत्त्यादौ ।" इत्यहाह्नतत्त्वम् ।*। सङ्गतम् । रतम् । इत्यमरः । ३ । ३ । १२१ । "सङ्गतिः सङ्गमो दारसंयोगः विवाह इति कलिङ्गः । रतं सुरतम् । अनयोर्मैथुनम् । मिथुनात् सङ्गमे इदमर्थे स्वार्थे रतौ निष्पाद्यार्थे वा यञ् । सम्भवे सुरते युग्मे दम्पतौ मिथुनमिष्यते । इति जटाधरः ।" इति वृत्तीकायां भरतः ।*। शेषस्य पर्य्यायः । सुरतम् २ अभिमानितम् ३ धर्षितम् ४ संप्रयोगः ५ अवारतम् ६ अन्नसम्भवकम् ७ उपहरम् ८ त्रिभद्रम् ९ क्रीडारत्नम् १० महासुखम् ११ । इति त्रिकाण्डशेषः । अपायः १२ ग्राम्यधर्म्मः १३ रतम् १४ निधुवनम् १५ । इत्यमरः । २ । ७ । ५७ । अस्य गुणाः । धातुसाम्यकारित्वम् । रतिसन्तानदार्ढ्यत्वञ्च । अतिप्रियमैथुनस्य त्रासकासज्वरकारित्वम् । अमैथुनस्य प्रमेहमेद यस्थिरोगाग्निमान्द्यकारित्वम् । स्त्रीसंसर्गरहितस्य आयुरन्नराश्रीरबलवर्णस्थिरोपचितमांसादि भवन्ति । पूज्यस्थानाशुचिस्थानसेकस्थानलोकसमीपप्रातःकालसन्ध्याकालपर्व्वकालेषु तस्य त्याज्यत्वम् । एतत्कर्म्मणि रजस्वलाकामा मलिना बन्ध्या वर्ष्मज्येष्ठा वयोज्येष्ठा व्याधियुक्ताङ्गहीनासती वेश्या योनिदोषयुक्ता सगोत्रा गुरुपत्नी भिक्षुकी कपटव्रतधारिणी दृष्टा च त्याज्या । रजस्वलागमने दृष्टायुक्तेः क्षयोऽधर्म्मश्च भवति । कपटव्रतयुक्तागुरुपत्नी सगोत्राद्दृढागमने एवं पर्व्वकाले सन्ध्याकाले च स्त्रीमैथुने पापमायुःक्षयश्च भवति । वयोरूपगुणोपेतां कुलशीलसमन्विताम् । अधिकामां कृशामलकृतां वाजीकरणपीडिताञ्च प्रमदां दृष्टोऽधिकामश्च पुरुषः सेवेत । शुक्रवर्द्धकद्रव्यं सशर्करं शीतजलं वा पीत्वा कामवाजीकरणं सुरूपामन्यां दृष्टां प्रमदामाद्यप्रहरे दृढः कामुको गत्वा तद्दृढं सुखं क्षपेत् । असद्दृढगमने तु नरो धातुवैषम्यमेति । रात्रौ क्षीरं सशर्करं क्षीरपानं निद्रा गौढिकरसभोजनञ्च हितम् । इति राजवल्लभः । * । ("तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति । यच्च तत्राधीयते गर्भः स प्रसवमागी विमुच्यते । द्वितीयेऽप्येवं स्रुतिकायदृष्टे वा । तृतीयेऽप्येवमसम्पूर्णाङ्गोऽल्पायुर्वा भवति । न च प्रवर्त्तमाने रक्ते बीजं प्रविष्टं शुक्रकरं भवति यथा नद्यां प्रतिस्रोतः स्रावितव्यं प्रक्षिप्तं प्रतिनिवर्त्तते नोर्द्धं गच्छति तद्वदेव द्रष्टव्यम् । तस्मान्नियमवतीं स्त्रिरात्रं परिहरेत् । अतःपरं मासादुपेयात् ।"
"ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ।
मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणम् ।
कललं जायते तस्या बर्ब्बितं पेटकैर्युते: ।"
इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ।)
व्रतदिवसे अहोरात्रमैथुनस्य त्याज्यत्वं यथा,—
"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ।
मैथुनं विविधं ज्ञात्वा व्रते क्रीडाविवर्ज्जयेत् ।"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४ अध्यायः ।
अस्य विधिनिषेधौ यथा,—
"ऋतुस्नातामुपगमः पुत्रः स्वर्गाभवनीपते ! ।
पुत्रामर्त्ते शुभे काले व्येकयुग्मासु रात्रिषु ।
नाक्षातां तु स्त्रियं गच्छेन्नातुरां न रजस्वलाम् ।
नानिष्टां न प्रकुपितां नाप्रस्नातां न दुर्म्मनीम् ।
नादक्षिणां नान्यकामां नाकामां नान्ययोषितम् ।
क्षुत्क्षामामतिभुक्तां वा स्वयं वैभिर्गुणैर्युतः ।
स्नातः सुगन्धवक्त्रः प्रीतो नाभ्रातः क्षुधितोऽपि वा ।
सकामः सानुरागश्च स्वयं पुरयो व्रजेत् ।
चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ।
तैलस्त्रीमांससंभोगी पर्व्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं ध्रुवम् ।
अग्नेयपर्व्वस्वेतेषु तस्मात् संयमिभिर्बुधैः ।
भार्य्यां सच्छास्त्रदेवेज्याध्यानजप्यपरैर्नरैः ।
नान्ययोनावयोनौ वा नोपसृत्यौषधस्तथा ।
देवद्विजगुरूणाञ्च स्वयायी नाम्नयो भवेत् ।
चैत्यचत्वरतीर्थेषु नैव गोष्ठे चतुष्पथे ।
नैव ब्रह्मणगोपवने सलिलेषु महीपते ! ।
प्रोक्तपर्व्वस्वशेषेषु नैव भूपाल ! सन्नयोः ।
गच्छेद्दाराय मतिमान्न स्त्रीकारपीडितः ।
पर्व्वस्वभिगमोऽधन्यो दिवा पापप्रदो नृप ! ।
भुवि रोगावहो नृणामप्रशस्तो जलाशये ।
परदाराञ्न गच्छेत मनसापि कदाचन ।
किन्तु वाचास्त्रिवर्गोऽपि नास्ति तेषु स्वयाविनाम् ।
हतो नरकमभ्येति क्षीयतेऽपि चायुषः ।
परदारगतिः पुंसामयशश्चापि भीतिदा ।
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत् ।
यथोक्तदोषहीनेषु सकामेष्वृतावपि ।"
इति विष्णुपुराणे । ३ । ११ । १११-१२४ ।*।
परस्त्र्यादिगमने दण्डो यथा,—
"ब्राह्मणः क्षत्रियो वैश्यः क्षत्रविट्शूद्रयोषितः ।
व्रजन्क्रमाद्यो भवेद्राजन् दण्ड उत्तमसाहसम् ।
वैश्यागमे च विप्रस्य क्षत्रियस्यान्त्यजागमे ।
मध्यमं प्रथमं वैश्यो दण्ड्यः शूद्रागमाद्व्रजेत् ।
शूद्रः सर्व्वागमने शूद्रो दण्ड्यो महीक्षता ।
वैश्यस्य द्विगुणं राजन् ! क्षत्रियस्त्रिगुणं तथा ।
ब्राह्मणस्य भवेद्दण्डस्तथा राजन्यतुर्गुणम् ।
अगुप्तासु भवेद्दण्डः खगुप्तासु द्विगो भवेत् ।
माता भार्य्यास्वसा स्नुषा भ्रूर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी तथा ।
भागिनेयी तथा चैव राजपत्नी तथैव च ।
तथा प्रव्रजिता नारी वर्णोत्तमा तथैव च ।
इत्यगम्यासु निर्द्दिष्टासासु गमने नरः ।
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वधमर्हति ।
भ्रातृभार्य्यागमे पूर्व्वादण्डस्तु द्विगुणो भवेत् ।
चाण्डालीञ्च स्वपाकीं वा गच्छन् वधमवाप्नुयात् ।
तिर्य्यग्योनौ च गोवर्ज्ये मैथुनं योऽभिसेवते ।
स पञ्चं प्राप्नुयाद्दण्डं तस्याश्च यदसोदकम् ।
सुवर्णञ्च भवेद्दण्डो गां व्रजन् मनुजोत्तम ! ।
वैश्यागामी द्विजो दण्ड्यो वैश्यशुल्कसमं पशुम् ।
गृहीत्वा वेतनं वैश्या लोभादन्यञ्च गच्छति ।
वेतनं द्विगुणं दत्त्वादण्डञ्च द्विगुणन्तथा ।
अन्यसुद्दिश्य यो दद्यात् नयेदन्यस्य कारणात् ।
तस्य दण्डं भवेद्राजन् ! सुवर्णस्य च मासकम् ।
भोक्त्वा भोगान्न यो दद्यादाप्तो द्विगुणवेतनम् ।
राज्ञश्च द्विगुणं दण्डन्तथा धर्म्मो न हीयते ।
बहूनां व्रजतामेकां सर्व्वे ते द्विगुणं दमम् ।
दद्युः पृथक् पृथक् सर्व्वे दण्डञ्च द्विगुणं परम् ।"
इति मात्स्ये २०१ अध्यायः ।
मैनाकः, पुं, (मेनकाया अपत्यं पुमान् । मेनकायां भव इति वा । मेनका + अण् । एषोदरादित्वात्

साधुः ।) पर्व्वतविशेषः । तत्पर्य्यायः । हिरण्यनाभः २ सुनाभः ३ हिमवत्सुतः ४ । इति जटाधरः ॥ स तु हिमालयस्य ज्येष्ठपुत्रः । यथा,—
"ततो भगवती प्राह मेनकां मुनिसन्निभाम् ।
स्मितपूर्व्वं तदा तस्याः पूरयन्ती मनोरथम् ॥
श्रीदेव्युवाच ।
सुतं पुत्राः संभवन्तु भवत्या वीर्य्यसंयुताः ।
तत्रैको बलवान् मुख्यः प्रथमं संभविष्यति ॥
एवमुक्त्वा जगद्धात्री तत्रैवान्तरधीयत ।
मेनका च सुतं लब्ध्वा स्वस्थानं प्रविवेश ह ॥
ततः काले तु संप्राप्ते मैनाकमचलोत्तमम् ।
पवनेन सह योऽद्यापि सिन्धुमध्ये प्रवर्त्तते ॥
मेनका सुषुवे देवी देवेन्द्रं सर्व्वया गतम् ।
अन्यानूनगुणं पुत्रान् क्रमात् सा सुषुवे च ह ॥"
इति कालिकापुराणे ४० अध्यायः ॥
(दानवविशेषः । इति हरिवंशे भविष्यपर्व्वणि । २३९ । ३ ॥)

मैनाकस्वसा, [ऋ] स्त्री, (मैनाकस्य स्वसा ।) पार्व्वती । इति हेमचन्द्रः । २ । ११८ ॥

मैनिकः, पुं, (मीनं हन्तीति । मीन+"पचिमत्स्यदृगादि हन्ति ।"४ । ४ । ३५ । इति ठक् ।) जालिकः । इति सिद्धान्तकौमुदी ॥

मैन्दः, पुं, विष्णुवध्यासुरविशेषः । इति हेमचन्द्रः । २ । १३४ ॥ (यथा, हरिवंशे । ४१ । १५८—१६० ।
"अपरः केशवस्यायं प्रादुर्भावो महात्मनः ।
विख्यातो माथुरे कल्पे सर्व्वलोकहिताय वै ॥
यत्र ग्रामश्च मैन्दश्च द्विविदं कंसमेव च ।
देवान् मानुषदेहस्थान् क्षुदयामास वीर्य्यवान् ॥"
वानरविशेषः । इति रामायणम् ॥ (यथा, महाभारते । २ । ३१ । १८ ।
"तत्र वानरराजाभ्यां मैन्देन द्विविदेन च ।
युयुधे दिवसान् सप्त न च तौ विक्षतिं गतौ ॥")

मैन्दहा, [न्] पुं, (मैन्दं हतवानिति । हन्+क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

मैरेयं, क्ली, (मारं कामं जनयतीति । मार+ढक् । निपातनात् साधुः ।) मद्यविशेषः । इत्यमरः । २ । १० । ४२ ॥ "यद्यपि ।
'सौधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् ।
मैरेयं धातकीपुष्पगुडधावाज्यसंस्कृतम् ॥'
इति माधवेन मेदः कृतः । तथापि कल्पभगवद्वचनेऽदोषकृम् । मारं कामं जनयति मैरेयं स्त्रीयः । निपातनादात् ऐत्वम् ।" इति भरतः । (यथा, "मद्यन्तु सौधुमैरेयमिरा च मदिरा सुरा ।
कादम्बरी वारुणी च हालापि बलवल्लभा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
क्वचित्, पुंलिङ्गेऽपि दृश्यते । यथा,—
"तीक्ष्णः कषायो मदकृत् दुर्नामकफशुक्रकृत् ।
क्रमिमेदोऽनिलहरो मैरेयो मधुरो गुरुः ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

मैलन्दः, पुं, भ्रमरः । यथा । "श्रीमन्मुरहरपदपाथोरुहनिःसरन्मकरन्दसन्दोहास्वादनतुन्दिलमनोमैलन्द इत्यादि ।" इति वरररुचिकृतपत्रकौमुद्यां राजप्रश्नस्तिः ॥

मोच, कि लेपे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) कि, मोचयति मोचति । इति दुर्गादासः ॥

मोचः, पुं, (मोच+भावे घञ् । मोच्यते दुःखमनेन । मोच+करणे घञ् । इति भरतः ।) मुक्तिः ॥ (यथा, सांख्यसारे । २ । ७ । २५ ।
"न मोक्षो नभसः पृष्ठे न पातालेऽपि न भूतले ।
सर्व्वाग्रासंक्षये चेतःक्षयो मोक्ष इति श्रुतेः ॥")
मोक्षधर्म्मेषु महाभारते ग्लानिपर्व्वणि द्रष्टव्यः ॥ पाटलिवृक्षः । मोचनम् । इति मेदिनी । चे, २५ ॥ (यथा, मेघदूते । ६१ ।
"साध्यो मोक्षस्तव यदि सखे ! धर्म्मलभ्यस्य नात्र
क्रीडाशैलाः श्रवणपरुषैर्गर्ज्जितैर्भाययेस्ताः ॥")
न्लघु । इति हेमचन्द्रः । १ । ७५ ॥ (विश्लेषः । यथा, श्रीमद्भगवद्गीतायाम् । ७ । १९ ।
"जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥"
"मोक्षाय विश्लेषणार्थम् ।" इत्यानन्दगिरिः । आत्मस्वरूपदर्शनम् । इति रामानुजः । निरसनम् । इति श्रीधरस्वामी ॥ पतनम् । यथा, कुमारसम्भवे । ३ । ३१ ।
"मरोद्धताः प्रत्यनिलं विचेरु-
र्वनस्थलीर्मर्म्मरपत्रमोक्षाः ।"
"मर्म्मरपत्रमोक्षाः शीर्णपर्णपाताः ।" इति तट्टीकायां मल्लिनाथः ॥)

मोचकः, पुं, (मोचयतीति । मोच+ण्वुल् ।) सुष्ककदलः । इति राजनिर्घण्टः ॥ (यथा, वृहत्संहितायाम् । ५४ । ११३ ।
"तोयं घृतं मोचकभक्षणं वा
यत्सप्तरात्रं परिवेचनं तत् ॥"
त्रि, मोचनकर्त्ता । यथा, मनुसंहितायाम् । ४ । २४२ ।
"अवन्तिकानां सन्धाता सन्धिकानाञ्च मोचकः ॥")

मोचोपायः, पुं, (मोचस्य मुक्तेरुपायः ।) मुक्तिसाधनम् । तत्तु तपः । शमादिः । योगः । ज्ञानञ्च । इति हेमचन्द्रः । १ । ७० ॥ (यथा, हरिवंशे । २५५ । ६३ ।
"स तं कृष्णगतं दृष्ट्वा कृपयाभिपरिप्लुतः ।
उवाच दानवश्रेष्ठं मोचोपायं ददामि ते ॥")

मोघं, त्रि, (मुह्यतेऽस्मिन्निति । मुह+घञ् । ऋदृदादित्वात् कुत्वम् ।) निरर्थकम् । इत्यमरः । ३ । १ । ८२ ॥ (यथा, मनौ । ६ । ५० ।
"यद्यद्गोषु दुष्टासु वत्सानां जनयेच्छतम् ।
गोमिनामेव तत् वत्सा मोघं स्कन्दितमार्षभम् ॥"
यथा च ।
"प्रेतभूतपिशाचाश्च रक्षांसि विविधानि च ।
मद्यमांससुरं नित्यमुपसर्पन्ति मानवम् ॥
तानि मेध्यवलीप्यानि प्रतिगृह्णन्ति निर्घृणाः ।
तस्माद्मोघाः क्रियाः सर्व्वा भवन्त्येव गतायुषः ॥"
इति सुश्रुते सूत्रस्थाने ३१ अध्याये ॥)
हीनम् । इति मेदिनी । घे, ४ ॥ (यथा, आर्य्यासप्तशत्याम् । ६७० ।
"सज्जन एव हि विद्या श्रोभायै भवति दुर्ज्जने मोघा ॥")

मोघः, पुं, (मुह्यत्यस्मिन् । मुह+घञ् । कुत्वम् ।) प्राचीरम् । इति शब्दमाला ॥

मोघपुष्पा, स्त्री, (मोघं पुष्पं रजो यस्याः ।) वन्ध्या । इति राजनिर्घण्टः ॥

मोघा, स्त्री, पुं, (मुह्यत्यनया । मुह+घञ् । कुत्वम् । स्त्रियां टाप् ।) पाटला । इति मेदिनी । घे, ४ ॥ (अस्याः पर्य्यायो यथा,—
"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
छण्डघण्टा कुवेराक्षी कालस्कन्धालिवल्लभा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
विड्लवणम् । इति शब्दमाला ॥

मोघोलिः, पुं, प्राचीरम् । इति हारावली ॥८॥

मोचं, क्ली,(मुच्यति त्वगादिकमिति । मुच्+अच् ।) कदलीफलम् । इत्यमरः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ३१ अः । "तालनाडिकेरपनसमोचप्रियालविल्वमधुकक्षौद्रगुडतक्रदधिकोलेक्षाः पित्तसंसृष्टे वायौ ॥" विवरणमस्य कदलीफलशब्दे द्रष्टव्यम् ॥)

मोचः, पुं, (मुच्यति त्वचमिति । मुच्+अच् ।) श्रोभाञ्जनवृक्षः । इति मेदिनी । चे, ८ ॥ (यथा, महाभारते । ३ । १५८ । ४३ ।
"पनसाम्रकुचान् मोचान् खर्ज्जूरानम्बुवेतसान् ॥")

मोचकः, पुं, (मोचयति संसारादिति । मुच्+णिच्+ण्वुल् ।) मोचः । (मुच्यति गन्धं त्वचमिति वा । मुच्+ण्वुल् ।) कदली । शिवुः । (मुञ्चति विषयानिति ।) विरागी । इति हेमचन्द्रः । ४ । २०० ॥ सुष्ककदलः । इति राजनिर्घण्टः ॥ (मुक्तिकारके, त्रि । यथा, शिवपुराणे वायुसंहितायां पूर्व्वभागे । २ । ५१ ।
"असुक्तो मोचकश्चायमकाक्षः कालचोदकः ॥")

मोचनं, क्ली, (मुच्+ल्युट् ।) मोचः । (यथा, महाभारते । ५ । ८४ । २१ ।
"अवतीर्य रथात्तूर्णं कृत्वाशौचं यथाविधि ।
रथमोचनमादिश्य सन्ध्यामुपविवेश ह ॥")
कल्कनम् । दम्भः । श्राद्धम् । इति मुचधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् । (मोचयतीति । मोचि+ल्युः । मोचनकर्त्तरि, त्रि । यथा, भागवते । ६ । १३ । २३ ।
"धन्यं यशस्यं निखिलाघमोचनं
रिपुञ्जयं स्वस्त्ययनं तथायुषम् ॥")

मोचनी, स्त्री, (मोचयति रोगादिति । मुच्+णिच्+ल्युः । स्त्रियां ङीप् ।) कण्टकारी । इति जटाधरः ॥ मोचकश्चौ च ॥

मोचरसः, पुं, (मोचस्य रसः ।) श्राल्मलिनिर्य्यासः । तत्पर्य्यायः । मोचसुत २ मोचस्रावः ३ मोच-

निर्यासः ४ पिच्छिलसारः ५ सुरसः ६ ग्राह्यलौ-
वेष्टः ७ मोचसारः ८। अस्य गुणाः। कषायत्वम्। कफवातहरत्वम्। रसायनत्वम्। बलपुष्टिवर्णवीर्य्यप्रज्ञायुर्दृष्टिहितत्वम्। ग्राहित्वञ्च। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। उत्तरतन्त्रे। ४० अध्याये।
"तिलामोचरसो लोध्रं तथैव मधुकोत्पलम्।
कच्छरातिलकल्कञ्च योगाश्चत्वार एव तु।
आजेन पयसा पेयाः सरक्ते मधुसंयुताः॥")

मोचा, स्त्री, (सुचति त्वचमिति। सुच्+अच्। टाप्।) ग्राह्यलिवृक्षः। (यथा,—
"ग्राह्यलिस्तु भवेन्मोचा पिच्छिला पूरणीति च।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी।"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे॥)
कदलीवृक्षः। इत्यमरः। २। ४। १३३॥
(यथास्याः पर्य्यायः।
"कदली वारणा मोचाम्बुसारांशुमतीफला॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
नीलीवृक्षः। इति राजनिर्घण्टः॥

मोचाटः, पुं, क्षत्त्रजातेः। रम्भाख्ये। मलयोद्भवः। इति मेदिनी। टे, ५४॥

मोची, स्त्री, (सुच्यते रोगो ययेति। सुच्+घञ्। ङीष्।) छिन्नमोचिका। इति रत्नमाला॥
(विवृतिरस्या छिन्नमोचिकाशब्दे ज्ञातव्या॥)

मोटकं, क्ली, (सुच्यते सुखीक्रियते इति। सुट्+घञ्। ततः कन्।) पिष्टदानार्थद्विगुणसुखकृच्चयम्। यथा। "इति द्विगुणसुखदर्भमोटकं पिष्टलाक्षणवामपार्श्वे दद्यात्।" इति आह्निकप्रयोगतत्त्वम्॥

मोटकी, स्त्री, (मोटक+ङीष्।) रागिणीविशेषः। इति हलायुधः॥

मोटनं, क्ली, (सुट्+ल्युट्।) चूर्णीकरणम्। आक्षेपः। इति सुटधात्वर्थदर्शनात्॥

मोटनः, पुं, (मोटतीति। सुट्+ल्युः।) वायुः। इति राजनिर्घण्टः॥

मोटनकं, क्ली, (मोटनेन कायतीति। कै+कः।) एकादशाक्षरच्छन्दोविशेषः। यथा,—
"स्यान्मोटनकं तजभाश्च जगौ॥"
"रङ्गे खलु मल्लकलाकुशलः
आखूरमहाभटमोटनकम्।
यः केलिलवेन चकार च मे
संसाररिपुं प्रति मोटयतु॥"
इति छन्दोमञ्जरी॥

मोटा, स्त्री, (सुट्+अच्। टाप्।) वला। इति राजनिर्घण्टः॥

मोट्टायितं, क्ली, (सुट्+भावे घञ्। बाहुलकात् घनसुट्। ततो भट्टादित्वात् क्वच्। ततो भावे क्तः।) स्त्रीणां स्वाभाविकदशविधालङ्कारान्तर्गतालङ्कारविशेषः। इति हेमचन्द्रः॥ तल्लक्षणं यथा, उज्ज्वलनीलमणौ॥
"कान्तसारणवार्त्तादौ हृदि तद्भावभावतः।
प्राकट्यमभिलाषस्य मोट्टायितमुदीर्य्यते॥"

मोत्तः, पुं, (सुच्+अच्।) शुक्लपटलम्। नक्तः। मक्षिका। सर्षपकरञ्जः। इति मेदिनी। ते, २४॥

मोदः, पुं, (मुद+भावे घञ्।) हर्षः। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८।१३३।१२।
"यत्रागन्द्राच मोदश्च मुदः प्रमुद आसते॥")

मोदकः, पुं, क्ली, (मोदयति वातादीनिति। मुद+णिच्+ण्वुल्।) खाद्यविशेषः। इत्यमरः। ३। ५। ३३॥ मोया इति भाषा। अस्य दानमन्त्रो यथा,—
"मोदकं खाद्युसंयुक्तं शर्करादिविनिर्म्मितम्।
मया निवेदितं भक्त्या गृहाण परमेश्वरि!॥"
इति दुर्गोत्सवपद्धतिः॥
गुडः। यवासशर्करा। इति राजनिर्घण्टः॥
शर्करादिद्वारापक्वौषधविशेषः। अस्य पूर्व्ववीर्य्यं वयसासं तिष्ठति। इति सुश्रुतोधः॥ (यथा,—
"वटका अथ कथ्यन्ते तन्नाम गुटिका वटी।
मोदको वटिका पिण्डी गुडो वर्त्तिस्तथोच्यते॥
द्रवन्तु द्विगुणं देयं मोदकेषु भिषग्वरैः॥
द्रवं द्रवरूपद्रव्यं कर्षप्रमाणं तन्नाम्ना वक्ष्यं दृष्ट्वा प्रयुज्यते। वक्ष्यमिति काणादेरप्युपलक्षणम्।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
हर्षके, त्रि। इति मेदिनी। के, १४१। (यथा, महाभारते। ७। ३५। १८।
"इतारोहांश्चिन्नवरूढान् क्रव्यादगणमोदकान्॥")

मोदकः, पुं, (मोदयति मिष्टान्ननिर्म्माणेनेति। मुद+णिच्+ण्वुल्।) वर्षसहरजातिविशेषः। मयरा इति भाषा। स च शूद्रायां क्षत्रियादात्तः। इति स्मृतिः॥

मोदनं, क्ली, (मोदयतीति। मुद+णिच्+ल्युः।) शिक्थकम्। इति राजनिर्घण्टः॥ (मुद+भावे ल्युट्।) हर्षः। सदधात्वर्थदर्शनात्॥ (हर्षजनके, त्रि। यथा, महाभारते। ८।२३।७६।
"हृदयग्रन्थिगात्राणां तुसुबे मोदनोऽहनि।
आसीद्गजचयो घोरस्तव पुत्रस्य पश्यतः॥")

मोदमोदिनी, स्त्री, (मोदात् मोदो महान् हर्षः सोऽस्या अस्तीति। मोदमोद+इनि। ङीप्।) जम्बूः। इति राजनिर्घण्टः॥

मोदयन्ती, स्त्री, (मोदयतीति। मुद+णिच्+शतृ। ङीप्।) वनमल्लिका। काठमल्लिका इति भाषा॥ यथा,—
"मदयन्ती गन्धवती मोदयन्ती खरस्करा।"
इति रत्नमाला॥
अपि च।
"हृद्यगन्धा मोदयन्ती भूपदी मदयन्तिका॥"
इति शब्दरत्नावली॥
(यथा च सुश्रुते। २। २५।
"पिष्ट्वाथ सर्व्वं सह मोदयन्त्या
मारग्वधस्य बीजकल्कसम्भवेन॥")

मोदा, स्त्री, (मोदयति गन्धेन लोकयतीति। मुद+णिच्+अच्। टाप्।) अजमोदा। इति राजनिर्घण्टः॥

मोदाख्यः, पुं, (मोदमाख्याति रसपक्वत्वादिना विस्तारयतीति। आ+ख्या+कः।) आम्रवृक्षः। इति राजनिर्घण्टः॥

मोदाढ्या, स्त्री, (मोदेन आमोदगन्धेन आढ्या बहुला।) अजमोदा। इति राजनिर्घण्टः॥ मोदेन आढ्या। हर्षयुक्ता च॥

मोदितः, त्रि, (मोदो हर्षोऽस्य जातः। मोद+तारकादित्वात् इतच्।) हर्षयुक्तः। इति व्याकरणम्॥

मोदिनी, स्त्री, (मोदयति गन्धेनेति। मुद+णिच्+णिनिः। ङीप्।) अजमोदा। मल्लिका। यूथिका। कस्तूरी। मदिरा। मल्लिकापुष्पविशेषः। तत्पर्य्यायः। वटपत्री २ कुमारिका ३ वृत्तमल्लिका ४। अस्या गुणाः। नेत्ररोगापहन्तृत्वम्। कटुत्वम्। उष्णत्वम्। व्रणघ्नत्वम्। गन्धबहुलत्वम्। आस्यनेत्ररोगनाशित्वञ्च। इति राजनिर्घण्टः॥ (हर्षदायके, त्रि। यथा, महाभारते। ६। ५६। १३।
"वराभरणरागाणां शरीरप्रभवा तदा।
परलोकार्थवसुखा शुभगोमायुमोदिनी॥")

मोरटं, क्ली, (मुर वेष्टने+"शुकादिभ्योऽटन्।" उणा० ४। ८२। इति अटन्।) इक्षुमूलम्। अङ्कोठपुष्पम्॥ वप्रराजात् परचौरम्। इति मेदिनी। टे, ५४॥ (यथा, वैद्यकरत्नमालायाम्।
"परतो मोरटं विद्यादग्रास्यं कपालकम्॥"
यथा च।
"नवदुग्धभवक्षीरं मोरटश्लेष्मदोऽन्नवीत्।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

मोरटः, पुं, (मुर+अटन्।) लताप्रभेदः। चीरमोरटा इति भाषा। तत्पर्य्यायः। कर्व्वपुष्पः २ पीलुपत्रः ३ मधुस्रवः ४ घनमूलः ५ दीर्घमूलः ६ पुरुषः ७ क्षीरमोरटः ८। क्वचित् पुस्तके कर्व्वपुष्पस्थाने क्षीरपुष्प इति पीलुपत्रस्थाने पीलुपुत्र इति च पाठः॥ (तथास्य पर्य्यायान्तरम्।
"पीलुपर्णी घनरसो हस्तिपर्णी च मोरटः॥"
इति वैद्यकरत्नमालायाम्॥)
अस्य गुणाः। क्षीरबहुलत्वम्। मधुरत्वम्। कषायत्वम्। पित्तदाहज्वरनाशित्वम्। दृष्यत्वम्। बलविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥
(यथा, सुश्रुते। १। ४५ अध्याये।
"गुरुः किलाटोऽनिलहा पुंस्त्वनिद्राप्रदः स्मृतः।
मधुरौ हृंहणौ हृद्यौ तद्वत्पीयूषमोरटौ॥")

मोरटकं, क्ली, (मोरट+स्वार्थे कन्।) इक्षुमूलम्। इति राजनिर्घण्टः॥

मोरटा, स्त्री, (मोरट+टाप्।) सूत्रा। इत्यमरः। २। ४। ८३॥ (यथा, सुश्रुते। २। ३८ अः।
"वीरतरुसहचरहृदयदर्भवृक्षादनी गुन्द्रानलकुशकाशाग्रशरभेदकाभिमन्थमोरटावसुकवसिरमल्लक कुरण्टकेन्दीवरकपोतवङ्काः॥" तथास्याः पर्य्यायो यथा,—

"मन्मथा मधुरसा देवी मोरटा तैजनी सुवा।
मधूलिका मधुश्रेणी गोकर्णी पौलुपर्ण्यपि ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

मोषकः, पुं. (मुष्णातीति। मुष् + ण्वुल्।) तस्करः। इत्यमरः। २। १०। २४॥

मोषणं, क्ली, मुष्टनम्। छेदनम्। वधः। इति सुषधातोर्भावेल्युट्। (ल्युट् ॥७॥ मुष्णातीति। मुष् + ल्युः। अपहारके, त्रि। यथा, भागवते। ५।२७।२२। "न वै भगवान् नूनमसुभ्यानुजग्राह यदुत पुनरात्मानुस्मृतिमोषणं मायामयं भोगैश्वर्यमेवातनुतेति॥")

मोषिता, [ऋ] त्रि, मोषणकर्त्ता। चौरः। इति सुषधातोस्तृन्प्रत्ययेन निष्पन्नः॥

मोहः, पुं, (मोहनमिति। मुह् + भावे घञ्।) मूर्च्छा। इत्यमरः। २। ८। १०६। (यथा. उत्तररामचरिते ३ अङ्के।

"वीचिवातैः शीकरक्षोदशीतै-
राकर्षद्भिः पद्मकिञ्जल्कगन्धान्।
मोहे मोहे रामभद्रस्य जीवं
खेदं खेदं प्रेषितैस्तर्पयेति॥"

अस्य विषयो यथा,—

"संज्ञावहासु नाड़ीषु पिहितासु निलादिभिः।
तमोऽभ्युपैति सहसा सुखदुःखमपोहवत्॥
सुखदुःखमपोहाच्च नरः पतति काष्ठवत्।
मोहो मूर्च्छेति तां प्राहुः षड्विधा सा प्रकीर्त्तिता॥"

इति सुश्रुते उत्तरतन्त्रे ४६ अध्याये॥)

अविद्या। इति मेदिनी। दे, ७। दुःखम्। इति शब्दरत्नावली। देहादिषु आत्मबुद्धिः। इति गीतासुबोधिन्यां श्रीधरस्वामी। अयं ब्रह्मणो बुद्धितो जातः। यथा,—

"बुद्धेर्मोहः समभवद्दम्भादाभूमदः।
प्रमोदश्चाभवत् कण्ठानूरुजुर्जोजनो नृप!॥"

इति मात्स्ये २ अध्यायः॥

मोहस्वरूपं यथा,—

"मम माता मम पिता ममेयं गृहिणी गृहम्।
इतीदं ममतं यत्तु स मोह इति कीर्त्तितः॥"

इति प्राणे क्रियायोगसारे १६ अध्यायः॥७॥

ब्रह्मणोविमूढत्वम्। यथा,—

"अकामतः कृतं पापं वेदाभ्यासेन शुद्ध्यति।
कामतस्तु कृतं मोहात् प्रायश्चित्तैः पृथग्विधैरिति॥"

अत्रत्र मोहादिति को मोहः। अत्र।

"मोहशब्देन देवेन्द्र! बुद्धिपूर्व्वो व्यतिक्रमः।
उच्यते पण्डितैर्नित्यं पुराणे सांप्रयायनः॥"

इति भविष्यपुराणवचनात् ज्ञातबुद्धिपूर्व्वो व्यतिक्रमो मोहः। इति शिवकरः। तत्र कामनाया अमूर्ख्यादेव बुद्धेर्जन्यत्वात्। उच्यते। मूढस्य ब्रह्मणो मोहादुद्गच्छत इत्यादौ मुह वैचित्ये इति धात्वर्थानुसारात् अज्ञानमात्रं मोहः। यत्र तु कामनाशब्दोऽस्ति तत्र भविष्यपुराणबहिर्वितमोहशब्दो न याह्यः। किन्तु धर्म्मविमूढत्वं मोहः स चाधर्म्मबुद्धौ सत्यामप्यकर्त्तव्ये रागात् कर्त्तव्यताभ्रमः। यथा, व्यासः।

"मोहो धर्म्मविमूढत्वं मानस्यात्माभिमानिता।"

एवञ्च भविष्यपुराणीयबुद्धिशब्दोऽप्यधर्म्मज्ञानमेवाभिधत्ते सत्यधर्म्मज्ञाने प्रायश्चौरवार्थमिदमुक्तं मोहादिति। इति प्रायश्चित्तविवेकः॥७॥

मोहदत्तो यथा,—

सुमनोवाच।

"श्रूयतामभिधास्यामि सर्व्वसन्देहनाशनम्।
स्वरूपसदृपदेशस्य सर्व्वविज्ञानदर्शनम्॥
लोभः पापस्य बीजोऽयं मोहो मूलन्तु तस्य हि।
असत्यं तस्य च स्कन्धो माया शाखासविस्तरः॥
दम्भकोटिशतैश्चापि कृतया पुष्पितः सदा।
पैशुन्यं तस्य सौगन्ध्यमज्ञानं फलमेव हि॥
क्रूरपापरुजचौराश्च कूटाः क्रूराश्च पापिनः।
पक्षिणो मोहदत्तस्य मायाशाखाः समाश्रिताः॥
अज्ञानन्तु फलं तस्य रसोऽधर्म्मफलस्य हि।
भावोदकेन संवर्द्धितस्य सत्यात् स तु प्रियः॥
अधर्म्मस्यास्य सुरभिः क्षेदश्च मधुरायते।
तादृशेन फलेनैव सुफलो लोभपादपः॥
तस्य छायां समाश्रित्य यो नरः परिवर्त्तते।
पलाशि तस्य योऽश्नाति सुपक्वानि दिने दिने॥
फलानान्तु रसेनैव अधर्म्मेण तु पोषितः।
सुसंपुष्टो भवेन्मर्त्यः पतनाय प्रयच्छति॥"

इति पाद्मे भूमिखण्डे ११ अध्यायः॥

मोहनं, क्ली, (मुह्यतेऽनेनेति। मुह् + ल्युट्।) सुरतम्। इति हेमचन्द्रः। ३। २००॥ यथा, मार्कण्डेये। ५१। ७७।

"प्रविश्य गर्भमत्तेऽको सुप्ता मोहयतेऽपरा।
जायन्ते मोहनास्तस्याः सर्व्वमङ्कुकरूपाः॥")

होममन्त्रौषधादिद्वारासुग्धताकरत्वम्। तत्र होमेऽङ्गनियमो यथा,—

"मोहनं वश्यकामस्य प्रीतिसंवर्द्धनं तथा।
प्रदेशिनीकनिष्ठाभ्यां सर्व्वमेतत् प्रसिध्यति॥
मोहनाकर्षणक्षोभ्यस्तोभनोच्चाटनं तथा।
कनिष्ठामध्यमाङ्गुष्ठसंयोगेन तु जीवया॥
विधियुक्तेन होमेन तथा द्रव्यानुयोगतः।
सर्व्वे मन्त्राः प्रसिध्यन्ति सुग्रामन्त्रप्रयोगतः॥"

इति तन्त्रसारः॥

(नगरभेदः। यथा, महाभारते। २। २५३। ६।

"मोहनं पत्तनञ्चैव त्रिपुरां कोशलां तथा।
इतान् सर्व्वान् विनिर्जित्य करमादाय सर्व्वशः॥")

मोहनः, पुं, (मोहयतीति। मुह् + णिच् + ल्युः।) धुस्तूरवृक्षः। इति राजनिर्घण्टः। कामदेवस्य पञ्चबाणान्तर्गतबाणविशेषः। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। ७१। १३२।

"कामस्येव जगज्जैत्रमोहनाख्याधिदेवतम्।
तदूपकृतचित्ताभूत समाधिस्थेव तत्क्षणम्॥"

नृपविशेषः। यथा, कथासरित्सागरे। ४०। ६१।

"वीक्ष्य प्रसन्नं त्रिदशं मोहनो नाम भूपतिः।
सन्निपत्याङ्कहारं तं ताड़यामास सायकैः॥"

मोहकारके, त्रि॥ यथा, गीतायाम्। १८। ३६।

"यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्॥"

"अत्र मोहनं मोहकरम्।" इति आनन्दगिरिः॥)

मोहनभोगः, पुं, (मोहनश्चासौ भोगश्चेति।) सर्म्मिताग्रकैराहृतादियुक्तमिष्टान्नविशेषः। इति पाकराजेश्वरः॥

मोहना, स्त्री, (मोहयति पुष्पमेतेति। मुह् + ल्युः। टाप्।) त्रिपुरमालीपुष्पम्। इति रत्नमाला। मरुन्माला। इति शब्दमाला॥

मोहनी, स्त्री, (मुह्यत्यनयेति। मुह् + ल्युट्। स्त्रियां ङीष्।) उपोदकी। इति राजनिर्घण्टः। वटपत्री। इति भावप्रकाशः॥ (तथास्याः पर्य्यायः।

"मोहनी मल्लिकाख्या तु वटपत्री च मोहना।"

इति वैद्यकरत्नमालायाम्॥)

माया। यथा, महाभारते। १४। ८०। ४५।

"मया तु मोहनी नाम मायेषा संप्रदर्शिता।")

मोहरात्रिः, स्त्री, (मोहस्य रात्रिः।) दैनन्दिनप्रलयः। यथा,—

"एवं पञ्चाशदब्दे च गते तु ब्रह्मणो नृप!।
दैनन्दिनन्तु प्रलयं वेदेषु परिकीर्त्तितम्॥
मोहरात्रिश्च सा प्रोक्ता वेदविद्भिः पुरातनैः।
तत्र सर्व्वे प्रजानाथ चन्द्रार्कादिदिगीश्वराः॥
आदित्या वसवो रुद्रा मन्विन्द्रा मानवादयः।
ऋषयो मुनयश्चैव गन्धर्व्वा राक्षसादयः॥
मार्कण्डेयो लोमशश्च पैपकश्चिरजीविनः।
इक्ष्वाकुश्च नृपतिर्भागूरश्च कच्छपः॥
नाड़ीजङ्घो वकश्चैव सर्व्वे नष्टाश्च तत्र वै।
ब्रह्मलोकादधः सर्व्वे लोका नागालयात्तथा।
ब्रह्मलोकं ययुः सर्व्वे ब्रह्मलोकादधस्तथा॥
गते दैनन्दिने ब्रह्मा लोकांश्च सकलान् पुनः।
एवं शतान्दपर्य्यन्तं परमायुश्च ब्रह्मणः॥
ब्रह्मणश्च निपातेन महाकल्पो भवेन्नृप!।
प्रकीर्त्तिता महारात्रिः सा एव च पुरातनैः।"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ५४। ७२—७६॥

मोहः, कर्म्मविपाकः। स एव रात्रिरिव रात्रिर्बुद्धिमोहकत्वान्निद्रारूपा। इदानीन्तनजनानां रात्रिरिति वा। इति देवीमाहात्म्यटीकायां विद्याविनोदः॥ ७॥ ब्रह्मणोरात्रिः। यथा,—

"दीर्घोत्सवचतुर्द्दश्यामसया योग एव चेत्।
कालरात्रिर्महेशानि! तारकाकीर्त्तिवर्द्धनी।
ब्रह्मणो रात्रिः महेशानि! मोहरात्रिः प्रकीर्त्तिता॥
तृतीया माधवे शुक्ला कुजवारर्क्षसंयुता।
दारुणा कीर्त्तिता देवि! सर्व्वसिद्धेश्वरी परा॥"

इति शक्तिसङ्गमतन्त्रम्॥

मोहाग्नं, क्ली, (मोहोत्पादकं शास्त्रमिति मध्यपदलोपिकर्म्मधारयः।) अविद्याजनकशास्त्रम्। यथा,—

"गोपतिं प्राह विप्रेन्द्रागोलोके भगवान् हरिः।

न वेदवाह्यपुरुषे पुण्यलेशोऽपि शङ्कर ! ॥
सङ्गच्छते महादेव ! धर्म्मो वेदादि निर्म्मलौ ।
तथापि भक्तवात्सल्यादुचितस्था महेश्वर ! ॥
अस्माभिः सर्व्व एवैते मन्तारो नरकानपि ।
अस्माद्वै वेदवाह्यानां रचनाय च यायिनाम् ।
विमोहनाय शास्त्राणि करिष्यावो वृषध्वज ! ॥
एवं सम्बोधितो रुद्रो माधवेन सुरारिणा ।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम् ।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ॥"

इति कौर्म्मे २४ अध्यायः ॥

मोहिनी, स्त्री, (मोहयति सौन्दर्य्यादिनेति । मुह + णिच् + णिनिः । स्त्रियां ङीप् ।) त्रिपुरमालीपुष्पम् । इति रत्नमाला ॥ (वटपत्री । तत्पर्य्यायो यथा,—

"वटपत्री तु कथिता मोहिनी रेचनी बुधैः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

समुद्रमन्थनकाले देवानाममृतपानायासुराणां मोहनाय च भगवदवतारविशेषः । यथा,—

"धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
अपाययत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया ॥"

इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥

सर्व्वज्ञताविशेषः । यस्याः प्रापात् ब्रह्मणोऽपूज्यत्वं जातम् । यथा,—

"यतो हससि गर्व्वेण ततोऽपूज्यो भवाचिरम् ।
अचिराद्दर्पभङ्गं ते करिष्यति हरिः स्वयम् ॥
निबोध प्रश्नमं ब्रह्मन् ! सर्व्वज्ञतायाश्च साम्प्रतम् ।
तवैव कवचं स्तोत्रं मन्त्रं यो वेत्ति यो नरः ।
भविता तस्य विघ्नश्च स यास्यत्युपहास्यताम् ॥
भविता वार्षिकी पूजा देवतानां युगे युगे ।
तव माघ्याश्च संक्रान्त्यां न भविष्यति सा पुनः ॥
इत्युक्त्वा मोहिनी शीघ्रं जगाम मदगालयम् ।
तेन सार्द्धं रतिं कृत्वा बभूव विष्वरा पुनः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३१ अध्यायः ॥ विस्तरस्तु ब्रह्मवैवर्त्तग्रन्थे द्रष्टव्यः । (मोहकर्त्तरि त्रि । यथा, भागवते । १ । ६ । ३५ ।

"अतो भागवती माया मायिनामपि मोहिनी ।
यत् स्वयञ्चात्मवर्त्मात्मा न वेद किमुतापरे ॥")

मौकुलिः, पुं, काकः । इति हेमचन्द्रः । ४ । ३८८ । (यथा, उत्तररामचरिते २ अङ्के ।

"कूजत्कुक्कुटकौटीरकौशिकघटाघुत्कारवत् कौशिक-
स्फाराडम्बरमत्रमौकुलिकुलः क्रौञ्चावतीयं गिरिः ।
एतस्मिन् प्रचलाकिनां प्रचलतासंदेहिताः कूजिते-
रुद्दीक्षन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भी-नसाः ॥")

मौक्तिकं, क्ली, (मुक्तैव । मुक्ता + "विनयादिभ्यष्ठक् ।" ५ । ४ । ३४ । इति ठक् ।) मुक्ता । इत्यमरः । २ । ६ । ९२ ॥ (यथा, चाणक्यशतके । ५५ ।

"ग्रैवेये ग्रैवेये न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो नहि सर्व्वत्र चन्दनं न वने वने ॥"

तथास्य पर्य्यायः ।

"मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलञ्च तत् ।
अभावे मौक्तिकस्यापि मुक्तिं प्रयोजयेत् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

मौक्तिकतण्डुलः, पुं, (मौक्तिकमिव शुक्लः तण्डुलोऽस्य ।) धवलयावनालः । इति राजनिर्घण्टः ॥

मौक्तिकप्रसवः, स्त्री, (मौक्तिकस्य प्रसवः ।) शुक्तिः । इति राजनिर्घण्टः ॥

मौक्तिकशुक्तिः, स्त्री, (मौक्तिकानां शुक्तिः ।) शुक्तिः । इति राजनिर्घण्टः ॥ मुक्तार झिनुक इति भाषा ॥

मौखं, क्ली, (मुखस्येदमिति । मुख + अण् ।) मुखसम्बन्धाधीनयापम् । तत्तु अभक्ष्यभक्षणरूपं तच्च क्लीवम् । संसर्गरूपस्य तस्य प्रायश्चित्तं यथा । सुमन्तुः । यश्च तैर्यौनमौखश्वावाणां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यात् । इयात् कुर्य्यात् । एतदेवेति द्वादशवार्षिकमित्यर्थः । अत्र याजनादीनामन्यतमेन संवत्सरेण पतितोत्थवगम्यते । इति मूलपाणिकृतप्रायश्चित्तविवेकः ॥ मुखसम्बन्धिनि, त्रि ॥

मौखर्य्यं, क्ली, मुखरत्वं । मुखरस्य भावः इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

मौखिकं, त्रि, मुखसम्बन्धि । मुखस्येदमित्यर्थे ठिक् (ठक्) प्रत्ययेन निष्पन्नम् ॥

मौञ्जी, स्त्री, (मुञ्जस्येयमिति । मुञ्ज + अण् । स्त्रियां ङीप् ।) मुञ्जनिर्म्मितमेखला । (यथा, ऋग्वेदभाष्ये । १ । ६ ।

"पिशङ्गमौञ्जीयुगमर्ज्जुनच्छविं
वसानमाजिनमञ्जनद्युति ।
सुवर्णशृङ्गाकलितामरार्धरां
विडम्बयन्तं शितिवाससस्तुम् ॥"

"मुञ्जस्तृणविशेषस्तन्मयीमेखला मौञ्जी ।" इति तट्टीकायां मल्लीनाथः ॥) यथा,—

"विप्रस्य चत्रियस्यापि मौञ्जी स्याद्विज्ञायने ।
दर्भिये च विप्रा कार्य्ये नानर्थाये न संक्रमे ॥"

मनुः ।

"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।
चत्रियस्य च मौर्व्वी ज्या वैश्यस्य शणतान्तवी ॥
सङ्घाभे तु कर्त्तव्या कुशाश्मन्तकबल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥"

इति संस्कारतत्त्वम् ॥

मौञ्जीदण्डाख्यः, पुं, (मौञ्जीदण्डमित्याख्यास्य ।) सुञ्जः । इति राजनिर्घण्टः ॥

मौञ्जीपत्रा, स्त्री, (मौञ्जीपत्रमिव पत्रमस्याः ।) वल्लजा । इति राजनिर्घण्टः ॥

मौञ्जीबन्धः, पुं, (मौञ्जा बन्धः बन्धनम् ।) मुञ्जमेखलाबन्धनम् । उपनयनमिति यावत् । यथा,

"ब्रह्मभादपमे सिंहे नौचस्थे शुक्रभे गुरौ ।
मौञ्जीबन्धः शुभः प्रोक्तस्त्रैवे मीनगते रवौ ॥"

इति ज्योतिर्निबन्धे नारदवचनम् ॥

मौञ्ज्य, क्ली, (मुञ्जस्य भावः कर्म्म वा । मुञ्ज + "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ।" ५ । १ । १२४ । इति ष्यञ् ।) मोहः । इति हेमचन्द्रः । ३ । २२४ ॥ (यथा, श्रीमद्भागवते । ३ । २६ । २२ ।

"यो मां सर्व्वेषु भूतेषु सन्तमात्मानमीश्वरम् ।
हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः ॥"

पुं, मुञ्जस्यापत्यम् । मुञ्ज + "कुर्व्वादिभ्यो ण्यः ।" ४ । १ । १५१ । इति ण्यः । मुञ्जपुत्रः । इति व्याकरणम् ॥)

मौञ्जलिः, पुं, काकः । इति त्रिकाण्डशेषः ॥

मौञ्जल्यः, पुं, (मुञ्जलस्यापत्यमिति । मुञ्जल + ष्यञ् ।) मुञ्जलमुनिपुत्रः । स च गोत्रकारकः । अस्य पञ्च प्रवराः यथा । और्व्वच्यवनभार्गवजामदग्न्याप्नुवन्तः । इति कुलदीपिका ॥ (यथा, हरिवंशे । १२ । ७० ।

"मुञ्जलस्य तु दायादो मौञ्जल्याः समुदाहृताः ॥)

मौञ्जीनं, क्ली, (मुञ्जानां भवनं क्षेत्रमिति । मुञ्ज + "धान्यानां भवने क्षेत्रे खञ् ।" ५ । २ । १ । इति खञ् ।) मुञ्जभवोचितक्षेत्रम् । इत्यमरः । २ । ९ । ८ ॥

मौनं, क्ली, (मुनेर्भाव इति । मुनि + अण् ।) शब्दप्रयोगराहित्यम् । तत्पर्य्यायः । अभाषणम् २ । तूष्णीम् ३ तूष्णीकाम् ४ । इत्यमरः । २ । ७ । ३६ ॥ (यथा, रघुवंशे । १ । २२ ।

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥")

कर्म्मविशेषे मौनाचरणं यथा,—

"उच्चारे मैथुने चैव प्रस्रावे दन्तधावने ।
स्नाने भोजनकाले च षट्सु मौनं समाचरेत् ॥"

इति तिथ्यादितत्त्वम् ॥

मौनी, [न्] पुं, (मौनमस्याऽस्तीति । मौन + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) मुनिः । इति जटाधरः ॥ (यथा, मार्कण्डेये । ७५ । ३६ ।

"ततः स चिन्तयामास राजा राज्याद्विकारजम् ।
विवेद च न तज्जज्ञौ जगद्धेर्यञ्च तं नृपः ॥")

मौनयुक्ते, त्रि । यथा,—

"सिनीवाली कुहूर्व्वापि यदि सोमदिने भवेत् ।
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम् ॥
एतच्च मौनमरुणोदयमारभ्य स्नानपर्य्यन्तं कार्य्यं न तु स्नानकालमात्रे ।" इति तिथ्यादितत्त्वम् ॥

मौनेयः, पुं, (मुनेरपत्यं पुमान् । मुनि + "इतश्चानिञ् ।" ४ । १ । १२२ । इति ढक् ।) गन्धर्वगणविशेषः । यथा,—

"गन्धर्व्वाप्सरसः पुण्या मौनेयांस्तु निबोधत ।
चित्रसेनोग्रसेनौ तु ऊर्णायुरनिघस्तथा ॥
धृतराष्ट्रस्तथोर्णाश्च सूर्य्यवर्च्चास्तथैव च ।
युगतन्तुश्च पत्राङ्गो निदिक्किरथस्तथा ॥
त्रयोदशः शालिशिरः पर्य्यण्डश्च चतुर्दशः ।
इत्येते देवगन्धर्व्वाश्चतुस्त्रिंशच्छुभाक्षराः ॥"

इति वह्निपुराणम् ॥

मौलिः

(अक्षरोमेदे, स्त्री। यथा, हरिवंशे।२१८।४०।
"काम्बा शारङ्गती चैव मौनेयाक्षरसः स्मृताः।")
मौरविकः, त्रि, (सुरजन्तद्वादनं शिल्पमस्य।
सुरज+"शिल्पम्।"४।४। ५५। इति ठक्।)
सुरजवादकः। इत्यमरः।२।१०।१३॥
मौर्ख्यं, क्ली, (मूर्खस्य भावः। मूर्ख+"वर्णदृढ़ादिभ्यः ष्यञ् च।"५।१।१२३। इति ष्यञ्।)
जाड्यम्। इति हेमचन्द्रः।२।२२६॥ (यथा,
सुश्रुते शारीरस्थाने ४ अः।
"अनवस्थितता मौर्ख्यं भीरुत्वं चलिताधिता॥")
मौर्व्वी, स्त्री, (मूर्व्वाया विकारः। मूर्व्वा+"अवयवे च प्राण्योषधिवृक्षेभ्यः।" ४।३।१३५।
इति अण्। ङीप्।) धनुर्गुणः। इत्यमरः।
२।८।८५। (यथा, रघुः।२।१६।
"शार्ङ्गेष्वकुण्ठिता बुद्धिर्मौर्व्वी धनुषि चातता॥"
अन्यच्च।
"मौर्व्वी चिह्नसमा शुद्धा कार्या विप्रस्य मेखला।
क्षत्रियस्य तु मौर्व्वी ज्या वैश्यस्य शणतान्तवी॥")
मौलः, पुं, (मूलं वेदेति। मूल+अण्।) भूम्यादेर्मूलज्ञाता। मोड़ल इति भाषा। यथा,—
"यतु परम्परया मौलाः सामन्ताः क्षाम्निमं विदुः।
तदन्वयक्षागतस्य दातया गोचनेर्मही॥"
इति दायतत्त्वम्॥
तस्य लक्षणं यथा,—
"ये तत्र पूर्व्वं सामन्ताः पश्चाद्देशान्तरं गताः।
तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्त्तिताः॥"
इति मिताक्षरा॥
(विशिगीश्वरिमध्योदासीनः। यथा, कामन्दकीये।८।३४।
"चत्वारः पार्थिवा मौलाः पृथङ्मित्रैः सहाष्टकम्॥"
मूलभूते, त्रि। यथा, तत्रैव।८।२५। (याः।
"मौला द्वादश याख्याता ह्यमात्याद्यास्तथा च सप्रतिद्वन्द्विका ह्येता सर्व्वे प्रकृतिमण्डलम्॥")
मौलिः, पुं, क्ली, (मूल+सुतङ्गमादित्वात् इन्।)
चूड़ा। (यथा, महाभारते। ६।५६।५।
"एवमुक्त्वा स वामेन पदा मौलिमुपास्पृशत्॥
शिरश्च राजसिंहस्य पादेन समलोड़येत्॥")
किरीटम्। (यथा, हरिवंशे।८७।३०।
"दृश्यन्ते सा मया मौलिरहृता वरुणालयात्॥")
संयतकेशः। इत्यमरः।३।३।१६२। (यथा, रघौ।७।६६।
"स चापकोटीनिहितैकबाहुः
शिरश्छिनिष्कर्षणभिन्नमौलिः।
ललाटबद्धभ्रमवारिबिन्दुः
भीतां प्रियामेत्य वचो बभाषे॥")
मस्तकम्। इति हेमचन्द्रः।३।२।२३०॥
(यथा, आर्य्यासप्तशत्याम्।४२४।

मौलिकः

"भालनयनेऽभिरिन्दुर्मौलौ गात्रे भुजङ्गमणिदीपाः॥"
प्रधानः। यथा, मार्कण्डेये।५६।१४।
"मौलयस्ते महाकायाः शाकपोतकरम्भकाः॥")
मौलिः, पुं, (मूलस्यादूरभवः। मूल+सुतङ्गमादित्वादिन्।) अशोकवृक्षः। इति मेदिनी॥
मौलिः, स्त्री, (मूले जाता। मूल+इन्।)
भूमिः। इति मेदिनी॥
मौलिकः, पुं, (मूले आदौ जातः। मूल+ठञ्।)
कुलीनभिन्नः। यथा राढ़ीयवारेन्द्रब्राह्मणस्य श्रोत्रियः तथा कायस्थस्य मौलिकः। एवं दाक्षिणात्यवैदिकब्राह्मणस्य अन्यपूर्व्वापरिणीतापि तत्पदवाच्यः। वङ्गजकायस्थस्य च मध्यशब्दवाच्यः। यथा। अथ मध्यलक्षणमाह।
मध्यशब्दो रूढ़ इत्यर्थः। डित्थडवित्सवत्।
मध्यः कुलमध्यस्थकुलीनस्य विश्रामस्थलमित्यर्थः। मध्यशब्दस्य लक्षणान्तरम्। कुलीनेतरसिद्धवंशजातकले सति दशपुरुषावधि अनवच्छिन्नकुलार्च्चकत्वं मध्यत्वम्। स च द्विविधः। सिद्धः साध्यश्च। सिद्धत्वं प्रकृतमध्यत्वम्। प्रकृतसिद्धवंशजातले सति दशपुरुषावधिकुलार्च्चकत्वं सिद्धत्वम्। सिद्धपदाकाङ्क्षिते सति दशपुरुषावधिकुलार्च्चकत्वं साध्यत्वम्। अस्य प्रशंसामाह।
"कुलीनकुलरक्षार्थं विवाहेषु मीमांसया।
एतेषां शुभमाश्रित्य मध्यः कुलसुत्तमः॥"
इति कुलदीपिका॥
दक्षिणराढ़ीयकायस्थस्याष्टसद्मौलिका यथा,—
"गौड़ेष्टौ कौलिनमन्तश्चिरवसतिलसा मौलिका ये हि सिद्धास्ते दत्ताः सेनदासाः करगुहसहिताः पालिताः सिंहदेवाः।
ये वा पद्माभिसुखाः क्षितिविनययुवः सप्रतिस्ते दिपूर्व्वा
मित्राद्या वीक्ष्य राज्ञा चरणगुरुयुता मौलिकस्तेन साध्याः॥"
अपि च।
"सेनो दत्तः करो ग्रेयो दासो देवः प्रतिष्ठितः।
पालितः सिंहधर्म्मश्च गुहः सद्मौलिकाः स्मृताः॥"
द्विसप्ततिसाध्यमौलिका यथा,—
"होड़ः खरधरधरणी वाण
आयिच सोमः पेसुर सामः।
भद्रो विन्दी गुह बल लोधः
शर्म्मा वर्म्मा कुइ भूँयि चन्द्रः॥
रक्षो रक्षित राजादित्यो
विष्णुर्नागः खिल पिल गूतः।
इन्द्रो गुप्तः प्राणो भद्र
ओमचाङ्कुर वन्धुर नाथः॥
शूँयिर्हंशो मानो गन्धो
राहा राजा राहुत सामा।
दाहा दामा गण उपमाना॥

मौषलं

खामः चोमो घर वे ओषः
वीदत्तेजचार्य्यव आग्रः।
शक्तिभूतो ब्रह्मो शागः
चैमो हेमो वर्द्धन रङ्गः।
शुरः कीर्त्तिर्यशः कुण्डो
नन्दी शीलो धनुर्गुणः॥"
इति द्विसप्ततिमौलिकाः॥७॥
अन्यच्च।
"देवो भूदेवभक्तो गुहसङ्घगुणो दास ईशानदासः
सेनो दत्तः सुदत्तामहितजनचयः पालितो धर्म्मपालः।
सिंहः सिंहप्रतापः क्षितिनिकरकरादानदक्षः करोऽसौ
गौड़ेष्टौ संस्थिताख्ये गुणगणनिपुणा मौलिकस्तेन सिद्धाः॥७॥
होड़वाखरधरणीखिलसोमा
धुक्षविन्दगुहराजरक्षिताः।
रुद्रपालबलसामरक्षिता
लोधशर्म्मसुँयिवर्म्मभद्धराः॥
चन्द्रशूँयिगुविभद्रपेसुरा
गण्डगुप्तधरकीर्त्तिवर्द्धनाः।
चैमहेमगणनाथविष्णवो
ब्रह्मरङ्गपिलकुण्डधनुर्गुणाः॥
तेजोऽर्य्यवखरधरायिच शक्तिभूताः
चोमोष शाग विदशोष यशोम नन्दी।
दाहाङ्कुरेन्द्रशुभकुक्कमनोपमाना
दानाशगूतविदिता भुवि कीर्त्तिमन्तः॥
हेमादिद्यौ राक्ष राहा सामा च खामकस्तथा।
द्विसप्ततिमिताः साध्या मौलिका विदिताः क्षितौ॥"
इति कुलाचार्य्यकारिका॥७॥
(देशविशेषः। यथा, मार्कण्डेये।५७।४८।
"मौरिका मौलिकाश्चैव अङ्गका भोगवर्द्धनाः॥")
त्रि, मूलसम्बन्धिनि मौलसम्बन्धिनि च॥ (भारभूतं मूलं हरति वहत्यावहति वा। मूल+"तद्धरति वहत्यावहति भारात् वंशादिभ्यः।" ५।१।५०। इति ठञ्। मूलभारहारके मूलभारवाहके मूलभारानेतरि च। इति व्याकरणम्।)
मौषलं, क्ली, (मूसलमिव। मूसलस्येदमिति वा। मूसल+अण्।) मूसलवत्। यथा,—
"गङ्गायां मौषलं स्नानं महापातकनाशनम्।"
इति प्रायश्चिततत्त्वधृतभविष्यपुराणवचनम्॥
महाभारतस्याष्टादशपर्व्वान्तर्गतपर्व्वविशेषः।
यथा,—
"मौषलं पर्व्व चोद्दिष्टं ततो घोरं सुदारुणम्।
महाप्रस्थानिकं पर्व्व स्वर्गारोहणिकं ततः॥"
इति महाभारते आदिपर्व्व॥
मूसलसम्बन्धिनि, त्रि॥

म्रदिमा, स्त्री, मृदिप्रहरणक्रीड़ा। इत्यमरः।३।५।५॥ "मृदिप्रहरणं अस्यां क्रीड़ायां मौष्टा या:(अच्) खित्वे त्रिरिति दृढ़िः यथोर्लोपः इति इकारलोपः। स्त्रियामत इत्याप्।" इति तट्टीकायां भरतः॥

मौकूर्त्तः, पुं, (मुकूर्त्तं अधीते वेद वा। मुकूर्त्त+"तदधीते तद्वेद।" ४।२।५०। इत्यण्।) ज्योतिर्व्वित्ता। इत्यमरः। २। ८। १४॥ (यथा, महाभारते। १२। २२१। ४६।

"भिक्षुकाः प्राड्विवाकाश्च मौकूर्त्ता देवचिन्तकाः॥")

मौकूर्त्तिकः, पुं, (मुकूर्त्तं तद्बोधकं शास्त्रमधीते वेद वा। मुकूर्त्त+"क्रतूक्थादिसूत्रान्तात् ठक्।" ४।२।६०। इति ठक्।) ज्योतिर्व्वित्ता। इत्यमरः। २। ८। १४॥ (यथा, कथासरित्सागरे। २२। १२३।

"ततो मौकूर्त्तिकादेशादन्येद्युर्व्वरकन्यका।
सा मया परिणीता भूम्निजिताखिलबन्धुना॥"

दृषकन्यासुकूर्त्तोद्भवदेवगणविशेषः। यथा, भागवते। ६। ६। ६।

"मौकूर्त्तिका देवगणा सुकूर्त्तायाश्च जज्ञिरे॥"

सुकूर्त्तोद्भवे, त्रि। यथा, भागवते।५।१३।२२।

"मौकूर्त्तिकादृश्य समायमाद्य मे
दुस्तर्कमूलोऽपहतोऽविवेकः।"

म्रा, अभ्यासे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) अभ्यासः पौनःपुन्येनानुशीलनम्। मनति सन्त्यां ब्राह्मणः। इति दुर्गादासः॥

म्रच, संघाते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफयुक्तादिः। म्रक्षति पयसा ग्रक्तून् लोकः। इति दुर्गादासः॥

म्रच, क म्रक्षये। क्षेहने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) रेफयुक्तादिः। म्रक्षयं द्रव्यस्य द्रव्यान्तरेण योजनम्। क, म्रक्षयति घृतेनान्नं लोकः। इति दुर्गादासः॥

म्रक्षः, पुं, (म्रक्ष+घञ्।) खदीयगूहनम्। इति त्रिकाण्डशेषः॥ म्रक्षयश्च॥ (वधः। यथा, ऋग्वेदे। ८। ५०। १०।

"उयवाहुर्व्वक्षला पुरन्दरो यदिमे द्यावह्नवम्।"

"म्रक्षवक्षला वधकर्त्ता।"इति तद्भाष्ये सायणः॥)

म्रक्षयं, क्ली, (म्रक्ष+कर्म्मणि क्युट्।) तैलम्। इति हेमचन्द्रः। ३। ८९॥ द्रव्यस्य द्रव्यान्तरेण संयोजनम्। क्षेहनम्। राशीकरणम्। इति म्रक्षधातोर्भावेऽनट् प्रत्ययेन निष्पन्नम्॥

म्रद, म, व, ड, क्षोदे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) रेफयुक्तः। क्षोदश्चूर्णीकरणम्। म, म्रदयति। ष, म्रदा। ड, म्रदते कानने हस्ती। इति दुर्गादासः॥

म्रदिमा, [न्] पुं, (म्रदोर्भावः। म्रदु+"पृथ्वादिभ्य इमनिज्वा।" ५।१।१२२। इति इमनिच्। "र ऋतो हलादेर्लघोः।" ७।४।१६९। इति ऋकारस्य रादेशः। "टेः।" ६।४।१५५। इति टेर्लोपः।) म्रदुता। यथा, राजतरङ्गिण्याम्। ८। ५६६।

"म्रदिम्ना पापिनस्तस्य नाशायि क्रूरता जनैः।
मधुरिम्नो विषस्येव शक्तिः प्राणापहारिणी॥")

म्रदिष्ठः, त्रि, अतिशयेन म्रदुः। म्रदुशब्दादिष्ठप्रत्ययेन निष्पन्नः॥

म्रदीयान् [स्] त्रि, अतिशयेन म्रदुः। म्रदुशब्दादीयसुप्रत्ययेन निष्पन्नः॥

म्रातन, क्ली, कैवर्त्तोसुस्तकम्। इति शब्दचन्द्रिका॥

म्रुच, उ इर् गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्त्वेट्।) उ, म्रोचित्वा म्रोक्ता। इर्, अम्रुचत् अम्रोचीत्। इति दुर्गादासः॥

म्रुनूच, उ अध्याम्। इवि कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) उ, म्रुनूचित्वा म्रुक्ता। इति दुर्गादासः॥

म्रेट, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्रेटत्। म्रेटति लोकः उन्मादतीत्यर्थः। इति दुर्गादासः॥

म्रेड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्रेडत्। म्रेडति लोकः उन्मादतीत्यर्थः। इति दुर्गादासः॥

म्लक्तं, क्ली, (म्लच्+क्तः।) चोरितम्।। यथा,—

"चोरितं सुचितं म्लक्तं प्रतीतञ्च प्रतीच्छितम्॥"

इति भूरिप्रयोगः॥

म्लागं, त्रि, (म्ले हर्षक्षये+क्तः। "संयोगादेरातो र्धातुयवतः।"८। २। ४३। इति निष्ठातस्य नः।) मलिनम्। यथा,—

"मलिनं कर्बरं म्लानं कश्मलञ्च मलीमसम्॥"

इति हेमचन्द्रः॥

(यथा, मार्कण्डेये। ६२। १६।

"स चिन्तयामास तदा किं म्लेच्छा गजगामिनी।
निश्वासपवनम्लाना गिरावत्र वरूथिनी॥")

दुर्बलम्। (यथा,—

"अन्तेषु भूयं परिहीनमध्यं
म्लानन्तथान्तेषु च मध्यभूयम्॥"

इति माधवनिदानटीकायां विजयरक्षितेन पाण्डुरोगव्याख्याने विजयेनोक्तम्॥ (म्ले+भावे क्तः। म्लानिः। यथा, मार्कण्डेये। ३५। २४।

"रथ्यावसथयज्ञानशुतृषाग्लानकर्म्मसु।
आघातेषु यथाद्यायं वायो विपरिधाय च॥")

म्लानिः, स्त्री, (म्ले+निः। स च नित्। इत्युज्ज्वलदत्तः। ४। ५१।) कान्तिक्षयः। यथा, देवीभागवते। १। ६। १८।

"प्रेक्षकस्तु तदा ब्रह्मा देवी चैवान्तरीक्षगा।।
न मन्वन्तरसन्धौ तु विष्णुस्तु म्लानिमान्यवान्॥")

म्लिष्टं, क्ली, (म्लेच्छ+क्तः+"शुष्कखान्तध्वान्तलग्नम्लिष्टविरिब्धम्लेत्यादि।" ७। २। १८। इति निपातितम्।) असम्बद्धवाक्यम्। सत्प्रभृतयः। अविस्पष्टम् २। इत्यमरः। १। ६। २१॥

म्लिष्टः, त्रि, (म्लेच्छ+क्तः।) अव्यक्तवाक्। म्लानः। इति मेदिनी। टे, २५॥

म्लुच, उ इर् गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) उ, म्लोचित्वा म्लुक्ता। इर्, अम्लुचत् अम्लोचीत्। इति दुर्गादासः॥

म्लेच्छ, कि देशोक्तौ। इति कविकल्पद्रुमः॥ (चुरा०-उभा०-पर०-अक०-सक० च-सेट्।) देशोक्तिर्म्लेच्छोक्तिरसंस्कृतकथनमित्यर्थः। कि, म्लेच्छयति म्लेच्छति म्लेच्छः। अन्तर्विद्यामसौ विद्वान् न म्लेच्छति धृतव्रत इति हलायुधः॥ अनेकार्थत्वादव्यक्तशब्देऽपि। तथा चामरः। अव्य म्लिष्टमविस्पष्टमिति। म्लेच्छ अव्यक्तायां वाचि इति प्राचः। तच्च रमानाथस्तु। म्लेच्छति वक्तुमेतं वदतीत्यर्थः। अव्यक्तायामिति पाठे कुत्सितायां वाचीत्यर्थः।

'तत्साङ्गमभावच्च तदन्तत्वं तदप्यसा।
अप्राग्रह्यं विरोधच्च नञर्थाः षट् प्रकीर्त्तिताः॥'

इति भाष्यवचनेन नञोऽप्राग्रह्यार्थत्वात् इति याज्ञवल्क्याय हलायुधोक्तमसदाक्षुतवान्। इति दुर्गादासः॥

म्लेच्छं, क्ली, (म्लेच्छसहेशः उत्पत्तिस्थानत्वेनास्त्यस्य। अर्शआद्यच्।) हिङ्गुलम्। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।

"हिङ्गुलन्दरदं म्लेच्छमिङ्गुलञ्चर्म्मपारदम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

म्लेच्छः, पुं, (म्लेच्छयति वा म्लेच्छति असंस्कृतं वदतीति। म्लेच्छ्+अच।) किरातप्रवरपुलिन्दादिजातिः। इत्यमरः॥ पामरभेदः। यावरक्तः। अपभाषणम्। इति मेदिनी। छे, ६॥ म्लेच्छादीनां सम्बन्धसंसर्गादिप्रयुक्तं यथा, हरिवंशे। १४। १५—१६।

"सगरः स्वां प्रतिज्ञाञ्च गुरोर्व्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्।
जवनानां शिरः सर्व्वं काम्बोजानाञ्चथैव च॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्कारास्तस्यैतस्य महात्मनः॥
शका जवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलसर्पाः समाहिषा दार्व्वाश्चोलाः सकेरलाः॥
सर्व्वे ते क्षत्रियास्तात धर्म्मस्तेषां निरासतः॥
वशिष्ठवचनाद्राजन् सगरेण महात्मना॥"

शकानां शकदेशोद्भवानां क्षत्रियाणाम्। एवं जवनादीनामपि। अत्र जवनशब्देनेदृशोद्भववाची चवर्गलतीयादिः। जवनो देशभेदिनीरिति त्रिकाण्डशेषाभिधानदर्शनात्॥ *॥ तेषां म्लेच्छत्वमप्युक्तं विष्णुपुराणे। तथाहि तान् जवनादीनुपक्रम्य ते चात्मधर्म्मपरित्यागात् म्लेच्छत्वं ययुरिति। बौधायनः।

"गोमांसखादको यश्च विरुद्धं बहु भाषते।
सर्व्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते॥"

इति प्रायश्चित्ततत्त्वम्॥ *॥

अपिच। देवयान्यां ययातेर्द्वौ पुत्रौ यदुः तुर्व्वसुश्च।

ग्रस्मिंस्त्रायां त्रयः पुत्त्राः हह्युः अनुः पुरुश्च। तत्र यदुप्रभृतयश्चत्वारः पितुराज्ञाहेलनं कृतवन्तः पित्रा शप्ताः। ज्येष्ठपुत्त्रं यदुं शशाप तव वंशे राजा चक्रवर्त्ती मा भूदिति। तुर्व्वसुद्रह्यून् शशाप युष्माकं वंश्या वेदबाह्या म्लेच्छा भविष्यन्ति। इति श्रीभागवतमतम्॥ *॥

("अरुणत् पह्लवान् पुच्छात् प्रस्थलाद्द्राविड़ान् शकान्।
योनिदेशाश्च यवनान् शकृतः शबरान् बर्ब्बरान्॥
मूत्रतश्चाहनत् काञ्चीम्ल्हरांश्चैव पार्श्वतः।
पौण्ड्रान् किरातान् यवनान् सिंहलान् बर्ब्बरान् खशान्॥
चिबुकांश्च पुलिन्दांश्च चीनान् हूनान् सकेरलान्।
सर्व्वे ते क्षत्रियास्तस्य वशिष्ठस्य प्रसादनात्॥
सस्रर्ज्ज फेनतः सा गौर्म्लेच्छान् बहुविधानपि॥"
सा वशिष्ठस्य धेनुः। इति महाभारते १।१७६। ३५—३७॥) अन्यच्च। "शकजवनकाम्बोजपारदपह्लवा हन्यमानास्तत्कुलगुरुं वशिष्ठं शरणं ययुः। अथैतान् वशिष्ठो जीवन्मृतकान् कृत्वा सगरमाह। वत्स वत्सालमेभिर्जीवन्मृतकैरनुसृतैः। एते च मयैव तत्प्रतिज्ञापालनाय निजधर्म्महिंसासङ्गपरित्यागं कारिताः। स तथेति तद्गुरुवचनमभिनन्द्य तेषां वेषान्यत्वमकारयत्। जवनाञ्शुष्कशिरसोऽर्द्धमुण्डान् शकान् शकृन्मात्रधरान्निःस्वाध्यायवषट्कारानेतानन्यांश्च क्षत्रियांश्चकार। ते चात्मधर्म्मपरित्यागाद्ब्राह्मणैश्च परित्यक्ता म्लेच्छतां ययुः।" इति विष्णुपुराणे। ४। ३। १८—२१॥ *॥ प्रकारान्तरेण तस्योत्पत्तिर्यथा,—

सूत उवाच।

"वंशे स्वायम्भुवस्यासीदङ्गो नाम प्रजापतिः।
मृत्योस्तु दुहिता तेन परिणीतातिदुर्म्मुखी॥
सुनीथा नाम तस्यासु वेनो नाम सुतः पुरा।
अधर्म्मनिरतः कामी बलवान् वसुधाधिपः।
लोकेऽप्यधर्म्मैकज्ञातः परभार्य्यापहारकः॥
धर्म्मोच्छेदप्रसिद्ध्यर्थं जगतोऽस्य महर्षिभिः।
अनुनीतोऽपि न ददावनुज्ञां स यदा ततः॥
शापेन मारयित्वेनमराजकभयार्दितैः।
ममन्थुर्बाहुमस्यास्य बलाद्देहमकल्मषम्॥
तत्काष्ठान्मथ्यमानात्तु निषादुर्म्लेच्छजातयः।
शरीरे मातुरंशेन कृष्णाङ्गसमप्रभाः॥"
इति मत्स्यपुराणे। १०। ३—८॥ *॥

म्लेच्छभाषाभ्यासनिषेधो यथा,—

"न सायंसन्ध्यामुपासीत नार्द्रेण पाणिना शिरः स्पृशेत्। न म्लेच्छभाषां शिक्षेत नार्द्रेण च पदा शयनम्॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥*॥

तस्य मध्यमा तामसी गतिर्यथा, मानवे।
१२।४३।

"हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः।
सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः॥"

(मन्वन्तराकाले म्लेच्छापसारणमुक्तं यथा, मनुसंहितायाम्। ७। १४६।

"अदृष्टकान्त्वधिरांस्त्वेवमङ्गहीनान् वयोऽतिगान्।
स्त्रीम्लेच्छव्याधितज्ञातान् मन्त्रकालेऽपसारयेत्॥"

"अथवा एवंविधा मन्त्रिणो न कर्त्तव्याः। बुद्धिविभ्रमसम्भवात्।" इति तद्भाष्ये मेधातिथिः॥
म्लेच्छानां पशुधर्म्मित्वम्। यथा, महाभारते।१। ८४। १५।

"गुरुदारप्रसक्तेषु तिर्य्यग्योनिगतेषु च।
पशुधर्म्मेषु पापेषु म्लेच्छेषु त्वं भविष्यसि॥")

म्लेच्छकन्दः, पुं, (म्लेच्छप्रियः कन्द इति मध्यपदलोपी कर्म्मधारयः।) लशुनम्। इति राजनिर्घण्टः॥ (तस्य पर्य्यायो यथा,—

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम्।
अरिष्टो म्लेच्छकन्दश्च पवनेष्टो रसोनकः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

म्लेच्छजातिः, स्त्री, (म्लेच्छस्य जातिरिति षष्ठीतत्पुरुषः म्लेच्छरूपा जातिरिति कर्म्मधारयो वा।) गोमांसखादकबहुविरुद्धभाषकसर्व्वाचारविहीनवर्णः। यथा,—

"गोमांसखादको यस्तु विरुद्धं बहु भाषते।
सर्व्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते॥"
इति प्रायश्चिततत्त्वधृतवौधायनवचनम्॥
अपि च।
"भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः॥"
इत्यमरः। २। ४०। २०॥
अन्यच्च।
"पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः॥
सुखबाहूरुपज्जानां या लोके जातयो बहिः।
म्लेच्छवाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः॥"
इति मानवे १० अध्यायः॥

म्लेच्छदेशः, पुं, (म्लेच्छानां देशः म्लेच्छप्रधानो देशो वा।) चातुर्व्वर्ण्यव्यवस्थादिरहितस्थानम्। तत्पर्य्यायः। प्रत्यन्तः २। इत्यमरः। २। १। ७॥ भारतवर्षस्थानां प्रतिगः प्रत्यन्तः। म्लेच्छति शिष्टाचारहीनो भवत्यत्र म्लेच्छः अल्। स चासौ देशश्चेति म्लेच्छदेशः। किंवा म्लेच्छयन्ति असंस्कृतं वदन्ति शिष्टाचारहीना भवन्तीति वा पचाद्यचि म्लेच्छा नीचजातयः तेषां देशो म्लेच्छदेशः। भारतवर्षस्थानां शिष्टाचाररहितः कामरूपवङ्गादिः। उक्तञ्च।

"चातुर्व्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते।
म्लेच्छदेशः स विज्ञेय आर्य्यावर्त्तस्ततः परमिति॥"
इति भरतः॥

(अपि च, मनुः। २। २३।

"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततःपरम्॥")

म्लेच्छभोजनं, क्ली, (भुज्यते यदिति। भुज्+कर्म्मणि ल्युट्। ततो म्लेच्छानां भोजनम्।) यावकः। इति शब्दरत्नावली॥

म्लेच्छभोजनः, पुं, (भुज्यतेऽसौ इति। भुज्+ल्युट्। म्लेच्छानां भोजनः। (गोधूमः। इति चिकाकण्वेषः॥

म्लेच्छमण्डलं, क्ली, (म्लेच्छानां मण्डलं समूहोऽत्र।) म्लेच्छदेशः। इति हेमचन्द्रः॥

म्लेच्छसुखं, क्ली, (म्लेच्छे म्लेच्छदेशे सुखमुत्पत्तिरस्य। इत्यमरटीकायां रघुनाथः।) ताम्रम्। इत्यमरः। २। ६। ६७॥ (तथास्य पर्य्यायः।

"ताम्रमौडुम्बरं शुल्बमुडुम्बरमपि स्मृतम्।
रविप्रियं म्लेच्छसुखं सूर्य्यपर्य्यायनामकम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"ताम्रमौडुम्बरं शूल्बं विद्यात् म्लेच्छसुखं तथा॥"
इति गारुड़े २०८ अध्याये॥)

म्लेच्छाशः, पुं, (म्लेच्छैरश्यते इति। अश्+कर्म्मणि+घञ्।) म्लेच्छभोजनः। गोधूमः। इति केचित्॥

म्लेच्छास्यं, क्ली, (म्लेच्छे म्लेच्छदेशे आस्यमुत्पत्तिरस्य।) ताम्रम्। इति हारावली॥

म्लेच्छितं, क्ली, (म्लेच्छ् देशोक्तौ+क्तः।) म्लेच्छभाषा। अपशब्दः। तत्पर्य्यायः। परभाषा २। इति हारावली॥

म्लेट, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्लेटत्। म्लेटति लोकः उन्मादतीत्यर्थः। इति दुर्गादासः॥

म्लेड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्लेडत्। म्लेडति। उन्मादतीत्यर्थः। इति दुर्गादासः॥

म्लेव, ऋ ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अमिम्लेवत्। ङ, म्लेवते। इति दुर्गादासः॥

म्लै, कान्तिसंक्षये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) म्लायति चन्द्रो दिवसे। इति दुर्गादासः॥

Reprinted by ; K. L. Sachdeva for
SKYLARK PRINTERS (Photo offset)
479, Matia Mahal, Jama Masjid, Delhi-6

॥ श्रीः ॥

शब्दकल्पद्रुमः

चतुर्थो भागः

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९३



शब्दकल्पद्रुमः

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः ।

चतुर्थो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : तृतीय, सं० २०२४ वि०
मूल्य : सम्पूर्ण ग्रन्थ १–५ भाग रु० १५०–००



PK
925
D47
1967
V.4

©
चौखम्बा संस्कृत सीरीज आफिस
पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी–१ (उ० प्र०)
भारतवर्ष
फोन नं० ३१४५

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 93

SHABDA-KALPADRUM

OR

AN ENCYCLOPÆDIC DICTIONARYIOF SANSKRIT WORDS ARRANGED IN ALPHABETICAL ORDER GIVING THE ETYMOLOGICAL ORIGIN OF THE WORDS ACCORDING TO PANINI, THEIR GENDER, VARIOUS MEANINGS AND SYNONYMS, AND ILLUSTRATING THEIR SYNTACTICAL USAGE AND CONNOTATION WITH QUOTATIONS DRAWN FROM VARIOUS AUTHORITATIVE SOURCES SUCH AS VEDAS, VEDANTA, NYAYA, OTHER DARSHANAS, PURANETIHAS, MUSIC, ART, ASTRONOMY, TANTRA, RHETORICS AND PROSODY AND MEDICINE ETC.

BY
RAJA RADHA KANTA DEVA

PART FOUR

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1

Publisher : The Chowkhamba Sanskrit Series Office, Varanasi.
Printer : Vidya Vilas Press, Varanasi.
Edition : Third, 1967
Price : 1–5 Vols. Complete Rs. 150–00

© The Chowkhamba Sanskrit Series Office
Oriental and Foreign Book-Sellers and Publishers
P. O. Chowkhamba, Post Box 8,
Varanasi–1 (India)
1967
Phone : 3145



शब्दकल्पद्रुमः

चतुर्थकाण्डम्।

य

य, अन्तःस्थवर्णः। स च षड्विंशग्रहलवर्णः। अस्योच्चारणस्थानं तालु। (यदुक्तं सिद्धान्तकौमुद्याम्। "इयुयण्नां तालु।" तथा च शिक्षायाम्। १७।
"कण्ठ्यावहाविचुयशाल्यजा ओष्ठ्यावुपू।")
तस्य स्वरूपं यथा,—
"यकारं शृणु चार्वङ्गि! चतुष्कोणमयं सदा।
प्रलयाग्निमयं वर्णं पद्मदेवमयं सदा।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं तथा।
प्रणमामि सदा वर्णं मूर्त्तिमन्मोक्षमव्ययम्॥"
इति कामधेनुतन्त्रे ५ पटलः॥
वर्णीयवर्णमालायामस्य लेखनप्रकारो यथा,—
"ऊर्द्धाधःक्रमतो रेखा चतुष्कोणमयी शुभा।
नारायणोग्रविधयस्तासु तिष्ठन्ति नित्यशः॥
माता कुण्डलिनी त्रेया ध्यानमस्य प्रचक्षते॥"
तस्य ध्यानं यथा,—
"धूम्रवर्णां महारौद्रीं षड्भुजां रक्तलोचनाम्।
रक्ताम्बरपरीधानां नानालङ्कारभूषिताम्॥
महामोक्षप्रदां नित्यामहसिद्धिप्रदायिनीम्।
एवं ध्यात्वा यकारन्तु तन्मन्त्रं दशधा जपेत्॥"*॥
तत्प्रणाममन्त्रो यथा,—
"त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा।
प्रणमामि सदा वर्णं शक्तिमामोक्षमव्ययम्॥"
इति वर्णोद्धारतन्त्रम्॥

अस्य नामानि यथा,—
"यो वायौ वसुधा वायुर्व्वैद्युतः पुरुषोत्तमः।
युगान्तः श्वसनः प्रौघो धूमार्चिः प्राणिसेवकः॥
प्रचण्डश्चमरो जटी लोला वायुवेगी यशस्करी।
सङ्कर्षणः क्षपा वालो हृदयं कपिलाप्रभा॥
आमेयो व्यापकस्त्यागो होमो यानं प्रभा सुखम्।
शक्रः सर्व्वेश्वरी धूमश्वासश्छा सुखेश्वरी॥
त्वगात्मा मलयो माता हंसिनी श्वङ्गिनायकः।
वेनमः प्रोथको मौनो घनिष्ठानङ्गवेदिनी।
मेष्ठः सोमः पक्षिनामा पापहा प्रायसंज्ञकः॥"
इति नागातन्त्रशास्त्रम्।

यङ्गत्

(धात्वनुबन्धविशेषः। स तु दिवादिगणस्थकः। तथा च कविकल्पद्रुमे। "दिवादौ यादादिकः॥" छन्दःशास्त्रान्तर्गतगणविशेषः। तथा च छन्दोमञ्जर्य्याम्।
"भादिगुरुः पुनरादिलघुर्यः॥"
अस्य साङ्केतिकचिह्नं यथा, ।ऽ ;
काव्यादौ अस्य प्रथमप्रयोगे लक्ष्मीलाभः फलम्। यथा, वृत्तरत्नाकरटीकायाम्।
"यो लक्ष्मीं रसु दार्ढं वसनमथ जयौ ग्रः सुखं वस्तु खेदम्॥")

यः, पुं, (याति वातीति। या गतौ + डः।) वायुः। यज्ञः। योगः। यानम्। याता। इति शब्दरत्नावली। सर्व्वनाम। यच्छब्दार्थे इति बाबतु। इति विश्वः॥

यकः, त्रि, यः। ये इति भाषा। यच्छब्दस्य टेरत्वे टेः पूर्व्वे यकागमेन निष्पन्नः॥ ("अयवयवर्मनाम्नामकच् प्राक् टेः।" ५।३।७१। इति पाणिनिसूत्रम्। यथा, ऋग्वेदे। ८।२१।१८।
"चित्र इन्नाभा राजका इदन्यके यके सरस्वतीमनु॥")

यजत्, क्लीं, (यज्+"ग्रकेऽर्त्तिन्।" उणा० ४।५८। इत्यत्र "बाहुलकात् यजेः कथ।" इत्युज्ज्वलदत्तोक्त्या ऋतिन् अस्य च कः।) कुचेर्दक्षिणभागस्थमांसखण्डम्। तत्पर्य्यायः। कालखण्डम् २। इत्यमरः। २।६।९९॥ कालखण्डम् ३ कालेयम् ४ कालकम् ५। इति हेमचन्द्रः॥ करञ्जा ६ महाखायुः ७। इति रभसः॥*॥ (यथा, ऋग्वेदे। १०।१६२।३।
"यच्चं मतस्याभ्यां यक्नः श्नाग्निभ्यो विष्टम्भि ते।"
"यक्नः हृदयसमीपे वर्त्तमानः कालमांसविशेषो यजत् तस्मात्।" इति तट्टीकायां सायणः॥)
अथ शरीरावयवविशेषस्य यजतः स्वरूपमाह।
"अधो दक्षिणतश्चापि हृदयाद्यजतः स्थितिः।
तत्तु रञ्जकपित्तस्य स्थानं श्लेष्मितमं मतम्॥"
अथ यजद्रोगमाह॥
"श्लीपहृदयस्य हेत्वादि समस्तं यजदामये।

यजदा

किन्तु स्थितिस्तयोर्ज्ञेया वामदक्षिणपार्श्वयोः॥"
अथ यजद्रोगचिकित्सा।
"श्लेष्मोद्दिष्टाः क्रियाः सर्व्वा यजत्यपि समाचरेत्।
कार्य्यश्च दक्षिणे बाहौ तत्र श्लेष्मितमोक्षणम्॥
चारुश्च विड्वराहाभ्यां पूतिकस्नायु निस्तुषम्।
पिबेत् प्रातर्यथायोगं यजत्यश्लेष्मप्रशान्तये॥"
इति भावप्रकाशः॥
(तथा च।
"वातेनोदीरितं रक्तं कफेन च घनीकृतम्।
पित्तेन पाकतां प्राप्तं त्रिदोषसंश्रितं यजत्॥
लक्षणं तस्य वक्ष्यामि तेन तत्रापि जायते।
क्षीयते तेन मनुजो ह्लादुरात्र प्रवर्त्तते॥
वमिभ्रमक्लथोद्गारो हृल्लासः श्वसनं भ्रमः।
दाहोऽक्षिकूपयोर्म्मूर्द्धा कण्ठे दाहः शिरोव्यथा॥
कृच्छ्रञ्च प्रतिश्यायः क्षीवत्वं कटुकास्यता।
सप्तल्यं हृदि मूलञ्च निद्रानाशः प्रलापतः॥
हृदये मन्यते नाथं उदरं मन्यते श्वभ्रम्।
एतैर्लिङ्गैर्विजानीयात् यजत् कोष्ठे च वक्षसि॥"
अथास्य चिकित्सा।
"निम्बगोपधवेतसं निशा
काशरो च तुलसी च सिंहिका।
क्वाथ एव हृदयामयापहः
स्यात् मूलबलतस्त्र गायजत्॥
सौराष्ट्रीकाशीसमत्तौषधानि
दुरालभाजातिप्रवालकञ्च।
दार्व्वी यमानी कटुभः समङ्गा
क्वाथः सर्पिर्यजदारु हन्ति॥"
इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये।
"श्लीपवद्विधातः पार्श्वात् कुर्य्यादृयजदपि क्षुतम्॥"
इति वाभटे निदानस्थाने द्वादशेऽध्याये॥)

यजदालिका, स्त्री, (यजत इवाला स्वरूपं यस्याः। बहुव्रीहौ कः। टापि अत इत्वम्।) तैल पायिका। इति शब्दचन्द्रिका॥

यक्षद्वेरी, [न्] पुं, (यक्षतो वैरी नाशकः।) रोहितकवृक्षः। यथा,—
"प्लीहघ्नो मांसदलनो यक्षद्वेरी चलच्छदः॥"
इति शब्दचन्द्रिका॥

यक्ष, क ड महि। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ड, यक्षयते। महि पूजायाम्। इति दुर्गादासः॥

यक्षः, पुं, (यक्ष्यते पूज्यत इति। यक्ष+घञ्। यद्वा, ईं लक्ष्मीमश्नोतीति। अश+अण्।) गुह्यकमात्रम्। गुह्यकेश्वरः। इति मेदिनी। षे, २२॥ इन्द्रियम्। धनरक्षकः। इति शब्दरत्नावली॥ यक्षस्वरूपं यथा,—
"आजानुबाहवश्चित्रकराः कुबेरवरकिङ्कराः।
शैलजप्रस्तरकरा अञ्जनाकारमूर्त्तयः॥
विकटाकारवदनाः पिङ्गलाक्षा महोदराः।
स्फटिका रक्तवेशाश्च दीर्घस्कन्धाश्च केचन॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः॥
यक्षगणो यथा,—
"प्रचेतसः सुता यक्षास्तेषां नामानि मे शृणु।
केवलो हरिकेशश्च कपिलः काञ्चनस्तथा।
मेघमाली च यक्षाणां गण एष उदाहृतः॥"
तस्य व्युत्पत्तिर्यथा,—
"धातुर्यश्चलधोक्तस्तदने तपसे च सः।
यदयच्चलुक्तवानेव तस्माद्यक्षो भवत्ययम्॥"
इति वह्निपुराणे काश्यपीयवंशः॥
(अपरा निरुक्तिर्यथा, विष्णुपुराणे १।१५।४१।
"मैवं भो रक्ष्यतामेष येनोक्तं राक्षसास्तु ते।
जघुः खादाम इत्यन्ये ये ते यक्षास्तु जक्षणात्॥"
पुं, स्त्री, पूजा। यथा, ऋग्वेदे। ७। ६१। ५।
"अमूरा विश्वा वयुना विमा वा
न यासु चित्रं ददृशे न यक्षम्॥"
"न यक्षं न पूजा दृश्यते।" इति तद्भाष्ये सायणः॥ तथाच अथर्ववेदे। १६। २। २४।
"तव यक्षं पशुपते अभूत्।")

यक्षकर्दमः, पुं. (यक्षप्रियः कर्दमः।) कर्पूरागुरुकस्तूरीकक्कोलानां मिश्रितसमभागः। इत्यमरः। २। ६। १३३॥ "कर्पूरादिभिर्गन्धद्रव्यैः समभागैः साधितोऽनुलेपनभेदो यक्षकर्दम उच्यते। यक्षप्रियः कर्दमो यक्षकर्दमः।
'कुङ्कुमागुरुकस्तूरीकर्पूरं चन्दनन्तथा।
महासुगन्धमित्युक्तं नामतो यक्षकर्दमः॥'
इति धन्वन्तरिः॥
अन्यच्चापि।
कर्पूरागुरुकस्तूरीकक्कोलघर्षणादि च।
एकीकृतमिदं सर्व्वं यक्षकर्दम इष्यते॥"
इति तट्टीकायां भरतः॥

यक्षतरुः, पुं, (यक्षप्रियो यक्षाश्रितो वा तरुः। शाकपार्थिवादित्वात् समासः।) वटवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्य वटशब्दे ज्ञातव्यम्॥)

यक्षधूपः, पुं, (यक्षप्रियो धूपः।) धूपसामान्यम्। धूनकधूपः। इति केचित्। धुना इति ख्यातेति केचित्। इति भरतः॥ तत्पर्य्यायः। सर्ज्जरसः २ अराल: ३ सर्ज्जरसः ४ बहुरूपः ५। इत्यमरः। २। ६। १२७॥ राल: ६ धूनकः ७ वह्निवल्लभः ८। इति रभसः॥ सालसारः ९ सालजः १० सालनिर्य्यासः ११ सर्ज्यः १२। इति रत्नमाला॥ (अस्य पर्य्यायान्तरं यथा,—
"राल्लस्तु शालनिर्य्यासस्तथा सर्ज्जरसः स्मृतः।
देवधूपो यक्षधूपस्तथा सर्ज्जरसश्च सः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
एतेन माधवपूजननिषेधो देवीपूजा चोक्ता यथा कालिकापुराणे ६८ अध्याये।
"न यक्षधूपं वितरेत् माधवाय कदाचन।"
"यक्षधूपेन वा देवीं महामायां प्रपूजयेत्॥")
सरलदृक्षरसः। टारपिन तैल इति भाषा। तत्पर्य्यायः। प्रायसः २ श्रीवासः ३ सरलद्रवः४। इति हेमचन्द्रः। ३। ३११॥

यक्षरसः, पुं, (यक्षप्रियो रसः। शाकपार्थिवादित्वात् समासः।) पुष्पमधम्। तत्पर्य्यायः। मध्वासवः २। इति त्रिकाण्डशेषः॥

यक्षराजः, पुं, (यक्षाणां राजा। "राजाहः-सखिभ्यष्टच्।" ५। ४। ९१। इति समासान्तष्टच्।) कुबेरः। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। १६४। ४६।
"इत्युक्ता भगवान्देवो यक्षराजः सुपूजितः।
प्रययौ सहितैः सर्व्वैर्निमेषान्नरचारिभिः॥")

यक्षराट्, [ज्] पुं, (यक्षेषु राजते इति। राज्+"सत्सूद्विषद्रुहेति।" ३।२।६१। इति क्विप्।) कुबेरः। (यथा, भागवते। ८। १८। १७।
"तस्मा इत्युपनीताय यक्षराट् प्रात्रिकामदात्॥"

यक्षराजमात्रम्। मल्लिभल्लः। यथा, महाभारते। १। ६४। १२७।
"तथा नो यक्षराडद्य मल्लिभल्लः प्रसीदतु॥"

यक्षरा इव मल्ला राजन्नेत्र। राज्+क्विप्।) रङ्गमल्लप्रः। इति मेदिनी। जे, ३५॥

यक्षराट्पुरी, स्त्री, (यक्षराज: पुरी।) अलका। सा च कैलासपर्व्वतस्थितकुबेरपुरी। इति जटाधरः॥

यक्षरात्रिः, स्त्री, (यक्षप्रिया यक्षाणां वा रात्रिः।) कार्त्तिकी पूर्णिमा। तत्पर्य्यायः। दीपाली २। इति त्रिकाण्डशेषः॥

यक्षसाधनं, क्ली, (यक्षाणां साधनम्।) यक्षोपासना। यथा, वाराहीतन्त्रे।
"यक्षाणां यक्षिणीनाञ्च पेशाचीनाञ्च साधनम्।
भूतवेतालगान्धर्व्वं मारणोच्चाटनानि च।
अधोगमनमेतेषां साधने ऐहिकं हितम्॥"

यक्षामलकं, क्ली, (यक्षाणामामलकम्।) पिण्डखर्জ্জूरफलम्। इति शब्दमाला॥

यक्षावासः, पुं, (यक्षाणामावासो वासस्थानम्।) वटवृक्षः। इति राजनिर्घण्टः॥

यक्षिणी, स्त्री, (यक्षः पूजा अस्त्यस्याः। यक्ष+इनिः। ङीप्।) कुबेरपत्नी। इति शब्दरत्नावली॥ यक्षभार्य्या च॥ (यथा, कथासरित्सागरे। १०। १७८।
"सोऽपि सुक्ताशु विजने भ्रातुः पुत्रं तमभ्यधात्।
अधृतिं मा कृथाः पुत्र! मम सिद्धा हि यक्षिणी॥")

यक्षी, स्त्री, (यक्षस्य भार्य्या। यक्ष+पुंयोगादिति ङीप्।) कुबेरपत्नी। इति शब्दरत्नावली॥ (यक्षभार्य्या। यथा, महाभारते। ३। ६४। ११७।
"यक्षी वा राक्षसी वापि उताहोस्वित् सुराङ्गना।
सर्व्वथा कुरु नः स्वस्ति रक्षसाज्ञानन्दिन्दिते!॥")

यक्षोडुम्बरकं, क्ली, (यक्षप्रियमुडुम्बरम्। ततः स्वार्थे कन्।) अश्वत्थफलम्। इति त्रिकाण्डशेषः॥

यक्ष्मघ्नी, स्त्री, (यक्ष्माणं हन्ति। हन्+"अमनुष्यकर्त्तृके च।" ३। २। ५३। इति टक्। ततो ङीप्।) द्राक्षा। इति शब्दमाला॥

यक्ष्मा, [न्] पुं, (यक्ष+"बाहुलकात् यक्षयतेरपि।" उणा०। ४।१५०। इत्यत्र उज्ज्वलदत्तोक्त्या मनिन्प्रत्ययेन साधुः।) रोगविशेषः। तत्पर्य्यायः। क्षयः २ शोषः ३। इत्यमरः। २। ६। ५१॥ राजयक्ष्मा ४ रोगराट् ५॥ अथ राजयक्ष्माधिकारः। "तत्र राजयक्ष्मणो विप्रकृष्टं सन्निकृष्टञ्च निदानमाह।
'वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात्।
त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात्॥'
वेगोऽत्र वातमूत्रपुरीषाणाम्।
'वातमूत्रपुरीषाणि नियच्छति यदा नरः॥'
इति चरकवचनात्॥
क्षयात् क्षीयतेऽनेनेति क्षयः तेनातिव्यवायानशनेर्य्यादयो धातुक्षयहेतवः क्षयशब्देनोच्यन्ते। साहसात् बलवता सम मल्लयुद्धादितः। विषमाशनात् बहु स्तोकमकाले वा भुक्तं ततु विषमाशनम्। तस्मात्। त्रिदोषः सान्निपातिकः। हेतुचतुष्टयात् अन्येऽपि हेतवः हेतुचतुष्टय एवान्तर्भवन्ति। यक्ष्मणः पर्य्यायाः राजयक्ष्मक्षयशोषाः॥ यक्ष्मादीनां शब्दानां निरुक्तिमाह।
'वैद्यो व्याधिमतां यस्मात् व्याधिर्यत्नेन यक्ष्यते।
स यक्ष्मा प्रोच्यते लोके शब्दशास्त्रविशारदैः॥'
यक्ष्यते पूज्यते।
'राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः।
तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः॥
क्रियाक्षयकरत्वात्तु क्षय इत्युच्यते बुधैः।
संशोषणाद्रसादीनां शोष इत्यभिधीयते॥'
संप्राप्तिमाह।
'कफप्रधानदोषेषु रुद्धेषु रसवर्त्मसु।
अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तरा।
क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानवः॥'
कफप्रधानदोषैः रसवर्त्मसु रुद्धेषु अनन्तरा सर्व्वे धातवः क्षीयन्ते ततो मानवः शुष्यति।

कारणभूतस्य रसस्य क्षये कार्य्याणां रक्तादीनामनुक्रमेण क्षीयमाणत्वात् ॥ * ॥ मार्गावरोधे रसक्षयहेतुमाह चरकः ।
'रसश्रोतःसु रुद्धेषु स्वस्थानस्थो विदह्यते ।
स ऊर्द्धं कासवेगेन बहुरूपः प्रवर्त्तते ॥'
स्वस्थानस्थः हृदयस्थः । कासं विनापि रसक्षयो भवति मार्गावरोधकुपितवातेन रसस्य शोषणात् । उक्तञ्च ।
'वायोर्द्धातुक्षयात् कोपो मार्गस्यावरणेन च ।
अनुलोमक्षयं दृष्ट्वा प्रतिलोमक्षयावहः ॥'
अनुलोमक्षयं दर्शयित्वा प्रतिलोमक्षयमाह । अतिक्षयवायिनो वा रेतसि क्षीणे प्रतिलोमक्रमेणानन्तरा सर्व्वे धातवो रसपर्य्यन्ताः क्षीयन्ते । तदृयथा । शुक्रे क्षीणे मज्जा क्षीयते मज्जनि क्षीणेऽस्थि क्षीयते । एवं पूर्व्वं पूर्व्वं क्षीयते । ननु कार्य्यस्य शुक्रस्य क्षये कथं कारणभूतानां मज्जादीनां क्षयः । उच्यते । शुक्रक्षयाद्वायुः कुप्यति । यदुक्तम् ।
'वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन चेति ।'
स वायुः सान्निध्यक्रमेण मज्जादीन् सर्व्वान् धातून् संशोषयति । ततस्तदनन्तरं मानवः शुष्यति ॥ * ॥ पूर्व्वरूपमाह ।
'श्वासाङ्गसादकफसंस्रवतालुशोष-
वक्त्राप्रिषादमदपीनसकासनिद्राः ।
शोषे भविष्यति भवन्ति स चापि जन्तुः
शुक्लेक्षणो भवति मांसपरो दिरंसुः ॥
स्वप्नेषु काकशुकगृध्रकिणीलकङ्क-
यक्षास्तथैव कपयः कृकलासकाश्च ।
तं वाहयन्ति स नदीर्विजलाश्च पश्येत्
शुष्कांस्तरून् पवनधूमदवार्दितांश्च ।'*॥
यक्ष्मणो लक्षणमाह ।
'अंसपार्श्वाभितापश्च सन्तापः करपादयोः ।
ज्वरः सर्व्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः ॥'
अंसयोः पार्श्वयोः अभितापः पीड़ा अत्र सकलधातुक्षयपूर्व्वकः सकलशरीरशोषोऽपि बोद्धव्यः । क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानव इति संप्राप्तेः । एवं षड्रूपे एकादशरूपे च बोद्धव्यम् । एतानि त्रीणि लक्षणानि प्रायोभावित्वेन चरकेणोक्तानि । सुश्रुतेन यक्ष्मणि षट्लक्षणान्युक्तानि ।
'भक्तद्वेषो ज्वरः कासः श्वासः शोणितदर्शनम् ।
स्वरभेदश्च जायेत षड्रूपे राजयक्ष्मणि ॥'*॥
उल्बणतया दोषाणां भेदादेकादश लक्षणान्याह ।
'स्वरभेदोऽनिलाच्छूलं सङ्कोचश्चांसपार्श्वयोः ।
ज्वरो दाहोऽतिसारश्च पित्तादक्तस्य चागमः ॥
शिरसः परिपूर्णत्वमभक्तच्छन्द एव च ।
कासः कण्ठस्य चोद्वंसो विज्ञेयः कफकोपतः ॥'
अनिलादुल्बणात् एवं पित्तात् कफाच्च । यत आह सुश्रुतः ।
'एक एवमतः शोषः सन्निपातात्मको मतः ।
उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति च ॥'
असाध्ययक्ष्माणमाह ।
'एकादशभिरेभिर्व्वा षड्भिर्वापि समन्वितम् ।
त्रिभिर्व्वा पीड़ितं लिङ्गैर्व्वरकासाङ्गमार्दवैः ।
जन्तोश्छोषार्दितं जन्तुमिच्छेत सुविपुलं यशः ॥'
तत्र विशेषमाह ।
'सर्व्वैरेतैस्त्रिभिर्व्वापि लिङ्गैर्मांसबलक्षये ।
युक्तो वर्ज्यचिकित्सस्तु सर्व्वरूपोऽप्यतोऽन्यथा ॥
सर्व्वैर्लिङ्गैरेकादशभिः । अर्द्धैः षड्भिः त्रिभिर्व्वरकासरुधिरवमनैः । अतोऽन्यथा मांसे बले सति सर्व्वरूपोऽपि प्रत्याख्याय चिकित्स्यः ।
'महाव्रणं क्षीयमाणमतीसारनिपीड़ितम् ।
सूनसुष्कोदरञ्चैव यक्ष्माणं परिवर्जयेत् ॥'
महाव्रणं क्षीयमाणमित्येकमसाध्यलक्षणम् । अतीसारनिपीड़ितमिति द्वितीयम् । यत उक्तम् ।
'मलायत्तं बलं पुंसां शुक्रायत्तन्तु जीवनम् ।
तस्मादृयत्नेन संरक्षेदृयक्ष्मिणो मलरेतसी ॥'
सूनसुष्कोदरमिति तृतीयम् ॥ * ॥ अरिष्टमाह ।
'शुक्लाक्षमन्नद्विट्कण्ठश्वासनिपीड़ितम् ।
लक्ष्येण बहु मेहन्तं यक्ष्मा हन्तीह मानवम् ॥'
मेहन्तं शुक्रं क्षरन्तम् । शुक्लाक्षत्वादीनि एकैकशोऽरिष्टलक्षणानि ॥ * ॥ अवधिमाह ।
'परं दिनसहस्रन्तु यदि जीवति मानवः ।
सुभिषग्भिरुपक्रान्तस्तदा शोषप्रपीड़ितः ॥'
शोषपीड़ितो मानवश्चेत्तदा भिषग्भिरुपक्रान्तो भवति । तदा परं दिनसहस्रम् । द्वितीयदिनसहस्रं यदि जीवति तत्र जीवनविकल्प इत्यर्थः । एतेन शोषपीड़ितो मानवश्चेत्तदा भवति । सदौषधिक्रियो भवति । तदा प्रथमदिनसहस्रं जीवेदेव इत्युक्ता चिकित्सामाह ।
'ज्वरातुरस्यरहितं बलवन्तं क्रियासहम् ।
उपक्रमेदात्मवन्तं दीप्ताग्निमक्षयं नरम् ॥'
आत्मवन्तं यत्नवन्तं धृतिमन्तं वा ॥ * ॥
अथ निदानविशेषैः शोषविशेषानाह ।
'अवायशोकवार्द्धक्यव्यायामाध्वप्रशोषितान् ।
व्रणोरःक्षतसंज्ञौ च शोषिणो लक्षयेद्भिषग् ॥'
व्रणोरःक्षतसंज्ञौ शोषिणौ । व्रणशोषी उरःक्षतशोषी च ॥ * ॥ तत्र अवायशोषिणो लक्षणमाह ।
'अवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः ।
पाण्डुदेहो यथापूर्व्वं क्षीयन्ते चास्य धातवः ॥'
शुक्रस्य क्षयलिङ्गैः सुश्रुतोक्तैः । तानि यथा, शुक्रक्षये मेढ्रवृषणयोर्वेदना अप्रवृत्तिर्मैथुने चिराद्वा प्रसेकः प्रसेके चाल्पशुक्रदर्शनमिति । यथापूर्व्वं क्षीयन्ते चास्य धातवः प्रथमं शुक्रं क्षीयते पश्चात् शुक्रक्षयजनितवायुना मज्जादयोऽपि धातवो यथापूर्व्वं क्षीयन्ते ॥ * ॥
शोकशोषिणो लक्षणमाह ।
'प्रध्यानशीलः सस्ताङ्गः शोकशोष्यपि तादृशः ।
विना शुक्रक्षयकृतैर्विकारैरुपलक्षितः ॥'
प्रध्यानशीलः यस्याभावेन शोको जनितस्तद्भावपरः । सस्ताङ्गः शिथिलाङ्गः । तादृशः अवायशोषिसदृशः । तेन शुक्रादिसर्व्वधातुक्षययुक्तो भवति । परं शुक्रक्षयकृतैर्विकारैर्मेढ्रवृषणवेदनादिभिर्वर्जितो भवति । आधिस्वभावात् ॥ * ॥ जराशोषिणो लक्षणमाह ।
'जराशोषी क्षयो मन्दवीर्य्यबुद्धिबलेन्द्रियः ।
कम्पनोरुशिमान् भिन्नकांस्यपात्रहतस्वरः ॥
क्षीयते श्लेष्मणा हीनं गौरवारुचिपीड़ितः ।
संप्रसुप्तास्यनासाक्षः शुष्करूक्षमलच्छविः ॥
मन्दग्रन्थः सख्यार्थः । शुष्करूक्षमलच्छविः शुष्करूक्षे मलच्छवी यस्य सः ॥ * ॥ अध्वशोषिणो लक्षणमाह ।
'अध्वप्रशोषी म्रस्ताङ्गः संभ्रष्टपरुषच्छविः ।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः ॥'
संभ्रष्टस्वेदः परुषा रूक्षिर्यस्य सः । प्रसुप्तगात्रावयवः प्रसुप्तः अङ्गाङ्गः । क्लोमं तिलकं पिपासास्थानम् ॥ * ॥ व्यायामशोषिणो लक्षणमाह ।
'व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः ।
लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विना ॥'
एभिरेव सस्ताङ्गत्वादिभिरध्वशोषिणो लक्षणैरेव । भूयिष्ठं अत्यर्थम् ॥ * ॥ सनिदानं व्रणशोषमाह ।
'रक्तक्षयादेहनाभिघातैर्वाहारयन्त्रणात् ।
व्रणितस्य भवेच्छोषो याप्योऽसाध्यश्च स स्मृतः ॥'
उरःक्षतस्य निदानमाह ।
'धनुषायास्यतोऽत्यर्थं भारसृद्वहतो गुरुम् ।
युध्यमानस्य बलिभिः पततो विषमोच्चतः ॥
दूरं द्रुतं वा धावन्तं दन्तं चाप्यं नियच्छतः ।
शिलाकाष्ठाग्ननिर्घातात् क्षिपतो निघ्नतः परान् ॥
अधीयानस्य चात्युच्चैर्दूरं वा व्रजतो हतम् ।
महानदीं वा तरतो हृदैर्व्वा सह धावतः ॥
सहसोत्पततो दूरं तूर्णं चातिप्रवृद्धतः ।
अघात्यैः कर्म्मभिः क्रूरैर्भृशमध्याहतस्य वा ॥
क्षीणे चातिप्रसक्तस्य रूक्षाल्पप्रमिताग्निनः ।
विद्यते वक्षसि याधिर्म्मलवान् सदुदीर्य्यते ॥'
आयास्यतः आयासं कुर्व्वतः । दन्तं दृषादिकम् । अघ्न्यं गवादिकम् । शिला दीर्घपाषाणः । अश्म प्रस्तरखण्डः । निर्घातोऽशनिशब्दः । व्याधिः उरःक्षताख्यः ॥ * ॥ उरःक्षतस्य लक्षणमाह ।
'उरो विरुध्यतेऽत्यर्थं भिद्यते च विभज्यते ।
शूलं भवति ततपार्श्वं शुष्यत्यङ्गं प्रवेपते ॥
प्रपीड्यते ततः पार्श्वं शुष्यत्यङ्गं प्रकम्पते ।
क्रमादीर्य्यं बलं वर्णो रुचिरग्निश्च क्षीयते ।
ज्वरो यथा मलोद्रेकं विदह्येदुरसि तथा ॥
दुष्टः स्रावः सुदुर्गन्धः पीतो विषयितो बहु ।
कासमानस्य चाभीक्ष्णं कफः सासृक् प्रवर्त्तते ॥
स च क्षतः क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात् ।
व्यक्तं लक्षणं तस्य पूर्व्वरूपमिति स्मृतम् ॥'
विरुध्यते पीड्यते । भिद्यते विदार्य्यत इव ।

विभज्यते द्विधा क्रियत इव। स पुरुषः। क्षतः उरःक्षतवान्। अत्यर्थं क्षीयते क्षीणो भवति। न केवलं सासकफक्षयादेव क्षीणो भवति। तथा शुक्रौजसोः क्षयात्। स्त्रीतिसेवनादिना शुक्रौजसोः क्षयादपि क्षीणो भवति ॥*॥ उरःक्षतस्य विशिष्टं लक्षणमाह।

'उरोरुक् श्लेष्मितच्छर्दिः कासो वैश्वेषिकः क्षते। क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहः ॥'

क्षते उरःक्षतवति। उरोरुक् श्लेष्मितच्छर्दिः कासो वैश्वेषिकः विशेषतो भवत्येव। तस्मिन्नेवोरःक्षतवति सासकफशुक्रौजसां क्षयात् क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहश्च भवति ॥*॥ निदानविशेषेणोरःक्षतस्य लक्षणविशेषमाह।

'व्रणारोधात् क्षयाच्चैव कोष्ठात् प्रतिमलात्तथा। क्षतोरस्कस्यान्नपाके निःश्वासो याति पूतिकः ॥'

क्षयात् धातुक्षयहेतोरतिव्यायामात्। कोष्ठात् प्रतिमलात् कोष्ठात् प्रतिमलवातेन प्रतिलोममलात् पूतिकः पूतिगन्धः ॥ * ॥ उरःक्षतस्य साध्यत्वासाध्यत्वलक्षणमाह।

'अल्पजिह्मस्य दीप्ताग्नेः साध्यो बलवतो नवः। परिसंवत्सरो याप्यः सर्वजिह्मन्तु वर्जयेत् ॥'*॥

अथ राजयक्ष्मचिकित्सा।

'बलिनो बहुदोषस्य पञ्च कर्माणि कारयेत्। यक्ष्मणः क्षीणदेहस्य तत्क्षतं स्यादिषोपमम्॥ मलायत्तं बलं पुंसां शुक्रायत्तन्तु जीवनम्। तस्मादादावनं संरक्षेत् यक्ष्मणो मतिमान्नरः॥ शालियष्टिकगोधूमयवषष्टादयो हिताः। मद्यानि जाङ्गलाः पक्षिणश्चाः प्रसहा विष्किरा विलेशयाः॥

सर्पिष्फलीकं सयवं सकुलत्थं सनागरम्। दाडिमामलकोपेतं स्निग्धमाजं रसं पिबेत्॥ तेन बद्धविनिर्वन्हौ विकाराः पीनसादयः॥ द्रवतो द्विगुणं मांसं सर्वतोऽर्द्धगुणं जलम्। पादस्थं संस्कृतस्थाथ्ये षड्ङ्गो यूष उच्यते॥' तद्यथा। यवपल १ कुलत्थपल १ छागमांसपल ४ जलपल ४८ श्लेषपल १२ तत: पलमिते हृते संस्करणीयम्। तत्र कर्षमितं सैन्धवं देयं क्षौरभार्थे क्षिप्तु च देयम्। पिप्पली नागरञ्च पृथक् मात्रमितं कल्कीकृत्य देयम्। दाडिमामलकाभ्यामम्लत्वं साध्यम्। षड्ङ्गयूषः ॥*॥

'कङ्कुभलक् नागबला वागरीबीजं विचूर्णितं पयसा।

पक्वं मधुघृतयुक्तं सक्षितं यक्ष्मादिकाक्षरम्॥ छागमांसं पयश्छागं छागं सर्पिश्च नागरम्। छागोपसेवा श्रयणं छागमध्ये तु यक्ष्मणुत्॥ मधुताप्यविड्ङ्गाक्षं जतुलोहरजोभयाः। क्षन्ति यक्ष्माणमत्युग्रं सेवमाना हिताशिनः॥' ताप्यं सुवर्णमाक्षीकम्।

'शर्करामधुसंयुक्तं नवनीतं लिहन् क्षयी। क्षीराग्री लभते पुष्टिमतुल्यो बाल्यमाप्तिके॥ सितोपलातुगाक्षीरीपिप्पलीबहुलात्वचः। अन्यादूर्द्धं द्विगुणिताश्चूर्णिता मधुसर्पिषा॥

लेहयेद्राजरोगार्त्तं कासश्वासक्षयातुरम्। पार्श्वशूलिनमत्यग्न्यं सुस्निग्धं रुचिप्रदम्॥ हस्तपादाङ्गदाहे च ज्वरे रक्ते तथोर्द्ध्वगे॥' सितोपला मिश्री। बहुला सूक्ष्मेला। इति सितोपलादिरवलेहः ॥*॥

'जातीफलं विड्ङ्गानि चित्रकं तगरं तिला। तालीशं चन्दनं गुष्ठी लवङ्गसुपकुञ्चिका॥ कर्पूरश्चाभया धात्री मरीचं पिप्पली तुगा। एषामष्टसमा भागाश्चातुर्जातकसंयुताः। पलानि सप्त भङ्गाया: सिता सर्वसमा मता॥ चूर्णमेतत् क्षयं कासं श्वासञ्च यहणीगदम्। अरोचकं प्रतिश्यायं तथा वातबलमन्दताम्। एतान् रोगान् निहन्त्येव दृष्टमिन्द्राग्निर्यथा॥ बालरोगाधिकारोक्तं तैलं लाक्षादि योजयेत्। अभ्यङ्गे यक्ष्मणो नित्यं वृद्धवैद्योपदेशतः॥'

इति जातीफलाद्यचूर्णम् ॥ * ॥

'वासकस्य रसप्रस्थं माक्षिकासितशर्करा। पिप्पली द्विपलं तावत् सर्पिषश्च शनैः पचेत्॥ तस्मिन् लेहबलमायाते शीते चौद्रपलाष्टकम्। दत्त्वावतारयेद्वैद्यो जीर्णे लेहोऽयमुत्तमः॥ निहन्ति राजयक्ष्माणं कासं श्वासञ्च दारुणम्। पार्श्वशूलञ्च हृच्छूलं रक्तपित्तं ज्वरन्तथा॥'

इति वासावलेहः ॥ * ॥

अथ वातादिहेतुकक्षीणचिकित्सा। तत्र वातक्षीणचिकित्सा।

'वातक्षीणं क्षीरसमांसाज्यभोजनैः। सुकूलैर्मधुरैर्द्रव्यैर्जीवनीयैरुपाचरेत्॥' रसो मांसरसः। सुकूलैर्हितैः॥ * ॥ शोकक्षीणचिकित्सा।

'हर्षणाश्वासनैः क्षीरैः स्निग्धैर्मधुरशीतलैः। दीपनैर्लघुभिश्चान्नैः शोकक्षीणमुपाचरेत्॥'*॥

व्यायामक्षीणचिकित्सा।

'व्यायामक्षीणं क्षीरैरसमांसाज्यभोजनैः। उपाचरेज्जीवनीयैर्विधिना श्लेष्मिकेण तु॥'*॥

अध्वक्षीणचिकित्सा।

'आस्यासुखैर्दिवास्वप्नैः शीतैर्मधुरहृद्यकैः। अन्नमांसरसाहारैरध्वक्षीणमुपाचरेत्॥'*॥

व्रणक्षीणचिकित्सा।

'व्रणक्षीणं जयेत् स्निग्धैर्दीपनैः स्वादुशीतलैः। हंसदक्षैरनक्षैर्वा यूषमांसरसादिभिः॥'*॥

अथोरःक्षतचिकित्सा।

'बलाश्वगन्धा श्रीपर्णी बहुपुत्री पुनर्नवा। पयसा निशमभ्यस्ताः श्रमयन्ति क्षतक्षयम्॥' श्रीपर्णी गम्भारी। बहुपुत्री शतावरी। इति बलादिचूर्णम् ॥*॥

'एला पत्रत्वचौ द्राक्षा पिप्पल्यर्द्धपलं पृथक्। सितामधुकखर्जूरेन्दीवराक्षं पलोन्मिताः॥ संचूर्ण्य मधुना युक्ता वटिका संप्रकल्पयेत्। अक्षमात्रा ततश्चैव भक्षयेच्च दिने दिने॥ क्षतक्षयं ज्वरं कासं श्वासं हिक्कां वमिं श्रमम्। मूर्च्छां मदं तृषां शोषं पार्श्वशूलमरोचकम्॥

श्लीहानमामवातञ्च रक्तपित्तं स्वरक्षयम्। एलादिगुटिका हन्ति दृष्या सप्तपर्णी परा॥ द्राक्षायाः प्रस्थमेकन्तु मधूकस्य पलाष्टकम्। पचेत्तोयाष्टके शुद्धे पादशेषेण तेन तु॥ पलिके मधुकद्राक्षे पिष्टे क्षुण्णपलद्वयम्। प्रदाय सर्पिषः प्रस्थं पचेत् क्षीरे चतुर्गुणे॥ सिद्धे घृते पलान्यष्टौ शर्करायाः प्रदापयेत्। एतद्राक्षाघृतं सिद्धं क्षतक्षीणे सुखावहम्॥ वातपित्तज्वरश्वासविस्फोटकहलीमकान्। प्रदरं रक्तपित्तञ्च हन्यान्नासबलप्रदम्॥'

इति द्राक्षाद्यघृतम् ॥*॥

'क्षीरे धात्रीविदारीक्षुवरीबाक्ष तथा रसे। पचेत् समे घृतप्रस्थं मधुरैः कर्षसम्मितैः॥ द्राक्षाद्विचन्दनोशीरशर्करोत्पलपद्मकैः। मधुककुसुमानन्ताकाश्मरीक्षसंज्ञकैः॥ प्रस्थार्द्धं मधुनः शीते शर्कराश्चतुलान्तथा। पलार्द्धकञ्च संचूर्ण्य लवणाम्लपञ्चकैश्चरान्॥ विनीय तत्र संलिह्यान्मात्रां नित्यं सुयन्त्रितः। अन्तप्राग्भक्तमित्येतदश्विभ्यां परिकीर्तितम्॥ क्षीरमांसाशिनां हन्ति रक्तपित्तक्षतक्षयम्। हृत्पार्श्वशिरआसकासच्छर्द्दिमूर्च्छाप्रमर्दनम्॥ मूत्रसृक्छ्वरघ्नञ्च वल्यं क्षीरतिवर्द्धनम्॥'

इति अन्तप्राग्भक्ताद्यघृतम् ॥*॥

'यदृच्छया तर्पणं शीतमविदाहि हितं लघु। अन्नपानं निषेवेत क्षतक्षीणैः सुखार्थिभिः॥

शोकं स्त्रियः क्रोधमसूयताञ्च त्यजेदुदारान् विषयान् भजेच्च। तथा द्विजातीन्त्रिदशान् गुरूंश्च वाचञ्च पुण्याः शृणुयाद्विजेभ्यः॥'*॥

अथ राजयक्ष्मणि रसाः। अन्तेश्वरो रसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ।

'रसभस्मान्तसत्त्वं लौहं मधुघृतान्वितम्। अन्तेश्वरनामायं हन्त्यलं राजयक्ष्माणम्॥'

इति अन्तेश्वरो रसः॥

रसभस्मः मारितो रसः। अन्तसत्त्वं गुडूचीसत्त्वम्। लौहं मारितम्॥ * ॥

'त्रयोऽग्नी मारितात् क्षतादेकोऽग्नी हेमभस्मतः।

एकोऽग्नी न्यतताम्रस्य शिखा गन्धश्च तावकम्। प्रत्येकं भागयुग्मं स्यादेतत् सर्वं विचूर्णयेत्॥ वराटीः पूरयेत्तेन छागीक्षीरेण टङ्कणम्। पिष्ट्वा तेन सुखं रुद्ध्वा पुटाच्छुद्धे ताश्च पूरयेत्॥ ततो गजपुटे पक्त्वा चूर्णयेत् खाङ्गशीतलम्। रसो राजन्यगाङ्कोऽयं चतुर्गुञ्जः क्षयापहः॥ मरिचैरूनविंशत्या कणाभिर्दशभिस्तथा। मधुना सर्पिषा चापि दद्यादेतं रसं भिषक्॥ अनेन नश्यति क्षिप्रं वातश्लेष्मभवक्षयः॥'

इति राजन्यगाङ्को रसो राजयक्ष्मणि रसेन्द्रचिन्तामणौ॥*॥

'शुद्धसूतं द्विधा गन्धं कुर्यात् खल्वेन कज्जलीम्। तयोः समं तीक्ष्णचूर्णं मर्दयेत् कन्यकाद्रवैः॥ त्रियाममातपे गोलं ताम्रपात्रे विचारयेत्।

आच्छाद्योरक्षपत्रेण स्नाद्वम्लं यामयुग्मतः ॥
धान्याराग्नौ न्यसेत् पश्चादहोरात्रात्तदुद्धरेत् ।
संचूर्ण्य गालयेदक्षं सत्वं वारितरं भवेत् ॥
चिकटुत्रिफलैलाभिर्नातीक्ष्णलवङ्गकैः ।
नवभागोन्मितैरेतैः समं सर्वं रसो भवेत् ॥
निष्कद्वयमितं नित्यं मधुना सह लेहयेत् ।
अयमग्निरसो नाम्ना कासक्षयहरः परः ॥'
इति अग्निरसः शार्ङ्गधरे ॥"
इति भावप्रकाशस्य मध्यखण्डे द्वितीयभागे राजयक्ष्माधिकारः ॥ * ॥ (अथास्य पौराणिकं विवरणं यथा,—
"द्विजौकसां कथयतान्वधिभिर्वै श्रुता कथा ।
कामव्यसनसंयुक्ता पौराणी अग्निनं प्रति ॥
रोहिण्यामतिसक्तस्य शशिनं नानुरज्यतः ।
आजगामाक्षतामिन्दोर्दक्षः स्नेहपरिक्षयात् ॥
दुहितॄणामसम्भोगाच्छापाच्च प्रजापतेः ।
क्रोधो निश्वासरूपेण ऋषिमाविशतो सुखात् ॥
प्रजापतेर्हि दुहितॄरश्विन्यादिसंयुताः ।
भार्यार्थं प्रतिजग्राह न च सर्वासु वर्त्तते ॥
गुरुणा तमवध्यातं भार्यासक्तमवर्त्तिनम् ।
रजोऽन्वमवलं दीनं यक्ष्मा अग्निनमाविशत् ॥
सोऽभिभूतोऽतिगुरुणा गुरुक्रोधेन निष्प्रभः ।
देवदेवर्षिसहितो जगाम शरणं गुरुम् ॥
अथ चन्द्रमसः शुद्धां मतिं बुद्धा प्रजापतिः ।
प्रसादं ज्ञतवान् सोमस्तोऽग्निर्भ्यां चिकित्सितः ॥
स विमुक्तग्रहश्चन्द्रो विरराज विशेषतः ।
तेजसा वह्निसोऽग्निभ्यां शुद्धं सत्त्वमवाप च ॥
क्रोधो यक्ष्मा ज्वरो रोग एकोऽर्थो दुःखसंज्ञितः ।
यस्मात् स राज्ञः प्रागासीद्राजयक्ष्मा ततो मतः ॥
स यक्ष्मा दुर्बलोऽग्निभ्यां मानुषं लोकमागतः ।
लब्ध्वा चतुर्विधं हेतुं समाविशति मानवान् ॥
अयथाबलमारम्भं वेगसन्धारणं क्षयम् ।
यक्ष्मणः कारणं विद्यात् चतुर्थं विषमाशनम् ॥"
अस्य विशेषहेतुर्यथा,—
"गुरुध्ययनभाराध्वलङ्घनप्लवनादिभिः ।
पतनैरभिघातैर्वा साहसैर्वा तथापरैः ॥
अयथाबलमारम्भैर्वेगोदरे विकृते ।
वायुः प्रकुपितो दोषावुदीर्य्याभौ विधावति ॥"
तथास्य लक्षणादिकं यथा,—
"स शिरःस्थः शिरःशूलं करोति गलमाश्रितः ।
कण्ठोद्धंसश्च कासश्च स्वरभेदमरोचकम् ।
पार्श्वशूलश्च पार्श्वस्थो वर्द्धभेदं गुदे स्थितः ।
तृष्णा ज्वरश्च सन्धिस्थ उरःस्थोरसो वमम् ॥
क्षयजाद्धोरसो रक्तं कासमानः कफानुगम् ।
जर्जरैरोरसा शुष्कैः स्वरशूलौ निरस्यति ॥
इति साहसिकं यक्ष्मा रूपैरेतैः प्रपद्यते ।
एकादशभिरात्मज्ञो भजेत्तस्मान्न साहसम् ॥
क्षीणस्यादो हविलादो भयाद्वा वेगमागतम् ।
वातमूत्रपुरीषाणां निगृह्णाति यदा नरः ॥
तदा वेगप्रतीघातात् कफपित्ते समीरयन् ।
ऊर्द्धं तिर्य्यगधः कुर्य्यादिकारान् कुपितोऽनिलः ॥
प्रतिश्यायश्च कासश्च स्वरभेदमरोचकम् ।
पार्श्वशूलं शिरःशूलं ज्वरमंसावमर्द्दनम् ॥
अक्षिमर्द्दं सुदुःखर्द्दैर्वर्चोभेदं क्षिलक्षणम् ।
रूपाण्येकादशैतानि यक्ष्मायेरथते महान् ॥"
इति चरके चिकित्सास्थाने अष्टमोऽध्यायः ॥
अस्य चिकित्सा यथा,—
"काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकम् ।
विद्रुमं ज्ञतवैक्रान्तं तारं ताम्रञ्च वङ्गकम् ॥
कस्तूरिका लवङ्गञ्च जातिकोषैलवालुका ।
प्रत्येकं विष्णुमात्रञ्च सर्व्वं मर्द्द्यं प्रयत्नतः ।
कन्यालीरेण संमर्द्द्य कैशराजरसेन च ।
अजाक्षीरेण संभाव्यं प्रत्येकं दिवसत्रयम् ।
चतुर्गुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
अनुपानं प्रदातव्यं यथादोषानुसारतः ॥
नानारोगप्रशमनं सर्व्वोपद्रवसंयुतम् ।
क्षयं हन्ति तथा कासं यक्ष्माणं श्वासमेव च ॥
प्रमेहान् विंशतिञ्चैव दोषत्रयसमुत्थितान् ।
सर्व्वान् रोगान् निहन्त्याशु भास्करस्तिमिरं यथा ॥"
इति हस्तिरुचिगाश्ववटी ॥
"श्लिलाजतुमधुशोधितास्थलौहरजांसि च ।
क्षीरेक्षुशोधितस्नायु यक्ष्मा क्षयमवाप्नुयात् ॥"
इति श्लिलाजत्वादिलौहम् ॥*॥
इति वैद्यकरसेन्द्रसारसंग्रहे राजयक्ष्माधिकारे ॥ * ॥)
यक्ष्मन्, [तृ] त्रि, दानकर्त्ता । उपरमकर्त्ता । दानधातोर्यमधातोश्च ग्रहणप्रत्ययेन निष्पन्नः ॥
यज, ऐ ज औ देवपूजासङ्गतिकरणदानेषु । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।) सङ्गस्य ज्ञतिः सङ्गज्ञतिः । ऐ, इच्छायां । ज, यजति यजते विष्णुं सुधीः पूजयतीत्यर्थः । पशुना रुद्रं यजते पशुं रुद्राय ददातीत्यर्थः । यजति सन्तं सनु सता सह सङ्गं करोतीत्यर्थः । औ, यष्टा । इति दुर्गादासः ॥
यजतः, पुं, (यजतीति । यज्+"भ्रन्दहग्रियजिपर्विपच्यमितमिनमिहर्यिभ्योऽतच् ।" उणा० ३।१२९।इति अतच् ।) ऋत्विक् । इति सिद्धान्तकौमुदी ॥ (ऋषिविशेषः । स तु ऋग्वेदस्य ५ म० ६७।६८। सूक्तयोः ऋषिः ॥ त्रि, यष्टरि । यथा, ऋग्वेदे । १ । १८१ । ३ ।
"अहंपूर्वो यजतो विप्रजा यः ॥"
"यजतो यष्टरि ।" इति तद्भाष्ये सायणः ॥ तथा च तत्रैव । २ । ५ । ८ ।
"यथा विप्रो अरं करद्भिभ्यो यजतेभ्यः ।"
"यजतेभ्यः सर्व्वेभ्यो यजनीयेभ्यो देवेभ्यः ।" इति तद्भाष्ये सायणः ॥)
यजतिः, पुं, (यज्+बाहुलकात् अतिः ।) यागः । यथा,—
"यजतिषु ये यजामहं कुर्य्यान्नानुयाजेषु ।"
इति मलमासतत्त्वधृता श्रुतिः ॥
यजत्रः, पुं, (यजतीति । यज्+"अमिनक्षियजिवधिपतिभ्योऽत्रन् ।" उणा० ३ । १०५ । इति अत्रन् ।) अग्निहोत्री । इत्युणादिकोषः ॥ (यजनशीले, त्रि । यथा, ऋग्वेदे ।७।५२।१६।
"पिता च तन्नो महान् यजत्रो
विश्वेदेवाः समनसो जुषन्त ॥"
"यजत्रः यजनशीलः ।" इति तद्भाष्ये सायणः ॥)
यजन्, [तृ] पुं, यागकर्त्ता । यजधातोः ग्रहणप्रत्ययेन निष्पन्नः ॥
यजनं, क्ली, (इज्यते इति । यज्+ल्युट् ।) यागः । (यथा, महाभारते । ७ । ५३ । ३७ ।
"यस्य सेन्द्रामरगणा दृष्टस्तिपुरोगमाः ।
देवा विश्वसृजः सर्व्वे यजनान्ते समासते ॥")
तत्तु ब्राह्मणस्य षट्कर्म्मान्तर्गतकर्म्मविशेषः । यथा, मानवे १ अध्याये ।
"अध्यापनं अध्ययनं यजनं याजनं यथा ।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत् ॥"
अस्य लक्षणं यथा । पशुक्षीराज्यपुरोडाशसोमौषधिचरुप्रभृतिभिर्हविर्भिः खदिरपलाशाश्वत्थयज्ञोडुम्बरप्रभृतिभिः समिद्भिः सुक्सुवोदूखलमुषलकुठारखनित्रयूपदारुदर्भचर्म्मस्रुवपवित्रभाजनादिभिर्द्रव्योपकरणैरुद्गाद्दोद्गध्वर्युब्रह्मादिभिर्ऋत्विग्भिः काम्यनैमित्तिकानां पश्वादिपूर्व्वकाणां यथोक्तदक्षिणानां समापनं यजनम् । इति आद्धविवेकधृतदेवलवचनम् ॥ (इज्यतेऽनेनेति । यज्+अधिकरणे ल्युट् । यज्ञस्थानम् । यथा, श्रीमद्भागवते । ४ । ४ । ६ ।
"ब्रह्मावलयः काञ्चनदर्भचर्म्माभिनिर्वृत्तभागं यजनं समाविशत् ॥"
"यजनं यज्ञस्थानम् ।" इति तट्टीकायां श्रीधरस्वामी ॥)
यजमानः, पुं, यागकर्त्ता । यजधातोर्भ्रूंच्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥
यजमानः, पुं, (यजतीति । यज्+शानच् ।) अध्वरे आदेष्टा । तत्पर्य्यायः । व्रती २ यष्टा ३ । इत्यमरः ।२।७।८। (यथा, श्रीमद्भागवते । ३।१४।८ ।
"नाहं तथाद्मि यजमानहविर्वितानै
र्योतदृष्टसुतमदत् हुतसुक्सुखेन ॥")
"ब्रह्मादित्वं यजमाने । अध्वरे यागविषये मम दृष्टसम्पादनाय यथार्थं कर्म्म कुरु इति ऋत्विजामादेशको यागस्वामी ब्रह्मादिशब्दत्रयवाच्य इत्यर्थः । व्रतमेषामग्निहोत्रादिधारकं विद्यतेऽस्य व्रती इन् । यजते इति क्विप् यष्टा । ज्ञाने यजमानः । स व्रती सोमपानवति अध्वरे यजमानः सनु दीक्षित उच्यते अन्यत्राप्युपचारात् । दीक्षा सौक्ष्म्यौपनयनव्रतादेश्च क्तः दीक्षाशब्दादितो वा ।" इति भरतः ॥
यजाकः, त्रि, (यजतीति । यज दाने+आकन् ।) दानकर्त्ता । इत्युणादिकोषः ॥
यजिः, पुं, (यजतीति । यज्+"सर्व्वधातुभ्य इन् ।" उणा० ४।११७। इति इन् ।) यष्टा । इत्युणादिकोषः ॥

यजुः, [स्] क्ली, (इज्यतेऽनेनेति । यज् + "अर्ति-पृवपियजीति ।" उणा० २ । ११८ । इति उसि: ।) वेदविशेष: । इत्यमर: । १ । ६ । ३ ॥ "इज्यतेऽनेनेति यजु: । यजे नौ देवार्चादानसङ्गतौ । त्रासुसिस् इति उस् ।" इति भरत: ॥*॥ अपि च । यजुराह जैमिनि: । ग्रेषे वा यजु:-शब्द: । ग्रेषे ऋक्सामभिन्ने मन्त्रजाते तत्र यन्मन्त्रजातं प्रश्लिष्य पठितं गानादिविच्छेद-रहितं तत् यजुरिति । इति तिथ्यादितत्त्वम् ॥ यजुर्वेदस्य षड्ग्रीतिभेदा भवन्ति । तत्र चरका नाम द्वादश भेदा भवन्ति । चरका: १ आध्व-रका: २ कठा: ३ प्राच्यकठा: ४ कपिष्ठलकठा:५ औपमन्या: ६ आष्टालकठा: ७ वारायणीया: ८ वाराय्णीया: ९ वार्त्तान्तवेया: १० श्वेताश्वतरा: ११ मैत्रायणीयाश्चेति १२ । तत्र मैत्रायणीया नाम सप्त भेदा भवन्ति । मानवा: १ दुन्दुभा: २ वैकेया: ३ वाराहा: ४ हारिद्रवेया: ५ श्यामा: ६ श्यामायनीया-श्चेति ७ । तेषामध्ययनमथो व्रतम् । यजु:-सहस्राण्यधीत्य ग्राखापारो भवति । तान्येव द्विगुणान्यधीत्य पदपारो भवति । तान्येव त्रिगु-णान्यधीत्य क्रमपारो भवति । षड़ङ्गान्यधीत्य षड़ङ्गविद्भवति । ग्रिक्षा कल्पो व्याकरणं निरुक्तं च्छन्दो ज्योतिषमित्यङ्गानि । तत्र प्राच्योदीच्या नैर्ऋत्या निर्ऋत्य: । तत्र राजसनेया नाम सप्त-दश भेदा भवन्ति । जाबाला: १ औधेया: २ काण्वा: ३ माध्यन्दिना: ४ ग्रापीया: ५ तापायनीया: ६ कापाला: ७ पौण्ड्रवत्सा: ८ आवटिका: ९ पाराशर्या: १० पाराव-टिका: ११ वैधेया: १२ वैनेया: १३ औधेया: १४ गालवा: १५ वैजवा: १६ कात्यायनीया-श्चेति १७ । प्रतिपदमनुपदं च्छन्दो भाषा धर्म्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि भवन्ति । उपज्योतिषम् १ सांग्रहणिकम् २ प्रतिज्ञा ३ अनुवाक्यम् ४ परिसंख्या ५ चरणव्यूहम् ६ आङ्गकल्प: ७ प्रवराध्यायश्च ८ ग्राद्धकल्पम् ९ क्रतु: १० संख्या ११ अनुगम: १२ यज्ञम् १३ प्रायश्चित्त: १४ होत्रकम् १५ पशव: १५ उक्-थानि १७ कूर्म्मलक्षणम् १८ । इत्यष्टादशपरि-ग्रिष्टानि ।

"ङ्गे सहस्रे ग्रुते न्यूने मन्त्रे वाजसनेयके ।
इत्युक्तं परिसंख्यातमेतत् सकलं सम्क्रियम् ॥
यस्यां च परिसंख्यातं ग्राह्मणञ्च चतुर्गुणम् ।
आदावारभ्य वेदान्तं ब्रह्मयाङ्गतिपूर्व्वकम् ।
वेदमध्याय एतेषां होमान्ते तु समारभेत् ॥"

तत्र तैत्तिरीयका नाम द्विभेदा भवन्ति । औख्या: खाण्डिकेयाश्चेति । तत्र खाण्डिकेया नाम पञ्च भेदा भवन्ति । आपस्तम्बी १ बौधा-यनी २ सत्याषाढ़ी ३ हिरण्यकेग्री ४ औधेया-श्चेति ५ । तत्र कठानामुपगानविशेष: । चतु-स्त्वारिंग्रदुपग्रन्थान् ।

"मन्त्रब्राह्मणयोर्वेदनामधेयं यत्र पठ्यते ।
यजुर्व्वेद: स विज्ञेयोऽन्ये ग्राखान्तरा: स्मृता: ॥"

यजुर्व्वेदस्य धनुर्व्वेद उपवेद: । यजुर्व्वेदस्य भार-द्वाजगोत्रम् । रुद्रदेवत्यम् । त्रैष्टुभं छन्द: । यजु-र्व्वेद: क्षत्र: । दीर्घ: । कपाली । ताम्रवर्ण: । काञ्चननयन: । आदित्यवर्ण: वर्णेन । पञ्चारत्नि-मात्र: । अस्य ध्यानम् ।

"वन्दे रौद्रं वेदभं ताम्रवर्णं
भारद्वाजं रुक्मनेत्रं क्षत्राङ्गम् ।
यजुर्व्वेदं दीर्घमादित्यवर्णं
कापालीनं पञ्च चारत्निमात्रम् ॥"

य इदं दैवतं रूपं गोत्रं प्रमाणं छन्दो वर्णं वर्णयति स विद्यां लभते स विद्यां लभते । जन्मजन्मनि वेदपारो भवति । जन्मजन्मनि वेदधारो भवति । अव्रतो व्रती भवति । अप्रयत: प्रयतो भवति । अब्रह्मचारी ब्रह्म-चारी भवति । जातिस्मरो जायते । इति चरणव्यूहम् ॥ (ऋक्सामभिन्नो मन्त्रविशेष: । इति कैचित् ॥)

यजुर्व्वेद:, पुं, (यजुरेव वेद: । यजुषां वेद इति वा ।) वेदविशेष: । तस्याधिपतिर्यथा,—

"ऋग्वेदाधिपतिर्जीव: सामवेदाधिप: कुज: ।
यजुर्व्वेदाधिप: शुक्र: ग्रग्निजोऽथर्व्ववेदराट् ॥"

इति ज्योतिषम् ॥

अस्य वक्ता वैग्म्यायन: । स तु आदावेक एवासीत् । यथा,—

"ऋग्वेदग्रावकं पैलं जग्राह स महामुनि: ।
यजुर्व्वेदप्रवक्तारं वैग्म्यायनमेव च ॥
जैमिनं सामवेदस्य ग्रावकं सोऽन्वपद्यत ।
तथैवाथर्व्ववेदस्य सुमन्तुर्म्मुनिसत्तमम् ॥
एक आसीद्यजुर्व्वेदस्तदुधा व्यकल्पयत् ।
चातुर्होत्रमभूद्यस्मिंस्तेन यज्ञमथाकरोत् ॥
अध्वर्य्यवे यजुर्भि: स्वाहुतभिर्होत्रं द्विजोत्तमा: ।
उद्गात्रे सामभिश्चक्रे ब्रह्मत्वञ्चाथर्व्वभि: ॥
तत: स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभु: ।
यजूंषि च यजुर्व्वेदं सामवेदञ्च सामभि: ॥
एकविंग्रतिभेदेन ऋग्वेदं कृतवान् पुरा ।
ग्राखानान्तु ग्रतेनाथ यजुर्व्वेदमथाकरोत् ॥
सामवेदं सहस्रेण ग्राखानाञ्च विभेदत: ।
अथर्व्वाणमथो वेदं विभेद नवकेन तु ॥"

इति कौर्म्मे ४६ अध्याय: ॥

यज्ञ:, पुं, इज्यते हविर्दीयतेऽत्र । (इज्यन्ते देवता अत्र इति वा । यज् + "यजयाचयतविच्छप्रच्छ-रक्षो नङ् ।" ३।३।९० । इति नङ् ।) याग: । तत्पर्य्याय: । सव: २ अध्वर: ३ याग: ४ सप्र-तन्तु: ५ मख: ६ क्रतु: ७ । इत्यमर: ।२।७।१३॥ इष्टि:८ इष्टम् ९ वितानम्१० मन्यु: ११ आहव: १२ सवनम् १३ हव: १४ अभिषव: १५ होम: १६ हवनम् १७ मह: १८ । इति ग्रब्दरत्ना-वली ॥ स त्रिविध: । सात्त्विको राजसिकस्तामसिकश्च । सात्त्विकयज्ञो यथा,—

"अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मन: समाधाय स सात्त्विक: ॥"

राजसिकयज्ञो यथा,—

"अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ ! तं यज्ञं विद्धि राजसम् ॥"

तामसिकयज्ञो यथा,—

"विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥"

इति श्रीभगवद्गीतायाम् १७ अध्याय: ॥ * ॥

स च नानाविध: । यथा,—

"द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतय: संग्रितव्रता: ॥"

इति श्रीभगवद्गीतायाम् ४ अध्याय: ॥ * ॥

पञ्च यज्ञा यथा,—

"अध्यायनं ब्रह्मयज्ञ: पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

इति गारुड़े ११५ अध्याय: ॥ * ॥

(तथाच मनु: । ४ । २१—२२ ।

"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत् ॥
एतानेके महायज्ञान् यज्ञशास्त्रविदो जना: ।
अनीहमाना: सततमिन्द्रियेष्वेव जुह्वति ॥"

अपरपञ्चयज्ञा उक्ता यथा, ग्रिवपुराणे वायु-संहितायामुत्तरभागे । १८ । ८—१९ ।

"कर्म्मयज्ञस्तपोयज्ञो जपयज्ञस्तृतीयक: ।
ध्यानयज्ञो ज्ञानयज्ञ: पञ्च यज्ञा: प्रकीर्त्तिता: ॥
कर्म्मयज्ञरता: केचित्तपोयज्ञरता: परे ।
जपयज्ञरतास्त्वन्ये ध्यानयज्ञरतास्तथा ॥
ज्ञानयज्ञरतास्त्वन्ये विग्रिष्टास्तोत्तरोत्तरम् ।
कर्म्मयज्ञो द्विधा प्रोक्त: कामाकामविभेदत: ॥
कामान् कामी ततो भुक्त्वा कामासक्त: पुनर्भवेत् ।
अकामो रुद्रभवने भोगान् भुक्त्वा ततश्च्युत: ॥
तपोयज्ञरतो भूत्वा जायते नात्र संग्रय: ।
तपस्वी च पुनस्तस्मिन् भोगान् भुक्त्वा ततश्च्युत: ॥
जपध्यानरतो भूत्वा जायते भुवि मानव: ।
जपध्यानरतो मर्त्यस्तेनैग्वर्य्यादिह ॥
ज्ञानं लब्ध्वा चिरादेव ग्रिवसायुज्यमाप्नुयात् ।
तस्मान्मुक्तौ ग्रिवाज्ञप्त: कर्म्मयज्ञोऽपि देहिनाम् ॥
अकाम: कामसंयुक्तो वन्द्यायैव भविष्यति ।
तस्मात् पञ्चसु यज्ञेषु ध्यानज्ञानपरो भवेत् ॥
ध्यानं ज्ञानञ्च यस्यास्ति तीर्थसेवन भवार्णव: ।
हिंसादिदोषनिर्मुक्तो विशुद्धस्वित्तसाधन: ॥
ध्यानयज्ञ: परस्तस्मादपवर्गफलप्रद: ।
बहि: कर्म्मकरा यज्ञजातीयफलभागिन: ॥
दृष्ट्वा नरेन्द्रभवने तद्दत्तापि कर्म्मिण: ।
ध्यानिनां हि वपु: सूक्ष्मं भवेत् प्रत्यक्षमेश्वरम् ॥
तथैव कर्म्मिणां स्थूलं स्वकाष्ठाद्यै: प्रकल्पितम् ।
ध्यानयज्ञरतास्तस्माद्देवान् पाषाणमृण्मयान् ॥
नात्मत्वं प्रतिपद्यन्ते ग्रिवयाथात्म्यवेदनात् ।
आत्मत्वं य: ग्रिवज्ञत्वं बहिरभ्यर्च्चयेन्नर: ॥
हस्तस्थं फलमुत्सृज्य लिहेत् कूर्परमात्मन: ।
ज्ञानात् ध्यानं भवेत् ध्यानाज्ज्ञानं भूय: प्रवर्त्तते ॥
तदभ्यासं भवेन्मुक्तिस्तस्मात् ध्यानरतो भवेत् ।
द्वादग्रान्ते तथा मूर्द्ध्नि ललाटे भ्रूयुगान्तरे ॥

नासाग्रे वा तथास्ये वा कन्धरे हृदये तथा ।
नाभौ वा शाश्वतस्थाने अङ्गाविद्येन चेतसा ॥
बहिर्योगोपचारेण देवं देवीञ्च पूजयेत् ।
अथवा पूजयेन्नित्यं लिङ्गे वा कृतकेपि वा ॥
वह्नौ वा स्थण्डिले वाथ भक्त्या वित्तानुसारतः ॥
अथवान्तर्बहिश्चैव पूजयेत् परमेश्वरम् ।
अन्तर्योगरतः पूजां बहिः कुर्वीत वा न वा ॥")

अस्योत्पत्तिर्यथा,—

ऋषय ऊचुः ।

"कथं यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
चैतालमगमत् पुत्रा वराहस्य कथं क्षयः ।
तन्नोऽत्र श्रोष्यमाणानां कथयस्व महामते ! ॥

श्रीमार्कण्डेय उवाच ।

शृणुध्वं द्विजशार्दूला यत् पृष्टोऽहं महाद्भुतम् ।
यज्ञेषु देवास्तिष्ठन्ति यज्ञे सर्वं प्रतिष्ठितम् ॥
यज्ञेन ध्रियते पृथ्वी यज्ञस्तारयति प्रजाः ।
अन्नेन भूता जीवन्ति पर्जन्यादन्नसम्भवः ॥
पर्जन्यो जायते यज्ञात् सर्वं यज्ञमयं ततः ।
स यज्ञोऽभूद्वराहस्य कायात् प्रभ्रुविदारितात् ॥
यथाहं कथये तद्वः शृणुध्वमवहिता द्विजाः ।
विदारिते वराहस्य काये भर्गेण तत्क्षणात् ॥
ब्रह्मविष्णुग्निवा देवाः सर्वेश्च प्रमथैः सह ।
नित्युर्जलात् समुद्भूत्य तच्छरीरं नभः प्रति ॥
तद्विभेजुः शरीरन्ते विष्णोश्चक्रेण खण्डशः ।
तस्याङ्गसन्धयो यज्ञा जातास्ते वै पृथक् पृथक् ॥
यस्मादयजाच्च ये यज्ञास्तत् शृणुध्वं महर्षयः ।
भूनासासन्धिना जातो ज्योतिष्टोमो महाध्वरः ॥
हनुश्रवणसन्ध्योस्तु वह्निष्टोमो व्यजायत ।
चक्षुर्भुवोः सन्धिना तु व्राघ्नष्टोमो व्यजायत ॥
राज्ञः पौनर्भवष्टोमस्तस्य पोत्रोष्ठसन्धिना ।
वृहष्टोमवृहष्टोमौ जिह्माङ्गुलाद्व्यजायत ॥
अतिरात्रं सवैराजमधोजिह्मान्तरादभूत् ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥
स्नानं तर्पणपर्यन्तं नित्ययज्ञाश्च सर्वशः ।
कण्ठसन्धेः समुत्पन्ना जिह्वातो विधयस्तथा ॥
वाजिमेधो महामेधो नरमेधस्तथैव च ।
प्राजिहिंसाकरा येऽन्ये ते जाता पादसन्धितः ॥
राजसूयोऽथ कारीषो वाजपेयस्तथैव च ॥
पृष्ठसन्धौ समुत्पन्ना ग्रहयज्ञास्तथैव च ॥
प्रतिष्ठोत्सर्गयज्ञाश्च दानश्राद्धादयस्तथा ।
कृत्सन्धितः समुत्पन्नाः सावित्रीयज्ञ एव च ॥
सर्वेषां साधका यज्ञाः प्रायश्चित्तकराश्च ये ।
ते मेढ्रसन्धितो जाता यज्ञास्तस्य महात्मनः ॥
रक्तःसत्वं सर्पसत्वं सर्वस्वेवाभिचारिकम् ।
गोमेधो वृत्तजाश्च खुरेभ्यो ह्यभवन्निमे ॥
मायेष्टिः परमेष्टिश्च गौष्यतिर्भोगसम्भवः ।
लाङ्गूलसन्धौ संजाता अग्निष्टोमस्तथैव च ॥
नैमित्तिकाश्च ये यज्ञाः संक्रान्त्यादौ प्रकीर्तिताः ।
लाङ्गूलसन्धौ ते जातास्तथा द्वादशवार्षिकम् ॥
तीर्थप्रयोगसामौजयजुःसङ्घर्षजस्तथा ।

आकर्माथर्वणश्चैव नाभिसन्धेः समुद्गताः ॥
ऋग्वोत्कर्षः क्षेत्रयज्ञः पञ्चमार्गोऽतियोजनः ।
लिङ्गसंस्थानहैरण्ययज्ञा जातास्च जानुनि ॥
एवमष्टाधिकं जातं सहस्रं द्विजसत्तमाः ॥
यज्ञानां सततं लोका यैर्भाव्यन्तेऽधुनापि च ।
सुगस्य पोत्रात् संजाता नासिकायाः सुवोऽभवत् ॥
अन्ये सुकसुवभेदा ये ते जाताः पोत्रनासयोः ।
ग्रीवाभागेन तस्याभूत् प्राग्वंशो मुनिसत्तमाः ॥
इष्टापूर्त्तं यज्ञधर्म्मो जाताः श्रवणरन्ध्रतः ।
दंष्ट्राभ्यो ह्यभवन् यूपाः कृष्णा रोमाणि चाभवन् ॥
उद्गाता च तथाध्वर्युर्होता समिध एव च ।
अग्रदक्षिणवामाङ्गपक्षात्पादेषु सङ्गताः ॥
प्रोडाग्राः शरवो जाता मस्तिष्कसञ्चयात् ।
कर्णैर्नेत्रयुगाच्चाता यज्ञकेतुस्तथा खुरात् ॥
मध्यभागोऽभवद्वेदी मेढ्रात् कुण्डमजायत ।
रेतोधारास्तथैवाज्यं स्रुगाद्याः समुद्गताः ॥
यज्ञालयः पृष्ठभागात् हृत्पद्मात् यज्ञ एव च ।
तदात्मा यज्ञपुरुषो सुक्षाः कक्षात् समुद्गताः ॥
एवं यावन्ति यज्ञानां भाण्डानि च हवींषि च ।
तानि यज्ञवराहस्य शरीरादेव चाभवन् ॥
एवं यज्ञवराहस्य शरीरं यज्ञतामगात् ।
यज्ञरूपेण सकलमाप्यायितुमिदं जगत् ॥
एवं विधाय यज्ञन्तु ब्रह्मविष्णुमहेश्वराः ।
सुदृप्तं कनकं घोरमासेदुर्यज्ञतत्परा ॥
ततस्तेषां शरीराणि पिण्डीकृत्य पृथक् पृथक् ।
चिदेवाख्यिशरीराणि अधमम्मुखवायुभिः ॥
सृष्टस्य शरीरन्तु अधमम्मुखवायुना ।
स्वयमेव जगत्स्रष्टा दक्षिणाग्निस्ततोऽभवत् ॥
कनकस्य शरीरन्तु आपयामास केशवः ।
ततोऽभूद्गार्हपत्याग्निः प्रथवेतानभोजनः ॥
घोरस्य तु वपुः प्रभुर्भापयामास वै स्वयम् ।
तत आहवनीयोऽग्निस्तृतीयात् समजायत ॥
एतेस्त्रिभिर्जगत् व्याप्तं चिन्मयं सकलं जगत् ।
एतत् यत्र त्रयं नित्यं तिष्ठति द्विजसत्तमाः ।
समस्ता देवतास्तत्र वसन्तेऽनुचरैः सह ॥
एतद्ब्रह्मपदं नित्यमेतदेव त्रयात्मकम् ।
एतत् त्रयीविधिज्ञानमेतत् पुण्यकरं परम् ॥
यस्मिन् जनपदे चैते हूयन्ते अग्नयस्त्रयः ।
तस्मिन् जनपदे नित्यं चतुर्वर्गो विवर्द्धते ॥
एतद्वः कथितं सर्वं यत् पृष्टं द्विजसत्तमैः ।
यथा यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
तथा च तस्य पुत्राणां देहाश्चैतात्वमागमन् ॥"

इति कालिकापुराणे ३० अध्यायः ॥*॥

ब्रह्मण आदियज्ञा यथा,—

पुलस्त्य उवाच ।

"पूर्व्वमेव मया ख्यातं यदा स्वायम्भुवो मनुः ।
जातः परमधर्म्मात्मा व्रतरूपाप्रतिः स्वयम् ॥
स्रष्टा प्रजापतिः पूर्व्वं सृष्टिकर्म्मण्ययोजयत् ।
वत्स ! त्वमेव संकल्प्य स्वयं सृष्टिं कुरु ह्यथ ॥
स्वयं तु पुष्करं गत्वा हुत्वा यज्ञन्तु विस्तरम् ।

ब्रह्मोद्गाता होताध्वर्युश्चत्वारो यज्ञवाहकाः ।
एकैकस्य चयश्चाग्ने परिवाराः स्वयं हुताः ॥
एते वै षोड़श प्रोक्ता ऋत्विजो वेदचिन्तकाः ।
घृतानि चौणि षड्भिश्च यज्ञाः सृष्टाः स्वयम्भुवा ॥

भीष्म उवाच ।

यज्ञस्य ब्रह्मणो विप्र ! समाप्तिं वद साम्प्रतम् ॥

पुलस्त्य उवाच ।

मन्वन्तरे व्यतीते तु यज्ञस्यावभृथोऽभवत् ।
दक्षिणा ब्रह्मणा दत्ता प्राची होतुस्तु दक्षिणा ॥
अध्वर्य्यवे प्रतीची तु उद्गातुश्चोत्तरा तथा ।
त्रैलोक्यं सकलं ब्रह्मा ददौ तेषान्तु दक्षिणाम् ॥
धेनूनाञ्च शतं सार्द्धं दातव्यं यज्ञसिद्धये ।
अध्वर्यूणां सहस्राणि स्वेच्छया दानमिष्यते ॥"

इति मात्स्ये ९३ अध्यायः ॥*॥

ब्राह्मणादीनां स्वधर्म्मयज्ञा यथा,—

"आरम्भयज्ञाः क्षत्रास्तु स्वर्हविर्यज्ञा विशः स्मृताः ।
परिचारयज्ञाः शूद्रास्तु जपयज्ञास्तु ब्राह्मणाः ॥"

इति मात्स्ये ९१८ अध्यायः ॥*॥

हिंसायज्ञस्य अधर्म्मजनकत्वं यथा,—

"तथा विश्वसृगिन्द्रस्तु यज्ञं प्रावर्त्तयत् प्रभुः ।
देवतैः सह संकल्प्य सर्वसाधनसंभृतम् ॥
तस्यान्नमेधे वितते समाजग्मुर्महर्षयः ।
महर्षयश्च तान् दृष्ट्वा दीनान् पशुगणांस्तदा ॥
विश्वं सृजन्तं त्वरयन् क्रोधयं यज्ञविधिञ्च ।
अधर्म्मो बलवानेष हिंसाधर्म्मेण्यया तव ॥
न नः पशुवधस्त्विष्टस्तव यज्ञेश्वरोत्तम ! ।
अधर्म्मो धर्म्मघाताय प्रारब्धः पशुभिस्त्वया ॥
नायं धर्म्मो ह्यधर्म्मोऽयं न हिंसा धर्म्म उच्यते ।
आगमेन भवान् धर्म्मं प्रकरोतु यदीच्छति ॥
विधिदृष्टेन यज्ञेन धर्म्मोदयसेतुना ॥
एवं विश्वसृगिन्द्रस्तु ऋषिभिस्तत्त्वदर्शिभिः ।
उक्तो न प्रतिजग्राह मानमोहसमन्वितः ॥
तेषां विवादः सुमहान् जज्ञे इन्द्रमहर्षीणाम् ।
जङ्गमैः स्थावरैः केन यष्टव्यमिति चोच्यते ॥
ते तु खिन्ना विवादेन तथ्यमुक्ता महर्षयः ।
सन्धाय वाक्यमिन्द्रेण पप्रच्छुः खचरं वसुम् ॥

ऋषय ऊचुः ।

महाप्राज्ञ कथं दृष्टस्त्व यज्ञविधिर्नृप ! ।
उत्तानपादे ! ब्रूहि संशयं नो सुद प्रभो ! ॥

सूत उवाच ।

श्रुत्वा वाक्यं वसुस्तेषामविचार्य्य बलाबलम् ।
वेदशास्त्रमनुस्मृत्य यज्ञतत्त्वमुवाच ह ॥
यष्टव्यं पशुभिर्मेध्यैरथ मूलफलैरपि ।
हिंसा स्वभावो यज्ञस्य इति मे दर्शनागमः ॥
एवं क्रतोत्तरास्ते तु युक्तात्मानं ततो धिया ।
अवश्यं भाविनं दृष्ट्वा तमधो ह्यधःसंस्थदा ॥
इत्युक्तमात्रो नृपतिः प्रविवेश रसातलम् ।
धर्म्माणां संशयच्छेत्ता राजा वसुरधो गतः ॥

तस्मान्न वाच्यो स्त्रीकेन बहुज्ञेनापि संयत्नः ।
तस्मान्न हिंसा यज्ञस्य यदुक्तन्मन्त्रिभिः पुरा ॥"
इति मात्स्ये ११६ अध्यायः ॥

तदैदिकपर्य्यायः । वेगः २ अध्वरः ३ मेधः ४ विदथः ५ नार्यः ६ सवनम् ७ होत्रा ८ इष्टिः ९ देवताता १० मखः ११ विष्णुः १२ इन्दुः १३ प्रजापतिः १४ धर्म्मः १५ । इति यजदश यज्ञनामानि । इति वेदनिघण्टौ । ३ । १७ ।

(विष्णुः । यथा, महाभारते ।१३।१४६।११७।
"यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥")

यज्ञकृत्, त्रि, (यज्ञं करोतीति । कृ + क्विप् । यागकर्त्ता । (यथा, श्रीमद्भागवते ।४।४।७ ।

"तामागतां तत्र न कञ्चनाद्रियद्-
विमानितां यज्ञकृतो भयाज्जनः ।
ऋते स्वदृर्वै जननीञ्च सादरः
प्रेमाश्रुकण्ठः परिषस्वजे मुदा ॥"

पुं, विष्णुः । यथा, महाभारते । १३ । १४६ । ११८ ।
"यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग् यज्ञसाधनः ॥")

यज्ञपशुः, पुं, (यज्ञार्थः पशुः ।) घोटकः । इति शब्दमाला ॥ (यथा, श्रीमद्भागवते । ४ । १६ । ११ ।

"चरमेणाश्वमेधेन यजमाने यजुष्पतिम् ।
वैराजे यज्ञपशुं सर्व्वन्नपोवाह तिरोहितः ॥")

ह्रागच्च ॥

यज्ञपुरुषः, पुं, (यज्ञरूपी पुरुषः ।) विष्णुः । इति हेमचन्द्रः । २ । २३ ॥ (यथा, श्रीमद्भागवते । २ । ७ । ११ ।

"सर्व्वं समाप्य भगवान् हयशीर्षाथो
साक्षात् स यज्ञपुरुषस्त्रयीमयोऽसौ
छन्दोमयो मखमयोऽखिलदेवतात्मा
वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥")

यज्ञभाजनं, क्ली, (यज्ञस्य भाजनम् ।) यज्ञपात्रम् । इति जटाधरः ॥

यज्ञभूषणः, पुं, (यज्ञं भूषयतीति । भूष + णिच् + ल्युः ।) श्वेतदर्भः । इति राजनिर्घण्टः ॥ (क्षुद्रमात्रम् । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।

"कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः ।
तलोऽन्यो दीर्घपत्रः स्यात् शरपत्रसमेव च ॥")

यज्ञयोग्यः, पुं, (यज्ञे योग्यः उचितः ।) उदुम्बरवृक्षः । इति राजनिर्घण्टः ॥ यागार्हे, त्रि ॥

यज्ञवल्ली, स्त्री, (यज्ञस्य वल्ली ।) सोमवल्ली । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः सोमलताशब्दे ज्ञातव्याः ॥)

यज्ञवाटः, पुं, (यज्ञस्य वाटो यत्र ।) यज्ञस्थानम् । इति हेमचन्द्रः ॥ (यथा, श्रीमद्भागवते । १० । २३ । ३३ ।

"इत्युक्ता मुनिपत्न्यस्ता यज्ञवाटं पुनर्गताः ।
ते चानसूयवः स्वाभिः स्त्रीभिः सत्रमपारयन् ॥")

यज्ञवृक्षः, पुं, (यज्ञस्य वृक्षः ।) वटवृक्षः । इति राजनिर्घण्टः ॥ (विकङ्कतः । तत्पर्य्यायो यथा,

"विकङ्कतः सुवाटचो यज्ञिया स्वादुकण्टकः ।
स एव यज्ञवृक्षश्च कण्टकी वाप्रपादपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

यज्ञवेष्टा, स्त्री, (यज्ञे वेष्टा ।) सोमवल्ली । इति राजनिर्घण्टः ॥

यज्ञसाधनः, पुं, (यज्ञं साधयतीति । षिध + णिच् + ल्युः ।) विष्णुः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १४६ । ११८ ॥ (यज्ञसाधके, त्रि । यथा, ऋग्वेदे । १।१४५।३।

"पुरुप्रेषस्तुरिर्यज्ञसाधनः ॥"

"यज्ञसाधनः यज्ञसाधकः अन्याधीनत्वात् यज्ञस्य ।"
इति तद्भाष्ये सायणः ॥)

यज्ञसारः, पुं, (यज्ञे सारः उत्तरः ।) यज्ञोडुम्बरवृक्षः । इति राजनिर्घण्टः ॥

यज्ञसूत्रं, क्ली, (यज्ञे धृतं सूत्रम् ।) यज्ञोपवीतम् । यथा,—

"पवित्रं यज्ञसूत्रञ्च यज्ञोपवीतमित्यपि ।
यज्ञसूत्रं तदेवोपवीतं स्याद्दक्षिणे भुजे ।
उद्धृते वामबाहौ तु प्राचीनावीतमुच्यते ।
निवीतन्तु तदेव स्यादूर्द्धवक्षसि लम्बितम् ॥"
इति जटाधरः ॥

तस्य प्रमाणं यथा,—

"ऊर्द्धन्तु त्रिगुणं सूत्रं सघवानिर्म्मितं शुभैः ।
तन्तुत्रयमधोदृत्तं यज्ञसूत्रं विदुर्बुधाः ।
त्रिगुणं तद्गुणन्यियुक्तं वेदप्रवरसम्मितम् ।
शिरोधरान्नाभिमध्यात् एतार्द्धपरिमाणकम् ॥
यजुर्व्विदां नाभिमितं सामगानामयं विधिः ।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम् ॥"
इति वह्निपुराणे ४ अध्यायः ॥

अस्य धारणे मन्त्रो यथा,—

"यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामि ।"
इति संस्कारतत्त्वधृतभट्टभाष्यम् ॥

यजुर्वेदे तु,—

"यज्ञोपवीतं परमं पवित्रं
हृदयतेर्यत्तु सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं
यज्ञोपवीतं बलमस्तु तेजः ॥"
इति पशुपतिः ॥

युगभेदे तत्सूत्रनियमो यथा,—

"सत्ये सर्व्वमयं सूत्रं त्रेतायां राजतं तथा ।
द्वापरे ताम्रजं प्रोक्तं कलौ कार्पाससम्भवम् ॥"
इति हरिदासराजमार्गकः ॥

अन्यच्च ।

"यज्ञार्थे धार्य्यते सूत्रं यज्ञं ब्रह्मण्यमिष्यते ।
स्वर्णं रौप्यं ताम्रजञ्च पट्टं कार्पासवार्हिषम् ॥
व्याघ्राजिनं गुटं ग्रन्थौ यथालाभं निधाय च ।
यज्ञसूत्रं परिधरेद्ब्रह्मक्षत्रियवैश्यकम् ॥
न तत्र नियमो याम्यः सूत्रब्रह्मण्यसूत्रयोः ॥"
इति हरिदासिद्धसंहिता ॥

यज्ञस्थानं, क्ली, (यज्ञस्य स्थानम् ।) यज्ञवाटः । इति जटाधरः ॥

यज्ञाङ्गः, पुं, (यज्ञं अङ्गति प्राप्नोतीति । अङ्ग + अच् ।) उदुम्बरः । इत्यमरः । २ । ४ । २२ ॥ (अस्य पर्य्यायो यथा,—

"यज्ञाङ्गो ब्रह्मवृक्षश्च हेमदुग्धोऽप्युडुम्बरः ॥"
इति वैद्यकरत्नमालायाम् ॥

"उडुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

खदिरवृक्षः । इति राजनिर्घण्टः ॥ ब्राह्मयष्टिका । इति शब्दचन्द्रिका ॥ (यज्ञ एव अङ्गं यस्य । विष्णुः । यथा, महाभारते ।१३।१४६। ११७ ।

"भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥")

यज्ञाङ्गा, स्त्री, (यज्ञमङ्गति प्राप्नोति या । अङ्ग + अच् । टाप् ।) सोमवल्ली । इति राजनिर्घण्टः ॥ (विषयोऽस्याः सोमवल्लीशब्दे ज्ञातव्यः ॥)

यज्ञान्तः, पुं, (यज्ञस्य अन्तोऽवसानं यस्मिन् ।) अवभृथः । इति हेमचन्द्रः । ३ । ३६८ ॥ यागशेषश्च ॥ (यथा, महाभारते । १३ । १४६ । ११८ ।

"यज्ञान्तजस्तु यज्ञगुह्यमन्त्रमन्त्रार एव च ॥")

यज्ञारिः, पुं, (यज्ञस्य दक्षयज्ञस्य अरिर्नाशकः ।) शिवः । इति धनञ्जयः । राक्षसश्च ॥

यज्ञिकः, पुं, प्लक्षवृक्षः । इति जटाधरः ॥ (अष्टकम्पितो यज्ञदत्तः । "वह्वचो मनुष्यनाम्नश्छ वा ॥" ५ । ३ । ३८ । इति छच् । "ठाजादावूर्द्धं द्वितीयादचः ।" ५।३।८३। इति प्रकृतेर्द्वितीयादच ऊर्द्धस्य लोपः । यज्ञदत्तकः । इति काशिका ॥)

यज्ञियं, त्रि, (यज्ञमर्हतीति । यज्ञ + "यज्ञर्त्विग्भ्यां घखञौ ।" ५।१।७१। इति घः ।) यज्ञकर्म्मार्हम् । इत्यमरः । २।७।२७ ॥ (यथा, हरिवंशे । २६ । १६ ।

"ज्ञातो यज्ञविभागो हि यज्ञियैर्हि सुरैः पुरा ॥")

यज्ञाय हितम् । इति सुश्रुतोक्ताकारत्रम् ॥ (यथा, मनुः । २ । २३ ।

"ज्ञानसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः ॥")

यज्ञियः, पुं, (यज्ञाय हितः । यज्ञ + घः ।) द्वापरयुगम् । इति त्रिकाण्डशेषः ॥ (खदिरवृक्षः । तत्पर्य्यायो यथा,—

"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥

प्लक्षवृक्षः । तत्पर्य्यायो यथा,—

"प्लक्षः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षो वरिष्ठरः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

यज्ञियदेशः, पुं, (यज्ञियश्चासौ देशश्चेति।) यागकरणीयपुण्यदेशः। यथा, मनुः।२।२३।
"ब्रह्मावर्त्तस्तु परितो नद्यो यत्र स्वभावतः।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः॥"

यज्ञियप्राजा, स्त्री, (यज्ञिया प्राजा।) यागमण्डपम्। इति भटाधरः॥

यज्ञीयः, पुं, (यज्ञे भवः इति। यज्ञ+"गहादिभ्यश्च।" ४।२।१३८। इति छः।) उडुम्बरवृक्षः। इति राजनिर्घण्टः॥ यागसम्बन्धिनि, त्रि॥ (यथा, महाभारते। ३।१२४।६।
"प्रग्रस्तेऽहनि यज्ञीये सर्व्वकामसमृद्धिमत्।
कारयामास ग्रथितैर्यज्ञायतनसुत्तमम्॥")

यज्ञीयब्रह्मपादपः, पुं, (यज्ञीयश्चासौ ब्रह्मपादपश्चेति।) विकङ्कतवृक्षः। इति राजनिर्घण्टः॥

यज्ञेश्वरः, पुं, (यज्ञानामीश्वरः।) विष्णुः। यथा,
"यज्ञेश्वरो हयशिरस्कवपुर्भोक्ताययात्मा हरिरीश्वरोऽच।
तत्सन्निधानादपयान्तु सद्यो रक्षांस्यशेषाण्यसुराश्च सर्व्वे॥"
इति आह्निकतत्त्वम्॥

यज्ञेष्टं, क्ली, (यज्ञे इष्टम्।) दीर्घरोहिषकटफलम्। इति राजनिर्घण्टः॥

यज्ञोडुम्बरः, पुं, (यज्ञोचितः उडुम्बरः।) उडुम्बरवृक्षः। यज्ञडुम्बर इति भाषा॥ तत्पर्य्यायः। हेमदुग्धी २ यज्ञफलः ३ यज्ञाङ्गः ४ हैमदुग्धकः ५ उडुम्बरः ६ जन्तुफलः ७। इति शब्दरत्नावली॥ अस्य गुणाः यथा, भावप्रकाशे।
"उडुम्बरो हिमो रूक्षो गुरुः पित्तकफासृजुत्।
मधुरस्त्वुडुम्बरो वर्ण्यो व्रणशोधनरोपणः॥"

यज्ञोपवीतं, क्ली, (यज्ञार्हतं उपवीतम्।) यज्ञसूत्रम्। पैता इति भाषा। तत्पर्य्यायः। पवित्रम् २ ब्रह्मसूत्रम् ३ द्विजानयनी ४। इति त्रिकाण्डशेषः॥ तस्य निरूपणं यथा। उपवीतमाह गोभिलः। यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा अपि वा कुशरज्जुमेव। यज्ञोपवीतं विशिष्टविन्यासधारणकर्म्मतया कुरुते। किं तत् सूत्रम्। सूत्रं विशेषयति छन्दोगपरिशिष्टम्।
"ऊर्द्धन्तु चिह्नितं कार्य्यं तन्तुत्रयमधोद्धृतम्।
चिह्नितञ्चोपवीतं स्यात्सूत्रेको ग्रन्थिरिष्यते॥"
वामावर्त्तवलितं तन्तुत्रयं त्रिगुणं कृत्वा दक्षिणावर्त्तवलितं कार्य्यं एवं चिह्नितं त्रिसूत्रं उपवीतं स्यात्। एको ग्रन्थिरिति ज्ञानतन्त्रनिबन्धार्थम्। तथा बौधायनः।
"कौशं सौत्रं चिह्नितं यज्ञोपवीतमानामेः॥"
कौशं क्षौमिकोषोद्भवं षट्सूत्रादिमयमित्यर्थः। सौत्रं कार्पासोद्भवम्। तथा मनुः।
"कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥"
त्रिचिह्नितमित्युक्तत्वात् मनुवचनेऽपि त्रिवृत्त्वात्रिसूत्रेण विशेष्यम्। यत्तु पैठीनसिवचनम्। कार्पासमुपवीतं षट्तन्तु चिह्नितं ब्राह्मणस्य। क्षौमं राजन्यस्य। आविकं वैश्यस्य। तन्नवतन्तुसम्भवे षट्तन्तुविधायकम्। नवतन्तुकं यत्तमाह देवलः।
"यज्ञोपवीतं कुर्व्वीत सूत्राणि नव तन्तवः।
एकेन ग्रन्थिना तन्तुर्द्विगुणस्त्रिगुणोऽथवा॥"
एकेन ग्रन्थिना युक्त इति शेषः। द्विगुणस्त्रिगुणोऽथवेति। तन्तुबलेन द्विसप्तत्रिसप्तो वा कर्त्तव्यः। द्विसप्तं त्रिसप्तसम्भवे। गोभिले वाशब्दो विकल्पार्थः। अपिशब्दो यज्ञकुशरज्ज्वोः सूत्रानुकल्पत्वप्रदर्शनार्थः। एवकारस्त्रिसप्तव्यवच्छेदार्थः। द्वितीयो वाशब्दः अनुक्तमौञ्जबालादिसमुच्चयार्थः। तथा निगमपरिशिष्टम्। वाससा यज्ञोपवीतानि कुरुते तदभावे त्रिवृता सूत्रेण। कुशसुञ्जबालप्रतिसररज्जुभिर्वा। बालोऽत्र गोबालः। यथा देवलः।
"कार्पासमौत्तमगोबालशरज्जुलक्षोद्भवम्।
सदा सम्भवतो धार्य्यमुपवीतं द्विजातिभिः॥"
तदभाव इति करणादभावे कुशरज्जुभिरिति शेषः। इति आह्निकतत्त्वम्॥ * ॥ अथोपनयनदिनम्। तत्र गर्भाष्टमेब्दे ब्राह्मणस्योपनयनं प्रशस्तम्। क्षत्रियस्य गर्भैकादशे। गर्भाद्दशे वैश्यस्य प्रशस्तम्। अत्रासामर्थ्ये ब्राह्मणस्य षोडशवर्षपर्य्यन्तमेव। क्षत्रियस्य द्वाविंशतिवर्षपर्य्यन्तम्। वैश्यस्य चतुर्विंशतिवर्षपर्य्यन्तं तदनुष्ठानकालः। तत्र मासाः माघफाल्गुनचैत्रवैशाखज्येष्ठाषाढ़ा विहिताः। तत्र तिथयः द्वितीयैकादशीद्वादशीपञ्चमीदशमीतृतीया विहिताः। तत्र वाराः दृङ्मतिशुक्रवाक्पतीनां प्रशस्ताः। सामगानां मङ्गलवारोऽपि। तत्र नक्षत्राणि। स्वाती ज्येष्ठा धनिष्ठा अश्विनी अनुराधा हस्ता रेवती पुष्या चित्रा श्रवणा मृगशिरः मृगशिरसि पूर्व्वफल्गुनी उत्तरफल्गुनी पूर्व्वभाद्रपदा उत्तरभाद्रपदा रोहिणी पूर्व्वाषाढ़ा। तत्र लग्नानि वृषसिंहतुलाधनुर्मीनसंज्ञकानि। तत्र पक्षः शुक्लः। तत्रत्रादिशुभेऽनध्यायादीन् परित्यज्य कर्त्तव्यम्। इति ज्योतिषतत्त्वमतम्॥ * ॥ अथोपनयनम्। तत्र गोभिलः। गर्भाष्टमेब्दे ब्राह्मणमुपनयेत् गर्भैकादशेब्दे क्षत्रियं गर्भाद्दशेब्दे वैश्यम्। आषोडशात् ब्राह्मणस्यानतीतः कालो भवति आद्दाविंशात् क्षत्रियस्य आचतुर्व्विंशात् वैश्यस्य। अत ऊर्द्धं पतितसावित्रीका भवन्ति। नैतानुपनयेयुर्याधापयेयुर्न एभिर्व्विवाहयेयुः॥ आषोडशादित्यभिविधावाङ्। तथा च विष्णुधर्म्मोत्तरम्।
"षोडशाब्दो हि विप्रस्य राजन्यस्य द्विविंशतिः।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता॥
सावित्री नातिवर्त्तेत अत ऊर्द्धं निवर्त्तते॥"
अत्र षोडशवर्षादासुपनयनाङ्गता प्रतीयते।
"पतिता यस्य सावित्री दश वर्षाणि पञ्च च।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः॥
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः॥"
इति यमवचनेन तदङ्गत्वा प्रतीयते अनयोर्गर्भजन्मगणनाभ्यामविरुद्धता। तथा च माधवः।
"व्रतबन्धविवाहे च वत्सरपरिगणनाङ्कुराचार्य्याः।
आधानपूर्व्वकमेके प्रशस्तिपूर्व्वं सदान्ये तु॥"
यत्तु द्विजानामित्युपक्रम्य पैठीनसिवचनम्। द्वादशषोड़शविंशतिवेदतीता अवरुद्धकाला भवन्ति। तद्द्वादशवर्षादुपरि ब्राह्मणादीनां महाव्याहृतिहोमप्रायश्चित्तार्थं षोड़शवर्षोपरि गुरुप्रायश्चित्तमिति। तथा च शङ्खलिखितौ। ब्राह्मणोऽब्दायणं चरेत् गोप्रदानञ्च कुर्य्यात्। चान्द्रायणाशक्तौ धेन्वष्टकं तन्मूल्यं वा सार्द्धद्वाविंशतिकार्षापणाः गोमूल्यं कार्षापण एकः मिलित्वा सार्द्धत्रयोविंशतिकार्षापणाः देयाः। पितृमातृरहितस्य निःस्वस्य देशोपद्रवादिना पतितसावित्रीकस्य वा विषये तु मनुर्विष्णुः।
"येषां द्विजानां सावित्री नानुयाति यथाविधि।
तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेत्॥"
कृच्छ्रं प्राजापत्यम्। तदशक्तौ धेनुत्रयं तन्मूल्यं वा तत्र कार्षापणाः। अकृतप्रायश्चित्तं प्रत्याह नैतानित्यादि। तत्र बहुवचनं तत्कर्त्तृसंसर्गिणां प्रायश्चित्तप्रदर्शनार्थम्। तथा च स्मृत्यन्तरम्।
"ब्राह्मणाचार्य्यस्य सुश्रूषां कृच्छ्रपादेन मुच्यति।
यज्ञोपनयते ब्राह्मान् त्रिभिः कृच्छ्रैः स मुच्यति॥"
शुक्लबलभौमलग्नचिन्तामण्योः।
"स्वातीमृगब्रध्नाश्विमित्रकरभे पौष्णेन्द्वचित्रा-
हरि-
विन्दौ तोयपतौ भगेऽदितिसुते भाद्रद्वये सागरे।
केन्द्रस्थे भृगुजेऽङ्गिरःसुतयुते चन्द्रे च तारे शुभे
कर्त्तव्यं व्रतकर्म्म मङ्गलतिथौ वाराः सितार्केन्द्व-
न्यकाः॥"
अदितिसुत उत्तरफल्गुनी। सागरः पूर्व्वाषाढ़ा। दीपिकायाम्।
"जीवार्केन्दूदृशुद्धौ हरिगयनवहिर्भास्करे
चोत्तरस्थे
स्वाधाये वेदवर्षाधिप इह शुभदे चौरिमे
नादितौ च।
शुक्रार्केन्द्यर्चलग्ने रविमदनतिथिं प्रोज्झ्य
षष्ठाष्टमेन्दुं
गो जीवास्तातिचारेऽर्कसितगुरुदिने काल-
शुद्धौ व्रतं स्यात्॥"
रविमदनतिथिं सप्तमीं त्रयोदशीम्। षष्ठाष्टमेन्दुं लग्नापेक्षया। लग्नचिन्तामण्यौ।
"माघे द्रविणगोजाढ्यः फाल्गुने च दृढव्रतः।
चैत्रे भवति मेधावी वैशाखे कोविदो भवेत्॥
ज्येष्ठे गृहगनीतिज्ञ आषाढ़े कृतभाजनः।
श्रेष्ठेष्वन्येषु राजिः स्यान्निषिद्धं निशि च व्रतम्॥"
राजमार्त्तण्डः।
"पुनर्व्रतौ कृतो विप्रः पुनःसंस्कारमर्हति॥"
आश्वलायनः। उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चूड़ोपनयनगोदानविवाहाः। विवाहः सार्व्वकालिक इत्येके। आपूर्य्यमाणे पक्षे शुक्ले पक्षे। वृद्धगर्गः।

"स्मृतिषूक्तानध्यायान् सप्तमीञ्च त्रयोदशीम् ।
पञ्चदशीमाश्वमासस्य द्वितीयां परिवर्ज्जयेत् ॥"
श्रीपतिपद्धतिः ।
"कार्त्तिकस्याश्विनस्यापि फाल्गुनाषाढ़योरपि ।
कृष्णपक्षे द्वितीयायामनध्यायं विदुर्बुधाः ॥"
भुजबलः ।
"चैत्रकृष्णद्वितीयायां तिस्रश्चैवाष्टकासु च ।
मार्गे च फाल्गुने चैव आषाढ़े कार्त्तिके तथा ॥
पञ्चदशीमाश्वमासस्य द्वितीयां परिवर्ज्जयेत् ।
नाकालवृष्टौ कुर्व्वीत व्रतबन्धमृभक्रियाम् ॥"
उपनयने उत्तरायणशुक्लपक्षयोर्विधानात् कार्त्तिकादौ कृष्णपक्षे च द्वितीयानिषेधः पुनःसंस्कारमर्हति इत्युक्तप्रायश्चित्तरूपोपनयनपरः। वैश्योपनयनपरश्च । तथा च गर्गः ।
"विप्रस्य चत्रियस्यापि मौञ्जी स्यादुत्तरायणे ।
दक्षिणे च विशां कार्य्यं नानध्याये न संक्रमे ।
अनध्यायेऽपि कुर्व्वीत यस्य नैमित्तिकं भवेत् ॥"
अग्निना दक्षिणायनकृष्णपक्षयोः समुच्चयः । नैमित्तिकं प्रायश्चित्तरूपम् । चैत्रशुक्लतृतीया आषाढ़शुक्लदशमी मन्वन्तरादित्वेन निषिद्धा । वैशाखशुक्लतृतीया युगादित्वेन निषिद्धा । षष्ठ्यामशुचिरुद्भार्य्यो रिक्तासु बहुदोषभाक् । सामगानां कुजवारेऽप्युपनयनम् । ग्राखाधिपत्वात् । यथा च ।
"ग्राखाधिपे बलिनि केन्द्रगतेऽथवास्मिन्
वारेऽस्य चोपनयनं कथितं द्विजानाम् ।
नीचस्थितेऽरिगृहगेऽथ पराजिते वा
जीवे भृगावुपनयः स्मृतिकर्म्महीनः ॥"
अस्य ग्राखाधिपस्य । कृत्यचिन्तामणौ ।
"जन्मोदये जन्मसु तारकासु
मासेऽथवा जन्मनि जन्मभे वा ।
व्रतेन विप्रो न बहुश्रुतोऽपि
विद्याविशेषैः प्रथितः पृथिव्याम् ॥
अस्तं गते दैत्यगुरौ गुरौ वा
ऋक्षेऽपि वा पापयुतेऽप्यनुक्ते ।
व्रतोपनीतो दिवसैः प्रणाशं
प्रयाति दैवैरपि रक्षितो यः ॥"
उदये लग्ने । व्रतेन उपनयनेन । इति संस्कारतत्त्वम् ॥

यज्युः, त्रि, (यजतीति । यज्+"यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणा० ३ । २० । इति युच् ।) यजुर्व्वेदवेत्ता ब्राह्मणः । इत्युणादिकोषः ॥ यजमानः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, ऋग्वेदे । १ । ३१ । १३ ।
"त्वमग्ने यज्यवे पायुरन्तरोऽनिषङ्गाय ।"
"हे अग्ने त्वं यज्यवे यज्योर्यजमानस्य पायुः पालकः ।" इति तद्भाष्ये सायणः ॥)

यज्वा, [न्] पुं, (यज्+"सुयजोर्ङ्वनिप् ।" ३ । २ । १०३ । इति ङ्वनिप् ।) विधिना इष्टवान् । वेदविधानेन कृतयागः । इत्यमरः । २ । ७ । ८ ॥ (यथा, नैषधचरिते । ३ । २४ ।
"राजा स यज्वा विबुधव्रजज्वा
क्रतोश्वराज्योपमयेव राज्यम् ।
भुङ्क्ते श्रितश्रोत्रियसात्क्रतत्रीः
पूर्व्वं वहो ग्रैष्ममग्रैष्ममन्त्यम् ॥")

यज्ञपतिः, पुं, चन्द्रः । इति त्रिकाण्डशेषः ॥

यत्, ई ङ यत्ने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । अनिट् निष्ठः ।) ईं, यतः । ङ, यतते पठितुं शिष्यः । इति दुर्गादासः ॥

यत्, क खेदोपस्करयोः । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) खेद इह ताड़नम् । क, यातयति पुत्रं पिता ताड़यति इत्यर्थः । यातयति गृहं गृहिणी उपस्करोति इत्यर्थः । निरः प्रत्यपूर्व्वे । प्रत्यपूर्व्वं परीवर्त्तः । निर्यातयति धान्येन माषान् लोकः धान्यं दत्त्वा माषान् गृह्णाति इत्यर्थः । इति दुर्गादासः ॥

यत्, य, हेतुः । यस्मात् । इत्यमरः । ३ । ४ । ३ ॥ (यथा, उत्तररामचरिते ।
"अत्र स्थिता लग्नमदात् बहुभ्यो यदेभ्यः
सीता ततो हरिणकेन विसृष्यते सा ॥")

यत्, [द्] त्रि, (यजन्ति सर्व्वैः पदार्थैः सह सङ्गतो भवतीति । यज्+"त्यजितनियजिभ्यो डित् ।" उणा० १ । १३१ । इति अदिः डित् ।) बुद्धिस्थोपलक्षितधर्म्मावच्छिन्नम् । इति न्यायमतसिद्धान्तकौमुद्युणादिवृत्तिश्च ॥ ये इति भाषा ॥ (एकविंशतिविभक्तिषु पुंलिङ्गे तस्य रूपाणि यथा, यः १ यौ २ ये ३ । प्रथमा । यम् ४ यौ ५ यान् ६ । द्वितीया । येन ७ याभ्याम् ८ यैः ९ । तृतीया । यस्मै १० याभ्याम् ११ येभ्यः १२ । चतुर्थी । यस्मात् १३ याभ्याम् १४ येभ्यः १५ । पञ्चमी । यस्य १६ ययोः १७ येषाम् १८ । षष्ठी । यस्मिन् १९ ययोः २० येषु २१ । सप्तमी । * । स्त्रीलिङ्गे तस्य रूपाणि यथा, या १ ये २ याः ३ । प्रथमा । याम् ४ ये ५ याः ६ । द्वितीया । यया ७ याभ्याम् ८ याभिः ९ । तृतीया । यस्यै १० याभ्याम् ११ याभ्यः १२ । चतुर्थी । यस्याः १३ याभ्याम् १४ याभ्यः १५ । पञ्चमी । यस्याः १६ ययोः १७ यासाम् १८ । षष्ठी । यस्याम् १९ ययोः २० यासु २१ । सप्तमी । * । क्लीवलिङ्गे तस्य रूपाणि । यत् १ ये २ यानि ३ । प्रथमा । यत् ४ ये ५ यानि ६ । द्वितीया । शेषः पुंवत् ॥)

यतः, अ, (यद्+"पञ्चम्यास्तसिल् ।"५ । ३ । ७ । इति तसिल् । "तद्धितश्चासर्व्वविभक्तिः ।" १ । १ । ३८ । इति तसिलप्रत्ययान्तस्यायव्ययत्वम् ।) हेतुः । यस्मात् । इत्यमरः । ३ । ४ । ३ ॥ (यथा, मनुः । २ । ११७ ।
"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च ।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत् ॥"
यद्+"इतराभ्योऽपि दृश्यन्ते ।"५ । ३ । १४ । इति तसिलप्रत्ययेन । येन । यथा, भागवते । २ । ५ । २ ।
"यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ! ॥"
येभ्यः । यथा, भागवते । १ । १५ । २१ ।
"तद्वै धनुस्त्वयः सरथो हयास्ते
सोऽहं रथी नृपतयो यत आनमन्ति ॥"
यत्र । यथा, अभिज्ञानशाकुन्तले ।
"यतो यतः षट्चरणोऽभिवर्त्तते
ततस्ततः प्रेरितवामलोचना ॥")

यतमः, त्रि, (यत्+"बा बहूनां जातिपरिग्रहे डतमच् ।" ५ । ३ । ९३ । इति डतमच् ।) बहूनां मध्ये निर्द्धारित एकः । एषां मध्ये यः । यच्छब्दात् डतमप्रत्ययेन निष्पन्नः । इति सुग्धबोधव्याकरणम् । ("यतमो भवतां कठः ।" इति काशिका ॥)

यतरः, त्रि, (यत्+"किं यत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् ।" ५ । ३ । ९२ । इति डतरच् ।) द्वयोर्मध्ये निर्द्धारित एकः । अनयोर्मध्ये यः । यच्छब्दात् डतरप्रत्ययेन निष्पन्नः । इति सुग्धबोधव्याकरणम् । (यथा, ऋग्वेदे । ७ । १०४ । १२ ।
"तयोर्यत् सत्यं यतरदृजीयस्तदित्सोमोवति
हन्त्यासत् ॥")

यति, त्रि, बहुवचनान्तयावच्छब्दार्थकः । यतगुलि इति भाषा । यच्छब्दात् निपातनात् डतिप्रत्ययेन निष्पन्नम् । इति सुग्धबोधव्याकरणम् ॥ (यथा, ऋग्वेदे । १० । १५ । १३ ।
"त्वं वेत्थ यति ते जातवेदः ।"
"यति ते यावन्तस्ते भवन्ति ।" इति तद्भाष्ये सायणः ॥)

यतिः, पुं, (यतते चेष्टते मोक्षार्थमिति । यत्+"सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) निर्व्जितेन्द्रियग्रामः । तत्पर्य्यायः । यती २ । इत्यमरः । २ । ७ । ४४ ॥ भिक्षुः ३ संन्यासिकः ४ कर्म्मन्दी ५ रक्तवसनः ६ परिव्राजकः ७ तापसः ८ पराशरी ९ परिकाङ्क्षी १० मस्करी ११ पारिव्रजकः १२ । इति हेमचन्द्रः ॥ निकारः । विरतिः । इति तत्रैव नानार्थे ॥* ॥ तस्य वारागस्यां वासो यथा,—
"अष्टौ मासान् विहारस्य यतीनां संयतात्मनाम् ।
एकत्र चतुरो मासानब्दं वा निवसेत् पुनः ॥
अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते ।
यतिभिर्मोक्षकामैश्च अविमुक्तं निषेव्यते ॥"
इति मात्स्ये अविमुक्तमाहात्म्ये १५९ अध्यायः ॥
यतिधर्म्मो यथा,—
"अलाबुं दारुपात्रञ्च मृण्मयं वैदलं तथा ।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥
एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे ।
भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
विधूमे सन्नमुसले अङ्गारे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥
अलाभे न विषादी स्यात्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः ।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥

अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ।
ह्रियमाणानि विषयेरिन्द्रियाणि निवर्त्तयेत् ॥
इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च ।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥
अवेक्षेत गतीर्नृणां कर्म्मदोषसमुद्भवाः ।
निरये चैव पतनं यातनाश्च यमक्षये ॥
विप्रयोगं प्रियैश्चैव संयोगञ्च तथाप्रियैः ।
जरया चाभिभवनं व्याधिभिश्चोपपीडनम् ॥
देहादुत्क्रमणञ्चास्मात् पुनर्गर्भे च सम्भवम् ।
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ॥
अधर्म्मप्रभवञ्चैव दुःखयोगं शरीरिणाम् ।
धर्म्मार्थप्रभवञ्चैव सुखसंयोगमक्षयम् ॥
सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः ।
देहेषु च समुत्पत्तिमुत्तमेष्वधमेषु च ॥
दूषितोऽपि चरेद्धर्म्मं यत्र तत्राश्रमे रतः ।
समः सर्व्वेषु भूतेषु न लिङ्गं धर्म्मकारणम् ॥
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् ।
न नामग्रहणादेव तस्य वारि प्रसीदति ॥
संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा ।
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥
अङ्गा रात्र्या च यान् जन्तून् हिनस्त्यज्ञानतो यतिः ।
तेषां ज्ञात्वा विशुद्ध्यर्थं प्राणायामान् समाचरेत् ॥
प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत् कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥
दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ।
उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ।
ध्यानयोगेन सम्पश्येत् गतिमस्यान्तरात्मनः ॥
सम्यग्दर्शनसम्पन्नः कर्म्मभिर्न निबध्यते ।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥
अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्म्मभिः ।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत् पदम् ॥
अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्म्मावनद्धं दुर्गन्धिपूर्णं मूत्रपुरीषयोः ॥
जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥
नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ।
तथा त्वजन्निमं देहं कृच्छ्राद्व्याहाद्विमुच्यते ॥
प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ।
विसृज्य ध्यानयोगेन ब्रह्माभ्येति सनातनम् ॥
यदा भावेन भवति सर्व्वभावेषु निस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥
अनेन विधिना सर्व्वान्त्यक्त्वा सङ्गान् शनैः शनैः ।
सर्व्वद्वन्द्वविनिर्म्मुक्तो ब्रह्मण्येवावतिष्ठते ॥
ध्यानिकं सर्व्वमेवैतत् यदेतदभिशब्दितम् ।
न ह्यनध्यात्मवित् कश्चित् क्रियाफलमुपाश्नुते ॥
अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ।
आध्यात्मिकञ्च सततं वेदान्ताभिहितञ्च यत् ॥
इदं शरणमज्ञानामिदमेव विजानताम् ।
इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छताम् ॥
अनेन क्रमयोगेन परिव्रजति यो द्विजः ।
स विधूयेहपापमानं परं ब्रह्माधिगच्छति ॥"

इति मानवे ६ अध्यायः ॥

(ब्रह्मणः पुत्रविशेषः । यथा, श्रीमद्भागवते ।४।८।१ ।

"सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः ।
नैते गृहान् ब्रह्मसुता ह्यावसन्नूर्द्धरेतसः ॥"

नहुषपुत्रः । यथा, महाभारते ।१।७५।३०।

"यतिं ययातिं संयातिमायातिमयतिं ध्रुवम् ।
नहुषो जनयामास षट्सुतान् प्रियवाससि ॥"

विश्वामित्रपुत्रः । यथा, महाभारते ।१३।४।५७।

"आरण्यनाचिकश्चैव वाभ्रव्योऽथयतौ तथा ।
नवतन्तुर्वकनखः सयनो यतिरेव च ॥"

चि । कर्म्मसुपरतोऽयङ् । यथा, ऋग्वेदे ।८।३।६।

"येनायतिभ्यो भृगवे धने हिते
येन प्रस्कण्वमाविथ ॥"

"येन सुवीर्य्येण यतिभ्यः कर्म्मसुपरतेभ्योऽयङ्भ्यो जनेभ्यः सकाशात् धनमाहृत्य भृगवे महर्षये प्रयच्छसि ।" इति तद्भाष्ये सायणः ॥)

यतिः, स्त्री, (यम्यते रसनाचेति । यम् + "स्त्रियां क्तिन् ।" ३ । ३ । ९४ । इति क्तिन् । "अनुदात्तोपदेशवनतितनोत्यादीनामिति ।" ६ । ४ । ३७ । इति मकारलोपः ।) पाठविच्छेदः । इति मेदिनी । ते, ४६ ॥ जिह्वेष्टविश्रामस्थानम् । यथा,—

"यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैर्व्वाच्या निजेच्छया ॥
क्वचिच्छन्दस्यसौ यतिरभिहिता पूर्व्वकृतिभिः
पदान्ते सा श्रोभां व्रजति पदमध्ये त्यजति च ।
पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां
यथा कृष्णः पुण्यात्वतुलमहिमा मां करुणया ॥
श्वेताश्वाश्वसुरस्यासु नेच्छन्ति सुनयो यतिम् ।
इत्याह भट्टः स्वयम्भे गुरुर्मे पुरुषोत्तमः ॥"

इति छन्दोमञ्जरी । १ । १६—१८ ॥

(नियम्यते इति । यम् + क्तिन् । यतते चेष्टते व्रतादिरर्थे इति वा । यत + "सर्व्वधातुभ्य इन् ।" उणा० ४।११७। इति इन् ।) विधवा । रागः । सन्धिः । इति शब्दरत्नावली ॥ वाद्याङ्गप्रबन्धविशेषः । यथा,—

"यतिरोढ्याप्यवच्छेदो गजरो रूपकं ध्रुवम् ।
गणपः सारिगोणी च नादश्च कथितं तथा ।
प्रहरणं छन्दनञ्च प्रबन्धा द्वादश स्मृताः ॥"

यथा दं यातः । इत्येकतालो यतिः । इति सङ्गीतदामोदरः ॥ (सा त्रिविधा । यथा, मार्कण्डेयपुराणे । २३ । ५३ ।

"चतुर्विधं पदं तालं त्रिःप्रकारं लयत्रयम् ।
यतित्रयं तथा तोद्यं मया दत्तं चतुर्विधम् ॥")

यतिचान्द्रायणं, क्ली (यतिभिरनुष्ठेयं चान्द्रायणम् ।) व्रतविशेषः । यथा,—

"अष्टावष्टौ समश्नीयात् पिण्डान् मध्यंदिने स्थिते ।
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥"

इति मानवे ११ अध्यायः ॥

यतिचान्द्रायणे प्रादोनधेनुचतुष्टयं तदशक्तौ सपादैकादशकार्षापणाः । इति प्रायश्चित्तविवेकः ॥

यतिनी, स्त्री, (यतं संयमोऽस्या अस्तीति । यत + इनिः । स्त्रियां ङीप् ।) विधवा । यथा,—

"विधवा जानिका रक्षा विश्वस्ता यतिनी यतिः ॥"

इति शब्दरत्नावली ॥

यतिमैथुनं, क्ली, (यतीनां दुष्टयतीनामिव गोपनीयं मैथुनम् ।) यतिगोप्यरतिः । तत्पर्य्यायः । खञ्जनरतम् २ । इति चिकाण्डशेषः ॥

यती, स्त्री, (यतिः । कृदिकारादिति स्त्रियां ङीष् ।) विधवा । इति शब्दरत्नावली ॥

यती, [न्] पुं, (यतं संयमोऽस्यास्तीति । यत + इनिः ।) यतिः । जितेन्द्रियः । इत्यमरः । २ । ७ । ४४ ॥ (यथा, सुग्धबोधे कारकप्रकरणे ।

"दृष्ट्वा दधि शारुकमेतदर्च्चकाः
शुन्नीतवन्तं यतिभिः सुदर्शनम् ॥")

यतुका, } स्त्री, (यत् + बाहुलकात् उकन् पचे
यतूका, } ऊक । स्त्रियां टाप् ।) दृष्टविशेषः । यथा,—

"रजनी स्यात्तु यतुका यतूका जननीति च ॥"

इति शब्दरत्नावली ॥

यत्नः, पुं, (यत + "यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३ । ३ । ९० । इति नङ् ।) रूपादिचतुर्व्विंशतिगुणान्तर्गतगुणविशेषः । स च त्रिविधः । प्रवृत्तिः १ निवृत्तिः २ जीवनयोनिः ३ । यथा,—

"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनयोनयः ।
एवं प्रयत्नश्चेविधं तान्त्रिकैः परिकीर्त्तितम् ॥"

तेषां कारणं यथा,—

"चिकीर्षा कृतिसाध्येऽसाधनत्वमतिस्तथा ।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥
निवृत्तिस्तु भवेद्द्वेषाद्दृष्टसाधनताधियः ।
यत्नो जीवनयोनिस्तु सर्व्वदातीन्द्रियो भवेत् ।
शरीरे प्राणसञ्चारे कारणं तत् प्रकीर्त्तितम् ॥"

इति भाषापरिच्छेदः ॥

उद्योगः । यथा,—

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥"

इति हितोपदेशः ॥

यत्नवान्, [त्] त्रि, यत्नविशिष्टः । यत्नशब्दात् वतुप्प्रत्ययेन निष्पन्नः ॥ (यथा, हरिवंशे ।८९।८।

"कंसेनापि समाज्ञप्तश्चानूरः पूर्व्वमेव तु ।
योद्धव्यं सह कृष्णेन त्वया यत्नवतेति वै ॥")

यत्र, इ क संकोचने । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) दन्त्यवर्गाद्योपधः । इ क, यन्त्रयति मन्त्रेण सर्पं जाङ्गलिकः । यत्र

इत्यनेनैवेरसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थः। इति दुर्गादासः॥

यत्र, व, यस्मिन्। येखाने इति भाषा। यच्छब्दात् सप्तम्याख्यलप्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुदी॥ (यथा, श्रीमद्भगवद्गीतायाम्।

"यत्र यत्र मनो देही धारयेत् सकलं थिया। स्नेहाद्वा यदि वा लोभाद् याति तत्तत् सरूपताम्॥")

यथा, व, सादृश्यम्। साम्यम्। तत्पर्य्यायः। वतु २ वा ३ तथा ४ एव ५ एवम् ६। इत्यमरः। १। ४। ६॥ (यथा, उत्तररामचरिते। २। ४।

"वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जड़े न च खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति च। भवति च तयोर्भूयान् भेदः फलं प्रति तद्यथा प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः॥")

यथाकामी, [न्] त्रि. (यथा कामयते इति। कामि+णिनिः। यद्वा, काममनतिक्रम्य प्रवृत्तिरस्यास्तीति। यथाकाम+अत इनिठनाविति इनिः।) स्वेच्छाचारी॥ तत्पर्य्यायः। स्वरुचिः २ स्वच्छन्दः ३ स्वैरी ४ अपाकृतः ५ स्वतन्त्रः ६ निरवग्रहः ७। इति हेमचन्द्रः। ३। १६॥ निर्यन्त्रणः ८। इति जटाधरः॥ (यथा, याज्ञवल्क्यसंहितायाम्। १। ८१।

"यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्। सदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः॥")

यथाक्रमं, व, क्ली, क्रमानुरूपम्। क्रममनतिक्रम्येति व्याकरणम्॥ (यथा, रघुवंशे। ३। १०।

"यथाक्रमं पुंसवनादिकाः क्रियाः
धृतेश्च धीरः सदृशीर्यधत्त सः॥")

अपि च।

"यथाक्रमेण पुत्रेण कार्य्या प्रेतक्रिया सदा। पतितापतिता वापि एकोद्दिष्टविधानतः॥"

इति श्राद्धतत्त्वम्॥

यथाजातः, त्रि, (यथा न जातः इति यथाजातः। जातोऽपि पुत्रादिरजात इव प्रतीयते विद्यया शौर्य्येण वा न कैरपि विदितत्वात्।) मूर्खः। इत्यमरः। १। १। ४८॥ नीचः। इति जटाधरः॥

यथातथं, व, क्ली, (यथा वर्त्तते तथानतिक्रम्य इति अनतिवृत्तौ अव्ययीभावः। अव्ययीभावश्च। २। ४। १८। इति नपुंसकत्वम्। "द्रुस्रो नपुंसके प्रातिपदिकस्य।" १। २। ४७। इति ह्रस्वः। "नाव्ययीभावादतोऽमृत्वपञ्चम्याः।" २। ४। ८२। इति प्रथमाविभक्तेरमादेशः।) यथार्थम्। इति शब्दरत्नावली॥ (यथा, श्रीमद्भागवते। ६। १। ४१।

"येन स्वधाम्नेमौ भावा रजःसत्त्वतमोमयाः। गुणनामक्रियारूपैर्विभाव्यन्ते यथातथम्॥")

यथापूर्व्वं, व, क्ली, (पूर्व्वमनतिक्रम्य इत्यव्ययीभावः।) पूर्व्वदिग्देशकालानुरूपम्। यथा,—

"अक्षतायां प्रतिष्ठायां प्राणानां प्रतिमासु च।

यथापूर्व्वं यथा भावः स्वर्गादीनां न विप्लुता।" इति तिथ्यादितत्त्वधृतकालिकापुराणवचनम्॥

यथासुखीनः, त्रि, (यथासुख+"यथासुखसंमुखस्य दृग्नेः खः।" ५। २। ६। इति खः।) सुखप्रतिबिम्बाश्रयः। सुखस्य सदृशं यथासुखं प्रतिबिम्बं निपातनात् सादृश्येऽव्ययीभावः। यथासुखं दृग्नेः यथासुखीनः। इति सिद्धान्तकौमुदी॥ अपि च।

"ततश्चौघमाणोऽसौ हेमरत्नमयो मृगः। यथासुखीनः सीतायाः पुप्लुवे बहु लोभयन्॥"

इति भट्टिः॥

सुखस्य सदृशं यथासुखं दर्पणादिस्थप्रतिबिम्बमुच्यते। सादृश्यार्थेऽव्ययीभावः। इति भरतः॥ निर्म्मलत्वात् सीतायां यत्तो यथासुखीनः प्रतिबिम्बाश्रय इव भूत्वा पुप्लुवे भ्रमति स्म इवशब्दलोपो द्रष्टव्यः। इति जयमङ्गलः॥

यथायथं, व, क्ली, ("यथार्हे यथायथम्।" ८। १। १४। योऽयमात्मा यच्छास्त्रीयं तदुद्देश्यात्मकम्। तस्मिन् यथाशब्दस्य द्वित्वं क्लीवत्वञ्च निपात्यते। यथायथं ज्ञाता यथास्वभावमित्यर्थः। यथाशब्दोयमिति वेति। इति सिद्धान्तकौमुदी।) यथास्वम्। इत्यमरः। ३। ४। १५॥ (अनुरूपम्। यथा, श्रीमद्भागवते। १०। १८। १६।

"तत्रोपाकृत्य गोपालान् कृष्णः प्राह विहारवित्।
हे गोपा विहरिष्यामो हृदीभूय यथायथम्॥"

"यथायथं वयोवर्णाद्यनुरूपम्।" इति तट्टीकायां श्रीधरस्वामी। यथा च,—

"लिङ्गमश्वत्तमस्यत्वात् आद्यौनां तदुद्यथा यथम्॥"

इति वाग्भटे निदानस्थाने प्रथमेऽध्याये॥

"यथायथं यस्य याधेर्यद्रूपं तदेवाचक्षम्।" इति तट्टीकायां विजयरक्षितः॥)

यथार्थं, व, क्ली, यथातथम्। इत्यमरः। ३। ४। १५॥

"हे अयभिचारिणि। अर्थमनतिक्रान्तं यथार्थं यथास्वरूपं यथातथं उभयत्र अव्ययीभावः। यथार्थमेवेदम्। यथातथं वक्ति सभासु विद्वान्।" इति भरतः॥ तत्पर्य्यायः।

"सत्यं सम्यक् समीचीनन्तथं तथ्यं यथातथम्। यथास्थितञ्च सद्भूतेऽलीके तु वितथानृते॥"

इति हेमचन्द्रः॥

(यथा, महाभारते। १३। ६। १८।

"शतञ्चापशतं किञ्चित् शतं कर्म्मणि सिध्यति। सुकृतं दुष्कृतं कर्म्म न यथार्थं प्रपद्यते॥")

यथार्हं, व, क्ली, (अर्हं योग्यमनतिक्रम्य इत्यव्ययीभावः।) यथायोग्यम्। यथा,—

"श्रुत्वा तु तौ यथान्यायं यथार्हन्तेन संविदम्। उपविष्टौ कथाः काश्चिच्चक्रतुर्विश्रुतार्थिवौ॥"

इति देवीभागवतम्॥

यथार्हवर्णः, पुं. (यथार्हं यथायोग्यं वर्णयतीति। वर्ण+अच्।) चरः। इत्यमरः। २। ८। १३॥ यथायोग्यमाचरं रूपं जातिश्च॥

यथाशक्ति, व, क्ली, शक्त्यनुसारेण। शक्तिमनतिक्रम्य। इति सुग्धबोधव्याकरणम्॥ (यथा, श्रीमद्भागवते। ६। १२। १६।

"पश्य मां निर्जितं शक्र! दृक्प्रहायुधसूनुभिः। घटमानं यथाशक्ति तव प्राग्विजिहीर्षया॥")

यथाशास्त्रं, व, क्ली, शास्त्रानुसारेण। शास्त्रमनतिक्रम्य। यथा, मलमासतत्त्वे।

"यथाशास्त्रञ्च निर्णीतो यथाव्याधि चिकित्सितः।
न भ्रमं याति यो व्याधिः स ज्ञेयः कर्म्मजो बुधैः॥"

यथास्थितं, त्रि, सत्यम्। इति हेमचन्द्रः। ३। १७६॥

यथास्यं, व, क्ली, (स्वमनतिक्रम्येत्यव्ययीभावः।) यथाव्याख्यितम्। इत्यमरः॥ (यथा, सुश्रुते चिकित्सास्थाने ८ अध्याये।

"बस्तं ततोऽनुकुर्व्वीत परिषेक्तुं सर्षपैः।
तृतीये दिवसे मुक्ते यथास्यं ग्रीवयेङ्गितम्॥")

यथेप्सितं, व, क्ली, (ईप्सितमनतिक्रम्येति।) यथाव्याख्यितम्। (यथा, भट्टिकाव्ये। २। २८।

"तान् प्रत्यवादीदथ राघवोऽपि
यथेप्सितं प्रस्तुतकर्म्म धर्म्यम्।
तपो महद्भिर्भवतां प्रशस्यैः
सन्तुष्यतां गोरसमिश्रमन्नैः॥")

तत्पर्य्यायः। कामम् २ प्रकामम् ३ पर्य्याप्तम् ४ निकामम् ५ इष्टम् ६। इत्यमरः। २। ६। ५७॥ यट् इष्टानतिक्रमे स्वच्छन्दप्रवृत्तौ कामादीनि प्रायः क्रियाविशेषणानि क्रियाविशेषणत्वात् क्लीवत्वमेषाम्। ईप्सितस्यानतिक्रमो यथेप्सितमित्यव्ययीभावः। इति भरतः॥

यथेष्टं, व, क्ली, इष्टमनतिक्रम्य। यथेप्सितम्। यथा,—

"शुश्रुषुर्वेष्टं तत् सर्व्वमीप्सिते स्वधनस्य वै॥"

इति दायभागः॥

यथेष्टचारी, [न्] पुं, (यथेष्टं चरतीति। चर+णिनिः।) पथी। इति शब्दरत्नावली॥

यथेष्टाचरणः, त्रि, (यथेष्टं आचरणं यस्य।) यथेष्टाचारी। यथा,—

"क्रियाहीनस्य मूर्खस्य महारोगिण एव च। यथेष्टाचरणस्याहुर्मरणान्तमशौचकम्॥"

यथेष्टाचरणस्य दूरतरेऽन्याद्यावस्तस्य। इति शुद्धितत्त्वम्॥

यथेष्टाचारी, [न्] पुं, स्वेच्छाचारी। यथेष्टमाचरितुं शीलमस्य इत्यर्थे इनिप्रत्ययेन निष्पन्नः॥

यथोचितं, व, क्ली, (उचितमनतिक्रम्येति।) यथायोग्यम्। यथाप्राप्तम्। यथा। "अंशो अंशो यथोचितात्।" इत्यमरः। २। ८। २३॥ (यथा च श्रीमद्भागवते। ४। २२। ५०।

"कर्म्माणि च यथाकालं यथादेशं यथाबलम्। यथोचितं यथावित्तमकरोद्ब्रह्मसात्कृतम्॥"

त्रि, यथोचितमस्यास्तीति। अर्श आद्यच्। यथार्हः। यथा, मार्कण्डेये। १६। ३८।

"वयमाप्यायिता मर्त्यैर्यज्ञभागैर्यथोचितैः।
इष्ट्वा तानुद्यतश्रीमो मर्त्यान् ग्रस्यादिसिद्धये॥")

यथोदितं, व, क्ली, (उदितं कथितमतिक्रम्य इत्यव्ययीभावः।) यथोक्तम्। यथा,—
"यथोदितन्ते पितृभिः कुरु दारपरिग्रहम्।"
इति मार्कण्डेयपुराणे रुचिस्तोत्रम्॥

यदा, व, (यस्मिन् काले इति। यद्+"सर्व्वैकान्यकिंयत्तदः काले दा।"५।३।१५। इति दा।) यस्मिन् काले। यथा,—
"यदा यदा सतां हानिर्व्वेदमार्गानुसारिणाम्।
तदा तदा कल्किवृद्धिरनुमेया विचक्षणैः॥"
इति तिथ्यादितत्त्वधृतवचनम्॥

यदि, व, पक्षान्तरम्। सम्भावना। तत्पर्य्यायः। चेत् २ यद्युवा ३। यथा,—
"यदीक्षेद्दिवपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान्।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ॥"
इति मलमासतत्त्वम्॥
"अपि चेत् सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥"
इति श्रीभगवद्गीता॥
"यद्युवाक्यतरसम्भारः स्यादपि पशुनेव कुर्य्यात्। इति। यद्युवेति निपातसमुदायो यद्यर्थे।" इति तिथ्यादितत्त्वम्॥

यदीर्य, त्रि, (यस्येदमिति। यद्+"इदाद्यः।" ६।२।११४। इति छः।) यत्सम्बन्धि। यथा,
"यदीयफलतो विलोक्य विपदं
कलिन्दतनया जलोद्गतगतिः।
विलासविपिनं विवेश सहसा
करोतु कुशलं हली स जगताम्॥"
इति छन्दोमञ्जर्य्यां द्वितीयस्तवकः॥

यदुः, पुं, (यजते इति। यज्+उः। पृषोदरत्वात् जस्थाने दकारः।) देवयान्यां जातो ययातेर्न्नहुषपुत्रः। तस्य वंशे पितृशापात् राजाचक्रवर्त्ती नाभूत्। तदंशे द्वापरयुगस्यान्ते श्रीकृष्णोऽवतीर्णः। इति श्रीभागवतमतम्॥ तस्य मातुलकन्याविवाहकारणं यथा,—
"जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव ह।
पुत्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीदचः॥
त्वं यदो! प्रतिपद्यस्व पाप्मानं जरया सह।
यौवनेन त्वदीयेन चरेयं विषयानहम्॥
पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम्।
दत्त्वा संप्रतिपत्स्यामि पाप्मानं जरया सह॥
यदुरुवाच।
सितश्मश्रुधरो दीनो जरया शिथिलीकृतः।
बलीसन्ततगात्रश्च दुर्ब्बलो दुर्ब्बलः क्षुधः॥
अशक्तः कार्य्यकरणे पापभूतश्च यौवने।
सहोपजीविभिश्चैव तां जरां नैव कामये॥
सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप!।
जरां गृहीतुं धर्म्मज्ञ! पुत्रमन्यं वृणीष्व वै॥
ययातिरुवाच।
यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि।
यापान्मातुलसम्बन्धात् प्रजा वै ते भविष्यति॥"
इति मात्स्ये ३१ अध्यायः॥ *॥
(हर्य्यश्वराजपुत्रः। यथा, हरिवंशे। ६३।४४।
"तस्येवं सुप्रवृत्तस्य पुत्रकामस्य धीमतः।
मधुमत्यां सुतो जज्ञे यदुर्नाम महायशाः॥")
यदुनाथः, पुं, (यदूनां नाथः।) श्रीकृष्णः। इति हेमचन्द्रः। २। १३३॥
यदुपतिः, पुं, (यदूनां पतिः।) श्रीकृष्णः। यथा—
"यदुपतेः क्व गता मथुरापुरी
रघुपतेः क्व गतोत्तरकोशला।
इति विचिन्त्य कुरुष्व मनः स्थिरं
न सदिदं जगदित्यवधारय॥"
इति रूपसनातनगोस्वामिनौ॥
यदृच्छा, स्त्री, स्वातन्त्र्यम्। तत्पर्य्यायः। खेरिता २। इत्यमरः। ३।२।२। खरिता ३। इति तट्टीका॥ (यथा, गीतायाम्। २। ३२।
"यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ! लभन्ते युद्धमीदृशम्॥")
यद्युवा, व, यदि। यथा। "यद्युवाक्यतरसम्भारः स्यादपि पशुनेव कुर्य्यात्। यद्युवेति निपातसमुदायो यद्यर्थे। अपि च। यद्युवा उभयं चिकीर्षेद्धोमं ब्रह्मत्वञ्च इति तेनैव कल्पेन हुत्वोत्तरासङ्गं स्रोदकं कमण्डलुं दर्भवटुं वा ब्रह्मासने निधाय तेनैव प्रत्यादृत्यान्यत्कर्त्तुं।" इति तिथ्यादितत्त्वम्॥
यद्वा, स्त्री, वृद्धिः। इति संक्षिप्तसारोणादिवृत्तिः॥ पक्षान्तरञ्च॥
यन्ता, [ऋ] पुं, (यम्+तृच्।) सारथिः। (यथा, रघौ। ७। ४४।
"प्रहारमूर्च्छापगमे रथस्था
यन्तुर्नुपालभ्य निवर्त्तितास्त्राः।
यैः सादिता लक्षितपूर्व्वकेतून्
तानेव सामर्षतया निजघ्नुः॥")
हस्तिपकः। इत्यमरः। २। ३। ५६। (यथा, माघे। ५। ४२।
"सेयोऽपि साधुनयमाकलनाय यन्त्रा
नीतेन वन्यकरिदानलताधिवासः।
नाभाजि केवलमभाजि गजेन ग्राम्यो
नान्यस्य गन्धमपि मानभृतः सहन्ते॥")
विरतिकारके, त्रि॥
यन्त्रं, क्ली, (यच्छत्यनेति। यम+"गुधृवीप्रविषिषियमिसदिभ्यस्त्रः।" उणा० ४।१६६। इति त्रः।) देवताधिष्ठानम्॥ (यथा, देवीभागवते। ३। २६। २१।
"अथोभावे तथा यन्त्रं नवार्णमन्त्रसंयुतम्।
स्थापयेत् पीठपूजार्थं कलसं तत्र पार्श्वतः॥")
पात्रभेदः। नियन्त्रणम्। इति हेमचन्द्रः॥ अधियन्त्रम्। इति महाभारतटीकायां नीलकण्ठः॥ कामान् वल्गुक इत्यादि भाषा॥ *॥
वाद्यम्। यथा,—
"यन्त्रस्य गुणदोषौ न विचार्य्यौ मधुसूदन!।
अहं यन्त्रं भवान् यन्त्री न मे दोषा न मे गुणाः॥"
इति महाभारतम्॥
दारुयन्त्रादि। कल इति भाषा। यथा,—
"ईश्वरः सर्व्वभूतानां हृद्देशेऽर्জ্জুन! तिष्ठति।
भ्रामयन् सर्व्वभूतानि यन्त्रारूढानि मायया॥"
इति श्रीभगवद्गीतायाम्। १८। ६१॥
अस्यार्थः। "सर्व्वभूतानां हृन्मध्ये ईश्वरोऽन्तर्य्यामी तिष्ठति। किं कुर्व्वन् सर्व्वाणि भूतानि मायया निजशक्त्या भ्रामयंस्तत्तत्कर्म्मसु प्रवर्त्तयन् यथा दारुयन्त्रमारूढानि कृत्रिमाणि भूतानि स्वधारो लोके भ्रामयति तद्वदिति। यद्वा यन्त्राणि शरीराणि आरूढानि भूतानि देहाभिमानिनो जीवान् भ्रामयन्नित्यर्थः।" इति श्रीधरस्वामी॥
अथ पूजाधारयन्त्रम्। तच्च नारदीये।
"आपोऽयिर्हृदयं चक्रं विष्णोः क्षीरसमुद्भवम्।
यन्त्रञ्च प्रतिमास्थानमर्च्चने सर्व्वदा हरेः॥"
गौतमीये।
"शालग्रामे मणौ यन्त्रे प्रतिमामस्तकेषु च।
नित्यं पूजा हरेः कार्य्या न तु कैवलभूतले॥"
योगिनीतन्त्रे।
"लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च।
मण्डलस्थां महामायां यन्त्रस्थां प्रतिमासु च।
जलस्थां वा शिलास्थां वा पूजयेत् परमेश्वरीम्॥"
एतत् सर्व्वं यन्त्राभावे। कौलावलीये।
"यत्रापराजितापुष्पं जवापुष्पञ्च विद्यते।
करवीरे शुक्लरक्ते द्रोणे वा यत्र तिष्ठति।
तत्र देवी वसेन्नित्यं तदृयन्त्रं चक्रिकार्च्चनम्॥"
एतत् सर्व्वयन्त्राभावे। तथा च।
"यन्त्रं मन्त्रमयं प्रोक्तं मन्त्रात्मा देवतैव हि।
देहात्मनोर्यथा भेदो यन्त्रदेवतयोस्तथा॥"
तथा।
"आदौ लिखेदृयन्त्रराजं देवतायाश्च विग्रहम्।
कामक्रोधादिदोषोत्थसर्व्वदुःखनियन्त्रणात्॥
यन्त्रमित्याहुरेतस्मिन् देवः प्रीणाति पूजितः।
विना यन्त्रेण पूजायां देवता न प्रसीदति॥
दुःखनिर्यन्त्रणाद्यन्त्रमित्याहुस्तन्त्रवेदिनः॥"
इति यन्त्रपूजाप्राधान्यम्॥ *॥
अथ धारणयन्त्राणि। तत्रादौ भुवनेश्वरीयन्त्रम्। प्रारदायाम्।
"आलिख्याष्टदिगर्गलान्तरगतं पाद्मादिकं चाक्षरं
कोष्ठेष्वङ्कमथो परेषु विलिखेदष्टाधमन्त्रत्रयम्।
अष्टपूर्व्वापरषट्कयुग्मवयवान् षोमास-
नागर्णवे-
ष्वालिख्येन्द्रजलाधिपादिगुणयुग्मं पंक्तिदयात्तत्परम्॥
कोष्ठेष्वष्टयुगार्णमात्मसहितां युग्मस्वरान्तर्गतां
मायां केशरगां दलेषु विलिखेन्मूलं त्रिपंक्ति-
क्रमात्।
त्रिः पाद्माङ्कुशवेष्टितञ्च त्रिपिभिर्व्वीतं क्रमाद्-
द्युत्क्रमात्
पद्मस्थेन घटेन पङ्कजसुखेनावेष्टितं तद्वहिः।"
घटार्णमिदं यन्त्रं मन्त्रिणां श्रीप्रदं महत्।
पाद्मश्रीशक्तिकन्दर्पकामशक्तीन्द्रिराङ्कुशाः॥
प्रथमोऽष्टाक्षरो मन्त्रस्ततः कामिनि रक्षिणि।
स्वाहान्तोऽष्टाक्षरः सङ्करपरः परिकीर्त्तितः॥

ह्रीं गौरि रुद्रदयिते योगेश्वरि सर्वम्भट्।
हिठान्तः षोढ्यार्णोऽयं मन्त्रः सङ्किरुदीरितः॥"
इति घटार्गलयन्त्रम्॥*॥

"तारे हुं विलिखेत् वरोत्तकुहरे साध्याभि-
धानान्वितं
मन्त्रार्णान् वसुसंख्यकान् वसुदलेष्वालिख्य
तद्बाह्यतः।
शक्त्या त्रिः परिवेष्टितं घटगतं पद्मस्यमन्त्रा-
गतं
यन्त्रं वश्यकरं ग्रहादिभयहृल्लक्ष्मीप्रदं
कीर्त्तिदम्॥"
इति त्वरितायन्त्रम्॥*॥

"पद्मं भानुदलान्वितं प्रविलिखेत् तत्कर्णिकायां पुन-
स्तारं शक्तिबीजसाध्यसहितं तत्केसरेषु
क्रमात्।
मर्दिन्यामनुसम्भवान् युगलशो वर्णान् पुनः पत्र-
गान्
मन्त्रार्णान् गुणशो विधाय विलिखेदन्तं
तदन्ये दले॥"
मन्त्रस्तु। [स्थितम्।

"उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुप-
यदि शक्यमशक्यं वा तन्मे भगवति शमय
स्वाहा॥

मात्रकार्णेन संवीतं भूपुरद्वयमध्यगम्।
यन्त्रञ्च विन्यवासिन्याः प्रोक्तं सर्वसिद्धिदम्॥
रक्षाकरं विघ्नविषं क्षुद्रभूतादिनाशनम्।
राज्यदं भ्रष्टराज्यानां वश्यदं वश्यमिच्छताम्॥
सुतार्थिनीनां सुतदं रोगिणां रोगशान्तिदम्।
बहुना किमिहोक्तेन यन्त्रं यत् कामदो मणिः॥"
इति वनदुर्गायन्त्रम्॥*॥

अथ लक्ष्मीयन्त्रम्।

"वेदादिस्थितसाध्यनामयुगलः श्रीशक्ति-
मारान्वितं
किञ्जल्केषु दिनेशपत्रविलसन्मन्त्राक्षरं तद्बहिः।
पद्मं यत्नकेसरं स्वरलसत्पत्राष्टयुग्मं धरा-
बिम्बाभ्यां वषड्न्तया त्वरितया यन्त्रं लिखेद्-
वेष्टितम्।
भूपुरद्वयकोणेषु हृत्पौ लेख्यौ पुनः पुनः।
महालक्ष्मीयन्त्रमिदं सर्वैश्वर्यफलप्रदम्॥
सर्वदुःखप्रशमनं सर्वापद्विनिवारकम्।
बहुना किमिहोक्तेन परमस्त्राम विद्यते॥"*॥

अथ त्रिपुरभैरवीयन्त्रम्। [स्थितम्।

"मध्यात्तं नवयोनिषु प्रविलिखेद्बीजानि वर्णा-
गायत्र्याः पुनरष्टपत्रविवरेष्वालिख्य लिप्या-
वृतम्।
भूबिम्बद्वितयेन मन्मथयुजा कोणेषु संवेष्टितं
यन्त्रं त्रैपुरभैरवीतं त्रिभुवनप्रक्षोभणं श्रीप्रदम्॥"
गायत्री तु।

"मन्मथं त्रिपुरादेवि विद्महे पदमुद्धरेत्।
उक्त्वा कामेश्वरिपदं प्रवदेदथ धीमहि॥
अन्ते च प्रवदेद्भूयस्तन्नः क्लिन्ने प्रचोदयात्।
गायत्र्यावं समाख्याता त्रैपुरी सर्वसिद्धिदा॥"

यन्त्रान्तरम्।

"षड्वर्गैर्द्वयुगान्तरस्थमदने मायां लिखेदाद्यभवं
षट्कोणेष्वथ सन्धिषु प्रविलिखेत् हुंकार-
मावेष्टितम्।
स्त्रीबीजेन समीरितं त्रिभुवनप्रक्षोभणं त्रैपुरं
यन्त्रं पञ्चमनोभवात्मकमिदं सौन्दर्यसम्पत्-
करम्॥"
इति त्रिपुरायन्त्रम्॥*॥

अथ श्रीविद्यायन्त्रम्।

"विघ्नेशं धारणं यन्त्रं प्रसङ्गात् कथयामि ते॥
रेफहकारयोर्नन्धे देवीनामभिसुस्थकम्।
साध्यनाम द्वितीयान्तं तस्योर्द्धे विलिखेन्नतुम्॥
तत्रैव मात्रकां सर्वां विलिखेच्चक्रबाह्यतः।
पद्मगर्भान्तरेणैव मूलेन परिवेष्टयेत्॥
तत्र प्राणं प्रतिष्ठाप्य विद्यामष्टोत्तरं शतम्।
तत् जपृत्वा प्रजपेन्मन्त्रं देवीध्यानपरायणः॥
हेम्नो मध्यगतं कृत्वा रजतस्थाथवा पुनः।
करे धृत्वा जगद्वश्यं हृदये श्रीयु वल्लभम्॥
कण्ठे धनं लभेद्बाहौ लक्ष्मीं जघनं भवेत्।
शिखायां मोक्षमाप्नोति तस्माद्यत्नेन धार-
येत्॥"*॥

अथ गणेशयन्त्रम्।

"बीजं षट्कोणमध्ये स्फुरदनलपुरे तारगं
दिक्षु लक्ष्मी-
मायाकन्दर्पभूमीक्षदशुरसपुटेष्वालिखेद्बीज-
षट्कम्।
तत्सन्धिष्वङ्गमन्त्रान् वसुदलकमले मूलमन्त्रस्य
वर्णान्
शिष्टान् पत्रेषु विद्वान् विलिखतु गुणशश्चान्त्य-
मन्त्रेण पत्राग्रे॥
आवीतं त्रिपिभिः क्रमोत्क्रमवशात् पाशा-
ङ्कुशाभ्यामपि
भूबिम्बद्वितयेन वेष्टितमिदं यन्त्रं गणाधीशितुः।
लाक्षाकुङ्कुमरोचनाश्वगमदैर्भूर्जोदरे हेम्नि वा
संलिख्याभिवहन् जनेत सकलैः संप्रार्थनीयां
श्रियम्॥
उक्तं महागणपतेर्विधानं सुरपूजितम्।
सर्वसिद्धिकरं पुंसां समस्तपुरुषार्थदम्॥"*॥

अथ श्रीरामयन्त्रम्।

"तारं मध्ये विलिखतु मनुं षट्सु कोणेषु सन्धि-
ष्वङ्गं मायां शरमपि लिखेत् कोणगर्भेषु
पश्चात्।
किञ्जल्केषु स्वरगणमतो पत्रमध्येषु मात्रा-
मन्त्रस्यार्णान् गुरुसुखमितानष्टमे पत्रवर्णान्॥
दद्याच्चरेण संवेष्ट्य कादिवर्णैश्च भूपुरे।
दिग्विदिक्षु लिखेद्बीजे नरसिंहवराह्योः॥
नमो भगवते ब्रूयाच्चतुर्थ्या रघुनन्दनम्।
रक्षोघ्नविषदायान्ते मधुरादि समीरयेत्॥
प्रसन्नवदनायेति पश्चादमिततेजसे।
बलाय पश्चाद्रामाय विद्महे तदनन्तरम्।
प्रणवादिनमोऽन्तोऽयं मालामन्त्रः प्रकीर्त्तितः॥"

अथ नृसिंहयन्त्रम्।

"बीजं साध्यसमन्वितं प्रविलिखेन्मध्येऽष्टपत्रेष्वथो
मन्त्रार्णान् स्तुतिशो विभज्य विलिखेल्लिप्या
बहिर्वेष्टयेत्।
बाह्ये कोणगबीजबद्धवसुधागेहेन वेष्टितं
यन्त्रं क्षुद्रविषग्रहामयरिपुप्रध्वंसनं श्रीप्रदम्॥"*॥

अथ गोपालयन्त्रम्। [षड्वर्णं

"पिण्डं मूलेन वीतं दहनपुरयुगे कोणराजत-
कुर्य्यात् पद्मं दशार्णस्फुरितदशदलं कामबीजेन
वीतम्।
पद्मं किञ्जल्कसंस्थस्वरविलसितदलप्रोल्लसत्-
षोढ्यार्णं
किञ्जल्कयुग्मनार्णं विलसितयुगदलेष्वर्पितानष्ट-
वर्णान्॥
प्राग्याम्याभ्यामवीतं चौलीपुरयुगासिषु।
अष्टाक्षरेण लसितं यन्त्रं गोपालदैवतम्॥
धर्मार्थकामफलदं सर्वरक्षाकरं स्तुतम्।
पद्मान्तको धरासंस्थो मनुर्बिन्दुविभूषितः॥
पिण्डबीजमिदं प्रोक्तं सर्वसिद्धिकरं परम्।
स्मरः क्षुधाय ठद्वन्द्वं षड्वर्णो मनुरीरितः॥
गोपीजनान्ते प्रदद्देहल्लभायाग्निवल्लभा।
अयं दशाक्षरो मन्त्रो दशाष्टफलप्रदः॥
प्रणवं हृदयं कृष्णं ङेऽन्तसुक्ता ततः परम्।
तादृग्गं देवकीपुत्रं हुं फट्स्वाहासमन्वितम्।
षोढ्याक्षरमन्त्रोऽयं गोविन्दस्य जगत्पतेः॥
पिण्डं रतिपतेर्बीजं नमो भगवते ततः।
नन्दपुत्राय बालादिवपुषे श्यामलाय च॥
गोपीजनपदस्यान्ते वल्लभाय हिठावधिः।
अनुष्टुप् मन्त्र आख्यातो गोपालस्य जगत्पतेः॥
अङ्गः कृष्णगोविन्दौ ङेऽन्तावष्टाक्षरो मनुः॥"
इति गोपालयन्त्रम्॥*॥

अथ गोपालस्य यन्त्रान्तरम्।

"प्राक् प्रत्यक् दक्षिणोदक् विधिवदभिलिखेत्
स्वरेखाश्चतुष्कं
कोणोच्चूलयुक्तं वलययुगयुतं मध्यपूर्वं
तदन्तम्।
श्लोकस्यार्धान् पुरस्ताद्दशपदविवरेष्वष्टवर्णं
लिखित्वा
तद्बाह्ये द्वादशार्णैस्तदनुपरिवृतं देवकीपुत्र-
यन्त्रम्॥

तं सुकौ देव देवेतं तं वेदे वरतो वतम्।
तं वर्णो रूढतो ख्यातं तं ख्यातो देवकीसुतम्॥
लिखितं भूर्जपत्रादौ यन्त्रमेतदुदाहृतम्।
विधृतं बाहुना नित्यं सर्वकामफलप्रदम्॥
पलाशवृक्षफलके लिखितं साधु साधितम्।
गोस्थाने निखनेदेतत् गवां वृद्धिर्भवेत्तदा॥"*॥

अथ ध्रुवयन्त्रम्। तत्रादौ षट्कोणमण्डलं कृत्वा तदन्तः साध्यनामयुक्तं प्रासादबीजं विलिख्य षट्कोणेषु प्रणवसहितपञ्चाक्षरवर्णान् विलिख्य विवरेषु षडङ्गमन्त्रान् तद्बहिः पञ्चदलानि विरचय्य तद्दलेषु ॐ ईशानाय नमः ॐ तत्पुरुषाय नमः ॐ अघोराय नमः

ॐ सद्योजाताय नमः ॐ वामदेवाय नमः। इति पञ्चमन्त्रान् प्रागादिक्रमेण लिखेत्। तद्बहिरष्टदलानि रचयित्वा तद्दलेषु मातृकावर्णान् लिखेत्। तद्बहिर्वृत्तं त्रासकेन वेष्टयेत्। एतद्यन्त्रं जपहोमादिना सम्पूज्य धारयेत्। आयुरारोग्यैश्वर्यादिसिद्धिर्भवति॥ *॥ अथ न्यत्युञ्जयस्य यन्त्रम्।

"मध्ये साध्याक्षरार्णं ध्रुवमभिविलिखेन्मध्यमं दिग्दलेषु
कोणेष्वन्यं मनोज्ञं क्षितिसुषनमधो दिक्षु चन्द्रं विदिक्षु।
टाम्तं यन्त्रं तदुक्तं सकलभयहरं चेड़भूतापमृत्यु-
व्याधिक्षामोदुःखप्रशमनसहितं श्रीप्रदं कीर्तिदायि॥"*॥

अथकालीयन्त्रम्। यामले।

"आद्यं बीजं ससाध्यं प्रथमवसुयुते तद्बहिः षट्कोणे
पूर्वाद्यं षष्ठबीजं तदनु वसुयुतेन्द्रके बीजषट्कम्।
किञ्जल्कं तत् खराढ्यं वसुदलविवरे स्वाहया बीजषट्कं
कूर्चाभ्यामेव वीतं क्षितिपुटयुगयोरन्तरे यन्त्रराजम्॥
देवीबीजत्रयं तत् प्रतिदिशमपरं ग्लौंत्रिबीजं त्रयं तत्
कोणे कोणे लिखेदृयक्षिजगति स गुरुः ग्रङ्गरस्यापि विष्णोः॥"

अथ ग्रान्तिकादौ ताराधारणयन्त्रम्। तदुक्तं पेतृकारीये।

"योनियुग्मे लिखेन्मन्त्रं मन्त्री हेमशलाकया।
जीवहीनान् दीर्घवर्णान् षट्कोणे विलिखेत्ततः॥
अष्टपत्रेष्वष्टवर्णान् तद्बहिर्भूपुरद्वयम्।
अष्टवज्रं भूपुरे च विलिख्य साधकोत्तमः॥
सुवर्णपट्टे भूर्ज्जे वा रूप्ये वाथ्य सुव्रते।
विलिखेद्वेमलेखन्या गन्धाष्टकसमन्वितम्॥
दूर्वाकाण्डेन वालिख्य कुशमूलेन वा पुनः॥"

एकवीराकल्पे।

"वेष्टितं पीतवस्त्रेण सूतेन परिवेष्टयेत्॥
बध्नीयात् षट्कुलेनैव स्त्रियूनां कण्ठभूषणम्।
स्त्रीणां वामभुजे चैवमन्येषां दक्षिणे भुजे।
वन्ध्यापि लभते पुत्रं निर्धनो धनवान् भवेत्॥
इमां रक्षां पुरा बध्वा ज्ञानार्थं गौतमादिभिः।
प्रौढ्यर्थं पार्थिवैश्चान्यैः संग्रामे जयकाङ्क्षिभिः॥"

अस्यार्थः। योनियुग्मे षट्कोणे। तस्य मध्ये हेमशलाकादिना भूर्ज्जपत्रादौ कुङ्कुमरोचनारक्तचन्दनजटामांसीनां समांशं विधाय षड़ङ्गक्रमेण मूलमन्त्रं लिखित्वा तस्य वृत्तलेखारेफमध्ये अमुकस्य रक्षां कुरु कुरु अमुकीनां शुभं पुत्रसुत्पादयेति वा अस्य ज्ञानं कुरु कुरु इत्यादि वा साध्यसहितं विलिख्य षट्कोणे जीवभिन्नान् दीर्घवर्णान् आ ई ऊ ऐ औ अः इत्येकैकं लिखेत्। तदुक्तम्।

"स्वराणां मध्यगं यच्च तच्चतुष्कं नपुंसकमिति।"

अष्टपत्रेष्वष्टवर्णान्। ऐं ह्रीं ॐ ऐं ह्रीं फट् स्वाहेति लिखेत्। तदुक्तम्।

"वाग्भवं कुलदेवीच तारकं वाग्भवं तथा।
वृत्तलेखा त्रासमन्त्रान्ते वह्निजायावधिर्मनुः॥
अष्टाक्षरो मनुः प्रोक्तो मन्त्राणां सार ईरितः॥"

अथ यन्त्रलिखनक्रमः।

"कार्पासैररोचनालाक्षागेभमदचन्दनैः।
विलिखेद्वेमलेखन्या यन्त्राण्येतानि देशिकः॥
भूमिस्पृष्टं ग्रवस्पृष्टं यन्त्रं निर्म्माल्यसङ्गतम्।
विदीर्णं सङ्क्षितं मन्त्री यन्त्रं नैव च धारयेत्॥
सौवर्णे राजते पात्रे भूर्जे वा सम्यगालिखेत्।
अथवा ताम्रपट्टे वा गुटिकां कृत्व धारयेत्॥
यावज्जीवं सुवर्णे स्यात् रौप्ये विंशतिवार्षिकम्।
भूर्ज्जे द्वादश वर्षाणि तदर्द्धं ताम्रपट्टके॥"

इति तन्त्रसारः॥ *॥

अन्यत् कालिकापुराणे ७७।७८।७९ अध्यायेषु द्रष्टव्यम्॥ *॥ अथ यन्त्रसंस्कारः। वामकेश्वरतन्त्रे।

"स्नात्वा संकल्पयेन्मन्त्री गुरोरर्चनमाचरेत्।
पञ्चगव्यं ततः कृत्वा शिवमन्त्रेण मन्त्रितम्॥
तत्र चक्रं क्षिपेन्मन्त्री प्रणवेन समाकुलम्।
तदुद्धृत्य ततश्चक्रं स्थापयेत् स्वर्णपात्रके॥
पञ्चाम्तेन दुग्धेन घृतेनेक्षुरसेन च।
चन्दनेन सुगन्धेन कस्तूरीकुङ्कुमेन च।
पयोदधिघृतक्षौद्रशर्करादैरनुक्रमात्।
तोयधृपान्तरैः कुर्य्यात् पञ्चाम्ततविधिं बुधः॥
घटकैः कलसैर्दैवीमष्टभिर्व्वारिपूरितैः।
कषायजलसम्पन्नैः कारयेत् स्नानमुत्तमम्॥
स्नानं समाप्य तां देवीं स्थापयेत् स्वर्णपाटके।
यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो यन्त्रं प्रचोदयात्॥
सृष्ट्वा यन्त्रं कुशाग्रेण गायत्र्या चाभिमन्त्रयेत्।
अष्टोत्तरशतं देवि! देवताभावसिद्धये॥
आत्मशुद्धिं ततः कृत्वा षड़ङ्गैर्देवतां यजेत्।
तत्रावाह्य महादेवीं जीवन्यासञ्च कारयेत्॥
उपचारैः षोड़शभिर्महासुद्रादिभिः सदा।
फलताम्बूलनैवेद्यैर्देवीं तत्र समर्चयेत्॥
पट्टसूत्रादिकं दद्यात् वस्त्रालङ्कारमेव च।
अगुरं चामरं घण्टां यथायोग्यं महेश्वरि!।
सर्व्वमेतत् प्रयत्नेन दद्यादात्महिते रतः॥
ततो जपेत् सहस्रञ्च सकलेप्सितसिद्धये।
बलिदानं ततः कृत्वा प्रणमेच्चक्रराजकम्॥
अष्टोत्तरशतं हुत्वा सम्यगाज्यं विनिःक्षिपेत्।
होमकर्म्मसमाप्तौ च द्विगुणं जपमाचरेत्॥
धेनुमेकां समानीय स्वर्णशृङ्गाद्यलङ्कृताम्।
गुरवे दक्षिणां दद्यात् ततो देव्या विसर्ज्जनम्॥"

अस्य प्रयोगः। कृतनित्यक्रियः स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात्। आद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकदेवतायाः पूजार्थं अमुकयन्त्रसंस्कारमहं करिष्ये। इति संकल्प्य पञ्चगव्यमानीय हौमितिमन्त्रेणाष्टोत्तरशतं घृतं अभिमन्त्र्य प्रणवेन यन्त्रं तत्र क्षिपेत्। तत उत्तोल्य स्नापयेत्। ततः श्रीतलजलचन्दनगन्धकस्तूरीकुङ्कुमैः स्नापयित्वा पञ्चगव्यमानीय हौमिति मन्त्रेणाष्टोत्तरशतमभिमन्त्र्य प्रणवेन पूर्व्ववत् श्रोधयित्वा स्नापयेत्। तत्र क्रमः। प्रथमं क्षीरेण स्नापयित्वा धूपं दद्यात्। एवं दध्ना घृतेन मधुना शर्करया च। ततोऽष्टभिः कलसैः कुङ्कुमगोरोचनाचन्दनमिश्रितैस्तोयैः स्नापयेत्। सर्व्वत्र स्नानं मूलमन्त्रेण ततो यन्त्रमुत्तोल्य कुशाग्रेण तत् सृष्ट्वा यन्त्रराजाय विद्महे महायन्त्राय धीमहि तन्नो यन्त्रं प्रचोदयात्। इत्यष्टोत्तरशतमभिमन्त्र्य प्राणप्रतिष्ठां कुर्य्यात्। अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषय ऋग्यजुःसामानि छन्दांसि चैतन्यं देवता प्राणप्रतिष्ठायां विनियोगः। तद्यथा। आं ह्रीं क्रों यं रं लं वं शं षं सं हौं हं सः असुकदेवतायाः प्राणा इह प्राणाः। एवं आमित्यादि असुकदेवतायाः जीव इह स्थितः। एवं आमित्यादि असुकदेवतायाः सर्व्वेन्द्रियाणि। एवं आमित्यादि असुकदेवतायाः वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। इति प्राणान् प्रतिष्ठाप्य तत्र प्रकृतदेवतामावाह्य षोड़शोपचारैः पञ्चोपचारैर्व्वा पूजयेत्। ततः षट्सूत्रादिकं दत्त्वा अष्टोत्तरशतं जप्त्वा शुक्लयेत् बलिं दद्यात्। ततोऽष्टोत्तरशतहोमं कृत्वा प्रत्याहुतिसम्यातं दद्यात्। होमाभावे द्विगुणजपः कार्य्यः। ततो दक्षिणां दत्त्वा अच्छिद्रावधारणं कुर्य्यात्। इति तन्त्रसारः॥ *॥ औषधपाकार्थयन्त्राणि यथा,—

"भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके।
कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते॥
भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते।
वालुकायन्त्रमेतद्धि यन्त्रतन्त्रबुधैः स्मृतम्॥"

इति वालुकायन्त्रम्॥

"निरङ्गमौषधं स्नूतं भूर्ज्जे तन्निर्गुणान्तरे।
रसपोटलिकां काष्ठे दृढं बद्ध्वा गुणेन हि॥
सन्धानपूर्णे कुम्भान्तः स्थापयेन्मन्त्रसंस्थितम्।
अधस्ताज्ज्वालयेदग्निं तत्तदुक्तक्रमेण हि।
दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि॥"

सन्धानं काञ्जिकादि। इति दोलायन्त्रम्॥ *॥

"सास्नुस्थालीमुखे बद्ध्वा वस्त्रे स्वेदं निधाय च।
पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम्॥"

इति स्वेदनयन्त्रम्॥

"अधःस्थाल्यां रसं क्षिप्त्वा निदध्यात्तन्मुखोपरि।
स्थालीमूर्द्धसुखीं सम्यक् निरुध्य मृदुमृत्सवा॥
ऊर्द्धस्थाल्यां जलं क्षिप्त्वा पुनरग्नारोप्य यत्नतः॥
अधस्ताज्ज्वालयेदग्निं यावत् प्रहरपञ्चकम्।
स्वाङ्गशीतं ततो यत्नादृग्रहीयादरसत्तमम्।
विद्याधराभिधं यन्त्रमेतत्तन्त्रज्ञैरुदाहृतम्॥"

इति विद्याधरयन्त्रम्॥

"वालुकासु समस्ताङ्गं गर्त्ते क्षारसान्विता।

दीप्तोपलैः मंडणुयादृयन्त्रं भूधरनामकम् ।"
इति भूधरयन्त्रम् ।
"यन्त्रं डमरुसंज्ञं स्यात्तत् स्याल्लोमुंडिते मुखे।"
इति डमरुयन्त्रम्। इति भावप्रकाशः। (तथाच।
"अन्तस्मृषा तु कर्तव्या गोस्तनाकारसन्निभा।
सैव छिद्रान्विता मध्ये गम्भीरामारसोचिता।"
इति अन्तस्मृषायन्त्रम्
"द्वौ भागौ तु सदुग्धस्य एकावस्त्रीकन्दत्तिका।
लोहकिट्टस्य भागैकं श्वेतपाषाणभागिकम्।
नरकेशसमं किंचित् छागीदुग्धेन पेषयेत्।
मांसद्वयं दृढं मर्द्य तेन मर्षां सुसम्पुटाम्।
शोषयित्वा रसं चिम्बा तत्कल्के: सन्धि लेपयेत्।
रौद्रमूषा समाख्याता सम्यक्पारदसाधिका।"
इति मूषायन्त्रम्। *।
"वालुकापूरितं भाण्डं तन्मध्ये सूतकं क्षिपेत्।
रसं मूषागतश्चैव भाण्डं सावेष्य रोधयेत्।
चिम्बा मृल्लवणैः सन्धिं पाचयेच्चुल्लिकाग्निना।
वालुकायन्त्रमेतद्धि योजयेद्रसकर्मणि।"
इति वालुकायन्त्रम्।
"तिर्यक्कण्ठं काचकुप्या गिलयेत् खल्वभाण्डके:।
तिर्यक्कृत्वा पचेत् भाण्डं वकयन्त्रमिति स्मृतम्।"
इति वकयन्त्रम्।
"ऊर्ध्वः संपुटाकारं तन्मध्ये रससंस्थितम्।
कवचीयन्त्रमेतद्धि रसादिद्रव्यसाधनम्।"
इति कवचीयन्त्रम्।*।
इति वैद्यकरसेन्द्रसारसंग्रहे जारणाद्यधिकारे।

चिकित्सोपयोग्यपरयन्त्रविवृतिर्यथा,—
"यन्त्रमूलमेकोत्तरमत्र दृष्टमेव प्रधानतमं यन्त्राणामवगच्छ। किं कारणम्। यस्माद्दृष्टादृते यन्त्राणामप्रवृत्तिरेव तदधीनत्वादृयन्त्रकर्मेणाम्। तत्र मनःशरीराबाधकराणि शल्यानि तेषामाहरणोपायो यन्त्राणि। तानि षट्प्रकाराणि। तद्यथा। स्वस्तिकयन्त्राणि। सन्दंशयन्त्राणि। तालयन्त्राणि। नाडीयन्त्राणि। शलाकायन्त्राणि। उपयन्त्राणि चेति।
तत्र चतुर्विंशतिः स्वस्तिकयन्त्राणि। द्वे सन्दंशयन्त्रे। द्वे एव तालयन्त्रे। विंशतिर्नाड्यः। अष्टाविंशतिः शलाकाः। पञ्चविंशतिरुपयन्त्राणि।
तानि प्रायशो लौहानि भवन्ति तत्प्रतिरूपकाणि वा तदलाभे। तत्र नानाप्रकाराणां बालानां मृगपक्षिणां सुखैर्भुक्तानि यन्त्राणां प्रायशः सदृशानि तस्मात् तत्प्रारूप्यादागमादुपदेशाद्दृष्टयन्त्रदर्शनाद्युक्तितश्च कारयेत्।
समाहितानि यन्त्राणि खरशस्त्रसुखानि च।
सुदृढानि सुरूपाणि सुग्रहाणि च कारयेत्।
तत्र स्वस्तिकयन्त्राण्यष्टादशाङ्गुलप्रमाणानि सिंहशार्दूलतरक्षुऋक्षदीपिमार्जारवृद्धगालमृगैर्वारककाककङ्कक्रररासभसंज्ञशल्यघातुलूकक्षिल्लिश्येनशुकौकभृङ्गराजाञ्जलिकर्णावभञ्जननन्दिमुखसुखानि मल्लराजतिभिः कौलेरवबडानि मूलेऽङ्गुलवृद्धोत्तरवारङ्गाण्यस्थिविनष्टशल्योद्धरणार्थमुपदिश्यन्ते।*।सनिग्रहोऽनिग्रहश्च सन्दंशौ षोडशाङ्गुलौ भवतस्त्वर्मांसशिराक्षायुगतशल्योद्धरणार्थमुपदिश्येते।
तालयन्त्रे द्वादशाङ्गुले मत्स्यतालुवदेकतालद्वितालके कर्णनासानाड्यौशल्यानामाहरणार्थम्।
नाडीयन्त्राण्यनेकप्रकाराण्यनेकप्रयोजनान्येकतोमुखान्युभयतोमुखानि च तानि स्रोतोगतशल्योद्धरणार्थं रोगदर्शनार्थमाचूषणार्थं क्रियासौकर्य्यार्थमिति तानि स्रोतोद्वारपरिणाहानि यथायोगपरिणाहदीर्घाणि च।
भगन्दरार्शोऽर्बुदव्रणवस्त्यश्मरीवस्तिमूत्रवृद्धिदकोदरधूमनिरुद्धप्रकाशसन्निरुद्धगुदयन्त्राण्यजाबुद्धदयन्त्राणि चोपरिष्टाद्वक्ष्यामः।
शलाकायन्त्राण्यपि नानाप्रकाराणि नानाप्रयोजनानि यथायोगपरिणाहदीर्घाणि च तेषां गण्डूपदशरपुङ्खसर्पफणवर्द्धिपत्रमुखे द्वे द्वे एषणघूर्णनचालनाहरणार्थमुपदिश्येते। मत्स्यरदनमात्रमुखे द्वे किंचिदानताग्रे स्रोतोगतशल्योद्धरणार्थम्। षट्कार्पासफलतोयीयाणि प्रमार्जनक्रियासु। त्रीणि दर्भाकृतीनि खल्लमुखानि व्रणौषधप्रक्षिधानार्थम्। त्रीण्यन्यानि जाम्बवदनानि त्रीण्यङ्कुशवदनानि षड्वाधिकर्मोन्मुखाभिप्रेतानि। नासार्बुदहरणार्थमेकं कोलास्थिदलमात्रमुखं खल्लतोत्पीडम्। अञ्जनार्थमेकं कलायपरिमण्डलमुभयतो मुकुलाग्रम्। मूत्रमार्गविशोधनार्थमेकं मालतीपुष्पदण्डाग्रप्रमाणपरिमण्डलमिति।
उपयन्त्राण्यपि रज्जुवेणिकापट्टचर्म्मान्तवल्कललतावल्कशालीलाग्र-सूत्र-पाक्षिपाद-तलाङ्गुलिजिह्वा-दन्तनखमुख-बालाश्चकटकग्राहाङ्गीवनप्रवाहणहर्षायस्कान्तमयानि चारायिभेषजानि चेति।
एतानि देहे सर्वस्मिन् देहस्यावयवे तथा।
सन्धौ कोष्ठे धमन्यां च यथायोगं प्रयोजयेत्॥
यन्त्रकर्म्माणि तु निर्घातनपूरणवमनघूर्णनचालनविवर्त्तनविवरणपीडनमार्गविशोधनविकर्षणाहरणाक्षनोन्नमनविनमनभञ्जनोन्मथनाक्षणेषणदारणच्छेदकरणप्रक्षालनप्रधमनप्रमार्जनानि चतुर्विंशतिः।
खलुद्या चापि विभजेद्यन्त्रकर्म्माणि बुद्धिमान्।
असंख्येयविकल्पत्वाच्छल्यानामिति निश्चयः॥
तत्रातिस्थूलमसारमतिदीर्घमतिह्रस्वमग्राह्यि विषमग्राह्यि वक्रं ग्रथिलमत्युन्नतं दृढकोलं दृढमुखं मृदुपाश्वमिति ह्याद्य यन्त्रदोषाः।
एतैर्दोषैर्विनिर्मुक्तं यन्त्रमष्टादशाङ्गुलम्।
प्रशस्तं भिषजा ज्ञेयं तद्धि कर्म्मसु योजयेत्॥
दृढं सिंहमुखाद्येषु गूढं कङ्कमुखादिभिः।
निर्हरेत्तु व्रणे: शल्यं ग्रस्तयुक्तियपेक्षया॥
विवर्तते साध्यवगाहते च
शल्यं निरस्योद्धरते च यस्मात्।
यन्त्रेष्वतः कङ्कमुखं प्रधानं
स्थानेषु सर्वेष्वविकारि चैव॥"
इति सुश्रुते सूत्रस्थाने सप्तमेऽध्याये।*।

गोलाध्यायोक्तयन्त्राणि यथा,—
"अथ यन्त्राध्यायो व्याख्यायते। तत्रादौ तदारम्भप्रयोजनमाह।
दिनगतकालावयवा ज्ञातुमशक्या यतो विना यन्त्रैः।
वक्ष्ये यन्त्राणि ततः स्फुटानि संक्षेपतः कतिचित्॥
गोलो नाड़ीवलयं यष्टिः शङ्कुर्घटी चक्रम्।
चापं तुर्यं फलकं धीरेकं पारमार्थिकं यन्त्रम्।"
"अथ प्रथमं गोलयन्त्रमाह।
अपहृतगरचिह्नं क्षितिजे धृत्वा कुजेन संसक्ते।
नाड़ीवृत्ते बिन्दुं कृत्वा धृत्वाथ जलसमं क्षितिजम्।
रविचिह्नस्य च्छाया पतति कुमध्ये यथा तथा विद्धृते।
उड्डुगोले कुजबिन्दोर्मध्ये नाड्यो द्वयाताः स्युः।"
"अथ नाड़ीवलयमाह।
अपहृते कुजलग्ने लग्नं चाधो खगोलनलिकान्तः।
भूस्थं ध्रुवयष्टिस्थं चक्रं धरया निजोदयैश्चाङ्कम्।
यष्टेर्यैर्भायासुदयैर्कं न्यस्य नाड़िका ज्ञेयाः।
दृक्छायासूर्य्यान्तरेऽथ लग्नं प्रभायाश्च।
केनचिदाधारेण ध्रुवाभिमुखकीलकेऽत्र धृते।
अथवा कीलच्छायातलमध्ये स्थूलता नाड्यः।"
घटिकायन्त्रलक्षणादिकं घटीयन्त्रग्रन्थे द्रष्टव्यम्।
"अथ शङ्कुमाह। [शङ्कुः।
समतलमस्तकपरिधिर्भमसिद्धो दन्तिदन्तजः।
तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम्।
इति शङ्कुयन्त्रम्।
अथ चक्रमाह।
चक्रं चक्रांशाङ्कं परिधौ ग्रथग्रन्थलादिकाधारम्।
धात्री चिभ आधारात् कल्प्या भार्द्धेऽत्र स्वार्द्धेऽत्र।
तन्मध्ये छिद्राक्षं चिम्बार्काभिमुखनेमिकं धार्यम्।
भूमेरुन्नतभागास्तच्चाक्षच्छायया भुक्तः।
ततृखार्द्धान्तश्च नता उन्नतलवसंगुणोद्धृतं द्युदलम्।
द्युदलोन्नतांशभक्तं नाड्यः स्थूलाः परैः प्रोक्ताः।"
"अथ वेधेन यद्ज्ञानमाह।
"नैचर्क्षपुष्यान्तिमवारुणान-
ऋक्षदयं नेमिगतं यथा स्यात्।
दूरेऽन्तरेऽक्ष्येषुभखेचरौ वा
तथात्र यन्त्रं सुधिया प्रधार्यम्॥
नेमिस्थदृश्याच्चगतं प्रपश्येत्
खेटञ्च धिष्ण्यस्य च योगतारां।
नेम्यक्षयोरप्ययुगोसु मध्ये
येऽंशाः स्थिता ध्रुवको युतस्तैः।
प्रत्यक् स्थिते मेऽथ पुरःस्थिते तै-
र्हीनो ध्रुवः स्यात् खचरस्य शुद्धम्॥"
"अथ चापं तुर्यगोलं चाह।
दलीकृतं चक्रमुशन्ति चापं
कोदण्डखण्डं खलु तुर्यगोलम्।"

"अथ पलकयन्त्रार्थमाह ।
इष्टघटेऽत्र स्फुटकाल उक्तः
सुखेन नान्येयैतितं मयातः ।
सन्नोलयुक्तैर्गणितस्य सारं
स्फुटं प्रवक्ष्ये पलकाख्ययन्त्रम् ।"
"इदानीं यन्त्रलक्षणमाह ।
कर्तव्यं चतुरस्रकं सुफलकं खाङ्गा-६० ङ्गुले-
र्विस्तृतं
विस्तारद्विगुणा-१८० यतं सुगव्यकेनायाममध्ये
तथा ।
आधारः शयङ्गलादिघटितः कार्या च
रेखा तत-
स्याधारादवलम्बसूत्रसहगौ सा लम्बरेखोच्यते ।
लम्बं नवत्य-९० ङ्गुलकैर्विभज्य
प्रत्यङ्गुलं तिर्यगतः प्रसार्य ।
सूत्राणि तत्रायतसञ्ज्ञरेखा
जीवाभिधानाः सुधिया विधेयाः ॥
आधारतोऽधः खगुणा-२० ङ्गुलेषु
न्यालम्बयोगे सुधिरच्च सूक्ष्मम् ।
इष्टप्रभाया सुधिरे शलाका
खेप्याख्यसंज्ञा खलु सा प्रकल्प्या ।
षष्ट्याङ्गुलश्यासमतच्च रन्ध्रात्
लात्वा सुवृत्तं परिधौ तदङ्कम् ।
षष्ट्या घटीनां भगणांश-३६० केच
प्रत्यंशकं चाम्बुपलेच दिग्भिः ॥
अग्रे सरन्ध्रा तनुपट्टिकैका
षष्ट्याङ्गुला दीर्घतया तथाङ्का ।"
"इदानीं यन्त्रोपकरणमाह ।
यत् खल्वकैः स्थूलधरं पलात्मं
तन्नोक्त-१६ वृत् स्वाधरग्निन्नीह ।"
"इदानीं यष्टिसाधनमाह ।
वेदाः ४ भवाः ११ शैलसुखो१७ धृतिश्च१८
विश्वे १३ च बाणाः५ पलकर्णनिघ्नाः ।
अर्कोद्धृताः स्युः क्रमशः खदेशे
राशङ्गुलभ्यानि हि खल्वकानि ।
तैः क्रान्तिपाताद्धरवेर्भुजज्या
षष्ट्याहृताच्चाग्रवशेन युक्ता ।
दिग्घ्नी लताप्ता भवतीह यष्टिः
सा पट्टिकायां सुधिरात् प्रदेया ।"
"इदानीं यष्टिप्रयोजनमाह ।
धार्यं तथा पलकयन्त्रमिदं यथैव
तत्पार्श्वयोर्लगति तुल्यमितस्य तैलः ।
छायाच्छला स्पृशति तत्परिधौ यमांशं
तत्रांशके मतिमतः तरणिः प्रकल्प्यः ॥
अग्रप्रोतां रविलवगतां पट्टिकां न्यस्य तस्माद्-
यष्टेरग्रादुपरि पलकेऽधश्च गोलक्रमेण ।
वज्राद्यैश्चरदलगुडस्तच्च या न्या तयाच्च
छिन्ने सूत्रे तलघटिकाः स्युर्नता यन्मकाग्राः ॥"
"अथ यष्टियन्त्रमाह ।
छिद्राविष्कम्भार्द्धं वृत्तं लात्वा दिगङ्कितं तत्र ।
दत्त्वाग्रां प्राक् पश्चाद्युग्याङ्कतच्च तन्मध्ये ॥
तत्परिधौ षष्ट्यङ्गं यष्टिनेष्टद्युतिस्थतः कैन्द्रे ।
क्षिप्ते

यन्त्रगोलः, पुं, कलायविशेषः। इति शब्दचन्द्रिका॥ मटर इति भाषा॥

यन्त्रणं, क्ली, (यन्त्र+ल्युट्।) रज्जुनम्। बन्धनम्। (यथा, सुश्रुते उत्तरतन्त्रे ४२ अध्याये।
"रक्तक्षयाद्दोषनाभिस्तथैवाहारयन्त्रणात्।
व्रणितस्य भवेच्छोषः स चासाध्यतमस्ततः॥")

यन्त्रणा, स्त्री, (यन्त्रि+"ण्यासश्रन्थो युच्।" ३। ३। १०७। इति युच्। टाप्।) पीड़ा। यथा, नैषधे। ४। १०।
"मदनतापभरेण विदीर्य नो
यदुदपाति हृदा दमनस्रुतः।
निविड़पीनकुचद्वयबन्धना
तमपराधमधात् प्रतिबध्नती॥"
(पीड़ाशब्देऽस्या विशेषो विज्ञेयः॥)

यन्त्रपेषणी, स्त्री, (पिष्यतेऽनयेति। पिष्+करणे ल्युट्। ङीप्। यन्त्रमेव पेषणी।) पेषणार्थयन्त्रम्। इति जटाधरः॥ याँता इति भाषा॥

यन्त्रिका, स्त्री, (यन्त्रयति क्षतकौतुकां पीड़यतीति। यन्त्रि+खुल्। टापि अत इत्वम्।) पत्न्याः कनिष्ठा भगिनी। यथा, हैमचन्द्रे।
"कनिष्ठा श्यालिका हाली यन्त्रिका केशिकुण्डिका॥"

यन्त्रितः, त्रि, (यन्त्रि+क्तः।) बद्धः। इति धरणिः॥ (यथा, देवीभागवते। ३। १७। १७।
"ते श्रुत्वा जगदुर्धेनुं हटादाकृष्य यन्त्रिताम्।
वेगमाना सुचिं प्राह सुरभिः साश्रुलोचना॥")

यन्त्री, [न्] त्रि. यन्त्रविशिष्टः। यन्त्रशब्दादस्यर्थे इनिप्रत्ययेन निष्पन्नः॥ (यन्त्रयति बध्नातीति। यन्त्रि बन्धने+णिनिः। बन्धनकारकः। यथा, रामायणे। १। १। ७६।
"अक्लेशोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात्।
सम्प्रेक्ष्य राक्षसान् वीरो यन्त्रिणश्चान् यदृच्छया॥")

यभ, औ मैथुने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) औ, अयाभीत्। यभति युवा। इति दुर्गादासः॥

यम, ञौ उ विरतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्। क्रावेट्।) औ, यन्ता। उ, यमित्वा यन्त्वा। विरतिर्निवृत्तिः। यच्छति पापात् साधुः। इति दुर्गादासः॥

यम, क मि परिवेषणे। तद्भावे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) कमि, यमयति यामयति। परिवेषणं अन्नादेरर्पणम्। वेष्टनमित्येके। विषयव्यापारेष्वस्य रूपमिति रमानाथः। केचित्तु परिवेषण एवायं मानुबन्धः। यमयत्यन्नं द्विजाय यज्ञी। अन्यत्र नियामयति संयामयति इत्याहुः। अन्ये तु अपरिवेषण एवायं मानुबन्धः। 'नियमयति विमार्गप्रस्थितानान्तु दण्डम्।' इति श्राकुन्तले। परिवेषणे तु यामयत्यन्नं द्विजाय यज्ञी इत्याहुः। तेन उभयस्य प्रामाणिकत्वादुभयत्र विकल्पज्ञापनार्थश्चानुबन्धः कृतः। इति दुर्गादासः॥

यमः, पुं, (यमयति नियमयति जीवानां फलाफलमिति। यम्+अच्।) दक्षिणदिक्पालः। तत्पर्य्यायः। धर्म्मराजः २ पितृपतिः ३ समवर्त्ती ४ परेतराट् ५ कृतान्तः ६ यमुनाभ्राता ७ श्रमनः ८ यमराट् ९ कालः १० दण्डधरः ११ श्राद्धदेवः १२ वैवस्वतः १३ अन्तकः १४। इत्यमरः। १।१।६१॥ धर्म्मः ... धर्म्मराट् १६ जीवितेशः १७ महिषध्वजः १८ औड़म्बरः १९ दण्डधरः २० कौणाशः २१ दभ्रः २२ महिषवाहनः २३ शौर्णपादः २४ भीमशासनः २५ कट्टः २६ हरिः २७। इति शब्दरत्नावली॥ कर्म्मकरः २८। इति जटाधरः॥ *॥ चतुर्दशयमतर्पणं यथा,—
"यां काञ्चित् सरितं प्राप्य स्नायते चतुर्दशीम्।
यमुनायां विशेषेण नियतस्तर्पयेदृषमान्॥
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च॥
औड़म्बराय दध्नाय नीलाय परमेष्ठिने।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः॥
एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन् दद्यात् जलाञ्जलीन्।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति॥"
इति तिथ्यादितत्त्वधृतभविष्यपुराणवचनम्॥ तस्योत्पत्तिर्यथा,—
"संज्ञा च रविणा दृष्टा निमीलयति लोचने।
यतस्ततः सरोषोऽर्कः संज्ञां निष्टरमब्रवीत्॥
मयि दृष्टे सदा यस्मात् कुरुषे नेत्रसंयमम्।
तस्मात्त्वन्नियमे मूढे! प्रजासंयमनं यमम्॥"
मार्कण्डेय उवाच।
"ततस्तस्यास्तु संज्ञायै भर्त्तृशापेन तेन वै।
यमश्च यमुना चेयं प्रख्याता सुमहानदी॥"
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे ७७ अः॥ पुण्यात्मनां सम्बन्धे तस्य रूपं यथा,—
"तानागतांस्ततो दृष्ट्वा नरान् धर्म्मपरायणान्।
भास्करिः प्रीतिमाधाय स्वयं नारायणो भवेत्॥
चतुर्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः।
शङ्खचक्रगदापद्मधारी गरुड़वाहनः॥
स्वर्णयज्ञोपवीती च क्षौमचारुतरानतः।
किरीटी कुण्डली चैव वनमालाविभूषितः॥"
पापिनां सम्बन्धे तस्य रूपं यथा,—
"चिपिटदृग्योननदीनाड्यो वापीसदृग्गलेक्षणः।
धूम्रवर्णो महातेजाः प्रलयाम्भोधरस्वनिः॥
लम्बाधिराजजोभा च ज्वलदग्निमुखायतः।
नासारन्ध्रस्फुरच्छ्वासखनैर्व्याप्तमहादिशः॥
सुदीर्घदशनश्रेणिः सर्पोपमनखावलिः।
प्रचण्डमहिषारूढः संदष्टदशनच्छदः॥
दक्षहस्तस्थदण्डेनावासा भ्रकुटीकुटिलाननः॥"
इति पाद्मे क्रियायोगसारे २२ अध्यायः।

अस्यानधिकारो यथा,—
"प्रोवाच धर्म्मं यदहं ब्रवीमि
कार्य्यं त्वया तत् खलु धर्म्मराज!॥
ब्रह्मोवाच।
ये भक्ताः पुष्करीकाक्षे कर्म्मणा मनसा गिरा।
स्वकर्म्मनिरता दान्ता न नियम्या हि ते त्वया॥
क्षणः संपूजितो यैस्तु यैः क्षणः वसुपासितः।
यैश्च नित्यं स्तुतः क्षणो न ते त्वद्विषयोपगाः॥
नमः क्षणाच्युतानन्त वासुदेवेत्युदीरितम्।
यैर्भावभावितो धर्म्म! न ते त्वद्विषयोपगाः॥
दानं दत्तद्विजेरुक्तमच्युत! प्रीयतामिति।
श्रद्धापुरःसरैर्धर्म्म! न ते त्वद्विषयोपगाः॥
उत्तिष्ठद्भिः सपाङ्क्ष्य व्रजद्भिश्च जनार्दन।
यैः स्मृतस्तु सदा धर्म्म! न ते त्वद्विषयोपगाः॥
सर्व्वावासासु ये क्षणं संस्मरन्त्युच्चरन्ति च।
तद्भावभाविनो ये च न ते त्वद्विषयोपगाः॥
स एव धाता सर्व्वस्य तन्नियोगकरा वयम्।
यमसंयमने व्यक्तः सोऽस्मत्संयमको हरिः॥"
इति वह्निपुराणे नरसिंहप्रादुर्भावाध्यायः॥
अपि च।
ब्राह्मण उवाच।
"यत् कृत्वा सुमहत् पुण्यं धर्म्माधर्म्मविनिश्चये।
प्रमाणं त्वं हि लोकानां फलं मे ब्रूहि तद्यम!॥"
यम उवाच।
यमो यम इति श्रुत्वा दृष्ट्वा दुष्कृतिजं जनः।
आत्मा च यमितो येन न तस्यैव यमः स्मृतः॥
आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवम्।
ध्यानं प्रसादो माधुर्य्यं सन्तोषश्च यमा दश॥
यमैश्च नियमैश्चैव यः करोत्यात्मसंयमम्।
न चाद्वा तु मां याति परं ब्रह्म सनातनम्॥"
इति तत्रैव यमशूर्म्मिलोपाख्यानम्॥ *॥
सावित्रीकृतं यमाष्टकं स्तोत्रं यथा,—
सावित्र्युवाच।
"तपसा धर्म्ममाराध्य पुष्करे भास्करः पुरा।
धर्म्मांशं यं सुतं प्राप धर्म्मराजं नमाम्यहम्॥१॥
समता सर्व्वभूतेषु यस्य सर्व्वस्य साक्षिणः।
अतो यन्नाम शमनमिति तं प्रणमाम्यहम्॥२॥
येनान्तश्च कृतो विश्वे सर्व्वेषां जीविनां परम्।
कर्म्मानुरूपफलदे च तं कृतान्तं नमाम्यहम्॥३॥
बिभर्त्ति दण्डं दण्डाय पापिनां मुक्तिहेतवे।
नमामि तं दण्डधरं यः पाता सर्व्वदेहिनाम्॥४॥
विश्वे च कलयत्येव यः सर्व्वायुष्मन्ततम्।
अतीव दुर्निवार्य्यश्च तं कालं प्रणमाम्यहम्॥५॥
तपस्वी वैष्णवो धर्म्मी संयमी विजितेन्द्रियः।
जीवानां कर्म्मफलदस्तं यमं प्रणमाम्यहम्॥६॥
स्वात्मारामश्च सर्व्वज्ञो मित्रः पद्मसुतस्य भवे।
पापिनां क्लेशदो यस्तं पुण्यमित्रं नमाम्यहम्॥७॥
यज्जन्म ब्रह्मणो वंशे ज्ञानार्थं ब्रह्मतेजसा।
यो ध्यायति परं ब्रह्म ब्रह्मवंशं नमाम्यहम्॥८॥
इत्युक्त्वा सा च सावित्री प्रणनाम यमं सुतं।
यमस्तां विष्णुभजनं कर्म्मपाकमुवाच ह॥

इदं यमाष्टकं नित्यं प्रातरुत्थाय यः पठेत्।
यमात्तस्य भयं नास्ति सर्व्वपापात् प्रमुच्यते॥
महापापी यदि पठेत् नित्यं भक्त्या च नारद!।
यमः करोति तं शुद्धं कायव्यूहेन निश्चितम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २६ अध्यायः॥*॥
पारिभाषिकयमदण्डा यथा,—
"कार्त्तिकस्य दिनान्यष्टावाग्रहायणस्य च।
यमस्य दण्डना एते लङ्घाहारी न जीवति॥"
इति वैद्यकम्॥*॥
("पङ्कमत्स्यवसातैलघृतगन्धांश्च ये नराः।
मद्यगन्धांश्च ये वान्ति गन्तारस्ते यमालयम्॥
यूका ललाटमायान्ति बलिं नाश्नन्ति वायसाः।
येषां वापि रतिर्नास्ति यातारस्ते यमालयम्॥"
इति सुश्रुते शारीरस्थाने ३१ अध्यायः॥
अस्य ग्राम्यवृत्तान्तं ग्राम्यान्तवृत्तान्तञ्च यमराजशब्दे द्रष्टव्यम्॥*॥) शरीरसाधनापेक्षनित्यकर्म्म। इत्यमरः। २। ७। ४६॥
"उपायान्तरनिरपेक्षं शरीरमात्रसाध्यं नित्यं यावज्जीवमवश्यकार्य्यं यत्कर्म्म सत्यास्तेयादि तद्यमः। यमेरल्।
'अहिंसा सत्यवचनं ब्रह्मचर्य्यमकल्कता।
अस्तेयमिति पञ्चैते यमाश्चैव व्रतानि च॥'
इति मनुः।" इति तट्टीकायां भरतः॥
स च अष्टाङ्गयोगान्तर्गताङ्गविशेषः। स तु दशविधो यथा,—
"ब्रह्मचर्य्यं दया क्षान्तिर्ध्यानं सत्यमकल्कता।
अहिंसास्तेयमाधुर्य्यं दमश्चेति यमाः स्मृताः॥"
इति गारुड़े १०६ अध्यायः॥*॥
स च पञ्चविधो यथा,—
"अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यापरिग्रहौ।
यमाः पञ्चाथ नियमाः शौचं द्विविधमीरितम्॥"
इति तत्रैव २३० अध्यायः॥
"अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः।"
इति पातञ्जले साधनपादे ३०॥ यच्छति नियच्छति इन्द्रियग्राममनेनेति। यम+घञ्।) संयमः॥ यथा, अमरः। ३। २। १८।
"वियामो वियमो यामो यमः संयामसंयमौ॥"
काकः। अग्निः। इति मेदिनी। मे, २२॥
(विष्णुः। यथा, महाभारते। १३। १४८। ३०।
"अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः॥"
"अन्तयेच्छतीति यमः।" इति तद्भाष्ये शङ्करः॥)

यमः, त्रि, (यच्छति एकत्र गर्भाशये नियतो भवतीति। यम+अच्।) यमजः। इति मेदिनी। मे, २३॥ तयोर्ज्येष्ठत्वनिरूपणं यथा,
"बहिर्वेणुं चारित्राद्ययमयोः पूर्व्वजन्मतः।
यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम्।
सन्तानः पितरश्चैव तस्मिन् ज्येष्ठं प्रतिष्ठितम्॥
जन्मप्राथम्यात् ज्येष्ठं यमयोः न तु निषेकप्राथम्यात् जन्मप्राथम्यसन्देहे सुखदर्शनप्राथम्यात्।" इति उद्वाहतत्त्वम्॥ (यथा,—
"नीलेऽन्तर्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ।
यमाविति अभिधीयेते धर्म्मेतरपुरःसरौ॥"
इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये॥
अनयोरेकस्य दृढिरपरस्य क्षीणताकथनमित्यत आह।
"कर्म्मात्मकत्वादिषमाग्निभेदात्
शुक्रास्थ्नं दृढिमुपैति कुक्षौ।
एकोऽधिको न्यूनतरो द्वितीय
एवं यमेऽप्यभ्यधिको विशेषः॥"
इति चरके शारीरस्थाने द्वितीयेऽध्याये॥)

यमकं, क्ली, (यमं युग्मभावं कायति प्राप्नोतीति। कै+कः।) शब्दालङ्कारः। तस्य लक्षणादि यथा,—
"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते॥
अत्र द्वयोरपि पदयोः क्वचित् सार्थकत्वं क्वचिन्निरर्थकत्वं क्वचिदेकस्य सार्थकत्वमपरस्य निरर्थकत्वमत उक्तं सत्यर्थे इति। तेनैव क्रमेणेति दमो मोद इत्यादेर्विभक्तिविषयत्वं सूचितम्। एतच्च पदपादार्द्धश्लोकावृत्तित्वेन पादाद्यावृत्तेश्चानेकविषयतया प्रभूततममेदं दिङ्मात्रमुदाह्रियते।
'नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलीकृयत्
सपुरभिं सुरभिं सुमनोभरैः॥'
इति माघे। ६। २॥
अत्र पदावृत्तिः पलाशपलाशेति सुरभिं सुरभिमित्यत्र च द्वयोः सार्थकत्वम्। लतान्तलतान्तेत्यत्र प्रथमस्य निरर्थकत्वं परागपरागेत्यत्र द्वितीयस्य एवमन्यत्राप्युदाहार्य्यम्। यमकादौ भवेदेवं श्लोकेऽवोलरोस्तथा। इत्युक्तनयात्। सुजलतां जड़तामबलाजन इत्यत्र न यमकत्वहानिः।" इति साहित्यदर्पणे दशमः परिच्छेदः। १०॥ (यमकालङ्कारस्तु युग्मपादयमकायुग्मपादयमकाद्यन्तयमक-पादमध्ययमक-पादान्तयमक-पादादियमक-पादादिमध्ययमक-पादाद्यन्तयमक-मध्यान्तयमक-काञ्चीयमकगर्भयमकचक्रवालयमकपुष्पयमकमहायमकमिथुनयमकदलयमकविपर्ययमकसमुद्गयमकसर्व्वयमक यमकावलीभेदात् बहुविधः। तत्तल्लक्षणोदाहरणादिकं भट्टिकाव्येदशमसर्गे यमकचक्रे काव्यादर्शे दशमपरिच्छेदे च द्रष्टव्यम्॥ यच्छविशेषः। यथा, महाभारते। ४। ५५। ४२।
"ततो विराटस्य सुतः सव्यमाहत्य वाजिनः।
यमकं मण्डलं कृत्वा तान् योधान् प्रत्यवारयत्॥"
"यमकं प्रचूर्णां निरोधकं मण्डलं कृत्वा।" इति तट्टीकायां नीलकण्ठः॥ षड्ग्रम्। यथा, महाभारते। ३। १६। ८।
"मण्डलानि विचित्राणि यमकानीतराणि च।
सव्यानि च विचित्राणि दक्षिणानि च सर्व्वशः॥"
"यमकानि षड्ग्राणि।" इति तट्टीकायां नीलकण्ठः॥) त्रि, यमजः। इति मेदिनी। के, १४२॥

यमकः, पुं, (यम+भावे घञ्। स्वार्थे कन्।) संयमः। इति मेदिनी। के, १४९॥
यमकालिन्दी, स्त्री, (यमः कालिन्दी च सुतः सुता च यस्याः।) संज्ञा। सा च सूर्य्यपत्नी। इति शब्दरत्नावली॥
यमकीटः, पुं, (यमसूचकः कीटः।) घुघूरनामा कीटः। इति चिकाण्डशेषः॥
यमकोटिः, स्त्री, लङ्कायाः पूर्व्वं पृथिव्याश्चतुर्थभागे देशविशेषः। यथा,—
"लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च।
अधस्तनः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये बड़वानलञ्च।
कुरुक्षपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति॥"
इति सिद्धान्तशिरोमणिः॥
यमघण्टः, पुं, (यमं घण्टयतीति। घण्ट+अण्।) योगविशेषः। यथा,—
"हे मघापूर्व्वफल्गुन्यौ पुष्याश्लेषा च चन्द्रयोः।
ज्येष्ठानुराधा भरणी चाश्विनी कुजवासरे॥
हस्तार्द्रा चन्द्रजे मूला पूर्व्वाषाढ़ा च रेवती।
जीवे श्रुत्तरभाद्रञ्च शुक्राहे स्वातिरोहिणी।
शनिवारे शतभिषा श्रवणा यमघण्टकः॥"
इति सारसंग्रहः॥
अपि च।
"घण्टोल्लङ्घर्क्षयुक्ते स्वगृहपतिदिने सौम्यवारेऽर्य्यमापि।"
अस्य वर्ज्यकालनिर्णयो यथा,—
"यमघण्टे त्यजेदाद्यौ मध्यौ द्वादश नाड़िकाः।
अन्त्येषां पापयोगानां मध्याह्नात् परतः शुभम्॥"
अस्य दोषा यथा,—
"अभिजातो न जीवेत यदि शुक्रसमो भवेत्।
विवाहे विधवा नारी यात्रायां मरणं भवेत्॥
निष्फलं क्षविवाणिज्यं विद्यारम्भे च मूर्खता।
गृहप्रवेशे भङ्गः स्याच्चूड़ायां मरणं ध्रुवम्॥
ऋणदाने फलं नास्ति व्रतदाने च निष्फले।
शुभकर्म्माणि सर्व्वाणि नैव कुर्य्यादिचक्षणः॥"
इति ज्योतिस्तत्त्वम्॥
रविवारे १०। ११। सोमवारे ८। ९। मङ्गलवारे १७। १८। १। २। बुधवारे १३। ६। वृहस्पतिवारे १६। २०। २६। २७। शुक्रवारे १५। ४। शनिवारे २४। २२। इति यमघण्टयोगः॥

यमजः, त्रि, (यमो यमकः सन् जायते इति। जन्+डः।) एककालीनैकगर्भजातसन्तानद्वयम्। यथा, मेदिनी। मे, २३।
"यमोऽन्यलिङ्गो यमजे ना काके ग्रामणे गुणौ॥"
(यथा च कथासरित्सागरे। २३। ६२।
"ग्रान्तिकरोऽपि पुरोधा आहूतश्चान्तिसोममपरञ्च।
वैश्वानरमर्पितवान् पिङ्गलिकापुत्रकौ यमजौ।")

अस्य ज्येष्ठत्वं यमशब्दे दृश्यम्। (अश्वविशेषे, पुं। यथा, अश्ववैद्यके। ३। १५२।
"एकेनाक्ष्णा हीनेन भिन्नेन च विशेषतः।
यमलं वाजिनं विन्द्यात् वामनं वामनाङ्गनिम्।")

यमदग्निः, पुं, (जमन् हुतभक्षणशीलः प्रज्वलितो ऽग्निरिव। दृषोदरादित्वात् जस्य यः।) जमदग्निमुनिः। स तु परशुरामपिता। इति भरतदिरूपकोषः। (विवृतिस्तु जमदग्निशब्दे द्रष्टव्या।)

यमदूतः, पुं, (यमस्य दूतः।) यमस्य चरः। यथा,—
"यमदूतपिशाचाद्यैर्यत् परासुरुपास्यते।
सद्भिरौषधवीर्य्याणि तस्मात्तं परिवर्जयेत्।"
इति वाग्भटे शरीरस्थाने पञ्चमेऽध्याये।)

धर्म्मस्य उवाच।
"के यूयं विकृताकाराः पाशमुद्गरपाणयः।
दंष्ट्राकरालवदना अङ्गारसदृशप्रभाः॥
यूयं सर्व्वे महावीराः त्वत्तोऽवकलोचनाः।
क्षता तथापि युष्माकमियं केन सुदुर्गतिः॥"

यमदूता ऊचुः।
यमदूता वयं सर्व्वे यमाज्ञाकारिणः सदा।
त्वदृक्षोऽयं द्विजाक्षाकं सुमहान् कश्मलोदयः॥"
इति पद्मपुराणे क्रियायोगसारे ६ अध्यायः॥

यमदूतकः, पुं, (यमस्य दूत इवेति कन्।) काकः। इति शब्दरत्नावली। (यमदूत+स्वार्थे कन्।) यमदूतश्च।

यमदूतिका, स्त्री, (यमस्य दूतिकेव।) तिन्तिड़ीवृक्षः। (यथा,—
"जीवन्तं जीवनं हन्ति प्राणान् हन्ति समीरणः।
किमाश्चर्य्यं चारभूमौ प्राणदा यमदूतिका॥"
हलायुधः।)

यमदेवता, स्त्री, (यमो देवता अधिष्ठात्री यस्याः।) भरणीनक्षत्रम्। इति हेमचन्द्रः। २। २२॥

यमदमः, पुं, (यम इव भयावहो दमः।) श्लाघालिवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्य श्लाघालिशब्दे ज्ञातव्यम्।)

यमद्वितीया, स्त्री, (यमप्रिया द्वितीया इति मध्यपदलोपिकर्म्मधारयः।) कार्त्तिकशुक्लद्वितीया। भ्रातृद्वितीया इति ख्याता। तत्तुल्यं यथा। लिङ्गपुराणे।
"कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम्।
या न कुर्य्याद्विशङ्कन्ति भ्रातरः सप्तजन्मनि॥"
तस्या इति श्लेषः। महाभारते।
"कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर!।
यमो यमुनया पूर्व्वं भोजितः स्वयदे स्वयम्।
तस्माद्विजयदे पार्थ! न भोक्तव्यमतो बुधैः॥
यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम्।
दानानि च प्रदेयानि भगिनीभ्यो विशेषतः॥"
तथा।
"यमश्च चित्रगुप्तश्च यमदूताश्च पूजयेत्।
अर्घ्यञ्चात्र प्रदातव्यो यमाय सहजद्वये॥"
सहजद्वयेभगिनीभ्राद्भिः। अर्घ्यमन्त्रः।
"एह्येहि मार्त्तण्डज पाशहस्त
यमान्तकालोकधरामरेश।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते॥
धर्म्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्र नमोऽस्तु ते॥"
यमुनाञ्च संपूज्य नमस्कुर्य्यात्।
"यमस्वसर्नमस्तेऽस्तु यमुने लोकपूजिते।
वरदा भव मे नित्यं सूर्य्यपुत्रि नमोऽस्तु ते॥"
अन्नं दत्त्वा पठेत्।
"भ्रातस्त्वयानुज्ञाताहं सुहृच्च भक्तमिदं शुभम्।
प्रीतये यमराजस्य यमुनायाः विशेषतः॥"
ज्येष्ठा चेत् तदाग्रजाताहमिति वदेत्। अत्र भोक्तव्यं पुष्टिवर्द्धनं इति विधिसमभिव्याहृतफलश्रुत्या भोजनक्रियमस्य प्राधान्यात्तस्य मुख्यकालोऽपराह्णविभक्तदिनपञ्चमांशो ग्राह्यः। यथा दक्षः।
"पञ्चमे च तथा भागे संविभागो यथार्हतः।
पितृदेवसमर्त्यानां कीटानाञ्चोपदिश्यते॥
संविभागं ततः कृत्वा यद्दत्तः प्रेतसङ्गभवेत्।
इतिहासपुराणाद्यैः यच्च सप्तमं नयेत्।"
संविभागो विभज्यान्नस्य प्रतिपादनम्। देवोऽत्र वैश्वदेवसम्बन्धी। पञ्चमांशलाभे तु।
"न मुञ्जीतोद्धृतक्लेदं नातिसौहित्यमाचरेत्।
नातिप्रगे नातिसायं नातिसन्ध्यासमीपतः॥"
इति मनूक्तपर्य्युदस्तसूर्य्योदस्तेतरकालोऽपि ग्राह्यः। सौहित्यं तृप्तिः। अत्र भोजनस्य रागप्राप्तत्वेऽपि तत्कालस्य।
"मुनिभिर्दिवसं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम्।
अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः॥"
इति कात्यायनीयेन नियमितत्वाद्भोजनकालस्य वैधत्वेन ग्राह्यीयत्वात् न सामान्यग्राह्यप्राप्युपजीविपर्य्युदासासङ्गतिः। अज्ञानाध्ययनं भ्रान्तानाम्। प्रेतपक्षोत्तरद्वितीयायां तन्निषेधात्। यथा च राजमार्त्तण्डे।
"प्रेतो यै चा द्वितीयाक्षाः प्रेतपक्षे गते तु या।
या तु कोजागरे याते चैत्र्याश्वयुजोरपि च।
चातुर्मास्ये मघाप्रे च द्वितीया या भवेत्तिथिः।
परास्तेताखनध्यायः पुराणे परिकीर्त्तितः॥"
ज्योतिषे। तथा यमद्वितीयायां यात्रायां मरणं भवेत्। इति तिथ्यादितत्त्वम्॥*॥ अस्यां व्रतविधानं यथा,—
नारद उवाच।
"भगवन्! प्रष्टुमिच्छामि त्वामहं विनयान्वितः।
तद्व्रतं ब्रूहि मे स्वामिन्! श्रुत्वा येन न पश्यति।
अल्पदीर्घं महत्पुण्यं शोभनं व्रतमुत्तमम्।
प्रसादं कुरु मे स्वामिन्! यथाहं तत् करोमि भोः॥

ब्रह्मोवाच।
यदि वेच्छसि विप्रेन्द्र व्रतानां व्रतमुत्तमम्।
व्रतं यमद्वितीयाख्यं शृणु त्वं श्रुतुवारकम्॥
कार्त्तिके मासि शुक्लायां द्वितीयायां सुनीश्वर!।
कर्त्तव्यं तद्विधानेन सूपश्रुत्यनिवारणम्॥
ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेदात्मनो हितम्।
प्रातः स्नात्वा द्विजः स्नानं दन्तधावनपूर्व्वकम्॥
ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः।
कृतनित्यक्रियो हृष्टः कुण्डलाङ्गदभूषितः॥
विधिं विष्णुञ्च रुद्रञ्च संस्मार्य्यौड्डमरे शुभे।
पद्मं सम्पदलं कृत्वा पूजयेत् सुसमाहितः॥
चन्दनागुरुकर्पूरकुङ्कुमैर्द्विजसत्तम!।
पुष्पैर्धूपैश्च नैवेद्यैर्नारिकेलादिभिः फलैः॥
सरस्वतीञ्च वरदां वीणापुस्तकधारिणीम्।
ध्यायेत् शुक्लाम्बरधरां हंसवाहनसंस्थिताम्॥
ततो मृत्युविनाशार्थं सालङ्कारां पयस्विनीम्।
विप्राय वेदविदुषे गाञ्च दद्यात् सवत्सकाम्॥
अपमृत्युविनाशाय संसाराम्बुतारिकाम्।
विप्र तुभ्यमिमां रौद्रीं धेनुं सम्प्रददे कृतम्॥
इति वाक्यविचारेण धेनुं दद्याद्विजातये।
कुलीनाय सुशान्ताय रोगहीनद्विजाय वै॥
तदभावे चोदकुम्भं सवस्त्रं सहिरण्यकम्।
औडुम्बरविधानेन सम्प्रदद्याद्विजातये॥
तस्याप्यलाभे विप्रेन्द्र! विप्राय सदुपानहौ।
दद्यात् कार्त्तिकशुक्लायां द्वितीयायां विशेषतः॥
भ्रातिश्रेष्ठान् तथा वृद्धान् संपूज्य चाभिवादयेत्।
नारिकेलादिदानेन तोषयेत् स्वजनानपि॥
ततः सोदरसम्पन्ना भगिनी याभवन्मुने!।
तस्या गृहं समागत्य श्रद्धानोऽभिराजयेत्॥
भद्रे भगिनि! शुभगे त्वद्विधूसरशीरुहे।
श्रेयसेऽत्र नमस्कर्त्तुमागतोऽहं तवालयम्॥
इति श्रुत्वा भगिन्यादिः सोदरं विनयान्वितम्।
दृष्ट्वाचक्षेततत्तस्य पूजनं क्रियते महत्॥
अद्य भ्रातृमती भ्रातस्त्वं नो वयसि बान्धवः।
भोक्तव्यं भोज्य मन्नेह त्वायुषे कुलदीपक!॥
कार्त्तिके शुक्लपक्षस्य द्वितीयायां सहोदरः।
यमो यमुनया पूर्व्वं भोजितः स्वयदेऽर्चितः।
अस्मिन् दिने यमेनापि पूजिता भगिनी शुभा॥
स्वसुर्गेहे वसन्ति यो न भुङ्क्ते
यमद्वितीयादिनमेव लब्ध्वा।
तं पापिनं सर्व्वसुराः प्रबुध्य
संसारमार्गे रटयन्ति विप्र!॥
तस्माद्भ्राता स्वसुर्गेहे भोक्तव्यं माघि कार्त्तिके।
शुक्लायाञ्च द्वितीयायां सर्व्वैश्वर्य्याय भो द्विज!॥
वर्षे वर्षे च कर्त्तव्यं यशसे चायुषे श्रिये।
ततः सम्पूज्य सुमते भगिन्यै सुविधानतः॥
स्वर्णालङ्कारवस्त्रादिदानसत्कारमादरात्।
प्रदद्यान्मुनिशार्दूल प्रश्रयावनतः सुधीः॥
स आशीर्वं प्रयुञ्जीत्या नमस्कृत्य क्षमापयेत्।
सर्व्वा भगिन्यः सन्तोष्या ज्येष्ठानुक्रमशस्तदा॥
वस्त्रान्नपानसत्कारैर्भोजनैः पुष्टिवर्द्धनैः।
करोत्येवं नरो विद्वान्न याति यमयातनाम्॥

अपनेतुं न चाप्नोति सत्यं सत्यं हि नान्यथा ॥
येभ्यगिन्यः सुवासिन्यो वस्त्रालङ्कारतोषिताः ।
न तेषां वत्सरं यावत् कलहो न रिपोर्भयम् ॥
व्रतस्यास्य प्रसादेन भूताः प्रेताश्च राक्षसाः ।
दूरादेव पलायन्ते धर्म्मराजेन ताडिताः ॥
यो देवो महिषारूढो दण्डमुद्गरधारकः ।
वेष्टितः किङ्करैर्दण्डैस्तस्मै कालात्मने नमः ॥
इत्थं त्वं द्विजशार्दूल ! कुरुष्व तद्व्रतं शुभम् ।
रम्यं यमद्वितीयाख्यमपमृत्युनिवारणम् ॥
व्रतस्यास्य प्रभावेन पुत्रपौत्रसमन्वितः ।
सत्यं वदामि ते विप्र ! गृहस्थः स्यात् सदैव हि ॥
गार्हस्थ्येन समो धर्म्मो न भूतो न भविष्यति ।
सन्देहोऽत्र न कर्त्तव्य इह लोके परत्र च ॥
ये वै यमद्वितीयाख्यं व्रतं कुर्वन्ति मानवाः ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥
अपुत्रो लभते पुत्रं धनहीनो लभेद्धनम् ।
भार्य्याहीनो लभेद्भार्य्यां सुरूपां कुलसम्भवाम् ॥
यस्यां तिथौ यमुनया यमराजदेवः
संभोजितः सकललोकनिपातदक्षः ।
तस्यां भुनक्ति सुतिथौ च यदे भगिन्याः
प्राप्नोति वित्तमतुलं स चिरायुरेव ॥"

इति पाद्मे उत्तरखण्डे १२५ अध्यायः ॥

यमधारः, पुं, (यमा युग्मीभूता धारास्य । यद्वा, यमवत् विनाग्निका धारा यत्र ।) पार्श्वद्वय-धारायुक्तास्त्रविशेषः । किरीच काटार इत्यादि भाषा ॥

यमनं, क्ली, (यम्+भावे ल्युट् ।) बन्धनम् । उपरतिः । इति मेदिनी । ने, १११ ॥ (संयमः । यथा, हरिवंशे भविष्यपर्व्वणि । १६ । ४८ ।
"अयुर्वामननामासि यतस्त्वं वामनाह्वया ।
मननान्मुनिरेवासि यमनाद् यतिरुच्यसे ॥")

यमनः, पुं, (यमयति नियमयतीति । यम्+ल्युः ।) यमः । इति मेदिनी । ने, १११ ॥ (यमयति वशमानयतीन्द्रियग्राममिति । संयमकर्त्तरि, त्रि । यथा, वाजसनेयसंहितायाम् । ६ । २२ ।
"यन्तासि यमनो ध्रुवोऽसि धरुणः ।"
"यमनः स्वयं संयमनकर्त्ता भवसि ।" इति तद्भाष्ये महीधरः ॥ नियमकारिणि च त्रि । यथा, तत्रैव । १४ । २२ ।
"यन्त्री राड्यन्त्रासि यमनो ध्रुवासि धरित्री ।"
"यमनो सर्व्वेषां नियमकारिण्यसि ।" इति तद्भाष्ये महीधरः ॥)

यमनिका, स्त्री, (यच्छति आवृणोतीति । यम्+ल्युः । कन् । टाप् ।) यवनिका । इत्यमरटीकायां रामाश्रमः ॥ कानात् इति भाषा ॥

यमपत्नी, स्त्री, (यमस्य पत्नी ।) यमस्य भार्य्या । यमस्य द्वे भार्य्ये । धूमोर्णा १ विजया २ । इति जटाधरः ॥

यमप्रियः, पुं, (प्रीणातीति । प्री+कः । यमस्य प्रियः ।) वटवृक्षः । इति शब्दरत्नावली ॥

यमभगिनी, स्त्री, (यमस्य भगिनी स्वसा ।) यमुना । इति हेमचन्द्रः । ४ । १३८ ॥

यमराजः, पुं. (यमश्चासौ राजा चेति । "राजाहः सखिभ्यष्टच् ।" ५।४।९१ । इति टच् ।) यमः । इति हेमचन्द्रः । २।६६ ॥ अस्य पुर्य्यादि यथा,
"पुरी संयमनी तस्य चित्रगुप्तस्तु लेखकः ।
भ्रुवौ चक्रमहाचक्रौ धूमोर्णाविजये प्रिये ।
विचारभूमिका नीचिः सहाया: कालपूरुषाः ॥"

इति जटाधरः ॥ *॥

स च विमात्रा छायया प्रसूतः । (यथा, मार्कण्डेये । ७७ । २५—२६ ।
"छायासंज्ञा त्वपत्येषु यथा स्नेहवतीसमा ।
तथा न संज्ञाकन्यायां पुत्रयोश्चान्ववर्त्तत ॥
मनिनाद्युपभोगेषु विशेषमनुवासरम् ।
मनुस्तत्रान्तरात्मा यमस्तस्या न चक्षमे ॥
ताडनाय च दैवे कोपात् पादस्तेन समुद्यतः ।
तस्याः पुनः शान्तिमता न तु देहे निपातितः ॥
ततः शशाप तं कोपात् छायासंज्ञा यमं द्विज ।
किञ्चित् प्रस्फुरमाणोष्ठी विचलत्पाणिपल्लवा ॥
पितुः पत्नीममर्य्यादं यस्मां तर्ज्जयसे पदा ।
भुवि तस्मादयं पादस्तवादेव पतिष्यति ॥")

तच्छापान्तं यथा,—
"स्वरूपधारिणीं चैनामानिनाय निजाश्रमम् ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥
ततः पूर्व्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः ।
द्वितीयस्तु यमः शापाद्रूक्षदृष्टिरभूत् सुतः ॥
क्रिमयो मांसमादाय पादतस्ते महीतलम् ।
पतिष्यन्तीति शापान्तं तस्य चक्रे पिता स्वयम् ॥
धर्म्मदृष्टिर्यतश्चासौ समो मित्रे तथाहिते ।
ततो नियोगं तं याम्ये चकार तिमिरापहः ॥
यमुना च नदी जज्ञे कलिन्दान्तरवाहिनी ॥"

इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे । ७८ । २५—२६ ॥

यमराट्, [ज्] पुं, (प्राणिसंयमनात् यमप्रभृतयः किङ्कराख्येषु राजते यमेन संयमेन राजते इति वा । राज्+क्विप् । इत्यमरटीकायां रघुनाथः ।) यमः । इत्यमरः । १ । १ । ९६ ॥

यमलं, क्ली, (यमं लातीति । ला+कः ।) युग्मम् । इति हेमचन्द्रः । ६ । ६० ॥ (त्रि, यमजः । यथा, देवीभागवते । ३ । २८ । ५ ।
"सुमित्रातनयौ जातौ यमलौ द्वौ मनोहरौ ।
ते जातौ वै किशोराश्च धनुर्व्वाणधराः किल ॥")

यमलपत्रकः, पुं, (यमलं यमजं पत्रमस्य । बहुव्रीहौ कः ।) अश्मन्तकवृक्षः । कोविदारवृक्षः । इति राजनिघण्टः ॥

यमलार्জ্জুनहा, [न्] पुं, (यमलार्জ্জুनौ हतवान् इति । हन्+क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः ॥

यमलार্জ্জুनौ, पुं, (यमलौ च तावर्জ্জুनौ चेति कर्म्मधारयः ।) गोकुलस्थार্জ্জুनवृक्षद्वयम् । सौ कुबेरपुत्रौ नलकूवरमणिग्रीवौ । नारदशापात् वृक्षतां गतौ श्रीकृष्णेन उद्धारितौ । यथा,—
"यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःश्रुतौ ।
न विवाससमात्मानं विजानीतः सुदुर्म्मदौ ॥
अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः ।
स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ॥
वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते ।
वृत्ते खलोकतां भूयो लब्धभक्ती भविष्यतः ॥

श्रीशुक उवाच ।

स एवमुक्त्वा देवर्षिर्गतो नारायणाश्रमम् ।
नलकूवरमणिग्रीवावासतुर्यमलार্জ্জुनौ ॥
ऋषेर्भागवतमुख्यस्य सत्यं कर्त्तुं वचो हरिः ।
जगाम शनकैस्तत्र यत्र स्तो यमलार্জ্জुनौ ॥
देवर्षिर्मे प्रियतमौ यदिमौ धनदात्मजौ ।
तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना ॥
इत्यन्तरेणार্জ্জुनयोः कृष्णस्तु यमयोर्ययौ ।
आत्मनिर्व्वेशमात्रेण तीर्य्यगतसदूखलम् ॥
बालेन निष्कर्षतान्वगुदूखलं ततः
दामोदरेण तर्षोत्कलिताङ्घ्रिबन्धौ ।
निष्पेततुः परमविक्रमितातिवेग-
स्कन्धप्रवालविटपौ कृतचक्षुगृद्धौ ॥
तत्र श्रिया परमया ककुभः स्फुरन्तौ
सिद्धावुपेत्य कुजयोरिव जातवेदाः ।
कृष्णं प्रणम्य शिरसाखिललोकनाथं
बद्धाञ्जली विरजसाविदमूचतुः स्म ॥
वाग्गी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्म्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव निवासजगत्प्रणामे
दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥

श्रीभगवानुवाच ।

तद्गच्छतं मत्परमौ नलकूवरसादनम् ।
संजातो मयि भावो वामीप्सितः परमोऽभवः ॥

श्रीशुक उवाच ।

इत्युक्तौ तं परिक्रम्य प्रणम्य च पुनः पुनः ।
बद्धोलूखलमामन्त्र्य जग्मतुर्दिशमुत्तराम् ॥"

इति श्रीभागवते १० स्कन्धे १० अध्यायः ॥

यमली, स्त्री, (यमल+स्त्रियां ङीष् ।) चोटिका-द्वयम् । इति मेदिनी । ने, १२६ ॥ चोटी शाटीपर्य्याये हेमचन्द्रेण गणिता सैव चोटिका ॥

यमवाहनः, पुं, (यमस्य वाहनः ।) महिषः । इति हेमचन्द्रः । ४ । ३३७ ॥ (तस्य पर्य्यायः ।
"महिषो घोटकारिः स्यात् कासरश्च रजस्वलः ।
पीनस्कन्धः कृष्णकायो लुलापो यमवाहनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

यमव्रतं, क्ली, (यमस्य धर्म्मराजस्येव व्रतम् ।) राजधर्म्मविशेषः । स तु पक्षपातं विना प्राणिनां शासनरूपः । इति पुराणम् ॥

यमस्वसा, [ऋ] स्त्री, (यमस्य स्वसा भगिनी ।) यमुना । दुर्गा । इति मेदिनी । से, ६० ॥ (यदुक्तं हरिवंशे आर्य्यास्तवप्रकरणे । ५८ । ६ ।
"जया च विजया च त्वं तुष्टिः पुष्टिः क्षमा दया ।
ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी ॥")

यमानिका, स्त्री, (यमानी+स्वार्थे कन् ।) यमानी । तत्पर्य्यायः । अजमोदा २ उग्रगन्धा ३ ब्रह्मदर्भा ४ । इत्यमरः । २ । ४ । १३५ ॥
"चत्वारि यमान्याम् । यमानी द्विविधा एका

चेत्ययमानी सा अजमोदा इत्येव ख्याता। अपरा यमानी इत्येव ख्याता अविशेषात् दरोरपीति सुभूतिः। केचित्तु अजमोदादिदयं वनयमान्यां ब्रह्मदर्भादिदयं यमान्यामित्याहुः। उग्रगन्धाजमोदाख्या स्मृता चेत्ययमानिका इति। 'यमानी दीपको दीप्यो भूतिकश्च यमानिका।' इति च रत्नः। यच्छति विरमति निवर्त्तते अस्मिन्वमनया यमानी। यमौ च विरतौ वान्तीति अनट् ङीप् यमानी स्वार्थे के यमानिका यमानी पचमवर्गपचममध्या। यवानीति अन्तःस्थचतुर्थमध्या इति केचित्।" इति भरतः। * । अस्या गुणाः। कृमिशूलनाशित्वम्। हृद्यत्वम्। पित्तास्रिकारित्वम्। वायुकफक्लमिनाशित्वञ्च। इति राजवल्लभः॥

यमानी, स्त्री, (यच्छति विरमति निवर्त्तते अस्मिन्वमनयेति। यम+करणे ल्युट्। ङीष्। एषोदरादित्वात् साधुः।) यमानिका। इति शब्दरत्नावली॥ (यथास्याः पर्य्यायः।

"यमानी दीपको दीप्यो भूतिकश्च यमानिका॥"
इति वैद्यकरत्नमालायाम्॥)

यमान्तकः, पुं, (यमस्यान्तकः। ऋतुश्यलादेवास्य तथात्वम्।) शिवः। इति शब्दरत्नावली॥ (यमश्च अन्तकश्च तौ इति विग्रहे। वैवस्वतकालौ। यथा, महाभारते। २। १७। १५।

"तेजसा सूर्य्यसङ्काशः क्षमया पृथिवीसमः।
यमान्तकसमः क्रोधे श्रिया वैश्रवणोपमः॥"

"यमो वैवस्वतः अन्तकः कालः।" इति तट्टीकायां नीलकण्ठः॥)

यमी, स्त्री, यमुनानदी। इति त्रिकाण्डशेषः॥ (यथा, श्रीमद्भागवते। ८। १३। ६।

"छतीयां वडवामेके तासां संज्ञासुतास्त्रयः।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु॥")

यमुना, स्त्री, (यमयतीति। यमि+"अजियमि ग्रीड्भ्यश्च।" उणा० ३। ६१। इति उनन्। टाप्।) दुर्गा। यथा,—

"सर्व्वाणि हृदयस्थानि मङ्गलानि शुभानि च।
ददाति चेप्सितान् लोके तेन सा सर्व्वमङ्गला॥
सङ्गमाद्गमनाद्गङ्गा लोके देवी विभाव्यते।
यमस्य भगिनी जाता यमुना तेन सा मता॥"
इति देवीपुराणे ४५ अध्यायः॥ *॥

यच्छति विरमति गङ्गायामिति। नदीविशेषः। सा तु हिमालयदक्षिणदेशान्निर्गत्य प्रयागे गङ्गायां मिश्रिता। तत्पर्य्यायः। कालिन्दी २ सूर्य्यतनया ३ भ्रमणस्वसा ४। इत्यमरः। २। १०। ३२॥ तपनतनूजा ५ कलिन्दकन्या ६ यमस्वसा ७ श्यामा ८ सावी ९ कालिन्दनन्दिनी १० यमनी ११ यमी १२। इति शब्दरत्नावली॥ कालिन्दीशैलजा १३ सूर्य्यसुता १४। इति जटाधरः॥ (यथा,—

"गङ्गा सरस्वती गोदायमुना सरयूः सची।
वेला इरावती नीला उत्तरात् पूर्ब्बवाहिनी॥"
इति हारीते प्रथमे स्थाने सप्तमेऽध्याये॥)

अस्या जलगुणाः। पित्तदाहश्रमनाशपटुत्वम्। स्वादुत्वम्। वातजननत्वम्। पावनत्वम्। वह्निदीपनकरत्वम्। रोचनत्वम्। बलप्रदत्वञ्च। इति राजनिर्घण्टः॥ * ॥ सा यमस्य भगिनी। यथा,—

"सावर्णिर्मेरुपृष्ठे तु तपो घोरं चकार ह।
अद्यापि भविता लोके मनुः सावर्णिकेऽन्तरे॥
भ्राता ग्रहेश्वरश्चास्य ग्रहत्वं स तु लब्धवान्।
तयोर्यवीयसी या तु यमस्वसा यमुस्रिणी।
अभवत् सा सरिच्छ्रेष्ठा यमुना लोकपावनी॥"
इति वह्निपुराणे सागरोपाख्यानम्॥ * ॥

सा च वृन्दावने सुप्तुत्राख्या परा भक्तिः। यथा,
श्रीभगवानुवाच।

"इदं वृन्दावनं रम्यं मम धामैव केवलम्।
तत्र ये पशवः साधारणाः कीटा नराधमाः।
ये वसन्ति ममाधिष्ठं स्मृता यान्ति ममान्तिकम्॥
तत्र या गोपपत्न्यश्च निवसन्ति ममालये।
योगिन्यस्तात! एवं हि मम देवाः परायणाः॥
पशुयोनिमवं हि वनं मे देहरूपकम्।
कालिन्दीयं सुप्तुत्राख्या परमाद्भुतवाहिनी॥"
इति पाद्मे पातालखण्डे ७ अध्यायः॥ * ॥

अस्या जलस्य क्षयवर्णत्वकारणं यथा,—
पुलस्त्य उवाच।

"यदा दग्धसुता ब्रह्मन्! सती याता यमक्षयम्।
विनाश्य दक्षयज्ञं तं विचचार त्रिलोचनः॥
ततो मृषध्वजं दृष्ट्वा कन्दर्पः कुसुमायुधः।
अपक्रीकं तदाक्षेप्तुं और्व्वादेनाभ्यताडयत्॥
ततो हरः शरेणाथ और्व्वादेनाभिताडितः।
विचचार तदोन्मत्तः काननानि सरांसि च॥
स्मरन् सतीं महादेवस्तथोर्व्वादेन ताडितः।
न धर्म्मे लेभे देवर्षे वाणविद्ध इव द्विपः॥
ततः पपात देवेशः कालिन्दीसरिते सुने।
निमग्ने शङ्करे चापे दग्धा क्षयत्वमागता॥
तदाप्रभृति कालिन्दी जगज्जननिभं जलम्॥"
इति वामने ६ अध्यायः॥ * ॥

ज्येष्ठशुक्लद्वादश्यादिष्वस्यां स्नानपिण्डदानफलं यथा,—

"यज्ञैरिष्ट्वा तु यत्फलं द्वादश्यां स्नात्वा वै यमुनाजले।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम्॥
यमुनासलिले स्नातः पुरुषो मुनिसत्तम!।
ज्येष्ठामूलाभवे पचे द्वादश्यामुपवासकृत्॥
समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहितः।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यधिकं फलम्॥
ज्येष्ठामूले सिते पचे समभ्यर्च्य जनार्द्दनम्।
धन्यो नः पिण्डनिर्व्वापं यमुनायां प्रदास्यति॥"
इति विष्णुपुराणे ६ अंशे ८ अध्यायः॥

यमुनाजनकः, पुं, (यमुनाया जनकः।) सूर्य्यः। इति हेमचन्द्रः। २। ६॥

यमुनाभित्, [द्] पुं, (यमुनां भिनत्तीति। भिद्+क्विप्।) बलदेवः। इति हेमचन्द्रः। २। १६८॥ (एतद्वृत्तान्तसूत्रं यथा, हरिवंशे। १०२। ३३—३६।

"स हलेनानताग्रेण कुले यस्य महानदीम्।
चकर्ष यमुनां रामो भुत्यितां वनितामिव॥
सा विह्वलजलस्रोता हृदप्रस्खितसञ्चया।
यावर्त्तत नदी भीता हलमार्गानुसारिणी॥
लाङ्गलादिदमार्गा सा वेगगा वक्रगामिनी।
सङ्कर्षणभयत्रस्ता योषेवाकुलतां गता॥")

यमुनाभ्राता, [ऋ] पुं, (यमुनाया भ्राता।) यमः। इत्यमरः। १। १। ६१॥

यमेश्वरा, स्त्री, (यमं ईश्वरयति प्रेरयतीति। ईश्वर+बाहुलकात् उकः। टाप्।) दक्षटका। इति त्रिकाण्डशेषः॥

ययातिः, पुं, नहुषराजपुत्रः। तत्पर्य्यायः। नाहुषिः २। इति त्रिकाण्डशेषः॥ नाहुषः ३। इति जटाधरः॥ तस्योपाख्यानं यथा,—

"नहुषस्य प्रवक्ष्यामि पुत्रान् सप्तैव धार्म्मिकान्।
यतिर्य्ययातिः संयातिरुद्भवः पञ्चमस्तथा॥
खयातिर्मेघयातिश्च सप्तैते वंशवर्द्धनाः।
ययातिरकरोद्राज्यं धर्म्मेकशरणस्तदा॥
अग्निष्ठा तस्य भार्य्याभूत् दुहिता वृषपर्व्वणः।
भार्गवस्याङ्गना तद्वदेवयानी च सुव्रता॥
ययातिर्देवयान्यान्तु पुत्रावजनयन्नृपः।
यदुञ्च तुर्व्वसुञ्चैव शुक्रविष्णू इवापरौ॥
तस्मादेव तु राजर्षेः अग्निष्ठा वार्षपर्व्वणी।
द्रुह्यञ्चानुञ्च पूरुञ्च त्रीन् कुमारानजीजनत्॥
ततः काले च कस्मिंश्चिद्देवयानी शुचिस्मिता।
ययातिसहिता राजन् जगाम हरितं वनम्॥
ददर्श्व तदा तत्र कुमारान् देवरूपिणः।
क्रीड़मानान् सुविश्रब्धान् विस्मिता चेदमब्रवीत्॥
किन्नामधेयं गोत्रं वः पुत्रकाः! ब्राह्मणः पिता।
विब्रूत मे यथातथ्यं श्रोतुमिच्छामि तं ह्यहम्॥
तेऽदर्शयन् प्रदेशिन्या तमेव नृपसत्तमम्।
बुद्ध्वा च तत्त्वतो देवी अग्निष्ठामिदमब्रवीत्॥
ममाधीना सती कस्मादकार्षीर्विप्रियं मम।
अग्निष्ठोवाच।
यदा तया हृतो राजा हृत एव तदा मया।
त्वत्तो हि मे पूज्यतमो राजर्षिः किं न वेत्सि तत्॥
शौनक उवाच।
श्रुत्वा तस्यास्ततो वाक्यं देवयान्यब्रवीदिदम्।
राजन्नादेष्टुमर्हस्यद्य विप्रियं मे त्वया कृतम्॥
अविब्रुवन्ती किञ्चिच्च राजानं साश्रुलोचना।
अचिरादेव संप्राप्ता काव्यस्योशनसोऽन्तिके॥
देवयान्युवाच।
अग्निष्ठयातिदृप्तासि दुहिता वृषपर्व्वणः।
जयोऽस्यां जनिताः पुत्रा राज्ञानेन ययातिना।
दुर्भगाया मम द्वौ तु पुत्रौ तात! ब्रवीमि वः॥
शुक्र उवाच।
धर्म्मज्ञः सन् महाराज! योऽधर्म्ममनया प्रियम्।
तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्ज्जया॥
ययातिरुवाच।
ऋतुकामां स्त्रियं यस्तु गम्यां रहसि याचितः।
नोपैति सह धर्म्मेण भ्रूणहेत्युच्यते बुधैः॥

अधर्म्मेभयसंविग्नः शर्म्मिष्ठासुपगम्यिवान् ॥
अहमो यौवनस्यार्हं देवयान्या भृगूद्वह ! ।
प्रसादं कुरु मे ब्रह्मन् जरेयं मा विशेत माम् ॥
शुक्र उवाच ।
नार्हं मृषा ब्रवीम्येतत् जरां प्राप्तोऽसि भूमिप ! ।
जरां वेतां त्वमन्यस्मै संक्रामय यदीच्छसि ।
ययो दास्यति पुत्रो यः स ते राजा भविष्यति ॥"
इति मात्स्ये ३२ अध्यायः ॥ * ॥
शौनक उवाच ।
"जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चेव हि ।
पुत्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीद्वचः ॥
त्वं यदो ! प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन त्वदीयेन चरेयं विषयानहम् ॥
पूर्णं वर्षसहस्रे तु पुनस्ते यौवनं त्वहम् ।
दत्त्वा सम्प्रतिपत्स्यामि पाप्मानं जरया सह ॥
यदुरुवाच ।
सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप ! ।
जरां यहीतुं धर्म्मज्ञ ! पुत्रमन्यं वृणीष्व वै ॥
ययातिरुवाच ।
यो मे त्वं हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
पापाच्चातुलसम्भवात् दुष्प्रजा ते भविष्यति ॥
तुर्व्वसो प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन चरेयं वै विषयांस्त्वत्प्रसादतः ॥
तुर्व्वसुरुवाच ।
न कामये जरां तात ! कामभोगप्रणाशिनीम् ।
वलरूपान्तकरणीं बुद्धिमानविनाशिनीम् ॥
ययातिरुवाच ।
यस्मं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मात् प्रजा ससुच्छेदं तुर्व्वसो ! तव यास्यति ।
द्रह्यो ! त्वं प्रतिपद्यस्व वर्षरूपविनाशिनीम् ।
जरां वर्षसहस्राणि यौवनं स्वं प्रयच्छ च ॥
द्रुह्युरुवाच ।
न गजं न रथं चाश्वं जीर्णो मुङ्क्ते वरस्त्रियम् ।
नीरोगश्चास्य भवति तां जरां ते न कामये ॥
ययातिरुवाच ।
यस्मं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मात् द्रह्यो ! प्रियः कामो न ते सम्पत्स्यते क्वचित् ॥
अनो ! त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
एकं वर्षसहस्रन्तु चरेयं यौवनेन ते ॥
अनुरुवाच ।
जीर्णः शिशुरिवादत्ते कालेऽन्नमशुचिर्यथा ।
न जुहोति च कालेऽग्निं तां जरां नैव कामये ॥
ययातिरुवाच ।
यस्मं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
जरादोषस्त्वयोक्तो यस्तस्मात्तं प्रतिपत्स्यते ॥
पूरो ! मे त्वं प्रियः पुत्र ! त्वं वरीयान् भविष्यसि ।
काव्यस्योशनसः प्राप्ताम्न च दग्धोऽसि यौवने ॥
पूरो ! त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
किञ्चित्कालं चरेयं वै विषयान् वयसा तव ॥
पूर्णं वर्षसहस्रे तु प्रतिदास्यामि यौवनम् ।
त्वदेव प्रतिपत्स्यामि पाप्मानं जरया सह ॥

शौनक उवाच ।
एवमुक्तः प्रत्युवाच पूरुः पितरमञ्जसा ।
यथात्थ त्वं महाराज ! तत् करिष्यामि ते वचः ॥
ययातिरुवाच ।
पूरो ! प्रीतोऽस्मि ते वत्स प्रीतश्चेदं ददामि ते ।
सर्व्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥"
इति मात्स्ये ३३ अध्यायः ॥ * ॥
शौनक उवाच ।
"पौरवेणाथ वयसा ययातिर्नहुषात्मजः ।
प्रीतियुक्तो नरश्रेष्ठश्चार विषयान् सुखी ॥
पूर्णे मत्वा ततः कालं पूरुं पुत्रमुवाच ह ।
पूरो ! प्रीतोऽस्मि भद्रं ते गृहाणेदं स्वयौवनम् ॥
राज्यञ्चापि गृहाणेदं यत् त्वयोपहृतं पुरा ॥
शौनक उवाच ।
एवं स साधुषो राजा ययातिः पुत्रमौरसम् ।
राज्येऽभिषिच्य मुदितो वानप्रस्थोऽभवन्मुनिः ॥
उषित्वा वनवासं स ब्राह्मणैः सह संश्रितः ।
फलमूलाशनो दान्तो ययौ स्वर्गमितो गतः ॥"
इति मात्स्ये ३५ अध्यायः ॥ * ॥
ययीः, पुं (यायते प्राप्यते भक्तैरिति । या + "यापोः कित् ङिच्च ।" उणा० १ । १५६ । इति ईः ङित्वञ्च ।) महादेवः । इत्युणादिकोषः । १ । १५४ ॥
(याति हृतं गच्छतीति । अच्, । इत्युज्ज्वलदत्तः ॥)
ययुः, पुं, (याती ति । या + "यो ङे च ।" उणा० १ । २२ । इति उः ङित्वञ्च । यलत्वेनेनेति । यज + उः । पृषोदरादित्वात् जस्य यत्वमित्यमरटीकायां रघुनाथः ।) अश्वमेधीयाश्वः । सामान्यघोटकः । इति मेदिनी । ये, ४७ ॥
यवः, पुं, (यूयते अमत्रा इति । यु मिश्रणे + अप् ।) स्रुवनामख्यातसूकधान्यम् । तत्पर्य्यायः । स्रितसूकः २ । इत्यमरः । २ । ९ । १५ ॥ स्रितसूकः ३ । इति शब्दरत्नावली ॥ मेध्यः ४ स्थिरः ५ अशुकः ६ कचुकी ७ धान्यराजः ८ तीक्ष्णशूकः ९ तुरगप्रियः १० शूकधुः ११ महेशः १२ पवित्रधान्यम् १३ । तस्य गुणाः । कषायत्वम् । मधुरत्वम् । सुशीतलत्वम् । श्रमेहपित्तकफापहारकत्वञ्च । अशूकसूकयवगुणाः । बलप्रदत्वम् । हृद्यत्वम् । वृष्यं बहुवीर्य्यपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥
अपि च ।
"यवः कषायमधुरो बहुवातप्रकोपनुत् ।
रूक्षः स्थैर्य्यकरः शीतो मूत्रमेदःकफापहः ॥"
इति राजवल्लभः ॥ * ॥
(अपि च ।
"यवः कषायो मधुरो हिमश्च
कटुर्विपाके कफपित्तहारी ।
व्रणेषु पथ्यस्त्वलवश्च नित्यं
प्रबद्धमूत्रो बहुवातवर्च्चाः ॥
स्थैर्य्यमेधा स्वरवर्णकृच्च
स पिच्छिलः स्थूलविलेखनश्च ।
मेदो मरुत्तृड्हरणोऽतिरूक्षः
प्रसादनः श्लेष्मितपित्तयोश्च ॥

एभिर्गुणैर्हीनतरास्तु किञ्चिद्-
विद्याद् यवेभ्योऽतियवान् विशेषैः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥
"रूक्षः शीतो गुरुः स्वादुर्बहुवातश्लेष्मदूषणः ।
स्थैर्य्यकृत् सकषायस्तु वल्यः शैत्यविकारनुत् ॥
रूक्षः कषायानुरसो मधुरः कफपित्तहा ।
मेदःक्रिमिविषघ्नश्च वल्यो वैद्युयवः स्मृतः ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥
"क्वचिद्वाक्यशेषादपि प्रक्तिग्रहः यथा यवपदस्य कङ्कुप्रभृतौ स्वेच्छानां दीर्घभूके च शिष्टानां अवहारादेकमात्रग्रहणे परिच्छेत्तुमशक्यत्वात् नानार्थत्वस्य चान्याय्यत्वात् यवमयश्चरुर्भवतीति श्रुतौ यवपदस्यार्थ उच्यते ।
'यवश्चरौ सर्व्वग्रहणानां जायते पवनाशनम् ।
मोदमानास्तु तिष्ठन्ति यवाः कञ्चिद्ग्रहालिनः ॥'
इति विध्यर्थाकाङ्क्षया प्रवर्त्तमानाद्वाक्यशेषादीर्घभूक एव यवपदस्य प्रक्तिग्रहः ।" इति शब्दशक्तिप्रकाशिकायां नैमित्तिकसंज्ञायाम् ॥ * ॥ हविष्ये यवानामेव मुख्यत्वम् । यथा,—
"हविष्येषु यवा मुख्याश्चादनु व्रीहयः स्मृताः ।
माषकोद्रवगोरादिसर्व्वान्नाभ्योऽपि वर्ज्ययेत् ॥"
इति कात्यायनसंहिता । ६ । १० ॥
नवयवागमे तैरवश्यं श्राद्धं कार्य्यं अकरणे प्रत्यवायश्रवणात् । यथा,—
"नवश्राद्धेषु पौरोडाशं दुग्धस्नावलोकने ।
इच्छाश्राद्धानि कुर्व्वीत नवशस्यागमे तथा ॥
इति विष्णुपुराणात् वत्सरमाद्यबहुतरवचनेषु नवान्नश्रुतेः नवान्नागमत्वेनैव निमित्तं लाघवात् । अमावस्यान्तिमोऽष्टका माघी प्रौष्ठपदपूर्व्वा तथोदगयनं व्रीहियवपाकौ च ।
एतासु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥"
इति श्राद्धतत्त्वे नवान्नश्राद्धे ॥)
परिमाणविशेषः । स तु चतुर्धान्यमानरूपः । इति शुभङ्करः ॥ षट्सर्षपपरिमाणात्मकश्च । यथा, —
"जालान्तरगते भानौ यच्छून्ये दृश्यते रजः ।
तेचतुर्भिर्भवेल्लिक्षा लिक्षाषड्भिश्च सर्षपः ।
षट्सर्षपैर्यवस्त्वेको गुञ्जैका तु यवैस्त्रिभिः ॥"
इति शब्दचन्द्रिका ॥ * ॥
अङ्गुलिस्थयवाकाररेखाविशेषः । यथा,—
"तर्ज्जनीमूलसंपृक्तौ यवौ पुत्रार्थदौ क्रमात् ।
मध्यमायां यवश्चेदङ्गुष्ठेऽपूर्व्वधनप्रदः ॥"
अपि च सामुद्रके ।
"मध्यमायां यदि यवो दृश्यते च सुशोभनः ।
तदान्यस्थितं द्रव्यं प्राप्नोत्यङ्गुष्ठके यदि ॥
यस्यापि चक्रमङ्गुष्ठे यवपूर्णश्च दृश्यते ।
तदा पितामहादीनामर्ज्जितं लभते धनम् ॥"
(पूर्व्वपक्षः । यथा, वाजसनेयसंहितायाम् । १४ । ३१ । "एकत्रिंशतास्य वत्स प्रजा अक्षय्यन्त यवाश्चायवाश्चाधिपतय आसन् ।" "यवाः पूर्व्वपक्षाः अयवाः अपरपक्षाः ।" इति तट्टीकायां महीधरः ॥)

यवकः, पुं (यवप्रकारः। यव+"शूलादिभ्यः प्रकारवचने कन्।"५।४।३। इति कन्।) यवः। इत्यमरटीकायां रामाश्रमः॥ (यथा,—
"यवका हायनाः पांशुवाप्यनैधकादयः।
शालीनां शालयः कुर्व्वन्त्यनुकारं गुणे गुणैः॥"
इति चरके सूत्रस्थाने २७ अध्याये॥)

यवक्य, त्रि, (यवकानां भवनं क्षेत्रमिति। यवक+"यवयवकषष्टिकाद् यत्।" ५।२।३। इति यत्।) यवभवनोचितक्षेत्रम्। इत्यमरः। २।९।७॥

यवक्षारः, पुं, (यवजातः क्षारः। शाकपार्थिवत्वात् समासः।) क्षारविशेषः। यथा,—
"नरसारयवक्षारस्फटिकारित एव काचवकयन्त्रैः।
बहुशः पात्यं सत्त्वं तद्धि महाद्रावकत्वाम॥"
इति रत्नावली॥
तत्पर्य्यायः। यवाग्यजः २ पाक्यम् ३। इत्यमरः। २।९।१०८॥ यवासः ४ यवशूकः ५ शारकः ६ रेचकः ७ यवनालकः ८। इति शब्दरत्नावली॥ यवशूकः ९ क्षारः १० तीक्ष्णः ११ तीक्ष्णरसः १२ यवनालजः १३ इति रत्नमाला॥ यवजः १४ यवशूकजः १५ यवाङ्गः १६ यवापत्यम् १७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातोदरार्शिनाशित्वम्। आमशूलाश्मरीकृच्छ्रव्रणदोषहरत्वम्। सरत्वञ्च। इति राजनिर्घण्टः॥ अर्शःश्वासगुल्मयकृत्प्लीहानाहगलामयनाशित्वञ्च। इति राजवल्लभः॥ (तथा च।
"पाक्यः क्षारो यवक्षारो यवशूको यवाग्यजः।
यवक्षारो लघुः स्निग्धः सुरुच्यो वह्निदीपनः॥
निहन्ति शूलवातार्शःश्लेष्मश्वासगलामयान्।
पाण्डुप्लीहयकृद्गुल्मानाहग्रहणीहृदामयान्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

यवक्षोदः, पुं, (यवानां क्षोदः।) यवचूर्णम्। तत्पर्य्यायः। चिक्कसः २। इति हेमचन्द्रः॥

यवगवः, पुं, (यूनो गवः स्फोटकः। पृषोदरादित्वात् यवादेशः।) युवगवः। इति शब्दरत्नावली॥ वयस्फोड़ा इति भाषा॥

यवजः, पुं, (यवाच्जायते इति। जन्+डः।) यवक्षारः। इति रत्नमाला॥ (यथास्य पर्य्यायः।
"यावशूको यवक्षारो यवशूको यवाग्यजः।
क्षारस्तीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः॥"
इति वैद्यकरत्नमालायाम्॥)

यवागौ। इति राजनिर्घण्टः॥

यवजोद्भव, क्ली, (यवजादुद्भवोऽस्य।) तवक्षीरम्। इति राजनिर्घण्टः॥

यवतिक्ता, स्त्री, लताप्रभेदः। ग्रन्थिनीति यवेची इति च ख्याता। (यथा, सुश्रुते सूत्रस्थाने४५अ०।
"यवतिक्तातैलं सर्व्वदोषप्रशमनमग्निदीप्तिकरम्। अग्निदीपनं लेखनं मेध्यं पथ्यं रसायनञ्च॥")
तत्पर्य्यायः। महातिक्ता २ दृढ़पादविसर्पिणी ३ नाकुली ४ नेत्रभीना ५ ग्रन्थिनी ६ पत्रतण्डुली ७ तण्डुली ८ अक्षपीड़ा ९ क्षुद्रपुष्पी १० यज्ञस्त्रिनी ११ माहेश्वरी १२ तिक्तफला १३ यावी १४ तिक्ता १५। अस्या गुणाः। सतिक्तालत्वम्। दीपनत्वम्। रुचिकारित्वम्। क्रिमिकुष्ठविषवर्णास्रदोषनाशित्वम्। रेचनत्वञ्च। इति राजनिर्घण्टः॥

यवतैलं, क्ली, (यवनिर्म्मितं तैलम्।) यवचूर्णादियुक्तपक्वतैलविशेषः। तत्प्रकारं गुरुक्वाह।
"यवचूर्णार्द्धकुडवं मञ्जिष्ठार्द्धपलेन तु।
तैलप्रस्थं घृतगुणे काञ्जिके साधितं जयेत्।
ज्वरं दाहं महावेगमङ्गानाञ्च प्रहर्षणम्॥"
इति सुश्रुतः॥

यवद्वीपः, पुं, (यवनामा द्वीपः इति मध्यपदलोपिकर्म्मधारयः।) उपद्वीपविशेषः। यावा इति भाषा। यथा,—
"यत्रवन्तो यवद्वीपं सप्तराज्योपशोभितम्।
सुवर्णरूप्यकं द्वीपं सुवर्णकरमण्डितम्॥"
इति वाल्मीकीये रामायणे किष्किन्धाकाण्डे ४० सर्गः॥*॥ "अतः परं यत्रवन्तो भूत्वा सप्तराज्योपशोभितं यवद्वीपं तथा सुवर्णद्वीपं विचेतव्यमिति शेषः। सुवर्णकरमण्डितमिति सुवर्णं कुर्व्वन्ति ये तैः शोभितम्।" इति रामायणतिलकनामतट्टीका॥

यवनः, पुं, देशविशेषः। (यथा, मात्स्ये।१२०।४३।
"तान् देशान् भावयन्ति स्म म्लेच्छप्रायांश्च सर्व्वशः।
सप्तैलान् कुकुरान् रौधान् वर्व्वरान् यवनान् खसान्॥")
वेगः। वेगाधिकाश्वः। इति मेदिनी॥ गोधूमः। गर्जरत्वम्। तुरुष्कः। इति राजनिर्घण्टः॥ (यौति मिश्रीभवतीति। यु+"सुयुरुहृभ्यो युच्।" उणा० २। ७४। इति युच्।) जातिविशेषः। इति शब्दरत्नावली॥ स तु यवनदेशोद्भवयवयातिराजपुत्रतुर्व्वसुवंशः। यथा,—
"यदोस्तु जाता यदवस्तुर्व्वसोर्यवना सुताः।
द्रुह्योस्तु तनया भोजा अनोस्तु म्लेच्छजातयः।
पूरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव!॥"
इति मात्स्ये ४४ अध्यायः॥*॥
सगरराजेनैषां सर्व्वक्षत्रियोचितकर्म्मधर्म्मराहित्यञ्च कृतं ते चात्मधर्म्मपरित्यागात् म्लेच्छतां ययुरिति विष्णुपुराणोक्तत्वात् यवनः मोसलमानेङ्गरेजोभयजातिवाचकः। यवनशब्दस्य वर्गलतीयादिरिति रघुनन्दनभट्टाचार्य्येण लिखितम्॥ यवनादीनान्तु सर्व्वधर्म्मराहित्यमुक्तं हरिवंशे। यथा,—
"सगरस्तां प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशाद्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानान्तथैव च॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलिसर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः॥
वशिष्ठवचनाद्राजन्! सगरेण महात्मना।

शकानां शकदेशोद्भवानां क्षत्रियाणां एवं यवनादीनामिति। अत्र यवनशब्दस्तद्देशोद्भववाची वर्गलतीयादिः। यवनो देशवेगिनोरिति त्रिकाण्डशेषाभिधानदर्शनात्। तेषां म्लेच्छत्वमप्युक्तं विष्णुपुराणे। तथा क्षतान् यवनादीनुपक्रम्य। ते चात्मधर्म्मपरित्यागात् म्लेच्छतां ययुरिति। वौधायनः।
"गोमांसखादको यश्च विरुद्धं बहु भाषते।
धर्म्माचारविहीनश्च म्लेच्छ इत्यभिधीयते॥"
इति प्रायश्चित्ततत्त्वम्॥*॥
यवनादीनां राज्यकालो यथा,—
"सप्त गर्द्दभिनश्चापि शकाश्चाष्टादश क्षुताः।
यवनाश्चाष्टौ भविष्यन्ति तुखाराश्च भविष्यति॥
अष्टौ ते यवना राज्यं वर्षाणां परिसङ्ख्यया।
भोक्ष्यन्त्यधीति तदश्च येऽपि गर्द्दभिनः क्षुताः॥
शतानि त्रीणि वर्षाणां दाग्नीतीनि शतानि वै।
शकानां राज्यकालः स्याच्चविंशो निश्चयो गतः॥
शतस्यार्द्धं चतुर्यानि वर्षाणां राज्यभागिनः।
मरुत्तानां सुताः काला यस्मिन् भोक्ष्यन्ति ते महीम्॥
मरुत्ता हयलैः सार्द्धं तथाग्नेयैः म्लेच्छसम्भवाः।
भोक्ष्यन्ति राज्यं प्राग्येषु भविष्ये तद्विधारितम्॥
शतानि त्रीणि वर्षाणां प्रौक्ता राज्यसुखः क्षुताः।
अन्ध्रान्ति पार्व्वतेयास्तु दे शते परिसङ्ख्यया॥
शतार्द्धमन्ध्रास्तथा राज्यं भोक्ष्यन्ति ते नृपाः।
सप्तदशस्तु वर्षाणि दशतीषाह्वयः क्षुताः॥
तेषु क्षत्रेषु काले तु ततः किलकिला नराः।
भविष्यन्तीह यवना धर्म्मतः कामतोऽर्थतः॥
तैर्विमिश्रा जनपदा आर्य्या म्लेच्छाश्च सर्व्वशः।
विपर्य्ययेण वर्त्तन्ते जनयिष्यन्ति वै प्रजाः॥
अल्पानिष्टवरांश्चैव भवितारस्तदा नृपाः।
तेषां यतीते पर्य्याये बहुवर्षयुगास्तदा॥
राजानः संप्रयास्यन्ति कालेन महता ततः।
कल्किना ताड़िताः सर्व्वे आर्य्या म्लेच्छाश्च सर्व्वशः॥
अधार्म्मिकाश्च ये सर्व्वे यावच्छाश्चैव सर्व्वशः।
सुष्टे नृपतिशब्दे वै सन्ध्याशिष्टे च वै कलौ॥"
इति ब्रह्माण्डपुराणे ३६ अध्यायः॥
मुनिविशेषः। यथा,—
"जातं दिनं दूषयते वशिष्ठ-
श्चाष्टौ च गर्गो यवनो दशाहम्।
जन्माक्षमासं किल भागुरिश्च
व्रते विवाहे क्षुरकर्म्मवैधे॥"
इति तिथ्यादितत्त्वम्॥*॥
कालयवनोत्पत्तिर्यथा,—
श्रीपराशर उवाच।
"गार्ग्यं गोष्ठे दिजं ग्वालः षण्ढ इत्युक्तवान् द्विज।
यदूनां सन्निधौ सर्व्वे जहसुर्यादवास्ततः॥
ततः कोपसमाविष्टो दक्षिणापथमेत्य सः।
सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम्॥

आराधयन्महादेवं सोऽयच्छूर्णमभक्षयत् ।
ददौ वरञ्च तुष्टोऽस्मै वर्षे द्वादशमे हरः ॥
सभाजयामास च तं यवनेशो ह्यनात्मजः ।
तद्योषित्सङ्गमाद्यास्य पुत्रोऽभूदलिसन्निभः ॥
तं कालयवनं नाम राज्ये स्वे यवनेश्वरः ।
अभिषिच्य वनं यातो वज्राग्यकठिनोरसम् ॥
स च वीर्य्यमदोन्मत्तः पृथिव्यां बलिनो नृपान् ।
पप्रच्छ नारदञ्चास्मै कथयामास यादवान् ॥
म्लेच्छकोटिसहस्राणां सहस्रैः सोऽभिसंवृतः ।
गजाश्वरथसम्पन्नश्चकार परमोद्यमम् ॥
प्रययौ चाव्यच्छिन्नं क्षिप्रयानो दिने दिने ।
यादवान् प्रति सामर्षो मैत्रेय मथुरां पुरीम् ॥
ह्यग्रोऽपि चिन्तयामास क्षयितं यादवं कुलम् ।
यवनेन रणे गन्तुं मागधस्य भविष्यति ॥
मागधस्य बलं क्षीणं स कालयवनो बली ।
हन्ता तद्दिदमायातं यदूनां वसनं द्विधा ॥
तस्मादुर्गं करिष्यामि यदूनामतिदुर्जयम् ।
स्त्रियोऽपि यत्र युध्येयुः किं पुनर्ह्यस्त्रिपुङ्गवाः ॥"
"इति सञ्चिन्त्य गोविन्दो योजनानि महोदधिम् ।
ययाचे द्वादशपुरीं द्वारकां तत्र निर्ममे ॥
मथुरावासिनो लोकांस्तत्रानीय जनार्द्दनः ।
आसन्ने कालयवने मथुरायाञ्च स्वयं ययौ ॥
बहिरावासिते सैन्ये मथुरायां निरायुधः ।
निर्जगाम स गोविन्दो दृष्ट्वा यवनञ्च तम् ॥
स ज्ञात्वा वासुदेवं तं बाहुप्रहरणो नृपः ।
अनुयातो महायोगिचेतोभिः प्राप्यते न यः ॥
तेनानुयातः ह्यग्रोऽपि प्रविवेश महागुहाम् ।
तत्र शेते महावीर्य्यो सुचुक्रुन्दो नरेश्वरः ॥
सोऽपि प्रविश्य यवनो दृष्ट्वा शय्यागतं नरम् ।
पादेन ताडयामास ह्यग्रं मत्वा सुदुर्म्मतिः ॥
दृष्टमात्रञ्च तेनासौ ज्वाल यवनोऽग्निवा ।
तत्क्रोधजेन मैत्रेय ! भस्मीभूतञ्च तत्क्षणात् ॥"
इति विष्णुपुराणे ५ अंशे २३ अध्यायः ॥

यवनः, त्रि, (यौतीति । यु + "नन्दिग्रहीति ।" ३ । १ । १३४ । इति ल्युः ।) वेगी । इति मेदिनी । ने, १११ ॥ (यथा, नैषधचरिते । १ । ६५ ।
"तमन्ववारा यवनान्वयायिनं
प्रकाशरूपा मनुजेशमन्वयुः ॥")

यवनद्विट्, पुं, (यवनैर्द्विष्टः । हिन्दुप्रियत्वात् तथात्वम् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥

यवनप्रियं, क्ली, (यवनानां प्रियम् ।) मरिचम् । इति हेमचन्द्रः । ३ । ४८ ॥ (विवरणमस्य मरिचशब्दे ज्ञातव्यम् ॥)

यवनाचार्य्यः, पुं, (यवनो नामाचार्य्यः ।) ज्योतिःशास्त्रकर्त्तृमुनिविशेषः । इति वराहमिहिरौ ॥

यवनानी, स्त्री, (यवनानां लिपिः । "यवनाल्लिप्याम् ।" ४ । १ । ४९ । इति वार्त्तिकोक्त्या ङीष् आनुगागमश्च ।) यवनस्य लिपिः । इति सुग्धबोधटीकायां दुर्गादासः ॥

यवनारिः, पुं, (यवनानामरिः । यवनः कालयवनोऽरिर्यस्येति वा ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥

यवनालः, पुं, (यवानां नाला इव नाला यस्य ।) धान्यविशेषः । देधारा इति भाषा । तत्पर्य्यायः । योनालः २ जूर्णाङ्कयः ३ देवधान्यम् ४ जोन्नाला ५ बीजपुष्पिका ६ । इति हेमचन्द्रः । ४ । २४४ ॥ (यथा, सुश्रुते उत्तरतन्त्रे १५ अध्याये ।
"यवनालस्य चूर्णेन त्रिकटोर्लवणस्य च ।
खेदयित्वा ततः प्रच्छाद्भक्षयेत् कुशलो भिषक् ॥")

यवनालजः, पुं, (यवानां नालेभ्यो जायते इति । जन् + डः ।) यवक्षारः । इति हेमचन्द्रः । ४ । १० ॥ (यथा, वैद्यकरत्नमालायाम् ।
"क्षारस्तीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः ॥")

यवनिका, स्त्री, (युनात्यावृणोत्यनया । यु + ल्युट् । ङीष् । स्वार्थे कन् । टाप् ।) जवनिका । इत्यमरटीका ॥ कानात् इति भाषा । (यथा, भागवते । १ । ८ । १६ ।
"मायायवनिकाच्छन्नमज्ञाधोक्षजमव्ययम् ।
न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥")

यवनी, स्त्री, (यूयते पच्यते भुक्तमनया । यु + ल्युट् । ङीष् ।) यवानीनामकौषधिभेदः । इति मेदिनी । ने, ११२ ॥ (यवनस्य स्त्रीति । यवन + ङीष् ।) यवनभार्य्या ॥ (यथा, रघुः । ४ । ६१ ।
"यवनीमुखपद्मानां सेहे मधुमदं नयः ।
बालातपमिवाजानामकालजलदोदयः ॥")

यवनेष्टं, क्ली, (यवनानां इष्टम् ।) सीसकम् । इति हेमचन्द्रः । ४ । १०७ ॥ मरीचम् । व्यञ्जनम् । इति राजनिर्घण्टः ॥

यवनेष्टः, पुं, (यवनानामिष्टः ।) लशुनः । राजपलाण्डुः । निम्बः । पलाण्डुः । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
"पलाण्डुर्यवनेष्टश्च दुर्गन्धो सुखदूषकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

यवप्रख्या, स्त्री, (यव इति प्रख्या यस्याः ।) क्षुद्ररोगविशेषः । तल्लक्षणं यथा, भावप्रकाशे ।
"यवाकारा सुकठिना ग्रथिता मांसमिश्रिता ।
पीड़का श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते ॥"
यवाकारा मध्ये स्थूला प्रान्ते क्षुद्रा । तच्चिकित्सा यथा,—
"अन्नालजीं यवप्रख्यां पूर्व्वं खेदैरुपाचरेत् ।
मनःशिलादेवदारुकुष्ठकल्कैः प्रलेपयेत् ।
पक्वां व्रणविधानेन यथोक्तेन प्रसाधयेत् ॥"

यवफलः, पुं, (यववत् फलमस्य ।) वंशः । इत्यमरः । २ । ४ । १६१ ॥ जटामांसी । कुटजः । इति मेदिनी । ले, १६२ । (अस्य पर्य्यायो यथा,
"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
ह्यग्रवृक्षः । इति शब्दरत्नावली ॥

यवमध्यं, क्ली, (यववत् मध्यं यस्य ।) चान्द्रायणप्रभेदः । यथा,—
"शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणन्तथा ।
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाह्वयम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(पुं, यज्ञभेदः । यथा, शतपथब्राह्मणे । १३ । ४ । १ । ६ ।
"यवमध्यः पञ्चरात्रो भवति ॥"
यवाकारमध्ये, त्रि । यथा, सुश्रुते चिकित्सास्थाने १ अध्याये ।
"शरावनिम्नमध्यञ्च यवमध्यास्त्वपरे ।
एवंप्रकाराह्यतयो भवन्त्यागन्तवो व्रणाः ॥")

यवमयः, त्रि, (यवस्य विकारोऽवयवो वा । यव + "असंज्ञायां तिलयवाभ्याम् ।" ४ । ३ । १४६ । इति मयट् ।) यवनिर्म्मितः । यवग्रन्थात् मयट्प्रत्ययेन निष्पन्नः ॥ (यथा, शतपथब्राह्मणे । २ । २ । ३ । १३ ।
"अर्कपलाशाभ्यां यवमयमपूपं कृत्वा यज्ञाहवनीयमाधास्यन् न भवति तन्निदधाति ॥")

यवलासः, पुं, (यवात् लासो यस्य ।) यवक्षारः । इति शब्दरत्नावली ॥ (विशेषोऽस्य यवक्षारशब्दे ज्ञातव्यः ॥)

यवशूकः, पुं, (यवानां शूकः कारबलेनाच्यस्य । अर्शआद्यच् ।) यवक्षारः । इति त्रिकाण्डशेषः ॥ (यथास्य पर्य्यायः ।
"यावशूको यवक्षारो यवशूको यवाग्रजः ।
क्षारस्तीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः ॥"
इति वैद्यकरत्नमालायाम् ॥)

यवशूकजः, पुं, (यवशूकात् जायते इति । जन् + डः ।) यवक्षारः । इति राजनिर्घण्टः ॥ (विवरणमस्य यवक्षारशब्दे ज्ञातव्यम् ॥)

यवसं, क्ली, (यौतीति । यु + "वहियुभ्यां सित् ।" उणा० ३ । ११६ । इत्यसच् । संज्ञापूर्व्वकत्वान्न वृद्धिः ।) तृणम् । घासः । इत्यमरः । २ । ४ । १६० ॥ (यथा, मनौ । ७ । ७५ ।
"तस्यादायुधसम्पन्नं धनधान्येन वाहनैः ।
ब्राह्मणैः श्रुतिसम्पन्नैर्यवसेनोदकेन च ॥")

यवसुरं, क्ली, (यवनिर्म्मिता सुरा । "सुरासीधोर्व्वाक्षायाणामाग्नेयानि स्त्रियाञ्च ।" सिद्धान्तशिरोमणौ नपुंसकाधिकारे १२ । इति क्लीवत्वम् ।) यवजातसुरा । इति सिद्धान्तकौमुदी ॥

यवागूः, स्त्री, (यूयते मिश्र्यते इति । यु + "ह्रस्वयवियोऽन्युजागूजकुचः ।" उणा० ३ । ८१ । इति आगूच् ।) षड्गुणजलपक्वघनद्रवद्रव्यविशेषः । याउ इति भाषा ॥ तत्पर्य्यायः । उष्णिका २ आर्द्रा ३ विलेपी ४ तरला ५ । इत्यमरः । २ । ९ । ५० ॥ "यूयते मिश्र्यते यावागूः यु ल मिश्रणे नाम्नीति आगूः गुणः । क्षीयति क्षिणोति ज्वरादिरोगं उष्णिका उषू च दाहे इह पूर्व्वञ्च निक् । आयते पच्यते स्म आर्द्रा आ ल पाके रक्तः सुखाद्योदिति नः । विलिम्पति विलेपी लिपौ ग्रप च लेपे पचाद्यच् । नदादित्वाद्दीप् । तरति प्लवति तरला त तरेऽभिधे वृत्तौ नाम्नीति अलः ।

'अत्रं पञ्चगुणे साध्यं विलेपी च चतुर्गुणे।
मण्डश्चतुर्दशगुणे यवागूः षड्गुणेऽम्भसि॥'
इति वैद्यकोक्तो भेद इह गाह्यतः॥" इति तट्टीकायां भरतः॥ अस्या गुणाः।
"यवागूर्ज्वरदग्धाग्नौ लघ्वी वस्तिविशोधनी।
अतीसारे ज्वरे दाहे हिता वह्निप्रदीपनी॥"
इति राजवल्लभः॥
(अथास्या गुणा लक्षणञ्च।
"सन्दीपनी खेदकरी यवागूः
सम्याचनी दोषमलामयानाम्।
सन्तर्पणी धातु बलेन्द्रियाणां
ग्रस्ता भवेत् सा ज्वररोगिणाञ्च॥
भागैकञ्च भवेत्तत्र द्विभागेन जलं क्षिपेत्।
चित्रकं पिप्पलीमूलं पिप्पलीचव्यनागरम्॥
धान्यकस्य समांशानि पिष्ट्वा श्वेतांश्च तण्डुलान्।
संभृष्टा ग्रथिता किञ्चित् सा यवागूर्निगद्यते॥
यवागूसुपसृज्यानौ जनो नारुचिमाचरेत्।
ग्राहकमाषफलैर्युक्ता यवागूः स्याच्च दुर्ज्जरा।"
इति हारीते प्रथमस्थाने १२ अध्याये॥
"यावागूः षड्गुणजले सिद्धा स्यात् क्षुत्परा घना।
यवागूर्ग्राहिणी बल्या तर्पणी वातनाशिनी॥"
इति मध्यखण्डे द्वितीयेऽध्याये ग्रार्ङ्गधरेणोक्तम्॥)
यवाग्वजः, पुं, (यवाग्वात् जायते इति। जन्+डः।) यवक्षारः। इत्यमरः। २। ६। १०८॥
(यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"प्राक्षः क्षारो यवक्षारो यावशूको यवाग्वजः॥")
यवानी। इति राजनिर्घण्टः॥
यवानः, त्रि, (यवेन वेगेन अनिति जीवतीति। अन्+अच्।) वेगी। इति मेदिनी। ने, २११॥
यवानिका, } स्त्री, (इष्टो यवः। "यवाद्दोषे।"
यावानी, } ४।१।४६। इत्यस्य वार्त्तिकोक्त्या ङीष् आनुगागमश्च। पक्षे स्वार्थे कन्।) ओषधिभेदः। योयानि इति भाषा। तत्पर्य्यायः। दीप्यकः २ दीप्यः ३ यवसाङ्गः ४ यवाग्वजः ५ दीपनी ६ उग्रगन्धा ७ वातारिः ८ भूकदम्बकः ९ यवजः १० दीपनीयः ११ भूलहली १२ यवानिका १३ उग्रा १४ तीव्रगन्धा १५। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातार्शःश्लेष्मशूलाध्मानकृमिच्छर्द्दिनाशित्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ अपि च। अथ यवान्या नामगुणाः।
"यवानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका।
सर्वोक्ता दीप्यका दीप्या तथा स्याद्यवसाङ्गया॥
यवानी प्राचनी रुक्षा तीक्ष्णोष्णा कटुका लघुः।
दीपनी च तथा तिक्ता पित्तला शुक्रमूत्रकृत्।
वातश्लेष्मोदरानाहगुल्मप्लीहकृमिप्रणुत्॥
अथ अजमोदायाः नामानि गुणाश्च।
अजमोदा खराश्वा च मायूरी दीप्यकस्तथा।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तका॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत्।
उष्णा विदाहिनी रुक्षा रुच्या बलकरी लघुः॥
नेत्रामयकृमिच्छर्द्दिहृद्विकाबस्तिरुजो हरेत्।
अथ खुरासानीयवानीनामगुणाः।
पारसीकयवानी तु यवानीसदृशी गुणैः।
विशेषात् पाचनी रुच्या ग्राहिणी मादिनी गुरुः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
यवापत्यं, क्ली, (यवस्यापत्यम्। तज्ञातत्वात्तथात्वम्।) यवक्षारः। इति राजनिर्घण्टः॥
यवाग्वजं, क्ली, (यवाग्वाभ्यां जायते इति। जन्+डः।) सौवीरम्। इति राजनिर्घण्टः॥
यवासः, पुं, (यौतीति। यु+"ऋतन्यञ्जीति।" उणा० ४।२। इत्वादिना आसः।) दुरालभा। यथा,—
"यवासो यवासो दृष्यर्शो धनुर्यासो दुरालभा॥"
इति रत्नमाला॥
खदिरभेदः। यथा,—
"कण्टकी वासपत्रश्च यवासः खदिरस्तथा॥"
इति शब्दमाला॥
यवासा इति ख्याता कण्टकीक्षुपविशेषः। तत्पर्य्यायः। यासः २ बहुकण्टकः ३ अल्पकः ४ क्षुद्रदुरुः ५ रोदनिका ६ कच्छुरा ७ बालपत्रः ८ विषघ्नः ९ कण्टकालुकः १० त्रिकण्टिका ११ गान्धारी १२ अगस्ता १३। अस्य गुणाः। मधुरतिक्तत्वम्। शीतत्वम्। पित्तार्त्तिदाहनाशित्वम्। बलदीपनकारित्वम्। क्षयाकफच्छर्द्दिविसर्पजित्त्वञ्च। इति राजनिर्घण्टः॥
यवासकः, पुं, (यवास+स्वार्थे कन्।) दुरालभा। इति शब्दरत्नावली॥ (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये।
"त्रयकासं ससन्तापं पार्श्वशूलानपास्यति।
गुडूचीत्रिफलावासाक्वाथमाक्षायवासकैः॥")
यवासशर्करा, स्त्री, (यवासेन तद्रसेन कृता शर्करा। ग्राकपार्थिववत् समासः।) यवासरसघटितशर्करा। तत्पर्य्यायः। सुधामोदकः२ मोदकः३ तवराजः ४ खण्डसरः ५ खण्डजः ६ खण्डमोदकः ७। अस्या गुणाः। अतिमधुरत्वम्। पित्तश्रमदाहनाशकत्वम्। दृष्यत्वम्। विदाहमूर्च्छार्त्तिभ्रान्तिग्लानिकरत्वम्। सरत्वञ्च। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"यवासशर्करा मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति॥")
यवासा, स्त्री, (यवास+टाप्।) गुडत्वक्सिनीतृणम्। इति राजनिर्घण्टः॥
यवाङ्कः, पुं, (यवमाङ्कयति सकारलोपादिति। आ+कै+कः।) यवक्षारः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये।
"यवाङ्कगौरिकोन्मिश्रैः पादलेपः प्रशस्यते॥")
गुणादिविशेषोऽस्य यवक्षारशब्दे विज्ञेयः॥)
यविष्ठः, त्रि, (अयमेषामतिशयेन युवा इति। युवन्+इष्ठन्। "स्थूलदूरेति।" यणादिलोपगुणौ।) अतिशययुवा। (यथा, ऋग्वेदे। १।१४७।२।
"बोधा मे अस्य वचसो यविष्ठ।")
कनिष्ठभ्रातरि, पुं। इति हेमचन्द्रः। ३।११६॥
(त्रिष्वपि। यथा, भागवते। ३।१।५।
"भ्रातुर्ज्यैष्ठस्य सुतान् विबन्धून्
प्रवेश्य लाक्षाभवने ददाह॥")
यवीयान्, [स्] त्रि, (अयमनयोरतिशयेन युवा। युवन्+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५।३।५७। इति ईयसुन्।) कनिष्ठः। (यथा, मनौ। २।१२८।
"अवाप्यो दीक्षितो नाम्ना यवीयानपि यो भवेत्॥"
अतिशय युवा। इति मेदिनी। से, ६१॥
यवीत्यं, क्ली, (यवेभ्य उत्तिष्ठतीति। उद्+स्थाकः।) सौवीरकम्। इति राजनिर्घण्टः॥
यव्यं, त्रि, (यवानां भवनं क्षेत्रम्। यव+"यवयवकषष्टिकाद् यत्।" ५।२।१। इति यत्।) यवादिभवनोचितक्षेत्रम्। तत्पर्य्यायः। यवक्यम् २ षष्टिक्यम् ३। इत्यमरः। २। ६। ७॥ यवोचितम् ४ यवकोचितम् ५। इति शब्दरत्नावली॥ (यवेभ्यो हितम्। यव+"खलयवमाषतिलकृष्णेत्रक्षेत्रात्।" ५।१।७। इति यत्। यवहितः।) इति व्याकरणम्॥)
यवः, पुं, (यवेभ्यो हितः। यव+यत्।) मासः। यथा,—
"यवद्वयं त्रयवादि सर्व्वा नद्यो रजस्वलाः।
तासु स्नानं न कुर्व्वीत वर्ज्जयित्वा ससुद्गमाः॥"
इति प्रायश्चित्ततत्त्वे गङ्गामाहात्म्यम्॥
(स्त्री, नदीभेदः। यथा, ऋग्वेदे। ८।८७।८।
"वाश्यन्ता यथाभिर्ऋष्टिं सूरश्चक्राणि।"
"यथाभिः नदीभिः। अवनयः यथाः इति नदीनामसु पाठात्।" इति तद्भाष्ये सायणः॥)
यश्चः, [स्] क्ली, (अश्नुते व्याप्नोतीति। अश्+"अशेर्देवने युट् च।" उणा० ४।१६०। इत्यसुन् युट् च।) सुखादिः। तत्पर्य्यायः। कीर्त्तिः २ समज्ञा ३। इत्यमरः। १।६।११॥ समाख्या ४ कीर्त्तना ५ अभिख्यानम् ६ आज्ञा ७ समज्या ८। इति शब्दरत्नावली॥
"दानादिप्रभवा कीर्त्तिः ग्लौर्ब्यादिप्रभवं यशः।
इति माधवी॥
अतएव यशःकीर्त्त्योर्भेदस्यापि दर्शनात् यशःकीर्त्तिपरिभ्रष्टो जीवन्नपि न जीवति। इति कस्यचित् प्रयोगः। जीवतः ख्यातिर्यशो मृतस्य ख्यातिः कीर्त्तिरिति केचित्। तन्न साधु कीर्त्तिर्क्ते वृप दूतिकेति प्रयोगदर्शनात्।" इत्यमरटीकायां भरतः॥ कीर्त्तिनाम्नि दोषो यथा,—
"हन्ति यः परकीर्त्तिञ्च स्वकीर्त्तिं मानवाधमः।
स मृतश्च इति ख्यातस्तत्फलञ्च निशामय॥
अन्धकूपे वसेत् सोऽपि यावदिन्द्राश्चतुर्दश।
कीटैर्नकुलमानैश्च भक्षितः सततं वृप!॥
तप्तक्षारोदकं पायी नित्यं पिबति खादति।
ततः सर्पो जन्म लब्ध्वा काकः पञ्च ततः शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४६ अध्यायः॥

(अन्नम्। यथा, ऋग्वेदे। ४। ५२। ११।
"वयं स्याम यज्ञसो जनेषु।"
"यज्ञसः कीर्त्तैरन्नस्य वा।" इति तद्भाष्ये सायणः॥ त्रि, यज्ञस्वी। यथा, ऋग्वेदे। ८। ७६। ५।
"त्वमिन्द्र यज्ञा अस्यूजोर्वी ग्रवसस्पते।"
"त्वं यज्ञाः यज्ञस्वान्सि भवसि।" इति तद्भाष्ये सायणः॥)

यज्ञःपटहः, पुं,(यज्ञःस्वकः पटहः। ग्राकपार्थिववत् समासः।) ढक्का। इत्यमरः। २। ७। ६॥

यज्ञःश्रेष्ठः, त्रि, (यज्ञ एव श्रेष्ठोऽस्य।) ऋतुः। इति हेमचन्द्रः। ३। ३८॥ (यथा, कथासरित्सागरे। ६१। ४४।
"ततः क्रमेण तेनैव सरस्वरभरोद्गता।
प्रबोधदेहः प्रययौ स यज्ञःश्रेष्ठतां नृपः॥")

मरुये, पुं॥

यज्ञाङ्गं, क्ली, धातुविशेषः। दस्ता इति भाषा। यथा,
"यज्ञाङ्गं रङ्गसदृशं रीतिश्चेतुच्च तन्मतम्।
यज्ञाङ्गं तुवरं तिक्तं शीतलं कफपित्तहृत्।
चक्षुष्यं परमं मेहान् पाण्डुश्वासच्च नाशयेत्॥"
इति भावप्रकाशः॥

यज्ञस्करः, त्रि, कीर्त्तिकारकः। सुखातिजनकः। यज्ञस्करोति य इत्यर्थे ("कृञो हेतुताच्छील्यानुलोम्येषु।"३।२।२०।) इति टप्रत्ययेन निष्पन्नः। यज्ञस्करी विद्या इति भाकरत्नम्॥ (यथा, मनौ। ८। ३८३।
"एतेषां नियहो राज्ञः पञ्चानां विषये स्वके।
साम्राज्यकृत् सजात्येषु लोके चैव यज्ञस्करः॥"
विष्णुक्षेत्रविशेषे, क्ली। यथा, नारसिंहे ६२ अः।
"विरजं पुण्यवत्यायां वालखामीकरे विदुः।
यज्ञस्करं विपाशायां माहिष्मत्यां हुताशनम्॥"
श्रीभावतीपुर्य्यां जाते ब्राह्मणविशेषे, पुं। यथा, कथासरित्सागरे। १०४। १६।
"तस्यां यज्ञस्करो नाम विद्वानाढ्यो बहुक्रतुः।
ब्राह्मणोऽभूद्भूतस्य सत्पत्नी मेखलेति च॥")

यज्ञस्या, स्त्री, (यज्ञसे हिता। यज्ञस्+यत्।) जीवन्ती। ऋद्धिनामौषधिः। इति राजनिर्घण्टः॥

यज्ञस्वान्, [त्] त्रि, (यज्ञोऽस्यास्य। यज्ञस्+मतुप्। मस्य वः।) कीर्त्तिविशिष्टः। इति भाकरत्नम्॥ (यथा, अथर्ववेदे। ६। ५८। २।
"यथेन्द्रो द्यावापृथिव्योर्यज्ञस्वान्
यथाप ओषधीषु यज्ञस्वतीः॥")

यज्ञस्विनी, स्त्री, (यज्ञस्विन्+ङीष्।) वनकार्पासी। इति शब्दरत्नावली॥ यवतिक्ता। महाज्योतिष्मती। इति राजनिर्घण्टः॥ (सत्यव्रतस्य पत्नी। यथा, कथासरित्सागरे। ७३।२५७।
"अहं यज्ञस्वती नाम राजसेवानुजीविनः।
भार्य्या सत्यव्रताख्यस्य विप्रस्येहाभवान्वया॥"
गङ्गा। यथा, काशीखण्डे तत्सङ्गमनामकथने। २६। १४१।
"यज्ञस्विनी यज्ञोदा च योग्या युक्तात्मसेविता॥")

यज्ञस्वी, [न्] त्रि, (यज्ञोऽस्यस्येति। यज्ञस्+"अस्मायेति।"५। २। १२१। इति विनिः।) यज्ञोविशिष्टः। कीर्त्तिमान्। इति भाकरत्नम्॥ (यथा, मनौ। ६। ३३४।
"विप्राणां वेदविदुषां गृहस्थानां यज्ञस्विनाम्।
शुश्रूषैव तु शूद्रस्य धर्म्मो नैःश्रेयसः परः॥")

यज्ञोदः, पुं, (यज्ञो ददातीति। दा+कः।) पारदः। इति राजनिर्घण्टः॥ (स्त्रीत्वेऽपि ङीष्भवति। यथा, वाराहे।
"सुवर्णं रजतं ताम्रं रङ्गं यज्ञोदमेव च।
सीसं लौहञ्च सप्तैते धातवो गिरिसम्भवाः॥")
यज्ञोदातरि, त्रि॥

यज्ञोदा,स्त्री,(यज्ञो ददातीति। दा+कः। टाप्।) नन्दपत्नी। यथा, श्रीभागवते १०। स्कन्धे।
"नन्दः किमकरोद्ब्रह्मन् श्रेय एवं महोदयम्।
यज्ञोदा वा महाभागा पपौ यस्याः स्तनं हरिः॥"
(दिलीपमाता। यथा, हरिवंशे। १८। ६०।
"तेषान्तु मानसी कन्या यज्ञोदा नाम विश्रुता।
पत्नी सा विश्वसहतः सुषुवे दृढ़धर्म्मिणः।
राजर्षेर्जननी चापि दिलीपस्य महात्मनः॥"
यज्ञोदातरि, त्रि। यथा, तैत्तिरीयसंहितायाम्। ४। ४। ६। २।
"यज्ञोदां त्वा यज्ञपतिं तेजोदां त्वा तेजसीति॥")

यज्ञा, [ऋ] पुं, (यजते इति। यज्+क्त्र।) यागकर्त्ता। तत्पर्य्यायः। यजमानः२। इत्यमरः।२। ७। ८॥ (यथा, मार्कण्डेये। १२०। २।
"स दानशीलो यज्ञा च यज्ञानामवनीपतिः॥")

यष्टिः, पुं, (इष्यते इति। यज्+बाहुलकात् तिः। इति उणादिवृत्तौ उज्ज्वलदत्तः।४।१७६।) व्यजदण्डः। इति विश्वप्रकाशरत्नावल्यौ॥ मुजदण्डः। इति मेदिनी। टे, २६॥

यष्टिः, पुं, स्त्री, (यजते सङ्गच्छते। यज्+तिः।) तनुः। इति शब्दमाला॥ हारलता। (हारावलिः। यथा, रघौ। १३। ५४।
"क्वचित्प्रभालेपिभिरिन्द्रनीलै-
र्मुक्तामयी यष्टिरिवानुविद्धा।
अन्यत्र माला सितपङ्कजानां
इन्दीवरैरुत्खचितान्तरेव॥"
"यष्टिः हारावलिः।" इति मल्लिनाथः॥ *॥) भार्गी। मधुका। शस्त्रभेदः। इति मेदिनी। टे,२६॥ शरीरस्य पर्य्यायः। दण्डः२। जगुड़ः३ इति हेमचन्द्रः। ३। ४४६॥ तद्दानफलं यथा, वह्निपुराणे।
"यष्टिं ये तु प्रयच्छन्ति नेत्रहीने सुदुर्म्मले।
तेषान्तु विपुलः पुंसां सन्तानो मोदवर्द्धनः॥"
(स्त्री, शाखा। यथा, कुमारे। ६। २।
"चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी॥"
"चूतयष्टिः चूतशाखा इव।" इति तत्र मल्लिनाथः॥ यष्टिमधु। तत्पर्य्यायः। यथा,
"यष्ट्याह्वं मधुकं यष्टिः क्लीतकं मधुयष्टिका।
यष्टिमधु स्त्वेजाता जलजातिरसा पुरा॥"
इति वैद्यकरत्नमालायाम्॥)

यष्टिकः, पुं, (यष्टिरिव। कन्।) जलकुक्कुटः। इति शब्दरत्नावली॥ (यष्टि+स्वार्थे कन्।) दण्डश्च॥

यष्टिका, स्त्री, (यष्टि+स्वार्थे कन्। टाप्।) हारभेदः। यथा,—
"यष्टिका दण्डिका चैव तिलका सारिकेत्यपि॥"
इति जटाधरः॥
वापी। यथा,—
"पल्वलं दीर्घिका वापी यष्टिका भीमगोधिका॥"
इति त्रिकाण्डशेषः॥
यष्टिमधुका। यथा,—
"अथ यष्टीमधुकं स्यान्मधुयष्टी तु यष्टिका॥"
इति शब्दरत्नावली॥
जगुड़ः। यथा,—
"अथ शक्तिश्च शक्ती च यष्टिर्यष्टी च यष्टिका।
दण्डः काण्डोऽपि जगुड़ः पश्चन्नो दण्डको-
ऽपि च॥"
इति शब्दरत्नावली॥

यष्टिग्रहः, पुं, (यष्टिं गृह्णातीति। यष्टि+ग्रह+"शक्तियष्टितोमरेति।" ३। २। ६। इत्यस्य वार्त्तिके अच्।) यष्टिधारकः। जगुड़ग्राही। इति सुग्धबोधटीकायां दुर्गादासः॥

यष्टिमधु, क्ली, (यष्ट्या मधु माधुर्य्यमस्य।) यष्टिमधुका। इति हलायुधः॥ (यस्यास्य पर्य्यायः।
"यष्ट्याह्वं मधुकं यष्टिः क्लीतकं मधुयष्टिका।
यष्टिमधु स्त्वेजाता जलजातिरसा पुरा॥"
इति वैद्यकरत्नमालायाम्॥)

यष्टिमधुका, स्त्री, (यष्टिमधुवत् कायतीति। कै+कः।) यष्टिमधु। तत्पर्य्यायः। क्लीतकम् २ मधुकम् ३ मधुयष्टिका ४। इत्यमरः। २।४।९०॥ यष्ट्याह्वम् ५ यष्टिः ६ स्त्वेजातं चेतु यष्टिमधु ७ जलजा चेतु अतिरसा ८। इति रत्नमाला॥ अपि च।
"ज्येष्ठीमधु तथा यष्टीमधुकं क्लीतकं तथा।
अन्यक्लीतनकं तत्तु भवेत्तोये मधूलिका॥"
अस्या गुणाः।
"यष्टी हिमा गुरुः स्वादी चक्षुष्या बलवर्ण-
कृत्।
सस्निग्धा शुक्रला केश्या स्वर्य्या पित्तानिला-
सजित्।
व्रणशोथविषच्छर्द्दिष्णाग्वानिक्षयापहा॥"
इति भावप्रकाशः॥

यष्टी, स्त्री, (यष्टि+"शृदिकारादक्तिनः।" इति ङीष्।) यष्टिमधु। इति भावप्रकाशः॥ (यथास्याः पर्य्यायः।
"यष्टी यष्ट्याह्वयं प्रोक्तं मधुकं मधुयष्टिका।"
इति गारुड़े २०८ अध्यायः॥
तथास्या गुणाः। भावप्रकाशस्य पूर्व्वखण्डे १।
"यष्टी हिमा गुरुः स्वादी चक्षुष्या बलवर्ण-
कृत्।

सुस्निग्धा शुक्ला केशा स्वर्या पित्तानिलास्रजित्।
व्रणशोथविषक्लेदहृल्लासानिलनाशनी॥"
(हारभेदः। तल्लक्षणं यथा, दृष्टसंहितायाम्। ८१। ३६।
"संयोजिता या मणिना तु मध्ये
यष्टीति सा भूषणविद्भिरुक्ता॥")

यष्टीकं, क्ली, (यष्टी+कन्।) यष्टिमधु। इति राजनिर्घण्टः॥

यष्टीपुष्पः, पुं, (यष्टीपुष्पमिव पुष्पं यस्य।) पुत्रजीववृक्षः। इति भावप्रकाशः॥

यष्टीमधु, क्ली, (यष्ट्यां मधु माधुर्य्यमस्य।) मिश्रमूलविशेषः। जेठीमधु इति मूलहटी इति च हिन्दी भाषा। तत्पर्य्यायः। मधुयष्टी २ मधुवल्ली ३ मधुस्रवा ४ मधूकम् ५ मधु ६ यष्टीकम् ७ यष्ट्याह्वम् ८। (तथा च।
"यष्टीमधु तथा यष्टी मधुकं क्लीतकन्तथा।
अन्यत् क्लीतनकन्तत्तु भवेत्तोये मधूलिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
अस्य गुणाः। मधुरत्वम्। किञ्चित्तिक्तत्वम्। शीतलत्वम्। चक्षुष्यत्वम्। पित्तहरत्वम्। रुच्यत्वम्। शोषक्षयान्नाशापहत्वञ्च। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सास्थाने २० अध्याये। "तत्र विदग्धलक्षणचूर्णमाहृत्य यष्टीमधुयुक्तं यथाबलं शीततोयेनोपयुञ्जीत॥")

यष्ट्याह्वं, क्ली, (यष्टीव्याह्वा यस्य।) यष्टिमधु। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने १६ अध्याये।
"यवाश्वगन्धा यष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं हितम्॥")

यस, इर् य उ यतने। इति कविकल्पद्रुमः॥ (दिवा०-परः०-अकः०-सेट्। ङावेट्।) इर्, अयसत् अयासीत् अयसीत्। असात् पुषादित्वान्नित्यं ङ इत्यन्ये। य, प्रयस्यति। क्रम क्रम इत्यादिना केवलात् संपूर्व्वाच्च असात् श्यन् विकल्पात् यसति यस्यति संयस्यति संयसति। उ, यसित्वा यस्त्वा। यतनं यत्नः। इति दुर्गादासः॥

यस्कः, पुं, (यसति मोक्षायेति। यस्+किप्। संज्ञायां कन्।) मुनिविशेषः। इति सुग्धबोधव्याकरणम्॥ (यथा, आश्वलायनश्रौतसूत्रे उत्तरार्द्धे। ६।१०।१०। "यस्कवार्षगणौलमौनमौकशाकराक्षिसाकिसावर्षिगालवायनजैमिनिदेवन्त्यायनानां भार्गववैतहव्यसावेतसेति॥")

यज्ञः, पुं, (यजतीति। यज+"ग्रेवायज्ञजिज्ञाग्रीवाप्रामीवाः।" उणा० १। १५४। इति नक्प्रत्ययेन निपातितः।) यजमानः। इत्यादिकोषः॥ (त्रि, महान्। यथा, ऋग्वेदे। ३। १। १२।
"उद्धसिया चनिता यो जजानापां गर्भो वृतमो यज्ञो अग्निः।"
"यज्ञो महान्।" इति तद्भाष्ये सायणः॥)

या, ल गतौ। इति कविकल्पद्रुमः॥ (अदा०-परः०-सकः०-अनिट्।) ल, याति। इति दुर्गादासः॥

यागः, पुं, (इज्यते इति। यज्+घञ्।) यज्ञः। इत्यमरः। २। ७। १३॥ तत्र औतायिकत्रयविर्यज्ञाः सप्त। यथा। आधानं तदेवाग्निहोत्रम् १ दर्शपौर्णमासौ २ पिण्डपितृयज्ञः ३ आग्रयणम् ४ चातुर्म्मास्यः ५ निरूढपशुबन्धः ६ सौत्रामणिः ७। स्मार्त्ताग्निकत्रयपाकयज्ञाः सप्त। यथा। औपासनम् १ वैश्वदेवः २ स्थालीपाकः ३ आग्रयणम् ४ सर्व्वबलिः ५ ईशानबलिः ६ अष्टकान्वष्टका ७। औतायिकसप्तसंस्थाः। यथा। सोमयागः स एवाग्निष्टोमः १ अत्यग्निष्टोमः २ उक्थ्यः ३ षोडशी ४ वाजपेयः ५ स द्विविधः संस्था कुरुश्च। अतिरात्रः ६ अप्तूर्य्यामः ७। उत्तरक्रतवो बहवः। यथा। महाव्रतम् १ सर्व्वतोमुखम् २ राजसूयः ३ पौण्डरीकम् ४ अभिजित् ५ विश्वजित् ६ अश्वमेधः ७ द्वादशसतिवः ८ आङ्गिरसः ९ चयनान्यष्टादश २०। इत्यादि श्रौतसूत्रम्॥*॥ सर्व्वदेवानां यागकालो यथा,
शुक्र उवाच।
"स्वल्पेनैव तु द्रव्येण महापुण्यं यथा भवेत्।
तदहं श्रोतुमिच्छामि ग्रहयागं सुरेश्वर!॥
ब्रह्मोवाच।
शृणु वत्स प्रवक्ष्यामि यथा त्वं परिपृच्छसि।
अल्पकेन महापुण्यं ग्रहर्क्षतिथियौगिकम्॥
शुगुपूर्णाश्मीयोगं शिवयागेषु चोत्तमम्।
रुद्रवर्गश्च भाग्यश्च उमाया भृगुवासरे॥
दैवयोगात् यदा षष्ठी पुष्यर्क्षरविवासरम्।
स्कन्दयागस्तदा कार्य्यः सर्व्वकामप्रसाधकः॥
वारेण वा यदा सूर्य्यः सप्तमी विजया मता।
तदा तु भवते भानोर्यागः सर्व्वगुणावहः॥
अग्निरिक्तानुसंयोगे अर्कर्क्षे सोत्तरासु च।
नवम्यां मङ्गलायोगो भानुमूलदिनं यदा॥
अश्वियां वाथ चन्द्रार्के अवमेन शुभावहम्।
अहिर्बुध्न्ये कुजार्के तु गणेशे तस्य वाहनि॥
पुनर्व्वसौ गुरोर्व्वारे द्वादश्यां अवमेन वा।
सोमयज्ञं यदा योगं विष्णोः सर्व्वार्थसाधकम्॥
द्वितीयायां यदा सौम्ये श्रुतिकर्क्षे भवेत् क्वचित्।
ग्रहयागस्तदा कार्य्यः सर्व्वग्रान्तिप्रदायकः॥
स्वातीसौमी चतुर्थी च उमायागे वरा स्मृता॥
उत्तरासु च सर्व्वासु भानुपौर्णाश्मीषु च।
ग्राम्यभिषेकयागेषु सर्व्वकामार्थदाश्मी॥
गुरावेकादशी पुष्ये रोहिण्या वा यदा भृगेः।
सुतसौभाग्यकामाय यागो रुद्रविनायके॥
पूर्णिमासु च सर्व्वासु अष्टमीद्वादशीषु च।
चतुर्दश्यां तृतीयासु ग्रह ऋक्षे शुभेषु च।
सर्व्वेषां भवते यागो भक्तिपूर्व्वो महामुने!॥
मन्त्रसाधनद्रव्यायो रुद्रयागादधाप्यते।
श्रीमेधाज्ञानवात्सल्यसमायागान्महामुने॥
योगज्ञानयशःसिद्धिं महादेवादवाप्नुयात्।

आरोग्यं सप्रतापत्वं भास्करात् प्राप्यते ध्रुवम्॥
गतिमिष्टां यथाकामं प्रयच्छति त्रिविक्रमः।
विघ्नो न भवते तस्य यस्तु पश्येद्विनायकम्॥
विगतारिर्भवेत् वह्नौ दृष्ट्वा स्कन्दं मखे व्रजात्।
माहेयागान्महासिद्धिः सर्व्वेषामपि जायते॥
भवते धनवान् पुंसः प्रथमार्हे हुताशनात्।
स्वर्गापवर्गसंसिद्धिर्दुर्गायागात् प्रजायते॥
माघादैर्मङ्गलांशोत्या ज्येष्ठाद्यैर्ब्रह्म जायते।
ईशाद्यैः कालिकाद्यास्तु यष्टव्या विधिना सुने॥"
इत्यादौ देवावतारे उदयतिथ्यृचयोगमाहात्म्यकीर्त्तनम्॥*॥

अथ ग्रहयागविधिः।

"प्रणम्य नव रथादीन् शुभाशुभफलप्रदान्।
ग्रहयागविधिं सम्यक् वक्ष्ये श्रीरघुनन्दनः॥

अथ ग्रहयागप्रयोगः।

तत्र रविसोमबुधगुरुशुक्रवारेषु चित्रानुराधाहस्ताश्विरोरेवतीपुष्याश्विनीहस्तारोहिण्युत्तरात्रयेषु चन्द्रतारानुकूले शुभलग्ने यागः कार्य्यः। अत्र बालग्रहभूतग्रहप्रबलतरनराधिपग्रहचन्द्रःसद्गोमाभिभवाद्भूतदुःस्वप्नावलोकनग्रहदौस्थ्यादिनिमित्तकं प्रान्तिकं मलमासादावपि कर्त्तव्यम्। अवग्रहं विना केवलदृष्ट्यायुःपुष्टिपुत्रश्रीकामादिपौष्टिकन्तु मलमासादीतरकाल एव कार्य्यम्॥*॥ तत्र यजमानः स्नातस्नानादिः गोमयोपलिप्ते देशे सदर्भासनोपविष्ट उदङ्मुखः स्वस्तिवाच्य सूर्य्यः सोम इति पठित्वा फलपुष्पतिलदर्भत्रयसहितजलपूर्णताम्रपात्रं गृहीत्वा, ॐ तद्विष्णोरिति विष्णुं संस्मृत्य ॐ तत् सदिद्युच्चार्य्य ॐ अद्येत्यादि असुकगोत्रः श्रीअसुकदेवशर्म्मा असुककामी ग्रहयज्ञमहं करिष्ये इति सङ्कल्प्य तज्जलमेवेष्टान्यां निःक्षिपेत्। अन्यार्थत्वे गोत्रनाम्नोः षष्ठ्यन्तता। करिष्ये इत्यत्र करिष्यामीति विशेषः। ततः श्वेतसर्षपानादाय।

ॐ वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः।
अपसर्पन्तु ते सर्व्वे ये चान्ये विघ्नकारकाः॥
ॐ विनायका विघ्नकरा महोग्रा
यज्ञद्विषो ये पितृसाधनाश्च।
सिद्ध्यर्थकैर्वश्यसमानकल्पै-
र्मया निरस्ता विदिशः प्रयान्तु॥

इत्येताभ्यां मन्त्राभ्यां श्वेतसर्षपप्रक्षेपैर्विघ्नकारकानपसारयेत्। ततः सगणाधिपषोढ़ामातृकापूजां वसोर्धारां आयुष्यजपं तदन्ते गायत्रीजपं दक्षिणाहस्तेन जलं गृहीत्वा तदग्रस्थौ भोज्यसुतल्प्य ब्राह्मणान् परितोष्य ततः स्वयमग्रस्थौ कर्त्ता प्राङ्मुखं गुरुम् ॐ साधु भवानास्तामिति वदेत् ॐ साध्वहमासे इति प्रतिवचनम्। ततो गन्धपुष्पवस्त्राङ्कुरीयकादिना गुरुमलङ्कृत्य दक्षिणं जानु स्पृष्ट्वा ॐ अद्येत्यादि मत्सङ्कल्पितग्रहयागकर्म्मणि ग्रहपूजाहोमकर्म्मकरणाय असुकगोत्रं असुकदेव-

ग्रस्मैनं गन्धादिभिरभ्यर्च्य भवन्तमर्हं इत्ये। ॐ इतोऽसीति प्रतिवचनम्। ॐ यथाविहितं पूजादिकर्म्म कुरु। ॐ यथाज्ञानं करवाणीति प्रतिवचनम्। *। ततो मण्डपोत्तरपूर्व्वभागे वितस्तिहयविस्तृतायां वितस्तुच्छ्रितायां उदक्प्रवायां वेद्यां गोमयेनोपलिप्तायां रक्तचन्दनादिना मध्ये वर्त्तुलं सूर्य्यम्। आग्नेय्यां श्वेतमर्द्धचन्द्राकारं सोमम्। दक्षिणस्यां त्रिकोणं रक्तं मङ्गलम्। ऐशान्यां पीतं धनुराकारं बुधम्। उत्तरस्यां पीतं पद्माकारं बृहस्पतिम्। प्राच्यां श्वेतं चतुष्कोणं शुक्रम्। प्रतीच्यां श्यामं सर्पाकारं शनिम्। नैर्ऋत्यां श्यामं मकराकारं राहुम्। वायव्यां धूम्रवर्णान् खड्गाकारान् केतून् विलिख्य स्वयम्भोक्तविधिना अग्न्याधानादिस्थापनपर्य्यन्तं कर्म्म कृत्वा मण्डले यहानावाहयेत्। *। तत्र क्रमः। मध्ये।

ॐ त्र्यस्रं काश्यपं रक्तं कार्त्तिकं द्वादशाङ्गुलम्।

पञ्चहस्तहृदयं पूर्व्वाननं सप्तास्यबाहुनम्। शिवाधिदेवतं ध्यायेद्वह्निप्रत्यधिदेवतम्। सप्तम्यां जायमानं विशाखानक्षत्रं रक्तमाल्याम्बरधरम्। इति ध्यात्वा ॐभूर्भुवः स्वः सूर्य्यग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्। १। आग्नेये।

ॐसासृग्रं वेश्यमात्रेयं हस्तमात्रं सिताम्बरम्। श्वेतं द्विबाहुं वरदं दक्षिणं सगदेतरम्। दध्याढ्यं श्वेतपद्मस्थं विचिन्त्योमाधिदेवतम्। जलप्रत्यधिदेवञ्च सूर्य्यास्यमाडयेत्तथा। चतुर्थ्यां जातं हस्तिकानक्षत्रमिति ध्यात्वा ॐभूर्भुवः स्वः सोमग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्। २। दक्षिणस्याम्।

ॐ आवन्त्यं त्र्यस्रं रक्तं मेषस्थं चतुरङ्गुलम्। आरक्तमाल्यवसनं भारद्वाजं चतुर्भुजम्। दक्षिणोर्द्धकमात् शक्तिवराभयगदाकरम्। आदित्याभिसुतं देवं तद्देव समाडयेत्। स्कन्दाधिदेवतं भौमं क्षितिप्रत्यधिदेवतम्। दशम्यां जातं पूर्व्वाषाढानक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः मङ्गलग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्। ३। ऐशान्याम्।

ॐ मागधं द्व्यङ्गुलाचैत्यं वैश्यं पीतं चतुर्भुजम्। वामोर्द्धकमतश्चक्रमेगदावरदखड्गिनम्। सूर्य्यास्यं सिंहगं सौम्यं पीतवस्त्रं तथाडयेत्। नारायणाधिदेवञ्च विष्णुप्रत्यधिदेवतम्। द्वादश्यां जातं धनिष्ठानक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः बुधग्रह इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्। ४। उत्तरस्याम्।

द्विभाङ्गिरसं पीतं क्षत्रियञ्च षडङ्गुलम्। श्वेतं पीताम्बरं जीवं वरोत्पलं चतुर्भुजम्। दक्षोर्द्धादक्षवरदकरकादक्षमाडयेत्।

ब्रह्माधिदेवं सूर्य्यास्यमिन्द्रप्रत्यधिदेवतम्। एकादश्यां जातं उत्तरफल्गुनीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः बृहस्पते इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्। ५। ततः प्राच्याम्।

ॐ शुक्रं भोजकटं विप्रं भार्गवञ्च नवाङ्गुलम्। पद्मस्थमाडयेत् सूर्य्यसुतं श्वेतं चतुर्भुजम्। सदाक्षवरकरकादक्षहस्तं सिताम्बरम्। शुक्राधिदेवतं ध्यायेत् शचीप्रत्यधिदेवतम्। नवम्यां जातं पुष्यनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः शुक्र इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्। ६। पश्चिमायाम्।

सौराष्ट्रं काश्यपं शूद्रं सूर्य्यास्यं चतुरङ्गुलम्। श्यामं श्यामाम्बरं गृध्रगतं सौरिं चतुर्भुजम्। तद्वदाक्षवरशूलधनुर्हस्तं समाडयेत्। यमाधिदेवतं प्रजापतिप्रत्यधिदेवतम्। श्यामचतुर्थ्यां जातं रोहिणीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः शनैश्चर इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्। ७। नैर्ऋत्याम्।

राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम्। श्यामं श्यामाम्बरं सिंहासनं ध्यात्वा तथाडयेत्। चतुर्व्वाहुं खड्गवरशूलचर्म्मकरं तथा। कालाधिदेवं सूर्य्यास्यं सर्पप्रत्यधिदेवतम्। पौर्णमास्यां जातं भरणीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः भगवन् राहो इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इति शुक्लतण्डुलैरावाह्य स्थापयेत्। ८। वायव्याम्।

कौशद्वीपं केतुगणं जैमिनीयं षडङ्गुलम्। धूम्रं ध्वजगतं शूद्रमाडयेत् विप्रतानवम्। सूर्य्यास्यं धूम्रवसनं वरदं ग्रहिणं तथा। चित्रगुप्ताधिदेवञ्च ब्रह्मप्रत्यधिदेवतम्। अमावास्यायां जातं अश्विनीनक्षत्रमिति ध्यात्वा ॐ भूर्भुवः स्वः भगवन् केतव इहागच्छत इहागच्छत इह तिष्ठत इह तिष्ठत इति शुक्लतण्डुलैरावाह्य स्थापयेत्। ९। अधिदेवतप्रत्यधिदेवतापूजनञ्च अयुतहोमादौ। ततस्तत्तद्ग्रहैर्वस्तत्तद्ग्रहैर्गन्धतत्तद्ग्रहैर्पुष्पं दद्यात्। सूर्य्ये विशेषः। रवये गुग्गुलुधूपम्। सोमाय सरलम्। मङ्गलाय देवदारुम्। बुधाय हृतमिश्रितदेवदारुम्। बृहस्पतये दशाङ्गम्। शुक्राय अगुरु। शनैश्चराय कालागुरु। राहवे गुग्गुलचम्। केतुभ्यो मधुमिश्रितगुग्गुलचम्। अभावे षोढाङ्गं वा। *। गन्धे विशेषः। सूर्य्याय रक्तचन्दनम्। सोमाय श्वेतचन्दनम्। मङ्गलाय कुङ्कुमम्। बुधाय सरलम्। गुरवे रक्तचन्दनश्वेतचन्दनकुङ्कुमसरलं मिश्रितसमभागत्वेन दद्यात्। शनैश्चराय कस्तूरीम्। राहवे पद्मकाष्ठम्। केतुभ्यश्च पद्मकाष्ठम्। अग्निदेवताप्रत्यधिदेवताः पूजयेत्। *। अधिदेवता प्रत्यधिदेवता यथा। सूर्य्यस्य शिववह्नी।

सोमस्य उमा जलम्। मङ्गलस्य स्कन्दः क्षितिः। बुधस्य नारायणविष्णू। बृहस्पतेः ब्रह्मा इन्द्रश्च। शुक्रस्य शक्रः शची। शनैश्चरस्य यमः प्रजापतिश्च। राहोः कालः सर्पश्च। केतूनां चित्रगुप्तः ब्रह्मा च। एतत् अयुतादिहोमे ज्ञेयम्। *। सूर्य्याय गुडौदनबलिः। एवं सोमादीनामपि। यति सामर्थ्ये षोढ़ोपचारादिना। वली तु। सूर्य्याय गुडौदनम्। सोमाय हृतपायसम्। मङ्गलाय पञ्चवर्णचूर्णात्मकथावकम्। बुधाय क्षीरान्नम्। गुरवे दध्योदनम्। शुक्राय घृतौदनम्। शनैश्चराय क्षारम्। राहवे छागमांसम्। केतुभ्यः अजाक्षीरसाधिताजकर्दमरक्तमिश्रित-यव-तिल-तण्डुलरूपं चित्रौदनम् तत्तद्ग्रहवाजामि भक्षान्तरं दद्यात्। *। ततश्चरुं अपयेत्। तत्र सामगानां क्रमः। अग्नेः पश्चिमायां दिशि प्रागग्रान् कुशानास्तीर्य्य तदुपरि प्रक्षालितवास्तदूखलं वैष्णवञ्च सूर्पे वास्तुसमसङ्ख्यतण्डुलोचितं संस्थाप्य व्रीहीन् यवान् वा अग्नौ प्रोक्षितकुशान् सूर्पे निधाय ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामि इति यष्ट्वा उदूखले क्षापयेत्। एवं सोमाय। एवं मङ्गलादीनामपि निर्व्वपणं कृत्वा उदूखले क्षापयेत्। दिक्षूक्षीम्। ततो दक्षिणहस्तमुपरि कृत्वा सव्येनावहत्य सूर्पेण प्रस्फोटयेत्। इत्थमेव वारत्रयम्। ततश्चरुस्थाल्याममन्त्रकं क्षतोत्तरार्द्धं पवित्रं निःक्षिप्य तत्र प्रक्षालिततण्डुलान् निधाय तदुपरि दुग्धं दत्त्वा यथा पायसश्चरुर्भवति तथा स्तोकं स्तोकमुदकं दत्त्वा तस्मिन् खदिरपलाशोडुम्बराश्वत्थमन्थमस्य प्रादेशप्रमाणं उभयधा साङ्गुष्ठप्रमाणं चतुष्कोणपुष्कलं मेखलं दक्षिणावर्त्तेन भ्रामयित्वा तथा पचेत् यथा अन्नरोधश्चा सम्यक् पाको भवति मण्डकाग्रं दाहश्च न भवति। सम्यक्पाके भूते चरुमध्ये हृतसुवं दत्त्वा प्रागादिदिक्चिह्नितं कृत्वा चरुमवतार्य्य अग्नेरुत्तरतः कुशोपरि स्थापयित्वा पुनर्मध्ये हृतसुवं दद्यात्। ततो भूमिजपादिसुवसंस्कारपर्य्यन्तं कर्म्म कृत्वा अग्नेः पश्चिमतः चरुकुशोपरि पूर्व्वमाज्यं पश्चाच्चरुं निधाय उदकाञ्जलिसेकं कृत्वा विरूपाक्षणपात्रां कुशखण्डिकां समापयेत्। *। यजुर्व्वेदिनान्तु आज्यस्थाल्यामाज्यनिर्व्वपणानन्तरं सूर्पे पुरतो दक्षिणभागे संस्थाप्य तण्डूलदूखलं विन्यस्य व्रीह्यावन्यतमं तत्र निधाय ॐ सूर्य्याय त्वा जुष्टं यजामि इत्येकां सृष्टिं यष्ट्वा ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामीति उदूखले क्षापयित्वा ॐ सूर्य्याय त्वा जुष्टं प्रोक्षामीति प्रोक्षणीयेन प्रोक्षयेत्। एवं सोमाय त्वा इत्यादि। तत ॐ अग्नये स्विष्टकृते त्वा इत्यादिना यजनिर्व्वपणप्रोक्षणानि कृत्वा द्विरूखलीं कुर्य्यात्। ततः पूर्व्ववत् अपवपम्। पवं कृत्वा स्रुवमादिं यष्ट्वा

चरुमध्ये दक्षिणावर्त्तेन स्रुवमग्निं कृत्वा तस्मिं तत्रैवाग्नौ क्षिपेत्। तत आधाराज्यभागान्तं कर्म्म कुर्य्यात्। ●। ऋग्वेदिनान्तु प्रोक्षणीपात्रस्थापनानन्तरं पवित्रान्तर्हितेऽ ॐ सूर्य्याय त्वा जुष्टं निर्व्वपामीति प्रोक्षाद्यन्तमसृचं प्रक्षिप्य ॐ सूर्य्याय त्वा जुष्टं प्रोक्षामीति प्रणीताजलेन प्रोक्षयेत्। एवं सोमाय त्वा इत्यादि। ततः खिरिक्षदर्वेक्षिदधिकं तूष्णीं तथा हुत्वा पवित्रान्तर्हितं हुत्वा पूर्व्ववदोदनं लोमत्वगजिने उदूखलं निधाय तत्र सूर्पस्थ-व्रीह्याद्यन्यतमं प्रक्षिप्य मुषलेनावहत्य सूर्पेण विधुवीकृत्य प्रस्फोट्य त्रिः प्रक्षाल्य पवित्रं चरुस्थाल्यां प्रक्षिप्य तयैव आपयित्वा उदीच्यां दक्षिणभागे ॐ सोमाय स्वाहेति होमपर्य्यन्तं कुर्य्यात्। ततः शान्तिकर्म्मणि अग्ने त्वं वरद-नामासीति नाम हुत्वा।

ॐ पिङ्गधूम्रश्मश्रुकेशाः पीनाङ्गजठरोऽरुणः।
छागस्तः साचलश्चोर्वि: सप्तार्चिः शक्तिधा-
रकः॥

इत्यादिपुराणोक्तं ध्यात्वा ॐ वरदनामन्नग्ने इहागच्छ इहागच्छ इदं तिष्ठ इह तिष्ठ इत्यावाह्य पाद्यादिना पूजयेत्। ●। पौष्टिक-कर्म्मणि तु वज्रदंष्ट्रामाह: । यद्धोमे अग्नी-नाह गोभिल:।

आदित्ये कपिलो नाम पिङ्गल: सोम उच्यते।
धूमकेतुस्तथा भौमे जठरोऽग्निर्बुधे स्मृत:॥
इहस्पतौ शिखी नाम शुक्रे भवति लोहित:।
शनैश्चरे महातेजा राहौ चैव हुताशन:।
केतुषु जोहितोऽग्नि: स्यादिति वह्निविनिर्णय:॥

ततः स्वयम्भोक्तविधानेन चरुणा सूर्य्यादि-ग्रहेभ्य: प्रत्यकाहुतिं दत्वा ॥●॥ अत्र मन्त्रा:। सूर्य्यस्य आकृष्णेनेतिमन्त्रस्य हिरण्यस्तूपाङ्गिरा ऋषिस्त्रिष्टुप् छन्द: सविता देवता आदित्यस्य पूजाहोमकर्म्मणि विनियोग:। ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिर-ण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। इदं सूर्य्याय इति देवतोद्देश: सामगेतरैः कार्य:॥ १। सोमस्य इमन्देवेति-मन्त्रस्य वरुण ऋषिरग्निर्देवता सोमस्य पूजा-होमकर्म्मणि विनियोग:। ॐ इमन्देवा असप-त्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानां राजा स्वाहा। इदं सोमाय। २। मङ्गलस्य अग्निर्मूर्द्धेति-मन्त्रस्य अथर्व्वाङ्गिरा ऋषिर्गायत्री छन्दोऽग्नि-र्देवता मङ्गलस्य पूजाहोमकर्म्मणि विनि-योग:। ॐ अग्निर्मूर्द्धा दिव: ककुत्पति: पृथिव्या अयमपां रेतांसि जिन्वति स्वाहा। इदं मङ्गलाय। ३। बुधस्य उद्बुध्यस्वेतिमन्त्रस्य पर-मेष्ठिऋषिस्त्रिष्टुप् छन्दोऽग्निर्देवता बुधस्य पूजा-होमकर्म्मणि विनियोग:। ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते संसृजेथामयश्चास्मिन् सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत स्वाहा। इदं बुधाय ॥४॥ बृहस्पते: बृह-स्पते अतीतिमन्त्रस्य यत्समद ऋषिस्त्रिष्टुप् छन्दो ब्रह्मा देवता जीवस्य पूजाहोमकर्म्मणि विनि-योग:। ॐ बृहस्पते अतियदर्य्योऽर्हाद्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयत्सरस ऋतु प्रजात तद-स्मासु द्रविणं धेहि चित्रं स्वाहा। इदं बृह-स्पतये ॥५॥ शुक्रस्य अन्नात् परिस्रुत इति मन्त्रस्य प्रजापतिर्ऋषिरतिजगतीच्छन्दोऽग्निसरस्वतीन्द्रा देवता: शुक्रस्य पूजाहोमकर्म्मणि विनियोग:। ॐ अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पय: सोमं प्रजापति:। ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा। इदं शुक्राय ॥६॥ शनैश्चरस्य अग्नो देवीरमीष्टये आपो भवन्तु पीतये संयोरभिस्रवन्तु न: स्वाहा। इदं शनैश्चराय ॥७॥ राहो: काण्डात् काण्डा-दिति मन्त्रस्य अग्निर्ऋषिर्गायत्री छन्दो दूर्व्वे-टका देवता राहो: पूजाहोमकर्म्मणि विनि-योग:। ॐ काण्डात् काण्डात् प्ररोहन्ती परुष: परुष: परि एवानो दूर्व्वे प्रतनु सहस्रेण शतेन च स्वाहा। इदं राहवे ॥८॥ केतूनां केतुं कृण्वन्निति मन्त्रस्य मधुच्छन्द ऋषिरनिरुद्गायत्री-च्छन्दोऽग्निर्देवता केतूनां पूजाहोमकर्म्मणि विनियोग:। ॐ केतुं कृण्वन् केतवे पेशो मर्य्या अपेशसे। समुषद्भिरजायथा स्वाहा। इदं केतुभ्य:॥ ९॥ ततो मधुघृताक्तां घृताक्तां क्षीराक्तां वा प्रादेशप्रमाणां सायामकसमिध-मादाय ॐ आकृष्णेन इत्यादिमन्त्रेण सूर्य्याया-ष्टोत्तरशतं अष्टाविंशतिमष्टौ वा अग्नौ जुहुयात्। अग्नौ यद्यत्यातिपीड़ाकरत्वादा अष्टोत्तर-सहस्रं जुहुयात्। ●। समिधमाह याज्ञ-वल्क्य:।

अर्कः पलाशः खदिरश्चापामार्गोऽथ पिप्पलः।
उदुम्बरः शमी दूर्व्वा कुशाश्च समिधः क्रमात्॥

होमो यद्यादिपूजायां शतमष्टोत्तरं भवेत्।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते।
अतिपीड़ाकरो यस्तु तन्तु यत्नेन पूजयेत्॥

ततो होमानन्तरं उदीच्यं कर्म्म कुर्य्यात्। ततो गुड़ौदनादीन् ऋत्विजे भोजयेत्। तत्तद्द्रव्या-लाभे भोज्यान्तराणि वा दद्यात्। भोजना-सामर्थ्ये तत्तद्द्रव्याणि पाणिना प्रतिगाहयेत्। ततो मतस्यपुराणोक्तैर्मन्त्रैर्देक्षिणां दद्यात्।

धेनुः शय्यासनाद्यानं हेम वासो हयस्तथा।
छत्रं गौरामसं छागं एता वै दक्षिणाः
क्रमात्॥

तत्र।

कपिले सर्व्वदेवानां पूजनीयासि रौहिणी।
तीर्थदेवमयी यस्मात्तः शान्तिं प्रयच्छ मे॥

इति पठित्वा ॐ अद्येत्यादि क्षत्रेतत्तृतीयाग्नेय-यज्ञकर्म्मणः प्रतिष्ठार्थं दक्षिणां कपिलां धेनुं रुद्रदेवताकां अमुकगोत्राय अमुकदेवशर्म्मणे ब्राह्मणाय ऋत्विजे तुभ्यमहं संप्रददे। अन्यार्थ-येत् ददानीति ब्रूयात्। कपिलाभावे गोमात्रं वा। तदभावे काञ्चनम्। तदभावे रजतादिकं वा दद्यात्। काञ्चनादिकन्तु गुरवादि दक्षिणा-भावेऽपि दद्यात्॥ १। एवम्।

पुण्यक्षं शुक्लपुण्यानां मङ्गलानाञ्च मङ्गलम्।
विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य पूर्व्वोक्तक्रमेण सोमयज्ञे शुक्लं दद्यात्॥ २॥

ॐ धर्म्मक्षं हरिरूपेण जगदानन्दकारकः।
अष्टमूर्त्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य मङ्गलयज्ञे हरिं दद्यात्॥ ३॥

ॐ हिरण्यगर्भगर्भस्थं हेमरूपं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य बुधयज्ञे काञ्चनं दद्यात्॥ ४॥

ॐ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम्।
वरप्रदानात्तद्विप्रोरतः शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य गुरुयज्ञे पीतवस्त्रयुगं दद्यात् तद-भावेऽन्यवस्त्रद्वयोपयुगमपि दद्यात्॥ ५॥

ॐ विष्णुवक्षस्थरूपेण यस्मादर्क्षसम्भवः।
चन्द्रार्कवाहनस्त्वं वै अतः शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य शुक्रयज्ञे अश्वं दद्यात्॥ ६॥

ॐ यस्मात्त्वं पृथिवी सर्व्वा धेनुः केशवसम्भवा।
सर्व्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य शनैश्चरयज्ञे कृष्णां धेनुं अन्यवर्णां वा दद्यात्॥ ७॥

ॐ यस्मादायुधकर्म्माणि त्वदधीनानि सर्व्वदा।
लाङ्गलाद्यायुधादीनि ततः शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य राहुयज्ञे लौहं दद्यात्॥ ८॥

ॐ यस्मात्त्वं सर्व्वभूतानां मङ्गलाय व्यव-
स्थितः।
यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे॥

इत्युच्चार्य्य केतुयज्ञे छागं दद्यात्॥९॥ दक्षिणाजलं शान्तिकुम्भजलेन संमिश्र्य शान्तिं कुर्य्यात्। ततः कृताञ्जलिः।

ॐ गच्छध्वममरा: सर्व्वे यज्ञेऽस्मिन् सम्प्रतिष्ठिताः।
मयाभ्यर्चितान् सर्व्वान् दक्षिणादानतो मुदा॥

इति विष्णुधर्म्मोत्तरीयं पठित्वा यजमानं विस-र्जयेत्। दक्षिणा च प्रदातव्या यजमानाच्च विस-र्जनमिति वह्निपुराणवचनात्।" इति रघुनन्दन-भट्टाचार्य्यविरचितयज्ञयागप्रयोगः समाप्तः॥

याच, टु डु ञ्च याचने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-द्विक०-सेट्।) याचनमात्मने दानार्थं प्रेरणम्। टु, याचयुः। डु, याचि-ष्यिमम्। ञ्च, अयायाचत्। न, याचति याचते नृपं विप्रः। यद्दानार्थं प्रेरणेऽपि याचति वित्तं गुरवे शिष्यः। इति दुर्गादासः॥

याचकः, त्रि, (याचत इति। याच्+ण्वुल्।) याच्ञाकर्त्ता। तत्पर्य्यायः। वनीयकः २ याचनकः ३ मार्गणः ४ अर्थी ५। इत्यमरः।

३।१।९६। वनीपकः ६ भिक्षुकः ७ भिक्षाकरः ८। इति शब्दरत्नावली॥ तस्य लघुत्वं यथा,—

"तृणादपि लघुस्तूलस्तूलादपि च याचकः।
वायुना किं न नीतोऽसौ किमित्यार्थनयक्षया॥"

इति प्राचीनाः॥

अपि च।

"कुजस्य कौटघातस्य वातामिष्कासितस्य च।
शिखरे वसतस्तस्य वरं जन्म न याचितम्॥
अगत्यतिर्हि याचित्वा विष्णुर्वामनतां गतः।
कोऽन्योऽधिकतरस्तस्य योऽधो याति न लाघवम्॥"

इति गारुड़े नीतिसारे ११५ अध्यायः॥

याचन, [तृ] त्रि, (याचतीति। याच्+ल्युट्।) याचकः। यथा,—

"सुखभङ्गः खरो दीनो मानसंदेहो मत्सरयम्।
मरणे यानि चिह्नानि तानि चिह्नानि याचतः॥"

इति गारुड़े नीतिसारे ११५ अध्यायः॥

याचनं, क्ली, (याच्+भावे ल्युट्।) याच्ञा। (यथा, नैषधे। ५। ११२।

"भीमजार्थयाचनवाचे
यूयमेव गुरवः करणीयाः॥")

याचनकः, त्रि, (याचन+स्वार्थे कन्।) याचकः। इत्यमरः। ३।१।३६॥ (यथा, मनौ। ३।१६५।

"आचारहीनः क्लीवश्च नित्यं याचनकस्तथा॥")

याचना, स्त्री, (याच्+स्वार्थे णिच्+युच्। टाप्।) याच्ञा। इत्यमरः। २। ७। ३२॥ (यथा, रामायणे। २। २७। २३।

"नयस्व मां साधु कुरुष्व याचनाम्॥")

याचमानः, त्रि, (याचते इति। याच्+शानच्।) याचकः। यथा,—

"नवीनदीनभावस्य याचमानस्य मानिनः।
वपोजीवितयोरासीत् पुरोनिःसरणे रयः॥"

इति वररुचिः॥

अपि च।

"द्विजेभ्यो याचमानेभ्यो यजमानः प्रयच्छति।
स याति याचयान् लोकान् येभ्यो गायत्रीते पुनः॥
षष्टिवर्षसहस्राणां सहस्राणि वसेद्दिवि।
योऽनुमन्तापि भवति निरये प्रतिषेधकः॥"

इति वह्निपुराणे वामनप्रादुर्भावो नामाध्यायः॥

याचितं, क्ली, (याच्+क्तः।) याचनवृत्तिः। तत्पर्य्यायः। ऋतम् २। यथा,—

"दे याचितायाचितयोर्यथासंख्यं ऋताम्रते॥"

इत्यमरः। २। ७। ३२॥

"दे। याचनवृत्तिर्मरणमिव दुःखजनकत्वात् ऋतम्। अयाचितं अमृतमिव अमृतम्। याचितायाचितयोर्भावे कर्म्मणि वा क्तः।" इति भरतः॥ प्रार्थितवस्तुनि, त्रि॥ (यथा, देवीभागवते। ३। २८। ६७।

"पिता ते याचितः पूर्व्वं मया वै त्वत्कृते-
ऽबले!॥")

याचितकं, क्ली, (याचितेन निर्वृत्तम्। याचित+"अपमित्ययाचिताभ्यां कक्कनौ।"४। ४। २१। इति कन्।) याच्ञाप्राप्तम्। इत्यमरः।२।६।४॥ "याच्ञया। प्रत्यर्पणीयत्वेन याच्ञया यत् प्राप्तमलङ्कारादिवस्तु तत् याचितकम्। कार्य्यानन्तरं वस्तुस्वामी यत् पुनर्यृह्णाति तदित्यर्थः। याचितेन प्राप्तमिति ढ्ये कादिति कः।" इति भरतः॥

याच्ञा, स्त्री, (याचनमिति। याच्+"यजयाच्यतविच्छिप्रच्छरक्षो नङ्।" ३। ३। ९०। इति नङ्।) याचनम्। तत्पर्य्यायः। अभिप्रार्थना २ याचना ३ अर्थना ४ भिक्षा ५ अर्दना ६। इत्यमरः। २। ७। ३२॥ लालसा ७। इति जटाधरः॥ (यथा, भागवते। २। ७। १७।

"न्यायार्जितैरवरजोऽप्यदितेः सुतानां
लोकान् विचक्रम इमान् यदथाधियज्ञः।
स्त्यां वामनेन जगृहे त्रिपदच्छलेन
याच्ञामृतेऽपथि चरन् प्रभुभिर्न चाल्यः॥")

तद्देहिकपर्य्यायः। इंमहे १ याम्रि २ मच्छे ३ दद्धि ४ ग्रभि ५ पूर्द्धि ६ मिमिद्धि ७ मिमीहि ८ रिरिद्धि ९ रिरीहि १० पीपरत् ११ यन्नारः १२ यन्धि १३ दधुथति १४ मदेमहि १५ मनामहे १६ मायते १७। इति सप्तदश याच्ञाकर्म्माणः। इति वेदनिघण्टौ ३ अः॥

याजः, पुं, अन्नम्। इति हेमचन्द्रः। ३। ५६॥ (ऋषिभेदः। यथा, महाभारते। १।१६८।७।

"याजोपयाजौ ब्रह्मर्षी ग्राम्यन्तौ परमेष्ठिनौ।
संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ॥")

याजकः, पुं, (यजतीति। यज्+ण्वुल्।) याज्ञिकः। राज्ञो गजः। इति मेदिनी। के, १४२॥ मत्तहस्ती। इति जटाधरः॥ ऋत्विक्। यथा,

"अग्नीध्राद्या धनैर्व्वार्य्या ऋत्विजो याजकाश्च ते॥"

इत्यमरः। २। ७। १७॥

"यजमानेन धनैर्व्वार्य्याः धनानि दत्वा दक्षसम्पादनाय व्रियन्ते प्रार्थ्यन्ते ये अग्नीध्रप्रभृतयस्ते ऋत्विजो याजकाश्च कथ्यन्ते। अग्निं इन्धयन्ति दीपयन्ति अग्नीध्राः इन्धी ञि ध ड ह्रस्वौ निः नाग्नीत्रः मनीषादित्वान्नलोपः। आदिना ब्रह्मोद्गातृहोतृध्वर्य्वाद्याङ्गिसिप्रभृतयः योद्धृश्च गृह्यन्ते। वार्य्या इति ह्रदयाद्योरिति घ्यण् ह्रस्वत्वेत्यादौ ह्र इ इति जातुवन्धनिर्देशात् अन्यतृधातोर्न क्यप् ऋतौ यजन्ति ऋत्विजः क्विप्। यजन्ति याचका यकः।" इति भरतः॥ * ॥ बहुयाजकयाभयाजकयोर्निन्दा यथा,—

"अब्राह्मणास्तु षट् प्रोक्ता ऋषिभिस्तत्त्वदर्शिभिः।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनादिश्चाध्यः पूर्व्वो सादित्याश्चैव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥"

इत्याह्निकतत्त्वे सन्ध्योपासनम्॥

अपि च।

"शूद्रसम्भोजित्वयाजी ग्रामयाजीति कीर्त्तितः।
शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः॥
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः।
एते महापातकिनः कुम्भीपाकं प्रयान्ति ते॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

याजनं, क्ली, (याज्यते इति। यज्+णिच्+ल्युट्।) यागक्रियाकारणा। याग कराण इति भाषा। तत्तु ब्राह्मणस्य षट्कर्म्मान्तर्गतकर्म्मविशेषः। यथा,—

"अध्यापनमध्ययनं यजनं याजनन्तथा।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्॥"

इति मानवे १ अध्यायः॥

याजिः, पुं, (यज्+"वसिवपियजिराजीति।" उणा० ४। १२४। इति इन्।) यज्ञः। इति संक्षिप्तसारोणादिवृत्तिः॥ यागकर्त्ता। इत्युणादिकोषः॥

याजुषं, त्रि, (यजुष इदमिति। यजुष्+अण्।) यजुर्व्वेदसम्बन्धि। इति सिद्धान्तकौमुदी॥

याज्ञवल्क्यः, पुं, (वल्क्यस्यति। वल्क्य+अण्। यज्ञस्य वल्क्यो वक्ता। तस्य गोत्रापत्यम्। यज्ञवल्क्य+"गर्गादिभ्यो यञ्।"४। २। १०५। इति यञ्।) धर्म्मशास्त्रप्रयोजकमुनिविशेषः। तत्पर्य्यायः। ब्रह्मराशिः २ योगीन्द्रः ३। इति हेमचन्द्रः॥ योगीश्वरः ४। इति मिताक्षरा॥ (महर्षिरयं याज्ञवल्क्यः सूर्य्यात् शुक्लयजुर्व्वेदं प्राप्तवान्। तथाहि ब्रह्मपरम्परया प्राप्तं वेदं वैदग्यासो मन्दमतीन् मनुष्यान् विचिन्त्य तेषु कृपापरः चतुर्धा अस्य ऋग्यजुःसामाथर्व्याख्यांश्चतुरो वेदान् पैलवैशम्पायनजैमिनिसुमन्तुभ्यः क्रमादुपदिदेश ते च स्वशिष्येभ्यः। तत्र व्यासशिष्यो वैशम्पायनो याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्व्वेदमध्यापयत्। तत्र दैवात् केनापि हेतुना क्रुद्धो गुरुः शिष्यं याज्ञवल्क्यं अधीतवेदपरित्यागार्थमादिदेश। याज्ञवल्क्योऽपि योगबलेन अधीतयजुर्व्वेदां मूर्त्तिमतीं विद्यामोद्वमत्। वान्तानि यजूंषि गृहीतेति गुरुरुक्त्वा अन्ये शिष्यास्तित्तिरयो भूत्वा यजूंष्यभक्षयन्। तान्येव यजूंषि बुद्धिमालिन्यात् कृष्णानि जातानि। ततो वेदहीनोऽतिदुःखितो याज्ञवल्क्यः सूर्य्यमाराध्य शुक्लानि यजूंषि प्राप्तवान् तानि च जाबालगौद्येयकाण्वमाध्यन्दिनादीन् पञ्चदशशिष्यानध्यापयामास। तथाहि भागवते द्वादशस्कन्धे ६ अध्याये।

"तेनासौ चतुरो वेदांश्चतुर्भिर्व्वदनैर्विभुः।
सव्याहृतिकान् सोङ्कारांश्चातुर्होत्रविवक्षया॥
पुत्रानध्यापयत् तांस्तु ब्रह्मर्षीन् ब्रह्मकोविदान्।
ते तु धर्म्मोपदेशारः स्वपुत्रेभ्यः समादिशन्॥
ते परम्परया प्राप्तास्तच्छिष्यैर्धृतव्रतैः।

चतुर्युगेष्वथ यस्मा द्वापरादौ महर्षिभिः ।
चीर्णायुषः चीणसत्त्वान्मेधान् वीक्ष्य कालतः ।
वेदान् ब्रह्मर्षयो यस्मात् चुदिस्याच्युतचोदिताः ।
अस्मिन्नप्यन्तरे ब्रह्मन् भगवान् लोकभावनः ।
ब्रह्मेशादीर्लोकपालैर्याचितो धर्मगुप्तये ।
पराशरात् सत्यवत्यामंशांशकलया विभुः ।
अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ।
ऋगथर्वयजुःसाम्नां राशीरुद्धृत्य वर्गशः ।
चतसृभिः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ।
तासां स चतुरः शिष्यानुपाकृय महामतिः ।
एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ।
पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ।
वैशम्पायनसंज्ञाय निगदाख्यं यजुर्गणम् ।
साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ।
अथर्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ।"

"वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् ।
यच्चेरुर्ब्रह्महत्यांहः सपत्नं खगुरोर्व्रतम् ।
याज्ञवल्क्याच तच्छिष्य आहाहो भगवन् कियत् ।
चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ।
इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ।
विप्रावमन्ता शिष्येण मदधीतं त्यजाश्विति ।
देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान् ।
यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाददुः ।
तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ।
याज्ञवल्क्यस्ततो ब्रह्मंश्छन्दांस्यधि गवेषयन् ।
गुरोरविद्यमानानि स्पष्टस्थैकमीश्वरम् ।"

"एवं स्तुतः स भगवान् वाजिरूपधरो रविः ।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ।
यजुर्भिरकरोच्छाखा दश पञ्च शतैर्विभुः ।
जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः ।"

अयमेव महर्षिभिर्मिथिलास्थ एव सामश्रवःप्रभृतिभिः ऋषिभिर्वेदाश्रमेतरधर्मज्ञानार्थमादिष्ट आचारव्यवहारप्रायश्चित्ताख्यकाण्डत्रयात्मकं धर्मशास्त्रं प्रणीय तेभ्यः प्रावितवान् । यदुक्तं याज्ञवल्क्यसंहितायां यत्प्रारम्भे ।

"योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः ।
मिथिलास्थः स योगीन्द्रः सर्वं ध्यात्वाब्रवीन्मुनीन् ।")

स्त्री. उपनिषत्तद्विशेषः । यथा, मुक्तिकोपनिषदि ।

"गोपालतापनं कृष्णं याज्ञवल्क्यं वराहकम् ।")

याज्ञसेनी, स्त्री, यज्ञसेनस्य स्वापत्यम् । (यज्ञसेन + अण् । ङीप् ।) सा च द्रौपदी । इति हेमचन्द्रः । ३ । ३७५ । (यथा, महाभारते । ४ । ४ । ५६ ।

"याज्ञसेनीं पुरस्कृत्य ब्रह्मवाद्यथ प्रवव्रजुः ।"

अस्या विवरणं द्रौपदीशब्दे द्रष्टव्यम् ।)

याज्ञिकः, पुं, (यज्ञमर्हति यज्ञाय हितो वा । यज्ञ + ठक् ।) दर्भभेदः । (यज्ञं यज्ञविद्यामधीते वेद वा । यज्ञ + ठक् ।) याजकः । यज्ञकर्त्ता । इति शब्दरत्नावली । (यथा, भागवते । ११ । १० । २३ ।

"इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः ।")

रक्तखदिरः । पलाशः । अश्वत्थः । इति राजनिर्घण्टः ।

याज्ञिकं, क्ली, (याज्ञिकानां धर्म्म आम्नायो वा । याज्ञिक + "छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः ।" ४ । ३ । १२६ । इति ञ्यः ।) यज्ञः । इति सिद्धान्तकौमुदी ।

याज्यं, क्ली, (इज्यत इति । यज् + ण्यत् । "यजयाचरुचप्रवचर्चश्च ।" ३ । १ । ९९ । इति कुत्वनिषेधः ।) यागसम्बन्धनादि । इति सिद्धान्तकौमुदी । यजनीये, त्रि । (यथा, मनौ । ८ । ३१७ ।

"अन्नादेर्भ्रूणहा मार्ष्टि पत्नी भार्यापचारिणी ।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषात् ।"

शिष्यः । शासनार्हः । यथा, देवीभागवते । १ । १८ । ६ ।

"याज्योऽसि जनकस्तत्र जीवन्मुक्तो नराधिपः ।
विदेहो लोकविदितः याति राज्यमकण्टकम् ।")

याज्या, स्त्री, (यजन्त्यनया । यज् + ण्यत् + टाप् ।) ऋक् । इति सुग्धबोधव्याकरणम् । (गङ्गा । यथा, काशीखण्डे सहस्रनामकीर्त्तने । २६ । १४२ ।

"योगसिद्धिप्रदा याज्या यज्ञेशपरिपूजिता ।")

यातृ, च, आख्यातप्रत्ययविशेषः । स च विधिलिङाशीर्लिङः परस्मैपदप्रथमपुरुषैकवचनम् । स तु विध्याद्यर्थके आशीर्व्वादार्थकञ्च । इति व्याकरणम् । सुग्धबोधमते विध्याद्यर्थे अस्य स्त्रीसंज्ञा । आशीरर्थे टीसंज्ञा ।

यातं, क्ली, (या + क्तः ।) निषादिनां पादकर्म्म । इति हेमचन्द्रः । ४ । १६७ । पुस्तकान्तरे यतमिति पाठः । यथा,—

"अपदस्खलनस्थानं यातमङ्गप्रचारणम् ।
निषादिनां पादकर्म्म या(य)तं वीतनु तद्वयम् ।"

यातः त्रि, गतः । धातोः क्तप्रत्ययेन निष्पन्नः । (यथा, मनुः । ४ । १७८ ।

"येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते ।")

यातना, स्त्री, (यत् + णिच् + "ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् । टाप् ।) गाढ़वेदना । तत्पर्य्यायः । कारणा २ तीव्रवेदना ३ । इत्यमरः । २ । ८ । ३ । अतिव्यथा ४ । इति शब्दरत्नावली ॥ (यथा, भागवते । ७ । १ । ४१ ।

"हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम् ।
जिघांसुरकरोन्नानायातना मृत्युहेतवे ।")

नरकभेदः । इति केचिदिति भरतः ॥

यातयामं, त्रि, (यातो गतो यामः उपभोगकालो यस्य वा यस्य ।) जीर्णम् । (यथा, भट्टिकाव्ये । ५ । ३६ ।

"तं भीतदारमाक्रुश्य रावणः प्रत्यभाषत ।
यातयामं विजितवान् स रामं यदि किन्नतः ।")

परिसुस्रुतम् । इत्यमरः । ३ । ३ । १४५ । उज्झितम् । इति मेदिनी । मे, ६२ । (प्राप्तप्रेतावस्थम् । यथा, गीतायाम् । १७ । १० ।

"यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ।"

गतरसः । यथा, ताण्ड्यमहाब्राह्मणे । ४ । ३ । १३ ।

"ब्रह्मवादिनो वदन्ति यातयामाः संवत्सरा अयातयामा इति ते नायातयामेति वक्तव्यम् ।"

"यातयामः गतरसः ।" इति सायणः ।)

यातृ, [तृ] स्त्री, (यततेऽन्योन्यभेदायेति । यत् + "ऋदृन् ।" उणा० २ । ९८ । इति ऋन् ।) पतिभ्रातृपत्नी । इत्यमरः । २ । ६ । ३० । या इति भाषा । (यथा, साहित्यदर्पणे । ३ । ७८ ।

"स्वामी निषसितेऽप्यस्यति मनो जित्रः सपत्नीजनः
स्मारिङ्गितदेवतं नयनयोरीहालिहो यातरः ।"

या + ऋच् । गमनकर्त्तरि, त्रि । (यथा, हरिवंशसंहितायाम् । ३१ । १३ । [यातुः ।"

"उल्का शुभदा पुरतो दिवाकरविनिःसृता सारथ्यादिः । यथा, मनौ । ८ । २६० ।

"यानस्य चैव यातुश्च यानस्वामिन एव च ।
दशावितर्षणान्याहुः श्रेणी दण्डो विधीयते ।"

"यातुः सारथ्यादेः ।" इति भरतः ॥ हन्ता । यथा, ऋग्वेदे । १ । ३२ । १४ ।

"अहेर्यातारं कमपश्य इन्द्र ।"

"यातारं हन्तारम् ।" इति तद्भाष्ये सायणः ॥)

यातायातं, क्ली, गमनागमनम् । यथा,—

"दृष्टे भान्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयनान्
निद्रालोः कमठाधिपतेर्भगवतः श्वासानिलाः
पान्तु वः ।
यत्संस्कारकलानुवर्त्तनवशाद्वेलानिभेनाम्भसां
यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति ।"

इति श्रीभागवते १२ स्कन्धे १३ अध्यायः ॥

यातिकः, पुं, (यातं गमनं प्रायश्चित्तमस्येति । यात + ठन् ।) पान्थः । इति शब्दरत्नावली ॥

यातु, क्ली, (सर्व्वेषामन्नं यातीति । या + "कमिमनिजनिगाभायाहिभ्यश्च ।" उणा० १ । ७३ । इति तुः ।) कालः । अध्वगः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ वायुः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (स्त्री, यातना । यथा, ऋग्वेदे । ८ । ७६ । २० ।

"मा नो रक्ष आवेशीदाहश्वीवसो मायातुर्यातु मावताम् ॥"

"यातुर्यातना पीड़ा।" इति सायणः। कर्म्मनाशकरी हिंसा। यथा, तत्रैव। ५। १२। २।
"नाहं यातुं सहसा न द्वयेन ऋतं ब्रुवाण्य-
रुषस्य वृष्णः।"
"यातुं कर्म्मणां नाशकरीं हिंसाम्।" इति तद्भाष्ये सायणः॥)

यातु, त्रि, यातीति। या+"कमिमनीति।" उणा० १। ७३। इति तुः।) गन्ता। इत्युणादिकोषः॥ क्रियापदं चेत् गच्छतु॥

यातुधानः, पुं, (यातु हन्तीति। हन्+"अमनुष्यकर्त्तृके च।" ३। २। ५३। इति टक्।) गुग्गुलुः। इति राजनिर्घण्टः॥

यातुधानः, पुं, (यातूनि रक्षांसि दधाति पुष्णातीति। धा+बहुलमन्यत्रापीति युच्। खलाति-पोषकत्वात्तथात्वम्।) राक्षसः। इत्यमरः। १। १। ६३॥ (यथा, भट्टिकाव्ये। २। २८।
"दक्षिण्यदिशं ज्वलमार्क्षजौनै-
स्तद्यातुधानैरिचिते प्रपेदे॥")

यात्रकः, पुं, (यातेवेति। यात्र+स्वार्थे कन्।) पान्थः। इति शब्दरत्नावली॥

यात्यं, त्रि, यतितव्यम्। यतनीयम्। यतधातोः कर्म्मणि ण्यत्प्रत्ययेन निष्पन्नम्॥

यात्रा, स्त्री, (या+"हुयामाश्रुभसिभ्यस्त्रन्।" उणा० ४। १६०। इति त्रन्। टाप्।) विजिगीषोः प्रयाणम्। तत्पर्य्यायः। क्रम्या १ अभिनिर्याणम् २ प्रस्थानम् ३ गमनम् ४ गमः ५। इत्यमरः। २। ८। ८५॥ प्रक्षितिः ७ यानम् ८ प्रायनम् ९। इति शब्दरत्नावली॥ यापनम्। (यथा, भागवते। १०। ८६। २५।
"यात्रामात्रं तवहरहर्देवदुपनमत्युत॥")
उत्सवः। इति मेदिनी। रे, ७८॥ (यथा, कथासरित्सागरे। १०। ८७।
"यात्रासुपवने द्रष्टुं जगाम सखिभिः सह॥"
व्यवहारः। यथा, गीतायाम्। ३। ८।
"शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः॥"
"शरीरयात्रा देहव्यवहारः।" इति तत्र नीलकण्ठः॥) उपायः। इति विश्वः॥* अथ यात्रादिनम्। भाद्रपौषचैत्रेतरमासेषु दूरयात्रा कर्त्तव्या। पूर्व्वस्यां दिशि रविशुक्रवारस्य प्राशस्त्यम्। दक्षिणस्यां मङ्गलवारस्य प्राशस्त्यम्। पश्चिमायां सोमशनिवारस्य प्राशस्त्यम्। उत्तरस्यां बृहस्पतिवारस्य प्राशस्त्यम्। पूर्व्वस्यां दिशि सोमशनिवारे न गन्तव्यम्। दक्षिणस्यां बृहस्पतिवारे केषाञ्चिन्मते बुधवारे च न गन्तव्यम्। पश्चिमायां रविशुक्रवारे। एवं उत्तरस्यां बुधमङ्गलवारे न गन्तव्यम्। द्वितीया तृतीया सप्तमी पञ्चमी दशमी एकादशी त्रयोदशी च एता यात्रायां प्रशस्ताः। अश्वोत्तमनक्षत्राणि। अश्विनी अनुराधा रेवती मृगशिरा मूला पुनर्व्वसु पुष्या हस्ता श्रविष्ठा। मध्यमनक्षत्राणि। रोहिणी पूर्व्वात्रयं चित्रा स्वाती मृगशिरा अवणा धनिष्ठा। अधमनक्षत्राणि। उत्तरात्रयं विशाखा मघा आर्द्रा भरणी कृत्तिका अश्लेषा। तत्र नक्षत्रमूलकथनम्। स्वातौ ज्येष्ठायाञ्च पूर्व्वदिग्गमनं निषिद्धम्। एवं पूर्व्वभाद्रपदे अश्विन्याञ्च दक्षिणदिग्गमनं पुष्ये रोहिण्याञ्च पश्चिमदिग्गमनं उत्तरफल्गुन्यां हस्तायाञ्च उत्तरदिग्गमनं निषिद्धम्। तत्रायुक्तकरणानि। गरं वणिजं विष्टिः। गरमपि केचिच्छुभं मन्यते। अत्र उत्तमसमानि। सिंहवृश्चिककन्यामिथुनानि। तत्र योगिनीनिर्णयः। प्रतिपदि नवम्यान्च प्राच्यां योगिनी। तृतीयायां एकादश्यान्चाग्नेय्यां। पञ्चम्यां त्रयोदश्यान्च दक्षिणे। द्वादश्यां चतुर्थ्यान्च नैर्ऋतकोणे। षष्ठ्यां चतुर्दश्यान्च पश्चिमे। सप्तम्यां पूर्णिमायान्च वायुकोणे। द्वितीयायां दशम्यान्च उत्तरदिशि। अष्टम्यामावास्यायान्च ईशानकोणे। तां दक्षिणे सम्मुखे च लाभा न गन्तव्यम्। पापयोगग्रहसंक्रमासदग्धादिषु यात्रा न कर्त्तव्या। वारवेलाकालवेलाकुलिकवेलादुष्टिभद्रादिषु च यात्रा न कर्त्तव्या। दिगागमनदिनं नवबधूश्च न दृष्टव्यम्।* अथ गोयात्राप्रवेशक्रियायाः। तत्र तिथयः। अमावास्याष्टमीचतुर्दश्यो विदिग्भिन्नाः। तत्र नक्षत्राणि। रोहिणी पूर्व्वफल्गुनी पूर्व्वाषाढा पूर्व्वभाद्रपत् उत्तरफल्गुनी उत्तराषाढा उत्तरभाद्रपत् अवणा भरणी चित्रा एतद्व्यतिरिक्तानि। योगाः। व्यतीपातभिन्नाः। वाराः। क्रूरभिन्नाः।* अथ नौकायात्रा। तत्र विहितनक्षत्राणि। अश्विनीहस्तापुष्यमृगशिरःपूर्व्वफल्गुनी-पूर्व्वाषाढा-पूर्व्वभाद्रपदपुनराधाधनिष्ठाश्रवणाः। वाराः शुभग्रहाणाम्। तत्र जयं शोभनम्। तत्र शोभनलग्नः। तारा च शोभना विहिता। इति ज्योतिस्तत्त्वम्।*।
अथ यात्रायां शुभजनकदर्शनादि यथा,—
"धेनुर्वत्सप्रयुक्ता वृषगजतुरगा दक्षिणावर्णवह्नि-
र्दैवज्ञोपूर्णकुम्भा द्विजवृषगणिका: पुष्यमाला
पताकाः।
सद्योमांसं हृतं वा दधि मधु रजतं काञ्चनं
शुक्लधान्यं
दृष्ट्वा श्रुत्वा प्रतिष्ठा यदभिह लभते मानवो
वाञ्छितानि॥"
इति समयप्रदीपः॥
तत्राशुभजनकदर्शनं यथा,—
"सम्मुखे रजकं पश्चात् क्षुरिकं यदि पश्यति।
न गन्तव्यं तदा तस्मात् तैलवाप्यम्बुशोभनः॥
अथो क्षुरति गौः काची क्षुतं वा कुरुते नरः।
पश्यन् यात्रा न कर्त्तव्या क्षीरं पश्यति वायतः॥"
इति ज्योतिरार्णवः॥
यात्राकाले विशेषदर्शनफलं यथा,—
"मृगाक्षिकपिमार्জ্জারश्वानः शूकरपक्षिणः।
नकुलो मूषिकश्चैव यात्रायां दक्षिणे शुभाः॥
विप्रकन्या ध्वजो वस्त्रगुडमेरीवसुन्धराः।
जम्बुकोदुम्बराद्याश्च यात्रायां वामके शुभाः।
वेश्यास्त्रीपूर्णकुम्भानां यात्रायां दर्शनं शुभम्॥"
यात्राकाले अशुभलक्षणं यथा,—
"कार्पासौषधतैलञ्च षड्व्यञ्जनयुतन्नमाः।
सुक्तकेशो रक्तमाल्यं नग्नाद्यशुभलक्षणम्॥"*॥
यात्राकाले छिक्कायाः फलं यथा,—
"छिक्कायां लक्षणं वक्ष्ये शृणुतं पूर्व्वं महाफलम्।
आग्नेये श्लोकसन्तापौ दक्षिणे हानिमाप्नुयात्॥
नैर्ऋते श्लोकसन्तापौ सिद्धान्नञ्चैव पश्चिमे।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत्॥
ईशाने मरणं प्रोक्तं प्रोक्तं छिक्कायफलम्॥"
अथ यात्रायां दिग्विशेषे विशेषनक्षत्राणि।
"क्षत्रिकादौ तु पूर्व्वेण सप्त ऋक्षाणि वै व्रजेत्।
मघादौ दक्षिणे गच्छेदनुराधादि पश्चिमे॥
धनिष्ठा चोत्तरे यात्रा धनिष्ठादिषु सप्तसु।
अश्विनीरेवतीचित्राधनिष्ठाः सदनप्रदाः।
मृगाश्विचित्रापुष्याश्च मूलहस्तौ शुभौ सदा॥"
यात्रादौ तत्यादिषु यद्दिशितिथयं यथा,—
"कन्याप्रदाने यात्रायां प्रतिष्ठादिषु कर्म्मसु।
शुक्लपक्षौ च बलिनौ शुभदौ च द्वितीयगौ॥
अग्निशशुक्लचौथाच्च राज्ञौ चाष्ट तृतीयके।
भौममन्दग्रहाष्टाकां बुधः श्रेष्ठश्चतुर्थके॥
शुक्लजीवौ पञ्चमौ च मेधौ बह्निदराहतौ।
मन्दार्केन्दुकुजाः षष्ठे गुरुशुक्रौ च सप्तमे॥
शुक्रशावष्टमे मेधौ नवमस्थौ गुरुः शुभः।
अर्कार्किचन्द्रा दशमे एकादशेऽखिला यदा॥
बुधोऽथ द्वादशे चैव मार्गवः सुखदो भवेत्॥"
इति मात्स्ये ९०। ९१ अध्यायौ॥*॥
अथ राजयात्रा।
"इदानीं सर्व्वधर्म्मज्ञ धर्म्मज्ञाग्रविशारद!।
यात्राकालविधानं मे सर्व्वस्व महीक्षिताम्॥
यदा मन्येत नृपतिराक्रन्देन बलीयसा।
पार्ष्णियाद्राभिभूतोऽरिसेना यात्रां प्रयोजयेत्॥
योधाश्चाला प्रभूताश्च प्रभूतश्च वयं मम।
मूलरक्षासमर्थोऽपि तदा यात्रां प्रयोजयेत्॥
अनुग्रहपार्ष्णिनृपतिर्न तु यात्रां प्रयोजयेत्।
पार्ष्णियाद्राधिकं सैन्यं मत्वे विःक्षिप्य वा व्रजेत्॥
चैत्रं वा मार्गशीर्षं वा यात्रां यायान्नराधिपः।
चैत्री नक्षत्रं भेदार्घं हन्ति पुष्टिश्च मार्गदी।
एतदेव विपर्य्यस्तं मार्गशीर्षं नराधिपः।
शुभोऽयं समये यायात् कालः स तु सुदुर्लभः॥
दिव्यान्तरीक्षचित्तिजेक्षतयातैः पीड़ितं परम्।
सदृष्टपीड़ासंतप्तं पीड़ितञ्च तथा यदैः॥
ज्वलन्तीव तथैवोल्का दिग्भं यस्य प्रपद्यते।
भूकम्पोल्का दिशं यान्ति वाच केतुः प्रदृश्यते॥
निर्घातश्च पतेद्दृश्यं तं यायाद्वसुधाधिपः।
सवज्रवज्रनीपेतं तथा दुर्भिक्षपीड़ितम्॥
सम्भूतान्तरकोपञ्च क्षिप्रं यायादरिं नृपः।
यूकमाक्षीकबहुलं बहुपङ्कं तथाविलम्॥
नास्थिकं भिन्नमर्य्यादं तथामङ्गलवादिनम्।
अपेतप्रकृतिश्चैव निरापच्च तथा जयेत्॥
विदिङ्मारुतैः सैन्यं तथा भिन्नं परस्परम्।
सवज्रावस्तृपतिं सर्व्वं राजाभियोजयेत्॥

सैनिकानामग्रखाणि स्फूरन्त्यङ्गानि यत्र च ।
दुःस्वप्नान्यपि पश्यन्ति बलान्नरभियोजयेत् ॥
उत्साहबलसम्पन्नश्चानुरक्तबलस्तथा ।
सुहृत्पुष्टबलो राजा परानभिमुखो व्रजेत् ॥
शरीरस्फुरणे धन्ये तथा दुःस्वप्ननाशने ।
निमित्ते सकले धन्ये जाते शत्रुपुरं व्रजेत् ॥
ऋक्षेषु षट्सु शुद्धेषु ग्रहेष्वनुगुणेषु च ।
प्रश्नकाले शुभे जाते परान् यायान्नराधिपः ॥
एवन्तु दैवसम्पन्नस्तथा पौरुषसंयुतः ।
दैवकालोपपन्नान् यात्रां यायान्नराधिपः ॥
उलूकस्य निशि ध्वाङ्क्षः स च तस्य दिवा वशे ।
एवं दैवञ्च कालञ्च ज्ञात्वा यात्रां प्रयोजयेत् ॥
यदातिनागबहुलां सेनां प्रावृषि योजयेत् ।
हेमन्ते शिशिरे चैव रथवाजिसमाकुलाम् ॥
खरोष्ट्रबहुलां सेनां तथा ग्रीष्मे नराधिपः ।
चतुरङ्गबलोपेतां वसन्ते वा व्रजत्यथ ॥
सेना पदातिबहुला यस्य स्यात् पृथिवीपतेः ।
अभियोज्यो भवेत्तेन शत्रुर्विषयमाश्रितः ॥
गम्ये वृक्षाद्रते देशे स्थितं शत्रुं तथैव च ।
किञ्चित्यक्ते तथा यायाद्बहुनागो नराधिपः ॥
रथाश्वबहुलो यायात् शत्रुं समपथाश्रितम् ।
तदाश्रयस्तो बहुलास्तथा राजाभिपूजयेत् ॥
खरोष्ट्रबहुलो राजा शत्रुं बन्धनसंस्थितम् ।
बन्धनस्थोऽपि योज्योऽरिस्तदा प्रावृषि भूसुरा ॥
हिमपातयुते देशे स्थितं शत्रुमभियोजयेत् ।
ग्रीष्मसन्तौ धर्मशस्य कालौ साधारणौ स्मृतौ ॥

विज्ञाय राजा द्विजदेशकालौ
दैवं त्रिकालञ्च तथैव बुद्ध्वा ।
प्रायात् परं कालविदां मतेन
सञ्चिन्त्य सार्द्धं द्विजमन्त्रविद्भिः ॥"

इति मात्स्ये २१४ अध्यायः ॥ ❀ ॥

यात्राकाले मङ्गलाद्यर्थानि यथा,—
"पौर्णमास्यां स्वस्तात्रं तानुक्त्वा च शुभक्षणे ।
तेरेव सार्द्धं बलवान् बभूव गमनोन्मुखः ॥
ददर्श मङ्गलं रामः शुशाव जयसूचकम् ।
बुबुधे मनसा सर्वं विजयं वैरिसंक्षयम् ॥
यात्राकाले च पुरतः शुशाव सहसा ध्वनिः ।
हरिशब्दं शङ्खरवं घण्टादुन्दुभिवादनम् ॥
आकाशवाणीं सङ्गीतां जयस्ते भवितेति च ।
नरोक्तं तच्च कल्याणं मेघशब्दं जयावहम् ॥
चकार यात्रां भगवान् शुभलग्नेवविधं शुभम् ।
ददर्श पुरतो विप्रवन्दिदेवशभिक्षुकान् ॥
ज्वलत्प्रदीपं विभ्राणां पतिपुत्रवतीं सतीम् ।
पुरो ददर्श सोरासां नानाभूषणभूषिताम् ॥
शिवं शिवां पूर्णकुम्भं वासश्च नकुलन्तथा ।
गच्छन् ददर्श रामेण्डो यात्रामङ्गलसूचकम् ॥
क्षत्त्रसारं गजं सिंहं तुरगं गरुडं दिपम् ।
चमरीं राजहंसञ्च चक्रवाकं शुकं पिकम् ॥
मयूरं खञ्जनञ्चैव शुक्लचिल्लचकोरकम् ।
पारावतं बलाकाञ्च कारण्डं चातकं चटम् ॥
सौदामनीं शक्रचापं सूर्यं सूर्यसभां शुभाम् ।
सद्योमांसं सलोष्ठञ्च मत्स्यं शुक्लं सुवर्णकम् ॥
माक्षिकं रजतं शुक्लां मणीन्द्रञ्च प्रवालकम् ।
दधि लाजं शुक्लधान्यं शुक्लपुष्पञ्च कुङ्कुमम् ॥
शुक्लच्छत्रं पताकाञ्च दर्पणं श्वेतचामरम् ।
धेनुं वत्सप्रयुक्ताञ्च रथस्थं भूमिपं तथा ॥
दुग्धञ्च रोचनामाष्यमन्नतं पायसं तथा ।
शालयामं पक्वफलं खस्तिकं शर्करां मधु ॥
मार्ज्जारञ्च वृषेन्द्रञ्च मेघपर्व्वतसन्निकम् ।
मेघाच्छन्नस्य च रवेरुदयं चन्द्रमण्डलम् ॥
कस्तूरीं कुङ्कुमं तोयं हरिद्रां सौभाग्यसन्तिकाम् ।
सिद्धार्थं सर्षपं दूर्वां विप्रवालञ्च बालिकाम् ॥
व्रणं वेश्याञ्च भ्रमरं कर्पूरं पीतवाससम् ।
गोमूत्रं गोपुरीषञ्च गोधूलिं गोपदाङ्कितम् ॥
गोष्ठं गवां वर्त्म रम्यं गोशालां गोरतिं शुभाम् ।
भूषणं देवप्रतिमां ज्वलदग्निं महोत्सवम् ॥
ताम्रं स्फटिकं रौप्यञ्च सिन्दूरं माल्यचन्दनम् ।
गन्धञ्च हीरकं रत्नं ददर्श दक्षिणे शुभम् ॥
सुगन्धि वायोराघ्राणं प्राप विप्राग्निसं शुभम् ।
एवंविधं मङ्गलं श्रुत्वा प्रययौ स मुदान्वितः ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३१ अध्यायः ॥❀॥

यात्राकाले अमङ्गलसूचकानि यथा,—
"राजा जगाम समरं क्षुद्रेण विदूषता ।
सार्द्धं सैन्यसमूहेन वाद्यभाण्डैरसंख्यकैः ॥
ददर्शामङ्गलं राजा पुरो वर्त्मनि वर्त्मनि ।
ययौ तथापि समरं न जगाम गृहं पुनः ॥
सुरक्तकेशीं छिन्ननासां रुदन्तीञ्च दिगम्बरीम् ।
क्षुधाक्षपरीषागामपरां विधवामपि ॥
सुखदुःखां योनिदुःखां व्याधियुक्ताञ्च कुट्टनीम् ।
पतिपुत्रविहीनाञ्च डाकिनीं पुंश्चलीमहो ॥
कुम्भकारं तैलकारं व्याधं सर्वोपजीविनम् ।
कुचैलमपि रूक्षाङ्गं नग्नं काषायवासिनम् ॥
वस्तुविक्रयिणञ्चैव कन्याविक्रयिणं तथा ।
चितां दग्धशवं भस्म निर्माल्याङ्गारमेव च ॥
सर्पंचतरं सर्पं गोधाञ्च शल्यकं विषम् ।
आढकाञ्च पिण्डञ्च मोदकञ्च तिलांस्तथा ॥
देवलं देवलाहञ्च शूद्रान्नाहारभोजिनम् ।
शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकम् ॥
कृत्रपुत्तलिकाञ्चैव शवदाहनकारिणम् ।
शून्यकुम्भं चूर्णकुम्भं तैलं लवणमस्थि च ॥
कार्पासं कच्छपं चूर्णं कुक्कुरं शून्यकारिणम् ।
दधिञ्च शृगालाञ्च कुर्व्वन्तं भैरवं रवम् ॥
कपर्दकञ्च चौरञ्च छिन्नकेशं नखं मलम् ।
कलहञ्च विलापञ्च विलापकारिणं जनम् ॥
अमङ्गलं वदन्तञ्च रुदन्तं शोककारिणम् ।
मिथ्यासाक्षिप्रदातारं चौरञ्च नरघातिनम् ॥
पुंश्चलीपतिपुत्रौ च पुंश्चल्योदनभोजिनम् ।
देवतागुरुविप्राणां वस्तुवित्तापहारिणम् ॥
दत्तापहारिणं दस्युं हिंसकं क्षुत्रकं खलम् ।
पिलमाल्लविरक्तञ्च द्विजाश्वत्थविघातिनम् ॥
सत्यघ्नञ्च कृतघ्नञ्च न्यासापहारिणं जनम् ।
मित्रद्रुहं मित्रघ्नञ्च सतं विश्वासघातिनम् ॥
गुरुदेवद्विजानाञ्च निन्दकं स्वाङ्गघातकम् ।
जीवानां घातकञ्चैव स्वाङ्गहीनञ्च निर्दयम् ॥
व्रतोपवासहीनञ्च दीक्षाहीनं नपुंसकम् ।
गलितव्याधिगात्रञ्च गुरुलङ्घनमेव च ॥
पुङ्कसं छिन्नलिङ्गञ्च सुरामत्तं सुरां तथा ।
छिन्नं वमन्तं रुधिरं महिषं गर्दभं तथा ॥
मूत्रं पुरीषं श्लेष्माणं कन्यिनं वृक्षवासिनम् ।
भस्मावातं रक्तवृष्टिं वायुञ्च वृषघातकम् ॥
गृध्रञ्च शूकरं गृध्रं श्येनं कङ्कञ्च भल्लुकम् ।
पाशुञ्च शुष्ककाष्ठञ्च वायसं गन्धकं वृथा ॥
अयदानिग्राहञ्च तन्त्रमन्त्रोपजीविनम् ।
वैद्यञ्च रक्तपुष्पश्चैवौषधमुभमेव च ॥
कुवार्त्तां हतवार्त्ताञ्च विप्रशापञ्च दारुणम् ।
दुर्गन्धवातं दुःशब्दं राजा संग्राम वर्त्मनि ॥
मनश्च कुत्सितं प्राणाः क्षुभिताश्च निरन्तरम् ।
वामाङ्गस्पन्दनं देहनाशं राज्ञो बभूव ह ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥

श्रीकृष्णस्य मथुरायात्रा यथा,—
"राधिकायाञ्च सुभ्रायां सुभ्रासु गोपिकासु च ।
पुण्यचन्दनतल्पे च वायुना सुरभीकृते ॥
तृतीयप्रहरेऽतीते निशायाञ्च शुभक्षणे ।
शुभचन्द्रार्क्षयोगे चाप्ततयोगसमन्विते ॥
सौम्यखामियुते लग्ने सौम्यग्रहविलोकने ।
पापग्रहसमासक्तदृष्टिदोषादिवर्ज्जिते ॥
यशोदां बोधयामास कारयामास मङ्गलम् ।
बन्धूनाश्वासयामास वस्तुत्याय हरिः स्वयम् ॥
वार्त्तां निवेदयामास राधिकाभयभीतवत् ।
खतल्पे विश्वकर्त्री च पाता भर्त्री खतल्पवत् ॥
प्रक्षाल्य पादयुगलं धृत्वा धौते च वाससी ।
उवास संस्कृते स्थाने विलिप्ते चन्दनादिना ॥
पत्रपल्लवसंयुक्तं संस्कृतं चन्दनादिभिः ।
वामे स्थापा पूर्णकुम्भं वह्निं विप्रं सदक्षिणे ।
पतिपुत्रवतीं दीपं दर्पणं पुरतस्तथा ॥
दूर्व्वाकाण्डञ्च सुस्निग्धं पुष्पं धान्यं सितं शुभम् ।
शुक्लवस्त्रं गृहीत्वा च प्रदधौ मस्तकोपरि ॥
घृतं ददर्श माध्वीकं रजतं काञ्चनं दधि ।
चन्दनं लेपनं स्नात्वा पुष्पमालां गले दधौ ॥
गुरुवर्गं ब्राह्मणञ्च वन्दयामास भक्तितः ।
शङ्खध्वनिं वेदपाठं सङ्गीतं मङ्गलाष्टकम् ॥
विप्राशीर्व्वचनं रम्यं शुश्राव परमादरम् ।
धात्वा मङ्गलरूपञ्च सर्व्वत्र मङ्गलप्रदम् ॥
क्षिप्तेव दक्षिणं पादं सुन्दरं स्वात्मविग्रहम् ।
विधृत्य नासिकावामभागं मध्यमया विभुः ॥
विलोक्य वायुमिष्टञ्च नासादक्षिणरन्ध्रतः ।
ततो ययौ नन्दनन्दो नन्दस्य प्राङ्गणं वरम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७१ अध्यायः ॥

अथ यात्रायुक्तिः । तत्र समयः ।
"यात्रायां द्विविधः कालो वैकारः सहजस्तथा ।
प्रोक्त आत्ययिके कार्य्ये विकारो नात्र निर्णयः ।
सहजः स्वेच्छया राज्ञां तस्य निर्णय उच्यते ॥
यात्राजसिंहमथा ग्रनैश्चरबुधोद्गसां गृहेषु ।

भानौ कुलीरवृषवृश्चिकगोभिदीर्घा
गुरुस्तु देवलमतेऽध्वनि वृश्चतोऽर्कः ॥
अश्विनी रेवती ज्येष्ठा तथा पुष्यपुनर्वसू ।

मैत्रं रुद्राग्निरो सुला यात्रायासुत्तमाः स्मृताः ॥
भरणी क्रत्तिकाश्लेषा विशाखा चोत्तराश्चयम् ।
मघा पशुपतिश्चेव यात्रायां मरणप्रदाः ॥
पूर्वे कुबेरे दहने निर्ऋटे
यमे जलेशे पवने महेशे ।
त्याज्यं नरस्य प्रतिपन्नक्रमेण
युग्मं तिथीनां प्रवदन्ति तज्ज्ञाः ।
स्यात् संमुखे यानमसुक्षयाय
पश्चाद्भवेत् सर्वसुभाय पुंसाम् ॥
सूर्यः शुक्रः कुजो राहुर्मन्दश्चन्द्रो गुरुर्बुधः ।
अयतः शोभना यात्रा एकतो मरणं ध्रुवम् ।
पूर्वेशेन्द्रं दक्षिणे यानपादं
रोहिण्ये तत्पार्श्वमाख्याश्च मूलम् ।
कामं यायात् साम्परायेषु कार्ये-
ष्वन्यद्यपि प्रेक्ष्य मूलानि भानि ॥"
तत्र दिक्शूलम् ।
"षष्ठ्यष्टमी चतुर्थी च नवमी द्वादशी तथा ।
चतुर्दशी कुहूरुक्ता यात्रायामशुभप्रदाः ॥
प्रायो ययुः सहजशुचुदशाय संस्थाः
पापाः शुभाः सविलग्नं परिसृत्य खस्थम् ।
सर्वेचराः शुभफलं जनयन्ति सौम्या-
स्त्यक्त्वारिसंस्थममरारिगुरुं जिगीषोः ॥
नाकालवर्षविद्युत्स्तनितेष्विदं कथञ्चिदपि यानम् ।
आसन्नाहांतु दिग्यात्रीत्यौमैस्तथोत्पातैः ॥"
तत्र क्रमः ।
"राज्ञां यात्राविधिं वक्ष्ये जिगीषूणां परावनीम् ।
नीराजनाविधिं कृत्वा सैनिकाञ्जानयेत्ततः ।
गजानश्वान् रथानन्यानिति यात्राक्रमो मतः ॥"
तत्र नीराजनाविधिः ।
"वर्षान्तेऽभ्युदिते शुक्रे चन्द्रे पूर्णे शुभक्षणे ।
अश्वनीराजनं कुर्यात् यथोक्तलक्षणसत्तमैः ॥
उदीचीं प्रस्थिते भानौ संक्रान्त्यां वा शुभे दिने ।
गजनीराजनं कुर्यात् महीपालो जिगीषुवान् ॥
दक्षिणस्थे रवौ कुर्यात् पत्तिनीराजनाविधिम् ।
नौकानीराजनं कुर्यात् दक्षिणाग्रां प्रतिष्ठति ॥
अन्येषामेव यानानां विजयादशमीतिथिम् ।
ध्वजादीनाञ्च सर्वेषां शुक्लोत्थाने नीराजनम् ॥
छत्रस्य नवदण्डस्य तथा सिंहासनस्य च ।
गृहस्य नगरस्यापि महाविष्टवसंक्रमे ॥
आत्मनो युवराजस्य महिष्या मन्त्रिणामथा ।
स्वजन्मदिवसे राजा कुर्यान्नीराजनाविधिम् ॥
अभिषेकदिनं प्रोक्तमेषां जन्मदिनं मया ॥"
तद्यथा,—
"अश्वानां भास्करो देवो रेवन्तमिति संज्ञया ।
गजानां देवता शक्रः पत्तीनां कालिका मता ॥
नौकानां वरुणो देवो यानानान्तु जयन्तकः ।
अस्त्राणां देवता रामो यमः खड्गस्य पूज्यते ॥
ध्वजानां हनुमान् पूज्यो दण्डस्यतिरिति क्रमात् ।
तान् पूजयित्वा विधिवदेतान्नीराजयेन्नृपः ॥
द्वादशमहिषैः पुष्टैश्चामरचण्डाखनादिभूषाढ्यैः ।
क्षामलैर्महिषदिगुणैः पुरयेत्तद्विगुणैश्चारदीपिकाभिः ॥
भयं वा सहसाभ्युदिते नीराजयेद्राजा ।
द्वादशवाहै रुचिरैः साङ्गोपाङ्गैरलोहलक्षणैः ॥
तस्याग्रतो याग्नेर्गजशतनीराजनं सम्भवति ।
छागलशतं दृषभशतं घृतस्य मेषाणाम् ॥
तुरगा दश कृष्णाङ्गा यात्राः पञ्च द्विपञ्चैकः ।
भल्लुका हि कुक्कुराश्चैकैकाः पत्तिलक्षणस्य ॥
नौकाशतकं साङ्गं नवदण्डकं काष्ठमादिभिर्घटितम् ।
बहुशतमपि जन्तूनां नौकानीराजने राज्ञाम् ॥
यदा द्विपदं यानं सर्वेषामिष्यते तुरगैः ।
सुदशावत्सरवसितैर्योग्याङ्गैर्योग्यवर्णैश्च ॥
अष्टाभिर्धातुभिः कुर्यादक्षनीराजनाविधिम् ।
गजाश्वनरनौकाभिर्हिगुणाभिर्यथोत्तरम् ।
रत्नैर्नानाविधैरक्षैर्धातुभिर्वसनैस्तथा ॥
सिंहासनेच योग्येच कुर्यान्नीराजनाविधिम् ।
गृहनीराजनाप्येवं नरस्याथ निगद्यते ॥
अभिः खरैः शृगालैश्च याग्नैरुक्तैर्यथोदितैः ।
पुरं नीराययेद्राजा चिरसम्पत्तिहेतवे ॥
या दशाश्वस्तदर्हेण नरश्चैव तदर्हतः ।
याग्नादीनां तथैवैकं रत्नं नानाविधन्तथा ॥
अस्त्राणि धातवश्चैव वस्त्राणि च फलानि च ।
वनजाः स्थलजाश्चैव जलजाश्चैव जन्तवः ॥
नवग्रहाश्च सूर्याद्याः शैलाः सप्त घटास्तथा ।
योग्यधातुससंभूता नौकाखड्गध्वजस्तथा ॥
निजदेहमितं स्वर्णं रजतं ताम्रमेव वा ।
आत्मनीराजने दद्यादृद्धिरिच्छेच्चिरसंस्थितिम् ॥
अक्षैर्नानाविधैः कुर्यादुयुवराजनीराजनम् ।
अलङ्कारैश्च विविधैर्वीनीराजनं मतम् ॥
मन्त्रिनीराजनं राजा हयेनैव समाचरेत् ।
अमात्यानां सैनिकानां विप्राणां धनिनान्तथा ।
वस्त्रैर्नीराजनं कुर्यादिति भोजस्य सम्मतम् ॥
नीराजनाया वस्तूनि न पश्येन्न पुनः स्पृशेत् ।
सम्प्राप्तः परिभाष्य कुर्यान्नीराजनाविधिम् ॥
अहेढा परराष्ट्रेषु गहने वा जलेऽपि वा ।
देवज्ञवेद्यदीनेभ्यः प्रयच्छेद्या यथायथम् ॥
इति संक्षेपतः प्रोक्तो मया नीराजनाविधिः ।
अनेन विधिना राजा सुचिरं सुखमश्नुते ॥"
तथा हि गर्गः ।
"नीराजना महीपालां निघ्नन्ति विपदोऽखिलाः ।
सैव सम्यङ्नृणां कण्डूनेव संयतः ॥
नीराजनावलितानां न भयं विद्यते क्वचित् ।
नीराजनाविहीनानां नश्येयुः सर्वसम्पदः ॥"
तथा च वात्स्यः ।
"ये भूमिपालाः प्रतिवत्सरान्तं
कुर्वन्ति नीराजनकर्म सम्यक् ।
तेषां न लक्ष्मीः क्षयतामुपेति
साम्राज्यलक्ष्मीः करगेव तेषाम् ॥
एवं नीराजनं कृत्वा राजा प्रस्थानमाचरेत् ॥"
इति नीराजनाविधिः ॥ * ॥
अथ यात्रा ।
"गुणातिशयसम्पन्नः शुक्रं यायान्निगीषया ।
यदि पश्चात् प्रकोपो न यदि राष्ट्रे न कण्टकाः ॥
संग्रायान्यच्च यायाद्वा पार्ष्णिग्राहेण शुक्रजा ॥
राजायुक्तो विनिघ्नन्ति काकान्
काकोऽप्युलूकान् रजनीक्षयापाये ।
इति स्वकालं समुदीक्ष्य यायात्
काले फलन्तीह समीहितानि ॥
प्रबलव्यसनोपेतं दुर्भिक्षादिप्रपीडितम् ।
सम्भूतान्तरकोपेतं न यायात् पृथिवीपतिः ॥
निजदेवानुकूल्ये हि प्रातिकूल्ये परस्य च ।
यायाज्जूपो यतो दैवं बलमेतत् परं मतम् ॥"
अन्यच्च तु ।
"निरातङ्के निरुत्पाते निरुद्विग्ने निरामये ।
विपक्षे जयमिच्छन्ति राजानो विजिगीषवः ॥"
इति युक्तिकल्पतरुः ॥
युद्धयात्रायामङ्गलदर्शनं यथा,—
"तस्य निर्गच्छतो गेहात् स्वानोऽस्मि सुखनोऽभवत् ।
भजे रुरोद कापोतः शिवा श्यामा च दक्षिणा ॥
पिङ्गला चक्षुगोधा च शूकरी केवली तथा ।
गजवानरसेनाजशिखिच्छिक्काश्च वामतः ॥
पथं विभिन्दते सर्पः कुम्भोदकं अयौर्यत ।
रुराव वानरो वृक्षो मार्जारो क्षुतिभैरवम् ॥
तैलतक्रलवणैर्मयुक्ताभ्यक्तादिदर्शनम् ।
वान्तोन्मत्तजडम्लेच्छक्षुत्क्षामकृशं रवम् ॥
तुवकार्पासलवणानां निन्दितानाञ्च दर्शनम् ।
रक्ताम्बरधरो मुण्डः पङ्कामिषं तथा वसा ॥
ललाटं शक्रजलाप उल्कापातध्वजारुणाः ।
दिशां दाहमहीकम्पाः सरजः कलुषं नभः ॥
निस्तेजस्कपतेर्भानुर्नद्यः प्रतिस्रोवहाः ।
उष्णोदकं महाकूपं दरयं दीर्घकासु च ॥
अकालविकृतिः पुष्पफलानामन्वभूत्तदा ।
प्रीत उच्चविपर्यासा मेघनादाश्च दारुणाः ॥
आरण्यसत्त्वा ग्रामेषु ग्रामणारण्यवासिनः ।
क्रोष्टृसर्पसमूहाश्च ग्रसन्ध्वानः पिपीलिकाः ॥
ऋक्षाणां महती सेना श्वगणाश्च तथैव च ।
एते च पुरप्राकारे निपतन्त्युत्पतन्ति च ॥
दुर्गन्धः शार्करो वायुर्दीनां योधा हतप्रभाः ।
प्रकम्पूश्चाश्रुपातानि गजा अश्वाः प्रचक्रिरे ।
ध्वजच्छत्रपताकानां स्फुटनं दण्डभिन्नम् ।
कलङ्कमंसे चक्रे च हता दुन्दुभिरेव च ॥
व्यालताकूटनखापि नाराचानाञ्च कुण्ठता ।
गदानां मुद्गराणाञ्च ग्रीवेता ह्यनुभिन्दता ॥
शुष्कप्ररोहश्चार्कसार्द्रपातस्तथैव च ।
प्रतिमारुदितं खेदो नतकानाञ्च जल्पनम् ॥
गवां रासभमारोहः स्त्रीणाञ्च वक्रपलता ।
क्षीरते अविच्छागादि ह्यजावि ग्रिशुशोभनम् ।
बालानां घातनं युद्धे निस्त्रिंशाः सकलाः प्रजाः ।
मक्षिकादंशमशकबहुगोनासदर्शनम् ॥
निस्तेजा न वहेद्वह्निः सधूमः स्फुटते मुहुः ॥
एवंविधान् तथोत्पातान् दृष्ट्वा घोरेण वासव ।
पप्रच्छ नारदं सोऽथ किमेतद्विद्धतं द्विज ! ॥"
इत्यादि देवावतारे घोरवधाध्यायः ॥

अथ द्वादश यात्रा।

"प्रणम्य जगतां नाथं कलिकल्मषनाशनम्।
द्वादशयात्रातत्त्वानि वक्ति श्रीरघुनन्दनः।"

तत्रादौ द्वादशयात्राकालस्य सुखोपादेयत्वात् आदौ स एव निरूप्यते। तद्यथा स्कन्दपुराणे।

रन्तिदेव उवाच।

"वैशाखादिषु मासेषु यात्रापूजाविधिं मुने!।
श्रोतुमिच्छामि देवेशे यथावद्वक्तुमर्हसि॥

जैमिनिरुवाच।

वैशाखादिषु मासेषु देवदेवस्य शार्ङ्गिणः।
या या द्वादश यात्राः श्रुता हि वक्ष्यामि ते
शृणु।

वैशाखे चान्द्रमो यात्रा ज्येष्ठे स्नपनदौरिता।
आषाढे रथयात्रा स्यात् श्रावणे शयनी तथा।
भाद्रे दधिव्रतार्थीया आश्विने वामपार्श्विका।
उत्थानी कार्तिके माघि द्वादशी मार्गशीर्षके।
पौषे पुष्याभिषेकः स्याच्चाये श्राद्धोदनी तथा।
फाल्गुने दोलयात्रा स्याच्चैत्रे मदनभञ्जिका।
एकैका सुकृतिरत्र धर्मकामार्थसाधनाः।"

अथ यात्राविधिः। स्कान्दे।

"वैशाखस्य सिते पक्षे तृतीयायामवसंयुता।
तत्र मां क्षेपयेन्नवक्षेपणैरतिशोभने॥
वैशाखस्यामले पक्षे तृतीया पापनाशिनी।
स्वयमाविष्कृता चैषा ब्राह्मणैश्चसंयुता।
यः पश्यति तृतीयायां शुक्लं चन्दनभूषितम्।
वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम्।
वैष्णवा जयशब्देन पूजयित्वा तदा हरिम्।
नानास्तोत्रैरविरतैर्नृत्यं संस्तुवन्ति च।
वेणुवीणादिवाद्यैश्च तथा नानोपहारकैः।
मन्त्रोदयन जगन्नाथं तृतीयादौ विक्षेपयेत्।
वैशाखस्य तृतीयायां चलमध्ये विशेषतः।
क्षेपणं मल्लपे कुर्याज्जले वा हरदने।
चन्दनागुरुकस्तूरीकुङ्कुमरोचनाः।
जटामांसी सुरा चैव विष्णोर्नाम्नाश्चकं विदुः।
एतैर्गन्धैस्तथान्यैश्च विष्णोर्नामानि क्षेपयेत्।
घृतञ्च तुलसीकाष्ठं कुर्याज्जेपनकर्मणि।"१।

अथ स्नानयात्रा। स्कन्दपुराणे।

"ज्येष्ठामलचतुर्दश्यां पूर्वं ब्रह्मवासरम्।
तस्माच्च स्नापनं कार्यं महास्नानविधानतः।
तस्मात् प्रातःस्नानवेद्यां ब्रह्मणा चर्चितञ्च माम्।
रामं सुभद्रां सुस्नाप्य मम लोकमवाप्नुयात्।"

तथा।

"भाविनि ज्येष्ठे तु संप्राप्ते मघत्रये ग्रहदेवते।
पौर्णमास्यां हरेः स्नानं सर्वकामफलप्रदम्।
सर्वतीर्थसमः प्रोक्तस्तदाहे विष्णुजः शुचिः।
तदा भोगवती तत्र प्रवहं भवति द्विजाः।
तस्मात् ज्येष्ठां वसुदृक्ष होमाग्नेः कलशैर्जलैः।
स्नापयन्ति तदा स्नानं ततस्तं वृषायुधम्।
जलाद्धरिं हरेः स्नानमुत्सवं परमाद्भुतम्।
उत्सवो वै न हीयेत तस्मात्तदुत्सवं चरेत्।
जन्मनो जयकारित्वाज्जययात्रा प्रतिष्ठिता।
ज्येष्ठस्नानं भजतो ये पश्यन्ति सुरात्मिकाः।
न ते भवाब्धौ मज्जन्ति यात्रायां यतमानसाः।
ज्येष्ठे च स्नपनं कुर्यात् श्रीविष्णोर्जन्मवासरे।
दैवन्दिनन्तु दुरितं पञ्चमासर्तुवर्जनम्।
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च।
सर्वक्षेयसुरापानगुरुतल्पयुतानि च।
कोटिकोटिसहस्राणि क्षुद्रपापानि यानि च।
सर्वाण्येव प्रणश्यन्ति पौर्णमास्यान्तु वासरे।
पुरुषस्तत्समक्षेव पापमाप्य तथैव च।
नारिकेलोदकेनाथ तथा तालफलाम्बुना।
पञ्चामृतैः श्रौततोयैर्दूर्वाकर्पूरवासितैः।
यवोदकेन शुद्धेन तथा पुष्पोदकेन च।
स्नापयित्वा जगन्नाथं पूजयेत् परमेश्वरम्।
ॐ नमो वासुदेवाय नमः इति वासुदेवं विवेदयेत्।
य एवं कुरुते विद्वान् ब्राह्मणः क्षत्रियः शुचिः।
सर्वपापैः प्रमुच्येत विष्णुलोकं स गच्छति।
चतुर्हस्तां दृढां मञ्चं कारयित्वा सुशोभनम्।
सुगन्धिधूपसुरभिं चन्दनाम्भःसमुक्षितम्।
एवं मञ्चं प्रतिष्ठाप्य फलसाधिवासयेत्।
सुवासितं जलपूर्णं पावकं कलशं न्यसेत्।
जयशब्देन स्तुतिभिर्गीयते जगदीश्वरः।
जय राम जयेति जयभद्रेति चोदिते।
गीयते मधदेशस्तु निर्गीथे ब्राह्मणादिभिः।"

अथ रथयात्रा। स्कन्दपुराणे।

"शुक्लपक्षां महायात्रां प्रकुर्म्वीथाः क्षितीश्वर!।
आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता।
तस्यां रथे समारोप्य रामं मां भद्रया सह।
यात्रोत्सवं प्रकुर्वाण प्रीणयेच्च द्विजान् बहून्।
अयाभावे तिथौ कार्या सदा सा प्रीतये मम।
स्नानाहं चरितक्षीरे मम यात्रा भविष्यति।
अहमे दिवसे सर्वान् रथान् मालैर्विभूषयेत्।
नवनामानयेदेवांस्तेषु प्रीतः सदद्विजान्।
दधिव्रताभिधो यात्रा विष्णोरेषा सुदुर्लभा।
यथा पूर्वा तथा चैषा ते दे मुक्तिप्रदायिके।
अहाहे विहरेच्छक्रं तदहेन तु पार्वतीम्।"

इतिवत् तिथिना एकादशी बोद्धव्यः।

"तिथिनैकेन दिवसव्याप्तमानेन कीर्तितः।"

इति विष्णुधर्मोत्तरात्।

वसुः।

"आषाढस्य सिते पक्षे भद्रा सा पुष्यसंयुता।
यात्रोत्सवं प्रकुर्वीथास्तदभावे पुष्य एव हि।"

इति पुंश्चरसंहितायां वचनान्तरम्।

तदुभयैकत्वियप्रयोगान्तरविधायकम्। पाद्मे।

"आषाढस्य द्वितीयायां रथं कुर्याद्विशेषतः।
आषाढशुक्लैकादश्यां जपहोमसमन्वितम्।
अतः परं हि सर्वस्य यात्रान्तरमपेक्षते।
अथ स्वयं त्रिलोकेशः स्वप्नेन कृतवृद्धजात्।
नाशयन् सर्वपापानि वर्षे वर्षे व्रजेदसौ।
रथस्थितं व्रजन्तं तं महावेदीमहोत्सवे।
ये पश्यन्ति सदा भक्त्या वासुदेवं हरेः पदे।
सर्वं सर्वं पुनः सर्वं प्रतिज्ञातं द्विजोत्तमाः।
अतः श्रेयःपदो विष्णोरत्सवः ब्राह्मसम्मतः।
रथयात्रैव यात्रायां मुख्येत्याह प्रजापतिः।
महावेदीं व्रजन्तं तं रथस्थं पुरुषोत्तमम्।
बलभद्रं सुभद्राञ्च दृष्ट्वा मुक्तिर्न चान्यथा।
आषाढस्य सिते पक्षे दिने विष्णोः शुभप्रदे।
प्रतिष्ठाप्य सन्दृढेन विधिना पूर्ववद्विजाः।
रथं नरो हरेः कुर्यात् स्वासनं सुपरिष्कृतम्।
भूषयेद्विविधैर्भक्त्या वस्त्रालङ्कारमाल्यकैः।
नृत्यद्भिरग्रतश्चैव भेरीटङ्कादयस्तथा।
नटनर्तकसङ्घाश्च गायना बहवस्तथा।
वेश्या यौवनदर्पाढ्या रूपालङ्कारभूषिताः।
ध्वजाश्च बहवस्तत्र पताकाधिष्ठितान्तराः।
गरुडञ्च ध्वजं कुर्यात् रक्तचन्दनमिश्रितम्।
दीर्घनासं पीतदेहं कुङ्कुमाभ्यां विभूषितम्।
चतुर्भुजं सुवर्णाभं सर्वालङ्कारभूषितम्।
देवाः पद्मध्वजं कुर्यात् पद्मकाष्ठविनिर्मितम्।
सप्तच्छदमयं कुर्याच्छीरिणो ज्ञाङ्गलध्वजम्।
सारथिं वाजिनञ्चैव बलं बलसदात्मिकम्।
हीरकैर्मङ्गलैर्दान्तैर्वलिवर्मैः सुशोभनम्।
रत्नं सुघटितं तत्तु रथं देवजयस्य च।
अरुणोदयवेलायां देवं तस्मात् प्रपूजयेत्।
ब्राह्मणैर्वैष्णवैः सार्द्धं यतिभिश्च तपस्विभिः।
विज्ञापयेद्देवदेवं यात्रायै स कृताञ्जलिः।
ततः कर्पूरपर्णैश्च सुमनोभिरवाकिरत्।
पठन्ति श्लोकरत्नानि प्रपठन्ति द्विजातयः।
केचिच्चाङ्गलगाथाश्च केचिच्चय जयेति च।
जितन्तु इति मन्त्रं वै केचित् पुष्पे जपन्ति च।
स्तुतिमागधसङ्घाश्च कीर्तिं कार्ष्णीं मुदा जगुः।
चर्चरीभम्भरीवेणुवीणामाधुरिकादयः।
गायन्त्यश्च सुमधुरं गोविन्दविजयान्तरे।
एवं प्रवृत्ते समये छत्रं रामपुरःसरम्।
नयन्ति विप्रा भक्त्याच क्षत्रियाश्च विशुद्धया।
करे धृत्वा जगन्नाथं श्रमयित्वा रथत्रयम्।
रामं भद्रां च छत्रञ्च रथमध्ये विशेषयेत्।
पूजयेदुपचारैस्तैः श्रद्धाभक्तिसमन्वितः।
रथच्छायां समाक्रम्य ब्रह्महत्या व्यपोहति।
तद्देशुसंस्थतत्पुण्यलेहे यात्रसंस्थितिम्।
यात्रानुवृत्तिसिक्तेन स्वर्गङ्गास्नानजं फलम्।
ये प्रकामं प्रकुर्वन्ति तेऽपि मोक्षमवाप्नुयुः।
अनुगच्छन्ति ये छत्रं ते देवतुल्यविग्रहाः।
वेदैः स्तुवन्ति वेदानां पारगा मोक्षभागिनः।
इतिहासपुराद्यैः स्त्रोत्रैश्चापि सुसंस्कृतैः।
स्तुवन्ति पुष्करीकाक्षं ये वै विगतकल्मषाः।
ते वै जयन्ति पापानि जयशब्दैः स्तुवन्ति ये।
नर्तनं कुरुते वापि गायत्यथ नरोत्तमाः।
वैष्णवोत्तमसंसर्गान्मुक्तिं प्राप्नोत्यसंशयम्।
नामानि कीर्तयिष्यन्ति न ते यान्ति यमालयम्।
जयस्व रामकृष्णेति जयभद्रेति यो वदेत्।
न मातृगर्भे वासोऽस्य स च देवत्वमाप्नुयात्।
चामरैर्वीजने: पुष्पैः स्तवकैश्चोपशोभकैः।
रथस्थाग्रे स्थितो यो वै वीजयेत् पुरुषोत्तमम्।
संवीज्यमानोऽमरोभिर्दिवगन्धर्वयोषितान्।
भुक्त्वा तु भोगानखिलान् यावदाभूतसंप्लवम्।

गतः परतरो लोके महादेवीमहोत्सवात् ।
सर्वपापहरो योगः सर्वतीर्थफलप्रदः ॥
ब्रह्मसुद्दिश्य ये तत्र दानं ददति वै नराः ।
यत्किंचिदत्तयफलं मेरुदानेन संमितम् ।
गुग्गिकामरूपे यात्रां भद्राह्वयं सहाफलम् ।
तत्रातपश्रान्तगात्रं दर्पणेव्यभिषेचयेत् ॥
पक्वान्नैः प्रीततोयैः पुष्पकर्पूरवासितैः ।
नारिकेलजलेनाथ तथा तालफलाम्बुना ॥
रत्नोदकेन शुद्धेन तथा पुष्पोदकेन च ।
सर्वाङ्गमनुलिप्यैव चन्दनेनेन्दुसुन्दरैः ॥
सुगन्धिमाल्याभरणैश्चीनचेलैः सुशोभनैः ।
चामरैश्च जलार्द्रैश्च प्रीतलैर्व्यजनैस्तथा ।
वीजयेत् पुष्करीकाक्षं सुभद्रां बलमेव च ।
सिताभिः पानकैर्दिव्यैस्तथा खण्डविकारकैः ।
खर्जूरैर्नारिकेलैश्च नागरम्भाफलादिभिः ।
तथा क्षीरविकारैश्च पनसैरिक्षुभिस्तथा ।
वासितैः प्रीततोयैश्च गन्धताम्बूलपत्रकैः ।
सकर्पूरलवङ्गाद्यैः पूजयेत् परमेश्वरम् ।
रथस्थयस्थितं देवत्रयं ये पुरुषर्षभाः ।
प्रदक्षिणं प्रकुर्वन्ति त्रिपतुःसप्त एव च ॥
ततोऽपराह्णे देवेशं दक्षिणाभिमुखीस्थितम् ।
अग्नेः अग्नेर्नयेद्दिष्टुं मण्डपस्य च मध्यमे ॥
एवं व्रजति देवेशे सूर्यस्याग्नं गतोऽभवत् ।
दीपकानां सहस्राणि ज्वालितानि नरैस्ततः ॥
मण्डपे वासयेद्देवान् गुण्डिकाख्ये मनोहरे ।
चादचन्द्रातपे चारुमाल्यचामरभूषिते ।
पूजयित्वा जगन्नाथं तोषयेत् गीतशब्दकैः ।
उपहारादिभिस्तत्र सप्ताहानि जगद्गुरुम् ॥
सप्ताहं ये प्रपश्यन्ति गुण्डिकामण्डपे स्थितम् ।
माघ रामं सुभद्राच विष्णुसायुज्यमाप्नुयात् ॥
दिवा तद्दर्शनं पुण्यं रात्रौ दशगुणं भवेत् ।
यत्किंचित् कुरुते कर्म कोटिकोटिगुणं भवेत् ॥
सर्वं मेरुसमं दानं सर्वे वासवसमा द्विजाः ।
महादेवां गते ब्रह्मे योगोऽयं खलु दुर्लभः ॥
अहोदयादयो योगाः खण्डेन परिभाविताः ।
महादेवाख्ययोगस्य कलां नार्हन्ति षोडशीम् ॥
अहाहे च पुनः स्नात्वा दक्षिणाभिमुखान्वितः ।
दक्षिणाभिमुखी यात्रा विष्णोरेषा प्रकीर्तिता ॥
कार्या प्रयत्नतः सा हि मुक्तिमुक्तिप्रदा भवेत् ।
दक्षिणाभिमुखं यान्तं ब्रह्मं पश्यन्ति ये नराः ॥
न तेषां पुनरावृत्तिः सत्यमेतन्न संशयः ।
पुराविदो वदन्त्येतां यात्रां नवदिनात्मिकाम् ॥
तस्याः संकीर्तनादेव निर्मलो जायते नरः ।
नावतीर्य मनायात्रा यो यथा कर्तुमिच्छति ॥
सोऽपि विष्णुप्रभावेन वैकुण्ठभवनं व्रजेत् ।
उद्धृत्य सप्तपुरुषान् पापावलिसमन्वितान् ।"४॥
अथ श्रयनयात्रा । खाण्डे ।
"आषाढे शुक्लदशमां कुर्यात् स्नापमहोत्सवम् ।
मण्डपे रचयेत्तत्र श्रयनागारसुत्तमम् ॥
देवस्य पुरतः श्रेष्ठां रत्नादिनिर्मितोपरि ।
आस्तीर्य तूलिकाद्यं तूलपीनोत्तरच्छदाम् ॥
कर्पूरधूलिविच्छिन्नां साधुचन्दनलिप्तां शुभाम् ।

पुष्पगन्धयुतां सुस्नारक्षितां चन्दनाङ्कितम् ॥
साधुदारां शुभां स्निग्धां नानाचित्रोपशोभिताम् ।
एवं स्नापयित्वा स्नात्वा निशीथे स्नापयेद्विभुम् ॥
संपूज्य भावयेद्देवं तैर्वा स्नात्रादिभिः सह ।
श्रीहीति च संप्रार्थ्य स्नापार्थं परमेश्वरम् ॥
नयेच्छय्यागृहद्वारं वासयेत् घटिकात्रयम् ।
पक्वान्नैः प्रीततोयैः स्नापयेत्तान् पृथक्फलप्रतादिकैः ॥
सुगन्धिचन्दनैर्लिप्तान् वस्त्रालङ्करणादिभिः ।
पूजयित्वा यथान्यायं प्राञ्जलिर्मन्त्रमुच्चरेत् ॥"
जगद्धन्य इत्यादि ।
"सुद्वारं कारयेद्वारं विष्णोः श्रयनवेश्मनः ।
स्नापयित्वा जगन्नाथं लभते सुखमुत्तमम् ।"५॥
अथ पार्श्वपरिवर्तनयात्रा ।
"अथ ते संप्रवक्ष्यामि पार्श्वस्य परिवर्तनम् ।
नभस्यविमले पक्षे संप्राप्ते हरिवासरे ॥
विष्णोः स्नापयद्वारं प्रणैर्गत्वा प्रविश्य च ।
नमस्कृत्य जगन्नाथं पर्यङ्कस्थितं सुदा ।
अवधार्य प्रणैर्द्वारं पूजयेदुपचारकैः ।
प्रणम्य भक्त्या तत्पादौ स्नापयेदुत्तरासुखम् ।"
मन्त्रमेनं पठेत् ।
"ॐ देवदेव ! जगन्नाथ ! कल्पादौ परिकल्पय ।
परिवृत्तमिदं सर्वं यथा स्थावरजङ्गमम् ।
यत् दृष्ट्वा चेष्टितैरेव जायन्तस्वप्नसुप्तिभिः ।
जगद्धिताय सुप्तोऽसि पार्श्वेन परिवर्तय ॥
परिवर्तनकालोऽयं जगतः पालनाय ते ।
खदयलोऽयं शक्रोऽपि क्षीरे तिष्ठेत् वसुतसुकः ।
इदं तत्पादकमलं विसुच्च मद्धिं तज्जलम् ।
मद्धौ जलं भावयति प्रजापालनहेतुकम् ।
इति संप्रार्थ्य देवेशं विनयात्तोषयेत्ततः ।
व्यजनैश्चामरैश्चैव वीजयेत् परमेश्वरम् ।
सुगन्धिचन्दनैरस्य सर्वाङ्गं परिलेपयेत् ।
खादूनि भक्ष्यद्रव्याणि पायसादीनि दापयेत् ।
श्रुत्वायद्वारि विभोः प्रणैर्भक्त्या निवेदयेत् ।
देवसुद्दिश्य यत् कुर्यात् सर्वमक्षयतां व्रजेत् ।
पार्श्वे च जन्मदिवसे उपवासपरो भवेत् ।"
एवं आश्विनशुक्लैकादश्यां पूर्वोक्तविधानेन
गीतवाद्यस्य वामपार्श्वपरिवर्तनं कार्यम् ।
मतान्तरे ।
"भुमे चैवाश्विने मासि महामायां प्रपूजयेत् ।
सौवर्णीं राजतीं मार्त्तीं विष्णुमायां महेश्वरीम् ।
हिंसा चैव न कर्तव्या कदाचिद्विष्णुपूजकैः ।"६॥
अथोत्थानयात्रा ।
"एकादश्यान्तु कार्तिक्यां शुक्लायां पृथिवीपते ।
ब्रह्मसत्यापयेद्ब्रह्मा पूजयित्वा जगद्गुरुम् ।
पूर्ववत् पूजयित्वा तु प्रातर्मन्त्रं समुच्चरेत् ॥"
मन्त्रस्तु ।
"ॐ उत्तिष्ठ देवदेवेश ! तेजोराशे जगत्पते ! ।
वोधयेतत् सकलं देव ! प्रसुप्तं तव मायया ॥
प्रफुल्लपुष्करीकाक्ष ! श्रीहरे ! श्रयनेन वै ।
त्वया दृष्टं जगदिदं परमं सुखमेष्यति ।
ये ते स्वाभाः क्रियाः सर्वाः प्रवर्तन्ते ततो ध्रुवम् ।
इत्युत्थाप्य जगन्नाथं वेद्यां वीणादिनिःस्वनैः ।

जयशब्दैस्तथा देवं नयेद्वृत्यमण्डपम् ।
तैलेनाभ्यङ्य तोयेन स्नापयेत पुरुषोत्तमम् ।
पञ्चान्तैर्नारिकेलरसैः पलरसैस्तथा ।
सुगन्धामलकेनाथ यवकल्केन लेपयेत् ।
घर्षयेत्तुलसीचूर्णैर्लेपयेच्चन्दनैः ॥
पुष्पवासिततोयैश्च कुङ्कुमोदकैस्तथा ।
स्नापयित्वा यथेत् पापं बहुजन्मोपपादितम् ॥
महोपचारैः संपूज्य विष्णुं नीराजयेत्ततः ।
कृताञ्जलिपुटो भूत्वा प्रार्थयेत् परया मुदा ।"७॥
अथ प्रावरणयात्रा ।
"मार्गशीर्षे सिते पक्षे कुर्यात् प्रावरणोत्सवम् ।
कृत्वा दृष्ट्वा नरो भक्त्या वैष्णवं लोकमाप्नुयात् ।
वासोऽधिवासं कुर्वीत पञ्चम्यां निशि कर्मवित् ।
प्रभाते मण्डलं कुर्यात् पद्ममरदलान्वितम् ॥
दिक्पालान् पूजयेद्दिक्षु क्षेत्रपालं गणाधिपम् ।
चक्रप्रक्षौ च वह्निचतुर्दिक्षु प्रपूजयेत् ॥
तन्मध्ये स्नापयेद्दण्डं कालयेदुदुम्बरिका ।
पूजयित्वा जगन्नाथं गन्धतैलेन दीपकम् ।
दत्त्वा कृताय भक्त्या तु गीतवाद्यैर्नयेन्निशाम् ।
प्रातः प्रपूजयेद्देवं नानाद्रव्यैः सुशोभनैः ॥
सप्तभिः सप्तभिर्वस्त्रैः वासोभिः परिवेष्टयेत् ।
सुखवर्णेन सर्वाङ्गे गीतप्रावरणैर्द्विजाः ॥
दूर्वाक्षतैः प्रपूज्याथ कुर्यान्नीराजनं विभोः ।
भगवन्तं वसुद्दिश्य ब्राह्मणेभ्यः प्रदापयेत् ।
गुरुभ्यश्चान्यदेवेभ्यो दीनानाथेभ्य एव च ।
गीतप्रावरणं दद्यात् वस्त्रं परमया मुदा ॥
ददाति भगवान् प्रीतस्तस्मै वरमनुत्तमम् ।"८॥
अथ पुष्पयागयात्रा ।
"पुष्पयागोत्सवं वक्ष्ये यथोक्तं ब्रह्मणा पुरा ।
पुष्यर्क्षेण च संयुक्ता पौर्णमासी यदा भवेत् ।
पौषे मासि तु तत् कुर्यात् पुष्पयागोत्सवं हरेः ।
चतुर्दशीदिनाद्यासु कुम्भागामधिवासनम् ।
रात्रौ जागरणं कृत्वा प्रातर्वेद्यां प्रकौरवेत् ।
ब्रह्मविष्णुशिवेभ्यश्च प्रत्येकं समिधं क्रमात् ।
जुहुयात् पूजयित्वा तु तदग्ने पुरुषोत्तमम् ।
पूजयेदुपचारैस्तु आदर्शे प्रतिबिम्बितम् ।
ततः पुरुषसूक्तेन कुम्भांस्नानमभिमन्त्रयेत् ।
क्रमात् देवस्य शिरसि स्नापयेद्विधिवत्ततः ।"
सूक्तमुच्चरन् ।
"ततः पञ्चान्तैरेव वासुदेवेन स्नापयेत् ।
तन्मात्रा युक्तं पुनर्विप्र उपचारैः प्रपूजयेत् ।
दूर्वाङ्कुराद्यैः स्तुतिभिर्वाद्यैः संपूज्य केशवम् ।
समन्तादिकिरेद्देवं कर्पूराद्यैः सुगन्धकान् ।
नीराजयेज्जगन्नाथं कर्पूरयुतवर्त्तिभिः ।
ततः प्रदक्षिणं कृत्वा दण्डवत् प्रणमेत् क्षितौ ।
पुष्यस्नानोत्सवं पुण्यं ये पश्यन्ति सुदान्विताः ।
सर्वसम्पन्नकामास्ते व्रजेयुर्वैष्णवं पदम् ।"९॥
अथ नवश्रयणयात्रा ।
"कुर्यादयनसंक्रान्त्यां नवश्रयणमहोत्सवम् ।
संक्रान्तेः पूर्वदिवसे नवं ग्राह्यं सुकृष्टिमम् ।
प्रासादपूर्वदेशे तु स्नापयित्वाधिवासयेत् ।"

तथा च पाद्मे।
"संक्रान्त्यां माघमासस्य साधिवासिततण्डुलान्।
निवेद्य विष्णवे भक्त्या दमं मन्त्रमुदीरयेत्॥
त्वयि तुष्टे जगत् सर्व्वमनेन प्रभविष्यति।
रक्ष सर्व्वं जगन्नाथ! गृहाणां पिष्टकं शुभम्॥
ब्राह्मणान् भोजयेत् भक्त्या देवदेवपुरःस्थितान्॥"
अभ्यर्च्य भगवद्भक्तानित्यादि॥
"नवेन वाससावेष्ट्य दूर्व्वासर्षपपुष्पकैः।
पूजयित्वाभिमन्त्रेण लक्षणाक्षामरिष्यतु॥
पुनः प्रभाते देवेशं प्रक्षिपेज्जलचन्दनैः।
वस्त्रालङ्कारमाल्यैश्च पूजयित्वा यथाविधि॥
नीराजयित्वा देवेशं तण्डुलानधिवासितान्।
स्थालीषु पाकपात्रेषु मधुरक्षाज्यमिश्रितान्॥
षड्भिक्षुभिः स्थापयेदग्रे गन्धपुष्पाक्षतान्वितान्।
सपूपं पायसं हुत्वा दद्याद्वै चक्रपाणये।
दध्यन्नकपिरुच्च विष्णोः प्रियतरं परम्॥
ॐ जीवनं सर्व्वभूतानां जनकस्त्वं जगद्गुरो!।
तन्मयाः प्राणिनो ह्येते त्वयैव जनिताः प्रभो!॥
लोकानुग्रहणार्थाय गृहीत्वा चित्रविग्रहम्।
तव प्रीत्यै हृतानेतान् गृहाण परमेश्वर!॥
त्वयि तुष्टे जगत् सर्व्वमनेन प्रभविष्यति।
स्वाहाकारस्वधाकारवषट्कारा दिवौकसाम्॥
प्याप्यायना भविष्यन्ति तेनैवाप्यायितं जगत्।
रक्ष सर्व्वं जगन्नाथ! तन्मयं सचराचरम्॥
इति संप्रार्थ्य देवेशं प्राणींस्तान् विनिवेदयेत्॥"१०॥
अथ दोलयात्रा।
"फाल्गुने माघि कुर्व्वीत दोलारोहणमुत्तमम्।
यत्र क्रीड़ति गोविन्दो लोकानुग्रहणाय वै॥
ग्रथमां देवदेवस्य गोविन्दाख्यान्तु कारयेत्।
मल्लगूलवं प्रकुर्व्वीत पञ्चाहानि त्र्याहानि वा॥
फाल्गुन्याः पूर्व्वतो विप्राश्चतुर्द्दश्यां निशामुखे।
बहूपत्सवं प्रकुर्व्वीत दोलमण्डपपूर्व्वतः॥"
पाद्मे।
"पौर्णमास्यां समारभ्य पञ्चम्याञ्च समापयेत्॥"११॥
अथ मदनभञ्जिका यात्रा।
"वासन्तिकां समाख्यास्ये यात्रां मदनभञ्जिकाम्।
यस्यां हतायां दृष्टायां प्रीयाति पुरुषोत्तमः॥
चैत्रशुक्लत्रयोदश्यामाहरेत्तत् समूलकम्।
देवस्याग्रे विरचिते मण्डपे साधिवासिते॥"१२॥
इति यात्रातत्त्वम्॥
देयाः षोड़शप्रकारोत्सवः। यथा,—
"वैशाखे मत्स्ययात्रा च चन्दनागुरुकल्पना।
ज्येष्ठे महास्नानयात्रा अम्बुवाचीदिनत्रयम्॥
आषाढ़े रथयात्रा च हरिशयनिका परा।
श्रावणे जलयात्रा च वस्त्रभूषणचामरैः॥
भाद्रे यात्रा धूननाख्या चक्रिकाया दिनत्रयम्।
आश्विने च महापूजा यात्रा यक्षबलिप्रिया॥
कार्त्तिके दीपयात्रा च नवान्नमयहायणे।
पौषे चाङ्गरागयात्रा वस्त्रालङ्कारभूषणैः॥
माघे माघि महादेवी रटन्ती च चतुर्द्दशी।
दोलाकेलिः फाल्गुने च चैत्रे यात्रा चतुर्थ्यां।
दूतीयात्रा रासयात्रा वासन्ती नीलयात्रिका।
एवं यात्रा मया प्रोक्ता षोड़शी भवमोचनी॥"
इति वामकेश्वरतन्त्रे ५४ पटलः॥
(रोगिदर्शनार्थं भिषजां यात्राविवरणम्। यथा,
"इदानीं निर्गमे पुत्र! प्रवेशे वा गृहस्य च।
शुभाशुभानि सर्व्वाणि वक्ष्यामि शकुनानि च॥
राजा गजो द्विजमयूरकखञ्जरीटा-
श्चाषः शुकोत्तरचकः सितवत्सयुक्तः।
पुत्रान्विता च युवती गणिका च कन्या
श्रेयः सुखाय पुरुषं प्रतिदर्शयन्ति॥
नटाचार्य्यो भासहारीतचक्री
भारद्वाजोच्छिक्करश्चागसंज्ञः।
एते श्रेष्ठा दक्षिणे वाथ वामे
वैद्यावेद्यो निर्गमे श्रेयसे च॥
सर्पोलूकौ वानरः शूकरश्च
गोधा ऋक्षः कृकलाशः शुनश्च।
एते रिष्टा निर्गमे वा प्रवेशे
कार्य्याघातो नोपकारेषु शस्ताः॥
मृगो वा पिङ्गलो वापि प्रशस्ता दक्षिणे सदा।
निर्गमे वा प्रवेशे च दक्षिणाः शुभदायकाः॥
एको वा त्रीणि वा पञ्च सप्त वा नवसंख्यया।
भाग्यकाले नराणान्तु मृगा यान्ति प्रदक्षिणाः॥
शिखिखड्गमृगगोधारासभो भृङ्गराजो
सुखरपिककपोतो गोनकौ शूकरौ वा।
तदनुविहगराजो मङ्गलाग्रेसिनः स्यु-
र्वदति शकुनवेत्ता वामतो निर्गमे वः॥
तित्तिरिः क्रुरः क्रौञ्चः सारसाभासशूकराः।
वामे तु शुभशंसी च निर्गमे कार्य्यसिद्धये॥
काको दक्षिणतः श्रेष्ठो निर्गमे शुभदायकः।
प्रवेशे गदितः श्रेष्ठो वामतः क्षणवायसः॥
जालको हि शुनकोऽपि कर्कटो-
कौर्णनश्च गदितं न सुखाय।
न शुभदर्शना अमी भवेयुः
सर्पगोधाभृकलाशविड़ालाः॥
दर्शनं हितकरं प्रवदन्ति
खञ्जरीटमरालछिक्करराज्ञाम्।
वामतः शुभकराः प्रवदन्ति
दार्व्वीघाटवराटकशुकञ्च॥
इति शुभाशुभशकुनानि॥"
इति हारीते हितीयस्थाने सप्तमेऽध्याये॥ *॥
तथा च।
"शवकाष्ठपलाशानां शुष्कानां पथि सङ्गमः।
नेष्यन्ते पतितास्थ्यादीनास्थरिपवस्तथा॥
दृष्टश्रौतोऽशुकूलञ्च सुगन्धिस्थानिलः शुभः।
खरोष्ट्रोऽनिष्टगन्धश्च प्रतिलोमश्च गर्हितः।
यस्याब्बुदादिषु सदा छेदशब्दश्च पूजितः।
विद्रधुदरगुल्मेषु भेदशब्दस्तथैव च॥
रक्तपित्तातिसारेषु रुद्धशब्दः प्रशस्यते।
एवं व्याधिविशेषेषु निमित्तमुपधारयेत्॥
तथैवाक्रुष्टहाकष्टमाक्रन्दरुदितस्वनाः।
छर्द्दयां वातपुरीषाणां शब्दो वै गर्हभोष्ट्रयोः॥
प्रतिषिद्धं तथा भग्नं च्युतं स्खलितमाहतम्।
दौर्म्मनस्यञ्च वैद्यस्य यात्रायां न प्रशस्यते॥"
इति सुश्रुते सूत्रस्थाने २६ अध्यायः॥)
यादईशः, पुं, (यादसां जलानां जलजन्तूनां वा ईशः।) समुद्रः। इति हेमचन्द्रः। ४। १६६॥
यादः, [स्] क्ली, (याम्ति वेगेनेति। या+असुन्। बाहुलकात् दागमश्च।) जलजन्तुः। इत्यमरः। १।१०।२०॥ (यथा, भगवद्गीतायाम्। १०।२६।
"अनन्तश्चास्मि नागानां वरुणो यादसा-
महम्॥"
जलम्। इति निघण्टुः। १। १२॥)
यादःपतिः, पुं, (यादसां पतिः।) समुद्रः। इत्यमरः। १।१६।२०॥ वरुणः। इत्यजयपालः॥
यादवः, पुं, (यदोरपत्यम्। यदु+अण्।) श्रीकृष्णः। इति शब्दरत्नावली॥ (यथा, भगवद्गीतायाम्। ११। ४१।
"सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण! हे यादव! हे सखेति।
अजानता महिमानं तवेदं
मया प्रमादात् प्रणयेन वापि॥")
ययातेर्ज्येष्ठपुत्रो यदुस्तस्य वंशः। यथा,—
"ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ!।"
इत्युपक्रम्य।
"माधवा वृष्णयो राजन् यादवास्त्वेतिसंज्ञितम्॥"
इति श्रीभागवते ६ स्कन्धे २३ अध्यायः॥
(यदुसम्बन्धिनि, त्रि। यथा, भागवते। ११।१।६।
"मन्येऽवनेर्भुवि गतोऽप्यगतं हि भारं
यदूयादवं कुलमहो अविषह्यमास्ते॥")
यादवी, स्त्री, (यदोरियमिति। यदु+अण्। ङीप्।) दुर्गा। इति त्रिकाण्डशेषः॥ (यदुवंशीयस्त्रीसामान्ये। यथा, महाभारते। १। ६५। १३।
"प्राचीन्वान् खड्गधृक्कौशुपयेमे यादवीं तस्यामस्य जज्ञे संयातिः॥")
यादसांनाथः, पुं, (यादसां जलजन्तूनां नाथः। षष्ठ्या अलुक्।) वरुणः। इति हलायुधः॥
यादसांपतिः, पुं, (यादसां जलजन्तूनां पतिः। षष्ठ्या अलुक्।) समुद्रः। इत्यमरः। १।१।६४॥ वरुणः। इति मेदिनी। ते, २३२॥ (यथा, देवीभागवते। ३। ६। ३५।
"अश्विनौ वसवस्त्वष्टा कुबेरो यादसांपतिः॥"
क्वचित् विशेषणमपि। यथा, मार्कण्डेये। २२।११।
"यावदम्भर्जले देवं वरुणं यादसांपतिम्॥")
याद्दक्, [ग्] त्रि, (य इव दृश्यते। दृश्+"यादृशादिषु दृशोऽनालोचने कञ्च्।" ३।२।६०। इति चकारात् क्विन्। "आ सर्व्वनाम्नः।" ६।३।६१। इत्याकारादेशः।) य इव दृश्यते सः। इति सुग्धबोधव्याकरणम्॥ येमन इति भाषा। (यथा, भागवते। ४। २६। ६४।
"नानुभूतं क्वचानेन देहेनाद्दृष्टमश्रुतम्।
कदाचिदुपलभ्येत यद्रूपं याद्दगात्मनि॥")
याद्दच्, त्रि, (य इव दृश्यते यमिव पश्यति वा। दृश्+"दृशेः क्वञ्च वक्तव्यः।" ३।२।६०। इति

वार्त्तिकोक्तेः क्वः। "आसर्व्वनाम्नः।"६।३।९१। इत्यत्र "ङ्ये चेति वक्तव्यम्।" इत्यात्वम्।) य इव दृश्यते सः। इति सुग्धबोधव्याकरणम्॥ येमन इति भाषा॥

यादृग्, त्रि, (य इव दृश्यते। दृश्+"त्यदादिषु दृशः इति।"३।२।६०। इति क्विन्। "आसर्व्वनाम्नः।" ६।३।९१। इत्याकारादेशः।) य इव दृश्यते सः। इति सुग्धबोधव्याकरणम्॥ येमन इति भाषा। (यथा, मनुः। ४। २५४।

"यादृशोऽस्य भवेदात्मा यादृशश्च चिकीर्षितम्। यथा चोपचरेदेनं तथात्मानं निवेदयेत्॥"

स्त्रियां यादृशी॥)

यादोनाथः, पुं. (यादसां नाथः।) समुद्रः। इति राजनिर्घण्टः॥ (वरुणः। इति यादसांनाथशब्ददर्शनात्।)

यादोनिवासः, पुं, (यादसां निवासः।) जलम्। इति हेमचन्द्रः। ४। १३५॥

यानं, क्ली, (या+ल्युट्। अर्हादिभ्यात् पुंलिङ्गमपि।) राज्ञां सन्ध्यादिषड्गुणान्तर्गतगुणविशेषः। तत्तु उपचितशक्तेः कृतमूलराष्ट्रस्यास्य शत्रोरुच्छेदाय यात्रा। इति भरतः॥ (यथा, देवीभागवते। ५। ४। ११।

"यानमप्यधुना नैव कर्त्तव्यं सहसा पुनः॥"

यान्त्यनेनेति। या+ल्युट्।) हस्त्यश्वरथदोलादि। तत्पर्य्यायः। वाहनम् २ युग्यम् ३ पत्रम् ४ धोरणम् ५। इत्यमरः। २।८।५८॥ विमानम् ६ चक्करम् ७ यापनम् ८ गतिमिश्रकम् ९। इति शब्दरत्नावली॥*॥ (यथा, मनुः। ३। ६४ ६५।

"शिल्पेन व्यवहारेण शूद्रापत्येन केवलैः। गोभिरश्वैश्च यानैश्च कृषया राजोपसेवया॥ अध्याध्यायनलेनैव नास्तिक्येन च कर्म्मणाम्। कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः॥")

अथ चतुष्पदयानोद्देशः।

"ये ब्रह्मजात्यादिविभेदतोऽमी
मया निरुक्ता इह वाजिसुखाः।
दिष्ट्यानया सर्व्वचतुष्पदानां
भेदो विधेयो विदुषादरेण॥
तथा यथाश्वादिकपोषणेन
यानेन वा दोषगुणौ भवेताम्।
तथा तथैवान्यचतुष्पदानां
प्रकीर्त्तितौ दोषगुणौ बुधेन॥
वरमयानमपोषणमेव वा
वरमिवान्यशरीरमपोषणम्।
न खलु दोषयुतं च चतुष्पदं
स्तृणति पश्यति शोभनचेतनः॥
सुराविन्दूर्दूषयति पयोघटशतं यथा।
तथा सर्व्वं दूषयति दोषदुश्चतुष्पदः॥"

इति चतुष्पदयानोद्देशः॥*॥

अथ द्विपदयानोद्देशः।

"मानुषैः पक्षिभिर्व्वापि तथान्यैर्द्विपदैरपि।
यानं स्याद्विपदं नाम तस्य भेदो ह्यनेकधा॥
सामान्यश्च विशेषश्च तस्य भेदो द्विधा भवेत्॥"

तत्र सामान्यं यथा,—

"यानं यद्विपदाभ्यां सत् तद्दोलादिकमुच्यते।
चतुर्भिर्युक्तिसंयुक्तैर्दण्डधातुगुणाम्बरैः।
दोलेति कथ्यते तेषां नियमोऽयं प्रदर्श्यते॥"

तत्र समयः।

"उपेन्द्रमूलाद्विगिषामिवर्जं
ग्रस्तेन्दुतारातिथियोगलग्ने।
दृष्टिस्मापुत्रयमाहवर्जं
दोलादिकारोहणमाद्यमिष्टम्॥

दण्डकाष्ठस्य नियमे नियमश्चन्दनद्रुवत्।
कनकं रजतं ताम्रं लौहं धातुचतुष्टयम्॥
चतुर्विधानां सप्तिहृदं ब्रह्मादीनां यथाक्रमम्।
सुराणामसुराणाञ्च चातुर्व्वर्ण्यसदाहृतम्॥
त्रिहस्तसम्मितो मध्ये तदर्द्धं पार्श्वयोर्द्वयोः।
विजया नाम दोलेयं विजयाय महीक्षिताम्॥
विजया मङ्गला क्रूरा शिवा क्लेशा शुभा क्रमात्।
वितस्त्येकैकसंवृद्धा दोलाः षट् स्युः सुखप्रदाः॥
कुम्भश्च पद्माकोषश्च शृङ्गः पर्व्वत एव च।
चतुर्विधानां दोलासु कल्याणाय चतुष्टयम्॥
हंसः केकी शुको भृङ्गश्चतुष्टयमिदं क्रमात्।
कुम्भाद्यर्थे निधातव्यं चतुर्विधमहीक्षिताम्॥
अत्रापि वर्णविन्यासो विज्ञेयो नवदण्डवत्॥"

भोजस्तु।

"गजः प्रस्थानदोलायां रथदोलासु केशरी।
मृगो भ्रमणदोलायां क्रीड़ादोलासु षट्पदः॥
भुजङ्गमः शुचुराख्ये वृषभो दानकर्म्मणि।
दोलोपर्य्युपरि न्यस्तो बहुभिर्मुनिभाषणम्॥
यदक्षदण्डं यानं स्यात् तत् पर्य्यङ्कमिति स्मृतम्।
त्रिहस्तसम्मितो यानस्तदर्द्धपरिणाहवान्।
पर्य्यङ्कः क्षेमनामायं भर्त्तुः सर्व्वार्थसाधकः॥
क्षेमो मृत्युर्जयो दुःखहारस्ते यथाक्रमम्।
वितस्त्येकैकसंवृद्धा यथा चायुर्न सङ्गिनः॥
मञ्चिकातुल्यतादीनां नियमः पूर्व्ववन्मतः।
विशेषमथ वक्ष्यामि पर्य्यङ्कस्य यथाक्रमम्॥
शुक्तिश्च गजदन्तश्च मृगश्चङ्गन्तथैव च।
अनूपादिकजातानां पर्य्यङ्केषु न्यसेत् क्रमात्॥
पद्मपङ्कजगजाश्वालिहंसकोकशुकान् क्रमात्।
आदित्यादिग्रहाणां मञ्चिरूपेण विन्यसेत्॥
महीक्षितां विशेषेण सिंहमानेव ग्रस्यते।
निर्म्माणे शुक्तिदण्डाश्च राज्यभोगसुखप्रदाः॥
तदेवावक्रदण्डन्तु खट्वायानमिति स्मृतम्।
अस्यापि पूर्व्ववन्मानमधिष्ठात्रादिनिर्णयः॥
विशेषश्चरणोच्छ्रायः परिणाहार्द्धसम्मितः।
तदेव चेन्निश्चरणं पीठयानमिति स्मृतम्॥
तस्य भेदो द्विधा दण्डवक्रावक्रप्रभेदतः।
मानादिकं पूर्व्वतुल्यं विशेषाच्चतुरस्रता॥
एवमन्यानि मिश्राणि यानानि विविधानि च।
सामान्याख्यानि जानीयात् शिल्पिभिर्निर्म्मितानि वै॥
मनोहरत्वं लघुता दृढ़तेति गुणत्रयम्।
प्रोक्तं द्विपदयानानां सहजं भोजभूभुजा॥

इति सामान्यद्विपदयानकथनम्॥"

इति युक्तिकल्पतरुः॥*॥ विशेषद्विपदयानन्तु चतुर्दालशब्दे निष्पदयानोद्देशस्तु नौकाशब्दे द्रष्टव्यम्॥ (फलप्राप्तिहेतौ, त्रि। यथा, ऋग्वेदे। १०। ११०। २।

"तनूनपात् पथ ऋतस्य यानान्
मध्वा समञ्जन् स्वदयास्वञ्जिभ॥"

"यानान् फलप्राप्तिहेतून् पथो मार्गान्।" इति तद्भाष्ये सायणः॥ या+भावे ल्युट्। गतिः। यथा, वाभटे शारीरस्थाने षष्ठेऽध्याये।

"यानं खरोष्ट्रमार्ज्जारकपिग्राह्यैणशूकरैः।
यस्य प्रेतैः शृगालैर्वा स च स्त्रीवर्त्तते सुखे॥")

यानपात्रं, क्ली, (यानसाधनं पात्रम्। शाकपार्थिवत् समासः।) निष्पदयानविशेषः। जाहाज इति भाषा॥ तत्पर्य्यायः। वहित्रकम् २ वोहित्थम् ३ वहनम् ४ पोतः ५। इति हेमचन्द्रः। ३। ५३६॥ सप्तदशयानम् ६। इति वराहपुराणम्॥ (यथा, हरिवंशे। १४५। ६३।

"सप्तच्छिद्रैः क्षितैः पोतैः यानपात्रैस्तथैव च। नौभिश्च भिन्नकाभिश्च शुभमे वरुणालयः॥")

यानसुखं, क्ली, (यानस्य सुखम् पुरोभागः।) रथादेः पुरोभागः। तत्पर्य्यायः। धूः २। इत्यमरः। २। ८। ५५॥

यापनं, क्ली, (या+णिच्+ल्युट्।) वर्त्तनम्। कालक्षेपणम्॥ (यथा, कामन्दकीये। १०। ३१।

"पूर्व्वसेनापतिर्गौप्तः कालयापनमाश्रितः॥")

निरशनम्। इति मेदिनी। ने, ११२। (यापयतीति। या+णिच्+ल्युः। प्रापके, त्रि। यथा, भागवते। ३। २२। ३३।

"अयातयामास्तस्यासन् यामाः स्वान्तर-यापनाः॥")

यामा, स्त्री, जटा। इति भूरिप्रयोगः॥

याप्यः, त्रि, (यापि+यत्।) अधमः। निन्दितः। इत्यमरः। ३। १। ५३॥ (यथा, हरिवंशे। १६। २९।

"यदशुभमशुभेऽह्नि मानसं तस्य हृद्विः शुभफलमपि चैवं याप्यमन्योऽन्यतायाम्॥")

यापनीयः। (यथा, सुश्रुते निदानस्थाने प्रथमे अध्याये।

"श्लेष्मितं तरसाध्यं स्यात् याप्यं संवत्सरोत्थितम्॥")

क्षेपणीयकालादिः। इति मेदिनी। ये, ४८॥

व्याधिविशेषः। यथा,—

"साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः।
सुखसाध्यः कृच्छ्रसाध्यो द्विविधः साध्य उच्यते॥

याप्यलक्षणमाह।

यापनीयन्तु तं विद्यात् क्रियां धारयते हिताम्।
क्रियायान्तु निवृत्तायां सद्यो यत्र विनश्यति॥
प्राप्ता क्रिया धारयति सुखिनं याप्यमातुरम्।
प्रपतिष्यद्विवागारं स्तम्भो यद्वन योषितः॥
साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा।
भ्रान्ति प्राप्तानसाध्यांस्तु नरान्नामक्रियावताम्॥

अक्रियावतां चिकित्सारहितानाम्।" इति भावप्रकाशः॥

यान्ययानं, क्ली, (यान्यं अधमं यानम्।) शिविका। इत्यमरः। २। ८। ५३॥

यामः, पुं, (यभ्यते इति। यभ+घञ्।) मैथुनम्। यथा। इयान्ययोर्यामभेर्थे सन्। इति विश्वप्रादे वोपदेवः। ८४॥ (यथा, भागवते। ६। १६। ६।

"पीवानं श्मश्रुलं प्रेष्ठं मीढुषं याभकोविदम्।
स एकोऽलब्धवत्तासां वर्ष्मानं रतिवर्द्धनः।
रेमे कामग्रहयस्त आत्मानं गावबुध्यत॥")

यामः, पुं, (याति यायते वा। या+"अर्शिसुसुहन्यश्चिच्छुभायावापदियच्चिनीभ्यो मन्।" उणा० १।१४०। इति मन्। यम्+घञ् वा।) दिवारात्रीणांचतुर्थभागैकभागः। तत्पर्य्यायः। प्रहरः २। इत्यमरः। १।४।६॥ (यथा, मनौ। ७। १४५।

"उत्थाय पश्चिमे यामे कृतशौचः समाहितः।
कुतामिन्नांश्चसंधार्य्य प्रविशेत् च शुभां
सभाम्॥")

संयमः। इति मेदिनी। मे, २४॥ (गमनम्। यथा, ऋग्वेदे। १। ४८। ४।

"उषो ये ते प्र यामेषु युञ्जते।"

"यामेषु गमनेषु।" इति तद्भाष्ये सायणः॥ गमनसाधनः। यथा, ऋग्वेदे। ४। ५१। ४।

"कुवित् देवीः सनयो नवो वा
यामो बभूयादुषसो वो अद्य।"

"यामो गमनसाधनः स रथः।" इति सायणः॥ देवगजभेदः। यथा, मार्कण्डेयपुराणे।१५।१८।

"यस्यश्च दधिवाहाद्यान्तु पुत्रा द्वादश जज्ञिरे।
यामा इति समाख्याता देवाः स्वायम्भुवेऽन्तरे॥")

यामघोषः, पुं, (यामे प्रतियामे घोषः रवोऽस्य। प्रतिप्रहरं रवकरत्वादेवास्य तथात्वम्।) कुक्कुटः। इति शब्दमाला॥

यामघोषा, स्त्री, (यामे यामे घोषोऽस्याः। यामान् प्रहरान् घोषति शब्दायत इति वा। घुष्+अच्। टाप्।) यन्त्रविशेषः। घड़ी इति भाषा। तत्पर्य्यायः। नाली २ घटी ३ यामनाली ४ यमेरका ५ दक्कटका ६। इति चिकाण्डशेषः॥

यामनाली,, स्त्री, (यामस्य नालीव।) यामघोषा। इति चिकाण्डशेषः॥

यामनेमिः, पुं, रथः। इति चिकाण्डशेषः॥

यामलं, क्ली, युगलम्। इति हेमचन्द्रः। ६। ६०॥ तन्त्रशास्त्रविशेषः। तस्य लक्षणं यथा,—

"सृष्टिश्च ज्योतिषाख्यानं नित्यलक्षणप्रदीपनम्।
क्रमश्चतुर्वर्गभेदो जातिभेदस्तथैव च।
युगधर्म्मश्च संख्यानो यामलस्यास्यलक्षणम्॥"

तत्तु षड्विधम्। आदियामलम् १ ब्रह्मयामलम् २ विष्णुयामलम् ३ रुद्रयामलम् ४ गणेशयामलम् ५ आदित्ययामलम् ६। इति वाराहीतन्त्रम्॥ एषां श्लोकसंख्या तन्त्रग्रन्थे द्रष्टव्या॥

यामवती, स्त्री (यामः प्रहरः अस्त्यस्यामिति॥ याम+मतुप्। मस्य वः ङीष्।) रात्रिः। इति राजनिर्घण्टः॥

यामाता, [तृ] पुं, (जामाता पृषोदरादित्वात्। जस्य यः।) जामाता। दुहितुः पतिः। इत्यमरटीका भरतसेनश्च॥ यामातुर्विष्णुतुल्यत्वं तस्य यदि कन्यादातुर्दौहित्रजननात् प्राक् भोजननिषेधश्च यथा, कामधेनावादित्यपुराणम्।

"विष्णुं यामातरं मन्ये तस्य मन्युं न कारयेत्।
अप्रजायान्तु कन्यायां नाश्नीयात्तस्य वै गृहे॥"

इत्युद्वाहतत्त्वम्॥

यामार्द्ध, क्ली, (यामस्यार्द्धम्।) प्रहरस्यार्द्धम्। तस्याधिपा यथा,—

"वारेशाद्दर्क्षयामेषु राज्यर्क्षोः पञ्च षट्क्रमात्।
अधिपाः सूर्य्यदेवाद्याश्च यथार्काद्धे भवन्ति हि।
रवौन्येन्दुभृगुज्ञाजगुनिशरवयो निशि।
रविशुक्रशरात्रीशगुरौन्ध्यकुजभास्कराः॥
दिने तुल्याः परेम्वेवं तत्राधश्चाधतुर्यहाः।
पापदर्क्षे भवेद्रिष्टिः शुभदर्क्षे शुभं भवेत्॥
शुभयुक्षस दर्क्षे तु कर्म्मारम्भाच्छुभं भवेत्।
आरम्भात् पापदर्क्षे तु कर्म्म निष्फलतां व्रजेत्॥
यस्यार्द्धयामलग्नेव प्राग्दृक्कः समुदाहृतः।
षट् षट् परीक्ष्य दक्काश्च त्रयो रात्रौ मताश्चया॥
यामार्द्धाधिपसंख्यातो द्वितीयस्तु तदर्द्धतः।
तदर्द्धात्तु तृतीयः स्यात्तदर्द्धात्तु तुरीयकः॥
अङ्गाभावे तु राहुः स्यात्तदङ्गो वसुसंख्यकः।
भयाङ्गस्य परित्यागाद्विदक्काधिपा यथा॥"

इति ज्योतिषतत्त्वम्॥

यामिः, स्त्री, (याति कुलात् कुलान्तरमिति। या+बाहुलकात् मिः।) स्वसा। कुलस्त्री। इत्यमरः। २। ३। १४२॥ "स्वसा भगिनी। कुलस्त्री कुलवधूः। प्रहरे संयमे यामो यामिः स्वसृकुलस्त्रियोरित्यन्तःस्यादौ रभसः॥ त्रिष्वस्तु कुटिले निन्द्ये यामिः स्वसृकुलस्त्रियोरिति चवर्गलतीयादावलयः इति भरतसेनकुटौ॥ यथा, यामयो यानि गेहानि ग्रथन्थप्रतिपूजिताः॥ इति स्वामी॥ जे त्वये बाहुलकान्मिः। यद्वा जसु अदने बाहुलकादिञ् यामिरिति। अन्तःस्यादौ या प्रापणे धातुर्बोध्यः।" इति रामाश्रमः॥ (यथा, मनौ। ४। १८१।

"यामयोऽरक्षणे लोके वैश्यदैवस्य बान्धवाः॥")

यामिनी। इति शब्दरत्नावली॥ धर्म्मस्य पत्नी। तस्याः कन्या नागवीथी। यथा,—

"अरुन्धती वसुर्यामिर्लम्बा भानुर्मरुत्वती।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च मातरः।
धर्म्मपत्न्यो दश त्वेतास्तासु पत्यादि मे शृणु।
जज्ञायाश्चैव घोषोऽसौ नागवीथी तु यामिजा॥"

इति वह्निपुराणे कश्यपीयप्रजासर्गः॥

यामिकभटः, पुं, (यामे यामे नियुक्तः। याम+ठक्। स चासौ भटश्चेति।) प्रहरिकः। चौकीदार इति भाषा। यथा,—

"उन्मादामुदवर्द्धितान्धतमसः प्रभ्रष्टदिङ्मण्डले
काले जाग्रदुदग्रयामिकभटप्रारब्धकोलाहले।
कर्षन्त्यासुहृदर्शनाम्बुवहवाहैर्यदन्तःपुरा-
दायातासि यदम्बुवाहि! क्षतकं मन्ये भयं
योषिताम्॥"

इति कर्षटः॥

यामित्रं, क्ली, लग्नात् सप्तमराशिः। यथा,—

"धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम्।
दूनं दूनं तथास्तास्थं षट्कोणं रिपुमन्दिरम्॥"

यामित्रवेधो यथा,—

"पापात् सप्तमगः शशी यदि भवेत् पापेन
युक्तोऽथवा
यत्नेनाशु विवर्जयेन्मुनिमतो दोषोऽप्ययं कथ्यते।
यात्रायां विपदो गृहे सुतवधः चौरेषु रोगोद्-
भवो-
ऽप्युद्वाहे विधवा व्रते तु मरणं शूलच्च पुंस्कर्म्मणि।
रविमन्दकुजाक्रान्तं स्वगाद्गात् सप्तमं त्यजेत्।
विवाहयात्राचूड़ासु एषकर्म्मप्रवेशने॥"

इति यामित्रवेधः॥

अस्य प्रतिप्रसवो यथा।

"मूलत्रिकोणनिजमन्दिरगोऽथ पूषा
मित्रर्क्षसौम्यगृहगोऽथ तरीक्षितो वा।
यामित्रवेधविहितानपनुद्य दोषान्
दोषाकरः सुखमनेकविधं विधत्ते॥"

इति ज्योतिस्तत्त्वम्॥

यामिनी, स्त्री, (यामाः सन्त्यस्याम्। याम+इनिः। ङीप्।) रात्रिः। (यथा, महाभारते।१२।५३।१।

"ततः शयनमाविश्य प्रसुप्तो मधुसूदनः।
याममात्रार्द्धशेषायां यामिन्यां प्रत्यबुध्यत॥")

हरिद्रा। इत्यमरः। १। ४। ४॥ (कश्यपपत्नी। यथा, भागवते। ६। ६। २१।

"तार्क्ष्यस्य विनता कद्रुः पतङ्गी यामिनीति च।
पतङ्गाच्छत पतगान् यामिनी शूलभानथ॥"

प्रजादक्ष द्वितीया तनया। यथा, कथासरित्सागरे। ४६। २२।

"प्रजादो यामिनीं नाम द्वितीयां तनयां ददौ॥")

यामिनीपतिः, पुं, (यामिन्याः पतिः।) चन्द्रः। इति शब्दरत्नावली॥ (यथा, भागवते। १०। ३५। २५।

"यदुपतिर्द्विजराजविहारो
यामिनीपतिरिवैष दिनान्ते।
सुहृदवक्त्र उपयाति दुरन्तं
मोचयन् व्रजगवां दिनतापम्॥")

कर्पूरम्। इत्यमरः॥

यामी, स्त्री, (यमस्येयम्। यमो देवतास्याः इति वा। यम+अण्। ङीप्।) दक्षिणदिक्। इति राजनिर्घण्टः॥ (यथा, ज्योतिषे।

"————यास्यां गुरौ न व्रजेत्।"

यामि+ङीप्।) कुलस्त्री। इति शब्दरत्नावली॥ (यथा, मनौ। ४।१८०।

"भ्रातापितृभ्यां यामीभिरेताश्च पतिभिस्तथा।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः॥"

दुहित्रा दासवर्गेण विवादं न समाचरेत्।"

धर्म्मपत्नी । यथा, विष्णुपुराणे ।१।१५।१०५।
"अरुन्धती वसुर्यामी लम्बा भानुमरुत्वती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च
ता इमाः ॥")

यासुनं, क्ली, (यसुनायां भवम् । यसुना + अण् । यसुनाया इदमिति वा ।) श्रोतोऽञ्जनम् । इत्यमरः । २।६।१०० ॥ (अस्य पर्य्यायो यथा,—
"अञ्जनं यासुनञ्चापि कापोताञ्जनमित्यपि ।
तत्तु श्रोतोऽञ्जनं क्लम्बं सौवीरं श्वेतमौरितम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पुं, जनपदभेदः । यथा, भागवते । ९।१०।३४ ।
"कुरुजाङ्गलपाञ्चालान् शूरसेनान् स यासुनान् ।
ब्रह्मावर्त्तं कुरुक्षेत्रं मत्स्यान् सारस्वतानथ ॥"
एकवचनविशेषे । यथा, रामायणे । ४।४०।२१ ।
"कालिन्दीं यसुनां रम्यां यासुनञ्च महा-
गिरिम् ।"

तीर्थभेदः । यथा, महाभारते । ३ । ८४ । ४९ ।
"यसुनाप्रभवं गत्वा सप्तयज्ञञ्च यासुनम् ।
अश्वमेधफलं लब्ध्वा स्वर्गलोके महीयते ॥")

यसुनासम्बन्धिनि, त्रि । (यथा, प्रायश्चित्ततत्त्वे ।
"त्रिभिः सारस्वतं तोयं सप्तभिस्तच्च यासुनम् ।
नाम्नेदं दशभिर्मासैर्गाङ्गं वर्षञ्च जीर्य्यति ॥")

यासुनैरेकं, क्ली, (यासुनमिवेरकम् ।) सौषकम् । इति जटाधरः ॥ (विशेषोऽस्य सौषकशब्दे विज्ञेयः ॥)

यामेयः, पुं, भागिनेयः । यामिः स्वस्रुकुक्षियो-रित्यनुशासनात् यामेरपत्यमित्यर्थे ढ्यञ्-(ढक्) प्रत्ययनिष्पन्नः ॥ (यास्या धर्म्मपत्न्या अपत्यमिति । यामिपुत्रः । यथा, भागवते । ६।६।६ ।
"ककुदः सङ्कटस्यस्य कीकटस्यनयो यतः ।
सुवो दुर्गाणि यामेयः स्वर्गो नन्दिस्ततोऽभवत् ॥")

याम्यः, पुं, (यामौ विवाहोऽस्य । यामी + यत् ।) अगस्त्यमुनिः । चन्दनवृक्षः । इति मेदिनी । ये, ४८ ॥ (यमस्यायमिति । यम + यञ्ः । यमदूतः । यथा, मार्कण्डेये । ११ । ३० ।
"क्लम्यमाणस्य याम्येश्च नरकेषु च पात्यतः ।
पूर्व्वञ्च गर्भो जन्माथ मरणं नरकस्तथा ॥")

याम्या, स्त्री, (यमस्येयं यमो देवतास्या इति वा । यम + "यमाच्चेति वक्तव्यम् ।" ४।१।८५ । इति वार्त्तिकोक्त्या यञ्ः । टाप् ।) दक्षिणदिक् । (यथा, रामायणे । २ । १०३ । २६ ।
"प्रयक्ष्य तु महीपालो जलपूरितमञ्जलिम् ।
दिशं याम्यामभिमुखो रुदन् वचनमब्रवीत् ॥")
भरणीनक्षत्रम् । इति मेदिनी । ये, ४८ ॥ (यमसम्बन्धिनि, त्रि । यथा, महाभारते । २।८।१।
"कथयिष्ये सभां याम्यां युधिष्ठिर ! निबोध ताम् ।
वेवस्वतस्य यां प्राप्य ! विश्वकर्म्मा चकार ह ॥")

याम्यायनं, क्ली, (याम्यायामयनं याम्यं अयनमिति वा ।) दक्षिणायनम् । यथा, मत्स्यपुराणे ।
"याम्यायने हरौ सुप्ते सर्व्वकर्म्माणि वर्ज्जयेत् ॥"

याम्योद्भूतः, पुं, (याम्यायासुद्भूतः ।) श्रीतालवृक्षः । इति राजनिर्घण्टः ॥

यायजूकः, पुं, (पुनः पुनर्यजति । यज् + यङ् । "यजजपदशां यङः ।" ३ । २ । १६६ । इति ऊकः ।) पुनःपुनर्यागकर्त्ता । तत्पर्य्यायः । इज्याशीलः । इत्यमरः । २ । ७ । ८ ॥ (यथा, रामायणे । २ । ७२ । १५ ।
"या गतिः सर्व्वभूतानां तां गतिं ते पिता गतः ।
राजा महात्मा तेजस्वी यायजूकः सतां गतिः ॥")

यायावरः, पुं, (पुनःपुनरतिशयेन वा याति देशादेशान्तरं गच्छतीति । या + यङ् । "यञ्च यङः ।" ३।२।१७६। इति वरच् ।) अश्वमेधीयाश्वः । इति जटाधरः ॥ अरत्काऋषिः । इति त्रिकाण्डशेषः ॥ (ऋषीणां गणविशेषः । यथा, महाभारते । १२ । २४३ । १७ ।
"तात प्रव्रज्यधर्म्मास्तथा यायावरा गणाः ॥"
अरत्काऋषिरेवैतद्गणीयः । यथा, महाभारते । १ । १३ । ११ ।
"अरत्कारुरिति ख्यात ऊर्द्धरेता महातपाः ।
यायावराणां प्रवरो धर्म्मेऽसौ संशितव्रतः ॥")
त्रि, पुनःपुनर्गमनशीलः । यथा,—
"यायावराः पुष्पफलैर्वर्त्तयन्ति
प्राणचुर्य्यां जगदर्च्चनीयम् ॥"
इति भट्टिः । २ । २० ॥
(क्ली, याच्ञा । यथा, भागवते ।७।११।१६ ।
"वार्त्ता विचित्रा शालीनयायावरशिलोञ्छनम् ।
विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चोत्तरोत्तरा ॥"
"यायावरं प्रत्यहं धान्ययाच्ञा ।" इति तट्टीकायां श्रीधरस्वामी ॥)

यावः, पुं, (यौति यूयते वा । यु + अच् अम् वा । ततः प्रज्ञाद्यण् ।) अजल्लः । इत्यमरः । २ । ९ । २२५ ॥ (तद्यास्य पर्य्यायः ।
"लाजा यवकृशालस्तो यावो दृप्तामयो मतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
यथा, नैषधे । २२ । ७६ ।
"ततस्तदीयाधरयावयोगा-
दुदेति विम्बारुणविम्ब एषः ॥"
यव एव । स्वार्थेऽण् । यावः । यथा, तैत्तिरीयसंहितायाम् । ४ । ३ । ६ । २ ।
"यावानां भागोऽस्य यावानामाधिपत्यमिति ॥")

यावकः, पुं, (यव एव यावः स इवेति इवार्थे कन् । यद्वा, याव एव । याव + "यावादिद्यः कन् ।" ५ । ४ । २६ । इति स्वार्थे कन् ।) कुल्माषः । इत्यमरः । २ । ९ । १६ । "हे घोरोऽथाऽथे । कुवलय इत्यन्ये मायाञ्जतिपत्रे काश्मीरेषु तुजसौति ख्याते । इति भूमिः ॥ यव एव गुणेन इति यवकः विकारसंज्ञेति कः । यवक एव यावकः स्वार्थे णः । कुवेन मस्यति परिणमति कुल्माषः मसीयं ईं परिमाणे परीणामे घञ् मनीषादित्वादनुक् । कुल्माषो दन्त्यषकारवान् मूर्द्धन्यषकारवांश्च । कुल्माषो रभसश्चेति दन्त्यान्ते रचित इति मधुः ॥ कुल्माषो यावके पुंसि काञ्जिके तु नपुंसकमिति मूर्द्धन्यान्ते रभसः ।" इति भरतः ॥

"यवकः स्यात्तु कुल्माषः कुल्माषो यावकोऽपि च ।
घोरवाक्ये घटिके वा कुल्मे काश्मीरदेशजे ।
शालिधान्येषु चत्वार इति केचित् प्रचक्षते ॥"
इति शब्दरत्नावली ॥ * ॥

यावानम् । इति हेमचन्द्रः ॥ (यथा, मनौ ।११। १२६ ।
"सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम् ।
मलिनी करणीयेषु तप्तः स्याद्यावकेऽहनि ॥")
अजल्लकः । इति शब्दरत्नावली ॥ (यथा, किराते । ५ । ३६ ।
"इह सनियमयोः सुरापगाया-
सुषसि सयावकसक्थपादलेखा ।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥")

यावज्जीवं, व, क्ली, (यावत् जीवतीति । जीव + "यावति विन्दजीवोः ।" ३ । ४ । ३० । इति णमुल् ।) यावदायुः । जीवनपर्य्यन्तम् । यथा,
"यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता ।
माता च मम वन्ध्यासीदपुत्रश्च पिता मम ॥"
इति आर्हतशब्दटीकायां भरतः ॥

यावत्, व, (यद् + डावतुः ।) साकल्यम् । अवधिः । मानम् । अवधारणम् । इत्यमरः । ३ । ३ । २४५ ॥ "साकल्ये निरवशेषे । यथा । यावद्दत्तं तावद्भुङ्क्ते । अवधौ मर्य्यादायाम् । मूलात् शाखां यावत् प्रकाण्डः ॥ मानं प्रमाणम् । यावदृग्रहाणि तावच्छिवः ॥ अवधारणमियत्तापरिच्छेदः । इयत्ता भाव इयत्ता परिमाणं तस्य परिच्छेदो निश्चयः । यथा यावत् पात्रं तावद्व्रीह्यादानमत्रयज्ञ । यावत् कार्य्यं क्षेऽवधारणे प्रश्नसायां परिच्छेदे मानाधिकारसम्भ्रमे प्रत्यन्तरे चेति मेदिनी ।" इति भरतः ॥ (यत्परिमाणमस्य इदमर्थे । यत् + "यत्तदेतेभ्यः परिमाणे वतुप् ।" ५ । २ । ३९ । इति वतुप् । "आसर्व्वनाम्नः ।" ६ । ३ । ९१ । इत्यालम् ।) यत्परिमिते, त्रि । तत्र यावान् यावती यावत् इति रूपत्रयं भवति । यच्छब्दात् निपातनादतुप्प्रत्ययनिष्पन्नः । इति तद्धितपादे बोपदेवः ॥ (यथा, भागवते । २ । ६ । ३१ ।
"यावानहं यथा भावो यद्रूपगुणकर्म्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥"
यथाच मनुः । ८ । १५५ ।
"यावतो धान्यबीजस्य तावतीं दातुमर्हति ॥"
तथाच याज्ञवल्क्यः । २ । २६३ ।
"यावत् ग्रस्तं विगृह्णेत्तु तावत् स्यात् चैत्रिकः पलम् ॥")

यावतिथः, त्रि, (यावतां पूरणः । यावत् + "तस्य पूरणे डट् ।" ५।२।४८ । इति डट् । "वतोरिथुक् ।"५।२।५३। इति इथुगागमश्च ।) यावत्परिमाणम् । इति सुग्धबोधव्याकरणम् ॥ (यथा, मनुः । १ । २० ।
"आद्याद्यस्य गुणस्यैषामवाप्नोति परः परः ।
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः ॥")

यावनः, पुं, (यवने यवनदेशे भवः। यवन+अण्।) सिङ्खाख्यगन्धद्रव्यम्। इत्यमरः। २।४।१२८॥ (विवृतिरस्य सिङ्कशब्दे ज्ञातव्या॥)

यावनालः, पुं, (यवनाल एवेति। यवनाल+स्वार्थे अण्।) धान्यविशेषः। जोयार इति भाषा। तत्पर्य्यायः। यवनालः २ शिखरी ३ दृत्ततण्डुलः ४ दीर्घनालः ५ दीर्घशूरः ६ चैजेन्तुः ७ दृत्तपत्रकः ८। तस्य गुणाः। धवलत्वम्। गौल्यत्वम्। बल्यत्वम्। विदोषजित्त्वम्। दृष्यत्वम्। रुच्यत्वम्। अर्शो यच्मगुल्मव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

यावनालशूरः, पुं, (यावनाल इव शूरः।) शूरभेदः। जोकुरली इति हिन्दी भाषा। तत्पर्य्यायः। नदीजः २ ढण्ढलक् ३ वारिसम्भवः ४ यावनालनिभः ५ खरपत्रः ६। अस्य मूलगुणाः। दैघन्मधुरत्वम्। रुच्यत्वम्। शीतत्वम्। पित्तरक्तनाशित्वम्। पशूनामबलप्रदत्वञ्च। इति राजनिर्घण्टः॥

यावनाली, स्त्री, (यवनालस्य विकारः। यवनाल+अण्। ततो ङीप्।) यावनालशूर्करा। तत्पर्य्यायः। हिमोत्पन्ना २ हिमानी ३ हिमशूर्करा ४ क्षुद्रशूर्करिका ५ क्षुद्रा ६ गर्दभा ७ जलविन्दुजा ८। अस्या गुणाः। गौल्यत्वम्। उष्णत्वम्। तिक्तत्वम्। अतिपिच्छिलत्वम्। वातघ्नत्वम्। खारकत्वम्। रुच्यत्वम्। दाहपित्तासृदायित्वञ्च। इति राजनिर्घण्टः॥

यावमूकः, पुं, (यवमूक एव। यवमूक+स्वार्थे अण्। यद्वा, यावस्य यवस्य शूकः कारणत्वेनास्त्यस्येति। अर्शआद्यच्।) यवक्षारः। इति रत्नमाला॥ (यथा, सुश्रुते चिकित्सास्थाने १ अध्याये।
"क्षौमं क्षोतं पिचुं फेनं यावशूकं ससत्त्वकम्। कर्कशानि च पत्राणि लेखनार्थे प्रदापयेत्॥")

यावसः, पुं, (यूयते इति। यु+"वहियुभ्यां तित्।") उणा० ३।११६। इति असच्। तस्य तित्त्वञ्च। यद्वा, यवसानां समूहः। यवस+"तस्य समूहः।" ४।२।३७। इति अण्।) यवससमूहः। इति सिद्धान्तकौमुदी॥

याव्यं, त्रि, (यूयते इति। यु+"आसुयुवपिरपिलपिक्षिपिचमिचमश्च।" ३।१।१२६। इति ण्यत्।) मिश्रणीयम्। यूयते यत्। इति मुग्धबोधव्याकरणम्॥

याश्वोधरेयः, पुं, (यश्वोधरस्यापत्यं पुमान्। यश्वोधर+ढक्।) शाकसुनिपुत्रः। इति हेमचन्द्रः॥

याष्टीकः, पुं, (यष्टिः प्रहरणमस्य। यष्टि+"शक्तियष्टेरीकक्।" ४।४।५६। इति ईकक्।) यष्टिधारियोद्धा। लेठैत इति भाषा। तत्पर्य्यायः। यष्टिहेतिकः २। इत्यमरः। २।८।७०। (यथा, राजतरङ्गिण्याम्। ६। २०२।
"आकलय्य इतं दिष्ट्या सत्यव्य प्रार्थनादिकम्। एष्टे प्रत्युत याष्टीकांस्तस्य हन्तुं वधर्जयत्॥")

यासः, पुं, (यस+घञ्।) दुरालभा। इत्यमरः। २। ४। ६९॥ (यथा,—
"यासो वयासो दुःस्पर्शो धन्वयासः कुनाशकः। दुरालभा दुरालम्भा वसुदत्ता च रोदिनी॥ गान्धारी कच्छुरानन्ता कषाया दुरभिग्रहा। यासः खादुः सरक्षिप्तसुवरः शीतलो लघुः॥ कफमेदोमदश्वासपित्तास्रकुष्ठकासजित्। क्षयाविसर्पवातामवमिज्वरहरः परः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

यासा, स्त्री, (यासः प्रयत्नोऽस्त्यस्या इति अर्शआद्यच्। टाप्।) मदनशलाकापक्षी। इति शब्दमाला॥

यु, ङ क निन्दने। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) ङ क, यावयते। इति दुर्गादासः॥ ("यावयते वाचा दृढम्।" इति मनोरमा॥)

यु, ञ ग बन्धे। इति कविकल्पद्रुमः॥ (क्र्या०-उभ०-सक०-सेट्।) ञ ग, युनाति यो वयसोऽपि न वेश्यावन्धकीजनैरिति हलायुधः। इति दुर्गादासः॥

यु, ल मिश्रणे। अमिश्रणे। इति कविकल्पद्रुमः॥ (अदा०-पर०-अक०-सेट्।) ल, यौति। मिश्रणे यथा,—
"यौति काले कुलस्त्रीभिः चक्रसन्तानदृढये॥"
इति हलायुधः॥
अमिश्रणे समवायलक्षणे। अयुतसिद्धानामिति मिलितसिद्धानामित्यर्थः। इति दुर्गादासः॥

युक्, [ञ्] चि, (युज्यते समाधत्ते इति। युज्यौ ङ समाधौ+क्विप्।) समाधिमान्। इति मुग्धबोधव्याकरणम्॥ (युज्यते परस्परमिति।) युग्मम्। इति शब्दरत्नावली॥ (यथा, मनुः। ३। २७७।
"युक्तु कुर्व्वन् दिनर्क्षेषु सर्व्वान् कामान् समश्नुते। अयुक्तु तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्कलाम्॥")

युक्, व, निन्दा। युज क ङ, निन्दे इत्यक्षाक्षावे क्विप्प्रत्ययेन निष्पन्नम्। (एतच्चिन्त्यम्॥)

युक्तं, त्रि, (युज्यत स्म इति। युज्+क्तः।) आयम्। तत्तु आयागतव्ययादिकम्। इत्यमरः। २। ८। २४॥ (यथा, शाकुन्तले। १ अङ्के।
"अस्य वस्य पुरोर्वंशे युक्तरूपमिदं तव। पुत्रमेवं गुणोपेतं चक्रवर्त्तिनमाप्नुहि॥")
अप्रथमभूतम्। मिलितमित्यर्थः। इति मेदिनी। ते, ३७॥ (यथा, आनन्दलहर्य्याम्। १।
"शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि। अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति॥")

युक्तं, क्ली, (युज्+क्तः।) हस्तचतुष्टयम्। इति मेदिनी। ते, ३७॥

युक्तः, पुं, (युज्यते स्म योगेनेति। युज्+क्तः।) अभ्यस्तयोगः। यथा,—
"योगज्ञो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः। युक्तस्य सर्व्वदा भानं चिन्तासङ्कल्पतोऽपरः॥"
इति भाषापरिच्छेदे। ६६॥
तस्य लक्षणं यथा, गीतायाम्। ६। ८।
"ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः। युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः॥"
"योगारूढस्य लक्षणं श्रेष्ठं योक्तुमुपसंहरति ज्ञानेति। ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभवः ताभ्यां तृप्तो निराकाङ्क्ष आत्मा चित्तं यस्य। अतः कूटस्थो निर्व्विकारः। अतएव विजितानि इन्द्रियाणि येन। अतएव समानि लोष्टादीनि यस्य। दृतखण्डपाषाणसुवर्णेषु हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते।" इति तट्टीकायां श्रीधरस्वामी॥
(वैवतमनोः पुत्रः। यथा, हरिवंशे। ७। २८।
"अथ पुत्रानिमांश्चास्य निबोध गदतो मम। धृतिमानयवो युक्तस्तत्त्वदर्शी निरुत्सुकः॥")

युक्तरसा, स्त्री, (युक्तः रसोऽस्याः।) राखा। इत्यमरभरतौ। २।४।१४०॥ काँटा आमरुली इति भाषा। (तथास्याः पर्य्यायः।
"राखा युक्तरसा रस्या सुवहा रसना रसा। एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

युक्ता, स्त्री, (युक्त+टाप्।) दृष्यविशेषः। इति रत्नमाला॥ एलाची इति भाषा॥

युक्तिः, स्त्री, (युज्यते इति। युज्+क्तिन्।) न्यायः। इति मेदिनी। ते, ४७॥ (यथा, पद्मतन्त्रे। ३। १६३।
"तस्य तद्वचनं श्रुत्वा धर्म्मयुक्तिसमन्वितम्। उपगम्य ततोऽश्वत्थः कपोतः प्राह शुभ्रकम्॥")
लोकव्यवहारः। इति व्यवहारमालका॥
"धर्म्मशास्त्राविरोधे तु युक्तियुक्तो विधिः स्मृतः॥"
इति स्मृतिश्च॥
अनुमानम्। यथा,—
"युक्तिव्यवसन्नासु सपथेनैवमर्हयेत्॥"
युक्तिरनुमानम्।
अनुमानेन विज्ञेयं न स्नातां पत्नसाक्षिणौ। दृष्टेकवाक्यत्वादिति विवरणम्॥ अथ युक्तिः। नारदः।
उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः। केशाकेशिग्रहीतश्च युगपत् पारदारिकः॥
कुठारपाणिर्विज्ञेयः छेत्तुमेत्ता समीपगः। तथा कुठारहस्तश्च वनच्छेत्ता प्रकीर्त्तितः॥
प्रत्यक्षचिह्नैर्विज्ञेयो दण्डपारुष्यकारकः। असाक्षिप्रत्यया ह्येते पारुष्ये तु परीक्षणम्॥
प्रत्यक्षचिह्नैः रुधिरास्रखड्गादिभिः। पारुष्ये वाक्पारुष्ये। शब्दः। क्रोशहस्तश्च चौर इति। नारदः।
अभीक्ष्णं दिश्यमानोऽपि प्रतिहन्यान्न तद्वचः। त्रिचतुःपञ्चशत्वो वा परतोऽर्थे समावहेत्॥
यदा धनिकेनाधमर्णिकस्त्रिचतुःपञ्चशत्वो वा त्वं मे ऋणं धारयसीति पुनःपुनर्दिश्यमानोऽपि

न तद्वाक्यं प्रतिहन्ति तदोत्तरकालमनेनाभ्युपगतोऽयमर्थ इत्यवधार्य्य तमर्थन्यधिकाय दापयेदित्यर्थः।" इति व्यवहारतत्त्वम्। * ॥ न्यायालङ्कारविशेषः। तस्य लक्षणम्। यथा।"युक्तिरर्थावधारणम्। उदाहरणं यथा,—

'यदिसमरमपास्य नास्ति नष्टो-
र्भयमिति युक्तमितोऽन्यतः प्रयातुम्।
अथ मरणमवश्यमेव जन्तोः
किमिति सुधा मलिनं यशः कुरुध्वम्॥'

इति वेणीसंहारः।" इति साहित्यदर्पणम्॥ (उपायः। यथा, कथासरित्सागरे। ३६। ५६।

"तत्स षड्भुजो देवाग्निर्व्वास्येतांचिरात् यथा।
तां पुत्र! चिन्तयेर्युक्तं त्वमन्यैर्भ्रातृभिः सह॥"

भोगः। यथा, सूर्य्यसिद्धान्ते। ७। २४।

"त्रिचतुःकर्णयुक्त्याप्तास्ते द्विघ्नाश्चिघ्न्या हताः।
स्फुटाः स्वकर्णसंघाता भवेयुर्मानलिप्तिकाः॥"

प्रमाणविशेषः। तद्यथा,—

"अत्राहुः तन्नयुक्तानां किं प्रयोजनमित्युच्यते वाक्ययोजनमर्थयोजनञ्च।"

"असदादिप्रयुक्तानां वाक्यानां प्रतिषेधनम्।
स्ववाक्यसिद्धिरपि च क्रियते तन्नयुक्तितः॥
यक्ता नोक्ताश्च ये ह्यर्था लीना ये चाप्य-
निर्म्मलाः।
वेदोक्ता ये क्वचित्तन्त्रे तेषाञ्चापि प्रसाधनम्॥
यथाम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा।
प्रबोधस्य प्रकाशार्थास्तथा तन्त्रस्य युक्तयः॥"

इति सुश्रुते उत्तरतन्त्रे ६५ अध्यायः॥)

युग, ट वर्ज्जने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) अन्तःस्थादिः। ट, युङ्क्ते। इति दुर्गादासः॥

युगं, क्ली, (युज्यत इति। युज्+घञ्। कुत्वम्। न गुणः। "युजेर्घञन्तस्य निपातनादगुणत्वं विग्रहविषये च निपातनमिदमिष्यते। कालविशेषे रथाद्युपकरणे च युगशब्दस्य प्रयोगोऽन्यत्र योग एव भवति।" इति काशिका। ६। १। १६०।) युग्मम्। (यथा, शिशुपालवधे। ६। ७२।

"उपनेतुमुन्नतिमतेव दिवं
कृतयोर्युगेन तरसा कलिताम्।
रभसोत्थितासुपगतः सहसा
परिरभ्य कञ्चन वधूमरुधत्॥")

कृतादिकालचतुष्टयम्। (यथा, गीतायाम्। ४।८।

"परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे॥")

दृढिनामौषधम्। हस्तचतुष्कम्। इति मेदिनी। गे, १६॥ (यथा, मार्कण्डेये। ४६। ३६।

"हे वितस्ती तथा हस्तो ब्राह्म्यतीर्थादिदेशयेत्।
चतुर्हस्तं धनुर्दण्डो नाड़िका युगमेव च॥")

देवानां द्वादशसहस्रवत्सरेण चतुर्युगं भवति। मनुष्यमानेन चतुर्युगपरिमाणं त्रिंशतिसहस्राधिकत्रिचत्वारिंशल्लक्षम्। तत्र सत्ययुगस्य मानम् १७२८००० वर्षाः। त्रेतायुगस्य १२९६००० वर्षाः। द्वापरयुगस्य ८६४००० वर्षाः। कलियुगस्य ४३२००० वर्षाः। इति श्रीभागवतमतम्॥ तेषां भारतवर्षवर्त्तित्वं विवरणञ्च यथा,—

"चत्वारि भारते वर्षे युगानि ऋषयोऽब्रुवन्।
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम्॥
पूर्व्वं कृतयुगं नाम ततस्त्रेता विधीयते।
द्वापरञ्च कलिश्चैव युगानि परिकल्पयन्॥
चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्।
तस्य तावत् शती सन्ध्या सन्ध्यांशश्च तथाविधः॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च॥
त्रेता त्रीणि सहस्राणि युगसंख्याविदो विदुः।
तस्यापि त्रिशती सन्ध्या सन्ध्यांशः सन्ध्यया समः॥
द्वे सहस्रे द्वापरे तु सन्ध्यांशौ तु चतुःशते।
सहस्रमेकं वर्षाणां दिव्यं कलौ प्रकीर्त्तितम्॥
द्वे शते च तथान्धे वै संख्यातस्य मनीषिभिः।
एषा द्वादशसाहस्री युगसंख्या तु संज्ञिता॥
कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम्।
तत्र संवत्सराः कृत्स्ना मानुषास्तान्निबोधत॥
चत्वारिंशच्छतान्यत्र त्रीणि कृतं युगमथोच्यते।
त्रिंशत्तिस्र सहस्राणि कालो ह्येष चतुर्युगः॥
पृथक्त्वेनेह वक्ष्यामि युगानि तु निबोधत।
नियुतानि दश द्वे च पञ्च चैवात्र संख्यया॥
अष्टाविंशसहस्राणि कृतं युगमथोच्यते।
अयुतन्तु तथा पूर्णं द्वे चान्ये नियुते पुनः॥
षट्त्रिंशच्च सहस्राणि संख्यातानि तु संख्यया।
त्रेतायुगस्य संख्येषा मानुषेण तु कीर्त्तिता॥
अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु।
चतुःषष्टिसहस्राणि वर्षाणां द्वापरं युगम्॥
चत्वारि नियुतानि स्युर्वर्षाणान्तु चतुर्युगम्।
द्वात्रिंशच्च तथान्यानि सहस्राणि तु संख्यया॥
एतत् कलियुगं प्रोक्तं मानुषेण प्रमाणतः।
एषा चतुर्युगावस्था मानुषेण प्रकीर्त्तिता॥
चतुर्युगस्य संख्याता सन्ध्या सन्ध्यांशकेन च।।
एषा चतुर्युगाख्या तु साधिका लोकसप्ततिः।
कृतत्रेतादियुक्ता सा मनोरन्तरमुच्यते॥"

इति मात्स्ये ११८ अध्यायः॥ * ॥

युगधर्म्मो यथा,—

"ध्यानं परं कृतयुगे त्रेतायां ज्ञानमध्वरः।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे॥
ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः।
द्वापरे देवतं विष्णुः कलौ रुद्रो महेश्वरः॥
ब्रह्मा विष्णुस्तथा सूर्य्यः सर्व्व एव कलिष्वपि।
पूज्यते भगवान् रुद्रश्चतुर्ष्वपि पिनाकधृक्॥
आद्ये कृतयुगे धर्म्मश्चतुष्पात् सनातनः।
त्रेतायुगे त्रिपात् स्याद्द्विपादो द्वापरे स्थितः।
त्रिपादहीनस्तिष्ये तु सत्तामात्रेण तिष्ठति॥"

इति कूर्म्मपुराणे युगधर्म्मकीर्त्तनं नाम २८ अध्यायः॥ * ॥ युगावतारा यथा,—

"कृते युगे परं ज्ञानं कपिलादिस्वरूपभृत्।
ददाति सर्व्वभूतात्मा सर्व्वभूतहिते रतः॥
चक्रवर्त्तिस्वरूपेण त्रेतायामपि स प्रभुः।
दुष्टानां निग्रहं कुर्व्वन् परिपाति जगत्त्रयम्॥
वेदमेकं चतुर्भेदं कृत्वा शाखाश्चतुर्विधाः।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक्॥
वेदांस्तु द्वापरे यस्य कलेरन्ते पुनर्हरिः।
कल्किस्वरूपी दुष्टांस्तान् मार्गे स्थापयति प्रभुः॥
एवमेष जगत् सर्व्वं परिपाति करोति च।
हन्ति चान्येष्वनन्तात्मा नास्यस्माद्व्यतिरेकि
यत्॥"

इति विष्णुपुराणे ३ अंशे २ अध्यायः॥ * ॥

युगधर्म्मान्तरं यथा,—

जैमिनिरुवाच।

"कलौ युगे महाभाग! समायाते सुदारुणे।
भविष्यन्ति जनाः सर्व्वे कौटिल्याश्चद्दृढं मे॥

व्यास उवाच।

आद्यं सत्ययुगं प्राहुस्ततस्त्रेताह्वयं युगम्।
ततश्च द्वापरं विप्र! कलिमन्त्यं विदुर्बुधाः॥
कृते धर्म्मश्चतुष्पात्तु सर्व्वधर्म्मरता जनाः।
वर्णाश्रमाचाररताश्चोपोद्वतपरायणाः॥
नारायणार्च्चनपराः प्रोक्ताधिविवर्जिताः।
सत्योक्तिभाषिणः सर्व्वे सदया दीर्घजीविनः॥
धनधान्यादिसम्पन्ना हिंसादम्भविवर्जिताः।
परोपकारिणश्चैव सर्व्वशास्त्रविदस्तथा॥
एवंविधाः सत्ययुगे सर्व्वे लोका द्विजोत्तम!।
राजधर्म्मास्त्रिपादश्च भूपाला जनपालिनः॥
अहो सत्ययुगस्यास्ति कः संख्यातुं गुणान् क्षमः॥
अधर्म्माचरणं तत्र जनाः केचिन्न कुर्व्वते॥ * ॥
त्रेतायुगे समायाते धर्म्मः पादेनतां गतः।
अल्पक्लेशान्विता लोकाः केचित् केचिद्दयान्वयाः।
विष्णुध्यानरता लोका यज्ञदानपरायणाः।
वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः॥
त्यक्ता भूमिसृजः शूद्राः सर्व्वे ब्राह्मणसेविनः।
ब्राह्मणाश्च महात्मानो वेदवेदाङ्गपारगाः॥
प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः।
तपोव्रतरता नित्यं दातारो विष्णुसेविनः॥
कालवर्षी तडित्वांश्च स्त्रियः सर्व्वाः पतिव्रताः।
वसुन्धरा च शस्याढ्या पुत्राश्च पितृसेविनः॥*॥
त्रेतायुगस्यावसाने द्वापरे युग आगते।
द्विपादो भूतवान् धर्म्मः सुखदुःखान्विता नराः॥
केचित् केचित् पापरताः केचिद्धर्म्मरतास्तथा।
केचित् केचित् गुरुद्वेषाः केचित् केचिन्महा-
गुणाः॥
अत्यन्तदुःखिनः केचित् केचित् चातिधनास्तथा।
प्रतिग्रहे ब्राह्मणाश्च कदाचित् कुर्व्वते स्पृहाम्।
भूसुजा धनलोभेन कदाचिद्दृश्यते प्रजाः।
विष्णुपूजापरा विप्राः शूद्राश्च द्विजसेविनः॥
तदा विष्णुर्यज्ञरूपी वेदभागं चकार ह॥*॥
कलौ युगे च विप्रेन्द्र! सर्व्वपापैकमन्दिरे।
एकपादोऽभवद्धर्म्मः सर्व्वे पापरता जनाः॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः पापपरायणाः।
निजाचारविहीनाश्च भविष्यन्ति कलौ युगे॥
विप्रा वेदविहीनाश्च प्रतिग्रहपरायणाः।
अत्यन्तकामिनः क्रूरा भविष्यन्ति कलौ युगे॥

परान्नभोजिनो नित्यं तपोव्रतपराङ्मुखाः।
पाषण्डसङ्घजुष्टाश्च भविष्यन्ति कलौ युगे ॥
विप्रार्थे ब्राह्मणाः केचिन्महाकपटधर्मिणः।
वल्काधरा भविष्यन्ति जटिलाः श्मश्रुधारिणः।
कलौ युगे भविष्यन्ति ब्राह्मणाः शूद्रधर्मिणः॥
शूद्राश्च दीक्षागुरवो नित्यं ब्राह्मणधर्मिणः।
कलौ यास्यन्ति निर्वृत्तिं उत्तमा अपि नीचताम्॥
नीचाश्च धनसम्पन्ना यास्यन्त्युच्चपदं प्रति।
प्रदास्यन्त्युपकारिभ्यो दानानि सकला जनाः॥
यत्नादपि च नेष्यन्ति वृषला विप्रवर्त्मनम्।
मित्रस्नेहादिदिष्यन्ति कुसाक्ष्यञ्च कलौ जनाः॥
अधर्मवृद्धिदातारो धर्मवृद्धिविलोपिनः।
परोक्षनिन्दकाः क्रूराः संसक्तप्रियवादिनः॥
परस्त्रीहिंसकाश्चैव मिथ्यावचनभाषिणः।
भविष्यन्ति कलौ विप्राः परवित्ताभिलाषिणः॥
गृहमायान्तमतिथिं समाराध्य विधानतः।
धनलोभाद्विनिघ्नन्ति नरा नरकभागिनः।
ऋणोपजीविनश्चैव भविष्यन्ति कलौ युगे॥
स्त्रीजिताः पुरुषाः सर्वे स्त्रियोऽप्यन्यजनप्रियाः।
दुर्नीतिर्व्याधितो तासां स्वामिनश्च न संशयः॥

जैमिनिरुवाच।

मनःशुद्धिविहीनत्वात् सर्वेषां प्राणिनां सुने!।
अतः सर्वं त्वया प्रोक्तं मनो विषयदं मम॥
कलौ सर्वे भविष्यन्ति मनःशुद्धिविवर्जिताः।
तेषां यथा भवेत् कर्म्म सफलं ब्रूहि तद्गुरो!॥

व्यास उवाच।

अनर्पितन्तु यत् कर्म्म तद्भवेन्निष्फलं खलु।
एकेन मनसा विप्र! शृणुष्वं कथ्यते मया॥
विष्णुभक्तिमतां पुंसां न किञ्चिदपि दुर्लभं भवेत्।
इति ते कथितं सर्वं यत्तं ब्राह्मणसत्तम!।
यत् श्रुत्वा भक्तिभावेन नरो मोक्षमवाप्नुयात्॥"
इति पाद्मे क्रियायोगसारे २५ अध्यायः॥

अपि च।

"क्षते धर्म्मश्चतुष्पाच्च सत्यं दानं तपो दया।
धर्म्मपाता हरिः श्वेतः सन्तुष्टा ज्ञानिनो नराः।
चतुर्वर्षसहस्राणि नरा जीवन्ति वै तदा॥
कृताब्दे क्षत्रियैर्विप्रा विट्शूद्राश्च जिता हि वै।
शूरस्य प्रवतिः पुत्रो विष्णुः सत्यं जघान ह॥
त्रेतायुगे त्रिपाद्धर्म्मः सत्यदाक्षिण्यालकः।
नरा यज्ञपराश्चित्रं कथा यज्ञोद्भवं जगत्॥
रक्तो हरिर्नरैः पूज्यो नरा दम्भयुताश्च वै।
तत्र विष्णुर्भौमरथः क्षत्रियो राघवाग्रजः॥
द्विपाच्च द्वापरे धर्म्मः पीतताक्ष्युते मते।
चतुःशतायुषो लोका द्विजश्रेष्ठतराः प्रजाः॥
तदा वेदाश्चतुर्धा च विष्णुर्व्यासस्वरूपधृक्।
तदैकन्तु यजुर्व्वेदं चतुर्धा विभजत् पुनः॥
शिष्यानध्यापयामास नामतस्तान्निबोध मे।
ऋग्वेदमथ पौलस्त्यं सामवेदञ्च जैमिनिम्॥
अथर्व्माणं सुमन्तुञ्च यजुर्व्वेदं महासुनिम्।
वैशम्पायनसंज्ञञ्च पुराणं कृतमेव च॥
अष्टादश पुराणानि अन्ये वै हरिरेव हि।
वर्णश्च प्रतिवर्णश्च वंशो मन्वन्तराणि च॥
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम्॥
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतन्तथा।
भविष्यं नारदीयञ्च पुराणञ्चेति विस्तरम्॥
मार्कण्डेयं तथाग्नेयं ब्रह्मवैवर्त्तमेव च।
कौर्म्मं मात्स्यं गारुडञ्च वायवीयमनन्तरम्॥
अष्टादशं समुदितं ब्रह्माण्डमिति संज्ञितम्।
अन्यान्युपपुराणानि मुनिभिः कथितानि तु॥
आद्यं सनत्कुमारोक्तं नारसिंहमथापरम्।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम्॥
चतुर्थं शिवधर्म्माख्यं साम्बान्नन्दीशभाषितम्।
दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम्॥
कापिलं वामनञ्चैव तथैवोशनसेरितम्।
ब्रह्माण्डं वारुणञ्चाथ कालिकाख्यमेव च॥
माहेश्वरं तथा याम्यं सौरसंज्ञार्थसञ्चयम्।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम्॥
पुराणं धर्म्मशास्त्रञ्च वेदा अङ्गानि यानुमुने!।
आयुः शौनक! मीमांसा आयुर्व्वेदार्थशास्त्रकम्।
गान्धर्वञ्च धनुर्व्वेदो विद्या ह्यष्टादश स्मृताः।
द्वापरान्ते च स हरिर्भुवो भारमपाहरत्॥
एकपादस्थिते धर्म्मे ह्यच्युताच्युते गते।
जनास्तदा दुराचारा भविष्यन्ति च निर्दयाः॥
सत्त्वं रजस्तम इति ह्यन्ते पुरुषे गुणाः।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि॥
प्रभूतञ्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च।
तदा कृतयुगं विद्याद्दाने तपसि यद्रतिः॥
यदा कर्म्मसु कार्य्येषु भक्तिर्यशसि देहिनाम्।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक!॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः।
कर्म्मणाञ्चापि काम्यानां द्वापरन्तद्रजस्तमः॥
यदा मृषातृतं तन्द्रीनिद्राहिंसादिसाधनम्।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः॥
यस्मिन् जनाः कामिनोऽपि शश्वत्कटुकभाषिणः।
दस्युलुब्धा असत्पदा वेदाः पाखण्डदूषिताः॥
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः।
व्रता वटोश्च शौचा भिक्षवश्च कुटुम्बिनः॥
तपस्विनो ग्रामवासा ज्ञानिनो निश्चयोज्झिताः।
दम्भकाया महाहाराश्चौर्य्यमायोरुसाहसाः॥
त्यक्ष्यन्ति भृत्याश्च पतिं भृत्यं भर्त्तार एव च।
सूना इव प्रतिच्छन्दा यन्तारो यन्त्रिणामिव॥
उद्विग्नाश्चानवद्वारा विप्राश्चण्डाः प्रजाः।
अक्षातभोजनेनाग्निदेवतातिथिपूजनम्।
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम्॥
क्षीणायुषो जवा सर्वे शूद्रप्रायाश्च शौनक!।
बहुप्रजास्त्वभाग्याश्च भविष्यन्ति कलौ स्त्रियः॥
शिरःकण्डूयनपरा आत्मानं नेष्यन्ति सत्पते।
विष्णुं न पूजयिष्यन्ति पाखण्डोपहता जनाः॥
ऋग्वेदोविधिवेदेषु अस्ति शौनो महान् गुरुः।
कौत्सनाद्येन लब्धस्य सूक्तस्य शतं जपेत्॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतः मखम्।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्॥
तस्माच्छ्रेयो हरिर्नित्यं ध्येयः पूज्यश्च शौनक।"
इति गारुडे युगधर्म्माः। २२० अध्यायः॥

युगः, पुं, (युज्यते बलीवर्द्दौ अस्मिन्निति। युज्+घञ्। युजेर्वृन्नलश्च निपातनादुगुभावश्च। इति काशिका। ६।१।१६०।) रथवहनाङ्गम्। इति मेदिनी। गे, १६॥ जोयालि इति भाषा। (यथा,—

"नावेव नः पारयतं युगेव
गन्धेव न उपधीव प्रधीव॥"
इति ऋग्वेदे। २। ३६। ४॥

"युगा इव यथा रथस्य युगे बध्ना इव।" इति तद्भाष्ये सायणः॥ तथा च कथासरित्सागरे। ६०। १२।

"तस्मैकदा बलिध्वंसे गच्छतो मथुरां पुरीम्।
भारवोढ़ा युगं कर्षन् भारेण युगभग्नतः॥")

युगकीलकः, पुं, (युगस्य कीलकः।) युगकाष्ठस्य कीलकः। जोयालेर खिल इति भाषा। तत्पर्य्यायः। ग्रन्था २। इत्यमरः। २। ८।१४॥

युगन्धरः, पुं, (युगं धारयतीति। धारि+"संज्ञायां भृतृवृजिधारिसहितपिदमः।" ३।२।४६। इति खच्। "अरुर्द्विषदजन्तस्य मुम्।" ६।३।६७०। इति मुम्।) यत्र रथस्य युगकाष्ठमासज्यते तत्र। रथस्याश्वा यत्र बध्यन्ते तद्युगकाष्ठं तद्युगं धरति युगन्धरः। इति भरतः॥ तत्पर्य्यायः। कूबरः २। इत्यमरः। २। ८। ५७॥ पर्व्वतविशेषः। यथा,—

"निषधो माल्यवान् विन्ध्यो हेमकूटो युगन्धरः॥"
इति शब्दरत्नावली॥

(तृञिपुत्रः। स च सात्यकेः पौत्रः। यथा, हरिवंशे। १६०। ३१।

"तृञेर्युगन्धरः पुत्र इति वंशः समाप्यते॥")

युगपत्, अ, एकदा। एककालीनम्। इत्यमरः। ३। ४। २२॥ (यथा, भागवते। १। ६। २।

"कालसंज्ञां तदा देवीं विभ्रच्छक्तिसुरक्रमः।
त्रयोविंशतितत्त्वानां गणं युगपदाविशत्॥")

युगपत्रः, पुं, (युगं पत्रमस्य।) कोविदारवृक्षः। इति हेमचन्द्रः। ४।११८॥ युग्मपर्णश्च्छत्राह्वश्च॥

युगपत्रकः, पुं, (युगपत्र+स्वार्थे कन्।) कोविदारवृक्षः। इत्यमरः। २। ४। २२॥ (यथास्य पर्य्यायः।

"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कुचली ताम्रपुष्पश्च कण्डारः खण्डकेशरी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

युगपत्रिका, स्त्री, (युगं पत्रमस्याः। कप्। टाप्। अकारस्येत्वञ्च।) शिंशपावृक्षः। इति त्रिकाण्डशेषः॥ (विवरणमस्याः शिंशपाशब्दे ज्ञातव्यम्।)

युगपार्श्वगः, पुं, (युगस्य पार्श्वं गच्छतीति। गम्+डः।) अभ्यासार्थं लाङ्गलपार्श्वबद्धो बौः। पाँटे बाँधा गरु इति भाषा। तत्पर्य्यायः। प्रष्ठवाट् २। इत्यमरः। २। ६। ६३॥

युगलं, क्ली, (युज्यते परस्परं संगच्छत इति। युज्+इगादिभ्यः कलच्। न्यङ्क्वादित्वात् कुत्वम्।) युग्मम्। इत्यमरः। २। ५। ३८॥ (यथा, भागवते। ४। २६। २०।

"पद्मपर्ण पादयुगलमाह शोभनलक्षणाक्षिताम्॥")

युगान्तः

युगलमन्त्रः, पुं, (युगलाख्यो मन्त्रः। युगकपार्थिववत् समासः।) लक्ष्मीनारायणमन्त्रः। यथा,—
"इदं रहस्यं परमं लक्ष्मीनारायणाह्वयम्।
राजंस्तवापि वक्ष्यामि प्रपत्तिं शरणागतिम्॥
द्वयात् परतरो मन्त्रो नास्ति सत्यं ब्रवीमि ते।
द्वयात् परतरो धर्म्मो नास्ति लोकेषु कश्चन॥
सर्व्वेषां लक्ष्यमन्त्राणां मध्ये युगलसंज्ञकम्।
मन्त्रं हि सर्व्वतः श्रेष्ठं लक्षणप्यमुत्तमम्॥
सर्व्वतो युगलं मन्त्रं कार्य्यं परतरं नृप!।
गुह्याद्गुह्यतमं जातु ज्ञेयं तत्तदुपासकैः॥"
इति पाद्मोत्तरखण्डे २५ अध्यायः॥

युगलाख्यः, पुं, (युगलमित्याख्या यस्य।) वल्मीकः। इति राजनिर्घण्टः॥ त्रि, युग्मनामकः॥

युगांशकः, पुं, (युगस्य अंशकः खण्डांशः इति।) वत्सरः। इति हारावली।२८॥ युगविभाजकश्च॥

युगाद्या, स्त्री, (युगस्याद्यादिभूता।) युगारम्भतिथिः। यथा। "अथ युगाद्याः। तासु च।
'युगाद्या वर्षर्द्धिश्च सप्तमी पार्व्वतीप्रिया।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता॥'
इत्यनेन व्यवस्था॥

ब्रह्मपुराणे।
'वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम्।
कार्त्तिके शुक्लपक्षे तु नवमेऽहनि त्रेतायाः॥
अथ भाद्रपदे कृष्णत्रयोदश्यान्तु द्वापरम्।
माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम्॥
युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुताः॥'
अत्र वैशाखाद्याः पौर्णमास्यन्ता एव। ब्रह्मपुराणे तथैव तिथिकृत्याभिधानात्। सुरवाक्षिसे कार्त्तिके नवमेऽहनीत्यनेनैवेऽसिद्धौ शुक्लपक्ष इति वर्षं स्यात्। तेन भाद्रकृष्णत्रयोदश्यामयुक्तकृष्णचतुर्दश्येति मैथिलोक्तं निरस्तम्॥*॥
आसां प्रशंसामाह विष्णुपुराणम्।
'वैशाखमासस्य सिता तृतीया
नवम्यसौ कार्त्तिकशुक्लपक्षे।
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी पञ्चदशी च माघे॥
एता युगाद्याः कथिताः पुराणै-
रत्यन्तपुण्यास्तिथयश्चतस्रः।
उपप्लवे चन्द्रमसो रवेश्च
त्रिभिश्चकाख्यग्रहये च॥'
उपप्लवे ग्रहणे।
'प्राणीयमप्यत्र तिलैर्विमिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः।
आब्दं श्रुतं तेन समाः सहस्रं
रहस्यमेतत् पितरो वदन्ति॥'
स्नानमधिकृत्य भविष्ये।
संवत्सरफलं तत्र नवम्यां कार्त्तिके तथा।
मन्वादौ च युगादौ च मासत्रयफलं लभेत्॥"
इति तिथ्यादितत्त्वम्॥

युगान्तः, पुं, (युगानामन्तो यत्र। युगानामन्तो वा।) प्रलयः। इति हलायुधः। (यथा, महाभारते। ५। ४८। ६५।
"उद्धर्त्तयन् दस्युसंघान् समेतान्
प्रवर्त्तयन् युगमन्यद्युगान्ते।
यदा धत्ताम्यमिवत् कौरवेयां-
स्तदा तप्ता धार्त्तराष्ट्राः सपुत्राः॥")
युगेशश्च॥

युग्मं, क्ली, (युज्यते इति। युज्+"युजिरुचितिजां कुश्च।" उणा० १।१४५। इति मक्।) द्वयम्। जोड़ा इति भाषा। तत्पर्य्यायः। द्वन्द्वम् २ युगलम् ३ युगम् ४। इत्यमरः। २। ५। ३८॥ (यथा, रामायणे। २। ६१। ७६।
"पादुकोपानहाचैव युगान्यत्र सहस्रशः॥")
द्वितीयचतुर्थषष्ठाष्टमद्वादशराश्यः। यथा
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्विस्वभावकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"
इति ज्योतिस्तत्त्वम्॥
(द्वितीया।) मेलनम्। यथा,—
"युग्मायिकृतभूतानि वज्रभूयोर्व्वसुरन्ध्रयोः।
रुद्रेण द्वादशी युक्ता चतुर्दश्याथ पूर्णिमा॥
प्रतिपदाद्यमावास्या तिथ्योर्युग्मं महाबलम्।
एतद्व्रतं महाघोरं हन्ति पुण्यं पुराकृतम्॥
द्वितीयाष्टतीययोश्चतुर्थीपञ्चम्योः षष्ठीसप्तम्योरष्टमीनवम्योरेकादशीद्वादश्योः चतुर्दशीपौर्णमास्योः प्रतिपदमावास्ययोर्युग्मं मेलनम्। तत्तत्तिथिमात्रनिमित्तके कर्म्मणि महाबलम्। एतत् प्रयोजनन्तु तिथिविशेषविहिते कर्म्मणि तिथिसङ्कविशेषनियमनम्। स्वतिथ्या कर्म्मानिर्व्वाहे सहायभावेनान्यतिथ्युपवेशाद्युपवासाद्याचरणञ्च।" इति तिथ्यादितत्त्वम्। (द्वयविशिष्टे, त्रि। यथा, मनुः। ३। ४८।
"युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु।
तस्मात् युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम्॥")

युग्मपत्रः, पुं, (युग्मं पत्रमस्य।) रक्तकाञ्चनवृक्षः। इति रत्नमाला॥ (युग्मं पत्रम्।) युगलपर्त्ते, क्ली॥

युग्मपत्रिका, स्त्री, (युग्मं पत्रमस्याः। "ग्रेवादिभ्यश्च।" ५। ४। १५४। इति कप्। टापि अत इत्वम्।) ग्रिंग्रपावृक्षः। इति शब्दरत्नावली॥ (विवरणमस्याः ग्रिंग्रपाशब्दे द्रष्टव्यम्॥)

युग्मपर्णः, पुं, (युग्मं पर्णमस्य।) कोविदारवृक्षः। सप्तपर्णवृक्षः। इति राजनिर्घण्टः॥

युग्मपत्रा, स्त्री, (युग्मं पत्रमस्याः।) दन्तिचिर्भिटी। दन्तिकाली। इति राजनिर्घण्टः॥ गन्धिका। इति रत्नमाला॥

युग्मादरः, पुं, (युग्मस्यादरः।) तिथिविशेषयोगेन तिथिसङ्कविशेषस्यादरत्वम्। यथा। "पञ्चमी सप्तमी चैवेत्यादिना विशेषतः सायाह्नव्यापितिथेर्यत्रोपवासेऽपि न रात्रियुग्मादरः।" इति तिथ्यादितत्त्वम्। अस्य विवरणं युग्मशब्दे द्रष्टव्यम्॥

युग्मादरत्वं, क्ली, (युग्मस्यादरत्वम्।) युग्मतिथिपूज्यता। यथा,—
"त्रिमुहूर्त्तव्यापिनी या तु सैव पूज्या सदा तिथिः।
न तत्र युग्मादरत्वमन्यत्र हरिवासरात्॥"
इति तिथ्यादितत्त्वम्॥

युग्यं, क्ली, (युगाय हितम्। युग+"उगवादिभ्यो यत्।" ५। १। २। इति यत्। युगमर्हतीति वा। दण्डादित्वात् यत्। यद्वा, युज्यत इति। युज्+"युर्ग्यं च पत्ते।" ३। १। १२९। इति व्यवस्थो निपातितः।) वाहनम्। यानम्। इत्यमरः। २। ८। ५८॥ (यथा, महाभारते। ३। ५६। ६।
"हिरण्यस्य सुवर्णस्य यानयुग्यस्य वाससाम्।
आविद्धः कलिना द्यूते जीयते स्म नलस्तदा॥"
यथा च मनौ। ८। २६३।
"यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विगुतं दमम्॥"
वाच्यलिङ्गेऽपि दृश्यते। यथा, "युग्यो गौः। युग्योऽश्वः। युग्यो हस्ती।" इति काश्चिका। ३। १। १२१॥)

युग्यः, पुं, (युगं वहतीति। युग+"तद्वहति रथयुगप्रासङ्गम्।" ४। ४। ७६। इति यत्प्रत्ययः।) युगवोढ़ा। इत्यमरः। २। ८। ६३॥ ("रथं वहतीति रथ्यः युग्यः प्रासङ्गः।" इति काश्चिका॥)

युङ् [ञ्] त्रि, (युजिर् योगे+क्विन्। "युजेरसमासे।" ७। ३। ९१। इति नुमागमः।) योगकर्त्ता। मेलनकर्त्ता। इति मुग्धबोधव्याकरणम्। (यथा, भट्टिकाव्ये। ६। ११८।
"गुहाया निरगाद्राज्ञी सिंहो दृग्गमिव द्विषन्।
भ्रातरं युद्धभिषः संख्ये घोषेवापूरयद्दिशः॥"
युग्मम्। यथा, मनौ। ३। २७७।
"युञ्जन् कुर्व्वन् हविर्यज्ञैर्देवान् कामान् समश्नुते।
आयुष्यं तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्कलाम्॥"
समः। स च छन्दसि द्वितीयचतुर्थपादरूपः। यथा, छन्दोमञ्जर्य्याम्। १। १।
"विषमे यदि सौ सजगा दले
भौ युजि भाद्युदकाद्युपचित्रम्॥")

युज्ञी, [न्] पुं, वर्णसङ्करजातिविशेषः। स तु गङ्गापुत्रकन्यायां वैश्यधारिण्यो जातः। यथा,—
"गङ्गापुत्रस्य कन्यायां दीर्घेण वैश्यधारिणः।
बभूव वैश्यधारी च पुत्रो युज्ञी प्रकीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥

युज्झ, प्रमादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) अन्तःस्थाद्यादिः पञ्चमस्वरी। प्रमादोऽनवधानता। युज्झति पापे साधुः। ओष्ठ्यवर्णाद्यादिरिति रमानाथः। पचादित्वादनि युज्झो जाङ्गूलम्। ओष्ठ्यवर्णग्रेवादिरिति त्रिलोचनः। युज्झति। इति दुर्गादासः॥

युज, इर् ध न औ युतौ। इति कविकल्पद्रुमः॥ (रुधा०-उभ०-सक०-अनिट्।) इर्, अयुजत् अयौक्षीत्। ध, युनक्ति युङ्क्ते इत्येतान्नं लोकः। औ, योक्ता। इति दुर्गादासः॥

युज, कि संयमे। युतौ। इति कविकल्पद्रुमः। (पुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) अन्तः-स्थादिः। कि, योजयति योजति। संयमो बन्धनम्। इति दुर्गादासः॥

युज, ड क निन्दे। इति कविकल्पद्रुमः। (पुरा०-आत्म०-सक०-सेट्।) ड क, योजयते। इति दुर्गादासः॥

युज, य औ ड समाधौ। इति कविकल्पद्रुमः। (दिवा०-आत्म०-अक०-अनिट्।) समाधि-र्योग्यभावः। य ड, स्वयमर्थे नियुज्यते। इति हलायुधः। औ, योक्ता। इति दुर्गादासः॥

युजानः, पुं, सारथिः। इति संक्षिप्तसारोणादि-वृत्तिः॥

युजौ, [न्] पुं, (युज्+क्विप्।) अश्विनीकुमारौ। इति त्रिकाण्डशेषः॥ नित्यद्विवचनान्तोऽयम्॥

युञ्जानः, पुं, (युज्+शानच्।) सारथिः। विप्रः। इति मेदिनी। ने, ११३॥ भावनासहकारेण सर्व्वज्ञः। यथा,—

"योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः।
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः॥"

इति भाषापरिच्छेदे। ६५॥

"युक्तस्यति। योगाभ्यासावगम्या वशीकृतसमाधि-समासादितो विविधसिद्धयुक्त इत्युच्यते अयमेव विशिष्टयोगवत्त्वात् युक्त इत्युच्यते। सर्व्वदेति चिन्तासहकारं विनेत्यर्थः। भानं सर्व्वविषयाणां प्रत्यक्षम्। अपरो युञ्जानः। विषयग्राहकत्वा मानससमाधिरयः। अयञ्च युञ्जान उच्यते। चिन्ता ध्यानं तदेव कारणं तत्सहकारात् स्थूलसूक्ष्मव्यवहितविप्रकृष्टान् अर्थान् मनः प्रत्यक्षीकरोतीत्यर्थः।" इति सिद्धान्तमुक्तावली॥

युत्, स्त्री, निन्दा। युड क निन्दे इत्यस्माद्भावे क्विप्प्रत्ययेन निष्पन्नम्॥

युत्, [द्] स्त्री, (योधनमिति। युध्+क्विप्।) युद्धम्। इत्यमरः। २। ८। १०६॥ (यथा, रामायणे। २। ५१। १०।

"यो न देवासुरैः सर्व्वैः शक्यः प्रसहितुं युधि।
तं पश्य सुखसंसुप्तं लङ्कायां सह सीतया॥")

युद्धं, क्ली, (युध्यते इति। युध्+भावे क्तः।) योध-नम्। लड़ाई इति भाषा। तत्पर्य्यायः। आयो-धनम्२ जन्यम्३ प्रधनम्४ प्रविदारणम्५ स्कन्धम्६ आस्कन्दनम्७ संख्यम्८ समीकम्९ साम्प-रायिकम्१० समरम्११ अनीकम्१२ रण१३ कलह१४ विग्रह१५ संप्रहार१६ अभिसम्पात१७ कलि१८ संस्फोट१९ संयुग२० अभ्यामर्द२१ समाघात२२ संग्राम२३ अभ्यागम२४ आहव२५ समु-दाय२६ संयत्२७ समिति२८ आजि२९ समित्३० युत्३१। इत्यमरः। २।८।१०३-१०६॥ संराव३२ आगाह३३ सम्परायक३४ विदार३५ दारणम्३६ संवित्३७ सम्पराय३८। इति शब्दरत्नावली॥ तीक्ष्णम्३९ अमरीषम्४० बलनम्४१ आनर्त्त४२ अभि-मर४३ समुदय४४। इति जटाधरः॥ *॥ युद्धे वर्ज्जनीयानि यथा। चर्म्म१ वर्म्म२ बलम्३ चरः४ धूलिः५ तूर्य्यस्वनः६ सिंहनादः७ ध्वजभङ्गम्८ रक्तनदी९ छिन्नच्छत्रम्१० रथ११ चामर१२ हस्ती१३ अश्व१४ केतु१५ विदीर्णकुम्भकरिकुम्भमुक्ता१६ व्यूहरचनावस्थितसेना१७ सुरपुष्पवृष्टि१८। इति कविकल्पलता॥ *॥ अथ युद्धफलम्।

'अग्निहोत्रादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः।
न तत् फलमवाप्नोति संग्रामे यदवाप्नुयात्॥
इति यज्ञविदः प्राहुर्यज्ञकर्म्मविशारदाः।
तस्मात्तत्ते प्रवक्ष्यामि यत् फलं शस्त्रजीविनाम्॥"

युद्धे मरणफलं यथा,—

"धर्म्मलाभोऽर्थलाभश्च यशोलाभस्तथैव च।
यः शूरो वध्यते युद्धे विन्दन् परवाहिनीम्॥
यस्य धर्म्मार्थकामौ च यज्ञश्चैव सदक्षिणः।
परं ह्यभिमुखे हत्वा तयोः पन्थामधिरोहति॥
विष्णोः स्थानमवाप्नोति एवं युध्यन् रणाजिरे।
अश्वमेधानवाप्नोति चतुरस्रेण कर्म्मणा॥
यस्तु शस्त्रं समुत्सृज्य वीर्य्यवान् वाहिनीमुखे।
सम्मुखो वर्त्तते शूरः स स्वर्गान्न निवर्त्तते॥
राजा वा राजपुत्रो वा सेनापतिरथापि वा।
हतः शत्रोश्च यः शूरस्तस्य लोकोऽक्षयो ध्रुवः॥
यावन्ति तस्य गात्राणि भिन्दन्ति शस्त्रमाहवे।
तावता लभते लोकान् सर्व्वकामदुहोऽक्षयान्॥
वीरासनं वीरशय्या वीरस्थानस्थितिः स्थिरा।
गवार्थे ब्राह्मणस्यार्थे गोब्राह्मार्थे च ये हताः।
ते गच्छन्त्यमरस्थानं ये स्युः सुव्रतिनस्तथा॥
अभयो यः परं सैन्यं भयञ्च परिरक्षति।
इष्टस्थितः पालयति सोऽपि गच्छति तत्पतिम्॥
अनुत्तीर्णस्तथा सद्यः प्राणान् यस्त्यजते युधि।
हतश्च स्वपते युद्धे स स्वर्गान्न निवर्त्तते॥

दृष्टिभिः शस्त्रिभिर्व्वापि तथा स्त्रीभिश्च तस्करैः।
स्वाम्यर्थे ये हता राजंस्तेषां स्वर्गो न संशयः॥
शस्त्राग्निना सुनिर्दग्धः स्वयुद्धे च च्युतो यदि।
संग्रामान्निर्व्रियते राजंस्तस्य स्वर्गो न संशयः॥
भयेन लज्जया वापि स्नेहेन च रणाजिरे।
सम्मुखो म्रियते राजंस्तदा स्वर्गो न संशयः॥
यस्तु भिन्नीकृतं गात्रं शरशक्त्यृष्टितोमरैः।
देवकन्यास्तु तं वीरं रामयन्ति रमन्ति च॥
वराप्सरःसहस्राणि शूरमायोधने हतम्।
त्वरितान्यभिधावन्ति मम भर्त्ता भवेति च॥
यत्र तत्र हतः शूरः शत्रुभिः परिवेष्टितः।
अक्षयान् लभते लोकान् यदि क्लीवं न भाषते॥
जितेन लभ्यते लक्ष्मीर्मृतेनापि सुराङ्गनाः।
क्षणविध्वंसिनि काये का चिन्ता मरणे रणे॥
हतस्याभिमुखस्यास्य ये लोका न निवर्त्तिनः।
हते गोब्राह्मविप्रार्थे नरमेधफलं हि तत्॥
स्त्रीबालवृद्धाजनगोग्रहे च
राज्ञो विपत्तौ द्विजसार्थघाते।
स्त्रीबालवृद्धाजनगोग्रहे च
शस्त्रं सुनीतामपि धारणीयम्॥
यां यज्ञसंवेशप्रसवा च विप्राः
स्वर्गैषिणो यत्र न वै प्रयान्ति।
क्षयेण तामेव गतिं प्रयान्ति
महाहवे स्वां तनुं संत्यजन्तः॥
सर्व्वांश्च वेदान् सुमहद्भिरङ्गैः
सांख्यञ्च योगञ्च वने विवासम्।
हते युधा एकयदे प्रविष्टा
महाहवे स्वां तनुं संत्यजेद्यः॥
इमां गिरं वेदविदः शुभाक्षरां
सुभाषितां शक्रभिदा दिवौकसाम्।
चर्म्मसुखे यः स्मरते ह्यसंस्तुतिं-
र्न हन्यते हन्ति च सोऽपि वैरिणः॥

सदा पुण्यतमः स्वर्ग्यः सुयज्ञः सर्व्वतो सुखः।
सर्व्वेषामेव वर्णानां क्षत्रियस्य विशेषतः॥
भूयश्चैव तु वक्ष्यामि रणधर्म्मं सनातनम्।
याहग्राय प्रवर्त्तव्यं याहग्रं परिवर्जयेत्॥
आततायिनमायान्तमपि वेदान्तगं द्विजम्।
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्॥
कोदण्डशस्त्रपाणिन्तु प्रहरन्तं द्विजं यदि।
हन्यात्तमासुरं भावं हत्वा न ब्रह्महा भवेत्॥
ब्रह्महा जायते येन हतेनात्मं शृणुष्व मे।
वत्सःसंवेश्य नृपश्रेष्ठ! कायपक्षे सनातने।
विरथं विगतं वर्म्मं विवर्म्मं विसुखस्थितम्।
युद्धोत्साहहतं हत्वा ब्रह्महा जायते नरः॥
विशस्त्रं विधनुष्कञ्च तं भीतोऽस्मीतिवादिनम्।
वर्णशाखायुतांस्तांस्तु हत्वा स ब्रह्महा भवेत्॥
अन्याहतो न हन्तव्यो बालो वृद्धो नपुंसकः।
तवाहं प्रवदन्मूढशस्त्रतृक्षतोऽथ भीरवः॥
तस्मादेतान् परिहरेत्कूरो धर्म्मभृतां वरः।
सम्यग्यज्ञफलम्प्रेप्सुर्हत्वासौ ब्रह्महा भवेत्॥
शस्त्रवन्तिह सत्क्षेत्रे यज्ञैः क्रतुशतैर्नृपाः।
आत्मदेहपरित्यागः कर्त्तुं युद्धे सुदुष्करः॥

ब्रह्महा युध्यतेऽगुद्धो देहं त्यक्ता रणाजिरे।
न शुद्धो रणभयानां ऋते क्षत्रिम्महापथात्॥
संग्रामे युध्यतो लक्ष्मीः कीर्तिः स्यात् स्वर्गतिस्तथा।
भग्नस्य तेऽपि नश्यन्ति महासत्त्वाम्महारणात्॥
तस्मात् सत्त्वेन यत्किञ्चिन् क्रियते तच्छुभप्रदम्।
यज्ञं दानं व्रतं वापि संग्रामे नृपसत्तम!॥"
इत्यादौ वह्निपुराणे संग्रामप्रशंसा॥*॥

अथ युद्धनिर्णयः।
"यत्रायुद्धे ध्रुवं नाशो युद्धे जीवितसंशयः।
तं कालमेकं युद्धस्य प्रवदन्ति मनीषिणः॥
आत्मोदये विपक्षीयात् चोभो नात्मबले यदि।
व्यसने च प्रहर्त्तव्यं अन्यौ न तु विपर्य्यये॥
स्वयं राज्ञा न योद्धव्यं येऽपि युद्धाद्विकोविदाः।
हता युद्धेषु दृश्यन्ते ग्रक्तेभ्यः शक्तिमत्तराः।
रथयुद्धं समे देशे विषमे हस्तिसङ्करः।
अश्वयुद्धं मरौ देशे पत्तियुद्धञ्च दुर्गमे॥
अन्वये सर्व्वयुद्धं स्यान्नौकायुद्धं जलप्लुते।
संहत्य योधयेदन्यान् कामं विस्तारयेद्बहून्।
स्वल्पोसुखमनीकं स्यादल्पं हि बहुभिः सह।
अपि पञ्चाशतः शूरान् निघ्नन्ति परवाहिनीम्।
येऽपि वा पञ्चषट्सप्तसहिताः कृतनिश्चयाः॥"

अथ युद्धासननिर्णयः।
"अन्यद्वारा विपक्षस्तु विग्रहासनमुच्यते।
अरिं विग्रह्य वा स्थानं विग्रहासनमुच्यते॥
अरेश्च विजिगीषोश्च विग्रहे हीयमानयोः।
सन्धाय यदवस्थानं सन्धायासनमुच्यते॥
उदासीने मध्यमे वा समाने प्रतिगृह्य वा।
एकीभूय अवस्थानं सम्भूयासनमुच्यते॥
सर्व्वेषां प्रीतिजननं निजराष्ट्रस्य लक्षणम्।
एतत् प्रीत्यासनं नाम सर्व्वासनमहत्तरम्॥"

अथ द्वन्द्वयुक्तिः।
"राज्ञो बलं नहि बलं द्वन्द्वमेव बलं बलम्।
अप्यल्पबलवान् राजा स्थिरो द्वन्द्वबलाद्भवेत्॥"
तथा च।
"एकः शूरो योधयति प्राकारस्थो धनुर्द्धरः।
शूरं दशसहस्राणि तस्माद्दुर्गं विधीयते॥
अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत्।
यद्दैवसुचितं द्वन्द्वं गिरिनद्यादिसंश्रयम्।
अकृत्रिममियं ज्ञेयं दुर्लक्ष्यमरिभूभुजाम्॥
प्राकारपरिखारण्यसंश्रयं यद्भवेदिह।
कृत्रिमं नाम विज्ञेयं लक्ष्यालक्ष्यन्तु वैरिणाम्॥"

अथाकृत्रिमद्वन्द्वयुक्तिः।
"अत्युच्चविस्तीर्णशिरा दुरारोहः सकाननः।
सजलाशयसम्भारभोज्यद्रव्यसमाश्रयः॥
सुखनिःसरणो द्वन्द्वः पर्व्वताख्यो महीभुजाम्।
नद्यो गभीरविस्तीर्णाश्चतुर्दिक्षु व्यवस्थिताः॥
तन्मध्ये भूप्रदेशो यो नदीद्वन्द्वः स उच्यते।
यद्यत्यचिरकालीनं दुर्लक्ष्यविपिनादिकम्।
तन्मध्यरचिता भूमिर्द्वन्द्वत्वेनोपतिष्ठते।
वनद्वन्द्वमिति ख्यातं यथापूर्व्वं महत्तरम्॥"

कृत्रिमद्वन्द्वयुक्तिर्यथा,—
"यस्मिन्नार्य्ये गिरिर्नास्ति नद्यो वा गहनोदकाः।
तस्य मध्ये महीपालः क्षत्रियं द्वन्द्वमारभेत्॥
गजैरलङ्घ्या विस्तीर्णा गम्भीराः पूर्णवारयः।
द्वन्द्वेन समादिष्टाः परिखा बहुयादवः॥
विशालशालं सुधनं बहुकण्टकि सङ्कटम्।
द्वन्द्वेन समादिष्टं विस्तीर्णं विषमं वनम्॥
अधोऽधो वध्यमानोऽपि कन्दरोऽत्यजलं स्मवन्।
द्वन्द्वेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम्॥
सर्व्वतः परिखां कृत्वा निम्नोपरि कन्दरम्।
तच्छन्नमृत्तदेशञ्चाप्यजलद्वन्द्वं तदुच्यते॥
एषामभावे निम्नस्य भूप्रदेशस्य बन्धना।
वर्षास्वपगते वारि जलद्वन्द्वं ततो भवेत्॥
एतयोरपि संमिश्रात् संमिश्रं द्वन्द्वमाचरेत्।
आश्रित्य क्षत्रियं द्वन्द्वं बलवद्वैरिणो दिशि॥
अन्यत्र कृत्रिमं द्वन्द्वं कृत्वा नरपतिर्विशेत्।
रथपतिर्यदा वैरी स्थलद्वन्द्वं तदाचरेत्॥
गजाश्वनाथवैरी जलद्वन्द्वं तदाचरेत्।
गिरिद्वन्द्वं नृपः सेवेत् यस्य स्याद्विविधो रिपुः॥
सर्व्वं हि त्रिविधं युद्धं समासाद्युपादिश्यते।
प्रतिराजस्य राज्यान्तं प्रकटे गुप्त एव च॥
राज्यान्ते सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम्।
गुप्ते स्त्रीकोषसम्भारं संरक्षेदिति निश्चयः॥"

अथ सामान्यतो गुणाः। तथा हि नीतिशास्त्रम्।
"सम्प्रवेशापसरणं द्वन्द्वसत्तममुच्यते।
अन्यत्र वन्दिग्राहेव न ताद्दगबहुमाश्रयेत्॥
धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च।
मनुष्यद्वन्द्वसंसर्गं वनद्वन्द्वञ्च तानि षट्॥"

अन्ये तु।
"न द्वन्द्वं द्वन्द्वमित्याहुर्योद्वृद्वन्द्वं प्रकीर्त्तितम्।
योद्वृभूयं हि यद्युद्धं स्तकायसमं हि तत्॥"

अथान्यत्रापि।
"यावत्प्रमाणं नगरं हि राज्ञां
ततो भवेदुत्तममध्यमान्त्यम्।
त्रिंशद्धनुर्लक्षगुणोत्तरेण
त्रिदेशजानां धरणीपतीनाम्॥"

गर्गस्तु।
"यदन्यद्विविधं द्वन्द्वं प्रोच्यते धरणीभुजाम्।
तेभ्य एवातिरिच्येत मन्त्रद्वन्द्वं विशेषतः॥
अन्येषु देवाद्विज्ञेषु मन्त्रद्वन्द्वान्यवेक्षते नृपः।
मन्त्रद्वन्द्वे हि भिन्ने हि न चान्यत् कार्य्यकारकम्॥
यदेव वैरिदुर्लङ्घं विस्तीर्णं विषमञ्च तत्।
सम्प्रवेशापसरणं तद्युद्धसत्तमं विदुः॥"

इति युक्तिकल्पतरुः॥

तद्दैदिकपर्य्यायः। रणः १ विवाक् २ विखादः३ नदनुः ४ भरे ५ आक्रन्दे ६ आहवे ७ आजौ ८ एतनाप्यम् ९ अभीके १० समीके ११ समत्यम् १२ नेमधिता १३ सङ्गः १४ समितिः१५ समनम्१६ मीळ्हे १७ एतनाः १८ स्मृधः १९ स्मधः २० एतसु २१ समतसु २२ समर्य्ये २३ समरणे २४ समोहे २५ समिधे २६ सङ्गे २७ सङ्गे २८ संयुगे २९ सङ्गथे ३० सङ्गमे ३१ तूत्रतूर्य्ये ३२ एत्ये ३३ आजौ ३४ शूरसातौ ३५ वाजसातौ ३६ समनीके ३७ खले ३८ खजे ३९ पौंस्ये ४० महाधने ४१ वाजे ४२ अजम ४३ सद्म ४४ संयत् ४५ संवतः ४६। इति षट्चत्वारिंशत् संग्रामनामानि। इति वैद्यनिघण्टौ २। १७॥

युद्धरङ्गः, पुं, (युद्धे रङ्गो रागोऽस्य।) कार्त्तिकेयः। इति शब्दचन्द्रिका॥ (युद्धस्य रङ्गः। युद्धस्थलम्। यथा, महाभारते। ७। ६५। १८।
"अन्योऽन्यं जघ्निरे क्रुद्धाः युद्धरङ्गगता नराः॥")

युद्धसारः, पुं, (युद्धस्य सारः।) घोटकः। इति शब्दचन्द्रिका॥

युध, य औ ङ युद्धे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-हनने सक०-अनिट्।) य ङ, युध्यते। औ, योद्धा।
संसक्तस्वितयोर्द्वयोः सांग्रामिकरीत्या परस्पराभिवेच्छा युद्धम्। युध्यते योधः कदाचिदेकस्य सह भावविवक्षायां युध्यते योधः परेण। कदाचिद्धननेऽपि युध्यते चौरं राजा हन्तीत्यर्थः। यो भक्तपिण्डस्य कृते न युध्येदिति असाङ्गावे क्विपि तमिच्छतीति क्ये तं करोतीति कष्टादिभ्यात् क्ये वा साध्यम्। इति दुर्गादासः॥

युधानः, पुं, (युध्यतेऽसौ। युध्+"युधिबुधिदृक्षिभ्यः किच्च।" उणा० २। ६०। इति आनच्। च च कित्।) क्षत्रियः। इत्युणादिकोषः॥ (रिपुः। इत्युज्ज्वलदत्तः॥)

युधिकः, त्रि, योद्धा। युधशब्दात् स्त्रियकप्रत्ययेन निष्पन्नः॥

युधिष्ठिरः, पुं, (युधि संग्रामे स्थिरः। "गवियुधिभ्यां स्थिरः।" ८। ३। ९५। इति षत्वम्। "हलदन्तात् सप्तम्याः संज्ञायाम्।" ६। ३। ९। इति सप्तम्या अलुक्।) पाण्डवराजः। स कुन्तीगर्भे धर्म्मोजातः। तत्पर्य्यायः। अजातशत्रुः २ शुक्लारिः ३ धर्म्मपुत्रः ४ अजमीढः ५। इति हेमचन्द्रः। ३। ३०१॥ (जगन्नाथाभिधानः पाण्डुर्निरपत्यतया खिन्नचित्तः पुत्रार्थमेकदा धर्म्मपत्नीं कुन्तीमुवाच। सुचिस्मिते! अनपत्यो हि न शुभलोकाँस्ते इति विचिन्त्य त्वं मदुपकारार्थं केनापि पुत्रमुत्पादयेति। एवमुक्ता कुन्ती दृष्ट्वा च पाण्डुराज्यहातिशयं धार्म्मिकपुत्रलाभाय दुर्व्वासः प्रदत्तमन्त्रबलेन धर्म्ममाकृष्य तेन सङ्गता युधिष्ठिरं पुत्रमलभत। यदुक्तं महाभारते।१। १२३। ५—८।
'संयुक्ता सा हि धर्म्मेण योगमूर्त्तिधरेण ह।
जेमे पुत्रं वारारोहा सर्व्वप्राणभृतां हितम्॥
ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽहनि।
दिवा मध्यगते सूर्य्ये तिथौ पूर्णेऽतिपूजिते॥
सन्नद्धयशसं कुन्ती सुषाव प्रवरं सुतम्।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी।
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः॥
विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति।

युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः ।" अथ गच्छति काले धृतराष्ट्रेण यौवराज्ये स्थापितोऽयं दयादाक्षिण्यादिगुणपरम्परया प्रजासु लब्धकीर्तिरनुजैः सह सुखमवास । अथ जतुगृहदाहानन्तरं लब्धराज्यो द्रुपदराज्यमभिगम्य द्रौपदीं सानुजः परिणीय पुनः स्वराज्यमागतवान् । ततः लब्धसहायो राजसूययज्ञकरणाय दुर्जयान् जरासन्धप्रभृतिनृपतीन् हत्वा राजसूयेष्टिं समापयामास । ततोऽक्षपराजयप्रदुर्योधनमतानुसारिणा कैतवपटुना शकुनिना सह द्यूतं कृत्वा पराजितोऽनुजैर्भीमादिभिः भार्य्या द्रौपद्या च सहितो द्वादशवर्षं वनवासाय एकवर्षमज्ञातवासाय च प्रस्थितो द्वैतवनमध्युवास । ततो द्वादशवर्षवनवासजातं महत् कष्टमनुभूय अज्ञातवासार्थं त्रयोदशवर्षे विराटनगरमधिवसन् पुनः लब्धसहायः स्वराज्यप्राप्त्यर्थं महतीं चेष्टां कृतवान् । कृतेऽपि यत्ने यदा विनयद्वयो दुर्योधनो राज्यादिकं न दत्तवान् तदा लब्धसैन्यवलोऽसौ कुरुक्षेत्रे महत् युद्धं कृत्वा विनाश्य च दुर्योधनादीन् हस्तिनाधिपतिः सम्राट् बभूव । अथाश्वमेधादिना सुरगणान् परितोष्य षट्त्रिंशद्वर्षं राज्यसुखमनुभूतवान् । ततः प्रभासे विप्रशापात् यदुवंशक्षयमाकर्ण्यातिनिर्विण्णः षट्त्रिंशद्वर्षवयस्कं अर्জ্জুनपौत्रं परीक्षितं स्वराज्येऽभिषिच्य उत्तरामार्गेण स्वर्गारोहणं कृतवानिति । तथाच देवीभागवते । २ । ८ । १५-१७ ।

"देहत्यागं हरेः श्रुत्वा यादवानां क्षयं तथा ।
गमनाय मतिं चक्रे राजा हैमाचलं प्रति ॥
षट्त्रिंशद्वार्षिकं राज्ये स्थापयित्वोत्तरासुतम् ।
निर्जगाम वनं राजा द्रौपद्या भ्रातृभिः सह ॥
षट्त्रिंशद्वत्सरे वर्षाधिक्ये कृत्वा राज्यं गजाह्वये ।
गत्वा हिमाचले षट् ते जहुः प्राणान् पृथासुताः ॥"

अस्याख्यानं शैलविवरणञ्च महाभारतादौ विस्तरशो द्रष्टव्यम् ।)

युधेयः, त्रि, योद्धा । युधधातोरीयप्रत्ययेन निष्पन्नः ॥

युप्राः, पुं, (युध्यते इति युध्यते येनेति वा । युध् + "इषियुधीन्धिदसिश्राधृक्षिभ्यो मक् ।" उणा० १।१४३। इति मक् ।) संग्रामः । धनुः । इति मेदिनी ॥ वाजः । इत्युणादिकोषः ॥ योद्धा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, ऋग्वेदे । १ । ५५ । ५ ।

"स इद्भवति समिथानि मज्मना
शूरो यृत्सु यौषसा तनेभ्यः ॥"

"युधः योद्धा ।" इति तद्भाष्ये सायणः ॥ शैवसंग्रामः । शरभः । इति संक्षिप्तसारोणादिवृत्तिः ॥

युप, य इर् विमोहे । इति कविकल्पद्रुमः ॥ (दिवा०-परः०-सकः-सेट् ।) विमोह आकुलीकरणम् । य, युप्यति । इर्, अयुपत् अयोपीत् । युष्मदित्वात् ङ इत्यन्ये । इति दुर्गादासः ॥

युयुक्खरः, पुं (युनैन्दितः युक् योजनास्य । तादृग्; खरो यस्य ।) क्षुद्रधान्यः । इति शब्दचन्द्रिका ॥

युयुधानः, पुं, (युध्यतेऽसौ । युध + "सृधिधृधिभ्यां कानच् ।" उणा० २ । ६२ । इत्यानच् कित्कार्य्यं सन्वत्कार्य्यञ्च ।) सात्यकिः । यथा,—

"शैनेयस्तु शिनेर्नप्ता युयुधानश्च सात्यकिः ॥"
इति त्रिकाण्डशेषः ॥

इन्द्रः । क्षत्रियः । इति संक्षिप्तसारोणादिवृत्तिः ॥ त्रि, योद्धा च ॥

युवकः, पुं, युवा । युवन् शब्दात् कन् प्रत्ययेन निष्पन्नः ॥

युवगल्भः, पुं, (यूनां गल्भ आश्रयत्वेनास्त्यस्य । युवगल्भ + अर्शआद्यच् ।) यूनो गल्भश्चाश्रयविशेषः । वयसुपोढ़ा इति भाषा । यथा,—

"युवगल्भो यवगल्भः स्यात् वयस्योढाङ्गये दयम् ।"
इति शब्दरत्नावली ॥

युवजानिः, पुं, (युवतिर्जाया यस्येति । "भाययाजिङ् ।" ५।४।१३४। इति जिङ् ।) युवतीपतिः । यथा,

"युवजानिर्धनुष्याञ्जिर्भूमिष्ठः खविचारिणः ।
रामो यज्ञहनो हन्ति कालकल्पग्निलीमुखः ॥"
इति भट्टिः । ५ । १३ ॥

युवतिः, स्त्रि, (युवन् + "यूनस्तिः ।" ४ । १ । ७७। इति तिः ।) प्राप्तयौवना । (यथा, अभिज्ञानशाकुन्तले ४ अङ्के ।

"गुरुषु कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥")

युवती, स्त्री, (युवन् + अण् + ङीप् । इति सिद्धान्तकौमुदी । ४ । १ । ७७ । ङादिति ङीप् । इत्युज्ज्वलदत्तः । १ । १५६ ।) प्राप्तयौवना । यथा, हरिवंशे भविष्यपर्व्वणि भविष्यतायाम् । ७५ । ४ ।

"यो यं चिन्तयति यानि स तस्यायत्तं
यस्मादतः सुभगयेव गता युवत्यः ॥")

तस्याः पर्य्यायः । युवतिः २ यूनी ३ तरुणी ४ तलुनी ५ किशोरी ६ धनिका ७ धनीका ८ मध्यमा ९ डहरजा: १० मध्यमिका ११ । इति शब्दरत्नावली ॥ ईश्वरी १२ वर्या १३ । इति हेमचन्द्रः । १ । ५११ ॥ वयस्या १४ । इति राजनिर्घण्टः ॥ तस्या लक्षणादि यथा,—

"आषोड़शाद्भवेद्बाला तरुणी त्रिंशता मता ।
पञ्चपञ्चाशतः प्रौढ़ा वृद्धा भवति तत्परम् ॥"
इति कालिदासः ॥

"बाला तु प्राग्वदा प्रोक्ता युवती प्राग्यकारिणी ।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥
निदाघप्ररोहोद्भेदा प्रौढ़ा वर्षावसन्तयोः ।
हेमन्ते शिशिरे योग्या न वृद्धा कापि शस्यते ॥"
योग्या युवती । इति राजवल्लभः ॥ स्त्रीसामान्यम् । यथा । प्रमदा चेति विज्ञेया युवतिश्च तथा स्मृतेति भागुरिः । प्राग्यौवना युवतिरिति वात्स्यायनः । इत्यमरटीकायां भरतः । २ । ६ । ८ ॥* हरिद्रा । इति शब्दचन्द्रिका ॥

युवतीष्टा, स्त्री, (युवतीनामिष्टा ।) स्वर्णयूथिका । इति राजनिर्घण्टः ॥

युवनाश्वः, पुं, सूर्य्यवंशीयराजविशेषः । स च गौरीगर्भे प्रसेनजितो जातः मान्धातृपिता च । यथा,—

"तस्याः प्रसेनजिज्जज्ञे तेभे भार्य्या पतिव्रता ।
गौरी नामाभिजग्मा सा नदीभूता तरङ्गिणी ।
तस्यां प्रसेनजिज्जज्ञे युवनाश्वं महीपतिम् ॥
यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति ।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥"
इति वह्निपुराणे सगरोपाख्यानाध्यायः ॥

युवनाश्वजः, पुं, (युवनाश्वात् जातः । जन् + डः ।) मान्धातृराजः । इति हेमचन्द्रः । १ । ४६४ ।

युवराजः, पुं, भाविनृपतिविशेषः । तत्पर्य्यायः । मैत्रेयः २ अजितः ३ । इति त्रिकाण्डशेषः ॥ राजपुत्रः । तत्पर्य्यायः । कुमारः २ भर्तृदारकः ३ । इत्यमरः । १ । ७ । १२ ॥ युवा चासौ राजा यूना वा राजा युवराजः । सप्तम्याः राज इति षः । कुमारयति कुमारः । स्वार्थे कुमार कुमाल तु क केलौ अण् । भर्तुर्दारकः पुत्रः भर्त्रा चासौ दारकश्चेति वा भर्तृदारकः । दारको भेदके शिशावितिनिगमः । इति भरतः ॥ (यथा, महाभारते । १ । ७३ । १६ ।

"मयि जायेत यः पुत्रः स भवेत्त्वदनन्तरम् ।
युवराजो महाराज ! सत्यमेतद्ब्रवीमि ते ॥")

युवा, [न्] त्रि, (यौतीति । यु + "कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः ।" उणा० १ । १५६ । इति कनिन् ।) तरुणः । (यथा, मनौ । २ । १२० ।

"जीर्णं प्राज्ञा श्रुतक्रामन्ति यून: स्थविर
आयति ।
प्रत्युत्थानाभिवादार्हा पुनस्तान् प्रतिपद्यते ॥")

श्रेष्ठः । निसर्गबलशाली । इति मेदिनी । ने, ९१३॥

युवा, [न्] पुं, (यौतीति । यु + कनिन् ।) यौवनावस्थाविशिष्टः । षोड़शवर्षात् त्रिंशद्वर्षपर्य्यन्तवयस्कः । इति कैचित् । षोड़शवर्षात् सप्ततिवर्षपर्य्यन्तवयस्कः । यथा,—

"आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्धः स्यात् सप्ततेरूर्द्धं वर्षीयान् नवतेः परम् ॥"
इति भरतधृतस्मृतिः ॥

("आषोड़शाद्भवेद्बालः पञ्चत्रिंशत् युवा नरः ।"
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥)

तत्पर्य्यायः । वयस्यः २ तरुणः ३ । इत्यमरः । २।६।४२ ॥ वयःस्थः ४ तलुनः ५ । इति शब्दरत्नावली ॥ गर्भरूपः ६ वेटकः ७ । इति जटाधरः ॥

युष, भजने । इति कविकल्पद्रुमः ॥ सौत्रधातुरयम् । (परः०-सकः०-सेट् ।) योषित् युष्मद् । इति दुर्गादासः ॥

युष्मद्, (योषति भजतीति । युष् + "युष्मस्मिभ्यां मदिक् ।" उणा० १ । १३८ । इति मदिक् ।)

सर्व्वनामयुग्मच्छब्दः। तस्य त्रिषु लिङ्गेषु सप्तमि रूपाणि। (एकविंशतिविभक्तिषु तस्य रूपाणि।) यथा। त्वम् १ युवाम् २ यूयम् ३। त्वाम् ४ युवाम् ५ युष्मान् ६। त्वया ७ युवाभ्याम् ८ युष्माभिः ९। तुभ्यम् १० युवाभ्याम् ११ युष्मभ्यम् १२। त्वत्१३ युवाभ्याम् १४ युष्मत्१५। तव १६ युवयोः १७ युष्माकम् १८। त्वयि १९ युवयोः २० युष्मासु २१। (द्वितीयाचतुर्थी-षष्ठीनामेकवचनद्विवचनबहुवचनविभक्तिषु तस्य रूपान्तराणि यथा। द्वितीयैकवचने त्वा। चतुर्थीषष्ठ्योरेकवचने ते। आर्षा द्विवचने वाम्। आर्षा बहुवचने वः। श्लोकपादे वाक्यादौ च-वा-हा-ह-एव-शब्दयोगे अदर्शनायदृश्यर्थ-धातुयोगे च न स्युः।) इति व्याकरणम्। यथा,—

"युष्मत्तुल्यते खञ्जनगञ्जनाक्षि!
शिरो मदीयं यदि याति यातु।
नीतानि नाशं जनकात्मजार्थं
दशाननेनापि दशाननानि।"

इति मुक्तिवादे गदाधरः।)

यूः, स्त्री, यूषः। इति हेमचन्द्रः। ३। ६८।

यूकः, पुं, (यौतीति। यु+"अजिवृधुनीभ्यो दीर्घश्च।" उणा० ३। ४०। इति कन् दीर्घश्च।) मत्कुणः। इति जटाधरः। (यथा, सुश्रुते उत्तरस्थाने ३१ अध्याये।

"यूका जलाटमयान्ति वलिं नाश्नन्ति वायसाः।
येषां वापि रतिर्नास्ति यातारस्ते यमालयम्।")

यूका, स्त्री, (यूक+स्त्रियां टाप्।) मत्कुणः। यूकी इति उड्डीश इति च भाषा। तत्पर्य्यायः। केशकीटः २ खेदजः ३ षट्पदः ४। इति राजनिर्घण्टः। यूकी ५ बालजन्मिः ६। इति जटाधरः ७ (यथा, मनौ। २। ४५।

"स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम्।
उष्णञ्चोपजायन्ते यच्चान्यत् किञ्चिदीदृशम्।"

क्रिमिविशेषः। तद्यथा,—

"नामतो विंशतिविधा बाह्याश्चैव मलोद्भवाः।
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः।
बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः।
द्विधा ते कोठपिड़काः कण्डूगात्रं प्रकुर्व्वते।"

इति माधवकरसंग्रहीतरक्तविनिश्चये क्रिम्यधिकारे।

"क्रिमयो द्विविधाः प्रोक्ता बाह्याभ्यन्तरसम्भवाः।
बाह्या यूकाः प्रविज्ञाः स्युः किंचुलूकास्तथान्तराः।
सप्तधा हि भवेद्बाह्याः बहुधा चान्तःसमुद्भवाः।
तेषां वक्ष्यामि संभूतिं बाह्यानाभ्यन्तरे वृथाम्।
रूक्षादति बलात् खेदाधिक्यतया श्लोचनादपि।
कफधातुसमुद्भूतास्तीक्ष्णा यूका भवन्ति हि।
यूकाः सप्ताः पराः श्वेतास्तृतीयास्तत्रमैत्रिकाः।
सूक्ष्मातिविकटा रूक्षाश्चर्म्माभाश्चर्म्मयूकिकाः।
चतुर्थी विन्दुकी नाम वस्तुजा मूत्रसम्भवा।
मत्कुणाद्याश्च पञ्चम्यो वाह्योपद्रवकारिणः।
यूका मस्तकसंस्थाने श्वेता वस्त्रनिवासिनी।
चर्म्मयूका नेत्रचर्म्मे कृष्णा रोमणि यष्टिका।"

इति हारीते चिकित्सितस्थाने पञ्चमेऽध्याये।

यूकानाशकौषधं यथा, कामरत्ने।

"विड्वङ्गगन्धोत्पलकल्कयोगात्
गोमूत्रसिद्धं कटुतैलमेतत्।
अभ्यङ्गयोगेन शिरोरुहाणां
यूकादिकीटाप्रचयं निहन्ति।

गोमूत्रेण बलामूलक्षेपो यूकानिवारकः।
पारदं मर्द्दयेन्निष्कत्रयमधुस्तूरजद्रवैः।
नागवल्लीद्रवैर्व्वाथ वस्त्रखण्डं प्रलेपयेत्।
तद्दग्धं वेष्टयेन्मौलौ धार्य्यं यामत्रयं तथा।
यूका पतन्ति निःशेषास्तत्क्षणान्नात्र संशयः।
द्विनिशागतनवनीतेन क्षेपान्मौलौ प्रकल्पयेत्।
नीलोत्पलं तिलं यद्वि सर्व्वपं नागकेशरम्।
धात्रीफलं समं पिष्ट्वा क्षेपो यूकाविनाशनः।
निशागन्धकगोमूत्रं विड्वङ्गकटुतैलकम्।
पारदेन समं मर्द्द्यं क्षेपो यूकानिवारकः।"

इति केशस्य यूकादिनिवारणम्।

परिमाणभेदः। यथा, मार्कण्डेये। ४६। ३०।

"परमाणुः परं सूक्ष्मं त्रसरेणुस्त्रिभेदजः।
बालाग्रस्तेऽष्टभिर्लिक्षा यूका तास्तैश्च यवोदरम्।")

यूतिः, स्त्री, (यु+"क्तियूतिजूतिसातिहेतिकीर्त्तयश्च।" ३।३।९७। इति क्तिन् निपातनाद्दीर्घश्च।) मिश्रणम्। इति सुगन्धबोधव्याकरणम्। (यथा, भट्टिकाव्ये। ७। ६६।

"करोमि वो वर्हिर्यूतीन् पिबध्वं पाणिभिर्द्रुतैः।")

यूथं, क्ली, (यु मिश्रणे+"तिथपृष्ठगूथयूथप्रोथाः।" उणा० २। १२। इति थक्प्रत्ययेन निपातितम्।) सजातीयसमूहः। इत्यमरः। २। ५। ४१। (यथा, रामायणे। २। ५४। ४१।

"तत्र कृष्णरयूथानि मृगयूथानि चैव हि।
विचरन्ति वनान्तेषु तानि द्रक्ष्यसि राघव!।")

यूथनाथः, पुं, (यूथस्य नाथः।) वन्यकरिणां समूहस्य ईश्वरः। तत्पर्य्यायः। यूथपः २। इत्यमरः। २। ८। ३५।

यूथपः, पुं, (यूथं पातीति। पा+कः।) अरण्यहस्तिनां प्रधानम्। इति शब्दरत्नावली। (यथा, श्रीमद्भागवते। ६। १५। २८।

"घोरमादाय परशुं सतूर्णं वर्म्मकार्मुकम्।
अन्वधावत दुर्म्मर्षो मृगेन्द्र इव यूथपम्।"

प्रधानमात्रे च। यथा, महाभारते। १। १८५।

"राजा पाण्डुर्महारण्ये मृगयामनिषेविते।
चरन् मैथुनधर्म्मेण ददर्शे मृगयूथपम्।")

यूथभ्रष्टः, पुं, (यूथादभ्रष्टश्चलितः।) यूथात् पलायितहस्ती। इति शब्दमाला। (यूथभ्रष्टमात्रे, त्रि। यथा, श्रीमद्भागवते। ३। २८। ४६।

"यदा गोपवधूभेताङ्गायन्त्या चरतो वने।
आसीत् संक्षिप्तहृदया यूथभ्रष्टा मृगी यथा।")

यूथिका, स्त्री, (यूथं पुष्पवृन्दमस्या अस्तीति। यूथ+ठन्। टाप्।) पाठा। इति राजनिर्घण्टः। अम्लानकः। इति मेदिनी। के, १४४। पुष्पविशेषः। युँइ फुल इति भाषा। (यथा, मेघदूते। १। २८।

"विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्चन्
उद्यानानां नवजलकणैर्यूथिकाजालकानि।")

तत्पर्य्यायः। गन्धिका २ अम्लष्ठा ३ मागधी ४। सा पीता चेत् हेमपुष्पिका। इत्यमरः। २। ४। ७१। यूथी५ प्रहसन्ती६। इति चिकाङ्शेषः। ग्रन्थिकिनी ७ वासन्ती ८। इति रत्नमाला। वासपुष्पिका ९ बहुगन्धा १० भृङ्गानन्दा ११। अस्या गुणाः। खादुत्वम्। ग्रन्थिरत्वम्। ग्रहैरार्त्तिपित्तदाहव्रणानाशत्वग्दोषनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"यूथीयुगं हिमं तिक्तं कटुपाकं सरं लघु।
मधुरं तुवरं रूक्षं पित्तश्लेष्मकफव्रणम्।
व्रणास्यसुखदन्तार्त्तिग्रन्थिरोगविषापहम्।"

इति भावप्रकाशः।

(तथा च सुश्रुते उत्तरतन्त्रे ४५ अध्यायः।

"पटोलग्रन्थिसुनिषण्णयूथिका
वटातिमुक्ताङ्कुरमिक्षुवारजम्।")

यूथी, स्त्री, (यूथ+अर्शआद्यच्। ततो ङीष्।) यूथिका। इति शब्दरत्नावली॥

यूथीनः, पुं, (यूथं पातीति। यूथ+खः।) यूथपः। इति शब्दचन्द्रिका॥

यूनिः, स्त्री, योगम्। मिश्रणम्। इति सिद्धान्तकौमुदी॥

यूनी, स्त्री, (युवन्+ङीष्। "न्यूनमधोनामसहिते।" ६। ४। १३३। इति वस्य उत्वम्।) युवती। इति शब्दरत्नावली। (यथा,—

"यूनी कामयते हृदयं वैधव्यभावाद्वधूः।")

इति कवीपि न्यूनमधोनामसहिते कुलचन्द्रः।)

यूपः, पुं क्ली, (यौति मिश्रयतीति। यूयते युज्यतेऽस्मिन्निति व्युत्पत्त्या सायणः। १। ५१। १४। यद्वा, यु+"कुयुर्भ्यां च।" उणा० ३। २०। इति पः दीर्घश्च।) यज्ञे पशुबन्धनकाष्ठम्। इत्यमरः। २। ४। ४१। तस्य परिमाणादिर्यथा। सुश्रुतौ।

"चतुर्हस्तो भवेद्यूपो यज्ञदक्षसमुद्भवः।
वर्त्तुलः श्लक्ष्णसंस्थानः सूक्ष्मः कर्त्तव्य एव च॥"

भविष्ये।

"विल्वस्य वकुलस्यैव कदम्बस्य पलाशस्य यूपः प्रशस्यते।"

इति सामवेदिब्रह्मोत्तरखण्डे तत्त्वम्।

यूपः, पुं, (यु+पः। दीर्घश्च।) जयस्तम्भः। यज्ञस्तम्भः। इत्युणादिकोषः॥ (यथा, रघुवंशे। ४। ३८।

"संग्रामनिर्व्विष्टसहस्रबाहु-
रुदादशद्भिर्दशनैरिवोग्रैः।
अनन्यसाधारणराजशब्दो
बभूव योगी किल कार्त्तवीर्य्यः॥")

यूपकटकः, पुं, (यूपस्य कटक इव।) यज्ञसमाप्तिसूचकं पशुबन्धार्थं यज्ञभूमौ यत् काष्ठमारोप्यते स यूपः तस्य शिरसि वलयाकृतिर्दर्भमयकाञ्चनवा यः काष्ठविकारः सः। यूपमूले निहितलोहवलय इति केचित्। इति भरतः॥ तत्पर्य्यायः। चषालः २। इत्यमरः।२।७।१८॥

यूपकर्ष्यः, पुं, (यूपस्य कर्ष्य इव।) यूपैकदेशः। तत्पर्य्यायः। स्रुवावनिः २। इति हेमचन्द्रः। ३। ४८६॥

यूपदः, पुं, (यूपाय दः।) खदिरवृक्षः। इति त्रिकाण्डशेषः॥

यूपदमः, पुं, (यूपाय दमः।) खदिरवृक्षः। इति शब्दरत्नावली। रक्तखदिरः। इति राजनिर्घण्टः॥

यूपवत्सः पुं, (यूपो वत्सस्य उपवेशनार्थमस्य।) यष्टी। इति शब्दमाला॥

यूपाय्यं, क्ली, (यूपस्यायम्।) यूपस्यायभागः। तत्पर्य्यायः। तर्म्म २। इत्यमरः। २। ७। १६॥

यूष, वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वहस्तरी। यूषति। इति दुर्गादासः॥

यूषं, पुं, क्ली, (यूष्+कः।) सूपादिकाथरसः। इत्यमरः। ३। ५। ३५॥ यूषोऽन्नःस्यादिः। यवगोधूमिदीत्यादिना सकारः। इति भरतः॥ *॥

अथ सूपयूषगुणाः।

"सूपयूषोऽग्निदो हृद्यः शुद्धानां ब्रह्मिनामपि। मण्डो बलाग्निपित्तघ्नो ज्वरहा च लघूद्गतः॥ अरुक्षेष्वलवणं सर्व्वमेतत् कटुकैर्विना। विज्ञेयं लवणक्षेद्रकटुकैः संस्कृतं हितम्॥ स तु दाड़िमभद्रौकायुक्तः स्याद्रागषाड़वः। रुचिकृल्लघुपाकश्च दोषाणामविरोधकृत्॥"*॥

मसूरयूषगुणाः।

"मसूरयूषः संग्राही हृद्यो स्वादुः प्रमेहजित्। पित्तश्लेष्मज्वरहरस्तथातीसारनाशनः॥"*॥

कुलत्थयूषगुणाः।

"कुलत्थयूषोऽनिलहृद् अर्करास्नरिनाशनः। तूबीप्रतूबीकासार्शोगुल्मभेदःकफापहः॥"*॥

अन्येन सह माषयूषगुणाः।

"अक्षमाषो गुरुर्भेदी वातघ्नो दीपनो मतः॥"

अथ खड़यूषः।

"तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रकैः। सुपक्वं खड़यूषोऽयमयं कामलिकोऽपरः॥"*॥

खड़कामलिकयूषगुणाः।

"दध्यम्लो जवक्षेहतिलमाषविपाचितः। खड़कामलिकौ यूषौ श्लेष्मवातकफापहौ॥"

इति राजवल्लभः॥ *॥

अपि च। अथ यूषस्य विधिर्गुणाश्च।

"अरादग्गुणे मौरे शुभौधान्यद्रुतो रसः। विरलान्नो घनः किञ्चित् पेयातो यूष उच्यते। उक्तः स एव निर्यूहो रुचिकृच्च विशेषतः॥"

यूषस्य प्रकारान्तरमाह।

"कल्कद्रयपलं शुण्ठीं पिप्पलीञ्चार्द्धकार्षिकीम्। वारिप्रस्थेन विपचेत्तद्भवो यूष उच्यते॥"

अयमर्थः। यूषान्नं पलमितं तत् कल्कीकृतं शुण्ठी पिप्पली च समुदितार्द्धकर्षमिता कल्कीकृता उभयमपि प्रस्थमितेन वारिणा पचेत्। तद्भवो यवः।

"यूषो वल्यो लघुः पाके रुच्यः कण्ठ्यः कफापहः॥"

अथ सूपयूषविधिः। वृन्दटीकायां तन्त्रान्तरे।

"सूपान्नं द्विपलं तोये प्रस्थमर्द्धावशेषिते। यादस्यं मर्द्दितं पूतं दाड़िमस्य पलेन तत्॥ युक्तं सैन्धवविश्वाम्लधान्यकैः पादकांशिकैः। कणाजीरकयोश्चूर्णाच्छाणैकेनावचूर्णितम्। संस्कृतो सूपयूषोऽयं पित्तश्लेष्महरो मतः॥"*॥

अथ सूपयूषगुणाः।

"सूपान्नामलकी यूषो दीपनः शीतलो लघुः। त्रयोदोषज्वरश्वासदाहकफपित्तज्वरापहृत्॥"*॥

अथ सूपामलकयूषगुणाः।

"सूपामलकयूषस्तु मेदी पित्तानिलापहः। हृद्दाहभ्रमनः शीतो मूर्च्छाश्रमममदापहः॥"

मसूरयूषगुणाः पूर्ब्बवत्। इति भावप्रकाशः॥ (तथा च।

"कुलत्थयूषो मधुरः कषायः
कफं सपित्तं विनिहन्ति शीघ्रम्।
मेहाश्मरी पायुजमेदहन्ता
सन्दीपनो मूत्रविशोधनश्च॥
आढ्यवयूषं मधुरञ्च शीतं
विशेषतो वातनिवारणञ्च।
श्लेष्मापहं पित्तहरं नराणां
कृमिं निहन्यादपि दारुणञ्च॥

शीतलं मधुरं मौद्गं यूषं पित्तविकारजित्। वातदोषहरं प्रोक्तं ज्वरार्त्तानां श्रमनं परम्॥ माषजो गुरुको यूषो दृंही स्वादुः प्रमेहजित्।

पित्तश्लेष्मज्वरघ्नः स्यात्तथातीसारनाशनः॥ कषायः कटुकश्चोष्णं वातघ्नं पुंस्त्वदीपनम्। रक्तपित्तं निहन्त्याशु नराणां यूषसुच्यते॥ घनं सवातं कफजञ्चाधयं स पित्तजित्। अम्लं पर्य्युषितं तच्च ग्रस्यते तैलपाचने॥ अन्यानि चैव ग्रस्तानि कौलत्थ्यान्युषितानि च। मसूराखिपुटा वल्याः कषायाद्याश्च वाय्वताः॥"

इति यूषविधिः॥ *॥

इति हारीते प्रथमस्थाने नवमेऽध्याये॥

"श्रेयः पथ्यतमश्चापि सूपयूषः कृताकृतः। स तु दाड़िमभद्रौकायुक्तः स्याद्रागषाड़वः॥"

"पटोलनिम्बयूषौ तु कफमेदोविशोषिणौ। पित्तघ्नौ दीपनौ हृद्यौ कृमिकुष्ठज्वरापहौ॥ श्वासकासप्रतिश्याय प्रसेकारोचकज्वरान्। हन्ति मूलकयूषस्तु कफमेदोगलामयान्॥ कुलत्थयूषोऽनिलहृद् आमवातनिनाशनः। तूबी प्रतूबी कासार्शोगुल्मोदावर्त्तनाशनः॥ दाड़िमामलकैर्यूषो हृद्यः संग्रहनो लघुः। प्राणाग्निजननोष्णश्च मेदोघ्नः पित्तवातजित्॥ सूपामलकयूषस्तु ग्राही पित्तकफे हितः।

यवकोलकुलत्थानां यूषः कण्ठ्योऽनिलापहः॥"

इति सुश्रुते सूत्रस्थाने ४५ अध्यायः॥)

यूषः, पुं, (यूषतीति। यूष्+कः।) ब्रह्मदारुवृक्षः। इति शब्दरत्नावली॥

येष, ऋ ङ यत्ने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) अन्तःस्थादिः। ऋ, अयियेषत्। ङ, येषते अयियेषे। इति दुर्गादासः॥

योक्त्र, [ऋ] क्ली, योगकर्म्म। इति उणादिकोषः कर्म्मणि ष्ट्रनप्रत्ययेन निष्पन्नम्। (यथा, वाजसनेयसंहितायाम्। ३०। १४।

"मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्त्रं शोकायाभिसर्त्तारम्॥"

"योक्त्रं योगकर्म्मारम्।" इति तद्भाष्यम्॥)

योक्त्रं, क्ली, (युज्यतेऽनेनेति। युज्+"हलश्चेति।" ३। ३। १२१। इति ष्ट्रन्।) युगेन सह ईषादण्ड आबध्यते अनेन तत्। योत् दडि इति भाषा। तत्पर्य्यायः। आबन्धः२ योत्रम् ३। इत्यमरः। २। ८। १३॥ (यथा, ऋग्वेदे। ५। ३३। २।

"सत्यं न इन्द्र धियमानो अर्कैर्हरीणां वृषभ योक्त्रमश्रेः॥"

"योक्त्रं नियोजनरज्जुं अश्रः आश्रयसि।" इति तद्भाष्ये सायणः॥ मन्थनरज्जुः। यथा, रामायणे। १। ४५। १८।

"ततो निश्चित्य मथनं योक्त्रं कृत्वा च वासुकिम्।
मन्थानं मन्दरं कृत्वा मथ्नन्तुरमितौजसः॥")

योगः, पुं, (युज समाधौ+भावादौ यथायथं घञ्।) सन्नहनः। उपायः। ध्यानम्। सङ्गतिः। युक्तिः। इत्यमरः। ३। ३। २२॥ (प्रेम। यथा, देवीभागवते। ३। १५। १३।

"स्त्रीयान् गुणान् प्रवितनान् प्रवदंस्तदासौ
तां प्रेमदामनुचकार च योगयुक्तः॥"

"योगयुक्तः प्रेमयुक्तः।" इति तट्टीकायां नीलकण्ठः॥ छलम्। इति मनुः। ८। २१५॥ अस्य प्रमाणं योगदानशब्दे द्रष्टव्यम्॥) अपूर्व्वार्थसम्प्राप्तिः। वपुःस्थैर्य्यम्। प्रयोगः। विष्कम्भादिः। भेषजम्। विश्वघातकः। द्रव्यम्। कार्म्मणम्। इति मेदिनी॥ नैयायिकः। धनम्। इति हेमचन्द्रः॥ चारः। सूत्रम्। इति त्रिकाण्डशेषः॥ *॥ (येन वाक्यं युज्यते स योगः। यथा,—

"तैलं पिबेच्चाष्टगवञ्चिनिम्ब-
हिंसाभयाश्वृक्षकपिप्पलीभिः।
सिद्धं बलाभ्याञ्च सदेवदारु
हिताय नित्यं गजगण्डरोगी॥

सिद्धं पिबेदिति प्रथमं वक्तव्ये द्वितीयपदे सिद्धं प्रयुक्तमेवं दूरस्थानामपि पदानामेकीकरणं योगः।" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥) अथ सप्तविंशतियोगानां नामानि। यथा,—

"विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभन-
स्तथा।
अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च ॥
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा।
वज्रसाध्यक् व्यतीपातो वरीयान् परिघः शिवः।
सिद्धः साध्यः शुभः शुक्लो ब्रह्मेन्द्रो वैधृतिस्तथा॥"

तेषां वर्ज्यनीयभागा यथा,—

"परिघस्य त्यजेदर्द्धं शुभकर्म्म तत: परम्।
त्यजादौ पञ्च विष्कम्भे सप्त शूले च नाड़िका: ॥
गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः।
वैधृतिव्यतिपातौ च समस्तौ परिवर्जयेत्॥
शेषा यथार्थनामानो योगाः कार्य्येषु शोभनाः॥"

अथ विष्कम्भादियोगानयनक्रमः।

"रवीन्दुयोगसिप्राप्यो योगा भभोगभाजिताः।
गतगम्याश्च षष्टिघ्ना नाड्यो सूक्ष्मास्तदोद्भवाः॥"

इति सूर्य्यसिद्धान्तः॥

विष्कम्भादिसप्तविंशतिसङ्ख्यककालविशेषः। तत्-साधनमाह।

"यद्दक्कलाः सरवीन्दुकलाहताः
खखगनैश्च भयोगमितौ क्रमात्।
अथ कृता खगतैर्व्यवलिप्तिका
निजजवेन गतागत नाड़िकाः॥"

इति भास्करीयसिद्धान्तशिरोमण्यौगणितिकाध्यायः॥ * ॥ यस्य यद्दस्य नक्षत्रं ज्ञातुमिष्यते तस्य कलाः कार्य्याः। तथा चन्द्रार्कयोर्योगस्य कलाः कार्य्याः। उभयत्र गतादर्केण हृते प्रथमस्थाने गतभानि। द्वितीयस्थाने गत-योगाः। अथ यान्यवशिष्टानि गतानि खख-हारच्युतानि गम्यानि स्युः तेषां गतानां सम-न्वियो विकलाः खखगतिभिर्भाज्याः। यल्लभ्यते ता गतनाड़िका भवन्ति। यद्वेष्याणां विकला भक्तास्तदेष्या घटिका भवन्ति। इति मिता-क्षरायान्नौ तत्तत्टीका॥ आनन्दयोगो यथा। भौमपराक्रमे।

"अश्विनी सह सूर्य्येण सोमे मृगशिरस्तथा।
अर्केज्या भौमवारेण बुधे हस्तः प्रकीर्त्तितः॥
अनुराधा गुरोर्वारे विश्वदेवस्तु भार्गवे।
वारेण शनिसंयुक्तमानन्दोऽयं प्रकीर्त्तितः॥"

योगवरा यथा। दीपिकायाम्।

"भूमिपुत्रार्कयोरर्क्षे नन्दा मरु-
द्वारुणार्द्रान्त्यचित्राश्विभूक्षाग्निभिः।
भार्गवेज्याङ्कयोरर्क्षे भद्रा
भवेत् फल्गुयुग्मोडुसंयुता॥
सोमपुत्रस्य वारे जया स्यान्मृगो-
पेन्द्रगुर्व्विन्द्रयाम्याभिजिद्भानिभिः।
गोष्यतेरर्क्षे रिक्ता च युक्ता यदा
विश्वभृक्रमियुक्पित्र्यादित्यर्क्षभिः॥
सूर्य्यसुतस्य दिने यदि पूर्णा
ब्रह्मादिनाधिपतिभविषे: स्यात्।
योगवरास्त्रिभिरेव समेताः
सर्व्वसमीहितसिद्धिनियुक्ताः॥"

अयमेव त्रान्तयोगः॥*॥ अथान्तयोगः।

"ध्रुवगुरुकरमूलापौष्णभान्यर्कवारे
हरियुगविधियुग्मे फल्गुनौ भाद्रयुग्मे।
दिवसकरतुरङ्गौ सर्व्वरीनाथवारे
गुरुयुगनलवातोपान्त्यपौष्णानि कौजे
दहनविधिभतास्यामैत्रभं सौम्यवारे
मरुददितिभपुष्यामैत्रभं जीववारे।
भगयुगजयुगघ्नो विष्णुमैत्रे सिताहे
त्वसनकमलयोनौ सौरिवारेऽन्तभानि॥
यदि विषियतीपातौ दिनं वाप्यशुभं भवेत्।
हन्यतेऽन्तयोगेन भास्करेण तमो यथा॥
सर्व्वदेशाविरोधेन फलं स्वाच्छुभयोगजम्।
अन्तं सिद्धियोगश्च यत्रैकस्मिन् दिने भवेत्।
तद्दिनन्तु भवेद्दुष्टं मधुसर्पिर्यथा विषम्॥"*॥

अथ सिद्धिदग्धपापयमघण्टयोगाः। यथा,—

"नन्दाद्याः सिद्धियोगा भृगुजबुधकुजार्कौण्य-
वारैः प्रशस्ताः।
सूर्य्येणाग्न्याग्निषड्दृङ्मुनिमिततिथयोऽर्कादि-
वारैः प्रदग्धाः॥"

राजमार्त्तण्डे।

"मासा रुद्रादित्यो रामा षट्पञ्चसुनयस्तथा।
दस्रान्ते तिथयः सप्त रव्यादिसप्तभिर्यद्दैः॥"

अपि च।

"द्वादश्यर्कयुता भवेद्दशभद्रा सोमेन चैकादशी
भौमे चापि युता तथैव दशमी नेष्टा तृतीया
बुधे।
षष्ठी नैऋतफलप्रदा सुरगुरौ शुक्रे द्वितीया तथा।
सर्व्वारम्भविनाशविघ्नजननी सूर्य्यात्मजे सप्तमी॥
पापोऽर्कांशे विशाखाचरयमसमुडुपस्थाङ्गि
चित्राश्चतुष्कं
तोयं विश्वाभिजिद्धं त्वथ कुजदिवसे स्वत्रयं
विश्वरुद्रौ।
ज्ञार्के मूला विशाखा यमधनतुरगान्यानि जैवे-
ऽङ्घ्रि मित्रं
रोहिण्यार्द्रा यमेन्दूद्गतभमथ भृगोरङ्घ्रि पुष्या-
श्लयेन्द्रौ॥
सौराहे हस्तयुग्माश्वियमभजयुक्पौष्णपुष्या-
धनानि
षष्ठोऽखर्क्षयुक्ते खरहपतिदिने सौम्यवारे
ऽर्यमापि॥"*॥

अथोत्पाटादियोगाः।

"रव्यादिदिवसेर्युक्ता विशाखादिचतुष्टयम्।
उत्पाटा मृत्यवः काणा अन्तानि यथा-
क्रमम्॥"

अथ करकचयोगः।

"वाजिचित्रोत्तराषाढ़ा मूलपाशैष्यभान्तकाः।
सूर्य्यादिवारसंयुक्ता योगाः करकचाः स्मृताः॥"

अथ मृत्युयोगः।

"आदित्यभौमयोर्नन्दा भद्रा शुक्रगुरुक्षयोः।
बुधे जया गुरौ रिक्ता शनौ पूर्णा च मृत्युदा॥"

अथ यमघण्टादीनां वर्ज्यकालनिर्णयः।

"यमघण्टे त्यजेदर्द्धं मृत्यौ द्वादश नाड़िकाः।
अन्येषां पापयोगानां मध्याह्नात् परतः शुभम्॥"

अथ शुभचन्द्रेण करकचादिग्राह्यम्।

"अयोगेषु च सर्व्वेषु पूर्व्वयामं परित्यजेत्।
अयोगाश्च विनश्यन्ति चन्द्रगुद्विहता इमे॥
करकचा मृत्युयोगाश्च दिनं दग्धं तथा परे।
शुभे चन्द्रे प्रणश्यन्ति दृष्टा वज्रहता इव॥"*॥

विरुद्धयोगानां देशविशेषे प्रतिप्रसवो यथा। श्रीपतिः।

"विरुद्धसंज्ञास्तिथिवारयोगा
नक्षत्रवारप्रभवाश्च ये वै।
कूर्माङ्गवङ्गेषु खशेषु वर्ज्याः
शेषेषु देशेषु न ते विरुद्धाः॥"

इति ज्योतिस्तत्त्वम्॥ * ॥

अथ क्रियायोगः। सूनय ऊचुः।

"दुःखार्णवमयाः पुरुषाः प्राप्य ब्रह्म महालयम्।
उत्तरेणुर्भवाम्भोधिं तथा त्वमनुचिन्तय।
इत्युक्तः स तदा प्राह क्रियायोगं महात्मनाम्।
नराणां सुपकाराय दुःखविच्छित्तिकारकम्॥

वह्निरुवाच।

आराधयध्वं विश्वेशं जगतां कारणं परम्।
केशवन्तन्निरापेक्षा एवमुक्तं प्रवास्यथ॥
दत्त्वा पूजानमस्कारैः शुश्रूषाभिरहर्निशम्।
व्रतोपवासैर्विविधैर्नानायागाच्च तर्पणैः॥
तेनैवात्महितैः कामैर्यैः स्वचेतसि तुष्टिदाः।
भवेयुरपरिच्छेदादाराधयत केशवम्॥
तन्निष्ठास्तत्कृतधियस्तत्कर्म्मायत्तदाश्रयाः।
तद्दृश्यत्वज्ञनसः सर्व्वस्मिन् स इति स्थितः॥
समस्तान्यथ कर्म्माणि तत्र सर्व्वात्मनात्मनि।
संन्यस्यध्वं स च वः कर्त्ता समस्तावरजस्तथः॥
परः परार्त्ता परमः स एको
नरोत्तमो यस्य पदन्न भिन्नम्।
चराचरं विश्वमिदं समस्ता-
दचिन्त्यरूपन्तपरिग्रहं यत्॥
तमाराध्य जगन्नाथं क्रियायोगेन वाड़वाः।
अयौ मोक्षं परं जन्तुस्तस्मात्तमोचकारकम्॥
संसारार्णवमग्नानां विषयाक्रान्तचेतसाम्।
विष्णुपोतं विना नान्यत् किञ्चिदस्ति परायणम्॥
उत्तिष्ठंश्चिन्तय हरिं व्रजंश्चिन्तय केशवम्।
सुञ्जंश्चिन्तय गोविन्दं स्वपंश्चिन्तय माधवम्॥
यूयमेकाग्रचित्ता हि संश्रिता मधुसूदनम्।
जन्मन्तुजरायाहं संसारं सन्तरिष्यथ॥
क्रियायोगपरा यूयं मुक्तिकार्य्याख्यनैकधा।
समाराध्य जगन्नाथं राजानो मोक्षमाप्नुथ॥"

इति वह्निपुराणम्॥ * ॥

अथ योगसाधनम्। केशिध्वज उवाच।

"योगस्वरूपं ब्राह्मण्य! श्रूयतां गदतो मम।
यत्र स्थितो न चवते प्राप्य ब्रह्मलयं मुनिः॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धस्य विषयासङ्गि मुक्तेर्निर्विषयं तथा॥
विषयेभ्यः समाकृत्य विज्ञानात्मा मनो मुने।
चिन्तयेन्मुक्तये तेन ब्रह्मभूयं परेश्वरम्॥
आत्मभावं नयत्येवं तद्ब्रह्माध्यायिनं मुनेः।
विकार्य्यचात्मनः शक्त्या लोहमाकर्षको यथा॥

आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥
एवमन्यैर्विशिष्टैर्युक्तधर्मोपलक्षणः ।
यस्य योगः स वै योगी सुसूक्ष्मरभिधीयते ॥
योगयुक् प्रथमं योगी युञ्जानः सोऽभिधीयते ।
विनिष्पन्नसमाधिस्तु परब्रह्मोपलब्धियान् ॥
यद्यन्तरायदोषेण दुष्यते चास्य मानसम् ।
जन्मान्तरेऽभ्यसतो सुक्तिः पूर्वस्य जायते ॥
विनिष्पन्नसमाधिस्तु मुक्तिं तस्मिन्न जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्म्मा च योऽचिरात् ॥
ब्रह्मचर्य्यमहिंसां च सत्यास्तेयापरिग्रहान् ।
सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन् ॥
स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान् ।
कुर्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः ॥
एते यमाः सनियमाः पञ्च पञ्च प्रकीर्तिताः ।
विशिष्टफलदाः काम्या निष्कामानां विमुक्तिदाः ॥
एवं भद्रासनादीनां समाख्याय गुणैर्युतः ॥
यमाख्यैर्नियमाख्यैश्च युञ्जीत नियतो यतिः ॥
प्राङ्मुखमनिलं वक्त्रमभ्यासात् कुरुते तु यत् ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च ॥
परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः सद्विधानेन तृतीयः संयमात्मयोः ॥
तस्य चालम्बनवतः स्थूलरूपं द्विजोत्तम ! ।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम् ॥
ग्रन्थादिष्वनुरक्तानि नियन्त्राण्यखिलानि योगवित् ।
कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥
वश्यता परमा तेन जायतेऽतिचलात्मनाम् ।
इन्द्रियाणामवश्येषु तेषु योगी योगसाधकः ॥
प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ।
वशीकृतैस्ततः कुर्यात् स्थिरं चेतः शुभाश्रये ॥

श्रीपराशर उवाच ।

कथ्यतां मे महाभाग ! चेतसो यः शुभाश्रयः ।
यदाधारमयं तस्मिन् दोषमुन्मूलयेदृषम् ॥

श्रीमैत्रेय उवाच ।

आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वभावतः ।
भूप ! मूर्त्तममूर्त्तं च परञ्चापरमेव च ॥
त्रिविधा भावना विप्र विष्णुमेतन्निबोध मे ।
ब्रह्माख्या कर्म्मसंज्ञा च यथा चैवोभयात्मिका ॥
ब्रह्मभावात्मिका ह्येका कर्म्मभावात्मिका परा ।
उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥
सनन्दनादयो ब्रह्मभावभावनया युताः ।
कर्म्मभावनया चान्ये देवाद्याः स्थावरान्ताः ॥
हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विया ।
बोधाधिकारयुक्तेषु विद्यते भावभावना ॥
अन्येषु सनकेषु विशेषज्ञानकर्म्मसु ।
विष्णुमेतत् परं चान्यद्भेदभिन्नद्वया नृप ! ॥
प्रथमस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥
तच्च विष्णोः परं रूपमरूपस्याजमक्षरम् ।
विश्वस्वरूपवैरूप्यवर्जं परमात्मनः ॥
न तद्योगयुजा ग्राह्यं नृप ! चिन्तयितुं यतः ।
ततः स्थूलं हरेरूपं चिन्त्यं यद्विषयोचरम् ॥
हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिः ।
मरुतो वसवो रुद्रा भास्कराः साध्यका ग्रहाः ॥
गन्धर्व्वयक्षदैत्याद्याः सकला देवयोनयः ।
मनुष्याः पशवः शैलाः समुद्राः सरितो द्रुमाः ॥
भूप भूतान्यशेषाणि भूतानां ये च हेतवः ।
प्रधानादि विशेषान्तं चेतनाचेतनात्मकम् ॥
एकपादं द्विपादञ्च बहुपादमपादकम् ।
स्थूलमेतद्धरे रूपं भावनान्वितयात्मकम् ॥
एतत् सर्व्वमिदं विश्वं जगदेतच्चराचरम् ।
परं ब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम् ॥
विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्या कर्म्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्व्वगा ।
संसारतापानखिलानवाप्नोत्यतिसन्ततान् ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्व्वभूतेषु भूपाल ! तारतम्येन लक्ष्यते ॥
अप्राधान्यतु सर्व्वत्राप्या स्थावरेषु ततोऽधिका ।
सरीसृपेभ्योऽपि तेभ्योऽपि अतिशक्ता पतत्रिषु ॥
पतत्रिभ्यो मृगास्तेभ्यः सशक्ता पशवोऽधिकाः ।
पशुभ्यो मनुजाश्चातिशक्ता पुंसः प्रभाविताः ॥
एभ्योऽपि नागगन्धर्व्वा यक्षाद्या देवता नृप ! ।
शक्रः समस्तदेवेभ्यस्ततश्चापि प्रजापतिः ॥
हिरण्यगर्भोऽतिततः पुंसः शक्त्युपलक्षितः ।
एतान्यशेषरूपस्य तस्य रूपाणि पार्थिव ! ॥
यतस्तच्छक्तियोगेन युक्तानि नभसा यथा ।
द्वितीयं विष्णुसंज्ञस्य योगिभिर्ध्येयं महामते ॥
अमूर्त्तं ब्रह्मणो रूपं यत् सदित्युच्यते बुधैः ।
समस्ताः शक्तयश्चेता नृप यत्र प्रतिष्ठिताः ॥
तद्विशुद्धस्वरूपं वै रूपमन्यद्धरेर्मतम् ।
समस्तशक्तिरूपाणि तत् करोति जनेश्वर ! ॥
देवतिर्य्यङ्मनुष्यादिचेष्टावन्ति स्वलीलया ।
जगतामुपकाराय न सा कर्म्म निमित्तजा ॥
चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ।
तद्रूपं विश्वरूपस्य तस्य योगयुजो नृप ! ॥
चिन्त्यमात्मविशुद्ध्यर्थं सर्व्वकिल्बिषनाशनम् ।
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्ते स्थितो विष्णुर्योगिनां सर्व्वकिल्बिषम् ।
तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः ।
कुर्व्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥
शुभाश्रयः सचित्तस्य सर्व्वस्य तथात्मनः ।
विभावभावनातीतो मुक्तये योगिनां नृप ॥
अन्ये च पुरुषव्याघ्र ! चेतसो ये शुभाश्रयाः ।
अशुद्धास्ते समस्तास्तु देवाद्याः कर्म्मयोनयः ॥
मूर्त्तं भगवतो रूपं सर्व्वावयवसंस्थितम् ।
एषा वै धारणा ज्ञेया यत्रित्तं तत्र धार्य्यते ॥
तत्र मूर्त्ते हरेरूपे धार्य्यमाणे नराधिप ! ।
तच्छ्रयतामनाधारा धारणा नोपपद्यते ॥
प्रसन्नचारुवदनं पद्मपत्रायतेक्षणम् ।
सुकपोलं सुविन्यस्तकर्णभूषणकुण्डलम् ॥
समकर्णान्तविन्यस्तचारुकम्बुविभूषणम् ।
कम्बुयोर्वं सुविस्तीर्णश्रीवत्साङ्कितवक्षसम् ॥
बलीचिभङ्गिना मग्ननाभिना चोदरेण वै ।
प्रलम्बाष्टभुजं विष्णुमथवापि चतुर्भुजम् ॥
समस्थितोरुजङ्घञ्च सुस्थिरावूरुकराम्बुजम् ।
चिन्तयेद्ब्रह्मभूतं तं पीतनिर्म्मलवाससम् ॥
किरीटचारुकेयूरकटकादिविभूषितम् ।
शङ्खचक्रगदाखड्गचक्राद्यायुधसंयुतम् ॥
चिन्तयेत्तन्मयो योगी समाधायात्ममानसम् ।
तावद्यावद्दृढीभूता तत्रैव नृप धारणा ॥
प्रसन्नस्त्रिदशोऽन्यदा स्वेच्छया कर्म्म कुर्व्वतः ।
नापयाति तदा चित्तात् सिद्धां मन्येत तां तदा ॥
ततः शङ्खगदाचक्रशार्ङ्गाद्यस्त्रविराजितं वपुः ।
चिन्तयेद्भगवद्रूपं प्रशान्तं सार्वलक्षणकम् ॥
सा यदा धारणा तद्वदवस्थानवती ततः ।
किरीटकेयूरसुहारभूषणं रहितं स्मरेत् ॥
तदेकावयवं देवं चेतसापि पुनर्बुधः ।
कुर्य्यात्ततोऽवयविनि प्रविधानपरो भवेत् ॥
तद्रूपप्रत्ययैकैकसन्ततिश्चान्यनिस्पृहा ।
तद्ध्यानं प्रथमैरङ्गैः बहुभिर्निष्पाद्यते नृप ॥
तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा धारणिष्यातं समाधिः सोऽभिधीयते ॥
विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव ! ।
प्राप्यत्वेनैव यस्यात्मा प्रत्यूहायैवभावनः ॥
क्षेत्रज्ञः करणं ज्ञानं करणं तेन तस्य तत् ।
निष्पाद्य मुक्तिकार्य्यं वै क्षेत्रज्ञत्वं निवर्त्तते ॥
तद्भावभावमापन्नस्ततोऽसौ परमात्मना ।
भवत्यभेदो भेदश्च तस्याज्ञानक्षतो भवेत् ॥
विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥
इत्युक्तस्ते मया योगः खाडिक्य ! परिपृच्छते ।"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥ * ॥

ब्रह्मक्षतयोगो यथा ।

"सुखं योगासनं कृत्वा बभूव संपुटाञ्जलिः ।
पुलकाङ्कितसर्व्वाङ्गः सास्रनेत्रोऽतिदीनवत् ॥
इडां सुषुम्नां मेधाञ्च पिङ्गलां नलिनीं धुराम् ।
गान्धारीषट्कयोगेन निरुध्य च प्रयत्नतः ॥
मूलाधारं स्वाधिष्ठानं मणिपूरमनाहतम् ।
विशुद्धं परमाज्ञाख्यं षट्चक्रञ्च निरुध्य च ॥
लङ्घनं कारयित्वा च तं षट्चक्रं क्रमादिधीः ।
ब्रह्मरन्ध्रं समानीय वायुवह्निं चकार ह ॥
निरुध्य वायुं मेधान्तामानीय हृदयाम्बुजम् ।
तं वायुं भ्रामयित्वा च योजयामास मेधया ॥
एवं कृत्वा तु निष्पन्नो यो दत्तो हरिणा पुरा ।
जजाप परमं मन्त्रं तस्यैकाग्र्याचरम् ॥
मुहूर्त्तञ्च जपं कृत्वा ध्यायं ध्यायं पदाम्बुजम् ।
ददर्श हृदयाम्भोजे सर्व्वं तेजोमयं सुतं ॥
तत्तेजसोऽन्तरे रूपमतीवसुमनोहरम् ।
द्विभुजं सुरलीहस्तं भूषितं पीतवाससा ॥
स्मितमुल्लसदास्यस्थवल्गत्कुण्डलकुन्तलम् ।
ईषद्धासं प्रसन्नास्यं भक्तानुग्रहकातरम् ॥
नवीननलदाकारश्यामसुन्दरविग्रहम् ।
स्थितं जगत्सु सर्व्वेषु निर्लिप्तं साक्षिरूपिणम् ॥

योगः

स्वात्मारामं पूर्णकामं जगद्व्यापि जगत्परम् ।
सर्वस्वरूपं सर्वेषां बीजरूपं सनातनम् ॥
सर्वाधारं सर्ववरं सर्वशक्तिसमन्वितम् ।
सर्वाराध्यं सर्वगुरुं सर्वमङ्गलकारणम् ॥
सर्वमन्त्रस्वरूपञ्च सर्वसम्पत्करं वरम् ।
यद्दृष्टं ब्रह्मरन्ध्रे च हृदि तद्धिरेव च ।
दृष्ट्वा च परमाश्चर्यं तुष्टाव परमेश्वरम् ॥"

इति ब्रह्मवैवर्ते श्रीकृष्णखण्डे २० अध्यायः ॥*॥

अथ ध्यानयोगः । हरिरुवाच ।

"अथ योगं प्रवक्ष्यामि मुक्तिमुक्तिकरं परम् ।
ध्यायिभिः प्रीयते ध्येयो ध्यानेन हरिरीश्वरः ॥
तत् शृणुष्व महेशान ! सर्वपापविनाशनम् ।
विष्णुः सर्वेश्वरोऽनन्तो यद्भूमिपरिवर्जितः ॥
वासुदेवो जगन्नाथो ब्रह्मात्मा अहमेव तु ।
देहिदेहस्थितो नित्यः सर्वदेहविवर्जितः ॥
देहधर्मविहीनश्च चराचरविवर्जितः ।
षड्विधेषु स्थितो द्रष्टा श्रोता घ्राता त्वतीन्द्रियः ॥
तद्धर्मरहितः सदा नामगोत्रविवर्जितः ।
मन्ता मनःस्थितो देवो मनसा परिवर्जितः ॥
मनोधर्मविहीनश्च विज्ञानाद्यय एव च ।
बोद्धा बुद्धिस्थितः साक्षी सर्वबोधविवर्जितः ॥
बुद्धिधर्मविहीनश्च सर्वः सर्वगतोऽमलः ।
सर्वप्राणविनिर्मुक्तः प्राणधर्मविवर्जितः ॥
प्राणिप्राणो महाप्राणो भयेन परिवर्जितः ।
अहङ्कारादिहीनश्च तद्धर्मपरिवर्जितः ॥
तत्साक्षी तन्नियन्ता च परमानन्दरूपकः ।
जाग्रत्स्वप्नसुषुप्तिस्थस्तत्साक्षी तद्विवर्जितः ॥
तुरीयः परमो धाता ह्यरूपो गुणवर्जितः ।
सक्तो बुद्धो जनयापी सत्य आत्माऽहं शिवः ॥
एवं ये मानवा विद्वा ध्यायन्तीशपरं परम् ।
प्राप्नुयुस्ते च तद्रूपं नात्र कार्या विचारणा ॥
इति ध्यानं मया ख्यातं तव शङ्कर ! सुव्रत ! ।
पठेद्य एतत् सततं विष्णुलोकं स गच्छति ॥"

इति गारुडे १४ अध्यायः ॥

अथाष्टाङ्गयोगः ।

"मुक्तिरष्टाङ्गविज्ञानात् संक्षेपात्तद्वदे शृणु ।
यमाः पञ्च तद्विसाद्या अहिंसा प्राग्व्यहिंसनम् ॥
सत्यं भूतहितं वाक्यमस्तेयं स्वाग्रहं परम् ।
ब्रह्मचर्यं ब्रह्मचर्यं सर्वत्यागोऽपरिग्रहः ॥
नियमाः पञ्च सत्याद्या बाह्यमाभ्यन्तरं द्विधा ।
शौचं तुष्टिश्च सन्तोषस्तपश्चेन्द्रियनिग्रहः ॥
स्वाध्यायः स्वात्मजापः प्रणिधानं हरेर्यजिः ।
आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः ॥
मन्त्रध्यानयुतो गर्भो विपरीतो ह्यगर्भकः ।
अगर्भात् सगर्भस्यः प्राणायामस्तदोऽधिकः ॥
एवं द्विधा त्रिधाप्युक्तः पूरणात् पूरकः स च ।
कुम्भको निश्चलत्वात् स रेचकाद्रेचकक्रिया ॥
लघुर्दादशमात्रः स्याच्चतुर्विंशतिकः परः ।
षट्त्रिंशन्मात्रिकः श्रेष्ठः प्रत्याहारश्च रोधनम् ॥
ब्रह्मात्मचिन्ता ध्यानं स्याद्धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यदस्यानं समाधिर्ब्रह्मणः स्थितिः ॥

योगः

अहमात्मा परं ब्रह्म सत्यं ज्ञानमनन्तकम् ।
विज्ञानमानन्दो ब्रह्म सत्तत्त्वमसि केवलम् ॥
अहं ब्रह्मास्म्यहं ब्रह्म अशरीरमनिन्द्रियम् ।
अहं मनो बुद्धिमदहङ्कारादिवर्जितम् ॥
जाग्रत्स्वप्नसुषुप्त्यादिसुक्तं ज्योतिस्तदीयकम् ।
नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम् ॥
योऽसावादित्यपुरुषः सोऽसावहमखण्ड ॐ ।
इति ध्यायन् विमुच्येत ब्राह्मणो भवबन्धनात् ॥"

इति गारुडे ४८ अध्यायः ॥*॥

अपि च ।

"एतत्ते कथितं ज्ञानं योगक्षेमं निबोध मे ।
यं प्राप्य ब्रह्मणो योगी प्राप्नुयात्तानन्तां व्रजेत् ॥
प्रागात्मेवात्मना ज्ञेयो योगिनां स हि दुर्ज्ञयः ।
कुर्वीत तज्जये यत्नं तस्योपायं शृणुष्व मे ॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥
यथा पर्वतधातूनां ध्मातानां दह्यते मलम् ।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ॥
प्रथमं साधनं कुर्यात् प्राणायामस्य योगवित् ।
प्राणापानविरोधस्तु प्राणायाम उदाहृतः ॥
लघुमध्योत्तरीयास्तु प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदर्कं ! शृणुष्व मे ॥
लघुर्दादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिश्च मात्राभिरुत्तरीय उदाहृतः ॥
निमेषोन्मेषणे मात्रा ताली लघ्वक्षरो मतः ।
प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः ॥
प्रथमेन जयेत् स्वेदं मध्यमेन तु वेपथुम् ।
विषादं हि ह्युत्तमेन जयेद्योगानुक्रमात् ॥
स्पन्दन्ते सैकमात्रासु सिंहशार्दूलभल्लुकाः ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः ॥
वश्यं मत्तं यथेच्छातो नागं नयति हस्तिपः ।
तथैव योगी स्वच्छन्दं प्राणं नयति साधितम् ॥
यथा हि साधितः सिंहो मृगान् हन्ति न मानुषान् ।
तद्वन्निरुद्धः पवनः किल्बिषं न कृतां तनुम् ॥
तस्मादुक्तः सदा योगी प्राणायामपरो भवेत् ।
श्रूयतां मुक्तिफलदं तस्यादस्याचतुष्टयम् ॥
ध्वस्तिः प्राग्निगदा संधित् प्रसादश्च महीपते ।
स्वरूपं शृणु वै तेषां कथ्यमानमनुक्रमात् ॥
कर्मभ्यामिहदुष्टानां जायते फलसंक्षयः ।
चेतसो विकषायत्वं यत्र सा ध्वस्तिरुच्यते ॥
ऐहिकामुष्मिकान् कामान् लोभमोहात्मकांश्च यान् ।
निरुध्यास्ते सदा योगी प्राग्निः सा सार्वकालिकी ॥
अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ।
विजानात्यौन्द्रियैर्यत्तैर्योगाभ्यासे सदा ॥
तुल्यप्रभावस्तु यदा योगी प्राप्नोति संविदम् ।
तदा संविदिति ख्याता प्राणायामस्य सा स्थितिः ॥
याति प्रसादं येनास्य मनः प्रश्च च वायवः ।

योगः

इन्द्रियाण्यौन्द्रियार्थाश्च स प्रसाद इति स्मृतः ।
शृणुष्व च महीपाल ! प्राणायामस्य लक्षणम् ॥
युञ्जतश्च यथायोगं यादृग्विहितमासनम् ।
पद्ममर्द्धासनं वापि तथा स्वस्तिकमासनम् ।
आस्थाय योगी युञ्जीत कृत्वा च प्रणवं हृदि ॥
समः समासनो भूत्वा संछृत्य चरणावुभौ ।
संवृतास्यस्तथा चोरू सम्यग्विन्यस्य वाग्यतः ॥
पार्ष्णिभ्यां लिङ्गवृषणावनुगृह्य प्रयत्नतः स्थितः ।
किञ्चिदुन्नामितशिरा दन्तैर्दन्तान्न संस्पृशेत् ॥
संपश्यन्नासिकाग्रं स्वं दिशश्चानवलोकयन् ।
रजसा तमसो वृत्तिं सत्त्वेन रजसस्तथा ।
संस्थाप्य निर्मले सत्त्वे स्थितो युञ्जीत योगवित् ॥
इन्द्रियाण्यौन्द्रियार्थेभ्यः प्राणादीन् मन एव च ।
नियम्य समवायेन प्रत्याहारमुपक्रमेत् ॥
यस्तु प्रत्याहरेत् कामान् कूर्मोऽङ्गानीव सर्वशः ।
स तत्परतिरेकस्थः पश्यन्नात्मानमात्मनि ॥
सबाह्याभ्यन्तरं शौचं निष्पादयेत्कृतनाभितः ।
पूरयित्वा बुधो देहं प्रत्याहारमुपक्रमेत् ॥
प्राणायामा दश द्वौ च धारणा साभिधीयते ।
द्विधारणा स्मृतो योगो योगिभिस्तत्त्वदर्शिभिः ॥
तथा वै योगयुक्तस्य योगिनो नियतात्मनः ।
सर्वे दोषाः प्रणश्यन्ति स्वस्थश्चैवोपजायते ॥
वीक्षते च परं ब्रह्म प्राप्नुतांश्च गुणान् पृथक् ।
योगादिपरमाणूंश्च तथात्मानमकल्मषम् ॥
इत्थं योगी जिताहारः प्राणायामपरायणः ।
जितं जितं शनैर्भूमिमारोहेत यथा गृहम् ॥
दोषान् व्याधिं तथा मोहमाक्रान्ता भूरनिर्जिता ।
विवर्धयति नारोहेत्तस्माद्भूमिमनिर्जिताम् ॥
प्राणानामुपसंरोधात् प्राणायाम इति स्मृतः ।
धारणेत्युच्यते चेयं धार्यते यन्मनोऽनया ॥
शब्दादिभ्यः प्रहृत्यानि यदर्थानि जितात्मभिः ।
प्रत्याह्रियन्ते योगेन प्रत्याहारस्ततः स्मृतः ॥
उपायश्चात्र कथितो योगिभिः परमर्षिभिः ।
येन व्याध्यादयो दोषा न जायन्ते हि योगिनः ॥
यथा तोयार्थिनस्तोयं यत्नतोऽन्विह्यभूमेः ।
आपिबेयुस्तथा वायुं पिबेद्योगी जितश्रमः ॥
प्राणाभ्यां हृदये वाथ हृतीये च तयोरपि ।
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्धसु ॥
किञ्चित्तस्मात् परस्मिंश्च धारणा परमा स्मृता ।
दृष्टेता धारणाः प्राप्य प्राप्नोत्यक्षरसाम्यताम् ॥
नाभ्यातः क्षुधितः श्रान्तो न च व्याकुललोचनः ।
युञ्जीत योगं राजेन्द्र ! योगी सिद्ध्यर्थमात्मनः ॥
नातिशीते न चैवोष्णे इन्धे नाम्बुगतालके ।
कालेष्वेतेषु युञ्जीत न योगं ध्यानतत्परः ॥
सप्तन्द्रोपजलाभ्यासे जीर्णे गोष्ठे चतुष्पथे ।
शुष्कपर्णचये नद्यां श्मशाने ससरीसृपे ॥
सभये कूपतीरे वा चैत्यवल्मीकसञ्चये ।
देशेष्वेतेषु तत्त्वज्ञो योगाभ्यासं विवर्जयेत् ॥
सत्त्वस्थानुपसृष्टौ च देशकालविवर्जिते ।
नास्तो दर्शनं योगे तस्मात्तं परिवर्जयेत् ॥
दोषानेतान्दहत्याशु ह्यग्निवद्योगसेवितः ।

विज्ञाय तस्य ये दोषा जायन्ते तान्निबोध मे ।
बाधिर्यं जड़तालोपः स्मृतेर्नाशस्तथा ।
ज्वरश्च जायते सद्यस्तद्दृष्टज्ञानयोगिनः ॥
प्रमादाद्योगिनो दोषा यदेते स्युश्चिकित्सितम् ।
तेषां नाशाय कर्त्तव्यं योगिनां तं निबोध मे ।
स्निग्धां यवागूमश्नीयात् सुक्ता तत्रैव धारयेत् ।
वातगुल्मप्रशान्त्यर्थं गुदावर्त्ते ततो दधि ॥
यवागूर्वापि पवने वायुग्रस्तौषधैः परिषिञ्चेत् ।
तद्वत् कर्म्म महाश्लेष्मं स्थिरं मनसि धारयेत् ।
विघाते वचसो वापि बाधिर्य्ये श्रवणेन्द्रिये ।
तत्रैवान्नपानं ध्यायेत्तृप्तात्तो रसनेन्द्रिये ॥
यस्मिन् यस्मिन् कृता देहे तस्मिंस्तदुपकारिणीम् ।
धारयेद्धारणासुखे प्रीतां प्रीते विदाहिनीम् ॥
कीलं शिरसि संस्थाप्य काष्ठं काष्ठेन ताड़येत् ।
सुप्रस्रुते: स्रुतिः सद्यो योगिनस्तेन जायते ॥
द्यावापृथिव्यौ वायुर्वा व्यापिनावनुधारयेत् ।
अमानुषात् वत्सजातादाधास्यितिचिकित्सितम् ॥
अमानुषं वत्समन्तर्योगिनं प्रविशेत् यदि ।
वायुग्निधारणा चैवं देहसंस्थं विनिर्दिशेत् ।
इदं सर्व्वात्मना कार्य्या रक्षा योगविदा नृप ! ।
धर्म्मार्थकाममोक्षाणां शरीरं साधनं यतः ।
प्रवृत्तिलक्षणा ख्याता योगिनो विसयात्तथा ।
विज्ञानं विजयं याहि तस्माद्गोप्याः प्रवृत्तयः ॥
अलौल्यमारोग्यमनिष्ठुरत्वं
गन्धः शुभो मूत्रपुरीषमल्पम् ।
कान्तिः प्रसादः स्वरसौम्यता च
योगप्रवृत्तेः प्रथमं हि चिह्नम् ॥
अनुरागं जनो याति परोक्षे गुणकीर्त्तनम् ।
न बिभर्त्ति च सत्त्वानि चिह्नैलक्षणमुत्तमम् ।
श्रोत्रोद्घादिभिरक्षुद्यैर्यस्य बाधा न जायते ।
न भीतिमेति चान्येभ्यस्तस्य सिद्धिरुपस्थिता ॥"
इति मार्कण्डेयपुराणे योगचिकित्सानाम ३६ अध्यायः ॥ (तथा च ।

ईश्वर उवाच ।

"मय्येकचित्तता योग इति पूर्व्वं निरूपितम् ।
साधनान्यधुना तस्य प्रवक्ष्यान्यधुना शृणु ॥
यमाश्च नियमास्त्रावदासनान्यपि षण्मुख ! ।
प्राणायामस्ततः प्रोक्तः प्रत्याहारश्च धारणा ॥
ध्यानं तथा समाधिश्च योगाङ्गानि प्रचक्षते ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यापरिग्रहौ ॥
यमाः संक्षेपतः प्रोक्ता नियमाः शृणु पुत्रक ! ।
तपः स्वाध्यायसन्तोषः शौचमीश्वरपूजनम् ॥
नियमाः कथिता तत्त्व ! योगसिद्धिप्रदायिनः ।
सर्व्वेषामेव भूतानामक्लेशजननं हि यत् ॥
अहिंसा कथिता सद्भिर्योगसिद्धिप्रदायिनी ।
यथार्थकथनं सत्यमस्तेयमधुना शृणु ॥
शौर्य्येण वा बलेनापि परस्वहरणं च यत् ।
स्तेयमित्युच्यते सद्भिरस्तेयं तस्य वर्ज्जनम् ॥
सर्व्वत्र मैथुनत्यागो ब्रह्मचर्य्यमिहोच्यते ।
द्रव्याणामप्यनादानमापद्यपि यथेच्छया ॥
अपरिग्रह इत्युक्तो योगसिद्धैस्तु साधनम् ।
चान्द्रायणादिना यत्तु शरीरस्य च शोषणम् ॥
तत्तपः कथितं पुत्र ! साधायमधुना शृणु ।
प्रणवः श्रुतरुद्रीयं तथाथर्वशिरःशिखा ॥
एतेषां यो जपः पुत्र ! स्वाध्याय इति कीर्त्तितः ।
यदृच्छालाभसन्तुष्टः सन्तोष इति पठ्यते ॥
बाह्ये चाभ्यन्तरे चापि शुद्धिः शौचं विधीयते ।
स्तुतिस्मरणपूजाभिर्वाङ्मनः कायकर्म्मभिः ॥
मयि भक्तिर्दृढ़ा पुत्र एतदीश्वरपूजनम् ।
यमाश्च नियमाः प्रोक्ताः संक्षेपान्न तु विस्तरात् ।
यमेषु नियमेषुक्तो योगी मोक्षाय संस्तुतः ।
स्थिरवुद्धिरसंमूढ़ः पूर्व्वमासनमभ्यसेत् ॥
पद्मकं स्वस्तिकं पीठं सैंहं कौकुटकौञ्चरम् ।
कौर्म्मं वज्रासनं चैव वैयाघ्रं चार्द्धचन्द्रकम् ॥
दण्डं तार्क्ष्यासनं शूलं खड्गं सुस्थिरमेव च ।
मकरं त्रिपथं काष्ठं स्थाणुर्वा हस्तिकर्णिकम् ।
भीमं वीरासनं चापि वाराहं नन्दवैणिकम् ।
कौशं पाशालिकं चापि सर्व्वतोभद्रमेव च ।
इत्येतान्यासनान्यत्र सप्तविंशतिसंख्या ॥
योगसंसिद्धिहेतोस्तु कथितानि तवानघ ! ॥
एषामेकतरं बद्धा गुरुभक्तिपरायणः ।
इन्द्रातीतो जयेत्प्राणानभ्यासक्रमयोगतः ॥
अन्तश्चरार्णां वायूनां बाह्याभ्यरोधनम् ।
प्राणायाम इति प्रोक्तो द्विविधः स च कथ्यते ॥
अगर्भश्च सगर्भश्च तयोराद्योऽजयः स्मृतः ।
द्वितीयः सजयः प्रोक्तो ध्रुवं चाधृतिमाद्भिः ॥
रेचकः पूरकश्चैव पूरकः कुम्भकस्तथा ।
एवं चतुर्विधो भेदः प्राणायामेऽत्र सूरिभिः ॥
अक्षणां नाड़यः प्रोक्ता गमागमजयाश्रयाः ।
रेचनाद्रेचकः प्रोक्तः पूरकस्तु यथोदितः ॥
पूरकः पूरणाद्वायोरुन्निरोधाच्च कुम्भकः ।
देहिनो दक्षिणे भागे पिङ्गला नाड़िका स्मृता ॥
पितृयोनिरिति ख्याता भागुस्तस्याधिदैवतम् ।
इत्यिंतरगा वा च इड़ा वा नाड़िका स्मृता ।
देवयोनिरिति ख्याता चन्द्रस्तस्याधिदैवतम् ।
एतयोरुभयोर्मध्ये सुषुम्ना नाम विश्रुता ।
पद्मसूत्रनिभा नाड़ी कार्य्याख्या ब्रह्मदैवतम् ।
ततः शून्यं निरालम्बं मध्ये स्वात्मनि योजयेत् ।
बाह्यस्याप्रोधनाद्वायोः शून्यकत्वं विनिर्दिशेत् ।
चन्द्रदैवत्यया भूयः पिबेदन्तस्तमुत्तमम् ।
आध्मायनं भवेत्तेन श्रावणं कल्मषस्य तु ।
आपूर्य्योदरसंस्थं तु उच्चैर्वायुं निरोधयेत् ।
कुम्भकः कुम्भवत् स्थाद्रेचको वर्णितस्य च ।
उत्क्षिप्य प्रयतो वायुमग्नदैवत्यमानयेत् ।
अङ्गुष्ठायान्तमारभ्य ब्रह्मरन्ध्रं च मोचयेत् ।
सङ्कोच्य कूर्चिकाचक्रन्मूर्द्धं नीत्वा रसाप्लवम् ।
संक्षोभ्य ग्रन्थिनौ सम्यक्ततो ब्रह्मगृहां नयेत् ।
अनेन शोधयेन्नाडीमैश्वरं विमलं मुनिः ।
क्रमेणाभ्यासयोगेन योगसंसिद्धिभाग्भवेत् ।
मुमुक्षूणां सदा तत्त्व ! योगाङ्गं योगसिद्धये ।
विहाय बहिर्मार्गं तु अङ्गुल्यास्तु शनैः शनैः ।
सौम्यनाकर्षयेद्वायुं नाभावाकाश धारयेत् ।
धारयन्नियतप्राणो योगैश्वर्य्यमन्वितः ।
जायते वत्सरादोगी जरामरणवर्जितः ॥
वायुमाकर्षयेद्वाक्षं वामया चोदरं भवेत् ।
नाभिनाडान्तराध्यायं क्षिः प्राणांश्च जयेद्ध्रुवम् ॥
मनःस्थैर्य्यं भवेत्तत्त्व ! क्षिप्त स्थानेषु धारणात् ।
अङ्गुष्ठाभिनासाग्रे वायुं योगी जितासनः ॥
अयानं कटिदेशे तु दृष्टतो वै विनिर्दिशेत् ।
सदा तत्रैव सन्ध्येय एष वायुजयक्रमः ॥
रेचकः पूरकश्चैव कुम्भकश्च न विद्यते ।
निरालम्बे मनः कृत्वा चलात्माजितो भवेत् ॥
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
निग्रहः प्रोच्यते यस्तु प्रत्याहारः स उच्यते ॥
यद्यत् पश्यति तत्सर्व्वं पश्येदात्मवदात्मनि ।
प्रत्याहारः स वै प्रोक्तो योगसाधनमुत्तमम् ॥
कर्म्मेन्द्रियाणां पञ्चानां पञ्चमाद्येतरे जने ।
यदि तत्र स्थिरो लोको मनो याति तदालयम् ॥
उद्धरेत्तान् दृश्य पश्येव कारयेद्धारणां बुधः ।
प्राणवायुं निवार्य्यैव मनः सूर्य्योत्तरे क्षिपेत् ॥
देवांश्च सिद्धान् गन्धर्व्वांश्चारणान् खेचरान् गणान् ।
यस्मात्साभ्यासयोगेन सूक्ष्मज्योतिः प्रपश्यति ॥
दृष्टे न स्थाण्वरे मृत्युः सर्व्वज्ञत्वं प्रजायते ।
स्फोटाख्या नाड़िका प्रोक्ता कूर्म्मलोकस्तदान्तरे ॥
उद्धार्य्य बिन्दुतत्त्वं तु तस्यान्ते गुरुवत् स्मरेत् ।
भूतं भवं भविष्यच्च वर्त्तमानच्च दूरतः ॥
ज्ञानं यत्तद्भवेन्नूनं स्फोटाख्ये ज्ञानमभ्यसेत् ।
ललाटे मूर्द्धिहृदये सदाग्निवमनुस्मरेत् ॥
शुद्धस्फटिकसङ्काशं जटाजूटेन्दुशेखरम् ।
पञ्चवक्त्रं दशभुजं सर्पयज्ञोपवीतिनम् ॥
ध्यात्वेवमात्मनि विभुं ध्यानं तत् स्मरयो विदुः ।
ततोऽनन्तं भवति न क्षयोति न पश्यति ।
न म्रियति न सुप्यति न किञ्चिदा समीक्षते ।
गुह्योदरादिस्थानेषु वायुं नासां विचिन्तयेत् ।
ईशोऽहमिति योगीन्द्रः परानन्दैकविग्रहः ।
जरामरणनिर्म्मुक्तः शिव एव भवेन्मुनिः ॥
गमनागमनाभ्यां यो हीनो वै विषयोज्झितः ।
एकान्तरोन्मनीभावः समाधिरभिधीयते ॥
न दृष्टदुस्तुनचिन्ता न सूक्ष्मस्यापि चिन्तनम् ।
न बहिर्नान्तरं पुत्र ! ब्रह्मण्यखिलभेदनम् ॥
न स्थूलं न ह्रस्वं वापि न दीर्घं नापि लोपितम् ।
न शुक्लं नापि वा पीतं न कृष्णं नापि कर्बुरम् ॥
कृत्वा कृतघ्ननिलये विश्वाख्यं विश्वसम्भवम् ।
आत्मानं सर्व्वभूतानां परस्तात्तमसं स्थितम् ॥
सर्व्वस्याधारमत्यक्तमानन्दं ज्योतिरव्ययम् ।
प्रधानपुरुषातीतमाकाशं दहरं शिवम् ॥
तदन्तः सर्व्वभूतानामीश्वरं ब्रह्मरूपिणम् ।
ध्यायेदनादिमध्यान्तमानन्दादिगुणालयम् ॥
महान्तं पुरुषं ब्रह्म ब्रह्माणं ब्रह्म चाव्ययम् ।

ओङ्कारान्ते तथात्मानं संस्थाप्य परमात्मनि ॥
आकाशे देवमीशानं ध्यायीताकाशमध्यगम् ।
कारणं सर्वभावानामानन्देकरसाश्रयम् ॥
पुराणं पुरुषं शम्भुं ध्यायेन्मुच्येत बन्धनात् ।
शिवभक्तिं विना यस्तु संसारं तर्तुमिच्छति ॥
मूढो यथा चलाङ्गेन: समुद्रं तर्तुमिच्छति ।
तथा विना शम्भुसेवां संसारतरणं न हि ॥
सर्वबीजप्रद: शम्भुर्नान्या काचन देवता ।
तस्मात् सर्वप्रयत्नेन महादेवं प्रपूजयेत् ॥
यदा गुहायां प्रकृतं जगत्संमोहनाशये ।
विचिन्त्य परमं योम सर्वभूतैककारणम् ॥
जीवनं सर्वभूतानां यत्र लोक: प्रलीयते ।
आनन्दं ब्रह्मण: रूपं यत्पश्यन्ति मुमुक्षव: ॥
तन्मध्ये निहितं ब्रह्म केवलं ज्ञानलक्षणम् ।
यातुं तिष्ठेन्महेशेन सोऽभ्युते योगमैश्वरम् ॥
नैकलक्षं द्विलक्षं वा त्रिलक्षं न नवात्मकम् ।
सर्वोपाधिविनिर्मुक्तं समाधिरभिधीयते ॥
बाह्ये चाभ्यन्तरे पुत्र ! यत्र यत्र मन: क्षिपेत् ।
तत्र तत्रात्मनो रूपमानन्दमनुभूयते ॥
संस्थाप्य मयि चात्मानं परं ज्योतिषि निर्गुणे ।
मुहूर्तं तिष्ठत: साक्षात्तस्य चाक्षुषो भवेत् ॥
सर्वज्ञ: परिपूर्णश्च जरामरणवर्जित: ।
मत्प्रसादाद्भवेद्योगी नान्यथा क्रौञ्चरन्ध्रन ! ॥
तस्मात् सर्वं परित्यज्य कर्मजातं सुदुष्करम् ।
मामेकं शरणं गच्छेदज्ञानं नाशयाम्यहम् ॥
ब्राह्मणा: क्षत्रिया वैश्या: शूद्राश्चान्ये च सङ्करा: ।
मद्भक्तिभावना पूता यान्ति मत्परमं पदम् ॥
जगत: प्रलये प्राप्ते नष्टे च कमलोद्भवे ।
मद्भक्ता नैव नश्यन्ति स्वेच्छाविग्रहधारिण: ॥
योगिनां कर्मिणां चैव तापसानां यतात्मनाम् ।
अहमेव गतिस्तेषां नान्यदस्तीति निश्चय: ॥"
इति ब्रह्मपुराणोपपुराणे श्रीसौरे शिवस्कन्द-संवादे यमनियमप्राणायामादिकथनं १२ अ: ॥
अथ योगान्तराया यथा,—
"योगान्तरायास्तस्याथ जायन्ते युञ्जत: पुन: ।
नश्यन्तेऽभ्यासतस्तेऽपि प्रणिधानेन वै गुरो: ॥"
सूत उवाच ।
"आलस्यं प्रथमं पश्चाद्व्याधिपीड़ा प्रजायते ।
प्रमाद: संशयस्थाने चित्तस्थैर्यानवस्थिति: ॥
अश्रद्धादर्शनं भ्रान्तिदु:खं त्रिविधं तत: ।
दौर्मनस्यमयोग्येषु विषयेषु च योग्यता ॥
दशधाभिप्रजायन्ते मुनेर्योगान्तरायका: ।
आलस्यञ्च प्रवृत्तिश्च गुरुत्वात् कायचित्तयो: ॥
बाधयो धातुवैषम्यात् कर्मणा दोषजास्तथा ।
प्रमादस्तु समाधेस्तु साधनानामभावनम् ॥
इदं वेत्युभयस्पृक्तं विज्ञानं स्यानसंशय: ।
अनवस्थितचित्तत्वमप्रतिष्ठा हि योगिन: ॥
जन्मावामपि भूमौ च चित्तस्य भवबन्धनात् ।
अश्रद्धाभावरहिता वृत्तिर्वै साधनेषु च ॥
साध्ये चित्तस्य हि गुरौ ज्ञानाचारश्रियादिषु ।
विपर्ययज्ञानमिति भ्रान्तिदर्शनमुच्यते ॥
अनात्मन्यात्मविज्ञानमज्ञानात् तस्य सन्निधौ ।
दु:खमाध्यात्मिकं प्रोक्तं तथा चैवाधिभौतिकम् ॥
आधिदैविकमित्युक्तं त्रिविधं सहजं पुन: ।
इच्छाविघातात् सङ्क्षोभश्चेतसस्तदुदाहृतम् ॥
दौर्मनस्यं निरोद्धव्यं वैराग्येण परेण तु ।
तमसा रजसा चैव संसृष्टं दुर्मन: स्मृतम् ॥
तदा मनसि सञ्जातं दौर्मनस्यमिति स्मृतम् ।
हटात् स्वीकरणं ज्ञात्वा योग्यायोग्यविवेकत: ॥
विषयेषु विचित्रेषु जन्तोर्विषयलोलता ।
अन्तराया इति ख्याता योगस्येते हि योगिनाम् ॥
अत्यन्तोत्साहयुक्तस्य नश्यन्ति न च संशय: ।
प्रनष्टेष्वन्तरायेषु द्विजा: पञ्चापि योगिन: ॥
उपसर्गा: प्रवर्तन्ते सर्वे ते सिद्धिरूपका: ।
प्रतिभा प्रथमा सिद्धिर्द्वितीया श्रवणा स्मृता ॥
वार्त्ता तृतीया विप्रेन्द्रास्तुरीया चेह दर्शना ।
आस्वादा पञ्चमी प्रोक्ता वेदना षष्ठिका स्मृता ।
खल्वषट्सिद्धिसन्त्यागात् सिद्धिदा: सिद्धयो मुने: ।
प्रतिभा प्रतिभादृत्ति: प्रतिभाव इति स्थिति: ॥
बुद्धिर्विवेचना वेद्यं बुध्यते बुद्धिरुच्यते ।
सूक्ष्मे व्यवहितेऽतीते विप्रकृष्टे जनागते ॥
सर्वत्र सर्वदा ज्ञानं प्रतिभाशब्दमेव तु ।
श्रवणात् सर्वशब्दानामप्रयत्नेन योगिन: ॥
दूरदूरश्रुतादीनां गुह्यानां श्रवणादपि ।
सप्तर्षेस्त्वधिगमो यस्तु वेदना तूपपादिता ॥
दर्शना दिव्यरूपाणां दर्शनाप्रयत्नत: ।
संविद्विचरसे तस्मिन्नास्वादो रूपयत्नत: ॥
वार्त्ता च दिव्यगन्धानां तन्मात्रा बुद्धिसंविदा ।
विन्दन्ते योगिनस्तस्मादात्मन्यवसुवं द्विजा: ॥
जगत्यस्मिन् हि देहस्थं चतु:षष्टिगुणं समम् ।
औपसर्गिकमेतेषु गुणेषु गुणितं द्विजा: ॥
सन्त्याज्यं सर्वथा सर्वमौपसर्गिकमात्मन: ।
प्रेक्षाये पार्थिवाद्यं राजसानां पुरे द्विजा: ॥
याचे तु तैजसं प्रोक्तं ज्ञात्वर्ग्वे चतुरात्मकम् ।
ऐन्द्रे योमात्मकं सर्वं सौम्ये चैव तु मानसम् ॥
प्राणापत्ये लक्षद्वारं ब्राह्मे बोधमनुत्तमम् ।
आद्ये चाष्टौ द्वितीये च तथा षोड़शरूपकम् ॥
चतुःसंख्यं तृतीये तु द्वात्रिंशच्च चतुर्थके ।
चत्वारिंशत्तु पञ्चमे तु भूतसाक्षात्मकं स्मृतम् ॥
गन्धो रसस्तथा रूपं शब्द: स्पर्शस्तथैव च ।
प्रत्येकमष्टधा सिद्धं पञ्चमे तच्छतक्रतो: ॥
तथाष्टचत्वारिंशच्च षट्पञ्चाशत् तथैव च ।
चतु:षष्टिगुणं ब्राह्मं लभते द्विजसत्तमा: ॥
औपसर्गिकमात्मज्ञ भुवनेषु परित्यजेत् ।
लोकैश्वालोकयोगेन योगवित् परमं सुखम् ॥
स्थूलता कृशता बाल्यं वार्द्धकं यौवनं तथा ।
नानाजातिरूपञ्च चतुर्भिर्देहधारणम् ॥
पार्थिवांशं विना नित्यं सुरभिर्गन्धसंयुत: ।
एतदष्टगुणं प्रोक्तमैश्वर्यं पार्थिवं महत् ॥
जले निवसनं यद्वज्जन्तूनामिव विनिर्गम: ।
इच्छेच्छत: स्वयं पातुं समुद्रमपि नातुर: ॥
यच्चेच्छति जगत्स्थित्यै तच्चास्य जलदर्शनम् ।
यदृच्छया समादाय भोक्तुमिच्छति कामत: ॥
तत्तद्रसान्वितं तस्य तयार्थो देहधारणम् ।
भाक्तं विनाथ हस्तेन जलपिण्डस्य धारणम् ॥
अन्यत्वं शरीरस्य पार्थिवेन समन्वितम् ।
एतत् षोड़शकं प्रोक्तमाप्यमैश्वर्यमुत्तमम् ॥
देहादियिविनिर्मोक्षं तत्तापभयवर्जितम् ।
लोकं दग्धमपीहान्यद्दग्धं स्वविधानत: ॥
जलमध्ये हुतवहस्याधाय परिरक्षणम् ।
अग्निग्रहणं हस्ते स्तुतिमात्रेण चागम: ॥
भस्मीभूतविनिर्माणं यथापूर्वं स्वकामत: ।
द्वाभ्यां रूपविनिष्पत्तिर्विना तैजिभिरात्मन: ॥
चतुर्विंशात्मकं श्रोतं तैजसं मुनिपुङ्गवा: ।
मनोगतित्वं भूतानामन्तर्निवसनं तथा ॥
पर्वतादिमहाभारस्खलनेऽहनं पुन: ।
लघुत्वञ्च गुरुत्वञ्च प्राणिभ्यां वायुधारणम् ॥
अङ्गुल्यग्रनिपातेन भूमे: सर्वत्र कम्पनम् ।
एकेन देहनिष्पत्तिर्वायव्यं स्मृतं बुधै: ॥
छायाविहीननिष्पत्तिरिन्द्रियाणाञ्च दर्शनम् ।
आकाशगमनं नित्यमिन्द्रियार्थै: समन्वितम् ॥
दूरे च शब्दग्रहणं सर्वशब्दावगाहनम् ।
तन्मात्रलिङ्गयत्वं सर्वेषामिन्द्रियदर्शनम् ॥
ऐकमैश्वर्यमित्युक्तमेतैरुक्त: पुरातन: ।
यथाकामोपलब्धिश्च यथाकामविनिर्गम: ॥
सर्वज्ञाभिभवश्चैव सर्वगुह्यनिदर्शनम् ।
कामानुरूपनिर्माणं वशित्वं प्रियदर्शनम् ॥
संसारदर्शनश्चैव मानसं गुणलक्षणम् ।
छेदनं ताड़नं चैव संसारपरिवर्तनम् ॥
सर्वभूतप्रसादश्च स्वल्पकालजयस्तथा ।
प्राधानमिदं प्रोक्तमाहङ्कारिकमुत्तमम् ॥
अकारश्चजगत्कृच्छ्रियाद्युश्च एव च ।
प्रलयश्चाधिकारश्च लोकतन्त्रप्रवर्तनम् ॥
अष्टाङ्गमिदं यत्तं निर्माणञ्च पृथक् पृथक् ।
संसारस्य च कर्तृत्वं ब्राह्ममेतदनुत्तमम् ॥
एतावत् तत्त्वमित्युक्तं प्राधान्यं वैष्णवं पदम् ।
ब्रह्मणा तद्गुणं ज्ञात्वं वेत्तुमन्येन शक्यते ॥
विद्यते तत् परं श्रेयं विष्णुना नावगम्यते ।
असंख्येयगुणं शुद्धं को जानीयाच्छिवात्मकम् ॥
तुल्याने सिद्धयश्चेता स्तुपसर्गाश्च कीर्तिता: ।
निरोद्धव्या: प्रयत्नेन वैराग्येण परेण तु ॥
नाशातिशयतां ज्ञात्वा विषयेषु भयेषु च ।
अश्रद्धया त्यजेत् सर्वं विरक्त इति कीर्तित: ॥
वैद्यानां पुरुषे ख्यातं गुरुवैद्यात्सुच्यते ।
वैराग्यमेव सन्त्याज्या: सिद्धयश्चौपसर्गिका: ॥
औपसर्गिकमात्मज्ञ भुवनेषु परित्यजेत् ।
निरुध्यैव त्यजेत् सर्वं प्रवीदति महेश्वर: ॥
प्रसन्ने विमला बुद्धिर्वैराग्येण परेण वै ।
अथवाशुग्रहार्थेन लोकार्थं वा तदा मुनि: ॥
अनिरुध्य विचेष्टेद्य: सोऽप्येवं हि सुखी भवेत् ।
क्वचिद्भूमिं परित्यज्य आकाशे क्रीड़ते श्रिया ।
उद्गिरेच्च क्वचिद्दिव्यान् रूपान्वर्णान् समाश्रित: ।
क्वचिच्छृणोति तद्दर्शेन लोकवत्तं करोति स: ॥

क्वचिद्दण्डकवत्स्तब्धः कुर्य्याद्वन्द्यं सहस्रशः।
स्वगपत्तिसमृद्धस्य तत्त्वज्ञानञ्च विन्दति॥
ब्रह्माद्यं स्थावरान्तञ्च हस्तामलकवद्वेत्ति।
बहुनात्र किमुक्तेन विज्ञानानि सहस्रशः॥
उत्पद्यन्ते मुनिश्रेष्ठ मुनेस्तस्य महात्मनः।
अभ्यासेनैव विज्ञानं विशुद्धञ्च स्थिरं भवेत्॥
तेजोरूपाणि सर्व्वाणि सर्व्वं पश्यति योगवित्।
देवविमान्यनेकानि विमानानि सहस्रशः॥
पश्यति ब्रह्मविष्णुन्द्रयमाग्निवरुणादिकान्।
यद्दनञ्चवतारांश्च भुवनानि सहस्रशः॥
प्रातालतलसंस्थाञ्च समाधिस्थः स पश्यति।
आत्मविद्याप्रदीपेन स्वस्थेनाचलेन तु॥
प्रसादोत्तमपूर्व्वेण सत्त्वपात्रस्थितेन तु।
तमो निहत्य पुरुषः पश्यति ह्यात्मनीश्वरम्॥
तस्य प्रसादाद्धर्म्मस्य ऐश्वर्य्यं ज्ञानमेव च।
वैराग्यमपवर्गश्च नात्र कार्य्या विचारणा।
न शक्यो विस्तराद्वक्तुं वर्षाणामयुतैरपि।
योगे पाशुपते निष्ठा स्थातव्यञ्च मुनीश्वराः!॥"
इति लिङ्गपुराणे ६ अध्यायः॥)

अथ त्रिविधयोगः।

श्रीभगवानुवाच।

"योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।
ज्ञानं कर्म्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्॥
निर्व्विण्णानां ज्ञानयोगो न्यासिनामिह कर्म्मसु।
तेष्वनिर्व्विण्णचित्तानां कर्म्मयोगस्तु कामिनाम्॥
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः॥
तावत् कर्म्माणि कुर्व्वीत न निर्व्विद्येत यावता।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते॥
स्वधर्म्मस्थो यजन् यज्ञैरनाशीः काम उद्धव!।
न याति स्वर्गनरकौ यद्यन्यत्र समाचरेत्॥
अस्मिँल्लोके वर्त्तमानः स्वधर्म्मस्थोऽनघः शुचिः।
ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया॥"
इति श्रीभागवते।११।२०।६—११॥*॥
सांख्ययोगः २ कर्म्मयोगः ३ ज्ञानकर्म्मन्यासयोगः ४ सन्न्यासयोगः ५ ज्ञानयोगः ६ विज्ञानयोगः ७ ब्रह्मयोगः८ राजगुह्ययोगः९ विभूतियोगः १० भक्तियोगः ११ प्रकृतिपुरुषविवेकयोगः १२ गुणत्रययोगः १३ पुरुषोत्तमयोगः१४ श्रद्धात्रयविभागयोगः १५ मोक्षयोगः १६ एते योगा एतेष्वध्यायेषु भगवद्गीतायां द्रष्टव्याः॥*॥
(कलौ योगसिद्धिर्नास्ति। यदुक्तं काश्यपसंहितायाम्। ३२ अध्याये।

"न सिध्यति कलौ योगो न सिध्यति कलौ तपः॥

तथा च तत्रैव ४२ अध्याये।

"चञ्चलेन्द्रियवृत्तिः स्यात् कलिकल्मषजन्मनात्।
अल्पायुः स्यात्तथा नृणां क्लेशे योगमहोदयः॥")

योगक्षेमं, क्ली, (योगश्च क्षेमश्च तयोः समाहारः॥) अप्राप्तानयनप्राप्तरक्षणे। यथा मनुः।

"दिवा वक्तव्यता पत्रे रात्रौ स्यामिनि तद्गृहे।
योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात्॥"
इहदङ्गिराः।

"अनागतस्य चानेता आगतस्य च रक्षकः।
राजावापि यदान्योऽस्ति तदा स्वामी न दोषभाक्॥"

इति प्रायश्चित्ततत्त्वम्॥

(तथा च गीतायाम्। ६। २२।

"अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥"

"योगोऽप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं वहामि।" इति शङ्करभाष्यम्॥ "योगं धनादिलाभं क्षेमञ्च तत्परिपालनं मोक्षं वा तैरप्रार्थितमपि अहमेव वहामि प्रापयामि।" इति श्रीधरस्वामी॥ योगश्च क्षेमश्च इतीतरेतरद्वन्द्वे पुंलिङ्गद्विवचनप्रयोगो भवति।) यथा,—

"योगक्षेमकरं कृत्वा सीतायाः लक्ष्मणं ततः।
न्यास्यानुपदी रामो जगाम गजविक्रमः॥"

इति भट्टिकाव्ये। ५। ५०॥

"फलपुष्पादेरलब्धस्य साधनं योगः शरीरादेर्लब्धस्य पालनं क्षेमः।" इति सङ्केतकायां भरतः॥ "योगक्षेमौ शरीरस्थितियापने।" इति तत्रैव जयमङ्गलः॥

योगचरः, पुं, (योगेषु चरतीति। चर+"चरेष्टः।" ३। २। १६। इति टः।) हनूमान्। इति शब्दरत्नावली॥

योगजं, क्ली, (योगात् जायते इति। जन्+डः।) अगुरु। इति भावप्रकाशः॥ योगजाते, त्रि॥

योगजः, पुं, (योगेभ्यो जायते इति। जन्+डः।) अलौकिकसन्निकर्षविशेषः। स च युक्तयुञ्जानभेदतो द्विविधः। यथा,—

"अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा॥
आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते।
तद्विशिष्टेन्द्रियतद्धर्म्मबोधसामग्र्यपेक्षते॥
विषयी यस्य तत्रैव व्यापारो ज्ञानलक्षणः।
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः॥
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः॥"

इति भाषापरिच्छेदे। ६२—६६॥*॥

"योगश्च इति। योगाभ्यासजनितधर्म्मविशेषः। स्मृतिपुराणादिप्रमाणक इत्यर्थः। युक्तेति। युक्तयुञ्जानरूपयोगिद्वैविध्यात् धर्म्मस्य द्वैविध्यमिति भावः। युक्तस्येति। योगाभ्यासवशात् वशीकृत-समाधि-समासादित-विविधसिद्धियुक्त इत्युच्यते। अयमेव विशिष्टयोगवत्त्वात् युक्त इत्युच्यते। सर्व्वदेति। चिन्तासहकारं विनेत्यर्थः। भानं सर्व्वविषयाणां प्रत्यक्षम्। अपरो युञ्जानः। विषयवाहुल्यात् मानससमाधिस्थः अयञ्च युञ्जान उच्यते। चिन्ता ध्यानं तदेव कारणं ततः सहकारात् व्यवहितविप्रकृष्टार्थान् मनः प्रत्यक्षीकरोतीत्यर्थः।" इति सिद्धान्तसुक्तावली॥

योगदानं, क्ली, (योगेन दानम्।) छद्मेन दानम्। यथा,—

"योगाधमनविक्रीतं योगदानप्रतिग्रहम्।
यच्च वाप्युपधिं पश्येत्तत् सर्व्वं विनिवर्त्तयेत्॥"

इति मानवे ८ अध्यायः॥

"योगाधमनेति। योगशब्दस्छद्मवाची छद्मेन ये बन्धकविक्रयदानप्रतिग्रहाः क्रियन्ते न तत्त्वतोऽन्यथापि निःक्षेपादौ यच्च छद्म जानीयात् वस्तुतो निक्षेपादि न स्यात् तत् सर्व्वं निवर्त्तयेत्।" इति तट्टीकायां कुल्लूकभट्टः॥

योगनाविकः, पुं, मत्स्यविशेषः। तत्पर्य्यायः। गर्गाटः २। इति हारावली॥

योगनिद्रा, स्त्री, (योगश्चित्तवृत्तिनिरोधलक्षणः समाधिस्तद्रूपा निद्रा।) दुर्गा। यथा,—

"या निस्तान्तःस्वकार्य्या जगदण्डकपालतः।
विभज्य पुरुषं याति योगनिद्रेति घोष्यते॥"

इति कालिकापुराणे ६ अध्यायः॥

(अपि च मार्कण्डेये देवीमाहात्म्ये। ८१। ३६।

"योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् प्रभुः॥"

योगेन सङ्कल्पनोपायादिना साध्या निद्रा। वीरार्य्या निद्रा। यथा, कामन्दकीयनीतिसारे। १५। ४४।

"मार्गे च दुर्गे विविधेऽरिसैन्यो
विधाय रक्षां विधिवद्विधिज्ञः।
सन्नद्धपार्श्वस्थितवीरयोधः
सेवेत साध्वीं सुखयोगनिद्राम्॥")

योगपट्टं, क्ली, (योगस्य पट्टं वसनविशेषः। योगार्थं पट्टमिति वा।) यद्वस्त्रेण पृष्ठजानुबन्धनं भवति तत्। यथा,—

"पाण्डुके योगपट्टश्च तार्क्ष्यन्यां रौप्यधारणम्।
न जीवत्पितृकः कुर्य्यात् ज्येष्ठे भ्रातरि जीवति॥"

तल्लक्षणं यथा,—

"पृष्ठजान्वोः समायोगे वस्त्रं बलयवद्दृढम्।
परिवेष्ट्य यदूर्द्धमुत्तिष्ठेत्तद्योगपट्टकम्॥"

इति पाद्मे कार्त्तिकमाहात्म्ये २ अध्यायः॥

(योगपट्टकम्। उत्तरीयविशेषः। यथा, याज्ञवल्क्यः।

"अभावे धौतवस्त्राणां शाणक्षौमाविकानि च।
कुशपो योगपट्टं वा दिर्व्वासा येन वा भवेत्॥")

इत्यादिकृतत्त्वम्॥

योगपट्टकं, क्ली, (योगस्य पट्टकम्।) पूजादौ ध्यार्य्योत्तरीयविशेषः। योगपाटा इति भाषा॥ यथा,—

"त्रिविधं योगपट्टकमाद्यं व्याघ्राजिनोद्भवम्।
द्वितीयं व्याघ्रचर्म्मोत्थं तृतीयं तन्तुनिर्म्मितम्।
चतुर्म्मात्रप्रविस्तारं दैर्घ्येण मणिबन्धवत्॥
चतुर्म्मात्रं चतुरङ्गुलमात्रम्॥" इति वीरमित्रोदयधृतसिद्धान्तशेखरः॥

योगपीठं, क्ली, (योगस्य योगार्थं वा पीठमासनम्।) देवानां योगासनम्। यथा,—

"मण्डलं योगपीठस्तु पद्मं पद्मे विचिन्तयेत्।
ग्रावादीन्यासनानीह चत्वार्यपि विचिन्तयेत्॥
योगपीठं पृथग्ध्यात्वा मण्डलेन सहैकताम्।
पुनर्ध्यात्वा ततः पश्चात् पूजयेदासनं ततः॥
ध्यानेन योगपीठस्य ध्यात्वा यद्दीयते जलम्।
नैवेद्यपुष्पधूपादि तत् स्वयम्भोपतिष्ठते॥
सर्व्वे देवाः सगन्धर्व्वाः सचराचरगुह्यकाः।
चिन्तिताः पूजिताश्च स्युर्योगपीठस्य पूजने॥"
इति कालिकापुराणे ५६ अध्यायः॥

योगमाया, स्त्री, (योग एव माया।) भगवती। सा च विष्णुमाया। यथा,—
"ततश्च श्वेरभेगवत्प्रचोदितः
सुतं समादाय स सूतिकागृहात्।
यदा बहिर्गन्तुमियेष तर्ह्यजा
या योगमायाजनिनन्दजायया॥"
इति श्रीभागवते १० स्कन्धे ३ अध्यायः॥

योगरङ्गः, पुं, (योगेन रङ्गो रागो यस्य।) नारङ्गः। इति राजनिर्घण्टः॥ (नारङ्गशब्दस्य विवरणं ज्ञेयम्॥)

योगराजगुग्गुलुः, पुं, (योगराजाख्यो गुग्गुलुः।) वातरोगादीनामौषधविशेषः। यथा,—
"नागरं पिप्पलीमूलं चव्यमूषणचित्रकम्।
भृष्टं हिङ्गुजमोदा च सर्व्वयो जीरकद्वयम्॥
रेणुकेन्द्रयवौ पाठा विड्ङ्गं गजपिप्पली।
कटुकातिविषा भार्गी वचा मूर्व्वा च पञ्चकम्॥
देवदारु कचा कुष्ठं राम्ना सुस्ता च सैन्धवम्।
एला त्रिकण्टकः पथ्या धान्यकञ्च विभीतकम्॥
धात्री च लवणश्चीरञ्च यवक्षारोऽखिलान्यपि।
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत्॥
यावन्त्येतानि चूर्णानि तावदेवाच्च गुग्गुलुः।
संमर्द्द सर्पिषा पश्चात् सर्व्वं संमिश्रयेच्च ततः॥
एकं पिण्डं ततः कुर्य्यात् धारयेत् घृतभाजने।
गुटिकाष्टकमात्रास्तु खादेत्ताच्च यथोचितम्॥
यथोचितमिति दोषकालानलाद्यपेक्षया॥
परिभाषा च।
आदौ ग्राह्योक्तितं खादेत् ततः कर्षार्द्धं-
मात्रकम्।
ततः कर्षमितं खादेत् गुग्गुलुं क्रमतो नरः॥
दिनानां सप्तके पूर्व्वे गुग्गुलोः ग्रायमाहरेत्।
द्वितीये कर्षमर्द्धन्तु पूर्व्वं कर्षं ततः परम्॥
गुग्गुलुर्योगराजोऽयं महाम्लुखो रसायनः।
मैथुनाहारपानानां नियमो नात्र विद्यते॥
सर्व्वान् वातामयान् हन्यात् आमवातमप-
स्मृतिम्।
वातरक्तं तथा कुष्ठं तथा दुष्टव्रणानपि॥
अर्शांसि ग्रन्थयोरोगं श्लीहगुल्मोदराण्यपि।
आनाहं मन्दमग्निञ्च श्वासं कासमरोचकम्॥
प्रमेहं नाभिशूलञ्च क्रिमिं क्षयमुरोग्रहम्।
शुक्रदोषं रजोदोषमुदावर्त्तं भगन्दरम्॥
राम्नादिक्वाथसंयुक्तः सर्व्ववातामयान् हरेत्।
काकोल्यादिश्रितात् पित्तं कफमारग्वधादिना॥
दार्व्वीश्रितेन मोहञ्च गोमूत्रेण च पाण्डुताम्।
मधुना मेदसो वृद्धिं कुष्ठं निम्बघृतेन च॥
क्षिप्राक्वाथेन वातास्रं ग्रीवं मूलकजात्
घृतात्।
पाटलाक्वाथसहितो विषं मूषकसम्भवम्॥
त्रिफलाक्वाथसंयुक्तो दारुणां नेत्रवेदनाम्।
पुनर्नवाद्यैः क्वाथेन हन्ति सर्व्वोदरान्यपि॥*॥
अत्र राम्नादिक्वाथो यथा,—
राम्ना पुनर्नवा शुण्ठी गुडूचीरण्डजं घृतम्।
समधातुगते वाते साम्ने सर्व्वाङ्गगे पिबेत्॥
इति योगराजो गुग्गुलुः॥" इति भावप्रकाशः॥

योगरूढः, पुं, (योगार्थप्रतिपादको रूढः।) योगार्थसहभावेन रूढ्यर्थबोधकशब्दः। यथा,
"योगरूढाश्च रूढाश्च यौगिकाश्चेति ते त्रिधा॥"
"ते शब्दाः पुनस्त्रिधा भवन्ति। योगरूढाः पङ्कजादयः। पङ्कजनिष्पत्त्यर्थैः पङ्कजनिकर्त्तभिधाय केन योगेनापि पदार्थं एव प्रतिपाद्यते न कुसुमाद्यर्थं इति। योगार्थपुरस्कारेणापि रूढ्यर्थ एवेति योगरूढः। एवं ईश्वरसङ्केतमहिमा भटिति पद्मस्येव स्मृतेः॥" इत्यलङ्कारकौस्तुभे २ किरणः॥ ("योगरूढं नाम जनयति। 'स्वाभ्यर्निविष्टशब्दार्थस्वार्थयोर्बोधकत्वमिथः। योगरूढं न यत्तेकं विनान्यस्यास्ति शब्दधीः॥' यन्नाम स्वाश्रयवृत्तिजन्यार्थेन समं स्वार्थस्यान्वयबोधकृत् तन्नाम योगरूढं यथा पङ्कजजन्यसर्पाधर्म्मादि तद्धि शाम्भनिविष्टानां पङ्कादिशब्दानां वृत्तिजन्येन पङ्कजनिकर्त्तादिना समं स्वश्रयस्य पद्मादेरन्वयानुभावकं पङ्कजमित्यादितः पङ्कजनिकर्त्तं पद्ममित्यनुभवस्य सर्व्वसिद्धत्वात्। दृश्यन्तु विशेषो यद्यपि मण्डपरथकारादिपदं योगार्थविनाकृतस्य रूढ्यर्थस्यैव रूढ्यर्थविनाकृतस्यापि योगार्थस्य बोधकं मण्डपे घृते रथादौ योगार्थस्य मण्डपानकर्त्तादेरिव मण्डपं भोजयेदित्यादौ समुदितार्थस्य ग्रहादेर्योग्यत्वेनान्वयबोधात्। योगरूढन्तु पङ्कजादिपदमवयवशक्त्या रूढ्यर्थमेव समुदायशक्त्या चावयवशक्त्यर्थमेवानुभावयति नत्वन्यं व्युत्पत्तिवैचित्र्यात्तथैव साकाङ्क्षत्वात्। अतएव पङ्कजं कुसुदमित्यत्र पङ्कजनिकर्त्तत्वेन भूमौ पङ्कजसुत्पन्नमित्यादौ च पद्मत्वेन पङ्कजपदस्य लक्षणयैव कुसुदत्वजलपद्मयोर्बोध इति वार्त्तिकम्। ननु पुष्पं पङ्कजेत्यादौ पङ्कजादेरन्वयस्यायोग्यात् बोधाच्च पङ्कजपुष्पमित्यादौ निर्विभक्तिकेन पङ्कजादिपदेनोपस्थाप्यार्थस्यान्वयधीसामान्यं प्रत्येव तादृशपङ्कजादिपदोत्तरशब्दोपस्थाप्यत्वं तन्नम् एवं पुष्पं पङ्कजमित्यादौ अन्वयबोधदर्शनात्तदनुरोधेन सविभक्तिकपङ्कजादिपदोपस्थाप्यार्थान्वयबोधं प्रति स्वसमानविभक्तिकपदोपस्थाप्यत्वञ्च अतस्तदुपस्थापितस्य पङ्कजातादेः कथं पदान्तरादुपस्थापितं 'पद्मादावन्वय इति चेदपङ्कजवृत्तिः सत्तेत्यादौ च अभिचारादुक्तयुपपत्तेः; 'स्वजदक्षरसंग्रीभि तरुण्यासुखपङ्कजम्।' इत्यादौ सङ्गोपेनेति ग्रहाद्य। नच धेनुप्रदस्य धानकर्म्मत्वविशिष्टायां गवीवपङ्कजादिपदस्यापि पङ्कजातत्वादिविशिष्टपद्मादौ रूढिरेवास्तु नतु योगरूढिरिति साम्प्रतं अन्यत्र क्लृप्तशक्तिभ्यः पङ्कजन्यादिपदेभ्य एवाकाङ्क्षादिसाचिव्येन पङ्कजनिकर्त्तृत्वादेर्लाभसम्भवे तद्विशिष्टस्य पद्मस्य गुरोः समुदायाग्रक्त्यत्वादनन्यलभ्यस्येव शब्दार्थत्वात्। यद्यपि कर्त्तरि कृदभिहितत्वे एव पङ्कजत्वविशिष्टस्य लक्षणया लाभसम्भवान्न पङ्कजभागस्य तत्र शक्तिरुचिता प्रकारान्तरालभ्यस्येव शब्दशक्यत्वमित्युक्तत्वात् कृतिवर्त्तमानत्वयोरिवैकपदार्थयोरपि कर्तृपद्मयोर्भिन्नोऽन्वयस्य सम्भवित्वात् तथाप्यवयवानां शक्तेरन्यत्र यत्रेऽपि वा पद्मादौ तदर्थस्यान्वयधीविरोधिधीदशायां पङ्कजमक्षीत्यादिनः पद्ममक्षीत्यानुभवार्थमवश्यं पद्मत्वादिविशिष्टे पङ्कजादिभागस्य रूढिरपेया इतरथा प्रत्ययार्थावच्छिन्नस्येव प्रत्ययार्थस्य पदार्थान्तरेणान्वयस्य व्युत्पन्नतया डप्रत्ययोपस्थापितस्यापि पद्मस्याक्षित्वादिना सहान्वयानुपपत्तेः। अतएव पङ्कजादिपदाग्रहीतशक्तिकस्य पुंसः पङ्कजमक्षीत्यादितो ज्ञातेऽपि कर्म्माक्षीत्याकारको नान्वयबोधः प्रत्ययमात्रोपस्थाप्यस्य कर्त्तुरन्यान्वये निराकाङ्क्षत्वादिति वक्ष्यते। किञ्चैवमेकाक्षरकोषावधृतशक्तिकानां कखादिप्रत्येकवर्णानामेव निरूढलक्षणया तत्तदर्थानुभावकत्वसम्भवाद्ककखादिसमुदायस्यापि तत्तदर्थे शक्तिर्व्यर्थैव कादिप्रत्येकवर्णस्य शक्तिग्रहं विनापि वकादिशब्दादकादेरनुभवार्थं तत्र समुदाये शक्तिरिति तु प्रक्रतेरपि समानं कादिप्रत्ययमात्रस्य पद्मादौ वृत्तिमत्त्वाग्रहेऽपि पङ्कादिसमुदायात् पद्मादेरनुभवस्य सर्व्वसिद्धत्वात्। नचैवं चित्रगुरित्यादावपि चित्रगोखाभ्यादौ समुदायस्य शक्तिप्रसङ्गः समासस्यावाविशिष्टत्वादिति वाच्यम् अवयवावयवशक्तिकस्य पुंसस्ततोऽर्थानधिगमेनावयवानां शक्तेरवश्यापेक्षायां तेषामेव तथाविधार्थबोधकत्वौचित्यस्य वक्ष्यमाणत्वादिति।

पङ्कजादिपदेभ्यः केवलस्यैव योगार्थस्य रूढ्यर्थस्य वा बोधव्युदासायैकाद्यर्थयोर्भेदयोः साकाङ्क्षत्वनियमो न कल्प्यते परन्तु रूढ्यर्थभिन्ने योगार्थस्य बोधं प्रति रूढिधियः प्रतिबन्धकत्वं तेन रूढेरप्रतिसन्धानदशायामवयवशक्तेरेव पङ्कं कुसुदमित्यादौ पङ्कजनिकर्त्तृत्वादिना कैरवादेरवगमसम्भवावयवशक्तेरनुपस्थितौ समुदायशक्तेरेव भूमौ पङ्कजसुत्पन्नमित्यादौ पङ्कत्वप्रकारेण खलपद्मादेरतएव च तैलपदं योगेन तिलप्रभवं रूढ्या विलक्षणद्रव्यपर्य्यवसितं स्नेहं बोधयेद्योगरूढमपि तैलं पत्रमित्यादौ सर्व्वस्य तैलमित्यादौ च शक्तेरेव प्रत्येकस्य बोधकमिति मीमांसकानामसम्प्रत्यति।

'रूढ्यर्थभिन्ने योगार्थग्रहौ रूढेर्विरोधिताम्।
वदन्ति केचिदेकेकबुद्धिस्थैः क्वचिदिष्यते॥'

क्वचित्समुदायावयवयोरेकमात्रस्य शक्तिप्रति-

सत्त्वानस्यते यद्यपि पद्माद्यधर्मिकपङ्कजातत्वान्वयधीसामान्यं प्रति पङ्कजपदं पद्मग्रहणमिलेयं रूढिज्ञानत्वेन न विरोधित्वं ताद्रूप्यधीसत्त्वेऽपि कर्दमजादिशब्देभ्यस्ताद्रूप्येऽ कैरवादेरवगमात् नापि पङ्कजपदजन्यताद्रूप्यबोधं प्रत्येव तथा विरोधित्वं रूढिज्ञानदशायामपि सकुदादयस्य तत्त्वबुद्धया ग्रहणमेव वा पङ्कजपदात् पङ्कजातत्वेन कुमुदबोधस्य सर्वैरेवगमात् तथाप्यवयवग्रहणा पङ्कजपदजन्यपद्माद्यधर्मिकपङ्कजातत्वान्वयबोधं प्रत्येव रूढिज्ञानत्वेन प्रतिबन्धकत्वम्। नच कुमुद एव पद्मत्वेन रूढिज्ञानदशायां ताद्रूप्येण कुमुदस्य बोधो न स्यादिति रूढिधियः सत्त्वादिति वाच्यं पद्माद्यधर्मिकेत्यनेन पद्मत्वावच्छिन्नविशेष्यतायाः कल्पनात्। पद्मत्वेन कुमुदस्यापि सकुदादयग्रहणत्वबुद्धिदशायामवयवग्रहणा पङ्कजातं कुमुदमित्याकारकधीस्वीकारे तु कुमुदादिग्रहणत्व ज्ञानजन्यत्वेनापि प्रतिबन्धं विशेषणीयम्। नच यत्र तात्पर्यादिधीविलम्बादयोग्यताभ्रमादिनाप्रतिबन्धाद्वा रूढ्योपस्थिते पद्मे योगार्थस्य पङ्कजनिकर्तृरत्नत्वबुद्धावयवग्रहणा पङ्कजातत्वेन कुमुदादिबोधो न स्यात् विरोधिनो रूढिज्ञानस्य सत्त्वादिति वाच्यं मीमांसकावाश्रित्वात् ते हि मकरं भोजयेत्यादावपि यद्यादौ रूढिधीसत्त्वे मकरपदादागमवयवग्रहणा मकरपावकर्तृत्वेन मन्यन्ते बोधं भ्रमत्वा यद्यागरूढ्यन्वितस्यैव रूढ्यर्थगोचरतत्तदयोग्यतात्राग्राह्यभावविशिष्टस्यैव रूढिज्ञानस्य विरोधितायाः सुवचत्वाच्च। यदि च सकुदाय एव पद्मत्वेन पङ्कजनिकर्तृत्वेन च शक्तिः प्रमात्वमाश्रित्य पङ्कजातं पद्ममित्याकारको बोधः प्रामाणिकस्तदार्थी च पङ्कजनिकर्तृत्वेन कुमुदस्य नान्वयधीः तदावयवग्रहणोत्तरपदाय पङ्कजपदघटकग्रन्थग्रहणेति प्रतिबन्धकुक्षौ निक्षेपणीयं तदुटकल्पनेन तद्विषयितायाप्रकविषयितासंबन्धमात्रं तदवयव एव तत्राप्यविशिष्टम्। यत्तु सावयवग्रहणा पङ्कजपदजन्यं पङ्कजकर्तृत्वेनान्वयबोधं प्रति पद्मत्वं हेतुत्वेन कार्यस्य विशेष्यत्वं तदवच्छेदकत्वं वा कारणस्य तु समवायसंबन्धादात्मा वा प्रत्यासत्तिरित्येतावतैव योगार्थमर्यादया कुमुदादेर्बोधव्युदाससंभवात् उक्तक्रमेण प्रतिबन्धकतायां मानाभावः पद्मत्वं पङ्कजप्रयोगोपाधिरिति प्राचीनप्रवादस्याप्युक्तार्थ एव पर्यवसानादिति तत्तुच्छं पद्मायद्दीतग्रहणिकस्यापि पुंसः पङ्कजनिकर्तृत्वेनावयवग्रहणा कुमुदस्य बोधोदयप्रसङ्गात् नचैतदापत्तिरनुभवविरोधात् नच रूढिज्ञानकालीनमेव बोधार्थस्य बोधं प्रत्युक्तरीत्या पद्मत्वस्य हेतुत्वं तथा सति रूढिधीदशायामपि तदसमानकालीनस्य पङ्कजातत्वेन कुमुदबोधस्य सामान्यसामग्यीमहिम्ना दुर्वारतापत्तेः रूढिज्ञानासमानकालीनताद्रूप्यबोधं प्रति विशेषतो हेतुत्वस्यास्थूलत्वात् तत्कल्पने चातिगौरवात्। यदपि पङ्कजजनकर्तृत्व पङ्कादिपदानां शक्तिसत्त्वेऽपि पङ्कजपदान्न ताद्रूप्येण बोधः परन्तु पद्मत्वमाश्रित्येव योगार्थमर्यादया पङ्कजातत्वप्रकारकबोधसामग्यं प्रत्येव पद्मत्वविशिष्टे रूढिज्ञानस्य लाघवेन विरोधित्वात् पद्माद्यधर्मिकत्वादेर्गौरवेण प्रतिबन्धकोच्यप्रविष्टत्वादतो योगरूढं नामैव नास्ति युधिष्ठिरादिशब्दादपि रजस्विरत्वादिकं योगार्थं परित्यज्यैव वैजात्यादिप्रकारेण कुन्तीपुत्राद्यवगमात्। यदुक्तमभियुक्तैः।

या वृत्तिरवयवार्था सेयमयोगपादिता।
अवयवार्था तु तत्रैव यत्र रूढिर्विरोधिनी।
पङ्कजं मनसादेवी पद्मनाभो युधिष्ठिरः॥

इति। तदेतदेयाकरणमतं पङ्कजमक्षीत्यादितः पङ्कजातं पद्ममक्षीत्याद्यनुभवस्य न्यायमीमांसादिसकलतत्त्वसिद्धत्वेन गौरवस्य प्रामाणिकत्वादनादेयमन्यथा अवयवशक्तेरपि प्रतिबध्यतायामप्रवेशापत्तिलाघवे पङ्कजातत्वप्रकारकशाब्दसामान्यं प्रत्येव रूढिधियः प्रतिबन्धकत्वस्य सुवचत्वात्। नन्वेवं ह्रदे सरसिजमक्षीत्यादितो ह्रदनिष्ठं सरोजमिव ह्रदाभिन्ने सरसि जातं पद्ममपि प्रतीयेत नामैक्यार्थयोरभेदान्वये तत्तस्य नाम्नोः समानविभक्तिकत्वस्यानयादिति चेत् सत्यं सविभक्तिकनामार्थस्य नामान्तरार्थान्वये वृत्तिग्रन्थैकदेशान्वयेनैव समानविभक्तिकनामान्तरेण स्मारितत्वस्य तन्नतायाः स्वीकार्यत्वादिति।

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैः समधिगम्यते॥

इति रूढ्यर्थयोगार्थयोर्युगपदुपस्थितौ तयोराकाङ्क्षादिसाचिव्यादाद्यत्वान्वयबुद्धित्वस्य एव योगार्थस्य वा रूढ्यर्थस्य वा नान्यत्रान्वयो नतु तयोरेव मिथः साकाङ्क्षत्वं अन्यत्र योगार्थस्य बोधने रूढिधियः प्रतिबन्धकत्वं वा प्रमाणाभावात् एवञ्च यत्र योगरूढिभ्यार्थयोस्तात्पर्याग्रहाद्विरोधिसमवधानाद्वा न प्रथममन्वयधीस्तत्र योगार्थमर्यादया पङ्कजातत्वेन कुमुदादेः सकुदादयग्रहणा च पद्मत्वेन रूढ्यवयवस्य बोधो भवत्येवेति मणिकृन्मतं दर्शयति।

'रूढ्यर्थेऽन्वय या यत्र यदाकाङ्क्षादिनिश्चयः।
तदेव तत्र योगार्थस्यान्वयो मणिकृन्मतः॥'

सकुदायग्रहणोपस्थापिते पदान्तरवृत्त्युपस्थापिते वा यत्र धर्मिण्यवयवान्तरवृत्तिलभ्यार्थस्य यदाकाङ्क्षानिश्चयादिस्तदैव तत्र तथान्वयबोध उत्पद्यते सम्भूतसामग्रीकत्वात् रूढ्यर्थभिन्ने योगार्थस्यान्वयबोधव्युदासाय तु रूढियोगापहारितावादी रूढ्यर्थमात्रे योगार्थस्यान्वयबोधसामग्यीस्वभावाभिप्रायक इति चिन्तामणिरहस्यम्। योगरूढं विभजते।

'सामासिकं तद्धितान्तमिति तद्द्विविधं भवेत्।
योगरूढं कृदन्तस्य समासत्वव्यवस्थितेः॥'

तत्र योगरूढं सामासिकं समासात्मकं कृदन्तं सपदादि तद्धितान्तं वासुदेवादि। कृदन्तस्य

पङ्कजादियोगरूढस्य सामासिक एवान्तर्भाव इति नाधिक्यम्॥ * ॥)

योगवाहः, पुं, (योगस्य वाहः। योगं वाहयतीति। वह + णिच् + अण् वा।) अनुस्वारः। विसर्गः। जिह्वामूलीयः। उपध्मानीयः। इति व्याकरणम्॥

योगवाही, स्त्री, (योगं वाहयतीति। वह + णिच् + अण्। ततो ङीष्।) चारविशेषः। यथा,—

"खर्ज्जिसु खर्ज्जिकासुन्नी योगवाही सुवर्चिका।"

इति हेमचन्द्रः॥

पारदश्च॥ (पुं, रोगविशेषे मिलितानामौषधानां प्रयोगः। यथा,—

"योगवाहिरसाः सर्व्वे सर्व्वरोगगलग्रहे॥"

इति वैद्यकरत्नसारसंग्रहे रक्तपित्ताधिकारे॥)

योगसारः, पुं, (योगस्यौषधप्रयोगस्य सारः।) सर्व्वरोगहरणोपायः। यथा,—

धन्वन्तरिरुवाच।

"सर्व्वरोगहरं दिव्यं योगसारं वदाम्यहम्।
यद्यु सुश्रुत! संक्षेपात् प्राणिनां जीवहेतवे॥
निमेषादिर्हविःकालश्चिन्ताभिः षड्विधो भवेत्॥
कषायकटुतिक्ताम्लरूक्षाहारादभोजनात्।
चिन्ताश्रमव्यायामभयशोकप्रजागरात्॥
उद्वेगाभ्यतिभावाच्च कर्म्मयोगातिकर्षणात्।
वायुः कुप्यति पर्य्यन्ते जीर्णान्ने दिनसंक्षये॥
उष्णाम्लबलवत्क्षारकटुकाजीर्णभोजनात्।
तीक्ष्णातपाग्निसन्तापमद्यक्रोधविषेवणात्॥
विदाहकाले भुक्तस्य मध्याह्ने जलदागमे।
ग्रीष्मकालेऽर्द्धरात्रेऽपि पित्तं कुप्यति देहिनः॥
खाद्यम्लवलयस्त्रिधगुरुशीतातिभोजनात्।
नवान्नपिच्छलानूपमाषाभिष्यन्दिसेवनात्॥
अव्यवायी दिवास्वप्नश्लेष्मसंसर्गसुखादिभिः।
कफः प्रदोषे भुक्ते च वसन्ते च प्रकुप्यति॥
गुरुस्निग्धसुशीतोदविष्टम्भिभोजनात्।
खरता सुप्तता हर्षरोचकम्लानगौरवम्॥
श्यावलम्बर्द्धिवलनाग्रामवर्त्तनम्।
वायोर्लिङ्गानि तैर्युक्तं रोगं वातात्मकं वदेत्॥
दाहोष्मपाकसंक्लेदकोपरागपरिस्रवाः।
कण्डूग्लपर्ववैगन्ध्यस्वेदमूर्च्छातिसृष्टमाः॥
हारिद्रं हरितत्वञ्च पित्तलिङ्गानि तैर्नयः।
श्लेष्मोपदेहमाधुर्य्यचिरकारित्वबन्धनम्॥
स्तैमित्यगुरुसंघातश्लीपश्लीतत्वगौरवम्।
कण्डूनिद्राभियोगश्च लक्षणं कफसम्भवम्॥
हेतुलक्षणसंसर्गाद्विद्याद्वाधिं द्विदोषजम्।
सर्व्वहेतुसमुत्पन्नं त्रिलिङ्गं सान्निपातिकम्॥
दोषधातुमलाधारो देहिनां देह उच्यते।
तेषां समत्वमारोग्यं वैषम्यं विकृतिर्मता॥
रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः।
वातपित्तकफा दोषा विमूत्राद्या मलाः स्मृताः॥
वायुः शीतो लघुः सूक्ष्मः खरो रूक्षोऽस्थिरो बली।
पित्तमम्लकटूष्णञ्च पक्वोजोरोगकारणम्॥
मधुरो जलवत् स्निग्धो गुरुः श्लेष्मातिपिच्छिलः।

गुदश्रोण्याश्रयो वायुः पित्तं पक्वाशयस्थितम् ॥
कफस्तामाशयं स्थानं कण्ठोरस्तूर्द्धसञ्चयः ।
कटुतिक्तकषायाश्च कफपित्तादिसंश्रयः ।
कटुस्वलवणाः पित्तं स्वाटूम्लवणाः कफम् ॥
एत एव विपर्य्यस्ताः समायेषां प्रयोजिताः ।
भवन्ति रोगिणां ग्रान्थे सुस्थानां सुखहेतवः ॥"
इत्यादि गारुड़े १७२ अध्यायः ॥
(योगस्य सारः । शिवस्वरात्मको ग्रन्थविशेषः ।)

योगाधमनं, क्ली, (योगेनाधमनम् ।) कूलेन बन्धकम् । यथा,—
"योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाप्युपधिं पश्येत् तत् सर्व्वं विनिवर्त्तयेत् ॥"
इति मनुः ॥
अस्य विवरणं योगदानशब्दे द्रष्टव्यम् ॥

योगारङ्गः, पुं, (योगेन ऋतुयोगेन आरङ्गः ।) नारङ्गः । इति राजनिर्घण्टः ॥

योगारूढः, त्रि, (योगं विषयनिवृत्तिं यमादिकं वा आरूढः ।) इन्द्रियभोग्येषु शब्दादिषु तत्साधनकर्म्मसु चानासक्तः । तस्य लक्षणं यथा,—
"यदा हि नेन्द्रियार्थेषु न कर्म्मस्वनुषज्जते ।
सर्व्वसङ्कल्पसंन्यासी योगारूढ़स्तदोच्यते ॥"
इति श्रीभगवद्गीतायाम् । ६ । ४ ॥ ॥
"कीदृशोऽयं योगारूढ़ो यस्य शमः कारणमुच्यते इत्यत्राह यदेति । इन्द्रियार्थेषु इन्द्रियभोग्येषु शब्दादिषु तत्साधनेषु च कर्म्मसु यदा नानुषज्जते आसक्तिं न करोति । तत्र हेतुः आसक्तिमूलभूतान् सर्व्वान् भोगविषयान् कर्म्मविषयांश्च सङ्कल्पान् संन्यसितुं त्यक्तुं शीलं यस्य सः । तदा योगारूढ़ उच्यते ।" इति तट्टीकायां श्रीधरस्वामी ॥

योगासनं, क्ली, (योगस्यासनं योगसाधनमासनमिति वा ।) ब्रह्मासनम् । ध्यानासनम् । इति हेमचन्द्रः । १ । ५०१ ॥ (तच्च पद्मासनादि । यथा, भट्टिकाव्ये । ७ । ७७ ।
"इत्युक्ता सर्व्व एवास्युर्वृद्धा योगासनानि ते ॥"
"योगासनानि पद्मासनानि ।" इति तट्टीकायां जयमङ्गलभरतमल्लिकौ ॥)

योगिदृक्, पुं, (योगिनां दृक्रोऽवलम्बनयष्टिः ।) वेत्रः । इति राजनिर्घण्टः ॥

योगिनी, स्त्री, (योगोऽस्त्यस्या इति । योग + इनिः । ङीप् ।) योगयुक्ता नारी । (यथा, मार्कण्डेये । ५२ । ३१ ।
"ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज ॥")
भगवत्याः सखीरूपा आवरणदेवता । सा कोटिविधा । तासां मध्ये चतुःषष्टिः प्रधानाः । यथा । नारायणी १ गौरी २ ग्राकम्भरी ३ भीमा ४ रक्तदन्तिका ५ भ्रामरी ६ पार्व्वती ७ दुर्गा ८ कात्यायनी ९ महादेवी १० चण्डघण्टा ११ महाविद्या १२ महातपा १३ सावित्री १४ ब्रह्मवादिनी १५ भद्रकाली १६ विग्रालाक्षी १७ रुद्राणी १८ कृष्णपिङ्गला १९ अग्निज्वाला २० रौद्रमुखी २१ कालरात्रिः २२ तपस्विनी २३ मेघस्वना २४ सहस्राक्षी २५ विष्णुमाया २६ जलोदरी २७ महोदरी २८ मुक्तकेशी २९ घोररूपा ३० महाबला ३१ मृतिः ३२ स्मृतिः ३३ धृतिः ३४ तुष्टिः ३५ पुष्टिः ३६ मेधा ३७ विद्या ३८ लक्ष्मीः ३९ सरस्वती ४० अपर्णा ४१ अम्बिका ४२ योगिनी ४३ डाकिनी ४४ शाकिनी ४५ हारिणी ४६ हाकिनी ४७ लाकिनी ४८ त्रिदशेश्वरी ४९ महाबली ५० सर्व्वमङ्गला ५१[1] लज्जा ५२ कौशिकी ५३ ब्रह्माणी ५४ माहेश्वरी ५५ कौमारी ५६ वैष्णवी ५७ ऐन्द्री ५८ नारसिंही ५९ वाराही ६० चासुण्डा ६१ शिवदूती ६२ विष्णुमाया ६३ मालिका ६४ । इति दक्षसन्दिकेश्वरपुराणोक्तदुर्गापूजापद्धतिः ॥ अपि च ।
"ब्रह्माणी चण्डिका रौद्री गौरीन्द्राणी तथैव च ।
कौमारी वैष्णवी दुर्गा नारसिंही च कालिका ॥
चासुण्डा शिवदूती च वाराही कौशिकी तथा ।
माहेश्वरी ग्राकरी च जयन्ती सर्व्वमङ्गला ॥
काली कपालिनी मेधा शिवा ग्राकम्भरी तथा ।
भीमा ग्रान्ता भ्रामरी च रुद्राणी चाम्बिका तथा ॥
क्षमा धात्री तथा स्वाहा स्वधापर्णा महोदरी ।
घोररूपा महाकाली भद्रकाली भयङ्करी ॥
क्षेमङ्करी चोग्रचण्डा चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चण्डी महामोहा प्रियङ्करी ॥
बलविकरिणी देवी बलप्रमथिनी तथा ।
मनोन्मथिनी देवी च सर्व्वभूतस्य दामिनी ॥
उमा तारा महानिद्रा विजया च जया तथा ।
पूर्व्वोक्ताः शैलपुत्र्याद्या योगिन्यश्च याः क्रमात् ॥
ताभिराभिश्च सहिताश्चतुःषष्टिश्च योगिनीः ।
पूजयेन्मङ्गलस्नाताः सर्व्वकामार्थसिद्धये ॥"
इति कालिकापुराणे ६२ अध्यायः ॥ ॥
अथ योगिन्यो यथा,—
"ततोऽपरत्रेव्वलस्य पूजयेद्दश योगिनीः ॥
शैलपुत्रीं चण्डघण्टां स्कन्दमातरमेव च ।
कालरात्रिञ्च पूर्व्वादिचतुर्दिक्षु प्रपूजयेत् ॥
चण्डिकामथ कुष्माण्डीं तथा कात्यायनीं शुभाम् ।
महागौरीं चाग्निकोणे नैर्ऋत्यादिषु पूजयेत् ॥"
इति तत्रैव ५३ अध्यायः ॥ ॥
तिथिविशेषे दिग्विशेषावस्थितयोगिन्यो यथा,—
"ब्रह्माणी संस्थिता पूर्व्वे प्रतिपन्नवमीतिथौ ।
माहेश्वरी चोत्तरे च द्वितीयादशमीतिथौ ।
स्थितायेये च कौमारी तृतीयैकादशीतिथौ ।
नारायणी च नैर्ऋत्ये चतुर्थीद्वादशीतिथौ ।
पञ्चम्यान्तु वयोदश्यां वाराही दक्षिणे तथा ।
षष्ठ्यान्चैव चतुर्दश्यामिन्द्राणी पश्चिमे स्थिता ॥
सप्तम्यां चौर्यमास्याञ्च चासुण्डा वायुगोचरे ।
अष्टम्यमावास्ययोश्च महालक्ष्मीश्चगोचरे ॥
योगिनीसंसुखे नैव गमनादि प्रकारयेत् ॥"
इति गारुड़े ५६ अध्यायः ॥ ॥

अपि च ।
"प्रतिपन्नवमी पूर्व्वे रामा रुद्राश्च पावके ।
शरत्त्रयोदशी याम्ये वेदा मासाश्च नैर्ऋते ॥
षष्ठी चतुर्दशी पश्चात् वायव्यां मुनिपूर्णिमा ।
द्वितीया दशमी यत्ने ऐशान्यां चाष्टमी कुहूः ॥
वामे शुभकरी देवी रुद्रुद्रा दक्षिणे स्थिता ।
वधवत्सकरी चाग्रे पृष्ठे सर्व्वार्थसाधनी ॥"
इति ज्योतिस्तत्त्वम् ॥ ॥
सत्कालयोगिनी यथा,—
"यस्यां दिश्युदयं याति ततो यामार्द्धमुक्तिका ।
भ्रमन्ती तेन मार्गेण भवेत्तत्कालयोगिनी ॥
प्राची धनेश्वरहुताशनकौणपेय-
वायव्यवारुणयमाधिपशङ्करेषु ।
एषु क्रमान्निवसति प्रतिपन्नवन्धोः
पृष्ठे स्थिता शुभकरी गिरिराजपुत्री ॥"
इति समयास्तम् ॥ ॥
अथ योगिनीसाधनम् । भूतडामरे ।
"अथातः संप्रवक्ष्यामि योगिनीसाधनोत्तमम् ।
सर्व्वार्थसाधनं नाम देहिनां सर्व्वसिद्धिदम् ॥
अतिगुह्या महाविद्या देवानामपि दुर्लभा ।
यासामर्च्चनं कृत्वा यक्षेशोऽभूद्धनाधिपः ॥
तासामाद्यां प्रवक्ष्यामि सुराणां सुन्दरीं प्रिये ।
अस्या अभ्यर्च्चनेनैव राजत्वं लभते नरः ॥
अथ प्रातः समुत्थाय कृत्वा स्नानादिकं शुभम् ।
प्रासादञ्च समासाद्य कुर्य्यादाचमनं ततः ॥
प्रणवान्ते सहस्रारे हूँ फट् दिग्बन्धनं चरेत् ॥
प्राणायामं ततः कुर्य्यात् मूलमन्त्रेण मन्त्रवित् ।
षड़ङ्गं मायया कुर्य्यात् पद्ममष्टदलं लिखेत् ॥
तस्मिन् पद्मे महामन्त्रं जीवन्यासं समाचरेत् ।
पीठे देवीं समावाह्य ध्यायेद्देवीं जगत्प्रियाम् ॥
पूर्णचन्द्रनिभां गौरीं विचित्राम्बरधारिणीम् ।
पीनोत्तुङ्गकुचां रामां सर्व्वाभयप्रदाम् ॥
इति ध्यात्वा च मूलेनदद्यात् पाद्यादिकं शुभम् ।
पुनर्धूपं निवेद्यैव नैवेद्यं मूलमन्त्रतः ।
गन्धचन्दनताम्बूलं सकर्पूरं सुशोभनम् ॥
प्रणवान्ते भुवनेशी आगच्छ सुरसुन्दरि ! ।
वह्निभार्य्या जपेन्मन्त्रं त्रिसन्ध्यञ्च दिने दिने ॥
सहस्रैकप्रमाणेन ध्यात्वा देवीं सदा बुधः ।
मासान्ते बाह्य दिवसं बलिपूजां सुशोभनाम् ॥
कृत्वा च प्रजपेन्मन्त्रं निशीथे याति सुन्दरी ।
सुदृढ़ं साधकं मत्वा याति सा साधकाग्रे ॥
सुप्रसन्ना साधकाग्रे सदा क्षेरसुखी ततः ।
दृष्ट्वा देवीं साधकेन्द्रो दद्यात् पाद्यादिकं शुभम् ॥
सुचन्दनं सुमनसो ज्ञात्वाभिलषितं वदेत् ।
मातरं भगिनीं वापि भार्य्यां वा भक्तिभावतः ॥
यदि माता तदा वित्तं ब्रूयच्च सुमनोहरम् ।
भूपतित्वं प्रार्थितं यत्तद्दाति दिने दिने ।
पुत्रवत् पाति तं लोके सत्यं सत्यं सुनिश्चितम् ॥
स्वसा ददाति द्रव्यञ्च दिव्यवस्त्रं तथैव च ।
दिव्यां कन्यां समानीय नागकन्यां दिने दिने ॥
यद्यद्भवति भूतञ्च भविष्यतीति यत् पुनः ।
तत् सर्व्वं साधकेन्द्राय निवेदयति निश्चितम् ॥

यत् यत् प्रार्थयते सर्वं ददाति सा दिने दिने ।
भ्राडवत् पाति तं लोके कामनाभिर्मनोगतैः ॥
भार्या स्यादृयदि सा देवी साधकस्य मनोहरा ।
राजेन्द्रः सर्वराजानां संसारे साधकोत्तमः ॥
स्वर्गे मर्त्ये च पाताले गतिः सर्वत्र निश्चितम् ।
यदृयद्ददाति सा देवी कथितुं नैव शक्यते ॥
तया सार्द्धं च संभोगं करोति साधकोत्तमः ।
अन्यस्त्रीगमनं त्यक्त्वा अन्यथा नश्यति ध्रुवम् ॥२०॥
ततोऽन्यत् साधनं वक्ष्ये निर्मितं ब्रह्मणा पुरा ।
नदीतीरं समासाद्य कुर्यात् स्नानादिकं ततः ॥
पूर्ववत् सकलं कार्यं चन्दनेमंडलं लिखेत् ।
स्मरन्नं तत्र संलिख्यावाह्य ध्यायेन्मनोहराम् ॥

कुरङ्गनेत्रां शरदिन्दुवक्त्रां
बिम्बाधरां चन्दनगन्धलिप्ताम् ।
चीनांशुकां पीनकुचां मनोज्ञां
श्यामां सदा कामदुघां विचित्राम् ॥

एवं ध्यात्वा जपेद्देवीमशुरघ्नपदीयकैः ।
गन्धं पुष्परसचैव ताम्बूलादींश्च मूलतः ॥
तारं माया गच्छ मनोहरे पावकवल्लभा ।
लक्षायुतं प्रतिदिनं जपेन्मन्त्रं प्रसन्नधीः ॥
मासान्ते चाप्य दिवसं कुर्याच्च जपमुत्तमम् ।
आनिग्रीयं जपेन्मन्त्रं ज्ञात्वा च साधकं दृढम् ॥
गत्वा च साधकाभ्यासे सुप्रसन्ना मनोहरा ।
तनोऽचिंता प्रसन्ना सा पृच्छति प्रार्थितं यत् ॥
स्वर्णयुतं साधकाय ददाति सा दिने दिने ।
भावशीघ्रं वयं कुर्यात् स्थिते तस्य न दास्यति ॥
अन्यस्त्रीगमनं तस्य न भवेत् सत्यमीरितम् ।
अव्याहतगतिस्तस्य भवतीति न संशयः ॥
इयं ते कथिता विद्या सुगोप्या या सुरासुरैः ।
तव स्नेहेन भक्त्या च वक्ष्येऽहं परमेश्वरि ! ॥२१॥
ततोऽन्यत् साधनं वक्ष्ये शृणुष्वैकमना: प्रिये ।
गत्वा वटतलं देवीं पूजयेत् साधकोत्तमः ॥
प्राणायामं षडङ्गञ्च माययाथ समाचरेत् ।
सन्नोमांसं बलिं दत्वा पूजयेत्तां समाहितः ॥
अर्धमुच्छिष्टरक्तेन दद्यात्तस्यै दिने दिने ।
प्रफुल्लवदनां गौरीं पक्वबिम्बाधरां प्रिये ॥
रक्ताम्बरधरां बालां सर्वकामप्रदां शुभाम् ।
एवं ध्यात्वा जपेन्मन्त्रमयुतं साधकोत्तमः ॥
सप्तदिनं समभ्यर्च्य चाष्टमे विधिवच्चरेत् ।
कायेन मनसा वाचा पूजयेच्च दिने दिने ॥
तारं माया तथा कूर्चं रक्त कर्म्मणि तद्वहिः ।
आगच्छ कनकान्ते तु वतिः स्वाहा महामनुः ।
आनिग्रीयं जपेन्मन्त्रं बलिं दत्वा मनोहरम् ॥
साधकेन्द्रं दृढं मत्वा आयाति साधकालये ।
साधकेन्द्रोऽपि तां दृष्ट्वा दद्याद्यर्घादिकं ततः ॥
ततः सपरिवारेण भार्या स्यात् कामभोजनैः ।
वस्त्रभूषादिकं त्यक्त्वा याति सा निजमन्दिरम् ।
एवंभार्या भवेन्नित्यं साधकाज्ञानुरूपतः ।
आत्मभार्यां परित्यज्य भजेत्तान्च विचक्षणः ॥३॥
ततः कामेश्वरीं वक्ष्ये सर्वकामफलप्रदाम् ।
प्रणवं भुवनेशानी चागच्छ कामेश्वरि ततः ॥
वह्निभार्या महामन्त्रं साधकानां सुखावहम् ।
पूर्ववत् सकलं कृत्वा भूर्जपत्रे सुशोभने ॥
गोरोचनाभिः प्रतिमां विनिर्माय खलङ्कृताम् ।
ग्रथ्यामारुह्य प्रजपेन्मन्त्रमेकमनाग्रतः ॥
सहस्रैकप्रमाणेन मासमेकं जपेद्बुधः ।
घृतेन मधुना दीपं दद्याच्च सुसमाहितः ॥
कामेश्वरीं ग्रथ्याद्वास्थां चलत्खञ्जनलोचनाम् ।
सदा लोलगतिं कान्तां कुसुमाकशरासनाम् ॥
एवं ध्यात्वा जपेन्मन्त्रं निशीथे याति सा तदा ।
दृष्ट्वा तु साधकः श्रेष्ठामाज्ञां देहीति तां वदेत् ॥
स्त्रीभावेन सदा तस्मै दद्यात् पाद्यादिकं ततः ।
सुप्रसन्ना तदा देवी साधकं तोषयेत् सदा ॥
अन्नाद्यैरतिभोगेन पतिवत् पालयेत् सदा ।
नीत्वा रात्रौ सुखैश्वर्यैर्दत्त्वा च विपुलं धनम् ॥
वस्त्रालङ्कारद्रव्यादीन् प्रभाते याति निश्चितम् ।
एवं प्रतिदिनं तस्य सिद्धिः स्यात् कामरूपतः ॥४॥
ततः पटे विनिर्माय पुत्तलिं ध्यानरूपतः ।
सुवर्णवर्णां गौराङ्गीं सर्वालङ्कारभूषिताम् ॥
नूपुराङ्गदहाराढ्यां रत्नाच्च पुष्करेक्षणाम् ।
एवं ध्यात्वा जपेन्मन्त्रं दत्त्वा च पाद्यमुत्तमम् ॥
सचन्दनेन पुष्पेण जातीपुष्पेण यत्नतः ।
गुग्गुलं धूपदीपौ च दद्याच्चूलेन साधकः ॥
मन्त्रस्तु ।
तारं मायां तथागच्छ रतिसुन्दरिपदं ततः ।
वह्निजाया चाष्टसहस्रं जपेन्मन्त्रं दिने दिने ॥
मासान्ते दिवसं प्राप्य कुर्यात् पूजादिकं शुभम् ।
घृतदीपं तथा गन्धं पुष्पं ताम्बूलमेव च ॥
तावन्मन्त्रं जपेद्विद्वान् यावदायाति सुन्दरी ।
ज्ञात्वा दृढं साधकेन्द्रं निशीथे याति निश्चितम् ॥
ततस्तामर्चयेद्भक्त्या जातीकुसुममालया ।
सुसन्तुष्टा साधकेन्द्रं तोषयेद्रतिभोजनैः ॥
भूत्वा भार्या च सा तस्मै ददाति वाञ्छितं वरम् ।
भूषादिकं परित्यज्य प्रभाते याति सा ध्रुवम् ॥
साधकाज्ञानुरूपेण प्रयाति सा दिने दिने ।
विघ्ने प्राप्तरे देवि! सिद्धिः स्यान्नात्र संशयः ॥
त्यक्त्वा भार्यां भजेत्तांच अन्यथा नश्यति ध्रुवम् ॥५॥
ततोऽन्यत् साधनं वक्ष्ये खट्वे शिवसन्निधौ ।
वेदाद्यं भुवनेशीचागच्छ यक्षिणि वल्लभा ।
पावकस्य महामन्त्रं पूर्ववत् सकलं ततः ।
मस्तकं चन्द्रैः ज्ञात्वा मूलमन्त्रं लिखेत्ततः ॥
पद्मानना श्यामवर्णा पीनोत्तुङ्गपयोधराम् ।
कोमलाङ्गीं क्षीरसखीं रक्तोत्पलदलेक्षणाम् ॥
एवं ध्यात्वा जपेन्मन्त्रं सहस्रञ्च दिने दिने ।
मासान्ते पूर्णिमां प्राप्य विधिवत् पूजयेत् सदा ॥
आनिग्रीयं जपेन्मन्त्रं दृढाभ्यासेन साधकः ।
सर्वत्र कुशलं ज्ञात्वा सा याति साधकालयम् ॥
भूत्वा भार्या साधकं हि साधयेद्विविधैरपि ।
भोगैर्दिव्यैर्भूषणाद्यैः पद्मिनी सा दिने दिने ॥
पतिवत् पाति तं लोके नित्यं स्वर्गे च सर्वदा ।
त्यक्त्वा भार्यां भजेत् तान्च साधकेन्द्रः सदा प्रिये ॥६॥
ततो वक्ष्ये महाविद्यां विश्वामित्रेण धीमता ।
ज्ञात्वा यां साधिता विद्या बला चातिबला प्रिये ॥
मन्त्रस्तु ।
प्रणवान्ते महामाया नटिनि पावकप्रिया ।
महाविद्येह कथिता गोपनीया प्रयत्नतः ॥
अशोकस्य तलं गत्वा स्नानं पूर्ववदाचरेत् ।
मूलमन्त्रेण सकलं कुर्याच्च सुसमाहितः ॥
त्रैलोक्यमोहिनीं गौरीं विचित्राम्बरधारिणीम् ।
विचित्रालङ्कृतां रम्यां नर्मकौवेरभूषिताम् ॥
एवं ध्यात्वा जपेन्मन्त्रं सहस्रञ्च दिने दिने ।
मांसोपहारैः संपूज्य धूपं दीपं निवेदयेत् ॥
गन्धचन्दनताम्बूलं दद्यात्तस्यै मुदा बुधः ।
मासमेकञ्च तां भक्त्या पूजयेत् साधकोत्तमः ॥
मासान्ते दिवसं प्राप्य कुर्याच्च पूजनं महत् ।
अर्द्धरात्रौ भयं दत्त्वा किञ्चित् साधकसत्तमे ।
दृढं साधकं मत्वा याति सा साधकालयम् ॥
विद्याभिः सकलाभिश्च किञ्चित्क्षीरसुखी ततः ।
वरं वरय शीघ्रं त्वं यत्ते मनसि वर्तते ॥
तत् श्रुत्वा साधकश्रेष्ठो भावयेन्मनसा धिया ।
मातरं भगिनीं वापि भार्यां वा प्रीतिभावतः ।
ज्ञात्वा सन्तोषयेद्भक्त्या नटिनी तत् करोत्यलम् ॥
माता स्यादृयदि सा देवी पुत्रवत् पाति तं सदा ।
स्वर्णयुतं सिद्धिदयं ददाति सा दिने दिने ॥
भगिनी यदि सा कन्यां देवस्य नागकन्यकाम् ।
राजकन्यां समानीय ददाति सा दिने दिने ।
अतीतानागतां वार्त्तां सर्वां जानाति साधकः ॥
भार्या स्यात् यदि सा देवी ददाति विपुलं धनम् ।
अन्नाद्येरुपचारैश्च ददाति कामभोजनम् ॥
स्वर्णयुतं सदा तस्मै ददाति सा ध्रुवं प्रिये ।
यत् यत् वाञ्छति तत् सर्वं ददाति नात्र संशयः ॥७॥
महाविद्यां प्रवक्ष्यामि सावधानावधारय ।
कुङ्कुमेन समालिख्य भूर्जपत्रे स्त्रियं सुदा ॥
ततोऽष्टदलमालिख्य कुर्याच्चन्द्रादिकं प्रिये ।
जीवन्यासादिकं कृत्वा ध्यायेत् तत्र प्रसन्नधीः ॥
शुद्धस्फटिकसङ्काशां नानारत्नविभूषिताम् ।
मञ्जीरहारकेयूररत्नकुण्डलमण्डिताम् ।
एवं ध्यात्वा जपेन्मन्त्रं सहस्रन्तु दिने दिने ॥
प्रतिपद्दिनमारभ्य पूजयेत् कुसुमादिभिः ।
धूपदीपविधानेन त्रिसन्ध्यं पूजयेन्मुदा ॥
पूर्णिमां प्राप्य गन्धाद्यैः पूजयेत् साधकोत्तमः ।
घृतदीपं तथा धूपं नैवेद्यञ्च मनोरमम् ।
रात्रौ च दिवसे जप्यं कुर्याच्च सुसमाहितः ।
प्रभातसमये याति साधकस्यान्तिकं ध्रुवम् ॥
प्रसन्नवदना भूत्वा तोषयेद्रतिभोजनैः ।
देवदानवगन्धर्वविद्याधृग्यक्षरक्षसाम् ॥
कन्याभी रत्नभूषाभिः साधकेन्द्रं सुदुर्मुदुः ।
वस्त्रं चोद्यादिकं दिव्यं दिव्यं ददाति सा ध्रुवम् ॥
स्वर्गे मर्त्ये च पाताले यद्वस्तु विद्यते प्रिये ।
आनीय दीयते सद्यं साधकाज्ञानुरूपतः ॥
स्वर्णयुतं सदा तस्मै ददाति सा दिने दिने ।
साधकाय वरं दत्त्वा याति सा निजमन्दिरम् ॥
तस्या वरप्रसादेन चिरजीवी निरामयः ।
सर्वज्ञः सुन्दरः श्रीमान् सर्वशो भवति ध्रुवम् ।
रेमे सार्द्धं तया देवि साधकेन्द्रो दिने दिने ॥
मन्त्रस्तु ।

तारं मायां तथागच्छानुरागिणि मेघुनप्रिये।
वह्निभार्य्या मनुः प्रोक्तः सर्व्वसिद्धिप्रदायकः॥
एषा मधुमती तु स्यात् सर्व्वसिद्धिप्रदा प्रिये।
गुह्यात् गुह्यतरा विद्या तव स्नेहात् प्रकी-
र्त्तिता॥ ८॥

देव्युवाच।

श्रुतञ्च साधनं पुण्यं यक्षिणीनां सुखप्रदम्।
यस्मिन् काले प्रकर्त्तव्यं विधिना केन वा प्रभो।
अत्राधिकारिणः के वा समासेन वदस्व मे॥

ईश्वर उवाच।

वसन्ते साधयेद्धीमान् हविष्याशी जितेन्द्रियः।
सदा ध्यानपरो भूत्वा तदर्च्चनमहोत्सुकः॥
उच्चटे प्रान्तरे वापि कामरूपे विशेषतः।
श्मशानेऽकेतनं प्राप्य साधयेत् सुसमाहितः।
अनेन विधिना साक्षात् भविष्यति न संशयः॥
देवाश्च सेवकाः सर्व्वे परं चाचाधिकारिणः।
तारकब्रह्मणो भक्तं विनाप्यत्राधिकारिणः॥"
इति तन्त्रसारे योगिनीसाधनप्रकरणं समाप्तम्॥

दशविधदशान्तर्गतदशाविशेषः। यथा,—

"स्वनक्षत्रं ध्रुवं कृत्वा पञ्च तत्र विभिश्रयेत्।
मङ्गलेन कृतः शेषो मङ्गलादिविनिश्चयः॥
मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा।
उल्का सिद्धा सङ्कटा च योगिन्यश्चौ प्रकीर्त्तिताः॥
अब्दैकं मङ्गला धत्ते शेषास्त्वेकैकवर्द्धिकाः।
पुनस्त्वार्काग्निवर्षन्ते चक्रवत् परिवर्त्तनात्॥"
अपि च।
"रोहिण्यादौ त्रिरावृत्त्या मङ्गलादौ यथाक्रमम्।
उल्का सिद्धा सङ्कटा च अश्विन्यादित्रये पुनः॥"
एतासामन्तर्दशा।
"दशावर्षन्तु षट्त्रिंशद्भागं कृत्वा विनिर्द्दिशेत्।
यन्तु यस्या हि यद्वर्षं तत्तद्भागं प्रकीर्त्तितम्॥"
फलं यथा,—
"मङ्गला मङ्गलं धत्ते तुलभोगं सुखं तथा।
गोगजाश्वसहस्राणि गृहे तस्य दिने दिने।
पिङ्गला विविधं दुःखमन्नचिन्तादिसम्भवम्।
ददाति नाग्नं शत्रुभ्यो धनधान्यगजादिकम्॥
धन्या च सततं दत्ते सर्व्वत्र विजयादिकम्।
शत्रुभ्यो रक्षते नित्यं मातृवत् परिपालयेत्॥
भ्रामरी विविधं दुःखमन्तःसम्भ्रमसम्भवम्।
अकस्मात्तस्य दुर्दैवं विधिना प्रेरितं भवेत्॥
भद्रिका विविधान् धत्ते सम्मानादिमनोरथान्।
तुष्टा चेद्भद्रिका नित्यं दुर्गृहः सुगृहायते॥
उल्का व्याधिकरी प्रोक्ता नित्यं नानाभयप्रदा।
उल्का यदि समायाति सुगृहो दुर्गृहायते॥
सिद्धा च साधयेत् सर्व्वं मन्त्रारम्भधनादिकम्।
यस्य तुष्टा भवेत् सिद्धा लक्ष्मीस्तस्य करे स्थिता॥
सङ्कटा सङ्कटं दत्ते भङ्क्ते धान्यधनादिकम्।
सैव भाग्या सदा नित्यं गृहे लक्ष्मीः फणी यथा॥"
इत्युदयदीपचन्द्रिका॥

योगी, [न्] पुं, (योगः अस्त्यस्येति। योग+इनिः। यद्वा, युज समाधौ। युजिर् योगे वा+"संपृचानुरुधेति।"३। २।१४२। इति घिनुण्।) योगयुक्तः। तस्य लक्षणादि यथा,—

"सर्व्वे लोष्टे गृहेऽरण्ये सुवर्णे चन्दने तथा।
समता भावना यस्य स योगी परिकीर्त्तितः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः॥
अपि च।
"आत्मौपम्येन सर्व्वत्र समं पश्यति योऽर्জ্জुन!।
सुखं वा यदि वा दुःखं स योगी परमो मतः॥"
इति श्रीभगवद्गीतायाम् ७ अध्यायः॥
अन्यच्च।

ऋषय ऊचुः।

"भगवन्! देवतारिघ्न! हिरण्यादिनिसूदन!।
चत्वारो ह्याश्रमाः प्रोक्ता योगी नाम क
उच्यते॥
सर्व्वकर्म्माणि संन्यस्य समाधिमचलं श्रितः।
य आस्ते निश्चलो योगी स सन्न्यासी न चेतरः॥
सर्व्वेषामाश्रमाणान्तु द्वैविध्यं श्रुतिदर्शितम्।
ब्रह्मचार्य्यूर्द्धरेतास्को नैष्ठिको ब्रह्मतत्परः॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत्।
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः॥
उदासीनसाधकश्च गृहस्थो द्विविधो भवेत्।
ऋणानि त्रीण्युपाहृत्य त्यक्त्वा भार्य्याधनादिकम्॥
एकाकी यस्तु विचरेदुदासीनः स मोक्षिकः।
कुटुम्बभरणायत्तः साधकोऽसौ गृही भवेत्॥
तपस्तप्यति योऽन्येन यजेद्वेदान् जुहोति च।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत्।
सन्न्यासिकः स विज्ञेयो वानप्रस्थाश्रमे स्थितः॥
योगाभ्यासरतो नित्यमारुरुक्षुर्जितेन्द्रियः।
ज्ञानाय कर्म्मते भिक्षुः प्रोच्यते परमैष्ठिकः॥
यस्यात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः।
सम्यग्दर्शनसम्पन्नः स योगी भिक्षुरुच्यते॥
ज्ञानसन्न्यासिनः केचिद्देवसन्न्यासिनः परे।
कर्म्मसन्न्यासिनः केचिद्विविधाः परमैष्ठिकाः॥
योगी च त्रिविधो ज्ञेयो भौतिकः सांख्य एव च।
तृतीयोऽध्यात्मयोगी प्रोक्तो योगसूत्तममाश्रितः॥"
इति कौर्म्मे २ अध्यायः॥
(तेषां स्त्रीसङ्गनिषेधो यथा,—
"यदि सङ्गं करोत्येव बिन्दुस्तस्य विनश्यति।
आयुःक्षयो बिन्दुहीनादसामर्थ्यञ्च जायते॥
तस्मात् स्त्रीणां सङ्गवर्জ्जं कुर्य्यादभ्यासमादरात्।
योगिनोऽङ्गस्य सिद्धिः स्यात् सततं बिन्दुधारणात्॥"
इति दत्तात्रेयसंहिता॥
तेषां पथ्यं यथा, हठयोगप्रदीपिकायाम्।
"गोधूममुद्गालियवषष्टिकशोभनान्नं
क्षीराज्यखण्डनवनीतसितामधूनि।
शृङ्गीकपोलकफलादिकपञ्चशाकं
सुन्नादिदिव्यसुदकञ्च यमीन्द्रपथ्यम्॥"
तेषामपथ्यं यथा, तत्रैव।
"कट्वम्लतिक्तलवणोष्णहरीतशाक-
सौवीरतैलतिलसर्षपमद्यमद्यम्।
आजादिमांसदधितक्रकुलत्थकोल-
पिण्याकहिङ्गुलसुनाद्यमपथ्यमाहुः॥")
योगीश्वरः, पुं, (योगिनामीश्वरः।) याज्ञवल्क्य-मुनिः। (इति हेमचन्द्रे योगेशशब्ददर्शनात्॥ ३। ८५१॥) यथा,—
"योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन्।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः॥"
"योगिनां सनकादीनां ईश्वरः श्रेष्ठस्तं याज्ञवल्क्यं संपूज्य।" इति मिताक्षरा॥ च,
यतिनां श्रेष्ठः। (यथा, मार्कण्डेये। ६६। २८।
"यजन्ति यानस्तमलैर्मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून्॥")
योगीश्वरी, स्त्री, (योगिनामीश्वरी।) दुर्गा। यथा,—
"योगिशक्रादयो देवाः सनकान्तास्तपोधनाः।
तेषां स्वामी तथा योगी ईश्वरी प्रभुपालना॥
आत्मेन्द्रियमनादीनां संयोगो योग उच्यते।
तेषां वा योजनाद्योगी योगेश्वर्य्यविबोधना॥"
इति देवीपुराणे ४५ अध्यायः॥
योगेशः, पुं, (योगस्य ईशः ईश्वरः।) याज्ञवल्क्यः। इति हेमचन्द्रः। ३। ८५१॥ (योगेश्वरे, त्रि। यथा, भागवते। ४। १६। ६।
"कपिलो नारदो दत्तो योगेशाः सनकादयः।
तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः॥")
योगेश्वरः, पुं, (योगानां ईश्वरः।) श्रीकृष्णः। यथा,—
"ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्म्मवर्म्मणि।
स्वां काष्ठामधुनोपेते धर्म्मः कं शरणं गतः॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः॥
(शिवः। यथा, महाभारते। १३। १४।३२३।
"नमस्ते भगवन् देव! नमस्ते भक्तवत्सल!।
योगेश्वर! नमस्तेऽस्तु नमस्ते विश्वसम्भव!॥"
देवहोत्रतनयः। यथा, भागवते। ८। १३।३२।
"देवहोत्रस्य तनय उपहर्त्ता दिवस्पतेः।
योगेश्वरो हरेरंशो हृदयां सम्बिभर्त्स्यति॥")
योगेश्वरी, स्त्री, वन्ध्याकर्कोटकी। इति भावप्रकाशः॥ (योगानामीश्वरी। दुर्गा। यथा,—
"त्वं योगेश्वरी तथा—।" इति चण्डीकवचम्॥ योगयुक्ते, त्रि। यथा, मार्कण्डेये। ६७। ८।
"प्रजापतेः कश्यपाय सोमाय वरुणाय च।
योगेश्वरेभ्यश्च सदा नमस्यामि कृताञ्जलिः॥")
योगेष्टं, क्ली, (योगे सन्धिच्छिद्रादिपूरणे इष्टम्।) सीसकम्। इत्यमरः। २। ६। १०५॥ (तस्य पर्य्यायः।
"नागं महाबलं चीनं पिष्टं योगेष्टसीसकम्॥"
इति वैद्यकरत्नमालायाम्॥)
योग्यं, क्ली, (योग्यत इति। युज्+णिच्+ण्यत्।) वह्निनामौषधम्। वृद्धिनामौषधम्। इत्यमरः। २। ४। १९२॥
योग्यः, त्रि, (योगाय प्रभवति। योग्+"योगाद्यच्।" ५। १। १०२। इति यत्।) प्रवीणः। योगार्हः। (यथा, रघुः। ६। २६।

"कान्त्या गिरा सूनृतया च योग्या
त्वमेव कल्याणि ! तयोक्ततोया ॥")
उपायौ । शक्तः । इति मेदिनी हेमचन्द्रश्च ॥
(यथा, मार्कण्डेये । ७१ । १० ।
"अपत्नीको नरो भूप न योग्यो निजकर्म्मणाम् ॥"
योजनसाधनभूतः । यथा, ऋग्वेदे । १ । ६ । ६ ।
"ऋतस्य वा केशिना योगाभिः ।"
"योगाभिर्योजनसाधनभूताभी रज्जुभिः ।" इति सायणः ॥ शकटादियोजनीयः । यथा, शतपथब्राह्मणे । १ । ३ । १ । १३ ।
"योक्त्रं वै हि योग्यं युञ्जन्त्यक्ति वै पक्ष्मा
अमेध्यं यद्वाचीनम् ।"
"योग्यं योजनीयमनड्वाहादिकम् ।" इति तट्टीकायाम् ॥) पुण्यनक्षत्रं, पुं । इति मेदिनी । ये, ३६ ॥
योग्यता, स्त्री, (योग्यस्य भावः । योग्य + तल् । टाप् ।) क्षमता । इति लोकप्रसिद्धिः ॥ (यथा, मार्कण्डेये । ११३ । ६ ।
"तथान्यानप्ययोग्यान्न योग्यतां यान्ति कानिचत् ।
योग्यान्ययोग्यतां यान्ति कालवशाद्धि
योग्यता ॥")
शाब्दबोधकारणविशेषः । स तु पदार्थानां परस्परसम्बन्धे बाधाभावः । इति साहित्यदर्पणम् ॥ न्यायमते तत्पदार्थे तत्पदार्थवत्ता । यथा,—
"पदार्थे तत्र तद्वत्ता योग्यता परिकीर्त्तिता ।"
इति भाषापरिच्छेदः ॥
"योग्यतां निरूपयति पदार्थ इत्यादिना । एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता इत्यर्थः । तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः । नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात् प्राक् सर्व्वत्र न सम्भवति वाक्यार्थस्यापूर्व्वत्वादिति चेन्न तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यताया ज्ञानस्य सम्भवात् । नन्वासत्तियोग्यताज्ञानं न शाब्दज्ञाने कारणं वह्निना सिञ्चति इत्यादौ सेकेन वह्निकरणकत्वाभावरूपायोग्यताया निश्चयेन प्रतिबन्धान्न शाब्दबोधः । तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दे प्रतिबन्धकत्वं सिद्धं योग्यताज्ञानविलम्बाच्च शाब्दविलम्बोऽपि सिद्ध इति वदन्ति ।" इति सिद्धान्तमुक्तावली ॥
योग्या, स्त्री. (योग्य + टाप् ।) अभ्यासः । (यथा, रघुः । ८ । १६ ।
"अपरः प्रणिधानयोग्यया
मरुतः पञ्च शरीरगोचरान् ॥"
"अपरो रघुः प्रणिधानयोग्यया समाधयाविनेत् ।" इति मल्लिनाथः ॥) अर्कयोषित् । इति मेदिनी । ये, ३६ ॥ शक्ताभ्यासः । तत्पर्य्यायः । खुरली २ श्रमः ३ अभ्यासः ४ । तन्दूः खलूरिका । इति हेमचन्द्रः । ३ । ४५२ ॥
(यथा, सुश्रुते सूत्रस्थाने ६ अध्याये ।
"अथातो योग्याशनीयमध्यायं व्याख्यास्यामः । अधिगतसर्व्वशास्त्रार्थमपि शिष्यं योग्याहारयेत् । हिक्काश्वासेषु क्षेदादिषु च कर्म्मसूपदिशेत् । सुबहुश्रुतोऽप्यहितयोग्यः कर्म्मसु योग्यो भवति । तत्र पुष्यफलालाबूकालिङ्गकर्कारुपर्व्वकर्कारुप्रभृतिषु क्षेदविशेषात् दर्शयेदुत्कर्त्तनपरिकर्त्तनानि चोपदिशेत् । इतिवस्तिप्रसेकप्रभृतिषूदकपङ्कपूर्व्वेषु भेद्ययोग्याम् । सरोजि चर्म्मण्यातते लेख्यस्य । मृतपशुशिरास्नायुपलनालेषु च वेध्यस्य । घृतोपहतकाष्ठवेणुनलनालीशुष्कालाबुमुखेर्व्व्यधस्य । पनसबिल्वीबिल्वफलमज्जन्यतपशुदन्तेष्वाहार्य्यस्य । मधुच्छिद्रोपलिप्ते ग्राह्यलीफलके विस्रावस्य । छत्राघनवस्त्रान्तयोर्मृदुचर्म्मान्तयोश्च सीव्यस्य । पुरुषमयपुरुषाङ्गप्रत्यङ्गविशेषेषु वध्ययोग्याम् । मृदुमांसपेशीषूपलनालेषु च कर्त्तसन्निबन्धयोग्याम् । मृदुषु मांसखण्डेष्वभिचारयोग्याम् । उदकपूर्व्वघटपार्श्वस्रोतस्यलाबूसुखादिषु च नेत्रग्रन्थिधानवस्त्रिव्रणवस्तिपीडनयोग्यामिति । भवतश्चात्र ।
एवमादिषु मेधावी योग्यार्हेषु यथाविधि ।
अन्येषु योग्यां कुर्व्वाणो न प्रसज्जति कर्म्मसु ॥
तस्मात् कौशलमन्विच्छेत् शास्त्रज्ञाधिकर्म्मसु ।
यस्य यत्रेह साधर्म्म्यं तत्र योग्यां समाचरेत् ॥"
(युवती । यथा,—
"निदाघशरदोर्बाला प्रौढ़ा वर्षावसन्तयोः ।
हेमन्ते शिशिरे योग्या न वृद्धा कापि शस्यते ॥"
योग्या युवती । इति राजवल्लभः ॥)
योजनं, क्ली, (युज्यते मनो यस्मिन्निति । युज् + ल्युट् ।) परमात्मा । चतुःक्रोशी । योगः । इति मेदिनी । ने, ११३ ॥ * ॥ (यथा, हरिवंशे । १४६ । १३ ।
"गान्धारकन्या वहने नृपाणां
रथे तथा योजनमूर्ज्जितानाम् ॥")
चतुःक्रोशार्थे यथा,—
"द्वादशाङ्गुलिकः प्रद्युम्नद्वयमु शयः स्मृतः ।
तच्चतुष्कं धनुः प्रोक्तं क्रोशो धनुःसहस्रिकः ॥
तच्चतुष्कं योजनं स्यादित्यादि मानशास्त्रम् ॥
एतन्मते षोड़शसहस्रैर्योजनं भवति ।
द्वात्रिंशतसहस्रैरपि योजनम् । यथा,—
यवोदरैरङ्गुलमष्टसंख्यै-
र्हस्तोऽङ्गुलैः षड़्गुणितैश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः
क्रोशः सहस्रद्वितयेन तेषाम् ।
स्याद्योजनं क्रोशचतुष्टयेन
तथा कराणां दशकेन वंशः ॥"
इति लीलावती ॥
योजनगन्धा, स्त्री, (योजनं गन्धोऽस्याः । योजनात् गन्धोऽस्या इति वा ।) कस्तूरी । सीता । सत्यवती । इति मेदिनी । धे, ४८ ॥ (यथा, देवीभागवते । २ । २ । १८ ।
"इत्युक्त्वा तु सा कन्या तत्रैवान्तरधीयत ।
सता योजनगन्धा तु सुरूपा च वरानना ॥")
योजनगन्धिका, स्त्री, सत्यवती । इति जटाधरः ॥ कस्तूरी । इत्यजयपालः ॥ सीता । योजनगन्धाशब्दात् स्वार्थे कप्रत्ययेन जातत्वात् ॥
योजनपर्णी, स्त्री, (योजनाय सन्धिस्थानाद्रोपणार्थं पर्णं यस्याः ।) मञ्जिष्ठा । इति रत्नमाला ॥
योजनवल्लिका, स्त्री (योजनवल्ली + स्वार्थे कन् । टाप् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥
योजना, स्त्री, योगकारणा । इति आत्मनेपदयुजधातोरनप्रत्ययेन सिद्धम् ॥
योजनवल्ली, स्त्री, (योजनगामिनी अतिदीर्घा वल्ली यस्याः सा ।) मञ्जिष्ठा । इत्यमरः । २ । ४ । ६१ ॥ (तथास्याः पर्य्यायः ।
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मञ्जूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
योजित, त्रि, कारितयोजनम् । आत्मनेपदयुजधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥ (यथा, भागवते । ४ । २१ । २२ ।
"अहं दक्षधरो राजा प्रजानामिह
योजितः ॥")
योटकः, पुं. योटनम् । मेलनमिति यावत् । विवाहे राशियोटक-गृहयोटक-नक्षत्रयोटक-गणयोटक-वर्गयोटक-योनियोटक-वर्गयोटकभेदेन सप्तविधो योटकः । तत्र राशियोटके षड़ष्टकनवपञ्चमद्विद्वादशविषमसप्तकयोगा निषिद्धाः । तदाह श्रीपतिसंहितायाम् ।
"षड़ष्टकं त्रिकोणञ्च द्विद्वादशकमेव च ।
परस्परं जन्मराशेस्त्यक्त्वा कन्याकुमारयोः ॥
षड़ष्टके भवेद्रोगो वैधव्यं मृत्युरेव वा ।
त्रिकोणे पुत्रहानिः स्यात् धनहानिर्धनत्रये ॥
पुरुषस्याग्रिमे कन्या कन्यायाः षष्ठके पुमान् ।
शुभं षड़ष्टकं ज्ञेयं नोद्वाहे दूषणं भवेत् ॥
नवपञ्चमे ।
पुंसो यद्यात् सुतगृहे सुतहा च कन्या
धर्म्मे स्थिता सुतवती पतिवल्लभा च ।
द्विद्वादशे धनगृहे धनहा च कन्या
रिष्फे स्थिता धनवती पतिवल्लभा च ॥
योटके सप्तके मेषतुलौ युग्मगृहौ तथा ।
सिंहघटौ सदा वर्ज्यौ मृतिस्तत्राब्रवीच्छिवः ॥
राजयोटकमाह दीपिकायाम् ।
एकराशौ च दम्पत्योः शुभं स्यात् समसप्तके ।
चतुर्थदशके चैव क्षतयैकादशे तथा ॥"
इति राशियोटकविचारः ॥ * ॥
गृहयोटके गृहमैत्र्यभावो निषिद्धः । कन्यावरराश्यधिपगृहयोः मैत्र्यभावे गृहमैत्र्यभावः । तत्र विवाहे रोगादिः फलम् । तदाह गर्गः । मरणं

भावविरोधे ग्रहरिपुभावे चाचिरेण रोगादिः। इति ग्रहयोटकविचारः॥ * ॥ अन्ये योटकाः प्रपञ्चभयान्न लिखिताः। इति ज्योतिषम्॥ ग्रन्थान्तरे जोटकशब्दस्यवर्गलतीयादिश्च॥

योतुः, पुं, (यूयते ज्ञायते अनेनेति। यु+बाहुलकात् तुः।) परिमाणम्। इत्यादिकोषः॥

योत्रं, क्ली, (यूयते अनेनेति। यु+"हान्नीभ्रस्व युजस्तुद सिसिच मिह-पतदंग्र-नहः करणे।" उणा० ३।२।१८२। इति ष्ट्रन्।) योक्त्रम्। इत्यमरः। २।६।१३॥ (यथा, भो० रामायणे। २। ४५। २६।

"भरतायाभिरक्षाः स्म योत्राय पशवो यथा।")

योद्धा, [द्धृ] पुं, (युध्यतीति। युध्+ल्वच्।) युद्धकर्त्ता। तत्पर्य्यायः। भटः २ योधः ३। इत्यमरः। २। ८। ६१॥ (यथा, हरिवंशे भविष्यपर्व्वणि। २। १८।

"वाधिष्यते पुरीं योद्धा छिद्रं यदि लभेत सः॥")

योधः, पुं, (युध्यतीति। युध्+अच्।) योद्धा। इत्यमरः। २। ८। ६१॥ (यथा, कथासरित्सागरे। १२। २२।

"सङ्केतमिलितैश्चान्यैर्योधाख्यैः सैनिकैः सह। निर्ययौ तत्सैन्यरं चक्रमहासेनान्तिकञ्च सत्॥")

योधनं, क्ली. युद्धम्। (यथा, मार्कण्डेये।१३५।१०।

"योधनेषु स्वरूपेण दमो यस्य दुरात्मनः। स दमो वारयत्येव हस्ति तस्य रिपोर्गुरुम्॥")

अस्त्रम्॥ युधधातोर्भावे करणे ल्युट् (ल्युट्) प्रत्ययेन निष्पन्नम्।

योधसंरावः, पुं, (योधानां संरावः।) अन्योन्यं योधानां युद्धायाह्वानम्। तत्पर्य्यायः। क्रन्दनम् २। इत्यमरभरतौ॥

योधेयः, पुं, (युध्+भावे घञ्। योधं युद्धं करोतीति। योध+खः।) योद्धा। योधशब्दात् स्त्रीयत्ययेन निष्पन्नः॥

योनलः, पुं, (यवस्य नल इव नलः काण्डोऽस्य। पृषोदरादिः।) शस्यविशेषः। तत्पर्य्यायः। यवनालः २ जूर्णकयः ३ देवधान्यम् ४ जोन्नाला ५ वीजपुष्पिका ६। इति हेमचन्द्रः। ४। २४४॥

योनिः, पुं, स्त्री, (यौति संयोजयतीति। यु+"वहिश्रिस्रुयुद्रुस्त्राहात्वरिभ्यो नित्।" उणा० ४। ५१। इति निः।) आकरः। इति मेदिनी। ने, १६॥ कारणम्। (यथा, उत्तररामचरिते। ६।

"ऋषयो राक्षसीमाहुर्वाचमुच्चण्डतामयीः। सा योनिः सर्व्ववैराणां सा हि लोकस्य निर्ऋतिः॥")

जलम्। इति हेमचन्द्रः। ३। २४६॥ (कुग्रहीयस्यनदीविशेषः। यथा,मार्कण्डेये।१२१।७१।

"धूतपापा नदी नाम योनिश्चैव पुनः स्मृता। सीता द्वितीया विज्ञेया सा चैव हि निशास्मृता॥"

तन्नशास्त्रविशेषः। यथा, महासिद्धिसारस्वते।

"सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम्। तन्त्रान्तरञ्च देवेशि! नवरत्नेश्वरं तथा॥")

प्राणिनामुत्पत्तिस्थानम्। इति चिकित्साशास्त्रम्। तच्च चतुरशीतिलक्षप्रकारम्। यथा,—

"चतुरशीतिलक्षाणि चतुर्भेदाश्च जन्तवः। अण्डजाः स्वेदजाश्चैव उद्भिज्जाश्च जरायुजाः॥ एकविंशतिलक्षाणि ह्यण्डजाः परिकीर्त्तिताः। स्वेदजाश्च तथैवोक्ता उद्भिज्जास्तत्प्रमाणतः॥ जरायुजाश्च सावन्तो मनुष्याद्याश्च जन्तवः। सर्व्वेषामेव जन्तूनां मानुषत्वं सुदुर्लभम्॥"

इति श्रीगरुडपुराणे प्रेतकल्पे धर्म्मप्रकटनो नाम २ अध्यायः॥ * ॥ अन्यच्च।

"स्थावराख्यिंशल्लक्षञ्च जलजो नवलक्षकः। कृमिजा दशलक्षञ्च रुद्रलक्षञ्च पक्षिणः॥ पशवो विंशलक्षञ्च चतुर्लक्षञ्च मानवाः। एतेषु भ्रमणं कृत्वा द्विजत्वमुपजायते॥"

इति कर्म्मविपाकः॥

("भूतानामष्टविधा योनिर्भवति जरायुजाण्डजस्वेदोद्भिदः। तासां खलु चतसृणामपि योनीनामेकैका योनिरपरिसङ्ख्येयभेदा भवति भूतानामाकृतिविशेषापरिसङ्ख्येयत्वात्। तत्र जरायुजानामण्डजानां प्राणिनामेते गर्भकरा भावा यां यां योनिमापद्यन्ते तस्यां तस्यां योनौ तथा तथा रूपा भवन्ति। तद्यथा कनकरजतताम्रत्रपुसीसा आविध्यमानास्तेषु तेषु 'मधूच्छिष्टविम्बेषु। ते यदा मनुष्यबिम्बमापद्यन्ते तदा मनुष्यविग्रहेण जायन्ते। तस्मात् समुदायात्मकः खलु गर्भो मनुष्यविग्रहेण जायते मनुष्यो मनुष्यप्रभव इत्युच्यते तद्योनित्वात्।" इति चरके शारीरस्थाने ह्यतीयेऽध्याये॥ * ॥)

भगम्। इत्यमरः।२।६।७६॥ तत्पर्य्यायः। वराङ्गम् २ उपस्थः ३ स्मरमन्दिरम् ४। इति राजनिर्घण्टः॥ रतिगृहम् ५ जन्मवर्त्म ६ अधरम् ७ अवाग्देशः ८ प्रकृतिः ९ अपथम् १० स्मरकूपकः ११ अग्रदेशः १२ प्रकृतिः १३ पुण्ड्री १४ संसारमार्गकः १५ संसारमार्गः १६ गुह्यम् १७ स्मरागारम् १८ स्मरध्वजम् १९ रत्नगृहम् २० रतिकुहरम् २१ कलत्रम् २२ अधः २३। इति शब्दरत्नावली॥ रतिमन्दिरम् २४ स्मरगृहम् २५ कन्दर्पकूपः २६ कन्दर्पसमाधः २७ कन्दर्पसन्धिः २८ स्त्रीचिह्नम् २९। इति जटाधरः॥ स तु गर्भस्थायाः सप्तभिर्मासैर्भवति। इति सुश्रुतः॥ * ॥ तस्य लक्षणं यथा,—

"शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः। वामोन्नतश्चेत् कन्यायाः पुत्रजो दक्षिणोन्नतः॥ आखुरीमा गूढसन्धिः सुश्लिष्टः संहतः पृथुः। तुङ्गः कमलवर्णाभः शुभोऽत्यल्पलोमकः॥ कुरङ्गखुरवृषो यस्याः शुक्तिकोदरसन्निभः। रोमशो विवृतास्यश्च दक्षनासोऽतिदुर्भगः॥ शृङ्गावर्त्तो भगो यस्याः सा गर्भमिह नेच्छति। चिपिटः कर्पराकारः किञ्चिदौपदको भगः॥ वंशपत्रसपत्राभो गजरोमोच्छ्रयाश्रिकः। विकटः कुटिलाकारो लम्बगल्लस्तथाशुभः॥"

इति काशीखण्डे ३० अध्यायः॥ * ॥

अपि च।

"शृङ्गनाभ्याकृतिर्योनिस्त्रावर्त्ता सा च कीर्त्तिता। तस्यास्तृतीये त्रावर्त्ते गर्भशय्या प्रतिष्ठिता॥"*॥

अथ योनिरोगाधिकारः।

"तत्र योनिरोगाणां निदानान्याह।

'मिथ्याहारविहाराभ्यां दुष्टैर्दोषैः प्रदूषितात्। आर्त्तवाद्दीर्य्यतस्यापि देवाद्वा सुभगे मदात्॥'

रोगिणीनां योनीनां नामान्याह।

'उदावर्त्ता तथा वन्ध्या विप्लुता च परिप्लुता। वातला योनयो रुग्णा वातदोषेण षड्विधाः॥ षड्विधा पित्तदोषेण तत्रादौ लोहितक्षरा। प्रसंसिनी वामिनी च पुत्रघ्नी पित्तला तथा॥ अत्यानन्दा कर्णिनी च चरत्यानन्दपूर्व्विका। अतिपूर्व्वापि सा श्लेष्मा श्लेष्मला च कफादिमाः॥ खड्गाख्यिनी च महती सूचीवक्त्रा त्रिदोषिणी। षडेता योनयः प्रोक्ताः सर्व्वदोषप्रकोपतः॥'

अथ तासां लक्षणान्याह।

'सा फेनिलसुदावर्त्ता रजःशुक्रे च सुस्रुतः। वन्ध्या नष्टार्त्तवा श्लेष्मा विप्लुता नित्यवेदना॥ परिप्लुता या भवति गात्रधर्म्मे रुजा भृशम्। वातला कर्कशा स्तब्धा शूलनिस्तोदपीड़िता॥ चतस्रश्चापि चाद्यासु भवन्त्यनिलवेदनाः॥'

अनिलवेदनास्तोदादयः॥ वातजायां त्वतिग्रथिता वातवेदना बोद्धव्या। वातला इत्यन्वयात्॥ * ॥

'सदाहं चरते रक्तं यस्याः सा लोहितक्षरा। प्रसंसिनी संसते च क्षोभिता दुःप्रजायिनी॥'

क्षोभिता विमर्दिता संसते स्खलनात् भवति। दुःप्रजायिनी दुष्टप्रजननशीला।

'संवातसुश्लिष्टदोषौ वामिनी रजसा युतम्। स्रवतं स्रवतं हन्ति गर्भं पुत्रघ्नी रक्तसंस्रवात्॥'

पुत्रघ्नशब्दोऽपत्योपलक्षकः।

'अत्यर्थं पित्तला योनिर्दाहपाकज्वरान्विता। चतस्रश्चापि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत्॥'

अत्यानन्दानसन्तोषं ग्राम्यधर्म्मेषु विन्दति। कर्णिन्यां कर्णिका योनौ श्लेष्मास्रग्भ्यां प्रजायते॥'

कर्णिका मांसस्य कर्णिकारो ग्रन्थिः॥

'मैथुने चरणापूर्व्वं पुरुषादतिरिच्यते।'

अतिरिच्यते रजो स्रवति इत्यर्थः।

'बहुशुक्रातिचरणा तयोर्व्वीर्यं न तिष्ठति॥'

बहुशः वारं वारं अतिरिच्यते तयोः चरणातिचरणयोः।

'श्लेष्मला पिच्छिला योनिः कण्डूयुक्तातिशीतला।

चतस्रश्वपि चाद्यासु श्लेष्मलिङ्गाक्ष्यो भवेत् ॥
अनार्तवास्तनी खल्वी खरस्पर्शा च मैथुने ॥'
ऊस्तनी ईषत् स्तनौ यस्यां सा अत्र लक्ष्या खल्वी। अक्ष्निीमाह।
'महामेढ्रगृहीतायां बालायां अक्ष्निी भवेत् ॥'
महामेढ्रः पुरुषः तेन गृहीतायां बालायाः सूक्ष्मयोनिच्छिद्रायां अक्ष्निी अक्षवल्लम्बमाना योनिर्भवति।
'विवृतातिमहायोनिः सूचीवक्त्रातिसंवृता।
मर्म्मलिङ्गसमुत्थानात् सर्व्वदोषप्रकोपना।
चतस्रश्वपि चाद्यासु सर्व्वलिङ्गनिदर्शनम् ॥'
असाध्या योनीराह।
'पञ्चासाध्या भवन्त्योह योनयः सर्व्वदोषजाः ॥'
पञ्च खल्वीप्रभृतयः ॥ * ॥
अथ योनिकन्दस्य निदानमाह।
'दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात्।
क्षताच्च नखदन्ताद्यैर्व्वाताद्याः कुपिता यथा ॥'
वाताद्याः कुपिता यथा यथा निदानकुपिता वाताद्याः ॥ * ॥ रूपमाह।
"पूयशोणितसङ्काशं लकुचाकृतिसन्निभम्।
जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः॥"
लकुचाकृतिसन्निभं लकुचाकाराकारम्। गुड़कमत्र विशेष्यं बोद्धव्यम् ॥ * ॥ वातजादिभेदेन रूपमेदमाह।
"रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत्।
दाहरागज्वरयुतं विद्यात् पित्तात्मकं तु तम्॥
तिलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम्।
सर्व्वलिङ्गसमायुक्तं सन्निपातात्मकं भवेत् ॥"* ॥
अथ योनिरोगाणां चिकित्सा। तत्र वन्ध्याचिकित्सा। तस्या लक्षणमाह। वन्ध्या नष्टार्त्तवा ज्ञेयेति। ततः प्रथमतो नष्टार्त्तवाचिकित्सा।
'आर्त्तवादर्शने नारी मत्स्यान् सेवेत नित्यशः।
काञ्जिकञ्च तिलान् माषानुदश्वित्तथा दधि ॥
इक्ष्वाकुवीजदन्तीचपलागुड़दमनकिंशयवशूकैः।
सक्षत्कौरैर्व्वमेर्योनिर्गता कुसुमसञ्जननी ॥'
इक्ष्वाकुः कटुतुम्बी। चपला पिप्पली। दमनो मदनफलम्। किंशं सुराबीजम्।
'घीतं ज्योतिष्मतीपत्रं राजिकोग्रासनं चाहम्।
घृतेन पयसा पिष्टं कुसुमं जनयेद्ध्रुवम् ॥'
ज्योतिष्मती कटभीवृक्षविशेषः करञ्ज इति लोके। पयसा दुग्धेन ॥ * ॥ अथ वन्ध्याचिकित्सा।

'वला सिता सातिबला मधूकं
वटस्य शुङ्गं गजकेशरञ्च।
एतन्मधुक्षीरघृतैर्निपीय
वन्ध्या सुपुत्रं नियतं प्रसूते ॥

अश्वगन्धाकषायेण सिद्धं दुग्धं घृतान्वितम्।
ऋतुस्नाताङ्गना प्रातः पीत्वा गर्भं दधाति हि।
पुष्यार्द्धृतं लक्ष्मणाया मूलं दुग्धेन कन्यया।
पिष्ट्वा पीत्वा ऋतुस्नाता गर्भं धत्ते न संशयः ॥
कुरण्टमूलं धातक्या कुसुमानि वटाङ्कुराः।
नालोत्पलं पयोयुक्तमेतद्गर्भप्रदं ध्रुवम् ॥

यावला पिबति प्रात्यपिप्पलं
जीरकेण सहितं हिताशना।
श्वेतया विधिखपुष्पया युतं
सा सुतं जनयतीह नान्यथा ॥"

श्वेतकुसुमया शरपुंखया सह।
"पत्रमेकं पलाशस्य पिष्ट्वा दुग्धेन गर्भिणी।
पीत्वा पुत्रमवाप्नोति वीर्य्यवन्तं न संशयः ॥
शूकरशिम्बीमूलं मध्वा दधि फलस्य सपयस्कम्
पीत्वाथोभयलिङ्गीबीजं कन्यां न सूते स्त्री ॥
पुत्रमञ्जारीमूलं विष्णुक्रान्तेग्रालिङ्गिनीसहिता।
एतत् गर्भेऽहदिनं पीत्वा कन्यां न सर्व्वथा सूते ॥
पुत्रमञ्जारी पतञ्जिया तस्या मूलम्। ग्रालिङ्गिनी पचगुरिया ॥ * ॥ गर्भप्रदरभेषजकथनावसरे गर्भाजनकमपि भेषजमाह।
'पिप्पलीविड्डटङ्कणसमचूर्णं या पिबेत् पयसा।
ऋतुसमये नहि तस्या गर्भः संजायते क्वापि ॥

आरनालपरिपेषितं चाहं
या जयाकुसुममत्ति पुष्पिणी।
सत्पुराणगुड़सृष्टिसेविनी
सा दधाति नहि गर्भमङ्गना ॥ * ॥

तासु योनिषु चाद्यासु स्नेहादिक्रम इष्यते।
वस्त्यभ्यङ्गपरीषेकप्रलेपपिचुधारणम् ॥'
वस्तिरुत्तरवस्तिः। क्रमश्चिकित्सा।
'नतवार्त्ताकिनीकुष्ठसैन्धवामरदारुभिः।
तिलतैलं पचेन्नारी पिचुं तस्य विधारयेत् ॥
विद्रुतायां सदा योनौ यथा तेन प्रशाम्यति ॥'
नतं तगरम्।
'वातलां कर्कशां स्तब्धामल्पस्पर्शां तथैव च।
कुम्भीस्नेहैरुपचरेदन्तर्व्वेश्मनि संवृते ॥
धारयेद्वा पिचुं योनौ तिलतैलस्य सा सदा।
पित्तलानाञ्च योनीनां सेकाभ्यङ्गपिचुक्रियाः ॥
घृताः पित्तहराः कार्य्याः स्नेहनार्थं घृतानि च।
प्रसंसिनीं घृताभ्यक्तां क्षीरस्निग्धां प्रवेशयेत् ॥
पिधाय वेशवारेण ततो बन्धं समाचरेत्।
मुण्डीमरिचकृष्णाभिर्धान्यकाजाजिदाड़िमैः ॥
पिप्पलीमूलसंयुक्तैर्व्वेशवारः सूतो बुधैः ॥
धात्रीरसं सितायुक्तं योनिदाहे पिबेत् सदा।
सूर्य्यक्रान्ताभवं मूलं पिबेद्वा तण्डुलाम्बुना ॥
योन्यास्तु पूयस्रावियां शोधनद्रव्यनिर्म्मितैः।
सगोमूत्रैः सलवणैः पिण्डैः संपूरणं हितम् ॥'
शोधनद्रव्याणि निम्बपत्रादीनि।
'दुग्धेन पिच्छिलां वापि चूर्णैः पञ्चकषायजैः।
पूरयेद्वारयेद्राजवृक्षादिक्वथितामुना ॥"
पञ्च कषायाः। वचावासापटोलप्रियङ्गुनिम्बाः। राजवृक्षादि धनवेहरा।
"पिप्पल्यामरिचैर्माषैः घृताक्ताकुष्ठसैन्धवैः।
वर्त्तिस्तुल्या प्रदेशिन्या योनौ श्लेष्मविशोधिनी ॥
तुल्या प्रदेशिन्या दैर्घ्येण परिणाहेन च।
कर्णिन्यां वर्त्तयो देयाः शोधनद्रव्यनिर्म्मिताः ॥
गुड़ूचीत्रिफलादन्तीक्वथितोदकधारया।
योनिं प्रक्षालयेत्तेन तत्र कण्डूः प्रशाम्यति ॥
सुवृपुष्पं सखदिरं पथ्या जातीफलं तथा।

विल्वीं पूगञ्च संचूर्ण्य वस्त्रपूतं क्षिपेद्भगे।
योनिर्भवति संकीर्णा न स्रवेच्च जलं ततः ॥
कपिकच्छूभवं मूलं क्वाथयेद्विधिना भिषक्।
योनिः सङ्कीर्णतां याति क्वाथेनानेन धावनात् ॥
जीरकदधितयं क्षौद्रा सुयुवी सुरभिर्व्वचा।
वासकः सैन्धवश्चापि यवक्षारो यवानिका ॥
एषां चूर्णं घृते किञ्चित् भृष्ट्वा खण्डेन मोदकम्।
कृत्वा खादेद्यथावह्नि योनिरोगाद्विमुच्यते ॥
मञ्जिष्ठा मधुकं कुष्ठं त्रिफला मूर्व्वरा बला।
मेदे पयस्या काकोली मूलञ्चेवाश्वगन्धजम् ॥
अजमोदा हरिद्रे द्वे प्रियङ्गुकटुरोहिणी।
उत्पलं कुसुदं द्राक्षा काकोल्यौ चन्दनद्वयम्
एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
घृतावशेषं क्षीरं घृताज्ञेयं चतुर्गुणम्।
सर्पिरेतन्नरः पीत्वा स्त्रीषु नित्यं वृषायते।
पुत्रान् जनयते वीरान् मेधाढ्यान् प्रियदर्शनान् ॥
या चैवास्थिरगर्भा स्यात् पुत्रं वा जनयेन्मृतम्।
अल्पायुषं वा जनयेत् या च कन्यां प्रसूयते ॥
योनिरोगे रजोदोषे परिस्रावे च शस्यते।
प्रजावर्द्धनमायुष्यं सर्व्वग्रहनिवारणम्।
नाम्ना फलघृतं श्लेतदश्विभ्यां परिवर्णितम् ॥
अनुक्तं लक्ष्मणामूलं क्षिपन्त्यत्र चिकित्सकाः।
जीवदृतुसेकवर्णाया घृतत्वाच्च प्रयुज्यते।
अरण्यगोमयेनेह वह्निज्वाला च दीयते ॥'
मेदे मेदा महामेदा तयोरभावे घृतावरी द्विगुणा देया। पयस्यात्र क्षीरकाकोली काकोलीयुगलाभावे अश्वगन्धा द्विगुणा देया। प्रियङ्गुस्थाने केचिद्विङ्गु पठन्ति। पयस्या काकोलीयुक्ता पुनः काकोल्याविति काकोलीक्षीरकाकोल्यौ द्वैगुण्यार्थं एतस्य फलघृतस्य पाठो नानातन्त्रेषु नानाविधः। तत्र द्विङ्गुवचातगरजीवकर्षभका एवाधिकाः। तत्र जीवकर्षभयोरभावे विदारीकन्दो द्विगुणो देयः। फलघृतं सकलयोनिरोगेषु ॥ * ॥

अथ योनिकन्दस्य चिकित्सा।
'गैरिकाम्बास्थिजन्तुघ्नरजन्यञ्जवकट्फलम्।
पूरयेद्योनिमेतेषां चूर्णैः क्षौद्रसमन्वितैः ॥
त्रिफलायाः कषायेण सक्षौद्रेण च सेचयेत्।
प्रमदा योनिकन्देन व्याधिना परिमुच्यते ॥'
अथ प्रसङ्गात् गुह्यरोगाणां चिकित्सा।
'श्वेतैरातिविषासुस्तमोचपद्मकैः घृतं जलम्।
दद्याद्गर्भे प्रचलिते प्रदरे कुक्षिरुज्यपि ॥'
कुक्षिरुक् उदरव्यथा। चलितगर्भस्यापने श्वेतैरादिक्वाथः ॥ * ॥

अथ गर्भस्रावपातयोर्निदानम्।
'गाम्बधर्म्माध्वगमनयानासनप्रपीड़नैः।
ज्वरोपवासोत्पतनग्रहाराजीर्णधावनैः ॥
वमनाच्च विरेकाच्च कृत्स्ननाड्यधपातनात्।
तीक्ष्णधारोष्णकटुकतिक्तरूक्षनिषेवणात् ॥
वेगाभिघाताद्विषमादासनाच्छयनाद्व्यात्।
गर्भे पतति रक्तस्य सम्भूलं दर्शनं भवेत् ॥'

गर्भपातनात् नियमे गर्भे पातनशीलं द्रव्यं तस्मात्। गर्भस्य स्रावपातयोः पूर्व्वरूपमाह। गर्भे पतितीत्यादि। पतति स्रावेण पातेन वा पतिष्यति स्रावपातयोरवधिमाह।

'आचतुर्थात्ततो मासात् प्रस्रवेद्गर्भविद्रवः।
ततः स्थिरशरीरस्य पातः षष्ठमषष्ठयोः॥'

आचतुर्थात् मासात् चतुर्थमासपर्य्यन्तम्। गर्भस्य विद्रवः। शोणितरूपगर्भः। स्रवति शोणितमिति भोजवचनात्। स्थिरशरीरस्य कठिनशरीरस्य गर्भस्य। गर्भपातस्य दृष्टान्तं दर्शयति।

'गर्भोऽभिघातविषमासनपीड़नाद्यैः
पक्वं द्रुमादिव फलं पतति क्षणेन॥'

यथा दृष्टान्तभूतं पक्वं फलमभिघातेनाकाल एव पतति तथा गर्भोऽप्यभिघातादिना अकालेऽपि पतति॥ *॥ अथ गर्भस्रावस्य चिकित्सा।

'गुर्व्विण्या गर्भतो रक्तं स्रवेद्यदि सहुर्मुहुः।
तन्निरोधाय सुस्निग्धमुत्पलादिशृतं पिबेत्॥'

उत्पलादिगणमाह।

'उत्पलं नीलमारक्तं कह्लारं कुमुदं तथा।
श्वेताम्भोजञ्च मधुकमुत्पलादिरयं गणः॥
संशोधितो हरत्येव दाहं तृष्णां हृदाश्रयम्।
रक्तपित्तञ्च मूर्च्छाञ्च तथा हृद्विभ्रमोद्भवम्॥'

अथ गर्भपातस्य उपद्रवानाह।

'प्रसंशमाने गर्भे स्याद्दाहः शूलञ्च पार्श्वयोः।
पृष्ठरुक् प्रदरानाहौ मूत्रसङ्गश्च जायते॥'

प्रसंशमाने पतति॥ *॥ अथ गर्भस्य स्थानान्तरगमने चोपद्रवानाह।

'स्थानात् स्थानान्तरं तस्मिन् प्रयात्यपि च
जायते।
आमपक्वाशयादौ तु क्षोभः पूर्व्वेऽप्युपद्रवाः॥'

पूर्व्वेऽप्युपद्रवाः पार्श्वशूलादयः॥ *॥

तच्चिकित्सामाह।

'क्षिप्तगुप्तौ क्रियास्तेषु दाहादिषु समाचरेत्।
कुक्कुटाण्डरुपूकाणां मूलैर्गोक्षुरकस्य च॥
शृतं दुग्धं सितायुक्तं गर्भिण्याः शूलशान्तये परम्।
यदंष्ट्रामधुकक्षुद्राम्बानैः सिद्धं पयः पिबेत्।
शर्करामधुसंयुक्तं गुर्व्विणीवेदनापहम्॥'

अम्बानः पुष्पजातिः। अयं वाशपुष्प इति गौड़ादौ प्रसिद्धः।

'स्रुत्कोष्ठागारिका गेहसम्भवाच्च च स्रुत्तिका।
समङ्गा धातकीपुष्पं गैरिकञ्च रसाञ्जनम्॥
तथा सर्व्वरसक्षौद्रान् यथालाभं विचूर्णयेत्।
तच्चूर्णं मधुना लिह्यान्नारी प्रदरशान्तये॥'

स्रुत्कोष्ठागारिकासम्भवा स्रुत्कोष्ठागारिका वरटी तन्निर्म्मितगृहभवा स्रुत्तिका। समङ्गा बन्धालुः।

'कसेरुत्पलशृङ्गाटकल्कं वा पयसा पिबेत्।
यकृद्वचारसोनाभ्यां हिङ्गुसौवर्चलान्वितम्।
आनाहे तु पिबेत् दुग्धं गुर्व्विणी सुखिनी
भवेत्॥'

सौवर्चलं चौहार इति लोके।

'क्षुण्णपक्वकमूलानां कल्केन विपचेत् पयः।
ततः पयो गुर्व्विणी पीत्वा मूत्रसङ्गाद्विमुच्यते॥
प्रालीक्षुकृष्णकाण्डैः स्यात् प्रस्थेन क्षुण्णपक्वकम्।
एषां मूलं क्षुण्णादाद्दर्पित्ताश्वड्मूत्रसङ्गहृत्॥'*॥

अथ प्रसूतायाः योनेः क्षतादेश्चिकित्सा।

'तुम्बीपत्रं तथा लोध्रं समभागं सुपेषयेत्।
तेन लेपो भगे कार्य्यः शीघ्रं स्यादयोनिरक्षता॥
पलाशोडुम्बरफलं तिलतैलसमन्वितम्।
योनौ विलिप्तं विधिना गाढ़ीकरणमुत्तमम्॥"

इति भावप्रकाशः॥ *॥

अथ कुयोनिप्राप्तिकारणानि।

"हविर्भुङ्क्ते न यो विप्रो गोविन्दं नार्च्चयन्ति ये।
लभन्ते नात्मविद्याञ्च सुतीर्थविमुखाश्च ये॥
सुवर्णं वस्त्रताम्बूलं रत्नमन्नं फलं जलम्।
आर्त्तेभ्यो न प्रयच्छन्ति सर्व्वे सुकृतदारकाः॥
ब्रह्मस्वञ्च स्त्रीधनानि लोभादेव हरन्ति ये।
बलेन छद्मना वापि धूर्त्ताश्च परवञ्चकाः॥
नास्तिकाः कुहकाश्चौरा ये चान्ये वकवृत्तयः।
बालवृद्धातुरस्त्रीषु निर्दयाः सत्यवर्ज्जिताः॥
अधिदा गरदा ये च ये चान्ये कूटसाक्षिणः।
अगम्यागामिनः सर्व्वे ये चान्ये ग्रामयाजिनः॥
वार्द्धुषिकरसम्पन्ना वर्णाधिधर्म्मवर्जिताः।
देवोपदेवद्युनरक्षोयक्षादिसेविनः॥
सर्व्वदा मादकद्रव्यपानमत्ता हरिद्विषः।
देवतोच्छिष्टपतितवृषाद्यान्नभोजिनः॥
असत्कर्म्मरता नित्यं सर्व्वपातकपापिनः।
पाषण्डधर्म्माचरणाः पुरोधोवृत्तिजीविनः॥
पिप्पलाढकसापत्यखदिरत्यागिनश्च ये।
ये कदर्य्याश्च क्षुद्राश्च नास्तिका धर्म्मदूषकाः॥
त्यजन्ति स्वामिनं युद्धे त्यजन्ति शरणागतम्।
गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषकाः॥
मद्याचैरेषु सर्व्वेषु प्रतिग्रहरताश्च ये।
परद्रोहरता ये च तथा ये प्राणिहिंसकाः॥
परापवादिनः पापा देवतागुरुनिन्दकाः॥
कुप्रतिग्राहिणः सर्व्वे सम्भवन्ति पुनः पुनः॥
प्रेतराक्षसपैशाचतिर्य्यग्वृक्षकुयोनिषु।
न तेषां सुखलेशोऽस्ति इह लोके परत्र च॥
तस्मात् त्वञ्च निजिहार्थं विहितं कर्म्म कारयेत्।
यज्ञं दानं तपस्तीर्थं मन्त्रं देवं गुरुं भरेत्॥
नाचरेत् कुत्सितं कर्म्म मनसा च कदाचन।
विपाकं कर्म्मणां दृष्ट्वा योनिकोटिषु दुःसहम्॥
चतुर्भिरपि वर्णैस्तु सेव्यो धर्म्मो निरन्तरम्॥"

इति पाद्मोत्तरखण्डे १८ अध्यायः॥ *॥

योनिदुष्टाया असाध्यत्वं यथा,—

"साध्वी स्त्री माढतुल्या च सर्व्वथा हितकारिणी।
असाध्वी वैरतुल्या च शृण्वतत्सम्भवादिकम्॥
सुखदुष्टा योनिदुष्टा चेत्यसाध्वीति विश्रुता॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे २ अध्यायः॥*॥

पापपुण्यफलं अधमोत्तमयोनिप्राप्तिर्यथा,—

"पापपुण्यफलं लोके प्रत्यक्षं खलु दृश्यते।
देवदानवमानुष्यतिर्य्यक्त्वं कृमियोनिता॥
नानायोनिषु जन्मानि नानाव्याधिप्रपीड़िताः।
मरणं बालवृद्धानामन्यत्वं कुजता तथा॥
ऐश्वर्य्यं सुदरिद्रत्वं पाण्डित्यं मूर्खता तथा।
एतादृशाचरे लोके भवन्ति कथमन्यथा॥"

इति पाद्मोत्तरखण्डे २१ अध्यायः॥ *॥

पक्षियोनिप्राप्तिकारणं यथा,—

"इति श्रुतकथो विप्र! सारसं प्राह वानरः।
सम्यक्वेत्ति भवान् नूनं त्वं कथं पक्षितां गतः।
वृत्तान्तमेतं कथय श्रोतुमिच्छामि सारस!॥

सारस उवाच।

कथयिष्यामि तत् कर्म्म येनाहं दुर्गतिं गतः।
पक्षियोनिं गतो येन तत् सर्व्वं श्रोतुमर्हसि॥
धान्यखारीशृतं साग्रसुतृप्तं हि त्वया पुरा।
बहुभ्यो ब्राह्मणेभ्यश्च नर्म्मदायाः परिग्रहे॥
पौरोहित्यमदाल्लोभाद्वञ्चयित्वा द्विजांस्तथा।
किञ्चिद्दत्त्वा तु तेभ्यश्च गृहीतमखिलं मया॥
विप्रसाधारणद्रव्यग्रहणोत्पन्नपातकात्।
पतितः कालसूत्रेऽहं नरके रक्तकर्द्दमे॥
वक्तुमत्र न शक्नोमि दुःखं वानर! दारुणम्।
दैवात् कथमपि प्राप्त उत्तारो नरकाम्बुधेः॥
मया यदि तथापीह शुकुलसुपस्थितम्।
अपहृत्य पुरा कांस्यभाजनं भगिनीगृहात्॥
द्यूतकर्म्मे मया दत्तं तेन मे सारसी गतिः॥
दृश्यश्च ब्राह्मणो पूर्व्वं कांस्यचौरौ सुदारुणौ।
तेनेह सारसौ जातौ मद्भार्य्या सहधर्म्मिणी।"

इति तत्रैव १६। २० अध्यायौ॥ *॥

पापिनां नरकभोगानन्तरं स्थावरादियोनिप्राप्तिर्यथा,—

"स्थावराः कृमयोऽब्जाश्च पक्षिणः पशवो नराः।
धार्म्मिकाश्चिद्दशाच्छुद्धोच्चिश्च यथाक्रमम्॥
सहस्रभागप्रथमा द्वितीयाशुक्रमास्तथा।
सर्व्वे ह्येते महाभाग यावच्छुक्तिसमाश्रयाः।"

इति विष्णुपुराणे २ अंशे ५ अध्यायः।

"पापिनां नरकभोगानन्तरं स्थावराद्यासूत्तरोत्तरसृतृद्धास्तु नवधा भिन्नासु योनिषु जन्माक्रममाह। स्थावरा इति। अन्ना मत्स्यादयः। धार्म्मिका नरेष्वेव पुण्यविशेषैश्च केचिच्चोत्तिष्ठन्ति सुसुचवश्च यथाक्रमं भवन्तीति शेषः। तेषाञ्च पूर्व्वबाहुल्यसूत्तरोत्तराल्पत्वाह सहस्रेति। द्वितीयाशुक्रमाः द्वितीयोऽशुक्रमः उद्देशो येषां द्वितीयस्थानेऽशुक्रान्ता ये क्रमयस्ते सहस्रभागप्रथमाः सहस्रभागाः सहस्रगुणाः प्रथमाः प्रथमनिर्द्दिष्टाः स्थावरा येषां ते। कृमिभ्यः सहस्रगुणमधिकाः स्थावराः। तच्छतसहस्रभागाः कृमयः इत्यर्थः। पक्ष्यन्नापाठेऽपि द्वितीयस्थानेऽशुक्रान्तात् कृमिवर्गात् सहस्रगुणाः स्थावरा इत्येवार्थः। तथा सर्व्वे ह्येत इति। यथा स्थावराः स्थानान्तरनिर्द्दिष्टेभ्यः कृमिभ्यः सहस्रगुणमधिकाः। तथा कृमयः स्थानान्तरनिर्द्दिष्टेभ्योऽब्जेभ्यः सहस्रगुणमधिकाः। एवं पक्ष्यादिष्वपि द्रष्टव्यम्। मोक्षं सम्यगाश्रयन्ति इति मोक्षसमाश्रया सुसुचवो ज्ञाननिष्ठात्तृपर्य्यन्तमेवं पूर्व्वपूर्व्वादुत्तरोत्तरन्यूनत्वेन जन्म-

क्रमः। ततः परं मुक्तिः। इतश्च संसारिजीव-बाहुल्यकथनं मोक्षस्य दुर्लभताख्यनार्थम्। अयञ्च नवधा निर्दिष्टो जन्मक्रमः प्रायिक एव। तदुक्तमादित्यपुराणे।

युतक्रमेष्वापि मानुष्यं प्राप्यते पुण्यगौरवात्। विचित्रा गतयः पुंसां कर्म्मणां गुरुलाघवैः॥"

इति तट्टीका॥

कुयोनिमोचनं यथा,—

वाराह उवाच।

"येन गर्भं न गच्छेत तन्मे ब्रूहि हि माधवि!। कथयिष्यामि ते देवि सर्व्वधर्म्मविनिश्चयम्॥ कृत्वापि विपुलं कर्म्म आत्मानं न प्रशंसति। कुर्व्वते बहुकर्म्माणि गुह्येनैवान्तरात्मना॥ कृत्वापि मम कर्म्माणि मत्प्रियाणि वसुन्धरे!। नैव कुर्व्वन्त्यहङ्कारं क्रोधञ्चैव न गच्छति॥ समं पश्यति चित्तेन लाभालाभविवर्जितः। पञ्चानामिन्द्रियाणाञ्च समर्थो निग्रहे रतः॥ कार्य्याकार्य्ये विजानाति सर्व्वधर्म्मेषु निश्चितः। शीतोष्णवातवर्षादिक्षुत्पिपासासहश्च यः॥ यो दरिद्रो निराजस्कः सत्यवागनसूयकः। स्वदारनिरतो नित्यं परदारविवर्जितः॥ सत्यवादी विशुद्धात्मा नित्यं भागवतप्रियः। संविभागी विशेषज्ञो नित्यं ब्राह्मणवत्सलः॥ प्रियवादी द्विजानाञ्च मम कर्म्मपरायणः। कुयोनिन्तु न गच्छेत मम लोकाय गच्छति॥"

वियोनिमोचनं यथा,—

"अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे!। यो वियोनिं न गच्छेत मम कर्म्मपरायणः॥ जीवहिंसानिवृत्तस्तु सर्व्वभूतहितः शुचिः। सर्व्वत्र समतायुक्तः समलोष्टाश्मकाञ्चनः॥ बाल्ये स्थितोऽपि वयसि शान्तो दान्तः शुभे रतः। ज्ञानं नैव विजानाति परेभ्यः पञ्चतं क्वचित्॥ ज्ञानञ्च संस्मरेत् स्तोत्रं सत्यञ्च न जल्पति। अलोकेषु निवृत्तो यः पर्य्येति ज्ञाननिश्चयः॥ निजञ्च धृतिमान् किञ्चित् परोक्षेऽपि न च क्षिपेत्। ऋतुकालेऽभिगच्छेत स्वपत्न्यर्थं स्वकां स्त्रियम्॥ ईदृशास्तु नरा भद्रे! मम कर्म्मपरायणाः। ते वियोनिं न गच्छन्ति मम गच्छन्ति सुन्दरि॥"

तिर्य्यग्योनिमोचनं यथा,—

वाराह उवाच।

"गुह्यानां परमं गुह्यं तच्छृणुष्व वसुन्धरे!। तिर्य्यग्योनिगताश्चापि यो न गच्छन्ति किञ्चिदपि॥ अश्वमाद्य चतुर्दश्यां मैथुनं यो न गच्छति। सुक्ता परस्य यानानि यश्चैव न विकुत्सति॥ बाल्ये वयस्यपि च यो मम नित्यमनुव्रतः। येन केनापि सन्तुष्टः पिबमाहप्रपूजकः॥ प्राप्तेन जीवति च यः प्रविभागी गुणान्वितः। असूयकः सर्व्वकार्य्येषु स्वतन्त्रो नित्यसंयतः॥ विकर्म्म नाभिकुर्व्वीत कौमारव्रतसंस्थितः। सर्व्वभूतदयायुक्तः सत्येन च समन्वितः॥ मतिमान्नैव तप्येत परार्थेषु कदाचन। ईदृशीं बुद्धिमास्थाय मम कर्म्माणि कुर्व्वते। तिर्य्यग्योनिं न गच्छेत मम लोकाय गच्छति॥"

इति वराहपुराणे योनिगर्भमोचननामाध्यायः॥

योनिकन्दः, पुं, (योनौ कन्द इव।) योनिरोग-विशेषः। तस्य निदानं यथा,—

"दिवास्वप्नादतिक्रोधादत्यायासादतिमैथुनात्। क्षताच्च नखदन्ताद्यैर्व्वाताद्याः कुपिता यथा॥ वाताद्याः कुपिता यथा। यथा निदानकुपिता वाताद्याः। रूपमाह।

'पूयशोणितसङ्काशं जतुचाङ्गेरिसन्निभम्। जनयन्ति यदा योनौ नाम्ना कन्दः स योनिजः॥' जतुचाङ्गेरिसन्निभं जतुचाकाराकारम्। गुह्यकमत्र विशेष्यं बोद्धव्यम्॥ *॥ वातजादि-भेदेन रूपभेदमाह।

'रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्द्दिशेत्। दाहरागज्वरयुतं विद्यात् पित्तात्मकन्तु तत्। तिलपुष्पप्रतीकाशं कण्डूयुक्तं कफात्मकम्। सर्व्वलिङ्गसमायुक्तं सान्निपातात्मकं भवेत्॥' अस्य चिकित्सा। योनिशब्दे द्रष्टव्या।" इति भावप्रकाशः॥

योनिज, त्रि, (योनेर्ज्जायते इति। जन+डः।) योनिनिःसृतशरीरादिकम्। यथा,—

"सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा। योनिजादिर्भवेद्देह इन्द्रियं ब्राह्मणत्रयम्॥"

इति भावापरिच्छेदः॥

"योनिजादीति। योनिजमयोनिजञ्चेत्यर्थः। योनिजमपि जरायुजमण्डजञ्च। जरायुजं मानुषादीनां पशूनां सर्पादीनाम्। अयोनिजं स्वेदजोद्भिदादिकम्। स्वेदजाः क्षमिदंशाद्याः। उद्भिदस्तरगुल्माद्याः। नारकिणां शरीरमप्ययोनिजम्।" इति सिद्धान्तसुक्तावली॥

योनिदेवता, स्त्री, (योनेर्देवता।) पूर्व्वफल्गुणी-नक्षत्रम्। इति हेमचन्द्रः॥

योनिमुद्रा, स्त्री, (योन्याकृतिर्मुद्रा इस्तभङ्गी।) भगवत्याः पूजायां प्रदर्शनीयाङ्गुलीरचितयोन्या-कारमुद्राविशेषः। यथा,—

"पद्म प्रजाप्य कृत्वाथ ॐ ह्रीं श्रीमिति मन्त्रकैः। अन्योन्यं पुरतश्चैव अधिकाल्या यथेच्छया। योनिमुद्रां ततः पश्चात् दर्शयित्वा विसर्ज्जयेत्। ह्रौं प्राणौ प्रहृतीकृत्य कृत्वा तूत्तानमञ्जलिम्। अङ्गुष्ठाग्रद्वयं न्यस्य कनिष्ठाग्रद्वयोत्तरम्। अनामिकायां वामस्य तत्कनिष्ठां पुरो न्यसेत्। दक्षिणस्यानामिकायां कनिष्ठां दक्षिणस्य च। अनामिकायाः पृष्ठे तु मध्यमे विनियोजयेत्। ते तर्ज्जन्यौ कनिष्ठाग्रे तदग्रेणैव योजयेत्। योनिमुद्रा समाख्याता देव्याः प्रीतिकरी मता। त्रिवारं दर्शयेदग्रे मूलमन्त्रेण साधकः। तां मुद्रां शिरसि न्यस्य मण्डलं विन्यसेत्ततः॥"

इति कालिकापुराणे ५१ अध्यायः॥ *॥

पारिभाषिकयोनिमुद्रा यथा। मन्त्रमुक्तावल्याम्।

"उपविश्यासने मन्त्री प्राङ्मुखो वाप्युदङ्मुखः। षट्चक्रं चिन्तयेद्देवि! प्राणायामपुरःसरम्॥ चतुर्दलं स्यादाधारं स्वाधिष्ठानन्तु षड्दलम्। नाभौ दशदलं पद्मं सूर्य्यसंख्यदलं हृदि॥ कण्ठे स्यात् षोड़शदलं भ्रूमध्ये द्विदलन्तथा। सहस्रदलमाख्यातं ब्रह्मरन्ध्रे महापथे॥ आधारे कन्दमध्यस्थं त्रिकोणमतिसुन्दरम्। त्रिकोणमध्ये देवेशि! कामबीजं सुलक्षणम्॥ कामबीजोर्द्ध्वतः सत्त्व स्वयम्भुलिङ्गसुत्तमम्। तस्योपरि पुनर्ध्यायेत् चिल्कलां हंसमाश्रिताम्॥ ध्यायेत् कुण्डलिनीं देवीं स्वयम्भुलिङ्गवेष्टिताम्। चिल्कलया कुण्डलिनीं तेजोरूपां जगन्मयीम्॥ आधाराद्दीनि पद्मानि भित्त्वा तेजःस्वरूपिणीम्। हंसेन मनुना देवीं ब्रह्मरन्ध्रं नयेत् सुधीः॥ सहस्राम्बुजे देवेशि! क्षणमात्रं रमेत प्रिये!। अक्षतं जायते देवि! ततश्चयात् परमेश्वरि!॥ तदुद्भवान्तं देवि! जाचारसमोपमम्। तेनाप्लुतेन देवेशि! तर्पयेत् परदेवताम्॥ षट्चक्रदेवताश्चैव सन्तर्प्यान्तसधारया। आनयेत्तेन मार्गेण मूलाधारं पुनः सुधीः॥ ततस्तु परमेशानि! क्षणमात्रां विचिन्तयेत्। चिच्छक्तिं विद्युतत्त्वाभां ब्रह्मनाड़ीगतान्तराम्॥ तया संग्रथिता ध्येया साधाच्चाग्रतःस्वरूपिणी। अनुलोमविलोमेन मन्त्रवर्णविभेदतः॥ मन्त्रेणान्तरितान् वर्णान् वर्णानन्तरितं मनुम्। कुर्य्यादर्णमयीं मालां सर्व्वमन्त्रप्रकाशिनीम्॥ चरमार्णं मेरुरूपं लङ्घनं नैव कारयेत्। सबिन्दुं वर्णसुद्धार्य्य पञ्चाशत्तं जपेत् सुधीः॥ अष्टोत्तरशतं मूलमन्त्रं ज्ञानेन संजपेत्। वर्गाणामष्टवर्गेण अष्टवारं जपेत् सुधीः॥ अ क च ट त प य श्चा इत्येवाष्टवर्गकाः। योनिमुद्रा महेशानि! तव स्नेहात् प्रकाशिता॥ मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः। शतकोटिजपेनापि तस्य सिद्धिर्न जायते॥"

इति शाक्तानन्दतरङ्गिणी॥

योनिरोगः, पुं, (योनेः रोगः।) भगगदः। (यथा, सुश्रुते। १। ४५।

"मूलोदावर्त्तातिसारप्रवाहिकायोनिरोगगर्भ-स्रावरक्तपित्तश्रमक्लमहरम्।" *॥) अस्य निदानादिर्योनिशब्दे द्रष्टव्यः॥

योन्यर्शः, [स्] क्ली, (योनिजातमर्शः।) योनि-जातरोगविशेषः। तत्पर्य्यायः। कन्दसंज्ञम् २। इति त्रिकाण्डशेषः॥ (यथा,—

"कैचित्तु भूयांसमेव देशमुपदिशन्त्यर्शसां शिश्न-मपथ्यपथं गलसुखनासिकाकर्णाक्षिवर्त्मानि त्वक्च।" इति चरके चिकित्सास्थाने अष्टमे अध्याये॥)

योषा, स्त्री, (यौति मिश्रीभवतीति। यु मिश्रणे + बाहुलकात् सः। इत्युज्ज्वलदत्तः। १। ६२। स्त्रियां टाप्।) नारी। इत्यमरः। २। ६। २॥ (यथा, देवीभागवते। १। २५। ६।

"यथा दारुमयी योषा नटादीनां प्रचेष्टते ।
तथा सकर्म्मवशगो देहो सर्व्वत्र वर्त्तते ॥")

योषित्, स्त्री, (योषति पुमांसं युञ्जते पुंभिरिति वा । युष्+"हृसृरुहियुषिभ्य इति:।" उणा० १ । ६६ । इति इति:।) नारी । इत्यमरः । १ । ६ । २ ॥ (यथा, मेघदूते । १ । ३६ ।
"गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ॥")
तस्या अवध्यत्वं यथा, वह्निपुराणे ।
"तं प्रेक्ष्य भरतं श्रेष्ठं ब्रह्मघ्नो वाक्यमब्रवीत् ।
अवध्याः सर्व्वभूतानां योषितः सन्यतामिति ॥"

योषित्प्रिया, स्त्री, (योषितां प्रिया ।) हरिद्रा । इति भावप्रकाशः ॥

योषिता, स्त्री, (योषित्+टाप् ।) नारी । यथा,
"स्त्री वधूरबला नारी प्रिया रामा जनिर्म्मनी ।
योषा योषित्स्त्रियोषिता च जोषिज्जोषा च
जोषिता ॥"
इति शब्दरत्नावली ॥
(यथा, सुश्रुते उपनिषदि । २ । १ । ५ ।
"तस्मादग्निः समिधो यस्य सूर्य्यः
सोमात् पर्জन्य ओषधयः पृथिव्याम् ।
पुमान् रेतः सिञ्चति योषितायां
बह्वीः प्रजाः पुरुषात् सम्प्रसूताः ॥")

यौक्तिकः, पुं, (युक्तिं करोतीति । युक्ति+ठञ् ।) नर्म्मसचिवः । इति शब्दरत्नावली ॥ युक्तियोग्ये, त्रि ॥

यौगकः, त्रि, (योगस्यायमिति । योग+अण्+स्वार्थे कन् ।) योगसम्बन्धी । इति सिद्धान्तकौमुदी ॥

यौगिकः, त्रि, (योगाय प्रभवतीति । योग+"योगाद्यच्च ।" ५ । १ । १२६ । इति ठञ् ।) प्रकृतिप्रत्यययोगलभ्यार्थवाचकः । यथा । योगाय प्रभवति । इति योग्यः यौगिकः । इति सिद्धान्तकौमुदी । "योगरूढाच्च रूढाच्च यौगिकाच्चेति ते त्रिधा । आदितेयादिशब्दा यौगिकाः अदितेरपत्यानीति ठक्प्रत्ययेन केवलं योगार्थ एव ।" इत्यलङ्कारकौस्तुभे २ किरणः ॥ * ॥
("यौगिकं नाम लक्षयति विभजते च ।
'योगलभ्यार्थमात्रस्य बोधकं नाम यौगिकम् ।
समासतद्धितान्तञ्च तदन्तमिति तत्त्रिधा ॥'
यन्नाम स्वान्तर्निविष्टशब्दानां योगलभ्यमेव याद्दृग्यार्थस्यान्वयबोधं प्रतिहेतुस्तन्नाम तादृग्यार्थे यौगिकम् । योगरूढन्तु लक्ष्यसमर्पादिदं योगेनावच्छिन्नस्य रूढ्यर्थस्य बोधकं न तु तन्मात्रस्य । तच्च यौगिकं त्रिविधं समासतद्धितान्तं तदन्तञ्चेति । इन्द्रोऽपि समासः खघटकशब्दानामाकाङ्क्षया लभ्यस्य धवखदिरादार्थस्यान्वयबोधकतया यौगिक एव । सर्व्वत्रेदं रूढ्यन्वयेन विशेषणीयं नातः लक्ष्यसमर्पादौ वासुदेवादौ पङ्कजादौ च योगरूढ्यतिप्रसङ्गः । ब्राह्मणी श्वश्रूः शूद्रेत्यादौ डीषादेः स्त्रीत्वबोधके तादृग्यं नाम यौगिकमेव अन्यथा तु स्त्रीत्वादिमति तत्तदर्थे रूढ़मेव नातो विभागस्य व्याघातः ॥ यौगिकेषु समासं लक्षयति ।
'याद्दृग्यस्य महावाक्यस्यान्तस्थादिर्निजार्थके ।
याद्दृग्यार्थस्य धीहेतुः स समासस्तदर्थकः ॥'
याद्दृग्यमहावाक्योत्तरस्थतत्तदादिः स्वार्थस्य याद्दृग्यार्थावच्छिन्नविषयतायाः जिबोधे हेतुस्ताद्दृग्यं तद्वाक्यं तथाविधार्थे समासः । पाचकादिकन्तु पाककर्त्तृत्वार्थकं वाक्यमपि खघटकानेकनाम लभ्यताद्दृग्यार्थकत्वविरहान्न महावाक्यम् । प्रकृत्यर्थमात्रावच्छिन्नप्रत्ययार्थस्यान्वयबोधं प्रत्ययोग्यत्वं वा प्रकृते वाक्यस्य महत्त्वं वाक्यम् । तेन उपकुम्भादौ नाद्यापत्तिर्नवा नीलघटत्वलमित्यादौ नीलघटत्वादिभागेऽतिप्रसङ्गः । चीरपायीत्यादिकन्तु प्रकृत्यर्थावच्छिन्नतद्दर्थस्यान्वयबोधे समर्थोऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य तस्य प्राग्भीजसामान्यस्याप्रत्ययात् । राज्ञः पुरुषत्वमित्यादितो राजन्येव पुरुषभावः प्रतीयते न तु राजपुरुषस्य भावः तद्धितानां प्रकृत्यर्थमात्रान्वितस्वार्थबोधकत्वाद्तो राज्ञः पुरुषेत्यादिभागे न प्रसङ्गः । पायंपायमित्यादिश्चमन्तभागस्तु स्वार्थावच्छिन्नस्य धात्वन्तरार्थस्यैवान्वयबोधको न तु त्वादिप्रत्ययार्थस्य प्रत्ययेत्यादौ समासव्यपदेशोक्त्यादिशब्दसंस्कारप्रयोजको गौणः ॥"

* * * * * *

"यौगिकेषु क्रमप्राप्तं तद्धितान्तं नाम लक्षयति ।
'यन्नाम तद्धितं यच्च यत्क्रमं सद्यदर्थकम् ।
यद्दृश्यं यत्क्रमं तच्च तद्धितान्तं निगद्यते ॥'
यद्यपि नामोत्तरतद्धितत्वं तद्धितोत्तरनामत्वं वा प्रत्येकं बहुगुडो ब्राह्मेत्यादौ व्यभिचारित्वादौ चाव्यापकमेव तद्धितान्तं नाम्नि तथापि याद्दृग्यं नाम यच्च तद्धितं याद्दृग्यानुपूर्व्यवच्छिन्नं सत्याद्दृग्यार्थस्यान्वयबोधे समर्थं ताद्दृग्यानुपूर्व्यवच्छिन्नं तद्दृश्यमपि ताद्दृग्यार्थे तद्धितान्तं नामेत्यर्थः पचतितरामित्यादिकन्तु नामैव न प्रागेव तु तद्धितान्तं तस्यापि लक्ष्यत्वे यः शब्दस्तद्धितं यच्चेति पठनीयं टावादेरपि तद्धितत्वोपगमादजाद्याकृतीत्यादेर्नासंग्रह इति वदन्ति ।
तदन्तं नाम लक्षयति ।
'यद्वाक्यार्थान्वितस्वार्थबोधजन्यं तदाद्दृग्यं भवेत् ।
तद्वाचूत्तरगं तत् स्यात् तदन्तं नाम ताद्दृग्यम् ॥'
यद्वाक्यार्थान्वितस्वार्थान्वयबोधं प्रति याद्दृग्यानुपूर्व्यवच्छिन्नस्य यत्नतो निश्चयः कारणं तद्वाचूत्तरगं तत् तदेव ताद्दृग्यानुपूर्व्यवच्छिन्नं सत् तदन्तं नाम । यथा पाठकपाठ्यमानादि तद्धि धात्वर्थान्वितस्य स्वार्थकर्त्तादेः कर्म्मत्वादावन्वयबोधं प्रति द्वितीयाद्यग्रे ताद्दृग्यानुपूर्व्विकत्वेन निश्चीयमानं हेतुः चैत्रेण ग्रामस्य गन्तव्यमित्यादौ धात्वर्थे स्वार्थमिश्रसाधनत्वादिकं बोधयदपि तथादिकं धात्वर्थनिष्ठविषयतानिरूपितस्वार्थविषयताकबोधजनकत्वेन धात्वर्थान्वितस्वार्थकमेव भावक्तताम्यपि स्वरूपार्थकत्वं व्युत्पादितमेव ॥" इति शब्दशक्तिप्रकाशिका ॥

अगुरुः । तत्पर्य्यायो यथा,—
"अयोगुरुः ससुहिदो यौगिको लोहनामभिः ॥"
इति भारुड़े २०५ अध्यायः ॥)

यौजनशतिकः, त्रि, (योजनशतं गच्छतीति । योजनशत+"क्रोशशतयोजनशतयोरुपसंख्यानम् ।" ५ । १ । ७४ । इत्यस्य वार्त्ति० इति ठञ् ।) योजनशतगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥ (योजनशतादभिगमनमर्हतीति वार्थे योजनशताभिगमनकर्त्ता । इति काशिका ॥)

यौजनिकः, त्रि, (योजनं गच्छतीति । योजन+"योजनं गच्छति ।" ५ । १ । ७४ । इति ठञ् ।) एकयोजनगमनकर्त्ता । इति सिद्धान्तकौमुदी ॥

यौट, ऋ सम्बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) चतुर्दृग्यक्षरी । ऋ, अयुयौटत् । यौटति काष्ठं तक्षा । इति दुर्गादासः ॥

यौड, ऋ सम्बन्धे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) चतुर्दृग्यक्षरी । ऋ, अयुयौड़त् । यौड़ति काष्ठं तक्षा । इति दुर्गादासः ॥

यौतकं, क्ली, (युतकयोर्बंधूवरयोरिदम् । युतक+अण् । युतकमेवेति । स्वार्थे अण् वा ।) यौतुकम् । इति हलायुधरायमुकुटौ । २ । ८ । २८ ॥
(यथा, मनुः । ६ । १३१ ।
"मातुस्तु यौतकं यत् स्यात् कुमारीभाग एव सः ॥"
अस्य विशेषविवरणन्तु यौतुकशब्दे द्रष्टव्यम् ॥)

यौतवं, क्ली, परिमाणम् । इत्यमरः । २ । ६ । ८५ ॥

यौतुकं, क्ली, यौतकम् । विवाहकाले दम्पत्योर्लभ्यं धनम् । उपचारात् अन्नप्राशनादिसंस्कारकाललभ्यमपि । युतकं योनिसम्बन्धः तत्र भवमिति ष्ठञि यौतकम् । युतयोर्बंधूवरयोरिदमिति वा कञि यौतकम् ॥ यौतकसुकारमधमपि ।
यौतकं यौतुकञ्च तत् । इति वाचस्पतिः ॥ यौतकादि तु यद्दृग्यं स दायो हरणञ्च तद्दृत्यामरटीकायां भरतः ॥*॥ स्त्रिया यौतकधनस्याधिकारक्रमो यथा,—
"यत्तु दुहितृमात्राधिकारार्थं गोतमवचनम् ।
'स्त्रीधनं दुहितृणामप्रत्तानामप्रतिष्ठितानाञ्च ।'
यच्च नारदस्य ।
'मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः ॥'
यच्च काात्यायनस्यापि ।
'दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्भवेत् ॥'
यच्च याज्ञवल्क्यस्य ।
'मातुर्दुहितरः श्रेयश्चयात्तास्य ऋतेऽन्वयः ॥'
तानि पूर्व्वोक्तदेवलवचनविरोधेन यौतकधनमात्रविषयाणि । अतएव मनुः । ६ । १३१ ॥
'मातुश्च यौतकं यत् स्यात् कुमारीभाग एव सः ॥'
यौतकं परिणयनलभ्यम् । यु मिश्रण इति धातोर्युत इति पदम् । मिश्रता च स्त्रीपुंसयोरेकशरीरता तच्च विवाहाद्भवति । अस्मिन्नरस्त्रीणि मासैर्मांसानि त्वचा त्वचमिति श्रुतेः । अतो विवाहकाललभ्यं यौतकम् । ततश्च परिणयनलभ्यं स्त्रीधनं दुहितुरेव न पुत्राणाम् । तत्रैव

क्रमार्थं गौतमवचनम्। स्त्रीधनं दुहितॄणामप्रतानामप्रतिष्ठितानाञ्च। प्रथममप्रत्तानां तदभावे प्रत्तानां तदभावे समूढ़ानाम्। स्त्रीधनं दुहितॄणामिति सामान्यतः प्राप्तत्वात्। अप्रत्तानामित्यादेस्तु क्रमार्थत्वात्। तथा, याज्ञवल्क्यः।

'अप्रजःस्त्रीधनं भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपि।
दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्।'

तत्र ब्राह्मादिषु विवाहेषु यल्लब्धमध्यग्निधनं स्त्रिया तत् तस्यां मृतायां प्रथमं दुहितृणामेव तत्रापि प्रथमं कन्यायास्तदभावे प्रत्तायास्तदभावे परिणीतायाः सर्व्वदुहितृभावे च पुत्रस्याधिकारः अप्रजःस्त्रीधने भर्त्तुरधिकारात्। दृष्टस्मृतिना अप्रत्तापदेन अप्रत्तात्वभावे समूढ़ाया अप्यधिकारः सूचितः।

'ब्राह्मादेवार्षगान्धर्व्वप्राजापत्येषु यद्धनम्।
अप्रजायामतीतायां भर्त्तुरेव तदिष्यते॥
यत्तस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु।
अतीतायामप्रजायां मातापित्रोस्तदिष्यते॥'

अस्याः स्याद्धनमिति पराधीनं पूर्व्वत्रानुषज्यते। तेन विवाहेषु यद्धनं दत्तमिति सम्बन्धात् वैवाहिकधनमात्रप्रतीतेर्न यावद्धनविषयत्वम्, तथा यमः।

'आसुरादिषु यद्दत्तं विवाहेषु प्रदीयते।'

विवाहक्रियायां पूर्व्वापरीभूतायां यद्दत्तं प्रदीयते इति यौतकधनमात्रगोचरत्वमेव प्रतीयते।" इति दायभागः॥*॥ "जड़ाया यौतकधने प्रथमं कुमारी तदभावे वाग्दत्ता अधिकारिणी। एतयोरभावे जड़्यो: पुत्रवतीसम्भावितपुत्रयोर्यंगपदधिकारः। एकाभावे चापरायाः। एतयोरभावे वन्ध्याविधवयोस्तुल्याधिकारः। एकाभावे चापरायाः। ततः पुत्रदौहित्रपौत्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राणां क्रमेणाधिकारः। यत्र श्रूयते सपत्नीपुत्रानन्तरं दौहित्रस्याधिकार इति विशेषः। ततो ब्राह्मादिविवाहपञ्चकसमयलभ्ययौतकधने भर्त्ता भ्राता माता पिता चेति क्रमः। आसुरादिविवाहत्रयसमयलभ्ययौतकधने माता पिता भ्राता भर्त्ता चेति क्रमः। ततो देवरः ततो देवरपुत्रभर्त्तृश्वशुरपुत्रौ भगिनीपुत्रः ततो भर्त्तृभागिनेयः ततो भ्रातृपुत्रः ततो जामाता ततः श्वशुरः ततो भ्रातृश्वशुरः तत आनन्तर्य्यक्रमेण सपिण्डाः ततः सकुल्याः ततः समानोदकाः।" इति तट्टीकायां श्रीकृष्णतर्कालङ्कारः॥

यौधिष्ठिरं, त्रि, (युधिष्ठिरस्य इदमिति। युधिष्ठिर+अण्।) युधिष्ठिरसम्बन्धि। यथा,—

"सा च यौधिष्ठिरी सेना गाङ्गेयशरसाड़िता।
प्रतिपत्पाठशीलानां विद्येव तनुतां गता॥"

इति महाभारतम्॥

(युधिष्ठिरस्यापत्ये, पुं। यथा, महाभारते। ६। ५०। ५६।

"यौधिष्ठिरः समंकुद्धः सौबलं निशितैः शरैः।
अदारयत संग्रामे मघवा इव दानवम्॥"

वासुदेवस्य पत्नीविशेषे, स्त्री। यथा, हरिवंशे। १६०। २०—२१।

"कौशिक्यां सुतसोमायां यौधिष्ठिर्य्यां युधिष्ठिरः।
कापाली गरुड़श्चैव जज्ञाते चित्रयोधिनौ॥
एवमादीनि पुत्राणां सहस्राणि निबोध मे।
दशायुतं समाख्याता वासुदेवस्य ते सुताः॥")

यौधेयः, पुं, (योधमर्हतीति। योध+छ्। यद्वा, "पार्श्वादियौधेयादिभ्यामञणौ।" ५। ३। ११७। इति स्वार्थे अण्।) योद्धा। इति सिद्धान्तकौमुदी। (युधिष्ठिरपुत्रः। स च ग्रैष्यराजदौहित्रः। यथा, महाभारते। १।६५।७६।

"युधिष्ठिरस्तु गोवासनस्य ग्रैष्यस्य देविकां नाम कन्यां स्वयम्वरे लेभे। तस्यां पुत्रं जनयामास यौधेयं नाम॥" वृषराजपुत्राः यौधेया इति ख्याताः। यथा, हरिवंशे। ३१।२५।

"दृष्ट्वाऽस्तु संजज्ञे शिबिरौशीनरो नृपः।
शिबेस्तु शिबयस्तात! यौधेयास्तु वृषस्य ह॥")

यौनं, क्ली, (योनेरिदमिति। योनि+अण्।) योनिसम्बन्धीनपापम्। यथा। बौधायनः।

"संवत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनाद्यौनात् सद्यो हि प्रयताप्रयतात्॥"

सुमन्तुः। यस्येतैर्यौनमौखश्रौवादीनां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यादिति। इयात् कुर्य्यात्। एतदेवेति द्वादशवार्षिकमित्यर्थः। अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते। इति प्रायश्चित्तविवेकः॥ (उत्पत्तिकारणम्। यथा, महाभारते। १३। १०२। २५।

"यत्राग्नियौनाश्च वसन्ति लोका
अब्योनयः पर्व्वतयोनयश्च॥"

उत्तरापथजातजातिविशेषे, पुं। यथा, महाभारते। १२। २०७। ४३।

"उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि।
यौनकाम्बोजगान्धराः किराता बर्ब्बरैः सह॥")

यौवतं, क्ली, (युवतीनां समूहः। युवति+"भिक्षादिभ्योऽञ्।" ४। २। ३८। इति अण्। पुंवद्भावाभावश्च।) युवतिसमूहः। इत्यमरः। २। ६। २२॥ (यथा, गीतगोविन्दे। १०। १५।

"रतिसुखसारगतं गतमभिसारे मदनमनोहरवेशं।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशं।
धीरसमीरे यमुनातीरे वसति वने वनमाली।
गोपीपीनपयोधरमर्द्दनचञ्चलकरयुगशाली॥
कृष्णविहारिणि वहसि मनोरमतनुतारुण्यं।
स्मरशरसुभगनखाहतमानसमतिशयचारुलावण्यं॥
एहि मुरारिरयं तृषितं तव कुचकलशविनिवेशं।
पीत्वा मुखमधुरमधरं मधुरिपुमिव भजसि हृषीकेशं॥
अनुगतमधुपमनोहरकोकिलकलकूजितपुञ्जं।
शीलय नीलनिचोलमिलितमिव जघनमनघमलज्जं॥
वदसि यदीदमपि दारुणमतिशठमधुपतिरधुना।
मधुवनकुसुमकलामपि रहसि तनुते तव मौनं॥
मामकमिह परिपालय करुणामयि! मुञ्च मानमनिदानं।
अपहर सत्वरमुरसिज! मम जघनं कुरु करमपि दानं॥
वदसि मृषा कुरु वचनमनुत्तरमुत्तरमपि देहि।
सुन्दरि! सुन्दरमुखरितमधुरिपुमधुरं वचनं सस्नेहि॥
इति मधुरिपुवचनं मधुरं मधुरं मधुरं मधुरं।
जयदेवभणितमतिललितं ललितं ललितं ललितं॥
वसन्तवर्णनं नाम दशमः सर्गः॥

यौवतिकं, क्ली, (युवतीनां समूहः। युवति+"भिक्षादिभ्योऽञ्।" ४। २। ३८। इति अण्। पुंवद्भावाभावश्च। ततः स्वार्थे कन्।) युवतिसमूहः। इत्यमरः। २। ६। २२॥ (यथा, गीतगोविन्दे। १०। १५।

"रतिसुखसारगतं गतमभिसारे मदनमनोहरवेशं।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशं।
धीरसमीरे यमुनातीरे वसति वने वनमाली।
गोपीपीनपयोधरमर्द्दनचञ्चलकरयुगशाली॥
कृष्णविहारिणि वहसि मनोरमतनुतारुण्यं।
स्मरशरसुभगनखाहतमानसमतिशयचारुलावण्यं॥
एहि मुरारिरयं तृषितं तव कुचकलशविनिवेशं।
पीत्वा मुखमधुरमधरं मधुरिपुमिव भजसि हृषीकेशं॥
अनुगतमधुपमनोहरकोकिलकलकूजितपुञ्जं।
शीलय नीलनिचोलमिलितमिव जघनमनघमलज्जं॥
वदसि यदीदमपि दारुणमतिशठमधुपतिरधुना।
मधुवनकुसुमकलामपि रहसि तनुते तव मौनं॥
मामकमिह परिपालय करुणामयि! मुञ्च मानमनिदानं।
अपहर सत्वरमुरसिज! मम जघनं कुरु करमपि दानं॥
वदसि मृषा कुरु वचनमनुत्तरमुत्तरमपि देहि।
सुन्दरि! सुन्दरमुखरितमधुरिपुमधुरं वचनं सस्नेहि॥
इति मधुरिपुवचनं मधुरं मधुरं मधुरं मधुरं।
जयदेवभणितमतिललितं ललितं ललितं ललितं॥
वसन्तवर्णनं नाम दशमः सर्गः॥

"आषोड़शाब्दवेतालस्तरुणस्तत उच्यते।
दृढः स्यात् सप्ततेरूर्द्धं वर्षीयान् नवतेः परम्॥"

इति स्मृतिः॥

नवयौवनलक्षणं यथा,—

"दरोद्भिन्नस्तनं किञ्चित् चलार्द्धं मेदुरस्थितम्।
मनागभिस्फूरदङ्गाभं नवं यौवनमुच्यते॥"

इत्युज्ज्वलनीलमणिः॥

("गर्भेश्वरत्वम् अभिनवयौवनत्वमप्रतिरूपत्वमसामान्यशक्तित्वमिति महतीयं खल्वनर्थपरम्परा। सर्व्वाविनयानामेकैकमप्येषामायतनम्। किमुत समवायः। यौवनारम्भे च प्रायः प्रायेण जलप्रक्षालननिर्म्मलापि कालुष्यमुपयाति दृष्टिः। अनुज्झितधवलतापि सरागेव भवति यूनां दृष्टिः। अयस्करति च वालेव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरदूरमालक्ष्येव यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुषभोगगर्द्धगाथिका। नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयसरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाग्रयति च दिङ्मोह इवोन्मार्गप्रवणेन पुरुषमत्यासङ्गो विषयेषु।" इति कादम्बर्य्यां चन्द्रापीड़ं प्रतिशुकनासोपदेशः॥)

नवयौवनकारकमौषधं यथा,—

"अश्वगन्धानागबलागुड़ूमांसनिषेविणाम्।
रूपं भवेद्यथा तद्वत् नवयौवनचारिणाम्॥"

इति गारुड़े १८६ अध्यायः॥

यौवनकण्टकं, पुं, क्ली, (यौवने कण्टकमिव दुःखदत्वात्।) युवगण्डः। इति शब्दमाला॥ वयस्फोड़ा इति भाषा॥

यौवनपिड़का, स्त्री, (यौवने पिड़का।) युवकाले सुखे जातः क्षुद्रस्फोटकः। वयस्फोड़ा इति भाषा॥ (यथा, सुश्रुते निदानस्थाने। १३।

"यौवनपिड़का पद्मिनी कण्टका जतुमणिरित्यादि॥") तल्लक्षणं यथा,—

"श्लाक्ष्णलोहकण्टकप्रख्याः कफमारुतप्रोथिताः।
जायन्ते पिड़का यूनां वक्त्रे या सुखदूषिकाः॥"

इति सुश्रुते। १। १४ अध्यायः॥

अस्याश्चिकित्सा सुखदूषिकाशब्दे द्रष्टव्या॥

यौवनलक्षणं, क्ली (यौवनस्य लक्षणं चिह्नम्।) लावण्यम्। स्तनः। इति मेदिनी। ने, ११७॥ तारुण्यचिह्नम्॥

यौवनाश्वः, पुं, (युवनाश्वस्यापत्यमिति। युवनाश्व+अण्।) मान्धातराजः। इति चिकाण्डशेषः॥ अपि च।

"यौवनाश्वोऽथ मान्धाता चक्रवर्त्ती नवीनप्रभुः।
सप्तद्वीपवतीमेकः शशासाच्युततेजसा॥
ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः॥
सर्व्वदेवमयं देवं सर्व्वात्मकमतीन्द्रियम्॥
द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथर्त्विजः।
धर्म्मो देशश्च कालश्च सर्व्वमेतदयदात्मकम्॥
यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति।
तत् सर्व्वं यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते॥

प्रग्रविन्दोर्दुहितरि विन्दुमत्यामधात्नृपः ।
पुरुकुत्समम्बरीषं मुचुकुन्दञ्च योगिनम् ॥
तेषां स्वसारः पञ्चाशत् सौभरिं वव्रिरे पतिम् ॥"
इति श्रीभागवते ६ स्कन्धे ६ अध्यायः ॥

यौवनाश्वकः, पुं, (यौवनाश्व + स्वार्थे कन् ।) मान्धातृराजः । इति जटाधरः ॥

यौष्माकं, त्रि, (युष्मद् + अण् । "तस्मिन्नणि च युष्माकास्माकौ ।" ४ । ३ । २ । इति प्रकृतेर्युष्माकादेशः ।) युष्मत्सम्बन्धि । युष्माकमिदं इत्यर्थे अप्रत्ययेन निष्पन्नम् । इति सुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्सागरे । ११२ । २०५ ।
"इत्यात्मसासु जल्पत्सु मिलितेष्वत्र तत्क्षणम् ।
विद्याधरो धूमशिखो यौष्माकोऽवातरद्दिवः ॥")

यौष्माकीनं, त्रि, (युष्मद् + "युष्मदस्मदोरन्यतरस्यां खञ्च ।" ७ । ३ । १ । इति खञ् । "तस्मिन्नणि चेति ।" ४ । ३ । २ । इति युष्माकादेशः ।) युष्मत्सम्बन्धि । युष्माकमिदं इत्यर्थे खीनञ् प्रत्ययेन निष्पन्नम् । इति सुग्धबोधव्याकरणम् ॥ युष्मच्छब्दे अलिखितत्वादवसरसङ्गत्या गौणयुष्मदस्मच्छब्दप्रयोगोऽत्र लिख्यते । युष्मदस्मदोर्मुख्ये गौणे च सिजसु ङेङसां स्वरूपग्रहणात् तेषु परेषु त्वाहौययवयतुभ्यमत्वतवममाः स्युरेव । सिजसादेरन्यत्र युष्मदस्मदोर्मुख्ये एकवचने परे त्वमदौ द्विवचने परे युवावौ बहुत्वचने परे स्वरूपेणावस्थानम्, गौणत्वे तु परविभक्तिमनादृत्य युष्मदस्मदोरेकत्वे त्वमदौ द्वित्वे युवावौ बहुत्वे स्वरूपेणावस्थानमिति ॥ ॥ यथा त्वामतिक्रान्तः अतित्वं अतित्वां अतियूयम् । अतित्वां अतित्वां अतित्वान् । अतित्वया अतित्वाभ्यां अतित्वाभिः । अतितुभ्यं अतित्वाभ्यां अतित्वभ्यम् । अतित्वत् अतित्वाभ्यां अतित्वत् । अतितव अतित्वयोः अतित्वयाम् । अतित्वयि अतित्वयोः अतित्वासु ॥ ॥ युवामतिक्रान्तः अतित्वं अतियुवां अतियूयम् । अतियुवां अतियुवां अतियुवान् । अतियुवया अतियुवाभ्यां अतियुवाभिः । अतितुभ्यं अतियुवाभ्यां अतियुवभ्यम् । अतियुवत् अतियुवाभ्यां अतियुवत् । अतितव अतियुवयोः अतियुवयाम् । अतियुवयि अतियुवयोः अतियुवासु ॥ ॥ युष्मानतिक्रान्तः अतित्वं अतियुष्मां अतियूयम् । अतियुष्मां अतियुष्मां अतियुष्मान् । अतियुष्मया अतियुष्माभ्यां अतियुष्माभिः । अतितुभ्यं अतियुष्माभ्यां अतियुष्मभ्यम् । अतियुष्मत् अतियुष्माभ्यां अतियुष्मत् । अतितव अतियुष्मयोः अतियुष्मयाम् । अतियुष्मयि अतियुष्मयोः अतियुष्मासु ॥ ॥ मामतिक्रान्तः अत्यहं अतिमां अतिवयम् । अतिमां अतिमां अतिमान् । अतिमया अतिमाभ्यां अतिमाभिः । अतिमह्यं अतिमाभ्यां अतिमभ्यम् । अतिमत् अतिमाभ्यां अतिमत् । अतिमम अतिमयोः अतिमयाम् । अतिमयि अतिमयोः अतिमासु ॥ ॥ आवामतिक्रान्तः अत्यहं अत्यावां अतिवयम् । अत्यावां अत्यावां अत्यावान् । अत्यावया अत्यावाभ्यां अत्यावाभिः । अतिमह्यं अत्यावाभ्यां अत्यावभ्यम् । अत्यावत् अत्यावाभ्यां अत्यावत् । अतिमम अत्यावयोः अत्यावयाम् । अत्यावयि अत्यावयोः अत्यावासु ॥ ॥ अस्मानतिक्रान्तः अत्यहं अत्यस्मां अतिवयम् । अत्यस्मां अत्यस्मां अत्यस्मान् । अत्यस्मया अत्यस्माभ्यां अत्यस्माभिः । अतिमह्यं अत्यस्माभ्यां अत्यस्मत् । अत्यस्मत् अत्यस्माभ्यां अत्यस्मत् । अतिमम अत्यस्मयोः अत्यस्मयाम् । अत्यस्मयि अत्यस्मयोः अत्यस्मासु । इति दुर्गादासः ॥

र

र, रेफः । यथा । वर्णात् कारतकारौ रादेफः । इति कलापसंक्षिप्तसारव्याकरणे ॥ रेफात् कारश्च । रकारः । इति प्रक्रियाकौमुदी ॥ स तु सप्तविग्रहलवर्णः । तस्योच्चारणस्थानं मूर्द्धा । इति सुग्धबोधव्याकरणम् ॥ ॥ (तथा च शिक्षायाम् । १७ ।
"सुमूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः ॥")
तस्य स्वरूपं यथा,—
"रेफश्च चञ्चलापाङ्गि ! कुङ्कुमोदयसंयुतम् ।
रक्तविद्युल्लताकारं पञ्चदेवात्मकं सदा ।
पञ्चप्राणमयं वर्णं त्रिबिन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रे ६ पटलः ॥ ॥
तस्य क्षेत्रप्रकारो यथा,—
"दक्षतः कुङ्कली रेखा वामाङ्गगताप्यधः ।
पुनर्दक्षगता द्वेधा ततोऽधोगत्य चोर्द्धतः ॥
भवानी प्रकरो वह्निस्तासु तिष्ठन्ति नित्यशः ।
अर्द्धमात्रा ब्रह्मरूपा महाशक्तिः प्रकीर्त्तिता ॥"
अपि च ।
"ऊर्द्धाधःक्रमतो रेखा त्रिकोणाधोगता हि सा ।
विधिरीशः केशवश्च तासु तिष्ठन्ति नित्यशः ॥
ऊर्द्धस्थिता तु या मात्रा सा शक्तिः परिकीर्त्तिता ।
तस्य मध्यगता रेखा वह्निरूपा हि सा स्मृता ।
निर्गुणोऽसौ सदा वर्णो न कदाचित् गुणीभवेत् ॥"
अस्य ध्यानं यथा,—
"ललज्जिह्वां महारौद्रीं रक्तास्यां रक्तलोचनाम् ।
रक्तवर्णामरुणां रक्तपुष्पोपशोभिताम् ॥
रक्तमाल्याम्बरधरां रक्तालङ्कारभूषिताम् ।
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिकाम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
तन्त्रगाममन्त्रो यथा,—
"त्रिशक्तिसहितं देवि ! आत्मादितत्त्वसंयुतम् ।
सर्व्वतेजोमयं वर्णं सततं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥ ॥

रः, पुं, (राति ऊर्द्धं गतच्छेदीति । रा + डः ।) पावकः । तीक्ष्णः । इति मेदिनी । रे, १ ॥ कामबीजं । इति मुग्धबोधव्याकरणम् ॥

रंहः, [स्] क्ली, (रमते येन इति । रम् + "रमेर्हश्च ।" उणा० ४ । २१३ । इति असुन् । हुरागमश्च धातोः ।) "अहिरहिभ्यामसुन् इति असुन्हो रहः । इति धातुप्रदीपः ।" इलुज्ज्वलदत्तः ।) वेगः । इत्यमरः । १ । १ । ६७ ॥ (यथा, रघुवंशे । २ । ३४ ।
"अस्ति महीपाल ! तव प्रभेद
प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्तिरंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥"
महादेवः । यथा, महाभारते । १७ । ८ । १५ ।
"हरिनेत्राय सुव्रताय ब्रह्मायोत्तरजाय च ।
भास्कराय सुतीर्थाय देवदेवाय रंहसे ॥"
विष्णुः । यथा, महाभारते हरिवंशपर्व्वणि २५२ । १८ ।
"नमस्कृत्य सुरेशाय तस्मै देवाय रंहसे ।
प्रयाताः प्राग्दिशं पुण्यां विपुलं कक्षपाश्रमम् ॥")

रक, क स्वादे । आपने । इति कविकल्पद्रुमः ॥ स्वादो रसेयादनम् । क, राकयति मोदकं बालकः । इति दुर्गादासः ॥

रक्तं, क्ली, (रज्यत अङ्गमनेनेति । रञ्ज् + क्तः ।) कुङ्कुमम् । ताम्रम् । (अस्य पर्य्यायो यथा,—
"रक्तं वरिष्ठं रुक्काख्यं ताम्रं मुख्यसुङ्कुमरम् ॥"
इति वैद्यकरत्नमालायाम् ॥)
प्राचीनामलकम् । इति मेदिनी । ते, ६८ ॥ पद्मकम् । (अस्य पर्य्यायो यथा,—

"रक्तं कोकनदं पद्मसख्यमन्यदलोहितम् ।"
इति रत्नमाला ।)
सिन्दूरम् । हिङ्गुलम् । इति राजनिर्घण्टः ।
(अस्य पर्य्यायो यथा,—
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ।"
इति रत्नमाला ।)
(रक्तचन्दनभेदः । तत्पर्य्यायो यथा,—
"पतङ्गं रञ्जनं रक्तं पत्राङ्गञ्च कुचन्दनम् ।"
इति रत्नमाला ।)
शरीरस्थसप्तधात्वन्तर्गतधातुविशेषः । तत्पर्य्यायः । रुधिरम् २ असृक् ३ लोहितम् ४ असम् ५ क्षतजम् ६ शोणितम् ७ । इत्यमरः । २ । ६ । ६४ । पलङ्कारम् ८ रोहितम् ९ रक्तकम् १० । इति शब्दरत्नावली । कीलालम् ११ अङ्गजम् १२ रोधिरम् १३ खजम् १४ । इति जटाधरः । त्वग्जम् १५ श्रोणम् १६ लोहम् १७ चर्म्मजम् १८ । इति राजनिर्घण्टः । * । अथ रक्तस्य स्वरूपमाह ।
"यदा रसो यकृद्याति तत्र रञ्जकपित्ततः ।
रागं पाकञ्च संप्राप्य स भवेद्रक्तसंज्ञकः ॥
रक्तं सर्व्वशरीरस्थं जीवस्याधार उत्तमः ।
स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत् ॥
जीवस्याधार उत्तम इति । यत आह ।
जीवो वसति सर्व्वस्मिन् देहे तत्र विशेषतः ।
वीर्य्ये रक्ते मले यस्मिन् दोषे याति क्षयं क्षणादिति ।
वीर्य्ये रक्ते मले च शरीरारम्भके । वाग्भटोक्तपरिमाणमिते शुद्धे जीवो वसति न तु दुष्टे प्रदुष्टे । रक्तस्रावणोपदेशस्य वैयर्थ्यप्रसङ्गात् । पित्तवद्भवेत् । अम्लं भवेदित्यर्थः । * । अथ रक्तस्य स्थानमाह ।
यकृत् प्लीहा च रक्तस्य सुखं स्थानं तयोः स्थितम् ।
अन्यत्रापि स्थितवतां रक्तानां पोषकं भवेत् ॥"
इति भावप्रकाशः ।
रक्तदोषनाशकौषधं यथा,—
"ब्रह्मयष्टिफलं पिष्टं वारिणा तनु लेपतः ।
तेन दुष्टं रक्तदोषः प्रयाञ्चति न संशयः ॥"
इति गारुडे १६२ अध्यायः ।
("स खल्वायो रसो यकृत्प्लीहानौ प्राप्य रागं सुपैति । भवतश्चात्र ।
रञ्जितास्तेजसा ह्याप्यः शरीरस्थेन देहिनाम् ।
अथाप्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥
रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते ।
सप्तधात्वादग्रादूर्द्ध्वं याति पञ्चाग्रतः क्षयम् ।"
"रसाद्रक्तं ततो मांसम् ।"
"तत्र पित्तिलमरुणं क्षय्यं परुषं तनु श्रोत्रमस्कन्दि च वातेन दुष्टम् । नीलं पीतं हरितं श्यावं विस्रमनिष्टं पिपीलिकामक्षिकाभ्यस्कन्दि च पित्तदुष्टम् । गैरिकोदकप्रतीकाशं स्निग्धं शीतलं बहलं पिच्छिलं चिरस्रावि मांसपेश्यप्रीप्रभं श्लेष्मदुष्टम् । सर्व्वलक्षणसंयुक्तं काङ्क्षिकाभं विशेषतो दुर्गन्धि च सन्निपातदुष्टम् । पित्तवद्रक्तेनातिक्षय्यञ्च । द्विदोषलिङ्गं संसृष्टम् ।"
"इन्द्रगोपप्रतीकाशमसंहतमविवर्णञ्च प्रकृतिस्थं जानीयात् ।"
"त्वग्दोषा व्यथयः शोफाः रोगाः शोणितजाश्च ये ।
रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥"
"देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते ।
तस्मादयत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥
इति सुश्रुते सूत्रस्थाने चतुर्दशोऽध्याये ॥ * ॥
"शीतोष्णस्निग्धरूक्षाद्यैरुपक्रान्ताश्च ये गदाः ।
सम्यक्साध्या न सिद्धन्ति रक्तजांस्तान् विभावयेत् ॥"
अरुणाभं भवेद्वातात् फेनिलं विषदं तनु ।
पित्तात्पीतासितं रक्तं सौम्यात्स्याद्यति वै चिरात् ॥
ईषत् पाण्डुकफाद्दुष्टं पिच्छिलं तन्तुमद्घनम् ।
द्विदोषलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ॥"
"नात्युष्णशीतं लघुदीपनीयं
रक्तेऽनीते हितमन्नपानम् ।
तदा शरीरं ह्लनवस्थितास्थ-
गस्निग्धैर्विशेषेण च रक्षितव्यः ॥
प्रसन्नवर्णेन्द्रियमिन्द्रियार्था
निष्क्लेशमध्याहतपक्तिवेगम् ।
सुखान्वितं पुष्टिबलोपपन्नं
विशुद्धरक्तं पुरुषं वदन्ति ॥"
इति चरके सूत्रस्थाने २४ अध्यायः ।)

रक्तः, पुं, लोहितवर्णः । इत्यमरः । १ । ५ । १५ ॥ कुसुम्भः । हिज्जलः । इति राजनिर्घण्टः ॥
(बन्धूकः । तत्पर्य्यायो यथा,—
"बन्धूको बन्धुजीवश्च रक्तो माध्याह्निकोऽपि च ॥"
इति भावप्रकाश्यस्य पूर्व्वखण्डे प्रथमे भागे ।)

रक्तः, त्रि, अनुरक्तः । नीलादिरञ्जितः । लोहितः । इति मेदिनी । ते, ४८ ॥ क्रीड़ारतः । इति धरणिः ॥ * ॥ रक्तवर्णवस्तुनि यथा,—
"श्रोणानि भौमतीर्ष्णांशुताम्रकुङ्कुमचक्राः ।
गुञ्जेन्द्रगोपखद्योतविद्युत्कुञ्जरबिन्दवः ॥
दृगन्ताधरजिह्वाहङ्सासिन्दूरधातवः ।
हिङ्गुलं कुक्कुटशिखा तेजः सारसमस्तकम् ॥
माणिक्यं हंसचञ्चुघ्री शुकमर्कटयोर्मुखम् ।
चकोरकोकिलपारावतनेत्रनखाश्मयः ॥
कुसुम्भकिंशुकाश्रोकजवाबन्धूकपाटलाः ।
कमलं दाड़िमीपुष्पं बिम्बिकिम्पाकपल्लवौ ॥
ताम्बूलरागो मञ्जिष्ठालक्तकं रक्तचन्दनम् ।
चेता नखक्षतश्चेधर्म्मरौद्ररसादयः ॥" * ॥
रक्तनीलवाचकानि यथा,—
"लोहितनीलौ पुष्करहरिद्विद्रुमकमलक्षाक्षारक्षाणि ।
सिन्दूरभूषणोत्पलधनञ्जयाम्भोजिनीदलानि ॥"
यथा । पुष्करं पद्माकाशयोः । हरिः सूर्य्यक्षाक्षयोः । विद्रुमः प्रवालविशिष्टवृक्षयोः । कमलं पद्मपाण्डीयामलयोः क्षाक्षारत्नं कौस्तुभेन्द्रनीलयोः । सिन्दूरभूषणं सिन्दूरालङ्कारगजयोः । उत्पलसुतक्षरमांसेन्दीवरयोः । धनञ्जयोऽग्निपार्थयोः । अम्भोजिनीदलं पद्मपत्रपुटकिन्नोः ।
"कमलाधिपपद्मेशौ नागजित्कान्तसूर्य्यभूः ।
रत्नाकरवरश्रीकः सदाधिकमलद्युतिः ॥"
कमलाधिपपद्मेशौ सूर्य्यक्षणौ । नागजित् गरुड़ो नागसङ्घौ च । कान्तः कमनीयः कं जलं तस्यान्तश्च । सूर्य्यभूः सूर्य्यांशवो यमश्च ।
"सदा सिन्दूरमुज्ज्वेता कलयन् कमलश्रियम् ।
स्फुटशोभनताम्रश्रीर्नरराहुस्वामिदीधितिः ॥
एवं सुसम्पन्नखप्रभः विद्रुमसमदीधितिः ।
प्रवालप्रबलच्छायः कलभानुमितच्छविः ॥"*॥
रक्तश्वेतवाचकानि यथा,—
"रक्तश्वेतौ हरिश्शुचिपुष्करशतपत्रसूर्य्यकान्ताक्षाः ।
नवहंसमहापद्मार्कसोदराः कमलकीलाले ॥"
हरिश्चन्द्रसूर्य्यौ । शुचिः श्वेतवह्नानरयोः । पुष्करं जलपद्मयोः । शतपत्रं हंसपद्मयोः । सूर्य्यकान्तः स्फटिके सूर्य्यवत्कान्ते च । अब्जः शुक्लाम्बुजयोः । नवहंसः नवहंसे प्रत्यूषसूर्य्ये च । महापद्मः श्वेतनागे पद्मे च । अर्कः स्फटिकसूर्य्ययोः । कमलं जलाम्बुजयोः । कीलालं जलरक्तयोः ।
"सुरुद्रवादिभिर्भानो रक्तैर्नाम्ने रदांशुकैः ।
जलेभ्यो जन्मशोभाभिः सरोजकुसुदादिभिः ॥"
भानोः परस्मात् सुरुद्रवादिभिः ॥ * ॥
सितरक्तौ यथा । रविमित्रं चन्द्रः रवितुल्यश्च । भानुरत्नं सूर्य्यकान्तः रविपद्मरागौ च । अग्निरत्नं सूर्य्यकान्तोऽग्निपद्मरागौ च । रदांशुकं दन्तवस्त्रे अधरश्च । जलजशोभा जलजा चासौ शोभा चेति पक्षे पद्मकान्तिः । एवं सरोजादिशोभा सरोजसदृशीशोभा पक्षे सरोजादिश्चन्द्रः । कुसुदादिशोभा कुसुदसदृशीशोभा पक्षे कुसुदादिरादित्यः । इति कविकल्पलतायाम् २ शेषस्तवके उद्दिष्टवर्णनं नाम १ कुसुमम् ।

रक्तकः, पुं, (रक्तं रक्तवर्णं कायति प्राप्नोतीति । कै + कः ।) अम्लानवृक्षः । बन्धूकवृक्षः । रक्तवस्त्रम् । अनुरागी । इति मेदिनी । के, १४५ ॥ विनोदी । इति शब्दरत्नावली ॥ रक्तशिशुः । रक्तैरक्षः । इति राजनिर्घण्टः । (अश्वविशेषः । यथा, अश्ववैद्यके । ३ । १०० ।
"पीतको हरितः प्रोक्तः कषायो रक्तकः स्मृतः ।
पक्वतालनिभो वाजी कषायः परिकीर्त्तितः ॥"
रक्त एव स्वार्थे कन् । लोहितवर्णे, त्रि । यथा, बृहत्संहितायाम् । ८ । ४६ ।
"अलसस्तु जनः प्रमादिसंज्ञे
ह्यमरं रक्तकपुष्पबीजनाशः ॥")

रक्तकन्दः, पुं, (रक्तः रक्तवर्णः कन्दोऽस्य ।) विद्रुमः । इति हेमचन्द्रः । ४ । १३२ ॥ राजपलाण्डुः । रक्तालुः । इति राजनिर्घण्टः ॥

रक्तकन्दलः, पुं. (रक्तं रक्तवर्णं कन्दलं नवाङ्कुरो यस्य।) प्रवालम्। इति त्रिकाण्डशेषः॥ (गुणादयोऽस्य प्रवालशब्दे विज्ञेयाः॥)

रक्तकमलं, क्ली, (रक्तं रक्तवर्णं कमलम्।) रक्तवर्णोत्पलम्। तत्पर्य्यायः। कोकनदम्२ रक्ताम्भोजम् ३ अरुणकमलम् ४ शोणपद्मम् ५ रक्तोत्पलम् ६ अरविन्दम् ७ रविप्रियम् ८ रक्तवारिजम् ९। (रक्तकमलम् १०। इति पाद्मोत्तरखण्डे १३ अध्यायः॥) अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। मधुरत्वम्। शिशिरत्वम्। रक्तदोषहरत्वम्। पित्तकफवातघ्नत्वम्। सन्तर्पणकारकत्वम्। दृष्यत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम्।
रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम्॥
धवलं कमलं शीतं मधुरं कफपित्तजित्।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम्॥"

इति भावप्रकाशः॥

रक्तकमलं, क्ली, (कमलं जलमाश्रयत्वेनास्त्यस्येति। अर्शं आद्यच्। रक्तं रक्तवर्णं कमलमुत्पलमिति।) रक्तोत्पलम्। यथा,—

"चन्दनागुरुकर्पूरकुङ्कुमैश्च सुगन्धिभिः।
कमलैः कुमुदैः पुण्यैः कह्लारैः रक्तकमलैः॥
फलैर्धूपैरपूपैश्च शोभनैर्गुडमिश्रितैः।
अर्च्चयेद्बलिराजानं मन्त्रेण द्विजसत्तमः॥"

इति पाद्मोत्तरखण्डे १३ अध्यायः॥

रक्तकरवीरकः, पुं, (करवीर+स्वार्थे कन्। ततो रक्तः रक्तवर्णः करवीरकः।) लोहितवर्णकरवीरपुष्पवृक्षः। लाल् कनेल् इति हिन्दी भाषा। तत्पर्य्यायः। रक्तप्रसवः २ गन्धेष्टकुसुमः३ चण्डीकुसुमः४ क्रूरः५ भूतद्रावी६ रविप्रियः७। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। विशोधनत्वम्। व्रणोद्वर्त्तनत्वम्। कण्डूतिकुष्ठविषहरत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"करवीरः श्वेतपुष्पः शुक्लकुम्भोऽग्निमारकः।
द्वितीयो रक्तपुष्पश्च चण्डालो लगुडस्तथा॥
करवीरद्वयं तिक्तं कषायं कटुकञ्च तत्।
व्रणालाघवकृन्नेत्रकोपकुष्ठव्रणापहम्।
दोषीर्ष्यां कृमिकण्डूघ्नं भक्षितं विषवन्मतम्॥"

इति भावप्रकाशः॥

रक्तकाञ्चनः, पुं, (रक्तः रक्तवर्णः काञ्चनः।) स्वनामख्यातपुष्पवृक्षविशेषः। तत्पर्य्यायः। विदलः २ चमरिकः ३। इति शब्दरत्नावली॥ काञ्चनालः ४ ताम्रपुष्पः ५ कुदारः ६। इति जटाधरः॥

रक्तकाण्डा, स्त्री, (रक्तः रक्तवर्णः काण्डः दण्डोऽस्याः।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ (विवरणमस्या रक्तपुनर्नवाशब्दे विज्ञेयम्॥)

रक्तकाष्ठं, क्ली, (रक्तं काष्ठं यस्य।) पत्राङ्गम्। इति राजनिर्घण्टः॥ लोहितवर्णदारु च॥

रक्तकुमुदं क्ली, (रक्तं रक्तवर्णं कुमुदम्।) रक्तकैरवम्। इति जटाधरः॥

रक्तकुसुमः, पुं. (रक्तानि रक्तवर्णानि कुसुमान्यस्य।) पारिभद्रः। धन्वनवृक्षः। इति राजनिर्घण्टः॥

रक्तकेशरः, पुं, (रक्ताः केशराः किञ्जल्काः अस्य।) पारिभद्रः। इति रत्नमाला॥

रक्तकैरवं, क्ली, (रक्तं रक्तवर्णं कैरवम्।) रक्तकुमुदम्। इति जटाधरः॥ (यथास्य पर्य्यायः।

"तदल्पगन्धं सोमाख्यं हल्लकं रक्तकैरवम्॥"

इति वैद्यकरत्नमाला॥)

रक्तकोकनदं. क्ली, (रक्तं रक्तवर्णं कोकनदम्।) रक्तोत्पलम्। इति जटाधरः॥ (विशेषोऽस्य रक्तोत्पलशब्दे ज्ञातव्यः॥)

रक्तखदिरः, पुं, (रक्तः रक्तवर्णः खदिरः।) रक्तवर्णखदिरवृक्षः। तत्पर्य्यायः। रक्तसारः २ सुसारः ३ ताम्रसारकः ४ बहुशल्यः५ याज्ञिकः६ कुष्ठनोदनः ७ यूपदृमः ८ अम्बखदिरः ९ अरुः १०। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कषायत्वम्। गुरुत्वम्। तिक्तत्वम्। आमवातास्रवातव्रणभूतज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाश्च।

"खदिरो रक्तसारश्च गायत्री दन्तधावनः।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः॥
खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत्।
तिक्तः कषायो मेदोघ्नः कृमिमेहज्वरव्रणान्।
चित्रश्लीपामपित्तास्रपाण्डुकुष्ठकफान् हरेत्॥"

इति भावप्रकाशः॥

रक्तगन्धकं, क्ली, (रक्तं रक्तवर्णं गन्धकम्।) गोलम्। इति राजनिर्घण्टः॥

रक्तगुल्मः, पुं, (रक्तजो गुल्मः इति मध्यपदलोपी कर्म्मधारयः।) स्त्रीणां रक्तजगुल्मरोगः। तस्यौषधं यथा,—

"द्विजयष्टीचिकटुकं चूर्णं पीतं हरेच्छिवं।
तिलकाथेन संयुक्तं रक्तगुल्मं स्त्रियाः हरं!॥"

इति गारुडे १६६ अध्यायः॥

(तथास्य निदानादिकं यथा,—

"शोणितगुल्मास्तु खलु स्त्रिया एव भवन्ति न पुरुषस्य गर्भकोष्ठार्त्तवागमनवैशेष्यात्। पारतन्त्र्यादवैशारद्यात् सततमपचारातुरोधादेगानुदीर्णानुपरुध्यन्त्या आमगर्भे वाप्यचिरात् पतिते तथाप्यचिरप्रजातायाः ऋतौ वा वातप्रकोपनान्यासेवमानायाः वातः प्रकोपमापद्यते। स प्रकुपितो योन्या सुखमनुप्रविश्यार्त्तवमुपरुणद्धि मासि मासि तदार्त्तवमुपरुध्यमानं कुक्षिं वर्द्धयति। तस्याः मूलकासातीसारच्छर्दिरोचकाविपाकाङ्गमर्दनिद्रालस्यकफप्रसेकाः सम्पद्यन्ते स्तनयोश्च स्तन्यमोक्षयोः स्तनमण्डलयोश्च कार्ष्ण्यं खानि चक्षुषोर्मूर्च्छा हृल्लासो दौहृदः क्षयणुः पादयोरीषच्छोफो रोमराज्याः योन्याश्चाणालत्वमपि योन्या दौर्गन्ध्यमास्रावश्चोपजायते। केवलञ्चास्या गुल्मः स्पन्दते तामगर्भाङ्गिनीमित्याहुर्मूढाः।" इति चरके निदानस्थाने तृतीयेऽध्याये॥ यथा च।

"न स्पन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम्।
तं गर्भकालातिगमे चिकित्स्य-
मसृग्भवं गुल्ममुशन्ति तज्ज्ञाः॥"

इति सुश्रुते उत्तरतन्त्रे ४२ अध्यायः॥

तथा च। रक्तगुल्मस्तु स्त्रिया एव प्रजायते। यथा,—

"ऋतौ वा नवसूता वा यदि वा योनिरोगिणी।
सेवते वातलान्नित्यं क्रुद्धस्तस्याः समीरणः॥
निरुणद्धार्त्तवं योन्यां प्रतिमासमवस्थितम्।
कुक्षिं करोति तद्गर्भलिङ्गमाविष्करोति च॥
हृल्लासदौर्हृदस्तन्यदर्शनं श्यामतादिकम्।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत्॥
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मिनम्।
रुक्स्तम्भदाहातीसारहृद्ज्वरादीनुपद्रवान्॥
गर्भाशये च सुतरां शूलं दुश्छर्द्यामाश्रये।
योन्याश्च स्रावदौर्गन्ध्यतोदस्पन्दनवेदनाः॥
न चाङ्गैर्गर्भवद्गुल्मः स्फुरत्यपि तु शूलवान्।
पिण्डीभूतः स एवास्याः कदाचित् स्पन्दते चिरात्॥
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते।
खदोषसंश्रयो गुल्मः सर्व्वो भवति तेन सः॥'
पार्श्वं चिरेण भजते नैव वा————॥"

इति वाभटे निदानस्थाने एकादशेऽध्याये॥*॥

तथास्य चिकित्सा।

"सरक्तगुल्मे न च पाचनन्तु
न हिङ्गुपानं कटिचालनञ्च।
न चैव संस्वेदनमर्दनञ्च
न वा क्रमेणोत्तरणं हितञ्च॥
रोधाञ्जनं खदिरमागधिका समङ्गा
काथोऽम्बुवेतससमं घृतसंप्रयुक्तम्।
गुल्मं सरक्तमपि चाथ निहन्ति शीघ्रं
कृत्स्नेदनञ्च विनिहन्ति च कुद्धरक्तम्॥
क्षीरपानं प्रदातव्यं घृतसौवर्चलान्वितम्।
रक्तगुल्मविनाशाय यद्वा हितमतोऽपि वा॥
न हिङ्गुसंयुतं पथ्यं न क्षोभ्यं न विदाहि च।
रक्तजे क्षतजे गुल्मे मांसानि जाङ्गलानि च॥"

इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये॥)

अन्यत् गुल्मशब्दे द्रष्टव्यम्॥*॥

रक्तघ्नः, पुं, (रक्तं हन्तीति। हन्+"अमनुष्यकर्त्तृके च।" ३। २। ५३। इति टक्।) रोहितकवृक्षः। इति जटाधरः॥ (रोहितकशब्देऽस्य विशेषो ज्ञेयः॥)

रक्तघ्नी, स्त्री, (रक्तं हन्तीति। हन्+टक्। ङीष्।) दूर्व्वाविशेषः। गाँठिया दूर्वा इति भाषा॥ यथा,

"महौषधिश्च गोलोम्नां रक्तघ्नी रक्तपित्तहा॥"

इति शब्दचन्द्रिका॥

रक्तचन्दनं, क्ली, (रक्तं रक्तवर्णं चन्दनम्।) रक्तवर्णचन्दनकाष्ठम्। (यथा, रामायणे।२।३३।६।

"पद्मरागोचितां शीतां रक्तचन्दनसेविनीम्।
वर्षसुष्णञ्च शीतञ्च नेष्यत्यायुः विवर्णताम्॥")

तत्पर्य्यायः। तिलपर्णी २ पत्राङ्गम् ३ रक्त-

नम् ४ कुचन्दनम् ५। इत्यमरः। १। ६। १३२॥ ताम्रसारम् ६ ताम्रवृक्षः ७ चन्दनम् ८। इति रत्नमाला॥ लोहितम् ९ शोणितचन्दनम् १० रक्तसारम् ११ ताम्रसारकम् १२ क्षुद्रचन्दनम् १३ अर्कचन्दनम् १४। इति राजनिर्घण्टः॥ रक्ताङ्गम् १५ प्रवालफलम् १६। इति भावप्रकाशः॥ पत्तङ्गम् १७ पत्तगम् १८ रक्तबीजम् १९। इति शब्दरत्नावली॥ अस्य गुणाः। अतिशीतलत्वम्। तिक्तत्वम्। ईषद्गतासदोषभूतपित्तकफकासज्वरभ्रान्तिनुद्वमथुल्लासनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"रक्तं शीतं गुरु स्वादु च्छर्दिहल्लासपित्तजित्। तिक्तनेत्रहितं दृष्यं ज्वरत्रयविषापहम्॥"

इति भावप्रकाशः॥

अन्यच्च।

"रक्तपित्तहरं वर्ण्यं चक्षुष्यं रक्तचन्दनम्॥"

इति राजवल्लभः॥

रक्तचित्रकः, पुं, (रक्तो रक्तवर्णश्चित्रकः।) क्षुपविशेषः। राङ्गचिता इति भाषा॥ तत्पर्य्यायः। काजः २ अत्यालः ३ कालमूलः ४ अतिदीप्यः ५ मार्ज्जारः ६ अग्निः ७ दाहकः ८ पावकः ९ चित्राङ्गः १० महाङ्गः ११। अस्य गुणाः। प्रन्थिकायकरत्वम्। रुच्यत्वम्। कुष्ठघ्नत्वम्। लोहवेधकत्वम्। रसनियामकत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

रक्तचूर्ण, क्ली, (रक्तं रक्तवर्णं चूर्णम्।) सिन्दूरम्। इति हारावली॥ ४४॥ रक्तवर्णचूर्णमात्रञ्च॥

रक्तजन्तुकः, पुं, (रक्तः रक्तवर्णो जन्तुः। ततः स्वार्थे कन्। अथवा रक्ता आसक्ता जन्तवोऽस्मिन्।) भृङ्गराजः। इति राजनिर्घण्टः॥ रक्तवर्णजन्तुमात्रञ्च॥

रक्तजिह्वः, पुं, (रक्ता रक्तवर्णा शोणितपानादौ आसक्ता वा जिह्वा यस्य।) सिंहः। इति शब्दमाला॥ रक्तवर्णजिह्वायुक्ते, त्रि॥

रक्तझिण्टी, स्त्री, (रक्ता रक्तवर्णा झिण्टी।) रक्तवर्णझिण्टीपुष्पवृक्षः। तत्पर्य्यायः। कुरुवकः २। इत्यमरः॥ (विशेषोऽस्याः कुरुवक शब्द ज्ञातव्यः॥)

रक्ततुण्डः, पुं, (रक्तौ तुण्डौ यस्य।) शुकपक्षी। इति राजनिर्घण्टः॥ लोहितसुखयुक्ते, त्रि॥

रक्ततुण्डकः, पुं, (रक्ततुण्डो यस्य। कन्। भृङ्गराजः।) इति राजनिर्घण्टः॥

रक्तत्वचा, स्त्री, (रक्तानि त्वचान्यस्याम्।) गोमूत्रिका। इति राजनिर्घण्टः॥

रक्तत्रिवृत्, स्त्री, (रक्ता त्रिवृत्।) रक्तवर्णत्रिवृता। लाल तेउड़ी। इति भाषा॥ तत्पर्य्यायः। कालिन्दी २ त्रिपुटा ३ ताम्रपुष्पिका ४ कुलवर्णा ५ मधुरी ६ अन्दता ७ काकनासिका ८। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। रेचनत्वम्। ग्रहणीमलविष्मलहारित्वम्। हितकारित्वञ्च। इति राजनिर्घण्टः॥ (अस्या विशेषो यथा,—

"तयोर्मूलतरं विद्धि मूलं यदरुणप्रभम्। सुकुमारे शिशौ हृद्ये मृदुकोष्ठे च तत् शुभम्॥"

इति चरके कल्पस्थाने सप्तमेऽध्याये॥

"अरुणाभं दृढन्मूलं श्रेष्ठं मूलविरेचने॥"

इति सुश्रुते सूत्रस्थाने ४४ अध्यायः॥)

रक्तदन्तिका, स्त्री, (रक्ता दन्ताः अस्याः।) रक्तदन्ता + स्वार्थे कन्। टापि अत इत्वम्।) चक्षिका। यथा,—

"भक्षयन्त्याश्च तानुग्रान् वेप्रचित्तान् महासुरान्। रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः॥ ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः। स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम्॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्ये। ८१। ४०॥

रक्तदला, स्त्री, (रक्तानि दलान्यस्याः।) नलिका। चिविलिका। इति राजनिर्घण्टः॥

रक्तदृक्, [श्] पुं स्त्री, (रक्ता दृक् दृष्टिर्यस्य।) कपोतः। इति केचित्॥ रक्तवर्णचक्षुर्विशिष्टे, त्रि॥

रक्तधातुः, पुं, (रक्तो रक्तवर्णो धातुः।) गैरिकम्। इति त्रिकाण्डशेषः॥ (अस्य पर्य्यायो यथा,—

"गैरिकं रक्तधातुश्च गैरेयं गिरिजन्मथा। सुवर्णगैरिकन्त्वन्यत्ततो रक्ततरं हि तत्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) ताम्रम्। इति राजनिर्घण्टः॥ रक्तवर्णधातुमात्रञ्च॥

रक्तनालः, पुं, (रक्तो नालोऽस्य।) जीवशाकः इति राजनिर्घण्टः॥ (विवरणमस्य जीवशाकशब्दे विज्ञेयम्॥)

रक्तनासिकः, पुं, (रक्ता नासिकास्य।) पेचकः। इति शब्दरत्नावली॥ लोहितनासायुक्ते, त्रि॥

रक्तपः, पुं, (रक्तं पिबतीति। पा + कः।) राक्षसः। इति मेदिनी। पे, २१॥ रक्तपानकर्त्तरि, त्रि॥

रक्तपक्षः, पुं, (रक्तौ पक्षौ अस्य।) गरुड़ः। इति केचित्॥

रक्तपक्षिका, स्त्री, (रक्तानि पक्षाण्यस्याः। स्वार्थे कन्। टापि अत इत्वञ्च।) नाकुली। रक्तपुनर्नवा। इति राजनिर्घण्टः॥ लोहितपक्षञ्च।

रक्तपदी, स्त्री, क्षुद्रवृक्षविशेषः। यथा,—

"भ्रमीपत्रा रक्तपदी समङ्गाञ्जलिकारिका॥"

इति जटाधरः॥

रक्तपद्मः, पुं क्ली, (रक्तो रक्तवर्णो पद्मः।) रक्तवर्णकमलम्। तत्पर्य्यायः। रक्तसरोरुहम् २ रक्तोत्पलम् ३ कोकनदम् ४। इत्यमरः। १। १०। ४२॥ अस्य प्रमाणं यथा,—

"येषा ललितकान्ताख्या देवी मङ्गलचण्डिका। वरदाभयहस्ता च द्विभुजा गौरदेहिका॥ रक्तपद्मासनस्था च जटासुकुटमण्डिता॥ रक्तकौषेयवस्त्रा च स्निग्धवस्त्रा शुभानना। नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा॥"

इति तिथ्यादितत्त्वम्॥

रक्तपल्लवः, पुं, (रक्ताः पल्लवा अस्य।) अशोकवृक्षः। इति राजनिर्घण्टः॥ लोहितपल्लवञ्च॥

रक्तपा, स्त्री, (रक्तं पिबतीति। पा + कः + स्त्रियां टाप्।) जलौका। डाकिनी। इति मेदिनी। गे, २१॥ शोणितपानकर्त्तरि, त्रि॥

रक्तपाकी, स्त्री, (पचते इति। पच् + घञ्। रक्तः रक्तवर्णः पाके यस्याः।) इङ्गुदी। इति राजनिर्घण्टः॥

रक्तपाता, स्त्री, (रक्तं पातयतीति। पत + णिच् + अच्। स्त्रियां टाप्।) जलौका। इति शब्दरत्नावली॥

रक्तपादः, पुं, (रक्तौ पादावस्य।) शुकपक्षी। इति हेमचन्द्रः॥ (यथा, रामायणे। ७।६।५७।

"रक्षोगणस्योपरिष्टात् परिभ्रमति कालवत्। कपोता रक्तपादाश्च सारिका विदृता ययुः॥"

तथा च याज्ञवल्क्यः। १। १७५।

"चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च। मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं चरेत्॥")

लोहितचरणयुक्ते, त्रि॥

रक्तपादी, स्त्री, (रक्ताः पादा अस्याः।) लज्जालुः। (अस्याः पर्य्यायो यथा,—

"लज्जालुः स्यात् भ्रमीपत्रा समङ्गा जलकारिका। रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) हंसपदी। इति राजनिर्घण्टः॥

रक्तपायिनी, स्त्री, (रक्तं पातुं शीलमस्याः। पा + णिनि। स्त्रियां ङीष्।) जलौका। इति राजनिर्घण्टः॥

रक्तपायी, [न्] त्रि, (रक्तं पातुं शीलमस्य। पा + णिनिः।) रक्तपानशीलः। इति शाकरतम्॥

रक्तपारदं, क्ली, (रक्तं रक्तवर्णं पारदम्।) हिङ्गुलम्। इति हारावली। १५५॥ जटाधरे, पुं॥

रक्तपिङ्गं, क्ली, (रक्तं रक्तवर्णं पिङ्गमिव।) जवापुष्पम्। इति शब्दरत्नावली॥

रक्तपिङ्गकः, पुं, (रक्तपिङ्गमिवेति। रक्तपिङ्ग + स्वार्थे कन्।) रक्तालुः। इति राजनिर्घण्टः॥

रक्तपित्तं, क्ली, (रक्तदूषकं पित्तमिति। मध्यपदलोपी कर्म्मधारयः। "रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुतः। रक्तञ्च तत् पित्तञ्चेति रक्तपित्तं रागप्राप्तं पित्तमिति कर्म्मधारय इति चरकः।") रोगविशेषः। तस्य निदानं यथा, धन्वन्तरिरुवाच।

"अथातो रक्तपित्तस्य निदानं प्रवदाम्यहम्। भ्रशोष्णतिक्तकट्वम्ललवणादिविदाहिभिः। कोद्रवोद्दालकैश्चान्यैस्तदुत्कैरतिसेवितैः। कुपितं पित्तरक्तैः पित्तं द्रवं रक्तञ्च मूर्च्छयेत्॥

ते मिथस्तुल्यरूपत्वमागम्य व्याप्नुवंस्तनुम् ।
पित्तरक्तस्य विकृतेः संसर्गाद्दूषणादपि ॥
गन्धवर्णानुवृत्तेषु रक्तेन व्यपदिश्यते ।
प्रभवत्यूष्मलत्वात्तु प्रीहतो यकृतश्च तत् ॥
शिरोगुरुत्वमरुचिः प्रीतेच्छा मधुकोत्कफः ।
कृद्दिष्टकृद्दिवैभत्स्यं काश्यः श्वासो भ्रमः क्लमः ॥
लोहितोऽलोहितो मत्स्यामगन्धास्यश्च विज्वरः ।
रक्तहारिद्रहरितवर्णता नयनादिषु ॥
नीललोहितपीतानां वर्णानामविवेचनम् ।
स्वप्ने तदर्थधर्मित्वं भवत्यस्मिन् भविष्यति ॥
ऊर्द्धं नासाक्षिकर्णास्यैर्मेढ्योनिगुदैरधः ।
कुपितं रोमकूपेभ्य समस्तैस्तत् प्रवर्त्तते ॥
ऊर्द्धं साध्यं कफाढ्यत्वात् तद्विरेचनसाधितम् ।
वक्ष्यौषधञ्च पित्तस्य विरेको हि वरौषधम् ॥
अनुबन्धी कफो यच्च तच्च तस्यापि शुद्धिकृत् ।
कषायाः स्वादवो यस्य विशुद्धे श्लेष्मलोहिताः ॥
कटुतिक्तकषाया वा ये निसर्गात् कफावहाः ।
अधो याप्यञ्च नामुष्यात् तत् प्रवर्द्धनसाधनम् ॥
अल्पौषधञ्च पित्तस्य वमनं ननु चौषधम् ।
अनुबन्धि च लोपस्य ग्लानपित्तनरस्य तत् ॥
कषायाश्च हितास्तस्य मधुरा एव केवलम् ।
कफमारुतसंसृष्टमसाध्यसुपनायनम् ॥
असत्प्रतिलोमत्वादसाध्यादौषधस्य च ।
नहि संशोधनं किञ्चिदस्य च प्रतिलोमनम् ॥
शोधनं प्रतिलोमञ्च रक्तपित्ते विनिर्द्दिशेत् ।
एवमेवोपशमनं सर्व्वशोधनमिष्यते ॥
संसृष्टेष्वाह दोषेषु सर्व्वथा कृद्दनं हितम् ।
तत्र दोषोऽत्र गमनं शिरावस्त्र इव लक्ष्यते ।
उपद्रवास्च विकृतं फलतस्त्वेषु चाधिकम् ॥"

इति गारुड़े १५३ अध्यायः ॥ * ॥

तस्यौषधं यथा,—

"त्रिवृता त्रिफला श्यामा पिप्पली शर्करा मधु ।
मोदकः सन्निपातान्तो रक्तपित्तज्वरापहः ॥
व्याप्तायां विद्यमानायामाशायां जीवितस्य च ।
रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥
अटरूषकनड़ीकापथ्याक्वाथः सशर्करः ।
क्षौद्राढ्यः कासनश्वासरक्तपित्तनिबर्हणः ॥"

इति गारुड़े १७४ अध्यायः ॥*॥

अपि च। "तत्र रक्तपित्तस्य निदानपूर्व्विकां संप्राप्तिमाह ।

'धर्म्मव्यायामशोकाध्ववायेरतिसेवितैः ।
तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च ।
पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम् ॥'

तीक्ष्णं मरिचादि। उष्णोऽग्नितापादिः। क्षारो यवक्षारादिः। विदग्धं दूषितम्। स्वगुणैः स्वकारणैर्गुणैस्तीक्ष्णादिभिः। गुणैरिति बहुत्वेन तीक्ष्णाम्ललवणकटूष्णधर्म्मादयो गृह्यन्ते। विदहति दूषयति ॥ * ॥ रक्तपित्तस्य सामान्यलक्षणमाह ।

'ततः प्रवर्त्तते रक्तमूर्द्धं वाधो द्विधापि वा ।'

रक्तमित्युपलक्षणम्। ततःसंसर्गे पित्तञ्च। अतएव रक्तञ्च पित्तञ्च रक्तपित्तमिति द्वन्द्व इति सुश्रुतः ॥ रक्तञ्च तत् पित्तञ्चेति रक्तपित्तं रागप्रायं पित्तमिति कर्म्मधारय इति चरकः ॥ मार्गानाह ।

'ऊर्द्धं नासाक्षिकर्णास्यैर्मेढ्योनिगुदैरधः ।
कुपितं रोमकूपेभ्य समस्तैस्तत् प्रवर्त्तते ॥'

कुपितमतिकुपितम् ॥*॥ पूर्व्वरूपमाह ।

'सदनं प्रीतकामित्वं कण्ठधूमायनं वमिः ।
लोहगन्धित्व निश्वासो भवत्यस्मिन् भविष्यति ॥'

विशिष्टं रूपमाह ।

'सान्नं सपाण्डु सक्लेदं पिच्छिलञ्च कफान्वितम् ।
श्यावारुणं सफेणञ्च तनुरूक्षञ्च वातिकम् ॥
रक्तपित्तं कषायाभं क्षणं गोमूत्रसन्निभम् ।
मेचकागारधूमाभमञ्जनाभञ्च पैत्तिकम् ।
संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ॥'

सपाण्डु ईषत्पाण्डु। पिच्छिलं मयूरपिच्छच्छविसदृक्षम्। क्षणं कज्जलाभम्। मेचकं चिक्कणकृष्णवर्णम्। अञ्जनं श्रोतोऽञ्जनं तदाभम् ॥*॥ संसर्गविशिष्टेषु मार्गभेदमाह ।

'ऊर्द्धगं कफसंसृष्टमधोगं मारुतानुगम् ।
द्विमार्गं कफवाताभ्यां उभाभ्यां तत्प्रवर्त्तते ॥'*॥

उपद्रवानाह ।

'दौर्ब्बल्यश्वासकासज्वरवमथुमदाः पाण्डुता दाहमूर्च्छा
मुक्ते घोरो विदाहस्त्वतिरयि सदा कृच्छ्रतुल्या च पीड़ा ।
क्षय्या कोष्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनञ्च
द्वेषो भुक्तेऽविपाको विकृतिरपि भवेद्रक्तपित्तोपसर्गाः ॥'

उपसर्गा उपद्रवाः। विकृतिर्मांसप्रक्षालनाभत्वादिः ॥ * ॥ साध्यत्वादिकमाह ।

'एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते ।
यन्निर्दोषमसाध्यं स्यान्नन्वाम्नेरतिवेगवत् ॥
ऊर्द्धं साध्यमधो याप्यमसाध्यं युगपद्गतम् ।
व्याधिभिः क्षीणदेहस्य दृढस्यानशनञ्च यत् ॥'

साध्यमाह ।

'एकमार्गं बलवतो नातिवेगं न चोत्थितम् ।
रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम् ॥'

सुखे काले हिमग्रिग्रियोः ॥*॥ असाध्यमाह ।

'मांसप्रक्षालनाभं क्वथितमिव च यत् कर्दमाम्भोनिभं वा
मेदः पूयासृक्लसं यकृदिव यदि वा पङ्कजं वा कफाभम् ।
यत् क्षय्यं यच्च नीलं भृशमपि कुणपं यच्च
शोक्ता विकारास्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥'

उक्ता विकारा दौर्ब्बल्यादयः। सुरपतिधनुषा तुल्यं नानावर्णम्।

'येन चोपहतो रक्तं रक्तपित्तेन मानवः ।
पश्येद्दृश्यं वियच्चापि तच्चासाध्यमसंशयम् ॥'

येन रक्तपित्तेन उपहतो मनुष्यः दृश्यं घटपटादिकं वियच्च रक्तं पश्यति स नश्यति वियच्चापि अदृश्यमपीत्यर्थः ॥ * ॥ अरिष्टमाह ।

'लोहितं हृदयेदृश्यं बहुशो लोहितेक्षणः ।
लोहितोद्गारदर्शी च म्रियते रक्तपित्तकः ॥'

लोहितोद्गारदर्शी व्याधिमहिन्नोद्गारमपि लोहितं पश्यति इत्यर्थः ॥*॥ अथ रक्तपित्तस्य चिकित्सा ।

'पित्तासृक्स्तम्भयेन्नादौ प्रवृत्तं बलिनोऽन्नतः ।
तृट्पाण्डुव्यङ्गगौरोगप्लीहगुल्मज्वरादिकृत् ॥
ग्लानिष्वधिकनीवारकोरदूषप्रसाधिकाः ।
श्यामाकाश्च प्रियङ्गुश्च भोजनं रक्तपित्तिनाम् ॥'

प्रियङ्गुः कङ्गुः ।

'मस्तरसुद्रचणकाः समकुष्ठाढ़कीफलाः ।
प्रशस्ताः सूपयूषार्थे कल्पिता रक्तपित्तिनाम् ।
दाड़िमामलकं विड्वानन्नार्थे चापि दापयेत् ।
पटोलनिम्बवेत्राग्रप्ररूढवेतसपल्लवाः ॥
शाकार्थे शाकसात्म्यानां तण्डुलीयादयो हिताः ।
पारावतान् कपोतांश्च लावाञ्छाश्वविष्किरान् ॥
मृगान् कपिञ्जलानेणान् हरिणान् कालपुच्छकान् ।
रक्तपित्तहरान् विद्याद्रसांस्तेषां प्रयोजयेत् ॥
ईषदम्लानन्नवांश्च घृतभृष्टान् ससैन्धवान् ।
कफानुगे यूषशाके दद्याद्वातानुगे रसम् ॥
पथ्यं सतिलयूषेण सशिताजाजशुक्तुभिः ।
धान्याकधान्यवासानां द्राक्षायाश्च पटोर्हिमः ।
रक्तपित्तं ज्वरं दाहं क्षय्यं शोषञ्च नाशयेत् ॥
धान्याकादेर्हिमः ॥ * ॥

'खसवीरसृतपलं ध्यान्यं चन्दनं यष्टिकोत्पला ।
उशीरञ्च वृषश्चैषां क्वाथं समधुशर्करम् ॥
पाययेत्तेन सद्यो हि रक्तपित्तं प्रशाम्यति ।
रक्तपित्तं जयत्युग्रं क्षय्यं दाहं ज्वरं तथा ॥*॥
पुराणं यवनानीयं कुष्माण्डस्य फलं दृढम् ।
तद्बीजाधारबीजत्वक्शिरास्नायुं समाचरेत् ॥
ततस्तस्य तुलां नीत्वा पचेच्चतुर्गुणेऽम्भसि ।
तस्मिन्नीरेऽर्द्धशिष्टे तु यत्नतः पूतमालोड्य ।
तानि कुष्माण्डखण्डानि पीड़येद्दृढवाससा ।
यत्नतस्तज्जलं नीत्वा पुनः पाकाय धारयेत् ॥
कुष्माण्डं शोषयेद्धर्म्मे ताम्रपात्रे ततः क्षिपेत् ।
क्षिप्त्वा तत्र घृतप्रस्थं कुष्माण्डं तेन भर्ज्जयेत् ॥
मधुवर्णं तदालोक्य तज्जलं तत्र निःक्षिपेत् ।
सिताया च तुलां तत्र क्षिप्त्वा तल्लेहवत् पचेत् ॥
सुपक्वे पिप्पलीशुण्ठीजीराणां द्वे पले पृथक् ।
पृथक् पलार्द्धं धान्याकत्वचेलामरिचं त्वचम् ॥
चूर्णमेषां क्षिपेत्तत्र घृतार्द्धं क्षौद्रमावपेत् ।
एतत् पलमितं खादेदश्वत्थबिल्वं यथा ॥
खण्डकुष्माण्डलेहोऽयं रक्तपित्तं विनाशयेत् ।
पित्तज्वरं क्षयं दाहं प्रदरं क्षतजं वमिम् ॥
स्वरभेदं सहृद्रोगं कासं श्वासं क्षतं क्षयम् ।
नाशयत्येव दृष्टोऽयं दृंहणो बलवर्द्धनः ॥'

इति खण्डकुष्माण्डावलेहः ॥ * ॥

'घृतावरीमूलकल्कं कल्कात् क्षीरं चतुर्गुणम् ।
क्षीरतुल्यं घृतं गव्यं सितया कल्कतुल्यया ॥

घृतप्रस्थं पचेत्तत्तु पलार्द्धं लेहयेत् सदा।
रक्तपित्तं क्षतपित्तं क्षयं श्वासञ्च नाशयेत्॥'
शतावरीपाकः। इति रक्तपित्ताधिकारः॥"

इति भावप्रकाशः॥

(तथास्य सनिदानपूर्व्वरूपलक्षणं सम्प्राप्तिञ्च।
"पित्तं यथा भूतं लोहितपित्तसंज्ञां लभते तत्तथानुव्याख्यास्यामः। यदा यस्तु अनुर्यवकोद्दालककोरदूषकप्रायाण्यन्नानि नित्यं भुङ्क्ते भृशोष्णातीक्ष्णमपि चान्यदन्नजातं निष्पावमाषकुलत्थचारस्नेपोपहितं दधिमस्तूदश्वित् कट्वम्लकाञ्जिकोपहितं वाराहमाहिषाविकमत्स्यगव्यपिण्डितं पिण्याकं पिण्डालकशाकोपहितं मूलक-सर्षपलशुनकरञ्जिग्रुकखरपूषभूस्तृणकशुभ्रसुरसकुठेरककक्कीरकालक-पर्णासवक-कवित्थचुक्रकोपदंशं सुरासौवीरतुषोदकमैरेयमेदकमधूलकक्कुबरबदरान्नप्रायानुपानं पिष्टान्नोत्तरभूयिष्ठसुखाभिलाषो वातिमात्रमतिवेलं वा पयसा समश्नाति रौहिषीकलकङ्कायोतं वा सर्षपतैलचारसिद्धं कुलत्थमाषपिण्याकजाम्बवलकुचपक्वैः शौक्तिकैर्वा सह क्षीरमाममतिमात्रमथवा पित्तलप्रायाभिलाषस्तेवमाचरतः पित्तं प्रकोपमापद्यते। लोहितञ्च स्वप्रमाणमतिवर्त्तते। तस्मिन् प्रमाणातिप्रवृत्ते पित्तं प्रकुपितं शरीरमनुसर्पदूष्यदेव यत्तत्शोणितप्रभवानां लोहितवहानां स्रोतसां लोहिताभिष्यन्दगुरूणि सुखान्यासाद्य प्रतिपद्यते तदेव लोहितं दूषयति। संसर्गान्तर्लोहितप्रदूषणाल्लोहितगन्धवर्णानुविधानाच्च पित्तं लोहितमित्याचक्षते। तस्येमानि पूर्व्वरूपाणि। तद्यथा। अन्नाभिलाषो मुक्तस्य विदाहः शुक्लाम्लरसगन्ध उद्गरस्यन्दोऽभीक्ष्णागमनं हृद्दिंसस्य बीभत्सता खरभेदो गात्राणां सदनं परिदाहश्च सुखालूमागम इव लोहलोहितमत्स्यामगन्धित्वमपि चास्यस्य रक्तहरितहारिद्रवर्त्तमङ्गावयवप्रक्लम्लूक्ष-खेदलाजाग्निद्रावकास्यकर्षमलपिड़कोलिकापिड़कारामसंवेदनालोहितनीलपीतश्यावाभासचैत्यताश्च रूपाणां स्वप्रदर्शनमभीक्ष्णमिति लोहितपित्तपूर्व्वरूपाणि। उपद्रवास्तु खलु दौर्ब्बल्यारोचकाविपाकश्वासकासज्वरातीसारग्रहणीपाण्डुरोगस्वरभेदाः। मार्गौ पुनरस्य द्वौ ऊर्द्ध्वाधश्च तद्दुष्टेष्वपि शरीरे श्लेष्मसंसर्गादूर्द्ध्वं प्रपद्यमानं कर्णनासिकानेत्रास्येभ्यः प्रधावते। वहुवाते तु शरीरे वातसंसर्गादधः प्रपद्यमानं मूत्रपुरीषमार्गाभ्यां प्रधावते। वहुवातश्लेष्मणि तु शरीरे श्लेष्मवातसंसर्गाद्द्वावपि मार्गौ प्रपद्यते। तौ मार्गौ प्रपद्यमानं सर्व्वेभ्य एव यथोक्तेभ्यः स्रोभ्यः प्रधावते शरीरस्य। तत्र यदूर्द्धभागं तत्साध्यं विरेचनोपक्रमसाध्यत्वात् वस्तिौषधत्वाच्च। यदधोभागं तदप्याशु शमनोपक्रमसाध्यत्वात् अस्त्यौषधत्वाच्च। यदुभयभागं तदसाध्यं वमनविरेचनायोगित्वादनौषधत्वाच्च। रक्तपित्तप्रकोपस्तु खलु पुरा दग्धयज्ञोर्ह्वसे रुद्रकोपाभिशप्तेन प्राणिनां परिगतशरीरप्राणानामनुच्चरमभवत्। तस्याशुकारिणो दावाग्नेरिवापतितस्यात्यधिकस्याशु प्रशान्तौ यतितव्यं मात्रां देशं कालञ्चाभिसमीक्ष्य सन्तर्पणेनापतर्पणेन वा मृदुमधुराग्निरतिरूक्षकषायैरभ्यवहार्य्यं प्रदेहपरिषेकावगाहसंसर्ज्जनैर्वमनाद्यैर्वा तच्चावहितेनेति॥"

संक्षेपतोऽस्योपशमनोपायो यथा,—

"साध्यं लोहितपित्तं तदूर्द्ध्वं प्रतिपद्यते।
विरेचनस्य योगित्वाद्वहुत्वाच्छ्लेष्मणस्य च।
वमनं नहि पित्तस्य हरणे श्रेष्ठमुच्यते।
यच्च तत्रानुगो वायुस्तच्छान्त्यै चापरं मतम्॥
स्याच्च योगावहन्तत्र कषायं तिक्तकानि च।
तस्मादाद्यं समाख्यातं यदूरुमनुलोमगम्॥
रक्तपित्तन्तु यन्मार्गौ द्वावपि प्रतिपद्यते।
असाध्यमपि तज्ज्ञेयं पूर्व्वोक्तादपि कारणात्॥
नहि संशोधनं किञ्चिदस्यास्य प्रतिमार्गगम्।
प्रतिमार्गञ्च हरणं रक्तपित्ते विधीयते॥
एवमेवोपशमनं सर्व्वस्रो नास्य विद्यते।
संसृष्टेषु च दोषेषु सर्व्वलिङ्गमनं मतम्॥
इत्युक्तं त्रिविधोर्द्धं रक्तं मार्गविशेषतः।
एभ्यस्तु खलु हेतुभ्यः किञ्चित् साध्यं न सिध्यति।
श्रेष्ठोपकरणाभावात् दौरात्म्याद्वैद्यदोषतः॥
अकर्म्मतश्च साध्यत्वं कस्यचिद्योगोऽतिवर्त्तते।
तच्च साध्यत्वमेकं स्यात् साध्यायाप्यपरिक्रमात्॥

रक्तपित्तस्य विज्ञानमिदं तस्योपदेक्ष्यते।
यत् क्षय्यमथवा नीलं यद्वा ग्रक्षयुग्यभम्॥
रक्तपित्तमसाध्यन्तदासन्ने रक्षणञ्च यत्।
भृशं पूयतिमात्रञ्च सर्व्वोपद्रवञ्च यत्॥
बलमांसक्षये यच्च तच्च रक्तमसिद्धिमत्।
येन चोपहतो रक्तं रक्तपित्तेन मानवः।
पक्ष्मेद्दृश्यं वियच्चैव तच्चासाध्यमसंशयम्॥
तच्चासाध्यं परित्यज्यं याप्यं यत्नेन यापयेत्।
साध्यञ्चावहितः सिद्धैर्भेषजैः साधयेद्भिषक्॥
कारणं नाम निर्व्वृत्तिं पूर्व्वरूपाण्युपद्रवान्।
मार्गौ दोषानुबन्धञ्च साध्यत्वं व च हेतुमत्॥
निदाने रक्तपित्तस्य आचष्टे पुनर्व्वसुः।
पीतमोदरजोदोषजोभमागमदस्मृदः॥"

इति चरके निदानस्थाने द्वितीयेऽध्याये॥ ०॥

अथास्य चिकित्सायां रसाः।

"घृतं गन्धं माक्षिकञ्चैव लौहं
सर्व्वं घृष्टं चैफलेनोदकेन।
लोहे पात्रे गोमये: पाचयित्वा
रात्रौ दद्यात् रक्तपित्तप्रशान्त्यै॥

इति सुधानिधीरसः॥

घृताधसुखतीक्ष्णञ्च माक्षिकं रसतालकम्।
गन्धकञ्च भवेत्तुल्यं यष्टिद्राक्षान्वितादवेः॥
दिनैकं मर्द्दयेत् खल्वे सिताक्षौद्रयुतावटी।
मात्रामात्रा निहन्त्याशु रक्तपित्तं सुदारुणम्।
ज्वरं दाहं क्षयं वान्तिं श्लेष्मपित्तान्वितो रसः॥

इति रक्तपित्तान्तको रसः॥

घृतकैरातिलसंयुक्तं त्रिकत्रययुतन्त्वयः।
रक्तपित्तं निहन्त्याशु अम्लपित्तहरं परम्॥

इति घृतकैरातं लौहम्॥"

इति वैद्यकरसेन्द्रसारसंग्रहे रक्तपित्ताधिकारे॥

अथास्य पथ्यापथ्यविधिः।

"अधोगते छर्दनसूर्द्धनिर्गमे
विरेचनं स्यादुभयत्र लङ्घनम्।
पुरातनाः षष्टिकशालिकोद्रव-
प्रियङ्गुनीवारयवपसातिकाः॥
सुद्गा मसूराढकवास्तु वर्य्यो-
सुकुष्टकाचिल्लिटवर्ब्भिमत्स्याः।
मृगः कपोतो हरिणेलताद-
ग्रारालिपारावतवर्ब्हकाश्च॥
वका उरभ्राश्च सकालपुच्छाः
क्षपिञ्जलाश्चापि कषायवर्गः।
नदामजायाश्च पयो घृतञ्च
घृतं महिष्याः पनसं प्रियालम्॥
रम्भाफलं कर्कटतण्डुलीय-
पटोलवेत्राग्रमहार्द्रकाणि।
पुराणकुष्माण्डफलञ्च पक्व-
फलानि तद्वोजजलानि वासा॥
स्वादूनि विम्बानि च दाड़िमानि
खर्ज्जूरधात्रीमिषिनारिकेलम्।
कपित्थराजाटमरुष्करानि
कपित्थशालूकपरूषकानि॥
भूनिम्बशाकं पिचुमर्द्दपत्रं
तुम्बीकलिङ्गानि च लाजसक्तुः।
द्राक्षा सिता माक्षिकमैक्षवञ्च
शीतोदकक्षौद्रिदवारि चापि॥
सेकोऽवगाहः घृतधौतसर्पि-
रभ्यङ्गयोगः शिशिरप्रदेहः।
हिमानिलस्पर्शनमिन्दुपादाः
कथा विचित्राश्च मनोऽनुकूलाः॥
धारागृहं भूमिगृहं सुशीतं
वेदूर्य्यसुक्ताम्बिधारणञ्च।
रम्योत्पलाम्भोरुहपत्रशय्या
शौमाम्बरक्षोपवनं सुशीतम्॥
प्रियङ्गुकाचन्दनरूषितानां
मालिङ्गनञ्चापि वराङ्गनानाम्।
पद्माकराणां सरितां ह्रदानां
चन्द्रोदयानां हिमवद्गिरीणाम्॥
सुशीतलानां गिरिनिर्झराणां
सुतिः प्रशस्तानि च कीर्त्तितानि।
प्रणीरनीरं हिमवालुका च
मिष्टं वृषा शोणितपित्तरोगे॥"

अथापथ्यानि।

"व्यायामाध्वनिषेवणं रविकरस्तीक्ष्णानि
कर्म्माणि च।
क्षोभो वेगविधारणञ्चपलता हस्त्यश्वयानानि च॥
स्वेदासंसुतिधूमपानसुरतक्रोधाः कुलत्थो गुड़ो
वार्त्ताकं तिलमाषसर्षपदधिक्षारामि कौपं पयः॥"

इति वैद्यकपथ्यापथ्यविधौ रक्तपित्ताधिकारः॥)

रक्तपित्तहा, स्त्री, (रक्तपित्तं हन्तीति । हन्+ड: । स्त्रियां टाप् ।) रक्तघ्नी । इति शब्दचन्द्रिका । गाँठिया दूब्बा इति भाषा । (विवृतिरस्या: रक्तघ्नीशब्दे ज्ञातव्या ।)

रक्तपुनर्नवा, स्त्री, (रक्ता रक्तवर्णा पुनर्नवा ।) रक्तवर्णपुनर्नवाशाक: । तत्पर्य्याय: । क्रूरा २ मण्डलपत्रिका ३ रक्तकाण्डा ४ वर्षकेतु: ५ लोहिता ६ रक्तपत्रिका ७ वैशाखी ८ रक्तवर्षाभू: ९ श्वेतघ्नी १० पुष्पिका ११ विकसरा १२ विषघ्नी १३ प्राहृषेण्या १४ शारिवी १५ वर्षाभव: १६ श्वेतपत्र: १७ भौम: १८ पुनर्भव: १९ नव: २० नव्य: २१ । अस्य गुणा: । तिक्तत्वम् । शारकत्वम् । श्वेतरक्तप्रदरदोषपाण्डुपित्तनाशित्वञ्च । इति राजनिर्घण्ट: ॥

रक्तपुष्प:, पुं, (रक्तं पुष्पमस्य ।) करवीर: । इति जटाधर: ॥ (अस्य पर्य्यायो यथा,—

"करवीर: श्वेतपुष्प: श्वेतकुम्भोऽश्वमारक: ।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) रौहितवृक्ष: । इति शब्दमाला ॥ रक्तकाञ्चनवृक्ष: । दाड़िमवृक्ष: । वकवृक्ष: । इति रत्नमाला ॥ बन्धूकवृक्ष: । पुन्नागवृक्ष: । इति राजनिर्घण्ट: ॥ (रक्तवर्णपुष्पविशिष्टे, त्रि ।) यथा, हरिवंशे । १५ । १४ ।

"इन्द्राग्निदेवते रक्तपुष्पफलशालिन: सतिलसुप्रा: ।
कार्पासमाषचणका: पुरन्दरकुलाश्रभक्ताश्च ॥")

रक्तपुष्पक:, पुं, (रक्तं पुष्पमस्य । कन् ।) पलाशवृक्ष: । (अस्य पर्य्यायो यथा,—

"पलाश: किंशुक: पर्णो याज्ञियो रक्तपुष्पक: ।
त्रारक्षेहो वातहरो ब्रह्मवृक्ष: समिद्वर: ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) रौहितकवृक्ष: । इति जटाधर: ॥ पर्णट: । शाल्मलिवृक्ष: । इति राजनिर्घण्ट: ॥

रक्तपुष्पा, स्त्री, (रक्तं पुष्पं अस्या: ।) शाल्मलिवृक्ष: । इति जटाधर: ॥ (अस्या: पर्य्यायो यथा,—

"शाल्मलिस्तु भवेत्कोषा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पुनर्नवा । तत्पर्य्यायो यथा,—

"पुनर्नवा पररक्ता रक्तपुष्पा श्रियाटिका ॥"

सिन्दूरी । तत्पर्य्यायो यथा,—

"सिन्दूरी रक्तबीजा च रक्तपुष्पा सुकोमला ॥"

इति भावप्रकाश: ॥)

रक्तपुष्पिका, स्त्री, (रक्तपुष्पा + कन् । टापि अत इत्वम् ।) चञ्चाशु: । इति शब्दचन्द्रिका ॥ रक्तपुनर्नवा । भूपाटलि: । इति राजनिघण्ट: ॥

रक्तपुष्पी, स्त्री, (रक्तं पुष्पं अस्या: । ङीष् ।) पाटलीवृक्ष: । इति जटाधर: ॥ जवा । आरक्तकोलता । नागदमनी । करञ्जवृक्ष: । उड्डकाष्ठी । इति राजनिर्घण्ट: ॥ (धातकी । तत्पर्य्यायो यथा,—

"धातकी रक्तपुष्पी स्यात् कुञ्जरा मध्यवासिनी ॥"

इति वैद्यकरत्नमालायाम् ॥)

रक्तपूरकं, क्ली, (रक्तं पूरयतीति । पूर् + ण्वुल् ।) दृक्षाम्लम् । इति राजनिर्घण्ट: ॥ (विवरणमस्य दृक्षाम्लशब्दे ज्ञातव्यम् ॥)

रक्तप्रसव:, पुं, (रक्त: रक्तवर्ण: प्रसव: पुष्पमस्य ।) रक्तकरवीर: । रक्ताम्बान: । इति राजनिर्घण्ट: ॥

रक्तफल:, पुं, (रक्तं लोहितवर्णं फलमस्य ।) वटवृक्ष: । इति जटाधर: ॥ (अस्य पर्य्यायो यथा,—

"वटो रक्तफल: प्रह्वी न्यग्रोध: स्कन्दजो ध्रुव: ।
चीरी वैश्रवणो वासो बहुपादो वनस्पति: ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तफला, स्त्री, (रक्तं पक्वदशायां लोहितवर्णं फलमस्या: ।) बिम्बिका । इत्यमर: । २ । ४ । १६६ ॥ (अस्या: पर्य्यायो यथा,—

"तुण्डी रक्तफला बिम्बी तुण्डिकेरी च बिम्बिका ॥"

इति वैद्यकरत्नमालायाम् ॥) स्वर्णवल्ली । इति राजनिर्घण्ट: ॥ (अस्या: पर्य्यायो यथा,—

"स्वर्णवल्ली रक्तफला काकाण्ड: काकवल्लरी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तफेनज:, पुं, (रक्तफेनात् जायते इति । जन् + ड: ।) वामपार्श्वशूकोम । तत्पर्य्याय: । पूस्नुष: २ । इति हेमचन्द्र: । ३ । २६६ ॥

रक्तबिन्दु:, पु, (रक्तानां बिन्दु: ।) रक्तकणा । यथा,—

"रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरत: ।
समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुर: ॥"

इति मार्कण्डेये देवीमाहात्म्यम् ॥)

रक्तबीज:, पुं, (रक्तवर्णं बीजमस्य ।) दाड़िम: । इति राजनिर्घण्ट: ॥ (अरिष्टकफल: । रीटा इति ख्यात: । तत्पर्य्यायो यथा,—

"अरिष्टकस्तु माङ्गल्य: फलवर्णोऽर्थसाधन: ।
रक्तबीज: पीतफेन: फेनिलो गर्भपातन: ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ रक्तं शोणितं बीजं कारणमस्य ।) असुरविशेष: । स च शुम्भनिशुम्भसेनापति: देव्या हतश्च । यथा,—

"पलायनपरान् दृष्ट्वा दैत्यान् माहेश्वरादिकान् ।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुर: ॥
रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरत: ।
समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुर: ॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुर: ।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताड़यत् ॥
कुलिशेनाहतस्याशु तस्य सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमा: ॥
यावन्त: पतितास्तस्य शरीरादृक्तबिन्दव: ।
तावन्त: पुरुषा जातास्तद्वीर्य्यबलविक्रमा: ॥
तैश्चासुरासृक्समभूतैरसुरै: सकलं जगत् ।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥
तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा ।
उवाच कालीं चामुण्डे ! विस्तरं वदनं कुरु ॥
मच्छस्त्रपातसम्भूतान् रक्तबिन्दून् महासुरान् ।
रक्तबिन्दो: प्रतीच्छ त्वं वक्त्रेणानेन वेगिता ॥
भक्षयन्ती चर रणे तदुत्पन्नान् महासुरान् ।
एवमेष क्षयं दैत्य: क्षीणरक्तो गमिष्यति ॥
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।
इत्युक्ता तां ततो देवी शूलेनाभिजघान तम् ॥
मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥
यतस्ततस्तद्वक्त्रेण चामुण्डा संप्रतीच्छति ।
मुखे समुद्गता येऽस्या रक्तपातान्महासुरा: ।
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ॥
देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभि: ।
जघान रक्तबीजं तं चामुण्डापीतशोणितम् ॥
स पपात महीपृष्ठे शस्त्रसंघसमाहत: ।
नीरक्तश्च महीपाल ! रक्तबीजो महासुर: ॥
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ! ।
तेषां मातृगणो जातो ननर्त्तासृक्पदोद्धत: ॥"

इति मार्कण्डेये देवीमाहात्म्यम् ॥

(महिषासुरपिता दानवो रम्भ एव जन्मान्तरे रक्तबीजो जात: । यथा, देवीभागवते । ५ । २ । ४४—४६ ।

"हतं रम्भं समानीय यत्राक्षे परमं प्रियम् ।
चितायां रोपयामासुस्तस्य देहस्य शुद्धये ॥
महिषी सा पतिं दृष्ट्वा चितायां रोपितं तदा ।
प्रवेष्टुं सा मतिं चक्रे पतिना सह पावकम् ॥
वार्य्यमाणापि यत्नै: सा प्रविवेश हुताशनम् ।
ज्वालामालाकुलं साध्वी पतिमादाय वल्लभम् ॥
महिषस्तु चितामध्यात् समुत्तस्थौ महाबल: ।
रम्भोऽप्यन्यवपु: कृत्वा निरगत: पुत्रवत्सल: ॥
रक्तबीजोऽप्यसौ जातो महिषोऽपि महाबल: ।
अभिषिक्तस्तु राज्येऽसौ हयारिरसुरोत्तमै: ॥
एवं स महिषो जातो रक्तबीजश्च वीर्य्यवान् ।
अवध्यस्तु सुरैर्दैत्यैर्मानवैश्च नृपोत्तम ! ॥")

रक्तबीजका, स्त्री, (रक्तो रक्तवर्णो बीजोऽस्या: । कन् + टाप् ।) तरबीजवृक्ष: । इति राजनिर्घण्ट: ॥

रक्तमञ्जर:, पुं, (रक्ता रक्तवर्णा मञ्जरी यस्य सोऽस्तीत्यर्थे । "अर्शआदिभ्य: अच् ।" ५ । २ । १२७ । रक्तप् ।) निचुलवृक्ष: । इति शिवकाण्डशेष: ॥ (गुणादयोऽस्य निचुलशब्दे ज्ञातव्या: ॥)

रक्तमत्स्य:, पुं, (रक्तो रक्तवर्णो मत्स्य: ।) रक्तवर्णो मत्स्यविशेष: । यथा,—

"यो रक्ताङ्गो नातिदीर्घो न चाल्पो
नातिस्थूलो रक्तमत्स्य: स तूक्त: ।
शीतो रुच्य: पुष्टिबलप्रदोऽसौ
नाशं धत्ते किञ्च दोषत्रयस्य ॥"

इति राजनिर्घण्ट: ॥

रक्तमूलकः, पुं, (रक्तं रक्तवर्णं मूलमस्य । कन् ।) देवसर्षपवृक्षः । इति राजनिर्घण्टः ॥

रक्तमूला, स्त्री, (रक्तं मूलं अस्याः । टाप् ।) लज्जालुवृक्षः । इति राजनिर्घण्टः ॥

रक्तमेहः, पुं, (मेहनं मेहः रक्तस्य मेहः ।) प्रमेहरोगविशेषः । तस्य लक्षणं यथा,—

"विस्रसृग्गं सलवणं रक्ताभं रक्तमेहतः ॥"

मूत्रं मूत्रयेदिति योजनीयम् । अस्यौषधम् । यथा,—

"चन्द्रप्रभावचासुस्ताभूनिम्बसुरदारवः ।
हरिद्रानिशिधादार्वीपिप्पलीमूत्रचित्रकम् ॥
धान्यकं त्रिफला चव्यं विड्ङं गजपिप्पली ।
सुवर्णमाक्षिकं योज्यं द्वौ द्वौ चारौ लवणत्रयम् ॥
यतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षहनलोहं स्याच्चतुष्कर्षा सिता भवेत् ॥
शिलाजतुकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्षोन्मा गुटिका शुभा ॥
चन्द्रप्रभेति विख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥
चतमश्चाश्मरीस्तद्वत् मूत्राघातांस्त्रयोदश ।
अष्ठष्ठीलां पाण्डुरोगं कामलाश्च हलीमकम् ॥
कासं श्वासं तथा कुष्ठमग्निमान्द्यमरोचकम् ।
वातपित्तकफव्याधीन् बल्या वृष्या रसायनी ॥
समाराध्य श्रियं तस्मात् प्रयत्नात् गुटिकामिमाम् ।
प्राग्रवांश्चन्द्रमा यस्मात् तस्माच्चन्द्रप्रभा स्मृता ॥"

इति भावप्रकाशः ॥

(तथास्य लक्षणम् । यथा,—

"विस्रं लवणमुष्णञ्च रक्तं मेहति यो नरः ।
पित्तस्य प्रकोपेण तं विद्याद्रक्तमेहिनम् ॥"

इति चरके निदानस्थाने चतुर्थेऽध्याये ॥)

रक्तमोक्षणं, क्ली, (रक्तस्य मोक्षणम् ।) शोणितस्रावः । यथा,—

"वेदनोपशमार्थाय तथा प्रकृपशमाय च ।
अविरोतृपतिते शोथे शोणितस्रावणञ्चरेत् ॥
चरेत् कुर्य्यात् ।
एकतस्तु क्रियाः सर्व्वा रक्तमोक्षणमेकतः ।
रक्तं हि देहनामूलं तच्चेन्नास्ति न चापि रुक् ॥
विवर्णे कठिने स्रावे ग्रन्थौ चात्यन्तवेदने ।
सविशेषे विशेषेण जलौकोभिः पदैरपि ॥
शोणितस्रावणञ्चरेदित्यनेनान्वयः ।" इति भावप्रकाशः ॥ (तथा च ।

"रक्तावसेचनं चतुर्भिः प्रकारैर्भवति ।
शिराविरेचनेनापि अलाबूभिश्चैव च ॥
अल्पाद्रङ्गैर्जलौकाभी रक्तञ्च स्रावयेद्बुधः ।
पूर्व्वाह्णे चापराह्णे च नात्युष्णे नातिशीतले ॥
यवागूपरिपीतस्य शोणितं मोक्षयेद्भिषक् ।
शिरोरोगेषु सर्व्वेषु नासामधपुटे तथा ।
अलजं रेचयेद्यत्नात् सर्व्वदा भिषगुत्तमः ॥"

इति हारीते शारीरस्थाने पञ्चमेऽध्याये ॥)

रक्तयष्टिः, स्त्री, (रक्ता यष्टिरिव । यद्वा रक्ता रक्तवर्णा यष्टिः शाखास्याः ।) मञ्जिष्ठा । इति जटाधरः ॥

रक्तयष्टिका, स्त्री, (रक्तयष्टि + कन् । टाप् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—

"मञ्जिष्ठा विकसा जिङ्गी काला योजनपर्य्यपि ।
ताम्रवल्ली चित्रपर्णी काण्डारी रक्तयष्टिका ॥"

इति वैद्यकरत्नमालायाम् ॥

"मञ्जिष्ठा विकसा जिङ्गी समङ्गा काल-
मेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लयपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जिष्ठा वस्त्ररञ्जिनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तयावनालः, पुं, (रक्तवर्णः यावनालः ।) तुवरयावनालः । इति राजनिर्घण्टः ॥

रक्तरेणुः, पुं, (रक्ताः रेणवोऽस्मिन्निति ।) सिन्दूरम् । (अस्य पर्य्यायो यथा.—

"सिन्दूरं रक्तरेणुश्च नागगर्भश्च सीसजम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पलाशकलिका । इति मेदिनी । ने, १०५ ॥ पुन्नागः । इति राजनिर्घण्टः ॥

रक्तरेणुका, स्त्री, (रक्ताः रेणवः परागा अस्याम् । कन् । टाप् च ।) पलाशकलिका । तत्पर्य्यायः । अङ्गारिका २ । इति शब्दमाला ॥

रक्तरेवतकं, क्ली, (रक्तवर्णं रेवतकम् ।) महापारेवतम् । इति राजनिर्घण्टः ॥

रक्तलशुनः, पुं, (रक्तवर्णो लशुनः ।) रक्तवर्णमूलविशेषः । तत्पर्य्यायः । महाकन्दः २ गृञ्जनः ३ दीर्घपत्रकः ४ पृथुपत्रः ५ स्थूलकन्दः ६ यवनेष्टः ७ । अस्य गुणाः ।

"गृञ्जनस्य मधुरं कटु कन्दं
नालमप्युपदिशन्ति कषायम् ।
पत्रसञ्चयमुशन्ति सतिक्तं
सूरयो लवणमस्य वदन्ति ॥"

इति राजनिर्घण्टः ॥

रक्तलता, स्त्री, (रक्तं लाति गृह्णातीति । ला + कः । टाप् ।) काकतुण्डी । इति राजनिर्घण्टः ॥ (विशेषोऽस्याः काकतुण्डीशब्दे ज्ञातव्यः ।)

रक्तलोचनः, पुं, (रक्ते लोहिते लोचने अस्य ।) कपोतः । इति हेमचन्द्रः । ४ । ४०५ ॥ लोहितलोचनयुक्ते, त्रि ॥

रक्तवटी, स्त्री, (रक्ता वटी वटिकेव ।) मसूरिका । इति त्रिकाण्डशेषः ॥

रक्तवरटी, स्त्री (रक्ता वरटीव ।) मसूरिका । इति जटाधरः ॥ (मसूरिकाशब्दोऽस्या गुणादयो ज्ञेयाः ।)

रक्तवर्गः, पुं, (रक्तानां लोहितवर्णानां वर्गः समूहोऽत्र ।) दाडिमः । किंशुकम् । लाक्षा । बन्धूकम् । निम्बाद्वयम् । कुसुम्भगुच्छम् । मञ्जिष्ठा, इति राजनिर्घण्टः ॥

रक्तवर्णः, पुं, (रक्तः लोहितः वर्णोऽस्य ।) इन्द्रगोपः । इति राजनिर्घण्टः ॥ (रक्तवर्णविशिष्टे, त्रि । यथा, सुश्रुते सूत्रस्थाने । ४६ अध्याये ।

"सितासिताः पीतकरक्तवर्णा
भवन्ति येऽनेकविधास्तु स्निग्धाः ॥")

रक्तवर्द्धनः, पुं, (रक्तं शोणितं वर्द्धयतीति । वृध् + णिच् + ल्युः ।) वार्त्ताकुः । इति शब्दचन्द्रिका ॥ (पारावतः । तत्पर्य्यायो यथा,—

"पारावतः कलरवः कपोतो रक्तवर्द्धनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तवर्षाभूः, स्त्री, (रक्तवर्णा वर्षाभूः ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

रक्तवसनः, पु, (रक्तं वसनमस्य ।) सन्न्यासी । इति हेमचन्द्रः । ३ । ४७३ ॥

रक्तवातः, पु, (रक्तप्रधानो वातः ।) रोगविशेषः । अस्यौषधम् । यथा, गारुडे १६३ अध्याये ।

"नारिकेलस्य वै मूलं छागक्षीरेण संयुतम् ।
पिबेच्च त्रिविधस्तस्य रक्तवातो विनश्यति ॥"

रक्तवालुकं, क्ली, (रक्ता वालुका चूर्णमत्र ।) सिन्दूरम् । इति हारावली ॥

रक्तवालुका, स्त्री, (रक्ता वालुकेव ।) सिन्दूरम् । इति शब्दरत्नावली ॥

रक्तवृन्ता, स्त्री, (रक्तवर्णं वृन्तं प्रसवबन्धनमस्याः ।) श्वेतकालिका । इति शब्दचन्द्रिका ॥ (श्वेतकालिकाशब्देऽस्या गुणादयो विज्ञेयाः ॥)

रक्तवृष्टिः, स्त्री, (रक्तानां वृष्टिः ।) रुधिरवर्षणम् । तत्तु उत्पातविशेषः । तत्फलं शुक्रोद्योगः । यथा । ऋत्यचिन्तामणौ ।

"रक्ते शुक्रोद्योगो मांसास्थिवसादिभिर्म्मेरकः ।
धान्यहिरण्यलवणफलकुसुमाद्यं वर्षति भयं
विद्यात् ॥"

इति ज्योतिस्तत्त्वम् ॥

रक्तशालिः, पुं, (रक्तवर्णः शालिः ।) रक्तवर्णधान्यविशेषः । (यथा, सुश्रुते सूत्रस्थाने । २० अध्याये । "रक्तशालिषष्टिकगङ्गकसुकन्दकयाकुकपीतकप्रमोदककालकेत्यादि ॥") तत्पर्य्यायः । ताम्रशालिः २ शोणशालिः ३ लोहितः ४ । अस्य गुणाः । मधुरत्वम् । लघुत्वम् । स्निग्धत्वम् । बलावहत्वम् । रुचिकारित्वम् । दीपनत्वम् । पथ्यत्वम् । पित्तदाहानिलासनाशित्वञ्च । इति राजनिर्घण्टः ॥ (तथा च ।

"रक्तशालिर्वरस्तेषु बल्यो वर्ण्यस्त्रिदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्य्यः शुक्रश्लेष्मलघुर्वरः ।
विषव्रणश्वासकासदाहतृड्दृष्टिपुष्टिदः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तशासनं, क्ली, (रक्तं रक्तवर्णं शास्ति वशीकरोतीति । शास् + ल्युः ।) सिन्दूरम् । इति हारावली ॥

रक्तशिग्रुः, पुं, (रक्तवर्णः शिग्रुः ।) रक्तशोभाञ्जनवृक्षः । तत्पर्य्यायः । रक्तकः २ मधुरः ३ बहुलच्छदः ४ सुगन्धः ५ केशरी ६ सिंहः ७ रुजारिः ८ । अस्य गुणाः । महावीर्य्यत्वम् । मधुरत्वम् । रसायनत्वम् । श्लेष्माग्निनाशित्वम् । सारकत्वञ्च । इति राजनिर्घण्टः ॥

रक्तशीर्षकः, पुं, (रक्तं रक्तवर्णं शीर्षं अग्रमस्य । कन् ।) सरलद्रवः । इति रत्नमाला ॥

रक्तशृङ्गिकं, क्ली, विषम् । इति राजनिर्घण्टः ॥

रक्तसंज्ञं, क्ली, (रक्तमिति संज्ञास्य ।) कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ (गुणादस्योऽस्य कुङ्कुमशब्दे विज्ञेयाः ॥)

रक्तसन्धिका, स्त्री, (रक्ताय रक्तपानाय सन्धत्ते इति । दन्शृ + खुल् । टापि अत इत्वञ्च ।) जलौका । इति राजनिर्घण्टः ॥

रक्तसन्धकं, क्ली, ("रक्तं सन्धयेति रघुनाथः । रक्तान् सन्धीन् व्यक्ति गच्छति व्याप्नोतीति । कः । इति रायमुकुटभरतमल्लिकौ ।") रक्तकङ्कारम् । तत्पर्य्यायः । हल्लकम् २ । इत्यमरः । १ । १० । ३६ ॥

रक्तसरोरुहं, क्ली, (रक्तं सरोरुहम् ।) रक्तपद्मम् । इत्यमरः । १ । १० । ४१ ॥

रक्तसर्षपः, पुं, (रक्तवर्णः सर्षपः ।) राजिका । इति राजनिर्घण्टः ॥

रक्तसहा, स्त्री, (रक्तं सहते इति । सह + अच् + टाप् ।) रक्ताम्लानः । इति राजनिर्घण्टः ॥

रक्तसारं, क्ली, (रक्तवर्णः सारोऽस्य ।) रक्तचन्दनम् । (यथास्य पर्य्यायः ।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पत्तङ्गम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"पत्तङ्गं रक्तसारञ्च सुरङ्गं रक्तचन्दनम् ।
पट्टरञ्जकमाख्यातं पत्तूरञ्च कुचन्दनम् ॥")
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रक्तसारः, पुं, (रक्तः सारो यस्य ।) अम्बष्ठवेतसः । रक्तखदिरः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
रक्ते सारो यस्येति । शोणितसारयुक्ते, त्रि । यथा, हृदृतसंहितायाम् । ६८ । ६७ ।
"ताम्बोष्ठदन्तपालीजिह्वानेत्रान्तपायुकरचरणैः ।
रक्तेषु रक्तसारा बहुसुखवनितार्थपुत्रयुताः ॥")

रक्तसौगन्धिकं, क्ली, (रक्तवर्णं सौगन्धिकम् ।) रक्तकङ्कारम् । इति जटाधरः ॥

रक्तस्रावः, पुं, (रक्तं स्रावयतीति । सु + णिच् + अच् ।) वेतसाम्लः । इति जटाधरः ॥ (रक्तस्य स्रावः ।) रक्तपतनम् । (यथा, हृदृतसंहितायाम् । ८७ । ३५ ।
"कलहो नैर्ऋतभागे रक्तस्रावोऽथ शुष्ककोपश्च ।
अपराह्णे चर्मकृतं विनश्यते चर्मकारभयम् ॥")

रक्तहंसा, स्त्री, (रक्ताः वशीभूताः हंसा अत्र ।) रागिणीविशेषः । इति हलायुधः ॥

रक्ता, स्त्री, (रक्त + टाप् ।) गुञ्जा । (अस्याः पर्य्यायो यथा,—
"रक्ता सा काकचिञ्ची स्यात् काकान्ती च रक्तिका ।
काकादनी काकमीलुः सा स्मृता काकवल्लरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
लाक्षा । मञ्जिष्ठा । उशीरकाष्ठी । इति राजनिर्घण्टः ॥

रक्ताकारः, पुं, (रक्तवर्णं आकारः अवयवोऽस्य ।) प्रवालः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य प्रवालशब्दे विज्ञेयः ॥)

रक्ताक्तं क्ली, (रक्तेन रक्तवर्णेन अक्तं म्रक्षितम् ।) रक्तचन्दनम् । इति जटाधरः ॥ शोणितमिश्रिते, त्रि ॥

रक्ताक्षः, पुं, (रक्ते लोहिते अक्षिणी अस्य । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।) महिषः । पारावतः । चकोरः । क्रूरः । इति मेदिनी । षे, ४४ । सारसः । इति राजनिर्घण्टः ॥ (अन्यविशेषः । यथा, हृदृतसंहितायाम् । ८ । ५१ ।
"रक्ताक्षमन्दं कथितं हतौजं
यस्मिन् भयं दंष्ट्रिकृतं गदाश्च ॥")
रक्तवर्णचक्षुर्युक्ते, त्रि । (यथा, रामायणे । २ । ८८ । १६ ।
"कथमिन्दीवरश्यामो रक्ताक्षः प्रियदर्शनः ।
सुखभागी न दुःखार्हो ग्रथितो भुवि राघवः ॥"
अयन्तु सदा लक्ष्मीयुक्तो भवेत् । यथा, ज्योतिःसागरे ।
"न श्रीस्त्यजति रक्ताक्षं नार्थः कनकपिङ्गलम् ।
न दीर्घबाहुमैश्वर्यं न सौख्यं प्रहसन्मुखम् ॥")

रक्ताङ्गं, क्ली, (रक्तवर्णमङ्गमस्य ।) विद्रुमः । कुङ्कुमम् । इति मेदिनी । गे, ४८ । (रक्तचन्दनम् । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम् ॥")

रक्ताङ्गः, पुं, (रक्तमङ्गं यस्य ।) मङ्गलग्रहः । कम्पिल्लः । इति मेदिनी । गे, ४७ । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"कम्पिल्लकस्तु रक्ताङ्गो गुच्छारोचनिकेति सा ॥"
"कम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)
प्रवालः । मत्कुणः । इति राजनिर्घण्टः ॥ मण्डलम् । इति शब्दरत्नावली ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । १७ ।
"ऋष्यभो वेगवान्नागः पिण्डारकमहाहनुः ।
रक्ताङ्गः सर्व्वसारङ्गः सन्हादः पटवासकौ ॥")

रक्ताङ्गी, स्त्री, (रक्ताङ्ग + ङीष् ।) जीवन्ती । इति मेदिनी । गे, ४६ । मञ्जिष्ठा । इति भावप्रकाशः ॥

रक्तातिसारः, पुं, (रक्तं अत्यन्तं सरत्वसात् । सृ + घञ् ।) रोगविशेषः । "तस्य संप्राप्तिमाह । 'पित्तकृत्तु यदात्यर्थं द्रवमश्नाति पैत्तिके ।
तद्दोषाञ्जयते शीघ्रं रक्तासीसार उच्यते ॥'
तस्य चिकित्सा ।
'वत्सकत्वक्त्वगार्द्रा दाडिमफलसम्भवा त्वक् ।
त्वग्युगलं पलमानं विपचेदर्द्धाङ्गसम्मिते तोये ॥
अष्टमभागं शेषं क्वाथं मधुना पिबेत् पुरुषः ।
रक्तातिसारमुल्बणमतिशयितं नाशयेन्नियतम् ॥
इति कुटजदाडिमक्वाथः ॥ * ॥
'गोदुग्धनवनीतन्तु मधुना सितया सह ।
लीढ़ं रक्तातिसारे तु आहकं परमं महत् ॥'
इति नवनीतावलेहः ॥ * ॥
'पीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना ।
रक्तातिसारजिद्रक्तपित्तलट्वीदाहमेहहृत् ॥'
चन्दनमत्र श्वेतम् । इति चन्दनकल्पः ॥" इति भावप्रकाशः ॥ (तथा च ।
"यस्तु रक्तशुद्धविरेचने शोणितदाहमतिरिच्यते ।
रक्तातिसार इति विज्ञेयो वैद्यैर्महामतिभिः ॥
धन्वनागरमुस्ता च बालकं बालविल्वकम् ।
बलानागबला चेति क्वाथो रक्तातिसारिणाम् ॥
दाडिमञ्च कपित्थञ्च पथ्याजम्बाम्रपल्लवान् ।
पिष्ट्वा देया मस्तुयुक्ता रक्तातिसारवारणाः ॥
गुडेन पक्वं दातव्यं विल्वं रक्तातिसारिणे ।
मधुजे मधुयुक्ता वा द्रव्या रक्तातिसारहाः ॥
वत्सकातिविषनागराभया
पेयितञ्च मधुमस्तुसंयुतम् ।
लेह एव मधुना च मानुषे
रक्तवाहमति वारयत्यपि ॥
कुटजत्वक् च पाठा च बिल्वं बिल्वञ्च धातकी ।
मधुना सहितं चूर्णं देयं रक्तातिसारहम् ॥
इति रक्तातिसारः ।" इति हारीते चिकित्सितस्थाने तृतीयेऽध्याये ॥)

रक्ताधारः, पुं, (रक्तस्याधारः ।) चर्म्म । इति राजनिर्घण्टः ॥

रक्तापहं, क्ली, (रक्तमपहन्तीति । हन् + डः ।) बोलम् । इति राजनिर्घण्टः ॥

रक्तापामार्गः, पुं, (रक्तवर्णः अपामार्गः ।) रक्तवर्णापामार्गक्षुपः । राङ्गा आपाङ् इति वङ्गभाषा । लाल चिरचिरी इति हिन्दी भाषा । तत्पर्य्यायः । क्षुद्रापामार्गः २ आघण्टकः ३ दुण्डिनिका ४ रक्तविट् ५ कल्यपत्रिका ६ । अस्य गुणाः । शीतत्वम् । कटुत्वम् । कफवातव्रणकण्डूविषनाशित्वम् । संग्राहित्वम् । वान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः । अथ आरक्तचिरचिरा ।
"रक्तोऽन्यो वप्रिरो दृक्फलो धामार्गवोऽपि च ।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ॥
अपामार्गोऽरुणो वातविष्मी कफहृद्विषः ।
रूक्षः पूर्व्वगुणैर्न्यूनः कथितो गुणवेदिभिः ॥
अपामार्गफलं स्वादु रसे पाके च दुर्ज्जरम् ।
विष्मि वातकरं रूक्षं वातपित्तप्रसादनम् ॥"
इति भावप्रकाशः ॥

रक्ताम्बरं, क्ली, (रक्तं रञ्जितमम्बरम् ।) काषायवस्त्रम् । यथा,—

"ग्रीवोपरिसमासीनां रक्तावरणरञ्जिताम्।
रक्तालङ्कारसंयुक्तां गुञ्जाहारविभूषिताम्॥"
इति तन्त्रसारधृतसुच्छिष्टचाण्डालिनीध्यानम्॥
तद्युक्ते, त्रि॥

रक्ताम्लः, पुं, (रक्तवर्णः आम्लः।) कोशाम्रः। इति राजनिर्घण्टः॥ (विवरणमस्य कोशाम्र-शब्दे ज्ञातव्यम्॥)

रक्ताम्लानः, पुं, (रक्तेन रक्तवर्णेन आ सम्यक् म्लायते इति। म्ला+क्तः। समधिकरक्तवर्णत्वात्तथात्वम्।) रक्तवर्णपुष्पविशेषः। तत्पर्य्यायः। रक्तसहा २ अपरिम्लानः ३ रक्ताम्लानकः ४ रागप्रसवः ५ रक्तप्रसवः ६ कुरुवकः ७ रामालिङ्गनकामः ८ मधूत्सवप्रसवः ९ सुभगः १० भ्रमरानन्दः ११। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। वातामयश्लीपज्वरार्शोनाशमूलकाश्वासार्तिग्रहमनत्वम्। वर्ण्यत्वञ्च। इति राजनिर्घण्टः॥

रक्तार्म्मन्, [न्] क्ली, (रक्तं ऋच्छतीति। ऋ+मन्।) नेत्ररोगभेदः। तस्य लक्षणं यथा,—
"पद्माभं स्यादु रक्तार्म्म यस्मात् क्षीयते सिते॥"
इति माधवकरः॥

रक्तार्बुदः, पुं, क्ली, (रक्तानामर्बुदमत्र।) रोगविशेषः। यथा, ज्ञातातपीयकर्म्मविपाके।
"जलोदरयकृत्प्लीहमूत्ररोगव्रणानि च।
श्वासाजीर्णज्वरच्छर्द्यभ्रममोहगलग्रहाः।
रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः॥"
इति मलमासतत्त्वम्॥ *॥

"रक्तार्बुदमाह।
'दोषप्रदुष्टा रुधिरं शिराश्च
सङ्दूष्य संपीड्य ततस्त्वपाकम्।
सवावसुन्नह्यति मांसपिण्डं
मांसाङ्कुरैराततमाशु वृद्धिम्॥
सवत्यजस्रं रुधिरं प्रदुष्ट-
मसाध्यमेतद्रुधिरात्मकन्तु।
रक्तक्षयोपद्रवपीड़ितत्वात्
पाण्डुर्भवेदर्बुदपीड़ितश्च॥'
दोषोऽत्र पित्तं रुधिरं शिराश्च सङ्दूष्य संपीड्य संदूषणेन मांसाक्षोः सर्व्वेष्वर्बुदेषु दूष्यत्वं रक्तस्य तु विशेषतो रक्तदुष्टिः एवं मांसार्बुदे विशेषतो मांसदुष्टिर्बोद्धव्या। ततो मांसपिण्डसुन्नह्यति उद्गतं करोति। अपाकं ईषत्पाकं यथा स्यादेवमिति क्रियाविशेषणम्। ईषत्पाकश्चैकदेशपाकेन। रक्तक्षयोपद्रवपीड़ितत्वात् रक्तक्षयोपद्रवाः सुश्रुतेनोक्ताः। तैः पीड़ितत्वात् अर्बुदपीड़ितः॥ *॥ अथार्बुदस्य चिकित्सा।
'अन्यार्बुदानां न यतो विशेषः
प्रदेशहेत्वाकृतिदोषदूष्यैः।
अतश्चिकित्सेद्विषमार्बुदानि
विधानविद्यन्त्रिचिकित्सितेन॥
हरिद्रालोध्रपत्तङ्गयष्टिघुमनःशिलाः।
मधुप्रगाढो लेपोऽयं मेदोऽर्बुदहरः परः॥
मूलकस्य क्षतः क्षारो हरिद्रायास्तथैव च।
गृहधूमेन संयुक्तो लेपः सिद्धोऽर्बुदापहः॥
वटदुग्धकुष्ठरोमकलिप्तं वह्निं वटस्य पत्रेण।
अथस्थि सप्तरात्राभ्यन्तरदणुपशान्तिमर्बुदं गच्छेत्॥
ग्रियुमूलकयोर्भ्रीतं रक्षोघ्नं सुरसा यवम्।
तक्रेणाश्वरिपुं पिष्ट्वा लिम्पेदर्बुदशान्तये॥'
रक्षोघ्नं सर्षपम्। सुरसा तुलसी। यवं इक्षुयवम्। अश्वरिपुं करवीरम्।" इति भावप्रकाशः॥

रक्तार्शः, [स्] क्ली, (रक्तजनितमर्शः।) अर्शोरोगविशेषः। तस्य लक्षणमाह।
"रक्तोल्वणा गुदे कीलाः पित्तात्तिसमन्विताः।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः॥
तेऽत्यर्थं दुष्टसृग्यस्य गाढविड्भिः प्रपीड़िताः।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः॥
मेकाभः प्रीयते दुःखैः श्लेष्मितश्चयसम्भवैः।
हीनवर्चोबलोत्साहो हतौजाः कलुषेन्द्रियः॥
विट्श्यावं कठिनं रूक्षमधो वायुर्न वर्त्तते।
तनु चारुणवर्णञ्च फेणिलञ्चास्रगर्शसाम्॥
कफूरगुदमूलञ्च दौर्ब्बल्यं यदि वाधिकम्।
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम्॥
ग्रथितं श्वेतपीतञ्च विट्स्निग्धं गुरु श्लेष्मलम्।
यत्तदर्शसां घनत्वाक्तु तत्तु सत्याढ्यपिच्छिलम्॥
गुदं सपिच्छं स्रिमितं गुरु स्निग्धञ्च कारयेत्।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः॥
गुदे कीला अर्शांसि। पित्तात्तिसमन्विताः पित्तार्शोलक्षणयुक्ताः। आकारेण च वटप्ररोहादिसदृशाः। दुःखैः रोगैः। त्वक्पारुष्यासृग्रीतप्रार्थनादिभिः कलुषेन्द्रियः व्याकुलसर्व्वेन्द्रियः। रक्तजस्यापि वातोल्वणस्य लक्षणमाह। तत्र रक्तार्शांसि अनुबन्धः उल्वणत्वम्। रूक्षणं रूक्षयतीति रूक्षणं रूक्षं द्रव्यम्। पित्तोल्वणस्य लक्षणं रक्तोल्वणा गुदे कीला पित्तात्तिसमन्विता इत्यादिनोक्तम्। रक्तपित्तयोः समानलिङ्गत्वात्॥ *॥ कफोल्वणस्य लक्षणमाह। सपिच्छं पिच्छिलार्शस्रिमितमार्द्रचर्म्मावगुण्ठितमिव। तस्य चिकित्सा।
रक्तार्शसामुपेक्षेत रक्तमादौ स्रवद्विधक्।
दुष्टाग्रेजियहीते स्युः शूलानाहरुगामयाः॥
चन्दनकिराततिक्तकधन्वयवासाः सनागराः कथिताः।
रक्तार्शसां प्रशमना दाम्भोत्वगुशीरनिम्बा वा॥
चन्दनमत्र रक्तचन्दनम्। इति चन्द्रादिकाथः॥
नवनीततिलाभ्यासात्
केशरनवनीतशर्करााभ्यासात्।
दधिसरमथिताभ्यासात्
गुदजाः शाम्यन्ति रक्तवहाः॥
दध्नस्तूपरि यो भागो घनः स्नेहयुतः सरः।
मथितं सररहितम्। निर्ज्जलं वस्त्रपूतं दधि।
सपद्मकेशरं चौद्रं नवनीतं नवं लिहन्।
सिताकेशरसंयुक्तं रक्तार्शःसु सुखी भवेत्॥
पयसा घृतेन यूषैः सतीनसुराढ्यकौलकुराणाम्।
ओदनमद्याद्भेषजसंसृष्टैरेषितसुगन्धैश्च॥
समङ्गोत्पलमोचाञ्जतिरीटतिलचन्दनैः।
सिद्धं क्षीरपयो दद्याद्गुदजे श्लेष्मितात्मके॥
समङ्गा लज्जालुः। मोचाम्रो मोचरसः। तिरीटो लोध्रः। चन्दनमत्र रक्तचन्दनम्। समङ्गादिदुग्धम्।
भावितं रजनीचूर्णं कृष्णीक्षीरैः पुनः पुनः।
बध्नन्नासं गुदं क्षत्रं छिनत्त्यर्शो भगन्दरम्॥
चारक्षत्रम्॥
नासानाभिसमुत्थेषु तथा मेढ्रादिजेष्वपि।
क्रियामर्शःसु कुर्व्वीत तत्र तत्र यथोदिताम्॥
चर्म्मकीलन्तु संछिद्य दहेत् क्षारेण वह्निना।
वेगावरोधान्नीष्टस्यानाशुत्कटकासनम्।
यथास्वं दोषलक्षणमर्शसः परिवर्ज्जयेत्॥"
इति भावप्रकाशः॥
(यथा चास्य लक्षणानि।
"रक्तजानि न्यग्रोधप्ररोहविद्रुमकाकणन्तिकाफलसदृशानि पित्तजलक्षणानि च यदाबगाढ़पुरीषप्रपीड़ितानि भवन्ति तदार्शसि दुष्टमनल्पमसृक् सहसा विस्रवन्ति तस्यैवातिप्रवृत्तौ श्लेष्मितातियोगोपद्रवा भवन्ति।" इति सुश्रुते निदानस्थाने द्वितीयेऽध्याये॥ अथास्य चिकित्सा।
"रक्तार्शसामुपचारं वक्ष्यामि शृणु पुत्रक!।
मातस्सिलान् भक्षयेच्च नवनीतविमिश्रितान्॥
सितानागरसंयुक्तं नवनीतं सशर्करम्।
केशरं मातुलुङ्गस्य विड्गशर्करायुतम्॥
भक्षेत् कुष्माण्डवलेहं नवनीतेन शर्करान्।
एतेन रक्तगुदजान् शमयन्ति विचक्षणाः॥
समङ्गा श्राम्रलीपुष्पं चन्दनं कङ्कुभत्वचम्।
नीलोत्पलमजाक्षीरं पिष्ट्वा पानमहर्म्मदान्॥
कुटजमूलसकेशरसुत्पलं
खदिरधातकिमूलशृतं पयः।
पिबति भक्षयतोगमहर्म्भवं
गुदजवेदनसङ्क्षविनाशनम्॥"
इति रक्तार्शश्चिकित्सा॥
इति हारीते चिकित्सितस्थाने १२ अध्यायः॥)

रक्तालुः, पुं, (रक्तः रक्तवर्णः आलुः।) रक्तवर्णालुविशेषः। शकरकन्द आलु इति भाषा॥ तत्पर्य्यायः। रक्तपिण्डालुः २ रक्तपिण्डकः ३ लोहितः ४ रक्तकन्दः ५ लोहितालुः ६। अस्य गुणाः। शीतत्वम्। मधुरास्लत्वम्। भ्रमपित्तदाहापहत्वम्। वृष्यत्वम्। बलपुष्टिकारित्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

रक्तिका, स्त्री, (रक्तो रक्तवर्णोऽस्त्यस्याः। रक्त+"अत इनिठनौ।" ५।२।११५। इति ठन्।) गुञ्जा। (अस्याः पर्य्यायो यथा,—
"साङ्कुष्ठा लज्जाला गुञ्जा रक्तिका काकणन्तिका।
काकादनी काकत्तिक्ता काकजङ्घा शिखण्डिनी॥"
इति वैद्यकरत्नमालायाम्॥
"रक्ता सा काकचिञ्ची स्यात् काकणन्ती च रक्तिका।
काकादनी काकपीलुः सा स्मृता काकवल्लरी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

राजिका। इति राजनिर्घण्टः॥ रक्तिका-परिमाणञ्च॥

रक्तेक्षुः, पुं, (रक्तो रक्तवर्णं इक्षुः।) रक्तवर्णेक्षुः। लाल आक् इति भाषा॥ तत्पर्य्यायः। सूच्यपत्रः २ शोणः ३ लोहितः ४ उत्कटः ५ मधुरः ६ इक्षमूलः ७ लोहितेक्षुः ८। अस्य गुणाः। मधुरत्वम्। पाके शीतलत्वम्। स्वादुत्वम्। पित्तदाहहरत्वम्। दृष्यत्वम्। तेजोबलविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥

रक्तैरण्डः, पुं, (रक्तवर्णः एरण्डः।) इक्षविशेषः। लाल भेरण्डा इति भाषा॥ तत्पर्य्यायः। व्याघ्रः २ हस्तिकर्णः ३ वसुः ४ उरुवूकः ५ नागवर्णः ६ पशुः ७ उत्तानपत्रकः ८ करपर्णः ९ पाचनः १० स्निग्धः ११ व्याघ्रतलः १२ रक्तकः १३ चित्रबीजः १४ इक्षैरण्डः १५। अस्य गुणाः। श्वयथुपवनश्लेष्मरक्तार्शःपाण्डुभान्त्रिश्वासज्वरारोचकनाशित्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्वहस्तकः।
पञ्चाङ्गुलो वह्निमानो दीर्घदण्डो यडग्मकः॥
रक्तोऽपरोरुवूकः स्यादूरुवूको वसुस्तथा।
व्याघ्रपुच्छश्च वातारिश्चतुरुत्तानपत्रकः॥
एरण्डयुग्मं मधुरसुखं गुरु विनाशयेत्।
मूलशोथकटीवस्तिग्रिरःपीड़ोदरज्वरान्॥
श्वासकासकफानाहकासकुष्ठाममारुतान्।
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम्।
मूत्रकृच्छ्रहरञ्चापि पित्तरक्तप्रकोपजम्॥
वातार्शयदलं गुल्मवस्तिशूलहरं परम्।
कफवातजमीन् हन्ति वृद्धिं सन्निपातामपि॥
एरण्डफलमम्लोष्णं गुल्मशूलानिलापहम्।
यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम्।
तद्बन्धा च विडूभेदी वातश्लेष्मोदयापहः॥"

इति भावप्रकाशः॥

रक्तैवारः, पुं, (रक्तः रक्तवर्णः एवारुः।) इक्षवारुकी। इति राजनिर्घण्टः॥ (विशेषोऽस्येक्ष्वारुकीशब्दे द्रष्टव्यः॥)

रक्तोत्पलं, क्ली, (रक्तं रक्तवर्णमुत्पलम्।) रक्तपद्मम्। तत्पर्य्यायः। रक्तसरोरुहम् २ कोकनदम् ३। इत्यमरः। १। १०। ४२॥ (यथा, हरिवंशे। २६। ६।

"विन्ध्याच्च विन्ध्यद्वारेण मौक्तिकं कुङ्कुमं कुसुम्भेन। रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः॥"

तथास्य गुणाः।

"धवलं कमलं शीतं मधुरं कफपित्तजित्। तस्मादल्पगुणं किञ्चिदन्यत् रक्तोत्पलादिकम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रक्तोत्पलः, पुं, (रक्तोत्पलमिव पुष्पमस्यास्य। अर्शआद्यच्।) श्लीपदरोगः। इति राजनिर्घण्टः॥

रक्तोत्पलाभः, पुं, (रक्तोत्पलस्य आभेव आभास्य।) शोणवर्णः। इति जटाधरः। तद्युक्ते, त्रि॥

रक्तोपलं, क्ली, (रक्तमुपलम्।) गैरिकम्। इति हारावली। ११५॥ (गुणादयोऽस्य गैरिकशब्दे ज्ञेयाः॥)

रक्ष, णि पालने। इति कविकल्पद्रुमः॥ (भ्वा॰-पर॰ सक॰-सेट्।) णि, रक्षितोऽस्ति। इति दुर्गादासः॥

रक्षः, [स्] क्ली, (रक्षत्यसादिति। रक्ष+"सर्व्वधातुभ्योऽसुन्।" उणा॰ ४। १८८। इति असुन्।) राक्षसः। इत्यमरः। १। १। ६२॥ तद्विशेषो यथा,—

"दृष्ट्वा तु विकलान् यज्ञाननाथान् रोगिणस्तथा दया न जायते यस्य स रक्ष इति मे मतिः॥"

इत्याग्नेये यमधर्म्मिलोपाख्याननामाध्यायः॥

रक्षोघ्नौषधं यथा,—

मनुरुवाच।

"रक्षोघ्नानि विषघ्नानि यानि धार्य्याणि भूभुजा। अगदानि समाचक्षु तानि धर्म्मभृतांवर॥

मत्स्य उवाच।

पत्रिका रोहिणी चैव रक्तमाला महौषधी। तथामलकवन्दारं या च चित्रपटोलिका॥ काकोली क्षीरकाकोली पौण्ड्रपर्णी तथैव च। केशिनी दुग्धिकाली च महानागा घृतावरी॥ तथा गरुड़वेगा च स्वर्णे कुसुदिनी तथा। स्वर्णे क्षीरोत्पलिनी या च महाभूमिलता च या। उन्मादिनी सोमराजी सर्व्वरत्नानि पार्थिव। विशेषाच्छरकताच्चैव कौटपक्षविशेषतः॥ जीवजाताश्च मण्डूकाः सर्व्वे धार्य्या विशेषतः। रक्षोघ्नाश्च यशस्याश्च ह्येता वैतालनाशनाः॥"

इति मात्स्ये १९२ अध्यायः॥

रक्षःसभं, क्ली, (रक्षसां राक्षसानां सभा। क्षीवत्वमभिधानात्।) रक्षःसमूहः। इत्यमरः। १। ५। २३॥

रक्षकः, त्रि, (रक्षतीति। रक्ष+ण्वुल्।) रक्षाकर्त्ता। यथा,—

"गोरक्षः सहदेवश्च नकुलो हयरक्षकः। वैराटे कुरुदायादो नराणां मातुलक्रमः॥"

इति पुराणम्॥

रक्षणं, क्ली, (रक्ष+भावे ल्युट्।) रक्षा। यथा,

"इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम्। पाययित्वा स्तनं माता संन्यवेशयदात्मजम्॥"

इति श्रीभागवते १०। स्कन्धे ६ अध्यायः॥

रक्षणकारः, पुं, मूत्रकृच्छ्ररोगः। इति शब्दरत्नावली॥ क्वचित् पुस्तके रक्षणीरकोऽपि पाठः॥

रक्षणिः, स्त्री, त्रायमाणा लता। इति राजनिर्घण्टः॥

रक्षा, स्त्री, (रक्षणमिति। रक्ष+"गुरोश्च हलः।" ३। ३। १०३। इति अः। स्त्रियां टाप्।) रक्षणम्। (यथा, कुमारे। २। २८।

"मयि रक्षाधिकारे लोकानां रक्षा युष्माकञ्चास्ति।")

अतु। इति मेदिनी। धे, २३॥ भस्म। इति शब्दरत्नावली॥ यज्ञोदाहृता रक्षा यथा,—

"रक्षां विदधिरे सम्यक् गोपुच्छभ्रमणादिभिः। गोभूचेष्टा स्थापयित्वा पुनर्गोरजसार्भकम्॥ रक्षां च चक्रुः प्रकृता द्वादशाङ्गेषु नामभिः। गोप्यः संस्पृष्टसलिला अङ्गेषु करयोः पृथक्॥ न्यस्यात्मन्यथ बालस्य वीजन्यासमकुर्व्वत॥

अथादशोऽङ्घ्रिमणिमांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं हयास्यः। हृत् केशवस्तदुर ईश इनस्तु कण्ठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः क्रम्॥ चक्र्यग्रतः सहगदो हरिरस्तु पश्चात् त्वत्पार्श्वयोर्धनुरसी मधुहा जनश्च। कोणेषु शङ्ख उरुगाय उपर्य्युपेन्द्रः खार्च्चः खितौ हलधरः पुरुषः समन्तात्॥

इन्द्रियाणि हृषीकेशः प्राणान् नारायणोऽवतु। श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु॥ इत्यगर्भस्तु ते कुक्षिमात्मानं भगवान् परः। क्रीड़न्तं पातु गोविन्दः शयानं पातु माधवः॥ व्रजन्तमव्याद्गोकुलः आसीनं त्वां श्रियः पतिः। भुञ्जानं यज्ञभुक् पातु सर्व्वग्रहभयङ्करः॥ डाकिन्यो यातुधान्यश्च कूष्माण्डा येऽर्भकग्रहाः। भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः॥ कोटरा रेवती ज्येष्ठा पूतना मातृकादयः। उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः॥ स्वप्नदृष्टमहोत्पाता वृद्धबालग्रहाश्च ये। सर्व्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः॥"

इति श्रीभागवते १०। स्कन्धे ६ अध्यायः॥ *॥

अथ पौर्णमास्यां रक्षाबन्धनम्। राखीबाँधा इति भाषा। यथा,—

"पौर्णमास्यां हरे रक्षाबन्धनं विधिपूर्व्वकम्। व्रजराजकुमारत्वात् केचिदिच्छन्ति साधवः॥"

तत्र भद्रादिषड्भावे तामतिक्रम्यैव कुर्य्यात्। तथा च स्मृत्यन्तरे।

"भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हन्ति ग्रामान् दहति फाल्गुनीति॥"

विधिश्च भविष्योत्तरे।

"उपाकर्म्मदिने प्रोक्तप्रक्रियाश्चैव तर्पणम्। ततोऽपराह्णसमये रक्षापोटलिकां शुभाम्॥ कारयेद्धनैः शुक्लैः सिद्धार्थैर्हेममूषिताम्। वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्वा मलवर्ज्जितैः। विचित्रं ग्रथितं सूत्रं स्थापयेद्वाजनोपरि॥ उपलेपहमध्ये दग्धचतुष्के न्यसेच्छुभं पीठम्। तत्रोपविशेद्राजा सामात्यः सपुरोहितः सयुक्तृन्॥ तदा पुरोधा नृपते रक्षां बध्नीत मन्त्रेण। येन बद्धो बली राजा दानवेन्द्रो महाबलः। तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल॥"

वैदिकञ्च। यदा यत्र दात्रमया छिन्नयः शुतानीका मनव्य माना तनूमया बध्नामि शतं शारदाया शुभ्नन् जरदष्टिर्यथा सम्।

"ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः। कर्त्तव्यो रक्षणाचारो विधानं शृणुष्व शक्तितः॥ अनेन विधिना यस्तु रक्षिकाबन्धमाचरेत्।

स सर्व्वदोषरहितः सुखं संवत्सरं वसेदिति॥"
अथ तद्दिननिर्णयार्थं उपाकर्म्मदिननिर्णयः क्रियते। यदाह स्मृत्यन्तरे।
"उपाकर्म्म तु कुर्व्वन्ति ते सामऋग्यजुर्व्विदः।
ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्व्वसु॥"
तथा च। सामवेदिनां भाद्रस्य हस्तानक्षत्रं ऋग्वेदिनां श्रावणस्य श्रवणनक्षत्रं यजुर्व्वेदिनां श्रावणी पूर्णिमोपाकर्म्मकालः। उपक्रमकक्षिकाकीर्त्तनरूपं कर्म्म उपाकर्म्म। अत्र करणाभावे भाद्रे श्रावणेऽपि विधेयम्।
"अष्टकोषधयस्तस्मिन् मासे न हि भवन्ति तेत्।
तदा भाद्रपदे मासि श्रावणेऽपि तदिष्यते॥"
इति बह्वृच्परिशिष्टवचनात्॥
श्रावणपक्षस्यनुकल्पः। तदाह गर्गः।
"यदि स्यात् श्रावणं पर्व्व ग्रहसंक्रान्तिदूषितम्।
स्यादुपाकरणं शुक्लपक्षस्यां श्रावणस्य च॥" इति॥
अत्र भूतविद्धा पूर्णिमा च निषिद्धा। तथा च कालिकापुराणे।
"चतुर्दश्यां समुत्पन्नावसुरौ मधुकैटभौ।
वेदान् स्वीकुर्व्वतः पद्मयोनेस्तौ जघ्नतुः श्रुतीः॥
हत्वा तावसुरौ देवः प्रातालतलवासिनौ।
आहृता ताः श्रुतीस्तस्मै ददौ लोकगुरुः स्वयम्॥
संप्राप्यवान् श्रुतीर्ब्रह्मा पर्व्वण्यौदयिके पुनः।
अतो भूतयुते तस्मिन्नोपाकरणमिष्यते।
आसुरं वर्ज्जयेत् कालं वेदाहरणसङ्कथेति॥"
व्यासोऽपि।
"श्रवणेन तु यत् कर्म्म उत्तराषाढसंयुतम्।
संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति॥
धनिष्ठासंयतं कुर्य्याच्छ्रावणं कर्म्म यद्भवेत्।
तत् कर्म्म सकलं विद्यादुपाकरणसंज्ञकमिति॥"
इति श्रीहरिभक्तिविलासे ५१ विलासः॥
(रक्षाकर्म्म यथा। उदकुम्भाचार्यो गृहीत्वा प्रोक्षयन् रक्षाकर्म्म कुर्य्यात् तद्यथाः।
"जन्तूनां प्रतिघातार्थं तथा रक्षोभयस्य च।
रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यताम्॥
नागाः पिशाचा गन्धर्व्वाः पितरो यक्षराक्षसाः।
अभिद्रवन्ति ये ये त्वां ब्रह्माद्या जन्तु तान् सदा॥
पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः।
दिशु वास्तुनिवासाश्च पान्तु त्वां नमस्कृताः॥
पान्तु त्वां मुनयो ब्राह्म्या दिव्या राजर्षयस्तथा।
पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः॥
अग्नी रक्षतु ते जिह्वां प्राणान् वायुस्तथैव च।
सोमो यानमपानन्ते पर्জन्यः परिरक्षतु॥
उदानं विद्युतः पान्तु समानं स्तनयित्नवः।
बलमिन्द्रो बलपतिर्मनुर्मन्यं मतिन्तथा॥
कामांस्ते पान्तु गन्धर्व्वाः सत्त्वमिन्द्रोऽभिरक्षतु।
प्रज्ञान्ते वरुणो राजा समुद्रो नाभिमण्डलम्॥
चक्षुः सूर्य्यो दिशः श्रोत्रे चन्द्रमाः पातु ते मनः।
नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव॥
रेतस्त्वाप्याययन्त्वापो रोमाण्योषधयस्तथा।
आकाशं खानि ते पातु देहन्तव वसुन्धरा॥
वैश्वानरः शिरः पातु विष्णुस्तव पराक्रमम्।
पौरुषं पुरुषश्रेष्ठो ब्रह्मात्मानं भ्रुवौ भुवौ॥
एता देहे विशेषेण तव नित्या हि देवताः।
एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि॥
स्वस्ति ते भगवान् ब्रह्म स्वस्ति देवाश्च कुर्व्वताम्।
स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्व्वतौ॥
स्वस्त्यश्विनौ वायुश्च स्वस्ति देवाः सहेन्द्रगाः।
पितामहकृता रक्षा स्वस्त्यायुर्वर्द्धतां तव॥
ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः॥"
इति स्वाहा॥
एतैर्व्वेदात्मकैर्मन्त्रैः कृता वाधिविनाशनैः।
मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि॥"
इति सुश्रुते सूत्रस्थाने पञ्चमेऽध्याये ५)
रक्षापत्रः, पुं, (रक्षार्थं पत्रमस्य।) भूर्जवृक्षः। इति राजनिर्घण्टः॥ भूर्जत्वचि, क्ली॥
रक्षिका, स्त्री, (रक्षैव। रक्षा+स्वार्थे कन्। टापि अत इत्वम्।) रक्षा। यथा,—
"अनेन विधना यस्तु रक्षिकावन्धमाचरेत्।
स सर्व्वदोषरहितः सुखं संवत्सरं वसेत्॥"
इति हरिभक्तिविलासे ५१ विलासः॥
रक्षितं, त्रि, (रक्ष+क्तः।) त्रातरक्षम्। तत्पर्य्यायः। त्रातम् २ त्रायम् ३ अवितम् ४ गोपायितम् ५ गुप्तम् ६। इत्यमरः।३।१।१०६॥ (यथा, मनुः। ११। २३।
"कल्पयित्वास्य वृत्तिञ्च रक्षेदेनं समन्ततः।
राजा हि धर्म्मषड्भागं तस्मात् प्राप्नोति रक्षितात्॥"
क्ली, भावे क्तः। रक्षा॥ *॥ स्त्रियां टाप्। अप्सरोविशेषः। यथा, महाभारते।१।६५।५०।
"अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलोत्तमा।
अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा॥")
रक्षिता, [क्तृ] पुं, (रक्षतीति। रक्ष+तृच्।) रक्षाकर्त्ता। यथा,—
"आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारदः।
कृताकृतज्ञो भृत्यानां श्रेयः स्यादेव रक्षिता॥"
इति मात्स्ये १८६ अध्यायः॥
रक्षिवर्गः, पुं, (रक्षिणां वर्गः समूहः।) राजाङ्गरक्षकगणः। तत्पर्य्यायः। अनीकस्थः २। इत्यमरः। २। ८। ६॥
रक्षोघ्नं, क्ली, (रक्षो राक्षसं हन्तीति। हन्+टक्।) काञ्जिकम्। इति हेमचन्द्रः॥ हिङ्गु। इति राजनिर्घण्टः॥
रक्षोघ्नः, पुं, (रक्षो हन्तीति। हन्+टक्।) भल्लातकवृक्षः। इति त्रिकाण्डशेषः॥ श्वेतसर्षपः। इति रत्नमाला। रक्षोघ्नमन्त्रो यथा,—
"स्थाने हृषीकेश तव प्रकीर्त्या
जगत् प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्व्वे नमस्यन्ति च सिद्धसंघाः॥"
इति भगवद्गीतायाम्। ११। ३६॥
"स्थाने इत्ययं युक्तमित्यर्थे। हे हृषीकेश सर्व्वेन्द्रियप्रवर्त्तक यतस्त्वमेवात्यन्ताद्भुतप्रभावो भक्तवत्सलश्च ततस्तव प्रकीर्त्या प्रकृष्टया कीर्त्या निरतिशयप्राप्तस्यस्य कीर्त्तनेन अवणेन च न केवलमहमेव प्रहृष्यामि किन्तु सर्व्वमेव जगच्चेतनमात्रं रक्षोविरोधि प्रहृष्यति प्रकृष्टं हर्षमाप्नोति इति यत् सत् स्थाने युक्तमित्यर्थः। तथा सर्व्वं जगत् अनुरज्यते च तद्विषयमनुरागमुपैति इति च यत्तदपि युक्तमेव। यथा रक्षांसि भीतानि सन्ति दिशो द्रवन्ति सर्व्वासु दिक्षु पलायन्त इति यत्तदपि युक्तमेव। यथा सर्व्वेषां सिद्धानां कपिलादीनां संघा नमस्यन्ति चेति यत्तदपि युक्तमेव। सर्व्वत्र तव प्रकीर्त्या इत्यस्यान्वयः स्थाने इत्यस्य च। अयं श्लोको रक्षोघ्नमन्त्रः प्राच्यप्रसिद्धः।" इति सटीकायां मधुसूदनसरस्वती॥ (रक्षोविनाशके, त्रि। यथा सुश्रुते। १। ५। "वेदमारक्षोघ्नैर्धूपैर्धूपयेद्रक्षोघ्नैश्च मन्त्रैः रक्षां कुर्व्वीत॥")
रक्षोघ्नी, स्त्री, (रक्षो हन्तीति। हन्+टक्। ङीप्।) वचा। इति रत्नमाला॥
रक्षोजननी, स्त्री, (रक्षसां जननीव।) रात्रिः। इति त्रिकाण्डशेषः॥ राक्षसमाता च॥
रक्षोहा, [न्] पुं, (रक्षो हन्तीति। हन्+क्विप्।) गुग्गुलुः। इति राजनिर्घण्टः॥ (ऋषिविशेषः। स तु ऋग्वेदस्य १० मण्डलस्य १६२ सूक्तस्य ऋषिः॥ राक्षसहन्तरि, त्रि। यथा, ऋग्वेदे। १०। ६७। ६।
"विप्रः स उच्यते भिषग्रक्षोहा मीवचातनः॥"
"रक्षोहा रक्षोहन्ता।" तद्भाष्ये सायणः॥)
रक्ष्णः, पुं, (रक्ष+"यजयाचयतविच्छप्रच्छरक्षो नङ्।" ३। ३। ६०। इति नङ्।) त्रातम्। इत्यमरः। ३। २। ८॥
रख, सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रखति। इति दुर्गादासः॥
रख, ड सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ड, रड्डति। इति दुर्गादासः॥
रग, ड गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ड, रङ्गति। इति दुर्गादासः॥
रग, क स्वादे आपने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-अक०च-सेट्।) क, रागयति। इति दुर्गादासः॥
रग, म ए ग्रङ्गे। इति कविकल्पद्रुमः॥ (भ्वा० पर०-अक०-सेट्।) म, रगयति। ए, अरगीत्। ग्रङ्गः ग्रङ्गा। रगति रोगी कुपथ्येभ्यः। इति दुर्गादासः॥
रघ, ड क भाषे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) ड क, रङ्घयति। भाषि दीप्तौ। इति दुर्गादासः॥
रघ, ड ड गमने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ड, रङ्घते। ड, रङ्घते। इति दुर्गादासः॥
रघुः, पुं, (लङ्घति ज्ञानसीमां प्राप्नोतीति। लङ्घ+"लङ्घिबंह्योर्नलोपश्च।" उणा० १। ३०। इति कुः नलोपश्च। "बालमूलजघ्यसुरालमङ्गलीनां वा स्त्री रत्नमापद्यते इति वक्तव्यम्।"

८। २। १८। इति काशिकोक्त्या तस्य रत्वम्। इत्युज्ज्वलदत्तः।) सूर्य्यवंशीयदिलीपराजपुत्रः। स तु अयोध्याधिपतिः। श्रीरामचन्द्रस्य प्रपितामहः। यथा, रघुः। ३। १८।

"स जातकर्म्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते।
दिलीपसञ्जुम्भणिराकरोद्भवः
प्रयुक्तसंस्कार इवाधिकं बभौ॥"

तन्नामयुत्पत्तिर्यथा,—

"श्रुतस्य यायादयमन्तमर्भक-
स्तथा परेषां युधि चेति पार्थिवः।
अवेक्ष्य धातोर्गमनार्थमर्थ-वि-
च्चकार नाम्ना रघुमात्मसम्भवम्॥"

इति रघुवंशे महाकाव्ये। ३। २१॥

(अस्य पिता दिलीपः माता सुदक्षिणा। अयं हि अश्वमेधयज्ञदीक्षितस्य पितुर्यज्ञीयाश्वरक्षणे नियुक्तस्तदश्वहारिणं देवराजं जितवान्। अथ बहुकालं राज्यसुखमनुभूय विश्वजिन्नामाध्वरे सर्व्वं वित्तं ब्राह्मणसात् कृतवानपि गुरुदक्षिणार्थिना वरतन्तुशिष्येण कौत्सेनाभ्यर्थितः कुबेरं विजित्य धनान्यादाय तस्मै प्रदत्तवान्। अथ स्वपुत्रमजं यौवराज्येऽभिषिच्य विगतविषयाभिलाषो योगसमाधिना भगवत्-सायुज्यमाप्तवान्। तथा च रघुवंशे। ८ सर्गे।

"अथ वीक्ष्य रघुः प्रतिष्ठितं
प्रकृतिष्वात्मजमात्मवत्तया।
विषयेषु विनाग्रधर्म्मसु
चिदिवस्थेष्वपि निःस्पृहोऽभवत्॥"
"अथ काञ्चिदजय्यपेक्षया
गमयित्वा समदर्शनः समाः।
तमसः परमापदव्ययं
पुरुषं योगसमाधिना रघुः॥" *॥

भौमादिवदेकदेशग्रहणे रघुवंशकाव्यम्। यथा,

"रघुरपि काव्यं तदपि च पाठ्यम्
तस्य च टीका सापि च पाठ्या॥"

एवं "रघोः काव्यं पदे पदे॥" एतावृत्तटौ॥

अपि च।

"रञ्जयतीति। राजा प्रभुः। तेन 'राजा प्रकृतिरञ्जनात्।' इति रघुः।" इति उणादिवृत्तौ उज्ज्वलदत्तः। १। १५६॥ *॥ रघुवंशीयमात्रम्। तत्र बहुवचनान्तः। यथा, रघुवंशे। १। ६।

"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्॥"

रघति इतं गच्छतीति। शीघ्रगामिनि, त्रि। यथा, ऋग्वेदे। ५। ३०। १३।

"अत्यो न वाजी रघुरद्यमानः॥"

"रघुः शीघ्रगामी।" इति तद्भाष्ये सायणः॥")

रघुकारः, पुं. (रघुं तदाख्यं काव्यं करोतीति। कृ+"कर्म्मण्यण्।" ३। २। १। इति अण्।) कालिदासः। इति त्रिकाण्डशेषः॥ (यथा, आर्य्यासप्तशत्याम्। ६८७।

"पूर्व्वैर्विभिन्नदत्तां गुणाढ्यभवभूतिबाणरघुकारैः।
वाग्देवीं भजतो मम सन्तः पश्यन्तु को दोषः॥"

यथा च।

"सीमन्तिनी च नलिनी च कुसुद्वती च
चन्द्रप्रभा च रघुकारसरस्वती च।
कान्तोज्झिता हिमहता रविरश्मितप्ता
मेघावृता जड़धियाभिहता न भाति॥"

रत्नमुकुटः॥)

रघुनन्दनः, पुं, (रघून् रघुवंशसम्भूतान् नन्दयतीति। नन्दि+ल्युः।) श्रीरामः। इति शब्दरत्नावली॥ (यथा, रामायणे। १। ५२। ९२।

"ततो वशिष्ठो भगवान् कथान्ते रघुनन्दन!।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव॥"

वङ्गदेशीयनवद्वीपनिवासी शार्म्मः पण्डितविशेषः। स च प्राचीनस्मृतिसंग्रहकर्त्ता। मलमासतत्त्वाद्यष्टाविंशतितत्त्वप्रणेता वन्द्यघटीयश्रीहरिहरभट्टाचार्य्यात्मजः। यथा,—

"प्रणम्य सच्चिदानन्दं परमात्मानमीश्वरम्।
मुनीन्द्राणां स्मृतेस्तत्त्वं वक्ति श्रीरघुनन्दनः।
मलिम्लुचे दायभागे संस्कारे शुद्धिनिर्णये।
प्रायश्चित्ते विवादे च तिथौ जन्माष्टमीव्रते॥
दुर्गोत्सवे श्रवणतावैकादश्यादिनिर्णये।
तड़ागभवनोत्सर्गे दशोत्सर्गत्रये व्रते॥
प्रतिष्ठायां परीक्षायां ज्योतिषे वास्तुयज्ञके।
दीक्षायामाह्निके ह्यत्रे चैत्रे श्रीपुरुषोत्तमे॥
सामश्राद्धे यजुःश्राद्धे शूद्रह्यत्रविचारणे।
इत्यष्टाविंशतिख्याते तत्त्वं वक्ष्यामि यत्नतः॥"

इति मलमासतत्त्वम्॥

अपरः पण्डितविशेषः। स च वर्द्धमानप्रदेशान्तर्गतमाड़्यामनिवासिचरः। राढ़ीयश्रेणीभुक्तः किञ्चोरीमोहनगोस्वामिसुतः श्रीमन्नित्यानन्दवंशीयगोस्वामी। भागवतसिद्धान्तत्रयरसापरिभाषकन्दोमञ्जरीटीकाव्याख्यानकौमुदीरामरसायनप्रभृतयो बहवो ग्रन्थास्तत्प्रणीताः सन्ति॥)

रघुनाथः, पुं, (रघूणां नाथः। ऋद्धादित्वात् समासाभावः।) श्रीरामः। इति शब्दरत्नावली॥ (यथा, रघुः। १५। ५४।

"रघुनाथोऽप्यगस्त्येन मार्गसन्दर्शितात्मना।
महौजसा संयुयुजे शरत्काल इवेन्दुना॥")

रघुपतिः, पुं, (रघूणां पतिः।) श्रीरामः। यथा,

"यदुपतेः क्व गता मथुरा पुरी
रघुपतेः क्व गतोत्तरकोशला।
इति विचिन्त्य कुरुष्व मनः स्थिरं
न सदिदं जगदित्यवधारय॥"

इति रूपगोस्वामी॥

(कैयाञ्चित् पण्डितानां नाम। यथा, रघुनाथशिरोमणिः अयन्तु नैयायिकः गाङ्गेयोपाध्यायकृतचिन्तामणिपञ्चकादेर्दीकाकारः। रघुनाथ चक्रवर्त्ती अयममरकोषस्य टीकाकारः। रघुनाथ तर्कवागीशः। रघुनाथ सरस्वती। रघुनाथ दासगोस्वामी। अयं हि श्रीचैतन्यदेवस्य प्रियभक्तः आसीत्। स्तवावल्यादिभक्तिग्रन्थप्रणेता। अयं खलु अग्नेर्वैराग्यसम्पन्नः यशोहरनिवासिचरः कायस्थकुलभूषणं मथुरानाथमित्रगोवर्द्धनगिरितटे राधाकुण्डे मर्त्यदेहं विहाय स्वर्धामागमत्। तत्समाधिरधुनापि तत्रैवास्ते सेव्यतेऽद्यापि बहुभिर्वैष्णवैः॥)

रघुवंशः, पुं, क्ली, (रघोर्वंशः सन्ततिर्वर्ग्गो यस्मिन्। यद्वा रघूणां वंशमधिकृत्य कृतमिति अण् लुक् च।) कालिदासकृतरघुराजान्वयवर्णनमहाकाव्यग्रन्थविशेषः। यथा,—

"रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः॥"

इति रघुवंशे महाकाव्ये। १। ६॥

(अयं हि जगद्विग्रसर्गात्मको ग्रन्थः। अत्र दिलीपादारभ्य अग्निवर्णपर्य्यन्तं वस्तु वर्णितम्॥ पुं, रघोर्वंशः। यथा,—

"जयति रघुवंशतिलकः कौशल्यानन्दिवर्द्धनो रामः॥"

इति रामायणम्॥)

रघुवंशतिलकः, पुं, (रघुवंशे तिलक इव शोभाजनकत्वात्।) श्रीरामः। यथा,—

"जयति रघुवंशतिलकः कौशल्यानन्दिवर्द्धनो रामः।
दशवदननिधनकारी दाशरथिः पुष्करीकाक्षः॥"

इति रामायणम्॥

रघुवरः, त्रि, (रघुषु वरः श्रेष्ठः।) रघुवंशीयश्रेष्ठः। यथा, रामायणे।

"रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं
धार्म्मिकम्॥"

रघूद्वहः, पुं. (उद्वहतीति। उद्+वह्+अच्। रघूणां उद्वहः रक्षाभारधारकः।) श्रीरामः। इति शब्दरत्नावली॥

रङ्कुः, पुं, (रमते तुष्यतीति। रम्+"वाहुलकात् कमेरपि कुः।" इति कुः। इत्युज्ज्वलदत्तः। ३। ४०।) क्षपणः। मन्दः। इति मेदिनी। के, ११॥

रङ्कुः, पुं. (रमते इति। रम्+वाहुलकात् कुः।) मृगविशेषः। इत्यमरः। २। ५। १०॥ स तु ग्रीवाप्रदेशहरिणः। इति राजनिर्घण्टः॥

रङ्गं, क्ली पुं, (रञ्जतीति। रञ्ज+अच्। रज्यते अस्मिन्। रञ्ज्+अधिकरणे घञ् वा।) धातुविशेषः। राङ्ग इति भाषा॥ तत्पर्य्यायः। त्रपु २ त्रपुषम् ३ आपूषम् ४ वङ्गम् ५ मधुरम् ६ हिमम् ७ कुरुण्यम् ८ पिच्छटम् ९ पूतिगन्धम् १०। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। हिमत्वम्। कषायत्वम्। लवणरसत्वम्। मेहघ्नत्वम्। कृमिपाण्डुदाहश्रमनत्वम्। काम्यिकरत्वम्। रसायनत्वञ्च। तद्विशेषो यथा,—

"श्वेतं मृदु लघु स्वच्छं स्निग्धसुप्तसहं हिमम्।
स्वप्नपत्करं कान्तं त्रपुश्लेष्महरोद्भवम्॥
क्षुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते।
उत्तमं क्षुरकं तत्र मिश्रकं लक्षितं मतम्॥"

इति राजनिर्घण्टः॥

तस्यानुद्वस्य दोषमाह ।
"वङ्गो विधत्ते खलु सुद्विहीन-
स्तथा त्वपक्वश्च किलासगुल्मौ ।
कुष्ठानि शूलं किल वातशोथं
पाण्डुं प्रमेहञ्च भगन्दरञ्च ॥
विषोपमं रक्तविकारदुःखं
क्षयञ्च हृच्छ्वासि कफज्वरञ्च ।
मेहाश्मरीविद्रधिसुखरोगान्
रागोऽपि कुर्य्यात् कथितान् विकारान् ॥"
तस्य शोधनमभिधीयते ।
"वङ्गनागौ प्रतप्तौ च गलितौ तौ निषेचयेत् ।
त्रिधा त्रिधा विशुद्धिः स्यान्नविदुग्धेऽपि च
त्रिधा ॥
तैलतक्रकाञ्जिकगोमूत्रकुलत्थकाथेषु प्रत्येकं त्रिधा
त्रिधा । ततोऽर्कदुग्धे त्रिधा ॥ * ॥
अथ वङ्गस्य मारणविधिः ।
"स्तनपात्रे द्रावितं वङ्गं त्रिश्चाम्लतैलचो रजः ।
त्रिधा वङ्गचतुर्थांशमयोदत्त्वा प्रचालयेत् ॥"
त्रिधा अमिली । रजचूर्णम् । अयोदर्वी कर-
छुली ।
"ततो द्वियाममात्रेण वङ्गं भस्म प्रजायते ।
अथ भस्मसमं तालं त्रिभृङ्गेन विमर्द्दयेत् ॥
ततो गजपुटे पक्त्वा पुनरर्केण मर्द्दयेत् ।
ताम्रेण दग्धमांसेन याममेकं ततः पुटेत् ।
एवं दशपुटैः पक्वं वङ्गं भवति मारितम् ॥"
एवं मारितस्य वङ्गस्य गुणाः ।
"वङ्गं लघु सरं रूक्षं कुष्ठमेहकफघ्नमीन् ।
निहन्ति पाण्डुं सश्वासं नेत्ररोगांश्च पित्तलम् ॥
सिंहो गजौघन्तु यथा निहन्ति
तथैव रङ्गोऽखिलहेमवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥"
इति भावप्रकाशः ॥
(यथाच ।
"वङ्गं तिक्तास्लकं रूक्षं किञ्चिदातपकोपणम् ।
मेदः श्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥"
इति वैद्यकरत्नेन्द्रसारसंग्रहे
जारणमारणाधिकारे ॥)
रङ्गः, पुं, (रञ्ज् + घञ् ।) रागः । (यथा, महा-
भारते । ५ । ३६ । १० ।
"वासो यथा रङ्गवशं प्रयाति
तथा स तेषां वशमभ्युपेतः ॥")
नृत्यम् । (यथा विष्णुपुराणे । २ । ६ । २० ।
"रङ्गोपजीवी कैवर्त्तः कुम्भाशी गरदस्तथा ।
सूचीमाहिषिकश्चैव पर्व्वकारी च यो द्विजः ॥"
रजति आसज्यति मल्लोऽत्र । रञ्ज् + अधि-
करणे घञ् ।) रणभूमिः । इति मेदिनी । गे,
२९ ॥ (यथा, श्रीमद्भागवते । १० । ४३ । १७ ।
"कृष्णोनां परदेवतेति विदितो रङ्गं गतः
साग्रजः ॥")
नाट्यस्थानम् । इति हेमचन्द्रः ॥ (यथा,
मृच्छकटिकप्रकरणे । १ ।
"इयं रङ्गप्रवेशेन कलानाचोपजिघ्यया ।
वचनापक्षिप्तलक्षेन स्वरूपेणुपयाश्रिता ॥"
लक्षणया नाट्यस्थानस्थितो जनः । यथा, अभि-
ज्ञानशकुन्तले १ प्रस्तावनायाम् ।
"सूत्रधारः । आर्ये ! साधु गीतम् । अहो
रागापहृतचित्तवृत्तिरालिखित इव विभाति
सर्व्वतो रङ्गः । तदिदानीं कतमं प्रयोगमाश्रित्यै-
नमाराधयामः ॥" राजमार्गः । यथा, देवी-
भागवते । ७ । २२ । ३ ।
"अवतार्य्य तदा रङ्गे तां मार्य्यां नृपसत्तमः ॥")
टङ्कः । खादिरसारः । इति राजनिर्घण्टः ॥
रङ्गकाष्ठं, क्ली, (रङ्गं रञ्जितं काष्ठमस्य ।) पत्त-
ङ्गम् । इति राजनिर्घण्टः ॥
रङ्गजं, क्ली, (रङ्गात् जायते इति । जन् + डः ।)
सिन्दूरम् । इति रत्नमाला ॥
रङ्गजीवकः, पुं, (रङ्गेण रञ्जनकार्य्येण जीवतीति ।
जीव् + ण्वुल् ।) चित्रकारः । इति शब्द-
रत्नावली ॥ नाट्यकारश्च ॥
रङ्गदः, पुं, (रङ्गं ददाति छिनत्तीति । दो + कः ।)
टङ्कः । खादिरसारः । इति राजनिर्घण्टः ॥
रङ्गदा, स्त्री, (रङ्गद + टाप् ।) स्फटी । इति
राजनिर्घण्टः ॥ (तथास्याः पर्य्यायः ।
"स्फटी च स्फटिका प्रोक्ता श्वेता शुभा च रङ्गदा ।
रङ्गढट्टा रङ्गदा च ढट्टा रङ्गापि कथ्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रङ्गदायकं, क्ली, (रङ्गस्य दायकम् ।) कङ्कुष्ठम् ।
इति राजनिर्घण्टः ॥
रङ्गढट्टा, स्त्री, (रङ्गवत् ढट्टा ।) स्फटी । इति
राजनिर्घण्टः ॥
रङ्गपत्री, स्त्री, (रङ्गं रङ्गार्थं पत्रमस्याः । ङीष् ।)
नीलीवृक्षः । इति राजनिर्घण्टः ॥
रङ्गपुष्पी, स्त्री, (रङ्गं रञ्जितं पुष्पमस्याः ।)
नीलीवृक्षः । इति राजनिर्घण्टः ॥
रङ्गबीजं, क्ली, (रङ्गं बीजं उत्पत्तिकारणमस्य ।)
रूप्यम् । इति शब्दरत्नावली ॥
रङ्गभूतिः, स्त्री, (रङ्गस्य रागस्य गौरिव भूतिः
शोभात्र ।[1]) कोजागरपूर्णिमा । इति शब्द-
रत्नावली ॥
रङ्गभूमिः, स्त्री, (रङ्गस्य भूमिः ।) मल्लभूमिः । इति
शब्दरत्नावली ॥ (यथा, महाभारते । १ । १३५ । ६ ।
"अवघुष्टे समाजे च तदर्थं वदतां वरः ।
रङ्गभूमौ सुविपुलं प्राच्छादृष्टं यथाविधि ॥"
रङ्गभूमिविवरणं यथा, अग्निपुराणे । ७ । ११-१२ ।
"सान्द्रां सुकठिनाञ्चैव पाषाणोदकसंयुताम् ।
दृढकाष्ठसमायुक्तां रङ्गभूमिन्तु कारयेत् ॥
समाञ्च विपुलाञ्चैव किञ्चित् पांशुसमन्विताम् ।
एकान्ते विजने रम्ये रङ्गभूमिन्तु कारयेत् ॥")
नाट्यभूमिश्च ॥
रङ्गमल्ली, स्त्री, (रङ्गाय रागाय मल्ली ।) वीणा ।
इति शब्दरत्नावली ॥
रङ्गमाणिक्यं, क्ली, (रङ्गं रञ्जितं माणिक्यम् ।)
माणिक्यरत्नम् । इति राजनिर्घण्टः ॥
रङ्गमाता, [त्र] स्त्री, (रङ्गस्य माता जनिका ।)
कुट्टनी । लाक्षा । इति मेदिनी । ते, २१५ ॥
रङ्गमालिका, स्त्री, (रङ्गमाल + स्वार्थे कन् । टाप् ।)
लाक्षा । इति चिकाण्डशेषः ॥
रङ्गलासिनी, स्त्री, (रङ्गेण रागेण लसितुं शीलम-
स्याः इति । लस + णिनिः । ङीप्) शैलालिका ।
इति शब्दचन्द्रिका ॥
रङ्गशाला, स्त्री, (रङ्गस्य शाला ।) नाट्यगृहम् ।
इति शब्दरत्नावली ॥ नाचघर इति भाषा ॥
रङ्गाङ्गा, स्त्री, (रङ्गं रङ्गार्हमङ्गमस्याः ।) स्फटी ।
इति राजनिर्घण्टः ॥
रङ्गाजीवः, पुं, (रङ्गो हरितालादिस्तेनाजीव-
तीति । जीव् + अण् । यद्वा, रङ्ग आजी-
वोऽस्य ।) चित्रकरः । इत्यमरः । २ । १० । ७ ॥
नटः । इति हेमचन्द्रः । ३ । ४८५ ॥
रङ्गावतारकः, पुं, (रङ्गे सङ्गीतभवने अवतर-
तीति । तॄ + ण्वुल् । यद्वा रङ्गं नृत्यादिकमव-
तारयतीति । तॄ + णिच् + ण्वुल् ।) रङ्गाव-
तारी । तत्पर्य्यायः । श्लेलूषः २ भरतः ३ सर्व्व-
वेधी ४ भरतपुत्रकः ५ धात्रीपुत्रः ६ रङ्ग-
जीवः ७ जायाजीवः ८ नटः ९ कृशाश्वी १०
श्लेलाली ११ । इति हेमचन्द्रः ॥ नृत्यगीतस्थाने
गीतवाद्यादिना तदनुगुणतया प्रवक्त्री । इति
प्रायश्चित्तविवेकः ॥ नटगायनव्यतिरिक्तरङ्गाव-
तरणजीवी । इति कुल्लूकभट्टः ॥ तस्यान्नभक्षण-
प्रायश्चित्तं यथा,—
"मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदाचन ।
केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः ॥"
इत्युपक्रम्य,—
"कर्म्मारस्य निषादस्य रङ्गावतारकस्य च ।
सुवर्णकर्त्तुश्चैणस्य भ्रूक्षविक्रयिणस्तथा ॥"
इत्यादुक्त्वा,—
"य एतेऽन्ये जघन्याजाः क्रमशः परिकीर्त्तिताः ।
तेषान्तु गवि रोमाणि वदन्त्यन्नं मनीषिणः ॥
शुक्लातोऽन्यतमस्यान्नममत्वा चपलं चाहम् ।
मत्वा शुक्ला चरेत् कृच्छ्रं रेतोविण्मूत्रमेव च ॥"
इति मानवे ४ अध्यायः ॥
रङ्गावतारी, [न्] पुं, (रङ्गमवतरतीति । तॄ +
णिनिः ।) नटः । इति जटाधरः ॥ (यथा,
याज्ञवल्क्यसंहितायाम् । २ । ७२ ।
"स्त्रीवृद्धबालक्षितवमत्तोन्मत्ताभिशप्तकः ।
रङ्गावतारिपाषण्डिकूटकृद्विकलेन्द्रियाः ॥")
रङ्गारिः, पुं, (रङ्गस्य तदाख्यधातोररिरिव ।)
करवीरः । इति रत्नमाला ॥
रङ्गिणी, स्त्री, (रङ्गोऽस्त्यस्या इति । रङ्ग +
इनिः । स्त्रियां ङीप् ।) शतमूली । इति
जटाधरः ॥ कैवर्त्तिका । इति राजनिर्घण्टः ॥
रङ्गविशिष्टे, त्रि ॥
रङ्गः, [स्] क्ली, (रंघ्यते प्राप्यते इति । रघि
+ "अधिरघिभ्यामसुन् ।" इति असुन् । इत्यु-
ज्ज्वलदत्तः । ४ । २१३ ।) रंहः । वेगः । इति
भरतद्विरूपकोषः ॥ (यथा, सूर्य्यशतके । ७१ ।

"रंघः संघो सुराणां जगदुपकृतये नित्यमुक्तस्य यस्य ॥")

रच, तु क कृत्याम्। इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट्।) रचयति। इति दुर्गादासः ॥

रचनं, क्ली, (रचि+भावे ल्युट्।) निर्म्माणम्। ग्रन्थनम्। यथा, जयदेवः। १। ४।

"वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः। शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनः स्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविः क्ष्मापतिः ॥"

रचना, स्त्री, (रच्यते इति। रच+णिच्+"ग्रास-अन्यो युच्।" ३। ३। १०७। इति युच्।) कुसुमप्रकारादेः पत्रावल्यादेश्च रचनम्। तत्पर्य्यायः। परिसन्दः २। इत्यमरः। २। ६। १३७ ॥ परिसन्दः ३। इति भरतः ॥ (यथा, साहित्यदर्पणे। ३। १४६।

"भूषणानामङ्गरचना तथा विन्यासवैचित्र्यम्। रहस्याख्यानमौचित्यं विशेषो दयितान्तिके ॥")

यथाक्रमेण स्थापनम्। तत्पर्य्यायः। निवेशः २ स्थितिः ३। इति हेमचन्द्रः। ३। ४११ ॥ (यथा, महाभारते। ८। ४६। १०।

"ग्रहणं बूहस्य रचनामर्ज्जुनस्य यथागतः ॥")

निर्म्मितिः। कृतिः। यथा,—

"असाधारणचमत्कारकारिणी रचना हि निर्म्मितिः।" इत्यलङ्कारकौस्तुभे १ किरणः ॥

तत्पर्य्यायः। सन्दर्भः २ गुम्फः ३ ग्रन्थनम् ४। ग्रन्थनम् ५। इति हेमचन्द्रः। ३। ३१७ ॥ (उद्यमः। यथा, श्रीमद्भागवते। ३। ६। १०।

"दैवाहतार्थरचना ऋषयोऽपि देव युष्मत्प्रसङ्गविमुखा इह संसरन्ति ॥"

"दैवेनाहताः सर्व्वतः प्रतिहताः अर्थानां रचनाः अर्थार्थिनां यासाम्।" इति तट्टीकायां श्रीधरस्वामी ॥ रचयतीति। रचि+ल्युः। टाप्। विश्वकर्म्मणो भार्य्या। यथा, श्रीमद्भागवते। ६। ६। ४४।

"त्वष्टुर्दैत्यात्मजा भार्य्या रचना नाम कन्यका। सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्य्यवान् ॥")

रचित, त्रि, कृतः। रचधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः। यथा,—

"शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः स्थिरायास्तद्भक्तेष्विपुरहर विस्फूर्ज्जितमिदम् ॥"

इति पुष्पदन्तकृतस्तुतिः ॥

रजं, क्ली, (रञ्जयतीति। रञ्ज+अच्। निपातनात् सिद्धम्।) स्त्रीकुसुमम्। इति शब्दरत्नावली ॥

रजः, पुं, (रञ्जयतीति। रञ्ज+अच्। निपातनान्नलोपः।) परागः। (यथा, गो० रामायणे। ३। ७६। २६।

"पद्मपुष्परजोमिश्रो वृक्षान्तरविनिःसृतः। निश्वास इव सीतायाः वायुर्वाति मनोरमः ॥")

रेणुः। ("अर्घाः पादरजोपमाः ॥" इति उज्ज्वलदत्तः। ४। २१६ ॥) गुणभेदः। आर्त्तवम्। इति जान्तवर्गे शब्दरत्नावली ॥ (स्कन्दस्य सेनाविशेषः। यथा, महाभारते। ६। ४५। ७१।

"दण्डबाहुः सुबाहुश्च रजः कोकिलकस्तथा ॥"

विरजपुत्रः। यथा, विष्णुपुराणे। २। १। ४०।

"त्वष्टा त्वष्टुश्च विरजो रजस्तस्याप्यभूत्सुतः ॥"

वशिष्ठपुत्रः ऋषिभेदः। यथा, विष्णुपुराणे। ३। १०। १३।

"ऊर्ज्जायान्तु वशिष्ठस्य सप्तासन्वै सुताः। रजो गात्रोर्द्ध्वबाहुश्च सवनश्चानघस्तथा ॥")

रजः [स्] क्ली, (रज्यते रजतीति। रञ्ज्+"भूरञ्जिभ्यां कित्।" उणा०४। २१६। इत्यसुन्।) स्त्रीणां मासि मासि योनिनिःसृतरक्तम्। तत्पर्य्यायः। पुष्पम् २ आर्त्तवम् ३। इत्यमरः। २। ६। २१ ॥ ऋतुः ४ कुसुमम् ५ रजम् ६। इति शब्दरत्नावली ॥ (यथा, मनौ। ५। १०८।

"रजसा स्त्री मनोदुष्टा सद्यःशौचेन शुद्ध्यति ॥"

अस्य लक्षणं यथा,—

"रञ्जितास्तेजसा त्वाप शरीरस्थेन देहिनाम्। अयापन्ना प्रसन्नेन रक्तमित्यभिधीयते ॥ रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते। तद्वर्षाद्द्वादशादूर्द्धं याति पञ्चाशतः क्षयम् ॥"

"नारीणां रजसि चोपचीयमाने शनैः शनैः स्तनगर्भाशययोन्यभिवृद्धिर्भवति।" इति सुश्रुते शरीरस्थाने १४ अध्यायः ॥

"मासि मासि रजःस्त्रीणां रसजं स्रवति ह्यहम्। वत्सरात्तद्द्वादशादूर्द्धं याति पञ्चाशतः क्षयम् ॥"

इति वाभटे शारीरस्थाने प्रथमेऽध्याये ॥)

प्रकृतेर्गुणविशेषः। तत्तु रागद्वेषात्मकं दुःखहेतुः। रजोऽन्तः पुंलिङ्गोऽपि। यथा,—

"रजोऽयं रजसा सार्द्धं स्त्रीपुंस्यगुणधूलिषु।"

इत्यमरदत्तः। इति भरतः ॥

महाभारतमते दुःखजनकगुणः। तस्य धर्म्मः कामः क्रोधः लोभः मानः दर्पश्च। इति मोक्षधर्म्मः ॥

"तृष्णा क्रोधोऽभिसंरम्भो राजसास्ते गुणाः स्मृताः ॥"

अभिसंरम्भो द्वेषाभिनिवेशः। इत्यान्वीक्षिकीपर्व्व ॥ अपि च।

"काम एष क्रोध एष रजोगुणसमुद्भवः। महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥"

इति श्रीभगवद्गीतायाम्। ३ अध्यायः ॥

अपि च।

"सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः। निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥"

"रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति कौन्तेय! कर्म्मसङ्गेन देहिनम् ॥"

"सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत। ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ रजस्तमश्चाभिभूय सत्त्वं भवति भारत। रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा।"

"लोभः प्रवृत्तिरारम्भः कर्म्मणामशमः स्पृहा। रजस्येतानि जायन्ते विवृद्धे भरतर्षभ! ॥"

"कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम्। रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च। प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ ऊर्द्धं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः। जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥"

इति श्रीभगवद्गीतायाम्। १४ अध्यायः ॥

"सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः। कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि ॥ प्रभूतत्व यदा सत्त्वं मनोबुद्धीन्द्रियाणि च। तदा कृतयुगं विद्याद्दाने तपसि यद्रतिः ॥ यदा कर्म्मसु कार्य्येषु शुक्लिर्यशसि देहिनाम्। तदा त्रेता रजोवृद्धिरिति जानीहि शौनक ॥ यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः। कर्म्मणाञ्चापि काम्यानां द्वापरं तदनुत्तमम् ॥ यदा सदानृतं तन्द्री निद्रा हिंसादिसाधनम्। शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥"

इति गारुड़े २२७ अध्यायः ॥

परागः। इति मेदिनी। से, ३२ ॥ (यथा, भागवते। ४। २४। २२।

"पद्मकोशरजो दिक्षु विक्षिपत्यवनोत्सवम् ॥")

रेणुः। अस्य पर्य्यायः धूलिशब्दे द्रष्टव्यः ॥ (यथा, माघे। २। ४६।

"पादाहतं यदुत्थाय मूर्द्धानमधिरोहति। स्वस्थादेवावमानेऽपि देहिनस्तद्वरं रजः ॥")

निषिद्धानिषिद्धरजो यथा,—

"आयुष्कामो न सेवेत तथा सम्मार्ज्जनीरजः। तथाश्वरथधान्यानां गवाञ्चैव रजः शुभम् ॥ अशुभञ्च विजानीयात् खरोष्ट्राजाविकेषु च। गवां रजो धान्यरजः पुत्रस्याङ्गभवं रजः ॥ एतद्रजो महाशुद्धं महापातकनाशनम्। अजारजः खररजो यत्तु सम्मार्ज्जनीरजः ॥ एतद्रजो महापापं महाकिल्बिषकारणम् ॥"

इति गारुड़े ११४ अध्यायः ॥

(राचिः। इति निघण्टुः। १। ७ ॥ उदकम्। यथा, ऋग्वेदे। १। ५६। ५।

"वियत्तिरोधरणमच्युतं रजोतिष्ठिपो दिव आतासु वर्हणा।"

'रज उदकम्।' इति तद्भाष्ये सायणः ॥ भुवनम्। यथा, तत्रैव। १०। ८२। ४।

"अरुर्त्ते रुर्त्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि।"

"रजसि लोके।" इति तद्भाष्ये सायणः ॥ ज्योतिः। यथा, तत्रैव। १०। ३२। २।

"वीन्द्र यासि दिवानि रोचना विमार्थिवानि रजसा पुरुष्टुत।"

"रजसा आत्मीयेन ज्योतिषा। विद्युल्लक्षणेन यदा रजःशब्दाक्षस आकारः पार्थिवान् लोकान्।" इति तद्भाष्ये सायणः ॥)

रजःग्रयः, पुं, (रजसि ग्रीते। ग्री+"अधिकरणे शेतेः।" ३। २। १५। इति अच्।) कुक्कुरः। इति शब्दमाला॥ (धूलिग्राथिनि, त्रि। रजतमयी। यथा, वाजसनेयसंहितायाम्। ५। ८।

"या तेऽग्ने रजःग्रया तनूर्वर्षिष्ठा॥"

"रजःग्रया रजतमयीति।" तङ्काग्ये महीधरः॥)

रजःसारथिः, पुं (रजसां सारथिरिव।) वायुः। इति शब्दरत्नावली॥

रजकः, पुं, (रजति निर्म्मलनेन क्षितिमानमापादयति वस्त्रादीनामिति। रजृ+"वृतिखनिरञ्जिभ्यः परिगणनं कर्त्तव्यम्।" ३। १। १४५। इति ण्वुल्।) वर्णसङ्करजातिविशेषः। धोबा इति भाषा॥ (यथा, भागवते। १०।४१।३२।

"रजकं कञ्चिदायान्तं रङ्गकारं गदाग्रजः।
दृष्ट्वायाचत वासांसि विधौतान्युत्तमानि च॥")

स च तीरपत्न्यां धीवराज्जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ तत्पर्य्यायः। निर्णेजकः २। इत्यमरः। २। १०।१०॥ ग्रौपेयः ३ कर्म्मकोलकः ४। इति शब्दरत्नावली॥ धावकः ५। इति हेमचन्द्रः। ३। ५। ७८॥ रजकस्य वस्त्रनिर्णेजनप्रकारो यथा,—

"वासांसि प्रथमे: शस्त्रैर्निर्धिन्याद्रजकः शनैः।
अतोऽन्यथा हि कुर्व्वीत दण्डः स्याद्द्रव्यमावकम्॥"

इति मात्स्ये २०१ अध्यायः॥

(रजकान्नभक्षणप्रायश्चित्तं यथाह आपस्तम्बः।

"रजके चैव ग्रैलूषे वेश्यायां पापजीविनि।
एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणञ्चरेत्॥"

इति प्रायश्चित्तविवेकः॥ विशेषस्तत्रैव द्रष्टव्यः॥)

अंशुकः। इति त्रिकः॥

रजकी, स्त्री, रजकपत्नी। रजृधातोः वकप्रत्ययान्तादपि ङीषि सिद्धा। इति सुग्धबोधव्याकरणम्॥ (यथा, आर्य्यासप्तशत्याम्। ३०२।

"परपट इव रजकीभिर्मलिनो भुक्तापि निर्दयं ताभिः।
अर्थग्रहणेन विना जघन्य! मुक्तोऽसि कुलटाभिः॥")

रजतं, क्ली, (रजति प्रियं भवति रज्यत इति वा। रजृ+"पृथिरञ्जिभ्यां कित्।" उणा०। ३। ११९। इति अतच् कित्कार्य्यञ्च।) रूप्यम्। इत्यमरः। २। ९। ९६॥ हस्तिदन्तः। धवलः। श्वेतितम्। हारः। हृद्यः। ग्रैवः। (स तु शाकद्वीपस्थ एव। यथा, मात्स्ये १२१। १४।

"रत्नमालान्तरमयः शाल्मलश्चाम्बराह्वयः।
तस्मादपरेण रजतो महाशृङ्गो गिरिः स्मृतः॥")

स्वर्णम्। इति हेमचन्द्रः। ३। १०९॥ शुक्लवर्णविशिष्टे, त्रि। इत्यमरटीकायां भरतः॥ पितृकार्य्ये रजतपात्रादीनां प्राशस्त्यादि यथा,

"सौवर्णं राजतं ताम्रं पितृणां पात्रमुच्यते।
रजतस्य कथा वापि दर्शनं दानमेव वा॥
राजतैर्भाजनैरेषामथवा रजतान्वितैः।
वार्य्यपि श्रद्धया दत्तमक्षय्यायोपकल्प्यते॥
यथार्घ्यपिण्डभोज्यादौ पितॄणां राजतं मतम्।
शिवनेत्रोद्भवं तस्माद्दत्तं तत् पितृवल्लभम्।
अमङ्गलं तदृग्रेषु देवकार्य्येषु वर्ज्जितम्॥"

इति मात्स्ये १७ अध्यायः॥

रजतद्युतिः, पुं, (रजतस्येव द्युतिरस्य।) हनूमान्। इति शब्दरत्नावली॥

रजतप्रस्थः, पुं, (रजतस्तम्बयः तद्वत् शुभ्रो वा प्रस्थः सानुरस्य।) कैलासपर्व्वतः। इति त्रिकाण्डशेषः॥

रजताचलः, पुं, (रजतप्रधानोऽचल इव। शाकपार्थिवादित्वात्समासः।) रौप्यपर्व्वतः। तस्य परिमाणं दानविधिश्च यथा,—

"राजतो नवमस्तेषां सुवर्णाचलः।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः॥
अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम्।
यत्प्रसादान्नरो याति सोमलोकं द्विजोत्तम॥
दशभिः पलसाहस्रैरुत्तमो रजताचलः।
पञ्चभिर्मध्यमः प्रोक्तस्तदर्द्धेनावरः स्मृतः॥
अग्रतो विंशतेरुर्द्धं कारयेत् प्रकृतिं सदा।
विष्कम्भपर्व्वतांस्तद्वत् तुरीयांशेन कल्पयेत्॥
पूर्व्ववद्राजतान् कुर्य्यान्मन्दरादीन् विधानतः॥"

पूर्व्ववत् रत्नाचलवत्।

"कलधौतमयांश्चैव लोकेशान् रचयेद्बुधः॥
ब्रह्मविष्णुकैवत् कार्य्यो नितम्बोऽत्र हिरण्मयः।
राजतं स्याद्यदन्येषां समस्तादिह काञ्चनम्॥
ग्रैवञ्च पूर्व्ववत् कुर्य्यात् होमयागरथादिकम्।
प्रदद्यात्तु प्रभाते तु गुरवे रौप्यपर्व्वतम्॥
विष्कम्भग्रैलाग्रलिङ्गेभ्यः पूज्य वस्त्रविभूषणैः।
इमं मन्त्रं पठन् दद्याद्भर्गपार्श्वनिवासिनम्॥
पितॄणां वल्लभं यस्मात् विष्णोर्वा शङ्करस्य च।
रजतं प्राहि तस्मान्नः शोकसंसारसागरात्॥
इत्थं निवेद्य वो दद्यात् रजताचलमुत्तमम्।
गवामयुतदानस्य फलं प्राप्नोति मानवः॥
सोमलोके सगन्धर्व्वैः किन्नराप्सरसाङ्गणैः।
पूज्यमानो वसेत्तिष्ठन् यावदाभूतसंप्लवम्॥"

इति मात्स्ये ७ अध्यायः॥

(कैलासपर्व्वतः। यथा, महाभिज्ञानशाकुन्तले।

"रजताचलमध्ये तु कुबेरेश्वर ईरितः॥")

रजताद्रिः, पुं, (रजतमयस्तद्वत् शुभ्रो वा अद्रिः। शाकपार्थिवादित्वात् समासः।) कैलासपर्व्वतः। इति हेमचन्द्रः। ४। ६४॥

रजनं, क्ली, (रज्यत इति। रजृ+"रञ्जेः क्युन्।" उणा०। २। ७६। इति क्युन्। "रजकरजनरजःशब्दसंख्यानम्।" ६। ४। २४। इति वार्त्तिकोक्तेर्नलोपश्च।) रागः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, महाभारते। ८। ५२। ६।

"यथा वा वाससी शुक्ले महारजनरञ्जिते।
विभ्रद्यात् युवतौ श्यामा तद्वदासीदसुस्वरा॥")

ऋषिविशेषे, पुं। यथा, तैत्तिरीयसंहितायाम्। २। ३। ८। १।

"रजनो वै कौशेयः क्रतुजितं जानकिं चक्षुर्व्वनुयमयात्॥")

रजनिः, स्त्री, (रजन्ति लोका यत्र। रजृ+बाहुलकादनिः। इत्युज्ज्वलदत्तः। २। १०३।) रात्रिः। इत्यमरटीका॥ (यथा, कथासरित्सागरे। १८। १४५।।

"इत्येवं स्वाप्य समयं प्राप्तायां रजनौ च तान्।
आमन्त्र्य विप्रान् प्रययौ स्नानार्थं स विदूषकः॥")

रजनी, स्त्री, (रजनि+ऋदिकारादिति ङीष्।) रात्रिः। (यथा, महाभारते। ३। ६६। २८।

"सा दृष्ट्वा रजनीमन्त्र पितुर्वेश्मनि भाविनी।
विश्रान्ता मातरं राजन्! इदं वचनमब्रवीत्॥")

हरिद्रा। (अस्याः पर्य्यायो यथा,—

"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा।
मेहघ्नी रञ्जनी पीता वर्ण्यिनी रात्रिनामिका॥"

इति वैद्यकरत्नमालायाम्॥

यथा, नवधे। २२। ६६।

"अस्याः सुराधीग्रदिग्रः पुरासीत्
यदम्बरं पीतमिदं रजन्याः।
चन्द्रांशुचूर्णैश्चयतिपुम्भितेन
तेनाधुना नूनमलोहितायि॥")

जतुका। इत्यमरः। २। ४। १५३॥ (यथा, वृहत्संहितायाम्। ४४। ६।

"दन्त्यन्द्रताक्षनरजनीसुवर्णपूष्पाग्निमन्थाश्च॥")

नीलिनी। इति मेदिनी। ने, ११६॥ (ग्राम्यजोषधभेदः। यथा, भागवते। ५।२०।१०।

"अनुमतो सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति॥")

रजनीकरः, पुं, (रजनीं करोतीति। कृ+टः।) चन्द्रः। इति शब्दरत्नावली॥ (यथा, भागवते। ४।२८।३४।

"हित्वा यदान् सुतान् भोगान् वेदभौ मदिरेक्षया।
अन्वधावत पाखण्डं ज्योत्स्नेव रजनीकरम्॥")

रजनीगन्धा, स्त्री, (रजन्यां गन्धोऽस्याः। रात्रौ विकाशात् तथात्वम्।) स्वनामख्यातश्वेतवर्णपुष्पविशेषः। इति लोकप्रसिद्धिः॥

रजनीचरः, पुं, (रजन्यां चरतीति। चर+"चरेष्टः।" ३। २। १६। इति टः।) राक्षसः। इति शब्दरत्नावली॥ (यथा, रामायणे। ७।५।४।

"स तया सह संयुक्तो वराज रजनीचरः॥"

तथा च।

"ओजोऽर्थिनां रजनीचराणां
आहारहेतोर्न शरीरमिदम्।
गर्भे हरेर्युर्यदि तेन मातु-
र्लब्धावकाशं न हरेयुरोजः॥"

इति चरके शारीरस्थाने द्वितीयेऽध्याये॥) चौरः॥ यामिकभटः॥ (रात्रिविहारके, त्रि। यथा, हरिवंशे। २०२। १८।

"ब्राह्मणाश्च राजानं ग्राह्मणं रजनीचरम्॥")

रजनीजलं, क्ली, (रजन्या जलम्।) नीहारः। इति हारावली। ६७॥

रजनीपुष्पः, पुं, (रजन्या हरिद्रायाः पुष्पमिव पुष्पमस्य।) पूतिकरञ्जः। इति राजनिर्घण्टः॥ (पूतिकरञ्जशब्देऽस्य विवरणं ज्ञातव्यम्॥)

रजनीमुखं, क्ली, (रजन्या मुखम्।) प्रदोषः। इत्यमरः। १। ४। ६॥ (यथा, राजतरङ्गिण्याम्। ४। ४३३।
"ततः प्रगाढान्धतमे सञ्जाते रजनीमुखे।
पार्थिवानालभ्य भूपालं गृह्याधेयं विवेश सा॥")

रजनीहासा, स्त्री, (रजन्यां हासो विकाशो यस्याः।) शेफालिकापुष्पम्। इति शब्दरत्नावली॥

रजसानुः, पुं, (रज्यतेऽस्मिन्निति। रञ्ज्+"असानुः सहिमन्दिभ्यां दृधिरक्षिभ्यां तु किदर्त्तेरर्शश्च।" इत्युणादिकोषटीकाकृत्सूत्रोक्तेः असानुप्रत्ययः।) मेघः। चित्तम्। इत्यणादिकोषः। १। १७३॥

रजस्वलः, पुं, (रजोऽस्यास्तीति। रजस्+"रजःकृष्यासुतिपरिषदो वलच्।" ५। २। ११२। इति वलच्।) महिषः। इति मेदिनी। ले, १६३॥ (अस्य पर्य्यायो यथा,—
"महिषो घोटकारिः स्यात् कासरश्च रजस्वलः।
घोनस्कः कृष्णकायोऽथ लुलापो यमवाहनः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
त्रि, रजोयुक्तः। यथा, भागवते। ७। १३।१२।
"तं ग्रथानं धरोपस्थे कावेर्य्यां सह्यसानुनि।
रजस्वलैस्तन्देशैर्निगूढामलतेजसम्॥"
रजोगुणयुक्तः। सृहयालुः। यथा, मनुः। ६। ७७।
"जराशोकसमाविष्टं रोगार्त्तं दुःखभागिनम्।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत्॥")

रजस्वला, स्त्री, (रजोऽस्यस्याः। "रजःकृष्यासुतीति।"५। २। ११२। इति वलच्। टाप्।) रजोयुक्ता। तत्पर्य्यायः। स्त्रीधर्म्मिणी २ अवी ३ आर्त्तवी ४ मलिनी ५ पुष्पवती ६ ऋतुमती ७ उदक्या ८। इत्यमरः। २।६।२०॥ दुरिः ९ पुष्पहासा १०। इति शब्दरत्नावली॥ पुष्पिता ११ अवीरा १२ विपली १३ निष्कली १४। इति जटाधरः॥ स्नाना १५ पांशुला १६। इति राजनिर्घण्टः॥ * ॥ अथ रजस्वलासम्पर्कप्रायश्चित्तम्। "काश्यपः।
'रजस्वला तु संस्पृष्टा ब्राह्मणी ब्राह्मणी यदि।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी तु या।
त्रिरात्रेण विशुद्धिः स्यात् शास्त्रस्य वचनं यथा॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि।
षड्रात्रेण विशुध्येत्तु ब्राह्मणी कामचारतः॥
अकामतश्चरेद्दण्डं ब्राह्मणी सर्व्वजातिषु॥'
एतेन रजस्वलाया ब्राह्मण्याः सवर्णेरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानं कामतः। अकामतस्तदर्द्धम्। नक्तव्रतम्। असवर्णरजस्वलास्पर्शे त्रिरात्रपञ्चरात्रषड्रात्रोपवासाः। अकामतस्तदर्द्धम्। एतत् चतुर्थाहानन्तरं कर्त्तव्यम्।
'चाण्डालेन त्वपाकेन संस्पृष्टा चेद्रजस्वला।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत्॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति।
तां निगृह्यातिक्रम्य स्नानादुत्क्रम्य कारयेत्॥'
इति वचनान्तरदर्शनात् एतत् कामतः॥
अत्र दिनभेदोऽपि नास्ति। अज्ञाने दृश्यते। 'पतितान्त्यश्वपाकैश्च संस्पृष्टा स्त्री रजस्वला।
तान्यहानि अतिक्रम्य प्रायश्चित्तं समाचरेत्॥
प्रथमेऽह्नि त्रिरात्रं तु द्वितीये द्व्यहमाचरेत्।
अहोरात्रं ततीयेऽह्नि चतुर्थे नक्तमाचरेत्॥'
चतुर्थेऽहनीति शुद्धिस्नानात् पूर्व्वम्। व्याघ्रः।
'रजस्वला यदा स्पृष्टा श्वसूकरखरैः क्वचित्।
निराहारा भवेत्तावत् यावत् स्नानेन शुध्यति॥'
अत्रापि दृश्यतत्तदिनभेदव्यवस्था। दृश्यातातपः।
'रजस्वले तु ये नार्य्यावन्योन्यं स्पृशतो यदि।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्चमतः परम्॥'
पञ्चगव्यपानं व्रतरूपम्। तेनोपवासः। ब्रह्मकूर्चमाह जाबालः।
'अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः।
पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्चविधिः स्मृतः॥'
तदशक्तौ पुराणैकं ज्ञातव्यम्।" इति प्रायश्चित्ततत्त्वम्॥ * ॥ अन्यच्च।
'शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा देवपैत्रयोः।
देवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति॥'
इति शुद्धितत्त्वम्॥

तस्यां गमने पापं यथा,—
"प्रथमे दिवसे कान्तां यो हि गच्छेद्रजस्वलाम्।
ब्रह्महत्याव्रतार्द्धं स लभते नात्र संशयः॥
स पुमान्न हि कर्म्मार्हो देवे पैत्रे च कर्म्मणि।
अधमः स च सर्व्वेषां निन्दितश्चायशस्करः॥
द्वितीयदिवसे नारीं यो व्रजेच्च रजस्वलाम्।
कामतः परिपूर्णां च ब्रह्महत्यां लभेद्ध्रुवम्॥
आजीवनं नाधिकारी पित्र्यविप्रसुरार्चने॥
अमनुष्योऽयशस्यः स्यादित्याङ्गिरसभाषितम्॥
तृतीयदिवसे जायां यो हि गच्छेद्रजस्वलाम्।
स मूढो ब्रह्महत्यां च लभते नात्र संशयः॥
पूर्व्ववत् पतितः सोऽपि न चार्हः सर्व्वकर्म्मसु।
असत्पुत्रा चतुर्थेऽह्नि न गच्छेत्तां विचक्षणः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५६ अध्यायः॥
अपि च।
"अपूर्णे ऋतुकाले तु योऽभिगच्छेद्रजस्वलाम्।
रेतपाः पितरस्तस्य एवमेतन्न संशयः॥
एकस्तु पुरुषो याति द्वितीयां काममोहितः।
तृतीयां वा चतुर्थीं च तदा स पुरुषाधमः॥
ऋतुकाले तु सर्व्वासां पित्र्यर्थं भोग इष्यते।
ऋतुकालाभिगामी यो ब्रह्मचार्य्येव सम्मतः॥
न गच्छति च यः क्रोधात् मोहादा पुरुषाधमः।
ऋतौ ऋतौ भ्रूणहत्यां प्राप्नोति पुरुषश्चरन्॥"
इति वाराहे गुह्यकर्म्मवर्णनं नामाध्यायः॥

(अपि च।
"रजस्वलास्त्रीगमनमेतन्नरककारणम्।
रजस्वलावीराश्च पुंस्त्वान्नश्च भक्षणम्।
अभक्ष्याश्च विप्रर्षे यदन्नं हृषलीपतेः॥"
तथा च।
"रजस्वलामकामाञ्च मलिनामप्रियान्तथा।
वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीड़िताम्॥
हीनाङ्गीं गर्भिणीं देव्यां योनिदोषसमन्विताम्।
सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि॥
सन्ध्यापर्व्वस्वगम्याश्च नोपेयात् प्रमदां नरः॥
रजस्वलां प्राप्नुवतो नरस्यानियतात्मनः।
दृष्ट्यायुस्तेजसां हानि-रधर्म्मश्च ततो भवेत्॥"
इति सुश्रुते चिकित्सितस्थाने २४ अध्यायः॥)

रजिः, पुं, चन्द्रवंशीयराजविशेषः। यथा। "पुरूरवसो ज्येष्ठपुत्रस्यायुषोनामा। स राहोर्दुहितरमुपयेमे। तस्यां पञ्च पुत्रानुत्पादयामास। नहुषवृत्रदृढरभ्ररजिसंज्ञाः। रजेः पञ्च पुत्रशतान्यतुलबीर्य्यसाराण्यासन्।" इति विष्णुपुराणे ४ अंशे। ८। ६। अध्यायौ॥ (राज्ञ्यम्। कन्याविशेषे, स्त्री। यथा, ऋग्वेदे। ६।२६। ६।
"त्वं रजिं पिठीनसे दशव्रजेषु षष्टिं सहस्रा
शुथा सचाहन्।"
"रजिं एतदाख्यां कन्यां वा राज्ञीं वा।" इति तद्भाष्ये सायणः॥ रज्जुः। यथा, ऋग्वेदे। १०। १००। १२। "रज्जिष्टया रज्ज्या पञ्च आ गोस्तुतुर्यति पर्यग्रं दुवस्युः॥"
"रज्जिष्टया ऋजुततया रज्ज्या रज्ज्वा।" इति तद्भाष्ये सायणः॥)

रजोवर्त्म, क्ली. (रज इव वर्त्मेति। वर्त्म+अच्।) अन्धकारः। इति त्रिकाण्डशेषः॥

रजोरसं, क्ली, अन्धकारः। इति शब्दरत्नावली॥

रजोहरः, पुं, (रजो हरतीति। हृ+"हरतेरुद्यमनेऽच्।" ३।२।६। इति अच्।) रजकः। इति शब्दमाला॥

रज्जुः, स्त्री, (रज्यते रच्यते इति। रञ्ज्+"रज्जेरसुच्च।" उणा० १। १६। इति उः। असुगागमश्च। धातुसकारलोपश्च। आगमसकारस्य नश्चुत्वम्। ककारः। तस्यापि चुत्वम्। जकारः। इत्युज्ज्वलः। अप्राणिजातेश्चारज्ज्वादीनामिति कथनात् न ऊङ्।) बन्धनसाधनवस्तु। दड़ी इति भाषा॥ तत्पर्य्यायः। गुलम् २ वराटकः ३ वटी ४ गुडः ५ इत्यमरः। २। १०। २७॥ गुला ६। इति भरतधृतरभसकोषः॥ गुल्मम् ७ गुल्मः ८ गुल्मा ९ गुल्वी १० गुल्मम् ११ वराटः १२ वटाकरः १३ वटीगुडः १४। इति टीकान्तरम्॥ (तस्या अपहरणे दोषो यथा, मनौ। ११। १६६।
"कार्पासकीटजीर्णानां द्विशफैकशफस्य च।
पक्षिगन्धौषधीनाञ्च रज्ज्वास्त्वेव त्र्यहं पयः॥")
वेणी। इति मेदिनी। ले, १४॥ (प्रत्यङ्गविशेषः। यथा, सुश्रुते शारीरस्थाने ५ अध्याये।
"रज्जवः सेवन्यः सङ्घाताः॥")

रञ्जकं, क्ली, (रञ्जयतीति। रञ्ज्+णिच्+ण्वुल्।) हिङ्गुलम्। इति राजनिर्घण्टः॥ (गुणादयोऽस्य हिङ्गुलशब्दे विज्ञेयाः॥)

रञ्जकः, पुं, (रञ्जयतीति। रञ्ज्+णिच्+ण्वुल्।) कम्पिल्लकः। इति राजनिर्घण्टः॥ प्रीतिजनकः। वस्त्रादिरागकर्त्ता च॥ (अस्य गुणे भोजनं निषिद्धं यथा, मनौ। ४। २१६।

"श्वतां प्रौष्ठिकानाञ्च पेलनिर्ह्रेणकस्य च।
रञ्जकस्य पृथ्वीसस्य यस्य चोपपतिर्गृहे॥"

नाद्यादिति शेषः॥ पित्तान्तर्गतोऽग्निविशेषः। यथा,—

"यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् रञ्जकोऽग्निरिति संज्ञा सरसस्य रागकृदुक्तः।" इति सुश्रुते सूत्रस्थाने २१ अध्यायः॥)

रञ्जनं, क्ली, (रज्यतेऽनेनेति। रञ्ज्+करणे ल्युट्।) रक्तचन्दनम्। इति मेदिनी। ने, ११५॥ (अस्य पर्य्यायो यथा,—

"पत्तङ्गं रक्तसारञ्च सुरङ्गं रञ्जनन्तथा।
षट्करञ्जनमाख्यातं पत्तूरञ्च कुचन्दनम्॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) हिङ्गुलम्। इति राजनिर्घण्टः॥ (रञ्ज्+णिच्। भावे ल्युट्। प्रीतिजननम्। यथा, रघौ। ४। १२।

"तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्॥")

रञ्जनः, पुं, (रञ्जयतीति। रञ्ज्+णिच्+ल्युः।) रागजनकः। इति मेदिनी। ने, ११५॥ सुञ्जट्टयम्। इति राजनिर्घण्टः॥

रञ्जनकः, पुं, (रञ्जन+कन्।) कट्फलः। इति राजनिर्घण्टः॥ (गुणादिविशेषोऽस्य कट्फलशब्दे विज्ञेयः॥)

रञ्जनदः, पुं, (रञ्जयतीति। रञ्ज्+णिच्+ल्युः। रञ्जनसाधौ दुनोति।) अक्षकटत्रः। आच्-माङ् इति भाषा॥

रञ्जनी, स्त्री, (रञ्जन+ङीष्।) शुक्लारोचनिका। नीली। (अस्याः पर्य्यायो यथा,—

"नीली तु नीलिनी तूली कालदोला च नीलिका।
रञ्जनी श्रीफली तुच्छा यामीला मधुपर्णिका॥
क्षौतिका कालकेशी च नीलपुष्पा च सा स्मृता॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) मञ्जिष्ठा। इति मेदिनी। ने, ११५॥ ग्रैवालिका। इति शब्दचन्द्रिका॥ हरिद्रा। (अस्याः पर्य्यायो यथा,—

"हरिद्रा पीतिका गौरी काञ्चनी रजनी निशा।
मेहघ्नी रञ्जनी पीता वर्णिनी राचिनामिका॥"

इति वैद्यकरत्नमालायाम्॥) पर्पटी। इति राजनिर्घण्टः॥

रट, वाचि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रटति। इति दुर्गादासः॥

रटन्ती, स्त्री, (रट्यते पुण्यजनकत्वेन कथ्यते इति। रट्+बहुलकात् झच्। ङीप्।) गौणचान्द्रमाघीयकृष्णचतुर्दश्यौ। तत्र अरुणोदयकाले स्नानं कर्त्तव्यम्। यथा। यमः।

"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्दशी।
तस्यामुदयवेलायां स्नाता नावेक्षते यमम्॥"

उदयवेलायामरुणोदयवेलायाम्।

"अनर्काभ्युदिते काले माघे कृष्णचतुर्दशी।
सतारत्रोमकाले तु तत्र स्नानं महाफलम्।
स्नात्वा सन्तर्प्य तु यमान् सर्व्वपापैः प्रमुच्यते॥"

अत्र तिथितत्त्वात् गौणचान्द्रादरः। अत्रारुणोदयकाल एव स्नानं पूर्ब्बोक्तचतुर्दशीयमतर्पणञ्च। यत्तु उदयवेलायां सूर्य्योदयवेलायां अनर्काभ्युदित इति ईषदर्थे नञिति स्नात्वेत्यनं तत् समुद्धरकरभाष्यधृतसतारत्रोम इति इत्युत्तरार्द्धावलोकनेनेति। इति तिथ्यादितत्त्वम्॥ किञ्च।

"अनर्काभ्युदिते काले स्नानं कुर्य्यात् सरिज्जले।
शतजन्मकृतं पापं तत्क्षणादेव नश्यति॥
रटन्ती नाम विख्याता सर्व्वपापहरा शिवा॥"

इति मत्स्यसूक्ते ५५ पटलः॥

क्वचित् पुस्तके सरिज्जले इत्यत्र वह्निर्ज्जले इति पाठः॥ *। तत्र ग्रामापूजाविधिर्यथा,—

"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्दशी।
तस्यां संपूजयेत्तारां महाविभवविस्तरैः।
चक्रवर्त्ती महाराजो भवत्येव न संशयः॥"

इति दक्षप्रोक्ततन्त्रे ७ पटलः॥

अपि च।

"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्दशी।
तदाद्यौ कालिकापूजा सर्व्वविघ्नोपशान्तये॥"

इति कालिकापुराणम्॥ *॥

अपरञ्च।

"माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्दशी।
तस्यां प्रदोषसमये पूजयेन्मुण्डमालिनीम्॥"

इत्याचार्य्यचूड़ामणिधृततत्त्वतत्त्वार्थवधृतवचनम्॥ अन्यत् ग्रामाशब्दे द्रष्टव्यम्॥

रटितं, त्रि, कथितम्। रटधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम्। (भावे क्तः।) कथनमात्रे, क्ली॥ (यथा, राजतरङ्गिण्याम्। २। १७४।

"वनहरिरसितैः पदे पदे
स प्रतिभटतां पटहध्वनेर्दधानैः।
अमत रटितैश्च कर्करेटोः
परिगलितां गमनोन्मुखस्त्रियामाम्॥")

रट, भाषणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) भाषणं कथनम्। रटति। इति दुर्गादासः॥

रण, रटि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) रणति। रटि शब्दे। इति दुर्गादासः॥

रठ, म गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, रठयति। इति दुर्गादासः॥

रणं, क्ली पुं, (रणन्ति शब्दायन्तेऽत्रेति। रण्+"अधेति।"३। ३। ५८। इत्यत्र। "वह्निरणोरूपसंख्यानम्।" इति काशिकोक्त्या अप्।) युद्धम्। इत्यमरः। २। ८। १०४॥ (यथा, मनौ। ७। ६०।

"न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून्।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः॥"

रमणम्। यथा, ऋग्वेदे। ८। १७। १२।

"ग्राचिगो ग्राचि पूजनायं रणाय ते सुनः॥"

"रणाय रमणाय।" इति तद्भाष्ये सायणः॥ रमणीये, त्रि। यथा, तत्रैव। १। ११६। २१।

"एकस्यावन्थो रावतं रणाय वग्नुमश्विनासनये सहस्रा।"

"रणाय रमणीयाय।" इति तद्भाष्ये सायणः॥)

रणः, पुं, (रण्+अप्।) शब्दः। कलः। इति मेदिनी॥ गतिः। इति शब्दरत्नावली॥

रणतूर्य्यं, क्ली, (रणस्य तूर्य्यम्।) युद्धवाद्यम्। तत्पर्य्यायः। संग्रामपटहः२ अभयडिण्डिमः३। इति त्रिकाण्डशेषः॥

रणप्रियं, क्ली, (रणे प्रियम्।) उशीरम्। इति राजनिर्घण्टः॥

रणप्रियः, पुं, (रणः प्रियोऽस्य। तत्र मांसभक्षणात्तथात्वम्।) श्लेष्मकपक्षी। इति राजनिर्घण्टः॥ (विष्णुः। यथा, महाभारते। १३। १४६। ८६।

"स्तवः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः॥"

युद्धप्रियमात्रे, त्रि। यथा, कामन्दकीये। १०। ३३।

"रणप्रियः साहसिक आत्मसम्भावितस्तथा।
विच्छिन्नधर्म्मकामार्थः क्रुद्धो मानी विमानितः॥")

रणमत्तः, पुं, (रणे रणं प्राप्य वा मत्तः।) हस्ती। इति शब्दमाला॥

रणमुष्टिः, पुं, विषमुष्टिभुयः। इति राजनिर्घण्टः॥

रणरङ्गः, पुं, (रणेषु रङ्गो मन्दः।) रणकातरहस्ती। तत्पर्य्यायः। प्रतिमः २। इति हारावली। २०४॥

रणरणं, क्ली, उद्वेगनम्। इति त्रिकाण्डशेषः॥

रणरणः, पुं, (रणरण इति शब्दोऽस्त्यस्येति। अर्श आदित्वादच्।) मशकः। इति त्रिकाण्डशेषः॥ (रणे रणः शब्दो यस्य। रणगर्ज्जनशीले, त्रि। यथा,—

"अवाङ्मः करणो रणो रणरणो राणो रणो रावणो
धृत्वा येन रमा रमा रमरमा रामा रमा सा रमा।
सश्रीमानदयो दयो दयदयो दायो दयो वेदयो
विष्णुर्ज्जिष्णुरभीरभीरभरभीराभीरभीसौरभिः॥"

रत्नमुकुटः॥)

रणरणकः, पुं, उत्कण्ठा। इति हेमचन्द्रः। २। २२६॥ (यथा, उत्तररामचरिते प्रथमाङ्के।

"अये सैवेयं रणरणकदायिनी चित्रदर्शना-
दिरहभावना देव्याः स्वप्नोद्वेगं करोति।")

रणसङ्कुलं, क्ली, (रणस्य सङ्कुलम्।) तुमुलम्। इत्यमरः। २। ८। १०६॥

रणालङ्करणः, पुं, (रणस्य अलङ्करणः।) कङ्कपक्षी। इति राजनिर्घण्टः॥

रङ्कः, त्रि, (रम्+"ममन्तात् ङः।" उणा० १।११३। इति ङः।) अर्द्धचर्म्मावच्छिन्नावयवः। धूर्त्तः। इति संक्षिप्तसारोणादिवृत्तिः॥

रङ्कः, पुं, (रङ्क इवेति। रङ्क+कन्।) अफलवृक्षः। इति शब्दचन्द्रिका॥

रङ्का, स्त्री, (रमन्तेऽत्रेति। रम्+"ममन्तात् ङः।" उणा० १।११३। इति ङः। टाप्।) मूषिकपर्णी। इत्यमरः। २। ४। ८८॥ (यथा, "हिङ्गुलात् समवं सूतं पालिधारसमर्दितम्। रङ्काशोणितगन्धञ्च तेनैव कज्जलीकृतम्॥" इति वैद्यकरसेन्द्रसारसंग्रहे ढक्कलोमनाथरसे॥) विधवा। राँड़ इति भाषा॥ यथा। तिष्ठते रङ्का विकर्म्मस्थेभ्यः स्वहृदयं यत्नतोऽत्यर्थः। इति संक्षिप्तसारे तिङन्तपादः॥

रङ्काश्रमी [न्] पुं, (रङ्को विफल आश्रमः सोऽस्यास्य। रङ्काश्रम+इनिः।) अष्टचत्वारिंशद्वत्सरोपरिभार्य्याविहीनः। यथा, भविष्यपुराणम्।
"चत्वारिंशद्वत्सराणां साष्टानाञ्च परे यदि। स्त्रिया वियुज्यते कश्चित् स तु रङ्काश्रमी मतः॥"
इत्युद्वाहतत्त्वम्॥

रतं, क्ली, (रमणमिति। रम्+भावे क्तः।) मैथुनम्। इत्यमरः। २। ७। ५७॥ (यथा, आर्य्यासप्तशत्याम्। ५४६।
"विपरीतमपि रतं ते स्रोतो नद्या इवानुकूलमिदम्।
तटतरुमिव मम हृदयं समूलमपि वेगतो हरति॥"
तत्तु द्विविधम्। यथा, कामशास्त्रम्।
"बाह्यमाभ्यन्तरञ्चेति द्विविधं रतमुच्यते। तत्राद्यं चुम्बनाश्लेषनखदन्तक्षतादिकम्॥ द्वितीयं सुरतं साक्षान्नानाकारेण कल्पितम्॥")
गुह्यम्। इति मेदिनी। ते, ४६॥ अनुरक्ते, त्रि॥ (यथा, राजतरङ्गिण्याम्। ३। ५०५।
"तत्तुल्यगुणनिर्म्मिक्षा तद्विषयरतौ रता॥"
नियुक्तः। यथा, मनुः। २। २३५।
"बालग्रहणे जीवेयुस्तावन्नान्यं समाचरेत्। तेष्वेव नित्यं शुश्रूषां कुर्य्यात् प्रियहिते रतः॥")

रतकीलः, पुं, (रते मैथुने कीलति परस्परं संबध्नातीति। कील्+कः।) कुक्कुरः। इति हेमचन्द्रः। ४। ३४६॥ (रतस्य कीलः।) सुरतकण्टकश्च॥

रतकूजितं, क्ली, (रतस्य कूजितम्।) मैथुनकालीनवाक्। तत्पर्य्यायः। मञ्जितम् २। इति हेमचन्द्रः॥

रतगुरुः, पुं, (रतस्य रते वा गुरुः।) पतिः। इति त्रिकाण्डशेषः। ६। ४४॥

रतज्वरः, पुं, (रतेन ज्वरोऽस्य।) काकः। इति त्रिकाण्डशेषः॥

रततालो, [न्] पुं, (रते तलति प्रतिष्ठां लभते इति। तल+णिनिः।) झिङ्गः। इति शब्दमाला॥

रततालो, स्त्री, (रते तालः प्रतिष्ठास्याः। ङीष्।) कुट्टनी। इति त्रिकाण्डशेषः॥

रतनारीचः, पुं, (रते नार्य्यां चिनोतीति। चि+डः।) नारीणां शीत्कारः। कुक्कुरः। स्मरः। इति मेदिनी। चे, २१॥ झिङ्गः। इति शब्दमाला॥

रतनिधिः पुं, (रतमेव निधिवत् गोप्यं यस्य।) खञ्जनः। इति शब्दरत्नावली॥

रतर्द्धिकं, क्ली, (रतस्य ऋद्धिरत्र। शेषाद्विभाषेति कप्।) दिवसः। सुखस्थानम्। अष्टमङ्गलम्। इति मेदिनी। के, २१०॥

रतव्रणः, पुं, (रतेन व्रणोऽस्य। रतं व्रण इव कण्डूयकं यस्येति वा।) कुक्कुरः। इति हेमचन्द्रः। ४। ३४६॥

रतशायी, [न्] पुं (रतेन शेते तनूकरोत्यात्मानमिति। शी+णिनिः।) कुक्कुरः। इति हेमचन्द्रः। ४। ३५६॥

रतहिक्कः, पुं, (रते रतार्थं वा हिक्कते इति। हिक्क्+खुल्।) स्त्रीचौरः। इति त्रिकाण्डशेषः॥ लम्पटः। लोचा इति भाषा। तत्पर्य्यायः। झिङ्गः २ शलीकः ३ पल्लवः ४ द्रावकः ५ सुचङ्गः ६ चुम्बकः ७ लङ्गः ८ भृङ्गः ९ नारीतरङ्गकः १० खस्किकः ११ रतनारीचः १२ बन्धकः १३ रततालो १४ कटारः १५ कामी १६ खेटी १७ नागरः १८ दासीप्रियः १९ कुक्कुटः २०। इति शब्दमाला॥

रताङ्कः, पुं, (रतार्थमङ्क इव।) कुक्कुरः। इति हेमचन्द्रः। ४। ३४६॥

रतास्थी, स्त्री, (रते अस्थीव।) कुलभाटिः। इति त्रिकाण्डशेषः॥

रतामर्दः, पुं, (रते रतकाले आमर्दोऽस्य।) कुक्कुरः। इति शब्दमाला॥

रतायनी, स्त्री, (रतमेवायनं जीवनगतिर्यस्याः।) वेश्या। इति शब्दमाला॥

रतार्थिनी, स्त्री, (रतमर्थयत इति। अर्थ+णिनिः। ङीप्।) मैथुनाभिलाषिणी। इति हलायुधः॥

रतिः, स्त्री, (रम्यतेऽनया इति। रम्+क्तिन्।) कामदेवपत्नी॥ (अस्याः नामनिरुक्तिर्यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ४। ६।
"मनो मथ्नाति सर्व्वेषां पञ्चबाणेन कामिनीम्। तन्नाम मन्मथस्तेन प्रवदन्ति मनीषिणः॥ तस्य पुंसो वामपार्श्वात् कामस्य कामिनी वरा। बभूवातीव ललिता सर्व्वेषां मोहकारिणी॥ रतिर्बभूव सर्व्वेषां तां दृष्ट्वा सस्मितां सतीम्। रनीति तेन तन्नाम प्रवदन्ति मनीषिणः॥")
तस्य उत्पत्तिः नामकारणं कामपत्नीत्वञ्च यथा, दक्ष उवाच।
"महेशजेयं कन्दर्प महापुरुषशालिनी। एनां गृहीत्व भार्य्यार्थे भवतः सदृशौ गुणैः॥ एषा तव महातेजाः सर्व्वदा सहचारिणी। भविष्यति यथाकामं धर्म्मतो वशवर्त्तिनी॥
मार्कण्डेय उवाच।
इत्युक्त्वा प्रददौ दक्षो देहस्वेदजलोद्भवाम्। कन्दर्पायाशुतः क्षत्वा नाम क्षत्वा रतीति ताम्॥
तां वीक्ष्य मदनो रामां रत्नाख्यां सुमनोहराम्। आत्मानुरूपेण विद्धोऽसौ सुमोह रतिरञ्जितः॥"
इति कालिकापुराणे ३ अध्यायः॥
अनुरागः। (यथा, भागवते। १। २। ८।
"नोत्पादयेद् यदि रतिं श्रम एव हि केवलम्॥")
रतम्। (यथा, हरिवंशसंहितायाम्। ७३। १८।
"कामिनीं प्रथमयौवनान्वितां मन्दचलद्गुच्छदुपोढ़शोभनाम्। उत्सवां समवलम्ब्य या रतिः सा न शाश्वदभवेदिति मे मतिः॥")
गुह्यम्। इति मेदिनी। ते, ४६॥ (अप्सरोविशेषः। यथा, महाभारते। १३। १६। ४५।
"विद्युता प्रभमी दान्ता विद्योता रतिरेव च। एताश्चान्याश्च वै वध्वः प्रवृत्ताश्चरवः शुभाः॥"
प्रीतिः। यथा, रामायणे। १। १८। २४।
"तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः॥"
'रतिः प्रीतिः।' इति तट्टीकायां रामानुजः॥)
रतिबन्धा यथा,—
"न भवन्ति यदा नार्य्यस्तुष्टा वाद्यरते मताः। नानाविधैस्तथा बन्धै रत्नाद्याः कामिभिः स्त्रियः॥ पद्मासनो नागपाशो लतावेष्टोऽर्द्धसंपुटः। कुलिशं सुन्दरश्चैव तथा केशर एव च॥ हिल्लोलो नरसिंहोऽपि विपरीतस्तथापरः। शुष्को वै धेनुकश्चैवसुतृक्षस्तु ततः परम्। सिंहासनो रतिनागो विद्याधरस्तु षोड़शः॥"
इति रतिमञ्जरी॥
एतेषां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि॥

रतिकुहरं, क्ली, (रत्याः कुहरम्।) योनिः। इति त्रिकाण्डशेषः॥

रतिक्रिया, स्त्री, (रत्याः क्रिया।) मैथुनम्। तत्पर्य्यायः। संवेशनम् २। इति त्रिकाण्डशेषः॥ (यथा, कामन्दकीये नीतिसारे। २। २५।
"अभिहोपचरणं जीवनञ्च स्वकर्म्मभिः। धर्म्मोऽयं गृहिणां काले पर्व्ववर्ज्यं रतिक्रिया॥")

रतिगृहं, क्ली, (रत्याः गृहम्।) योनिः। इति त्रिकाण्डशेषः॥ रमणमन्दिरञ्च॥ (यथा, हरिवंशसंहितायाम्। ५३। १६।
"पश्चाश्रमिणामभितं धान्यायुधवह्निरतिगृहाणाञ्च।
नेच्छन्ति ग्राह्यकारा हस्तग्रहादुच्छ्रितंपरतः॥")

रतिनागः, पुं, षोड़शरतिबन्धान्तर्गतपञ्चदशबन्धः। तस्य लक्षणं यथा,—
"षोड़शैदूरयुग्मेन कासुकं कामिनी यदि। रतिनागः समाख्यातः कामिनीनां मनोरमः॥"
इति रतिमञ्जरी॥

रतिपतिः, पुं, (रत्याः पतिः।) कामदेवः। इत्यमरः॥ (यथा, महाभागवतपुराणे। १०।

"पश्चात्पिण्डजमाश्रितो रतिपतिर्हैवस्य रत्नोत्पले ।
बिभ्रत्या समभेद्यवं धनुरिषून् पौष्पान् वहन् पञ्च च ॥")
ईषद्विशेषसम्भोगां स्थानविशेषे तस्याविर्भावो यथा,—
"वाचि श्रीमाथुरीणां जनकजनपदस्थायिनीनां कटाक्षे
दम्भे गौड़ाङ्गनानां सुललितजघने चोत्कलप्रेयसीनाम् ।
तैलङ्गीनां नितम्बे सजलघनरुचौ केरलीकेशपाशे
कार्णाटीनां कटौ च स्फुरति रतिपतिर्गुर्जरीणां स्तनेषु ॥"
इति साहित्यदर्पणम् ॥
रतिपाशुकः, पुं, (रतेः पाशु इव । ततः स्वार्थे कन् ।) रतिबन्धविशेषः । यथा,—
"पीड़येदूरुयुग्मेन कामुको यदि सुन्दरीम् ।
रतिपाशुकसंज्ञात: कामिनीनां सुखावहः ॥"
इति स्मरदीपिका ॥
रतिप्रियः, पुं, (रतेः प्रियः ।) कामदेवः । इति शब्दरत्नावली ॥ सुरतप्रियश्च । (स्त्री, शक्तिविशेषः । यथा, देवीभागवते । ७ । ३० । ६८ ।
"गोदावर्यां विसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥")
रतिमदा, स्त्री, (रतेर्मदोऽस्याः ।) अश्वरसः । यथा,—
"स्वर्णानन्दा रतिमदाश्वरसः सुमदात्मजा ॥"
इति त्रिकाण्डशेषः ॥
रतिमन्दिरं, क्ली, (रतेर्मन्दिरमिव ।) योनिः । इति जटाधरः ॥ मैथुनगृहम् । यथा,—
"सञ्चारो रतिमन्दिरावधि सखीकर्णावधि व्याहृतं
चैतः कान्तसमीहितावधि पदन्यासावधि प्रेक्षितम् ।
हासश्चाधरपल्लवावधि महामानोऽपि मौनावधिः
सर्व्वं सावधि नावधिः कुलसुवां प्रेम्णः परं केवलम् ॥"
इति रसमञ्जरी ॥
रतिमित्रः, पुं, (रतौ मित्रः सूर्य्य इव ।) रतिबन्धविशेषः । तस्य लक्षणं यथा,—
"पातयेदूरुयुग्मे च कामुकं यदि कामुकी ।
रतिमित्रसमाख्यातः कामिनीनां सुखावहः ॥"
इति रतिमञ्जरी ॥
रतिरमणः, पुं, (रत्या रमणः ।) कामदेवः । इति त्रिकाण्डशेषः ॥
रतिलक्षं, क्ली, (रतिं लक्षयतीति । लक्ष + अच् ।) त्रिभुवनम् । इति हारावली । ५० ॥
रतिसत्वरा, स्त्री, (रतौ सत्वरा ।) चिरञ्जीवा । इति शब्दचन्द्रिका ॥ पिड़िङ्ग प्राक् इति भाषा ॥
रतिसुन्दरः, पुं, (रत्या सुन्दरः सुखावहः ।) रतिबन्धविशेषः । तस्य लक्षणं यथा,—
"नारीपदद्वयं कामी धारयेद्धृदये यदि ।
धृतकण्ठो रमेत् कामी बन्धः स्याद्रतिसुन्दरः ॥"
इति रतिमञ्जरी स्मरदीपिका च ॥
रतुः, स्त्री, (ऋतीयते इति । स्मृत्यर्थकऋतुसौत्रधातुः + "ऋतेरम् च ।" उणा० १ । ६४ । इति कुः । अम् च ।) देवनदी । सत्यवाक् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
रतोद्वहः, पुं, (रतं उद्वहति प्रापयतीति । उत् + वह + अच् ।) कोकिलः । इति शब्दमाला ॥
रत्नं, क्ली, (रमयति हर्षयतीति । रम् + णिच् + "रमेस्त च ।" उणा० ३ । १४ । इति नः तकारश्चान्तादेशः ।) अश्मजातिः । सुक्तादि । तत्पर्य्यायः । मणिः २ । इत्यमरः ॥ (यथा, कुमारे । ५ । ४५ ।
"न रत्नमन्विष्यति मृग्यते हि तत् ॥")
खजातिश्रेष्ठः । इति मेदिनी ॥ (यथा, मार्कण्डेये । ८५ । ४५ ।
"स्फोरत्नमतिचाब्जो द्योतयन्ती दिशः स्त्रियः ॥")
माणिक्यम् । वज्रम् । इति राजनिर्घण्टः ॥*॥
अथ रत्नोत्पत्तिकारणम् । यथा,—
सूत उवाच ।
"वक्ष्यामि परीक्षां रत्नानां बलो नामासुरोऽभवत् ।
इन्द्राद्या निर्ज्जितास्तेन निर्जेतुं तेन शक्यते ॥
वरत्राजेन पशुतां याचितः स सुरैर्मखे ।
बलो ददौ स्वपशुतामतिसत्त्वो मखे हतः ॥
पशुत्वं विगतं तस्मे स्वकाव्यामृतयन्त्रितः ।
बलो लोकोपकाराय देवानां हितकाम्यया ॥
तस्य सत्त्वविशुद्धस्य सुविशुद्धेन कर्म्मणा ।
कायस्यावयवाः सर्व्वे रत्नबीजत्वमाययुः ॥
देवानामथ यज्ञानां सिद्धानां पवनाग्निनाम् ।
रत्नबीजमयं ग्राह्यं सुमहानभवत्तदा ॥"*॥
अथ तस्याकरस्थानानि यथा,—
"तेषान्तु पतितां वेगाद्विमानेन विहायसा ।
यद्यत् पपात रत्नानां बीजं क्वचन किञ्चन ॥
महोदधौ सरिति वा पर्व्वते काननेऽपि वा ।
तत्तदाकरतां यातं स्थानमाधेयगौरवात् ॥
तेषु रत्नोद्भवस्थानाधिष्ठात्र्यश्चाकरा अपि च ।
प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च ॥
वज्रसुक्ताश्मसमयः सपद्मरागाः समरकताः प्रोक्ताः ।
अपि चेन्द्रनीलमणिवरवैदूर्य्याच्च पुष्परागाच्च ।
कर्केतनं सपुलकं रुधिराक्षसमन्वितं तथा स्फटिकम् ।
विद्रुममणिश्च यत्राद्रुद्दिष्टं संग्रहे तज्ज्ञैः ॥*॥
आकारवर्णौ प्रथमं गुणदोषौ ततः फलं परीक्षा च ।
मूल्यञ्च रत्नकुशलैर्विज्ञेयं सर्व्वशास्त्राणाम् ॥
कुलमेषूपजायन्ते यानि चोपहतेऽहनि ।
दोषैस्तानुपयुज्यन्ते हीयन्ते गुणसम्पदा ।
परीक्षापरिशुद्धानां रत्नानां पृथिवीभुजा ।
धारणं संग्रहो वापि कार्य्यः श्रियमभीप्सता ॥
ग्राह्यज्ञाः कुशलाश्चापि रत्नभागः परीक्षकाः ।
त एव मूल्यमाचार्या वेत्तारः परिकीर्त्तिताः ॥"
इति गारुड़े ६८ अध्यायः ॥
विशेषरत्नपरीक्षा तत्तच्छब्दे द्रष्टव्या ॥*॥ चतुर्दश महारत्नानि यथा । रत्नकोशिचरथः तत्तनयः शशबिन्दुश्चतुर्दशमहारत्नचक्रवर्त्ताभवत् । चतुर्दश महान्ति रत्नानि यस्य सः । रत्नानि तु स्वजातिश्रेष्ठानि धर्म्मसंहितोक्तानि ।
"चक्रं रथो मणिः खड्गश्चर्म्म रत्नञ्च पञ्चमम् ।
केतुर्निधिश्च सप्तैवमप्राणानि प्रचक्षते ॥
भार्य्या पुरोहितश्चैव सेनानी रथकृच्च यः ।
पत्त्यश्वौ कलभश्चेति प्राणिनः सप्त कीर्त्तिताः ॥
चतुर्दशैतानि रत्नानि लक्ष्मवां चक्रवर्त्तिनामिति । इति विष्णुपुराणे ४ अंशे १२ अध्यायः तट्टीका च ॥ (अथ रत्नस्य निरुक्तिः ।
"धनार्थिनो जनाः सर्व्वे रमन्तेऽस्मिन्नतीव यत् ।
ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ॥"
अथ रत्नस्य नामानि स्वरूपनिरूपणञ्च । यथा,—
"रत्नं क्लीवे मणिः पुंसि स्त्रियामपि निगद्यते ।
तनु पाषाणभेदोऽस्ति सुक्तादि च तदुच्यते ॥"
अथ रत्नानां निरूपणम् ।
"रत्नं गारुत्मतं पुष्परागो माणिक्यमेव च ।
इन्द्रनीलश्च गोमेदस्तथा वैदूर्य्यमित्यपि ॥
मौक्तिक विद्रुमश्चेति रत्नान्युक्तानि वै नव ।
रत्नं हीरा । गारुत्मतं पान्ना । माणिक्यं पद्मरागः । इन्द्रनीलः लीला ।
विष्णुधर्म्मोत्तरेऽपि नवरत्ननिरूपणम् ।
मुक्ताफलं हीरकश्च वैदूर्य्यं पद्मरागकम् ।
पुष्परागश्च गोमेदं नीलं गारुत्मतन्तथा ।
प्रवालयुक्तान्येतानि महारत्नानि वै नव ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रत्नकन्दलः, पुं, (रत्नानां कन्दलो नवाङ्कुर इव ।) प्रवालम् । इति शब्दरत्नावली ॥
रत्नकूटः, पुं, (रत्नमयः कूटो यद्वस्य ।) पर्व्वतविशेषः । इति शब्दरत्नावली ॥ (स्त्री, द्वीपविशेषः । यथा, कथासरित्सागरे । २६ । ३ ।
"अस्ति द्वीपवरं मध्ये रत्नकूटाख्यमम्बुधेः ।
तत्प्रतिष्ठस्तत्र भगवान् हरिरब्धिना ॥")
रत्नगर्भः, पुं, (रत्नानि गर्भे लक्षणया अधिकारेऽस्य ।) कुबेरः । इति त्रिकाण्डशेषः । (रत्नानि गर्भेऽस्य ।) समुद्रः । इति राजनिर्घण्टः ॥
रत्नगर्भा, स्त्री, (रत्नानि गर्भे मध्येऽस्याः ।) पृथिवी । इति हेमचन्द्रः । ४ । ३ ॥ उपचारात् गुणवत्पुत्रवती च ॥
रत्नद्वीपं, क्ली, (रत्ननिर्म्मितं द्वीपम् । ज्ञाकपार्थिववत् समासः ।) रत्ननिर्म्मितस्थानम् । यथा,—
"सिंहस्कन्धाधिसंरूढां नानालङ्कारभूषिताम् ।
चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम् ॥
शङ्खचक्रधनुर्ब्बाणशोभितोचतचित्रयाम् ।
रक्तवस्त्रपरीधानां बालार्कसदृशद्युतिम् ।

नारदाद्यैर्मुनिगणैः सेवितां भवसुन्दरीम्।
त्रिवलीवलयोपेतनाभिनालसुशालिनीम्॥
रत्नद्वीपे महादीपे सिंहासनसमन्विते।
प्रफुल्लकमलारूढां ध्यायेत्तां भवगेहिनीम्॥"
इति तन्त्रसारे जगद्धात्रीध्यानम्॥

रत्नधेनुः, स्त्री, (रत्ननिर्म्मिता धेनुः।) महादानविशेषः। यथा,—
मत्स्य उवाच।
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम्।
रत्नधेनुरिति ख्यातं गोलोकफलदं नृणाम्॥
पुण्यन्दिनमधासाद्य तुलापुरुषदानवत्।
लोकेशावाहनं कृत्वा ततो धेनुं प्रकल्पयेत्॥
भूमौ कृष्णाजिनं कृत्वा लवणद्रोणसंयुतम्।
धेनुं रत्नमयीं कुर्य्यात् सङ्कल्प्य विधिपूर्ब्बकम्॥
स्थापयेत् पद्मरागाणामेकाग्रीतिं सुखे बुधः।
पुष्यरागयुतं तद्वद्घोणायां परिकल्पयेत्॥
ललाटे हेमतिलकं मुक्ताफलयुतं दृशोः।
भ्रूयुगे विद्रुमयुतं शुक्ती कर्णद्वये स्रुते॥
काञ्चनानि तु शृङ्गाणि शिरो वज्रयुतात्मकम्।
ग्रीवायां नेत्रपटलं गोमेदकसमन्वितम्॥
इन्द्रनीलयुतं पृष्ठे वैदूर्य्यशतपार्श्वकौ।
स्फाटिकैरुदरं कार्य्यं सौगन्धिकयुतान् हृदि॥
खुरा हेममयाः कार्य्याः पुच्छं मुक्तावलीमयम्।
सूर्य्यकान्तेन्दुकान्तौ च घ्राणं कर्पूरचन्दनैः॥
कुङ्कुमानि च रोमाणि रौप्यं नाभिञ्च कारयेत्।
गारुत्मतयुतं तद्वदस्रोनि परिकल्पयेत्॥
तथान्यानि च रत्नानि स्थापयेत् सर्व्वसन्धिषु।
कुर्य्याच्छर्करया जिह्वां गोमयञ्च गुडात्मकम्॥
गोमूत्रमाज्यञ्च तथा दधि दुग्धं स्वरूपतः।
पुच्छाग्रे चामरं दद्यात् समीपे ताम्रदोहनम्॥
कृष्णलानि च हैमानि भूषणानि च शक्तितः।
कारयेद्देवमेवन्तु चतुर्थांशेन वत्सकम्॥
तथान्यानि च सर्व्वाणि पादांश्चैलमयांस्तथा।
नानाफलानि सर्व्वाणि पञ्चवर्णवितानकम्॥
एवं विरचनं कृत्वा तद्गोमाधिवासनम्।
ऋत्विग्भ्यो दक्षिणां दत्त्वा धेनुमामन्त्रयेत्ततः।
गुडधेनुवदावाह्य दद्योदाहरेत्ततः॥
त्वं सर्व्वदेवगणधाम यतः पठन्ति
रुद्रेन्दुविष्णुकमलासनवासदेवाः।
तस्मात् समस्तभुवनत्रयहेतुभूता
मां पाहि देवि भवसागरपीड्यमानम्॥
आमन्त्र्य धेनुमभितः परिवर्त्त्य भक्त्या
दद्याद्विजाय गुरवे जलपूर्ब्बकं ताम्।
यः पुण्यमाप्य दिनमत्र कृतोपवासः
प्राप्नोर्विमुक्ततनुरेति पदं मुरारेः॥
इति सकलविघ्नो रत्नधेनुप्रदानं
वितरति च विमानं प्राप्य देदीप्यमानम्।
कलिकलुषविमुक्तो बन्धुभिः पुत्रपौत्रैः
स हि मदनसुरूपः स्थानमभ्येति शुभ्रोः।"
इति मत्स्यपुराणे महादानानुकीर्त्तने रत्नधेनुप्रदानिको नाम २९२ अध्यायः॥

रत्ननिधिः, पुं, खञ्जनपक्षी। इति त्रिकाण्डशेषः॥

रत्नपारायणं, क्ली, (परायणमेव। अण्। रत्नस्य पारायणम्।) सर्व्वरत्नस्थानम्। यथा,—
"सप्तद्वीपवती हैमी पर्व्वताधिष्ठिता पुरी।
रत्नपारायणं नाम्ना लङ्केति मम गेहिनि!॥"
इति भट्टिः॥

रत्नप्रभा, स्त्री, (रत्नानां प्रभात्र।) जिनानां नरकविशेषः। यथा,—
"रत्नशर्क्करावालुकापङ्कधूमतमप्रभाः।
महातमप्रभा चेत्यधोऽधो नरकभूमयः॥"
इति हेमचन्द्रः॥

रत्नसुखं, क्ली, (रत्नेषु सुखम्।) हीरकम्। इति हेमचन्द्रः॥

रत्नराट्, [ज्] क्ली, (रत्नेषु राजते इति। राज्+क्विप्।) माणिक्यम्। इति राजनिर्घण्टः। रत्नश्रेष्ठञ्च॥

रत्नवती, स्त्री, (रत्नानि सन्त्यस्यामिति। रत्न+मतुप्। मस्य वः। उदित्त्वात् ङीप्।) पृथिवी। इति शब्दमाला॥ (राज्ञो वीरकेतोः कन्या। यथा, कथासरित्सागरे। ८८। ६।
"नन्दयन्त्यभिधानायां पत्न्यां तस्योदपद्यत।
सुता रत्नवती नाम देवताराधनार्ज्जिता॥")
रत्नयुक्ते, त्रि॥ (यथा, रघुः। ६। ४।
"पराङ्मुखैर्वर्षशतोपपन्न-
मासेदिवान् रत्नवदासनं सः॥"
फलप्रदे च त्रि। यथा, ऋग्वेदे। ३। २८। ५।
"धारत्नवन्तमद्रयेषु जागृविम्॥"
"रत्नवन्तं रत्नशब्देन स्वर्गादिलक्षणसुखं फलमभिधीयते तद्वन्तं फलप्रदम्।" इति तद्भाष्ये सायणः॥)

रत्नवर्षुकं, क्ली, (रत्नानि वर्षितुं शीलमस्य। वृष्+"लषपतपदस्थेति।" ३। २। १५४। इति उकञ्।) पुष्यकरयः। इति शब्दरत्नावली॥ रत्नवर्षणशीले, त्रि॥

रत्नवानुः, पुं, (रत्नानि वानौ प्रस्थे यस्य।) सुमेरुपर्व्वतः। इत्यमरः। १। १। ५२॥

रत्नसूः, स्त्री, (रत्नानि सूते इति। सू प्रसवे+क्विप्।) पृथिवी। इति हेमचन्द्रः। ४। ३॥ (यथा, राजतरङ्गिण्याम्। १। ४२।
"त्रिलोक्यां रत्नसूः श्लाघ्या तस्यां धनपतेर्हरित्।
तत्र गौरीगुरुः शैलो यत्रास्तिन्नपि मङ्गलम्॥"
रत्नप्रसवकारिणि, त्रि। यथा, रघुः। १। ६५।
"न मामवति सद्वीपा रत्नसूरपि मेदिनी॥")

रत्नाकरः, पुं, (रत्नानामाकरः उत्पत्तिस्थानम्।) समुद्रः। इत्यमरः। १। १०। २॥ (यथा, महाभारते। ३। १०१। २३।
"दुर्गं समाश्रित्य महोर्म्मिमन्तं
रत्नाकरं वरुणस्यालयं वा॥")
रत्नोत्पत्तिस्थानञ्च॥ (स्वनामख्यातकविविशेषः। यथा, राजशेखरचरितश्लोकः।
"मा स्म वन्तु हि चत्वारः प्रायो रत्नाकरा इमे।
इतीव स कृतो धात्रा कविरत्नाकरोऽपरः॥"
स तु धनिगाधापल्लिका-वक्रोक्तिपञ्चाशिका-हरविजयादिग्रन्थप्रणेता। अन्तरभागु कनुर्विद्याधिपत्यपरनामायं कविः काश्मीरदेशेऽवन्तिवर्म्मणो राज्यकाले समुत्पन्नः। तथा च राजतरङ्गिण्याम्। ५। ६६।
"सुक्ताकरः शिवस्वामी कविरानन्दवर्द्धनः।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्म्मणः॥"
अवन्तिवर्म्मराज्यकालस्तु ७७७ शकाब्दादारभ्य ८०६ शकाब्दपर्य्यन्तमासीदतस्तत्कालीन एवायं कविरिति ज्ञायते। रत्नाकरप्रणीतं हरविजयाभिधं पञ्चाशत्सर्गात्मकं महाकाव्यं काश्मीरेषु प्रसिद्धमस्ति॥)

रत्नाङ्कः, पुं, (रत्नानामङ्कश्चिह्नं यस्मिन्।) विष्णुरयः। इति शब्दरत्नावली॥ (रत्नानामङ्कः।) रत्नचिह्नञ्च॥

रत्नाचलः, पुं, (रत्ननिर्म्मितः अचलः। शाकपार्थिववत् समासः।) दानार्थमद्रिमयपर्व्वतः। यथा,—
"अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम्।
मुक्ताफलसहस्रेण पर्व्वतः स्यादनुत्तमः॥
मध्यमः पञ्चशतिकक्षिशतेनाधमः स्मृतः।
चतुर्थांशेन विष्कम्भाः पर्व्वताः स्युः समन्ततः॥
पूर्ब्बेण वज्रगोमेदैर्दक्षिणेनेन्द्रनीलकैः।
पुष्यरागयुतैः कार्य्यो विद्रुमैर्गन्धमादनः॥
वैदूर्य्यविद्रुमैः पश्चात् संमिश्रो विमलाचलः।
पद्मरागसमो वर्णैरुत्तरेण तु विन्यसेत्॥
धान्यपर्व्वतवत् सर्व्वमत्रापि परिकल्पयेत्।
तदद्रावाहनं कृत्वा दृष्ट्वा देवांश्च काञ्चनान्॥
पूजयेत् पुण्ययानीयैः प्रभाते चाथ पूर्ब्बवत्।
पूर्ब्बवद्गुरुऋत्विग्भ्यः फलमन्नादुदीरयेत्॥
यथा देवगणाः सर्व्वे सर्व्वरत्नैरवस्थिताः।
त्वञ्च रत्नमयो नित्यमतः पाहि महाचल!॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरिः।
सदा रत्नप्रदानेन तस्मान्मां पाहि पर्व्वत॥
अनेन विधिना यस्तु दद्याद्रत्नं महागिरिम्।
स याति वैष्णवं लोकममरेश्वरपूजितः॥
यावत् कल्पशतं साग्रं वसेदिह नराधिप।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत्॥
ब्रह्महत्यादिकं किञ्चिद्दुष्कृतञ्चापि वा कृतम्।
तत् सर्व्वं नाशमायाति गिरिर्व्वज्रहतो यथा॥"
इति मात्स्ये ९० अध्यायः॥

रत्नाभरणं, क्ली, (रत्नविशिष्टमाभरणम्।) मणिमयालङ्करणम्। जड़ाओ गहना इति भाषा॥ तस्य धारणगुणाः।
"धन्यं यशस्यमायुष्यं श्रीमद्व्यसनसूदनम्।
हर्षदं कान्तिमोजस्यं रत्नाभरणधारणम्॥"
इति राजवल्लभः॥

रत्निः, पुं, (ऋच्छति प्राप्नोत्यनेनेति। ऋ+"ऋतन्यञ्जीति।" उणा०। ४। २। इति कनिन्।) बहुमुष्टिहस्तः। इत्यमरः। २। ६। ८१॥ मुटुम् हात इति भाषा॥ स्त्रीपुंसयो

रत्नारत्नी रत्नये। इति भरतः। (यथा, महाभारते। ८। ७२। २७।
"अथरश्मिर्महाराजदुर्बुद्धेरस्य दुर्जयः।")
रथाङ्ग, क्ली, (रतेरङ्गम्।) योनिः। इति शब्दरत्नावली॥
रथः, पुं, (रम्यतेऽनेनाच वा। रम्+"इति कुविनीरमिकाशिभ्यः कथन्।" उणा० २।२। इति कथन्। अनुनासिकलोपश्च।) कायः। (यथा, गीतायाम्।
"आत्मानं रथिनं विद्धि शरीरं रथमेव च।")
चरणः। वेतसदण्डः। इति विश्वः॥ (अस्य पर्य्यायो यथा,—
"वेतसो नम्रकः प्रोक्तो वाणीरो वञ्जुलस्तथा।
अम्बुपुष्पश्च विदुलो रथः शीतश्च कीर्त्तितः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
निगडदण्डः। इति राजनिर्घण्टः॥ चक्रविशिष्टयुद्धार्थयानम्। तत्पर्य्यायः। शताङ्गः २ स्यन्दनः ३। हलायुधः। २। ८। ५१॥ स्यन्दनमात्रम्। इत्यजयः॥ (यथा, मनुः। ८।२६५।
"स चेत् तु पथि संरुद्धः पशुभिर्वा रथेन वा।
प्रमापयेत् प्राच्यभृतस्तत्र दण्डोऽविचारितः॥")
तद्द्वारा भ्रमणयुक्तः।
"हस्त्यश्वरथदोलाद्यैर्भ्रमणं वातकोपनम्।
स्त्रीकरत्नमङ्गानां वह्नेर्वर्द्धनम्॥"
इति राजवल्लभः॥ *॥
रथविशेषाणां नामानि यथा,—
"युद्धार्थे चक्रवद्यानं शताङ्गः स्यन्दनो रथः।
संक्रीड़ार्थः पुष्परथो देवार्थस्तु मरुद्रथः॥
भोग्यो रथो वैनायिकोऽध्वरथः परिचारिकः।
कर्णेरथः प्रवहणं ह्ययनं रथगर्भकः॥
अनस्तु शकटोऽथ स्याद्गन्त्री कमलिवाह्यकम्।
अथ कामलवल्लाद्यास्तेषां परिरते रथे॥
सपाण्डुकम्बली यः स्यात् संवीतः पाण्डुकम्बलैः।
स तु देवो वैयाघ्रश्च यो हतो द्वीपिचर्म्मणा॥"
इति हेमचन्द्रः॥
गोलोकस्य रथो यथा,—
"प्रदत्तं विप्रपत्नीभिर्मिश्रमन्नं सुधोपमम्।
बालकान् भोजयित्वा तु स्वयं च भुक्तवे विभुः॥
एतस्मिन्नन्तरे तत्र शातकुम्भरथं वरम्।
दक्षभुविप्रपत्नाश्च पतन्तं गगनादधो॥
रत्नदर्पणसंयुक्तं रत्नसारपरिच्छदम्।
रत्नस्तम्भैर्विवहच्च सद्रत्नकलशोज्ज्वलम्॥
श्वेतचामरसंयुक्तं वह्निशुद्धांशुकान्वितम्।
पारिजातप्रसूनानां मालाजालविराजितम्॥
शतचक्रसमायुक्तं मनोयायि मनोहरम्।
वेष्टितं पार्षदैर्दिव्यैर्वनमालाविभूषितैः॥
पीतवस्त्रपरीधानैः रत्नालङ्कारभूषितैः।
नवयौवनसम्पन्नैः श्यामलैः सुमनोहरैः॥
द्विभुजैर्मुरलीहस्तैर्गोपवेशधरैर्वरैः।
शिखिपुच्छगुच्छमालाबद्धद्विमचूड़कैः॥
अवरुह्य रथात्तूर्णं ते प्रणम्य हरेः पदम्।
रथमारोहयं कर्त्तुमुद्युक्तांश्चगकाभिनीः॥
विप्रभार्य्या हरिं नत्वा जग्मुर्गोलोकमीप्सितम्।
बभूवुर्गोपिकाः सद्यस्त्यक्त्वा मानुषविग्रहान्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १८ अध्यायः॥
देवा रथयात्रा यथा,—
ब्रह्मोवाच।
"भूयस्तं संप्रवक्ष्यामि देवाराधनमुत्तमम्।
यत् कृत्वा सर्व्वकामानां भाजिस्तुग्निर्भविष्यति॥
दन्तिदन्तमयैर्दण्डैर्हेमदण्डैः सुशोभनैः।
विचित्रपट्टरागाद्यैर्मल्लिभिरुपशोभितैः॥
रथस्थैः कारयेद्देवा सप्तभौमं मनोरमम्।
दुकूलवस्त्रसंछन्नमर्द्धचन्द्रोपशोभितम्॥
घण्टाकिङ्किणिसंयुक्तैश्चामरैः कटकान्वितम्।
पताकाध्वजशोभाढ्यं दर्पणैरुपशोभितम्॥
तं रथं पूजयेच्छक्र जातीकुसुममल्लिकैः।
पारिजातकपुष्पैश्च यत्नकृद्भक्तचन्दनैः॥
सुगन्धधूपितैः कृत्वा देवीं तत्र निवेशयेत्।
प्रतिमां शोभनां वत्स! महासुरवधकरीम्॥
पूजयेद्रथविन्यस्तां सर्व्वमङ्गलमङ्गलाम्।
दुर्गां कात्यायनीं देवीं वरदां विन्ध्यवासिनीं॥
निशुम्भशुम्भमथनीं महिषासुरघातिनीं।
प्रसीदतु सदा मेऽस्तु यच्च नो वाञ्छितं हृदि॥
अनेन बलिपूर्व्वेण नमस्कारयुतेन च।
पूजयित्वा ततो नेया समस्ताश्चरगीतकैः॥
पञ्चमी सप्तमी पूर्णा नवम्येकादशीषु च।
तृतीयाग्निचतुर्दश्यादिवसेषूत्सवेषु च॥
महानदीनदसंप्राप्तपर्व्वतस्रवणेषु च।
तत्र मण्डपविन्यासं महदाविरनिर्म्मितम्॥
शैलं वा दारुमयं वापि कृत्वा वास्तुविचारितम्।
सर्व्वलक्षणसंपूर्णं सर्व्वशोभासमन्वितम्॥
पूर्व्वे च कारयेच्छक्र पश्चादुद्यानं प्रचक्षते।
महाजनपदोपेतां महाश्रीभिः ससङ्कुलाम्॥
सर्व्वान्नपानवैद्येः समस्तैरपि पूजयेत्।
दद्याद्बलिं शक्र सर्व्वं सर्व्वदिक्षु समन्ततः॥
भूयो वेतालसंघस्य मन्त्रेणानेन सुव्रत!।
रक्ष मां निजभूतेभ्यो बलिं गृह्ण सदा प्रियम्॥
मातर्मातर्वरे देवि! सर्व्वकामार्थसाधिनि।
अनेन बलिदानेन सर्व्वकामान् प्रयच्छ मे॥
एवं दत्त्वा बलिं शक्र तथा देवावतारयेत्।
विन्यसेद्भद्रपीठे तु मल्लैरुपशोभितां॥
तत्रस्थां पूजयेद्देवीं हेमरूपेच ताम्रजे।
कलसैस्तु सहस्रेण गन्धोदकसुपूरितैः॥
समस्तफलसम्पूर्णैर्यज्ञियैरथ पल्लवैः।
स्नापयेदेकमेकेन रत्नगर्भेर्नवैर्घटैः॥
वेदमङ्गलशब्देन शक्रवाद्यनिस्वनैः।
वेणुवीणाशब्दशब्देश्च घण्टाकिङ्किणिरावियैः॥
स्नापयित्वा ततो देवीं निर्मञ्छ्योच्छनकैः शुभैः।
गोमयादिक्षते पद्मैर्दीपवर्त्या विशोधितैः॥
स्वस्तिकैर्नन्दिकावर्त्तैः शङ्खैर्नीलोत्पलोत्पलैः।
यवग्राह्यङ्कुरोद्भिन्नैर्यवाचारैर्निमञ्जयेत्॥
प्रत्येकच्च घटेष्वेषु प्रत्येकं कलसे क्षपेत्।
तथा कर्पूरचोलेन चन्दनैः कुङ्कुमेन च॥
गोरोचनासमेतेन देवीमालिप्य पूजयेत्॥
हेमजैर्जातिजैर्माल्यै रत्नमाल्यैरनेकधा।
वासोभिः सुमनैश्चित्रैः पुनर्धूपं समुत्क्षिपेत्॥
भक्षयेत तथा कन्या द्विजातीनथ दुःखितान्।
भक्षभोज्यान्नपानेन तत्र सर्व्वांश्च प्रीणयेत्॥
भोजयित्वा क्षमायेत देवि मे प्रीयतामिति।
रथे कृत्वा तथा देवीं पुनरेव गृहं नयेत्॥
महता जनसंघेन समस्तविभवान्वितैः।
शान्तरेणुपथं सर्व्वं पुष्पदूर्व्वांक्षतैर्ज्वलैः॥
प्रक्षिप्यमाणैः कन्याभिः स्त्रीभिर्मङ्गलवादिभिः।
सलिलेन यथा पांसुं कृत्वा पङ्कं प्रचक्रिरे॥
पुरशोभां पथे शोभां द्वारशोभां गृहे गृहे।
कारयीत तथा शक्र सर्व्वबाधा निवारयेत्॥
अक्षैद्यासत्रवस्तस्मिन् प्राणिहिंसां विवर्ज्जयेत्।
बन्धनस्था विमोक्तव्या बद्धाः क्रोधादिशत्रवः॥
अकालकौसुदीं शक्र रथयात्रासु कारयेत्।
सर्व्वदा सर्व्वदेवेषु शक्रराद्यैः प्रतिष्ठिता॥
रथयात्रा तदा शक्र सुरैः स्वर्गे सदा कृता।
तथा किन्नरगन्धर्व्वैर्भूपातालनिवासिभिः॥
रथयात्राप्रभावेण मोदन्ते दिवि देवताः।
आदित्यो रथयात्राकृद्रथेन नभसः क्रमेत्॥
देवो दिव्यविमानस्था रथयात्राप्रभावतः।
क्रीड़न्ते विविधैर्भोगैः सर्व्वातङ्कविवर्जिताः॥
तथा त्वमपि देवेन्द्र! रथयात्राकरो भव।
ग्रिवायाः ग्रिवदायास्तु परमेण समाधिना॥
अगस्त्य उवाच।
रथयात्राकृतं पुण्यं ब्रह्मणो वासवस्य तु।
पूर्व्वं यत् कथितं तात तत्ते सर्व्वं मयाखिलम्॥
व्यापितं नात्र सन्देहो देवीमाहात्म्यमुत्तमम्।
यः पठेत् शृणुयाद्वापि भक्तिमान् नृपसत्तम॥
स सुखं यशः सौभाग्यं पुत्रप्राप्तिमवेप्सिताम्।
लभते नात्र सन्देह इत्येवं ब्रह्मणोऽब्रवीत्॥
खण्डेन कृते राज्ये पुरा शक्रस्य कीर्त्तिता।
धनदस्य पुरीप्राप्तिर्व्वरुणस्य च वायुना॥
कृते स्थाने कृता तेन तथा शुक्रा च निर्ऋतेः।
भुञ्जते परया दृष्ट्या पुरीर्भोगवतीः शुभाः॥"
इति देवीपुराणे रथयात्राविधिमाहात्म्यम्
३९ अध्यायः॥*॥ नवग्रहाणां रथा यथा,—
"योजनानां सहस्राणि भास्करस्य रथो नव।
तदर्द्धात्तस्य वैषाम्यादद्विगुणो द्विजसत्तमाः॥
सार्द्धकोटित्रया सप्त नियुतान्यधिकानि तु।
योजनानान्तु तस्यार्क्षं तत्र चक्रं प्रतिष्ठितम्॥
त्रिनाभिमतिपञ्चारे षण्णेमित्वयात्मके।
संवत्सरन्तु यत् कृत्स्नं कालचक्रं प्रतिष्ठितम्॥
चत्वारिंशत्सहस्राणि द्वितीयोऽक्षो विवस्वतः।
पञ्चाश्वानि तु सार्द्धानि स्यन्दनस्य द्विजोत्तमाः॥
अक्षप्रमाणसमयोः प्रमाणं तत्परार्द्धयोः।
भूयोऽक्षस्तदयुगार्द्धे च ध्रुवाधारं रथस्य वै॥
द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले।
हयाश्च सप्त छन्दांसि तन्नामानि निबोधत॥
गायत्री च बृहत्युष्णिक् जगती पंक्तिरेव च।
अनुष्टुप् त्रिष्टुबित्युक्ताश्छन्दांसि हरयो रवेः॥"१॥
इति कौर्म्मे ३८ अध्यायः॥

"रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः।
वामदक्षिणतो युक्ता दश तेन निशाकरः।
वीथ्याश्रयाणि चरति नक्षत्राणि रविर्यथा ॥२॥
सोमपुत्रस्य चाष्टाभिर्वाजिभिर्वायुवेगिभिः।
वारिजैः स्यन्दनो युक्तस्तेनासौ याति सर्वतः ॥३॥
शुक्रस्य भूमिजैरश्वैः स्यन्दनो दशभिर्वृतः ॥ ४ ॥
अष्टाभिश्चाथ भौमस्य रथो हैमः सुशोभनः ॥५॥
बृहस्पतेरथाश्वाः स्यन्दनो हैमनिर्मितः ॥६॥
रथस्तमोमयो ह्यश्वो मन्दस्यायसनिर्मितः। ७।
स्वर्भानोर्भास्कराश्चैव तथा षड्भिर्हयैर्वृतः ॥८॥९॥
एते महाग्रहाणां वै समाख्याता रथा नव।
सर्वे ध्रुवे महाभागा निबद्धा वातरश्मिभिः ॥
ग्रहर्क्षतारादिष्ठानि ध्रुवे बद्धान्यशेषतः।
भ्रमन्ति भ्रामयन्त्येनं सर्वाण्यनिलरश्मिभिः ॥"
इति कौर्मे ४० अध्यायः ॥ * ॥

श्रीजगन्नाथदेवस्य रथः यात्राशब्दे दृश्यः ॥*॥
(त्रिपुरदहनार्थं महेश्वरादिष्टा देवा येन प्रकारेण तद्रथं निर्म्मितवन्तस्तदाह। मात्स्ये। १३३। १३—७१।
"त्रिनेत्र एवमुक्तस्तु देवैः शक्रपुरोगमैः।
उवाच देवान् देवेशो वरदो वृषवाहनः ॥
अपगच्छतु वो देवा महद्दानवजं भयम्।
तदहं त्रिपुरं धक्ष्ये क्रियतां यद्ब्रवीमि तत् ॥
यदीक्षथ मया दग्धुं ततः पुरं महद्दानवम्।
रथमेपयिकं मह्यं सज्जयध्वं किलाखिलं ते ॥
दिवासमा तथोत्साह्य संपितामहकाः सुराः।
तथेत्युक्ता महादेवं चक्रुस्ते रथमुत्तमम् ॥
धरां कूबरकौ द्यौ तु रुद्रपार्श्वधरावुभौ।
अधिष्ठानं गिरौ मेरोरक्षो मन्दर एव च ॥
चक्रुश्चन्द्रार्कौ चक्रे काञ्चन-राजते।
कृष्णपक्षं शुक्लपक्षं पक्षद्वयमथेश्वराः ॥
रथनेमिदयं चक्रुर्देवा ब्रह्मपुरःसराः।
आदित्यं पक्षयन्त्रं यन्नमेताश्च देवताः ॥
कम्बलाश्वतराभ्याश्च नागाभ्यां समवेष्टितम्।
भार्गवाङ्गिराश्चैव बुधोऽङ्गारक एव च ॥
शनैश्चरस्तथा चात्र सर्वे ते देवसत्तमाः।
वरूथं गगनं चक्रुश्चारुरूपं रथस्य ते ॥
कृतं द्विजिह्वनयनं त्रिवेणुं शातकौम्भिकम्।
मणिसुक्तेन्द्रनीलैश्च कृतं हरसुखैः सुरैः ॥
गङ्गा सिन्धुः शतद्रुश्च चन्द्रभागा इरावती।
वितस्ता च विपाशा च यमुना शरदूश्च तथा ॥
सरस्वती देविका च तथा च शरयूरपि।
एताः सरिद्वराः सर्वा वेणुसंज्ञाः कृता रथे ॥
धृतराष्ट्राश्च ये नागास्ते च वेणुशलाकाः कृताः।
वासुकेः कुलजा ये च ये च रैवतवंशजाः ॥
ते सर्पा दर्पसम्पूर्णाश्चापतूणेष्वनूनगाः।
अवतस्थुः शरा भूत्वा नानाजातिशुभानताः ॥
सुरसा सरमा कद्रूर्विनता शुचिरेव च।
क्षुधा बुभुक्षा सर्वोग्रा म्लुः सर्वशमस्तथा ॥
ब्रह्मवध्या च गोवध्या बालवध्या प्रजाभयाः।
गदा भूत्वा शुक्लयज्ञ तदा देवरथेऽभ्ययुः ॥
युगं कृतयुगश्चात्र चातुर्होत्रप्रयोजकाः।
चतुर्वर्णाः सलीलाश्च बभूवुः स्वर्गकुण्डलाः ॥
तद्युगं युगसङ्काशं रथशीर्षे प्रतिष्ठितम्।
धृतराष्ट्रेण नागेन बद्धं बलवता महत् ॥
ऋग्वेदः सामवेदश्च यजुर्वेदस्तथापरः।
वेदाश्चत्वार एवैते चत्वारस्तुरगा भवन् ॥
अन्नदानपुरोगाणि यानि दानानि कानिचित्।
तान्यासन् वाजिनां तेषां भूषणानि सहस्रशः ॥
पद्मदर्भं तक्षकश्च कर्कोटक-धनञ्जयौ।
नागा बभूवुरेवैते हयानां वालबन्धनाः ॥
ओङ्कारप्रभवास्त्रा वा मन्त्रयज्ञक्रतुक्रियाः।
उपद्रवाः प्रतीकाराः पशवस्त्वेयस्तथा ॥
यज्ञोपवाहान्येतानि तस्मिन् लोकरथे शुभे।
मणि-मुक्ता-प्रवालैस्तु भूषितानि सहस्रशः ॥
प्रतोदोऽङ्कार एवासीत् तदग्रश्च वषट्कृतम्।
सिनीवाली कुहूः राका तथा चानुमती शुभा ॥
योक्त्राण्यासंस्तुरङ्गाणामपसर्पणविग्रहाः ॥
कृष्णान्यथ च पीतानि श्वेतमाञ्जिष्ठकानि च।
अवदाताः पताकास्तु बभूवुः पवनेरिताः ॥
ऋतुभिश्च कृतः षड्भिर्धुः संवत्सरोऽभवत्।
अजरा व्याभवच्चापि साम्बिका धनुषो दृढा ॥
कालो हि भगवान् रुद्रस्तच्च संवत्सरं विदुः।
तस्माद्धुमा कालरात्रिर्धनुषो व्याऽजराभवत् ॥
सगर्भं त्रिपुरं येन दग्धवान् स त्रिलोचनः।
स इक्ष्वित्वाशुसोमाग्नि-त्रिदैवतमयोऽभवत् ॥
आननं ह्यग्निरभवच्छ्लं सोमस्तमोनुदः।
तेजसः समवायोऽथ चैषोक्तिजो रथाङ्गधृक् ॥
तस्मिंश्च वीर्यवृद्ध्यर्थं वासुकिर्नागपार्थिवः।
तेजः संवसनार्थं वै सुमोचातिविषो विषम् ॥
कृत्वा देवा रथश्चापि दिव्यं दिव्यप्रभावतः।
लोकाधिपतिमभ्येत्य इदं वचनमब्रुवन् ॥
संस्कृतोऽयं रथोऽस्माभिस्तव दानवशत्रुजित्।
इदमापत्परित्राणं देवान् सेन्द्रपुरोगमान् ॥
तं मेरुशिखराकारं त्रैलोक्यरथसत्तमम्।
प्रगृह्य देवान् साधित्रि रथं यक्षति शङ्करः ॥
सहसृदृष्ट्वा रथं साधु साध्वित्युक्ता सहस्रांशुः।
उवाच सेन्द्रानमरानमराधिपतिः स्वयम् ॥
यादृशोऽयं रथः कृत्स्नो युष्माभिर्मम सत्तमाः।
ईदृशो रथसम्पत्त्या यन्ता शीघ्रं विधीयताम् ॥
इत्युक्ता देवदेवेन देवा विद्वा इवेशुभिः।
अवापुर्महतीं चिन्तां कथं कार्यमिति ब्रुवन् ॥
महादेवस्य देवोऽन्यः को नाम सदृशो भवेत्।
सुक्ता चक्रायुधं देवं सोपास्य इषुमाश्रितः ॥
धुरि युक्ता इवोचाग्रो घटन्त इव पर्वतैः।
निश्वसन्तः सुराः सर्वे कथमेतदिति ब्रुवन् ॥
अहं सारथिरित्युक्ता जयाद्याश्चास्तथाऽभवः ॥
ततो देवैः सगन्धर्वैः सिंहनादो महान् कृतः।
प्रतोदहस्तं सम्पूज्य ब्रह्माणं स्तुतां गतम् ॥
भगवानपि विश्वेशो रथस्थे वै पितामहे।
सदश्वः स्तुत इत्युक्ता चारुरोह रथं हरः ॥
आरोहति रथं देवे ह्यश्वा हरभरातुराः।
जानुभिः पतिता भूमौ रजोग्रासश्च ग्रासितः ॥
देवो दृष्ट्वाथ वेदांस्तानभीरुग्रहयान् भयात्।
उज्जहार पितॄनार्त्तान् सुपुत्र इव दुःखितान् ॥
ततः सिंहरवो भूयो बभूव रथभैरवः।
जयशब्दश्च देवानां सम्बभूवार्थवोधमः ॥
तदोङ्कारमयं गृह्य प्रतोदं वरदः प्रभुः।
स्वयम्भुः प्रययौ वाहानुमन्त्र्य यथाक्रमम् ॥
ग्रसमाना इवाकाशं सुवन्त इव मेदिनीम्।
सुखेभ्यः सहसुः श्वासानुच्छ्वसन्त इवोरगाः ॥
स्वयम्भुवा चोद्यमानाश्चोदितेन कपर्दिना।
व्रजन्ति तेऽश्वा जवनाः क्षयकाल इवानिलाः ॥
ध्वजोच्छ्रयविनिर्मोक्षी ध्वजयष्टिमनुत्तमाम्।
आक्रम्य नन्दी वृषभं तस्थौ तस्मिंश्छिवेच्छया ॥
भार्गवाङ्गिरसौ देवौ दक्षहस्तौ रविप्रभौ।
रथचक्रे तु रक्षेते रुद्रस्य प्रियकाङ्क्षिणौ ॥
ग्रीवश्च भगवान् नागः अनन्तोऽन्तकरोऽरिणाम्।
शरहस्तो रथं याति शूरयन् ब्रह्मणस्पदा ॥
यमस्तूर्णं ससाखाय महिश्चाप्तिदारुणम्।
द्रविणाधिपतिर्याति सुराणामधिपो दिपम् ॥
मयूरं शूलचक्रश्च कूजन्तं किन्नरं यथा।
गुह आस्थाय वरदो युगोपमरथं पितुः ॥
नदीश्वरश्च भगवान् शूलमादाय दीप्तिमत्।
दृष्टश्चापि पार्श्वाभ्यां लोकस्य क्षयकृद्यथा ॥
प्रमथाश्चाग्निवर्णाभाः साग्निज्वाला इवार्चिषः।
अनुजग्मू रथं शार्वं नक्षत्रा इव महार्णवम् ॥
भृगुर्भरद्वाज-वसिष्ठ-गौतमाः
क्रतुः पुलस्त्यः पुलहस्तथोशनाः।
मरीचिरत्रिर्भगवानथाङ्गिराः
पराशरागस्त्यसुखा महर्षयः ॥
हरमजितमजं प्रतुष्टुवु-
र्वचनविधेविचित्रभूषणैः।
रथक्षिपुरे सकाञ्चनाचलो
व्रजति यथाग्र इवाङ्गिरस्मरे ॥
करिगिरिरविमेघसन्निभाः
सजलपयोदनिनादनादिनः।
प्रमथगणाः परिवार्य देवगुप्तं
रथमभितः प्रयुः खदर्पयुक्ताः ॥
मकर-तिमि-तिमिङ्गिलाहतः
प्रलय इवातिसमुद्धतोऽर्णवः।
व्रजति रथवरोऽति भास्करो
ह्यगनिपातपयोदनिस्वनः ॥"*॥)

अथ ज्योतिश्चिदाभरणे रथकर्माह।
"लोलमेत्रजघुणिष्णुकमेषु
स्यन्दनाखिलविधानमथाहुः।
सैनसद्गुवशाम्युतपक्षैः
साधुराग्निवति साधुभिरङ्ग ॥"

अथ रथचक्रमाह।
"उच्चदृष्णिकरकौर्णपुरर्चा-
देर्घनद्धवलयं वलयस्य।
सद्यभागनिचितभ्रममध्या-
दाविमध्यमनसो नवभागम् ॥
अग्रभे भवति संकलिरन्तः-
कूबरोडुनि जयोऽथ रथाङ्गे।

सन्धिभेऽर्धध्रुतिरन्तरसन्धौ
भीतिरिहमनसो नतु गर्भे ।"
अथ सुकृच्छ्रगणपतौ रथकल्पम् ।
"पुष्ये पुनर्वसुज्येष्ठानुराधा रेवती त्रयोः ।
अवमादित्यभे हस्तत्रितये रोहिणोत्तरे ।
सार्के सौम्यदिने सौम्यविलग्ने रथकर्म्म सत् ।"
अथ ज्योतिःसागरे रथचक्रम् ।
"रथाकारं लिखेच्चक्रं भानुभादौ विलोकयेत् ।
रथाग्रे त्रीणि रक्षांसि रुद्रिमार्गे प्रदापयेत् ।
मध्ये ऋक्षत्रयं चक्रे सन्धिदक्षे महद्वयम् ।
रथाग्रे च महोत्पातं मध्ये चैव सुखप्रदम् ।"
इत्यार्य्येषु ज्योतिश्चिद्दक्षभरामेष क्षताः शुभा दिग्रः । * । अस्यार्थः । अथानन्तरं धीराः स्यन्दनानां रथानां अखिलं सम्पूर्णं विधानं कार्य्यमाहुः कथयन्ति । केषु लोलसंज्ञानि स्वाति पुनर्वसुः श्रवणा धनिष्ठा शतभिषा एतानि । मैत्रसंज्ञानि मृगशिरा रेवती चित्रा अनुराधा एतानि । लघुसंज्ञानि हस्ता अश्विनी पुष्या अभिजित् एतानि । तिष्यरिन्द्रक्षसंज्ञं ज्येष्ठा को ब्रह्मा तक्षं रोहिणी एतेषु नक्षत्रेषु । पुनः केषु सेनसदुग्रसंज्ञं इत्रः सूर्य्यः तेन सह वर्त्तमानेषु । सतां शुभयहाणां बुधं वारेषु । पुनः कस्मिन् साधुराग्नियति शुभयहराग्नियुक्ते अर्के लग्ने वर्त्तति । पुनः कैः वक्ष्यमाणैः स्थानं अनुचतुर्थं तपः नवमं एतद्भवनस्थैः साधुभिः शुभयहैरिति । अथ रथचक्रे नक्षत्रस्थापनम् । उच्यते । उच्छ्रयः सूर्य्यस्तत्र करैः किरणैः कीर्णं व्याप्तं पूरं कृत्तामर्क्षीयस्वभागप्रदेशं यस्य तत्र तदृक्षचक्रेति तस्मात् अर्थात् सूर्य्या क्रान्तनक्षत्रात् अनसः शकटस्य वलयऋक्षं तस्माद्यात् अयभागमारभ्य आविमर्धं मध्यभागपर्य्यन्तं सुधिया ऋक्षवलयं भचक्रं देयं न्यासीकर्त्तव्यं किम्भूतं ऋक्षवलयं नवभागं नवभिर्भागैः स्थितमिति यावत् । पुनः किंभूतं स्वयभागनिक्षितभसं वामभागेन याम्यभसम्बन्धिनि । अथास्य फलम् । अनसः शकटस्य अग्रमे अग्रगतवर्त्तमाने चन्द्रनक्षत्रे सङ्कटः युद्धं भवति । कूबरोडुनि युगमध्यगते वर्त्तमाननक्षत्रे अन्तो क्षतिः मरणं भवति । रथाक्षे चक्रयुग्मे जयो भवति । सन्धिमे सन्धिगतनक्षत्रे अर्थक्षतिः द्रव्यहरणं भवति । अन्तरसन्धौ मध्यस्थानगतनक्षत्रे भीतिभंयो भवति । गर्भे मध्यभागगतनक्षत्रे इष्टं शुभं भवति । नतु चिन्तितमिति । अन्यत् सुगमम् ।

रथकः, पुं, (रथ इव प्रतिक्षतिः । कन् ।) मन्दिरावयवविशेषः । यथा,—
"अष्टकांशेन गर्भस्य रथकानान्तु निर्गमः ।
परिधेर्गुणभागेन रथकांश्चैव कल्पयेत् ।
तत्तृतीयेन वा कुर्य्यात् रथकानान्तु निर्गमम् ।
रामत्रयं स्थापनीयं रथकत्रितये सदा ।"
इति श्रीहरिभक्तिविलासे २० विलासः ।

रथकक्षा, स्त्री, (रथानां समूह इति । "जनखलादिगौरादिति ।" इति सुग्धबोधसूत्रेण कक्षः । टाप् ।) रथसमूहः । तत्पर्य्यायः । रथव्रजः २ । इत्यमरः । २ । ८ । ५५ । (रथकक्षा । इति याज्ञिनिः । ४ । २ । ५१ ।)

रथकरः, पुं, (करोतीति । कृ + अच् । रथानां करः ।) रथकारः । इति शब्दरत्नावली ।

रथकारः, पुं, (रथं करोतीति । कृ + अण् ।) रथनिर्म्माणकर्त्ता । कुसार इति भाषा । स तु करणीगर्भे माहिष्याञ्जातः । (यथा, वाजसनेयसंहितायाम् । ३० । ६ ।
"स्त्रीषकं प्रमदे कुमारीपुत्रं
मेधायै रथकारं धैर्य्याय तक्षाणम् ।"
"रथकारं माहिष्येण करिष्यां जातम् ।"
इति तद्भाष्ये महीधरः ।) तत्पर्य्यायः । तक्षा २ वर्द्धकिः ३ त्वष्टा ४ काष्ठतट् ५ । इत्यमरः । सूत्रधारः ६ वर्द्धका ७ रथकरः ८ काष्ठतक्षकः ९ । इति शब्दरत्नावली ।

रथकुटुम्बी, [न्] पुं, (रथं कुटुम्बयितुं धारयितुं शीलमस्य । णिनिः । यद्वा, रथ एव कुटुम्बम् । तदस्यास्तीति । इनिः ।) सारथिः । इत्यमरः । २ । ८ । ६० ।

रथक्रान्तः, पुं, (रथवत् क्रान्तं क्रमणमस्य ।) तालविशेषः । यथा,—
"अश्वक्रान्तो रथक्रान्तो विष्णुक्रान्तस्ततः परः ।
सूर्य्यक्रान्तो विधुक्रान्तो बलभिन्नागपञ्चकः ।
इति पञ्चमहीनानां संज्ञाः सप्त क्रमाच्छताः ।"
इति सङ्गीतरत्नाकरः ।

रथगर्भकः, पुं, (रथो गर्भोऽस्य ।) स्वल्पवाह्यानम् । नररथः । तत्पर्य्यायः । कर्णीरथः २ प्रवहणम् ३ डयनम् ४ । इति हेमचन्द्रः ।

रथगुप्तिः, स्त्री, परप्रहरणाभिघातरक्षार्थं रथस्य सन्नाहवदावरणकादिद्रव्यम् । रथस्य गुप्तिः काष्ठादिभ्यो रक्षार्थमावरणम् । तत्पर्य्यायः । वरूथः २ । इत्यमरः भरतश्च ।

रथगोपनं, क्ली, (रथस्य गोपनं गुप्त्यादिभ्यो रक्षार्थमावरणम् ।) रथगुप्तिः । इति हलायुधः ।

रथचरः, पुं, (रथचरं चक्रं तदेव नामास्य ।) चक्रवाकपक्षी । इति शब्दरत्नावली । (पुं, क्ली, रथस्य चरः ।) रथचक्रम् । यथा,—
"रथः क्षौमो वस्त्रा शुभ्रतिरश्चीनो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरजपाकिः शुर इति ।"
इति महिम्नः स्तोत्रम् ।

रथदः, पुं, (रथमाभा दुः । वदा, रथस्य दुर्द्रुमः । तत्पयोगित्वात् ।) तिनिशवृक्षः । इत्यमरः । २ । ४ । २६ । (तथास्य पर्य्यायः ।
"तिनिशः स्यन्दनो नेमी रथदुर्द्रुमकुलस्तथा ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

रथन्तर, त्रि, रथेन तरति यः । इति सुग्धबोधव्याकरणम् । (कल्पविशेषे, पुं । यथा, मत्स्यपुराणे । ५३ । ३३—३४ ।
"रथन्तरस्य कल्पस्य वृत्तान्तमधिकृत्य यत् ।
सावर्णिना नारदाय कथितं हरिसंयुतम् ।
यत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः ।
तदष्टादशसाहस्रं ब्रह्मवैवर्त्तमुच्यते ।"
रथेन तरतीति . तॄ + "संज्ञायां भृतॄवृजिधारिसहितपिदमः ।" ३ । २ । ४६ । इति खच् । मुमच । अत्र युनुपत्तिमात्रम् । तत्प्रत्ययार्थानुगमः । सामभेदे, क्ली । यथा, ऋग्वेदे । १ । १६४ । २५ ।
"जगता सिन्धुं दिव्यस्तभायद्रथन्तरे सूर्य्यं पर्य्यपश्यत् ।"
"रथन्तरे एतन्नामके साम्नि ।" इति तद्भाष्ये सायणः । स्त्रियां ङीप् । रथन्तरी । पौरवस्य ईलिनस्य भार्य्या । यथा, महाभारते । १ । ९४ । १७ ।
"रथन्तर्य्यां सुतान् पञ्च पञ्चभूतोपमांस्ततः ।
ईलिनो जनयामास दुष्मन्तप्रभृतीन् नृपान् ।")

रथपर्य्यायः, पुं, (रथः पर्य्यायो यस्य ।) वेतसवृक्षः । इति शब्दचन्द्रिका । (विवरणमस्य वेतसशब्दे विज्ञेयम् ।)

रथपादः, पुं, (रथस्य पादः ।) चक्रम् । इति हेमचन्द्रः ।

रथपा, स्त्री, नदीविशेषः । इति शब्दरत्नावली ।

रथयात्रा, स्त्री, (रथेन भगवतो यात्रा ।) आषाढशुक्लद्वितीयायां श्रीजगन्नाथस्य रथारोपणरूपोत्सवः । यथा, स्कन्दपुराणे ।
"आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ।
यात्रोत्सवं प्रदृश्याथ प्रीणयेच्च द्विजान् बहून् ।
तथा ।
ऋक्षाभावे तिथौ कार्य्या सदा सा प्रीतये मम ।
मां जगन्नाथम् । सा यात्रा ।" इति तिथ्यादितत्त्वम् ।*।
"नातः श्रेयःपदो विष्णोरुत्सवः शास्त्रसम्मतः ।
रथयात्रैव यात्रायां सुखेत्याह प्रजापतिः ।"
इति यात्रातत्त्वम् ।७।
अन्यत् यात्राशब्दे द्रष्टव्यम् ।

रथाङ्गं, क्ली, (रथस्याङ्गम् ।) चक्रम् । इत्यमरः । (यथा, रघुः । ७ । ४१ ।
"रथो रथाङ्गध्वनिना विजज्ञे
विलोलघण्टाक्वणितेन नागः ।"
रथावयवमात्रम् । यथा, महाभारते । १४ । ८२ । १३ ।
"ध्वजे पताकादण्डेषु रथयन्त्रहयेषु च ।
अन्येषु च रथाङ्गेषु न शरीरे न सारथौ ।"
सुदर्शनचक्रम् । यथा, माघे । १ । २१ ।
"रथाङ्गपाणेः पटलेन रोचिषा-
ऽदितिष्वः संवलिता विरेजिरे ।")

रथाङ्गः, पुं, चक्रवाकपक्षी । इत्यमरः । (यथा, नैषधे । १६ । ३५ ।
"विरहतरलिताक्षा वक्षसोऽयन्त्यतिविडजा-
मिह सहचरीं नामयाहं रथाङ्गविहङ्गमाः ।")

रथाङ्गपाणिः, पुं, (रथाङ्गं सुदर्शनचक्रं पाणौ यस्य।) विष्णुः। इति हलायुधः॥ (यथा, भागवते। १। ३। ३८।
"सवेद धातुः पदवीं परस्य
दुरन्तवीर्यस्य रथाङ्गपाणेः॥")
रथाङ्गी, स्त्री, (रथस्याङ्गमिवाङ्गमितिर्यस्याः। रथाङ्ग+ङीष्।) ऋद्धिः। इति राजनिर्घण्टः॥
रथान्तरः, पुं, कल्पभेदः। इत्यग्निपुराणम्। (रथन्तर इत्यपि पाठः॥)
रथाभः, पुं, वेतसवृक्षः। इति शब्दरत्नावली॥
रथाश्वपुष्यः, पुं, (रथाश्वस्य पुष्यमिव पुष्यमस्य।) वेतसः। इत्यमरटीकायां भरतः॥
रथावरोही, [न्] पुं, (रथे अवरोहतीति। अव+रुह+णिनिः।) रथस्थयुद्धकर्त्ता। इति हेमचन्द्रः॥
रथिकः, पुं, (रथोऽस्यास्तीति। रथ+ठन्।) रथी। इत्यमरः। २। ८। ७६॥ (यथा, हरिवंशसंहितायाम्। १५। ११।
"हस्ते तस्करकुञ्जर-
रथिकमहामात्रग्रिक्षिपथ्यानि॥")
तिनिशवृक्षः। इति राजनिर्घण्टः॥ (रथेन चरतीति। रथ+"पर्यादिभ्यः ठन्।" ४। ४। १०। इति ठन्। रथचारिणि, त्रि। इति सिद्धान्तकौमुदी॥)
रथिनः, पुं, (रथस्य इनः प्रभुः। अकन्यादिजादकारलोपः।) रथी। इत्यमरः। २। ८। ७६॥
रथिरः, पुं, (रथोऽस्यास्तीति। रथ+"मेधारथाश्वाभिरन्निरथी वक्तव्यौ।" ५। २। १०८। इत्यस्य वार्त्तिकोक्त्या इरच्।) रथी। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ३। १। १७।
"अदेवेवृधिरो यासि साधन्॥"
"रथिरः रथी।" इति तद्भाष्ये सायणः॥)
रथी, [न्] पुं, (रथोऽस्यास्तीति। रथ+इनिः।) रथस्वामी राजादिः। तत्पर्य्यायः। रथिकः २ रथिनः ३। इत्यमरः। २। ८। ७६॥ रथारोही ४ रथी ५ रथिरः ६। इति हेमचन्द्रः॥ रथस्वामी ७ सारथः ८। इति शब्दरत्नावली॥ स्यन्दनारोहः ९। इति जटाधरः॥ (यथा, रघुः। ७। ३७।
"पत्तिः पदातिं रथिनं रथेशः
सुरङ्गसादी तुरगाधिरूढम्॥")
रथ्यः, पुं, (रथं वहतीति। रथ+"तद्वहति-रथयुगप्रासङ्गम्।" ४। ४। ७६। इति यत्।) रथस्य वोढा घोटकः। इत्यमरः। २। ८। ४६॥ रथांसः। इति हेमचन्द्रः॥ (रथस्य नेता। यथा, ऋग्वेदे। ६। २१। ६।
"ऋभुर्नं रथ्यं नवं दधाता केतमादिशे।"
"रथ्यं रथस्य नेतारम्।" इति तद्भाष्ये सायणः॥ रथसम्बन्धिनि, त्रि। यथा, ऋग्वेदे। २। ३१। ७।
"सन्निर्नं रथ्यो अहधीतिमग्नाः।"
"रथ्यो रथसम्बन्धी सन्निर्नं सर्पणशीलोऽश्व इव।" इति तद्भाष्ये सायणः। रथस्येदमिति। "रथात् यत्।" ४। ३। १२१। इति यत्।) क्लीबे चक्रम्॥ (युगम्। इति काशिका॥
रथ्या, स्त्री, (रथानां समूहः। रथ+"ब्राह्मणो-रथात्।" ४। २। ५०। इति यत्।) रथसमूहः। तत्पर्य्यायः। रथकथा (चा) २ रथव्रजः ३। अध्वन्तरमार्गः। गाड्ड इति भाषा॥ तत्पर्य्यायः। प्रतोली २ विप्रिखा ३। इत्यमरः॥ आवर्त्तनी। इति मेदिनी॥ (रथाय हिता। रथ+"रथादृयत्।" ४। ३। १२१। इति यत्। यद्वा, रथं वहतीति। "तद्वहतीति।" ४। ४। ७६। इति यत्।) पन्थाः। (यथा, महाभारते। १। १४१। ६०।
"प्रागागारेषु रथ्यासु सर्व्वतीर्थेषु चाध्वग।
चत्वरेषु च कूपेषु पर्व्वतेषु वनेषु च॥")
चत्वरम्। इति हेमचन्द्रः॥
रद, उतृखाते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफादिः। उतृखातमुत्खननमिति गोविन्दभट्टः। रदति भूमिं शूकरः। इति दुर्गादासः॥
रदः, पुं, (रदतीति। रद विलेखने+पचाद्यच्।) दन्तः। (यथा, आर्य्यासप्तशत्याम्। ४०६।
"भ्रमसि प्रकटयसि रदं
करं प्रसारयसि लज्जमपि त्रयसि।
धिङ्मानं तव कुञ्जर
जीवं न जुहोषि जठरायौ॥")
विलेखनम्। इति मेदिनी। दे, १४॥ पुरुषदन्तलक्षणं यथा,—
"विवर्णैर्धवलैर्नीलाश्च दन्ताः स्निग्धा घनाः शुभाः।
तीक्ष्णा दंष्ट्राः समाः श्रेष्ठा जिह्वा रक्ता समा शुभा॥"
स्त्रीदन्तलक्षणं यथा,—
"कुन्दपुष्पसमा दन्ता भाविनं कोकिलासमम्।
दाक्षिण्ययुक्तमग्रन्थं हंसशब्दसुखावहम्॥
नासा समा समपुटा स्त्रीणान्तु रुचिरा शुभा।
करालविषमा दन्ताः क्लेशाय च भयाय च।
चौर्य्याय लम्बमांसाश्च दीर्घा भर्त्तुश्च मृत्यवे॥"
इति गारुड़े ६६ अध्यायः॥*॥
दन्तलम्बस्य शुचित्वं यथा,—
"दन्तवद्दन्तलम्बेषु जिह्वासर्थेऽशुचिर्भवेत्॥"
इति कौर्म्मे उपविभागे १२ अध्यायः॥*॥
"दन्तलम्बसंज्ञार्थं लेपं मन्येत दन्तवत्।
न तत्र बहुशः कुर्य्यादुदयन्तसुरजे पुनः।
भवेदग्रौचमत्यर्थं लयवेधाद्रजे कृते॥"
इति प्रायश्चित्ततत्त्वधृतवचनम्॥
रदच्छदः, पुं, (रदानां छद आच्छादकः।) ओष्ठः। इति हेमचन्द्रः॥
रदनः, पुं, (रद्यतेऽनेनेति। रद+करणे ल्युट्। रदतीति। रद+ल्युर्णा।) दन्तः। इत्यमरः। २। ६। ८९॥ (यथा, हरिवंशे। १३०। ८७।
"रदनैः पन्नगरिपुं करेण शिरसा तदा।
ऐरावतो गजपतिराजघान नदंस्तथा॥"
रद+भावे ल्युट्।) उत्खनने, क्लीबे॥
रदनच्छदः, पुं, (रदनानां छद आच्छादकः।) ओष्ठः। अधरः। इत्यमरः। २। ६। ९०॥ तस्य शुभाशुभलक्षणं यथा,—
"मांसलेच धनोपेता अवक्रैरधरैर्नृपाः।
विशोषमेच स्फुटितैरोष्ठे रूक्षेच लक्षिते:।
विवर्णैर्धवलैर्नीलाश्च दन्ता स्निग्धा घनाः शुभाः॥"
इति गारुड़े ६६ अध्यायः॥
रदनी, [न्] पुं, (रदनौ प्रशस्तदन्तावस्य स्त इति। रदन+इनिः।) हस्ती। इति राजनिर्घण्टः॥
रदी, [न्] पुं, (रदौ प्रशस्तदन्तावस्य स्त इति। रद+इनिः।) हस्ती। इति हलायुधः॥
रध, य ऊ ल हिंसने। पाके। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-वेट्।) य, रध्यति। ऊ, रधिष्यति रस्यति। ल, अरन्धत्। इति दुर्गादासः॥
रन्, म औ ण } रागे। इति कविकल्पद्रुमः॥
रञ्ज, य म औ ण } (भ्वा०-दिवा० च-उभ०-वर्णान्तरोत्पादने सक०-आसक्तौ अक०-अनिट्।) य ण, रञ्यति रज्यते। म, रजयति रङ्गान् रङ्गरमणादन्यत्र रञ्जयति पुत्रं पिता। औ, रङ्क्ता। ण, रजति रजते। रागो वर्णान्तरोत्पादनमासक्तिश्च। इति दुर्गादासः॥
रन्तिदेवः, पुं, (रमते इति। रम+संज्ञायां तिक्। रन्तिश्चासौ देवश्चेति।) विष्णुः। चन्द्रवंशीयनृपतिभेदः। स तु साङ्कृतिपुत्रः। इति मेदिनी। वे, ६२॥ (यथा, भागवते। ६।२१।२।
"गुरुश्च रन्तिदेवश्च संकृतेः पाण्डुनन्दन!।
रन्तिदेवस्य महिमा दृष्टश्रुतश्च गीयते॥"
अयं हि याज्ञिको दाताग्रगण्य इति पुराणेषु श्रूयते। स्तदृग्यजुर्हतगोचर्म्मरसेनैव चर्म्मण्वती नदी जाता। यथा, महाभारते। ३। २०७। ८—९।
"राज्ञो महानसे पूर्व्वं रन्तिदेवस्य वै द्विज।
द्वे सहस्रे तु वध्येते पशूनामन्वहं तदा॥
अहन्यहनि वध्येते द्वे सहस्रे गवां तथा।
समांसं ददतो ह्यन्नं रन्तिदेवस्य नित्यशः॥
अतुला कीर्त्तिरभवत् नृपस्य द्विजसत्तम!।"
तथाच तत्रैव। १२। २६। १२२—१२८।
"उपावर्त्तञ्च प्रश्नवः स्वयं तं संश्रितव्रतम्।
याज्यारण्या महात्मानं रन्तिदेवं यशस्विनम्॥
महानदी चर्म्मराशेरुत्क्लेदात् सुस्रुवे यतः।
ततश्चर्म्मण्वतीत्येवं विख्याता सा महानदी॥
ब्राह्मणेभ्यो ददौ नित्यान् मदसि प्रतते नृपः।
तुभ्यं निष्कं तुभ्यं निष्कमिति क्रोशन्ति वै द्विजाः॥
सहस्रं तुभ्यमित्युक्ता ब्राह्मणान् संप्रयच्छते।
अन्नाद्यार्थोपकरणं द्रव्योपकरणञ्च यत्॥
घटाः पात्राः कटाहानि स्थाल्यश्च पिठराणि च।
नासीत् किञ्चिदवैवर्ण्यं रन्तिदेवस्य धीमतः॥

सांकृते रन्तिदेवस्य यां राशिमवसन् गृहे ।
आलभ्यन्त शतं गावः सहस्राणि च विंशतिः ॥
तत्र स्म सूदाः क्रोशन्ति सुन्दरमभिकुञ्जलाः ।
रूपभूयिष्ठमन्नौघं नाद्यमांसं यथा पुरा ॥")
कुरुः । इति शब्दरत्नावली ।

रन्धुः, स्त्री, (रमते अत्रेति । रम् + तुन् ।) वल्ली । नदी । इति मेदिनी । ते, ७६ ।

रन्धनं, क्ली, पाकः । रधधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् । यथा रन्धनाय स्थाली । इति संक्षिप्तसारव्याकरणम् । (रध् + ल्युः । गाग्रके, त्रि । यथा, भागवते । ४ । १० । २८ ।
"यदनुग्रसते काले खलुद्यामदरन्धन ! ॥"
"हे अमदरन्धन ! अमङ्गलनाशन ! ।" इति तट्टीकायां श्रीधरः ॥)

रन्धितं, क्ली, (रध् + क्तः ।) क्षतरन्धनक्रियम् । तच्च पात्रान्तरे स्थापनविधिर्यथा,—
"सङ्कीर्णे पात्रसम्भारे मार्गे वा ग्रामवर्त्मनि ।
स्थापयेदृजुवान् क्षुद्रः सिद्धान्नं पात्रकान्तरे ॥
भक्तं खपाचके स्थाप्यं न स्थाप्यं पात्रकान्तरे ।
हृतं काष्ठासने स्थाप्यं मांसं मांसभवं रसम् ।
स्थापयेद्राजते हैमे पात्रे लौहेऽथ काष्ठजे ।
यवादिषड्विधं शाकं स्थाप्यं कांस्येऽथ दारुजे ।
यत्नान्नं पिष्टकं भक्ष्यं स्थाप्यं कांस्येऽथ दारुजे ।
धारयेत् सुव्रतं क्षीरं यार्थिवे वाथ काष्ठजे ।
यानीयं पायसं तक्रं ह्यसवेम्बेव धारयेत् ॥
काचजे स्फाटिके वाथ वैदूर्यादिविनिर्मिते ।
धारयेत् सर्वदा पात्रे रागषाड्वगुडकान् ।
उक्तपात्रान्तरे स्थाप्यं तद्द्रव्यं तद्दृजापहम् ।
सर्वदा सुखदं क्षुद्यमन्यथा दोषकारकम् ।"
इति रूपकारग्राम्ये पाकराजेश्वरः ॥

रन्ध्रं, क्ली, (रन्ध्रयति छिनत्त्यनेनेति । रध् + बाहुलकात् रक् ।) दूषणम् । (यथा, रघुः । १२ । ११ ।
"रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥")
छिद्रम् । इति मेदिनी ॥ (यथा, रघौ । १५ । ८२ ।
"अथ सुप्ते तया साध्वी रन्ध्रात् सद्योभवाद्भयः ।
प्रातर्हृदमिव ज्योतिः प्रभामण्डलसूद्ययौ ॥"
मनुष्यशरीरस्थरन्ध्राणि यथा,—
"नासानयनकर्णानां द्वे द्वे रन्ध्रे प्रकीर्त्तिते ।
मेढ्रगापानवक्त्राणामेकैकं रन्ध्रमुच्यते ।
दशमं मस्तके प्रोक्तं रन्ध्राणीति वृधा विदुः ॥
स्त्रीणामूर्ध्वाधिकानि स्युः स्तनयोर्गर्भवर्त्मनः ।
क्षुत्पिपासादि चान्यानि मतानि तत्र जन्मिनाम् ।"
इति गारुडे पूर्वखण्डे पञ्चमेऽध्याये ॥
योनिः । यथा, महाभारते । १२ । २८२ । ५३ ।
"रन्ध्रागतमथान्यासां श्रियोद्वेदय वर्द्धिताम् ।
नेत्ररोगः कोकिलस्य स्वरः प्रोक्तो महात्मना ॥")

रन्ध्रकण्टः, पुं, (रन्ध्रे कण्टः कण्टको यस्य ।) आलर्कवृक्षः । इति राजनिर्घण्टः ॥

रन्ध्रबधुः, पुं, (रन्ध्रे गर्त्ते बधुर्नकुल इव ।) उन्दुरः । इति त्रिकाण्डशेषः ॥

रन्ध्रवंशः, पुं, (रन्ध्रविशिष्टो वंशः ।) छिद्रयुक्तवंशः । फाँपावाँश इति भाषा । तत्पर्य्यायः । त्वक्सारः २ कीचकाह्वयः ३ मस्करः ४ वादनीयः ५ शुषिरासः ६ । अस्य गुणाः ।
"वंशौ त्वक्षौ कषायौ च किञ्चित्पित्तौ च शीतलौ ।
मूत्रकृच्छ्रप्रमेहार्शःपित्तदाहासनाशनौ ॥
विशेषो रन्ध्रवंशस्तु दीपनोऽजीर्णनाशकः ।
वंशिकस्तु पाचनो रूक्षः श्लेष्मघ्नो गुल्मनाशनः ॥"
इति राजनिर्घण्टः ॥

रप, वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रपति । वधः कथनम् । इति दुर्गादासः ॥

रप, गत्याम् । वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रपति । इति दुर्गादासः ॥

रप, ट गत्याम् । वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ट, रप्यते । इति दुर्गादासः ।

रब, ट गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् ।) ट, रब्यते । इति दुर्गादासः ॥

रब, ट ड शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ॥)

रबः, पुं, शब्दः । रबधातोर्भावेऽल्प्रत्ययेन निष्पन्नः ॥ (यथा, राजतरङ्गिण्याम् । ५ । ४०८ ।
"सुप्तस्तटाद्गृहे भट्ट इव निद्राजसेऽधुना ।
प्रबुद्धः शृङ्खपाते स यथासुखद भैरवान् रवान् ॥")

रभ, ट ड शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ट, रभ्यते । ड, रभते । इति दुर्गादासः ॥

रभ, औ ड राभस्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-अनिट् । राभस्यसुतसुकीभावः । निर्विचारा प्रवृत्तिरिति गोविन्दभट्टः । औ, रब्धा । ड, रभते साधुः पुरुषे । आङ्पूर्व्वोऽयमारम्भे । ग्राम्यं पठितुमारभते शिष्यः । इति दुर्गादासः ॥

रभसः, पुं, (रभणमिति । रभ + "अलविचमितमिरभिरभिलभीति ।" उणा० ३ । ११७ । इति असच् ।) वेगः । (यथा, माघे । ६ । ७२ ।
"रभसोत्थितासुपगतः सहसा
परिरभ्यकञ्चन वधूमरुधत् ॥")
हर्षः । इति मेदिनी । से, ३१ । (प्रेमोत्साहः । यथा, गीतगोविन्दे । ५ । ६ ।
"मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥"
"रभसस्य प्रेमोत्साहस्य ।" इति तट्टीकायां बोधिनी ।) संरम्भः । यथा, माघे । ११ । १६ ।
"प्रमदमदनमाद्यदयौवनोद्दामरामा
रमणरभसखेदस्खेदविच्छेददक्षः ॥"
संभ्रमः । यथा, भागवते । ११ । १६ ।
"वयन्तु शश्वन्मघवन्नतानि
विभ्यत्तिरश्चः सरभसं खादन्तः ॥")
पौनःपुन्यविचारः । रभसः । औत्सुक्यमिति कलिङ्गः । स्त्रियामाम् रभसा च दृश्यते । इति हेमचन्द्रः । (यथा, किरातार्জ্জুनीये । ५ । १ ।
"अथ जयाय तु मेरुमहीभृतो
रभसया तु दिगन्तदिदृक्षया ।
अभिययौ स हिमालयसुच्छ्रितं
ससुदितं तु विलङ्घयितुं नभः ॥")
(यथा, महाभारते । ५ । ५१ । १० ।
"सर्व्वेषां मम पुत्राणां स एकः क्रूरविक्रमः ।
वज्रहस्तो विप्रतीपश्च बाल्येऽपि रभसः सदा ॥"
महान् । इति निघण्टुः । ३ । ३ ॥)
यदा तु रभसगुणयोगात्सूर्य्य आदित्यात् अप्रलये तद्वति वर्त्तते तदा बाध्यलिङ्गता स्यात् । इति लिङ्गादिसंग्रहे भरतः ॥
खनामख्यातः अभिधानविशेषश्च ॥

रम, उ ड ञ क्रौ क्रीड़े । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-अक०-अनिट् । क्रावेट् ।) रेफादिः । उ, रमित्वा । रन्त्वा । ड, रमते । ञ, रामः रमः । औ, रन्ता । इति दुर्गादासः ॥

रमः, पुं, (रमते इति । रम् + यत्राच्च ।) कान्तः । (यथा, किरातार्জ্জुनीये । ५ । २० ।
"निधिगुह्यकाधिपरमैः परमैः ॥")
रक्ताशोकवृक्षः । कामदेवः । इति मेदिनी । मे, २५ । रमणञ्च । रमधातोर्भावेऽल्प्रत्ययनिष्पन्नम् ॥

रमकः, पुं, (रमते इति । रम् + "रमेरच्च लो वा ।" उणा० १ । ३३ । इति कुन् ।) कान्तः । हलुचादिकोषः ॥

रमठं, क्ली, (रम + अठन् ।) हिङ्गु । हलुचादिकोषः ॥ (जनपदविशेषे, पुं । तद्देशवासिनि, त्रि । यथा, महाभारते । ३ । ५१ । २४ ।
"जागुडान् रमठान् सुङ्गान् स्त्रीराज्यानथ तङ्गणान् ॥")

रमठध्वनिः, पुं. (रमठ इति शब्देन ध्वन्यते कथ्यते इति । ध्वन् + इन् ।) हिङ्गु । इति शब्दचन्द्रिका ॥

रमणं, क्ली, (रमयतीति । रम् + णिच् + ल्युः ।) पटोलमूलम् । इति मेदिनी । जघनम् । इति हेमचन्द्रः ॥ (रम् + भावे ल्युट् ।) जघनम् । तत्पर्य्यायः । अवक्षत्तर्य्यकम् २ ग्राम्यधर्म्मः ३ सुरतम् ४ रतम् ५ संप्रयोगः ६ निधुवनम् ७ मेथुनम् ८ रतिः ९ उपहरम् १० धर्षितम् ११ क्रीड़ारतम् १२ महासुखम् १३ विभ्रमम् १४ योगमिथुनम् १५ अभिमानितम् १६ । इति शब्दरत्नावली ॥ (यथा, माघे । ११ । १६ ।
विकच कमलगन्धैरन्वयुन् भृङ्गमालाः
सुरभितमकरन्दं मन्दमावाति वातः ।
प्रमदमदनमाद्यादौवनोद्दामरामा-
रमणरभसखेदस्खेदविच्छेददक्षः ॥")
क्रीड़नम् । इति रमधातोर्ल्युदन्तात् ॥ (रत्युत्पादनम् । यथा, भागवते । १० । २ । १३ ।
"रामेति लोकरमणाद्ब्रह्म बलमुदीरयात् ॥"
"लोकस्य रमणात् रत्युत्पादनात् । इति तत्र

स्वामी। वनविशेषः। यथा, हरिवंशे। १५५।२१।
"भाति चैत्रवनञ्चैव नन्दनञ्च वनं महत्।
रम्यं भावनं चैव वेणुमद्दे समन्ततः॥")
रमणः, पुं, (रमते रमयतीति वा। रम्+ल्युट्। वा+ल्युः।) पतिः। (यथा, कुमारे। ४। २१।
"वचनीयमिदं व्यवस्थितं
रमण! त्वामनुयामि यद्यपि॥"
रमयति स्त्रीपुरुषयोर्मनःकरणमिति। रम्+णिच्+ल्युः।) कामदेवः। इति मेदिनी। णे, ७२॥ गर्दभः। इति हेमचन्द्रः। ३। १८१॥ वृषभः। इति शब्दचन्द्रिका॥ महादेवः। इति राजनिर्घण्टः॥ (धरवसुपुत्रभागमन्यतमः। यथा, भाग्वते। ५। २४।
"कल्याङ्गिन्यां ततः प्राणो रमणः शिशिरोऽपि च
मनोहरा धरात् पुत्रानवापाथ हरेः सुता॥"
रमणीये त्रि। यथा, भागवते। ४। ६। १०।
"रमणं विहरन्तीनां रमणैः सिद्धयोषिताम्॥")
रमणकं, क्ली, (रमन्ते लोका अत्र। रम्+ल्युट्। संज्ञायां कन्।) जम्बुद्वीपान्तर्गतवर्षविशेषः। स तु रम्यकवर्षः। यथा,—
"एवमेवोत्तरे भागे वर्षाणि च तपोधन।
कुरुवर्षं सिन्धुकूलात् प्रह्लवानवधिः स्मृतः॥
हिरण्मयं ततो वर्षं शृङ्गावधि निगद्यते।
रम्यकञ्च ततो वर्षं नीलस्यावधिः स्मृतः॥"
अपि च।
श्रीभ उवाच।
"दक्षिणेन तु श्वेतस्य निषधस्योत्तरेण तु।
वर्षं रमणकं नाम जायन्ते तत्र मानवाः॥
शुक्लाभिजनसम्पन्नाः सर्वे सुप्रियदर्शनाः।
दशवर्षसहस्राणि शतानि दश पञ्च च।
जीवन्ति ते महाभाग निर्यं मुदितमानसाः॥"
इति पाद्मे भूखण्डे १२८। २२६ अध्यायौ॥
(अन्यत् रम्यकशब्दे द्रष्टव्यम्। वैतिहोत्रस्य पुत्रभेदः। यथा, भागवते। ५। २०। ३१।
"तद्वीपस्याधिपतिः प्रियव्रतो वैतिहोत्रो नाम तस्यात्मजौ रमणकधातकनामानौ वर्षपती नियुज्य स्वयं पूर्वजवद्भगवत्कर्मशील एवास्ते॥")
रमणा, स्त्री, रमणी। इत्यमरटीका॥ (पीठस्य शक्तिविशेषः। यथा, देवीभागवते। ७।३०।४७।
"रमणा रामतीर्थे तु वसुनायां त्रिगावती॥")
रमणी, स्त्री, (रमतेऽस्यामिति। रम्+ल्युट्। ङीप्।) नारी। इति मेदिनी। णे, ७२॥ उत्तरदेशीविशेषः। या वपुर्गुणोपचारेण सौभाग्येन कान्तं रमयति सा। इत्यमरभरतौ। (यथा, कथासरित्सागरे। ५२। २१४॥
"रथेन रमणीयुक्तः प्रजानां दत्तकौतुकः॥")
बालास्त्रदत्तः। यथा,—
"बाला च रमणी रामा वन्द्या कामकलापि च॥"
इति शब्दचन्द्रिका॥
रमणीय त्रि, (रम्+अनीयर्।) सुन्दरम्। इत्यमरटीका। (यथा, गीतगोविन्दे। १। ११।
"वितरति दिक्षु रणे दिक्पतिकमनीयम्
दशमुखमौलिबलिं रमणीयम्॥")
रमणीय, त्रि, (रम्+"ह्रस्वोच।" उणा० ३। १०१। इति अनीयप्रत्ययः। रमणीयम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥)
रमतिः, पुं, (रमतेऽस्मिन् इति। रम्+"रमेर्मितिः।" उणा० ४। ६३। इति अतिप्रत्ययः। णिच्।) नायकः। स्वर्गः। इति मेदिनी। ते, १४३॥ काकः। इति शब्दरत्नावली॥ कामः। कामदेवः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
रमा, स्त्री, (रमयतीति। रम्+णिच्+अच्। टाप् च।) लक्ष्मीः। इति मेदिनी। मे, २५॥ (यथा, भागवते। ३। ६। २३।
"एष प्रसन्नवरदो रमयात्मशक्त्या
यदूयत्र करिष्यति यदीतगुणावतारः॥"
यथा च।
"रमा यत्र नवाक् तत्र यत्र वाक् तत्र नो रमा।
ते यत्र विनयो नास्ति सा च सा च न च
त्वयि॥"
रघुभटः॥)
शृङ्गिध्वजराजकन्या। सा कल्किदेवेन विवाहिता। यथा,—
"ततः शृङ्गिध्वजो राजा युद्धादाकृष्य पुत्रकान्।
सुशान्तायां मतिं कृत्वा रमां प्रादात् च कल्कये॥"
इति कल्किपुराणे २५ अध्यायः॥
शोभा। इति राजनिर्घण्टः। (गङ्गा। यथा, काशीखण्डे। २६। १४५।
"रेवती रतिर्जह्नुजा रम्भगर्भा रमा रतिः॥"
रमाधवः, पुं, (रमाया लक्ष्म्या धवः पतिरिति।) श्रीकृष्णः। यथा। रमाधवः पूर्णो माधवत्वात्। इत्यवयवग्रन्थे जगदीशः॥
रमानाथः, पुं, श्रीकृष्णः। रमा लक्ष्मीस्तस्या नाथः स्वामी। इति षष्ठीतत्पुरुषसमासनिष्पन्नः॥
रमापतिः, पुं, (रमायाः पतिः।) श्रीकृष्णः। यथा, सुग्धबोधव्याकरणे।
"सुकुन्दस्यासितमिदमिदं यातं रमापतेः।
शुक्लमेतदनन्तस्येत्युपुर्गोप्यो दिदृक्षवः॥"
(यथा च देवीभागवते। १। ५। ८।
"दत्त्वा भारं धनुष्कोट्यां निराभाय रमापतिः॥")
रमाप्रियं, क्ली, (रमायाः प्रियम्।) पद्मम्। इति शब्दचन्द्रिका॥
रमावेदः, पुं, (रमया वेद्यतेऽसौ। वेद्+घञ्।) श्रीवासः। इति राजनिर्घण्टः॥
रमिता, त्रि, (रम्+णिच्+क्त। टाप्।) रतिप्रापिता। यथा,—
"त्वरितगतिर्व्रजयुवतिस्तरङ्गितसुताविपिनगता।
सुरपिपुणा रतिगुरुणा परिरमिता प्रमद
मिता॥"
इति छन्दोमञ्जरी।
"व्रजयुवतिगोपवधूः सुरपिपुणा श्रीकृष्णेन परिरमिता सती प्रमदं हर्षं इता गता। किम्भूता। त्वरितगतिः त्वरिता शीघ्रा गतिर्यस्याः सा तथा। पुनः किम्भूता तरङ्गितसुताविपिनगता यमुनासम्बन्धिवनमुपागता। किम्भूतेन रतिगुरुणा रतौ शृङ्गारे गुरुणा उपाध्यायेन। अयमभिप्रायः। स्वयं रतिकुशलो नायिकाश्च रतिमध्यापयति।" इति तट्टीका॥
रमेश्वरः, पुं, (रमाया लक्ष्म्या ईश्वरः पतिर्नियन्ता वा।) विष्णुः। यथा,—
"श्रीराम राघव रमेश्वर रावणारे
भूतेश मन्मथरिपो प्रमथाधिनाथ।
चाणूरमर्दन हृषीकपतेऽसुरारे
त्राह्या भटा य इति सन्ततमामनन्ति॥"
इति काशीखण्डे हरिहरस्तोत्रम्॥
रम्भः, पुं, (रम्भते रागमङ्गेनादिकमनेनेति। रभि+कर्मणि घञ्।) वेणुः। (रम्भते उद्यमशीलो भवति निरन्तरसुदरभरणायेति भावः। रभि+अच्।) वानरविशेषः। इति मेदिनी। भे, ७॥ महिषासुरपिता। यथा,—
श्रीऔर्व्य उवाच।
"आराधितो महादेवो रम्भेण सुरवैरिणा।
चिरेण स च सुप्रीतस्तपसा तस्य शङ्करः॥
अथ तुष्टो महादेवः प्रत्यक्षं रम्भमब्रवीत्।
प्रीतोऽस्मि ते वरं रम्भ वरयस्व यथेप्सितम्॥
एवमुक्तः प्रत्युवाच रम्भस्तं चन्द्रशेखरम्।
अपुत्रोऽहं महादेव यदि ते मय्यनुग्रहः॥
मम जन्मन्यये पुत्रो भवान् भवतु शङ्कर।
एवमुक्तस्तु देवेन प्रत्युवाच हसन्निव॥
भवत्येतदभिप्रेतं ते भविष्यामि सुतस्तव।
इत्युक्त्वा स महादेवस्तत्रैवान्तरधीयत॥
रम्भोऽपि यातः स्वस्थानं हर्षोत्फुल्लविलोचनः।
पथि गच्छन् स रम्भोऽथ ददर्शे महिषीं
शुभाम्॥
त्रिहायणीं त्रिवयसां सुन्दरीं ऋतुगामिनीम्।
स तां दृष्ट्वाथ महिषीं रम्भः कामेन मोहितः॥
होर्भां गृहीत्वा च तदा चकार सुरतोत्सवम्।
तयोः प्रवृत्ते सुरते सा तदा तस्य तेजसा॥
दधार महिषी गर्भं तदाभून्महिषासुरः॥"
इति कालिकापुराणे ५६ अध्यायः॥
(असौ एव जन्मान्तरे रक्तबीजो जातः। एतद्विवरणं यथा, देवीभागवते। ५।२।१७-४६।
व्यास उवाच।
"दनोः पुत्रौ महाराज! विख्यातौ क्षितिमण्डले।
रम्भश्चैव करम्भश्च द्वावास्तां दानवोत्तमौ॥
तावपुत्रौ महाराज! पुत्रार्थं तेपतुस्तपः।
बहून् वर्षगणान् कामं पुण्ये पञ्चनदे जले॥
करम्भस्तु जले मग्नश्चकार परमं तपः।
दृष्ट्वं रसातलवटं प्राप्य स रम्भोऽग्निमसेवत।
पञ्चाग्निसाधनासक्तः स रम्भस्तु यदाभवत्।
ज्ञात्वा शचीपतिर्दुःखमुदपयौ दानवौ प्रति॥

गत्वा पञ्चशरे तत्र व्याहरूपं चकार ह।
वासवस्तु करम्भस्तं तदा जग्राह पादयोः॥
निजघान च तं दुष्टं करम्भं दृढमुष्टिना॥
भ्रातरं निहतं श्रुत्वा रम्भः कोपं परञ्जगत्॥
स्वशीर्षं पावके होतुमैच्छच्छित्वा करेण ह।
केशपाशे गृहीत्वास्य वामेन क्रोधसंयुतः॥
दक्षिणेन करेणोग्रं गृहीत्वा खड्गमुत्तमम्।
छिनत्ति शीर्षं तत्तावद्वह्निना प्रतिबोधितः॥
उत्तस्थौ देव मूर्खोऽसि स्वशीर्षं हेतुमिच्छसि।
आत्महत्यातिदुःसाध्या कथं त्वं कर्तुमुद्यतः॥
वरं वरय भद्रं ते यस्ते मनसि वर्त्तते।
मा म्रियस्व मृतेनाद्य किन्ते कार्यं भविष्यति॥

व्यास उवाच।

तच्छ्रुत्वा वचनं रम्भः पावकस्य सुभाषितम्।
ततोऽब्रवीद्वह्निं रम्भस्तदा केशग्रहापकम्॥
यदि तुष्टोऽसि देवेश! देहि मे वाञ्छितं वरम्।
त्रैलोक्यविजयी पुत्रः स्यान्मे परबलार्दनः॥
अजेयः सर्व्वथा स स्याद्देवदानवमानवैः।
कामरूपी महावीर्यः सर्व्वलोकाभिवन्दितः॥
पावकस्तं तथेत्याह भविष्यति तवेप्सितम्।
पुत्रस्तव महाभाग! मरुद्वह्निरधुना॥
यस्यां चित्तं तु रम्भ! त्वं प्रमदायां करिष्यसि।

व्यास उवाच।

तस्यां पुत्रो महाभाग! भविष्यति बलाधिकः॥
इत्युक्तो वह्निना रम्भो वचनं चित्तरञ्जनम्।
श्रुत्वा प्रणम्य प्रययौ वह्निं तं दानवोत्तमः॥
यत्रैः परिवृतं स्थानं रमणीयं श्रियान्वितम्।
दृष्ट्वा चक्रे तदा भावं महिष्यां दानवोत्तमः॥
मत्तायां रूपपूर्णायां विलासिन्यां च योषितम्।
सा समागात्य तरसा कामयन्ती सुदान्विता॥
रम्भोऽपि गमनं चक्रे भवितव्यप्रबोधितः।
सा तु गर्भवती जाता महिषी तस्य वीर्य्यतः॥
तां गृहीत्वाथ यातालं प्रविवेश मनोहरम्।
महिषैश्चरतां रत्नैः प्रियामनुमतां किल॥
कदाचित् महिषश्चान्यः कामार्त्तस्तासुपाद्रवत्।
खड्गमाकृष्य तं हन्तुं दानवः समुपाद्रवत्॥
स्वरक्षार्थं समागत्य महिषं समताडयत्।
सोऽपि तं निजघानाशु शृङ्गाभ्यां काममोहितः॥
ताडितस्तेन तीक्ष्णाभ्यां शृङ्गाभ्यां हृदये भृशम्।
भूमौ पपात तरसा ममार च विमूर्च्छितः॥
मृते भर्त्तरि सा दीना भयार्त्ता विह्वला भृशम्।
सा वेगात्तं वटं प्राप्य यत्राद्यां शरणं गता॥
एतस्मिन् गतस्तत्र महिषः कामपीडितः।
कामयानस्तु तां कामी बलवीर्यमदोद्धतः॥
रुदती सा भृशं दीना दृष्ट्वा यत्नैर्भयातुरा।
शापमाशु तं वीक्ष्य यत्नाच्छातुं समाययुः॥
युद्धं समभवद्घोरं यत्नानां च हयारिणा।
शूरेण ताडितस्तूर्णं पपात धरणीतले॥
मृतं रम्भं समानीय यत्नास्ते परमं प्रियम्।
चितायां रोपयामासुस्तस्य देहस्य शुद्धये॥
महिषी सा पतिं दृष्ट्वा चितायां रोपितं तदा।
प्रवेष्टुं सा मतिं चक्रे पतिना सह पावकम्॥

वार्य्यमाणापि यत्नैः सा प्रविवेश हुताशनम्।
ज्वालामालाकुलं साध्वी पतिमादाय वल्लभम्॥
महिषस्तु चितामध्यात् समुत्तस्थौ महाबलः।
रम्भोऽप्यनुहृषु! श्रुत्वा निःसृतः पुत्रवत्सलः॥
रक्तबीजोऽप्यसौ जातो महिषोऽपि महाबलः।
अभिषिक्तस्तु राज्येऽसौ हयारिरसुरोत्तमैः॥
एवं स महिषो जातो रक्तबीजश्च वीर्य्यवान्।
अवध्यस्तु सुरैर्दैत्यैर्मानवैश्च नृपोत्तम!॥")

रम्भा, स्त्री, (रभि+अच्। टाप्।) कदली। (यथा, नैषधे। २। ३७।
"तरुरम्भयुगेन सुन्दरी
किमु रम्भां परिवाहिना परम्॥")
अप्सरोविशेषः। इति मेदिनी। मे, ७। (यथा, महाभारते। १। ६५। ५०।
"अरम्भा रचिता चैव रम्भा तद्वन्मनोरमा॥")
गौरी। इति शब्दरत्नावली। (सा तु पौराणिकस्य शुम्भस्य भ्रातृभार्य्यातत्तया। यथा, देवीभागवते। ७। ३०। ५८।
"गौरी प्रोक्ता कान्यकुब्जे रम्भा कु मलया-चले॥")
गोधनिः। इति हेमचन्द्रः। ६। ४२। वेश्या। इति धरणिः॥

रम्भाव्रतीया, स्त्री, (रम्भाख्या व्रतीया।) व्रतविशेषकालः। यथा,—
ब्रह्मोवाच।
"रम्भाव्रतीयां वक्ष्ये च सौभाग्यश्रीसुताप्रियाम्।
मार्गशीर्षे सिते पक्षे व्रतीयायामुपोषितः॥
गौरीं यजेद्विल्वपत्रैः कुशोदकैः करम्भकैः।
कदम्बादो गिरिसुतां पौषे मरुवकैर्यजेत्॥
कर्पूरादः शुभ्ररदो मल्लिकादन्तकाष्ठवत्।
माघे सुभद्रां कङ्कारेर्धृतात्मो मल्लकप्रदः॥
गौतीमयं दन्तकाष्ठं फाल्गुने गोमतीं यजेत्।
कुन्दैः कृत्वा दन्तकाष्ठं जीवाढ्यः सल्लकीप्रदः॥
विभ्राजार्चीं दमनकैश्चैत्रे काशारचंप्रदः।
दधिप्राश्यो दन्तकाष्ठं तगरं श्रीसुतीं यजेत्॥
वैशाखे कर्बिकारैश्च अशोकाढ्यो वटप्रदः।
ज्येष्ठे नारायणीमर्च्चेत्कदम्बैश्च सलक्षदः॥
नवक्षाढ्यश्च तन्मादं आषाढे माधवीं यजेत्।
तिलाढ्यो बिल्वपत्रैश्च चीराम्रवटकप्रदः॥
औदुम्बरं दन्तकाष्ठं तगर्या; श्रावणे श्रियम्।
दन्तकाष्ठं खदिराढ्यः क्षीरदो द्युतमां यजेत्॥
पद्मैर्यजेत् भाद्रपदे शङ्खोदाढ्यो गुणाब्दिदः।
राजपुत्रीपलाशयुजे जवापुष्पैश्च जीवकम्॥
प्राग्यवैर्निग्नि नैवेद्यैः शुभ्ररैः कार्त्तिके यजेत्।
जातिपुष्पैः पद्मजाढ्यः पद्मजाढ्यो यजेत्॥
इक्षोदनश्च वर्षान्ते सपत्नीकान् द्विजान् यजेत्।
उमामहेश्वरं स्वार्च्चे लवणे तु गुडे स्थितम्॥
वस्त्रच्छत्रसुवर्णाद्यैः रात्रौ च कृतजागरः।
गीतवाद्यैर्दहेत् प्रातर्गवाद्यं सर्व्वमाप्नुयात्॥"
इति गारुडे १२० अध्यायः॥ *॥
अपि च। "अथ तृतीया। सा चतुर्थीयुता रम्भाव्रतेतरदैवकर्म्मसु शस्ता।

'रम्भाख्यां वक्ष्यमिश्रितां तु तृतीयां मुनिसत्तम।
अन्येषु सर्व्वकार्य्येषु गौरयुक्ता प्रशस्यते॥'
इति ब्रह्मवैवर्त्तात्॥
ततश्च युग्मवाक्यं रम्भाव्रतपरम्। भविष्योत्तरे।
'कुरुष्व भद्रे यत्नेन रम्भाख्यं व्रतमुत्तमम्।
ज्येष्ठे शुक्लतृतीयायां स्नातनियमतत्परा॥'
रम्भाख्यमिति रम्भया कृतमिति रम्भाव्रतम्।"
इति तिथ्यादितत्त्वम्॥

रम्भोरूः, स्त्री, रम्भे इव ऊरू यस्याः सा। इति व्याकरणम्॥ (यथा, रघौ। ६। ३५।
"अनेन यूना सह पार्थिवेन
रम्भोरु! कच्चिन्मनसो रुचिस्ते॥")

रम्यं, क्ली, (रम+"पोरदुपधात् यत्।" ३। १। ९८। इति यत्।) पटोलमूलम्। इति मेदिनी॥ प्रधानधातु। इति जटाधरः॥

रम्यः, पुं, (रम्यते अनेनेति। रम+यत्।) चम्पकवृक्षः। इति मेदिनी॥ वकवृक्षः। इति शब्दचन्द्रिका॥

रम्यः, त्रि, (रम+यत्।) मनोज्ञः। इति मेदिनी॥ (यथा, मनौ। ७। ६६।
"रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत्॥")
बलकरः। इति जटाधरः॥

रम्यकं, क्ली, (रम्यते जनोऽत्रेति। रम्+यत्। ततः कप् संज्ञायां कन् वा।) वर्षविशेषः। इति जटाधरः॥ एतस्य विवरणं यथा,—
"दक्षिणेन तु मेरोस्तु श्वेतस्य चोत्तरेण च।
वायव्यं रम्यकं नाम जायन्ते तत्र मानवाः॥
मतिप्रधाना विमला अरादुर्गविवर्जिताः।
तत्रापि सुमहान् वृक्षो न्यग्रोधो रोहितः स्मृतः।
तत्फलप्राशनादेव जीवन्ति बहुवासरम्॥"
इति वराहपुराणे रुद्रगीतानामाध्यायः॥
(तथाच देवीभागवते। ८। ६। १८—२१।
"रम्यके नाम वर्षे च मूर्त्तिं भगवतः पराम्।
मात्स्यां देवासुरैर्नम्यां मनुः स्तौति निरन्तरम्॥

मनुरुवाच।

ॐ नमो मुख्यतमाय नमः सत्त्वाय प्राबाह्यौजसे बलाय महामीत्याय नमः।
अन्तर्बहिश्चाखिललोकपालके-रदृश्यरूपो विचरस्युरुस्वनः।
स ईश्वरस्त्वं स इदं वशे नय-न्माया यथा दारुमयौ नरः स्त्रियम्॥
यं लोकपालाः किल मत्सरोत्थरा हित्वा यतन्तोऽपि पृथक् समेत्य च।
पातुं न शेकुर्हिपदचतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते॥
भवान् युगान्तार्णव ऊर्म्मिमालिनि चौर्वीमिमामोषधिबीरुधां निधिम्।
मया सहोरुक्रमतेऽज ओजसा तस्मै जगत्प्राणगात्मने नमः॥
एवं स्तौति च देवेशं मनुः पार्थिवसत्तमः।
मत्स्यावतारं देवेशं संयुवच्छेदकारकम्॥

ध्यानयोगेन देवस्य निर्धूताघेषकल्मषः।
आस्ते परिचरन् भक्त्या महाभागवतोत्तमः॥"
तथाच मात्स्ये। ११२। ६०॥ वैष्णवे। २।२।१३॥
ब्रह्माण्डे च। ६। १। ७॥ द्रष्टव्यम्॥) पटोल-
मूलम्। इति चिकित्साघेषः॥ (यथा, सुश्रुते।
१। २६ अध्याये।
"कम्पिल्लकरम्यकपाटलापूगहरीतकीत्रायदयः॥"
पुं, त्रयाणामपुत्राणामेषः। एतन्नामासुरारेरेव रम्यक-
वर्षोऽभवत्। यथा, भागवते। ५। २। १६।
"तस्यासुत्र वा आत्मजान् स राजवर्य आत्मीयो
नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मय-
कुरुभद्राश्वकेतुमालसंज्ञान् नवपुत्रानजनयत्॥")
रम्यपुष्पः, पुं, (रम्यं दर्शनीयं पुष्पमस्य।)
ग्राम्यलिङ्गः। इति राजनिर्घण्टः। (ग्राम्यलि-
ङ्गस्य गुणादयो ग्रेया।)
रम्यफलः, पुं, (रम्यं फलमस्य।) कारस्करवृक्षः।
इति राजनिर्घण्टः॥
रम्या, स्त्री, (रमतेऽस्यामिति। रम+"घोर-
डुपधात् यत्।" ३। १। ६८। इति यत्।
टाप् च।) रात्रिः। इति मेदिनी॥ स्थल-
पद्मिनी। इति राजनिर्घण्टः॥ (गङ्गा।
यथा, काशीखण्डे तत्सहस्रनामकीर्त्तने। २६।
१४५।
"रेवती रतिर्लक्ष्मीश्च रत्नगर्भा रमा रतिः॥")
रम्रः, पुं, (रम+ग्रकादित्वात् रः।) अश्ववर्त्मः।
ग्रोभा। इत्युणादिकोषः। २। २३८॥
रय, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-
सक०-सेट्।) ङ, रयते। इति दुर्गादासः॥
रयः, पुं, (रयते अनेनेति। रय+"पुंसि संज्ञायां
घः प्रायेण।" ३। ३। ११८। इति घः। रीङा-
त्मनेनेति वा। रीं गतौ+वप्रत्ययेन साधुरिति।)
वेगः। इत्यमरः। १।१।६७॥ प्रवाहः। यथा,—
"प्रवाहः पुनरोघः स्यादेको धारा रयश्च सः॥"
इति हेमचन्द्रः॥
(यथा, महाभारते। २। १७। ६।
"कथमम्भो न गच्छेम द्रुतस्रोत नदीरयाः॥"
पुरूरवसः पुत्रभेदः। यथा, भागवते। ६। १५। १।
"ऐलस्य चोर्व्वश्यगर्भात् षडासन्नात्मजा नृप।
आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः॥")
ररार्टी, स्त्री, (ललाट+रलयोरैक्यात् लस्य रत्वम्।
ततो ङीप्।) ललाटः। इति पुरुषम्॥ (यथा,
भागवते। २। १। २८।
"तपो ररार्टी विदुरादिपुंसः
सत्त्वन्तु भौर्वाणि सहस्रवीर्य्यः॥")
रलकः, पुं, ("रमन्तं रतु क्रियानुबन्धिकोऽपि
रतु इच्छा तां लाति कः रलसतः स्वार्थे
कन्।" इत्यमरटीकायां रघुनाथचक्रवर्त्ती।)
कम्बलः। इत्यमरः॥ पद्मम्। इति मुक्तिः॥
न्यगविशेषः। इति मुकुटः॥
रव, ङ शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-
सक०-सेट्।) ङ, रवति। इति दुर्गा-
दासः॥

रवः, पुं, (रूयते इति। रु ध्वनौ+भावे अप्।)
शब्दः। इत्यमरः॥ (यथा, रघुः। ६। ५४।
धनुरधिज्यमनाधिरुपारुहे
नरवरो रवरोषितकेशरी॥")
रवकं, क्ली, (रौतीति। रु+युच्।) कांस्यम्।
इति हेमचन्द्रः॥ (रु+भावे खुट्।) रवश्च॥
रवकः, पुं, (रौतीति। रु+"सुयुरुटृनो युच्।"
उणा० २। ७४। इति युच्।) उष्ट्रः। इति
हेमचन्द्रः॥ (यथा, माघे। १२। ६।
"उत्पातुमिच्छून् विधृतः पुरोबला-
न्निधीयमाने भरभाजि यन्त्रके।
अहोर्जुभितोद्धारविभक्तरेखरः
खनाम निम्बे रवकः स्फुटार्थताम्॥")
कोकिलः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
रवकः, त्रि, (रु+युच्।) शब्दनः। तीक्ष्णः।
भक्षकः। चञ्चलः। इति शब्दरत्नावली॥
रवथः, पुं, (रु+"ग्रीङ्शुरिगमिवधिजीवि-
प्राधिभ्योऽथः।" उणा० १। ११३। इति
अथप्रत्ययः।) कोकिलः। इत्युणादिकोषः॥
रविः, पुं, (रूयते स्तूयते इति। रु+"अच इः।"
उणा० ४। १३८। इति इः।) सूर्य्यः। अर्क-
वृक्षः। इत्यमरः॥ सूर्य्यस्य भोग्यं दिनं वार-
रूपम्। यथा,—
"रवौ वर्च्चो चतुः पञ्च सोमे सप्त द्वयं तथा॥"
इत्यादिवारवेलाकथने समयप्रदीपः॥
तत्र निषिद्धानि यथा,—
"माषमामिषमांसञ्च मसूरं निम्बपञ्चकम्।
भक्षयेद्यो रवेर्व्वारे सप्तजन्मन्यपुत्रकः॥
आर्द्रकं मधु मांसञ्च भक्षयेद्यो रवेर्दिने।
सप्तजन्म भवेद्रोगी जन्म जन्म दरिद्रता॥
निम्बं मांसं मसूरञ्च विल्वकाञ्जिकमार्द्रकम्।
भक्षयेद्यो रवेर्व्वारे सप्तजन्मन्यपुत्रकः॥"
इति कर्म्मलोचनम्॥ *॥
रविग्रहस्य रक्तग्रामभिन्नितवर्णः। अयं
पूर्व्वदिक्पुरुषक्षत्रियजातिसत्त्वगुणकटुरसेसिंह-
राशिग्रहलग्नचक्रसप्तमीतिथितास्त्रकलिङ्गदेशा-
नामधिपतिः। काश्यपगोत्रः। द्वादशाङ्गुल-
शरीरः। पद्महस्तद्वयः। पूर्व्वाननः। सप्तास्व-
वाहनः। शिवाधिदेवतः। रुद्रिप्रत्यधिदेवतश्च।
इति यवनमतसारादयः॥ अस्य धातुपत्तिर्यथा,
"अवतीर्य्याम्बरो लोकांस्तमात् सूर्य्यः परि-
भ्रमात्।
अचिरात्तु प्रकाशेत अवनात् स रविः स्मृतः॥"
इति मात्स्ये २०१ अध्यायः॥ *॥
अस्य भार्य्यापत्यानि यथा,—
"मरीचेः कश्यपो जज्ञे तस्माच्चन्द्रे विभावसुः।
तस्य भार्य्याभवत् संज्ञा पुत्री त्वष्टुः प्रजापतेः॥
त्रीण्यपत्यानि राजेन्द्र! संज्ञायां महतां
निधिः
आदित्यो जनयामास कन्यामेकां सुलोचनाम्।
वैवस्वतं मनुञ्चैव यमञ्च यमुनां ततः॥
नातितेजोमयं रूपं सोढुं भर्त्तुं विवस्वतः।

मायामयीं ततश्छायां सवर्णां निर्ममे सतः॥
संज्ञोवाच ततश्छायां सवर्णे श्रूयतां मे वचः।
अहं यास्यामि सदनं पितुर्नित्यं पुनश्च मे।
भवने वस कल्याणि! निर्विशङ्कं ममाज्ञया॥
मनुरेष यमावेतौ यमुनायमसंज्ञकौ।
स्वापत्यदृष्ट्या द्रष्टव्यमेतद्वालचयं त्वया॥
न वक्तव्यमिदं वृत्तं त्वया पत्यौ कदाचन।
इत्याकर्ण्यांथ सा त्वष्टुर्दी देवी छाया जगाद
ताम्॥
आकर्षयद्दृशामाहमाज्ञापार्श्वे कदाचन।
आख्यास्यामि चरिष्यते याहि देवि! यथासुखम्॥
इति च्छायां गृहे स्थाप्य संज्ञागात् पितुरालयम्।
उवाच पितरं देवी जामातुस्तव न क्षमा॥
तेजः सोढुमहं तात! काश्यपस्य महात्मनः।
तन्निशम्य चुकोपासौ भर्तृसयामास कन्यकाम्॥
मह्यं श्रेयः कथं वा स्यादिति सा परिचिन्त्य च।
अगच्छद्वडवा भूत्वा चरन्ती चोत्तरान् कुरून्॥
तपस्तेपे च सा तीव्रं पतिमाराध्य चेतसि।
मन्यमानोऽथ तां संज्ञां सवर्णायां तथा रविः॥
सावर्णिं जनयामास मनुश्रेष्ठं महीपते।
शनैश्चरं द्वितीयञ्च सुतां भद्रां त्रयीमिकाम्॥
सवर्णा स्वेष्वपत्येषु सापत्न्यात् स्त्रीस्वभावतः।
चकाराप्यधिकं स्नेहं न तथा पूर्व्वजेष्वहो॥
चिरमालोक्य तां भार्य्यां उवाच सविता वचः।
अयि भाविनि बालेषु समेष्वपि कृतत्वया॥
विधीयतेऽधिकः स्नेहः सावर्ण्यादिसुतान् प्रति।
याचयन्ते तदा साथ भाषते परिपृच्छते॥
ततः ससुदते ग्रस्तुं छाया सर्व्वं ग्रसंश्च ह।
यथा वृत्तं तथा तथ्यं तुतोष भगवान् रविः॥
निरागसं न ग्रग्राप जगाम त्वरुरन्तिकम्।
त्वष्टापि च यथान्यायं सान्त्वयित्वाथ काश्यपम्।
निर्देग्धुकामं कोपेन प्राथर्यच्च सुदा तदा॥
त्वष्टोवाच।
तवातितेजसो भीता प्राप्तोत्तरकुरून् वने।
वडवारूपमास्थाय संज्ञा चरति भादवे।
द्रष्टा हि तां भवानश्व स्वभार्य्यां तात मा दव॥
तच्छ्रुत्वाथ सविता गत्वोत्तरकुरूनथ।
स हरिर्हरिरूपेण सुखेन समताड्यत॥
स्मरमाणा च सवितुः परपूरुषमञ्जसा।
सा तन्निरवमत् ग्रक्र नासिकाभ्यां विवस्वतः।
देवौ तस्मादजायेतामश्विनौ भिषजां वरौ॥"
इति वाह्ये स्वर्गखण्डे ११ अध्यायः॥
(अन्यत् सूर्य्यशब्दे द्रष्टव्यम्।)
रविकान्तः, पुं, (रविश्चासौ रविकरसंयोगेन कान्तः
कमनीयः।) सूर्य्यकान्तमणिः। इति राज-
निर्घण्टः॥
रविचक्रं, क्ली, (रवेश्चक्रम्।) नराकारसूर्य्यचक्र-
विशेषः। यथा,—
"लिखते रविचक्रन्तु भास्करो नरसन्निभः॥
यस्मिन्मर्म्मणि भवेत् सूर्य्यस्तत्रादौ चोभि मस्तके।
अयं वक्त्रे प्रदातव्यमेकैकं स्कन्धयोर्न्यसेत्॥
एकैकं बाहुयुग्मे तु एकैकं हस्तयोर्न्यसेत्।

हृदये पञ्च ऋचानि एकं नाभौ प्रदापयेत् ।
ऋचमेकं ददेद्गुह्ये एकैकं जानुके न्यसेत् ।
नवर्चानि च शेषाणि रविपादे नियोजयेत् ।
चरुस्थेन ऋचेनैव अल्पायुर्जायते नरः ।
विदेशगमनं जानौ गुह्यरोगे परदारवान् ।
नाभिस्थेनाल्पसन्तुष्टो हृत्स्थेन स्वाम्यहेश्वरः ।
पार्श्वस्थेन भवेच्चौरः स्यात्सप्तो भवेद्रुजे ।
स्कन्धस्थिते धनपतिर्मुखे मिष्टान्नमाप्नुयात् ।
मस्तके पङ्क्तयस्तु नवर्चं स्यादृषि स्थितम् ॥"
इति गारुडे ६० अध्यायः ।

रविजः, पुं, (रवेर्जात इति । जन्+डः ।) शनैश्चरः । यथा, ज्योतिस्तत्त्वे ।
"उरगप्लुतभिवाङ्गात्तिमूलाद्विपूर्व्वा
रविरविजकुजादे भूतषष्ठीवयव्याम् ।"
(बहुवचने तु केतवः । यथा, बृहत्संहितायाम् । ११ । १० ।
"ग्रामपरदिशोर्द्धध्रा
वृषतिविरोधावहा रविजाः ।")

रवितनयः, पुं, (रवेः तनयः पुत्रः ।) सावर्णिकमनुः । यथा,—
"स बभूव महाभागः सावर्णिस्तनयो रवेः ।"
इति देवीमाहात्म्यम् ।

रैवतमनुः । अग्निः । (यथा, बृहत्संहितायाम् । ३७ । १२ ।
"परिवेषग्रसङ्गतो
रवितनयो सुप्रधान्यनाशकरः ।")
यमः । (सुग्रीवः । कर्णः । द्विवचने अश्विनीकुमारौ ।)

रविवन्दनः, पुं, (रवेर्नन्दनः । यद्वा, रविं नन्दयतीति । नन्दि+ल्युः ।) सुग्रीवः । इति त्रिकाण्डशेषः । सावर्णिमनुः । रैवतमनुः । (यथा, भागवते । ६ । १ । १६ ।
"होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनन्दनम् ।")
अग्निः । यमश्च । (द्विवचने अश्विनीकुमारौ ।)

रविवाद्यं, क्ली, (रविरेव वाद्योऽस्य ।) पद्मम् । वन्धूके, पुं । इति शब्दचन्द्रिका ।

रविपत्रः, पुं, (रविवत् दीप्तिमत्पत्रं यस्य ।) आदित्यपत्रक्षुपः । इति राजनिर्घण्टः ।

रविप्रियं, क्ली, (रविरेव प्रियमस्य ।) रक्तकमलम् । ताम्रम् । इति राजनिर्घण्टः । (अस्य पर्य्यायो यथा,—
"ताम्रमौदुम्बरं शुल्बसुदुम्बरमपि स्मृतम् ।
रविप्रियं रक्तपुष्पं सूर्य्यपर्य्यायनामकम् ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

रविप्रियः, पुं, (रवेः प्रियः ।) आदित्यपत्रः । रक्तकरवीरः । इति राजनिर्घण्टः । कङ्कुभः । इति शब्दमाला ।

रविरत्नकं, क्ली, (रवे रत्नम् । ततः कन् ।) माणिक्यम् । इति राजनिर्घण्टः ।

रविलोहं, क्ली, (रविप्रियं लोहम् ।) ताम्रम् । इति राजनिर्घण्टः । (गुणादयोऽस्य ताम्रशब्दे विज्ञेयाः ।)

रविलोचनः, पुं, (रविर्लोचनमस्य ।) विष्णुः । यथा,—
"रविर्विलोचनः सूर्य्यः सविता रविलोचनः ।"
इति तस्य सहस्रनामस्तोत्रम् ।

रविसंज्ञकं, क्ली, (रविः संज्ञा यस्य इति । कप् ।) ताम्रम् । इति शब्दचन्द्रिका ।

रविसुतः, पुं, (रवेः सुतः ।) सूर्य्यपुत्रः । स च शनैश्चरादिः । यथा,—
"नीलाञ्जनचयप्रख्यं रविसुतं महाग्रहम् ।
छायाया गर्भसंभूतं वन्दे भक्त्या शनैश्चरम् ।"
इति नवग्रहस्तोत्रम् ।

रवीन्दं, क्ली, (रविणा सूर्य्यकरसङ्गेन इन्दति प्रकाशते इति । इन्द+अच् ।) पद्मम् । इति धरणिः ।

रघ्र, स्त्रने । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-सेट् ।) रेफादिस्त्रासवान्तः । रघ्रणा । इति दुर्गादासः । सौत्रधातुरयम् ।

रघ्रणा, स्त्री, (अश्नुते व्याप्नोतीति । अशू व्याप्तौ+"अशेर्घ्रण च ।" उणा० २ । ७५ । इति घ्रण् धातोर्घ्रणादेशश्च ।) काची । इत्युणादिकोषः । (यथा, रघौ । ८ । ५८ ।
"इयमप्रतिबोधशायिनीं
रघ्रणा त्वां प्रथमा रहःसखी ।")
जिह्वा । इति शब्दरत्नावली । ("जिह्वावाची तु रघ्रणाशब्दो दन्त्यसकारवानेव । रसयति स्वादयतीति । नन्द्यादित्वात् ल्युः । इति कलिङ्गः । रसना काञ्चिनिङ्गयोरिति तु धरणिः ।" इत्युज्ज्वलः । २ । ७५ ॥ रज्जुः । यथा, वाजसनेयसंहितायाम् । २१ । ४६ ।
"होता यक्षदनक्षतिमभि हि प्रियतमया रभिष्टया रघ्रणयाधित ।" "रघ्रणया रज्ज्वा क्षत्वा अधित धृतवान् पशून् इति वेदः ।" इति तद्भाष्ये महीधरः । अङ्गुलयः । इति निघण्टुः ।२ ।५ । अत्र सदा बहुवचनप्रयोगो भवति । इति देवराजयज्वा ।)

रश्मिः, पुं, (अश्नुते व्याप्नोतीति । अशू व्याप्तौ+"अशेर्नित्" उणा० ४ । ६६ । इति मिः धातोर्रश्मादेशश्च ।) किरणः । (यथा, मनौ । ५ । १११ ।
"मक्षिका विप्रुषश्छाया गौरश्वः सूर्य्यरश्मयः ।
रजो भूम्यायुरग्निश्च सूर्ये मेध्यानि निर्दिशेत् ।")
पक्षी । अश्वरज्जुः । इति मेदिनी । ९ । (यथा, ऋग्वेदे । १ । २८ । ४ ।
"यच्च मन्यो विधन्वति रश्मीन् यामत वा इव ।"
"रश्मीन् अश्वबन्धनरज्जून् प्रयच्छान् ।" इति तद्भाष्ये सायणः ।) सूर्य्यस्य रश्मिना अकादानदाने यथा,—
"तेजोभिः सर्व्वलोकेभ्यो गृह्णाति रश्मिभिर्जलम् ।
सप्तद्वाङ्गायुसंयोगाद्वहत्यापो गभस्तयः ।
ततस्तु पयसां काले परिवर्त्तेद्विवाकरः ।
नियच्छत्यपो मेघेभ्यः शुक्लाशुक्लेषु रश्मिभिः ।"
इति मात्से १०२ अध्यायः । ९ ।

अपि च ।
"एवमेव महादेवो देवदेवः पितामहः ।
करोति नियतं कालं कालात्मा ह्यीश्वरो तनुः ।
तस्य ये रश्मयो विप्राः सर्व्वलोकप्रदीपकाः ।
तेषां श्रेष्ठा पुनः सप्त रश्मयो ग्रहयोनयः ।
सुसुम्नो हरिकेशश्च विश्वकर्म्मा तथैव च ।
विश्वश्रवाः पुनश्चान्यः सम्यद्वसुरतः परः ।
अर्व्वावसुरिति ख्यातः खराड्न्यः प्रकीर्त्तितः ।
सुसुम्नः सूर्य्यरश्मिस्तु पुष्णाति शशिरद्युतिम् ।
तिर्य्यगूर्द्धप्रचारोऽसौ सुसुम्नः परिगीयते ।
हरिकेशस्तु यः प्रोक्तो रश्मिर्नक्षत्रपोषकः ।
विश्वकर्म्मा तथा रश्मिर्बुधं पुष्णाति सर्व्वदा ।
विश्वश्रवास्तु यो रश्मिः शुक्रं पुष्णाति नित्यदा ।
सम्यद्वसुरिति ख्यातः स पुष्णाति च लोहितम् ।
बृहत्सातिं प्रपुष्णाति रश्मिरर्व्वावसुः प्रभोः ।
शनैश्चरं प्रपुष्णाति सप्तमश्च खराट् तथा ।
एवं सूर्य्यप्रभावेन सर्व्वा नक्षत्रतारकाः ।
वर्द्धन्ते वर्द्धिता नित्यं नित्यमाप्याययन्ति च ।
दिव्यानां पार्थिवानाञ्च नैष्ठानामेव सर्व्वशः ।
आदानान्नित्यमादित्यस्तेजसा तमसा प्रभुः ।
आदत्ते स तु नाड़ीनां सहस्रेण समन्ततः ।
नादेयांश्चैव सासुद्रान् कूपांश्चैव सहस्रकम् ।
स्थावरान् जङ्गमांश्चैव यच्च कुल्यादिकं पयः ।
तस्य रश्मिसहस्रन्तु प्रीतवर्षाण्यनिशम् ।
तासां चतुःशतं नाड्यो वर्षन्ते चित्ररूपिणः ।
छन्दनाश्चेति याताश्च कोलगा भक्षणास्तथा ।
अन्तता नामतः सर्व्वा रश्मयो हरिसञ्ज्ञिताः ।
हिमोहहाश्च तामस्यो रश्मयस्त्रिशतं पुनः ।
वप्रयो मेघ्यश्च पेय्यश्च ह्रादिन्यो हिमसञ्ज्ञिताः ।
चन्द्राख्या नामतः सर्व्वाः पीताभाः सुवर्णभस्यः ।
शुक्राश्च कक्षुभश्चैव गावो विश्वभृतस्तथा ।
शुक्राख्या नामतः सर्व्वास्त्रिविधा धर्म्मसञ्ज्ञिताः ।
सर्व्वं बिभर्त्ति ताभिः स मनुष्यपितृदेवताः ।
मनुष्यानोषधीर्नेह स्वधया च पितॄनपि ।
अन्नेन सुरान् सर्व्वानृतिसञ्ज्ञीस्तर्पयत्यसौ ।
वसन्ते ग्रीष्मके चैव ऋतैः सन्तर्पति त्रिभिः ।
शरदपि च वर्षासु चतुर्भिः संप्रवर्त्तते ।
हेमन्ते शिशिरे चैव हिमसृतृड्जति त्रिभिः ।
वहन्ती भावमासे तु सूर्य्यः पूषा तु फाल्गुने ।
चैत्रे मासि भवेदीशो धाता वैशाखतापनः ।
ज्येष्ठमूले भवेदिन्द्र आषाढ़े सविता रविः ।
विवस्वान् श्रावणे मासि द्यौष्पत्र्यो भग उच्यते ।
पर्य्यण्योऽश्वयुजि त्वष्टा कार्त्तिके मासि भास्करः ।
मार्गशीर्षे भवेन्मित्रः पौषे विष्णुः सनातनः ।
एष रश्मिसहस्राणि वरुणस्यार्कमण्डले ।
षड्भिः सहस्रैः पूषा तु देवेशः सप्तभिस्तथा ।
धाताऽष्टभिः सहस्रैस्तु नवभिस्तु ऋतक्रतुः ।
विवस्वान् दशभिः पाति पार्श्वैकादशभिर्भगः ।
सप्तभिस्तपते मित्रश्चतुरश्चैवाऽष्टभिस्तपेत् ।
अर्य्यमा दशभिः पाति पर्य्यण्यो नवभिस्तपेत् ।
षड्भी रश्मिसहस्रैस्तु विष्णुस्तपति विश्वधृक् ।
वसन्ते कपिलः सूर्य्यो ग्रीष्मे काञ्चनसप्रभः ।

ऋतौ वर्षासु वर्षेण पाकरः शरदि प्रभुः।
हेमन्ते तान्रवर्णः स्यात् शिशिरे लोहितो रविः॥
औषधीषु बलं धत्ते स्वधामपि पितृव्रथ।
कुर्योऽमरत्वमन्यत्वयं त्रिषु नियच्छति॥
अन्ये चार्कौ यहाः ज्ञेयाः कुर्ये चाधिष्ठिता दिशाः।
चन्द्रमाः सोमपुत्रश्च शुक्रश्चैव हरिष्यतिः॥
भौमो भानुसुता राहुः केतुमानपि चाष्टमः।
सर्वे ध्रुवे निरुद्धा ये यहास्ते वातरश्मिभिः।
भ्राम्यमाणा यथायोगं भ्रमन्त्यनुदिवाकरम्॥"
इति कौर्मे ४० अध्यायः॥

तद्वैदिकपर्य्यायः। खेदया १ किरणः २ गावः ३ रश्मयः ४ अभीशवः ५ दीधितयः ६ गभस्तयः ७ वनम् ८ उक्षाः ९ वसवः १० मरीचिपाः ११ मयूखाः १२ सप्तऋचयः १३ साध्याः १४ सुपर्णाः १५। इति पञ्चदश रश्मिनामानि। इति वेदनिघण्टौ। १५॥

रश्मिपतिः, पुं, (रश्मिः पतिः पोषको यस्य।) आदित्यपत्नुषः। इति राजनिर्घण्टः॥

रस, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) रसति। इति दुर्गादासः॥

रस, तृ क आस्वादे। खेदे। इति कविकल्पद्रुमः॥ (अदन्तपुरा०-पर०-सक०-सेट्।) दन्त्योपधः। रसयति मधु हिरेफः। इति दुर्गादासः॥

रसं, क्ली, बोधम्। इति राजनिर्घण्टः॥

रसः, पुं, (रसतीति। रस + पचाद्यच्। यद्वा, रस्यते इति। रस आस्वादने + "पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। इति घः।) रसनेन्द्रियग्राह्यवस्तु। स च कालसहावभूमिवियदनिलानलसंसर्गेण परिणामान्तरं गतः षट्प्रकारो भवति। तत्र पृथिव्यप्गुणबाहुल्यान्मधुरः १ तोयाग्निगुणबाहुल्यादम्लः २ पृथिव्यग्निगुण-बाहुल्याल्लवणः ३ वायुग्निगुणबाहुल्यात् कटुकः ४ वायुकाश्यगुणबाहुल्यात् तिक्तः ५ पृथिव्यनिलगुणबाहुल्यात् कषायः ६। आपो रसानामाधारकारणं अत आप्यो नाम। अपां पृथिव्यामनुप्रवेशात् पृथिव्याप्याधारकारणमेव। तेन जलस्थितौ अपि तदाधारतया रसानामभिव्यक्तौ कारणे। अभिव्यक्तेश्च मधुरादिरूपमन्तरेणासम्भवान्मधुरादिविशेषेऽपि जलस्थितौ कारणे। अम्लादयस्तु त्रयः नीरसतया मधुरादिविशेषे प्राधान्येन निमित्तकारणम्। तदतिरेकेणाम्लादिरसाभावात्। रसाभिव्यक्तेश्च अम्लादिभूतत्रयसन्निधानं विनानुपलब्धेरभिव्यक्तावपि अम्लादीनां कारणत्वम्। तदुक्तं चरके।

"रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा। निर्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः॥"
एते च रसाः परस्परसंयोगात् सप्तषष्ट्यादयश्च भवन्ति। इति चक्रपाणिदत्ततत्तत्प्रत्ययगुणोपरि शिवदासीयटीका॥ * ॥ (तथाच।

"भेदश्चेषां त्रिवृद्विविधविकल्पो द्रव्यदेशकालप्रभावात्तदुपदेश्यामः।
स्वादुरम्लादिभिर्योगं यैरेरम्लादयः पृथक्।
यानि पञ्चदशैतानि द्रव्याणि द्विरसानि तु॥
पृथग्म्लादियुक्तस्य योगः यैः पृथग्भवेत्।
मधुरस्य तथाम्लस्य लवणस्य कटोस्तथा।
त्रिरसानि यथासङ्ख्यं द्रव्याण्युक्तानि विंशतिः।
वक्ष्यन्ते तु चतुष्केण द्रव्याणि दश पञ्च च॥
स्वाद्वम्लौ सहितौ योगं लवणाद्यैः पृथग् गतौ योगैः यैश्च पृथग्यातस्त्रयुष्कं रससञ्ज्ञया॥
सहितौ स्वादुलवणौ तद्वत् कट्वादिभिः पृथक्।
युक्तौ यैः पृथग् योगं यातः स्वादूलवणौ तथा॥
कट्वाद्यैरम्ललवणौ संयुक्तौ सहितौ पृथक्।
यातः यैः पृथग्योगं यैरेरम्लकटू तथा॥
युज्यते तु कषायेण सतिक्तौ लवणोषणौ।
षट् तु पञ्च रसान्याहुरेकैकस्यापवर्जनात्॥
षट् चैवैकरसानि स्युरेकं षड्रसमेव तु।
इति त्रिवृद्विभेदाभ्यां निर्दिष्टा रससञ्ज्ञया॥
त्रिवृत्तिः स्यात्त्रसञ्ज्ञेया रसाश्रुरसकल्पनात्।
रसास्तरतमाभ्यस्ताः सङ्ग्रामतिपतन्ति हि॥
संयोगाः सप्तषष्ट्यादयस्तु कल्पना तु त्रिविधिधा।
रसानां तत्र योग्यत्वात् कल्पिता रसचिन्तकैः॥
क्वचिदेको रसः कल्प्यः संयुक्ताश्च रसाः क्वचित्।
दोषौषधादीन् सञ्चिन्त्य भिषजा सिद्धिमिच्छता॥"

परस्परात् प्रवक्ष्यन्ते रसानां षड्विभक्तयः।
षट्पञ्चभूतप्रभवाःसङ्ग्रातश्च यथा रसाः॥"
"सौम्याः खखाग्नीन्दुतरिक्षप्रभवाः प्रकृति शीता लघुश्च अयस्तरसाश्च ताक्ष्मान्तरिक्षादृक्षग्रमाणाश्चाष्ट पञ्च महाभूतगुणसमन्विता जङ्गमस्थावराणां भूतानां मूर्त्तीरभिप्रीणयन्ति यासु मूर्त्तिषु षड्भिरभ्यूर्च्छन्ति रसाः।

तेषां यस्यां रसायां सोमगुणातिरेकान्मधुरो रसः पृथिव्यग्निभूयिष्ठत्वादम्लः सलिलाग्निभूयिष्ठत्वाल्लवणो वायुग्निभूयिष्ठत्वात् कटुको वायुकाश्यातिरेकात्तिक्तः पवनपृथिव्यतिरेकात् कषायः। एवमेषां रसानां षट्त्वमुत्पन्नम्॥"
इति च चरके सूत्रस्थाने २६ अध्यायः॥
तथाच।

"दोषाणां पञ्चदशधा प्रसरोऽभिहितस्तु यः।
त्रिवृद्या रसभेदानां तंप्रयोजनमुच्यते॥
अविदग्धा विदग्धाश्च भिद्यन्ते ते त्रिधा त्रिधा।
रसभेदत्रिभिस्तु वीक्ष्य दोषावचारयेत्॥
एकैकेनागुगमनं भागशो यदुदीरितम्।
दोषाणां तत्र मतिमान् त्रिवृद्भिस्तु प्रयोजयेत्॥
यथाक्रमं प्रवृत्तानां हिकेह मधुरो रसः।
पश्चानुक्रमते योगान्नत्वारः एव च॥
चौषधानुगच्छति रसो लवणः कटुको द्वयम्।
तिक्तः कषायमन्वेति ते द्विका द्वय पञ्च च॥
तद्वयया। मधुराम्लः। मधुरलवणः। मधुरतिक्तः। मधुरकटुकः। मधुरकषायः। एते पञ्चानुक्रान्ता मधुरश्च। अम्ललवणः। अम्लकटुकः। अम्लतिक्तः। अम्लकषायः। एते चत्वारोऽनुक्रान्ता अम्लेन। लवणकटुकः। लवणतिक्तः। लवणकषायः। एते त्रयोऽनुक्रान्ता लवणेन। कटुतिक्तः। कटुकषायः। द्वावेतावनुक्रान्तौ कटुकेन। तिक्तकषाय एक एवानुक्रान्तस्तिक्तेन। एते पञ्चदशद्विकसंयोगा आख्याताद्विकं वक्ष्यामः॥

आदौ प्रयुज्यमानस्तु मधुरो दश गच्छति।
षड्रसो लवणस्त्रयादर्द्धलवकं रसः कटुः॥
मधुराम्ललवणः। मधुराम्लकटुकः। मधुराम्लतिक्तः। मधुराम्लकषायः। मधुरलवणकटुकः। मधुरलवणतिक्तः। मधुरलवणकषायः। मधुरकटुकतिक्तः। मधुरकटुकषायः। मधुरतिक्तकषायः। एवमेषां त्रिकसंयोगानां दशानामादौ मधुरः प्रयुज्यते। अम्ललवणकटुकः। अम्ललवणतिक्तः। अम्ललवणकषायः। अम्लकटुकषायः। अम्लकटुकतिक्तः। अम्लतिक्तकषायः। एवमेषां त्रयाणामादौ लवणः प्रयुज्यते। लवणकटुतिक्तः। लवणकटुकषायः। लवणतिक्तकषायः। एवमेषां त्रयाणामादौ लवणः प्रयुज्यते। कटुतिक्तकषायः। एवमेकस्यादौ कटुकः प्रयुज्यते॥
एवमेते त्रिकसंयोगविंशतिर्व्याख्याताः॥ चतुष्कान् वक्ष्यामः।

चतुष्करसयोगान्मधुरो दश गच्छति।
चतुरोऽम्लस्तु गच्छेच्च लवणस्त्रिकमेव तु॥
मधुराम्ललवणकटुकः। मधुराम्ललवणतिक्तः। मधुराम्ललवणकषायः। मधुराम्लकटुकतिक्तः। मधुराम्लकटुककषायः। मधुरलवणतिक्तकटुकः। मधुराम्लतिक्तकषायः। मधुरलवणकटुतिक्तः। मधुरलवणकटुकषायः। मधुरलवणतिक्तकषायः।
एवमेषां दशानामादौ मधुरः प्रयुज्यते॥
अम्ललवणकटुकतिक्तः। अम्ललवणकटुककषायः। अम्ललवणतिक्तकषायः। अम्लकटुतिक्तकषायः। एवमेषां चतुर्णामम्लः॥ लवणकटुतिक्तकषायः। एवमेकस्यादौ लवणः। एवमेते चतुष्करसंयोगाः पञ्चदशकीर्त्तिताः॥ पञ्चकान् वक्ष्यामः। पञ्चकान् पञ्चमधुर एकमश्नुते गच्छति।
मधुराम्ललवणकटुतिक्तः। मधुराम्ललवणकटुककषायः। मधुराम्ललवणतिक्तकषायः। मधुराम्लकटुतिक्तकषायः। मधुरलवणकटुतिक्तकषायः। एवमेषां पञ्चानां पञ्चकरसंयोगानामादौ मधुरः प्रयुज्यते। अम्ललवणकटुतिक्तकषायः। एवमेकस्यादावम्लः प्रयुज्यते।
एवमेते षट्पञ्चकसंयोगा आख्याताः॥ षट्कमेकं वक्ष्यामः। एकस्तुषट्कसंयोगः मधुराम्ललवणकटुकतिक्तकषायः। एवमयमेकषट्संयोगः॥
एकैकश्च बहुधा भवन्ति। मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति। भवति चात्र।
एषा त्रिवृद्व्याख्याता रसानां रसचिन्तकैः।
दोषभेदे त्रिवृत्तिस्तु प्रयोक्तव्या विचक्षणैः॥"
इत्युत्तरतन्त्रे सुश्रुतेन त्रिवृत्तिभेदाध्याय उक्तः॥
"रसास्तु प्रधानं कल्पादागमादागमो हि प्राक्-

मुच्यते ग्राह्ये हि रसा अधिक्षिप्ता यथा रसायत्त आहार इति तस्मिंश्च प्राणाः। उपदेशाद्योपदिश्यन्ते हि रसाः। यथा मधुराम्ललवणा वातं शमयन्ति। अनुमानाच्च रसेन अनुमीयते द्रव्यं यथा मधुरमिति। ऋषिवचनाच्च ऋषिवचनं वेदो यथा विधिविधिर्थं मधुरमाहरेदिति। तस्मादसाः प्रधानं रसेषु गुणसंज्ञा।" इति च सुश्रुते सूत्रस्थाने ४० अध्याये। यथा च, वाग्भटे १० अध्याये।

"आप्योऽग्निः आग्नेयः खवायुर्वायोरनिलः।
द्वयोरवनेः क्रमाज्जातैर्मधुराद्यैरसोद्भवः॥
तेषां विद्याद्रसं स्वादुं यो वक्त्रमनुलिम्पति।
आस्वाद्यमानो देहस्य ह्लादनोऽग्र्यप्रसादनः॥
प्रियः पिपीलिकादीनां अन्नः स्यालयते सुखम्।
हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचनः॥
लवणः स्यन्दयत्यास्यं कपोलगलदाहकृत्।
तिक्तो विशदयत्यास्यं रसनं प्रतिहन्ति च।
उद्वेजयति जिह्वाग्रं कुर्वन्निमिमिमिं कटुः॥
स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च।
कषायो जडयेज्जिह्वां कण्ठस्रोतो विबन्धकृत्॥
रसानामिति रूपाणि कर्माणि मधुरो रसः।
आजन्मसात्म्यात् कुरुते धातूनां प्रबलं बलम्॥
बालवृद्धक्षतक्षीणवर्णकेश्येन्द्रियौजसाम्।
प्रशस्तो दृंहणः कण्ठ्यः स्तन्यसन्धानकृद्गुरुः॥
आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः।
कुरुतेऽल्पयोगेन सम्भेदः कफजान् मदान्॥
सौखास्यनिद्रासम्यासमेहगण्डार्बुदादिकान्॥
अग्नेऽग्निदीप्तितृस्निग्धो हृद्यः पाचनभोजनः।
उष्णवीर्यो हिमस्पर्शः प्रीणनः क्लेदनी लघुः॥
करोति कफपित्तास्रं मृद्वातानुलोमनम्।
नोऽलभक्ष्यस्तनोः कुर्याच्छैथिल्यं तिमिरं भ्रमम्॥
कण्डूपाण्डुत्वदीसर्पश्लीपदक्ष्वित्रकोठकृत्वरान्।
लवणः सम्यक्संघातवन्धविध्मापनोऽग्निकृत्।
क्लेदनः क्लेदनस्तीक्ष्णो रोचनश्छेदभेदकृत्॥
सोऽतियुक्तोऽल्पबलं खलतिं पलितं वलिम्।
दद्रुकुष्ठविषवीसर्पान् जनयेत् क्षपयेद्बलम्॥
तिक्तः स्वयमरोचिष्णुरुचिं क्षमिदृष्टिविषम्।
कृमिमूर्च्छाज्वरोत्क्लेशदाहपित्तकफान् जयेत्॥
क्लेदमेदो वसामज्जशुक्रस्तन्योपशोषणः।
लघुर्मेध्यो हिमो रूक्षः स्तन्यकण्डूविशोधनः॥
धातुक्षयानिलव्याधीनतियोगात् करोति सः॥
कटुर्गलामयोदर्दकुष्ठालसकगण्डजित्।
व्रणावसादनस्नेह मेदः क्लेदोपशोषणः॥
छिनत्ति बन्धान् स्रोतांसि विवृणोति कषायपः।
कुरुते सोऽतियोगेन हृद्यां शुक्रबलक्षयम्॥
मूर्च्छामाकुञ्चनं कम्पं कटिपृष्ठादिषु व्यथाम्।
कषायः पित्तकफहा गुरूरूक्षविशोषणः।
पौष्टिको रोपणः शीतः क्लेदमेदोविशोषणः॥
आमसंस्तम्भनो ग्राही रूक्षोऽतिवृक्षप्रसादनः।
करोति शीलितः सोऽतिविष्टम्भाध्मानवृद्धिकृत्॥
दृष्टकार्श्यपौरुषभंशशोषोरोधमलग्रहात्॥
घृतक्षैमगुडाचोढ़मोचचोचरूचकम्।
अभीरुवीरापनसराजादनबलाजयम्॥
मेदे चतसः पर्णिन्यो जीवन्ती जीवकर्षभौ।
मधूकं मधुकं बिम्बी विदारी श्रावणीयुगम्॥
क्षीरशुक्ला तुगाक्षीरी क्षीरिण्यौ काश्मरी सहे।
क्षीरेक्षुगोखुरक्षौद्रशतादिर्मधुरो गणः॥
अम्लो धात्रीफलाम्लीकामातुलुङ्गाम्लवेतसम्।
दाडिमं रजतं तक्रं चुक्रं पालेवतं दधि।
आम्रमाम्रातकं भव्यं कपित्थं करमर्दकम्॥
वरं सौवर्चलं क्षारं विड़ं सामुद्रमौद्भिदम्॥
रोमकं पांसुजं शीर्षं चारश्च लवणो गणः।
तिक्तः पटोली त्रायन्ती बालकोशीरचन्दनम्।
भूनिम्बनिम्बकटुकातगरागुरुवत्सकम्॥
गुडूचीमालतिरजनीसुस्तमूर्वाटरूषकम्।
पाठापामार्गकांक्षायीगुडूचीधन्वयासकम्॥
पटोलमूलं महतीद्वयाद्री विशालात्तिविषा वचा॥
कटुको हिङ्गुमरिचकृमिशत्रुकोलकम्।
कुठेराद्या हरितका: पित्तं मूत्रमरुष्करम्॥
वर्गः कषायः पथ्याद्यं शिरीषः खदिरो मधु।
कदम्बोडुम्बरं सुक्षाप्रवालाञ्जनगैरिकम्।
बालं कपित्थं खर्जूरं विसपद्मोत्पलादि च॥
मधुरं श्लेष्मलं प्रायो जीर्णाच्छालियवाद्दते।
सुक्षाद्गोधूमतः क्षौद्रात्सितायाश्चाक्षणात्॥
प्रायोऽम्लं पित्तजननं दाडिमामलकादृते।
अपथ्यं लवणं प्रायश्चक्षुष्योऽन्यत्र सैन्धवात्॥
तिक्तं कटु च भूविल्वमद्यं वातकोपनम्।
ऋतेऽल्पतापटोलीभ्यां मुष्कीक्षुक्षारशोभनः॥
कषायं प्रायशः शीतं स्तम्भनं चाभयाऽन्यते।
रसा कटूम्ललवणा वीर्येणोष्णा यथोत्तरम्।
तिक्तः कषायो मधुरस्तद्वदेव च शीतलः॥
तिक्तः कटुः कषायश्च रूक्षा बह्वमलास्तथा॥
षड्रसमधुराः स्निग्धाः स्वरविशुद्धसुखमारुताः।
पटोः कषायस्तस्माच्च मधुरः परमं गुरुः॥
लघुरम्लः कटुस्तस्मात्तस्मादपि च तिक्तकः।
संयोगाः सप्तपञ्चाशत्कल्पना तु त्रिषष्टिधा।
रसानां यौगिकत्वेन यथासूत्रं विभज्यते॥
एकैकहीनांस्तान् पञ्च पञ्च यान्ति रसा द्विके।
त्रिके स्वादुर्दशाम्लः षट् त्रीन् षट्तिक्त एकके॥
चतुष्केषु दश स्वादुश्चतुरोऽम्लः षट्कः सप्तकृत्।
पञ्चकेष्वेकमेवाम्लो मधुरः पञ्च सेवते।
द्वयमेकं षड्रास्वादमसंयुक्ताश्च षड्रसाः॥
षट्पञ्चकाः षट् च पृथग्रसाः स्युः
चतुर्दिकौ पञ्चदशप्रकारौ।
भेदास्त्रिकाविंशतिरेकमेकं
द्वयं षड्रास्वादमिति त्रिषष्टिः॥
ते रसाश्चरसतो रसभेदा-
स्तारतम्यपरिकल्पनया च।
सम्भवन्ति गणनां समतीता
दोषभेषजबलाद्रुपयोज्याः॥"

अथ षड्रसगुणाः।

"मधुरः प्रीणनो बल्यो बृंहणोऽनिलपित्तहा।
रसायनो गुरुः स्निग्धश्चक्षुष्यः शीतलश्च सः॥
आयुःस्तन्यसहा रुच्यः कण्ठ्योदावर्तनाशकः।
अम्लो रुचिकरो हृद्यः प्रीणनो वह्निवर्द्धनः॥
वातहा रसनोद्वेगी स्निग्धोष्णो रक्तमांसदः।
क्लेदनस्तर्पणः पक्ता लघुश्चापी कटुश्च यः॥
लवणः क्लेदनस्तीक्ष्णः पाचनोद्भेदनो रसः।
स्निग्धो रुचिकरः स्यन्दी दृष्टिशुक्रकरोऽगुरुः॥
कटुर्जिह्वास्यनासाक्षिरोचनो रुचिराङ्गकृत्।
उष्णस्तीक्ष्णो लघुः कण्ठ्यकृमिशुक्रकफापहः॥
लघुः शीघ्रो पक्तिकरः श्लेष्माकर्षणकः पटुः।
तिक्तः पित्तकफक्लेदी विषकुष्ठज्वरापहः॥
दीपनः पाचनो रूक्षः कण्डूकृमिहरो लघुः।
कषायः शीतकः स्तम्भी व्रणक्षतविशोधनः॥
कफमेदोऽसृपित्तघ्नो रूक्षः शीतो लघुस्तथा।
शीतलः पित्तहृद्वल्यः कफवातहरो गुरुः॥
उष्णं पित्तकरो वीर्य्यो वातश्लेष्महरो लघुः।
शीतं वीर्य्येण यद्द्रव्यं मधुरं रसपाकयोः॥
तयोरम्लं कटुर्व्यस्य यस्योष्णं कटुकं तयोः।
कटुतिक्तकषायाणां विपाकः प्रायशः कटुः॥
अम्लीभं पच्यते स्वादु मधुरं लवणं तथा।
कटुर्विपाके शुक्रघ्नो बह्वविड्वातलो लघुः॥
स्वादुर्गुरुः सृष्टमलो विपाके कफशुक्रलः।
पाकेऽम्लः सृष्टविण्मूत्रपित्तश्लेष्मकृल्लघुः।"
गारुड़े।

"कटुतिक्तकषायाश्च कोपयन्ति समीरणम्।
कटूम्ललवणाः पित्तं स्वाद्वम्ललवणाः कफम्॥
अतएव विपर्य्यस्ताः समायैषां प्रयोजिताः।
चक्षुष्यो मधुरो ज्ञेयो रसो धातुविवर्द्धनः॥
स्नौल्यालस्यविषघ्नश्च कटूद्दीपन पाचनः।"
इत्याह्निकतत्त्वम्।)

न्यायमते तु।

"रसस्तु रसनाग्राह्यो मधुरादिरनेकधा।
सहकारी रसज्ञाया नित्यत्वादि च पूर्ववत्॥"
इति भाषापरिच्छेदः॥

"रसस्निति। सहकारीति रासनज्ञाने रसकारणमित्यर्थः। पूर्ववदिति जलपरमाणो रसो नित्यः अन्यः सर्व्वोऽपि रसोऽनित्य इत्यर्थः।"
इति सिद्धान्तसुक्तावली॥*॥ शरीररसधातुविशेषः। तत्पर्य्यायः। रसिका २ खेदमाता ३ वपुःसवः ४ चर्म्मोभाः ५ चर्म्मसारः ६ रक्तसारः ७ असृग्माटका ८। इति राजनिर्घण्टः॥ आहारसम्भवः ९ तेजःसम्भवः १० अग्निसम्भवः ११ वहूरसासवः १२ आग्नेयः १३ अङ्गकरः १४ धातुबन्धः १५ मूलमहापरः १६। इति हेमचन्द्रः॥ तस्य निरुक्तिर्यथा,—

"यत् प्रार्थो रसधातुर्यस्ततोऽभवदयं रसः।
सदैव सकलं देहं रसतीति रसः स्मृतः॥"
तस्य स्वरूपमाह।
"सम्यक्पक्वस्य शुक्लस्य सारो निगदितो रसः।
स तु द्रवः सितः शीतः स्वादुः स्निग्धश्चलो भवेत्॥"

सारः। यथा, गुडमधूकपुष्पवकुलखर्जूरी-मृद्वादिभवः सारो मदिरा। तस्य स्थानमाह।
"सर्व्वदेहचरस्यापि रसस्य हृदयं स्थलम्।
समानमरुता पूर्व्वं यदयं हृदये धृतः॥"
तस्य कर्म्माण्याह।
"आरुह्य धमनीर्गत्वा धातून् सर्व्वानयं रसः।
पुष्णाति तदनु स्नेयैर्व्याप्नोति च तनुं गुणैः॥"
गुणैः स्निग्धपोषकत्वैः।
"मन्दवह्निविदग्धस्तु कटुर्व्याध्वो भवेदसः।
स जुर्य्याद्दुष्टलान् रोगान् विषकल्पं करोत्यपि॥"
इति भावप्रकाशः॥
(तथा च। "तत्र पाञ्चभौतिकस्य चतुर्व्विधस्य षड्रसस्य द्विविधवीर्य्यस्याष्टविधवीर्य्यस्य वानेक-गुणस्योपयुक्तस्याहारस्य सम्यक् परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः स रस इत्युच्यते। तस्य च हृदयं स्थानं स हृदयाच्चतुर्व्विंशतिं धमनीरनुप्रविश्योर्द्ध्वगा दश दश चाधोगामिनी-श्चतस्रस्तिर्य्यग्गाः कृत्स्नं शरीरमहरहस्तर्पयति वर्द्धयति धारयति यापयति जीवयति चाहर-हेतुकेन कर्म्मणा। तस्य शरीरमनुधावतोऽनु-मानाद् गतिरूपलक्षयितया क्षयवृद्धिवेद्यते। तस्मिन् सर्व्वशरीरावयवदोषधातुमलाशयानु-सारिणि रसे जिज्ञासा किमयं सौम्यस्तेजस इति। अत्रोच्यते स खलु द्रवानुसारी स्नेहन-जीवनतर्पणधारणादिभिर्विंशेषैः सौम्य इत्यव-गम्यते।" इति च सुश्रुते सूत्रस्थाने चतुर्दशे-ऽध्याये॥*॥)
शृङ्गारादिदशविधस्थायी भावः। शृङ्गारादयो-ऽष्टौ रसशब्दवाच्याः। रस्यन्ते आस्वाद्यन्ते रसाः। रसत् क्त्वास्वादे घञ्। तथा हि। विभावैरनुभावैश्च व्यक्तो वा व्यभिचारिभिः। आस्वाद्यत्वात् प्रधानत्वात् स्थायी भावो रसो भवेदिति॥
रत्युत्साहशोक-विस्मयहासभयजुगुप्साक्रोधाः क्रमादेते स्युः स्थायिनः। यदुक्तम्।
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः क्रमादमी॥
समये यः समुद्भूतः स्थान्ते यश्चावतिष्ठते।
भावः स्थायी स विज्ञेयो व्यभिचारी ततोऽन्यथा।
निर्व्वेदग्लानिशङ्काद्या व्यभिचारिण ईरिताः॥"
स्थायिनः कारणं विभावः स चावलम्बनोद्दीप-नत्वेन द्विविधः। यथा रतेरवलम्बनकारणं पुंसो युवती युवत्याश्च पुमान्। उद्दीपनकारणं चक्र-चन्दनादि। एवं सर्व्वत्रोह्यम्। रतिप्रमोदा-त्मको भावः स च युवभिरुत्पादितः शृङ्गारः। यदाह।
"पुंसः स्त्रियां स्त्रियाः पुंसि संयोगं प्रति या स्पृहा।
स शृङ्गार इति ख्यातो रतिक्रीडादिकारणम्॥
दानधर्म्मयुद्धेषु जीवानपेक्षोत्साहकारी रसो वीरः। शोकस्थायिभावः करुणः। असम्भावित-मर्थान्तरोद्गमनादिजोऽद्भुतः। कौतुकोद्भवो हासः। क्रुध्यदाक्षसादिभयजन्यो भयानकः। घृणाकरपूयरसादिजो बीभत्सः। सर्व्वाभि-भाविता रौद्रः। यथा, रावणचरितादि। शान्तोऽपि रसोऽस्ति।
"शृङ्गारवीरबीभत्सरौद्रहास्यभयानकाः।
करुणाद्भुतशान्ताश्च नव नाट्या रसाः स्मृताः॥"
इति रत्नकोषः॥
एवं वत्सलोऽपि रसोऽस्ति।
"शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः।
बीभत्सरौद्रौ वात्सल्यं शान्तश्चेति रसा दश॥"
इति नामनिधानम्॥
वत्सलः पुत्रादिस्नेहात् स्नारतिभेद एव। शान्तस्त्वलौकिकत्वान्नोक्तः। इति सुकुटः॥ यच्छब्दात् शान्तवत्सलावपि संगृहीताविति केचित्। इत्यमरटीकायां भरतः॥*॥ अपि च। तत्र शृङ्गारादिसर्व्वरसकदम्बमूर्त्तिर्भगवान् तत्तदभिप्रायानुसारेण बभौ न साकल्येन सर्व्वे-षामित्याह। मल्लानामिति। मल्लादीनां दृशानां द्रष्टृणां अशनिरिव दृशधा विदितः सन् साग्रजो रङ्गं गतः इत्यन्वयः। मल्लादिषु अभिपत्ता रसाः क्रमेण श्लोकेन निबध्यन्ते।
"रौद्रोऽद्भुतश्च शृङ्गारो हास्यवीरौ दया तथा।
भयानकश्च बीभत्सः शान्तः सप्रेमभक्तिकः॥"
अविद्वांसो विराट् विकलः अपर्य्याप्तो जड़ इति यावत्। अनेन बीभत्स उक्तः। विकलत्वञ्च वज्रसारसर्व्वाङ्गावित्यादिना वक्ष्यति। इति श्रीमद्भागवते १० स्कन्धे ४३ अध्याये १५ श्लोक-टीकायां श्रीधरस्वामी॥*॥ (तथा च।
"रसे सारश्चमत्कारः सर्व्वत्राप्यनुभूयते॥
तच्चमत्कारसारत्वे सर्व्वत्राप्यद्भुतो रसः।
तस्मादद्भुतमेवाह कृती नारायणो रसम्॥"
इति साहित्यदर्पणे धर्म्मदत्तः॥
रस: कथ्यते।
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्॥"
अस्य स्वरूपकथनगर्भं आस्वादप्रकारः कथ्यते।
"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥
लोकोत्तरचमत्कारप्राणः केनित् प्रमातृभिः।
स्वाकारवदभिन्नत्वे नायमास्वाद्यते रसः।
रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते॥"
इति साहित्यदर्पणे विश्वनाथः॥१॥
"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥"
शृङ्गारस्य यथा,—
"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते॥
परोढ़ां वर्জ्जयित्वा तु वेश्यां चानुरागिणीम्।
आलम्बनं नायिकाः सुदीप्तिमाद्याश्च नायकाः॥
चन्द्रचन्दनरोलम्बरुतादुद्दीपनं मतम्।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः॥
व्रीड़ौग्र्यमरणाशङ्कजुगुप्सा व्यभिचारिणः।
स्थायी भावो रतिः श्यामवर्णोऽयं विष्णुदेवतः॥"
यथा,—
"शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चि-दाञ्चने:
निद्रायाजनुषागतस्य सुचिरं निर्व्वर्ण्य पत्यु-र्म्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्ड-स्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥"
हास्यस्य।
"विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत्।
हासो हास्यस्थायिभावः श्वेतः प्रमथदैवतः॥
विकृताकारवाक्चेष्टं यदालोक्य हसेन्नरः।
तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम्॥
अनुभावोऽक्षिसङ्कोचवदनस्मेरतादयः।
निद्रालस्यावहित्याद्या अत्र स्युर्व्यभिचारिणः॥
ष्येष्ठानां स्मितहसिते मध्यानां विहसिता-वहसिते च।
नीचानामपहसितं तथातिहसितञ्च षड्भेदाः॥
ईषद्विकाशिनयनं स्मितं स्यात् स्पन्दिताधरम्।
किञ्चिल्लक्ष्यदशनं तच्च हसितं कथितं बुधैः॥
मधुरस्वरं विहसितं सांसश्रुः कम्पनमव-हसितम्।
अपहसितं सोच्चैर्विचित्रमङ्गं भवत्यति-हसितम्॥"
यथा,—
"आकुञ्च्य पाणिमशुचिं मम मर्द्दितुं वेश्या
मन्त्राम्भसा प्रतिपदं प्रहते: पवित्रे।
तारस्वरं प्रथितयूत्कमदात् प्रहारं
हा हा हतोऽहमिति रोदिति विष्णुशर्म्मा॥"
करुणस्य।
"इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः॥
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम्।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः।
अनुभावा देवनिन्दा भूपातक्रन्दनादयः॥
वैवर्ण्योच्छ्वासनिश्वासस्तम्भप्रलपनानि च।
निर्व्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः॥
विषादजड़तोन्मादचिन्ताद्या व्यभिचारिणः॥"
यथा,—
"विपिने क्व जटानिबन्धनं
तव चेदं क्व मनोहरं वपुः।
अनयोर्घटनाविधेः स्फुटं
ननु खड्गेन शिरीषकर्त्तनम्॥"
रौद्रस्य।
"रौद्रः क्रोधः स्थायिभावो रक्तो रुद्राधिदैवतः।
आलम्बनमरिस्तच्च चेष्टोद्दीपनं मतम्॥
मुष्टिप्रहारपतनविक्षतच्छेदादारणैरेव।
संग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढ़ा॥

भ्रूविभङ्गोऽनिर्देश्यबाष्पस्फोटनसर्जनम् ।
आत्मावदानकथनमायुधोत्क्षेपजानि च ।
अनुभावास्तथाक्षेपकूरसन्दर्शनादयः ।
उग्रतावेगरोमाञ्च स्वेदवेपथवो मदः ॥
मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः ॥"
यथा,—
"हतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-
मयमहमहङ्मेदोमांसैः करोमि दिशां बलिम् ॥"
वीरस्य ।
"उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः
महेन्द्रदेवतो हेमवर्णोऽयं समुदाहृतः ॥
आलम्बनविभावाश्च विजेतव्यादयो मताः ।
विजेतव्यादिचेष्टाद्यास्तथोद्दीपनरूपिणः ।
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः ।
सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः ॥
स च दानधर्मयुद्धदैवया च समन्वितश्चतुर्धा स्यात् ॥"
यथा,—
"क्षुद्राः सन्त्वासमेते विलहितहरयः ! क्षुद्रभ्रूक्षेपभङ्गभा
युग्रहैरेव लब्धां दधति परममी सायका निष्पतन्तः ।
सौमित्रे ! तिष्ठ पात्रं त्वमसि नहि रणे नन्वहं मेघनादः
किञ्चिद् भ्रूभङ्गलीलानियमितजलधिं राम-
मन्वेषयामि ॥"
भयानकस्य ।
"भयानको भयस्थायिभावः कालाधिदेवतः ।
श्यामो वक्रप्रकृतिः श्रव्यो मतस्तत्त्वविचारदैः ॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरा तस्य तदत्रोद्दीपनं पुनः ॥
अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम् ।
पुलकस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ॥
जुगुप्सावेगसम्मोहसन्त्रासग्लानिदीनताः ।
शङ्कापस्मारसम्भ्रान्तिश्चपलाद्या व्यभि-
चारिणः ॥"
यथा,—
"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
प्रस्तार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः
कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां
प्रयाति ॥"
बीभत्सस्य ।
"जुगुप्सा स्थायिभावस्तु बीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदेवतोऽयमुदाहृतः ॥
दुर्गन्धमांसपिशितमेदोऽस्यालम्बनं मतम् ।
तत्रैव कृमिपातादिरुद्दीपनमुदाहृतम् ॥
निष्ठीवनास्यवलननेत्रसङ्कोचनादयः ।
अनुभावास्तत्र मतास्तत्र स्युर्व्यभिचारिणः ॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ॥"
यथा,—
"उत्तृत्योत्तृत्य वृत्तिं प्रथममथ पृथूत्सेध-
भूयांसि मांसा-
न्यंसस्थिक् पृष्ठपिण्डाद्वयवसुषभान्युच्यपूतीनि
जग्ध्वा ।
अन्तःपर्यस्तनेत्रः प्रकटितदशनः प्रेतराट्
करङ्का-
दण्डस्यादक्षिसंस्थं स्फुटगतमपि क्रव्यमन्य-
मत्ति ॥"
अद्भुतस्य ।
"अद्भुतो विस्मयस्थायिभावो गन्धर्वदेवतः ।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ॥
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ।
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसंभ्रमाः ॥
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्तिताः ।
वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः ॥"
यथा,
"चित्रं महानेष वतावतारः
क्व कातिरेषाभिनवेव भङ्गिः ।
लोकोत्तरं धैर्यमहो प्रभावः
काप्याकृतिर्नूतन एष सर्गः ॥"
शान्तस्य ।
"निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ॥"
तथा च ।
"शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदेवतः ॥
अनित्यत्वादिनाशेषवस्तुनिःसारता तु या ।
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ॥
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ॥
रोमाञ्चाद्या अनुभावास्तथास्युर्व्यभिचारिणः ।
निर्वेदहर्षस्मरणमतिभूतदयादयः ॥"
यथा,—
"अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
क्वचित् पुण्येऽरण्ये शिवशिवशिवेति प्रलपतः ॥"
इति काव्यप्रकाशसाहित्यदर्पणे ॥ विश्वेश्वरसूरिकृतिस्तु साहित्यदर्पणे दशमपरिच्छेदे दृश्या ॥
तन्त्रशास्त्रेऽपि साधकानामुपासनासौकर्य्यार्थं रसास्वादः रसप्रकारश्च कथ्यते । यथा,—
भैरव उवाच ।
"क्रियाकाण्डप्रकथने तन्त्रं बहुतरं भवेत् ।
किञ्चिल्लक्षणमेतेषां संक्षेपात् कथयामि ते ॥
काव्यशास्त्रे नव रसा योगे चाष्टौ रसाः स्मृताः ॥
अष्टादशप्रकारा हि विद्यायाः परिकीर्तिताः ।
भक्तियोगे नव रसा ऋतवो विषये स्मृताः ॥
रसमाद्या रसा देवि ! पञ्चपञ्चाशतः स्मृताः ।
भेदं रसानां वक्ष्यामि शृणुष्वावहिता प्रिये ॥
शृङ्गारवीरकरुणहास्योद्भुतभयानकाः ।
बीभत्सः शान्तको रौद्रो नवधा काव्यशास्त्रके ॥
यमश्च नियमश्चैव आसनं प्राणसंयमः ।
प्रत्याहारो धारणा च ध्यानं समाधिरष्टधा ॥
योगशास्त्रे महादेवि कथिता विस्तरात् प्रिये ॥
छन्दः पादौ च वेदस्य मुखं व्याकरणं स्मृतम् ।
ज्योतिषं देवि तन्नेत्रं निरुक्तं श्रोत्रमुच्यते ।
अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरैः ॥
धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश ।
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः ॥
अर्थशास्त्रसमायुक्ता विद्याश्चाष्टादशधा रसाः ।
मननं कीर्त्तनं ध्यानं स्मरणं पादसेवनम् ॥
अर्चनं वन्दनं दास्यं सख्यमात्मसमर्पणम् ।
इत्थं देवि नव रसा भक्तियोगे प्रकीर्तिताः ॥
सगन्धवनिताशय्यावस्त्रालङ्करणानि च ।
कथिताः परमेशानि विषये ऋतवो रसाः ॥
स्वाद्याः पञ्चरसा गौड्यो माध्वीस्तुफलशस्यकाः ।
एतेषु रसभावज्ञा ये ते वै रसिकाः स्मृताः ॥
तत्त्वविधिर्ज्ञपविधिर्ध्यप्रयोगविधिको विधिः ।
वाह्यमानसिकी पूजा विधिश्च परमेश्वरि ! ॥
पुरश्चर्याविधिर्देवि ! कर्म्मकाण्डानि षड्विधा ।
त्रिधा कृत्य विधिर्देवि ! प्रातः सायं दिनत्रया ॥
अनुभूय रसान् सर्व्वान् क्रियाकाण्डं विधाय च ।
साधकः स्थिरचित्तेन कुर्य्यात् पूर्णाभिषेचनम् ॥"
इति वामकेश्वरतन्त्रे त्रयःपञ्चाशत् पटलः ॥
देव्युवाच ।
"मन्त्रप्रकथनं नाथ ! देव प्रकथनं कथम् ।
तत्तद्रसानां वचनैश्चित्तं मोहयसीव मे ॥
साम्प्रतं संशयच्छेदकारणं ब्रूहि मे प्रभो ! ॥
आश्चर्य्याख्यानमेवं हि श्रवणात् कौतुकं महत् ॥
भैरव उवाच ।
तन्त्रोक्तं वेदवाक्यञ्च सर्व्वज्ञानस्य कारणम् ।
भेदं रसानां वक्ष्यामि शृणुष्वावहिता सती ॥
शृङ्गारो वीरतो ज्ञेयस्तस्मिंस्ते करुणादयः ।
शृङ्गारादिष्वादिम अपि शृङ्गारतो भवेत् ॥
शृङ्गारस्तु यदा देवी परमार्थैकसूचकः ।
तदैव परमा ज्ञप्तौ रूपत्वं संप्रपद्यते ॥
तेषां प्रकरणार्थेषु शृणु प्राणाधिके ! मयि ।
पादं विना शरीरस्य न गतिर्विद्यते प्रिये ! ॥
छन्दसा वेदमार्गे तु प्रविशेन्न कदाचन ॥
अलङ्कारं विनाच्छन्दो न शोभेत प्रियंवदे ॥
चक्षुः परोक्षभेदः स्यात् ज्योतिःशास्त्रं तदेवच ।
चन्द्रसूर्य्यस्य ग्रहणात् ज्योतिः प्रत्यक्षतामियात् ॥
वेदशाखा निरुक्तं स्यात् शाखाभिर्व्रह्म गायते ।
गानकार्य्ये श्रूयमाणे भक्तिर्भवति ब्रह्मणि ॥
तदेव गानरूपत्वं सुखनाशिकयोर्भवेत् ।
गानं विना न वृत्यं स्यात् वृत्यं गानेन जायते ॥
श्रिताश्चास्त्रं नाटकादि ग्रन्थाकारं स्मृतम् ।
अविनाभावसम्बन्धात्त्रयोरेव शुचिस्मिते ॥

वेदाः षड़ङ्गसहिताः ब्रह्मव्याख्यानतत्पराः। न्यायेन सार्द्धं मीमांसा ब्रह्म निर्णीयते ध्रुवम्॥ ब्रह्मज्ञाने तु जीवस्य परमात्मविचारणम्। धर्म्मशास्त्रानुसारेण व्यवस्थादिर्निरूपितः॥ पुराणाख्यानि तेनैव जायते सततं प्रिये!। ब्रह्मानन्दपरो जीव आत्मसंरक्षणोत्सुकः॥ आयुर्व्वेदं धनुर्व्वेदं गान्धर्व्वञ्च समभ्यसेत्। अनुसन्धानतो देवि पूर्णज्ञानी च साधकः॥ मधुनेक्षुरसेनेव दुग्धादिफलशस्यकैः। गन्धमाल्यादिना देवि! वस्त्रालङ्करणादिना॥ भ्रुयायां वनितारूपं पूजयेज्जगदम्बिकाम्। वनितापूजने देवि! ब्रह्मारो रससाधनम्॥ पूजनं कर्म्मकाण्डञ्च षड्धा तत्परिकीर्त्तितम्। तत्सर्व्वं साधयेद्वीरो देवी सम्प्रीणितो यतः॥ पूजने नवधा भक्तौ रसोल्लासश्च जायते। तदा योगं समभ्यस्य समाधिस्थो भवेद्यतिः॥ अतएव महेशानि! पुरैव कथितं मया। अनुभूय रसान् सर्व्वान् पश्चात्पश्चाद्गतः प्रिये!॥ विषये कर्म्मकाण्डेषु निष्कामी भवति प्रिये!। निष्कामे फलमाचार्य्यं तेन ह्लभते देवता॥ देही देहं समाश्रित्य न च कर्म्म परित्यजेत्। दिव्यां क्रियां समाप्यैव देवीयात्रादिकर्म्मणा॥ पूर्णज्ञानरसानन्दात् जीवन्मुक्तो भवेद्ध्रुवम्॥"

इति वामकेश्वरतन्त्रे चतुःपञ्चाशत् पटलः॥

रसस्य परब्रह्मस्वरूपत्वमुक्तम्। यथा,—

"रसो वै सः।" इति श्रुतिः॥ सन्यासमन्त्रोऽपि।

"आपो ज्योती रसोऽमृतं ब्रह्म।" अत्र ब्राह्मण-सर्व्वस्वे हलायुधः॥ "स एव ब्रह्मरूपो भर्गो रसः ह्लवृक्षौषध्यादिषु स्थावरेषु च स एव रस-रूपेण वसतीत्यर्थः। तथा च योगियाज्ञ-वल्क्यः।

"वृक्षौषधिह्लतानाञ्च रसरूपेण तिष्ठति॥"

श्रीमद्भगवद्गीतायामपि।

"रसोऽहमप्सु कौन्तेय इति॥")

विषम्। (यथा, सुदाराचसे २ अङ्के।

"ये मन्त्रेषु रसेषु च प्रविहितास्तेरेव ते घातिताः॥")

वीर्य्यम्। गुणः। रागः। (यथा,—

"कविता कोमलवनिता
रसयति रसिकं रसेन मिलिता।
सा यदि दुर्ज्जनहस्ते
पतिता प्रतिपदभया संशयमया॥"

इत्युद्भटः॥)

द्रवः। इत्यमरः। ३। ३। २२६॥ गन्धरसः। (तत्पर्य्यायो यथा,—

"विद्वान् गोलः पिण्डकश्च पिण्डो बोलो रसो रसः॥")

जलम्। (यथा, रघौ। १। १८।

"प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्। सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥") पारदः। इति मेदिनी॥ ("तत्र रसप्राधान्य-माह।

अल्पमात्रोपयोगित्वादस्यैरप्रसङ्गतः। क्षिप्रमारोग्यदायित्वादौषधेभ्योऽधिको रसः॥ सार्द्धेषु भेषजं सर्व्वमीरितं तन्त्रवेदिना। असार्द्धेष्वपि दातव्यो रसोऽतः श्रेष्ठ उच्यते॥ हतो हन्ति जराव्याधिं मूर्च्छितो व्याधिघातकः। वङ्गः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः॥"

अथ रसपर्य्यायमाह।

"रसेन्द्रः पारदः सूतः सूतराजश्च सूतकः। शिवतेजो रसः सप्त नामान्येवं रसस्य तु॥"

मतान्तरम्।

"शिववीजं रसः सूतः पारदश्च रसेन्द्रकः। एतानि रसनामानि तथान्यानि यथा शिवे॥"

यथा शिवे इत्यनेन शिवपर्य्यायाण्यामपि रस-वाचकत्वम्॥ * ॥ अथ रसलक्षणम्।

"अन्तः सुनीलो बहिरुज्ज्वलो यो
मध्याह्नसूर्य्यप्रतिमप्रकाशः।
गुरुश्च धूम्रः परिपाण्डरश्च
चित्रो न योज्यो रसकर्म्मसिद्धौ॥
नागो वङ्गो मलो वह्निश्चापल्यञ्च विषं गिरिः। असह्याग्निर्म्महादोषा निसर्गाः पारदे स्थिताः॥ व्रणं कुष्ठं तथा जाड्यं दाहं वीर्य्यस्य नाशनम्। मरणं जड़तां स्फोटं कुर्व्वन्त्येते क्रमात्क्रमात्॥ तस्मात्तस्य संशुद्धिं विदध्याद्विधिना बुधः। शुद्धोऽयमन्तं साक्षाद्दोषयुक्तो रसो विषम्॥"

"भृतं पञ्चाशतं वापि पञ्चविंशद्गुणैर्द्रवैः च। पञ्चैकं वा बलञ्चैव पलार्द्धं कर्षमेव च॥ कर्षाद्यूनो न कर्त्तव्यो रससंस्कार उत्तमः। प्रयोगेषु च सर्व्वेषु यवालाभं प्रकल्पयेत्॥

शुभेऽह्नि विष्णुं परिचिन्त्य कुर्य्यात्
सम्यक्कुमारीवटुकार्च्चनञ्च।
सुखोपवासाच्यसमुद्भवेऽस्मिन्
दृढ़े च वेदाङ्गुलिगर्भमात्रे॥
सुतप्रसूत्रे निजमन्त्रयुक्तां
विधाय रक्षां स्थिरसारबुद्धिः।
अनन्यचित्तः शिवभक्तियुक्तः
समाचरेत् कर्म्मरसस्य तज्ज्ञः॥"

"अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च। सर्व्वतः सर्व्वर्व्वेभ्यो नमस्ते रुद्ररूपिभ्यः॥"

इति रुद्रयामलम्॥

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-कारे। विस्तृतविवृतिरस्य पारदशब्देऽभिहिता॥

शिरालसः। तत्पर्य्यायो यथा,—

"कपिनामा कपितैलं कपिलञ्च कपिः। तुरुष्को मुक्तिसक्तश्च पिच्छाते पिङ्को रसः॥"

हिङ्गुलम्। तत्पर्य्यायो यथा,—

"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः॥"

इति वैद्यकरत्नमालायाम्॥)

रसकः, पुं, (रस+संज्ञायां कन्।) निष्क्वाथ-मांसः। इति हेमचन्द्रः। ३। ७७॥

रसकर्पूरं, क्ली, कर्पूररसः। रसकापूर इति भाषा। यथा, "तत्र पारदस्य संक्षिप्तं शोधनं कर्त्तव्यम्।

शुद्धसूतसमं कुर्य्यात् प्रत्येकं गैरिकं सुधीः। इष्टिकां खटिकां तद्वत् स्फुटिकां सिन्धुजन्म च॥ वल्मीकक्षारलवणं भाण्डरङ्गकण्टत्तिकाम्। सर्व्वाण्यतानि संचूर्य्य वाससा चापि शोधयेत्॥

खटिका खड़ी। स्फुटिका फिट्‌करी। सिन्धु-जन्म सैन्धवम्। वल्मीकं तच्चा मृत्। वल्मीक वरउर। क्षारलवणं खारीलवण। भाण्डरङ्गक-ण्टत्तिका काविसमाटी।

एभिश्चूर्णैर्युतं सूतं यावद्यामं विमर्द्दितम्। तच्चूर्णसहितं सूतं स्थालीमध्ये परिक्षिपेत्॥ तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत् समाम्।

सवस्त्रकुट्टितन्दद्या सुदृढ़ेदुभयोर्म्मुखम्॥ संशोष्य सुदृढ़ेष्टूयो भूयः संशोष्य सुदृढ़येत्। सम्यग्विशोष्य सुदृढ़ां स्थालीं पुनर्व्वा विधारयेत्॥ अग्निं निरन्तरं दद्यादृयावद्दिनचतुष्टयम्। अङ्गारोपरि तद्यन्त्रं रक्षेद्यत्नाद्दृढ़निर्भृतम्॥ यन्त्रेरुद्धारयेद्यन्त्रभूर्द्धस्थालीगतं रसम्। कर्पूरवत् सुविमलं यत्नीयाद्गुणवत्तरम्॥ तं देवकुसुमचन्दनकस्तूरीकुङ्कुमैर्युक्तम्। खादन् हरति शिरङ्गं वाधिं सोपद्रवं सपदि॥ विन्दति वह्निर्दीप्तिं पुष्टिं वीर्य्यं बलं विपुलम्। रमयति रमणीशतकं रसकर्पूरस्य सेवकः सततम्॥"

इति भावप्रकाशः॥ * ॥

अपि च।

"गैरिकतुरवीखटिकासैन्धवगड़्गं रजं कुड़वम्। प्रत्येकं दृढ़हड्यामाधायास्योपरि घृतं स्थाप्यः॥ कुड़वमितोऽथ तदूर्द्धे देया हड्डीतदास्य पात-सुखौ।

अथ तत्सन्धेर्म्मुद्रां कृता तदधो हुताशनो ज्वाल्यः॥

अग्नेरष्टकप्रमितैर्द्दारुभिरनुनातिदुर्ब्बलस्थूलैः। अग्निं क्रमेण दद्यादृगुरुदग्निं तवर्द्धना द्विगिरम्॥ तदनु ततो यन्त्रवरादुद्धृत्या कर्पूरसन्निभं सूतम्। आदाय काचकुम्भे निधाय नवसादरं दद्यात्॥ संमर्द्द्य चाथ काष्ठैर्द्दार्व्वीसंमितैः पचेत् चयम्। पुत्तीडमरुकमध्यं वितस्तिचतुराङ्गुलावकाशगतम्॥ कर्त्तव्यं क्रमदहनं तदधः प्रज्वालयेन्मध्यम्। अग्निधवलमुपरिलयं बुद्ध्वा संयन्त्र रक्षयेद्-यत्नात्॥

वल्लं वल्लार्द्धं वा गुड़ेन जीर्णेन रोगिणे दद्यात्। दुग्धोदनन्तु पथ्यं देयं तस्मै च ताम्बूलम्॥ हरति समस्तं रोगं कर्पूराख्यो रसो नृणाम्॥ शिरङ्गकरिकेशूरी सकलकुष्ठदावागलो-ऽखिलव्रणविनाशकृत् व्रणजगर्त्तपूर्त्तिप्रदः। सुवर्णसमवर्णकृत् बलहुताशतेजस्करः समस्तगदतस्करो रसपतिः स कर्पूरकः॥"

अन्यान्तरम्।

"टङ्कणं मधु लाक्षाच ऊर्षा गुञ्जायुतो रसः। मर्द्दयेत् भृङ्गजद्रावैर्द्दिनैकं श्लक्ष्णयेत् पुनः। भ्रातो भक्षणमात्रेण शुद्धकर्पूरसन्निभः॥

नवसादरं पारदाचतुर्थांशमिति सङ्गृह्य। गड़ूचं सामरिलोम इति भाषा। श्लेष्मं स्पष्टम्। इत्यायुर्व्वेदप्रकाशः॥ (तथा च।

"स्निग्धं पांशुपटु प्रगाढममलं षण्मुद्गुना नैकशः
स्रुतं धातुगतं खटीकवलितं ततसंपुटे रोधयेत्।
अन्तस्सङ्गवशस्य तस्य च तले प्रज्वाल्य वह्निं
दृढात्
घसं याह्य मथेन्मृकुन्दघवलं भस्मोपरिस्थं घृनैः॥
तद्वल्लक्षितयं जवङ्गसहितं प्रातः प्रयुक्तं भजेत्।
ऊर्द्धं रेचयति द्वियाममसकृत्पेयं जलं शीतलम्॥
एतद्भुक्ति च वत्सरावधि विषं वान्मासिकं
मासिकम्।
श्लेष्मोत्थं गरलं नगेन्द्रकुटिलोऽद्भुतश्च तालका-
लिकम्॥"

इति सुधानिधिरसः॥ *॥ रकर्पूरमिति रस-मञ्जरी कारः। श्वेतभस्म इति चन्द्रिका। इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे।)

रसकेशरं, क्ली, कर्पूरम्। इति हारावली। (कर्पूरशब्दस्यास्य विवरणं ज्ञातव्यम्॥)

रसगन्धं, क्ली, वालम्। इति राजनिर्घण्टः॥

रसगन्धः, पुं, गन्धरसः। यथा,—

"रसगन्धो गन्धरसो गान्धारं मखिवर्द्धनम्॥"

इति चिकाण्डशेषः॥

रसगन्धकः, पुं, (रसगन्ध+स्वार्थे कन्।) गन्ध-रसः। इति शब्दचन्द्रिका॥ गन्धकः। इति राजनिर्घण्टः॥

रसगर्भं, क्ली, रसाञ्जनम्। इत्यमरः॥ (तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"रसाञ्जनन्तार्क्ष्यशैलं रसगर्भञ्च तार्क्ष्यजम्॥")

द्विगुणम्। इति राजनिर्घण्टः॥

रसघ्नः, पुं, (रसं रसस्य दोषावहशक्तिं हन्तीति। हन+टक्।) टङ्कणः। इति राजनिर्घण्टः॥

रसजं, क्ली, (रसाज्जायते इति। जन्+डः।) रक्तम्। इति शब्दचन्द्रिका॥

रसजः, पुं, (रसाज्जातः। जन्+डः।) गुड़ः। इति राजनिर्घण्टः॥ (यथा, मनुः।११।१४४।

"अन्नाद्यजानां सत्त्वानां रसजानाञ्च सर्व्वशः॥")

मद्यकीटः। इति हेमचन्द्रः॥ (रसजाते, त्रि। यथा,—

"रसजं पुरुषं विद्याद्रसं रक्षेत् प्रयत्नतः।
अन्नात् पानाच्च मतिमानाचाराच्चाप्यतन्द्रितः॥"

इति सुश्रुते सूत्रस्थाने चतुर्दशोऽध्याये॥)

रसज्ञा, स्त्री, (रसं जानातीति। ज्ञा+कः। टाप्।) जिह्वा। इत्यमरः॥ (गङ्गा। इति काशीखण्डे। २६।१४६॥) रसवेत्तरि, त्रि॥ (यथा, रघौ। २।३६।

"यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः॥")

रसज्येष्ठः, पुं, (रसेषु ज्येष्ठः।) मधुररसः। इति हेमचन्द्रः॥ शृङ्गाररसश्च॥

रसतेजः, [स्] क्ली, (रसात् रसजन्यं वा तेजो यस्य।) रक्तम्। इति हेमचन्द्रः॥

रसदालिका, स्त्री, (रसं दालयति इति। दल+णिच्+ण्वुल्। टापि अत इत्वम्।) पुष्पकेचुः। इति राजनिर्घण्टः॥

रसद्रावी, [न्] पुं, (रसं द्रावयतीति। द्रु+णिच्+णिनि।) मधुरलवणः। इति राज-निर्घण्टः॥

रसधातुः, पुं, (रसात्मको धातुः।) पारदः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायादिर्यथा,—

"रसायनार्थिभिर्लोकैः पारदो रस्यते यतः।
ततो रस इति प्रोक्तः स च धातुरपि स्मृतः॥
पारदो रसधातुश्च रसेन्द्रश्च महारसः।
चपलः शिववीर्य्यश्च रसः स्मृतः शिवाङ्गयः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रसधेनुः, स्त्री, (रसकल्पिता धेनुः।) दानार्थे-क्षुरसनिर्म्मितधेनुः। यथा,—

होतोवाच।

"रसधेनुं महाराज कथयामि समासतः।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे॥
रसस्य तु घटं राजन् संपूर्णमेवस्य च।
तद्वत् संकल्पयेत् प्राज्ञश्चतुर्थांशेन वत्सकम्॥
इक्षुदण्डमयाः पादा रजतक्षुरसंयुताः।
सुवर्णशृङ्गाभरणां वस्त्रपुच्छां घृतस्तनीम्॥
पुण्यकर्मलसंयुक्तां शर्करासुखलिङ्गिकाम्।
दन्ताः फलमयास्तस्याः पृक्तताम्रमयीं शुभाम्॥
पुण्यरोमाणु राजेन्द्र मुक्ताफलजतेक्षणाम्।
सप्तधीद्विसमायुक्तां चतुर्द्दिक्षु च दीपिकाम्॥
सर्व्वोपस्करसंयुक्तां सर्व्वगन्धादिवासिताम्।
चत्वारि तिलपात्राणि चतुर्द्दिक्षु निवेशयेत्॥
ब्रह्मणे वेदविदुषे श्रोत्रियायाहिताग्नये।
पुराणज्ञे विशेषेण साधुवृत्ताय धीमते॥
तादृशाय प्रदातव्या रसधेनुः कुटुम्बिने।
सर्व्वलक्षणयुक्ताय श्रोत्रियाय कुटुम्बिने॥
रसधेनुः प्रदातव्या सर्व्वकामेश्व नित्यदा।
दाता स्वर्गमवाप्नोति सर्व्वपापक्षयच्युतः॥
दाता च ग्राहको वाथ एककालमभोजनः।
सोमपानफलं तस्य सर्व्वक्रतुफलं लभेत्॥
दीयमानान्तु पश्यन्ति ते यान्ति परमां गतिम्।
धेनुञ्च पूजयित्वाथ गन्धधूपसगादिभिः॥
पूर्व्वोक्तैरेव मन्त्रैस्तु ततस्तां प्रार्थयेत् सुधीः।
प्रार्थनापूर्व्वकं भक्त्या द्विजाग्र्याय निवेदयेत्॥
दश पूर्व्वान् परांश्चैव आत्मानञ्चैकविंशकम्।
प्रापयेत् परमं स्थानं स्वर्गावर्त्तते पुनः॥
एषा ते कथिता राजन् रसधेनुरनुत्तमा।
ददस्व च महाराज परं स्थानमवाप्नुहि॥
य इदं पठते नित्यं शृणुयादथ भक्तितः।
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते॥"

इत्यादि वाराहपुराणे श्वेतोपाख्याने रसधेनु-माहात्म्यं समाप्तम्॥

रसन, क्ली, (रस्+भावे ल्युट्।) स्वादनम्। ध्वनिः। इति मेदिनी॥ (यथा, कुहूतसंहितायाम्। ७६। ८८।

"कस्योद्वर्त्तनवेद्यत्वं रसनं दरणं क्षितेः॥")

रसन, क्ली स्त्री, (रस्यते रसयत्यनेन वा। रस+करणे ल्युट्।) जिह्वा। इति मेदिनी॥ सा च जलेन्द्रियम्। यथा,—

"नित्यतादि प्रथमवत् किन्तु देहमयोनिजम्।
इन्द्रियं रसनं सिन्धुर्हिमादिर्व्विषयो मतः॥"

इति भाषापरिच्छेदः॥

"प्रथमवदिति पृथिव्या इयेत्यर्थः। तथा हि जलं द्विविधं नित्यमनित्यञ्च। परमाणुरूपं नित्यं द्व्यणुकादिकं सर्व्वमनित्यम्। अवयवसमवेतत्वा-नित्यत्वलमपि त्रिविधम्। शरीरेन्द्रियविषय-भेदात्। किन्तु पृथिवीतोययोर्यो विशेषस्तमाह किन्त्विति। अयोनिजमेवेत्यर्थः। जलीयं शरीरं अयोनिजं वरुणलोके प्रसिद्धमिति। इन्द्रियं रसनं जलीयम्। तथा हि रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात्। शुक्ल-रसाभिव्यञ्जकोदकवत्। रसनासन्निकर्षे व्यभि-चारवारणाय द्रव्यत्वं हेतौ देयम्। विधयं दर्शयति सिन्धुर्हिमादिरिति। सिन्धुः समुद्रः हिमं तुषारः। आदिना सरित्कासारकरकादिः सर्व्वो ग्राह्यः।" इति सिद्धान्तसुक्तावली॥

रसना, स्त्री, (रस+युच्। टाप् च।) जिह्वा। इत्यमरः॥ (यथा, भागवते। ६। ४। १६।

"घ्राणञ्च तत्पादसरोजसौरभे
श्रीमत्तुलस्या रसनां तदर्पिते॥")

तस्याः शुभलक्षणं यथा,—

"तीक्ष्णा दंष्ट्राः समाः श्रेष्ठा जिह्वा रक्ता समा शुभा।
ह्रस्वा दीर्घा च विज्ञेया तालुः श्वेतो धनञ्जये॥"

इति गारुड़े ६६ अध्यायः॥

न्यायमते रसनेन्द्रियग्राह्यो रसो रसत्वादि-सहितः। यथा,—

"रसस्तु रसनाग्राह्यो मधुरादिरनेकधा।
सङ्कारी रसज्ञाया नित्यतादि च पूर्व्ववत्॥
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।
तथा रघो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः॥"

इति भाषापरिच्छेदः॥

"तथारस इति रसत्वादिसहित इत्यर्थः।" इति सिद्धान्तसुक्तावली॥*॥ राखा। इति मेदिनी॥ (अस्याः पर्य्यायो यथा,—

"राज्ञा युक्तरसा रस्या सुवहा रसना रसा।
रसालयर्णी च सुरसा सुगन्धा श्रेयसी तथा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) गन्धभद्रा। इति शब्दचन्द्रिका। काञ्ची। इति हेमचन्द्रः॥ (यथा, रघौ। ७। १०।

"कस्याञ्चिदासीदसना तदानीं
अङ्कुलमूलार्पितसूत्रशेषा॥")

रज्जुः। इति संक्षिप्तसारोणादिवृत्तिः॥

रसनाथः, पुं, (रसानां नाथः श्रेष्ठ इत्यर्थः।) पारदः। इति राजनिर्घण्टः॥

रसनायकः, पुं, (रसानां नायकः नेता रसायन-विद्याविष्कारकत्वादस्य तथात्वम्।) शिवः। इति शब्दरत्नावली॥

रसनालिट्, [ह्] पुं, (रसनया लेढ़ीति । लिह + क्विप् ।) कुक्कुरः । इति हेमचन्द्रः ॥ रसनया लेहनकर्त्तरि, त्रि ॥

रसनेत्रिका, स्त्री, (रसो नेत्रमिव तदस्त्यस्या इति । रसनेत्र + ठन् ।) मनःशिला । इति हेमचन्द्रः ॥ (मनःशिलाशब्दे ऽस्या गुणादयो ज्ञेयाः ॥)

रसपाकजः, पुं, (रसपाकात् जायते इति । जन् + डः ।) गुड़ः । इति राजनिर्घण्टः ॥

रसफलः, पुं, (रसो जलं फले यस्य रसयुक्तं फलमस्येति वा । प्राकपार्थिववत् मध्यपदलोपी समासः ।) नारिकेलवृक्षः । इति शब्दरत्नावली ॥ (नारिकेलशब्दे ऽस्य विशेषो विज्ञेयः ॥)

रसभवं, क्ली, (रसात् रसे वा भवतीति ।) भू + अच् ।) रक्तम् । इति राजनिर्घण्टः ॥

रसमञ्जरी, स्त्री, (रसानां मञ्जरीव ।) नायकनायिकाभेदकथनग्रन्थविशेषः । यथा,—

"विद्वज्जनमनोभृङ्गरसचासङ्गहेतवे ।
इयं प्रकाश्यते श्रीमद्भानुना रसमञ्जरी ॥"

इति तस्य द्वितीयः श्लोकः ॥

रसमयः, त्रि, रसस्वरूपः । रसात्मकः रसशब्दात् मयट्प्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । ३ । ५ । ३४ ।

"आधत्तामो रसमयं कालमाद्यांशयोगतः ॥")

रसमर्द्दनं, क्ली, (रसस्य पारदधातोर्मर्द्दनम् ।) पारदपेषणम् । यथा,—

"इष्टिकाचूर्णचूर्णाभ्यामादौ मर्द्यो रसस्ततः ।
दृषा गुड़ेन सिन्धूत्थराजिकायुग्धूमकैः ॥"

अन्यच्च ।

"कुमारिकाचित्रकरक्तसर्षपैः
स्नुतैः कषायैर्हृतौविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥"

इति भावप्रकाशः ॥

रसमारणं, क्ली, (रसस्य पारदस्य मारणम् ।) पारदस्य मारणम् । यथा,—

"धूमसारं रसं तोरिं गन्धकं नवसादरम् ।
यामैकं मर्द्दयेदम्लैर्भागं कृत्वा समं समम् ॥
काचकूप्यां विनिःक्षिप्य ताप्यं स्रद्वस्त्रमुद्रया ।
विलिप्य परितो वक्त्रं मुद्रां दत्त्वा विशोषयेत् ॥
अधःसच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीवालुकापूरैर्भृत्वा वा कूपिकागलम् ॥
निवेश्य चुल्ल्यां तदधो वह्निं कुर्य्याच्चनैः शनैः ।
तस्मादप्यधिकं किञ्चित् पावकं ज्वालयेत् क्रमात् ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत् खाङ्गशीतं तन्मर्द्दनं गन्धकं त्यजेत् ॥
अधश्च स्रुतं स्रुतं गृह्णीयात् तन्तु मात्रया ।
यथोचितानुपानेन सर्व्वकर्म्मसु योजयेत् ॥"

इति भावप्रकाशः ॥

रसमूर्च्छनं, क्ली, (रसस्य पारदस्य मूर्च्छनम् ।) पारदस्य मूर्च्छाकरणम् । यथा,—

"त्रुट्यर्धं त्रिफलाबन्धाकन्दैः क्षुद्रद्वयान्वितैः ।
चित्रकोष्णनिशाचारकन्याकनकदवैः ॥
स्रुतं स्रुतेन यूषेण वारान् सप्ताभिमूर्च्छयेत् ।
इत्थं संमूर्च्छितः सूतस्त्रयेत् सप्तापि कक्षुकान् ॥"

इति भावप्रकाशः ॥

(तथास्य विवृतिः ।

"गन्धकेन रसं प्राज्ञः सुदृढ़ं मर्द्दयेद्विधक् ।
कज्जलाभो यदा स्रुतो विहाय घनचापलम् ॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः ।
अयं रोगचयं हन्यादनुपानस्य योगतः ॥"

इति मूर्च्छनम् ॥ * ॥

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रसराजः, पुं, (रसानां धातूनां राजा इति । "राजाहःसखिभ्यष्टच् ।"५।४।९१। इति टच् ।) पारदः । रसाञ्जनम् । इति राजनिर्घण्टः ॥

रसलेढ्यः, पुं, (रसान् अपरान् धातून् लेढ़ीति । लिह + पचाद्यच् ।) पारदः । इति राजनिर्घण्टः ॥

रसवती, स्त्री, (रसो विविधखाद्यरसो विद्यतेऽस्यामिति । रस + "रसादिभ्यश्च ।" ५ । २ । ९५ । इति मतुप् । मस्य वत्वम् ।) महानसम् । इत्यमरः ॥ (यथा, सांख्यतत्त्वकौमुद्याम् । ५ ।

"यथा धूमादग्नित्वसामान्यविशेषः पर्व्वते अनुमीयते तस्य च वह्नित्वसामान्यविशेषस्य स्वलक्षणो वह्निविशेषो दृष्टो रसवत्याम् ॥*॥")

रसविग्निष्टे, त्रि ॥ (यथा, आर्य्यासप्तशती ।४९८।

"रोगोऽपि रसवतीनां न कर्कशो वा चिरानुबन्धी वा ॥")

रसशोधनं, क्ली, (रसः शोध्यतेऽनेनेति । शुध् + णिच् + ल्युट् । रसं पारदं शोधयत्यनेनेति वा ।) टङ्कणः । इति हेमचन्द्रः ॥ (रसस्य शोधनम् ।) पारदशुद्धिः । यथा,—

"कुमारिकाचित्रकरक्तसर्षपैः
स्नुतैः कषायैर्हृतौविमिश्रितैः ।
फलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥

एवं कदर्थितः सूतः वह्नौ भवति निश्चितम् ।
वङ्गौषधीकषायेण स्वेदितः स बली भवेत् ॥
सर्पाक्षीचिञ्चिकाबन्धाभ्रङ्गारैः स्वेदितो बली ।
ततः सपावकदावैः खिन्नः स्यादतिदीप्तिमान् ॥"

इति भावप्रकाशः ॥

(मतान्तरम् ।

"जयन्त्या वर्द्धमानस्य पार्श्वकस्य रसेन च ।
वायस्याश्चानुपूर्व्व्यैवं मर्द्दनं रसशोधनम् ॥
एषां प्रत्येकशस्तावन्मर्द्दयेत् स्वरसेन च ।
यावच्च शुष्कतां याति सप्तवारं विचक्षणः ॥
उद्वृत्योद्धारनालेन स्रुद्धाक्षे चालयेत् सुधीः ।
सर्व्वदोषविनिर्म्मुक्तः सप्तकञ्चुकवर्ज्जितः ॥
जायते शुद्धसूतोऽयं युज्यते सर्व्वकर्म्मसु ॥"

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रसस्निन्दूरं, क्ली, (रसजातं सिन्दूरमिति ।) औषधविशेषः । तस्य नामान्तरं सिन्दूररसः ।

यथा,—

"शुद्धसूतस्य गृह्णीयाद्भिषग्भागचतुष्टयम् ।
शुद्धगन्धस्य भागैकं तावत् स्रुचिमगन्धकम् ॥
अथवा पारदस्यार्द्धं शुद्धगन्धकमेव हि ।
तयोः कज्जलिकां कुर्य्याद्दिनमेकं विवर्ज्जयेत् ।
स्फटिकां वाससा सार्द्धं कुट्टयेदतियत्नतः ।
तया वारत्रयं सम्यक् काचकूपीं प्रलेपयेत् ॥
स्फटिकां श्लोषयित्वा तु कूप्यां कज्जलिकां
क्षिपेत् ।
तां कूपीं वालुकायन्त्रे स्थापयित्वा रसं पचेत् ॥
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम् ।
गृह्णीयादूर्द्धसंलग्नं सिन्दूरसदृशं रसम् ॥"

इति भावप्रकाशः ॥

(मतान्तरम् ।

"पृथक् समं समं कृत्वा पारदं गन्धकन्तथा ।
नवसारं धूमसारं स्फटिकं यावमात्रकम् ॥
निम्बूरसेन संमर्द्द्य काचकूप्यां निवेशयेत् ।
मुखे पाषाणखटिकां दत्त्वा मुद्रां प्रलेपयेत् ॥
सप्तभिर्म्रत्तिकावस्त्रैः पृथक्संशोष्य देशयेत् ।
सच्छिद्रायां स्रुदस्थाल्यां कूपिकां तां निवेशयेत् ।
पूरयेत् सिकतापूरैरागलं मतिमान् भिषक् ।
निवेश्य चुल्ल्यां दहनं मन्दं मध्यं खरं क्रमात् ॥
प्रज्वाल्य दारुजं यामं खाङ्गशीतं समुद्धरेत् ।
स्फोटयित्वा तु मुक्ताभमूर्द्धलग्नं वलिं त्यजेत् ।
अधःस्थं रससिन्दूरं सर्व्वरोगेषु योजयेत् ॥"

इति रससिन्दूरम् ॥

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

रसस्थानं, क्ली, (रसः स्थानमाधार उत्पत्तिस्थानं यस्य । रसस्य पारदस्य स्थानमिव्वेके ।) हिङ्गुलम् । इति शब्दचन्द्रिका ॥ शरीरस्य रसस्थानञ्च । तस्य प्रमाणं रसशब्दे द्रष्टव्यम् ॥

रसा, स्त्री, (माधुर्य्यादिरूपो विविधो रसोऽस्यस्यामिति । "अर्शआदिभ्योऽच् ।"५ । २ । १२७ । इति अच् । रसति शब्दायते इति वा । रस + अच् । टाप् च ।) पृथिवी । इत्यमरः ॥ रसना । (तत्पर्य्यायो यथा, भावप्रकाशे ।१।१।

"रास्ना युक्तरसा रस्या सुवहा रसना रसा ।
रजाप्रसूती च सुरसा सुगन्धा श्रेयसी तथा ॥")

पाठा । (अस्याः पर्य्यायो यथा भावप्रकाशे ।१।१।

"पाठाम्बष्ठाम्बष्ठकी च प्राचीना पारिपेलिका ।
एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥"

शल्लकी । (अस्याः पर्य्यायो यथा,—

"शल्लकी गजभक्ष्या च सुवहा सुरभी रसा ।
मद्दरुग्णा कुन्दुरुकी वल्लकी च बहुत्वचा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कङ्कुः । इति मेदिनी ॥ द्राक्षा । काकोली । इति शब्दरत्नावली ॥ (रसातलम् । यथा, भागवते । १० । ६ । १२ ।

"रसा दिशश्च प्रतिनेदिरे जनाः
पेतुः क्षितौ वज्रनिपातशङ्कया ॥"

यथा च तत्रैव । ३ । १३ । १६ ।

"ह्रजतो मे क्षितिवांभिः प्राय्यमाना रसां गता ॥"
"रसां रसातलं गता।"इति तट्टीकायां स्वामिपादाः॥ नदी। यथा, ऋग्वेदे।१।११२।१२।
"याभी रसां चोदसोदः पिपिन्वथुः॥"
"रसां नदीम्।" इति तद्भाष्ये सायणः॥)
रसाखनः, पुं, (खनतीति। खन् विदारे+अच्। रसाया भूमेः खनः।) कुक्कुटः। इति शब्दचन्द्रिका॥
रसाग्रजं, क्ली, (रसानां अग्र्यं रसस्य अग्रे जायते इति वा। जन्+डः।) रसाञ्जनम्। इति राजनिर्घण्टः॥
रसाञ्जनं, क्ली, (रसजातमञ्जनं इति मध्यपदलोपी कर्म्मधारयः।) रसजातीयाञ्जनविशेषः। रसवत् इति भाषा॥ तत्पर्य्यायः। रसगर्भम् २ तार्क्ष्यशैलम् ३। इत्यमरः॥ रसोद्भूतम् ४ रसाग्र्यजम् ५ कृतकम् ६ दालभेदिव्यम् ७ दार्व्यौकाधोद्भवम् ८ रसराजः ९ वर्ण्याञ्जनम् १० रसनागर्भम् ११ अग्निसारम् १२। अस्य गुणाः। स्निग्धत्वम्। तिक्तत्वम्। चक्षुष्यत्वम्। मधुरत्वम्। कटुत्वम्। रक्तपित्तविषच्छर्द्दिकापस्मारनाशित्वञ्च।
"रीत्यानु प्राय्यमाणायां तत्कटङ्कु रसाञ्जनम्। तदभावे तु कर्त्तव्यं दार्व्यौकाधसमुद्भवम॥"
इति राजनिर्घण्टः॥
अपि च।
"दार्व्यौकाधसमं क्षौद्रं पादं पक्वा यथाधनम्। तदा रसाञ्जनाख्यं तन्नेत्रयोः परमं हितम॥
रसाञ्जनं तार्क्ष्यशैलं रसगर्भञ्च तार्क्ष्यजम्। रसाञ्जनं कटु स्नेग्धविषनेत्रविकारनुत्।
उष्णं रसायनं शिक्षं छेदनं व्रणदोषहृत्॥"
इति भावप्रकाशः॥
रसाढ्यः, पुं, (रसेनाढ्यः युक्तः।) आम्रातकः। इति राजनिर्घण्टः॥ (आम्रातकशब्देऽस्य विवरणं ज्ञातव्यम॥)
रसातलं, क्ली, (रसायाः तलं निम्नभाग्यलोकविशेषः।) पातालम्। इत्यमरः॥ (यथा, महाभारते। १२। ३४७। ५६।
"जग्राह वेदानखिलान् रसातलगतो हरिः॥")
पातालभेदः। यथा,—
"अतलं वितलञ्चैव नितलञ्च तलातलम्॥
महातलञ्च सुतलं सप्तमञ्च रसातलम्॥
पातालभेदाः सप्तैव नामतः कीर्त्तिता अमी। तच्च पातालमेकैकं दशसाहस्रयोजनम्॥"
इति शब्दमाला॥
(इदमेव निवातकवचानां निवासस्थानम्। तथा च देवीभागवते। ८। २०। ८—१२।
"ततोऽधस्ताच्च विवरे रसातलसमाह्वये। दैतेया निवसन्त्येव पणयो दानवाश्च ये॥
निवातकवचा नाम हिरण्यपुरवासिनः। कालेया इति च प्रोक्ताः प्रह्लादीका इवि-भुजाम्॥
महौजसश्चोत्पत्तौव महासाहसिनस्तथा। सकलेशस्य च हरेस्तेजसा हतविक्रमाः॥
विलेशया इव सदा विवरे निवसन्ति हि। ये दैवागभिः सरमया भक्षयित्वा निरन्तरम्॥
मन्त्रवर्णाभिरसुरास्ताड़िता विभ्यति स्म ह॥")
रसादानं, क्ली, (रसानां आदानं ग्रहणम्।) शोषणम्। इति हेमचन्द्रः॥ (रसाया दानम्।) भूमिदानञ्च॥
रसाधारः, पुं, (रसानां जलानां आधारः। रसां पृथिवीं धरति स्वाकर्षणेनेति वा। धृ+णच्।) सूर्य्यः। इति शब्दरत्नावली॥ रसस्याधारश्च॥
रसाधिकः, पुं, (रसाय स्वर्णादीनां द्रवीकरणाय अधिकः प्रबलः।) टङ्कणः। इति राजनिर्घण्टः॥ अधिकरसश्च॥
रसाधिका, स्त्री, (रसेन अधिका।) काकोलीद्राक्षा। इति राजनिर्घण्टः॥
रसाभासः, पुं, (रस इव आभासते इति। आ+भास्+अच्।) अनौचित्यविशिष्टरसः। तस्य लक्षणं यथा,—
"अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः।"
अनौचित्यञ्चात्र रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे सत्येकदेशयोगित्वोपलक्षणपरं बोध्यम्। तच्च बालयुवत्पत्तये एकदेशतो दृश्यते। उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च। बहुनायकविषयायां रतौ तथानुभयनिष्ठायां प्रतिनायकनिष्ठत्वे तद्दृश्यमपात्रतिर्य्यगादिगते शृङ्गारे अनौचित्यम्। रौद्रे गुर्व्वादिगतकोपे। भ्रान्तौ च हीननिष्ठे। गुर्व्वालम्बने हास्ये। ब्रह्मवधादुत्साहे। अधमपात्रगते तथा वीरे। उत्तमपात्रगतत्वे भयानके स्त्रीयमेवमन्यच्च। तत्र रतेरुपनायकनिष्ठत्वे यथा मम।
"स्वामी सुग्धतरो वनं घनमिदं बालाहमेकाकिनी चौरीमाशङ्कते तमालमलिनच्छायातमः-सन्ततिः।
तन्वि सुन्दर! सुष्ठ लब्धं! सहसा वर्त्मेति गोप्या गिरः
श्रुत्वा तां परिरभ्य मन्मथकलामल्लो हरिः पातु वः॥"
बहुनायकनिष्ठत्वे यथा,—
"कान्तास्त्व एव भुवनत्रितयेऽपि मन्ये येषां कृते सुतनु! पाण्डुरयं कपोलः।"
अनुनयनिष्ठत्वे यथा,—
मालतीमाधवे नन्दनस्य मालत्याम्। पश्चादुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रतेराभासत्वमिति श्रीमल्लोचनकाराः। तत्रोदाहरणं यथा रत्नावल्याम्। सागरिकाया अन्योन्यदर्शनात् प्राक् वत्सराजे रतिः। प्रतिनायकनिष्ठत्वे यथा हयग्रीववधे। हयग्रीवस्य जलक्रीड़ावर्णने। अधमपात्रगतत्वे यथा,—
"जघनस्थलनड्वपल्वली-गिरिमल्लीकुसुमानि कापि भिल्ली।
अवचित्य गिरौ पुरो निषण्णा स्वकनासुल्कचयाच्चकार भल्लम्॥"
तिर्य्यग्गतत्वे यथा,—
"मल्लीमतल्लीषु वनान्तरेषु वल्लान्तरे वल्लभमाश्रयन्ती।
यच्छद्मपक्षी कलनादभङ्गी सङ्गीतभङ्गीकुरुते स्म भृङ्गी॥"
आदिशब्दात्तापसादयः। रौद्राभासो यथा—
"रक्तोत्फुल्लविशाललोचनयुगः कम्योत्तराङ्गो मुहु-र्म्मुञ्चाकर्षमपेतभीर्धृतधनुर्ब्बाणो हरेः पश्यतः।
आभातः कटुकोक्तिभिः क्षमसखद्रोर्व्विक्रमं कीर्त्तयन् अंसास्फोटपटुर्युधिष्ठिरमसौ हन्तु प्रविष्टोऽर्জ্জুनः॥"
भयानकाभासो यथा—
"अग्रक्रुधन् सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम्।
प्रविश्य हैमादिगुहाग्रहान्तरं निनाय विभ्यद्दिवसानि कौशिकः॥"
स्त्रीनीचविषयमेव हि भयं रसग्रहाति। एवमन्यच्च। इति साहित्यदर्पणे ३ परिच्छेदः॥
रसाम्लं, क्ली, (रसात्कोऽम्लो यत्र।) वृक्षाम्लम्। इति राजनिर्घण्टः॥ चुक्रम्। इति भावप्रकाशः॥
रसाम्लः, पुं, (रसेन सह अम्लो यत्र।) अम्लवेतसः। इति राजनिर्घण्टः॥
रसायकः, पुं, (रसं रसत्वमयति प्राप्नोति इति। अय+खुल्।) व्रणविशेषः। इति शब्दचन्द्रिका॥
रसायनं, क्ली, कटिः। इति राजनिर्घण्टः॥ (रसो दुग्धं अयनं स्थलं यस्येति।) तक्रम्। इति हेमचन्द्रः॥ विषम्। (रसा रसरक्तादय इयन्ते प्राप्यन्ते अनेनेति। इ+ल्युट्।) ज्वराद्यधिनाशकौषधम्। इति मेदिनी॥ (यथा, माघे। २। ६३।
"षाड्गुण्यमुपयुञ्जीत शक्रयंपेयं रसायनम्। भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च॥")
"न स्तुतेन विना कान्तं न कान्तेन विना रसः। स्तुतकान्तसमायोगात् रसायनमुदीरितम्॥"
इति राजनिर्घण्टः॥ *॥
अथ रसायनाधिकारः। तत्र रसायनस्य लक्षणमाह।
"यज्जराव्याधिविध्वंसि वयस्तम्भकरञ्च यत्। चक्षुष्यं हृद्यं दृश्यं भेषजं तद्रसायनम्॥"
रसायनस्य फलमाह।
"दीर्घमायुः स्मृतीर्मेधामारोग्यं तरुणं वयः। देहेन्द्रियबलं कान्तिं नरो विन्देद्रसायनात्॥"
तद्विधिमाह।
"पूर्व्वे वयसि मध्ये वा मनुष्यस्य रसायनम्। प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा॥
नाविशुद्धशरीरस्य युक्तो रसायनो विधिः। न भाति वाससि श्वेते रङ्गयोग इवाहितः॥*

अथ तदुदाहरणानि ।
"प्रीतोदकं पय: क्षौद्रं घृतमेकैकशो हिम: ।
त्रिम: समस्तमथवा प्राक् पीतं स्यात्पयेहय: ॥
मण्डूकपर्ण्या: स्वरस: प्रभाते
प्रयोज्य यष्टीमधुकस्य चूर्णम् ।
रसो गुडूच्यास्तु सशर्कराया:
कल्क: प्रयोज्य: खलु शङ्खपुष्प्या: ॥
आयु:प्रदान्यामयनाशनानि
बलाग्निवर्णस्वरवर्द्धनानि ।
मेध्यानि चैतानि रसायनानि
मेध्यो विशेषेण च शङ्खपुष्पी ॥"
मण्डूकपर्णी ब्राह्मी। वरभी इति लोके। तदलाभे मञ्जिष्ठापि ग्राह्या। तस्या अपि रसायनत्वात् ।
"माक्षिकेण तुगाक्षीर्या पिप्पल्या लवणेन च ।
त्रिफला सितया वापि युक्ता सिद्धं रसायनम् ॥
सिन्धूत्थशर्करासुष्ठीकणामधुगुडै: क्रमात् ।
वर्षादिष्वभया प्राश्या रसायनगुणैषिणा ॥
पुनर्नवस्यार्द्धपलं नवस्य
पिष्टं पिबेदूष्य पयसार्द्धमासम् ।
मासत्रयं तत्त्रिगुणं समां वा
जीर्णोऽपि भूय: स पुनर्नव: स्यात् ॥
ये मासमेकं खरसं पिबन्ति
दिने दिने भृङ्गरजःसमुत्थम् ।
क्षौराग्निसर्पे बलवीर्य्ययुक्ता:
समाशतं जीवनमाप्नुवन्ति ॥
घृतावरी सुस्थितिका गुडूची
सहस्रिकर्षा सहतालमूली ।
एतानि क्षुत्वा समभागयुक्ता-
न्याज्येन किंवा मधुनावलिह्यात् ।
जराकृशाग्न्यल्पवियुक्तदेहो
भवेन्नरो वीर्य्यबलादियुक्त: ।
विभाति देवप्रतिम: स नित्यं
प्रभामयो भूरिविवृद्धबुद्धि: ॥
पीताम्बुगन्धा पयसार्द्धमासं
घृतेन तैलेन सुखाम्बुना वा ।
वीर्य्यस्य पुष्टिं वपुषो विधत्ते
बालस्य ग्रस्तस्य यथामृतर्द्धि: ॥
अय:पलं गुग्गुलुरत्र योज्य:
पलत्रयं शोधितजानि पञ्च ।
पलानि चाष्टौ त्रिफलारजश्च
कर्षं लिहन् याति नरस्तमेव ॥"
लोहगुग्गुलु: ।
"न केवलं दीर्घमिहायुरश्नुते
रसायनं यो विधिवत् निषेवते ।
गतिं स देवर्षिनिषेवितां शुभां
प्रपद्यते ब्रह्म तथैव चाक्षयम् ॥"
इति रसायनाधिकारे भावप्रकाश: ॥
(तथा च ।
"नाभीपायोद्भिन्नानां रसादीनां रसायनम् ।
पूर्वे वयसि मध्ये वा तत् प्रयोज्यं जितात्मन: ।
स्निग्धस्य सुतरक्तस्य विशुद्धस्य च सर्व्वथा ॥
नाविशुद्धे शरीरे हि युक्तो रसायनो विधि: ।
वाजीकरो वा मलिने वस्त्रे रङ्ग इवाफल: ॥'
"रसायनानां द्विविधं प्रयोगमृषयो विदु: ।
कुटीप्रावेशिकं सद्म वातातपिकमन्यथा ॥
निर्व्वाते निर्भये हर्म्ये प्राग्योपकरणे पुरे ।
दिग्युदीच्यां शुभे देशे त्रिगर्भां सूक्ष्मलोचनाम् ॥
धूमातपरजोव्यालस्त्रीसूर्खाद्यविलङ्घिताम् ।
सर्व्वदोपकरणां सुस्थां कारयेत् कुटीम् ॥
अथ पुण्येऽह्नि संपूज्य पूज्यांस्तां प्रविशेच्छुचि: ।
तत्र संशोधनै: शुद्ध: सुखी जातबल: पुन: ॥
ब्रह्मचारी धृतियुत: श्रद्दधानो जितेन्द्रिय: ।
दानशीलदयासत्यव्रतधर्म्मपरायण: ॥
देवताद्युक्तितो युक्तो युक्तस्वप्नप्रजागर: ।
प्रियौषध: पेशलवाक् प्रारभेत रसायनम् ॥
हरीतकीमामलकं सैन्धवं नागरं वचाम् ।
हरिद्रां पिप्पलीं वेल्लं गुडूचीञ्चानुना पिबेत् ॥
स्निग्ध: स्निग्धो नर: पूर्व्वं तेन साधु विरिच्यते ।
तत: शुद्धशरीराय कृतसंसर्ज्जनाय च ॥
चिराचं पयसाद्यं वा सप्ताहं वा घृतान्वितम् ।
दद्यादृषाक्कमाशुद्धे: पुराणशकृतोऽथ वा ॥
इत्थं संस्कृतकोष्ठस्य रसायनमुपाहरेत् ।
यस्य यद्यौगिकं प्रोक्तं सर्व्वमालोच्य सात्म्य-
वित् ॥"
"कुटीप्रवेश: क्षणिनां परिच्छदवतां हित: ।
अतोऽन्यथा तु ये तेषां सूर्य्यमातपिकीविधि: ॥
वातातपसहायोगा वक्ष्यन्तेऽतो विशेषत: ।
सुखोपचारा भंगेऽपि ये न देहस्यबाधका: ॥"
इत्युत्तरस्थानीयवागभटे २६ अध्याये ।
विशेषस्तु तत्रिमध्याये ज्ञातव्य: ॥ * ॥ रस: पारद: तत्सदृशया तज्जातीय-हरितालादिकञ्च अयनं आश्रय उपायो वा यस्य तत् । स्वर्णादि-करणम् ।
अथरसायने ईश्वर उवाच ।
"गोमूत्रं हरितालञ्च मन्थकञ्च मन:शिलाम् ।
समं समं गृहीत्वा तु यावत् शुष्यति पेषयेत् ॥
एकादशदिनं यावत् यत्नेन रक्षयेत् शुचि: ।
मन्त्रेण धूपदीपादिनैवेद्यैर्दुग्धमिश्रितै: ॥
मन्त्रस्तु ॐ हरिहराय रसायनं सिद्धिं कुरुकुरु स्वाहा । अयुतजपेन सिद्धि: ।
तद्वटीं गोलकं कृत्वा वस्त्रेणावेष्टयेत् पुन: ।
मृत्तिकां लेपयेत्तस्य च्छायायां शुष्कमु कारयेत् ॥
गर्त्ते कुक्षे विनिक्षिप्ते पलाशकाष्ठवह्निना ।
ज्वालयेदहोरात्रमेवं नान्यथा शङ्करोदितम् ॥
तद्वटस्य जायते सिद्धिर्व्विद्ध सिद्धिसमाकुलम् ।
ताम्रपात्रे अग्निमध्ये विद्रुमाभं नियच्छति ॥
ततश्चाजायते स्वर्णं नान्यथा शङ्करोदितम् ।
दातव्यं गुरुभक्ताय न दद्याद्दुष्टमानसे ।
सिद्धपीठे भवेत्सिद्धिर्गोपनीयञ्चजापनै: ॥
यस्मै कस्मै न दातव्यं दातव्यं शिवभक्तके ।
अग्निमुखं द्विजातीनां पाचकानां विशेषत: ।
गोप्यं गोप्यं महागोप्यं देवानामपि दुर्लभम् ॥"
प्रकारान्तरम् ।
"आनीय वह्नियत्नेन समभागं तोलकद्वयम् ।
वसुराजं शिवबीजं मायाविष्टसमन्वितम् ॥
बीजत्रयञ्चाष्टगुणं प्रक्षेपेत् सम्बलीपरि ।
अग्नीतितोलकमानं क्षणाधेगुसमुद्भवम् ॥
दुग्धमानीय यत्नेन चाष्टोत्तरशतं जपेत् ।
वस्त्रयुक्तेन सत्त्वेन दुग्धमध्ये विनिक्षिपेत् ॥
उत्तापं ज्वालयेद्धीमान् मन्दमन्देन वह्निना ।
रिपुर्व्वदाहपर्य्यन्तमङ्गशैथिल्यं भवेद्यदि ॥
तदैवोत्तोल्य तद्द्रव्यं दुग्धं तोये विनिक्षिपेत् ॥"
तत: परीक्षा कर्त्तव्या ।
"निर्धूमं पावके द्रव्यं दृष्ट्वा उत्थाप्य यत्नत: ।
तत्रैव प्रक्षपेत्तत्तुल्यं सर्व्वबन्धनमात्रकम् ॥
सार्द्धेन तोलकं ताम्रं दृष्ट्वा उत्थाप्य यत्नत: ।
गुञ्जाप्रमाणं तद्द्रव्यं सत्यं सत्यं हि शङ्करि ! ।
रौप्यं भवति तद्द्रव्यं नान्यथा शङ्करोदितम ॥"
प्रकारान्तरम् ।
"ताम्रसर्पमेकं गृहीत्वा तस्य मुखे शिवबीजं पूरयित्वा सर्पस्य मुखं गुदञ्च बद्ध्वा नूतनन्मृन्मय-स्थालीमध्ये संस्थाप्य स्थालीमुखं मृदादिना संलिप्य निर्ज्जनस्थाने प्रातरारभ्य पुन:प्रात-र्यावत् वह्निना ज्वालं दद्यात् । तत: शुभलग्ने स्थालीमुखमुद्घृत्य सर्पभस्म विहाय शिवबीजं गृह्णीयात् । ततस्तोलकमितं ताम्रं गालयित्वा तस्मिन् गालिततास्रे रक्तिकमात्रं तत् शिवबीजं दद्यात् तेन ततश्चणादेव तत्ताम्रं सुवर्णीभूतम् । आदौ शिवबीजं क्षत्वा पश्चात् प्रयोग एव कर्त्तव्य: ॥" इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेय-संवादे रसायनं नाम त्रयोदश: पटल: ॥)
रसायन:, पुं, शङ्कर: । विष्णु: । इति मेदिनी ॥
रसायनफला, स्त्री, (रसायनेन फलति या । फल्+अच् । टाप् ।) हरीतकी । इति त्रिकाण्डशेष: ॥
रसायनश्रेष्ठ:, पुं, (रसायनेषु श्रेष्ठ: ।) पारद: । इति राजनिर्घण्ट: ॥
रसायनी, स्त्री, (रसान् तैलादीन् अयते प्राप्नोतीति । अय्+ल्यु: । ङीष् ।) गुडूची । काकमाची । महाकरञ्ज: । गोरक्षदुग्धा । मांसरोहिणी । इति राजनिर्घण्ट: ॥ (मञ्जिष्ठा । अस्या: पर्य्यायो यथा,—
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लयपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जुषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रसाल, क्ली, (रसं आलातीति । आ+ला+क: ।) सिक्थकम् । मोमम् । इति मेदिनी ॥
रसाल:, पुं, (रसं आलाति गृह्णाति । आ+ला+क: ।) इक्षु: । आम्र: । इत्यमर: ॥ (यथा, साहित्यदर्पणे १०परिच्छेदे अतिशयोक्त्यलङ्कारे।
"प्रागेव हरिणाक्षीणां चित्तसत्कलिकाकुलम् ।
पाश्चादुद्भिन्नबकुलरसालसुकुलस्मिय: ॥")
पनस: । इति शब्दरत्नावली ॥ कुन्दरलता ॥ गोधूम: । पुष्करनामेक्षु: । इति राजनिर्घण्ट: ।

रसालसा, स्त्री, (रसेन अलसा ।) नाड़ी । इति शब्दचन्द्रिका ॥

रसाला, स्त्री, (रसान् आलातीति । आ + ला + कः । टाप् ।) रसना । दूर्व्वा । विदारी । इति मेदिनी ॥ द्राक्षा । इति शब्दरत्नावली ॥ शिखरिणी । तत्पर्य्यायः । मार्क्षिका २ । इत्यमरः ॥ तस्याः करणप्रकारो यथा,—

"आदौ माक्षिकमस्तमम्लरहितं दध्याढकं शर्करां
शुभ्रां प्रस्थयुगोन्मितां शुचिपटे किञ्चिच्च
कञ्चित् क्षिपेत् ।
दुग्धेनाढ्यघनेन स्वल्पमथवास्यात्तां दृढं स्रावये-
देलाबीजलवङ्गचन्द्रमरिचैर्योग्यैश्च तद्योजयेत् ॥
भीमेन प्रियभोजनेन रचिता नाम्ना रसाला स्वयं
श्रीकृष्णेन पुरा पुनःपुनरियं प्रीत्या समा-
स्वादिता ।
एषा येन वसन्तवर्ज्जितदिने सेव्या परं नित्यशः
तस्य स्यादतिवीर्य्यवृद्धिरनिशं सर्व्वेन्द्रियाणां
बलम् ।
ग्रीष्मे तथा शरदि ये रविशोषिताङ्गा
ये च प्रमत्तवनितासुरतातिखिन्नाः ।
ये चापि मार्गपरिसर्पणशीर्णगात्रा-
स्तेषामियं वपुषि पोषणमाशु कुर्य्यात् ॥
रसाला शुक्रला बल्या रोचनी वातपित्तजित् ।
दीपनी हृद्या स्निग्धा मधुरा गुरुगी सरा ।
रक्तपित्तं क्षयं दाहं प्रतिश्यायं विनाशयेत् ॥"

इति राजनिर्घण्टः ॥

अपि च ।

"दध्नोऽर्द्धांढकमीषदम्लमधुरं खण्डस्य चन्द्रद्युतेः
प्रस्थं चौद्रपलञ्च पञ्च हविषः शुण्ठ्याश्चतुर्भागकान् ।
एलामाक्षिकतुल्यं मरिचतः कर्षं लवङ्गं तथा
धृत्वा शुक्लपटे घृते: करतलेनोन्मथ्य विस्रा-
वयेत् ॥
स्निग्धे भाजनमाभिषन्दनरसद्रव्यैर्गुरुद्धूपिते
कर्पूरेण सुगन्धितं तदखिलं संलोप्य संस्थापयेत् ।
खण्डार्द्धं मधुरेश्वरेण रचिता क्षौद्रा रसाला स्वयं
भोक्तुर्मन्मथदीपनी सुखकरी कान्तेव नित्यं प्रिया ॥"

इति भावप्रकाशः ॥

रसालिहा, स्त्री, शीर्णनाला । इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ।

रसाली, स्त्री, (रसान् आलाति या । आ + ला + कः । ङीप् ।) पुङ्खकेक्षुः । इति राजनिर्घण्टः ॥

रसाश्वासा, स्त्री, पलाण्डुलता । इति राजनिर्घण्टः ॥

रसास्वादः, पुं, (रसस्य आस्वादः ।) अखण्डस्वप्रकाशानन्दानुभवः । इति वेदान्तसारः ॥*॥ "चतुर्थे विघ्नमाह अखण्डेति । उक्तसविकल्पकसमाधौ सिद्धे द्वितीयः शब्दानुविद्धस्त्रिपुटीविभ्रिष्टस्तस्मिन् य आनन्दो वाच्यशब्दादिविषयप्रपञ्चभारत्यागप्रयुक्तो नतु चैतन्यप्रयुक्तः । यथा निधिग्रहणाय प्रवृत्तस्य निधिपरिपालकभूतप्रेतात्प्रवृत्तस्य निधिप्राप्तेः अभावेऽपि भूतात्प्रनिवृत्तिमात्रेण कोऽपि महानानन्दो भवति तथा सविकल्पकसमाधावखण्डस्वरूपावलम्बनेन नित्यानन्दरसास्वादनाभावेऽपि अनिष्टबाह्यप्रपञ्चनिवृत्तिजन्यानन्दं सविकल्पकरूपं ब्रह्मानन्दभ्रमेण स्वादयति तदास्वादनमित्यर्थः । लक्षणान्तरमाह समाधौत्यादि । निर्व्विकल्पकसमाधारम्भकाले अनुभूय मानसविकल्पकानन्दत्यागासक्तिद्युतया पुनस्तस्मिन्वास्वादनं रसास्वाद इत्यर्थः ।" इति सुबोधव्याख्या तट्टीका ॥

रसास्वादी, [न्] पुं, (रसं मधु आस्वादयितुं शीलमस्य । आ + स्वद् + णिनिः ।) भ्रमरः । इति शब्दमाला ॥ रसास्वादिन्यग्रिहे, त्रि ॥

रसाक्षः, पुं, (रसः आक्षा व्याप्ता यस्य ।) सरलद्रवः । इति रत्नमाला ॥

रसिकः, पुं, (रसोऽस्त्यस्यास्मिन्नेति वा । रस् + ठन् ।) सारसपक्षी । इति राजनिर्घण्टः ॥ तुरङ्गः । हस्ती । इति सारस्वतः ॥ सरसे, त्रि । इति मेदिनी ॥ (यथा, भागवते । २ । १ । ३ ।

"पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ॥")

रसिका, स्त्री, (रसिक + टाप् ।) रसाला । इक्षुरसः । इति मेदिनी ॥ काची । रसना । इति विश्वः ॥

रसिकेश्वरः, पुं, (रसिकानां रसज्ञानामीश्वरः ।) श्रीकृष्णः । यथा,—

"वृन्दावनान्तरे रम्ये रासोत्सवसमुत्सुकम् ।
रासमण्डलमध्यस्थं नमामि रसिकेश्वरम् ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३२ अध्यायः ॥ (रसिकश्रेष्ठश्च ॥)

रसितं, क्ली, (रस शब्दे + भावे क्तः ।) मेघनिर्घोषः । इत्यमरः । कृतम् । खण्डादिखचिते, त्रि । इति मेदिनी ॥

रसुनः, पुं, (रस + उनन् ।) लशुनः । इति शब्दचन्द्रिका ॥(विवरणमस्य रसोनशब्दे ज्ञातव्यम्॥)

रसेन्द्रः, पुं, (रसानां धातुरसानामिन्द्रः श्रेष्ठः ।) पारदः । इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशे । १ । १ ।

"असाध्यो यो भवेद्रोगो यस्य नास्ति चिकित्सितम् ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥"

अस्य पर्य्यायादिकं रसशब्दे द्रष्टव्यम् ॥)

रसोत्तमः, पुं, (रसेषु उत्तमः । यद्वा, रसः उत्तमोऽस्य ।) शुक्रः । इति राजनिर्घण्टः ॥ श्रेष्ठरसश्च ॥

रसोद्भवं, क्ली, (रसात् पारदधातोरुद्भवतीति । उत् + भू + अच् ।) हिङ्गुलम् । इति राजनिर्घण्टः ॥ रसजाते, त्रि ॥

रसोनः, पुं, (रसेनेकेनोनः ।) रसुनः । इति राजनिर्घण्टः ॥ (तस्योत्पत्तिर्यथा,—

"राहोरुत्तप्तचौर्य्येण लूनात् ये पतिता गलात् ।
अमृतस्य कणा भूमौ ते रसोनत्वमागताः ॥
द्विजा नाश्नन्ति तमतो दैत्यदेहसमुद्भवम् ।
साक्षादमृतसम्भूतेर्ग्रामणीः सरसायनम् ॥"

इति वाभटे उत्तरस्थाने ३९ अध्यायः ॥

"अथ वीर्य्यञ्च वक्ष्यामि रसोनस्य महामते ।
रसेन पञ्चभिर्युक्तो रसोनस्तेन वर्ज्जितः ॥"
"दृष्टा वातादिशमनो रसोनो विहितो बुधैः ।
जाङ्गलानि रसान्येव भोजनार्थे प्रदापयेत् ॥"

इति हारीते कल्पस्थाने तृतीयोऽध्याये ॥ अथास्यगुणाः ।

"रसोनो वृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः ।
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ॥
भग्नसन्धानकृत्कण्ठ्यो गुरुः पित्तासृग्दृद्विदः ।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥"

इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ अन्यद्विवरणमस्य रसोनशब्दे लशुनशब्दे च द्रष्टव्यम् ॥)

रसोनकः, पुं, (रसोन + स्वार्थे कन् ।) रसुनः । तत्पर्य्यायः ।

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् ।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥"

तस्योत्पत्तिर्यथा,—

"यदाहृतं वैनतेयो जहार सुरसत्तमात् ।
तदा ततोऽपतद्बिन्दुः सुरसोनोऽभवद्भुवि ॥
पञ्चभिश्च रसैर्युक्तो रसेनाक्षेण वर्ज्जितः ।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः ॥"

अस्यावयवगुणाः ।

"कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ।
बीजे तु मधुरः प्रोक्तो रसज्ञैर्गुणवेदिभिः ॥"

अस्य भक्षणगुणाः ।

"रसोनो वृंहणो वृष्यो स्निग्धोष्णः पाचनः सरः ।
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ॥
भग्नसन्धानकृत्कण्ठ्यो गुरुः पित्तासृग्दृद्विदः ।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥
कुष्ठोदरजीर्णज्वरकृमिशूल-
विबन्धगुल्मारुचिकासप्लीहान् ।
दुर्नामकुष्ठानलसादजन्तु-
समीरणश्वासकफांश्च हन्ति ॥
मद्यं मांसं तथाम्लञ्च हितं लशुनसेविनाम् ॥
यायाममातपं रोषमतितीक्ष्णपयो गुरुम् ।
रसोनभक्षन् पुरुषस्त्यजेदेतन्निरन्तरम् ॥"

इति भावप्रकाशः ॥

(तथास्यान्या विकृतिर्यथा,—

"अस्तमधने जातः सुरासुरयज्ञो महान् ।

जहार वैनतेयश्च चक्षुषा त्रिदिवं गतः ॥
संग्रामश्रमसम्प्राप्ते श्रमवेगप्रधाविते ।
आरूढे वैजवं प्राप्ते च्युता क्षुत्तविन्दवः ॥
सकृत् सन्दूषिते देहे पतितास्तत्र संस्थिताः ।
तस्मात् कालवशाज्जातं दुर्भिक्षं द्वादशाब्दिकम् ॥
विमुक्ताः कानने सर्व्वा वृक्षकाष्ठप्रतारिकाः ।
तस्माच्च कानने सर्व्वे प्रकृतं गहनं गताः ॥
तेषां मध्ये जरायस्तो गतिहीनोऽतिजर्ज्जरः ।
सपुष्टिः सरजिह्वश्च श्रीर्षदन्तावलीसुखः ॥
सक्तक्षेत्रे क्षुधापन्नैः ऋषिभिस्तत्र विप्लुतः ।
सोऽपि क्षुधातुरः सर्व्वां पर्य्यटन्नुर्व्वरां महीम् ॥
कुत्रचित् पुण्ययोगेन दृष्टवान् विटपान् शुभान् ।
शीतशैवालसङ्काशान् शाद्वलान् बहुलान् भुवि ।
क्षुधासंपीड़नेनापि भुक्तवान् साद्वलानपि ॥
बह्वात्मानन्तरे शुष्कान् विटपान् तदनन्तरम् ।
भुक्तवान् कन्दकान् सोऽपि मासमेकं तथा ऋषिः ॥
पश्चात् सुभिक्षे सञ्जाते सर्व्वे चैकत्र संस्थिताः ।
सोऽपि दृष्टो युवा भूत्वा गतस्तत्र च यत्र ते ॥
तं दृष्ट्वा विस्मयापन्नाः पप्रच्छुः किं कृतं त्वया ।
सोक्तवान् सोऽपि किञ्चित्र कृपा तैः प्रापितक्षतः ॥
यत्त्वया खादितं द्रव्यं तदभक्ष्यं द्विजातिभिः ।
दुर्गन्धमपि चित्रञ्च तस्माज्जातं रसोनकम् ॥"
"तेन रसोनकं नाम विख्यातं भुवनत्रये ।
कुक्कुटाण्डनिभं श्रीमे प्रौर्णपर्णे वसुन्धरेत् ॥
मद्रा पुटे सुनिर्गन्धं धारयेत्तन्महामते ।
दोषान्यिदग्धनाशेन म्रियते दीर्घते भुवि ॥
वर्षासु शिशिरे चैव कारयेन्मात्रया युतम् ।
रामठं जीरकं हे च अजमोदाकटुत्रयम् ॥
घृतसौवर्चलोपेतं वातरोगे विशेषतः ।
मातुलुङ्गरसेनापि शूलानाहे प्रकीर्त्तितः ॥"
इति हारीते कल्पस्थाने तृतीयोऽध्याये ।
अस्यान्यत् द्विजाभक्ष्यत्वकारणादिकं रसोनशब्दे द्रष्टव्यम् ।)

रसोपलं, क्ली, (रसवत् पारद इव उपलम् ।) मौक्तिकम् । इति त्रिकाण्डशेषः ॥

रसं, क्ली, (रस+"हविशुषिरसिभ्यः कित् ।" उणा० ३ । १२ । इति मप्रत्ययः ।) द्रव्यम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रसं, क्ली, (रसात् शुक्लान्नादिपरिपाकात् आगतमिति । रस+ यत् ।) रक्तम् । इति शब्दचन्द्रिका । (यथा, महाभारते । १४ । ५ । ० । ३२ ।
"यत्रैव गन्धिनो रसं गरूपं सम्प्रगृह्यवत् ।"
रसयुक्ते, त्रि : यथा, भगवद्गीतायाम् । १७ । ८ ।
"रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥")

रस्ना, स्त्री, (रसाय हिता । रस+यत् । टाप् ।) राखा । (अस्याः पर्य्यायो यथा,—
"राखा शुक्लरसा रस्ना सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
पाठा । इति राजनिर्घण्टः ॥

रंह, गै गतौ । इति कविकल्पद्रुमः । (अदन्त चुरा०-पर०-सक०-सेट् ।) रंहयति रंहापयति । इति दुर्गादासः ॥

रंहः, [स्] क्ली, (रम+"रमेर्हश्च ।" उणा० ४ । २१३ । इति असुन् हुगागमश्च । "अहि रहिभ्यामसुन् इत्यहो रंह इति धातुप्रदीपः ।" इत्युज्ज्वलः ।) वेगः । तत्पर्य्यायः । तरः २ रयः ३ स्फूर्द्दः ४ यवः ५ । इत्यमरः ॥ रंघः ६ यवनः ७ । इति तट्टीका ॥ (यथा, रघुः । २ । ३४ ।
"न पादपोन्मूलनशक्तिरंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥")

रह, त्यजि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रहति सुखं दीनः । इति दुर्गादासः ॥

रह, ह ङ त्यागे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ह, रंक्षते । इति दुर्गादासः ॥

रह, तृ क त्यागे । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) रहयति श्लोकं धीरः । इति दुर्गादासः ॥

रहः, [स्] क्ली, (रमन्तेऽस्मिन् । रह+"हेरेच्च ।" उणा० ४ । २१४ । इति असुन्प्रत्ययः । हकारस्यान्तादेशः । "रह त्यागे अस्मादसुनि रह इति धातुप्रदीपः ।" इत्युज्ज्वलः ।) निर्ज्जनम् । तत्पर्य्यायः । विविक्तः २ विजनः ३ छन्नः ४ निःशलाकः ५ रहः ६ उपांशुः ७ इत्यमरः ॥ (यथा, रघौ । ३ । ३ ।
"तदानतं स्तनसुरभि चितीश्वरः
रहस्युपायाय न शक्रमायया ॥")
तल्पम् । रतिः । गुह्यम् । इति मेदिनी ॥

रहः, [स्] य, विजनम् । इत्यमरः ॥
"रहो निधुवनेऽपि स्यादहो गुह्ये नपुंसकम् ॥"
इति रभसश्च ॥
"देशादन्यत्र रहोऽयं शब्दान्तरं वाक्ति सुरतवाचकम् ।" इत्युज्ज्वलः । ४ । २१४ ॥)

रहस्यं, त्रि, (रहसि भवम् । रहस्+दिगादित्वात् यत् । इत्युज्ज्वलः । ४ । २१४ ।) गोपनीयम् । रहसि भवम् । इति मेदिनी अमरश्च ।
रहस्यरोमस्पर्शनिषेधो यथा,—
"न सर्पेयुर्मुखे क्रोड़े स्वानि स्वानि न संस्पृशेत् ।
रोमाणि च रहस्यानि नाग्निदृष्टेन सदा त्रजेत् ॥"
इति कौर्म्मे १५ अध्यायः ॥

रहस्या, स्त्री, (रहस्य+टाप् ।) नदीभेदः । इति मेदिनी । (यथा, महाभारते । ६ । ६ । ९ । ८ ।
"रहस्यां घृतकुल्यां च सरयूं च नरेश्वर ! ॥")
राखा । पाठा । इति राजनिर्घण्टः ॥

रहितं, त्रि, (रह+क्तः ।) वर्ज्जितम् । यथा,—
"जातस्तकमादौ च अन्ते च मृतसूतकम् ।
गुरोरुद्रहितं ज्ञात्वा जपकर्म्म समाचरेत् ॥"
इति तन्त्रसारः ॥
अपि च ।
"दिग्भोऽन्दक्षान्तिरहितो जन्मर्क्षाद्यो भयेन्वितः ।
भं भवेदन्दवेशेऽच योगेऽप्येवं विचिन्तयेत् ॥"
इति जातकपद्धतिः ॥

रा, ल दाने । यहणे । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) ल, राति । इति दुर्गादासः ॥

रा:, क्ली, (रा+सम्पदादित्वात् क्विप् ।) विभ्रमः । दानम् । इत्मेकाक्षरकोषः ॥ काञ्चनम् । इति शब्दरत्नावली ॥

रा:, [रै] पुं, (रा दाने+"राते र्डैः ।" उणा० २ । ६६ । इति डैः ।) धनम् । (यथा, भागवते । ३ । २५ । ३८ ।
"आत्मानमनु ये चेह ये राय: पशवो गृहाः ॥")
स्वर्णम् । इत्यमरः ॥ शब्दः । इति शब्दरत्नावली ॥ (स्त्री, श्रीः । यथा, ऋग्वेदे । १० । ११९ । ७ ।
"स चन्नयदुषसः सूर्य्येण चित्रामस्त्र केतवो रामविन्दन् ॥"
"चित्रां राधां विश्वपर्शां रायं श्रियमविन्दन् अङ्गिरसः ।" इति तद्भाष्ये सायणः ॥)

राका, स्त्री, (रा दाने+"ऋदाधारार्चिकलिभ्यः कः ।" उणा० ३ । ४० । इति कः । बहुलवचनादेव न ह्रस्वः ।) नदीविशेषः । (सा च ग्राह्यजीहोपस्थार्जा नदीनामन्यतमा । यथा, भागवते । ५ । २० । १० ।
"तेषु वर्षगिरयो नद्यश्च सन्त्येवाभिज्ञाताः । सुरसः शतरुद्रो वामदेवः कुन्दः कुमुदः पुष्पवर्षः सहस्रस्रुतिरिति । अनुमतो सिनीवाली सरस्वती कुहू राकेति ॥")
कर्पूरोगः । नवजातरजःस्त्री । (रावते दीयते देवेभ्य हविर्यस्याम् । इति निघण्टुटीकायां देवराजयज्वा । ५ । ५ । २१ ।) सम्पूर्णेन्दुतिथिः । इति मेदिनी । (यथा, ऋग्वेदे । २ । ३२ । ४ ।
"राकामहं सुहवा सुष्टुतीहुवे
शृणोतु नः सुभगा बोधतुत्मना ॥"
"संपूर्णचन्द्रा पौर्णमासी राका ।" इति सायणः ॥
राक्षसीविशेषः । सा च खरस्य सूर्पणखायाश्च जननी । यथा, महाभारते । ३ । २७३ । ९-८ ।
मार्कण्डेय उवाच ।
"पुलस्त्यस्य तु यः क्रोधाद्देहोऽभवन्मुनेः ।
विश्रवा नाम सक्रोधः स वैश्रवणमैक्षत ॥
बुबुधे तन्तु सक्रोधं पितरं राक्षसेश्वरः ।
कुबेरस्तत्प्रसादार्थं यतते स्म सदा नृप ! ॥
स राजराजो लङ्कायां विबभ्रद्राक्षसान् बलान् ।
राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः ॥
ताः सदा तं महात्मानं सन्तोषयितुमुद्यताः ।
ऋषिं भरतशार्दूल ! वृत्तशीलविशारदाः ॥

पुष्पोत्कटा च राका च मालिनी च विशां पते।
अन्योन्यस्पर्द्धया राजन्! श्रेयस्कामाः सुमध्यमाः॥
स तासां भगवांस्तुष्टो महात्मा प्रददौ वरान्।
लोकपालोपमान् पुत्रानेकैकस्या यथेप्सितान्॥
पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ।
कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि॥
मालिनी जनयामास पुत्रमेकं विभीषणम्।
राकायां मिथुनं जज्ञे खरः सूर्पणखा तथा॥")

राक्षसः, पुं, रक्षन्त्यस्मात् रक्ष+रक्ष एव राक्षसः। तत्पर्य्यायः। कौणपः २ क्रव्यात् ३ क्रव्यादः ४ असपः ५ आशरः ६ रात्रिञ्चरः ७ रात्रिञ्चरः ८ कर्व्वुरः ९ निकषात्मजः १० यातुधानः ११ पुण्यजनः १२ नैर्ऋतः १३ यातु १४ रक्षः १५। इत्यमरः॥ सन्ध्यावलः १६ चपाटः १७ रजनीचरः १८ कौलाशाः १९ नृचक्षाः २० नक्तञ्चरः २१ पलाशी २२ पलाशः २३ भूतः २४। इति शब्दरत्नावली॥ नीलाम्बरः २५ कल्माषः २६ कटपूः २७ अगिरः २८ कौलालपाः २९ नरधिष्ण्यः ३०। इति जटाधरः॥
तस्योत्पत्तिर्यथा,—
"रजोमात्रान्निकामेव ततोऽन्यां जगदे तनुम्।
ततः क्षुद्भक्षणो जाता जज्ञे कोपाग्न्यायत्तः॥
क्षुत्क्षामगन्धाकारांश्च सोऽदहद्भगवांस्ततः।
विरूपाः क्षुधिता जातास्तेऽभ्यधावन्त तं प्रभुम्॥
नैवं भो रक्ष्यतामेष रक्षं राक्षसास्तु ते।"
इति वह्निपुराणम्॥ *॥

अपि च।
"रक्षोगणं क्रोधवशात् स्वनामाक्षमजीजनत्।
दंष्ट्रिणां निर्युतं तेषां भीमसेनाहतं क्षयम्॥"
इति माल्ये आदिसर्गे कल्पान्तयनाम ६ अध्यायः॥ *॥ राक्षसभोज्यान्नानि यथा,—
"क्षुत्कोटाणुपपन्नञ्च यच्चोच्छिष्टान्वितं भवेत्।
केशावपन्नमाधूतं मारुतस्पर्शदूषितम्॥
एभिः संसृष्टमन्नञ्च भागो वै रक्षसो भवेत्।
तस्मात्तन्नाशयेत् सद्यो विद्वान्नान्नेतानि वर्ज्जयेत्॥
राक्षसा नाम ये प्रोक्तास्ते सुक्रूरान्नभोजनम्॥"
इति वामनपुराणे ३६ अध्यायः॥ *॥
तेषां विहारः सूर्य्यलोकादधः। यथा,—
"अम्भोचरसा ये च भूतप्रेतपिशाचकाः।
वर्ज्जयित्वा रुद्रगणांस्ते तत्रैव चरन्ति हि॥
नोर्द्धं विक्रमते प्रक्तिस्तेषां सम्भूतपाप्मनाम्।
अतः ऊर्द्धं हि विप्रेन्द्र राक्षसा ये क्षतैनसः।
ते तु सूर्य्यादधः सर्व्वे विहरन्त्यूर्द्धवर्ज्जिताः॥"
इति पाद्मे स्वर्गखण्डे १५ अध्यायः॥ *॥
(अनेनाधिष्ठितस्य रोगिणो लक्षणं यथा,—
"सक्रोधदृष्टिं भ्रुकुटीमुद्वहन्तं ससंभ्रमम्।
प्रहरन्तं प्रधावन्तं शब्दन्तं भैरवारवम्॥
अन्नादिनापि बलिनं नष्टनिद्रं निशाचरम्।
निर्लज्जमशुचिं शूरं क्रूरं प्रबलभाषिणम्॥
रोषणं रक्तमाल्यस्रोरक्तमद्यामिषप्रियम्।
दृष्ट्वा च रक्तं मांसं वा लिहानं दशनच्छदौ।
हसन्तमन्नकाले च राक्षसाधिष्ठितं वदेत्॥"
इति वाग्भटे उत्तरस्थाने चतुर्थोऽध्यायः॥)
अष्टप्रकारविवाहान्तर्गतविवाहविशेषः। यथा,
"आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः।
राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात्॥"
इत्युद्वाहतत्त्वम्॥
(एतल्लक्षणान्तरञ्च यथा, मनुः। ३। ३३।
"हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते॥"
राक्षसविवाहस्तु क्षत्रियस्यैव प्रशस्तः। यथा, तत्रैव। ३। २४।
"चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः।
राक्षसं क्षत्रियस्यैकं आसुरं वैश्यशूद्रयोः॥"
निम्नप्रजोत्पत्तिजनकतया तु ब्राह्मादिपेक्षया राक्षसादिविवाहस्य गर्हितत्वमाह तत्रैव। ३। ४१—४२।
"इतरेषु च शिष्टेषु नृशंसानृतवादिनः।
जायन्ते दुष्टिवाहेषु ब्रह्मधर्म्मद्विषः सुताः॥
अनिन्दिते स्त्रीविवाहेऽनिन्द्या भवति प्रजा।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्ज्जयेत्॥"*॥

अब्दविशेषे, पुं, क्ली। यथा, बृहत्संहितायाम्। ८। ४५।
"इन्द्राग्निदैवं दशमं युगं यत्
तत्राब्दमन्दं परिधाविसंज्ञम्।
प्रमाट्यायान्दमतःपरं यत्
स्यात्राक्षसं चानलसंज्ञितञ्च॥")
रक्षःसम्बन्धिनि, त्रि॥

राक्षसी, स्त्री, (राक्षस+ङीप्।) कौणपी। राक्षसपत्नी। यथा, रघुः। १२। ६९।
"दृष्ट्वा विचिन्वता तेन लङ्कायां राक्षसीवृता।
जानकी विषवल्लीभिः परीतेव महौषधिः॥")
दंष्ट्रा। इत्यहन्तीति यावत्। इति हेमचन्द्रः॥ चक्रा चोरनामगन्धद्रव्यमिति यावत्। इति मेदिनी॥ सायाह्नवेला। यथा,—
"प्रातःकालो सुकूर्त्तोक्तो सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम्॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् प्राह्णं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु॥"
इति तिथ्यादितत्त्वम्॥

राक्षसेन्द्रः, पुं, (राक्षसानामिन्द्रः।) रावणः। इति त्रिकाण्डशेषः॥ (राक्षसपतिमात्रे च। यथा, महाभारते। १। १५४। १८।
"धिक् त्वामसति पुंश्चलि मम विप्रियकारिणि।
पूर्व्वेषां राक्षसेन्द्राणां सर्व्वेषामयशस्करि॥")

राक्षा, स्त्री, (राक्षा। रलयोरैक्यात् अस्य ह्रस्वम्।) राक्षा। इत्यमरः॥

राख, ऋ शोषालमर्थ्ययोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० च-सेट्।) शोषः स्नेहरहितीभावः। अलमर्थो भूषणं सामर्थ्यं निवारणञ्च। ऋ, अरराखत्। इति दुर्गादासः॥

रागः, पुं, (रञ्जनमिति रज्यतेऽनेनेति वा। रञ्ज+भावे करणे वा घञ्। "घञि च भावकरणयोः।" ६। ४। २७। इति नलोपः।) माल्यम्। लोहितादिः। (यथा, कुमारे। ३। ३०।
"रागेण बालारुणकोमलेन
चूतप्रवालोष्ठमलञ्चकार॥")
स्नेहादिः। अनुरागः। (यथा, आर्य्यासप्तशत्याम्। २७०।
"तानवमेत्य छिन्नः परोपहितरागमदन-
सङ्कटितः।
कर्षं इव कामिनीनां न शोभते निर्भरः प्रेमा॥")
गान्धारादिः। नृपः। इति मेदिनी॥ चन्द्रः॥ सूर्य्यः। इति शब्दरत्नावली॥ आचारादिः। (यथा, कुमारे। ४। १६।
"तस्मिं कुरु दयितेतरं
चरणं विस्मितरागमेहि मे॥")
रक्तिमलिट्। रञ्जनम्। इति नानार्थरत्नमाला॥ प्रीतिः। यथा,—
"वीतरागभयक्रोधस्थितधीर्मुनिरुच्यते॥"
इति भगवद्गीतासूपनिषत्कोकाया श्रीधरस्वामी॥
तस्य लक्षणं यथा,—
"सुखमप्यधिकं चित्ते सुखत्वेनैव रज्यते।
यतस्तु प्रथयोत्कर्षात् स च राग इति कीर्त्यते॥"
इत्युज्ज्वलनीलमणिः॥ *॥
(अभिमतविषयाभिलाषः। स तु पञ्चक्लेशान्तर्गतः। यथा,—
"अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः। रागोऽभिमतविषयाभिलाषः।" इति शिशुपालवधटीकायां मल्लिनाथः। ४। ५६॥
"सुखानुशयी रागः।" इति पातञ्जलिः। गानग्राह्यौषधरागा यथा। भरतमते हनूमन्मते च रागः षड्विधः। तेषां नामानि यथा। भैरवः १ कौशिकः २ हिन्दोलः ३ दीपकः ४ श्रीरागः ५ मेघः ६। हनूमद्भरतयोर्म्मते प्रत्येकमेषां पञ्च रागिण्यः। सोमेश्वरकल्लिनाथयोर्म्मते प्रत्येकमेतेषां षट् रागिण्यः। एतेषां प्रत्येकमष्टौ पुत्राः एकैकपुत्रभार्य्या च। कल्लिनाथसोमेश्वरमते षड्रागा यथा। श्रीरागः १ वसन्तः २ पञ्चमः ३ भैरवः ४ मेघः ५ नटनारायणः ६। इति नानासंगीतग्राह्यम्॥*॥
अथ रागस्य युत्पत्तिसंख्यास्थानानि।
"वेषु वेषांषि रज्यन्ते जगन्नितयवर्त्तिनाम्।
ते रागा इति कथ्यन्ते मुनिभिर्भरतादिभिः॥
गोपीभिर्गीतमारब्धमेकैकं लक्षसंख्यकौ।
तेन जातानि रागाणां षड्लक्षाणि तु षोडश॥
रागेषु तेषु षट्त्रिंशद्रागा जगति विश्रुताः।

कालक्रमेण तत्रापि ह्रास एव तु दृश्यते ।
केचिदद्यन्ति ते रागाः सर्व्वे सन्तीति निश्चितम् ॥
मेरोरुत्तरतः पूर्व्वे पश्चिमे दक्षिणे तथा ।
समुद्रकण्ठे ये देशास्तत्रामीषां प्रचारणा ॥"
तथा च । अङ्गवङ्गकलिङ्गतैलङ्गभूलिङ्गहावङ्ग-
सुरङ्गयूपलङ्गखेलाङ्गसौवीरकीरकाश्मीरनाभी-
रनाहीरसिन्धुजालन्धरमगमगधनिषधमलयद्वी-
पगजाह्वयमालवजालवमरुमरुचोलोल्कलङ्क-
ल्लसिंहलहरिकेलकेरल-कोङ्कणमल्लिवालमल्ल-
भल्लसौविदल्लवातकिल्लातगुर्जरातगुल्लरकालञ्जर-
गौड्रद्रविड्रौड्रान्ध्रवैदिकाचीपाचालसौराष्ट्रग्ध-
रलौहावरखण्डकौकण्डवरूपकामरूपहरिगर्भ-
विदर्भदुर्मदवाटकौकटदेवेङ्गनटङ्कनगाटभोटक-
वाटकरहाटकर्णाटकुन्तिकावन्तिककनकाल-
काम्बुजभोजकाम्बोजतोजतुखारविहारवली-
हारवाजगेहविदेहवाङ्गौकचञ्चरीकचित्रगर्त्ता-
र्त्तादिदेशेषु रागाः प्रचरन्तीति ।
"यस्य अवयवमात्रेण रञ्जन्ते सकलाः प्रजाः ।
सर्व्वाधरञ्जनाद्धेतोस्तेन राग इति स्मृतः ॥"*।
अथ रागाः ।
"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरागश्च ततः पश्चाद्वसन्तस्तदनन्तरम् ॥
हिन्दोलश्चाथ कर्णाट एते रागाः षडेव तु ।६।
षट्त्रिंशद्रागिणी तत्र क्रमशः कथिता मया ॥
धानसी मालसी चैव रामकिरी च सिन्धुड़ा ।
आशावरी भैरवी च मालवस्य प्रिया इमाः ॥६
वेलावली च पुरवी कानड़ा माधवी तथा ।
कोड़ा केदारिका चापि मल्लारदयिता इमाः ॥६
गान्धारी शुभगा चैव गौरी कौमारिका तथा ।
वेलोयारी च वैरागी श्रीरागस्य प्रिया इमाः ॥६
तुड़ी च पञ्चमी चैव ललिता पठमञ्जरी ।
गुज्जरी च विभाषा च वसन्तस्य प्रिया इमाः ॥६
मायूरी दीपिका चैव देशकारी च पाहिड़ा ।
वराड़ी मोरहाटी च हिन्दोलस्य प्रिया
इमाः ॥६॥
नाटिका चाथ भूपाली रामकेली गड़ा तथा ।
कामोदा चापि कल्याणी कर्णाटस्य प्रिया
इमाः ॥६।२६॥*॥

अथ कालनियमः ।
"विभाषा ललिता चैव कामोदा पठमञ्जरी ।
रामकीरी रामकेली वेलोयारी च गुज्जरी ॥
देशकारी च सुभगा पञ्चमी च गड़ा तुड़ी ।
भैरवी चाथ कौमारी रागिण्यो दश्च षच्च ॥
एताः पूर्व्वाह्णकाले तु गीयन्ते गायनोत्तमैः ॥
वराड़ी मायूरी कोड़ा वैरागी चाथ धानसी ।
वेलावली मोरहाटी सप्तैता रागयोषितः ।
गेया मध्याह्नकाले तु यथा भारतभाषितम् ॥
गान्धारी दीपिका चैव कल्याणी पुरवी तथा ।
कानड़ा आरवी चैव गौरी केदारपाहिड़ा ।
मायूरी मालसी नाटी भूपाली सिन्धुड़ा तथा ।
सायाह्ने ताश्च रागिण्यः प्रगायन्ति चतुर्दश ॥
पुरुषा वस्तुभूषाढ्या रागास्ते मालवादयः ।
प्रदोषे चापराह्णे च रजन्यां गानगोचराः ॥
दग्धदण्डात् परं रात्रौ सर्व्वेषां गानमीरितम् ।
मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा ॥
श्रीपञ्चम्यां समारभ्य यावत् जन्मोत्सवं हरेः ।
तावद्वसन्तरागस्य गानमुक्तं मनीषिभिः ॥
ग्रीष्मोत्थानं समारभ्य यावद्दुर्गामहोत्सवम् ।
गीयते तद्बुधैर्नित्यं मालसी सा मनोहरा ॥
सर्व्वेषामिह रागाणां रागिणीनाञ्च सर्व्वथा ।
रङ्गभूमौ नृपाज्ञायां कालदोषो न विद्यते ॥
रागचत्वारपर्यन्तादारभ्य तत्पञ्चदशान्तरम् ।
नाम्नपत्नी प्रगातव्या नृपाज्ञायां न दूषणम् ॥
रागाः षड़ेव रागिण्यः षट्त्रिंशद्भार्य-
विग्रहाः ।
आगता ब्रह्मसदनात् ब्रह्माणं सप्तपासते ।"*।
अथ ध्यानम् ।
"नितम्बिनीचुम्बितवक्त्रपद्मः
शुकद्युतिः कुङ्कुमवान् प्रमत्तः ।
सङ्गीतशालां प्रविशन् प्रदोषे
मालाधरो मालवराजराजः ॥ १ ॥
नीलोत्पलं कर्णयुगे वहन्ती
श्यामा सुकेशी च समध्यभागा ।
ईषत्सहासामुखरम्यवक्त्रा
सा धानसी पद्मसुचारुनेत्रा ॥ २ ॥
करे युता चाम्बुजयुग्मरम्या
इतस्ततश्चारु विलोकयन्ती ।
कङ्कस्फरन्मौक्तिकरत्नहारा
सा मालसी संकथिता विचित्रा ॥ ३ ॥
प्रतप्तचामीकरचारुवक्त्रा
कर्णावतंसं कमलं वहन्ती ।
पुष्पं धनुः पुष्पशरैर्दधाना
चन्द्रानना रामकिरी प्रदिष्टा ॥४॥
महेन्द्रनीलद्युतिरम्यचोली
प्रवादयन्ती कपिलाग्रयन्त्रम् ।
विचित्ररत्नाभरणा सुकेशी
सा सिन्धुड़ा कान्तसमीपसंस्था ॥५॥
जपाप्रसूनद्युतिबिम्बवक्त्रा
सकञ्चुपद्मं करयोर्दधाना ।
सौमांशुकाच्छादितगात्रयष्टि-
राशावरी रङ्गकिला विदग्धा ॥६॥
सरोवरस्था स्फटिकस्य मन्दिरे
सरोरुहैः शुक्लरमर्चयन्ती ।
तालप्रयोगप्रतिरङ्गगीतै
र्गौरीतनुर्भैरविका सतीयम् ।"६।*।
अथ मल्लारः ।
"विहारशीलोऽतिसुकान्तदेहः
कान्ताप्रियो धार्म्मिकशीलयुक्तः ।
कामातुरः पिङ्गलनेत्रयुग्मो
मल्लाररागः प्रियतां सुवेशः ॥१॥
सङ्केतितोत्पुल्लतमालकुञ्जे
लतल्लिताः कान्तसमागमाय ।
वेलावली चम्पकमौलिनी सा
बाला विचित्राभरणा निरुक्ता ॥२॥
रहःसु कान्तप्रियमाल्यपत्रं
रम्यं वहन्ती कुचकुम्भयुग्मे ।
दूर्व्वादलश्यामतनुः सकामा
पुरातनैः सा पुरवी निरुक्ता ॥३॥
अशोकवृक्षस्य तले निषण्णा
वियोगिनी वासकसज्जिताङ्गी ।
विभूषिताङ्गी जटिलेव बाला
सा कानड़ा हेमलतेव तन्वी ॥४॥
संगुप्य संगुप्य गले दधाना
प्रसूनमाला दयितेन बाला ।
गौरी सकाश्मानननुम्बितास्या
सा सुन्दरी माधविका निकुञ्जे ॥५॥
सकञ्चुपीं वादयति स्वभर्तुः
गानार्थमभ्यस्यति सम्मुखेन ।
सदैव ताला विहिता च माला
कोड़ा कला तानवती मता सा ॥६॥
बाला सुसीमन्तवती सुदेहा
केशप्रसिक्तस्नसवारिबिन्दुः ।
निर्व्योढयन्ती तिमिरांशुकान्तं
केदारिका रक्तपरोधरश्रीः ॥"६।*।
अथ श्रीरागः ।
"लीलावतारेव वनान्तराणि
चिक्वन् प्रसूनानि वधूसहायः ।
विलासवेषो स्फुतिदिव्यमूर्त्तिः
श्रीराग एष प्रथितः पृथिव्याम् ॥१॥
सन्ध्यासुकाले गृहमध्यदेशे
प्रवादयन्ती ह पिनाकयन्त्रम् ।
धाराधराधातुविचित्रिताङ्गी
गान्धारिका गन्धसजं निषण्णे ॥ १ ॥
रसज्ञया सुविचारकौतुकं
विदधती कविकोविदकौतुकम् ।
सुकवितान्तभावरसत्परा
भगवती सुभगा समुदाहृता ॥२॥
पुष्पोद्याने सार्द्धमालीकलापैः
क्रीड़न्त्येवं कोकिलाकाकलीषु ।
रामा श्यामा सद्गुणाढ्या च सीमा
गौरी गौरी गौरवालोकदिष्टा ॥३॥
अट्टालिकायां स्फुटकौसुदीभिः
प्रकाशितायां रजनीविहारम् ।
आप्तुं कान्तेन समं वसन्ती
कौमारिका कामकला वहन्ती ॥४॥
गौरीपादाम्भोजमभ्यर्चयन्ती
गन्धोद्भूतं गन्धमाल्यं दधाना ।
नानारत्नोपायनैर्भक्तिभावै-
र्वेलोयारी कथ्यते वालिकेयम् ॥५॥
उल्लासयन्ती धर्म्मिल्ले रहःस्थान् प्राणवल्लभान् ।
मालतीकुसुमस्रग्भिर्वैरागी रागिणी स्मृता॥"६
अथ वसन्तः ।
"चूताङ्कुरैश्चैव लतावतंसो
विधूल्यमानारुणनेत्रपद्मः ।
पीताम्बरः काञ्चनचारुदेहो
वसन्तरागो युवतिप्रियश्च ॥१॥

सृज्यमानातिसुश्रोणियुक्ता
सुक्लाजताक्षिप्तहारयष्टिः।
चूताङ्कुरं प्राप्तियुगे वहन्ती
जवारयाङ्गी तुडिकेरितेयम् ॥१॥
संगीतगोष्ठीषु गरिष्ठभावं
समाश्रिता गायनसम्प्रदाये।
खर्वाङ्गिनी नूपुरपादपद्मा
सा पञ्चमी पञ्चमवेदवेद्या ॥२॥
उरसि केशूचयस्य सुभारं
विदधती ग्रथनोत्थितचारुवेग्रम्।
विद्युल्लिताललकवल्लिजङ्घाङ्गी
भासुरा ललिता कथिता बुधैः ॥३॥
सखीकलापैः परिहास्यमाना
वियोगिनी कान्तवियोगदेहा।
मौनस्तनी चैव धराप्रसुप्ता
श्यामा सकेशी पटमञ्जरीयम् ॥४॥
कर्णोत्पलालम्बिमधुव्रतालो
ह्रस्वोति सा मञ्जुलकूजितानि।
कान्तान्तिकं गन्तुमनाः प्रदोषे
सा गुर्ज्जरी वेग्रकलोचिताङ्गी ॥५॥
अध्यापयन्ती निजशिष्यवृन्दं
सङ्गीतशास्त्राणि विवेचनाभिः।
मनोहरा हारलताभिरामा
समस्तभाषाकुशला विशेषा ॥"६॥

अथ हिन्दोलः।

"हासाभिलासेन पतन् पृथिव्यां
उत्थापितस्तत्क्षणमाशिवृन्दैः।
उल्लोलसङ्गीतरसैर्विदग्धो
हिन्दोलरागः कथितो रसज्ञैः ॥१॥
मयूरकेकाश्रवणोल्लसन्ती
मयूरिकातृल्यतनुं किरन्ती।
मयूरकान्तीव धृतिं दधाना
मायूरिका संकथिता बुधज्ञैः ॥२॥
प्रदोषकाले गृहसंप्रविष्टा
प्रदीपहस्तास्तनगात्रवस्त्रा।
सीमन्तसिन्दूरविराजमाना
सुरक्तमाल्या किल दीपिकेयम् ॥३॥
सार्द्धं सखीभिर्विजने वसन्ती
विचित्रवस्त्राभरणैरुपेता।
निरीक्षमाणाननदर्पणं या
सा दैग्रकारी कथिता बुधज्ञैः ॥४॥
भर्त्तुर्दधाना चरणारविन्दं
निषेधयन्ती परदेग्रयानम्।
प्रकामदाम्यप्रसुखे निमग्ना
या पाहिड़ा संकथिता कवीन्द्रैः ॥५॥
कर्णे दधाना सुरपुष्पयुग्मं
स्फुरत्सुवस्त्राभरणैरुपेता।
क्षीरानना चारुविलोलनेत्रा
वराङ्गनेयं कथिता वड़ारी ॥६॥
उत्पन्नमात्रे प्रथमापराधे
मानं पुनः कर्त्तुमनास्तथैव।
ऋजुस्वभावान्वितं वदन्ती
सा मोरहाटी हठकेलिरङ्गा ॥"६॥

अथ कर्णाटः।

"लतागृहाभिस्तुरगाधिरूढो
मयूरकण्ठातिसुकण्ठकान्तिः।
स्फुरत्प्रसन्नस्मितरम्यवक्त्रः प्रशान्तः
कर्णाटरागो हरितालवर्णः ॥१॥
चिरं नटन्ती सुभरङ्गमध्ये
संप्रार्थयन्ती नटिनं वसन्तम्।
सुगीततालेषु लतावधाना
नटी सुग्राटीपरिधानदेहा ॥२॥
खनायकं पुष्पलताधिरूढ़ा
हृष्यन्मुखी सर्व्वसुखं वहन्ती।
खनानि गृह्णन्निति सुग्धा
भूपालिका सा खलदुत्तरीया ॥३॥
अध्यापयन्ती शुकसारसारीः
श्रीराम रामेति सुवेग्रलग्नीः।
वामस्तनार्द्धस्खलितांशुकश्रीः
श्रीरामकेली कथिता कवीन्द्रैः ॥४॥
विग्रेषवेदग्ध्यवती समक्षात्
कलाविलासेन विमोहयन्ती।
दृष्टस्मितस्या परिपूर्णदेहा
वड़ा प्रसक्तस्तनभारभग्ना ॥५॥
भर्त्तुः क्रमं पार्श्वगि वल्लरन्ती
पयोविहारेण सरोरुहाणि।
विचिन्वती सौरभमोदमाना
कामोदरागिण्युदिता गुरुज्ञैः ॥६॥
धावूता नटवृत्तपरिश्रमेण
बाला लीलाभिः सुरती क्षतादरा।
नटीनां कल्याणी कथयति मतङ्गजो
रवप्रख्यानं मुखरिता किङ्किणीकलापम् ॥"६॥

अथ रागरागिणीनां भावनिरूपणम्।

"भावज: श्रीश्च हिन्दोलो मल्लारस्तदनन्तरम्।
गायन्ति गायका धीरं सागर्देन चतुष्टयम्॥
वसन्तो रागः कर्णाटो दौ वीरौ भवतः क्रमात्॥
धानसी मालवी चैव भैरवी माधवी तथा।
सुभगा पञ्चमी गाटी वेलोवारी च गुर्ज्जरी॥
कामोदा चापि कल्याणी कोड़ा केदारिका तुड़ी।
कौमारी मायूरी चैव देग्रकारी च सिन्धुड़ा॥
रामकेली च भूपाली रागिण्यश्चेति विंग्रतिः।
आनन्दांग्रा इति प्रोक्ता गीयन्ते गानकोविदैः॥
पुरवी कानड़ा गौरी रामकिरी च दीपिका।
आग्राबरी विभासा च वड़ारी च मड़ा तथा॥
एताश्च नव रागिण्यो वीरांग्रे गानसुत्तमम्॥
वेलावली च गान्धारी ललिता पटमञ्जरी।
वैरागी रागिणी चापि मोरहाटी च पाहिड़ा॥
कल्याणा विभागीयात् सप्तैता रागयोषितः॥
रागेण रसभागेन षट्त्रिंग्रद्रागिणीषु च।
कल्याणन्दवीरेषु ग्रापगार्थं मतत्रयम्॥"
इति संगीतदामोदरे ग्रिवनारदसंवादे १। १ अध्यायौ॥ (तथा च संगीतदर्पणे।

अथ रागाणामासङ्गं दर्ग्रयति।

"ग्रिवग्रक्तिसमायोगाद्रागाणां सम्भवो भवेत्।
पञ्चास्यात् पञ्च रागाः स्युः षष्ठस्तु गिरिजा-
सुखात्॥
सद्योजातात् ग्रीरागो वामदेवाद् वसन्तकः।
अघोराद् भैरवोऽभूत् तत्पुरुषात् पञ्चमो-
ऽभवत्॥
ईग्रानाख्यान्मेघरागो नाचारम्भे ग्रिवादभूत्।
गिरिजाया सुखाज्जाते नट्टनारायणोऽभवत्॥"

अथ रागवेग्राः।

"मधुमाधवौ च देग्राख्या भूपाली भैरवी
तथा।
वेलावली च मल्लारी वल्लारी सोमगुर्ज्जरौ॥
धनाग्रीर्मालवग्रीश्च मेघरागश्च पञ्चमः।
देग्रकारी भैरवश्च ललिता च वसन्तकः॥
एते रागाः प्रगीयन्ते प्रातरारभ्य निग्रम्॥
गुर्ज्जरी कौग्रिकश्चैव वादेरी पटमञ्जरी॥
रेवा गुणकिरी चैव भैरवी रामकिर्यपि।
सौराटी च तथा गेया प्रथमप्रहरोत्तरम्॥
वैराटी सोढ़िका चैव कामोदी च कुड़ायिका।
गान्धारी नागग्रन्थी च तथा देग्री विग्रेषतः॥
मुद्गराभरणो गेयो द्वितीयप्रहरात् परम्॥
ग्रीरागो मालवाख्यश्च गौरी ग्रिवसंज्ञिका।
नट्टकल्याणसंज्ञश्च सारङ्गनट्टकौ तथा॥
सर्व्वे गाटाश्च केदारी कर्णाभीरिका तथा।
वड़हंसी पहाड़ी च तृतीयप्रहरात् परम्॥
अर्द्धरात्रावधि ग्रेया एते रागाः सुखप्रदाः॥
यथोक्तकाल एवैते गेयाः पूर्व्वविधानतः।
राजाज्ञया सदा गेया न तु कार्यं विचारयेत्॥"

इति रागवेग्राः।

अथ ऋतवः।

"ग्रीरागो रागिणीयुक्तः ग्रिग्रिरे गीयते
बुधैः।
वसन्तः सहायस्तु वसन्तौ प्रगीयते॥
भैरवः सहायस्तु ऋतौ ग्रीष्मे प्रगीयते।
प्रथमस्तु तथा गेयो रागिण्या सह शारदे॥
मेघरागो रागिणीभिर्युक्तो वर्षासु गीयते।
नट्टनारायणो रागो रागिण्या सह हेमके॥
यथेच्छया वा गातव्याः सर्व्वेतु सुखप्रदाः।"

इति रागाणां ऋतुनिर्णयः। इति सोमेश्वर-
मतम्। ७।)

रागचूर्णं, पुं, कामदेवः। खदिरद्रुमः। इति मेदिनी। ने, १०६। फलगुचूर्णम्। इति ग्रब्द-रत्नावली। आचारः। इति राजनिर्घण्टः।

रागच्छन्नः, पुं, (रागेण च्छन्नः।) कामदेवः। इति ग्रब्दरत्नावली। रागेणाच्छन्ने, त्रि।

रागदः, पुं, (रागं ददातीति। दा+कः।) सैरवीस्वरः। इति राजनिर्घण्टः। रागदातरि, त्रि।

रागदात्रिः, पुं, (रागदा रागप्रदा त्रिः यष्टिर्यत्र।) मन्दरः। इति राजनिर्घण्टः। (विवरण-मस्य मन्दरग्रब्दे विग्रेयम्।)

रागपुष्पः, पुं, (रागविशिष्टं रक्तवर्णं पुष्पं यस्य ।) बन्धूकः । रक्ताम्बानः । इति राजनिर्घण्टः ॥

रागपुष्पी, स्त्री, (रागयुक्तं पुष्पं यस्याः । ङीप् ।) जवा । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य जवाशब्दे ज्ञातव्याः ।)

रागप्रसवः, पुं, (रागयुक्तो रक्तवर्णः प्रसवः पुष्पं यस्य ।) बन्धूकः । रक्ताम्बानः । इति राजनिर्घण्टः ॥

रागयुक्, [ज्] पुं, (रागेण युज्यते इति । युज् + क्विप् ।) माणिक्यम् । इति राजनिर्घण्टः । कस्मिंचित् पुस्तके रागाढ्क् इति पाठोऽपि विद्यते ॥

रागरज्जुः, पुं, (रागो रज्जुरिव यस्य । नायकयोः परस्परानुरागबद्धत्वात्तथात्वम् ।) कामदेवः । इति शब्दरत्नावली ॥

रागलता, स्त्री, (रागस्य जनिका लतेव ।) कामदेवपत्नी । इति जटाधरः ॥

रागवृन्तः, पुं, (रागस्य वृन्त इव ।) कामदेवः । इति शब्दमाला ॥

रागषाड्वः, पुं, दाड़िमद्राक्षायुक्तसुद्गयूषः । अस्य गुणाः । रुचिकारित्वम् । लघुपाकित्वम् । वातपित्तकफाविरोधित्वञ्च । इति राजवल्लभः ॥ (यथा, सुश्रुते । १ । ४६ अध्याये क्षतान्नवर्गे ।
"श्रेयः पथ्यतमश्चापि सुद्गयूषः क्षताक्षतः ।
स तु दाड़िमदीकायुक्तः स्याद्रागषाड्वः ।
रुचिष्यो लघुपाकश्च दोषाणामविरोधकृत् ।"
तथास्य गुणाः ।
"लघवो दृंहणा दृष्याः कृता रोचनदीपनाः ।
दृक्शुक्रौजोऽग्निमेधाहृद्बलमांसा रागषाड्वाः ।"
इति च सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

रागसूत्रं, क्ली, (रागयुक्तं रक्तवर्णं सूत्रम् ।) तुलासूत्रम् । पट्टसूत्रम् । इति मेदिनी । रे, २६३ ॥

रागाङ्गी, स्त्री, (रागविशिष्टमङ्गं यस्याः । ङीप् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

रागाढ्या, स्त्री, (रागेण आढ्या ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

रागाढ्यः, त्रि, आर्द्रां दत्त्वा दानविशुद्धः । यथा,
"आर्द्रां वसवतीं दत्त्वा यो हन्ति पिशुनो जनः ।
स जीवन्नपि रागाढ्यो दासत्वं दातरि ।"
इति शब्दमाला ॥

रागाग्निः, पुं, (रागेषु विषयवासनासु अग्निरिव ।) बुद्धः । इति त्रिकाण्डशेषः ॥

रागिणी, स्त्री, (रागोऽस्यस्या इति । राग + इनिः । ङीप् ।) विदग्धा नारी । इति जटाधरः । मेनकाया ज्येष्ठकन्या । यथा,—
"रागिणी नाम संजाता ज्येष्ठा मेनासुता सुते ।
शुभाङ्गी पद्मपत्राक्षी नीलकुञ्चितमूर्द्धजा ।"
इति वामनपुराणे ४८ अध्यायः ॥ जयश्रीनाम्नी लक्ष्मीः । इति पुराणम् । षड्रागाणां पत्नी । इति हलायुधः ॥ सा तु हनूमन्मते भरतमते च त्रिंशत्प्रकारा । सोमेश्वरमते कल्लिनाथमते च षट्त्रिंशत्प्रकारा ॥ आर्द्रां विवरणं रागशब्दे द्रष्टव्यम् ॥

रागी, [न्] त्रि, (रज्यते + "संपृचानुरुधेति ।" ३ । २ । १४२ । इति तच्छीलादिषु घिणुन् । यदा, रागोऽस्यास्तीति । राग + इनिः ।) अनुरक्तः । (यथा, मार्कण्डेये । २९ । ४९ ।
"त्वय्यस्या हृदयं रागि भर्त्ता चान्यो भविष्यति ।
यावज्जीवमतो दुःखं सुरभ्या नान्यथा वचः ॥")
कामुकः । इति विश्वः ॥ रङ्क्ता । इति मेदिनी ॥ (विषयानुरागयुक्तः । स च द्विविधः । यथा, देवीभागवते । १ । १७ । ३७—३८ । ४१ ।
"द्वैविध्यं सर्व्वलोकेषु सर्व्वत्र द्विविधो जनः ।
रागी चैव विरागी च तयोश्चित्तं द्विधा पुनः ॥
विरागी त्रिविधः कामं ज्ञानोज्ज्ञातश्च मध्यमः ।
रागी च द्विविधः प्रोक्तो मूर्खश्च चतुरस्तथा ॥"
"रागो यस्यास्ति संसारे स रागीत्युच्यते ध्रुवम् ।
दुःखं बहुविधं तस्य सुखञ्च विविधं पुनः ॥"
रक्तवर्णविशिष्टः । यथा, कथासरित्सागरे । २१ । ६ ।
"ईर्ष्याविषामभावेऽपि भङ्गुरभ्रुवि रागिणि ।
न सुखे तत्तयो राज्ञोऽहृदिस्थेऽप्रिमायया ॥")
पुं, लक्षधान्यविशेषः । तत्पर्य्यायः । लाञ्छनः २ बहुतरकणिशः ३ गुच्छकणिशः ४ । अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । कषायत्वम् । शीतत्वम् । पित्तासृगग्नित्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः ॥

राघ, ऋ ङ शक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अरराघत् । ङ, राघते । शक्तिः सामर्थ्यम् । इति दुर्गादासः ॥

राघवः, पुं, (रघोरपत्यमिति । रघु + अण् ।) रामचन्द्रः । (यथा, रघुः । १२ । ३२ ।
"रावणावरजा तत्र राघवं मदनातुरा ।
अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमम् ॥"
अजः । यथा, रघुः । ८ । १६ ।
"यतिपार्थिवलिङ्गधारिणौ
ददृशाते रघुराघवौ जनैः ॥"
दशरथः । यथा, रामायणे । २ । ६३ । १ ।
"वचनप्रतिरूपं तु महर्षेस्तस्य राघवः ।
विलपन्नेव धर्म्मात्मा कौशल्यामिदमब्रवीत् ॥"
रघुवंशीयमात्रम् । यथा, तत्रैव । २ । ६३ । २५ ।
"अपि त्वद्य कुशं न स्याद्राघवाणां कुतो
भवान् ॥")
समुद्र-महामात्यविशेषः । इति मेदिनी । वे, ४८ । (यथा, लघुस्तुतौ प्रथमपादे दुर्गासिंहः ।
"अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति
राघवः ॥")

राघवायणं, क्ली, (राघवस्य रामस्य चरितान्तिं अयनं ज्ञानम् ।) रामायणम् । यथा,—
"इतिहासपुराणानि राघवायनभारतम् ।
समाप्तिरहितान्येव सन्ति तानि श्रुतानि ते ॥"
इत्यग्निपुराणे वामनप्रादुर्भावनामाध्यायः ॥

राङ्कवः, पुं, रुरुमृगः । इति हारावली ।६१ ॥

राङ्कवं, क्ली, (रङ्कौ भवम् । रङ्क + "रङ्कोरमनुष्येऽण् च ।" ४ । २ । १०० । इति अण् ।) मृगलोमजातवस्त्रादि । तत्पर्य्यायः । मृगरोमजम् २ । इत्यमरः । २ । ६ । १११ ॥ रङ्कुर्मृगभेदः ततो जातार्थे अण् । पशवोऽपि मृगा इति रूढ्या मेषादिलोमजमपि कम्बलादि राङ्कवम् । इति तट्टीकायां भरतः ॥ (यथा, महाभारते । २ । ५० । २३ ।
"और्णञ्च राङ्कवञ्चैव पट्टजं कीटजन्तथा ॥"
पुं, गौः । इति काम्बिका ॥ राङ्कवाजतौ, त्रि । यथा, महाभारते । ६ । ४४ । २६ ।
"क्रौञ्चपारावतनिभैर्व्वदनैराङ्कवैरपि ॥")

राङ्कवं, क्ली, पुष्पविशेषः । रङ्कून् इति भाषा । अस्य गुणः । रक्तपित्तनाशित्वम् । इति द्रव्यगुणः ॥

राज, ऋ ञ ण दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-अक० सेट् ।) ऋ, अरराजत् । ञ, राजति राजते । ण, रेजतुः । इति दुर्गादासः ॥

राजकं, क्ली, (राज्ञां समूहः । राजन् + "गोत्रोक्षोष्ट्रोरभ्राजेति ।" ४ । २ । ३६ । इति वुञ् ।) नृपसमूहः । इत्यमरः । २ । ८ । ३ ॥ यथा, मार्कण्डेये । १०६ । ६ ।
"कृष्णपृष्ठमतीवासीत् तस्मिन् राजन्यशेषतः ।
राजकं सकलं चोर्व्व्यां पौरजानपदो जनः ॥"
राजन् + स्वार्थे कन् ।) राजनि, पुं । (यथा, हरिवंशे भविष्यपर्व्वणि । २४ । ६ ।
"तवाङ्गं तिलशः कृत्वा अग्नौ दास्यामि राजक ॥"
राज् + खुल् ।) दीप्तिकारके, त्रि ॥

राजकदम्बः, पुं, (कदम्बानां राजा । राजदन्तादित्वात् परनिपातः ।) कदम्बविशेषः । यथा,—
"कादम्बः प्राट्पवेयो नीपो धूलीकदम्बकः ।
कदम्बप्रियको राजकदम्बोऽरुष्करोऽधिकः ॥"
इति जटाधरः ॥

राजकन्या, स्त्री, (राज्ञः कन्येव ।) कैशिकापुष्पम् । इति राजनिर्घण्टः ॥ नृपसुता च ॥ (यथा, भागवते । ६ । ६ । ३३ ।
"ततः स राजकन्याभिरेकः पञ्चाग्नयो वरः ॥")

राजकर्कटी, स्त्री, चीनाकर्कटी । इति राजनिर्घण्टः ॥

राजकशेरुः, पुं, (कशेरूणां राजा । राजदन्तादित्वात् परनिपातः ।) भद्रमुस्ता । इति राजनिर्घण्टः ॥

राजकीयः, त्रि, (राज्ञ इदम् । राजन् + "राज्ञः कच ।" ४ । २ । ९४० । इति छः ककारस्यान्तादेशः ।) राजसम्बन्धी । राजकस्यायं इत्यर्थे छीयप्रत्ययेन सिद्धः ॥ (यथा, कथासरित्सागरे । ६२ । २२८ ।
"ततस्तदर्थं रात्रौ स राजकीयं सरो ययौ ॥")

राजकुमारः, पुं, (राज्ञः कुमारः ।) राजपुत्रः । तत्र वर्णनीयानि यथा,—
"कुमारे शस्त्रशास्त्रज्ञौकलावत्त्वगुणोच्छ्रयाः ।

वाट्टाली खुरली राजभक्तिः शुभगतादयः ।"
इति कविकल्पलतायाम् १ स्तवकः ॥
राजकृष्णाङ्कः, पुं, वार्त्ताकी । इति जटाधरः ॥
राजकोशातकी, स्त्री, (राजप्रिया कोशातकी ।) निक्षाकविशेषः । घिया तोरई इति हिन्दीभाषा ॥ तत्पर्य्यायः । हस्तिपर्णिका २ प्रीतपुष्पिका ३ धामार्गवः ४ केशफला ५ महाजाली ६ सपीतकः ७ । अस्या गुणाः । प्रीतलत्वम् । ज्वरघ्नत्वम् । कफवातनत्वञ्च । इति मदनविनोदः ॥
राजखर्ज्जूरी, स्त्री, (राजप्रिया खर्ज्जूरी ।) श्रेष्ठखर्ज्जूरी । पिण्डखर्ज्जूरिका । तत्पर्य्यायः । राजपिण्डा २ नृपपिण्डा ३ । अस्या गुणाः । गौरत्वम् । स्वादे हिमत्वम् । गुरुत्वम् । पित्तदाहार्त्तिश्वासभ्रमनाशित्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥
राजगामि, [न्] त्रि, (राजानं गच्छतीति । गम् + णिनिः ।) राजसम्बन्धि । यथा,—
"अनृतञ्च समुत्कर्षे राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्ब्बन्धः समानि ब्रह्महत्यया ॥"
इति मानवे ११ अध्यायः ॥
"राजनि वा स्त्रीनादीनां परेषां मरणफलदोषाभिधानम् ।" इति कुल्लूकभट्टः ॥ अपि च ।
"अपुत्रस्य धनं पत्न्यभिगामि तदभावे माटृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्रगामि तदभावे सकुल्यगामि तदभावे बन्धुगामि तदभावे शिष्यगामि तदभावे सहाध्यायिगामि तदभावे ब्राह्मणधनवर्ज्जं राजगामि ।" इति दायभागव्यवस्थृतविष्णुवचनम् ॥
राजगिरिः, पुं, शाकभेदः । तत्पर्य्यायः । राजाद्रिः २ राजशाकिनी ३ राजशाकिनिका ४ । अस्य गुणाः । रूक्षत्वम् । पित्तनाशित्वम् । शीतलत्वम् । स्थूलस्य तु अतिशीतलत्वम् । अतिरूक्षत्वञ्च । इति राजनिर्घण्टः ॥ (मगधदेशस्थः पर्व्वतविशेषश्च ॥)
राजग्रीवः, पुं, (राजते इति । राज् + अच् । राजा दीप्तिशालिनी ग्रीवा यस्य ।) मत्स्यविशेषः । फलुई इति भाषा । यथा,—
"पलकी स्यात्तिमपली राजग्रीवो मदार्मदः ॥"
इति त्रिकाण्डशेषः ॥
राजघः, त्रि, तीक्ष्णः । इति त्रिकाण्डशेषः ॥ (राजानं हन्तीति । हन् + "राजघ उपसंख्यानम् ।" ३ । २ । ५५ । इत्यस्य वार्त्तिकोक्त्या कप्रत्ययेन साधु ।) राजहन्ता । यथा,—
"अनल्पदग्धारिपुराजलोच्चले-
र्निजप्रतापैर्ज्वलयं ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय हृष्या
रराज नीराजनया स राजघः ॥"
इति नैषधे । १ । ९० ॥
राजचिह्नकं, क्ली, उपस्थः । इति शब्दचन्द्रिका । चिह्नानां स्त्रीपुंविभागकानां राजा इति व्युत्पत्त्या चिह्नम् ॥
राजजम्बूः, स्त्री, (जम्बूनां राजा । राजदन्तादित्वात् परनिपातः ।) पिण्डखर्ज्जूरम् । इति मेदिनी ॥ महाजम्बूः । इति राजनिर्घण्टः ॥
राजयक्ष्मा [न्] पुं, क्षयरोगः । "यक्ष्यते पूज्यते रोगराजत्वात् यक्ष्मा यक्ष क ड मह्यन्तः-स्थादिः घासुसिसिति मनुः चवर्गद्वितीयादिरित्वे तद्धा जश्च भवद्वचनयोरित्यस्य रूपं राजयक्ष्मग्रन्थोऽप्यत्र ।" इत्यमरटीकायां भरतः ॥ (अस्य विवरणन्तु राजयक्ष्मग्रन्थे द्रष्टव्यम् ॥)
राजतं, त्रि, (रजतस्य विकारः । रजत + "प्राणिरजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इति अञ् ।) रजतनिर्म्मितम् । यथा,—
"सौवर्णं राजतं ताम्रं पित्र्यां पात्रमुच्यते ।
रजतस्य कथा वापि दर्शनं दानमेव वा ॥"
इति मात्स्ये १७ अध्यायः ॥
रजते, क्ली ॥ (यथा, गो० रामायणे ।३।४८।१।
"तं तु सीता मृगं दृष्ट्वा वने काञ्चनसप्रभम् ।
हेमराजतचित्राभ्यां पार्श्वाभ्यां समलङ्कृतम् ॥")
राजतरुः, पुं, (तरूणां राजा । राजदन्तादित्वात् परनिपातः ।) कर्णिकारवृक्षः । आरग्वधः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते ।६। ५७ ।
"सुस्तादिराजतरुवर्गदशाङ्गसिद्धैः
क्वाथैर्जयेद्बधुयुतैर्विविधैश्च लेहैः ॥")
राजतरुणी, स्त्री, (राज्ञस्तरुणीव । सौन्दर्य्यातिशय्यवत्त्वात् ।) पुष्पविशेषः । तत्पर्य्यायः । महासहा २ वर्णपुष्पः ३ अम्लानः ४ अम्लातकः ५ सुपुष्पः ६ सुवर्णपुष्पः ७ । अस्या गुणाः । कषायत्वम् । कफकारित्वम् । चक्षुष्यत्वम् । हर्षदत्वम् । हृद्यत्वम् । सुरभित्वम् । सुखवल्लभत्वञ्च । इति राजनिर्घण्टः ॥
राजता, स्त्री, राजत्वम् । राज्ञो भाव इत्यर्थे राजन् शब्दात् तल्प्रत्ययेन सिद्धा ॥ (यथा, कथासरित्सागरे । ३६ । ६८ ।
"तेन मत्तामसुचन्तीमपि मुक्त्वा स तां ययौ ।
रत्नकूटं स्वकार्य्यार्थं नित्यसिद्धा हि राजता ॥")
राजताल्लः, पुं, (राज्ञस्ताल इव ।) गुवाकवृक्षः । इति शब्दरत्नावली ॥
राजतिमिश्रः, पुं, सुखाम्रः । इति हारावली । १८१ ॥
राजत्वं, क्ली, राजता । राज्ञो भाव इत्यर्थे राजन् शब्दात् त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे । २० । १६१ ।
"कथं राजत्वमिच्छन्ती स राजा निषिषेध तत् ॥")
राजदण्डः, पुं, (राज्ञो दण्डः ।) राजशासनम् । यथा,—
"ऊनैकादशवर्षस्य षण्ढवर्षाधिकस्य च ।
चरेद्गुरुः सूकृच्छ्रापि प्रायश्चित्तं विशुद्धये ।
ततो न्यूनतरस्यास्य नापराधो न पातकम् ।
न चास्य राजदण्डोऽपि प्रायश्चित्तं न विद्यते ॥"
इति प्रायश्चिततत्त्वधृताङ्गिरोवचनम् ॥
राजदन्तः, पुं, दन्तानां राजा । ("राजदन्तादिषु परम् ।" २ । २ । ३१ । इति परनिपातः ।) उपरिश्रेणीस्थमध्यवर्त्तिदन्तद्वयम् । यथा,—
"राजदन्तौ तु मध्यस्थावुपरिश्रेणिकौ क्वचित् ॥"
इति हेमचन्द्रः ॥
राजदेशीयः, पुं, (ईषद्ग्नो राजा । राजन् + "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ।" ५ । ३ । ६७ । इति देशीयर् ।) राजदेश्यः । राजकल्पः । इति व्याकरणम् ॥
राजधनूरकः, पुं, (धनूरकाणां राजा । राजदन्तादित्वात् परनिपातः ।) दृढधुस्तूरः । इति क्वचित् राजनिर्घण्टः ॥ तस्य पर्य्यायः राजधुस्तूरशब्दे द्रष्टव्यः ॥
राजधर्म्मः, पुं, (राज्ञो धर्म्मः ।) राज्ञः कर्त्तव्यं कर्म्म । यथा,—
"राजधर्म्मान् प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।
सम्भवश्च यथा तस्य सिद्धिश्च परमा यथा ॥
ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि ।
सर्व्वस्यास्य यथान्यायं कर्त्तव्यं परिरक्षणम् ॥
अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः ॥
इन्द्रानिलयमार्क्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्म्मितो नृपः ।
तस्मादभिभवत्येष सर्व्वभूतानि तेजसा ॥
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्म्मराट् ।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम् ॥
कार्य्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च तत्त्वतः ।
करोति धर्म्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः ॥
यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्व्वतेजोमयो हि सः ॥
तं यस्तु द्वेष्टि संमोहात् स विनश्यत्यसंशयम् ।
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥
तस्माद्धर्म्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टाप्यनिषिद्धेषु तं धर्म्मं न विचालयेत् ॥
तस्यार्थे सर्व्वभूतानां गोप्तारं धर्म्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत् पूर्व्वमीश्वरः ॥
तस्य सर्व्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्म्मान्न चलन्ति च ॥
तं देशकालौ शक्तिञ्च विद्याश्चावेक्ष्य तत्त्वतः ।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्त्तिषु ॥
स राजा पुरुषो दण्डः स नेता शासिता च सः ।
चतुर्णामाश्रमाणाञ्च धर्म्मस्य प्रतिभूः स्मृतः ॥
दण्डः शास्ति प्रजाः सर्व्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्बुधाः ॥
समीक्ष्य स धृतः सम्यक् सर्व्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्व्वतः ॥
यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन् दुर्ब्बलान् बलवत्तराः ॥

अद्यात् कादः पुरोडाशं श्यावलिश्चाडविक्लवा।
स्वाम्यञ्च न स्यात् कस्मिंश्चित् प्रवर्त्तेताधरोत्तरम्॥
सर्व्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः।
दण्डस्य हि भयात् सर्व्वं जगद्भोगाय कल्पते॥
देवदानवगन्धर्व्वा रक्षांसि पतगोरगाः।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीड़िताः॥
दुष्येयुः सर्व्ववर्णाश्च भिद्येरन् सर्व्वसेतवः।
सर्व्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात्॥
यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा।
प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति॥
तस्माद्दुः संप्रणेतारं राजानं सत्यवादिनम्।
समीक्ष्य कारिणं प्राज्ञं धर्म्मकामार्थकोविदम्॥
तं राजा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्द्धते।
कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते॥
दण्डो हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः।
धर्म्माद्विचलितं हन्ति नृपमेव सबान्धवम्॥
ततो दुर्गञ्च राष्ट्रञ्च लोकञ्च सचराचरम्।
अन्तरीक्षगतांश्चैव सुरान् देवांश्च पीड़येत्॥
सोऽसहायेन मूढ़ेन लुब्धेनाकृततद्विदा।
न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च॥
शुचिना सत्यसन्धेन यथाशास्त्रानुसारिणा।
प्रणेतुं शक्यते दण्डः सुसहायेन धीमता॥
स्वराष्ट्रे न्यायवृत्तः स्यादभृशदण्डश्च शत्रुषु।
सुहृत्स्वजिह्मः स्निग्धेषु ताक्ष्ण्येषु क्षमान्वितः॥
एवंवृत्तस्य नृपतेः श्लिलोञ्छेनापि जीवतः।
विस्तीर्य्यते यशो लोके तैलबिन्दुरिवाम्भसि॥
अतस्तु विपरीतस्य नृपतेरजितात्मनः।
संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि॥
स्वे स्वे धर्म्मे निविष्टानां सर्व्वेषामनुपूर्व्वशः।
वर्णानामाश्रमाणाञ्च राजा सृष्टोऽभिरक्षिता॥
तेन यद्यत् सभृत्येन कर्त्तव्यं रक्षता प्रजाः।
तत्तदोऽहं प्रवक्ष्यामि यथावदनुपूर्व्वशः॥
ब्राह्मणान् पर्य्युपासीत प्रातरुत्थाय पार्थिवः।
त्रैविद्यवृद्धान् विदुषस्तिष्ठेत्तेषाञ्च शासने॥
वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन्।
वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते॥
तेभ्योऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः।
विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित्॥
बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः।
वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे॥
वेनो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः।
सुदासो यवनश्चैव सुमुखो निमिरेव च॥
पृथुस्तु विनयाद्राज्यं प्राप्तवान् मनुरेव च।
कुबेरश्च धनैश्वर्य्यं ब्राह्मण्यञ्चैव गाधिजः॥
त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम्।
आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः॥
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः॥
दश कामसमुत्थानि तथाष्टौ क्रोधजानि च।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्ज्जयेत्॥
कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः।
वियुज्यतेऽर्थधर्म्माभ्यां क्रोधजेष्वात्मनैव तु॥
मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥
द्वयोरप्येतयोर्म्मूलं यं सर्व्वे कवयो विदुः।
तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ॥
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम्।
एतत् कष्टतमं विद्याच्चतुष्कं कामजे गणे॥
दण्डस्य पातनञ्चैव वाक्पारुष्यार्थदूषणे।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा॥
सप्तकस्यास्य वर्गस्य सर्व्वत्रैवानुषङ्गिणः।
पूर्व्वं पूर्व्वं गुरुतरं विद्याद्व्यसनमात्मवान्॥
व्यसनस्य च मृत्योच्च व्यसनं कष्टमुच्यते।
व्यसन्यधोऽधो व्रजति स्वर्य्यात्यव्यसनी मृतः॥
मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्गतान्।
सचिवान् सप्त चाष्टौ वा प्रकुर्व्वीत परीक्षितान्॥
अपि यत् सुकरं कर्म्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम्॥
तैः सार्द्धं चिन्तयेन्नित्यं सामान्यं सन्धिविग्रहम्।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च॥
तेषां स्वं समभिप्रायसुपलभ्य पृथक् पृथक्।
समस्तानाञ्च कार्य्येषु विदध्याद्धितमात्मनः॥
सर्व्वेषान्तु विशिष्टेन ब्राह्मणेन विपश्चिता।
मन्त्रयेत परमं मन्त्रं राजा षाड्गुण्यसंयुतम्॥
नित्यं तस्मिन् समाश्वस्तः सर्व्वकार्य्याणि निःक्षिपेत्।
तेन सार्द्धं विनिश्चित्य ततः कर्म्म समारभेत्॥
अन्यानपि प्रकुर्व्वीत शुचीन् प्राज्ञानवस्थितान्।
सम्यगर्थसमाहर्त्तॄनमात्यान् सुपरीक्षितान्॥
निर्व्वर्त्तेतास्य यावद्भिरितिकर्त्तव्यता नृभिः।
तावतोऽतन्द्रितान् दक्षान् प्रकुर्व्वीत विचक्षणान्॥
तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान्।
शुचीनाकरकर्म्मान्ते भीरूनन्तर्निवेशने॥
दूतञ्चैव प्रकुर्व्वीत सर्व्वशास्त्रविशारदम्।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम्॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित्।
वपुष्मान् वीतभीर्व्वाग्मी दूतो राज्ञः प्रशस्यते॥
आमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया।
नृपतौ कोशराष्ट्रे च दूते सन्धिविपर्य्ययौ॥
दूत एव हि सन्धत्ते भिनत्त्येव च संहतान्।
दूतस्तत् कुरुते कर्म्म भिद्यन्ते येन वा न वा॥
स विद्यादस्य कृत्येषु निगूढ़ेङ्गितचेष्टितैः।
आकारमिङ्गितं चेष्टा भृत्येषु च चिकीर्षितम्॥
बुद्ध्वा च सर्व्वं तत्त्वेन परराजचिकीर्षितम्।
तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीड़येत्॥
आङ्गिकं शुद्धसम्पन्नमार्य्यप्रायमनाविलम्।
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत्॥
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम्॥
सर्व्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्।
एषां हि बहुगुण्येन गिरिदुर्गं विशिष्यते॥
चौरव्याघ्रान्त्यश्रितास्त्वेषां मृगगर्त्ताश्रयाश्चराः।
त्रीण्युत्तराणि क्रमशः प्रवङ्गमनरामराः॥
यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः।
तथारयो न हिंसन्ति नृपं दुर्गसमाश्रितम्॥
एकः शतं योधयति प्राकारस्थो धनुर्द्धरः।
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते॥
तत् स्यादायुधसम्पन्नं धनधान्येन वाहनैः।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च॥
तस्य मध्ये सुपर्य्याप्तं कारयेद्गृहमात्मनः।
गुप्तं सर्व्वर्तुकं शुभ्रं जलवृक्षसमन्वितम्॥ * ॥
तदध्यास्योद्वहेद्भार्य्यां सवर्णां लक्षणान्विताम्।
कुले महति सम्भूतां हृद्यां रूपगुणान्विताम्॥
पुरोहितञ्च कुर्व्वीत दृष्ट्यादेव चर्त्विजम्।
तेऽस्य गृह्याणि कर्म्माणि कुर्य्युर्वैतानिकानि च॥
यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः।
धर्म्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च॥
सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम्।
स्याच्चास्यायपरो लोके वर्त्तेत पितृवन् नृषु॥
अध्यक्षान् विविधान् कुर्य्यात् तत्र तत्र विपश्चितः।
तेऽस्य सर्व्वाण्यवेक्षेरन् नृणां कार्य्याणि कुर्व्वताम्॥
आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत्।
नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयते॥
न तं स्तेना न चामित्रा हरन्ति न च नश्यति।
तस्माद्राजा निधातव्यो ब्राह्मणेष्वक्षयो निधिः॥
न स्कन्दते न व्यथते न विनश्यति कर्हिचित्।
वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतम्॥
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे।
प्राधीते शतसाहस्रमनन्तं वेदपारगे॥
पात्रस्य हि विशेषेण श्रद्धायानतयैव च।
अल्पं वा बहु वा प्रेत्य दानस्याप्नोति फलम्॥
समोत्तमाधमैः राजा त्रिधृतः पालयन् प्रजाः।
न निवर्त्तेत संग्रामात् क्षात्रं धर्म्ममनुस्मरन्॥
संग्रामेष्वनिवर्त्तित्वं प्रजानाञ्चैव पालनम्।
शुश्रूषा ब्राह्मणानाञ्च राज्ञां श्रेयस्करं परम्॥
आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः॥
न कूटैरायुधैर्हन्यात् युध्यमानो रणे रिपून्।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः॥
न च हन्यात् स्थलारूढ़ं न क्लीवं न कृताञ्जलिम्।
न मुक्तकेशं नासीनं न तवास्मीति वादिनम्॥
न सुप्तं न विसन्नाहं न नग्नं न निरायुधम्।
नायुध्यमानं पश्यन्तं न परेण समागतम्॥
नायुधव्यसनप्राप्तं नार्त्तं नातिपरीक्षतम्।
न भीतं न परावृत्तं सतां धर्म्ममनुस्मरन्॥
यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः।
भर्त्तुर्यद्दुष्कृतं किञ्चित्तत् सर्व्वं प्रतिपद्यते॥
यच्चास्य सुकृतं किञ्चिदमुत्रार्थमुपार्ज्जितम्।
भर्त्ता तत् सर्व्वमादत्ते परावृत्तहतस्य तु॥ * ॥

रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः।
सर्वद्रव्याणि कुप्यञ्च यो यज्जयति तस्य तत्॥
राज्ञश्च दण्डधारणमित्येषा वैदिकी श्रुतिः।
राज्ञा च सर्वयोधेभ्यो दातव्यमपृथग्जितम्॥
एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः।
अस्माद्धर्मान्न च्यवेत क्षत्रियो भृत्यरक्षणे रिपून्॥
अलब्धञ्चैव लिप्सेत लब्धं रक्षेत् प्रयत्नतः।
रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निःक्षिपेत्॥
एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम्।
अस्य नित्यमनुष्ठानं सम्यक् कुर्यादतन्द्रितः॥
अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया।
रक्षितं वर्द्धयेद्वृद्धा वृद्धं दानेन निःक्षिपेत्॥*
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः।
नित्यं संवृतसंवार्यो नित्यं छिद्रानुसारिरेः॥
नित्यमुद्यतदण्डस्य कृतमुद्यच्छते जगत्।
तस्मात् सर्वाणि भूतानि दण्डेनैव प्रसाधयेत्॥
अमाययैव वर्त्तेत न कथञ्चन मायया।
बुध्येतारिप्रयुक्तांश्च मायां नित्यं स्वसंवृतः॥
नास्य च्छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु।
गूहेत् कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः॥
बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्॥
एवं विजयमानस्य येऽस्य स्युः परिपन्थिनः।
तानानयेद्वशं सर्वान् सामादिभिरुपक्रमैः॥
यदि ते तु न लिप्सेयुरुपायैः प्रथमैस्त्रिभिः।
दण्डेनैव प्रसह्यैतान्वशमानयेत्॥
सामादीनामुपायानां चतुर्णामपि पण्डिताः।
सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये॥
यथोद्धरति निर्दाता कक्षं धान्यञ्च रक्षति।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया।
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः॥
अरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा।
तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात्॥
राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत्।
सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते॥
द्वयोस्त्रयाणां पक्षानां मध्ये गुल्ममधिष्ठितम्।
तथा ग्रामशतानाञ्च कुर्यात्प्राकृत संग्रहम्॥
ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा।
विंशतीशं शतेशञ्च सहस्रपतिमेव च॥
ग्रामे दोषान् समुत्पन्नान् ग्रामिकः शनकैः स्वयम्।
शंसेद्ग्रामदशेशाय दशेशो विंशतीशिनम्॥
विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत्।
शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयम्॥
यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः।
अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात्॥
दशी कुलन्तु शुश्रूषेद्विंशी पञ्च कुलानि च।
ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम्॥
तेषां ग्राम्याणि कार्याणि पृथक् कार्याणि चैव हि।
राज्ञोऽन्यैः सचिवैः स्निग्धैस्तानि पश्येदतन्द्रितः॥
नगरे नगरे चैकं कुर्यात् सर्वार्थचिन्तकम्।
उच्चैः स्थानं घोररूपं नक्षत्राणामिव ग्रहम्॥
सतानुपरिक्रामेत् सर्वानेव सदा स्वयम्।
तेषां वृत्तं परिणयेत् सम्यग्राष्ट्रेषु तच्चरैः॥
राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः।
भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः॥
ये कार्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः।
तेषां सर्वस्वमादाय राजा कुर्यात् प्रवासनम्॥
राजकर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च।
प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्मानुरूपतः॥
पणो देयोऽवकृष्टस्य षडुत्कृष्टस्य वेतनम्।
वास्त्रासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः॥*॥
क्रयविक्रयमध्वानं भक्तञ्च सपरिव्ययम्।
योगक्षेमञ्च संप्रेक्ष्य वणिजो दापयेत् करान्॥
यथा फलेन युज्येत राजा कर्त्ता च कर्मणाम्।
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान्॥
यथाल्पाल्पमदन्त्याद्यं वार्योको वत्स षट्पदाः।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः कर:॥
पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा॥
आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम्।
गन्धौषधिरसानाञ्च मूलपुष्पफलस्य च॥
पत्रशाकतृणानाञ्च वैदलस्य च चर्मणाम्।
मृण्मयानाञ्च भाण्डानां सर्वस्याश्ममयस्य च॥
स्त्रियमाणोऽप्यादद्रीत न राजा श्रोत्रियात्करम्।
न च क्षुधास्य संसीदेत् श्रोत्रियो विषये वसन्॥
यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा।
तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति॥
श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्पयेत्।
संरक्षेत् सर्वतश्चैनं पिता पुत्रमिवौरसम्॥
संरक्ष्यमाणो राज्ञा यं कुरुते धर्ममन्वहम्।
तेनायुर्वर्द्धते राज्ञो द्रविणं राष्ट्रमेव च॥
यत्किञ्चिदपि वर्षस्य दापयेत् करसंज्ञितम्।
व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम्॥
कारुकान् शिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः।
एकैकं कारयेत् कर्म मासि मासि महीपतिः॥
योऽरक्षन्बलिमादत्ते करं शुल्कं परेऽहनि।
प्रत्यहं लोकपालानां इन्द्रलोके महीयते॥
अनाद्यमत्वं पशुमत्वं कृषेर्गोरक्षणं तथा।
वाणिज्यं विविधं तौल्यं दानादानमथो दमः॥
सूचीकर्म शिल्पकर्म पुस्तकर्म तथैव च।
गन्धसूत्रं गुडत्वञ्च लवणस्य च विक्रयः॥
दासगोरक्षकृषिकाः कारुशिल्पोपजीविनः।
एतान्भृत्यान्नृपो विद्यात् प्रेष्यान्सर्वांश्च शूद्रवत्॥
शूद्रवैश्यौ प्रयत्नेन स्वकर्मसु नियोजयेत्।
तद्धि तौ वर्द्धयेतां स्वं तच्च राज्ञो न हीयते॥
शूद्रवैश्यौ प्रयत्नेन स्वकर्मसु नियोजयेत्।
तद्धि तौ वर्द्धयेतां स्वं तच्च राज्ञो न हीयते॥
उत्थाय पश्चिमे यामे कृतशौचः समाहितः।
हुतामिर्ब्राह्मणांश्चार्च्य प्रविशेत् स शुभां सभाम्॥
तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द विसर्जयेत्।
विसृज्य च प्रजाः सर्वा मन्त्रयेत् सह मन्त्रिभिः॥
गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः।
अरण्ये निःशलाके वा मन्त्रयेदविभावितः॥
यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः।
सम्पूर्णामपि पृथिवीं भुञ्जीतैवोदधेरपि पार्थिवः॥
जडमूकान्धबधिरांस्तिर्यग्योनीन् वयोगतान्।
स्त्रीम्लेच्छव्याधितव्यङ्गान् मन्त्रकालेऽपसारयेत्॥
भिन्नस्त्रवमता मन्त्रं तैर्यग्योनास्तथैव च।
स्त्रियश्चैव विशेषेण तस्मात्तत्राद्रतो भवेत्॥
मध्यन्दिनेऽर्द्धरात्रे वा विश्रान्तो विगतक्लमः।
चिन्तयेद्धर्मकामार्थान् सार्द्धं तैरेक एव वा॥
परस्परविरुद्धानां तेषाञ्च समुपार्जनम्।
कन्यानां सम्प्रदानञ्च कुमाराणाञ्च रक्षणम्॥
दूतसंप्रेषणञ्चैव कार्यशेषं तथैव च।
अन्तःपुरप्रचारञ्च प्रणिधीनाञ्च चेष्टितम्॥
कृत्स्नं चाष्टविधं कर्म पञ्चवर्गञ्च तत्त्वतः।
अनुरागापरागौ च प्रचारं मण्डलस्य च॥
मध्यमस्य प्रचारञ्च विजिगीषोश्च चेष्टितम्।
उदासीनप्रचारञ्च सम्यक्चैव प्रयत्नतः॥*॥
एताः प्रकृतयो मूलं मण्डलस्य समासतः।
अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः॥
अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च चापराः।
प्रत्येकं कथिता ह्येताः संक्षेपेण हिसप्रतिः॥
अनन्तरमरिं विद्यादरिसेवितमेव च।
अरेरनन्तरं मित्रमुदासीनं तयोः परम्॥
तान् सर्वानभिसन्धत्यात् सामादिभिरुपक्रमैः।
वक्षसैव समक्षेण पौरुषेण नयेन च॥
सन्धिञ्च विग्रहञ्चैव यानमासनमेव च।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा॥
आसनञ्चैव यानञ्च सन्धिं विग्रहमेव च।
कार्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रयमेव च॥
सन्धिन्तु द्विविधं विद्याद्राजा विग्रहमेव च।
उभे यानासने चैव द्विविधः संश्रयः स्मृतः॥
समानयानकर्मा च विपरीतस्तथैव च।
तदात्वायतिसंयुक्तः सन्धिर्ज्ञेयो द्विलक्षणः॥
स्वयंकृतश्च कार्यार्थमकाले काल एव वा।
मित्रेण चैवापकृते द्विविधो विग्रहः स्मृतः॥
एकाकिनश्चात्ययिके कार्ये प्राप्ते यदृच्छया।
संहतस्य च मित्रेण द्विविधं यानमुच्यते॥
क्षीणस्य चैव क्रमशो दैवात् पूर्वकृतेन वा।
मित्रस्य चानुरोधेन द्विविधं स्मृतमासनम्॥
बलस्य स्वामिनश्चैव स्थितिः कार्यार्थसिद्धये।
द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः॥
अर्थसम्पादनार्थञ्च पीड्यमानस्य शत्रुभिः।
साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः॥*॥
यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः।
तदात्वे चाल्पिकां पीडां तदा सन्धिं समाश्रयेत्।"

तदात्वे तत्काले ।
"यदा प्रकृष्टा मन्येत सर्व्वास्तु प्रकृतीर्भृशम् ।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम् ॥
यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम् ।
परस्य विपरीतञ्च तदा यायाद्रिपुं प्रति ॥
यदा तु स्यात् परिक्षीणो वाहनेन बलेन च ।
तदासीत प्रयत्नेन शनकैः सान्त्वयन्नरीन् ।
मन्येतारिं यदा राजा सर्व्वथा बलवत्तरम् ।
तदा द्विधा बलं कृत्वा साधयेत् कार्य्यमात्मनः ॥
यदा परबलानान्तु गमनीयतमो भवेत् ।
तदा तु संश्रयेत् क्षिप्रं धार्म्मिकं बलिनं नृपम् ॥
नियहं प्रकृतीनाञ्च कुर्य्यादुग्रोऽरिबलस्य च ।
उपसेवेत तं नित्यं सर्व्वयत्नैर्गुरुं यथा ॥
यदि तत्रापि संपश्येत् दोषं संश्रयकारितम् ।
सुदुष्टमेवं तत्रापि निर्विशङ्कः समाचरेत् ॥
सर्व्वोपायैस्तथा कुर्य्यान्नीतिज्ञः पृथिवीपतिः ।
यथास्याभ्यधिका न स्युर्मिथोदासीनशत्रवः ॥
आयतिं सर्व्वकार्य्याणां तदात्वञ्च विचारयेत् ।
अतीतानाञ्च सर्व्वेषां गुणदोषौ च तत्त्वतः ॥
आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः ।
अतीते कार्य्यशेषज्ञः शत्रुभिर्नाभिभूयते ॥
यश्चैनं नाभिसन्दध्युर्मिथोदासीनशत्रवः ।
तथा सर्व्वं संविदध्यादेष सामासिको नयः ॥
यदा तु यानमास्थितेदरिराष्ट्रं प्रति प्रभुः ।
तदानेन विधानेन यायादरिपुरं शनैः ॥
मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः ।
कालगुणं वाथ चैत्रं वा माघौ प्रति यथाबलम् ॥
अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयम् ।
तदा यायादिहैवेह व्यसने चोत्थिते रिपोः ॥
कृत्वा विधानं मूले तु यात्रिकञ्च यथाविधि ।
उपगृह्यास्पदञ्चैव चारान् सम्यग्विधाय च ॥
संशोध्य त्रिविधं मार्गं षड्विधञ्च बलं स्वकम् ।
साम्परायिककल्पेन यायादरिपुरं शनैः ॥
शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत् ।
गतप्रत्यागते चैव स हि कष्टतरो रिपुः ॥
दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा ॥
यतश्च भयमाशङ्केत्ततो विस्तारयेद्बलम् ।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम् ॥
सेनापतिबलाध्यक्षौ सर्व्वदिक्षु निवेशयेत् ।
यतश्च भयमाशङ्केत् प्राचीं तां कल्पयेद्दिशम् ॥
गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः ।
स्थाने युद्धे च कुशलानभीरूनविकारिणः ॥
संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून् ।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत् ॥
स्यन्दनाश्वैः समे युध्येदनूपे वारिदैस्तथा ।
दृढतुल्यास्तरे चापैरसिचर्म्मायुधैः स्थले ॥
कुरुचेदांश्च मत्स्यांश्च पञ्चालान् शूरसेनकान् ।
दीर्घान् लघूंश्चैव नरानश्वानीकेषु योधयेत् ॥
प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक् परीक्षयेत् ।
चेष्टाश्चैव विजानीयादरीन् योधयतामपि ॥
उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत् ।
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम् ॥
भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा ।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा ॥
उपजप्यानुपजपेदुपेक्षेतैव च तत्कृतम् ।
युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः ॥
साम्ना दानेन भेदेन समस्तैरथवा पृथक् ।
विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ॥
अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः ।
पराजयश्च संग्रामे तस्माद्युद्धं विवर्ज्जयेत् ॥
त्रयाणामप्युपायानां पूर्व्वोक्तानामसम्भवे ।
तथा युध्येत संयत्तो विजयेत रिपून् यथा ॥*॥
जित्वा सम्पूजयेद्देवान् ब्राह्मणांश्चैव धार्म्मिकान् ।
प्रदद्यात् परिहारांश्च स्थापयेदभयानि च ॥
सर्व्वेषान्तु विदित्वैषां समासेन चिकीर्षितम् ।
स्थापयेत्तत्र तद्वंश्यं कुर्य्याच्च समयक्रियाम् ॥
प्रमाणानि च कुर्व्वीत तेषां धर्म्म्यान् यथोदितान् ।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह ॥
आदानमप्रियकरं दानञ्च प्रियकारकम् ।
अभीप्सितानामर्थानां काले युक्तं प्रशस्यते ॥
सर्व्वं कर्म्मेदमायत्तं विधाने दैवमानुषे ।
तयोर्दैवमचिन्त्यन्तु मानुषे त्वते क्रिया ॥
सह वापि व्रजेदृयुक्तः सन्धिं कृत्वा प्रयत्नतः ।
मित्रं हिरण्यं भूमिं वा सम्पश्यंस्त्रिविधं फलम् ॥
पार्ष्ण्यिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले ।
मित्रादथाप्यमित्राद्वा यात्राफलमवाप्नुयात् ॥"
आक्रन्दः पार्ष्ण्यिग्राहस्य नियामको राजा ।
"हिरण्यभूमिसम्प्राप्त्या पार्थिवो न तथेधते ।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम् ॥*॥
धर्म्मज्ञञ्च कृतज्ञञ्च तुष्टप्रकृतिमेव च ।
अनुरक्तं स्थिरारम्भं लघु मित्रं प्रशस्यते ॥
प्राज्ञं कुलीनं शूरञ्च दक्षं दातारमेव च ।
कृतज्ञं धृतिमन्तञ्च कष्टमाहुररिं बुधाः ॥
आर्य्यता पुरुषज्ञानं शौर्य्यं करुणवेदिता ।
स्थौलक्षण्यञ्च सततमुदासीनगुणोदयः ॥"
स्थौलक्षण्यं बहुप्रदत्वम् ।
"क्षेम्यां शस्यप्रदां नित्यं पशुहिरण्यकरीमपि ।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन् ॥
आपदर्थं धनं रक्षेद्दारानपि धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥
सह सर्व्वाः समुत्पन्नाः प्रवर्त्तीरन्नापदो भृशम् ।
संयुक्तांश्च वियुक्तांश्च सर्व्वोपायान् प्रयोजयेत् ॥
उपेतारमुपेयञ्च सर्व्वोपायांश्च कृत्स्नशः ।
एतत् त्रयं समाश्रित्य प्रयतेतार्थसिद्धये ॥"
उपेतारं आत्मानम् । उपेयं प्राप्तव्यम् ॥*॥
"एवं सर्व्वमिदं राजा सह सम्मन्त्र्य मन्त्रिभिः ।
यायादासाद्य मध्याह्ने भोक्तुमन्तःपुरं विशेत् ॥
तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः ।
सुपरीक्षितमन्नाद्यमद्याज्जन्यैर्विषादिभिः ॥
विषघ्नैरगदैश्चास्य सर्व्वद्रव्याणि योजयेत् ।
विषघ्नानि च रत्नानि नियतो धारयेत् सदा ॥
परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः ।
वेषाभरणसंगुप्ताः शुचयः सुसमाहिताः ॥
एवं प्रयत्नं कुर्व्वीत यानशय्यासनाशने ।
स्नाने प्रसाधने चैव सर्व्वालङ्कारकेषु च ॥
भुक्तवांस्तु विहरेच्चैव स्त्रीभिरन्तःपुरे सह ।
विसृज्य तु यथाकालं पुनः कार्य्याणि चिन्तयेत् ।
अलङ्कृतश्च संपश्येदायुधीयं पुनर्जनम् ।
वाहनानि च सर्व्वाणि शस्त्राण्याभरणानि च ॥
सन्ध्याञ्चोपास्य शृणुयादन्तर्व्वेश्मनि शस्त्रभृत् ।
रहस्याख्यायिनाञ्चैव प्रणिधीनाञ्च चेष्टितम् ॥
गत्वा कक्षान्तरं त्वन्यत् समनुज्ञाप्य तं जनम् ।
प्रविशेद्भोजनार्थञ्च स्त्रीवृतोऽन्तःपुरं पुनः ॥
तत्र भुक्त्वा पुनः किञ्चित्तूर्य्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्थितश्च गतक्लमः ॥
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः ।
अस्वस्थः सर्व्वमेतत्तु भृत्येषु विनियोजयेत् ॥"

इति मानवे ७ अध्यायः ॥*॥

काशीकापुराणोक्तराजधर्म्मः ८५ । ८६ अध्याययोः द्रष्टव्यः । महाभारतोक्तराजधर्म्मः शान्तिपर्व्वणि द्रष्टव्यः । पद्मपुराणोक्तराजधर्म्मः स्वर्गखण्डे १३८ अध्याये द्रष्टव्यः ॥

राजधानकं, क्ली, (धीयतेऽत्रेति । धा + ल्युट् । ततः कन् । राज्ञां धानकं नगरम् ।) राजपुरम् । इति शब्दरत्नावली ॥

राजधानी, स्त्री, (धीयतेऽस्यामिति । धा + अधिकरणे ल्युट् । ङीप् । राज्ञां धानी नगरी ।) राजधानिका । तत्पर्य्यायः । कोट्टः २ राजधानकम् ३ । इति शब्दरत्नावली ॥ स्कन्धावारः ४ । इति हेमचन्द्रः ॥ (यथा, रघुः । २ । ७० ।

"तौ दम्पती स्वां प्रति राजधानीं
प्रस्थापयामास वशी वशिष्ठः ॥")

राजधान्यं, क्ली, (राजप्रियं धान्यम् ।) श्यामाकः । इति राजनिर्घण्टः ॥ (यथा, हृहत्संहितायाम् । १५ । १२ ।

"त्वाष्ट्रं भूयश्चमणिरागवेश्मगान्धर्व्वगन्धयुक्तिज्ञाः ।
गन्धितपटुतनुवायाः शालाक्या राजधान्याश्च ॥")

राजभुक्तूरकः, पुं, (भुक्तूरकाणां राजा । राजदन्तादित्वात् परनिपातः ।) हृहद्भुक्तूरः । तत्पर्य्यायः । राजभूर्णः २ महाशठः ३ निश्चेष्टपुष्पकः ४ भ्रान्तः ५ राजखर्जः ६ । इति राजनिर्घण्टः ॥ अस्य गुणाः भुक्तूरशब्दे द्रष्टव्याः ॥

राजनामा, [न्] पुं, (राज्ञो नाम नाम यस्य ।) पटोलः । इति राजनिर्घण्टः ॥

राजनीतिः, स्त्री, (राज्ञां नीतिः ।) राज्ञां नयः । यथा, चाणक्यपण्डितकृतप्रथमः श्लोकः ।

"नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ।
सर्व्वलोकहितं शास्त्रं चाणक्यं सारसंग्रहम् ॥"

सा यथा,—

"गदितं वह्निशुक्राभ्यां श्रुत्वा भार्गवशङ्करः ।
प्राह धर्म्मार्थसंयुक्तं प्रश्नादौ वाक्यमुत्तमम् ॥
यदायत्यां क्षमं राजन्! यद्दृष्टं सुखमस्य च ।
अविरोधेन धर्म्मस्य अर्थस्योपार्ज्जनञ्च यत् ॥
सर्व्वसत्त्वानुगमनं कामवर्गफलञ्च यत् ।

परत्रेह च यच्छ्रेयः पुत्र तत् कर्म्म आचर ।
यथा श्राद्धं प्रयास्यद्य यथा कीर्त्तिर्भवेत्तव ।
यथा नाशयशोयोगस्तथा कुरु महामते ॥
एतदर्थं श्रियं दीप्तां काङ्क्षन्ते पुरुषोत्तमाः ।
येनेति हि गृहेऽस्माकं निवसन्ति सुनिर्वृताः ।
दृष्टो ज्ञातिर्गुणा विप्रः कीर्त्तिश्च यशसा सह ॥
तस्मादृद्धयथा ते निवसन्ति पुत्र-
राज्यस्थितस्येह कुलोत्तमाद्याः ।
तथा यतस्वामलसत्त्वचेष्टया
यथा यशस्वी भविताऽसि लोके ॥
भूम्यां सदा ब्राह्मणभूषितायां
क्षेत्रान्वितायां दृढवापितायाम् ।
शुश्रूषणासक्तसमृद्धवार्यां
ऋद्धिं प्रयान्तीह नराधिपेन्द्राः ॥
तस्मादृद्विजाग्र्याः श्रुतिशास्त्रयुक्ता
नराधिपांस्ते प्रतियाजयन्ते ।
दिव्यैर्यजन्तु क्रतुभिर्दिवेन्द्रा
यज्ञाग्निधूमो न नृपस्य शान्तिः ॥
तपोऽध्ययनसम्पन्ना याजनाध्यापने रताः ।
सन्तु विप्रा बले पुण्यास्ततोऽनुग्रहमवाप्य हि ॥
स्वाध्याययज्ञनिरता दातारः शस्त्रजीविनः ।
क्षत्रियाः सन्तु देवेन्द्र प्रजापालनधर्म्मिणः ॥
यज्ञाध्ययनसम्पन्ना दातारः कृषिकारिणः ।
पाशुपाल्यं प्रकुर्वन्तु वैश्या विपिनजीविनः ॥
ब्राह्मणक्षत्रियविशां सदा शुश्रूषणे रताः ।
शूद्राः सन्त्वसुरश्रेष्ठ तवाज्ञाकारिणः सदा ॥
यदा वर्णाः स्वधर्म्मस्था भवन्ति दितिजेश्वर ! ।
धर्म्मवृद्धिस्तदा स्याद्वै धर्म्मवृद्धौ नृपोदयः ॥
तस्माद्वर्णा स्वधर्म्मस्थास्त्वया कार्य्याः सदा बले ! ।
तद्वृद्धौ भवतो वृद्धिस्तद्धानौ हानिरुच्यते ॥
इत्थं वचः प्राह महासुरेन्द्रो
बलिं महात्मा स बभूव तूष्णीम् ।
ततो यदाज्ञापयसे करिष्ये
इत्थं बलिः प्राह वचो महर्षे ।"
इति वामने ७१ अध्यायः ॥ * ॥
अपि च ।
"एवं दत्त्वा ततो राज्यं ऋद्धिं चाप्राय धर्म्मवित् ।
उवाच मधुरं वाक्यं पुत्रं पुत्रवतां वरः ॥
राज्यस्थेनापि ते पुत्र कर्त्तव्यं श्रृणु तन्मम ।
यदीच्छेत् परमं धर्म्मं पितॄणां तारणं तथा ॥
दानवोऽग्निर्न कर्त्तव्या हन्तव्या परदारिकाः ।
बालवाताश्च हन्तव्या हन्तव्या स्त्रीविघातकाः ॥
मा लोभं परद्रव्येषु अन्यायोपार्ज्जितेषु च ।
न चिरं तिष्ठते कापि सर्व्वे मान्याः कदाचन ॥
रक्षणीयश्च ते देशः कुलन्यायवशार्ज्जितः ।
नित्योद्युक्तेन स्थातव्यममात्यवचनं कुरु ॥
अमात्यो यद्वचो ब्रूयात् पुत्र कार्य्यविमर्शनम् ।
अवश्यमेव कर्त्तव्यं शरीरपरिरक्षणम् ॥
प्रजा येन प्रमोदन्ति येन तुष्यन्ति ब्राह्मणाः ।
एवं ते पुत्र कर्त्तव्यं मम प्रियहितैषिणा ॥
मम वचनं वर्ज्जयेत् दोषो राज्ञस्तु तन्महत् ।
येषु राजा विनश्येत सम्यक्तोऽपि महाद्युतिः ॥
वर्ज्जयेत सुरापानं मृगया वर्ज्जयेत् सदा ।
वाक्यं रूक्षं न वक्तव्यं वृथा यावत् कदाचन ॥
राजगुह्यं न वक्तव्यं दूतभेदं विवर्ज्जयेत् ।
वर्ज्जयेदतियाच्ञ्यं असद्भिश्च समागमम् ॥
व्यर्थदूषणकश्चैव न कर्त्तव्यं कदाचन ।
अमात्यं नाप्रियं ब्रूयादृयदीच्छेद्राजकर्म्मणि ॥
नाहं निवारणीयस्ते गमनाय पथे स्थितः ।
एतन्मे क्रियतां शीघ्रं यदीच्छसि मम प्रियम् ॥
ततः पितुर्व्वचः श्रुत्वा राजपुत्रो यशस्विनः ।
उभौ तु पादौ संगृह्य कारुण्यं प्रत्युवाच तम् ॥"
इत्यादि श्रीवराहपुराणे भगवच्छास्त्रे श्रौकरवे तीर्थमाहात्म्ये आदित्यवरप्रदानन्नयजम्बुकोपाख्यानं नामाध्यायः ॥ * ॥
अन्यच्च ।
मनुरुवाच ।
"राज्ञोऽभिषिक्तमात्रस्य किंतु कृत्यतमं भवेत् ।
एतत् सर्व्वं समाचक्ष्व सम्यग्वेत्सि यतो भवान् ॥
मत्स्य उवाच ।
अभिषेकार्द्रशिरसा राज्ञा राजीवलोचन ।
सहायावरणं कार्य्यं तत्र राज्यं प्रतिष्ठितम् ॥
यदस्याप्यतरं कर्म्म तदप्येकेन दुष्करम् ।
पुरुषेणासहायेन किंतु राज्यं महत् पदम् ॥
तस्मात् सहायान् वरयेत् कुलीनान् नृपतिः स्वयम् ।
शूरान् कुलीनान् जातीयान् बलयुक्तान् श्रियान्वितान् ॥
रूपसत्त्वगुणोपेतान् सम्मतान् समया युतान् ।
क्लेशक्षमान् महोत्साहान् धर्म्मज्ञांश्च प्रियंवदान् ॥
हितोपदेशकालज्ञान् स्वामिभक्तान् यशोऽर्थिनः ।
एवंविधान् सहायांश्च शुभकर्म्मसु योजयेत् ॥
गुणहीनानपि सदा विज्ञाय नृपतिः स्वयम् ॥
कर्म्मस्वेव नियुञ्जीत यथायोग्येषु भारत ! ।
कुलीनः शीलसम्पन्नो धनुर्व्वेदविशारदः ।
हस्तिशिक्षास्वशिक्षासु कुशलः शस्त्रभाषणः ॥
निमित्ते शकुनज्ञाने वेत्ता चैव चिकित्सिते ।
क्षत्रजः कर्म्मणा शूरस्तथा क्लेशसहो ऋजुः ॥
व्यूहतत्त्वविधानज्ञः फल्गुसारविशेषवित् ।
राज्ञा सेनापतिः कार्य्यो ब्राह्मणः क्षत्रियो यथा ॥
प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः ।
चित्तज्ञश्च सर्व्वेषां प्रतीहारो विधीयते ॥
यथोक्तवादी दूतः स्याद्देशभाषाविशारदः ।
शक्तः क्लेशसहो वाग्मी देशकालविभागवित् ॥
विज्ञातदेशकालश्च दूतः स्यात् स महीक्षितः ।
वक्ता नयस्य यः काले स दूतो भूपतेर्भवेत् ॥
प्रांशवो आयताः शूराः दृढभक्ता निराकुलाः ।
राज्ञा तु रक्षिणः कार्य्याः सदा क्लेशसहा हिताः ॥
अनाहार्य्योऽनृशंसश्च दृढभक्तिश्च पार्थिवे ।
ताम्बूलधारी भवति नारी वाचश्च तद्गुणा ॥
षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः ।
सन्धिविग्रहिकः कार्य्यो राज्ञा नयविशारदः ॥
आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारदः ।
कृताकृतज्ञो भृत्यानां ज्ञेयः स्यादेष रक्षिता ॥
सुरूपस्तरुणः प्रांशुर्दृढभक्तिः कुलोचितः ।
शूरः क्लेशसहश्चैव खड्गधारी प्रकीर्त्तितः ॥
शूरश्च बलयुक्तश्च गजाश्वरथकोविदः ।
धनुर्धारी भवेद्राज्ञः सर्व्वक्लेशसहः शुचिः ॥
निमित्तशकुनज्ञानहयशिक्षाविशारदः ।
हयायुर्व्वेदतत्त्वज्ञो भूवि भागविशेषवित् ॥
स्वामिभक्तो महोत्साहः सर्व्वेषाञ्च प्रियंवदः ।
बलाबलज्ञो रथिकः स्थिरदृष्टिः प्रियंवदः ॥
शूरश्च कृतविद्यश्च सारथिः परिकीर्त्तितः ।
अनाहार्य्यः शुचिर्दक्षश्चिकित्सितविदांवरः ॥
क्षुद्रशास्त्रविशेषज्ञः क्षुद्राश्वज्ञः प्रशस्यते ।
क्षुद्रशास्त्रविधानज्ञाः पराभेद्याः कुलोद्गताः ।
सर्व्वे महानसे धार्य्या लुप्तकेशनखा जनाः ॥
समः शुचौ च मित्रे च धर्म्मशास्त्रविशारदः ।
विप्रमुख्यः कुलीनश्च धर्म्माधिकरणो भवेत् ॥
कार्य्यास्तथाविधास्तत्र द्विजमुख्याः सभासदः ।
सर्व्वदेशाक्षराभिज्ञः सर्व्वशास्त्रविशारदः ॥
लेखकः कथितो राज्ञः सर्व्वाधिकरणेषु वै ।
श्रीघोषितान् सुसम्पूर्णान् समश्रेणिगतान् समान् ।
अक्षरान् वै लिखेत् यस्तु लेखकः स वरः स्मृतः ॥
उपायवाक्यकुशलः सर्व्वशास्त्रविशारदः ।
वक्ष्यर्थवक्ता चाक्ष्येन लेखकः स्याद्भृगूत्तम ॥
वाक्याभिप्रायतत्त्वज्ञो देशकालविभागवित् ।
अनाहार्य्यो नृपे भक्तो लेखकः स्याद्भृगूत्तम ॥
पुरुषान्तरतत्त्वज्ञाः प्रांशवश्चाप्यलोलुपाः ।
धर्म्माधिकरणे कार्य्या जनाज्ञानकरा नराः ।
एवंविधास्तथा कार्य्या राज्ञा दौवारिका जनाः ।
लोहवस्त्राजिनादीनां रत्नानाञ्च विधानवित् ॥
विज्ञाता फल्गुसाराणामनाहार्य्यः शुचिः सदा ।
निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः ॥
आयव्ययेषु सर्व्वेषु धनान्यक्षसमा नराः ।
व्ययव्ययेषु च तथा कर्त्तव्या पृथिवीक्षिता ॥
परम्परागतो यः स्यादृद्धक्षे तु चिकित्सिते ।
अनाहार्य्यः स वैद्यः स्याद्धर्म्मात्मा च कुलोद्गतः ॥
प्राणाचार्य्यः स विज्ञेयो वचनं तस्य भूभुजः ।
राजन् राज्ञा सदा कार्य्यं यथाकार्य्यं पृथग्जनैः ॥
हस्तिशिक्षाविधानज्ञो वनजातिविशारदः ।
क्लेशक्षमस्तथा राज्ञो गजाध्यक्षः प्रशस्यते ॥
एतैरेव गुणैर्युक्तः खासनश्च विशेषतः ।
गजारोहो नरेन्द्रस्य सर्व्वकर्म्मसु शस्यते ॥
हयशिक्षाविधानज्ञस्तच्चिकित्सितपारगः ।
अश्वाध्यक्षो महीभर्त्तुः खासनश्च प्रशस्यते ॥
अनाहार्य्यश्च शूरश्च तथा प्राज्ञः कुलोद्गतः ।
दुर्गाध्यक्षः स्मृतो राज्ञ उद्युक्तः सर्व्वकर्म्मसु ॥
वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः ।
दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्त्तितः ॥

यन्त्रसुक्ते पाणिसुक्ते व्यसुक्ते सुक्तधारिते ।
अस्त्राचार्यो निरुद्वेगः कुलग्रश्च विशिष्यते ॥
वृद्धः कुलोन्नतः सुक्तः पिलपेतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥
एवं सप्ताधिकारेषु पुरुषाः सप्त तेऽपरे ।
पञ्च ग्रन्थाधिकरणाः पुरुषाः सप्त तेऽपरम् ॥
अन्तःपुरचराः कार्या राज्ञा सर्वेषु कर्मसु ।
स्थापनाजातितत्त्वज्ञाः सततं प्रतिजाग्रताः ॥
राज्ञः स्यादायुधागारे दक्षः कर्मसु चोद्यतः ।
कर्माण्यपरिमेयानि राज्ञां भृगुकुलोद्वह ॥
उत्तमाधममध्यानि वृद्धा कर्माणि पार्थिवः ।
उत्तमाधममध्येषु पुरुषेषु नियोजयेत् ॥
नरकर्मविपर्यासाद्राजा नाशमवाप्नुयात् ।
नियोगं पौरुषं भक्तिं श्रुतं शौर्यं कुलं नयम् ॥
ज्ञात्वा वृत्तिर्विधातव्या पुरुषाणां महीक्षिता ।
पुरुषान्तरविज्ञाने तत्त्वसारनिबन्धनात् ॥
बहुभिर्मन्त्रयेत् कामं राजा मन्त्रं पृथक् पृथक् ।
मन्त्रिणामपि नो कुर्यान्मन्त्रिमन्त्रप्रकाशनम् ॥
कश्चित् कस्यचिद्विश्वासो भवतीह सदा नृणाम् ।
निश्चयश्च सदा मन्त्रे कार्य एकेन शूरिणा ॥
भवेद्वा निश्चयाबाप्तिः परबुद्ध्यनुजीवनात् ।
एकस्येव महीभर्तुर्भूयः कार्यो विनिश्चयः ॥
ब्राह्मणान् पर्युपासीत चर्यां नाम सुनिश्चिताम् ।
नासच्छास्त्रवतो मूढास्ते हि लोकस्य कण्टकाः ॥
वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन् ।
तेभ्यो हि शिक्षेद्विनयं विनीतात्मा हि नित्यशः ।
समर्यां यशसां कुर्यात् पृथिवीं नाव संशयः ॥
बहवोऽविनयाद्भ्रष्टा राजानः सपरिच्छदाः ।
वनस्थाश्चैव राज्यानि विनयात् प्रतिपेदिरे ॥
त्रैविद्येभ्यस्त्रयीविद्यां दण्डनीतिञ्च शाश्वतीम् ।
आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भांश्च लोकतः ॥
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥
यजेत राजा क्रतुभिर्बहुभिराप्तदक्षिणैः ।
धर्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च ॥
संवत्सरिकमाप्तेभ्य आददीताहरेद्बलिम् ।
स्यात् स्वाध्यायपरो लोके वर्त्तेत पितृबन्धुषु ॥
आवृत्तानां गुरुकुलात् द्विजानां पूजको भवेत् ।
कृषाम्रामयो स्नेह विधिस्नातो विधीयते ॥
ततः स्तेनानवामित्रा हरन्ति न च नश्यति ।
तस्मादाज्ञा विधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥
समोत्तमाधमे राजा स्थापयेत् पालयेत् प्रजाः ।
न निवर्तेत संग्रामान्मात्र क्षत्रव्रतमनुस्मरन् ॥
संग्रामेष्वनिवर्त्तित्वं प्रजानां परिपालनम् ।
शुश्रूषा ब्राह्मणानाञ्च राजा निश्रेयसं परम् ॥
कृपणानाञ्च वृद्धानामातुराणाञ्च योगिनाम् ।
योगक्षेमञ्च वृत्तिञ्च तथैव परिकल्पयेत् ॥
वर्णाश्रमव्यवस्थानं तथा कार्यं विशेषतः ।
स्वधर्मेप्रच्युतान् राजा स्वधर्मे स्थापयेत्तथा ॥
आश्रमे च यथाकार्यं तैलभाजनभोजनम् ।
स्वयमेवानयेद्राजा सत्कृतान्नावमानयेत् ॥
तापसे सर्वकार्याणि राज्यमात्मानमेव च ।
निवेदयेत् प्रयत्नेन देव्वाचरमर्चयेत् ॥
हे प्रश्ने वेदितव्ये च ऋत्वी वक्ता च मानवैः ।
वक्तां ज्ञात्वा न सेवेत प्रतिबाधेत चागताम् ॥
नास्य च्छिद्रं परो विद्यात् विद्याच्छिद्रं परस्य तु ।
गूहेत् कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥
विश्वासयेच्चाप्यपरं तत्त्वभूतेन हेतुना ।
बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् ॥
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ।
दृढ़प्रहारी च भवेत् तथा शूकरवन्नृपः ॥
चित्राकारश्च गृध्रिवद्दृढ़भक्तस्तथाश्ववत् ।
भवेच्च मधुराभाषो तथा कोकिलवन्नृपः ॥
काकशङ्की भवेन्नित्यं नाज्ञातवसतिं वसेत् ।
नापरीक्षितपूर्वञ्च भोजनं शयनं व्रजेत् ॥
वस्त्रं पुष्पमलङ्कारं यच्चान्यन्मनुजोत्तम ।
न गाहेज्जलसम्बाधं न चाज्ञातजलाशयम् ॥
अपरीक्षितपूर्वन्तु पुरुषैरात्मकारिभिः ।
नारोहेत् कुञ्जरं बालं न जातु तुरगं तथा ॥
नाविज्ञातक्रियं गच्छेत् नैव देवोत्सवे वसेत् ।
नरेन्द्रलक्ष्मा धर्मज्ञ त्रासा यत्तो भवेन्नृपः ।
सदृत्तास्च तथा पुष्टा सततं प्रतिमानिताः ।
राज्ञा सहायाः कर्त्तव्या पृथिवीं जेतुमिच्छता ।
यथार्हञ्चाथ सुभृतान् राजा कर्मसु योजयेत् ।
धर्मिष्ठान् धर्मकार्येषु शूरान् संग्रामकर्मसु ॥
निपुणानर्थशास्त्रेषु सर्वत्र च तथा शुचीन् ।
क्षीणव्रणान् नियुञ्जीत तीक्ष्णान् दारुणकर्मसु ।
धर्मे चार्थे च कामे च भये च रविनन्दन ।
राजा यथार्हञ्च कुर्यादुपधाभिः परीक्षणम् ॥
समतीतोपधान् भृत्यान् कुर्याद्विश्वासनेचरान् ।
तत्यादान्वेषणे यत्नांस्तदध्यक्षांश्च कारयेत् ॥
एवमादीनि कर्माणि नृपैः कर्माणि भार्गव ।
सर्वथा नेष्यते राज्ञस्तीक्ष्णोपकरणक्रियः ॥
पापसाध्यानि कर्माणि यानि राज्ञां नृपोत्तम ।
सन्तस्तानि न कुर्वन्ति तस्मात्तान् विद्यात्रृपः ।
नेष्यते पृथिवीशानां तीक्ष्णोपकरणक्रिया ।
यस्मिन् कर्मणि यस्य स्यात् विशेषेण च कौशलम् ।
तस्मिन् कर्मणि तं राजा परीक्ष्य विनियोजयेत् ।
पितृपैतामहान् भृत्यान् सर्वकर्मसु योजयेत् ।
विना दायादकलहेषु परीक्ष्य सकृताग्रान् ।
नियुञ्जीत महाभाग तस्य ते हितकारिणः ॥
परराजग्रहात् प्राज्ञ जनसंग्रहकाम्यया ।
दुष्टान् वाग्व्यवहारेणानाश्वीत प्रयत्नतः ॥
दुष्टं विज्ञाय विश्वासं न कुर्यात्तत्र भूमिपः ।
वृत्तिं तस्यापि वर्त्तेत जनसंग्रहकाम्यया ॥
राजा देशान्तरं प्राप्तं पुरुषं पूजयेद्गृहम् ।
ममायं देशसंप्राप्तो बहुमानेन चिन्तितः ॥
तेषाचारेण चारित्रं राजा विज्ञाय नित्यशः ।
गुणिनां पूजनं कुर्यात् निर्गुणानाञ्च शासनम् ॥
कथिताः सततं राजन् राजनयाश्चतुरः ।
स्वके देशे परे देशे ज्ञातशीलान् विचक्षणान् ॥
अनाढ्यांश्च क्लेशसहान् नियुञ्जीत सदा चरान् ।
जनस्याविदितान् सौम्यांस्तथाज्ञातान् परस्परम् ॥
वणिजो मन्त्रकुशलान् सांवत्सरचिकित्सकान् ।
तथा प्रव्रजिताकारान् चारान् राजा नियोजयेत् ॥
नैकस्य राजा श्रद्धात्त चारस्यापि च भाषितं ।
दृयोः सम्बन्धमाज्ञाय श्रद्धानृपतिस्ततः ॥
परस्परस्याविदितौ यदि स्यातांचरावुभौ ।
तस्माद्राजा प्रयत्नेन गूढ़ांश्चारान्नियोजयेत् ॥
राज्यस्य मूलमेतावत् या राज्ञश्चारदृष्टिता ।
चाराणामपि यत्नेन राज्ञा कार्यं परीक्षणम् ॥
विरज्यते तथा केन विज्ञेयं तन्महीक्षिता ।
अनुरागात् कथं लोके कर्म कार्यं महीक्षिता ॥
लोकरागापरागौ च भृत्यानाश्च गुणागुणान् ।
सर्वं राज्ञां चरायत्तं तेषु यत्नपरो भवेत् ॥
कर्मणा केन मे लोके जनः सर्वोऽनुरज्यते ।
विरज्यते केन तथा विज्ञेयं तन्महीक्षिता ।
विरोधजननं लोके वर्जनीयं विशेषतः ॥

जनानुरागप्रभवा हि लक्ष्मी
राज्ञां मता भार्गववंशचन्द्र ।
तस्मात् प्रयत्नेन नरेन्द्रसूनुः
कार्योऽनुरागो भुवि मानवेषु ॥"

इति मात्स्ये २१५ अध्यायः ॥ * ॥

अपरञ्च ।

राजोवाच ।

"बहवो भूपतेर्धर्म्मास्तान् वक्तुं नहि शक्यते ।
तस्मात् समासतो ब्रूमि मद्भाग निशामय ॥
पृथिवी वैष्णवी पुण्या सदा प्रियतमा हरेः ।
नारायणाद्ऋते नान्यो वसुमत्याः पतिर्भवेत् ॥
नारायणांशजो राजा मनुष्यो न कदाचन ।
अतस्तु दुर्नयं त्यक्त्वा सर्वां नीतिं समाचरेत् ॥
नीतिग्राही नृपो यस्तु विपत्तिर्नास्ति तस्य वै ।
चिरं भुनक्ति पृथिवीं कण्टकैः परिवर्जितः ॥
यस्मै न रोचते नीतिर्भूपालाय दुरात्मने ।
अदृष्टैरुपरिष्टैव स भवेन्नाव संशयः ॥
आयुर्बलं यशो वित्तं विजयं सुखमिच्छता ।
मन्त्रित्वे पण्डितो राज्ञा नियोज्यः सर्वदैव हि ॥
अवमन्या महीभर्तुरश्यन्ति सदसीं बुधाः ।
सभायां बुधहीनायां नीतिर्बलवती न हि ॥
ततो नीतौ विपन्नायां सहसा धरणीयते ।
राजश्रियो विनश्यन्ति सकोषबलवाहनाः ॥
ब्राह्मणान् गवकांश्चैव वैद्यांश्च बान्धवांस्तथा ।
कृपाः कल्याणमिच्छन्तो न द्विषन्ति कदाचन ॥
गतश्रीर्गर्वकद्वेषी वैद्यद्वेषायुरर्चितः ।
ज्ञातिद्वेषी निष्कुलः स्यात् द्विजद्वेषाच्चिकित्सितः ॥
राजानः पितरः प्रोक्ता पुत्रा जनपदास्तथा ।
अतो भूपाः पालयन्ति प्रजाः पुत्रानिवौरसान् ॥
पौरलोकवधूं राजा पश्येत् पुत्रवधूमिव ।
पौरलोके तथा कुर्यात् यथा स्नेहो निजात्मजे ॥
प्रजापीड़ाकरा ये च भूपाला अतिपापिनः ।
शिरसा विपदस्तेषां विज्ञेया दीर्घदर्शिभिः ॥

विवेकिनो महीपालाः पालयन्ति यथा प्रजाः ।
तथा तानपि देवेशः पालयत्यनिशं हरिः ॥
प्रजानां पालनं दानं देवपि राज्ञां शुभावहे ।
द्वाभ्यां ये वर्जिता भूपास्ते विज्ञेया नृपाधमाः ॥
दुष्टानां शासनञ्चैव शिष्टानां प्रतिपालनम् ।
प्रकुर्वन्तो महीपालाश्चिरं गच्छन्ति भूतले ॥
न्यायेनोपार्ज्जितं वित्तं यदाददेन्महीपतिः ।
निर्व्वित्तो हि महीपालो विपत्तां न हि निस्तरेत् ॥
नृपाः कल्याणमिच्छन्तो निजराज्यशुभाशुभम् ।
पश्यन्ति नित्यं विप्रेन्द्र ! सत्यराचारचक्षुषः ॥
परचक्रभयं यावत् नायाति चिन्तयेद्भयम् ।
आगते तु भये भूप आचरेन्निर्भयो यथा ॥
भ्रातौ वापि च मित्रे वा पुत्रे वापि च मन्त्रिणि ।
कुर्य्याच्चुखेन गाम्भीर्य्यं मनसा प्रेम केवलम् ॥
मन्त्रिणो भ्रातयः पुत्राः प्रजाश्च भ्रातरस्तथा ।
गाम्भीर्य्यहीनं भूपालं मन्यन्ते न हि भूपवत् ॥
तिष्ठन्ति प्रथमं दूरे वसन्ति पुरसन्निधौ ।
लोकाः श्रियं यदिच्छन्ति त्यक्तगाम्भीर्य्यभूपतेः ।
एकस्य मन्त्रिणो राज्ञा चिरं राजत्वमिच्छता ।
कर्त्तव्याः सकले राज्ये दृढयो नैव भूसुर ॥
अत्यन्तलब्धदृढानां भृत्यानां सम्पदं हरेत् ।
तस्मात् सम्पदि भूपालो भृत्यमन्यं नियोजयेत् ॥
मूर्खः स्त्रीविजितो राजा गीतवाद्यरतः सदा ।
चतुरङ्गबलैर्हीनः सहसा विपदं व्रजेत् ॥
स्वाचार्य्यश्रद्धं सत्त्वं स्ववाक्यप्रतिपालनम् ।
गाम्भीर्य्यञ्चेति भूपानां लक्षणानि द्विजोत्तम ! ॥
स कथं नृपतिर्यस्तु प्रतापेन विवर्ज्जितः ।
स कथं नृपतिर्येन न जिता परमेदिनी ॥
जितायां परमेदिन्यां यावत् पादं व्रजेन्नृपः ।
प्रतिपादेऽश्वमेधस्य फलं प्राप्नोति चाक्षयम् ॥
परभूमिजयाकाङ्क्षी हतो वा नृपतिर्युधि ।
तदा गच्छेत् परं धाम विमुक्तः सर्व्वपातकैः ॥
युधि प्राप्तजयो राजा प्राप्नोति परमं पदम् ।
स साहसप्राप्तदुर्द्धर्षेन्द्रसम्पदं लभेत् ॥
त्यक्तसत्त्वं त्यक्तशस्त्रं पलायनपरायणम् ।
योद्धारं युधि यो हन्यात् स भूपो याम्यधोगतिम् ॥
पलायनपरो युद्धे तद्धन्ता च द्विजोत्तम ! ।
तावुभावपि तिष्ठेतां नरकेष्वन्तदुःसहे ॥
युधि साहसवान् योद्धा तद्धन्ता च महीसुर ।
तिष्ठेतां दावपि स्वर्गे यावच्चन्द्रदिवाकरौ ॥
बहुनात्र किमुक्तेन संक्षेपादुच्यते मया ।
प्रजापालनकृद्राजा कदाचिन्नावसीदति ॥"

इति पाद्मे क्रियायोगसारे २० अध्यायः ॥

राजनीलं, क्ली, मरकतमणिः । इति शब्दरत्नावली ॥

राजन्यः, पुं, (राज्ञोऽपत्यमिति । राजन् + "राजश्वशुरात् यत्" ४ । १ । १३७ । इति यत् ।) क्षत्रियः । इत्यमरः ॥ (यथा, ऋग्वेदे । १० । ९० । १२ ।
"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥")
राजपुत्रः । (राजति दीप्यते इति । राज् + "राजेरन्यः ।" उणा० ३ । १०० । इति अन्यः ।) अग्निः । इत्युणादिकोषः ॥ चौरिकाकृत्यः । इति जटाधरः ॥

राजन्यकं, क्ली, (राजन्यानां क्षत्रियाणां समूहः । राजन्य + "गोत्रोक्षोष्ट्रोरभ्रराजराजन्यति ।" ४ । २ । ३९ । इति वुञ् ।) क्षत्रियसमूहः । इत्यमरः ॥ (यथा, रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
इमाः स राजन्यकमेकवीरः ।
निवारयामास महावराहः
कल्पद्रुमोद्दत्तमिवार्णवाम्भः ॥"*॥

राजन्यानां विषये देशे च पुं । इति काशिका ॥ अत्र "राजन्यादिभ्यो वुञ् ।" ४ । २ । ५३ । इति वुञ्प्रत्ययः ॥)

राजन्वान्, त्रि, (राजाऽस्त्यस्मिन्निति वा । राजन् + प्रशंसायां मतुप् । "राजन्वान् सौराज्ये ।" ८ । २ । १४ । इति निपातनात् नलोपाभावः ।) सुराराष्ट्रयुक्तदेशः । इत्यमरः ॥ "प्रजापालनादिस्वधर्म्मपरायणराजयुक्ते देशे राजन्वात् राजा विद्यतेऽस्येति मोदुमृक्षादिति प्रशंसायां वतुः । यदुक्तं तत्रान्तरे ।
'भूम्नि निन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुवादयः ।' इति स्मृते अस्त्यर्थे भमादयोऽमी अर्था अर्थात्तु लभ्यन्त एव । निपातनान्नलोपाभावः । न सौराज्ये राज्ञो नस्य लुङ्मतावितिपरे । सुराज्ञि स्वधर्म्मपरत्वात् शोभना राजानोऽत्रेति नार्थायां स्तेरिति अनिषेधः । देशो लोकोपलक्षणं सुराज्ञि लोके इत्यर्थः ।" इति तट्टीकायां भरतः ॥ (यथा, रघुः । ६ । २२ ।
"कामं नृपाः सन्तु सहस्रशोऽन्ये
राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः ॥")

राजपटोलः, पुं, (पटोलानां राजा । परनिपातः ।) मधुरपटोलः । इति रत्नमाला ॥

राजपटोली, स्त्री, (राजप्रिया पटोली ।) मधुरपटोली । इति राजनिर्घण्टः ॥

राजपट्टः, पुं, (राजप्रियः पट्ट इव ।) मणिविशेषः । तत्पर्य्यायः । विराटजः २ । इति त्रिकाण्डशेषः ॥

राजपट्टिका, स्त्री, पातकपत्री । इति हारावली ॥

राजपथः, पुं, (राज्ञां पन्थाः । "अकर्पूरशुःपथामानक्षे ।" ५ । ४ । ७४ । इत्यः ।) राजमार्गः । तस्य लक्षणं यथा,—
"धनूंषि दश विस्तीर्णः श्रीमान् राजपथः स्मृतः ।
नृवाजिरथनागानामभिसम्बाधः सुसञ्चरः ॥"
इति देवीपुराणम् ॥
(यथा, कुमारसम्भवे । ७ । ६३ ।
"तावत्पताकाकुलमिन्दुमौलि-
रुत्तोरणं राजपथं प्रपेदे ॥")

राजपर्णी, स्त्री, प्रसारिणी लता । इति राजनिर्घण्टः ॥

राजपलाण्डुः, पुं, (पलाण्डूनां राजा । राजदन्तादित्वात् परनिपातः ।) रक्तवर्णपलाण्डुः । लाल प्याँज इति भाषा । तत्पर्य्यायः । जवनेष्टः २ नृपाक्षयः ३ राजप्रियः ४ महामूलः ५ दीर्घपत्रः ६ रोकः ७ नृपेष्टः ८ नृपकन्दः ९ महाकन्दः १० नृपप्रियः ११ रक्तकन्दः १२ राजेष्टः १३ । अस्य गुणाः । अग्निरतम् । पित्तकफनाशित्वम् । दीपनत्वम् । बहुनिद्राकरत्वञ्च । इति राजनिर्घण्टः ॥

राजपीलुः, पुं, (राजप्रियः पीलुः ।) महापीलुवृक्षः । इति राजनिर्घण्टः ॥

राजपुत्रः, पुं, (राज्ञश्चन्द्रस्य पुत्रः ।) बुधग्रहः । इति शब्दरत्नावली ॥ महाराजसुतः । इति राजनिर्घण्टः ॥ वर्णसङ्करजातिविशेषः । राजपुत इति भाषा ॥ यथा,—
"वैश्यादम्बष्ठकन्यायां राजपुत्रस्य सम्भवः ॥"
इति पराशरपद्धतिः ॥
करणकन्यायां क्षत्रियाज्जातश्च । इति पुराणम् ॥ राजनन्दनः । तत्पर्य्यायः । युवराजः २ कुमारः ३ भर्तृदारकः ४ । इत्यमरः ॥ (यथा,—
"राजपुत्र ! चिरं जीव माजीव सुनिपुत्रक ! ।
जीव वा मर वा साधो साधु माजीव मा मर ॥"
इत्युद्भटः ॥)
तस्य रक्षणं यथा,—
"राजपुत्रस्य रक्षा च कर्त्तव्या पृथिवीक्षिता ।
आचार्य्यैश्चास्य कर्त्तव्यं नित्यमुक्तैश्च रक्षणम् ॥
धर्म्मकामार्थशास्त्राणि धनुर्व्वेदञ्च शिक्षयेत् ।
रथे च कुञ्जरे चैनं वाजिनं कारयेत् सदा ॥
शिक्षयानि शिक्षयेच्चैव नानाभिर्मित्रशास्त्रियं वदेत् ॥
गुणाधानमशक्यन्तु यस्य कर्त्तुं स्वभावतः ।
वन्धनं तस्य कर्त्तव्यं गुप्ते देशे सुखान्वितम् ॥
अविनीतकुमारं हि कुलमाशु विशीर्य्यते ।
अधिकारेषु सर्व्वेषु विनीतं हि नियोजयेत् ॥
आदौ स्वल्पेषु ततःपश्चात् क्रमेणाथ महत्सुपि ।
न्यायापानमशक्यञ्च वर्ज्जयेत् पृथिवीपतिः ।
एतान्यासेवमानासु विनश्यः पृथिवीक्षितः ॥
बहवो नृपशार्दूला येषां संख्या न विद्यते ॥
तथाटनदिवास्वप्नं विशेषेण विवर्ज्जयेत् ।
वाक्पारुष्यं न कर्त्तव्यं दण्डपारुष्यमेव च ॥
परोक्षनिन्दा च तथा वर्ज्जनीया महीक्षिता ।
अर्थस्य दूषणं राजा द्विःप्रकारं विवर्ज्जयेत् ॥
अर्थानां दूषणञ्चैव तथा चार्थेषु दूषणम् ।
अकारणात् सतश्छेदं दुर्गादीनामसत्क्रिया ।
अर्थस्य दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ॥
अदेशकाले यद्दानमपात्रे दानमेव च ॥
अर्थस्य दूषणं प्रोक्तमसत्कर्म्मप्रवर्त्तनम् ।
कामं क्रोधं मदं मानं लोभं हर्षन्तथैव च ।
जेतव्यमरिषड्वर्गं सादरं पृथिवीक्षिता ॥

एतेषां विजयं कृत्वा कार्य्यं भृत्यजयं ततः।
कृत्वा भृत्यजयं सर्व्वं राजा जनपदं जयेत्॥
कृत्वा तु विजयं तेषां शत्रून् बाह्यांस्ततो जयेत्।
बाह्याच्च त्रिविधा ज्ञेयास्त्वभ्यन्तरकृत्रिमाः॥
गुरवस्ते यथापूर्व्वं तेषु यत्नपरो भवेत्।
पितृपैतामहं मित्रममित्रञ्च तथा रिपोः॥
कृत्रिमञ्च महाभाग मित्रं त्रिविधमुच्यते।
तथापि च गुरुः पूर्व्वं भवेत्तत्रापि चाहतः॥
स्वाम्यमात्यो जनपदो दुर्गं सैन्यन्तथैव च।
कोषो मित्रञ्च धर्म्मज्ञ सप्ताङ्गं राज्यमुच्यते॥
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्त्तितः।
तन्मूलत्वात्तथाङ्गानां राजा रक्ष्यः प्रयत्नतः।
षड्वर्गरक्षा कर्त्तव्या तथा तेन प्रयत्नतः॥
षड्भ्यो यस्यैकस्य द्रोहमाचरतेऽल्पधीः।
वधस्तस्य तु कर्त्तव्यः क्षीप्रमेव महीक्षिता॥
न राज्ञा स्तब्धना भाव्यं स्तब्धहिं परिभूयते।
न भाव्यं दारुणेनापि तीक्ष्णादुद्विजते जनः॥
काले स्तब्धो भवति काले भवति दारुणः।
राजा लोकद्वयापेक्षी तस्य लोकद्वयं भवेत्॥
भृत्यैः सह महीपालः परिहासं विवर्ज्जयेत्।
भृत्याः परिभवन्तीह नृपं हर्षवशं गतम्॥
व्यसनानि च सर्व्वाणि भूपतिः परिवर्ज्जयेत्।
लोकसंग्रहणार्थाय कृतव्यसनो भवेत्॥
क्षौटीरस्य नरेन्द्रस्य नित्यमुद्विग्नचेतसः।
जना विरागमायान्ति सदा दुःखितभावतः॥
क्षितपूर्व्वाभिभाषी स्यात् सर्व्वस्यैव महीपतिः।
वध्येष्वपि महाभाग भ्रुकुटीं न समाचरेत्॥
भाव्यं धर्म्मभृता श्रेष्ठ शूलहस्तेन भूभुजा।
शूलहस्तस्य वश्यगा सर्व्वा भवति मेदिनी॥
अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिवः।
दीर्घसूत्रस्य नृपतेः कर्म्महानिर्ध्रुवं भवेत्॥
रागे द्वेषे च कामे च द्रोहे पापे च कर्म्मणि।
अप्रिये चैव कर्त्तव्ये दीर्घसूत्रः प्रशस्यते॥
राज्ञा संदृतमन्त्रेण सदा भाव्यं द्विजोत्तम।
तस्यासंदृतमन्त्रस्य ज्ञेयाः सर्व्वापदो ध्रुवाः॥
कृतान्येव तु कर्म्माणि जायन्ते यस्य भूपतेः।
नारब्धानि महाभाग तस्य खाद्वसुधा वशे॥
मन्त्रमूलं सदा राज्यं तस्मान्मन्त्रं सुरक्षितम्।
कर्त्तव्यं पृथिवीपालैर्मन्त्रभेदभयात् सदा॥
मन्त्रवित् साधितो मन्त्रः संयतानां सुखावहः।
मन्त्रक्षयेन बहवो विनष्टाः पृथिवीक्षितः॥
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥
नयस्य कुशलस्यास्य वशे सर्व्वा वसुन्धरा।
भवतीह महीभर्त्तुः सदा पार्थिवनन्दन॥
नैकस्तु मन्त्रयेन्मन्त्रं न राजा बहुभिः सह।
नारोहेद्विषमां नावं नापरीक्षितनाविकाम्॥
ये चास्य भूमिं जयतो भवेयुः परिपन्थिनः।
सामादिभिरुपक्रमैः॥
यथा न स्यात् क्षयोभावः प्रजानामनपेक्षया।
तथा राज्ञा प्रकर्त्तव्यं स्वराष्ट्रपरिरक्षता॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनपेक्षया।
सोऽचिराद्भ्रश्यते राज्यात् जीविताच्च सबान्धवः॥
भृतो वल्लो जातबलः कर्म्मयोग्यो यथा भवेत्।
तथा राष्ट्रं महाभाग भृतं कर्म्मसहं भवेत्॥
यो राष्ट्रमनुगृह्णाति राज्यं स्वं परिरक्षति।
संघातसुपयाचैस्तु विन्दते स महत् फलम्॥
राष्ट्राद्विरण्यं धान्यञ्च महीं राजा सुरक्षिताम्।
महता तु प्रयत्नेन स्वराष्ट्रस्य च रक्षिता॥
नित्यं स्वेभ्यः परेभ्यश्च यथा माता यथा पिता।
गोपितानि सदा कुर्य्यात् स विभागी प्रियाणि च॥
अनसस्युपयोक्तव्यं फलं तेभ्यस्तथैव च।
धर्म्मकर्म्मेदमायत्तं विधाने दैवमानुषे।
तयोर्दैवमचिन्त्यं हि पौरुषे विद्यते क्रिया॥
एवं महीं पालयतोऽस्य भर्त्तु-
र्लोकानुरागः परमो भवेच्च।
लोकानुरागप्रभवा च लक्ष्मी-
र्लक्ष्मीवतश्चैव परा च कीर्त्तिः॥"
इति मात्स्ये २०० अध्यायः॥

राजपुत्रिका, स्त्री, (राजपुत्री + संज्ञायां कन्।) शरारिपक्षी। शरालो इति भाषा॥ यथा,—
"शरारिराटिराड्डिञ्च हापुत्री राजपुत्रिका॥"
इति जटाधरः॥
राजकन्या च॥ (यथा, हरिवंशे। २५। ४६।
"उत्पादयामास ततः पुत्रं वै राजपुत्रिका॥")

राजपुत्री, स्त्री, (राज्ञः पुत्रीव।) कटुतुम्बी। रेणुका। जाती। राजरीतिः। कुकुन्दरी। इति राजनिर्घण्टः॥ मालती। यथा,—
"अतिमुक्तकाथ जातिर्मालती सुमना अपि॥"
राजपुत्री मनोज्ञा——॥" इति जटाधरः॥
राजकन्या च॥ (यथा, महाभारते। १।७३।१।
"सुव्यक्तं राजपुत्री त्वं यथा कल्याणि! भाषसे।
भार्य्या मे भव शुभ्रोणि! ब्रूहि किं करवाणि ते॥")

राजपुष्यः, पुं, (पुष्यार्क्षं राजा। राजदन्तादित्वात् परनिपातः।) नागकेशरपुष्पवृक्षः। यथा,—
"चम्पेयः केशरो नागकेशरः कनकाह्वयः।
महौषधं राजपुष्पः फलकः खरघातनः॥"
इति शब्दचन्द्रिका॥

राजपुष्पी, स्त्री, (राजप्रियं पुष्पमस्याः। ङीप्।) करञ्जवृक्षः। इति राजनिर्घण्टः॥

राजप्रिया, स्त्री, (राज्ञः प्रिया।) करञ्जवृक्षः। इति राजनिर्घण्टः॥

राजप्रियजम्भकः, पुं, (राजते इति। राज्+अच्। राजौ दीप्तिशालौ प्रियजम्भकः।) नागरङ्गवृक्षः। इति शब्दमाला॥

राजफलं, क्ली, (राजाभिधेयं फलम्।) पटोलम्। इति चिकाण्डशेषः॥

राजफला, स्त्री, (राजप्रियं फलमस्याः।) जम्बूः। इति राजनिर्घण्टः॥

राजबदरं, क्ली, (राज्ञो बदरमिव प्रियत्वात्।) रक्तामलकम्। लवणम्। इति मेदिनी॥

राजबदरः, पुं, (बदराणां राजा। राजदन्तादित्वात् परनिपातः।) उत्तमकोलिः। तत्पर्य्यायः। नृपश्रेष्ठः २ नृपबदरः ३ राजवल्लभः ४ पृथुकोलः ५ तनुबीजः ६ मधुरफलः ७ राजकोलः ८। अस्य गुणाः। सुमधुरत्वम्। शीघ्रिरत्वम्। दाहार्त्तिपित्तवातहरत्वम्। हृद्यत्वम्। वीर्य्यवर्द्धिकरत्वम्। श्लेष्मश्रमनाशित्वञ्च। इति राजनिर्घण्टः॥

राजबीजी, [न्] त्रि, (राजा बीजी कारणं यस्य।) राजवंश्यः। इत्यमरः। २। ७। २॥

राजभट्टिका, स्त्री, हापुत्रीपक्षी। यथा,—
"गोभक्षीरः पङ्कजीरो हापुत्री राजभट्टिका॥"
इति जटाधरः॥

राजभद्रकः, पुं, कुष्ठम्। निम्बः। इति राजनिर्घण्टः॥ पारिभद्रकः। इति साधुपाठः॥

राजभूयं, क्ली, (राज्ञो भावः। राजन्+भू+क्यप्।) राजत्वम्। यथा,—
"स्यादृत्विग्भूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि।
देवभूयादिकं तद्वत्।" इत्यमरकोषदर्शनात्॥

राजभोग्यं, क्ली, (राज्ञा भोक्तुं योग्यम्। भुज्+ण्यत्। कुत्वञ्च।) जातीकोषम्। प्रियालवृक्षे, पुं। इति शब्दचन्द्रिका॥

राजमकूकः, पुं, (मकूकानां राजा। राजदन्तादित्वात् परनिपातः।) वड़ वेड् इति भाषा। तत्पर्य्यायः। महामकूकः २ पीताङ्गः ३ पीतमकूकः ४ वर्षाघोषः ५ महारवः ६। इति राजनिर्घण्टः॥

राजमल्लः, पुं, राज्ञां मल्लः। राजार माल् इति भाषा। तत्पर्य्यायः। उत्क्रुत्तः २ उद्धतः ३। इति चिकाण्डशेषः॥

राजमार्गः, पुं, (राज्ञो मार्गः।) राजपथः। तद्विवरणं यथा,—
"राजमार्गं सौधयुक्तं यः करोति प्रतिव्रते।
वर्षाणामयुतं सोऽपि शक्रलोके महीयते॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः॥
अपि च।
"चिंशद्धनूंषि विस्तीर्णो देवमार्गस्तु तैः कृतः।
विंशं धनुर्यामार्गः सीमामार्गो दशैव तु॥
धनूंषि दश विस्तीर्णः श्रीमान्राजपथः कृतः।
वृषाश्वरथनागानामसम्बाधः सुसङ्करः॥
धनूंषि चैव चत्वारि प्राकारस्यास्तु निर्म्मिताः।
चिकराश्चोपरिस्थास्तु द्विकराश्चोपरिस्थकाः॥
जङ्घापथश्चतुष्पार्श्वस्त्रिपादश्च गृहान्तरम्।
वृतौपादस्त्रिपादः प्रागवग्रः पादकः स्मृतः।
अवकरः परिवारः पादमात्रः समन्ततः॥"
इति देवीपुराणे गोपुरद्वारलक्षणं नामाध्यायः॥
(अत्रामेध्योत्सर्गे दण्डविधानं कर्त्तव्यम्। यथा, मनुः। ९। २८२।
"सप्तसूनाकृते राजमार्गे वधमेध्यमनापदि।
स द्वौ कार्षापणौ दद्यादमेध्यान्याशु शोधयेत्॥"
नीतिः। यथा, हरिवंशे भविष्यपर्व्वणि। ५४। २।

"ज्ञानविज्ञानसम्पन्नौ राजमार्गविशारदौ।
युयुधाते महारङ्गे राक्षसेन दुरात्मना॥")

राजमाषः, पुं, (माषाणां राजा श्रेष्ठत्वात्। राजदन्तादित्वात् परनिपातः।) वर्बटः। वरवटी कड़ार इति भाषा। तत्पर्य्यायः। नीलमाषः २ कृष्णमाषः ३ कृषोचितः ४। अस्य गुणाः। कफपित्तहरत्वम्। रुच्यत्वम्। वातकारित्वम्। बलदायकत्वञ्च। इति राजनिर्घण्टः॥ सारकत्वम्। शुक्रान्नपित्तहरत्वम्। सुस्वादुत्वम्। रूक्षत्वम्। कषायत्वम्। विषदत्वम्। लघुत्वञ्च। इति राजवल्लभः॥ अन्यच्च।

"राजमाषो महामाषश्चपलश्च बलः स्मृतः।
राजमाषो गुरुः स्वादुस्तुवरस्तर्पणो रसः।
रूक्षो वातकरो रुच्यः स्तन्यो भूरिमलप्रदः॥"

इति भावप्रकाशः॥ *॥

कालविशेषे अस्याभक्षणं यथा। नारदीये।

"निष्पावान् राजमाषांश्च सुप्ते देवे जनार्दने।
यो भक्षयसि राजेन्द्र चाण्डालाद्धिको हि सः॥
कार्त्तिके तु विशेषेण राजमाषांश्च वर्जयेत्।
निष्पावान् मुनिमाहूँल यावदाभूतसंप्लवं॥"

इति तिथ्यादितत्त्वम्॥

राजमुद्गः, पुं, (मुद्गानां राजा। राजदन्तादित्वात् परनिपातः।) सकुरुकः। इति हेमचन्द्रः। ४। २४०॥

राजयक्ष्मा, [न्] पुं, (राज्ञश्चन्द्रस्य क्षयकारको यक्ष्मा। राजा चासौ यक्ष्मा चेति वा।) क्षयरोगः। इति हेमचन्द्रः॥ अस्य पर्य्यायनिदानौषधादयो यक्ष्मशब्दे द्रष्टव्याः॥*॥

(असौ हि सर्व्वरोगाणामाकरः। यथा, माधवे। २। ६६।

"मावेदि यदभावेको जेतव्यस्तेदिराड़िति।
राजयक्ष्मेव रोगाणां सस्यहः स महीभृताम्॥"

"तथाह वाग्भटः।

अनेकरोगानुगमो बहुरोगपुरःसरः।
राजयक्ष्मा क्षयः पोषो रोगराड़िति च स्मृतः॥
नक्षत्राणां द्विजानाञ्च राजोऽभूत् यदयं पुरा।
यक्ष्म राजा च यक्ष्मा च राजयक्ष्मा ततो मतः॥"

इति तट्टीकायां मल्लिनाथः॥)

महापातकजन्यविघ्नमध्यम्। यथा, विष्णुः। अथ नरकानुभूतदुःखानां निर्यक्कुलसुस्त्रीणां मानुष्ये लक्षणानि भवन्ति। कुष्ठातिपातकी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तकः सुवर्णहारी कुनखी गुरुतल्पगो दुष्कर्म्मा। इत्यादि कूर्म्मपुराणम्॥

"क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यथेष्टाचरणस्याहुर्भैरवास्तन्मयौषधम्॥"

महारोगिणः पापरोगाष्टकान्यतमरोगवतः। ते च उन्मादस्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः उदरोऽर्शरी इत्यष्टौ पापरोगा नारदोक्ताः। इति शुद्धितत्त्वम्॥*॥

तस्योत्पत्तिरुपाख्यानानि यथा,—

"अथ कौण्डवतस्यास्य दक्षस्य सुमहात्मनः।
निश्चक्राम तदा यक्ष्मा नासिकाग्रादिभीषणः॥
दंष्ट्राकरालवदनः क्षयाङ्गारसमप्रभः।
अतिदीर्घः खल्वकेशः क्षयी धमनिसन्ततः॥
अधोमुखो दग्धहस्तः कासं विस्रन्य सन्ततम्।
कुर्व्वाणो निम्ननेत्रश्च योगासम्भोगलोलुपः॥
स चोवाच तदा दक्षं कुत्र स्थास्याम्यहं सुने!।
किंवा चाहं करिष्यामि तन्मे वद महामते॥
ततो दक्षस्तु तं प्राह सोमं यातु इतं भवान्।
सोममत्तु भवान्नित्यं सोमे त्वं तिष्ठ स्वेच्छया॥

मार्कण्डेय उवाच।

इति तस्य वचः श्रुत्वा दक्षस्याथ महात्मनः।
प्रणम्य प्रणतस्तस्य सोममासाद्य स च इतम्॥
आसाद्य स तदा सोमं वल्मीकं पन्नगो यथा।
प्रविवेशोद्धृदये छिद्रं प्राप्य महागदः॥
तस्मिन् प्रविष्टे हृदये दारुणे राजयक्ष्मणि।
शुशोच चन्द्रस्तन्त्रीश्च विषमां प्राप्नवंस्ततः॥
उत्पत्य प्रथमं यस्मात्क्षीणो राजन्यसौ गदः।
राजयक्ष्मेति लोकेऽस्मिंस्तस्य ख्यातिरभूत् द्विजाः॥
ततस्तेनाभिभूतस्य यज्ञभागा रोहिणीपतेः।
क्षयं जगामानुदिनं ग्रीष्मे शुष्का नदी यथा॥
तथा चन्द्रे क्षीयमाणे सर्व्वौषधिः क्षयं गताः।
क्षयं जातास्वोषधीषु न यज्ञः संप्रवर्त्तते॥
यज्ञाभावात्तु देवानामन्नं सर्व्वं क्षयं गतम्।
पर्य्यण्याश्च ततो नद्यास्तनो वृष्टिर्न चाभवत्॥
वृष्ट्यभावे तु लोकानामाहारो क्षीणतां गतः॥
दुर्भिक्षव्यसनोपेते सर्व्वलोके द्विजोत्तमाः।
दानधर्म्मादिकं किञ्चिन्न लोकेषु प्रवर्त्तते॥
सत्त्वहीनाः प्रजाः सर्व्वा लोभेनोपहतेन्द्रियाः।
मायामेव तदा चक्रुर्न धर्म्मेरुद्यतास्तथा॥
एतद्दृष्ट्वा तदा भावं दिक्पालाः सपुरन्दराः।
जग्मुः क्षोभं परं देवाः सागराश्च यथातथा॥
ततो दृष्ट्वा जगत् सर्व्वं व्याकुलं दस्युपीड़ितम्।
ब्रह्मागमगमन्देवाः सर्व्वे शक्रपुरोगमाः॥
उपसङ्गम्य लोकेशं स्रष्टारं जगतां पतिम्।
प्रणम्याथ यथायोग्यमुपविष्टास्ततः सुराः॥
तान् म्लानवदनान् दीनान् ब्रह्मा लोकपितामहः।
अभिभूतान् परैरेव हृतस्वविषयानिव।
पप्रच्छ सुसुखीकृत्य गुरुमिन्द्रं हुताशनम्॥

ब्रह्मोवाच।

स्वागतं भोः सुरगणाः किमर्थं यूयमागताः।
दुःखोपहतदेहांश्च युष्मान् म्लानांश्च लक्षये।
निराधारान् निरातङ्कान् सुरान् सर्व्वांस्तु कामगान्।
कृता स्वविषये म्लानान् कथं पश्यामि दुःखितान्॥
यदभूत्वं दुःखबीजं युष्मान् वा यस्तु बाधते।
तत् कथ्यतामशेषेण सिद्धिं चाप्यवधार्य्यताम्॥

मार्कण्डेय उवाच।

ततो दृष्ट्वाऽब्जजो जीवः क्षयवर्त्मा च लोककृत्।
उवाचात्मसुवे तस्मै सुराणां दुःखकारणम्॥
शृणु सर्व्वं जगत्कर्त्रस्यां येन वयमागताः।
यदस्माकं दुःखबीजं यतो म्लानश्रियो वयम्।
न कश्चित् संप्रवर्त्तन्ते यज्ञा लोकपितामह॥

देवा ऊचुः।

निराधारा निरातङ्काः प्रजाः सर्व्वाः क्षयं गताः।
न च दानादिधर्म्माश्च न तपांसि क्षितौ क्वचित्॥
नैव वर्षति पर्य्येण्यः क्षीणतोयाभवत् क्षितिः।
क्षीणाः सर्व्वास्तथौषधयः शुष्का लोकाः समाकुलाः॥
दस्युभिः पीड़िता विप्रा वेदवादान्न कुर्व्वते।
अन्नवैकल्यमासाद्य म्रियन्ते बहवः प्रजाः॥
क्षीणेषु यज्ञभागेषु भोगहीनास्तथा वयम्।
दुर्बलाश्च श्रिया हीना नैव शान्तिं लभामहे॥
रोहिण्या मन्दिरे चन्द्रो वक्रगत्या चिरं स्थितः।
दक्षशापी स च क्षीणो ज्योत्स्नाहीनश्च वर्त्तते॥
यदेवान्विष्यते देवैश्चन्द्रो नैषां पुरःसरः।
कदाचिदपि देवानां समाजे वा भवद्विधे॥
कदाचिद्रोहिणीं त्यक्त्वा नैव क्व च न गच्छति।
यद्यन्यः कोऽपि न भवेत्तदा चन्द्रो बहिर्भवेत्।
दृश्यते स कलाहीनः कलामात्रावशेषितः॥
इति सर्व्वत्र लोकेषु दृष्टः कर्म्मविपर्य्ययः।
तं दृष्ट्वा कान्तिहीनाश्च वयं त्वां शरणं गताः॥
पातालादुद्यावद्दृत्याय कालकल्पादयोऽसुराः।
नाशान् लोकेषु बाधन्ते तावन्नः पाहि साध्वसात्॥
स्वयं प्रवर्त्तते कस्माच्चलतां वा अतिक्रमः।
न जानीमस्तु तत् सर्व्वं विप्रवे चापि कारणम्॥

मार्कण्डेय उवाच।

एतत् सुराणां वचनं दिव्यदर्शी पितामहः।
श्रुत्वा क्षयमभिध्याय निजगाद सुरोत्तमान्॥

ब्रह्मोवाच।

श्रूयतां तु देवताः सर्व्वा यदर्थं लोकविप्लवः।
प्रवर्त्तते ऽधुना येन शान्तिस्तस्य भविष्यति॥
सोमो दाक्षायणीः कन्याः सप्तविंशतिसंख्यया।
अश्विन्याद्या वरवधूर्भार्य्यार्थे परिगीतवान्॥
परिणीय स ताः सर्व्वा रोहिण्यां सततं विधुः।
प्रवर्त्तताधुरागेण न सर्व्वासु प्रवर्त्तते॥
अश्विन्याद्यास्ततः सर्व्वा दौर्भाग्यज्वरपीड़िताः।
षड्विंशतिर्वरारोहाः पितरं प्रस्थिताः स्वकम्॥
प्रवर्त्तते निशानाथो रोहिण्यां रागतो यथा।
तथा न तासु भजते तद्दक्षाय न्यवेदयन्॥
अतो दक्षो महाबुद्धिः सान्त्वा संस्तूय विट्पतिम्।
बहुस्तुतमाभाष्य पुत्रार्थेऽनुरुरोध तम्॥
अनुरुद्धो यथाकामं दक्षेण सुमहात्मना।
समं प्रवर्त्तितं तासु समयं कृतवान् विधुः॥
समभङ्गीकृते भावं तासु कर्त्तुं हिमांशुना।
खं जगाम ततः स्नातं दक्षोऽपि मुनिसत्तमः॥
गते दक्षे मुनिश्रेष्ठे वैषम्यं तासु चक्रमाः।
जहौ न भावं ताः भूयस्तु कुपिताः पितरं गताः॥
ततो दक्षः पुनश्चन्द्रमृषिश्च सुतान्तरे।

समदृष्टिं प्रतिश्राव्य वचनञ्चेदमब्रवीत् ॥
न समं वर्त्तते चन्द्र सर्व्वासासु भवान् यदि ।
तदा ग्रस्तो ह्यहं तुभ्यं तस्माद् कुरु समञ्च-
समम् ॥
ततो गते पुनर्दृष्टे न समं वर्त्तते यदा ।
तासु चन्द्रसदा दत्तं पुनर्गत्वाब्रवन् रुषा ॥
न ते वचः स कुरुते नैवासासु प्रवर्त्तते ।
वयं तपः करिष्यामः स्थास्यामश्च त्वदन्तिके ॥
तासामिति वचः श्रुत्वा कुपितस्य सदा मुनेः ।
क्षयाय चन्द्रस्य मनः प्रापायोत्सुकतां गतम् ॥
प्रापायोद्युक्तमनसः कुपितस्य महात्मनः ।
क्षयो नाम महारोगो नासिकायाद्विनिर्गतः ॥
प्रेषितः स च चन्द्राय दक्षेण मुनिना ततः ।
प्रविवेशास्य देहे क्षयितस्तेन चन्द्रमाः ॥
क्षीणे चन्द्रे क्षयं याता ज्योत्स्ना तस्य महा-
त्मनः ।
क्षीणासु सर्व्वज्योत्स्नासु सर्व्वौषध्यः क्षयं गताः ॥
ओषध्यभावाल्लोकेऽस्मिन् यज्ञः संप्रवर्त्तते ।
यज्ञाभावादनावृष्टिस्ततः सर्व्वप्रजाक्षयः ॥
यज्ञभागोपभोगेन हीनानां भवतां तथा ।
दुर्ब्बलत्वं समुत्पन्नं विकारश्च खगोचरे ॥
इति वः कथितं सर्व्वं यथाभूल्लोकविप्लवः ।
येनोपायेन तच्छान्तिस्तत्प्रयध्वं सुरोत्तमाः ॥"
इति कालिकापुराणे २० अध्यायः ॥ * ॥
ब्रह्मोवाच ।
"गच्छन्तु भोः सुरगणा दक्षस्य सदनं प्रति ।
तं प्रसाद्य चन्द्रार्थे स च पूर्णो भवेद्यथा ॥
पूर्णे चन्द्रे जगत् सर्व्वं प्रकृतिस्थं भविष्यति ।
युष्माकञ्च भवेत् प्राप्तिरोषधीनाञ्च सम्भवः ॥
मार्कण्डेय उवाच ।
इति ब्रह्मवचः श्रुत्वा देवाः शक्रपुरोगमाः ।
प्रययुर्दक्षभवनं सत्सदा दक्षनिवेशनम् ॥
यथान्यायमुपस्थाय सर्व्वे मुनिवरं सुराः ।
प्रोचुः प्रजापतिं दक्षं प्रणम्य श्लक्ष्णया गिरा ॥
देवा ऊचुः ।
प्रसीद सीदतां ब्रह्मन्नस्माकं बहुदुःखिनाम् ।
उद्धरस्व महाबुद्धे त्राहि नः शोकसागरात् ॥
यद्रूपं ब्रह्मसंज्ञन्तु दृष्टिज्ञत्परमात्मनः ।
तदंशरूपं परं ज्योतिर्विश्वरूपं नतोऽस्मि ते ॥
दक्षत्वात् सर्व्वजगतां प्रजापालनकारणात् ।
दक्षप्रजापतिश्चेति योगैरुक्तनुतो वयम् ॥
दक्षाय सर्व्वजगतां दक्षाय कुशलात्मनाम् ।
दक्षायात्महितायास्तु नमस्तुभ्यं महात्मने ॥
सततं चिन्त्यमानस्य योगिभिर्नियतात्मभिः ।
सारस्य सारभूतस्त्वं दक्षाय परमात्मने ॥
योगविद्भिरनाधृष्टः पारगाणां परायणः ।
आद्यन्तशून्यः सहसा तस्मै नित्यं नमो नमः ॥
इति तेषां वचः श्रुत्वा दक्षो यज्ञभुजां तदा ।
प्राह प्रसन्नवदनः शक्रमाभाष्य सुव्रतः ॥
दक्ष उवाच ।
कुतः शक्र महाभाग भवतां दुःखमागतम् ।
दुःखहेतुं वद विभो श्रोतुमिच्छाम्यहन्तु तम् ॥
ममास्ति यदि कर्त्तव्यं भवतां दुःखहानये ।
तदहं यदि शक्नोमि करिष्यामि हितं सदम् ॥
मार्कण्डेय उवाच ।
तत् श्रुत्वा वचनं तस्य ब्रह्मसूनोर्महर्षेयः ।
जगाद गौरयतिः शक्रो वीतिहोत्रोऽथ तं
मुनिम् ॥
क्षयं यातो निशानाथस्तस्मिन् क्षीणे क्षयंगताः ।
सर्व्वौषध्यो द्विजश्रेष्ठ तद्धानिर्यज्ञहानिकृत् ॥
यज्ञे विनष्टे सकलाः प्रजाः क्षुद्भयकातराः ।
दृष्टाभावाच्चहृद्दुःखं प्राप्य नष्टाश्च काश्चन ॥
क्षयोऽयं राजिनाथस्य यस्ते कोपात् प्रवर्त्तते ।
स सर्व्वजगतो ब्रह्मन्नभवार्थमुपस्थितः ॥
नाधुना तच्छमुपने यत्न शक्नन्तु किञ्चन ।
विप्लवं यान्ति विप्रेन्द्र सागराः स्थावराश्चराः ॥
न यज्ञाः संप्रवर्त्तन्ते न तपस्यन्ति तापसाः ।
आहारदुःखान्निर्द्रोकाः प्रजाः क्षीणा भया-
तुराः ॥
एवं प्रवृत्ते विप्रेन्द्र विप्लवेऽस्मान् रसातलात् ।
देवा न यावदुत्थाय बाधन्ते तावदुद्धर ॥
प्रसीद दक्ष सततं तं पूरय तपोबलात् ।
पूर्णे चन्द्रे जगत् सर्व्वं प्रकृतिस्थं भविष्यति ॥
मार्कण्डेय उवाच ।
इति तेषां वचः श्रुत्वा प्रजापतिसुतस्तदा ।
उवाच तान् सुरगणान् हृदयाच्छल्यसुद्धरन् ॥
दक्ष उवाच ।
यन्मे वचो निशानाथे प्रवृत्तं शापकारणम् ।
न केनापि निदानेन मिथ्यां कर्त्तुं तदुत्सहे ।
किन्तु मद्वचनं यस्मान्नैकान्तेन वृथा भवेत् ।
चन्द्रोऽपि वर्द्धते यस्मात् तस्मात्पायमपेक्षते ॥
तत्राप्ययमुपायोऽस्ति मासार्द्धं यातु चन्द्रमाः ।
क्षयं वृद्धिञ्च मासार्द्धं स्वयं भार्य्यासु वर्द्धताम् ॥
तस्य तद्वचनं श्रुत्वा तं प्रसाद्य प्रजापतिम् ।
सर्व्वे सुरगणास्तत्र गता शक्रास्ति चन्द्रमाः ॥
एवमुक्ते तु वचने दक्षेण मुनिना द्विजाः ।
अथ चन्द्रं समादाय भार्य्याभिः सहितं तदा ।
अभ्युक्ते ब्रह्मसदनं मुदिताः सुरसत्तमाः ॥
तत्र गत्वा महाभागा यथा दक्षेण भाषितम् ।
तत्सर्व्वं कथयामासुर्ब्रह्मणे परमात्मने ॥
ब्रह्मा दक्षवचः श्रुत्वा देवानां सदनं तदा ।
चन्द्रभागं महाशैलं जगाम सहितः सुरैः ॥
तत्र गत्वा सुरश्रेष्ठः प्रजानां हितकाम्यया ।
स्नापयामास शुभ्रांशुं दृषद्रोहितपुष्करैः ॥
भूतभव्यभवज्ज्ञानः पूर्व्वमेव पितामहः ।
एतदर्थं चकारात्र सरः पूर्णं जगत्प्रभुः ॥
तत्र स्नातस्य लोकस्य गौरोगत्वं प्रजायते ।
चिरायुस्त्वञ्च सततं दृढश्लोहितसंज्ञके ॥
तत्र स्नातस्य चन्द्रस्य शरीरात् तत्क्षयं गदः ।
राजयक्ष्मा निःससार पूर्व्वरूपो यथोदितः ॥
निःसृत्य राजयक्ष्मा तु ब्रह्माणञ्च जगत्पतिम् ।
प्रणम्याहं किं करिष्ये क्व गच्छामीत्युवाच ह ॥
स्थानं प्रजाश्च लोकेश ! क्षयं मम सदातनम् ।
निदेश्ययानुरूपं मे सदा त्वं जगतां यतः ॥
मार्कण्डेय उवाच ।
ततो ब्रह्मापि तं पृष्टं निरीक्ष्येन्द्रशरीरगैः ।
अन्तैस्तेनातिशुक्लैः क्षीणश्चापि निशापतिम् ॥
दोर्भिः स्वयं तं गृहीत्वा गिरौ निक्षिप्य वै
मुहुः ।
अस्तं गालयामास शरीराद्राजयक्ष्मणः ॥
अस्तानि च गात्रेभ्यः तदपूतं तदा जले ।
क्षीरोदस्य च चित्तेप मध्ये रक्षसि लोकभृत् ॥
तस्मादप्यस्तादिन्दोः कलाः क्षीणाः पुराभ
वाः ।
तासां जग्राह लवशस्तूर्णान् क्षीरोदसागरात् ॥
कलामात्रावशेषस्य संसर्गाद्राजयक्ष्मणः ।
क्षीणाः कलाः पञ्चदश याः पूर्व्वमस्तसंज्ञिकाः ।
ता रागयक्ष्मगर्भस्याश्चूर्णीभूतासु पीड़या ॥
तेजोज्योत्स्नाकलाभिस्तु निवद्धं यत् कला-
यते ।
शरीरं तन्निधाभूतं गर्भस्थं राजयक्ष्मणः ॥
ज्योतिश्चूर्णमभूत् ज्योत्स्ना लीना राजादि-
यक्ष्मणि ।
द्रवीभूताः सुधाः सर्व्वा गर्भे रोगस्य च स्थिताः ॥
यदा निर्गालयामास सुधां ब्रह्मा गदान्तरात् ।
तदा ज्योत्स्ना सुधा ज्योतिः सर्व्वं तस्माद्-
बहिर्गतम् ॥
क्षीरोदसागरे क्षिप्तं तत्सर्व्वं विधिना तदा ।
देवान् गिरौ परित्यज्य स्वयं गत्वा हतं तमः ॥
ततोऽस्तानि प्रक्षाल्य कलाचूर्णानि वारिधेः ।
ज्योत्स्नाचाप्याजगामाशु गृहीत्वा तत्त्रयं
गिरिम् ॥
क्षीरोदाद्गिरिमागम्य चन्द्रभागं तदा विधिः ।
देवमध्ये कलाचूर्णं सुधां ज्योत्स्नां न्यवीविशत् ॥
संस्थाप्य तत्त्रयं ब्रह्मा देवानां मध्यतस्ततः ।
जगाद राजयक्ष्माणं तत्स्थानादि निदेशयन् ॥
ब्रह्मोवाच ।
सर्व्वदा यो दिवा रात्रौ सन्ध्यायां वनितारतः ।
सेवते सुरतं तस्मिन् राजयक्ष्मन् वसिष्यसि ॥
प्रतिश्रायश्वासकासयुक्तो यो मैथुनं चरेत् ।
स ते प्रवेशः सततं क्षेमञ्च तथाविधः ॥
क्षयाख्या श्लेष्मपुत्री या भवतः सदृशी गुणैः ।
सा तेऽस्तु भार्य्या सततं भवन्तमनुयास्यति ॥
क्षीणत्वं भवतः क्षत्रं ततस्त्वं विषये कुरु ।
इतं गच्छ यथाकामं चन्द्रे त्वं विमुखो भव ॥
मार्कण्डेय उवाच ।
एवं विसृष्टो विधिना राजयक्ष्मा महागदः ।
यज्ञघ्नतां सर्व्वदेवानामन्तर्द्धानं जगाम ह ॥
अन्तर्हिते महारोगे ब्रह्मा लोकपितामहः ।
चन्द्रं समग्रयामास कलाषष्ठदशैधितम् ॥
तेन क्षीरोदधौतेन सुधापूर्णेन वात्मभूः ।
सञ्ज्योत्स्नेस्तु कलाचूर्णैः पूर्व्ववच्चाकरोद्विधुम् ॥
स षोड़शकलापूर्णः पूर्व्ववद्विबभौ यदा ।
चन्द्रस्तदा सर्व्वदेवा मुमुदुस्तस्य दर्शनात् ॥
अथ चन्द्रस्तदा पूर्णः प्रणिपत्य पितामहम् ।
उवाचेदं सुरसदो मध्यगो नातिहर्षितः ॥

सोम उवाच ।
न स्थानं पूर्ववद्ब्रह्मन् शरीरे मम वर्तते ।
न वीर्यं वा तथोत्साहो विशीर्णत्वङ्नसंक्षयः ॥
नोत्सहे पूर्ववच्चेष्टां विधातुं सुतरामहम् ।
चेष्टाहीनस्त्वनुदिनं वर्त्तयं केन लोकभृत् ॥
ब्रह्मोवाच ।
यस्मस्य यज्ञमुखा सोम यदभूद्दक्षसंक्षयः ।
पूर्वं विशीर्णा भवतस्तनुपूर्णमभवन्न हि ॥
अधुना भवतो देहचूर्णं निःसारितं मया ।
शरीरात् साम्प्रतज्योत्स्ना अङ्गसा राज-
यक्ष्मणः ॥
तेषां प्रक्षालनविधौ लवणो यत् स्थितं जले ।
ज्योत्स्नायाश्च सुधायाश्च तेन हीनो भवान्
यतः ।
ततोऽङ्गसंक्षयो राजंस्तव सीदन्ति साम्प्रतम् ॥
अत्रोपायं विधास्यामि यथा नार्त्तिं लभेद्भवान् ।
प्राजापत्यः पुरोडाशो हविषीयः पुरोऽध्वरे ॥
ऐन्द्राग्नोऽनु चाग्नेयः प्रदेयः सर्वतः क्रतौ ।
ततोऽनु भवतो भागः पुरोडाशो मया कृतः ॥
तेन भागेन सुकृतं नित्यं यज्ञहुतेन हि ।
पूर्ववत्ते समुत्साहः स्थानं वीर्यं भविष्यति ॥
यस्मात्तत्कणास्तोये क्षीरोदस्य स्थितास्तव ।
शरीरचूर्णं यावत्ते ज्योत्स्नायाश्चापि ये कणाः ।
वृद्धिं यास्यन्ति सततं क्षीरसागरमध्यगाः ॥
स्वारोचिषेऽन्तरे प्राप्ते द्वितीये शुक्रसंभवः ।
दुर्वासा भविता विप्रः प्रचण्डश्चण्डभास्करः ॥
स महेन्द्रस्याविनयात् शापं दत्त्वा सुदारुणम् ।
करिष्यति त्रिभुवनं निःश्रीकं ससुरासुरम् ॥
श्रिया हीने ततो लोके भविता लोकविप्लवः ।
यथा तव क्षयात् सोम प्रवृत्तो लोकविप्लवः ॥
तस्मात्पुरुषप्रमाणेन तृतीये तु कृते युगे ।
भविष्यति स्थास्यति च यावद्युगचतुष्टयम् ॥
ततश्चतुर्थे सम्प्राप्ते सह देवैः कृते युगे ।
क्षीरोदं निर्मथिष्यामः शम्भुविष्णुरहं तथा ॥
मन्थानं मन्दरं कृत्वा सर्पराजं तथाशुकम् ।
यज्ञभागेषु हीनेषु देवानार्थे वयं ततः ।
मथिष्यामः समं देवैः क्षीरोदं सह दानवैः ।
त्वच्छरीरावशेषमिदं यत् स्थितं क्षीरसागरे ॥
तत्प्रमथ्य ग्रहीष्यामो राशीभूतं तथाक्षयम् ।
सर्वौषधीस्तरे कृत्वा त्वच्छरीरं तदा वयम् ।
क्षेप्स्यामः सागरजले शरीरार्थं विधो तव ॥
निर्मथ्य सागरं पश्चात् समुद्धार्य यदाप्तम् ।
तदा तव वपुस्तस्मिन्नपूर्वं सम्भविष्यति ॥
ओजो वीर्यांशुकं कान्तमक्षयञ्च सुधात्मकम् ।
दृढाङ्गसन्धिकं चारु भविष्यति वपुस्तव ॥
मार्कण्डेय उवाच ।
सुधांशुमेवमाभाष्य ब्रह्मा लोकपितामहः ।
विधोः क्षयाय मासार्द्धं वृद्धये यत्नवानभूत् ॥
यथा दक्षेण शप्तितं मासार्द्धं यातु चन्द्रमाः ।
क्षयं वृद्धिञ्च मासार्द्धं यत्र तत्राकरोद्विधिः ॥
यतः षोडशधा चन्द्रं सुरज्येष्ठो विभक्तवान् ।
विभज्य च सुरान् सर्वान् ससर्वाचेदमद्भुतम् ॥
कलाः षोडश चन्द्रस्य तत्रैका शम्भुमूर्द्धनि ।
तिष्ठत्यवधि परा क्षयं यान्तु क्षयं विना ॥
क्षयेण यदि रोगेण मासार्द्धं दक्षवाक्यतः ।
क्षयाय पीयते चन्द्रो नोपशाम्यति सदा भवेत् ॥
किन्त्वस्य या कला शम्भौ ज्योत्स्ना गच्छन्तु तां
प्रति ।
चतुर्दशकलासंस्थाः प्रतिमासं सुरोत्तमाः ॥
चतुर्दशकलासंस्थान्यन्नतानि पिबन्तु वै ।
प्रतिपत्तिथिमारभ्य भवन्त्स्वाश्चतुर्दशीम् ॥
तेजोभागाः सूर्यबिम्बं चतुर्दशतिथौ क्रमात् ।
प्रविशन्तु क्षयं त्वेवं कृष्णपक्षे विधोर्भवेत् ॥
यातु श्वेषा कलादर्शे हरित्पक्षे पलायिता ।
तिष्ठतु प्रथमे भागे तिथौ तस्यां निशापतेः ॥
द्वितीये दर्शभागे तु रोहिण्या यातु मन्दिरम् ।
तृतीये तु सरस्वत्यां स्नात्वा सन्तुष्टितो विधुः ॥
चतुर्थे बलसंपूर्णस्तिथिभागे विभावसोः ।
मण्डलं यातु चन्द्रोऽयं सविस्मयघोषणः ॥
यावत्कालेन हि कला प्रथमा क्षयमाप्नुयात् ।
एवमेवं कृष्णपक्षे तावत्सा प्रतिपत् भवेत् ॥
द्वितीयादौ कृष्णपक्षे वृद्धिर्भासस्तथाविधः ।
तिथीनां वृद्धिहेतुश्च शुक्ले कृष्णे तथा भवेत् ॥
ततः पुनः शुक्लपक्षे यावत् पूर्वा कलोदिता ।
वृद्धिमेति भवेत्तावत् प्रतिपत्तिथिरादितः ॥
ततो द्वितीयभागस्य या ज्योत्स्ना हरमूर्द्धनि ।
स्थितायां वै कलायान्तु गता सा पुनरेष्यति ॥
युग्माभिस्तु भवेत् पेयमन्नतं यद्दिने दिने ।
तद्वितीयादितिथिभिः पूर्णान्ताभिः सदैव हि ॥
क्षयमुत्पत्स्यते चन्द्रो ज्योत्स्नायोगात् सुरो-
त्तमाः ।
यथा दिने दिने भागाः क्षयं यान्ति तथा
विधोः ॥
वृद्धिं गच्छन्त्यनुदिनं शुक्लपक्षेऽन्वहं सुराः ।
तेजोभागाः सूर्यबिम्बात् पुनरेव समेष्यति ॥
प्रयास्यति क्षयं पक्षे यथाभागक्रमन्तथा ।
ज्योत्स्नाहरशिरश्चन्द्रात् प्रत्यहं पुनरेष्यति ॥
तेजोभागः सूर्यबिम्बादन्नतं वत्स्यते स्वयम् ।
एवं वृद्धिः शुक्लपक्षे सुधांशोः संभविष्यति ॥
पक्षयोः शुक्लकृष्णात्मं चन्द्रवृद्धिक्षयाङ्कितम् ।
यावत्कालेन यो भागं क्षयं वृद्धिञ्च यास्यति ॥
तावत्कालमभिव्याप्य तिथिः स्थास्यति सा पुनः ॥
चिरेण वृद्धिर्यदि वा क्षयो वा
हतेन वृद्धिर्यदि वा क्षयो वा ।
हतातिथीनां तु सदा क्षयः स्या-
च्चिरात्तु वृद्धिस्तिथिषु प्रवेशे ॥
क्षयं कृत्वा चन्द्रेण विना न संभविष्यति ।
तस्मात् तयोः प्रवृद्ध्यर्थं चक्रं रचयतु देवताः ॥
आस्वादनीयः शुभ्रांशुः कलाग्नेयोऽनुमासतः ।
अमावास्यापरार्द्धे तु पितृभो रोहिणीयुते ॥
तस्यैवास्वादनात् कृत्वं वृद्धिं यास्यति चान्वहम् ।
तेन क्रमेण पितरस्तृप्तिं यास्यन्ति वै पराम् ॥
श्रीमार्कण्डेय उवाच ।
ततः सुरगणाः सर्वे यथोक्तं विधिना तथा ।
चक्रुर्लोकहितार्थाय चन्द्रस्य क्षयवृद्धये ॥
महादेवोऽपि चन्द्रार्द्धं स्वरूपं परमात्मनः ।
जग्राह देवैर्विधिना शिरसाभ्युदितो भृशम् ॥
यत्तेजः परमं नित्यमजमव्ययमक्षयम् ।
तत्स्वरूपाश्चन्द्रकलाः प्रापतस्तु क्षयं गताः ॥
प्रविशन्ति यदा ज्योतिरानन्दममरं परम् ।
योगिनस्तु तदा तेषां चित्तं तल्लीनरेष्यति ॥
महादेवशिरःसंस्थे लीने चित्ते सुधानिधौ ।
चन्द्रद्वारा भवेन्मुक्तिरित्येवं वेदिकी श्रुतिः ॥
एतज्ज्ञात्वा महादेवः क्षयवृद्ध्या विना कृतम् ।
हिताय सर्वलोकानां जग्राह शिरसा विधुम् ॥
चन्द्रज्योत्स्नासमायोगादोषधीः यान्ति वृद्धये ।
सर्वौषधीषु वृद्धासु प्रवर्तन्ते ततोऽध्वराः ॥
अध्वरेषु प्रवृत्तेषु स्वान् स्वान् भागांस्तु देवताः ।
परिगृह्णन्ति पितरस्तथा कव्यानि भूरि च ॥
अस्तं ब्रह्मा ददौ यद्वैवेभ्यः पूरातनम् ।
तेन तृप्यन्ति हीना ये हव्यभागेन देवताः ॥
यज्ञेनाप्यायिते तस्य ज्योत्स्नाभिर्वृद्धिमेति वै ।
यज्ञज्योत्स्ना विना भूतं तस्य स्यात् क्षीण-
मन्यथा ॥
अतोऽस्तस्य यज्ञस्य चन्द्रमाः कारणं स्वयम् ।
अतोऽस्य दक्षशापात्तु रक्षाये तत्किर्तितम् ॥
अद्यापि कृष्णपक्षेऽपि सुधा संप्रीयते सुरैः ।
तेजः सूर्यं याति शम्भोश्चन्द्रार्द्धं ज्योत्स्निका तथा ।
पुनश्च शुक्लपक्षे तु ग्रेषोदेति कला ततः ।
ज्योत्स्नाहितीयो भागस्तु तेजोभागो द्वितीयकः ॥
अन्वेत्यग्निशिरश्चन्द्रात् सूर्यबिम्बाद्यथाक्रमम् ।
कलाः षोडश चन्द्रस्य तत्रैका शम्भुमूर्द्धनि ॥
सिताऽसितावुभौ पक्षौ ग्रेषाभासदयक्षयौ ।
इति वः सर्वमाख्यातं विभक्तश्चन्द्रमा यथा ।
ब्रह्मणा पर्वतश्रेष्ठे तथा तच्चन्द्रभागतः ।
यज्ञभागे स्थिते यस्माद्देवार्थमकरोद्विधुम् ।
कव्ये स्थितेऽपि पित्रर्थं तिथिवृद्धिक्षयौ यथा ॥
इदं पुण्यतमाख्यानं यः शृणोति सदानरः ।
राजयक्ष्मा तस्य कुले न कदाचिद्भविष्यति ॥
यक्ष्मणा परिभूतो यः शृणोति वचनं विधेः ।
अचिरात् यक्ष्मणा मुक्तः स भवेन्नरसत्तमः ॥
इदं स्वस्त्ययनं पुण्यं गुह्यात् गुह्यतरं परम् ।
यः शृणोत्येकचित्तः सन् स महापुण्यभाग्-
भवेत् ॥"
इति कालिकापुराणे २१ अध्यायः ॥
राजयोग्यः, त्रि, (राज्ञो योग्यः ।) राजार्हः ।
नृपोचितः । यथा,—
"त्रिकोणकण्टके सौम्ये पापे चोपचयस्थिते ।
राजयोग्या भवेन्नारी सुन्दरी कुलवर्द्धिनी ॥"
इति जातकाभरणम् ॥
राजरङ्गं, क्ली, (राजयोग्यं रङ्गम् ।) रजतम् ।
इति शब्दरत्नावली ॥
राजराजः, पुं, (राज्ञामपि राजा धनाधिपत्वात् ।
"राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति
टच् ।) कुबेरः । इत्यमरः । १ । १ । ६३ ॥
(यथा, किरातार्जुनीये । ५ । ५१ ।

"इत्युक्त्वा सपदि हितं प्रियं प्रियार्हे
धाम स्वं गतवति राजराजभृत्ये।
सोत्कण्ठं किमपि पृथासुत: प्रदध्यौ
सन्यस्ते भुजमरतिं हि सहियोग:।")
सार्वभौम:। (यथा, रामायणे।२।६२।१४।
"प्रयाणमिति च श्रुत्वा राजराजस्य योषित:।
हित्वा यानानि यानार्हा ब्राह्मणं पर्यवारयन्॥")
सुधाकर:। इति मेदिनी। वे, ३६॥

राजरीति:, स्त्री, पित्तलविशेष:। तत्पर्य्याय:। पाकतुल्या २ राजपुत्री ३ मदेश्वरी ४ ब्रह्मजा ५ ब्रह्मारीति: ६ कपिला ७ पिङ्गला ८। अस्य गुणा:। तिक्तत्वम्। श्वेतलत्वम्। लवणत्वम्। श्लेष्मघ्नत्वम्। पाण्डुवातक्रिमिप्लीहपित्तनाशित्वञ्च। इति राजनिर्घण्टु:॥

राजर्षि:, पुं, (राजा ऋषिरिव श्रेष्ठत्वात्।) क्षत्रधर्म्मादिराज:। इति त्रिकाण्डशेष:॥ तस्य स्मरणं कलिनाशनम्। यथा,—
"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च।
ऋतपर्णस्य राजर्षे: कीर्त्तनं कलिनाशनम्॥"
इति महाभारतम्॥

राजलक्ष्मा, [न्] पुं, (राज्ञो लक्ष्म चिह्नं यत्र।) युधिष्ठिर:। इति धनञ्जयकोष:॥ (राजचिह्नयुक्ते, त्रि॥)

राजलक्ष्मी:, स्त्री, (राज्ञो लक्ष्मी:।) राजश्री:। यथा, ज्योतिषतत्त्वे।
"मन्त्रप्रभावनिपुण: प्रमदाविलास:
श्वेतातपत्रनृपपूजितदेशलाभ:।
हस्त्यश्वलाभधनपूर्णमनोरथ: स्यात्
शौक्री दृशा भवति निश्चलराजलक्ष्मी:॥"

राजवंश्य:, त्रि, (राजवंशे भव:। राजवंश+यत्।) राजवंशोद्भव:। तत्पर्य्याय:। राजवौंशौ २। इत्यमर:। २। ७। २॥

राजवर्त्म, [न्] क्ली, (राज्ञो वर्त्म पन्था:।) राजपथ:। तत्पर्य्याय:। घण्टापथ: २ संसरणम् ३ श्रीपथ: ४ उपनिष्क्रमणम् ५ उपनिष्करम् ६ महापथ: ७। इति हेमचन्द्र:। ४। ५३॥

राजवल्ला, स्त्री, (राजते श्लोभते इति। राज्+अच्। राजा वल्ला इति कर्म्मधारय:।) भद्रवल्ला। इत्यमर:। २। ४। १५३॥ गन्धभादालिया इति भाषा॥

राजवल्लभ:, पुं, (राज्ञां वल्लभ:।) राजादनी। राजान्न:। राजबदर:। इति राजनिर्घण्टु:॥ नारायणदासकविराजकृतद्रव्यगुणग्रन्थविशेष:। यथा—
"श्रीनारायणदासेन कविराजेन धीमता।
प्रतिसंस्क्रियते द्रव्यगुणोऽयं राजवल्लभ:॥"
इति तस्य द्वितीयश्लोक:॥
नृपप्रिये, त्रि। (यथा, मार्कण्डेये। ४६। ४६।
"दृष्ट्वायो विना चेदे: परभूमिचरो बली।
याम एवाक्रमीसंज्ञो राजवल्लभसंश्रय:॥")

राजवल्ली, स्त्री, (राजप्रिया वल्ली।) तोयवल्ली। इति रत्नमाला। उल्ला इति भाषा।

राजवान्, [त्] त्रि, (राजास्यस्येति। राजन्+मतुप्। मस्य व:।) राजमाषयुक्तदेश:। यथा,—
"सुराष्ट्रे देशे राजवान् स्यात्ततोऽत्र राजवान्॥"
इत्यमर:। २। १। १३॥
(नृपविशिष्ट:। यथा, महाभारते।५।१८.७।
"रराज सा राजवती सम्वृता
ग्रहैरिव द्यौर्विमलैरुपेता॥")

राजवाह:, पुं, (राजानं वहतीति। वह+घञ्।) घोटक:। इति शब्दचन्द्रिका॥

राजवाह्य:, पुं, (राज्ञां वाह्य:।) राजवाहकहस्ती। तत्पर्य्याय:। उपवाह्य: २। इति हेमचन्द्र:॥ विजयकुञ्जर: ३। इति त्रिकाण्डशेष:॥ राज्ञ इदं छ।

राजवृक्ष:, पुं, (वृक्षाणां राजा। राजदन्तादित्वात् परनिपात:।) आरग्वधवृक्ष:। इत्यमर:॥ पियालवृक्ष:। इति मेदिनी॥ लङ्कास्थायी वृक्ष:। इति शब्दचन्द्रिका॥ लङ्कासिज् इति भाषा॥

राजशृङ्ग:, पुं, (राज्ञ: शोभमान: शृङ्ग:।) पर्वत:। इति शब्दमाला॥ पाट् इति भाषा॥

राजसर्षप:, पुं, इक्षुशृङ्गमत्स्य:। इति हारावली॥

राजश्रेष्या, स्त्री, (राज्ञ: श्रेष्या।) राज्ञ: श्रयणीयम्। तत्पर्य्याय:। महाश्रेष्या २। इति हेमचन्द्र:॥

राजश्राक:, पुं, (राजप्रिय: श्राक:। श्राकानां राजा इति वा।) वास्तूकम्। इति राजनिर्घण्टु:॥

राजशुक:, पुं, (शुकानां राजा। राजदन्तादित्वात् परनिपात:।) पक्षिविशेष:। राजा शूगा इति हिन्दी भाषा। तत्पर्य्याय:। प्राज्ञ: २ शुतपत्र: ३ नृपप्रिय: ४। इति राजनिर्घण्टु:॥

राजश्रृङ्गं, क्ली, राज्ञश्छत्रम्। तत्पर्य्याय:। कनकदण्डकम् २। इति त्रिकाण्डशेष:॥

राजश्रृङ्ग:, पुं, महद्गुरुमत्स्य:। इति हेमचन्द्र:॥

राजस:, त्रि, (रजसो भव:। रजस्+अण्।) रजोगुणोद्भव:। लक्षणञ्च यथा,—
"आरम्भरुचिताधैर्य्यमसत्कार्य्यपरिग्रह:।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम्॥"
आरम्भरुचिता फलार्थं कर्म्मानुष्ठानशीलता॥*॥
संक्षेपतस्तल्लक्षणञ्च यथा,—
"येनास्मिन् कर्म्मणा लोके ख्यातिमिच्छति पुष्कलाम्।
न च शोचत्यसम्पत्तौ तद्विज्ञेयन्तु राजसम्॥"
तस्याश्च तिर्य्यथा,—
"देवत्वं सात्त्विका यान्ति मनुष्यत्वञ्च राजसा:।
तिर्य्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गति:॥"
तद्गतिप्रकारा यथा,—
"भल्ला मल्ला नटाश्चैव पुरुषा: शस्त्रवृत्तय:।
द्यूतपानप्रसक्ताश्च जघन्या राजसी गति:॥
राज्ञाञ्च क्षत्रियाश्चैव राज्ञश्चैव पुरोहिता:।
वादयुद्धप्रधानाश्च मध्यमा राजसी गति:॥
गन्धर्व्वा गुह्यका यक्षा विबुधानुचराश्च ये।
तथैवाप्सरस: सर्व्वा राजसीषूत्तमा गति:॥"
इति वामने १२ अध्याय:॥
राजसाहारा यथा,—
"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिन:।
आहारा राजसस्येष्टा दु:खशोकामयप्रदा:॥"
राजसयज्ञो यथा,—
"अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥"
राजसतपो यथा,—
"सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥"*॥
राजसदानं यथा,—
"यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुन:।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्॥"
इति श्रीभगवद्गीतायाम् १७ अध्याय:॥
राजसत्यागो यथा,—
"दु:खमित्येव यत् कर्म्म कायक्लेशभयात् त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥"
राजसज्ञानं यथा,—
"पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥"
राजसकर्म्म यथा,—
"यत्तु कामेप्सुना कर्म्म साहङ्कारेण वा पुन:।
क्रियते बहुलायासं तद्राजसमुदाहृतम्॥"*॥
राजसकर्त्ता यथा,—
"रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचि:।
हर्षशोकान्वित: कर्त्ता राजस: परिकीर्त्तित:॥"
राजसी बुद्धिर्यथा,—
"यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च।
अयथावत् प्रजानाति बुद्धि: सा पार्थ राजसी॥"
राजसी धृतिर्यथा,—
"यया तु धर्म्मकामार्थान् धृत्या धारयतेऽर्জ্জুন।
प्रसङ्गेन फलाकाङ्क्षी धृति: सा पार्थ राजसी॥"
राजससुखं यथा,—
"विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम्।
परिणामे विषमिव तत् सुखं राजसं स्मृतम्॥"
इति श्रीभगवद्गीतायाम् १८ अध्याय:॥*॥
राजसपुराणानि यथा,—
"ब्राह्मं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च।
भविष्यं वामनं ब्राह्मं राजसानि निबोधत॥"॥
राजसस्मृतयो यथा,—
"आवर्त्तं याज्ञवल्क्यञ्च आत्रेयं दाक्षमेव च।
कात्यायनं वैष्णवञ्च राजसा: स्वर्गदा मता:॥"
इति पाद्मोत्तरखण्डे ४१ अध्याय:॥

राजसदनं, क्ली, (राज्ञ: सदनम्।) राजगृहम्। तत्पर्य्याय:। सौध: २। इत्यमर:। २। २। १०॥ भूपालभवनम् ३ सुधाभवनम् ४। इति शब्दरत्नावली॥ तद्भेदा यथा,—
"सौधोऽस्त्री राजसदनसपक्ष्योपक्षारिका।

स्वस्तिकः सर्व्वतोभद्रो गन्धावर्त्तादयोऽपि च।
विच्छन्दकः प्रमेदा हि भवन्तीश्वरसङ्गनाम्।"
इत्यमरः। २। २। १०॥

राजसभा, स्त्री, राज्ञः सभा। ("सभा राजामनुष्यपूर्व्वा।" २। ४। २१। इत्यत्र राजपर्य्यायस्येह ग्रहणात् न ङीषन्तम्।) नृपतिसमाजः। इत्यमरः। २। ५। ६। (वाचस्पत्ये नपुंसकलिङ्गतोक्तिस्तु प्रामादिकी॥)

राजसर्षपः, पुं, (सर्षपाणां राजा। राजदन्तादित्वात् परनिपातः।) सर्षपविशेषः। तत्पर्य्यायः। भुजङ्गभोजी २। इति हेमचन्द्रः। ४। ३७०॥

राजसर्षपः, पुं, (सर्षपाणां राजा श्रेष्ठत्वात्। परनिपातः।) सर्षपविशेषः। राजसर्षा इति भाषा। राइ इति केचित्। तत्पर्य्यायः। क्षत्रिका २ राजिका ३ क्षुरी ४ सुरुकः ५। सुरुक इत्यत्र अरुक इति वा पाठः। इति रत्नमाला। क्षवः ६ क्षुताभिजननः ७। क्षुताभिजनन इत्यत्र क्षुवाभिजनन इति वा पाठः। इति हेमचन्द्रः। क्षत्रा ८ तीक्ष्णकला ९ राजी १० क्षत्रसर्षपाख्या ११। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। वातशूलगुल्मकफकुष्ठव्रणनाशित्वम्। पित्तदाहप्रदत्वञ्च। इति राजनिर्घण्टः॥ (चतुर्व्विंशतिअसरेणुपरिमित-परिमाणविशेषः। यथा, मनुः। ८। १३३।

"त्रसरेवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः।
ता राजसर्षपस्त्रस्ते त्रयो गौरसर्षपः॥"

"त्रसेत्यादि। अष्टौ त्रसरेणवो लिक्षैका परिमाणेन ज्ञेया ताभिस्तिस्रो लिक्षा राजसर्षपो ज्ञेयः। ते राजसर्षपास्त्रयो गौरसर्षपो ज्ञेयः॥" इति तट्टीकायां कुल्लूकः॥)

राजसायुज्यं, क्ली, (राज्ञः सायुज्यम्।) राजत्वम्।

"स्यादब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि।
देवभूयादिकं तद्वत्————॥"

इत्यमरदर्शनात्॥

राजसारसः, पुं, (राज्ञः सारस इव। राजः श्रोभाग्राही सारस इव इति वा।) मयूरः। इति शब्दमाला॥

राजसी, स्त्री, (रजस इयमिति। रजस्+अण्। ङीप्।) दुर्गा। इति शब्दरत्नावली॥ रजोगुणसम्बन्धिनी च॥ (यथा, गीतायाम्।

"यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी॥")

राजसूयः, पुं, ("राज्ञा क्रतात्मकः सोमः सूयते अत्र।" इत्यमरटीका। सु+अधिकरणे क्यप्।) "राज्ञा सोतव्यः राज्ञा वा इह सूयते।" इति काशिका। "राजसूयसूर्य्येति।" ३। १। ११३। इति निपातनात् दीर्घः।) राजकर्त्तव्यक्रतुविशेषः। तत्पर्य्यायः। नृपाध्वरः २ क्रतुराजः ३ क्रतूत्तमः ४। इति शब्दरत्नावली॥ (अमरमते क्षौद्रविशेषोऽयम्। २। ५। ३९॥ यथा, महाभारते। २। १५०। १६।

"यक्ष्यन्ति चैनरश्वाद्या निर्ज्जित्य पृथिवीमिमाम्
राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः॥"

राजसूयमन्त्रादिकं राजसनेयसंहितायाम् ६ अध्यायस्य ३५ कण्डिकामारभ्य १० अध्यायस्य ३० कण्डिकापर्य्यन्तं द्रष्टव्यम्। युधिष्ठिरस्य राजसूयक्रतुविवरणन्तु महाभारते सभापर्व्वणि विशेषतो द्रष्टव्यम्॥)

राजस्कन्धः, पुं, (राज्ञः श्रोभाग्राही स्कन्धो यस्य।) चोटकः। इति त्रिकाण्डशेषः॥

राजस्वं, पुं क्ली, (राज्ञे देयं स्वं धनम्।) राजधनम्। राजकरः। इति लोकप्रसिद्धम्॥

राजस्वर्णः, पुं, (स्वर्णानां धुस्तूराणां राजा। राजदन्तादित्वात् परनिपातः।) राजधुस्तूरकः। इति राजनिर्घण्टः॥

राजहंसः, पुं, (हंसानां राजा श्रेष्ठत्वात्। राजदन्तादित्वात् परनिपातः।) चञ्चुचरणलोहितश्वेतवर्णहंसः। इत्यमरः। २। ५। २४॥ (यथा, कुमारे। १। ३४।

"सा राजहंसैरिव सन्नताङ्गी
गतेषु लीलाक्षितविक्रमेषु।
अनीयतप्रत्युपदेशमुच्चै-
राद्रियुभिर्नूपुरशिञ्जितानि॥")

कदम्बः। कलहंसः। नृपोत्तमः। इति मेदिनी॥

राजहर्षकं, क्ली, (राजानमपि हर्षयतीति। हृष्+णिच्+ण्वुल्।) तगरपुष्पम्। इति राजनिर्घण्टः॥

राजहस्ती, [न्] पुं, (राज्ञो हस्ती।) राजगजः। तत्पर्य्यायः। मारीचः २ याजकगजः ३ मदोत्कटः ४। इति हारावली। ४६॥

राजहासकः, पुं, (राजानमपि हासयतीति। हस्+णिच्+ण्वुल्।) मत्स्यविशेषः। तत्पर्य्यायः। कातरः २ कातलः ३ राजीवः ४। इति शब्दरत्नावली॥

राजचवकः, पुं, सर्षपः। इति राजनिर्घण्टः॥ (अस्य शाकगुणाः।

"संग्राहि शीतलञ्चापि लघुदोषविरोधि च।
राजचवकशाकन्तु सटीशाकन्तु तद्विधम्॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

राजा, [न्] पुं, (राजते श्रोभते इति। राज्+"कञ्जिन् दृग्दिवराजीति।" उणा० १। १५६। इति कञ्जिन्।) प्रभुः। नृपतिः। (यथा-रघुः। ४। ११।

"यथा प्रह्लादनात् चन्द्रः प्रतापात् तपनो यथा।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्॥")

क्षत्रियः। (यथा, मनुः। २। ३२।

"ग्रुम्भेदब्राह्मणस्य स्यात् राज्ञो रक्षाबलान्वितम्।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम्॥")

चन्द्रः। यक्षः। इन्द्रः। इति मेदिनी। उत्तरपदे चेत् श्रेष्ठार्थवाचकः॥ अथ नृपतेः पर्य्यायः। राट् २ पार्थिवः ३ क्ष्मावृत् ४ नृपः ५ भूपः ६ महीक्षित् ७। इत्यमरः॥ नरपतिः ८ पार्थः ९ नृपतिः १० भूपालः ११ भूभृत् १२ महीपतिः १३ नाभिः १४ नाराट् १५ भूमीन्द्रः १६ नरेन्द्रः १७ नायकाधिपः १८। इति शब्दरत्नावली॥ क्षणेश्वरः १९ भूमिपः २० नृपः २१ इक्ष्वरः २२ अवनीपतिः २३ स्कन्दः २४ स्कन्धः २५ भूभुक् २६ अर्थपतिः २७। इति जटाधरः॥ ॥ अस्य व्युत्पत्तिर्यथा,—

"महता राजराज्येन पृथुर्वैण्यः प्रतापवान्।
सोऽभिषिक्तो महातेजा विधिवद्ब्रह्मवादिभिः॥
पित्रापरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः।
अनुरागात्ततस्तस्य नाम राजेत्यभावत॥"

इति विष्णुपुराणे १ अंशे १३ अध्यायः॥

अपि च।

"राज्ञो राजसिकं स्वर्ग्यं कुरुते कर्म्म रागतः।
रागान्धाच्च राजसिकात्तेन राजा प्रकीर्त्तितः॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः॥

तस्य सर्व्वपितृत्वं यथा,—

ग्रथ्युवाच।

"ग्रहीतु वत्स! महाराज हे तात! भयभञ्जन।
भयत्राता च राजा च सर्व्वेषां पालकः पिता॥
भक्तश्रीच्च महेन्द्रोऽत्र त्वच्च स्वर्गे नृपोऽधुना।
यो राजा स पिता पाता प्रजानामेव निश्चयः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५६ अध्यायः॥

पृथोरेवादौ राजा इति संज्ञा आसीत्। यथा,

"देवैर्विप्रैस्तथा सर्व्वैरभिषिक्तो महामनाः।
राज्ञान्धेवाधिकारे वै पृथुर्वैण्यः प्रतापवान्॥
तदा पित्रा प्रजाः सर्व्वाः कृता नैवानुरञ्जिताः।
तेनानुरञ्जिताः सर्व्वाः सुखैर्म्मुदिरे तदा।
अनुरागात्ततस्तस्य वीरस्य नाम राजेत्यभावत॥"

इति पाद्मे भूमिखण्डे २६ अध्यायः॥

अथ राजलक्षणम्।

"सोऽपि क्षत्रपटे बालं द्वाभ्यां द्वीविंशपीडितम्।
नरेन्द्रलक्षणोपेतं चिन्तामाप नरेश्वरः॥
तस्यास्यं चन्द्रबिम्बाभं सुभ्रु रम्यं समुन्नसम्।
नीलाः केश्याः कुञ्चिताश्च समा दीर्घाक्षरञ्जिताः॥
राजीवनेत्रयुगलो त्रिलोलपुटसन्नतः।
चतुर्दन्तश्चतुष्किष्कुर्द्दीर्घास्यो दीर्घबाहुकः॥
चतुर्जेखाकरो मांसयवदृङ्केकपर्व्वकः।
श्रिराजपादो गम्भीरः क्षत्रलक्षणवित्तमः॥"

इति मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्यानाध्यायः॥ ॥ अथच।

"अक्षेदिनौ मृदुतरौ कमलोदरसन्निभौ।
श्रिराशुजौ ताम्रनखौ पादावुक्षौ श्रिरोज्ज्वितौ।
जङ्घोन्नतौ गूढशुजौ सुपार्ष्णी नृपतेः स्मृतौ।
मृदुलोमा समा जङ्घा तथा करिकरप्रभा।
उरवो जानवस्तुल्या नृपस्योपचिताः स्मृताः॥
कोषगूढे नृपे दीर्घैर्भुक्तैश्च मृदवश्चिते।
समाश्चा चितिपः प्रोक्तः प्रजन्येव प्रतान्वितः।
सप्तस्वन्तिःशुन्दनासाः सप्तैरिताश्च मानवाः।

एकद्विचितुःपञ्चषड्धारादिभिरेव च ।
दक्षिणावर्तसंचलितमुभाभिश्च नृपाः स्मृताः ।
नृपाः पुष्यगन्धिशुक्ला मधुगन्धे धनं बहु ।
मांसलस्निग्धः सुखी स्याच्च सिंहस्निग्धः भूपतिः स्मृतः ।
भवेत् सिंहकटी राजा निग्धः कपिकटिर्नरः ॥
नृपाश्चोन्नतकक्षाः स्युर्ज्ञिग्धा विषमकक्षकाः ।
वलिमध्यगता नाभिः शूलधारां करोति हि ॥
अधो गवाढ्यं कुर्य्याच्च नृपत्वं पद्मकर्णिका ।
अनुद्धतेषुपुष्टेषु भवन्ति सुभगा नराः ।
निर्हीना विषमैर्दोषैः पीनोपचितकैर्नृपाः ॥
समोन्नतश्च हृदयमकम्पं मांसलं पृथु ।
नृपाणामधमानाञ्च खरलोम शिराचयम् ॥
कम्बुग्रीवश्च नृपतिर्लम्बकर्णोऽतिभक्षकः ।
आजानुलम्बिनौ बाहू दृष्टौ पीनौ नृपेश्वरे ॥
मणिबन्धैर्निगूढैश्च सुश्लिष्टसुभसन्धिभिः ।
नृपा हीनैः करच्छेदमग्नन्धैर्धनवर्जिताः ॥
निखाताक्षनखस्निग्धदर्शनैश्च परतर्ककाः ।
ताम्रैर्भूपा धनाढ्याश्च अरुक्षैः सयवैस्तथा ॥
धनाङ्गुलिश्च सधनस्निग्धो रेखाश्च यस्य वै ।
नृपतेः करतलगा मणिबन्धे समुत्थिताः ॥
शुक्लातपत्रशिविका गजपद्मोपमा नृपे ।
कुम्भाङ्कुशपताकाभा न्यग्रोधाभा निरीश्वरे ॥
दामाभाश्च गवाढ्यानां खस्तिकाभा नृपेश्वरे ।
चक्राङ्कितोमरधनुःकुन्ताभा नृपतेः करे ॥
मांसलैश्च घनोपेता अवक्रैरधरैर्नृपाः ।
बिम्बोपमैश्च स्फुटितैरोष्ठैश्च खण्डितैः ॥
विवर्णैर्धनहीनाश्च दक्षाः स्निग्धा घनाः शुभाः ।
तीक्ष्णा दंष्ट्राः समाः श्रेष्ठा जिह्वा रक्ता समा शुभा ॥
शुक्ला दीर्घा च विज्ञेया तालु श्वेतं धनेश्वरे ।
लक्ष्मा च परुषा वक्त्रं समं सौम्यञ्च संवृतम् ॥
भूषणाममलं श्रेष्ठं विपरीतञ्च दुःखिनाम् ।
शुक्लकर्णाश्च राजानो रोमकर्णाः शतायुषः ॥
करा: स्निग्धावनद्धैश्च बालमेमांसलैर्नृपाः ।
श्रोण्यन्तुचिपिटनासः श्रेष्ठो भाग्यवतां भवेत् ॥
अल्पच्छिद्रा सुपुटा च अवक्रा च नृपेश्वरे ।
संवृतैश्च ललाटैश्च नृपता उन्नतैर्नृपाः ॥
ललाटोपस्थतास्तिस्रो रेखाः स्युः शतवर्षिणाम् ।
नृपतेः स्याच्चतस्रोऽपि पञ्चवत्यथ ॥
ह्रस्वाकारैः शिरोभिस्तु नृपा निम्नशिरा धनी ।
बहुमतश्चतुरंसो रक्तः सप्तरसौ नृपः ॥"
इति गारुडे नरलक्षणवर्णं नाम ६६ अध्यायः ॥
अपि च ।
"पार्थिवस्य तु वक्ष्यामि भक्तानाञ्चैव लक्षणम् ।
सर्व्वाणि यो महीपालः सम्यङ्नित्यं परीक्षयेत् ॥
राज्यं पालयते नित्यं सत्यधर्म्मपरायणः ।
निर्जित्य परसैन्यानि क्षितिं धर्म्मेण पालयेत् ॥
पुष्यं पुष्यं विचिन्वीयान्मूलच्छेदं न कारयेत् ।
मालाकार इवारण्ये न यथाङ्गारकारकः ॥
दुष्टो चौरश्च शुद्धोऽपि विक्रेतारो न शुद्धते ।
परराट्टं महीपालो कालवाक्यञ्च दूषयेत् ॥
नोधस्निघ्नान्तु यो धेन्वाः चौरार्थी लभते पयः ।
एवं राष्ट्रमयोगेन पीड्यमानं न वर्द्धते ॥
तस्मात् सर्व्वप्रयत्नेन पृथिवीमनुपालयेत् ।
पालकस्य भवेद्भूमिः कौर्त्तिरायुर्यशो बलम् ॥
अभ्यर्च्य विष्णुं धर्म्मात्मा लोकानाप्नोति दुर्लभान् ।
प्रजाः पालयितुं शक्तः पार्थिवो यो जितेन्द्रियः ॥
ऐश्वर्य्यमक्षयं प्राप्य राजा धर्म्मे मतिञ्चरेत् ॥"
इति गारुडे १११ अध्यायः ॥ * ॥
ब्रह्माभिषिक्तराजानो यथा,—
श्रीपराशर उवाच ।
"यदाभिषिक्तः स पृथुः पूर्व्वं राज्ये महर्षिभिः ।
ततः क्रमेण राज्यानि ददौ लोकपितामहः ॥
नक्षत्रग्रहविप्राणां वीरुधां वाप्यथेशतः ।
सोमं राज्ये ददाद्ब्रह्मा यज्ञानां तपसामपि ॥
राज्ञां वैश्रवणं राज्ये जलानां वरुणं तथा ।
आदित्यानां पतिं विष्णुं वसूनामथ पावकम् ॥
प्रजापतीनां दक्षन्तु वास्तवं मरुतामपि ।
दैत्यानां दानवानाञ्च प्रह्लादमधिपं ददौ ॥
पितॄणां धर्म्मराजानं यमं राज्येऽभ्यषेचयत् ।
ऐरावतं गजेन्द्राणामुग्राणां पतिं ददौ ॥
पतत्रीणाञ्च गरुडं देवानामपि वासवम् ।
उच्चैःश्रवसमश्वानां वृषभन्तु गवामपि ॥
शेषन्तु नागराजानं मृगाणां सिंहमीश्वरम् ।
वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत् ॥
एवं विभज्य राज्यानि दिशां पालानलम्बरम् ।
प्रजापतिपतिर्ब्रह्मा स्थापयामास सर्व्वतः ॥
पूर्व्वस्यां दिशि राजानं वैराजस्य प्रजापतेः ।
दिशः प्राचं सुधन्वानं पुत्रं वै सोऽभ्यषेचयत् ॥
दक्षिणस्यां दिशि तथा कर्दमस्य प्रजापतेः ।
पुत्रं शङ्खपदं नाम राजानं सोऽभ्यषेचयत् ॥
पश्चिमायां दिशि तथा रजसः पुत्रमच्युतम् ।
केतुमन्तं महात्मानं राजानमभिषिक्तवान् ॥
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
उदीच्यां दिशि दुर्द्धर्षं राजानमभिषिक्तवान् ॥
तैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मतः प्रतिपाल्यते ॥
एते सर्व्वे प्रकृत्यस्य स्थितौ विष्णोर्महात्मनः ।
विभूतिभूता राजानो ये चान्ये मुनिसत्तम ॥
ये भविष्यन्ति येऽतीताः सर्व्वभूतेश्वरा द्विज ।
ते सर्व्वे सर्व्वभूतस्य विष्णोरंशा द्विजोत्तम ॥"
इति श्रीविष्णुपुराणे प्रथमेऽंशे २२ अध्यायः ॥*
सूत उवाच ।
"एवं सृष्टासु सर्व्वासु स्थावरासु चरासु च ।
ब्रह्मा क्रमेण राज्यानि यादेशमसृजत्पुरा ॥
द्विजानां वीरुधाञ्चैव नक्षत्राणां ग्रहैः सह ।
यज्ञानां तपसाञ्चैव सोमं राज्येऽभ्यषेचयत् ॥
दृष्ट्वासृष्टिञ्च सर्व्वेषां ददावङ्गिरसामपि ।
भृगूणामाधिपत्ये च काव्यं राज्येऽभ्यषेचयत् ॥
आदित्यानां पुनर्व्विष्णुं वसूनामथ पावकम् ।
प्रजापतीनां दक्षञ्च मरुतामथ वासवम् ॥
दैत्यानामथ राजानं प्रह्लादं दितिनन्दनम् ।
नारायणन्तु साध्यानां रुद्राणां वृषभध्वजम् ॥
मृगाणामधिपत्ये च कार्यं राज्येऽभ्यषेचयत् ।
आदित्यानां पुनर्व्विष्णुं वसूनामथ पावकम् ।
प्रजापतीनां दक्षञ्च मरुतामथ वासवम् ॥
दैत्यानामथ राजानं प्रह्लादं दितिनन्दनम् ।
नारायणन्तु साध्यानां रुद्राणां वृषभध्वजम् ॥
मृगाणामथ शार्दूलं गरुडं पततां वरम् ।
गन्धर्व्वाणां चित्ररथं नागानामथ वासुकिम् ॥
गन्धानां मरुतञ्चैव भूतानाञ्च शरीरिणाम् ।
सर्व्वेषां दंष्ट्रिणां शेषं सर्पाणाञ्चैव तक्षकम् ॥
सागराणां नदीनाञ्च मेघानां वर्षितस्य च ।
आदित्यानामथ तमं पर्ज्जन्यमभिषिक्तवान् ।
सर्व्वाक्षरोगबाधानां कामदेवं तथा प्रभुम् ॥
ऋतूनामधिमासानां दिवसानां तथैव च ।
पक्षाणाञ्च क्षपाणाञ्च मुहूर्त्ततिथिपर्व्वणाम् ॥
कलाकाष्ठाप्रमाणानां गतेरयनयोस्तथा ।
गणितस्याथ योगस्य चक्रे संवत्सरं प्रभुम् ॥
प्रजापतेर्विरजसः पूर्व्वस्यामभिषेचयन् ।
पुत्रं नाम्ना सुधामानं राजानञ्चाभ्यषेचयत् ॥
यथाप्रदेशं राजानं दक्षिणस्यां प्रजायते ।
कर्दमस्य शङ्खपदं पुत्रं राज्येऽभिषिक्तवान् ॥
पश्चिमस्यां दिशि तथा रजसः पुत्रमुत्तमम् ।
केतुमन्तं महात्मानं राजानं ह्यभ्यषेचयत् ॥
तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
दिगुत्तरायां पुत्रन्तु राजानमभ्यषेचयत् ॥
मानुषाणामधिपतिं चक्रे वैवस्वतं मनुम् ।
तैरेव पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मेण परिरक्ष्यते ॥
स्वायम्भुवेऽन्तरे पूर्व्वं ब्रह्मणा तेऽभिषेचिताः ।
इन्द्रादिलोकपालास्तु पुनर्व्वैवस्वतेऽन्तरे ॥
राजसूयेऽभिषिक्तस्तु पृथुः पूर्व्वं महर्षिभिः ।
मनुभिर्व्विधिना तद्वत् सोऽधिराजः प्रतापवान् ॥"
इत्याद्ये वह्निपुराणे वराहप्रादुर्भावनामाध्यायः ॥
राजकर्त्तव्यकर्म्माणि यथा,—
मदालसोवाच ।
"वत्स ! राज्याभिषिक्तेन प्रजारञ्जनमादितः ।
कर्त्तव्यमविरोधेन स्वधर्म्मेण महीभृता ॥"
अविरोधेन धर्म्मस्याविरोधेन ।
"व्यसनानि परित्यज्य सप्तमूलहराणि वै ।
आत्मा रिपुभ्यः संरक्ष्यो बहिर्मन्त्रविनिर्गमात् ॥
अरक्षणाद्यमाप्नोति स्वचक्रस्यन्दनादृषः ।
तथा राज्याप्यसन्दिग्धं बहिर्मन्त्रं विनिर्गमात् ॥
दुष्टादुष्टांश्च जानीयादमात्यानरिदोषतः ।
चरैश्चरास्तथा शत्रोरन्वेष्याः प्रयत्नतः ॥
विश्वासो न तु कर्त्तव्यो राज्ञा मित्रात्मवन्नृप ।
कार्य्ययोगादमित्रेऽपि विश्वसेत नराधिपः ॥
स्थानवृद्धिक्षयज्ञेन बाह्यगुह्यविदात्मना ।
भवितव्यं नरेन्द्रेण न कामवशवर्त्तिना ।
प्रागात्मा मन्त्रिणश्चैव ततो भृत्यो महीभृता ।
जेयाश्चान्तरं पौरा विरुध्यन्ते ततोऽरिभिः ॥
यस्त्वेतानविजित्यैव वैरिणो विजिगीषते ।
सोऽजितात्मा जितामात्यः शत्रुवर्गेण बाध्यते ॥
तस्मात् कामादयः पूर्व्वं जेयाः पुत्र महीभृता ।
तज्जये हि जयो राज्ञो राजा नश्यति तैर्जितः ॥
कामः क्रोधश्च लोभश्च मदो मानस्तथैव च ।
हर्षश्च शत्रवो ह्येते नाशाय कुमहीभृताम् ॥
कामप्रसक्तमात्मानं ज्ञात्वा दक्षं निपातितम् ।

निवर्त्तयेत्तथा क्रोधादनुद्वाहं हतात्मजम् ।
हतमेलं तथा लोभान्मदाद्विंशं दिनेश्वरम् ।
मासादनायुषः पुत्रं हतं हर्षात् पुरन्दरम् ।
एभिर्जितैर्जितं सर्व्वं मरुत्तेन महात्मना ।
स्तुत्वा विवर्ज्ययेदेतान् षड्दोषांश्च महीपतिः ।
काककोकिलभृङ्गानां बकचाषशिखण्डिनाम् ।
हंसानां लोहकृद्वानां शिक्षेत चरितं नृपः ।"
काकात् सर्व्वार्थचिन्ता । कोकिलात् माधुर्य्यम् ।
भृङ्गात् प्रपीड्य अर्थाहरणम् । बकात् ध्यानैकाग्र्यता ।
चाषात् दूरपतितम् । शिखण्डिनश्चित्रतां सर्पग्रहणाय मूकतां राजा-
वाप्नुयादिति । हंसस्य सारग्राहित्वम् । लोहकृद्वात् सन्धानम् ।
"कौशिकस्य क्रियां कुर्य्याद्दिवसे मनुजेश्वरः ।
चेष्टां पिपीलिकानाञ्च काले भूपः प्रदर्शयेत् ।"
कौशिकस्य उलूकस्य रात्रौ काकावस्कन्दनम् ।
पिपीलिकानां सैन्यावहुत्वं सर्पभक्षणञ्च ।
"श्रेयोऽग्निविस्फुलिङ्गानां बीजक्षेत्राच्च शाल्मले: ।
चन्द्रसूर्य्यस्वरूपञ्च नीत्यर्थं पृथिवीपतिना ॥"
अग्निविस्फुलिङ्गात् दूरात् दाहः । बीजाक्षेत्रदर्शनिष्पादनम् । उष्णकाले चन्द्रः सुखदायी
शीतकाले न । एवं सूर्य्यः शीते सुखदायी उष्णकाले न । एवं कालानुसारेण सुखदुःखदातृत्वम् ॥
"वधकात् पक्षिग्रहभूमिन्या गुर्व्विणीस्त्रीक्षणात् ।
प्रजा नृपेण चादेया तथा चण्डालयोषितः ॥"
वधकात् निर्दृणत्वम् । पक्षात् कण्टकगोपनं स्थितसुखता च । ग्रहभात् हत्वापि शत्रून्
नीरिकः । यथा ग्रहभोऽपदः परोन्नतिं न सहते । भूमिन्या आसिञ्चापनम् । गुर्व्विण्या
स्नानात् कालेऽर्थादानम् । चण्डालयोषित् शौनकी छागग्रिरो दर्शयित्वा अन्यद्विक्रीणाति ।
"शत्रूकार्य्यमसोमानां तद्वदायोर्महीपतिः ।
रूपाणि पञ्च कुर्व्वीत महीपालनकर्म्मणि ।
यथेन्द्रश्चतुरो मासान् वार्य्यर्थैश्चैव भूतलम् ।
आप्याययेत्तथा लोकान् परिचारैर्महीपतिः ॥"
परिचारैरर्थदानादिभिः ।
"मासानष्टौ यथा सूर्य्यस्तोयं हरति रश्मिभिः ।
सूर्य्यरूपेणाभ्युपायेन तथा गृह्णादिना नृपः ॥
यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ।
तथा प्रियाप्रियौ राजा दुष्टादुष्टे समो भवेत् ।
पूर्णेन्दुमालोक्य यथा प्रीतिमान् जायते नरः ।
एवं यत्र प्रजाः सर्व्वा निर्व्वृत्तास्तच्छ्रियव्रतम् ।
मारुतः सर्व्वभूतेषु विगूढश्चरते यथा ।
एवं चरेन्नृपश्चारैः पौरामात्यारिबन्धुषु ।
न लोभार्थेन कामार्थेनार्थार्थेर्यस्य मानसम् ।
महार्थैः क्षयते धर्म्मान् स राजा स्वर्गच्छति ॥"
लोभादिपर्य्योजनैः ।
"उत्पथग्राहिणो मूढान् स्वधर्म्मात्खलितान्नरान् ।
यः करोति निजे धर्म्मे स राजा स्वर्गच्छति ॥"
उत्पथग्राहिणः पापिनः ।
"वर्णधर्म्मो न हीयन्ति यस्य राष्ट्रे तथाश्रमाः ।
राज्ञस्तस्य सुखं तात परत्रेह च शाश्वतम् ।
एतद्राज्ञः परं ह्यस्त्रं तथैतद्दुष्टनिग्रहकारणम् ।
स्वधर्म्मे स्थापनं नृणां चाल्पते न कुबुद्धिभिः ।
पालनेनैव भृत्यानां हतस्त्रो महीपतिः ।
सम्यक् पालयिता भागं धर्म्मस्यान्नोति वै यतः ।
एवमाचरते राजा चातुर्व्वर्ण्यस्य रक्षणे ।
स सुखी विहरत्येव शक्रस्येति सलोकताम् ॥"
इति मार्कण्डेयपुराणे मदालसोपाख्यानाध्यायः तट्टीका च । * । राजाभिषेकस्य विहितनक्षत्राणि यथा,—
"पुष्यानुराधा श्रेष्ठा च रोहिणी चोत्तरात्रयम् ।
हस्ताश्विनी रेवती च वृषाभिषेचनोत्तमाः ॥"
इति ज्योतिःसारसंग्रहः ॥
अस्य विवरणं अभिषेकशब्दे द्रष्टव्यम् । * ।
राज्ञि वर्ज्जनीयानि यथा,—
"नृपे कौशिप्रतापान्नाद्दुष्टग्राहिविवेकिताः ।
धर्म्मप्रयागसंग्रामग्रन्थाटाः सनयत्नमाः ॥
प्रजारागोऽरिशैलादिवासोऽरिपुरभूम्यना ।
औदार्य्यधैर्य्यगाम्भीर्य्यशौर्य्यैश्चर्य्योद्यमादयः ॥"
इति कविकल्पलतायाम् १स्तवके २कुसुमम् ॥*॥
राजान्नभक्षणे दोषो यथा,—
वाराह उवाच ।
"शुद्धा भागवता भूत्वा मम कर्म्मपरायणाः ।
ये तु भुञ्जन्ति राजान्नं लोभेन च भयेन च ॥
आपन्नता हि भुञ्जीत राजान्नन्तु वसुन्धरे ।
दशवर्षसहस्राणि पच्यन्ते नरके नराः ॥
भगवद्वचनं श्रुत्वा सा मही ग्रसितव्रता ।
उवाच मधुरं वाक्यं सर्व्वलोकसुखावहम् ॥
धरण्युवाच ।
शृणु तत्त्वेन मे देव हृदये हि व्यवस्थितम् ।
को नु दोषो हि राज्ञान्नु तन्मे त्वं वक्तुमर्हसि ॥
ततो भूम्या वचः श्रुत्वा सर्व्वधर्म्मविदां वरः ।
प्राह नारायणो वाक्यं धर्म्मकामां वसुन्धराम् ॥
वाराह उवाच ।
शृणु सुन्दरि ! तत्त्वेन गुह्यमेतदनिन्दिते ।
राजान्नन्तु न भोक्तव्यं शुभैर्भागवतैः सदा ।
यद्यप्येष समत्वेन राजा लोकं प्रवर्त्तते ।
राजसस्तामसो वापि कुर्व्वन् कर्म्म सुदारुणम् ।
अपि वा गर्हितं तेन राजान्नन्तु वसुन्धरे ।
धर्म्मसन्धारणार्थाय न तु मे रोचते भुवि ।
ततोऽहं संप्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यथा राज्ञान्नु भोक्तव्यं वै शुद्धैर्भागवतैः शुभैः ।
ख्यापयित्वा तु मां देवि विधिदृष्टेन कर्म्मणा ।
धनधान्यप्रदृद्धानि दत्त्वा भागवतेरपि ॥
सिद्धं भागवतैर्ज्ञान्नं मम प्रापञ्चपेषकम् ।
भुञ्जानस्तु वरारोहे न स पापेन लिप्यते ।
एवं विष्णुवचः श्रुत्वा धरणी ग्रसितव्रता ।
वाराहरूपिणं देवं प्रत्युवाच वरानना ।"*॥
तदन्नभोजनप्रायश्चित्तानि यथा,—
धरण्युवाच ।
"राजान्नन्तु ततो भुक्त्वा शुद्धो भागवतः शुचिः ।
कर्म्मणा केन शुद्धेत तन्मे ब्रूहि जनार्द्दन ॥
वाराह उवाच ।
शृणु तत्त्वेन मे देवि यन्मां त्वं भीरु भाषसे ।
तरन्ति मनुजा येन राजान्नस्योपसङ्गकाः ॥
एकं चान्द्रायणं कृत्वा तप्तकृच्छ्रञ्च पुष्कलम् ।
कृच्छ्रात् सान्तपनञ्चैकं शीघ्रं शुध्यति किल्बिषात् ।
शुक्ला वै राज्ञोऽन्नानि इदं कर्म्म समारभेत् ।
न तस्येहापराधोऽस्ति वसुधे वै वचो मम ॥
एवमेव न भोक्तव्यं राजान्नन्तु कदाचन ।
ममात्र प्रियकामाय यदीच्छेत् परमां गतिम् ॥"
इत्यादि वाराहे राजान्नभक्षणप्रायश्चित्तं नामाध्यायः । * । अपि च ।
"राजान्नं तेन आदत्त शूद्रान्नं ब्रह्मवर्चसम् ।
इत्याद्यभिधाय,—
शुक्ला चान्यतमस्यान्नममत्वा क्षपयेन्नरम् ।
मत्वा भुक्ता चरेत् कृच्छ्रं रेतो विण्मूत्रमेव च ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(राजनम् । यथा, ऋग्वेदे । १० । ४८ । ४ ।
"अहं भुवं यजमानस्य राजनि ।"
"अहं यजमानस्य राजनि राजनार्थे भुवं अभवं समर्थ इति ग्रिफः ।" इति तद्भाष्ये सायणः ।)
राजातनः, पुं, (राजानं अतनोति । अत सातत्यगमने + "बहुलमन्यत्रापि ।" उणा० २ । ७८ । इति युच् ।) प्रियालवृक्षः । इति शब्दमाला ।
राजादनं, क्ली, (राजभिरद्यते इति । अद भक्षणे + कर्म्मणि ल्युट ।) चौरिका । प्रियालः । किंशुकः । इति मेदिनी । ने, २०५ । (यथा, सुश्रुते । १ । ४६ । लवणवर्गे ।
"दाडिमामलकं द्राक्षा खर्ज्जूरं सपरूषकम् ।
राजादनं मातुलुङ्गं फलवर्गं प्रशस्यते ॥"
पुंलिङ्गान्तोऽपि दृश्यते । इत्यमरः । २ । ४ । ४५ ॥ हेमचन्द्रश्च । ४ । २०८ ॥ चौरिकार्थे पर्य्यायो यथा,—
"राजादनः क्षीरवृक्षः पालाशी वानरप्रियः ॥"
इति वैद्यकरत्नमालायाम् ॥
किंशुकार्थे पर्य्यायो यथा,—
"वातपोथः पलाशः स्याद्वानप्रस्थश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोत्तरः ॥")
राजानुजीवी, [न्] त्रि, (राज्ञः अनुजीवी ।) राजोपजीवी । तस्य कर्म्मादि यथा,—
मत्स्य उवाच ।
"यथानुवर्त्तितव्यं स्यात्सभ्यैः राजोपजीविना ।
तथा ते कथयिष्यामि निबोध गदतो मम ॥
आज्ञा सर्व्वात्मना कार्य्या स्वशक्त्या रविनन्दन ।
आत्मिष्ठ वचनन्तस्य न वक्तव्यं तथा वचः ॥
अनुकूलं प्रियन्तस्य वक्तव्यं ज्ञानसंहितं ।
रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् ॥
परार्थमस्य वक्तव्यं स्वार्थे चेत्सि भार्गव ।
स्वार्थः सुहृद्भिश्चक्तव्यो न स्वयन्तु कदाचन ।
कार्य्याभिघातः सर्व्वेषु रक्षितव्यः प्रयत्नतः ।
न च हिंसं धनं किञ्चिन्नियुक्तेन च कर्म्मणि ॥
नोपेक्षं भाष्यमाणञ्च तथा राज्ञः प्रियो भवेत् ।

राज्ञश्च न तथा कार्य्यं वैद्यभाषितचेष्टितम् ।
राजसेवा न कर्त्तव्या तद्विद्विद्वं विवर्जयेत् ।
राज्ञः समोऽधिको वा न कार्य्यो वैद्यो विजानता ॥
दूतादिषु तथैवास्य कौशलञ्च प्रदर्शयेत् ।
प्रदर्शं कौशलञ्चास्य राजानञ्च विशेषयेत् ॥
अन्तःपुरधनाध्यक्षैरदूते: समागते: ।
संसर्गं न व्रजेद्राजन् ! विना पार्थिवशासनम् ॥
निःस्नेहनाशवमानं प्रयत्नेन च गोपयेत् ।
यच्च गुह्यं भवेद्राज्ञो न तल्लोके प्रकाशयेत् ॥
नृपेण आविनं यत् स्याद्दाक्षाद्यावाद्यं नृपोत्तम ! ।
न तत् संश्रावयेल्लोके तदा राज्ञः प्रियो भवेत् ॥
आह्वाय्यमाने चान्यस्मिन् ससृत्याय त्वरान्वितः ।
अहं किं करवाणीति वाचो राजा विजानता ॥
कार्य्यावस्थाञ्च विज्ञाय कार्य्यमेव तथा भवेत् ।
सततं क्रियमाणेऽस्मिन् लाघवन्तु व्रजेत् ध्रुवम् ॥
राज्ञः प्रियाणि वाक्यानि न चात्यर्थं पुनःपुनः ।
न हास्यशीलश्च भवेन्न चापि भ्रुकुटीमुखः ॥
नातिवक्ता न निर्वक्ता न च मत्सरिकस्तथा ।
आत्मसम्भावितश्चैव न भवेत् कथञ्चन ॥
दुष्कृतानि नरेन्द्रस्य न तु संकीर्त्तयेत् क्वचित् ।
वस्त्रं गुह्यमलङ्कारं राज्ञा दत्तञ्च धारयेत् ॥
औदार्य्येण न तद्देयमन्यस्मै भूतिमिच्छता ।
तत्रैवोपासनं कार्य्यं दिवास्वप्नं न कारयेत् ॥
नानिर्दिष्टे तथा द्वारे प्रविशेत् कदाचन ।
न च पश्येत्तु राजानमयोग्यासु च भूमिषु ॥
राज्ञस्तु दक्षिणे पार्श्वे वामे चोपविशेत्तथा ।
पुरस्तात्तु तथा पश्चादासन्नन्तु विगर्हितम् ॥
जृम्भा निष्ठीवनं कासं क्षोपं पर्य्यस्तिकाश्रयम् ।
भ्रुकुटीं बाल्यमुद्गारं तत्समीपे विवर्जयेत् ॥
स्वयं तत्र न कुर्व्वीत स्वगुणाख्यापनन्तथा ।
स्वगुणाख्यापने चैव परमेव प्रयोजयेत् ॥
हृदयं निर्म्मलं कृत्वा परां भक्तिमुपाश्रितैः ।
अनुजीविगणैर्भाव्यं नित्यं राज्ञामतन्द्रितैः ॥
ग्राम्यं शौल्यञ्च पैशुन्यं नास्तिक्यं क्षुद्रतान्तथा ।
चापल्यञ्च परित्याज्यं नित्यं राजानुजीविना ॥
श्रुतेन विद्याशिल्पैश्च संयोज्यात्मानमात्मना ।
राजसेवां ततः कुर्य्याद्भूतये भूतिवर्द्धिनीम् ॥
नमस्कार्य्याः सदा चास्य पुत्रवल्लभमन्त्रिणः ।
सचिवैश्चास्य विश्वासो न तु कार्य्यः कथञ्चन ॥
अपृष्टश्चास्य न ब्रूयात् कामं ब्रूयात्तथापदि ।
हितं पथ्यञ्च वचनं हितैः सह सुनिश्चितम् ॥
चित्तवेत्तास्य विज्ञेयं नित्यमेवोपजीविना ।
मर्त्तुराराधनं कुर्य्यात् चित्तज्ञो मानवः सुखम् ॥
रागापरागौ चैवास्य विज्ञेयौ भूतिमिच्छता ।
त्यजेदृत्तिं विरक्तस्तु रक्तो वृत्तिन्तु कारयेत् ॥
विरक्तः कारयेन्नाशं विपक्षाभ्युदयन्तथा ।
आत्मावज्ञानकं कृत्वा फलनाशं करोति च ॥
अकोपोऽपि सकोपान्तः प्रसन्नोऽपि च निष्फलः ।
वाक्यं स मन्दं वदति वृत्तिच्छेदं करोति च ॥
प्रदेयवाक्यसुदितो न सम्भावयतेऽन्यथा ।
आराधनासु सर्व्वासु सुप्रयत्नं विचेष्टते ।
कथासु दोषं क्षिपति वाक्यभङ्गं करोति च ।
लक्ष्यते विमुखेनैव गुणसंकीर्त्तने कृते ॥
दृष्टिं क्षिपत्यन्यत्र क्रियमाणे च कर्म्मणि ।
विरक्तलक्षणं स्नेतत् प्रभुणा रक्तस्य लक्षणम् ॥
दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् ।
कुशलादिपरिप्रश्नी संप्रयच्छति चासनम् ॥
विरक्तदर्शने चास्य रहस्ये च न गृह्यते ।
जायते हृष्टवदनः श्रुत्वा तस्य तु तत्कथाम् ॥
अप्रियाण्यपि वाक्यानि तदुक्तान्यभिनन्दति ।
उपायनञ्च गृह्णाति स्तोकमप्यादरात्तथा ॥
कथान्तरेषु स्मरति प्रहृष्टवदनस्तथा ।
इति रक्तस्य कर्त्तव्या सेवा रविकुलोद्वह ॥
आपत्सु न त्यजेत् पूर्व्वं विरक्तमपि सेवितम् ॥
मित्रं न चापत्सु तथा च भृत्यं
त्यजन्ति ये निर्गुणमप्रमेयम् ।
प्रभुं विशेषेण च ते व्रजन्ति
सुरेन्द्रधामामरवृन्दवन्द्यम् ॥"
इति मत्स्यपुराणे राजधर्म्मे अनुजीविवृत्तिनाम २१६ अध्यायः ॥

राजादनी, स्त्री, (राजभिरद्यते या । अद् + कर्म्मणि ल्युट् । ङीप् ।) वृक्षविशेषः । चौरिगी इति भाषा । तत्पर्य्यायः । राजफलः २ चीरवृक्षः ३ वृषद्रुमः ४ निम्बबीजः ५ मधुफलः ६ कपोतः ७ माधवोद्भवः ८ क्षीरी ९ गुच्छफलः १० भूपेष्टः ११ राजवल्लभः १२ श्रीफलः १३ दृढस्कन्धः १४ क्षीरशुक्रः १५ । अस्या गुणाः । मधुरत्वम् । पित्तनाशित्वम् । गुरुत्वम् । तर्पणत्वम् । वृष्यत्वम् । स्थौल्यकरत्वम् । हृद्यत्वम् । सुस्निग्धत्वम् । मेहनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"क्षीरिकायाः फलं वृष्यं बल्यं स्निग्धं हिमं गुरु ।
तृष्णाहृच्छर्दिमदभ्रान्तिक्षयदोषव्रयापहम् ॥"
इति भावप्रकाशः ॥

राजान्न, क्ली, (राजयोग्यमन्नम् । अन्नानां राजा इति वा ।) अन्यदेशोद्भवशालिविशेषः । तत्पर्य्यायः । वृषान्नम् २ राजार्हम् ३ दीर्घमूककम् ४ धान्यश्रेष्ठम् ५ राजधान्यम् ६ राजेष्टम् ७ दीर्घकूरकम् ८ । अस्य गुणाः । त्रिदोषघ्नत्वम् । सुस्निग्धत्वम् । मधुरत्वम् । लघुत्वम् । दीपनत्वम् । बलकारित्वम् । पथ्यत्वम् । कान्तिवीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ (राज्ञः अन्नम् ।) राजस्वामिकभक्तम् । तद्भोजननिषेधप्रायश्चित्ते राजगृह्यादि दृश्यते ॥ (राजान्नभक्षणेन हि तेजोहानिर्भवति । यथा, मनुः । ४ । २१८ ।
"राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ।
आयुः सुवर्णकारान्नं यशश्चर्म्मावकर्त्तिनः ॥")

राजाम्रः, पुं, (आम्राणां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) आम्रविशेषः । तत्पर्य्यायः । राजफलः २ सराम्रः ३ कोकिलोत्सवः ४ मधुरः ५ कोकिलानन्दः ६ कामेष्टः ७ नृपवल्लभः ८ । अस्य फलगुणाः । कोमलत्वम् । कटुत्वम् । पित्तदाहदत्वञ्च ॥ सुपक्वस्य तस्य गुणाः । स्वादुत्वम् । मधुरत्वम् । पुष्टिवीर्य्यबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"राजाम्रस्तु आम्रातः कामाङ्गो राजपुत्रकः ।
राजाम्रं तुवरं स्वादु विषदं शीतलं गुरु ।
ग्राहि रूक्षं विबन्धाध्मवातश्लेष्मपित्तनुत् ॥"
इति भावप्रकाशः ॥

राजाम्लः, पुं, (अम्लानां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) अम्लवेतसः । इति राजनिर्घण्टः ॥

राजार्कः, पुं, (अर्काणां राजा श्रेष्ठत्वात् ।) श्वेतार्कवृक्षः । सादा आकन्द इति भाषा । तत्पर्य्यायः । वसुकः २ अर्कः ३ मन्दारः ४ गणरूपकः ५ काष्ठीलः ६ सदापुष्पः ७ । इति राजनिर्घण्टः ॥ अलर्कः ८ प्रतापसः ९ । इति शब्दरत्नावली ॥

राजार्हं, क्ली, (राजानमर्हतीति । अर्हं + अण् ।) अगुरु । (अस्य पर्य्यायो यथा,—
"अगुरु प्रवरं लोहं राजार्हं योगजन्तथा ।
वंशिकं क्रमिजं वापि क्रमिजग्धमनार्यकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
राजयोग्ये, त्रि । इति मेदिनी । हे, २३ ॥ (यथा, गो० रामायणे । ३ । ४६ । ४२ ।
"तदेदमुपपन्नं मे रणरूपस्य धर्षणम् ।
राजार्हाणि च रत्नानि रत्नभाजो वयं ध्रुवम् ॥")

राजार्हा, स्त्री, (राज्ञोऽर्हा ।) जम्बूः । इति राजनिर्घण्टः ॥

राजालाबूः, स्त्री, (अलाबूनां राजा । राजदन्तादित्वात् परनिपातः ।) स्वादुतुम्बी । मिठा लाउ इति भाषा । तत्पर्य्यायः । महातुम्बी २ मधुरालाबुनी ३ ग्रामालाबूः ४ तुम्बकः ५ भक्ष्यालाबूः ६ अलाबुनी ७ मिष्टतुम्बी ८ । अस्याः फलगुणाः । वृष्यत्वम् । कफपित्तहरत्वम् । गुरुत्वञ्च । इति मदनविनोदः ॥

राजालुकः, पुं, (आलूनां राजा । ततः स्वार्थे कन् ।) महाकन्दः । इति हारावली । १०१ ॥

राजावर्त्तः, पुं, (राजानं आवर्त्तयति आनन्दयतीति । आ + वृत् + णिच् + अच् । यद्वा, राजः शोभमान आवर्त्तो यत्र ।) उपरत्नभेदः । रेउटी इति हिन्दी भाषा । तत्पर्य्यायः । वृषावर्त्तः २ राजावर्त्तकः ३ आवर्त्तमणिः ४ आवर्त्तः ५ । अस्य गुणाः । स्पृदुत्वम् । स्निग्धत्वम् । शिशिरत्वम् । पित्तनाशनत्वम् । भूषणे प्रयोजितश्चेत् नृणां बहुभाग्यकरत्वञ्च । इति राजनिर्घण्टः ॥ विराटदेशजहीरकः । तत्पर्य्यायः । विराटजः २ राजपट्टः ३ । इति हेमचन्द्रः । ४ । १३२ ॥ (यथा, कथासरित्सागरे । ७३ । ३३६ ।
"राजावर्त्तोपलश्यामतले सदासवेश्मनि ॥"
तथास्य गुणाः ।
"राजावर्त्तः कटुश्लिक्तः शिशिरः पित्तनाशनः ।

राजावर्त्तः प्रमेहघ्नः हृद्दोषिक्षयनाशनः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

राजाहिः, पुं, (अहीनां राजा । राजदन्तादित्वात् परनिपातः ।) द्विगुसमासः । तत्पर्य्यायः । दिसुखादिः २ विलावासी ३ विषाशुषः ४ । इति शब्दरत्नावली । अहीराजिः ५ । इति त्रिकाण्डशेषः ॥

राजिः, स्त्री, (राजते इति । राज + "वसिवपियजिराजीति ।" उणा० ४ । १२४ । इति इन् ।) श्रेणी । (यथा, अमरुशतके ४६ ।
"उल्लसति रोमराजिः स्तनमुखभोगैरलक्षितेव ।") रेखा । इति मेदिनी । जे, १४ । (यथा, महाभारते । ७ । २२ । ६२ ।
"कलायपुष्पवर्णासु श्वेतलोहितराजयः ।
रथसेनं हयश्रेष्ठाः सम्प्रकुर्युर्हृदर्शनम् ।"
पुं, आयुधपुत्रविशेषः । स तु ऐलपौत्रः । यथा, महाभारते । १ । ७५ । २५ ।
"नहुषं दृढधर्म्माणं राजिं गयमनेनसम् ।
स्वर्भानवी सुतानेतानायोः पुत्रान् प्रचक्षते ।")

राजिका, स्त्री, (राजते या । राज + ण्वुल् । टापि अत इत्वम् ।) केदारः । राजसर्षपः । रेखा । इति मेदिनी । के, १४५ । षड्लिङ्गः । इति हेमचन्द्रः ॥ क्षुद्रसर्षपः । तत्पर्य्यायः । क्षवः २ क्षुताभिजनकः ३ क्षत्रिका ४ आसुरी ५ । इत्यमरः । २ । ६ । १६ । क्षुताभिजनकः ६ असुरी ७ । इति तट्टीका । रक्तसर्षपः । राई इति भाषा । तत्पर्य्यायः । राजी २ आसुरी ३ रक्तिका ४ रक्तसर्षपः ५ तीक्ष्णगन्धा ६ मधूलिका ७ क्षवकः ८ क्षुतकः ९ क्षवः १० । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातश्लेष्मकृमिव्रणनाशित्वम् । दीप्तपित्तप्रदत्वञ्च । तत्तैलगुणाः । तीक्ष्णत्वम् । वातादिदोषनाशित्वम् । शिरोरत्नत्वम् । यूककण्डूत्वनत्वम् । केशघ्नत्वम् । त्वग्दोषनाशित्वञ्च । तत्पत्रगुणाः । कटुत्वम् । उष्णत्वम् । कृमिवातकफकण्डूनाशकरत्वम् । स्वादुत्वम् । वह्निदीपनकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
राजी तु राजिका तीक्ष्णगन्धा क्षुत्कलिकासुरी ।
क्षवः क्षुताभिजनकः कृमिकः कृष्णसर्षपः ॥
राजिका कफपित्तघ्नी तीक्ष्णोष्णा रक्तपित्तकृत् ।
किञ्चिद्वातप्रदा कण्डूकुष्ठकोठकृमीन् हरेत् ।
अतितीक्ष्णा विशेषेण तद्वत् कृष्णापि राजिका ।"
इति भावप्रकाशः ॥

राजिकाफलः, पुं, (राजिकायाः फलमिव फलमस्य ।) गौरसर्षपः । इति राजनिर्घण्टः ॥

राजिफला, स्त्री, (राजीभूतानि श्वेतबिन्दूनि फलानि यस्याः ।) चीनाककटी । इति राजनिर्घण्टः ॥

राजिलः, पुं, (राजौ रेखास्त्यस्येति । राजि + सिध्मादित्वात् लच् । यद्वा, राजिं लातीति । ला + कः ।) कुक्कुरसर्षपः । इत्यमरः । १ । ८ । ५ ॥ (यथा, रघुः । ११ । २० ।
"किं मद्दोरसविसर्पिविक्रमो
राजिषेषु गरुडः प्रवर्त्तते ।")

राजी, स्त्री, (राजि + इदितोऽर्थादिति ङीष् ।) निच्छिद्रपङ्क्तिः । इति शब्दरत्नावली ॥ (श्रेणिः । यथा, माघे । ४ । ६ ।
"राजीवराजीवशुलोलभृङ्ग-
सङ्गन्तसङ्गन्ततिभिस्तटस्थाम् ।") राजिका । (अस्या गुणा यथा,—
"राजी तु राजिका तीक्ष्णगन्धा क्षुज्जनिकासुरी ।
क्षवः क्षुताभिजनकः कृमिकः कृष्णसर्षपः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥) रक्तसर्षपः । इति राजनिर्घण्टः ॥

राजीफलः, पुं, (राजीभूतानि श्रेणिबद्धानि फलानि यस्य ।) पटोलः । इति राजनिर्घण्टः ॥ (तस्यास्य पर्य्यायः ।
"पटोलः कुलकस्तिक्तः पाण्डुकः कर्कशच्छदः ।
राजीफलः पाण्डुफली राजेयश्चान्ततापसः ।
बीजगर्भः प्रतीकश्च कुहक्षा कासभञ्जनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

राजीवं, क्ली, (राजी रेखाश्चिरस्यास्तीति । राजी + "अर्शआद्यच् ।" ५ । २ । १०० । इत्यस्य वार्त्तिकोक्त्या मः ।) पद्मम् । इत्यमरः । १ । १० । ४१ ॥ (यथा, कुमारे । ३ । ४५ ।
"उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये ।")

राजीवः, पुं, (राजी अस्त्यस्येति । राजी + वः ।) हरिणभेदः । (अस्य लक्षणं यथा,—
"राजीवन्तु श्वसो श्वेयो राजीभिः परितो वृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
वृक्षौषधिभेदः । इति मेदिनी । वे, ४८ । (यथा, मनुः । ५ । १६ ।
"पाठीनरोहितावाद्यौ निर्णक्तौ हव्यकव्ययोः ।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः ।") वृक्षौ । इति । त्रिकाण्डशेषः । सारसपक्षी । इत्यमरः । राजीपक्षीवित्, त्रि । इत्यजयः ॥

राजेन्द्रः, पुं, (राजसु इन्द्र इव श्रेष्ठत्वात् ।) मण्डलेश्वरात् दशगुणो राजा । यथा,—
"चतुर्योजनपर्य्यन्तमधिकारं नृपस्य च ।
यो राजा तच्छतगुणः स एव मण्डलेश्वरः ।
तस्माद्दशगुणो राजा राजेन्द्रः परिकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः ॥ (राजश्रेष्ठः । यथा, महाभारते । २ । ४५ । ४१ ।
"कर्म्मणैतेन राजेन्द्र ! धर्म्मञ्च सुमहान्तं कृतः ॥") राजोदनसंज्ञकः, पुं, (राजोदनमिति संज्ञा यस्य । ततः कन् ।) भूताङ्कुशवृक्षः । इति राजनिर्घण्टः ॥

राज्ञी, स्त्री, (राज्ञः पत्नी । राजन् + ङीप् । यद्वा, राजते इति । राज + कनिन् । ततः स्त्रियां ङीप् ।) राजपत्नी । राजी इति भाषा ॥ (यथा, रघुः । १ । ५७ ।
"तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी ।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ॥")

सूर्य्यपत्नी । इति मेदिनी । ज्ञे, २ । राजपत्न्यां वर्त्तनीयानि यथा,—
"ईर्षां सौभाग्यगर्वस्यप्रीतिशृङ्गारमत्सराः ।
अपाङ्गातुर्य्यदाक्षिण्यप्रेमसम्भावनादयः ॥
वेषौधस्निग्धसीमन्तभाजनप्रसवस्त्रियः ।
कपोलाधरनेत्रभ्रूकटाक्षरदकन्धराः ॥
गर्व्वबाहुकरोरोजनाभीमध्यवलित्रयम् ।
श्रोणिश्रोणिजघोरुपादद्युग्मनखं क्रमात् ॥"
इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम् ॥
सूर्य्यपत्न्याः प्रभाणान्तरं यथा,—
सूत उवाच ।
"विश्वस्रष्टुः कश्यपात् पूर्व्वमदित्यामभवत् पुरा ।
तस्य पत्नीत्रयं तद्वत् संज्ञा राज्ञी प्रभा तथा ।
रेवन्तस्य सुता राज्ञी रेवन्तं सुषुवे सुतम् ।
प्रभा प्रभातं सुषुवे त्रयी संज्ञा तथा मनुम् ।
यमञ्च यमुना चैव यमलौ तु बभूवतुः ॥"
इति मात्स्ये २१ अध्यायः ॥
काष्ठः । इति । हेमचन्द्रः ॥ नीली इति राजनिर्घण्टः ॥ * ॥ (प्रतीची दिक् । यथा, छान्दोग्योपनिषदि । ३ । १५ । २ । "तस्य प्राची दिक् जुहूर्नाम सङ्गमाना नाम दक्षिणा राज्ञी नाम प्रतीची सुभूता नामोदीचीति ।"
'तथा राज्ञी नाम प्रतीची पश्चिमा दिक् राज्ञी राज्ञा वैश्वदेवाधिष्ठिता सन्ध्यारागयोगाद्या ।'
इति शाङ्करभाष्यम् ॥)

राज्यं, क्ली, (राज्ञो भावः कर्म्म वा । राजन् + "पत्यन्तपुरोहितादिभ्यो यक् ।" ५ । १ । १२८ । इति यक् ।) राज्ञः इदम् । तत्पर्य्यायः । नीवृत् २ मण्डलम् ३ जनपदः ४ देशः ५ प्रदेशः ६ विषयः ७ राष्ट्रम् ८ उपवर्त्तनम् ९ । इति शब्दरत्नावली । अमरमते नीवृज्जनपदौ अङ्गवङ्गकलिङ्गपञ्चालमगधकोशलादौ मण्डलेन ख्याते ग्रामसमूहे । देशविषयोपवर्त्तनानि च जनपदे जनपदसमुदाये । जनपदैकदेशे सजनिर्जलस्थानमात्रे च । उपाधिभेदेन देशादित्रिकं भिन्नार्थम् । सामान्येन प्रयोगदर्शनात् । नीवृदादयः पर्य्यायैकार्थाः । इत्यपरे । इत्यायुक्तम् । इति भरतः । * । तस्य लक्षणं अङ्गानि च यथा,—
"परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते ॥
अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चमः ।
एताः प्रकृतयस्तद्वद्विजिगीषोरुदाहृताः ॥
एताः पञ्च तथा मित्रं सप्तमं पृथिवीपतिः ।
सप्तप्रकृतिकं राज्यमित्युवाच बृहस्पतिः ॥
पौरश्रेष्ठी तदङ्गञ्च ब्रुवते ग्रन्थवेदिनः ॥
स्वाम्यमात्यः सुहृत् कोशो राष्ट्रं दुर्गं बलं तथा ।
पौरश्रेष्ठी च राज्याङ्गं प्रकृतिश्च भवेत् क्रमम् ॥"
इति शब्दरत्नावली ॥

अपि च ।
"लक्षाधिपत्यं राज्यं स्यात् साम्राज्यं दशलक्षके ।
शतलक्षे महीशानि महासाम्राज्यमुच्यते ॥"
इति वरदातन्त्रम् ॥

राज्यक्ता, स्त्री.(राज्या सर्व्वेभ्य अक्ता त्यक्ता ।) पिष्टराजिकादधिलवणमिश्रितसक्तावू-खलादि । राबता इति भाषा॥ यथा,—
"संचूर्ण्य निक्षिपेत्तक्रे भृशं जीरकहिङ्गु च ।
लवणान्तत्र वटकान् सकलानपि मज्जयेत् ॥
शुक्लसक्तत्र वटको वलहृद्रोचनो गुरु: ।
विबन्धहृद्विदाही च श्लेष्मल: पवनापह: ।
राज्यक्तयावितिरोचिष्या पाचन्या तांस्तु भक्षयेत्॥"
इति भावप्रकाशे क्षुताम्नवर्ग: ॥

राज्याङ्गं, क्ली, (राज्यस्य अङ्गम् ।) राज्यस्योपाय: । तत्पर्य्याय: । प्रकृति: २ । तत्तु अष्टविधं यथा । स्वामी १ अमात्य: २ सुहृत् ३ कोष: ४ राष्ट्रम् ५ दुर्गम् ६ बलम् ७ पौराणां श्रेण्यश्च ८ । अमर: । २ । ८ । १८ ॥ "स्वाम्यादय: सप्त पुरस्सरलोकश्रेयस्त्व राज्याङ्गप्रकृतिपदवाच्या: । राज्यं सप्ताङ्गम् । कस्यचिन्मते अष्टाङ्गत्वेनुभयमेव दर्शितम् । यदुक्तं कामन्दकीये ।
'स्वाम्यमात्यश्च राष्ट्रञ्च दुर्गं कोषो बलं सुहृत् ।
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते ।'
पौरश्रेण्या सहाष्टाङ्गमपि राज्यं प्रकीर्त्तितमिति । स्वाम्यादय: सप्त परस्परोपकारित्वात् राज्यस्य अङ्गानि उपाया: साधनानि राज्याङ्गानि प्रकृतं कुर्व्वन्ति राज्यम् । प्रकृतय: सन्ति: अस्यार्थ उक्त: क्ति: प्रकृति: स्त्रियाम् । स्वामी राजा । अमात्यो मन्त्री । सुहृन्मित्रम् । सर्व्वादिभाण्डागारं कोष: । राष्ट्रं जनपदवर्त्त भूमि: । पर्व्वतादिदुर्गमं पुरं दुर्गम् । बलं सैन्यम् । पौरश्रेणीशब्दे विद्वद्भि पुनर्व्वचनं प्राधान्यख्यापनार्थम् ।" इति भरत: ॥ ॥ अपि च ।
"स्वाम्यमात्यो जनपदो दुर्गं दण्डस्तथैव च ।
कोषो मित्रञ्च धर्म्मज्ञ सप्ताङ्गं राज्यमुच्यते ॥
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्त्तित: ।
तन्मूलत्वात्तथाङ्गानां राजा रक्ष्य: प्रयत्नत: ॥
यद्यङ्गरक्षा कर्त्तव्या तथा तेन प्रयत्नत: ।
अङ्गेभ्यो बलवत्त्वेन क्रोधमाचरतेऽन्यधी: ।
बलस्थस्तु कर्त्तव्य: क्रोधमेव महीक्षिता ।"
इति मात्स्ये १६८ अध्याय: ॥

राटि:, स्त्री, (राटवति परस्परमाक्रामयत्यनयेति । रट+क्विप्+इन् ।) युद्धम् । इति हैमचन्द्र: । २ । ६९ ॥ (राटवतीति । रट भाषायै+क्वार्थे क्विप्+इन् ।) मुरारिपत्नी । इत्यमर: । २ । ५ । २५ ॥

राढ़क:, पुं, स्वनामख्यातदेश: । यथा,—
"प्राच्यां मागधगौडौ च वारेन्द्रीगौडराढ़का: ॥"
इति ज्योतिषतत्त्वम् ॥

राढ़ा, स्त्री, रूक्षा: । शोभा । इति मेदिनी । ढे, २ ॥ पुरीविशेष: । यथा ।
"गौडं राढ़मइग्रम निवसता तत्रापि राढ़ा पुरी
भूरिश्रेष्ठिकुलाधिधाम परमं तत्रोत्तमो न: पिता ॥"
इत्यादि प्रबोधचन्द्रोदये दम्भवाक्यम् ॥

राढ़ीय:, त्रि. (राढ़ो निवासोऽस्य । राढ़+ "इदाच्छ: ।" ४।२।११४। इति छ: ।) राढ़देशोद्भव: । यथा,—
"अयनांशानयमानं दृक्तुल्यमिति.नोच्यते ।
राढ़ीयश्रीनिवासोक्तं तन्मानं स्थूलतोऽत्र तु ॥"
इति मलमासतत्त्वम् ॥

राज्ञं, क्ली ज्ञानम् । यथा,—
"राज्ञञ्च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।
तेनेदं पञ्चराज्ञञ्च प्रवदन्ति मनीषिण: ॥"
इति नारदपञ्चरात्रे प्रथमरात्रे १ अध्याय: ॥
(रात्रि: । यथा, महाभारते । १३ ।१३६।११ ।
"क्षेत्रप्रतिग्रहे चैव यद्दत्तकयोस्तथा ।
त्रीणि रात्राण्युपोषित्वा तेन प्राप्नोति सुव्रते ॥")

रात्रक, क्ली, (रात्रं ज्ञानं तेन कायतीति । के+क: ।) पञ्चरात्रम् । इति मेदिनी । के, १४६ ॥

रात्रक:, पुं, एकवर्षं वैश्यायद्दवासी । इति मेदिनी । के, १४६ ॥

रात्रि:, स्त्री, रातिं ददाति कर्म्मभ्योऽवसरं निद्रादिसुखं वा । रादाने+"राग्रदिभ्यां त्रिप् ।" उणा० ४ । ६० । इति त्रिप् ।) हरिद्रा । (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।
"लाक्षा कुष्ठं सर्षपा: श्रीनिकेतं
रात्रिर्व्योषं चक्रमर्द्दस्य बीजम् ।
सर्व्वैकस्यं तच्च पिष्ट: प्रलेपो
दद्रूयुक्तो मूलकाह्वोऽयुक्त: ॥")
एतद्द्वीपावच्छिन्न-सूर्य्यकिरणावच्छिन्नकाल: । रातिं ददाति भावा । तत्पर्य्याय: । अर्व्वरी २ निशा ३ निशीथिनी ४ त्रियामा ५ क्षणदा ६ क्षपा ७ विभावरी ८ तमस्विनी ९ रजनी १० यामिनी ११ तमी १२ । इत्यमर: ।१।४।४॥ क्षियामा १३ घोरा १४ यामा १५ तुङ्गी १६ नक्तम् १७ दोषा १८ वासतेयी १९ तमा २० क्षमा २१ प्रतारी २२ क्षपिनी २३ निशिथा २४ चक्रमेदिनी २५ शार्व्वरी २६ क्षया २७ वासरा २८ निवहरी २९ । इति शब्दरत्नावली । वसति: ३० मायुरोषा ३१ निशीथ: ३२ निट् ३३ । इति जटाधर: । यामवती ३४ तारा ३५ भूषा ३६ ज्योतिष्मती ३७ तारकिणी ३८ काली ३९ कपायिनी ४० । इति राजनिर्घण्ट: । ॥ तस्या: कारकं यथा,—
"यदा दिनु च अरासु मेरोर्भूगोलकोद्भवा ।
छाया भवेत्तदा रात्रि: ज्ञात्व तद्विरुद्धादिनम् ॥"
इति वह्निपुराणे नक्षत्रभेदो नामाध्याय: ।७।
पितृदेवानां रात्रिर्यथा,—
"माघेन च नराणाञ्च पितृणां तदहर्निशम् ।
कृष्णपक्षे दिनं प्रोक्तं शुक्ले रात्रि: प्रकीर्त्तिता ॥
वत्सरेण नराणाञ्च देवानाञ्च दिवानिशम् ।
उत्तरायणे दिनं प्रोक्तं रात्रिश्च दक्षिणायने ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्याय: ॥

अथ रात्रिकृत्यम् । स्मृति: ।
"पूर्व्वाह्णविहितं कर्म्म न जातं तत् प्रमादत: ।
रात्रेस्तु प्रहरं यावत् तत् कर्त्तव्यं यथोक्तवत् ॥
दिवोदितानि कर्म्माणि प्रमादात् पतितानि च ।
सूर्य्यस्य: प्रथमे यामे तानि कुर्म्मादतन्द्रित: ॥"
इति रत्नाकर: ॥

याज्ञवल्क्यादिरपरौ ।
"उपास्य पश्चिमां सन्ध्यां कृत्वायीस्तानुपास्य च ।
भक्ते: परिहृतो भुक्त्वा नातिरात्रोऽथ संविशेत् ॥
अग्निहोत्रोपासने सायंप्रपरे । उपास्य चेति चकारो वैश्वदेवादिकं समुच्चिनोति । संविशेत् स्वपेत् । तथा च विष्णुपुराणम् ।
"पुन: प्राक्तनमादाय सायमप्यवनीपते ।
वैश्वदेवनिमित्तं वै पञ्चधा सार्द्धं बलिं हरेत् ॥
अतिथिभ्यागतं तत्र स्वशक्त्या पूजयेद्गृही: ।
दिवातिथौ तु विमुखे गते यत् पातकं भवेत् ।
तदेवाद्गुणं पुंसां सूर्य्ये विमुखे गते ॥"
सूर्य्येऽस्तं गते सूर्य्ये । तथा,—
"स्नात्वादिद्यौचस्तु शुद्धा सायं ततो गृही ।
गच्छेदस्फुटितां ग्रस्यामति दारमयीं वृथ ॥"
भोजने सायमिति सार्द्धप्रहरपरं प्रागुक्तात् ॥
अथ रात्रौ शयनविधि: । अति सूर्य्ये शय्या च न पातनीया सा च सूर्य्योदयात् पूर्व्वमुत्थातव्या । तथा च स्मृति: ।
"भास्करोदयशय्यानि निशायामिलितानि च ।
सूर्य्यावलोकिदीपानि वह्नयन्नानि वेश्मानि भोजनम्॥
खाद: ।
"शुचौ देशे विविक्ते च गोमयेनोपलेपिते ।
प्रागुदक्प्रवणे चैव संविशेत् सदा गृही: ॥
मङ्गल्यं पूर्णकुम्भञ्च शिर:स्थाने विधाय च ।
वेदिक्षेत्रार्द्रदेवर्षिं रक्षां कृत्वा स्वपेत्तत: ॥"
गर्ग: ।
"स्वपेद्दे प्राक्शिरा: शेते स्नात्वे दक्षिणशिरा: ।
प्रलक्शिरा: प्रवासे तु न कदाचिदुदक्शिरा: ॥"
मार्कण्डेयपुराणे ।
"प्राक्शिर: शयने विद्यात् धनमायुश्च दक्षिणे ।
पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे ॥"
तथा ।
"नमस्कृत्वाथवं विष्णुं समाधिस्थं स्वपेन्निशि ॥"
मार्कण्डेय: ।
"शून्यालये श्मशाने च एकवृक्षे चतुष्पथे ।
महादेवगृहे चापि प्रकरोजीर्णगोगृह ॥
धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि ।
न चापि भक्षशयने नाशुचौ नाशुचि: स्वयम् ॥
नार्द्रपादो न शयीत नोत्तरापरमस्तक: ।
नाकाशे सर्व्वभूम्ये च न च चैत्यद्रुमे तथा ॥"
स्वपेदिति शेष: ॥ ॥ अथ रात्रौ दारोपगमनविधि: । याज्ञवल्क्य: ।
"षोड़शर्त्तुर्निशा: स्त्रीणां तासु युग्मासु संविशेत् ।
ब्रह्मचार्य्येव पर्व्वण्यावाद्यतस्तासु वर्ज्जयेत् ।"
स्त्रीणां षोड़शनिशा ऋतुगर्भाधानयोग्यकाल: ।

तत्रोक्तविधिना गच्छेत्। तत्र युग्मासु रात्रिष्वपि पर्व्वणि ब्रह्मचार्य्येव भवति। तत्र व्रतादौ गच्छतो ब्रह्मचर्य्यस्खलनदोषो नास्ति इति मिताक्षरा॥ विष्णुपुराणम्।

"ब्रह्मचर्य्यमृतावास्तामृते पर्व्वणि चतुर्दशीम्।
मैथुनं नोपसेवेत हादशीञ्च मम प्रियाम्॥"

हारीतः। "चतुर्थेऽहनि स्नातायां युग्मासु च गर्भाधानवदुपेत ब्रह्मगर्भं सन्दधातीति।" अत्र चतुर्थी रात्रौ यद्गर्भाधानमुक्तं तदजोनिवृत्तौ बोध्यम्। रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला। इति मनुवचनैकवाक्यत्वात्। साध्वी गर्भाधानादिविहितकर्म्मयोग्येत्यर्थः। आद्याश्चतस्रस्तु वर्ज्जयेत्। इति तु रजोनिवृत्तीतरपरम्। अनृतावपि कामतोगमनमाह। विष्णुपुराणम्।

"स्नातो नरकमभ्येति स्त्रीयेदप्यपि चायुषः।
परदाररतिः पुंसामुभयत्रापि भीतिदा॥
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत्।
यथोक्तदोषहीनेषु सकामेष्वनृतावपि॥"

पैठीनसिः। "त्वां विश्वरूपं जघान वर्च्चोघ्नेऽस्मै प्रति देवा ब्रह्महन्निति अवदन् स स्त्रिय उपायत्तीत वरं दास्यामि ततोऽस्मात्तीयं ब्रह्महत्याया प्रपद्यन्तं स्त्रियः एकं भूमिर्म्बनस्पतयश्चैकम्। आसां मघवा तुष्टो वरं प्रायच्छत भूमेः स्थिरत्वं वृक्षाणां छिन्नप्ररोहत्वं स्त्रीणां सर्व्वकालेषु सम्भवः।" सम्भवो मैथुनं सम्भोग इति यावत्। सर्व्वकाले ऋतावनृतौ च। न तु प्रतिषिद्धपर्व्वादौ। तथाच गौतमः। ऋतावुपेयात् सर्व्वत्र वा प्रतिषिद्धवर्ज्जमिति। दुष्टकालमाह ज्योतिषे।

"ज्येष्ठा मूला मघाश्लेषा रेवती कृत्तिका-
श्विनी।
उत्तराचित्रयं त्यक्त्वा पर्व्ववर्ज्यं व्रजेत्तदा॥"

एवच।

"ऋतौ नोपैति यो भार्य्यामनृतौ यश्च गच्छति।
तुल्यमाहुस्तयोर्दोषमयोनौ यश्च सिञ्चति॥"

बौधायनीयमनृतौ गमनदोषाभिधानमकामाविषयम्। विष्णुः। पर्व्वणारोग्यवर्ज्जनृतावगच्छन् पत्नीं चिरात्रमुपवसेदिति। वृद्धयातातपः।

"स्त्रीयां संप्रेक्षणात् स्पर्शात् ताभिः संकथना
दपि।
ब्रह्मचर्य्यं विपद्येत न दारेष्वृतुषट्कगात्॥"

संप्रेक्षणात् संकथनादित्यत्र सरागत्वं संग्रन्थार्थः। आह्वानन्तरन्तु स्त्रीप्रेक्षणमाहतुः गृह्यलिखितौ। ऋतुस्नातां तद्दीरात्रं परिहरेत् नार्त्तवे दिवामैथुनं व्रजेत् स्त्रीवाप्यवीर्य्यत्वाच्च दिवा प्रदृश्यन्तेऽस्यायुष्य तस्मादेतद्विवर्ज्जयेत्। प्रजाकामश्च पितृणां नोपहरेत तन्तुं विच्छिन्द्यात् प्रयतेताच्छेदाय स्त्रीणाप्रतिष्ठो भवति तस्मात् प्रतिष्ठाकामः प्रजया प्रतिष्ठतेति। नोशब्दो निषेधे। तन्तुं सन्तानं अच्छेदाय अविच्छेदाय सन्तानस्य। येन ब्रह्मात् अप्रतिष्ठः प्रजोत्पत्त्या अप्राप्तप्रतिष्ठः सन् प्रतति तस्मात् तदुत्पत्त्यर्थं यतितव्यमिति कल्पतरुः। एवच आद्यदिने यदभिगमनं प्रागुक्तयाज्ञवल्क्यवचनात् उक्तं मिताक्षरायां तद्दियम्। वशिष्ठः।

"शूद्रान्नेन तु सक्तेन मैथुनं योऽधिगच्छति।
यस्यान्नं तस्य ते पुत्रा अलक्ष्यां शूद्रवत्
द्विजाः॥"

पराशरः।

"ऋतुस्नाताच्च यो भार्य्यां सन्निधौ नोपगच्छति।
स गच्छेन्नरकं घोरं ब्रह्महेति तथोच्यते॥"

सन्निधावित्यभिधानात् असन्निहितस्य गमनाभावे न दोषः। पुत्रोत्पत्तिरूपनन्तत्वमभिगमनन्नियममाह। कूर्म्मपुराणम्।

"ऋतुकालाभिगामी स्यात् यावत् पुत्रो न
जायते।
ऋणापकर्षणार्थं हि पुत्रस्योत्पादनं प्रति॥"

यतितव्यमिति शेषः। आपस्तम्बः।

"ऋतौ तु गर्भग्रहित्वात् स्नानं मैथुनिनः
स्मृतम्।
अनृतौ तु सदा कार्य्यं शौचं सूत्रपुरीषवदिति॥
द्वावेतावशुची स्नातां दम्पती शयनं गतौ।
शयनादुत्थिता नारी शुचिः स्यादशुचिः
पुमान्॥
मैथुनमुद्धः प्राक् मलमूत्रोत्सर्गं न कुर्य्यात्।
तैलाभ्यक्ते तथा वान्ते क्षवथुकर्म्मणि मैथुने।
सूत्रोच्चारं यदा कुर्य्यादहोरात्रेण शुद्ध्यति॥"

इति वचनात्।

पुत्रानुत्पन्नौ पाराशरः। सा यदि गर्भं नादधीत निदिधिकायाः श्वेतपुष्पाया उपोष्य पुष्यनक्षत्रे मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदकेन पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चतीति। इयमोषधीस्तूयमाना सहमाना सरस्वती। अस्या अहं दृहत्याः पुत्रः पितुरिव नाम जनयत्यभित इति। सा परिणीता ऋतुकालेऽपि स्नताभिगमना यदि गर्भं न दधाति तदा उपोष्य पुष्ये नक्षत्रे श्वेतकण्टकारिकामूलमुत्थाप्य चतुर्थेऽहनि ऋतुस्नातायां सत्यां रात्रावुदकेन पिष्ट्वा दक्षिणनासापुटे पतिः इयमोषधीरिति मन्त्रेण नस्यं ददाति दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां गृहीता प्राङ्मुखः संविदाथा इति गोभिलस्मरणात्। आयुर्व्वेदीये।

"पिप्पलीं शङ्खवेरञ्च मरीचं नागकेशरम्।
आज्येन सह सुश्लक्ष्णं पिबेत् वन्ध्या प्रसूयते॥"

वशिष्ठः।

"एवं गच्छन् स्त्रियं श्यामां मघां मूलाच्च वर्ज्जयेत्।
पुत्रं इन्द्रौ सकृत् पुत्रं लक्षणं जनयेत्
पुमान्॥"

श्यामामाहारलाघवादिना। सकृदेकवारम्। अत्र सम्यगाधानहेतुतया उत्तानकरचरणामेव कुर्व्वीत न तिर्य्यगाद्यितकरचरणां स्त्रियञ्च ऋतुभिगमनानन्तरं दक्षिणपार्श्वे न स्थापयेत्। पुरुषायिते तु गर्भानुत्पत्तिरिति विशेषः। दक्षः।

"प्रदोषयस्त्रिमौ यामौ वेदाभ्यासेन तौ नयेत्।
यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते॥"

इत्याह्निकतत्त्वम्॥ *॥

अथ रात्रिजागरणदोषगुणौ।

"रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा।
अरूक्षमनभिष्यन्दि त्वासीनप्रचलायितम्॥
कफमेदोविषार्त्तानां रात्रौ जागरणं हितम्।
दिवा वा यदि वा रात्रौ निद्रा स्वाभाविकी
तु यैः।
न तेषां स्वपतां दोषो जाग्रतां वा विधीयते॥"

इति राजवल्लभः॥ *॥

रात्रौ कुलपूजा यथा। "यतु।

रात्रावेव महापूजा कर्त्तव्या वीरवन्दिते।
न दिने सर्व्वथा कार्य्या शासनाज्ञप्त सुव्रते॥

तत्र पुनः कुलपूजाविधयम्।

अर्द्धरात्रात् परं यच्च सुकृष्णदयमेव च।
सा महारात्रिरुद्दिष्टा तत्तमत्रयन्तु वै॥"

इति तन्त्रसारः॥*॥

अथ रात्रौ विहितनिषिद्धे। क्रन्दोगपरिशिष्टम्।

"मुनिभिर्दिवसं प्रोक्तं विप्राणां मन्त्रवासिनां
नित्यम्।
अहनि च तथा तमस्विन्यां सार्द्धप्रहर-
यामान्तः॥"

जाबालः।

"अहःसु नित्यः पुण्याः कर्म्मानुष्ठानतो दिवा।
नक्तादिव्रतयोगे तु रात्रियोगो विधीयते॥"

देवलः।

"राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु।
स्नानदानादिकं कुर्य्युर्निशि काम्यव्रतेषु च॥"

ब्रह्मवैवर्त्तपुराणम्।

"न रात्रौ पारणं कुर्य्यात् ऋते वै रोहिणीव्रतात्।
तत्र निशापि वै कुर्य्यादहनैयित्वा महानिशाम्॥"

इति नित्यादितत्त्वम्॥*॥

"एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन दानेन नैवाहादग्निको भवेत्॥"

स्कन्दपुराणम्।

"प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा।"

देवीपुराणम्।

"हविष्यभोजनं सत्यं स्नानमाहारलाघवम्।
अग्निकार्य्यमधःशय्या नक्तभोजी घडाचरेत्॥"

इत्येकादशीतत्त्वम्॥ *॥

देवलः।

"रात्रौ श्राद्धं न कुर्व्वीत रात्रसी कीर्त्तिता हि
सा।
सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाचिरोदिते॥"

इति श्राद्धतत्त्वम्॥ *॥

विष्णुपुराणम्।

"प्रातर्निशि तथा सन्ध्यामध्याह्नादिषु संस्मरन्।
नारायणमवाप्नोति सद्यः पापक्षयं नरः॥"

रात्रावपि गङ्गायां स्नानादौ प्रतिग्रहमाह।

ब्रह्मपुराणम्।
"दिवारात्रौ च सन्ध्यायां गङ्गायाञ्च प्रसङ्गतः।
स्नात्वाश्वमेधजं पुण्यं लभेऽणुहृततत्फलैः॥"
रात्रिचराधिकारसुपक्रम्य आदित्यपुराणे।
"अतो रात्रौ प्रभुक्तायां जातं ब्रह्मविदो जनाः।
गर्हयन्ति जनान् सर्व्वान् वनस्थान् वृषतीनपि॥"
तत्रार्জ্জुनस्य प्रतिवचनम्।
"समुद्रे हिमवत्पार्श्वे नद्यामस्याञ्च दुर्म्मते।
रात्रावहनि सन्ध्यायां कस्य गुप्तः परिग्रहः॥"
देवलः।
"मङ्गानिघ्ना तु विज्ञेया मध्यमं प्रहरद्वयम्।
तस्यां स्नानं न कुर्व्वीत काम्यनैमित्तिकादते॥"
अतएव कल्पतरुः। न नक्तं स्नायादिति बौधायनवचनं रागप्राप्तस्नानविषयम्। एवञ्च गङ्गास्नानस्य दिवारात्रिकर्त्तव्यत्वाविशेषात् तत्तन्निमित्ततिथिविशेषस्यापि दिवारात्रिसमत्वेनाविशेषः। इति प्रायश्चित्ततत्त्वम्।
(रात्र्युक्तनियमाः यथा,—
"रात्रौ च भोजनं कुर्य्यात् प्रथमप्रहरागमे।
किञ्चिदूनं समश्नीयात् दुर्ज्जरन्तच्च वर्জ্জयेत्॥
शरीरे जायते नित्यं देहिनः सुरतस्पृहा।
अयवायान्मेहमेदोवृद्धिः श्लथिलता तनोः॥
बालेति गीयते नारी यावद्वर्षाणि षोड়श।
ततस्तु तरुणी ज्ञेया द्वात्रिंशत् वत्सरावधि॥
तदूर्द्धमधिरूढ़ा स्यात् प्रज्ञाशुद्धत्सरावधि।
वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्জ্জिता॥"
अधिरूढ़ा प्रौढ़ा।
"निदाघशरदोर्बाला हिता विषयिणी मता।
तरुणी शीतसमये प्रौढ़ा वर्षावसन्तयोः॥
नित्यं बाला सेव्यमाना नित्यं वर्द्धयते बलम्।
तरुणी ह्रासयेच्छक्तिं प्रौढ़ोद्वाधयते जराम्॥
मद्यो मांसन्नवान्नं बाला स्त्री क्षीरभोजनम्।
ऋतस्नातोदके स्नानं सद्यः प्राजकराणि षट्॥
पूतिमांसं स्त्रियो वृद्धा बालाकैक्षरसं दधि।
प्रभाते मैथुनं निद्रा सद्यः प्राजहराणि षट्॥"
प्राजहन्दोऽत्र बलवाचकः। बालार्कः कन्यार्कः।
"वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात्।
वयोऽधिकां स्त्रियं गत्वा तरुणः स्थविरायते॥
आयुघ्नो मन्दजरा वपुर्वर्षवलान्विताः।
स्त्रीरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः॥
सेवेत कामतः कामं बलाद्राजोज्झतो हि मे।
प्रकामन्तु निषेवेत मैथुनं शिशिरागमे॥
आहारसन्नयरदोः प्रचाद्वृद्धिनिदाघयोः॥"
सुश्रुतस्तु।
"त्रिभिस्त्रिभिरहोभिर्हि समेयात् प्रमदानरः।
सर्व्वेष्वृतुषु धर्म्मेषु पश्चात् पश्चाद्बलेषुधः॥"
समेयात् सङ्गच्छेत् धर्म्मे ग्रीष्मे।
"ग्रीष्मे रात्रौ दिवा ग्रीष्मे वसन्ते तु दिवा-
निशि।
वर्षासु वारिदध्वाने शरत्सु सरसः क्षरः॥
उपेयात् पुरुषो नारीं सन्ध्ययोर्न च पर्व्वसु।
गोसर्गे चार्द्धरात्रे च तथा मध्यदिनेऽपि च॥
विहारं भार्य्यया कुर्य्याद्दैशेऽतिशयसंवृते।
रम्ये अवाङ्मुखागारे सुगन्धे सुखमारुते॥
देशे गुरुजनासन्ने विदूरेऽतिप्रकाशके।
श्रुयमाणे यथाहेतुवचने न रमेत वा॥
स्नातस्नग्दनलिप्ताङ्गः सुगन्धः सुमनोऽन्वितः॥
सुस्नातृप्तः सुवसनः सुवेषः समलङ्कृतः।
ताम्बूलवदनः प्रत्यागमनुरक्तोऽधिकः क्षरः॥
एतावर्थो पुरुषो नारीसुपेयाच्छयने शुभे।
अत्याग्निरोऽधृतिः क्षुद्वान् सद्यश्चाप्तः पिपासितः॥
बालो वृद्धोऽन्यवेगार्त्तस्त्वजेद्रोगी च मैथुनम्॥"
रोगी मैथुनसंवर्द्धनीयरोगयुक्तः।
"भार्य्यां रूपगुणोपेतां तुल्यशीलां कुलोद्भवाम्।
अतिकामोऽभिकामाञ्च हृद्यो हृद्यामलङ्कृताम्॥
सेवेत प्रमदां युक्त्या वाजीकरणतंहितः।
रजकलामकामाञ्च मलिनामप्रियाञ्चथा॥
वर्षीयसीं वयोवृद्धां तथा व्याधिप्रपीड़िताम्।
हीनाङ्गीं गर्भिणीं दैन्यां रोगिणीमगुणान्विताम्॥
सगोत्राङ्गरुपत्नीञ्च तथा प्रव्रजितामपि।
नाभिगच्छेत् पुमान्नारीं भूरिवैगुण्यशङ्कया॥"
"स्नानं सद्यःकरं क्षीरं भक्ष्यमेद्यवसंस्कृतम्।
बालो मांसरसः खड्गः सुरतान्ते हिता अमी॥
शूलकासज्वरश्वासकार्श्यपाण्डामयक्षयः।
अतिव्यवायाज्जायन्ते रोगाश्चापेक्षकादयः॥
रात्रौ जागरणं रूक्षं कफदोषविधायिनित्।
निद्रा तु सेविता काले धातुसाम्यमतन्द्रितम्॥
पुष्टिवर्णबलोत्साहं वह्निदीप्तिं करोति च॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तद्दैनिकपर्य्यायः। ध्रुवादौ १ क्षपा २ नक्तन्तरी ३ अक्तु ४ ऊर्य्या ५ रात्र्या ६ यन्या ७ नक्ता ८ दोषा ९ नक्ता १० तमः ११ रजः १२ असिक्नी १३ पयस्वती १४ तमस्वती १५ घृताची १६ शिरिजा १७ मोकी १८ श्लोकी १९ लक्ष्मः २० पयः २१ हिमा २२ वस्वी २३। इति त्रयोविंशतौ रात्रिनामानि। इति वैद्यनिघण्टौ। १। ७। (क्रौष्टुकीयपञ्चमदौविशेषः। यथा, माघे। १२२। ८७।
"मृतानामेव नद्यस्तु प्रतिवर्षं गताः शुभाः।
गौरी कुमुदती चैव सन्ध्या रात्रिर्मनोजवा॥")
रात्रिकरः, पुं, (रात्रिं करोतीति। कृ+टः।) चन्द्रः। इति हेमचन्द्रे निघण्टुशब्दशेषात्॥ (कर्पूरः। इत्यमरः। २। ६। १९०॥)
रात्रिचरः, पुं, (रात्रौ चरतीति। "चरेष्टः।" ३।२।१६। इति टः। "रात्रेः कृति विभाषा।" ६।३।७२। इति सुम्भावः।) राक्षसः। इत्यमरः। १।१।६३॥ रात्रौ गमनकर्त्तरि, त्रि॥
रात्रिचरी, स्त्री, (रात्रिचर+टित्वात् ङीप्।) राक्षसी। यथा, भट्टिः। २। २१।
"तं विप्रदर्शं क्षतघातयत्नां
यान्तं वने रात्रिचरीं कुटुम्बे।
निघांसुवेदं धृतभासुराङ्ग-
स्तं ताड़काख्यां निजघान रामः॥"
रात्रिजलं, क्ली, (रात्रेर्जलम्।) कुज्झटिका। इति शब्दमाला॥
रात्रिजागरः, पुं, (रात्रौ जागर्त्तीति। जागृ+अच्।) कुक्कुरः। इति हेमचन्द्रः॥ रात्रौ जागरणकर्त्तरि, त्रि॥
रात्रिजागरदः, पुं, (रात्रौ जागरं जागरणं ददातीति। दा+कः।) मशकः। इति राजनिर्घण्टः॥
रात्रिञ्चरः, पुं, (रात्रौ चरतीति। चर्+टः। "रात्रेः कृति विभाषा।" ६।३।७२। इति सुम्।) राक्षसः। इत्यमरः। १।१।६३॥ (स्त्रियां ङीप्। रात्रिञ्चरी॥) रात्रौ गमनकर्त्तरि, त्रि॥
रात्रिपुष्पं, क्ली, (रात्रौ पुष्पति विकाशते इति। पुष्प्+अच्।) उत्पलम्। इति राजनिर्घण्टः॥
रात्रिभटः, पुं, (रात्रौ भटतीति। भट्+अच्। "रात्रेः कृति विभाषा।" ६।३।७२। इति सुम्।) राक्षसः। इति त्रिकाण्डशेषः॥ रात्रौ गमनकर्त्तरि, त्रि॥
रात्रिमणिः, पुं, (रात्रेर्मणिरिव।) चन्द्रः। इति हारावली॥ १३॥
रात्रिवासः, [स्] क्ली, (रात्रेर्वासो वस्त्रमिव।) अन्धकारः। इति शब्दमाला॥ रात्रौ शयनकालीनपरिधेयवस्त्रम्। यथा। ब्राह्मे मुहूर्त्ते उत्थाय सुप्तस्थानः रात्रिवासस्त्यक्त्वा शिरसि सहस्रदलकमलावस्थितं श्वेतवर्णं द्विभुजं वराभयकरं श्वेतमाल्यानुलेपनं स्वप्रकाशरूपं स्ववामस्थितरक्तशक्त्या सुप्रकाशरूपया सहितं गुरुं विभाव मानसोपचारैराराध्य नमस्कुर्य्यात्। इति तन्त्रसारः॥ अपि च।
"शयनस्थान्धकारे च रात्रिवासो दिने तथा।
स्नानाम्बरं कुवेशञ्च वर्জ্জयेत् शुष्कभोजनम्॥"
इति लक्ष्मीचरित्रम्॥
रात्रिविगमः, पुं, (रात्रेर्विगमो यत्र।) प्रभातम्। इति शब्दमाला॥
रात्रिविहङ्गमः, [न्] पुं, (रात्रौ विहङ्गं विहङ्गं गच्छतीति। गम्+खिनिः।) चक्रवाकः। इति राजनिर्घण्टः॥
रात्रिवेदः, पुं, (रात्रिं रात्रिञ्चरं वेदयति रवेरिति। विद्+णिच्+अच्।) कुक्कुटः। इति शब्दरत्नावली॥
रात्रिवेदी, [न्] पुं, (रात्रिं रात्रिञ्चरं वेदयति खरेरिति। रात्रि+विद्+णिच्+णिनिः।) कुक्कुटः। इति त्रिकाण्डशेषः॥
रात्रिव्रासः, पुं, (रात्रेर्व्रास इव शुभ्रत्वात्। रात्रौ व्रासो विकाशो यस्य इति वा।) श्वेतोत्पलम्। इति शब्दरत्नावली॥
रात्रिहिण्डकः, पुं, (रात्रौ हिण्डति अन्तःपुरमध्ये भ्रमतीति। हिण्ड् गतौ+खुल्।) अन्तःपुररक्षकः। इति शब्दरत्नावली॥
रात्री, स्त्री, (रात्रि+ऋदिकारादिति ङीप्।) निशा। इत्यमरटीकायां भरतः। (यथा, ऋग्वेदे। १०। १२७। १।

"रात्रौ चरत्यावती पुरुषा देवयत्तभिः ।"
हरिद्रा । निशापर्य्यायत्वात् ॥)

राक्षटः, पुं, (रात्रौ अटतीति । अट्+अच् ।) राक्षसः । इति केचित् ॥ रात्रौ गमनकर्त्तरि, त्रि ॥

राक्षान्धः, त्रि, (रात्रौ अन्धः ।) रात्रौ दृष्टिहीनो नरः । रातिकाणा इति भाषा ॥ रात्रौ स्वाभाविकदृष्टिहीनपक्षी । स तु काकादिः । यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ।
"दिवान्धाः प्राणिनः केचिद्राक्षावन्धास्तथापरे ।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥"
तन्नाशकौषधं यथा,—
"देवदारोश्च वै चूर्णं अजामूत्रेण भावयेत् ।
एकविंशति वै वारमक्षिणी तेन चाञ्जयेत् ।
राक्षान्धता पटलता नश्येदिति विनिश्चयः ॥"
इति गारुडे १८६ अध्यायः ॥

राद्धं, त्रि, (राध सिद्धौ+क्तः ।) पक्वम् । सिद्धम् । इति हेमचन्द्रः । ३ । ७६ ॥ त्रिकाण्डशेषश्च ॥ (यथा, भागवते । ३ । ६ । ४० ।
"पूर्त्तेन तपसा यज्ञैर्दानैर्योगेः समाधिना ।
राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविच्चतम् ॥")

राद्धान्तः, पुं, (राद्धः सिद्धः अन्तो निर्णयो यस्मात् ।) सिद्धान्तः । इत्यमरः । १ । ५ । ४ ॥ (यथा, भागवते । १२ । ११ । १ ।
"अथेदमर्थं पृच्छामो भवन्तं बहुवित्तमम् ।
समस्ततन्त्रराद्धान्तो भवान् भागवततत्त्ववित् ॥")

राध, न स्यौ य सिद्धौ । इति कविकल्पद्रुमः ॥ (स्वा०-दिवा०-च-पर०-स्वादिपक्षे सक०-दिवादिपक्षे अक०-अनिट् ।) रेफादिः । न, राध्नोति । य, राध्यति । स्यौ, अराद्धीत् । सिद्धिरिह स्वादिपक्षे निष्पादना । दिवादिपक्षे निष्पत्तिः । अन्नं राध्नोति विप्राणां य इति हलायुधः । निष्पादयतीत्यर्थः । सततं राध्यति श्रिये इति हलायुधः । निष्पन्नो स्वादिरित्यर्थः । सिद्धिरन्तर्भूतण्यर्थत्वादुभयत्रैव निष्पादनेति गोविन्दभट्टः । इति दुर्गादासः ॥ (शुभाशुभपर्य्यालोचने च । यथा, सुग्धबोधे । "गर्गो राध्यति रामाय ।" रामस्य शुभाशुभं पर्य्यालोचयतीत्यर्थः ॥)

राधः, पुं, (राधा विशाखा तद्युतो यौगमासो राधी । सास्मिन्नस्तीति । राधी+"सास्मिन् पौर्णमासीति ।" ४ । २ । २१ । इति अण् ।) वैशाखमासः । इत्यमरः । १ । ४ । १६ ॥ (यथा, राजतरङ्गिण्याम् । ८ । २४८२ ।
"राधमासावधि दधुस्ततः प्रभृति वारिदाः ॥"
धनम् । यथा, ऋग्वेदे । २ । ३० । ५ ।
"स्तोतं राधानां पते गौर्वाणो वीर यस्य ते ॥"
"हे इन्द्र राधानां पते धनानां पालक ।" इति तद्भाष्ये सायणः ॥)

राधनं, क्ली, (राध्+ल्युट् ।) साधनम् । प्राप्तिः । इति मेदिनी । ने, ११४ ॥ तोषः । इति हेमचन्द्रः ॥

राधना, स्त्री, (राध्+णिच्+युच् । टाप् ।) भावणम् । इति मेदिनी । ने, ११४ ॥

राधा, स्त्री, (राध्नोति साधयति कार्य्याणीति । राध+अच् । टाप् ।) धन्विनां चित्रभेदः । (यथा, वाजभारते १ अङ्के । "इह हि महाराजसमाजे न जाने कमवलम्बिष्यते राधावेधकीर्त्तिर्वेणयन्ती ॥") गोपीविशेषः । विशाखानक्षत्रम् । आमलकी । विष्णुकान्ता । विद्युत् । इति मेदिनी । धे, १३ ॥ (स्तुतस्याधिरथस्य पत्नी । असौ एव कुन्तीगर्भजस्य श्रियोः कर्णस्य पालयित्री अतएव कर्णो राधासुत इति ख्यात आसीत् । यथा, महाभारते । १ । ६० । ११८—११६ ।
"निगूहमाना जात वै वसुषत्तमयात्तदा ।
उत्ससर्ज्ज जले कुन्ती तं कुमारं यशस्विनम् ॥
तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः ।
राधायाः कथयामास पुत्रं सोऽधिरथस्तदा ॥"
तथा च देवीभागवते । २ । ६ । ३८ ।
"राधा स्तुतस्य भार्य्या वै तयासौ प्रार्थितः सुतः ।
कर्णोऽभूद्बलवान् वीरः पालितः स्तसञ्ज्ञितः ॥")
श्रीराधिका । सा च श्रीकृष्णवामभागांशा मूर्त्तिः । यथा,—
"स कृष्णः सर्व्वतश्चादौ त्रिरूपश्चैक एव च ।
इच्छान्मुखस्तदंशेन कालेन प्रेरितः प्रभुः ॥
स्वेच्छामयः स्वेच्छया च द्विधारूपो बभूव ह ।
स्त्रीरूपा वामभागांशा दक्षिणांशः पुमान् स्मृतः ॥
तां ददर्श्व महाकामी कामाधारः सनातनः ।
अतीवकमनीयाञ्च वारयन्यकसन्निभाम् ।"
रत्नादि ।७।
तस्या अनपत्यताकारणादिर्यथा,—
"इदमाद्यं तया सार्द्धं रासेशो रासमण्डले ।
रासोल्लासे सुरहसि रासक्रीड़ाञ्चकार ह ॥
नानालङ्कारशृङ्गारं शृङ्गारो मूर्त्तिमानिव ।
चकार सुखसम्भोगं यावद्वै ब्रह्मणो दिनम् ॥
ततः स चापरिश्रान्तस्तस्या योनौ जगत्पिता ।
चकार वीर्य्याधानञ्च निजानन्दः शुभे क्षणे ॥
गात्रतो योषितस्तस्याः सुरतान्ते च सुव्रत ।
निःससार श्रमजलं आलस्यायासजेन हरेः ॥
महाकामवह्निराया निःश्वासश्च बभूव ह ।
तदा वव्रे श्रमजलं तत्सर्व्वं विश्वगोलकम् ।
स तु निश्वासवायुश्च सर्व्वाधारो बभूव ह ।
निःश्वासवायुः सर्व्वेषां जीवितानाञ्च भवेषु च ।
बभूव मूर्त्तिमद्योर्वामाङ्गात्प्राणश्च वल्लभा ।
तत्पत्नी सा च तत्पुत्राः प्राणाश्च पञ्च जीवितानाम् ॥
प्राणोऽपानः समानश्चोदानो यान एव च ।
बभूवुरेव तत्पुत्रा अधःप्राणाश्च पञ्च च ।
धर्म्मतोयाधिदेवश्च बभूव वरुणो महान् ।
तदामाङ्गात्तु तत्पत्नी वरुणानी बभूव ह ।
अथ सा कृष्णशक्तिश्च कृष्णगर्भं दधार च ।
शतमन्वन्तरं यावत् ज्वलन्ती ब्रह्मतेजसा ॥
कृष्णप्राणाधिदेवी सा कृष्णप्राणाधिकप्रिया ।
कृष्णस्य सङ्गिनी शश्वत् कृष्णवक्षःस्थलस्थिता
शतमन्वन्तरान्तेतिकालेऽतीतेऽपि सुन्दरी ।
सुषाव डिम्बं स्वर्णाभं विश्वाधारालयं परम् ॥
दृष्ट्वा डिम्बञ्च सा देवी हृदयेन विदूयता ।
उत्ससर्ज्ज च कोपेन ब्रह्माण्डं गोलके जले ॥
दृष्ट्वा कृष्णश्च तत्त्यागं हाहाकारं चकार ह ।
शशाप देवीं देवेशस्तत्क्षणञ्च यथोचितम् ॥
यतोऽपत्यं त्वया त्यक्तं कोपशीले सुनिश्चरे ।
भव त्वमनपत्यापि चाद्यप्रभृति निश्चितम् ॥
या यास्तदंशरूपाश्च भविष्यन्ति सुरस्त्रियः ।
अनपत्याश्च ताः सर्व्वास्तत्समा नित्ययौवना ॥
एतस्मिन्नन्तरे देवीविज्ञायात् सहसा ततः ।
आविर्ब्बभूव कन्यैका शुक्लवर्णा मनोहरा ॥
पीतवस्त्रपरीधाना वीणापुस्तकधारिणी
रत्नभूषणभूषाढ्या सर्व्वशास्त्राधिदेवता ॥
अथ कालान्तरे सा च द्विधारूपो बभूव ह ।
वामार्द्धाङ्गा च कमला दक्षिणार्द्धा सरस्वती ॥
एतस्मिन्नन्तरे कृष्णो द्विधारूपो बभूव सः ।
दक्षिणार्द्धश्च द्विभुजो वामार्द्धश्च चतुर्भुजः ॥
उवाच वाणीं श्रीकृष्णस्तस्य कामिनी भव ।
अनेन मानिनी राधा नैव भद्रं भविष्यति ॥
एव लक्ष्मीञ्च प्रददौ तुष्टो नारायणाय च ।
स जगाम च वैकुण्ठं ताभ्यां सार्द्धं जगत्पतिः ॥
अनपत्ये च ते द्वे च यतो राधाङ्गसम्भवा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २ अध्यायः ॥
राधाया उत्पत्तिर्यथा,—
"पुरा वृन्दावने रम्ये गोलोके रासमण्डले ।
शतशृङ्गैकदेशे च मल्लिकामाधवीवने ॥
रत्नसिंहासने रम्ये तस्थौ तत्र जगत्पतिः ।
स्वेच्छामयश्च भगवान् बभूव रमणोत्सुकः ॥
रसञ्च कर्त्तुमिच्छुश्च तद्बभूव सुरेश्वरी ।
इच्छया च भवेत् सर्व्वं तस्य स्वेच्छामयस्य च ।
एतस्मिन्नन्तरे दुर्गे द्विधारूपो बभूव सः ।
दक्षिणाङ्गश्च श्रीकृष्णो वामार्द्धाङ्गा च राधिका ॥
बभूव रमणी रम्या रासेशी रमणोत्सुका ।
अमूल्यरत्नाभरणा रत्नसिंहासनस्थिता ॥
वह्निशुद्धांशुकाधाना कोटिपूर्णशशिप्रभा ।
तप्तकाञ्चनवर्णाभा राजिता च स्वतेजसा ॥
सस्मिता सुदती शुद्धा शरत्पद्मनिभानना ।
बिभ्रती कबरीं रम्यां मालतीमाल्यमण्डिताम् ॥
रत्नमालाञ्च दधती श्रीमत्स्वेदसमप्रभाम् ।
सुस्वाहारेण शुभ्रेण गङ्गाधारानिभेन च ॥
संयुक्तं वर्त्तुलोत्तुङ्गं सुमेरुगिरिसन्निभम् ।
कठिनं सुन्दरं दृश्यं कस्तूरीपत्रचर्चितम् ॥
माङ्गल्यं मङ्गलार्हञ्च स्तनयुग्मञ्च बिभ्रतीम् ।
नितम्बश्रोणिभारार्त्तां नवयौवनसंयुताम् ॥
कामातुरां सस्मिताञ्च ददर्श रसिकेश्वरः ।
दृष्ट्वा कान्तां जगत्कान्तो बभूव रमणोत्सुकः ॥
दृष्ट्वा रिरंसुं कान्तञ्च सा दधार हरेः पुरः ।
रासेशं भूय गोलोके सा दधार हरेः पुरः ॥
तेन राधा समाख्याता पुराविद्भिर्महेश्वरि ।

राधा जयति श्रीकृष्णं स च ताञ्च परस्परम् ।
उभयोः सर्व्वसाम्यञ्च सदा सर्व्वे वदन्ति च ।
भवनं धावनं रासे सरत्यालिङ्गनं जपेत् ।
तेन जल्पति सङ्केतादस्या राधा यदीश्वरः ।
राशब्दोच्चारणाद्भक्तो राति मुक्तिं सुदुर्लभाम् ।
धाशब्दोच्चारणाद्गर्भे धावत्येव हरेः पदम् ।
कृष्णवामांशसम्भूता राधा रासेश्वरी पुरा ।
तस्याश्चांशांशकलया बभूवुर्देवयोषितः ।
रा दत्तादानवचनो धा च निर्व्वाणवाचकः ॥
यतोऽवाप्नोति सकलं सा च राधा प्रकीर्त्तिता ।
बभूव गोपीसंघश्च राधाया लोमकूपतः ॥
श्रीकृष्णलोमकूपेषु बभूवुः सर्व्ववल्लवाः ।
राधा वामांशभागेन महालक्ष्मीर्बभूव सा ।
चतुर्भुजस्य सा पत्नी देवी वैकुण्ठवासिनी ।
तदंशा राजलक्ष्मीश्च राजसम्पत्प्रदायिनी ।
तदंशा सर्व्वलक्ष्मीश्च गृहिणाञ्च गृहे गृहे ।
गृह्याधिष्ठातृदेवी च सा एव गृहदेवता ॥
स्वयं राधा कृष्णपत्नी कृष्णवक्षःस्थलस्थिता ।
प्राणाधिष्ठातृदेवी च तस्यैव परमात्मनः ॥
ब्रह्मादिस्तम्बपर्य्यन्तं सर्व्वं मिथ्येव प्रार्व्वति ।
भज सत्यं परं ब्रह्म राधेशं चिद्गुणात् परम् ॥
परं प्रधानं परमं परमात्मानमीश्वरम् ।
सर्व्वाद्यं सर्व्वपूज्यञ्च निरीहं प्रकृतेः परम् ॥
स्वेच्छामयं निराकारं भक्तानुग्रहविग्रहम् ।
तद्विप्राणाञ्च देवानां प्राकृतं रूपमेव च ।
तस्य प्राणाधिका राधा बहुसौभाग्यसंयुता ।
महद्विष्णोः प्रसूः सा च मूलप्रकृतिरीश्वरी ॥
मानिनीं राधिकां सन्तः सदा सेवन्ति निःस्पृहाः ।
सुलभं यत्पदाम्भोजं ब्रह्मादीनां सुदुर्लभम् ।
स्वप्ने राधापदाम्भोजं न हि पश्यन्ति वल्लवाः ।
स्वयं देवी हरेः क्रोडे छाया रायाश्चकामिनी ॥
स च दामगोपानां रायाणः परमः प्रिये ।
श्रीकृष्णांशश्च भगवान् विष्णुतुल्यपराक्रमः ॥
श्रीदामशापात् सा देवी गोलोकादागता महीम् ।"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे राधोपाख्यानं ४५ अध्यायः ॥ * ॥ अपि च ।

गर्ग उवाच ।

"शृणु नन्द प्रवक्ष्येऽहमितिहासं पुरातनम् ।
पुरा गोलोकवृत्तान्तं श्रुतं शङ्करवक्त्रतः ॥
श्रीदाम्नो राधया सार्द्धं बभूव कलहो महान् ।
श्रीदामा शापादेतस्य गोपी राधा च गोकुले ॥
वृषभानुसुता सा च माता यस्याः कलावती ।
कृष्णस्यार्द्धांशसम्भूता नाथस्य सदृशी सती ॥
गोलोकवासिनी सेयमत्र कृष्णाज्ञयाधुना ।
अयोनिसम्भवा देवी मूलप्रकृतिरीश्वरी ॥
मातुर्गर्भे वायुपूर्णं कृत्वा च मायया सती ।
वायुनिःसारणे काले कृत्वा च शिशुविग्रहम् ॥
आविर्बभूव सा सद्यः पृथ्व्यां कृष्णोपदेशतः ।
वर्द्धते सा व्रजे राधा शुक्ले चन्द्रकला यथा ॥
श्रीकृष्णतेजसोऽर्द्धेन सा च मूर्त्तिमती सती ।
एका मूर्त्तिर्द्विधा भूता भेदो वेदे निरूपितः ॥
इयं स्त्री न पुमान् किंवा सा वा कान्ता पुमानयम् ।
द्वे रूपे तेजसा तुल्ये रूपेण च गुणेन च ॥
पराक्रमेण बुद्ध्या वा ज्ञानेन सम्पदेन च ।
पुरतो गमनेनैव किन्तु सा वयसाधिका ॥
ध्यायते तामयं ग्रन्थमिदं सा स्मरति प्रियम् ।
रचिता सास्य प्राणेन तत्प्राणैर्मूर्त्तिमानयम् ॥
अस्य राधानुसारेण गोकुलागमनं परम् ।
स्वीकारं सार्थकं कर्त्तुं गोलोके यत् कृतं पुरा ॥
कंसभीतिच्छलेनैव गोकुलागमनं हरेः ।
प्रतिज्ञापालनार्थञ्च भयेग्रस्य भयं कृतः ॥"*॥

राधाशब्दस्य व्युत्पत्तिर्यथा—

"राधाशब्दस्य व्युत्पत्तिः सामवेदे निरूपिता ।
नारायणस्तासुवाच ब्रह्माणं नाभिपङ्कजे ।
ब्रह्मा तां कथयामास ब्रह्मलोके च शङ्करम् ।
पुरा कैलासशिखरे मासुवाच महेश्वरः ॥
देवानां दुर्लभं नन्द निगूढमय वदामि ते ।
सुरासुरमुनीन्द्राणां वाञ्छितां मुक्तिदां पराम् ॥
रेफो हि कोटिजन्माघं कर्म्मभोगं शुभाशुभम् ।
आकारो गर्भवासञ्च मृत्युञ्च रोगसूतकञ्च ॥
धकारमायुषो हानिमाकारो भवबन्धनम् ।
अवणस्मरणोक्तिभ्यः प्रणश्यति न संशयः ॥
रेफो हि निश्चलां भक्तिं दास्यं कृष्णपदाम्बुजे ।
सर्व्वेप्सितं सदानन्दं सर्व्वसिद्धौघमीश्वरम् ॥
धकारः सहवासञ्च तत्तुल्यकालमेव च ।
ददाति सार्ष्टिं सारूप्यं तत्त्वज्ञानं हरेः स्वयम् ॥
आकारस्तेजसी राशिं दानशक्तिं हरौ यथा ।
योगशक्तिं योगमतिं सर्व्वकालहरिस्मृतिम् ॥
मृत्युक्लिशरजादुःखागम्भोहजाञ्च किल्बिषम् ।
रोगशोकश्रमुत्थञ्च वेपन्ते नाश्च संशयः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३ अध्यायः ॥

तस्याः षोड़शनामानि वेदेषु व्युत्पत्तिश्च यथा,

नारद उवाच ।

"कानि षोड़श नामानि राधिकाया जगद्गुरोः ।
तानि मे वद शिष्याय श्रोतुं कौतूहलं मम ॥
श्रुतं नाम्नां सहस्रञ्च सामवेदनिरूपितम् ।
तथापि श्रोतुमिच्छामि तत्तो नामानि षोड़श ॥
अभ्यन्तराणि तेषां वा तदन्यान्येव वा विभो ।
अहो पुण्यस्वरूपाणि भक्तानां वाञ्छितानि च ॥
नामानि तेषां व्युत्पत्तिं सर्व्वेषां दुर्लभानि च ।
पावनानि जगन्मातुर्जगतां गुरुरूपिणी ॥

नारायण उवाच ।

राधा रासेश्वरी रासवासिनी रसिकेश्वरी ।
कृष्णप्राणाधिका कृष्णप्रिया कृष्णस्वरूपिणी ॥
कृष्णवामांशसम्भूता परमानन्दरूपिणी ।
कृष्णा वृन्दावनी वृन्दा वृन्दावनविनोदिनी ॥
चन्द्रावती चन्द्रकान्ता शतचन्द्रनिभानना ।
नामान्येतानि सारांणि तेषामभ्यन्तराणि च ।
राधेत्येवञ्च संसिद्धा राकारो दानवाचकः ।
स्वयं निर्व्वाणधात्री या सा राधा परिकीर्त्तिता ॥
रा च रासे च भवनाद्धा एव धारणादपि ।
हरेरालिङ्गनाधारात्तेन राधा प्रकीर्त्तिता ॥
रासेश्वरस्य पत्नीयं तेन रासेश्वरी स्मृता ।
रासे च वासो यस्याश्च तेन रासनिवासिनी ॥
सर्व्वांशा रसिकानाञ्च देवीनामीश्वरी परा ।
प्रवदन्ति पुरा सन्तस्तेन तां रसिकेश्वरीम् ॥
प्राणाधिका प्रेयसी सा कृष्णस्य परमात्मनः ।
कृष्णप्राणाधिका सा च कृष्णेन परिकीर्त्तिता ॥
कृष्णस्यापि प्रिया प्राज्ञा कृष्णो वाञ्छाः प्रियः सदा ।
सर्व्वदर्वगर्वोक्ता तेन कृष्णप्रिया स्मृता ॥
कृष्णरूपं संविधातुं या शक्ता चावलीलया ।
सर्व्वांशैः कृष्णसदृशी तेन कृष्णस्वरूपिणी ॥
वामार्द्धाङ्गेन कृष्णस्य या सम्भूता परा सती ।
कृष्णवामांशसम्भूता तेन कृष्णेति कीर्त्तिता ॥
परमानन्दराशिश्च स्वयं मूर्त्तिमती सती ।
श्रुतिभिः कीर्त्तिता तेन परमानन्दरूपिणी ॥
कृषिर्भूवाचकः शब्दो णश्च निर्व्वृतिवाचकः ।
आकारो दातृवचनस्तेन कृष्णा प्रकीर्त्तिता ॥
अस्ति वृन्दावनं यस्यास्तेन वृन्दावनी स्मृता ।
वृन्दावनस्याधिदेवी तेन राधा प्रकीर्त्तिता ॥
वृन्दः संघवचः शश्वदाकारोऽस्तिवाचकः ।
सन्ति वृन्दास्ति यस्याश्च सा वृन्दा परिकीर्त्तिता ॥
सुहास्यको विनोदश्च सा यस्या अस्ति नित्य च ।
वेदा वदन्ति तां तेन वृन्दावनविनोदिनीम् ॥
नखचन्द्रावलीवक्त्रचन्द्रोऽस्ति यच्च सन्ततम् ।
तेन चन्द्रावली सा च कृष्णेन कीर्त्तिता पुरा ॥
कान्तिरस्ति चन्द्रतुल्या यदा यस्या दिवानिशम् ।
सा चन्द्रकान्ता हर्षेण हरिणा परिकीर्त्तिता ॥
शरच्चन्द्रप्रभा यस्याश्चानने ऽस्ति दिवानिशम् ।
मुनिना कीर्त्तिता तेन शरच्चन्द्रप्रभानना ॥
इदं षोड़शनामोक्तमर्थव्याख्यानसंयुतम् ।
नारायणेन यद्दत्तं ब्रह्मणे नाभिपङ्कजे ॥
ब्रह्मणा च पुरा दत्तं धर्म्माय जनकाय मे ।
धर्म्मेण कृपया दत्तं मह्यमादित्यपर्व्वणि ॥
पुष्करे च महातीर्थे पुण्याहे देवसंसदि ।
राधाप्रभावप्रस्तावे सुप्रसन्नेन चेतसा ॥
इदं स्तोत्रं महापुण्यं तुभ्यं दत्तं महामुने ।
निन्दकायावैष्णवाय न दास्यसि महामुने ॥
यावज्जीवमिदं स्तोत्रं त्रिसन्ध्यं यः पठेन्नरः ।
राधामाधवयोः पादपद्मे भक्तिर्भवेदिह ॥
अन्ते लभेत्तयोर्दास्यं गच्छन् सहचरो भवेत् ।
अणिमादिकसिद्धिञ्च संप्राप्य नित्यविग्रहम् ।
व्रतदानोपवासैश्च सर्व्वैर्नियमपूर्व्वकम् ।
चतुर्णाञ्चैव वेदानां पाठैः सर्व्वार्थसंयुतैः ॥
सर्व्वेषां यज्ञतीर्थानां करणैर्विधिबोधितैः ।
प्रादक्षिण्येन भूमेश्च कृत्स्नायाश्चैव सप्तधा ॥
शरणागतरक्षायामज्ञानज्ञानदानतः ।
देवानां वैष्णवानाञ्च दर्शनेनापि यत् फलम् ॥
तदेव स्तोत्रपाठस्य कलां नार्हन्ति षोड़शीम् ।
स्तोत्रस्यास्य प्रभावेन जीवन्मुक्तो भवेन्नरः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १० अध्यायः ॥

राधानामोच्चारणानन्तरं कृष्णनामोच्चारण-विधिर्यथा,—

नारद उवाच।

"आदौ राधां समुच्चार्य पश्चात् कृष्णं विदुर्बुधाः।
निमित्तमस्य मां ब्रूहि वद भक्तजनप्रिय॥

श्रीनारायण उवाच।

निमित्तमस्य निखिलं कथयामि निशामय।
जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता॥
गरीयसीति जगतां माता ब्रह्मगुरोः पितुः।
राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः॥
कृष्णराधेशगौरीति लोके न च कदा श्रुतः।
प्रसीद रोहिणीचन्द्र गृहाणार्घ्यमिदं मम॥
गृहाणार्घ्यं मया दत्तं संध्यया सह भास्कर।
प्रसीद कमलाकान्त गृहाण मम पूजनम्॥
इति छन्दः सामवेदे कौथुमे मुनिसत्तम।
राधाशब्दोच्चारणादेव स्रोतो भवति माधवः।
धाशब्दोच्चारतः पश्चाद्धावत्येव ससम्भ्रमः॥
आदौ पुरुषमुच्चार्य पश्चात् प्रकृतिमुच्चरेत्।
स भवेन्मातृगामी च वेदातिक्रमणे सुने॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ५२ अध्यायः॥

तस्या निन्दायां दोषो यथा,—

"ये वा द्विषन्ति निन्दन्ति पापिनश्च हसन्ति च।
कृष्णप्राणाधिकां देव देवीञ्च राधिकां पराम्॥
ब्रह्महत्याव्रतं ते च लभन्ते नात्र संशयः।
तप्तताम्रे च पच्यन्ते कुम्भीपाके च रौरवे॥
तप्ततैले महाघोरे ध्वान्ते कीटे च यन्त्रके।
चतुर्दशेन्द्रावच्छिन्नं पितृभिः सप्तभिः सह॥
ततः परमजायन्त जन्मैकं कोलयोनितः।
दिव्यं वर्षसहस्रञ्च विष्ठाकीटाश्च पापतः॥
पुंश्चलीनां योनिकीटास्तद्रक्तमलभक्षकाः।
मलकीटाश्च तन्मानवर्षञ्च पूयभक्षकाः।
वेदे च काण्वशाखायामित्याह कमलोद्भवः॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ६७ अध्यायः॥

राधास्वरूपं यथा,—

यशोदोवाच।

"हरौ च निश्चला भक्तिस्तद्दास्यं वाञ्छितं मम।
तव नाम्नश्च व्युत्पत्तिं का वा त्वं वक्तुमर्हसि॥

राधिकोवाच।

भवेद्भक्तिर्निश्चला ते हरेर्दास्यञ्च दुर्लभम्।
लभस्व मद्वरणादि कथयामि स्वनिर्णयम्॥
पुरा नन्देन दृष्टाहं भाण्डीर वटमूलके।
मया च कथितो नन्दो निखिलस्य व्रजेश्वरः॥
अहमेव स्वयं राधा कृष्णा रासेशकामिनी।
रासेशः श्रीहरेरंशः पार्षदप्रवरो महान्॥
राशब्दश्च महदिष्टो विश्वानि यस्य लोमसु।
विश्वप्राणिषु विश्वेषु धा धात्रीमातृवाचकः॥
धात्री माताहमेतेषां मूलप्रकृतिरीश्वरी।
तेन राधा समाख्याता हरिणा च पुरा बुधैः॥
अहं श्रीदामशापेन वृषभानुसुताधुना।
गतवर्षञ्च विच्छेदो हरिणा सह साम्प्रतम्॥
वृषभानुश्च कृष्णस्य पार्षदप्रवरो महान्।
पितृणां मानसी कन्या मम माता कलावती॥
अयोनिसम्भवाहञ्च मम माता च भारते।
पुनः सार्द्धञ्च युष्माभिर्यास्यामि श्रीहरेः पदम्॥
इति ते कथितं सर्व्वं व्रजं व्रज व्रजेश्वरि।
व्रजेश्वरेण सहिता स्वामिना ज्ञानिना सति!॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥

राधापार्व्वत्योरभेदो यथा,—

पार्व्वत्युवाच।

"किं वा प्रश्नं करिष्यामि त्वां राधां मङ्गलाजयाम्।
गता ते विरहज्वाला श्रीदाम्नः शापमोक्षणे॥
सततं तन्मनःप्राणा त्वय्येव मयि ते तथा।
न स्नेहभावयोर्भेदः शक्तिपुरुषयोर्यथा॥
ये त्वां निन्दन्ति मद्भक्तास्तद्भक्ताश्चापि मामपि।
कुम्भीपाके च पच्यन्ते यावच्चन्द्रदिवाकरौ॥
राधामाधवयोर्भेदं ये कुर्व्वन्ति नराधमाः।
वंशहानिर्भवेत्तस्य पच्यन्ते नरकं चिरम्॥
यान्ति शूकरयोनिञ्च पितृभिः सप्तकैः सह।
वृष्टिं वर्षसहस्राणि विष्ठायां कृमयस्तथा॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १२३ अध्यायः॥

गोलोके तस्या आश्रमो यथा,—

"एतान् मनोरमान् दृष्ट्वा ते देवा गमनोन्मुखाः।
जग्मुः शीघ्रं कियद्दूरं ददृशुः सुन्दरं ततः॥
आश्रमं राधिकायाश्च रासेशस्यापि नारद।
देवाधिदेव्या गोपीनां वराया वरनिर्मितम्॥
प्राणाधिकायाः कृष्णस्य रम्यान्नव्यं मनोहरम्।
सर्व्वानिर्व्वचनीयञ्च पण्डितैर्न निरूपितम्॥
सुचारु वर्त्तुलाकारं षड्गव्यूतिप्रमाणकम्।
शतमन्दिरसंयुक्तं ज्वलितं रत्नतेजसा॥
अमूल्यरत्नसाराणां वरैर्विरचितं वरम्।
दुर्लङ्घ्याभिर्गभीराभिः परिखाभिः सुशोभितम्॥
कल्पवृक्षैः परिवृतं पुष्पोद्यानशतान्तरम्।
सुमूल्यरत्नरचितं प्राकारैः परिवेष्टितम्॥
सद्रत्नवेदिकायुक्तं युक्तैर्द्वारैश्च सप्तभिः।
संयुक्तरत्नरचितैश्च विचित्रैर्वस्तुलेमुने॥
प्रधानद्वारसन्नद्धैः क्रमशः क्रमशो मुने।
सर्व्वतोऽपि ततश्चाष्टगुणद्वारसंयुतम्॥
देवा दृष्ट्वा च प्राकारं सहस्रधनुरुच्छ्रितम्।
सद्रत्नरत्नकलससमूहैः सुमनोहरम्॥
सुदीप्तं तेजसा रम्यं परमं विस्मयं ययुः।
ततः प्रदक्षिणीकृत्य कियद्दूरं ययुर्मुदा॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः॥

तस्या जन्मतिथिर्यथा,—

"भाद्रस्य कृष्णपक्षे तु हरिजन्माष्टमी यदा।
तस्याः परे तु या शुक्ला तस्यां जाता हरिप्रिया।
वृषभानुपुरी नाम्ना सर्व्वरत्नमयी शुभा।
सुवर्णमणिमाणिक्यविचित्रभवनाङ्गना॥
अणिमादिसुखैश्वर्य्यपरिपूर्णमनोहरा।
चित्रध्वजपताकादिविचित्रा चित्रनिर्म्मिता।
चिदानन्दस्वरूपा सा चिदानन्दप्रदायिनी।
आनन्दकलिला नार्य्यो यत्र तिष्ठन्ति सर्व्वदा॥
विचित्रवेशालङ्कारा विचित्रवसनाम्बरा।
गानावेशविचित्राङ्गा प्रमदामोददायिनी॥
सर्व्वलक्षणसम्पन्ना राधा नाम्ना विनोदिनी।
जगतां मोहिनी देवी गुह्यगुह्यातिसुन्दरी।
सहस्रनामसंस्तोत्रं न कथं मुनिसत्तम॥

नारद उवाच।

प्रब्रूहि महाभाग पृच्छामि तव किङ्करः।
का लक्ष्मीः किं सरस्वत्याश्चाख्यानं; सरस्वती॥
विद्याधिष्ठातृदेवी वा देवी प्रकृतिः किंवा।
वेदकन्या देवकन्या मुनिकन्याथवा वद॥

सदाशिव उवाच।

कोटिकोटिमहालक्ष्मीर्लक्ष्मीः का वा परा वरा।
निन्दिता यत्पदाम्भोजे कथिता मुनिसत्तम॥
अपरं किं निगदेऽहमेकवक्त्रेण नारद।
श्रीराधारूपलावण्यगुणादीन् वक्तुमक्षमः॥
तत्तद्यादिमाहात्म्यं लक्ष्येऽहमपि नारद।
त्रैलोक्ये तु समर्थो हि न मातुं वक्तुमर्हति॥
तद्रूपमाधुर्य्यं जगन्मोहनमोहनम्।
यद्यनन्तसुखोऽपि स्यां तद्वक्तुं नास्ति मे गतिः॥
लक्षांशः कमला दास्यो यस्याः सा लक्ष्यकोटिका मता।
एवं शतसहस्राणामीश्वरी राधिका परा॥

नारद उवाच।

प्रभो श्रीराधिकाकवचमाहात्म्यं सर्व्वतः परम्।
तदहं श्रोतुमिच्छामि यमस्तं भक्तवत्सल॥
कथयतां मे महाभाग व्रतानाञ्च व्रतोत्तमम्।
ध्यानं वा कौथुमी पूजा स्तुतिर्वापि वदस्व मे॥
तत्सर्व्वं श्रोतुमिच्छामि कथयतां मे सदाशिव।
चर्य्या पूजाविधानञ्च विशेषमर्चनं भव॥
यत्तं मन्त्रं स्तुतिर्ध्यानं पूजनं यत्र निर्म्मितम्।
पूजने किं विधानञ्च तत्सर्व्वमावर्च्यते विधौ॥

शिव उवाच।

वृषभानुपुरीराजा वृषभानुर्महाशयः।
महाकुलप्रसूतोऽसौ सर्व्वशास्त्रविशारदः॥
महाशयो धनी श्रीमानग्निमाद्यष्टवैभवः।
वैश्यः सदन्तःकरणः कुलीनः कृष्णदेवतः॥
तस्य भार्य्या महाभागा श्रीमत्कीर्त्तिरिति श्रुता।
रूपयौवनसम्पन्ना महाराजकुलोद्भवा॥
महालक्ष्मीस्वरूपा सा भक्ता परमसुन्दरी।
महापतिव्रता कान्ता सर्व्वविद्यागुणान्विता॥
तस्यां श्रीराधिका जाता श्रीमद्वृन्दावनेश्वरी।
भाद्रे मासि सिताष्टम्यां मध्याह्ने शुभदायिनी॥
वेदागमपुराणादिगीता या कृष्णवल्लभा।
सदा कृष्णप्रिया साध्वी श्रीकृष्णानन्ददायिनी॥
शृणु मत्तो महाभाग पूजनं भजनं तथा।
कर्त्तव्यं यदनुष्ठानं राधाजन्ममहोत्सवः॥
समवेत्य सदा राधां जन्मव्रतपरायणैः।
तत् समग्रं प्रवक्ष्यामि ध्यानादिकमनुक्रमात्॥
सर्व्वदा पश्चिमद्वारे श्रीराधाकृष्णमन्दिरे।
ध्वजसच्चक्रकलसपताकातोरणादिभिः॥
नानासुमङ्गलद्रव्यैर्यथाविधि प्रवर्त्तते।
सुवासितगन्धपुष्पैर्धूपितैर्गृहम्॥
मध्ये पञ्चवर्णचूर्णैर्मण्डपं सुसरोरुहम्।
सुयोऽष्टदलाकारं तत्र निर्म्माय यत्नतः॥
दिव्यासने पद्ममध्ये पश्चिमाभिमुखीं स्थिताम्।

श्रीयुग्ममूर्त्तिं सुपास्य ध्यानपाद्यादिभिः क्रमात् ॥
भक्तैः सह सजातीयैः प्रक्यानुसारवस्तुभिः ।
तद्भक्तः पूजयेद्भक्त्या तां सदा संयतेन्द्रियः ॥"

अथ ध्यानम् ।

"हेमेन्दीवरकान्तिमञ्जुलतरं श्रीमज्जगन्मोहनं
नित्याभिर्ललितादिभिः परिवृतं सन्नीलपीताम्बरम् ।
नानाभूषणभूषणाङ्गमधुरं कैशोररूपं युगं
गान्धर्व्वाजनमत्यं सुललितं नित्यं शरण्यं भजे ॥
युग्ममूर्त्तिमिति ध्यात्वा शालग्रामेऽथवा पुनः ।
साक्षात् शैलादिमूर्त्तौ वा मनोमय्यां समर्चयेत् ॥
ततो मण्डलपूजाञ्च तयोः सम्मुखतः क्रमात् ।
कुर्य्याद्भक्तः प्रयत्नेन ध्यानपाद्यादिभिः सदा ॥
ललिता पश्चिमे पूज्या पीतवर्णदले ऽपरा ।
चन्द्रावली शुक्लदले तद्वामे पूजयेत् सुधीः ॥
वायव्ये श्यामलां देवीं कृष्णवर्णदले ऽर्चयेत् ।
तद्वामे चित्ररेखाख्यां शुक्लवर्णदले ततः ॥
उत्तरे श्रीमतीं लक्ष्यां रक्तवर्णदले तथा ।
तद्वामपार्श्वे चन्द्राख्यां नीलवर्णदले ऽर्चयेत् ॥
रक्तवर्णदले ऽप्यर्च्या ईशाने श्रीहरिप्रिया ।
तस्या वामे शुक्लदले पूज्या मदनसुन्दरी ॥
पीतवर्णदले पूर्व्वे विशाखामर्चयेत्ततः ।
प्रियां तस्या वामपार्श्वे शुक्लवर्णदले ऽर्चयेत् ॥
अग्निकोणे श्यामवर्णा दले सख्यां समर्चयेत् ।
तद्वामे श्रीमधुमतीं शुक्लवर्णदले ऽर्चयेत् ॥
पूजयेद्दक्षिणे पद्मे रक्तवर्णदले तथा ।
शुचिरेखाञ्च तद्वामे नीलवर्णदले ऽर्चयेत् ॥
पूजयेन्नैर्ऋते भद्रां रक्तवर्णदले ततः ।
रसप्रियाञ्च तद्वामे शुक्लवर्णदले ऽर्चयेत् ॥ * ॥
श्रीराधाप्रियसङ्गिनीं विधुसुखीं कृष्णप्रियां
प्रेयसीं
हेमाभां परिधायिनीं सुमधुरध्यानां सुवेशाम्बराम् ।
सद्रत्नाभरणैर्मनोज्ञसुतनुं नित्यां जगन्मोहिनीं
वन्दे श्रीललितां कुरङ्गनयनीं पीताम्बरेणावृताम् ॥ १ ॥
श्यामां श्यामपरायणां वरतनुं चामीकराङ्गच्छटां
मञ्जीरैर्मधुरध्वनिं परिलसच्चन्द्राननां सुखराम् ।
सद्रत्नाभरणां सरोजनयनीं शुक्लांशुकेनावृतां
ध्यायेत् श्रीललितासखीं शुचिमुखीं चन्द्रावतीं-
सत्तमाम् ॥ २ ॥
कान्त्या काञ्चनसन्निभां सुललितां कृष्णाम्बरं
बिभ्रतीं
नानाभूषणमञ्जुलाङ्ग सुदतीं माहेङ्गिकीं सुन्दरीम् ।
श्रीवृन्दाविपिनेश्वरीं प्रियसखीं भव्यां शशाङ्काननां
वेणीचारुसुमल्लिकास्रजमहं नित्यं भजे श्यामलाम् ॥ ३ ॥
श्रीकृष्णप्रियवल्लभां शशिसुखीं सच्चन्दनालिप्तां

शुद्धस्वर्णशरीरकान्तिमतुलां शुक्लाम्बरेणावृताम् ।
स्वर्णाद्याभरणां सदा पुलकिनीं श्रीकृष्णभावेन वै
गायन्तीं मधुरस्वरैरविरतं श्रीचित्रलेखां
भजे ॥४॥
कनकनिभशरीरां बिभ्रतीं रक्तवस्त्रं
ललितनलिननेत्रां चारुभूषाङ्गशोभाम् ।
सुमधुरपिकवाक्यां चन्द्रवक्त्रां सुवेशां
मधुरिपुनिजदासीं श्रीमतीं तां हि वन्दे ॥५॥
वृन्दावनेशनिजसेवनसौख्यदासीं
रम्यां सुनीलवसनां सुरवावयवाम् ।
नानाविभूषिततनुं स्फुरदम्बुजाक्षीं
चन्द्रां भजे सकलरागमनोज्ञगानाम् ॥६॥
सुवर्णवर्णां शुकधारिणीं ता-
सुपाङ्गयन्त्रां मणिभूषणाङ्गीम् ।
हरिप्रियां मञ्जुलपत्रनेत्रां
भजेऽहमीड्यां कनकाङ्गशोभाम् ॥ ७ ॥
रवावकलवादिनीं सकलरागसंगायिनीं
सुचारुमणिकुण्डलां शरदपूर्णचन्द्राननाम् ।
सुरत्नवरभूषणां रुचिरशुभ्रपट्टाम्बरां
भजे मदनसुन्दरीं कनकवर्णदेहां शुभाम् ॥८॥
सुतानज्ञां गीते भ्रमरकलकण्ठीं सुचतुरां
जगद्वन्द्यां वेल्लन्नलिननयनामिन्दुवदनाम् ।
विशाखां गौराङ्गीं ललितसुरलीं पीतवसनां
भजे श्यामां सेव्यां सकलगुणपूर्णां सुखमयीम् ॥९॥
सुचामीकराभूषणाढ्यां सुवेशा-
सुसङ्गीतविद्यासुधीरां वरेण्याम् ।
सुवंशीसुगानां सुहेमाङ्गशोभां
भजे श्रीप्रियां शुक्लवस्त्रां मनोज्ञाम् ॥१०॥
गान्धर्व्वानिजदासिकां सुगदवाभयन्तं सदा
बिभ्रतीं
मञ्जुस्वर्णविभूषितां वरतनुं पाथोजनेत्रां
वराम् ।
ध्यायेत् कृष्णपदारविन्दमधुपीं कृष्णाम्बरेणावृतां
संगीते मधुरवरामविरतं सेव्यां मनोहारिणीम् ॥११॥
रुचिरमधुमतीं तां तप्तचामीकराभां
पिककलरवकण्ठीं शुक्लवस्त्रं दधानाम् ।
तिलकुसुमसुनासां चारुहेमाङ्गभूषां
युगलचरणसेवातत्परामाभजेऽहम् ॥१२॥
रत्नालङ्कारदेहां जितकुसुमरुचीमङ्गलावण्यरूपैः
भव्यां सङ्गीतविद्यासुनिपुणरसिकां तानमानातिविज्ञाम् ।
शारङ्गीयन्त्रगानां कनकनिभतनुं सर्व्वदा कृष्णसेवीं
वन्दे पद्मां सुवेशां शशधरवदनां बिभ्रतीं रङ्गवस्त्रम् ॥ १३ ॥
शुचिरेखां स्मरङ्गच वादयन्तीं सुहुसंहुः ।
रसालापरूपाच्च रसप्रेमैकसंयुताम् ॥१४॥
भव्यां श्रीशुचिरेखिकां सुखमकां यत्नादिगानावरां

वन्देऽहं मधुरस्वरां परमिकां लावण्यसारान्विताम् ।
नानायन्त्रविशारदां वरतनुं पट्टाम्बरेणावृतां
फुल्लेन्दीवरलोचनामविरतं ध्याये जगन्मोहिनीम् ॥१५॥
श्रीयन्त्रं स्वरमण्डलं कलरवं गाने सदा बिभ्रतीं
श्रीभद्रां मधुरस्वरां सुललितां सद्रत्नवस्त्रावृताम् ।
राजत्स्वर्णरुचिं विभूषणवरैरङ्गैः सदा शोभितां
ध्याये श्रीयुगसेविकां परमिकां ज्ञादेकमग्नां
सदा ॥१६॥
राधाकृष्णपदारविन्दमधुपीं सद्भङ्गतुल्याधिनीं
नानाभूषणभूषिताङ्गरुचिरां सद्रत्नवस्त्रां
शुभाम् ।
ध्याये सन्ततलक्ष्यभावललितां केयूरहेमाङ्गदां
स्वर्णाङ्गीञ्च रसप्रियां सुखमयीं सर्व्वाङ्गशोभान्विताम् ॥१७॥
मधुस्वरां कोकिलभङ्गगानां
सतुम्बरीयन्त्रविधारिणीञ्च ।
वनप्रियां शुक्लसुचीनवस्त्रां
भजे हरिद्राङ्गसमङ्गशोभाम् ॥१८॥
एवं ध्यात्वा पूजयिला ललिताद्या यथाक्रमात् ।
पाद्यादिभिः सोपचारैर्विधिवल्लक्षितत्परः ॥
सङ्गिनो ललितादीनां दलात्यधिमतो सुने ! ।
प्रणवादिनमोऽन्तेन संप्रदानपदेन वै ।
तत्तन्नाम्ना तु मनुना पूज्यगन्धादिभिर्मुने ! ॥"

इति पाद्मे उत्तरखण्डे श्रीराधाकृष्णाष्टमीव्रतकथनमाहात्म्य नाम १६२ अध्यायः ॥

श्रीसदाशिव उवाच ।

"प्रत्येकेऽष्टौ पूजयेद्दे क्रमतस्तु दले दले ।
प्रथमं नाम्ना कथ्यते ताञ्चाष्टाविंशाधिकं शतम् ।
रङ्गसुखी रसज्ञा च शुभदा सुमुखी तथा ।
वल्लवी चन्द्रिका चारुचतुरा च सुचञ्चला ॥
मधुरा हस्तकमला तथा मधुरभाविनी ।
विलासिनी रसवती तथा खञ्जनलोचना ॥
सुखदा चन्द्रकलिका रसदा रसमञ्जरी ।
सदा सुमञ्जरी शीला चन्द्रा चन्द्रप्रभावती ॥
वंशस्थी मालती जाती चन्द्रकान्ती सुकुन्तला ।
रम्भा भ्रमरगम्भीरा सुशीला च सुवेशिनी ॥
आमलकी सुधाकण्ठी प्रिता च श्रीरतिप्रिया ।
शुकप्रिया मधुकरी सुवेशा चान्तोद्भवा ॥
सुरलीवल्लभा वृन्दा पारिजातप्रिया शुभा ।
पद्मखरा रत्नमाला मदिरा रासवल्लवी ॥
मातङ्गगमनी तारावती कुण्डलधारिणी ।
केशरी मित्रवृन्दा च लक्ष्माच्युतमालिका ॥
मायावती कौशिकी च कोमलाङ्गी सुचन्दनी ।
पीयूषभाषिणी सत्यवती च कुञ्जवासिनी ॥
कपोतमालिका लोपामुद्रा च किंशुकप्रिया ।
दलावती कुङ्कुमा च कमला च मदालसा ॥
तिलोत्तमा च सावित्री बहुला प्रियवादिनी ।
सुकावली चित्ररेखा सुमित्रा लोलकुण्डला ॥
अरुन्धती चित्रवती श्रीरक्ता पद्मगन्धिनी ।
मेनका कलिका रङ्गकेतकी कामसूर्च्छनी ॥

कुसुदप्रिया च तानङ्गा तथा वृत्तविलासिनी ।
हिरावती हारकण्ठी सिंहमध्या सुलोचना ॥
नन्दया नन्दकलिका सुनन्दा नन्ददायिनी ।
कुरङ्गाक्षी च सुश्रोणी केलिलोला प्रियंवदा ॥
श्यामाराध्या श्यामसेव्या कस्तूरी मानभञ्जिनी ।
विचित्रवसना रत्नमञ्जीरा मञ्जुकिङ्किणी ॥
किङ्करा भृङ्गमाला तथा रासविहारिणी ।
श्रीकृष्णदयिते पूज्या यत्नात् चन्द्रावली तत: ।
ध्यानपाद्यादिभि: सम्यक्प्रकारैश्च च पूजके: ॥
हेमाभां मधुरस्वरां विधुसुखीं गान्धर्वविद्या-
रतां
नानालङ्कारभूषितागमधुरां जातीसुमालीसजम्।
वीणायन्त्रसुवादिनीं वरतनुं चित्राम्बरं बिभ्रतीं
ध्याये त्वत्परायणां सुचियुतां चन्द्रावलीं
मङ्गलाम् ॥
एवं राधाजन्मतिथौ कुर्य्यान्मङ्गलपूजनम्।
कार्य्यादीन् वैष्णवान् सर्व्वान् यत्नत: परि-
पूजयेत् ॥
एवं राधाजन्यपूजां तथोर्मङ्गलपूजनम् ।
प्रवन्दे यत्नत: कुर्य्यात् कार्य्ये रासमहोत्सवे ॥
न्यूनातिरिक्तं देवर्षे ! न कर्त्तव्यं कदाचन ।
श्रीमत्कृष्णैकतानेनावश्यं तेनैव सर्व्वदा ॥
नाकृत्वेत् ग्रैवग्रात्कादीन् राधाजन्ममहोत्सवे ।
मायाबद्धान् पतितान् कोलात्यत्वान्न निमन्त्रयेत् ॥
विना भाग्यवतां लोकान्न च तत्र प्रवेशयेत् ।
गन्धपुष्पादिभिर्माल्यैश्चन्दनैस्तन्निवेदितै: ॥
नानापराधभीतस्तु भक्तांस्तांस्तत्र चार्चयेत् ।
तत्तन्महाप्रसादैश्च भक्ष्यपेयादिभिस्तथा ॥
तत्तन्मङ्गलपूजाया: कार्य्यो मान्यांश्च भोजयेत् ।
बहिर्मुखान् श्रीकृष्णस्य मान्यवैभक्तितत्पर: ॥
कार्य्यादीन् वैष्णवान् भक्त्या भोजयेत् पूजयेत्तथा।
तन्नैवेद्यैर्गन्धपुष्पैर्माल्यैर्मेलयजादिभि: ॥
यजातीयैर्भक्तवृन्दै: समं तत्र महोत्सवम् ।
दिवा कुर्य्यात् प्रयत्नेन राधाभक्तिपरायण: ॥
महाप्रसादं भुञ्जीत दिनान्ते चरणोदकम् ।
पूजां कृत्वा पिबेत् कार्य्यै: सार्द्धमानन्दितेक्षत: ॥
रात्रौ जागरणं कुर्य्याद्राधाकृष्णेति वा स्मरन् ।
पूजयेन्मूर्त्तिमारोप्य रूप्यसर्वादिसंस्कृताम् ॥
कृष्णान्यकथालापं पुराणाद्यनुकीर्त्तनम् ।
अवश्यं प्रयत्नेन नारीभिर्व्वान्धवै: सह ॥
य: करोति नरो भक्त्या राधाजन्माष्टमीं शुभाम्।
वदन्ति विबुधा: सर्व्वे राधाभक्तोऽस्ति भूतले ॥
प्रहरे प्रहरे राधां गोकाष्टम्यां दिवानिशि ।
पूजयित्वा विधानेन श्रीकृष्णसहितां तथा ॥
तद्रसिकै: सहालापे राधाकृष्णस्तुतिं सुधु: ।
तत्तन्महोत्सवं कृत्वा परमानन्दितो भवन् ।
दण्डवत् प्रणतिं कुर्य्यादष्टाङ्गविधिबोधिताम् ।
प्रत्यब्दमेव कुरुते राधाजन्ममहोत्सवम् ॥
य: पुमान्यथा नारी राधाभक्तिपरायणा ।
भूत्वा वृन्दावने वास: श्रीराधाकृष्णसङ्गिनी ।
व्रजदासी भवेत् सोऽपि राधाभक्तिपरायण: ।
तस्याश्चापप्रयोगाच्च मुक्तवन्धो नरो भवेत् ।

राधाराधेति यो ब्रूयात् स्मरणं कुरुते नर: ।
सर्व्वतीर्थेषु संस्कारात् सर्व्वविद्याप्रयत्नवान् ॥
राधाराधेति कुर्य्यात्तु राधाराधेति पूजयेत् ।
राधाराधेति यन्निष्ठा राधाराधेति जल्पति ॥
वृन्दारण्ये महाभागा राधासहचरी भवेत् ।
जगतां पृथिवी धन्या तत्र वृन्दावनं पुरी ।
तत्र धन्या सती राधा श्रेष्ठा या मुनिसत्तमै: ॥
ब्रह्मादीनां महाराध्यां दूरत: सेवते सुर: ।
तां राधिकां यो भजते देवर्षे तं भजेम्यहम् ॥
तदालापं कुरुष्वैव जपस्व मन्त्रसुत्तमम् ।
अहर्निशं महाभाग कुरु राधेति कीर्त्तनम् ॥
राधेति कीर्त्तनं कुर्य्यात् कृष्णेन सह यो जन: ।
तस्माहात्म्यं न शक्नोऽहं वक्तुं शेषोऽपि नैव च ॥
न गङ्गा न गया नित्यं न हिता च सरस्वती ।
कदाचिन्नैव विमुखा सर्व्वतीर्थफलप्रदा ॥
सर्व्वतीर्थमयी राधा सर्व्वैश्वर्य्यमयी पुन: ।
कदाचिद्विमुखा लक्ष्मीर्न भवेत् तदालये ॥
तस्यालये वसेत् कृष्णो राधया सह नारद ।
राधाकृष्णेति यस्येष्टं तदेतद्व्रतमुत्तमम् ।
तद्गेहे देहमनसो: कदाचिन्न चलेद्धरि: ॥
एतदेव वच: श्रुत्वा नारदो मुनिसत्तम: ।
प्रणत: पूजयामास गोकाष्टम्यां ययोदितम् ॥
जन्माष्टमीव्रतकथां य: शृणोतीह मानव: ।
श्रीराधाया: सुखी मानी धनी सर्व्वगुणान्वित: ॥
जपेद्यो भक्तिसंयुक्त: पठेन्नित्यं शरेन्नर: ।
धर्म्मार्थी लभते धर्म्ममर्थार्थी लभते धनम् ॥
कामार्थी लभते कामं मोक्षार्थी मोक्षमाप्नु-
यात्तु ॥
सर्व्वदानव्रतरत: कार्य्यादिवैष्णव: सुखी ।
विवेकी च तथा निष्कामी यदा भक्तिमाप्नु-
यात् ॥"
इति पाद्मे उत्तरखण्डे श्रीसदाशिवनारदसंवादे
श्रीराधाजन्माष्टमीव्रतमाहात्म्ये १६३अध्याय: ॥
(तन्त्रमतेऽस्या उत्पत्त्यादिविवरणानि यथा,—
कात्यायन्युवाच ।
"वासुदेव महाबाहो मा भयं कुरु पुत्रक ।
मथुरां गच्छ तातेति तव सिद्धिर्भविष्यति ॥
गच्छ गच्छ महाबाहो पद्मिनीसङ्गमाचर ।
पद्मिनी मम देवेश व्रजे राधा भविष्यति ।
अन्याश्च गोपकादेश: सदा तस्यानुचारिका: ॥
वासुदेव उवाच ।
शृणु मातर्म्महामाये चतुर्वर्गप्रदायिनि ।
त्वां विना परमेशानि ! विद्यासिद्धिर्न जायते ॥
पद्मिनीं परमेशानि ! शीघ्रं दर्शय सुन्दरि ! ।
प्रत्ययं मम देवेशि ! तदा भवति मानसम् ॥
इति श्रुत्वा वचस्तस्य वासुदेवस्य तत्क्षणात् ।
आविरासीत्तदा देवी पद्मिनी परसंस्थिता ॥
रक्तविद्युल्लताकारा पद्मगन्धसमन्विता ।
रूपेण मोहयन्ती सा सखीगणसमन्विता ।
सहस्रदलपद्मान्तर्मध्यस्थानसंस्थिता सदा ।
सखीगणयुता देवी जपन्ती परमाक्षरम् ॥
एकाक्षरी महेशानि ! सा एव परमाक्षरा ।

कालिका या महाविद्या पद्मिन्या रूपदेवता ।
वासुदेवो महाबाहुर्दृष्ट्वा विस्मयमागत: ॥
पद्मिन्युवाच ।
व्रजं गच्छ महाबाहो शीघ्रं हि भगवन् ! प्रभो ! ।
तथा सह महाबाहो कुलाचारं करोम्यहम् ॥
वासुदेव उवाच ।
शृणु पद्मिनि मे वाक्यं कदा ते दर्शनं भवेत् ।
कृपया वद देवेशि ! जपं किंवा करोम्यहम् ॥
पद्मिन्युवाच ।
तवाग्रे देवदेवेश मम जन्म भविष्यति ।
गोकुले माथुरे पीठे वृकभानुगृहे ध्रुवम् ॥
दु:खं नास्ति महाबाहो मम संसर्गहेतुना ।
कुलाचारोपयुक्ता या सामग्री पद्मलक्षजा ॥
मालायां तव देवेश सदा स्थास्यति नान्यथा ।
स्मृत्वा पद्मिनी सा तु सुन्दर्य्या दूतिका तदा ॥
अन्तर्धानं ततो गत्वा मालायां सहसा जगात् ।
वासुदेवोऽपि तां दृष्ट्वा चीराब्धिं प्रययौ ध्रुवम् ॥
त्यक्त्वा काशीपुरं रम्यं महापीठं दुरासदम् ।
प्रययौ माथुरं पीठं पद्मिनी परमेश्वरी ॥
यत्र कात्यायनी दुर्गा महामायास्वरूपिणी ।
नारदाद्यैर्मुनिश्रेष्ठै: पूजिता संस्तुता सदा ॥
कात्यायनी महामाया यमुनाजलसंस्थिता ।
यमुनाया जलं तत्र साक्षात् कालीस्वरूपिणी ॥
बहुपद्मयुतं रम्यं शुक्लपीतं महाप्रभम् ।
रक्तं कृष्णं तथा चित्रं हरितं सर्व्वमोहनम् ।
कालिन्द्याख्या महेशानि यत्र कात्यायनी परा ॥
कालिन्दी कालिका माता जगतां हित-
कारिका ।
सारार्थाख्ये महेशानि ! देवर्षिसंस्तुता परा ।
सहस्रदलपद्मान्तर्मध्ये माथुरमण्डलम् ॥
केशवस्थे महेशानि ! यत् पद्मं सततं स्थितम् ।
पद्ममध्ये महेशानि ! केशपीठं मनोहरम् ।
केशवस्थे महेशानि ! व्रजं माथुरमण्डलम् ।
यत्र कात्यायनी माया महामाया जगन्मयी ॥
व्रजं वृन्दावनं देवि ! नानाशक्तिसमन्वितम् ।
शक्तिस्तु परमेशानि ! कलारूपेण साक्षिणी ।
शक्तिं विना परं ब्रह्म न भाति ध्रुवरूपवत् ॥"
इति वासुदेवरहस्ये राधातन्त्रे षष्ठ: पटल: ॥
ईश्वर उवाच ।
"व्रजं गत्वा महादेवाकरोत् किं पद्मिनी तदा ।
कस्य वा भवने सा तु जाता सा पद्मिनी परा ॥
तत् सर्व्वं परमेशान विस्तारादद शङ्कर ।
यदि नो कथ्यते देव विमुह्यामि तदा तनुम् ॥
ईश्वर उवाच ।
पद्मिनी पद्मगन्धा सा वृकभानुगृहे प्रिये ! ।
आविरासीत्तदा देवी कृष्णस्य प्रथमं प्रिया ।
चैत्रे मासि सिते पक्षे नवम्यां पुष्ययुते ।
कालिन्दीजलकल्लोले नानापद्मगणावृते ।
आविरासीत्तदा पद्मा मायाद्विदलसुप्तश्रिता ॥
द्विदलोभूता तदा पद्मा स्थिता कनकमध्यत: ।
कोटिचन्द्रप्रतीकाशं द्विदलं मायासमन्वितम् ॥
पुष्ययुक्तनवम्यां वै निशार्द्धे पद्ममध्यत: ।

आविरासीत्तदा पद्मा रङ्गिणी कुसुमप्रभा ॥
तरुणादित्यसङ्काशे पद्मे परमकामिनी ।
वृकभानुपुरं देवि ! कालिन्दीपारमेव च ।
नाम्ना पद्मपुरं रम्यं चतुर्वर्गसमन्वितम् ॥
डिम्बज्योतिर्मयेशानि ! सहसादित्यसन्निभम् ।
तत्तच्चणात् परमेशानि गाढ़ध्वान्तविनाशनम् ॥
वृकभानुर्महात्मा स कालिन्दीतटमाश्रितः ।
महाविद्यां महाकालीं सततं प्रजपेत्सुधीः ॥
आविरासीन्महामाया तदा कात्यायनी परा ।
दृष्ट्वा पुत्र महाबाहो वृकभानो महीधर ।
सिद्धोऽसि पुरुषश्रेष्ठ वरं वरय साम्प्रतम् ॥

वृकभानुरुवाच ।

सिद्धोऽहं सततं देवि ! त्वत्प्रसादात् सुरेश्वरि ! ।
त्वत्प्रसादान्महामाये यथा सुखी भवाम्यहम् ॥
त्वत्प्रसादान्महामाये असाध्यं नास्ति भूतले ।
आत्मनः सदृशाकारां कन्यामेकां प्रयच्छ मे ॥
तच्छ्रुत्वा परमेशानि ! तदा कात्यायनी परा ।
मेघगम्भीरया वाचा यदाह वृकभानवे ।
तच्छृणुष्व महेशानि ! पीयूषसदृशं वचः ।
भक्त्या त्वदीयपत्न्यास्तु तुष्टाहं त्वयि सुन्दरि ! ॥
एतद्धि वचनं वत्स ! तव पत्न्या सुयुज्यते ।
इत्युक्त्वा सहसा तत्र महामाया जगन्मयी ॥
प्रददौ परमेशानि ! तस्मै डिम्बं मनोहरम् ।
वृकभानुर्महात्मा स तत्तच्चणादृद्यहमाययौ ॥
भार्य्यां तस्य विशालाक्षीं विशालकटिमोहिनीं ।
रत्नप्रदीपमाभाष्य रत्नपर्य्यङ्कमाश्रिता ।
तस्या हस्ते तदा भानुः प्रददौ डिम्बमोहनम् ।
तं दृष्ट्वा परमेशानि ! विस्मयं परमं गता ॥
हस्ते कृत्वा तु डिम्बं वै निरीक्ष्य च पुनः पुनः ।
नानागन्धयुतं डिम्बं सर्व्वशक्तिसमन्वितम् ॥
नानाज्योतिर्मयं डिम्बं तत्तच्चणाद्वे द्विधाभवत् ।
तत्रापश्यन्महाकन्यां पद्मिनीं लक्ष्मीमोहिनीम् ॥
रक्तविद्युल्लताकारां सर्व्वसौभाग्यवर्द्धिनीम् ।
तां दृष्ट्वा परमेशानि सहसा विस्मयं गता ॥

कीर्त्तिरुवाच ।

हे मातः पद्मिनीरूपे रूपं संहर संहर ।
ततस्तु परमेशानि ! तद्रूपं तत्तच्चणात् प्रिये ! ॥
संहृत्य सहसा देवी सामान्यं रूपमाश्रिता ।
ततस्तु कीर्त्तिदा देवी रूपमस्या अलोकयत् ॥
रङ्गिणी कुसुमाकारा रक्तविद्युत्समप्रभा ॥

कन्योवाच ।

हे मातः कीर्त्तिदे भद्रे चीरं पाययं सुन्दरि ! ।
स्तनं देहि स्तनं देहि तव कन्या भवाम्यहम् ॥
तत्श्रुत्वा वचनं तस्याः पद्मिन्याः कमलेचणे ।
अपाययत् स्तनं तस्मै पद्मिन्यै नगनन्दिनि ॥
चकार नाम तस्यास्तु भानुः कीर्त्तिदयान्वितः ।
रक्तविद्युत्प्रभां देवीं धत्ते यस्मात् शुचिस्मिते ।
तस्मात्तु राधिका नाम सर्व्वलोकेषु गीयते ॥

ईश्वर उवाच ।

दिने दिने वर्द्धमाना वृकभानुगृहे प्रिये ! ।
एवं माथुरपीठे च चकार व्रजवासिनी ॥
तस्माद्भाद्रपदे मासि कृष्णोऽभूत् कमलेचणः ॥

महादेव उवाच ।

शृणुष्वं पद्मपत्राक्षि रहस्यं पद्मिनीमतम् ।
सम्प्राप्ते परमेशानि ! द्वितीये वत्सरे तदा ॥
कुर्य्यादृषभेन देवेशि ! शिवलिङ्गप्रपूजनम् ।
प्रजपेत् परमां विद्यां कालीं ब्रह्माण्डरूपिणीम् ॥
पूजयेद्विविधैः पुष्पैर्गन्धैश्च सुमनोहरैः ।
फलैर्नैकविधैर्भक्ष्यैः पूजयेत् परमेश्वरीम् ॥

पद्मिन्युवाच ।

कात्यायनि महामाये महायोगिन्यधीश्वरि ! ।
देहि देहि महामाये विद्यामिह्मिमनुत्तमाम् ॥
सिद्धिञ्च वासुदेवस्य देहि मातर्नमोऽस्तु ते ।
त्वां विना ब्रह्म निःशब्दं निश्चलं सततं सदा ॥
शरीरस्थं हि ब्रह्मस्थं ब्रह्मणो ज्योतिर्मयं सदा ।
विना देहं परं ब्रह्म शवरूपवदीरितम् ॥
अतएव महामाये ब्रह्मणः कारणं परा ।
एवं प्रार्थ्य महेशानि ! सततं परमेश्वरीम् ॥
संपूज्य परया भक्त्या लक्ष्यं जप्त्वा तु मानसम् ।
वरं प्राप्ता महेशानि कात्यायन्याः समीपतः ॥

कात्यायन्युवाच ।

पद्मिनि शृणु महाक्यं शीघ्रं प्राप्स्यसि केशवम् ।
इत्युक्त्वा परमेशानि ! तत्रैवान्तरधीयत ॥
कात्यायनी महामाया सदा वृन्दावनेश्वरी ।
वृकभानुसुता राधा सखीगणवृता सदा ॥
वर्द्धमाना सदा राधा यथा चन्द्रकला प्रिये ! ।
सर्व्वशृङ्गारवेशाढ्या स्मरचकितलोचना ॥
सर्व्वालङ्कारसंयुक्ता साचात् श्रीरिव पार्व्वति ।
चचार गहने घोरे पद्मिनी परसुन्दरी ॥
या राधा परमेशानि ! पद्मिनी परमेश्वरी ।
पद्मस्य वनमाश्रित्य सदा तिष्ठति कामिनी ॥
अत्यमूर्त्तिं महेशानि ! दृष्ट्वा चैवात्मसन्निभाम् ।
आत्मनः सदृशाकारां राधामन्यां ससर्ज्ज सा ॥
या सा तु कृत्रिमा राधा वृकभानुगृहे सदा ।
अयोनिसम्भवा यातु पद्मिनी सा पराचरा ॥
कृत्रिमा या महेशानि ! तस्यास्तु चरितं शृणु ।
वृकभानुर्महात्मा स तस्या वैवाहिकीं क्रियाम् ॥
कारयामास यत्नेन पञ्चवर्षे तु सुन्दरि ! ।
तस्यास्तु चोभयं वंशं सावधानावधारय ॥
श्वशुरस्य वृकस्यापि वंशं परमसुन्दरम् ।
श्वश्रूस्तु जटिला ख्याता पतिर्म्मान्योऽतिमन्युकः ॥
ननान्दा कुटिलानाम्नी देवरो दुर्म्मदाभिधः ।
तिलकं क्षारमादाख्यं हरीहरिमनोहरः ॥
रोचनो रक्तताढ़ङ्को दृष्यिमुक्तप्रभाकरौ ।
कृष्णं दृष्ट्वा प्रतिच्छायं पद्मञ्च मदनाभिधम् ॥
श्यामलकान्यपर्य्यायः शृङ्गचूड़शिरोमणिः ।
पुष्यवन्तोत्पलकः सौभाग्यमणिरुच्यते ॥
काञ्ची काञ्चनचित्राङ्गि नूपुरे चित्रगोपुरे ।
मधुसूदनभावज्ञा ययोः सिञ्जितमाधुरी ॥
वासो मेघाम्बरं नाम कुरुविन्दनिभं सदा ।
आद्यं सुप्रियमभ्राभं रक्तमन्यं हरेः प्रियम् ॥
सुधांशो र्दर्पहरणो दर्पणो मणिवान्यवः ।
शृङ्गाका गन्धदा हैमी खड्गिका नाम कङ्कतिः ॥

कन्दर्पकुहरी नाम कटिका पुष्पभूषिता ।
स्वर्गसुखीनद्दिदली कृष्णा ख्याता खनामतः ॥
नीपा नदीतटे यस्य रहस्यकाननस्थली ।
मन्दारश्च धनुः स्त्रीश्च रागोद्दयमन्दगौ ॥
छानिवर्यं दयिता नित्यं वल्लभा रुद्रधन्वकी ।
सख्यः ख्याताः सदा भद्राचारुचन्द्रावलीसुखाः ॥
गन्धर्व्वास्तु कलाकण्ठी सुकण्ठी पिककण्ठिका ।
कलावती रसोल्लासा गुणवत्याद्याः स्मृताः ॥
या विशाखाश्रुतासौतिर्गायन्त्यः सुखदा हरेः ।
वादयन्त्यश्च सुस्वरं तालज्ञश्चनस्त्वपि ॥
माणिक्या नर्म्मदा प्रेमवती कुसुमपेशलाः ।
दिवाकीर्त्तेस्तनूजे तु सुगन्धानलिनीसुते ॥
मञ्जिष्ठा रङ्गवत्याख्ये रत्नकस्य किशोरिके ।
पालिन्धिसमसैरिन्ध्री वृन्दाकन्दलताद्याः ॥
धनिष्ठा गुणवत्याद्या धन्यवेश्यरगेहगाः ।
कामधा रामधा प्रेयी सखीभावविशेषभाक् ॥
लवङ्गमञ्जरी रागमञ्जरी गुणमञ्जरी ।
सुभानुसत्यनुपमा सुप्रिया रतिमञ्जरी ॥
रागलेखा कलाकेली भूविदाद्याश्च नायिकाः ।
नान्दीमुखी विन्दुमुखी आद्याः सन्धिविधायिकाः ॥
सुहृत्यत्नतया ख्याताः श्यामला मङ्गलाद्यः ।
प्रतिपत्तया श्रेष्ठा राधाचन्द्रावलीलुभे ॥
समूहास्तु ययोः सन्ति कोटिसंख्यागोहग्राम् ।
तयोरप्युभयोर्मध्ये सर्व्वमाधुर्य्यसोऽधिका ॥
श्रीराधा त्रिपुराभूती पुराणपुरुषप्रिया ।
असमानगुणोदर्य्या धूर्य्यो गोपेन्द्रनन्दनः ॥
यस्याः प्राणपरार्द्धार्णा परार्द्धादतिवल्लभः ।
श्रेष्ठा सा माहकादिभ्यस्तत्र गोपेन्द्रगेहिनी ।
वृषभानुः पिता यस्या वृषभानुविधो महान् ।
रत्नगर्भा क्षितौ ख्याता जगतो कीर्त्तिदा यथा ॥
उपास्यो जगतां चक्षुर्भगवान् पद्मबान्धवः ।
जप्यः स्वाभीष्टसंसर्गे कात्यायन्या महामनुः ॥
पौर्णमासी भगवती सर्व्वसौभाग्यवर्द्धिनी ।
पितामही महीभानुर्विन्दुर्म्मातामही मतः ॥
मातामहीपितामह्यौ सुखदामोदनाभिधे ।
रत्नभानुः स्वभानुश्च भानवः पितुः ॥
भद्रकीर्त्तिर्म्महाकीर्त्तिः कीर्त्तिचन्द्रश्च मातुलः ।
स्वसा कीर्त्तिमती मातुर्भानुसुता पितृस्वसा ॥
पितृस्वश्रूपतिः काश्यो मातृस्वश्रूपतिः शुभः ।
मातुली मेनकामेना यशो धात्री तु धातकी ॥
श्रीदामा पूर्व्वजो भ्राता कविष्ठाङ्गमञ्जरी ।
परमप्रेष्ठसख्यस्तु ललिता च विशाखिका ॥
विचित्रा चम्पकलता रङ्गदेवी सुदेविका ।
तुङ्गविद्यङ्गलेखा च इन्दुरेखा च गण्या मताः ॥
प्रियसख्यः कुरङ्गाक्षी मण्डली मानकुण्डला ।
मालती चन्द्रवलिका माधवामदनालसा ॥
मञ्जुमेधा शशिकला सुमध्या मधुमेचणा ।
कमला कामलतिका कान्तचूड़ा वराङ्गना ॥
मधुरी चन्द्रिका प्रेममञ्जरी तनुमध्यमा ।
कन्दर्पसुन्दरी मञ्जुभाषिणी चाद्यास्तु कोटिशः ॥
रक्तानीवितयाख्याता कलिका केलिसुन्दरी ।

कादम्बरी ग्रन्थिसखी चन्द्ररेखा प्रियंवदा ।
मदोन्मादा मधुमती वासन्ती कलभाषिणी ।
रत्नवेणी मालवती कर्पूरतिलकादयः ॥
एता वृन्दावनेश्वर्याः प्रायः सारूप्यमागताः ।
निद्यसख्यस्तु कस्तूरी मनोज्ञा मणिमञ्जरी ॥
सिन्दूरा चन्दनवती कौमुदी मुदितादयः ।
कानना दिगतास्तस्या विहारार्थं कला इव ॥
अथ तस्याः प्रकीर्त्यन्ते प्रेयस्यः परमाद्भुताः ।
वनादिशोपुरप्रेमसौन्दर्य्यभरभूषिताः ॥
चन्द्रावली च पद्मा च श्यामा सैका च भद्रिका ।
तारा चित्रा च गन्धर्व्वी पालिका चन्द्रमालिका ॥
मङ्गला विमला नीला भवनाक्षी मनोरमा ।
कल्पलता तथा मञ्जुभाषिणी मञ्जुमेखला ॥
कुसुदा केरवी पारी शारदाक्षी विशारदा ।
शृङ्गारी कुसुमा क्षमा सारङ्गी प्रविलासिनी ॥
तारावली गुणवती सुसुखी केलिमञ्जरी ।
हारावली चकोराक्षी भारती कामिनीति च ॥
आसां यूथानि शतशः ख्यातान्यन्यानि सुभ्रुवाम् ।
लक्षसंख्यास्तु कथिता यूथे यूथे वराङ्गनाः ॥
सख्यास्तेषु यूथेषु कान्ताः सर्व्वगुणोत्तमाः ।
राधा चन्द्रावली भद्रा श्यामला पालिकादयः ॥
जलनाथ सा ख्याता मधुमासे विशेषतः ।
पुण्यर्क्षे च नवम्यां वै शुक्लपक्षे शुचिस्मिते ॥
जाता राधा महेशानी स्वयं प्रकृतिपद्मिनी ।
तासु रेमे महेशानि स्वयं कृष्णः शुचिस्मिते ।
रमणं वासुदेवस्य मत्तश्चिह्नेषु कारणम् ॥

देव्युवाच ।

भो देव तापसां श्रेष्ठ विस्तारात्तद ईश्वर ।
कथं सा पद्मिनी राधा सदा पद्मवने स्थिता ॥
पितरं मातरं त्यक्त्वा आत्मतुल्यां सखीं सतीं ।
पद्ममाश्रित्य देवेश वृन्दावनविलासिनी ।
सदाध्यास्ते महेशानि एतद्गुह्यं वद प्रभो ! ॥"
इति वासुदेवरहस्ये राधातन्त्रे सप्तमः पटलः ॥

ईश्वर उवाच ।

"या राधा नगशावाक्षि ! पद्मिनी विष्णुवल्लभा ।
महामाया जगद्धात्री त्रिपुरा परमेश्वरी ॥
तस्या दूती महेशानि पद्मिनी पद्मगन्धिनी ।
कृष्णस्य दृढभक्ता तु पद्मिनी तस्य वल्लभा ।
एकभावोन्मनेशानि दृढभक्तिः शुचिस्मिते ।
दृष्टिपातं गता देवी पद्मिनी गन्धमालिनी ॥
कृत्वा तु स्नपनं हि राधामन्यां सखीं सा ।
पद्मवक्त्रं समाश्रित्य यमुनाजलमध्यतः ॥
महाकाला महामन्त्रं प्रजपेन्निर्ज्जने वने ।
अन्या चन्द्रावली राधा एकभावगृहे स्थिता ॥
पूर्व्वोक्तं यद्गुणं देवि पद्मिनी कमलेक्षणे ।
तत्र सर्व्वं पद्मिनीस्थं नान्यथा परमेश्वरि ॥
राधिका त्रिविधा प्रोक्ता चन्द्रा तु पद्मिनी तथा ।
न पश्येत् परमेशानि चन्द्रसूर्य्यं शुचिस्मिते ॥
मानवानां महेशानि वराकाणां हि का कथा ।
आत्मनोऽपत्रपं कृत्वा पद्मिनी पद्ममाश्रिता ।
त्रिपुराया महेशानि पद्मिनी अनुचारिणी ॥"
इति वासुदेवरहस्ये राधातन्त्रे अष्टमः पटलः ॥

अस्याः सहस्रनामानि यथा,—

पार्व्वत्युवाच ।

"देवदेव जगन्नाथ भक्तानुग्रहकारक ।
यद्यस्ति मयि कारुण्यं यद्यस्ति मयि ते दया ॥
यदृयत् त्वया प्रगदितं तत् सर्व्वं मे श्रुतं प्रभो ।
गुह्यात् गुह्यतरं यत्तु यत्ते मनसि काङ्क्षते ॥
त्वया न गदितं यत्तु यस्ते कस्मै कदाचन ।
तन्मां कथय देवेश सहस्रं नाम चोत्तमम् ॥
श्रीराधाया महादेव्या गोप्या भक्तिप्रसाधनम् ।
ब्रह्माण्डकर्त्री हर्त्री सा कथं गोपीत्वमागता ॥

महादेवउवाच ।

शृणु देवि ! विचित्रार्थां कथां पापहरां शुभाम् ।
सन्ति जन्मानि कर्म्माणि तस्या नूनं महेश्वरि ! ॥
यदा हरिश्चरित्राणि कुरुते कार्य्यगौरवात् ।
तदा विवर्त्तते रूपाणि हरिसान्निध्यसाधनी ॥
तस्या गोपीत्वभावस्य कारणं गदितं पुरा ।
इदानीं शृणु देवेशि ! नाम्नां चैव सहस्रकम् ॥
यन्मया कथितं नैव तन्त्रेष्वपि कदाचन ।
तव स्नेहात् प्रवक्ष्यामि भक्त्या धार्य्यं सुसूक्ष्मभिः ॥
मम प्राणसमा विद्या भाषते मे त्वहर्निशम् ।
शृणुष्व गिरिजे नित्यं पठस्व च यथामति ॥
यस्याः प्रसादात् कृष्णस्तु गोलोकेशः परः प्रभुः । * ।
अस्या नामसहस्रस्य ऋषिर्नारद एव च ॥
देवी राधा परा प्रोक्ता चतुर्व्वर्गप्रसाधिनी ।
श्रीराधा राधिका कृष्णवल्लभा कृष्णसंयुता ।
वृन्दावनेश्वरी कृष्णप्रिया मदनमोहिनी ।
श्रीमती कृष्णकान्ता च कृष्णानन्दप्रदायिनी ॥
यशस्विनी यशोगम्या यशोदानन्दवल्लभा ।
दामोदरप्रिया गोपी गोपानन्दकरी तथा ॥
कृष्णाङ्गवासिनी कृष्णा हरिकान्ता हरिप्रिया ।
प्रधाना गोपिका गोपकन्या त्रैलोक्यसुन्दरी ॥
वृन्दावनविहारी च विस्फूर्ज्जितसुखाम्बुजा ।
गोपकुलानन्दकर्त्री गोकुलानन्ददायिनी ॥
गतिप्रदा गीतगम्या आगमागमनप्रिया ।
विष्णुप्रिया विष्णुकान्ता विष्णोरङ्गनिवासिनी ॥
यशोदानन्दपत्नी च यशोदानन्दगेहिनी ।
कामारिकान्ता कामेशी कामलालसविग्रहा ॥
जयप्रदा जया जीवा जीवानन्दप्रदायिनी ।
यशोदानन्दपत्नी च वृषभानुसुता शिवा ॥
गवाध्यक्षा गवाधक्षा गवां गतिरनुत्तमा ।
काञ्चनाभा हेमगात्री काञ्चनाङ्गदधारिणी ।
अशोका शोकरहिता विशोका शोकनाशिनी ।
गायत्री वेदमाता च वेदातीता विदुत्तमा ॥
नीतिशास्त्रप्रिया नीतिर्गतिर्म्मतिरभीष्टदा ।
वेदप्रिया वेदगर्भा वेदमार्गप्रवर्त्तिनी ॥
वेदगम्या वेदपरा विचित्रकनकोज्ज्वला ।
तपोजज्वलप्रदा नित्या तपोजज्वलगात्रिका ॥
नन्दप्रिया नन्दसुता राधानन्दप्रदा शुभा ।
शुभाङ्गी विमलाङ्गी च विलासिन्यपराजिता ॥
जननी जन्मशून्या च जन्मन्यज्वरापहा ।
गतिर्गतिमतां धात्री धात्रानन्दप्रदायिनी ॥
जगन्नाथप्रिया शैलवासिनी हैमसुन्दरी ।
विचित्रवासिनी चित्रवासिनी चित्ररूपिणी ॥
निर्गुणा सुकुलीना च निष्कुलीना निराकुला ।
गोकुलान्तरगेहा च योगानन्दकरी तथा ॥
वेणुवाद्या वेणुरतिर्वेणुवाद्यपरायणा ।
गोपालस्य प्रिया सौम्या रम्या सौम्यकुलोद्भवा ॥
अतिसौम्यातिमोहा च गतिरिष्टा गतिप्रदा ।
गौर्व्वाणवन्द्या गौर्व्वाणा गौर्व्वाणगणसेविता ॥
ललिता च विशोका च विशाखा चित्र-
मालिनी ।
जितेन्द्रिया शुद्धसत्त्वा कुलीना कुलदीपिका ॥
दीपप्रिया दीपदात्री विमला विमलोदका ।
कान्तारवासिनी क्षमा कृष्णचन्द्रप्रिया मतिः ॥
अनुत्तरा दुःखहन्त्री दुःखकर्त्री कुलोद्भवा ।
मतिर्लक्ष्मीर्धृतिर्लज्जा कान्तिः पुष्टिः स्तुतिः क्षमा ॥
क्षीरोदशायिनी देवी देवारिकुलमर्द्दिनी ।
वैष्णवी च महालक्ष्मीः कुलपूज्या कुलप्रिया ॥
संहर्त्री सर्व्वदेवानां सावित्री वेदगामिनी ।
वेदातीता निरालम्बा निरालम्बगणप्रिया ।
निरालम्बजनैः पूज्या निरालोका निराश्रया ।
एकाङ्गी सर्व्वगा सेव्या विष्णोः पत्नी सरस्वती ॥
रासप्रिया रासगम्या रासाधिष्ठातृदेवता ।
रसिका रसिकानन्दा स्वयं रासेश्वरी परा ॥
रासमण्डलमध्यस्था रासमण्डलशोभिता ।
रासमण्डलसेव्या च रासक्रीड़ामनोहरा ॥
पुष्करीकाक्षनिलया पुष्करीकाक्षगेहिनी ।
पुष्करीकाक्षसेव्या च पुष्करीकाक्षवल्लभा ॥
सर्व्वजीवेश्वरी सर्व्वजीववन्द्या परात्परा ।
प्रकृतिः प्रभुकान्ता च सदाशिवमनोहरा ॥
क्षुत् पिपासा दया निद्रा भ्रान्तिः श्रान्तिः क्षमा कुला ।
विधुरूपा गोपपत्नी भारती सिद्धयोगिनी ॥
शत्रुरूपा मित्ररूपा नित्याङ्गी नित्यगेहिनी ।
ख्यातदात्री तथा धात्री महालक्ष्मीः स्वयंप्रभा ॥
सिन्धुकन्या ख्यातदात्री द्वारकावासिनी तथा ।
बुद्धिः स्थितिः ख्यातरूपा सर्व्वकारणकारणम् ॥
भक्तप्रिया भक्तगम्या भक्तानन्दप्रदायिनी ।
भक्तकल्पद्रुमालीता तथातीतगुणा तथा ॥
मनोऽधिष्ठातृदेवी च कृष्णप्रेमपरायणा ।
निरामया सौम्यदात्री तथा मदनमोहिनी ॥
एकानंशा शिवा क्षेमा दुर्गा दुर्गतिनाशिनी ।
ईश्वरी सर्व्ववन्द्या च गोपनीया शुभङ्करी ॥
पालिनी सर्व्वभूतानां तथा कामाङ्गहारिणी ।
सद्योमुक्तिप्रदा देवी वेदसारा परात्परा ॥
हिमालयसुता सर्व्वा पार्व्वती गिरिजा सती ।
दक्षकन्या देवमाता मन्दलज्जा हरेस्तनुः ॥
वृन्दारण्यप्रिया वृन्दा वृन्दावनविलासिनी ।
विलासिनी वैष्णवी च ब्रह्मलोकप्रतिष्ठिता ॥
रुक्मिणी रेवती सत्यभामा जाम्बवती तथा ।
सुलक्षणा मित्रविन्दा कालिन्दी जह्नुकन्यका ॥

परिपूर्णा पूर्णतरा तथा हेमवती गतिः ।
अपूर्वा ब्रह्मरूपा च ब्रह्माण्डपरिपालिनी ॥
ब्रह्माण्डभाण्डमध्यस्था ब्रह्माण्डभाण्डरूपिणी ।
अण्डरूपाण्डमध्यस्था तथाण्डपरिपालिनी ॥
अण्डवाह्याण्डसंहन्त्री ब्रह्मग्निवहरिप्रिया ।
महाविष्णुप्रिया कल्पवृक्षरूपा निरन्तरा ॥
सारभूता स्थिरा गौरी गौराङ्गी ग्रग्निग्रेश्वरा ।
श्वेतचम्पकवर्णाभा ग्रग्निकोटिसमप्रभा ॥
मालतीमाल्यभूषाढ्या मालतीमाल्यधारिणी ।
कृष्णसुता कृष्णकान्ता वृन्दावनविलासिनी ॥
तुलस्यधिष्ठातृदेवी संसारार्णवपारदा ।
सारदा हारदा गोपनन्दिनी सर्व्वसिद्धिदा ॥
अतीतगमना गौरी परानुग्रहकारिणी ।
करुणार्णवसंपूर्णा करुणार्णवधारिणी ॥
माधवी माधवमनोहारिणी श्यामवल्लभा ।
अन्धकारभयध्वस्ता मङ्गला मङ्गलप्रदा ॥
श्रीप्रभा श्रीप्रदा श्रीज्ञा श्रीनिवासाच्युतप्रिया ।
श्रीरूपा श्रीहरा श्रीदा श्रीकामा श्रीस्वरूपिणी ॥
श्रीदामानन्ददात्री च श्रीदामेश्वरवल्लभा ।
श्रीनिताम्बा श्रीगणेज्ञा श्रीस्वरूपाश्रिता श्रुतिः ॥
श्रीक्रियारूपिणी श्रीला श्रीकृष्णभजनाश्रिता ।
श्रीराधा श्रीमतिः श्रेष्ठा श्रेष्ठरूपा श्रुतिप्रिया ॥
योगेज्ञा योगमाता च योगातीता युगप्रिया ।
योगप्रिया योगगम्या योगिनीगणवन्दिता ॥
जवाकुसुमसङ्काज्ञा दाड़िमीकुसुमोपमा ।
नीलाम्बरधरा धारी धैर्य्यरूपा धरा धृतिः ॥
रत्नसिंहासनस्था च रत्नकुण्डलभूषिता ।
रत्नालङ्कारसंयुक्ता रत्नमाल्यधरा परा ॥
रत्नेन्द्रसारहाराढ्या रत्नमालाविभूषिता ।
इन्द्रनीलमणिश्रेष्ठपादपद्मा शुभा शुचिः ॥
कार्त्तिकी पौर्णमासी च अमावस्या भयापहा ।
गोविन्दराजग्रहिणी गोविन्दराजपूजिता ॥
गोविन्दार्पितचित्ता च गोपीजनगणान्विता ।
वैकुण्ठनाथग्रहिणी गोविन्दपरमानसा ॥
गोविन्ददेवदेवाढ्या तथा वैकुण्ठसुन्दरी ।
मानदा सा वेदवती सीता साध्वी पतिव्रता ॥
अन्नपूर्णा सदानन्दरूपा कैवल्यसुन्दरी ।
कैवल्यदायिनी श्रेष्ठा गोपीनाथमनोहरा ॥
गोपीनाथेश्वरी पत्नी नायिका नयनान्विता ।
नायका नायकप्रीता नायकानन्दरूपिणी ॥
ग्रेवा ग्रेववती ग्रेवरूपा चैव जगन्मयी ।
गोपालपालिका माया वन्दनाया तथा परा ॥
कुमारी यौवनानन्दी युवती गोपसुन्दरी ।
गोपमाता जगत्की च जनकानन्दकारिणी ॥
कैलासवासिनी रम्या हरतोषणतत्परा ।
हरेश्वरी रामरता रामरासेश्वरी रमा ॥
श्यामला चित्रलेखा च तथा भुवनमोहिनी ।
सुगोप्या गोपवनिता गोपराज्यप्रदा शुभा ॥
आनन्दपूर्णा माहेज्ञी मत्स्यराजसुता सती ।
कौमारी नारसिंही च वाराही गवदुर्गिका ॥
चञ्चलाचञ्चला मोदा नारी भुवनसुन्दरी ।
दक्षयज्ञहरा दात्री दक्षकन्या सुलोचना ॥

रतिरूपा रतिप्रीता रतिश्रेष्ठा रतिप्रदा ।
रतिलक्षणगेहस्था विरजा भुवनेश्वरी ॥
ग्रह्लादा हरेर्जाया जामाढ़कुलवन्दिता ।
दक्षजा वकुलामोदधारिणी यमुना जया ॥
विजया जयपत्नी च यमलार्জ্জुनभञ्जिनी ।
वक्रेश्वरी वक्ररूपा वक्रवीक्षणदीक्षिता ॥
अपराजिता जगन्नाथा जगन्नाथेश्वरी मतिः ।
खेचरी खेचरसुता खेचरत्वप्रदायिनी ॥
विष्णुवक्षःस्थलस्था च विष्णुभावनतत्परा ।
चन्द्रकोटिसुगात्रा च चन्द्राननमनोहरा ॥
सर्व्वसेव्या ग्रिवा क्षेमा तथा क्षेमङ्करी वधूः ।
यादवेन्द्रवधूः ग्रेष्ठा ग्रिवभक्ता ग्रिवान्विता ॥
केवला निष्कला सूक्ष्मा महाभीमा भयप्रदा ।
जीमूतरूपा जैमूती जिता मित्रप्रमोदिनी ॥
गोपालवनितानङ्गा कुलजेन्द्रनिवासिनी ।
जयन्ती यमुनाङ्गी च यमुनातोषकारिणी ॥
कलिकल्मषभङ्गा च कलिकल्मषनाग्निनी ।
कलिकल्मषरूपा च निस्तारानन्दकारी कृपा ॥
कृपावती कुलवती कैलासाचलवासिनी ।
वामदेवी वामभागा गोविन्दप्रियकारिणी ॥
नगेन्द्रकन्या योगेज्ञी योगिनी योगरूपिणी ।
योगसिद्धा सिद्धरूपा सिद्धचेतनिवासिनी ॥
चेताधिष्ठातृरूपा च चेतातीता कुलप्रदा ।
केज्ञवानन्ददात्री च केज्ञवानन्दाधिनी ।
केज्ञवा केज्ञवप्रीता केज्ञोरी केज्ञवप्रिया ।
रासक्रीड़ाकरी रासवासिनी राससुन्दरी ॥
गोकुलान्वितदेहा च गोकुलत्वप्रदायिनी ।
लवङ्गनासी नारङ्गी नारङ्गकुलमण्डला ॥
एलालवङ्गकर्पूरसुखवाससुखान्विता ।
सुखा सुखप्रदा सुखरूपा सुखप्रदायिनी ॥
नारायणी कृपा राधा करुणा करुणामयी ।
कारुण्या करुणाकर्त्री गोकर्णा नागकर्णिका ॥
सर्पिणी कौलिनी चैत्रवासिनी च जगन्मयी ।
जटिला कुटिला नीला नीलाम्बरधरा शुभा ॥
तिलतिलनी रूपवती युवती कृष्णपीवरी ।
विभावरी वेत्रवती संकटा कुटिलालका ॥
नारायणप्रिया ग्रेला कृष्णमोहपरिमोहिता ।
कृपातमोहिता प्रातराग्निलनवनीतिका ॥
नवीना नवनारी च नारङ्गफलशोभिना ।
हेमी हेमसुखी चन्द्रसुखी ग्रग्निसुशोभना ॥
अर्द्धचन्द्राधरा चन्द्रवल्लभा रोहिणी तिमिः ।
तिमिङ्गिलकुलामोदमत्स्यरूपाम्बुहारिणी ॥
कारणी सर्व्वभूतानां कार्य्यातीता किशोरिणी ।
किशोरवल्लभा केज्ञकारिका कामकारिका ।
कामेश्वरी कामकला कालिन्दीकुलदीपिका ।
कलिन्दतनयातीरवासिनी तीरगेहिनी ।
कादम्बरीपानपरा कुसुमामोदधारिणी ॥
कुसुदा कुसुदानन्दा कृष्णेज्ञी कामवल्लभा ॥
तर्कारी वैजयन्ती च निम्बदाड़िमरूपिणी ।
विल्वतृप्तिप्रिया कृष्णाम्बरा विल्वोपमस्तनी ।
विल्वालिका विल्ववपुर्विल्वतृप्तनिवासिनी ।
तुलसी तोषिका चैव तेतिलानन्दकारिणी ॥

गजेन्द्रगामिनी श्यामलतानङ्गलता तथा ।
योषिच्छक्तिस्वरूपा च योषिदानन्दकारिणी ॥
प्रेमप्रिया प्रेमरूपा प्रेमानन्दतरङ्गिणी ।
प्रेमहरा प्रेमदात्री प्रेमग्रक्तिमयी तथा ।
कृष्णप्रेमवती धन्या कृष्णप्रेमतरङ्गिणी ।
प्रेमार्थदायिनी सर्व्वश्वेता नित्यतरङ्गिणी ॥
हावभावान्विता रौद्रा रुद्रानन्दप्रकाग्निनी ।
कपिला पङ्गला केज्ञपाज्ञसम्बर्द्धिनी घटी ॥
कुटीरवासिनी धूम्रा धूम्रकेज्ञा जनोदरी ।
ब्रह्माण्डगोचरा ब्रह्मरूपिणी भवभाविनी ॥
संसारनाग्निनी ग्रेवा ग्रेवानन्दप्रदायिनी ।
ग्रिग्रिरा हेमरागाढ्या मेघरूपातिसुन्दरी ॥
मनोरमा वेगवती वेगाढ्या वेदवादिनी ।
दयान्विता दयाधारा दयारूपा सुसेविनी ॥
किशोरसङ्गसंसर्गा गौरचन्द्राननी कला ।
कलाधिनाथवदना कलानाथाधिरोहिणी ॥
विरागकुण्डला हेमपिङ्गला हेममण्डला ।
भाष्कीरतालवनगा कैवर्त्ती पौवरी शुकी ॥
शुकदेवगुणातीता शुकदेवप्रियासखी ।
विकलोत्कण्ठिनी कौवा कौथियाम्बरधारिणी ॥
कोवारी कोषरूपा जगदुत्पत्तिकारिका ।
स्थितिस्थितिकरी संहारिणी संहारकारिणी ॥
केज्ञग्रेवालधात्री च चन्द्रगात्रा सुकोमला ।
पद्माङ्गरागसंरागा विन्ध्यादिपरिवासिनी ॥
विन्ध्यालया श्यामसखी सखी संसाररागिणी ।
भूता भविष्या भव्या च भवगात्रा भवातिगा ॥
भवनाग्नान्तकारिण्याकाग्नरूपा सुवेग्निनी ।
रतिरङ्गपरित्यागा रतिवेग्ना रतिप्रिया ॥
तैजस्विनी तेजरूपा कैवल्यपथदा शुभा ।
मुक्तिहेतुर्मुक्तिहेतुस्वरूपिणी लक्ष्मणा क्षमा ॥
विग्नालनेत्रा वैग्नाली विग्नालकुलसम्भवा ।
विग्नालग्रहवासा च विग्नालवरीरतिः ॥
भक्तप्रीता भक्तिगतिर्भक्तिबाधा भवाकृतिः ।
वामाङ्गहारिणी विष्णोः ग्रिवभक्तिसुखान्विता ॥
विधिताविधिता मोदमया च गणतोषिता ।
हयाक्षा हेरम्बसुता गजमाता सुरेश्वरी ॥
दुःखहन्त्री दुःखहरा सेवितैक्षितसर्व्वदा ।
सर्व्वाङ्गासुविधात्री च कुलस्त्रीविनाग्निनी ॥
लवङ्गा पाण्डवसखी सखीमण्डलवासिनी ।
आत्मगीता गया गम्या गमनातीतनिर्भरा ॥
सर्व्वाङ्गसुन्दरी गङ्गा गङ्गाजलमयी तथा ।
गङ्गेरिता पूतमाता पवित्रकुलदीपिका ॥
पवित्रगुणशीलाढ्या पवित्रानन्ददायिनी ।
पवित्रगुणसीमाढ्या पवित्रकुलपाविका ॥
गतिश्चा गीतकुशला दनुजेन्द्रनिवारिणी ।
निर्व्वाणदात्री नैर्व्वाणी हेतुयुक्तागमोत्तरा ॥
पर्व्वताधिनिवासा च निवासकुशला तथा ।
सन्न्यासधर्म्मकुशला सन्न्यासे फलदा शुभा ॥
शूरचन्द्रसुखी श्यामहारा चैत्रनिवासिनी ।
वसन्तरागा सुश्रोणी वसन्तवसनाकृतिः ॥
चतुर्भुजा बहुभुजा च द्विभुजा गौरविग्रहा ।

सहस्राक्षा विशालाक्षा च सुदक्षा सुदक्षिणी।
प्राणप्रिया प्राणरूपा प्राणरूपिणप्राणदा।
कृष्णप्रीता कृष्णरता कृष्णतोषणतत्परा॥
कृष्णप्रेमवती कृष्णभक्ता भक्तफलप्रदा।
कृष्णप्रेमप्रेमभक्ता हरिभक्तिप्रदायिनी॥
चैतन्यरूपा चैतन्यप्रिया चैतन्यरूपिणी।
उग्ररूपा शिवक्रोड़ा कृष्णक्रोड़ा जलोदरी॥
महोदरी महादुर्गकान्तारस्थलवासिनी।
चन्द्रावली चन्द्रकेशी चन्द्रप्रेमतरङ्गिणी॥
समुद्रान्तरूपा च समुद्रजलवासिका।
कैशोराधरता निद्रा क्षुधा प्रेमरताम्बिका॥
दूर्व्वादलश्यामतनुर्दूर्व्वादलतनुच्छविः।
नागरा नागरीवासा नगरानन्दकारिणी॥
नागरालिङ्गनपरा नगराङ्गनमङ्गला।
उच्चनीचा हैमवती प्रियाकृष्णतरङ्गिणी॥
प्रेमालिङ्गनसिद्धाङ्गी सिद्धराधाविलासिका।
मङ्गला मोदजननी मेखला मोदधारिणी॥
रत्नमञ्जीरभूषाढ्या रत्नभूषणभूषणा॥
जम्बालमालिका कृष्णप्राणा प्राणविमोचना॥
सत्यप्रदा सत्यवती सेवकानन्ददायिका।
जगद्योनिर्ज्जगद्वीप्ता विचित्रमणिभूषणा॥
राधारमणकान्ता च राधाराधनरूपिणी।
कैलासवासिनी कृष्णप्राणसर्व्वस्वदायिनी॥
कृष्णावतारनिरता कृष्णभक्तफलार्थिनी।
याचका याचकानन्दकारिणी याचकोज्ज्वला॥
हरिभूषणभूषाढ्या नन्दयुक्ता कृपापगा।
हैहैताल्धरा हैयेग्रन्थग्रन्थिप्रकाशिनी॥
हेहेग्रन्थस्वरूपा च हीहीवाक्यविशारदा।
जगदानन्दकर्त्री च ब्राह्मानन्दविशारदा॥
पण्डिता पण्डितगुरा पण्डितानन्दकारिणी।
परिपालनकर्त्री च तथा स्थितिविनोदिनी॥
तथा संहारग्रन्थाढ्या विद्वज्जनमनोहरा।
विदुषां प्रीतिजननी विद्वत्प्रेमविवर्द्धिनी॥
नादेयी नादरूपा च नादबिन्दुविधारिणी।
शून्यस्थानस्थिता शून्यरूपा शून्यनिवासिनी॥
कार्त्तिकव्रतकर्त्री च रसनाहारिणी खरा।
ज्वलना पातलतली शिखातलनिवासिनी॥
क्षुद्रकीटाङ्गसंसर्गसङ्गदोषविनाशिनी।
कोटिकन्दर्पलावण्या कन्दर्पकोटिसुन्दरी॥
कन्दर्पकोटिजननी कामबीजप्रदायिनी।
कामग्राम्यविनोदा च कामग्राम्यप्रकाशिनी॥
कामप्रकाशिका कामिन्यधिमाद्यसिद्धिदा।
यामिनी यामिनीनाथवदना यामिनीश्वरी॥
योगेश्वरी हरयोगसुक्तिदात्री हिरण्यदा।
कपालमालिनी देवी सौभाग्यसुखरूपदा॥
कृपान्वितगुणा गौण्या गुणातीता फलप्रदा।
कृष्णाङ्गभूतवेतालनाशिनी शारदान्विता॥
सिताऽसिता च सरला लीलालावण्यमङ्गला।
विद्यार्थिविद्या माया च विद्याविद्यास्वरूपिणी॥
आन्वीक्षिकीशास्त्ररूपा शास्त्रसिद्धान्त-
कारिणी।
नागेन्द्राणी नागमाता क्रीड़ाकौतुकरूपिणी॥

हरिभावनशीला च हरिसेवनतत्परा।
हरिप्राणा हरप्राणा शिवप्राणा शिवान्विता॥
नरकार्णवसंहन्त्री नरकार्णवनाशिनी।
नरेश्वरी नरातीता नरसेव्या वराङ्गना॥
यशोदानन्दिनीक्रीड़ा यशोदाक्रोड़वासिनी।
यशोदानन्दनप्राणा यशोदानन्दनार्पदा॥
वत्सला कोशला काला करुणार्णवरूपिणी।
स्वर्गलक्ष्मीर्भूमिलक्ष्मीर्द्रौपदी पाण्डवप्रिया॥
तथार्জ্জुनसखी भौमी भीमा भैमी भयानका।
त्रिजगन्मोहिनी चीना प्राणासक्ततरा तथा॥
पानार्थिनी पानपात्रा पानपानन्ददायिनी।
दुग्धमत्स्यकरुक्षोड्या दधिमन्थनतत्परा॥
दधिभाण्डार्थिनी कृष्णक्रोधिनी नन्दनाङ्गना।
घृतलिप्ता तक्रयुक्ता यमुनापारकौतुका॥
विचित्रकर्म्मका कृष्णहास्यभाषणतत्परा।
गोपाङ्गनावेष्टिता च कृष्णसङ्गार्थिनी तथा॥
रासरक्ता रासरतिरासवासक्तवासना।
हरिद्रा हरिताकृपा हरार्पितचेतसा॥
निश्चेतन्या च निश्चेता तथा दारुहरिद्रिका।
सुवस्त्रस्था सखा चैव कृष्णभावातिवेगिनी॥
श्रीदामस्य सखी दामदामिनी दामधारिणी।
मल्लिकोल्लासिनी केशी हरिस्मरधारिणी॥
हरिसान्निध्यदात्री च हरिकौतुकमङ्गला।
हरिप्रदा हरिप्राणा यमुनाजलवासिनी॥
तपःप्रदा जितार्था च चतुरा चातुरीतमी।
तमिस्रा तपरूपा च रौद्ररूपा यशोऽर्थिनी॥
कृष्णकामा कृष्णभक्ता कृष्णानन्दप्रदायिनी।
कृष्णार्थवासना कृष्णरागिणी भाविनी तथा॥
कृष्णार्थरहिता भक्ता भक्ताभक्तसुभक्तिदा।
श्रीकृष्णरहिता दीना विरहिणी हरेः प्रिया॥
मथुरा मधुराराजगेहभावनभाजना।
श्रीकृष्णभावनामोदा तस्योल्लासविधायिनी॥
कृष्णार्थकुशला कृष्णसारचर्म्मधरा शुभा।
अलकेश्वरपूज्या च कुबेरेश्वरवल्लभा॥
धनधान्यविधात्री च जया काया हया हयी।
प्रणवा प्रणवेशी च प्रणवार्थस्वरूपिणी॥
ब्रह्मविष्णुशिवार्द्धाङ्गहारिणी शैवशिंशपा।
राजसीतामसिनी भूतप्रेतप्राणविनाशिनी॥
सकलेप्सितदात्री च सती साध्वी अरुन्धती।
पतिव्रता पतिप्राणा पतिवाक्यविनोदिनी॥
अशेषवासिनी कल्पवासिनी कल्परूपिणी।
इत्येतत् कथितं देवि! राधानामसहस्रकम्।
यः पठेत् पाठयेद्वापि तस्य तुष्यति माधवः॥
किं तस्य यमुनाभिर्व्वा नदीभिः सर्व्वतः प्रिये।
कुरुक्षेत्रादितीर्थैर्व यस्य तुष्टो जनार्दनः॥
स्तोत्रस्यास्य प्रसादेन किं न सिध्यति भूतले।
ब्राह्मणो ब्रह्मवर्चस्वी क्षत्रियो जगतीपतिः।
वैश्यो निधिपतिर्भूयात् शूद्रो सुचैव जायतः॥
ब्रह्महत्या सुरापानमित्यादीन्यतिपापतः।
सद्यो मुच्येत देवेशि! सत्यं सत्यं न संशयः॥
राधानामसहस्रस्य समानं भास्त भूतले।
स्वर्गे वाथय पाताले गिरौ वा जलतोऽपि वा॥

नातः परं शुभं स्तोत्रं तीर्थं नातः परं परम्।
एकादश्यां शुचिर्भूत्वा यः पठेत् सुसमाहितः॥
तस्य सर्व्वार्थसिद्धिः स्यात् शृणुयाद्वा सुशोभने।
द्वादश्यां पौर्णमास्यां वा तुलसीसन्निधौ शिवे!॥
यः पठेत् शृणुयाद्वापि तस्य तत्तत् फलं शृणु।
अश्वमेधं राजसूयं वाईस्पत्यं तथाविधम्॥
अतिरात्रं वाजपेयं अग्निष्टोमं तथा शुभम्।
कृत्वा यत्फलमाप्नोति श्रुत्वा तत्फलमाप्नुयात्॥
कार्त्तिके चाष्टमीं प्राप्य पठेद्वा शृणुयादपि।
सहस्रयुगकल्पान्तं वैकुण्ठवसतिं लभेत्॥
ततश्च ब्रह्मभवने शिवस्य भवने पुनः।
सुराधिनाथभवने पुनर्यांति सलोकताम्॥
गङ्गातीरं समासाद्य यः पठेत् शृणुयादपि।
विष्णोः स्वरूपतां याति सत्यं सत्यं सुरेश्वरि!॥
मम वक्त्रगिरेर्जाता पार्व्वतीसागराश्रिता।
राधानामसहस्राख्या नदी त्रैलोक्यपावनी॥
पश्यतेहि मयानित्यं भक्त्याग्रक्ष्या यथोचितम्।
मम प्राणसमं स्तोत्रं तव भक्त्या प्रकाशितम्॥
नाभक्ताय प्रदातव्यं पाषण्डाय कदाचन।
नास्तिकाय विरागाय रागयुक्ताय सुन्दरि!॥
तथा देयं महास्तोत्रं हरिभक्ताय शङ्करि!।
वैष्णवेषु यथाशक्तिदात्रे पुण्यार्थशीलिने॥
राधानामसुधावारि मम वक्त्रं महाखनिः।
उद्धृतं हि त्वया यत्नात् पाता सर्व्वजगतां
शुभे!॥

विशुद्धसत्त्वाय यथार्थवादिने
द्विजस्य सेवानिरताय मन्त्रिणे।
दात्रे यथाशक्ति सुभक्तिमानसे
राधापदध्यानपराय शोभने॥
हरिपादाब्जमधुपमनोभूताय मानसे।
राधापादसुधास्वादशालिने वैष्णवाय च॥
दद्यात् स्तोत्रं महापुण्यं हरिभक्तिप्रसाधनम्।
जन्मान्तरं न तस्यास्ति राधाकृष्णपदार्थिनः॥
मम प्राणा वैष्णवा हि तेषां रक्षार्थमेव हि।
शूलं मया धार्य्यते हि नान्यथा मेघकारणम्॥
हरिभक्तिविधानार्थं शूलं संधार्य्यते मया।
शृणु देवि यथार्थं मे गदितं त्वयि सुव्रते!॥
भक्तासि मे प्रियासि त्वमतः स्नेहात् प्रकाशितम्।
कदापि नोच्यते देवि मया नामसहस्रकम्॥
किं परं त्वां प्रवक्ष्यामि प्राणतुल्यं मम प्रिये।
स्तोत्रं मन्त्रं राधिकाया यन्त्रं कवचमेव हि॥"
इति नारदपञ्चरात्रे राधिकासहस्रनामसमा-
प्तोऽध्यायः॥*॥ (राधातन्त्रोक्तसहस्रनामस्तोत्रं
यथा,—

ईश्वर उवाच।
"इति ते कथितं देवि किमन्यत् कथयामि ते।
श्रोत्री त्वं परमेशानि अहं वक्ता च शाश्वतः॥

देव्युवाच।
कियदन्यन्महादेव श्रोतुमिच्छामि यदि रोचते।
हृदये तव देवेश नानातन्त्राणि सन्ति वै।
नानातन्त्राणि मन्त्राणि रहस्यानि पृथक् पृथक्।

बहूनि तव देवेश हृदये देव सुव्रत।
कृपया परमेशान कथयस्व दयानिधे॥

ईश्वर उवाच।

पद्मिन्याः परमेशानि रहस्यं नास्ति सुन्दरी।
त्वयि सर्व्वं महेशानि कथितं परमेश्वरि॥
किञ्चिदत्यन्महेशानि नास्ति मे गोचरे प्रिये।
यदृयदस्ति महेशानि रहस्यं कथितं मया॥

देव्युवाच।

पद्मिन्याः परमेशान रहस्यं कथय प्रभो।
यदि नो कथ्यते देव त्यजामि विग्रहं तदा॥

ईश्वर उवाच।

शृणु प्रिये कुरङ्गाक्षि एतत् प्रौढ़ं कथं तव।
प्रौढ़त्वं यदि चार्व्वङ्गि रहस्यं कथयामि ते॥
रहस्यं शृणु चार्व्वङ्गि स्तोत्रं परमदुर्लभम्।
स्तोत्रं सहस्रनामाख्यं उपविद्यासु सम्मतम्॥
उपविद्यासु देवेशि अतिगुप्तं मनोहरम्।
एतत् स्तोत्रं महेशानि पद्मिनीसम्मतं सदा॥
एतत्तु पद्मिनीस्तोत्रमाश्चर्य्यं परमाद्भुतम्।
यन्नोक्तं सर्व्वतन्त्रेषु तव भक्त्या प्रकाशितम्॥
अस्य श्रीपद्मिनीसहस्रनामस्तोत्रस्य श्रीकृष्ण-ऋषिर्मैहियमर्हिष्यधिष्ठात्री देवता गायत्री-च्छन्दो महाविद्यासिद्ध्यर्थे विनियोगः। ॐ ह्रीं ह्रें पद्मिन्यै राधिकायै। राधा रमणीरूपा निरुपमरूपवती रूपधन्या वन्द्या वामा रजोगुणा।
रक्ताङ्गी रक्तपुष्पाभा राधा रासपरायणा।
रम्भावती रूपशीला रदनी रञ्जिनी रतिः॥
रतिप्रिया रमणीया रसपुञ्जा रसायना।
रासमध्ये रासरूपा रसवेग्या रसोत्सुका॥
रसवती रसोल्लासा रसिका रसभूषणा।
रसमालाधरी रङ्गी रसपङ्कपरिच्छदा॥
कमला कल्पलतिका कुलव्रतपरायणा।
कामिनी कमला कुन्ती कलिकल्मषनाशिनी।
कुलिना कुलवती कामी कामसन्दीपनी तथा॥
कौमारी कन्यवनिता कामार्त्ता कामरूपिणी।
कासुकी कलुषघ्नी च कुलज्ञा कुलपण्डिता॥
कृष्णवर्णा कृशाङ्गी च कृष्णवस्त्रपरिच्छदा।
कान्ता कामस्वरूपा च कामरूपा कृपावती॥
क्षेमा क्षमावती चैव खेलत्खञ्जनगामिनी।
खस्था खगा खगस्थाची खगस्थ विहारिणी॥
गरिष्ठा गरिमा गङ्गा गया गोदावरी गतिः।
गान्धारी गुणिनी गौरी गङ्गा गोकुलवासिनी॥
गान्धर्व्वी गानकुशला गुणा गुप्तविलासिनी।
घर्घरा घर्म्मदा घर्म्मा घनस्था घनवासिनी॥
घृणा घृणावती घोरा घोरकर्म्मविवर्ज्जिता।
चन्द्रा चन्द्रप्रभा चैव चन्द्रमण्डलपरिच्छदा॥
चन्द्ररूपा च चन्द्राक्षा चपला चारुभूषणा।
चतुरा चारुशीला च चम्पा चम्पावती तथा॥
चन्द्ररेखा चन्द्रकला चारुवेग्या विनोदिनी।
चन्द्रचन्दनभूषाङ्गी चार्व्वङ्गी चन्द्रभूषणा॥
चिच्चिन्ती चित्तरूपा च चित्तमण्डलधारिणी सदा।
छन्दरूपा छन्दवेग्री श्वेतच्छत्रविधारिणी॥
छत्रातपा च छत्राङ्गी छत्रिणी छत्रपालिनी।
छुरितान्तधारौघा छद्मवेग्रनिवासिनी॥
छटीकृतमरालौघा छटीकृतनिजाश्रिता।
जयन्ती च जगन्माता जननी जन्मदायिनी॥
जया जैत्री च जरती जीवनी जगदम्बिका।
जीवा जीवस्वरूपा च जाग्रद्विध्वंसकारिणी॥
जगज्जनिर्जनश्रेष्ठा जगद्वेतुर्ज्जगन्मयी।
जगदानन्दजननी जगद्यित्री जगन्मदा॥
झङ्कारवाहिनी झङ्का झङ्कारनिर्झरावती।
टङ्कारटङ्किनी टङ्का टङ्किता टङ्करूपिणी॥
डम्बरा डम्बरा डम्बा डमडम्बा च डम्बुरा।
ढोकिताग्रेक्षणिर्घोषा ढक्कटेलितलोचना॥
तापिनी त्रिपथा तीर्थवासिनी त्रिदशेश्वरी।
त्रिलोकत्रयी त्रैलोक्यतरणी तरणे तरुः॥
तापहन्त्री तपा तापा तपनीया तपावती।
तापिनी त्रिपुरादेवी त्रिपुराज्ञाकरी सदा॥
त्रिलक्षा तारिणी तारा तारामायकमोहिनी।
त्रैलोक्यगमना तीर्था तुष्टिता त्वरिता त्वरा॥
त्वष्टा तरङ्गिणी तीर्था त्रिविक्रमविधारिणी।
तमोमयी तामसी च तपस्या तपसः फला॥
त्रैलोक्यव्यापिनी तुष्टा त्वष्टिसुता तुजा तथा।
त्रैलोक्यमोहिनी तूर्ज्जा त्रैलोक्यविभवप्रदा॥
त्रिपदी च तथा तथ्या तिमिरध्वंसचन्द्रिका।
तेजोरूपा तपःपारा त्रिपुरा त्रिपदस्थिता॥
त्रयी तन्वी तापहरा तपगाङ्गजबाहिनी।
तरिस्तरन्तितारण्या तपिता तरुणीप्रिया॥
तीव्रपापहरातुल्यातुलपापतनूपातृ।
दारिद्र्यनाशिनी दात्री दया देवा दयावती॥
दिव्या दिवसरूपा च दीक्षादक्षा दया द्रवा।
दिव्यरूपा दिवमूर्त्तिर्देवेन्द्रप्राणनाशिनी॥
हुता च हुतरूपा च दन्दशूकविनाशिनी।
दुर्व्वाराद्यमनीया च देवकार्य्यकरी सदा॥
देवप्रिया देवमाण्या देवा देवधिया सदा।
दिक्पालपददात्री च दीर्घाङ्गा दीर्घलोचना॥
दुग्धेयकामदुघा दोग्ध्री दूषणवर्ज्जिता।
दुग्धा द्युसदृशाभाषा दिव्या दिव्यगतिप्रिया॥
द्युनदी दीनशरण्या दिव्या देहविहारिणी।
दुर्गमा दरिमा दामा दूरस्था दूरवासिनी॥
दुर्ब्बिगाह्या दयाधारा दूरसन्तापनाशिनी।
दुराग्रया दुराधारा द्राविणी हृद्विनस्तुता॥
दैत्यगुह्यकरी देवी सदादानवसिद्धिदा।
दुर्भुद्धिनाशिनी देवी सततं दानदायिनी॥
दानदात्री च देवेशी द्यावाभूमिविगाहिनी।
दक्षिदा दक्षिफलदा देवताद्यसंस्तुता॥
दीर्घव्रतकरी दीर्घा दीर्घधर्म्मा दयावती।
दक्षिनी दक्षनीतिश्च दीप्तदण्डधराचिता॥
दानार्च्चिता द्रवद्रथा द्रव्यैकनियमा परा।
दुरन्तापप्रशम्या च दात्री द्रवणोदधिनी॥
देवी दिव्या बलवती दान्ता दान्तजनप्रिया।
दारिद्र्यदितटा दुर्गा दुर्गादम्यप्रचारिणी॥
धर्म्मरूपा धर्म्मधुरा धेनुरूपा धृतिर्ध्रुवा।
धेनुदाना ध्रुवस्थाणुर्धर्म्मकामार्थमोक्षदा॥
धर्म्मिणी धर्म्ममाता च धर्म्मदात्री धनुर्द्धरा।
धात्री धेया धरा धर्म्मधारिणी धृतकल्मषी॥
धनदा धर्म्मदा धन्या धन्यदा धान्यदा धना।
धन्या धनाधिरूपा च धरित्री धनपूरिता॥
धारणा धनरूपा च धर्म्मा धर्म्मप्रचारिणी।
धर्म्मिणी धर्म्मतन्त्राख्या धर्म्मिष्ठामलकेशिनी॥
धर्म्मप्रचारनिरता धर्म्मरूपा धुरन्धरी।
धनुर्व्विद्याधरी धात्री धनुर्व्विद्याविशारदा॥
निरानन्दा निरीहा च निर्व्वाणद्वारसंस्थिता।
निर्व्वाणपदवी दात्री नन्दिनी नायिकायिका॥
नारायणी निषिद्धघ्नी विश्वरूपप्रकाशिनी।
नमस्या निर्दया नन्दनता नूतनरूपिणी॥
निर्म्मला निर्म्मलाभासा निरस्था निरुपद्रवा।
नित्यानन्दमयी नित्यानित्या नूतनविग्रहा॥
निषिद्धा नौसिधेर्य्या च निर्व्वाणपददीपिका।
निःशङ्का च निरातङ्का निर्नाशितमहामनाः॥
निर्म्मला नन्दजननी निर्म्मलश्यामवेशिनी।
निरवद्यकुलस्त्री नित्यानन्दस्वरूपिणी॥
निर्व्यथा निर्व्ययज्ञाता निषिद्धकर्म्मवर्ज्जिता।
नित्योत्सवा नित्यतृप्ता नमस्कार्य्या निरञ्जना॥
निष्ठावती निरातङ्का निर्लेपा निष्कलात्मिका।
निरवद्या निरीशा च निरञ्जनपुरस्थिता॥
पुण्यप्रदा पुण्यकरी पुण्यगर्भा पुरातनी।
पुण्यरूपा पुण्यदेहा पुण्यगीता च पावनी॥
पूजा पवित्रा परमा परा पुण्यविभूषणा।
पुण्यदात्री पुण्यधरा पुण्या पुण्यप्रवाहिनी॥
पुण्यदेहा पुण्यवती पूर्णिमा पूर्णचन्द्रमा।
पौर्णमासी परा पद्मा पद्मशा पद्मगन्धिनी॥
पद्मिनी पद्मवस्त्रा च पद्ममालाधरा सदा।
पद्मोद्भवा परध्या च परमानन्दरूपिणी॥
प्रकाशशा परमाश्चर्य्या पद्मगर्भनिवासिनी।
पावनी च तथा पूता पवित्रा परमाकला॥
पद्मार्च्चिता पद्मवर्ण्या पद्ममाता पुरातनी।
पद्मासनगता विद्या पद्मासनपरिच्छदा॥
शुक्लपद्मासनगता रक्तपद्मासना तथा।
पीतपद्मासनगता कृष्णपद्मस्थिता तथा॥
पदार्थदायिनी पद्मवनवासपरायणा।
प्रकाशिनी प्रगल्भा च पुण्यश्लोका च पावनी॥
फलहस्ता फलहरा फलिनी फलरूपिणी।
फुल्लेन्दीवरलोचना फुल्ला फुल्लकोरकगन्धिनी॥
फलिनी फालिनी फेला फुल्लस्फाटितपातका।
विश्वमाता च विश्वेशी विश्वा विश्वेश्वरप्रिया॥
ब्रह्मण्या ब्राह्मणी ब्राह्मी ब्रह्मज्ञा ब्रह्मशासना।
बहुला बाहुला बह्वी बहुरी बलदायिनी॥
विक्रान्ता विक्रमाक्रान्ता बहुभाग्यविलोचना।
विश्वामित्रा विष्णुसखी वैष्णवी विष्णुवल्लभा॥
विरूपाक्षप्रिया देवी विभूतिर्विश्वतोमुखी।
वेदवेदरता वाणी वेदाचारसमन्विता॥
विद्या विद्यावती वन्द्या वहती ब्रह्मचारिणी।
वरदा विप्रवहा च वरिष्ठा च विशोधिनी॥
विद्याधरी वसुमती विप्रवहा विशोधिता।
शोभमानावती वामा विद्याङ्गी विदुषप्रिया॥

बुद्धिर्विनाशिनी चित्ता ब्रह्मरूपा वरानना ।
वाणिनी ब्रह्मजननी ब्रह्महत्यापहारिणी ॥
ब्रह्मविष्णुस्वरूपा च सदा विभववर्द्धिनी ।
विभाषिणी व्यापिनी च व्यापिका परिचारिका ॥
विपन्नार्तिहरा देवी विनयव्रतचारिणी ।
विपन्नशोकसंहर्त्री विपत्त्रीवाद्यतत्परा ॥
वेणुवाद्यपरा देवी वेणुस्तुतिपरायणा ।
वर्चस्विनी बलकरी बलमूला विवस्वती ॥
विपाप्मा विग्निखा चैव विकल्पपरिवर्जिता ।
बुद्धिदा बृहती देवी विधिविच्छिन्नसंशया ॥
विचित्राङ्गी विचित्राभा विच्छा विभववर्द्धिनी ।
विजया विनया वन्द्या वामदेवी वरप्रदा ॥
विद्वत्नी च विशालाक्षी विज्ञानवित्तमालिनी ।
भद्रा भोगवती भव्या भवानी भयवासिनी ॥
भूतधात्री भयहरी भक्तवश्या भयापहा ।
भक्तिदा भयहा भैरीभक्तदुर्गप्रदारिणी ॥
भागीरथी भानुमती भाग्यदा भगनिर्हिता ।
भवप्रिया भूततनुर्भूतिदा भूतभूषणा ॥
भोगवती भूतिमती भव्यरूपा भमिर्भमा ।
भूरिदा भक्तिसुलभा भाग्यवृद्धिकरी सदा ॥
भित्तुमाता भित्तुनिभा भव्या भवस्वरूपिणी ।
महामाया माहप्रिया महानन्दा महोदरी ॥
मतिर्मुक्तिर्मनोज्ञा च महामङ्गलदायिनी ।
महापुण्या महाद्यात्री मैथुनप्रियलालसा ॥
मनोज्ञा मालिनी मान्या मणिमाणिक्यधारिणी ।
सुनिस्तुता मोहकरी मोहहन्त्री मदोत्कटा ॥
मधुपानरता मद्या मदाघूर्णितलोचना ।
मधुपानप्रमत्ता च मधुलुब्धा मधुव्रता ॥
माधवी मालिनी मान्या मनोरथपथातिगा ।
मोक्षैश्वर्यप्रदामर्त्या महापद्मवनाश्रिता ॥
महाप्रभावा महती मृगाक्षी मीनलोचना ।
महाकाठिन्यसम्पूर्णा महाक्षी महती कला ॥
मुक्तिरूपा महासुक्ता मणिमाणिक्यभूषणा ।
मुक्ताफलविचित्राङ्गी मुक्ताकल्पितनासिका ॥
महापातकसंहर्त्री मनोनयननन्दिनी ।
महामणिक्यरचिता महाभूषणभूषिता ॥
मायावती मोहहन्त्री महाविद्याविधारिणी ।
महामेधा महाभूतिर्मेहामाया प्रिया सखी ॥
मनोधरी महोपाया महामणिविभूषिता ।
महामोहप्रशमिनी महामङ्गलदायिनी ॥
यज्ञेश्वरी यज्ञोदा च यमुनावारिहारिणी ।
योगसिद्धिकरी यज्ञा यज्ञेश्ववन्दितप्रिया ॥
यज्ञेशी यज्ञफलदा यजनीया यशस्करी ।
योगयोनिर्योगसिद्धा योगिनी योगवृद्धिदा ॥
योगयुक्ता यमाद्यष्टसिद्धिर्यज्ञैकधारिणी ।
यमुनाजलसेव्या च यमुनाजलहारिणी ॥
यामिनी यमुना याम्या यमलोकनिवासिनी ।
लोकालोकविलासा च लोलत्तरङ्गोलमालिका ॥
लोलाक्षी लोकमाता च लोकानन्दप्रदायिनी ।
लोकबन्धुर्लोकधात्री लोकालोकनिवासिनी ॥
लोकत्रयनिवासा च लक्षलक्षणलक्षिता ।
लीलालोका च लावण्या लघिमा लसदीक्षणा ॥

वासुदेवप्रिया वामा वसन्तसमयप्रिया ।
वासन्ती वसुदा वन्द्या वेणुवादपरायणा ॥
वीणावाद्यप्रमत्ता च वीणानादविभूषणा ।
वेणुवाद्यरता चैव वंशीनादविभूषणा ॥
शुभा शुभरतिः शान्तिः श्रेयसा श्रान्तिविग्रहा ।
श्रीतला श्रोषिता श्रोभा शुभदा शुभदायिनी ॥
शिवप्रिया शिवानन्दा शिवपूजासु तत्परा ।
शिवस्तुत्या शिवसत्या शिवनित्यपरायणा ॥
श्रीमती श्रीनिवासा च श्रुतिरूपा शुभव्रता ।
शुद्धविद्याजपकरी शुभकर्त्री शुभाशया ॥
श्रुतानन्दा श्रुतिः श्रोत्री शिवप्रेमपरायणा ।
श्रोषणी शुभवार्त्ता च श्रालिनी शिवनर्त्तकी ॥
षड्गुणायुपदाक्रान्ता षड्ङ्गश्रुतिरूपिणी ।
सरसा सुप्रभा सिद्धा सिद्धसिद्धिप्रदायिनी ॥
सेवासङ्गा सती सक्ता सक्तिरूपा सदाप्रिया ।
सम्यक्प्रदा स्तुतिः स्तुत्या स्तवनीया स्तवप्रिया ॥
स्थैर्यदा स्थैर्यगा सौख्या स्त्रैणसौभाग्यदायिनी ।
स्वाहास्वधा स्वधा स्वाहा स्वधालेपप्रमोदिनी ॥
स्वर्गप्रिया सप्तदाभा सर्वपातकनाशिनी ।
संसारवारिणी राधा सौभाग्यवर्द्धिनी सदा ॥
हरप्रिया हिरण्याभा हरिणाक्षी हिरण्मयी ।
हंसरूपा हरिद्राभा हरिदर्णा शुचिस्मिते ॥
क्षेमदा क्षालिता क्षेमा क्षुद्रघण्टाविधारिणी ।
अपरैकं प्रवक्ष्यामि प्रौढ़े स्वराचरसमन्वितम् ॥
स्तोत्रं सहस्रनामाख्यं स्वरयञ्जनसंयुतम् ।
अजपा अतुलानन्ता अनन्ताष्टसदायिनी ॥
अन्नदाना अशोका च अलका अष्टसिद्धा ।
अनाथवल्लभानन्ता अयोनिसम्भवा प्रिये ॥
अव्यक्तलक्षणाक्षुण्णा विच्छिन्नापापराजिता ।
अनायासामोदार्थसिद्धिदानन्दवर्द्धिनी ॥
अणिमादिगुणाधारा अगण्यालिकहारिणी ।
अचिन्त्यशक्तिबलयाङ्गुनरूपा च हारिणी ॥
अद्रिराजसुता दूती अष्टयोगसमन्विता ।
अच्युता अनवच्छिन्ना अक्षुण्णशक्तिधारिणी ॥
अनन्ततीर्थरूपा च अनन्ताष्टनरूपिणी ।
अनन्तमहिमा पारा अनन्तसुखदायिनी ॥
अर्थदा अन्नदा अर्था सदा अष्टतवर्षिणी ।
अविद्याजालशमनी अप्रतर्क्यगतिप्रदा ॥
अशेषविघ्नसंहन्त्री अशेषगुणगुम्फिता ।
अज्ञानतिमिरप्रभा अनन्तसिद्धिदायिनी ॥
अशेषपापसंहन्त्री अशेषदेवतामयी ।
अघोरा अष्टसा देवी अज्ञानतिमिरप्रदा ॥
अशुभहरा देवी अभिरामविनोदिनी ।
अनवद्यपरिच्छिन्ना अत्यनन्तकलङ्किणी ॥
आरोग्यदात्री आनन्दा आपन्नार्तिविनाशिनी ।
आश्चर्यरूपा आत्मस्था आत्मविद्या सदा प्रिया ॥
आप्यायिनी च आलस्या आपदाहान्तप्रदा ।
इष्टारतिरिष्टदात्री इष्टपूर्णफलप्रदा ॥
इतिहासस्तुतिः श्वेता इहामुत्रफलप्रदा ।
इष्टा च इष्टरूपा च इत्यादिपरिवन्दिता ॥
इन्दिरा इतराचीच इक्षुहार इषारिणी ।
इन्द्राणीसेवितपदा इन्द्रियप्रीतिदायिनी ॥

ईश्वरी ईशजननी ईशस्त्रैश्वर्यदायिनी ॥
उत्तङ्गशक्तिसंयुक्ता उपमानविवर्जिता ।
उत्तमश्लोकसंसेव्या उत्तमोत्तमरूपिणी ॥
उषा उषा उधाराधा ऊर्मिला च शुचिस्मिते ।
ऊहा ऊहवितर्का च ऊर्द्धधारा च ऊर्द्धगा ॥
ऊर्द्धधारा ऊर्द्धयोनी उपपापविनाशिनी ।
ऋषिवृन्दस्तुता ऋद्धिकरणत्रयनाशिनी ॥
ऋतम्भरा ऋद्धिदात्री ऋक्या ऋक्षस्वरूपिणी ।
ऋतुप्रिया ऋक्षमाता ऋचार्चिर्ऋक्षमार्गगा ॥
ऋतुलक्षणरूपा च ऋतुमार्गप्रदर्शिनी ।
एषिताखिलसर्वस्वा एकैकायुतदायिनी ॥
ऐश्वर्यतर्प्यरूपा च ऐरितेन्द्रशिरोमणिः ।
ओजस्विनी ओषधी च ओजोनादौजदायिनी ॥
ओङ्कारजननी देवि ओङ्कारप्रतिपादिता ।
औदार्यप्रकरा भद्रे औषेन्द्रौषधिविग्रहा ॥
अंशवस्था च अन्तस्था अम्बा अम्बालिका तथा ।
अम्बुजाक्षी च अन्धाना अम्बुस्निग्धाम्बुजानना ॥
अंशुमाली अंशुमती अंशूत्यंशांशसम्भवा ।
अन्तर्यामिसहा भद्रे अत्यन्तशोभनस्वरा ॥
अर्थेशा अर्थदात्री च अर्णरूपा अनाहता ।
अन्यु नामान्तरं भद्रे ककारादि वरानने ! ॥
अत्यन्तसुन्दरं शुद्धं निर्मलोत्पलगन्धिनी ।
कुटन्ता करुणा कान्ता कर्म्मजालविनाशिनी ॥
कमला कल्पलतिका कलिकल्मषनाशिनी ।
कमनीयकला कर्णा कपर्दिपूजनप्रिया ॥
कदम्बकुसुमाभाषा सदा कोकनदेक्षणा ।
कालिन्दीकेलिकलिता कला कादम्बमालिका ॥
कान्तालोकनया कन्या कन्यरूपा मनोहरा ।
खड्गिनी खड्गधाराभा खगा खगेन्द्रधारिणी ॥
खेखेलगामिनी खड्गा खड्गेन्दुतलकान्विता ।
खेचरी खेचरी विद्या खगतिः खातिदायिनी ॥
खल्विपाग्नेयपापौघा खलदृद्धिविनाशिनी ।
खातेन कन्दसन्दोहा खड्गखड्गाङ्गधारिणी ॥
खरसन्तापशमनी खरदुःखनिकृन्तनी ।
गुहामन्त्रगतिर्गौरी गन्धर्वनगरप्रिया ॥
गूढ़रूपा गुणवती गुर्व्वी गौरवरङ्गिणी ।
गद्यपीड़ाहरा गुप्ता गद्यस्निग्धमना प्रिया ॥
चारुनेत्रोत्पला चारु चार्वङ्गी चारुरूपिणी ।
चन्द्रचन्दनसिक्ताङ्गी चर्व्वनीया चिरस्थिता ॥
चारुचम्पकमालाढ्या चलिताग्नेयदुष्कृता ।
चारिताग्नेयदलिना चारुताग्नेयमस्तका ॥
रक्तचन्दनसिक्ताङ्गी रक्ताङ्गी रक्तमालिका ।
शुक्लचन्दनसिक्ताङ्गी शुक्लाङ्गी शुक्लमालिका ॥
पीतचन्दनसिक्ताङ्गी पीताङ्गी पीतमालिका ।
कृष्णचन्दनसिक्ताङ्गी कृष्णाङ्गी कृष्णमालिका ॥
शुक्लवस्त्रपरीधाना शुक्लवस्त्रोत्तरीयिका ।
रक्तवस्त्रपरीधाना रक्तवस्त्रोत्तरीयिका ।
पीतवस्त्रपरीधाना पीतवस्त्रोत्तरीयिका ।
कृष्णपट्टपरीधाना कृष्णपट्टोत्तरीयिका ॥
वृन्दावनेश्वरी राधा कृष्णकार्य्यप्रकाशिनी ।
पद्मिनी रागिनी गोपी कालिन्दी अवगाहिनी ॥
गोपीश्वरप्रिया भद्रा सदा नगरमोहिनी ।

त्रिपुरा त्रिपुरादेवी त्रिपुराऽऽकरी सदा ॥
त्रिपुरासन्निकर्षस्था त्रिपुरापरिचारिका ।
त्रिपुरापुरसंस्था तु या राधा पद्मिनी परा ॥
नानासौभाग्यसम्पन्ना नानाभरणभूषिता ।
स्तोत्रं सहस्रनामाख्यं कथितं तव भक्तितः ॥
एतत् स्तोत्रञ्च मन्त्रञ्च कवचञ्च वरानने ।
कल्पे कल्पे च देवेशि प्रपठेद्यदि मानवः ॥
उपास्य राधिकां विद्यां कैवल्यं कमलेक्षणे ।
बहुकालेन देवेशि उपविद्यापि सिध्यति ॥
पद्मिनी राधिका विद्या उपविद्यासु निश्चिता ।
महाविद्यां महेशानि उपास्य यत्नतः स्वयम् ॥
प्रकटं परमेशानि राधामन्त्रेण सुन्दरि ! ।
श्रुत्वा नाम सहस्राणि प्रकटे यत्तु गूह्यते ॥
कृष्णस्तु कालिका साक्षात् राधाप्रकृतिपद्मिनी ।
हे कृष्ण राधे गोविन्द इदमुच्चार्य यत्नतः ॥
सदासौ वैष्णवो देवि सर्व्वत्रैव प्रकाशते ।
गोविन्दो यस्तु देवेशि स्वयं त्रिपुरसुन्दरी ॥
विना मन्त्रं विना होमं विना पूजां विना बलिम् ।
विना गन्धं विना पुष्पं विना नित्योदितां क्रियाम् ॥
प्राणायामं विना ध्यानं विना भूतविशोधनम् ।
विना जपं विना दानं येन राधा प्रसीदति ॥
राधासहस्रनामाख्यस्तोत्रमार्गेण पार्व्वति ।
यो जपेद्देव्यर्चं मन्त्रं राधिकामन्त्रमेव च ॥
स याति नरके घोरे यावदिन्द्राश्चतुर्दश ।
श्रुत्वा गुरुमुखान्मन्त्रं वैष्णवो भक्तितत्परः ॥
ततः पुरश्चरीं कुर्य्यादेकविंशतिसंख्यकम् ।
पूर्व्वाभिषेकसिद्धस्य ततो गुरुपदार्चनम् ॥
विना पूर्व्वाभिषेकञ्च भवाब्धौ पारमिच्छति ।
अन्नस्य तस्य दुर्म्मुद्धेर्निरये पतनं भवेत् ॥
सत्यं सत्यं महेशानि सत्यं सत्यं वदाम्यहम् ।
भवाब्धितरणे नास्ति विना पूर्व्वाभिषेचनम् ॥
नानागमपुराणानि वेदवेदाङ्गमाश्रितः ।
मयोद्धृतं महेशानि सारं पूर्व्वाभिषेचनम् ॥
तस्मात् सर्व्वप्रयत्नेन कुर्य्यात् पूर्व्वाभिषेचनम् ।
श्रुत्वा पूर्व्वाभिषेकञ्च पठेत् राधास्तवं प्रिये ॥
स्तवपाठान्महेशानि स भवेद्भुवनन्दनः ।
स्तोत्रं सहस्रनामाख्यं न यस्य जपतो मनुम् ॥
राधामन्त्रस्य देवेशि तस्य पापफलं ध्रुवम् ।
कुम्भीपाके स पच्येत यावदै ब्रह्मणः शतम् ॥
निम्नगानां यथा श्रेष्ठा भवेद्भागीरथी प्रिये ।
वैष्णवानां यथा शम्भुः प्रकृतीनां यथा सती ॥
पुरुषाणां यथा विष्णुर्नेत्राणां यथा शुभ्रौ ।
स्तवानाञ्च तथा श्रेष्ठं राधास्तोत्रमिदं प्रिये ॥
जपपूजादिकं यद्यद्बलिहोमादिकन्तथा ।
श्रीराधास्तोत्रपाठस्य कलां नार्हति षोड़शीम् ॥"
इति वासुदेवरहस्ये राधातन्त्रे द्वाविंशत्यं पटले सहस्रनामस्तोत्रम् ॥*॥) अथ राधाकवचम् ।

श्रीपार्व्वत्युवाच ।

"कैलासवासिन् भगवन् भक्तानुग्रहकारक ।
राधिकाकवचं पुण्यं कथयस्व मम प्रभो ॥
यद्यस्ति करुणा नाथ त्राहि मां दुःखतो भयात् ।
त्वमेव शरणं नाथ मूलप्राणे पिनाकधृक् ॥

श्रीमहादेव उवाच ।

शृणुष्व गिरिजे तुभ्यं कवचं पूर्व्वसूचितम् ।
सर्व्वरक्षाकरं पुण्यं सर्व्वदुःखहरं परम् ॥
हरिभक्तिप्रदं साक्षात् मुक्तिमुक्तिप्रसाधनम् ।
त्रैलोक्याकर्षणं देवि हरिसान्निध्यकारणम् ॥
सर्व्वत्र जयदं देवि सर्व्वशत्रुभयापहम् ।
सर्व्वेषाञ्चैव भूतानां मनोवृत्तिकरं परम् ॥
चतुर्व्वर्गसुखिजनकं सदानन्दकरं परम् ।
राजसूयाश्वमेधानां यज्ञानां फलदायकम् ॥
इदं कवचमज्ञात्वा राधामन्त्रञ्च यो जपेत् ।
स नाप्नोति फलं तस्य विघ्नस्तस्य पदे पदे ॥
ऋषिरस्य महादेवोऽनुष्टुप्छन्दः प्रकीर्त्तितम् ।
राधास्य देवता प्रोक्ता रां बीजं परिकीर्त्तितम् ॥
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ।
श्रीराधा मे शिरः पातु ललाटं राधिका तथा ॥
वृषभानुसुता दन्तान् चिबुकं गोपनन्दिनी ।
चन्द्रावली पातु गण्डं जिह्वां कृष्णप्रिया तथा ॥
कण्ठं पातु हरिप्राणा हृदयं विजया तथा ।
बाहू द्वौ चन्द्रवदना उदरं सुवलसखा ॥
कटिं योगान्विता पातु पादौ सौभद्रिका तथा ।
नखान् चन्द्रसखी पातु गुल्फौ गोपालवल्लभा ॥
सर्व्वं विधुमुखी पातु गोपी पदतलं तथा ।
शुभप्रदा पातु पृष्ठं कुक्षौ श्रीकान्तवल्लभा ॥
गुह्यदेशं जरा पातु हरिणी पातु सर्व्वतः ।
वाक्यं वाणी सदा पातु धनागारं धनेश्वरी ॥
पूर्व्वां दिशं कृष्णरता कृष्णप्राणा च पश्चिमाम् ।
उत्तरां हरिता पातु दक्षिणां वृषभानुजा ।
चन्द्रावली नैर्ऋतमेव दिवा खेड़ितमेखला ॥
सौभाग्यदा मध्यदिने सायाह्ने कामरूपिणी ।
रौद्री प्रातः पातु मां हि गोपिनी रजनीष्वये ॥
हेतुदा सङ्गवे पातु कोमला च दिवार्द्धके ।
ग्रीष्मापराह्णसमये भ्रमिता सर्व्वसन्धिषु ।
योगिनी भोगसमये रतौ रतिप्रदा सदा ।
कामेश्वरी कौतुके नित्यं योगे रत्नावली मम ॥
सर्व्वदा सर्व्वकार्य्येषु राधिका कृष्णमानसा ।
इत्येतत् कथितं देवि कवचं परमाद्भुतम् ।
सर्व्वरक्षाकरं नाम महारक्षाकरं परम् ।
सर्व्वार्थसिद्धिदस्यास्य स्यात् यद्यन्मनसि वर्त्तते ।
राजद्वारे सभायाञ्च संग्रामे शत्रुसङ्कटे ।
प्राणार्थनाशसमये यः पठेत् प्रयतो नरः ।
तस्य सिद्धिर्भवेद्देवि न भयं विद्यते क्वचित् ।
आराधिता राधिका च तेन सर्व्वं न संशयः ।
गङ्गास्नानात् हरेर्नामग्रहणात् यत् फलं लभेत् ।
तत् फलं तस्य भवति यः पठेत् प्रयतः शुचिः ।
हरिद्रारोचना चन्द्रमण्डितं हरिचन्दनम् ।
कृत्वा लिखित्वा भूर्ज्जे च धारयेत् मस्तके भुजे ।
कण्ठे वा देवदेवेशि स हरिर्नात्र संशयः ।
कवचस्य प्रसादेन ब्रह्मा सृष्टिं स्थितिं हरिः ।
संहारञ्चाहं नियतं करोमि कुरुते तथा ॥
वैष्णवाय च गुह्याय विरागगुरुशीलिने ।
दद्यात् कवचमत्यग्रमन्यथा नाग्रमाप्नुयात् ॥"
इति श्रीनारदपञ्चरात्रे ज्ञानामृतसारे पञ्चरात्रे सर्व्वरक्षाकवचं समाप्तम् ॥ * ॥ (राधातन्त्रोक्त-राधिकाकवचं यथा,—

देव्युवाच ।

"देवदेव महादेव सृष्टिस्थित्यन्तकारक ।
राधिकाकवचं देव कथयस्व दयानिधे ॥

ईश्वर उवाच ।

शृणु देवि वरारोहे कवचं जनमोहनम् ।
गोपितं सर्व्वतन्त्रेषु इदानीं प्रकटीकृतम् ॥
या राधा त्रिपुरा दूती उपविद्या सदा तु सा ।
उपविद्याक्रमाद्देवि कवचं शृणु पार्व्वति ॥
अस्य पूजाविधानस्य फलं सर्व्वसिद्धिदम् ।
यत्र तत्र न वक्तव्यं कवचं गोपितं महत् ।
भक्तिहीनाय देवेशि द्विजनिन्दापराय च ।
न शूद्रयाजिविप्राय वक्तव्यं परमेश्वरि ॥
शिष्याय भक्तियुक्ताय शक्तिदीक्षारताय च ।
वैष्णवाय विशेषेण गुरुभक्तिपराय च ॥
वक्तव्यं परमेशानि मम वाक्यं न चान्यथा ॥
अस्य श्रीराधात्रैलोक्यमङ्गलकवचस्य गोपिका ऋषिरनुष्टुप्छन्दः श्रीराधिका देवता महा-विद्यासाधनगोपार्थे विनियोगः ॥
ॐपूर्व्वे च पातु सा देवी रुक्मिणी शुभदायिनी ।
ह्रीं पश्चिमे पातु सदा सर्व्वकामप्रपूरणी ।
याम्यां ह्रीं जाम्बवती पातु सर्व्वकामफलप्रदा ।
उत्तरे पातु भद्रा ह्रीं भद्रभक्तिसमन्विता ॥
ऊर्द्धं पातु महादेवी क्रीं कृष्णप्रिया यशस्विनी ।
अधश्च पातु मां देवी ऐं पातालतलवासिनी ॥
अधरे राधिका पातु ऐं पातु हृदयं मम ।
नमः पातु च सर्व्वाङ्गं ङेयुता च पुनः पुनः ।
सर्व्वत्र पातु मे देवी ईश्वरी भुवनेश्वरी ॥
ऐं ह्रीं राधिकायै ह्रीं ऐं शिरः पातु मां क्रीं क्रीं राधिकायै क्रीं क्रीं दन्तवाङ्मं रक्षतु मम ।
ह्रीं ह्रीं राधिकायै ह्रीं ह्रीं नाभाङ्गं रक्षतु पद्मिनी पद्मगन्धिनी । ऐं ह्रीं राधिकायै ऐं ऐं दक्षपादं रक्षतु मम । क्रीं क्रीं ऐं ऐं राधिकायै ह्रीं ह्रीं ऐं ऐं क्रीं क्रीं ॐ सर्व्वाङ्गं मम रक्षतु । क्रीं राधिकायै क्रीं वामपादं रक्षतु सदा पद्मिनी । ह्रीं राधिकायै ह्रीं अक्षियुग्मं रक्षतु मम । ऐं राधिकायै ऐं कर्णयुग्मं सदा रक्षतु मम । ह्रीं राधिकायै ह्रीं नासायुग्मं सदा रक्षतु मम । ॐ ह्रीं राधिकायै ॐ ह्रीं दन्तपंक्तिं सदा पातु सरस्वती । ह्रीं भुवनेश्वरी ललाटं पातु ह्रीं काली मे मुखमण्डलं सदा पातु । ह्रीं ह्रीं ह्रीं महिषमर्द्दिनि ह्रीं ह्रीं महिषमर्द्दिनी द्वारकावासिनी सहस्रारं रक्षतु सदा मम । ऐं ह्रीं ऐं मातङ्गी हृदयं सदा मम रक्षतु । ह्रीं ऐं ह्रीं उग्रतारा नाभिपद्मं सदा रक्षतु मम । क्रीं ऐं क्रीं सुन्दरी क्रीं ऐं क्रीं स्वाधिष्ठानं लिङ्गमूलं रक्षतु मम । लं ऐं लं पृथिवी गुदमण्डलं रक्षतु मम । ऐं ऐं ऐं वज्रमा ऐं ऐं ऐं जानुहयं रक्षतु मम । ह्सौं भैरवी ह्सौं: स्कन्धहयं रक्षतु मम । ह्रीं

अन्नपूर्णा ङीं घाटां रक्षतु मम। ऐं ङीं ऐं वोजत्रयं सदा पातु दृष्टदेग्रं मम। ॐ महादेव: पातु सर्व्वाङ्गं मे ॐ नारायण: पातु सर्व्वाङ्गं सदा मम।
ॐ ॐ कृष्ण: पातु सदा गोत्रं रुक्मिणीनाथ:। रुक्मिणी सत्यभामा च सेव्या जाम्बवती तथा॥ लक्ष्मणा मित्रविन्दा च भद्रा नग्नजिता तथा। एता: सर्व्वा युवतय: शोभनास्या: सुलोचना:॥ रक्षेयुर्म्मां सन्तु दिक्षु सततं शुभदर्शना:।
ॐ नारायणश्च गोविन्द: शिर: पद्मदलेक्षण:॥ सर्व्वाङ्गं मे सदा रक्षेत् केशव: केशिहा हरि:। इतीदं कवचं भद्रे त्रैलोक्यमङ्गलं शुभम्॥ पद्मिन्या: परमेशानि उपविद्यासु सङ्गतम्। य: पठेत् पाठयेद्वापि सततं भक्तितत्पर:॥ निराहारो जलत्यागी अयुतं वत्सरे सदा। तदैव परमेशानि पद्मिनी वशमानियात्॥ एतत्ते कथितं देवि कवचं भुवि दुर्लभम्। फलमूलजलं त्यक्त्वा पठेत् संवत्सरं यदि॥ पद्मिनी वशमायाति तदैव नगनन्दिनि। अनेनैव विधानेन य: पठेत् कवचं परम्॥ विष्णुलोकमवाप्नोति नान्यथा वचनं मम। संगोप्य पूजयेद्विद्यां महाविद्यां वरानने॥ प्रकटार्थमिदं देवि कवचं प्रपठेत् सदा। महाविद्यां विना भद्रे य: पठेत् कवचं प्रिये। तदैव सहसा भद्रे कुम्भीपाकं व्रजेत् प्रिये॥"
इति वासुदेवरहस्ये राधातन्त्रे एकत्रिंशत् पटल:॥) अथ राधास्तोत्रम्।
"स्तोत्रञ्च सामवेदोक्तं प्रपठेत् भक्तिपूर्व्वकम्। राधा रासेश्वरी रम्या परमा च परात्मन:॥ रासोद्भवा कृष्णकान्ता कृष्णवक्ष:स्थलस्थिता। कृष्णप्राणाधिदेवी च महाविष्णुप्रसूरपि॥ सर्व्वया विष्णुमाया च सत्यासत्या सनातनी। ब्रह्मरूपा परमा निर्लिप्ता निर्गुणा परा॥ वृन्दावनेशा विजया यमुनातटवासिनी। गोलोकवासिनी गोपी गोपीशा गोपमालका। सानन्दा परमानन्दा नन्दनन्दनकामिनी। वृषभानुसुता शान्ता कान्ता पूर्णतमस्य च॥ काम्या कलावतीकन्या तीर्थपूता सतीनिभा। सप्तत्रिंशच्च नामानि वेदोक्तानि शुभानि च॥ सारभूतानि पुण्यानि सर्व्वनामसु नारद:। य: पठेत् संयत: शुद्धो विष्णुभक्तो जितेन्द्रिय:॥ इह वै निश्चलां लक्ष्मीं लब्ध्वा याति हरे: पदम्॥ हरिभक्तिं हरेर्दास्यं लभते नात्र संशय:॥ भक्तो लक्षजपेनैव स्तोत्रसिद्धिर्भवेत् ध्रुवम्। स्तोत्रस्मरणमात्रेण जीवन्मुक्तो भवेन्नर:॥ पदे पदेऽश्वमेधस्य लभते निश्चितं फलम्। कोटिजन्मार्ज्जितात् पापात् ब्रह्महत्यादितोऽपि। स्तोत्रस्मरणमात्रेण मुच्यते नात्र संशय:॥ मृतवत्सा काकवन्ध्या महावन्ध्या प्रसूयते। शृणोति वर्षमेकं या शुद्धा स्त्रिग्धान्नभोजनी॥ शृणोति मासमेकं य: सर्व्वाभीष्टं लभेन्नर:। सामवेदे कुमारं तमित्याह कमलोद्भव:॥"
इति नारदपञ्चरात्रे ज्ञानामृतसारे द्वितीयरात्रौ शिवनारदसंवादे भक्तिज्ञानकथने श्रीराधिकास्तोत्रं समाप्तम्॥

राधाकान्त:, पुं, (राधाया: कान्त:।) श्रीकृष्ण:। यथा,—
"गोलोके द्विभुज: कृष्णो राधाकान्त:सनातन:। गोपाङ्गनादिभिर्युक्तो द्विभुजैर्गोपपार्षदै:॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १७ अध्याय:॥

राधासनय:, पुं, (राधाया: सूतपत्न्यास्तनय:। तथा पालितत्वात् तथात्वम्।) कर्ण:। इति हेमचन्द्रे कर्णपर्य्याये राधासुतशब्ददर्शनात्॥

राधाभेदी, [न्] पुं, (राधां धन्विचित्रभेदं भिनत्तीति। भिद्+णिनि:।) अर्জ্জुन:। इति भूरिप्रयोग:॥

राधावेधी, [न्] पुं, (राधां धन्विचित्रविशेषं विध्यतीति। विध्+णिनि:।) अर्জ্জुन:। यथा,
"राधावेधी किरीत्येन्द्रिर्ज्जिष्णु: श्वेतहयो नर:। वृहन्नलो गुडाकेश: सुभद्रेश: कपिध्वज:। वीभत्सु: कर्णजित्तस्य गाण्डीवं गाण्डिवं धनु:॥"
इति हेमचन्द्र:। ३। ३७३॥

राधासुत:, पुं, (राधाया: सूतपत्न्या: सुत:।) कर्ण:। यथा,—
"वेदिजा यात्रसेनी च कर्णस्याधिरथोऽङ्गराट्। राधासुतोऽर्कतनय: कालदृष्टस्तु तद्गु:॥"
इति हेमचन्द्र:। ३। ३७५॥
(यथा, महाभारते। ८। ८६। ३।
"पश्य चैनं समायुक्तं रथं कर्णस्य पाण्डव। श्वेतवाजिसमायुक्तं युक्तं राधासुतेन च॥")

राधेय:, पुं, (राधाया अपत्यमिति। राधा+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) कर्ण:। इति त्रिकाण्डशेष:॥ (यथा, महाभारते। १। १३४। ११।
"सूतपुत्रस्तु राधेयो गुरुं द्रोणमियात्तदा॥")

राध्य:, त्रि, (रध्यते इति। रध्+"आसुयुवपिरपीति।" ३। १। १२६। इति ण्यत्।) कथनीय:। रधधातो: कर्म्मणि ण्यत्प्रत्ययेन निष्पन्न:॥

रामं, क्ली, (रम्यतेऽनेनेति। रम्+घञ्।) वास्तुकम्। कुस्तुम्। इति मेदिनी। मे, २६॥ तमालपत्रम्। इति राजनिर्घण्टः॥ (नेदं तम:। यथा, ऋग्वेदे। १०। ३। ३।
"सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन् रुशद्भिर्वर्णैरभिरामस्यात्॥"
"रामं कृष्णवर्णं ग्राम्यं तम: अभ्यस्यात्सायं होमकाले अभिभूय तिष्ठति।" इति तद्भाष्ये सायण:॥)

राम:, त्रि, (रमते इति। रम्+घञ्:। रम्यतेऽनेनेति। रम्+घञ् वा।) मनोज्ञ:। (यथा, वृहत्संहितायाम्। १६। ५।
"गाव: प्रभूतपयसो नयनाभिरामा रामा रतेरविरतं रमयन्ति रामान्॥")
सित:। असित:। इति मेदिनी। मे, २७॥

राम:, पुं, (रमते इति। रम क्रीड़ायाम्+"ज्वलितिकसन्तेभ्यो ण:।" ३। १। १४०। इति ण:।) परशुराम:। स तु विष्णोरंश: जमदग्निसुते: पुत्रत्वेन त्रेतायुगादाववतीर्ण: एकविंशतिवारान् पृथिवीं नि:क्षत्रियामकरोत्। (असौ एव समन्तपञ्चके पञ्च क्षत्रियशोणितह्रदान् विधाय पितॄन् सन्तर्पयामास। यदुक्तं महाभारते। १। २। २—११।

सौतिरुवाच।
"शृणुध्वं मम भो विप्रा ब्रुवतश्च कथा: शुभा:। समन्तपञ्चकाख्यश्च श्रोतुमर्हथ सत्तमा:॥ त्रेताद्वापरयो: सन्धौ राम: शस्त्रभृतांवर:। असक्तं पार्थिवं क्षत्रं जघानामर्षचोदित:॥ स सर्व्वं क्षत्रमुत्साद्य स्ववीर्य्येणानलद्युति:। समन्तपञ्चके पञ्च चकार रुधिरान् ह्रदान्॥ स तेषु रुधिराम्भ:सु ह्रदेषु क्रोधमूर्च्छित:। पितॄन् सन्तर्पयामास रुधिरेणेति न: श्रुतम्॥ अथर्चीकादयोऽभ्येत्य पितरो राममब्रुवन्। राम राम महाभाग प्रीता: स्मस्तव भार्गव॥ अनया पितृभक्त्या च विक्रमेण तव प्रभो। वरं वृणीष्व भद्रन्ते यमिच्छसि महाद्युते॥

राम उवाच।
यदि मे पितर: प्रीता यद्यनुग्राह्यता मयि। यच्च रोषाभिभूतेन क्षत्रमुत्सादितं मया॥ अतश्च पापान्मुच्येऽहमेष मे प्रार्थितो वर:। ह्रदाश्च तीर्थभूता मे भवेयुर्भुवि विश्रुता:॥ एवं भविष्यतीत्येवं पितरस्तमथाब्रुवन्। तं क्षमस्वेति निर्विण्णस्तत: स विरराम ह॥ तेषां समीपे यो देशो ह्रदानां रुधिराम्भसाम्। समन्तपञ्चकमिति पुण्यं तत् परिकीर्त्तितम्॥"
अस्त्राण्यद्भिवरं परशुरामग्रन्थे द्रष्टव्यम्। *)

राघव:। श्रीरामचन्द्र: स च पूर्णब्रह्मस्वरूप: अयोध्याधिपतिदशरथराजतनयत्वेन त्रेतायुगशेषे रावणादिवधार्थमवतीर्ण:। बलदेव:। स तु अनन्तदेवो विष्णोरंश: यदुवंशीयवसुदेवपुत्रत्वेन द्वापरयुगान्ते कंसादिवधार्थमवतीर्ण:। (यथा, भागवते। १। ११। १७।
"निशम्य प्रेष्ठमायान्तं वासुदेवो महामना:। अक्रूरञ्चोग्रसेनञ्च रामञ्चाद्भुतविक्रम:॥")
त्रयो रामा यथा,—
"अघोरश्चाथ रामश्च महाकालौ प्रकीर्त्तितौ। भार्गवो राघवो गोपस्त्रयो रामा: प्रकीर्त्तिता:॥"
इति वह्निपुराणम्॥ *॥

वरुण:। घोटक:। पशुभेद:। इति मेदिनी। मे, २६॥ (रम्+भावे घञ्। रति:। यथा, भागवते। ७। ६। १४।
"सर्व्वत्र तापत्रयदु:खितात्मा निर्व्विद्यते न स्वकुटुम्बरामः॥"
"स्वकुटुम्बे रामो रतिर्यस्य।" इति तत्र श्रीधरस्वामी॥) रामशब्दस्य व्युत्पत्तिर्यथा,—
"राशब्दो विश्ववचनो मश्चापीश्वरवाचक:। विश्वानामीश्वरो यो हि तेन राम: प्रकीर्त्तित:॥

रामः

रमते रमया सार्द्धं तेन रामं विदुर्बुधाः ।
रमायां रमणस्थानं रामं रामविदो विदुः ॥
रा चेति लक्ष्मीवचनो मश्चापीश्वरवाचकः ।
लक्ष्मीपतिं गतिं रामं प्रवदन्ति मनीषिणः ॥
नाम्नां सहस्रं दिव्यानां स्मरणे यत् फलं लभेत् ।
तत् फलं लभते नूनं रामोच्चारणमात्रतः ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ११०अध्यायः ॥
(तथा च अध्यात्मरामायणे । १ । ३ । ४४ ।
"यस्मिन् रमन्ते मुनयो विद्यया ज्ञानविश्वे ।
तं गुरुः प्राह रामेति रमणाद्राम इत्यपि ॥"
एतत्कृतराक्षसवधवृत्तान्तं विचार्य्य यदुक्तं रामानुजेन तदाह । "अत्र युद्धदिवसगणनायां कतकतीर्थौ । पूर्वं सुवेलारोहणदिने ।
'ततोऽस्तमगमत् सूर्यः सन्ध्यया प्रतिरञ्जितः ।
पूर्णचन्द्रप्रदीप्ता च क्षपा समतिवर्त्तते ॥'
इत्युक्तेस्तद्दिनं चतुर्दश्यीपूर्णिमान्यतरदिति स्मरेम् । ततः लङ्काप्रतिपदि युद्धारम्भस्तस्यामेव रात्रौ नागपाशबन्धतद्विमोचौ । द्वितीयायां धूम्राक्षवधः । तृतीयायां वज्रदंष्ट्रस्य । चतुर्थ्यामकम्पनस्य । पञ्चम्यां प्रहस्तस्य । षष्ठ्यां रावणभङ्गः । सप्तम्यां कुम्भकर्णवधः । अष्टम्यामतिकायादेः । नवम्यामिन्द्रजितो ब्रह्मास्त्रप्रयोगः । दशम्यां दिवा निकुम्भवधः । तद्रात्रौ मकराक्षवधः । एकादश्यादित्रयोदश्यन्तदिनत्रयेण इन्द्रजिद्वधः । चतुर्दश्यां मूलबलवधः । अमायां रावणयुद्धारम्भतद्वधाविति पञ्चदशदिनानि सर्वं युद्धमिति । अत्रेदं वक्तव्यम् । कथं लङ्काप्रतिपत् माघशुक्लस्य वा चैत्रशुक्लस्य वा । नाद्यः चैत्रे पुष्यानक्षत्रेऽयोध्यातो वनं प्रति रामस्य प्रस्थानमिति स्मरेमयोध्याकाण्डे । चैत्रे पुष्यश्च शुक्लपक्ष एव तत्रापि नवम्यादिदिनत्रये एवेति स्मरेमेव ज्योतिषादौ । तत्र नवमीरिक्तात्वादभिषेकायोग्या दशम्येव तु पूर्णत्वादयोग्या । एवञ्च चैत्रशुक्लदशम्यां प्रस्थानम् । तत्र माघलङ्कायामायां युद्धसमाप्तौ तदुत्तरपञ्चम्यां भरद्वाजाश्रमगमनम् ।
'पूर्णे चतुर्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः ।
भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम् ॥'
इति वक्ष्यमाणत्वात् । तत्र न च चतुर्दशवर्षसमाप्तिरिति भगवतः प्रतिज्ञाहानिः । पूर्णे चतुर्दशे वर्षे इत्युक्तेरसङ्गतिश्च । युद्धोत्तरं तावत्कालं लङ्कायामवस्थानस्यालाभाच्च । चैत्रशुक्लपञ्चम्यां तत्रागमनेऽपि पञ्चदिनन्यूनतेवेति तद्वानिस्तदवस्थैव । तदुत्तरद्वितीयदिने एवायोध्याप्रवेशस्य लाभात् । अमान्तमानेन चैत्रशुक्लोत्तरपञ्चम्यां तदाश्रमगतावपि चतुर्दशवर्षतो बहुदिनाधिक्येन चतुर्दशवर्षसमाप्तिर्नेत्योध्यागमने "मया प्राणा ह्येया" इति भरतप्रतिज्ञाहानिः । सा च प्रतिज्ञा चित्रकूटे रामसन्निधाविति योध्याकाण्डे स्मरेम् । एतेन चैत्रलक्ष्मणप्रतिपदि युद्धारम्भस्तच्छुक्लप्रतिपदि रावणसंहार इति तीर्थोक्तश्चैत्रलक्ष्मण्यैत्यन्योऽपि परास्तः । पूर्णिमान्तमानेन तिथिबहुत्वादशमासैर्व्वर्षगणने पञ्चदिनानां न्यूनत्वात् । अमान्तमानेन चैत्रलक्ष्मण्यग्रहणे बहुदिनाधिक्यम् । सावनमानेन षष्ट्युत्तरत्रिशता दिनैर्व्वर्षगणने तु तिथिबहुत्ववशात् तत्र षड्दिनाधिक्येन चतुर्दशवर्षाणां चतुरशीत्यहोरात्रतुल्या बहुदिनन्यूनतैव । किञ्च महाभारते युधिष्ठिरवनवासे त्रयोदशवर्षमिते किञ्चित्कालादर्व्वागेव तेषां प्राकट्ये दुर्योधनेन तदसमाप्तौ एषां प्राकट्येन पुनस्तावत्पर्य्यन्तं पुनरितैर्वनवासः कर्त्तव्यो भविष्यतीति भीष्मं प्रत्युक्ते भीष्मवाक्यं विराटपर्व्वणि ।
'पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः ।
एषामप्यधिका मासाः पञ्च च द्वादशक्षपाः ॥
त्रयोदशानां वर्षाणामिति मे धीयते मतिः ।
सर्वं यथावच्चरितं यद्यदेभिः प्रतिश्रुतम् ॥
एवमेतद्ध्रुवं ज्ञात्वा ततो वीभत्सुरागतः ।
सर्वे चैव महात्मानः सर्वे धर्मार्थकोविदाः ॥
येषां युधिष्ठिरो राजा कस्माद्धर्म्मपराभवुः ॥'
इति । एवञ्चेदृशव्यवहारनिबन्धनद्वादशमासैरेव वर्षगणना । अधिकमासगणना चोचितैव । एवञ्चाधिकमासगणनायां धर्म्महानौ न्याय्यत्वे च स्थिते कस्माद्रामस्तानुपेक्षेत । भरतो वा तान्न गणयेत् । एवञ्चामान्तमानेन चतुर्दशीयाश्विनकृष्णे । पूर्णिमान्तमानेन कार्त्तिककृष्णे षष्ठ्यां तत्समाप्तिरित्यायाति । अन्यथा चैत्रशुक्लदशम्यामारब्धस्य वनवासस्य षष्ठ्यां चतुर्दशवर्षसमाप्तिर्न कथमप्युपपद्यते । तद्गणने तु एकादशदिनन्यूनषण्मासानां चतुर्दशवर्षेषु हृद्यायुपपद्यत एव सा । तस्मात् द्वादशसमाप्युत्तरं त्रयोदशे किञ्चिदतीते अरण्यकाण्डोक्तासन्नीत्या फाल्गुनाश्वत्थां रावणहतसीतापहारः । ततश्चतुर्दशे किञ्चिदतीते रामस्य लङ्कासमीपगमनम् । वर्त्तते दशमो मासो द्वौ तु श्लोकौ प्रवक्ष्यमेति सीतोक्तिः सावनमानेन स्वहरणदिनतः कालगणनया । तत्र पूर्णचन्द्रप्रदीप्ता चेति रामोक्ता पौषशुक्लचतुर्दश्यां पूर्णिमायां वा चित्रकूटशिखरप्राप्तौ रामस्य । किञ्च हनूमतो लङ्काप्रवेशोत्तरं सीतादर्शनकाले हिमत्ययेन च शीतरश्मिरभ्युत्थितो नैकनक्षत्ररश्मिरिति वाक्येन द्वौ मासौ रचितव्यौ मे योऽवधिस्ते मया कृत इति रावणवाक्येन मार्गशुक्लदशम्युत्तरं हनूमतो लङ्काप्रवेशो दिनद्वयान्तरे लभ्यते इति निरूपितं सुन्दरकाण्डे । ततो मार्गलक्ष्मण्यां राघवप्रस्थानस्यान्यत्रोक्तेन पौषपूर्णिमात्वमेवोचितं तत्प्राप्तिदिनस्य । ततो दशपञ्चदिनानि सेनानिवेशदूतप्रेषणादिना गतानि । ततो युद्धारम्भश्च तदारभ्य भाद्रश्रावणोभयमामान्तं लङ्कापुराद् बहिः सेनयोः सङ्कुलं युद्धम् । ततो बहुराक्षसक्षयेण भीता राक्षसा लङ्कां प्रविष्टा इति तद्दिनेऽवहारः । तदुत्तरप्रतिपदि राक्षविन्द्रजितो हतप्रत्यूषस्य इत्यादि । अतएव प्रत्यूषबहुराघवदर्शनकाले सीतावाक्यम् । तीर्त्वा सागरमक्षोभ्यं भ्रातरौ गोप्यदे हताविति । अनेन बहुदिनयुद्धे बहुषु राक्षसेषु क्षयितेषु यूथपतिपतियूथरूपेऽत्यल्पावशिष्टे सैन्ये तयोः प्रत्यूष इति लभ्यते । तथा अयं ते समुहान् कालः प्रयातस्य महाबलेति कुम्भकर्णस्मृति रावणोक्ता सार्द्धनवनिद्रायाः षण्मासाधिकत्वप्रतीतेरप्येवमेवोचितम् । निरूपितञ्चैतत् प्राक् । सेतुबन्धादिवृत्तान्तं त्वं न जानीषे इति कुम्भकर्णस्मृति रावणोक्ता पूर्वमन्त्रकरणोत्तरं मध्ये जागरणाभावस्य प्रतीतेः । किञ्च । प्रत्यूषनदिनं न लक्ष्मणप्रतिपत् । तस्याः पूर्णिमोत्तरत्वेन सम्पूर्णरात्रौ चन्द्रसत्तया तस्मिंस्तमसि दारुणे इत्याद्युक्तेरसङ्गत्यापत्तेश्च । सा शुक्लप्रतिपदार्था । एवञ्चामान्तपञ्चमात्रं युद्धमित्यस्यात्यन्तमसङ्गत्यापत्तिः । यत्तु अमायामेव रावणवध इति तत्तु न युक्तम् । इन्द्रजिद्वधोत्तरम् ।
'अभ्युत्थानं त्वमद्यैव लक्ष्मणस्य चतुर्दशीम् ।
कृत्वा निर्य्यातमावास्यां विजयाय बलैर्वृतः ॥'
इति रावणस्मृति सुषार्श्वस्योक्त्या । चतुर्दश्यां रावणप्रेषितबलवधोत्तरममायां निर्गतरावणेन रामलक्ष्मणयोर्युद्धे रात्रौ लक्ष्मणस्य शक्तिघातोत्तरं रावणलङ्काप्रवेशस्योक्ततया ततो लक्ष्मणचिकित्सोत्तरं पुना रामरावणयुद्धस्य वाल्मीकिनैव स्पष्टमुक्ततया तदसम्भवात् । किञ्च । आदित्यहृदयस्यादित्यं प्रेक्ष्य जप्तेदं परं हर्षमवाप्तवानित्यनेन सूर्य्यदर्शनोत्तरं जपस्योक्ततया रावणमरणोत्तरं शिरःप्रभाभ्यभवद्दिवाकर इत्युक्त्या दिवा तद्वधप्रतीत्या च चिरकालयुद्धोत्तरं लक्ष्मणे शक्तिघातस्य तदथमोषधीपर्व्वतानयनस्य चोक्तत्वेनामारात्रौ शक्तिघातप्रतीत्या रणाद्रावणापगमस्य प्रतीत्या च तद्विरोधात् । तथा पाद्मे ।
'ततो जग्मे महायुद्धं सङ्कुलं कपिरक्षसाम् ।
मध्याह्ने प्रथमं युद्धं प्रारब्धं प्रतिपद्यभूत् ॥'
प्रतिपदि शुक्लप्रतिपदीत्यर्थः । उक्तयुक्तेः ।
'ततो निशि समागम्य मायावी शुक्लजिद् बली ।
ववन्द नागपाशैस्तौ राघवौ च हरिव्रजान् ॥'
ततः चिरकालसङ्कुलयुद्धोत्तरम् । अन्यथा तस्यां निशीत्येव वदेत् । अये द्वितीयेऽह्नि षष्ठ्यामिति चोक्त्वा दारुणे तमसीति रामायणोक्त्या च भाद्रश्रावणोभयमामोत्तरप्रतिपत्तेतदिति बोध्यम् ।
'वैनतेयस्तदाभेत्य तानि चास्त्राण्यमोचयत् ।
द्वितीयेऽह्नि धूम्राक्षं हनूमान्निजघान वै ॥
तृतीयेऽह्नि वज्रदंष्ट्रं खड्गाच्चिच्छेद चाङ्गदः ।
जघान हनूमान् भूयश्चतुर्थेऽह्न्यकम्पनम् ॥
प्रहस्तं पञ्चमीत्यां नीलश्चिच्छेदमर्दनि ।
रावणः परिभूतोऽभूत् षष्ठ्यां रामेण धन्विना ॥
अथ लङ्केश्वरः क्षिप्रः कुम्भकर्णं ददोहरम् ।
प्रेषयामास रावाय वधायाशेषरक्षसाम् ॥
जघान तं कुम्भकर्णं रामः सप्तमवासरे ॥'

इदं बोधनं दिनद्वयेन । तं बोधितं कुम्भकर्णम् । सप्तमवासरे बोधनोत्तरं सप्तमवासरे इत्यर्थः । यत् तु बोधनं यष्ठ्यां रात्रौ सप्तम्यामेतद्ध्य इति तन्न । तदुत्थापने उल्कास्रातिप्रयासस्य रात्रिमात्रेणासम्भवात् । रावणमन्दिरगमनकाले सूर्यप्रभया रावणमन्दिरस्यातिभास्वरत्ववर्णनेन मध्याह्नादिना सप्तम्यां युद्धासम्भवात् । इन्द्रजितो दिनद्वयेन वधोऽस्य यामषट्केनेत्यस्यासङ्गतत्वाच्च । एवञ्च भाद्रपूर्णिमायामेतद्वधः । 'जघान लक्ष्मणोऽन्येद्युरतिकायं दशास्यजम् । वध्वान्येद्युरिन्द्रारिर्वैश्रवणेन वृषो कपीन् ॥ हनूमता समानीतो महौषधमहीधरः । तस्यानिलसुतस्पर्शप्रभावात् सर्व एते समुत्थिताः ॥ अन्येद्युः कपिराट् कुम्भं निकुम्भं बायुजोऽवधीत् । तस्यां निशि रघुश्रेष्ठो जघान मकरेक्षणम् ॥ मायासीतावधश्चक्रे शुक्रजिद्रणमूर्द्धनि । तेन खिन्नोऽभवद्राम आश्वस्तो लक्ष्मणेन सः । त्रयोदश्यां सौमित्रिस्त्रिदिनं योधयन् बली ॥ जघान शुक्रजेतारं रामध्यानेन हेतुना ॥' अन्येद्युः अन्येषु दिवसेषु । अत्रातिकायग्रहणं त्रिशिरोदेवान्तकनरान्तकमहोदरमहापार्श्वोपलक्षणम् । लक्ष्मणग्रहणमङ्गदहनूमतोरप्युपलक्षणम् । एवं षड्भिर्दिनैः वध्यां वधः । पूर्वं क्रमेणैव तद्बोधनेः । अन्येद्युः सप्तम्याम् । पर्व्वतानयनमष्टम्याम् । अन्येद्युर्नवम्याम् । तस्यां निशि नवमीरात्रौ तदन्ते मायासीतावधः । ततो दशमीचतुर्थयामारभ्य त्रयोदशीचतुर्थयामपर्यन्तमिन्द्रजिद्वधः ।

'ततोऽवधीन्मूलबलचतुर्दश्यां रघूद्वहः ।
दर्शेऽह्नि निर्ऋथौ राजा योद्धुं रामेण संयुगे ॥
चतुरङ्गबले: सार्द्धं मन्त्रिभिर्भृशकन्धरः ।
कृतचामरसंयुक्तः सर्व्वाभरणभूषितः ॥
महारथगतो द्वाराद्दक्षराभिर्ऋथौ बहिः ।
आगतो रक्षसां राजा ब्रह्मणो देवकण्टकः ॥
योद्धुं रघुवरेणेति शुश्रुवे कलहध्वनिः ।
तत्र युद्धं समभवद्वानरागाञ्च रक्षसाम् ॥
रामरावणयोश्चैव तथा सौमित्रिणा सह ॥
शक्तिञ्चिक्षेप संक्रुद्धः सोऽनुजं प्रति रावणः ।
वक्षसा धारयामास सौमित्रिस्तां वियद्गताम् ।
तया स बाध्यमानः सन् पपात धरणीतले ॥
हनूमता जीवितोऽभूत्सौषध्यानयनात् पुनः ।
ततः क्रुद्धो महातेजा राघवो राक्षसान्तकः ॥
जघान राक्षसान् सर्व्वान् शरैः कालान्तकोपमैः ।
भयात् प्रदुद्राव रणे लङ्कां प्रति निशाचरः ॥
जगद्रामममयं पश्यन्निर्व्वेदात् स्वयञ्च विमुक्तः ।
निकुम्भिलां ततः प्राप्य होमचक्रे जिगीषया ॥
ध्वंसितं वानरैस्तस्यां होमं ज्ञात्वा रिपोः ।
पुनरुत्थाय पौलस्त्यो रामेण सह योधितुम् ॥
दिव्यं स्यन्दनमारुह्य राक्षसैर्निर्ऋथौ बहिः ॥
इदं निर्गमनमाश्विनशुक्लप्रतिपदि ।
'ततः शुक्लमखो दिव्यं रथं हर्य्यश्वसंयुतम् ।

राघवाय सस्तेन प्रेषयामास भक्तिमान् ।
तन्तु मातलिनानीतमारुह्य रथसत्तमम् ।
स्तूयमानः सुरगणैर्युयुधे तेन रक्षसा ॥
ततो युद्धमभूद्घोरं रामराघवयोर्महत् ।
सप्ताह्निकमहोरात्रं शुक्लाक्षैरतिभीषणैरिति ।'
ततो मातलिरथागमनदिनोत्तरम् । एवञ्च नवम्यां तद्वधः । तदुक्तं कालिकापुराणे ।
'रामस्यानुग्रहार्थं वै रावणस्य वधाय च ।
राज्ञावेव महादेवी ब्रह्मणा बोधिता पुरा ॥
ततस्तु व्यक्तनिद्रा सा नन्दायामाश्विनेऽसिते ।
जगाम नगरीं लङ्कां यत्रासीद्रावणः पुरा ।'
आगत इति शेषः । इदञ्चागमनं रात्र्यन्ते तदेव मातलिरथागमनम् ।
'तत्र गत्वा महादेवी तदा सौ रामलक्ष्मणौ ।
युद्धेन योजयामास स्वयमन्तर्हिताम्बिका ॥
राक्षसानां वानराणां शुश्रुवे सा मांसशोणितम् ।
रामरावणयोर्युद्धं सप्ताहं सा व्यधीजयत् ॥
व्यतीते सप्तमे रात्रे नवम्यां रावणं ततः ।
रामेण घातयामास महामाया जगन्मयी ॥
यावत्त्वयो: स्वयं देवी युद्धकेलिमुदैक्षत ।
तावत्तु अष्टरात्रादि सर्व्वैर्देवैः सुपूजिता ।
निहते रावणे वीरे नवम्यां सकलैः सुरैः ।
विष्णोरुपूजां दुर्गायाश्चक्रे लोकपितामहः ॥'
सकलैः सुरैरित्यस्य सहेति शेषः ।
'रामरावणयोर्युद्धं दृष्ट्वा देवेश भीतिदम् ।
तृतीयायान्तु लङ्कायाः पूर्व्वोत्तरदिशि स्थितम् ॥
स्वातिनक्षत्रयुक्तायां भीतं सुरबलं महत् ।
शान्त्यर्थ वारयामास देवेन्द्रो वचनाद्धरेः ॥
शान्त्यर्थं भयशान्त्यर्थम् ।
'ततस्तु श्रवणे नाथ दृश्यां चण्डिका शुभाम् ।
विष्णुश्च चक्रे शान्त्यर्थं बलनीराजनं हरिः ॥'
रिपुजनितभयशान्त्यर्थमित्यर्थः ।
'नीराजितबलः शुक्रस्तत्र रामं सलक्ष्मणम् ।
सम्भाष्य प्रययौ स्वर्गं सह देवैः शचीपतिः ॥
इति वृत्तं पुरा कल्पे मनोः स्वायम्भुवेऽन्तरे ।
पुरा कल्पे यथा वृत्तं प्रतिकल्पं तथैव तु ।
प्रवर्त्तते स्वयं देवी देवानां त्राणाय वै ।'
स्वायम्भुवमन्वन्तररूपे पुरा कल्पे इत्यर्थः ।
प्रतिकल्पं प्रतिमन्वन्तरमित्यर्थः । जलप्रवसामान्येन तत्रापि कल्पव्यवहारात् ।
'प्रतिकल्पं भवेद्रामो रावणश्चापि राक्षसः ।
तथैव जायते युद्धं तथैव चिदजागमः ॥
एवं रामसहस्राणि रावणानां तथैव च ।
भवितव्यानि भूतानि तेषु देवी प्रवर्त्तते ॥
तां पूजन्ति सुराः सर्व्वे बलं नीराजयन्ति च ।
तथैव च नराः सर्व्वे कुर्य्युः पूजां यथाविधि ॥
बलनीराजनं राजा कुर्य्याद् बलविवृद्धये ।'इति ।
इत्थञ्च ब्रह्मबोधिता महादेवी अम्बौ प्रविष्टा सीतैव भगवच्छक्तिरूपेति प्रतिभाति । अतएव ब्रह्मवैवर्त्ते प्रथमेऽंशविभागे । प्रतिकल्पं विष्णोश्चरितं क्रीडनमिति नारदप्रश्ने ब्रह्मवाक्यम् ।

'स एव भगवान्नूनं प्रतिमन्वन्तरं सुने ! ।
वधाय दुष्टदैत्यानां भूमिभारहृतां भुवि ॥
कलिद्वापरयोः सन्धौ भविष्यति न संशयः ।
प्रतिकल्पं त्वेवमेव भविष्यति न संशयः ॥" इति ।
सहस्रशत्वो रामोऽपि भविता ब्रह्मणो दिने इति ब्रह्मवैवर्त्ते प्रथमविभागस्थे राधां प्रति कृष्णवाक्ये । दिने इति जातावेकवचनम् । दिनेष्वित्यर्थः । पूर्वं प्रतिमन्वन्तरमित्युक्तेः । प्रतिचतुर्युगं रामावतार इति तु न युक्तम् । चतुर्विंशतितमचतुर्युगे रामावतारस्याष्टाविंशतितमचतुर्युगे कृष्णावतारस्य हरिवंशे पुराणान्तरे च प्रसिद्धत्वादिति दिक् । अग्निवेश्यरामायणमिति प्रसिद्धग्रन्थेषु ।
'रामः पञ्चदशे वर्षे धनुर्यागमथ मैथिलीम् ।
उपयेमे त्रयोधाया द्वादशाब्दानुवास सः ॥
सप्तविंशतिमे वर्षे वनवासमकल्पयत् ।
अष्टादश तु वर्षाणि सीतायास्तु तदाभवन् ॥
त्रिरात्रसदकाहारचतुर्थेऽह्नि बलाग्रजः ।
पञ्चमे चित्रकूटे तु रामो वासमकारयत् ॥
अथ त्रयोदशे वर्षे पञ्चवट्यां महामनाः ।
रामो विरूपयामास घोरां शूर्पणखां वने ॥
ततो माघे सितारभ्यां सुहूर्त्ते दक्षसंज्ञके ।
राघवाभ्यां विना सीतां जहार दशकन्धरः ॥'
माघे शुक्लचतुर्दश्यामिति पाठान्तरम् ।
'मार्गशुक्लदशम्यान्तु वसन्तौ रावणालये ।
सप्तातिर्हृदये मासे आचख्यौ वानरेषु ताम् ॥
एकादश्यां महेन्द्राद्यात् युयुधे शतयोजनम् ।
तद्राक्षिप्तेषु सीताया दर्शनं हि हनूमतः ॥
द्वादश्यां गृध्रपाताच्च हनूमान् पर्य्यवस्थितः ।
तस्यां निशायां सीतायां विश्वासालापसत्कथाः ॥
अष्टादिभिरहोरात्रैस्ततो युद्धमवर्त्तत ।
वधो ऋक्षकुमारस्य वनविध्वंसनं तथा ॥
ब्रह्मास्त्रेण चतुर्दश्यां बद्धः शुक्रजितो कपिः ।
वह्निना पुच्छयुक्तेन लङ्कायाः दहनं तथा ॥
पौर्णमासीं महेन्द्राद्रौ पुनरागमनं कपेः ।
मार्गाश्वितप्रतिपदः पञ्चभिः पथि वासरैः ॥
पुनरागम्य षष्ठेऽह्नि ध्वंसं मधुवनस्य तैः ।
सप्तम्यां प्रत्यभिज्ञानदानं सुहृन्निवेदनम् ॥
अष्टम्युत्तरफल्गुन्यां सुहूर्त्ते विजयाभिधे ।
मध्यं प्राप्ते सहस्रांशौ प्रस्थानं राघवस्य तु ।
वासरे सप्तमेऽम्भोधौ स्कन्धावारनिवेशनम् ॥
पौषशुक्लप्रतिपदस्तृतीया यावदम्बुधेः ।
उपस्थानं ससैन्यस्य राघवस्य बभूव ह ॥
विभीषणचतुर्थ्यां वै रामेण सह सङ्गतः ।
समुद्तरणार्थाय पञ्चम्यां मन्त्र उद्यमः ॥
प्रायोपवेशनञ्चक्रे रामो दिनचतुष्टयम् ।
समुद्वरलाभश्च सेतूपायप्रकीर्त्तनम् ॥
सेतोर्दशम्यामारम्भस्त्रयोदश्यां समापनम् ।
चतुर्दश्यां सुवेलाग्रे रामः सैन्यं न्यवेशयत् ॥
पौर्णमास्यां द्वितीयायां त्रिदिनैः सैन्यतारणम् ।
तृतीयाया दशम्यन्तं सन्नो युद्धनिवेशने ॥

शुक्लारम्भो: सैन्यप्राप्तिरेकादशे दिने।
माघे सितायां द्वादश्यां सैन्यसंख्या श्रुता तु वै।
वारबेन क्षयीगान्तु वाराबारोपवर्णनम्।
त्रयोदश्याद्यमां यावच्छुक्लायां दिवसैस्त्रिभिः॥
रावणः सैन्यसंख्यानं रक्षायोत्साहनं तथा।
यथावधाङ्गदो दौत्यं माघशुक्लादिवासरे॥
माघशुक्लद्वितीयादिदिनैः सप्तभिरेव तु।
रक्षसां वानराणाञ्च युद्धमासीत् सुदारुणम्॥
माघशुक्लनवम्यान्तु रात्रावित्रजिता रणे।
रामलक्ष्मणयोर्नागपाशैर्बन्धो बभूव ह॥
नागपाशविमोक्षार्थं दशम्यां गरुडोऽभ्यगात्।
अत्राबहारः कथितो दशम्यादिदिनत्रयम्॥
द्वादश्यामाञ्जनेयेन धूम्राक्षस्य वधः श्रुतः।
त्रयोदश्यान्तु तेनैव निहतोऽकम्पनो रणे॥
माघशुक्लचतुर्दश्यां यावत् क्षणादिवासरम्।
त्रिदिनेन प्रहस्तस्य नीलेन विहितोऽवधः॥
माघासितद्वितीयायाश्चतुर्थ्यन्तदिनैस्त्रिभिर्हिते:।
रामेण तुमुले युद्धे रावणो द्राविते रणात्॥
पञ्चम्याञ्चाष्टमी यावद्रावणेन प्रबोधितः।
कुम्भकर्णः सप्तरात्रौ तावद्युद्धचतुर्दिनम्॥
कुम्भकर्णो दिनैः षड्भिर्नवम्यान्तु चतुर्दशीम्।
रामेण निहतो युद्धे बहुवानरभक्षकः॥
अमावास्यादिने श्रोणादबहारो बभूव ह।
कालगुवादिप्रतिपदश्चतुर्थ्यन्तदिनैस्त्रिभिः॥
नरान्तकप्रभृतयो निहताः पञ्च राक्षसाः।
पञ्चम्याः सप्तमी यावदतिकायवधश्चाहात्॥
अष्टम्या द्वादशी यावन्निहतो दिनपञ्चकात्।
निकुम्भकुम्भावुद्दण्डौ मकराक्षश्चतुर्दिनैः॥
फाल्गुनस्य द्वितीयायां क्षणं शक्रजिता जितम्।
ऋतौबायास्तु सप्तम्यां हरयः पञ्चवासरात्॥
औषधानयने वयाक्षदासीदवहारकः।
तत्र त्रयोदशीं यावद्दिनैः षड्भिस्तु शक्रजित्॥
लक्ष्मणेन हतो युद्धे विन्नितोऽभिचरन् क्रमात्।
चतुर्दश्यां दशग्रीवरथदीक्षाविधिः क्रमात्॥
अमावास्यां ययौ वीरो युद्धाय दशकन्धरः।
चैत्रशुक्लप्रतिपदः पञ्चमी दिनपञ्चकैः॥
रावणस्य प्रधानानां युध्यतामभवत् क्षयः।
चैत्रषष्ठ्यष्टमी यावल्लङ्कापार्श्वादिमारणम्॥
चैत्रशुक्लनवम्यान्तु सौमित्रेः शक्तिभेदनम्।
श्रोणादिराञ्जनेयेन लक्ष्मणार्थेसमाहृतः॥
दशग्रीवबहारोऽभूद्रात्रौ युद्धं दृढ़रथोः।
एकादश्यान्तु रामाय रथो मातलिसारथिः॥
अष्टादश्यदिने रामो दैवरथे रावणं वधीत्।
द्वादश्याः शुक्लपक्षस्य यावत् क्षणचतुर्दशीम्॥
माघशुक्लद्वितीयायाश्चैत्रक्षणचतुर्दशीम्।
अष्टाशीतिदिनं युद्धं मध्ये पञ्चदशाहतम्॥
युद्धावहारः संग्रामक्षिप्तप्रतिदिनात्मभूत्।
संस्कारो रावणादीनाममावास्यादिनेऽभवत्॥
वैशाखादितिथौ रामः सुवेलं पुनरागतः।
अभिषिक्तो द्वितीयायां जङ्घाराज्ये विभीषणः॥
सीताग्निशुद्धिस्तृतीयायां देवेभ्यो वरलम्भनम्।

वैशाखस्य चतुर्थ्यान्तु रामः पुष्पकमास्थितः॥
पूर्वं चतुर्दशे वर्षे पञ्चम्यां माधवस्य तु।
भरद्वाजाश्रमं रामः ससीतः पुनरागमत्॥
नन्दिग्रामे तु षष्ठ्यां वै भरतेन समागमः।
सप्तम्यामभिषिक्तोऽसावयोध्यायां रघूत्तमः॥
जानकी रामसहिता रावणस्य निवेशने।
मनुमासान् स्थिता पञ्चदशवासरसंवृतेति॥'
यत्तु सर्व्वाग्नेये अग्निचितप्रामाण्यम्। कालिकापुराणादिविरोधात्। इदं कल्पान्तरविषयमिति न युक्तम्। तद्विरोधादेव। तस्मात् क्रियाविरोधे पुराणेषु उपसंहार एव न्याय्यः। आख्यानान्तरोक्ताङ्गोपसंहारवत्। यथा कुम्भकर्णवधोऽत्र रामेणोक्तो भारते लक्ष्मणेन तादृशे विषये न तु कल्पभेदेन व्यवस्था। अन्यविषये एव तु हरिवंशोक्ता सेति बोध्यम्।"इति श्रीरामायणतीलके लङ्काकाण्डे ११० सर्गः।) तस्य परिपूर्णतमत्वं यथा,—
"सर्व्वे चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्।
परिपूर्णतमो रामो ब्रह्मशापात् खविस्मृतः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ९१६ अध्यायः॥
अथ श्रीराममन्त्राः।
"अगस्त्योऽस्याऋषिः सेन्दुर्बीजं रामाय हृच्छक्तुः।
षड्वर्णोऽयमादिष्टो भक्तानां कामदो मनुः॥"
तस्य तारकब्रह्ममन्त्रो यथा,—
"सर्व्वेषां राममन्त्राणां मन्त्रराजः षड्वर्णः।
तारकब्रह्म चेत्युक्तं तेन पूजा प्रशस्यते॥"
तन्मन्त्रश्च रां रामाय स्वाहा। इति रामार्चनचन्द्रिकायाम् ४ पटलः॥ अस्य पूजाप्रयोगः। प्रातःस्नानादि वैष्णवोक्तपीठन्यासान्तं कर्म्म विधाय ऋष्यादिन्यासं कुर्य्यात्। शिरसि ॐ ब्रह्मणे ऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि श्रीरामाय देवतायै नमः। ततः करान्यासौ। रां अङ्गुष्ठाभ्यां नमः। रीं तर्ज्जनीभ्यां स्वाहा। रूं मध्यमाभ्यां वषट्। रैं अनामिकाभ्यां हुम्। रौं कनिष्ठाभ्यां वौषट्। रः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। ततो मन्त्रन्यासः। ब्रह्मरन्ध्रे रां नमः। भ्रूमध्ये रा नमः। हृदि मा नमः। नाभौ य नमः। लिङ्गे ण नमः। पादयोर्मं नमः। ततो मूर्त्तिपञ्जरादिविधिं विधाय देवं ध्यायेत्।
"कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासिनं
मुद्रां ज्ञानमयीं दधानमपरं हस्तांबुजं जानुनि।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं सुकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं
भजे॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्। ततः पीठपूजां विधाय वैष्णवोक्तपीठशक्तीः पीठमन्त्रञ्च संपूज्य पुनर्ध्यात्वा वाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। यथा देवतामपार्श्वे श्रीं

सीतायै नमः। अग्रे ॐ शङ्खाय नमः। दक्षिणवामपार्श्वयोः ॐ शरेभ्यो नमः। ॐ चापाय नमः तद्दक्षिः केशरेषु अस्त्रादिकोणेषु मध्ये दिक्षु च रां हृदयाय नमः। इत्यादिना षड्ङ्गानि पूजयेत्। ततो दलेषु पूर्व्वादिदिक्षु ॐ हनुमते नमः। ॐ सुग्रीवाय नमः। ॐ भरताय नमः। ॐ विभीषणाय नमः। ॐ लक्ष्मणाय नमः। ॐ अङ्गदाय नमः। ॐ शत्रुघ्नाय नमः। ॐ जाम्बवते नमः। दलाग्रेषु ॐ हृदाय नमः। ॐ जयन्ताय नमः। ॐ विजयाय नमः। ॐ सुराष्ट्राय नमः। ॐ राष्ट्रवर्द्धनाय नमः। ॐ अकोपाय नमः। ॐ धर्म्मपालाय नमः। ॐ सुमन्त्राय नमः। तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्॥ * ॥ अस्य पुरश्चर्य्यं षड्लक्षजपः। तथा च।
"ऋतुलक्षं जपेन्मन्त्रं दशांशं कमलैः शुभैः।
जुहुयादर्चिते वह्नौ ब्राह्मणान् भोजयेत्ततः॥"
अयं मन्त्रः षड्विधः। तथा च।
"स्वकामशक्तिवाक्कूटलक्ष्मीताराद्याः पञ्चवर्णकः।
षड्वरः षड्विधः स्यात् चतुर्व्वर्गफलप्रदः॥
ब्रह्मा सम्मोहनः शक्तिर्देशिकाग्निरुच्यते।
अगस्त्यः ऋग्विधः प्रोक्तो मुनयोऽत्र क्रमादिमे॥
अथवा कामबीजादेर्विश्वामित्रो मुनिर्मतः।
छन्दो गायत्रीसंज्ञञ्च श्रीरामश्चैव देवता॥
ध्यानपूजादिकं सर्व्वं पूर्व्ववच्च समाचरेत्॥"
तथा।
"जानकीवल्लभं ङेऽन्तं वह्निजाया हृदादिकम्।
दशाक्षरोऽयं मन्त्रः स्याद्ग्रहिरुद्रस्तु ऋषिर्विराट्॥
छन्दस्तु देवता रामः सीतापार्श्वपरिग्रहः।
आद्यं बीजं हृदः शक्तिः कामेनाङ्गक्रिया मता॥
शिरोललाटभ्रूमध्यताबुकण्ठेषु हृदपि।
नाभ्यूरुजानुपादेषु दशवर्णान् न्यसेन्मनोः॥"*॥
ततो ध्यानम्।
"अयोध्यानगरे चित्ररत्नसौवर्णमण्डपे।
मन्दारपुष्पैरावृतविताने तोरणाञ्चिते॥
सिंहासनसमारूढं पुष्पकोपरि राघवम्।
रत्नोभिरभिदैर्दिव्यैरागतैः शुभैः॥
संस्तूयमानं मुनिभिर्मन्त्रैः परिशोभितम्।
सीतालङ्कृतवामाङ्गं लक्ष्मणेनोपशोभितम्॥
श्यामं प्रसन्नवदनं सर्व्वाभरणभूषितम्।
ध्यायन्नेवं जपेन्मन्त्रं वर्णलक्षमनन्यधीः॥"
अन्यत् सर्व्वं पूर्व्ववत्॥ * ॥
"वह्निर्नारायणीनाट्यौ जठरः केवल एव च।
द्वाक्षरो मन्त्रराजोऽयं सर्व्वाभीष्टफलप्रदः॥
श्रीमाया मन्मथैकेबीजाद्यन्तगतो मनुः।
चतुर्व्वर्गः स एव स्यात् षड्वर्णो वाञ्छितप्रदः॥
स्वाहान्तो हुं पड़न्तो वा नमोऽन्तो वा
भवेन्मनुः॥"
तथा।
"तारमायारमाकूटवाक्कवीजेषु षड्विधः।
अक्षरो मन्त्रराजः स्यात् सर्व्वाभीष्टफलप्रदः॥

द्वाचरश्चन्द्रभद्राभो चन्द्रोऽयं चतुरक्षरः।
रामाय हृन्मनुः प्रोक्तो मन्त्रः पञ्चाक्षरः परः॥
षडाद्यष्टाक्षरावर्णैः प्रत्येकपूर्वको मनुः।
लक्ष्मीवाक्मन्मथादिश्च ताराद्याः स्युर्नेकधा॥
तेन यं राम। यां राम। रत्यादि चाक्षरः।
तथा लक्ष्मीवाक्मन्मथादीनामन्यतमदानेऽपि चाक्षरः। तेन श्रीं राम। ऐं राम। क्लीं राम इति।

"वह्निस्थं शृणु विप्रोरङ्कचन्द्रविभूषितम्।
एकाक्षरो मनुः प्रोक्तो मन्त्रराजः सुरद्रुमः॥
ब्रह्मा मुनिः स्याद्गायत्री च्छन्दो रामस्तु देवता॥"॥

एकाक्षरे तु द्वादशलक्षजपः पुरश्चरणम्। तथा च। भानुलक्षं जपेन्मन्त्रं इति वचनात् अन्येषां षड्लक्षजप इति विशेषः। ध्यानपूजादिकं षड्क्षरवत्॥॥ अथ श्रीरामचन्द्रप्रयोगः।

"जातीप्रसूनैर्जुंबूयादिन्दिरावाप्तये नरः।
जातीप्रसूनैर्जुंबूयाच्चन्दनाभःसुचित्तेः॥
राजवश्याय कमलैर्धनधान्यादिसम्पदः।
नीलोत्पलानां होमेन वशयेदखिलं जगत्॥
बिल्वप्रसूनैर्जुंबूयादिन्दिरावाप्तये नरः।
दूर्वाहोमेन दीर्घायुर्भवेन्मन्त्री निरामयः॥
रक्तोत्पलहुताज्यस्त्री धनमाप्नोति वाञ्छितम्।
मेधाकामेन होतव्यं पलाशकुसुमैर्नरैः॥
तज्जप्तमन्नं प्रपिबेत् कविर्भवति वत्सरात्।
तन्मिश्रितान्नं भुञ्जीत महदारोग्यवर्द्धनम्॥"॥

अथ श्रीरामचन्द्रस्तोत्रम्।

श्रीहनूमानुवाच।

"तिरश्चामपि राजेति समवायं समीयुषाम्।
यथा सुग्रीवसख्यानां यस्तसुखं नमाम्यहम्॥
सकृदेव प्रपन्नाय विभीषणायैव यस्तु प्रियम्।
विभीषणायाश्रितटे यस्तं वीरं नमाम्यहम्॥
यो महान् पूजितो याति महाब्धेः करुणाऽऽकृतम्।
स्तुतं जटायुषा येन महाविष्णुं नमाम्यहम्॥
तैलसाध्यायिता यस्य ज्वलन्ति ज्वलनादयः।
प्रकाशते खतन्त्रो यस्तं ज्वलन्तं नमाम्यहम्॥
सर्व्वतोसुखदा येन लोकया दर्शिता रवेः।
राजसेश्वरयोगानां तं वन्दे सर्व्वतोसुखम्॥
कृपावतु प्रपन्नानां क्षिणक्ति च यथा कृतु।
क्षिंहः सर्व्वेष्वितुल्यस्तं कृपिंहं नमाम्यहम्॥
यस्याद्विभेति वाताकैज्वलनेन्द्राः सदृत्यवः।
भियं धिनोति पापानां भीषणं तं नमाम्यहम्॥
परस्य योग्यतापेक्षारहितो नित्यमङ्गलम्।
ददात्येव निजौदार्य्यादृद्यत्तं भद्रं नमाम्यहम्॥
यो हन्तुं निजदासानां मारयत्यखिलेश्वरः।
तत्रोद्यतयो वज्रो हन्युन्तुं नमाम्यहम्॥
यत्पादपद्मप्रणतो भवेदुत्तमपूरुषः।
तमीशं सर्व्वदेवानां नमनीयं नमाम्यहम्॥
आत्मभावं ससृजिप्य दास्येनैव रघूत्तमम्।
भजेऽहं प्रत्यहं रामं सखीतं सहजक्षमम्।

तिलं श्रीरामभक्तस्य किङ्करा यमकिङ्कराः।
शिवमय्यो दिशस्तस्य सिद्धयस्तस्य दासिकाः॥
इदं हनूमता प्रोक्तं मन्त्रराजात्मकं स्तवम्।
पठेदनुदिनं यस्तु स रामे भक्तिमान् भवेत्॥"
इति हनूमत्कल्पे मन्त्रराजात्मकं श्रीरामचन्द्रस्तोत्रं समाप्तम्॥॥ अथ श्रीरामचन्द्रस्याष्टोत्तरशतकं नाम।

वेदव्यास उवाच।

"शृणु शाङ्गेय वक्ष्यामि रामस्याद्भुतकर्म्मणः।
नामाष्टशतकं पुण्यं त्रिषु लोकेषु विश्रुतम्॥
नातः परतरं गुह्यं त्रिषु लोकेषु विद्यते।
कैलासशिखरे रम्ये नागारत्नविचित्रिते।
एकाग्रमनसो भूत्वा विष्णुमाराध्य भक्तितः॥
उपविश्यासनो भोक्तुं पार्व्वतीं शङ्करोऽब्रवीत्।
पार्व्वत्येहि मया सार्द्धं भोक्तुं सुखमवाप्स्यते।
तमाह पार्व्वती देवी जग्ना नाम सहस्रकम्।
ततो भोक्ष्याम्यहं देव भुज्यतां भवता प्रभो॥
ततश्चां पार्व्वतीं प्राह प्रहसन् परमेश्वरः।
धन्यासि कृतपुण्यासि विष्णुभक्तासि पार्व्वति।
दुर्लभा वैष्णवी भक्तिर्भागधेयं विनेश्वरि॥
रकारादीनि नामानि शृण्वतो मम पार्व्वति।
मनः प्रसन्नतामेति रामनामाभिगृह्णतः।
रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि।
इति रामपदेनासौ परं ब्रह्माभिधीयते॥
राम रामेति रामेति रमे रामे मनोरमे।
सहस्रनामभिस्तुल्यं रामनाम वरानने॥
रामेत्युक्ता महादेवि शुचं सार्द्धं मयाधुना।
ततो रामेति नामोक्ता सह मुक्ता च पार्व्वती॥
ततो मुक्ता महादेवी पतिना सह संस्थिता।
पप्रच्छ श्रीमहादेवं प्रीतिप्रवणमानसा॥
सहस्रनामभिस्तुल्यं रामनाम त्वयोदितम्।
तस्मान्यान्यपि नामानि सन्ति चेन्नाथवद्विधः।
कथ्यतां मम देवेश तत्र मे प्रीतिरुत्तमा॥

श्रीशङ्कर उवाच।

शृणु नामानि वक्ष्यामि रामचन्द्रस्य पार्व्वती।
लौकिका वैदिकाः ब्रह्मन् ये केचित् सन्ति पार्व्वति॥
नामानि रामचन्द्रस्य सहस्रं तेषु चाधिकम्।
तेषु चात्यन्तसुखं हि नाम्नामष्टोत्तरं शतम्।
विष्णोरेकैकनामानि सर्व्ववेदाधिकं फलम्।
तादृङ्नामसहस्रेषु रामनाम परं मतम्।
जपतः सर्व्ववेदांश्च सर्व्वमन्त्रांश्च पार्व्वति।
तस्मात् कोटिगुणं पुण्यं रामनाम्नैव लभ्यते।
अस्य श्रीरामनामाष्टोत्तरशतनामस्तोत्रस्य रुद्र ऋषिरनुष्टुप् छन्दः श्रीरामचन्द्रो देवता श्रीरामचन्द्रप्रीत्यर्थं जपे विनियोगः।
श्रीरामो रामचन्द्रश्च रामभद्रश्च शाश्वतः।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः।
जानकीवल्लभो जैत्रो जितामित्रो जनार्द्दनः।
विश्वामित्रप्रियो दान्तः शरण्यत्राणतत्परः।
वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः।
सत्यव्रतो व्रतधरः सदा हनुमदाश्रयः।

कौशलेयः खरध्वंसी विराधवधपण्डितः।
विभीषणपरित्राता दशग्रीवशिरोहरः।
सप्ततालप्रभेत्ता च हरकोदण्डखण्डनः।
जामदग्न्यमहादर्पदमनस्ताड़कान्तकः।
वेदान्तसारोऽमेयात्मा भववैद्यश्च भेषजः।
दूषणत्रिशिरस्कृन्ता-त्रिमूर्त्तित्रिगुणत्रयी।
त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्त्तनः।
त्रिलोकरक्षको धन्वी दण्डकारण्यपुण्यकृत्।
अहल्यापावनश्चैव पितृभक्तो वरप्रदः।
जितेन्द्रियो जितक्रोधो जितलोभो जगद्गुरुः।
ऋक्षवानरसंघाती चित्रकूटसमाश्रयः।
जयन्तत्राणवरदः सुमित्रापुत्रसेवितः।
सर्व्वदेवाधिदेवश्च मृतवानरजीवनः।
मायामारीचहन्ता च महाभागो महाभुजः।
सर्व्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः।
महायोगी महोदारः सुग्रीवेप्सितराज्यदः।
सर्व्वपुण्याधिकफलस्तीर्थः सर्व्वाघनाशनः।
आदिपुरुषो महापुरुषः परमः पुरुषोत्तमः।
पुण्योदयो दयासारः पुराणः पुरुषोत्तमः।
स्मितवक्त्रो मितभाषी पूर्व्वभाषी च राघवः।
अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तरः।
मायामानुषचारित्रो महादेवाभिपूजितः।
सेतुकृत् जितवारीशः सर्व्वतीर्थमयो हरिः।
श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्द्धरः।
सर्व्वयज्ञाधिपो यज्वा जरामरणवर्ज्जितः।
शिवलिङ्गप्रतिष्ठाता सर्व्वाघगणवर्ज्जितः।
परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः।
परं ज्योतिः परं धाम पराकाशः परात्परः।
परेशः पारगः पारः सर्व्ववेदात्मकः शिवः।
इत्येतद्रामभद्रस्य नाम्नामष्टोत्तरं शतम्।
गुह्याद्गुह्यतरं देवि तव प्रीत्या प्रकीर्त्तितम्॥
यः पठेत् शृणुयादापि भक्तियुक्तेन चेतसा।
स सर्व्वैर्मुच्यते पापैः कल्पकोटिसमुद्भवैः।
अज्ञानि ज्ञानतां यान्ति शत्रवो यान्ति मित्रताम्।
राजानो दासतां यान्ति वह्नयो यान्ति सौम्यताम्।
अनुकूलाश्च भूतानि श्रेयं यान्ति चला: स्त्रियः।
अनुग्रहं ग्रहा यान्ति शान्तिमायान्त्युपद्रवाः॥
पठतो भक्तिभावेन जनस्य गिरिसम्भवे।
यः पठेत् परया भक्त्या तस्य वश्यं जगत्त्रयम्॥
यद्यत् कामयते चित्ते तत्तदाप्नोति कीर्त्तनात्।
यः पठेद्रामचन्द्रस्य नाम्नामष्टोत्तरं शतम्।
अज्ञानेनापि कुर्व्वाणो न स पापैर्विलिप्यते।
पुण्यकालेषु सर्व्वेषु पठनानन्त्यमाप्नुयात्॥
सर्व्ववेदेषु तीर्थेषु दानेषु च तपःसु च।
तत्फलं कोटिगुणितं स्तवेनानेन लभ्यते॥
पुण्यकालेषु सर्व्वेषु पठन्नामशताष्टकम्।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च॥
वैकुण्ठे वासमाप्नोति दशपूर्व्वैर्दशापरैः।
रामं दूर्व्वादलश्यामं पद्माक्षं पीतवाससम्।
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः।

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥
इमं मन्त्रं महेशानि ! जपन्नेव दिवानिशम् ।
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥
इत्येतद्रामभद्रस्य माहात्म्यं वेदसम्मतम् ।
कथितं तव गाङ्गेय यत्तत्त्वं वैष्णवोत्तमः ॥
वन्दामहे महेशानं हरकोदण्डखण्डनम् ।
जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥"
इति पद्मपुराणे उमामहेश्वरसंवादे श्रीरामचन्द्राष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥ * ॥
(अस्य विराड्ऋषिर्गीतिश्छन्दः श्रीरामचन्द्रो देवता श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः । ॐ श्रीरो मे राघवः पातु भालं दशरथात्मजः । कौशल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती । घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः । जिह्वां विद्यानिधिः पातु कण्ठौ भरतवन्दितः । स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः । करौ सीतापतिः पातु हृदयं जामदग्न्यजित् । मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः । सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्प्रभुः । ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् । जानुनौ सेतुकृत् पातु जङ्घे दशमुखान्तकः । पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः । एतां रामबलोपेतां रक्षां यः सुकृती पठेत् । स चिरायुः सुखी पुत्री विजयी विनयी भवेत् । पाताळभूतलव्योमचारिच्छद्मचारिणः । न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥ रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् । नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ॥ अमङ्गलैकमूलेन रामनाम्नाभिरक्षितम् । यः करे धारयेत्तस्य करस्थाः सर्वसिद्धयः ॥ भूर्जपत्रे लिखां विद्यां गन्धचन्दनचर्चिताम् । धृत्वा वै धारयेद्यस्तु सोऽभीष्टं फलमाप्नुयात् ॥ रणे राजकुले द्यूते निद्यं तस्य जयो भवेत् । कारागता च वा नारी सुतापत्या च या भवेत् ॥ वन्ध्यापत्या जीववत्सा सा भवेन्नात्र संशयः ॥ वज्रपञ्जरनामेदं यो रामकवचं पठेत् । अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम् ॥ आदिष्टवान् यथा स्वप्ने रामरक्षामिमां हरिः । तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः ॥ धन्विनौ बद्धनिस्त्रिंशौ काकपक्षधरौ शुभौ । वीरौ मां पथि रक्षेतां तावुभौ रामलक्ष्मणौ ॥ तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ । पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ । पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥ शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् । रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥
आत्तसज्यधनुषाविषुस्पृशा-
वक्षयाशुगनिषङ्गसङ्गिनौ ।
रक्षणाय मम रामलक्ष्मणा-
वग्रतः पथि सदैव गच्छताम् ॥
सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन्मनोरथान्नश्च रामः पातु सलक्ष्मणः ॥
अग्रतस्तु वृषभो मे दृढव्रतः ।
पार्श्वयोस्तु धनुष्पाणी शुभौ रामलक्ष्मणौ ॥
रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थः पुरुषः पूर्णः कौशल्येयो रघूत्तमः ॥
वेदान्तवेद्यो यज्ञेशः पुराणः पुरुषोत्तमः ।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥
आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥
दक्षिणे लक्ष्मणो यस्य वामतो जानकी शुभा ।
पुरतो मारुतिर्यस्य तं नमामि रघूत्तमम् ॥
एतानि मम नामानि मङ्गलानि सदा स्मरेत् ।
तस्य मेधायुतं पुण्यं न प्राप्नोति न संशयः ॥"
इति पद्मपुराणे वज्रपञ्जरनामाख्यं श्रीरामकवचम् । इति तन्त्रसारः ॥

रामकरी, स्त्री, रामकली रागिणी । इति हलायुधः । (क्वचित् रामकिरीत्यपि पाठः । यथा, सङ्गीतदर्पणे रागाध्याये ।

अथ रामकिरी ।

"षड्जग्रहांशकन्यासा पूर्वा रामकिरी मता ।
मूर्च्छना प्रथमा श्रेया कल्पे सा प्रयुज्यते ॥
रिधवक्रतायवा प्रोक्ता केचित् पञ्चमवर्जिता ।
त्रिविधा सा समुद्दिष्टा सम्पूर्णा षाड़वौड़वा ॥"
अस्या ध्यानम् ।
"हेमप्रभा भास्वरभूषणा च
गौरं विलोलं वपुषा वहन्ती ।
कान्ते समीपे कमनीयकण्ठा
मालोन्नता रामकिरी मतेयम् ॥"
उदाहरणम् ।
स रि ग म प ध नि स । सम्पूर्णा ।
अथवा
स ग म प नि स । औड़वा ।

अथवा
स रि ग म ध नि स। साढ़वा।
इति रामकिरी।)
अस्य अन्यत् विवरणं रागग्रन्थे द्रष्टव्यम्।

रामकर्पूरकः, पुं, (रामो रमणीयः कर्पूरः। ततः स्वार्थे संज्ञायां वा कन्।) स्वामख्यात-द्रव्यम्। यथा,—
"सौगन्धिकञ्च सौगन्धं रामकर्पूरके द्वये।"
इति ग्रन्थरत्नावली।

रामगिरिः, पुं, (रामाश्रितो गिरिः। रामो रमणीयो गिरिर्वा।) पर्व्वतविशेषः। चित्र-कूटपर्व्वतः। इति कश्चित्। यथा,—
"कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तं गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु।"
इति मेघदूतः।१।

रामचन्द्रः, पुं, (रामश्चन्द्र इवाह्लादकत्वात्।) श्रीरामः। इति ग्रन्थरत्नावली। (लक्ष्मण-भ्रातृसुतः स्वनामख्यातः कविविशेषः। स तु अयोध्यानगरे वैराग्यशृङ्गारार्थद्वयोपेतं सटीकं रसिकरञ्जनं नाम काव्यं प्रणीतवान्। तस्यादि-मश्लोको यथा,—
"शृङ्गारवैराग्यशृतं सपद्य-
विन्यासयोध्यानगरे वधत्ते।
अब्दे वियद्वारणबाणचन्द्रे
श्रीरामचन्द्रोऽनु च तस्य टीकाम्॥
श्रीरामचन्द्रकविना काव्यमिदं वरचि विरति-बीजतया।
रसिकानामपि रतये शृङ्गारार्थोऽपि संग्रहीतोऽत्र॥"
एतत्कविप्रणीतानि रोमावलीशृतकप्रभृतीन्य-न्यान्यपि काव्यानि द्रष्टव्यानि।)

रामच्छद्मकः, पुं, (रामं मनोज्ञत्वं छद्मयति। छद्म+ण्युः। स्वार्थे कन्।) मदनवृक्षः। इति भावप्रकाशः॥ क्वचित् पुस्तके रामाच्छदनकः इति च पाठः॥ (गुणाश्चास्य मदनग्रन्थे विज्ञेयाः।)

रामजननी, स्त्री, (रामस्य जननी।) बलदेव-माता। यथा,—
"रोहिणी रामजननी रोहिणिश्च बलप्रसूः॥"
इति ग्रन्थरत्नावली॥
कौशल्या। रेणुका च॥

रामठं, क्ली, (रम्यतेऽनेनेति। रम+"रमेर्ठक्च।" उणा० १।१०१। इति अठः ठक्च धातोः।) हिङ्गु। इत्यमरः। १।१०२॥ (यथा, सुश्रुते। १।१।
"तत्र नखाङ्गने कुष्ठं रामठं नलदं मधु।
कुर्य्यात् शिरीषरजनीचन्दनैश्च प्रलेपनम्॥")

रामठः, पुं, (रम्+अठः। ठक्च।) अङ्गोट-वृक्षः। इति रत्नमाला॥ (जनपदविशेषः। यथा, बृहत्संहितायाम्। १०।५।
"रौद्रस्थे पारतरामठतैलिकरजबचौराश्च॥"
तद्देशवासिनश्च। यथा, महाभारते।२।३२।१२।
"रामठान् हारहूणांश्च प्रतीच्यांश्चैव ये नृपाः।
तान् सर्व्वान् सव्यसाची चक्रे ग्रासनदेव पार्थिवः॥")

रामठी, स्त्री, (रामठ+स्त्रियां ङीष्।) वाढ़ी-हिङ्गु। इति राजनिर्घण्टः॥

रामठः, पुं, गिरिनिम्बः। तिन्दुकः। इति राज-निर्घण्टः॥

रामणीयकं, क्लि, रमणीयम्। इत्यमरटीका॥ (यथा, महाभारते। १।२६।८।
"रामणीयकमागच्छन्नाचा सह भुजङ्गमाः॥"
रामणीयकं रमणीयं द्वीपमिति शेषः॥
क्ली, रमणीयस्य भावः कर्म्म वा। रमणीय+ "शोषधादृगुरूपोत्तमाद्युञ्।" ५।१।१३२। इति युञ्। रमणीयत्वम्॥ यथा, किरातेः। १।३६।
"पुरोपनीतं नृप! रामणीयकं
द्विजातिशेषेण यदेतदन्वसा।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः॥")

रामतरुणी, स्त्री, (रामा मनोहरा तरुणीव।) तरुणीपुष्पम्। इति राजनिर्घण्टः॥ सेउती इति भाषा॥

रामदूतः, पुं, (रामस्य दूतः।) हनूमान्। इति ग्रन्थरत्नावली॥

रामदूती, स्त्री, (रामस्य दूतीव। विष्णुप्रियत्वात्।) तुलसीविशेषः। तत्पर्य्यायः। पर्व्वपुष्पी २ विष्णुप्रिया ३ नागदन्तिका ४ काष्ठली ५ क्षुद्र-पर्णी ६ भरण्याह्वा ७ पक्षिणभक्षा ८। इति शब्दचन्द्रिका॥

रामनवमी, स्त्री, (रामस्य जन्मतिथिरूपा नवमी। मध्यपदलोपिकर्म्मधारयः।) चैत्रशुक्लनवमी। सा च श्रीरामचन्द्रस्य जन्मतिथिः। यथा,—
"अगस्त्यसंहितायाम्।
'चैत्रे मासि नवम्यान्तु जातो रामः स्वयं हरिः।
पुनर्व्वसूदयसंयुक्ता सा तिथिः सर्व्वकामदा।
पुनर्व्वसूदयसंयोगः स्वल्पोऽपि यदि लभ्यते।
चैत्रशुक्लनवम्यान्तु सा तिथिः सर्व्वकामदा।
श्रीरामनवमी प्रोक्ता कोटिसूर्य्यग्रहाधिका।
तस्मिन् दिने महापुण्ये रामसुद्दिश्य भक्तितः।
यत्किञ्चित् क्रियते कर्म्म तद्भवत्यक्षयकारकम्।
उपोषितं जागरणं पितॄनुद्दिश्य तर्पणम्।
तस्मिन् दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः।'
चैत्रपदं चान्द्रपरम्।
'मेषं पूषणि संप्राप्ते सप्ते च कर्कटोदये।
आविरासीत् सकलया कौशल्यायां परः पुमान्।'
अत्र मेषसप्तस्थे चान्द्रचैत्रस्यैव सम्भवात् तिथि-शब्दलाभाच्च। तथा।
'तस्मिन् दिने महापुण्ये रामसुद्दिश्य भक्तितः।
जपेद्धेकान्त आसीनो यावत् स्याद्दृग्मीदिनम्।
तेनैव स्यात् पुरश्चर्य्या दृग्म्यां भोजयेद्दृजान्।
भक्ष्यभोज्यैर्बहुविधैर्भक्त्या दद्याच्च दक्षिणाम्।
श्रुतश्रुत्यो भवेत्तेन सद्यो रामः प्रसीदति॥'
तथा।
'चैत्रशुक्ला तु नवमी पुनर्व्वसुयुता यदि।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत्॥
नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः।
उपोष्यं नवम्यान्तु दृग्म्यामेव पारणम्॥'
एतद्वचनद्वयं कालमाधवीयेऽपि। किन्तु मह-पुण्या इत्यत्र महापवेति पाठः। शुद्धेति-श्रवणात् सर्व्वत्र शुद्धायामष्टम्यादरो न विद्धायाम-मिति। अतएवाष्टमीविद्धा नवमी सनक्षत्रापि नोपोष्या। इति माधवाचार्य्यः। सैव तादृश्येव तु विद्धा। यदा तु परदिने एकादश्यां दृग्मी पारण्ययोग्या तदा दृग्मीयुक्ता नवम्युपोष्या। वैष्णवैर्विष्णुपरायणैरितिश्रवणात्। अवैष्णवैस्तु अष्टमीविद्धैव ग्राह्या। यदा तु पूर्व्वदिने अष्टमी-विद्धा नवमी परत्र दृग्मीयुता नवमी एका-दश्यादिने च न पारण्ययोग्या दृग्मी तदा नक्षत्रयोगायोगेऽप्यष्टमीविद्धैव ग्राह्या। परदिने दृग्म्यामेव पारणमिति नियमात्। तथा च रामार्चनचन्द्रिकायाम्।
'दृग्म्यादिषु वृद्धित्वेत् त्याज्या विद्धैव वैष्णवैः।
सदन्येषान्तु सर्व्वेषां व्रतं तत्रैव निश्चितम्।
दृग्म्यामेवाग्रहेण दृग्मीं नैव लङ्घयेत्।
निश्चित्यैवं विचारेण नवमीव्रतमाचरेत्॥'
इति कारिकाभ्यामगस्त्यसंहिताव्याख्यानम्। वस्तुतस्तु दृग्मीपारण्यसत्त्वे सर्व्वैरेवाष्टमीविद्धा नोपोष्या। विष्णुपरायणैरिति तु विष्णुपरायण-त्वेन भवितव्यमित्युपदेशपरं न तु कर्त्तृविशे-षणम्। अगस्त्यैरवैष्णवस्य विद्धोपवासानुप-देशात्। कर्त्तृभेदे विधिद्वयकल्पनापत्तेश्च। अत-एव माधवाचार्य्येण सामान्यत एव विद्धा निषिद्धा। अगस्त्यसंहितायामस्य निन्दाभाह।
'प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः।
उपोषितं न कुरुते कुम्भीपाकेषु पच्यते।
यस्तु रामनवम्यान्तु भुङ्क्ते मोहादविमूढधीः।
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः॥'
अत्र मद्ये इत्युपादानात् नरमात्रस्याधिकारः। एवञ्च।
'कुर्य्याद्रामनवम्यां य उपोषणमतन्द्रितः।
मातुर्गर्भमवाप्नोति नैव रामो भवेत् स्वयम्॥
तस्मात् सर्व्वात्मना सर्व्वैः कर्त्तव्यं नवमीव्रतम्।
सुप्यन्ते पातकैः सर्व्वैर्यान्ति ब्रह्म सनातनम्॥'
इति पञ्चकीर्त्तनं प्रायुक्तसंयोगगृह्यकल्पन्यायात् सिद्धम्। अगस्त्यसंहितायाम्।
'ग्रामयामग्रिकायाञ्च तुलसीदलकल्पिता।
पूजा श्रीरामचन्द्रस्य कोटिकोटिगुणाधिका॥'

तत्रानुष्ठानं अगस्त्यसंहितातः संक्षिप्य लिख्यते। स्नातप्रातःस्नानादिः।
उपोष्य नवमीन्तद्य यामेष्वष्टसु राघव।
तेन प्रीतो भव त्वंभो संसारान्नाहि मां हरे।'
इति निवेद्य।
'कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभम्।
दक्षिणांशे दशरथं पुत्रावेक्षणतत्परम्।
पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभम्।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ।
अग्रे वायुं हनूमन्तं रामानुग्रहकाङ्क्षिणम्।'
एवं ध्यात्वा श्रीरामं पूजयेत्। स्नानमन्त्रस्तु।
'इन्द्रोऽग्निश्च यमश्चैव नैर्ऋतो वरुणोऽनिलः।
कुबेर ईशो ब्रह्मादिर्दिक्पालाः स्नापयन्तु ते।'
अहिरनन्तः। कौशल्यां पूजयेत्। मन्त्रस्तु।
'रामस्य जननी चासि राममयमिदं जगत्।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते।'
तथा।
'नमो दशरथायेति पूजयेत् पितरं ततः।
ततोऽनुज्ञाप्य देवेशं परिवारान् समर्चयेत्।
पूर्वषट्कोणकोणेषु हृदयादीनि च क्रमात्।'
हृदयादीनि यथा। रां हृदयाय नमः। रीं शिरसे स्वाहा। रूं शिखायै वषट्। रैं कवचाय हुम्। रौं नेत्राभ्यां वौषट्। रः अस्त्राय फट्। तथा,—
'हनूमन्तं सुग्रीवं भरतं सविभीषणम्।
लक्ष्मणाङ्गदशत्रुघ्नं जाम्बवन्तं दलादिषु।
धूम्रं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम्।
अशोकं धूम्रपाक्षाख्यं सुमन्त्रं दलमध्यतः।
दलाग्रे लोकपालांश्च तदस्त्राणि तदग्रतः।'
लोकपाला इन्द्रादयो दश्र। तदस्त्राणि वज्रशक्तिदण्डखड्गपाशाङ्कुशगदाशूलपद्मचक्राणि।
मध्याह्ने जन्म भावयेत्।
'उच्चस्थे ग्रहपक्षके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुदिने मेषं गते पूषणि।
निर्दग्धुं निखिलाः पलाशसमिधो मध्याद-
योध्यारये-
राविर्भूतमभूदपूर्वविभवं यत्किञ्चिदेकं महः।'
पलाशा राक्षसाः।
'मन्त्रेवं वादयेद्वाद्यानर्घ्यं दद्याज्जगत्पतेः।
कलपुष्पानुसंपूर्णं गृहीत्वा शुद्धसत्तमम्।
अशोकरक्तकुसुमैर्युक्तं तुलसीदलैः।'
मन्त्रस्तु।
'दशाननवधार्थाय धर्मसंस्थापनाय च।
दानवानां विनाशाय देवानां निधनाय च।
परित्राणाय साधूनां रामो जातः स्वयं हरिः।
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितो मम।
पुष्पाञ्जलिं पुनर्दत्त्वा यामे यामेष्वतन्द्रितः।
पूजयेद्विधिवद्भक्त्या दिवारात्रं नयेद्बुधः।'
तदयं संक्षेपः। शुद्धायां नवमीयुक्तायां विवादाभावः। विद्धायान्तु एकादश्यादिने दशमौ पारण्ययोग्या न चेत् तदा नवमीयोगायोगेऽपि अष्टमीविद्धायाम्। पारण्ययोग्या चेत् तदा अष्टमीविद्धां त्यक्त्वा परेऽहनि उपवासः।" इति तिथ्यादितत्त्वम्।

रामपूगः, पुं, (रामो रमणीयः पूगः।) गुवाकविशेषः। तत्पर्य्यायः। कामीनः २ सुनिपूगः ३ सुरेवटः ४। इति चिकाण्डशेषः।

रामबाणः, पुं, (रामस्य बाण इव सफलत्वात्।) औषधविशेषः। यथा। रसेन्द्रचिन्तामणौ।
"पारदान्ततलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितम्।
तत्र जातिफलमर्द्धभागिकं
तिन्तिलीफलरसेन मर्दितम्।
वह्निमान्द्यदशुवक्त्रनाशनो
रामबाण इति विश्रुतो रसः।
संग्रहग्रहणीकुम्भकर्णैक-
मामवातखरदूषणं जयेत्॥
दीयते तु चणकानुमानतः
सद्य एव जठराग्निदीपनः।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः।"
पाराभागः १ विषभागः १ लवङ्गभागः १ गन्धकभागः १ मरिचभागः८ जायफलभागः२। रामबाणो रसोऽजोर्णे। इति भावप्रकाशः॥ (शरट्टभेदः। इति राजनिर्घण्टः॥ रामशरट्ट।)

रामभद्रः, पुं, (राम एव भद्रो मङ्गलजनकत्वात्।) श्रीरामः। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ३४। २३६।
"लोकश्च सर्व्वदा रक्षस्तत्प्रवादेन किं पुरा।
रामभद्रेण शुद्धापि त्यक्ता देवी न जानकी॥")

रामलक्ष्मं, क्ली, (रामं रमणीयं लक्ष्म।) श्यामरिलक्ष्म। तत्पर्य्यायः। रोमकम् २ पाषाणाकरसम्भवम् ३। इति रत्नमाला॥

रामवल्लभं, क्ली, (रामं रमणीयं वल्लभत्वात्।) त्रपुम्। इति राजनिर्घण्टः॥ (रामस्य वल्लभम्।) रामप्रिये, त्रि॥

रामवीणा, स्त्री, (रामा रमणीया वीणा।) वीणाविशेषः। यथा, शब्दरत्नावली॥
"कुची च कच्छपीवीणा वीणा तुम्बुरुनारदी।
सारस्वती केलिकला रामवीणा बलाचिता॥"

रामशरः, पुं, (रामस्य शर इव।) शरट्टभेदः। तत्पर्य्यायः। रामकाण्डः २ रामबाणः ३ रामेषुः ४ अपर्व्वदण्डः ५ दीर्घः ६ नृपप्रियः ७। तस्य गुणगुणाः। ईषदुष्णत्वम्। वह्निप्रदत्वम्। रसे अम्लत्वम्। कषायत्वम्। पित्तकारित्वम्। कफवातनाशित्वञ्च। इति राजनिर्घण्टः॥ (रामचन्द्रस्य बाणोऽपि।)

रामशैवला, स्त्री, आरामशैवला। इति राजनिर्घण्टः॥

रामसखः, पुं, (रामस्य सखा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) सुग्रीवः। इति शब्दरत्नावली॥

रामसेनकः, पुं, भूनिम्बः। (अस्य पर्य्यायो यथा,—
"किरातितिक्तः कैरातः कटुतिक्तः किरातकः।
काण्डतिक्तो नार्य्यतिक्तो भूनिम्बो रामसेनकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
कटफलः। इति राजनिर्घण्टः॥

रामा, स्त्री, (रमते रमयतीति वा। रम+ण्वुलादित्वात् ण्वुः। टाप्। रमतेऽनयेति। करणे घञ् वा।) उत्तरस्त्रीविशेषः। इत्यमरः। २। ६। ४॥ गीतकलाभी रमते रामा। इति भरतः॥ (यथा, भागवते। ३। २३। ४३।
"विभज्य नवधात्मानं मानवीं सुरतोत्सुकाम्।
रामां निरमयन् रेमे वर्षपूगान् सुरैर्वृतः॥")
योषा। (यथा, रघुः। ५। ४६।
"स च्छिन्नवत्मद्वतयुग्यसूत्यं
भयाच्चयर्य्यन्तरथं त्वरेण।
रामापरिष्वाविहस्तयोधं
सेनानिवेशं तुमुलं चकार॥")
हिङ्गु। नदी। इति मेदिनी॥ हिङ्गुलम्। इति शब्दरत्नावली॥ श्वेतकण्टकारी। गृहकन्या। आरामशैवला। अशोकः। गोरोचना। इति राजनिर्घण्टः॥ वाला। गैरिकम्। इति शब्दचन्द्रिका॥

रामायणं, क्ली, (रामस्य चरितान्वितं अयनं ग्रन्थम्।) रामेण रावणवधकाव्यम्। इति त्रिकाण्डशेषः॥ तच्च शतकोटिसंख्यकम्। यथा। स्कान्दे पातालखण्डे अयोध्यामाहात्म्ये तत्रत्यतीर्थाश्रमवर्णनप्रस्तावे।
"आपोक्षा हृदि सन्तप्तं प्रायश्चित्तमकल्मषम्।
प्रोवाच वचनं ब्रह्मा तत्रागत्य सुसंवृतः॥
न निषादः स वै रामो नृगयाचरणं गतः।
तस्य संवर्णनेनैव सुशोक्षयं भविष्यति॥
इत्युक्त्वा तं जगामाशु ब्रह्मलोकं सनातनः।
ततः संवर्णयामास राघवं शतकोटिभिः॥"
कोटिभिः शतकोटिभिः। चरितं रघुनाथस्य शतकोटिप्रविस्तरमित्यन्यत्रोक्तेः। तच्च संपूर्णं ब्रह्मलोके इत्येतिल्लभ्यम्। इह तु कुशलवोपदिष्टं चतुर्विंशतिसाहस्रीश्लोकम्। इति रामायणटीकायां नागोजीभट्टः॥ *॥ तथा हि।
"प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवान् ऋषिः।
चकार चरितं कृत्स्नं विचित्रपदमर्थवत्॥
चतुर्विंशत्सहस्राणि श्लोकानामुक्तवान् ऋषिः।
तथा सर्गशतान् पञ्च षट् काण्डानि तथोत्तरम्॥
इति रामायणे वाल्मीकीये बालकाण्डे १ सर्गः॥
संक्षिप्तरामचरितं यथा,—
"रामायणमथो वक्ष्ये श्रुतं पापविनाशनम्।
विष्णुनाभ्यब्जजो ब्रह्मा मरीचिस्तत्सुतः स्मृतः॥
मरीचेः कश्यपस्तस्मात् परस्तस्मात् मनुः सुतः।
मनोरिक्ष्वाकुवंश्योऽभूदंशे राजा रघुः स्मृतः॥
रघोरजस्ततो जातो राजा दशरथो बली।
तस्य पुत्रास्तु चत्वारो महावीर्यपराक्रमाः॥
कौशल्यायामभूद्रामो भरतः कैकयीसुतः।
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रायां बभूवतुः॥

रामो भक्तः पितुर्मातुर्विश्वामित्रादवाप्तवान् ।
अस्त्रग्रामं यतो यज्ञे ताडकां प्रजघान ह ॥
विश्वामित्रस्य यज्ञे तु सुबाहुं व्यधीद्बली ।
जनकस्य क्रतु गत्वा उपयेमेऽथ जानकीम् ॥
उर्मिलां लक्ष्मणो वीरो भरतो माण्डवीं सुताम् ।
शत्रुघ्नो वै कीर्तिमतीं कुशध्वजसुते च ते ॥
पित्रादिभिरयोध्यायां गत्वा रामादयः स्थिताः ।
युधाजितं मातुलच्च शत्रुघ्नभरतौ गतौ ॥
गतयोर्नृपवर्य्येण राज्यं दातुं समुद्यतम् ।
रामाय ज्येष्ठपुत्राय कैकेय्या प्रार्थितं तदा ।
चतुर्दशसमा वासो वने रामस्य वाञ्छितः ॥
रामः पितृहितार्थन्तु लक्ष्मणेन च सीतया ।
राज्यच्च त्यक्तवत्यत्वा भ्रातृवैरपुरं गतः ।
रथं त्यक्त्वा प्रयागच्च चित्रकूटं गिरिं गतः ॥
रामस्य तु वियोगेन राजा स्वर्गं समाश्रितः ।
संस्कृत्य भरतश्चागात् रामं माहबलान्वितः ॥
अयोध्यान्तु समागत्य राज्यं कुरु महामते ।
स नैच्छत् पादुके दत्वा राज्याय भरताय तु ॥
विसर्ज्जितोऽथ भरतो रामराज्यमपालयत् ।
नन्दिग्रामे स्थितो भक्तो ह्ययोध्यां नाविशद्गृहम् ॥
रामोऽपि चित्रकूटाच्च अत्रेराश्रममाययौ ।
नत्वा अभीक्ष्णं नागत्यं दण्डकारण्यमागतः ॥
तत्र शूर्पनखा नाम राक्षसीसार्द्धमागता ।
निकृत्य कर्णौ नासे च रामेणाथ पराहिता ॥
तत्प्रेरितः खरश्चागाद्दूषणस्त्रिशिरास्तथा ।
चतुर्दशसहस्रेण रक्षसान्तु बलेन च ।
रामोऽपि प्रेषयामास बाणैर्यमपुरञ्च तान् ।
राक्षस्या प्रेरितोऽभ्यागात् रावणो हरणाय हि ।
मृगरूपं स मारीचं कृत्वाऽथेच्छ चिदक्षधृक् ।
सीतया प्रेरितो रामो मारीचं प्रजघान ह ।
म्रियमाणः स च प्राह हा सीते लक्ष्मणेति च ।
सीतोक्तो लक्ष्मणोऽथागाद्रामस्याशु ददर्श तम् ।
उवाच राक्षसी माया नूनं सीता हृतेति सा ।
रावणोऽन्तरमासाद्य अङ्कादाय जानकीम् ।
जटायुषं विनिर्जित्य ययौ लङ्कां ततो बली ।
अशोकवृक्षच्छायायां रक्षितां तामधारयत् ।
आगत्य रामः शून्यञ्च पर्णशालां ददर्श ह ।
शोकं कृत्वाथ जानक्या मार्गणं कृतवान् प्रभुः ।
जटायुषञ्च संस्कृत्य तदुक्तो दक्षिणां दिशम् ।
गत्वा सख्यं ततश्चक्रे सुग्रीवेण च राघवः ॥
सप्ततालान् विनिर्भिद्य शरेणानतपर्व्वणा ।
वालिनञ्च विनिर्भिद्य किष्किन्धायां हरीश्वरम् ।
सुग्रीवं कृतवान् रामो ऋष्यमूके स्वयं स्थितः ।
सुग्रीवः प्रेषयामास वानरान् पर्व्वतोपमान् ।
सीताया मार्गणं कर्त्तुं पूर्व्वाद्यैः समहाबलान् ।
प्रतीचीमुत्तरां प्राचीं दिशं गत्वा समागताः ।
दक्षिणान्तु दिशं ये च मार्गयन्तोऽथ जानकीम् ।
वनानि पर्व्वतान् द्वीपान् नदीनां पुलिनानि च ।
जानकीं ते ह्यपश्यन्तो मरणे कृतनिश्चयाः ।
सम्पातिवचनात् ज्ञात्वा हनूमान् कपिकुञ्जरः ।
शतयोजनविस्तीर्णं पुप्लुवे मकरालयम् ।
अपश्यज्जानकीं तत्र अशोकवनिकास्थिताम् ।
भर्त्सितां राक्षसीभिश्च रावणेन च रक्षसा ।
भव भार्य्येति वदता चिन्तयन्तीञ्च राघवम् ।
अङ्गुलीयं कपिर्दत्त्वा सीतां कौशल्यमब्रवीत् ।
रामस्य तस्य दूतोऽहं शोकं मा कुरु मैथिलि ।
अभिज्ञानञ्च मे देहि येन रामः स्मरिष्यति ।
ततः श्रुत्वा प्रददौ सीता वेणी रत्नं हनूमते ॥
यथा रामो नयेत् शीघ्रं तथा वाच्यं त्वया गते ।
तथेत्युक्त्वा तु हनुमान् वनं दिव्यं बभञ्ज तत् ॥
हत्वाक्षं राक्षसांश्चान्यान् बन्धनं स्वयमागतः ।
सर्व्वैरिन्द्रजितो बाणैर्द्दृष्ट्वा रावणमब्रवीत् ॥
रामदूतोऽस्मि हनुमान् देहि रामाय मैथिलीम् ।
एतत् श्रुत्वा प्रकुपितो दीपयामास पुच्छकम् ॥
कपिर्ज्वलितलाङ्गूलो लङ्कागेहे महाबलः ।
दग्ध्वा लङ्कां समायातो रामपार्श्वं स वानरः ।
जग्धा फलं मधुवने हत्वा सीतेत्यवेदयत् ।
मणिरत्नञ्च रामाय रामो लङ्कां ययौ पुरीम् ॥
ससुग्रीवः सहनुमानङ्गदाद्यः सलक्ष्मणः ।
विभीषणोऽपि संप्राप्तः शरणं राघवं प्रति ॥
लङ्केश्वर्य्येऽभ्यषिञ्चद्रामस्तं रावणानुजम् ।
रामो नलेन सेतुञ्च कृत्वाब्धौ घोष्कृतायतम् ॥
सुवेलावस्थितश्चैव पुरीं लङ्कां ददर्श ह ।
अथ ते वानरा वीरा नीलाङ्गदनलादयः ॥
धूम्रधूम्राक्षधूम्रेन्द्रा जाम्बवत्प्रमुखास्तदा ।
मैन्दद्विविदसुखास्ते पुरीं लङ्कां बभञ्जिरे ॥
राक्षसांश्च महाकायान् कालाञ्जनचयोपमान् ।
रामः सलक्ष्मणो हत्वा सकपिः सर्व्वराक्षसान् ।
विद्युज्जिह्वञ्च धूम्राक्षं वेदान्तकनरान्तकौ ।
महोदरमहापार्श्वावतिकायं महाबलम् ॥
कुम्भं निकुम्भं मत्तञ्च मकराक्षं शुकस्यनम् ।
प्रहस्तं वीरसुम्भञ्च कुम्भकर्णं महाबलम् ॥
रावणिं लक्ष्मणश्छित्त्वा हत्वाद्यो राघवो बली ।
निकृत्य बाहू वक्षाणि रावणन्तु व्यपातयत् ॥
सीतां शुद्धां गृहीत्वाथ विमाने पुष्पके स्थितः ।
सवानरः समायातो ह्ययोध्याप्रवरं पुरम् ॥
तत्र राज्यं चकाराथ पुत्रवत् पालयन् प्रजाः ।
दशाश्वमेधानाहृत्य गयाशिरसि पातनम् ॥
पिण्डानां विधिवत् कृत्वा दत्त्वा दानानि राघवः ।
पुत्रौ कुशलवौ दृष्ट्वा तौ च राज्येऽभ्यषेचयत् ॥
एकादशसहस्राणि रामो राज्यमकारयत् ।
शत्रुघ्नो लवणं हत्वा शूलेषं भरतः स्थितः ॥
अगस्त्यादीन् मुनीन् श्रुत्वा श्रुत्वोत्पत्तिञ्च रक्षसाम् ।
स्वर्गं गतो जनैः सार्द्धमयोध्यां वैष्णवात्मकः ॥"

इति गारुडे १४८ अध्यायः ॥ ॥

एतदतिरिक्तं वाल्मीकिप्रणीतं सप्तविंशतिसर्गयुक्तं सहस्रश्लोकात्मकं सीताकर्षणसहस्रकन्धरावधवधकाण्डरूपादद्भुतोत्तरकाण्डमस्ति। तस्य प्रथमसर्गेऽष्टश्लोका यथा,—

"तमसातीरनिलयं सर्व्वेषां तपसां गुरुम् ।
वचसां प्रथमं स्थानं वाल्मीकिं मुनिपुङ्गवम् ॥
विनयावनतो भूत्वा भारद्वाजो महामुनिः ।
पप्रच्छ समितः शिष्यः कृताञ्जलिपुटो वशी ॥
रामायणमितिख्यातं शतकोटि प्रविस्तरम् ।
प्रणीतं भवता यच्च ब्रह्मलोके प्रतिष्ठितम् ॥
श्रूयते ब्रह्मणा नित्यमृषिभिः पितृभिः सुरैः ।
षड्विंशतिसाहस्रं रामायणमिदं भुवि ।
तदाकर्णितमस्माभिः सावधानं महामुने ॥
शतकोटिप्रविस्तारे रामायणमहार्णवे ।
किं गीतमिह यन्नास्ति तन्मे कथय सुव्रत ॥
आकर्ण्यादरिणः पृष्टं भरद्वाजस्य वै मुनिः ।
हस्तामलकवत् सर्व्वं संस्मार शतकोटिकम् ॥
ओमित्युक्त्वा मुनिः शिष्यं प्रोवाच वदतां वरः ।
भारद्वाज चिरं जीव साधु स्मारितमद्य नः ॥
शतकोटिप्रविस्तारे रामायणमहार्णवे ।
रामस्य चरितं सर्व्वमाख्यं सम्यगीरितम् ॥
षड्विंशतिसाहस्रं भूलोके यत् प्रतिष्ठितम् ।
मृषा हि सहस्रं रामचरितं वर्णितं मया ।
सीतामाहात्म्यसारं यत् विशेषादत्र गोप्तवान् ।
ब्रह्मण्यावहितो ब्रह्मन् काकुत्स्थचरितं महत् ।
सीताया मूलभूतायाः प्रकृतेश्चरितञ्च यत् ॥"

इत्यादार्षे रामायणे वाल्मीकीये आदिकाव्ये आदिकाव्ये प्रथमः सर्गः॥ ॥अन्यत् ब्रह्माण्डपुराणीयोत्तरखण्डान्तर्गतेकषष्टितमाध्यायादिकरपार्व्वती-संवादरूपाध्यात्म-रामायणमस्ति । तत्र अध्यात्मबालकाण्डे सर्गाः सप्तैव ग्रन्थगोहिताः षट्त्रिंशत्सहस्रश्लोकाः मोक्षप्रदा नृणाम् १। अध्यात्मरामचरिते अयोध्याकाण्डे नवानां सर्गाणां सप्तशतानि श्लोकाः पुण्यमोक्षप्रदाः २। काण्डेऽरण्येऽध्यात्माख्ये सर्गा द्विपञ्च परिविज्ञाः पञ्चशतानि श्लोकाः पापहराः पार्व्वतीश्लोक्ताः ३। श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्धाकाण्डे नवमः सर्गः पञ्चशतानि श्लोकाः दुरितहरा पञ्चपञ्चाशत् ४। सुन्दरकाण्डे सर्गाः पञ्चैवाध्यात्मिकग्रन्थिते प्रोक्ताश्चौत्रि शतानि श्लोकाश्चिभुवनपापहराः ५। काण्डे युद्धात्मके सर्गा नवसप्त नवैव कथिताः सार्द्धकादशशतश्लोका मनुसंख्यायुताः पुण्याः ६। अध्यात्मोत्तरकाण्डे सर्गाः यट्संख्या प्रविज्ञा ऋतुशतसंख्यश्लोकाः ७। पुराणसंख्याच पुरा हरेणोक्ताः ।

"पार्व्वत्यै परमेश्वरेण गदिते ह्यध्यात्मरामायणे काण्डैः सप्तभिरन्वितेऽतिशुभदे सर्गाश्चतुःषष्टिकाः ।
श्लोकानान्तु शतद्वयेन सहिता युक्तानि चत्वारि सा-
हस्राण्येव समासतः श्रुतिशते प्रोक्तानि तत्त्वार्थतः ॥"

इत्यध्यात्मरामायणम् ॥ ॥

अपरं रामवशिष्ठसंवादरूपमोक्षोपायकदेवभूतोत्तरवाशिष्ठनामकमहारामायणमस्ति । तत्र प्रथमार्द्धे अष्टाविंशत्यधिकशततमसर्गाः । तस्य आद्यश्लोकौ यथा,—

श्रीवाल्मीकिरुवाच ।
"उपशमप्रकरणादनन्तरमिदं प्रकरणम् ।
तन्निर्व्याणप्रकरणं ज्ञातं निर्व्याणदायि यत् ॥१॥
य इमं प्रकरणयात्रिकं विधिं रामवशिष्ठयोः ।
सर्व्वावस्थोऽपि श्रवणान्मुच्यते नात्र संशयः ॥२॥
उत्तरार्द्धे षोड़शोत्तरद्विशततमसर्गः । तस्योत्पत्तिप्रकारो यथा,—
श्रीराम उवाच ।
"नैष्कर्म्म्यात् कर्म्मणस्त्यागात् तनुः पतति रोहितः ।
कथमेतदतो ब्रह्मन् सम्भवत्याशु जीवतः ॥ १ ॥
यत् तत्त्वं खल्विदं ब्रह्म तज्ज्ञानमिति च स्फुटम् ।
श्रुत्वा स्तुतीर्य्यते साधि तस्मै ब्रह्मात्मने नमः ॥"२॥
अत्रादौ वैराग्यप्रकरणग्रन्थः । द्वितीयो मुमुक्षुग्रन्थः । तृतीय उत्पत्तिग्रन्थः । चतुर्थः स्थितिग्रन्थः । पञ्चमः सकलोपशमग्रन्थः । षष्ठप्रकरणे निर्व्याणग्रन्थः । पूर्व्वार्द्धे सटीकग्रन्थसंख्या १३६०० । उत्तरार्द्धे सटीकग्रन्थसंख्या २३६०० । इति श्रीमद्रामायणे निर्व्याणप्रकरणे बालकाण्डे मोक्षोपाये देवभूतोक्ते द्वात्रिंशत्सहस्रां संहितायां वाशिष्ठे ब्रह्मदर्शने उत्तरार्द्धे षोड़शोत्तरद्विशततमः सर्गः ॥

रामालिङ्गनकामः, पुं, (रामाद्यामालिङ्गनस्य कामोऽभिलाषो यस्मात् ।) रक्तान्वानः । इति राजनिर्घण्टः ॥

रामावधोपमः, पुं, (रामावधोरयोः स्त्रीजनयोरुपमा यत्र ।) चक्रवाकः । इति राजनिर्घण्टः ।

रामिल:, पुं, रमस्यम् । कामः । इति मेदिनी । ले, १२० ॥

राम्भः, पुं, (रम्भस्य विकारः । रम्भ+"पत्राद्यादिभ्यो वा ।" ४ । ३ । १४१ । इञ् ।) व्रते वेश्यातनो दक्षः । रम्भो वेश्यः तस्य विकारः । इत्यमरभरतौ । २ । ७ । ४५ ॥

रावकं, क्ली, पीड़ा । इति कांचित् ग्रन्थरत्नावली ॥

रावभाटी, स्त्री, नदीस्रोतोविशेषः । आओड़ इति भाषा । यथा,—
"पूरोढ़ि पाचसङ्घारो रावभाटी समाङरे ।"
इति ग्रन्थरत्नावली ॥

राव:, पुं, सालवृक्षनिर्य्यासः । धुना इति भाषा । तत्पर्य्यायः । सर्ज्जरसः २ साल: ३ वनकोद्भवः ४ वलनः ५ सालनिर्य्यासः ६ देवेष्टः ७ ग्रीतनः ८ बहुरूपः ९ सालरसः १० सर्ज्जनिर्य्यासकः ११ सुरभिः १२ सुरधूपः १३ यक्षधूपः १४ अग्निवल्लभः १५ कणः १६ कणजः १७ । अस्य गुणाः । स्निग्धत्वम् । कषायत्वम् । तिक्तत्वम् । संग्रहत्वम् । वातपित्तस्फोटकक्षतव्रणनाशित्वञ्च । अस्य पानलेपगुणौ । श्लिग्धत्वम् । प्रदरामयग्लानिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"रालस्तु सालनिर्य्यासस्तथा सर्ज्जरसः स्मृतः ।
देवधूपो यक्षधूपस्तथा सर्ज्जरसश्च यः ॥

रालो हिमो गुरुस्निग्धः कषायो याहको हरेत् ।
दोषासृक्खेददौर्गन्ध्यव्रणविषादिकाः ।
यक्षभयाग्निदग्धांश्चनृजातीसारनाशनः ॥"
इति भावप्रकाशः ॥

राजकार्य्यः, पुं, (राजस्य सालरसस्य कार्य्यं यत्र ।) सालवृक्षः । इति राजनिर्घण्टः ॥

राव:, पुं, (रवयतीति । रु+ण्यन्तो+भावे घञ् ।) शब्दः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । २१ । १८ ।
"गम्भीरं तिमिमकरोग्रसंकुलं तं
गर्ज्जन्तं जलचररावरौद्रनादैः ।
विस्तीर्णं दृढगुतरम्बरप्रकाशं
तैरगाधं निधिसुरमम्भसामनन्तम् ॥")

रावण:, पुं, (रवणस्यापत्यमिति । रवण+ "अश्वादिभ्योऽञ् ।" ४ । १ । ११२ । इति अञ् । यद्वा, रावयति भीषयति सर्व्वानिति । रु+णिच्+ल्यु: ।) लङ्काधिपतिः । तत्पर्य्यायः । पौलस्त्यः २ रक्षः ३ लङ्केशः ४ दशकन्धरः ५ । इति हेमचन्द्रः ॥ दशकण्ठः ६ निकषात्मजः ७ राक्षसेन्द्रः ८ लङ्केशः ९ पङ्क्तियोधः १० दशाननः ११ । इति शब्दरत्नावली ॥ लङ्कापतिः १२ दशास्यः १३ । इति जटाधरः ॥ (अस्य निरुक्तिर्यथा, रामायणे ।
"यस्माल्लोकत्रयं चैतन्नावितं भयमागतम् ।
तस्मात्तं रावणो नाम ब्राह्मा चक्रे भविष्यति ॥")

तस्योत्पत्तिर्ब्राह्मो यथा,—
सूत उवाच ।
"मानवस्य नरेश्वस्य आसीत् पुत्रो दमः किल ।
नवमस्तस्य दायादस्तृणबिन्दुरिति स्मृतः ॥
तस्य कन्या वड़विड़ा रूपेणाप्रतिमा भुवि ।
पुलस्त्याय स राजर्षिस्तां कन्यां प्रत्यपादयत् ॥
ऋषिरैड़विड़ो यस्यां विश्रवाः समपद्यत ।
तस्य पत्न्यश्चतस्रश्च पूर्व्वं वै देववर्णिनी ॥
ज्येष्ठं वैश्रवणं यत्ने जुरूपं देववर्णिनी ।
त्रिपादं सुमहाकायं स्थूलग्रीवं महाहनुम् ॥
अरुणं हरिश्मश्रुं प्रङ्कुकर्णविलोहितम् ।
पिङ्गलं नाम संदध्रु पिता तस्यान्नवीत्ततः ॥
कुत्सायान्तु कुश्रुण्ड्यां श्रीरश्चेदसुच्यते ।
कुश्रीरोरत्वाच्च नाम्ना तेन वै स कुवेरकः ॥
ऋक्षां कुवेरो जनयद्विश्रुतं नलकूबरम् ।
रावणं कुम्भकर्णञ्च कन्यां सूर्पनखां तथा ।
विभीषणं चतुर्थन्तु नैकव्यजनयत् सुतम् ॥
प्रङ्कुकर्णो दशग्रीवः पिङ्गलो रक्तलङ्घजः ।
चतुष्पादिंग्रतिसुजो महाकायो महाबलः ॥
जाम्बूनदनिभो मर्द्दलोहितश्चैव एव च ।
निसर्गाद्दारुणः क्रूरः स रावण इति स्मृतः ॥
हिरण्यकशिपुस्त्वासीत् स राजा पूर्व्वजन्मनि ।
चतुर्युगानां राजा तु त्रयोदश स राक्षसः ॥
ता: पञ्चकोट्यो वर्षाणां संख्याता: संख्यया द्विजैः ।
नियुतानामेकषष्टिः संख्याविद्भिरुदाहृता: ॥

वर्त्तिष्येव सहस्राणि वर्षाणां हि स रावणः ।
देवतानां पितॄणाञ्च घोरं कृत्वा प्रजाक्षयम् ।
त्रेतायुगे चतुर्थांशे रावणस्तपसः क्षयात् ।
रामं दाशरथिं प्राप्य समरे क्षयमीयिवान् ॥"
इति वह्निपुराणे वाराहप्रादुर्भावनामाध्यायः ॥

रावणगङ्गा, स्त्री, (रावणेन कृता गङ्गा ।) सिंहलदेशस्थनदीविशेषः । यथा,—
सूत उवाच ।
"दिवाकरस्य महामहिम्नो
महासुरस्योत्तमरत्नबीजम् ।
अङ्गप्रसूतो चरितं प्रतस्थे
निखिलगुणैरेव नभस्तलेन ॥
जेता सुराणां समरेष्वजस्रं
वीर्य्यावलेपोद्धतमानसेन ।
लङ्काधिपेनार्द्धपथं समेत्य
स्वभानुनेव प्रबलं निरुद्धम् ॥
ततः सिंहलीचारुनितम्बबिम्ब-
विक्षोभितागाधमहाह्रदायाम् ।
पूगद्रुमावद्धतटद्वयायां
समोच सूर्य्यः सरिदुत्तमायाम् ॥
ततः प्रभृति सा गङ्गा तुल्यपुण्यफलोदया ।
नाम्ना रावणगङ्गेति प्रथिमानमुपागता ॥
ये तु रावणगङ्गायां जायन्ते कुरुविन्दकाः ।
पद्मरागा वनं रामं विधाया: खस्फटार्चिषः ॥"
इति गारुड़े ७० अध्यायः ॥

रावणारिः, पुं, (रावणस्य अरिः शत्रुः ।) श्रीरामः । इति जटाधरः ॥ (यथा,—
"वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥"
इति महानाटकम् ॥)

रावणि:, पुं, (रावणस्यापत्यमिति । रावण+ "अत इञ्।" ४ । १ । ९५ । इति इञ् ।) रावणज्येष्ठपुत्रः । स च इन्द्रजित् । यथा,—
"रावणिः शत्रुजिन्मेघनादो मन्दोदरीसुतः ॥"
इति हेमचन्द्रः । २ । ३७० ॥
(यथा, महाभारते । १ । २८७ । १२ ।
"रावणिस्तु यदा नैनं विशेषयति सायकैः ।
ततो गुरुतरं बलमातिष्ठद्बलिनां वरः ॥"
रावणपुत्रमात्रे । यथा, भट्टिः । १४ । ७८ ।
"तस्याहारिषत प्राणा सुहृत्सु बालिसूनुना ।
प्रादुद्रवंस्ततः क्रुद्धाः सर्व्वे रावणयोधदम ॥")

राध्, ऋ ङ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) दन्त्यान्तोऽयमिति गदसिंहः । रासभः खरः । दुर्गसिंहस्तु इमं तालव्यान्तं मत्वा उवादौ इमं कृत्वा रश्मिशब्दं व्युत्पादितवान् । ऋ, अरराधत् । ङ, राध्यते । इति दुर्गादासः ॥

राशि:, पुं, (राध्यते इति । राध् शब्दे+इञ् । यद्वा, अश्नुते व्याप्नोतीति । अशू व्याप्तौ+ "अशिघसाय्यो रुड़ायलुकौ च ।" उणा० ४ । १३२ । इति इञ् रुड़ागमश्च ।) मान्यादिसमूहः । तत्पर्य्यायः । पुञ्जः २ उत्करः ३ कूटम् ४ ।

त्यमरः। २।५।४२॥ समुच्चयः ५ समाहारः ६। इति जटाधरः॥ अश्नुते व्याप्नोति इति राशिः। अशू ञ व्याप्तिसंघातयोरित्यस्मात् नाम्नीति इन् निपातनाद्गुणागमः। इति भरतः॥ * ॥ (यथा, शकुन्तलायाम् ९ अङ्के। "न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् नृदुनि मृगशरीरे तूलराशाविवाग्निः॥")

ज्योतिश्चक्रस्य द्वादशांशः। तस्योत्पत्तिर्यथा,—

अथ सृष्टौ मनश्चक्रे ब्रह्माहङ्कारमूर्त्तिभृत्। मनसश्चन्द्रमा जज्ञे सूर्य्योऽग्नेस्तेजसां निधिः॥ मनसः खं ततो वायुरग्निरापो धरा क्रमात्। गुणैकवृद्ध्या पञ्चैव महाभूतानि जज्ञिरे॥ अयोधोमौ भास्करेन्दू ततस्तङ्कारकादयः। तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्च जज्ञिरे॥ पुनर्द्वादशधात्मानं विभज्यैतान्निधिं मनः। नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी॥"

इति सूर्य्यसिद्धान्ते गोलाध्यायः॥ * ॥

तस्य संस्थानं यथा,—

"विषुवत्क्रान्तिवृत्तेभ्यात् पूर्व्वभागस्थिताः शिराः।
मेषाद्या राशयः क्रान्तिवृत्तयः पूर्व्वदिक्क्रमात्॥"

इति सुधाकरतत्त्वसार्व्वभौमसिद्धान्तः॥ * ॥

अथ राश्यादिनिर्णयः।

"मेषवृषमिथुनकर्कटसिंहाः कन्या तुलाथ वृश्चिकभम्।
धनुरथ मकरः कुम्भो मीन इति च राशयः कथिताः॥"

इति राशिकथनम्॥ * ॥

"अश्विन्या सह भरणी कृत्तिकापादश्च कीर्त्तितो मेषः। १।
वृषभः कृत्तिकाशेषं रोहिण्यर्द्धञ्च मृगशिरसः॥ २॥
मृगशिरसोऽर्द्धं चार्द्रा पुनर्व्वसोस्त्रिपादो मिथुनम्। ३।
पादः पुनर्व्वसोरन्त्यः पुष्योऽश्लेषा च कर्कटः॥४॥
सिंहोऽथ मघा पूर्व्वफल्गुनी पाद उत्तरायाः॥५॥
तच्छेषं हस्ता चित्रार्द्धञ्च कन्यकाख्याः॥ ६॥
तौलिनि चित्रार्द्धं स्वाती विशाखायाः पादत्रयम्। ७।
अलिनि विशाखा पादस्त्वथानुराधान्विता ज्येष्ठा॥ ८॥
मूलं पूर्व्वाषाढा प्रथमचाप्युत्तराग्रको धन्वी॥९॥
मकरस्तत्परिशेषं श्रवणा चार्द्धं धनिष्ठायाः॥१०॥
धनिष्ठार्द्धं शतभिषा पूर्व्वभाद्रपदपादत्रयं कुम्भः। ११।
पूर्व्वभाद्रपदाशेषस्त्वथोत्तरा रेवती मीनः॥ ११॥

इति राशिनक्षत्रभेदकथनम्॥ * ॥

"राशिनामानि च क्षेत्रं मन्त्रं गृहनाम च।
मेषादीनाञ्च पर्य्यायं लोकादेव विचिन्तयेत्॥"

इति राशिपर्य्यायकथनम्॥ * ॥

"क्रियतावुरिजितुमकुलीरक्षेयपाथेययूककौर्पीखाः।
तौक्षिक आकोकेरो द्रुद्रोगश्चान्त्यभं चैत्यम्॥"

इति मेषादीनां विशेषनामकथनम्॥ * ॥

"अरुणसितहरितपाटलपाण्डुविचित्राः सितेतरपिङ्गलौ।
पिङ्गलकर्व्बुरबभ्रुमलिना रुचयो यथासंख्यम्॥"

इति मेषादीनां वर्णभेदकथनम्॥ * ॥

"मत्स्यौ घटी वृश्चिमिथुनं मगदं सवीणं चापी नरोऽब्जघनौ मकरो मृगास्यः।
तौली सशस्त्रदहना ह्यवगा च कन्या शेषाः खनामसदृशाः खचराश्च सर्व्वे॥"

अब्जघनोऽब्जाकारजघनो यतः अब्जारूढ़ इति अब्जघनः। उत्तरत्र चतुश्चरणत्वकथनात्।

राश्यधिष्ठातृदेवताकथनम्॥ * ॥

"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च स्त्रीजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्व्यात्मकनामधेया मेषादयोऽमी क्रमशः प्रदिष्टाः॥"

इति राशीनां क्रूरसौम्यादिविवेकः॥ * ॥

देवब्रह्मनोहरे।

"पुष्यश्च पुष्करश्चैव आधानाख्यस्तथैव च।
ह्यत्वा दृष्ट्वा भवन्त्येते नित्यं द्वादश राशयः॥"

इति पुष्यादिविवेकः॥ * ॥

"मिथुनतुलाघटकन्या द्विपदाख्याश्चापपूर्व्वभागश्च।
मृगधनुराद्यन्तार्द्धं दृग्जलसिंहाश्चरणाः॥"

इति द्विपदचतुष्पदराशिकथनम्॥ * ॥

"कर्कटवृश्चिकमीना मकरान्त्यार्द्धञ्च कीटसंज्ञाः स्युः।
वृश्चिकराशिर्मुनिभिः सरीसृपत्वेन निर्दिष्टः॥"

इति कीटसरीसृपराशिकथनम्॥ * ॥

"द्विपदवयूगाः सर्व्वे सिंहं विहाय चतुष्पदाः।
सलिलनिलया मत्स्या वृश्चाः सरीसृपजातयः॥
मृगपतिवर्ज्ये तिष्ठन्त्येते विहाय सरीसृपान्।
अकथितयदेषूक्तं वर्त्तं जनयवहारतः॥"

सरीसृपजातय इति बहुवचनात् कीटस्यापि परिग्रहः। राशीनां वर्णावर्णकथनम्॥ * ॥

"श्याम्या मिथुनतुलाकौपापाजिघटाः सिताश्च वृषमेषौ।
मकरादिमार्द्धसिंहौ वन्यौ दिवसेऽब्जवृषभौ च॥
जलजौ कर्कटमीनौ मकरान्त्यार्द्धञ्च शिवमते कुम्भः॥"

इति श्यामारक्तजलजराशिकथनम्॥ * ॥

"दृक्शक्तिमिगोऽविघटा मिथुनघनुःकर्किटृगसुखाश्च समाः।
वृश्चिककन्याब्जगपतिवञ्जिनो दीर्घाः समाख्याताः॥"

इति राशीनां दृक्शदीर्घकथनम्॥ * ॥

"प्रागादिककुभां नाथा यथासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयाश्चिराद्वृत्तपरिभ्रमात्॥"

इति दिगधिपत्वकथनम्॥ * ॥

"कुजशुक्रबुधेन्दुकैसौम्यशुक्रावनीसुवाम्।
जीवार्किभानुजेज्यानां क्षेत्राणि स्युरनादयः॥"

इति ग्रहाणां क्षेत्रकथनम्॥ * ॥

"अजो गोपतियुग्मञ्च कर्किधन्विन्द्यगास्तथा।
निशासंज्ञाः स्मृताश्चेते शेषाश्चान्ये दिनात्मकाः॥
निशासंज्ञा विमिथुना; स्मृताः पृष्ठोदयास्तथा।
शेषाः शीर्षोदया ज्ञेते मीनश्चोभयसंज्ञकः॥"

इति निशादिसंज्ञाकथनम्॥ * ॥

"रविर्मासं निशानाथः सपाददिवसद्वयम्।
पक्षत्रयं भूमिपुत्रो बुधोऽष्टादशवासरान्॥
वर्षमेकं सुराचार्य्यश्चाष्टाविंशदिनं भृगुः।
शनिः सार्द्धत्रयं वर्षं खभांशुः सार्द्धवत्सरम्॥
एवं प्रमाणात् सकलाः खराशिं भुञ्जते यदा॥"

इति राशिभोगकथनम्॥

इति ज्योतिश्चक्रत्वम्॥ * ॥ द्वादशराशात्मकशिवरूपं यथा,—

पुलस्त्य उवाच।

"स्वरूपं शिवरूपस्य वदिष्ये कालरूपिणः।
अश्विनी भरणी चैव कृत्तिकापादमीश्वरम्॥
मेषकं हि विजानीयात् कुजक्षेत्रमुदाहृतम्।
आग्नेयांशात्मको ब्रह्मन् प्राणापत्यं कवेर्गृहम्॥
सौम्यार्द्धं हरनामेदं वदनं परिकीर्त्तितम्।
मृगार्द्धमाद्रादित्यां शक्तयः सौम्यरूपं त्विदम्॥
मिथुनं भुजयोस्तस्य गगनस्यस्य भूमिनः।
आदित्यांशश्च पुष्यश्च अश्लेषा ग्रन्थिनी गृहम्॥
राशिः कर्कटको नाम पार्श्वे मखविनाशिनः।
पित्र्यार्द्धं भगदैवत्यं उत्तरांशश्च केशरी॥
सूर्य्यक्षेत्रं विभोर्ब्रह्मन् हृदयं परिकीर्त्तितम्।
उत्तरांशात्मकाः पाणिचित्रार्द्धं कन्यका स्त्रियम्॥
सोमपुत्रस्य सम्भेदद्वितीयं जठरं विभोः।
चित्रांशद्वितयं स्वाती विशाखायांशकत्रयम्॥
द्वितीयं शुक्रसदनं तुला नाभिरुदाहृता।
विशाखांशमनुराधा ज्येष्ठा भौमगृहं त्विदम्॥
द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः।
मूलं पूर्व्वोत्तरांशश्च देवाचार्य्यगृहं धनुः॥
उरुयुगलमीशस्य अमर्षे प्रगीयते।
उत्तरांशात्मको ऋक्षं श्रवणं मकरो सुने।
धनिष्ठार्द्धं शनिक्षेत्रं जानुनी परिकीर्त्तिते॥
धनिष्ठार्द्धं शतभिषा प्रोष्ठपदांशकत्रयम्।
सौरं पद्मापरमिदं कुम्भो जङ्घे च विश्रुते॥
प्रोष्ठपदांशमेकन्तु उत्तरा रेवती तथा।
द्वितीयं जीवसदनं मीनन्तु चरणांघ्रिभौ॥"* ॥

राशीनां वर्णस्वरूपादि यथा,—

नारद उवाच।

"राशयः कथिता ब्रह्मन्! त्वया द्वादश वै मम।
तेषां विशेषतो ब्रूहि लक्षणानि स्वरूपतः॥

पुलस्त्य उवाच।

स्वरूपं तस्य वक्ष्यामि राशीनां शृणु नारद।
यादृशा यत्र सञ्चारा यस्मिन् स्थाने वसन्ति हि॥
सञ्चारस्थानमेकस्य धान्यरत्नाकरादिषु।
नवसाहस्रसंच्छन्नो वसुधायाश्च सर्व्वशः॥
नित्यं चरति पुष्पेषु सरसां पुलिनेषु च।
मेषः समानमूर्त्तिश्च अजाविकधनादिषु॥

वृषः सद्गुरूपेषु चरते गोकुलादिषु ।
तस्याधिवासभूमिस्तु क्षत्रीवलधराश्रया ॥
स्त्रीपुंसयोः समं भद्रग्रथासनपरिग्रहैः ।
वीणावाद्यर्क्षिमुखं गीतनर्तकशिल्पिषु ॥
स्थितं क्रीड़ा रतिर्नित्यं विहारोऽवनिरस्य तु ।
मिथुनं नाम विख्यातं राशिर्देधात्मकः स्मृतः ॥
कर्किः कुलीरेण समः बलिलक्षः प्रकीर्त्तितः ।
केदारवापीपुलिनविविक्तावनिरेव च ॥
सिंहस्तु पर्व्वतारण्यदुर्गकन्दरभूमिषु ।
वसते व्याघपक्षीषु गह्वरेषु गुहासु च ॥
या हि प्रदीपकरा नावारूढ़ा च कन्यका ।
चरते क्षीरतिक्ताने वसते तद्गतेषु च ॥
तुलापाणिश्च पुरुषो वीथ्यापणविचारकः ।
नगराध्वनि शालासु वसते तत्र नारद ॥
खभ्रवल्मीकसञ्चारी वृश्चिको वृश्चिकाकृतिः ।
वृषगोमयकीटोऽश्मिपाषाणादिषु संस्थितः ॥
धनुस्तुरङ्गजघनो दीप्यमानो धनुर्द्धरः ।
वालिभूरोऽश्वविद्वीरः स्थायी युद्धबलादिषु ॥
मृगास्यो मकरो ब्रह्मन् ! हृदयस्थः फलाङ्गदः ।
मकरोऽसौ नदीचारी वसते च महोदधौ ॥
रिक्तकुम्भश्च पुरुषः स्कन्धधारी जलाप्लुतः ।
दूतशालाश्वरः कुम्भस्थायी शौल्किकसद्मसु ॥
मीनरूपलमांसज्ञो मीनक्षौर्यासुसञ्चरः ।
वसते पुण्यदेशेषु देवब्राह्मणपूजकः ॥
तत्त्वयं कथितं तुभ्यं मेषादीनां महामुने ।
न कस्यचित्त्वयाख्येयं गुह्यमेतत् पुरातनम् ॥
एतन्मया ते कथितं सुरर्षे
यथा जिनेन्द्रः प्रममाथ यज्ञे ।
पुण्यं पुराणं परमं पवित्रं
संग्रहस्तां पापहरं शिवञ्च ॥"

इति श्रीवामनपुराणे पुलस्त्यनारदसंवादे हरचरितः पञ्चमोऽध्यायः ॥

राशिचक्रं, क्ली, (राशीनां चक्रम् ।) मेषादिद्वादशराश्यात्मकवृत्तम् । तस्य नामान्तरं भचक्रं ज्योतिश्चक्रञ्च । यथा,—

"सप्तविंशतिभेर्ज्योतिश्चक्रं क्षिप्तिवायुगम् ।
तदर्कोघ्नो भवेद्राशिर्नवर्क्षैश्चरञ्चाङ्कितः ॥"

इति दीपिका । * ॥

तद्विवरणं यथा,—

"भचक्रं ध्रुवयोर्ब्रह्मन्नाक्षिप्तं प्रवहानिलैः ।
पर्य्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमम् ॥
उपरिस्थस्य महतीकक्षाख्याधःस्थितस्य च ।
महता कक्षया भागा महान्तोऽल्पास्तथाऽल्पया ॥
कालेनाल्पेन भगणं सुदूरेऽल्पमलाश्रितः ।
यदः कालेन महता मण्डले महति भ्रमन् ॥
खल्पया तु बहून् सुदूरे भगणान् शीघ्रदीप्तिः ।
महता कक्षयागच्छन् ततः खल्पः शनैश्चरः ॥
मन्दादधःक्रमेणैव खुखतुर्था दिवाधिपाः ।
वर्षाधिपतयस्त्वेतत् तृतीयाः परिकीर्त्तिताः ॥
ऊर्द्धक्रमेण शशिनो मासानामधिपाः स्मृताः ।
होरेशाः सूर्य्यतनयादधोधः क्रमशस्तथा ।
भवेद्गकक्षा तीक्ष्णांशोर्भमध्यं वृष्टिताड़ितम् ।
सर्व्वोपरिष्टात् भ्रमति योजनैस्त्रिभमण्डलम् ॥"

तत्र कक्षाक्रममाह ।

"ब्रह्माण्डमध्ये परिधिर्योभकक्षाभिधीयते ।
तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा ॥
मन्दामरेज्यभूपुत्रसूर्य्यशुक्रेन्दुजेन्दवः ।
परिभ्रमन्त्यधोऽधःस्थाः सिद्धविद्याधरा घनाः ॥"

इति सूर्य्यसिद्धान्तः ॥ * ॥

ग्रहत्रयचक्रसंयोगे षड्विधेशजनकं राशिचक्रं यथा,—

"राशिचक्रं प्रवक्ष्यामि कृपार्त्ता हितकाम्यया ॥
रविर्जीवस्तथा सौम्यस्त्रीय चन्द्रे समागते ।
जलपातो भवेत् सत्यमित्युक्तं विष्णुयामले ॥
रविर्जीवस्तथा शुक्रस्त्रीय चन्द्रे समागते ।
वायुपातो भवेत् सत्यमित्युक्तं विष्णुयामले ॥
रविर्जीवस्तथा भौमस्त्रीय चन्द्रे समागते ।
अग्निपातो भवेत् सत्यमित्युक्तं ब्रह्मयामले ॥
रविर्भौमस्तथा राहुस्त्रीय चन्द्रे समागते ।
लोहपातो भवेत् सत्यमित्युक्तं रुद्रयामले ॥
रवौ राहुस्तथा केतुस्त्रीय चन्द्रे समागते ।
पाषाणपातोऽपि भवेदित्युक्तं भानुयामले ॥"

इति नरपतिजयचर्य्यायां तुलुचक्रे राशिचक्रम् । * । जातकराशिचक्रम् । यथा,—

"तन्वादिद्वयपर्य्यन्तं राशिचक्रे व्यवस्थितम् ।
तत्र वृद्धाख्यमतयो वदन्त्येतं तथा तथा ॥"

इति पद्धतिः ॥ * ॥

मन्त्रग्रहोक्तराशिचक्रम् यथा । आगमकल्पद्रुमे ।

"रेखाद्वयं पूर्व्वपरागतं स्यात्
तस्मात्ततो याम्यकुबेरभेदात् ।
एकैकमीशानविशाचरे तु
कृताग्नवायोर्विलिखेत्ततोऽर्द्धान् ॥
वेदाग्निवह्निद्युगलश्रवस्याक्षिसंख्यान्
पञ्चेषुवाणाग्नरपक्षचतुरश्रयार्द्धान् ।
मेषादितः प्रविलिखेत् सकलांस्तु वर्णान्
कन्यागतान् प्रविलिखेदथ शादिवर्णान् ॥"

तथा,—

"वाणं गौरं खुरं शीर्षं ग्रसौ ग्रीमेति राशिषु ।
क्रमेण भेदिता वर्णाः कन्यायां शादयः स्मृताः ॥"

तेन अ आ इ ई मेषः । उ ऊ ऋ ॠः । ऋ ॡ ॡ मिथुनम् । ए ऐ कर्कटः । ओ औ सिंहः । अं अः श ष स ह चाः कन्याः । कवर्गस्तुला । चवर्गो वृश्चिकः । टवर्गो धनुः । तवर्गो मकरः । पवर्गः कुम्भः । यवर्गो मीनः ।

खराग्नीनामनुक्रमं मन्त्रं भजेत् । तथा च ।

"खतारराशिकोष्ठानामनुक्रमान् भजेन्मनून् ॥"

इति वचनात् ॥

"राशीनां शुद्धतां ज्ञेया त्रयोदशं ऋतिं वयम् ।
खराग्रेर्मन्त्रराशिस्तं गणनीयं विचक्षणैः ॥"

यदा तु खराग्रेरज्ञानं तदा साधकनामाद्यक्षरसन्निभं राशिं गृहीत्वा गणयेत् ।

"साधाद्यक्षरराशिस्तं गणयेत् साधकाक्षरम् ।"

इति रामार्च्चनचन्द्रिकाधृतवचनात् । तथा,

"अज्ञाते राशिनक्षत्रे नामाद्यक्षरराशितः ।"

इति तन्त्रराजे ॥

"तेन मन्त्राद्यवर्णेन नामाद्यक्षरेण च ।
गणयेद्यदि वर्णं वाप्यृणं द्वादशगुणं वा ।
रिपुमैत्राद्यवर्णः स्यात् तेन तस्याहितं भवेत् ॥
एक पञ्च नव वान्यवाः स्मृताः
द्वौ च षट् च दशमाश्च सेवकाः ।
षड्विरुद्धसुतयस्तु पोषकाः
द्वादशाष्टचतुरस्तु घातकाः ॥"

इति विष्णुविषयम् ।

रामार्च्चनचन्द्रिकाधृतत्वात् । गृह्यादौ तु षड्वर्ज्जनीयम् । तथा च ।

"षडष्टमद्वादशानि वर्ज्जनीयानि यत्नतः ॥"

इति वचनात् ॥

तन्त्रान्तरे ।

"लग्नं धनं भ्रातृबन्धुपुत्रशत्रुकलत्रकाः ।
मरणं धर्म्मकर्म्मायव्यया द्वादश राशयः ॥
नामाद्यक्षरमेतेषां शुभाशुभफलं भजेत् ।
लग्ने सिद्धिस्तथा नित्यं धने धनसमृद्धिदः ॥
भ्रातरि भ्रातृहृद्धिः स्यात् बन्धौ बान्धववत् प्रियः ।
कलत्रे मध्यमा प्रोक्ता मरणे मरणं भवेत् ॥
धर्म्मे धर्म्मविवृद्धिः स्यात् सिद्धिः कर्म्मसंस्थितेः ।
आये च धनसम्पत्तिर्व्यये च सञ्चितक्षयः ॥"

वैद्यवल्लभे तु शत्रुस्थाने बन्धुरिति पाठः । इति तन्त्रसारः ॥

राशिव्यवहारः, पुं, (राशेर्व्यवहारः ।) अङ्कराशिपरिमाणज्ञापकाङ्कः । तद्विवरणं यथा,—


अथ राशिव्यवहारे करणसूत्रं दृष्टम् ।

"अनङ्कतु दशमांशोऽनुत्वनेकादशांशः
परिधिगणभागः शून्यखाग्नेष वेधः ।
भवति परिधिखण्डे वर्जिते वेधविज्ञे
धनगणितकरः स्याद्भाजधाखाच खार्यः ॥"

उदाहरणम् ।

"समसुवि किल राशेर्यः स्थितः शून्यधान्यः
परिधिपरिमितिः स्याद्वेदवह्नयब्धिदोषा ।
प्रवद गणक खार्यः किंमितः खल्पि तस्मिन्
अथ पृथगखधान्यैः शून्यधान्येष शीघ्रम् ॥"

अथ शून्यधान्यराशिमानावबोधनाय



परिधिः १० । वेधः ९ । परिधेः खण्डाग्रः १० । वर्जितः १०० । वेधे ९ क्षिप्तः । लब्धाः खार्यः १०० ।

राशिव्य

अथाशुधान्यराशिमानानयनाय


न्यासः



परिधिः ६०। वेधः $\frac{६०}{११}$। जातं फलम् ५४५ $\frac{५}{११}$।

अथ मूकधान्यराशिमानानयनाय

न्यासः



परिधिः ६०। वेधः $\frac{२०}{१}$। खार्थं: ६६६ $\frac{२}{१}$।

अथ भिन्नान्तर्वाह्यकोणसंलग्नराशिप्रमाणानयने करणसूत्रं दत्तम्।

"द्विदेरूनिभागैकनिघ्नात्तु परिधेः फलम्।
भिन्नान्तर्वाह्यकोणस्थराशेः खगुणभाजितम्॥"


उदाहरणम्।

"परिधिर्भित्तिलग्नस्य राशेस्त्रिंशत्करः किल।
अन्तःकोणस्थितस्यापि तिथितुल्यः करः सखे॥
बहिः कोणस्थितस्यापि पञ्चत्रिंशत्समितः।
तेषामाचक्ष्व मे क्षिप्रं घनफलान् पृथक् पृथक्॥"

अत्रापि स्थूलादिधान्यानां राशिमानावबोधनाय खण्डक्षेत्रत्रयम्।

तथाहि त्रयाणामशुधान्यराशिमानबोधकं क्षेत्रम्।

न्यासः




अत्राद्यस्य परिधिः ३०। द्वितीयः ६०। अन्यः १५। चतुर्थः ६०। अपरः ३५। सन्धिभागैकः $\frac{३}{१}$ भिन्नः ६०। एषां वेधः ६। एभ्यः फलं तुल्यमेतावत्यं एव खार्थं: ६००। एतत्खखगुणेन भक्तं जातं पृथक् पृथक् फलम् २००। १५०। ३५०॥

राष्ट्रिका

अथाशुधान्यराशिमानानयनाय


न्यासः



पूर्ववत् क्षेत्रत्रयार्थं खगुणगुणितपरिधिः ६०। वेधः $\frac{६०}{११}$। फलानि २७२ $\frac{८}{११}$। १९६ $\frac{३}{११}$। ४०६ $\frac{१}{११}$।

अथ मूकधान्यराशिमानानयनाय

न्यासः



अत्रापि पूर्ववत् क्षेत्रत्रयार्थं खगुणगुणितः परिधिः ६०। वेधः $\frac{२०}{१}$। फलानि १११ $\frac{१}{३}$। १९९ $\frac{२}{३}$। ५००।

इति गोलाध्याये राशिव्यवहारः समाप्तः॥

राट्, पुं, स्त्री, (राजते इति। राज्+"सर्वधातुभ्यः क्विन्।" उणा० ४। १५८। इति क्विन्। ब्रश्चेति वः।) विश्वः। (यथा, मनुः। ९। २५३।

"अग्राह्यस्तस्करान् यस्तु वलिं गृह्णाति पार्थिवः।
तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते॥")

उपद्रवः। इत्यमरः। ३। ३। १८३॥ विषयो जनपदः। उपद्रवो मरकादिः। इति भरतः॥ (राष्ट्रपालननियमादिकं अश्वमेधपर्व्वणि १२। ८७ अध्याये द्रष्टव्यम्॥ *॥ पुं. पुरूरवोवंशजातस्य काशेः पुत्रः। यथा, भागवते। ९। १७। ४।

"काशस्य काशितत्पुत्रो राष्ट्रो दीर्घतमः पिता॥")

राष्ट्रनिवासी, [न्] पुं, (राष्ट्रे निवसतीति॥ नि+वस्+णिनिः।) जानपदः। देशवासी। इति त्रिकाण्डशेषः॥

राष्ट्रिका, स्त्री, (राष्ट्रं उत्पत्तिस्थानत्वेनास्त्यस्या इति। राष्ट्र+ठन्। टाप्।) कण्टकारिका। इत्यमरः। २। ४। ६३॥ (पुं, राष्ट्रवासी। जानपदः। यथा, मनुः। १०। ६१।

"यत्र नैते विरुध्यन्ते जायन्ते वर्णदूषकाः।

राष्ट्रिकः

राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति॥")

राष्ट्रपतिः। यथा, हरिवंशे। १८३। २७—२८।

"कुम्भाण्ड! मन्त्रिणां श्रेष्ठ! प्रीतोऽस्मि तव सुव्रत।
सुकृतन्ते विजानामि राष्ट्रिकोऽस्तु भवानिह॥
सप्तातियज्ञः सुसुखो निर्ऋतोऽस्तु भवानिह।
राज्यञ्च ते मया दत्तं चिरं जीव ममाज्ञया॥")

राष्ट्रियः, पुं, (राष्ट्रेऽधिकृतः। राष्ट्र+"राष्ट्रावारपाराद् घखौ।" ४। २। ९३। इति घः। यद्वा, राष्ट्रे जातः। "तत्र जातः।" ४। ३। २५। इति घः।) गान्धोक्तौ राजश्यालः। इत्यमरः। २। ७। १४॥ (राष्ट्राधिपः। यथा, महाभारते। १२। ८५। १२।

"ततः संप्रेषयेद्राष्ट्रे राष्ट्रियाय च दर्शयेत्॥")

राष्ट्रीयः, पुं, (राष्ट्रे भव इति। राष्ट्र+छः।) गान्धोक्तौ राजश्यालः। इति हेमचन्द्रः। २। २४॥ राष्ट्रसम्बन्धिनि, त्रि॥ (यथा, महाभारते। १२। ८७। ९।

"धान्यं हिरण्यं भोगेन भोक्तुं राष्ट्रीयसञ्जनः॥")

रास, ङ शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) दन्त्यान्तोऽयमिति गदक्षिंदः। रासभः खरः। दुर्गसिंहस्त्विमं तालव्यान्तं मत्वा उणादौ दृशं ज्ञात्वा रक्षिशब्दं व्युत्पादितवान्। ऋ, अररासत्। ङ, रासते। इति दुर्गादासः॥

रासः, पुं, (रासनमिति रासतेऽनेनेति वा। रास शब्दे+भावे अधिकरणे वा घञ्।) कोलाहलः। ध्वानः। भावाश्लेषकः। गोपानां क्रीड़ाभेदः। इति मेदिनी। से, ११॥ तस्य विधिर्यथा,—

"कार्त्तिकीपूर्णिमायाञ्च ज्ञात्वा तु रासमण्डलम्।
गोपानां व्रतकं ज्ञात्वा गोपीनां व्रतकन्तथा॥
शिलायां प्रतिमायां वा श्रीकृष्णं राधया सह।
भारते पूजयेत् ज्ञात्वा षोपहारादि षोड़श॥
गोलोके च वसेत् सोऽपि यावद्वै ब्रह्मणो वयः।
भारतं पुनरागत्य हरिभक्तिं लभेद्ध्रुवम्॥
क्रमेण सुदृढ़ां भक्तिं लब्ध्वा मन्त्रं हरेरपि।
देहं त्यक्त्वा च गोलोकं पुनरेव प्रयाति च॥
तत्र तस्यास्य सारूप्यं संप्राप्य पार्षदो भवेत्।
पुनस्तत्पतनं नास्ति जरामृत्युहरो महान्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २५ अध्यायः॥

विस्तारस्तु श्रीकृष्णजन्मखण्डे २८ अध्याये श्रीमद्भागवतीयरासपञ्चाध्यायेषु च द्रष्टव्यः॥*॥

कस्यचिन्मते कल्पतरुयात्रेयम्। अस्य विधिर्यथा,—

"कार्त्तिके पौर्णमास्यान्तु रासयात्रा महानिशि।
नन्दस्नोः प्रकर्त्तव्या महाविभवविस्तरैः॥
इह लोके सुखं प्राप्य अन्ते विष्णुपुरं व्रजेत्।
पूजा कार्य्याह्निकात्रे तु नयेत् प्रेयं महोत्सवैः॥
गीतैर्नानाविधैर्वाद्यैर्नृत्यैश्च विविधैरपि॥
इत्येवंरात्रिनागीतैरङ्गनाभिश्च कीर्त्तनैः।

चन्दनागुरुकस्तूरीपङ्कलेपैर्विराजिते: ॥
विहरद्भिर्विष्णुभक्तै: कार्य्य एष महोत्सव: ।
ध्यायेद्वृन्दावने रम्ये यमुनापुलिने वने ॥
निकुञ्जसदने लक्ष्यं गोपीमण्डलमण्डितम् ।
रासमण्डलयन्त्रस्थं गोविन्दं कणिकागतम् ॥
द्वयोर्द्वयोर्गोपिकयोर्मध्ये वान्तमनेकधा ।
अपरं नटवेषेण मध्ये तं सुरलीधरम् ॥
गोपीगण्डसुखास्फोटमधुपानमधुव्रतम् ।
कुलालचक्रप्रतिमं मण्डलं पङ्कजाङ्कितम् ॥
दलाद्यैश्चोभितं कार्य्यं महिष्योऽष्टौ च मध्यतः ।
मध्ये मध्ये च गोविन्दं पार्श्वयोरष्टरूपकम् ॥
मुकुन्दं माधवं लक्ष्यं नटनागरमेव च ।
हरिं दामोदरं विष्णुं पूजयेत् कामरूपिणम् ॥
सहस्रे भूपुरे गोप्य: शतशोऽथ सहस्रश: ।
पूजनीया: प्रयत्नेन वृत्यगीतपरायणा: ॥
असंख्या गोपिकास्तत्र मण्डलेऽष्टौ वराङ्गना: ।
महिष्यस्ता: समाख्याता: सदासङ्गसुनिव्रता: ॥
भक्तोत्सवाभिलाषेण कमला बहुरूपिणी ।
राधा विद्याखा विमला सुमित्रा ललिता तथा ।
सुन्दरी कमला रम्भा महिष्योऽष्टौ प्रकीर्त्तिता: ॥
तारा राधा निराबाधा लक्ष्मा भेदमुपागता: ।
तासां ध्यानेऽर्च्चनामार्गे: पूजा कार्य्या विशेषत: ॥
उत्तीर्णे सायं समये गोप्यो वृन्दावनं ययु: ।
रासक्रीड़ां ततस्ताभिश्चक्रे च जगदीश्वर: ॥
गोप्यो रासक्रीड़ां चक्रु: पौर्णमास्यां महा-
निशि ।
न तत्र पक्षिनिनदो न झिल्लीनिनदस्तथा ॥
महानिशा सा घटिके रात्रेर्मध्यमयामयो: ।
तदप्राप्तौ च कर्त्तव्यं पौर्णमास्यां निशासुखे ॥
एवं रासक्रीड़ां यस्तु कारयेद्भुवि मानव: ।
स सर्व्वदुष्कृतं त्यक्त्वा निर्व्वाणमुक्तिमाप्नुयात् ॥"
प्लुतुकलक्षणिका ॥
(विलास: । यथा, भागवते । ५ । २ । १२ ।
"अस्मद्विधस्य मन उन्नयनौ विभर्त्ति
वक्त्रद्युतं सरसरासमुदाविवक्षे ॥"
"वक्त्रे च वक्त्रद्युतं विभर्त्ति किं तदाह । रसो मधुरालाप: रासो विलासस्ताभ्यां सहिता सुधा अधरास्तम् । आदिशब्दात् स्मितनर्म्मादि ।" इति तत्र श्रीधरस्वामी ॥ क्रिया । यथा, भागवते । ५ । १३ । १० ।
"तैर्वञ्चितो हंसकुलं समाविशत्
नरोचयन् व्रीलसुपैति वानरान् ।
तच्चातिरासेन सुनिर्वृतेन्द्रिय:
परस्परोद्वीक्षयविस्मृतावधि: ॥"
"तैर्वञ्चितस्तत्र फलाभावं ज्ञात्वा हंसानां ब्राह्मणानां कुलं पुन: प्रविशन् तेषां व्रीलं प्रायश्चित्तपूर्व्वकं पुनरुपनयनाद्याचारमरोचयन् अप्रियं पश्यन् वानरतुल्यान् अब्राह्मणान् शूद्रप्रायानुपैति । तच्चातिरासेन वानरजातिक्रियया स्त्रियां मिथुनीभूय परस्परमुद्वीक्षणेन विस्मृतो जीवितावधिर्मरणकालो येन ।" इति तट्टीकायां श्रीधरस्वामी । ७ ।)

रासभ:, पुं, (रासते शब्दायते इति । रास + "राधिवधिभ्याञ्च ।" उणा० ३ । १२५ । इति अभच् ।) गर्द्दभ: । इत्यमर: । २ । ६ । ७८ । (अयं हि ब्रह्मण: पद्भ्यां जात: । यथा, मार्कण्डेये । ४८ । २६ ।
"पद्भ्यामश्वान् समातङ्गान् रासभान् शरभान् मृगान् ।
उष्ट्रानश्वतरांश्चैव नागरूपाच्च जातय: ।"
अश्वतर: । खच्चर इति भाषा । यथा, महाभारते । १ । १४५ । ७ ।
"स त्वं रासभयुक्तेन स्यन्देनाशुगामिना ।
द्वारवतमथैवेह यथा यासि तथा कुरु ॥")
रासभवन्दिनी, स्त्री, मल्लिका । इति शब्दचन्द्रिका ॥
रासभी, स्त्री, (रासभ + ङीप् ।) गर्द्दभी । इति शब्दरत्नावली ॥ (यथा, महाभारते । १३ । २७ । १४ ।
"एतत् श्रुत्वा मतङ्गस्तु दारुणं रासभीवच: ।
श्वशुरौ रथात्तूर्णं रासभीं प्रत्यभाषत ॥")
रासमण्डलं, क्ली, (रासस्य मण्डलम् ।) श्रीकृष्णस्य रासक्रीड़ास्थलम् । तद्विवरणम् । यथा,—
"तस्मादुपरि गोलोक: प्रधानामृतकोटियोजने ।
वायुना धार्य्यमाणश्च विचित्रपरमाश्रय: ॥
अतीवरम्यनिर्म्माणो नित्यरूपो महीयसा ।
शतशृङ्गेण शैलेन पुण्यवृन्दावनेन च ॥
सुरासमण्डलेनापि नद्या विरजयावृत: ।
कोटियोजनविस्तीर्णा प्रस्थेन विरजा व्रज ॥
दैर्घ्ये तस्य शतगुणा परित: परमा शुभा ।
अमूल्यरत्ननिकरा हीरामाणिक्यशोभिता ॥
मणीनां कौस्तुभादीनामसंख्यानां मनोहरा ।
अमूल्यरत्ननिर्म्माणं तत्रापि प्रतिमन्दिरम् ॥
मनोहरश्च प्राकारसप्तकं विश्वकर्म्मणा ।
गोपीभिर्गोपिकाभिश्च वेष्टितं कामधेनुभि: ॥
कल्पवृक्षै: परिजातैरसंख्यैश्च सरोवरै: ।
पुष्पोद्यानै: सुकोटिभि: संवृतं रासमण्डलम् ।
वेष्टितं वेष्टितं गोपैर्मन्दिरै: शतकोटिभि: ।
रत्नप्रदीपयुक्तैश्च पुष्पतल्पसमन्वितै: ॥
सुगन्धिचन्दनामोदै: कस्तूरीकुङ्कुमान्वितै: ।
क्रीड़ोपयुक्तैर्भोगैश्च ताम्बूलैर्वासितैर्जलै: ॥
धूपै: सुरभिभिश्चैव माल्यैश्च रत्नदर्पणै: ।
रत्नकै रचितै: पुष्पशय्याधारविकोटिभि: ॥
अमूल्यरत्नाभरणैर्बिभ्रद्भिर्वपुषामपि ।
उत्तमत्तगजेन्द्राणां वेष्टितैश्च वनै: क्रमात् ॥
नवयौवनसम्पन्नै रूपेणैवमरैरपि ।
रम्यश्च वर्त्तुलाकारं चन्द्रबिम्बं यथा व्रज ॥
अमूल्यरत्नरचितं दशयोजनविस्तृतम् ।
कस्तूरीकुङ्कुमै रम्यै: सुगन्धिचन्दनार्चितै: ॥
आहतं मङ्गलघटै: पल्लवप्रवसंयुतै: ।
दधिजातैश्च पर्व्वैश्च स्निग्धदूर्व्याङ्कुरै: शुभै: ॥
श्रीरामरम्भोद्भवभैरवैश्च मनोहरै: ।
पङ्कजविवहैश्च स्निग्धैश्चन्दनपल्लवै: ॥
चन्दनावृत्तमाल्यैश्च भूषणैश्च विभूषितम् ।
अमूल्यरत्नरचितं शतशृङ्गं मनोहरम् ॥
कोटियोजनमुद्दिश्य दैर्घ्ये दशगुणोत्तरम् ।
शैलप्रस्थं परिमितं पञ्चाशत्कोटियोजनम् ॥
अतीवकमनीयञ्च वेदैरनिर्व्वचनीयकम् ।
प्राकारमिव तस्यापि गोलोकस्य मनोहरम् ॥
परितो वेष्टितं रम्यं हीराहारसमन्वितम् ।
तत्र वृन्दावनं रम्यं युक्तं चन्दनपादपै: ॥
कल्पवृक्षैश्च रम्यैश्च मन्दारै: कामधेनुभि: ।
शोभितं शोभनाद्यैश्च पुष्पोद्यानैर्मनोहरै: ॥
क्रीड़ासरोवरै रम्यै: सुरम्यै रतिमन्दिरै: ।
अतीवरम्यं रहसि रासयोग्यस्थलान्वितम् ॥
रचितं रत्नकै रम्यैरसंख्यैर्गोपिकागणै: ।
परितो वर्त्तुलाकारं त्रिलक्षयोजनं वनम् ॥
षट्पदध्वनिसंयुक्तं पुंस्कोकिलरुतान्वितम् ।
तत्राश्रयवटो रम्यो रहस्येव हि विश्रुत: ॥
सहस्रयोजनोर्द्ध्वञ्च परितश्च चतुर्गुण: ।
गोपीनां कल्पवृक्षश्च सर्व्वबाञ्छाफलप्रद: ॥
क्रीड़ान्वितैराहृतश्च राधादासीजनैरपि ।
विरजातीरनारीभि: यमुनाप्रीतयेन च ॥
पुण्यान्वितेन मान्येन पवित्रेण सुगन्धिना ।
दासीगणैरसंख्यैश्च वृन्दावनविनोदिनी ॥
तत्र क्रीड़ति सा राधा मम प्राणाधिदेवता ।
सेयं श्रीदामशापेन वृषभानुसुताधुना ।
ब्रह्मादिदेवै: सिद्धेन्द्रैर्मुनीन्द्रै: पूजिता व्रज ॥"
इति ब्रह्मवैवर्त्ते भगवद्ब्रह्मसंवादे श्रीकृष्णजन्मखण्डे ८४ अध्याय: ॥
रासयात्रा, स्त्री, (रासस्य यात्रा उत्सव: ।) कार्त्तिकीपौर्णमासीकर्त्तव्यश्रीकृष्णोत्सवविशेष: । तद्विवरणं यात्राशब्दे द्रष्टव्यम् । ७ । अस्ति-विषयकरासयात्रा यथा,—
"पौर्णमास्यां रासयात्रां देवा: कुर्य्युर्नि-
शार्द्धके ।
पूर्व्ववत्पूजयित्वा देवीं देवासनं यजेत् ॥"
पौर्णमास्यां चैत्रपौर्णमास्याम् ।
"संसुखे रासमध्यानं भैरवीभैरवान्वितम् ।
ध्यात्वा तान् पूजयित्वा च आसनेत कुम्भचक्रवत् ॥
कोलाहलं नटद्गन्धर्व्वादीनृत्यै: सुगीतकै: ।
कुर्य्यादानन्दहृदय: साधक: स्थिरमानस: ॥
चित्तग्राह्यं न कुर्व्वीत देवीयात्रा सुखप्रदा ॥"
इति कामाख्यातन्त्रे ५४ पटल: ॥
रासेरस:, पुं, (रासे क्रीड़ाविशेषे य रस: । अनुकूलभाव: ।) गोष्ठी । रास: । प्रहार: । रसविद्वि: । रसाधार: । वहीभागरक: । इति मेदिनी । से, ६० । उत्सव: । इति शब्दरत्नावली । परिहास: । इति जटाधर: ॥
रासेश्वरी, स्त्री, (रासस्य ईश्वरी ।) राधा । यथा,—
"राधा रासेश्वरी रासवासिनी रसिकेश्वरी ।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १० अध्याय: ॥
रास्ना, स्त्री, (रसते इति । रस आस्वादने + "राजास्थासास्नायवागीवा: ।" उणा० ३ । १५ । इति नप्रत्ययेन साधु: । अमरमालातन्त्रता-

विशेषः। राजन इति हिन्दी भाषा। तत्पर्य्यायः। नाकुली २ सुरसा ३ सुगन्धा ४ गन्धनाकुली ५ नकुलेष्टा ६ भुजङ्गाक्षी ७ क्षुवाकीर्८ सुवहा ९। इत्यमरः॥ नाकुल्यादिपञ्चकं राजायाम्। नकुलेष्टादिचतुष्कं सर्पाख्यामित्याहुः। इति तट्टीकायां भरतः॥ रसा १० श्रेयसी ११ रसना १२ रसा१३ सुगन्धिमूला १४ रसाढ्या १५ अतिरसा १६ दीर्घगन्धिका १७ सर्पगन्धा १८ पलङ्कषा १९। इति जटाधरः॥ अस्या गुणाः। गुरुत्वम्। तिक्तत्वम्। उष्णत्वम्। विषवातासकासश्लीपकम्योदरश्लेष्मनाशित्वम्। पाचनत्वञ्च।

"राजा तु त्रिविधा प्रोक्ता मूलं पत्रं त्वगथा।
श्रेयौ मूलदलौ त्रिदौ त्वचा राजा तु मध्यमा॥"

इति राजनिर्घण्टः॥

अपि च।

"नाकुली सुरसा राजा सुगन्धा गन्धनाकुली।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी॥
नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत्।
भोगिभूतादृष्टिकाखुविषज्वरकफिमरुजान्॥"

इति भावप्रकाशः॥

राजा श्लेष्मावातघ्नी। इति राजवल्लभः॥ औषधिविशेषः। कांटा आमरली इति भाषा। तत्पर्य्यायः। एलापर्णी २ सुवहा ३ युक्तरसा ४। इत्यमरः॥ अपि च।

"राजा युक्तरसा रसा सुवहा रसना रसा।
एलापर्णी च सुरसा सुस्निग्धा श्रेयसी तथा॥
राजामपाचनी तिक्ता गुरूष्णा कफवातजित्।
श्लेष्मश्वासक्रमीरासवातशूलोदरापहा।
काश्यज्वरविषाश्लीतिवातिकामयदिग्धहृत्॥"

इति भावप्रकाशः॥

(रशना। यथा, वाजसनेयसंहितायाम्। १।३०।

"आदित्ये राजासि।"

"हे योक्त्र आदित्ये अदित्या भूत्वाऽसं राजासि रशना असि॥" इति तद्भाष्ये महीधरः॥ रत्नपत्नीनामन्यतमा। यथा, ब्रह्मवैवर्त्ते। १। ९। १३—१४।

"नामानि रत्नपत्नीनां सावधानं निबोध मे।
रत्ना कलावती काष्ठा कालिका कलहप्रिया॥
कन्दली भीषणा राज्ञा प्रलोचा भूषणा शुकी।
एतासां बहवः पुत्रा बभूवुः शिवपार्षदाः॥")

राहुः, पुं, (रह त्यागे + बहुलवचनात् उन्।) ग्रामः। इति संक्षिप्तसारोणादिवृत्तिः॥ (रहति गृह्णाति त्यजति चन्द्रमिति। रह त्यागे + बहुलवचनात् उन्। रहेर्नुग्वश्च। १। ९।) ग्रहविशेषः। तत्पर्य्यायः। तमः २ स्वर्भानुः ३ सैंहिकेयः ४ विधुन्तुदः ५। इत्यमरः॥ असुरिशेषः ६ ग्रहकक्षोलः ७ सैंहिकः ८ उपग्रहः ९ श्रीवत्सः १० उपरागः ११ सिंहिकासूनुः १२। इति शब्दरत्नावली। ज्ञानवर्त्मः १३ ज्ञानवान् १४। इति जटाधरः। अयुः १५ असुरः १६। इति ज्योतिस्तत्त्वम्। तस्योत्पत्त्यादिर्यथा,—

"सिंहिकायामथोत्पन्ना विप्रचित्तेश्चतुर्दश।
ग्रस्तः ग्रसनशीलश्च यज्ञः ग्राह्यस्तथैव च॥
श्वसनो नभसिंहश्चैव वातापी हरपो जिकः।
हरकल्पकलिनाभौ भीमश्च नरकस्तथा॥
राहुर्ज्येष्ठस्तेषां वै चन्द्रसूर्य्यप्रमर्दनः।
इत्येते सिंहिकापुत्रा देवैरपि दुरासदाः॥
दानवाभिजनाः क्रूराः सर्व्वे ब्रह्मद्विषस्तु ते।
दशान्यानि सहस्राणि सैंहिकेयो गवः स्मृतः॥
निहतो यामदग्न्येन भार्गवेण बलीयसा।
स्वर्भानोस्तु प्रभा कन्या पुलोमस्तु ग्रभौ सुता॥"

इति ब्रह्मपुराणे प्रजापतिसर्गनामाध्यायः॥*॥

तस्य शिरश्छेदकारणं यथा,—

"देवसिङ्घप्रतिच्छन्नः स्वर्भानुर्दैवसंसदि।
प्रविष्टः सोममपिबत् चन्द्रार्काभ्यां सूचितः॥
चक्रेण क्षुरधारेण जहार पिबतः शिरः।
हरिरूपस्य कबन्धस्तु सुधयाप्लावितोऽपतत्॥
शिरस्तमरतां नीतमजो ग्रहमचीकरत्पतत्।
यस्तु पर्व्वणि चन्द्रार्कावभिधावति वैरधीः॥"

इति श्रीभागवते ८ स्कन्धे ६ अध्यायः॥

स च मलयपर्व्वतजातः। शूद्रवर्णः। द्वादशाङ्गुलपरिमाणः। लक्षवर्णः। लक्षवक्त्रः। सिंहवाहनः। चतुर्भुजः। खड्गवरशूलचर्म्मधारी। खड्गास्त्रः। अस्य अधिदेवता कालः। प्रत्यधिदेवता सर्पः। इति ग्रहयज्ञतत्त्वम्॥ अस्य स्वरूपं ग्रन्थिवत्। स च चण्डालजातिः। सर्पाजातिः। अस्त्रिस्वामी नैर्ऋतदिक्स्वामी च। इति दृढ्यातकादयः॥ (राहुचारस्य फलाफलं दृढतुसंहितायाः ५ अध्यायतो द्रष्टव्यम्॥)

राहुग्राहः, पुं, (राहोर्ग्राहो ग्रहणं यत्र।) चन्द्रसूर्य्ययोर्ग्रहणम्। यथा,—

"राहुग्राहोऽर्केन्दोर्यत्र उपरागः उपग्रवः॥"

इति हेमचन्द्रः। २। ३६॥

(अत्र राहुग्रास इत्यपि पाठो दृश्यते॥)

राहुचक्रं, क्ली, (राहोश्चक्रम्।) रवादिसप्तवारेषु अभ्यगत्या वामावर्त्तेन यामार्द्धं प्राप्य सम्भवितु राहोर्गमनम्। यथा,—

"पश्चादर्के विधौ भौमे सौम्यां ग्रे वायवे कुजे।
रवौदिग्धि भृगौ याम्यां गुरावीशे ग्नौ दिने।
राहुर्ध्रमति यामार्द्धमभ्यगत्या च वामतः॥
द्यूते युद्धे विवादे च यात्रायां सम्मुखं स्थितम्।
राहुं विवर्ज्ज्येद्दूरयात्रादयदीक्षेत् कर्म्मजः फलम्॥"

इति सत्त्वज्ञसुक्तावली॥*॥

राहुकालानलचक्रं यथा,—

"तस्य चक्रं प्रवक्ष्यामि राहुकालानलाख्यकम्।
ग्रहाकाशसमं चक्रं ईशादौ क्षतिकादिका:॥
यत्र ऋक्षे स्थितो राहुर्वेदनं तद्विनिर्द्दिशेत्॥
सुखात् पञ्चदशे ऋक्षे तस्य पृच्छं व्यवस्थितम्।
अधोत्तरशतं स्थाता जायन्ते यत्र केतवः॥
प्राप्य तत्तुर्य्यगतं सर्व्वं सहस्राकैसमन्वितः।

राहुस्नानानि ऋक्षाणि जीवपत्ने त्रयोदश॥
त्रयोदशैव भोग्यानि मृतपत्ने प्रकीर्त्तयेत्।
मृतपत्ने सुखं तस्य गुदं जीवाङ्गमध्यगम्॥
एवमङ्गत्रयो राहुर्ज्ञातव्यः खरपारगैः।
जीवपत्ने त्रपानाशे मृतपत्ने रवौ स्थिते।
तस्मिन् काले शुभा यात्रा विपरीते तु
हानिदा॥"

इति खरोदयः॥

राहुच्छत्रं, क्ली, आर्द्रकम्। इति राजनिर्घण्टः॥

राहुदर्शनं, क्ली, (राहोर्दर्शनं यत्र।) राहोश्चाक्षुषज्ञानम्। ग्रहणमिति यावत्। यथा,—

"चक्षुषा दर्शनं राहोर्यत्तदृग्ग्रहणमुच्यते।
तत्र कर्म्माणि कुर्व्वीत गणनामात्रतो मतु॥
राहुदर्शनसंक्रान्तिविवाहाद्यत्रहिंसु।
ज्ञानमात्रन्तु कर्त्तव्यं दानश्राद्धविवर्ज्जितम्॥"

इति तिथ्यादितत्त्वम्॥

राहुभेदी, [न्] पुं, (राहुं भिनत्तीति। भिद् + णिनिः।) विष्णुः। इति जटाधरः॥

राहुमर्द्दभित्, पुं, (राहोर्मर्द्दनं भिनत्ति छिनत्तीति। भिद् + क्विप्।) विष्णुः। इति त्रिकाण्डशेषः॥

राहुरत्नं, क्ली, (राहुप्रियं रत्नम्। राहो रत्नमिति वा।) गोमेदकः। इति राजनिर्घण्टः॥

राहुलक्षः, पुं, वृक्षः। इति हेमचन्द्रः। २। १५१॥

राहुदृष्टसूतियोगः, पुं, (राहुणा दृष्टसूतेर्योगो मेलनम्।) एकराशिस्थितगुरुराहुः। गुरुचाण्डालियोग इति ख्यातः। तस्य कालाशुद्धिजनकत्वं यथा, भोजदेवव्यवहारसमुच्चये।

"सर्व्वं कार्य्यं न कर्त्तव्यं गुरौ सिंहेऽस्तगेऽपि च।
व्रतदीक्षे न कुर्व्वीत तमोयुक्ते दृष्टसूतौ॥"

तमोयुक्ते राहुयुक्ते। व्रतदीक्षे इति नित्येतरवैदिककर्म्मोपलक्षणम्। तथा च स्मृतिसारे ज्योतिषम्।

"एकराशौ स्थितौ स्यातां यदि राहुदृष्टसूतौ।
विवाहव्रतयज्ञादि सर्व्वं तत्र परित्यजेत्॥"

मलमासादुपक्रम्य भविष्ये।

"ऋक्षभेदेऽप्येकराशौ सन्धौ यदि मासयोः।
गुरौ राहोरपि तथा त्यजेदिष्टानि संयतः॥"

अत्र गुरोर्लक्षितत्वं हेतुः।

"यत्र यत्र स्थितो जीवस्तमोयोगेन लक्ष्यते।
उपहासाय किं न स्यादस्तङ्गो मनीषिणाम्॥"

इति मलमासतत्त्वम्॥*॥

अस्य प्रतिप्रसवो यथा,—

"कर्णाटगाटाङ्गकलिङ्गदेशे
दृष्टसूतौ राहुयुतौ विवाहः।
शेषेषु देशेषु न चास्ति दोषः
सर्व्वत्र कार्य्यं मुनयो वदन्ति॥"

इति दृढ्यातमार्त्तण्डधृतवचनमिति केचिद्वदन्ति॥

राहुसूर्य्यः, पुं, (राहोः सूर्य्यो यत्र।) उपरागः। इति हेमचन्द्रः॥

राहुहा, [न्] पुं, (राहुं हन्तीति। हन् + क्विप्।) विष्णुः। इति हेमचन्द्रः॥

राहूच्छिष्टः, पुं, (राहोरुच्छिष्टः।) लशुनः। इति त्रिकाण्डशेषः॥ (अस्य विवरणन्तु रसोनशब्दे द्रष्टव्यम्॥)

राहूत्सृष्टः, पुं, (राहुणा उत्सृष्टः परित्यक्तः।) लशुनः। इति हारावली। २२३॥ (अस्य विवरणं रसोनशब्दे द्रष्टव्यम्॥)

रि, ग्र गतौ। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) रेफादिः। ग्र, रियति। इति दुर्गादासः॥

रिक्तं, क्ली, (रिच् + क्तः।) शून्यम्। वनम्। इति मेदिनी। ते, ५०॥

रिक्तं, त्रि, (रिच् + क्तः।) निर्धनम्। इति शब्दरत्नावली॥ (शून्यम्। यथा, मनुः। ८।४०५।

"भाण्डपूर्णानि यानानि तार्थे दाप्यानि सारतः।
रिक्तभाण्डानि यत्किञ्चित् पुमांसञ्चापरिच्छदाः॥")

रिक्तकं, त्रि, (रिक्त + कन्।) शून्यम्। इत्यमरः। ३।१।१५६॥ (यथा, मनुः। ८। ४०४।

"पणं यानं तरे दाप्यं पौरुषेऽर्द्धपणं तरे।
यादं पशुञ्च योषिच्च पादार्द्धं रिक्तकः पुमान्॥")

रिक्ता, स्त्री, (रिच् + क्तः। टाप्।) तिथिभेदः। सा तु चतुर्थी नवमी चतुर्दशी च। यथा,—

"नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात्॥"

इति तिथ्यादितत्त्वम्॥

कर्म्मसु तस्या निषेधविधौ यथा,—

"नन्दा भद्रा जया रिक्ता पूर्णा नामसदृक्फलाः।"

न रिक्ता सर्व्वकर्म्मसु। इति ज्योतिःसारः॥

"चन्द्रे चार्कैऽर्कशुक्रविद्युते मध्येऽथवा पापयोर्लग्ना च व्यतिपातवैधृतिदिनं विद्धि च रिक्तां तिथिम्।
क्रूराहायनचेत्रभौमरहिते लग्नांशके मानुषे॥
रिक्तासु विधवाकन्या दर्शेऽपि स्याद्विवाहिता।
ग्रहैश्चरहिते चैव यदि रिक्ता तिथिर्भवेत्।
तस्मिन् विवाहिता कन्या पतिसन्तानवर्द्धिनी॥"

इति दीपिका॥

"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वा तिथौ सौम्यादित्यसितेन्दुजीववदिवसे पद्मे च लग्नेतरे॥"

इति शुभवत्रभौमः॥

"द्वादशी सप्तमी नन्दा रिक्तासु पञ्चपर्व्वसु।
वलमायुर्यशो हन्यात् श्रियूनामप्यभक्तिकम्॥"

इति ज्योतिश्चिन्तामणिः॥

"पूर्व्वेद्युरुक्तकलपेक्षमूलरहितेष्वृक्षेष्वरिक्ते तिथौ षष्ठे मासि सितेन्दुजीवदिवसे गोत्रार्थ मौनोदये।
संप्राप्ते पञ्चमे वर्षे अप्रसुप्ते जनार्द्दने।
षष्ठीं प्रतिपदञ्चैव वर्जयित्वा तथाष्टमीम्।
रिक्तां पञ्चदशीञ्चैव सौम्यभौमदिने तथा।
एवं सुनिश्चिते काले विद्यारम्भन्तु कारयेत्॥"

इति विष्णुधर्म्मोत्तरः॥

"पूर्व्वाग्नियाम्यधिष्ण्यचित्रग्निवान्त्यभेषु रिक्ताष्टमीं विगतचन्द्रतिथिं विहाय।
द्वाद्वालिगोसमुदये विकृताकिवारे
ग्रस्तेन्दुयोगकरणेषु हलप्रवाहः॥"

इति दीपिका॥

"चन्द्रार्कयोर्भवेत् पूर्णा कुजे भद्रा जया गुरौ।
बुधमन्दौ च नन्दायां शुक्रे रिक्तास्तिथिः॥"

इति भीमपराक्रमः॥

"सर्व्वत्र कार्य्ये बुधजीवशुक्राः
केन्द्रत्रिकोणोपगताः प्रशस्ताः।
तृतीयलाभारिगताश्च पापाः
क्षितिर्विरिक्ता शुभदस्य चाहः॥"

इति दीपिका॥

"चतुर्थी नवमी चैव रिक्ता चैव चतुर्दशी।
शुक्रे नन्दा बुधे भद्रा ग्रनौ रिक्ता कुजे जया।
गुरौ पूर्णा च संयुक्ता सिद्धियोगाः प्रकीर्त्तिताः॥
बुधमन्दगता नन्दा कुजे भद्रा जया गुरौ।
भृगुरिक्तान्वितं प्रोक्तं पूर्णा च रविचन्द्रयोः॥"

इति ज्योतिःसागरसारः॥

"षष्ठ्यष्टमीद्वादशीषु न गच्छेन्निदिनस्त्रियं।
पूर्णिमाप्रतिपदृर्क्षरिक्तावमदिनेषु च।
तथा यमद्वितीयायां यात्रायां मरणं भवेत्॥"

इति सत्तत्त्वसुक्तावली॥

रिक्थं, क्ली, (रिङ्क्ते बहिर्गच्छति गम्यतीति। रिच् + "पातृतुदिवचिरिचिसिचिभ्यस्थक्।" उणा०२।७। इति थक्।) धनम्। इत्यमरः। २।६।६०॥ (यथा, मनुः। ८। २७।

"बालदायादिकं रिक्थं तावद् राजानुपालयेत्।
यावत् स स्यात् समावृत्तो यावच्चातीतशैशवः॥")

रिक्थहारी, [न्] त्रि, (रिक्थं हरतीति। हृ + णिनिः।) दायादः। धनहारी। यथा।

"यदासौ नियुक्तो देवरादिः स्वयमप्यपुत्रोऽपुत्रस्य चेत्रे स्वपरपुत्रार्थं ग्रहीतोऽयं जनयति स द्विपिण्डको द्वासुश्यायणो द्वयोरपि रिक्थहारी पिण्डदाता च।" इति मिताक्षरायां दायभागः॥

रिक्थी, [न्] त्रि, (रिक्थमस्यास्तीति। रिक्थ + इनिः।) धनहारी। धनी। (यथा, याज्ञवल्क्यः। २। २६।

"योऽभियुक्तः परेतः स्यात् तस्य रिक्थी तदुद्धरेत्॥")

रिक्षा, स्त्री, ऋक्षा। भालुका। इति हेमचन्द्रः। ३। २७४॥

रिख, ट सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ट, रिख्यते। इति दुर्गादासः॥

रिग, ट गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ट, रिग्यते। इति दुर्गादासः॥

रिङ्गणं, क्ली, (रिङ्ग + ल्युट्।) खलनम्। इति हेमचन्द्रः। ६। १५६॥ (यथा,—

"सुक्षाथ रिङ्गणविधिं पादचंक्रमणक्षमः।
कुमारः पञ्चवर्षीयः कलाभ्यासं विधास्यति॥")

रिङ्गणं, क्ली, (रिङ्ग + ल्युट्।) खलनम्। इत्यमरः॥ "ये धर्म्मादुपचितादप्रतिष्ठायां स्वकीयविधानादन्यथाभावे इत्यर्थः। औचित्यात् पिच्छिलादेश्च खलने। इति रमानाथः॥ धर्म्मविलङ्घनं रिङ्गणमिति स्वामी॥ बालानां हस्तपादाभ्यां चलनं रिङ्गणम्। पिच्छिलादौ पतनं खलनमित्यन्ये। एतन्मते भेदेऽप्यभेदोपचारेण सर्व्वे इत्युक्तम्। रग रिग लिगि गतौ अनट्। रिङ्गयमिति पाठे रिख रिख रिखि सर्पणे इत्यस्य रूपम्।" इति भरतः॥

रिच, क्रि सम्पर्कवियोगयोः। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-अक०-सेट्।) किरेचयति रेचति। रिङ्क्ते रिपुर्यदाक्रान्तो धनैर्मन्त्रैश्च रेचति। रेचयन्ति च तन्मार्य्य इति हलायुधः। इति दुर्गादासः॥

रिच, हर् ध च औ विरेके। इति कविकल्पद्रुमः॥ (रुधा०-उभ०-अक०-अनिट्।) विरेकः पौनःपुन्येन पुरीषोत्सर्गः। इति चतुर्भुजः। हर्, अरिचत् अरेचीत्। ध च, रिणक्ति रिङ्क्ते अतिसारकी। औ, रेक्ता। इति दुर्गादासः॥

रिण, ङ ऋण्यर्थे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋण्यर्थे भर्त्सने। ङ, रेणते। इति दुर्गादासः॥

रिधमः, पुं, कामः। वसन्तः। इति विश्वः॥

रिपुः, पुं, (अनिष्टं रपतीति। रप वाचि + "रपेरिचोपधायाः।" उणा० १। २७। इति कुः इकारश्चोपधायाः। "रिप कत्थनयुद्धनिन्दाहिंसादानेषु। 'रुंधेः किच्च।' उणा० १। १४। इति बाहुलकादुप्रत्ययः। रिपतीति केचित् पठन्ति। तत्र बाहुलकादेव ककारस्य प्रकारः। रिपति मोक्षार्थं बुध्यते हिनस्ति वा निन्दति च सत्पुरुषैः।" इति निघण्टुटीकायां देवराजयज्वा। ३। २४। ४।) शत्रुः। इत्यमरः। २। ८। १०॥ (यथा, हितोपदेशे।

"नकश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।
कारणादेव जायन्ते मित्राणि रिपवस्तथा॥")

शरीरस्थषड्रिपवो यथा। कामः क्रोधः लोभः मोहः मदः मात्सर्य्यञ्च। तथा हि।

"आत्माय योगमवाप्य च वैरिषट्कमावध्य चेन्द्रियगणं मनसि प्रसन्ने॥"

इत्यादि तन्त्रसारे सुवनेश्वरीस्तोत्रम्॥ ● ॥

चोरकनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

जयापिप्पल्या षड्भेदयम्। तत्पर्य्यायः। षट्कोशम्। २ रिपुमन्दिरम्। ३। यथा,—

"धीस्थानं पञ्चमं ज्ञेयं यामित्रं षष्ठमं स्मृतम्।
द्यूनं सूनं तथाष्टस्थं षट्कोशं रिपुमन्दिरम्॥"

अपि च।

"सुनीचगेऽस्तगेऽपि वा रिपोर्यदे स्थिता ग्रहाः।
तथा बलं प्रकीर्त्तितं समक्षमेव सूरिभिः॥"

अग्नेश्च।

"अरातिस्थगतो भौमे षष्ठे चाष्टमे ऋणुरन्ध्रगे।
अयस्य द्वादशस्थाने वैपरीत्येन चिन्तनम्॥"

इति ज्योतिस्तत्त्वम्॥

(ध्रुवपुत्रस्य शिष्टेः पुत्रः। यथा, हरिवंशे। २। १४-१५.
"तस्मात्शिष्टिश्च भव्यश्च ध्रुवात् श्लम्भुर्व्यजायत।
शिष्टेराधत्त सुच्छाया पञ्चपुत्रानकल्मषान्॥
रिपुं रिपुञ्जयं पुण्यं वृकलं वृकतेजसम्॥"
यदोः पुत्रः। यथा, भागवते। ६। २३। २०।
"यदोः सहस्रजित् क्रोष्टानलोरिपुरितिश्रुताः॥")
रिपुघातिनी, स्त्री, (रिपुं हन्तीति। हन+णिनिः।) लताविशेषः। कुचुर इति भाषा। यथा,
"कुचिका वकुचिस्तौर्वा कुचिका रिपुघातिनी।"
इति शब्दचन्द्रिका॥
रिपृप, प अ वधे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) नोपधः। प अ, रिम्फति रिरिम्फ। सप्तमस्वरादिरयमित्यन्ये। इति दुर्गादासः॥
रिपर्ण, क्ली, लवणेक्षया द्वादशराशिः। यथा,—
"कर्मस्थानच दशमं खं मेसूरत्रमाखदम्।
छिद्राख्यमष्टमं स्थानं रिपर्णाख्य द्वादशं स्मृतम्॥"
तत्र चिन्तनीयं यथा,—
"प्राप्तायावय चिन्तयेद्भवगृहे रिपर्णेऽथ मन्त्रिव्ययौ
सौम्यस्वामियुतौचितेरुपचितिस्त्रेषां चतिस्त्र्यथा॥"
इति ज्योतिस्तत्त्वम्॥
रिप्रः, त्रि, (रीङ् स्रवणे+"लीड्रीङो ड्रक्षच्च पुट्च तरौ क्षैवक्लृप्तितयोः।" उणा०५। ५५। इति रप्रत्ययः। धातोर्ङ्रक्षः। प्रत्ययस्य पुट्च।) अधमः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, ऋग्वेदे। ६। ७८। १।
"गृभ्णाति रिप्रमविरस्य तान्वा।'
"रिप्रं अनुपादेयत्वेन पापरूपम्॥" इति तद्भाष्ये सायणः॥ क्ली, पापम्। यथा, ऋग्वेदे। १०। १७०। १०।
"विश्वं हि रिप्रं प्रवहन्ति देवीः॥"
"देवीर्दैव्यः देवनशीला आपः विश्वं सर्वं रिप्रं पापं प्रवहन्ति पुरुषसकाशात् प्रगमयन्ति अपनयन्तीति यावत्।" इति तद्भाष्ये सायणः॥)
रिप्रवाहः, त्रि, पापवाहकः। यथा,—
"ऋषादमग्निं प्रहिणोमि दूरम्।
यमराज्यं गच्छतु रिप्रवाहः॥"
इति भवदेवभट्टोक्तकृष्णब्रिकापद्धतिः॥
"रिप्रं पापं वहतीति रिप्रवाहः।" इति तट्टीकायां गुणविष्णुः॥ "स प्रहितः ऋषादमग्निः यमराज्यं गच्छतु यमस्य राज्यं प्रति व्रजतु। किम्भूतः रिप्रवाहः रिप्रमिति पापनाम। रिप्रं पापं वहति नाशयति रिप्रवाहः।" इति वाजसनेयसंहिताभाष्ये महीधरः। ३५। १६॥
"रिप्रवाहः रिप्रं पापं तस्य वोढा सोऽग्निः यमराज्ञः यमो राजा येषां तानि यमराजकानि अन्यप्रदेशान् गच्छतु प्राप्नोतु।" इति ऋग्भाष्ये सायणः। १०। १६। ८॥)
रिफ, कुत्सने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सौत्रधातुरयम्। रिप्पः रेफः। इति दुर्गादासः॥
रिफ, ग्र अर्पे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) ग्र, रिफति। अर्पो दानज्ञाधाहिंसानिन्द्यायुद्धानि। इति दुर्गादासः॥
रिव, ट गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ट, रिव्यते। इति दुर्गादासः॥
रिभ, रवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) विरिभ्वः। इति दुर्गादासः॥
रिमेदः, पुं, अरिमेदः। इति राजनिर्घण्टः॥
ररी, स्त्री, पित्तम्। इति हेमचन्द्रः। ३। ११४॥
रिव, ट व्रजे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ट, रिव्यते। व्रजो गतिः। इति दुर्गादासः॥
रिश्र, औ ग्र हिंसे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-अनिट्।) औ, अरिश्रत्। ग्र, रिश्रति। रेश्यति। इति दुर्गादासः॥
रिश्रः, पुं, (रिश्रते हिंसते इति। रिश्र+क्यप्।) खगः। इति त्रिकाण्डशेषः॥
रिष, वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेषति। इति दुर्गादासः॥
रिषिः, पुं, ऋषिः। ऋषन्ति ज्ञानसंसारयोः पारं गच्छन्ति ऋषयः। ऋषी ग्र गतौ नाञ्चीति किः। रिषिर्हंसादिश्च। विद्याविदग्धमतयो रिषयः प्रसिद्धाः। इति प्रयोगात्। स्त्रियां ऋषी च। इत्यमरटीकायां भरतः॥
रिष्टं, क्ली, (रिष्+क्तः।) क्षेमम्। कल्याणम्। अशुभम्। अमङ्गलम्। (यथा, मार्कण्डेये। ५०। ८६।
"स्त्रीकौपिधाने यज्ञाभिदंशो दन्तौपवेन वा।
यद्दृष्टं तत्र हि रिष्टानामशेषाणां समाश्रयः॥") अभावः। नाशः। इत्यमरभरतौ॥ अशुभस्याभावः। इति केचित्। इति भरतः॥ पापम्। इत्यजयः॥ तद्वति, त्रि॥
रिष्टः, पुं, (रिष्+क्तः।) खड्गः। पेचिलः। स तु रक्तग्रियुः। इति मेदिनी। टे, २७॥
रिष्टकः, पुं, (रिष्ट एव। स्वार्थे कन्।) रक्तग्रियुः। इति शब्दरत्नावली॥
रिष्टिः, पुं, (रेवति हिनस्तीति। रिष्+क्तिच्।) खड्गः। इति मेदिनी। टे, २७॥
रिष्टिः, स्त्री, (रिष्+क्तिन्।) अशुभम्। इति मेदिनी। टे, २७॥ गृध्रभेदः। इति शब्दरत्नावली॥
रिष्यः, पुं, (रिष्यते इति। रिष्+क्यप्।) मृगविशेषः। यथा,—
"ऋष्य ऋष्यो रिश्यो रिष्य एणः स्यादेणकोऽपि च।"
इति शब्दरत्नावली॥
रिष्यः, त्रि, (रिष वधे+"सर्व्वनिघृष्वरिभ्येति।" उणा० १। १५३। इति वनृप्रत्ययेन साधुः।) वधकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
रिह, वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेहति। इति दुर्गादासः॥
री, श्वी ङ य शब्दे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-अनिट्।) श्वी, रीयः। ङ य, रीयते पयः। इति दुर्गादासः॥
री, गि रवे। वधे। गतौ। इति कविकल्पद्रुमः॥ (क्र्या०-पृ०-पर०-अक०-सक० च-अनिट्।) गि, रिणाति रीयः रिरिः। रव; शब्दः। तथा च कातन्त्रादौ री गतिरेषयोः। रेषणं वृक-ध्वनिरिति रमानाथः। रिणाति रेषते वृकः। इति शब्दार्थे भट्टमल्लः। इति दुर्गादासः॥
री, स्त्री, (री+क्विप्।) गतिः। इति शब्दरत्नावली॥ रवः। वधः। इति रीधात्वर्थदर्शनात्॥
रीण्या, स्त्री, घृणा। यथा। मोहो रीण्या जुगुप्सा च घृणीया घृणिया घृणेति वाचस्पतिः। अयन्तु लक्षायां प्रसिद्धेः प्रमादात् घृणायां प्रयुक्त इति कश्चिन्। इत्यमरटीकायां भरतः॥
रीठा, स्त्री, रीठाकरञ्जः। इति राजनिर्घण्टः॥
रीठाकरञ्जः, पुं, खगमख्यातवृक्षः। तत्पर्य्यायः। गुच्छकः २ गुच्छपुष्पकः ३ रीठा ४ गुच्छफलः५ अरिष्टः ६ मङ्गल्यः ७ कुम्भबीजकः८ प्रकीर्य्यः९ सोमवल्कः १० फेनिलः ११। अस्य फलगुणाः। तिक्तत्वम्। उष्णत्वम्। कटुत्वम्। स्निग्धत्वम्। वातकफकुष्ठकण्डूतिविषविष्फोटनाशित्वञ्च। इति राजनिर्घण्टः॥
रीढ़कः, पुं, पृष्ठवंशः। इति हेमचन्द्रः। ३। २४५॥
रीढ़ा, स्त्री, (रिह वर्धे+औणादिकः क्तः।) अवज्ञा। इत्यमरः। १। ७। २३॥
रीर्यं, त्रि, (री+क्तः। ओदितश्चेति नः।) सुतजलादि। चरितम्। इत्यमरः। ३। १। ८२॥
रीतिः, स्त्री, (री+क्तिच् क्तिन् वा।) आरकूटः। (तत्पर्य्यायगुणा यथा,—
"पित्तलञ्चारकूटं स्यादरो रीतिश्च कथ्यते।
राजरीतिर्म्म धरीतिः कपिला पिङ्गलापि च॥
रीतिरप्युपधातुः स्यात्ताम्रस्य यद्गदस्य च।
पित्तलस्य गुणा ज्ञेयाः खयोनिसदृशा जने॥
संयोगजप्रभावेण तस्याप्यत्र गुणाः स्मृताः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) प्रचारः। स्वनः। इत्यमरः। २। ८। ८०॥ ३। ३। ६८॥ लोहविकृतिः। इति मेदिनी। ते, ५०॥ दन्तक्षर्जादिमलम्। इति धरणिः॥ सीमा। सवनम्। गतिः। स्वभावः। शैवस्य पर्य्यायः। रूपम् २ तत्त्वम् ३ भावः ४ आत्मा ५ प्रकृतिः ६ सहजः ७ रूपतत्त्वम् ८ धर्म्मः ९ सर्गः १० निसर्गः ११ शीलम् १२ सतत्त्वम् १३ संस्थितिः १४। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। १४। ६२।
"निशान्तस्त्रिदशक्रीडारीतिवृद्धो रसक्रमः॥"

स्तुतिः । यथा, ऋग्वेदे । २ । २४ । १४ ।
"महीव रीतिः श्रवसायतत् पृथक् ॥"
"महीव रीतिः महती स्तुतिरिव ।" इति तद्भाष्ये सायणः ॥) कायस्थात्मा । इति वामनस्तुतम् । गुणभेदेन तद्विभागमाह ।
"ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः ।
गौड़वैदर्भपाञ्चालरीतयः परिकीर्त्तिताः ॥"
प्रत्येकेनैषां लक्षणानि यथा,—
"ओजः समासभूयस्त्वं मांसलं पदडम्बरम् ।
अक्लार्थपदमग्राम्यं प्रसादः परिकीर्त्तितः ॥
ग्रन्दार्थयोस्तु रसवन्मधुरं परिकीर्त्तितम् ।
सर्व्वलोकावगम्यं यदग्राम्यं तदभिधीयते ।
सुश्राव्यमपि गम्भीरं प्रसन्नमुपनागरम् ॥"
ग्राम्यं यथा,—
"कन्ये मन्येऽयौ धन्यो यस्यामद्य विवाहयेत् ।
नाल्पेन तपसा लभ्यः सुन्दरश्रोसमागमः ॥"
उपनागरं यथा—
"तन्वि तदधरं स्वादु नाविदन्नविदो जनाः ।
वसुधायां सुधाभावान्नृष्वा स्वर्गं ययासवः ॥
ग्रन्दालङ्करणं तत् स्यादयदनुप्रासभास्वरम् ।
वर्णावृत्तिरनुप्रासः पदे पादे विधीयते ।
पदावृत्तिस्तु यमकमादिमध्यान्तसर्व्वगम् ॥" ॥
क्रमेण रीतित्रयाभासदाहरणानि ।
"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्पथि-
स्फूर्ज्जत्पुण्यतृणच्छटाभिरभितः सम्भृतिचमत्कारस्फुरत्-
सम्भ्रमा ।
आनन्दाश्रुतवापिकां विदधती चित्ते गिरीश्र-
प्रभो-
र्यां पायान्नवसङ्गमे भगवती सञ्जावती
पार्व्वती ॥
भवतो विरूढ़याधिमधिगम्य सम्भ्रमा ।
कामिनी यामिनीकान्तं क्षतान्तमिव पश्यति ॥
हन्तालि सन्तापनिवृत्तयेऽस्याः
किं तालवृन्तं तरलीकरोषि ।
उत्ताप एषोऽन्तरतापहेतु-
र्नंतभ्रुवो मन्मथजापनेयः ॥"
इति काव्यचन्द्रिका ॥
(अस्या अन्यद्विवरणं साहित्यदर्पणे ६ परिच्छेदे द्रष्टव्यम् ॥)

रौतिकं, क्ली, पुष्पाञ्जनम् । इति राजनिर्घण्टः ॥

रौतिका, स्त्री, कुसुमाञ्जनम् । इति ग्रन्दचन्द्रिका पित्तञ्च ॥ (यथा, वृहत्संहितायाम् । ५७८ ।
"अर्द्धौ सौरकभागाः कांस्यस्य द्वौ तु रौतिका-
भागः ।
मयकथितो योगोऽयं विज्ञेयो वयसंघातः ॥")

रौतिपुष्पं, क्ली, (रौतेः पित्तलस्य पुष्पमिव । तदाकृतित्वात् ।) कुसुमाञ्जनम् । इत्यमरः । २ । ६ । १०३ ॥

रीव, ऋ ञ गतौ वे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ, अरिरीवत् । ञ, रीवति रीवते । वौ वो ग्रहणसंवरणयोः । इति दुर्गादासः ॥

रु, ड वधे । गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ड, रवते । इति दुर्गादासः ॥

रु, ल ध्वनौ । इति कविकल्पद्रुमः ॥ (अदा०-पर०-अक०-सेट् ।) ल, रौति रवीति पक्षी । इति दुर्गादासः ॥

रुः, पुं, ग्रन्दः । इत्येकाक्षरकोषः ॥

रुक्, त्रि, बहुप्रदः । इति ग्रन्दमाला ॥

रुक्, [च्] स्त्री, (रुच्+भावे क्विप् ।) ग्रोभा । (यथा, माघे । ४ । ६६ ।
"दधद्भिरभितस्तटौ विकचवारिजाभ्यूनदे-
र्विनोदितदिनक्लमाः क्षतरुचश्च जाम्बूनदेः ॥")
द्युतिः । (यथा, किरातें । ५ । ४५ ।
"क्षिपति योऽनुवनं वितता हरिद्-
दृहतिकामिव रौक्मनिकीं रुचम् ॥")
इच्छा । इति मेदिनी ॥ (यथा, महाभारते । १३ । १२४ । २८ ।
"नागायुतद्विरुचो लोके मनुष्यान्नमिच्छसि ।
यद्दातुं स्वर्गगे सर्व्वांस्तेनापि हरिमः क्षयः ॥"
तेजः । यथा, रघुः । ६ । ६ ।
"अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा ॥")
ग्रारिकाशुकवाक् । इति ग्रन्दरत्नावली ॥

रुक्, [ज्] स्त्री, (रुज्+क्विप् ।) रोगः । इत्यमरः । २ । ६ । ५१ ॥ (यथा, भागवते । ६ । १ । ८ ।
"दोषस्य दृष्ट्वा गुरु लाघवं यथा
भिषक् चिकित्सेत रुजां निदानवित् ॥"
रुजति पीड़यतीति । पीड़ादायके, त्रि । यथा, महाभारते । ५ । ८४ । १ ।
"प्रयान्तं देवकीपुत्रं परवीररुजो दृश ।
महारथा महाबाहुमन्वयुः शस्त्रपाणयः ॥"
अथवा परस्य वीराणां रुक् येति ॥)

रुक्प्रतिक्रिया, स्त्री, (रुजः प्रतिक्रिया निरसनम् ।) चिकित्सा । इत्यमरः । २ । ३ । ५० ॥

रुक्मं, क्ली, (रोचते ग्रोभते इति । रुच्+"ग्रुजिरुचितिजां कुच्च । उणा० १ । १४५ । इति मक् कवर्गस्य चान्तादेग्रः ।) काञ्चनम् । (यथा, रामायणे । २ । ७० । २१ ।
"रुक्मनिष्कसहस्रे द्वे धौतशस्त्रशतानि च ।
सतूणश्च कैकयीपुत्रं कैकेयो धनमादिशत् ॥")
धुस्तूरम् । इत्यमरः ॥ लोहम् । इति मेदिनी । मे, १८ । (अस्य पर्य्यायो यथा,—
"क्षयायसं कालतोहं रुक्मं तत्तीक्ष्णमध्यथ ।"
इति वैद्यकरत्नमालायाम् ॥)
नागकेग्रम् । इति राजनिर्घण्टः ॥ (वर्णे, पुं । इति उज्ज्वलदत्तः । १ । १४५ ॥ रौप्यनिर्म्मिते, त्रि । यथा, ऋग्वेदे । ५ । ६१ । १२ ।
"दिवि रुक्म इवोपरि ॥"
"दिवि द्युलोके रुक्मो रोचमान आदित्य इव ।"
इति तद्भाष्ये सायणः ॥)

रुक्मकारकः, पुं, (रुक्मं स्वर्णालङ्कारं करोतीति । कृ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ततः स्वार्थे कन् ।) स्वर्णकारः । इत्यमरः । २ । १० । ८ ॥

रुक्माङ्गदः, पुं, राजविग्रेषः । यथा । अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नरपतिर्दिग्विजययात्रापारक्रमेणागत्य चन्द्रभागानदीतीरे समावेग्रितकटको वर्त्तते । इत्यादि हितोपदेग्रे १ परिच्छेदः ॥

रुक्मिणी, स्त्री, (रुक्मो वर्णोऽस्त्यस्या इति । रुक्म+इनिः । ङीप् ।) लक्ष्मीमहिषीविग्रेषः । तत्पर्य्यायः । ह्रीः २ रमा ३ सिन्धुजा ४ सामा ५ चला ६ हीरा ७ चपला ८ इवाकपायी ९ चपला १० इन्दिरा ११ लक्ष्मीः १२ पद्मालया १३ पद्मा १४ कमला १५ श्रीः १६ हरिप्रिया १७ । इति जटाधरः ॥ अस्या विवरणं यथा,
"विदर्भराजो धर्म्मात्मा भीष्मको नाम धार्म्मिकः ।
बभूवुस्तस्य पुत्रास्तु नाना रुक्मादयः शुभाः ॥
तेषामवरजा कन्या रुक्मिणी रुक्मवर्ज्जिनी ।
कमलांग्रेन सम्भूता सर्व्वलक्षणशोभिता ॥
राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
साक्षाल्लक्ष्मीस्तु विज्ञेया प्राकटेनैव पार्व्वति ॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥॥
(रुक्मिण्या सह ग्रिग्रुपालस्य विवाहवोधना श्रीकृष्णस्य रुक्मिणीहरणं कृतायाञ्च तस्यां यादवैः सह राज्ञां तुमुलयुद्धादिकं हरिवंग्रे । ११६ अध्याये द्रष्टव्यम् ॥॥ नारदस्य रुक्मिण्यै पारिजातपुष्पप्रदानवृत्तान्तं तत्रैव च १२२ अध्याये द्रष्टव्यम् ॥॥ अस्याः सन्ततिनामानि यथा तत्रैव । १६० । ४—६ ।
"————————रुक्मिणीतनयान् शृणु ।
प्रद्युम्नः प्रथमं यत्ने शम्बरान्तकरः सुतः ।
द्वितीयश्चारुदेष्णश्च वृष्णिसिंहो महारथः ।
चारुभद्रश्चारुगर्भः सुदंष्ट्रो ह्यम एवच ॥
सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ।
चारुबाहुः कनीयांश्च कन्या चारुमती तथा ॥")
स्वर्णचौरी । इति राजनिर्घण्टः ॥

रुक्मिणीव्रतं, क्ली, (रुक्मिण्या व्रतम् ।) व्रतविग्रेषः । यथा,—
सूत उवाच ।
"जामदग्न्यः समाकर्ण्य रमां तां पुत्रगर्द्धिनीम् ।
कल्कैरभिमतं बुद्ध्वा कारयद्रुक्मिणीव्रतम् ॥
व्रतेन तेन च रमा पुत्राढ्या सुभगा सती ।
सर्व्वभोगेन संयुक्ता बभूव स्थिरयौवना ॥
शौनक उवाच ।
विधानं ब्रूहि मे सूत व्रतस्यास्य च यत् फलम् ।
पुरा केन कृतं धर्म्मं रुक्मिणीव्रतमुत्तमम् ॥
सूत उवाच ।
शृणु ब्रह्मन्! राजपुत्री ग्रर्म्मिष्ठा वार्षपर्व्वणी ।
अवगाह्य सरोनीरं सोमं हरमपश्यत ।
सा सखीभिः परिवृता देवब्राह्मणा च संगता ।
शम्भुभीत्या समुत्थाय पर्य्यधुर्व्वसनं हृतम् ।
तत्र शुक्रस्य कन्या या वक्षयत्नाभासमालभः ।
संलक्ष्य कुपिता प्राह वसनं त्वज भिक्षुकि ! ॥

इति दानवकन्या सा दासीभिः परिवारिता।
तां तस्या वाससा बद्ध्वा कूपे चिप्त्वा गता गृहम्॥
तां कूपमग्नां रुदतीं जलार्द्रां नहुषात्मजः।
करे स्पृष्ट्वा समुद्धृत्य प्राह का त्वं वरानने॥
सा शुक्रपुत्री वसनं परिधाय ह्रिया भिया।
ग्लानिस्थया कृतं सर्वं प्राह राजानमीक्षती॥
ययातिस्तदभिप्रायं ज्ञात्वानुनय्य श्लोभनाम्।
आश्वास्य तां ययौ गेहं तस्याः परिजनाहृतः॥
सा गत्वा भवनं शुक्रं प्राह ग्लानिस्थया कृतम्।
तच्छ्रुत्वा कुपितं विप्रं वृषपर्वाह सान्त्वयन्॥
दह्यां मां दह्य विभो रोषो यद्यस्ति ते मयि।
ग्लानिष्ठां वाप्यपत्नीतां कुरु यत्तनसेप्सितम्॥
राजानं प्रणतं पादे पितुर्दृष्ट्वा रुषाब्रवीत्।
देवयानी प्रियं कन्या मम दासी भवत्विति॥
समानीय तदा राजा दास्ये तां विनियुज्य सः।
ययौ निजगृहं ज्ञानी देवं परमकं स्मरन्॥
ततः शुक्रसमानीय ययातिं प्रतिलोमकम्।
तस्मै ददौ तां विधिवत् देवयानीं तया सह॥
दत्त्वा प्राह नृपं विप्रोऽयेनां राजसुतां यदि।
शयने नयसे सद्यो जरा त्वामुपभोक्ष्यति॥
शुक्रस्येतदचः श्रुत्वा राजा तां वरवर्णिनीम्।
अदत्त्वा स्थापयामास देवयान्यनुगां भिया॥
सा ग्लानिष्ठा राजपुत्री दुःखशोकभयाकुला।
नित्यं दासीवृत्तावीर्ष्या देवयानीन्तु सेवते॥
एकदा सा वनगता रुदती जाह्नवीतटे।
विश्वामित्रं मुनिं सा तं दृष्ट्वा क्षीभिराहृतम्॥
व्रजिनं पुण्यगन्धाभिः सुरूपाभिः सुभाषितम्।
कारयन्तं व्रतं माल्यधूपदीपोपहारकैः॥
निर्म्मायाष्टदलं पद्मं वेदिकायां सुचिह्नितम्।
रम्भापोतैश्चतुर्भिस्तु चतुष्कोणं विराजितम्॥
वाससा निर्म्मितगृहे सर्वपट्टैर्विचित्रिते।
निर्म्मितश्रीवासुदेवं नानारत्नविचित्रितम्॥
पौरुषेण च सूक्तेन नानागन्धोदकैः शुभैः।
पञ्चाङ्गतैः पञ्चगव्यैर्यामलैर्हविषैरितैः॥
स्नापयित्वा महापीठे कर्णिकायां प्रपूजयन्।
यत्नभिदृग्भिर्व्यापि षोडशैरुपचारकैः॥
पाद्यमर्घ्यमथाचमं श्रीतलं सुमनोहरम्।
परमानन्दजनकं गृहाण परमेश्वर॥
दूर्व्वाचन्दनगन्धाढ्यमर्घ्ययुक्तं प्रयत्नतः।
गृहाण रुक्मिणीकान्त प्रपन्नस्य मम प्रभो॥
नागतीर्थाद्भवं वारि सुगन्धि सुमनोहरम्।
गृहाणाचमनीयं त्वं श्रीनिवास श्रिया सह॥
नानाकुसुमगन्धाढ्यं सूक्तग्रथितसुस्तवम्।
वस्त्रशोभाकरं चारु माल्यं नय सुरेश्वर॥
तनुवस्त्रानसन्धानरचितं वन्दन हरे।
गृहाणावरणं शुद्धं निरावरण सप्रिय॥
यज्ञसूत्रमिदं देव प्रजापतिविनिर्म्मितम्।
गृहाण वासुदेव त्वं रुक्मिण्या रमया सह॥
नानारत्नसमायुक्तं सर्वसूक्तादिचर्चितम्।
प्रियया सह देवेश गृहाणाभरणं मम॥
दधिक्षीरगुडाज्यादिपूपलड्डुकखण्डकान्।
गृहाण रुक्मिणीनाथ सनाथं कुरु मां प्रभो॥
कर्पूरागुरुगन्धाढ्यं परमानन्ददायकम्।
धूपं गृहाण वरद वेदभोग्या प्रियया सह॥
भक्तानां गेहसक्तानां संसारध्वान्तनाशनम्।
दीपमालोकय विभो जगदालोकनादर॥
श्यामसुन्दर पद्माक्ष पीताम्बर चतुर्भुज।
प्रपन्नं पाहि देवेश रुक्मिण्या सहितोच्युत॥
इति तासां व्रतं दृष्ट्वा मुनिं नत्वा सुदुःखिता।
ग्लानिष्ठा मिष्टवचना कृताञ्जलिरुवाच ताः॥

ग्लानिष्ठोवाच।

राजपुत्री दुर्भगां मां स्वामिना परिवर्ज्जिताम्।
चातुर्मास्यं हे देव्यो व्रतेनानेन कर्म्मणा॥
श्रुत्वा तु ता वचस्तस्याः कारुण्याच्च कियत् कियत्।
पूजोपकरणं दत्त्वा कारयामासुरादरात्॥
व्रतं कृत्वा तु ग्लानिष्ठा लब्ध्वा स्वामिनमीश्वरम्।
सुखी पुत्रान् सुसम्पन्ना समभूत् स्थिरयौवना॥
सीता चाशोकवनिकामध्ये सरमया सह।
व्रतं कृत्वा पतिं लेभे रामं राक्षसनाशनम्॥
हरदत्तप्रसादेन कृत्वेदं द्रौपदी व्रतम्।
पतियुक्ता दुःखमुक्ता बभूव स्थिरयौवना॥
तथा रमा चिते पक्षे वैशाखे द्वादशीदिने।
जामदग्न्याद्व्रतं चक्रे पूर्णे वर्षचतुष्टयम्॥
पट्टसूत्रं करे बद्ध्वा भोजयित्वा द्विजान् बहून्।
भुक्त्वा हविष्यं चीराक्तं सुमिष्टं स्वामिना सह॥
बुभुजे पृथिवीं सर्व्वामपूर्व्वां स्वजनैर्वृता।
सा पुत्रौ सुषुवे साध्वी मेघमालबलाहकौ॥
देवानामुपकर्त्तारौ यज्ञदानतपोव्रतौ।
महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ॥
व्रतवरमिति श्रुत्वा सर्व्वसम्पत्प्रदाता
भवति विदिततत्त्वा पूजिता पूर्णकामा।
हरिचरणसरोजद्वन्द्वभक्तैकताना
व्रजति गतिमपूर्व्वां ब्रह्मविष्णोरगम्याम्॥"

इति कल्किपुराणे रुक्मिणीव्रतम् ३१ अध्यायः॥

रुक्मिदर्पः, पुं, (रुक्मिणि भीष्मकपुत्रे दर्पो यस्य सः। तस्य रुक्मिनाशकत्वात्।) बलदेवः। इति हलायुधः॥

रुक्मिदारी, [न्] पुं, (रुक्मिणं दारयतीति। दृ+णिच्+णिनिः।) बलदेवः। इति त्रिकाण्डशेषः॥

रुक्मिभित्, [द्] पुं, (रुक्मिणं भिनत्तीति। भिद्+क्विप्।) बलदेवः। इति हेमचन्द्रः। २। १६८॥

रुक्मी, [न्] पुं, (रुक्मो वर्णविशेषोऽस्यास्तीति। रुक्म+इनिः।) भीष्मकराजज्येष्ठपुत्रः। यथा,
"राजासीद्भीष्मको नाम विदर्भाधिपतिर्महान्।
तस्य पञ्चाभवन् पुत्राः कन्यैका रुचिराननाः॥
रुक्माग्रजो रुक्मरथो रुक्मबाहुरनन्तरः।
रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती॥"

इति श्रीभागवते १० स्कन्धे ५२ अध्यायः॥
(रुक्मिणीहरणानन्तरं क्रुद्धेन सहास्र युद्धादिविवरणं हरिवंशे ११० अध्याये तथा प्रद्युम्नेन सहास्र कन्यापरिणयवृत्तान्तः अनिरुद्धेन सहास्र पौत्र्याः परिणयस्तदा बलदेवादस्र ऋतुविवरणञ्च ११८ अध्याये विस्तरशो द्रष्टव्यम्॥)

रुक्षान्न, [न्] क्ली, मलम्। इति केचित्॥

रुचः, त्रि, अप्रेम। अचिक्कणः। रुहधातोरौणादिकसप्रत्ययेन निष्पन्नः। इत्युणादिकोषः॥
(नीरसः। तद्यथा, वायुस्वरूपवर्णने।
"दोषधातुमलादीनां नेता ग्रीष्मः समीरणः।
रजोगुणमयः क्षय्यो रुचः शीतो लघुचलः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रुचः, त्रि, (रुच्+क्तः। ओदितश्चेति नः।) रोगादिना कुटिलीकृतः। तत्पर्य्यायः। भुग्नः २। इत्यमरः॥ (यथा, रामायणे। २। १०२। ६।
"त्वया विहीनस्त्वयि शोकरुग्ण-
स्त्वां संस्मरन्नेव गतः पिता ते॥")
रोगी। इति राजनिर्घण्टः॥

रुच, ङ क्ष प्रीतिप्रकाशयोः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) प्रीतिरिह अनुरागविशेषः। तच्च यस्यानुरागस्य सम्पादनम्। ङ, रोचते अन्नं वसुचवे। क्ष, अरुचत्। इति दुर्गादासः॥

रुचकं, क्ली, (रोचतेऽनेनेति। रुच्+"बहुलमन्यापि।" उणा० २। ३७। इति कुन्।) सर्जिकाक्षारम्। अश्वाभरणम्। माङ्गल्यम्। सौवर्चलम्। (यथा,—
"सौवर्चलं स्याद्रुचकमन्यपाकञ्च तन्मतम्॥"
तस्यास्य गुणाः।
"रुचकं रोचनम्भेदि दीपनम्याचनम्परम्।
सुखेयं वातपुन्नाभिपित्तलं विशदं लघु।
उद्गारशुद्धिदं हृद्यं विबन्धानाहशूलजित्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)
माङ्गल्यद्रव्यम्। (यथा, भागवते। ३। २३। ३१।
"हारेण च महार्हेण रुचकेन च भूषितम्॥"
"रुचकेन मङ्गलद्रव्येण।" इति श्रीधरः॥) उत्कटः। इति मेदिनी। के, १४६॥ स्वाद्वरसः। इति शब्दरत्नावली॥ रोचना। विड्लवणम्। इति हेमचन्द्रः॥ लवणम्। इति हारावली॥ (दक्षिणदिक्। यथा, हरिवंशे। ५३। ३५।
"प्राक्पश्चिमावलिन्दावन्तगतौ तदवधिस्थितौ
शैलौ।
रुचके हारं न शुभदमुत्तरतोऽम्बानि शुक्लानि॥"
"रुचकं मातुलुङ्गकम्।" इत्युज्ज्वलदत्तः। २। ३७॥)

रुचकः, पुं, (रोचते इति। रुच्+कुन्।) शीलपुरः। निम्बः। दन्तः। कपोतः। इति मेदिनी॥ (यथा, हरिवंशे। ६६। २।
"जीवेन भवति हंसः
सौरेय शुभ्रः कुलेन रुचकश्च॥"
पर्व्वतविशेषः। यथा, विष्णुपुराणे। २। २। २६।
"त्रिकूटः शिखिरश्चैव पतङ्गो रुचकस्तथा॥"
स्तम्भः। यथा, हरिवंशे। ५३। २८।

"समचतुरस्रो रुचको
वचोऽत्राश्विर्द्विवल्को द्विगुणः ।")

रुच्, स्त्री, (रुच् + क्विप् । पक्षे टाप् ।) दीप्तिः । शोभा । इच्छा । (यथा, महाभारते ।३।५।१३।

"तदे तस्मै न रुचामभ्युपैति
ततश्चाहं चममन्यत्र मन्ये ।")

शारिकाशुकवाक् । इति शब्दरत्नावली ॥

रुचिः, स्त्री, (रुच्यते इति । रुच् + "इगुपधात् कित् ।" उणा० ४ । ११६ । इति इन् । सच कित् ।) अभिष्वङ्गः । अनुरागः । आशक्तिर्वा । इच्छा । (यथा, किराते । १० । ६२ ।

"रुचिकरमपि नार्थवद्बभूव
स्तिमितसमाधिगुणौ पृथातनूजे ॥"

"अन्धो रुचिकरो रूप्यः प्रीणनो वह्निदीपनः ॥"
इति वैद्यकराजवल्लभे द्रव्यगुणव्याख्यायाम् ॥)

अभिलाषः । गभस्तिः । किरणः । इत्यमरभरतौ ॥ शोभा । इति मेदिनी । (यथा, रघुः । ५ । ६७ ।

"लक्ष्मीर्विनोदयति येन दिगन्तलम्बी
सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥")

बुभुक्षा । इति हेमचन्द्रः ॥ गोरोचना । इति राजनिर्घण्टः ॥ आलिङ्गनविशेषः । तल्लक्षणं यथा । नायिकाया नायकस्य संसुखे जान्वोरुपर्युपविश्य वक्षसि वक्षो दत्त्वा यदवस्थानम् । इति कामशास्त्रम् ॥

रुचिः, पुं, (रोचते शोभते इति । रुच् + इन् । सच कित् ।) प्रजापतिविशेषः । स च रौच्यमनुपिता । यथा,—

मार्कण्डेय उवाच ।

"रुचिः प्रजापतिः पूर्व्वं निर्ममो निरहङ्कृतिः ।
यत्राच्युतमतिर्ग्राह्यो न चचार पृथिवीमिमाम् ॥
अनग्निमनिकेतन्तमेकाहावसथाश्रयम् ।
विमुक्तसङ्गं तं दृष्ट्वा प्रीयुः स्वपितरो मुनिम् ॥

पितर ऊचुः ।

वत्स कस्मात् त्वया पुण्यो न कृतो दारसंग्रहः ।
स्वर्गापवर्गहेतुत्वाद्दत्यक्तेनाग्निं विना ॥
यज्ञो समस्तदेवानां पितॄणाञ्च तथाऽऽश्रयाम् ।
ऋषीणामतिथीनाञ्च कुर्व्वन् लोकानुपाश्नुते ॥
स्वाहोच्चारयतो देवान् स्वधोच्चारयतः पितॄन् ।
विभजन्नन्नदानेन भूतान्यानतिथीनपि ॥
स त्वं देवाद्ऋणाद्गृह्यं वन्यमस्मदृणादपि ।
आवाप्नोषि मनुष्यर्षिभूतेभ्यश्च दिने दिने ॥
अनुत्पाद्य सुतान् देवानसन्तर्प्य पितॄंस्तथा ।
भूतादींश्च कथं मोक्षात् सुगतिं गन्तुमिच्छसि ॥

रुचिरुवाच ।

परित्यक्तोऽतिदुःखाय पापायाधोगतेस्तथा ।
भवत्तो मया पूर्व्वं न कृतो दारसंग्रहः ॥
प्रत्याख्यातेऽनुदिवसं यदात्मा नित्यरिग्रहैः ।
ममत्वपङ्कदिग्धोऽपि चिन्ताभोभिर्न रं हि तत् ॥"
इत्यादि ॥

पितर ऊचुः ।

"युक्तं प्रत्याख्यानं कर्त्तुमात्मनो नियतेन्द्रियैः ।
किन्तु लोपाय मार्गोऽयं यत्र त्वं पुत्र वर्त्तसे ॥"
इत्यादि ॥ * ॥

मार्कण्डेय उवाच ।

"स तेन पितृवाक्येन भृशमुद्विग्यमानसः ।
कन्याभिलाषी विप्रर्षिः परिबभ्राम मेदिनीम् ॥
कन्यामलभमानोऽसौ पितृवाक्यार्त्तिदीपितः ।
चिन्तामवाप महतीमतीवोद्विग्यमानसः ॥
किं करोमि क्व गच्छामि कथं मे दारसंग्रहः ।
क्षिप्रं भवेत् पितॄणां यो ममाभ्युदयकारकः ॥
इति चिन्तयतस्तस्य मतिर्जाता महात्मनः ।
तपसाराधयाम्येनं ब्रह्माणं कमलोद्भवम् ॥
ततो वर्षशतं दिव्यं तपस्तेपे स वैधसम् ।
दिदृक्षुः सुचिरं कालं रुचिर्नियममास्थितः ॥
ततः सन्दर्शयामास ब्रह्मा लोकपितामहः ।
उवाच च प्रसन्नोऽस्मीत्युच्यतामभिवाञ्छितम् ॥
ततोऽसौ प्रणिपत्याह ब्रह्माणं जगतः पतिम् ।
पितॄणां वचनात्तेन यत् कर्त्तुमभिवाञ्छितम् ॥
ब्रह्मा चाह रुचिं विप्रं श्रुत्वा तस्याभिवाञ्छितम् ।
प्रजापतिस्त्वं भविता सदृश्या भवता प्रजाः ॥
दृष्ट्वा प्रजाः सुतान् विप्र यस्मात्त्वं क्रियास्थया ।
लब्ध्वा कृताधिकारस्त्वं ततः सिद्धिमवाप्स्यसि ॥
स त्वं यथोक्तं पितृभिः कुरु दारपरिग्रहम् ।
कामश्चेममभिध्याय क्रियतां पितृपूजनम् ॥
त एव तुष्टाः पितरः प्रदास्यन्ति तवेप्सितम् ।
पत्नीं सुतांश्च सम्प्राप्य किं न दद्युः पितामहाः ॥

मार्कण्डेय उवाच ।

इत्यृषिर्व्वचनं श्रुत्वा ब्रह्मणोऽव्यक्तजन्मनः ।
तदा विवित्से पुलिने चकार पितृतर्पणम् ॥
तुतोष च पितॄन् विप्रः स्वैरेरभिरधादृतः ।
एकाग्रः प्रयतो भूत्वा भक्तिनम्रात्मको रुचिः ॥"
रुचिकृतपितृस्तोत्रं यथा,—

रुचिरुवाच ।

"नमस्येऽहं पितॄन् भक्त्या ये वसन्त्यधिदेवतम् ।
देवैरपि हि तर्प्यन्ते ये आद्धेषु स्वधोत्तरैः ॥
नमस्येऽहं पितॄन् स्वर्गे ये तर्प्यन्ते महर्षिभिः ।
आद्धैर्मनोमयैर्भक्त्या मुक्तिमुक्तिमभीप्सुभिः ॥
नमस्येऽहं पितॄन् स्वर्गे सिद्धाः सन्तर्प्पयन्ति यान् ।
आद्धेषु दिव्यैः सकलैरुपहारैरनुत्तमैः ॥
नमस्येऽहं पितॄन् भक्त्या येऽर्च्यन्ते गुह्यकैर्दिवि ।
तन्मयत्वेन वाञ्छद्भिर्ऋद्धिमात्यन्तिकीं पराम् ॥
नमस्येऽहं पितॄन् मर्त्यैरर्च्यन्ते भुवि ये सदा ।
आद्धेषु श्रद्धयाभीष्टलोकपुष्टिप्रदायिनः ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा ।
वाञ्छिताभीष्टलाभाय प्राणापत्यप्रदायिनः ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्तेऽरण्यवासिभिः ।
वन्ये: आद्धेयताहारैस्तपोनिर्द्धूतकल्मषैः ॥
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकव्रतधारिभिः ।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभिः ॥
नमस्येऽहं पितॄन् आद्धे राजन्यास्तर्पयन्ति यान् ।
कवैरग्नेयैर्विधिबल्लोकदयफलप्रदान् ॥
नमस्येऽहं पितॄन् वैश्यैरर्च्यन्ते भुवि ये सदा ।
स्वकर्म्माभिरतैर्नित्यं पुष्यधूपान्नवारिभिः ॥
नमस्येऽहं पितॄन् आद्धे ये शूद्रैरपि भक्तितः ।
सन्तर्प्यन्ते जगत्यस्मिन् नाम्ना ख्याताः सुकालिनः ॥
नमस्येऽहं पितॄन् आद्धे पाताले ये महासुरैः ।
सन्तर्प्यन्ते स्वधाहाराख्यत्तदम्भमदैः सदा ॥
नमस्येऽहं पितॄन् आद्धेऽर्च्यन्ते ये रसातले ।
भोगैरग्रैर्विविधैर्नागैः कामानभीप्सुभिः ॥
नमस्येऽहं पितॄन् आद्धे सर्व्वैः सन्तर्पितान् सदा ।
तत्रैव विविधैर्मन्त्रैर्भोगसम्पत्समन्वितैः ॥
पितृन्नमस्ये निवसन्ति साक्षाद्
ये देवलोकेऽथ महीतले वा ।
तथान्तरीक्षे च सुरादिपूज्या-
स्ते संप्रतीच्छन्तु मयोपनीतम् ॥
पितृन्नमस्ये परमाणुभूता
ये वै विमाने निवसन्त्यमूर्त्ताः ।
यजन्ति यानत्तमला मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून् ॥
पितृन्नमस्ये दिवि ये च मूर्त्ता:
स्वधाभुजः काम्यफलाभिसन्धौ ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु ॥
तृप्यन्तु तेऽस्मिन् पितरः समस्ता
इच्छावतां ये प्रदिशन्ति कामान् ।
सुरत्वमिन्द्रत्वमतोऽधिकं वा
यस्यात्मजान् श्यामवलां ददाति ॥
सूर्य्यस्य ये रश्मिषु चन्द्रबिम्बे
शुक्ले विमाने च सदा वसन्ति ।
तृप्यन्तु तेऽस्मिन् पितरोऽमृतायै-
र्गन्धादिना पुष्टिमतो व्रजन्तु ॥
येषां हुतेऽग्नौ हविषा च तृप्ति-
र्यै भुञ्जते विप्र शरीरसंस्थाः ।
ये पिण्डदानेन सुदं प्रयान्ति
तृप्यन्तु तेऽस्मिन् पितरोऽमृतायैः ॥
ये खड्गमांसेन सुरैरभीष्टैः
स्थाप्योक्षिलेहैर्मधुरैर्गवेच ।
काक्षेण शाकेन महर्षिवर्य्यैः
संप्रीणितास्ते सुदमत्र यान्तु ॥
कव्यान्यशेषाणि च यान्यभीष्टा-
न्यतीव येषाममरार्चितानाम् ।
तेषान्तु सान्निध्यमिहास्तु पुष्य-
गन्धादिभोज्येषु मयाऽर्पितेषु ।
दिने दिने ये प्रतियन्ति तेऽर्चां
मासान्तपूज्या भुवि येऽष्टकासु ।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तुष्टिम् ॥
पूज्या द्विजानां कुलदेवभासो
ये क्षत्रियाणाञ्च नवार्कवर्णाः ।
तथा विशां ये कनकावदाता
गौरीनिभाः शूद्रजनस्य ये च ॥
तेऽस्मिन् समस्ता मम पुष्पगन्ध-
धूपान्नतोयादिनिवेदनेन ।

तथाग्निहोत्रेण च यान्तु तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥
ये देवपूर्व्वाण्यतितृप्तिहेतो-
रश्नन्ति कव्यानि सुभाहृतानि ।
तृप्ताश्च ये भूतिसृजो भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
विघ्नाय्यन्तस्तृप्तिमं प्रजानाम् ।
आद्याः सुराणाममरेश्वरपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं श्राद्धेऽस्मिन् पितरस्तर्पिता मया ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ।
तथा बर्हिषदः पान्तु याम्यां ये पितरःस्थिताः ॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
ऊर्ध्वंतस्त्वर्यमा रक्षेत् कव्यवालोऽनलोऽप्यधः ॥
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्व्वतश्चाधिपस्त्वेषां यमो रक्षां करोतु मे ॥
विष्णो विश्वभुगाराध्यो धन्यो धर्म्मः सनातनः ।
भूतिदो भूतिसम्भूतिः पितृणां ये गणा नव ॥
कव्याश्वः कव्यदः कर्म्मा कव्यः कव्यतराश्रयः ।
कव्यताश्चेतुरनघः पञ्चैते गणाः स्मृताः ॥
वरो वरेण्यो वरदस्तुष्टिदः पुष्टिदस्तथा ।
विश्वपाता तथा धाता सप्त चैते गणाः स्मृताः ॥
महाभ्महात्मा महितो महिमावाम्महाबलः ।
गणाः पञ्च तथैवैते पितृणां पावनाग्रगाः ॥
सुखदो धनदश्चान्यो धर्म्मदोऽन्यो विभूतिदः ।
पितृणां कथ्यते चैतत्तथा गणचतुष्टयम् ॥
एकत्रिंशद्गणा ह्येते यैर्व्याप्तमखिलं जगत् ।
ते मेऽपि तृप्तास्तृप्यन्तु यच्छन्तु च समीहितम् ॥"
इति मार्कण्डेयपुराणे रौच्ये मन्वन्तरे पितृस्तवः ॥

मार्कण्डेय उवाच ।

"एवन्तु स्तुवतस्तस्य तेजसो राशिरुच्छ्रितः ।
प्रादुर्बभूव सहसा गगनव्याप्तिकारकः ॥
तदृष्ट्वा सुमहत्तेजः समाच्छाद्य स्थितं जगत् ।
जानुभ्यामवनिं गत्वा रुचिः स्तोत्रमिदं जगौ ॥
अमूर्त्तानाञ्च मूर्त्तानां पितॄणां दीप्ततेजसाम् ।
नमस्यामि सदा तेषां ध्यानिनां दिव्यचक्षुषाम् ॥
इन्द्रादीनाञ्च नेतारो दक्षमारीचयोस्तथा ।
सप्तर्षीणान्तथान्येषां तान् नमस्यामि कामदान् ॥
मन्वादीनाञ्च नेतारः सूर्य्याचन्द्रमसोस्तथा ।
तान्नमस्याम्यहं सर्व्वान् पितॄनप्युदधावपि च ॥
नक्षत्राणां ग्रहाणाञ्च वाय्वग्निनभसां तथा ।
द्यावापृथिव्योश्च तथा नमस्यामि कृताञ्जलिः ॥
प्रजापतेः कश्यपाय सोमाय वरुणाय च ।
योगेश्वरेभ्यश्च तथा नमस्यामि कृताञ्जलिः ॥
नमो गणेभ्यः सप्तभ्यस्तथा लोकेषु सप्तसु ।
स्वयम्भुवे नमस्यामि ब्रह्मणे योगचक्षुषे ॥
सोमाधाराः पितृगणा योगमूर्त्तिधरा हि ते ।
नमस्यामि ततः सोमं पितरं जगतामहम् ॥
अग्निरूपांस्तथैवान्यान्नमस्यामि पितॄनहम् ।
अग्नीषोममयं विश्वं यत एतदशेषतः ॥
ये तु तेजसि ये वायौ सोमसूर्य्याग्निमूर्त्तयः ।
जगत्स्वरूपिणश्चैव तथा ब्रह्मस्वरूपिणः ॥
तेभ्योऽखिलेभ्यो योगिभ्यः पितृभ्यो यतमानसः ।
नमो नमो नमस्ते मे प्रसीदन्तु स्वधाभुजः ॥

श्रीमार्कण्डेय उवाच ।

एवं स्तुतास्ततस्तेन तेजसो मुनिसत्तमाः ।
निश्चक्रमुस्ते पितरो भासयन्तो दिशो दश ॥
निवेदितन्तु यत्तेन पुष्पगन्धानुलेपनम् ।
तद्गृहितानथ स तान् ददर्शे पुरतः स्थितान् ॥
प्रणिपत्य रुचिर्भक्त्या पुनरेव कृताञ्जलिः ।
नमस्तुभ्यं नमस्तुभ्यमित्याह पृथगादृतः ॥
ततः प्रसन्नाः पितरस्तमूचुर्मुनिसत्तमम् ।
वरं वृणीष्वेति स तानुवाचानतकन्धरः ॥
साम्प्रतं सर्गकर्तृत्वमादिष्टं ब्रह्मणा मम ।
सोऽहं पत्नीमभीप्सामि धन्यां स्त्रियां प्रजावतीम् ॥

पितर ऊचुः ।

अद्यैव सद्यः पत्नी ते भविष्यति मनोरमा ।
तस्याञ्च पुत्रो भविता भवतो मुनिसत्तम ! ॥
मन्वन्तराधिपो धीमान् त्वयाख्येयोपलक्षितः ।
रुचे रौच्य इति ख्यातिं प्रयास्यति जगत्त्रये ॥
तस्यापि बहवः पुत्रा महाबलपराक्रमाः ।
भविष्यन्ति महात्मानः पृथिवीपरिपालकाः ॥
त्वञ्च प्रजापतिर्भूत्वा प्रजाः सृष्ट्वा चतुर्विधाः ।
क्षीणाधिकारो धर्म्मज्ञस्ततः सिद्धिमवाप्स्यसि ॥
स्तोत्रेणानेन च नरो योऽस्मांस्तोष्यति भक्तितः ।
तस्य तुष्टा वयं भोगान् दास्यामो ज्ञानसुत्तमम् ॥
अरोगारोग्यमैश्वर्य्यं पुत्रपौत्रादिसन्ततिम् ।
प्रदास्यामो न सन्देहो यच्चान्यदभिवाञ्छितम् ॥
तस्मात् पुण्यफलं लोके वाञ्छद्भिः सततं नरैः ।
पितॄणामाप्तये श्राद्धं कार्य्यं स्तोत्रेण मानवैः ॥
श्राद्धे च य इमं भक्त्या श्रावयेत् प्रीतिकरं स्तवम् ।
पठिष्यन्ति द्विजाग्र्याणां शृण्वतां पुरतः स्थिताः ॥
स्तोत्रश्रवणसंप्रीत्या सन्निधाने परे हृते ।
अस्माभिरक्षयं श्राद्धं तद्भविष्यत्यसंशयम् ॥
यद्यप्यश्रोत्रियं श्राद्धं यद्यप्यपहृतं भवेत् ।
अन्यायोपार्जितवित्तेन यदि वा हृतमन्यथा ।
अश्राद्धार्हैरुपहृतैरुपहारैस्तथा हृतम् ।
अकालेऽप्यथवा देये विधिहीनमथापि वा ।
अश्रद्धया वा पुरुषैरभक्त्याश्रित्य वा हृतम् ।
अस्माकं प्रीतये श्राद्धं तथाप्येतदुदीरयात् ॥
यच्चैतत् प्रच्यते श्राद्धे स्तोत्रमस्मत्सुखावहम् ।
अस्माकं जायते तृप्तिश्च द्वादशवार्षिकी ॥
हेमन्ते द्वादशाब्दानि तृप्तिमेतत् प्रयच्छति ।
शिशिरे द्विगुणाब्दानि तृप्तिं स्तोत्रमिदं श्रुतम् ॥
वसन्ते षोडशसमास्तृप्तये श्राद्धकर्म्मणि ।
ग्रीष्मे च षोडशेवैतत् पठितं तृप्तिकारकम् ॥
विकाले च हृते श्राद्धे स्तोत्रेणानेन साधिते ।
वर्षासु तृप्तिरस्माकमक्षया जायते रुचे ॥
शरत्काले ऽपि पठितं श्राद्धकाले प्रयच्छति ।
अस्माकमेतत् पुरुषैस्तृप्तिं पञ्चदशाब्दिकीम् ॥
यस्मिन् गृहेऽपि लिखितमेतत्तिष्ठति नित्यदा ।
सन्निधानं हृते श्राद्धे तत्रास्माकं भविष्यति ॥
तस्मादेतत्त्वया श्राद्धे विप्राणां शृण्वतां पुरः ।
श्रावणीयं महाभाग अस्माकं तुष्टिकारकम् ॥"
इति मार्कण्डेयपुराणे रौच्ये मन्वन्तरे पितृस्तवे ॥*

मार्कण्डेय उवाच ।

"ततस्तस्मान्नदीमध्यात् समुत्तस्थौ मनोरमा ।
प्रश्नोचा नाम तन्वङ्गी तत्समीपे वराप्सराः ॥
सा चोवाच महात्मानं रुचिं सुमधुराक्षरम् ॥
प्रश्रयावनता शुभ्रूः प्रश्नोचा वै वराप्सराः ।
अतीवरूपिणी कन्या मत्सुता तपतांवर ।
जाता वरुणपुत्रेण पुष्करेण महात्मना ॥
तां गृहाण मया दत्तां भार्य्यार्थे वरवर्णिनीम् ।
मनुर्म्मेहामतिस्तस्यां समुत्पत्स्यति ते सुतः ॥

मार्कण्डेय उवाच ।

तथेति तेन चाप्युक्ता तस्मात्तोयाद्बहिर्गताम् ।
उज्जहार ततः कन्यां मालिनीं नाम नामतः ॥
तस्याञ्च पुलिने तस्मिन् स मुनिर्म्मुनिसत्तम ! ।
जग्राह पाणिं विधिवत् समानाय्य महामुनीन् ॥
तस्यां तस्य सुतो जज्ञे महावीर्य्यो महामतिः ।
रौच्योऽभवत् पितुर्नाम्ना ख्यातोऽत्र वसुधातले ॥
तस्य मन्वन्तरे देवास्तथा सप्तर्षयश्च ये ।
तनयाश्च नृपाश्चैव ते सम्यक् कथितास्तव ॥
धर्म्मद्रविणसंयोगं धनधान्यसुतोद्भवः ।
नृणां भवत्यस्मिन्नध्ये मन्वन्तरे श्रुते ॥
पितृस्तवं तथा श्रुत्वा पितॄणाञ्च तथा गणान् ।
सर्व्वान् कामानवाप्नोति तत्प्रसादान्नरो मुने ।"
इति मार्कण्डेयपुराणे रौच्यमन्वन्तरं समाप्तम् ॥
गारुडे ८६ । ६० अध्यायेऽप्येवमस्ति ॥

रुचितं, त्रि, (रोचते इति । रुच्+"रुचिवचिकुचिकुटिभ्यः कितच् ।" उणा० ४ । २८५ । इति कितच् ।) मिश्रवस्तु । इत्युणादिकोषः ॥ (रुच्+क्तः । अभिलषितः । यथा, महाभारते । ५ । १०० । १६ ।
"मातस्ते कच्चिदप्यद्य रुचितस्ते वरो भवेत् ॥" क्ली, रुच्+भावे क्तः । इच्छा । अभिलाषः । यथा, महाभारते । ३ । २६६ । ७६ ।
"वसावेह त्वमेकां रुचितं यदि तेऽनघ ॥")

रुचिफलं, क्ली, (रुचिजनकं फलम् ।) अन्नताम्रम् । इति राजनिर्घण्टः ॥

रुचिरं, क्ली, (रोचते इति । रुच्+"इषिमदिसुदीति ।" उणा० १ । ५२ । इति किरच् ।) मूलकम् । कुङ्कुमम् । लवङ्गम् । इति राजनिर्घण्टः ॥ (पुं, सैनजितपुत्रः । यथा, हरिवंशे । २० । २१ ।
"पुत्राः सैनजितश्चासंश्चत्वारो लोकसत्तमाः ।
रुचिरः श्वेतकेतुश्च महिन्नारश्चैव च ॥")

रुचिरं, त्रि, (रुच्+किरच् ।) सुन्दरम् । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । ११० ।
"उल्लसितभ्रूधनुषा तव पृथुना लोचनेन रुचिराङ्गि ।

अचला अपि न महान्तः के चञ्चलभावमागीताः ।")
मिश्रम् । इत्युणादिकोषः ॥

रुचिरा, स्त्री, (रोचते इति । रुच् + किरच् । ततष्टाप् ।) गोरोचना । इति राजनिर्घण्टः ॥ (चयोदग्राक्षरवृत्तिविशेषः । अस्य लक्षणोदाहरणादिकं छन्दःग्रन्थे द्रष्टव्यम् ॥)

रुचिराञ्जनः, पुं, (रुचिरः सुन्दरोऽञ्जनः ।) शोभाञ्जनः । इति राजनिर्घण्टः ॥

रुचिराश्वः, पुं, (रुचिरः सुन्दरोऽश्वो यस्य ।) राजविशेषः । स तु देवापेः भ्रातुरः । यथा,—
"मरोः भूपाललोकानां खलये कुरु मे वचः ।
रुचिराश्वसुतां प्राप्तां देवापेः त्वं ग्रहाण ह ॥"
इति कल्किपुराणे १८ अध्यायः ॥
सुन्दरघोटकश्च ॥

रुचिष्यं, त्रि, (रुच्यते इति । रुच् + "रुचिशुचिभ्यां किच्च्यन् ।" उणा० ४ । १७८ । इति किच्च्यन् ।) मिश्रवस्तु । इत्युणादिकोषः ॥ (यथा, सुश्रुते । १ । ४६ । पुष्यवर्गे ।
"सिद्धाकी वातला सान्द्रा रुचिष्यानलदीपनी ॥")
अभिष्यन्दम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, हरिवंशे । २५४ । ६० ।
"न पृथ्वीं कामये क्षत्तर्न सशुरोऽपि पद्मजे ।
एष एव रुचिष्यो मे वरो दानवसत्तम ! ॥")

रुची, स्त्री, (रुचि + ऋदिकारादिति ङीष् ।) रुचिः । यथा । रुक् रुची रुचयः समाः । इत्येकार्थसंग्रहः ॥

रुच्यं, क्ली, (रोचते इति । रुच् + "राजसूयसूर्य्यमृषोद्यरुच्यकुप्यकृष्टपच्याधेति ।" ३ । १ । ११४ । इति क्यप्प्रत्ययेन निपातितम् ।) सौवर्चलम् । इति राजनिर्घण्टः ॥

रुज्यः, पुं, (रुच् + क्यप् ।) कतकवृक्षः । प्राणिधान्यम् । इति राजनिर्घण्टः ॥ पतिः । इति हेमचन्द्रः । ३ । ९८१ ॥ सुन्दरे, त्रि । इत्यमरः ॥ (रुचिकरः । यथा,—
"पक्वं वर्णकरं रुच्यं मांसशुक्रबलप्रदम् ।
पित्तावरोधि वातघ्नं छर्द्यं गुर्व्यश्लोमनम् ॥"
इति वैद्यकराजवल्लभे द्रव्यगुणाख्यायाम् ॥)

रुचकन्दः, पुं, (रुच्यः कन्दो यस्य ।) शूरणः । इति राजनिर्घण्टः ॥

रुज, ओ भ्रौ भङ्गे । इति कविकल्पद्रुमः ॥ (तुदा० पर० सक० अनिट् ।) ओ, रुजः । भ्र, रुजति रोगी हसम् । औ, रोक्ता । इति दुर्गादासः ॥

रुज, क हिंसे । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) क, रोजयति । इति दुर्गादासः ॥

रुजा, स्त्री, (रुज् + क्विप् । पक्षे टाप् ।) रोगः । भङ्गः । इति मेदिनी । जे, १४ ॥ (पीड़ा । यथा, महाभारते । ८ । ३४ । १४६ ।
"निपातात् तव शूलस्य शूरीरे यामवद्रुजा ।
तया ते मानुषं कर्म्म व्यपोढ़ं भृगुनन्दन ! ॥")
मेघी । इति हेमचन्द्रः । ४ । ३४३ ॥ कुष्ठम् । इति राजनिर्घण्टः ॥

रुजाकरः, स्त्री, (रुजां रोगं करोतीति । रुज + ट । ।) कर्म्मरङ्गफलम् । इति शब्दचन्द्रिका ॥

रुजाकरः, पुं, (रुजां करोतीति । रुज + ट । ।) व्याधिः । यथा । व्याधिस्त्वाधी रुजाकरः । इति हेमचन्द्रः । २ । २२६ ॥ (व्याधिकारके, त्रि ॥)

रुजासहः, पुं, (रुजां सहते इति । सह + अच् ।) धन्वनवृक्षः । इति राजनिर्घण्टः ॥

रुट, इ क्षेपे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पञ्चमस्वरी । इ, रुण्टति धनं चौरेण । इति दुर्गादासः ॥

रुट, ल ड दीप्तिप्रतिघातयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अक० च-सेट् ।) ल, अरुटत् । ड, रोटते । प्रतिघातः शोकादिना पतनं पुनर्हननं वा । इति दुर्गादासः ॥

रुट, क रुधि । द्युतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, रोटयति ॥ इति दुर्गादासः ॥

रुट् [ष्] स्त्री, (रुष् + क्विप् ।) क्रोधः । इत्यमरः ।१।७।२६ ॥ (यथा, भागवते । १।१८।३० ।
"स तु ब्रह्म ऋषेरंशे गतासुसुरगं रुषा ।
विनिर्गच्छन् धनुष्कोट्या निधाय पुरमागतः ॥")

रुठ, उपघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रोठति शोकं शोकः । इति दुर्गादासः ॥

रुठ, इ गत्यालस्ययोः खोटे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अक० च-सेट् ।) पञ्चमस्वरी । इ, रुण्ठति । आलस्यं मन्दीभावः । स्त्रियं चौर्य्यम् । खोटः खोड़नम् । इति दुर्गादासः ॥

रुठ, ल ड प्रतीघाते । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ल, अरुठत् । ड, रोठते । प्रतीघातः शोकादिना पतनं पुनर्हननं वा । इति दुर्गादासः ॥

रुड्, [ष्] स्त्री, (रुष रुधि + क्विप् ।) रुट् । इति व्याकरणम् ॥

रुणरुरा, स्त्री, सुखसन्दोहा गौः । इति शब्दचन्द्रिका ॥

रुण्डः, पुं, कबन्धः । इति जटाधरः ॥ (छिन्नपादहस्तः । यथा, कथासरित्सागरे । ६५ । ११ ।
"तेनारोप्य स्वयं पृष्ठे स रुण्डः पुरुषोऽभ्यधात् ।
निक्षत्तहस्तचरणो नटां चिह्नोऽस्मि शृणुभिः ॥")

रुण्डिका, स्त्री, (रुण्डः कबन्धोऽस्यत्रेति । रुण्ड + ठन् ।) युद्धभूमिः । दारप्रिण्डिका । विभूतिः । इति शब्दरत्नावली ॥

रुतं, क्ली, (रु + क्तः ।) पशुपक्ष्यादीनां शब्दः । तत्पर्य्यायः । वाश्रितम् २ । इत्यमरः ॥ वाशितम् ३ । इति शब्दरत्नावली ॥ (यथा, शिशुपालवधे । १६ । २५ ।
"अशुद्धं कुरुते घनध्वनिं
न तु गोमायुरुतानि केशरी ॥")

रुद, ल घ इर् रोदे । इति कविकल्पद्रुमः ॥ (अदा०-पर०-अक०-सेट् ।) रोदोऽश्रुविमोचनम् । ल घ, रोदिति लोकः शोकात् । इर्, अरुदत् अरोदीत् । रोदिष्यमाणमात्मानमिति भट्टौ । आक्रन्दविशिष्टरोदनक्रियायाश्चाप्यत्वात् सकर्म्मकत्वमिति जयमङ्गला । इति दुर्गादासः ॥

रुदथः, पुं, (रोदितीति । रुद रोदने + "रुदिविदिभ्यां किन् ।" उणा० ३ । ११६ । इति अथः । सच किन् ।) कुक्कुरः । इत्युणादिकोषः ॥ गृध्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रुदन्तिका, रुदन्ती } स्त्री, (रोदनं रुत् । अति अदि वन्धने + अच् + ङीप् । स्वार्थे कन् च ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । सवल्लीया २ सञ्जीवनी ३ अन्तस्रवा ४ रोमाञ्चिका ५ महामांसी ६ वणाग्रणी ७ सुधास्रवी ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । क्षीमरक्तपित्तकफश्वासमेहव्रणाग्नित्वम् । रसायनत्वञ्च । अस्य स्वरूपं यथा,—
"वृषपत्रसमं पत्रं क्षुपस्यैव तथाकृतिः ।
ग्रैष्मिरे जलबिन्दूनां स्रवन्तीति रुदन्तिका ॥"
इति राजनिर्घण्टः ॥
अस्य गुणाः ।
"रुदन्ती वह्निकृद्वृष्या पित्तघ्नी च रसायनी ॥"
इति राजवल्लभः ॥
(रोदनशीले, त्रि । यथा,—
"धरित्रि पुण्याञ्जलिरेष तुभ्यं
सुता मदीयास्तव पालनीयाः ।
इतीव रम्भा नमितायमौलिना
भयं रुदन्ती मकरन्दबिन्दुना ॥"
इति प्रयिद्धम् ॥)

रुदितं, क्ली, (रुद् + क्तः ।) क्रन्दनम् । इत्यमरः ॥ तद्वति, त्रि ॥ (यथा, महाभारते । १३।२३।६ ।
"केशकौटावपतितं क्षुतं श्वभिरवेक्षितम् ।
रुदितश्वावधूतञ्च तं भागं रक्षसां विदुः ॥")

रुद्धं, त्रि, (रुध् + क्तः ।) नदीप्राकारादिना कृतवेष्टनम् । तत्पर्य्यायः । वेष्टितम् २ वलयितम् ३ संवीतम् ४ आवृतम् ५ । इत्यमरः ॥ (यथा, मेघदूते । ३६ ।
"रुद्धालोके नरपतिपथे रुद्धिमेद्यैस्तमोभिः ॥")

रुद्रः, पुं, (रोदयतीति । रुद् + क्विप् + "रोदेर्णिलुक् च ।" उणा० २ । २२ । इति रक् । णेश्च लुक् ।) आदित्यपक्षवृक्षः । इति राजनिर्घण्टः ॥ शिवः । (यथा, महाभारते । १३ । १७ । ७६ ।
"त्रिजटस्त्रीरवासाश्च रुद्रः सेनापतिर्विभुः ॥")
गणदेवताविशेषः । इत्यमरः ॥ अग्निमूर्त्तिः । यथा रुद्राय अग्निमूर्त्तये नमः । इति तिथ्यादितत्त्वे शिवपूजापद्धतिः ॥ स च ब्रह्मणः क्रोधरूपः स्रष्टिकाले भ्रूमध्यात्जातः । तत्पतिः भूतप्रेतपिशाचादिः । अयमेवाग्निः संहारकर्त्ता । इति भागवतम् ॥ * ॥ अथैकादशरुद्रनामानि यथा । अजः १ एकपात् २ अहिर्बुध्नः ३ पिनाकी ४ अपराजितः ५ त्र्यम्बकः ६

महेश्वरः ७ हराकपिः ८ शम्भुः ९ हरः १० ईश्वरः ११ । इति महाभारते दानधर्म्मे ॥ * ॥

अपि च ।

"अजैकपादहिर्बुध्नो विरूपाक्षः सुरेश्वरः ।
जयन्तो बहुरूपश्च त्र्यम्बकोऽपराजितः ।
वैवस्वतश्च सावित्रो हरो रुद्रा इमे स्मृताः ॥"

इति जटाधरः ॥ * ॥

अन्यच्च ।

"अजैकपादहिर्बुध्नश्चरो रुद्रश्च वीर्य्यवान् ।
त्वष्टुर्व्याप्त्यासुतः पुत्रो विश्वरूपो महातपाः ॥
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ।
हराकपिश्च शम्भुश्च त्रयश्चैते रैवतस्तथा ॥
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः ॥"

इति गारुडे ६ अध्यायः ॥

अग्निपुराणे तद्गुस्थाने क्षत्तिवासाः ॥ * ॥ अपरञ्च ।

"अजैकपादहिर्बुध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्र्याश्च जयन्तश्च पिनाकी चापराजितः ।
एते रुद्राः समाख्याता एकादश गणेश्वराः ॥
एतेषां मानसानान्तु त्रिमूलवरधारिणाम् ।
कोटयश्चतुरशीतिस्तत् पुत्राश्चात्तमा मताः ॥
किन्तु सर्व्वासु ये रुद्रा प्रकुर्व्वन्ति गणेश्वराः ।
पुत्रपौत्रसुताख्येते सुरभीगर्भसम्भवाः ॥"

इति मात्स्ये ५ अध्यायः ॥ * ॥

तस्य उत्पत्तिर्यथा.—

"प्रजाः सृष्टुमनास्तेपे तपः परमदुश्चरम् ।
तस्यैवं तप्यमानस्य न किञ्चित् समवर्त्तत ॥
ततो दीर्घेण कालेन दुःखात् क्रोधो व्यजायत ।
क्रोधाविष्टस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दवः ॥
ततस्तेभ्योऽश्रुबिन्दुभ्यो भूताः प्रेतास्तदाभवन् ।
सर्व्वांस्तानग्रजान् दृष्ट्वा ब्रह्मात्मानमचिन्तत ।
तदा प्राज्ञमयो रुद्रः प्रादुरासीत् प्रभोर्मुखात् ।
सहस्रादित्यसङ्काशो युगान्तदहनोपमः ॥
ररोद सस्वरं घोरं देवदेवः स्वयं शिवः ।
रोदमानं तदा ब्रह्मा मारोदीरित्यभाषत ।
रोदनाद्रुद्र इत्येवं लोके ख्यातिं गमिष्यसि ॥
अन्यानि सप्तनामानि पत्नीः पुत्रांश्च प्राप्नुतान् ।
स्थानानि चैषामद्यानां दत्तो लोकपितामहः ॥
भवः शर्व्वस्तथेशानः पशूनाम्पतिरेव च ।
भीमश्चोग्रो महादेवस्तानि नामानि सप्त वै ॥
सूर्य्यो जलं मही वह्निर्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणश्चन्द्र इत्येता अष्टमूर्त्तयः ॥
स्थानेषु तेषु ये रुद्रं ध्यायन्ति मनुजाधिप ।
तेषामुत्तनुर्देवो ददाति परमं पदम् ॥
सुवर्चला तथोमा विकेशी च शिवा तथा ।
स्वाहा दिशा च दीक्षा च रोहिणीति च पत्नयः ॥
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ।
स्कन्दः सर्गोऽथ सन्तानो बुधश्चैवां सुताः स्मृताः ॥"

इति कौर्म्मे १० अध्यायः ॥ * ॥

विष्णुरुद्रयोरभेदो यथा,—

"सदैव देवो भगवान् महादेवो न संशयः ।
मन्यन्ते ये जगद्योनिं विभिन्नं विष्णुमीश्वरात् ।
मोहादवेदनिष्ठास्ते यान्ति नरकं नराः ॥
वेदानुवर्त्तिनं रुद्रं देवं नारायणन्तथा ।
एकीभावेन पश्यन्ति मुक्तिभाजो भवन्ति ते ॥"

इति च तत्रैव १९ अध्यायः ॥ * ॥

कल्पभेदे तस्योत्पत्तिर्नामस्थानभार्य्यादीनि यथा,

"कुकोप च ततो ब्रह्मा ज्वलन्निव हुताशनः ।
ततः कोपं स्वपुत्रेभ्यः क्षतमन्याय्यमित्यपि ॥
विचार्य्य परिवर्द्धन्तं नियन्तुमुपचक्रमे ।
यत्नान्नियम्यमानोऽपि स कोपः परमेष्ठिनः ॥
भ्रुवोर्म्मध्यादथोद्भूतः कुमारो नीललोहितः ।
जातमात्रः कुमारोऽसौ ररोद भगवान् भवः ॥
ब्रह्मोवाच कथं पुत्ररोदिषि त्वं महाबल ।
तन्मे कथय कामन्ते सद्यः सम्पादयाम्यहम् ॥

रुद्र उवाच ।

नामानि कुरु मे ब्रह्मन् ! स्थानानि च जगद्गुरो ।
पत्नीश्च देहि भगवन् ततः शान्तिर्भविष्यति ॥

ब्रह्मोवाच ।

जानामि त्वां देवदेवं पूर्व्वं दत्तं वरं मम ।
सत्यं कर्त्तुं भवान् जातस्तं हि सर्व्वेश्वरेश्वरः ॥
जातमात्रो रोदिषि त्वं ततो रुद्र इति स्मृतः ।
नामान्यन्यानि ते देव विधास्ये शृणु पुत्रक ।
ऋतध्वजो मनुर्मन्युरुग्ररेता महान् शिवः ।
भवः कालो महिनसो वामदेवो धृतव्रतः ॥
एतानि तव नामानि ये स्मरन्ति नरा भुवि ।
तेषां सदैव कल्याणं करिष्यसि महामते ॥
स्थानानि च प्रवक्ष्यामि तेषु वासो विधीयताम् ॥
इन्द्रियाण्यसृगङ्गोम वायुरस्थिलं मही ।
तपश्चन्द्रश्च सूर्य्यश्च स्थानान्येतानि ते भव ॥
धृतिर्धीरसिलोभा च नियुत् सर्पिर्विलम्बिका ।
इरावती स्वधा दीक्षा योषितस्तव सुन्दरी ॥
प्रजाः सृज महाभाग जगदेतत् प्रपूरय ॥
इत्यादिष्टः स भगवान् ब्रह्मणा नीललोहितः ।
सृष्टवान् स प्रजा वक्त्रभूतप्रेतपिशाचकान् ।
कुष्माण्डान् विकृताकारान् भैरवान् भीमनादिनः ॥

तान् दृष्ट्वा तु तदा ब्रह्मा जगदिदावकान् बहून् ।
वारयामास पुत्र त्वं मा स्राक्षीरीदृशीः प्रजाः ॥
तपसा विष्णुमाराध्य विहरस्व यथासुखम् ।
इति ते कथितो राजन् ! रुद्रसर्गः प्रजापतेः ॥
यं श्रुत्वापि नरः सद्यो जह्यादभूतकृतं भयम् ॥"

इति पाद्मे स्वर्गखण्डे रुद्रसर्गः ८ अध्यायः ॥ * ॥

प्रकारान्तरं यथा,—

"कथितस्तमसः सर्गो ब्रह्मणोऽयं महामुने ।
रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥
कल्पादावात्मनस्तुल्यं सुतं ध्यायतस्ततः ।
प्रादुरासीत् प्रभोरङ्कं कुमारो नीललोहितः ॥
रुदन् वै सस्वरं सोऽथ द्रवंश्च द्विजसत्तम ! ।
किं करोषीति तं ब्रह्मा रुदन्तं प्रत्युवाच वै ॥
नाम धेहीति तं सोऽथ प्रत्युवाच प्रजापतिम् ।
रुदन्तं देव मामाहि मारोदीर्धैर्य्यमाप्नुहि ॥
एवमुक्तः पुनः सोऽथ सप्तकृत्वो ररोद वै ।
ततोऽष्टानि ददौ तस्मै सप्त नामानि स प्रभुः ॥
स्थानानि चैषामद्यानां पत्नीः पुत्रांश्च वै प्रभुः ॥
भवं शर्व्वमथेशानं तथा पशुपतिं द्विज ।
भीमसुग्रं महादेवमुवाच स पितामहः ॥
चक्रे नामान्यथैतानि स्थानान्येषां चकार सः ॥
सूर्य्यो जलं मही वह्निर्व्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ॥
सुवर्चला तथोमा सुकेशी चापरा शिवा ।
स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमम् ॥
सूर्य्यादीनां नरश्रेष्ठ रुद्राद्यैर्नामभिः सह ।
पत्नयः स्मृता महाभाग तदपत्यानि मे शृणु ॥
येषां सृतिप्रसूतैस्तु इदमापूरितं जगत् ।
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ॥
स्कन्दः सर्गोऽथ सन्तानो बुधश्चाष्टक्रमात् सुताः ॥
एवंप्रकाररुद्रोऽसौ सतीं भार्य्यामविन्दत ॥
दक्षकोपाच्च तत्याज सा सती स्वं कलेवरम् ।
हिमवद्दुहिता साभून्मेनायां द्विजसत्तम ! ॥
उपयेमे पुनश्चोमामनन्यां भगवान् भवः ॥
देवौ धाता विधातारौ भृगोः ख्यातिरसूयत ।
श्रियञ्च देवदेवस्य पत्नी नारायणस्य या ॥"

इति विष्णुपुराणे १ अंशे ८ अध्यायः ॥ * ॥

("द्वितीये हि युगे सर्व्वमक्रोधव्रतमास्थितम् ।
दिवं सहस्रवर्षाणामसुरा अभिदुद्रुवुः ॥
तपोविघ्नं शमीकर्त्तुमुपोविघ्नं महात्मनाम् ।
पश्यन् समर्थश्चोपेक्षामकरोद्दक्षः प्रजापतिः ॥
पुनर्माहेश्वरं भागं ध्रुवं दक्षः प्रजापतिः ।
प्रायो न कल्पयामास प्रोच्यमानः सुरैरपि ॥
पाशुपत्यं ऋचो याज्ञ्यश्चाहुतयश्च याः ।
यज्ञसिद्धिश्च तस्याभिहोंगश्चैव स दृष्टवान् ॥
अथोत्तीर्णव्रतो देवो बुद्ध्वा दक्षव्यतिक्रमम् ।
रुद्रो रौद्रं पुरस्कृत्य भावमात्मविदात्मनः ॥
दृष्ट्वा ललाटे चक्षुर्वै दग्ध्वा तानसुरान् प्रभुः ।
वाक्यं क्रोधाग्निसन्तप्तमसृजत् शूलपाणिनम् ॥
ततो यज्ञः स विध्वस्तो यथितास्च दिवौकसः ।
दाहज्वरा परीताश्च भ्रान्ता भूतगणा दिशः ॥"

इति शरके चिकित्सास्थाने तृतीयोऽध्याये ॥)

रुद्रगीता वराहपुराणे दृश्या ॥ * ॥ (विश्वकर्म्मपुत्रविशेषः । यथा, विष्णुपुराणे । १ । १५ । १२२ ।

"तस्य पुत्रास्तु चत्वारस्तेषां नामानि मे शृणु ।
अजैकपादहिर्बुध्नस्त्वष्टा रुद्रश्च बुद्धिमान् ॥")

स्वनामख्यातः कविविशेषः । स च विद्याविलासपुत्रः भावविलासप्रणेता । कविरयं भावसिंहपुत्रस्य भावसिंहमहीपतेः समये बभूव । स च भावसिंहमहीपतिर्व्वर्त्तमानजयपुरमहाराजस्य षोड़शः पूर्व्वपुरुषः । तथा च भावविलासे । १३४—१३६ ।

"अव्यापदेशविनिवेशविदग्धबुद्धि-
श्रीभावसिंहनरसिंहनियोगयोगात्।
सम्पादितो विविधभावविकासभाजां
प्रीतिं भृशं भवतु भावविलास एषः॥
सङ्गानां समुदेक रुद्रेक ग्रथिता गुणैः।
कण्ठस्था शोकमालेयं केषां न कुरुते श्रियम्॥
विद्याविलासपुत्रस्य न्यायवाचस्पतेरियम्।
काव्यालापविदग्धानां सुदं निर्म्मातु निर्म्मितिः॥")

रुद्रकवचं, क्ली, (रुद्रस्य कवचम्।) शिवनाम-समूहेन सर्व्वाङ्गरक्षकम्। यथा,—

"वक्ष्यामि रुद्रकवचमाद्यं प्राणस्य रक्षणम्।
अघोराख्यं महादेव रक्षार्थं देवनिर्म्मितम्॥
ॐ रुद्रो मामग्रतः पातु पृष्ठतः पातु शङ्करः।
कपर्द्दी दक्षिणे पातु वामपार्श्वे तथा हरः॥
शिवः शिरो मे च पातु ललाटे नीललोहितः।
नेत्रयोस्त्र्यम्बकः पातु सुखे पातु महेश्वरः॥
कर्णयोर्नासिकायाञ्च जिह्वायां शम्भुरव्ययः।
श्रीकण्ठस्तु गले पातु बाह्वोः पातु पिनाकधृक्॥
हृदयं मे महादेव ईश्वरस्तु तथोदरम्।
नाभौ कुक्षौ कटिस्थाने पातु सर्व्वं प्रजापतिः॥
ऊरू जानू महादेवः पादौ पातु महेश्वरः।
सर्व्वं रक्षतु भूतेशः सर्व्वगात्राणि यत्नतः॥
परशुं शूलखट्वाङ्गं दिव्यास्त्रं रौद्रमेव च।
नमस्काराय देवेशं रक्ष मां जगदीश्वरः॥
रक्षोभ्यो ग्रहपीड़ाभ्यो रोगशोकार्त्तवेषु च।
पापेभ्यो नरकेभ्यश्च त्राहि मां भक्तवत्सल॥
जन्म मृत्युर्ज्जरा व्याधिः कामः क्रोधः श्रमो दमः।
लोभमोहमदाश्चापि त्यजन्तु भुवनेश्वर॥
त्वं गतिस्त्वं मतिश्चैव त्वं बुद्धिस्त्वं परायणः।
कायेन मनसा वाचा त्वयि भक्तिर्द्दृढास्तु मे॥
इत्येतद्रुद्रकवचं पठतः पापनाशनम्।
महादेवप्रसादेन दुर्व्वासःपरिकीर्त्तितम्॥
न तस्य पापजेयोऽस्ति भयं तस्य न विद्यते।
प्राप्नोति सुखमारोग्यं पुण्यमात्मप्रवन्दनम्॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्।
विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नुयात्॥
देहे यैदं हृदि न्यस्य शिवरूपो भवेन्नरः।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकं स गच्छति॥"
इति स्कन्दपुराणे रुद्रकवचं समाप्तम्। इति तन्त्रसारः॥

रुद्रगणः, पुं, (रुद्रस्य गणः।) शिवपार्षदसमूहः। यथा,—

"अपरे रुद्रनामानो जटाचन्द्रार्द्धमण्डिताः।
देवेन्द्रस्य नियोगेन वर्त्तन्ते त्रिदिवे सदा॥
तेषां संख्या चैककोटिर्ल्लक्षं सर्व्वे बलवत्तराः।
कुर्व्वन्ति हि सदा सेवां हरस्य सततं गणाः॥
विलसयन्ति च पापिष्ठान् धर्म्मिष्ठान् पालयन्ति च।
अनुयङ्गन्ति सततं धृतपाशुपतव्रतान्॥
विघ्नांश्च सततं घ्नन्ति योगिनां प्रयतात्मनाम्।
षट्त्रिंशत्कोटयश्चैव हरस्य सकला गणाः॥
वराहगणनाग्राग्रं हिताय जगतां तथा।
शङ्करस्याथ सेवायै समुत्पन्ना इमे गणाः॥"
इति कालिकापुराणे २६ अध्यायः॥

रुद्रचण्डी, स्त्री, (रुद्रा चण्डी।) रुद्रयामलोक्त-देवीमाहात्म्यम्। यथा। "अस्य चण्डिका-महामन्त्रस्य महारुद्र ऋषिरनुष्टुप् छन्दश्चण्डिका देवता रुद्रचण्डीजपे विनियोगः। ॐ नमश्चण्डिकायै।

श्रीशङ्कर उवाच।

चण्डिकां हृदये न्यस्य स्मरणं यः करोत्यपि।
अनन्तफलमाप्नोति देवि चण्डीप्रसादतः॥
रविवारे यदा चण्डीं पठेदागमसम्मताम्।
नवाष्टसिद्धिफलं तस्य जायते नात्र संशयः॥
सोमवारे यदा चण्डीं पठेद्यस्तु समाहितः।
सहस्राष्टसिद्धिपाटस्य फलं जानीहि सुव्रते॥
कुजवारे जगद्धात्रि पठेदयामलसम्मताम्।
शताष्टसिद्धिफलं तस्य बुधे लक्षफलं भवेत्॥
गुरौ यदि महामाये लक्षयुग्मफलं ध्रुवम्।
शुक्रे देवि जगद्धात्रि चण्डीपाठेन शङ्करि॥
शनैश्चरे तुल्यफलं दुर्गे यदि चण्डीं समाहितः।
शनिवारे जगद्धात्रि कोट्यष्टसिद्धिफलं ध्रुवम्॥
अतएव जगद्धात्रीं यत्र चण्डीं समभ्यसेत्।
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत्॥
आरोग्यं विजयं सौख्यं वस्त्ररत्नप्रवालकम्।
पठनाच्छ्रवणाच्चैव जायते नात्र संशयः॥
धनं धान्यं प्रवालञ्च वस्त्ररत्नविभूषितम्।
चण्डीसरणमात्रेण कुर्य्यात् सर्व्वं महेश्वरि॥
ॐ घोरचण्डी महाचण्डी चण्डमुण्डविखण्डिनी।
चण्डवक्त्रा महामाया महादेवविभूषिता॥
चतुर्वक्त्रा इत्यपि पाठः।
रक्तदन्ता वरारोहा महासुरविमर्द्दिनी।
तारिणी जननी दुर्गा चण्डिका चण्डविक्रमा॥
शुम्भकाली जगद्धात्री चण्डी च यामलोद्भवा।
श्मशानवासिनी देवी घोरचण्डी भयानका॥
शिवा घोरा रुद्रचण्डी महेशगणभूषिता।
जाह्नवी परमा क्षमा महात्रिपुरसुन्दरी॥
विद्या श्रीपरमा विद्या चण्डी च वैरमर्द्दिनी।
दुर्गे दुर्गा शिवा घोरा चण्डहन्त्री प्रचण्डिका॥
महेशी वगला देवी भैरवी चण्डविक्रमा।
प्रमथैर्भूषिता क्षमा चासुरा सुरमर्द्दिनी॥
रणघण्टा चण्डघण्टा रणरामवरप्रदा।
तारिणी भद्रकाली च शिवा घोरा भयानका॥
विष्णुप्रिया महामाया नन्दगोपगृहोद्भवा।
मङ्गला जननी चण्डी महाक्रुद्धा भयङ्करी॥
विमला भैरवी निद्रा जातिरूपा मनोहरा।
क्षमा निद्रा क्षुधा माया शक्तिरूपा मनोहरा॥
तस्यै देव्यै नमस्तस्यै सर्व्वरूपेण संस्थिता।
प्राणप्रिया जातिमाया निद्रारूपा महेश्वरी॥
या देवी सर्व्वभूतेषु सर्व्वरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥
एतां चण्डीं जगद्धात्रीं त्राह्मणस्तु सदा पठेत्।
गान्धस्तु पाठको देवी पठने ब्रह्महा भवेत्॥
नारदः पाठकश्चैव कैलासे रत्नभूषिते।
वैकुण्ठे ब्रह्मलोके च देवराजपुरे शिवे॥
यः शृणोति धरायाञ्च मुच्यते सर्व्वपातकैः।
ब्रह्महत्या च गोहत्या स्त्रीवधोद्भवपातकम्॥
तत् सर्व्वं पातकं दुर्गे मातुर्गमनपातकम्।
स्वसृगमनपापञ्च यत् कन्यागमपातकम्॥
सुतस्त्रीगमनञ्चैव यत् यत् पापं प्रजायते।
परदारकृतं पापं तत्क्षणादेव नश्यति॥
जन्मजन्मान्तरात् पापात् गुरुहत्यादिपातकात्।
मुच्यते मुच्यते देवि गुरुपत्नीषु सङ्गमात्॥
मनसा वचसा पापं यत् पापं ब्रह्महिंसने।
मिथ्यायाञ्चैव यत् पापं तत् पापं नश्यति क्षणात्॥
श्रवणं पठनञ्चैव यः करोति धरातले।
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत्॥
यः करिष्यत्यवज्ञां वै रुद्रयामलचण्डिकाम्।
पापैरेतैः समायुक्तो रौरवं नरकं व्रजेत्॥
अश्रद्धां ये प्रकुर्व्वन्ति ते च पातकिनो नराः।
रौरवं रक्तकुण्डञ्च कृमिकुण्डं मलस्य वै॥
शुक्रस्य कुण्डं क्षीरस्य यान्ति तेऽप्यचिरेण वै।
ततः पितृगणैः सार्द्धं विष्ठायां जायते कृमिः॥
शृणु देवि महामाये पठेत् चण्डीं शृणोत्यपि।
गयायाञ्चैव यत् पुण्यं काश्यां विश्वेश्वराग्रतः॥
प्रयागे मुण्डनञ्चैव हरिद्वारे हरेर्गृहे।
तुल्यं पुण्यं भवेद्देवि सत्यं दुर्गे शिवे रमे॥
त्रिगयायां चिकाश्यां वै यच्च पुण्यं शृणु प्रिये।
तच्च पुण्यं तच्च पुण्यं तच्च पुण्यं न संशयः॥
भवानी च भवानी च भवानीत्युच्यते बुधैः।
भकारस्तु भकारस्तु भकारः केवलः शिवः॥
ब्राह्मो चैव जगद्धात्री वरारोहे भकारकः।
प्रेतवद्वि विश्वेशि भकारः प्रेतवत् सदा॥
आरोग्यञ्च जयं दुःखनाशनं सुखवर्द्धनम्।
धनं पुत्रं जयारोग्यं कुष्ठं गलितनाशकम्॥
अर्द्धाङ्गरोगान्मुच्येत दद्रुरोगाद्धि पार्व्वति।
सत्यं सत्यं जगद्धात्रि महामाये शिवे रमे॥
चण्डे चण्डे महाघोरे चण्डिके व्याधिनाशिनि।
मन्दे दिने महेशानि विशेषफलदायिनी॥
सर्व्वदुःखात् प्रमुच्येत भक्त्या चण्डीं शृणोति यः।
ब्राह्मणो हितकारी च पठेन्नियतमानसः॥
मङ्गलं मङ्गलं श्रेयं मङ्गलं जयमङ्गलम्।
भवेद्धि पुत्रपौत्रादिकन्यादासादिभिर्युतः॥
तत्त्वज्ञानञ्च निधने काले निर्व्वाणमाप्नुयात्।
महादानोद्भवं पुण्यं तुलाहिरण्यके यथा॥
चण्डीश्रवणमात्रेण पठनाद्ब्राह्मणोऽपि सः।
निर्व्वाणमेति देवेशि महास्तव्ययनं हि तत्॥
सर्व्वत्र विजयं याति श्रवणाद्दुःखदोषतः।
मुच्यते सर्व्वपापेभ्यो राजराजाधिपो भवेत्॥
महाचण्डी शिवा घोरा भयानकवरप्रदा।
काली च कमला विद्या महोरगविमर्द्दिनी॥
गुह्यचण्डी घोरचण्डी चण्डी त्रैलोक्यदुर्लभा।
देवानां दुर्लभा चण्डी रुद्रयामलसम्भवा॥
अपराजिता महादेवप्रिया रावणमर्द्दिनी।

मनुष्यप्रिया मांसरता मनुष्यमांसबलिप्रिया ॥
मदमत्ता सदा नित्या भूतप्रमथसङ्गता ।
मध्यभागा महारामा धान्यदा धनरत्नदा ॥
वस्त्रदा मणिदा राज्यप्रदा विषयवर्द्धिका ।
मुक्तिदा सर्व्वदा चण्डी महाविपदनाशिनी ॥
इमाञ्च चण्डीं पठते मनुष्यः
प्रमुच्यते भक्त्या परमां शिवस्य ।
चण्डीं धरण्यामतिपुण्ययुक्तः
पठेच्च गच्छेद्धरमन्दिरं शुभम् ॥
यदृच्छमनोरथात् दुर्गं करोति धरणीतले ।
रुद्रचण्डीप्रसादेन किं न सिध्यति भूतले ॥
रुद्रधेया रुद्ररूपा रुद्राणी रुद्रवल्लभा ।
रुद्रभक्ता रुद्ररूपा रुद्रभूषासमन्विता ॥
शिवचण्डी महारक्ता शिवप्रीतिगणान्विता ।
भैरवी परमा विद्या महाविद्या च षोड़शी ॥
सुन्दरी परमा विद्या महात्रिपुरसुन्दरी ।
गुह्यकाली भद्रकाली महाकालविमर्द्दिनी ॥
लक्ष्मा लक्ष्मस्वरूपा सा जननी मोहकारिणी ।
अतितन्द्रा महालक्ष्मा सर्व्वमङ्गलदायिनी ॥
घोरचण्डी भीमरूपा भीमा देवी मनोहरा ।
वगला वगला सिद्धिदायिका सर्व्वदा शिवा ॥
स्तुतिरूपा कीर्त्तिरूपा बुद्धिरूपा मनोहरा ।
विष्णुप्रिया शुक्रपूज्या योगेन्द्रैरपि सेविता ॥
भयानका महालक्ष्मा देवी भयविनाशिनी ।
चण्डिका शुक्तिहस्ता च कौमारी सर्व्वकामदा ॥
वाराही च वराहस्य रुद्राणी शुक्रपूजिता ।
माहेश्वरी महेशस्य महेशगणभूषिता ॥
चामुण्डा नारसिंही च नृसिंहशवनाशिनी ।
सर्व्वशत्रुप्रशमनी सर्व्वारोग्यप्रदायिनी ॥
नैव दुःखं भयं किञ्चित् पठनात् श्रवणाज्जनः ।
इति सत्यं महेशानि सत्यं सत्यं वदाम्यहम् ॥
नैव शोकं नैव रोगं नैव दुःखं भयन्तथा ।
आरोग्यं मङ्गलं नित्यं करोति शुभमङ्गलम् ॥
महेशानि वरारोहे ब्रवीमि सत्यसुत्तमम् ।
अभक्ताय न दातव्यं मम प्राणाधिकं शुभम् ॥
मम भक्ताय शान्ताय शिवविष्णुप्रियाय च ।
दद्यात् कदाचिद्देवेशि सत्यं सत्यं न संशयः ॥
अनन्तफलमाप्नोति शिवचण्डीप्रसादतः ।
अश्वमेधवाजपेयराजसूयशतैन वै ।
दत्ता: स्युः पितरो देवास्तथा च सर्व्वदेवताः ॥
दुर्गे त्वां स्मरणीयानां रुद्रयामलपुस्तकम् ।
मन्त्रमक्षरसंज्ञानं यः करोति नराधमः ॥
अतएव महेशानि किं वक्ष्ये तव सन्निधौ ॥
लक्षोदराधिकचण्डीपठनाच्छ्रवणात् जनः ।
तत्त्वमसीति वाक्येन मुक्तिमाप्नोति दुर्लभाम् ॥"
इति श्रीरुद्रयामले हरगौरीसंवादे रुद्रयामल-चण्डी समाप्ता ॥

रुद्रजः, पुं, (रुद्रात् जात इति । जन् + डः ।) पारदः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य पारदशब्दे विज्ञेयाः ।)

रुद्रजटा, स्त्री, (रुद्रस्य जटेव ।) लताविशेषः । तत्पर्य्यायः । रौद्री २ जटा ३ रुद्रा ४ सौम्या ५ सुगन्धा ६ सुवहा ७ घना ८ ईश्वरी ९ रुद्रलता १० सुपत्रा ११ सुगन्धपत्रा १२ सुरभिः १३ शिवाङ्का १४ मत्तवल्ली १५ जटावल्ली १६ रुद्राणी १७ नेत्रपुष्करा १८ महाजटा १९ जटारुद्रा २० । अस्या गुणाः । कटुरत्वम् । श्वासकासकृमिरोगभूतरक्षोनाशित्वञ्च । इति राजनिर्घण्टः ॥

रुद्रपत्नी, स्त्री, (रुद्रस्य पत्नी ।) दुर्गा । इत्युणादिकोषः ॥ (यथा, महाभारते । ३ । ८३ । १५८ । "सान्निध्यं तत्र राजेन्द्र रुद्रपत्न्या कुरुद्वह । अभिगम्य च तां देवीं न दुर्गतिमवाप्नुयात् ।"). अतसी । इति रत्नमाला ॥

रुद्रप्रिया, स्त्री, (रुद्रस्य प्रिया ।) हरीतकी । इति शब्दरत्नावली ॥ पार्व्वती च ॥

रुद्रभूः, स्त्री, (रुद्रस्य भूः स्थानम् ।) श्मशानम् । इति केचित् ॥

रुद्रविंशतिः, स्त्री, (रुद्रदेवताका विंशतिः ।) शुभवादिवृष्टिवर्षान्तर्गतशेषविंशतिवर्षाणि । तेषां नामानि फलानि च यथा,—

"आद्या तु विंशतिर्ज्ञेया द्वितीया वैष्णवी स्मृता ।
तृतीया रुद्रदेवत्या श्रेष्ठा मध्याधमा भवेत् ॥
शुभधान्यानि पीयन्ते शीघ्रं वर्षति वासवः ।
शुभङ्गे पीड़िताः सर्व्वाः प्रजाश्च सुरवन्दिते ॥१॥
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम् ।
सौम्यवृष्टिर्भवेद्राजा कालिके च शुभं वदेत् ॥२॥
सुभिक्षं क्षेममारोग्यं सुखञ्च निरुपद्रवम् ।
सौम्यवृष्टिर्भवेद्राजा सौम्ये सौख्यं प्रकीर्त्तितम् ॥३॥
तोयपूर्णो भवेन्मेघो वर्षते च दिने दिने ।
निरुपद्रवाश्च राजानः सर्व्वसाधारणे प्रिये ॥४॥
वासवो वर्षते देवि देशे चाखण्डमण्डले ।
अहिच्छत्रे कान्यकुब्जे विरोधी क्षत्रिनाशकृत् ॥५॥
अभिभूतं जगत् सर्व्वं क्लेशैर्व्याधिविधैः प्रिये ।
मारुतैः फलदाश्चैव परिवारिणि शोभने ॥६॥
निष्पत्तिः सर्व्वशस्यानां सुभिक्षं भवति प्रिये ।
प्रमाथिनि जलोद्गारी जलदो मोदते प्रजा ॥७॥
निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यमहार्घता ।
घृतं तैलसमं याति आनन्दे नन्दिनी प्रजा ॥८॥
कोद्रवाः शालिसुद्राश्च पीयन्ते वरवर्णिनि ।
सर्व्वौषधानि धान्यानि राक्षसे निष्ठुरा प्रजा ॥९॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम् ।
अनले च समाख्यातं नात्र कार्य्या विचारणा ॥१०॥
देशभङ्गोऽथ दुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चारुपद्माक्षि दुर्भिक्षं नर्म्मदातटे ॥११॥
गोमहिष्यो विनश्यन्ति ये चान्ये नटनर्त्तकाः ।
वासवो वर्षते देवि शस्यञ्च नहि जायते ॥
तिलसर्षपमाषादिकार्पासानां महार्घता ।
गोमहिष्यः सुवर्णानि कांस्यताम्राद्यशेषतः ॥
ततः सर्व्वं देवि विक्रीय कर्षको धान्यसञ्चयः ।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्दिनम् ।
पार्थिवा सेवका दीनाः कान्ययुक्ते प्रपीड़िताः ॥ १२ ॥

तोयपूर्णाः स्फुटा मेघा बहुशस्या च मेदिनी ।
निष्ठुराः पार्थिवा देवि सिद्ध्यर्थे च वरानने ॥१३॥
अल्पशोया घनाश्चैव कीटकाः प्रबलाः स्फुटाः ।
विरुद्धाः पार्थिवा देवि रौद्रे वर्षे वरानने ॥१४॥
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते ।
भवेद्वे मध्यमा वृष्टिर्दुर्भिक्षं समुपस्थिते ॥ १५ ॥
सुभिक्षं जायते लोकः सर्व्वोपद्रववर्जितः ।
प्राणिनां जायते हर्षो दुन्दुभौ वरवर्णिनि ॥१६॥
महिषीगोहिरण्यादिताम्रकांस्याद्यशेषतः ।
ततः सर्व्वं देवि विक्रीय कर्षको धान्यसञ्चयः ॥
रक्षे संवत्सरे देवि क्रूरबुद्धिर्नराधिपः ।
मानवाः क्रूरचेष्टाश्च संग्रामे न जयो भवेत् ॥१७॥
दुर्भिक्षं मरकं रोगो धान्यौषधिनिपीड़नम् ।
पारधरोगो भवेद्देवि रक्ताख्येऽमरवन्दिते ॥ १८ ॥
रोगो मरकदुर्भिक्षं विविधोपद्रवाकुलम् ।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये ॥१९॥
मेदिनी चलते देवि सर्व्वभूतं चराचरम् ।
ऐशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजा ॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा ।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ॥
कौसुदीचर्म्मनद्योश्च यमुनानर्म्मदातटे ।
विन्ध्यार्य्या सैन्धवे चैव विनश्यति न संशयः ॥
सिंहलो मरुदेशश्च कालञ्जरं तथैव च ।
क्षये क्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि ।"२०
इति ज्योतिस्तत्त्वम् ॥

रुद्रवीणा, स्त्री, (रुद्रस्य वीणा ।) वीणाभेदः । यथा,—

"दण्डः स्याद्रुद्रवीणाया सुश्लक्ष्णादग्रसम्मितः ।
भ्रमदङ्गुष्ठाग्रमितं शुषिरं तस्य कीर्त्तितम् ॥
दण्डस्योभयतो ग्रेयं कांस्यसंवरकद्वयम् ।
पश्चात् संवरकस्याग्रे कृत्रीकृतशिरो भवेत् ॥
दण्डस्य वेष्टनं सार्द्धं पश्चाङ्गुलमिवोदितम् ।
तन्मिता लक्षरी तस्याः कर्त्तव्या सुन्दराकृतिः ॥
कक्षुभो रुद्रवीणायाश्चिह्नितः परिकीर्त्तितः ।
ऊर्द्धे शिरसि दातव्या लोहपत्री समन्विता ॥
मूलतन्त्री तदुपरि तस्या जौही ततः परम् ।
दक्षिणे शिरसि न्यस्येत् श्रुतितन्त्रीद्वयं क्रमात् ॥
एवन्तु कक्षुभं तत्र वीणादण्डे निवेशयेत् ।
द्व्याङ्गुलोच्चर्ऋर्द्धशिरोऽङ्गुष्ठमात्रन्तु पार्श्वकम् ॥
सप्ताङ्गुलान्तरं तस्मात्तन्त्रूलञ्च निवेशयेत् ।
अन्यं ततश्चतुस्त्रिंशद्दङ्गुलान्तरमाच्चिपेत् ॥
अष्टादशाङ्गुलमुखं चक्रं वै चारुगर्भकम् ।
दण्डं सप्तमितं कान्तं वर्त्तुलं तुम्बयुग्मकम् ॥
ऊर्द्धन्तु किञ्चिदाधिक्यमलयञ्च प्रशस्यते ।
अर्द्धाङ्गुलान्तरं पश्चात्तुम्बरं स्थापयेद्बुधः ॥
दण्डपृष्ठे रन्ध्रमेकं स्थापयेच्च समन्ततः ।
लोहाङ्कुशन्तु कर्त्तव्यं वर्त्तुलं पङ्कजाकृति ॥
तदग्रन्तु गुणं तस्मिन् वेष्टयन्वै निवेशयेत् ।
एतत्परायां मोटिन्यां वेष्टयन्त्वाङ्कुशं क्षिपेत् ॥
तन्मोटनीत्तरन्त्वष्टाङ्गं दण्डरन्ध्रकम् ।
सुयन्त्रिते तु तत्रैव बध्नीयात्सुखतन्त्रिकाम् ॥
तावच्च भ्रामयेत् पूर्व्वां मोटनीञ्च मुने: मुने: ।

न यावदेति खस्थानं तन्नो यन्त्रविशारदः ॥
अस्माच्चतुरादश प्रोक्ताः शारिकाः पूर्व्वसूरिभिः।
तासां द्वसप्ततरा अष्टौ दश क्षुद्राः प्रकीर्त्तिताः ॥
एतास्तु तारवादित्यस्तिष्ठन्ति परिकोपरि ।
वितस्तिमात्रपरिकाङ्कुशोत्थाप्यस्य गर्भकः ॥
तावत् शून्यस्तु कर्त्तव्यो यथा दर्व्वे शिरो भवेत्।
मदनस्य च सिक्थस्य योगेन सुदृढ़ीकृता ॥
द्वसप्ततीनाच्च शारीणां खननोत्थं तलक्रमात्।
एतास्तु सर्व्वावयवैः कथिताक्षाङ्कुला बुधैः ॥
स्थाप्य दर्व्वस्य ता: पृष्ठे यथारागस्वरं पुरः।
मदनस्य च सिक्थस्य योगेन सुदृढ़ीकृताः ॥
सर्व्वासां लोहकलिका मस्तके स्युः सुयन्त्रिताः।
एकाङ्कुलोचाः क्षुद्राः स्युरिति शारीविनिर्णयः ॥
एवं विनिर्म्मिता रुद्रवीणा जनमनोहरा।
अस्यां शिक्षात्तु कर्त्तव्या दाक्षिणात्योपदेशतः ॥"

इति सङ्गीतनारायणः ॥

रुद्रसर्गः, पुं, (रुद्रस्य सर्गः।) रुद्रकर्त्तृकसृष्टिः। यथा,—

"इदानीं रुद्रसर्गं त्वं शृणु पार्थिवसत्तम !।
दशवर्षसहस्राणि तपश्चीर्त्वा महाजले ॥
प्रतिबुद्धो यदा रुद्रस्तदा घोरीं सकाननाम्।
दृष्ट्वा शून्यवतीं रम्यां मनुष्यपशुसंकुलाम् ॥
शुशाव च तदा शब्दान्मृत्तिजां दग्धसद्मनि।
आश्रमे यज्विनाश्चैवौंगस्तेरिति कीर्त्तितान् ॥
ततः श्रुत्वा महातेजा सर्व्वज्ञः परमेश्वरः।
चुकोप सुभृशं देवो वाक्यच्छेदमुवाच ह ॥
अहं पूर्व्वमसु कविना सृष्टः सर्व्वात्मना विभुः।
प्रजाः सृजस्वेति तदा वाक्यमेतत्तथोक्तवान् ॥
इदानीं केन तत् कर्म्म कृतं सृष्ट्यादिवर्णनम्।
एवमुक्त्वा भृशं कोपात्ननाद परमेश्वरः ॥
तस्य तां वदतो ज्वालाः श्रोत्रेभ्यो निर्य्ययुस्तदा।
तत्र भूतानि वेताला उच्छुष्माः प्रेतपूतनाः ॥
कुष्माण्डा यातुधानाश्च सर्व्वे प्रज्वलितानना:।
उत्तस्थुः कोटिशस्तत्र नानाप्रहरणोद्यताः ॥"

इति वराहपुराणम् ॥

रुद्रसावर्णिः, पुं, द्वादशो मनुः। अस्मिन् मन्वन्तरे सुधामाख्योऽवतारः। ऋतधामा इन्द्रः। हरितादयो देवाः। तपोमूर्त्त्यादयः सप्तर्षयः। देववदुपदेवादयो मनुपुत्रा भविष्यन्ति। इति श्रीभागवतमतम्। अपि च।

"द्वादशे रुद्रपुत्रस्य प्राप्ते मन्वन्तरे मनोः।
सावर्ण्यास्य ये देवा सुनयश्च शृणुष्व तान् ॥
सुकर्म्माणः सुमनसो हरितो रोहितस्तथा।
सुरापाश्च सुरासत्र पञ्चैते दशका गणाः ॥
त्रिःप्रकारा भविष्यन्ति एकैकस्मिंश्चतुष्टये गणः।
तेषामिन्द्रो हि विज्ञेयो ऋतधामा महाबलः ॥
सर्व्वैरिन्द्रगुणैर्युक्तः सप्तर्षीनपि मे शृणु।
द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः ॥
तपोरतिस्तपोधन्यः सप्तमस्तु तपोधृतिः।
देववान् वामदेवश्च देवश्रेष्ठो विदूरथः।
मित्रवान्मित्रदूतश्च भाविनस्तत्सुता मनोः ॥"

इति मार्कण्डेयपुराणम् ॥

रुद्रस्रुः, स्त्री, (रुद्रं तत्परिमितपुत्रं स्रुते इति। स्रु+क्विप्।) एकादशपुत्रजननी। यथा,—

"विख्यातदेवपुत्रा स्यादेकाधिका तु रुद्रस्रुः॥"

इति शब्दरत्नावली ॥

रुद्राक्रीड़ः, पुं, (रुद्रस्य आक्रीड़ा देवनं यत्र।) श्मशानम्। इति त्रिकाण्डशेषः ॥

रुद्राक्षं, क्ली, (रुद्रस्य अक्षि कारणत्वेनास्त्यस्येति। अर्शआदित्वादच्।) खनामख्यातवृक्षबीजम्। तस्य स्थूलत्वं प्रशस्तत्वञ्च यथा,—

"रुद्राक्षं गिरिलिङ्गञ्च स्थूलं स्थूलं विशिष्यते।
शालग्रामो नर्म्मदश्च सूक्ष्मः सूक्ष्मो विशिष्यते॥"

इति मेरुतन्त्रे ६ प्रकाशः ॥

रुद्राक्षः, पुं, खनामख्यातवृक्षः। तत्पर्य्यायः। त्रिणमेरुः २ अमरः ३ पुण्यचामरः ४। इति शब्दरत्नावली ॥ तस्य फलपर्य्यायः। शिवाक्षम् १ सर्पाक्षम् २ भूतनाशनम् ३ पावनम् ४ नीलकण्ठाक्षम् ५ हराक्षम् ६ शिवप्रियम् ७। अस्य गुणाः। अम्लत्वम्। उष्णत्वम्। वातश्लेष्मगिरोगाग्निभूतग्रहविषनाशित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः ॥ शिवपूजायां अस्य मालाधारणमावश्यकम्। यथा, लिङ्गपुराणे।

"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥"

तस्योत्पत्तिर्यथा। संवत्सरप्रदीपे।

"त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोऽपतंस्तु ये।
अश्रुबो बिन्दवस्ते तु रुद्राक्षा अभवन् भुवि ॥"

यद्यप्येकादिचतुर्दशमुखरुद्राक्षेषु मन्त्रफलविशेषाः सन्ति तथापि सुलभत्वात् पञ्चवक्त्रस्य फलमन्त्रावभिधीयेते। यथा, स्कान्दे।

"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात्।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥
ॐ नमः इति प्रत्येकमष्टोत्तरशतं जपन् शिवाम्भसा प्रक्षाल्य धारयीयम्।
"विद्या मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः।
स याति नरकं घोरं यावदिन्द्राश्चतुर्दश ॥"

इति तिथ्यादितत्त्वम् ॥ * ॥

तस्य धारणे आवश्यकत्वं यथा, संवत्सरप्रदीपे।

"अरुद्राक्षधरो भूत्वा यदृयत् कर्म्म च वैदिकम्।
करोति जपहोमादि तत् सर्व्वं निष्फलं भवेत् ॥"

स्कान्दे।

"ध्यानधारणहीनोऽपि रुद्राक्षं धारयेद्बुधः।
सर्व्वपापविनिर्म्मुक्तः स याति परमां गतिम् ॥"

इत्येकादशीतत्त्वम् ॥

अथ रुद्राक्षमाहात्म्यम्।

श्रीमहादेव उवाच।

"इदानीं देवदेवेशि ! मालानां धारणं शुभम्।
रुद्राक्षस्य च माहात्म्यं वद मे परमेश्वरि ! ॥

श्रीदेव्युवाच।

"शिखायां दक्षयोः कर्णे कण्ठयोश्चापि यो नरः।

रुद्राक्षं धारयेद्भक्त्या शिवलोकमवाप्नुयात् ॥
नववक्त्रन्तु रुद्राक्षं धारयेद्दामबाहुना।
दशबाहौ तथा वत्स! धारयेदूयतमानसः ॥
शिखायां दशनं धार्य्यं कण्ठे च षष्टिविंशतिम्।
कर्णयोः पञ्च संख्या हृदि चाष्टोत्तरं शतम् ॥
नाभौ सप्त च रुद्राक्षं धारणाच्चोत्तमो भवेत्।
रुद्राक्षधारणादेव नरो देवत्वमाप्नुयात् ॥"
शिखायां दशनं हारिंशत्परिमितम् ॥ तथा।
"रुद्राक्षं धारयेन्नित्यं भद्राक्षञ्च सुरेश्वर !।
रुद्राक्षस्य महाबाहो माहात्म्यं शृणु यत्नतः ॥
एकवक्त्रः शिवः साक्षात् ब्रह्महत्यां व्यपोहति।
अश्वमेधं प्रतिश्रोतो वह्निस्नानं करोति च ॥
द्विवक्त्रो हरगौरी स्यात् गोवधाद्यघनाशनकृत्।
त्रिवक्त्रोऽग्निस्त्रिजन्मोत्थपापराशिं प्रणाशयेत् ॥
तूलराशिं यथा वह्निर्भस्मसात् कुरुते हर !।
चिवक्त्रोऽपि च रुद्राक्षस्तथा दहति किल्बिषम् ॥
चतुर्व्वक्त्रस्तु धाता स्यात् नरहत्यां व्यपोहति।
पञ्चवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापनुत् ॥
षड्वक्त्रो यो गुहः साक्षात् गर्भहत्यां शमेदयम्।
सप्तवक्त्रो जनन्यश्च स्वर्णस्तेयाघनुत् सदा ॥
विनायकोऽष्टवक्त्रः स्यैं सर्व्वाशुविनाशनकृत्।
भैरवो नववक्त्रः स्यात् शिवशासुख्यदायकः ॥
दशवक्त्रः स्वयं विष्णुर्भूतप्रेतपिशाचहा।
एकादशमुखो रुद्रो नानायज्ञफलप्रदः ॥
द्वादशास्यो भवेदर्कः सर्व्वतीर्थफलप्रदः।
त्रयोदशमुखः कामः सर्व्वकामफलप्रदः ॥
चतुर्दशास्यः श्रीकण्ठो वंशोद्धारकरः सुतः।
यथोक्तलक्षणेऽपि रुद्राक्षे तदिन्द्राक्षे प्रकीर्त्तितम् ॥
भद्राक्षेऽपि सुरश्रेष्ठ तद्गुणं परिकीर्त्तितम् ॥"

इति योगसारे २ परिच्छेदः ॥

अपि च।

"निश्छिद्राश्च सुपक्वाश्च रुद्राक्षा धारणे स्मृताः।
पञ्चाशत्तं पञ्चगव्यं स्नानकाले प्रयोजयेत् ॥
रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं तथा।
त्र्यम्बकादिकमन्त्रञ्च तथा तत्र प्रयोजयेत् ॥
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमाऽमृतात् ॥
तथा ॐ ह्रीं अघोरे ह्रीं घोरे हूं घोरघोरतरे ॐ हूं हूं श्रीं ऐं सर्व्वतः सर्व्वसर्व्वेभ्यो नमस्तेऽस्तु रुद्ररूपिणे हूं हूं।
अनेनापि च मन्त्रेण रुद्राक्षस्य द्विजोत्तमः।
प्रतिष्ठां विधिवत् कुर्य्यात् ततोऽधिकफलं लभेत् ॥
ततो यथा स्वमन्त्रेण धारयेद्भक्तिसंयुतः।
एकादिचतुर्दशवक्त्राणां संस्कारे प्रत्येकं क्रमेण मन्त्रा यथा। ॐ ॐ शृं नमः। १। ॐ ॐ नमः। २। ॐ ॐ नमः।३। ॐ ॐ ह्रीं नमः। ४। ॐ हूं नमः। ५। ॐ हूं नमः। ६। ॐ ॐ हूं हूं नमः। ७। ॐ नमः।८। हूं नमः। ९। ॐ हं नमः। १०। ॐ ह्रीं नमः।११। ॐ ह्रीं नमः। १२। ॐ त्रां त्रीं नमः। १३। ॐ नमो नमः। १४।
"रुद्राक्षे देहसंस्थे तु कुक्कुरो म्रियते यदि।

मोऽपि रुद्रपदं याति किं पुनर्मानवा गृह ॥
सप्तविंशतिरुद्राक्षमालया देहसंस्थया ।
यः करोति नरः पुण्यं सर्व्वं कोटिगुणं भवेत् ॥
यो ददाति द्विजातिभ्यो रुद्राक्षं भुवि षण्मुख ।
तस्य प्रीतो भवेद्रुद्रः स्वपदञ्च प्रयच्छति ॥
विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
स याति नरकान् घोरान् यावदिन्द्राश्चतुर्दश ॥"
इति पद्मपुराणे रुद्राक्षमाहात्म्यम् । इति तन्त्रसारः ॥

रुद्राणी, स्त्री, (रुद्रस्य पत्नी । "इन्द्रवरुणभव-शर्व्वरुद्रेति ।" ४ । १ । ४९ । इति ङीष् ।) दुर्गा । इत्यमरः । तस्या व्युत्पत्तिर्यथा,—
"रुद्रस्येयन्तु रुद्राणी रौद्रं हन्ति करोति या ॥"
इति देवीपुराणे ४५ अध्यायः ॥

रुद्रजटा । इति राजनिर्घण्टः ॥

रुद्रावासः, पुं, (रुद्रस्य आवासः ।) काशी । इति केचित् ॥

रुद्रारिः, पुं, (रुद्रः अरिर्यस्य ।) कामदेवः । इति केचित् ॥

रुद्री, स्त्री, वीणाभेदः । इति शब्दरत्नावली ॥ अस्या विवरणं रुद्रवीणाशब्दे द्रष्टव्यम् ॥

रुध, ऋ ध ण औ णि आवहनौ । इति कविकल्पद्रुमः ॥ (रुधा०-उभ०-सक०-अनिट् ।) ऋ, अरुधत् अरौत्सीत् । ध ण, रुणद्धि रुन्धे । औ, रोद्धा । णि, रुद्धोऽस्ति । इति दुर्गादासः ॥

रुध, य ड औ कामे । अनुपूर्ब्बोऽयम् । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) य ड, अनुरुध्यते धनं लोकः । औ, अनुरोद्धा । इति दुर्गादासः ॥

रुधिरं, क्ली, (रुणद्धि रुध्यते इति वा । रुध + "इषिमदिसदीति ।" उणा० १ । ५२ । इति किरच् ।) शरीरस्थरसभवधातुः । तत्पर्य्यायः । रक्तम् २ असृक् ३ लगृजम् ४ कीलालम् ५ क्षतजम् ६ शोणितम् ७ लोहितम् ८ अस्रक् ९ शोणम् १० लोहम् ११ चर्म्मजम् १२ । इति राजनिर्घण्टः ॥ (यथा,—
"तद्विशुद्धं हि रुधिरं बलवर्णसुखायुषा ।
युनक्ति प्राणिनं प्रायः शोणितं ह्यनुवर्त्तते ॥"
"बलदोषप्रमाणाद्वा विसृष्टा रुधिरस्य वा ।
रुधिरं स्रावयेच्छस्त्रोराद्यं प्रसमीक्ष्य वा ॥"
इति चरके सूत्रस्थाने चतुर्विंशोऽध्याये ॥
"चतुर्ब्बिंधं यदेतद्धि रुधिरस्य निवारणम् ।
सन्धानं स्कन्दनञ्चैव पाचनं दहनन्तथा ॥
व्रणं कषायः सन्धत्ते रक्तं स्कन्दयते हिमम् ।
तथा सम्पाचयेद्वसा दाहः सङ्कोचयेत् शिराः ॥
अस्कन्दमाने रुधिरे सन्धानानि प्रयोजयेत् ।
सन्धाने सस्यमाने तु पाचनैः समुपाचरेत् ॥
कल्पैरेतैरभिर्विद्वः प्रयतेत यथाविधि ।
असिद्धिमत्सु चैतेषु दाहः परम इष्यते ॥
मधूच्छिष्टे रुधिरे न व्याधिरतिवर्त्तते ।
स्रावणीये ततः स्वयं न तु कुर्य्यादतिक्रमम् ॥
देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते ।
तस्मादयत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥"
इति सुश्रुते सूत्रस्थाने चतुर्दशोऽध्याये ॥
रुधिरस्रावेऽनध्ययनसूक्तं यथा, मनौ । ४ । १२२ ।
"रुधिरे च सुते गात्राच्छस्त्रेण च परिक्षते ।
सामध्वनावृग्यजुषी नाधीयीत कदाचन ॥")
कुङ्कुमम् । इत्यमरः ॥ (यथा, रघुः । १२ । २० ।
"रामस्मन्मथशरेण ताडिता
दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा ॥")

रुधिरः, पुं, (रुध + किरच् ।) मङ्गलग्रहः । इति मेदिनी ॥

रुधिराख्यं, क्ली, (रुधिरमिति आख्या यस्य ।) मणिभेदः । यथा,—
"हृतसुग्रूपमादाय दानवस्य वधेच्छिनम् ।
तस्मैदायां निचिक्षेप किञ्चिद्धीनादि भूतले ॥
तच्चेन्द्रगोपकलितं शुकवक्त्रवर्णं
संस्थानतः प्रकटपीलुसमानमाद्यम् ।
नानाप्रकारविहितं रुधिराख्यरत्न-
सङ्घट्टय तस्य खलु सर्व्वसमानमेव ॥
मध्येन्दुपाण्डरमतीवविमुग्धवर्णं
तच्चेन्द्रनीलसदृशं पटलं तुले स्यात् ।
सैन्धर्य्यभट्टजननं कथितं तदेव
पक्वञ्च तत् किल भवेत् सुरवज्रवर्णम् ॥"
इति गारुडे ७८ अध्यायः ॥

रुष, य ऋ विमोहे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) विमोह आकुलीकरणम् । य, रुष्यति लोकं लोकः । ऋ, अरुषत् अरोषीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यत्रे । इति दुर्गादासः ॥

रुमा, स्त्री, सुग्रीवभार्य्या । विद्वज्जनवशाकरः । इति मेदिनी । मे, २७ ॥

रुरुः, पुं, (रुरु + "चकिरन्योरुच्चोपधायाः ।" उणा० २ । १४ । इति रक् उपधायाश्च उत्वम् ।) अरुणः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रुरुः, पुं, (रौतीति । रु + "रुशातिभ्यां क्नुन् ।" उणा० ४ । १०३ । इति क्नुन् ।) मृगविशेषः । इत्यमरः ॥ (यथा, महाभारते । ३ । ५० । ७ ।
"रुरून् कृष्णान् गवयांश्चैव मेध्यांस्तान्यान् वनेचरान् ।
वाणैरुग्रैश्च विविधैर्व्राह्मणेभ्यो न्यवेदयत् ॥")
अस्य मांसगुणाः । स्निग्धत्वम् । गुरुत्वम् । मन्दाग्निवलप्रदत्वञ्च । इति राजनिर्घण्टः ॥ देवभेदः । इति मेदिनी । रे, ७६ ॥ (यथा, कथासरित्सागरे । ५३ । १७१ ।
"एकानंशे शिवे दुर्गे नारायणि सरस्वति ।
भद्रकालि महालक्ष्मि सिद्धिरुरुविदारिणि ॥"
क्रूरसत्त्वविशेषः । तस्य भारद्वाज इति नाम । इति भागवतटीकायां श्रीधरः । ५ । २६ । ११ ॥
यथा च देवीभागवते । ८ । २२ । १०—११ ।
"इह लोकेऽसुरा ये तु हिंसिता जन्तवः पुरा ।
त एव रुरवो भूत्वा परत्र पीडयन्ति तम् ॥
तस्माद्रौरवमित्याहुः पुराणज्ञा मनीषिणः ।
रुरुः सर्पादतिक्रूरो जन्तुरुक्तः पुरातनैः ॥"
स्वनामख्यातमुनिविशेषः । स तु अवनस्य पौत्रः । अयमेव निजायुषोऽर्द्धं दत्त्वा प्रियां जीवयामास । अस्य विवरणं देवीभागवते २ स्कन्धे ८ अध्याय-मारभ्य तथा महाभारते १ पर्व्वणि ५ अध्याय-मारभ्य द्रष्टव्यम् ॥)

रुरुः, पुं, (रु + कुः ।) एरण्डवृक्षः । इति रत्नमाला ॥ रक्तैरण्डः । इति राजनिर्घण्टः ॥ (एरण्डशब्दोऽस्य विषयो ज्ञातव्यः ।)

रुरुकः, पुं, (रुरुरेव । रुरु + स्वार्थे कन् ।) एरण्डवृक्षः । इति रत्नमाला ॥ रक्तैरण्डः । इति राजनिर्घण्टः ॥

रुरुक्, पुं, एरण्डवृक्षः । इति रत्नमाला ॥

रुरूकः, पुं, एरण्डवृक्षः । इत्यमरः ॥ (तस्याश्च पर्य्यायः ।
"शुल्फरण्ड आमण्डुचिरो गन्धर्व्वहस्तकः ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽण्डरुक्कः ॥
वातारिरक्तरण्डापि रुवूकश्च निगद्यते ।
रक्तोऽपरो रुवूकः स्यादुरुवूको रुवूस्तथा ॥
आम्रपृष्ठश्च वातारिश्चक्षुरुत्तानमादकः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

रुग्ण, औ ग्ण हिंसे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट् ।) औ, अरुग्णत् । ग्ण, रुग्णति रोग्ष्यति । इति दुर्गादासः ॥

रुष, क क्रुधि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, रोषयति । इति दुर्गादासः ॥

रुष, णि वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) णि, रुट्टः रुषितोऽस्ति । रुरोष । इति दुर्गादासः ॥

रुष, य ऋ णि क्रुधि । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) य, रुष्यति भूपाय भूपालः । ऋ, अरुषत् अरोषीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यत्रे । णि, रुट्टः रुषितोऽस्ति । इति दुर्गादासः ॥

रुषा, स्त्री, (रुष् + क्विप् । भागुरिमते टाप् ।) अमर्षः । तत्पर्य्यायः । क्रोधः २ मन्युः ३ क्रुधा ४ क्रुत् ५ कोपः ६ प्रतिघः ७ रोषः ८ रुट् ९ । इति हेमचन्द्रः । २ । २१२ ॥

रुषितः, त्रि, (रुष्यति स्मेति । रुष + क्तः । "रुष्यमत्वरसंघुषास्वनाम् ।" ७ । २ । २८ । इति पक्षे इट् ।) क्रोधयुक्तः । यथा,—
"तं नागपाशैर्बलिनन्दनो बली
बद्धं स्वसैन्ये रुषितो बबन्ध ह ॥"
इति श्रीभागवते बाणयुद्धे ६२ अध्यायः ॥

रुष्टः, त्रि, (रुष्यते स्मेति । रुष + क्तः । "रुष्यमत्वरसंघुषास्वनाम् ।" ७ । २ । २८ । इति इडभावः ।) क्रोधयुक्तः । यथा,—
"ग्लिवे दृष्टे गुरुश्लाघी गुरौ रुष्टे न कश्चन ।"
इति तन्त्रसारः ॥

रुह, ण ज औ जन्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) ण, रूढोऽस्ति ।

ज. रोहः रुहः। औ, अरुक्षत्। जनिर्जन्म। रोहति जन्तुर्जायते इत्यर्थः। रुह जन्मनि प्रादुर्भावे इति प्राचः। जन्मप्रादुर्भावयोरेकोऽर्थः। इति गोविन्दभट्टचतुर्भुजमिश्रौ। रमानाथस्तु प्रादुर्भावः स्फूर्त्तिरिति भेदमाह। इति दुर्गादासः॥

रुहः, त्रि, (रोहतीति। रुह+"इगुपधज्ञेति। ३।१।१३५। इति कः।) जातः। आरूढः। (यथा, मनुः। १। ४८।

"बीजकाण्डरुहाण्येव प्रताना वल्ल्य एवच॥")

रुहकं, क्ली, छिन्नम्। इति शब्दचन्द्रिका॥

रुहा, स्त्री, (रोहति छिन्नापि पुनरुत्पद्यते इति। रुह+कः। टाप्।) दूर्व्वा। इत्यमरः॥ (अस्याः पर्य्यायो यथा,—

"सहस्रवीर्य्या दूर्व्वा तु मङ्गल्या भार्गवी रुहा॥"

इति वैद्यकरत्नमालायाम्॥

"नीलदूर्व्वा रुहानन्ता भार्गवी व्रतपर्व्विका।
शत्यं सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) महासमङ्गा। इति राजनिर्घण्टः॥

रुहिरुहिका, स्त्री, (रुह+इन्। रुहिरुत्पत्तिः। रुहिरुहिका पुनः पुनरुक्तत्वेन कायतीति। कै+कः। टाप्।) उत्कण्ठा। इति पुरुषम्॥

रुक्षा, [न्] पुं, (रोहतीति। रुह+"ग्रीष्मकुशिरुहीति।" उणा० ४। ११३। इति क्तनिप्।) वृक्षः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

रूक्ष, तृ क पारुष्ये। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-अक०-सेट्।) "दीर्घौ। तथा च।

'स पुनातु व्रजे यस्य गोरजःपातरूक्षितौ।
शिशुरुच्छिद्य यमलौ निष्पिपेष तरू क्षितौ।'

इति कौक्षेयकमकम्॥

पारुष्यमस्निग्धीभावः। रूक्षयति रूक्षापयति केशः तैलाभावादिति श्लेषः।" इति दुर्गादासः॥

रूक्षं, त्रि, (रूक्षयतीति। रूक्ष पारुष्ये+पचाद्यच्।) अस्निग्धम्। अचिक्कणम्। इत्यमरः। ३। ३। २२४॥ (यथा, महाभारते। १।१५३।६।

"ऊर्द्धाङ्गुलिः स कक्षूयन् धुन्वन् रूक्षान् शिरोरुहान्॥")

रूक्षः, पुं, वृक्षः। इति हेमचन्द्रः॥ वरकदलम्॥ इति राजनिर्घण्टः॥

रूक्षगन्धकः, पुं, (रूक्षो गन्धो यस्य। कन्।) गुग्गुलुः। इति राजनिर्घण्टः॥

रूक्षजातिका, स्त्री, (रूक्षश्च जातिर्यस्याः। कन्। टापि अत इत्वम्।) सङ्कीर्णधान्यम्। इति राजनिर्घण्टः॥

रूक्षदर्भः, पुं, (रूक्षः कर्कशो दर्भः।) हरिदर्भः। इति राजनिर्घण्टः॥

रूक्षपत्रः, पुं, (रूक्षाणि पत्राणि यस्य।) प्राखोटवृक्षः। इति राजनिर्घण्टः॥

रूक्षप्रियः, पुं, (रूक्षस्य प्रियः।) ऋषभौषधम्। इति राजनिर्घण्टः॥

रूक्षखादुफलः, पुं, (रूक्षं खादु च फलं यस्य।) धन्वनवृक्षः। इति राजनिर्घण्टः॥

रूक्षा, स्त्री, (रूक्षयतीति। रूक्ष+अच्+टाप्।) द्राक्षावृक्षः। इति राजनिर्घण्टः॥

रूढ़, त्रि, (रुह+क्तः।) जातम्। (यथा, रघुः। १। ४१।

"येन स्त्रियः संश्रयदोषरूढ़ं
स्वभावलोलेत्ययशः प्रमृष्टम्॥")

प्रसिद्धम्। इति मेदिनी। ढ़े, १॥ (यथा, रघुः। २। ५३।

"घनात् किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढ़ः॥")

रूढ़ः, पुं, (रुह+क्तः।) प्रकृतिप्रत्ययार्थमनपेक्ष्य शब्दबोधजनकः शब्दः। यथा,—

"मुख्यो व्याप्तिको गौणः शब्दः स्यादौपचारिकः।
यौगिको योगरूढ़ो वा रूढ़ो वा मुख्य एव सः॥"

इति शाब्दिकाः॥ *॥

अपिच। रूढ़ं नाम लक्षयति विभजते च।

"रूढ़ं सङ्केतवन्नाम तेन संज्ञेति कीर्त्यते।
नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्विदा॥"

यन्नाम यादृशार्थे सङ्केतितमेव न तु यौगिकमपि सद्रूढ़म्। योगरूढ़न्तु पङ्कजादिकं न तथा रूढ़नामेव च संज्ञापदेनाभिलप्यते। न तु रूढ़ादिवत् संज्ञापि नान्योऽवान्तरभेदः। येन विभागव्याघातः स्यात्। संज्ञायाश्च त्रयो भेदाः नैमित्तिकी पारिभाषिकी औपाधिकी चेति। पाचकपाठकादयस्तु न संज्ञाः सङ्केतशून्यत्वादिति वक्ष्यते॥ ये तु रूढ़स्य नामचतुर्विधत्वमाहुस्तन्मतमुपन्यस्यति।

"जातिद्रव्यगुणक्रियाभेदैर्धर्म्मैः सङ्केतवत्तया।
जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः॥"

गोगवयादीनां गोत्वादिजात्या। पशाट्टादीनां लाङ्गूलधनदादित्वेन। धन्यपिशुनादीनां पुण्यदेवादिगुणेन। चलचपलादीनाञ्च शब्दानां कर्म्मत्वावच्छिन्नशक्तिमत्त्वाच्चातुर्विध्यमेव रूढ़नामेति। यदुक्तं दक्षाचार्य्यैः।

"शब्देरेभिः प्रतीयन्ते जातिद्रव्यगुणक्रियाः।
चातुर्विध्यादमीष्वाहुः शब्द उक्तचतुर्विधः॥" इति तदेतच्चञ्चु-मुक-मुखादीनामन्यशून्यादीनाञ्च शब्दानामपरिग्रहापत्त्या परित्यक्तमस्माभिः॥ *॥

नैमित्तिकसंज्ञां लक्षयति।

"जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता।
जातिमात्रे हि सङ्केतादाक्लेर्भावं सुदुष्करम्॥"

यन्नामजात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा यथा गोचैत्रादिः। सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रम्। गोपदं गोत्वे सङ्केतितमित्याकारकग्रहात्मानयेत्यादौ गोत्वादिना गवादेरन्वयानुपपत्तेश्च एकशक्तित्वग्रहस्यान्याननुभावकत्वेऽतिप्रसङ्गात्॥ *॥ पारिभाषिकौपाधिकौ च संज्ञां क्रमेण लक्षयति।

"उभयावृत्तिधर्म्मेण संज्ञा स्यात् पारिभाषिकी।
औपाधिकी त्वनुगतोपाधिना या प्रवर्त्तते॥"

उभयावृत्तिधर्म्मावच्छिन्नसङ्केतवती संज्ञा पारिभाषिकी। यथाकाशहित्यादिः। या त्वनुगतोपाध्यवच्छिन्नसङ्केतवती संज्ञा सा त्वौपाधिकी। यथा भूतदूतादिः। सा हि सचेतनवृत्तिविशेषगुणवत्त्ववार्त्ताहारकत्वाद्यनुगतोपाधिपुरस्कारेणैव प्रवर्त्तते। इति शब्दशक्तिप्रकाशिका॥

रूढ़िः, स्त्री, (रुह+क्तिन्।) जन्म। प्रादुर्भावः। (प्रसिद्धिः। यथा, राजतरङ्गिण्याम्। ४।२७१।

"रूढ़िः परम्परायाता सेयमस्मदृषेः स्थिता॥")

आरोहणम्। यथा, तत्रैव। १। २८५।

"यात्राश्रितः किल समाश्रयणीयलभ्यां
निन्द्यां गतिं जगति सर्व्वजनार्च्चितां वा।
गच्छन्नधस्तृणगुणः श्रितकूपयन्त्रः
पुण्याश्रया सुरगिरेरुषि रूढ़िमेति॥")

रूढ़शब्दनिरुक्तिः। यथा,—

"जन्मालिका सती रूढ़िर्भवेद्दृयोगापहारिणी।
कथनीया तु जभते नामानं योगबाधतः॥"

इति कुमारभट्टकारिका॥

रूप, तृ क तत्तृप्तौ। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट्।) तत्तृप्तौ रूपकरणम्। अरूरूपत् प्रतिमां शिल्पी। प्रतिमाया रूपं करोतीत्यर्थः। निपूर्व्वः स्वरूपकथने। अनुमानं निरूप्यत इत्यनुमानखण्डम्। इति दुर्गादासः॥

रूपं, क्ली, (रूप्यते कीर्त्यते रौतीति वा। रु+"ख्यञ्जिरूपभ्यश्चेति।" उणा० ४। २८। इति पः दीर्घश्च। रूपयतीति। रूप्+अच् वा।) स्वभावः। सौन्दर्य्यम्। नामकर्म। पद्मः। शब्दः। ग्रन्थावृत्तिः। नाटकादिः। आकारः। (यथा, मनुः। ७। ७७।

"तदध्यास्योद्वहेद्भार्य्यां सवर्णां लक्षणान्विताम्।
कुले महति सम्भूतां हृद्यां रूपगुणान्विताम्॥")

श्लोकः। इति मेदिनीशब्दरत्नावलीभूरिप्रयोगाः॥ (स्वरूपम्। यथा, मनुः। ८। ४५।

"देशं रूपञ्च कालञ्च व्यवहारविधौ स्थितः॥")

शुक्लादिः। नामकस्थाने नामकर्म। इति नानार्थरत्नमालाविश्वहेमचन्द्राः॥ *॥ रूपन्तु षोढ़ग्रविधम्। यथा। ह्रस्वम् १ दीर्घम् २ स्थूलम् ३ चतुरस्रम् ४ वृत्तम् ५ शुक्लम् ६ कृष्णम् ७ नीलारुणम् ८ रक्तम् ९ पीतम् १० कठिनम् ११ चिक्कणम् १२ श्लक्ष्णम् १३ पिच्छिलम् १४ मृदु १५ दारुणम् १६। इति भरतः भारते मोक्षधर्म्मः॥ *॥ तस्य लक्षणं यथा,—

"अङ्गान्यभूषितान्येव केनचिद्भूषणादिना।
येन भूषितवद्भान्ति तद्रूपमिति कथ्यते॥"

इत्युज्ज्वलनीलमणिः॥

न्यायमते तत्तु चक्षुरिन्द्रियग्राह्यम्। प्रत्यक्षप्रत्यक्षकारणम्। चक्षुः संयोगादि। शुक्लादयनेकप्रकारम्। जलादिपरमाणुरूपं नित्यम्। अन्यत्र अनित्यम्। यथा,—

"चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलभकम्।
चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा।
जलादिपरमाणौ तन्नित्यमन्यत् सङ्केतकम्॥"
इति भाषापरिच्छेदः॥
उत्तरपदस्यरूपादिशब्दस्य उपमानवाचकत्वम्। यथा,—
"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः।
भूतरूपोपमाः काश्यः सन्निभः प्रथितः परः॥"
इति हेमचन्द्रः॥
अतिशयरूपस्य दोषो यथा,—
उमोवाच।
"रूपातिशयसम्पन्ना नानागुणसमन्विताः।
किमर्थं दुःखिता जाताः कान्तसौख्यविवर्जिताः॥
ईश्वर उवाच।
दमयन्ती तथा सीता रूपातिशयपारगा।
दुःखिता तेन संजाता कान्तसौख्यविवर्जिता॥
अहल्या वन्यकी जाता कपिलस्य तु योषिता।
रूपस्य तु प्रभावेण दासी जाता तिलोत्तमा॥
तस्माद्रूपं न नेच्छन्ति लक्षणज्ञास्तपोधनाः।
अतिरूपेण खल्वायुः पुरुषो योषितोऽपि वा।
अथवा सौख्यहीनस्तु जायते तु महातपे॥"
इति देवीपुराणे नन्दाकुण्डप्रवेशाध्यायः॥
तद्वैदिकपर्य्यायः। निर्ऋतिः १ वज्रिः २ वर्षः ३ वपुः ४ अमतिः ५ अघः ६ भुः ७ अप्रः ८ मिहम् ९ पेशः १० लक्षणम् ११ स्वरः १२ अर्जुनम् १३ ताम्रम् १४ अरुषम् १५ श्लिष्टम् १६। इति मोढ्यरूपनामानि। इति वैद्यनिघण्टौ ३ अध्यायः॥

रूपकं, क्ली, (रूप्यतीति। रूपि+खुल्।) नाटकम्। ("तस्य रूपकसंज्ञाहेतुमाह। रूपारोपात्तु रूपकम्। रूपकस्य भेदानाह।
नाटकमथ प्रकरणं
भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः
प्रहसनमिति रूपकाणि दश॥
किञ्च।
नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा॥
संलापकं श्रीगदितं शिल्पकञ्च विलासिका।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च॥
अष्टादश प्राहुरुपरूपकाणि मनीषिणः।
विना विशेषं सर्व्वेषां लक्ष्म नाटकवन्मतम्॥"
इति साहित्यदर्पणे ६ परिच्छेदः॥)
मूर्खम्। (यथा, कथासरित्सागरे। ५५। ४३।
"आदिश्यताञ्च चित्रे किमालिखामीह रूपकम्॥")
काथालङ्करणम्। इति मेदिनी। के, १४८॥
श्लेषस्य लक्षणं यथा,—
"रूपकं रूपितारोपात् विषये निरपह्नवे।
तत् परम्परितं साङ्गं निरङ्गमिति च त्रिधा॥
यत्र कस्यचिदारोपः परारोपणकारणम्।
तत् परम्परितं श्लिष्टाश्लिष्टग्रन्थनिबन्धनम्॥
प्रत्येकं केवलं मालारूपत्वेति चतुर्विधम्।
अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत्॥
समस्तवस्तुविषयमेकदेशविवर्त्ति च।
आरोप्यमाणमप्येषां ग्राह्यत्वे प्रथमं मतम्॥
यत्र कस्यचिदर्थत्वमेकदेशविवर्त्ति तत्।
निरङ्गं केवलत्वेन रूपणं तदपि द्विधा॥
माला केवलरूपत्वात् तेनाष्टौ रूपके भिदाः॥"
इति साहित्यदर्पणे १० परिच्छेदः॥
अपि च।
"अभेदो भासते यस्मिन्नुपमानोपमेययोः।
रूपकं कथ्यते सद्भिरलङ्कारोत्तमं यथा॥
तन्वि युग्मनयनाभीलं लोलालकमधुव्रतम्।
न कस्य हरते चेतो लसद्वदनकेसरम्॥
अस्यनेकप्रकारत्वं रूपकोपमयोरपि।
संक्षेपेणोक्तमन्यत्तु सुधीभिरवधीयताम्॥"
इति काव्यचन्द्रिका॥
संज्ञाविशेषः। यथा,—
"सज्ञाजौ प्रोच्यते शुक्ला सा तिक्तो रूपकं भवेत्।
रूपकैर्ग्रथितः प्रोक्तः कलङ्को नाम नामतः॥"
इति युक्तिकल्पतरुः॥
(उपमानम्। यथा, साहित्यदर्पणे १० परिच्छेदे समासोक्त्यलङ्कारे।
"यत्र तु रूप्यरूपकयोः साहश्यमस्फुटमिति॥"
पुं, सुद्रा। यथा, कथासरित्सागरे। ७८।१३।
"अस्थे परिकरेऽप्येभिरियङ्गिः स्वर्णरूपकैः।
किमेष व्यसनं पुष्णात्यथ कश्चन सद्व्ययम्॥"
तथाच हरत्संहितायाम्। ८२। १२।
"गुञ्जात्रयस्य मूल्यं पञ्चाग्निद्रूपका गुञ्जयुतस्य॥")

रूपतत्त्वं, क्ली, (रूपस्य तत्त्वम्।) श्रीतत्त्वम्। यथा,—
"स्यादूपं लक्षणं भावश्चात्मप्रकृतिरीतयः।
सहजो रूपतत्त्वञ्च धर्म्मसर्गौ निसर्गवत्॥"
इति हेमचन्द्रः। ६। १२॥

रूपधारी, [न्] (रूपं धरतीति। धृ+णिनिः।) सौन्दर्य्यविशिष्टः। यथा,—
"ततो विकटरूपोऽसौ सर्व्वशास्त्रार्थपारगः।
विवाहयद्द्विजसुतां रूपेणानुपमां द्विजः॥
सापमेने च भर्त्तारं सुशीलमपि भाविनी।
विरूपमिति मन्वाना ततः सोऽभूत् सुदुःखितः॥
ततो निर्व्वेदसंयुक्तो गलाश्रमपदं महत्।
इरावत्यास्तटे श्रीमान् रूपधारिणमासदत्॥
तमाराध्य जगन्नाथं नचिरात्पुरुषेण हि।
सुरूपतामवाप्याग्र्यां तस्मिन्नेव च जन्मनि॥"
इति वामनपुराणे ७६ अध्यायः॥

रूपनाशनः, पुं, (रूपस्य नाशनं अदर्शनं यत्र।) पेचकः। इति शब्दरत्नावली॥

रूपवान्, [त्] त्रि, (रूपमस्यास्तीति। रूप+"रसादिभ्यश्च।" ५। २। ६५। इति मतुप्। मस्य वः।) आकारविशिष्टः। (यथा, भागवते। २। ५। २७।
"वायोरपि विकुर्व्वाणात् कालकर्म्मस्वभावतः।
उदपद्यत वै तेजो रूपवत् स्पर्शशब्दवत्॥")
सौन्दर्य्ययुक्तः। (यथा, महाभारते। ३। ४५। १२।
"सत्यवाक् पूजितो वक्ता रूपवाननहङ्कृतः॥")

रूपाजीवा, स्त्री, (रूपेण सौन्दर्य्येण आजीवतीति। आ+जीव्+अच्। टाप्।) वेश्या। इत्यमरः। २। ६। १६॥ (यथा, रामायणे। २। ३६। ३।
"रूपाजीवाश्च वादिन्यो वणिजश्च महाधनाः।
शोभयन्तु कुमारस्य वाहिनीः सुप्रसारिताः॥")

रूपाक्षः, पुं, (रूपमेव अक्षं यस्य।) कामदेवः। इति त्रिकाण्डशेषः॥

रूपिका, स्त्री, (रूपमस्या अस्तीति। रूप+ठन्।) श्वेतार्कवृक्षः। इति रत्नमाला॥ (यथा, सुश्रुते। ५। ६।
"पललं तिलतैलञ्च रूपिकायाः पयो गुडः॥")

रूपेश्वरी, स्त्री, (रूपाणामीश्वरी।) देवीविशेषः। सा तु प्रभवादिषष्टिवर्षान्तर्गतैकविंशवर्षे पूज्या। यथा,—
"रूपेश्वरी प्रकर्त्तव्या दृषद्युग्मव्यवस्थिता।
जटासुकुटभारेन्दुचित्रभूलोरगभूषणा॥
मणिमौक्तिकशोभाढ्या सितचन्दनचर्चिता।
पूजिता कुसुमैर्हृद्यैः सर्व्वकामफलप्रदा॥"
इति देवीपुराणे संवत्सरदेवतार्विंशतिविधिः प्रथमः॥

रूप्यं, क्ली, (आहतं रूपं अस्यास्तीति। रूप्+"रूपादाहतप्रशंसयोर्यप्।" ५।२।१२०। इति यप्।) आहतस्वर्णरजतम्। इत्यमरः। २।६। ६१॥ हेम रूप्यञ्च आहतं अश्ववराहपुरुषादिरूपमुत्पाद्यितुं निर्घातिकया ताड्यते रूप्यमुच्यते रूपाय आहतं रूप्यं ष्ठ्यै कादित्वात्। इति भरतः॥ * ॥ धातुविशेषः। रूपा इति भाषा॥ (यथा, महाभारते। ५। ३६। ७६।
"सुवर्णस्य मलं रूप्यं रूप्यस्यापि मलं त्रपु।
त्रैयं त्रपु मलं सीसं सीसस्यापि मलं मलम्॥")
तत्पर्य्यायः। मृदुमम् २ वसुश्रेष्ठम् ३ रुधिरम् ४ चन्द्रलोहकम् ५ श्वेतकम् ६ महाशुभम् ७ रजतम् ८ तप्तरूपकम् ९ चन्द्रभूति १० सितम् ११ तारम् १२ कलधूतम् १३ इन्द्रलोहकम् १४ रौप्यम् १५ धौतम् १६ सौधम् १७ चन्द्रहासम् १८। इति राजनिर्घण्टः॥ खर्ज्जूरम् १९ दुर्व्वर्णम् २० श्वेतम् २१ रङ्गबीजम् २२ राजरङ्गम् २३ लोहराजकम् २४। इति शब्दरत्नावली॥ कलधौतम् २५। इति जटाधरः॥ अस्य गुणाः। स्निग्धत्वम्। कषायत्वम्। अम्लत्वम्। विपाके मधुरत्वम्। सरत्वम्। वातपित्तहरत्वम्। रूक्षत्वम्। वलीपलितनाशित्वञ्च। इति राजनिर्घण्टः॥ * ॥ अथ रूप्यस्योत्पत्तिनामलक्षणगुणाः।
"त्रिपुरस्य वधार्थाय निर्निमेषैर्त्रिलोकनैः।
निरीक्षयामास शिवः क्रोधेन परिपूरितः॥
ततस्तूष्णा समपतत्तस्मैकस्मादिलोकवात्।

अतो रुद्रः समभवद्वैश्वानर इव ज्वलन् ॥
द्वितीयादपतन्नेत्रादश्रुबिन्दुस्तु वामकात् ।
तस्मादजतमुत्पन्नमुक्तकर्म्मसु योजयेत् ॥
कृत्रिमश्च भवेत्तद्वि रङ्गादिरसयोगतः ।
रूप्यन्तु रजतं तारं चन्द्रकान्ति सितं शुभम् ॥
गुरु स्निग्धं मृदु श्वेतं दाहच्छेदघनक्षयम् ।
वर्णाढ्यं चन्द्रवत् स्वच्छं रूप्यं नवगुणं शुभम् ॥
कठिनं कृत्रिमं रूप्यं रक्तं पीतं दलं लघु ।
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥
रूप्यं शीतं कषायाम्लं स्वादुपाकरसं सरम् ।
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ॥
प्रमेहादिकरोगांश्च नाशयत्यचिरात् ध्रुवम् ।
तारं शरीरस्य करोति तापं
विध्वंसनं यच्छति शुक्रनाशम् ।
वीर्य्यं बलं हन्ति तनोश्च पुष्टिं
महागदान् प्रोषयति ह्यशुद्धम् ॥"

अथ मारणाय योग्यं रूप्यमाह ।
"गुरु स्निग्धं मृदु श्वेतं दाहच्छेदघनक्षयम् ।
वर्णाढ्यं चन्द्रवत् स्वच्छं तारे नवगुणं स्मृतम् ॥"
अथायोग्यम् ।
"कठिनं कृत्रिमं रूप्यं रक्तं पीतं दलं लघु ।
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥"
अथ शोधनविधिः ।
"पत्तलीकृतपत्राणि तारस्थाने प्रतापयेत् ।
निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं रजतपत्राणां विशुद्धिः संप्रजायते ॥"
अथाशुद्धस्य रूप्यस्य दोषमाह ।
"रूप्यं ह्यशुद्धन्तु करोति तापं
विध्वंसनं वीर्य्यबलक्षयञ्च ।
देहस्य पुष्टिं हरते तनोति
रोगांस्ततः शोधनमस्य कुर्य्यात् ॥"
अथ रूप्यस्य मारणविधिः ।
"भागैकं तालकं मर्द्द्यं याममम्लेन केनचित् ।
तेन भागत्रयं तारपत्राणि परिलेपयेत् ॥
धृत्वा मृन्मपुटे रुद्ध्वा पुटेत् चिंशद्दनोपलैः ।
संसृज्य पुनस्तारं दत्त्वा रुद्ध्वा पुनः पचेत् ।
एवं चतुर्दशपुटैस्तारं भस्म प्रजायते ॥"
अन्यप्रकारः ।
"क्षुद्दीक्षीरेण संपिष्टं माक्षिकं तेन लेपयेत् ।
तालकस्य प्रकारेण तारपत्राणि बुद्धिमान् ।
पुटे चतुर्दशपुटैस्तारं भस्म प्रजायते ॥"
एवं मारितस्य रूप्यस्य गुणाः ।
"रूप्यं शीतं कषायाम्लं स्वादुपाकरसं सरम् ।
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ॥
प्रमेहादिकरोगांश्च नाशयत्यचिरात् ध्रुवम् ॥"
इति भावप्रकाशः ॥

अथ रूप्यकरञ्जम् ।
"मध्वाज्यं गुडताम्रञ्च करेणा माक्षिकं रसम् ।
घमनाच्च भवेद्रौप्यं सुवर्णकरणं ह्यदः ॥"
इति गारुड़े १८८ अध्यायः ॥

रूप्यं, त्रि, (प्रशस्तं रूपं अस्यास्तीति । रूप+"रूपादाहतप्रशंसयोर्यप् ।" ५ । २ । १२० । इति यप् ।) सुन्दरम् । इति मेदिनी । ये, ५० ॥ (क्ली, उपमेयम् । यथा, साहित्यदर्पणे १० परिच्छेदे समासोक्त्यलङ्कारे ।
"तत्र हि तिमिरांशुकयोरूप्यरूपकभावो द्वयोरावरकत्वेन स्फुटमिति ॥"*॥ पुं, प्रत्ययविशेषः । स च तत आगत इत्येतस्मिन्विषये "हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ।" ४ । ३ । ८१ । इति सूत्रेण हेतुभ्यो मनुष्येभ्यश्चान्यतरस्यां भवति ॥ यथा समादागतं समरूप्यम् । देवदत्तरूप्यम् ॥)

रूप्याध्यक्षः, पुं, (रूप्यस्य रूप्यं वा अध्यक्षः ।) नैष्किकः । इत्यमरः ॥ रूप्यं रजतं तदेव निष्कं पूर्ब्बवत् स्वार्थिकः रजताध्यक्षो नैष्किकः । टङ्कपतिर्नैष्किक इत्यन्ये । पुरुषाश्वादिरूपं गठितं रजतं रूप्यं तस्याध्यक्षो नैष्किक इति केचित् । इति भरतः ॥

रूष्कः, पुं, एरण्डः । इति शब्दमाला ॥ (यथास्य पर्य्यायः ।
"शुक्लएरण्ड आमण्डुश्चिल्लो गन्धर्व्वहस्तकः ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः ॥
वातारिरुरुशश्चापि रूष्कश्च निगद्यते ।
रक्तोऽपरो रूष्कः स्यादरुष्को रुष्कजया ।
व्याघ्रपुच्छश्च वातारिश्चुरुश्चानुपादकः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

रूष, तृ क विस्फुरणे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-अक०-सेट् ।) दीर्घौ । मूर्द्धन्योपधः । अरूरूषत् । इति दुर्गादासः ॥

रूषकः, पुं, (रूषयतीति । रूष+ण्वुल् ।) वासकः । इति जटाधरः ॥

रूषितं, त्रि, (रूष+क्तः ।) शुष्कितम् । इत्यमरः ॥ दे धूलिगुण्ठकेनैव म्लपिते । गुढ़ि क वेष्टे रूष तृ क स्वाद्विस्फुरणे क्तः । इति भरतः ॥ (यथा, रामायणे । २ । ४२ । १५ ।
"यः सुखेनोपधानेषु शेते चन्दनरूषितः ।
वीज्यमानो महार्हाभिः स्त्रीभिर्मम सुतोत्तमः ॥")

रे, य, सम्बोधनविशेषः । यथा,—
"सम्बोधने ऽङ्ग भोः पाट् प्याट् हे हैं हं होरे रेऽपि च ।"
इति हेमचन्द्रः । ६ । १७१ ॥
(यथा, कथासरित्सागरे । ३२ । १५५ ।
"तत्र मन्दमिवालोक्य साभिप्रायः समं नृपः ।
पप्रच्छ रे किमीदृक् त्वं सञ्जातः कथयतामिति ॥")

रेक, ऋ ङ शङ्कायाम् । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) शङ्का संशयारोपः । ऋ, अरिरेकत् । ङ, रेकते पुरुषत्वं स्थाणौ । स्थाणुर्व्वा पुरुषो वेति संशयमारोपयतीत्यर्थः । रिरेके । इति दुर्गादासः ॥

रेकः, पुं, (रेक शङ्कायाम् अथवा रिच्+घञ् ।) शङ्का । नीचः । विरेचनम् । इति मेदिनी । के, ११ । (यथा,—
"वस्तिर्वातविकारान् पेत्तान् रेकः कफोद्भवान् वमनम् ।
शौद्रं जयति वलासं सर्पिः पित्तं समीरणं तैलम् ॥"
इति वाभटे उत्तरस्थाने ४० अध्याये ॥)
भेकः । इति त्रिकाण्डशेषः ॥

रेकणः, [सु] क्ली, (रिणक्तीति । रिच्+"रिचेर्धने घित् किच्च ।" उणा० ४ । १६८ । इति असुन् । चात् प्रत्ययस्य डुट् । घित्वात् कुत्वम् ।) स्वर्णम् । इति सिद्धान्तकौमुद्यामरादित्तिः ॥

रेका, स्त्री, (रेक शङ्कायाम्+अच् । स्त्रियां टाप् ।) सन्देहः । इति हेमचन्द्रः ॥

रेखा, स्त्री, (लिख्यते इति । लिख विलेखने+"लिखिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इति भिदादित्वात् अङ् । टाप् । रलयोरैक्यात् तस्य रत्वम् ।) अल्पकम् । क्षुद्र । आभोगः । उल्लेखः । इति विश्वः ॥ उल्लेखश्च दक्षाकारलिपिविशेषः । दाँड़ी इति कची इति च भाषा । यथा,—
"यावती यावती रेखा यद्यामद्यवर्गके ।
तावतीं द्विगुणीकृत्य अराभिः परिशोधयेत् ॥
अधोपरि भवेद्रेखा अष्टाभ्यन्तरबिन्दवः ।
यत्र रेखा न बिन्दुश्च तत् सर्वं परिकीर्त्तितम् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥

शरीरस्थरेखया शुभाशुभलक्षणं यथा,—
"ललाटे यस्य दृश्यन्ते तिस्रो रेखाः समाहिताः ।
सुखी पुत्रसमायुक्तः स वर्षं जीवते नरः ॥
चत्वारिंशच्च वर्षाणि द्विरेखादर्शनान्नरः ।
विंशत्यब्दमेकरेख आकर्णान्ताः शतायुषः ॥
आकर्णान्तरिता रेखास्तिस्रश्च स्युः शतायुषः ।
सप्तम्या भ्रुवि रेखा तु षष्ट्यायुस्तिसृभिर्भवेत् ॥
यवाभयवाभौ रेखाभिर्विंशत्यब्दायुरेव हि ।
चत्वारिंशच्च वर्षाणि हीनरेखासु जीवति ॥
भिन्नाभिश्चैव रेखाभिरपन्थत्वं नरस्य हि ॥
त्रिमूलं षट्पदं वापि ललाटे यस्य दृश्यते ।
धनपुत्रसमायुक्तः स जीवेत् शरदः शतम् ॥
तर्जन्या मध्यमाङ्गुल्या आयूरेखा तु मध्यतः ।
सम्प्राप्ता या भवेद्यत्र स जीवेत् शरदः शतम् ॥
कुलरेखा तु प्रथमा अङ्गुष्ठादनुवर्त्तते ।
मध्यमायाः करे रेखा आयूरेखा अतः परम् ॥
कनिष्ठिकां समाश्रित्य आयूरेखां समादिशेत् ।
अच्छिन्ना वाविभक्ता वा स जीवेच्छरदः शतम् ॥
यस्य पाणितले रेखा आयुस्तस्य प्रकाशयेत् ।
शतं वर्षाणि जीवेच्च भोगी रङ्क ! न संशयः ॥
कनिष्ठिकां समाश्रित्य मध्यमायामुपागता ।
षष्टिं वर्षायुषं कुर्य्यात् आयूरेखा तु मानवम् ॥"
इति गारुड़े ६२ अध्यायः ॥ * ॥

अपिच ।
"घनाङ्गुलिश्च सघनस्तिस्रो रेखाश्च यस्य वै ।
नृपतेः करतलगा मणिबन्धे समुत्थिता ॥
युगसीनाङ्कितकरो भवेत् सत्रप्रदो नरः ।
वज्राकारश्च धनिनां मत्स्यपुच्छनिभो बुधे ॥

ग्रहातपत्रश्रियिकागजपद्मोपमा नृपे ।
कुम्भाङ्कुशपताकाभा ध्वजालाभा निरीश्वरे ॥
दामाभाश्च गजाढ्यानां स्वस्तिकाभा नृपेश्वरे ।
चक्राब्जितोमरधनुःकुन्ताभा नृपतेः करे ॥
उदूखलाभा यज्ञाढ्ये वेदीभाश्चाग्निहोत्रिणि ।
वापीदेवकुलाभाश्च त्रिकोणाभाश्च धार्मिके ॥
अङ्कुशस्थलगा रेखाः पुत्राः सूक्ष्माश्च कारिकाः ।
प्रदेशिनीगता रेखा कनिष्ठास्थलगामिनी ॥
मृतायुषश्च कुरुते छिन्नया तरुतो भयम् ।
निःस्वाश्च बहुरेखाः स्युर्निर्द्रव्याश्चिपुके: क्रमैः ॥"
इति गारुडे ६६ अध्यायः ।

रेखागणितः, पुं, (रेखाया गणितं प्रमाणस्वरूपादि यत्र ।) श्रीजयसिंहमहाराजपक्षीतद्विजसम्राड्जगन्नाथकृतगणितग्रन्थविशेषः । तस्य संक्षिप्तविवरणम् । यथा,—
"येनेदं वाजपेयाद्यैर्मखदानानि षोड्श ।
दत्तानि द्विजवर्य्येभ्यो गोग्रामगजवाजिनः ॥
तस्य श्रीजयसिंहस्य तुष्ट्यै रचयति स्फुटम् ।
द्विजः सम्राड् जगन्नाथो रेखागणितसुत्तमम् ॥
अपूर्व्वं विहितं ग्राह्यं यत्र कोणावबोधनात् ।
क्षेत्रेषु जायते सम्यक् व्युत्पत्तिर्गणिते तथा ॥
शिल्पग्राह्यमिदं प्रोक्तं ब्रह्मणा विश्वकर्म्मणे ।
यावन्मर्य्यवधादेतदागतं धरणीतले ॥
तदुच्छिन्नं महाराजजयसिंहाज्ञया पुनः ।
प्रकाशितं मया सम्यक् गणकानन्दहेतवे ॥"*॥
अथ रेखागणिता । अत्र ग्रन्थे पञ्चदशाध्यायाः सन्ति । अष्टसप्तोत्तरचतुःशतम् श्लोकानि सन्ति । तत्र प्रथमाध्याये अष्टचत्वारिंशच्छ्लोकानि । तत्रादौ परिभाषा । यः पदार्थः दर्शनयोग्यः विभागानर्हः स बिन्दुर्वाच्यः । यः पदार्थः दीर्घः विस्काररहितः विभागार्हः स रेखाशब्दवाच्यः । विस्तारदैर्घ्ययोर्यद्भिद्यते तद्धरातलं तदेव क्षेत्रम् । तद्द्विविधं एकं नतवत् समं द्वितीयं विषमम् । अथ रेखापि द्विविधा । एका वक्रा अन्या सरला । अथ सरलरेखालक्षणम् । यस्यां व्याप्ता बिन्दवः अवलोकिताः सन्त एकबिन्दुनाच्छाद्यन्ते सा सरला अन्यथा कुटिला । धरातलमपि समं विषमञ्च ज्ञेयम् । समं यदाद्रियते । यत् रेखाद्वयं समं समानान्तरं न भवति तस्य यस्मिन् प्रदेशे बहुन्तरं भवति तद्दिग्भिर्वर्द्धितयो रेखयोरन्तरसुत्तरोत्तरं अधिकमेव भवति यत्राल्पमन्तरं भवति तद्दिग्भिर्वर्द्धितयो रेखयोरन्तरसुत्तरोत्तरमल्पमेव भवति यावद्रेखासंयोगं तदनन्तरमन्तरं वर्द्धिष्णु भवति । यत्र कोणशब्दः तत्र सरलरेखाकृत एव कोणो ज्ञेयः । यत्र रेखाशब्दः तत्र सरलैव रेखा ज्ञेया । यत्र भूमितलशब्दः तत्र जलसमीकृतमेव भूतलं ज्ञेयम् । इति रेखागणितस्य परिभाषा ।

रेखाभूमिः, स्त्री, (रेखास्थिता भूमिः ।) लङ्कासुमेरुपर्व्वतयोर्मध्यसूत्रगतदेशः । यथा,—
"यल्लङ्कोज्जयिनीपुरोपरिकुरुक्षेत्रादिदेशान् स्पृशन्
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः ।
यादौ प्रागुदयोऽपरत्र विषये पश्चाद्रि रेखोदयात्
स्यात्तस्मात् क्रियते तदन्तरभुवं खेटेष्वृणं खं फलम् ॥"
इति सिद्धान्तशिरोमणिः । * ॥
अन्यच्च । रेखोक्ता सूर्य्यसिद्धान्ते । यथा रेखामधिकृत्य ।
"राक्षसालयदेवौकः शैलयोर्म्मध्यसूत्रगाः ।
रौहितकमवन्ती च तथा सन्निहितं सरः ॥"
अस्यार्थः । लङ्कासुमेरुपर्व्वतयोर्म्मध्यसूत्रगा देशा रेखासंज्ञिताः । तान् देशानाह । रौहितकदेशोऽवन्तीदेशः सन्निहितं सरः कुरुक्षेत्रक्षेत्रयोः । रेखायाः पूर्व्वदेशे परदेशे च यथासंख्यं सूर्य्योदयकालात् परकालं पूर्व्वकालश्च वारप्रवृत्तिः स्यादित्यर्थः । एतेनैतदुक्तं भवति रेखासंज्ञकदेशस्थलोका यदा सूर्य्यं पश्यन्ति तदैव सर्व्वदेशे वारप्रवृत्तिरित्यर्थः । तत्र रेखा पूर्व्वस्याः सन्निहितत्वादादौ सूर्य्यं पश्यन्ति तदनन्तरञ्च रेखास्थाः । अतो रेखापूर्व्वे सूर्य्योदयात् परं वारः । तथा रेखास्थैः सूर्य्ये दृष्टे सति पश्चात् रेखापरस्थाः पश्यन्ति अतो रेखापरदेशे सूर्य्योदयात् पूर्व्वं वार इत्यर्थः । तत्र कालपरिमाणमाह । रेखातो यावन्ति देशान्तरयोजनानि तत्सम्मिताभिर्विघटीभिः पलैः पादहीनाभिः चतुर्थभागहीनाभिर्वारप्रवृत्तिः स्यादित्यर्थः । देशान्तरसाधनप्रकारस्तु सूर्य्यसिद्धान्ते उक्तः । अत्र तु संक्षेपेण किञ्चित् कथ्यते । गौड़े पञ्चदशाधिकशतयोजनानि ११५ । दक्षिणराढ़े गङ्गातीरे दशाधिकशतम् ११० । भैरवीतीरे विंशत्यधिकशतम् १२० । वङ्गे सुवर्णग्रामादौ चत्वारिंशदधिकशतम् १४० । वाराणस्यामष्टोत्तरशतम् १०८ देशान्तरम् । एवमन्यत्राप्यूह्यम् । तच्चतत्तु लोकसंग्रहीतमिति किन्तु सूर्य्यसिद्धान्ते अर्द्धरात्रादेव वारप्रवृत्तिरुक्ता । यथा,—
"वारप्रवृत्तिः प्राग्देशे चपार्द्धेऽल्पधिके भवेत् ।
तद्देशान्तरनाड़ीभिः पश्चादूने विनिर्दिशेत् ।"
इति दीपिकाटीकायामर्कौसुतां गोविन्दानन्दः ॥

रेचकं, क्ली, (रेचयतीति । रिच्+णिच्+खुल् ।) कञ्चुलवृत्तिका । इति राजनिर्घण्टः । (भेदके, त्रि ।)

रेचकः, पुं, (रेचयतीति । रिच्+णिच्+खुल् ।) यवक्षारः । इति त्रिकाण्डशेषः । जयपालवृक्षः । इति राजनिर्घण्टः । क्रीड़ार्थजलनिःक्षेपयन्त्रम् । पिचकारी इति भाषा । यथा,—
"सिच्यमानोऽच्युतस्ताभिर्म्मेहिषीभिः स रेचकैः ।
प्रतिषिञ्चन् विचिक्रीड़े यक्षीभिर्यक्षराड़िव ॥"
इति श्रीभागवते । १० । ६० । ६ ॥
(धाटनाधिकया प्राणायामाङ्गसुच्यमानवायुः । यथा, भागवते । ३ । २८ । ६ ।
"प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ।"
अस्यान्यद्विवरणं प्राणायामशब्दे द्रष्टव्यम् ।)

रेचः, पुं, धाटनाधिकया प्राणायामाङ्गसुच्यमानवायुः । यथा,—
"पूरकः कुम्भको रेचः प्राणायामस्त्रिलक्षणः ।
नासिकाञ्जर उच्छ्वासो धातुः पूरक उच्यते ।
कुम्भको निश्चलश्वासो सुच्यमानस्तु रेचकः ॥"
इत्याह्निकाचारतत्त्वम् ।
भेदके, त्रि ॥

रेचनं, (रिच्+ल्युट् ।) मलभेदनम् । तत्पर्य्यायः । प्रस्कन्दनम् २ विरेकः ३ विरेचनम् ४ । इति रत्नमाला ॥ रेकः ५ रेचना ६ । इति शब्दरत्नावली ॥ (यथा, सुश्रुते । १ । ३ ।
"रसज्ञानं वमनार्थमध्यायो रेचनाय च ॥"
रेचनद्रव्याणि तु सुश्रुते । १ । ४४ । अध्यायतो ज्ञेयानि ॥)

रेचनकः, पुं, (रेचयतीति । रिच्+णिच्+ल्युः । ततः स्वार्थे कन् ।) कम्पिल्लकः । इति राजनिर्घण्टः ॥

रेचना, स्त्री, (रिच्+णिच्+युच् । टाप् ।) कम्पिल्लः । इति शब्दरत्नावली ॥

रेचनी, स्त्री, (रिच्यतेऽनयेति । रिच्+ल्युट्+ङीप्) कम्पिल्लः । इति शब्दरत्नावली ॥ कालाञ्जनी । इन्द्रवृक्षः । इति राजनिर्घण्टः ॥ श्वेतत्रिवृता । इति मेदिनी ॥ (अस्याः पर्य्यायो यथा,—
"श्वेता त्रिवृत्ता भद्रा स्यात् त्रिवृता त्रिपुटापि च ।
सर्व्वानुभूतिः सरला निशोत्था रेचनीति च ॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥
वटपत्री । तत्पर्य्यायो यथा,—
"वटपत्री तु कथिता मोहिनी रेचनी बुधैः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रेचौ, स्त्री, (रेचयतीति । रिच्+णिच्+अच् । गौरादित्वात् ङीष् ।) कम्पिल्लकः । अङ्गोठः । इति राजनिर्घण्टः ॥

रेज, ऋ ड दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अरिरेजत् । ड, रेजते रिरेजे । इति दुर्गादासः ॥

रेट, ऋ ण याचे । याचि । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-द्विक०-सेट् ।) ऋ, अरिरेटत् । ण, रेटति रेटते । याचौ याचनम् । इति दुर्गादासः ॥

रेणुः, पुं स्त्री, (रिणातीति । री गतिरेषणयोः + "अजिवृरीभ्यो निच्च ।" उणा० ३ । ३८ । इति णुः ।) धूलिः । इत्यमरः ॥ (यथाह कश्चित् ।
"मातुलीकरजरेणुरक्षिते
पादयोरिति कथा प्रथीयसी ।

चालयामि तव पादपङ्कजं
नाथ ! दारुदृषदोस्तु का भिदा ॥")

रेणुः, पुं, (री + णुः ।) पर्पटः । रेणुका । पांशुः । इति राजनिर्घण्टः ॥ (यथा, रघुः । ६ । २३ ।

"दिनकराभिसुखा रणरेणवो
रुरुधिरे रुधिरेण सुरद्विषाम् ॥"

विड्गः । तत्पर्य्यायो यथा,—

"जन्तुघ्नं भस्मकं रेणुः क्रिमिघ्नं चित्रतण्डुलम् ।
क्रिमिघ्नुः विड्गश्च गर्हभं तच्च केवलम् ॥"

इति वैद्यकरत्नमालायाम् ॥)

रेणुका, स्त्री, (रेणुना कायतीति । कै + कः । टाप् ।) मरिचाङ्गतिसुगन्धिद्रव्यविशेषः । तत्पर्य्यायः । द्विजा २ हरेणुः ३ कौन्ती ४ कपिला ५ भस्मगन्धिनी ६ । इत्यमरः ॥ कान्ता ७ नन्दिनी ८ महिला ९ राजपुत्री १० हिमा ११ रेणुः १२ पाण्डुपुत्री १३ हरेणुका १४ सुपर्णी १५ शिग्रिका १६ ग्रान्ता १७ दृन्ता १८ क्वचित् पुस्तके दृत्ता इति च पाठः । धर्म्मिणी १९ कपिलोमा २० हैमवती २१ पाण्डुपत्नी २२ । अस्या गुणाः । कटुत्वम् । शीतत्वम् । खर्जू-कण्डूति-क्षया-दाह-विषनाशित्वम् । सुखवैमल्य-कारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

अथ रेणुका मरीचसदृशी ।

"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका ॥
रेणुका कटुका पाके तिक्तानुष्णा कटूर्लघुः ।
पित्तला दीपनी मेध्या पाचनी गर्भपातिनी ।
वलास-वात-वैकृत्य-लट्-कण्डू-विष-दाह-नुत् ॥"

इति भावप्रकाशः ॥

अन्यच्च ।

"रेणुका कफवातघ्नी दीपनी पित्तला लघुः ।"

इति राजवल्लभः ॥ * ॥

("हरेणू रेणुका कौन्ती ब्राह्मणी हैमगन्धिनी ॥"

इति वैद्यकरत्नमालायाम् ॥)

परशुरामस्य माता । तद्विवरणं यथा,—

मार्कण्डेय उवाच ।

"अथ काले व्यतीते तु जमदग्निर्महातपाः ।
विदर्भराजस्य सुतां प्रयत्नेन जितां स्वयम् ॥
भार्य्यार्थे प्रतिजग्राह रेणुकां लक्षणान्विताम् ।
सा तस्मात् सुषुवे पुत्रान् चतुरो वेदसम्मतान् ॥
रुक्मवन्तं सुषेणञ्च वसुं विश्वावसुं तथा ।
पश्चात्तस्यां स्वयं जज्ञे भगवान् मधुसूदनः ॥
कार्त्तवीर्य्यवधार्थाय शक्राद्यैः सकलैः सुरैः ।
याचितः पञ्चमः सोऽभूत्तेषां रामाह्वयस्तु यः ॥
भारावतारणार्थाय जातः परशुना सह ।
सहजः परशुस्तस्य तं जहाति कदापि न ॥
अयं निजपितामह्याश्चरुभुक्तिविपर्य्ययात् ।
ब्राह्मणः क्षत्रियाचारो रामोऽभूत् क्रूरकर्म्मकृत् ॥
स वेदानखिलान् ज्ञात्वा धनुर्व्वेदांश्च सर्व्वतः ।
स्वतातात् कृतलक्ष्योऽभूदेदविद्याविशारदः ॥
एकदा तस्य जननी स्नानार्थं रेणुका गता ।
गङ्गातोये तथापश्यन्नाना चित्ररथं नृपम् ॥
भार्य्याभिः सहगीभिश्च जलक्रीड़ारतं शुभम् ।
सुमालिनं सुकान्तञ्च तरुणं चन्द्रसन्निभम् ॥
तथाविधं नृपं दृष्ट्वा संजातमदना भृशम् ।
रेणुका सृहयामास तस्मै राज्ञे च मैथुनम् ॥
सृहायुतायास्तस्यास्तु संक्लेदः समजायत ।
विचेतना तथा क्लिन्ना चस्रा सा स्वाश्रमं ययौ ॥
अबोधि जमदग्निस्तां रेणुकां विकृतां तथा ।
धिक् धिक् पापरतेत्येवं निनिन्द च समन्ततः ॥
ततः स्वतनयान् प्राह चतुरः प्रथमं मुनिः ।
रुरुक्षत्प्रमुखान् सर्व्वान् एकैकं क्रमतो रुतम् ॥
छिन्ध्वेनां पापनिरतां रेणुकां व्यभिचारिणीम् ।
ते तद्वचो नैव चक्रुर्मूढ़ास्त्रासन् जड़ा इव ॥
कुपितो जमदग्निस्तान् शशापेति विचेतनान् ।
भवध्वं यूयं नचिरात् जड़ा गोबद्विगर्हिताः ॥
अथाजगाम चरमो जामदग्न्योऽतिवीर्य्यवान् ।
तञ्च रामं पिता प्राह पापिष्ठां छिन्धि मातरम् ॥
स भ्रातॄंश्च तथाभूतान् दृष्ट्वा ज्ञानविवर्ज्जितान् ।
पित्रा शप्तान् महातेजाः प्रस्कं परशुनाच्छिनत् ॥
रामेण रेणुकां छिन्नां दृष्ट्वा चाक्रोधनोऽभवत् ।
जमदग्निः प्रसन्नः सन्निति रामब्रुवाच ह ॥
प्रीतोऽस्मि पुत्र भद्रं ते यत्स्वयं मद्वचः कृतम् ।
तस्माद्दिष्टवरान् कामान् त्वं वै वरय साम्प्रतम् ॥
स तु रामो वरान् वव्रे मातुरुत्थानमादितः ।
वधस्यास्मरणं तस्या भ्रातॄणां शापमोचनम् ॥
मातृहत्याव्यपनयं युद्धे सर्व्वत्र वै जयम् ।
आयुः कल्पान्तपर्य्यन्तं क्रमाद्धे नृपसत्तम ! ॥
सर्व्वान् वरान् स प्रददौ जमदग्निर्महातपाः ।
सुप्रीत्येति तदा जननी रेणुकाप्यभवत्तदा ॥
वधं न चापि सस्मार सहजप्रकृतिं तथा ।
युद्धे जयं चिरायुष्त्वं लेभे रामस्तदैव हि ॥
मातृहत्याव्यपोहाय पिता तं वाक्यमब्रवीत् ।
न पुत्र वरदानेन मातृहत्यापगच्छति ॥
तस्मात्तं ब्रह्मकुण्डाय गच्छ स्नातुञ्च तज्जले ।
तत्र स्नात्वा मुक्तपापो नचिरात् पुनरेष्यसि ।
जगद्धिताय पुत्र त्वं ब्रह्मकुण्डं व्रज द्रुतम् ।
स तस्य वचनं श्रुत्वा रामः परशुधृक् तदा ।
उपदेशात् पितुर्यातो ब्रह्मकुण्डं हृदोदकम् ।
तत्र स्नातं स विधिवत्कृत्वा धौतपरश्वधः ।
शरीरान्निःसृतां सम्यक् मातृहत्यां ददर्शह ॥
जातसंप्रत्ययः सोऽथ तीर्थमासाद्य तं वरम् ।
वीथिं परशुना कृत्वा ब्रह्मपुत्रमवाहयत् ।
ब्रह्मकुण्डात् सुतः सोऽथ कासारे लोहिताह्वये ।
कैलासोपत्यकायास्तु न्यपतद्ब्रह्मणः सुतः ॥
तस्यापि सरसस्तीरं समुत्थाय महाबलः ।
कुठारेण दिशं पूर्व्वामनयद्ब्रह्मणः सुतम् ॥
ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च ।
कामरूपान्तरं पीठमवाहयदसुं हरिः ॥
तस्य नाम विधिश्चक्रे स्वयं लोहितगङ्गकम् ।
लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत् ॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा ।
गोपयन् सर्व्वतीर्थानि दक्षिणं याति सागरम् ॥
प्रागेव दिग्यमुनां संत्यक्ता ब्रह्मणः सुतः ।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् ॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात् ॥
इति ते कथितं राजन् यदर्थं मातरं पुरा ।
हन्ति धीरो जामदग्न्यो यस्माद्वा क्रूरकर्म्मकृत् ॥
इदन्तु महदाख्यानं यः शृणोति दिने दिने ।
स दीर्घायुः प्रसूतो धनवानभिजायते ॥"

इति कालिकापुराणे ८५ अध्यायः ॥

रेणुकासुतः, पुं, (रेणुकायाः सुतः ।) परशुरामः । इति हेमचन्द्रः । ३ । ५१२ ॥ (यथा, महाभारते । ३ । ६६ । ४३ ।

"आर्चीकनन्दनो रामो भार्गवो रेणुकासुतः ॥")

रेणुरुधितः, पुं, (रेणुना रुधितः ।) गर्दभः । इति त्रिकाण्डशेषः ॥ धूलिम्लुचिते, त्रि ॥

रेणुवासः, पुं, (रेणौ परागे वासो यस्य ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

रेणुसारः, पुं, (रेणुरेव सारो यस्य ।) कर्पूरः । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य कर्पूरशब्दे-विज्ञेयाः ॥)

रेणुसारकः, पुं, (रेणुसार एव । स्वार्थे कन् ।) कर्पूरः । इति शब्दरत्नावली ॥

रेतः, [स्] क्ली, (रीयते क्षरतीति । री य ड क्षरणे + "सृरीभ्यां तुट् च ।" उणा० ४ । २० ।) इति असुन् तस्य तुट् च ।) शुक्रम् । (यथा,—

"स्त्रीणां रजोमयं रेतो बीजाढ्यमिन्द्रियं नरे ।
तस्मात् संयोगतः पुंसो जायते गर्भसम्भवः ।
प्रथमेऽहनि रेतश्च संयोगात् कलनञ्च यत् ॥"

इति हारीते शारीरस्थाने प्रथमेऽध्याये ॥

"मातापित्रोर्बीजदोषादशुभैराहृतात्मनः ।
गर्भस्यस्य यदा दोषाः प्राप्य रेतोवहाः शिराः ॥
शोषयन्त्यासु तन्नाड्यादेतश्चाप्युपहन्यते ।
तत्र सम्पूर्णसर्व्वाङ्गः स भवत्युपमान् पुमान् ।
एते त्वसाध्या व्याख्याताः सन्निपातसमुच्छ्रयात् ॥"

इति चरके चिकित्साख्याने त्रिंशेऽध्याये ॥)

अप्सु रेतःपातनिषेधो यथा,—

"न वामहस्तेनोद्धृत्य पिबेच्चक्रेण वा जलम् ।
नोत्तरेदनुपस्पृश्य नाप्सु रेतः समुत्सृजेत् ॥"

इति कौर्म्मे उपविभागे १५ अध्यायः ॥

पारदम् । इति मेदिनी । से, ३३ ॥ (जलम् । इति निघण्टुः । १ । १२ । "दृष्टि-लक्षणानां अपां देवानां रेतस्त्वमेत उच्यते । तथाचोपनिषत् । देवानां रेतो वर्षमिति ।" इति तट्टीकायां देवराजयज्वा ॥ यथा, ऋग्वेदे । ६ । ७० । २ ।

'अस्मे रेतः सिचतं यन्नुदुह्तम् ॥")

रेतजा, स्त्री, (रेतसि जायते इति। जन्+ड:। टाप्। सर्व्वे सान्ता अदन्तास इति न्यायात् अत्राकारान्तरेतशब्द:।) वालुका। इति भावप्रकाश:॥

रेतनं, क्ली, शुक्रम्। इति शब्दचन्द्रिका॥

रेतं, क्ली, पित्तलम्। इत्यमरटिकायां नीलकण्ठ:॥

रेत्रं, क्ली, (रीयते चरतीति। री+बाहुलकात् त्र:।) रेत:। पीयूषम्। पटवास:। स्रुतकम्। इति मेदिनी॥

रेप:, ड ऋ शब्दे। गमने। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-शब्दे अक०-गमने सक०-सेट्।) ड, रेपते रिरेपे। ऋ, अरिरेपत्। इति दुर्गादास:॥

रेप:, त्रि, (रेप्यते निन्द्यते इति। रेप+घञ्।) निन्दित:। क्रूर:। क्षपण:। इति मेदिनी। पे, १०॥

रेफ:, पुं, (रिफ्यते इति। रिफ+घञ्। यद्वा, "रादिफन्।" इत्यनेन वर्णस्वरूपार्थे रशब्दादिफन्प्रत्यय:। तथाच "रेफ इत्यौणादिक:।" इति श्रुतस्तु ५ पादे दुर्ग:।) रवर्ण:। (यथा,—

"परेर्गतो य: शिरसापि धार्य्यते
समागते सद्मनि याति नम्रताम्।
गुरुं: परेषां हिगुरुत्वमीहते।
रेफेण तुल्या प्रकृतिर्मदात्मनाम्॥"

इत्युद्भट:॥)

राग:। इति शब्दरत्नावली॥ (शब्द:। यथा, भागवते। ८। २०। २५।

"श्रियश्च वक्षस्यरविन्दहस्तां
कण्ठे च सामानि समस्तरेफान्॥")

रेफ:, त्रि, (रिफ+"अवद्यावमाधमार्वरेफा: कुत्सिते।" उणा० ५। ५४। इति अप्रत्ययेन निपातित:।) कुत्सित:। इत्यमर:॥

रेफा:, [स्] त्रि, (रिफतीति। रिफ्+असुन्।) क्रूर:। अधम:। दुष्ट:। क्षपण:। इति शब्दरत्नावली॥

रेभ, ड ऋ शब्दे। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-अक० सेट्।) ड, रेभते रिरेभे। ऋ, अरिरेभत्। इति दुर्गादास:॥

रेभणं, क्ली, (रेभ शब्दे+भावे ल्युट्।) गवां ध्वनि:। इति त्रिकाण्डशेष:॥

रेरिहाण:, पुं, शिव:। असुर:। इति मेदिनी। णे, १०६॥ चौर:। इति शब्दरत्नावली॥

रेव, ऋ ड प्लुतौ प्लवे। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-अक०-सेट्।) प्लुति: प्लवेन गमनम्। ऋ, अरिरेवत्। ड, रेवते कपि: उत्प्लुत्य गच्छतीत्यर्थ:। इति दुर्गादास:॥

रेवटं, क्ली, दक्षिणावर्त्तशङ्खम्। इत्यजयपाल:॥

रेवट:, पुं, (रवते इति। रेव+बाहुलकात् अटच्।) शूकर:। वेणु:। वातुल:। विषवैद्य:। इत्यजयपाल:॥

रेवत:, पुं. भ्रमर:। इति जटाधर:॥ (यथा, सुश्रुते। ४। ५।

"पित्तप्रबले द्राक्षारेवतकट्फलपयस्यामधुक-चन्दनकाश्मर्य्यकषायं शर्करामधुमधुरं पाययेत्॥") आरग्वधवृक्ष:। इति शब्दरत्नावली॥ राजविशेष:। स तु रेवतीपिता। बलरामश्वशुरश्च। इति महाभारतम्॥ (अयं हि आनर्त्तपुत्र: शर्य्यातिपौत्र:। स खलु स्वपुत्र्या रेवत्या वरं प्रष्टुकामस्तया सह ब्रह्मलोकं गतवान् आत्मनश्च ब्रह्मणा बलदेवाय कन्यां दत्तवान्। एतद्विवरणं देवीभागवते ७ स्कन्धे ७। ८ अध्यायतो द्रष्टव्यम्॥)

रेवतकं, क्ली, (रेवत इव कायतीति। के+क:।) पारेवतम्। इति राजनिर्घण्ट:॥

रेवति:, स्त्री, कामदेवपत्नी। इति त्रिकाण्डशेष:॥

रेवती, स्त्री, (रेवतस्यापत्यं स्त्री। रेवत+अण्। न द्वृद्ध:। ङीष्।) बलदेवपत्नी। नक्षत्रभेद:। माल्लकाभेद:। इति मेदिनी॥ स्त्रीगवी। इत्यजयपाल:॥ दुर्गा। यथा,—

"रेवा तु नर्म्मदा देवी नदी वा रेवती मता।
अतिखड्गवन्या वा लोके देवी प्रकीर्त्तिता॥"

इति देवीपुराणे ४५ अध्याय:॥ *॥

रेवतीनक्षत्रन्तु अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतैवेनक्षत्रम्। तस्य रूपं मत्स्याकृति दार्चिं-प्रत्तारात्मकम्। तस्याधिष्ठातृदेवता पूषाख्य: स्वर्य:। यथा,—

"दन्तसंख्यभवने भसाङ्कता-
वन्तभे लसदनन्तमध्यगे।
कोमलाङ्गि मिथुनोदयात् प्रिये
कालखानलकला: प्रियेऽचलन्॥"

इति कालिदासकृतरात्रिलयनिरूपणम्॥*॥

तत्र जातफलं यथा,—

"चारुशीलविभवो जितेन्द्रिय:
सत्कुल: स्वभवनैकमानस:।
मानवो ननु भवेन्महीपती
रेवती भवति यस्य जन्मभम्॥"

इति कोष्ठीप्रदीप:॥ *॥

बालग्रहविशेष:। तच्चिकित्सा यथा,—

"अश्वगन्धाजशृङ्गी च शारिवाथ पुनर्नवा।
सहा विदारी श्वेतासां क्वाथेन परिषेचनम्॥"

अजशृङ्गी मेढ़ाशृङ्गी। सहा सेवतीपुष्पजाति:।

"तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्ज्जरसे तथा।
पलङ्कषायां नलदे तथा गौरकदम्बके॥"

सर्ज्जरस: राल:। पलङ्कषा गुग्गुलु:। नलदं लामज्जकतृणगौरवत् पीतच्छवि। गौरकदम्बको हारिद्रक:। हरदुया कदम्ब इति लोके।

"धवाश्वकर्णककुभशल्लकीतिन्दुकेषु च।
काकोलादौ गणे चापि सिद्धं सर्पि: पिबेच्छिशु:॥"

अश्वकर्ण: सांखु इति लोके।

"कुलत्था: शूकशूर्णञ्च प्रदेह: साखगन्धिक:।
यूषोलूकपुरीषाणि यवान् यवफलो घृतम्।
सत्र्यहोद्भवो: कार्य्यमेतद्बालग्रहापनं शिशो:॥"

यवफलो वंशाङ्कुर:।

"युक्ता: सुमनसो लाजा: पय: शाल्योदनं दधि।
बलिर्निवेद्यो गोतीर्थे रेवत्ये प्रयतात्मना॥"

गोतीर्थं गोष्ठे।

"स्नानं धात्रीकुमाराभ्यां सङ्गमे कारयेद्भिषक्॥
नानाशस्त्रधरा देवी चित्रमाल्यानुलेपना।
चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु॥
उपासते यां सततं देवो विविधभूषणा:।
लम्बा कराला विनता तथैव बहुपुत्रिका।
रेवती शुष्कनासा च तुभ्यं देवी प्रसीदतु॥"

इति भावप्रकाश:॥ *॥

बलदेवपत्न्या विवरणं यथा,—

"रेवस्य रैवत: पुत्र: ककुद्मान्नाम धार्म्मिक:।
श्रेष्ठ: पुत्रशतस्यासीत्तस्यां पुर्य्यां नृपोऽभवत्॥
स कन्यासहित: प्रायाद्रैवतो ब्रह्मणोऽन्तिकम्॥
न जरा क्षुत् पिपासा वा न श्रमस्तत्र कर्हिचित्।
ऋतुवक्त्रश्च भवति ब्रह्मलोके द्विजोत्तमा:॥
रैवतस्य गतस्याथ सा पुरी राक्षसैर्हृता।
तस्य पुत्रशतं यच्च त्यक्त्वा तामगमद्दिश:॥
तस्य वंशे तु ये तत्र स्थिता इति विश्रुता:।
क्षत्रिया ह्यभवन् विप्रा हृतु सर्व्वासु
धार्म्मिका:॥
गते बहुयुगे काले आजगामाथ रैवत:।
सङ्कर्षणमेकं मत्वासौ ददर्श यादवेर्हृताम्॥
हृतां द्वारवतीं नाम बहुद्वारां मनोरमाम्।
भोजवृष्ण्यन्धकैर्गुप्तां वासुदेवपुरोगमै:॥
गत्वा तु रैवत: सम्यग्बलभद्राय रेवतीम्।
प्रादाद्गुरुतरां तान्तु बलदेवो हलेन वै।
समानां लघुतां नीत्वा उवाह स प्रहर्षत:॥
दत्त्वा जगाम शिखरं मेरोरुत्तरपश्चिमे रैवत:।
रेमे रामोऽपि धर्म्मात्मा रेवत्या सहित: सुखी॥"

इति वह्निपुराणम्॥*॥

(ब्रह्मणो वाक्येनैव इयं रेवतेन बलदेवाय प्रदत्ता। एतद्विवरणन्तु देवीभागवते ७ स्कन्धे ८ अध्याये द्रष्टव्यम्॥) रैवतमनुमाता। तद्विवरणं यथा,—

मार्कण्डेय उवाच।

"प्रथमोऽपि मनुर्ब्रह्मन् रैवतो नाम विश्रुत:।
तस्योत्पत्तिं विस्तरश्च शृणुष्व कथयामि ते॥
ऋषिरासीन्महाभाग ऋतवागिति विश्रुत:।
तस्यापुत्रस्य पुत्रोऽभूत् रैवत्यन्ते महात्मन:॥
स तस्य विधिवच्चक्रे जातकर्म्मादिका: क्रिया:।
तथोपनयनादींश्च स चाग्नीनाधवन्मुने॥
यत: प्रभृति जातोऽसौ तत: प्रभृति सोऽर्भवि:।
दीर्घरोगपरामर्शमवाप मुनिपुङ्गव॥
माता चास्य परामार्शि कुष्ठरोगादिपीड़िता।
जगाम स पिता चास्य चिन्तयामास दु:खित:॥
किमेतदिति सोऽप्यस्य पुत्रोऽत्यन्तसुदुर्म्मति:।
जग्राह भार्य्यामन्यस्य मुनिपुत्रस्य मन्दधी:॥
ततो विषण्णो मनसा ऋतवागिदमब्रवीत्।
अपुत्रता मनुष्याणां श्रेयसे न कुपुत्रता॥

कुपुत्रो हृदयायासं सर्व्वदा कुरुते पितुः ।
मातुश्च स्वर्गसंस्थाच्च खपितॄन् पातयत्यधः ॥
सुहृदां नोपकाराय पितॄणां नापि हृत्यये ।
पित्रार्दुःखाय धिक् जन्म तस्य दुष्कृतकर्म्मणः ॥
धन्यास्ते तनया येषां सर्व्वलोकाभिसम्मताः ।
परोपकारिणः शान्ताः साधुकर्म्मण्यनुव्रताः ॥
अनिर्वृत्तं तथा मूर्खं परलोकपराङ्मुखम् ।
नरकाय न सङ्कल्पे कुपुत्रालम्बि यन्मनः ॥
करोति सुहृदां दैन्यमहितानां तथा सदम् ।
अकाले च जरां पित्रोः कुपुत्रः कुरुते हि वै ॥

मार्कण्डेय उवाच ।

एवं सोऽत्यन्तदुष्टस्य पुत्रस्य चरितैर्मुनिः ।
दह्यमानमनोवृत्तिर्दुःखं गर्गमपृच्छत ॥

ऋषिरुवाच ।

सुव्रतेन पुरा वेदा गृहीता विधिवन्मया ।
समाप्य वेदान् विधिवत् कृतो दारपरिग्रहः ॥
सदारेण यथा कार्य्याः श्रौताः स्मार्त्ताश्च याः क्रियाः ।
नानुन्यूनाः कृताः काश्चिदृषावद्य महामुने ॥
गर्भाधानविधानेन न काममनुरुध्यता ।
पुत्रार्थं जनितश्चायं पुत्रान्नो विश्रुता मुने ॥
सोऽयं किमात्मदोषेण मम दोषेण वा मुने ।
अस्मद्दुःखखदो जातो दौःशील्याद्दुःखशोकदः ॥

गर्ग उवाच ।

रेवत्यन्ते मुनिश्रेष्ठ जातोऽयं तनयस्तव ।
तेन दुःखाय ते काले दृष्टे यस्माद्दुजायत ॥
न तेऽपचारो नैवास्य मातुर्नापि कुलस्य ते ।
तस्य दौःशील्यहेतुत्वं रेवत्यन्तमुपागतम् ॥

ऋतवागुवाच ।

यस्माच्चमेकपुत्रस्य रेवत्यन्तसमुद्भवम् ।
दौःशील्यमेतत् सा तस्मात् पततामाशु रेवती ॥

मार्कण्डेय उवाच ।

तेनैव चाच्छते शापे रेवत्यन्तं ययात हि ।
पश्यतः सर्व्वलोकस्य विस्मयाविष्टचेतसः ॥
रेवत्यन्तश्च पतितं कुसुदाद्रौ समन्ततः ।
भासयामास सहसा वनकन्दरनिर्झरान् ॥
कुसुदाद्रिश्च तत्पातात् ख्यातो रैवतकोऽभवत् ।
अतीवरम्यः सर्व्वस्यां पृथिव्यां पृथिवीधरः ॥
तस्यर्क्षस्य तु या कान्तिर्जाता पङ्कजिनीश्वरः ।
ततो जज्ञे तदा कन्या रूपेणातीव शोभना ।
रैवतीकान्तिसंभूतां तां दृष्ट्वा प्रसुचो मुनिः ।
तस्या नाम चकारेत्थं रैवतीति हि भागुरे ॥
पोषयामास चैवैनां स्वाश्रमाभ्याससम्भवाम् ।
प्रसुचः स महाभागस्तस्मिन्नेव महाचले ॥
तान्तु यौवनिनीं दृष्ट्वा कन्यकां रूपशालिनीम् ।
स मुनिश्चिन्तयामास कोऽस्या भर्त्ता भवेदिति ॥
एवं चिन्तयतः कालो जगाम सुमहात्मनः ।
न चाससाद सदृशं वरं तस्या महामुनिः ॥
ततस्तस्या वरं प्रष्टुमग्निं स प्रसुचो मुनिः ।
विवेश वह्निशालां वै दृष्ट्वं प्राह हव्यवट् ॥
महाबलो महावीर्य्यः प्रियवाक् धर्म्मवत्सलः ।
दुर्दमो नाम भविता भर्त्ता तस्या महीपतिः ॥

मार्कण्डेय उवाच ।

अनन्तरञ्च यज्ञायाः प्रसङ्गेनागतो मुने ।
तस्याश्रमपदं धीमान् दुर्दमः स नराधिपः ॥
प्रियव्रतान्वयभवो महाबलपराक्रमः ।
पुत्रो विक्रमशीलस्य काञ्चिनीजठरोद्भवः ॥
स प्रविश्याश्रमपदं तां तन्वीं जगतीपतिः ।
अपश्यमानस्तद्दृष्टिं प्रियेत्यामन्त्र्य पृष्टवान् ॥

राजोवाच ।

क्व गतो भगवानस्मादाश्रमान्मुनिपुङ्गवः ।
तं प्रणन्तुमिहेच्छामि तत्त्वं ब्रूहि शोभने ॥

मार्कण्डेय उवाच ।

अग्निशालां गतो विप्रस्तच्छ्रुत्वा तस्य भाषितम् ।
प्रियेत्यामन्त्रणञ्चैव निश्चक्राम त्वरान्वितः ॥
स ददर्श महात्मानं राजानं दुर्दमं मुनिः ।
नरेन्द्रचिह्नसहितं प्रत्युयावनतं पुरः ॥
तस्मिन् दृष्टे ततः शिष्यमुवाच स तु गौतमम् ।
गौतमानीयतां शीघ्रमर्घोऽस्य जगतां पतेः ॥
एष तावदयं भूपश्चिरकालादुपागतः ।
जामाता च विशेषेण योग्योऽर्घोऽस्य मतं मम ॥

मार्कण्डेय उवाच ।

ततः स चिन्तयामास राजा जामालकारणम् ।
विवेद न च तत्कौनी जग्रहेऽर्घञ्च तं नृपः ॥
तमासनगतं विप्रं गृहीतार्घं महामुनिः ।
प्रहृतं प्राह राजेन्द्रमपि ते कुशलं पुरे ॥
कोषे बले च मित्रेषु भृत्यामात्येषु चेश्वर ।
तथात्मनि महाबाहो यत्र सर्व्वं प्रतिष्ठितम् ॥
पत्नी च ते कुशलिनी यत एवाच तिष्ठति ।
पृच्छाम्यस्यास्ततो नाहं कुशलिन्योऽपरास्तव ॥

राजोवाच ।

त्वत्प्रसादादकुशलं न क्वचिन्मुनिसत्तम ।
जातकौतूहलश्चास्मि मम भार्य्याञ्च का मुने ॥

ऋषिरुवाच ।

रेवती तु महाभागा त्रैलोक्ये सापि सुन्दरी ।
तव भार्य्या वरारोहा मानवेन्द्र न वेत्सि किम् ॥

राजोवाच ।

सुभद्रां ग्राम्यतनयां कावेरीतनयां विभो ।
शूरात्मजां सुजाताञ्च कस्माच्च वरूथजाम् ॥
विपाठां नन्दिनीञ्चैव वेद्मि भार्य्या गृहे हि याः ।
तिष्ठन्ति मे न भगवन् रेवतीं वेद्मि का त्वियम् ॥

ऋषिरुवाच ।

प्रियेति चाम्यृतं येयं त्वयोक्ता वरवर्णिनी ।
किं विस्मृतं ते भूपाल श्राद्धेयं गृहिणी तव ॥

राजोवाच ।

सत्यमुक्तं मया किन्तु भावो दुष्टो न मे मुने ।
नात्र कोपं भवान् कर्त्तुमर्हत्यस्मासु याचितः ॥

ऋषिरुवाच ।

सत्यं ब्रवीषि भूपाल न भावस्तव दूषितः ।
याजहार भवानेवं वह्निना नृप नोदितः ॥
मया पृष्टो हुतवहः कोऽस्या भर्त्तेति पार्थिव ।
भविता तेन चाप्युक्तो भवानेवाद्य चागतः ।
तदृच्छतां मया दत्ता कन्या तुभ्यं नराधिप ।
प्रियेत्यामन्त्रिता चेयं विचारं कुरुषे कथम् ॥

श्रीमार्कण्डेय उवाच ।

ततश्च सोऽभवन्मौनी तेनोक्तः पृथिवीपतिः ।
ऋक्षिस्त्रयोद्यतः कर्त्तुं तस्या वैवाहिकं विधिम् ॥
समुद्यतश्च पितरं विवाहाय महामुने ।
उवाच कन्या सा किञ्चित् प्रश्रयावनतानना ॥
यदि मे प्रीतिमांस्तात प्रसादं कर्त्तुमिच्छसि ।
रेवत्यृक्षे विवाहं मे तत् करोतु प्रसादितः ॥

ऋषिरुवाच ।

रेवत्यृक्षं न वै भद्रे चन्द्रयोगे दिवि स्थितम् ।
अन्यानि सन्ति ऋक्षाणि शुभे वैवाहिकानि ते ॥

कन्योवाच ।

तात तेन विना कालो विफलः प्रतिभाति मे ।
विवाहो विफले काले महिधायाः कथं भवेत् ॥

ऋषिरुवाच ।

ऋतवागिति विख्यातस्तपस्वी रेवतीं प्रति ।
चकार कोपं क्रोधेन तेनर्क्षं तन्निपातितम् ॥
मया चास्मै प्रतिज्ञाता भार्य्येति मदिरेक्षणे ।
न चेच्छसि विवाहं त्वं संकटं नः समागतम् ॥

कन्योवाच ।

ऋतवाक् स मुनिस्तात किं मे कस्मान्नवांस्तपः ।
न त्वया समता तेन ब्रह्मबन्धोः सुतास्मि किम् ॥

ऋषिरुवाच ।

ब्रह्मबन्धोः सुता न त्वं बाले नैवातपस्विनः ।
सुता त्वं मम यो देवान् कर्त्तुमन्यान् समुद्यतः ॥

कन्योवाच ।

तपस्वी यदि मे तातस्तत् किन्त्वमिदं दिवि ।
समारोप्य विवाहो मे नाचर्च्चे क्रियते पितः ॥

ऋषिरुवाच ।

एवं भवतु भद्रं ते भद्रे प्रीतिमतो भव ।
आरोपयामीन्द्रमार्गे रेवत्यृक्षं कृते तव ॥

श्रीमार्कण्डेय उवाच ।

ततस्तपःप्रभावेन रेवत्यृक्षं महामुनिः ।
यथापूर्व्वं तथा चक्रे सोमयोगे द्विजोत्तमः ॥
विवाहश्चैव दुहितुर्विधिवत्तत्र योगजम् ।
निर्व्याद्य प्रीतिमान् भूयो जामातरमथाब्रवीत् ॥

ऋषिरुवाच ।

औदाहिकं ते भूपाल कथयां किं ददाम्यहम् ।
दुर्लभ्यमपि दास्यामि ममाप्रतिहतं तपः ॥

राजोवाच ।

मनोः स्वायम्भुवस्याहमुत्पन्नः सन्ततौ मुने ।
मन्वन्तराधिपं पुत्रं त्वत्प्रसादादृणोम्यहम् ॥

मुनिरुवाच ।

भविष्यत्येव ते कामो मनुस्तत्तनयो महान् ।
सकलां भोक्ष्यते भूमिं धर्म्मविच्च भविष्यति ॥

श्रीमार्कण्डेय उवाच ।

तामादाय ततो भूपस्तदैव नगरं ययौ ।
तस्याञ्चाजायत सुतो रैवत्यां रैवतो मनुः ॥
समेतः सकलैर्धर्म्मैर्मानवैरपराजितः ।
विज्ञाताखिलशास्त्रार्थो वेदविद्यार्थशास्त्रवित् ॥
इति मार्कण्डेयपुराणे रैवतमन्वन्तरं समाप्तम् ॥

(गौः। इति निघण्टुटीकायां देवराजयज्वा। २। १०। १६॥)
रेवतीभवः, पुं, (रेवत्यां भव उत्पत्तिर्यस्य।) ग्रहेश्वरः। इति हेमचन्द्रः। २। ३४॥ (रैवतमनुः। इति मार्कण्डेयपुराणम्॥)
रेवतीरमणः, पुं, (रेवत्या रमणः पतिः।) बलदेवः। इत्यमरः। १। १। २४॥
रेवतीशः, पुं, (रेवत्या ईशः।) बलरामः। इति हेमचन्द्रः। २। १३८॥
रेवन्तः, पुं, सूर्य्यपुत्रविशेषः। स च गुह्यकाधिपतिः। तस्योत्पत्तिर्यथा,—
"ततोऽसौ योगमास्थाय स्वां भार्य्यां वड़वां रविः।
ददर्श नियमस्थान्तामश्वरूपमधारयत्॥
मैथुनायोपचक्राम सूर्य्योऽसौ च त्वरान्वितः।
नेच्छन्ती तेन संयोगं परपुंसोऽभिशङ्कया॥
संग्रहात् संमुखी तेजो सुखनासिकया रवेः।
देवौ यतः प्रजायेतामश्विनौ भिषजां वरौ।
नासत्यौ हौ ततीयश्च रेवन्तोऽश्वप्रवाहकः॥"
इति वह्निपुराणम्॥
अपि च।
"ततोऽश्वरूपधृक् भानुरुत्तरानगमत् कुरून्।
ददर्श तत्र संज्ञान्तु वड़वारूपधारिणीम्॥
सा च दृष्ट्वा तमायान्तं परपुंसोऽभिशङ्कया।
जगाम संमुखं तस्य पृष्ठरक्षणतत्परा॥
ततश्च नासिकायोगे तयोस्तत्र समेतयोः।
नासत्यदस्रौ तनयावश्ववक्त्राद्विनिर्गतौ॥
रेतसोऽन्ते च रेवन्तः खड़्गी धन्वी तनुत्रधृक्।
अश्वारूढः सप्तपत्नो बाणतूणसमन्वितः॥
ततः स्वं रूपममलं दर्शयामास भानुमान्।
तस्मै सा च समालोक्य स्वरूपं मुदमादधे॥
स्वरूपधारिणीं तेमामानिनाय निजाश्रमम्।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः॥
ततः पूर्व्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः।
द्वितीयश्च यमः प्राप्ताद्धर्म्मपीठस्थिरभूत सुतः॥
क्रमयो मांसमादाय पादतस्ते महीतलम्।
प्रतिपद्यन्ति प्राणान्तं तस्य चक्रे पिता स्वयम्॥
धर्म्मपीठस्थितस्यासौ समो मित्रे तथाहिते।
ततो नियोगं तं याम्ये चकार तिमिरापहः॥
यमुना च नदी जज्ञे कलिन्दात्तरवाहिनी।
अश्विनौ देवभिषजौ स्तुतौ पित्रा महात्मना।
गुह्यकाधिपतित्वे च रेवन्तो विनियोजितः॥"
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे॥ *॥
सप्तदिनकर्त्तव्यनीराजनविधौ रेवन्तस्य राजकर्त्तृकपूजाविधिर्यथा,—
"सप्तमे हि तु रेवन्तं पूजयेत्तोरणान्तरे।
सूर्य्यपुत्रं महावाहुं द्विभुजं कवचोज्ज्वलम्॥
ज्वलन्तं शुक्लवस्त्रेण केशान् वितत्य वाससा।
कशां वामकरे बिभ्रद्दक्षिणे तु करे पुनः।
खड़्गं न्यस्य महातीक्ष्णं सितसैन्धवसंस्थितम्॥
एवंविधन्तु रेवन्तं प्रतिमायां घटेऽपि वा।
सूर्य्यपूजाविधानेन पूजयेत्तोरणान्तरे॥"
इति कालिकापुराणे नीराजनविधिः ८६ अध्यायः॥ *॥ कोजागरपूर्णिमारात्रौ द्वारोपान्ते तस्य पूजाविधिर्यथा,—
"द्वारोपान्ते सुदीप्तस्तु संपूज्यो हव्यवाहनः।
यवाचतण्डुलैरेतैस्तण्डुलैश्च सुतर्पितः॥
संपूजितश्च पूर्णेन्दुः पयसा पायसेन च।
स्कन्दः सभार्य्यो रुद्रश्च तथा नन्दीश्वरो मुनिः॥
गोमङ्गिः सुरभिः पूज्या छागवह्निर्हुताशनः।
उरभ्रवह्निर्वरुणो गजवह्निर्विनायकः।
पूज्याः सार्य्याश्च रेवन्तो यथाविभवविस्तरैः॥"
इति तिथ्यादितत्त्वम्॥
(रेवन्तदर्शनेन लक्ष्मीं प्रति नारायणस्य प्रापदत्तान्तं देवीभागवते ६ स्कन्धे १७ अध्याये द्रष्टव्यम्॥)
रेवन्तमनुः, स्त्री. (रेवन्तं मनुञ्च स्तुते इति। स्तु+क्विप्।) संज्ञा। इति त्रिकाण्डशेषः॥
रेवा, स्त्री, (रेवते उत्प्लुत्य गच्छतीति। रेव+अच्। टाप्।) नर्म्मदा नदी। इत्यमरः। १। १०। ३२॥ (यथा, मेघदूते। २०।
"रेवां द्रक्षस्युपलविषमे विन्ध्यपादे विशीर्णाम्॥")
अस्याः शिवलिङ्गोत्पत्तिर्यथा,—
"रेवया च कृतं पूर्व्वं तपः शिवसुतुष्टिदम्।
मम त्वत्सदृशः पुत्रो भूयादिति विधो तथा॥
अहं कस्यापि न सुतः किं करिष्यामि चिन्तयन्।
रेवायास्तु वरो देयस्त्वयश्यं मृगलाञ्छन॥
निश्चित्येवं तदा प्रोक्तं प्रसन्नेनान्तरात्मना।
लिङ्गरूपेण ते देवि! गजाननपुरस्कृतः।
गर्भे तव वसिष्यामि पुत्रो भूत्वा शिवप्रिये!॥
मम त्वमपरा मूर्त्तिः ख्याता जलमयी शिवा।
शिवमूर्त्तिविभेदेन चावामेकत्र संस्थितौ॥
एवं दत्तवरा रेवा मत्सान्निध्यमिहागता।
रेवाखण्डमिति ख्यातं ततः प्रभृति गोपते॥"
इति वाराहे सोमेश्वरादिलिङ्गमहिमाध्यायः॥
रेतिः। सा च कामपत्नी। नीलीवृक्षः। इति मेदिनी। वे, २१॥ दुर्गा। यथा,—
"रेवा तु नर्म्मदा देवी नदी वा रेवती मता।
अतिखण्डनवन्द्या वा लोके देवी प्रकीर्त्तिता॥"
इति देवीपुराणे ४५ अध्यायः॥
रेष, ऋ ङ क्ष्वेड्यायाम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) क्ष्वेडा धोटककर्त्तृकशब्दः। ऋ, अरिरेवत्। ङ, रेषते रिरेषेऽश्वः। इति दुर्गादासः॥
रे, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) रेफादिः। रायति। इति दुर्गादासः॥
रैवतः, पुं, स्वर्णासुतश्चः। (यथा, गारुड़े २०८अ:।
"चतुरङ्गलसम्याको याधिघातामिसंज्ञकः।
विद्याद्दारुवधं राजन्नं रैवतसंज्ञकम्॥")
ग्रैलभेदः। (अर्जुनेनाच्युनः सुभद्रां हृतवान्। यथा, महाभारते। २२१। ६—८।
"सुभद्रा तव ग्रैलेन्द्रमभ्यर्च्यैव हि रैवतम्।
देवतानि च सर्व्वाणि ब्राह्मणान् स्वस्ति वाच्य च॥
प्रदक्षिणं गिरेः कृत्वा प्रययौ द्वारकां प्रति॥
तामभिद्रुत्य कौन्तेयः प्रसह्यारोपयद्रथम्।
सुभद्रां चारुसर्व्वाङ्गीं कामबाणप्रपीड़ितः॥
ततः स पुरुषव्याघ्रस्तामादाय शुचिस्मिताम्।
रथेन काञ्चनाङ्गेन प्रययौ स्वपुरं प्रति॥")
शुक्रः। इति मेदिनी। ते, ४५॥ देवविशेषः। इति धरणिः॥ (स तु बालग्रहाणामन्यतमः। यथा, महाभारते। ३। २२६। २६।
"अदितिं रैवतीं प्राहुर्ग्रहस्तस्यास्तु रैवतः।
सोऽपि बालान् महाघोरो बाधते वै महाग्रहः॥"
रेवत्यां भवः। रेवती+अण्।) वर्त्तमानकल्पीयः पञ्चमो मनुः। स तु रेवतीगर्भे दुर्दमराजपुत्रः। अस्मिन् मन्वन्तरे विकुण्ठोऽवतारः। विभुरिन्द्रः। भूतरयादयो देवाः। हिरण्यरोमादयः सप्तर्षयः। बलिविन्ध्यादयस्तन्मनुसुताः। इति श्रीभागवतम्॥ तद्विवरणं यथा,—
"पञ्चमस्य मनोस्तद्वत् रैवतस्यान्तरं शृणु।
देवबाहुः सुबाहुश्च पर्ज्जन्यः सोमपो मुनिः॥
हिरण्यरोमा सप्तार्षः सप्तेते ऋषयः स्मृताः।
देवाश्चाभूतरजसस्तथा प्रकृतयः स्मृताः॥
अरुणस्तत्त्वदर्शी च वित्तवान् हव्यपः कविः।
सुत्तो निरुत्सुकः सत्यो निर्म्मोहोऽथ प्रकाशकः।
धर्म्मवीर्य्यबलोपेता दृश्यते रैवतात्मजाः॥
भृगुः सुधामा विरजः सहिष्णुर्नाद एव च।
विवस्वानतिनामा च वशिष्ठसप्तर्षयोऽपरे॥"
इति मात्स्ये ६ अध्यायः॥ *॥
मार्कण्डेयपुराणोक्तरैवतमनुविवरणन्तु रेवतीशब्दे द्रष्टव्यम्॥ (यदुवंशानामन्यतमः। यथा, मात्स्ये। ५। २६।
"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः॥"
मेघः। इति निघण्टुः। १। १०॥
"रेवत्यो गावः 'पशवो वै रेवतीः।' इति श्रुतेः 'तस्येदम्।' ४। ३। १२०। इत्यण्। मेघो हि सर्व्वत्र वर्षति यवसं पानीयं च जनयित्वा तदीयो भवति पर्ज्जन्यसदृक्षतया। यद्वा, रयिरस्यास्तीति मतुपि 'रयेर्मतौ बहुलम्।' ६। १। ३८। इति सम्प्रसारणम्। 'संज्ञायाम्।' ८। २। ११। इति वत्वम्। सर्व्वस्य धनस्येशित्वात् रेवान् इन्द्रः मघवेति हि, तस्य नाम तदीयो रैवतः पूर्ब्ववत् तदीयत्वं द्रष्टव्यम्॥" इति तत्र देवराजयज्वा॥ *॥ सोमलताविशेषः। यथा, सुश्रुते। ४। २६।
"अग्निसोमौ रैवतश्च यथोक्त इति संज्ञितः॥"
ऋषिविशेषः। यथा, महाभारते। १३५। ११।
"नारदः सुमहातेजा ऋषिभिः सहितस्तदा।
पारिजातेन राजेन्द्र रैवतेन च धीमता॥"
धनवति, त्रि। यथा, ऋग्वेदे। ५। ६०। ४।
"वरा रवेदेवतासो हिरण्ये-
रभिस्वधाभिस्तन्वः पिपिग्रे।"
"वैरतासो धनवन्तः।" इति तद्भाष्ये सायणः॥)

रैवतकं, क्ली, (रैवतकमेव। स्वार्थे अण्।) पारेवतवृक्षः। इति राजनिर्घण्टः॥ (पारेवतशब्देऽस्य गुणादिकं ज्ञेयम्॥)

रैवतकः, पुं, (रैवत एव। स्वार्थे कन्।) रैवतपर्व्वतः। तत्पर्य्यायः। उज्जयन्तः २। इति हेमचन्द्रः॥ (यथा, महाभारते।१।२२०।१।
"ततः कतिपयाहस्य तस्मिन् रैवतके गिरौ।
दृष्ण्यन्धकानामभवदुत्सवो नृपसत्तम!॥")
तस्य नामकारणं रैवतीशब्दे द्रष्टव्यम्॥

रैवतिकः, त्रि, (रैवती+"रैवत्यादिभ्यष्ठक्।" ४।१।१४६। इति ठक्।) रैवत्या अपत्यम्। इति मुग्धबोधव्याकरणम्॥

रोकं, क्ली, (रोचतेऽनेनेति। रुच्+घञ्। अकारादित्वात् कुत्वम्।) छिद्रम्। इत्यमरः।१।८।२॥ नौका। चलम्। इति मेदिनी॥ के, ३२॥

रोकः, पुं, (रुच्+घञ्।) क्षयभेदः। दीप्तिः। इति मेदिनी। के, ३१॥ (यथा, ऋग्वेदे।१।६।७।
"दिवक्षितासो रुचयन्त रोकाः।"
"ते रोकाख्यदीया दीप्तयः।" इति तद्भाष्ये सायणः॥")

रोगः, पुं, (रुज्यतेऽनेनेति। रोजनमिति वा। रुज+घञ्। यद्वा, रुजतीति। रुज्+"यदरुजविशृधृभ्यो घञ्।" ३।३।१६। इति कर्त्तरि घञ्।) कुष्ठौषधम्। इति मेदिनी। गे, २३॥ देहभङ्गकारकः। तत्पर्य्यायः। रुक् २ रुजा ३ उपतापः ४ व्याधिः ५ गदः ६ आमयः ७। इत्यमरः।२।६।५१॥ अपाटवः ८ आमः९ आतङ्कः १० भयः ११ उपघातः १२ भङ्गः १३ अर्त्तिः १४ तमोविकारः १५ व्याधिः १६ क्षयः १७ अनार्त्तवः १८ रुत्पुरुषत्वः १९। इति राजनिर्घण्टः॥ अमः २०। इति जटाधरः॥ मान्थम् २१ आकल्यम् २२। इति हेमचन्द्रः॥ *॥

अस्य निदानादिर्यथा,—
धन्वन्तरिरुवाच।
"सर्व्वरोगनिदानञ्च वक्ष्ये सुश्रुत तत्त्वतः।
आत्रेयाद्यैर्मुनिवरैर्यथापूर्व्वमुदीरितम्॥
रोगः पापा ज्वरो व्याधिर्विकारो दुःखमामयः।
यक्ष्मातङ्कगदाबाधाः ग्रन्थाः पर्य्यायवाचिनः॥
निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा।
संप्राप्तिरिति विज्ञानं रोगाणां पञ्चधा स्मृतम्॥
निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः।
निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते।
उत्पित्सुरामयो दोषविशेषैरधिष्ठितः॥
लिङ्गमव्यक्तमव्यक्तात् व्याधीनां तदयथातथम्।
तदेव व्यक्ततां यातं रूपमित्यभिधीयते॥
संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः।
हेतुव्याधिविपर्य्यस्तं विपर्य्यस्तार्थकारिणाम्॥
औषधान्नविहाराणां उपयोगं सुखावहम्।
विद्यादुपशयं व्याधेः स हि साध्यमिति स्मृतः॥
विपरीतोऽनुपशयो व्याधेरसाध्यताभिसंज्ञितः।
यथा दुष्टेन दोषेण तथा चाप्तविसर्पता॥
निवृत्तिरामयस्यासौ संप्राप्तिर्नातिरागतिः।
संख्याविकल्पप्राधान्यबलकालविशेषतः॥
स भिद्यते यथाचैव संख्यातोऽसौ ज्वरा इति।
दोषाणां समवेतानां विकल्पांशांशकल्पना॥
खातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्।
हेत्वादिकार्त्तस्त्र्याश्रयवैबलाबलविशेषणम्॥
नक्तं दिनर्तुभुक्तांशैर्व्याधिकालो यथा मलम्।
इति प्रोक्तो निदानार्थः स व्यासेनोपदेक्ष्यते।
सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः॥
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्।
अहितस्त्रिविधो योगस्त्रयाणां प्राग्रुदाहृतः॥
तिक्तोषणकषायाम्लरूक्षाप्रमितभोजनैः।
धावनोदीरणनिशाजागरात्युच्चभाषणैः॥
क्रियाभियोगभीशोकचिन्तायायासमैथुनैः।
ग्रीष्मात्तीक्ष्णोष्णकटुक्रोधविदाहिभिः॥
प्रस्रन्मध्याह्नरात्र्यर्द्धविदाहसमयेषु च।
खादन्नलवणस्निग्धगुर्व्वभिष्यन्दिशीतलैः॥
आस्यास्वप्नसुखाजीर्णदिवास्वप्नादिदूषणैः॥
प्रच्छर्दनात्ययोगेन भुक्तमात्रवसन्तयोः।
पूर्व्वाह्णे पूर्व्वरात्रे च श्लेष्मा वक्ष्यामि शुद्धिदान्॥
मिश्रीभावात् समस्तानां सन्निपातस्तथा पुनः।
सङ्कीर्णानीर्णविषमविरुद्धाध्यशनादिभिः॥
व्यापन्नमद्यपानीयशुष्कशाकासृजकैः।
पिण्याकदध्यरसरापूतिशुष्कशाकामिषैः॥
दोषत्रयकरैस्तैस्तैरुक्तव्याधिपरिवर्त्तनतः।
ऋतोर्दुष्टात् पुरोवातात् विपरीतविसृष्टात्॥
दुष्टाम्बुनैरतिस्निग्धरूक्षैर्नानर्त्तुपीडनात्।
मिथ्यायोगाच्च विविधात् पापानाच्च निषेवणात्॥
स्त्रीणां प्रसवदौर्ब्बल्यात्तथा मिथ्योपचारतः।
प्रतिरोगमिति क्रुद्धा रोगविध्यनुगामिनः।
रसायनीं प्रपद्याशु दोषा देहे विकुर्व्वते॥"
इति गारुडे. सर्व्वरोगनिदानं १५१ अध्यायः॥
रोगविशेषाणां औषधानि गारुडे १८६।१६०।१६१। १६२। १६३। १६४। १६५। १६६। १६७। १६८। १६९ अध्यायेषु द्रष्टव्यानि।
सर्व्वरोगहरवैष्णवकवचञ्च तत्रैव २०० अध्याये द्रष्टव्यम्॥ *॥ अपि च।
"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः।
शिवभक्तश्च योगी च स एव विकृताकृतिः॥
भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः॥
मन्दाग्निस्तस्य जनको मन्दाग्नेर्जनकास्त्रयः।
पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः॥
वायुश्च पित्तञ्चैव श्लेष्मा च तथैव च।
ज्वरभेदाश्च त्रिविधास्तुर्य्यश्च त्रिदोषजः॥
पाण्डुकः कामलः कुष्ठः शोथः प्लीहा च गुल्मकः।
ज्वरातिसारग्रहणीकाश्मव्रणगुदाङ्कुराः॥
हृच्छूलकृच्छ्र गुल्मश्च रक्तदोषविकारकः।
आरिश्मो मेहनः कुल्जो गोदश्च गलगण्डकः॥
भ्रमरी सन्निपातश्च विसूची दारुणी सति।
एषां भेदप्रभेदेन चतुःषष्टिरुजः स्मृताः॥
रुत्पुरुषत्वमुताक्षेते जरा तस्याश्च कन्यका।
जरा च भ्रातृभिः सार्द्धं ग्रन्थद्भ्रमति भूतलम्॥
एते चोपायवेत्तारं न गच्छन्ति च संयुतम्।
पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः॥*॥
चत्वर्जलञ्च व्यायामः पादाधस्तैलसेवनम्।
कर्णतैलं मूर्द्धितैलं जराव्याधिविनाशकम्॥
वसन्ते भ्रमणं वह्निसेवाखड्गं करोति यः।
बालाञ्च सेवते काले जरा तं नोपगच्छति॥
स्रोतस्तोयोदकस्नायी सेवते चन्दनद्रवम्।
नोपयाति जरा तञ्च निदाघेऽनिलसेवनम्॥
प्रावृड्भुज्जोदकस्नायी घनतोयं न सेवते।
समये च समाहारी जरा तं नोपगच्छति॥
ग्रहदोषं न गच्छति भ्रमणं तत्र वर्जयेत्।
स्रोतस्नायी समाहारी जरा तं नोपतिष्ठति॥
स्रोतस्नायी च हेमन्ते काले वह्निं निषेवते।
भुङ्क्ते नवान्नसुस्नाञ्च जरा तं नोपगच्छति॥
शिशिरेऽशुकवह्निञ्च नवोष्णान्नञ्च सेवते।
य एवोष्णोदकस्नायी जरा तं नोपगच्छति॥
घृतोमांसं नवान्नञ्च बाला स्त्री चौरभोजनम्।
घृतञ्च सेवते यो हि जरा तं नोपगच्छति॥
भुङ्क्ते सदन्नं क्षुत्काले क्षणार्द्धां पीयते जलम्।
नित्यं भुङ्क्ते च ताम्बूलं जरा तं नोपगच्छति॥
दधि हैयङ्गवीनञ्च नवनीतं तथा शुभम्।
नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति॥
शुष्कमांसं स्त्रियो वृद्धा बालकं तरुणं दधि।
संसेवन्तं जरा याति प्रवृद्धा भ्रातृभिः सह॥
रात्रौ ये दधि सेवन्ते पुंश्चलीञ्च रजस्वलाम्।
तमुपैति जरा क्षिप्रा भ्रातृभिः सह सुन्दरि!॥
रजस्वलां च कुलटां चाण्डालीं नारदूतिकाम्।
शूद्रयाजकपत्नीं या ऋतुहीनां च या सति!॥
यो हि ताभिरन्नभोजी ब्रह्महत्यां लभेत्तु सः।
तेन पापेन सार्द्धं सा जरा तमुपगच्छति॥
पापानां व्याधिभिः सार्द्धं मित्रता सन्ततं ध्रुवम्।
पापं व्याधिजरावीजं विघ्नबीजञ्च निश्चितम्॥
पापेन जायते व्याधिः पापेन जायते जरा।
पापेन जायते दैन्यं दुःखं शोकं भयं कलिः॥
तस्मात् पापं महावैरं दोषबीजममङ्गलम्।
भारते सन्ततं सन्तो नाचरन्ति भयातुराः॥
स्वधर्म्माचारयुक्तञ्च दीक्षितं हरिसेवकम्।
गुरुदेवातिथीनाञ्च भक्तं सक्तं तपःसु च॥
व्रतोपवाससुयुक्तञ्च सदा तीर्थनिषेविणम्।
पापा द्रवन्ति तं दृष्ट्वा वैनतेयमिवोरगाः॥
एतान् जरा न सेवेत व्याधिसङ्घश्च दुर्ज्जयः।
सर्व्वं बोधमसमये काले सर्व्वं ग्रहीष्यति॥*॥
ज्वरश्च सर्व्वरोगाणां जनकः कथितः सति।
पित्तश्लेष्मसमीराश्च ज्वरस्य जनकास्त्रयः॥
एते यदा सञ्चरन्ति स्वयं यान्ति च देहिन।
तमेव विविधोपायं साध्यि मन्तो निशामय॥
क्षुधि जाठ्यल्यमानायामाहाराभाव एव च।
प्राणिनां जायते पित्तं चक्रे च मधिपूरके॥
तालं बिल्वफलं शुक्रा जलपानञ्च तत्क्षणम्।

तदेव तु भवेत् पित्तं सद्यःप्राणहरं परम् ॥
तपोदकञ्च शरदि भाद्रे तिक्तं विशेषतः ।
हैमन्तञ्च यो भुङ्क्ते पित्तं तस्य प्रजायते ॥
सशर्करञ्च घृताक्तं पित्तं शीतोदकान्वितम् ।
चणकं सर्वमद्यञ्च दधितक्रविवर्जितम् ॥
बिल्वतालफलं पक्वं सर्वमत्तारमेव च ।
आर्द्रकं सूदयूषञ्च तिलपिष्टं सशर्करम् ॥"
अत्तारस्थाने ऐक्षवमिति च पाठः ।
"पित्तक्षयकरं सद्यो बलपुष्टिप्रदं परम् ।
पित्तनाशञ्च तद्दीर्घसुक्तमन्यं निबोध मे ॥
भोजनानन्तरं स्नानं जलपानं विना तथा ।
तिलतैलं स्निग्धतैलं स्निग्धमामजकीद्रवम् ॥
पर्य्युषितान्नं तक्रञ्च पक्वरम्भाफलं दधि ।
छायाशुष्कैरातोयं सुस्निग्धस्थलसेवनम् ॥
नारिकेलोदकं रूक्षस्थानं पर्य्युषितं जलम् ।
तरुसुस्रपक्वफलं सुपक्वकर्कटीफलम् ॥
खातस्थानञ्च वर्षासु मूलकं श्लेष्मकारणम् ।
ब्रह्मरन्ध्रे च तच्छस्य महदौर्ग्यविनाशनम् ॥
वह्निखेदं भृष्टिभक्षं पक्वतैलं विशोषकम् ।
भ्रमणं शुष्कभक्षञ्च शुष्कपक्वहरीतकौ ॥
पिष्टकारकमपक्वञ्च रम्भाफलमपक्वकम् ।
वेशवारसिन्धुवारमनाहारमपानकम् ॥
सघृतं रोचनाचूर्णं सघृतं शुष्कशर्करम् ।
मरीचं पिप्पलीशुष्कमार्द्रकं जीरकं मधु ॥
द्रव्याण्येतानि गन्धर्व्वि सद्यः श्लेष्महराणि च ।
बलपुष्टिकराण्येव वायुवीजं निशामय ॥
भोजनानन्तरं सद्यो गमनं धावनं तथा ।
क्षेदनं वह्नितापञ्च गुरुदुर्भरमैथुनम् ॥
वृद्धस्त्रीगमनञ्चैव मनःसन्ताप एव च ।
अतिरूक्षमनाहारं युद्धं कलहमेव च ॥
कटुवाक्यं भयं शोकः केवलं वायुकारणम् ।
आज्ञाचक्रे तच्छस्य निशामय तदौषधम् ॥
पक्वरम्भाफलञ्चैव सबीजं सर्करोदकम् ।
नारिकेलोदकञ्चैव सद्यस्क्रं सुमिश्रकम् ॥
माहिषं दधि मिष्टञ्च केवलं वा सशर्करम् ।
सद्यःपर्य्युषितान्नञ्च सौवीरं शीतलोदकम् ॥
पक्वतैलविशेषञ्च तिलतैलञ्च केवलम् ।
साङ्गुलीतालखर्ज्जूरमुस्तमामलकीद्रवम् ॥
शीतलोष्णोदकस्नानं सुस्निग्धचन्दनद्रवम् ।
स्निग्धपक्वपक्वतल्पं सुस्निग्धव्यजनानिलः ॥
एतत्ते कथितं वत्से ! सद्यो वातप्रणाशनम् ॥
वायवस्त्रिविधाः पुंसां श्लेष्मसन्तापकामजाः ॥
व्याधिसंघञ्च कथितस्तन्त्राणि विविधानि च ।
तानि व्याधिप्रणाशाय कृतानि सद्भिरेव च ॥
तन्त्राण्येतानि सर्व्वाणि व्याधिक्षयकराणि च ।
रसायनादयो येषु चोपायश्च सुदुर्लभः ॥
न शक्तः कथितुं साधि याथार्थ्यं वत्सरेण च ।
तेषाञ्च सर्व्वतन्त्राणां कृतार्थानां विचक्षणैः ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥

अथ व्याधिलक्षणम् । तत्र वाग्भटः ।
"रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता ।
रोगा दुःखस्य दातारो ज्वरप्रभृतयो हि ते ॥
ते च स्वाभाविकाः केचित् केचिदागन्तवः स्मृताः ।
मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः ॥"
तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः । क्षुत्पिपासासुषुप्त्याजागराद्यस्तयः ॥ अथवा स्वस्य भावादुत्पत्तेर्जाताः स्वाभाविकाः सहजा इति यावत् । ते च जन्मान्तादयः । आगन्तवोऽभिघातादिजनिताः । अथवा जन्मोत्तरभाविनः । मानसाः कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यविषादेर्षासूयामात्सर्य्यप्रभृतयः । अथवा उन्मादापस्मारमूर्च्छाभ्रमतमःसंन्यासप्रभृतयः । कायिकाः पाण्डुरोगप्रभृतयः ॥
"कर्म्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे ।
कर्म्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृताः ॥"
तत्र कर्म्मजा व्याधयः । यत् प्राक्तनं दुष्कर्म्मप्रबलं व्याधिरूपं केवलं भोगदायं प्रायश्चित्तनाश्यं वा ततो जाताः न तु दुष्टवातादिदोषैरेव जनिताः । तथा ।
"यथाग्नाक्रान्तु निर्यौता यथाव्याधि चिकित्सिताः ।
न भ्रमं यान्ति ये रोगास्ते ज्ञेयाः कर्म्मजा बुधैः ॥"
दोषजाः मिथ्याहारविहारप्रकुपितवातपित्तकफजाः ॥ * ॥ ननु मिथ्याहारविहारिणामपि प्राक्तनसुकृतेन नैरुज्यं दृश्यत एव ततो दोषजेष्वपि प्राक्तनकर्म्मैव कारणं तत् कथं दोषजा इति । उच्यते । दोषजेष्वपि वस्तुतः आदिकारणं दुष्कर्म्म वर्त्तत एव किन्तु तच्च मिथ्याहारविहारभूषिता दोषा हेतवो दृश्यन्त इति दोषजा इत्युच्यत इति समाधिः ॥ * ॥ कर्म्मदोषोद्भवाः ।
"खल्वदोषो गरीयांसस्ते ज्ञेयाः कर्म्मदोषजाः ।"
अत्र कारणं दुष्कर्म्मप्रबलं यतो दोषास्त्वल्पेऽपि व्याधेर्गरीयस्त्वं तत्कर्म्मक्षयादेव क्षीणं भवति । दोषास्तु स्वल्पा अपि निदानत्वेनोक्ता दृश्यन्त एवेति । दोषाणां कारणत्वं मन्यत इति कर्म्मदोषोद्भवाः ।
"कर्म्मक्षयात् कर्म्मजता दोषजाः स्वस्वभेषजैः ।
कर्म्मदोषोद्भवा यान्ति कर्म्मदोषक्षयात् क्षयम् ॥"
दोषजाः स्वस्वभेषजैरिति दोषजेष्वादिकारणं दुष्कर्म्म तद्धेषजार्थद्रव्यक्षयादिजनितदुःखभोगेन कटुतिक्तकषायाद्यरुचिभक्षणादिजनितदुःखभोगेन च क्षयं याति । शेषाहृद्धेतवो दोषास्ते स्वस्वभेषजैः क्षयं यान्तीत्यर्थः ।
"साध्या याप्या असाध्याश्च व्याधयस्त्रिविधाः स्मृताः ।
सुखसाध्यः कृच्छ्रसाध्यो द्विविधः साध्य उच्यते ॥"
याप्यलक्षणमाह ।
"यापनीयन्तु तं विद्यात् क्रियां धारयते हि तम् ।
क्रियायान्तु निवृत्तायां सद्यो यश्च विनश्यति ॥
प्राप्ता क्रिया धारयति सुखिनं प्राप्यमातुरम् ।
प्रप्रतिष्ठदिवागारं स्तम्भो यत्नेन योजितः ॥
साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा ।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् ॥"
अक्रियावतां चिकित्सारहितानाम् ॥ * ॥
अथोपद्रवलक्षणम् ।
"रोगारम्भकदोषस्य प्रकोपादुपजायते ।
योऽन्यो विकारः स बुधैरुपद्रव इहोदितः ॥"
अथारिष्टस्य लक्षणमाह ।
"रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्यादरिष्टाधिप तदुच्यते ॥"
अथ रोगस्य चिकित्सालक्षणमाह ।
"या क्रिया व्याधिहरणी सा चिकित्सा निगद्यते ।
दोषधातुमलानां या साम्यकृत् सैव रोगहृत् ॥"
क्रियायाः कर्म्म । व्याधिर्हियतेऽनयेति व्याधिहरणी । करणाधिकरणयोरिति सूत्रेण करणार्थे ल्युट् । तथा च ।
"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम् ॥
या हृदीर्णं भ्रमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ॥"
क्रियायाः चिकित्सा । तथा चामरसिंहः ।
"व्याधेर्निष्कृतिः शुश्रूषा पूजनं संप्रधारणम् ।
उपायः कर्म्म चेष्टा च चिकित्सा च नवक्रियाः ॥"
इति ॥ * ॥
अथ चिकित्साविधुपदेशः ।
"जातमात्रचिकित्सः स्यान्नोपेक्ष्योऽल्पतया गदः ।
वह्निश्चुविषेस्तुल्यः स्वल्पोऽपि विकरोत्यसौ ॥
रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म्म भिषक् पश्चात् ज्ञानपूर्व्वं समाचरेत् ॥"
अयमर्थः । भिषक् आदौ रोगं परीक्षेत विचारयेत् । ततोऽनन्तरं औषधं विचारयेत् । ततः पश्चात् रोगौषधविचारानन्तरं ज्ञानपूर्व्वं सावधानो न तु अवज्ञया कर्म्म चिकित्सामौषधदानादिरूपं समाचरेदित्यर्थः ॥ * ॥ रोगाज्ञाने चिकित्साकरणे दोषमाह ।
"यस्तु रोगमविज्ञाय कर्म्माण्यारभते भिषक् ।
अपौषधविधानञ्च तस्य सिद्धिर्यदृच्छया ॥"
यदृच्छया खेरितया सिद्धिर्भवति नापि भवतीत्यर्थः । अन्यच ।
"औषधं केवलं कर्त्तुं यो जानाति न चामयम् ।
वैद्यकर्म्म स चेत् कुर्य्याद्यमर्हति राजतः ॥"* ॥
रोगज्ञाने भेषजाज्ञाने दोषमाह ।
"यस्तु केवलरोगज्ञो भेषजेष्वविचक्षणः ।
तं वैद्यं प्राप्य रोगी स्यादृग्या नौर्नाविकं विना ॥"
नाविकं कर्णधारं विना यथा नौः सङ्कटे पतति तथा रोगीत्यर्थः । अन्यच ।
"यस्तु केवलशास्त्रज्ञः क्रियासु कुशलो भिषक् ।
स मुह्यत्यातुरं प्राप्य भीरुः शस्त्रीव चाहवम् ॥"
रोगौषधयोर्ज्ञाने गुणमाह ।
"यस्तु रोगविशेषज्ञः सर्व्वभेषज्यकोविदः ।
देशकालविभागज्ञस्तस्य सिद्धिर्न संशयः ॥

आदावन्ते रुजां ज्ञाने प्रयतेत चिकित्सकः।
भेषजानां विधानेऽथ ततः कुर्याच्चिकित्सितम्॥"
चिकित्सितमित्यत्र भावे क्तः। इति भावप्रकाशे पूर्वखण्डः॥*॥ अथ येन रोगाणां ज्ञानं स्यात्तत्तदाह।
"हेतुलक्षणसंप्राप्तिः पूर्वरूपञ्च लक्षणम्।
तथैवोपशयः पञ्च रोगविज्ञानहेतवः॥"
तत्र हेतोर्लक्षणमाह।
"यस्तु न स्याद्विना येन तस्य तद्धेतुरुच्यते।
ग्राह्ये संव्यवहाराय तत्पर्य्यायान् प्रवक्ष्यते॥
निदानं कारणं हेतुर्निमित्तञ्च निबन्धनम्।
मूलमायतनं तन्तु प्रत्ययोऽपि निगद्यते॥"
तत्र हेतुर्व्याधीनां ज्ञानाय हेतुर्यथा। वर्षारूक्षश्रमहिमानग्लानातिमैथुनशोकचिन्ताभयादयो वातप्रकोपहेतवो वातजान् व्याधीन् बोधयन्ति। ग्रीष्मतीक्ष्णोष्णतीक्ष्णक्रोधलङ्घनाशुधाभिघातादयः पित्तप्रकोपहेतवः पित्तजान् व्याधीन् बोधयन्ति। वसन्तमधुरस्निग्धगुरुतादयः कफप्रकोपहेतवः कफजान् व्याधीन् बोधयन्ति॥*॥ अथ संप्राप्तेर्लक्षणमाह।
"यथा दुष्टेन दोषेण यथा चानुविसर्पता।
उत्पत्तिर्व्याधयस्यासौ संप्राप्तिर्जातिरागतिः॥"
यथा दुष्टेन दोषेण यथा कारणभेदेन दुष्टेन दोषेण। यथा चानुविसर्पता अनेकधा दोषाणां विसर्पणमूर्द्धाधस्तिर्य्यगादिगतिभेदेन। तथा च विसर्पता आमयस्य या उत्पत्तिः असौ संप्राप्तिः। ग्राह्ये व्यवहाराय संप्राप्तेः पर्य्यायावाह जातिरागतिरिति। संप्राप्तेरौपाधिकभेदानाह।
"संख्याविकल्पप्राधान्यबलकालविशेषतः।
सा भिद्यते यथात्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति॥"
संख्यादिरूपा ये विशेषास्तेभ्यः सा संप्राप्तिर्भिद्यते भेदवती क्रियते इत्यर्थः। तत्र संख्यां विवृणोति। यथा ज्वरोऽष्टधा अतीसारः षड्विध इत्यादि। विकल्पं विवृणोति। दोषाणां समवेतानां विकल्पोऽंशांशकल्पना। समवेतानां समुदितानां दोषाणां अंशांशकल्पना हीनमध्याधिकभेदैर्भागकल्पना विकल्पः॥*॥ प्राधान्यं विवृणोति।
"स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्।
व्याधेः स्वातन्त्र्येण प्राधान्यं पारतन्त्र्येणाप्राधान्यञ्च वदेदित्यर्थः। यथा स्वतन्त्रस्य ज्वरस्य प्राधान्यं ज्वराधीनानां श्वासादीनामप्राधान्यम्॥*॥ बलं विवृणोति।
"हेत्वादिकार्त्स्न्याद्यथैर्बलाबलविशेषणम्।"
अत्रापि व्याधेरित्यनुवर्त्तते। हेत्वादेः हेतुपूर्वरूपाणां कार्त्स्न्येन साकल्येन। अवयवैः एकदेशेन। व्याधेर्बलाबलयोर्विशेषणं विशेषबोधः॥*॥ कालं विवृणोति।
"नक्तं दिनर्त्तुभुक्तांशैर्व्याधिकालो यथाबलम्।"
नक्तमत्राव्ययं रात्रिवाचकम्। एतेनैतदुक्तं यस्मिन्नक्तादेरंशे यस्य दोषस्य प्रकोप उक्तोऽस्ति सोऽंशस्तद्दोषजस्य व्याधेः काल इत्यर्थः। नक्तादेरंशेषु वातादिप्रकोप उक्तो वाग्भटेन।
"ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः।
वयोऽहोरात्रिभुक्तानामन्तमध्यादिगाः क्रमात्॥"
इति॥
ते वातपित्तकफाः। ऋतुषु वातादिकोपो यथा,
"वर्षासु ग्रिष्मिरे वायुः पित्तं शरदि उच्यते।
वसन्ते तु कफः कुप्येदेषा प्रकृतिरार्त्तवी॥"*॥
संप्राप्तिर्व्याधीनां ज्ञानाय हेतुर्यथा। मिथ्याहारविहारकुपितवाताद्यामाशयगमनरसदूषणकोष्ठाग्निविक्षेपनिरसनरूपं ज्वरोत्पत्तिप्रकारं बोधयति तथा व्याधीनां संख्यादोषांशांशकल्पनाप्राधान्यबलकालांश्च बोधयति। तेषु ज्ञानेषु चिकित्सा विधेयः स्यात्॥*॥ अथ पूर्वरूपस्य लक्षणमाह।
"पूर्वरूपन्तु तद्येन विद्याद्भावि निजामयम्।
सामान्यञ्च विशिष्टञ्च द्विविधं तदुदाहृतम्॥
सामान्यं तत्र दोषाणां विशेषैरनधिष्ठितम्।
विशिष्टमीषद्व्यक्तं स्यात् विशेषैश्च समन्वितम्॥"
दोषाणां विशेषाः जृम्भातिप्रसेकहृल्लासाभिमान्यादयः। तत्र पूर्वरूपं व्याधीनां ज्ञानाय हेतुर्यथा। श्रमादयो भाविनं ज्वरं बोधयन्ति। अथ च त एव श्रमादयोऽतिप्रसेकजृम्भायुक्ता भाविनं वातज्वरं नेत्रदाहयुक्ता भाविनं पित्तज्वरं वह्निमान्द्ययुक्ता भाविनं श्लेष्मज्वरं बोधयन्ति॥*॥ अथ लक्षणस्य लक्षणमाह।
"पूर्वरूपं विशिष्टं यद्व्यक्तं तल्लक्षणं स्मृतम्।
संस्थानं लिङ्गचिह्नं च लक्षणं रूपमाकृतिः॥"
विशिष्टं पूर्वरूपं ईषद्व्यक्तं रूपं तदेव सम्यग्व्यक्तं लक्षणं स्मृतम्। तत्र ग्राह्ये व्यवहाराय पर्य्यायानाह संस्थानमित्यादि। लक्षणं व्याधेर्ज्ञानाय हेतुर्यथा। खेदावरोधः सन्तापः सर्व्वाङ्गग्रहणञ्च युगपदेतल्लक्षणं ज्वरं बोधयति॥*॥ अथोपशयस्य लक्षणमाह।
"औषधान्नविहाराणामुपयोगं सुखावहम्।
तृणामुपशयं विद्यात् स हि साध्यमिति स्मृतः॥"
तत्र वातस्योपशयमाह।
"मधुरलवणस्निग्धस्निग्धनस्वेदनिद्रा-
गुरुरुचिकरवस्तिस्वेदसंमर्द्दनानि।
दहनजलदग्रीष्माभ्यङ्गसन्तर्पणानि
प्रकुपितपवनानां शान्तमेतानि कुर्युः॥"
अथ पित्तस्योपशयमाह।
"तिक्तस्वादुकषायशीतपवनच्छायानिशावीजन-
ज्योत्स्नाभूगृहयत्नवारिजलदस्त्रीगात्रसंस्पर्शनम्।
सर्पिः क्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं
पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं नयेत्॥"
अथ कफस्योपशयमाह।
"रूक्षचारकषायतिक्तकटुकव्यायामनिष्ठीवनं
धूमाल्पुष्णाग्निरोविरेकवमनं खेदोपवासादिकम्।
लङ्घनाध्वनियुद्धजागरजलक्रीड़ाङ्गनासेवनं
पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं हरेत्॥"
जलक्रीड़ा कथं कफं हरति तदाह। जलक्रीड़ाजनितश्लेष्मणा वह्निदेहोष्मा पङ्कलिप्तपाकाग्निरिवोष्मा भूत्वा कफं शोषयति इति समाधिः॥*॥ उपशयो व्याधेर्ज्ञानाय हेतुर्यदुक्तं चरकेण। गूढलिङ्गं सङ्कीर्णलक्षणञ्च व्याधिमुपशयानुपशयाभ्यां परीक्षेतेति। तथा च सुश्रुते।
"अभ्यङ्गस्वेदनजैर्विकारो वातिको न यः।
ग्राम्यैस्तच्च तु विज्ञेयं रक्तमाचास्ति दूषितम्॥
सर्व्वेषामेव रोगानां निदानं कुपिता मलाः।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्॥"
सर्व्वेषां रोगानां निदानं सन्निहितं कारणम्। कुपिताः स्वहेतुदुष्टाः। मला वातपित्तकफा एवेत्यन्वयः। तथा च दाल्भटः। दोषा एव हि सर्व्वेषां रोगाणामेककारणमिति। नखागन्तुजव्याधिषु व्यभिचारः स्यात्। तत्र तत्रोत्पत्तेरनन्तरं दोषप्रकोपस्यावश्यं भावित्वात्। उत्पन्नश्चेषु गुणयोगस्येव। इति भावप्रकाशः॥*॥ पापजरोगा यथा। भ्रातातपीयकर्म्मविपाके।
"कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा।
स्रक्तक्ष्माश्मरीकाशा अतिसारभगन्दरौ॥
दुश्चर्म्म गण्डमाला पक्षाघातोऽर्शिनाशनम्।
इत्येवमादयो रोगा महापापोद्भवाः स्मृताः।
जलोदरयकृत्प्लीहशूलरोगव्रणानि च।
श्वासार्शोज्वरच्छर्द्दिभ्रममोहगलग्रहाः।
रक्तार्ब्बुदविसर्पाद्या उपपापोद्भवा गदाः॥
दक्षावतानकश्चित्रवपुःकम्पविचर्चिकाः।
वल्मीकपुष्करीकाद्या रोगाः पापप्रसङ्गवाः॥"
तथा।
"अग्र्यैराद्या नृणां रोगा अतिपापाद्भवन्ति हि।
अन्ये च बहुधा रोगा जायन्ते रोगकर्त्तरः।
उच्यन्ते हि निदानानि प्रायश्चित्तानि च
क्रमात्॥"
सर्व्वरोगनाशकदानं यथा। हेमाद्रिधृतदानखण्डे भगवद्वाक्यम्।
"सुवर्णदानं सर्व्वेषां रोगाणां नाशकारणम्।
तस्मात् सर्व्वप्रयत्नेन कर्त्तव्यं कमलोद्भव॥"
इति मलमासतत्त्वम्॥*॥
अथारोग्यस्नानदिनम्। तत्र तिथयो रिक्ताः प्रशस्ताः। दशमीप्रतिपद्द्वितीयात्रयोदश्यौ पञ्चमीभिन्ना मध्यमाः। तत्र नक्षत्राणि। स्वातीश्रवणाश्विनिहस्तपुष्यपूर्व्वाषाढ़ापूर्व्वफल्गुनीपूर्व्वभाद्रपदमघाभरणीमृगशिरांसि। तत्र वारः क्रूराः। तत्र योगो व्यतीपातः। अग्नेयभनक्षत्रः। लग्नापेक्षया केन्द्रेषु पापग्रहः। इति ज्योतिस्तत्त्वम्॥ अपि च।
"चन्द्रानुद्यौ व्यतीपाते भौमार्कर्क्षदिनेषु च।
व्रणसक्तो व्याधिसक्तः क्षयः स्नानं समाचरेत्॥
पूर्व्वात्रयमघाश्लेषा भरणी कृत्तिका तथा।
आर्द्रायाश्च तिथौ रिक्ते चारोग्यस्नानमाचरेत्॥"
इति ज्योतिःसारसंग्रहः॥

रोगघ्नं, क्ली, (रोगं हन्तीति । हन+टक् ।) औषधम् । इति वैद्यकम् ॥ रोगनाशके, त्रि । (स्त्रियां ङीप् । यथा, सुश्रुते । १ । ४४ ।
"त्रिफला सर्व्वरोगघ्नी त्रिभागघृतमूर्च्छिता ।")

रोगभूः, स्त्री, (रोगाणां भूः स्थानं व्याधिमन्दिरत्वात् ।) शरीरम् । इति शब्दचन्द्रिका ।

रोगराजः, पुं, (रोगाणां राजा । टच् ।) राजयक्ष्मा । इति राजनिर्घण्टः ॥ (यथा,—
"इति व्याधिसमूहस्य रोगराजस्य हेतुजम् ।
रूपमेकादशविधं हेतुश्चोक्तश्चतुर्विधः ॥"
इति चरके चिकित्सास्थाने ८ अध्यायः ॥)

रोगलक्षणं, क्ली, (रोगाणां लक्षणम् ।) निदानम् । इति राजनिर्घण्टः ॥

रोगशान्तकः, पुं, (रोगान् शान्तयतीति । शान्ति+खुल् ।) वैद्यः । इति शब्दचन्द्रिका ॥

रोगशिला, स्त्री, (रोगाय रोगनिहत्तये शिला ।) मनःशिला । इति राजनिर्घण्टः ॥ (विवरणमस्या मनःशिलाशब्दे विलेयम् ।)

रोगश्रिष्णी, [न्] पुं, (रोगे श्रिष्णीव ।) वृक्षविशेषः । इति शटाधरः । अराळु इति भाषा ॥

रोगश्रेष्ठः, पुं, (रोगेषु श्रेष्ठः ।) ज्वरः । इति राजनिर्घण्टः ॥

रोगहं, क्ली, (रोगान् हन्तीति । हन्+डः ।) औषधम् । इति शब्दचन्द्रिका ॥

रोगहरद्रव्यं, क्ली, (रोगहरं रोगनाशकं द्रव्यम् ।) रोगनाशकवस्तु । यथा,—
धन्वन्तरिरुवाच ।
"द्रव्याणि मधुरादीनि वक्ष्ये रोगहराण्यहम् ।
शालिषष्टिकगोधूमशीरश्वेत मधु ॥
मज्जाश्वदंष्ट्राटकयवकश्मैर्व्वारुकगोक्षुरम् ।
गम्भारी पौष्करं बीजं द्राक्षा खर्ज्जूरकं बला ॥
नारिकेलेक्षुतालगुप्ता विदारी च पियालकम् ।
मधुकं तालकुष्माण्डं सुखोष्णं मधुरो रसः ॥
मूर्च्छादाहश्रमहरः षड्इन्द्रियप्रसादनः ।
क्लमिकृत् कफकृत् तृष्ण एकोऽर्थं निषेवितः ॥
श्वासकासास्यमाधुर्य्यस्वरघातार्व्बुदानि च ।
गलगण्डश्लीपदानि गुडलेपादि कारयेत् ॥ * ॥
दाडिमामलकाम्लश्च कपित्थकरमर्दकौ ।
मातुलुङ्गाम्लातकश्च बदरं तित्तिरीफलम् ॥
दधितक्रं काञ्जिकश्च लकुचं चाम्लवेतसम् ।
अम्ला दन्तशठायुक्तो जारणः पाचनो रसः ॥
क्लेदनो वातकृत् तृष्णो विदाही चानुलोमनः ।
अश्नीयार्थं संयमानः कुर्य्याद् दन्तहर्षकम् ॥
शरीरस्य च शैथिल्यस्वरकृच्छ्रनखद्रवेत् ।
छिन्नभिन्नप्रवादीनि पाचयत्यग्निभावतः ॥ * ॥
लवणादियवक्षारः सर्ज्जकादिश्च लावणः ।
शोधनः पाचनः क्लेदी विश्लेषस्वेदादिकृत् ।
मागधेरोधी मार्दवकृत् स एकः परिषेवितः ।
गात्रकण्डूकोठशोफवैवर्ण्यं जनयेदसः ।
रक्तवातं रक्तपित्तं पुंस्त्वेन्द्रियरुजादिकम् ॥ * ॥
शोधयेत् मूलकश्च देवदारु च कुष्ठकम् ।
लवणं जम्बुजफलं सुक्ता गुग्गुलाङ्गली ।
कटुको दीपनः शोधी कुष्ठकङ्कूकफान्तकृत् ॥
सौल्यालस्वक्रमिहरः शुक्रमेदोविरोधनः ।
एकोऽर्थं सेव्यमानो भ्रमदाहादिकृद्भवेत् ॥*॥
क्षतमालः करीराणि हरिद्रेन्द्रयवास्तथा ।
स्वादुकण्टकवेत्राणि दहतीदग्निनी ।
गुडूची च द्रवन्ती च चित्रमङ्कूकपर्ण्यपि ।
कारवेल्लकवार्त्ताकुकरवीरकवासकाः ॥
रोहिणी शङ्खपुष्पी च कर्कोटी वैजयन्तिका ।
जाती वरुणकं निम्बो ज्योतिष्मती पुनर्नवा ॥
तिक्तो रसस्फेदनः स्याद्रोचनो दीपनस्तथा ।
शोधनो जरलश्लाघ्नो मूर्च्छाकण्डूतिकादिजित् ॥
विष्मूत्रक्लेदसंशोषी अत्यर्थं स च सेवितः ।
मन्यास्तम्भोपकार्शिरः शूलव्रणादिकृत् ॥*॥
त्रिफलागुग्गुलौनस्तु आम्लस्नानवटादिकम् ।
तिन्दुकं बकुलं शाकं निम्बावं सुद्रचिल्लिका ॥"
निम्बावस्थाने पालङ्क्या इति क्वचित् पाठः ।
"कषायो व्याधको रोपी स्तम्भनः क्लेदशोषणः ।
एकोऽर्थं सेव्यमानो हृदयाद्य पीड़कृत् ॥
सुखशोषज्वराध्मानमन्यास्तम्भादिकारकः ॥*॥
हरिद्रा कुष्ठलवणमेषशृङ्गीवलाद्वयम् ॥
कच्छभी शुल्लकी पद्मो पुनर्नवा शतावरी ।
अग्निमन्थो ब्रह्मदण्डी खदिरैरण्डके तथा ॥
यवकोलकुलत्थादि कषायोदीरसमूलकम् ।
पृथक् समस्तो वातान्तो बहुपित्तहरस्तथा ॥
शतावरी विदारी च बालकौशीरचन्दनम् ।
दूर्व्वा वटः पिप्पली च वदरी शुल्लकी तथा ।
कदली चोत्पलं पद्मसुड्म्बरपटोलकम् । * ।
अथ शैत्यहरो वर्गो हरिद्रा गुड़कुष्ठकम् ॥
शतपुष्पी च जाती च योधारग्वधनाकुली ॥*॥
सर्पिस्तैलवसामज्जा स्नेहेषु प्रवरं घृतम् ॥
तथाधीस्मृतिमेधाग्निकान्तिदं शस्यते घृतम् ।
केवलं पैत्तिके सर्पिर्व्वातिके लवणान्वितम् ॥
देयं बहुकफे वापि शोधनारग्वधान्वितम् ।
ग्रन्थीनाड़ीक्रमिश्लेष्ममेदोमारुतरोगिषु ॥ * ॥
तैलं लाघवदार्ढ्याय क्रूरकोष्ठेषु देहिषु ।
वातातपाध्वभाषातिव्यायामस्त्रीक्षधातुषु ॥
रूक्षे क्षीणक्षयात्यग्निवातार्त्तपथिषु च ।
तथा दग्धा हतभ्रष्टा योनिकर्म्मा शिरोरुजि ॥
उत्तमस्य पलं मात्रा त्रिभिश्चार्द्धेन मध्यमे ।
अधमस्य पलार्द्धेन स्नेहकार्य्यौषधेषु च ॥ * ॥
अलसुप्तं घृते देयं पृथक् तैले न शस्यते ।
स्नेहे पीते तु तृष्णायां पिबेदुष्णोदकं नरः ॥
वातानुलोमदीप्ताग्निवर्च्चोस्निग्धसमं मतम् ।
रूक्षस्य स्नेहनं कार्य्यमतिस्निग्धस्य रूक्षणम् ॥
श्यामाकाकोरदूषामतक्रपिण्याकयवैभिः ।
वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते ॥
न स्वेदयेदतिस्थूलरूक्षदुर्ब्बलमूर्च्छितान् ।"
इति गारुड़े योगसारे १७७ अध्यायः ॥*॥
धन्वन्तरिरुवाच ।
"घृततैलादि वक्ष्यामि शृणु सुश्रुत रोगघ्नुत् ।
शतपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्च्चला ॥
अभया गुड़ूची चैव अतिरूपकवाकुची ।
एतैरष्टसमैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
कण्टकार्य्या रसप्रस्थः क्षीरप्रस्थसमन्वितः ।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम् ॥*॥
त्रिफलाचित्रकवलानिर्गुण्डीनिम्बवासकाः ।
पुनर्नवा गुड़ूची च दहती च शतावरी ॥
एतैर्घृतं यथालाभं सर्व्वरोगविमर्द्दनम् । * ।
बलाशृतकषाये तु तैलस्याढ़ाकं पचेत् ॥
कल्कैर्मधुकमञ्जिष्ठाचन्दनोत्पलपद्मकैः ।
क्षुद्रैलापिप्पलीकुष्ठलगेलागुरुकैरपि ॥
गन्धाश्वजीवनीयैश्च क्षीराढ़कसमान्वितम् ।
एतन्नस्यदृशिना पक्षं स्नापयेद्रजते शुभे ॥
सर्व्ववातविकारांस्तु सर्व्वधालन्तरायान् ।
तैलमेतत् प्रशमयेद्बलाख्यं राजवल्लभम् । * ॥
शतावरीरसप्रस्थं क्षीरप्रस्थं तथैव च ।
शतपुष्पा देवदारु मांसी श्वेतैरकं बला ॥
चन्दनं तगरं कुष्ठं माला चांशुमती तथा ।
एतैः कर्षसमैः कल्कैस्तैलप्रस्थं विपाचयेत् ॥
कुब्जवामनपङ्गूनां बधिरान्धकुष्ठिनाम् ।
वायुना भग्नगात्राणां ये च सीदन्ति मैथुने ।
जराजर्जरगात्राणां पानान्नसुखशोषिणाम् ।
त्वग्गतान्यापि ये धातोः शिरास्नायुगतान्य ये ।
स वस्तिर्नाशयत्याशु तैरेव स्याद्बलाङ्कः ।
नारायणमिदं तैलं विष्णुनोक्तं रणर्द्दनम् ॥*॥
पृथक् तैलं घृतं कुर्य्यात् समस्तैरौषधैः पृथक् ।
शतावर्य्या गुड़ूच्या वा चित्रके रोचनायुतः ॥
निर्गुण्ड्या वा प्रसारण्या कण्टकार्य्या रसादिभिः ।
वर्षाभानलया वापि वासकस्य फलत्रिकैः ॥
ब्राह्म्या चैरण्डकेनापि भृङ्गराजेन सुक्ष्मिना ।
मूषल्या दशमूलेन खदिरेण वटादिभिः ॥
वटिका मोदको वापि चूर्ण स्यात् सर्व्वरोगघ्नुत् ।
घृतेन मधुना वापि युक्तं खण्डगुड़ादिभिः ।
लवणैः कटुकैर्युक्तं यथाभागञ्च रोगघ्नुत् ॥
चित्रककार्षरुचिरतामलकद्वयसारकम् ।
स्वधा च वाला गन्धिका सप्तपर्णसुवर्च्चिकाम् ।
ज्योतिष्मतीञ्च संभृत्य तैलं धीरो विपाचयेत् ।
एतन्निष्यन्दनं तैलं भृशं दद्यात् भगन्दरे ।
शोधनं रोचनञ्चैव सर्व्ववर्णकरं परम् ।
चित्रकाद्यं महातैलं सर्व्वरोगप्रभञ्जनम् ।
अजमोदः सिन्दूरो हरितालनिशाद्वयम् ।
चारद्वयं फेनयुतमार्द्रकं सरलोद्भवम् ॥
इन्द्रवारुण्यपामार्गकदलैः कन्दलैः समैः ।"
कन्दलैः स्थाने स्नन्दैः इति च पाठः ।
"एभिः सर्षपजं तैलमजामूत्रेण योजितम् ।
हृदयेन पचेदेतत् अर्कक्षीरेण संयुतम् ।
अजमोदादिकं तैलं गण्डमालां व्यपोहति ।
विदग्धस्तु पचेत् पक्वं पक्वञ्चैव विशोधयेत् ।
रोपणं मृदुभावञ्च तैलेनानेन कारयेत् ।
अजमोदादिकं तैलं महावीर्य्यञ्च रोगघ्नुत् ॥"
इति गारुड़े १७८ अध्यायः ॥

रोगहारी, [न्] पुं, (रोगं हरति तच्छीलः । हृ + णिनिः ।) वैद्यः । इत्यमरः । २ । ६ । ५७॥ रोगनाशके, त्रि ॥

रोगितरुः, पुं, (रोगिणां शोकनाशकत्वरुः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

रोगिवल्लभं, क्ली, (रोगिणां वल्लभं प्रियम् ।) औषधम् । इति शब्दचन्द्रिका ॥ रोगिप्रिये, त्रि ॥

रोगी, [न्] त्रि, (रोगोऽस्यास्तीति । रोग + इनिः ।) रोगयुक्तः । तत्पर्य्यायः । आधितः २ विक्षतः ३ क्षतः ४ क्षतः ५ मन्दः ६ आतुरः ७ अभ्यान्तः ८ अभ्यमितः ९ रुग्नः १० सामयः ११ अपटुः १२ । इति राजनिर्घण्टः ॥ आमयावी १३ क्लान्तुः १४ । इत्यमरः ॥ * ॥ अथ चिकित्सार्थं रोगिणः परीक्षा । तत्र वाग्भटः ।

"दर्शनस्पर्शनप्रश्नैः परीक्षेद्वै रोगिणम् ।
आतुरादि दृशा स्पर्शाच्छीतादेः प्रश्नतोऽपरम् ॥"

आतुरादि । आदिशब्दात् साध्यत्वासाध्यत्वादि । दृशा दर्शनेन । अत्र सम्यदादिभ्यश्चेति भावे क्विप् । स्पर्शात् शीतादेः । शीतोष्णमृदुकठिनत्वादिना परीक्षणञ्च । प्रश्नतः । उदरलाघवगौरवक्षुधाबुभुक्षाबलाबलादिना ॥

"मिथ्या दृष्टा विकारा हि दुराख्याताश्चथैव च ।
तथा दुष्परिचाराश्च मोहयेयुश्चिकित्सकान् ॥"

तत्र दर्शनं नेत्रजिह्वास्यादेः कर्त्तव्यम् ॥ * ॥ तत्र नेत्रपरीक्षा यथा,—

"नेत्रं स्यात् पवनाद्रूक्षं धूम्रवर्णं तथारुणम् ।
कोटरान्तःप्रविष्टञ्च तथाश्रुच्च विलोकनम् ॥
हरिद्राखण्डवर्णञ्च रक्तं वा हरितं तथा ।
दीप्तेऽपि सदाहञ्च नेत्रं स्यात् पित्तकोपतः ॥
चक्षुर्जलाप्लवाद्बुल्यात् स्निग्धं स्यात् सलिलप्लुतम् ।
तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम् ॥
नेत्रं हिदोषवाद्बुल्यात् स्यादोषद्वयलक्षणम् ।
त्रिदोषलिङ्गं सेवेत तन्मारयति रोगिणम् ॥
त्रिदोषदूषितं नेत्रमन्तर्भेदं भृशं भवेत् ।
चिह्नं सलिलस्रावि प्राप्तेनोन्मीलयत्यपि ॥"*

अथ जिह्वापरीक्षा ।

"श्लाकपत्रप्रभा रूक्षा स्फुटिता रसनानिलात् ।
रक्ता श्यामा भवेत् पित्तान्निष्प्रभा धवला कफात् ।
परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके ।
सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा ॥"

अथ मूत्रपरीक्षा ।

"वातेन पाण्डुरं मूत्रं रक्तं नीलञ्च पित्ततः ।
रक्तमेव भवेत्कृष्णं फेनिलं कफात् ॥"

अथ शरीरस्य उष्णत्वादिज्ञानार्थं स्पर्शनं कार्य्यम् । तत्र नाड़ीपरीक्षामाह ।

"पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य तु ।
अङ्गुष्ठमूलगा नाड़ी परीक्षेत भिषग्वरैः ॥
अङ्गुलीभिस्तु तिसृभिर्नाड़ीमवहितः स्पृशेत् ।
तत्रैकया सुखं दुःखं जानीयात् कुशलोऽखिलम् ॥
सद्यःस्नातस्य सुस्नस्य क्षुत्तृष्णातपशीलिनः ।
व्यायामश्रान्तदेहस्य सम्यक् नाड़ी न बुध्यते ॥
वातेऽधिके भवेन्नाड़ी प्रचला तर्ज्जनीतले ।
पित्ते चला मध्यमायां क्षतीयाङ्गुलिगा कफे ॥
तर्ज्जनीमध्यमामध्ये वातपित्तेऽधिके स्फुटा ।
अनामिकायां तर्ज्जन्यां चला वातकफे भवेत् ॥
मध्यमानामिकामध्ये स्फुटा पित्तकफेऽधिके ।
अङ्गुलित्रितयेऽपि स्यात् प्रचला सन्निपातिनः ॥
वाताङ्कगतिर्नाड़ी पित्ताङ्कगतुल्य गामिनी ।
कफाङ्कमन्दगतिर्ज्ञेया सन्निपातादतिद्रुता ॥
वक्रसूत्रगुरु चलति धमनी वातपित्ततः ।
वहेद्वक्रञ्च मन्दञ्च वातश्लेष्माधिके ततः ॥
उत्प्लुत्य मन्दं चलति नाड़ी पित्तकफेऽधिके ।
कामात् क्रोधात् वेगवहा क्षीणा चिन्ताभयाद्रुता ॥
स्खलित्वा स्खलित्वा चलेद्दृया सा हन्ति स्थानच्युता तथा ।
अतिक्षीणा च क्षीता च प्राणान् हन्ति न संशयः ॥
ज्वरकोपेन धमनी सोष्णा वेगवती भवेत् ।
मन्दाग्नेः क्षीणधातोश्च सैव मन्दतरा मता ॥
चपला क्षुधितस्य स्यात् तृप्तस्य भवति स्थिरा ।
सुखिनोऽपि स्थिरा ज्ञेया तथा बलवती मता ॥"

इति भावप्रकाशः ॥

(लक्षणान्तरादिकमाह ।

"रोगी यस्यास्ति रोगी स स चिकित्स्यस्तु याडृशः ।
याडृशश्चाचिकित्स्योऽपि वक्ष्यमाणो निगद्यताम् ॥"

तत्र चिकित्स्यः ।

"निजप्रकृतिवर्णाभ्यां युक्तः सत्त्वेन चक्षुषा ।
चिकित्स्यो भिषजां रोगी वैद्यभक्तो जितेन्द्रियः ॥"

सत्त्वं यशसाभ्युदयक्रियादिष्वविक्लवताकरं तेन युक्तः । चक्षुषा चक्षुरुपलक्षितेन । ततोऽन्येनापीन्द्रियेण चिकित्स्यः रोगान् मोचयितव्यः । अन्यच्च ।

"आयुष्मान् सत्त्ववान् साध्यो द्रव्यवान् मित्रवानपि ।
चिकित्स्यो भिषजा रोगी वैद्यवाक्यक्रियास्तिकः ॥"

आयुर्व्वेदोऽस्तीति मतिर्यस्य स आस्तिकः ॥

अथाचिकित्स्यः ।

"चक्रः साहसिको भीरुः क्षतघ्नो वध्य एव च ।
शोकाकुलो सुमूर्षुश्च विहीनः करणैश्च यः ॥
वैरी वैद्यविदग्धश्च अज्ञाहीनश्च शङ्कितः ।
भिषजामविधेयाः स्युर्नोपक्रम्या भिषग्विधाः ॥
एतानुपाचरन् वैद्यो बहून् दोषानवाप्नुयात् ।"

चक्रोऽत्यन्तक्रोधशीलः । साहसिकः अविचार्य्यकारी । भीरुर्भयशीलः । क्षतघ्नो वैद्यकृतोपकारलोपकः । वध्यो घातुकः । विहीनः करणैश्च यः निजेन्द्रियशक्तिरहितः । वैरी न चिकित्स्यः कदाचिदोगदैके अपवादभयात् । वैद्यविदग्धो वैद्यधूर्त्तः । तथा च सुश्रुतः ।

"स न सिद्ध्यति वैद्यस्तु यत्र यस्य न पूज्यते ।"

शङ्कितो वैद्यविश्वासरहितः । भिषजामविधेयाः ॥ वैद्यवचनाविधायिनः । भिषग्विधा वैद्यतुल्याः । एते नोपक्रम्याः न चिकित्स्याः । अथ दूतस्य लक्षणम् ।

"यश्चिकित्सकमानेतुं याति दूतः स कथ्यते ।
स च याडृक् ससुचितस्ताडृगत्र निगद्यते ॥
दूताः सुजातयोऽङ्गाः पटवो निर्म्मलाम्बराः ।
सुखिनोऽत्यटवाक्रूढाः शुभ्रपुष्पफलैर्युताः ॥
सजातयः सुचेष्टाश्च सजीवद्दिग्विसङ्गताः ।
भिषजं समये प्राप्ता रोगिणः सुखहेतवे ॥"

सजातयः रोगिसमानजातयः ।

"यस्यां प्राणमरुद्याति सा नाड़ी जीवसंज्ञिता ।"

अथ दूतस्य याचायां शकुनविचारः ।

"वैद्याह्वानाय दूतस्य गच्छतो रोगिणः क्षते ।
न शुभं सौम्य शकुनं प्रदीप्तन्तु सुखावहम् ॥"

प्रदीप्तमग्निं दूतो रोगी रिक्तहस्तो वैद्यं न पश्येत् । तथा च ।

"रिक्तहस्तो न पश्येत्तु राजानं भिषजंगुरुम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रोग्यं, त्रि, (रोगाय हितमिति । रोग + यत् ।) अपथ्यम् । अहितम् । इति शब्दचन्द्रिका ॥ रोगसम्बन्धिनि च ॥

रोचकः, पुं, (रोचयतीति । रुच् + णिच् + ण्वुल् ।) क्षुधा । तत्पर्य्यायः । बुभुक्षा २ अशना ३ जिघत्सा ४ रुचिः ५ । इति हेमचन्द्रः । ३ । ५७ ॥ कदली । इति शब्दरत्नावली ॥ राजपलाण्डुः । अवदंशः । इति राजनिर्घण्टः ॥ यन्थिपर्णभेदः । भक्किउर इति नेपालदेशे ख्यातः । तत्पर्य्यायः । निग्राहरः २ धनहरः ३ कितवः ४ गणहासकः ५ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । कटुत्वम् । पाके कटुत्वम् । लघुत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । हिमत्वम् । कुष्ठकण्डूकफानिलरक्तोश्रीखेदमेदोऽस्रव्रणगन्धविषव्रणनाशित्वञ्च । इति भावप्रकाशः ॥ (काचकूप्यादिकारकः । यथा, रामायणे । २ । ८३ । १३ ।

"माथूरका क्राकचिका वैधका रोचकास्तथा ॥"

"रोचकाः काचकूप्यादिकर्त्तारः इति कनकः ।" इति तट्टीका ॥) रुचिकारके, त्रि ॥ (यथा, सुश्रुते । १ । ४६ । मांसवर्गे ।

"संग्राही रोचको बल्यस्तेषामेलो ज्वरापहः ॥")

रोचनः, पुं, (रोचयतीति । रोचि + नन्द्यादित्वात् ल्युः ।) कूटशाल्मलिः । इत्यमरः ॥ (तस्य पर्य्यायो यथा,—

"कृत्रिमः शाल्मलिः प्रोक्तो रोचनः कूट-
शाल्मलिः ।"
इति भावप्रकाशे । १ । १ ॥
काम्पिल्लः । तत्पर्य्यायो यथा,—
"काम्पिल्लः कर्कशश्चक्रो रक्ताङ्गो रोचनोऽपि च ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
श्वेतशिग्रुः । पलाशुः । आरग्वधः । करञ्जः । अश्वोटः । दाड़िमः । इति राजनिर्घण्टः ॥ (देवयोनिविशेषः । यथा, हरिवंशे । १६६ । ७५ ।
"कुम्भाण्डः कुम्भसम्भूतो रोचनो वैद्युतोग्रहः ।"
दक्षिणापुत्राणामन्यतमः । स च स्वायम्भुवमन्वन्तरे देवविशेषः । इति भागवतम् । ४ । १ । ७ ॥
खारोचिषमन्वन्तरे इन्द्रः । इति च तत्रैव । ८ । १३ । २० ॥ भारतवर्षान्तर्गतपर्व्वतविशेषः । यथा, मार्कण्डेये । ५७ । १३ ।
"तुङ्गप्रस्थो गोमगिरी रोचनः पाण्डराचलः ।")
त्रि, रोचकः । इति मेदिनी । ने, ११६ ॥ (यथा, सुश्रुते । १ । ४६ । शाकवर्गे ।
"वृष्योष्णं रोचनं हृद्यं सक्षेद्रं लघु दीपनम् ॥"
दीप्तिशाली । यथा, हरिवंशे । १२६ । ३५ ।
"अन्तश्चरं रोचनं चारुशाखं
महाबलं धर्म्मनेतारमीड्यम् ।
सहस्रनेत्रं व्रतवर्म्माणमुग्रं
महादेवं विश्वसृजं नमस्ये ॥"
शोभमानः । यथा, भट्टिः । ६ । ७३ ।
"भृङ्गालिकोकिलकुडिम्बिनीभिः पद्म लक्ष्मण ।
रोचनैर्भूषितां पम्पामभजाकं हृद्यविधम् ॥"
अनुरागकरः । यथा, भागवते । २ । १० । २१ ।
"भक्तज्ञानसुखदुःखसङ्गौ हातुं नोत्सहते बुधः ।
कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥")
रोचकः, पुं, (रोचयतीति । रोचि + ण्वुः । ततः कन्) जम्बीरः । इति राजनिर्घण्टः ॥ (गुणादर्य्यास्य जम्बीरशब्दे ज्ञातव्याः ॥)
रोचनफलः, पुं, (रोचनं रुचिकरं फलमस्य ।) बीजपूरकः । इति राजनिर्घण्टः ॥
रोचनफला, स्त्री, (रोचनं रोचकं फलमस्याः ।) चिर्भिटा । इति राजनिर्घण्टः ॥
रोचना, स्त्री, (रोचते या । रुच् + "बहुलमन्यत्रापि ।" उणा० २ । ७८ । इति युच् । टाप् ।) रक्तकुङ्कुमम् । गोपित्तम् । गोरोचना इति ख्यातम् । (यथा, मनुः । ८ । २३४ ।
"कर्णौ चर्म्म च बालांश्च वस्तिं स्नायुञ्च रोचनाम् ।
अप्सु स्वामिनमादाय स्तेयङ्गच्छन्न दुष्यति ॥")
वरयोषित् । इति मेदिनी । ने, ११८ ॥ (वसुदेवभार्य्या । यथा, भागवते । ६ । २४ । ४५ ।
"गौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकी प्रमुखाश्चासन् पत्न्य आनकदुन्दुभेः ॥")
रोचनिका, स्त्री, (रोचनैव । स्वार्थे कन् । टापि अत इत्वम् ।) वंशरोचना । इति राजनिर्घण्टः ॥ शुष्करोचनी । इति रत्नमाला ॥
रोचनी, स्त्री, (रोचते इति । रुच् + ल्युल्युटौ बहुलमिति ल्युट् । ततो ङीष् ।) आमलकी । गोरोचना । इति राजनिर्घण्टः ॥ मनःशिला । इति हेमचन्द्रः ॥ श्वेतत्रिवृता । गुँड़ारोचनीतिख्यातवणिग्द्रव्यम् । तत्पर्य्यायः । काम्पिल्लः २ कर्कशः ३ चक्रः ४ रक्ताङ्गः ५ । इत्यमरः ॥ कम्पिल्लः ६ कम्पीलः ७ कम्पिलः ८ काम्पिल्यः ९ रेचनी १० । इति भरतः ॥ पर्य्यायान्तरं गुणाश्च कम्पिल्लशब्दे द्रष्टव्याः ॥
रोचमानः, पुं, (रोचते इति । रुच् + शानच् ।) अश्वत्थवाख्यरोमावर्त्तः । यथा,—
"श्रीवृक्षो हृदयावर्त्तो रोचमानो गलोद्भवः ॥"
इति विकाण्डशेषः ॥
(यथा, माघे । ५ । ४ ।
"अश्वाः व्यधुर्वेसुमतीमतिरोचमाना-
स्तूर्णं पयोधय इवोर्म्मिभिरापतन्तः ॥"
नृपविशेषः । यथा, महाभारते । १ । ६७ । १८ ।
"अश्वत्थोव इति ख्यातः सत्त्ववान् यो महासुरः ।
रोचमान इति ख्यातः पृथिव्यां सोऽभवन्नृपः ॥"
दीप्यमाने, त्रि । यथा, कथासरित्सागरे । ७४ । ७८ ।
"रोचमानैः समायुक्तचूड़ामणिकङ्कणादिभिः ।
गन्धर्व्वकुलसम्भूतिसंसिद्धैरिव भूषितम् ॥")
रोचिः, [स्] क्ली, (रोचतेऽनेनेति । रुच् + बाहुलकात् इसिन् । इत्युज्ज्वलः । २ । १२ ।) प्रभा । इत्यमरः । (यथा, माघे । १ । २१ ।
"रथाङ्गपाणेः पटलेन रोचिषा-
स्थितिषः संवलिता तिरेजिरे ॥")
रोचिष्णुः, त्रि, (रोचते तच्छीलः । रुच् + "अलं लज निराकाङ्क्षिति ।" ३ । २ । १३६ । इति इष्णुच् ।) अलङ्कारादिना दीप्तिशीलः । तत्पर्य्यायः । विभ्राट् २ भ्राजिष्णुः ३ । इत्यमरः ॥ (यथा, कथासरित्सागरे । ६४ । ८ ।
"तत्र शूकरवृन्दानि भिन्दन् बाणैर्निरन्तरम् ।
श्यामलाम्बररोचिष्णुस्तमांसीव रविः करैः ॥"
रोचकः । यथा, सुश्रुते । १ । ४५ । मद्यवर्गे ।
"सुगन्धि दीपनं हृद्यं रोचिष्णु क्लमनाशनम् ॥")
रोची, स्त्री, (रोचते इति । रुच् + इन् । वा ङीष् ।) छिल्लमोचिका । इति शब्दरत्नावली ॥
रोची, [न्] त्रि, (रोचते इति । रुच् + णिनिः ।) रोचिष्णुः । इति हेमचन्द्रः ॥
रोच्यं, त्रि, (रुच् + ण्यः । "यजयाचरुचप्रवचर्चश्च ।" ७ । ३ । ६६ । इति कवर्गादेशो न ।) प्रकाश्यम् । प्रीतिविषयः । रुचधातोः कर्म्मणि यप्रत्ययेन निष्पन्नोऽयम् ॥
रोट्, [ष्] त्रि, (रुध् + "अन्येभ्योऽपि दृश्यन्ते ।" ३ । २ । ७५ । इति विच् ।) हिंसः । वधकः । रोधतीति विचि गुणः । इति सुग्धबोधटीकायां दुर्गादासः ॥
रोटिका, स्त्री, पिष्टकविशेषः । रोटी इति रुटी इति च भाषा । तत्करणप्रकारमाह ।
"शुष्कगोधूमचूर्णेन किञ्चित् पृष्ठाच्च पोलिकाम् ।
तप्तके खेदयेत् क्षिप्त्वा भूयोऽङ्गारोपरि तां पचेत् ॥
सिद्धेयं रोटिका प्रोक्ता गुणानस्याः प्रचक्ष्महे ।
रोटिका बलकृद्वृष्या दृंहणी धातुवर्द्धनी ॥
वातघ्नी कफकृद्गुर्व्वी दीप्ताग्नीनां प्रपूजिता ॥"
अथ लेटी ।
"सुद्गगोधूमचूर्णन्तु साम्बुगाढं विमर्द्दयेत् ।
विधाय वटकाकारं निर्धूमेऽग्नौ पचेत् ॥
अङ्गारकर्कटी श्लक्ष्णा दृंहणी शुक्रला लघुः ।
दीपनी कफकृद्वल्या पीनसश्वासकासजित् ॥"
अथ यवरोटिका ।
"यवजा रोटिका रूक्षा मधुरा विशदा लघुः ।
मलशुक्रानिलकरी बल्या हन्ति कफामयान् ।
पीनसश्वासकासांश्च मेदोमेहगलामयान् ॥"
अथ माषरोटिका ।
"पूर्णं यच्चुक्कमाषाणां चमसी साभिधीयते ।
चमसीरचिता रोटी कथ्यते बलभद्रिका ॥
रूक्षोष्णा वातला बल्या दीप्ताग्नीनां प्रपूजिता ।
माषाणां दलयुग्मेऽपि स्थापिताख्यक्लकचुकाः ॥
आतपे शोषिता यत्ने पिष्टास्ता धूमसी स्मृता ।
धूमसीरचिता सैव प्रोक्ता भर्भरिका बुधैः ॥"
भर्भरिकास्थाने सुर्भुरिका इति गुर्गुरिका इति वा पाठः ।
"भर्भरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ॥"
अथ चणकरोटिका ।
"चाणक्या रोटिका रूक्षा श्लेष्मपित्तासनुद्गुरुः ।
विदग्धिनी न चक्षुष्या तद्गुणा तिलशष्कुली ॥"
इति भावप्रकाशः ॥
रोड, ऋ अनादरे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अरुरोड़त् । इति दुर्गादासः ॥
रोदः, [स्] क्ली (रुद् + असुन् ।) स्वर्गः । भूमिः । इति मेदिनी । से, ३३ ॥ (यथा, ऋग्वेदे । ६ । २२ । ५ ।
"इते पृष्ठानि रोदसोर्विप्रयन्तो व्यानशुः ॥")
रोदनं, क्ली, (रुद् + ल्युट् ।) क्रन्दनम् । (यथा, याज्ञवल्क्यस्मृतौ । ६२ ।
"दुर्ब्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं चौराणामनृतं बलम् ॥")
असु । इति मेदिनी । ने, ११८ । तस्य शुभाशुभं यथा,—
"अनश्रु स्निग्धरुदितमदीनं शुभदं नृणाम् ।
प्रचुरांश्च दीनं रूक्षञ्च रुदितं न सुखावहम् ॥"
इति गारुड़े ६६ अध्यायः ॥
कपिलाधेनूनां नेत्राम्बुना रत्नसम्भवो जातः । यथा,—
"दृष्ट्वा मुनिं मृतं दृष्ट्वा रुरोद कपिला मुहुः ॥"
इत्युपक्रम्य ।
"तदश्रुबिन्दुना मर्त्ये रत्नसंघो बभूव ह ॥"
रोदनाश्रुपतनेन मृतानां नरकं स्यात् । यथा.—
"ज्ञानिनो मा रुदन्त्येव मा रोदीः पुत्र साम्प्रतम् ।

रोदनाश्रुपतनानृस्तानां नरकं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २७ अध्यायः ॥
मृतमुद्दिश्य रोदननिषेधो यथा,—
"श्लेष्माश्रु वान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः।
अतो न रोदितव्यं हि क्रियाः कार्य्या विधानतः॥"
इति शुद्धितत्त्वम्।
रोदनिका, स्त्री, (रोदनं अस्त्र पात्यत्वेनास्त्यस्येति। रोदन+ठन्।) यवासः। इति राजनिर्घण्टः॥ (विवरणमस्य यवासशब्दे ज्ञातव्यम्॥)
रोदनी, स्त्री, (रुद्यतेऽनयेति। रुद्+करणे ल्युट्। ङीप्।) दुरालभा। इत्यमरः। २। ४। ६२॥
रोदसी, स्त्री, (रोदस्+गौरादित्वात् ङीष्।) स्वर्गः। भूमिः। इत्यमरः। ३। ३। २२८॥
रोदसी, ष, स्वर्गः। भूमिः। यथा,—
"द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति च॥"
इति भरतधृतकोषः॥
रोदस्यौ, स्त्री, भूमिस्वर्गौ। यथा,—
"प्रस्तरन्यापि भूद्यावौ रोदस्यौ रोदसी च ते॥"
इत्यमरः। ३। ३। २२८॥
"भूर्भूमिः द्यौराकाशं ते सहिते विग्रहौते च रोदसीरोदःशब्दयोर्वाच्ये इति भूद्यावौ परान्वय्येते एतेन द्वंवन्तसान्तशब्दद्वयेन एकवचनान्तेनापि भूद्यावौ समुदिते उच्येते।
'रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक्।
सह प्रयोगेऽप्यनयो रोदः स्यादपि रोदसी।'
इति विश्वः॥
'रोदसी रोदसा सार्द्धं पृथ्वीस्वर्गे दिवि स्थितौ॥'
इत्यजयः॥
रोदसीशब्दयमप्यस्ति। यथा। द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति चैति।" इति तट्टीकायां भरतः॥
रोधः, पुं, (रुणद्धि जलमिति। रुध्+घञ्।) नदीतीरम्। इत्यमरटीकायां भरतः। १।१०।७॥ (रुध्+घञ्। रोधनम्। यथा, मार्कण्डेये। १३। १।
"अहं वेश्यकुले जातो जन्मत्यक्षासु सप्तमे।
समतीते गवां रोधं निपाने कृतवान् पुरा॥")
रोधः, [स्] क्ली, (रुणद्धि वार्य्यादिकमिति। रुध्+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) नदीतीरम्। इत्यमरः। १। १०। ७॥ (यथा, रघुः। ५। ४२।
"स नर्म्मदारोधसि वीरसार्द्रै-
र्मदद्विरानर्त्तितनक्तमालै।
निषेदुषामाश्च विनीताध्वा
क्लान्तं रजोधूसरकेतु सैन्यम्॥")
रोधनः, त्रि, (रुणद्धीति। रुध्+ल्युः।) रोधकर्त्ता। (रुध्+भावे ल्युट्।) रोधे, क्ली। इति व्याकरणम्। (यथा, भागवते। ३। ३०। २७।
"पातनं गिरिदुर्गेभ्यो रोधनं चाम्बुगर्त्तयोः॥")
रोधवक्रा, स्त्री, (रोधेन वक्रा।) नदी। यथा। निम्नगा रोधवक्रा च स्रवन्ती सिन्धुरापगेति नदीपर्य्याये भागुरिः। इति भरतः॥
रोधोवक्रा, स्त्री, (रोधसा वक्रा।) नदी। इति त्रिकाण्डशेषः॥
रोधोवती, स्त्री, (रोधोऽस्त्यस्या इति। रोधस्+मतुप्। ङीप्।) नदी। इति राजनिर्घण्टः॥
रोध्रं, क्ली, (रुध्यतेऽनेन। रुध+बाहुलकात् रन्।) अपराधः। पापम्। इति मेदिनी। रे, ८१॥
रोध्रः, पुं, लोध्रः। इति मेदिनी राजनिर्घण्टश्च॥ (यथा, सुश्रुते। १। १२।
"मधूच्छिष्टं समधुकं रोध्रं सर्ज्जरसं तथा।
मञ्जिष्ठां चन्दनं लाक्षां पिष्ट्वा सर्पिर्विपाचयेत्॥")
रोध्रपुष्पः, पुं, (रोध्रस्येव पुष्पमस्य।) मधूकवृक्षः। इति राजनिर्घण्टः॥ (मण्डलिसर्पजातिविशेषः। तद्यथा।"आदर्शमण्डलः श्वेतमण्डली रक्तमण्डलश्चित्रमण्डलः एषतो रोध्रपुष्पो मिलिन्दको गोनसः इत्यादिषु।" इति सुश्रुते कल्पस्थाने चतुर्थोऽध्याये॥)
रोध्रपुष्पिणी, स्त्री, (रोध्र इव पुष्पात्यस्याः। पुष्प+इनि। ङीप्।) धातकीवृक्षः। इति राजनिर्घण्टः॥
रोपः, पुं, (रुप्यतेऽनेनेति। रुप विमोहे+घञ्।) बाणः। इत्यमरः॥ (रुह+णिच्+घञ्।) रोपणम्। इति मेदिनी। पे, २॥ (यथा, महाभारते। १३। ५८। २४।
"एता जात्यस्तु तृणानां तेषां रोपे गुणाञ्छिमे॥")
छिद्रे, क्ली। इति हेमचन्द्रः॥
रोपणं, क्ली, विमोहनम्। रुपधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम्॥ जननम्। प्रादुर्भावः। आन्तरुहधातोः पङादेशे अनट्प्रत्ययेन निष्पन्नम्। इति व्याकरणम्॥ (यथा, सुश्रुते। १। १५।
"सन्धिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्य्यकृत्क्षेप्या पञ्चधा प्रविभक्त उदकस्मानुग्रहं करोति॥")
अञ्जनविशेषः। यथा,—
"रोपणं रसकं पिष्ट्वा सम्यक् संज्ञाप्य वारिणा।
गृह्णीयात्तज्जलं सर्व्वं त्र्यहेणूर्णमधोगतम्॥
शुष्कञ्च तज्जलं सर्व्वं पर्पटीसन्निभं भवेत्।
विचूर्ण्य भावयेत् सम्यक् त्रिवेलं त्रिफलारसैः॥
कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत्।
अञ्जयेन्नयनं तेन सर्व्वदोषप्रशान्तये॥
समस्तनेत्ररोगघ्नं चूर्णमेतत् संशयः॥"
रोपणीवर्त्तिः, स्त्री, नेत्राञ्जनभेदः। यथा। अथ रोपणीवर्त्तिः।
"अशीतितिलपुष्पाणि यष्टिः पिप्पलितण्डुलाः।
जातीपुष्पाणि पञ्चाग्न्यरिचानि च षोडश॥
सर्व्वं पिष्ट्वाम्बुना वर्त्तिः कृता कुसुमिकाभिधा।
तिमिरार्ज्जुनशुक्राणां नाशिनी मांसदृद्धिनुत्।
एतस्या अञ्जने प्रोक्ता मात्रा सार्द्धहरेणुका॥"
कुसुमिकावटी रोपणी। इति भावप्रकाशः॥
रोप्यातिरोप्यः, पुं, धान्यविशेषः। अस्य गुणाः।
"रोप्यातिरोप्या लघवः शीघ्रपाका गुणोत्तराः।
अदाहिनो दोषहरा बल्या सञ्जिवर्द्धनाः॥"
इति राजवल्लभः॥
रोमं, क्ली, जलम्। इति शब्दचन्द्रिका॥ (लोम। यथा, महाभारते। ३। ११२। ३।
"द्वौ चास्य पिण्डावधरेण कण्ठा-
दजातरोमौ सुमनोहरौ च॥"
जनपदविशेषः। इति केचित्॥)
रोम, [न्] क्ली, (रौतीति। रु+"नामन्सीमन्व्योमन्रोमन्निति।" उणा० ४। १५०। इति मनिन्प्रत्ययेन साधुः।) शरीरजसाङ्कुरः। रोंआ इति भाषा। तत्पर्य्यायः। लोम २ अङ्गजम ३ त्वग्जम ४ चर्म्मजम ५ तनुरुहम ६। इति राजनिर्घण्टः॥ स्थानविशेषे तस्य शुभाशुभसूचकत्वं यथा,—
"अल्परोमयुता श्रेष्ठा जङ्घा हस्तिकरोपमा।
रोमैकैकं कूपके स्यानृपाणान्तु महात्मनाम्॥
द्वे द्वे रोमे पण्डितानां श्रोत्रियाणान्तथैव च।
रोमत्रयं दरिद्राणां रोगी निर्म्मांसजानुकः॥"
इति गारुड़े ६३ अध्यायः॥
रहस्यरोम्णोऽप्रशस्तत्वं यथा,—
"न सर्पशस्त्रैः क्रीड़ेत स्वानि स्वानि न संस्पृशेत्।
रोमाणि च रहस्यानि नाग्निदेव सदा व्रजेत्॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥
(जनपदविशेषः। तद्देशवासिनि। पुं भूम्नि। यथा, महाभारते। ६। ६। ५५।
"वानायवो दशाः पार्श्वा रोमाणः कुरुविन्दवः॥")
रोमकं, क्ली, (रोमे कायतीति। कै+कः।) पांशुलवणम्। (यथा, सुश्रुते। १। ४२।
"सैन्धवसौवर्चलविड्पाक्यरोमकसामुद्रकपाक्लिमयवक्षारोषप्रसूतसुवर्चिकाप्रभृतीनि समासेन लवणो वर्गः॥") अयस्कान्तभेदः। इति राजनिर्घण्टः॥ (रोमैव। जनपदविशेषः। तद्देशवासिनि, पुं भूम्नि। यथा, महाभारते। २। ५०। १५।
"औण्डीकानन्तवासांश्च रोमकान् पुरुषादकान्॥")

रोमकन्दः, पुं, (रोमयुक्तः कन्दो मूलमस्य।) पिण्डालुः। इति राजनिर्घण्टः॥

रोमकपत्तनं, क्ली, (रोमकं पत्तनमिति कर्म्मधारयः।) देशविशेषः। रूम इति पारस्यभाषा। यथा,—

"लङ्कोर्ज्जयिन्योर्मध्ये यमकोटिरेखाः
प्राक् पश्चिमे रोमकपत्तनञ्च।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये बड़वानलञ्च।
कुरुक्षपादास्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति॥"

इति सिद्धान्तशिरोमण्यौ गोलाध्यायः॥

रोमकूपः, पुं, (रोम्णां कूपः।) लोमविवरम्। यथा,—

"प्रजापतिस्त्वाश्रमालां ददौ ब्रह्मा कमण्डलुम्।
समस्तरोमकूपेषु निजरश्मीन्दिवाकरः॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

(तथा च।

"ऊर्द्धं नासाग्निकर्णाक्षिमेढ्योनिगुदेरधः।
कुपितं रोमकूपेभ्य समस्तेभ्यस्तुप्रवर्त्तते॥"

इति वाभटे निदानस्थाने त्रयोदशेऽध्याये॥)

रोमकेशरं, क्ली, (रोम्णां केशरमिव।) चामरम्। इति त्रिकाण्डशेषः॥

रोमगुच्छः, पुं, (रोम्णां गुच्छस्तबकः।) चामरम्। इति हेमचन्द्रः। २।३८१॥ हारावली च। १७३॥

रोमगुच्छकः, पुं, (रोमगुच्छ एव। स्वार्थे कन्।) चामरम्। इति जटाधरः॥

रोमन्थः, पुं, उद्गीर्य चर्व्वणम्। इत्यमरः॥ जाओरकाटा इति भाषा॥ (यथा, रघुः। १। ५२।

"रुग्णैर्वनितरोमन्थशटजाङ्गनभूमिषु॥")

रोमभूमिः, स्त्री, (रोम्णां भूमिरिव।) चर्म्म। इति राजनिर्घण्टः॥

रोमलता, स्त्री, (रोम्णां लतेव।) लोमावलिः। इति हेमचन्द्रः। ३। २७०॥

रोमवान्, [त्] त्रि, लोमविशिष्टः। रोमशब्दादस्त्यर्थे मतुप्प्रत्ययेन निष्पन्नः॥

रोमविकारः, पुं, (रोम्णां विकारः।) रोमाञ्चः। इति हलायुधः॥

रोमशः, पुं, (रोमाणि सन्त्यस्येति। रोमन्+"लोमादिपामादिपिच्छादिभ्यः शनेलचः।" ५। २। १००। इति शः।) मेषः। इति हेमचन्द्रः॥ पिण्डालुः। कुम्भी। शूकरः। इति राजनिर्घण्टः॥ (ऋषिविशेषः। यथा, भागवते। ६। १५। १४।

"रोमशस्यावनो दत्त आसुरिः सपतञ्जलिः॥"

अस्य ऋषेरेकलोमपतने एकेन्द्रपातो भवेत् एवं सर्व्वलोमपतनकालस्तस्य परमायुः। एतादृशोऽप्यसौ जीवामि वा क्रियन्ति दिनानीति चिन्तयन् निवस्तुं एहं न निर्म्ममे केवलं वर्षासु धारापातनिवृत्तये मस्तकविन्यस्तकटस्तपश्चरति। विष्णोर्विराटरूपस्य ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे दृश्यम्॥ क्ली, उपस्थम्। यथा, ऋग्वेदे। १०। ८६। १६।

"सेदीग्ने यस्य रोमशं निषेदुषो
विजृम्भते विश्वमाहिन्न उत्तरः॥"

"निषेदुषः शयानस्य रोमशमुपस्थं विजृम्भते विवृतं भवति।" इति तद्भाष्ये सायणः॥) अतिशयलोमविशिष्टे, त्रि। (यथा, मनुः। ३। ७।

"हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम्॥")

रोमशफलः, पुं, (रोमशं फलमस्य। टिड्ढाणञ्द्वयसज्दघ्ण्ञमात्यिटन्नित्यादिना ङीप्।) पिण्डालुः। इति राजनिर्घण्टः॥

रोमशा, स्त्री, (रोमाणि सन्त्यस्या इति। रोमन्+शः। टाप्।) दक्षदुहितृभेदः। इति राजनिर्घण्टः॥ लोमशा च॥ (दक्षदुहितृकन्या। यथा, ऋग्वेदे। १। १२७। ७।

"सर्व्वाहमस्मि रोमशा गन्धारीणामिवाविका॥")

रोमशूकं, क्ली, (रोमयुक्तं शूकं यस्य।) स्त्रीधान्यकम्। इति भावप्रकाशः॥

रोमहर्षः, पुं, (रोम्णां हर्षः।) रोमाञ्चः। इति हलायुधः॥ (यथा, गीतायाम्। १। २८।

"वेपथुश्च शरीरे मे रोमहर्षश्च जायते॥")

रोमहर्षणं, क्ली, (रोम्णां हर्षणम्।) रोमाञ्चः। इत्यमरः॥ (रोम्णां हर्षणं यस्मात्। रोमाञ्चकरे, त्रि। यथा, गीतायाम्। १८। ७४।

"संवादमिदमश्रौषमद्भुतं लोमहर्षणम्॥")

रोमहर्षणः, पुं, सूतः। अस्य व्युत्पत्तिर्यथा,—

"अस्य ते सर्व्वरोमाणि वचसा हृषितानि यत्।
द्वैपायनस्य भगवंस्ततो वै रोमहर्षणः।
भवन्तमेव भगवान् याजहार स्वयं प्रभुः॥"

इति कौर्म्मे १ अध्यायः॥

(स तु व्यासशिष्यः। यथा, भागवते। १०। ७८। २२।

"सोऽचैत: सपरीवारः हुतासनपरिग्रहः।
रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत॥"

अस्यान्यद्विवरणं लोमहर्षणशब्दे द्रष्टव्यम्॥) विभीतकवृक्षः। इति मेदिनी। णे, ११६॥

रोमाञ्चः, पुं, (रोम्णां अञ्चः उद्गमः।) रोमहर्षणम्। इत्यमरः॥ पुलककण्टकरोमविक्रिया रोमोद्गमरोमहर्षाश्चात्र। इति भरतः॥ (स तु सात्त्विकभावानामन्यतमः। यथा, साहित्यदर्पणे। ३। १६६।

"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः॥"

"हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया॥")

रोमाञ्चिका, स्त्री, (रोमाञ्च उत्पाद्यत्वेनास्त्यस्या इति। रोमाञ्च+ठन्।) रदनीवृक्षः। इति राजनिर्घण्टः॥

रोमाञ्चितः, त्रि, (रोमाञ्चः सञ्जातोऽस्येति। रोमाञ्च+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) जातपुलकः। रोमाञ्चविशिष्टः। तत्पर्य्यायः। हृष्टरोमा २। इति त्रिकाण्डशेषः॥ (यथा, मार्कण्डेये। १००। २०।

"स च शान्तिर्गते वह्नौ परितुष्टेन चेतसा।
हर्षरोमाञ्चिततनुः प्रविवेशाश्रमं गुरोः॥")

रोमाली, स्त्री, (रोम्णां आली श्रेणिर्यत्र।) वयःसन्धिः। इति शब्दमाला॥ (रोम्णां आली।) रोमावली। (यथा, आर्य्यासप्तशत्याम्। ३१८।

"निधिनिःश्वेषशयानस्योपरि चिह्नार्थमिव
लता निहिता।
लोभयति तव तनूदरि जघनतटादुपरि
रोमाली॥")

रोमालुः, पुं, (रोमविशिष्टं आलुः।) पिण्डालुः। इति राजनिर्घण्टः॥

रोमालुविटपी, [न्] पुं, (रोमालुरिव विटपी वृक्षः।) कुम्भीवृक्षः। इति राजनिर्घण्टः॥

रोमावली, स्त्री, (रोम्णामावली।) नाभेरूर्द्धलोमश्रेणी। तत्पर्य्यायः। रोमलता २। इति हेमचन्द्रः। ३। २७०॥ रोमाली ३। इति शब्दमाला॥ लोमराजी ४। यथा,—

"तस्याः प्रविश्य नतनाभिरन्ध्रं
रराज तन्वी नवलोमराजी।
नीवीमतिक्रम्य स्थितेतरस्य
तन्मेखलामध्यमणेरिवार्चिः॥"

इति कुमारसम्भवम्॥

सा च यौवनारम्भे भवति। अज्ञातयौवना यथा,—

"नीराजीरसुपागता अवयवैः सौन्दर्य्य स्फुरन्नेत्रयोः
ओजे लक्ष्यमिदं किसुत्पलमिति ज्ञातुं करं व्यस्यति।
सैवाताम्रकुरङ्गया मृगिसखी रोमावलीं प्रोञ्छति
आत्मानीति सुहृत् सखीमविदितामीभीरा पृच्छति॥"

इति रसमञ्जरी॥

रोमाश्रयपत्रा, स्त्री, (रोमाश्रयं पत्रमस्याः।) भिण्डिरिडालुपः। इति राजनिर्घण्टः॥

रोमोद्गमः, पुं, (रोम्णामुद्गमः।) रोमाञ्चः। इति हलायुधः॥ (यथा, कुमारे। ७। ७७।

"रोमोद्गमः प्रादुरभूदुमायाः
खिन्नाङ्गुलेः पुङ्खकेतुरासीत्।
वृत्तिस्तयोः पाणिषमागमेन
समं विभक्तेव मनोभवस्य॥")

रोमोद्भेदः, पुं, (रोम्णामुद्भेदः।) रोमाञ्चः। इति त्रिकाण्डशेषः॥ (यथा, प्रबोधचन्द्रोदये। १ अङ्के।

"स्फुरद्रोमोद्भेदस्फुरलतरतारा कुलदृशो
भयोत्कम्पोत्सङ्गस्खलनयुगभरासङ्गसुभगः॥")

रोलः, पुं, पानीयामलकम्। इति शब्दचन्द्रिका॥ (पानीयामलकशब्दोऽस्य गुणाद्योऽभिहिताः॥)

रोलम्बः, पुं, (रौतीति। रु+विच्। रौः कुजन् सन् वमति स्थानात् स्थानान्तरं गच्छतीति। लम्ब+अच्।) भ्रमरः। इति त्रिकाण्डशेषः॥

(यथा, वक्रोक्तिपञ्चाशिकायाम् । ४० ।
"गच्छे दानवनाशिनो गणपतेः कुर्व्वन्ति कोलाहलं
रोलम्बा दनुसूनुनाशनविधौ सक्ताः स्फुरन्ते कथम् ॥")

रोषः, पुं, (रुष + घञ् ।) क्रोधः । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । ४४८ ।
"मुञ्चसि किं मानवतीं व्यवसायादृद्दिगुणमन्यु-वेगेति ।
स्नेहभवः प्रथमाम्भः मान्त्वेन च रोष उन्मिषति ॥")

रोषणः, पुं, (रोषति तच्छीलः । रुष + "क्रुधमन्थार्थेभ्यश्च ।" ३ । २ । १५१ । इति युच् ।) पारदः । हेमघर्म्मोपलः । इति मेदिनी । ने, ७३ ॥ ऊषरभूमिः । क्रोधने, त्रि । इति हेमचन्द्रः । (यथा, मार्कण्डेये । ११२ । १५ ।
"न धर्म्मः क्रोधशीलस्य नार्थशास्त्रोक्तिरेव च ।
नाशं सुखाय कामाग्निः कोपेनाधिश्चेतसाम् ॥")

रोहः, पुं, (रोहतीति । रुह् + अच् ।) अङ्कुरः । इति हेमचन्द्रः ॥ (यथा, महाभारते । १२ । १२० । ३८ ।
"अग्निः स्तोको वर्द्धतेऽभ्याश्वसिक्तो
बीजञ्चैकं रोहसाहस्रमेति ।
व्ययव्ययौ विपुलौ सन्निधान्य
तस्मादर्थं नावमन्येत वित्तम् ॥"
रोहणीये, त्रि । यथा, वाजसनेयसंहितायाम् । १३ । ५१ ।
"तेन रोहमायन्नुप मेध्यासः ।"
"रोहं रोहणीय स्वर्गम् ।" इति तद्भाष्ये महीधरः ॥)

रोहकः, पुं, (रुह् + ण्वुल् ।) प्रेतभेदः । बोढ़रि, त्रि । इति मेदिनी । के, १४६ ॥ (यथा, महाभारते । ८ । ३४ । ३२ ।
"सिनीवालीमनुमतिं कुहूं राकाञ्च सुव्रताम् ।
योक्ष्यामि चक्रुर्वाहानां रोहकांस्तत्र कारुकान् ॥")

रोहणं, क्ली, (रोहत्यनेनेति । रुह् + करणे ल्युट् ।) शुक्रम् । इति राजनिर्घण्टः ॥ जन्म । प्रादुर्भावः । इति रुहधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥

रोहणः, पुं, (रोहत्यस्मिन्निति । रुह् + अधिकरणे ल्युट् ।) पर्व्वतविशेषः । तत्पर्य्यायः । विदूराद्रिः २ । इति जटाधरः ॥ (यथा, राजेन्द्रकर्णपूरे । ५२ ।
"अपारपुलिनस्थलीभुवि हिमालये मालये
निकामविकटोन्नते दुरधिरोहणे रोहणे ।
महत्समरभूधरे गहनकन्दरे मन्दरे
भ्रमन्ति न पतन्त्यहो परिगता भवत्कीर्त्तयः ॥")

रोहन्तः, पुं, (रुह्यादिति । रुह् + "रुहिनन्दिभ्रात्रिभ्यः पिदाग्निषि ।" उणा० १ । १२० । इति झच् ।) वृक्षभेदः । इत्युणादिकोषः ॥ वृक्षमात्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

रोहन्ती, पुं, (रुह् + झच् । स्त्रियां ङीष् ।) लताभेदः । इत्युणादिकोषः ॥ लतामात्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

रोहिः, पुं, (रोहतीति । रुह् + "रुहिधिरुहीति ।" उणा० ४ । ११८ । इति इन् ।) बीजम् । वृक्षः । इत्युणादिकोषः ॥ धार्म्मिकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रोहिणं, क्ली, (रुह् + "रुहेश्च ।" उणा० २ । ५५ । इति इनन् ।) कालभेदः । इत्युणादिकोषः ॥ स तु दिवसीयनवमसमूहः । पूर्व्वाह्णआह्नस्य गौणकालत्वेनोत्तरावधिः । अपराह्णआह्नस्य पूर्व्वावधिः । एकोद्दिष्टआह्नस्य समापनकालः । रौहिणञ्चास्य नामान्तरम् । यथा । अत्र पूर्व्वाह्णे आह्नमभिधाय रौहिणन्तु न लङ्घयेदित्यभिधानेन पूर्व्वाह्णआह्नस्य सङ्गवात् परो रौहिणपर्य्यन्तगौणपूर्व्वाह्णकालः प्रतीयते तेन रौहिणं पूर्व्वाह्णआह्नस्य गौणकालत्वेनोत्तरावधिः अपराह्णआह्नस्य पूर्व्वावधिरित्यवगम्यते । रौहिणन्तु दिवसस्य नवमसमूहः । तस्य ज्योतिषोक्तरोहिणीदैवतत्वात् रौहिणत्वमिति । व्यासः ।
"आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत् ॥"
इति श्राद्धतत्त्वम् ॥

रोहिणः, पुं, (रोहतीति । रुह् + "रुहेश्च ।" उणा० २ । ५५ । इति इनन् ।) भूतृणः । वटवृक्षः । रोहितकवृक्षः । इति राजनिर्घण्टः ॥ (ग्राह्मलद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२२ । ६६ ।
"रोहितो यस्तृतीयस्तु रोहिणो नाम विश्रुतः ॥")

रोहिणिः, स्त्री, रोहिणीनक्षत्रम् । इति शब्दरत्नावली । (यथा, बृहत्संहितायाम् । १०७ । ४ ।
"धारणवर्षणरोहिणि-
वायव्याषाढ़भाद्रपदयोगाः ।
त्रिगुणवृष्टिः कुसुमलताः
सत्याचिह्नं दिशां दाहः ॥")

रोहिणिका, स्त्री, (रोहिण्येव स्वार्थे कन् । टाप् ह्रस्वश्च ।) कोषादिना रक्तवर्णा स्त्री । इति जटाधरः ॥

रोहिणी, स्त्री, (रुह् + इनन् । गौरादित्वात् ङीष् ।) स्त्रीगवी । इत्यमरः ॥ (यथा, माघे । १२ । ४० ।
"प्रीत्या नियुक्तालिहती: स्तनन्धया-
न्निग्धस्य पारोसुभयेन जानुनोः ।
वर्हिष्णुधाराध्वनि रोहिणी: पय-
श्चिरं निदध्यौ दुहतः स गोदुहः ॥")
तड़ित् । कटुम्भरा । (यथास्याः पर्य्यायः ।
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा ।
अशोका मन्थपूर्णका चक्राङ्गी शकुलादनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सोमवल्कः । (यथास्याः पर्य्यायो रत्नमालायाम् ।
"कट्फलः सोमवल्काख्यः सोमवृक्षश्च रोहिणी ॥"
महाश्वेता । तत्पर्य्यायो यथा,—
"कटभी किणिही श्वेता महाश्वेता च रोहिणी ॥"
इति वैद्यकरत्नमालायाम् ॥)
लोहिता । इति मेदिनी । णे, ३७ ॥ जिनानां विकाङ्घ्रीविशेषः । इति हेमचन्द्रः ॥ काश्मरी । हरीतकी । मञ्जिष्ठा । इति राजनिर्घण्टः ॥ कपिलवर्णा वर्त्तुलाकारा विरेचने प्रशस्ता हरीतकी । इति राजवल्लभः ॥ * ॥ बलदेवमाता । सा वसुदेवभार्य्या कश्यपपत्नीसुरभ्यंशजाता । यथा,—
"देवकी रोहिणी चैमे वसुदेवस्य धीमतः ।
रोहिणी सुरभिर्देवी अदितिर्देवकी ह्यभूत् ॥"
इति महाभारते हरिवंशः ॥ * ॥
सुरभिकन्या । यथा,—
श्रीमार्कण्डेय उवाच ।
"दक्षस्य तनया यासीत् सुरभिर्नाम नामतः ।
गवां माता महाभागा सर्व्वलोकोपकारिणी ॥
तस्यास्तु तनया जज्ञे कश्यपात् प्रजापतेः ।
नाम्ना सा रोहिणी शुभा सर्व्वकामदुघा नृणाम् ॥
तस्यां यज्ञे शूरसेनाङ्सोरिति तपोऽन्वितात् ।
कामधेनुरिति ख्याता सर्व्वलक्षणसंयुता ॥"
इति कालिकापुराणे श्रेषाध्यायः ॥ * ॥
नववर्षीया कन्या । यथा,—
"अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशमे कन्यका प्रोक्ता अत ऊर्द्ध रजस्वला ॥"
इत्युद्वाहतत्त्वम् ॥ * ॥
(पञ्चवर्षा कुमारी । यथा, देवीभागवते । ३ । २६ । ४२ ।
"रोहिणी पञ्चवर्षा च षड्वर्षा कालिका स्मृता ॥"
रोगनाशायैवास्याः पूजा कर्त्तव्या । यथा, तत्रैव । ३ । २६ । ४८ ।
"रोहिणीं रोगनाशाय पूजयेद्विधिवन्नरः ॥"
अस्याः पूजामन्त्रो यथा, तत्रैव । ३ । २६ । ५६ ।
"रोहयन्ती च बीजानि प्राग्जन्मसञ्चितानि वै ।
या देवी सर्व्वभूतानां रोहिणीं पूजयाम्यहम् ॥")
हिरण्यकशिपुकन्या । यथा, महाभारते । ३ । २२० । १८ ।
"कन्या सा रोहिणी नाम हिरण्यकशिपोः सुता ॥" * ॥
रोहिष + पचे ङीष् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतचतुर्थनक्षत्रम् । तत्पर्य्यायः । रोहिणिः २ । इति शब्दरत्नावली ॥ ब्राह्मी १ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १४६ । ३३ ।
"अष्टमेऽहनि रोहिण्यां प्रयाताः फाल्गुनस्य ते ।
वारणावतमासाद्य दह्यमानगरं जनम् ॥")
तस्य शकुनाश्चेति पञ्चतारात्मकम् । तस्याधि-

ब्राह्मी देवता ब्रह्मा। गगनमध्ये उदिते सति सिंहलग्नस्य अष्टत्रिंशत्पलाधिकदण्डचितयं गतं भवति। यथा,—

"कम्बुकण्ठि! शुकुलाङ्गतौ नभो-
मध्यमागतवति प्रजापतौ।
पश्चमे गजकुपत्रलिप्रिका
निःसृता: सुमुखि! सिंहलग्नत:॥"

इति कालिदासकृतराशिलग्ननिरूपणम्॥*॥

तत्र जातफलं यथा,—

"स्याद्धर्मकार्ये कुशल: कुलीन:
सुधारदेहो विलसत्कलेवर:।
खरानिलाकुलितास्त्रिलाशयो
यो रोहिणीज: स धनी स मानी॥"

इति कोष्ठीप्रदीप:॥*॥

गलरोगविशेष:। यथा। रोहिणीनामकगल-रोगाणां नामानि संख्याञ्चाह।

"रोहिणी प्रथमा प्रोक्ता कण्ठशालूक एव च।
अधिजिह्वश्च बलयोऽलासनामैरष्टन्दक:॥
ततो वृन्द: ग्रुतघ्नी च गिलायु: कण्ठविद्रधि:।
गलौघ: प्रस्तरश्च मांसतानस्तथैव च।
विदारी कण्ठदेशे तु रोगा अष्टादशस्मृता:॥"

तत्र प्रथमनामपि रोहिणीनां सामान्यसंप्राप्तिमाह।

"गलेऽनिल: पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम्।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निहन्त्यतस्तं आधिरियं हि रोहिणी॥"

अनिल: मूर्च्छित: प्रदूष: कफपित्तौ च मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छित:। नतु त्रयोऽपि मूर्च्छिता: पृथग्दोषजाया अविवक्षितत्वात्। तस्या वातजाया लक्षणमाह।

"जिह्वासमन्तादरुजस्तुवेदनास्तु
मांसाङ्कुरा: कण्ठविरोधना: स्यु:।
सा रोहिणी वातबलता प्रदिष्टा
वातात्मकोपद्रवगाढ़दुष्टा॥"

जिह्वासमन्तात् जिह्वाया: सर्व्वत:। वातात्मकोपद्रवगाढ़दुष्टा स्वाभाविकैरतिशयेन युक्ता॥"

पित्तजामाह।

"क्षिप्रोद्गमा क्षिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्तजाता॥"

श्लेष्मजामाह।

"श्लोतोनिरोधिन्यपि मन्दपाका
गुर्व्वी स्थिरा सा कफसम्भवा तु॥"

श्लोतोऽत्र कण्ठस्रोत:॥*॥ सन्निपातजामाह।

"गम्भीरपाकित्यनिवार्य्यवीर्य्या
त्रिदोषलिङ्गा त्रिभवा भवेत् सा॥"

रक्तजामाह।

"स्फोटैश्चिता पित्तसमानलिङ्गा
साध्या प्रदिष्टा रुधिरात्मिका तु॥"

रक्तजेतरासंहारकत्वावधिमाह।

"सद्यश्छिदोत्था हन्ति त्र्यहात् कफसमुद्भवा।
पञ्चाहात् पित्तसम्भूता सप्ताहात् पवनोत्थिता॥"

कण्ठशालूकमाह।

"कोलास्थिमात्र: कफसम्भवो यो
ग्रन्थिर्गले कण्टकशूकभूत:।
खर: स्थिर: शुष्कनिपातसाध्य-
स्तं कण्ठशालूकमिति ब्रुवन्ति॥"

कण्टकशूकभूत: कण्टकवच्छूकवदेदनाजनक:॥

अधिजिह्वमाह।

"जिह्वाग्ररूप: श्वयथु: कफात्तु
जिह्वोपरिष्टादथवैव मिश्रात्।
श्लेयोऽधिजिह्व: खलु रोग एष
विवर्ज्जयेदागतपाकमेनम्॥"

अथवा मिश्रादेवेलक्षय:॥*॥ बलयमाह।

"बलाग्र एवायतसुव्रतश्च
श्लोथं करोत्यग्रगतिं निवार्य्य।
तं सर्व्वथैवाप्रतिवार्य्यवीर्य्यं
विवर्ज्जनीयं बलयं वदन्ति॥"

अलासमाह।

"गले तु श्लोथं कुरुत: प्रदूषौ
श्लेष्मानिलौ श्वासरुजोपपन्नम्।
मर्म्मच्छिदं दुस्तरमेनमाहु-
रलाससंज्ञं भिषजो विकारम्॥"

मर्म्मच्छिदं हृदयमर्म्मभि छिदेनेव वेदनाजनकम्।

एकवृन्दमाह।

"वृत्तोन्नतोऽन्त: श्वयथु: सदाह:
सकण्डुरोऽपाक्यरुजं दुनोति च।
गात्रैकवृन्द: परिकीर्त्तितोऽसौ
व्याधिर्बलाग्र: श्वतजप्रसूत:॥"

अन्त: गलमध्ये। अपाकी ईषत् पाकी। अरुज: ईषदरुज:॥*॥ वृन्दमाह।

"बहुप्रतं वृत्तममन्ददाहं
तीव्रज्वरं वृन्दमुदाहरन्ति।
तत्रापि पित्तोत्थतमप्रकोपा-
द्विद्यात् सतोदं पवनात्मकन्तु॥"*॥

ग्रुतघ्नीमाह।

"वर्षाभिधेना कण्ठनिरोधिनी तु
चिताभिमात्रं पिच्छिलप्ररोहै:।
अनेकरूक् प्राग्लहरी त्रिदोषा
ज्ञेया ग्रुतघ्नीसदृशी ग्रुतघ्नी॥"

घना कठिना। अनेकरूक् वातपित्तकफज-तोददाहकण्ड्वादियुक्ता। ग्रुतघ्नीसदृशी लोह-कण्टकसंछन्ना ग्रुतघ्नी महती ग्लिका। तत्तुल्या यत: प्राग्लहरी॥*॥ गिलायुमाह।

"ग्रन्थिर्गले ताम्रलकास्यिमात्र:
स्थिरोऽल्परुक् स्यात् कफरक्तमूर्च्छित:।
संलक्ष्यते शुक्लमिवासितञ्च
स शुष्कसाध्यस्तु गिलायुसंज्ञ:॥"

गलविद्रधिमाह।

"सर्व्वं गलं व्याप्य समुत्थितो य:
शोथो रुज: सन्ति च यत्र सर्व्वा:।
स सर्व्वदोषैर्गलविद्रधिस्तु
तस्यैव तुल्य: खलु सर्व्वजस्य॥"*॥

गलौघमाह।

"शोथो महान् यस्तु गलावरोधी
तीव्रज्वरो वायुगतिर्निहन्ता।
रूपेण जातो रुधिरान्वितेन
गले गलौघ: परिकीर्त्तितोऽसौ॥"

वायुगतिर्निहन्ता उदानवायुगतिरोधक:॥*॥

स्वरघ्नमाह।

"यस्याध्मात: श्वसिति प्रसक्तं
भिन्नस्वर: शुष्कविसृक्तकण्ठ:।
कफोपदुष्टेष्वनिलालयेषु
ज्ञेय: स रोग: श्वसनात् स्वरघ्न:॥"

ताध्मात: तम: प्राप्तन्। शुष्कविसृक्तकण्ठ: शुष्को विसृक्तोऽस्वाधीन: कण्ठो यस्य स:। अस्वाधीनता शुष्कं गिलितुं अशक्यत्वात्। अनिलालयेषु वायुवर्त्मसु। श्वसनादातात्॥*॥

मांसतानमाह।

"प्रतानवान् य: श्वयथु: सुकष्टो
गलोपरोधं कुरुते क्रमेण।
स मांसतान: कथितोऽनिलघ्नो
प्राग्रूपमुक्त सर्व्वगतो विकार:॥"

प्रतानवान् विस्तारवान्। सुकष्ट: अतिग्रथितं कष्टं यत्र स:॥*॥ विदारीमाह।

"सदाहतोदं श्वयथुं सुताम्र-
मन्तर्गले पूतिविशीर्णमांसम्।
पित्तेन विद्याद्रदने विदारीं
पार्श्वे विशेषात् स तु येन पीते॥"

पार्श्वे विशेषात् स तु येन पीते स पुरुषो येन पार्श्वेन विशेषाद्वाहुल्येन शेते तस्मिन् पार्श्वे सा विदारी भवति इत्यर्थ:॥*॥ अथ गलरोगाणां चिकित्सा।

"रोहिणीणान्तु साध्यानां हितं शोणितमोक्ष-
णम्।
वमनं धूमपानञ्च गण्डूषो नस्यकर्म्म च॥
वातजान्तु क्षते रक्ते लवणै: प्रतिसारयेत्।
सुखोष्णान् स्नेहगण्डूषान् धारयेच्चाप्यभीक्ष्णश:॥
विस्राव्य पित्तसंभूतां सिताक्षौद्रप्रियङ्गुभि:।
घर्षयेत् कवलं द्राक्षापरूषै: कथितो हित:॥
आगारधूमकटुकै: कफजां प्रतिसारयेत्।
आगारधूम: झूल इति लोके। कटुकानि शुण्ठीपिप्पलीमरिचानि।
"श्वेताविड्वन्दलोद्भवं तैलं सिद्धं ससैन्धवम्।
नस्यकर्म्मणि दातव्यं कवलञ्च कफोच्छ्रये॥"
श्वेता अपराजिता।
"पित्तवत् साधयेद्वैद्यो रोहिणीं रक्तसम्भवाम्।
विस्राव्य कण्ठशालूकं साधयेत्तुल्किरिवत्॥
एककालं यवान्नञ्च भुञ्जीत क्षीरमध्यग:।
उपजिह्वकवच्चापि साधयेदधिजिह्वकम्॥
एकवृन्दन्तु विस्राव्य विधिं शोथनमाचरेत्।
एकवृन्दमिव प्राज्ञो वृन्दञ्च समुपाचरेत्॥
गिलायुञ्चापि यो व्याधिस्तञ्च शुष्केण साधयेत्।
अमर्म्मस्थं सुसंपक्वं छेदयेद्गलविद्रधिम्॥"

इति भावप्रकाश:॥

(शूले, त्रि। यथा, महाभारते।२।६१।३६।

"नैव दृष्टा न श्रुता न च लक्षा नापि रोहिणी।
नीलकुञ्चितकेशी च तथा सौभाग्यहं त्वया॥")
रोहिणीपतिः, पुं, (रोहिण्याः पतिः।) चन्द्रः। इति हेमचन्द्रः। २। १८॥ (यथा, देवीभागवते। १। ११। १८।
"इत्येवं भावमाणं तमुवाच रोहिणीपतिः।
गुरुं क्रोधसमायुक्तं कान्ताविरहदुःखितम्॥"
वसुदेवः। हरिवंश॥)
रोहिणीरमणः, पुं, (रोहिण्या रमणः।) हरिः। इति राजनिर्घण्टः॥ वसुदेवश्च॥ (चन्द्रः। यथा, गीतगोविन्दे। १। १०।
"वसिते जयदेवकेन हरेरिदं प्रवणेन।
केन्दुबिल्वसमुद्भवरोहिणीरमणेन॥")
रोहिणीवल्लभः, पुं, (रोहिण्या वल्लभः।) चन्द्रः। इति हलायुधः॥ वसुदेवश्च॥
रोहिणीशः, पुं, (रोहिण्या ईशः।) चन्द्रः। इति हेमचन्द्रः॥ (यथा, माघे। ३। ६०।
"यां रेवतीजानिरियेष हर्तुं
न रौहिणेयो न च रोहिणीशः॥")
वसुदेवश्च॥
रोहिण्यष्टमी, स्त्री, (रोहिणीयुक्ता अष्टमी।) रोहिणीनक्षत्रयुक्तभाद्रकृष्णाष्टमी। यथा,—
"कृष्णाष्टम्याञ्च रोहिण्यामर्द्धरात्रेऽयनं हरेः।
कार्य्या विद्धापि सप्तम्या हन्ति पापं त्रिजन्मजम्॥
उपोषितोऽर्चयेत्तत्रैस्त्रिथिभान्ते च पारणम्॥
योगाय योगपतये योगेश्वराय योगसम्भवाय गोविन्दाय नमो नमः॥ स्नानमन्त्रः। यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः॥ अर्घ्यस्य। विश्वाय विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नमः॥ धूपस्य। सर्व्वाय सर्व्वेश्वराय सर्व्वपतये सर्व्वसम्भवाय गोविन्दाय नमो नमः॥ पारणस्य।
स्थण्डिले पूजयेद्देवं सचन्द्रां रोहिणीमथा।
गन्धं तोयं समादाय सपुष्पफलचन्दनम्।
जानुभ्यामवनीं गत्वा चन्द्रायार्घ्यं निवेदयेत्॥
क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव।
गृहाणार्घ्यं मयादत्तं रोहिण्या सहितो मम॥
श्रियै वसुदेवाय बलदेवाय नन्दाय यशोदायै।
अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम्॥
वासुदेवं हृषीकेशं वृषाङ्कं दैत्यसूदनम्।
वाराहं पुष्करोक्षञ्च श्रीकान्तमनघव्ययम्॥
दामोदरं पद्मनाभं केशवं गरुडध्वजम्॥
गोविन्दमच्युतं देवमनन्तमपराजितम्।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारकम्॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम्।
नारायणञ्चतुर्बाहुं शङ्खचक्रगदाधरम्॥
पीताम्बरधरं दिव्यं वनमालाविभूषितम्।
श्रीवत्साङ्कं जगद्धाम श्रीपतिं श्रीधरं हरिम्॥
यं देवं देवकी देवी वसुदेवादजीजनत्।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः।
नामान्येतानि संकीर्त्य गत्यर्थं प्रार्थयेत् पुनः॥
त्राहि मां सर्व्वपापघ्न दुःखशोकार्णवात् प्रभो।
देवकीनन्दन श्रीश दुरे संसारसागरात्॥
दुर्वृत्तात्त्राहि विष्णो ये स्मरन्ति सकृत् सकृत्।
सोऽहं देवादिदुर्वृत्तात्त्राहि मां शोकसागरात्॥
पुष्कराक्ष निमग्नोऽहं महत्यज्ञानसागरे।
त्राहि मां देवदेवेश स्वात्मतोऽन्यो न रक्षिता॥
खलस्य वासुदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥
शान्तिरस्तु शिवञ्चास्तु धनर्द्धिस्त्वतिराज्यभाक्॥"
इति भारते १३२ अध्यायः॥
रोहित्, पुं. (रोहतीति। रुह+"हुहरुहिभ्यश्च इतिः।" उणा० १। ८८। इति इतिः।) सूर्य्यः। इति मेदिनी। टे, १४७॥ वर्णभेदः। मत्स्यभेदः। इति संक्षिप्तसारोणादिवृत्तिः॥ (ऋष्यङ्गः। यथा, वाजसनेयसंहितायाम्। "२४। ३०॥ "मनुष्यराजाय मर्कटः शार्दूलाय रोहित्।" "एको रोहित् ऋष्यः शार्दूलाय।" इति तद्भाष्ये महीधरः॥ रोहितवर्णविशिष्टे, त्रि। (यथा, ऋग्वेदे। १। १००। १६। "रोहित् शोणा सुमदंशुर्जरन्ती।"
"रोहित् रोहितवर्णा शोणा शोणवर्णा।"
इति तद्भाष्ये सायणः॥)
रोहित्, स्त्री, (रुह+"हुहरुहिभ्यश्च इतिः।" उणा० १। ८८। इति इतिः।) नदी। ("ऋष्यस्य नदस्य नद्यो रोहिदुच्यते। तथाच मन्त्रिणः स्तवे। यतं रोहिदूतां रिरमथिषुरुष्यस्य वपुषा।" इत्युज्ज्वलः। १। ८८॥) लतामेदः। इति मेदिनी। टे, १४७। (वड्वा। यथा, ऋग्वेदे। १। १४। १२।
"युञ्जन्त्यरुषी रथे हरिणी देवा रोहितः॥"
"हे देवाः रोहितः रोहिच्छब्दाभिधेयाश्वदीया वड्वाः रथे युञ्जयुञ्जन योजयः।" इति तद्भाष्ये सायणः॥) रोहन्त्यामिर्वीजानि तज्जातेन हि बीजानि प्ररोहन्तीति तथात्वम्। नदी। इति निघण्टुः। १। १३। १८॥ निगमेषु बहुवचनान्तत्वेन प्रायशः अवगात् बहुवचनान्तत्वम्॥)
रोहितं, क्ली, (रुह+"रुहे रश्च लो वा।" उणा० १। ८४। इति इतन्।) कुङ्कुमम्। रक्तम्। ऋक्षभल्लभरालसम्। इति मेदिनी। ते, १४५॥ (यथा, मनुः। १। ३८।
"विद्युतोऽग्निमेघाश्च रोहितेन्द्रधनूंषि च।
उल्कानिर्घातकेतूंश्च ज्योतींष्युत्पातजानि च॥")
रोहितः, पुं, (रोहतीति। रुह+"रुहे रश्च लो वा।" उणा० १। ८४। इति इतन्।) मीनविशेषः। (यथाह कश्चित्।
"इलीशो जितपीयूषो वाचा वाचामगोचरः।
रोहितो गो हितः प्रोक्तो मधुरो मधुरोः प्रियः॥")
रोहितमत्स्यस्य तत्त्वं गुणाश्च यथा,—
"कृष्णः शल्की श्वेतकुक्षिस्तु मत्स्यो
यः श्रेष्ठोऽसौ लोहितो दृत्तवक्त्रः।
कोयं वक्त्रो रोहितस्यापि मांसं
वातं हन्ति स्निग्धमम्लाति वीर्य्यम्॥"
इति राजनिर्घण्टः॥
अपि च।
"रक्तोदरो रक्तसखो रक्ताक्षो रक्तपत्तिः।
कृष्णपक्षो भस्मरेखो रोहितः कथितो बुधः॥
रोहितः सर्व्वमत्स्यानां वरो दृष्योऽहितानिलजित्।
कषायानुरसः स्वादुर्व्रणघ्नो नातिपित्तलत्॥
कफेनजुगतान् रोगान् हन्यान्नोहितसञ्चकम्॥"
इति भावप्रकाशः॥
(तथाच।
"वातघ्नो नहि पित्तकफकरः स्यान्नोहितः सर्व्वदा॥"
इति हारीते प्रथमस्थाने एकादशेऽध्याये॥
"शैवलाहारभोजित्वात् स्वप्नस्य च विवर्जनात्।
रोहितो रोपनीयश्च लघुपाकी महाबलः॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥
"कषायानुरसस्नेहो गुरुश्लेष्मबलप्रदः।
रोहितो मारुतहरो नात्यर्थं पित्तकोपणः॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥
खनामख्यातो हरिश्चन्द्रस्य नृपतेः पुत्रः। यथा देवीभागवते। ७। १५। १५॥
"राजा पुत्रसुखं दृष्ट्वा सुखमाप महत्तरम्।
नाम्नास्य रोहितश्चेति चकार विधिपूर्व्वकम्॥"
अस्य विवरणन्तु तत्रैव द्रष्टव्यम्॥) नगभेदः। रोहितकवृक्षः। इति मेदिनी। ते, १४६॥ (रोहीतोऽपि पाठः। रोहीतकशब्ददर्शनात्॥ यथा, सुश्रुते। ६। १७।
"प्लक्षाश्वरोहीतमधूकजम्बू रसाः
सौम्येन युक्ता मदिरास्वभिश्रिताः॥"
अभिषोटकः। इति निघण्टुः। १। १५॥
"रोहन्ति आरोहन्ति रथं वहन्त्यादित्यमिति रोहितः।" इति तत्र देवराजयज्वा॥ यथा, ऋग्वेदे। १। ८३। १०।
"यदयुक्था अरुषा रोहिता रथे॥"
"रोहिता लोहितवर्णौ रोहित इत्यश्वेरश्वाख्या रोहितोऽश्वैरितिदर्शनात् रोहितेनलाग्निर्हवींषि गमयतीतिमन्त्रवर्णाच्च।" इति तद्भाष्ये सायणः॥) रक्तवर्णः। रक्तवर्णविशिष्टे, त्रि। इत्यमरः॥ (यथा, वाजसनेयसंहितायाम्। १६। १६।
"नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमः॥")
रोहितकः, पुं, (रोहित एव। स्वार्थे कन्।) वृक्षविशेषः। रोहेड़ा इति भाषा। तत्पर्य्यायः। रोहीः २ श्रीपर्णकः ३ दाड़िमपुष्पकः ४। इत्यमरः॥ रोहीतकः ५ रोहितः ६ रोहिणः ७ कुष्ठाख्यः ८ दाड़िमपुष्पः ९ सदाप्रसूनः १० कूटशाल्मलिः ११ विरोचनः १२ शाल्मलिकः १३। अस्य गुणाः। कटुत्वम्। स्निग्धत्वम्। कषायत्वम्। सुग्रीतत्वम्। त्रिदोष-

ब्रह्मवीहरक्तनेत्रामयाण्हत्वच्च। इति राजनिर्घण्टः॥ अपि च।
"रोहितो लोहिनो रोही लोही दाड़िम-पुष्पकः।
रोहीतकः व्रीहयाती रक्तो रक्तप्रसादनः॥"
इति भावप्रकाशः॥
अन्यच्च।
"रोहीतको यकृत्प्लीहगुल्मोदरहरः स्मृतः॥"
इति राजवल्लभः॥
(गणविशेषः। यथा, महाभारते।३।२५३।१८।
"भद्रान् रोहितकांश्चैव आग्नेयान्मालवानपि।
गणान् सर्व्वान् विनिर्जित्य नीतिज्ञस्य प्रहसन्निव।
शूद्रकान् यवनांश्चैव विजिग्ये सूतनन्दनः॥")

रोहिना, स्त्री, (रोहित+टाप्। "वर्णादनुदात्तात्तोपधातो नः।" ४।१।३९। इति प्राप्तिको ङीष् नकारस्य नकारादेशश्च न।) रागादिना रक्तवर्णा। यथा,—
"रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा।"
इति जटाधरः॥

रोहिताश्वः, पुं, (रोहितः अश्वो यस्य।) अग्निः। इत्यमरः॥ हरिश्चन्द्रराजपुत्रः। इति मेदिनी। ते, ६३॥

रोहितिका, स्त्री, (रोहिनो वर्णोऽस्यस्या इति। रोहित+ठन्।) रागादिना रक्तवर्णा। इति जटाधरः॥

रोहितेयः, पुं, (रोहित एव। स्वार्थे ढक्।) रोहितवृक्षः। यथा,—
"व्रीहारी रोहितेयः स्यात् रक्तपुष्पश्च रोहितः॥"
इति भरतधृतरत्नकोषः॥
(विवरणमस्य रोहितकशब्दे ज्ञातव्यम्॥)

रोही, [न्] पुं, (अवश्यं रोहतीति। रुह्+आवश्यके णिनिः।) रोहितकवृक्षः। (अस्य पर्य्यायो यथा,—
"रोही रोहितकः व्रीहाग्रचुर्दाड़िमपुष्पकः॥"
इति वैद्यकरत्नमालायाम्॥
"रोहीतको रोहितको रोही दाड़िमपुष्पकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
अश्वत्थवृक्षः। वटवृक्षः। इति मेदिनी। नै, १२०॥

रोहीतकः, पुं, (रोहीत एव। स्वार्थे कन्।) रोहितकवृक्षः। इति राजनिर्घण्टः॥ (यथा, वृहत्संहितायाम्। ५४। ६८।
"रोहितकस्य पञ्चादहिवासश्चैत्रिभिः करैर्याम्ये॥"
तथास्य पर्य्यायः।
"रोहीतको रोहितको रोही दाड़िमपुष्पकः।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

रौक्ष्यं, क्ली, (रूक्षस्य भावः। रूक्ष+ष्यञ्।) रूक्षता। रूक्षस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्। तथा हि।
"तैलं यद्दौस्थ्यदोषघ्नं तैलं यच्चार्द्रकं स्मृतम्।
तेन त्वां स्नापयाम्यद्य जगन्मातरम्बिकाम्॥"
इति दुर्गापूजायां महाष्टमीमहानवम्योर्महास्नानप्रकरणे देवीपुराणम्॥ (तथा च।
"ये रसा वातघ्नमना भवन्ति यदि तेषु वै।
रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणम्॥"
इति सुश्रुते सूत्रस्थाने ४० अध्यायः॥)

रौच्यः, पुं, (रुचेरपत्यमिति। रुचि+यञ्।) मनुविशेषः। यथा,—
"रौच्यादयस्तथान्येऽपि मनवः संप्रकीर्त्तिताः।
रुचेः प्रजापतेः पुत्रो रौच्यो नाम भविष्यति॥"
इति मात्स्ये ९ अध्यायः॥
तन्मन्वन्तरे देवादयो यथा,—
"त्रयोदशस्य पर्य्याये ये रौच्यस्य मनोः सुराः।
सप्तर्षींश्च नृपांश्चैव वदतो मे निशामय॥
सुपर्व्वाणः सुरास्तत्र सुकर्म्माणस्तथापरे।
सुशर्म्माणस्तथा ख्याते समस्ता सुनिसत्तम॥
महाबलो महावीर्य्यस्त्विषामिन्द्रो दिवस्पतिः।
भविष्यत्यत्र सप्तर्षान् गदतो मे निशामय॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः।
निर्म्मोहः सुतपाश्चान्यो निष्प्रकम्पश्च सप्तमः॥
चित्रसेनो विचित्रश्च नयज्ञस्त्रिभयो दृढ़ः।
सुनेत्रः चित्रबुद्धिश्च सुरतश्चैव तत्सुताः॥"
इति मार्कण्डेयपुराणम्॥
अन्यद्विवरणं तत्रिशब्दे द्रष्टव्यम्॥*॥ विल्वकाष्ठदण्डः। तत्पर्य्यायः। वेल्वः २। इति हेमचन्द्रः॥ (स्त्री, रौच्यस्येदमिति। अण्। मन्वन्तरविशेषः। यथा, मार्कण्डेये। १००। ३६।
"ज्ञातिश्रेष्ठो गुणैर्युक्तो दक्षसावर्णिके श्रुते।
निशामयत्यतिबलं रौच्यं श्रुत्वा नरोत्तम॥")

रौट, ऋ नादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) चतुर्दशस्वरी। ऋ, अरुरौटत्। नादरोऽनादरः। रौटति खलं लोकः। इति दुर्गादासः॥

रौड, ऋ अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अररौड़त्। इति दुर्गादासः॥

रौद्रं, क्ली, (रुद्रस्येदम्। रुद्र+अण्।) भृङ्गराजवृक्षः। तत्पर्य्यायः। उग्रम् २। इत्यमरः॥ रे क्रोधस्याश्रये। रुद्रो देवता यस्य रौद्रम्। यदाह भरतः।
"भृङ्गारो विष्णुदेवः स्याद्दासः प्रमथदेवतः।
करुणो यमदेवः स्याद्रौद्रो रुद्राधिदेवतः॥" इति रे क्रोधस्याश्रये। उद्यति क्रुधा समवैति उग्रः। उद्यिर्थं समवायने नाञ्चीति रक् निपातनाच्चस्य गः। सर्व्वाभिभाविता रौद्रः। यथा, रावणचरितादि। एषु वीभत्सरौद्रे क्लीवे रूपभेदात् अन्ये पुंसि वीभत्सरौद्रौ चेति पुंलिङ्गपाठ इह युक्तः। इति भरतः॥*॥ अपि च।

अथ रौद्रः।

"रौद्रः क्रोधस्याश्रिभावो रक्तो रुद्राधिदैवतः।
आक्षेपनं रिपुस्तत्र तच्चेष्टोद्दीपनं मतम्॥
मुष्टिप्रहारपातनविक्षेपच्छेदावदारणैश्चैव।
संग्रामसंभ्रमादेरस्रोद्भेदैश्च भवेत् प्रौढ़ा॥
भ्रूविभङ्गौष्ठनिर्देशबाहुस्फोटनतर्জ্জনाः।
आत्मावदानकथनमायुधोत्क्षेपणानि च।
अनुभावास्तथा क्षेपक्रूरसन्दर्शनादयः॥
उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः।
मोहहर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः॥"
यथा,—
"क्षतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुगिर्निर्म्मर्य्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-
मयमहमरुङ्मेदोमांसैः करोमि दिशां बलिम्॥"
अस्य युद्धवीराद्भेदमाह।
"रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः॥"
इति साहित्यदर्पणे ३ परिच्छेदः॥

रौद्रः, पुं, (रुद्रस्यायमिति। रुद्र+अण्।) सूर्य्यतेजः। तत्पर्य्यायः। घर्म्मः २। इति मेदिनी। रे, ८०॥ प्रकाशः ३ द्योतः ४ आतपः ५। इत्यमरः॥ तस्य गुणाः।
"आतपः कटुको रूक्षः स्वेदमूर्च्छाश्रमावहः।
दाहवैवर्ण्यजननो नेत्ररोगप्रकोपणः॥"
इति राजवल्लभः॥*॥
सप्तरौद्रा यथा,—
"जठरः पिङ्गलो रौद्रो घोराख्यः कालसंज्ञितः।
अग्निगामा हतो रौद्रः सप्त रौद्राः प्रकीर्त्तिताः॥"
मन्वन्तरे सप्तमो रौद्रः प्राणदाहः॥ तेषां फलानि यथा,—
"पिङ्गलो रौद्रनामा च कालरूपः प्रजाक्षयम्।
सूर्य्ये बहुरोगः स्यात् सर्व्वजीवसमुद्भवः॥
जठरो रौद्रनामा च घोरधूम्रश्च कारयेत्।
व्रणादिपित्तरोगञ्च नानाक्लेशकरो नृणाम्॥
अग्निगाम्बा यदा वर्षे रौद्रो भवति नान्यथा।
उत्तापेन क्षितिं शुष्येत् नराणां रोगदो भवेत्।
रौद्रनामा महारौद्रो यत्राब्दे च भवेद्ध्रुवम्।
चित्तोद्वेगं व्रणं कुर्य्यान्नानारोगसमन्वितम्॥
घोरनामा महारौद्रो घोरधूम्रश्च कारयेत्।
उत्तापेन सदा दग्धं नानारोगसमन्वितम्॥
कालनामा महारौद्र उत्तापे पीड़नं सदा।
नानारोगसमायुक्तं व्रणादिकण्डुकं भवेत्॥"
इति ज्योतिषम्॥
रसविशेषः। इति मेदिनी। रे, ८०॥ तद्विवरणं बीभत्सरौद्रशब्दे द्रष्टव्यम्। हेमन्त ऋतुः। इति हेमचन्द्रः॥ यमः। इति धरणिः॥ (कार्त्तिकेयः। यथा, महाभारते। १। १३८। १३।
"आग्नेयः क्षत्रिकापुत्रो रौद्रो गाङ्गेय इत्यपि।
श्रूयते भगवान् देवः सर्व्वदेवमयो गुहः॥")

रौद्रः, त्रि, (रुद्र+अण्।) तीव्रः। (यथा, रुग्विनिश्चयव्याख्याने विजयरक्षितेन हरिवंशोक्तस्वरवर्णनवचनमुक्तम्।
"स्वरश्चित्रादस्त्रिशिराः षड्भुजो नवलोचनः।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः॥")

भीषणः। इति मेदिनी। रे, ८०॥ (यथा, महाभारते। २। ६४। ५०।
"तस्य ते तद्वचः श्रुत्वा रौद्रं लोमहर्षणम्।
प्रचक्रुर्वैदुलां पूजां कृतसन्तो धृतराष्ट्रजम्॥")
रुद्रसम्बन्धिनि च॥
रौद्री, स्त्री, (रौद्र+ङीप्।) चण्डी। इति मेदिनी। रे, ८०॥ रुद्रजटा। इति राजनिर्घण्टः॥ रुरुदैत्यकृतमहारौद्री माया महारौद्रीनाम्नी चामुण्डा च। यथा,—
"एक एव महादैत्यो रुरुस्त्वासौ महाद्युतिः।
स च मायां महारौद्रीं रौरवीं विससर्ज्ज ह॥
सा माया वटुके भीमा सर्व्वदेवप्रमोहिनी।
तया तु मोहिता देवाः सद्यो निद्रां तु मेनिरे॥
देवी च त्रिशिखेनाजौ तं दैत्यं समताड़यत्।
तया तु ताड़ितं तस्य दैत्यस्य शुभलोचने।
चर्म्मसुखे उभे सम्यक् पृथग्भूते बभूवतुः॥
रुरोस्तु दानवेन्द्रस्य चर्म्मसुखे चकर्त्तयत्।
अपच्छत्य हरेर्देवी चामुण्डा तेन साभवत्॥
सर्व्वभूतमहारौद्री या देवी परमेश्वरी।
संहारिणी तु या चैव कालरात्रिः प्रकीर्त्तिता॥"
इति वाराहे त्रिशक्तिमाहात्म्यम्॥
रौप्यं, क्ली, (रूप्यमेव। स्वार्थे ष्यञ्।) रूप्यम्। इति राजनिर्घण्टः॥ (यथा, माघे। ४। ६७।
"दर्पणनिर्म्मलासु पतिते घनतिमिरसुषि
ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति
स्तुहुः॥")
तत्करणं यथा,—
"मध्वाज्यं गुड़नाम्नश्च करेणा माक्षिकं रसम्।
घमनाच्च भवेद्रौप्यं सुवर्णकरणं परम्॥"
इति गारुड़े १८८ अध्यायः॥
(औषधादिषु अस्यालाभे यद्दातव्यं तदुक्तं यथा,—
"सुवर्णमथ रौप्यं वृत्तं यत्र न लभ्यते।
तत्र कार्य्यं कर्म्मणि भिषक् कुर्य्यादिचक्षणः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
तद्विशिष्टे, त्रि। यथा, भागवते। ४।२५।१४।
"स्वर्णरौप्यायसैः पट्टैः सङ्कुलां सर्व्वतो गृहैः॥")
रौमं, क्ली, (रुमायां लवणाकरे भवम्। रुमा+अण्।) ग्राम्भरिलवणम्। इत्यमरटीकायां रामाश्रमः॥
रौमकं, क्ली, ग्राम्भरिलवणम्। तत्पर्य्यायः। वसुकम् २। इत्यमरः॥ "रुमा नाम नदी लवणाकरः तत्र भवं रौमकम्। ढ्यै कादिति कः। रौमं ततः स्वार्थे कः रौमकम्।" इति तट्टीकायां भरतः॥ (पर्य्यायोऽस्य यथा,—
"ग्राकम्भरीयं कथितं गुड़ाख्यं रौमकन्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
रौमलवणं, क्ली, (रौमं लवणमिति।) ग्राम्भरिलवणम्। इति रत्नमाला॥
रौरवः, पुं, (रुरुर्ब्रह्मविशेषस्तस्यायमिति। रुरु+अण्।) नरकविशेषः। घोरः। इति मेदिनी। वे, ४६॥ अस्यस्य विवरणं यथा,—
"रौरवे कूटसाक्षी तु याति यश्चानृतो नरः।
तस्य स्वरूपं वदतो रौरवस्य निशामय॥
योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः।
आतुमात्रप्रमाणस्तु तत्र श्वभ्रं सुदुस्तरम्॥
तप्ताङ्गारचयो येन कृतं तद्दुरतीक्रमम्।
ज्वालातापितलौहेन तापिताम्बरभूमिना॥
तस्मध्ये पापकर्म्माणं विसृजन्ति यमानुगाः।
स दह्यमानस्तीव्रेण वह्निना तेन धावति॥
पदे पदे च पादोऽस्य ग्रीर्य्यते जायते पुनः।
अहोरात्रेणोद्धरणं पादन्यासं स गच्छति॥
एवं सहस्रं विस्तीर्णे योजनानां विमुच्यते॥"
इति मार्कण्डेयपुराणे पितापुत्रसंवादनामाध्यायः॥ (तथाच देवीभागवते। ८।२२।८-११।
"एतन्मात्रमिति यो भूतद्रोहेण केवलम्।
पुष्णाति प्रत्यहं स्वीयकुटुम्बं कार्य्यलम्पटः॥
एतद्विहाय चाचैव स्वानुभेन पतेदिह।
रौरवे नाम नरके सर्व्वसत्त्वभयावहे॥
इह लोकेऽसुना ये तु हिंसिता जन्तवः पुरा।
त एव रुरवो भूत्वा परत्र पीड़यन्ति तम्॥
तस्माद्रौरवमित्याहुः पुराणज्ञा मनिषिणः।
रुरुः सर्पादपि क्रूरो जन्तुरुक्तः पुरातनैः॥")
रौरवः, त्रि, चञ्चलः। धूर्त्तः। घोरः। इति शब्दरत्नावली॥ (रुरोर्मृगस्येदमिति। अण्। मृगसम्बन्धिनि च। यथा, मनुः। २। ४१।
"कार्ष्णरौरवबास्तानि चर्म्माण्यृजुव्रतेषु च।
वसीरन्नानुपूर्व्वेण शाणक्षौमाविकानि च॥")
रौहिट, [ष्] पुं, रौहिणमृगः। यथा। "स एष रौहिषो मध्ये चरतीति भवभूतिः।" इत्यमरटीकायां भरतः॥
रौहिणं, क्ली, (रोहिणमेव। स्वार्थे अण्।) दिनस्य नवमसुहूर्त्तः। यथा। अत्र पूर्व्वाह्णे श्राद्धमभिधाय रौहिणन्तु न लभ्येदित्यभिधानेन पूर्व्वाह्णश्राद्धस्य सङ्गवात् परो रौहिणपर्य्यन्तगौणपूर्व्वाह्णकालः प्रतीयते। तेन रौहिणं पूर्व्वाह्णश्राद्धस्य गौणकालत्वेनोत्तरावधिः अपराह्णश्राद्धस्य पूर्व्वावधिरित्यवगम्यते तत्र पूर्व्वदिने सङ्गवात् परं रौहिणपर्य्यन्तं तिथेर्लाभे परदिने सुहूर्त्तत्रयमात्रे तत्तिथिलाभे पूर्व्वदिने श्राद्धम्। रौहिणान्तरूपगौणपूर्व्वाह्णलाभात् न परदिने तथालाभात्। उभयदिने सङ्गवलाभे परदिने शुक्लपक्षे तिथिर्य्यात्रा इति वचनात्। रौहिणन्तु दिवसस्य नवमसुहूर्त्तस्य ज्योतिषोक्तरोहिणीदेवतत्वात् रौहिणत्वमिति। इति श्राद्धतत्त्वम्॥
रौहिषः, पुं, (रुह्+इषन्। स्वार्थे अण्।) चन्दनवृक्षः। इति त्रिकाण्डशेषः॥
रौहिषेयं, क्ली, मरकतमणिः। इति राजनिर्घण्टः॥
रौहिषेयः, पुं, (रोहिण्या अपत्यमिति। रोहिणी+"शुभ्रादिभ्यश्च।" ४।१।१२३। इति ढक्।) बलदेवः। (यथा, महाभारते। १।१६२।१६।
"तत्रोपविष्टं पृथुदीर्घबाहुं
ददर्श कृष्णः सहरौहिषेयः॥")
बुधग्रहः। इत्यमरः॥ (पुरुषोत्तमस्थतीर्थपञ्चकान्यतमः। यथा, तीर्थतत्त्वे।
"मार्कण्डेये वटे कृष्णे रौहिणेये महोदधौ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते॥")
रौहिणेयः, त्रि, (रोहिण्या अपत्यमिति। रोहिणी+ढक्।) गोवत्सः। इति मेदिनी। ये, १२७॥
रौहिषं, क्ली, (रोहतीति। रुह्+"रुहेर्हिश्च।" उणा० १।४८। इति टिषच्। ह्रस्वश्च धातोः।) कृत्तृणम्। इत्यमरः॥ रोहिषत्तृणम्। इति राजनिर्घण्टः॥ तन्नामगुणाः।
"कृत्तृणं रौहिषं देवजग्धं सौगन्धिकं तथा।
भूतृणकं श्यामं पौरञ्च श्यामकं धूपगन्धिकम्॥
रौहिषं तुवरं तिक्तं कटुपाकं त्रपोहनि।
कुष्ठकण्डूयाधिपित्तास्रशूलकासकफज्वरान्॥"
इति भावप्रकाशः॥ *॥
अन्यत् कृत्तृणशब्दे द्रष्टव्यम्॥
रौहिषः, पुं, (रुह्+टिषच्। ह्रस्वश्च धातोः।) मृगविशेषः। इत्यमरः॥ रोहितमत्स्यः। इत्यजयपालः॥
रौहिषी, स्त्री, (रौहिष्+ङीप्।) मृगी। दूर्व्वा। इति संक्षिप्तसारोणादिवृत्तिः॥

ल

ल, लकारः। स तु यवर्गस्य चतुर्थो वर्णो जिह्वाग्रस्योर्द्ध्वदन्तमूलस्पर्शात्मकप्रयत्नजन्यः। अस्योच्चारणस्थानं दन्ताः। इति व्याकरणम्॥ (तथाच सिद्धान्तकौमुद्याम्।
"लृतुलसानां दन्ताः॥") तस्य स्वरूपं यथा,—
"लकारं चञ्चलापाङ्गि! कुण्डलीचयसंयुतम्।
पीतविद्युल्लताकारं सर्व्वरत्नप्रदायकम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा।
आत्मादितत्त्वसहितं हृदि भावय पार्व्वति!॥"
इति कामधेनुतन्त्रम्॥ *॥
(वङ्गीयवर्णमालायाम्।) अस्य लेखनप्रकारो यथा,—
"कुण्डलीचयसंयुक्ता वामाङ्गगता लधः।
पुनरूर्द्धगता रेखा तासु नारायणः शिवः।
ब्रह्मशक्तिश्च सन्तिष्ठेद्वानमस्य प्रचक्षते॥"
ध्यानं यथा,—
"चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनाम्।
सर्व्वदा वरदां भीमां सर्व्वालङ्कारभूषिताम्॥
योगीन्द्रसेवितां नित्यां योगिनीं योगरूपिणीम्।
चतुर्वर्गप्रदां देवीं नागहारोपशोभिताम्॥
एवं ध्यात्वा लकारन्तु तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥
तस्य नामानि यथा,—
"लक्ष्मीः पूतना पृथ्वी माधवः शक्रवाचकः।
दक्षात्मजः पिनाकीशो वापको मांससंज्ञकः॥

खड्गी गादोऽन्तं देवी जवर्गं वारजोपतिः। प्रिया वाणी क्रिया माता भामिनी कामिनी प्रिया॥

ज्वालिनी वेगिनी गादः प्रद्युम्नः शोषणो हरिः। विन्ध्याचलमन्त्री वजी चेतो मेरुर्गिरिः कला रसः॥"

इति नानार्थतन्त्रग्राह्यम्॥

(अनुबन्धविशेषः। यथा, कविकल्पद्रुमे। "दिवादौ धूवादिकः।" इतेन अद् जौ भक्षणे तुगदृभ्योऽपः। अत्ति इति। छन्दः-ग्रन्थोक्तो अनुसंज्ञको गन्धविशेषः। इति छन्दोमञ्जरी॥)

लं, क्ली, (लीयतेऽत्रेति। ली+अधिकरणे डः।) पृथ्वीबीजम्। इति तन्त्रम्॥

लः, पुं, (लातीति। ला+अच्।) इन्द्रः। इति मेदिनी। ले, १॥

लक्ष, ष स्वादे आपने। इति कविकल्पद्रुमः॥ (चुरा०-उभ०-सक०-सेट्।) स्वादो रसोपादानम्। क, लाक्षयति मोदकं बालकः। इति दुर्गादासः॥

लक्षः, पुं, लक्षुरक्षः। इति शब्दरत्नावली॥

लक्षुः, पुं, (लक्ष्यते इति। लक्ष स्वादे+बाहुलकादुः।) वृक्षविशेषः। डेहुया इति मादार इति च भाषा। तत्पर्यायः। लिक्षुः२ प्लाक्षः३ कषायी४ ह्रस्ववल्कलः५ ह्रस्वः६ काश्यः७ शूरः८ क्षुद्रफलः९। अस्य गुणाः। तिक्तरसत्वम्। कषायत्वम्। उष्णत्वम्। लघुत्वम्। कण्ठदोषहरत्वम्। दाहित्वम्। मलबंधहरायकत्वञ्च। इति राजनिर्घण्टः॥*॥ अपि च।

"लक्षुः क्षुद्रफलो लिक्षुः प्लक्षो ह्रस्वोऽपि दुरिति।
आमं लक्षुफलञ्चाथ गुरु विष्मलघ्नयोः।
मधुरञ्च तथाम्लञ्च दोषत्रितयरक्तजित्।
शुक्रास्थिनाग्निवर्द्धापि नेत्रयोरहितं स्मृतम्॥
सुपक्वं तत्तु मधुरमम्लं वातनिवर्त्तकृत्।
कफपित्तकरं रुच्यं दृष्यं विष्मलकञ्च तत्॥"

इति भावप्रकाशः॥*॥

अन्यच्च।

"लक्षुकं गुरु विष्मि स्वादम्लं रक्तपित्तकम्।
श्लेष्मकारि समीरघ्नं शुक्रास्थिनाग्निनम्॥"

इति वैद्यकम्॥

लक्तकः, पुं. (रक्तेन रक्तवर्णेन कायतीति। कै+कः। रक्त लक्तम्।) अलक्तकः। इति शब्दरत्नावली॥ (यथा, गो० रामायणे। २।६०।१६।

"प्रलम्बा लक्तकरसप्रख्यौ तद्वत्सवर्त्तितौ।
तथैव रेजतुस्तस्याश्चरणौ पद्मवर्चसौ॥")

जीवबन्धखलकम्। नेकड़ा इति भाषा। तत्पर्यायः। कर्पटः२। इत्यमरः॥ लक्तकः३। इति भरतः॥ ये मलिनत्वादिदुर्जीवबन्धखलके नेकड़ा इति ख्याते। लक्तकाद्यदकं वस्त्रमाचे इति केचित्। पटोऽस्त्री कर्पटः शाटः सिचयः प्रोतलक्तकाः। इति रभसः॥ लक्ष्यते दोषैराक्रान्यते अनुभूयते वस्तुः रक्त लक्त क स्वादे आपने चुरां उभयों सिर्वेति विभाषितत्वात् न णिः। कर्मण्यण्। लक्तः; ततः स्वार्थे कः। लक्तकोऽस्त्रः स्यादिः। अन्यते स्म अक्तं यक्तं अनृजोः क्तः। न अक्तं कं सुखं यस्मादिति विग्रहवाक्ये नञीषादित्वात् अक्तस्य पूर्वनिपातो नञ्कक्तवर्गपञ्चमादिरपि। इति तट्टीकायां भरतः॥

लक्तकम्मा, [न्] पुं, (लक्तं रक्तवर्णं करोतीति। लक्त+मनिन्।) रक्तवर्णकोत्रः। इति शब्दचन्द्रिका॥

लक्ष, क ण दर्शने। अङ्के। इति कविकल्पद्रुमः॥ (चुरा०-उभ०-सक०-सेट्।) क ण, लक्षयति लक्ष्यते घटं लोकः। प्रश्नति चिह्नयुक्तं करोतीत्यर्थो वा। इति दुर्गादासः॥

लक्षं, क्ली, (लक्षयतीति। लक्ष+अच्।) व्याजः। शरव्यम्। इति मेदिनी। षे, २३॥ (यथा, मनुः। ७। ५४।

"मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्गतान्।
सचिवान् सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान्॥")

लक्षं, क्ली, क्लीं, (लक्षयतीति। लक्ष+अच्।) दशायुतसंख्या। इति मेदिनी। षे, २३॥ लाख इति भाषा। (यथा, कथासरित्सागरे। ३६।१०८।

"तस्यैकादशभिर्लक्षैः सङ्ख्यातैर्युतस्य हि।
लक्षमभ्यधिकं देव वर्त्तते तरवाजिनाम्॥")

लक्षकं, क्ली, (लक्षयतीति। लक्ष+ण्वुल्।) लक्षयति यत्। यथा। लक्षकं नाम लक्षयति।

"याद्यार्थस्य समन्वयति शक्तस्तु यद्भवेत्।
तत्र लक्षकं नाम लक्षशक्तिविदुरं यदि॥"

याद्यार्थसमन्वयति यन्नाम सङ्केतितं तदेव ताद्यार्थे लक्षकं यदि ताद्यार्थे शक्तिशून्यं भवेत्। सैन्धवादयस्तु शब्दाः तुरगादिसमभिव्याहृतसैन्धवादाविव तुरगादावपि शक्ता एव। गङ्गादयस्तु तीरादावसङ्केतिताः तत्समभिव्याहृतगङ्गादिशब्दैन गृहीता एव तीरादावन्वयं बोधयन्ति तत्र लक्षका एव। अपि च। तदेवं विधलक्षणावत्त्वाल्लक्षकं नामापि जहत्स्वार्थादिभेदादनेकविधमित्यर्थः। स्यादेतदुदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीरादावनुभवे भवेद्धेतुत्वादुक्तक्रमेण लक्षकाणां विभागो न खेतदस्ति। तीरादावन्वयबोधं प्रति तीरादिशक्तत्वेनैव पदज्ञानस्य लाघवेन हेतुतया लक्षकाणामनुभावकत्वात् गुरुत्वाभावौ शैत्यं सुशैत्यादिवादौ शक्तेन दहनादिवेव गङ्गायां घोष इत्यादौ लक्षितेन तीरादिना साहित्यगृहीतार्थसंसर्गकस्येव समभ्यर्थाधियत्वान्वयबोधप्रविष्टत्वादिति चेन्न। प्रत्ययार्थावच्छिन्नस्येव प्रत्ययार्थस्य धर्म्यन्तरेऽन्वयं बुद्धेर्जुगुप्सनतया तीरादिविशेषितस्य सुवर्याधियत्वादेर्घोषादावन्वयबोधायोगात्। न च शक्तस्येव पदस्य स्वसाकाङ्क्षपदान्तरोपस्थाप्यार्थान्वितस्वार्थधर्म्मिकान्वयबोधं प्रति हेतुत्वादन्वयदुर्द्धौ लक्षार्थस्य प्रवेशः। कुम्भाः प्रविशन्तीत्यादौ लक्षस्य कुम्भधरादेरन्वयविशेषितत्वानुपपत्तेः। कुमतिः पशुरित्यादौ लक्षार्थयोर्मिथोऽन्वयबोधस्याप्यनुभविकत्वाच्च। तस्मात् शक्तेरिव भक्तेरपि ज्ञानमनुभावकं भवत्येव कार्य्यतावच्छेदकस्य दुर्ज्ञेयत्वाच्च न व्यभिचारः। इति शब्दशक्तिप्रकाशिका॥

लक्षणं, क्ली, (लक्ष्यतेऽनेनेति। लक्ष+ल्युट्। यद्वा, "लक्षेरट् च।" उणा०। ३। ७। इति नप्रत्ययस्यस्याड़ागमश्च।) चिह्नम्। (यथा, रघुः। १०। ६।

"अथाविषो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम्॥")

नाम। इति मेदिनी। णे, ७५। लक्ष्यते ज्ञायतेऽनेनेति लक्षणम्। तद्विविधम्। इतरभेदानुमापकम्। व्यवहारप्रयोजकञ्च। इति न्यायमतम्। वैयाकरणमते तु।

"लक्षणञ्चित्तसमासानामभिधानं नियामकम्।
लक्षणस्त्वभिज्ञानं तदभिज्ञानलक्षकम्॥"

इति वोपदेवः॥

(लक्षणलक्षणन्तु। "समानासमानजातीयो व्यवच्छेदो लक्षणार्थः।" इति सांख्यतत्त्वकौमुद्याम्। ५। सुखदुःखलक्षणं यथा, मनौ। ३।२६०।

"सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः॥")

दर्शनम्। इति लक्षणालक्षणदर्शनात्॥

लक्षणः, पुं, (लक्ष+"लक्षेरट् च।" उणा० ३।७। इति नप्रत्ययस्याड़ागमश्च। लक्षणमस्यस्तीति अर्श आद्यच्।) सौमित्रिः। यथा, हरिवंशे। ४१।१९६।

"लक्षणाद्युयुतो यश्च सर्वभूतहिते रतः।
चतुर्दश वने तस्थौ तपो वर्षाणि राघवः॥")

सारसपक्षी। इति शब्दरत्नावली॥

लक्षणा, स्त्री, (लक्षण+टाप्।) सारसी। इति मेदिनी। णे, ७५। हंसी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (अक्षरोविशेषः। यथा, महाभारते। १। १२३। ५६।

"अम्बिका लक्षणा क्षेमा देवी रम्भा मनोरमा॥")

शब्दसम्बन्धः। यथा,—

"लक्षणा शब्दसम्बन्धस्तात्पर्य्यानुपपत्तितः॥"

इति भाषापरिच्छेदः॥

गङ्गायां घोष इत्यादौ गङ्गापदस्य शब्दार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्य्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोधः। सा च शब्दसम्बन्धरूपा। तथा हि प्रवाहरूपशब्दार्थसम्बन्धस्य तीरे गृहीतत्वात्तीरस्य स्मरणं ततः शाब्दबोधः। इति सिद्धान्तमुक्तावली॥*॥ अपि च।

"जहत्स्वार्थाजहत्स्वार्थानिरूढ़ाधुनिका दिकाः।
लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा॥"

काचिल्लक्षणा शब्दवृत्तिरूपैव बोधकतया जहत्स्वार्थेत्युच्यते। यथा तीरत्वादिना गङ्गादिपदस्य। काचिच्छब्दलक्षोभयवृत्तिना शब्द-

ढत्तिनैव वा रूपेणानुभावकत्वादनङ्गत्वार्था। यथा द्रव्यत्वादिना नीलघटत्वादिना च घटादिपदस्य। कांचिच्च तत्तावच्छेदकीभूततत्तद्रूपेण पूर्वपूर्वं प्रत्यायकत्वान्निरूढा। यथा, आरुण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरुणादिपदस्य। कांचिच्च पूर्वपूर्वं तादृग्रूपेणाप्रत्यायकत्वादाधुनिकी। यथा घटत्वादिना घटादिपदस्य। आदिना द्रव्यसङ्ख्यत्वप्रकारेण बोधकतया गौण्यौत्पत्तिकी। यथा अग्निर्माणवक इत्यादावग्निसङ्ख्यत्वादिना अग्न्यादिपदस्य। इति ग्रन्थग्रन्थिप्रकाशिका॥ *॥ अन्यच्च।

"मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते। रूढेः प्रयोजनाद्वासौ लक्षणाग्रन्थिरर्पिता॥"१॥

कलिङ्गः साहसिक इत्यादौ कलिङ्गादिग्रन्थो देशविशेषादिरूपे स्वार्थे असम्भवन् यया ग्रन्थस्य ग्रन्था स्वसंयुक्तान् पुरुषादीन् प्रत्याययति। यथा च गङ्गायां घोष इत्यादौ गङ्गादिग्रन्थो जलमयाद्यर्थबाधकत्वात् प्रकृतेऽसम्भवन् स्वस्य सामीप्यादिसम्बन्धिनं तटादिं बोधयति। सा ग्रन्थस्यार्पिता स्वाभाविकेतरा ईश्वरादृद्धाविता वा ग्रन्थिर्लक्षणा नाम। पूर्वत्र हेतू रूढिः प्रसिद्धिरेव। उत्तरत्र गङ्गातटे घोष इति प्रतिपादनादलभ्यस्य प्रीतित्वपावनत्वातिशयस्य बोधनरूपं प्रयोजनम्। हेतुं विनापि यस्य कस्यचित् सम्बन्धिनो लक्षणेतिप्रसङ्गः स्यादत उक्तं रूढेः प्रयोजनाद्वेति॥ *॥

तद्भेदानाह।

"मुख्यार्थसहितस्यापो वाक्यार्थेऽन्वयसिद्धये। स्वादात्मनोऽप्युपादानादेषोपादानलक्षणा॥"२॥

रूढावुपादानलक्षणा यथा। श्वेतो धावति। प्रयोजने यथा। कुन्ताः प्रविशन्ति। अनयोर्हि श्वेतादिभिः कुन्तादिभिश्च अचेतनतया केवलैर्धावनप्रवेशनक्रिययोः कर्तृतयान्वयमलभमानैरेतत्सिद्धये आत्मसम्बन्धिनो ऽश्वादयः पुरुषादयश्च आक्षिप्यन्ते। पूर्वत्र प्रयोजनाभावाद्रूढिः। उत्तरत्र कुन्तादीनामतिशहनत्वं प्रयोजनम्। अत्र च मुख्यार्थस्यात्मनोऽप्युपादानम्। लक्षणलक्षणायास्तु परस्परोपलक्षणमित्यनयोर्भेदः। इयमेवाजहत्स्वार्थेत्युच्यते॥ *॥

"अर्थं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये। उपलक्षणहेतुत्वादेषा लक्षणलक्षणा॥"३॥

रूढिप्रयोजनयोर्लक्षणलक्षणा यथा। कलिङ्गः साहसिकः गङ्गायां घोष इति च। अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गाग्रन्थावात्मानमर्पयतः। यथा वा।

"उपकृतं बहु तत्र किमुच्यते
सुजनता ग्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे
सुखितमास्व ततः शरदां शतम्॥"

अत्रानुपकारादीनां वाक्यार्थेऽन्वयसिद्धये उपलक्षणादयः ग्रन्थाः आत्मानमर्पयन्ति। अत्रापकारित्वं प्रति उपकारादिप्रतिपादनात्तात्पर्यार्थबाधः। वैपरीत्यलक्षणः सम्बन्धः फलमपकारातिशयः। इयमेव जहत्स्वार्थेत्युच्यते॥ *॥

"आरोपाध्यवसानाभ्यां प्रत्येकं सा अपि द्विधा।"

ताः पूर्वोक्ताश्चतुर्भेदा लक्षणाः।

"विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिरुत। सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका॥४॥

रूढावुपादानलक्षणा सारोपा यथा। अश्वः श्वेतो धावति अत्र हि श्वेतगुणवान् अश्वोऽनिगीर्णस्वरूपः स्वसमवेतश्वेतगुणतादात्म्येन प्रतीयते। प्रयोजने यथा एते कुन्ताः प्रविशन्ति अत्र सम्बन्धात्मा कुन्तधारिपुरुषनिर्देशात् सारोपात्मम्। रूढौ लक्षणलक्षणा यथा। कलिङ्गः पुरुषो युध्यति। अत्र पुरुषकलिङ्गयोराधार्याधारतासम्बन्धः। प्रयोजने यथा आयुर्घृतम्। अत्रायुष्कारणमपि घृतं कार्यकारणभावसम्बन्धसम्बन्ध्यायुस्तादात्म्येन प्रतीयते अन्यथैतल्लक्षणायाभिचारेणायुष्करत्वं प्रयोजनम्। यथा च राजकीये पुरुषे गच्छति राजासौ गच्छति इत्यत्र स्वस्वामिभावलक्षणः सम्बन्धः। यथा वा अयमाक्षेपविषये हस्तोऽयम्। अत्रावयवावयविभावलक्षणः सम्बन्धः। आक्षेपेऽपि तत्रासौ अत्र तात्कर्म्यलक्षणः सम्बन्धः। इन्द्रार्थासु स्थूणासु अमी इन्द्राः अत्र तादर्थ्यरूपः। एवमन्यत्रापि। निगीर्णस्य पुनर्विषयस्यान्यतादात्म्यप्रतीतिरुत साध्यवसाना। अस्याश्चतुर्षु भेदेषु पूर्वोदाहरणान्येव॥ *॥

"साद्यन्तेतरसम्बन्धाः शुद्धास्ताः सकला अपि। साद्यन्तास्तु मता गौण्यस्तेन षोढाग्र भेदिताः॥"५॥

ताः पूर्वोक्ता अष्टभेदा लक्षणाः साद्यन्तेतरसम्बन्धाः कार्यकारणभावादयः। अत्र शुद्धानां पूर्वोदाहरणान्येव। रूढावुपादानलक्षणा सारोपा गौणी यथा। एतानि तैलानि हैमन्ते सुखानि अत्र तैलशब्दस्निग्धभक्ष्यरूपं सुखार्थमुपादायेव सार्थपादिस्थेषु वर्तते। प्रयोजने यथा राजकुमारेषु तत्सदृशेषु च गच्छत्सु एते राजकुमारा गच्छन्ति। रूढावुपादानलक्षणा साध्यवसाना गौणी यथा तैलानि हैमन्ते सुखानि। प्रयोजने यथा राजकुमारा गच्छन्ति। रूढौ लक्षणलक्षणा सारोपा गौणी यथा राजा गौडेन्द्रः कण्टकं बोधयति। प्रयोजने गौर्वाहिकः। रूढौ लक्षणलक्षणा साध्यवसाना गौणी यथा कण्टकं बोधयति। प्रयोजने यथा गौर्व्वाह्लति॥ *॥

"यद्वस्तु गूढागूढत्वाद्द्विधा स्युः फललक्षणाः।"६॥

प्रयोजने या अष्टभेदा लक्षणा दर्शितास्ताः प्रयोजनरूपवस्तुनः गूढागूढतया प्रत्येकं द्विधा भूत्वा षोढ्रग्रभेदाः। तत्र गूढः वाक्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यः। यथा उपकृतं बहु तत्रेत्यादि। अगूढोऽतिस्फुटतया सर्वजनवेद्यः। यथा उपदिशति कामिनीनां यौवनमद एव ललितानि। अत्रोपदिशतीत्यनेन आविष्करोतीति लक्ष्यते आविष्कारातिशयाभिधेयवत् स्फुटं प्रतीयते॥ *॥

"धर्म्मिधर्म्मगतत्वेन फलस्यैता अपि द्विधा।"७॥

एता अनन्तरोक्ताः षोढ्रग्रभेदा लक्षणाः फलस्य धर्म्मिगतत्वेन धर्म्मिगतत्वेन च प्रत्येकं द्विधा भूत्वा द्वात्रिंशद्भेदाः। क्रमेणोदाहरति।

"स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि! धीरा भव॥"

अत्रात्यन्तदुःखसहिष्णुरूपे रामे धर्म्मिणि लक्ष्ये लक्ष्येवातिशयः फलम्। गङ्गायां घोष इत्यत्र तटादिस्थे लक्ष्ये प्रीतित्वपावनत्वादिरूपधर्म्मस्यातिशयः फलम्॥ *॥

"तदेवं लक्षणाभेदाश्चत्वारिंशन्मता बुधैः।"

रूढावष्टौ फले द्वात्रिंशदिति चत्वारिंशल्लक्षणाभेदाः॥ *॥ किञ्च।

"पदवाक्यगतत्वेन प्रत्येकं सा अपि द्विधा।"८।

ता अनन्तरोक्ताः। अत्र पदगतत्वेन यथा गङ्गायां घोषः। वाक्यगतत्वेन यथा उपकृतं बहु तत्रेति। एवमप्रीतिप्रकारा लक्षणा। इति साहित्यदर्पणम्॥

लक्षा, स्त्री, (लक्षयतीति। लक्ष्+अच्। टाप्।) लक्षम्। एषायुतसंख्या। इति मेदिनी। धे, २३॥

लक्षितः, त्रि, (लक्ष्+क्तः।) आलोचितः। दृष्टः। (यथा, रघुः। ७। ४४।

"यैः सादिता लक्षितपूर्व्मकेतून्
सानेव सामर्थ्यतया निजघ्नुः॥")

अङ्कितः। इति लक्षधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम्। लक्षणाश्रयश्च॥

लक्षितलक्षणा, स्त्री, लक्षिते लक्षणा। यथा द्विरेफपदेन बहुव्रीहिलक्षणयोपस्थापितद्विरेफद्वययुक्तभ्रमरपदादभिधयैवाङ्गीपस्थितिः। अत्र रूढिरस्ति। प्रकृते तु रूढिप्रयोजनाभावान्नैयार्थ्यं इयमेव लक्षितलक्षणेत्युच्यते। न च लक्षणाद्वयाभावात् कथमियं लक्षितलक्षणेति वाच्यम्। यत्र लक्षिताच्छब्दादर्थाभिधानं तत्रैव लक्षितलक्षणायाः यदभिधानात्। इति साहित्यदर्पणटीकाकृत् श्रीरामचरणतर्कवागीशः॥

लक्षिता, स्त्री, (लक्ष्+क्तः। स्त्रियां टाप्।) परकीयान्तर्गतनायिकाभेदः। अस्या लक्षणम्।

पुंसलीभावनिपुणा। उदाहरणं यथा,—
"यद्भूतं भद्भूतं यद्भूयात्तदपि वा भूयात्।
यद्भवतु तद्भवतु वा विफलस्तव गोपनोपायः॥"
इति रसमञ्जरी॥

लक्ष्म, [न्] क्ली, (लक्ष्यतेऽनेन लक्ष्यते इति वा। लक्ष+मनिन्।) चिह्नम्। (यथा, भाकुन्तले १ अङ्के।
"मरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥")
प्रधानम्। इत्यमरः। ३। ३। १२४॥

लक्ष्मणं, क्ली, चिह्नम्। इति शब्दरत्नावली॥ (यथा, माघे। ६। ३१।
"अथ लक्ष्मणानुगतकान्तवपु-
र्जलधिं विलङ्घ्य प्लविदाशरथिः।
परिवारितः परित ऋक्षगणै-
स्त्रिभिरौघराक्षसकुलं विभिदे॥")
नाम। इत्यमरटीकायां भरतः॥ (लक्ष्मीरस्यस्तीति। लक्ष्मी+प्रागिवात्। लक्ष्म्या अङ्केति गणरत्नावलेर्ज्ञेयम्।) श्रीविष्णौ, त्रि। इति मेदिनी। णे, ७५॥

लक्ष्मणः, पुं, (लक्ष्मलक्षणमस्यास्तीति। अर्शआदित्वादच्।) सारसः। इति हेमचन्द्रः॥ श्रीरामभ्राता। इति मेदिनी। णे, ७६॥ (यथा, अध्यात्मरामायणे। १। ३। ४५।
"भरणाद्धरतो नाम लक्ष्मणं लक्ष्मणान्वितम्।
शत्रुघ्नं शत्रुहन्तारमेवं गुरुरभाषत॥")
स च त्रेतायुगे अयोध्यायां सुमित्रागर्भे दशरथाज्जातः। इन्द्रजिद्वधार्थं तस्य चतुर्दशवर्षपर्य्यन्तं आहारनिद्रादिरहितत्वं यथा,—
"एकदा रघुनाथश्च सीतया लक्ष्मणेन च।
स्नातः सरसि तत्रस्थो रम्ये पञ्चवटीतटे॥
उवाच सीतां हेमन्ते जलं सुस्वादु निर्मलम्।
तथान्नपचनं रम्यं सर्व्वं वस्तु सुशीतलम्॥
फलञ्च चयनं चक्रे सीतायै प्रददौ पुरः।
ततो ददौ लक्ष्मणाय पश्चाद्भुङ्क्ते स्वयं प्रभुः॥
लक्ष्मणस्तु गृहीत्वा न नैव भुङ्क्ते फलं जलम्।
मेघनादवधार्थञ्च सीतोद्धारणकारणात्॥
निद्रां न याति नो भुङ्क्ते वर्षाणाञ्च चतुर्दश।
य एव पुरुषो योगी तद्धी रावणात्मजः॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ११५ अध्यायः॥

लक्ष्मणप्रसूः, स्त्री, (लक्ष्मणस्य प्रसूर्जननी।) सुमित्रा। इति शब्दरत्नावली॥

लक्ष्मणा, स्त्री, (लक्ष्मलक्षणमस्यास्या इति। अर्शआदित्वात् अच्। टाप्।) श्वेतकण्टकारी। इति राजनिर्घण्टः॥ सारसी। ओषधिभेदः। इति मेदिनी। णे, ७६॥ श्रेयस्तु लक्ष्मणाकन्द इति भाषा ख्यातः। तस्याः पर्य्यायः। पुत्रकन्दा २ पुत्रदा ३ नागिनी ४ नागाह्वा ५ नागयज्ञी ६ तुलिनी ७ मल्लिका ८ अमृतबिन्दुच्छदा ९ पुच्छदा १०। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। स्त्रीवन्ध्यत्वनाशित्वम्। रसायनकरत्वम्। बल्यत्वम्। त्रिदोषघ्नत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"पुत्रकाकाररक्ताक्षबिन्दुभिर्लाञ्छिता सदा।
लक्ष्मणा पुत्रजननी वस्तुगत्याऽनतिर्भवेत्॥"
इति भावप्रकाशः॥*॥
(महाधिपतिकन्या। यथा, भागवते। १०। ५८। ५७।
"सुताश्च महाधिपतेर्लक्ष्मणां लक्ष्मणेयनाम्।
स्वयंवरे जहारैकः स सुपर्णः सुधामिव॥")
दुर्य्योधनकन्या। सा तु श्रीकृष्णपुत्रेण साम्बेन विवाहिता। इति महाभारतम्॥ (यथा, भागवते। १०। ६८। १।
"दुर्य्योधनसुतां राजन् लक्ष्मणां समितिञ्जयः।
स्वयंवरस्थामहरत् साम्बो जाम्बवतीसुतः॥")

लक्ष्मीः, स्त्री, (लक्ष्यति पश्यति उद्योगिनमिति। लक्षि+"लक्ष्मेर्मुट् च।" उणा० ३।१६०। इति ईप्रत्ययो मुडागमश्च।) विष्णुपत्नी। तत्पर्य्यायः। पद्मालया २ पद्मा ३ कमला ४ श्रीः ५ हरिप्रिया ६ इन्दिरा ७ लोकमाता ८ मा ९ क्षीराब्धितनया १० रमा ११। इत्यमरः॥ अब्धिजा १२ भार्गवी १३। इति शब्दरत्नावली॥ हरिवल्लभा १४ दुग्धाब्धितनया १५ क्षीरसागरसुता १६। इति कविकल्पलता॥*॥

अथ लक्ष्मीमन्त्राः।

"वाग्भं वह्निसमारूढं वामनेत्रेन्दुसंयुतम्।
बीजमेतत् श्रियः प्रोक्तं सर्व्वकामफलप्रदम्॥"*॥
अस्य पूजाप्रयोगः। प्रातःस्नानादिपीठन्यासान्तं कर्म्म विधाय हृत्पद्मस्य पूर्व्वादिकेसरेषु मध्ये च पीठशक्तीः पीठमन्त्रञ्च न्यसेत्। ॐ विभूत्यै नमः। एवं उन्नत्यै कान्त्यै सृष्ट्यै कीर्त्यै सन्नत्यै पुष्ट्यै उत्कृष्ट्यै ऋद्ध्यै। ततः श्रीकमलासनाय नमः। इत्यासनं विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। शिरसि भृगुऋषये नमः मुखे त्रिष्टुच्छन्दसे नमः। हृदि श्रियै देवतायै नमः। ततः करादिन्यासौ कुर्य्यात्। श्रां अङ्गुष्ठाभ्यां नमः। श्रीं तर्জनीभ्यां स्वाहा। श्रूं मध्यमाभ्यां वषट्। इत्यादि। एवं श्रां हृदयाय नमः इत्यादिना च न्यसेत्। तथा च निबन्धे।
"अङ्गानि दीर्घयुक्तेन रमाबीजेन कल्पयेत्।"
ततो ध्यानम्।
"कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यै-
श्चतुर्भिर्गजै
र्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां
श्रियम्।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटो-
ज्ज्वलां
क्षौमाबद्धनितम्बबिम्बललितां वन्देऽरविन्द-
स्थिताम्॥"
एवं ध्यात्वा मानसैः संपूज्य गुरुस्यात्मानं कुर्य्यात्। ततः पीठपूजां विधाय केसरेषु मध्ये च विभूत्यादिपीठमन्त्रान्तपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत्। अष्टदलादिकेसरेषु मध्ये दिक्षु च श्रां हृदयाय नमः। इत्यादिना संपूज्य दिग्दलेषु पूर्व्वादिषु ॐ वासुदेवाय नमः। एवं सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय। विदिग्दलेषु ॐ हंसकाय ॐ सलिलाय ॐ गुरुगुरुवे ॐ कुरुरुटकाय। ततो दक्षा दक्षिणे ॐ गृहनिधये नमः। एवं वसुधारायै। वामे ॐ पद्मनिधये वसुमद्भ्यै। यक्षायेषु पूर्व्वादिषु ॐ वलाक्षै नमः। एवं विमलायै कमलायै वनमालिकायै विभीषिकायै शङ्खिन्यै वसुमालिकायै। तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्জनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं दशसहस्रजपः। तथा च।
"भानुलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः।
तत्सहस्रञ्च जुहुयात् कमलैर्मधुराप्लुतैः।
जपान्ते जुहुयान्मन्त्री तिलैर्वा मधुराप्लुतैः।
बिल्वैः फलैर्वा जुहुयात्तिभिर्वा साधकोत्तमः॥
वाग्भवं वनिता विष्णोर्माया मकरकेतनः।
चतुर्व्योजालको मन्त्रश्चतुर्व्वर्गफलप्रदः॥"
वाग्भवं ऐं। विष्णुवनिता श्रीं। माया ह्रीं। मकरकेतनः क्लीं। अस्य पूजादिकं पूर्व्ववद्बोध्यम्। तथा च।
"रमायाः कल्पिते पीठे तद्विधानेन पूजयेत्।
कुर्य्यात् प्रयोगान् तत्तत्स्थानेन साधकोत्तमः॥
निधिभिः सेव्यते नित्यं मूर्त्तिमद्भिरुपस्थितैः॥"
ध्याने तु विशेषः।
"माणिक्यप्रतिभप्रभां हिमनिभैस्तुङ्गैश्चतुर्भिर्गजै-
र्हस्ताग्राहृतरत्नकुम्भसलिलैराषिच्यमानां सदा।
हस्ताब्जैर्वरदानमम्बुयुगलीभीतीर्दधानां हरेः
कान्तां काञ्चितपारिजातलतिकां वन्दे सरोजासनाम्॥"
अस्य पुरश्चरणं दशसहस्रजपः। तथा च।
"भानुलक्षं हविष्याशी जपेदन्ते सरोरुहैः।
जुहुयादशतञ्चैः पुण्यैस्तत्सहस्रं जितेन्द्रियः॥"
मन्त्रान्तरम्। नमः कमलान्ते वासिन्यै इत्ययमिति प्रोक्तो दशाक्षरः। तथा च निबन्धे।
"दीर्घा यादिर्विसर्गान्तो ब्रह्मा भानुर्वसुन्धरा।
वान्तेसिन्यै प्रिया वह्निर्मनुः प्रोक्तो दशाक्षरः॥"
"दीर्घा नकारः। यादिर्मः। ब्रह्मा कः। भानुर्मः। वसुन्धरा लः। वान्तेसिन्यै वाशब्दे। वह्निप्रिया स्वाहा। अस्य पूजाप्रयोगः। पूर्व्ववत् पीठमन्त्रान्तं विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। शिरसि दत्तऋषये नमः। मुखे विराट्छन्दसे नमः। हृदि श्रियै देवतायै नमः। तथा च शारदायाम्।
"ऋषिर्दत्तो विराट्छन्दो देवता श्रीः प्रकीर्त्तिता॥"
ततः करादिन्यासौ। ॐ देव्यै नमोऽङ्गुष्ठाभ्यां नमः। ॐ पद्मिन्यै नमस्तर्জनीभ्यां स्वाहा। ॐ विष्णुपत्न्यै नमो मध्यमाभ्यां वषट्। ॐ वरदायै नमोऽनामिकाभ्यां हुं।

ॐ कमलरूपाये नमः कनिष्ठाभ्यां फट्। एवं हृदयादिषु। ॐ देव्यै नमो हृदयाय नम इत्यादि। तथा च निवन्धे।
"देव्यै हृदयमाख्यातं पद्मिन्यै शिर ईरितम्।
विष्णुपत्न्यै शिखा प्रोक्ता वरदायै तनुच्छदम्।
अस्त्रं कमलरूपाये नमोऽन्ताः प्रणवादिकाः॥"
ततो ध्यानम्।
"आसीना सरसीरुहे सितसुखी हस्ताम्बुजे-
र्बिभ्रती
दानं पद्मयुगाभये च वसुधा सौदामिनी-
सन्निभा।
सत्काहारविराजमानदृगुलोत्तुङ्गस्तनोद्भासिनी
पायाद्वः कमला कटाक्षविभवैरानन्दयन्ती
हरिम्॥"
एवं ध्यात्वा मानसैः संपूज्य गुरुस्थापनं कृत्वा पूर्वोक्तपीठशक्तिसहितपीठमन्त्रान्तां पूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजामारभेत्। अग्न्यादिचतुष्के तु च ॐ देव्यै नमो हृदयाय नमः। ॐ पद्मिन्यै नमः शिरसे स्वाहा। ॐ विष्णुपत्न्यै नमः शिखायै वषट्। ॐ वरदायै नमः कवचाय हुम्। ॐ कमलरूपाये नमोऽस्त्राय फट्। ततः पूर्वादिदलेषु पूर्ववत् बलाक्यादि पूजयेत्। तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म समापयेत्। अस्य पुरश्चरणं दशलक्षजपः। तथा च।
'दशलक्षं जपेन्मन्त्रं मन्त्रविद्विजितेन्द्रियः।
दशांशं जुहुयान्मन्त्री मधुराक्तैः सरोरुहैः॥'*।
अथ लक्ष्मीस्तोत्रम्।
ईश्वर उवाच।
"त्रैलोक्यपूजिते देवि! कमले विष्णुवल्लभे।
यथा त्वं सुस्थिरा कृष्णे तथा भव मयि स्थिरा॥
ईश्वरी कमला लक्ष्मीश्चला भूतिर्हरिप्रिया।
पद्मा पद्मालया सम्पत्समृद्धिः श्रीः पद्मधारिणी॥
द्वादशैतानि नामानि लक्ष्मीं संपूज्य यः पठेत्।
स्थिरा लक्ष्मीर्भवेत् तस्य पुत्रदारादिभिः सह॥"
इति तन्त्रसारः।
विष्णुपुराणोक्तलक्ष्मीस्तोत्रं तत्रैव १ अंशे ९ अध्याये द्रष्टव्यम्॥*। अथ लक्ष्मीपूजानिरूपणम्। यथा, स्कन्दपुराणे।
"पौषे चैत्रे तथा भाद्रे पूजयेयुः स्त्रियः श्रियम्।
सिंहे धनुषि गौने च स्थिते सप्ततुरङ्गमे॥
प्रत्यब्दं पूजयेल्लक्ष्मीं शुक्लपक्षे गुरोर्दिने।
नापराह्णे न रात्रौ च नाशिते न चाहस्यृशि॥
द्वादश्यां चैव नन्दायां रिक्तायाञ्च निरंशके।
त्रयोदश्यां तथाऽमायां कमलां नैव पूजयेत्॥
न पूजयेत् शनौ भौमे न बुधे नैव भार्गवे।
पूजयेत्तु गुरोर्वारे चाप्राप्ते रविसोमयोः॥
गुरुवारे हि पूजा च यत्नेन यदि लभ्यते।
तत्र पूज्या तु कमला धनपुत्रविवर्द्धिनी॥
न कुर्यात् प्रथमे मासि नैव कुर्याद्विसर्जनम्।
न घण्टां वादयेत्तत्र नैव भिण्टीं प्रदापयेत्॥
पौषे च दशमी शुक्ला चैत्रके पञ्चमी तथा।
नभस्ये पूर्णिमा ज्ञेया गुरुवारे विशेषतः॥
आढ्यं धान्यसमृद्धं नानाभरणभूषितम्।
सुगन्धिशुक्लपुष्पैश्च शुक्लपक्षे प्रपूजयेत्॥
पौषे तु पिष्टकं दद्यात् परमान्नञ्च चैत्रके।
पिष्टकं परमान्नञ्च नभस्ये तु विशेषतः॥
गुरुवारसमायुक्ता नभस्ये पूर्णिमा शुभा।
कमलां पूजयेत्तत्र पुनर्जन्म न विद्यते॥
एकेन कमलेनैव कमलां पूजयेद् यदि।
इह लोके सुखं प्राप्य परत्र केशवं व्रजेत्॥
प्राङ्मुखी पूजयेल्लक्ष्मीं पश्चिमाननसंस्थिताम्।
गन्धपुष्पधूपदीपनैवेद्यादुपचारकैः॥
गन्धद्वारेतिमन्त्रेण गन्धेनावाहयेदसौ।
श्रिये जात इति द्राभ्यां पुष्पैरावाहयेत्ततः॥"
ततो ध्यानम्।
"हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदसमावहाम्॥
गौरवर्णान्तु द्विभुजां स्थितपद्मोपरिस्थिताम्।
विष्णोर्वक्षःस्थलस्थाञ्च जगच्छोभाप्रकाशिनीम्॥
ध्यायेदाद्यां सदा देवीं पूजाकाले विशेषतः।
ततः पूजादिकं कुर्यात् श्रीं लक्ष्मीं नम इत्यृचा॥
लक्ष्मीः पद्मालया पद्मा कमला श्रीर्धृतिः क्षमा।
तुष्टिः पुष्टिस्तथा कान्तिर्मेधा विद्या रमा स्मृतिः॥
हरिप्रिया तथा विष्णोः प्रिया नारायणस्य च।
एताभिः सप्तदशभिर्लक्ष्मीबीजादिनार्चयेत्॥
लक्ष्मीनारायणाभ्याञ्च नमोऽन्तेन प्रपूजयेत्।
धिषणञ्च कुबेरञ्च पूजयेत्तदनन्तरम्॥"
लक्ष्मीचरित्रे।
"न कृष्णपक्षे रिक्तायां दशमीदादशीषु च।
अमावास्यादिचतुष्कं लक्ष्मीपूजां न कारयेत्॥"
इति कालचन्द्रिका॥
दीपान्वितामावस्यायां लक्ष्मीपूजाविधिर्यथा,—
"तुलाराशिगते भानौ अमावास्यां नराधिपः।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च॥
कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुडादिभिः।
ततोऽपराह्णसमये घोषयेन्नगरे नृपः।
लक्ष्मीः संपूज्यतां लोका उल्काभिश्चाभिवेद्यताम्॥
अमावास्या यदा रात्रौ दिवाभागे चतुर्दशी।
पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका॥
अमावास्या यदा देवाः कार्त्तिके मासि केशवात्।
अभयं प्राप्य सुप्ताश्च क्षीरोदार्णवसायुजः॥
लक्ष्मीर्दैत्यभयात्युक्ता सुखं सुप्तास्वलोदरे।
चतुर्युगसहस्रान्ते ब्रह्मा स्वपिति पङ्कजे॥
अतोऽत्र विधिवत् कार्य्या मनुष्यैः सुखसुप्तिका।
दिवा तत्र न भोक्तव्यमते बालातुराज्ञनात्॥
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्।
दीपश्चात्सथा कार्य्या भक्ता देवगृहेष्वपि॥
चतुष्पथसुरास्थानेषु नदीपर्व्वतसानुषु।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च॥
वस्त्रैः पुष्पैः क्षौमतल्पैः क्रयविक्रयभूमयः।
दीपमालापरिक्षिप्ता प्रदोषे तदनन्तरम्॥
ब्राह्मणान् भोजयित्वादौ विभव्य च बुभुक्षितान्।
अलङ्कृतैर्भोक्तव्यं नववस्त्रोपशोभिना।
स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्भृत्यकैः सह॥"
अत्र लक्ष्मीपूजायां पुण्यदानकाले।
"नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये!।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात्॥"
लक्ष्मी नम इत्यनेन वारत्रयं पूजयेत्।
"सुखरात्र्यां प्रदोषे तु कुबेरं पूजयन्ति ये॥"
इति रुद्रधरधृतात् कुबेरमपि पूजयन्ति।
"धनदाय नमस्तुभ्यं निधिपद्माधिपाय च।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः॥"
इति पठित्वा कुबेराय नम इति त्रिः पूजयेत्।
ततो देवगृहादिषु दीपान् दद्यात्। तत्र मन्त्रः।
"अग्निर्ज्योतीरविर्ज्योतिश्चन्द्रज्योतिस्तथैव च।
उत्तमः सर्व्वज्योतीनां दीपोऽयं प्रतिगृह्यताम्॥"
ततो ब्राह्मणान् बन्धूंश्च भोजयित्वा स्वयं भुक्त्वा सुखं सुप्त्वा प्रभूते भविष्योक्तं कर्म कुर्य्यात्। तथा,—
"सुखरात्रेरुषःकाले प्रदीपोज्ज्वलितालये।
बन्धूंस्तन्धूनबन्धूंश्च वाचा कुशलयार्चयेत्॥
प्रदीपवन्दनं कार्य्यं लक्ष्मीमङ्गलहेतवे।
गोरोचनाक्षतैश्चैव दद्याद्दीपेषु सर्व्वतः॥"
लक्ष्मीपूजामन्त्रः।
"विष्णुरूपस्य भार्य्यासि पद्मे पद्मालये शुभे।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्।
सुखरात्रिप्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता।
संवत्सरप्रिया या च सा ममास्तु सुमङ्गला॥
माता त्वं सर्व्वभूतानां देवानां हरिसम्भवा।
आख्याता भूतले देवि! सुखरात्रि नमोऽस्तु ते॥"
लक्ष्मी नम इति त्रिः पूजयेत्। इति तिथ्यादितत्त्वम्॥*॥ तस्या उपाख्यानं यथा,—
नारद उवाच।
"श्रीलक्ष्म्यास्तामसेनैव निर्गुणस्य निराकृतेः।
सावित्र्योरसंवादे श्रुतं मुनिभिरञ्जसा यशः॥
तद्गुणोत्कीर्त्तनं सत्यं मङ्गलानाञ्च मङ्गलम्।
अधुना श्रोतुमिच्छामि लक्ष्म्युपाख्यानमेव च॥
कैलासे पूजिता सापि किम्भूता केन वा पुरा।
तद्गुणोत्कीर्त्तनं सत्यं वद वेदविदांवर॥
श्रीनारायण उवाच।
सृष्टेरादौ पुरा ब्रह्मन् लक्ष्म्यास्य परमात्मनः।
देवी वामांशसम्भूता बभूव रासमण्डले॥
अतीवसुन्दरी रामा सर्व्वैश्वर्यसमन्विता।
यथा द्वादशवर्षीया सुस्थिरयौवना॥
श्वेतचम्पकवर्णाभा सुखदृश्या मनोहरा।
शरत्पार्व्वणकोटीन्दुप्रभाप्रच्छादिताननाः॥
शरन्मध्याह्नपद्मानां शोभामोचनलोचना।

सा च देवी द्विधा भूता सहसैवेश्वरेच्छया ।
समा रूपेण वर्णेन तेजसा वयसा विभा ।
यशसा वाससा सत्या भूषणेन गुणेन च ।
स्मितेन चारुचित्तेनैव वचसा गमनेन च ।
मधुरेण स्वरेणैव नयनेनासुनेन च ।
तद्वामांशो महालक्ष्मीर्हरिर्वामांशश्च राधिका ।
राधादौ वरयामास हरिश्च परात्परम् ।
महालक्ष्मीश्च तत्पत्न्यामेकमेव कमनीयकम् ।
लक्ष्मीलक्षणैरेवैव विधारूपो बभूव ह ।
दक्षिणांशश्च हरिणो वामांशश्च चतुर्भुजः ।
चतुर्भुजाय हरिणो महालक्ष्मीं ददौ पुरा ।
लक्ष्यते ह्यमते विश्वं स्मितदृष्ट्या ययाविश्वम् ।
देवीषु या च महती महालक्ष्मीश्च सा स्मृता ।
हरिणो राधिकाकान्तो लक्ष्मीकान्तश्चतुर्भुजः ।
शुद्धसत्त्वस्वरूपेण गोपैर्गोपीभिरावृतः ।
चतुर्भुजश्च वैकुण्ठं प्रययौ पद्मया सह ।
सर्वांशेन समौ द्वौ तौ लक्ष्मीनारायणौ परौ ।
महालक्ष्मीश्च योगेव नानारूपा बभूव सा ।
वैकुण्ठे च महालक्ष्मीः परिपूर्णतमा रमा ।
शुद्धसत्त्वस्वरूपा च सर्वसौभाग्यसंयुता ।
प्रेमदा सा च प्रधावा च सर्वांसु रमणीषु च ।
स्वर्गे च स्वर्गलक्ष्मीश्च शक्रसम्पत्स्वरूपिणी ।
पातालेषु च मर्त्येषु राजलक्ष्मीश्च राजसु ।
गृहलक्ष्मीर्गृहेष्वेव गृहिणी च कलांशया ।
सम्पत्स्वरूपा गृहिणां सर्वमङ्गलमङ्गला ।
गवां प्रसूः सा सुरभी दधिदा यज्ञकामिनी ।
क्षीरोदसिन्धुकन्या सा श्रीरूपा पद्मिनीषु च ।
शोभास्वरूपा चन्द्रे च सूर्यमण्डलमण्डिता ।
विभूषणेषु रत्नेषु फलेषु च जलेषु च ।
तृणेषु तृणपत्रीषु दिव्यस्त्रीषु गृहेषु च ।
सर्वशस्येषु वस्त्रेषु स्थानेषु संस्कृतेषु च ।
प्रतिमासु च देवानां मङ्गलेषु घटेषु च ।
माङ्गल्येषु च मुक्तासु माल्येषु च मनोहरा ।
मणीन्द्रेषु च हीरेषु क्षीरेषु चन्दनेषु च ।
वृक्षशाखासु रम्यासु नवमेघेषु वस्तुषु ।
वैकुण्ठे पूजिता सादौ देवी नारायणेन च ।
द्वितीये ब्रह्मणा भक्त्या तृतीये शङ्करेण च ।
विष्णुना पूजिता सा च क्षीरोदे भारते सुने ।।
स्वायम्भुवेन मनुना मानवेन्द्रेण सर्वतः ।
ऋषीन्द्रैश्च मुनीन्द्रैश्च सिद्धैश्च गृहिभिर्भवे ।
गन्धर्वाद्यैश्च नागाद्यैः पातालेषु च पूजिता ।
शुक्लाष्टम्यां भाद्रपदे कृता पूजा च ब्रह्मणा ।
भक्त्या च पञ्चपर्यन्तं विश्वे लोकेषु नारद ! ।
पैत्रे पौषे च भाद्रे च पुण्ये मङ्गलवासरे ।
विष्णुना विधिना पूजा विश्वे लोकेषु भक्तितः ।
वर्षान्ते पौषसंक्रान्त्यां मेघामावास्य प्राङ्गणे ।
मनुस्तां पूजयामास सा भूता भुवनत्रये ।
राजेन्द्रेण पूजिता सा मङ्गलेनैव मङ्गला ।
केदारेणैव नीलेन नलेन सुबलेन च ।
ध्रुवेणोत्तानपादेन शक्रेण बलिना तथा ।
कश्यपेन च दक्षेण कर्दमेन विवस्वता ।
प्रियव्रतेन चन्द्रेण कुबेरेणैव वायुना ।
यमेन वह्निना चैव वरुणेनैव पूजिता ।
एवं सर्वत्र सर्वैश्च वन्दिता पूजिता सदा ।
सर्वैश्वर्याधिदेवी सा सर्वसम्पत्सुखरूपिणी ।"
अपि च ।

नारद उवाच ।

"नारायणप्रिया सा च वरा वैकुण्ठवासिनी ।
वैकुण्ठाधिष्ठातृदेवी महालक्ष्मीः सनातनी ।
कथं बभूव सा देवी पृथिव्यां सिन्धुकन्यका ।
किं तद्दानं व्रतं स्तवनं सर्वं पूजाविधिक्रमः ।
पुरा केन स्तुतादौ सा तन्मां व्याख्यातुमर्हसि ।

श्रीनारायण उवाच ।

पुरा दुर्वाससः शापात् भ्रष्टश्रीश्च पुरन्दरः ।
बभूव देवसंघश्च सर्वलोकश्च नारद ! ।।
लक्ष्मीः स्वर्गादिकं त्यक्त्वा रुष्टा परमदुःखिता ।
गत्वा लीना च वैकुण्ठे महालक्ष्म्याश्च नारद ।
तदा शोकादयुर्देवा दुःखिता ब्रह्मणः सभाम् ।
ब्रह्माणश्च पुरस्कृत्य ययुर्वैकुण्ठमेव च ।
वैकुण्ठे शरणापन्ना देवा नारायणे परे ।
अतीवदैन्ययुक्ताश्च शुष्ककण्ठौष्ठतालुकाः ।
तदा लक्ष्मीश्च कलया पुरा नारायणाश्रया ।
बभूव सिन्धुकन्या सा शक्रसम्पत्सुखरूपिणी ।
तथा मथित्वा क्षीरोदं देवा दैत्यगणैः सह ।
संप्राप्य वरं लक्ष्म्या ददुस्तां च तत्र हि ।
सुरादिभ्यो वरं दत्त्वा वरमालां विधाय वै ।
ददौ प्रसन्नवदना तुष्टा क्षीरोदशायिने ।
देवाश्चाप्यसुरयुतं राज्यं प्राप्य तदरात् ।
तां सम्पूज्य च सम्भूय सर्वत्र च विरापदः ।"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ४५ ।३६ अध्यायौ ।
लक्ष्म्या अगम्यगृहाणि यथा,—
"यं यं रहो गुरुर्देवो माता तातश्च बान्धवः ।
अतिथिः पितृलोकाश्च न यामि तस्य मन्दिरम् ।
मिथ्यावादी च यः ग्रन्थान्क्षीति वाचकः सदा ।
सत्यहीनश्च दुःशीलो न गेहं तस्य याम्यहम् ।
सत्यहीनः स्वाध्यायारी मिथ्यासाक्ष्यप्रदायकः ।
विश्वासघ्नः कृतघ्नो यो न यामि तस्य मन्दिरम् ।
चिन्तायस्तो भयग्रस्तः शत्रुग्रस्तोऽतिपातकी ।
ऋणग्रस्तोऽतिरुग्णो न गेहं यामि पापिनाम् ।
दीर्घाशौचश्च शोकार्त्तो मन्दधीः स्त्रीजितः सदा ।
पुंश्चलीपतिपुत्रौ यौ तद्गेहं नैव याम्यहम् ।
पुंश्चलान्नरतावीरान्नं यो भुङ्क्ते कामतः सदा ।
शूद्रान्नभोजी तद्याजी तद्गेहं नैव याम्यहम् ।
यो दुर्वाक् कलहाविष्टः कलिः शूद्रदलाश्रये ।
स्त्री प्रधाना गृहे यस्य न यामि तस्य मन्दिरम् ।
यत्र नास्ति हरेः पूजा तदीयगुणकीर्तनम् ।
नोत्सुकश्च प्रशंसायां न यामि तस्य मन्दिरम् ।
कन्यान्नवेदविक्रेता नरघाती च हिंसकः ।
नरकागारसदृशं न यामि तस्य मन्दिरम् ।
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं सुरस्य च ।
यो हरेद्दानहीनश्च न यामि तस्य मन्दिरम् ।
यत् कर्म दक्षिणाहीनं मूढधीः कुरुते शठः ।
स पापी पुण्यहीनश्च न यामि तस्य मन्दिरम् ।
मातरं पितरं भार्यां गुरुपत्नीं गुरुञ्च तम् ।
अनाथां भगिनीं कन्यामनन्याश्रयवान्धवाम् ।
कार्पण्याद्यो न पुष्णाति सत्त्वयं कुरुते सदा ।
तदन्नवारकाकारान्न यामि तान्मुनीश्वरः ।
मूत्रं पुरीषसृष्टञ्च यस्तत् प्रश्नाति मन्दधीः ।
यः शेते श्वित्रपादेन न यामि तस्य मन्दिरम् ।
अधौतपादहस्तायी यो नग्नः शेतेऽतिनिन्दितः ।
सन्ध्यास्नायी दिवास्नायी न यामि तस्य मन्दिरम् ।
मूर्ध्नि तैलं पुरो दत्त्वा योऽन्यदङ्गमुपस्पृशेत् ।
ददाति पञ्चरात्रे वा न यामि तस्य मन्दिरम् ।
दत्त्वा तैलं मूर्ध्नि गात्रे विघ्नं यः सम्पृच्छेत् ।
प्रश्नमेदाहरेत् पुण्यं न यामि तस्य मन्दिरम् ।
दन्तं छिनत्ति नखरैर्नखरैर्लिखेन्महीम् ।
गात्रे पादे मलं यस्य न यामि तस्य मन्दिरम् ।
दग्धनं वसनं यस्य समलं रूक्षमस्तकम् ।
विकृतौ ग्रासहासौ च न यामि तस्य मन्दिरम् ।
मन्त्रविद्योपजीवी च ग्रामयाजी चिकित्सकः ।
शूद्रक्षेत्रबलञ्चैव न यामि तस्य मन्दिरम् ।
विवादं धर्मकार्यं वा यो निहन्ति च कोपतः ।
दिवामैथुनकारी यो न यामि तस्य मन्दिरम् ।"
इत्यादि ब्रह्मवैवर्ते गणेशखण्डे लक्ष्मीचरित-नाम २३ अध्यायः । * । अपि च ।

"कुचेलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम् ।
सूर्योदये चास्तमये च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ।
नित्यं क्षेदस्तृणानां धरणिविलिखनं प्राग्योरक्षमार्हि-
दैन्तानामक्षशौचं वसनमलिनता रूक्षता मूर्द्धजानाम् ।
ये सन्ध्ये चापि निद्रा विवसनशयनं यावशातिरेकः
खाङ्गे पीठे च वाद्यं निधनमुपनयेत् केशवस्यापि लक्ष्मीम् ।
शिरः स्नातं चरणौ सुमार्ज्जितौ
वराङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ।
यस्य कस्य तु पुण्यस्य प्राक्तरस्य विशेषतः ।
शिरसा धार्य्यमाणस्य अलक्ष्मीः प्रतिहन्यते ।
दीपस्य पश्चिमा च्छाया छाया ग्रन्थासनस्य च ।
रक्षकस्य तु यत्तीर्थमलक्ष्मीस्तत्र तिष्ठति ।"
इत्यादि गारुडे ११४ अध्यायः । * ।
अङ्गविशेषे तस्याः स्थितिफलं यथा,—

देवा ऊचुः ।

"कथयस्व जगन्नाथ ! केषु स्थानेष्ववस्थिता ।
पुरुषाणां फलं किं वा प्रयच्छत्यथ नश्यति ।

दत्तात्रेय उवाच ।
वृषां पादस्थिता लक्ष्मीर्निलयं संप्रयच्छति ।
सक्थिनि संस्थिता वस्त्रं रत्नं नानाविधं वसु ।
कलत्रदा गुह्यसंस्था क्रोडस्थापत्यदायिनी ।
मनोरथान् पूरयति पुरुषाणां हृदि स्थिता ।
लक्ष्मीर्लक्ष्मीवतां श्रेष्ठं कक्षस्था कक्षभूषणम् ।
अभीष्टबन्धुदारेषु तथास्येयं प्रवासिभिः ॥
भिक्षान्नं वाक्यलावण्यमाज्ञामवितथान्तथा ।
सुखसंस्था कवित्वं च यच्छत्युदधिसम्भवा ॥
शिरोगता संत्यजति ततोऽन्यं याति संश्रयम् ।
सेयं शिरोगता देवान् परित्यजति साम्प्रतम् ॥"
इति मार्कण्डेयपुराणे दत्तात्रेयचरिताध्यायः ॥७॥
अथ लक्ष्मीचरित्रम् ।
श्रीशुक उवाच ।
"मेरुपृष्ठे सुखासीनां लक्ष्मीं पृच्छति केशवः ।
केनोपायेन देवि त्वं वृषा भवसि निश्चला ।
श्रीरुवाच ।
शुक्लाः पारावता यत्र गृहिणी यत्र चोज्ज्वला ।
अकलहा वसतिर्यत्र तत्र क्षत्र वसाम्यहम् ।
धान्यं सुवर्णसदृशं तण्डुला रजतोपमाः ।
अन्नपूर्णेवातुर्यं यत्र तत्र क्षत्र वसाम्यहम् ॥
यः संविभागी प्रियवाक्यभावी
देवोपसेवी प्रियदर्शनश्च ।
अल्पप्रलापी न च दीर्घसूत्री
तस्मिन् सदाहं पुरुषे वसामि ॥
यो धर्मशीलो विजितेन्द्रियश्च
विद्याविनीतो न परोपतापी ।
अगर्हितो यश्च जनानुरागी
तस्मिन् सदाहं पुरुषे वसामि ॥
चिरं याति हृतं शुक्ले पुण्यं प्राप्य न क्षिपति ।
यो न पश्येत् स्वियं नयां नियतं स च मे प्रियः ॥
त्यागः सत्यं शौचं यत्र एते महागुणाः ।
यः प्राप्नोति गुणानेतान् श्रद्धावान् स च मे प्रियः ॥
सर्वलक्षणमध्ये तु त्याग एव विशिष्यते ।
काले देये च पात्रे च स च त्यागः प्रशस्यते ॥
नित्यमामलके लक्ष्मीर्नित्यं वसति गोमये ।
नित्यं शुक्ले च पद्मे च नित्यं श्रीः शुक्लवाससि ॥
वसामि पद्मोत्पलशङ्खमध्ये
वसामि चन्द्रे च महेश्वरे च ।
नारायणे चैव वसुन्धरायां
वसामि नित्योत्सवमन्दिरेषु ॥"
वसुन्धरायामित्यत्र वसौ धरायामिति वा पाठः ॥
"यथोपदिष्टा गुरुभक्तियुक्ता
पत्युर्वचो नाक्रमते च नित्यम् ।
नित्यं च शुक्ले पतिशुक्लशैयं
तस्याः शरीरे नियतं वसामि ॥
तुष्टा च धीरा प्रियवादिनी च
सौभाग्ययुक्ता च सुशोभना च ।
लावण्ययुक्ता प्रियदर्शना या
पतिव्रता या च वसामि तासु ॥
श्यामा नगाक्षी क्षमध्यभागा
सुभ्रूः सुकेशी सुगतिः सुशीला ।
गम्भीरनाभिः समदन्तपङ्क्ति-
स्तस्याः शरीरे नियतं वसामि ॥
या पापरक्ता विगुणस्वभावा
स्वाधीनकान्तः परिभूयते च ।
असंयतात्मा कुपरिग्रहा च
तामङ्गनां प्रेतसुखीं त्यजामि ॥
पुष्पं पर्युषितं पूतिं शूयमं बहुभिः सह ।
भस्मासनं कुनारीश्च दूरतः परिवर्जयेत् ॥
चिताङ्गारकमस्थीनि वह्निं भस्म द्विजं गाम् ।
न पादेन स्पृशेत् प्राज्ञः कार्पासास्थि तुषं गुरुम् ॥
नखकेशोदकञ्चैव मैथुनं पर्वसन्ध्ययोः ।
वर्जयेन्नग्नयाथिलमेकाकी मिश्रभोजनम् ॥
शिरः सपुष्पं परधौ सुपूजितौ
निजाङ्घ्रिसेवनमन्यभोजनम् ।
अनग्नयाथिलमपर्वमैथुनं
चिरप्रजां श्रियमानयन्ति षट् ॥
सम्मार्जनीरजोवातं निर्गुण्डीं लङ्घयन्तथा ।
रात्रौ बिल्वपलाशञ्च कपित्थं वर्जयेद्बुधः ॥
खगात्रासनयोर्वाद्यं अपूजा गृहेपादयोः ।
उच्छिष्टस्नानं गृहिं स्नानाभ्यङ्गञ्च वर्जयेत् ॥
शूयनञ्चान्धकारे च रात्रिवासो दिने तथा ।
स्नानाम्बरं कुवेशञ्च वर्जयेत् शुष्कभोजनम् ॥
परेद्युरुषितं वस्त्रं स्वयं माल्यापकर्षणम् ।
आलस्यमवसादञ्च न कुर्याल्लोष्टमर्दनम् ॥
शुक्रवारे च यत्नेन श्रिलाश्चित्र दर्शकं ।
स्वयं वामेन मूर्द्धानं पाणिना नैव संस्पृशेत् ॥
तारकाः पूज्यवन्तो च न पश्येदशुचिः पुमान् ।
नेक्षेद्दृशुं परस्त्रीणां नाशं यान्तं दिवाकरम् ॥
कुर्यान्नान्यधनाकाङ्क्षां परस्त्रीणां तथैव च ।
परेषां प्रतिकूलञ्च उदितार्के प्रबोधनम् ॥
नखकेशकरक्लेदं क्षत्तिकाङ्गारवारिभिः ।
त्यजेत् विलेखनं भूमौ न कुर्याच्छस्त्र काङ्क्षया ।
स्वयं दोषं स्वयं माल्यं स्वयं वृक्षच्च चन्दनम् ।
नापितस्य गृहे चौरं शक्रादपि हरेत् श्रियम् ॥"
स्वयं दोहमित्यत्र यचितक्षेति वा पाठः ।
"न निन्द्यां नखकेशे विप्रे पादयोर्नतिं तथा ।
प्रतिकूलं चरेत् स्त्रीणां शुक्रा च स्नानधावनम् ॥
अदत्तं मांसलञ्च तथा चैव क्षियन्तथा
मद्यवाद्यगनाश्चैव शक्रादपि हरेत् श्रियम् ॥
मत्तैरयुक्तः परदारसेवी
आचारहीनः परसेवकश्च ।
बह्वीश्वरी परिवादशीलः
स्त्रं निर्हरं दम्भमयं त्यजामि ॥
शूयनञ्चार्द्रपादेन रात्रिवासो दिने तथा ।
नोत्तरीयमधः कुर्यात् शुष्कपादेन भोजनम् ॥
अशुचिं स्नानवस्त्राच्च दुर्गन्धामसुखावहाम् ।
अभूतवाक्यपुष्पाच्च न कुर्यादात्मनस्तनुम् ॥
कर्णे च वदने ग्राणे तथा करतलेऽपि च ।
पादे पृष्ठे तथा नेत्रे न कुर्यादङ्गलेपनम् ॥
चत्वर्जने हृतं श्रेयो सुखत्यजे धनक्षयः ।
दरिद्रः कर्णजपे च पादपृष्ठे तथायुषः ॥
गन्धं पुष्पं यथा तोयं रत्नञ्चैव महोदधिम् ।
गृहीतं प्रथमं वस्त्रं वर्जयेन्न कदाचन ॥
अजरजः खररजस्तथा सम्मार्जनीरजः ।
स्त्रीणां पादरजो राजन् शक्रादपि हरेत् श्रियम् ॥
कुचैलिनं दन्तमलप्रधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम् ।
सूर्योदये चास्तमिते तु शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥"
महाशठमित्यत्र वह्वाशिनमिति वा पाठः ।
"नित्यं छेदस्तृणानां क्षितिनखलिखनं पादयो-
रक्षशौचं
एकाङ्गे तैलहीनं वसनमलिनतावस्त्रं गृहे-
जानाम् ।
ह्रे सन्ध्ये चापि निद्रा दिवसनशयनं यासहासा-
तिरेकः
खाङ्गे पीठे च वासं हरति धनपतेः केशव-
स्यापि लक्ष्मीम् ॥"
अवस्थानमित्यत्र रूक्षता इति वा पाठः ।
"एवं यः कुरुते नित्यं मयोक्तानि च केशव ! ।
तुष्टा भवामि तस्याहं त्यक्ष्येवा निश्चला यथा ॥
श्रीभावितमिदं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
तदृग्रहं विपुलं रम्यं नित्यं भवति नान्यथा ॥
व्याधितो मुच्यते रोगी बद्धो मुच्येत बन्धनात् ।
आपदस्तस्य नश्यन्ति तमः सूर्योदये यथा ॥"
इति स्कन्दपुराणे लक्ष्मीकेशवसंवादे लक्ष्मी-
चरित्रं समाप्तम् ॥ * ॥ दुर्गा । यथा,—
"स्तुतिः स्त्रिद्विरिति ख्याता श्रिया संश्रयणाच्च वा ।
लक्ष्मीर्भा लजना वापि क्रमात् सा कान्ति-
रुच्यते ॥
इति देवीपुराणे ५५ अध्यायः ॥
लक्ष्मिः । शोभा । ऋद्धौषधम् । हरिनामौ-
षधम् । धन्विनीवृक्षः । इति मेदिनी । मे, २८ ।
सीता । वीरवोधितृ । इति शब्दरत्नावली ॥
कमलपत्निनी । हरिद्रा । भूमौ । क्षयम् । सक्ता ।
इति राजनिर्घण्टः ॥ मोक्षप्राप्तिः । इति
चक्रोटीकायां नागभट्टः ॥ (शोभा । यथा,
कुमारे । १ । ३८ ।
"कपालनेत्रान्तरलब्धमार्गै-
र्ज्योतिःप्ररोहैरुदितैः शिरस्तः ।
स्वयालकूनाधिकसौकुमार्यां
बालस्य लक्ष्मीं स्वपयन्तमिन्दोः ॥")
लक्ष्मीकान्तः, पुं, (लक्ष्म्याः कान्तः ।) नारायणः ।
यथा,—
"नमः कमलनेत्राय हरये परमात्मने ।
जगतः पालयित्रे च लक्ष्मीकान्त नमोऽस्तु ते ॥"
इति लक्ष्म्याष्टमीव्रतकथा ॥
लक्ष्मीपद्मं, क्ली, (लक्ष्म्याः पद्ममिवावासस्थानम् ।)
रक्तोत्पलम् । इति त्रिकाण्डशेषः । लक्ष्मी-
वेश्म च ॥
लक्ष्मीजनार्दनः, पुं, (लक्ष्म्या सहितो जनार्दनः ।)
शालग्रामविशेषः । तस्य लक्षणं यथा,—
"एकद्वारे चतुश्चक्रं नवीननीरदोपमम् ।

लक्ष्मीजनार्हनो ग्रेयो रहितो वनमालया ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
(तथा, देवीभागवते । ६ । २४ । ५६ ।)

लक्ष्मीताल:, पुं, (लक्ष्मीयुक्तस्ताल: ।) श्रीताल-वृक्ष: । इति राजनिर्घण्ट: ॥ तौर्य्यत्रिकस्य परिच्छेदविशेष: । तस्य द्रुतलघ्वनुविरामक्रमो यथा,—
"दौ लो गू द्वौ विरामान्तौ दलौ गू द्विराम-मकः ।
विरामान्तौ द्रुतौ लश्च द्रुतौ लघुविरामक: ॥"
इति सङ्गीतरत्नाकरे लक्ष्मीताल: ॥

लक्ष्मीनारायण:, पुं, (लक्ष्म्यान्वितो नारायण: ।) ग्रामविशेष: । तस्य लक्षणं यथा,—
"एकद्वारे चतुश्चक्रं वनमालाविभूषितम् ।
नवीननीरदाकारं लक्ष्मीनारायणाभिधम् ।"
इति ब्रह्मवैवर्त्तपुराणम् ॥

लक्ष्मीनृसिंह:, पुं, (लक्ष्मीयुतो नृसिंह: ।) ग्रामविशेष: । तस्य लक्षणं यथा,—
"द्विचक्रं विस्तृतास्यञ्च वनमालाविभूषितम् ।
लक्ष्मीनृसिंहं विज्ञेयं ग्रहिणाञ्च सुखप्रदम् ।"
इति ब्रह्मवैवर्त्तपुराणम् ॥

लक्ष्मीपति:, पुं, (लक्ष्म्या: पति: ।) वासुदेव: । नरपति: । इति मेदिनी । ते, २१५ । (यथा, किरातें । १ । ४४ ।
"अथ क्षमामेव निरस्तविक्रम-
श्चिराय पर्य्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलब्ध कार्म्मुकं
जटाधर: सन् जुहुधीह पावकम् ॥")
लवङ्गवृक्ष: । पूग: । इति विश्व: ॥

लक्ष्मीपुत्र:, पुं, (लक्ष्म्या: पुत्र: ।) कामदेव: । चोटक: । इति मेदिनी । रे, २२३ । कुश: । लव: । इति शब्दरत्नावली ॥

लक्ष्मीपुष्प:, पुं, (लक्ष्मीयुक्तं सौन्दर्य्यविशिष्टं पुष्प-मिवास्य ।) पद्मरागमणि: । इति हेमचन्द्र: ॥

लक्ष्मीफल:, पुं, (लक्ष्म्यास्तनयं फलं यत्र ।) विल्व-वृक्ष: । इति राजनिर्घण्ट: ॥

लक्ष्मीवान्, [त्] पुं, (लक्ष्मी: शोभाऽस्यस्येति । मतुप् । मस्य व: ।) धनवृक्ष: । इति शब्द-माला ॥ श्वेतरोहितवृक्ष: । इति राजनिर्घण्ट: ॥ (विष्णु: । यथा, महाभारते । १३।१४८।५२ । "सर्व्वज्ञश्चजगत्साक्षी लक्ष्मीवान् समितिञ्जय:॥")

लक्ष्मीवान्, [त्] त्रि, (लक्ष्मीरस्यस्येति ।) श्रीयुक्त: । धनवान् । तत्पर्य्याय: । लक्ष्मव: २ श्रील: ३ श्रीमान् ४ । इत्यमर: ॥ (यथाह कश्चित् । "श्रीषे धराभराक्रान्ते श्रीषे विश्वम्भर: श्रिया । लक्ष्मीवन्तो न पश्यन्ति दु:खार्त्ता परवेदनाम् ॥")

लक्ष्मीवेष्ट:, पुं, (लक्ष्मीयुक्तो वेष्ट: ।) श्रीवेष्ट: । इति राजनिर्घण्ट: ॥

लक्ष्मीश:, पुं, (लक्ष्म्या ईश: ।) विष्णु: । इति सुग्धबोधव्याकरणम् ॥

लक्ष्मीसमाऽऽख्या, स्त्री, (लक्ष्म्या: सम आख्यो यस्या: ।) सीता । इति शब्दरत्नावली ॥

लक्ष्मीसहज:, पुं, (लक्ष्म्या सह जात: इति । जन् + ड: । चीराभिजातत्वादस्य तथात्वम् ।) चन्द्र: । इति शब्दरत्नावली ॥

लक्ष्म्याराम:, पुं, (लक्ष्म्या आराम: ।) वनभेद: । इति शब्दमाला ॥

लक्ष्यं, क्ली, (लक्ष्यते यदिति । लक्ष् + ण्यत् ।) शरवेधस्थानम् । तत्पर्य्याय: । लक्षम् २ शर-व्यम् ३ । इत्यमर: । २ । ८ । ८६ । प्रतिकाय: ४ वेध्यम् ५ । इति जटाधर: ॥ वेधम् ६ । इति शब्दरत्नावली ॥ (यथा, कुमारे । ३ । ६४ ।
"कामस्तु बाणावसरं प्रतीक्ष्य
पतङ्गवद्विन्नसुखं विविक्षु: ।
उमासमक्षं शरवद्दलक्ष्य:
शरासनज्यां मुहुराममर्श ॥")

लक्ष्य:, त्रि, लक्षणया बोध्य: । इति साहित्य-दर्पणम् ॥ (लक्ष्यते इति । लक्ष् + ण्यत् ।) दर्शनीय: । इति लक्षधातोर्यदर्शनात् । (व्याप्त: । इत्यमर: ॥ यथा, रघु: । ६ । ८१ ।
"रोमाञ्चलक्ष्येण स गात्रयष्टिं
भित्वा निराक्रामदरालकेश्या: ॥"
अनुमेय: । इति मल्लिनाथ: ॥ यथा, कुमारे । ५ । ७४ ।
"इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ॥"
तथा च रघु: । ४ । ५ ।
"छायामखण्डलक्ष्येण तमद्रक्ष्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥")

लख, ङ्क्ष्पि । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् ।) लखति । क्ष्पि गतौ । इति दुर्गादास: ॥

लख, ङ् क्ष्पि । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् ।) ङ्, लक्षयते । क्ष्पि गतौ । इति दुर्गादास: ॥

लग, ङ् खङ्गे । गतौ । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-खङ्गे अक०-गतौ सक०-सेट् ।) ङ्, लङ्गयते । खङ्गो गतिवैकल्यम् । इति दुर्गा-दास: ॥

लग, क रके । इति कविकल्पद्रुम: ॥ (चुरा०-पर०-सक०-सेट् ।) क, लागयति । रके खादाग्रह: । रके इति रक क खाद आपने । इत्यस्य णेरनित्यत्वे भावे अलि रूपम् । इति दुर्गादास: ॥

लग, म ए सङ्गे । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-अक०-सेट् ।) म, लगयति । ए, अल-गीत् । गलति अधर ओष्ठे । इति दुर्गादास: ॥

लगड़, त्रि, चारु । इति त्रिकाण्डशेष: ॥

लगितं, त्रि, सङ्गयुक्तम् । लागा इति भाषा । इति लगधातो: कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥

लगुड़:, पुं, दण्ड: । लाठी इति भाषा । इत्यमर: ॥ लगुड़ो वंशादिमयो दण्ड: । लौहमयोऽस्त्रभेद: । इति सुभूति: । लगुड़ो लौहमयो यष्टिरन्यत्रो-पचारादित्यन्ये । इति तट्टीकायां भरत: ॥

लग्नं (अस्यातिपरिमाणादि यथा, शुक्रनीतौ ।
"लगुड़: लक्ष्मपाद: स्यात् दृढ्यंग्र: स्थूलशीर्षक: ।
लौहवद्दार्य्यभागश्च हस्तदेह: सुपीवर: ॥
एकाकारो दृढ़ाङ्गश्च तथा हस्तद्वयोन्नत: ।
उत्थानं पातनञ्चैव पेषणं पोषणं तथा ।
चतस्रो गतयस्तस्य पञ्चमी नेह विद्यते ।
दृढ़काय: पत्तिवर्गो तेन युध्येत शत्रुभि: ॥")

लग्नं, क्ली, (लगति फले इति । लग सङ्गे + "ल्युब्-खान्तध्वान्तलग्नेति ।" ७ । २ । १८ । इति निपातनात् साधु ।) राशीनामुदय: । इत्यमर: ॥ राति फलं राशिस्तालग्नयतीति कारः । अहोरात्र-मध्ये द्वादशराशय उदयन्ति । उदय: पूर्व्वा-चलसंयोग: । तेषां क्रमेण उदयाचलसंयोगो लग्नं यो लगुजो व्रीड़े ओदित्वात्र: निपातना-दस्य ग: । इति तट्टीकायां भरत: ॥ तेषां मूल्यायनांशपरिमाणं यथा,—
"रामोऽग्नवेदै-३ । ४७ जैलधिषु मैत्रे-४ ।१७
व्योमो रसै: ५ । ६ पक्ष खसागरैश्च ५ । ४० ।
वाम: कुवेदै-५।४१ विंधयोऽङ्कयुग्मै: ५। २६
क्रमोत्क्रमाभ्यामेवतुलादिमानम् ।"
तथा हि ।
मेषस्य ३ । ४७ ॥ तुलाया: ५ । २६ ॥
वृषस्य ४ । १७ ॥ वृश्चिकस्य ५ । ४१ ॥
मिथुनस्य ५ । ६ ॥ धनुष: ५ । ४० ॥
कर्कटस्य ५ । ४० ॥ मकरस्य ५ । ६ ॥
सिंहस्य ५ । ४१ ॥ कुम्भस्य ४ । १७ ॥
कन्याया: ५ । २६ ॥ मीनस्य ३ । ४७ ॥
इति दीपिका । * । दृग्यङ्कुलाधिकपञ्चाङ्कुल-प्रमे कलिकातास्वदेशे वर्त्तमानोनविंशायनांशे प्रामाणिककारिका यथा,—
"वेदोऽङ्गै: ४ । ६ सोऽम्बरवेदै ४ । ४८ रिष्टरगन-यनै: ५।२७ सोऽम्बरीक्षाम्बुनाथै: ५ । ४० ।
पारावाराग्नयासै-५।३४ गंगनगनयनै: ५ । २६
षट्त्रिभि-५।३६ खवेदै: ५ । ४१ ।
अङ्कास्त्राभि: ५ । १६ समुद्रोऽसुरुचिभि-४ ।३५
रनलोऽश्विभि: ३।५८ सोऽगवेदै-३ । ४७ ।
मैषादेकोनविंशे गणितपरिगतं मानमत्रा-यनांशे ।" * ।
उदयलग्नास्तलग्नयोर्दिनं प्रति रविभोग्यं यथा,
"लग्नदक्षफलं द्विघ्नं तत्संख्यं क्रमत: फलम् ।
विपलञ्च रवेर्भोग्यमेवं कल्पनमक्षमे ॥"
इति ज्योतिषम् ॥

एतयोर्विवरणं यथा,—
तत्र प्राचीनलग्नमानम् ।

लग्ना:	दिनसुक्तम् ।	मासंसुक्तम् ।
यथा	पलम् । विपलम् ।	दण्ड: । पलम् ।
१ मेष: ।	७ । ३४ ॥	१ । ४७ ॥
२ वृष: ।	८ । ३४ ॥	१ । १७ ॥
३ मिथुनम् ।	१० । १२ ॥	१ । ६ ॥
४ कर्कट: ।	११ । २० ॥	१ । ४० ॥
५ सिंह: ।	११ । २२ ॥	१ । ४१ ॥
६ कन्या ।	१० । ५८ ॥	१ । २६ ॥

लग्नाः दिनभुक्तम्। मासभुक्तम्।
यथा पलम्। विपलम्। दण्डः। पलम्।
७ तुला। १०। ५८॥ ५। २६॥
८ वृश्चिकः। ११। २२॥ ५। ४१॥
९ धनुः। ११। २०॥ ५। ४०॥
१० मकरः। १०। १२॥ ५। ६॥
११ कुम्भः। ८। ३४॥ ४। १७॥
१२ मीनः। ७। ३४॥ ३। ४७॥
तच्च खदेशग्राह्यनिकलग्नमानम्।

लग्नाः दिनभुक्तम्। मासभुक्तम्।
यथा पलम्। विपलम्। दण्डः। पलम्।
१ मेषः। ८। १२॥ ४। ६।
२ वृषः। ९। ३६॥ ४। ४८॥
३ मिथुनम्। १०। ५४॥ ५। २७॥
४ कर्कटः। ११। २०॥ ५। ४०॥
५ सिंहः। ११। ८॥ ५। ३४॥
६ कन्या। १०। ५८॥ ५। २६॥
७ तुला। ११। १२॥ ५। ३६॥
८ वृश्चिकः। ११। २२॥ ५। ४१॥
९ धनुः। १०। ३८॥ ५। १६॥
१० मकरः। ९। १०॥ ४। ३५॥
११ कुम्भः। ७। ५६॥ ३। ५८॥
१२ मीनः। ७। ३४॥ ३। ४७॥

अथ लग्नकालीनलग्नस्थग्रहसूचितफलम्।

"लग्ने सूर्येऽस्थिरोगी ग्रन्थिनि बलयुतो
रूपवान् वित्तयुक्तो
भौमे यङ्गः सुवाग्मी ग्रन्थधरतनये सर्व-
ग्राह्यार्थवेत्ता।
जीवे दाता पवित्रः सुकविरथ गते भार्गवे
मल्लवेश्यः
सौरौ कण्डूतिगात्रस्तमसि च नियतं वञ्चितो
धर्म्महीनः॥"
इति ज्योतिस्तत्त्वम्॥ *॥

अपि च।

हरिरुवाच।

"उदयर्क्षं समारभ्य राशौ भानुः स्थितो हर।
स्वराश्यादौ व्रजेदह्नि षड्भिः षड्भिस्तथा
निशाम्॥
मौने मेषे च पञ्च स्युर्वृषकुम्भयोः।
मकरे मिथुने तिस्रः पञ्च चापे च कर्कटे॥
सिंहे च वृश्चिके षट् च सप्त कन्या तुले तथा।
एता लग्नप्रमाणेन घटिकाः परिकीर्त्तिताः॥
ग्ररपूर्व्वावग्राहेयुरसाब्धीष्वधिसागराः।
लङ्घोदया हि ह्रस्वं वस्तु लग्ना मेषादयोऽथवा॥
मेषलग्ने भवेद्दन्ता वृषे भवति कामिनी।
मिथुने सुभगा कन्या वेश्या भवति कर्कटे॥
सिंहे चैवाल्पपुत्रा च कन्यायां रूपसंयुता।
तुलायां रूपमैश्वर्यं वृश्चिके कर्कशा भवेत्॥
सौभाग्यं धनुषि स्याच्च मकरे नीचगामिनी।
कुम्भे चैवाल्पपुत्रा स्याद्मीने वैराग्यसंयुता॥
तुला कर्कटको मेषो मकरश्चैव राशयः।
चरकार्य्याणि कुर्य्याच्च स्थिरकार्य्याणि चैव हि॥
पद्मानने वृषः कुम्भो वृश्चिकः स्युः स्थिराणि हि।
कन्या धनुश्च मीनश्च मिथुनं द्विस्वभावतः॥
द्विस्वभावानि कर्म्माणि कुर्य्यादेषु विचक्षणः।
यात्रा चरेण कर्त्तव्या प्रवेश्यं स्थिरेण तु।
देवस्थापनवेश्मादि द्विस्वभावेन कारयेत्॥"
इति गारुडे ६२ अध्यायः॥

लग्नः, पुं, (लग्+क्तः। निपातनात् साधुः। यद्वा, लस्ज+क्तः। "ओ लस्जी। लग्नः लग्नवान्। लसृजेरोदनुबन्धबलादिड्भावे नत्वं स्यात्।" इति क्षीरतरङ्गे दुर्गसिंहः।) स्तुतिपाठकः॥ तत्पर्य्यायः। प्रातर्गेयः २ स्तुतिव्रतः ३। इति त्रिकाण्डशेषः॥ स्तुतः ४। इति जटाधरः॥

लग्नः, त्रि, (लस्ज+क्तप्रत्ययेन साधुः।) सक्तः। लज्जितः। इति मेदिनी॥

लग्नकः, पुं, (लग्न एव। स्वार्थे कन्।) प्रतिभूः। इत्यमरः॥ ई लागा इति भाषायां इति च ख्याते। तत्कार्य्ये लग्नकः। ओ लस्जी व्रीड़े क्तः। स्वार्थे कन्। प्रतिनिधिर्भवति प्रतिभूः क्विप्। इति तट्टीकायां भरतः॥

लग्निका, स्त्री, नग्निका। इत्यमरटीका॥

लघ, ङ श्लाघे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ङ, लघ्यते। श्लाघ इह अल्पीकरणम्।

'यं व्याधिरतिदीप्ताङ्गं कदाचित्तु न लघ्यति॥'
इति हलायुधः॥

गतावप्यन्ये। अन्ये चालङ्घिषुः श्लैलात्। इति दुर्गादासः॥

लघ, ङ क त्वरि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) ङ क, लघ्यति। त्वरि दीप्तौ। इति दुर्गादासः॥

लघ, ङ ङ असुगत्योः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सक०च-सेट्।) ङ, लघ्यते। ङ, लङ्घते। असुक् भोजनाभावः। तथा च।

'ये गुणा लङ्घने प्रोक्तास्ते गुणा लघुभोजने॥'
इति वैद्यकम्॥

लङ्घने उपवासे इत्यर्थः। इति दुर्गादासः॥

लघट्, पुं, (लङ्घते मध्यस्थानमसृष्ट्वोत्तरस्थाने पतति द्रुतं इतस्ततो गच्छतीति वा। लङ्घ+"लङ्घेर्नलोपश्च।" उणा०१।१३४। इति अटिः। नलोपश्च धातोः।) वायुः। इत्युणादिकोषः॥

लघटिः, पुं, (लघ गतौ+अटिः। इदभावः।) वायुः। इत्युणादिकोषः॥

लघिमा, [न्] पुं, (लघोर्भावः। लघु+"पृथ्वादिभ्य इमनिज्वा।" ५।१।१२२। इति इमनिच्।) लघुत्वम्। (यथा, रघुः। १३। ३७।

"ज्ञात्वा हविर्गन्धि रजोविमुक्त-
समश्नते मे लघिमानमात्मा॥")

तनु ग्रिवस्याष्टैश्वर्य्यान्तर्गत ऐश्वर्य्यविशेषः। यथा, "लघिमा वपुषितूलं प्राकाम्यं महिमाणिमा।
यत्र कामावसायित्वं प्राप्तिरैश्वर्य्यमष्टधा॥"
इति हेमचन्द्रः॥

(अबहुमतत्वम्। दुःखत्वम्। यथा, आर्य्यासप्तशत्याम्। ६०।

"अन्ये लघिमा पश्चात् महतापि विधीयते नहि महिम्ना।
वामन इति त्रिविक्रममभिदधति दशावतार-विदः॥")

लघिष्ठः, त्रि, अयमनयोरेषां वा अतिशयेन लघुः इत्यर्थे इष्ठप्रत्ययेन निष्पन्नः। अतिशयलघुत्वयुक्तः। इति व्याकरणम्॥ (यथा, विदग्धमुखमण्डने।

"भविचौ रम्भोरु त्रिदशवदनम्लानिरधुना
न रामोऽपि स्थाता न युधि पुरतो लक्ष्मणयुतः।
गमिष्यत्येवोच्चैर्विपदमधुना वानरचमू-
र्लघिष्ठेदं षष्ठाक्षरपरविलोपात् पठ पुनः॥"
सीतारावणयोरुक्तिप्रत्युक्तिरियम्। सप्तमाक्षरलोपे लेवं वाक्यम्। यथा। "दशवदनम्लानिः।" "स्थाता युधि।" "उच्चैः पदम्॥")

लघीयान् [स्] त्रि, अयमनयोरेषां वा अतिशयेन लघुः इत्यर्थे ईयसुप्रत्ययेन निष्पन्नः। अतिशयलघुत्वयुक्तः। इति व्याकरणम्॥ (यथा, महाभारते। २। ६३। १४।

"न वै सन्धिं पालयते लघीयान्
यत्तां समानेष्यति राजपुत्रि!॥")

लघु, क्ली, (लङ्घते अनेनेति। लङ्घ+"लङ्घेर्नलोपश्च।" उणा० १। ३०। इति कुः। धातोर्नलोपश्च।) ग्रीवम्। इत्यमरः॥ (यथा, रामायणे। २। ४६। २१।

"यावदेव तु संसुप्तास्तावदेव वयं लघु।
रथमारुह्य गच्छामः पन्थानमकुतोभयम्॥")

लघ्वाशुरु। इति मेदिनी। घे, ५॥ लामज्जकम्। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—

"लामज्जकं सुगन्धं स्यादल्पाग्रं लघ्वं लघु।
दृढकाण्डकं सेव्यं नलदच्छवदातकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
हस्ताश्विनीपुष्यनक्षत्राणि। यथा, दक्षसंहितायाम्। ६८। ६।

"लघु हस्ताश्विनिपुष्याः
पक्ष्यरतिज्ञानभूषकलासु।
शिल्पौषधयानादिषु
सिद्धिकराणि प्रदिष्टानि॥"

कालपरिमाणविशेषः। यथा, भागवते। ३। ११। ७।

"त्रयाणु पञ्च विदुः काष्ठां लघुता दश पञ्च च।
लघूनि वै समाम्नाता दश पञ्च च नाड़िका॥"

पुं, प्राणायामविशेषः। यथा, मार्कण्डेये। ३६। १३—१४।

"लघुमध्योत्तरीयाख्याः प्राणायामस्त्रिधोदितः।
तस्य प्रमाणं वक्ष्यामि तदर्कं शृणुष्व मे॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः।
त्रिगुणाभिस्तु मात्राभिरुत्तमः परिकीर्त्तितः॥")

लघुः, स्त्री, एका नाम ओषधिः। इति मेदिनी। घे, ५॥ (तथोक्ताः पर्य्यायः।

'सृक्काद्वयगुञ्जाऽलिर्वी देवी मरुन्माला लता लघुः।
मनुद्रान्ता वधूः कोटिवर्षालङ्कोपिकेत्यपि ।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।)
लघुः, त्रि, (लङ्घ + कुः। नलोपश्च।) अगुरुः। (यथा,—
"शृगादपि लघुस्तूलस्तूलादपि च भिक्षुकः।
न मां स्पृशेद् वायुरिति कस्मादर्थं प्रार्थनग्रहया ।"
इत्युद्भटः।)
मनोज्ञः। (हृद्यः। इत्यमरः। यथा, रघुः। ११। २१।
"नाम्भसां कमलशोभितां तथा
श्राखिनाञ्च न परिश्रमच्छिदाम्।
दर्शनेन लघुना यथा तयोः
प्रीतिमापुरुभयोस्तपस्विनः।")
निःसारः। इति मेदिनी। धे, ५। (यथा, रघुः। १२। ६६।
"श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः।
महार्घवपरिक्षेपं लङ्कायाः परिखालघुम्।")
ह्रस्वः। इति हेमचन्द्रः। ४। याकरणोक्तलघुसंज्ञा यथा। ह्रस्वो लघुः दीर्घो गुरुरित्युच्चारणवशादुच्यते। तथा संयोगे सति ह्रस्वोऽपि गुरुर्गुरुसमतोऽपृच्छ इति वर्णनाच्च। इति दुर्गासिंहलघुकलापवृत्तिः। ४। छन्दःशास्त्रोक्तं लघुलक्षणं यथा,—
"मध्यगुरुश्चिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः।
गुरुरेको गकारस्तु लकारो लघुरेकक।"
इति छन्दोमञ्जरी।
लघुकायः, पुं, (लघुः कायो यस्य।) छागः। इति त्रिकाण्डशेषः। क्षुद्रशरीरश्च।
लघुकाश्मर्यः, पुं, (लघुः काश्मर्यः।) कट्फलवृक्षः। इति राजनिर्घण्टः।
लघुखड्किका, स्त्री, (लघुः खड्किका।) क्षुद्रखड्गः। तत्पर्य्यायः। आसन्दी २। इति हारावली। २०६।
लघुगन्धः, पुं, (लघुर्गन्धः।) अश्विनीपुष्यहस्तनक्षत्राणि। यथा,—
"उषः पूर्वमघात्रका ध्रुवगजक्षीण्युत्तराणि क्षभू-
र्मातादित्यहरित्रयं चरगजः पुष्यान्विहस्ता लघुः।"
इति दीपिका।
लघुगर्गः, पुं, (लघुर्गर्ग इव।) त्रिकण्टकमत्स्यः। इति हारावली। २६०।
लघुचिर्भिटा, स्त्री, (लघुचिर्भिटा।) नगेर्भार। इति राजनिर्घण्टः।
लघुजङ्गलः, पुं, लावकपक्षी। इति त्रिकाण्डशेषः।
लघुदन्ती, स्त्री, (लघुः क्षुद्रा दन्ती।) क्षुद्रदन्तीवृक्षः। यथा,—
"लघ्वी दन्ती विशल्या च स्वादुदम्भरपर्ण्यपि।
तर्येरण्डफला ग्रीष्मा श्लेष्मघण्टा घुणप्रिया।
वराहाङ्घ्री च कथिता निकुम्भश्च मकूलकः।"
अस्या गुणाः।
"दन्तीद्वयं सरं पाके रसे च कटु दीपनम्।
गुदाङ्कुराश्मशूलास्रकण्डूकुष्ठविदाहजित्।
तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रिमीन्।"
इति भावप्रकाशः।
तत्फलगुणाः।
"क्षुद्रदन्तीफलन्तु स्याच्मधुरं रसपाकयोः।
शीतलं हृद्यविष्मूत्रं गलशोथकफापहम्।"
इति भावप्रकाशः।
लघुदुन्दुभिः, पुं, (लघुर्दुन्दुभिः।) झगड़वाद्यम्। इति शब्दरत्नावली।
लघुद्राक्षा, स्त्री, (लघुः क्षुद्रा द्राक्षा।) काकलीद्राक्षा। इति राजनिर्घण्टः।
लघुनाम, [न्] क्ली, (लघु लघुत्वबोधकं नाम यस्य।) अगुरु। इति शब्दचन्द्रिका।
लघुपञ्चमूलं, क्ली, (लघु क्षुद्रं पञ्चमूलम्।) क्षुद्रपञ्चमूलपाचनम्। तत्तु शालपर्णीपृश्निपर्णीबृहतीकण्टकारीगोक्षुरसंयुक्तम्। यथा,—
"शालपर्णी पृश्निपर्णी वार्ताकी कण्टकारिका।
गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम्।"
अस्य गुणाः।
"पञ्चमूलं लघु स्वादु वल्यं पित्तानिलापहम्।
नात्युष्णं दीपनं हृद्यं ज्वरश्वासाग्निसादजित्।"
इति भावप्रकाशः।
लघुपचकः, पुं, (लघूनि पचादि यस्य। कप्।) रोचनी। शुकारोचनी इति ख्यातः। इति शब्दचन्द्रिका।
लघुपत्री, स्त्री, (लघूनि पत्राणि यस्याः। ङीष्।) अश्वत्थवृक्षः। इति राजनिर्घण्टः।
लघुपिच्छिलः, पुं, (लघुः पिच्छिलः।) भूकर्ब्दारकः। इति राजनिर्घण्टः।
लघुपुष्पः, पुं, (लघूनि क्षुद्राणि पुष्पाणि यस्य।) भूमिकदम्बः। इति राजनिर्घण्टः। (भूमिकदम्बशब्देऽस्य विशेषो ज्ञेयः।)
लघुबदरः, पुं, (लघुः क्षुद्रो बदरः।) क्षुद्रकोलिः। तत्पर्य्यायः। कक्षपक्षः २ बहुकरः ३ कक्षपक्षः ४ दुरालभः ५ मधुरः ६ दरदारः ७ प्रियप्रियः ८। इति राजनिर्घण्टः। अस्य फलगुणाः।
"कर्कन्धुः क्षुद्रबदरं कथितं पूर्वसूरिभिः।
अम्लं स्यात् क्षुद्रबदरं कषायं कथितं मनाक्।
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम्।
शुष्कं मेद्यग्निजनकं सर्वं लघु क्षणाक्षमा-
क्षमितं।"
इति भावप्रकाशः।
अस्य पक्वफलगुणाः। मधुराम्लत्वम्। कफवातनाशित्वम्। रुच्यत्वम्। स्निग्धत्वम्। जन्तुकारकत्वम्। दुर्जन्तिपित्तार्तिदाहशोषघ्नत्वञ्च। इति राजनिर्घण्टः।
लघुवदरी, स्त्री, (लघुः क्षुद्रा बदरी।) भूबदरी। इति राजनिर्घण्टः।
लघुब्राह्मी, स्त्री, (लघुः क्षुद्रा ब्राह्मी।) क्षुद्रब्राह्मी। तत्पर्य्यायः। जलोद्भवा २ सुप्रसन्ना ३। इति राजनिर्घण्टः।
लघुमत्स्यः, पुं, (लघुः क्षुद्रो मत्स्यः) क्षुद्रमत्स्यः। इति राजनिर्घण्टः।
लघुमांसः, पुं, (लघु स्वल्पं मांसं यस्य।) तित्तिरिपक्षी। इति त्रिकाण्डशेषः।
लघुमांसी, स्त्री, गन्धमांसी। इति राजनिर्घण्टः।
लघुलयं, क्ली, (लघु शीघ्रं लीयते इति। ली + अच्।) वीरमूलम्। इत्यमरः।
लघुसदाफला, स्त्री, (सदा फलं यस्याः सा। लघुः सदाफला।) लघूदुम्बरिका। इति राजनिर्घण्टः।
लघुहस्तः, पुं, (लघुः क्षिप्रकारी हस्तो यस्य।) शीघ्रवेधी। इति हेमचन्द्रः। ३। ४३१।
(बाणलिङ्गेऽपि। यथा, कथासरित्सागरे। ४२। १३३।
"स राजपुत्रस्त्रिभिरेव रक्षसस्तस्य तच्छिरः।
भूयः खड्गप्रहारेण लघुहस्तो विधाकरोत्।"
यथा च।
"तत्राधिगतशास्त्रार्थो दृढकर्म्मा स्वयं कृती।
लघुहस्तः शुचिः शूरः सज्योपस्करभेषजः।
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः।
सद्वृत्तधर्म्मपरो यश्च स भिषक् पाद उच्यते।"
इति सुश्रुते सूत्रस्थाने ३४ अध्यायः।)
लघुहैमदुग्धा, स्त्री, (लघुर्हैमदुग्धा।) लघूदुम्बरिका। इति राजनिर्घण्टः।
लघूदुम्बरिका, स्त्री, (लघुः क्षुद्रा उदुम्बरिका।) क्षुद्रोडुम्बरिका। छोट डुमुर इति भाषा। तत्पर्य्यायः। लघुपञ्चफला २ लघुहैमदुग्धा ३ लघुसदाफला ४ लघ्वादुडुम्बरिका ५। रसवीर्य्यविपाकेषु उडुम्बरात् किञ्चिन्न्यूनगुणेयम्। इति राजनिर्घण्टः।
लङ्घी, स्त्री, (लघु + ङीष्।) लाघवयुक्ता। (यथा,—
"गुर्व्वी पिच्छी खराद्यर्थं लङ्घी सैव विपर्य्ययात्।
शुक्लानामाशु जीर्य्यन्ते मृदुलादवलेहिका।"
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे।)
स्वन्दनभेदः। इति मेदिनी। धे, ५। एका। इति राजनिर्घण्टः।
लङ्का, स्त्री, (रमन्तेऽस्यामिति। रम् + बाहुलकात् कः। रस्य लत्वम्। इत्युज्ज्वलः। ३। ४०।) रक्षःपुरी। (यथा, नैषधे। ३। ६०।
"चेतो न लङ्कामयते मदीयं
वाञ्छत्र कुत्रापि च साभिलाषम्।")
ज्योतिःशास्त्रमते सा च पृथिव्या मध्यभागे तिष्ठति। लङ्कोदयात् चरखण्डेभ्यः खदेशे लग्नप्रमाणं भवति। यथा,—
"लङ्का कुमध्ये यमकोटिरस्याः
प्राक् पश्चिमे रोमकपत्तनञ्च।

अधस्तत: सिद्धपुरं सुमेरु:
सौम्येऽध याम्ये वडवानलश्च ।
कुवृत्तपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति ॥"

अपि च ।

"यल्लङ्कोज्जयनीपुरोपरिकुरुक्षेत्रादिदेशान् स्पृशन्
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुव: ।
आदौ प्रागुदयोऽपरत्र विषये पश्चाद्धि रेखोदयात्
स्यात्तस्मात् क्रियते तदन्तरभुवं खेटैष्यगं खं फलम् ॥"

इति सिद्धान्तशिरोमणि: ॥ * ॥

अथ लङ्कापुरीवर्णनम् ।

ऋषिरुवाच ।

"त्रिंशद्योजनविस्तीर्णा स्वर्गप्राकारतोरणाम् ।
दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वत: ।
शिखरे तस्य मध्यस्य मध्यमम्बुधिसन्निधौ ॥
पतद्भिश्च दुग्धार्णा टङ्कच्छिन्नां चतुर्दिशम् ।
प्रकारार्थे मतङ्गेन पूर्वं प्रयत्नात् कृतवत्तरे: ॥
वसन्ति तत्र दुर्द्धर्षा: सुखं राक्षसपुङ्गवा: ।
अमरावतीं समासाद्य सेन्द्रा इव दिवौकस: ॥
लङ्कादुर्गं समासाद्य शूरैर्नां प्रकरुदना: ।
दुराधर्षा भविष्यन्ति राक्षसैर्बहुभिर्वृता: ॥"

इति वह्निपुराणे कपिलदर्शननामाध्याय: ॥ * ॥

शाखा । शाकिनी । कुलटा । इति मेदिनी । के, ३३ ॥ धान्यविशेष: । तत्पर्य्यायय: । करालचिपुटा २ काण्डिका ३ रूक्षशाल्यिका ४ । अस्या गुणा: । रूक्षत्वम् । हिमत्वम् । गौरुत्वम् । पित्तनाशित्वम् । वातकारित्वम् । गुरुत्वञ्च । इति राजनिर्घण्ट: ॥

लङ्कादाही, [न्] पुं, (लङ्कां दहति तच्छील: । दह् + णिनि: ।) हनूमान् । इति शब्दरत्नावली ॥

लङ्काधिपति:, पुं, (लङ्काया अधिपति: ।) रावण: । इति जटाधरभूरिप्रयोगौ ॥ (यथा, रघु: । ६ । ६२ ।

"पुरा जनस्थानविमर्दशङ्की
सन्धाय लङ्काधिपति: प्रतस्थे ॥")

लङ्कापति:, पुं, (लङ्काया: पति: ।) रावण: । इति भूरिप्रयोग: ॥

लङ्कापिका
लङ्कायिका
लङ्कारिका } स्त्री, पुत्रिका । इति शब्दरत्नावली ॥ पिड़िंशाक इति भाषा ॥

लङ्कास्थायी, [न्] पुं, (लङ्कायां तिष्ठतीति । स्था + णिनि: ।) वृक्षविशेष: । लङ्कासिज इति भाषा । यथा,—

"लङ्कास्थायी राजवृक्षो भद्रचूड़ो विघ्नायक: ।"

इति शब्दचन्द्रिका ॥

(लङ्कायां तिष्ठतीति ।) लङ्कावासिनि, त्रि ॥

लङ्केश:, पुं, (लङ्काया ईश: पति: ।) रावण: । इति त्रिकाण्डशेष: ॥

लङ्कोपिका, स्त्री, पुत्रिका । इति शब्दरत्नावली ॥

लङ्कोयिका, स्त्री, पुत्रिका । इति शब्दरत्नावली ॥

लङ्ग:, पुं, (लङ्गतीति । लङ्ग गतौ + अच् ।) सङ्ग: । विहङ्ग: । इति मेदिनी । गे, २१ ॥ नां इति भाषा ॥

लङ्गूलं, क्ली, लाङ्गूलम् । इत्यमरादिकोष: ॥

लङ्घनं, क्ली, (लङ्घ + ल्युट् ।) उपवास: । (यथा, सुश्रुते । १ । ४६ ।

"तत्राम लङ्घनं कार्य्यं विदग्धे वमनं हितम् ।
विदग्धे स्वेदनं पथ्यं रसशेषे प्रयोजयेत् ॥"

यथा च ।

"लङ्घनं दृंहणं काले रूक्षणं स्नेहनन्तथा ।
स्वेदनं स्तम्भनञ्चैव जानीते य: स वै भिषक् ॥"

"तदग्निवेगस्य वधो निगृह्य गुरुत्वमूचे: ।
यत्किञ्चिल्लाघवकरं देहे तल्लङ्घनं स्मृतम् ॥"

"लघूष्णातीक्ष्णविशदं रूक्षं सूक्ष्मं खरं सरम् ।
कठिनञ्चैव यद्द्रव्यं प्रायस्तल्लङ्घनं स्मृतम् ॥"

"————————पिपासा मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥"

"प्रभूतश्लेष्मपित्तास्रमला: सङ्दृढमारुता: ।
दृढच्छरीरा बलिनो लङ्घनीया विशुद्धिभि: ॥"

"लग्दोषाणां प्रवीढ़ानां स्निग्धाभिष्यन्दिहिनाम् ।
शिशिरे लङ्घनं प्रस्तमपि वातविकारिणाम् ॥"

इति चरके सूत्रस्थाने द्वाविंशेऽध्याये ॥

"ज्वरे लङ्घनमेवादावुपदिश्यते, ज्वरात् ।
व्यायामानलभयक्रोधकामशोकश्रमोद्भवात् ॥
आमाशयस्थो दृष्टाग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तदा लङ्घनमाचरेत् ॥
अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम् ।
ज्वरघ्नं दीपनं कार्श्यरुचिलाघवकारकम् ॥
प्राक्संविरोधिना चैनं लङ्घनेनोपपादयेत् ।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रम: ॥
तत्तु मारुतसृष्टत्वात्सुखशीघ्रभमान्विते ।
कार्य्ये न बाले वृद्धे वा न गर्भिण्यां न दुर्बले ॥
वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्रा क्षमे गते ॥
खेदे जाते रुचौ क्षुत्तृट्प्रपासासहोदये ॥
क्षुतं लङ्घनमादेश्यं निर्यत्ने चान्तराऽग्नि ॥
पर्व्वभेदोऽङ्गमर्दश्च कास: श्लेष्मो मुखस्य च ।
क्षुत्प्रणाशोऽरुचिश्छर्दा दौर्ब्बल्यं श्लेष्मनेत्रयो: ॥
मनस: सम्भ्रमोऽभीक्ष्णमङ्गवातस्तमो हृदि ।
देहाग्निबलहानिश्च लङ्घनेऽतिकृते भवेत् ॥"

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

क्रमणम् । (यथा, कुमारे । ५ । ६४ ।

"यथा श्रुतं वेदविदांवर त्वया
जनोऽयमुच्चै: पदलङ्घनोत्सुक: ।
तप: किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥")

प्लवनम् । इति मेदिनी । ने, १२० ॥ अग्निलङ्घनविधौ यथा,—

"न चाग्निं लङ्घयेद्वीमान्नोपदध्यादध: क्वचित् ।
न चैनं पादत: कुर्य्यात् सुखेन न धमेद्मुख: ॥"

इति कौर्म्मे उपविभागे १५ अध्याय: ॥

(अतिक्रम: । यथा, महाभारते । १ । १५८ । १६ ।

"न चाप्यधर्म्म: कल्याण बहुपत्नीकता नृणाम् ।
स्त्रीणामधर्म्म: सुमहान् भर्तु: पूर्व्वस्य लङ्घने ॥")

अवहेलनीयगति: । यथा,—

"श्रुतस्तु लङ्घनं पश्चिन्द्यगत्यनुहारकम् ।"

इति हेमचन्द्र: ॥ * ॥

(स्त्री, अवमानना । यथा, मार्कण्डेये । १३५ । ३३ ।

"अन्यस्यापि स्वयंग्रस्य लङ्घना क्रियते हि या ।
सा नारी क्षत्रिय: सोढुं किं पुन: पितृमारुषम् ॥")

लङ्घ, लङ्घयि । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् ।) लङ्घति वृषं चक्रेण गोप: । इति दुर्गादास: ॥

लज, भर्त्सने । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् ।) लजति । इति दुर्गादास: ॥

लज, इ भर्त्सने । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लज्जते । इति दुर्गादास: ॥

लज, इ क भाषहार्थे । इति कविकल्पद्रुम: ॥ (चुरा०-पर०-अक०-सक०च-सेट् ।) इ क, लज्जयति । भा दीप्ति: षड्भार्थो निकेतनहिंसाबलदानानि । इति दुर्गादास: ॥

लज, क अन्तर्द्धौ । इति कविकल्पद्रुम: ॥ (चुरा०-पर०-सक०-सेट् ।) अन्तर्द्धिराच्छादनम् । क, लाजयति चन्द्रं मेघ: । इति दुर्गादास: ॥

लज, ड व्रीड़े । इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ड, लजते । निष्ठायां लग्न इत्यत्रे । इति दुर्गादास: ॥

लज, त् क भाषने । इति कविकल्पद्रुम: ॥ (अदन्त चुरा०-पर०-अक०-सेट् ।) क, लजयति । भाषनं दीप्ति: । इति दुर्गादास: ॥

लजकारिका, स्त्री, (लजं लज्जां करोतीव । ल + खुल् । टापि अत इत्वम् ।) लज्जालुलता । इति शब्दमाला ॥

लज्जा, स्त्री, (लज्जनमिति । लस्ज व्रीड़ने + "गुरोश्च हल: ।" ३ । ३ । १०३ । इति अ: । टाप् ।) अन्त:करणवृत्तिविशेष: । इति नागोजीभट्ट: ॥ अकर्त्तव्ये कर्म्मणि परज्ञानभयम् । लाज इति भाषा । तत्पर्य्यायय: । मन्द्राक्षम् २ ह्री: २ त्रपा ३ व्रीड़ा ४ । सा अन्यतश्चेत् अपत्रपा ५ । इत्यमर: ॥ मन्द्राक्षम् ७ लज्या ८ व्रीड़: ९ व्रीड़नम् १० । इति शब्दरत्नावली ॥ (यथा, कुमारे । १ । ४८ ।

"लज्जा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्व्वतराजपुत्र्या: ।
तं केशपाशं प्रसमीक्ष्य कुर्यु-
र्बालप्रियत्वं शिथिलं चमर्य्य: ॥")

लज्जालु: । इति राजनिर्घण्ट: ॥

लज्जालुः, पुं,स्त्री,(लज्जेवास्या अस्तीत्यर्थे आलुः।) चुपविशेषः। तत्पर्य्यायः। रक्तपादी २ ग्रमीपत्रा ३ सृक्का ४ खदिरपत्रिका ५ सङ्कोचिनी ६ समङ्गी ७ नमस्कारी ८ प्रसारिणी ९ सप्रपर्णी १० खदिरी ११ गन्धमालिका १२ लज्जा १३ लज्जिरी १४ सपर्णलज्जा १५ असरोधिनी १६ रक्तमूला १७ ताम्रमूला १८ स्वगुप्ता १९ अङ्गविकारिका २०। इति राजनिर्घण्टः॥ महाभीता २१ वह्निनी २२ महौषधिः २३। इति शब्दचन्द्रिका॥ अस्या गुणाः। कटुत्वम्। शीतत्वम्। पित्तातिसारग्रीपदाहश्रमश्वासव्रणकुष्ठ-कफार्शिनाशित्वञ्च॥ तद्वृक्षो यथा,—

"लज्जालुर्विपरीतास्या अल्पक्षुपदृहद्बला।
वेपरीत्या च लज्जालुर्नामभिधाने प्रयोजयेत्॥
लज्जालुर्वेपरीत्याद्रुः कटुरुष्णः कफापहृत्।
रसे नियामकश्चैव नागाविज्ञानकारकः॥"

इति राजनिर्घण्टः॥

अन्या हंसपादीशब्दे द्रष्टव्या॥*॥ अपि च।

"लज्जालुः स्यात् ग्रमीपत्रा समङ्गाञ्जलिकारिका।
रक्तपादी नमस्कारी नाम्ना खदिरकेऽपि॥
लज्जालुः शीतला तिक्ता कषाया कफपित्तजित्।
रक्तपित्तमतीसारं योनिरोगान् विनाशयेत्॥"

अत लज्जालुभेदः।

"अलम्बुषा खरत्वक् च तथा मेदोगला स्मृता।
अलम्बुषा लघुः स्वादुः क्षमिपित्तकफापहा॥"

इति भावप्रकाशः॥

अन्या दुग्धिकाशब्दे द्रष्टव्या।

लज्जाशीलः, त्रि, (लज्जा शीलं स्वभावो यस्य।) लज्जाविशिष्टः। तत्पर्य्यायः। अपत्रपिष्णुः २। इत्यमरः॥ लज्जितः ३। इति शब्दरत्नावली॥

लज्जितः, त्रि, (लज्जा सञ्जातास्य। लज्जा+तारकादित्वात् इतच्।) लज्जायुक्तः। तत्पर्य्यायः। व्रीडः २ व्रीतः ३। इत्यमरः॥ (यथा, रघुः। १२। ७५।

"कामं जीवति मे नाथः इति सा विजहौ शुचम्।
प्राक् मत्वा सत्यमस्यार्थं जीवितास्मीति लज्जिता॥")

लज्जिरी, स्त्री, लज्जालुः। इति राजनिर्घण्टः॥

लज्या, स्त्री, लज्जा। इति शब्दरत्नावली॥

लञ्ज, तृ क भाषने। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-अक०-सेट्।) क, लञ्जयति। भाषनं दीप्तिः। इति दुर्गादासः॥

लञ्जः, पुं, (लञ्जयति श्लोभते इति। लञ्ज+अच्।) पदः। कच्छः। इति हेमचन्द्रः॥ पुच्छः। इति जटाधरः॥

लञ्जिका, स्त्री, (लञ्जयति श्लोभते इति। लञ्ज+ण्वुल्। टापि अत इत्वम्।) वेश्या। इति हेमचन्द्रः॥

लट, वाल्योक्त्योः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० च-सेट्।) बालोऽयः तस्य भावो बाल्यं बालिमोह इति यावत्। लटति लोकः ग्रिम्नः स्यात्। किञ्चिद्वदति वेत्यर्थः। इति दुर्गादासः॥

लटः, पुं, (लटति यथेच्छया वदतीति। लट+अच्।) प्रमादवचनम्। दोषः। इति विश्वः॥

लटकः, पुं, (लटतीति। लट्+"कुन् ग्रिल्पिसंज्ञयोरपूर्व्वस्यापि।" उणा० २। ३२। इति कुन्।) दुर्जनः। इत्युणादिकोषः॥

लटपर्णं, क्ली, (लटसुयं पर्णमस्य।) लवणम्। इति राजनिर्घण्टः॥

लट्टः, पुं, दुर्जनः। इति शब्दरत्नावली॥

लट्टः, पुं, (लटतीति। लट+"अस्यूपूधिलटीति।" उणा० १। १५२। इति कन्।) जातिविशेषः। नेटुया इति भाषा। रागभेदः। तुरङ्गमः। इत्युणादिकोषः॥

लट्टा, स्त्री, (लट्+कन्। टाप्।) करञ्जभेदः। नाटाकरञ्जा इति भाषा। वाद्यभेदः। पक्षिविशेषः। ग्रामघटक इति ख्यातः। इति मेदिनी। वे, २२॥ कुसुम्भम्। इति हेमचन्द्रः॥ भ्रमरकः। भोंडरी इति ख्यातः। इत्यमरभरतौ॥ (ग्रिलौ। इति हारावली। २५६॥ तूलिका। द्यूतम्। यथा,—

"लट्टा तु तूलिका ख्याता लट्टा द्यूतेऽपि दृश्यते॥"

इति वाढ़िरभसौ।" इति उणादिवृत्तौ उज्ज्वलः। १। १५१॥)

लड, विलासे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) लड़ति बालः। इति दुर्गादासः॥

लड, इ कि भाषणे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) इ, लड्डयते। कि, लड्डयति लड्डति। भाषणं कथनम्। अयं केचिन्न मन्यते। इति दुर्गादासः॥

लड, ओ इ कि उत्क्षेपणे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) ओ, लड्डितः। अनुबन्धबलादिमुपधानेऽपि निष्ठातस्य नत्वम्। अन्यात् निष्ठायामिम् न स्यादित्येके। लड् इति। इ, लड्डयते। कि, लड्डयति लड्डति तद्वुलं लोकः। इति दुर्गादासः॥

लड, क उपसेवे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) उपसेव इह अत्यन्तपालनम्। क, लालयेत् पञ्चवर्षाणि पुत्रमित्रि अत्र डलयोरेकत्वाल्लत्वम्। कण्ड्वादायामस्य प्रयोगः। इति रमानाथः। लाडयति लतां वायुः। इति दुर्गादासः॥

लड, क ड वीर्य्ये। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्। क ड, लाड़यते। लाभ एव इत्यन्ये। विशेषेण आत्मनिच्छा वीप्सा। इति दुर्गादासः॥

लड, तृ क क्षेपे। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-सक०-सेट्।) लड़यति। अलाड़त्। इति दुर्गादासः॥

लड, म उन्मत्थनजिह्मयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-क्वचित् पीड़नादौ सक०-सेट्।) उन्मत्थनं पीड़ितौभावः उत्क्षिप्तीभावश्च। लड़ति लता वायुना पीड़िता उत्क्षिप्ता वा स्यादित्यर्थः। जिह्मा तद्विषयक्रिया। लड़ति जिह्मा स्यन्दनवती स्यादित्यर्थः। म, लड़यति। लड़यति लघुसुललयत्यमिति श्रीहर्षः। पीड़यतीत्यर्थः। कवाटन्नीमिन्द्रः किरणलहरीसुललयतीति मुरारिः। उत्क्षिपतीत्यर्थः। उभयत्र डलयोरेकत्वाल्लत्वम्। केचित्तु जिह्मोन्मत्थने इति पठित्वा जिह्माया उन्मत्थनं उत्क्षेपणमिति व्याख्याय लड़ति जिह्मां सर्पं इत्येवोदाहरन्ति। इति दुर्गादासः॥

लड़हः, त्रि, मनोज्ञः। इति त्रिकाण्डशेषः॥

लड्डः, त्रि, दुर्जनः। इति शब्दरत्नावली॥

लड्डुकः, पुं, पिष्टकविशेषः। लाडु इति भाषा॥ यथा। लड्डुको दुर्ज्जरो गुरुः। इति राजवल्लभः॥ अपि च।

"तैलेन हविषा पक्वं भवेत् चूर्णञ्च लड्डुकः॥"

इति शब्दचन्द्रिका॥

लड्डं, क्ली, (लड्डयते उत्क्षिप्यते इति। लड्ड+घञ्।) पुरीषम्। ल्याड़ इति भाषा। यथा,—

"समेधमानेन स लण्डवायुना
निरुद्धवायुश्चरणांश्च निक्षिपन्।
प्रखिन्नगात्रः परिवृत्तलोचनः
पपात लड्डं विसृजन् चितौ वसुः॥"

इति श्रीभागवते १० स्कन्धे ३० अध्याये ८ श्लोकः॥ लड्डं पुरीषमुत्सृजन्। इति तट्टीकायां श्रीधरस्वामी॥

लड्डज, त्रि, (लड्डे तदाख्यदेशे जायते इति। जन्+डः।) लड्डदेशजातः। यथा,—

"पूर्व्वाम्नाये नवशतं षड़शीतिः प्रकीर्त्तिताः।
फिरङ्गभाषया तन्त्रास्तेषां संसाधनात् भुवि॥
अधिपा मल्लनाथ संग्रामेष्वपराजिताः।
इंरेजा नव षट् पञ्च लड्डजाश्चापि भाविनः॥"

इति मेरुतन्त्रे २३ प्रकाशः॥*॥

लड्डस्तु अधुना लण्डन् इति ख्यातः। इंरेजानां राजधानी च॥

लत, घाते। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) लता। इति दुर्गादासः॥

लता, स्त्री, (लतति वेष्टयते यान्यमिति। लत+पचाद्यच्। टाप्।) शाखादिरहिता गुड्वादिः। तत्पर्य्यायः। वल्ली २ प्रतति: ३। इत्यमरः॥ वल्लिः ४ वेल्लिः ५ प्रततिः ६। सा शाखापत्रसमायुक्ता चेत्प्रतानिनी। इति शब्दरत्नावली॥ तत्पर्य्यायः। वीरुत् २ गुल्मिनी ३ उलपः ४। इत्यमरः॥*॥ अभायां वीरुधां छेदकर्त्तरिन्दी

यथा,—
"अप्सु तस्मिन्नहोरात्रे पूर्व्वं विशति चन्द्रमाः
ततो वीरुत्सु वसति प्रयात्यर्कं ततः क्रमात् ॥
क्षिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे।
पत्रं वा मातयेत्तोकं ब्रह्महत्यां स विन्दति ॥"
इति श्रीविष्णुपुराणे २ अंशे १२ अध्यायः ॥*॥
आश्रमे रोपणीया शुभदा लतादिर्यथा,—
"अलाबुकापि कुष्माण्डं मायासुञ्च सुकासुकः।
स्वर्णुरी कर्कटी चापि शिविरे मङ्गलप्रदा ॥
वास्तूकः कारवेल्लञ्च वार्ताकुञ्च शुभप्रदा।
लतापलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥
शाखा। प्रियङ्गुः। (अस्याः पर्य्यायो यथा,—
"प्रियङ्गुः फलिनी कान्ता लता च महिलाह्वया।
गुन्द्रा गुन्द्रफला श्यामा विल्वकं सेनाङ्गना-
प्रिया ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
एका। (यथास्याः पर्य्यायः।
"तस्करोत्तारकश्चण्डो देवी एका लता लघुः ॥"
इति वैद्यकरत्नमालायाम् ॥)
अग्रनपर्णी। इत्यमरः ॥ ज्योतिष्मती। (अस्याः पर्य्यायो यथा,—
"ज्योतिष्मती स्यात् कटभी ज्योतिष्का कट्फलीनी-
नि च।
पारावतपदी पथ्या लता प्रोक्ता ककुन्दनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
लताकस्तूरिका। माधवी। दूर्व्वा। इति मेदिनी। ते, ५१-५२॥ केवलिका। सारिवा। इति राजनिर्घण्टः ॥ (दृहती। तत्पर्य्यायो यथा,—
"भण्डाकी दृहती सिंही वार्ताकी राष्ट्रिकाकुली।
प्रसहा रक्तपाका च लता दृहतिका परा।")
नारी। यथा,—
"नत्वां परलतां पद्मनु अयुतं यस्तु साधकः।
प्रजपेत् स भवेत् शीघ्रं विद्यायां वल्लभः स्वयम्॥"
इति तन्त्रसारे श्यामासाधनम् ॥
(तथा च नैषधे। १। ८५।
"नवा लता गन्धवहेन सूचिता
करम्बिताङ्गी मकरन्दशीकरैः।
दृशा तृषेव स्खलदग्रमीभकुड्मला
दरादराभ्यां दरकम्पिनी पपे ॥"
"नवा नवीना लता माधवीलता पक्षे नवा रम्या लता स्त्री।" इति तट्टीका ॥*॥ अक्षरोविशेषः। यथा, महाभारते। १। २१७। २०।
"अहञ्च सौरभेयी च समीची बृहती लता।
योगपत्नीं तं विप्रमभ्यगच्छाम भारत! ॥")
लताकरञ्जः, पुं, (लतारूपः करञ्जः।) करञ्जविशेषः। कण्टकरेण इति हिन्दी भाषा। तत्पर्य्यायः। दुष्पर्शः २ वीराख्यः ३ वह्निबीजकः ४ धनदाह्वी ५ कण्टफलः ६ कुबेराक्षी ७। अस्य पञ्चगुणाः। कटुत्वम्। उष्णत्वम्। कफवातनाशित्वञ्च। तद्बीजगुणाः। दीपनत्वम्। पथ्यत्वम्। शूलगुल्मविषापहत्वञ्च। इति राजनिर्घण्टः ॥
लताकस्तूरिका, स्त्री, (लतारूपा कस्तूरी तद्वद्गन्धत्वात्। ततः स्वार्थे कन्।) लताकस्तूरी। तत्पर्य्यायः। कटुः २ दक्षिणदेशजा ३। अस्या गुणाः। तिक्तत्वम्। स्वादुत्वम्। दृष्यत्वम्। हिमत्वम्। लघुत्वम्। चक्षुष्यत्वम्। छेदनीत्वम्। श्लेष्मश्लथावस्थास्थरोगनाशित्वञ्च। इति पथ्यापथ्यविवेकः ॥ अपि च।
"लताकस्तूरिका तिक्ता हृद्या शीतास्र-
रोगनुत्।"
इति राजवल्लभः ॥
लताजिह्वः, पुं, (लतेव जिह्वा यस्य।) सर्पः। इति शब्दमाला ॥
लतातरुः, पुं, (लतेव दीर्घस्तरुः।) नारङ्गवृक्षः। तालवृक्षः। इति शब्दमाला ॥ प्रालवृक्षः। इति त्रिकाण्डशेषः ॥
लतादुमः, (लतेव द्रुमः दीर्घत्वात्।) लताप्रालः। तत्पर्य्यायः। तार्क्षः २ अश्वकर्णः ३ कुम्भिकः ४ वन्यः ५ दीर्घः ६। इति रत्नमाला ॥
लतापनसः, पुं, (लतायां पनसमिव फलमस्य।) फललताविशेषः। तरमुज इति ख्यातः। तत्पर्य्यायः। चेलालः २ चित्रफलः ३ सुखाग्रः ४ राजतेमिषः ५ नाटाम्रः ६ सेदुः ७। इति त्रिकाण्डशेषः ॥
लताएका, स्त्री, (लताप्रधाना एका।) सप्तदाल्ता। इति शब्दरत्नावली ॥ पिंडिंगाक इति भाषा ॥
लताप्रतानिनी, स्त्री, (लताप्रतानोऽस्यस्येति। इनिः।) शाखाप्रचयवती लता। तत्पर्य्यायः। वीरुत् २ गुल्मिनी ३ उलपः ४। इत्यमरभरतौ। वीरुधा ५ वरुत् ६। इति शब्दरत्नावली। प्रतानैर्गा ७ कच्छः ८। इति जटाधरः ॥
लतापलं, क्ली, (लतायां फलमस्य।) पटोलः। यथा,—
"वार्त्ताकुः कारवेल्लञ्च वार्ताकुञ्च शुभप्रदा।
लतापलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः ॥
लताभद्रा, स्त्री, (लतया भद्रा यस्याः।) भद्रालीवृक्षः। इति शब्दमाला ॥
लतामणिः, पुं, (लतासदृशो मणिः।) प्रवालः। इति त्रिकाण्डशेषः राजनिर्घण्टश्च ॥ (प्रवालशब्दे ऽस्य विवरणं ज्ञातव्यम्।)
लतामरुत्, स्त्री, (लतायां मरुत् यस्याः।) एका। इति शब्दरत्नावली ॥
लतामाधवी, स्त्री, (लताप्रधाना माधवी।) माधवीलता। इति शब्दरत्नावली ॥
लतायष्टिः, स्त्री, (लता यष्टिरिव।) मञ्जिष्ठा। इति शब्दमाला ॥
लतायावकं, क्ली, (लतायां याव इव यस्य। कन्।) प्रवालम्। इति हारावली। ८१॥ (शब्दार्थोऽस्य प्रवालशब्दे ज्ञेयः।)
लतारसनः, पुं, (लतेव रसना यस्य।) सर्पः। इति हारावली। १५॥
लतार्कः, पुं, (लता अर्क इव तीव्रा यस्य।) हरितपलाङ्गः। तत्पर्य्यायः। दुद्रुमः २। इत्यमरः ॥
लतालकः, पुं, हस्ती। इति त्रिकाण्डशेषः ॥
लतावेष्टः, पुं, (लतयेव आवेष्टो वेष्टनं यत्र।) गोदूरतिबन्धान्तर्गततृतीयबन्धः। यथा,—
"बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा स्त्रियं रमेत्।
लघुलिङ्गताडनं योनौ लतावेष्टोऽयमुच्यते ॥"
इति रतिमञ्जरी ॥*॥
पर्व्वतविशेषः। यथा,—
"अन्वेषयेथ निरुद्दस्य चरान् आदिश्यवान् तदा।
अभ्यन्तरञ्च मार्गध्वं बाह्यतश्च समन्ततः ॥
वेणुमन्तं लतावेष्टं तथा रैवतकं गिरिम्।
ऋष्यवन्तं गिरिञ्चैव मार्गध्वं त्वरिता हयैः ॥"
इति हरिवंशे बाणयुद्धम् ॥
(पर्व्वतोऽयं द्वारकायां दक्षिणस्यां दिशि स्थितः। यथा, तत्रैव। १५५। १६।
"दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते।
इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः ॥")
लतावेष्टितकं, क्ली, (लतयेव वेष्टितं वेष्टनं यत्र। कन्।) आलिङ्गनभेदः। यथा, शब्दमालायाम्।
"उद्वृत्तकं पीडितकं लतावेष्टितकं तथा ॥"
लताशुक्रः, पुं, प्रालवृक्षः। इति शब्दरत्नावली ॥
लतासाधनं, क्ली, (लतया स्त्रिया साधनम्।) योषिदधिकरणकदेवताराधनम्। तद्यथा,—
"लतायाः साधनं वक्ष्ये शृणुष्व हरवल्लभे।
घृतं केशे घृतं भाले घृतं सिन्दूरमण्डले ॥
स्तनद्वन्द्वे घृतद्वन्द्वं घृतं नाभौ महेश्वरि।
घृतं योनौ महेशानि उत्थाय च घृतत्रयम् ॥
एवं दशघृतं जप्त्वा सर्व्वसिद्धीश्वरो भवेत्।
अथान्यत् संप्रवक्ष्यामि साधनं भुवि दुर्लभम् ॥
रजोऽस्याः समानीय तदूर्ध्वोनौ खेटदेवताम्।
पूजयित्वा महाराज्ञीं त्रिदिनं पूजयेन्मनुम् ॥
घृतत्रयञ्च षट्त्रिंशद्गुणितं प्रत्यहं जपन्।
अष्टोत्तरंघृतं पूर्व्वं चक्रवर्त्ती जपेद्बुधः ॥
ततस्तां ववभिः पुष्पैर्यजेदष्टोत्तरं शतम्।
ततः पूर्णाहुतिं दत्त्वा जपेदष्टोत्तरं शतम् ॥
धनवान् बलवान् वाग्मी सर्व्वयोषित्प्रियङ्करः।
षोडशाहेन च भवेत् सत्यं सत्यं न संशयः ॥"
इति मायातन्त्रे १२ पटलः ॥
अन्यत् अन्नदाकल्पे १६ पटले गुप्तसाधनतन्त्रे ४ पटले च द्रष्टव्यम् ॥
लतिका, स्त्री, लता। इति लताशब्दात् स्वार्थे कन्प्रत्ययेन ङीकप्रत्ययेन वा निष्पन्नम्। (यथा,—
"इयं सन्त्या दूरादहसुपगतो हन्त भजयात्
तदेनां तद्गेहे विनयवति। नेष्यामि रजनीम्।
समीरेणोक्तेयं नवकुसुमिता चूतलतिका
धुनाना सद्भृङ्गं नहि नहि नहीत्येव कुरुते ॥"
रुद्रटः ॥)

लतिका, स्त्री, (लत घाते + "क्लतिभिदिलतिभ्यः किन्।" उणा० ३। १४७। इति किन्।) गोधा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

लप, ऋ भाषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अलीलपत् अललापत्। भाषः कथनम्। इति दुर्गादासः॥

लपनं, क्ली, (लप्यतेऽनेनेति। लप्+करणे ल्युट्।) सक्थम्। इत्यमरः॥ (भावे ल्युट्।) भाषणम्। इति लपधातोरर्थदर्शनात्॥ (यथा, आर्य्यासप्तशत्याम्। ३८१।

"प्रकटयति रागमधिकं लपनमिदं वक्त्रमाश्रमावहति।
प्रीणयति च प्रतिपदं दूति शुकस्येव दयितस्य॥"

"शुकस्येव दयितस्य लपनं सम्भाषणम्। पक्षे वदनम्।" इति तट्टीका॥)

लपितं, क्ली, (लप्+क्तः भावे।) वचनम्। कथिते, त्रि। इत्यमरः॥ (लपितमस्यास्तीति। अच्। वचनयुक्ते च त्रि। यथा, अथर्ववेदे। ४।३६।८।

"ये मा क्रोधयन्ति लपिता हस्तिनं मशका इव।
तानहं मन्ये दुर्हितां जने अल्पशय्यूनिव॥")

लप्तिका, स्त्री, खात्रविशेषः। लप्ती। इति ख्याता। यथा,—

"समितां सर्पिषा भृष्टां शर्करां पयसि क्षिपेत्।
तस्मिन् घनीकृते न्यस्येत् लवङ्गमरिचादिकम्।
सिद्धैषा लप्तिका ख्याता गुणानस्या वदाम्यहम्॥
लप्तिका दीपनी हृद्या बल्या पित्तानिलापहा।
स्निग्धा श्लेष्मकरी गुर्वी रोचनी तर्पणी परम्॥"

इति भावप्रकाशः॥

लब, ह्र ड लंसने। ग्रन्थे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अवलम्बने सक०-ग्रन्थे अक०-सेट्।) ह्र, लम्बते। ड, लम्बते। लंसनमिहावलम्बनमिति गोविन्दभट्टः। ननाद चरणायुधस्तदपि मौनमालम्बसे। इति दुर्गादासः॥

लब्धः, त्रि, (लभ्+क्तः।) प्राप्तः। इत्यमरः॥ (यथा, हितोपदेशे।

"अलब्धमेव लिप्सेत लब्धं रक्षेत्प्रयत्नतः।
रक्षितं वर्द्धयेत् सम्यक् वृद्धं तीर्थेषु निक्षिपेत्॥")

लब्धवर्णः, पुं, (लब्धौ वर्णौ यशांसि येन।) पण्डितः। इत्यमरः॥ (यथा, रघुः। १५। २।

"लक्ष्मलब्धमपि लब्धवर्णभाक्
तं दिदेश सुनये सलक्षणम्॥")

लब्धा, स्त्री, (लभ्+क्तः। टाप्।) नायिकाभेदः। यथा,—

"खण्डितोत्कण्ठिता लब्धा तथा प्रोषितभर्तृका।
कलहान्तरिता वाससज्जा स्वाधीनभर्तृका॥"

इति जटाधरः॥

लभ, ह्र ड ग्रन्थे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ह्र, लम्भते। ड, लभते। इति दुर्गादासः॥

लभ, डु लौ ड भ प्राप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-अनिट्।) डु, लब्धुमम्। लौ, लब्धा। ड, लभते। भ, लभा। लभन्ति पुनरत्यानमिति गणकृतानित्यत्वादिति रमानाथः। वस्तुतस्तु लभते लभः पचाद्यजन्ततो लभ इवाचरतीति क्यौ साध्यम्। इति दुर्गादासः॥

लभः, पुं, (लभ्+"अत्यविचमीति।" उणा० ३। ११७। इति असच्।) वाजिबन्धनरज्जुः। इत्युणादिकोषः॥ धनम्। याचकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

लभ्यं, त्रि, (लभ्यते इति। लभ्+गोरुपधात्।" ३। १। ६८। इति यत्।) न्याय्यम्। इत्यमरः॥ लभ्यम्। इति मेदिनी। ये, ४१॥ (यथा, सुश्रुतसंहितायाम्। ३। २। ३।

"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥")

लमकः, पुं, (रमते इति। रम्+"रमेरच लो वा।" उणा० २। ३३। इति कुन् रस्य लत्वञ्च।) विड्गः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (तीर्थशोधकः। इत्युज्ज्वलः॥ विलासिनि, त्रि। इति केचित्॥)

लम्पटः, पुं, विड्गः। इति लम्पाकशब्दार्थे मेदिनी। के, १७६॥ (यथा, कथासरित्सागरे। ४७। १०१।

"अथेतराज्ञीर्व्यसनैर्यदापि स्त्रीषु लम्पटः।
तथापि न स दुःखेऽस्मिन्नौदग्र्यः स्यात्तथाविधः॥")

आसक्तः। यथा,—

"यथेहकासुग्मिककामलम्पटः
सुतेषु दारेषु धनेषु चिन्तयन्।
ग्रहीत विद्वान् कुकलेवराद्ययाद्-
यस्तस्य यत्नः श्रम एव केवलम्॥"

इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥

लम्पाकः, पुं, लम्पटः। देशभेदः। इति मेदिनी। के, १४६॥ (यथा, मार्कण्डेये। ५७। ४०।

"लम्पाकाः शूलकाराश्च चुलिका जागुडैः सह।
औषधाश्चानिभद्राश्च किरातानाञ्च जातयः॥")

लम्पाटहः, पुं, पटहवाद्यम्। इति हारावली॥

लम्फः, पुं, प्लुतगतिः। लाफ इति भाषा। इति प्रसिद्धः। उल्लम्फनं प्रलम्फनञ्चात्र॥

लम्बः, पुं, (लम्बते इति। लबि अवस्रंसने+अच्।) नर्मकः। अङ्गम्। कान्तः। इति संक्षिप्तसारोणादिवृत्तिः॥ उत्कोचः। यथा, "प्राभृतं चौकनं लम्बोत्कोचः कोशलिकामिधे। उपाचारः प्रदानन्दा हारो ग्राह्यायने अपि॥" इति हेमचन्द्रः॥

अन्यभेदः। यथा,—

"चरलम्बगमा भेदाः पाटकोऽन्यादिचालने॥"

इति शब्दमाला॥

क्षेत्रादौ लम्बमानरेखा सूत्रं वा। यथा,—

"त्रिभुजे भुजयोर्योगस्तदनन्तरगुणो भुवाहतो लम्बात्।
द्विघ्ना भूरूनयुता दलितावाधे तयोः स्याताम्॥
बाधाभुजलम्बोरन्तरमूलं प्रजायते लम्बः।
लम्बगुणं भूम्यर्द्धं स्यात् त्रिभुजे फलं भवति॥"

उदाहरणम्।

"क्षेत्रे मही मनुमिता त्रिभुजे भुजौ तु
यत्र त्रयोदशमितिश्चमितौ हि यस्य।
तत्रावलम्बकमथो कथयाशु बाधे
क्षिप्रं तथा च समकोष्ठमितिं फलाख्याम्॥"

न्यासः। भूः १४ भुजौ १३। १५ लम्बे बाधे ५। ६। लम्बो लम्बश्च १२ क्षेत्रफलञ्च ८४। इति लीलावती। (दैत्यविशेषः। यथा, हरिवंशे। ४३। २२।

"लम्बस्तु लम्बमेघाभः प्रलम्बाम्बरभूषणः।
दैत्यवृक्षगतो भाति मणीहार इवांशुमान्॥")

त्रि, दीर्घः। लम्बा इति भाषा। यथा,—

"दूरतः शोभते मूर्खो लम्बशाटपटावृतः।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते॥"

इति चाणक्यधृतकम्॥

(लम्बमानः। यथा, रघुः। ६। ६०।

"पाण्ड्योऽयमंसार्पितलम्बहारः
कुक्षिप्राङ्गरागो हरिचन्दनेन।
आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्रिराजः॥")

लम्बकर्णः, पुं, (लम्बौ कर्णौ यस्य।) छागः। अक्षोटवृक्षः। इति मेदिनी। णे, १०॥ राक्षसः। हस्ती। इति शब्दरत्नावली॥ श्येनपक्षी। इति राजनिर्घण्टः॥ (ग्रहः। तद्यथा, अथ विशेषग्रहेषु तत्र ग्रहः स्यात्।

"लम्बकर्णः ग्रहः शूली लोमकर्णो विशेषग्रहः॥"

इति वैद्यकम्॥

लम्बःकर्णः इति कर्मधारये।) दीर्घश्रोत्रम्॥ तद्युक्ते, त्रि। (यथा, महाभारते। ६। ४६। ३४।

"लम्बोदर्यो लम्बकर्णास्तथा लम्बपयोधराः॥")

लम्बकेशः, पुं, (लम्बः केशः इवाग्रभागो यस्य।) विष्टरः। स तु विवाहकाले वरोपवेशनार्थं सार्द्धद्वितयवामावर्त्तवलिताधोमुखा असंख्यातदर्भाः। यथा,—

"ऊर्द्धकेशो भवेत् ब्रह्मा लम्बकेशस्तु विष्टरः।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः॥"

इति संस्कारतत्त्वम्॥

केशोऽत्राग्रम्। इति प्रायश्चित्ततत्त्वे गङ्गामाहात्म्ये प्रतिनिहतदम्भैवटुज्ञानप्रकरणे लिखितम्॥ *॥ दीर्घकेशयुक्ते, त्रि।

लम्बदन्ता, स्त्री, (लम्बा दन्ता इव फलानि यस्याः।) सैंहलीपिप्पली। इति राजनिर्घण्टः। दन्तदूषणविशिष्टे, त्रि।

लम्बनं, क्ली, (लम्बते इति। लम्ब+ल्युः।) नाभिलम्बितकस्तिकादिः। तत्पर्य्यायः। ललन्तिका २। इत्यमरः। लम्बते लम्बनं नन्द्यादिलादनः। इति तट्टीकायां भरतः। (लम्ब+भावे ल्युट्।) लम्बशब्दार्थाच्च।

लम्बनः, पुं. (लम्बते इति। लम्ब+ल्युः।) कफः। इति शब्दचन्द्रिका।

लम्बबीजा, स्त्री, (लम्बानि बीजानि यस्याः।) सैंहलीपिप्पली। इति राजनिर्घण्टः।

लम्बमार्ग, त्रि, लम्बायमानवस्तु। लम्बधातोः कर्मणि घञ्प्रत्ययेन निष्पन्नम्।

लम्बा, स्त्री, लम्बोः। गौरी। तिक्तलुम्बी। इति मेदिनी। बे, ६। दक्षकन्याविशेषः। यथा,—

"अरुन्धतीं वसुं यामीं लम्बां भानुं मरुत्वतीम्।
सङ्कल्पाञ्च सङ्कल्पांश्च साध्यां विश्वाञ्च भारत।
मनवे दत्तपुत्राय दक्ष एता ददौ प्रभुः।"

इति हरिवंशे अधिपतिस्थापनम्।

हिमालयकन्याविशेषः। यथा,—

"ततस्त्वाचवचः श्रुत्वा देवीलम्बामथाब्रवीत्।
गच्छस्व लम्बे शीघ्रं त्वं वाणसंरक्षणं कुरु।
ततो योगं समाधाय अदृश्या हिमवत्सुता।
लम्बास्येकस्य तद्रूपं दर्शयत् पार्श्वमागता॥
सान्तर्द्धानमुपागम्य त्वक्त्वा सा वासवी पुनः।
परित्राणाय वाणस्य विजयाधिष्ठिता ततः।
प्रसुखे वासुदेवस्य दिवासाः कोट्टवी स्थिता।"

इति महाभारते हरिवंशे वाणयुद्धम्।

लम्बिका, स्त्री, (लम्बते या। लम्ब+ण्वुल्। टापि अत इत्वम्।) तालूर्द्धलम्बिजिह्वा। तत्पर्य्यायः। घण्टिका २। इति राजनिर्घण्टः। सुधास्रवा ३ गलमुष्टिका ४। इति हेमचन्द्रः। अलिजिह्वा ५ अलिजिह्विका ६। इति शब्दरत्नावली।

लम्बितः, त्रि, (लम्ब+क्तः।) संसितः। (यथा, गीतगोविन्दे। १२। १८।

"लदधरपुलनलम्बितकज्जलमुज्ज्वलय प्रिय लोचने।")

ग्रन्थितः। इति लम्बधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम्। लम्बमानमाल्यादिच्च। (यथा, महाभारते। ३। १५७। ४२।

"वह्निर्ज्वोऽयं त्वया यत्नः कालरूपेण लम्बितः।")

लम्बोदरः, पुं, (लम्बमुदरं यस्य।) गणेशः। इत्यमरः। (यथा, आर्य्यासप्तशत्याम्। १८८।

"गतिगञ्जितवरयुवतिः करी कपोलौ करोतु मदमलिनौ।
सुखबन्धमात्रसिन्धुर लम्बोदर किं मदं वहसि।"

नृपविशेषः। इति भागवतम्। १२। १। २२।) औदरिके, त्रि। इति हेमचन्द्रः। (यथा, कथासरित्सागरे। ७०। १०२।

"ततो लम्बोदरेणेत्य पुंसारोपितबाहुकः।
सम्पादितः स बातस्तदनं केनरीकृते।")

लम्बोष्ठः पुं, (लम्ब ओष्ठो यस्य। ओष्ठोऽथवा समासे वा। इति साधुः।) उष्ट्रः। इति राजनिर्घण्टः। लम्बमानौष्ठयुक्ते, त्रि। (क्षेत्रपालदेवताविशेषः। यथा, प्रयोगसारे क्षेत्रपालप्रकरणे।

"युगान्तो वाह्यकस्याथ लम्बोष्ठो वसवस्तथा।")

लम्बौष्ठः, पुं, (लम्ब ओष्ठो यस्य।) उष्ट्रः। इति त्रिकाण्डशेषः। दीर्घोष्ठविशिष्टे, त्रि।

लम्भनं, क्ली, प्रतिलम्भः। इति हेमचन्द्रः। ध्वनिः। लभि ड शब्दे इत्यस्मात् भावेऽनट् (ल्युट्) प्रत्ययेन निष्पन्नमिति।

लम्भा, स्त्री, (लभते इति। लभ इ ड शब्दे+अच्। टाप्।) वाटशब्दला। इति शब्दावली।

लय, ड गत्याम्। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-सक०-सेट्।) ड, लयते। इति दुर्गादासः।

लयः, पुं, (ली+अच्।) विनाशः। संश्लेषः। तौर्य्यत्रिकस्य साम्यम्। इति मेदिनी। ये, ५२। प्रलयः। इति शब्दरत्नावली। *। अखण्डस्वरूपावलम्बनेन चित्तवृत्तेर्निरोधः। इति श्रीपरमहंससदानन्दयोगीन्द्रकृतवेदान्तसारः। तच्चाद्यं विघ्नं लक्षयति लयस्त्वविदिति। लयो द्विविधः। चिरकालसत्काष्टाङ्गसहितनिर्विकल्पकसमाध्यभ्यासपाटवेनातितप्तलोहतलस्थितप्रज्वलबिन्दुवत् तैलरहितदीपकलिकावच्च प्रत्यगभिन्ने परमात्मन्ये चित्तवृत्तेर्लयः प्रथमः। द्वितीयस्तु मूर्च्छावस्थावत् आलस्येन चित्तवृत्तेर्बाह्यशब्दादिविषयग्रहणानादरे सतिप्रत्यगात्मस्वरूपानवभासनात् वृत्तेस्तमोभावलक्षणनिद्रारूपः। इति श्रीवृसिंहसरस्वतीकृतसुबोधिन्याख्या तट्टीका। गीतवाद्यादेर्व्याप्तारागक्रियाकालयोः परस्परं समता लयः। लीयन्ते श्लिष्यन्तेऽनेनेति लयन्ति व्रजन्ति साम्यं गीतादयोऽत्रेति वा लयः। ली ड य श्लिषि लय गत्यां वा अच्। इत्यमरटीकायां भरतः। *। लयस्थानविवर्ज्जं गायकस्य चतुर्दशदोषान्तर्गतदोषविशेषो यथा,—

"लज्जितं भीतसङ्क्लिष्ट व्यक्तमनुनासिकम्।
काकस्वरः शिरःकम्पो लयस्थानविवर्ज्जितम्।
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम्।
आकुलं तालहीनञ्च गातुर्दोषाश्चतुर्दश।"*।

अथ लयः। क्षुदि स्थितिः कक्षस्थितिः कपालस्थितिरिति लयत्रयम्। अपरे तु।

"द्विपदी स्याद्वलतिका झल्लिका झिल्लखल्लिका।
वामभ्रुवस्तत्क्षिप्ता खल्लघावा षड्ढक्कः।
जम्झट्टिका कलतिकः खल्लकः खरिकस्तथा।
कथितश्चतुरस्रोऽर्द्धचतुरस्रोऽथ नर्त्तकः।
त्र्यस्रः षड्यान्दालनाश्चलदा नन्दश्चटीत्यपि।
कादम्बचर्च्चरी वट्टा मिश्रोऽर्द्धवनिता ततः।
अतिचित्रः समयश्च वलितोऽर्द्धलक्षतथा।
आविद्धस्तु टक्कवक्त्रस्तच्चिचर्चिचकौ।
आस्त्री विक्षतधावा च सुकुलोऽथ विलोलकः।
रमणीयस्तत्तथैव करकण्टकसंज्ञकः।
चत्वारिंशदिमे प्रोक्ता लया लयविशारदैः।
लयेन यस्मो भगवान् लये लीनो जनार्द्दनः।"

इति संगीतदामोदरः।

(त्रि, आधरणात्मकम्। इति श्रीधरस्वामी। यथा, भागवते। ११। २५। १५।

"यदा जयेद्रजः सत्त्वं तमो मूढं लयं जडम्।
युञ्जीत श्लोकमोहार्थां निद्रया हिंसया ग्रया।"

क्ली. लामज्जकम्। यथा,—

"लामज्जकं सुगालं स्यादलगालं लयं लघु।
इष्टकापथकं सेयं नलदस्यादतकम्।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

लयपुत्री, स्त्री, (लयस्य पुत्रीव।) नर्त्तकी। इति शब्दरत्नावली।

लयारम्भः, पुं, (लयस्यारम्भो यस्मात्।) नटः। इति त्रिकाण्डशेषः।

लयालम्बः, पुं, (लयमालम्बते इति। लम्ब+घञ्।) नटः। इति शब्दरत्नावली।

लर्ब, गतौ। (भ्वा०-पर०-सक०-सेट्।) लर्बति। इति सिद्धान्तकौमुदी।

लल, ड क ईप्सायाम्। इति कविकल्पद्रुमः। (चुरा०-आत्म०-सक०-सेट्।) क ड, लालयते। ईप्सा आप्तुमिच्छा। इति दुर्गादासः।

लल, तृ क ईप्से। इति कविकल्पद्रुमः। (अदन्त चुरा०-पर०-सक०-सेट्।) ईप्सा इति आपधातोः सनन्तस्य रूपम्। ग्रंस्यादित्यकारेण सरूपोऽपि अल् कथं न बाध्यते इति चेन्न स्त्रीविहितप्रत्ययैः क्वचित् सरूपोऽपि न बाध्यते इत्यस्य बाधत्वात् अन्यथा कारणाकारणमित्यादयोऽपि न स्युः। एवं वक्ष्यमाणेषु ब्रीड लज्जे इत्यादिष्वपि बोध्यम्। ललयति घनं लोकः। इति दुर्गादासः।

ललज्जिह्वः, पुं, (ललन्ती जिह्वा यस्य।) उष्ट्रः। कुक्कुरः। हिंसे, त्रि। इति मेदिनी। वे, १६। (चलद्रसनायुक्ते च त्रि। यथा, कथासरित्सागरे। १०६। १२०।

"तावच्च प्रकटीभूय भगवान् भैरवाकृतिः।
उद्धृतासिर्ललज्जिह्वः क्षत्वा हुंकारमध्यधात्।")

ललत्, त्रि, विलासयुक्तः। उच्चत्यनविशिष्टः। जिह्वाक्रियाविशिष्टः। क्षेपविशिष्टः। वीप्साविशिष्टः। उपसेवाविशिष्टः। भावग्रविशिष्टः। कृतक्षेपविशिष्टः। इति लडधातोः कर्मणि शतृप्रत्ययेन डस्य लकाराद्देशेन च निष्पन्नम्।

ललद्भुः, पुं, (ललत् चलद्भु यस्य।) लिम्याकः। इति जटाधरः। (विषयोऽस्य लिम्याकशब्दे द्रष्टव्यः।)

ललनं, क्ली, (लल+ल्युट्।) केलिः। इति हेमचन्द्रः। चालनम्। इति नागोजीभट्टः। यथा,—

"काली करालवदना विनिष्क्रान्तासिपाशिनी।
विचित्रखट्वाङ्गधरा नरमालाविभूषणा।
द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा।
अतिविस्तारवदना जिह्वाललनभीषणा।"

इति देवीमाहात्म्यम्।

ललनः, पुं, (लल्यते ईप्स्यते इति। लल+कर्म्मणि ल्युट्।) बालः। लालः। प्रियालः। इति राजनिर्घण्टः।

ललना, स्त्री, (ललयति ईप्सति कामानिति। लल+ल्युः। टाप्।) कामिनी। (यथा कथासरित्सागरे। १। ५।
"रतिसुलित ललित ललनाङ्गमजल लवबाहिन सुहृर्यच।
अथ केशकुसुम परिमल वासितदेहा वहन्त्यनिलाः॥")
नारीभेदः। जिह्वा। इति मेदिनी। ने, १२१॥
ललनाप्रियं, क्ली, (ललनानां प्रियम्।) हीवेरम्। इति राजनिर्घण्टः॥
ललनाप्रियः, पुं, (ललनानां प्रियः।) कदम्बः। इति राजनिर्घण्टः॥ कामिनीवल्लभश्च॥
ललन्तिका, स्त्री, (ललन्तेव। स्वार्थे कन्।) नाभिलम्बकण्डिकादिः। तत्पर्य्यायः। लम्बनम् २। इत्यमरः॥ गोधा। इति शब्दमाला॥
ललाकः, पुं, मेढ्रम्। इति शब्दचन्द्रिका।
ललाटं, क्ली, (लं ईप्सामटति ज्ञापयतीति। अट्+अण्।) अवयवविशेषः। कपाल इति ख्यातम्। तत्पर्य्यायः। अलिकम् २ गोधिः ३। इत्यमरः॥ महाशुक्तः ४ शुक्तः ५ भालः ६ कपालकः ७ अलीकम् ८। इति शब्दरत्नावली॥ ललाटकम् ९। इति धनञ्जयः॥ तस्य शुभाशुभलक्षणम्। यथा,—
"उन्नतेर्विपुलैः शुक्लैर्ललाटैर्विमलैस्तथा।
निर्व्रणैः धनवन्तश्च अर्द्धेन्दुसदृशैर्नराः॥
आचार्य्याः मुक्तिविशालैः शिरालैः पापकारिणः।
उन्नताभिः शिराभिस्तु खत्तिकाभिर्धनेश्वराः॥
निर्व्रणैर्ललाटैर्वेधार्हाः क्रूरकर्म्मरतास्तथा।
संवृतैश्च ललाटैश्च क्षपया उन्नतैर्नृपाः॥
ललाटोपरिरेखास्तिस्रो रेखाः स्युः शतवर्षिणाम्।
नृपत्वं स्याच्चतसृभिरायुः पञ्चभवेत्यथ॥
अरेखैरायुर्नवतिर्विच्छिन्नाभिश्च पुंचलाः।
केशान्तोपगताभिश्च अशीत्यायुर्नरो भवेत्॥
पञ्चभिः सप्तभिः षड्भिः पञ्चाशद्वत्सरैस्तथा।
चत्वारिंशच्च वक्राभिश्छिन्नाद्भूलम्बगामिभिः॥
विंशतिर्व्यायवक्राभिरायुः क्षुद्राभिरल्पकम्।
न पृथु बालेन्दुनिभे भ्रुवौ यत्र ललाटकम्॥
शुभमर्द्धेन्दुसंस्थानमतुङ्गं स्यादलोमशम्॥"
इति गारुडे ६५ अध्यायः॥
("अतःपरं प्रत्यङ्गानि वक्ष्यन्ते। मस्तकोदरपृष्ठनाभिललाटनासाचिबुकवस्तियोवा इत्येता एकैकाः।" इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)
ललाटकं, क्ली, (ललाटमेव। कन्।) प्रशस्तललाटम्। इति शब्दरत्नावली। ललाटमात्रम्। इति धनञ्जयः॥
ललाटन्तपः, त्रि, (ललाटं तपतीति। ललाट+तप+"अकर्म्मललाटयोर्दृशितपोः।" ३। २। २६। इति खञ्। सुम्।) ललाटतापकः।
"ललाटन्तपः सूर्य्यः।" इति सिद्धान्तकौमुदी॥
(यथा, रघुः। १३। ७१।
"हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटन्तपसन्निधिः।
असौ तपस्यत्परस्तपस्वी
कान्या सुतीक्ष्णचरितेन दान्तः॥"
यथा च, नैषधे। १। १३८।
"कथं विधातस्मयि पाणिपङ्कजात्
तव प्रिया श्लेष्यदुलघ्निस्थिनः।
वियोक्ष्यसे वल्लभयेति निर्गता
लिपिर्ललाटन्तपनियुराक्षरा॥")
ललाटिका, स्त्री, (ललाटे भवोऽलङ्कारः। "कर्णललाटात् कनलङ्कारे।" ४। ३। ६५। इति कन्।) स्वर्णादिरचितललाटाभरणम्। टिका इति ख्याता। तत्पर्य्यायः। पत्रपाश्या २। इत्यमरः॥ लालटस्यचन्दनम्। तत्पर्य्यायः। शुक्लचर्ची २। इति शब्दरत्नावली॥ (तिलकः। इति मल्लिनाथः॥ यथा, कुमारे। ५। ५५।
"तदा प्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका।
न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि॥")
ललाम, [न्] क्ली, ललामम्। यथाह रुद्रः।
"प्रधानश्वजशृङ्गेषु पुच्छवालधिलक्ष्मसु।
भूषावाजिप्रभावेषु ललामं स्यात् ललाम च॥"
(प्रधाने। यथा, रघुः। ५। ६४।
"तत्र स्वयंवरसभाकृतराजलोकं
कन्याललाम कमनीयमजस्य लिप्सोः॥"
पुरुषः। इति रघुटीकायां मल्लिनाथधृतयादवः। ५। ६४॥)
ललामं, क्ली, (लड़ विलासे+क्विप्। तं श्रमति प्राप्नोतीति। श्रम गतौ+अण्। ह्रस्वस्य लत्वम्।) चिह्नम्। ध्वजः। शृङ्गम्। प्रधानम्। भूषा। (यथा, भागवते। ३। १४। ४८।
"पौत्रस्तव श्रीललनाललामं
द्रक्ष्यस्युरत् कुन्तलमञ्चितानम्॥")
वालधिः। पुच्छम्। तुरङ्गः। प्रभावः। इति मेदिनी। मे, ५१। अश्वललाटे अन्यवर्णचिह्नम्। गवादीनां ललाटचित्रम्। अश्वस्य भूषा। इत्यमरटीकायां भरतः॥ (पुंनपुंसकलिङ्गमपि। यथा,—
"ललामोक्षो ललामापि प्रभावे पुरुषे ध्वजे।
श्रेष्ठभूषापुच्छशृङ्गपुच्छचिह्नाङ्कलिङ्गिषु॥"
इति रघुटीकायां मल्लिनाथधृतयादवः॥
रम्ये श्रेष्ठे च त्रि। यथा, महाभारते। ७। २२। १६।
"ललामैर्हरिभिर्युक्तः सर्व्वशस्त्रभृतां वरैः।
राज्ञां मध्ये महेष्वासः शान्तभीरभ्यवर्त्तत॥")
ललामकं, क्ली, पुरोन्यस्तमाल्यम्। इत्यमरः॥ तदेव माल्यं पुरः संमुखभागे न्यस्तं ललाटपर्य्यन्तमागतं ललामकं ललामं तिलकमिव इति स्वार्थे कः। इति भरतः॥
ललामी, स्त्री कर्णभूषणविशेषः। तत्पर्य्यायः। उत्क्षिप्तिका २। इति शब्दमाला॥
ललितं, क्ली, (लल+क्तः।) शृङ्गारभावजक्रियाविशेषः। इत्यमरः॥ सुकुमारविधानेन भूनेत्रादिक्रियासचिवकरचरणाङ्गविन्यासो ललितम्। तथा च।
"सुकुमाराङ्गविन्यासे मसृणा ललितं भवेत्॥"
तथा,—
"सभ्रूभङ्गं करकिसलयावर्त्तनैरापतन्ती
सा विभ्रन्ती ललितललिना लोचनस्याञ्जनेन।
विन्यस्यन्ती चरणकमले लीलया स्वैरयाते
निःशङ्का च प्रथमवयसा नर्त्तिता पङ्कजाक्षी॥
भ्रूनेत्रादिक्रियाश्लिष्टसुकुमारविधानतः।
हस्तपादाङ्गविन्यासस्तरुण्या ललितं विदुः॥"
इत्यन्येऽपि॥
"अनाचार्य्योपदिष्टं स्याल्ललितं रतिचेष्टितम्।"
इत्यन्ये।
ललत् कर्म्मणि भावे क्तः। लड विलासे इत्यस्य मनीषादित्वात् डस्य लत्वं वा। इति भरतः॥ अपि च।
"विन्यासभङ्गिरङ्गानां भूविलासमनोहरा।
सुकुमारा भवेद्यत्र ललितं तदुदीरितम्॥"
इत्युज्ज्वलनीलमणिः॥
ललितः, पुं, (लक्ष्मणे ईप्सते इति। लल+कर्म्मणि क्तः।) रागविशेषः। तस्य स्वरूपं यथा,—
"प्रफुल्लसप्तच्छदमाल्यधारी
युवातिगौरोऽलसलोचनश्रीः।
विनिःसरन् वासगृहात् प्रभाते
विलासिवेशो ललितः प्रदिष्टः॥"
तस्य गानसमयो यथा,—
"प्रातर्गेयास्तु देशागो ललितः षष्ठमञ्जरी।
विभाषा भैरवी चैव कामोदो गौडकौशिकः॥"
इति सङ्गीतदामोदरः॥
ललितः, त्रि, (लल+क्तः।) सुन्दरः। (यथा, रघुः। ८। १।
"अथ तस्य विवाहकौतुकं
ललितं बिभ्रत एव पार्थिवः॥")
ईप्सितः। इति मेदिनी। ते, १४७॥ चलितः। इति विश्वप्रकाशरत्नावल्यौ॥
ललितकान्ता, स्त्री, (ललिता कान्ता च।) मङ्गलचण्डिका। तस्या ध्यानं यथा,—
"यैषा ललितकान्तारव्या देवी मङ्गलचण्डिका।
वरदाभयहस्ता च द्विभुजा गौरदेहिका॥
रक्तकौशेयवस्त्रा च स्मितवक्त्रा शुभानना।
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा॥"
इति तिथ्यादितत्त्वम्॥
ललिता, स्त्री, (ललिन+टाप्।) कस्तूरी। हरी। इति राजनिर्घण्टः॥ नदीविशेषः। यथा,—
"निमिनाम्नस्तु राजर्षेः श्रापादङ्गसुतः पुरा।
वशिष्ठो ह्यशरीरोऽभूत् श्रापाच्च निमिनस्तथा॥
ततो ब्रह्मोपदेशेन निर्जने कामरूपके।
सन्ध्याचले तपस्तेपे तस्य विष्णुरभूत्तदा॥
प्रत्यक्षस्तस्य देवस्य वरदानान्महामुनिः।
अन्तर्धानवतार्य्याशु कुण्डं कृत्वा गिरेस्तटे॥
तत्र स्नात्वा च पीत्वा च शरीरं प्राप पूरितम्।
तस्मादन्तर्कुण्डात्तु सन्ध्या नाम नदी वरा।

निःस्तता तत्र चाङ्गत्य चिरायुरगदो भवेत् ॥
तस्मात् पूर्वन्तु कुर्व्वात्तु ललिताख्या सरिद्वरा।
सागरादुत्थितात् पूर्व्वं महादेवावतारिता ॥
वैशाखशुक्लपक्षस्य तृतीयायां नरस्तु यः।
कुर्य्याद्वै ललितास्नानं स शम्भुसदनं व्रजेत् ॥
ललितायाः पूर्व्वतीरे भगवान्नाम पर्व्वतः।
स्वयं विष्णुर्लिङ्गरूपी तत्रास्ते भगवान् हरिः ॥
ललितायां नरः स्नात्वा द्वादश्यां शुक्लपक्षके।
भगवन्तं समाराध्य यो यजेत् परमेश्वरम्।
स याति विष्णुभवनं शरीरेण विराजता ॥"

इति कालिकापुराणे ८९ अध्यायः ॥ * ॥

गोपीविशेषः। यथा,—

"अखिलरसामृतमूर्त्तिः
प्रसृमरशुचिरुचितारका पालिः।
कलितश्यामा ललितो
राधाप्रेयान् विधुर्जयति ॥

इति भक्तिरसामृतसिन्धुः ॥

ललिता श्यामला धैर्य्या पद्मा भद्राच्च अयन्ते ॥
इति तट्टीकायां जीवगोस्वामी ॥ तस्याः स्वरूपं यथा,—

"या दुर्गा सैव ललिता ललिता सैव राधिका।
एतासामन्तरं नास्ति सत्यं सत्यं हि नारद! ॥"

इति पाद्मे पातालखण्डे रासलीलायां नारदं प्रति श्रीकृष्णवाक्यम् ॥ रागिणीविशेषः। सा च मेघरागस्य पत्नी। यथा, सङ्गीतदामोदरे।

"ललिता मालसी गौड़ी नाटी देवकिरी तथा।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥"

(सा तु हनूमन्मते हिन्दोलरागस्य पत्नी। सोमेश्वरमते वसन्तस्य पत्नी। यथा, संगीतदर्पणे।

"वेलावली रामकिरी देशाख्या पटमञ्जरी।
ललिता सहिता एता हिन्दोलस्य वराङ्गनाः ॥"
"देशी देवकिरी चैव वराटी तोड़िका तथा।
ललिता चाथ हिन्दोली वसन्तस्य वराङ्गनाः ॥"

अस्या ध्यानादिकमाह तत्रैव। अथ ललिता।

"रि-प-वर्ज्या च ललिता औड़वा सत्रया मता।
मूर्च्छना सुभगमध्या स्यात् सम्पूर्णा केचिदूचिरे।
धैवतत्रयसंयुक्ता द्वितीया ललिता मता ॥"

ध्यानम्। यथा,—

"प्रफुल्लसप्तच्छदमाल्यकण्ठा
सुगौरकान्तिर्युवती सुदृष्टिः।
विनिश्चलन्ती सहसा प्रभाते
विलासवेश्मा ललिता प्रदिष्टा ॥"

उदाहरणम्। स ग म ध नि स। अथवा,—

स रि ग म प ध नि स। इति प्रथमा ॥
ध नि स ग म ध। इति द्वितीया ॥
इति ललिता ॥)

ललितासप्तमी, स्त्री, (ललिताख्या सप्तमी।) भाद्रशुक्लसप्तमी। तत्र कुक्कुटीव्रतं कार्य्यम्। यथा भविष्ये।

"भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या।
स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम्।
पूजयेच्च तदा तस्यां दुष्प्रापं नैव विद्यते ॥"

इति कुक्कुटीव्रतत्वेन ख्यातम्। इति तिथ्यादितत्त्वम् ॥ * ॥

तद्विधिर्यथा। तत्रादौ स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात्। ॐ अद्येत्यादि भाद्रे मासि शुक्ले पक्षे सप्तम्यान्तिथौ यावज्जीवनपर्य्यन्तं अमुकगोत्रा श्रीमदमुकी शिवदुर्गाप्रीतिकामा प्रतिवर्षीयभाद्रशुक्लसप्तम्यां गणेशादिदेवतापूजापूर्व्वकशिवपार्व्वतीपूजायावज्जीवनडोरकधारणभविष्यपुराणोक्तव्रतकथाश्रवणरूपललितासप्तमीव्रतमहं करिष्ये। ततः सङ्कल्पसूक्तं पठित्वा सामान्यार्घ्यं विधाय गणेशादीन् संपूज्य भूतशुद्ध्यादिकं विधाय मण्डलादिषु पूजामारभेत। ततो ध्यात्वा स्वशिरसि पुष्पं दत्त्वा मानसोपचारैः संपूज्य अर्घ्यं संस्थाप्य पुनर्ध्यात्वा आवाहयेत्। शिवपूजाविधिना शिवं दुर्गापूजाविधिना दुर्गाञ्च यथाशक्त्युपचारैः संपूज्य आवरणदेवान् पूजयेत्। ततो ऽभ्यर्च्चियुक्तडोरकं दुग्धेन सिक्तं शिवदुर्गाभ्यां अर्पयित्वा ततः डोरकं वामकरे बद्ध्वा भोज्यसुवस्त्वन्यं कथां श्रृणुयात्। अष्टफलानि दद्यात्। ततो दध्यां दद्यात् ॥ * ॥ अथ कथा।

श्रीकृष्ण उवाच।

"सोमशर्म्मो नाम देवर्षिर्मथुरामागतः पुरा।
सोऽर्चितो वसुदेवेन देवकेन च युधिष्ठिर! ॥
उपविष्टः कथाः पुण्याः कथयामास वै तदा।
ततः कथयितुं भूयः कथामेतां प्रचक्रमे ॥
कंसेन निहताः पुत्रा जाता जाताः पुनः पुनः।
स्तववत्सा देवकि! त्वं पुत्रदुःखेन दुःखिता ॥
यथा चन्द्रसुखी दीना बभूव नहुषप्रिया।
तथा त्वं देवकी भद्रे पुत्रदुःखेन दुःखिता ॥
पश्चाच्चीर्णव्रता सा तु बभूवाक्षयपुत्रिका।
त्वमेव देवकी देवि! भविष्यसि न संशयः ॥

देवक्युवाच।

का सा चन्द्रसुखी दीना बभूव नहुषप्रिया।
कथं चीर्णव्रतं सम्यक् तस्याः सन्ततिकारणम् ॥

सोमशर्म्म उवाच।

अयोध्यायां पुरा राजा नहुषो नाम विश्रुतः।
तस्य राज्ञो महादेवी नाम्ना चन्द्रसुखी प्रिया ॥
पुरोहितस्य तस्यैव पत्नी माला च नामिका।
तयोरासीद्दृढप्रीतिः सुहृज्जीया परस्परम् ॥
अथ तैरपि च मित्रिण्यौ स्नानार्थं सरयूजले।
प्राप्ते प्राप्तास्तु तत्रैव बहवो नगराङ्गनाः ॥
स्नात्वा मण्डलं चक्रुस्तन्मध्ये शक्तरूपिणम्।
लेखयित्वा शिवं शान्तसुमया सह शङ्करम्।
गन्धपुष्पाक्षतैर्भक्त्या पूजयित्वा यथाविधि।
प्रणम्य शिरसा भक्त्या ददुस्ताभ्यां वरस्त्रियः ॥
किमिदं क्रियते साध्वि! कथ्यतां यदि रोचते।
कदा वा क्रियते किं वा फलं सम्यक् तदुच्यताम् ॥

स्त्रिय ऊचुः।

पूजितोऽस्माभिरेतस्मिन् पार्व्वत्या सह शङ्करः।
व्रतमेतत् शुभं शिवस्यात्मा निवेदितः ॥
धारणीयमिदं तावद्यावत् प्राणस्य धारणम्।
तासान्तद्वचः श्रुत्वा ते स्नात्वा मानसं तथा ॥
स्नात्वा च सम्मतिं तत्र वव्रे दोर्भ्यां सुडोरकम्।
ततस्ताः स्वगृहं जग्मुः सखीभिः परिवारिताः ॥
कालेन महता तत्र विस्मृतं तद्व्रतं नृप!।
प्रमत्तया चन्द्रमुख्या विस्मृतञ्च सुडोरकम् ॥
स्तता कैश्चिदहोरात्रैः सा बभूव प्रवङ्गमी।
माला च कुक्कुटी जाता त्वसत्यव्रतपालनात् ॥
तथैव ते च मित्रिण्यौ जाते जातिस्मरे कुले।
सम्भूय भूयस्तत्रैव प्राप्तश्च समयः पुनः ॥
तद्दिने तद्दिने प्राप्ते पुनः काले च ते स्तते।
अदेयमालके देशे जाते गोकुलसङ्कुले ॥
राज्ञो जाया बभूवाथ एष्वीनाथस्य सा पुनः।
ईश्वरी नाम विख्याता सा तु राज्ञोऽतिवल्लभा ॥
अग्निमीलदिनस्यासीद्भार्य्या भूषणनामिका।
पुरोहितस्य कालेन कुक्कुटी बहुपुत्रिणी ॥
जातिस्मरा चाष्टपुत्रा तथैव चास्तप्रजा।
पुनर्निरन्तरा प्रीतिर्बभूवाथ तयोर्द्वयोः ॥
तत्रेश्वरी पुत्रमेकं प्रसूता तच्च रोगिणम्।
नववर्षे तु पञ्चत्वमगात्तच्च युधिष्ठिर! ॥
तच्च तां भूषणा दृष्ट्वा जगामातिदुःखिता।
सखीभावादतिस्नेहादृष्टपुत्रसमन्विता ॥
अयुक्ताभरणा नित्यं स्वभावेनैव भूषिता।
तां दृष्ट्वा पुत्रिणीं मर्त्यां प्रजज्वालेश्वरी रुषा ॥
ततो यत्नं प्रेषयित्वा तां सखीं तीव्रमत्सरा।
चिन्तयामास सा राज्ञी तस्याः पुत्रवधं प्रति ॥
हता हताश्च ये पुत्राः पुनर्जीवन्त्यनामयाः।
बहुपुत्रा जीववत्सा प्रयुक्ताभरणा कथम्।
द्योभसे त्वधिकं भद्रे तड़ित् सौदामिनी यथा ॥

भूषणोवाच।

भाद्रे मासि सिते पक्षे सप्तम्यां ललितालये।
स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम् ॥
संपूज्य विधिवत् प्राप्तं त्रैलोक्ये यच्च विद्यते।
तदेव हि व्रतं पूर्व्वं त्वया सह मया कृतम् ॥
तन्मयाचरितं भद्रा तेनाहं सुस्थिरा सखि।
त्वया नाचरितं सम्यक् दर्पेणातिगुरोरया ॥
तेन ते सन्ततिच्छिन्ना राज्येऽपि सति दुःखिता।
प्रभाव एष कथितो व्रतस्यास्य मया सखि! ॥
अहं तुभ्यं प्रदास्यामि तस्य धर्म्मस्य सुव्रते।
सखीभावात् प्रतीच्छ त्वं नात्र कार्य्या विचारणा ॥
संपूज्य शङ्करं भक्त्या करे बद्ध्वा सुडोरकम्।
यावज्जीवं मया तावत् शिवस्यात्मा निवेदितः ॥
इत्येवं समयं कृत्वा ततः प्रभृति डोरकम्।
स्वर्णरूप्यमयं वापि करशाखासु धारयेत् ॥
शङ्करोमया सार्द्धं सौवर्णे राजतेऽथवा।
ताम्रपात्रे प्रतिष्ठाप्य ब्राह्मणायोपपादयेत् ॥
पायसं पिष्टकञ्चैव भक्ष्यं भोज्यं प्रयत्नतः।
सगोत्रान् भोजयित्वा तु स्वयं भुञ्जीत तत्परम् ॥
मण्डलं सोमसदृशं शिवस्यात्मनिवेदितम्।
इत्येवं प्रतिजग्राह व्रतदानफलं ततः ॥

बभूव सुप्रजा साध्वी ईश्वरी सुवनेश्वरी।
व्रतस्यास्य प्रभावेन सुपुत्रा त्वञ्च देवकि!॥
भविष्यसि त्रिलोकेषु पुत्रञ्च जनयिष्यसि।
इत्येवं श्रावयित्वा च विरराम मुनिस्तदा॥
जगाम स्वपुरं पार्थ मयाप्येवं सवोदितम्।
याः स्त्रियः स्वाचरिष्यन्ति व्रतमेतदनुत्तमम्॥
कुक्कुटाख्यं प्रवङ्गाख्यं देवव्याचरितं शुभम्।
तासां सन्ततिविच्छेदो न कदाचिद्भविष्यति॥
स्त्रियश्चैवाचरिष्यन्ति व्रतमेतत् सुखप्रदम्।
अस्मिन् लोके सुखं भुक्त्वा यास्यन्ति शिवमन्दिरम्॥

या कुक्कुटीव्रतमिदं प्रवणीसमेतं
देवं विभाव्य हृदये च गुरुं निधाय।
भक्त्या करोति कलुषौघविनाशदक्षं
साध्वी सदा भवति शोभनजीववत्सा॥"

इति भविष्यपुराणे कुक्कुटीव्रतकथा समाप्ता॥

लवं, क्ली, (लू+अप्।) जातीफलम्। इति शब्दचन्द्रिका। लवङ्गम्। लामज्जकम्। ईषत्। इति राजनिर्घण्टः॥

लवः, पुं, (लवणमिति। लू+अप्।) लेशः। (यथा, रघुः। १६। ६६।

"वक्त्रेतराग्रेरलकेश्चरण्य-
चूर्णांश्चलान् वारिलवान् वमन्ति॥") विनाशः। छेदनम्। रामपुत्रः। इति मेदिनी। वे, २२। अत्र विनाशस्थाने विलासः। इति विश्वः हेमचन्द्रश्च। (रामपुत्रस्य जन्मविवरणादिकं रामायणे उत्तरकाण्डतो द्रष्टव्यम्।) कालभेदः। यथा,—

"अष्टादशनिमेषास्तु काष्ठा काष्ठादशं लवः॥"

इति हेमचन्द्रः॥

(यथा, भागवते। १। १८। १३।

"तुलयाम लवेनापि न स्वर्गं नापुनर्भवम्।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः॥")

लावनामा पक्षी। इति राजनिर्घण्टः॥ (किञ्चस्कः। पक्षः। गोपुच्छलोम। इति रघुटीकायां मल्लिनाथधृतवैजयन्ती। यथा, रघुः। १५। ३२।

"स तौ कुथलवोन्मर्दगर्भक्लेदौ दृढाश्रया।
कविः कुथलवावेव चकार किल भारतः॥")

लवङ्गं, क्ली, (लुनाति श्लेष्मादिकमिति। लू+"तरत्यादिभ्यश्च।" उणा० १। ११६। इति अङ्गच्।) सुनामख्यातवणिग्द्रव्यभेदः। तत्पर्य्यायः। देवकुसुमम् २ श्रीसंज्ञम् ३। इत्यमरः॥ श्रीप्रसूनम् ४। इति भावप्रकाशः॥ लवङ्गकम् ५। इति शब्दरत्नावली॥ लवङ्गकलिका ६ दिव्यम् ७ श्रेखरम् ८ लघम् ९ श्रीपुष्पम् १० रुचिरम् ११ वारिसम्भवम् १२ भृङ्गारम् १३ गोवर्णकुसुमम् १५ चन्दनपुष्पम् १६। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। चक्षुष्यत्वम्। मुखरोचनत्वम्। वातपित्तकफनाशित्वम्। तीक्ष्णत्वम्। मूर्छरुजापहत्वञ्च। इति राजनिर्घण्टः॥ आभानाहशूलघ्नत्वम्। दीपनत्वम्। लघुत्वञ्च। इति राजवल्लभः॥ अपि च।

"लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम्।
दीपनं पाचनं रुच्यं कफपित्तास्रनाशनम्॥
छर्दिं हृद्रोगं तथाध्मानं शूलमाशु विनाशयेत्।
कासं श्वासञ्च हिक्काञ्च क्षयं शमयति ध्रुवम्॥"

इति भावप्रकाशः॥

(यथा,—

"विरहानलसन्तप्ता तापिनी कापि कामिनी।
लवङ्गानि समुत्सृज्य गरुडे राघवे ददौ॥"

इत्युद्भटः॥)

लवङ्गकं, क्ली, (लवङ्ग+स्वार्थे कन्।) लवङ्गम्। इति शब्दरत्नावली॥ (लवङ्गशब्दोऽस्य विवरणं विज्ञेयम्॥)

लवङ्गकलिका, स्त्री, लवङ्गम्। इति राजनिर्घण्टः॥

लवङ्गलता, स्त्री, (लवङ्गस्य लता।) पुष्पलताविशेषः। यथा, जयदेवः।

"ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे॥
विहरति हरिरिह सरसवसन्ते।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते॥"

(यथा च।

"अयि! भवङ्ग! लवङ्गलतालये
पिब मधूनि विधूय मधुव्रतान्।
इह वने हि वनेचरसङ्कुले
जहि सतामसतामपि वञ्चना॥")

राधायाः सखीविशेषश्च॥

लवणं, क्ली, (लुनाति जायमिति। लू+बन्धादित्वात् ल्युः। पृषोदरादित्वात् वलम्।) षाररसयुक्तद्रव्यम्। तत्तु पञ्चविधं यथा। सौवर्चलम् १ सैन्धवम् २ विटम् ३ औद्भिदम् ४ सामुद्रम् ५। तथा हि।

"सामुद्रं यत्तु लवणमत्यौष्णं वस्तिरुक् तत्।
सैन्धवोऽल्पौ प्रीतस्निग्धौ माहिषस्त्वम्ल सिन्धुजे॥
रौमकं बहुकं पाक्यं विड्रुक् कृतके द्वयम्।"

सौवर्चलेऽक्षरूषके। इत्यमरः॥ (अस्य विवरणं यथा। "सैन्धवसामुद्रविड्सौवर्चलरोमकौद्भिदप्रभृतीनि लवणानि यथोत्तरमुष्णानि वातहराणि कफपित्तकराणि यथापूर्वं स्निग्धानि स्वादूनि वृष्यमूत्रपुरीषाणि चेति॥

"चक्षुष्यं सैन्धवं हृद्यं रुच्यं लघ्वग्निदीपनम्।
स्निग्धं समधुरं दृष्यं शीतं दोषघ्नसुत्तमम्॥
सामुद्रं मधुरं पाके बल्यमुष्णमविदाहि च।
भेदनं स्निग्धमीषच्च शूलघ्नं नातिपित्तलम्॥
सचारं दीपनं रूक्षं शूलहृद्रोगनाशनम्।
रोचनं तीक्ष्णमुष्णञ्च विड्रुं वातानुलोमनम्॥
लघुसौवर्चलं पाके वीर्य्योष्णं विशदं कटु।
गुल्मशूलविबन्धघ्नं हृद्यं सुरभि रोचनम्॥
रौमकं तीक्ष्णमत्युष्णं श्वयथ्वग्नि कटुपाकि च।
वातघ्नं लघु विस्यन्दि सूक्ष्मं विड्भेदि मूत्रलम्॥
लघु तीक्ष्णोष्णसुतरामौद्भिदं सूक्ष्मं वातानुलोमनम्।
सतिक्तं कटु सक्षारं विद्याल्लवणमौद्भिदम्॥
कफवातक्रिमिहरं भेदनं पित्तकोपनम्।
दीपनं पाचनं भेदि लवणं गुटिकाह्वयम्॥
ऊषसञ्ज्ञं वालुकेयं श्लेष्ममूलाकरोद्भवम्।
लवणं कटुकं क्षेदि विद्यात् कटु चोच्यते॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥

लू+भावे ल्युट्।) छेदनम्। यथा। लवोऽभिलाषो लवणे। इति चामरः (खड्गायुधप्रकारविशेषः। यथा, हरिवंशे भविष्यपर्व्वणि। ५३। १७।

"आहितं चित्रकं चित्रं क्षुरवं लवणं धृतम्।")

लवणः, पुं, (लुनातीति। लू+ल्युः।) सिन्धुभेदः। (यथा, महाभारते। ६। ५। १५।

"लवणेन वसुदेव समन्तात् परिवारितः॥")

राक्षसविशेषः। रसविशेषः। इति मेदिनी। णे, ७४॥ (यथा, भागवते। ३। ३१। ७।

"कटुतीक्ष्णाम्ललवणक्षारादिभिरखण्डैः।
माढसक्लेदपरसृक्सर्व्वाङ्गोल्लिखितवेदनः॥")

पृथिव्यभिगुणबाहुल्याल्लवणः। इति चक्रपाणिदत्तसूत्रद्रव्यगुणोपरि शिवदासीयटीका॥ तत्पर्य्यायः। पटुः २। तस्य गुणाः।

"लवणो रुचिकृद्वह्नेर्विदाही
पचनः स्वादुकरश्च सारकश्च।
रसितो नितरां गुरुश्च पित्तं
श्लेष्मितमानश्च ददाति कुष्ठकारी॥"

इति राजनिर्घण्टः॥

अपि च।

"लवणः क्लेदनस्तीक्ष्णः पाचनो दीपनः सरः।
स्निग्धो रुचिकरः स्यन्दी दृष्टिमुक्करुरो लघुः॥"

अन्यच्च।

"लवणः श्लेष्मसङ्घातभेदनो वह्निदीपनः।
छेदनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदनः॥
सोऽतियुक्तोऽक्षिपाकास्रपित्तकुष्ठक्षयापहः।"

इति राजवल्लभः॥

("लवणः स्यन्दयत्यास्यं कफोलेशगलादिकम्।"
"लवणः श्लेष्मसङ्घातभेदनोऽग्निबलप्रदः॥
छेदनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदनः॥
सोऽतियुक्तोऽक्षपाकं खलतिं पलितं वलिम्॥
कुष्ठविषवीसर्पान् जनयेत् शमयेद्बलम्॥"

इति वाग्भटे सूत्रस्थाने दशमेऽध्याये॥

"लवणो रसः पाचनः क्लेदनः दीपनः भावनः छेदनः भेदनस्तीक्ष्णः सरो विकाशधःसंस्रंसकारकरो वातहरः श्लेष्मबन्धसङ्घातविधमनः सर्व्वरसप्रत्यनीकभूत आस्यं विस्रावयति कफं विस्यन्दयति मार्गान् शोधयति सर्व्वशरीरावयवान् क्लेदकरोति रोचयत्याहारमाहारयोगी भावयेद्गुरुः स्निग्ध उष्णश्च॥

स एवं गुणोऽपेक एवात्यर्थमुपयुज्यमानः पित्तं कोपयति रक्तं दूषयति तर्पयति मूर्च्छं-

यति तापयति दाहयति कुष्णाति मांसानि प्रगालयति कुष्ठानि विषं वर्द्धयति स्रोतान् स्फोटयति दन्तान् म्लापयति पुंस्त्वमुपहन्ति इन्द्रियाण्युपरुणद्धि वलीपलितखालित्यमापादयति च लोहितपित्तान्वितपीसर्पवातरक्तविचर्चिकेन्द्रलुप्तप्रभृतीन् विकारानुपजनयति।"

"प्रलीयन् क्लेद्यविष्यन्दलाघवं कुरुते सुखे।
यः स्रोतसं लवणो ज्ञेयः सविदाहस्त्रुतस्य च॥"

इति चरके सूत्रस्थाने २६ अध्यायः॥

"लवणः संशोधनः पाचनो विस्रेषणः क्लेदनः शैथिल्यकृद्रुक्षः सर्व्वरसप्रत्यनीको मार्गविशोधनः सर्व्वशरीरावयवमार्द्दवकरश्चेति स एवंगुणोऽप्यतिकृच्छ्रात्यर्थमासेव्यमानो गात्रकण्डूकोठश्वेतवैवर्ण्यपुंस्त्वोपघातेन्द्रियोपतापान् तथासृक्षाधिपाकं रक्तपित्तवातश्लेष्मिताम्लीकाप्रभृतीनापादयति।"

"यो भक्तरुचिमुत्पादयति कफप्रसेकं जनयति मार्द्दवमापादयति स लवणः।" इति सुश्रुते सूत्रस्थाने ४२ अध्यायः॥ * ॥)

लवणासुरस्य विवरणं यथा,—

"पूर्व्वं कृतयुगे राजन्! दैतेयः सुमहामतिः।
लोलापुत्रोऽभवच्छ्रेष्ठो मधुर्नाम महासुरः॥
स मधुर्वीर्य्यसम्पन्नो धर्म्मे च सुसमाहितः।
बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः॥
शूलं शूलाद्विनिष्कृष्य महावीर्य्यं महाप्रभम्।
ददौ महात्मा सुप्रीतो वाक्यं चैतदुवाच ह॥
यावत् सुरेषु विप्रेषु न विरुध्येर्महासुर!।
तावच्छूलं तवेदं स्यादन्यथा नाशमेष्यति॥
यच्च त्वामभियुञ्जीत युद्धाय विगतज्वरः।
तं शूलो भस्मसात् कृत्वा पुनरेष्यति ते करम्॥
एवं रुद्रादरं लब्ध्वा भूय एव महासुरः।
प्रणिपत्य महादेवं वाक्यमेतदुवाच ह॥
भगवन्मम वंशस्य शूलमेतदनुत्तमम्।
भवेत्तु सततं देव सुरायामीश्वरो ह्यसि॥
तं ब्रुवाणं मधुं देवः सर्व्वभूतपतिः शिवः।
प्रत्युवाच महादेवो नैतदेवं भविष्यति॥
माभूत्ते विफला वाणी मत्प्रसादकृता शुभा।
भवतः पुत्रमेकन्तु शूलमेतद्धनिष्यति॥
यावत् करस्थः शूलोऽयं भविष्यति सुतस्य ते।
अवध्यः सर्व्वभूतानां शूलहस्तो भविष्यति॥
एवं मधुर्व्वरं लब्ध्वा देवात् सुमहदद्भुतम्।
भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम्॥
तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या।
विश्वावसोरपत्यं साप्यनलायां महाप्रभा॥
तस्याः पुत्रो महावीर्य्यो लवणो नाम दारुणः।
बाल्यात् प्रभृति दुष्टात्मा पापान्येव समाचरत्॥
तं पुत्रं दुर्व्विनीतन्तु दृष्ट्वा क्रोधसमन्वितः।
मधुः स श्लोकमापेदे न चैनं किञ्चिदब्रवीत्॥
स विहाय इमं लोकं प्रविष्टो वरुणालयम्।
शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत्॥
स प्रभावेण शूलस्य दौरात्म्येनात्मनस्तथा।
सन्तापयति लोकांस्त्रीन् विस्रेषेण च तापसान्॥

आहारः सर्व्वसत्त्वानि विस्रेषेण च तापसाः।
आचारो रौद्रता नित्यं वासो मधुवने तथा॥
हत्वा बहुसहस्राणि सिंहव्याघ्रगजाङ्गनाः।
मानुषांश्चैव कुरुते नित्यमाहारमाह्निकम्॥
तच्छ्रुत्वा राघवो वाक्यमुवाच स महामुनीन्।
घातयिष्यामि तद्रक्षो भवगच्छतु वो भयम्॥
प्रतिज्ञाय तदा तेषां मुनीनामुग्रतेजसाम्।
स भ्रातॄन् सहितान् सर्व्वानुवाच रघुनन्दनः॥
को हन्ता लवणं वीरः कस्यांशः स विधीयताम्।
भरतस्य महाबाहो शूलस्य च धीमतः॥
राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत्।
अहमेनं वधिष्यामि ममांशः स विधीयताम्॥
भरतस्य वचः श्रुत्वा धैर्य्यौर्य्यसमन्वितम्।
लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम्॥
शूलस्त्रस्त्रवीद्वाक्यं प्रणिपत्य नराधिपम्।
कृतकर्म्मा महाबाहुर्मध्यमो रघुनन्दन!॥
आर्य्येण हि पुरा मूल्या त्वयोध्या परिपालिता।
सन्तापं हृदये कृत्वा आर्य्यस्यागमनं प्रति॥
प्रेष्ये मयि स्थिते राजन्न भूयः क्लेशमाप्नुयात्॥
तथा ब्रुवति शूलेऽस्मिन् राघवः पुनरब्रवीत्।
एवं भवतु काकुत्स्थ क्रियतां मम शासनम्॥
स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम्।
राज्यं प्रशाधि धर्म्मेण वाक्यं मे यदि वेत्स्यसे॥
यदा तु युद्धमाकाङ्क्षन् यदि कश्चित् समाह्वयेत्।
तदा शूलं गृहीत्वा तु भस्म रक्षः करोति हि॥
स त्वं पुरुषशार्द्दूल! तमायुधविनाकृतम्।
अप्रविष्टं पुरं पूर्व्वं द्वारि तिष्ठ धृतायुधः॥
अन्यथा क्रियमाणे तु अवध्यः स भविष्यति॥
ततः प्रभाते विमले तस्मिन् काले स राक्षसः।
निर्गतस्तु पुराद्वीरो भक्ष्याहारप्रचोदितः॥
एतस्मिन्नन्तरे वीर उत्तीर्य्य यमुनां नदीम्।
तौर्त्वा मधुपुरद्वारि धनुष्पाणिरतिष्ठत॥
ततोऽर्द्धदिवसे प्राप्ते क्रूरधर्म्मा स राक्षसः।
आगच्छद्बहुसाहस्रं प्राणिनां भारसङ्कुलम्॥
ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधम्।
तमुवाच ततो रक्षः किमनेन करिष्यसि॥
तस्यैवं भाषमाणस्य हसतश्च मुहुर्मुहुः।
शत्रुघ्नो वीर्य्यसम्पन्नो रोषादभ्यवदत्ततः॥
उवाच च सुसंक्रुद्धः शत्रुघ्नः स निशाचरम्।
योद्धुमिच्छामि दुर्बुद्धे द्वन्द्वयुद्धं त्वया सह॥
तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः।
क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत्॥
आकृतस्तु पुनस्तेन शत्रुघ्नेन महात्मना।
लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः॥
आकर्णात् स विकृष्याथ तद्धनुर्घ्नन्निणां वरः।
स सुमोच महाबाणं लवणस्य महोरसि॥
उरस्तस्य विदार्य्याशु प्रविवेश रसातलम्।
पुनरेवागमत्तूणमिच्छाकुकुलनन्दनम्॥
शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः।
पपात सहसा भूमौ वज्राहत इवाचलः॥
तच्च शूलं महद्दिव्यं हते लवणराक्षसे।

पश्यतां सर्व्वदेवानां रुद्रस्य वशमन्वगात्॥
हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः।
ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम्॥
वरदास्तु महाबाहो सर्व्व एव समागताः।
विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः॥
देवानां भाषितं श्रुत्वा शूरो ह्रीं कृताञ्जलिः।
प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान्॥
इयं मधुपुरी रम्या मधुरा देवनिर्म्मिता।
निवेशं प्राप्नुयाच्छीघ्रमेष मेऽस्तु वरः परः॥
तं देवाः प्रीतमनसो वाढमित्येव राघवम्।
भविष्यति पुरी रम्या शूरसेना न संशयः॥
ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा।
शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयेत्॥
सा सेना शीघ्रमागच्छत् श्रुत्वा शत्रुघ्नशासनम्।
निवेशनञ्च शत्रुघ्नः श्रावयेन समारभत्॥
तां पुरीं दिव्यसङ्काशां नानापण्योपशोभिताम्।
निरीक्ष्य परमप्रीतः परं हर्षमुपागमत्॥
तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम्।
रामपादौ निरीक्षेऽहं वर्षे द्वादश आगते॥"

इति श्रीरामायणे उत्तरकाण्डे एकषष्ट्यधिकशततमाध्यायेभ्यः सङ्कलितम्॥ * ॥ लवणसमुद्रस्योत्पत्तिर्यथा,—

"विरजा सा रजोयुक्ता श्रुत्वा वैर्य्यमघोघकम्।
सद्यो बभूव तत्रैव धन्या गर्भवती सती॥
तस्यौ तत्र सुखासीना सार्द्धं पुत्रैश्च सप्तभिः॥
एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्জ্জने।
विजहार पुनः साध्वी शृङ्गारासक्तमानसा॥
एतस्मिन्नन्तरे तत्र मातुः क्रोड़ं जगाम ह।
कनिष्ठपुत्रस्तस्याश्च भ्रातृभिः पीड़ितो भिया॥
भीतं स्वतनयं दृष्ट्वा तत्राज्ञा तां कृपानिधिः।
क्रोड़े चकार बालं सा कृष्णो राधामहं ययौ॥
प्रबोध्य बालं सा साध्वी न ददर्शाग्निके प्रियम्।
विललाप भृशं तत्र शृङ्गाराऽऽसक्तमानसा॥
शशाप स्वसुतं कोपात् लवणोदो भविष्यति॥
कदापि ते बलं केचित् न खादिष्यन्ति जीविनः॥
शशाप सर्व्वान् बालांश्च यान् मूढ़ा मही-
तलम्।
गच्छध्वं च महीं मूढ़ा जम्बुद्वीपं मनोहरम्॥
स्थितिर्नैकत्र युष्माकं भविष्यति पृथक् पृथक्।
द्वीपे द्वीपे स्थितिं कृत्वा तिष्ठन्तु सुखिनः सुताः॥
द्वीपस्थाभिर्नदीभिश्च सह क्रीड़न्तु निर्জ্জने।
कनिष्ठो बालशापाच्च लवणोदो बभूव ह॥
कनिष्ठः कथयामास बालशापञ्च बालकान्।
आजग्मुर्दुःखिताः सर्व्वे बालस्थानञ्च बालकाः॥
श्रुत्वा विवरणं सर्व्वे प्रणम्युर्धरणीतलम्।
प्रणम्य मातुश्चरणं भक्तिनम्रात्मकन्धराः॥
सप्तद्वीपे समुद्राश्च सप्त तस्युर्विभागशः।
कनिष्ठादृष्टपर्य्यन्तं द्विगुणं द्विगुणं सुने॥
लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः।
एतेषाञ्च जलं पृथ्वी ग्रस्यार्थञ्च भविष्यति।
आप्ताः समुद्राः सप्तैव सप्तद्वीपां वसुन्धराम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३ अध्यायः॥

लवणः, त्रि, (लवणेन संसृष्टः। लवण+टक्। "लवणात् लुक्।" ४।४।२४। इति ठको लुक्। यद्वा, लवणो रसोऽस्यास्मिन्निति। अर्श आद्यच्।) लवणरसयुक्तः। इति मेदिनी। णे, ७५। (यथा, सुश्रुते। १।२१। "मधुरस्त्वविदग्धः स्यादविदग्धो लवणः स्मृतः।") लावण्ययुक्तश्च॥

लवणकिंशुका, स्त्री, महाज्योतिष्मती। इति राजनिर्घण्टः॥

लवणक्षारः, पुं, (लवणस्य क्षारः।) लोहाक्षारः। इति राजनिर्घण्टः॥

लवणखानिः, स्त्री, (लवणस्य खानिः खनिः।) ग्राम्यारिलवणोत्पत्तिस्थानम्। तत्पर्य्यायः। रसा २। इति हेमचन्द्रः। ४।७॥ लवणाकरमात्रेऽपि॥

लवणत्रयं, क्ली, (लवणरसविशिष्टं त्रयम्।) त्रयविशेषः। तत्पर्य्यायः। लोमत्रयम् २ त्रयान्वम् ३ पटुत्रयकम् ४ अम्लकात्रयम् ५। अस्य गुणाः। सर्व्वौषत्वम्। अम्लत्वम्। कषायत्वम्। अग्नित्वम्। अग्नदीपकत्वञ्च। इति राजनिर्घण्टः॥

लवणत्रयं, क्ली, (लवणानां त्रयम्।) सैन्धवं विड्रं रुचकञ्च। इति राजनिर्घण्टः॥

लवणधेनुः, स्त्री, (लवणनिर्म्मिता धेनुः।) दानार्थलवणादिनिर्म्मितधेनुः। तद्विवरणं यथा,—

ईश्वरोवाच।

"लवणधेनुं वक्ष्यामि तां निबोध महीपते।
अनुलिप्ते महीपृष्ठे लक्षाजिनकुशोत्तरे॥
धेनुं लवणमयीं कृत्वा षोड़शप्रस्थसंयुताम्।
वत्सं चतुर्भी राजेन्द्र दध्नुपादांश्च कारयेत्॥
नीलवर्णसुखस्पर्शाञ्जि खुरा रौप्यमयास्तथा।
सुवर्णं गुड़मयं तस्या दन्ताः फलमया नृप!॥
जिह्वा शर्करया राजन् स्रोत्रं गन्धमयन्तथा।
नेत्रे रत्नमये कुर्य्यात् कर्णौ पत्रमयौ तथा॥
शीलवर्णं सुवर्णकोटौ च नवनीतमयाः स्तनाः।
सूत्रपुच्छां ताम्रशृङ्गीं दभरोमणीं पयस्विनीम्॥
कांस्योपदोहां राजेन्द्र वस्त्राभरणभूषिताम्।
सुगन्धपुष्पधूपैश्च पूजयित्वा विधानतः।
व्याख्याय वस्त्रयुग्मेन ब्राह्मणाय निवेदयेत्॥
अहन्यहनि यावत्सु यतीयाते तथायनं।
नक्षत्रग्रहपीड़ासु सर्व्वकालं प्रदापयेत्॥
द्विजाय साधुवृत्ताय कुलीनाय च धीमते।
वेदवेदाङ्गविदुषे श्रोत्रियायाहिताग्नये॥
दरिद्राय प्रदातव्या तथामत्सरिणे नृप!।
अनयैव मन्त्रतु पुच्छदेशोपरिस्थितः॥
क्षत्रकोपानहौ देयौ सुदिवायर्त्तपचके।
आच्छाद्य वस्त्रयुग्मेन दक्षिणां कनकं ददेत्॥
पूर्व्वोक्तेन विधानेन स्वशक्त्या कनकेन तु।
इमां गृहाण भो विप्र रुद्ररूपे नमोऽस्तु ते॥
रसानां सर्व्वभूतानां सर्व्वदेवनमस्कृता।
कामं कामदुघे कामा धारयेनो नमोऽस्तु ते॥
रक्षा धेनुं लवणेन एकाहमेव तिष्ठति।
स्वयं विरात्रं विप्रेण तथैव लवणाग्निना॥
सहस्रेण घृतेनाथ स्वशक्त्या कनकेन तु।
दत्त्वेमां स्वर्गमाप्नोति यत्र देवो वृषध्वजः॥
य इदं शृणुयाद्भक्त्या श्रावयेदापि मानवः।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकञ्च गच्छति॥"

इत्यादि वाराहपुराणे श्वेतोपाख्याने लवणधेनुमाहात्म्यम्॥

लवणमदः, पुं, (लवणस्य मदः।) लोहाक्षारः। इति राजनिर्घण्टः॥

लवणा, स्त्री, (लुनाति या। लू+ल्युः। टाप्।) नदीभेदः। दीप्तिः। इति मेदिनीशब्दरत्नावल्यौ। महाज्योतिष्मती। इति राजनिर्घण्टः॥

लवणाचलः, पुं, (लवणनिर्म्मितः अचलः।) दानार्थलवणादिनिर्म्मितपर्व्वतः। यथा,—

"अथातः संप्रवक्ष्यामि लवणाचलमुत्तमम्।
यत्प्रदाता नरो लोकं प्राप्नोति शिवसंयुतम्॥
उत्तमः षोड़शद्रोणः कर्त्तव्यो लवणाचलः।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः॥
वित्तहीनो यथाशक्त्या द्रोणादूर्द्धन्तु कारयेत्।
चतुर्थांशेन विष्कम्भात् पर्व्वतान् कारयेत् पृथक्॥
विधानं पूर्व्ववत् कुर्य्यात् ब्रह्मादीनाञ्च सर्व्वदा।
तद्वद्धेमतनून् सर्व्वान् लोकपालान्निवेशयेत्॥
सरांसि कामदेवादींस्तद्वच्च निवेशयेत्।
कुर्य्याच्चागरमन्त्रापि दानमत्र निबोधत॥
सौभाग्यरससम्भूतो यतोऽयं लवणो रसः।
तदात्मकेन च मां पाहि पायान्नगोत्तम॥
यस्मादन्यरसाः सर्व्वे नोत्कटा लवणं विना।
प्रियश्च शिवयोर्नित्यं तस्मात् शान्तिप्रदो भव॥
विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनम्।
तस्मात् पर्व्वतरूपेण पाहि संसारसागरात्॥
अनेन विधिना यस्तु दद्याल्लवणपर्व्वतम्।
उमालोके वसेत् कल्पं ततो याति परां गतिम्॥"

इति मात्स्ये ७७ अध्यायः॥

लवणाब्धिजं, क्ली, (लवणाब्धौ लवणसमुद्रे जायते इति। जन+डः।) सामुद्रलवणम्। इति राजनिर्घण्टः॥

लवणारजं, क्ली, लोहाक्षारः। इति राजनिर्घण्टः॥

लवणोत्तमं, क्ली, (लवणेषु उत्तमम्।) सैन्धवम्। इति रत्नमाला॥

लवणोत्थं, क्ली, (लवणादुत्तिष्ठतीति। उत्+स्था+कः।) लोहाक्षारः। इति राजनिर्घण्टः॥

लवणोदः, पुं, (लवणं उदकं यस्य। उत्तरपदस्य पेलुदकस्योदादेशः।) लवणसमुद्रः। इत्यमरः॥

लवनं, क्ली, (लू+भावे ल्युट्।) छेदनम्। इत्यमरः॥

लवनी, स्त्री, फलवृक्षविशेषः। लोना इति भाषा॥ तत्पर्य्यायः। श्रीपर्णी २ अग्निमा ३। इति शब्दचन्द्रिका॥

लवली, स्त्री, (लवं वेद्यं लातीति। ला+कः। गौरादित्वात् ङीष्।) फलवृक्षविशेषः। लोवाड़ि इति भाषा। तत्पर्य्यायः। सुगन्धमूला २ गन्धः ३ कोमलवल्कला ४। इति राजनिर्घण्टः॥ तस्य फलगुणाः। हृद्यत्वम्। सुगन्धित्वम्। कफवातनाशित्वञ्च। इति राजवल्लभः॥

"लवलीफलमम्लाग्नीवातपित्तहरं लघु॥"

इति केचित्॥

(यथा, राजेन्द्रकर्णपूरे। ४७।

"छत्वा वेलापुलिनलवलीपल्लवग्रासगोष्ठीं
दिङ्मातङ्गाः समममथ सरिन्नाथपाथः
पिबन्ति॥")

लवाकः, पुं, (लवार्थं छेदनार्थं अकतीति। अक+अच्।) छेदनद्रव्यम्। इत्युणादिकोषः॥

लवाणकः, पुं, (लूयतेऽनेनेति। लू+"आयकोलूधूग्निन्धिधाञ्भ्यः।" उणा० ३। ८३। इति आणकः।) दात्रादिः। इत्युणादिकोषः॥

लविः, त्रि, (लूयतेऽनेनेति। लू+"अच इः।" उणा० ४। १३८। इति इः।) छिद्रः। इत्युणादिकोषः॥

लवित्रं, क्ली, (लूयतेऽनेनेति। लू+"अर्त्तिलूधूसूखनसहचर इत्रः।" ३। २। १८४। इति इत्रः।) दात्रम्। इत्यमरः॥

लश्, क श्लिष्यर्थयोगे। इति कविकल्पद्रुमः॥ (पुराः-परः-अकः-सेट्।) क, लाश्यति कृष्णलो वृत्ते श्लिष्यं युनक्तीत्यर्थः। इति दुर्गादासः॥

लशुनं, क्ली, (अश्यते भुज्यते इति। अश्+"अशेर्लशुन च।" उणा० ३। ५७ इति उनन्। लशादेशश्च धातोः।) रसुनः। तत्पर्य्यायः। महौषधम् २ यक्षघ्नः ३ अरिष्टः ४ महाकन्दः ५ रसोनकः ६। इत्यमरः॥ रसोनः ७ म्लेच्छकन्दः ८ भूतघ्नः ९ उग्रगन्धः १०। अस्य गुणाः। अग्निदीपनत्वम्। गुरुत्वम्। उष्णत्वम्। कफवातनाशित्वम्। असृष्टित्वम्। क्रिमिकुष्ठोदरगुल्मोपशमत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ * ॥ अपि च।

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम्।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः॥
यदाहृतं वैनतेयो जहार सुरसत्तमात्।
सदा ततोऽपतद्बिन्दुः सुरसोनोऽपतद्भुवि॥
पञ्चभिश्च रसैर्युक्तो रसोनाख्येन वर्ज्जितः।
तस्मादसौ रसोक्तो वै यथार्थो गुणवेदिभिः॥
कटुकश्चापि मधुरे तिक्तः पञ्चसु संस्थितः।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः॥
बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः।
रसोनो दृंहणो हृद्यो स्निग्धोष्णः पाचनः
सरः॥
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः।
भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तासृग्दिदः।
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः॥
हृद्रोगजीर्णज्वरकुक्षिशूलं
विबन्धगुल्मारुचिकासशोफान्।
दुर्नामकुष्ठानलसादजन्तु-
समीरणश्वासकफांश्च हन्ति॥

मद्यं मांसं तथाम्लञ्च हितं लशुनसेविनाम् ॥
व्यायाममातपं रोषमतिगौरं पयो गुडम् ।
रसोनमन्नं पुरुषस्त्यजेदेतन्निरन्तरम् ॥"
इति भावप्रकाशः ॥ * ॥

अन्यच्च ।

"लशुनः क्षारमधुरः कण्ठ्यो वृष्यो गुरुः सरः ।
भग्नसन्धानलघ्वग्नी रक्तपित्तप्रदूषणः ॥"
इति राजवल्लभः ॥

(तथाचास्य गुणादिविषयो यथा,—

"कटुरसवीर्य्यो लशुनो हितश्च
स्निग्धो गुरुः स्वादुरसोऽथ वृष्यः ।
दृष्टस्य मेधास्वरवर्णचक्षु-
र्भग्नास्रिसन्धानकरः सुतीक्ष्णः ॥
कुष्ठोगजीर्णज्वरकृच्छ्रशूल-
प्रमेहहिक्कारुचिगुल्मगोफान् ।
दुर्नामकुष्ठानलमान्द्यजन्तु-
समीरजं श्वासकफान्निहन्ति ॥"
इति हारीते कल्पस्थाने द्वितीयाध्याये ॥
"घृतेवातहिमदग्धतनूनां
स्नग्धमुष्णकुटिलग्रथितास्याम् ।
भेषजस्य पवनोपहतानां
वक्ष्यते विधिरतो लशुनस्य ॥"
"घृतेऽयेक्षलशुनं घृते वसन्तेऽपि कफोल्बणः ।
घनोदयेऽपि वातार्त्तः शरदा वा घृतलीलया ॥"
इति वागभटे उत्तरस्थाने ३६ अध्यायः ॥
"क्रिमिकुष्ठकिलासघ्नो वातघ्नो गुल्मनाशनः ।
स्निग्धोष्णश्च रसश्च लशुनः कटुको गुरुः ॥"
इति चरके सूत्रस्थाने २७ अध्यायः ॥)

लशूनः, पुं. (रसेन जनः रस्य लत्वम् । पृषोदरादित्वात् सस्य शः अकारलोपश्च ।) लशुनः ।
इति शब्दरत्नावली ॥

लष, क श्लिष्यर्थयोगे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, लाषयति क्रमूलो वृत्ते श्लिष्यं युनक्तीत्यर्थः । इति दुर्गादासः ॥

लष, ण सृष्टि । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ण, लषति लष्यते ।
इति दुर्गादासः ॥

लष, य ण सृष्टि । इति कविकल्पद्रुमः ॥ (दिवा०-उभ०-सक०-सेट् ।) य ण, लष्यति लष्यते ।
इति दुर्गादासः ॥

लष्कः, पुं, (लाषयति वृत्ते श्लिष्यं युनक्तीति । लष्+"सर्व्वधातुभ्यस्त्विति ।" उणा० १।१५६।
इति वनूप्रत्ययेन साधुः ।) नपुंसकः । इत्युणादिकोषः ॥

लस, श्लिषि । क्रीड़े । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) लसति । इति दुर्गादासः ॥

लस, क श्लिष्यर्थयोगे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक० सेट् ।) क, लासयति क्रमूलो वृत्ते श्लिष्यं युनक्तीत्यर्थः । इति दुर्गादासः ॥

लसा, स्त्री, (लसतीति । लस्+अच् ।) हरिद्रा । इति हारावली । ६३ ॥

लसिका, स्त्री, (लसतीति । लस्+अच् । ततः कन् ततष्टापि अत इत्वम् ।) लाला । यथा,—
"लालायां पिच्छिला खाता लसिका लासिका तथा ॥"
इति शब्दचन्द्रिका ॥

लसीका, स्त्री. इक्षुरसः । त्वङ्मांसमध्यगरसः ।
इति केचित् ॥ (यथा । "लसीका उदकविशेषः । यथाह चरकः । यत्तु मांसत्वगन्तरे उदकं तल्लसीकाशब्दं लभते ।" इति विजयरक्षितकृतप्रमेहरोगव्याख्याने ॥
"यत्तु त्वगन्तरे प्रवर्त्तमानं लसीकाशब्दं लभते ।"
इति चरके शारीरस्थाने सप्तमेऽध्याये ॥)

लसुज, ईं ओ ड क्रीड़े । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) क्विपि संयोगादिलोपे लक् । ईं ओ, लग्नः । ड, लज्यते । इति दुर्गादासः ॥

लस्तः, त्रि, श्लिष्टः । क्रीड़ितः । श्लिष्टयुक्तः । लसधातोः क्तप्रत्ययेन निष्पन्नः । इति लस्तकशब्दव्युत्पत्तौ भरतश्च ॥

लस्तकः, पुं, घनुषो मध्यभागः । इत्यमरः ॥

लस्तकी, [न्] पुं, (लस्तकोऽस्यास्तीति । लस्तक+इनिः ।) धनुः । इति शब्दमाला ॥

लहरिः, } स्त्री, महातरङ्गः । तत्पर्य्यायः ।
लहरी, } उल्लोलः २ कल्लोलः ३ । इति हेमचन्द्रः शब्दरत्नावली च ॥ (यथा, आर्य्यासप्तशत्याम् । ६१४ ।
"सरित इव यस्य गेहे सुप्यन्ति विशाल-
गोत्रजा नार्य्यः ।
पाराम्बुधेर्व्व ह्रियते जलधिसुहृद्भिर्जलद इव ॥")

ला, ञ आदाने । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) ञ, लाति । यद्यो यद्दानम् । इति दुर्गादासः ॥

ला, स्त्री, यद्दानम् । दानम् । इति मेदिनी । ले, १ ॥

लाक्षकी, स्त्री, सीता । यथा,—
"राघव ते इयं सीता द्वारकेशस्य रुक्मिणी ।
विष्णोरवतारमात्रस्य लक्ष्मीर्य्या कमलालया ॥
वाराहस्यां विशालाक्षी विमला पुरुषोत्तमे ।
वैकुण्ठे तु महालक्ष्मी राधा वृन्दावने वने ॥
लक्षयः कमला दास्यो यस्याः सा लाक्षकी मता ।
एवं व्रतसहस्राणामीश्वरी राधिकाधिका ॥"
इति पाद्मोत्तरखण्डे ५५ अध्यायः ॥

लाक्षणिकः, पुं, लक्षणया प्रतिपादकः । इति साहित्यदर्पणम् ॥ लक्षणात्मकवृत्तिमत्पदत्वं लाक्षणिकत्वम् । इति सारमञ्जरी ॥ (यथा, विभक्तिसन्दर्भे वादे ।
"मुख्यो लाक्षणिको रूढ़ो योगरूढ़श्च यौगिकः ।
क्वचित् यौगिकरूढ़श्च शब्दः शोणे निगद्यते ॥"
(लक्षणमधीते वेद वा । लक्षण+"कतूक्थादिसूत्रान्तात् ठक् ।" ४ । २ । ६० । इति ठक् ।
लक्षणाभिज्ञे, त्रि ।)

लाक्षा, स्त्री, (लक्ष्यतेऽनयेति । लक्ष्+"गुरोश्च हलः ।" ३।३।१०३ । इति अः । टाप् । यद्वा, "वाहुलकात् राजतेरपि षः । कापिलिकादित्वात् वा लत्वम् ।" इत्युज्ज्वलः । ३ । ६२ ।) रक्तवर्णवृक्षनिर्य्यासविशेषः । लाहा इति भाषा ॥ तत्पर्य्यायः । राक्षा २ क्रतुः ३ याव: ४ अलक्तः ५ द्रुमामयः ६ । इत्यमरः ॥ खदिरिका ७ रक्षा ८ रङ्गमाता ९ पलङ्कषा १० क्रिमिजा ११ द्रुमव्याधिः १२ अलक्तकः १३ यवाग्नी १४ सुदिनी १५ दीप्तिः १६ जतुका १७ गन्धमादिनी १८ नीला १९ हरसा २० पित्तारिः २१ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । श्लेष्मपित्तार्त्तिशोफविषरक्तविषमज्वरनाशित्वञ्च ।
इति राजनिर्घण्टः ॥ भग्नविसर्पव्रणदोषनाशित्वम् । बल्यत्वञ्च । इति राजवल्लभः ॥ अपि च ।
"लाक्षा वर्ष्या हिमा बल्या स्निग्धा च तुवरा लघुः ।
व्रणघ्नी कफपित्तास्रहिक्काकासज्वरप्रणुत् ॥
व्रणोरःक्षतवीसर्पक्रिमिकुष्ठगदापहा ।
अलक्तको गुणैस्तद्वदिशेषाद्व्रणनाशनः ॥"
इति भावप्रकाशः ॥
(घृतपत्री । सेवती । गुलाव इति च । तत्पर्य्यायो यथा,—
"घृतपत्री तरुण्यक्ता कर्णिका चारुकेशरा ।
महाकुमारी गन्धाढ्या लाक्षा लक्षातिमङ्गला ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लाक्षातरुः, पुं, (लाक्षोत्पादकस्तरुः ।) पलाशवृक्षः । इति शब्दमाला ॥ (पलाशशब्दस्य विशेष ज्ञेयः ॥)

लाक्षातैलं क्ली, (लाक्षादिभिः पक्वं तैलम् ।) पक्वतैलविशेषः । लाक्षादितैलमिति ख्यातम् । तद्विधिर्यथा स्वल्पं दृष्ट्वा । यथाक्रमं तत्प्रकारं तद्गुणञ्चाह ।
"लाक्षाहरिद्रामञ्जिष्ठाकल्कैस्तैलं विपाचितम्
सद्गुणैर्नारनाथेन राहुग्रीतज्वरापहम् ॥"
इति स्वल्पलाक्षातैलम् ॥

दृष्ट्वा यथा,—
"लाक्षारसाढ़के प्रस्थं तैलस्य विपचेद्भिषक् ।
मञ्चाढ़कसमायुक्तं पिष्ट्वा चात्र समावपेत् ॥
घृतपुष्पां हरिद्राञ्च मूर्व्वां कुष्ठं हरेणुकाम् ।
कटुकां मधुकां रास्नामञ्जनञ्चाथ दारु च ॥
सुरतकं चन्दनञ्चैव पृथगञ्जसमानकैः ।
क्वाथैरेतैश्च तत् सिद्धं अभ्यङ्गान्नाशयेत्तमम् ॥
विषमाख्यान् ज्वरान् सर्व्वानाशु चैव प्रशमं नयेत् ।
कासं श्वासं प्रतिश्यायं कण्डूं दौर्गन्ध्यगौरवम् ॥
त्रिकपृष्ठग्रहं शूलं गात्राणां स्फुटनन्तथा ।
पापालक्ष्मीप्रशमनं पर्व्वग्रहनिवारणम् ॥
अश्विभ्यां निर्म्मितं सम्यक् तैलं लाक्षादिकं महत् ॥"
इति दृष्टलाक्षातैलम् । इति सुखबोधः ॥

लाघाप्रसादः, पुं, (लाघायाः प्रसादो यस्मात् ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥

लाघाप्रसादनः, पुं, (लाघां प्रसादयतीति । प्र+सद्+णिच्+ल्युः ।) रक्तलोध्रः । तत्पर्य्यायः । क्रमुकः २ पट्टिका ३ पट्टी ४ । इत्यमरः ॥ (तथास्य पर्य्यायः ।

"द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः । जीर्णपत्रो दृढत्वक्कः पट्टी लाघाप्रसादनः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लाघावृक्षः, पुं, (लघोत्पादको वृक्षः ।) कोशाम्रः । इति राजनिर्घण्टः ॥ पलाशवृक्षः । इति हारावली ॥

लाञ्छ, ऋ शोधनलक्षणयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ऋ, अललाञ्छत् । इति दुर्गादासः ॥

लाघ, ऋ ङ श्लाघायाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ, अललाघत् । ङ, लाघते । शक्तिः सामर्थ्यम् । इति दुर्गादासः ॥

लाघवं, क्ली, (लघोर्भावः कर्म्म वा । लघु+"इगन्ताच्च लघुपूर्व्वात्" ५ । १ । १३१ । इति अण् ।) आरोग्यम् । इति राजनिर्घण्टः ॥ लघुत्वम् । लघोर्भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥ (शीघ्रत्वम् । यथा, महाभारते ।५।१८३।७०।

"तासां रूपं भारत नोत्सृजन्त्यं
तेजस्वित्वात् लाघवाच्चैव वक्तुम् ॥"

अस्पत्वम् । यथा, मार्कण्डेये । ४१ । १७ ।

"अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम् । नित्यस्वाध्याय इत्येते नियमाः पञ्च कीर्त्तिताः ॥"

क्षैप्यम् । यथा, कुमारे । २ । २३ ।

"यमोऽपि विलिखन् भूमिं दण्डनासक्तिमत्तिषा । कृतेऽस्मिन्नप्योघेऽपि निर्व्याजालातलाघवम् ॥")

लाङ्गलं, क्ली, (लङ्गतीति । लगि गतौ+बाहुलकात् कलच् । दृढ्यादेर्नोः । इति उणादिवृत्तौ उज्ज्वलदत्तः । १ । १०८ ।) स्वनामख्यातभूमिकर्षणयन्त्रम् । तत्पर्य्यायः । हलम् २ गोदारकम् ३ सीरः ४ । इत्यमरः ॥ हलः ५ हालम् ६ हालः ७ शीरः ८ । इति भरतः ॥ (यथा, वाजसनेयसंहितायाम् । १२ । ७१ ।

"लाङ्गलं पवीरवत्सुशेवꣳसोमपित्सरु ॥")


लिङ्गः । इति त्रिकाण्डशेषः ॥ पुष्पविशेषः । तालवृक्षः । गृहदारु । इति मेदिनी । ले, १२८ ।

लाङ्गलग्रहः, पुं, शबकः । लाङ्गलं गृह्णाति य इत्यर्थे अनुप्रत्ययेन निष्पन्नः ॥ ("शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघण्टीधनुःशु यहेरुपसंख्यानम् ।"३ । २ । ८ । इत्यस्य वार्त्तिकोक्त्या अच् ॥)

लाङ्गलचक्रं, क्ली, (लाङ्गलाकारं चक्रम् ।) क्षत्रियकर्म्मणि शुभाशुभगणन हलाकारचक्रविशेषः । यथा । अथ लाङ्गलचक्रं खरोदये ।

"लाङ्गलं दक्षिकायुग्मयोरुहृदयसमन्वितम् । दक्षिकादि लिखेत् भानि दिनेशाक्रान्तभादितः ॥ दक्षिकाहलयूपानां द्विद्विस्थाने त्रिकं त्रिकम् । योक्त्रयोश्च त्रिकञ्चैव मध्ये पञ्चायके द्विकम् ॥ दक्षस्थे च गवां हानिर्यमस्थे स्वामिनो भयम् । लक्ष्मीलाङ्गलयोर्क्षे स्यात् चैत्रारम्भदिनर्क्षके ॥"

इति ज्योतिस्तत्त्वम् ॥



लाङ्गलदण्डः, पुं, (लाङ्गलस्य दण्डः ।) लाङ्गलमध्यस्थकाष्ठम् । लाङ्गलेर ईश इति भाषा । तत्पर्य्यायः । ईषा २ । इत्यमरः ॥ ईषा ३ । इति शब्दरत्नावली ॥

लाङ्गलपद्धतिः, स्त्री, (लाङ्गलस्य पद्धतिः ।) लाङ्गलरेखा । सिराल इति भाषा । तत्पर्य्यायः । शीता २ । इत्यमरः ॥ सीता ३ । इति शब्दरत्नावली ॥

लाङ्गलिकः, पुं, (लाङ्गलवत् आकृतिरस्त्यस्येति । लाङ्गल+ठन् ।) स्थावरविषभेदः । इति हेमचन्द्रः ॥

लाङ्गलिका, स्त्री,(लाङ्गलमिवाकारोऽस्त्यस्या इति । लाङ्गल+ठन् । टाप् ।) लाङ्गलीवृक्षः । इति शब्दरत्नावली ॥ (यथा, गारुडे १६२ अध्याये ।

"वृद्धलाङ्गलिकामूलं छिन्नलस्य तथैव च । तेन व्रणसुखं लिप्तं शूल्यो निःसरति द्रुतात् ॥")

लाङ्गलिकी, स्त्री, (लाङ्गल+ठन् । ङीष् ।) वृश्चिकविशेषः । लाङ्गलिया इति विषलाङ्गलिया इति च भाषा । तत्पर्य्यायः । अग्निशिखा २ । इत्यमरः ॥ अग्निज्वाला ३ लाङ्गलिका ४ लाङ्गली ५ । इति शब्दरत्नावली ॥ गौरी ६ दीप्ता ७ हलिनी ८ गर्भघातिनी ९ अग्निजिह्वा १० इन्द्रपुष्पा ११ अग्निमुखी १२ वह्निशिखा १३ । इति रत्नमाला ॥ अस्या गुणः । कुष्ठदुष्टव्रणनाशित्वम् । इति राजवल्लभः ॥ राजनिर्घण्टोक्तगुणपर्य्यायाः कलिकारीशब्दे द्रष्टव्याः ॥

लाङ्गली, [न्] पुं, (लाङ्गलमस्त्यस्येति । लाङ्गल+इनिः ।) बलरामः । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ३८ । ३८ ।

"स्थापयित्वा बलदारि यदून् लाङ्गलिना सह । प्रार्द्धयन्वा विवस्वन्तु जाम्बवन्तं ददर्श ह ॥")

नारिकेलः । इत्यमरः ॥ (यथा,—

"नारिकेलो डपफलो लाङ्गली कूर्चशीर्षकः । तुङ्गस्कन्धफलश्चैव लवराजः सदाफलः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सर्पः । इति शब्दचन्द्रिका ॥ (लाङ्गलविशिष्टे, त्रि । यथा, रामायणे । २ । ३२ । ३० ।

"तत्रासीत् पिङ्गलो गार्ग्यस्त्रिजटो नाम वै द्विजः । चतुष्पथे वने नित्यं फालकुद्दाललाङ्गली ॥"

तथा, महाभारते । १ । २२२ । ५३ ।

"रामः फाल्गुनदत्तानि ददौ पार्थाय लाङ्गली ॥"

स्त्रियां ङीष् । नदीविशेषः । यथा, मार्कण्डेये । ५७ । २६ ।

"लाङ्गलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः ॥")

लाङ्गली, स्त्री, (लाङ्गलाकारोऽस्त्यस्या इति । लाङ्गल+अच् । ङीष् ।) लाङ्गलाकारपुष्पजलजशाकविशेषः । काँचड़ा इति भाषा । तत्पर्य्यायः । शारदी २ तोयपिप्पली ३ शूकशिम्बी ४ । इत्यमरः ॥ जलाढ्या ५ जलपिप्पलिः ६ । इति शब्दरत्नावली ॥ पित्तला ७ श्यामादिनी ८ मत्स्यगन्धा ९ । इति जटाधरः ॥ कलिकारी १० । इति राजनिर्घण्टः ॥ (शाकपर्य्यायो यथा,—

"स्थिरा विदारिगन्धा च शाकपर्य्यस्तमत्यपि । लाङ्गली कलशी चैवकोष्टुपुच्छा गुहा मता ॥"

इति गारुडे २०८ अध्यायः ॥)

लाङ्गुलं, क्ली, पुच्छम् । इत्यमरटीकासारसुन्दरी ॥

लाङ्गूलं, क्ली, (लङ्ग+"खर्जिपिञ्जादिभ्य ऊरोलचौ ।" उणा० ४ । ६० । इति ऊलच् । बाहुलकात् दृढिश्च ।) पशुपक्षादिपुच्छसमानलोमाद्यावयवविशेषः । ल्याज इति भाषा । तत्पर्य्यायः । पुच्छम् २ लूम ३ बालहस्तः ४ बालधिः ५ । इत्यमरः ॥ लङ्गूलम् ६ लाङ्गूलम् ७ लुलामः ८ अवालः ९ । इति शब्दरत्नावली ॥ लङ्गः १० पिच्छः ११ बालः १२ । इति जटाधरः ॥ (यथा, कुमारे । १ । १३ ।

"लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चक्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति बालव्यजनैश्चमर्यः ॥")

गोलाङ्गूलजलशमाहात्म्यं यथा,—

"लाङ्गूलेनोद्धृतं तोयं मूर्द्धा यद्गाति यो नरः । सर्व्वतीर्थफलं प्राप्य सर्व्वपापैः प्रमुच्यते ॥"

इति वाराहपुराणम् ॥

शैपः । इति मेदिनी । ले, १२७ । कुमूलः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

लाङ्गूलिका, स्त्री, (लाङ्गूलाकृतिरस्त्यस्या इति । लाङ्गूल+ठन् ।) वृश्चिकपर्य्यी । इति राजनिर्घण्टः ॥

लाङ्गूली, [न्] पुं, (प्रशस्तं लाङ्गूलमस्त्यस्येति । लाङ्गूल+इनिः ।) वानरः । इति शब्दचन्द्रिका ॥ ऋषभनामौषधम् । इति राजनिर्घण्टः ॥

लाछ, इ लक्ष्मणि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, लाञ्छयति । लाञ्छति । इति दुर्गादासः ॥

लाज, भर्त्सने । भर्ग्गे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) लाजति ॥

लाज, इ भर्त्सने । भर्ग्गे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) द्वौ द्वितीय-

खरिणौ। लाजति। ट, लाङ्क्षते। भर्त्सनेऽप्येव केचित् पठन्ति। भर्गो भर्ज्जनम्। इति दुर्गादासः॥

लाजं, क्ली, (लाज्+अच्।) उशीरम्। इति मेदिनी। जे, १५॥ (भृष्टधान्यम्। खइ इति भाषा॥

"येषां सुस्तङ्गुलाक्तानि धान्यानि सतुषाणि च।
भृष्टानि स्फुटितान्याहुर्लाजानीति मनीषिणः॥
लाजाः सुमधुराः पूता लघवो दीपनाश्च ते।
स्वल्पमूत्रमला रूक्षा बल्याः पित्तकफच्छिदः।
कृच्छ्रातीसारदाहास्रमेहमेदस्तृषापहाः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लाजः, पुं, (लाज्+अच्।) आर्द्रतण्डुलः। इति मेदिनी। जे, १५॥

लाजा, स्त्री, अक्षतम्। इति मेदिनी। जे, १५॥ (यथा, सुश्रुते। ४। २६।

"पैत्तिकं प्रकरोत्याजामधुकैः सारिवायुतैः॥")

लाजाः, पुं भूम्नि, (लाज्यन्ते ये ते। लाज्+घञ्।) भृष्टधान्यम्। लाओया इति खइ इति च भाषा। (यथा, रामायणे। २। ४३। १३।

"कदा प्राप्निसहस्राणि राजमार्गे ममात्मजौ।
लाजैरवकरिष्यन्ति प्रविशन्तावरिन्दमौ॥")

तत्पर्य्यायः। अक्षतम् २। इत्यमरः। २। ४। ४०॥

लाजा ३ अक्षताः ४। इति भरतः॥ अस्य गुणाः। लघ्वाच्छद्रातीसारप्रमेहमेदःकफनाशित्वम्। कासपित्तोपशमनत्वम्। अग्निकारित्वम्। लघुत्वम्। प्रीतनत्वञ्च। अस्य मण्डगुणाः। अग्निकारित्वम्। दाहत्रयाच्यरातीसारनाशित्वम्। अपित्तदोषनाशनत्वञ्च। तस्य पेयागुणाः। श्रमकण्ठस्य श्रमनाशित्वम्। क्षुधात्रयान्त्यादीर्घव्याधिकृशिरोगनाशित्वञ्च। इति राजवल्लभः॥ *॥ अपि च।

"एते च व्रीहयो भृष्टास्ते लाजा इति संज्ञिताः।
यवादयश्च ये भृष्टास्ते धानाः परिकीर्त्तिताः॥
लाजाश्च यवधानाश्च तर्पणाः पित्तनाशनाः।
गोधूमयावनालोत्थाः किञ्चिद्वातकराश्च दीपनाः॥
क्षुत्तातीसारशमनो धातुशोषकरः परः।
मन्दाग्निविषमाग्नीनां बालस्थविरयोषिताम्।
देयश्च सुकुमाराणां लाजमण्डः सुसंस्कृतः॥"

इति राजनिर्घण्टः॥ *॥

तस्य चूर्णगुणाः।

"क्षाद्यादाढ़िमखर्ज्जूरमृद्वीकाम्बुघृतैर्युतम्।
लाजचूर्णं समध्वाज्यं सन्तर्पणसुदाहृतम्॥"

लाजचूर्णं क्षाद्यादिजलघृतैरामध्वाज्यसहितं तर्पणसंज्ञकमित्यर्थः। लाजघृतगुणाश्च गुडघृते।

"लाजानां घृतवत् स्वादुसिताघृक्ता विशेषतः।
हृद्रातीसारदाहास्रविषमूर्च्छाज्वरापहाः॥"

धन्वन्तरश्च।

"तत्र तर्पणमेवादौ प्रदेयं लाजघृक्तुभिः।
ज्वरामद्यैः प्रस्तरसेर्युक्तं समधुघृतैकरम्॥"

इति भावप्रकाशः॥

लाञ्छनं क्ली, (लाञ्छ्+ल्युट्।) नाम। चिह्नम्। इति मेदिनी। ने, १२१॥ (यथा, कुमारे। ७। ३५।

"दिवापि निष्प्रभतमरीचिभासा
बालादनाविष्कृतलाञ्छनेन।
चन्द्रेण नित्यं प्रतिभिन्नमौलेः
चूड़ामणेः किं ग्रहणं हरस्य॥")

लाञ्छनः, पुं, (लाञ्छयतीति। लाञ्छ्+ल्युः।) रागौषधम्। इति राजनिर्घण्टः॥ क्वचित् पुस्तके लाञ्छनीति च पाठः॥

लाटः, पुं, देशान्तरम्। (यथा, कथासरित्सागरे। ७८। ११६।

"ददौ तस्मै सपुत्राय प्रीत्या वीरवराय च।
लाटदेशे ततो राज्यं स कर्णाटयुते नृपः॥")

वस्त्रम्। इति मेदिनी। टे, २०॥ जीर्णभूषणादि। इति शब्दरत्नावली॥

लाड, तृ क क्षेपे। इति कविकल्पद्रुमः॥ (अदन्तुरा० परः-सकः-सेट्।) लाड़यति अलालाड़त्। इति दुर्गादासः॥

लापः, पुं, कथनम्। लपधातोर्भावे घञ्प्रत्ययेन निष्पन्नम्॥

लाप्यं, त्रि, (लप्यते इति। लप्+ण्यत्।) कथनीयम्। लपधातोः कर्म्मणि ण्यञ्प्रत्ययेन निष्पन्नम्। इति सुबोधव्याकरणम्॥

लाभः, पुं, (लभ+घञ् करणे।) मूलधनादधिकं वाणिज्योपार्ज्जितं धनम्। तत्पर्य्यायः। फलम् २। इत्यमरभरतौ॥ अर्थम् ३ दृद्धिः ४। इति शब्दरत्नावली॥ (यथा, रामायणे। २। २२। २२।

"सुखदुःखे भयक्रोधौ लाभालाभौ भवाभवौ।
यच्च किञ्चित्तथाभूतं नहु दैवस्य कर्म्म तत्॥")

प्राप्तिः। इति लभधातोर्घञ्प्रत्ययेन॥ (सप्तधर्म्मोपचितागमेषु अन्यतमः। यथा, मनुः। १०। ११५।

"सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च॥")

लाभ्यं, क्ली, (लभ्+ण्यत्।) लाभः। इति शब्दरत्नावली॥

लामज्जकं, क्ली, वीरणमूलम्। इत्यमरः। अस्य पर्य्यायगुणादुशीरशब्दे द्रष्टव्यौ। उशीरवत्पीतरक्तविद्रधिविशेषः। तत्पर्य्यायः। सुगालम् २ अन्तर्लालम् ३ लवम् ४ लघु ५ इक्षिकापथिकम् ६ प्रीवम् ७ दीर्घनालम् ८ लालाग्रयम् ९। अस्य गुणाः। हिमत्वम्। तिक्तत्वम्। वातपित्तरक्तदाहश्रममूर्च्छातृष्णिरक्तज्वरापहत्वञ्च। इति राजनिर्घण्टः॥

लालनं, क्ली, (लल्+णिच्+ल्युट्।) अत्यन्तस्नेहकरणम्। प्रेमपूर्ब्बकबालकादरणम्। सोहाग इति भाषा। लड कोपसेवे उपसेव इह अत्यन्तमालनम्। क, लालयेत् पञ्च वर्षाणि पुत्रमित्यत्र डलयोरेकत्वात्। इति कविकल्पद्रुमटीकायां दुर्गादासः॥ तथा हि।

"लालने बहवो दोषास्ताड़ने बहवो गुणाः।
तस्मात् पुत्रञ्च शिष्यञ्च ताड़येन्न तु लालयेत्॥"

अपि च।

"लालयेत् पञ्च वर्षाणि दशवर्षाणि ताड़येत्।
प्राप्ते तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत्॥"

इति चाणक्यशतकम्॥

लालसा, पुं स्त्री, (लस्+यङ्। ततः "अ प्रत्ययात्।"३।३।१०२। इति अः। टाप्।) महाभिलाषः। इत्यमरः। औत्सुक्यम्। याच्ञा इति मेदिनी। से, ३४। दोहदम्। यथा,—

"दोहदं दौर्हृदं श्रद्धा लालसा स्तुतिमासि तु।"

इति हेमचन्द्रः॥

लोलः। इति नानार्थे स एव॥ (लोधुपे, त्रि। इति यादवः॥ यथा, माघे। ४। ६।

"छायां निजस्त्री चटुलालसानां
मदेन किञ्चित् चटुलालसानाम्।
कुर्व्वाणसूतपिञ्जरजातपत्रै-
र्विहङ्गमानां जजजातपत्रैः॥"

तथा च कुमारे। ७। ५६।

"तस्मिन् सुहूर्त्ते पुरसुन्दरीणा-
मौद्यानसन्दर्शनलालसानाम्॥")

लालसीकं, क्ली, पिच्छलम्। इति शब्दरत्नावली॥

लाला, स्त्री, (लल्+णिच्+अच्। टाप्।) सुखभवनलम्। लाल इति भाषा। तत्पर्य्यायः। क्लेदिका २ स्यन्दिनी ३। इत्यमरः॥ दाविका ४ क्लोका ५। इति शब्दरत्नावली॥ सुखस्रावः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। ४। २२।

"क्षीणक्षेदात् भवेच्छोफो लालानिद्राश्रमक्लमः॥")

लालाटिकः, त्रि, (ललाटं पश्यतीति। ललाट+"संज्ञायां ललाटकुकुटौ पश्यति।" ४।४।३६। इति ठक्। दूरेस्थितो प्रभोर्ललाटं पश्यति न तु कार्य्येषूपतिष्ठते इत्यर्थः।) प्रभोर्भावदर्शी। कार्य्यावमः। इत्यमरः॥ यः सेवकः क्रोधप्रसादचिह्नज्ञानाय प्रभोर्ललाटमेव पश्यति। यच्च प्रभोः कार्य्येऽवमोऽग्रहस्तौ लालाटिकौ पूर्व्ववत् त्रिकः। केचित्तु कार्य्यावमः इति भावदर्शिन एव विशेषयन्तो एकमेव लालाटिकमाहुर्न तु द्वाविति। भावदर्शीति च पाठः लालाटिकः तदालस्ये प्रभुभावनिदर्शिनि। इत्यमरः॥ इति तट्टीकायां भरतः॥ आक्षेपकविशेषे, पुं। इति मेदिनी। के, २२१॥ ललाटसम्बन्धिनि, त्रि। यथा। प्राप्तिस्तु लालाटिकौलादि॥

लालामेहः, पुं, (लालावत् मेहतीति। मिह+अच्।) प्रमेहविशेषः। यथा,—

"लालातण्डुलसूत्रं लालामेहेन पिच्छिलम्।"

प्रमेहतीति मेहः। अक्षौषधम्।

"गुडूचा खदिरः पेयो मधुना सर्व्वमेहिनः।

हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाधिकः ॥"

अपि च ।

"चन्द्रप्रभा वचा मुस्ता भूनिम्बं सुरदारु च ।
हरिद्रानिम्बिषा दार्व्वी पिप्पलीमूलचित्रकम् ॥
वट्टदुग्धीपत्रकञ्च त्वगेला वंशलोचना ।
प्रत्येकं कर्षमात्राणि कुर्य्यादेतानि बुद्धिमान् ॥
धात्र्यर्कं त्रिफला चव्यं विड्ङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं लोहं द्वौ द्वौ चारौ त्वगष्टमम् ॥
एतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षेक्षुरसोद्भं स्याच्चतुःकर्षा सिता भवेत् ॥
घृतान्जलयष्टकर्षं स्यादर्धौ कर्षौ च गुग्गुलोः ।
विधिना योजितैरेतैः कर्षमात्रा गुटिका शुभा ॥
चन्द्रप्रभातिविख्याता सर्व्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥"

इत्यादि भावप्रकाशः ॥

(तथास्य लक्षणान्तरम् ।

"तन्तुबद्धमिवालालं पिच्छिलं यः प्रमेहति ।
आलालमेहिनं विद्यात्तं नरं श्लेष्मकोपतः ॥"

इति चरके निदानस्थाने चतुर्थेऽध्याये ॥)

लालायितः, त्रि, लालाविशिष्टः । कातर इति यावत् । लालाशब्दात् नमस्पोवरिवः कष्ठादिभ्यः क्यच् । क्तौ इति सुब्धातोराकारस्येत्वं क्यप्रत्यये कृते क्तप्रत्ययान्निष्पन्नः । यथा । अत्र लालायितः पक्षी । इति अनन्तदेवोक्तगोयीगीलिखितपाणिनियाकरणीयमहाभाष्यम् ॥

अपि च ।

"परिखावलयच्छलेन या
न परेषां गृहगस्य गोचरः ।
फणिभाषितभाष्यफक्किका
विषमा कृष्णलनामवापिता ॥"

इति पूर्व्वनैषधे २ सर्गः ॥

परिखेति । अचूर्णां गृहगगोचरो नेयमिति ज्ञात्वा परिखावलयव्याजेन या पुरी कृष्णलनां प्राणिता विधात्रेति शेषः । फणिना भाषिता या महाभाष्यफक्किका तद्वद्विषमा सापि परेषां ज्ञानगोचरो नेयमिति ज्ञात्वा अत्र लालायितः पक्षीत्येवं कृष्णलनां प्राणिता पण्डितैरिति शेषः । इति भवदत्तकृततट्टीका ॥

लालाविधः, पुं, (लालायां विधं यस्य ।) लूतादिः । इति हेमचन्द्रः । ४ । ३७६ ॥

लालास्रावः, पुं, (लालां स्रावयतीति । सु + णिच् + अच् ।) ऊर्णनाभः । इति हेमचन्द्रः । (लालाशारके, त्रि । यथा, सुश्रुते । २ । १६ ।

"लालास्रावी स विज्ञेयः कफमात्रं प्रवेरितो गदः ॥")

लालिकः, पुं, महिषः । इति हेमचन्द्रः । ४ । ३४६ ॥

लालित्यं, क्ली, (ललित + ष्यञ् ।) ललितस्य भावः । यथा,—

"प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नन् सुतः
सं हुङ्कारकटुद्वदन्तिपटलं त्रस्त्वा मदज्ञाननम् ।
पाटीं सङ्गलितस्य वक्त्रमि चतुरप्रीतिप्रदां प्रस्फुट-
संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम् ॥"

इति लीलावती ॥

लाव(ब)वः, पुं स्त्री, पक्षिविशेषः । लावोया इति भाषा । इत्यमरभरतौ ॥ (यथा, सुश्रुते ।४।८।

"ग्राम्यानुपोदकैर्मांसैर्लावाद्यैर्व्वापि विष्किरैः ॥")

अस्य मांसगुणाः । लघुत्वम् । कटुत्वम् । मलबद्धकारित्वम् । स्वादुत्वम् । शीतत्वम् । त्रिदोषनाशित्वञ्च । इति राजवल्लभः ॥ (तथा च ।

"संग्राही दीपनश्चैव कषायो मधुरो लघुः ।
लावः कटुविपाकश्च सन्निपाते च पूजितः ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

(यथास्य गुणपर्य्यायौ ।

"लावा विष्किरवर्गेषु ते चतुर्धा मता बुधैः ।
पांशुलः गौरकोऽन्यस्तु पौण्ड्रकोदर्भरस्तथा ॥
लावा वह्निकराः स्निग्धा गरघ्ना व्याधिका हिताः ॥
पांशुलः श्लेष्मलस्तेषु वीर्य्योष्णोऽनिलनाशनः ।
गौरो लघुतरो रूक्षो वह्निकारी त्रिदोषजित् ॥
पौण्ड्रकः पित्तकृत् किञ्चिल्लघुर्वातकफापहः ।
दर्भरोरक्तपित्तघ्नो हृद्यमग्निकरो हिमः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

लाव(ब)कः, पुं, (लाव एव । स्वार्थे कन् ।) लावपक्षी । तत्पर्य्यायः । लघुजङ्गलः २ । इति त्रिकाण्डशेषः ॥ (तथास्य मांसगुणाः ।

"पक्षिणाञ्च महाश्रेष्ठो लावको जाङ्गलात्मकः ।
संग्राही दीपनः प्रोक्तः कषायो मधुरो लघुः ।
तथा विपाके मधुरः सन्निपातेऽतिपूजितः ॥"

इति हारीते प्रथमे स्थाने एकादशेऽध्याये ॥

यथा, सुश्रुते । ४ । ३६ ।

"विरिक्तवान्तैर्हरिणैलावकाः
प्रग्राह्य सेयः समयूरतित्तिरिः ॥"

लुनातीति । लू + ण्वुल् । ह्रस्वकः । यथा, मार्कण्डेये । ४६ । १६ ।

"यथा प्रगल्भापकः क्षेत्री पालको लावकस्तथा ॥")

लावकं, त्रि, (लवण + अञ् ।) लवणेन संस्कृतम् । यथा,—

"सार्पिष्कं दाधिकं सर्पिर्दधिभ्यां संस्कृतं क्रमात् ।
लवणेक्षुकाञ्जिकैः लावणिकमुदाहृतम् ।
औदश्वितमौदश्वित्कं लवणे स्यात्तु लावणम् ॥"

इति हेमचन्द्रः ॥

लवणसम्बन्धि च । (यथा, हरिवंशे ।५३।२०।

"स मां परिभवन्नेव स्वां वेलां वसुधाक्रमत् ।
क्षोदयामास चपलैर्लावणैरम्बुविप्लवैः ॥")

नक्षे, क्ली । इति रत्नमाला ॥

लावणिकं, त्रि, (लवण + ठञ् ।) लवणेन संस्कृतम् । इति हेमचन्द्रः ॥ लवणसम्बन्धि च ।

लवणविक्रेतरि, पुं । (यथा, माघे । १० । ६८ ।

"लीलयैव सुतगोस्तुलयित्वा
गौरवाद्यमपि लावणिकेन ॥")

लवणपात्रे, क्ली । इति केचित् ॥

लावण्यं, क्ली, (लवण + ष्यञ् ।) लवणत्वम् । लवणस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् । (लवणा त्विट् विद्यते यस्येति लवणः । अर्शआदिभ्योऽच् । तस्य भावः । दृढादित्वात् ष्यञ् । यद्वा, लवणा त्विट् सैव । चतुर्वर्गादित्वात् स्वार्थे ष्यञ् ।) सौन्दर्य्यविशेषः । तस्य लक्षणं यथा,—

"सुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥"

इत्युज्ज्वलनीलमणिः ॥

तथा हि ;

"नीतिर्भूमिसुतां नतिर्गुणवतां स्थैर्यं नृपाणां धृतिर्दैन्यस्योः शिशुवो गृहस्य कविता बुद्धेः प्रसादो गिराम् ।
लावण्यं वपुषः स्तुतिस्तु मनसो भ्रान्तिर्दिशस्य क्षमा
भक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मण्डनम् ॥"

इति नवरत्नान्तर्गतामरसिंहः ॥

(श्रीलनेपुराणादि । अस्य प्रमाणं लावण्यार्जितशब्दे द्रष्टव्यम् ॥)

लावण्यार्जितं, क्ली, (लावण्येन अर्जितम् ।) विवाहकालीनं श्वशुराभ्यां दत्तं धनम् । यथा,—

"प्रीत्या दत्तञ्च यत्किञ्चित् श्वश्वा वा श्वशुरेण वा ।
पादवन्दनिकं यत्तल्लावण्यार्जितमुच्यते ॥"

इति विवादचिन्तामणिधृतकात्यायनवचनम् ॥

लावण्यं श्रीलनेपुराणादि । तथा च पादप्रणतायै श्रीलादिमत्ये वा स्त्रिये श्वशुरादिना दत्तं स्त्रीधनमित्यर्थः । इति तद्व्याख्यानम् ॥

लावा, स्त्री, (लाव + टाप् ।) पक्षिविशेषः । तत्पर्य्यायः । लावकः २ लावः ३ लवः ४ । अस्या मांसगुणाः । पथ्यत्वम् । ग्राहित्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥

लाबुः, स्त्री, अलाबुः । इति शब्दरत्नावली ॥

लाबूः,

लासः, पुं, (लस् + घञ् ।) वृत्यमात्रम् । स्त्रीणां वृत्यम् । इति शब्दरत्नावली ॥ (यथा, ऋतुसंहारे । ६ । ३१ ।

"मदनजनितलासैर्दीप्यतेमुंनीन्द्रान्
स्तनभरनतनार्य्यः कामयन्ति प्रयान्तीः ॥")

यूथः । इति शब्दचन्द्रिका ॥

लासकं, क्ली, (लसतीति । लस + ण्वुल् ।) मद्यकम् । इति हारावली ॥ मद्य इति भाषा ॥

लासकः, पुं, (लसतीति । लस + ण्वुल् ।) नाट्यकारी । मयूरः । लसकः । इति मेदिनी । के, ॥ वेदः । इति धरणिः ॥ (दोषिकारकः । यथा, ऋतुसंहारे । २ । २६ ।

"नवजलकणसेकाच्छीततामादधानः
कुसुमभरनतानां लासकः पादपानाम् ॥")
लासकी, स्त्री, नर्त्तकी। इत्यमरः॥
लासिका, स्त्री, (लासोऽस्यस्या इति। लास+ठन्।) नर्त्तकी। इत्यमरः॥
लास्फोटनी, स्त्री, आस्फोटनी। वैद्यनिका। इत्यमरटीकायां रायमुकुटः॥
लास्यं, क्ली, (लस्+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) नृत्यम्। इत्यमरः॥ तौर्य्यत्रिकम्। इति मेदिनी॥ भावाश्रयं नृत्यम्। ताललयाश्रयं नृत्यम्। इति भरतः॥
"पुंनृत्तं ताण्डवं प्राहुः स्त्रीनृत्तं लास्यमुच्यते।"
इति सङ्गीतनारायणे नारदसंहिता॥
(यथा, महाभारते। १। ६८। १०।
"सम्भोगस्त्वेष वातूर्य्यैर्ललास्यमनोहरैः।
राजानं रमयामास तथा रेमे तथैव सः॥")
लास्यः, पुं, (लास्यमस्त्यस्येति। लास्य+अच्।) नर्त्तकः। इति शब्दरत्नावली॥
लास्यकं, क्ली, (लास्यमेव। स्वार्थे कन्।) नृत्यम्। इति शब्दरत्नावली॥
लास्या, स्त्री, (लास्यमस्त्यस्या इति। लास्य+अच्। टाप्।) नर्त्तकी। इति शब्दरत्नावली॥
लिकुचं, क्ली, (लक्यते आस्वाद्यते इति। लक्+बाहुलकात् उचः। एषोदरादित्वात् इत्वम्।) चुक्रम्। इति राजनिर्घण्टः॥ (डहुः। अस्य गुणा यथा,—
"पित्तश्लेष्मप्रकोपोऽपि कर्कन्धुलिकुचान्यपि॥"
इति चरके सूत्रस्थाने २७ अध्याये॥)
लिकुचः, पुं, लकुचः। इत्यमरः॥
लिक्का, स्त्री, लिच्चा। इति शब्दरत्नावली॥
लिच्चा, क्ली, (लिह्यते गतौ+बाहुलकात् सः। सच कित्। इत्युणादिवृत्तौ उज्ज्वलः। ३। ६६।) यूकाण्डम्। इत्यमरः॥ लिक्षि इति भाषा। इत्यमरभरतौ॥ तत्पर्य्यायः। लिक्षा २ लीक्षा ३ लीक्षा ४ लिक्षिका ५। इति शब्दरत्नावली॥ (यथा,—
"जङ्घादाच्च सूत्राच्च यूका लिच्चाच्च नामतः॥"
इति वाभटे निदानस्थाने चतुर्दशेऽध्याये॥)
परिमाणविशेषः। यथा,—
"जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः।
तस्त्रसरेणवस्तिस्रो लिच्चाधस्तूभिधा सवेषः॥"
इति शब्दचन्द्रिका॥
सयकारकवर्गहितीयवतीत्यपि पाठः॥
लिख, इ क्षपि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, लिक्षते। क्षपि गतौ। इति दुर्गादासः॥
लिख, ग्र लेखने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) ग्र, लिखति पुस्तकं लेखकः। अयं विभाषया कुटादिरिति केचित्। तेन लिखितं विन्यस्तोऽपि शुद्धिहानिरिति। लिखितव्यं लेखितव्यं लिखनं इत्यादि सिद्धम्। इति दुर्गादासः॥
लिखः, त्रि, (लिखतीति। लेख+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) लेखकः। इति लिखधातोः कप्रत्ययेन निष्पन्नम्॥
लिखनं, क्ली, लेखनम्। लिपिः। इत्यमरटीकायां सारसुन्दरी॥ (यथा, मार्कण्डेये। ५१। २२।
"प्रसिद्धमन्त्रलिखनात् शुद्धमाल्यादिधारणात्।
विशुद्धगेहावसथादनायासाच्च वै द्विज!॥")
विधिलिपिरखड्गनीया यथा,—
"यस्य यल्लिखनं पूर्व्वं यत्र काले निरूपितम्।
तदेव खण्डितुं राधे चन्द्रे नाहत्व को विधिः॥
विधातुश्च विधाताहं येषां यल्लिखनं कृतम्।
ब्रह्मादीनाच्च क्षुद्राणां न तत् खण्डं कदाचन॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १५ अध्यायः॥
लिखितं, क्ली, (लिख+भावे क्तः।) लिपिः। इत्यमरः॥ लेखनम्। इति भरतः॥ (लिख+कर्म्मणि क्तः।) लिखितपत्रादौ, त्रि। यथा,—
"प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति
कीर्त्तितम्॥"
इति मिताक्षरायां याज्ञवल्क्यः॥
सन्निविशेषे, पुं। यथा, श्राद्धतत्त्वे याज्ञवल्क्यः॥
"पराशरस्यासग्रहलिखिता दत्तगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥"
लिखा, स्त्री, परिमाणविशेषः। यथा,—
"जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः।
तस्त्रसरेणवस्तिस्रो लिखाधस्तूभिधा सवेषः॥"
इति शब्दचन्द्रिका॥
लिग, इ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, लिङ्गते। इति दुर्गादासः॥
लिग, इ क चिह्ने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) इ क, लिङ्गयति शब्दं स्त्रीपुंसके; प्राग्दिक; चिह्नं करोतीत्यर्थः। इति दुर्गादासः॥
लिगु, क्ली, (लिङ्गति विषयात् विषयान्तरं गच्छतीति। लिग+"स्फुरुर्ज्जकुपीयुनीलकुलिगु।" उणा० १। ३७। इति कुप्रत्ययेन साधु।) मनः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
लिगुः, पुं, (लिग+कुः।) मर्खः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ भूप्रदेशः। स्वर्गः। इति नानार्थरत्नमाला॥
लिङ्गं, क्ली, (लिङ्ग्यते अनेन इति। लिङ्ग+घञ्। अभिधानात् क्लीवलिङ्गत्वम्।) चिह्नम्। (यथा, महाभारते। १। २। १२।
"येन लिङ्गेन यो देशो युक्तः समुपलक्ष्यते।
तेनैव नाम्ना तं देशं वाचमाहुर्मनीषिणः॥")
शेफः। इत्यमरः॥ अनुमानम्। साङ्ख्योक्तप्रकृतिः। (यथा, साङ्ख्यकारिकायाम्। ५५।
"तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः
पुरुषः।
लिङ्गस्याविनिवृत्तेस्तस्मादृदुःखं स्वभावेन॥"
प्रकृतिकार्य्ये विज्ञप्तिश्च। यथा, तत्रैव। १०।
"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं
लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्॥"
विशेषस्तु तत्र द्रष्टव्यः।) शिवमूर्त्तिविशेषः। इति मेदिनी। गे, २३॥ व्याप्यम्। व्यक्तम्। पुंस्त्वादिः। इति चिकाण्डशेषः॥ (यथा, मनुः। ५। १२६।
"एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता॥")
सामर्थ्यम्। यथा,—
"यावतामेव धातूनां लिङ्गं रूढिगतं भवेत्।
अर्थत्वेवाभिधेयस्तु तावद्भिर्गुणविग्रहः॥"
इति सिद्धान्तकौमुद्यां एतत्कारिकायाख्यायां रघुनन्दनः॥ *॥ अथ शेफार्थस्य लिङ्गस्य पर्य्यायः।
शिश्नः२ स्वरसनः३ उपस्थः४ मदनाङ्कुशः५ कन्दर्पसुखः६ शेफः७ मेहनम् ८ शेफः [सु]९ मेढ्रः१० लांगुः११ ध्वजः१२ रागलता१३ वज्रः१४। इति शब्दरत्नावली॥ लाङ्गूलम्१५ साधनम्१६ सेफः१७ कामाङ्कुशः१८। इति जटाधरः॥ *॥ लिङ्गमूले वादिलान्तवर्णयुक्तस्वाधिष्ठाननामकषड्दलपद्ममस्ति। यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके।
मध्ये स्वयम्भूलिङ्गन्तु कोटिसूर्य्यसमप्रभम्॥
तदाख्ये हेमवर्णाभं व स वर्णचतुर्दलम्।
तदूर्द्धेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम्॥
वादिलान्तषड्वर्णेन युक्तस्वाधिष्ठानसंज्ञकम्।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः॥"
इति तन्त्रम्॥*॥
अस्याधिष्ठातृदेवतादिर्यथा।
"प्रजनः सर्व्वभूतानामुपस्थोऽध्यात्मसुच्यते।
अधिभूतं तथा शुक्रं देवताश्च प्रजापतिः॥"
इति महाभारते आश्वमेधिकपर्व्व॥ *॥
अस्य शुभाशुभलक्षणं यथा,—
"स्वल्पे लिङ्गे च धनवान् स्याच्च पुत्रादिवर्ज्जितः।
स्थूललिङ्गो दरिद्रः स्याद्दीर्घलिङ्गो दृषण्वी भवेत्॥"
इति गारुड़े ६३ अध्यायः॥ *॥
अपि च।
"महद्भिरायुराख्यातं ह्रस्वलिङ्गो धनी नरः।
अपत्यरहितश्चैव स्थूललिङ्गो धनोज्झितः॥
महद्भिर्जानुभिरिति शेषः।
मेढ्रे वामगते चैव सुतान्वितो भवेत्।
वक्रेऽन्यथा पुत्रवान् स्यात् दारिद्र्यं विगते स्वयः॥
ह्रस्वे तु तनयो लिङ्गे शिरालेऽच सुखी नरः।
स्थूलग्रन्थियुते लिङ्गे भवेत् पुत्रादिसंयुतः॥"
इति गारुड़े ६६ अध्यायः॥
अन्यच्च।
"दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्द्धनः।
ह्रस्वलिङ्गेन सौभाग्यं दृश्यलिङ्गेन भूपतिः॥
कर्कशैः कठिनैर्लिङ्गैः परदाररतः सदा।
रमते च सदा दासीं निर्द्धनो भवति ध्रुवम्॥
ह्रस्वलिङ्गेन सूक्ष्मेण रक्तलिङ्गेन भूपतिः।
परस्त्रीं रमते नित्यं नारीणां वल्लभो भवेत्॥
ह्रस्वलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम्।

राज्यं सुखञ्च दिव्यास्त्रा: कन्यकाया: पति-
र्भवेत् ।'
इति वासुदेवकम् ॥
शिवस्य लिङ्गरूपस्य तन्निर्माख्यात्मलक्षस्य च
कारणं यथा,—
दिलीप उवाच ।
"वेद्मि त्वाहं द्विजश्रेष्ठ ! रुद्रस्त्रिपुरहन्तक: ।
कस्माद्विगर्हितं रूपं प्राप्तवान् सह भार्य्यया ॥
योनिलिङ्गस्वरूपञ्च कथं स्यात् सुमहात्मन: ।
पद्मवक्त्रचतुर्बाहु: शूलपाणिस्त्रिलोचन: ॥
कथं विगर्हितं रूपं प्राप्तवान् द्विजपुङ्गव ! ।
एवं सर्व्वं समाचक्ष्व मित्रावरुणनन्दन ॥
श्रीवशिष्ठ उवाच ।
शृणु राजन् प्रवक्ष्यामि यस्मां पृच्छसि गौरवात् ।
स्वायम्भुवो मनु: पूर्व्वं मन्दरे पर्व्वतोत्तमे ॥
ऋषिभि: सार्द्धं दीर्घसत्रमनुत्तमम् ।
तस्मिन् समागता: सर्व्वे मुनय: संशितव्रता: ॥
अन्वेतुं देवतातत्त्वं मिथ: प्रोचुस्तपोधना: ।
विप्राणां वेदविदुषां क: पूज्यो देवतावर: ॥
इति तस्य वच: श्रुत्वा सर्व्व एव महर्षय: ।
भृगुं तपोनिधिं विप्रं प्रोचु: प्राञ्जलयस्तदा ॥
ऋषय ऊचु: ।
अस्माकं संशयं छेत्तुं समर्थोऽसि शुभव्रत ।
ब्रह्मविष्णुमहेशानामस्तिकं व्रज सुव्रत ॥
गत्वा तेषां समीपन्तु तथा दृष्ट्वा च विद्यहान् ।
शुद्धसत्त्वगुणस्तेषां यस्मिन् संविद्यते मुने ! ॥
स एव पूज्यो विप्राणां नेतरस्तु कदाचन ।
तस्मात् त्वं हि मुनिश्रेष्ठ विदुषां निरासकम् ॥
शिघ्रं कुरु मुनिश्रेष्ठ सर्व्वलोकहितं प्रभो ॥
एवमुक्तस्ततस्तूर्ण्णं कैलासं मुनिसत्तम: ।
जगाम वामदेवेन यत्रास्ते वृषभध्वज: ॥
यद्द्वारमुपागम्य भृङ्गस्य महात्मन: ।
शूलहस्तं महारौद्रं नन्दिं दृष्ट्वाब्रवीद्विभु: ॥
संप्राप्तो हि भृगुर्विप्रो हरं द्रष्टुं सुरोत्तमम् ।
निवेदयस्व मां शीघ्रं शङ्कराय महात्मने ॥
तस्य तद्वचनं श्रुत्वा नन्दी सर्व्वमशेषत: ।
उवाच परमं वाक्यं महर्षिममितौजसम् ॥
असान्निध्य: प्रभोस्तस्य देवा क्रीडति शङ्कर: ।
निवर्त्तस्व निवर्त्तस्व यदि जीवितुमिच्छसि ॥
एवं निराकृतस्तेन तत्रातिष्ठन्महातपा: ।
बभूवुर्दिवसास्तस्मिन् शङ्करे मुनीश्वर: ॥
तत: क्रोधसमाविष्टो भृगु: प्रोवाच शङ्करम् ।
विनष्टस्तमसाच्छन्नो मां न जानाति शङ्कर: ॥
नारीसङ्गममत्तोऽसौ यस्मान्मामवमन्यते ।
योनिलिङ्गस्वरूपं वै रूपं तस्माद्भविष्यति ॥
ब्राह्मणं मां न जानाति तमसा चाप्युपागत: ।
अनुग्रहस्वभावापन्नो न पूज्योऽसौ द्विजन्मनाम् ।
तस्मान्न जलमन्नन्तु तस्मै दत्तं हविस्तथा ।
शिवस्यान्नं जलञ्चैव पत्रं पुष्पं फलादिकम् ॥
निर्म्माल्यमस्य चाघ्राणं भविष्यति न संशय: ॥
एवं शप्त्वा महातेजा: शङ्करं लोकपूजितम् ।
उवाच नन्दमप्युग्रं नन्दिं शूलधरं नृप ! ॥
रुद्रभक्ताश्च ये लोके भस्मलिङ्गास्थिधारिण: ।
ते पाशुपतमापन्ना वेदबाह्या भवन्ति वै ॥
एवं शप्त्वा मुनिस्तत्र रुद्रं त्रिपुरहन्तकम् ।
जगाम ब्रह्मलोकं वै सर्व्वलोकनमस्कृतम् ॥"
इति पाद्मोत्तरखण्डीयाष्टषष्टितमाध्यायात्
सङ्कलितम् ॥*॥ शिवलिङ्गस्य पूजाधारत्वं यथा,
"पूजास्थानानि वक्ष्यामि यस्मिन् सान्निध्यमा-
व्रजेत् ।
लिङ्गस्थां पूजयेद्देवीं स्थण्डिलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पादुके प्रतिमासु च ॥
लिङ्गमाश्रयेन्मन्त्री शुक्लाद्यैर्यैतु प्रतिष्ठितम् ।
कनीयैर्यैतु कृतं लिङ्गं वर्ज्जनीयन्तु साधके: ॥
अल्पसौख्यप्रदं प्रोक्तं वेदमन्त्रै: प्रतिष्ठितम् ।
साधिकारन्तु सल्लिङ्गं मुक्तिभोगं तथैव च ।
ज्ञातव्यं साधकेन्द्रेण सिद्धिदञ्चाप्यसिद्धिदम् ॥
देव्युवाच ।
साधिकारन्तु यल्लिङ्गं मन्त्रहीनं प्रतिष्ठितम् ।
निर्व्वर्त्तितविकारञ्च अक्षयम्भु स्वयम्भवम् ॥
कुर्व्वन्ति भक्तिवात्सल्यं लोकानां वासनात्मकम् ।
दुर्विज्ञेयमिदं ज्ञानं योगिनामप्यगोचरम् ॥
मर्त्यैर्जडधियैर्नाथ कथं विज्ञायते विभो ॥
ईश्वर उवाच ।
साधु साधु महादेवि ! रहस्यमिदमुत्तमम् ।
यत्त्वया चोदितं भद्रे ! तत्तथैव न चान्यथा ॥
दुर्विज्ञेयं सुरैरापि किं पुनर्मानुजैर्जनै: ।
आधिष्ठ्य साधक: शैवं हृदयानन्दकारकम् ॥
इन्द्रियाणाञ्च चौतुस्यं ददामि लिङ्गदर्शने ।
सेयमात्मं ततो लिङ्गं नित्यमानन्ददायकम् ॥
सुखप्राप्तं प्रपश्यते नित्यं विमानस्थां वराङ्गनाम् ।
भैरवं प्रपश्यते नित्यं क्रीड़न्तं मालमञ्चके ॥
उमामहेश्वरञ्चापि स्वप्ने पश्यति साधक: ।
अनिर्व्वर्त्तिताधिकारं लिङ्गं त्रिभुवनेश्वरि ! ॥
आक्रमन्ति महाविघ्ना: सदैत्या राक्षसादय: ॥
शून्यागारं यथा देवि ! आक्रमन्ति नरा: प्रिये ।
अनर्च्चितन्तु शुद्धन्ति तथा लिङ्गन्तु कल्पना ॥
प्रेतं यथा सुराश्चैव आक्रमन्ति पिशाचका: ।
शून्यञ्च यल्लिङ्गन्तु आश्रयन्ति तथा प्रिये ॥"
इत्यादौ देवीपुराणे नन्दाकुण्डप्रवेशाख्याय: ॥*॥
अथ लिङ्गलक्षणम् ।
तत्र बाणलिङ्गस्य लक्षणं यथा,—
"बाणलिङ्गं तथा ज्ञेयं मुक्तिमुक्तिप्रदायकम् ।
उत्पत्तिं बाणलिङ्गस्य लक्षणं शृणुत भृगु ॥
नर्म्मदादेविकायाञ्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यवदीनाञ्च बाणलिङ्गानि यत्सुखे ॥
इन्द्रादिपूजितान्यत्र तच्छिद्रैर्विहितानि च ।
सदा सन्निहितस्तत्र शिव: सर्व्वार्थदायक: ॥
इन्द्रलिङ्गानि तान्याहु: सास्त्राण्यार्थप्रदानि
च ॥"
अथार्षेयलिङ्गलक्षणम् ।
"आरुयं हित्वकीलालसुवर्णार्थं करोत्यलम् ।
आर्षेयं तत् भुक्तिनिर्भमथवा भुक्तिमुक्तिकृतम् ॥
इदं लिङ्गवरं ख्यात्य तेजसाधिपतिर्भवेत् ॥" *॥
अथ याम्यलिङ्गलक्षणम् ।
"दक्षाकारं भवेद्यान्यमथवा रसनाकृति ।
यदृयदुक्तं सह तैर्न निर्णिक्तं ज्ञायते तदा ।
निवित्तं निधनं तेन क्रियते स्थापितेन तु ॥"*॥
अथ नैर्ऋतलिङ्गलक्षणम् ।
"राक्षसं खड्गसदृशं ज्ञानयोगफलप्रदम् ।
कर्करादिप्रतिमन्तु कृष्णकृत्तियुतं तथा ।
राक्षसं निष्कृते लिङ्गं गार्हस्थे न सुखप्रदम् ॥"
अथ वारुणलिङ्गलक्षणम् ।
"वारुणं वर्त्तुलाकारं पाशाङ्कं चालिवर्च्चसम् ।
दृढिमुंखादे: दुःखत्वं संभोगात्मनु मध्यगे ॥"
अथ वायुलिङ्गलक्षणम् ।
"लक्षं धूम्रं न वारुयं ध्वजाभं ध्वजवज्रजम् ।
मस्तके स्थापितं तस्य शून्यशून्यमितस्तत: ॥"*॥
अथ कुबेरलिङ्गलक्षणम् ।
"तूणपाशगदाकारं गुह्यकेशस्य मध्यगम् ॥"
अथ रौद्रलिङ्गलक्षणम् ।
"दिनं वाप्यथवा रात्रिं सग्रीवं रविवर्च्चसम् ।
अस्थिमूलाङ्कितं रौद्रं हेमकुण्डलवर्च्चसम् ॥"
अथ वैष्णवलिङ्गलक्षणम् ।
"चतुर्व्वर्णमयं वापि वैष्णवं ज्ञायतेऽथत: ।
वैष्णवं शङ्खचक्राङ्कगदाद्याद्यैर्विभूषितम् ॥
श्रीवत्सं कौस्तुभाङ्कञ्च सर्व्वसिद्धासनाङ्कितम् ।
वैनतेयपदाङ्कं वा तथा विष्णुपदाङ्कितम् ॥
वैष्णवं नाम तत् प्रोक्तं सर्व्वैश्वर्य्यफलप्रदम् ।
ग्रालग्रामादिसंस्थन्तु शङ्खाङ्कं श्रीविवर्द्धनम् ॥
पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये ॥"
इति वीरमित्रोदयधृतकालोत्तर: ॥ * ॥
नारद उवाच ।
"अथ वक्ष्यामि ते विप्र चिह्नमेकाक्षरं परम् ।
श्रवणाद्यस्य पापानि नाशमायान्ति तत्
क्षणात् ॥
मधुपिङ्गलवर्णाभं जटाकुण्डलिकायुतम् ।
स्वयम्भुलिङ्गमाख्यातं सर्व्वसिद्धैर्निषेवितम् ॥
बालार्कवर्णसमाकीर्णं जटाशूलसमन्वितम् ।
मृत्युञ्जयाख्यं लिङ्गं सुरासुरनमस्कृतम् ॥
दीर्घाकारं शुभ्रवर्णं कृष्णबिन्दुसमन्वितम् ।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरै: ॥
शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम् ।
त्रिलोचनं महादेवं सर्व्वपापप्रमोदनम् ॥
ज्वलल्लिङ्गं जटाजूटं कृष्णाभं स्थूलविग्रहम् ।
कालाग्निरुद्रमाख्यातं सर्व्वसत्त्वैर्निषेवितम् ॥
मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतिनम् ।
श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम् ॥
प्रलयाख्यसमायुक्तं त्रिपुरारिसमाह्वयम् ।
शुभ्राभं पिङ्गलजटं सुरुद्राक्षाधरं परम् ॥
त्रिशूलधरमीशानं लिङ्गं सर्व्वार्थसाधनम् ।
त्रिशूलडमरुधरं शुभरक्ताङ्गभागत: ॥
अर्द्धनारीश्वराङ्गानं सर्व्वदेवैरभिष्टुतम् ।
ईषद्रक्तमयं कान्तं स्थूलं लिङ्गं सतुल्यलम् ॥
महाकालं समाख्यातं धर्म्मकामार्थमोक्षदम् ।
एतत्तु कथितं तुभ्यं लिङ्गचिह्नं महेशितु: ।

एकेनैव कृतार्थः स्यात् बहुभिः किमु सुव्रत ।"
इति हेमाद्रिधृतलक्षणकाण्डम् । * ।
"ऊर्ध्वाङ्गं श्रेयसे योज्यं शीर्षमन्नं विवर्जयेत् ।
यमवर्जन्तु यल्लिङ्गं यमाङ्गं वा कमण्डलुम् ।
दक्षाङ्गं छत्रचिह्नं वा ब्रह्मज्ञानान्वितं मतम् ।
शुक्लिवर्णं महाकालं नन्दीशं पद्मरागवत् ।
पद्मरागनिभं सर्व्वं महाभं सिद्धपूजितम् ।
मौक्तिकाभं नीलनिभं रुद्रादित्यैः प्रपूजितम् ।
वसुदैः सेन्द्रयज्ञेशं गुह्यकैर्यातुधानकैः ।
गारुत्मतमयं नीलं शुभाङ्गमण्डलप्रभम् ।"
इति वीरमित्रोदयधृतकालोत्तरः ।
इति बाणलिङ्गलक्षणम् । * ।
अथ तस्य परीक्षा ।
"इत्येतल्लक्षणं प्रोक्तं परीक्षा तत्रकोविदैः ।
त्रिः सप्त पञ्च वारं वा तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं श्रेष्ठं पाषाणसम्भवम् ।"
इति वीरमित्रोदयधृतम् ।
तुलाकरणंतु तण्डुलेन । अपरतुलादिषु तण्डुला यदधिकाः स्युस्तदा तल्लिङ्गं गृहिणां पूज्यमवधार्य्यं लिङ्गवेदधिकं तदोदासीनपूज्यमदिति किं वदन्तीति हेमाद्रिधृतलक्षणकाण्डम् ।
"सप्तलत्वसुलाकृष्टं दृष्टिमेति न हीयते ।
बाणलिङ्गमिति ख्यातं श्रेष्ठं नार्म्मदमुच्यते ।
त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं श्रेष्ठं पाषाणसम्भवम् ।"
इति श्रुतसंहिता ।
"नद्यां वा प्रक्षिपेद्भूयादृष्ट्वा तदुपलभ्यते ।
बाणलिङ्गं तदा विद्धि नूनं सुखविवर्द्धनम् ।"
इति वीरमित्रोदयः । * ।
बाणग्रन्थ्यन्तरेऽपि तत्रैव ।
"अथ बाणं समाख्यातं यथा दक्षं तथादितः ।
बाणः सदाशिवो देवो बाणो बाणान्तरोऽपि च ।
तेन यज्ञे कृतं तस्मात् बाणलिङ्गसदाद्भुतम् ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ।
श्रुतप्रतिष्ठं तल्लिङ्गं बाणाख्येन शिवेन च ।
पङ्कजस्य फलाकारं कुक्कुटस्य समाकृति ।
मुक्तिमुक्तिप्रदत्वेन बाणलिङ्गसदाद्भुतम् ।"
पङ्कजफलं पद्मबीजम् ।
"पङ्कजस्यफलाकारं कुक्कुटाण्डसमाकृति ।"
इति हेमाद्रिधृतलक्षणकाण्डे पाठः । * ।
देवीं प्रति शिववाक्यम् ।
"प्रशस्तं नार्म्मदं लिङ्गं पङ्कजस्यफलाकृति ।
मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम् ।
हंसडिम्बाकृति पुनः स्थापनायां प्रशस्यते ।
स्वयं संभवते लिङ्गं गिरितो नर्म्मदाजले ।
पुरा बाणासुरेणाहं प्रार्थितो नर्म्मदातटे ।
आविरासं गिरौ तत्र लिङ्गरूपी महेश्वरः ।
बाणलिङ्गमपि ख्यातमतोऽर्थाज्जगतीतले ।
अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत् ।
तत् फलं लभते मर्त्यो बाणलिङ्गैकपूजनात् ।"

तथा,—
"तान्त्री वा स्फाटिकी स्वार्णी पाषाणी राजती तथा ।
वैदिकी च प्रकर्त्तव्या तत्र संस्थाप्य पूजयेत् ।"*।
प्रत्यहं योऽर्चयेल्लिङ्गं नार्म्मदं भक्तिभावतः ।
ऐहिकं किं फलं तस्य मुक्तिस्तस्य करे स्थिता ।"
इति प्रत्यहबाणलिङ्गपूजायाः फलम् । इति याज्ञवल्क्यसंहिता । * ।
"संस्थाप्य श्रीबाणलिङ्गं रत्नकोटिगुणं भवेत् ।
रसलिङ्गे ततो बाणात् फलं कोटिगुणं स्मृतम् ।
गुणांस्तु रसलिङ्गस्य वक्तुं शक्नोति शङ्करी ।
सिद्धयो रसलिङ्गे स्युरणिमाद्याः सुसंस्थिताः ।"
इति स्मृतसंहिता । * ।
"रत्नधातुमयान्येव लिङ्गानि कथितान्यपि ।
पवित्राण्येव पूज्यानि सर्व्वकामप्रदानि च ।
एतेषामपि सर्व्वेषां काश्मीरं हि विशिष्यते ।
काश्मीरादपि लिङ्गाच्च बाणलिङ्गं विशिष्यते ।
बाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते ।
ऐहिकामुष्मिकं सर्व्वं पूजाकर्त्तुः प्रयच्छति ।"
इति बाणलिङ्गप्रशंसा । इति केदारखण्डम् ।*।
निन्द्यलिङ्गमाह तत्रैव ।
"कर्कशे बाणलिङ्गे तु पुत्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ।
एकपार्श्वस्थिते धेनुपुत्रदारधनक्षयः ।
शिरसि स्फुटिते बाणे व्याधिमृत्युमेव च ।
छिद्रलिङ्गेऽर्चिते बाणे विदेशगमनं भवेत् ।
लिङ्गे च कर्बुरां दृष्ट्वा व्याधिमान् जायते पुमान् ।
अस्रुन्नतिं विलाये तु गोधनानां क्षयो भवेत् ।*
तीक्ष्णाग्रं वक्रशीर्षं च त्रासलिङ्गं विवर्जयेत् ।
अतिस्थूलत्वातिह्रस्वं खण्डं वा भूयसान्वितम् ।
यद्वा विवर्जयेत्ताडक् तद्धि मोक्षार्थिनो हितम् ।"
इति दुष्टबाणलिङ्गलक्षणम् । इति हेमाद्रिः ।*।
शुभलिङ्गमाह ।
"अर्थदं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणः ।
लघु वा कपिलं स्थूलं गृही नैवार्चयेत् क्वचित् ।
पूजितव्यं गृहस्थेन वर्षेण भ्रमरोपमम् ।
तत् सपीठमपीठं वा मन्त्रसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं लिङ्गं सर्व्वप्रासादपीठगम् ।"
इति शुभबाणलिङ्गलक्षणम् । इति वीरमित्रोदयः । * । बाणलिङ्गेष्वावाहनादि न कर्त्तव्यं यथा,—
"बाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं न च ।"
इति भविष्यपुराणम् ।
"ब्राह्मे मुहूर्त्ते चोत्थाय यः स्मरेद्बाणलिङ्गकम् ।
सर्व्वत्र जयमाप्नोति सत्यं सत्यं महेश्वर ! ।"
इति योगसारे ५ परिच्छेदः । * ।
अथ बाणलिङ्गध्यानम् ।
"ॐ प्रणवं शक्तिसंयुक्तं बाणाख्यञ्च महाप्रभम् ।
कामबीजान्वितं देवं संसारदहनक्षमम् ।
हृङ्कारादिरशेषान्तं बाणाख्यं परमेश्वरम् ।
एवं ध्यात्वा बाणलिङ्गं यजेत्तं परमं शिवम् ।
मनसा गन्धपुष्पाद्यैः संपूज्यास्त्रं मनुं स्मरेत् ।
प्राणायामं ततः कृत्वा बाणलिङ्गन्तु शोधयेत् ।
तद्दिव्यदेवयोरैक्यं विभाव्य बाणभवं जपेत् ।
ततो जपं समाप्याथ स्तवेनानेन शोधयेत् ।"*।
अथ स्तवः ।
"बाणलिङ्ग महाभाग संसाराब्धेर्हि मां प्रभो
नमस्ते भोगरूपाय नमस्तेऽयक्तयोनये ।
संसारकारिणे तुभ्यं नमस्ते ह्यग्निरूपधृक् ।
प्रमत्ताय महेन्द्राय कालरूपाय वै नमः ।
दहनाय नमस्तुभ्यं नमस्ते योगकारिणे ।
भोगिनां भोगकर्त्रे च मोक्षदात्रे नमो नमः ।
नमः कामाङ्गनाशाय नमः कलयहारिणे ।
नमो विश्वप्रदात्रे च नमो विश्वस्वरूपिणे ।
बाणस्य वरदात्रे च रावणस्य क्षयाय च ।
रामस्यानुग्रहार्थाय राज्याय भरतस्य च ।
मुनीनां योगदात्रे च राक्षसानां क्षयाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ।
ह्रैं दाहिकाशक्तियुक्ताय महामायाप्रियाय च ।
भगप्रियाय सर्व्वाय वैरिणां निग्रहाय च ।
परित्राणाय योगिनां कौलिकानां प्रियाय च ।
कुलाङ्गनानां भक्ताय कुलाचाररताय च ।
कुलभक्ताय योगाय नमो नारायणाय च ।
मधुपानप्रमत्ताय योगेशाय नमो नमः ।
कुलनिन्दाप्रणाशाय कौलिकानां सुखाय च ।
कुलयोगाय निष्ठाय शुद्धाय परमात्मने ।
परमात्मस्वरूपाय लिङ्गमूलात्मकाय च ।
सर्व्वेश्वराय सर्व्वाय शिवायै निर्गुणाय च ।* ।
इत्येतत् परमं गुह्यं बाणलिङ्गस्य शङ्कर ।
यः पठेत् साधकश्रेष्ठो गाणपत्यं लभेत सः ।
स्तवस्यास्य प्रसादेन योगी योगित्वमाप्नुयात् ।
राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च ।
साधूनां साधनं देव कौलिकानां कुलं भवेत् ।
यं यं कामयते मन्त्री तं तमाप्नोति लीलया ।
बाणलिङ्गप्रसादेन सर्व्वमाप्नोति सत्वरम् ।
किमन्यत् कथयामीह सर्व्वं वेत्सि कुलेश्वर ! ।
महाभये समुत्पन्ने राजद्वारे कुलेश्वर ! ।
देशान्तरभये प्राप्ते दस्युचौरादिसङ्कटे ।
पठनात् स्तवराजस्य न भयं लभते क्वचित् ।
बाणलिङ्गस्य माहात्म्यं संक्षेपात् कथितं मया ।
तस्य श्रवणमात्रेण नरो मोक्षमवाप्नुयात् ।
बाणलिङ्गं सदाराध्यं योगिनां योगसाधने ।
कौलिकानां कुलाचारे पशूनां ग्रहणिग्रहे ।
वेदज्ञानां वेदपाठे रोगिणां रोगनाशने ।
यो यो नाराधयेदेनं सर्व्वं तन्निष्फलं भवेत् ।"
इति श्रीयोगसारे सर्व्वागमोत्तमे पार्व्वतीशिवसंवादे बाणलिङ्गस्तोत्रं समाप्तम् । * ।
अथ रौद्रलिङ्गलक्षणम् ।
"नदीसङ्गभवं रौद्रमन्योन्यस्य विघर्षणात् ।

नदीवेगात् समं स्निग्धं संघातं रौद्रमुच्यते ।"
इति वीरमित्रोदयः ॥
"सरित्प्रवाहसंस्थानं वायुलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं रौद्रलिङ्गं सुखावहम् ॥
नदीसारनभेदाया वायुलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं लिङ्गं रौद्रं भविष्यति ॥
रौद्रलिङ्ग तथाख्यातं वायुलिङ्गसमाकृति ।
श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितम् ॥
स्वभावात् कृष्णवर्णं वा सर्व्वजातिषु सिद्धिदम् ।
नर्म्मदासम्भवं रौद्रं वायुलिङ्गवदीरितम् ।"
इति रौद्रलिङ्गलक्षणम् । इति लक्षणसमुच्चयोऽपि ॥
अथ शिवनाभिलिङ्गलक्षणम् ।
"उत्तमं मध्यमधमं त्रिविधं लिङ्गमीरितम् ।
चतुरङ्गुलमुत्सेधे रम्यवेदिकसुत्तमम् ॥
उत्तमं लिङ्गमाख्यातं मुनिभिः शास्त्रकोविदैः ।
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमधमं स्मृतम् ॥"
तस्य महिमा ।
"शिवनाभिमयं लिङ्गं प्रतिपूज्य महर्षिभिः ।
श्रेष्ठञ्च सर्व्वलिङ्गभ्यस्तस्मात् पूज्यं विशेषतः ॥"
इति शिवनाभिलिङ्गलक्षणम् । इति वीरमित्रोदयधृतशिवनारदसंवादः ॥ * ॥
अथ देवलिङ्गलक्षणम् । सिद्धान्तशेखरे ।
"करसंपुटसंस्थाग्रैं शूलटङ्केन्दुभूषितम् ।
रेखाकोटरसंयुक्तं निम्नोन्नतसमन्वितम् ॥
दीर्घाकारञ्च यल्लिङ्गं ब्रह्मभागादिवर्जितम् ।
लिङ्गं गोलमिति प्रोक्तं गोलकं प्रोच्यतेऽधुना ।
कुष्माण्डस्य फलाकारं नागरङ्गफलोपमम् ।
काकडिम्बफलाकारं गोललिङ्गमितीरितम् ॥"
इति गोललिङ्गलक्षणम् ॥
अथार्द्धलिङ्गलक्षणं तत्रैव ।
"नागाकोलफलाकारं ब्रह्मसूत्रविवर्जितम् ।
मूले स्थूलञ्च यल्लिङ्गं कपित्थफलसन्निभम् ॥
नालस्य वा फलाकारं मध्ये स्थूलञ्च यद्भवेत् ।
मध्ये स्थूलं वरं लिङ्गमित्याचसुदाहृतम् ॥"
इत्यार्द्धलिङ्गलक्षणम् ॥*॥
अथ लिङ्गलक्षणम् ।
"लिङ्गं हि द्विविधं प्रोक्तं ज्ञविमाङ्गत्रिमच्चतत् ।
तल्लिङ्गं द्विविधं ज्ञेयमचलञ्च चलन्तथा ।
प्रत्येकं त्रिविधं ज्ञेयं लिङ्गं तदुभयात्मकम् ॥
प्रासादे स्थापितं लिङ्गमचलं तच्छिलादिजम् ।
स्थापितं चलनं गेहे स्थिरं लिङ्गमयोजिते ॥
पञ्चधा तत् स्थितं लिङ्गं स्वयम्भु दैवपालकम् ।
आर्षञ्च मानवं लिङ्गं तेषां लक्षणमुच्यते ।"
इति सिद्धान्तशेखरः ॥
"आचार्य्यसुनये खेदं स्वयम्भूतो महेश्वरः ।
यच्च चैव स्वयं यत्नं लिङ्गमस्तु स्वयम्भु तत् ॥
धमनी यस्य संस्पर्शात् दहति त्रिभवं तु ।"
इति षट्कर्म्मदीपिका ॥ * ॥
"नानाच्छिद्रसुसंयुक्तं नानावर्णसमन्वितम् ।
अदग्धमलं यल्लिङ्गं कर्केयं भुवि दृश्यते ॥
तल्लिङ्गन्तु स्वयम्भूतमपरं लक्षयच्युतम् ।
स्वयम्भु लिङ्गमित्युक्तं तच्च नानाविधं मतम् ॥
शुक्लाभमस्तकं लिङ्गं वैखार्यं तदुदाहृतम् ।
पद्माभमस्तकं त्राह्मं कृष्णाभं शाक्रमुच्यते ॥
शिरोयुग्मं तदार्षेयं त्रिपदं याम्यमीरितम् ।
खड्गाभं नैर्ऋतं लिङ्गं वारुणं कलसाकृति ॥
वायव्यं ध्वजवल्लिङ्गं कौवेरन्तु गदान्वितम् ।
ईशानस्य त्रिशूलाभं लोकपालादिनिःसृतम् ।
स्वयम्भु लिङ्गमाख्यातं सर्व्वशास्त्रविशारदैः ॥"
इति स्वयम्भुलिङ्गलक्षणम् ॥
इति सिद्धान्तशेखरः ॥ * ॥
"दृष्ट्वा लिङ्गं महेशस्य स्वयम्भूतस्य पार्व्वति ।
सर्व्वपापविनिर्म्मुक्तः परे ब्रह्मणि लीयते ॥"
एतेषां पूजाफलं तत्रैव ।
"विशेषाच्छैलजं सुक्त्यै भुक्तये चानुषङ्गतः ।
पार्थिवं भुक्तये प्रोक्तं मुक्तये चानुषङ्गतः ॥
एवं वै दारुजं ज्ञेयं चिद्दलिङ्गं तथा पुनः ।
स्थिरलक्ष्मीप्रदं ज्ञेयं हैमं राज्यप्रदञ्च तत् ।
पुत्रवृद्धिकरं राङ्गमायुःप्रवर्द्धनम् ॥"
इति मत्स्यसूक्तमहातन्त्रम् ॥ * ॥
"पारदञ्च महाभूत्यै सौभाग्याय च मौक्तिकम् ।
चन्द्रकान्तं स्रुतुजित् स्याद्घाटकं सर्व्वकामदम् ॥"
इति पद्मपुराणम् ॥ * ॥
"सर्व्वफलप्रदा भूमिर्मणयस्तद्वदेव हि ।
अगस्त्याद्याः स्मृता ह्यष्टौ मणयो विद्युदुज्ज्वलाः ॥
रात्रौ प्रकाशकाः सर्व्वविषाद्याघातकारिणः ।
नानावर्णास्तु विज्ञेया रत्नैर्नवभिरेव रूपतः ॥
वज्राद्याः स्फाटिकाद्याश्च गुडान्नादिविनिर्म्मितम् ।
सर्व्वकामप्रदं पुंसां लिङ्गं तात्कालिकं मतम् ॥"
इति वीरमित्रोदयधृतकालोत्तरः ॥ * ॥
"गान्धं सौभाग्यदं लिङ्गं पौष्पं मुक्तिप्रदायकम् ।
नानाधूनोद्भवं लिङ्गं नानाकामप्रदायकम् ॥
सैकतं गुणदं लिङ्गं सौभाग्याय च लावणम् ।
उच्चाटने तु पाषाणं मौलं शत्रुक्षयावहम् ।
तात्कालिकं दरिद्रश्च ज्ञात्वा भक्त्या समर्च्चयेत् ॥"
इति लक्षणसमुच्चयः ॥
अथ गन्धलिङ्गम् । गरुड़पुराणे ।
"कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य त्रयश्चैव अगुरुणा च चतुःसमम् ॥
एतद्धि गन्धलिङ्गन्तु ज्ञात्वा संपूज्य भक्तितः ।
शिवसायुज्यमाप्नोति बन्धुभिः सहितो नरः ॥"
पुष्पमयलिङ्गं यथा,—
"कार्य्यं पुष्पमयं लिङ्गं हयगन्धसमन्वितम् ।
नवखण्डां धरां भुक्त्वा गणेशोऽधिपतिर्भवेत् ॥"
अथ रजोमयलिङ्गम् ।
"रजोभिर्निर्म्मितं लिङ्गं यः पूजयति भक्तितः ।
विद्याधरपदं प्राप्य पश्चाच्छिवसमो भवेत् ॥"
अथ गोशृङ्गलिङ्गम् ।
"श्रीकामो गोशृङ्गलिङ्गं ज्ञात्वा भक्त्या प्रपूजयेत् ।
स्वच्छेन कापिलेनैव गोमयेन प्रकल्पयेत् ॥"
स्वच्छेन भूमिपतनरहितेन । मूत्रोद्धृतेनेति यावत् ॥*॥
अथ यवगोधूमशालिजलिङ्गम् ।
"कार्य्यं यष्टिक्रमं लिङ्गं यवगोधूमशालिजम् ।
श्रीकामः पुष्टिकामश्च पुत्रकामस्तदर्च्चयेत् ॥"
अथ सिताखण्डमयलिङ्गम् ।
"सिताखण्डमयं लिङ्गं कार्य्यमारोग्यवर्द्धनम् ।
वश्ये लवणजं लिङ्गं तालत्रिकटुकान्वितम् ॥"
तालं हरितालम् । त्रिकटुकं शुण्ठीपिप्पलीमरीचं इति प्रसिद्धम् ।
"गव्यघृतमयं लिङ्गं संपूज्य बुद्धिवर्द्धनम् ।"
तथा ।
"लवणेन च सौभाग्यं पार्थिवं सर्व्वकामदम् ।
कामदं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतम् ॥
भक्षणोत्थं सर्व्वफलदं गुड़ोत्थं प्रीतिवर्द्धनम् ।
गन्धोत्थं गुणदं भूरि शर्करोत्थं सुखप्रदम् ।
वंशाङ्कुरोत्थं वंशकरं गोमयं सर्व्वरोगदम् ।
केशास्थिसम्भवं लिङ्गं सर्व्वशत्रुविनाशनम् ॥
घोषणे मारणे पिष्टसम्भवं लिङ्गमुत्तमम् ।
दारिद्र्यदं द्रुमोद्भूतं पिष्टं सारस्वतप्रदम् ।
दधिदुग्धोद्भवं लिङ्गं कीर्त्तिलक्ष्मीसुखप्रदम् ।
धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत् ॥
पुष्पोत्थं दिव्यभोगायुर्मूले धात्रीफलोद्भवम् ।
नवनीतोद्भवं लिङ्गं कीर्त्तिसौभाग्यवर्द्धनम् ॥
दूर्व्वाकाण्डसमुद्भूतमपत्यतुनिवारणम् ।
कर्पूरसम्भवं लिङ्गं चलं वै मुक्तिमुक्तिदम् ॥
त्रयस्त्रिंशत् चतुर्धा तु ज्ञेयं सामान्यसिद्धिषु ॥
सर्व्वं नवभवं श्रेष्ठं तत्र वज्रमरिच्छिदि ।
यमलिङ्गं महाभूत्यै सौभाग्याय च मौक्तिकम् ।
पुष्टिमूलं महानीलं ज्योतिश्चीरसमुद्भवम् ॥
सूर्य्यकं कुलसन्नद्धे तैजसं सूर्य्यकान्तजम् ।
चन्द्रापीड़ं स्रुतुजितं स्फाटिकं सर्व्वकामदम् ॥"
चन्द्रापीड़ं चन्द्रकान्तमित्यर्थः ।
"शूलाख्यमणिजं शत्रुक्षयार्थं मौक्तिकं तथा ।"
यत्सन्निधानात् शूलरोगनाशः स शूलमणिः ॥
"आपुत्रं हीरकं ज्ञेयं रोगघ्नमौक्तिकोद्भवम् ।
शुभक्षत् पुष्पलं तीर्थे वैदूर्य्यं शत्रुदर्पहृत् ।
नीलं लक्ष्मीप्रदं ज्ञेयं स्फाटिकं सर्व्वकामदम् ॥"
इति सारसंग्रहे ॥
"महाभुक्तिप्रदं हैमं राजतं भूतिवर्द्धनम् ।
आरकूटं तथा कांस्यं ह्यसु सामान्यमुक्तिदम् ॥"
आरकूटं पित्तलम् ।
"त्रपु सीसायसं लिङ्गं शत्रूणां नाशने हितम् ।
कीर्त्तिदं कांस्यजं लिङ्गं राजतं पुष्टिवर्द्धनम् ।
पैत्तलं भुक्तिमुक्त्यर्थं मिश्रजं सर्व्वसिद्धिदम् ॥"
मिश्रजमष्टधातुनिर्म्मितम् । इति कालोत्तरः ॥
"पितॄणां मुक्तये लिङ्गं पूज्यं रजतसम्भवम् ।
हैमजं सत्यलोकस्य प्राप्तये पूजयेत् पुमान् ॥
पूजयेत्ताम्रजं लिङ्गं पुष्टिकामो हि मानवः ॥"
इति शिवनारदसंवादः ॥
ताम्रादिलिङ्गपूजनन्तु कलौतरपरम् ।
"ताम्रलिङ्गं कलौ नार्च्चेत् रौप्यस्य सीसकस्य च ।
रक्तचन्दनलिङ्गञ्च शङ्खकांस्यायसं तथा ॥
तुष्टिकामस्तु सततं लिङ्गं पित्तलसम्भवम् ।

कीर्तिकामो यजेन्नित्यं लिङ्गं कांस्यसमुद्भवम् ।
शत्रुमारणकामस्तु लिङ्गं लौहमयं सदा ।
सदा सीसमयं लिङ्गमायुष्कामोऽर्चयेत् नरः ।"

इति मत्स्यसूक्तमहातन्त्रम् ।

"स्थिरलक्ष्मीप्रदं हेम राजतं चैव राज्यदम् ।
प्रजावृद्धिकरं राङ्गं ताम्रमायुःप्रवर्द्धनम् ।
विद्वेषकारणं कांस्यं रीतिजं शत्रुनाशनम् ।
रोगघ्नं सैसकं लिङ्गमायसं शत्रुनाशनम् ।
अष्टलौहमयं लिङ्गं कुष्ठरोगक्षयावहम् ।
त्रिलौहसम्भवं लिङ्गं विज्ञानं प्रति सिद्धिदम् ।"

इति लक्षणसमुच्चयः ।

"श्रीप्रदं वज्रजं लिङ्गं शिलाजं सर्व्वसिद्धिदम् ।
धातुजं धनदं साक्षाद्दारुजं भोगसिद्धिदम् ।"

इति लिङ्गपुराणम् ।

"गन्धपुष्पमयं लिङ्गं तथान्नादिविनिर्म्मितम् ।
कस्तूरीसम्भवं लिङ्गं धनाकाङ्क्षी प्रपूजयेत् ।
लिङ्गं गोरोचनोत्थञ्च रूपकामस्तु पूजयेत् ।
कान्तिकामस्तु सततं लिङ्गं कुङ्कुमसम्भवम् ।
श्वेतागुरुसमुद्भूतं महावृद्धिविवर्द्धनम् ।
धारणाच्छक्तिदं लिङ्गं कृष्णागुरुसमुद्भवम् ।
यत्नकर्दमसम्भूतम् ।" इति कालोत्तरः ।

"पार्थिवे शिवपूजायां सर्व्वसिद्धियुतो भवेत् ।
पाषाणे शिवपूजायां द्विगुणं फलमीरितम् ।
स्वर्णलिङ्गे च पूजायां शतानां नाशनं मतम् ।
सर्व्वसिद्धीश्वरो रौप्ये फलं तस्माच्चतुर्गुणम् ।
ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसंचयः ।
गङ्गायाञ्च शतगुणं लाक्षायां रोगवान् भवेत् ।
स्फाटिके सर्व्वसिद्धिः स्यात्तथा मरकते प्रिये ।
लौहलिङ्गे रिपोर्नाशः कामदं भस्मलिङ्गकम् ।
धातुकायां काम्यसिद्धिर्गोमये रिपुसूदनम् ।
सर्व्वलिङ्गस्य माहात्म्यं धर्म्मकामार्थमोक्षदम् ।"

इति मातृकाभेदतन्त्रे १२ पटलः ।

"ब्रह्मा संपूजयेन्नित्यं लिङ्गं शैलमयं शुभम् ।
तस्य संपूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमम् ।
इन्द्रनीलमयं लिङ्गं विष्णुः समर्चयेत् सदा ।
विष्णुत्वं प्राप्तवान् तेन सोऽभूद्भूतैकपालकः ।
स्फाटिकं निर्म्मलं लिङ्गं वरणोऽभ्यर्चयेत् सदा ।
तेन तद्वरुणत्वं हि प्राप्तं तेजोबलान्वितम् ।"

इति षट्कर्म्मदीपिकाधृतशिवधर्म्मः ।

"पूजयेत् पार्थिवे लिङ्गे पाषाणलिङ्गकेऽथवा ।
स्वर्णलिङ्गेऽथवा देवि रौप्ये ताम्रे च कांस्यके ।
पारदे वाथ गङ्गायां स्फाटिके मरकतेऽपि वा ।
कार्य्यभेदे लौहलिङ्गे भस्मनिर्म्मितलिङ्गके ।
धातुकानिर्म्मिते लिङ्गे गोमये वाथ पूजयेत् ।
संस्कारेण विना देवि पाषाणादौ न पूजयेत् ।"

इति मातृकाभेदतन्त्रे ७ पटलः ।

इति शिवलिङ्गनिर्म्माणप्रकाराः । * । अथ शिवलिङ्गसंस्कारः ।

"संस्कारञ्च प्रवक्ष्यामि विशेष इह यद्भवेत् ।
रौप्यञ्च स्वर्णलिङ्गञ्च स्वर्णपात्रे निधाय च ।
तस्मादुष्णोदकं तत्र लिङ्गं दुग्धमधौ दिनत्रयम् ।
आम्रकेण स्रापयित्वा कालदण्डं प्रपूजयेत् ।
षोढ़ान्यासोपचारेण वेद्यान्तु पार्व्वतीं यजेत् ।
तस्मादुत्थाप्य तल्लिङ्गं गङ्गातोये दिनत्रयम् ।
ततो वेदोक्तविधिना संस्कारमाचरेत् सुधीः ।"

पूर्व्वोक्तवचनैः फलविशेषकामनया नानाविधलिङ्गपूजोक्ता सा च पूजा ।

"लिङ्गं सुलक्षणं कुर्य्यात्तत्रैलिङ्गमलक्षणम् ।
दैर्घ्यहीने भवेद्व्याधिरधिके शत्रुवर्द्धनम् ।
मानहीने विनाशः स्यादधिके च शिशुक्षयः ।
विस्तारे चाधिके हीने राष्ट्रनाशो भवेद्ध्रुवम् ।
पीठहीने तु दारिद्र्यं शिरोहीने कुलक्षयः ।
ब्रह्मसूत्रविहीने च राज्ञां राष्ट्रञ्च नश्यति ।
तस्मात् सर्व्वप्रयत्नेन लिङ्गं कुर्य्यात् सुलक्षणम् ।"

इत्यादिना सुलक्षणलिङ्गस्यैव फलदात्रत्वमुक्तम् ।

इति मातृकाभेदतन्त्रे ७ पटलः ।

देव्युवाच ।

"इन्द्रिये रहितो देवः शून्यरूपः सदाशिवः ।
आकारो नास्ति देवस्य किं तस्य पूजने फलम् ।

शिव उवाच ।

प्रेते पूजा महेशानि कदाचिन्नास्ति पार्व्वती ।
रुद्रस्य परमेशानि रौद्री शक्तिरितीरिता ।
रौद्री तु परमेशानि आद्या कुरुकुलिनी भवेत् ।
वर्त्तते परमेशानि ब्रह्मविष्णुशिवात्मिका ।
सार्द्धत्रिवलयाकारैः शिवं वेष्ट्य सदा स्थिता ।
शक्तिं विना महेशानि प्रेतत्वं तस्य निश्चितम् ।
शक्तिसंयोगमात्रेण कर्म्मकर्त्ता सदाशिवः ।
अतएव महेशानि पूजयेच्छिवलिङ्गकम् ।"

इति सशक्तिकशिवलिङ्गपूजनफलम् ।

इति लिङ्गार्चनतन्त्रे २ पटलः । * ।

देव्युवाच ।

"लिङ्गप्रमाणं देवेश कथयस्व मयि प्रभो ।
पार्थिवे च शिलादौ च विशेषो यत्र यो भवेत् ।

श्रीशिव उवाच ।

स्फटिकातोलकं याक्षमथवा तोलकद्वयम् ।
एतदन्यत्र कुर्व्वीत कदाचिदपि पार्व्वति ।"

इति मातृकाभेदतन्त्रे ७ पटलः ।

अपि च ।

"स्फटिकातोलकं याक्षमथवा तोलकद्वयम् ।
त्रिसूत्रस्य प्रमाणेन घटनं कारयेद्बुधः ।
खण्डस्फुटपर्व्वमानन्तु त्यक्त्वा लिङ्गं प्रपूजयेत् ।
स्फटादिलिङ्गघटने प्रमाणं परिकीर्त्तितम् ।
फलसूक्तमवाप्नोति अन्यथा चेत्तदन्यथा ।"

इति षट्कर्म्मदीपिकाधृतविश्वसारतन्त्रम् ।

"लिङ्गे वेद्यां तथा पीठे समसूत्रनिपातनात् ।
समत्वेन विजानीयान्निष्कोकरणमिदम् ।"

इति कालोत्तरः ।

स्फटिकभेदेन ब्राह्मणादीनां पूजाफलस्य प्रश्नस्तत्वं यथा,—

"चतुर्धा पार्थिवं लिङ्गं स्फटिकाभेदेन पार्व्वति ।
शुक्लं रक्तं तथा पीतं कृष्णञ्च परमेश्वरि ।
शुक्लन्तु ब्राह्मणे प्रोक्तं क्षत्रिये रक्तमिष्यते ।
पीतन्तु वैश्यजातौ स्यात् कृष्णं शूद्रे प्रकीर्त्तितम् ।"

तथा ।

"शुक्लं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत् ।
स एव परमेशानि त्रिवर्गफलभाग्भवेत् ।
क्षत्रियस्तु वरारोहे रक्तं निर्म्माय पार्थिवम् ।
पूजयेत् सततं यस्तु त्रिवर्गफलमाप्नुयात् ।
हरितं पार्थिवं देवि ! निर्म्माय यस्तु पूजयेत् ।
स च वैश्यो महेशानि ! त्रिवर्गफलभाग्भवेत् ।
कृष्णं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत् ।
स शूद्रः परमेशानि ! त्रिवर्गफलभाग्भवेत् ।"

इति लिङ्गार्चनतन्त्रे ३ पटलः । * ।

"शिलादौ च महेशानि ! स्थूलञ्च फलदायकम् ।
अङ्गुष्ठमानं देवेशि ! यद्वा हैमादिमानकम् ।
क्रमेण देवदेवेशि ! फलं बहुविधं लभेत् ।
स्थूलात् स्थूलतरं लिङ्गं रुद्राक्षं परमेश्वरि ! ।
पूजनाद्धारणाद्देवि ! फलं बहुविधं स्मृतम् ।"

स्थूलात् स्थूलमिति पार्थिवलिङ्गेतरपरम् । स्फटिकातोलकमिति विशेषवचनात् । शिलास्फाटिकमरकतादीनां पञ्चसुकीकरणसूक्तं यथा,—

"शिवलिङ्गस्य यन्मानं तन्मानं दक्षसव्ययोः ।
योन्यग्रमपि यन्मानं तदधोऽपि तथा भवेत् ।"

इति लिङ्गपुराणम् ।

"लिङ्गस्य यादृग्विस्तारः परिणाहोऽपि तादृशः ।
लिङ्गस्य द्विगुणा देवी योनिस्तद्दर्शसम्मिता ।
कुर्व्वीताङ्गुष्ठतो दूरं न कदाचिदपि क्वचित् ।
रत्नादिशिवनिर्म्माणे मानमिच्छावशाद्भवे ।"

इति तन्त्रान्तरम् ।

लिङ्गव्युत्पत्तिर्यथा,—

"आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।
आलयः सर्व्वदेवानां लयनाल्लिङ्गमुच्यते ।"

इति स्कन्दपुराणम् ।

लिङ्गमहिमा यथा,—

शिव उवाच ।

"न तुष्याम्यर्चितोऽर्च्चायां पुष्पधूपनिवेदनैः ।
लिङ्गेऽर्चिते तथात्यर्थं परं तुष्यामि पार्व्वति ! ।
एष देवि ! पुरा ह्यत्रे जीनोऽहं सर्व्वदेवतैः ।
लिङ्गत्वाल्लिङ्गमित्युक्तं सदेवासुरकिन्नरैः ।
प्रयच्छामि दिवं देवि ! यो मल्लिङ्गार्चने रतः ।
त्यक्त्वा सर्व्वाणि पापानि निर्गतो दग्धकल्मषः ।
मन्मनाः मन्मस्कारो मामेव प्रतिपद्यते ।"

इति वीरमित्रोदयधृतस्कन्दपुराणम् ।

अथविशेषेण पूजादिफलं यथा,—

"वज्रपूतनलैर्लिङ्गं स्नपित्वा मम मानवः ।
लक्षाश्वाश्वमेधानां फलमाप्नोति सत्तमः ।
सुगन्धिचन्दनरसैर्लिङ्गमालिप्य भक्तितः ।
आलिप्यते सुरस्त्रीभिः सुगन्धैर्यत्नकर्द्दमैः ।"

इति तत्रैव । * ।

लिङ्गपूजाया अकरणे दोषः तत्पूजाफलञ्च यथा,

"विना लिङ्गार्चनं यस्य कालो गच्छति नित्यशः ।
महाहानिर्भवेत्तस्य दुर्गतस्य दुरात्मनः ।
एकतः सर्व्वदानानि व्रतानि विविधानि च ।
तीर्थानि नियमा यज्ञा लिङ्गाराधनमेकतः ॥

न लिङ्गाराधनादन्यत् पुरा वेदे चतुर्ष्वपि ।
विद्यते सर्वशास्त्राणामेष एव सुनिश्चितः ।
मुक्तिमुक्तिप्रदं लिङ्गं विविधापत्निवारणम् ।
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात् ।
सर्वमन्यत् परित्यज्य क्रियाजालमशेषतः ।
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत् ।"

इति स्कन्दपुराणम् ।*।

"अश्वमेधसहस्राणि वाजपेयशतानि च ।
महेशार्चनपुण्यस्य कलां नार्हन्ति षोडशीम् ।"

इति मत्स्यसूक्त १६ पटलः ।

"ब्रह्मणाच किमुक्तेन चराचरमिदं जगत् ।
शिवलिङ्गं समभ्यर्च्य स्थितमत्र न संशयः ।"

इति लिङ्गपुराणम् ।*।

"शिवस्य पूजनाद्देवि चतुर्वर्गाधिपो भवेत् ।
अष्टैश्वर्ययुतो मर्त्यः शम्भुनाथस्य पूजनात् ।
स्वयं नारायणेनोक्तं यदि शम्भुं प्रपूजयेत् ।
स्वर्गे मर्त्ये च पाताले ये देवाः संस्थिताः सदा ।
तेषां पूजा भवेद्देवि शम्भुनाथस्य पूजनात् ।"

इति लिङ्गपुराणम् ।*।

"असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भु-
पूजनम् ।"

इति षट्कर्मदीपिकाधृतकालोत्तरे नारद-
वाक्यम् ।*।

"अग्निहोत्रास्त्रिवेदाश्च यज्ञाश्च बहुदक्षिणाः ।
शिवलिङ्गार्चनस्यैते कोटयंशेनापि ते समाः ।
हित्वा भित्त्वा च भूतानि हित्वा सर्वमिदं
जगत् ।
यजेद्देवं विरूपाक्षं न स पापेन लिप्यते ।
अनेकजन्मसाहस्रं भ्राम्यमाणश्च योनिषु ।
कः समाप्नोति वै मुक्तिं विना लिङ्गार्चनं नरः ।"

इति स्कन्दपुराणम् ।*।

"ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्यनुलोमजः ।
पूजयेत् सततं लिङ्गं तत्तन्मन्त्रेण सादरम् ।"

तत्तन्मन्त्रेणेति यथायोग्यं वैदिकतान्त्रिकनाम-
मन्त्रैरित्यर्थः । इति वीरमित्रोदयधृतस्कन्द-
पुराणम् ।*।

"मूले ब्रह्मा तथा मध्ये विष्णुस्त्रिभुवनेश्वरः ।
रुद्रोपरि महादेवः प्रणवाख्यः सदाशिवः ।
लिङ्गवेदी महादेवी लिङ्गं साक्षान्महेश्वरः ।
तयोः प्रपूजनान्नित्यं देवी देवश्च पूजितौ ।"

इति लिङ्गपुराणम् ।*।

अथ पारदशिवलिङ्गमाहात्म्यम् ।

"ज्योतिर्मयं महालिङ्गं कैलासनगरे प्रिये ।
तस्यैव षोडशांशैकः काश्यां विश्वेश्वरः स्थितः ।
पूर्वलिङ्गं महेशानि शिवबीजं न चान्यथा ।
शिलामध्ये यथा चक्रं लक्ष्मीनारायणः परम् ।
पारदस्य मृतांशैको लक्ष्मीनारायणो न हि ।
पकारं विष्णुरूपञ्च आकारं कालिका स्वयम् ।
रेफं शिवं दकारञ्च ब्रह्मरूपं न चान्यथा ।
पारदं परमेशानि ब्रह्मविष्णुशिवात्मकम् ।
यो यजेत् पारदं लिङ्गं स एव शम्भुरव्ययः ।
आजन्ममध्ये यो देवि एकदा यदि पूजयेत् ।
स एव शुद्धो देवेशि स ज्ञानी स च तत्त्ववित् ।
स ब्रह्मवेत्ता स धनी स राजा भुवि पूज्यते ।
अणिमादिविभूतीनामीश्वरः साधकोत्तमः ।"*।

अथ पारदशिवलिङ्गनिर्माणविधिः ।

"पारदे शिवनिर्माल्ये नानाविघ्नं यतः प्रिये ।
अतएव महेशानि शान्तिस्वस्ययनं चरेत् ।
पारदं शिववीजं हि ताडनं हि न कारयेत् ।
ताडनादितनाशः स्यात्ताडनाद्वितहीनता ।
ताडनाद्रोगयुक्तत्वं ताडनाच्चरत्वं भवेत् ।"

इति माहकालीमहातन्त्रे ८ पटलः ।*।

अथ शिवलिङ्गोत्पत्तिः ।

ब्रह्मोवाच ।

"पुरा त्वां चक्षुषा ज्ञात्वा तदर्थे न प्रकाशितम् ।
इदानीं योगिनं ज्ञात्वा कथयामि न संशयः ।
अतिगुह्यमतिगुह्यमतिगुह्यं न संशयः ।
गोपितव्यं गोपितव्यं गोपितव्यं त्वयापि च ।
शम्भुना गोपितं तन्त्रे तन्त्रान्तरे प्रकाशितम् ।
शृणु तत् कथयाम्यद्य सावधानोऽवधारय ।
सर्गादौ विविधाः सर्गा मया सृष्टा हि नारद ।
देवदानवदैत्याश्च गन्धर्वोरगराक्षसाः ।
सर्वे स्त्रीवशगाः श्रेष्ठा मैथुनाज्जायते प्रजा ।
केवलं हि शिवः शम्भुर्दारग्रहकर्मणि ।
कदापि न मनश्चक्रे दृष्ट्वा चिन्तापराः सुराः ।
मामेव शरणं जग्मुः सेन्द्रा देवासुरादयः ।
प्रणिपत्य स्तुतिं कृत्वा उपतस्थुः समाहिताः ।
प्रोचुः प्राञ्जलयः सर्वे भवाद्भगवदमानसाः ।

देवाद्या ऊचुः ।

उद्धरिता वयं सर्वे भवानपि जगद्गुरुः ।
केवलं हि महादेवो देवदेवो जगत्पतिः ।
विवाहे न मनश्चक्रे कथा वा मोक्षते शिवः ।
उपायं चिन्तय विभो सदारः कथमीश्वरः ।
येन स्त्रीवशगतां नायस्तत् कुरुष्व दयानिधे ।

इति श्रुत्वा वचस्तेषां ततो ब्रह्मा प्रजापतिः ।
सह तैर्गरुडारूढं जगाम कमलासनः ।
उवाच तं जगन्नाथं विष्णुं कमललोचनम् ।

ब्रह्मोवाच ।

दृष्टा मया सुरश्रेष्ठ मायया मैथुनोद्भवाः ।
सर्वे क्लेशा विना शम्भुं यतः कर्तव्यं वदस्व मे ।

श्रीभगवानुवाच ।

एभिः सह महाबाहो गच्छामस्तमहं शिवम् ।
कर्तव्यं स्थिरं तेन अनुज्ञातेयमावयोः ।
किन्तु तद्योग्यनारीस्तु विवाहार्थं प्रकल्पय ।

ब्रह्मोवाच ।

दक्षं गच्छामहे सर्वे अनुज्ञापय तं हरे ।
आद्याशक्तिं महामायां प्रसादयतु वै लघु ।
कन्या भूत्वा महाशम्भुं मोहयिष्यति शङ्करम् ।
एवमुक्त्वा तु तैः सार्द्धं जग्मतुर्विधिकेशवौ ।
यत्र दक्षो महातेजाः प्रोचतुः कार्यमात्मनः ।
उवाच दक्षं तद्युक्तं तपस्तप्तुं प्रजापतिः ।
ब्रह्मा विष्णुश्च सर्वे ते तपसा तोषयेच्छिवाम् ।
आविर्बभूव सा देवी कालिका जगदीश्वरी ।
प्राह मां वः किमर्थन्तु सस्तुत्कर्ता सुरासुराः ।

देव्युवाच ।

प्रीतं रूपं यथाकामं भवतां प्रार्थने फलम् ।
अचिरात् तत्प्रदास्यामि सत्यं सत्यं न संशयः ।

देवाद्या ऊचुः ।

भूत्वा तु दक्षकन्या त्वं शङ्करं परिमोहय ।
अस्माकं वाञ्छितञ्चैतत् कुरु सिद्धिं सदा शिवे ।
एतत् श्रुत्वा वचस्तेषां निरीक्ष्य कमलासनम् ।
उवाच विस्मयाविष्टा कालिका जगदीश्वरी ।

देव्युवाच ।

शम्भुरत्यन्तनो बालः किं मां सन्मोहयिष्यति ।
मम योग्यं पुमांसन्तु अन्यं वै परिकल्पय ।

ब्रह्मोवाच ।

शम्भुः सर्वगुरुर्देवो ह्यस्माकं परमेश्वरः ।
महासत्त्वो महातेजाः स ते तोषं करिष्यति ।
शम्भुतुल्यः पुमान्नास्ति कदाचिदपि कुत्रचित् ।
इत्युक्ता ब्रह्मणा देवी बाढमित्याह चेश्वरी ।
दक्षाय दर्शनं दत्त्वा उवाच उच्यतां वरः ।
दक्षोऽपि दृष्ट्वा तां देवीं खड्गकर्तृधरां पराम् ।
खर्वां लम्बोदरीं श्यामचर्मावृतकटिस्थलीम् ।
नीलोत्पलकपालाढ्यकरयुग्मां वरप्रदाम् ।
ज्ञातज्ञत्वमिवात्मानं मेने दक्षः प्रजापतिः ।

दक्ष उवाच ।

यदि मे वरदासि त्वं देवानामपि वाञ्छितम् ।
मदीयतनया भूत्वा शङ्करं किल मोहय ।
तथेत्युक्त्वा जगद्धात्री अन्तर्धानं गता तदा ।
देवताश्च ततो नत्वा यत्र तेपे तपो हरः ।
सस्त्रीकाः परमात्मानमुपतस्थुर्जगत्पतिम् ।
प्रणेमुस्तुष्टुवुर्भक्त्या प्राहुर्गद्गदभाषिणः ।

देवाद्या ऊचुः ।

भगवन् देवदेवेश लोकनाथ महाशय ।
वयं सर्वे तु सस्त्रीकाः स्वदर्थं परमेश्वर ।
अतस्तं कुरु चोद्वाहं स्वरिरक्षा यथा भवेत् ।
दक्षगेहे महाकाली मायेति परिकीर्तिता ।
जाता ते प्रीतये शम्भो सा ते योग्या न
संशयः ।

ईश्वर उवाच ।

भवतां प्रीतये सम्यक् करिष्ये नात्र संशयः ।
उद्योगः क्रियतां क्षिप्रं विवाहाय ममेव हि ।
इत्युक्तास्तु सुराः सर्वे ईश्वरेण महात्मना ।
ज्ञातज्ञत्वा गताः सर्वे भवनं सर्वसुन्दरम् ।
दक्षाय कथयामासुः शङ्करोदितं वचः ।
ततो विवाहं निर्वर्त्य ज्ञातज्ञत्वा यथा गताः ।
गताः सर्वे महेशोऽपि सत्या सह तदा गृहम् ।
जगाम रेमे सत्या च चिरं निर्भरमानसः ।
अथ काले कदाचित्तु सत्या सह महेश्वरः ।
रेमे न शैके तं सोढुं सती आत्माभवत्तदा ।
उवाच दीनया वाचा देवदेवं जगद्गुरुम् ।
भगवन्नहि शक्नोमि तव भारं सुदुःसहम् ।
क्षमस्व मां महादेव कृपां कुरु जगत्पते ।
निशम्य वचनं तस्या भगवान् दृषभध्वजः ।
निर्भरं रमणं चक्रे गाढं निर्दयमानसः ।

ङ्खा सम्पूर्णरसं सती च तत्क्षणेयुना।
उत्थानाय मनश्चक्रे उभयोस्तेज उत्तमम्।
पपात धरणीपृष्ठे तेषांग्रमखिलं जगत्।
पातालेे भूतले स्वर्गे शिवलिङ्गास्तदाभवन्।
तेन भूता भविष्याश्च शिवलिङ्गाः सयोनयः॥
यत्र लिङ्गं तत्र योनिर्यत्र योनिस्ततः शिवः।
उभयोश्चैव तेजोभिः शिवलिङ्गं व्यजायत॥"
इति शिवलिङ्गोत्पत्तिकथनमिति नारदपञ्चरात्रान्तर्गतलक्ष्मीतन्त्रराजे प्रथमाध्याये नारदब्रह्मसंवादः॥ *॥ शिवलिङ्गपूजायां सर्व्वेषामधिकारो यथा,—
"शाक्तो वा वैष्णवो वापि सौरो वा गाणपोऽथवा।
शिवार्च्चनविहीनस्य कुतः सिद्धिर्भवेत् प्रिये॥
अनाराध्य च मां देवि योऽर्च्चयेद्देवतान्तरम्।
न गृह्णाति महादेवि ग्रामं दत्त्वा व्रजेत् पुरम्॥
पञ्चतायसमं देवि मिष्टान्नादि क्रमेण हि।
फलानि बहुधान्यैव पुण्यान्यैव यथाविधि॥
सुमेरुसदृशं चान्नं नानाविधं महेश्वरी।
सूपादिकं महेशानि यदि स्यात् सागरोपमम्॥
यद्दत्तं पुण्यनैवेद्यं सर्व्वं विष्ठासमं भवेत्।
शिवार्च्चनविहीनो यः पूजयेद्देवतान्तरम्।
विशेषतः कलियुगे स नरः पापभाग्भवेत्॥"
इति उत्पत्तितन्त्रे ६४ पटलः॥ *॥
"सर्व्वपूजासु देवेशि! लिङ्गपूजापरं पदम्।
लिङ्गपूजां विना देवि अन्यपूजां करोति यः॥
विफला तस्य पूजा स्यादन्ते नरकमाप्नुयात्।
तस्मालिङ्गं महेशानि प्रथमं परिपूजयेत्॥
यदन्यं लिङ्गपूजायां रहितं सततं प्रिये।
तदन्यं पतितं मन्ये विष्ठाभूमिसमं स्मृतम्॥
ब्रह्म विट् क्षत्रियो देवि यदि लिङ्गं न पूजयेत्।
तत्तुल्यात् परमेशानि त्रयश्चण्डालतामियुः।
शूद्रश्च परमेशानि सदा शूकरवद्भवेत्॥
शिवार्च्चनन्तु देवेशि यस्मिन् गेहे विवर्त्तितम्।
विष्ठागर्त्तसमं देवि ततगृहं विद्धि पार्व्वति॥
अन्नं विष्ठा पयो मूत्रं तस्मिन् वेश्मनि पार्व्वति॥
शाक्तो वा वैष्णवो वापि गौवो वा परमेश्वरि!।
आदौ लिङ्गं प्रपूज्याथ विष्वक्सेनेश्वरानने!॥
यद्यदन्यं महेशानि! लिङ्गं पार्श्वे प्रपूजयेत्।
अन्यथा मूत्रवत् सर्व्वं शिवपूजां विना प्रिये!॥"
इति लिङ्गार्च्चनतन्त्रे २ पटलः॥
उपक्रमोपसंहारादि। यथा। लिङ्गानि तु उपक्रमोपसंहारावभ्यासापूर्व्वताफलार्थवादोपपत्त्याख्यानि। तदुक्तम्।
"उपक्रमोपसंहारावभ्यासोऽपूर्व्वताफलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णये॥"
तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपादानं उपक्रमोपसंहारौ। यथा छान्दोग्ये षष्ठे प्रपाठके। प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादौ ऐतदात्म्यमिदं सर्व्वमित्यन्तेन च प्रतिपादनम्॥ १॥ प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनं अभ्यासः। यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम्॥ २॥ प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तरेणाविषयीकरणं अपूर्व्वत्वम्। यथा। तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम्॥३॥ फलन्तु। प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्। यथा। तत्रैव आचार्य्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्षे अथ सम्पत्स्ये इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिप्रयोजनं श्रूयते॥ ४॥ प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनं अर्थवादः। यथा तत्रैव उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनम्॥ ५॥ प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः। यथा तत्र यथा सौम्यैकेन मृत्पिण्डेन सर्व्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते॥६॥
इति श्रीपरमहंससदानन्दयोगीन्द्रविरचितवेदान्तसारः॥ (पुराणविशेषः। यथा, देवीभागवते। १। ३। १०।
"एकादशसहस्राणि लिङ्गाख्यं चातिविस्तृतम्॥"
अस्यात्यद्भिवरणं पुराणशब्दे द्रष्टव्यम्॥ हेतुः। यथा, तर्ककौमुद्याम्। "लिङ्गज्ञानजन्यं लिङ्गिज्ञानमनुमितिः। "ज्ञायमानं लिङ्गन्तु करणं न हि।" इति भाषापरिच्छेदः॥ सूक्ष्मशरीरम्। यथा, पञ्चदश्याम्। १। २९।
"बुद्धिकर्म्मेन्द्रियप्राणपञ्चकैर्म्मनसा धिया।
शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते॥")
लिङ्गकः, पुं, (लिङ्गेन कायतीति। कै+कः।) कपित्यवृक्षः। इति शब्दचन्द्रिका॥ (गुणादयोऽस्य कपित्यशब्दे विज्ञेयाः॥)
लिङ्गवर्द्धः, पुं. (लिङ्गं वर्द्धयतीति। वृध्+णिच्+अच्।) कपित्यवृक्षः। इति शब्दचन्द्रिका॥ शिश्नवृद्धिकरणम्। तस्यौषधं यथा,—
"कट्फलेजं भल्लातकं वृक्षतीक्ष्णफलदाड़िमम्।
वल्कलैः साधितं लिप्तं लिङ्गं तेन विवर्द्धते॥"
अपि च।
"कुष्ठमाषमरीचानि तगरं मधुयष्टिली।
अपामार्गाश्वगन्धा च वृक्षती सितसर्षपाः॥
यवाक्षिलं सैन्धवञ्च पाञ्चिकोऽर्द्धनं शुभम्।
लिङ्गवर्द्धनकानाञ्च कर्षयोर्द्धद्विलङ्घवेत्॥"
इति गारुड़े १८० अध्यायः॥
लिङ्गवर्द्धिनी, स्त्री, (लिङ्गं वर्द्धयति या। वृध्+णिच्+ल्युट्। ङीप्।) अपामार्गः। इति शब्दचन्द्रिका॥
लिङ्गवृत्तिः, पुं, (लिङ्गमेव वृत्तिर्जीवनोपायो यस्य।) जीविकार्थजटादिचिह्नधारी। तत्पर्य्यायः। धर्म्मध्वजी २। इत्यमरः। २। ७। ५४॥
"जीविकादिनिमित्तन्तु यो बिभर्त्ति जटादिकम्।
धर्म्मध्वजी लिङ्गवृत्तिरयं तत्र निगद्यते॥"
इति शब्दरत्नावली॥

लिङ्गालिका, स्त्री, क्षुद्रमूषिकः। तत्पर्य्यायः। दीना २। इति हारावली। २१०॥
लिङ्गिनी, स्त्री, (लिङ्गमस्त्यस्या इति। लिङ्ग+इनिः। ङीप्।) लताविशेषः। पथ्यगुरिया इति हिन्दी भाषा। तत्पर्य्यायः। बहुपत्री २ ईश्वरी ३ शिववल्लिका ४ स्वयम्भूः ५ लिङ्गसम्भूता ६ लैङ्गी ७ शिवफला ८ चाङ्गाली ९ लिङ्गना १० देवी ११ चक्रा १२ शोषसम्भिनी १३ शिवजा १४ शिववल्ली १५। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। दुर्गन्धत्वम्। रसायनत्वम्। सर्व्वसिद्धिकरत्वम्। दिव्यत्वम्। वश्यत्वम्। रसनियामनत्वञ्च। इति राजनिर्घण्टः॥ (सञ्ज्ञादिलिङ्गधारिणी। यथा, सुश्रुते। ४। २४।
"लिङ्गिनीं गुरुपत्नीञ्च सगोत्रामथ पर्व्वसु।
दृष्ट्वाच सन्त्यजेच्चापि गच्छतो जीवितक्षयः॥")
लिङ्गी [न्], पुं, (लिङ्गमस्त्यस्येति। इनिः।) हस्ती। इति जटाधरः॥ त्रि, धर्म्मध्वजी। यथा,—
"अलिङ्गी लिङ्गवेषेण यो लिङ्गसुपजीवति।
स लिङ्गिनां हरेद्देनस्तिर्य्यग्योनौ च गच्छति॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥
(वासनाश्रयः। इति श्रीधरस्वामी॥ यथा, भागवते। ४। २६। ६५।
"तेनास्य तादृशं राजन् लिङ्गिनो देहसम्भवम्।
अङ्गोपसर्गानुभवोऽर्थो न मनः स्पृष्टुमिच्छति॥")
लिप, णि औ ग्र प ञ लेपे। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-अनिट्।) णि, लिम्पोऽस्ति। औ, लेप्ता। ग्र प ञ, लिम्पति लिम्पते चन्दनेन गात्रं सुखी। इति दुर्गादासः॥
लिपः, पुं, (लिम्पतीति। लिप+कः।) लेपनकर्त्ता। इति लिपधातोः कर्त्तरि कप्रत्ययेन निष्पन्नम्॥
लिपिः, स्त्री, (लिप+"इगुपधात् कित्।" उणा० ४। ११९। इति इन्। सच कित्।) लिखितवर्णम्। तत्पर्य्यायः। लिखितम् २ अक्षरसंस्थानम् ३ लिविः ४। इत्यमरः। लिखनम् ५ लेखनम् ६ अक्षरविन्यासः ७ लिपी ८ लिवी ९। इति तट्टीका॥ अक्षररचना १०। इति जटाधरः॥ लिपिका ११। इति शब्दरत्नावली॥ (यथा, वैद्यके। १। १५।
"अयं दरिद्रो भवितेति वेधसा
लिपिं ललाटेऽधिजनस्य जाग्रतीम्।
दृष्ट्वा न चक्रेऽस्यितकल्पपादपः
प्रकीर्य दारिद्र्यदरिद्रतां नृपः॥"
अस्याः पञ्चविधत्वं यथा, वाराहीतन्त्रे।
"सुरालिपिः प्रियलिपिर्लिपिर्म्लेच्छनिसम्भवा।
शुल्किकाघुलसम्भूता लिपयः पञ्चधा स्मृताः॥")
लिखितपुस्तकादि। इति केचिदिति भरतः॥
लिपिकरः, पुं, (लिपिं करोतीति। लिपि+कृ+"हिवाविभानिग्रेति।" ३। २। २१। इति डः।) लेखकः। इत्यमरटीका॥

लिपिका, स्त्री, (लिपिरेव । लिपि + स्वार्थे कन् । टाप् ।) लिपिः । इति शब्दरत्नावली ॥

लिपिकारः, पुं, (लिपिं करोतीति । कृ + अण् ।) लेखकः । इत्यमरः । २ । ८ । १८ ॥

लिपी, स्त्री, (लिपिः । ह्रस्वादिकारादिति ङीष् ।) लिपिः । इति शब्दरत्नावली ॥

लिप्तं, त्रि, (लिप + क्तः ।) भक्षितम् । क्षतलेपनम् । तत्पर्य्यायः । दिग्धम् २ । इत्यमरः ॥ विलिम्पितम् ३ । इति शब्दरत्नावली ॥ चर्चितम् ४ । इति जटाधरः ॥ (यथा, कथासरित्सागरे । ४ । ४८ ।

"तस्मिन्नाचिलखड्गाच्च चत्वारो विहितास्त्रया ॥") मिलितम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ विचर्दिग्धम् । इति मेदिनी । ते, ५२ ॥

लिप्तकः, पुं, (लिप्त एव । स्वार्थे कन् ।) विषाक्तबाणः । इत्यमरः । २ । ८ । ८८ ॥

लिप्तिका, स्त्री, (लिप्तेव । स्वार्थे कन् ।) दक्षः । यथा । वैन्यस्य चतुर्थोंऽगः अवस्कादौ लिप्तिकाचतुष्कं अभिजित् । इति सतुलस्यसूक्तावली ॥

लिप्सा, स्त्री, (लब्धुमिच्छा । लभ + सन् + अः । टाप् ।) इच्छा । इत्यमरः ॥ (यथा, हरिवंशे । १८ । २६ ।

"लिप्सां चक्रे प्रसेनाशु मणिरत्ने स्वमन्तके ।
गोविन्दो न च तं लेभे मृत्योऽपि न जहार ह ॥")

लिप्सुः, त्रि, (लभ + सन् + उः ।) लब्धुमिच्छुः । तत्पर्य्यायः । यक्षुः २ गर्द्धनः ३ क्षत्यक् ४ लुब्धः ५ अभिलाषुकः ६ लोलुपः ७ लोलुभः ८ । इति हैमचन्द्रः ॥ (यथा, कथासरित्सागरे । २४ । १९६ ।

"लोऽप्युपायनलोभात्तत् अहृषे कथितायतिः ।
उपप्रदानं लिप्सूनामेकं आकर्षलोषधम् ॥")

लिबि(वि)धिः, स्त्री, (लिप् + इन् । बाहुलकात् पस्य बत्वम् ।) लिपिः । इत्यमरः ॥

लिबि(वि)धिकरः, पुं, (लिपिं करोतीति । कृ + "दिवादिभ्यः श्यन्" । ३ । २ । २१ । इति टः ।) लिपिकरः । लिपिं करोति इत्यर्थे कृकुर इत्यनेन कर्मणि टप्रत्ययेन निष्पन्नः ॥

लिबि(वि)धिकरः, पुं, (लिपिं करोतीति । कृ + टः । पृषोदरादित्वात् द्वितीयाया अलुक् ।) लिपिकारः । इत्यमरटीकायां भानुदीक्षितः ॥

लिबी, स्त्री, (लिबि + ह्रस्वादिकारादिति ङीष् ।) लिपिः । इति शब्दरत्नावली ॥

लिम्पः, पुं, (लिम्पतीति । लिम्प + "अनुपसर्गात् लिम्पविन्देति ।" ३ । १ । १३८ । इति घः ।) लेपनकर्त्ता । इति लिम्पधातोः कर्मणि घप्रत्ययनिष्पन्नम् । इति सुग्धबोधव्याकरणम् ॥

लिम्पटः, पुं, विटगः । इति हारावली । १६२ ॥

लिम्पाकं, क्ली, लिम्पकविशेषः । पातिवेद इति भाषा । तस्य गुणाः । सुरभित्वम् । स्वादुत्वम् । नात्यम्लत्वम् । भक्षरोचनत्वम् । वातश्लेष्महरत्वम् । वृष्यत्वम् । हृद्यत्वम् । नातिपित्तलत्वञ्च । इति राजवल्लभः ॥ (तथा च ।

"कर्षं गुरु न्तं तार्क्षं लिम्पाकाद्वित्वचां फलम् ॥"

इति रसेन्द्रसारसंग्रहे औद्भिदखण्डे ।)

लिम्पाकः, पुं, जम्बीरः । खरः । इति शब्दरत्नावली ॥

लिश्, ङ य औ तौच्छ्ये । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-अनिट् ।) तौच्छ्यमल्पीभावः । ङ य, लिश्यते धर्म्मः कर्त्ता । औ, लेष्टा । इति दुर्गादासः ॥

लिश्, श्र औ गत्याम् । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट् ।) लिश्नति । औ, अलिश्नत् लेष्टा । इति दुर्गादासः ॥

लिश्वः, पुं, गर्भकः । लश्धातोः कर्मणि वनुप्रत्ययेन निपातनात् सिद्धः । उपधाया ह्रस्वमपि । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । १।१५३॥ (लश्व इति पाठः साधुः ॥)

लिह, ल ञ औ स्वादे । इति कविकल्पद्रुमः ॥ (अदा०-उभ०-सक०-अनिट् ।) ल ञ, लेढि घृष्वादि षट्पदः । लीढ्वा । औ, अलिक्षत् । इति दुर्गादासः ॥

ली, कि द्रावणे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-अनिट् ।) द्रावणं द्रवीकरणम् । कि, लाययति लयति । मिम्योर्यकृद्वाविति लापयति लोहमयौ कर्म्मकारः । क्षेद्रद्रवे तु लाल्योर्लेत्रगाविति अनो द्रुतमयौ लोमयत्यपि । इति दुर्गादासः ॥

ली, गि श्लिषि । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-अक०-अनिट् ।) गि, लिनाति बाला लावण्यं प्राप्नोतीत्यर्थः । कर्म्मविच्छायायाञ्च लिनाति जलधौ नदी । लीनः लीनिः । अयं अन्तःस्थतौयादिः । इति दुर्गादासः ॥

ली, ङ य ओ श्लिषि । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-अनिट् ।) ङ य, लीयते चन्द्रः सूर्य्ये । ओ, लीनः । इति दुर्गादासः ॥

लीका, स्त्री, लिक्षा । इति शब्दरत्नावली ॥

लीक्षा, स्त्री, लिक्षा । इति शब्दरत्नावली ॥

लीढः, त्रि, आस्वादितः । इति लिहधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः । (यथा, श्रीकण्ठचरिते । १ । ५३ ।

"सा शुद्धवेश्यु ग्रिवपादनखावलिर्यो
भक्ता यदीयचरितैर्लीढललाटपट्टाः ॥")

लीनः, त्रि, (ली + क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः ।) क्षयप्राप्तः । श्लिष्टः । इति व्याकरणम् । अपि च ।

"दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वसूचेः शिरसामतीव ॥"

इति कुमारसम्भवे । १ । १२ ॥

लीला, स्त्री, (क्रियमिति । ली + सन्यङादिभ्यः क्विप् । क्रियं लातीति । ला + कः ।) केलिः । विलासः । ह्रद्भावचेष्टा । इति मेदिनी । ले, ४७ । खेला । इति विश्वः ॥ (यथा, भागवते । १ । १ । १८ ।

"अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः ।
लीलाविदधतः स्वैरमीश्वरस्यात्ममायया ॥")

अलब्धप्रियसमागमया स्वचित्तविनोदनार्थं प्रियस्य या वेशगतिहृद्दिहसितभ्रूविलेरनुकृतिः क्रियते सा लीला । तथा च ।

"अप्राप्तवल्लभसमागमनायिकायाः
सख्याः पुरोऽत्र निजचित्तविनोदहेतोः ।
आलापवेशगतिहास्यविलोकनाद्यैः
प्रायेश्वरानुकृतिमाकथयन्ति लीलाम् ॥" इति ।

प्रियानुकरणं लीला । यथा वैनोदितं यदिति यातं तथा तथासाविद्यादीत्यत्रोऽपि । ली ङ य ओ श्लिषि नान्नीति लक् लीला । इत्यमरटीकायां भरतः ॥ * ॥ सा प्रकटाप्रकटभेदेन द्विविधा यथा,—

"प्रकटाप्रकटा चेति लीला सेयं द्विधोच्यते ।"

इति पद्मपुराणम् ॥

तथा हि ।

"सदानन्दैः प्रकाशैः खेलीलाभिश्च स दीव्यति ।
तत्रैकेन प्रकाशेन कदाचिच्चमदन्तरे ॥
सहैव स्वपरीवारैर्लक्ष्म्यादि कुरुते हरिः ।
तत्स्वभावानुसारेण लीलाख्या शक्तिरेव सा ॥
तेषां परिकराणाञ्च तं तं भावं विभावयेत् ।
प्रपञ्चगोचरत्वेन सा लीला प्रकटा स्मृता ॥
अन्याख्यप्रकटा भान्ति तादृश्यस्तदगोचराः ।
तत्र प्रकटलीलायामेव ख्याता गमागमौ ॥
गोकुले मथुरायाञ्च द्वारकायाञ्च ग्राङ्गिणः ।
यास्तत्र तत्राप्रकटास्तत्रैव सन्ति ताः ॥"

इति श्रीभागवतामृतम् ॥

लीलावती, स्त्री, (लीलास्त्यस्या इति । लीला + मतुप् । मस्य वः ।) केलियुक्ता । विलासवती । ह्रद्भावचेष्टान्विता । खेलाविशिष्टा । इति लीलाशब्दार्थदर्शनात् ॥ * ॥ भास्कराचार्य्यस्य पत्नी । तत्सुतताद्दृग्ग्रन्थः । यथा । गोदावरीतीरनिवासिनो महाराष्ट्रदेशोद्भवस्य श्रीभास्कराचार्य्यस्य ग्रन्थकर्त्तुः सुप्रिया लीलावती विरहविच्छिन्नहृदयस्य तां पद्मैर्लीलावत्या लीलावतीमिव । इति लीलावतीग्रन्थस्य मङ्गलाचरणश्लोकस्य टीकायां भवेशः ॥ * ॥ (अविचितृपतेः स्त्रीविशेषः । यथा, मार्कण्डेये । १२३ । १७ ।

"लीलावती वीरसुता वीरभद्रसुतानिभा ॥")

वेश्याविशेषः । । यथा,—

"अभिरूपेण सम्पन्नान् धनहीना विना भृतिम् ।
धर्म्मकार्य्यमिति ज्ञात्वा न गृह्णाति कथञ्चन ॥
योऽसौ सुवर्णकारस्य दरिद्रोऽप्यथ सत्त्ववान् ।
न मूल्यमादादेत्तस्मात् सभार्य्य ऋद्धिसंयुतः ।
समद्वीपपतिर्ज्ञातः सूर्य्यायुतसमप्रभः ॥"

इति मत्स्यपुराणे लीलावतीवेश्याया अवस्थानदाने हेमतरुघटकस्य तथाविधफलदर्शनात् ।

इति तिथ्यादितत्त्वम् । * । न्यायग्रन्थविशेषः । तस्य द्वितीयश्लोको यथा,—

"ग्रथं नाकुलसुज्ज्वलो गुरुगरुः कर्म्मोधिकं साध्यते
जातिर्विश्रुतिमागता न च पुनः साध्या विशेषस्थितिः ।
सम्बन्धः सहजो गुणादिभिरयं यत्नास्तु सत्प्रीतये
बान्धीच्या नयवेश्मकर्म्मकुशला श्रीन्यायलीलावती ।"

इति मल्लनमिश्रः ।

लीलोद्यानं, क्ली, (लीलार्थमुद्यानम् ।) देववनम् । इति त्रिकाण्डशेषः । (यथा, कथासरित्सागरे । १०६ । ४१ ।

"अथ मानससङ्गत्या देवर्षिभ्रातसेवितम् ।
अतीत्य गरुडश्रेणीश्च लीलोद्यानं द्युयोषिताम् ।")

लुक्, [च्] पुं, लोपः । यथा । स्वमोर्लुक् स्त्रीवात् परयोः स्वमोर्लुक् स्यात् । इति सुग्धबोधव्याकरणम् ।

लुक्कायितः, त्रि, (लुक् कायस्य यस्य ताडग्र इवाचरतीति । लुक्काय + क्विप् । ततः क्तः ।) अन्तर्हितः । यथा । अन्तर्धानं लुक्कायनमिति यावत् । यथा गुरोरन्तर्द्धाने ग्रिग्रुः विलीयते पलायते लुक्कायते लुक्कायतीति लुक्कापनयनेऽपि लुक् । लुक् कायः शरीरं यस्य स लुक्कायः ततः स इव आचरतीति क्विप् साध्यम् । इति कारकटीकायां दुर्गादासः । कर्म्मणि क्तप्रत्यय निष्पन्नोऽयम् ।

लुक्कुरः, पुं, क्षोणक्षः । इति रत्नमाला ।

लुच, ऋ क भावकर्त्तरि । इति कविकल्पद्रुमः । (चुरा०-पर०-अक०-सक०-च-सेट् ।) ऋ क, लुञ्चयति । भा दीप्तिः । यत्कर्त्तरि निकेतनहिंसावलदानानि । इति दुर्गादासः ।

लुच, अपनयने । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) सोऽलुचीत् कर्म्मणासिकम् । इति दुर्गादासः ।

लुट, विलोटविलोड़नयोः । इति कविकल्पद्रुमः । (भ्वा०-पर०-विलोटे अक०-विलोड़ने सक०-सेट् ।) लोटति । इति दुर्गादासः ।

लुट, ऋ क्षुभौ । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) ऋ, लुण्टते । क्षुतिर्लौल्यम् । इति दुर्गादासः ।

लुट, ल ऋ य विलोटविलोड़नयोः । इति कविकल्पद्रुमः । (दिवा०-पर०-विलोटे अक०-विलोड़ने सक०-सेट् ।) ल, अलुटत् । ऋ, अलूलुटत् अलुलोटत् । य, लुट्यति । विलोटः सम्बन्धीभावः । तत्र लुट्यन् सम्बोको भुवि रोरुदवान् । इति भट्टिः । विलोड़ने लुट्यत्प्रालवकान् दुर्गान् कपाटानि च लोटति । इति हलायुधः । इति दुर्गादासः ।

लुड, ल ड दौर्ग्रप्रतिक्रमयोः । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-अक०-पुनर्हरणे सक०-सेट् ।) ल, अलुटत् । ड, लोटते । प्रतिक्रतिः श्लोकादिना पतनं पुनर्हरणं वा । इति दुर्गादासः ।

लुड, क भाषे । इति कविकल्पद्रुमः । (चुरा०-पर०-अक०-सेट् ।) क, लोटयति । भाषो दीप्तिः । इति दुर्गादासः ।

लुठ, उपघाते । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) लोठति । इति दुर्गादासः ।

लुठ, ऋ गत्यालस्यस्त्रैर्य्येषु । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-अक० च-सेट् ।) ऋ, लुण्ठते । आलस्यं मन्दीभावः । स्त्रैर्यं चौर्य्यम् । लोटः स्त्रोड़नम् । इति दुर्गादासः ।

लुठ, ल ड प्रतीघाते । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) ल, अलुठत् । ड, लोठते । इति दुर्गादासः ।

लुठ, क चौर्य्ये । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) क, लोठयति । इति दुर्गादासः ।

लुठ, ग्रि लोटे । इति कविकल्पद्रुमः । (तुदा०-पर०-अक०-सेट् ।) ग्रि, लुठति अलुठीत् लुलोठ । लोटः सम्बन्धीभावः । हारोऽयं हरिचन्दनौघां लुठति स्तनमण्डले । इति दुर्गादासः ।

लुठनं, क्ली, (लुठ लोटे + ल्युट् ।) अवस्य भूमौ पुनः पुनः भ्रमोपड़ननम् । लोटा इति गड़ागड़ि इति च भाषा । तत्पर्य्यायः । वेल्लनम् २ । इति त्रिकाण्डशेषः ।

लुठितः, त्रि, (लुठ + क्तः ।) सुदुर्भुवि पराहतः । भ्रमग्लान्यर्थं पुनःपुनर्भूमौ लुठितोऽभ्यः । तत्पर्य्यायः । उपाहतः २ । इत्यमरभरतौ । वेल्लितः ३ । इति शब्दरत्नावली । अपाहतः ४ पराहतः ५ । इति हेमचन्द्रः । (यथा, कथासरित्सागरे । १०२ । ७७ ।

"ग्रिलाकलापो लुठितः किमङ्गनगिरेरयम् ।
किंसुताकालकल्पान्तमेघौघः पतितो भुवि ।")

लुड, मन्थे । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) लोड़ति । मन्थो विलोड़नम् । इति दुर्गादासः ।

लुड, ग्रि संश्लेषे । इति कविकल्पद्रुमः । (तुदा०-पर०-सक०-सेट् ।) ग्रि, लुड़ति अलुड़ीत् लुलोड़ । इति दुर्गादासः ।

लुण्ट, कि अवज्ञाचौर्य्ये । इति कविकल्पद्रुमः । (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) इत्यवधारणप्रकृतिः टयोगान्मूर्द्धन्यः । तेन भ्वादिपक्षे यगादौ तङ्गोपे लुण्टत इत्यादि । कि, लुण्टयति लुण्टति । इति दुर्गादासः ।

लुण्टकः, पुं, (लुण्टतीति । लुण्ट + ण्वुल् ।) ग्राम्यविशेषः । गन्धा इति भाषा । तत्पर्य्यायः । मागधः २ । इति शब्दचन्द्रिका ।

लुण्टा, स्त्री, (लुण्ट + अङ् । टाप् ।) लुठनम् । इति काचित् शब्दरत्नावली ।

लुण्टाकः, पुं, (लुण्टतीति । लुण्ट + "अन्यभिक्षुलुण्टरः शाकन् ।" ३ । २ । १५५ । इति शाकन् ।) चौरः । लुटघातोः शाकप्रत्ययेन निष्पन्नः ।

लुण्टाकी, स्त्री, (लुण्टाक + स्त्रियां ङीप् ।) चौरा स्त्री । इति सुग्धबोधव्याकरणम् ।

लुण्टकः, त्रि, (लुण्टतीति । लुण्ट + ण्वुल् ।) लेखकारकः । लुटेरा इति भाषा । यथा,—

"ये चौरा वह्निना दग्धा गरदा ग्रामलुण्टकाः ।
सारमेयादने ते वै पाश्यन्ति पातकान्विताः ।"

इति पाद्मे पातालखण्डम् ।

लुण्ठनं, क्ली, (लुण्ठ + ल्युट् ।) लुठनम् । इति काचित् शब्दरत्नावली । (यथा, देवीभागवते । ५ । २ । २८ ।

"हरर्क्षं लुण्ठनं तद्वत् ततुपत्नीनां नराधिप ।")

लुण्ठा, स्त्री, (लुण्ठ + अङ् । स्त्रियां टाप् ।) लुठनम् । इति काचित् शब्दरत्नावली ।

लुण्ठाकः, पुं, (लुण्ठ + शाकन् ।) चौरः । इति त्रिकाण्डशेषः । (चौरः । यथा, कथाविलासे । १ । ३ ।

"विघ्नोऽभिसारिकाणां भवनगवस्फाटिकप्रभाविकरः ।
यत्र विराजति रजनीतिमिरपटप्रकटलुण्ठाकः ।")

लुण्ठी, स्त्री, लुठनम् । इति काचित् शब्दरत्नावली ।

लुड, क चौर्य्ये । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) क, लुण्डयति । इति दुर्गादासः ।

लुण्डिका, स्त्री, (लुण्डी । स्वार्थे कन् । ततष्टाप् ।) न्यायसारिणी । इति शब्दरत्नावली । एवञ्च वेष्टितमेखलोमालिः । लुण्डि इति लुटि इति च भाषा । यथा,—

"सैन्धवञ्च घृताभ्यक्तं ताम्रभाजनमास्पृशेत् ।
प्रतप्तमर्कयां घृतं तत्रैवञ्च समाहरेत् ।"
ताम्रभाजने घृतं सैन्धवं दत्त्वा रौद्रे तप्तं कृत्वा मेखलोमलुण्डिकया घृतं मलयजं कृत्वा तेन अञ्जयेत् । इति भैषज्यरत्नावली ।

लुण्डी, स्त्री, न्यायसारिणी । इति त्रिकाण्डशेषः ।

लुण्ड, ऋ कुत्सने । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) ऋ, लुण्ड्यते । कुत्सो वधबन्धौ । इति दुर्गादासः ।

लुप, ऋद ग्र प ल भ औ छेदे । इति कविकल्पद्रुमः । (तुदा०-उभ०-सक०-अनिट् ।) ऋद, अलूलुपत् अलुलोपत् । ग्र प भ, लुप्यति लुप्यते । ल, अलुपत् । औ, लोप्ता । इति दुर्गादासः ।

लुप्, ऋद य लुपि । इति कविकल्पद्रुमः । (दिवा०-पर०-अक०-सेट् ।) ऋद, अलुपत् अलोपीत् । अस्मात् प्रथादिभ्यश्च इत्यत्र ये, लुप्यति । लुपि आकुलीभावे । पातुं लुप्यति लावण्यं नेत्राञ्जलिपुटैर्नरः । इति हलायुधः । इति दुर्गादासः ।

लुप्, पुं, (लुप् छेदे + क्विप् ।) लोपः । यथा । अभोभगोऽघोऽवोऽपे लुप् । इति सुग्धबोधव्याकरणम् ।

लुप्तं, क्ली, (लुप्+क्तः।) चौर्य्यधनम्। लोत इति ख्यातम्। इति शब्दरत्नावली॥ लोपवति, त्रि। यथा,—
"चक्षुष्मानिति लुप्ताक्षं चाण्डालं ब्राह्मणेति च।
प्रशंसा निन्दनं द्वेषात् परपक्षे विपद्यते॥"
इति तिथ्यादितत्त्वम्॥
(यथा च, आर्य्यासप्तशत्याम्। ३६३।
"परिहृतनाभि लुप्तत्रिवलि श्यामस्तनाग्र-
मलसाक्षि।
बहुधवलजघनरेखं वपुर्न पुरुषायितं सहते॥")
लुभ. कि इ अर्हने। इति कविकल्पद्रुमः॥ (पुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) कि, लुभ्यति लुभति। इ, लुभ्यते। अर्हनं वधः। इति दुर्गादासः॥
लुब्धः, पुं, (लुभ+गर्द्ध्यर्थेति क्तः।) व्याधः। (यथा, महाभारते। १६। ४। २१।
"स संनिरुद्धेन्द्रियवाङ्मनास्तु
ग्रिष्मे महायोगमुपेत्य लुब्धः।
जराथ तं देशमुपाजगाम
लुब्धस्तदानीं मृगसंलिप्सुरुग्रः॥")
लम्पटः। इति शब्दरत्नावली॥
लुब्धः, त्रि, (लुभ+क्तः।) आकाङ्क्षी। इति मेदिनी। धे, १४॥ तत्पर्य्यायः। गृध्नुः २। गर्द्धनः ३ अभिलाषुकः ४ लोलुक् ५। इत्यमरः॥ (यथा, कथासरित्सागरे। ५५। ३०।
"लुब्धो यशसि नत्वर्थे भीतः पापान्न मुच्चुनः।
मर्म्मः परापवादेषु नच ग्राम्येषु योऽभवत्॥")
लुब्धकः, पुं. (लुब्ध एव। स्वार्थे कन्।) व्याधः। इत्यमरः॥ (यथा, कथासरित्सागरे। ८। २४।
"आस्ताकमीदृशं मांसं ददते लुब्धका इति॥")
लम्पटः। इति लुब्धशब्दार्थदर्पणात्॥ (यथा, भागवते। ४। २५। ५३।
"निर्ऋतिर्नाम यदाद्द्वास्या याति पुरञ्जनः।
वैशसं नाम विषयं लुब्धकेन समन्वितः॥")
लुभ, य इर् गार्द्धे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) गार्द्धमाकाङ्क्षा। य, लुभ्यति धनं लुब्धः। इर्, अलुभत् अलोभीत्। अस्मात् पृषादित्वात् नित्यं ड इत्यपि। इति दुर्गादासः॥
लुभ, ग्र विमोहने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) ग्र, लुभत्यात्मनि कामे च। इति हलायुधः॥ लोभिता लोब्धा। इति दुर्गादासः॥ [क्तप्रत्ययेन निष्पन्नः॥
लुभितः, त्रि, विमोहितः। विमोहनार्थलुभधातोः
लुल, विमर्द्दने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) लौचधातुरयम्। लुलायः। इति दुर्गादासः॥
लुलापः, पुं, (लुल्यते इति। लुल विमर्द्दने+भिदादित्वात् अङ्। लुलां आप्नोतीति। आप्+अण्।) महिषः। इत्यमरः॥ (यथा, दुर्गाभक्तितरङ्गिण्याम्।
"लुलापं खड्गेन छिन्धि छिन्धि॥")
(तथास्य पर्य्यायः।
"महिषो घोटकारिः स्यात्कासरश्च रजस्वलः।
गौनस्कन्धः क्षणकायो लुलापो यमवाहनः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
लुलापकन्दः, पुं, (लुलापप्रियः कन्दः।) महिषकन्दः। इति राजनिर्घण्टः॥
लुलापकान्ता, स्त्री, (लुलापस्य कान्ता।) महिषी। इति राजनिर्घण्टः॥
लुलितः, त्रि, (लुल+क्तः।) आन्दोलितः। यथा,
"प्रेङ्खोलितस्तरलितो लुलितान्दोलितोऽपि॥"
इति भूरिप्रयोगः॥
(यथा, कथासरित्सागरे। ३७। ७०।
"इत्थं रथाङ्गविच्छेद शिरो लुलितकुण्डलम्॥"
विकीर्णः। इति श्रीधरः॥ यथा, भागवते। २। ६। ३४।
"युधि तुरगरजो विधूम्रविष्वक्
कचलुलितश्रमवार्य्यलङ्कृतास्ये॥"
व्याप्तः। यथा, रामायणे। २। ६५। १६।
"न स विभ्राजते देवो ग्रोकाम्बुलुलितानना॥"
म्लानः। यथा, आर्य्यासप्तशत्याम्।
"प्रातर्निद्राति यथा यथाल्पना लुलितनिःसहैरङ्गैः।
जामातरि सुदितमनास्तथा तथा सादरा श्वश्रूः॥"
उन्मूलितः। यथा, भागवते। ३। १६। २४।
"विग्रीर्णबाहूरुशिरोरुहोऽपतत्
यथा नगेन्द्रो लुलितो नभस्वता॥"
खण्डितः। यथा, तत्रैव। ४। ६। १०।
"किम्बलनकासिलुलितात् पतनां विमानात्॥"
विध्वस्तः। यथा, तत्रैव। ७। ६। २३।
"वेश्यासुतपितुः कुपितहासविजृम्भितभ्रू-
विस्फूर्ज्जितेन लुलिताः स तु ते निरस्तः॥")
लुष, स्तेये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) लोषति। इति दुर्गादासः॥
लुष, हिंसने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) लौचधातुरयम्। लुषाः। इति दुर्गादासः॥
लुषभः, पुं, (रोषतीति। रुष हिंसायाम्+"रुषेर्निलुट् च।" उणा० ३। १२४। इति अभच्। लुषादेशश्च धातोः।) मत्तहस्ती। इत्युणादिकोषः॥
लुह, औ गार्द्धे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) औ, अलुहत्। गार्द्धं वस्तुमिच्छा। लोहति धनं लोकः। इति दुर्गादासः॥
लू, ञ गि क्विप्। इति कविकल्पद्रुमः॥ (क्रया०-उभ०-सक०-अनिट्।) ञ गि, लूनाति लूनीते। लूनः लूनिः। इति दुर्गादासः॥
लूता, स्त्री, (लूनातीति। लू+वाहुलकात् तन्। गुणाभावश्च।) कीटविशेषः। माकड़सा इति भाषा। तत्पर्य्यायः। तन्तुवायः २ ऊर्णनाभः ३ मर्कटकः ४। इत्यमरः॥ मर्कटः ५ लूतिका ६ ऊर्णनाभिः ७ मूनकः ८ तन्तवायः ९। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ५०४।
"लूतातन्तुनिरुद्धद्वारः शून्यालयः पतत्पतगः।
पथिके लक्षितशबलपिहितमुखो रोदितीव सखि!॥")
पिपीलिका। रोगविशेषः। इति मेदिनी। ते, ५२॥ श्लेष्मस्य पर्य्यायः। मर्म्मभवः २ श्लेष्मा ३। इति राजनिर्घण्टः॥ तद्रोगस्य निदानादि लूतानां जन्तुविशेषाणामुत्पत्तिं संख्याञ्चाह।
"यस्मान्नूनलवणं प्राप्य सूनेः प्रस्वेदविन्दवः।
तेभ्यो जातास्ततो लूता इति ख्यातास्तु षोड़श॥"
अत्र सुश्रुतः।
"विश्वाभिजो नृपवरः कदाचिदधिसत्तमम्।
वह्निष्टं कोपयामास गत्वाश्रमपदं किल॥
कुपितस्य मुनेस्तस्य ललाटे स्वेदविन्दवः।
अपतन् दर्शनादेव क्षुधस्तात्तीव्रवर्चसः॥
लूते लग्ने महर्षेस्तु धेन्वर्थे संभृतेऽपि च।
ततो जातास्त्विमा घोरा नानारूपा महाविषाः।
तासामष्टौ कष्टसाध्या वर्ज्यास्तावत्र एव हि॥"
तत्र लूतमण्डलाप्रभृतयोऽष्ट कष्टसाध्याः। सौवर्णिकाप्रभृतयोऽष्टावसाध्याः। तासां सामान्यतो दंशलक्षणमाह।
"तासिदंष्टे दंशकोऽल्पप्रवृत्तिः क्षतजस्य च।
ज्वरो दाहोऽतिसारश्च गदाः क्षुच्च विदोषजाः॥
पिड़िका विविधाकारा मण्डलानि महान्ति च।
शोथा महान्तो रुदवो रक्ताः श्यावासिताः सिताः।
सामान्यं सर्व्वलूतानामेतद्दंशस्य लक्षणम्॥"
दंशकोऽल्पदंशमर्म्मे पूतिभावः।
"दंशमर्म्मे तु यत् क्षणं श्यावं वा जालकावृतम्।
दग्धाक्षति भृशं पाकं भेदशोथज्वरान्वितम्।
दूषीविषाभिलूनाभिरुद्दष्टमिति निर्द्दिशेत्॥"
सौवर्णिकादयोऽष्टावसाध्यास्तासां लक्षणमाह।
"शोथः श्वेतासितो रक्तो पीतो च पिड़िका ज्वरः।
प्राणान्तिको भवेद्दाहः श्वासो हिक्का शिरोग्रहः॥ *॥
तस्यौषधं यथा,—
"रजनीयुग्मपत्तङ्गमञ्जिष्ठागारकेश्वरैः।
शीतामुपिदैरालेपः सद्यो लूतां विनाशयेत्॥"
अपि च।
"अभयां रोचनां कुष्ठमकेपुष्पं तथोत्पलम्।
नलवेतसमूलानि गरकं सुरसां तथा॥
सकलिङ्गं समञ्जिष्ठामनन्तान्च शतावरीम्।

ग्रङ्गाटकं समङ्गाच्च पद्मकेशरमित्यपि ॥
कल्कीकृत्य पचेत् सर्पिः पयो दत्त्वाचतुर्गुणम् ।
सम्यक् पक्केऽवतीर्णे च शीते तस्मिन् विनिः ।
क्षिपेत् ॥
सर्पिस्तुल्यं भिषक् चौद्रं ज्ञात्वा तत्र निधापयेत् ।
विषाणि हन्ति दुर्गाणि गरदोषज्वराणि च ॥
सर्पाङ्हन्ति विषं सर्वं गरैरुपहतां त्वचाम् ।
योगवल्लमकं कल्कं मांसखादं विसर्पताम् ॥
गात्रभ्यङ्गनाभ्यङ्गं पानवस्तिषु योजितम् ।
सर्पकीटाखुलूतादिदष्टानां विषघ्नत् परम् ॥"
ह्लपाघ्रच्छेदि घृतम् । इति भावप्रकाशः ॥
(तथा च ।
"कोटिशो दारुणतरा लूताः कीर्त्यन्ता बुधैः ।
अष्टाविंशतिरित्येके ततोऽप्यन्ये तु भूयसीः ॥
सहस्रशश्चरन्त्यन्ये सहस्रशः ।
स्वरूपवर्णरूपा तु लूतैवेव विषात्मिका ॥
रूपाणि नामतस्तस्या दुर्ज्ञेयान्यतिसङ्कटात् ।
नास्ति स्थानव्यवस्था च दोषतोऽत्र प्रचक्षते ॥
कृच्छ्रसाध्या पृथग्दोषैरसाध्या निचयेन सा ।
तद्दंशः प्रेक्षितो दाहत्वट्स्फोटज्वरदाहवान् ॥
श्यावोग्रा रक्तपीताभः क्लेदी व्राव्याफलोपमः ।
श्लेष्मिकः कठिनः पाण्डुः परुषकफलाकृतिः ॥
निद्रां शीतज्वरं कासं कण्डूञ्च कुरुते भृशम् ।
वातिकः परुषः श्यावः पर्व्वभेदज्वरप्रदः ॥
तद्विभागं यथास्वञ्च दोषलिङ्गैर्विभावयेत् ।
असाध्यास्तु हृल्लीहश्वासहिक्काग्निरोधजाः ॥
श्वेताः पीताः सिता रक्ताः पिटिकाः श्यावपूर्वजाः ॥
वेपथुर्ज्वमयुर्दाहस्तृष्णान्धं वक्त्रनासता ।
ग्रावोऽवक्त्रदन्तलं एष्ठग्रीवाबाधभञ्जनम् ॥
पक्वजम्बूसवर्णञ्च दंशात् स्रवति शोणितम् ।
सर्व्वाणि सर्व्वजा प्रायो यथादेशस्तु भूयसा ॥
तीक्ष्णमध्यावरत्वेन सा त्रिधा हन्तुपेक्षिता ।
सप्ताहेन दशाहेन पक्षेण च परं क्रमात् ॥
लूतादंशश्च सर्व्वोऽपि एदुमण्डलसन्निभः ।
सितोऽसितोऽरुणः पीतः श्यावो वा स्वदुरुक्षतः ॥
मध्ये क्षतोऽथवा श्यावः पर्यन्ते जालकाङ्कितः ।
विसर्पवान् शोफयुतस्तप्यते बहुवेदनः ॥
ज्वराशुपाकविक्लेदकोदावदरगान्वितः ।
क्लेदेन यत् सृग्गन्धं तत्रापि कुरुते ग्रथम् ॥
श्वासदंशाग्निमूत्रशुक्लाजानखार्त्तवैः ।
अष्टाभिरुदमत्वेवा विषं वक्त्रैर्विशेषतः ॥
लूता नामेहशत्यूर्द्धमूर्द्ध वाघच कीटकाः ।
तदूषितच वस्त्रादिदेहे एक्तं विकारजित् ॥
दिनार्द्धं जायते नैव दंशो लूताविषोद्भवः ।
कण्डूयथवदाभाति ततोऽसौ ग्रथमेऽहनि ॥
अवक्तवर्णः ग्रचलः किञ्चित् कण्डूयान्वितः ।
द्वितीयेऽभ्युन्नतोऽन्तेषु पिटकैरिव वाचितः ॥
वक्तवर्णो गतो मध्ये कण्डूमान् मध्यिवर्णभः ।
दृतीये सज्वरो रोमहर्षच्छर्द्यरुक्तमण्डलः ॥
ग्ररावरूपस्तोदाढ्यो रोमकूपेषु ससवः ।
महांश्चतुर्थे ग्रथयुक्तापन्नाशभ्रमप्रदः ॥
विकारान् कुरुते तांस्तान् पञ्चमे विषकोपजान् ।
षष्ठे याप्नोति मर्म्माणि सप्तमे हन्ति जीवितम् ॥
इति तीक्ष्णं विषं मध्यं हीनच विभजेदतः ।
एकविंग्रतिरात्रेण विषं ग्राम्यति सर्व्वथा ॥
अथाशु लूतादष्टस्य ग्रस्रेणादृग्रसुहरेत् ।
दष्टेच जाम्बवौष्ठाद्यैर्न तु पित्तोत्तरं दहेत् ॥
कर्कटं भिन्नरोमाणं मर्म्मसन्ध्यादिसंग्रितम् ।
प्रहृतं सर्व्वतो दंशं नक्षिन्दीत दहेन्न च ॥
लेपयेद्दग्धमगदैर्मधुसैन्धवसंयुतैः ।
सुग्रीतः सेचयेच्चारुकषायैः क्षीरिवृक्षजैः ॥
सर्व्वतोऽपहरेद्रक्तं ग्रृङ्गाद्यैः सिरयापिवा ।
सेका लेपास्तताः ग्रीता बोधिस्नेग्धान्नकाङ्क्षरैः ॥
कलिङ्गैर्द्विनिग्राक्षौद्रसर्पिर्भिः पञ्चकाङ्क्षयः ।
ग्रग्नेयलूताकीटानामगदः सर्व्वकार्म्मिकः ॥"
"रोधं सेव्यं पद्मकं पद्मरेणुः
कालीयाख्यं चन्दनं वच्च रक्तम् ।
कान्ता पृथ्वी दुग्धिनीका ग्रवालं
लूताः सर्व्वा ग्नन्ति सर्व्वक्रियाभिः ॥"
इति वाग्भटे उत्तरस्थाने ३० अध्यायः ॥)
लूतारिः, पुं, (लूताया ग्ररिः ।) दुग्धफेनीवृक्षः ।
इति राजनिर्घण्टः ॥
लूतिका, स्त्री, (लूतैव । स्वार्थे कन् । टापि ग्रत इत्वम् ।) मर्कटकः । इति ग्रब्दरत्नावली ॥
लून, त्रि, (लूयते स्मेति । लू + क्तः । "स्वादिभ्यः ।" ८ । २ । ४४ । इति निष्ठातस्य नः ।) छिन्नः ।
इत्यमरः ॥ (यथा, कथासरित्सागरे । २७ । १३३ ।
"देवेन वैरिणा संख्ये लूनबाहुयुगः कृतः ॥"
उपचितः । यथा, कुमारे । ३ । ६१ ।
"तस्याः सखीभ्यां प्रथिपातपूर्व्वं
स्वहस्तलूनैः ग्रिग्रिरात्ययस्य ।
यकीर्य्यत ग्रामकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥")
लूनकः, पुं, (लून एव । स्वार्थे कन् ।) मेदितः ।
पशुः । इति मेदिनी । के, १५६ ॥
लूनिः, स्त्री, (लू + क्तिन् । "ग्रकारखादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम् ।" ८ । २ । ४४ ।
इत्यस्य वार्त्तिकोक्त्या तस्य नः ।) छेदः । इति सुग्धबोधव्याकरणम् । (क्रीहिः । इत्युज्ज्वलदत्तः । ४ । १०५ ।)
लूमं, क्ली, (लूयते इति । लू + बाहुलकात् मक् ।) बालूलम् । इत्यमरः ॥
लूमविषः, पुं, (लूमे बालूले विषमस्य ।) वृश्चिकादिः । इति हेमचन्द्रः ॥
लूष, क वधे । क्षेपे । इति कविकल्पद्रुमः ॥
(चुरा०-पर०-सक०-सेट् ।) क, लूषयति ।
इति दुर्गादासः ॥
लेखः, पुं, (लिख्यते इति । लिख् + घञ् ।) देवः ।
इत्यमरः ॥ लेखः । इति मेदिनी । खे, ४ ॥ (यथा, कुमारे । १ । ७ ।
"ग्रनन्ति विद्याधरसुन्दरीणा-
मनङ्गलेखक्रिययोपयोगम् ॥")
लेखकः, पुं, (लिख्यतीति । लिख् + खुल् ।)
लेखनकर्त्ता । तत्पर्य्यायः । लिपिकरः २ अक्षरचनः ३ अक्षरचुचुः ४ । इत्यमरः । २ । ८ । १५ ॥
लोलकः ५ करकः ६ मसीधरः ७ करघ्नीः ८ ।
इति ग्रब्दरत्नावली ॥ वर्णी ९ । इति जटाधरः ॥ * ॥ तस्य लक्षणानि यथा,—
"सर्व्वदेग्याक्षराभिज्ञः सर्व्वग्रास्त्रविग्रारदः ।
लेखकः कथितो राज्ञः सर्व्वाधिकरणेषु वै ॥
ग्रीर्घांपेतान् सुसंपूर्णान् समग्रैर्विगतान् समान् ।
अक्षरान् वै लिखेद्यस्तु लेखकः स वरः स्मृतः ॥
उपायवाक्यकुग्रलः सर्व्वग्रास्त्रविग्रारदः ।
वक्तर्यवक्ता वाक्येन लेखकः स्यादृभृगूत्तम ॥
वाक्याभिप्रायतत्त्वज्ञो देग्यकालविभागवित् ।
अनाहार्य्यो नृपे भक्तो लेखकः स्यादृभृगूत्तम ॥"
इति मात्स्ये १९६ अध्यायः ॥ * ॥
अपि च ।
"सव्यदक्षगृहीतार्थो लघुहस्तो जिताक्षरः ।
सर्व्वग्रास्त्रसमालोकी प्रज्ञश्री नाम लेखकः ॥"
इति याज्ञवल्क्यसंग्रहः ॥ * ॥
राजलेखकलक्षणं यथा,—
"ब्राह्मणो मन्त्रणाभिज्ञो राजनीतिविग्रारदः ।
नानालिपिज्ञो मेधावी नानाभाषासमन्वितः ॥
मन्त्रणायां चतुरो धीमान् नीतिग्रास्त्रार्थकोविदः ।
सन्धिविग्रहभेदज्ञो राजकार्य्ये विचक्षणः ॥
सदा राजहितान्वेषी राजसन्निधिसंस्थितः ।
कार्य्याकार्य्यविचारज्ञः सत्यवादी जितेन्द्रियः ॥
स्वरूपवादी शुद्धात्मा धर्म्मज्ञो राजधर्म्मवित् ।
एवमादिगुणैर्युक्तः स एव राजलेखकः ॥
कृपालुवर्त्ती सततं कृपविग्रारदक्षकः ।
कृपतेर्हितकान्वेषी स एव राजलेखकः ॥"
इति पद्मकौमुदी ॥ * ॥
लेखकर्म्म कायस्थेन कर्त्तव्यम् । यथा,—
"लेखकानपि कायस्थान् लेखकृत्ये विचक्षणान् ॥"
कुर्य्यादितिग्रेषः । इति पराग्ररसंहितायाम् १० अध्यायः ॥ (गवेग्रस्तु महाभारतस्य लेखकः ।
यथा, महाभारते । १ । १ ७८—७९ ।
"ग्रुश्रैतत् प्राह विघ्नेग्रो यदि मे लेखनी क्षणम् ।
लिखतो नावतिष्ठेत तदा स्यां लेखको ह्यहम् ॥
व्यासोऽप्युवाच तं देवमबुद्ध्वा मा लिख क्वचित् ।
ॐमित्युक्त्वा गवेग्रोऽपि बभूव किल लेखकः ॥")
लेखनं, क्ली, (लिख + ल्युट् ।) छेदनम् । शुच्चलक् ।
अक्षरविन्यासः । इति मेदिनी । ने, १२२ ॥ * ॥
भूमौ लेखननिषेधो यथा,—
"न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तकं लिखेत् ॥"
इति योगिनीतन्त्रे दृतीयभागे ७ पटलः ॥
लेखनाङ्गम् । यथा,—
"दृग्वाङ्मनस्त्रिलोकीकाग्यग्रङ्खचन्दनसेन्धवैः ।
चूर्णितैरञ्जनं प्रोक्तं पुण्यार्म्मादिनिक्षत्तनम् ॥"

दयः कुक्कुटः तस्याऽऽख्यस्य लक्। घ्रिणा मनः-घ्रिणा। इति भावप्रकाशः॥

लेखनः, पुं, (लिख+ल्युः।) काशः। इति राजनिर्घण्टः॥

लेखनिकः पुं, (लेखनं घ्रिण्यमस्य। लेखन+ठन्।) लेखहारकः। परहस्तेन लेखकः। स्वहस्तेन लेखकः। इति मेदिनी। के, २११॥

लेखनी, स्त्री, लिखतेऽनया। (लिख+ल्युट्। ङीप्।) लेखनसाधनवस्तु। तत्पर्य्यायः। वर्णतूलिका २। इति हारावली॥ वर्णतूली ३ कलमः ४ अक्षरतूलिका ५। इति जटाधरः॥ करात्रयः ६ चित्रकः ७। इति शब्दरत्नावली॥ *॥ (यथा, महाभारते। १।९।७८।

"शृणोतु प्राह विघ्नेशो यदि मे लेखनी चलम्। लिखतो नावतिष्ठेत तदास्यां लेखको ह्यहम्।")

लेखनीकरजभागुभं यथा,—

"वंशस्वच्छा लिखेद्वर्णं तस्य हानिर्भवेद्ध्रुवम्। ताम्रस्वच्छा तु विभवो भवेन्न तत्क्षयो भवेत्॥ महालक्ष्मीर्भवेन्नित्यं सुवर्णस्य प्रभाकरा। हरिन्नस्य स्वच्छा वै मतिर्हृद्धिः प्रजायते॥ तथा अग्निमयैर्हैवि पुत्रपौत्रधनागमः।"

अग्निमयैश्चित्रकाष्ठमयैः।

"रैक्षेन विपुला लक्ष्मीः कार्ष्णेन मरणं भवेत्॥ अष्टाङ्गुलप्रमाणेन दशाङ्गुलेन वाथवा। चतुरङ्गुलस्वच्छा वा यो लिखेत् पुस्तकं शुभे। तत्तदक्षरसंख्यं तु सुखमायुर्याति वै दिने॥"

यथा रैक्षेनेत्यादिवचने एकत्रैव विधिनिषेधौ तथाग्र्याष्टाङ्गुलदशाङ्गुलयोर्विधिः निषिद्धचतुरङ्गुले। इति योगिनीतन्त्रे तृतीयभागे ७ पटलः॥ (खटिका। तत्पर्य्यायो यथा,—

"खटिका कठिनी चापि लेखनी च निगद्यते॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लेखनीयः, त्रि, लेख्यम्। लेखितव्यम्। इति लिख-धातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नम्॥ (यथा, सुश्रुते। ६। १८।

"लेखनो लेखनीयश्च रोपणीयश्च षड्विधः॥")

लेखर्षभः, पुं, (लेखेषु देवेषु ऋषभः श्रेष्ठः। लेख ऋषभ इवेति वा।) इन्द्रः। इत्यमरः॥

लेखहारः, पुं, लेखं हरति हरत्यर्थे अण्प्रत्ययेन निष्पन्नः। पत्रवाहकः। इति सिद्धान्तकौमुदी॥ (यथा, कथासरित्सागरे। ५। ४५।

"विभूषं च नृपस्यास्य लेखहारं जघर्ष्ण्वत्॥")

लेखहारकः, पुं, (लेखहार एव। स्वार्थे कन्।) पत्रवाहकः। (यथा, कथासरित्सागरे। १६। १६०।

"आह्वानाय खनगरे स्थितेनोच्छ्वसिताते। भ्रातुर्भूमिगृहस्थेन प्रहितो लेखहारकः।")

लेखा, स्त्री, (लिख्यते इति। लिख+वाहुलकात् अप्। टाप्।) लिपिः। पङ्क्तिः। इति मेदिनी। खे, ४॥

लेखार्हः, पुं, (लेखे अर्हः।) शीताम्बरः। इति राजनिर्घण्टः। लेखनयोग्ये, त्रि॥

लेखितं, त्रि, लेखते यत्। कारितलिखितम्। इति ण्यन्तलिखधातोः क्तप्रत्ययेन निष्पन्नम्॥

लेख्यं, त्रि, (लिख+ण्यत्।) लेखितव्यम् लेखनीयम्। इति लिखधातोः कर्म्मणि यत्प्रत्ययेन निष्पन्नम्। *। व्यवहाराङ्गक्रियापादानम्। यथा,—

"व्याख्याप्रसिद्धेऽपि समये भ्रान्तिः संजायते यतः। व्याख्याश्चराणि दृष्टानि पण्डितैरुदाहृतः पुरा। लेखन्तु द्विविधं प्रोक्तं सहस्राव्यङ्कतस्तथा। असाक्षिकं साक्षिमच्च सिद्धिर्देशस्थितेस्त्रयोः॥ कृतास्तु साक्षिणो यत्र धनिकर्णिकलेखकाः। तदप्यार्थे करजन्ते लाभे: क्षिप्राभयात्॥ दग्धितं प्रतिकाणच्च पतितं आवितच्च यत्। लेखं सिध्यति सर्व्वत्र स्तेयेऽपि च साक्षिणः॥"

इति व्यवहारतत्त्वे दक्षस्मृतिः॥

अपि च। साम्मतं लेखं निरूप्यते। तत्र लेखं द्विविधम्। शासनं आगमपदमेति। शासनं निरूपितम्। आगमपदमभिधीयते। तत्र द्विविधम्। सहस्रव्यङ्कतमव्यङ्कतमेति। तत्र सहस्रव्यङ्कतमसाक्षिकम्। अव्यङ्कतं ससाक्षिकम्। अनयोश्च देशाचारानुसारेण प्रामाण्यम्। यदाह नारदः।

"लेखन्तु द्विविधं ज्ञेयं सहस्राव्यङ्कतस्तथा। असाक्षिमत् साक्षिमच्च सिद्धिर्देशस्थितेस्त्रयोः॥"

इति॥

तत्राव्यङ्कतमाह।

"यः कश्चिदर्थो निष्पन्नः स्वहस्ता परहस्ततः। लेखन्तु साक्षिमत् कार्य्यमन्यस्मिन् धनिकपूर्व्वकम्॥"

धनिकाधमर्णयोर्योऽर्थो हिरण्यादिः परस्परं स्वहस्ता दत्ता वाऽन्येनैतावद्देयमितीयती च प्रतिमासं वृद्धिरिति निष्पन्नो व्यवस्थितस्तस्मिन्नर्थे कालान्तरे विप्रतिपत्तौ वस्तुतत्त्वनिर्णयार्थं लेख्यम्। साक्षिमद्ग्रहणञ्चात्र साक्षियुक्तम्। धनिकः पूर्व्वो यस्मिन् तद्धनिकपूर्व्वकम्। धनिकनामलेखनपूर्व्वकमिति यावत् कार्य्यं कर्णवम्। उत्तमर्णचराः साक्षिणो वा कर्णवाः।

"ऋणं तु यत् स्मृतं कार्य्यं सिद्ध्यर्थन्तस्य साक्षिणः। प्रवर्त्तन्ते विवादेषु सञ्जातं व्याप्यलेखकम्॥"

इति स्मरणात्॥

अपि च।

"समामासतदर्द्धानामवधिस्त्रीत्रकैः। सत्रञ्चकारिकालीयपिट्टनामादिसिञ्चितम्॥"

समा संवत्सरः। मासश्चैत्रादिरूढः। पक्षः शुक्लः कृष्णो वा। अवधिस्तिथिः प्रतिपदादिः। नाम धनिकाधमर्णयोः। जातिर्ब्राह्मणादिः। स्त्रीत्रं साक्षिणादिगोत्रमेतैः समादिभिश्चिह्नितम्। तथा सत्रञ्चकारिकं यद्भूचादिग्राह्यप्रयुक्तं गुणनामवद्भूचः कठ इतः। आलीयपिट्टनाम धनिकर्णिकपिट्टनाम। आदि यद्ब्राह्मणजातिसंस्थाचारादेर्यद्वचनम्। एतैश्चिह्नितं लेखं कार्य्यमिति यतेन सम्बन्धः। किञ्च।

"समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्। मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम्॥"

धनिकाधमर्णयोर्योऽर्थः स्वस्था अवस्थितस्तस्मिन्नर्थे समाप्ते लिखिते ऋणी अधमर्णो नामात्मीयं स्वहस्तेनाक्षिलेखी यदुपरि लेखितं तन्ममामुकपुत्रस्य मतमभिप्रेतमिति निवेशयेत् पत्रे लिखेत्। तथा;—

"साक्षिणश्च स्वहस्तेन पिट्टनामकपूर्व्वकम्। अमाहमसुकः साक्षी लिखेयुरिति ते समाः॥"

तस्मिन् लेखे ये साक्षिणो लिखितास्तेऽप्यात्मीयपिट्टनामलेखनपूर्व्वकमस्मिन्नर्थे अहमसुको देवदत्तः साक्षीति स्वहस्तेनैकैकशो लिखेयुस्ते च समाः संख्यातो गुणतश्च कर्णवाः। यद्यधमर्णः साक्षी वा लिपिज्ञो न भवति तदाधमर्णोऽन्यत्र साक्षी च साक्षान्तरेण सर्व्वसाक्षिसन्निधौ स्वमतं लेखयेत्। यथाह नारदः।

"अलिपिज्ञ ऋणी यः स्यात् स्वमतन्तु न लेखयेत्। साक्षी वा साक्षिणान्येन सर्व्वसाक्षी समीपतः॥"

इति।

अपि च।

"उभयाभ्यर्थ्यते नैतन्मया स्वमुकसूनुना। लिखितं स्वमुकेनेति लेखकोऽन्ते ततो लिखेत्॥ ततो लेखको धनिकाधमर्णिकाभ्यां उभाभ्यां प्रार्थितेन मयासुकेन देवदत्तेन विष्णुमित्रसूनुना एतल्लेखं लिखितमित्यन्ते लिखेत्। *। साम्मतं स्वहस्तलेखमाह।

"विनापि साक्षिभिर्लेखं स्वहस्तलिखितन्तु यत्। तत् प्रमाणं स्मृतं लेखं बलोपधिकृताद्धते॥"

यल्लेखं स्वहस्तेन लिखितं अधमर्णेन तत् साक्षिभिर्विनापि प्रमाणं स्मृतं मन्वादिभिः। बलोपधिकृताद्धते। बलेन बलात्कारेण। उपधिना हृज्जोभक्रोधभयमदादिजन्यैर्येन यत् कृतं तस्मादिना। नारदोऽप्याह।

"मत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत्। तदप्रमाणं लिखितं भयोपधिकृतन्तथेति॥"

तच्चैतत् स्वहस्तकृतं परहस्तकृतञ्च यल्लेखं देशाचारानुसारेण सत्सत्कवत्कारे सत्कवत्कारयुक्तमर्थक्रमापरिलोपेन लिप्यक्षरापरिलोपेन च लेखमित्येतावन्न पुनः साधुशब्देरेव प्रातिस्विकदेशभाषयापि लेखनीयम्। यथाह नारदः।

"देशाचाराविरुद्धं यदृक्तार्थविधिलक्षणम्। तत् प्रमाणं स्मृतं लेखमविलुप्तक्रमाक्षरम्॥"

इति॥

विधानं विधिरार्षेविधिराधीकरजस्य जघन्यम्। गोप्याधिर्भोग्याधिकालकृतमिश्रादि तद्वक्ष्यं विस्तरं यस्मिंस्तद्व्यक्ताधिविधिलक्षणम्। अविलुप्तक्रमाक्षरं अर्थानाक्रमः क्रमश्चाक्षराणि च क्रमाक्षराणि अविलुप्तानि क्रमाक्षराणि यस्मिंस्तदविलुप्तक्रमाक्षरम्। तदेवं भूतं लिखितं प्रमाणम्। राजशासनवन्न साधुशब्दनियमोऽत्रेत्यभिप्रायः। लेखप्रवन्धेन लेखारूढमर्थं जिभिरेव

देयमित्याह। ऋणं लेखकृतमन्येयं पुरुषैस्त्रिभिरेव तु। यथा साक्ष्यादिकृतमन्यत्रिभिरेव देयं तथा लेखकृतमप्याहर्नृपुत्रकृतपुत्रैस्त्रिभिरेव देयम्। न चतुर्थादिभिरिति नियम्यते। ननु पुत्रपौत्रैर्ऋणमन्येयमित्यविशेषेणर्णमात्रत्रिभिरेव देयमिति नियतमेव। बाढ़मस्त्येवोत्सर्गस्य पत्रारूढ़र्णविषये स्मृत्यन्तरप्रभवामपवादग्रङ्कामपनेतुमिदं वचनमारब्धम्। तथा हि। पत्रलक्षणमभिधाय कात्यायनेनाभिहितम्। एवं कालमतिक्रान्तं पितृव्याद्याप्यते ऋणमिति। इत्थं पत्रारूढ़मतिक्रान्तकालमपि पितृव्यामपि पितृव्यां सम्बन्धिदाप्यते। अत्र पितृव्यामिति बहुवचननिर्देशात् कालमतिक्रान्तमिति वचनाच्चतुर्थादिर्दाप्यत इति प्रतीयते। तथा हारीतेनापि। लेख्यं यस्य भवेद्धस्ते लाभस्तस्य विनिर्दिशेदिति। अत्रापि यस्य हस्ते पत्रमस्ति तस्यर्णलाभ इति सामान्येन चतुर्थादिश्योऽप्यलाभोऽस्तीति प्रतीयते। अतश्चेतदाग्रङ्कानिवृत्त्यर्थं एतद्वचनमिति युक्तम्। वचनद्वयन्तु योगीश्वरवचनानुसारेण योजनीयम्॥*॥

अस्यापवादमाह। आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते। सर्वत्रकेऽपि पत्रारूढ़े ऋणे त्रिभिरेव देयमिति नियमाद्दायकरक्षानधिकारेणाधाहरणेऽप्यनधिकारप्राप्ताविदमुच्यते। यावच्चतुर्थेन पञ्चमेन वा ऋणं न दीयते तावदेवाधिर्भुज्यत इति वदता सर्वत्रकर्णापाकरणे चतुर्थादेरप्यधिकारो दर्शितः। नन्वेतदप्ययुक्तमेव फलभोग्यो न नश्यतीति सत्यम्। तदप्येतस्मिन्न सत्यपवादवचने पुरुषत्रयविषयमेव स्यादिति सर्वमनवद्यम्॥*॥ प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुसरति।

"देशान्तरस्थे दुर्लेखे नष्टोन्मृष्टे कृते तथा। भिन्ने दग्धेऽथवा छिन्ने लेखमन्यत्तु कारयेत्॥" व्यवहाराङ्गे पत्रे पत्रान्तरं कुर्यादिति विधीयते। व्यवहाराङ्गत्वाच्चान्यव्यवहितदेशान्तरस्थे पत्रे दुर्लेखे दुष्टानि सन्दिह्यमानानि अवाच्यकानि वा लेखानि लिप्यक्षराणि यदानि वा यस्मिंस्तद्दुर्लेखं तस्मिन्दुर्लेखेऽ नष्टे कालक्षेपेण उन्मृष्टे मसीदौर्बल्यादिना मृदिते लिप्यक्षरे कृते तस्करादिभिर्भिन्ने विदलिते दग्धे अग्निना छिन्ने द्विधा भूते सति दिर्भवति। एतद्यार्थिप्रत्यर्थिनोः परस्परानुमतौ सत्यां विमत्यान्तु व्यवहाराप्राप्तौ देशान्तरस्थपत्रानयनाद्याना-क्षेपया कालो दातव्यः दुर्देशावस्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्यः। यथाह नारदः।

"लेखो देशान्तरस्थस्तु ग्रीर्णे दुर्लिखिते कृते। एतस्मात्कालकरणमसतो दृष्टदर्शनम्॥" इति॥ सतो विद्यमानपत्रस्य देशान्तरस्थस्यानयनाय कालकरणं कालावधिदातव्यः। असतः पुनरविद्यमानस्य पत्रस्य पूर्वे ये दृष्टाः साक्षिणस्तेर्दर्शनं व्यवहारपरिसमापनं कार्यम्। यदा तु साक्षिणो न सन्ति तदा दिव्येन निर्णयः कार्यः। व्यलेखसाक्षिके दैवी व्यवहारे विनिर्दिष्टेतिस्मरणात्। एतच्च जानपदं व्यवस्थापत्रम्। राजकीयमपि व्यवस्थापत्रमीदृशमेव भवति। इयांस्तु विशेषः।

"राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितन्तथा। राजकीयं स्मृतं लेखं सर्वेष्वर्थेषु साक्षिमत्॥" इति॥*॥

तथान्यदपि राजकीयं जयपत्रं दृढव्यग्रिष्ठेनोक्तम्। यथोपन्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियम्। सावधारणकञ्चैव जयपत्रकमिष्यते॥

प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया। सिद्धेऽर्थे वादिने दद्याज्जयिने जयपत्रकमिति॥ तथा। सभासदोऽपि मतं मेऽमुकपुत्रस्येति स्वहस्तं दद्युः।

"सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः। यथा लेखविधौ तद्वत् स्वहस्तं दद्युरेव ते॥" इति मनुस्मरणात्॥

सभासदाश्च परस्परानुमतिव्यतिरेकेण व्यवहारो निःग्रन्थो भवति। यथाह नारदः।

"यत्र सभ्यो जगः सर्वः साध्ये तद्धि मन्यते। स निःग्रन्थो विवादः स्यात् सग्रन्थस्त्वन्यथा भवेत्॥" इति।

एतच्चतुष्पाद्व्यवहार एव।

"साधयेत् साध्यमर्थं यच्चतुष्पादान्वितञ्च यत्। राजमुद्राङ्कितञ्चैव जयपत्रकमिष्यते॥" इति स्मरणात्॥

यत्र तु हीनता यथा।

"अन्यवादी क्रियाहेतौ नोपस्थाता निरुत्तरः। व्याकृतप्रपलायी च हीनः पक्षत्रिधः स्मृतः॥" इति॥

तत्र न जयपत्रमस्ति अपि तु हीनपत्रमेव तच्च कालान्तरे दण्डप्राप्त्यर्थं जयपत्रं तु प्राड्न्याय-विधिसिद्ध्यर्थमिति विशेषः। लेखसन्देहे निर्णयनिमित्तान्याह।

"सन्दिग्धलेखशुद्धिः स्यात् स्वहस्तलिखितादिभिः। युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः॥"

शुद्धमशुद्धमिति सन्दिग्धस्य लेखस्य शुद्धिः स्वहस्तलिखितादिभिः स्यात्। स्वहस्तेन लिखितं यल्लेखान्तरस्थेन शुद्धिः। यदि सदृशान्यक्षराणि भवन्ति तदा शुद्धिः स्यादित्यर्थः। आदिग्रन्थात् साक्षिलेखकस्वहस्तलिखितान्तरसमादाच्छुद्धिरिति। युक्त्या प्राप्तियुक्तिप्राप्तिः। देशकालपुरुषाणां द्रव्येण सह सम्बन्धः प्राप्तिः। अस्मिन्देशे अस्मिन् काले अस्य पुरुषस्येदं द्रव्यं घटत इति युक्तिः। प्राप्तिः क्रिया तत्साक्ष्युपन्यासः। चिह्नमसाधारणं श्रीकारादि। सम्बन्धः अर्थिप्रत्यर्थिनोः पूर्वमपि परस्परविश्वासेन दानग्रहणादिसम्बन्धः। आगमोऽस्तेतावतोऽर्थस्य सम्भावितः प्रामुख्यायः। एत एव हेतवः। एभिर्हेतुभिः सन्दिग्धलेखशुद्धिः स्यादित्यन्वयः। यदा तु लेखे सन्देहनिर्णयो न जायते तदा साक्षिभिर्निर्णयः कार्यः। यथाह कात्यायनः।

"दूषिते पत्रके वादी तदारूढ़ांस्तु निर्दिशेत्॥" इति।

साक्षिसम्भवविषयमिदं वचनम्। साक्ष्यसम्भवविषयन्तु हारीतवचनम्।

"न मयैतत् कृतं पत्रं कूटमेतेन कारितम्। अधरीकृत्य तत् पत्रमथ दिव्येन निर्णयः॥" इति॥*॥

एवं शोधिते पत्रे ऋणे च दातव्ये प्राप्ते यदा कृतघ्नमेवर्णदातुमसमर्थस्तदा किं कर्तव्यमित्यत आह।

"लेखस्य पृष्ठेऽभिलिखेद्दत्वा दत्तर्णिको धनम्। धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम्॥" यदाधमर्णिकः सकलमृणं दातुमसमर्थस्तदा शक्त्यनुसारेण दत्त्वा दत्ता पूर्वकृतस्य लेखस्य पृष्ठेऽभिलिखेदेतावन्मया दत्तमिति। उत्तमर्णो वा उपगतं प्राप्तं धनन्तस्मिन् लेखस्य पृष्ठे दत्तमभिलिखेदेतावन्मया लब्धमिति। कथं स्वहस्तपरिचिह्नितम्। स्वहस्तलिखिताक्षरचिह्नितम्। यद्वोपगतं प्रवेशप्राप्तं स्वहस्तलिखितचिह्नितमधमर्णायोत्तमर्णो दद्यात्॥*॥ ऋणे तु कृतघ्ने दत्ते लेखं किं कर्तव्यमित्यत आह।

"दत्तर्णे पाटयेल्लेखं शुद्धौ चान्यत्तु कारयेत्॥" क्रमेण यज्ञदेव वा कृतघ्नत्वन्दत्त्वा पूर्वकृतं लेखमपाटयेत्। यदा तु दुर्गदेशावस्थितं लेखं नष्टं वा तदा शुद्धेऽ अधमर्णलक्षणिवृत्त्यर्थमन्यल्लेखं कारयेदुत्तमर्णमधमर्णः पूर्वोक्तक्रमेणोत्तमर्णो विशुद्धिपत्रं अधमर्णाय दद्यादित्यर्थः॥*॥ ससाक्षिके ऋणे कृतघ्ने दातव्ये किं कर्तव्यमित्यत आह।

"साक्षिमच्च भवेत् यद्वा तद्दातव्यं ससाक्षिकम्॥" यत्तु ससाक्षिकत्वमन्तत् पूर्वसाक्षिसमक्षमेव दद्यात्। इति लेखप्रकरणम्। इति मिताक्षरायां व्यवहाराध्यायः॥

लेखचूर्णिका, स्त्री, (लेखस्य चूर्णिका।) तूलिका इति शब्दरत्नावली॥

लेखपत्रः, पुं, (लेखं लेखार्हं पत्रं अस्य।) ताडपत्रः। इति भावप्रकाशः॥ लेखनीयपत्रे, क्ली॥

लेखस्थानं, क्ली, (लेखस्य स्थानम्।) लिखते यत्र। आफिस इति दप्तरखाना इति च लोकभाषा। तत्पर्यायः। अक्षशुण्डी २। इति शब्दरत्नावली॥

लेखं, क्ली, गूथम्। ल्याड़ इति भाषा। यथा,—

"उत्सर्जने दहेल्लेखं स्नात्वा भक्षमाप च॥" इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे धेनुकासुरवधे २२ अध्यायः॥

लेप, ष्ट ड गमने। इति कविकल्पद्रुमः॥ (भ्वा॰-आत्म॰-सक॰-सेट्।) ष्ट, अलिलेपत्। ड, लेपते लिलेपे। इति दुर्गादासः॥

लेपः, पुं, (लिप + घञ्।) लेपनम्। (यथा, मार्कण्डेये। ३५। १५।

"भूमिर्विशुध्यते कालात् दाहमार्ज्जनगोक्रमैः। लेपादुल्लेखनात् सेकादेभसंमार्ज्जनार्चनात्॥") भोजनम्। इति मेदिनी। पे, १०। (लिप्यतेऽनेनेति।) सुधा। इति विश्वः। चुन इति भाषा॥

लेपकः, पुं, (लिम्पतीति। लिप्+ण्वुल्।) जातिविशेषः। राज इति घेकर इति च भाषा। तत्पर्य्यायः। पलङ्कषः २। इत्यमरः। लेपी ३। इति शब्दरत्नावली॥ लेप्यलृत् ४। इति हेमचन्द्रः। (लेपनकर्म्मरि, त्रि।)

लेपनं, क्ली, (लिप्+ल्युट्।) लेपः। लेपा इति भाषा। यथा,—

"वैशाखस्य सिते पक्षे तृतीयायां यमसंयुता। तत्र मां लेपयेद्गन्धलेपनैरतिशोभितम्॥"

इति तिथ्यादितत्त्वम्॥

विष्णुग्रहलेपनफलं यथा,—

वराह उवाच।

"शृणु तत्त्वेन मे देवि! लिप्यमानस्य यत् फलम्। सर्व्वं ते कथयिष्यामि यथा प्राप्नोति मानवः॥ गोमयं यस्य वै भूमे मम वेश्मोपलेपयेत्। व्यक्तानि तत्र यावन्ति पदानि च विलिम्पतः॥ तावद्वर्षसहस्राणि दिव्यानि दिवि मोदते। यदि द्वादश वर्षाणि लिप्यते मम कर्म्मसु॥ जायते विपुले शुद्धे धनधान्यसमाकुले॥ दिव्येनैश्वर्य्यकृतो देवि! कुशद्वीपाय गच्छति। कुशद्वीपमनुप्राप्य सहस्रं जीवते नरः। मङ्गल्यश्चैव जायेत महिमायुक्तवान् शुचिः॥ कुशद्वीपात् परिभ्रष्टो मम कर्म्मपरायणः। राजा वै जायते सुभ्रु सर्व्वधर्म्मेषु निष्ठितः॥ लेपनस्य प्रभावेण मम कर्म्मपरायणः। अक्षया व्यवस्थितश्चापि सर्व्वग्राह्याणि गच्छते॥ देवि! कारयते सर्व्वं मम चायतनानि च। कारयित्वा यथान्यायं मम लोकाय गच्छति॥ गोमयस्य तु वक्ष्यामि तच्छृणुष्व वसुन्धरे। गोमयन्तु समादाय यावल्लोकोऽनुगच्छति॥ समीपे यदि वा दूरे गत्वानयति गोमयम्। यावन्ति तत्पदान्यस्य तावद्वर्षसहस्रकम्। गोमयानयिता चैव स्वर्गलोके महीयते॥ एकादशसहस्राणि एकादशशतानि च। ततः स ग्राह्यले द्वीपे रमते च सदा युतः॥ ग्राह्यलात्तु परिभ्रष्टो राजा भवति धार्म्मिकः। मङ्गल्यश्चैव जायेत सर्व्वधर्म्मविदांवरः॥ अथ द्वादशवर्षाणि सचित्तः सुदृढव्रतः। वहते गोमयं सुभ्रु मम लोकाय गच्छति॥"

इति वराहपुराणम्॥

देवीग्रहलेपनफलं यथा,—

"देव्या ग्रहन्तु यः शुक्ल गोमयेनानुलेपयेत्। स्त्रियो वा यदि वा पुंसः वक्षासन्तु निरन्तरम्। स लभेदीप्सितान् कामान् देव्या लोकञ्च गच्छति॥"

इति देवीपुराणे ४२ अध्यायः॥

(रात्रौ लेपननिषेधो यथा,—

"न रात्रौ लेपनं कुर्य्यात् शुष्कमार्द्रं न धारयेत्। शुष्कमार्द्रमुपेक्षेत प्रदेहे पीडनं प्रति॥"

इति मध्यखण्डे त्रयोविंशेऽध्याये ब्राह्मधरेणोक्तम्॥)

लेपनः, पुं, (लिम्पत्यनेनेति। लिप्+करणे ल्युट्।) तुरुष्कनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

लेपी [न्] पुं. (लिम्पतीति। लिप्+णिनिः।) लेपकः। घेकर इति भाषा। इति शब्दरत्नावली॥ लेपकर्म्मरि लेपविशिष्टे च त्रि॥

लेप्यं, त्रि, (लिप्+ण्यत्।) लेपनीयम्। लेपनयम्। लिप्यधानोः कर्म्मणि यप्रत्ययेन निष्पन्नम्॥ (यथा, भागवते। ११। २७। १२।

"श्रैलो दारुमयी लौही लेप्या लेख्या च सैकती। मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता॥")

लेप्यलृत्, पुं, (लेप्यं करोतीति। लृ+क्विप्।) लेपकः। इति हेमचन्द्रः। ३। ५८६॥

लेप्यमयी, स्त्री, (लेप्य+मयट्। ङीप्।) काष्ठादिघटितपुत्तलिका। तत्पर्य्यायः। अञ्जलिकारिका २। इति हेमचन्द्रः॥

लेप्यस्त्री, स्त्री, (लेप्या स्त्री।) सुगन्धद्रव्यलिप्ता स्त्री। इति शब्दरत्नावली॥

लेयः, पुं, सिंहराशिः। इति ज्योतिस्तत्त्वम्॥

लेलिहानः, पुं, (पुनःपुनरतिशयेन वा लेढ्यति। लिह्+यङ्+शानच्।) शिवः। इति शब्दरत्नावली। सर्पः। इति हेमचन्द्रः॥ पुनःपुनर्लेहनकर्म्मरि, त्रि॥ (यथा, महाभारते। १। २३६। ५।

"सप्तजिह्वानलः क्रूरो लेलिहानो विसर्पति॥")

लेलिहाना, स्त्री, (लेलिहान+स्त्रियां टाप्।) सुरादिविशेषः। यथा,—

"वक्त्रं विस्तारितं कृत्वाप्यधो जिह्वाञ्च चालयेत्। पार्श्वस्थं सुहृद्युगलं लेलिहानेति कीर्त्तिता॥"

एषा ताराराधने। अन्या लेलिहाना वक्ष्यते।

"योनिर्म्मायाधरः सेन्दुर्वधूः कूर्चं क्रमादिदुः। दीर्घाणि चोच्चरन् मन्त्री सुरावन्त्यनमाचरेत्। तर्ज्जनीमध्यमानामाः समं कुर्य्यादधोमुखम्। अनामायां क्षिपेद्दृष्ट्वा ऋक्षीं कृत्वा कनिष्ठिकाम्। लेलिहानाख्यमुद्रेयं जीवन्यासे प्रकीर्त्तिता॥"

इति तन्त्रसारः॥

लेखः, पुं, (लिख्+घञ्।) कला। इत्यमरः। (यथा, महाभारते। १२। ५८। २४।

"एष ते राजधर्म्माणां लेखः समनुवर्णितः॥")

लेष्टुः, पुं, (लिश्यते इति। लिश्+बाहुलकात् तुन्।) लोष्टम्। इत्यमरः। (यथा, महाभारते। १३। ३४। २५।

"अथ यो ब्राह्मणान् क्रुद्धः पराभवति लोष्टचिरात्। यथा महार्णवे क्षिप्त आमलेष्टुर्विनश्यति")

लेष्टुघ्नः, पुं, (लेष्टुं हन्तीति। हन्+टक्।) लेष्टुभेदनः। इति शब्दरत्नावली॥

लेष्टुभेदनः, पुं, (लेष्टुं भिनत्तीति। भिद्+ल्युट्।) लोष्टभङ्गसाधनसुहृत्। मर इति ख्यातः। इति केचित्। इति भरतः॥ तत्पर्य्यायः। कोटिघ्नः २। इत्यमरः॥ कोटीघ्नः ३। इति रत्नकोषः॥ लेष्टुघ्नः ४ लेष्टुभेदी ५ चूर्णदलः ६। इति शब्दरत्नावली॥

लेखिकः, पुं, (श्रोण्यारोहकः। तत्पर्य्यायः। कटिरोहकः २। इति शब्दमाला॥

लेढः, पुं, (लेहनमिति। लिह्+घञ्।) आहारः। भक्षणम्। इति हेमचन्द्रः॥ तत्पर्य्यायः। खादनम् २ रसनम् ३ स्वदनम् ४ स्वदिः ५। इति राजनिर्घण्टः॥ (यथा, सुश्रुतसंहितायाम्। ५। ४१।

"सक्थापस्थग्रलेहयसनशिरोधावमर्द्दनारोहाः। आघातं मथितमस्तमोष्ठ इति ते दश ग्रासाः॥"

कर्म्मणि घञ्। रसः। यथा, सुश्रुते। १। १७३।

"पचेल्लेढं सिता क्षौद्रं पलार्द्धकुडवान्वितम्॥"

लेढीति। लिह्+पचाद्यच्। लेहनकर्म्मरि, त्रि। यथा, भट्टिः। ६। ८२।

"दृष्ट्वेहं मधुनो लेढ्यैर्विरुग्णैर्यथा गिरिः॥"

अवलेढः। तत्पर्य्यायो यथा,—

"क्षायस्य स्यात् पुनः पाकात् घनत्वं सारसक्रिया। सोऽवलेढ्यश्च लेहः स्यात्तन्मात्रा स्यात् पलोन्मिता॥ सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुडः। द्रवं चतुर्गुणं दद्यादिति सर्व्वत्र निश्चयः॥"

इति मध्यखण्डेऽष्टमेऽध्याये ब्राह्मधरेणोक्तम्॥")

लेहनं, क्ली (लिह्+ल्युट्।) जिह्वया रसग्रहणम्। चाटन इति भाषा। तत्पर्य्यायः। जिह्वास्वादः २। इति हेमचन्द्रः॥

लेह्यः, पुं, (लिह्+बाहुलकात् एनप्।) टङ्कणम्। इति हेमचन्द्रः॥

लेह्यं, क्ली, (लिह्+ण्यत्।) अवलेहम्। इति शब्दमाला॥ लेहनीये, त्रि॥ (यथा, कथासरित्सागरे। ४५। २३०।

"तत्तन्नानाविधं भक्ष्यभोज्यलेह्यादि षड्रसम्। दिव्यमन्नं बुभुजिरे पयः पानमथोत्तमम्॥"

आहारविशेषो यथा,—

"आहारं षड्विधञ्चूष्यं पेयं लेह्यन्तथैव च। भोज्यं भक्ष्यन्तथा चर्व्यं गुरु विद्यादथोत्तरम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लेङ्गं, क्ली, (लिङ्गमधिकृत्य कृतो ग्रन्थ इति। लिङ्गस्येदमिति वा। लिङ्ग+अण्।) लिङ्गपुराणम्। यथा,—

"मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दन्तथैव च॥"

इत्यादि पाद्मोत्तरखण्डे ३४ अध्यायः॥

(अस्य विवरणादिकं पुराणशब्दे द्रष्टव्यम्॥)

लेङ्गी, स्त्री, लिङ्गिनी। इति राजनिर्घण्टः। लिङ्ग सन्त्यस्मिन्, इनि।

लोक, ऋ क दीप्तौ। इति कविकल्पद्रुमः। (चुरा०-पर०-सक०-सेट्।) ऋ, अलुलोकत्। क, लोकयति। इति दुर्गादासः।

लोक, ऋ ड ईक्षे। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अलुलोकत्। ड, लोकते। विलोकयन्त्यो वपुरापुरस्त्रां प्रकाम-विस्तारफलं हरिण्यः। इत्यादौ विलोकनं विलोकः पश्चात् तं करोतीति णौ साध्यम्। इति दुर्गादासः।

लोकः, पुं, (लोक्यते इति। लोक्+घञ्।) भुवनम्। जनः। इत्यमरः। सप्तलोकनामानि यथा—

"भूर्भुवः स्वर्महश्चैव जनश्च तप एव च। सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः।"

इत्यग्निपुराणम्।

अपि च।

"भूर्लोको भुवः स्वर्लोकस्त्रैलोक्यमिदमुच्यते। महर्ज्जनस्तपः सत्यः सप्त लोकाः प्रकीर्त्तिताः। भूर्लोकः पार्थिवो लोकः अन्तरीक्षं भुवः स्मृतः। भावो लोको दिवि ज्ञेयस्त्रैवादूर्द्धं यथाक्रमम्। भूतस्याधिपतिर्ब्रह्मस्ततो भूतपतिस्तु यः। वायुर्नभसोऽधिपतिस्तेन वायुर्नभस्वतिः। भावस्य सूर्य्याधिपतिस्तेन सूर्य्यो दिवस्पतिः। गन्धर्व्वाप्सरसश्चैव गुह्यकाः सह राक्षसैः। भूर्लोकवासिनः सर्व्वे अन्तरीक्षचराश्च ये। मरुतः सप्तभिः स्कन्धै रुद्रास्तथैव चाश्विनौ। आदित्या वसवः सर्व्वे तथैव च गवाङ्गनाः। चतुर्थे तु महर्लोके तिष्ठन्ते कल्पवासिनः। प्रजानां पतिभिः सर्व्वैः सेव्यते पञ्चमो महान्। मनुः सनत्कुमाराद्या वैराजश्च सुताक्षयः। षष्ठे तु संस्थिता ह्येते देवा देवविरोधकाः। सत्यस्तु सप्तमो लोको ह्यपुनर्भववासिनाम्। ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः। महीतलात् सहस्रांशुस्तत ऊर्द्धं दिवाकरः। दश तानि ध्रुवे यावद्द्विगुणे द्विगुणान्तरे। दशयोजनकोट्यास्तु मेरुरूर्द्धं ध्रुवः स्मृतः। त्रयोविंशतिलक्षाणि त्रैलोक्येऽयेक उच्यते। द्विगुणेषु सहस्रेषु योजनानां शतेषु च। लोकान्तरमथैवैकं ध्रुवादूर्द्धं विधीयते। देवदानवगन्धर्व्वयक्षराक्षसपन्नगाः। भूतविद्याधराश्चैव अष्टौ ते देवयोनयः। ते ब्रह्मणस्तु मध्यस्थाः प्रस्तम्बसमाश्रिताः। ततोऽग्निवायुराकाशं ततो भूतादिरुच्यते। ततो महान् प्रधानश्च प्रकृतिः पुरुषस्ततः। पुरुषादीश्वरो ज्ञेयो यस्य ब्रह्माऽऽदितं जगत्। शिवोमाभानुदेवानां परापरतरा मताः।"

इति देवीपुराणे त्रैलोक्याभ्युदये ग्रहगति-र्नामाध्यायः। *। दिक्पालानां लोका यथा,

"प्रजापतिस्तु भगवान् गुह्यतः प्रेक्ष्य देवताम्। आधिपत्येषु शुक्रेषु न्ययोजयत योगवित्। त्रयाणामपि लोकानां देवतानां द्विजोत्तमाः। चकार ब्रह्मं राजानं देवानां दितिपूर्व्वजम्। पूर्व्वस्यां कौशिको राजा दक्षिणस्यां यमो दिशि। वरुणः पश्चिमायान्तु उत्तरस्यां सदा धनी।"*।

पुण्यवतां लोका यथा,—

"एवं विभज्य राज्यानि पुरा प्रोक्तानि यानि च। लोकांश्च विदधे दिव्यान् ददावथ पृथक् पृथक्। कस्यचित् सूर्य्यसङ्काशान् कस्यचिद्वह्निनिर्म्मलान्। कस्यचिद्विद्युदाविद्धान् कस्यचिच्चन्द्रनिर्म्मलान्। नानावर्णान् काममयाननेकशतयोजनान्। स तान् सुकृतिनां लोकान् पावनाय च संस्थितान्। भावूर्द्धं ये तपस्यन्ति सौम्याश्चारागवाः सदा। एते सुकृतिनां लोका ये शान्ताः पुण्यकर्म्मभिः। ये यजन्ति मखैः पुण्यैः समाप्तवरदक्षिणैः। स्वदारनिरता दान्ता ऋजवः सत्यवादिनः। दीनानुग्रहकर्त्तारो ब्रह्मण्या लोकपूजिताः। योगयुक्ता महात्मानो यान्ति तत्र तपोज्वलाः। सर्व्वे सहाः क्षमायुक्ता कोपिता ये तमोजिताः। एवं नियोज्य तनयान् स्वयं लोकपितामहः। पौष्करं ब्रह्मसदनमारुरोहं प्रजापतिः। सर्व्वे स्वयम्भुदत्तेषु यावनेषु दिवौकसः। रेमिरे स्वेषु लोकेषु महेन्द्रेणाभिपालिताः।"

इति वह्निपुराणे वाराहप्रादुर्भावनामाध्यायः। (जगत्यर्थे विषयोऽस्य यथा,—

"यथा लोकस्य स्वार्गादिस्तथा पुरुषस्य गर्भाधानं यथा ऋतुयुगमेवं वाच्यम्। यथा चैता तथा यौवनं यथा द्वापरस्तथा स्थाविर्य्यं यथा कलिरेवमायुर्य्यं यथायुगान्तस्तथा मरणमित्येव-मनुमानेनानुक्तानामपि लोकपुरुषयोरवयव-विशेषाणामभिवेशसामान्यं विद्यात्।"

"तत्र संयोगापेक्षो लोकशब्दः षड्धातुसमुदायो हि सामान्यतः सर्व्वलोकः। तस्य हेतुरुत्-पत्तिर्वृद्धिरुपप्लवो वियोगश्च तत्र हेतुरुत्पत्ति-कारणं उत्पत्तिर्जन्म हृद्विराध्यायनं उपप्लवो दुःखागमः षड्धातु विभ्रमो वियोगः स जीवापगमः स प्राणनिरोधः स भङ्गः स लोक-स्वभावः।" इति चरके शारीरस्थाने पञ्चमे-ऽध्याये।

"तस्मिन् क्रिया सोऽधिष्ठानं कस्मात् लोकस्य हैविध्यात्। लोको हि द्विविधः स्थावरो जङ्गमश्च। द्विविधात्मक एवायेः सौम्यश्च तद्भूयस्त्वात्। प्रधानको वा।" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये। *।)

लोककान्ता, स्त्री, (लोकानां कान्ता प्रिया।) ऋद्धिनामौषधम्। इति राजनिर्घण्टः। (लोकप्रिये, त्रि। यथा, गो० रामायणे। २। ३८। ६।

"लोककान्तं प्रियं पुत्रं कुशचीराम्बरं वनम्। प्रस्थितं पश्यतो मेऽद्य हृदयं किं न दीर्य्यते।")

लोकचक्षुः, [स्] क्ली, (लोकानां चक्षुरिव।) सूर्य्यः। इति शब्दमाला। जनस्य लोचनञ्च।

लोकजित्, पुं, (लोकं जितवानिति। जि+क्विप्।) बुद्धः। इत्यमरः। (लोकजेतरि, त्रि। यथा, भूतपथब्राह्मणे। १४। ४। १। ३३।

"यं कामं कामयते तमागायति तद्वै तल्लोक-जिदेव।")

लोकतुषारः, पुं, (लोके तुषार इव।) कर्पूरः। इति राजनिर्घण्टः। (कर्पूरशब्दोऽस्य गुणादिकं ज्ञातव्यम्।)

लोकनाथः, पुं, (लोकानां नाथः।) बुद्धः। इति विकाण्डशेषः। (यथा, राजतरङ्गिण्याम्। १। ११८।

"लोके भगवतो लोकनाथादारभ्य केचन ये जन्तवो गतक्लेशान् बोधिसत्त्वानवेहि तान्।")

ब्रह्मा। इति शब्दरत्नावली। विष्णुः। इति तस्य सहस्रनामस्तोत्रम्। शिवः। यथा,—

"अकिञ्चनः सनू प्रभवः स सम्पदां स लोकनाथः पिष्टसङ्गगोचरः। स भीमरूपः शिव इत्युदीर्य्यते न सन्ति यार्थार्थविदः पिशाकिनः।"

इति कुमारसम्भवम्।

(तथा च महाभिङ्गार्चनतन्त्रे शिवसहस्रनाम-स्तोत्रे।

"त्रैलोक्ये लोकनाथश्च रुद्रलोके महेश्वरः।")

वटिकौषधविशेषः। तद्यथा,—

"पारदं गन्धकञ्चैव समभागं विचूर्णयेत्। स्तताभं रसतुल्यञ्च पुनस्तेनैव मर्द्दयेत्। रसाद्द्विगुणलौहञ्च लौहतुल्यञ्च ताम्रकम्। भल्लवराटिकायाश्च ताम्रतश्चिगुणं क्षिपेत्। नागवल्लीदलेनैव मर्द्दयेद्दयहतो भिषक्। प्रक्षेपनपुटेनैव खाङ्गपीतं समुद्धरेत्। यवतण्डीद्रोदरहरः गुल्मश्चयथुनाशनः। पिप्पलीमधुसंयुक्तां सगुडां वा हरीतकीम्। गोमूत्रञ्च पिबेद्वापु गुडं वा क्षीरकान्वि-तम्।"

इति लोकनाथो रसः। इति वैद्यकरसेन्द्रसार-संग्रहे यक्ष्मतण्डीरोगाधिकारे। *। लोकप्रभौ, त्रि। यथा, गो० रामायणे। २। ३३। १६।

"लोकनाथस्य रामस्य पौरुषा पीड़ितं जगत्। अपर्व्वणीव सोमस्य राहुग्रहणपीड़या।")

लोकपालः, पुं, (लोकान् पालयतीति। पाल+णिच्+अण्।) राजा। इति हलायुधः। (यथा, राजतरङ्गिण्याम्। १। ३३६।

"उत्तमो लोकपालोऽयमिति लक्ष्म प्रचक्षिरे। यः प्राप्नवान् विना यत्नं चक्षसे न मनुष्यताम्।")

दिक्पालाः। यथा,—

"इन्द्रो वह्निः पितृपतिर्निर्ऋतिर्वरुणोऽनिलः। धनदः शङ्करश्चैव लोकपालाः पुरातनाः।"

इति वह्निपुराणम्।

(यथा च, मनुः । ५ । ९६ ।
"सोमार्य्यार्कानिलेन्द्राणां वित्तेशस्यैवमस्य च ।
अष्टानां लोकपालानां वपुर्धारयते नृपः ॥")
लोकबान्धवः, पुं, (लोकानां बान्धवः ।) सूर्य्यः । इति जटाधरः ॥
लोकबाह्यः, पुं, (लोकात् लोकसमाजात् बाह्यः ।) सर्व्वाचारवर्ज्जितः । यथा,—
"लोकबाह्यस्तु यो याज्ञिकवाह्याचारवर्ज्जितः ॥"
इति जटाधरः ॥
लोकमाता, स्त्री, (लोकानां माता इव ।) लक्ष्मीः । इत्यमरः ॥ (तत्तया लोकजननीसमापि च ।
यथा, भागवते । २ । ३ । ५ ।
"प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥")
लोकलोचनं, क्ली, (लोकानां लोचनमिव ।) सूर्य्यः । इति शब्दरत्नावली ॥ (जनस्य लोचनञ्च ।
कथा, कथासरित्सागरे । १८ । ९२ ।
"सोऽचलत्तृषार्त्तिघातेन यत्नैर्वेवरितः शरः ।
अगाम लाघवातिशयादलक्ष्यो लोकलोचने ॥")
लोकविनायकः, पुं, (लोके विनायक इव ।) यक्षविशेषः । यथा,—
"स्कन्दग्रहादयो ये च आर्यकत्रासकादयः ।
कौमारास्ते भुवि ज्ञेया ये च लोकविनायकाः ।
बहवस्तत्संख्याता मर्त्यलोकविचारिणः ॥"
इति वह्निपुराणम् ॥
लोकविश्रुतिः, स्त्री, (लोके विश्रुतिः ।) जनश्रुतिः । किंवदन्ती । इति केचित् ॥
लोकायतं, क्ली, (लोकेषु आयतं विस्तीर्णमिव ।) तर्कभेदः । चार्व्वाकग्राह्यम् । इत्यमरभरतौ ॥
लोकायतिकः, पुं, (लोकायतं ग्राह्यमस्यास्तीति । लोकायत + ठन् ।) चार्व्वाकः । इति हेमचन्द्रः ॥ (तार्किकः । यथा, हरिवंशे । २४६ । ३० ।
"हेत्वनाभाससंयोगसमवायविशारदैः ।
लोकायतिकसुक्ष्मैश्च शुश्रुवुः स्वनभीरितम् ॥")
लोकालोकः, पुं, (लोक्यतेऽसौ इति लोकः । न लोक्यतेऽसौ इति अलोकः । ततः कर्म्मधारयः ।) स्वनामख्यातपर्व्वतः । तत्पर्य्यायः । चक्रवाडः २ । इत्यमरः ॥ ये सप्तद्वीपां महीमावेष्ट्य प्राकारवत् स्थिते गिरौ लोकालोक इति स्वनाम्नाख्याते । अत्तर्लोक्यते सूर्य्यरश्मिभिः सूक्ष्ममानत्वात् इति लोकः । तथा बहिः सूर्य्यकिरणाग्रान्न लोक्यते इति अलोकः । लोक्र लोके कर्म्मणि घञ् लोकयतीति अलोकः लोकालोकः । चक्रं मही चक्रं वक्रते वेष्टयति चक्रवाडः । वक्रि ड वेष्टे च घञ् । आपकत्विद्वस्तानित्यत्वात् न कुञ् । इति भरतः ॥ (यथा, रघुः । १ । ६८ ।
"सोऽहमिन्द्रादिसुहृदां प्रजानोपनिमौलितः ।
प्रकाशप्रतिघातेन लोकालोक इवाचलः ॥"
अस्य विवरणं यथा देवीभागवते । ८ । १४ । १-१५ ।
श्रीनारायण उवाच ।
"ततः परस्तादचलो लोकालोकेति नामकः ।
अन्तराले च लोकालोकयोर्यः परिकल्पितः ।
यावदस्ति च देवर्षे ह्यन्तरं मानसोत्तरात् ।
सुमेरोस्तावती भूमा काञ्चनी भूमिरस्ति हि ।
दर्पणोदरतुल्या सा सर्व्वप्राणिविवर्ज्जिता ।
यस्यां पदार्थः प्रक्षिप्तो न किञ्चित् प्रदृश्यते ।
अतः सर्व्वप्राणिसञ्चारहिता सा च नारद ! ।
लोकालोक इति ख्याता यदत्र परिकल्पिता ।
लोकालोकान्तरे चास्य वर्त्तते सर्व्वदा स्थितिः ।
ईश्वरेण सलोकानां त्रयाणामन्तगः कृतः ।
सूर्य्यादीनां ध्रुवान्तानां रश्मयो यद्यदाहि च ।
अर्व्वाचीनाश्च ये लोकास्तत्स्थानां कदापि हि ।
पराचीनत्वभाजो हि न भवन्ति च नारद ! ।
तावदुच्चत्वनायामः पर्व्वतेन्द्रो महोदयः ।
एतावॉल्लोकविन्यासोऽयं संख्यामानलक्षणैः ।
कविभिः स तु पञ्चाशत्कोटिभिर्गणितस्य च ।
भूगोलस्य चतुर्थांशो लोकालोकाचलो मुने ! ।
तस्योपरि चतुर्दिक्षु ब्रह्मणा चात्मयोनिना ।
निवेशिता दिग्गजा ये तन्नामानि निबोधत ।
ऋषभः पुष्पचूडोऽथ वामनोऽथापराजितः ।
एते समस्तलोकस्य स्थितिहेतव ईरिताः ।
तेषाञ्च स्वविभूतीनां बहुवीर्य्यापहृत्तये ।
विष्णुश्चक्रञ्चक्रेऽर्थं वर्द्धयन् भगवान् हरिः ।
आस्ते सिद्धाष्टकोपेतो विष्वक्सेनादिसंवृतः ।
निजायुधैः परिवृतो भुजदण्डैः समं ततः ।
आस्ते सकललोकस्य स्वस्तये परमेश्वरः ।
आकल्पमेवं वेद्मं स गतो विष्णुः सनातनः ।
स्वमायारचितस्यास्य गोपीथायात्मसाधनः ।
योऽस्मिन्विसार एतेन ह्यलोकपरिमाणकम् ।
व्याख्यातं यद्दिशोकालोकाचल इतीरितम् ॥" ॥
लोकश्च अलोकश्च तौ । सूर्य्यादालोकविशिष्टतद्रहितदेशौ । अत्र द्विवनप्रयोगः स्यात् । यथा, भागवते । ५ । २० । ३४ ।
"ततः परस्तात् लोकालोकनामाचलो लोकालोकयोरन्तराले परित उपक्लृप्तः ॥")
लोकेशः, पुं, (लोकानामीशः ।) ब्रह्मा । इत्यमरः ॥ रुद्रभेदः । इति त्रिकाण्डशेषः । पारदः । इति राजनिर्घण्टः ॥ (इन्द्रः । यथा, रघुः । २ । ६६ ।
"यथा च दृष्टान्तमिमं सदोगत-
स्त्रिलोचनेक्षाग्नितया दुरासदः ।
तवेव सन्देशहरादिशांपतिः
प्रबोधितो लोकेश ! तथा विधीयताम् ॥"
लोकपालः । यथा, मनुः । ५ । ९७ ।
"लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते ।
शौचाशौचं हि मर्त्यानां लोकेशप्रभवाप्ययम् ॥"
लोकाधिपतौ, त्रि । यथा, भागवते । ३ । ६ । १६ ।
"पादावस्य विनिर्भिन्नौ लोकेशौ विष्णुराविशत् ॥")
लोकेश्वरः, पुं, (लोकानामीश्वरः ।) बुद्धभेदः । इति त्रिकाण्डशेषः । सकलानां जगतां प्रभुश्च । (यथा, महाभारते । ३ । ११३ । १६ ।
"अवसोदश कौन्तेय दत्तमात्रा मही तदा ।
उवाच चापि कुपिता लोकेश्वरमिदं प्रभुम् ॥")
लोकपालः । यथा, महाभारते । ८ । ३३ । २६ ।
"यक्षगन्धर्वताराभिश्चित्रं नभस्तलम् ।
सुरासुरपितृगणा मतीन् लोकेश्वरान् दृशन् ॥")
लोकेश्वरात्मजा, स्त्री, (लोकेश्वरस्य बुद्धस्य आत्मजेव ।) बुद्धशक्तिभेदः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओड्डारा ४ खाड्डा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अजिता १० शिवा ११ खदूरवासिनी १२ भद्रा १३ वैष्णवी १४ नीलसरस्वती १५ भृकुटिनी १६ महाताराः १७ वसुधारा १८ धनदा १९ त्रिलोचना २० लोचना २१ । इति हेमचन्द्रः ॥
लोच, ऋ क भासि । इति कविकल्पद्रुमः ॥ (पुरा०-पर०-अक०-सेट् ।) ऋ, अलुलोचत् । भासि दीप्तौ । किन्तु पुरुषोत्तमशूरस्तदेवौ भाव इति सूर्द्धन्यकारं मत्वा वचनार्थमाहतुः । इति दुर्गादासः ॥
लोच, ऋ ड ईक्षे । इति दुर्गादासः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ईक्षः पर्य्यालोचनं प्रतिधानमिति यावत् । ऋ, अलुलोचत् । ड, लोचते कार्य्यं सुधीः । इति दुर्गादासः ॥
लोचं, क्ली, (लोचते पर्य्यालोचयति सुखदुःखादिकमिति । लोच + अच् ।) अश्रु । इति जटाधरः ॥
लोचकः, पुं, (लोचते इति । लोच + ण्वुल् ।) मांसपिण्डम् । अक्षितारका । कज्जलम् । स्त्रीणां ललाटाभरणम् । कदली । लोहवज्रम् । निर्म्मुण्डिः । कर्ब्बूरः । भ्रूर्व्वी । भ्रूलतायाम् । इति मेदिनी । के, ५० । निमीलकः । इति शब्दरत्नावली ॥
लोचनं, क्ली, (लोचतेऽनेनेति । लोच + ल्युट् ।) चक्षुः । इत्यमरः ॥ तस्य शुभाशुभलक्षणं यथा,—
"वक्राग्रैः पद्मपत्राभैर्लोचनैः सुखभागिनः ।
मार्जारलोचनैः पापो महात्मा मधुपिङ्गलैः ॥
क्रूराः केकरनेत्राश्च हरिताक्षाः सकल्मषाः ।
निर्लोमलोचनैः क्रूराः सेनाग्रो गजलोचनाः ॥
गम्भीराक्षा ईश्वराः स्युर्मन्त्रिणः स्थूलचक्षुषः ।
नीलोत्पलाक्षा विद्वांसः सौभाग्यं श्लक्ष्णचक्षुषाम् ॥
स्यात् श्लक्ष्णतारकाक्षाणामश्रुणात्पाटनं क्षिप्रम् ।
मक्षलाक्षाश्च पापाः स्युर्निःस्नाः स्युर्दीर्घलोचनाः ॥
दृक् क्षिप्रा विपुला भोगे अल्पायुर्नाभिदग्नता ।
विश्रान्तोन्नता सुखिनो दरिद्रा विषमभ्रुवः ॥"
इति गारुडे ६५ अध्यायः ॥
लोचनहिता, स्त्री, (लोचनाभ्यां हिता ।) तुत्थाञ्जनम् । इति राजनिर्घण्टः ॥

लोचना, स्त्री, (लोचते पर्य्यालोचयतीति। लोच + ल्युः। टाप्।) वृद्धशक्तिभेदः। अस्याः प्रभावं पर्य्यायाश्च लोकेश्वरात्मजाशब्दे द्रष्टव्याः॥

लोचनामयः, पुं, (लोचनयोरामयः।) चक्षूरोगविशेषः। तत्पर्य्यायः। अभिमन्थः २। इति चिकित्साशेषः॥

लोचनी, स्त्री, (लोचतेऽनौ। लोच्+ल्युट्। ङीप्।) महाश्रावणिका। इति राजनिर्घण्टः॥

लोचमर्कटः, पुं, लोचमल्लकः। इत्यमरटीकायां स्वामी॥

लोचमल्लकः, पुं, (लोचं दृश्यं मल्लकं मयूरग्रिवेव यस्य।) मयूरग्रिवौषधम्। रत्नजटा इति ख्यातः। चेत्रयमालिकेति केचित्। तत्पर्य्यायः। खराश्वा २ कारवी ३ दीप्यः ४ मयूरः ५। इत्यमरः॥ लोचमर्कटः ६। इति भरतः॥

लोचिका, स्त्री, दधितप्तमहिषीतोयोदकसहितइलितमक्षलाकारनिर्म्मितघृतभृष्टसमिता। लुचि इति भाषा। इति शाकरत्नेश्वरः॥

लोट, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अलुलोटत्। लोटति लोकः उन्मादतीत्यर्थः। इति दुर्गादासः॥

लोटुलः, पुं, (लोटतीति। लोट्+बाहुलकात् उलच्।) अभिलोटकः। इति संक्षिप्तसारोणादिवृत्तिः॥

लोड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अलुलोड़त्। इति दुर्गादासः॥

लोणत्वगं, क्ली, (लोणं लवणरसयुक्तं त्वक्।) लवणत्वक्। इति राजनिर्घण्टः॥

लोणा, स्त्री, (लवणमस्त्यस्या इति। अच्। टाप्। पृषोदरादित्वात् साधुः।) क्षुद्रान्विका। इति राजनिर्घण्टः॥ (तथास्याः पर्य्यायः।

"लोणा लोणी च कथिता हृल्लोणी तु घोटिका।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लोणारं, क्ली, (लवणं ऋच्छतीति। लवण+ऋ+अण्। पृषोदरादित्वात् साधुः।) क्षारविशेषः। तत्पर्य्यायः। लवणोत्थम् २ लवणाकरजम् ३ लवणभवः ४ जलजम् ५ लवणक्षारः ६ लवणः ७। अस्य गुणाः। अम्लत्वम्। तीक्ष्णत्वम्। पित्तवृद्धिकारित्वम्। क्षारत्वम्। दैवज्ञवल्लभत्वम्। वातगुल्मादिशूलनाशित्वञ्च। इति राजनिर्घण्टः॥

लोणाम्बा, स्त्री, क्षुद्रान्विका। इति राजनिर्घण्टः॥

लोतं, क्ली, (लुनातीति। लू+"हविस्पशिविति।" उणा० ३। ८६। इति तन्।) स्नेहधनम्। तत्पर्य्यायः। लोम्नम् २। इति जटाधरः॥ लोम्नी ३ लोत्रम् ४ लुम्पम् ५। इति शब्दरत्नावली॥

लोतः, पुं, क्ली, (लुनातीति। लू+"हविस्पशिविति।" उणा० ३। ८६। इति तन्।) नेत्रामयः। इति चिकित्साशेषः॥ चिह्नम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ लवणम्। अश्रुपातः। इति संक्षिप्तसारोणादिवृत्तिः॥

लोत्रं, क्ली, (लुनातीति। लू+"सर्व्वधातुभ्यष्ट्रन्।" उणा० ४। १५८। इति ष्ट्रन्। यद्वा, लो+"अग्रिचादिभ्य इत्रौ।" उणा० ४। १७२। इति उत्रः। इत्युज्ज्वलः।) लोतम्। इति शब्दरत्नावली॥ नेत्रजलम्। इति संक्षिप्तसारोणादिवृत्तिः॥

लोध्रः, पुं, (रुणद्धीति। रुध+अच्। रस्य लः।) खनामख्यातवृक्षः। रक्तवर्णस्य तस्य पर्य्यायः। तिरीटः २ मार्ज्जनः ३ रक्तः ४ लोध्रः ५ तिल्वकः ६। श्वेतस्य तस्य पर्य्यायः। शुक्लः २ शबरलोध्रः ३ महालोध्रः ४ शाबरः ५। इति रत्नमाला॥ अस्य गुणाः। असृक्पित्तवातनाशित्वम्। चक्षुष्यत्वम्। व्रणरोपित्वम्। सरत्वञ्च। इति राजवल्लभः॥

लोध्रः, पुं, (रुणद्धीति। रुध+बाहुलकात् रन्। रस्य लः।) लोधवृक्षः। (यथा, शिशुपालवधे। ६। ४६।

"अधरेष्वलक्तकरसः सुदृशां
विगृहं कपोलसुषि लोध्ररजः।
नवमञ्जनं नयनपङ्कजयो-
र्विभिदे न मूहुरनिद्रितात् प्रयसः॥")

तत्पर्य्यायः। गालवः २ शाबरः ३ तिरीटः ४ तिल्वः ५ मार्ज्जनः ६। इत्यमरः॥ षट् लोध्रभेदे लोध्र इति ख्याते। षट् श्वेतलोध्रे इति सुभूतिः॥ आद्यपादः श्वेतलोध्रे श्रेष्ठो रक्तलोध्र इति स्वामी॥ तस्य पर्य्यायान्तरं यथा। लोध्रः ७ भिल्लतरुः ८ तिल्वकः ९ काण्डकीलकः १० लोध्रकवृक्षः ११ शुभ्रवरः १२ हस्तिरोधकः १३ तिलकः १४ काण्डनीलकः १५ क्षेमपुष्पकः १६ भिल्लो १७ शाबरकः १८। अस्य गुणाः। कषायत्वम्। शीतत्वम्। वातकफासनाशित्वम्। चक्षुष्यत्वम्। विषघ्नत्वम्। तत्र विशिष्टो वल्कलोध्रकः। इति राजनिर्घण्टः॥ अपि च।

"लोध्रस्तिक्तस्तिरीटश्च शाबरो गालवस्तथा।
द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः॥
जीर्णपत्रो दृढत्वक्च पट्टीलाक्षाप्रसादनः।
लोध्रो ग्राही लघुः शीतश्चक्षुष्यः कफपित्तजित्।
कषायो रक्तपित्तास्रग्वातातीसारशोथहृत्॥"

इति भावप्रकाशः॥

(तथा च।

"तिल्वकस्तु मतो लोध्रो दृढत्वक्तिरीटकः।
तस्य मूलत्वचं शुष्कामम्लवेल्लसवर्ज्जिताम्॥
चूर्णयेत्तु त्रिधा कृत्वा द्वौ भागौ शीतलेन्ततः।
लोध्रस्त्वेव कषायेण तृतीयं तेन भावयेत्॥
भागं तं दुग्धलस्य पुनः क्वाथेन भावयेत्।
शुष्कं चूर्णं पुनः कृत्वा तत ऊर्द्धं प्रयोजयेत्॥
दधितक्रसुरामद्यमैरेयैरक्षीधुना।
रसेनामलकानां वा ततः पानितलं पिबेत्॥"
"सुरां लोध्रकषायेण जातां पक्वस्थितां पिबेत्॥"

इति चरके कल्पस्थाने नवमेऽध्याये।)

लोध्रकट्वचः, पुं, (लोध्र एव लोध्रकः। स एव वृक्षः।) लोधः। इति राजनिर्घण्टः॥

लोपः, पुं, क्ली, (लुप्यतेऽनेनेति। लुप+करणे घञ्।) आकुलीभावः। लुप्यधातोर्भावे घञ्प्रत्ययेन निष्पन्नोऽयम्। (अभावः। यथा, रघुः। १। ६८।

"सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः॥")

व्याकरणमते वर्णनाशः। तथा हि। नाशविधिर्यथा। लोपोऽशोमाडोरित्यादि। अपि च।

"सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा।
लोपखरादेशयोस्तु खरादेशो विधिर्बली॥"

इति दुर्गादासः॥

लोपा, स्त्री, अगस्त्यमुनिपत्नी। इति जटाधरः॥

लोपाकः, पुं, (लोपं श्रीघ्रमदर्शनं अकति प्राप्नोतीति। अक्+अच्।) शृगालः। इति त्रिकाण्डशेषः॥ (यथा, सुश्रुते। १। ४६।

"श्वाविच्छल्यकगोधाग्रशृकरदंशलोपाकलोमशकर्कटकलीन्द्रगव्रियकाजगरसर्पमूषिकनकुलमहावभ्रुप्रभृतयो विलेशयाः॥")

लोपाकः, पुं, (लोपं हतमदर्शनं आप्नोतीति। आप्+खुल्।) शृगालः। इति शब्दमाला॥

लोपाकिका, स्त्री, (लोपाक+स्त्रियां टाप्। अत इत्वम्।) शृगाली। इति शब्दमाला॥

लोपामुद्रा, स्त्री, अगस्त्यमुनिभार्य्या। इत्यमरः॥ लोपयति योषितां रूपाभिधानमिति लोपा पश्चात्तं आमुद्रयति मुष्णातीति आमुद्रा अन् ततः कर्म्मधारयः। किंवा न मुद्रं राति आमुद्रा पतिमुखाभाया लोपे अमुद्रा लोपामुद्रा। लोपा च।

"लोपामुद्रा तु वेदर्भौ लोपा स्त्री कुम्भजन्मनः।"

इति कल्पभूरुहम्। इति भरतः॥*॥

अस्या अर्घ्यदानप्रसङ्गेन अगस्त्यार्घ्यदानं लिख्यते। अगस्त्यार्घ्यदानन्तु सौरेश्च शिवरात्रौ विधानात्। यथा, ब्रह्मवैवर्त्ते।

"अप्राप्ते भास्करे कन्यां ग्रेयभूतेस्त्रिभिर्दिनैः।
अर्घ्यं दद्याद्गरुत्थाय गौड़देशनिवासिनः॥"

नारसिंहे।

"शुद्धे तोयं विनिक्षिप्य सितपुष्पाक्षतैर्युतम्।
मन्त्रेणानेन वै दद्यादृश्चिभाग्रासुखस्थितः॥
काशपुष्पप्रतीकाश अग्निमारुतसम्भव।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते॥"

प्रार्थनन्तु।

"आतापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु॥"

गन्धादिकन्तु अगस्त्याय नम इत्यनेन देयं विशेषाशुद्धौ सामान्यतः प्राप्तत्वात्।

दृश्चिकाग्रासुखस्थित इति गन्धादावपि प्रयोगाङ्गकर्तृधर्म्मैवादिति रत्नाकरः॥*॥

तत्पत्न्यर्घ्यदानमन्त्रस्तु।

"लोपामुद्रे महाभागे राजपुत्रि पतिव्रते।
यद्दत्तार्घ्यं मया दत्तं मैत्रावरुणिवल्लभे॥"

इति मन्त्रमाहतत्त्वम्॥

(अस्या जन्मादिविवरणन्तु महाभारते वनपर्व्वणि ६६ अध्यायमारभ्य द्रष्टव्यम्।)

लोपामुद्रापतिः, पुं, (लोपामुद्रायाः पतिः।) अगस्त्यमुनिः। इति पुराणम्।

लोपाशकः, पुं, (लोपं चाकुलीभावं चकितमश्नाति। अश् + ण्वुल्।) शृगालः। इति हारावली।

लोपाशिका, स्त्री, (लोपाशक + स्त्रियां टाप्। अत इत्वम्।) शृगाली। इति हारावली। १०२।

लोभ्रं, क्ली, (लुभ् + रन्।) लोध्रधनम्। लोतम्। इत्यमरः। (यथा, महाभारते। १।१०७।५।

"ते तस्यावसथे लोभ्रं दृष्ट्वा कुरुवरोत्तम!।
निधाय च भयात्तीक्ष्णान्येवागच्छते वने।")

लोभ्री, स्त्री, (लोभ्र + स्त्रियां ङीष्।) लोभ्रम्। इति शब्दरत्नावली।

लोभः, पुं, (लुभ् + घञ्।) आकाङ्क्षा। परद्रव्याभिलाषः। तत्पर्य्यायः। इच्छा २ निच्छा ३ वाञ्छा ४ गृद्धा ५ काङ्क्षा ६ गृंसा ७ गर्द्धः ८ वाञ्छा ९ इच्छा १० लट् ११ मनोरथः १२ कामः १३ अभिलाषः १४। इति हेमचन्द्रः।७।

तस्य लक्षणं यथा,—

"परवित्तादिकं दृष्ट्वा नेतुं यो हृदि जायते।
अभिलाषो द्विजश्रेष्ठ स लोभः परिकीर्त्तितः।"

इति मात्स्ये क्रियायोगसारे १६ अध्यायः।७।

स च ब्रह्मणोऽधराज्जातः। यथा,—

"भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः।"

इति मात्स्ये सृष्ट्युत्पत्तिर्नाम ३ अध्यायः।७।

स तु नाशकारणं यथा,—

"लोभप्रमादविश्वासैः पुरुषो बध्यते चिभिः।
तस्माल्लोभो न कर्त्तव्यः प्रमादो नैव विश्वसेत्।"

इति गारुडे नीतिसारे ११५ अध्यायः।

अपि च।

"त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।"

इति श्रीभगवद्गीतायाम् १६ अध्यायः।

(लोभनिन्दाविषयकश्लोकानि यथा,—

"लोभः प्रतिष्ठा पापस्य प्रकृतिर्लोभ एव च।
देवक्रोधादिजनको लोभः पापस्य कारणम्।
लोभात् क्रोधः प्रभवति लोभात्कामः प्रजायते।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम्।
लोभात् क्रोधः प्रभवति क्रोधाद्द्वेषः प्रवर्त्तते।
द्वेषेण नरकं याति ब्राह्मणोऽपि विचक्षणः।
मातरं पितरं पुत्रं भ्रातरं वा सुहृत्तमम्।
लोभाविष्टो नरो हन्ति स्वामिनं वा महोदरम्।
लोभेन बुद्धिश्चलति लोभो जनयते तृषाम्।
तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः।
लोभाविष्टो नरो वित्तं वीक्षते न स चापदम्।
दुर्गं पश्यति भार्य्यारो यथा न जगुडादृतिम्।
प्रायेण धनिनामेव धनलोभो निरन्तरम्।
पश्य कोटिद्वयोपेतं लक्षाय प्रयतं धनुः।
नात्यर्थमर्थार्थितया लुब्धसुदेजयेज्जनम्।
अस्थिदेत्वाश्चरन्तं क्रौर्य्यमाणोऽहजद्दिवम्।
लोभः सदा विचिन्त्यो लुब्धेभ्यः सर्व्वतो भयं दृढम्।
कार्य्याकार्य्यविचारो लोभविमूढस्य नास्त्येव।
सत्यप्रशमतपोभिः प्रच्यवनैः प्राज्ञवेदिभिर्विवर्जितः।
लोभो वत प्रविष्टः कुटिलं हृदयं किरातीनाम्।
क्षेत्रोपपन्न इति पूर्व्वदग्राविशेषज्ञाली स्वमात्मनि वसुप्रकरं निधाय।
लब्धोदये तमथ यच्छति पद्मबन्धौ
दीपा भवन्ति कलुषा बलवान् हि लोभः।
यद्दुर्गमाटवीमटन्ति विकटं क्रामन्ति देशान्तरं
गाहन्ते गहनं समुद्रमथनक्लेशं क्षिपं कुर्व्वते।
सेवन्ते नृपतिं गजघटासङ्घट्टदुःसञ्चरं
सर्व्वन्ति प्रधनं धनान्वितधियश्चलोभविस्फूर्ज्जितम्।" *।)

लोभी, [न्] त्रि, (लोभोऽस्यास्तीति। लोभ + इनिः।) लोभयुक्तः। तत्पर्य्यायः। लुभुः २ गर्द्धनः ३ लुब्धः ४ अभिलाषुकः ५ इच्छकः ६ लोलुपः ७ लोलुभः ८। इति जटाधरः। लिप्सुः ९। इति हेमचन्द्रः।

लोभ्यः, पुं, (लुभ्यते इति। लुभ + यत्।) सुहृत्। इति हेमचन्द्रः। लोभनीये, त्रि।

लोम, [न्] क्ली, (लूयते छिद्यते इति। लू + "नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्धाम्नः।" उणा० ४। १५०। इति मनिन्प्रत्ययेन साधुः।) शरीरस्थकेशः। तत्पर्य्यायः। तनूरुहम् २ रोम ३। इत्यमरः। तनुरुहम् ४ तनुरुट् ५। इति शब्दरत्नावली। (यथा, सुश्रुते शारीरस्थाने। १। १। ७।

"यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम्।")

तत्तु गर्भस्थस्य षष्ठे मासि भवति। इति सुखबोधः। अपि च।

"षष्ठे मासि च नारीणां वैदिके माधिकास्तिका।
उदरस्थस्य बालस्य नखलोमप्रवर्त्तनात्।"

इति स्मृतिः।

(तथास्य विवृतिः।

"अस्थो मलानि लोमानि असङ्ख्यानि भवन्ति हि।
सन्ति यावन्ति लोमानि तावन्तो लोमकूपकाः।
अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते।
सन्निवेशश्च मात्राणां नाम्नि ते कारणान्तरम्।"

निर्वृत्तिः सिद्धिः स्वभावात् ईश्वरात्। सन्निवेशो रचनाविशेषः। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

लोमं, क्ली, लाङ्गूलम्। इति जटाधरः। (रोम। यथा, तैत्तिरीयसंहितायाम्। ५। २। ६। २।

"अथो ग्रन्थायाजलोमैः संदंशलेवा वा अग्नेः प्रिया तनूर्यदजेति।")

लोमकरणी, स्त्री, मांसच्छदा। इति राजनिर्घण्टः।

लोमकर्णः, पुं, (लोमयुक्तौ कर्णौ यस्य।) शूकरः। इति हेमचन्द्रः। (अस्य पर्य्यायो यथा,—

"लम्बकर्णः शूकरः शूली लोमकर्णो विशेषयः।"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।)

लोमयुक्तकर्णविशिष्टे, त्रि।

लोमघ्नं, क्ली, (लोमानि हन्तीति। हन + टक्।) इन्द्रलुप्तकम्। इति भूरिप्रयोगः। टाक इति भाषा। लोमघातके, त्रि।

लोमपादः, पुं, (लोमानि पादयोर्यस्य।) अङ्गदेशीयराजविशेषः। स तु ऋष्यशृङ्गमुनिश्वशुरः। इति रामायणम्। (अयं हि सूर्य्यपुत्रावंशस्य दशरथस्य सखा। विप्रावमानजात एवास्य राष्ट्रे बहुकालं अवर्षणः सम्भूय तत एवासौ काश्यपं ऋष्यशृङ्गं स्वराष्ट्रे आनीय शान्तां नाम दशरथकन्यामस्मै दत्तवान्। एतदृत्तान्तन्तु महाभारते वनपर्व्वणि ११० अध्यायतो विशेषतो द्रष्टव्यम्।)

लोमपादपुः, स्त्री, (लोमपादस्य पुः।) पुरीविशेषः। अधुना भागलपुर इति ख्याता। तत्पर्य्यायः। चम्पा २ मालिनी ३ कर्णपुः ४। इति हेमचन्द्रः।

लोमफलं, क्ली, (लोमयुक्तं फलम्।) भयम्। इति राजनिर्घण्टः।

लोमविषः, पुं, (लोम्नि विषं यस्य।) व्याघ्रादिः। इति हेमचन्द्रः।

लोमशः, पुं, (लोमानि सन्त्यस्येति। लोमन् + "लोमादिभ्यः शः।" इति शः।) मुनिविशेषः। (मुनिवरोऽयं तीर्थगमनाभिलाषिणः सानुजस्य युधिष्ठिरस्यानुगामी सर्व्वतीर्थवृत्तान्तमस्मै विज्ञापयामासेति महाभारते वनपर्व्वणि द्रष्टव्यम्।*।)

मेषः। अतिलोमान्विते, त्रि। इति मेदिनी। शे, २७। यथा,—

"कदाचिद्गुरो स्वर्गः कदाचिल्लोमशः सुखी।"

इति सासुद्रकम्।

(धान्यापहरणरूपकर्म्मविपाकात् लोमशो भवति। यथा, महाभारते। १३। १११। ११६।

"धान्यं हृत्वा तु पुरुषो लोमशः संप्रजायते।")

लोमशकाक्षा, स्त्री, (लोमशः काक्षो यस्याः।) कर्कटी। इति राजनिर्घण्टः। (कर्कटीशब्दे ऽस्या गुणादयो ज्ञातव्याः।)

लोमशपर्णिनी, स्त्री, (लोमशं पर्णमस्त्यस्या इति। इनि। ङीप्।) माषपर्णी। इति शब्दचन्द्रिका।

लोमशपुष्पकः, पुं, (लोमशानि पुष्पाणि यस्य। कप्।) शिरीषवृक्षः। इति राजनिर्घण्टः।

लोमशमार्ज्जारः, पुं, (लोमशो लोमबहुलो मार्ज्जारः।) मार्ज्जारविशेषः। गन्धगकुला

इति भाषा। तत्पर्य्यायः। पूतिकः २ मारजातकः ३ सुगन्धी ४ मूत्रपातनः ५ गन्धमार्ज्जारकः ६। इति राजनिर्घण्टः॥ अस्य गुणाः।

"गन्धमार्ज्जारवीर्य्यन्तु वीर्य्यकृत् कफवातहृत्।
कण्डुकोष्ठहरं नेत्र्यं सुगन्धं खेदगन्धनुत्॥"

इति भावप्रकाशः॥

लोमशा, स्त्री, (लोमानि सन्त्यस्या इति। लोमन्+श। टाप्।) काकजङ्घा। मांसी। (अस्याः पर्य्यायो यथा,—

"नलदं नन्दिनी पेषी मांसी लक्ष्मणटा जटी।
किरातिनी च जटिला लोमशा तु तपस्विनी॥"

इति वैद्यकरत्नमालायाम्॥)

वचा। (अस्याः पर्य्यायो यथा,—

"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

शूकशिम्बिः। महामेदा। कासीसम्। ग्राकिनीभेदः। इति मेदिनी। शे, २०॥ अतिबला। इति विश्वः॥ गुरुपुष्पी। एर्व्वारुः। गन्धमांसी। इति राजनिर्घण्टः॥

लोमशातनं, क्ली, (लोम्नां शातनम्।) लोमशातनम्। तस्यौषधानि यथा,—

"हरितालं गृहधूमं कदलीदलभस्मना।
एतद्द्वयेन चोद्वर्त्तं लोमशातनमुत्तमम्॥
लवणं हरितालञ्च तक्रुल्याश्च फलानि च।
लाचारसमायुक्तं लोमशातनमुत्तमम्॥
सुधा च हरितालञ्च गृहधूमेन मर्द्दितम्।
सैन्धवेन सहैकत्र क्षागमूत्रेण पेषयेत्।
तत्क्षणोद्वर्त्तनादेव लोमशातनमुत्तमम्॥"

इति गारुडे १८५ अध्यायः॥

(तथाच।

"भल्लातकं विड्ङ्गञ्च यवक्षारञ्च सैन्धवम्।
मनःशिला गृहधूमं तैलपक्वं तथैव च।
लोमानि शातयत्येव नात्र कार्य्या विचारणा॥"

इति वैद्यके भैषज्यधन्वन्तरौ वश्यीकरणाद्यधिकारे॥ *॥)

लोमहर्षणं, क्ली, (लोम्नां हर्षणमिव।) रोमाञ्चः। इत्यमरः॥ (लोम्नां हर्षणमस्मादिति। रोमाञ्चकारके, त्रि। यथा, महाभारते। ६।६०।१३।

"तस्मिन् महाभये घोरे तुमुले लोमहर्षणे।
ववर्षुः शरजालानि क्षत्रिया युद्धदुर्म्मदाः॥")

लोमहर्षणः, पुं, (विचित्रपुराणकथाश्रवणात् लोम्नां हर्षणं उद्गमो यस्मात्।) सूतः। यथा,

"पुराणसंहितां चक्रे पुराणार्थविशारदः।
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै लोमहर्षणः॥
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः॥"

इति विष्णुपुराणे ३ अंशे ७ अध्यायः॥ *॥

स च बलरामेण हतः। यथा,—

"तथा क्षेत्रे सुतपुत्रो निहतो लोमहर्षणः।
बलरामाश्रयुक्तात्मा नैमिषेऽभूत् स्ववाञ्छया॥"

इति कल्किपुराणे २० अध्यायः॥

लोमहृत्, पुं, (लोमानि हरति नाशयतीति। हृ+क्विप्।) हरितालम्। इति हेमचन्द्रः॥

लोमालिका, स्त्री, (लोमाल्या लोमश्रेण्या कायतीति। के+कः। टाप्।) शूगालिका। यथा,—

"लोमालिका दीर्घजिह्वा किंशिरुल्कासुखी च सा॥"

इति त्रिकाण्डशेषः॥

लोलः, त्रि, (लोड़तीति। लुड़ विलोड़ने+अच्।) चपलः। (यथा, साहित्यदर्पणे ३ परिच्छेदे। १४९।

"पल्लवोपमितिसाम्यसपर्य्यं
दृष्टवल्लधरबिम्बमधीष्टे।
पर्य्यकूजि सरलेव तरुण्या-
स्तारलोलवलयेन करेण॥")

साकाङ्क्षः। इत्यमरः॥ (यथा, रघुः। ७।२३।

"श्रीयन्त्रणामानशिरे मनोज्ञा-
मन्योन्यलोलानि विलोचनानि॥"

पुं, तामसमनुः। इति मार्कण्डेयपुराणम्। ७४। ४१॥)

लोला, स्त्री, (लोल+टाप्।) जिह्वा। लक्ष्मीः। इति मेदिनी। ले, ४०॥ चपला स्त्री च। (यथा, आर्य्यासप्तशत्याम्। ६०८।

"सर्व्वाङ्गमर्पयन्ती लोला सुखं अमेव गृह्णायाम्।
अलसमपि भाग्यवन्तं भजते पुरुषायितेव श्रीः॥"

चतुर्दशाक्षरवृत्तविशेषः। इति छन्दोमञ्जरी॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥)

लोलार्कः, पुं, (लोलनामा अर्कः।) सूर्य्यः। यथा,

पुलस्त्य उवाच।

"ततः सुकेशिवचनात् सर्व्व एव निशाचराः।
तेनोदितन्तु ते धर्म्मं चक्रुर्मुदितमानसाः॥
ततः प्रहृष्टं सुतरामगच्छन्त निशाचराः।
पुत्रपौत्रार्थसंयुक्ताः सदाचारसमन्विताः॥
तज्ज्योतिस्तेजसा तेषां राक्षसानां महात्मनाम्।
गन्तुं नाशक्नुवन् सूर्य्यो नक्षत्राणि च चन्द्रमाः॥
ततस्त्रिभुवनं ब्रह्मन् निशाचरपुरोऽभवत्।
दिवा सूर्य्येण सदृशः शश्वदायाच्च चन्द्रवत्॥
ततः क्रोधाभिभूतेन भानुना विप्रमेदिभिः।
भानुभौ राक्षसपुरं तद्दृष्टञ्च यथेच्छया॥
तच्चक्षुषा तदा दृष्टं क्रोधाभातेन चक्षुषा।
निपपाताम्बरादुग्रः शीघ्रपुष्प इव ग्रहः॥
पतमानं समालोक्य पुरं ग्राहकुटङ्कटः।
नमो भवाय सर्व्वाय इदमुच्चैरधीयत॥
तेषां क्रन्दितमाकर्ण्य चारणा गगनेचराः।
हाहेत्युचुक्रुशुः सर्व्वे हरभक्ताः पतत्त्रसौ॥
तच्चारणवचः श्रुत्वा श्रुतवान् सर्व्वतोऽच्युतः।
श्रुत्वा स चिन्तयामास केनाशौ पात्यते भुवि॥
ज्ञातवान् देवपतिना सहस्रकिरणेन तत्।
पातितं राक्षसपुरं ततः क्रुद्धस्त्रिलोचनः॥
क्रुद्धस्तु भगवान् दृग्भिर्भानुमन्तमपश्यत।
दृष्टमात्रस्त्रिनेत्रेण निपपात ततोऽम्बरात्॥
ततो ब्रह्मा सुरपतिः सुरैः सार्द्धं समभ्ययात्।
रम्यं महेश्वरावासं मन्दरं रविकारणात्॥
गत्वा दृष्ट्वा च देवेशं शूलपाणिनम्।
प्रसाद्य भास्करार्थाय वाराणस्यासुपानयत्॥
ततो दिवाकरं भूयः पाणिनादाय शङ्करः।
क्षिप्त्वा नासास्य लोलेति रथमारोपयत् पुनः॥
आरोपिते दिनकरे ब्रह्माभ्येत्य सुकेशिनम्।
सबान्धवं सनगरं पुनरारोपयद्दिवि॥"

इति श्रीवामनपुराणे सुकेशिचरिते लोलार्कजननं नाम ९५ अध्यायः॥

लोलिका, स्त्री, (लोलतीति। लुल+ण्वुल्। टापि अत इत्वम्।) चाङ्गेरी। यथा,—

"क्षुद्रा दन्तशठाम्लिका चाङ्गेरी लोलिका च सा॥"

इति जटाधरः॥

लोलितः, त्रि, स्रस्तः। झोला इति भाषा। लुल विमर्हे अस्माद्भावे क्तनि लोलः सोऽस्य जातः इतर्थे इतप्रत्ययेन निष्पन्नः॥

लोलुपः, त्रि, (गर्हितं लुभ्यतीति। लुभ+यङ्+अच्।) अतिलुब्धः। इत्यमरः॥ (यथा, माघे। १। ४०।

"तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः॥")

लोलुभः, त्रि, (भृशं लुभ्यतीति। लुभ+यङ्+अच्।) लोलुपः। इत्यमरः॥ (यथा, कथासरित्सागरे। ११०। ४६।

"स्त्रियोऽपीच्छन्ति पुंभावं यं दृष्ट्वा रूपलोलुभाः।
तस्यास्ते को भवेन्नार्थी तुल्यरूपः स किं पुनः॥")

लोष्ट, ड संहतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ड, लोष्टते धान्यं लोकः। इति दुर्गादासः॥

लोष्टं, क्ली, (लोष्टते इति। लोष्ट+अच्।) लौहमलम्। इति राजनिर्घण्टः॥ लेष्टुः। इत्यमरः॥

लोष्टः, पुं क्ली, (लोष्टते इति। लोष्ट+घञ्। यद्वा, लूयते इति। लू+"लोष्टपलितौ।" उणा० ३। ६२। इति क्तप्रत्ययेन निपातितः।) मृत्तिकाखण्डम्। ढेला इति भाषा। तत्पर्य्यायः। लोष्टुः २। इति शब्दरत्नावली अमरश्च। लोष्टुः ३ दलिः ४। इति हेमचन्द्रः॥ (यथा, वेतालपञ्चविंशत्याम्। १।

"अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित्पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः॥")

लोष्टघ्नः, पुं, (लोष्टं हन्त्यनेन। हन+टक्।) लेष्टुभेदः। इत्यमरटीकायां भरतः॥

लोष्टभेदनः, पुं, (भिनत्तीति। भिद्+ल्युः। लोष्टस्य भेदनः।) लोष्टभङ्गसाधनमुद्गरः। मर इति ख्याते इति केचित्। तत्पर्य्यायः। लेष्टुभेदनः २ लोष्टघ्नः ३ लेष्टुघ्नः ४ कोटिघ्नः ५ कोटीघ्नः ६। इत्यमरटीका॥

लोष्टुः, पुं, लोष्टः। इति हेमचन्द्रः॥

लोहं, क्ली, अगुरु। इत्यमरः। (अथास्य पर्य्यायः।
"अगुरुप्रवरं लोहं राजार्हं योगजन्तथा।
वंशिकं क्रिमिजं वापि क्रिमिजग्धमनार्यकम्।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

लोहः, पुं क्ली, (लूयतेऽनेनेति। लू+बाहुलकात् हः।) लौहम्। लोहकम्। सर्व्वतेजसम्। इति मेदिनी। हे, ८। रुधिरम्। इति राजनिर्घण्टः।

अथ सुवर्णलोहस्य पर्य्यायः। सुवर्णम् २ सुवर्णायसम् ३ हयत्वसारम् ४ शिलाजतुजम् ५ अग्नजम् ६ हरिलोहम् ७ आरम् ८ हेमायसम् ९।

अथ तीक्ष्णलोहस्य पर्य्यायः। तीक्ष्णम् २ शस्त्रायसम् ३ शस्त्रम् ४ पिण्डम् ५ पिण्डायसम् ६ मृदुम् ७ आयसम् ८ निशितम् ९ तीव्रम् १० खड्गम् ११ सुवर्णजम् १२ अयः १३ चित्रायसम् १४ चोनजम् १५। अस्य गुणाः। रूक्षत्वम्। उष्णत्वम्। तिक्तत्वम्। वातपित्तकफप्रमेहपाण्डुव्रणनाशित्वम्। तीक्ष्णत्वम्। सुवर्णाधिकगुणत्वञ्च। इति राजनिर्घण्टः॥ *॥

अथ लोहस्योत्पत्तिनामगुणाः।
"पुरा लोमिलदैत्यानां निहतानां सुरैर्युधि।
उत्पन्नानि शरीरेभ्यो लोहानि विविधानि च॥
लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी।
गुरुता दृढ़लोहकपदार्थस्य कारिता।
अग्निदोषः सुदुर्गन्धो दोषाः सप्तायसस्य तु॥
लोहं तिक्तरसं शीतं मधुरं तुवरं गुरु।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्॥
कफं पित्तं गरं शूलं शोथार्शःशीहपाण्डुताः।
मेदोमेहकृमीन् कुष्ठं तत्किट्टं तद्वदेव हि॥
यत्कृत्यकुठामयन्त्वकारि
कुष्ठोगशूलौ कुरुतेऽक्षरीच।
नानारजाद्यापि तथा प्रकोपं
करोति कुष्ठासमशुद्धलोहम्॥
जीवहारि मदकारि चायसं
चेदशुद्धिमदसंस्कृतं ध्रुवम्।
पाटवं न तनुते शरीरके
दारुणं कुरुते रुजाञ्च यच्छति॥"*॥

तत्र सारलोहस्य लक्षणं गुणाश्च।
"चमाभश्छिखराकाराश्यङ्गान्यस्मिन् वेधिते।
लोहे स्फुरति तत्सारमभिधीयते॥
लोहं सारासयं हन्यादग्निदोषमतिसारकम्।
अर्हसञ्चारुजं वातं शूलञ्च परिणामजम्।
कृच्छ्रेण पीनसं पित्तं चासमानु व्यपोहति॥"

अथ कान्तलोहस्य लक्षणं गुणाश्च।
"यत्पात्रे न प्रसरति जले तेजबिन्दुः प्रतप्ते
द्विर्द्वुर्गन्धं त्यजति च निजं तिक्तनां निम्बकन्दः।
तप्तं दुग्धं भवति शिखराकारकं नेति भूमिं
लक्षाङ्गः स्यात् बलसचयकः कान्तलोहं तदुक्तम्॥
गुल्मोदरार्शःशूलाममामवातं भगन्दरम्।
कामलाप्लीहयकृद्रोगान् सर्व्वं कान्तमयो जयेत्॥
लौहानमन्यपित्तञ्च यत्किञ्चापि शिरोरुजम्।
सर्व्वानोगान् विजयते कान्तलोहं न संशयः।
बलं वीर्य्यं वपुःपुष्टिं कुरुतेऽग्निं विवर्द्धयेत्॥"

अथ किट्टी।
"भ्रायमानस्य लोहस्य मलं मण्डूरमुच्यते।
लोहसिंहानिका किट्टी सिंहानश्च निगद्यते॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्॥"

अथ लोहस्यामुद्धस्य दोषमाह।
"यत्कृत्यकुठामयन्त्वकारि
कुष्ठोगशूलौ कुरुतेऽक्षरीच।
नानारजाद्यापि तथा प्रकोपं
कुर्य्याच्च कुष्ठासमशुद्धलोहम्॥"

अथ लोहस्य दोषघ्नान्यौषधान्यभिधीयते।
"पत्तलीकृतपत्राणि लोहस्यार्य्यो प्रतापयेत्।
निषिक्तेष्वम्लतक्रेषु तैले तक्रे च कांजिके॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा।
एवं लोहस्य पत्राणां विशुद्धिः संप्रजायते॥"

अथ लोहस्य मारणविधिः।
"शुद्धलोहभवं चूर्णं पातालगरुडीरसैः।
मर्द्दयित्वा पुटेदग्नौ दद्यादेवं पुटद्वयम्॥
पुटत्रयं कुमार्य्याश्च कुठारच्छिल्लिकारसैः।
पुटषट्कं ततो दद्यादेवं तीक्ष्णन्तदिभवेत्॥"

अन्यच्च।
"त्रिपेद्दादशमांशेन दरदं तीक्ष्णचूर्णतः।
मर्द्दयेत् कन्यकाद्रावैर्यामयुग्मं ततः पुटेत्॥
एवं सप्तपुटैर्मृतं लोहचूर्णमवाप्नुयात्॥
सत्योऽनुभूतो योगोऽयं क्रमोऽन्यो लोहमारणे।
कथ्यते रामराजेन कौतूहलधियाधुना॥
खतकाद्विगुणं गन्धं दत्त्वा कुर्य्याच्च कज्जलीम्।
द्वयोः समं लौहचूर्णं मर्द्दयेत् कन्यकाद्रवैः॥
यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके।
धर्म्मे धृत्वा रूक्षकस्य पत्रैराच्छादयेद्बुधः॥
यामद्वयाद्वेदुखं धान्यराशौ न्यसेत्ततः।
दग्धोपरि शरावञ्च त्रिदिनान्ते समुद्धरेत्॥
पिष्ट्वा च मालयेद्दग्धादेवं वारितरं भवेत्।
दाडिमस्य दलं पिष्ट्वा तचतुर्गुणवारिणा॥
तप्तसेनायसचूर्णं सप्तीयात् शावयेदपि।
आतपे शोषयेत्तच्च पुटेदेव पुनः पुनः।
एकविंशतिवारैस्तत्त्रियते नात्र संशयः।
एवं सर्व्वाणि लोहानि सर्व्वरोग्यपि मारयेत्॥"

एवं मारितलोहस्य गुणाः।
"लोहं तिक्तं सरं शीतं कषायं मधुरं गुरु।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्॥
कफं पित्तं गरं शूलं शोथार्शःशीहपाण्डुताः।
मेदोमेहकृमीन् कुष्ठं तत्किट्टं तद्वदेव हि॥
गुल्मामेकां समारभ्य यावत् खुर्णवरक्षिकाः।
तावल्लोहं समश्नीयाद्दृष्ट्वादोषानयं नरः॥
कुल्माषं तिलतैलञ्च मांसान्नं रात्रिकान्तथा।
मद्यमन्दरसञ्चैव वर्जयेल्लोहसेवकः॥"

इति भावप्रकाशः।

लोहपात्रे भक्षणनिषेधो यथा,—
"यदा तु आयसे पात्रे पक्वमन्नाति वै द्विजः।
स पापिष्ठोऽपि शुद्धोऽन्नं रौरवे परिपच्यते॥"

इति मत्स्यसूक्ततन्त्रम्॥

अपि च।
"अयःपात्रे पयःपानं गव्यं सिद्धान्नमेव च।
भक्षादिकं मधु गुडं नारिकेलोदकन्तथा॥
फलं मूलञ्च यत्किञ्चिदभक्ष्यं मुनिरब्रवीत्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥

(अस्यैव उत्पत्तिः श्रूयते। यथा, मनुः। ६। ३२१।
"अद्भ्योऽग्निस्तेजसः चत्रमश्मनो लोहसुत्थितम्।
तेषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति॥"

पुं, ह्रागः। स तु लक्षणान्वितः लक्षणवर्णो रक्तवर्णो वा। यथा, मनुः। ३। २७२।
"कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्पन्ते सुन्यन्नानि च सर्व्वशः॥"

पार्व्वतजातिविशेषः। यथा, महाभारते। २। २७। २५।
"लोहान् परमकाम्बोजादधिकानुत्तरानपि।
सहितांस्तान् महाराज जयत्यु याक-
शासनिः॥"

रक्तवर्णे, त्रि। यथा, महाभारते। ७। १३६। २३।
"भ्रमतश्च वराहस्य लोहस्य प्रमुखे सदम्।
यश्चवाणान् सुसंयुक्तान् स सुमोचैकबाणवत्॥")

लोहकण्टकः, पुं, (लोहवत् कण्टकं यत्र।) मदनवृक्षः। इति शब्दचन्द्रिका। लौहमयकण्टकश्च। (यथा, आर्य्यासप्तशत्याम्। ४७६।
"सन्ति लोहकण्टकनिभस्तथा तथा मदन-
विग्रिक्षोऽपि।")

लोहकान्तं, क्ली, (लोहः कान्तोऽस्येति।) अयस्कान्तम्। इति राजनिर्घण्टः॥

लोहकारः, पुं, (लोहं लोहमयं शस्त्रादि करोतीति। लू+अण्।) लौहकारकः। इति हलायुधः॥ (यथा, गो० रामायणे। २। ६०। २३।
"प्रख्यातास्तर्म्मकाराश्च लोहकारास्तथैव च॥")

लोहकारकः, पुं, (लोहं तन्मयशस्त्रादि करोतीति। लू+ण्वुल्।) वर्णसङ्करजातिविशेषः। कामार इति भाषा। तत्पर्य्यायः। ओकारः २ इत्यमरः। लौहकारः ३ अयस्कारः ४ कर्म्मकारः ५ कर्म्मारः ६। इति भरतरभसौ॥ तस्योत्पत्तिर्यथा।
"गोपालात्तन्नवायां वै कर्म्मकारोऽप्यभूत् सुतः॥"

इति पराशरपद्धतिः॥

लोहकिट्टं, क्ली, (लोहस्य किट्टम्।) लोहमलम्। तत्पर्य्यायः। किट्टम् २ लोहचूर्णम् ३ अयोमलम् ४ लोहजम् ५ लोहचूर्णम् ६ लोहम् ७ लोहमलम् ८। (यथा, सुश्रुते। ६। ४४।
"सूचस्थितं सैन्धवसंप्रयुक्तं
मांसं पिबेदापि हि लोहकिट्टम्।")

अस्य गुणाः। मधुरत्वम्। कटुत्वम्। उष्णत्वम्। कृमिवातपित्तमूलमेहक्षूलगुल्मशोथनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"भ्रायमाणस्य लोहस्य मलं मक्षूरमुच्यते ।
लोहसिंहानिका किट्टी सिंहाणश्च निगद्यते ॥
यल्लोहं यदृगुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥"
इति भावप्रकाशः ॥

(तथास्योद्धरणादिविधिः ।
"मृतोऽर्द्धसुक्तमं किट्टं मध्वाज्यौतिषार्षिकम् ।
अधमं षष्टिवर्षोर्यं ततो हीनं विषोपमम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाद्यधिकारे ॥
"कुरवं पथ्याचूर्णं हिपलगन्धाश्मलोहकिट्टस्य ।
गुडरसखार्द्धपलं भृङ्गस्य रसं केशराजस्य ॥"
इति वैद्यकचक्रपाणिसंग्रहे परिणामशूलाधिकारे ॥)

लोहचूर्णं, क्ली, (लोहस्य चूर्णम् ।) लोहकिट्टम् । इति राजनिर्घण्टः ॥ (यथा, हृदृतसंहितायाम् । ७६ । ६ ।
"माक्षीकधातुमधुपारदलोहचूर्ण-
यष्ट्याह्वयाञ्जनतुविङ्गुडतानि योऽद्यात् ।
सेकादि विंशतिरहानि जरान्वितोऽपि
सोऽधीतिकोऽपि रमयत्यबलां युवेव ॥")

लोहजं, क्ली, (लोहात् जायते इति । जन् + डः ।) लोहकिट्टम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा, "मक्षूरं लोहजं किट्टम् ।" इति वैद्यकरत्नमालायाम् ॥) कांस्यम् । इति हेमचन्द्रः ॥

लोहद्रावी [न्] पुं, (लोहानि द्रावयतीति । द्रु + णिच् + णिनिः ।) टङ्कणः । इति राजनिर्घण्टः ॥ (टङ्कणगुणोऽस्य विषयो विज्ञेयः ॥)

लोहनालः, पुं, (लोहस्य नालं दण्डो यत्र ।) नाराचः । इति त्रिकाण्डशेषः ॥

लोहपृष्ठः, पुं, (लोहस्येव कठिनं श्यामलं वा पृष्ठं यस्य ।) कङ्कपक्षी । इत्यमरः ॥ लौहमयपृष्ठयुक्ते, त्रि ॥

लोहप्रतिमा, स्त्री, (लोहस्य प्रतिमा ।) लौहमयी प्रतिमा । तत्पर्य्यायः । स्नर्म्मी २ स्नुषा ३ । इत्यमरः ॥ भूर्म्मी ४ भूर्म्मिः ५ भूर्म्मः ६ । इति भरतः ॥ भूर्म्मिका ७ । इति शब्दरत्नावली ॥

लोहमयं, त्रि, लोहात्मकम् । लोहनिर्म्मितम् । लोहशब्दात् तद्वार्थे मयट्प्रत्ययेन निष्पन्नम् ॥ (यथा, छान्दोग्योपनिषदि । ६ । १ । ५ ।
"यथा सौम्येकेन लोहमणिना सर्व्वं लोहमयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् ॥")

लोहमारकः, पुं, (लोहं मारयति, म्रियतीति । मृ + णिच् + ण्वुल् ।) म्लेच्छजातिः । इति त्रिकाण्डशेषराजनिर्घण्टौ ॥

लोहलः, पुं, (लोहं लातीति । ला + कः ।) शब्दलाचार्य्यः । इति मेदिनी । ले, १२६ ॥

लोहलः, त्रि, (लोहमिव लातीति । ला + कः ।) अव्यक्तवाक् । इत्यमरः ॥ लोह्याद्यकश्च ॥

लोहवरं, क्ली, (लोहेषु सर्व्वतेजसेषु वरम् ।) स्वर्णम् । इति त्रिकाण्डशेषः ॥

लोहश्लेष्मा, पुं, (लोहानि सर्व्वतेजसानि श्लेष्मयति योजयतीति । श्लेष्मि + ल्युः ।) टङ्कणः । इति हेमचन्द्रः ॥

लोहसङ्करं, क्ली, (लोहानां सङ्करो यत्र ।) वर्म्मलोहम् । इति राजनिर्घण्टः ॥ मिश्रिततेजसच्च ॥

लोहाख्यं, क्ली, (लोहमेव आख्या यस्य ।) अगुरु । इति रत्नमाला ॥

लोहाभिसारः, पुं, (लोहानां शस्त्रादीनां अभिसारो यत्र ।) लोहाभिहारः । इत्यमरटीकायां भरतः ॥

लोहाभिहारः, पुं, (लोहानामभिहारो यत्र ।) शस्त्रभृतां राज्ञां नीराजनाविधिः । इत्यमरः ॥ महानवमीदीक्षायां अस्त्रादीनां नीराजने सति पश्चात् शस्त्रधारिणां राज्ञां यः शास्त्रोक्तो निर्म्मञ्छनप्रधानो विधिः प्रस्थानात् प्राक् स लोहाभिहारः । लोहस्य शस्त्रस्य अभिहारः सर्व्वतो हरणमत्रेति बहुव्रीहिः । लोहाभिहार इत्युक्तो विधिर्नीराजनोत्तर इत्यमरमाला ॥ लोहोऽस्त्री शस्त्रके लौहे इति मेदिनी । लोहाभिसार इति पठन्त्यन्ये तत्र लोहं शस्त्रं अभिसार्य्यते प्रस्थाप्यतेऽत्रेति घञ् बाहनायुधादेर्निःशेषेण राजनं यत्र सा नीराजना नीरस्य शान्त्युदकस्य अञ्जनं क्षेपो यत्र सा नीराजना वा । इति भरतः ॥

लोहार्गलं, क्ली, (लोहस्य अर्गलमिव ।) तीर्थविशेषः । यथा,—
वराह उवाच ।
"शृणु देवि च तत्रैव यत्रां त्वं परिपृच्छसि ।
गुह्यमप्यद्य वक्ष्यामि भक्तः कर्म्मजो गतिः ॥
ततः सिद्धवटे गत्वा त्रिंशद्योजनदूरतः ।
म्लेच्छमध्ये वरारोहे हिमवन्तं समाश्रितम् ॥
तत्र लोहार्गलं नाम निवासो मे विधीयते ।
गुह्याः पञ्चदशा यत्र समन्तात् पञ्चयोजनम् ॥
सुलभं पुण्ययुक्तानां मम कर्म्मानुचारिणाम् ।
तत्र तिष्ठाम्यहं भद्रे ! उदीचीं दिशमाश्रितः ॥
तत्र ब्रह्मा च रुद्रश्च स्कन्देनश्च मरुद्गणाः ।
आदित्या वसवो रुद्रा अश्विनौ च महौजसः ॥
सोमो हुताशनश्चैव ये चान्ये च दिवौकसः ।
तेषामेवार्गलं दत्त्वा चक्रं गृह्य महौजसम् ॥
ततो मे दानवाः सर्व्वे क्रमन्तो लोकसुत्तमम् ।
मया चैवान्तरं ज्ञात्वा ज्ञात्वा मायाश्च वैष्णवीम् ॥
शतकोटिसहस्राणि ग्रीवामेव निपातितम् ।
एवं लोहार्गलेत्याख्यां मे तत्र कारितम् ॥
एकधारा पतत्यत्र इन्द्रगोपकसन्निभा ।
यस्तत्र कुरुते स्नानं सप्तरात्रोषितो नरः ॥
ब्रह्मलोकं समासाद्य ब्रह्मणा सह मोदते ।
अथात्र मुच्यते प्राणानहङ्कारविवर्ज्जितः ॥
ब्रह्मलोकं परित्यज्य मम लोकं प्रपद्यते ।
गुह्याख्याने महाभागे चैत्रे लोहार्गले मम ॥
सिद्धिकामेन मर्त्येन गन्तव्यं नात्र संशयः ॥
एतत्ते कथितं भद्रे लोहार्गलनिवासिनः ।
माहात्म्यं पद्मपत्राक्षि गुह्यं पञ्चमहौजसम् ।
मङ्गल्यञ्च पवित्रञ्च मम भक्तसुखावहम् ॥"
इत्यादि वराहपुराणे लोहार्गलमाहात्म्यवर्णनं नामाध्यायः ॥ * ॥ लौहकीलके क्ली स्त्री च ॥

लोहि, क्ली, श्वेतटङ्कणम् । इति कश्चिद्राजनिर्घण्टः ॥

लोहिका, स्त्री, (लोहमस्त्यत्रेति । लोह + ठन् ।) लौहपात्रम् । तत्पर्य्यायः । खरलोन्दः २ खरपात्रम् ३ । इति त्रिकाण्डशेषः ॥

लोहितं, क्ली, (रुह्यते इति । रुह + "रुहेरच्च लो वा ।" उणा० ३ । ६४ । इति इतन् रस्य लत्वच्च ।) रक्तगोशीर्षम् । कुङ्कुमम् । रक्तचन्दनम् । इति मेदिनी । ते, १४७ ॥ पत्तङ्गम् । हरिचन्दनम् । हृद्यकुङ्कुमम् । रुधिरम् । इति राजनिर्घण्टः ॥ (यथा, मनुः । ४ । ५६ ।
"नाग्नौ मूत्रं पुरीषं वा क्ष्वीवनं वा समुत्सृजेत् ।
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ॥")
युद्धम् । इति हेमचन्द्रः ॥ (सरोवरविशेषः । इति मात्स्ये । १२० । १२ ॥ माणिक्यम् । तत्पर्य्यायो यथा,—
"माणिक्यं पद्मरागः स्याच्छोणरत्नञ्च लोहितम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लोहितः, पुं, (रुह + इतन् । रस्य लः ।) नदविशेषः । (सागरविशेषश्च । यथा, रामायणे । ४ । ४० । ३६ ।
"ततो रक्तजलं भीमं लोहितं नाम सागरम् ।
गत्वा प्रेक्षत ताक्ष्येव दहतीं कूटशाल्मलीम् ॥")
भौमः । (यथा, हृदृतसंहितायाम् । ६ । ८ ।
"मधेन यदि मघानां गतागतं लोहितः करोति ततः ।
पाञ्चाली नृपो विगम्यति शस्त्रोद्योगाद्भयमदृष्टिः ॥")
रक्तवर्णः । इति मेदिनी । ते, १४८ ॥ रोहितमत्स्यः । मत्स्यविशेषः । इति शब्दरत्नावली ॥ सर्पः । (यथा, महाभारते । २ । ६ । ८ ।
"वासुकिश्चक्रुधे नागश्चैरावतकुलोद्वहः ।
क्रुद्धश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान् ॥")
सुरासुरः । इति धरणिः ॥ मङ्गलः । इति शब्दचन्द्रिका ॥ रक्तालुः । रक्तशालिः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । १ । ४६ ।
"यष्टिका यवगोधूमा लोहिता ये च शालयः ।
सुगन्धकी मक्षिकाक्ष धान्येषु प्रवराः स्मृताः ॥")
बलभेदः । इति हेमचन्द्रः ॥ (वर्णसविशेषः । इति मात्स्ये । १२० । ११ ॥ कुमुदोपक्षवर्णविशेषः । इति तत्रैव । १२६ । ६५ ॥)

लोहितः, त्रि, रक्तवर्णयुक्तः । इत्यमरः ॥ (यथा, मनुः । ५ । ६ ।
"लोहितान् दृषन्निर्य्यासान् ब्रह्मणप्रभवांश्चया ।
शेषुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत् ॥")

लोहितकं, क्ली, (लोहितमिव । इवार्थे कन् ।) रीतिः । इति राजनिर्घण्टः ॥

लोहितकः, पुं, (लोहित एव । स्वार्थे कन् ।) मङ्गलग्रहः । इति शब्दमाला ॥ पद्मरागमणिः । इति हेमचन्द्रः ॥ (यथा, माघे । १३ । ५२ ।

"लयनेषु लोहितकनिर्मिता भुवः
श्रितिरत्नरश्मिहरितीकृतान्तराः ॥"

रक्तवर्णयुक्ते, त्रि । यथा, महाभारते । २।८।३।

"नीलपीतासितश्यामैः स्थितैर्लोहितकैरपि ।
अवतानैस्तथा शुक्लैर्मञ्जरीजालधारिभिः ॥")

लोहितचन्दनं, क्ली, (लोहितं चन्दनमिव ।) कुङ्कुमम् । इत्यमरः ॥ रक्तचन्दनम् ॥ (यथा, किरातार्जुनीये । १ । ३४ ।

"परिभ्रमन् लोहितचन्दनोचितः
प्रदातिरन्तर्गिरिरेणुरुक्षितः ॥")

लोहितपुष्पकः, पुं, (लोहितं पुष्पमस्य । कप् ।) दाडिमवृक्षः । इति भावप्रकाशः ॥

लोहितमृत्तिका, स्त्री, (लोहिता मृत्तिका ।) गैरिकम् । इति रत्नमाला ॥ रक्तवर्णमृत्तिका च ॥

लोहिता, स्त्री, (लोहित + स्त्रियां टाप् ।) रागादिना रक्तवर्णा । इति जटाधरः ॥ वराहक्रान्ता । इति शब्दचन्द्रिका ॥ रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

लोहिताक्षः, पुं, (लोहिते अक्षिणी यस्य । सक्थ्यक्ष्णोः खाङ्गात् षच् ।) विष्णुः । इति शब्दमाला ॥ कोकिलः । इति शब्दचन्द्रिका ॥ रक्तवर्णचक्षुर्युक्ते, त्रि । (यथा, महाभारते । १ । ५६ । ६ ।

"यथा स्तो लोहिताक्षो महात्मा
पौराणिको वेदितवान् पुरस्तात् ॥")

लोहिताङ्गः, पुं, (लोहितमङ्गं यस्य ।) मङ्गलग्रहः । इत्यमरः ॥ (यथा, हरिवंशे । २२८।१२।

"वामे च दक्षिणे चैव स्थितौ शुक्रबृहस्पती ।
अग्नेश्वरो लोहिताङ्गो लोहिताक्षसमद्युतिः ॥")

कम्पिल्लकः । इति राजनिर्घण्टः ॥

लोहितानन: पुं, (लोहितमानमं मुखं यस्य ।) नकुलः । इति राजनिर्घण्टः ॥ रक्तवर्णमुखे, त्रि ॥

लोहितायः, [स्] क्ली, (लोहितमयः ।) ताम्रम् । इति त्रिकाण्डशेषः ॥ (विशेषोऽस्य ताम्रशब्दे विज्ञेयः ॥)

लोहितायसं, क्ली, (लोहितमायसम् ।) रक्तवर्णलोहजातिः । इति मुग्धबोधव्याकरणम् ॥

लोहिनी, स्त्री, (लोहिता + "वर्णादनुदात्तादिति ।" ४ । १ । ३९ । इति ङीप् । तकारस्य नकारादेशश्च ।) रक्तवर्णा स्त्री । यथा,—

"रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा ॥"

इति जटाधरः ॥

लोहोत्तमं, क्ली, (लोहेषु सर्व्वतेजस्सेषु उत्तमम् ।) स्वर्णम् । इति हेमचन्द्रः ॥

लौकायतिकः, पुं, (लोकायतमधीते वेद वा । लोकायत + "क्रतूक्थादि सूत्रान्तात् ठक् ।" ४ । २ । ६० । इति ठक् ।) तार्किकभेदः । (यथा, गो० रामायणे । २ । १०६ । २६ ।

"कच्चिन्न लौकायतिकान् ब्राह्मणांस्तपसिनस्तथा ।
अनर्थकुशलान् लुब्धान् बालान् पण्डितमानिनः ॥")

चार्व्वाकशास्त्रवेत्ता । लोकायतं वेत्ति इत्यर्थे ठिकप्रत्ययेन निष्पन्नोऽयम् ॥

लौकिकः, त्रि, (लोके विदितः प्रसिद्धो हितो लोकं वेत्ति वा । लोक + ठञ् ।) लोकव्यवहारसिद्धः । यथा,—

"वैदिका लौकिकाश्चैव ये यथोक्तास्तथैव ते ।
निर्णीतार्थास्तु विज्ञेया लोकास्तेषामसंशयः ॥"

इति कलापव्याकरणे सन्धिवृत्तौ प्रथमप्रकरणम् ॥ लोकाय हितं इत्यर्थे च ठिकप्रत्ययनिष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

लौकिकता, स्त्री, (लौकिकस्य भावः । लौकिक + तल् ।) लोकव्यवहारसिद्धत्वम् । शिष्टाचारोऽस्य भूरिप्रयोगः ॥

लौकिकाग्निः, पुं, (लौकिकोऽग्निः ।) असंस्कृताग्निः । यथा, आहृतत्त्वे ।

"न वैश्वयज्ञियो होमो लौकिकाग्नौ विधीयते ॥"

लौड, ऋ उन्मादे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) चतुर्दन्त्यसरौ । ऋ, अलुलौड्त् । इति दुर्गादासः ॥

लौहः, पुं, (लोह एव । प्रज्ञाद्यण् ।) लोहः । इत्यमरटीकायां भरतः ॥ स च पञ्चविधः । यथा । काचिः १ पाञ्चिः २ कान्तः ३ कालिङ्गः ४ वज्रकः ५ । अस्य त्रयोदशविधसंस्काराः । यथा । शालिधर्व्वणम् १ उद्वर्त्तनम् १ अम्लभावनम् ३ आतपशोषः ४ निषेकः ५ मारणम् ६ दलनम् ७ भावनम् ८ सूर्य्यपाकः ९ स्थालीपाकः १० चूर्णनम् ११ पुटपाकः १२ पाकनिष्पन्नः १३ । अस्य गुणाः । आयुर्व्वलवीर्य्यकामदात्वम् । रोगनाशित्वम् । श्रेष्ठतमरसायनत्वञ्च । कृष्णवर्णस्य तस्य गुणाः । ग्रीथशूलार्शःकुष्ठपाण्डुप्रमेहमेदोवायुनाशित्वम् । वयःस्थैर्य्यचक्षुष्यकारित्वम् । सारकत्वम् । गुरुत्वञ्च । शोधितस्यास्य गुणौ । सर्व्वरोगनाशित्वम् । मरणनाशित्वञ्च । अशुद्धस्य तस्य गुणाः । आरभ्यायोग्यत्वम् । आयुर्नाशकत्वञ्च । इति रत्नावल्यादयः ॥* । (अथास्य शोधनादिनियमः ।

"त्रिफलाद्दगुणे तोये त्रिफलार्धोद्धृतं पलम् ।
ततः कार्षे पादशेषे लौहस्य पलपञ्चकम् ।
क्षिप्त्वा तप्ताग्नि पञ्चाग्नि सप्तवारं निषेचयेत् ।
ध्रुवं प्रशीयते दोषो गिरिजे लोहसम्भवः ॥"

इति लोहशोधनम् ॥ * ॥

"भानुपाकात्तथा स्थालीपाकाच्च पुटपाकतः ।
निरत्यो जायते लौही यथोक्तफलदो भवेत् ॥"

इति संक्षिप्तलौहमारणम् ॥ * ॥

"दादशांशेन दरदं तीक्ष्णचूर्णस्य मेलयेत् ।
कन्यानीरेण संमर्द्द्य यामयुग्मञ्च संपुटे ।
पुटेदेवं लौहचूर्णं सप्तधा मारणं व्रजेत् ॥"

इति वैद्यकरसेन्द्रसारसंग्रहे मारणमारणाधिकारे ॥") अन्यत् लोहशब्दे द्रष्टव्यम् ॥ (छागविशेषः । यथा, महाभारते । १३ । ८८ । १३ ।

"अजेन वापि लौहेन मघास्वेव यतव्रतः ।
इत्सिच्छायासु विधिवत् कर्म्म व्यजनवीजितम् ॥"

लोहशब्दार्थोऽप्यत्र ॥)

लौहचारकः, पुं, (लौहेन लौहनिगडेन चारः प्रचारो यत्र ।) नरकभेदः ॥ यत्र नियतं वध्यन्ते । इति पुराणम् ॥

लौहजं, क्ली, (लौहात् जायते इति । जन् + डः ।) मक्षूरम् । इति रत्नमाला ॥

लौहभाण्डः, पुं, (लौहस्य भाण्डमिवाकृतिर्यत्र ।) अस्त्रभालम् । इति शब्दचन्द्रिका ॥ हामनदिस्ता इति भाषा । लौहनिर्म्मितभाण्डे, क्ली ॥

लौहभूः, स्त्री, (लौहस्य भूरिव ।) कठिनी । सा तु लौहपात्रविशेषः । यथा,—

"लौहात्मा चायुगा लोहा लौहभूः कठिनी-ल्यपि ॥"

इति शब्दचन्द्रिका ॥

लौहमलं, क्ली, (लौहस्य मलम् ।) लौहमलम् । इति राजनिर्घण्टः ॥ (तथास्य विषयः ।

"सद्यो लौहमलाभ्यामाक्षिकक्षितभागाः समा मानतः
पात्रे ताम्रमये दिनान्तमथितं संस्थापयेदासवे ।
प्रक्षाल्यादृषनतां प्रयोय रजनीमेकां बहिः स्थापयेत् ।
पात्रे ताम्रमये विधेयमथवा पात्रे हविर्भाविते ॥
प्रक्षाम्याथचतुर्थ्यं प्रतिदिनं जगध्वा जलं शीतलम् ।
पेयं भोजनपूर्व्वमध्यविरतोऽस्वच्छन्दभोज्येनरैः ॥
क्षेतुं शूलहृतागमाग्निकसनश्वासाम्लपित्तज्वरोन्मादापस्मृतिमेहसर्व्वजठराजीर्णादि सर्व्वा रुजः ॥"

इति भैषज्यरत्नावली शूले चतुःसममक्षूरम् ॥)

लौहयन्त्रं, पुं, (लौहस्य यन्त्रमत्र ।) नरकविशेषः । यत्र सूचीभिर्भिद्यते । इति पुराणम् ॥ लौहनिर्म्मितकीलकञ्च ॥

लौहा, स्त्री, लौहभूः । इति शब्दचन्द्रिका ॥

लौहात्मा, स्त्री, (लौह आत्मा यस्याः ।) लौहभूः । इति शब्दचन्द्रिका ॥

लौहितः, पुं, लोहितः । इति लोहितशब्दात् स्वार्थे अण् (अण्) प्रत्ययेन निष्पन्नः ॥ लोहितसम्बन्धिनि, त्रि ॥

लौहितीकः, त्रि, (लोहित इव । लोहित + "कर्कलोहितादीकक् ।" ५ । ३ । ११० । इति ईकक् ।) लोहितवर्णतुल्यः । इति सिद्धान्तकौमुदी ॥

लौहित्यं, क्ली, (लोहितस्य भावः । लोहित + ष्यञ् ।) लोहितत्वम् । इति मेदिनी । ये, १०२ ॥

लौहित्यः पुं, (लोहित एव। स्वार्थे ष्यञ्।) नदभेदः। स च ब्रह्मपुत्रः। इति मेदिनी। ये, १०२। सागरः। इति शब्दमाला॥ तस्य नदविशेषस्य उत्पत्तिर्यथा,—

सगर उवाच।

"अमोघायां कथं जज्ञे लौहित्यो ब्रह्मणः सुतः।
कथं शान्तनुभार्य्यायां रतः स कमलासनः॥
पारस्त्रैणेयपुत्रो वा कथं जज्ञे पितामहात्।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम॥

और्व्व उवाच।

शृणु त्वं नृपशार्दूल कथयामि महत्तरम्।
आख्यानं ब्रह्मपुत्रस्य लौहितस्य महात्मनः॥
हरिवर्षे महावर्षे शान्तनुर्नाम नामतः।
मुनिरासीन्महाभागो ज्ञानवान् सुतपोधनः॥
तस्य भार्य्या महाभागा अमोघाख्या महासती।
हिरण्यगर्भस्य सुतेस्तृतीयस्या अमोघवा॥
तया सार्द्धं स कैलासमर्य्यादापर्व्वतेऽवसत्।
लौहित्याख्यस्य सरसस्तीरे वै गन्धमादने॥
एकदा स तपोनिष्ठो निजपुण्यादिगोचरे।
जगाम वनमध्यन्तु चिन्वन् बहुफलानि च॥
तस्मिन्नवसरे ब्रह्मा सर्व्वलोकपितामहः।
तत्राजगाम यत्रास्ति अमोघा शान्तनोः प्रिया॥
तां दृष्ट्वा हेमगर्भाभां युवतीमतिसुन्दरीम्।
मोहितो मदनेनाशु तथाभूद्दूषितेन्द्रियः॥
उद्दीपितेन्द्रियो भूत्वा निषण्णस्तां महासतीम्।
अथाधावत्तदा ब्रह्मा संसुखो मदनार्दितः॥
धावमानं विधातारं दृष्ट्वामोघा महासती।
मैवं मैवमिति प्रोक्ता पर्व्वशालां बलीयत॥
दरघोवाच धातारममोघा कुपिता तदा।
पर्व्वशालान्तरगता द्वारमाश्रित्य तत्क्षणात्॥
अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम्।
बलात् प्रमथ्य चाहं तस्या त्वाच्च शपाम्यहम्॥
अमोघया चैवमुक्ते विधातुश्च तदा नृप।
रेतश्चस्कन्द च तदैवाश्रमे शान्तनोर्मुनेः॥
च्युते रेतसि धातापि हंसयानं समाश्रितः।
लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ॥
गते वेधसि शान्तनुर्निजमाश्रममागतः।
आगत्य दृष्ट्वा हंसानां पदचोभं तथा भुवि॥
तेजश्च पतितं भूमौ विधातुर्ज्वलनोपमम्।
अमोघां परिपप्रच्छ पर्व्वशालान्तरस्थिताम्॥
किमेतदत्र शुभगे प्रवृत्तं दृश्यते तु यत्।
पक्षिणाञ्च पदचोभं तेजश्चैव च कौद्गमम्॥
सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम्।
अमर्षितेव न्यगददाकुला विकलानना॥
हंसयुक्तस्यन्दनेन कोऽप्यागत्य चतुर्मुखः।
कामक्लमकरो भीरू रतिं मां समयाचत॥
ततो मया मर्त्सितस्य उटजान्तरलीनया।
प्रत्याय तेजः संयातो मम शापभयार्दितः॥
कुरु तत्र प्रतीकारं यदि शक्नोषि शान्तनो।
न हि मां धर्षणां सोढुं कश्चित् शक्नोति जीवभृत्॥

स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः।
इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत्॥
दिव्यध्यानेन तज्ज्ञात्वा देवकार्य्यमुपस्थितम्।
तीर्थावतारणञ्चापि हिताय जगतां मुनिः॥
ध्यात्वोदकं चिन्तयित्वा स्वभार्य्यामिदमब्रवीत्।
इदं तेजो ब्रह्मणस्तं पिनाकीधे ममाज्ञया॥
हिताय सर्व्वजगतां देवकार्य्यार्थसिद्धये।
भवत्या निकटं ब्रह्मा स्वयमेव समागतः॥
लाभप्राप्य महाकृत्यभावयोः स समर्थ्य च।
गतो निजाश्रमं तत्त्वं कर्त्तुमर्हसि तद्वच॥
तत् श्रुत्वा शान्तनोर्वाक्यममोघातीव लज्जिता।
सान्त्वयन्तीव तं प्राह पतिं नत्वा महासती॥
नान्यस्य तेजो धास्यामि न चेत्ते विमनस्कता।
अवश्यं यदि कर्त्तव्यं पीत्वा त्वं मयि मोचय॥
एतच्छ्रुत्वा वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः।
स्वयं पीत्वा च तत्तेजस्तस्या गर्भे व्यसेचयत्॥
संक्रामिते शान्तनुना तेजोभिर्ब्रह्मणः सती।
गर्भं दधानामोघाख्या हिताय जगतां ततः॥
तस्यां काले तु संप्राप्ते संजातो जलसञ्चयः।
सञ्चये तनयञ्चापि नीलवासाः किरीटधृक्॥
रक्तमाल्यसमायुक्तो रक्तगौरश्च ब्रह्मवत्।
चतुर्भुजः पद्मविद्याधरयुक्तिधरस्तथा॥
शिशुमारशिरःस्थश्च तुल्यकायो जलोत्करैः।
तं जातञ्च तथा भूतं शान्तनुर्लोकशान्तनुः॥
चतुर्णां पर्व्वतानाञ्च मध्यदेशे व्यवेशयत्॥
कैलासस्योत्तरे पार्श्वे दक्षिणे गन्धमादनः।
जारुधिः पश्चिमे शैलः पूर्व्वे सर्व्वसुकाश्रयः॥
तेषां मध्ये स्वयं कुण्डं पर्व्वतानां विधेः सुतः।
कृत्वातिवृद्धे नित्यं शरदीव निशाकरः॥
तं तोयमध्यगं पुत्रमासाद्य दुहिता स्वयम्।
क्रमतस्तस्य संस्कारानकरोद्विधिपूर्व्वके॥
अथ काले बहुतिथे यतीते ब्रह्मणः सुतः।
तोयराशिस्वरूपेण वर्द्धे पर्व्वतयोजनान्॥
तस्मिन् देवाः प्रभुः सर्व्वदितीय इव सागरे।
प्रीतामलजले कुण्डे देवश्चाश्वस्थो गजैः॥
तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान्।
चक्रे मातृवधं घोरमतुग्रं पितुराज्ञया॥
तस्य पापस्य मोचाय स्वपितृभ्योपदेशतः।
स जगाम महाकुण्डं ब्रह्माख्यं स्नातुमिच्छया॥
तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत्।
वीर्य्यौ परशुना क्षत्वा तत्र ब्रह्मावतारयत्॥"

इति कालिकापुराणे जामदग्न्योपाख्याने ८४ अध्यायः॥ *॥ अपि च।

"जातसंप्रत्ययः सोऽथ तीर्थमासाद्य तं वरम्।
वीर्य्यौ परशुना क्षत्वा ब्रह्मपुत्रमवाहयत्॥
ब्रह्मकुण्डात् सुतः सोऽथ कासारे लोहिताख्ये।
कैलासोपत्यकायान्तु न्यपतद्ब्रह्मणः सुतः॥
तस्यापि सरसस्तीरं समुत्थाय महाबलः।
कुठारेण दिशं पूर्व्वामनयद्ब्रह्मणः सुतम्॥
ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च।
कामरूपान्तरं पीठमवाहयदसौ हरिः॥
तस्य नाम विधिश्चक्रे स्वयं लोहितगङ्गकम्।
लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत्॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा।
गोपयन् सर्व्वतीर्थानि दक्षिणं याति सागरम्॥
प्रागेव दिव्यसुनां संत्यक्ता ब्रह्मणः सुतः।
पुनः पतति लौहित्ये गत्वा द्वादशयोजनम्॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम्॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात्॥"

इति कालिकापुराणे ८५ अध्यायः॥

ल्यी, गि क्षिपि। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-अनिट्।) ओष्ठ्यवर्णोपधः। ल्यिनाति ल्यीनः ल्यीनिः। अन्तःस्थोपध इति रमानाथः। ल्यिनाति। इति दुर्गादासः॥

ल्वी, गि ग गत्याम्। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-अनिट्।) वकारोपधः। ग, ल्वीनाति ल्वीतः ल्वीतिः। गि, ल्विनाति ल्वीनाति ल्वीनः ल्वीनिः। गिनेव क्रयादित्वसिद्धौ गकरणं ग्वादित्वविकल्पार्थम्। इति दुर्गादासः॥

व

व, वकारः। स च अन्तस्थस्य जनश्रुतिवर्णः। यवर्गस्य चतुर्थवर्णश्च। अस्योच्चारणस्थानं दन्तः ओष्ठश्च। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १८।

"निष्क्रामन्ते तु कुः प्रोक्तो दन्तोष्ठो वः स्मृतो बुधैः॥")

दन्तयवकारः। स च अन्तःस्थवर्णः। यथा। अन्तःस्था यरलवाः। इति कलापव्याकरणम्॥ अपि च।

"ततोऽवरसमाम्नायमञ्जगवानजः।
अन्तःस्थोष्मस्वरार्द्धर्क्षदीर्घादिजचयम्॥"

इति श्रीभागवते १२ स्कन्धे ६ अध्यायः॥

"ततस्तेभ्योऽवराणां समाम्नायं समाहारं तमेवाह। अन्तःस्था यरलवाः। उष्माणः शषसहाः। स्वरा अकारादयः। आर्द्धाः कादयो मावसानाः। दृक्षा दीर्घाश्च। आदिशब्दात् जिह्वामूलीयादयः। त एव जचयं स्वरूपं यस्य तम्।" इति तट्टीकायां श्रीधरस्वामी॥*॥ "यवरलीयवकारस्य प फ व भ म वा इत्येकपदोक्त्या उत्पत्तिस्थानमोष्ठसृक्का दन्त्यकार्य्यार्थं दन्त्यमध्येऽपि त थ द ध न ल सा व इति भिन्नपदे पठितवान्। यथा संवुर्वृर्वेति इत्यादौ वकारस्य ओष्ठ्यत्वात् उर् दन्त्यत्वात् अनुस्वारस्य मकारो न स्यात्। वैदिकास्तु अस्योत्पत्तिस्थानं दन्त एवेत्याहुः। अतएव तद्विदोः परमं पदं इत्यादौ तथैवोच्चारयन्ति।"

इति सुबोधटीकायां दुर्गादासः॥ ●॥

तस्य पर्य्यायः।
"वो वाणो वारुणो वाय्वा वरुणो देव-
संज्ञकः।
नोयं सान्तस्य वामांशः॥" इति बीजवर्णाभि-
धानम्॥*॥ अपि च।
"वकारो वरुणो वायुः खेदः खड्गीश्वरो भवः॥"
इति रुद्रयामले मन्त्रकोषः॥*॥
अपि च।
"वो वाणो वारुणी वाय्वा वरुणो देवसंज्ञकः।
खड्गीशो ज्वालिनी वक्त्रः कलसध्वनिवाचकः॥
उत्कारौष्ठ्यस्तु नावीतो वक्त्रा स्फिक् सागरः
शुचिः।
त्रिधातुः शङ्करः श्रेष्ठो विष्णुर्यो यमसादनम्॥"
इति नानातन्त्रशास्त्रम्॥
तस्य स्वरूपं यथा,—
"वकारं पद्मलापाङ्गि कुण्डली मोक्षदायिनम्।
पञ्चप्राणमयं वर्णं त्रिशक्तिसहितं सदा॥
त्रिबिन्दुसहितं वर्णमाद्यादित्यसंयुतम्।
पञ्चदेवमयं वर्णं पीतविद्युल्लतामयम्॥
चतुर्व्वर्गप्रदं वर्णं सर्व्वसिद्धिप्रदायकम्।
त्रिशक्तिसहितं देवि! त्रिबिन्दुसहितं सदा॥"
इति कामधेनुतन्त्रम्॥*॥
वर्णोद्धारतन्त्रोक्तवर्णमालावाचकस्य वर्णस्य ध्यानप्रकारो यथा,—
"कोकनदद्युतिं रेखा ब्रह्मविष्णुशिवात्मिका।
माया शक्तिः परा नित्या ध्यानमस्य प्रचक्षते॥"
इति वर्णोद्धारतन्त्रम्॥*॥
अस्य ध्यानम्।
"कुन्दपुष्पप्रभां देवीं द्विभुजां पङ्कजेक्षणाम्।
शुक्लमाल्याम्बरधरां रत्नहारोज्ज्वलां पराम्॥
साधकाभीष्टदां सिद्धां सिद्धिदां सिद्धसेविताम्।
एवं ध्यात्वा वकारन्तु तन्मन्त्रं दशधा जपेत्॥"
इति वर्णोद्धारतन्त्रम्॥
व, य, इवार्थः। इति मेदिनी। वे, १॥ (यथा, रघुः। ४। ४२।
"ताम्बूलीनां दलैस्तत्र रचितापानभूमयः।
नारिकेलासवं योधाः ग्राव्यं व यवाः पपुः॥")
वं, क्ली, (वा ल गमनहिंसयोः+क:।) प्रचेताः। इति मेदिनी। वे, १॥ वरुणबीजम्। इति तन्त्रम्॥
वः, पुं, (वानमिति। वा+भावे घः:) सान्त्व-नम्। (वाति गच्छतीति। वाल गमने+कः।) वायुः। वरुणः। इति मेदिनी। वे, १॥ बाहुः। मन्त्रयम्। कल्याणम्। बलवान्। वसतिः। वरुणालयः। इति शब्दरत्नावली॥ ग्राहूणः। वस्त्रम्। ग्रालूकः। वन्दनम्। इति नानैकाक्षरकोषः॥
वः, [स्] त्रि, युष्मान्। युष्मभ्यम्। युष्माकम्। युष्मच्छब्दस्य द्वितीयाचतुर्थीषष्ठीबहुवचनान्त-रूपोऽयम्। इति व्याकरणम्॥ (यथा, सुग्ध-बोधे।
"युष्मा तु वो नोऽपि हरिर्धनं वो
ददातु नो हन्त्वशुभानि वो नः॥"
पादवाक्यादौ तु अस्य प्रयोगो न भवति। इति वैयाकरणिकाः॥)
वंशः, पुं, (वमति उद्गिरति पुरुषान् वध्यते इति वा। टु वम उद्गिरणे इति धातोर्यद्वा वन शब्दे इति धातोर्वा कुलकात् शः। यद्वा, वष्टि उच्यते इति वा। वश कान्तौ+अच् घञ् वा। ततो मुम्।) पुत्रपौत्रादिः। तत्पर्य्यायः। सन्ततिः २ गोत्रम् ३ जननम् ४ कुलम् ५ अभिजनः ६ अन्वयः ७ अन्ववायः ८ सन्तानः ९। इत्यमरः। २। ७। १॥ निघनम् १० जातिः ११। इति जटाधरः॥ कुलञ्च विद्यया जन्मना वा प्राणिनामेकलक्ष्यः सन्तानो वंश इति जयादित्यः। धनेन विद्यया वा ख्यातस्या-प्यन्वयधारा वंश इति भुजः। वमति उद्गिरति पूर्व्वपुरुषान् वंशः नाम्नीति शः। इत्यमर-टीकायां भरतः॥*॥ (यथा, रघुः। १। २।
"क्व भूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥"
पुत्रः। यथा, भागवते। ९। २। १७।
"नृपस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः॥")
ब्रह्मजातिविशेषः। बाँश इति भाषा। तत्-पर्य्यायः। लकुचारः २ कर्म्मारः ३ लघिचारः४ ब्रह्मबन्धुः ५ व्रतपर्व्वा ६ यवफलः ७ वेणुः ८ मस्करः ९ तेजनः १०। इत्यमरः। २। ८। ६०॥ किञ्चुपर्व्वा ११। इति जटाधरः॥ वम्भः १२। इति शब्दरत्नावली॥ ब्रह्मकेतुकः १३ कण्डालुः १४ कण्टकी १५ महाबलः १६ दृढ-ग्रन्थिः १७ दृढपत्रः १८ धनुर्द्रुमः १९ धानुष्यः २० दृढ़काण्डः २१॥ (यथा, ऋतुसंहारे। १। २५।
"ध्वनति पवनविद्धः पर्व्वतानां दरीषु
स्फुटति पटुनिनादः शुष्कवंशस्थलीषु।
प्रसरति ज्वलनसख्ये लब्धवृद्धिः क्षणेन
क्षपयति वनराजिं प्रावृषेण्यो दवाग्निः॥")
अस्य गुणाः। अम्लत्वम्। कषायत्वम्। किञ्चित्तिक्तत्वम्। शीतलत्वम्। सृक्वस्रक्-प्रमेहार्शः पित्तदाहास्रनाशित्वञ्च। इति राज-निर्घण्टः॥*॥ अपि च।
"वंशः सरो हिमः स्वादुः कषायो वह्निशोधनः।
छेदनः कफपित्तघ्नः कुष्ठासृग्व्रणशोथजित्॥*॥
तत्करीरः कटुः पाके रसे रूक्षो गुरुः सरः।
कषायः कफवातघ्नः स्वादुर्व्रणदाही वातपित्तघ्नः॥
तदुद्भवास्तु सरा रूक्षाः कषायाः कटुपाकिनः।
वातपित्तकरा उष्णा बह्वम्लाः कफापहाः॥"
इति भावप्रकाशः॥*॥
(गृहोपकरणम्। यथा,—
"वंशः पृष्ठास्थि गेहोपकरणे वेणौ गणे कुले॥"
इति रघुटीकायां मल्लिनाथधृतकेशवः। ७। ३६।)
पृष्ठावयवः। पिठेर दाँड़ा इति भाषा॥ (यथा, भागवते। ११। ८। ३३।
"यदस्थिभिर्निर्म्मितवंशवंश-
स्तूर्यं त्वचा रोमभिरद्भिरम्॥")
वर्गः। इति मेदिनी। शे, १३॥ (यथा, रघुः। ७। ३६।
"उत्थापितः संयति रेणुरश्वैः
सान्द्रीकृतः स्यन्दनवंशचक्रैः॥")
बाहुभाक्तविशेषः। इति धरणिः॥ बाँशी इति भाषा॥ (यथा, रघुः। २। १२।
"स कीचकैर्मारुतपूर्णरन्ध्रैः
कूजद्भिरापादितवंशकृत्यम्।
शुश्राव कुञ्जेषु यशः खसूचे-
रुद्गीयमानं वनदेवताभिः॥"
विवृतिरस्य वंशोद्गीते द्रष्टव्या॥) इक्षुः। साजवृक्षः। इति राजनिर्घण्टः॥ (गर्भागर्भ-सम्भूताश्वरोविशेषे, स्त्री। यथा, महाभारते। १। ६५। ४६।
"अश्वयां मनुं वंशामसुरां मार्गवप्रियाम्।
अदूषां सुभगां भासीमिति प्राधा अजायत॥")
वंशकं, क्ली, (वंश इव कायतीति। के+कः।) अगुरु। इति हारावली। १०४॥
वंशकः, क्ली, (वंश इव प्रतिकृतिः। "इवे प्रति-कृतौ।" ५। ३। ९६। इति कन्।) मत्स्यविशेषः। इति शब्दमाला॥ बाँशपाताभाछ इतिभाषा॥ इक्षुविशेषः। इति रत्नमाला॥ बाँशाड़ इति सामशाड़ा इति च भाषा। अस्य गुणाः।
"वंशकस्वलनभिष्यन्दी बहुदोषत्रयापहः॥"
इति राजवल्लभः॥
(यथा, सुश्रुते। १। ४५।
"बौड्डको भौरुकश्चैव वंशकः पूतपोरकः॥"
"अविद्राही गुरुर्ग्राह्यः बौड्डको भौरुकस्तथा।
आर्द्धा तुल्यगुणः किञ्चित् सञ्चारो वंशको मतः॥")
(इक्षौ वंशः। "संज्ञायां कन्।" ५। ३। ८७। इति कन्। क्षुद्रवंशः। इति सिद्धान्त-कौमुदी॥)
वंशकर्पं, क्ली, आकाशोद्भवियमानस्तवम्। यथा,—
"वृहत्पत्रकमिलाङ्कुरिन्नतूलं मनीषिभिः।
यौवनाश्वं वंशकर्पं वातनूलं मरुज्जनम्॥"
इति हारावली। २३॥
वंशकर्पूररोचना, स्त्री, (कर्पूर इव रोचते शोभते इति। रुच्+ल्युः। ततः षष्ठीतत्-पुरुषः।) वंशरोचना। इति राजनिर्घण्टः॥
वंशचीरी, स्त्री, (वंशस्य चीरमिवास्या अस्तीति। अच्। गौरादित्वात् ङीष्।) वंशरोचना। इति राजनिर्घण्टः॥
वंशजः, पुं, (वंशाज्जायते इति। जन्+डः।) वेणुयवः। इति राजनिर्घण्टः॥
वंशजः, त्रि, (वंशात् सदृवंशाज्जायते इति। जन्+डः।) सदृवंशजातः। तत्पर्य्यायः। दौग्ध्यः २ वंश्यः ३। इति हेमचन्द्रः॥३। ३००॥ (वैदूत-पत्नोऽपि। यथा आर्य्यासप्तशत्याम्। ४७६।
"यन्नियतनिर्गुणं यन्न वंशजं यच्च नित्यनिर्व्या-
जम्।
किं कुमैस्तत्तिरोहितं धनुः यदे देवराजेन॥")

वंशजा, स्त्री, (वंशे जायते इति । जन् + डः + टाप् ।) वंशरोचना । इति शब्दरत्नावली ॥ (अस्या गुणाः यथा,—
"वंशजा दृंहणी दृष्या बल्या स्वादी च शीतला ।
लघ्वाकाशगुरुश्वासक्षयपित्तास्रकामलाः ।
हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातलक्लमित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वंशतण्डुलः, पुं, (वंशजातस्तण्डुलः ।) वेणुयवः । इति राजनिर्घण्टः ॥
वंशधान्यं, क्ली, (वंशस्य धान्यम् ।) वेणुयवः । इति राजनिर्घण्टः ॥
वंशनालिका, स्त्री, (वंशनालोऽस्त्यस्या इति । वंशनाल + ठन् । टाप् ।) वंशी । इति शब्दरत्नावली ॥
वंशनेत्रं, क्ली, (वंशस्येव नेत्रमस्य ।) इक्षुमूलम् । इति राजनिर्घण्टः ॥
वंशपत्रः, पुं, (वंशस्य पत्रमिव पत्रमस्य ।) नलः । इति राजनिर्घण्टः ॥ (वंशस्य पत्रम् ।) वंशस्य दलं, क्ली । (हरितालम् । यथा,—
"तालकं वंशपत्राख्यं कुष्ठाक्षसलिले क्षिपेत् ।
सप्तधा वा त्रिधा वापि दृष्यत्वेन च वा पुनः ॥
शोधयित्वा पुनः शुष्कं चूर्णयेत्तत्कुलत्थवत् ।
ततः शरावके पात्रे स्थापयेत् कुशलो भिषक् ॥
बदरीपत्रकल्केन वह्निलेपञ्च कारयेत् ।
अर्द्धयामभृशं पात्रं तावच्चाला प्रदीयते ॥
खाङ्गशीतं समुद्धृत्य मालिक्याभो भवेन्नरः ॥"
इति वैद्यकरत्नसारसंग्रहे कुष्ठाधिकारे ।)
वंशपत्रकं, क्ली, (वंशपत्रमेव । स्वार्थे कन् ।) हरितालम् । इति हेमचन्द्रः । ४ । १२४ ॥
वंशपत्रकः, पुं, (वंशस्य पत्रमिवाकृतिरस्यति । इवार्थे कन् ।) क्षुद्रमत्स्यविशेषः । इति शब्दमाला ॥ वांशपाता माछ इति भाषा ॥ नलः । श्वेतेक्षुः । इति राजनिर्घण्टः ॥
वंशपत्रपतितं, क्ली, सप्तदशाक्षरपादच्छन्दोविशेषः । यथा,—
"दिङ्मुनिवंशपत्रपतितं भ र ण भ न स गे: ॥"
उदाहरणम् ।
"नूतनवंशपत्रपतितं रजनिजलार्द्रं
पश्य सुकुन्द ! मौक्तिकमिवोत्तममरकतशृङ्गम् ।
स्रष्टुमिव च तं चकोरनिकरः प्रपिबति मुदितो
वान्तमिव चन्द्रकिरणैरुद्गतकणमिव ॥"
वंशपत्रचरितेति केचित् । वंशदलमिति शृङ्गौ । इति छन्दोमञ्जरी ॥
वंशपत्री, स्त्री, (वंशपत्र + गौरादित्वात् ङीष् ।) नाड़ीहिङ्गुः । लवणविशेषः । तत्पर्य्यायः । वंशदला २ जीरिका ३ जीर्णपत्रिका ४ । अस्या गुणाः । सुमधुरत्वम् । स्निग्धिरत्वम् । पित्तरक्तदोषनाशित्वम् । रुच्यत्वम् । पथ्यत्वं । दुग्धदायित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
"वंशपत्री वेणुपत्री पिङ्गा हिङ्गु स्निवाटिका ।
हिङ्गुपत्रीगुणा विप्रैर्वंशपत्री च कीर्त्तिता ॥"
इति भावप्रकाशः ॥
वंशपीतः, पुं, (वंशः वंशपत्रमिव पीतः ।) कण-गुग्गुलुः । इति राजनिर्घण्टः ॥
वंशपुष्पा, स्त्री, (वंशस्य पुष्पाणीव पुष्पाण्यि यस्याः ।) सहदेवीलता । इति राजनिर्घण्टः ॥
वंशपूरकं, क्ली, (वंशस्येव पूरकमस्य ।) इक्षु-मूलम् । इति राजनिर्घण्टः ॥
वंशरोचना, स्त्री, (रोचते इति । रुच + नन्द्या-दित्वात् युः । टाप् । वंशस्य रोचना ।) खनामख्यातवंशपर्व्वस्थितश्वेतवर्णौषधविशेषः । वंशलोचन इति भाषा । तत्पर्य्यायः । त्वक्-क्षीरा २ । इत्यमरः । २ । ६ । १०६ ॥ वंश-लोचना ३ । इति भरतः ॥ तुगाक्षीरी ४ शुभा ५ वांशी ६ वंशजा ७ । इति रत्नमाला ॥ क्षीरिका ८ । इति शब्दरत्नावली ॥ तुगा ९ त्वक्क्षीरी १० शुभा ११ वंशक्षीरी १२ वैणवी १३ त्वक्सारा १४ कर्म्मरी १५ श्वेता १६ वंश-कर्पूररोचना १७ तुङ्गा १८ रोचनिका १९ पिङ्गा २० वंशग्रकैरा २१ । अस्या गुणाः । रूक्षत्वम् । कषायत्वम् । मधुरत्वम् । हिमत्वम् । रक्तशुद्धिकारित्वम् । तापपित्तोद्रेकहरत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वंशजा दृंहणी दृष्या बल्या स्वादी च शीतला ।
लघ्वाकाशगुरुश्वासक्षयपित्तास्रकामलाः ।
हरेत् कुष्ठं व्रणं पाण्डुं कषाया वातलक्लमित् ॥"
इति भावप्रकाशः ॥
वंशलोचना, स्त्री, (वंशरोचना । रस्य लः ।) वंशरोचना । इति हेमचन्द्रः ॥ अस्या गुणाः ।
"कषायमधुरा रूक्षा वातघ्नी वंशलोचना ।
तुगाक्षीरी क्षयश्वासकासघ्नी मधुरा हिमा ॥"
इति राजवल्लभः ॥
वंशवृक्षैरा, स्त्री, (वंशस्य वृक्षैरेव ।) वंशलोचना । इति राजनिर्घण्टः ॥
वंशशलाका, स्त्री, (वंशस्य शलाकेव दाढ्यात् ।) वीजमूलम् । इति हेमचन्द्रः । २ । २०० ॥ (वंशनिर्म्मिता शलाकेति मध्यलोपी समासः ।) वंशनिर्म्मितशलाका च ।
वंशस्तुतिः, } स्त्री, द्वादशाक्षरपादच्छन्दो-वंशस्तवितं, } विशेषः । यथा,—
"वदन्ति वंशस्तवितं जतौ जरौ ॥"
उदाहरणम् ।
"विलासवंशस्तवितं सुखालिभिः
प्रपूर्य्य यः पञ्चमरागसुस्थिरम् ।
व्रजाङ्गनानामपि मानशालिनां
जहार मानं स हरिः पुनातु वः ॥"
वंशस्तुतितमपि तापि । इति छन्दोमञ्जरी ॥
वंशाग्र्यं, क्ली, (वंशस्य अग्र्यम् । प्रथमजातत्वात् ।) वंशाङ्कुरः । इति राजनिर्घण्टः ॥
वंशानुचरितं, क्ली, (वंशस्य अनुचरितम् ।) वंश-चरितवर्णनम् । तच्च पुराणस्य पञ्चलक्षणान्त-र्गतलक्षणविशेषः । यथा, शब्दरत्नावल्याम् ।
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चेति पुराणं पञ्चलक्षणम् ॥"
(यथा, भागवते । ६ । १ । ४ ।
"तेषां वंशं पृथग्ब्रह्मन् ! वंशानुचरितानि च ।
कीर्त्तयस्व महाभाग ! नित्यं शुश्रूषतां हि नः ॥")
वंशाङ्कुरः, पुं, वंशस्याङ्कुरः । वाँशेर कोँड़ा इति भाषा । तत्पर्य्यायः । करीरम् २ वंशाग्रम् ३ यवफलाङ्कुरः । अस्य गुणाः । कटुत्वम् । तिक्त-त्वम् । अम्लत्वम् । कषायत्वम् । लघुत्वम् । शीतलत्वम् । पित्तासदाहक्लक्लमत्वम् । रुचि-कारित्वम् । तत्पर्व्वणो निर्गुणत्वञ्च । इति राज-निर्घण्टः ॥
वंशिकं, क्ली, (वंशोऽस्यस्येति । ठन् ।) अगुरु । इत्यमरः । २ । ६ । १२६ ॥
वंशिका, स्त्री, (वंशिक + टाप् ।) अगुरु । इत्यमर-टीकायां भरतः ॥ वंशी । इति शब्दरत्नावली ॥
वंशी, स्त्री, (वंशः कारणत्वेनास्त्यस्याः । अच् । गौरादित्वात् ङीष् ।) सुरली । इति शब्दरत्ना-वली ॥ बाँशी इति भाषा ॥ (यथा, काव्यचन्द्रि-कायाम् ।
"निर्म्मिता कापि गोपीनां कुलशीलविनाशिनी ।
विधिना पामरेणेयं न वंशी सुरवैरिणः ॥")
कर्षचतुष्टयम् । इति राजनिर्घण्टः ॥ वंशी-वाद्यस्य विवरणम् । यथा,—
"तालेन राजते गीतं तालो वाद्यसम्भवः ।
शरीरयन्त्रे वाद्यं तच्चतुर्विधमुच्यते ॥
ततं सुषिरमानद्धं घनमित्यं चतुर्विधम् ।
ततं तन्त्रीगतं वाद्यं वंशाद्यं सुषिरं तथा ।
चर्म्मावनद्धमानद्धं घनं तालादिकं मतम् ॥"
सुषिरं यथा,—
"वंशोऽथ पारीमधुरीतित्तिरीशङ्खकाहलाः ।
तोड़हीसुरणीदुड्डाद्यङ्किकाखरनाभयः ॥
अङ्गं कापालिकं वंशश्चर्म्म वंशस्तथा परः ।
इते सुषिरभेदासु कथिताः पूर्व्वसूरिभिः ॥
वर्त्तुलः सरलश्चैव पर्व्वदोषविवर्ज्जितः ।
वेणवः खादिरो वापि रक्तचन्दनजोऽथवा ॥
श्रीखण्डजोऽथ शौवर्णो दन्तिदन्तमयोऽपि वा ।
राजतस्ताम्रजो वापि शौद्रवः स्फाटिको-ऽथवा ॥
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः ।
शिल्पविद्याप्रवीणेन वंशः कार्य्यो मनोहरः ॥
वंशीतेव मतोऽपीति मतङ्गमुनिनोदितम् ।
ततोऽन्येऽपि तदाकारा वंशा एव प्रकीर्त्तिताः ॥
तत्र त्यक्त्वा शिरोदेशादधो द्विमितमङ्गुलम् ।
पूत्कारारन्ध्रं कुर्व्वीत मितमङ्गुलिपर्व्वणा ॥
पञ्चाङ्गुलानि संत्यज्य तारारन्ध्राणि कारयेत् ।
कुर्य्यात्तथान्यरन्ध्राणि सप्तसंख्यानि कौशलात् ॥
बदरीबीजतुल्यानि संत्यज्यार्द्धाङ्गुलमङ्गुलम् ।
प्राणयोर्मन्थनं कार्य्यं खरालेनादरेतवे ॥
सिक्थकेन कला देया तेन सुस्वरता भवेत् ।
पञ्चाङ्गुलोऽयं वंशः स्यादेकैकाङ्गुलिवर्द्धितः ॥
षड़ङ्गुलानि त्यक्त्वा स्यात् यावदष्टाङ्गुलम् ।
पूत्कारारन्ध्रमस्य यावदङ्गुलमन्तरम् ।
तदेव नाम वंशस्य वांशिकैः परिकीर्त्यते ॥

एकाङ्गुलो द्व्यङ्गुलश्च त्र्यङ्गुलश्चतुरङ्गुलः। अतितारतरत्वेन वांशिकैः सप्तधेष्यितः॥ त्र्यादश्चाङ्गुलो वंशोऽपरः पञ्चदशाङ्गुलः। निन्दितो वंशतत्त्वज्ञैस्तथाषष्ठदशाङ्गुलः॥ महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा। चत्वार उत्तमा वंशा मतङ्गमुनिसम्मताः॥ दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः। द्वादशाङ्गुलमानस्तु विजयः परिकीर्त्तितः॥ चतुर्दशाङ्गुलमितो जय इत्यभिधीयते। ब्रह्मा रुद्रो रविर्विष्णुः क्रमादत्र व्यवस्थिताः॥ नैर्विड्यं पौढ़ता चापि सुस्वरत्वञ्च शीघ्रता। माधुर्य्यमिति पञ्चामी फुल्लतेषु गुणाः स्मृताः॥ शीत्कारबहुलः स्रस्तो विस्वरः स्फुटितो लघुः। अमधुरश्च विज्ञेयाः षड्दोषाः फुल्लते क्रमात्॥ तथाप्रयोगबाहुल्यमप्यता गीतवादने। एभिर्दोषैर्युतोऽतीव निन्दितो वांशिको मतः॥ स्थानकादित्रयाभिज्ञो गमकाढ्यः स्फुटाक्षरः। शीघ्रहस्तः कलाभिज्ञो वांशिको रक्त उच्यते॥ प्रसक्तिर्म्मेड़सक्तिश्च युक्तिश्चेत्यङ्गुलैर्गुणाः। सुस्थानत्वं सुस्वरत्वं अङ्गुलीसारयक्रिया। समस्तगमकज्ञानं रागरागाङ्गवेदिता॥ क्रियाभाषाविभाषासु दक्षता गीतवादने। स्वस्थाने चापि दुःस्थाने नादनिर्म्माणकौशलम्॥ गातृणां स्थानदाढ्यं तद्दोषाच्छादनं तथा। वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः॥"

इति संगीतदामोदरः॥

वंश्यः, त्रि, (वंशे भवः। वंश+"दिगादिभ्यो यत्।" ४। ३। ५४। इति यत्।) सहंशजातः। तत्पर्य्यायः। कुल्यः २ वीज्यः ३। इति त्रिकाण्डशेषः॥ (यथा, मनुः। १। ६१।

"स्वायम्भुवस्यास्य मनोः षड्वंश्या मनवोऽपरे॥"

वंशोत्पन्नमात्रे च। यथा, रघुः। १८। ३६।

"वंश्याः गुणाः खल्वपि लोककान्ताः प्रारम्भरूढ्याः प्रथिमानमापुः॥"

वृक्षोद्भेदकाण्डविशेषः। पृष्ठावयवविशेषश्च। इति वंशशब्ददर्शनात्॥ यथा, भागवते।११।८।३३।

"यदस्थिभिर्निर्म्मितवंशवंश-स्त्वगं त्वचा रोमनखैः पिनद्धम्॥")

वक्र, ट ङ कौटिल्ये। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सक० च-सेट्।) कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च। ट, वक्रते। ङ, वक्रते काष्ठं कुटिलं स्यादित्यर्थः। वक्रते काष्ठं कुटिलं करोतीत्यर्थः। इति दुर्गादासः॥

वक्र, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, वक्रते। इति दुर्गादासः॥

वक्रयः, त्रि, (न वक्तुं वा+तथाः।) कुत्सितः। हीनः। (यथा, मनुः। ८। ६६।

"नाधर्मिको न वक्रयो न दस्युर्न विकर्म्मकृत्॥")

वचनार्हः। इति मेदिनी। ये, १०३॥ (यथा, महाभारते। १४। ७६। २३।

"वक्रयाश्चापि राजानः सर्व्वे सह सुहृज्जनैः। युधिष्ठिरस्याश्वमेधो भवद्भिरनुभूयताम्॥"

वच्+भावे तथ्य।) वचने, क्ली॥

वक्ता, [क्तृ] त्रि, (वच्+तृच्।) योवक्तुं जानाति सः। इति भरतः॥ औचित्यात् बहु विशिष्टं वदति। इति सुकुटः॥ (यथा, हितोपदेशे।

"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे। दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम्॥")

तत्पर्य्यायः। वदः २ वदावदः ३। इत्यमरः। ३। १। २५॥ वदान्यः ४ वग्मी ५। इति जटाधरः॥ सुष्ठुवक्ता। इति भरतः॥ बहुभाषी। इत्येके। तत्पर्य्यायः। वाचोयुक्तिपटुः २ वाग्मी ३ वावदूकः ४। इत्यमरः॥ वचक्रः ५ सुवचाः ६ प्रवाक् ७। इति जटाधरः॥ पण्डितः। इति मेदिनी। ते, ५३॥

वक्त्रं, क्ली, (वक्ति अनेनेति। वच्+"गुधृवीपचिवचियमिसदिखिदिभ्यस्त्रः।" उणा० ४। १६६। इति त्रः।) मुखम्। इत्यमरः। २। ६। ८६॥ (यथा, मनौ। ८। २७२।

"धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्व्वतः। तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः॥")

तगरमूलम्। इति शब्दमाला॥ वस्त्रभेदः। इति मेदिनी। रे, ८३॥ छन्दोविशेषः। इति हेमचन्द्रः। तस्य लक्षणादि यथा,—

"भवत्यर्हसमं वक्त्रं विषमञ्च कदाचन। तयोर्द्वयोरुपान्त्येऽपि ह्रस्वस्तदधुनोच्यते॥ वक्त्रं युग्मार्था मगौ स्यातामन्त्यौऽनुष्टुभः स्यातम्॥"

अत्र द्विरावर्त्तेन श्लोकः पूरयितव्यः।

"वक्त्राम्भोजं सदा स्मेरं चक्षुर्नीलोत्पलं पुनः। पल्लवीनां सुरारातेश्चेतो भृङ्गं जहारोच्चैः॥"

इति छन्दोमञ्जरी॥

वक्त्रखुरः, पुं, (वक्त्रस्य खुर इव पृषोदरादित्वात् खः।) दन्तः। इति त्रिकाण्डशेषः॥

वक्त्रजः, पुं, (ब्रह्मणो वक्त्रात् जायते इति। ब्राह्मणोऽस्य सुखमासीत् इति श्रुतेः। जन्+डः।) ब्राह्मणः। इति त्रिकाण्डशेषः॥ सुखजाते, त्रि॥

वक्त्रताल, क्ली, (वक्त्रस्य तालम्।) सुखवाद्यम्। इति केचित्॥ त्रिकाण्डशेषे सुखवाद्यं वक्त्रतालमिति लिखितम्॥

वक्त्रपट्टः, पुं, (वक्त्रस्य पट्ट इव।) अन्नभोजनपात्रम्। तोवड़ा इति भाषा। तत्पर्य्यायः। तलिका २ तलसारकम् ३। इति हेमचन्द्रः। ३। ३१०॥

वक्त्रभेदी, [न्] पुं, (वक्त्रं भिनत्तीति। भिद्+णिनिः।) तिक्तरसः। इति हेमचन्द्रः। ६। २५॥ सुखभेदके, त्रि॥

वक्त्रवासः, पुं, (वक्त्रं वासयति सुरभीकरोतीति। वासि+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) नागरङ्गः। इति राजनिर्घण्टः॥ (विवरणमस्य नागरङ्गशब्दे ज्ञातव्यम्। वक्त्रस्य वासः।) सुखगन्धश्च॥

वक्त्रशोधनं, क्ली, (वक्त्रस्य शोधनमिव।) भद्रम्। इति राजनिर्घण्टः॥ (वक्त्रस्य शोधनम्।) सुखशुद्धिकरश्च॥

वक्त्रशोधी, [न्] पुं, (वक्त्रं शोधयतीति। शुध्+णिच्+णिनिः।) जम्बीरः। इति जटाधरः॥ सुखशोधके, त्रि॥

वक्त्रासवः, पुं, (वक्त्रस्य आसवः।) अधरमधु। इति त्रिकाण्डशेषः॥

वक्रं, क्ली, (वङ्क्ते इति। वकि कौटिल्ये+रन्। पृषोदरादित्वात् न लोपः। यद्वा, वच्यतीति। वच्चु गतौ+"स्फायितञ्चिवञ्चीति।" उणा० २। १३। इति रक्। व्यङ्कादित्वात् कुत्वम्।) नदीवङ्कः। तत्पर्य्यायः। पुटभेदः २। इत्यमरः॥ वङ्कः ३। इति भरतः॥ (तगरपादिकम्। तत्पर्य्यायो यथा,—

"कालानुसारिवा वक्रं तगरं कुटिलं शठम्। मञ्जीरसं नलं जिह्मं दीनं तगरपादिकम्॥"

इति वैद्यकरत्नमालायाम्॥

तथास्य विषयः।

"घृताक्तैरक्तमूलीया वक्त्रयाग्नीपलैः शृतम्। तैलं नस्यं मरुत्सृष्टमिति मिरोरुजादहम्॥"

इति घृताक्तादि तैलम्।

इति चक्रपाणिसंग्रहे शिरोरोगाधिकारे॥)

वक्रः, पुं, (वङ्क्तीति। वच्च गतौ+"स्फायितञ्चिवञ्चीति।" उणा० २। १३। इति रक्। व्यङ्कादित्वात् कुत्वम्।) शनैश्चरः। इति मेदिनी। रे, ६५॥ मङ्गलग्रहः। इति हेमचन्द्रः। २। ३०॥ रुद्रः। त्रिपुरासुरः। इति धरणिः॥ पर्पटः। इति राजनिर्घण्टः॥ वक्रगतिविशिष्टग्रहः। स तु यस्य ग्रहस्याश्रितात् रथधिष्ठितराशीयत्रिंशांशात्तर्गतादंशात् पञ्चमषष्ठांशे रविस्तिष्ठति। यथा,—

"वक्राः स्युः पञ्चषष्ठेऽर्के स्तिवक्रा नगाष्टगे। नवमे दशमे भानौ जायते सहजा गतिः॥ द्वादशैकादशे सूर्य्ये लभन्ते शीघ्रतां पुनः। रविस्थितांशकस्थांशावधेः संख्याच्च कथ्यते॥ न तु राश्यन्तरस्थांशात् द्वितीयादिनिरूपणम्। राहुकेतू सदा वक्रौ शीघ्रगौ चन्द्रभास्करौ॥"

इति ज्योतिस्तत्त्वम्॥

(करूषदेशीयनृपतिभेदः। यथा, महाभारते। २। १४। ११।

"तमेव च महाराज! शिष्यवंत् ससृपस्थितः। वक्रः करूषाधिपतिर्म्मायायोधी महाबलः॥")

वक्रः, त्रि, (वङ्क्ते इति। वकि कौटिल्ये+रन्। पृषोदरादित्वात् न लोपः। यद्वा, वच्चि+रक्।) अनृजुः। बाँका इति भाषा। तत्पर्य्यायः। अराजम् २ वृजिनम् ३ जिह्मम् ४ ऊर्म्मिमत् ५ कुण्डितम् ६ नतम् ७ व्याविद्धम् ८ कुटिलम् ६ भुग्नम् १० वेल्लितम् ११। इत्यमरः। ३। १। ७१। वङ्क्रम् १२ वेङ्कु १३ विनतम् १४ उन्द्रम् १५। इति शब्दरत्नावली॥ अवनतः १६ आनतः १७ भङ्गुरः १८। इति जटाधरः॥*॥

(यथा, महाभारते । ३ । १३२ । १२ ।
"स वै तथा वक्र एवाभ्यजाय-
दृष्टावक्रः प्रथितो वै महर्षिः ॥")
वक्राणि यथा । अलकः १ भालः २ भ्रूः ३ नखविक्षतम् ४ अङ्कुशः ५ कुचिका ६ भयकङ्कणम् ७ वाजेन्द्रः ८ दात्रम् ९ कुद्दालः १० चन्द्रकः ११ शुक्तास्रम् १२ पलाशपुष्पम् १३ विद्युत् १४ कटाक्षः १५ शक्रधनुः १६ कथा १७ प्रबोधः १८ करः १९ हस्तिदन्तः २० शूकरदन्तः २१ सिंहनखादिः २२ । इति कविकल्पलता ॥ क्रूरः । इति मेदिनी । रे, ६५ ॥

वक्रकण्टः, पुं, (वक्राः कण्टकाः कण्टका यस्य ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥ (वक्रः कण्टः ।) कुटिलकण्टकश्च ॥

वक्रकण्टकः, पुं, (वक्राः कण्टकाः अस्य ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥ (विषयोऽस्य खदिरशब्दे विलेयः ॥)

वक्रखड्गः, पुं, (वक्रः खड्गः ।) करवालः । इति राजनिर्घण्टः ॥

वक्रग्रीवः, पुं, (वक्रा ग्रीवास्य ।) उष्ट्रः । इति त्रिकाण्डशेषः ॥

वक्रचञ्चुः, पुं, (वक्रा चञ्चुर्यस्य ।) शुकपक्षी । इति शब्दरत्नावली ॥

वक्रताल, क्लीं, (वक्रं तालं यत्र ।) वाद्यविशेषः । तत्पर्य्यायः । सुखवाद्यम् २ । वक्रनालमिति वा पाठः । इति त्रिकाण्डशेषः ॥

वक्रतालो, स्त्री, (वक्रताल + गौरादित्वात् ङीष् ।) सुखवाद्यम् । इति शब्दरत्नावली ॥

वक्रतुण्डः, पुं, (वक्रतुण्डं यस्य ।) शुकपक्षी । इति शब्दरत्नावली ॥ (वक्रौष्ठे, त्रि । यथा, भागवते । ६ । १ । २८ ।
"स पाशहस्तांश्चीन् दृष्ट्वा पुरुषानतिदारुणान् ।
वक्रतुण्डानूर्ध्वरोम्ण आत्मानं नेतुमागतान् ॥")

वक्रदंष्ट्रः, पुं, (वक्रा दंष्ट्रा यस्य ।) शूकरः । इति केचित् ॥

वक्रनक्रः, पुं, (वक्रः कुटिलः नक्र इव हिंस्रश्च ।) पिशुनः । शुकपक्षी । इति मेदिनी । रे, २८५ ॥

वक्रनालं, क्लीं, सुखवाद्यम् । इति सदाशिवत्रिकाण्डशेषः ॥

वक्रनासिकः, पुं, (वक्रा नासिका यस्य ।) पेचकः । इति त्रिकाण्डशेषः ॥ कुटिलनासायुक्ते, त्रि ॥

वक्रपुच्छः, पुं, क्लीं, (वक्रं पुच्छं यस्य ।) कुक्कुरः । इति त्रिकाण्डशेषः ॥ सलोमकुटिललाङ्गूलश्च ॥

वक्रपुष्पः, पुं, (वक्राणि पुष्पाण्यस्य ।) वकवृक्षः । इति शब्दरत्नावली ॥ पलाशवृक्षः । इति राजनिर्घण्टः ॥

वक्रबालधिः, पुं, (वक्रो बालधिः केशयुक्तलाङ्गूलं यस्य ।) कुक्कुरः । इति हेमचन्द्रः । ४ । ३४४ ॥ कुटिलपुच्छश्च ॥

वक्रभणितं, क्लीं, (वक्रं कुटिलं भणितम् ।) कुटिलवाक्यम् । तत्पर्य्यायः । श्लेषोक्तिः २ । इति त्रिकाण्डशेषः ॥

वक्रमः, पुं, (अवक्रमणमिति । अव + क्रम + भावे घञ् । अक्रोपः ।) पलायनम् । इति शब्दरत्नावली ॥

वक्रलाङ्गूलः, पुं, (वक्रं लाङ्गूलं यस्य ।) कुक्कुरः । इति राजनिर्घण्टः ॥ कुटिलपुच्छे, क्लीं ॥

वक्रवक्रः, पुं, (वक्रं वक्रं सुखमस्य ।) शूकरः । इति शब्दरत्नावली ॥ कुटिलसुखविशिष्टे, त्रि ॥

वक्रशल्या, स्त्री, (वक्रं शल्यमिव पत्राद्यस्याः ।) कुटुम्बिनीक्षुपः । इति राजनिर्घण्टः ॥

वक्राग्रं, क्लीं, (वक्रमग्रं यस्य ।) कवाटवक्रदण्डः । इति रत्नमाला ॥ ॥ कुटिलाग्रभागश्च ॥

वक्राङ्गः, पुं, (वक्रमङ्गं यस्य ।) हंसः । इति हेमचन्द्रः ॥ कुटिलावयवे, क्लीं ॥ (कुटिलावयवविशिष्टे, त्रि । यथा, हरिवंशे । १०२ । ३८ ।
"तरङ्गविक्षोभपरीक्षा चक्रवाकोत्सुकस्तनी ।
वेगगम्भीरवक्राङ्गी चक्षुर्मीनविभूषणा ॥")

वक्रिः, त्रि, मिथ्यावादी । वकधातोः क्रिनुप्रत्ययेन निष्पन्नः ॥

वक्री, [न्] पुं, (वक्रो वक्रतास्यास्तीति । इनिः । वैदिकधर्म्मविरुद्धवादित्वादस्य तथात्वम् ।) बुद्धः । इति शब्दरत्नावली । वक्रतावित्रिष्टे, त्रि । यथा,
"लग्नेशो यदि वक्री स्यात् पुंसः कार्य्येषु वक्रता ।
लग्नेशेऽस्तं गते मर्त्यो दुःखोदधिमधिगच्छति ॥"
इति ज्योतिस्तत्त्वम् ॥

वक्रोक्तिः, स्त्री, (वक्रा कुटिला उक्तिः ।) काकूक्तिः । यथा, कामधेनुकल्पतरुवृक्षप्रशंसायाम् ।
"अथ दृप्ते दधीतसर्गे दाता वक्रोक्तिभिः पदैः ।
ब्राह्मणानाह यत् किञ्चित् मयोत्सृष्टन्तु निर्व्वृते ॥
तत् कश्चिदन्यो न नयेन्न विभाज्यं यथाक्रमम् ।
न वाच्यं न च तत् चौरं पातव्यं केनचित् क्वचित् ॥"
इत्यप्रदीपेऽप्येवम् । वक्रोक्तिभिः काकूक्तिभिः । इति सुहितत्त्वम् ॥ * ॥ कुटिलोक्तिः । यथा,
"वादी व्याकरणं विनेव विदुषां दृष्टः प्रविष्टः सभां
जल्पन्नल्पमतिः स्यात् पटुवटुर्भ्रूभङ्गवक्रोक्तिभिः ।
दीनः सन्नुपहासमेति गणको गोलानभिज्ञस्तथा
ज्योतिर्वित्सदसि प्रगल्भगणकः प्रश्नप्रपञ्चोक्तिभिः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥
(वक्रा अर्थान्तरगर्भेण कुटिला उक्तिः । शब्दालङ्कारप्रभेदः । तल्लक्षणादिकं यथा, साहित्यदर्पणे दशमपरिच्छेदे ।
"अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद् यदि ।
अन्यः श्लेषेण काकुर्वा सा वक्रोक्तिस्ततो द्विधा ॥
द्विधेति श्लेषवक्रोक्तिः काकुवक्रोक्तिरच । क्रमेणोदाहरणं यथा,—

"के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रयः
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ।
वामा यूयमहो विडम्बरसिकः कीदृक् स्मरो वर्त्तते
येनाक्रान्तु विवेकशून्यमनसः पुंस्त्वेव योषिद् भ्रमः ॥"
अत्र विशेषपदस्य विः पक्षी शैलौ नाग इति अर्थद्वययोगात् सभङ्गः श्लेषः । अन्यत्र तु अभङ्गः ।
"काले कोकिलवाचाले सहकारमनोहरे ।
कृतागसः परित्यागात् तस्याश्चेतो न दूयते ॥"
अत्र कयाचित् सख्या निषेधार्थे नियुक्तो नञ् अन्यया काकात् दूयत एवेति विध्यर्थे घटितः ॥")

वक्रोष्ठिका, स्त्री, (वक्रोष्ठोऽस्त्यस्या इति । ठन् । ईषद्ग्रहणेन हि ओष्ठस्य वक्रता जायते अतोऽस्यास्तथात्वम् । यद्वा, वक्र ओष्ठो यस्याः । ततः स्वार्थे कन् । टापि अत इत्वम् ।) अट्टहासम् । ईषद्धास्यम् । तत्पर्य्यायः । क्षितम् २ । इति हेमचन्द्रः ॥

वच, रोषसंहत्योः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-रोषे अक०-संहतौ सक०-सेट् ।) वचति । इति दुर्गादासः ॥

वच्चः, [स्] क्लीं, (उच्यतेऽनेनेति । वच + "पचिवचिभ्यां सुट् च ।" उणा० ४ । २१६ । इति असुन् सुट् । वचतेरसुन् इति रमानाथः । धातुप्रदीपश्च ।) अङ्गविशेषः । स तु हृदयोपरिकण्ठादधोभागः । बुक् इति भाषा । तत्पर्य्यायः । क्रोडम् २ शुनान्तरम् ३ उरः ४ वक्षस्थम् ५ । इत्यमरः ॥ अङ्कः ६ उक्षसङ्गः ७ । इति जटाधरः ॥ वच्चस्थम् ८ गजपीठकम् ९ । इति शब्दचन्द्रिका ॥ आपि च ।
"अथ वच्चश्च वक्षं स्यादुरो वच्चस्थले त्रयम् ।"
इति शब्दरत्नावली ॥
तस्य शुभाशुभलक्षणं यथा,—
"अम्बवान् समवच्चाः स्यात् पीनैर्व्वच्चोभिरूर्ज्जितः ।
वच्चोभिर्विषमैर्निस्वः शल्केन निधनस्तथा ॥"
इति गारुडे ६६ अध्यायः ॥
(पुं, वहतीति । वह + "वहिहाधाभ्यश्छन्दसि ।" उणा० ४ । २२० । इति असुन् । सुट् च । अनड्वान् । इत्युज्ज्वलदत्तः ॥")

वच्चस्यं, क्लीं, (वच्चस्यनेनेति । वच्चोरोगसंहत्योः + ल्युट् ।) वच्चः । इति शब्दचन्द्रिका ॥ (वाहके, त्रि । यथा, ऋग्वेदे । ६ । २३ । ६ ।
"क्रियासं वच्चस्यानि यज्ञे ।"
"वच्चस्यानि वाहकानि स्तोत्राणि क्रियासम करवाम ।" इति तद्भाष्ये सायणः ॥)

वच्चोजं, क्लीं, (वच्चसि जायते इति । जन् + डः ।) स्तनः । इति शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"मध्यस्य प्रथिमानमेति जघनं वच्चोजयोर्मन्दतां
दूरं यात्युदरच्च लोमलतिका नेत्रार्द्धवं धावति ।

कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तं यथात्
अङ्गानीव परस्परं विदधते निर्लुण्ठनं सुभ्रुवः॥")

वक्षोरुहः पुं, (वक्षसि रोहतीति। रुह+कः।) स्तनः। इति त्रिकाण्डशेषः॥ (यथा, आर्य्यासप्तशत्याम्। ४३६।

"मा ग्रथ्नीतरुणि पीवरवक्षोरुहयोर्भरेण भज गर्व्वम्।
निर्म्मोकैरपि शोभा ययोर्भुजङ्गीभिरध्युक्ते:॥")

वक्ष्यमाणः, त्रि, भविष्यत्कथनीयविषयः। वक्ष्यतीति स्यमानप्रत्ययेन निष्पन्नः। यथा। अत्र वक्ष्यमाणवचनात् मथुराब्रह्मप्राप्तावेव जयन्तीत्वम्। इति तिथ्यादितत्त्वम्॥ अपि च।

"तत्रैव द्वादशीमध्ये पारणं श्रवणोऽधिके।
वक्ष्यमाणश्च घटतेऽन्यथा प्राग्विद्धया व्रतम्॥"

इति श्रीहरिभक्तिविलासे १५ विलासः॥

वक्ष, क्षपि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वक्षति। क्षपि गतौ। इति दुर्गादासः॥

वक्ष, रु क्षपि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। इदित्।) रु, वक्ष्यते। क्षपि गतौ। इति दुर्गादासः॥

वग, रु क्षङ्गे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) रु, वग्यते। इति दुर्गादासः॥

वगला } स्त्री, दशमहाविद्यान्तर्गतदेवी-
वगलासुखी } विशेषः। तदुक्तं तन्त्रान्तरे।

"ब्रह्मास्त्रं संप्रवक्ष्यामि सद्यः प्रत्ययकारकम्।
साधकानां हितार्थाय स्तम्भनाय च वैरिणाम्॥
यस्याः स्मरणमात्रेण पवनोऽपि स्थिरायते।
प्रथमं स्थिरमाद्याच्च ततश्च वगलामुखि॥
तदन्ते सर्व्वदुष्टानां ततो वाचं मुखं पदम्॥
स्तम्भयेति ततो जिह्वां कीलयेति पदद्वयम्॥
बुद्धिं नाशय पश्चात्तु स्थिरमायां समालिखेत्।
लिखेच्च पुनरोङ्कारं स्वाहेति पदमन्ततः॥
षट्त्रिंशदक्षरी विद्या सर्व्वसम्पत्करी मता॥"

स्थिरमायां क्लीं। तथा च।

"वह्निहीनेन्द्रमायायुक् स्थिरमाया प्रकीर्त्तिता॥
ॐ क्लीं वगलामुखी सर्व्वदुष्टानां वाचं मुखं स्तम्भय जिह्वां कीलय कीलय बुद्धिं नाशय क्लीं ॐ स्वाहा॥*॥ तन्त्रान्तरे।

"वह्निहीनेन्द्रमायायुक् वगलामुखि सर्व्वयुक्।
दुष्टानां वाचमित्युक्त्वा मुखं स्तम्भय कीलयेत्॥
जिह्वां कीलय बुद्धिं तत् विनाशय पदं वदेत्।
पुनर्व्वीजं ततस्तारं वह्निजायावधिर्भवेत्।
तारादिका चतुस्त्रिंशदक्षरा वगलामुखी॥"

ॐ क्लीं वगलामुखि सर्व्वदुष्टानां वाचं मुखं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय क्लीं ॐ स्वाहा। इत्यपि मन्त्रान्तरम्॥*॥ अनयोः पूजा। प्रातःस्नानादिप्राणायामान्तं विधाय ऋष्यादिन्यासं कुर्य्यात्। यथा, शिरसि नारदऋषये नमः। मुखे बृहत्पङ्क्तिछन्दसे नमः। हृदि वगलामुखी देवतायै नमः। गुह्ये क्लीं बीजाय नमः। पादयोः स्वाहाशक्तये नमः।

"नारदोऽस्य ऋषिर्मूर्द्ध्नि बृहत्पङ्क्तिश्छन्दश्च मुखे।
श्रीवगलामुखी देवी हृदये विन्यसेत्ततः।
क्लीं बीजं गुह्यदेशे तु स्वाहाशक्तिस्तु पादयोः॥"

ततः कराङ्गन्यासौ। ॐ क्लीं अङ्गुष्ठाभ्यां नमः। वगलामुखि तर्जनीभ्यां स्वाहा। सर्व्वदुष्टानां मध्यमाभ्यां वषट्। वाचं मुखं स्तम्भय अनामिकाभ्यां हूं। जिह्वां कीलय कीलय कनिष्ठाभ्यां वौषट्। बुद्धिं नाशय क्लीं ॐ स्वाहा करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। तथा च दिग्बन्धे।

"गुल्फजानुसनाभिहृद्गलांसेषु च मूर्द्धनि।
करद्वयात्तु तलयोः कराङ्गन्यासमाचरेत्॥"

ततो मूलमन्त्रे आत्मतत्त्वव्यापिनीवगलामुखीश्रीपादुकां पूजयामि इति मूलाधारे। मूलान्ते विद्यातत्त्वव्यापिनीवगलामुखीश्रीपादुकां पूजयामि शिरसि। मूलान्ते शिवतत्त्वव्यापिनीवगलामुखीश्रीपादुकां पूजयामि सर्व्वाङ्गे। ततश्च।

"मूर्द्ध्नि भाले दृशोः श्रोत्रे गण्डयोर्नासयोः पुनः।
ओष्ठयोर्मुखवृत्ते च दन्तिवर्णाग्रे च कूर्परे॥
मणिबन्धेऽङ्गुलेर्मूले गले च कुचयोर्हृदि।
नाभौ कट्यां गुह्यदेशे वामांघ्रे कूर्परे तथा॥
मणिबन्धेऽङ्गुलेर्मूले ततश्च विन्यसेत् पुनः।
दक्षवामे चोरुजान्वोर्गुल्फयोरङ्गुलिन्यसयोः।
क्रमेण मन्त्रवर्णांस्तु न्यस्य ध्यायेत् यथाविधि॥"*॥

ततो ध्यानम्।

"मध्ये सुराब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम्।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं स्मरामि धृतमुद्गरवैरिजिह्वाम्॥
जिह्वाग्रमादाय करेण देवीं
वामेन शत्रुं परिपीडयन्तीम्।
गदाभिघातेन च दक्षिणेन
पीताम्बराढ्यां द्विभुजां नमामि॥"

एवं ध्यात्वा मानसैः सम्पूज्य बहिःपूजामारभेत्॥*॥ तत्र प्रथमतोऽर्घ्यस्थापनम्। यथा। अष्टदलं चतुरस्रं विधाय ईशानादिकोणेषु पूर्व्वादिदिक्षु च कुसुमाक्षतरक्तचन्दनैर्ओं गङ्गादित्ये नमः इत्यनेन गन्धादिना संपूज्य तेन मधुना वा अर्घ्यपात्रमापूरयेत्। ततो वारत्रयं विद्यया संपूज्य अङ्गानि विन्यसेत्। ततो धेनुयोनिमुद्रे प्रदर्श्य तेनोदकेन आत्मानं पूजोपकरणञ्चाभ्युक्षयेत्॥*॥ अस्या यन्त्रम्। चारुं षड्दलं वृत्तमष्टदलं भूपुराङ्कितम्। ततो मूलमुच्चार्य ॐ आधारशक्तिकमलासनाय नमः। एवं शक्तिपद्मासनाय नमः। पूर्व्ववत् ध्यात्वा पीठे आवाह्य षडङ्गानि न्यसेत्। ततो मुद्रां प्रदर्श्य पुरतः षडङ्गेन मण्डलं यजेत्। ततो मूलेन मन्त्रयित्वा धेनुयोनिमुद्रे प्रदर्श्य आत्मविद्याग्निवेलक्लेदिबिन्दुत्रयं सुखे चिन्त्वा तर्जन्यङ्गुष्ठयोगेन साङ्गावरणां वगलामुखीं तर्पयेत्। ततो यथासम्भवमुपचारैः संपूज्य आवरणपूजामारभेत्। षट्कोणेषु पूर्व्वे ॐ सुभगायै नमः। एवमग्निकोणे भगसर्पिण्यै। ईशाने भगावहायै। पश्चिमे भगसिद्धायै। नैर्ऋते भगपातिन्यै। वायौ भगमालिन्यै। ततोऽष्टदलपत्रेषु ब्राह्म्याद्याः पूज्याः। पत्राग्रेषु ॐ जयायै नमः। एवं विजयायै। अजितायै। अपराजितायै। स्तम्भिन्यै। जृम्भिन्यै। मोहिन्यै। आकर्षिण्यै। ततो द्वारेषु ॐ भैरवाय नमः। तद्बाह्ये इन्द्रादीन् वज्रादीन् पूजयेत्। ततो मूलेन धूपादिकं दत्त्वा यथाशक्ति जपं विधाय त्रिमूलमुद्रां प्रदर्श्य पुष्पाञ्जलित्रयं दत्त्वा देवीयोनिमुद्रां प्रदर्श्य देवैः। ततो भैरवाय बलिं दद्यात्। ततो विसर्जनान्तं कर्म्म समापयेत्॥ अस्य पुरश्चरणं लक्षजपः। तथा च।

"पीताम्बरधरो भूत्वा पूर्व्वाद्याभिमुखस्थितः।
लक्षमेकं जपेन्मन्त्रं हरिद्रायन्थिमालया॥
ब्रह्मचर्य्यरतो नित्यं प्रयतो ध्यानतत्परः।
प्रियङ्गुकुसुमेनापि पीतपुष्पेण होमयेत्॥"*॥

द्वितीयमन्त्रस्य तु न्यासादिकं सर्व्वं पूर्व्ववत्। ध्यानन्तु।

"गम्भीरां मदोन्मत्तां स्वर्णकान्तिसमप्रभाम्।
चतुर्भुजां त्रिनयनां कामलालसमानसाम्॥
सुन्दरं दक्षिणे पार्श्वं वामे जिह्वाञ्च बज्रकम्।
पीताम्बरधरां देवीं दृढपीनपयोधराम्॥
हेमकुण्डलभूषाढ्यां सर्व्वसिंहासनस्थिताम्॥"*॥

अथ प्रयोगः।

"कुरुते वाग्मतिस्तम्भं दुष्टानां बुद्धिनाशनम्।
जपहोमप्रयोगे च मन्त्रं चाप्ययुतं जपेत्॥
हरिद्राहरितालाभ्यां लवणं जुहुयान्निधि।
स्तम्भयेत् परसैन्यानि नात्र कार्य्या विचारणा॥
अथवा पीतपुष्पेण त्रिमध्वक्तेन होमयेत्।
स्तम्भनेषु च सर्व्वेषु प्रयोगः प्रत्ययावहः॥"*॥

यन्त्रन्तु।

"ॐकारयोः संस्थयोरूर्द्धाधःशिरसोर्लिखेत्।
मध्यगं नाम साध्यस्य तद्बाह्ये चाष्टरेफयम्।
बीजं द्वितीयवर्गस्य द्वतीयं विन्दुभूषितम्।
चतुर्द्वारयुतोपेतं संलिखेत् पृथिवीगतम्।
ठकारेण समावेष्ट्य चतुष्कोणपुटं बहिः।
तल्लोचरेखासंस्थैः भूपैर्मन्त्राक्षरं लिखेत्।
त्रिमूलमध्यरेखायाः पृथ्वी बीजानि पार्श्वयोः।
अष्टस्वपि च कोणेषु तद्बहिर्व्वगलां लिखेत्।
पृथिव्यन्तरितं बाह्ये माहेन्द्रपरिमण्डलम्।
आवेष्ट्य चाष्टधा पश्चात्तद्बाह्ये स्थिरमायया।
निरुध्याङ्कुशबीजेन नादसंभिन्नितार्द्धया।
लिखेत् पूर्व्ववदावेष्ट्य पश्चाच्च वगलामुखीम्।
मद्यं पाषाणपट्टे वा हरिद्रोन्मत्तताल्वके।
दिक्षस्तम्भे सुखस्तम्भे लिखित्वा गाढमाक्रमेत्॥
विवादे यन्त्रमालिख्य भूर्ज्जे तेरेव वस्तुभिः।
कुम्भकारस्य चक्रस्य भ्रमतो विपरीततः॥

मृत्तिकां समुपादाय वृषभं कारयेत्ततः ।
यन्त्रं तस्योपरि न्यस्य तालकेन विलिप्य च ॥
तन्नासायां विनिःक्षिप्य पीतरज्जुं निजे गृहे ।
अर्चयेत्तं चतुष्कालं नित्यं पीतोपचारतः ।
दुष्टस्य स्तम्भयत्येव सुखं वाचस्पतेरपि ॥"
इति वगलापरिच्छेदः ॥ * ॥

विश्वसारे ।
"काली तारा महाविद्या षोड़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्तिताः ॥"

अथ वगलामुखीस्तोत्रम् ।
"मध्ये सुधाब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं भजामि धृतमुद्गरवैरिजिह्वाम् ॥
जिह्वाग्रमादाय करेण देवीं
वामेन शत्रुं परिपीड़यन्तीम् ।
गदाभिघातेन च दक्षिणेन
पीताम्बरां तां द्विभुजां भजामि ॥
चलत्कनककुण्डलोल्लसितचारुगण्डस्थलीं
लसत्कनकचम्पककद्युतिमदिन्दुबिम्बाननाम् ।
गदाहतविपक्षकां कलितलोलजिह्वाञ्चलां
स्मरामि वगलामुखीं विमुखवाङ्मनःस्तम्भिनीम् ॥
पीयूषोदधिमध्यचारुविलसद्रत्नोत्पले मण्डपे
यत्सिंहासनमौलिपातितरिपुप्रेतासनाध्यासिनीम् ।
स्वर्णाभां करपीड़ितारिरसनां भ्राम्यद्गदाविभ्रमा-
मित्थं ध्यायति यान्ति तस्य विलयं सद्योऽथ सर्व्वापदः ॥
देवि त्वच्चरणाम्बुजार्चनरते यः पीतपुष्पाक्षतान्
भक्त्या वामकरे निधाय च मनुं मन्त्री मनोज्ञाक्षरम् ।
पीठध्यानपरोऽथ कुम्भकवशात् बीजं स्मरेत् पार्थिवं
तस्यामित्रसुखस्य वाचि हृदये जाड्यं भवेत् तत्क्षणात् ॥
वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति
क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्राद्गुरुः खञ्जति ।
गर्व्वी खर्व्वति सर्व्वविच्च जड़ति त्वन्मन्त्रणा-
यन्त्रितः श्रीनित्ये वगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः ॥
मन्त्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रञ्च ते
यन्त्रं वादिनियन्त्रणं त्रिजगतां जैत्रञ्च चित्रं न ते ।
मातः श्रीवगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे
त्वन्नामग्रहणेन संसदि सुखस्तम्भी भवेद्-
वादिनाम् ॥
दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं
भूभृद्भ्रामणमुग्रवाग्गदपदं पीतःसमाकर्षणम् ।
सौभाग्यैकनिकेतनं मम दृशोः कारुण्यपूर्णार्द्रतां
स्तोत्रोच्चारणमात्रतो वितरतु प्रत्यक्षतो मातरम्बिके ॥
मातर्भञ्जय मे विपक्षवदनं जिह्वाञ्चलं कीलय
ब्राह्मीं मुद्रय नाशयाशु धिषणां सुम्भां गतिं स्तम्भय ।
शत्रूंश्चूर्णय देवि तीक्ष्णगदया गौराङ्गि पीताम्बरे
विघ्नौघं वगले हर प्रणमतां कारुण्यपूर्णेक्षणे ॥
मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये
श्रीविद्ये समये महेशि वगले कामेशि रामे रमे ।
मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे
दासोऽहं शरणागतः करुणया विश्वेश्वरि त्राहि माम् ॥
संरम्भे चौरसङ्घे प्रहरणसमये बन्धने व्याधिमध्ये
विद्यावादे विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम् ।
वश्ये वा स्तम्भने वा रिपुवधसमये निर्जने वा वने वा
गच्छंस्तिष्ठंस्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु धीरः ॥
नित्यं स्तोत्रमिदं पवित्रमिह यो देव्याः पठत्यादरा-
द्धृत्वा यन्त्रमिदं तथैव समरे बाहौ करे वा गले ।
राजानो हरयो मदान्धकरिणः सर्पा व्याघ्रेन्द्रा-
दिकास्ते वै यान्ति विमोहिता रिपुगणा लक्ष्मीः स्थिरा सिद्धयः ॥
त्वं विद्या परमा त्रिलोकजननी विघ्नौघसंछेदिनी
योषाकर्षणकारिणी जगमनःसम्मोहसन्दायिनी ।
स्तम्भोत्सारणकारिणी पशुमनःसम्मोहसंदायिनी
जिह्वाकीलनभैरवी विजयते ब्रह्मादिमन्त्रो यथा ॥
विद्या लक्ष्मीः सर्व्वसौभाग्यमायुः
पुत्रैः पौत्रैः सर्व्वसाम्राज्यसिद्धिः ।
मानं भोगो वज्रसारोग्यसौख्यं
प्राप्तं तत्तद्भक्तवैश्विन् नरेऽस्मिन् ॥
यत् कृतं जपसन्नाहं गदितं परमेश्वरि ।
दुष्टानां निग्रहार्थाय तदयत्नाद्य नमोऽस्तु ते ॥
ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु विश्रुतम् ।
गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित् ॥
पीताम्बरां द्विभुजाञ्च त्रिनेत्रां गात्रकोमलाम् ।
शिलामुद्गरहस्ताञ्च स्मरेत्तां वगलामुखीम् ॥
प्रातर्मध्याह्नकाले स्तवपठनमिदं कार्य्यसिद्धिप्रदं स्यात् ॥"
इति रुद्रयामले वगलामुखीस्तोत्रं समाप्तम् ।
इति ब्रह्मानन्दसततन्त्रसारः ॥

वगाहः, पुं, (अव+गाह+भावे घञ् । अवलोपः ।) अवगाहः । इति सुग्धबोधव्याकरणं भरतश्च ॥

वग्वुः, पुं, (वक्ति इति । वच्+"वचेर्गश्च ।" उणा० २ । ३३ । इति गुः गश्चान्तादेशः ।) वक्ता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ वावदूकः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (ऋग्वेदः । यथा, ऋग्वेदे । ७ । १०३ । २ ।
"गवामाहनमायुर्वत्सिनीनां
मण्डूकानां वग्वुरत्रासमेति ॥"
"मण्डूकानां वग्वुः शब्दः समेति सङ्गच्छते ॥" इति तद्भाष्ये सायणः ॥)

वघ, इ ङ गतिनिन्दारम्भजीवेषु । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-जीवे अक० च-सेट् ।) इ, वंघते । ङ, वंघते । जीवे एव केचित् प्रयुञ्जते । इति दुर्गादासः ॥

वङ्कः, पुं, (वङ्कतीति । वङ्क+अच् ।) नदीवक्रम् । इत्यमरटीकायां भरतः ॥

वङ्का, स्त्री, (वङ्क+टाप् ।) वल्गाग्यभागः । तत्पर्य्यायः । पल्ययनम् २ । इति त्रिकाण्डशेषः ॥

वङ्गिलः, पुं, (वङ्कति इति । वङ्क+इलच् ।) कण्टकः । इति त्रिकाण्डशेषः ॥

वङ्ग्यः, त्रि, (वङ्ग+ण्यत् । "वङ्गेर्गतौ ।" ७ । ३ । ६३ । इति अगत्यर्थे कुत्वञ्च ।) वक्रम् । यथा, वङ्ग्यं काष्ठम् । इति सुग्धबोधव्याकरणम् ॥

वङ्क्रि, स्त्री, (वङ्कते इति । वकि कौटिल्ये+"वङ्क्रादयश्च ।" उणा० ४ । ६६ । इति क्रिन्प्रत्ययेन निपातितम् ।) पार्श्वास्थि । तत्पर्य्यायः । पशुक्रम २ । इति हेमचन्द्रः । ३ । २८१ ॥

वङ्क्रिः, पुं, स्त्री, (वङ्कते इति । वकि कौटिल्ये+"वङ्क्रादयश्च ।" उणा० ४ । ६६ । इति क्रिन्प्रत्ययेन निपात्यते ।) वाद्यभेदः । इत्युणादिकोषः । यष्टिदारु । पार्श्वास्थि । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वङ्क्षः, पुं, (वङ्क्षति संङ्कते भवतीति । वङ्क्ष+क्षुः । पृषोदरादित्वात् हुम् ।) जघनसन्धिः । इत्यमरः । २ । ६ । ७३ ॥ कुँचकी इति भाषा ॥ (यथा, सुश्रुते शारीरस्थाने ५ अध्याये ।
"चतुर्दशास्थ्नां संघाताः । तेषां त्रयोगुल्फजानुवङ्क्षणेषु ॥")

वङ्क्षुः, स्त्री, (वङ्कतीति । वङ्क+बाहुलकात् कुन् । हुम् च ।) गङ्गाख्योनदीविशेषः । यथा,—
"तस्याः स्रोतसि सीता च वङ्क्षुर्भद्रा च कीर्त्तिता ॥"
सा च केतुमालवर्षस्था गङ्गा । यथा । एवं माल्यवच्छिखरान्निष्पतन्ती तत उपरतवेगा केतुमालमभिवङ्क्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति । इति श्रीभागवते ५ स्कन्धे १७ अध्यायः ॥(यथा च महाभारते । १३ । १६५ । २२ ।
"गोदावरी च वेणा च कृष्णवेणा तथा दिवा ।
हरद्वती च कावेरी वङ्क्षुर्मन्दाकिनी तथा ॥")

वङ्गं

वङ्गं, क्ली, (वङ्गतीति। वगि गतौ + अच्।) धातुविशेषः। रां इति भाषा॥ तत्पर्य्यायः। त्रपुः २ स्वर्णजम् ३ नागजीवनम् ४ रूढङ्गम् ५ रङ्गम् ६ गुरुपत्रम् ७ पिच्चटम् ८ चक्रसंज्ञम् ९ समरम् १० नागजम् ११ कस्तीरम् १२ आलीनकम् १३ सिंहलम् १४। इति हेमचन्द्रः। ४। १०८॥ श्वेतम् १५ नागम् १६ त्रपु १७। इति शब्दरत्नावली॥ अस्य गुणाः। तिक्तत्वम्। मधुरत्वम्। भेदित्वम्। पाण्डुत्वम्। कृमिवातनाशित्वम्। लेखनत्वम्। किञ्चित्पित्तकारित्वञ्च। इति राजवल्लभः॥ (अथ वङ्गस्य नामलक्षणगुणाः।

"रक्तवङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि।
खुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते॥
उत्तमं खुरकं तत्र मिश्रकन्त्ववरं मतम्।
वङ्गं लघु सरं रूक्षमुष्णं मेहकफक्रिमीन्॥
निहन्ति पाण्डुं सश्वासं क्षतक्षय पित्तलं मनाक्।
सिंहो यथा हस्तिगणं निहन्ति
तथैव वङ्गोऽखिलमेहवर्गम्।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ अस्य शोधनमारणविधिर्यथा,—

"वङ्गं चूर्णोदके क्षिप्तं यामार्द्धेन विशुध्यति॥"

इति वङ्गशुद्धिः॥

"वङ्गं सतालमर्कस्य पिष्ट्वा दुग्धेन संपुटेत्।
शुष्कान्यत्यभवेद्भस्म सप्तधा भक्षतां नयेत्॥"

मतान्तरम्।

"वङ्गं खर्परके क्षिप्त्वा चुल्ल्यां संस्थापयेत् सुधीः।
द्रवीभूते पुनस्तस्मिन् चूर्ण्यान्येतानि दापयेत्॥
प्रथमं रजनीचूर्णं द्वितीये च यमानिका।
तृतीये जीरकञ्चैव ततश्चित्रकगुडूचम्॥
अश्वत्थवल्कलोत्थञ्च चूर्णं तत्र विनिःक्षिपेत्।
एवं विधानतो वङ्गं म्रियते नात्र संशयः॥
वङ्गं तिक्तास्लकं रूक्षं किञ्चिद्वातप्रकोपनम्।
मेदःश्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम्॥"

इति वङ्गमारणम्। इति वैद्यकरसेन्द्रसारसंग्रहे मारणमारणाधिकारे॥) अन्यद्रङ्गशब्दे द्रष्टव्यम्॥ * ॥ सीसकम्। देशविशेषे पुं भूम्नि। इति मेदिनी। गे, २२॥ (एकवचनान्तोऽपि। यथा, महाभारते। १। १०४। ५०।

"अङ्गस्याङ्गो भवेद्देशो वङ्गो वङ्गस्य च
स्मृतः॥")

स तु प्राचीदेशान्तर्गतदेशविशेषः। यथा,—

"अङ्गवङ्गा मद्गुरका अन्तर्गिरिबहिर्गिराः॥"

इत्युपक्रम्य।

"ग्राह्या मागधगोनर्द्दाः प्राच्या जनपदाः स्मृताः॥"

इत्यन्तं मत्स्यपुराणवचनम्॥

मतान्तरं यथा,—

"व्याख्यामङ्गवङ्गोपवङ्गत्रिपुरकोबलाः।

वङ्गालः

कलिङ्गोद्रान्मुकिञ्चिन्नाविदर्भग्रवरादयः॥"

इति ज्योतिस्तत्त्वधृतकूर्म्मचक्रवचनम्॥

तस्य सीमा यथा,—

"रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं शिवे!।
वङ्गदेशो मया प्रोक्तः सर्व्वसिद्धिप्रदर्शकः॥"

इति शक्तिसङ्गमतन्त्रे ७ पटलः॥

वङ्गः, पुं, चन्द्रवंशीयबलिराजपुत्रः। यथा,—

"बलिः सुतप्रसो जज्ञे अङ्गवङ्गकलिङ्गकाः।
सुह्मपौण्ड्राश्च बालेया अनपानश्चधाङ्गतः॥"

इति गारुडे १४४ अध्यायः॥ * ॥

(स च वङ्गो दीर्घतमस औरसो बलेः क्षेत्रजश्च। यथा, महाभारते। १। १०४। ४७ ५१।

"ततः प्रसादयामास पुनस्तद्विसत्तमम्।
बलिं सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत्पुनः॥
तां स दीर्घतमाङ्केषु सृष्ट्वा देवीमथाब्रवीत्।
भविष्यन्ति कुमारास्ते तेजसादित्यवर्चसः॥
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः।
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि॥
अङ्गस्याङ्गो भवेद्देशो वङ्गो वङ्गस्य च स्मृतः।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः॥
पुण्ड्रस्य पुण्ड्रा प्रख्याताः सुह्मा सुह्मस्य च
स्मृताः।
एवं बलेः पुरा वंश्याः प्रख्यातो वै महर्षिजः॥")

वार्त्ताकुः। कार्पासः। इति मेदिनी। गे, २२॥

वङ्गजं, क्ली, (वङ्गात् धातुविशेषात् जायते इति। जन + डः।) सिन्दूरम्। इति रत्नमाला॥ वङ्गदेशजाते, त्रि॥

वङ्गनः, पुं, (वङ्गतीति। वगि + ल्युः।) वार्त्ताकुः। इति शब्दरत्नावली॥ वेगुन इति भाषा॥ (गुणादयोऽस्य वार्त्ताकुशब्दे ज्ञातव्याः॥)

वङ्गला, स्त्री, रागिणीविशेषः। इति हलायुधः॥ वङ्गालीति च नामान्तरम्॥

वङ्गशुक्लजं, क्ली, (वङ्गशुक्लाभ्यां रङ्गताम्राभ्यां जायते इति। जन + डः।) कांस्यम्। इति हेमचन्द्रः। ४। ११५॥

वङ्गसेनः, पुं, वकटचः। यथा,—

"वङ्गसेनस्त्वगस्तिद्दुः शुकनाशो सुनिद्रुमः।
अनलिः कुनली॥" इति त्रिकाण्डशेषः॥

वङ्गसेनकः, पुं, (वङ्गसेन + स्वार्थे कन्।) वकटचः। यथा,—

"रक्तपुष्पो सुनितरुरगस्तिर्वङ्गसेनकः॥"

इति रत्नमाला॥

अस्य पुष्पगुणाः।

"वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि।
कटुपाकानि तिक्तानि कासक्षयकराणि च॥"

इति राजवल्लभः॥

वङ्गारिः, पुं, (वङ्गस्य रङ्गधातोरिरिः। अस्य वङ्गधातुजारकत्वात् तथात्वम्।) हरितालम्। इति हेमचन्द्रः॥

वङ्गालः, पुं, भैरवरागस्य पुत्रः। यथा,—

"वङ्गालः पञ्चमः षष्ठो मधुरो हर्षकक्षया।

वचक्रुः

देशाख्यो माधवः सिन्धुभैरवपुत्राः प्रकीर्त्तिताः॥"

अस्य ध्यानम्।

"कलानिधेर्शुलकरस्वरूपस्त्री
भास्वत्त्रिशूलपरिमण्डितवामहस्तः।
भस्मोज्ज्वलो निबिड़बद्धजटाकलापो
वङ्गाल इत्यभिहितस्तरुणार्कवर्णः॥
धाड़वो देववङ्गालो गृहांशुग्यासमध्यमः।
प्रहर्षं विनियोक्तव्यः प्रोक्तोऽयं मुनिना स्वयम्॥"

इति सङ्गीतरत्नाकरः॥

वङ्गाली, स्त्री, भैरवरागस्य रागिणी। यथा,—

"भैरवी कौशिकी चैव भाषा वेलावली तथा।
वङ्गाली चेति रागिण्यो भैरवस्येव वल्लभाः॥"

इति सङ्गीतदामोदरः॥

अस्या मूर्त्तिः।

"मनोज्ञमुक्तागुणभूषिताङ्गी
सुकं दधाना धरणीधरस्था।
प्रांशुः कुमारी कमनीयमूर्त्तिः
र्वङ्गालिकेयं शुचिसाङ्गगीता॥"

इति सङ्गीतरत्नाकरः॥

"वङ्गाली औड़वा ज्ञेया गृहांशुग्यासषड़्जभाक्।
ऋधहीना च विज्ञेया मूर्च्छना प्रथमा मता।
पूर्णा वा महयोपेता कल्लिनाथेन भाषिता॥"

इति सङ्गीतदर्पणम्॥

वच, ऊौ वाचि। सन्देशे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) ऊौ, वक्ता। अयं सेमु (सेट्) इत्येके। न वचत्यप्रियं वचः। इति हलायुधः। इति दुर्गादासः॥

वच, क सन्देशे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) सन्देशो वचनविशेषः। क, वाचयत्यखिलां लिपिमिति हलायुधः। इति दुर्गादासः॥

वच, ल ऊौ वाचि। इति कविकल्पद्रुमः॥ (अदा०-पर०-दिक०-सेट्।) ल, वक्ति। ऊौ, वक्ता। असादन्तिविभक्तिर्न प्रयोज्या। इत्यालङ्कारिकाः। इति दुर्गादासः॥ (यथा,—

"वचेरन्यत्तुशब्दज्ञैः प्रयोगो नाभिधीयते।
जयतेर्नास्ति पञ्चम्या उक्तम् पुरुषः क्वचित्॥"

इति बहुसम्मतम्॥)

वचः, पुं, (वक्तीति। वच + ल्युच्।) कीरपक्षी। इति मेदिनी। चे, ६॥

वचः, [स्] क्ली, (उच्यते इति। वच् + "वचेरसुन्।" उणा० ४।१८६। इत्यसुन्।) वाक्यम्। इत्यमरः। १।६।१२॥ (यथा, रघौ। २।४१।

"इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य।
प्रत्याहृतास्त्रो गिरिशप्रभावा-
दात्मन्यवज्ञां शिथिलोचकार॥")

वचक्रुः, पुं, (वक्तीति। वच् + "हृयुवचिभ्योऽत्युजागृजक्रुचः।" उणा० ३। ८१। इति अक्रुच्।) ब्राह्मणः। इति मेदिनी। ने, १२७॥

वचक्रु: त्रि, (वक्तीति। वच्+"इगुवचिभ्य:" इति।"उणा० ३।८१। इत्यक्रुच्।) वावदूक:। इति मेदिनी। ने, १२७।

वचड्डी, स्त्री, शारिका। वर्हि:। शस्त्रभेद:। इति शब्दरत्नावली॥ मेदिन्यां वचड्डा इति वरड्डा इति च पाठ:॥

वचनं, क्ली, (उच्यतेऽनेनेति। ल्युट्नाशुकत्वादस्य तथात्वम्। वच्+ल्युट्।) शुण्ठी। इति शब्दचन्द्रिका॥ वाक्यम्। तत्पर्य्याय:।

"इरा सरस्वती ब्राह्मी भाषा वाणी च भारती।
गिरा गीश्च गिरां देवी गीर्देवी भारसी-
श्वरी॥
वाग्वाचा वचसामीशा वाग्देवी वर्णमालका।
वचनं भाषितं चोक्तिर्व्याहारो लपितं वच:॥
वाग्देवीवचसोरेष पर्य्याय: परिकीर्त्तित:।
यथास्थानं यथायोग्यं भेद ऊह्यो मनीषिभि:॥"
इति शब्दरत्नावली॥ *॥

(यथा, हितोपदेशे।
"असेवितेश्वरद्वारमदृष्टविरहव्यथम्।
अनुत्कण्ठोत्ववचनं धन्यं कस्यापि जीवनम्॥")

तत्तु त्रिविधम्। यथा,—
वशिष्ठ उवाच।
"वचनं त्रिविधं प्रोक्तं लौकिकं वैदिकं तथा।
सर्व्वं जानाति प्राज्ञस्तु निर्म्मलज्ञानचक्षुषा॥
असत्यमहितं पश्चात् सांप्रतं श्रुतिसुन्दरम्।
सुबुद्धिप्रभुर्ब्रूयादेतं नहि तेषां कदाचन॥
आपद: प्रीतिजनकं परिणामसुखावहम्।
दयालुर्धर्म्मशीलश्च बोधयत्येव बान्धवम्॥
श्रुतिमात्रात् सुधातुल्यं सर्व्वकाले सुखावहम्।
सत्यं सारं हितकरं वचसां श्रेष्ठमीप्सितम्॥
एवं स त्रिविधं प्रोक्तं नीतिसारनिरूपितम्।
कथयामि त्रिधामध्ये किं वदामि वाक्यमीप्सि-
तम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४१ अध्याय:॥ विभक्ति:। सा तु स्यादिस्यादिच्च। यथा।
"क्लीबेकैकं वचनं क्रमात् कहव्यसंज्ञं स्यात्।"इति सुग्धबोधव्याकरणम्॥ तदेतदेकपर्य्याय:। श्लोक:
१ धारा २ इळा ३ गौ: ४ गौरी ५ गान्धर्व्वी ६ गभीरा ७ गम्भीरा ८ मन्द्रा ९ मन्द्राजनी १० वाग्वी ११ वाजी १२ वाजीची १३ वाग: १४ पवि: १५ भारती १६ धमनि: १७ नाडी: १८ मेना १९ मेळि: २० सूर्य्या २१ सरस्वती २२ निवित् २३ खाहा २४ वयु: २५ उपन्दि: २६ मायु: २७ काकुत् २८ जिह्वा २९ घोष: ३० स्वर: ३१ शब्द: ३२ स्वन: ३३ ऋक् ३४ होत्रा ३५ गी: ३६ गाथा ३७ गण: ३८ धेना ३९ मा: ४० विषा ४१ नग्ना ४२ कण्वा ४३ धिषणा ४४ नौ: ४५ अक्षरम् ४६ मही ४७ अदिति: ४८ ऋचौ ४९ वाक् ५० अनुष्टुप् ५१ धेनु: ५२ वलगु: ५३ गल्दा ५४ सर: ५५ सुपर्णी ५६ वेकुरा ५७। इति सप्तपञ्चाशत् वाङ्नामानि। इति वैद्यनिघण्टौ। १। ११॥

वचनग्राही [न्], त्रि, (वचनं गृह्णातीति। ग्रह+णिनि:।) वचने स्थित:। इत्यमरटीकायां रमानाथ:॥

वचनीय:, त्रि, (वच्+अनीयर्।) कथनीय:। इति वचधातो: कर्म्मणि अनीयप्रत्ययेन निष्पन्न:॥ (निन्दायां, क्ली। यथा, कुमारे। ४। २१।
"मदनेन विना कृता रति:
क्षणमात्रं किल जीवितेति मे।
वचनीयमिदं व्यवस्थितं
रमण! त्वामनुयामि यद्यपि॥"
"इति वचनीयं निन्दा मे मम व्यवस्थितम्॥"
इति तट्टीकायां मल्लिनाथ:॥)

वचनीयता, स्त्री, (वचनीयस्य भाव:। वचनीय+तल्।) लोकापवाद:। यथा,—
"जनापवाद: कौलीनं विगानं वचनीयता॥"
इति हेमचन्द्र:। २। १८४॥
(तथा, रुक्मकटिकनाटके तृतीयाङ्के।
"कामं नीचमिदं वदन्ति पुरुष: खप्ने च यद्दुर्लभं
विश्वस्तेषु च वञ्चनापरिभवश्चौर्य्यं न ह्रीर्य्यं हि तत्।
स्वाधीना वचनीयतापि हि वरं बह्वो न सेवाञ्जलि-
र्मार्गो ह्येष नरेन्द्रसौम्रिकवधे पूर्व्वं कृतो द्रौणिना॥")

वचनेस्थित:, त्रि, (वचने तिष्ठति क्षेति। स्था+"गत्यर्थेति।" ३।४।७२। इति क्त:। "ततपुरुषे कृति बहुलम्।"६।३।१४। इति सप्तम्या अलुक्।) वचने तिष्ठति य:। वचनस्थ:। तत्पर्य्याय:। विधेय: २ विनयग्राही ३ आश्रव:। इत्यमर:। ३। १। २४॥ वश्य: ५ प्रणेय: ६। इति केचिदिति भरत:॥

वचनोपक्रम:, पुं, (वचनस्य उपक्रम:।) वाक्यारम्भ:। इति भरतशब्दरत्नावल्यौ॥ तत्पर्य्याय:। उपन्यास: २ वाङ्मुखम् ३। इत्यमर:॥

वचर:, पुं, (अवान्तरे चरतीति। अव+चर+अच्। अलोप:।) कुक्कुट:। धूत:। इति मेदिनी॥

वचलु:, पुं, शुचु:। यथा,—
"पुंसि मनु: क्षुपण्युश्च वचलुर्जगलुस्तथा।
भरण्युश्च प्रणण्यु: स्यादमित्रे क्षणिरित्यपि॥"
इति शब्दमाला॥

वचसांपति:, पुं, (वचसां वाचां पति:।) बृहस्पति:। यथा,—
"जीवोऽङ्गिरा: सुरगुरुर्व्वचसांपतीत्यौ॥"
इति दीपिका॥

वचस्कर:, त्रि, (करोतीति। कृ+अच्। वचस: कर:।) वचने स्थित:। इति केचित्॥

वचा, स्त्री, (वाचयतीति। वच्+णिच्+अच्। निपातनात् ह्रस्व:। यद्वा, अन्तर्भावितण्यर्थात् वच: अच्।) औषधविशेष:। वच् इति भाषा। तत्पर्य्याय:। उग्रगन्धा २ षड्ग्रन्था ३ गोलोमी ४ शतपर्व्विका ५। इत्यमर:। २। ४। १०२॥ तीक्ष्णा ६ जटिला ७ मङ्गल्या ८ विजया ९ उग्रा १० रक्तोग्री ११। इति रत्नमाला॥ वचा १२ लोमशा १३। इति जटाधर:॥ भद्रा १४। अस्या गुणा:। अतितीक्ष्णत्वम्। कटुत्वम्। उष्णत्वम्। कफामयग्रन्थिशोफवातज्वरातिसारसादभूतनाशित्वम्। वान्तिकारित्वञ्च। इति राजनिघण्टु:॥ *॥ अपिच।
"वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्व्विका।
क्षुद्रपत्री च मङ्गल्या जटिलोग्रा च लोमशा॥
वचोग्रगन्धा कटुका तिक्तोष्णा वान्तिवह्निकृत्।
विबन्धाध्मानशूलघ्नी ग्रहोन्मादविशोधिनी॥
अपस्मारकफोन्मादभूतजन्त्वनिलान् हरेत्॥"
अथ खुरासानी वचा।
"पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा।
हैमवत्युदिता तद्वत् शूलं हन्ति विशेषत:॥"
अथ महाभरी वचा। अस्या लोके कुलीजन इति नामान्तरम्।
"सुगन्धाप्युग्रगन्धा च विशेषात् कफकासनुत्।
सुस्वरत्वकरी रुच्या हृत्कण्ठसुखशोधिनी॥"
अपरा सुगन्धा शूलघ्नस्थिरेत्या लोके महाभरा इति नाम।
"शूलघ्नस्थि: सुगन्धाख्या ततो हीनगुणा स्मृता॥"
अथ चोपचीनीति लोके प्रसिद्धा। तस्या गुणा:।
"द्वीपान्तरवचा कट्वी तिक्तोष्णा वह्निदीपिनी।
विबन्धाध्मानशूलघ्नी ग्रहोन्मादविशोधिनी॥
वातव्याधीनपस्मारसन्न्यासं सप्तधेदनाम्।
अपोहति विशेषेण क्रिरङ्गामयनाशिनी॥"
इति भावप्रकाश:॥ *॥

अपरञ्च।
"वचायुष्या वातकफहृत्प्लीह्नो स्मृतिवर्द्धिनी॥"
इति राजवल्लभ:॥ *॥

अन्यच्च।
"अङ्गिर्व्वा पयसाश्येन मासमेकन्तु सेविता।
वचा कुर्य्यादरं प्राज्ञं श्रुतिधारणसंयुतम्॥
चन्द्रसूर्य्यग्रहे पीतं पलमेकं पयोऽन्वितम्।
वचायास्तृतीयं कुर्य्याद्महाप्रज्ञान्वितं नरम्॥"
इति गारुडे १९८ अध्याय:॥

वचोग्रह:, पुं, (ग्रहातीति। ग्रह+अच्। वचसां ग्रह:।) कर्ण:। इति राजनिघण्टु:॥

वज, गतौ। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-सक०-सेट्।) वजति। इति दुर्गादास:॥

वज, क संस्कृतौ। गतौ। इति कविकल्पद्रुम:॥ (चुरा०-पर०-सक०-सेट्।) अयं मार्गणसंस्कारे इति प्राच:। मार्गणस्य शरस्य पश्चादिना संस्कारो मार्गणसंस्कार:। क, वाजयति शरेर्वाणं काण्डकार:। इति रमानाथ:॥ मार्गणसंस्कारयोरिति कश्चित्। इति दुर्गादास:॥

वज्रं, पुं, क्ली, (वजतीति। वज गतौ+"ऋज्रेन्द्राग्रवज्रविप्रेति।"उणा० २। २८। इति रन्प्रत्ययेन निपातित:।) इन्द्रस्यास्त्रविशेष:। वाज् इति भाषा। तत्पर्य्याय:। ह्रादिनी २ कुलिशम् ३

भिदुरम् ४ पवि: ५ शतकोटि: ६ स्वरु: ७ शम्ब: ८ दम्भोलि: ९ अशनि: १० । इत्यमर: । १।१।५० ॥ कुलीशम् ११ भिदिरम् १२ भिदु: १३ स्वरुस् १४ सम्ब: १५ संव: १६ अशनी १७ वज्राशनि: १८ । इति तट्टीका ॥ जम्भारि: १९ छिदशायुधम् २० शतधारम् २१ शतारम् २२ आपोत्रम् २३ अचलम् २४ । इति पुरुषोत्तम: ॥ गिरिकण्टक: २५ गौ: २६ अभ्रोत्थम् २७ मेघभूमि: २८ गिरिश्वर: २९ । इति शब्दरत्नावली ॥ जाम्बवि: ३० दम्भ: ३१ । इति जटाधर: ॥ भिद: ३२ अम्बुजम् ३३ । इति त्रिकाण्डशेष: ॥ (यथा, ऋग्वेदे १।३२।२।

"अहन्नहिं पर्वते शिश्रियाणं
त्वष्टास्मै वज्रं स्वर्यं ततक्ष ॥")

अस्योत्पत्तिर्यथा,—

"तपेलुक्त: स रविणा भ्रमौ कृत्वा दिवाकरम् ।
पृथक् चकार तत्तेजश्चक्रं विष्णोरकल्पयत् ॥
त्रिशूलञ्चापि रुद्रस्य वज्रमिन्द्रस्य चाधिकम् ।
दैत्यदानवसंहर्त्तु: सहस्रकिरणात्मकम् ॥
रूपञ्च प्रतिमञ्चक्रे त्वष्टा पादादते महत् ।
न शशाकाथ तद्द्रष्टुं पादरूपं रवे: पुन: ॥
अर्चायामपि तत: पादौ न कश्चित् कारयेत्
क्वचित् ।
य: करोति स पापिष्ठां गतिमाप्नोति निन्दिताम् ॥
कुष्ठरोगमवाप्नोति लोकेऽस्मिन् दु:खसंयुतम् ।
तस्मात्न धर्म्मकामार्थी चित्रेष्वायतनेषु च ।
न क्वचित् कारयेत् पादौ देवदेवस्य धीमत: ॥"
इति मात्स्ये १९ अध्याय: ॥ * ॥

अपि च ।

"प्रविश्य जठरं शुद्धो दैत्यमातु: पुरन्दर: ।
ददर्शोड्डमुखं बालं कटिन्यस्तकरं महत् ॥
तस्यैवान्तेऽथ ददृशे पेशीं मांसस्य वासव: ।
शुद्धस्फटिकसंकाशां कराभ्यां जग्रहेऽथ ताम् ॥
तत: कोपसमाघातो मांसपेशीं शतक्रतु: ।
कराभ्यामर्दयामास तत: सा कठिनाभवत् ॥
ऊर्द्धेनार्द्धेन वज्रोऽधो वज्रोऽर्द्धं वज्रधे तथा ।
शतपर्व्वा च कुलिश: संजातो मांसपेशित: ॥"
इति वामने ६८ अध्याय: ॥ * ॥

वृत्रासुरवधार्थं दधीचिमुनेरस्थ्ना इन्द्राज्ञया विश्वकर्म्मणा निर्म्मितवज्रस्य प्रमाणं यथा,—

"एवं कृतव्यवसितो दधीड्डायत्नैवमस्तुम् ।
परे भगवते ब्रह्मण्यात्मानं सन्नयन् जही ॥
यतोऽतस्तु मनो बुद्धिस्तत्त्वटक ध्वस्तबन्धन: ।
आस्थित: परमं योगं न देहं बुबुधे गतम् ॥
अथेन्द्रो वज्रमुद्यम्य निर्म्मितं विश्वकर्म्मणा ।
मुने: सकृथिभरुत्सिक्तो भगवत्तेजसान्वित: ॥
तुतो देवगणै: सर्व्वैर्गन्धर्व्वेन्द्रो पर्य्यशोभत ।
स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥"
इति श्रीभागवते ६ स्कन्धे १० अध्याय: ॥*॥

तन्निर्म्माणवारकविधिर्यथा,—

"प्रचक्रुपवनाघाते मेघेषु स्तनितेषु य: ।
त्रि: पठेज्जैमिनीयोऽसि प्राङ्मुखो वाप्युदङ्मुख: ॥
तस्य माभूद्भयं घोरं विद्युतोयोऽवसीदति ॥"
इत्याद्भिकतत्त्वधृतब्रह्मपुराणम् ॥

"सुने: कल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात् ।
विद्युदग्निभयं नास्ति पठिते च गृहोदरे ॥"
लिखिते च गृहोदरे । इति वा पाठ: ।

"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च ।
पुलस्त्य: पुलहश्चैव पञ्चैते वज्रवारका: ॥"
इति पुराणम् ॥*॥*॥

रत्नविशेष: । हीरा इति भाषा । तत्पर्य्याय: । इन्द्रायुधम् २ हीरम् ३ भिदुरम् ४ कुलिशम् ५ पवि: ६ अभेद्यम् ७ अशिरम् ८ रत्नम् ९ दृढ़म् १० भार्गवकम् ११ षट्कोणम् १२ वहुधारम् १३ शतकोटि: १४ । अस्य गुणा: । षट्रसोपेतत्वम् । सर्व्वरोगापहारकत्वम् । सर्व्वाघशमनत्वम् । सौख्यत्वम् । दैहदार्ढ्यकरत्वम् । रसायनत्वञ्च । तद्विशेषो यथा,—

"स्वच्छं विद्युत्प्रभं स्निग्धं सौन्दर्य्यं लघु लेखनम् ।
षड़ारम्नीरुधारञ्च सुग्राह्यारं श्रियं दिशेत् ॥"
तस्य कुलक्षणं यथा,—

"भस्माभं काकपादञ्च रेखाक्रान्तन्तु वर्त्तुलम् ।
आधारमलिनं बिन्दु संत्रासे स्फुटितन्तथा ।
नीलाभं च्युतिमत् रूक्षं तदवं दोषवं त्यजेत् ॥"
वज्रस्य चतुर्व्वर्णलक्षणं यथा,—

"श्वेतालोहितपीतमेचकतया छायाश्चतस्र: क्रमाद्-
विप्रादित्वमिहास्य यत् सुमनस: पृंसन्ति सत्वं तत: ।
स्फीतां कीर्त्तिमनुत्तमां श्रियमिह दत्ते यथा संभृतं
मत्यानामयथायथं तु कुलिशं पथ्यं हितं जात्यत: ॥"*॥

तस्य परीक्षा यथा,—

"यत् पाषाणतले निकाग्निकरे नोदृश्यते निष्ठुरे
यच्चान्योपलकोटिसुस्करसुखैर्लेखान्न याताहनम् ।
यच्चाग्नं निजलीलयैव दलयेद्वज्रेण वा भिद्यते
तज्ज्ञातं कुलिशं वदन्ति कुशला: श्राद्धं महा-
धर्घ्यं तत् ॥"*॥

तस्य वर्णगुणौ यथा,—

"विप्र: सोऽपि रसायनेषु बलवानष्टाङ्गसिद्धिप्रदो
राजन्यस्तु नृणां बलीपलितजिन्मृत्युं जयेद-
क्षया ।
वैश्याकर्षणसिद्धिदस्तु सुतरां वैश्योऽथ शूद्रो
भवेत्
सर्व्वव्याधिहरस्तदेव कथितो वज्रस्य वर्णो
गुण: ॥"
इति राजनिर्घण्ट: ॥*॥

अपि च ।

अथ वज्रस्य नामलक्षणगुणा: ।
"हीरक: पुंसि वज्रोऽस्त्री चन्द्रो मणिवरश्च स:।
स तु श्वेत: क्षत्री विप्रो लोहित: वैश्यो मत: ।
पीतो वैश्योऽसित: शूद्रश्चतुर्व्वर्णात्मकश्च स: ॥
रसायने मतो विप्र: सर्व्वसिद्धिप्रदायक: ।
क्षत्रियो व्याधिविध्वंसी जराघ्नदुहर: पर: ॥
वैश्यो धनप्रद: प्रोक्तस्तथा देहस्य दार्ढ्यकृत् ।
शूद्रो नाशयति व्याधीन् वयस्तम्भं करोति च ।
पुंस्त्रीनपुंसकाख्येते लक्षणीयानि लक्षणै: ॥
सुवृत्ता: फलसंपूर्णास्त्रीयुक्ता दृढ़तरा: ।
पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिता: ॥
रेखाबिन्दुसमायुक्ता: षड़स्रास्ते स्त्रिय: स्मृता: ।"
षड़स्रा: षट्कोणा: ।

"त्रिकोणाश्च सुदीर्घाश्च ते विज्ञेया नपुंसका: ॥
तेऽपि स्यु: पुरुषा: श्रेष्ठा रसबन्धनकारिण: ।
स्त्रिय: कुर्व्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदा: ॥
नपुंसकास्त्रवीर्य्या: स्युरकामा: सत्त्ववर्ज्जिता: ।
स्त्रिय: स्त्रीभ्य: प्रदातव्या: स्त्रीवं स्त्रीवे प्रयोजयेत् ।
सर्व्वेभ्य: सर्व्वदा देया: पुरुषा वीर्य्यवर्द्धना: ॥
अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा ।
पाण्डुतां यकृदुत्थञ्च तस्मात् संशोध्य मारयेत् ॥"
मारितस्य वज्रस्य गुणा: ।

"आयु: पुष्टिं बलं वीर्य्यं वर्ण्यं सौख्यं करोति च ।
सेवितं सर्व्वरोगघ्नं स्तं वज्रं न संशय: ॥"
इति भावप्रकाश: ॥

(अथ वज्रमारणम् ।

"त्रिवर्षारूढ़कार्पासमूलमादाय पेषयेत् ।
त्रिवर्षनागवल्लास्तु निजद्रावै: प्रपेषयेत् ॥
तद्गोलके क्षिपेद्वज्रं रुद्धा गजपुटे यत्नेत् ।
एवं सप्तपुटेनैव म्रियते कुलिशं ध्रुवम् ॥"
मतान्तरम् ।

"कांस्यपात्रे तु भेकस्य मूत्रे वज्रन्तु नि:क्षिपेत् ।
त्रि:सप्तकृत्व: सन्तप्तं वज्रमेवं स्तं भवेत् ॥"
अथान्य: ।

"त्रि:सप्तकृत्व: सन्तप्तं खरमूत्रेण सेचयेत् ।
सूकरेस्त्यालकं पिष्ट्वा तद्गोले कुलिशं क्षिपेत् ॥
प्रभातं वाजिमूत्रेण सिक्तं पूर्व्वक्रमेण तु ।
भस्मी भवति तद्वज्रं वज्रवत् कुरुते तनुम् ॥
आयुष्यं सौख्यजननं बलरूपप्रदन्तथा ।
रोगघ्नं रसदुत्तरं वज्रभस्म भवत्यलम् ॥"
इति वज्रमारणम् । इति वैद्यकरत्नसारसंग्रहे जारणमारणाधिकारे । * ।) अन्यच्च । अथ वज्रगणना । विष्णुधर्म्मोत्तरे ।

"वज्रं मरकतञ्चैव पद्मरागञ्च मौक्तिकम् ।
इन्द्रनीलं महानीलं वैदूर्य्यं गन्धसंज्ञकम् ॥
चन्द्रकान्तं सूर्य्यकान्तं स्फाटिकं वलकं तथा ।
कर्केतरं पुष्परागं तथा ज्योतीरसं द्विज ॥
स्फाटिकं राजवर्त्तञ्च तथा राजमतं शुभम् ।
सौगन्धिकं तथा गर्ज्झं शुद्धगर्ज्झमयं तथा ॥
गोमेदं रुधिराख्यञ्च तथा भल्लातकं द्विज ।
धूलीमरकतञ्चैव तुत्थकं सीसमेव च ॥

पौलुं प्रवालकञ्चैव गिरिवज्रञ्च भार्गव ।
भुजङ्गमामणिश्चैव तथा वज्रमणिः शुभः ॥
तित्तिरञ्च तथा पीतं भ्रामरञ्च तथोत्पलम् ।
वज्राण्येतानि सर्व्वाणि धार्य्याण्येव महीभृता ॥
सुवर्णप्रतिबद्धानि जयारोग्यसमृद्धये ॥"
इति युक्तिकल्पतरुः ॥

तस्योत्पत्तिपरीक्षामूल्यादि यथा,—
"वज्रमि परीक्षां रत्नानां बलो नामासुरोऽभवत् ।
इन्द्राद्या निर्ज्जितास्तेन निर्ज्जेतुं तेन गृह्यते ॥"
इत्यपक्रम्य ।
"महाप्रभावं विबुधैर्यस्माद्वज्रमुदाहृतम् ।
वज्रपूर्व्वा परीक्षेयं ततोऽस्माभिः प्रकीर्त्त्यते ॥
तस्मास्त्रिलेखो निपपात येषु
भुवः प्रदेशेषु कथञ्चिदेव ।
वज्राणि वज्रायुधनिर्ज्जिगीषो-
र्भवन्ति नानाकृतिमन्ति तेषु ॥
हैममातङ्गसौराष्ट्राः पौण्ड्रकालिङ्गकोशलाः ।
वेणातटाः ससौवीरा वज्रस्याष्टविधाकराः ॥
आताम्रा हिमशैलजाश्च शुभ्रिमा वेणातटीयाः स्मृताः
सौवीरे तुषितालमेघसदृशास्ताम्राश्च सौराष्ट्रजाः ।
कालिङ्गाः कनकावदातरुचिराः पीतप्रभाः कोशले
श्यामाः पुण्ड्रभवा मतङ्गविषये नात्यन्तपीतप्रभाः ॥
अत्यर्थं लघु वर्णतश्च गुणवत् पार्श्वेषु सम्यक् समं
रेखाबिन्दुकलङ्ककाकपदकच्छायादिभिर्व्वर्जितम् ।
लोकेऽस्मिन् परमाणुमात्रमपि यत् वज्रं क्वचिद् दृश्यते
तस्मिन् देवसमाश्रयो ह्यवितथस्तीक्ष्णाग्रधारं यदि ॥
वर्णेषु वर्णयुक्ता देवानामपि परिग्रहः प्रोक्तः ।
वर्णेभ्यश्च विभागः कार्य्यो वर्णाश्रयादेव ॥
हरितसितपीतपिङ्गश्यामताम्राः स्वभावतो रुचिराः ।
हरिवरुणशुक्रहुतवहपिठपतिमरुतां स्वका वर्णाः ॥
विप्रस्य शुक्लकुसुदस्फटिकावदातः
स्यात् क्षत्रियस्य शुभ्रेवभ्रुविलोचनाभः ।
वैश्यस्य कान्तकदलीदलसन्निकाशः
शूद्रस्य धौतकरवालसमानदीप्तिः ॥
द्वौ वज्रवर्णौ पृथिवीपतीनां
सङ्गः प्रतिष्ठो न तु सार्व्वजन्यौ ।
यः स्याच्चवाविद्रुमभङ्गशोणो
यो वा हरिद्दारससन्निकाशः ॥
दैग्यात् सर्व्ववर्णानां गुणवत् सार्व्ववर्णिकम् ।
कामतो धारयेद्राजा न वर्ण्योऽत्यन्त कथञ्चन ॥
अधरोत्तरवृत्त्या हि यादृक् स्यादवर्णसङ्करः ।
ततः कृष्णतरो वर्ज्यो वर्णानां सङ्करो मतः ॥
न च मार्गविभागमात्रवृत्त्या
विदुषा वज्रपरिग्रहो विधेयः ।
गुणवद्गुणसम्पदां विभूति-
र्विपरीतो व्यसनोदयस्य हेतुः ॥
एकमपि यस्य पृष्ठं
विदलितमवलोक्यते विशीर्णं वा ।
गुणवदपि तन्न धार्य्यं
वज्रं श्रेयोऽर्थिभिर्भवने ॥
स्फुटितामिविशीर्णपृष्ठदेशं
मलवर्णैः पृथतेरुपैतमध्यम् ।
नहि वज्रभृतोऽति वज्रमाशु
श्रियमन्याश्रयलालसां न कुर्य्यात् ॥
यस्यैकदेशः चतवावभासो
यदा भवेल्लोहितवर्णचित्रम् ।
न तन्न कुर्य्याद्विधमाशुमाशु
स्वच्छन्दलोलरुपि जीवितान्तम् ॥
कोट्यः पार्श्वानि धाराश्च षड्दौ द्वादशैति च ।
उत्तुङ्गसमतीक्ष्णाग्रा वज्रस्याकरजा गुणाः ॥
षट्कोटिशुद्धममलं स्फुटतीक्ष्णधारं
वर्णान्वितं लघु सुपार्श्वमपेतदोषम् ।
इन्द्रायुधांशुविहतिच्छुरितान्तरीच-
मेवंविधं भुवि भवेत् सुलभं न वज्रम् ॥
तीक्ष्णाग्रं विमलमपेतसर्व्वदोषं
धत्ते यः प्रयततनुः सदैव वज्रम् ।
दृष्ट्वित्तं प्रतिदिनमेति यावदायुः
श्रीसम्पत्सुतधनधान्यगोपशूनाम् ॥
व्यालव्रिविषव्याघ्रतस्करास्त्रभयानि च ।
दूरात्तस्य निवर्त्तन्ते कर्म्माण्याथर्व्वणानि च ॥
यदि वज्रमपेतसर्व्वदोषं
विभ्रयात्तस्कुलविंग्रतिं गुरुत्वे ।
मणिशास्त्रविदो वदन्ति तस्य
द्विगुणं रूपकलक्षणसम्पद् मूल्यम् ॥
त्रिभागहीनार्द्धतदर्द्धभागं
त्रयोदशं त्रिंशदतोऽर्द्धभागाः ।
अशीतिभागोऽथ शतांशभागः
सहस्रभागोऽल्पसमानयोगः ॥
यत्तण्डुलैर्द्वादशभिः कृतस्य
वज्रस्य मूल्यं प्रथमं प्रदिष्टम् ।
द्वाभ्यां क्रमाद्धानिमुपागतस्य
लेकावसानस्य विनिश्चयोऽयम् ॥
न चापि तण्डुलैरेव वज्राणां धारणक्रमः ।
अष्टाभिः सर्षपैर्गौरैस्तण्डुलं परिकल्पयेत् ॥
यत्तु सर्व्वगुणैर्युक्तं वज्रं तरति वारिणि ।
रत्नवर्गे समस्तोऽपि तस्य धारणमिष्यते ॥
अनेनापि हि दोषेण लघ्वालक्ष्येण दूषितम् ।
स्वमूल्यात् दशमं भागं वज्रं लभति मानवः ॥
प्रकटानेकदोषस्य स्वल्पस्य महतोऽपि वा ।
स्वमूल्याच्छतमो भागो वज्रस्य न विधीयते ॥
सूक्ष्मदोषमलङ्कारे वज्रं यद्यपि दृश्यते ।
रत्नानां परिकर्म्मार्थं मूल्यं तस्य भवेल्लघु ॥
प्रथमं गुणसम्पदाभ्युपेतं
प्रतिवद्धं समुपैति यच्च दोषम् ।
व्यलमाभरणेन तस्य राज्ञो
गुणहीनोऽपि मणिर्न भूषणाय ॥
नार्य्या वज्रमधार्य्यं गुणवदपि सुतप्रसूति-
मिच्छन्त्या ।
अन्यत्र दीर्घविपिटङ्कादृगुणैर्विसृक्ताच्च ॥
अयसा पुष्परागेण तथा गोमेदकेन च ।
वैदूर्य्यस्फटिकाभ्याञ्च काचेश्चापि पृथग्विधैः ॥
प्रतिरूपाणि कुर्व्वन्ति वज्रस्य कुशला जनाः ।
परीक्षा तेषु कर्त्तव्या विद्वद्भिः स्वपरीक्षकैः ॥
चारोल्लेखनघृष्टाभिस्तेषां कार्य्यं परीक्षणम् ।
पृथिव्यां यानि रत्नानि ये चान्ये लोहधातवः ॥
सर्व्वाणि विलिखेद्वज्रं तच्च तैर्न विलिख्यते ॥
गुरुता सर्व्वरत्नानां गौरवाधारकारणम् ।
वज्रे तान्येपरीतेन गुरवः परिचक्षते ॥
जातिरजातिं विलिखन्ति वज्रकुरविन्दाः ।
वज्रेवज्रं विलिखति नान्येन लिख्यते वज्रम् ।
वज्राणि मुक्ता मणयो ये च केचन जातयः ।
न तेषां प्रतिवद्धानां भा भवत्यूर्द्धगामिनी ॥
तिर्य्यक्कृततत्वात् कैयाचित् कथञ्चिदूर्द्धं
दृश्यते ।
तिर्य्यग्लिख्यमानानां सा पार्श्वेष्वपि दृश्यते ॥
यद्यपि विशीर्णकोटिः
सविन्दुरेखान्वितो विवर्णो वा ।
तदपि धनधान्यपुत्रान्
करोति सेन्द्रायुधो वज्रः ।
सौदामिनीविस्फुरिताभिरामं
राजा यथोक्तं कुलिशं दधानः ।
खराक्रमाक्रान्तपरप्रतापः
समस्तसामन्तभुवं भुनक्ति ॥"
इति गारुडे ६८ अध्यायः ॥

वज्रार्थे वैदिकपर्य्यायो यथा। विद्युत् १ नेमिः २ हेतिः ३ नभः ४ पविः ५ शुक्रः ६ शुक्रः ७ वधः ८ वज्रः ९ अर्कः १० कृत्नुः ११ कुलिशः १२ तुजः १३ तिग्मम् १४ मेनिः १५ स्वधितिः १६ सायकः १७ परशुः १८। द्व्यष्टाद्यग्र वज्रनामानि । इति वेदनिघण्टौ । २ । २० ॥

वज्रं, क्ली, (वज गतौ + ऋज्रेन्द्रेति रन् ।) बालकः । धात्री । इति मेदिनी । रे, ६ ॥ काञ्जिकम् । इति धरणिः ॥ वज्रपुष्पम् । इति शब्दरत्नावली । लौहविशेषः । स च बहुविधो यथा । नीलपिच्छम् १ अरुणाभम् २ मोरकम् ३ नागकेशरम् ४ तित्तिराङ्गम् ५ स्वर्णवज्रम् ६ प्रैवालवज्रम् ७ श्रोत्रवज्रम् ८ रोहिणी ९ काङ्कोलम् १० ग्रन्थिवज्रकम् ११ मदनाख्यम् १२ इत्यादि । तेषां नामानुरूपं चिह्नम् । इति पुराणम् । अभ्रविशेषः । तस्योत्पत्त्यादि यथा,—
"पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतम् ।
विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः ॥
ते निपेतुर्घनध्वानाच्छिखरेषु महीभृताम् ।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकम् ।
तद्वज्रं वज्रजातत्वादभ्रमभ्रवोद्भवात् ।

गगनात् स्खलितं यस्मात् गगनञ्च ततो मतम् ॥
पिनाकं दण्डं नाम वज्रमेति चतुर्विधम् ।
वज्रस्तु वज्रवत् लिङ्गेत् तन्नामौ विकृतिं व्रजेत् ॥
सर्व्वास्त्रेषु वरं वज्रं यादिवाङ्गस्यतुङ्कृत् ॥"
इति भावप्रकाशः ॥

वज्रः, पुं, (वज्र+रन् ।) कोकिलाक्षवृक्षः । श्वेतकृष्णः । इति राजनिर्घण्टः ॥ मेहुरङ्-वृक्षः । इति भावप्रकाशः ॥ श्रीकृष्णप्रपौत्रः । यथा,—
"अनिरुद्धात् सुभद्रायां वज्रो नामृपोऽभवत् ।
प्रतिबाहुर्वज्रसुतश्चारुस्तस्य सुतोऽभवत् ॥"
इति गारुडे १७४ अध्यायः ॥
अपि च ।
"प्रद्युम्न आसीत् प्रथमः पिलवद्रुक्मिणीसुतः ।
स रुक्मिणो दुहितरमुपयेमे महारथः ॥
तस्यां ततोऽनिरुद्धोऽभून्नागायुतबलान्वितः ।
स चापि रुक्मिणः पौत्रीं दौहित्रो जगृहे ततः ॥
वज्रस्तस्यामभूदयस्तु मौषलादवशेषितः ।
प्रतिबाहुरभूत्तस्मात् सुबाहुस्तस्य चात्मजः ॥"
इति श्रीभागवते १० स्कन्धे ६० अध्यायः ॥*॥
(विश्वामित्रपुत्रभेदः । यथा, महाभारते १३। ४ । ५१ ; ५६ ।
"वसुपुत्रश्च भगवान् गालवश्च महामुनिः ।
ऋषिर्यश्चस्यथाख्यानः सालङ्कायन एव च ॥"
"विश्वामित्रात्मजाः सर्व्वे मुनयो ब्रह्मवादिनः ॥")
विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चदशयोगः । तस्याद्यनवदण्डा वर्জ্জनीया यथा,—
"त्यजादौ पञ्च विष्कम्भे सप्त शूले च नाड़िकाः ।
गण्ड व्याघातयोः षट् च नव हर्षणवज्रयोः ॥
वैधृतिव्यतिपातौ च समस्तौ परिवर्জ্জयेत् ।
शेषा यथार्थनामानो योगाः कार्য্येषु शोभनाः ॥"
इति ज्योतिस्तत्त्वम् ॥
अस्य जातफलं यथा,—
"गुणी गुणज्ञो बलवान् महौजाः
सद्रत्नवस्त्रादिपरीक्षकः स्यात् ।
वज्राभिधाने यदि चेत् प्रसूतो
वज्रोपमः स्यादरिपुक्षमिणीनाम् ॥"
इति कोष्ठीप्रदीपः ॥

वज्रकं, क्ली, (वज्र+संज्ञायां कन् ।) वज्रसारम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सित-स्थाने ६ अध्याये । तैलं वज्रकमभ्यङ्गार्थं ॥) सर्व्वतोभद्रचक्रान्तर्गतसूर्য্यभोग्यनक्षत्रात् तृतीय-विंशनक्षत्रात्मक उपग्रहः । यथा,—
"सूर्য্यभात् पञ्चमं धिष्ण्यं ज्ञेयं विद्युन्मुखा-
भिधम् ।
शून्याष्टमगं प्रोक्तं सन्निपातं चतुर्दशम् ॥
केतुमद्दारुणं प्रोक्तमुल्का स्यादेकविंशतिः ।
द्वाविंशतितमं कम्पं त्रयोविंशञ्च वज्रकम् ।
निर्घातश्च चतुर्विंशमुल्का अष्टाविंशमग्रहाः ॥"
इति ज्योतिस्तत्त्वम् ॥

वज्रकटः, पुं, (वज्रः कङ्कटो देहावरणमस्य ।) हनूमान् । इति हेमचन्द्रः । ३ । ३७० ॥

वज्रकण्टकः, पुं, (वज्रस्य कण्टकमिव तदार-कत्वात् ।) खदीवृक्षः । इति जटाधरः ॥ कोकि-लाक्षवृक्षः । इति राजनिर्घण्टः ॥

वज्रकन्दः, पुं, (वज्राकारः कन्दोऽस्य ।) वज्रकर्णः । इति रत्नमाला ॥ सकरकन्द आलु इति भाषा ॥

वज्रकपाली, [न्] पुं, (वज्रकपालोऽस्यास्तीति । इनिः ।) बुद्धविशेषः । तत्पर्য্यायः । हेरम्बः २ हेरकः ३ चक्रसम्वरः ४ देवः ५ निगुह्यौशः ६ अग्निग्रेश्वरः ७ वज्रटीकः ८ । इति हेमचन्द्रः ॥

वज्रकालिका, स्त्री, (वज्रोपलक्षिता कालिका ।) मायादेवी । इति हेमचन्द्रः ॥

वज्रकेतुः, पुं, (वज्रं केतुश्चिह्नमस्य ।) नरकराजः । यथा,—
"गते षष्ठिछे नरकः शीघ्रं विषयसंयुतः ॥"
इत्युपक्रम्य ॥
"इति यामीन्मनिरुक्तस्य वज्रकेतोस्तदा चला ।
दूतश्च प्राहिणोत् यत्तं वाराणस्य नगरं प्रति ॥"
इति कालिकापुराणे ३८ अध्यायः ॥

वज्रक्षारं, क्ली, (वज्रसंज्ञकं क्षारमिति ।) क्षार-विशेषः । तत्पर्য্यायः । वज्रकम् २ क्षार-श्रेष्ठम् ३ विदारकम् ४ सारः ५ चन्द्रसारः ६ धूमोत्थम् ७ धूमजाङ्गकम् ८ । अस्य गुणाः । अत्युष्णत्वम् । तीक्ष्णत्वम् । क्षारत्वम् । रेचन-त्वम् । गुल्मोदरार्शोविषमाग्निप्रशमनत्वम् । सरत्वञ्च । इति राजनिर्घण्टः ॥ (भल्लातीयौषध-विशेषः । तद्गुणा यथा,—
"सासुद्रं सैन्धवं काचं यवक्षारं सुवर्চ্চलम् ।
टङ्कणं सर्জ्जिका क्षारं तुल्यं सर्व्वं विचूर्णयेत् ॥
अर्कक्षीरैः खदीक्षीरैरातपे भावयेत् त्र्यहम् ।
तेन लिप्त्वार्कपत्रञ्च रुद्धा चान्तः पुटे पचेत् ॥
ततः क्षारं चूर्णयेत् पश्चात् चूर्णगस्त्रिफलारजः ।
क्षीरकं रजनी वह्निः नवभागं समं समम् ॥
क्षारार्द्धमेवं सर्व्वञ्च एकीकृत्य प्रयोजयेत् ।
वज्रक्षारमिदं सिद्धं स्वयं प्रोक्तं पिनाकिना ॥
सर्व्वोदरेषु गुल्मेषु शूलदोषेषु योजयेत् ।
अग्निमान्द्येऽप्यजीर्णेऽपि भक्ष्यं निष्कट्टयं हयम् ॥
वातादिकं जलं कोष्णं घृतं वा पैत्तिकं हितम् ।
कफे गोमूत्रसंयुक्तमारनालं चिरोधजे ॥"
इति वैद्यकरत्नसारसंग्रहे औषधिकारे ॥*॥)

वज्रचर्म्मा, [न्] पुं, (वज्रवत् दुर्भेद्यं चर्म्म यस्य ।) खड्गी । गण्डकम् । इति राजनिर्घण्टः ॥

वज्रजित्, पुं, (वज्रं जयति तस्याघातसहनेनेति । जि+क्विप् । "इसस्य प्रिति क्षति तुक् ।" ६ । १ । ७१ । इति तुगागमश्च ।) गरुड़ः । इति हेमचन्द्रः । २ । १४५ ॥

वज्रज्वाला, स्त्री (वज्रस्य ज्वाला ।) वज्राग्निः । इति हलायुधः ॥ (यथा, मात्स्ये । १२१ । १४ । "वज्रज्वालान्तरमयः शालमलश्चान्तरालकः ॥")

वज्रटीकः, पुं, (वज्रेण वज्रकपालेन टीकतेऽसौ प्रकाशते इति । टीक+कः ।) वज्रकपाली नामक-बुद्धः । इति त्रिकाण्डशेषः ॥

वज्रतुण्डः, पुं, (वज्रं वज्रतुल्यं कठिनतुण्डं यस्य ।) गरुड़ः । गृध्रः । इति त्रिकाण्डशेषः ॥ गृध्रः । मशकः । इति राजनिर्घण्टः ॥ (वज्रतुण्डधरे, त्रि । यथा, भागवते । ५ । २६ । ३५ ।
"यस्त्विह वा अतिघोरमभागतान् वा गृहपति-रसकृदुपगतमन्युर्दिधक्षुरिव तापेन जन्तुषा निरीक्षते तस्य चापि निरये तापदहैरतिभृशं वज्रतुण्डा गृध्रकङ्ककाकवटादयः प्रसह्योरुबलादुत्पाटयन्ति ॥")

वज्रदन्तः, पुं, (वज्रमिव कठिना दन्ता यस्य ।) शूकरः । मूषिकः । इति शब्दमाला ॥

वज्रदृशनः, पुं, (वज्रमिव कठिनं दशनमस्य ।) मूषिकः । इति हेमचन्द्रः । ४ । ३६६ ॥

वज्रद्रुः, पुं, (वज्रवारको द्रुः ।) खदीवृक्षः । इत्य-मरः ॥

वज्रद्रुमः, पुं, (वज्रवारको द्रुमः ।) खदीवृक्षः । इति शब्दरत्नावली ॥ (तथास्य पर्য্यायः ।
"खेदुरुः खिंखिदुरुः स्यादथो वज्रद्रुमोऽपि च ।
सुधासमन्तदुग्धा च सुकक्षिर्या स्यात् खदी-गुड़ा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वज्रधरः पुं, (धरतीति । धृ+अच् । वज्रस्य धरः ।) इन्द्रः । इति हलायुधः ॥ (यथा, मह-भारते । ३ । २१३ । २३ ।
"अरुन्धती वा सुभगा वशिष्ठं
लोपामुद्रा वापि यथा अगस्त्यम् ।
नलस्य वा दमयन्ती यथाभूद्
यथा शची वज्रधरस्य चैव ॥")
जिनविशेषः । इति त्रिकाण्डशेषः ॥ (वज्रा-पुराधिपतिराजविशेषः । यथा, राजतरङ्गि-ण्याम् । ८ । ५४० ।
"उपरागे नवे सर्व्वे पार्व्वतीयाख्यो नृपाः ।
चाम्पेयो जाघटो वज्रधरो वज्रापुराधिपः ॥")

वज्रनिर्घोषः, पुं, (वज्रस्य निर्घोषः ।) वज्रजनित-शब्दः । इति हलायुधः ॥

वज्रनिर्घोषः, पुं, (वज्राणां निर्घोषः संघर्षध्वनिः ।) वज्रनिर्घोषः । तत्पर्য্यायः । स्फुर्জथुः २ । इत्य-मरः । १ । ३ । १० ॥ "ह्रे वज्रजनितशब्दे । अन्योन्यसंघट्टनात् भयं साग्निमेघखण्डं वज्रमिव वज्रं तस्य साटोपध्वनौ द्वयमिति केचित् ॥ ह्रो स्फुर्জौ वज्रनिर्घोषे । निर्घोषः संघट्टध्वनिः । अग्न्याघात इत्येके । निर्घोषचूर्णनं साटोप-ध्वनिश्च इह तु ध्वनिरभिप्रेतः । श्रुत्वा विस्फु-র্জथुप्रख्यं निनादं परिदेविनीति भट्टिः । स्फुर्जो-ऽथुरिति अथुः निपातनात् दीर्घः । स्फूर्जे-रथुरिति दीर्घार्थं परसूत्रम् । केचित्तु दीर्घं नेच्छन्ति । केचिद्विभाषया दीर्घमिच्छन्ति । वज्रस्य निर्घोषो वज्रनिर्घोषः धौ पिष्ल चूर्णने घञ् । निर्घोषो द्विरुह्यन्यः ।" इति भरतः ॥

वज्रपाणिः, पुं, (वज्रं पाणौ यस्य ।) इन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ६ । १८ । ७ ।
"एष यूहामि ते यूहं राजसत्तम दुर्জ्जयम् ।

अचलं नाम वज्राख्यं विहितं वज्रपाणिना ॥" ब्राह्मणः । यथा, महाभारते । १ । १७१ । ५१ । "वज्रपाणिर्ब्राह्मणः स्यात् क्षत्रं वज्रधरं स्मृतम् । वैश्या वै दानवज्राश्च कर्म्मवज्रा यवीयसः ॥") वज्रपुष्पं, क्ली, (वज्रमिव पुष्पम् ।) तिलपुष्पम् । इत्यमरः । २ । ४ । ७६ ॥

वज्रपुष्पा, स्त्री, (वज्रमिव पुष्पं यस्याः ।) शतपुष्पा । इति राजनिर्घण्टः ॥

वज्रबीजकः, पुं, (वज्रमिव कठिनं बीजमस्य । कप् ।) लताकरञ्जः । इति राजनिर्घण्टः ॥

वज्रमूली, स्त्री, (वज्रमिव कठिनं मूलं यस्याः । ङीष् ।) माषपर्णी । इति राजनिर्घण्टः ॥ (विवरणमस्या माषपर्णीशब्दे ज्ञातव्यम् ॥)

वज्ररथः, पुं, (वज्रमिव रथो यस्य ।) क्षत्रियः । इति पुराणम् ॥ (यथा, महाभारते । १ । १७१ । ५१ । "वज्रपाणिर्ब्राह्मणः स्यात् क्षत्रं वज्रधरं स्मृतम् ॥")

वज्ररदः, पुं, (वज्रमिव रदोऽस्य ।) शूकरः । इति त्रिकाण्डशेषः ॥ वज्रतुल्यदन्तश्च ॥

वज्रवल्ली, स्त्री, (वज्रमिव कठिना वल्ली ।) अस्थिसंहारलता । इति हारावली ॥

वज्रवाराही, स्त्री, मायादेवी । तत्पर्य्यायः । मारीची २ त्रिमुखा ३ वज्रकालिका ४ विकटा ५ गौरी ६ पोत्रिरथा ७ । इति त्रिकाण्डशेषः ॥

वज्रवृक्षः, पुं, (वज्रनिवारको वृक्षः ।) सेहुण्डवृक्षः । इति राजनिर्घण्टः ॥ (तथास्यान्यः पर्य्यायो यथा, वैद्यकरत्नमालायाम् । "स्नुही स्नुक् च महावृक्षो वज्रवृक्षः सुधागुड़ा ॥")

वज्रशल्यः, पुं, (वज्रमिव कठिनं शल्यं गात्रलोमशल्लाका यस्य ।) शल्यकनामा जन्तुः । इति राजनिर्घण्टः ॥

वज्रशृङ्खला, स्त्री, (वज्रवत् शृङ्खलं यस्याः ।) विद्यादेवी । इति हेमचन्द्रः । २ । १५३ ॥

वज्रसूर्य्यः, पुं, (अतिसारवत्त्वात् वज्रमिव तेजस्वित्वात् सूर्य्य इव च ।) बुद्धविशेषः । इति त्रिकाण्डशेषः ॥

वज्रा, स्त्री, (वजति गच्छतीति । वज गतौ + "ऋज्रेन्द्रेति ।" उणा० २ । २८ । इति रक् । टाप् ।) स्नुहीवृक्षः । गुड़ूची । इति मेदिनी । रे, ८१ ॥ दुर्गा । यथा,— "वज्राङ्गशकरी देवी वज्रा तेनोपगीयते ॥" इति देवीपुराणे ४५ अध्यायः ॥

वज्राङ्गः, पुं, (वज्रमिव अङ्गं यस्य ।) सर्पः । इति राजनिर्घण्टः ॥ वज्राङ्ग इति वा पाठः । वज्रतुल्याङ्गयुक्ते, त्रि ॥

वज्राङ्गी, स्त्री, (वज्रमिव अङ्गं यस्याः । ङीष् ।) गवेधुका । इति शब्दचन्द्रिका ॥ अस्थिसंहारी । इति भावप्रकाशः ॥

वज्राभः, पुं, (वज्रस्य हीरकस्य आभा इव आभा यस्य ।) दुग्धपाषाणः । इति राजनिर्घण्टः ॥ हीरकतुल्यादीप्तिमति, त्रि ॥

वज्राग्निः, पुं, वज्रम् । इति त्रिकाण्डशेषः ॥

वज्राग्निशृङ्खला, स्त्री, कोकिलाक्षवृक्षः । इति राजनिर्घण्टः ॥

वज्री, [न्] पुं, (वज्रोऽस्यास्तीति । वज्र + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) इन्द्रः । इत्यमरः । १ । १ । ४५ ॥ (यथा, रघुः । ६ । २७ । "यमकुबेरजनेश्वरवह्निणां समधुरं मधुरस्मितविक्रमम् ॥") बुद्धः । इति मेदिनी । ने, १२६ ॥ (वज्रविशिष्टे, त्रि । यथा, महाभारते । १३ । १४ । ३८१ । "पिनाकिनं वज्रिणं सौम्यदंष्ट्रं शुभाङ्गदं व्यालयज्ञोपवीतम् ॥")

वज्री, स्त्री, (वज् + रक् । गौरादित्वात् ङीष् ।) स्नुहीभेदः । इति मेदिनी । रे, ८१ ॥ (तथास्याः पर्य्यायः ।

"सेहुण्डः सिंहतुण्डः स्यादज्री वज्रद्रुमोऽपि च । सुधासमन्दुग्धा च स्नुक् स्त्रियां स्यात् स्नुहीगुड़ा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वञ्चकः, पुं, (वञ्चयते प्रतारयतीति । वञ्च + णिच् + ण्वुल् ।) शृगालः । इत्यमरः ॥ शठबभ्रुः । इति मेदिनी । के, १५४ ॥

वञ्चकः, त्रि, (वञ्चयते इति । वञ्च + णिच् + ण्वुल् ।) खलः । धूर्त्तः । इति मेदिनी । के, १५४ ॥ (यथा, कलाविलासे । १ । ३६ । "शृणु पुत्र वञ्चकानां सकलकलाहृदयसारमतिकुटिलम् । ज्ञाते भवन्ति यस्मिन् क्षणरुचिचपलाः स्त्रियोऽप्यचलाः ॥")

वञ्चथः, पुं, (वञ्चति प्रतारयतीति । वञ्च + "ग्रीड्ग्रथीति ।" उणा० ३ । ११३ । इति थप्रत्ययः ।) धूर्त्तः । इत्युणादिकोषः ॥ वञ्चना । कोकिलः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वञ्चनं क्ली, (वञ्च + भावे ल्युट् ।) प्रतारणम् । इति हेमचन्द्रः । ३ । ४३ ॥ तस्य गोपनीयत्वम् । यथा,— "वञ्चनाञ्चापमानञ्च मतिमान्न प्रकाशयेत् ॥" इति चाणक्यसंग्रहः ॥

वञ्चना, स्त्री, (वञ्च् + णिच् + युच् + टाप् ।) प्रतारणा । यथा,— "ते कान्तं सुनयो दिशः प्रेक्ष्य हैमवतं पुरम् । स्वर्गाभिसन्धि सुकृतं वञ्चनामिव मेनिरे ॥" इति कुमारसम्भवे । ६ । ४७ ॥

वञ्चितः, त्रि, (वञ्च्यते स्मेति । वञ्च + णिच् + क्तः ।) वञ्चनाविशिष्टः । प्रतारितः । तत्पर्य्यायः । विप्रलब्धः २ । इति हेमचन्द्रः । ३ । १०६ ॥ (यथा, कुमारे । ४ । १० । "विधिना जन एष वञ्चित- स्त्वदधीनं खलु देहिनां सुखम् ॥")

वञ्चुकः, त्रि, (वञ्चति प्रतारयतीति । वञ्च + उकञ् ।) प्रतारणशीलः । तत्पर्य्यायः । धूर्त्तः २ वञ्चुकः ३ । इति शब्दरत्नावली ॥

वञ्च्य, त्रि, (वञ्च् + ण्यत् । "वञ्चेर्गतौ ।" ७ । ३ । ६३ । इति कुत्वं न ।) गमनीयम् । इति गत्यर्थवृत्तधातोः कर्म्मणि ण्यत्प्रत्ययेन निष्पन्नम् । इति सुग्धबोधव्याकरणम् ॥

वञ्जुलः, पुं, (वञ्जतीति । वञ्ज गतौ + बाहुलकात् । उलच् हुमुच् ।) तिनिशवृक्षः । (तथास्य पर्य्यायः ।

"तिनिशः स्यन्दनो नेमी रथदुर्व्वञ्जुलस्तथा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) अशोकवृक्षः । इत्यमरः । २ । ४ । २७ ॥ स्थलपद्मवृक्षः । इति शब्दरत्नावली ॥ पक्षिविशेषः । इति हलायुधः ॥ वेतसवृक्षः । इति मेदिनी । ले, १२६ ॥ (अस्य पर्य्यायो यथा,— "वेतसो नम्रकः प्रोक्तो वानीरो वञ्जुलस्तथा । अभ्रपुष्पश्च विदुलो रुग्ण ग्रीष्मश्च कीर्त्तितः ॥" इति भावप्रकाशः ॥ यथा च रामायणे । ६ । ४ । ७६ । "चिरबिल्वा मधूकाश्च वञ्जुला वञ्जुलास्तथा ॥")

वञ्जुलद्रुमः, पुं, (वञ्जुलो द्रुमः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (वेतसवृक्षादिरपि तदर्थे वञ्जुलशब्ददर्शनात् ॥)

वञ्जुलप्रियः, पुं, (वञ्जुलस्य प्रियः । वञ्जुलः प्रियश्चेति कर्म्मधारयो वा ।) वेतसवृक्षः । यथा. "विदुलो वेतसः प्रीतो वानीरो वञ्जुलप्रियः ॥" इति रत्नमाला ॥

वञ्जुला, स्त्री, (वञ्जुल + टाप् ।) बहुदुग्धा गौः । इति हेमचन्द्रः । ४ । ३३५ ॥ (नदीविशेषः । यथा, माल्ये । ११३ । २६ । "गोदावरी भीमरथी कृष्णवेणी च वञ्जुला । तुङ्गभद्रा सुप्रयोगा बाह्या कावेरी चैव तु । दक्षिणापथनद्यस्ताः सह्यपादाद्विनिःसृताः ॥")

वट, वेष्टे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) वटति वृत्तं लता । इति दुर्गादासः ॥

वट, इ स्तुतौ । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । इदित् ।) इ, वण्टकः । इति दुर्गादासः ॥

वट, इ किं वण्टने । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) वण्टनं विभागः । इ, वण्टयते । किं, वण्टयति वण्टति । वण्टन्ति हाटकं यस्मात् प्राप्य विप्राः परस्परम् । इति हलायुधः । अयं चुरादौ केचिन्न पठ्यते । इति दुर्गासिंहादयः । इति दुर्गादासः ॥

वट, तृ क वेष्टे । भागे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) वटयति । इति दुर्गादासः ॥

वट, म उक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) म, वटयति । इति दुर्गादासः ॥

वटः, पुं. (वटति वेष्टयति मूलेन वृक्षान्तरमिति।) वट्+पचाद्यच्।) वृक्षविशेषः। बड़गाछ इति भाषा। तत्पर्य्यायः। न्यग्रोधः २ बहुपादः ३। इत्यमरः। २। ४। ३२॥ वृक्षनाथः४ वनप्रियः ५। इति शब्दरत्नावली॥ रक्तफलः ६ शृङ्गी ७ कर्म्मजः ८ ध्रुवः ९ क्षीरी १० वैश्रवणावासः ११ भाङ्गीरः १२। इति जटाधरः॥ जटालः १३ रोहिणः १४ अवरोही१५ विटपी १६ स्कन्धशृङ्गः १७ मङ्गली १८ महाच्छायः १९ शृङ्गी २० यक्षावासः २१ यक्षतरुः २२ पादरोहणः २३ नीलः २४ प्रिक्षारुहः २५ बहुपादः २६ वनस्पतिः २७। अस्य गुणाः। कषायत्वम्। मधुरत्वम्। स्निग्धत्वम्। कफपित्तज्वरदाहक्षयास्रमेहव्रणशोफनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः।
वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत्॥"
इति भावप्रकाशः॥*॥
स च वृक्षस्वरूपः। यथा,—
ऋषय ऊचुः।
"कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ॥
सूत उवाच।
अश्वत्थरूपो भगवान् विष्णुरेव न संशयः।
वृक्षरूपो वटस्साक्षात् पलाशो ब्रह्मरूपधृक्॥
दर्शनस्पर्शसेवासु तौ वै पापहरौ स्मृतौ।
दुःखापद्व्याधिदुष्टानां विनायकारिणौ ध्रुवम्॥"
इति पाद्मोत्तरखण्डे १६० अध्यायः॥
अन्यत् पलाशशब्दे द्रष्टव्यम्॥*॥ कपर्दः। इति मेदिनी। टे, २४॥ कड़ि इति भाषा॥ गोलः। भस्म। बड़ा इति भाषा। साम्यम्। इति हेमचन्द्रः॥*॥ क्ली, व्रजमण्डलाभ्यन्तरीयवटसंज्ञकषोड़शवनानि यथा। अथैषां वटसाङ्गवनानामभ्यन्तरे सङ्केतवटाद्या यमुनायाश्चतुरशीतिक्रोशमर्य्यादान्तरे दक्षिणोत्तरतटयोः षोड़शवनानि। पाद्मे।
"सङ्केतवटमादौ तु भाण्डीराख्यं वटं द्वयम्।
यावकाख्यं लतीयञ्च वटं शृङ्गारसंज्ञकम्।
तूर्य्यं वंशीवटं श्रेष्ठं पञ्चमं श्रीवटञ्च षट्।
सप्तमञ्च जटाजूटं कामाख्यवटमष्टकम्।
मनोऽर्थवटकं नाम नवमं परिकीर्त्तितम्।
आम्रावटं महाश्रेष्ठं दशमं शुभदायकम्।
अशोकाख्यं वटं श्रेष्ठमेकादशमुदाहृतम्।
नाम केलिवटं श्रेष्ठं द्वादशं परिकीर्त्तितम्।
नाम भद्रवटञ्चैव त्रयोदशमसंज्ञकम्।
नाम वृन्दवटं श्रेष्ठं चतुर्दशमुदाहृतम्।
धीराख्यं वटं ख्यातं पञ्चदशमिरीरितम्।
कालिन्दाख्यं वटं श्रेष्ठं संख्याषोड़शनिर्म्मितम्॥"
इति व्रजमण्डलान्तरे षोड़शवटानि। इति नारायणभट्टकृतव्रजभक्तिविलासः॥*॥
वटः, त्रि, (वटतीति। वट्+अच्।) गुरुः। इति मेदिनी। टे, २४॥ बेटे इति भाषा॥

वटकः, पुं. (वट एव। स्वार्थे कन्।) पिष्टकविशेषः। इत्यमरभरतौ॥ बड़ा इति भाषा। अस्य गुणौ। विदाहित्वम्। क्षाराकारित्वञ्च। इति राजवल्लभः॥ अपि च।
"माषाणां पिष्टिकां युक्तां लवणार्द्रकहिङ्गुभिः।
कृत्वा विदध्याद्वटकांस्तांस्तैलेषु पचेच्छनैः॥
विशुष्का वटका वल्या दृंहणा वीर्य्यवर्द्धनाः।
वातामयहरा रुच्या विशेषादहिंतापहाः॥
विबन्धभेदिनः श्लेष्मकारिणोऽत्यग्निपूजिताः।
संचूर्ण्य निक्षिपेत्तत्रे भृष्टं जीरकहिङ्गु च॥
लवणं तत्र वटकान् सकलानपि मज्जयेत्।
शुक्लसत्र वटको बलदृग्रोचनो गुरुः॥
विबन्धकृद्विदाही च श्लेष्मलः पवनापहः।
राज्यक्तयातिरोचिन्या पाचन्या तांस्तु भक्षयेत्॥
तत्प्रकारा यथा।
कदलसुमनमाषचौदसक्षीरिशुस्तै-
र्म्मरिचसुघनदुग्धैः सचतुर्ज्जातचन्द्रैः।
कृत इह घृतपक्वो यः पतेत् खण्डपाके
वटकमण्डतकेलिं सा यथात्तं प्रियेऽहम्॥ १॥
सामिक्षैः प्रालिचूर्णैर्दधिमरिचसिताना रिकेला-
र्द्रशुस्तै-
र्जात्येलासल्लवङ्गान्वितकदलफलैः फेणिते:
पिष्टसुद्गैः।
स्वष्टः पक्वो घृते यः प्रपतति समधौ दुग्धपूरे
प्रगाढ़े
सेन्दौ कर्पूरकेलिं तमिह सुवटकं सा यथात्तं
प्रियेऽहम्॥ २॥
ग्रन्थिवद्दटिकालिस्तैर्द्रव्यैः स्वष्टा तु या पतेत्।
पश्चात्ते यथात्तां सा पीयूषग्रन्थिपालिकाम्॥३
सचीरसारघृतखूलनारिकेल-
जातीलवङ्गमरिचैः सचितैः सुपिष्टैः।
रम्भेलया च घृतभावनया भवेद्या
सा तामनङ्गगुटिकां विदधे प्रियेऽहम्॥४॥
कदलमरिचदुग्धैः खण्डगोधूमपक्व-
प्रकटितवटकोऽयं भूरिजातीफलाढ्यः।
नवविधुमधुमध्ये यो विलासं विधत्ते
रचित इह तथासौ सीधुपूर्व्वो विलासः॥५॥
लवङ्गैलेन्दुमरिचैः संयुतैः शर्करान्वयैः।
पक्वे गङ्गाजलाख्यानि लड्डुकान्यपराणि च॥६
तैस्तैर्युतैः क्षीरसारैस्तथा लाङ्गलिशस्यकैः।
अन्यान्यद्याद्यसंभृष्टैः सा रसैः सरपूपिका॥"७
इति रघुनाथभट्टकृते गोविन्दलीलान्ते १६ सर्गः॥*॥ अथाम्बिकावटकः।
"अम्बिकां स्वेदयित्वा तु जलेन सह मर्दयेत्।
तन्नीरे कृतसंस्कारे वटकान् मज्जयेच्छनः॥
अम्बिकावटकास्ते तु रुच्या वह्निप्रदीपनाः।
वटकस्य गुणैः पूर्व्वैरेतैरपि च समन्विताः॥*॥
अथ तक्रवटकः।
सुद्गानां वटकास्तत्र मज्जिता लघवो हिमाः।
संस्कारत्रयभावेन विदोषघ्नमना हिताः॥*॥
अथ माषवटकः।
माषाणां पिष्टिका हिङ्गुलवणार्द्रकसंस्कृता।

तया विरचिता वह्नौ वटिकाः साधु शोषिताः॥
तालितास्तप्ततैले ता अथवा सुप्रलेहिताः।
वटकस्य गुणैर्युक्ता ज्ञातया रुचिदा भृशम्॥*॥
अथ कुष्माण्डवटिः।
कुष्माण्डकवटी ज्ञेया पूर्व्वोक्तवटिकागुणा।
विशेषात् पित्तरक्तघ्नी लघ्वी च कथिता बुधैः॥
अथ सुद्गवटिका।
सुद्गानां वटिका तद्वद्द्रविता साधिता तथा।
पथ्या रुच्या ततो लघ्वी सुद्गसूपगुणा स्मृता॥"
इति भावप्रकाशः॥*॥
(वटी। बड़ि इति भाषा॥ यथा,—
"वटका अथ कथ्यन्ते तन्नाम गुटिका वटी।
मोदको वटिका पिण्डी गुड़ोवार्भिस्तथोच्यते॥
लेहवत् साध्यते वह्नौ गुड़ो वा शर्करापि वा।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्मिलिता वटी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
यथा च।
"मण्डूरं चूर्णयेच्छुद्धं गोमूत्रेऽष्टगुणे क्षिपेत्।
पक्त्वा च वटकं कृत्वा दद्यात्तक्रानुपानतः॥"
इति शार्ङ्गधरे मध्यखण्डे सप्तमेऽध्याये मण्डूर वटके॥*॥) अष्टमाषकपरिमाणम्। यथा,—
"दशगुञ्जास्तु माषः स्यात् शाणो माषचतुष्टयम्।
द्वौ शाणौ वटकः कोलस्तोलको द्रङ्क्षण स्मृतः॥"
इति शब्दमाला॥
(तथा च।
"माषैश्चतुर्भिः शाणः स्याद्वटकः स निगद्यते।
टङ्कः स एव कथितस्तद्वयं कोल उच्यते।
त्रुटको वटकश्चैव द्रङ्क्षणः स निगद्यते॥"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये॥)
वटपत्रः, पुं, (वटस्येव पत्रं यस्य।) सितार्जकः।
इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।
"वर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका।
पर्णाग्रस्तत्र कृष्णे तु कठिल्लकुकुटेरकौ॥
तत्र शुक्लोऽर्जकः प्रोक्तो वटपत्रस्ततोऽपरः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वटपत्रा, स्त्री, (वटस्येव पत्रमस्याः।) त्रिपुरमालीपुष्पवृक्षः। इति रत्नमाला॥
वटपत्री, स्त्री, (वटस्येव पत्रं यस्याः। गौरादित्वात् ङीष्।) पाषाणभेदीविशेषः। तत्पर्य्यायः। इरागी २ ऐरावती ३ गोधावती ४ इरावती ५ श्यामा ६ खड्गाङ्गनामिका ७। अस्याः गुणाः। हिमत्वम्। गौरुत्वम्। मेहरुक्छूविनाशित्वम्। बलदात्रत्वम्। व्रणरुहत्वम्। किञ्चिद्दोषनकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"वटपत्री तु कथिता मोहिन्यैरावती बुधैः।
वटपत्री कषायोष्णा योनिमूत्रगदापहा॥"
इति भावप्रकाशः॥
वटरः, पुं, कुक्कुटः। वेष्टः। गृष्टः। चौरः। चञ्चलः। इति शब्दरत्नावली॥
वटवासी [न्] पुं, स्त्री, (वटे वटवृक्षे वसतीति। वस्+णिनिः।) यक्षः। इति हेमचन्द्रः। २। १०८॥ वटवृक्षवासकर्त्तरि, त्रि॥

वटाकरः, पुं, रज्जुः। इत्यमरटीकायां रामाश्रमः॥

वटारका, स्त्री, रज्जुः। दड़ि इति वेटे इति च भाषा। इति पुराणम्॥ (यथा, महाभारते। १२। ३२६। ३६।
"चत्वारिंशं सत्यमयीं धर्म्मस्थैर्य्यवटारकाम्॥"
पुंलिङ्गोऽप्ययं शब्दः। यथा, महाभारते। ३। १८७। ४०।
"वटारकमयं पाशमथ मत्स्यस्य मर्द्दनि।
मनुर्मनुजशार्दूल! तस्मिन् शब्दे व्यवेशयत्॥")

वटावीकः, पुं, चौरविशेषः। यथा,—
"नामचौरो वटावीकः सन्धिचौरस्तु दारकः॥"
इति शब्दमाला॥

वटिः, स्त्री, (वटतीति। वट+"सर्व्वधातुभ्य इन्।" उणा० ४। ११८। इति इन्।) उपजिह्विका। यथा,—
"उपजिह्विकोत्पादिका च वटिरुद्देहिका देवी॥"
इति हारावली। ११०॥

वटिका, स्त्री, (वटिरेव। स्वार्थे कन्। टाप्।) वटी। वड़ी इति भाषा। तत्पर्य्यायः। गिल्लकी २। इति शब्दचन्द्रिका॥ अथ वटिकाविधिः।
"वटका अथ कथ्यन्ते तन्नामा वटिका वटी।
मोदको गुटिका पिण्डी गुड़ो वर्त्तिस्तथोच्यते॥
लेहवत् साध्यते वह्नौ गुड़ो वा शर्करापि वा।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्मिश्रिता वटी॥"
तत्र वह्निसिद्धे गुड़ादौ।
"कुर्य्यादवह्निसिद्धेन क्वचिद्गुग्गुलुना वटीम्।
द्रवेण मधुना वापि गुटिकां कारयेद्बुधः॥
सिता चतुर्गुणा देया वटीषु द्विगुणो गुड़ः।
चूर्णे चूर्णसमः कार्य्यो गुग्गुलुर्मधु तत्समम्॥"
तत्समं चूर्णसमम्।
"द्रवन्तु द्विगुणं देयं मोदकेषु भिषग्वरैः॥"
द्रवं चतुर्गुणमिति वा पाठः। द्रवं द्रवरूपं द्रव्यम्।
"कर्षप्रमाणा तन्मात्रा बलं दृष्ट्वा प्रयुज्यते।
बलमिति कालादेरुपलक्षणम्। इति भावप्रकाशः॥ * ॥ अङ्गगोपयोगिद्रव्यम्। अस्यापि वड़ी इति भाषा। यथा,—
"मात्रार्द्धा पिष्टिका हिङ्गुवचार्द्रकसंस्कृता।
तथा विरचिता वह्नौ वटिकाः साधु शोधिताः॥
कालिताक्षप्रतीसे ता अथवा सुप्रशेषिताः।
वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिदा भृशम्॥
कुमाकटवटी श्रेया पूर्व्वोक्तवटिकागुणा।
विशेषात् पित्तरक्तघ्नी लघ्वी च कथिता बुधैः॥
सुन्नाभां वटिका तद्वदचिता साधिता तथा।
पथ्या रुचा ततो लघ्वी सुन्नरूपगुणा स्मृता॥"
इति भावप्रकाशः॥

वटी, स्त्री, (वट+अच्। गौरादित्वात् ङीष्।) वटिका। इति भावप्रकाशः॥ इत्यविशेषः। तत्पर्य्यायः। नदीवटः २ यवशष्पः ३ सिद्धार्थः ४ वटकः ५ अमरा ६ भङ्गिनी ७ चीरकाष्ठाः। अस्या गुणाः। कषायत्वम्। मधुरत्वम्। अग्निरत्वम्। पित्तनाशित्वम्। दाहश्लेष्मश्रमनाशविषच्छर्द्दिभ्रमनत्वञ्च। इति राजनिर्घण्टः॥

वटी, त्रि, रज्जुः। इत्यमरः। २। १०। २७॥

व(ब)टुः, पुं, (वटतीति। वट+"कटिवटिभ्याञ्च।" उणा० १। ६। इति उः।) माणवकः। यथा,—
"वटुः पुनर्म्माणवको भिक्षास्य ग्रासमात्रकम्॥"
इति हेमचन्द्रः॥
ब्रह्मचारी। यथा। वटुर्ब्रह्मचारी। इति शब्दरत्नावली॥ (यथा, महाभारते। १। १८६। १५।
"तस्मादृभुवन्तु सर्व्वेऽत्र वटुरेष धनुर्म्महान्।
आरोपयतु शीघ्रं वै तत्रेत्युचुर्द्विजर्षभाः॥")
कुटनटदृष्टः। यथा,—
"मद्धूकपर्णैः श्लोणाकः शुकनासः कुटनटः।
ऋषौ वटुर्दीर्घदन्तो दीर्घदन्तक इत्यपि॥"
इति च शब्दरत्नावली॥
बालकः। यथा,—
"बालको माणवो बालः किशोरो वटुरित्यपि॥"
इत्यपि शब्दरत्नावली॥

वटुकः, पुं, (वटु+स्वार्थे संज्ञायां वा कन्।) बालकः। इति शब्दरत्नावली॥ (यथा, पाद्मे क्रियायोगसारे।
"कुमारीवटुकान् पूज्य तथा श्वेतपोधनान्।
राजसूयफलं तेन प्राप्यते नात्र संशयः॥"
ब्रह्मचारी। यथा, भागवते। १०। ८८। २७।
"तं तथा पतितं दृष्ट्वा भगवान् दृजिनार्द्दनः।
दूरात् प्रत्युदियाद् भूत्वा वटुको योगमायया॥")
भैरवविशेषः। (यथा, महानिर्व्वाणतन्त्रे। २। २४।
"भैरवाश्चैव वेताला वटुका नायिकागणाः।
प्राक्ताः श्वेता वैष्णवाश्च सौरा गाणपतादयः॥")
अस्य मन्त्रादिर्यथा,—
"उद्धरेद्वटुकं हृल्लमापदुद्धारकं तथा।
कुरुद्वयं पुनर्हृल्लं वटुकञ्च समुद्धरेत्।
एकविंशत्यक्षरात्मा प्रोक्तोऽयं मनुरुत्तमः॥"
अस्य पूजा। प्रातःस्नात्वादिप्राणायामान्तं विधाय पीठन्यासं कुर्य्यात्। यथा। धर्म्मादिअनैश्वर्य्यान्तं देहे विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। यथा शिरसि ॐ हृदयारण्यऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि वटुकभैरवाय देवतायै नमः। ततो मूर्त्तिन्यासः। ह्रीं वीं ईशानाय नमोऽङ्गुष्ठयोः। ह्रैं वैं तत्पुरुषाय नमस्तर्ज्जन्योः। ह्रुं वुं अघोराय नमो मध्यमयोः। ह्रैं वैं वामदेवाय नमोऽनामिकयोः। ह्रं वं सद्योजाताय नमः कनिष्ठयोः। पुनस्तत्तदङ्गुलीभिः शिरोवदनहृदयगुह्यपादेषु तत्तद्बीजादिकांस्तत्तन्मूर्त्तीर्न्यसेत्। ततोऽर्घ्यप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु च तान् न्यसेत्। तथा च निगदे।
"अङ्गुलीदेहवक्त्रेषु मूर्त्तीर्न्यसेदयथा पुरा।
सद्यादिपञ्चब्रह्माद्यशक्तिबीजपुरःसरम्।
वकारं पञ्चब्रह्माद्यौशानादिषु योजयेत्॥"
ततः कराङ्गन्यासौ। तद्यथा ॐ ह्रां वां अङ्गुष्ठाभ्यां नम इत्यादि। ॐ ह्रां वां हृदयाय नम इत्यादि च। षड्दीर्घबीजहृदयेन कुर्य्यात्। तथा च निगदे।
"षड्दीर्घयुक्तया शक्त्या वकारेणापि तद्वता।
अङ्गानि जातियुक्तानि प्रणवाद्येन कल्पयेत्॥"
ततो ध्यानम्।
"तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः॥"
सात्त्विकम्। यथा,—
"वन्दे बालं स्फटिकसदृशं कुण्डलोद्भासिवक्त्रं
दिग्वासस्त्वेनवमभिमतैः किङ्किणीनूपुराद्यैः।
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां वटुकमनिशं शूलदण्डौ दधानम्॥" १॥
राजसं यथा,—
"उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागरुजं
क्षौमाढ्यं वरदं कपालमभयं शूलं दधानं करैः।
नीलग्रीवसुदारभूषणयुतं प्रोत्तांशुचूड़ोज्ज्वलं
बन्धूकारुणवाससं भयहरं देवं सदा भावये॥"२॥
तामसं यथा,—
"ध्यायेन्नीलाद्रिकान्तं प्रलयशिखिनिभं रुक्षमालं महेशं
दिग्वस्त्रं पिङ्गकेशं डमरुमथ खड्गं खड्गं
शूलाभयानि।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं
भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणी-
नूपुराढ्यम्॥" ३॥
"सात्त्विकं ध्यानमाख्यातमपष्टत्वविनाशनम्।
आयुरारोग्यजननमपवर्गफलप्रदम्॥ १॥
राजसं ध्यानमाख्यातं धर्म्मकामार्थसिद्धिदम्। २।
तामसं शत्रुशमनं ज्ञात्वाभूतगणादिपम्॥" ३॥
एवं ध्यात्वा मानसैः संपूज्य मूलमन्त्रापवं कुर्य्यात्॥ * ॥ अस्य पूजायन्त्रम्।
"धर्म्माधर्म्मादिभिः कल्पपीठे पद्मत्रयोभिते।
वटुकोद्यत्खड्गिकोऽस्मे योमपङ्कजसंयुते॥"
ततो मूलेन मूर्त्तिं सङ्कल्प्य पूर्व्ववत् ध्यात्वावाहनादिकं कुर्य्यात्। तत्र क्रमः। मूलेन सद्योजातमन्त्रेणावाहनम्। मूलादिवामदेवेन स्नायनम्। मूलेन सन्निधानम्। अघोरेण सन्निरोधनम्। तत्पुरुषेण योनिमुद्राप्रदर्शनम्। ईशानेन वन्दनमिति विशेषः। ततः कर्णिकायां दिक्षु कोणेषु ईशानादीन् यजेत्। ततो योमपङ्कजदलेषु असिताङ्गादिभैरवान् यजेत्।
"असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तौ च भैरवौ।
कपाली भीषणश्चैव संहारोऽष्टौ च भैरवाः॥"
एतैरष्टभैरवैर्द्वितीयावरणम्। ततः वटुकोक्तेषु ह्रां वां हृदयाय नम इत्यनेन पूजयेत्।

ततः पूर्व्वादिडाकिनीराकिणीलाकिनीकाकिनी-साकिनीहाकिनीमालिनीपुत्रान् देवीपुत्रान् उमापुत्रान् रुद्रपुत्रान् मातृकापुत्रान् दक्षिणे यजेत्। ऊर्द्ध ऊर्द्धमुखीपुत्रान् अधोऽधोमुखी-पुत्रान्। तद्बहिरष्टपत्रेषु लोकेशान् वटुक-रूपान् पूजयेत्। तद्बहिः पूर्व्वे ॐ ब्रह्माणी-पुत्राय नमः। एवमीशाने माहेश्वरीपुत्राय। उत्तरे वैष्णवीपुत्राय। अनिले कौमारीपुत्राय। पश्चिमे इन्द्राणीपुत्राय। नैर्ऋते महालक्ष्मी-पुत्राय। याम्ये वाराहीपुत्राय। अनले चामुण्डापुत्राय। तथा च निवर्त्ते।

"ब्रह्माणीपुत्रकं पूर्व्वे माहेशीपुत्रमैशरे।
वैष्णवीपुत्रकं सौम्ये कौमारीपुत्रमानिले॥
इन्द्राणीपुत्रकं भूयः पश्चिमे पूजयेत्ततः।
महालक्ष्मीसुतं पश्चादग्नेयादिषु समर्चयेत्।
वाराहीपुत्रकं याम्ये चामुण्डापुत्रमानले।"

तद्बहिर्दशसु च। हेतुकं त्रिपुरान्तकं वेताल वह्निजिह्वं करालं कालान्तकं एकपादं भीम-रूपं अचलं चाटकेश्वरं पूजयेत्। ततो योगिनीसहितदिव्ययोगीशाय नमः। एवं योगिनीसहितान्तरीक्षयोगीशाय नमः। एवं योगिनीसहितभूमिष्ठयोगीशाय नमः। ईशा-नादिनिर्ऋतिषु पूजयेत्॥ * ॥ अस्य पुर-श्चरणमेकविंशतिलक्षजपः।

"वर्णलक्षं जपेन्मन्त्रं हविष्याशी जितेन्द्रियः।
तद्दशांशं प्रजुहुयात्तिलैर्मधुरसंयुतैः॥"* ॥

अथ बलिदानम्।

"पूर्व्वं विघ्नं दुर्गां समाराध्य बलिं दद्यात्।
घृताक्तान्नं पललं सर्पिर्लाजचूर्णानि शर्करा॥
गुडमिक्षुरसापूपैर्मधुक्षीरैः परिप्लुतैः।
लब्धा कवलमाराध्य देवं प्रागुक्तवर्त्मना।
रक्तचन्दनपुष्पाद्यैर्निशि तस्मै बलिं हरेत्॥"

यद्वा।

"अन्धूनाङ्गमलं हत्वा राजसं प्रागुदीरितम्।
बलिप्रदानसमये रिपूणां सर्व्वसैन्यकम्।
निवेदयेद्बलित्वेन वटुकाय विशुद्धधीः॥
विदर्भयेच्छनुनाशा बलिमन्नं तथा सुधीः।
घृतपक्वस्य रुधिरं पिशितस्य दिने दिने॥
भक्षयञ्छ गवे; साद्धं सारमेयसमन्वितः।
बलिमन्त्रोऽयमाख्यातः सर्व्वेषां विजयप्रदः॥
अनेन बलिना तृप्तो वटुकः परसैन्यकम्।
सर्व्वं गणेभ्यो विभजेच्चामिष क्षुद्रमानसः॥
एवं कृते परबलं क्षीयते नात्र संशयः॥"

इति तन्त्रसारः॥ * ॥

अथ वटुकभैरवस्तोत्रम्।

"कैलासशिखरासीनं देवदेवं जगद्गुरुम्।
शङ्करं परिपप्रच्छ पार्व्वती परमेश्वरम्॥

श्रीपार्व्वत्युवाच।

भगवन् सर्व्वधर्म्मज्ञ सर्व्वागमविशारद।
आपदुद्धारणं मन्त्रं सर्व्वसिद्धिप्रदं नृणाम्॥
सर्व्वेषामेव भूतानां हितार्थं वाञ्छितं मया।
विघ्नेशतन्त्रे राज्ञां वै शान्तिपुष्टिप्रसाधनम्॥

अङ्गन्यासकरन्यासबीजन्यासममन्त्रितम्।
वक्तुमर्हसि देवेश मम हर्षविवर्द्धनम्॥

श्रीभगवानुवाच।

शृणु देवि महामन्त्रमापदुद्धारहेतुकम्।
सर्व्वदुःखप्रशमनं सर्व्वशत्रुनिबर्हणम्॥
अपस्मारादिरोगाणां ज्वरादीनां विशेषतः।
नाशनं स्मृतिमात्रेण मन्त्रराजमिमं प्रिये॥
यद्दराजभयानाच्च नाशनं सुखवर्द्धनम्।
स्नेहाद्वक्ष्यामि ते मन्त्रं सर्व्वसारमिमं प्रिये॥
सर्व्वकामार्थदं मन्त्रं राज्यभोगप्रदं नृणाम्।
प्रणवं पूर्व्वमुच्चार्य्य देवी प्रणवमुद्धरेत्॥
वटुकायेति वै पश्चादापदुद्धारणाय च।
कुरुद्वयं ततः पश्चाद्वटुकाय पुनः क्षिपेत्॥
देवी प्रणवमुद्धृत्य मन्त्रराजमिमं प्रिये।
मन्त्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभम्।
अप्रकाश्यमिमं मन्त्रं सर्व्वशक्तिसमन्वितम्॥
स्मरणादेव मन्त्रस्य भूतप्रेतपिशाचकाः।
विद्रवन्ति भयार्त्ता वै कालरुद्रादिव प्रजाः॥
पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम्।
नाग्निचौरभयं वापि यद्दराजभयन्तथा।
न च मारीभयं तस्य सर्व्वत्र सुखवान् भवेत्॥
आयुरारोग्यमैश्वर्य्यं पुत्रपौत्रादिसम्पदः।
भवन्ति सततं तस्य पुस्तकस्यापि पूजनात्॥

श्रीपार्व्वत्युवाच।

य एष भैरवो नाम आपदुद्धारको मतः।
त्वया च कथितो देव भैरवः कल्प उत्तमः॥
तस्य नामसहस्राणि श्रुतान्यद्भुतानि च।
सारसङ्गृह्य तेषां वै नामाष्टशतकं वद॥ * ॥

श्रीभगवानुवाच।

यस्तु संकीर्त्तयेदेतत् सर्व्वदुरितबर्हणम्।
सर्व्वान् कामानवाप्नोति साधकः सिद्धिमेव च॥
शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः।
आपदुद्धारकस्येह नामाष्टशतमुत्तमम्॥
सर्व्वपापहरं पुण्यं सर्व्वापद्विनिवारकम्।
सर्व्वकामार्थदं देवि साधकानां सुखावहम्॥
देहाङ्गन्यसनञ्चैव पूर्व्वं कुर्य्यात् समाहितः।
भैरवं मूर्द्ध्नि विन्यस्य ललाटे भीमदर्शनम्॥
अक्षोभ्यं ताम्रमश्रु न्यस्य वदने तीक्ष्णदर्शनम्।
स्कन्धयोर्भैरवं न्यस्य हृदये दक्षिणे न्यसेत्॥
वामपार्श्वे कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत्।
क्षेत्राख्यं नाभिदेशे च कट्यां सर्व्वाघनाशनम्॥
त्रिनेत्रमूर्व्वोर्विन्यस्य जङ्घयो रक्तपाणिकम्।
पादयोर्दण्डपाणिं सर्व्वाङ्गे वटुकं न्यसेत्॥
एवं न्यासविधिं कृत्वा तदनन्तरमुत्तमम्।
नामाष्टशतकस्यापि छन्दोऽनुष्टुबुदाहृतम्॥
दक्षदारण्यको नाम ऋषिश्च परिकीर्त्तितः।
देवता कथिता चेह सद्भिर्वटुकभैरवः।
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः॥
ॐभैरवो भूतनाथश्च भूतात्मा भूतभावनः।
क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट्।
श्मशानवासी मांसाशी खर्पराशी मखान्तकृत्।
रक्तपः प्राणपः सिद्धः सिद्धिदः सिद्धसेवितः॥
कराल; कालशमनः कलाकाष्ठातनुः कविः।

त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः॥
शूलपाणिः खड्गपाणिः कङ्काली धूम्रलोचनः।
अभीरुर्भैरवो वीरभूतपो योगिनीपतिः॥
धनदो धनहारी च धनवान् प्रतिभाववान्।
नागहारो नागकेशो सोमकेशः कपालभृत्॥
कालः कपालमाली च कमनीयः कलानिधिः।
त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपात्॥
त्रिनेत्रतनयो डिम्भः शान्तः शान्तजनप्रियः।
वटुको वटुकेशश्च खट्वाङ्गवरधारकः॥
भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः।
धूर्त्तो दिगम्बरः शौरिर्हरिणः पाण्डुलोचनः॥
प्रशान्तः शान्तिदः शुद्धः शङ्करप्रियबान्धवः।
अष्टमूर्त्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः॥
अष्टाधारः कलाधारः सर्पयुक्तः शिखीसखः।
भूधरो भूधराधीशो भूपतिर्भूधरात्मकः॥
कङ्कालधारी सुभगः पवित्रो यज्ञोपवीतवान्।
नृमुण्डो मोहनः स्तम्भी मारणः क्षोभणस्तथा॥
शुद्धनीलाञ्जनप्रख्यदेहो मुण्डविभूषितः।
बलिभुक् बलिभूतात्मा कामी कामपराक्रमः॥
सर्व्वापत्तारको दुर्गो दुष्टभूतनिषेवितः।
कामी कलानिधिः कान्तः कामिनीवशकृद्वशी।
सर्व्वसिद्धिप्रदो वैद्यः प्रभविष्णुः प्रभाववान्॥
अष्टोत्तरशतं नाम भैरवस्य महात्मनः।
मया ते कथितं देवि रहस्यं सर्व्वकामिकम्॥
य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम्।
न तस्य दुरितं किञ्चिन्न रोगेभ्यो भयं तथा।
न शत्रुभ्यो भयं किञ्चित् प्राप्नोति मानवः क्वचित्॥
पातकानां भयं नैव पठेत् स्तोत्रमनन्यधीः।
मारीभये राजभये तथा चौराग्निजे भये॥
औत्पातिके महाघोरे यथा दुःखप्रदर्शने।
बन्धने च तथा घोरे पठेत् स्तोत्रं समाहितः॥
सर्व्वे प्रशमनं यान्ति भयाद्भैरवकीर्त्तनात्।
एकादशसहस्रन्तु पुरश्चरणमुच्यते॥
त्रिसन्ध्यं यः पठेद्देवि संवत्सरमतन्द्रितः।
स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानुषः॥
यस्यासान् भूमिकामस्तु स जम्भो लभते महीम्।
राजा शत्रुविनाशाय जपेन्मासाष्टकं पुनः॥
रात्रौ वारत्रयञ्चैव नाशयत्येव शात्रवान्।
जपेन्मासत्रयं रात्रौ राजानं वशमानयेत्॥
धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः।
पठेद्वारत्रयं यद्वा वारमेकं तथा निशि॥
धनं पुत्रांस्तथा दारान् प्राप्नुयान्नात्र संशयः।
रोगी रोगात् प्रमुच्येत बद्धो मुच्येत बन्धनात्॥
भीतो भयात् प्रमुच्येत देवि सत्यं न संशयः।
यान् यान् समीहते कामांस्तांस्तानाप्नोति

निश्चितम्॥

अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित्।
सत्कुलीनाय शान्ताय ऋजवे दम्भवर्জ্জिते।
दद्यात् स्तोत्रमिदं पुण्यं सर्व्वकामफलप्रदम्।
ध्यानं वक्ष्यामि देवस्य यथा ध्यात्वा पठेन्नरः॥ * ॥
ॐ शुद्धस्फटिकसङ्काशं सहस्रादित्यवर्चसम्।
अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम्।

भुजङ्गमेखलं देवमम्बिवर्णशिरोरुहम् ।
दिगम्बरं कुमारीशं वटुकाख्यं महाबलम् ॥
खट्वाङ्गमसिपाशञ्च शूलञ्चैव तथा पुनः ।
डमरुञ्च कपालञ्च वरदं भुजमन्तथा ॥
नीलजीमूतसङ्काशं नीलाञ्जनचयप्रभम् ।
दंष्ट्राकरालवदनं नूपुराङ्गदभूषितम् ॥
आत्मवर्णसमोपेतसारमेयसमन्वितम् ।
ध्यात्वा जपेत् सुसंहृष्टः सर्व्वान् कामानवाप्नुयात् ॥
एतच्छ्रुत्वा ततो देवी नामाष्टशतमुत्तमम् ।
भैरवाय प्रहृष्टाभूत् स्वयञ्चैव महेश्वरी ॥"
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे भैरव-स्तवराजः समाप्तः ॥*॥ अथ वटुकभैरवकवचम् ।

श्रीभैरव उवाच ।

"देवेशि देहरक्षार्थं कारणं कथयां ध्रुवम् ।
म्रियन्ते साधका येन विना श्मशानभूमिषु ॥
रणेषु चातिघोरेषु महावायुजलेषु च ।
शस्त्रास्त्रमकरव्यूहे ज्वरादिव्याधिसङ्कटे ॥

श्रीदेव्युवाच ।

कथयामि शृणु प्राज्ञ वटोस्तु कवचं शुभम् ।
गोपनीयं प्रयत्नेन मार्जारोपमं यथा ॥
तस्य ध्यानं विधा प्रोक्तं सात्त्विकादिप्रभेदतः ।
सात्त्विकं राजसञ्चैव तामसं देव तत् शृणु ॥
वन्दे बालं स्फटिकसदृशं कुण्डलोद्भासिवक्त्रं
दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराद्यैः ।
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां वटुकमनिशं शूलखट्वौ
दधानम् ॥१॥
उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागस्रजं
सीरास्यं वरदं कपालमभयं शूलं दधानं करैः ।
नीलग्रीवमुदारभूषणयुतं प्रीतांशुचूडोज्ज्वलं
वन्दे कारुणवासकं भयहरं देवं सदा भावये ॥२॥
ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं मुक्तमालं
महेशं
दिग्वस्त्रं पिङ्गकेशं डमरुमथ शशिं खड्ग-
शूलाभयानि ।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं
भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणी
नूपुराढ्यम् ॥ ३ ॥*॥
अस्य वटुकभैरवकवचस्य महाकाल ऋषिरनुष्टुप्छन्दः श्रीवटुकभैरवो देवता वं बीजं ह्रीं शक्तिरापदुद्धारणायेति कीलकं मम सर्व्वाभीष्टसिद्ध्यर्थे विनियोगः ।
"ॐ शिरो मे भैरवः पातु ललाटं भीषणस्तथा ।
नेत्रे च भूतहननः सारमेयानुगो भ्रुवौ ॥
भूतनाथश्च मे कर्णौ कपोलौ प्रेतवाहनः ।
नासापुटौ तथोष्ठौ च भस्माङ्गः सर्व्वभूषणः ॥
भीषणास्यो ममास्यञ्च शक्तिहस्तो गलं मम ।
स्कन्धौ दैत्यरिपुः पातु बाहू अतुलविक्रमः ॥
पाणी कपाली मे पातु मुण्डमालाधरो हृदम् ।
वक्षःस्थलं तथा शूलः कामचारी स्तनं मम ॥
उदरञ्च स मे तुष्टः चेत्रेशः पार्श्वतस्तथा ।
चेत्रपालः पृष्ठदेशं चेचाख्यो नाभितस्तथा ॥
कटौ पापौघनाशश्च वटुको लिङ्गदेशकम् ।
गुदं रत्नाकरः पातु ऊरू रत्नाकरः सदा ॥
जानू च युधुरारायो जङ्घे रत्नेशः रक्षतु ॥
गुल्फौ च पादुकासिद्धः पादपृष्ठं सुरेश्वरः ॥
आपादमस्तकञ्चैव आपदुद्धारणस्तथा ।
सहस्रारे महापद्मे कर्पूरधवलो गुरुः ॥
पातु मां वटुको देवो भैरवः सर्व्वकर्मसु ।
पूर्व्वस्यामसिताङ्गो मे दिशि रक्षतु सर्व्वदा ॥
आग्नेय्यां रुरुः पातु दक्षिणे चण्डभैरवः ।
नैर्ऋत्यां क्रोधनः पातु मामुन्मत्तस्तु पश्चिमे ॥
वायव्यां मे कपाली च नित्यं पायात् सुरेश्वरः ।
भीषणो भैरवः पातूत्तरस्यां दिशि सर्व्वदा ॥
संहारभैरवः पातु दिश्यैशान्यां महेश्वरः ।
ऊर्द्धं पातु विधाता वै पातालेऽनन्तको विभुः ॥
सद्योजातस्तु मां पायात् सर्व्वतो देवसेवितः ।
वामदेवोऽवतु प्रीतो रणे घोरे तथावतु ॥
जले तत्पुरुषः पातु स्थले पातु गुरुः सदा ।
डाकिनीपुत्रकः पातु दारांस्तु लाकिनीसुतः ॥
पातु साकलको भ्रातॄन् श्रियं मे सततं गिरः ।
लाकिनीपुत्रकः पातु पशूनश्वानजांस्तथा ॥
महाकालोऽवतु क्षत्रं सैन्यं वै कालभैरवः ।
राज्यं राज्यश्रियं पायात् भैरवो भीति-
हारकः ॥
रक्षाहीनन्तु यत् स्थानं वर्जितं कवचेन च ।
तत् सर्व्वं रक्ष मे देव त्वं यतः सर्व्वरक्षकः ॥
एतत् कवचमीशान तव स्नेहात् प्रकाशितम् ।
नाख्येयं नरलोकेषु सारभूतञ्च सुश्रियम् ॥
यस्मै कस्मै न दातव्यं कवचेयं सुदुर्लभम् ।
न देयं परशिष्येभ्यः कृपणेभ्यश्च शङ्कर ॥
यो ददाति निधित्रेभ्यः स वै भ्रष्टो भवेद्ध्रुवम् ॥
अनेन कवचेनैव रक्षां कृत्वा हि योगिनः ।
विचरन् यत्र कुत्रापि विघ्नौघैः प्राप्यते न सः ॥
मन्त्रेण म्रियते योगी कवचं यत्र रक्षितः ।
तस्मात् सर्व्वप्रयत्नेन दुर्लभं पापचेतसाम् ॥
भूर्जे रक्तास्त्रके वापि लिखित्वा विधिवत् प्रभो ।
धारयेत् पाठयेद्वापि सम्पठेद्वापि नित्यशः ।
सम्प्राप्नोति प्रभावं वै कवचस्यास्य वर्णितम् ॥
नमो भैरवदेवाय सारभूताय वै नमः ।
नमस्त्रैलोक्यनाथाय नाथनाथाय वै नमः ॥"
इति विश्वसारोद्धारतन्त्रे आपदुद्धारकल्पे भैरव-भैरवीसंवादे वटुकभैरवकवचं समाप्तम् ॥

वटुकरणं, क्ली, (वटोः करणम् ।) उपनयनम् । इति त्रिकाण्डशेषः ॥

वठ, स्थौल्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) स्थौल्यमिह सामर्थ्यम् । वठति दाता दातुं समर्थः स्यादित्यर्थः । इति दुर्गादासः ॥

वठ, इ ड एकचरे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । इदित् ।) एककर्तृकचरणम् । इ, वठते । ड, वठते चौरशोरयितुं एकाकरतीत्यर्थः । इति दुर्गादासः ॥

वटरः, पुं, (वल्गति । वल् + "वल्गिमन्यिभ्यां टिच् ।" उणा० ५ । ३८ । इति अरप्रत्ययः । टकारान्तादेशः ।) अश्वः । इत्युणादिकोषः ॥ अश्वष्ठः । इति हेमचन्द्रः ॥ शब्दकारः । वक्रः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वटरः, त्रि, (वल् + अरः । टकारान्तादेशः ।) शठः । मन्दः । इति त्रिकाण्डशेषः ॥

वट आरोहणे । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) वड़भी । वाड़िगम । इति दुर्गादासः ॥

वड, इ क विभागे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् । इदित् ।) इ क, वण्डयति । अयं केषिन्न पठ्यते । इति दुर्गादासः ॥

वड, इ ड वेष्टे । विभागे । इति कविकल्पद्रुमः ॥ (स्वा०-आत्म०-सक०-सेट् । इदित् ।) इ, वण्डते । ड, वण्डते । इति दुर्गादासः ॥

वड़भी, स्त्री, (वध्यते आरुह्यतेऽत्रेति । वड् + बाहुलकात् अभिच् । ङीदिकारादिति ङीष् ।) गृहचूड़ा । इत्यमरः ॥ सुदनि । इति भाषा । तत्पर्य्यायः । गोपानसी २ । इति तट्टीकासारसुन्दरी ॥ चन्द्रशालिका ३ कूटागारम् ४ । इति त्रिकाण्डशेषः ॥

"चन्द्रशाला च वड़भी स्यात् प्रासादमूर्द्धनि ।"
इति श्रीधरः ॥

खेलायां वड़भौ चूड़ा । इति रुद्रः ॥

"वड़भी चन्द्रशालेति प्रासादादौ च मण्डपे ।"
इति कोषान्तरम् ॥

"शुद्धान्ते वड़भी चन्द्रशाले सौधोर्द्धवेश्मनि ।"
इति रभसः ॥

हस्वान्तापि वड़भिः । तां कस्याश्चिद्वनवड़भौ सुप्तपारावतायामिति । मेघदूतम् । ४० ॥ वड़भिः वड़भी वलभिः वलभी चेति चातूरूप्यमिति टीकाः । इति भरतः ॥ (यथा, हरिवंशे । ८४ । ११ ।

"सुवासिता वपुष्मन्त उपनीतोत्तरच्छदाः ।
क्रियन्तां मच्चवाटाश्च वड़भ्यो वीथयस्तथा ॥")

वड़ा, स्त्री, (वड् + अच् + टाप् ।) वटकः । यथा,—

"कदलेनाथवा तालैर्युक्तं यत्ताण्डुलं पिष्टम् ।
पिष्टं चूर्णं वटो वड़ा । इति शब्दचन्द्रिका ॥

वड्, त्रि (वड़ते इति । वड़ + बहुलमन्यचापीति रक् ।) दृढम् । इत्यमरः । ३ । १ । ६१ ॥ अस्य भाषा वड़ ॥

वण, ऋ शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ऋ, अवीवणत् अववाणत् । इति दुर्गादासः ॥

वणट, तृ क भागे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) वणटयति वणटापयति । इति दुर्गादासः ॥

वणटः, पुं, (वणट्यते इति । वणट् + घञ् ।) भागः । दायमुष्टिः । इति हेमचन्द्रः । ६ । ७० ॥ (वणट् + अच् ।) अक्षतोदाहः । इति शब्दमाला ॥

वण्टकः, पुं, (वण्ट एव । स्वार्थे कन् ।) भागः । इत्यमरः । २।६।८६ । (वण्ट + ण्वुल् । विभाग-कर्त्तरि, त्रि ।)

वण्डः, पुं, (वण्डते इति । वडि ड एकचरे + अच् ।) अक्षतोदाहः । खर्जः । कुन्तायुधः । इति मेदिनी । डे, ८ ।

वण्डरः, पुं, स्यगिकारज्जुः । कुक्कुरस्य लाङ्गूलम् । करीरकोषः । तालस्य पल्लवम् । पयोधरः । इति मेदिनी । रे, १८८ । तत्र ओड्रावकारादौ गणितोऽयम् । किन्तु वडि ड एकचरे इत्यमरात् अरच्-प्रत्ययेन निष्पन्नत्वात् दन्त्यवकारादौ लिखितः ॥

वण्डालः, पुं, शूरणद्रुमः । गौकाः । खनित्रम् । इति मेदिनी हेमचन्द्रश्च ॥

व(ब)ण्डः, पुं, (वनते इति वनु सम्भक्तौ । वन् + "अमन्ताड्डः ।" उणा० १ । ११३ । इति डः ।) अनावृतमेढ्रः । तत्पर्य्यायः । दुश्चर्म्मा २ छिन्नमकः ३ शिपिविष्टः ४ । इति हेमचन्द्रः ॥

वण्डः, त्रि, (वनते इति । वन सम्भक्तौ । वन् + "अमन्ताड्डः ।" उणा० १।११३ । इति डः ।) हस्तादिवर्জ्जितः । इति मेदिनी । डे, २३ । बेंड़े इति भाषा ॥

वण्डा, स्त्री, (वण्ड + टाप् ।) पांशुला । इति मेदिनी । डे, २४ ॥

वत, य, (वातीति । वा + डति ।) साम्यम् । तत्पर्य्यायः । वा २ यथा ३ तथा ४ एव ५ एवम् ६ । इत्यमरः ॥

वत, य, खेदः । अनुकम्पा । (यथा, ऋक्-लतायाम् । प्रथमाङ्के ।

"क्व वत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥")

सन्तोषः । विस्मयः । आमन्त्रणम् । इत्यमरः । ३ । ३ । २४३ ॥

वतंसः, पुं, (अवतंसयति अवतंस्यतेऽनेन वेति । अव + तसि + अच् । घञ् वा । अवस्यात्लोपः ।) कर्णपूरः । कर्णभूषणम् । शेखरः । शिरोभूषणम् । इति मेदिनी । से, १७ ॥ (यथा, गीतगोविन्दे । २ । २ ।

"चलितदृगञ्चलचञ्चलमौलिकपोलविलोल-
वतंसम् ।
रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ।")

वतण्डः, पुं, (वनतीति । वन् + "अकर्त्तृ कृवृभ्-तृजः ।" उणा० १ । १२८ । इत्यत्र वनतेस्तकारान्तादेशः । वतण्ड इति काचिद्वृत्तिरित्युज्ज्वलदत्तोक्ता अकर्त्तृ प्रत्ययेन साधुः ।) सुनिमेदः । इत्युणादिकोषः ॥

वतूः, पुं, देवनदी । सत्यवाक् । पन्थाः । अक्षिरोगः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वतोका, स्त्री, (अवगतं तोकं अपत्यं यस्याः अवस्यात्लोपः ।) अवतोका । इत्यमरटीकायां भरतः ॥

वत्सं, क्ली, (वदतीति । वद व्यक्तायां वाचि + "हृत्रुवदिहनिकमिकमिभ्यः सः ।" उणा० ३ । ६२ । इति सः ।) वक्षः । इत्यमरः ॥

वत्सः, पुं, (वदतीति । वद + "हृत्रुवदिहनिकमिकमिभ्यः सः ।" उणा० ३ । ६२ । इति सः ।) वर्षः । गोशिशुः । बाछुर इति भाषा । तत्पर्य्यायः । प्रक्रन्दकरिः २ तर्णकः ३ । इति वैद्यवर्गे नानार्थे चामरः ॥ दोग्धा ४ दोषकः ५ दोषः ६ । इति शब्दरत्नावली । रौहिणेयः ७ वाङ्गुलेयः ८ तन्तुभः ९ । सद्योजातस्य तस्य पर्य्यायः । तर्णकः १ तर्णभः २ तन्तुभः ३ कक्षः ४ । इति जटाधरः ॥ पुत्रादिः । इति मेदिनी । से, ११ । बाछा इति भाषा । (यथा, भागवते । ४ । ८ । ११ ।

"न वत्स ! नृपतेर्धिग्यं भवानारोढुमर्हति ।
न क्रीतो मयता यत् त्वं कृच्छ्रादपि नृपात्मज ! ॥"

दिवोदासपुत्रः । द्युमानित्यादीन्यस्य नामान्तराणि । यथा, भागवते । ९ । १७ । ५—६ ।

"ततपुत्रः केतुमालस्य यज्ञे भीमरथस्ततः ।
दिवोदासो द्युमांस्तस्मात् प्रतर्दन इति स्मृतः ॥
स एव शत्रुजिन् वत्स ऋतध्वज इतीरितः ।
तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ॥")

देशभेदः । यथा, कथासरित्सागरे । ६ । ४ ।

"अस्ति वत्स इति ख्यातो देशो दर्पोपशान्तये ।
स्वर्गस्य निर्म्मितो धात्रा प्रतिमल्ल इव क्षितौ ॥")

वत्सकं, क्ली, (वत्स + संज्ञायां स्वार्थे वा कन् ।) पुष्पकासीसम् । इति राजनिर्घण्टः ॥ (विवरणमस्य पुष्पकासीसशब्दे ज्ञातव्यम् ॥)

वत्सकः, पुं, (वत्स + कन् ।) कुटजः । इत्यमरः ॥ (अस्य पर्य्यायो यथा,—

"वृक्षकः शक्रपर्य्यायो वत्सको गिरिमल्लिका ।
कुटजस्तरुफलेन्द्रयवश्चापि कलिङ्गकः ॥"

इति वैद्यकरत्नमालायाम् ॥

तथान्यः पर्य्यायः ।

"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।) इन्द्रयवः । इति राजनिर्घण्टः ॥

वत्सकबीजं, क्ली, (वत्सकस्य बीजम् ।) इन्द्रयवः । इति राजनिर्घण्टः ॥ (यथा,—

"योषं वत्सकबीजञ्च निम्बभूनिम्बमार्कवम् ।
चित्रकं रोहिणीं पाठां दार्व्वीमतिविषां
समाम् ॥"

इति वैद्यकचक्रपाणिसंग्रहे ज्वरातिसारे लोधाद्यचूर्णे ॥)

वत्सकामा, स्त्री, (वत्सं कामयते इति । कम् + अच् । टाप् ।) वत्साभिलाषिणी गौः । तत्पर्य्यायः । वत्सला २ । इति राजनिर्घण्टः ॥ पुत्रादिकामा स्त्री च ॥

वत्सतरः, पुं, (प्रथमवया वत्सः । "वत्सोक्षाश्वर्षभेभ्यस्तिः ।"५।३।८२। इति तरच् ।) प्राप्तदमनकालगवः । दोयाने बाछुर इति भाषा । तत्पर्य्यायः । दम्यः २ । इत्यमरः । २ । ८ । ६२ ॥ दुहांत्तः ३ गड़िः ४ । इति राजनिर्घण्टः ॥

वत्सतरी, स्त्री, (वत्सतर + ङीप् ।) दृषोत्सर्गे वृषपत्नीत्वेन कल्पिता चिह्नायत्नी गौः । यथा, काल्यायनसूत्रम् । यस्यस्त्रियाः पुत्रो यूथे च रूपवान् स्यात् तमलङ्कृत्य यूथमुख्याचतस्रो वत्सतर्य्यस्ताभ्यामेकैकं युवानं पतिं वो ददानि तेन क्रीड़न्तीश्चरथ प्रियेण मनः साम्मनसा सुभगा रायस्पोषेण समिषा मदेम इत्यनयैव ऋचोत्सृष्टेरन्निति । अगर्थस्तु हे वत्सतर्य्यो वो युष्माकं एनं युवानं पतिं स्वामिनं ददानीत्युक्तं प्रार्थयामि तेन वृषेण सह क्रीड़न्त्यः खेलन्त्यश्चरथ भ्रमथ हे वत्सतर्य्यो यूयमपि मातः नास्मत्सत्वविषया भविष्यथ किन्तु मया त्यक्तयाः । वयं वृषस्य वत्सतरीणाञ्च त्यागेन रायस्पोषेण धनसन्दृद्धा साम्मनसुभा सम्मनस्कयापकेन इषा अन्नेन च सम्मदेम हृष्टा भवामः सुभगा लोकस्य प्रिया इति सम्मदेम इति भविष्यत्सामीप्ये वर्त्तमान इति पाणिनिस्वरसाङ्गविध्यर्थे वर्त्तमानः ॥ * ॥ वत्सतरीनिर्म्मिप्रेषयति स्तुतिः ।

"अग्रतो लोहिता पत्नी पार्श्वाभ्यां नीलपाण्डरे ।
पृष्ठतस्तु भवेत् कृष्णा वृषभस्य तु मोचने ॥"

तासां वयःप्रमाणं यथा,—

"चिह्नायत्नीभिर्धन्याभिः सुरूपाभिः सुशोभितः ।
सर्व्वोपकरणोपेतः सर्व्वशस्यश्चरो महान् ।
उत्सर्गस्यो विधानेन वृतिस्तुतिनिदर्शनात् ।"

इति शुद्धितत्त्वे वृषोत्सर्गविचारः ॥

वत्सनाभः, पुं, (वत्सान् नभ्यति हिनस्तीति । नभ हिंसायाम् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) विषवृक्षविशेषः । इत्यमरः २।८।११॥ स तु स्थावरविषभेदः । प्रायो वत्सान् नभ्यति हिनस्ति वत्सनाभः नभ्य ग हिंसे छात् वन्निति वन् । वत्सस्य नाभिरिव वत्सनाभः यः अनिसञ्ज्ञेति न वृद्धिः अथं सिन्धुवारपत्रसदृशपत्रः । इति भारतः ॥ * । (यथा, हरिवंशे । २२३ । ६५ ।

"वरुणा वत्सनाभाश्च पलाशाश्चैव सप्त ॥)

तत्पर्य्यायः । अन्तकम् २ विषम् ३ उग्रम् ४ महौषधम् ५ गरलम् ६ मारणम् ७ नागः ८ लोकक्षम् ९ प्राणहारकम् १० स्थावरादि ११ । अस्य गुणाः । अतिमधुरत्वम् । उष्णत्वम् । वातकफक्षयरक्तसन्निपातनाशित्वम् । पित्तसन्तापकारकत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अस्य स्वरूपनिरूपणं यथा ।

"सिन्धुवारसदृक्पत्रो वत्सनाभस्तिक्षया ।
यत्पार्श्वेन तरोर्वृद्धिर्वत्सनाभः स भाषितः ॥"

तस्य सामान्यगुणा यथा ।

"विषं प्राणहरं प्रोक्तं अवायि च विकाशि च ।
आग्नेयं वातकफहृद्दृयोगवाहि महावहम् ॥"

अवायि सकलकायव्यापनपूर्ब्बकपाकगमनशीलम् ।

विकासि ओजःशोषणपूर्ब्बकं सन्धिबन्धग्रन्थिलौ करणशीलम्। आग्नेयं अधिकाग्न्यंशम्। योगवाहि संसर्गगुणग्राहकम्। मदावहं तमोगुणाधिक्येन बुद्धिविध्वंसकम्।

"तदेव युक्तियुक्तं तु प्राणदायि रसायनम्॥
योगवाहि चिरोपन्नं दृंहणं वीर्यवर्द्धनम्॥
ये दुर्गुणा विषेऽशुद्धे ते सुश्रुतेन विशोधनात्।
तस्मादिदं प्रयोगेषु शोधयित्वा प्रयोजयेत्॥"

इति भावप्रकाशः॥

(क्लीवेऽपि दृश्यते। यथा,—

"चत्वारि वत्सरनामानि सुखदे द्वे प्रकीर्त्तिते।"
"श्रीवास्तभो वत्सरनामे प्रीतविश्नूजनेश्वरा॥"

इति सुश्रुते कल्पस्थाने द्वितीयोऽध्याये॥)

वत्सपत्तनं, क्ली, (वत्सस्य वत्सराजस्य पत्तनम्।) भारतवर्षस्योत्तरे देशविशेषः। तत्पर्य्यायः। कौशाम्बी २। इति हेमचन्द्रः। ४। ४१॥

वत्सपालः, पुं, (वत्सान् पालयतीति। वत्स+पालि+अण्) श्रीकृष्णः। बलदेवः। यथा,—

"वृन्दावनं गोवर्द्धनं यमुनापुलिनानि च।
वीक्ष्याक्षीदुत्तमा प्रीती राममाधवयोर्नृप॥
एवं व्रजौकसां प्रीतिं यच्छन्तौ बालचेष्टितैः।
कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः॥"

इति श्रीभागवते। १०। ११। ३६॥

(वत्सपालके, त्रि। यथा, हरिवंशे। ६०।२४।

"स तत्र वयसा तुल्यैर्वत्सपालैः सहानघः।
रेमे वै दिवसं कृष्णः पुरा स्वर्गगतो यथा॥")

वत्सरः, पुं, (वसन्त्यस्मिन् अयनर्त्तुमासपक्षवारादय इति। वस निवासे+"वसेश्च।" उणा० ३। ७१। इति सरन्। "सः स्याद्धातुके।" ७। ४। ४९। इति सस्य तः।) द्वादशमासात्मककालः। अयनद्वयात्मकश्च। तत्पर्य्यायः। संवत्सरः २ अब्दः ३ हायनः ४ शरत् ५ समा ६। अमरः। १। ४। २०॥ शरदा ७ वर्षम् ८ वरिषम् ९ संवत् १०। इति शब्दरत्नावली॥*॥

"ब्रतबन्धविवाहे च वत्सरपरिकल्पनमाहुरार्य्याः।
आधानपूर्ब्बमेके प्रसूतिपूर्ब्बं सदान्ये तु॥"

सौरसावननाक्षत्रचान्द्रभेदेन चतुर्व्विधो वत्सरः। यथा चूड़ोपनयनादिषु वर्षगणना सावनेन शुभाशुभगणनन्तु सौरेणेति सिद्धम्। सावनसंवत्सरेण एकदिनाधिकवत्सरो नाक्षत्रो भवतीत्यनयोर्भेदः। सौरस्तु पञ्चषष्ट्यधिकत्रिशतदिनैर्भवति। यथा,—

"मेषादीनामहर्वृन्दं षष्ट्या सप्तशतक्रमम्।१८७।
तुलादीनामहस्तच्चक्रन्तु लिखेत्ततः।"१८८॥

चान्द्रवत्सरोऽपि द्वादशमासैर्भवति। मलमासपाते तु त्रयोदशमासैर्भवति। तथा च श्रुतिः। द्वादशमासाः संवत्सरः क्वचित्त्रयोदशमासाः संवत्सर इति। त्रयोदशेत्यधिमासे। श्रुतिः। यस्मिन्नब्दे द्वादशैकश्च यत्र इति। यत्रो मास इति। यत्रा मासाः सममेकः संवत्सर इति शतपथश्रुत्या यत्र-समेक-शब्दयोर्मासवर्षपर्य्यायतोक्ता। इति मलमासतत्त्वम्॥*॥ अथ बहिर्संवत्सरगणना।

"शकेन्द्रकालः पृथगाकृतिः-२२ भ्रः
शून्याङ्कनन्दाश्वियुगैः ४२९१ समेतः।
शरान्विवस्विद्-१८७५ हृतः सलब्धः
षष्ट्यावशिष्टाः प्रभवादयोऽब्दाः॥
वर्षवर्जन्तु यच्छेषं खर्त्तैः संपूर्य्य खोऽग्निभिः।३०।
हृतशुक्लक्रमतः खाग्निहृतेऽग्नेर्मासकादयः॥"

अस्यार्थः शकेन्द्रकालः शकराजाब्दकालः। पृथक् आकृतिः २२ द्वाविंशत्या पूरितः। शून्याङ्कनन्दाश्वियुगैरेकनवत्यधिकशतद्वयाधिकचतुःसहस्रैः समेतोऽङ्कः। शरान्विवस्विद्धृतः पञ्चसप्तत्यधिकाष्टादशशतैर्यावत्संख्यं हर्त्तुं शक्नोति तावता हृतः कर्त्तव्यः। सलब्धः पूर्ब्बशकाब्दः शरेत्यादिना लब्धसंख्यया युतः कार्य्यः। षष्ट्यावशिष्टे पञ्चाशेषोऽङ्कः पूर्ब्ववत् षष्ट्याद्धृतलब्धस्यावशिष्टे प्रभवादयः। एकावशेषे प्रभवः द्व्यादयवशिष्टे विभवादिः। वर्षवर्जन्तु यच्छेषं वर्षातिरिक्तं शरान्विवस्विद्धृतावशिष्टं तत् खर्त्तैर्द्वादशभिः संपूर्य्य खोऽग्निभिः षष्ट्या हृते शुक्लक्रमत इत्यनेन यच्छिष्टावशिष्टा अङ्का दद्याः यच्छिष्टलब्धांशके खाग्निहृते त्रिघ्नता हृतेऽवशिष्टा अंशका लभ्या मासाः स्फुरिति। प्रभवादिवर्षाण्युपक्रम्य।

"आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता।
तृतीया रुद्रदैवत्या श्रेष्ठा मध्यामा भवेत्॥"

भविष्यपुराणे।

भैरव उवाच।

"यस्माद्वं कथयास्यत्र क्रूराः सौम्याश्च ये प्रिये!।
संवत्सरफलं सर्व्वं प्रभवादौ वरानने!॥
बहुतोयास्तथा मेघा बहुशस्या च मेदिनी।
बहुचौरास्तथा गावो व्याधिरोगविवर्ज्जिताः॥
प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्त्तिताः।१।
सुभिक्षं क्षेममारोग्यं सर्व्वे व्याधिविवर्ज्जिताः॥
प्रशान्ता मानवास्तत्र बहुशस्या वसुन्धरा।
हृष्टास्तुष्टा जनाः सर्व्वे विभवे च वरानने!॥२॥
रोगा बहुविधाश्चैव मनुष्या वाजिकुञ्जराः।
सर्व्व एव प्रयच्छन्ति शुक्ले वर्षे वरानने!॥३॥
उन्मत्तश्च जगत् सर्व्वं धनधान्यसमाकुलम्।
नित्योत्सवः प्रजावृद्धिः प्रमोदे जायते प्रिये॥४॥
नीरोगाश्च निराबाधा मानवा विगतद्विषः।
बहुचौरास्तथा गावः प्राजापत्ये वरानने॥५॥
निरातङ्कं जगत् सर्व्वं धनयौवनगर्व्वितम्।
अङ्गिरसि प्रजाः सर्व्वा नित्योत्साहा वरानने॥६॥
सुभिक्षं क्षेममारोग्यं वर्षाकालं सुशोभनम्।
शस्यवृद्धिं विजानीयात् श्रीसुखे सुरवन्दिते॥७॥
बहुचौरास्तथा गावो धान्यञ्च बलवत्तरम्।
जायन्ते सर्व्वशस्यानि भावे वर्षे वरानने॥८॥
महार्घं जायते सर्व्वं घृततैलरसादिकम्।
प्रजानाञ्च भवेद्वृद्धिर्यूनि संवत्सरे शुभे॥९॥
निघ्नन्ति सर्व्वशस्यानां मक्षा धातरि कीर्त्तिता।
इक्षुक्षीरगुड़ादीनां प्रबलत्वं वरानने॥१०॥
सुभिक्षं क्षेममारोग्यं कार्पासस्य महार्घता।
लवणं मधु गव्यञ्च ईश्वरे दुर्लभं प्रिये॥११॥
सुभिक्षं क्षेममारोग्यं प्रशान्ताः पार्थिवाः प्रिये।
तस्करोपहतं वित्तं बहुधान्ये वरानने॥१२॥
राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैश्चोपपीड़नम्।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने॥१३॥
जायन्ते सर्व्वशस्यानि मेदिनी निरुपद्रवा।
लवणं मधु गव्यञ्च महार्घं विक्रमे प्रिये॥१४॥
कोद्रवाः शालिमुद्गाश्च शुक्लमाषास्तथैव च।
महार्घं जायते सर्व्वं हृषे च सुरवन्दिते॥१५॥
चणका मुद्गमाषाश्च अन्यच्च विदलं प्रिये।
महार्घं जायते सर्व्वं चित्रभानौ वरानने॥१६॥
सुभिक्षं क्षेममारोग्यं विश्वञ्च निरुपद्रवम्।
व्यवहारो भवेत् हृष्टः स्वर्भानौ देवपूजिते॥१७॥
अतिवृष्टिश्च जायेत धान्यस्याथ प्रपीड़नम्।
शस्यं भवति मामान्यं दारुणे सुरवन्दिते॥१८॥
बहुशस्यानि जायन्ते सर्व्वदेशे सुलोचने।
सौराष्ट्रे नाटदेशे च पार्थिवे नात्र संशयः॥१९॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम्।
अनावृष्टिः समाख्याता व्यये संवत्सरे प्रिये॥२०॥
उदितो वर्षणे मेघो जलं नैवोपजायते।
महार्घं सर्व्वजिन्नर्घं सर्व्वमेव वरानने॥२१॥
कोद्रवाः शालिमुद्गाश्च कङ्गुमाषास्तथैव च।
सुलभं जायते सस्यं जगद्धे सर्व्वधारिणि॥२२॥
अनयिप्रबला लोका धान्यौषधिप्रपीड़नम्।
जायते मानुषे कष्टं विरोधिनि न संशयः॥२३॥
सर्व्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते।
शिरोवक्षोऽक्षिरोगाश्च पापाद्धि विद्यते जगाः॥२४॥
उपद्रुतं जगत् सर्व्वं तस्करैर्म्लेच्छिकैः खगैः।
पीड़िताश्च प्रजाः सर्व्वा देशभङ्गः खरे प्रिये॥२५॥
सुभिक्षं क्षेममारोग्यं शस्यं भवति शोभनम्।
बहुचौरास्तथा गावो नन्दने नन्दने प्रिये॥२६॥
अल्पतोयास्तथा मेघा वर्षन्ति खण्डमण्डले।
नश्यन्ति सर्व्वशस्यानि विजये नात्र संशयः॥२७॥
क्षत्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः।
पीड़ितास्ते वरारोहे जये सर्व्वे न संशयः॥२८॥
सरोगश्च तथा देवि दाहज्वरसमन्वितम्।
अभिभूतं जगत् सर्व्वं मन्मथे सुरवन्दिते॥२९॥
तृणधान्यक्षयो देवि सर्व्वशस्यमहार्घता।
व्यवहाराश्च नश्यन्ति दुर्मुखे दुर्मुखाः प्रजाः॥३०॥
पीड़ाभ्ये सर्व्वशस्यानि देशे देशे शुचिस्मिते।
हेमलम्बे प्रजाः सर्व्वाः क्षीयन्ते नात्र संशयः॥३१॥
तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत्।
अर्घो भवति सामान्यो विलम्बे तु भयं महत्॥३२॥
विषमस्थं जगत् सर्व्वं विरोधे भयसंप्लवम्।
विकारी सर्व्वतोऽपायो मम वाक्यन्तु नान्यथा॥३३॥
क्वचिद्वर्षति पर्ज्जन्यो देशे संक्षिप्तमण्डलः।
दुर्भिक्षं ग्रन्थरोवर्षे व्यवहारो विपर्य्ययः॥३४॥

दुर्भिक्षं जायते सर्व्वा मेदिनी दृश्यति प्रिये ।
प्रयं व्रजन्ति लोयानि पीड़िता मानवा भुवि ॥३५॥
सुवर्णरूप्यधान्यानि जगत् सर्व्वं सुशोभनम् ।
ब्राह्मणा वणिजस्तुष्टाः सुभिक्षे शुभकृत्
प्रिये ॥ ३६ ॥
सुभिक्षं क्षेममारोग्यं तृप्ता गोब्राह्मणाः प्रिये ।
सुस्थिताः शोभने वर्षे प्रजाः सर्व्वाः सुखो-
त्पन्ने ॥ ३७ ॥
विप्लवस्थं जगत् सर्व्वं चाकुलं समुदाकुलम् ।
जनानां जायते भद्रे क्रोधः क्रोधः परस्परम् ॥३८॥
सर्व्वत्र जायते क्षेमं सर्व्वशस्यमहार्घता ।
विन्ध्यवासी वरारोहे कार्पासस्य महार्घता ॥३९॥
पार्थिवेनृपसैन्येश्च समस्तैः खण्डमण्डले ।
प्रपीड्यन्ते जनाः सर्व्वे भयभीताः पराभवे ॥४०॥
क्षुद्रधान्यानि पीड्यन्ते शोभे वर्षति वासवः ।
प्रवङ्गे पीड़िताः सर्व्वाः प्रजाश्च सुरवन्दिते ॥४१॥
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम् ।
सौम्यदृष्टिर्भवेद्राजा कालिके च शुभं वदेत् ॥४२॥
सुभिक्षं क्षेममारोग्यं सुखञ्च निरुपद्रवम् ।
सौम्यदृष्टिर्भवेद्राजा सौम्ये सौख्यं प्रकी-
र्त्तितम् ॥ ४३ ॥
तोयपूर्णा भवेन्मेघो वर्षते च दिने दिने ।
निरुपद्रवाश्च राजानः सर्व्वसाधारणे प्रिये ॥४४॥
वासवो वर्षते देवि देशे चाखण्डमण्डले ।
अहिच्छत्रे कान्यकुब्जे विरोधी क्षत्रियाग्र-
ङ्गत् ॥४५॥
अभिभूतं जगत् सर्व्वं क्लेशैर्व्याधिभिः प्रिये ।
मारुतैः फलदाहैश्च परिवारिणि शोभने ॥४६॥
निर्व्यक्तिः सर्व्वशस्यानां सुभिक्षं भवति प्रिये ।
प्रमाथिनि जलाहारो जलदो मोदते प्रजा ॥४७॥
निर्व्यक्तिः सर्व्वशस्यानां सर्व्वशस्यमहार्घता ।
घृतं तैलसमं याति आनन्दे नन्दति प्रजा ॥४८॥
कोद्रवाः शालिमुद्गाश्च पीड्यन्ते वरवर्णिनि ।
सर्व्वौषधानि धान्यानि राक्षसे निधुराः
प्रजाः ॥ ४९ ॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम् ।
अनले च समाख्यातं नात्र कार्य्या विचा-
रणा ॥ ५० ॥
देशभङ्गः सुदुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चारुपद्माक्षि दुर्भिक्षं नर्म्मदातटे ॥५१॥
गोमहिष्यो विनश्यन्ति ये चान्ये नटजन्तवः ।
वासवो वर्षते देवि शस्यञ्च नहि जायते ॥
तिलसर्षपमाषादिकार्पासानां महार्घता ।
गोमहिष्यः सुवर्णानि कांस्यताम्राद्यग्रेयतः ॥
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः ।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्दिनम् ।
पार्थिवा मोदका दीनाः कालयुक्ते प्रपी-
ड़िताः ॥ ५२ ॥
तोयपूर्णाः स्रुता मेघा बहुशस्या च मेदिनी ।
निधुराः पार्थिवा देवि ! सिंहार्के च वरा-
रुने ! ॥ ५३ ॥
अल्पतोया घनाश्चैव कीटकाः प्रबलाः स्रुताः ।
विरुद्धाः पार्थिवा देवि रौद्रे संवत्सरे प्रिये ॥
५४ ॥
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते ।
भवेद्दे मध्यमा वृष्टिर्धर्म्मतो समुपस्थिते ॥ ५५ ॥
सुभिक्षं जायते लोकः सर्व्वोपद्रववर्ज्जितः ।
प्राणिनां जायते हर्षो दुन्दुभौ वरवर्णिनि ॥५६॥
महिषीगोहिरण्यादितास्त्रकांस्याद्यग्रेयतः ।
तत् सर्व्वं देवि ! विक्रीय कर्त्तव्यो धान्यसञ्चयः ॥
रक्ते संवत्सरे देवि ! क्रूरग्रहनिरीक्षितः ।
मानवाः क्रूरचेष्टाश्च संग्रामे न जयो भवेत् ॥५७॥
दुर्भिक्षं मरणं रोगो धान्यौषधिप्रपीड़नम् ।
पापरोगी भवेद्देवि ! रक्ताक्षेमरवन्दिते ॥५८॥
रोगो मरणदुर्भिक्षं विरोधो बहुसंकुलः ।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये ! ॥५९॥
मेदिनी चलते देवि ! सर्व्वभूतं चराचरम् ।
देशभङ्गश्च दुर्भिक्षं क्षये संजायते प्रजा ॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा ।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ! ॥
कौमुदीचर्म्मनद्योश्च यमुनानर्म्मदातटे ।
विन्ध्यायां सैन्धवे चापि विनश्यति न संशयः ॥
सिंहले मध्यदेशश्च कालक्षरं तथैव च ।
क्षये क्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि ॥"
६० ॥ * ॥

कार्त्तिकादिद्वादशवर्षाणि यथा । वराहसंहितायाम् ।
"नक्षत्रेण सहोदयमस्तं वा येन याति सुर-
राजमन्त्री ॥"
तत्संज्ञं वक्ष्यं वर्षं मासक्रमेणैव ॥
वर्षाणि कार्त्तिकादीनि आग्नेयाद्ग्रहयातु-
योगेन ।
क्रमशश्चित्रश्च पञ्चममन्त्यमुपान्त्यञ्च विज्ञेयम् ॥"
नक्षत्रेण गुरुभुज्यमाननक्षत्रेण । आग्नेयं कृत्तिका । पञ्चमं फाल्गुनं वर्षम् । अन्त्यमाश्विनम् । उपान्त्यं भाद्रम् ।
"अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो
मतः ।
ग्रेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया ॥
दे दे चित्रादितारायां पूर्णपर्व्वेन्दुसङ्गते ।
मासाश्चैत्रादयो ज्ञेयाश्चित्रे षड्रान्त्यसप्तमाः ॥"
इति सङ्क्षेपकाख्याद् ॥
पूर्णपर्व्वेन्दुसङ्गते पौर्णमास्यां युते दे दे तारे तदेकवाक्यतया पूर्ववचने पौर्णमासीलाभः ।
यथा मासानां पौर्णमास्यां कृत्तिकादिसम्बन्धात् कार्त्तिकादित्वं तथा वर्षाणामपि गुरोः कृत्तिकादावस्तोदयसम्बन्धात् कार्त्तिकादित्वं तेन कृत्तिकारोहिण्योरेकतरस्मिन् गुरोरस्तोदये-
ऽन्यतरलाभे कार्त्तिकं वर्षम् । एवं मार्गशीर्षादि । अत्र वर्षद्वयघटकयोर्नक्षत्रयोरेकतरस्मिन् अस्तं गतो गुरुरन्यतरस्मिन्नुदेति तत्र का गतिरिति चेत् कार्त्तिकोत्तरं मार्गशीर्षं ततः पौषमित्यादिक्रमाद्गतिरिति । फलानि च ।
"अकटानलोपजीविक्रगोपीड़ाव्याधिशोकश्च ।

वृद्धिस्तु रक्तपीतकुसुमानां कार्त्तिके वर्षे ॥ १ ॥
सौम्यश्चन्द्रोनवृष्टिर्मृगाखुशलभाश्चैव ग्रस्य-
नाशः ।
व्याधिभयं मिथ्येरपि भूपानां जायते वैरम् ॥२॥
शुभकृच्छान्तः पौषो निवृत्तवैराः परस्परं
भूपाः ।
द्विचिगुणो धान्यार्घः पौष्टिककर्म्मप्रसिद्धिश्च ॥३॥
पितृपूजा परिवृद्धिर्म्माघे दाहश्च सर्व्वभूता-
नाम् ।
आरोग्यवृष्टिधान्यार्घसम्पदो वित्तलाभश्च ॥ ४ ॥
फाल्गुने वर्षे विद्यात् क्वचित् क्वचित् क्षेम-
वृष्ट्यादिग्रस्यानि ।
दौर्भाग्यं प्रमदानां प्रवलाश्चौरा नृपाश्चोग्राः ॥५
चैत्रे मन्दा वृष्टिः प्रियमद्यं क्षेमवनिपा
स्तदवः ।
वृद्धिश्च कोद्रवाद्यस्य भवति पीड़ा च रूप-
वताम् ॥ ६ ॥
वैशाखे धर्म्मपरा विगतभयाः प्रमुदिताः प्रजाः
सतृपाः ।
यज्ञक्रियाप्रवृत्तिर्निवृत्तिः सर्व्वग्रस्यानाम् ॥ ७ ॥
ज्यैष्ठे ज्ञातिकुलधर्म्मश्रेयोश्रेष्ठा नृपाः सर्व्व-
धर्म्मज्ञाः ।
पीड्यन्ते धान्यानि च हित्वा क्षुद्रग्रमीणानि ॥८
आषाढ़े जायन्ते ग्रस्यानि क्वचिद्वृद्धिरन्यत्र ।
योगक्षेमं मध्यं ग्रस्यसमा भवन्ति भूपाः ॥९॥
श्रावणे वर्षे क्षेमं कामं ग्रस्यानि पाकसुप-
यान्ति ।
क्षुद्रा ये पार्थिवास्ते पीड्यन्ते ये च तद्भक्ताः ॥
१० ॥
भाद्रपदे वल्लीजं निर्व्यक्तिं याति पूर्व्वग्रस्यञ्च ।
न भवत्यरं ग्रस्यं क्वचित् सुभिक्षं क्वचिच
दुर्भिक्षम् ॥ ११ ॥
आश्वयुजेऽप्यजस्रं पतति जलं प्रमुदिताः प्रजाः
क्षेमम् ।
प्राणभयः प्राणभृतां सर्व्वेषामर्थवाहुल्यम् ॥"
१२ ॥
इति ज्योतिस्तत्त्वम् ॥ * ॥

समाद्यादिपञ्चवत्सरा यथा, —
"अकाब्दात् पञ्चभिः शेषात् समाद्यादिषु वत्-
सराः ।
सम्भरीदानपूर्व्वाश्च तथोदापूर्व्वका मताः ॥"
संवत्सरादिफलमुक्तं विष्णुधर्म्मोत्तरे ॥
"संवत्सरे तथा दानं तिलस्य तु महाफलम् ।
परिपूर्व्वे तथा दानं यवानाञ्च द्विजोत्तमाः ॥
इदापूर्व्वेऽनवस्थायां धान्यानाञ्चानुपूर्व्वके ।
उदासंवत्सरे दानं रजतस्य महाफलम् ॥
ज्योतिर्विद्दक्षिण्यमध्यात् प्रभवादेश्च सम्भवम् ।
ऋक्षुक्षद्वत् समाद्यादिवर्षाणामपि सम्भवम् ॥"
इत्यमध्यात्। गुरुमध्यभोगगमनात्। प्रभवादेः ।
प्रभवादिवर्षस्य । इति मलमासतत्त्वम् ॥ * ॥
(ध्रुवपुत्रः । यथा, भागवते । ४ । १० । १ ।
"प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः ।

उपयेमे भमिं नाम तनूसुतौ कल्पवत्सरौ ॥")

वत्सरान्तक:, पुं, (वत्सरस्यान्ते कायति श्लीभवते इति। कै+क:। यद्वा, वत्सरस्यान्तो नाशो यस्मात्।) फाल्गुनमास:। इति राजनिर्घण्ट:॥

वत्सल:, त्रि, (वत्से पुत्रादिस्नेहपात्रे कामोऽस्यास्तीति। वत्स+"वत्साशाभ्यां कामबले।" ५।२।९८। इति लच्।) स्नेहयुक्त:। तत्पर्य्याय:। स्निग्ध: २। इत्यमर:। ३।१।१४॥ (यथा, भागवते। १।५।३०। "ज्ञानं गुह्यतमं यत्तत् साक्षात् भागवतोदितम्। अन्ववोचन् गमिष्यन्त: कृपया दीनवत्सला:॥" वत्सं लाति गृह्णातीति। ला+क:। वत्सकामुके च॥)

वत्सल:, पुं, (वत्स+लच्।) शृङ्गारादिरसान्तर्गतरसविशेष:। तत्पर्य्याय:। वात्सल्यम् २। इति जटाधर:॥ (अस्य लक्षणोदाहरणे तु रसशब्दे ज्ञातव्ये॥*॥ स्कन्दानुचरविशेष:। यथा, महाभारते। ९। ४५। ६९। "वत्सलो मधुवर्षश्च कलसोदर एव च॥")

वत्सला, स्त्री, (वत्से कामोऽस्यस्या इति। लच्। यद्वा, वत्सं लातीति। ला+क:।) वत्सकामा गौ:। इति हेमचन्द्र:। ४। ३२७॥ (यथा, रामायणे। २। ४३। १८। "साहं गौरिव सिंहेन विवत्सा वत्सला कृता। कैकेय्या पुरुषव्याघ्र बालवत्सेव गौर्बलात्॥")

वत्सास्थी, स्त्री, (वत्सस्यास्थीव गात्रचिह्नं यस्या:। ङीष् समासे।) गोडुम्बा। इति जटाधर:॥

वत्सादन:, पुं, (अत्तीति। अद्+ल्यु:। वत्सानां अदनो भक्षक:।) वृक:। इति राजनिर्घण्ट:॥

वत्सादनी, स्त्री, (वत्सैरद्यते प्रियत्वादिति। अद् ल्युट्। ङीप्।) गुडूची। इत्यमर:।२।४।८६॥

व(ब)द, इ ङ तुत्यभिवादयो:। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-सक०-सेट्।) अभिवादो नमस्कार:। इ, वन्द्यते। ङ, वन्दते गुरुं लोक:। नमस्करोति स्तौति वा इत्यर्थ:। इति दुर्गादास:॥

व(ब)द, ऐ वाचि। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-सक०-सेट्।) ऐ, उद्यात्। इति दुर्गादास:॥ ("क्विपि संवत् दन्त्योष्ठ्यात् पश्चे सानुनासिको वकार: संवत् यस्तु मन्यते नायं संप्रसारिणो वदे: प्रयोग: किन्तर्हि वद स्नेह्य इत्यस्य ओष्ठ्यवकारादे: तन्मते मकारवदपि सम्वदिति वर्त्तदेशना।" इति मनोरमा॥)

वद, क वाक्सन्देशयो:। इति कविकल्पद्रुम:॥ (चुरा०-पर०-सक०-आत्म०-इत्येके-सेट्।) क, वादयति। सन्देशो वचनविशेष:। अयमात्मनेपदीत्येके। इति दुर्गादास:॥

वद, भ ङ वाक्सन्देशयो:। इति कविकल्पद्रुम:॥ (भ्वा०-उभ०-आत्म०-इत्येके-सक०-सेट्।) भ, वदति वदते। ङ, वदते। अयमात्मनेपदीत्यन्ये। इति दुर्गादास:॥

वद:, त्रि, (वदति वक्तीति। वद+पचाद्यच्।) वक्ता। इत्यमर:। ३।१।९५॥

वदनं, क्ली, (वदत्यनेनेति। वद+करणे ल्युट्।) मुखम्। इत्यमर:॥ (यथा, आर्य्यासप्तशत्याम्। २७६। "दर्शनविनीतमाना ग्रहिणी हर्षोल्लसत्कपोलतलम्। चुम्बननिषेधमिषतो वदनं पिदधाति पाणिभ्याम्॥" लक्षणया अग्रभाग:। यथा, सुश्रुते। १।७। "त्रीण्यन्यानि (यन्त्राणि) जाम्बवदनानि त्रीण्यङ्कुशवदनानि षड्वाग्मिकर्म्मस्वभिप्रेतानि॥" वद+भावे ल्युट्। कथनम्॥)

वदनासव:, पुं, (वदनस्य आसव:।) अधरमधु। इति भूरिप्रयोग:॥

वदन्ति:, } स्त्री, (वद्+"वदेश्च।" इत्युञ्चल-
वदन्ती, } दन्तोक्ष्या भिच्प्रत्यय:।३।५०॥ ऋदिकारादिति वा ङीष्।) कथा। इति सिद्धान्तकौमुदी॥ विसर्गशून्यं वदन्तिपदं क्रियापदं भवति॥ (यथा, मनु:। १२। ११५। "यं वदन्ति तमोभूता मूर्खा धर्म्ममतद्विद:॥")

वदन्य:, त्रि, वदान्य:। इत्यमरटीकासारसुन्दरी॥

वदान्य:, त्रि, (वदति सर्व्वेभ्य एव दास्यामीति मनोहरवाक्यमिति। वद+"वदेरान्य:।" उणा० ३।१०४। इति आन्य:।) बहुप्रद:। (यथा, रघु:। ५। २४। "गतो वदान्यान्तरमित्यये मे माभूत् परीवादनवावतार:॥")

वदान्यवाक्, इत्यमर:। ३। १। ६॥ (खनामख्यात ऋषिविशेषे, पुं। यथा, महाभारते। १३। १६। ११। "निवेष्टुकामस्तु पुरा अष्टावक्रो महातपा:। ऋषेरथ वदान्यस्य वव्रे कन्यां महात्मन:॥")

वदामं, क्ली, फलविशेष:। बादाम इति भाषा॥ तत्पर्य्याय:। सुफलम् २ वातवैरि: ३ नेत्रोपमम् ४। अस्य गुणा:। उष्णत्वम्। सुस्निग्धत्वम्। वातघ्नत्वम्। गुरुत्वम्। शुक्रकारित्वञ्च। इति राजनिर्घण्ट:॥ अपि च।

"वातादौ वातवैरी स्यान्नेत्रोपमफलस्तया। वातादुष्ण: सुस्निग्धो वातघ्न: शुक्रकृत् गुरु:॥ वातादम्ला मधुरी वृक्ष: पित्तानिलापह:। स्निग्धोष्णकफकृत् श्रेष्ठो रक्तपित्तविकारिणाम्॥"

इति भावप्रकाश:॥

वदाल:, पुं, (वद+वर्णे क:। वदेन वदनेन अलति पर्य्याप्नोतीति। वद+अल्+अच्।) मत्स्यविशेष:। बोयालि इति भाषा। तत्पर्य्याय:। पाठीन: २। इति त्रिकाण्डशेष:॥ हयकव्ययोरस्योपयोगित्वं यथा, मनु:।

"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययो:॥"

वदालक:, पुं, (वदाल एव। स्वार्थे कन्।) पाठीनमत्स्य:। इति भूरिप्रयोग:॥

वदावद:, त्रि, (अत्यन्तं वदतीति। वद+अच्। "चरिचलीति।"३।१।२३४। इत्यस्य वार्त्तिकोक्त्या निपातितम्।) वक्ता। इत्यमर:।३। १। ९५॥

वध:, पुं, (हननमिति। हन्+अप्। वधादेशश्च।) प्राणवियोगफलकव्यापार:। तत्पर्य्याय:। प्रमापणम् २ निबर्हणम् ३ निकारणम् ४ निष्कारणम् ५ प्रवासनम् ६ परासनम् ७ निरूढनम् ८ निर्हिंसनम् ९ निर्लोडनम् १० संज्ञपनम् ११ निर्मन्थनम् १२ अपासनम् १३ निस्तर्हणम् १४ निहननम् १५ अवदानम् १६ परिवर्ज्जनम् १७ निर्व्यापणम् १८ विशसनम् १९ मारणम् २० प्रतिघातनम् २१ उद्दासनम् २२ प्रमथनम् २३ क्रथनम् २४ उच्छासनम् २५ आलभ: २६ पिञ्ज: २७ विशूर: २८ घात: २९ उन्मथ: ३०। इत्यमर:॥ हिंसा ३१ घातनम् ३२ विदारणम् ३३ पिञ्जकम् ३४ पात: ३५ परिघ: ३६ परिघातनम् ३७ कदनम् ३८ निवारणम् ३९ समाघात: ४० निर्मन्थनम् ४१ मारि: ४२ मारी ४३ उत्पात: ४४ मारक: ४५ मरक: ४६ मार: ४७ संघात: ४८। इति शब्दरत्नावली॥*॥ पुण्यप्रदवधो यथा,—

"एकस्य यत्र निधने प्रवृत्ते दुष्टकारिण:। बहूनां भवति क्षेमं तस्य पुण्यप्रदो वध:॥ ब्रह्मस्त्रेयी सुरापश्च ब्रह्महा गुरुतल्पग:। आत्मानं घातयेद्यस्तु तस्य पुण्यप्रदो वध:॥"

इति कालिकापुराणे २० अध्याय:॥

अपि च।

"कथं नु स्त्रीवधं कुर्य्यां महापातकिनामपि। स्त्रीवधे तु महापापं यथा ब्रह्मवधे स्मृते॥ इति रामवच: श्रुत्वा विश्वामित्रश्चमाह वै॥ यस्यास्तु बहवो मासान् म्रियन्तेऽपि द्विजन्मन:। न पापं विद्यते तेन न दोषा नृपनन्दन॥ यस्यास्तु निधनाद्राम जना: स्यु: सुखिनो भृशम्। भवन्ति सततं तस्यास्तस्या: पुण्यप्रदो वध:॥"

इत्यग्निपुराणम्॥*॥

अपि च।

"नैकस्यार्थे बहून् हन्यादिति शास्त्रेषु निश्चय:। एकं हन्यादबहूनां हि न पापी तेन जायते॥"

इति वामनपुराणे ५५ अध्याय:॥*॥

"नातताथिवधे दोषो हन्तुर्भवति कश्चन।" इति गीतायां १। २६ श्लोकटीकायां स्वामी॥ पापजनकवध: प्रायश्चित्तशब्दे द्रष्टव्य:॥*॥

वधबन्धौ पूर्व्वकर्म्मवशौ यथा,—

"न कश्चित्तात केनापि वध्यते हन्यतेऽपि वा। वधबन्धौ पूर्व्वकर्म्मवशौ नृपतिनन्दन॥"

इति वामनपुराणे ६२ अध्याय:॥*॥

पारिभाविकवधो यथा,—

"वपनं द्रविणादानं देशान्निर्य्यापनन्तथा। एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिक:॥"

इति महाभारते सौप्तिकपर्व्व॥

(वधप्रकारो वधित्वभेदादिकञ्च वधित्रितिशब्दे द्रष्टव्यम्॥)

वधक:, पुं, (हन्तीति। हन्+कृन्। "हनो वध च।" उणा० २। ३६ इति वधादेश:।) वधकर्त्ता।

हिंस्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ व्याधिः। स्नन्थु। इति संक्षिप्तसारोणादिवृत्तिः॥

वधकर्म्मन्, क्ली, (वध एव कर्म्म।) प्राणवियोगफलकव्यापारः। तद्वैदिकपर्य्यायः। हन्मीति १ गृणति २ धरति ३ धूर्व्वति ४ हृणक्ति ५ यधति ६ क्षणति ७ हन्ति ८ व्यधिति ९ वधति १० अर्हयति ११ क्षुणाति १२ खेडयति १३ यातयति १४ स्फुरति १५ स्फुलति १६ निथयन्ति १७ अवतिरति १८ वियातः १९ आतिरत् २० तळित् २१ आखळलः २२ हृणाति २३ रन्धति २४ भ्रणाति २५ भ्रस्वाति २६ हवैलुहि २७ तालुहि २८ निसोग्धते २९ निवर्हयति ३० मिनाति ३१ मिनोति ३२ धमति ३३। इति वेदनिघण्टौ। २। १९॥

वधत्वं, क्ली, (वध्यतेऽनेन इति। वध+"अमिनक्षियजिवधिपतिभ्योऽत्वन्।" उणा० ३।१०५। इति अत्वन्।) अस्त्रम्। इत्युणादिकोषः॥

वधस्थली, स्त्री, (वधाय वधस्य वा स्थली स्थानम्।) प्राणिवधस्थलम्। मशान इति भाषा। तत्पर्य्यायः। आघातः २। इति त्रिकाण्डशेषः॥ प्रघातः ३ वधस्थानम् ४। इति शब्दरत्नावली॥ आघातनम् ५। इति हारावली॥

वधस्थानम्, क्ली, (वधाय वधस्य वा स्थानं भूमिः।) वधस्थली। इति हारावली। १९६॥

व(ब)धाङ्कं, क्ली, (वधः बन्धनं एवाङ्कं यस्य। ततः कन्।) कारावेश्म। इति त्रिकाण्डशेषः॥

वधार्हः, त्रि, (वधं अर्हतीति। अर्ह+अण्।) वध्यः। हननयोग्यः। यथा, हरिवंशे।

"वधार्हः सुबहून् दस्यून् दाप्यस्तु पुरुषैः।
अङ्गच्छेदार्थकस्तूर्द्धं सन्दंशार्हस्तदर्द्धकम्॥"

सन्दंशो दृढाङ्गुलितर्जनीच्छेदः। इति प्रायश्चित्तविवेकः॥

वधी, [न्] त्रि, (प्राणवियोगफलकव्यापारो वधः स नित्यात्मनिरूपितनिष्पादकत्वेनास्त्यस्येति। वध+इनिः।) वधकर्त्ता। प्राणवियोगफलकव्यापारो वधः तन्निष्पादकत्वञ्च साक्षात् परम्परोद्देश्यीभूतं स्मृतिकारपरिगणितं वधित्वम्। तच्च पञ्चविधं स्मृतिस्वरसात् कर्त्ता प्रयोजकोऽनुमन्तानुमाहको निमित्ती चेति। वधान्तरव्यापारव्यवधानेन वधनिष्पादकः कर्त्ता। १। यः कर्त्तारं कारयति स प्रयोजकः। २। स च द्विविधः। एकः स्वतोऽप्रवृत्तमेव पदार्तिं वेतनादिना प्रेरयति। अपरः स्वतः प्रवृत्तमेव मन्त्रोपायोपदेशादिना प्रोत्साहयति। अनुमतिदातानुमन्ता। ३। अनुमतिश्च द्विविधा एका यद्विरोधाहननं न भवति तस्य विरोधिनो मया निरोधः कर्त्तव्य इति प्रयुक्तिरनुमतिः। अपरा एनं हन्मीति वचने प्रवृत्तस्याप्रतिषेध एव। अनुग्राहकोऽपि द्विविधः। एको विघ्नप्रतिरोधकः। अपरः स्वप्रवृत्तौ। ४। उद्देश्यत्वे सति हन्तुर्मनस्यादको निमित्ती। ५। अत्र प्रयोजकस्य कर्तृप्रवृत्तिद्वारेण वधकारणत्वम्। अनुमन्तुश्च हन्तुर्निर्भयत्वेन हठतरप्रहारोत्पत्तिद्वारेण। अनुग्राहकस्य पलायनात्सम्भवेन हननीयस्यैर्य्यं कुर्वतः प्रहारस्वरूपोत्पत्तिद्वारेण वा कारणत्वम्। निमित्तिनो हन्तुर्मनस्यादनद्वारेणेति। प्रयोजकादीनां चतुर्णां व्यवहितहननकारणानामवान्तरभेदाद्वैः। अतः पञ्चविधं वधित्वम्। इति प्रायश्चित्तविवेकः॥

वधोद्यतः, त्रि, (वधाय उद्यतः।) परवधायोद्युक्तः। तत्पर्य्यायः। सन्नद्धः २ आततायी ३। इत्यमरः॥ आततायिवधापवादमाह हरिः।

"नाततायिवधे हन्ता प्राप्नुयात् किल्बिषं क्वचित्।
विनाग्राथिनमायान्तं घातयन्नापराभुयात्॥"

कात्यायनः।

"आततायिनमायान्तमपि वेदान्तपारगम्।
जिघांसन्तं जिघांसीयात् न तेन ब्रह्महा भवेत्॥"

जिघांसी सन् ईयात् गच्छेदित्यर्थः। देवलः।

"उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम्।
निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत्॥"

भ्रूणो ब्राह्मणविशेषः। दोषदर्शनं नियमार्थम्। मनुर्विष्णुः।

"गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।
आततायिनमायान्तं हन्यादेवाविचारयन्॥"

एवकारो नियमार्थः। तथा।

"नाततायिवधे दोषो हन्तुर्भवति कश्चन।
प्रकाशं वाप्रकाशं वा मन्युस्तन्मन्युमृच्छति॥"

यस्माद्धन्तुर्मन्युर्हन्यमानमन्युं नाशयति न पुनः पुरुषो हन्ति हन्यते वेति हननविधिरपवादः। आततायिनमाह वशिष्ठः।

"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारापहारी च षड्ऐते आततायिनः॥"

विष्णुः कात्यायनौ।

"उद्यतासिविषाग्निश्च शापोद्यतकरं तथा।
आथर्व्वणेन हन्तारं पिशुनञ्चैव राजसु॥
भार्य्यातिक्रामिणञ्चैव विद्यात् सप्ततायिनः।
यशोवृत्तिहरानन्यानाहुर्धर्म्मार्थहारकान्॥"

विशेषमाह कात्यायनः।

"अनाचारिस्तपूर्व्वो यस्त्वपराधे प्रवर्त्तते।
प्राणद्रव्यापहारे च प्रवृत्तस्यातताथिना॥"

अनाचारिसोऽपवदतः। तेन पूर्व्वकृतापराधस्य मारणोद्यतस्य नाततायिता। एतेन प्रत्यपकारविधे दोष एव। मनु आततायिनोरपि गोब्राह्मणयोर्हनने दोषमाह सुमन्तुः।

"आततायिवधे न दोषोऽस्ति गोब्राह्मणात् यदा हन्यात् प्रायश्चित्तं कुर्य्यात्।" तथा भविष्ये।

"कृष्णानामपि गोविप्रं न हन्याद्धि कदाचन।"

अतः पूर्व्ववचनविरोधः। अत्र व्यवस्थामाह कात्यायनः।

"आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः।
वधस्तत्र तु नैव स्यात् पापे हीने वधो भवेत्॥"

जन्मपदेन जातिकुलयोरुच्यते। तेन हन्तृपेक्षया तपोविद्याजातिकुलैरुत्कृष्टो नाततायी वधः तदन्यो वध एव। भगवद्गीतायाम्। १। ३६। यथा,—

"पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः॥"

इति।

एनान् भीष्मादीनत्यन्तोत्कृष्टगुणानित्यर्थः। एवम्भूतातताथिनश्चाहनने फलमप्याह हरिः।

"आततायिनमुत्कृष्टं दृप्तस्वाध्यायसंयुतम्।
यो न हन्याद्यथाप्राणं सोऽन्धमेधफलं लभेत्॥"

यद्यपि गुरुं बहुश्रुतं हन्यादिति श्रूयते तथापि गुरोः सकाशात् कुलविद्यातपोभिः शिष्यस्याप्युत्कर्षसम्भवादेवं बहुश्रुतादपि। एवमधमवर्णस्य उत्तमवर्णो न वधः पूर्व्वापराधज्ञततविषयं वा सुमन्तुवचनम्। गौरातताय्यपि न वधः।

"नखिनां शृङ्गिणाञ्चैव दंष्ट्रिणाञ्चाततायिनाम्।
हस्त्यश्वानां तथार्य्यैर्वा वधे हन्ता न दोषभाग्॥"

इति कात्यायनवचनं गोव्यतिरिक्तशृङ्गिविषयम्। विशेषमाह कात्यायनः।

"उद्यतानान्तु पापानां हन्तुर्दोषो न विद्यते।
निवृत्तास्तु यदारम्भाद्दृश्यन्तं न वधः स्मृतः॥"

इति प्रायश्चित्तविवेकः॥

वध्यः, त्रि, (वधमर्हतीति। वध+यत्।) वधार्हः। तत्पर्य्यायः। घ्रौर्षक्लेद्यः २। इत्यमरः। ३।१।१४५॥

"किन्नया न श्रुतं लोके अवध्याः स्त्रीयुवोषितः।
हीनवर्णोपसृष्टा या त्याज्या वध्यापि वा भवेत्॥"

इति प्रायश्चित्ततत्त्वम्॥

अवध्या यथा,—

"गोब्राह्मणं वृद्धमथापि सूनं
बालं स्वबन्धुं ललनां सुदृष्टाम्।
कृतापराधानपि नैव वध्या-
दाचार्य्यसुखा गुरवस्त्वधैव॥"

इति वामनपुराणे ५५ अध्यायः॥

वध्यपालः, पुं, (वध्यं बन्धनस्थानं कारागारं पालयतीति। वध्य+पाल+अण्।) कारागाररक्षकः। यथा,—

"साध्वीविक्रयसद्यपालः केशरिविक्रयी।
तप्तलौहे तु पच्यन्ते यश्च भक्तं परित्यजेत्॥"

इति विष्णुपुराणे। २। ६। ११॥

वन, सम्भक्तिशब्दयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वनति। संभक्तिः सेवनम्। इति दुर्गादासः॥

वन, उ म याचनौ। इति कविकल्पद्रुमः। (भ्वा०-पर०-अक०-सेट्। उदित्त्वात् क्त्वेट्।) उ, वनित्वा वत्वा। म, प्रवनयति। मिश्रेऽपि अस्य नौ ज्वलह्वलेत्यादिना केवलस्य हलविकल्पनात् सोपसर्गस्यैव नित्यं हलः। वनयति वानयति। याचतिर्व्याप्तिः। अयन्तु कण्ड्वादिक्रियामाह इत्यन्ये। इति दुर्गादासः॥

वन, कि उपक्षतिश्रद्धाघातग्रन्थोपतापेषु। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-अक०च-सेट्।) कि, वानयति वनति। अयं केचिन्न मन्यते। इति दुर्गादासः॥

वन, द ड उ याचे। इति कविकल्पद्रुमः॥ (तना०-आत्म०-द्विक०-सेट्। उदित्त्वात् क्त्वावेट्।) द ड, वनुते। उ, वनित्वा वत्वा। इति दुर्गादासः॥

वनं, क्ली क्लो, (वनतीति। वन+पचाद्यच्। यद्वा, वन्यते सेव्यते इति। "पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। इति घः।) बहुवृक्षयुक्तस्थानम्। (यथा, मनुः। ८। ३५६।

"परस्त्रियं योऽभिवदेदविशेषेण वनेऽपि वा।
नदीनां वापि सम्भेदे तत्संग्रहणमाप्नुयात्॥"

स्त्रियान्तु यथा, साहित्यदर्पणे आर्यायञ्जनायाम्।

"कालो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहराः समीराः।
कैलीवनीयमपि वल्लुलकुञ्जमञ्जु
दूरेयतिः कथय किं करणीयमद्य॥")

तत्पर्य्यायः। अटवी २ अरण्यम् ३ विपिनम् ४ गहनम् ५ काननम् ६। इत्यमरभरतौ॥ दावः ७ द्रवः ८ अटविः ९ भीरुकम् १० झाटम् ११ गुहिनम् १२। इति शब्दरत्नावली॥ शून्यम् १३ समजम् १४ प्रान्तरम् १५ विक्तम् १६॥ इति जटाधरः॥ कान्तारम् १७। इति राजनिर्घण्टः॥ * ॥ गृहसमीपकर्षणयवनं यथा,—

"शिविराभ्यन्तरे भद्रा स्थापिता तुलसी कृशाम्।
धनपुत्रप्रदात्री च पुण्यदा हरिभक्तिदा।
प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत्॥
मालती यूथिका कुन्दं माधवी केतकी तथा।
नागेश्वरं मल्लिका च काञ्चनं वकुलं शुभम्॥
अपराजिता च शुभदा तेषामुद्यानमीप्सितम्।
पूर्व्वे च दक्षिणे चैव शुभदं नात्र संशयः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः॥

मथुरायां द्वादश वनानि यथा,—

"रम्यं मधुवनं नाम विष्णुस्थानमनुत्तमम्।
तद्दृष्ट्वा मनुजो देवि सर्व्वान् कामानवाप्नुयात्॥
वनं तालवनञ्चैव द्वितीयं वनमुत्तमम्।
तत्र स्नात्वा नरो देवि कृतकृत्यो हि जायते॥
तृतीयं कुमुदं नाम वनं चैवोत्तमं तथा।
तत्र गत्वा नरो देवि कृतकृत्यो हि जायते॥
एकादशी शुक्लपक्षे माघि भाद्रपदे हि वा।
तत्र स्नातो नरो देवि रुद्रलोके महीयते॥
चतुर्थं काम्यकवनं वनानां वनमुत्तमम्।
तत्र गत्वा नरो देवि मम लोके महीयते॥
विमलस्य च कुण्डे तु सर्व्वैः पापैः प्रमुच्यते।
यस्तु प्रसृजते प्राणान् मम लोकं स गच्छति॥
पञ्चमं बहुलवनं वनस्थानमनुत्तमम्।
तत्र गत्वा नरो देवि अग्निस्थानं स गच्छति॥
यमुनायाः परे पारे देवानामपि दुर्लभम्।
अस्ति भद्रवनं नाम षष्ठं वनमनुत्तमम्॥
तत्र गत्वा तु वसुधे मद्भक्तो मत्परायणः।
तद्वनस्य प्रभावेण नागलोकं स गच्छति॥
सप्तमन्तु वनं भूमे खादिरं लोकविश्रुतम्।
तत्र गत्वा नरो भद्रे मम लोकं स गच्छति॥
महावनं चाष्टमन्तु सदैव तु मम प्रियम्।
तस्मिन् स्नात्वा तु मनुजो इन्द्रलोके महीयते॥
लोहजङ्घं धवलं नाम लोहजङ्घेन रक्षितम्।
नवमन्तु वनं देवि महापातकनाशनम्॥
वनं बिल्ववनं नाम दशमं देवपूजितम्।
तत्र गत्वा तु मनुजो ब्रह्मलोके महीयते॥
एकादशन्तु भाण्डीरं योगिनां प्रियमुत्तमम्।
तस्य दर्शनमात्रेण नरो गर्भं न गच्छति।
भाण्डीरं समनुप्राप्य वनानां वनमुत्तमम्।
वासुदेवं ततो दृष्ट्वा पुनर्जन्म न विद्यते॥
इन्द्रावनं द्वादशमं इन्द्रया परिरक्षितम्।
मम चैव प्रियं भूमे महापातकनाशनम्॥
इन्द्रावनन्तु गोविन्दं ये पश्यन्ति वसुन्धरे।
न ते यमपुरं यान्ति वैकुण्ठं प्राप्नुवन्नराः॥"

इति वाराहे मथुरातीर्थवनद्वादशकवर्णनं नामाध्यायः॥ * ॥ वनविशेषे मरुजफलं यथा,—

"यदेवं कथितं पुण्यं मया ब्रह्मसुखाच्युतम्।
तत् समग्रं भवेत्तस्य अरण्येषूपरेषु च॥
अरण्यानि प्रवक्ष्यामि तथा चैवोषराणि च।
सैन्धवं दण्डकारण्यं नैमिषं कुरुजाङ्गलम्॥
उपलाहृतमारण्यं जम्बूमार्गोऽथ पुष्करम्।
हिमवासस्ततोऽरण्य उत्तमः परिकीर्त्तितः॥
नवस्वेतेष्वरण्येषु यस्तु प्राणान् परित्यजेत्।
ब्रह्मलोकातिथिर्भूत्वा स याति परमं पदम्॥"

इति देवीपुराणे अरण्योषरप्रशंसा॥ * ॥

अरण्ये वर्णनीयानि यथा,—

"अरण्येऽहिवराहेभयूथसिंहादयो द्रुमाः।
शुककाककपोताद्या भिल्लभल्लदवादयः॥"

उद्याने वर्णनीयानि यथा,—

"उद्याने सरसि सर्व्वफलपुष्पलताद्रुमाः।
पिकालिकेकिहंसाद्याः क्रीड़ाद्याध्वगस्थितिः॥"

इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम्॥ (शङ्कराचार्य्यशिष्यस्य हस्तामलकस्य ग्रन्थाणामुपाधिविशेषे, पुं। यदुक्तं प्राच्यतीर्थिस्यामवधूतप्रकरणे।

"सुरम्ये निर्झरे देशे वने वासं करोति यः।
आशापाशविनिर्मुक्तो वननामा स उच्यते॥")

वनं, क्ली, (वन्यते सेव्यते इति। वन्+"पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। घः। इति निघण्टौ देवराजयज्वा। १।१२।६।) जलम्। (यथा, रघुः। ६। २२।

"नमयति स्म स केवलसम्पदं
वनसुचे नसुचेररये शिरः॥")

निवासः। आलयः। इति मेदिनी। ने, १६॥ (चमसः। यथा, ऋग्वेदे। २। १३। ६।

"अध्वर्यवः कर्त्तना शुष्मिमस्मै वने निषूतं वन उन्नयध्वम्॥"

"वने संभजनीये वने उदके निषूतमाप्यायनेन शोधितं सोमसुन्नयध्वमृद्धं नयत। यद्वा वने तद्विकारे चमसे निषूतं दशापवित्रेण शोधितं सोमं वने चमसे उन्नयध्वम्।" इति तद्भाष्ये सायणः॥) प्रस्रवणम्। इति हेमचन्द्रः॥ (रश्मिः। इति निघण्टुः। १।५।८॥ "वन षण सम्भक्तौ भूवादिः परस्मै षदी। पुंसि संज्ञायां घः। वन्यते सेव्यते प्रीतादिनिवारणाय। अथवा वनतिर्हिंसार्थः। वन्यते हिंस्यतेऽनेन तमः। यद्वा, वनु याचने तनादि आत्मने भाषा। वन्यते याच्यते दृष्टिप्रदानाय। यद्वा, वनशब्दे भूवादिः परस्मैपदी। वन्यते शब्द्यते स्तूयते स्तोतृभिः।" इति तत्र देवराजयज्वा॥ यथा, ऋग्वेदे। १। २४। ७।

"अग्ने राजा वरुणो वनस्य॥")

वनकदली, स्त्री, (वनोद्भवा कदली।) काष्ठकदली। इति राजनिर्घण्टः॥ (विवृतिरस्याः काष्ठकदलीशब्दे ज्ञातव्या॥)

वनकन्दः, पुं, (वनजातः कन्दः।) वनसूरणः। अरण्यीकन्दः। इति राजनिर्घण्टः॥

वनकार्पासी, स्त्री, (वनोद्भवा कार्पासी।) वनोद्भवकार्पासः। तत्पर्य्यायः। त्रिपर्णा २ भारद्वाजी ३ वनोद्भवा ४। इति रत्नमाला॥

वनकोलिः, स्त्री, (वनोद्भवा कोलिः।) वनजबदरी। तत्पर्य्यायः। कर्कशिका २ फलकर्कशा ३। इति कैयदन्तरम्॥

वनगोचरः, पुं, (वनं गोचरो देशो यस्य।) व्याधः। इति केचित्॥ (वनं जलं गोचरो निवासस्थानं यस्य। गोरप्यत्र। इति भागवतटीकायां श्रीधरस्वामी। ३। १८। ३॥ त्रि, जलचरः। यथा, भागवते। ३। १८। २।

"सुस्नातमम्भस्युरुवारणश्रिया
जघ्रासघाघो वनगोचरो मुहुः॥"

काननविहारी। यथा, मनुः। ८। २५६।

"सामन्तानामभावे तु मौलानां सौन्धि साधिनाम्।
इमानष्टगुणुञ्जीत पुरुषान् वनगोचरान्॥")

वनगौः, स्त्री, (वनस्य गौः।) गवयः। इति राजनिर्घण्टः॥

वनचन्दनं, क्ली, (वनजातं चन्दनम्।) अगुरु। देवदारु। इति विश्वः॥

वनचन्द्रिका, स्त्री, (वने चन्द्रिका ज्योत्स्नेव।) मल्लिका। इति राजनिर्घण्टः॥

वनचम्पकः, पुं, (वनजातश्चम्पकः। शाकपार्थिववत् समासः।) वनजचम्पकपुष्पवृक्षः। तत्पर्य्यायः। वनदीपः २ हेमाङ्गः ३ सुकुमारः ४। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। वातकफनाशित्वम्। वर्ण्यत्वम्। चक्षुष्यत्वम्। ग्रहरोपशत्वम्। वयःस्तम्भकारित्वञ्च। इति राजनिर्घण्टः॥

वनच्छागः, पुं, (वनस्य छागः।) अरण्यच्छागलः। तत्पर्य्यायः। एडकः २ प्रिश्नुवाह्यकः ३। इति त्रिकाण्डशेषः॥ (वने छाग इव।) शूकरः। इति शब्दमाला॥

वनज, क्ली, (वने जले जायते इति। जन्+डः।) अम्बुजम्। इति मेदिनी। जे, २८॥ (यथा, रघुः। ५। ७३।

"दीर्घेष्वमी नियमिताः पटमण्डपेषु निद्रां विहाय वनजाक्ष! वनायुदेशाः।
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि लेह्यानि सैन्धवशिलाशकलानि वाहाः॥"

जलजाते वनोद्भवे च त्रि। यथा, रामायणे। २। ५४। ७।

"दारूणि परिभिन्नानि वनजैरुपजीविभिः॥")

वनजः, पुं, (वने जले अरण्ये वा जायते इति। जन्+डः।) सुस्तकः। इति मेदिनी। जे, २८॥ गजः। इति विश्वः॥ वनसूरणः। इति राजनिर्घण्टः॥ (तुम्बुरुफलम्। तत्पर्य्यायो यथा,—

"तुम्बुरुः सौरवः सौरो वनजः सानुजोऽग्रजः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वनजा, स्त्री, (वने जायते इति। जन्+डः। टाप्।) सुरपर्णी। इति मेदिनी। जे, २८॥ अरण्यकार्पासी। वन्ध्योपोदकी। अश्वगन्धा। गन्धपत्रा। मिश्रेया। ऐन्द्रम्। इति राजनिर्घण्टः॥

वनजीरः, पुं, (वनोद्भवो जीरः।) वनोद्भवजीरकः। तत्पर्य्यायः। हृद्गन्धाली २ क्षुद्रपत्रः ३ अरण्यजीरः ४ कणः ५। अस्य गुणाः। कटुत्वम्। शीतत्वम्। ग्रहणाग्नित्वञ्च। इति राजनिर्घण्टः॥

वनतिक्तः, पुं, (वनेषु वनोद्भवेषु तिक्तः।) हरीतकी। इति शब्दमाला॥

वनतिक्ता, स्त्री, (वनेषु वनोद्भवेषु मध्ये तिक्ता।) वनतिक्तिका। इति रत्नमाला॥

वनतिक्तिका, स्त्री, (वनतिक्ता+कन्। टापि अत इत्वम्।) पाठा। इत्यमरः। २। ४। ८४॥ (गुणादिकमस्याः पाठाशब्दे ज्ञेयम्॥)

वनदः, पुं, (वनं जलं ददातीति। दा+कः।) मेघः। इति शब्दमाला। वनदातरि, त्रि॥

वनदमनः, पुं, (वनजातो दमनः।) अरण्यदमनः। इति राजनिर्घण्टः॥

वनदीपः, पुं, (वनस्य दीप इव।) वनचम्पकः। इति राजनिर्घण्टः॥

वनधेनुः, पुं, (वनस्य धेनुरिव।) गवयो। इति राजनिर्घण्टः॥

वनपल्लवः, पुं, (वनमिव निबिड़ः पल्लवो यस्य।) श्वेताञ्जनवृक्षः। इति जटाधरः॥ अरण्यजपत्रञ्च॥

वनपांशुलः, पुं, (वने पांशुलः पापिष्ठः।) शाखः। इति शब्दरत्नावली॥

वनपिप्पली, स्त्री, (वनोद्भवा पिप्पली।) वनोद्भवपिप्पली। तत्पर्य्यायः। क्षुद्रपिप्पली २ क्षुद्रपिप्पली ३ वनकणा ४। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। तीक्ष्णत्वम्। रूक्षत्वम्। दीपनत्वम्। सा आमा गुणाढ्या। शुष्का खल्पगुणा। इति राजनिर्घण्टः॥

वनपुष्पा, स्त्री, (वनमिव निबिड़ं पुष्पं यस्याः। टाप्।) घृतपुष्पा। इति राजनिर्घण्टः॥ (घृतपुष्पाशब्देऽस्या विवरणं ज्ञातव्यम्॥)

वनपूरकः, पुं, (वनजातः पूरको बीजपूरकः।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनप्रियं, क्ली, (वनेषु वनजातेषु मध्ये प्रियम्।) लवङ्गम्। इति राजनिर्घण्टः॥

वनप्रियः, पुं, (वनं प्रियं यस्य।) कोकिलः। इत्यमरः। २। ५। १६॥ (यथा,—

"अयि वनप्रिय विश्रुत एव किं वलिभुजो विषयो भवताधुना।
यदगयेव कुहूरिति विद्यया न घृतचरवौ धरवौ तव॥"

इत्युद्भटः॥)

अरण्यप्रियमात्रे, त्रि॥

वनबीजः, पुं, (वनस्य वनोद्भवो वा बीजो बीजपूरकः।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनबीजकः, पुं, (वनबीज+स्वार्थे कन्।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनबीजपूरकः, पुं, (वनोद्भवो बीजपूरकः।) अरण्यजातबीजपूरः। तत्पर्य्यायः। वनजः २ वनबीजकः ३ वनबीजः ४ अत्यम्लः ५ गन्धाम्लः ६ वनोद्भवः ७ देवदूती ८ प्रीता ९ देवदासी १० देवेष्टा ११ मातुलङ्गिका १२ पचनी १३ महाफला १४। अस्य गुणाः। अम्लत्वम्। कटुत्वम्। उष्णत्वम्। रुचिप्रदत्वम्। वातामदोषक्रमिकफप्लीहनाशित्वञ्च। इति राजनिर्घण्टः॥

वनभद्रिका, स्त्री, (वने भद्रं यस्याः। ततः टाप्रि अत इत्वम्।) भद्रबला। इति केचित्॥

वनभृक्, [ज्] पुं, (वनं भृङ्क्ते इति। वन्+भुज्+क्विप्।) ऋषभौषधम्। इति शब्दचन्द्रिका॥

वनमक्षिका, स्त्री, (वनस्य मक्षिका।) दंशः। इत्यमरः। २। ५। २७॥

वनमल्ली, स्त्री, (वनोद्भवा मल्ली।) वनोद्भवमल्लिका। इति शब्दरत्नावली॥

वनमाला, स्त्री, (वनोद्भवपुष्परचिता माला। मध्यपदलोपिसमासः।) श्रीकृष्णस्य माला। तत्स्वरूपं यथा,—

"आजानुलम्बिनी माला सर्व्वर्तुकुसुमोज्ज्वला।
मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्त्तिता॥"

इति शब्दमाला॥

(वनपुष्पसक्। यथा, रघुः। ६। ५१।

"ग्रथितमौलिरसौ वनमालया तरुपलाशसवर्णतनुच्छदः॥")

वनमालिनी, स्त्री, (वनमाली अस्त्यस्यामिति। इनिः। ङीप्।) द्वारकापुरी। इति त्रिकाण्डशेषः॥ वाराही। इति राजनिर्घण्टः॥

वनमाली, [न्] पुं, (वनमाला अस्त्यस्येति। इनिः।) श्रीकृष्णः। इत्यमरः। १। ६। २१॥ (नारायणः। यथा, प्रद्युम्नविजये। ३ अङ्के।

"कमलयामलया वनमालिनं गिरिजया गिरिशश्च निशा विधुम्।
सुविहिता परियोजयतो विधेः चतुरता खलु रूपसमागमे॥")

वनमुक्, [च्] पुं, (वनं जलं मुञ्चतीति। मुच्+क्विप्।) मेघः। इति शब्दरत्नावली॥ (जलवर्षिणि, त्रि। इति रघुः। ६। २२॥)

वनमुद्गः, पुं, (वनोद्भवो मुद्गः।) तुकुरुकः। इत्यमरः। २। ६। १७॥ तत्पर्य्यायः। वरकः २ निगूढ़कः ३ कुलीनकः ४ खण्डी ५। इति हेमचन्द्रः। ४। २३६॥ अस्य अन्यपर्य्यायगुणौ तुकुरुकशब्दयोर्द्रष्टव्यौ॥ (यथा, सुश्रुते। १। ४६।

"वनमुद्गकलायमकुष्ठमसूरमहेल्यचणकसतीनचिपिटकहरेणुकाढकीप्रभृतयो वैदलाः॥")

वनमुद्गा, स्त्री, (वनमुद्ग+टाप्।) मुद्गपर्णी। इति राजनिर्घण्टः॥

वनमूलः, पुं, मेघः। वनं जलं मूलं यद्धेतुं यस्मिन् वनं मुञ्चति इति वा मनोहादिः। इत्यमरटीकायां भरतसेनशब्दोन्मूलशब्दयुतुपत्तिदर्शनात्॥

वनमूर्द्धजा, स्त्री, (वनस्य मूर्द्धनि जायते इति। जन्+डः।) वनबीजपूरकः। इति राजनिर्घण्टः॥

वनमोचा, स्त्री, (वनोद्भवा मोचा।) काष्ठकदली। इति राजनिर्घण्टः॥

वनरः, पुं, (वानरः। पृषोदरादित्वात् ह्रस्वे साधुः।) वानरः। इति भरतसेनरूपकोषः॥

वनराजः, पुं, (वनस्य वने वा राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) सिंहः। इति शब्दमाला॥ वनस्य राजा च॥

वनलक्ष्मीः, स्त्री, (वनस्य लक्ष्मीः शोभा।) कदली। इति राजनिर्घण्टः॥

वनवर्व्वरः, पुं, (वनोद्भवो वर्व्वरः।) लशुनार्जकः। इति राजनिर्घण्टः॥

वनवर्व्वरिका, स्त्री, (वनजाता वर्व्वरिका।) अरण्यजवर्व्वरी। वनवायुर इति भाषा। तत्पर्य्यायः। सुगन्धिः २ सुप्रसन्नकः ३ दोषाक्षेपी ४ विषघ्नः ५ सुसुखः ६ क्षुद्रपत्रकः ७ निद्राघ्नः ८ शोफहारी ९ सुवक्त्रः १०। अस्य गुणाः। उष्णत्वम्। सुगन्धित्वम्। पित्तास्रवान्तिभूतघ्नत्वम्। घ्राणसन्तर्पणत्वञ्च। इति राजनिर्घण्टः॥

वनवल्लरी, स्त्री, (वनोद्भवा वल्लरी।) निःश्रेणिकालताम्। इति राजनिर्घण्टः॥

वनवह्निः, पुं, (वनस्य वनोद्भवो वा वह्निः।) दावानलः। इति हेमचन्द्रः। ४। १६७॥ (यथा, कथासरित्सागरे। ५६। ३४३।

"फणारत्नप्रभाजालजटिलं वनवह्निना। ग्रहीतमिव तेनोग्रहेतिहस्तेन सङ्गदि॥")

वनवासनः, पुं, (वनं वासयति गन्धेनेति। वासि+ल्युः।) खड्गासः। इति त्रिकाण्डशेषः॥

वनवासी, [न्] पुं, (वनं वासयति सुरभीकरोतीति। वास+णिनिः।) ऋषभनामौषधम्। शुष्ककन्दः। वाराहीकन्दः। शालालीकन्दः। नीलमक्षिकन्दः। इति राजनिर्घण्टः॥ (वने वसतीति। वस्+णिनिः।) वनवासकर्त्तरि, त्रि॥ (यथा, मनुः। ६। २७।
"तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत्।
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु॥")

वनवृन्ताकी, स्त्री, (वनस्य वृन्ताकी वार्त्ताकी।) इक्षुती। इति राजनिर्घण्टः॥

वनव्रीहिः, पुं, (वनस्य व्रीहिः।) नीवारः। इति हेमचन्द्रः। ४। २४२॥

वनशूकरी, स्त्री, (वनस्य शूकरीव रोमशत्वात् मांसलत्वाच्च।) कपिकच्छुः। इति राजनिर्घण्टः॥ (वनस्य शूकरी।) आरण्यवराही च॥

वनशूरणः, पुं, (वनजातः शूरणः।) वनोद्भवौल्लः। वन ओल इति भाषा। तत्पर्य्यायः। सितशूरणः२ वन्यः३ वनकन्दः४ अरण्यशूरणः५ वनजः६ श्वेतशूरणः७ वनकचुलः८। अस्य गुणाः। रुच्यत्वम्। कटुत्वम्। उष्णत्वम्। कृमिगुल्मशूलादिदोषसञ्चारोपचकनाग्नित्वञ्च। इति राजनिर्घण्टः॥

वनशृङ्गाटः, पुं, (वनस्य शृङ्गाट इव कण्ठकाकृतत्वात्।) गोक्षुरकः। इत्यमरः। २। ४। ६६॥ (अस्य पर्य्यायो यथा,—
"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि॥
पलङ्कषा खदंष्ट्रा च तथा स्यादिक्षुगन्धिका।")
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वनशृङ्गाटकः, पुं, (वनशृङ्गाट+स्वार्थे कन्।) गोक्षुरकः। इति राजनिर्घण्टः॥

वनश्रीभनं, क्ली, (वनं जलं श्रीभयतीति। शुभ+णिच्+ल्युः।) पद्मम्। इति शब्दचन्द्रिका॥ वनस्य श्रीभाकर्त्तरि, त्रि॥

वनश्वा, [न्] पुं, (वनस्य वने वा श्वा कुक्कुरः।) गन्धमार्जारः। वृषकः। व्याघ्रः। इति मेदिनी। ने, २०७॥

वनसङ्कटः, पुं, (वने सङ्कटो बाहुल्यं यस्य।) मत्सरः। इति शब्दचन्द्रिका॥

वनसमूहः, पुं, (वनानां समूहः।) अरण्यसंहतिः। तत्पर्य्यायः। वन्या २। इत्यमरः। २। ४। ४॥ वान्या ३। इति शब्दरत्नावली॥ जलसमूहश्च॥

वनसरोजिनी, स्त्री, (वनस्य सरोजिनी पद्मिनीव शोभाकरत्वात्।) वनकार्पासी। इति शब्दरत्नावली॥

वनस्थः, पुं, (वने तिष्ठतीति। स्था+कः।) वृगः। इति शब्दचन्द्रिका॥ (वानप्रस्थः। यथा, मनुः। ५। १२७।
"एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्।
त्रिगुणं स्यादनस्थानां यतीनान्तु चतुर्गुणम्॥")

वनवासिनि, त्रि॥ (यथा, हरिवंशे। १५२। २१।
"प्रवृत्तचक्रो वृषतिर्वनस्थान्
गजान् गजैः खेरिव वीर्य्यदीप्तान्॥")

वनस्था, स्त्री, (वने तिष्ठति या। स्था+कः। टाप्।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥

वनस्पतिः, पुं, (वनस्य पतिः। पारस्करादित्वात् सुट्।) विना पुष्पं फलिष्यन्तः। (यथा, मनुः। १। ४७।
"अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः॥")
वृक्षमात्रम्। इति मेदिनी। ते, २१६॥ (यथा, महाभारते। १। १४१। १६।
"कथं नु शाखाशिखरैरश्निन्नले वनस्पतौ॥")
स्थालीवृक्षः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—
"नन्दीवृक्षोऽत्यभेदः प्ररोहो गजपादपः।
स्थालीवृक्षः शतवरः चीरी च स्याद्वनस्पतिः॥"
इति भावप्रकाशे। १। १॥
पृतपृष्ठस्य पुत्रविशेषः। यथा, भागवते। ५। २०। २१॥ "आत्मा मधुरहो मेधपृष्ठः सुधामा भाजिष्ठो लोहितवर्णो वनस्पतिरिति पृतपृष्ठसुताः॥" वटवृक्षः॥ तत्पर्य्यायो यथा,—
"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः।
चीरी वैश्रवणावासो बहुपादो वनस्पतिः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वनहरिद्रा, स्त्री, (वनोद्भवा हरिद्रा।) अरण्यहरिद्रा। तत्पर्य्यायः। श्रोणी २ श्रोणिका ३ वनहरिद्रा ४। अस्या गुणाः। कटुत्वम्। गौल्यत्वम्। रुच्यत्वम्। तिक्तत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"अरण्यहलदीकन्दः कुष्ठवातासनाशनः॥"
इति भावप्रकाशः॥

वनहासः, पुं, (वनस्य हास इव प्रकाशकत्वात्।) काशतृणम्। इति त्रिकाण्डशेषः॥ कुन्दवृक्षः। इति राजनिर्घण्टः॥

वनहासकः, पुं, (वनहास+स्वार्थे कन्।) काशतृणम्। इति शब्दरत्नावली॥

वनाखुः, पुं, (वनस्याखुः।) मूषकः। इति त्रिकाण्डशेषः॥

वनाखुकः, पुं, सुगः। इति त्रिकाण्डशेषः॥

वनाजः, पुं, (वनस्य अजः।) वनच्छागः। तत्पर्य्यायः। दर्द्दिकः २ शिशुवाहकः ३ पृष्ठपृङ्गः ४। इति हेमचन्द्रः। ४। ३४४॥

वनाटुः, पुं, वर्व्वरा। नीलमक्षिका। इति शब्दचन्द्रिका॥

वनामलः, पुं, (वनस्य आमल आमलक इव।) क्षुद्रपाकफलः। इति शब्दमाला॥

वनाम्रः, पुं, (वनस्य आम्र इव।) कोशाम्रः। इति राजनिर्घण्टः॥ (गुणादिविशेषोऽस्य कोशाम्रशब्दे ज्ञेयः॥)

वनायुः, पुं, देशविशेषः। यथा,—
"गया गयश्च वानायुर्वनायुर्यदुसात्वतम्।"
इति शब्दरत्नावली॥

(यथा, महाभारते। ८। ७। ११।
"आजानेयैः सैन्धवैः पार्व्वतीयैर्नदीजकाम्बोजवनायुवाह्लिकैः॥"
दानवविशेषः। यथा, महाभारते। १। ६५। ३०।
"गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः॥")

वनायुजः, पुं, (वनायौ देशे जायते इति। जन+डः।) वनायुदेशोद्भवघोटकः। अस्य रूपान्तरं वानायुजः। इति शब्दरत्नावली॥

वनारिष्टा, स्त्री, (वनजाता अरिष्टेव।) वनहरिद्रा। इति राजनिर्घण्टः॥

वनार्चकः, पुं, (वनस्य अर्चक इव। नियतपुष्पयाचित्वात् तथात्वम्।) पुष्पजीवी। मालाकारः। इति जटाधरः॥

वनार्द्रका, स्त्री, (वनोद्भवा आर्द्रका।) वनभवार्द्रकम्। इति राजनिर्घण्टः॥ अस्याः पर्य्यायगुणौ ऐन्द्रशब्दे द्रष्टव्यौ॥

वनालिका, स्त्री, (वनं अलति भूषयतीति। अल+ण्वुल्। टापि अत इत्वम्।) हस्तिशुण्डी। यथा,—
"वप्रवल्लाग्रशिखंहारो हस्तिशुण्डी वनालिका।"
इति हारावली। ६५॥

वनाश्रयः, पुं, (वनमेव आश्रयो यस्याः।) दीपकाकः। इति जटाधरः॥ (अरण्याश्रयिणि, त्रि। यथा, मार्कण्डेये। १०६। ४३।
"सौदिव्यलक्षिको लोकस्त्वयि भूप! वनाश्रये॥")

वनाहिरः, पुं, (वनस्य आहिरः।) शूकरः। इति त्रिकाण्डशेषः॥

वनिः, पुं, अग्निः। खनि कषि अजि असि वसि षञि ञमि यञि वलिभ्यश्च। इत्यनेन वनधातोः पूर्व्वोक्तवृत्त-इप्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। ४। १३६॥

वनित, त्रि, (वन+क्तः।) याचितः। सेवितः। इति मेदिनी। ते, १४६॥

वनिता, स्त्री, (वन+क्त। टाप्।) जातरागस्त्री। स्त्रीसामान्यम्। इति मेदिनी। ते, १४६॥ (यथा, रघुः। २। १६।
"वशिष्ठधेनोरनुयायिनं स-
मावर्त्तमानं वनिता वनान्तात्।
प्रपौ निमेषालसपक्ष्मपङ्क्ति-
रूपोषिताभ्यामिव लोचनाभ्याम्॥")

वनी, स्त्री, वनम्। इत्यमरटीकायां भरतः॥ (यथा, साहित्यदर्पणे। २।
"केलीवनीयमपि वञ्जुलकुञ्जमञ्जुः॥")

वनी, [न्] पुं, (वनं आश्रयत्वेनास्त्यस्येति। वन+इनिः।) वानप्रस्थः। यथा,—
"गृहमेधी ग्रहस्थाभ्यां यजेत वनी वर्षासु ग्रामाकैरापत्कल्पेऽन्यैः पुरातनैर्वा।" इति आह्निकतत्त्वे हारीतः॥

वनीकः, त्रि, याचकः। इत्यमरटीकासारसुन्दरी॥

वनीयकः, त्रि, (वनिं याचनमिच्छतीति। क्यच्। ततो ण्वुल्।) याचकः। इत्यमरः। ३। १। ४६॥

वनेक्षुद्रा, स्त्री. (वने क्षुद्रा। अलुक्समासः।) करञ्जः। इति रत्नमाला॥
वनेचरः, त्रि, (वने चरतीति। चर+"चरेष्टः।" इति टः। ततपुरुषे क्षतीत्यलुक्।) अरण्यचारी। यथा,—
"वनेचराणां वनितासखानां
दरीशयोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्या-
मतैलपूराः सुरतप्रदीपाः॥"
इति कुमारसम्भवे १ सर्गः॥
वनेज्यः, पुं, (वने इज्यः पूज्यः।) बहरसालः। इति राजनिर्घण्टः॥
वनेसर्ज्जः, पुं, (वने सर्ज्ज इव।) असनवृक्षः। इति रत्नमाला॥
वनोद्भवा, स्त्री, (वने उद्भवो यस्याः।) वनकार्पासी। इति रत्नमाला॥
वनौकाः, [स्] पुं, (वनमेव ओको गृहं यस्य।) वानरः। इत्यमरः। २। ५। ३॥ (वनवासिनि, त्रि। यथा, भागवते। ४। ८। २१।
"धर्म्मोऽपि कश्यपः शुक्रो सुनयो ये वनौकसः।
चरन्ति दक्षिणीकृत्य भ्रमन्तो यत् सतारकाः॥")
वन्दका, स्त्री, वन्दा। यथा,—
"वन्दाका शेखरी सेवा वन्दा च वन्दकेत्यते॥"
इति भरतधृतहडुः॥
वन्द्यः, पुं, (वन्दते स्तौति वन्द्यते स्तूयते इति वा। वन्द + "ग्रीड्ग्रपिरुगमिवच्छिजीविप्राजिभ्योऽयः।" इत्यत्र वधीत्यस्य स्थाने वन्दीति पाठोऽपि बहुसम्मतः। इत्यतोऽयः।) स्तोता। स्तुत्यः। वन्दिधातोरर्थप्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥
वन्दनं, क्ली, (वन्दतेऽनेनेति। वन्द+करणे ल्युट्।) वदनम्। इति शब्दचन्द्रिका॥ (वन्द+भावे ल्युट्।) प्रणामः। स तु षोड़शधाभक्त्यन्तर्गतभक्तिविशेषः। यथा। पाद्मोत्तरखण्डे शिवपार्व्वतीसंवादे।
"आद्यं तु वैष्णवं प्रोक्तं शङ्खचक्राङ्कनं हरेः।
धारणार्थं पुण्ड्राणां तन्नामानां परिग्रहः॥
अर्चनञ्च जपो ध्यानं तन्नामस्मरणं तथा।
कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम्॥
तत्पादोदकसेवा च तन्निवेदितभोजनम्।
तदीयानाञ्च संसेवा दास्यमेतन्निगद्यते॥
तुलसीरोपणं विष्णोर्दैवदेवस्य शार्ङ्गिणः।
भक्तिः षोड़शधा प्रोक्ता भवबन्धविमुक्तये॥"
इति हरिभक्तिविलासे ११ विलासः॥
षोड़शोपचारपूजान्तर्गतशेषोपचारः। यथा,—
"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्कंचमनस्नानवसनाभरणानि च॥
गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा॥"
इत्याह्निकतत्त्वे आचारचिन्तामणिः॥*॥

अथ वन्दनम्।
"प्रणमेदथ साष्टाङ्गं तन्मुद्राञ्च प्रदर्शयेत्।
पठेत् प्रतिप्रणामञ्च प्रसीद भगवन्निति॥"
तदुक्तमेकादशे श्रीभगवता।
"स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि।
स्तुत्वा प्रसीद भगवन्निति वन्देत दण्डवत्॥"
अथ प्रणामविधिः। कालिकापुराणे।
"यः स्वयं गत्वपद्याभ्यां घटिताभ्यां नमस्कृतिम्।
शिरो मत्पादयोः कृत्वा बाहुभ्याञ्च प्ररस्परम्।
प्रपन्नं पाहि मामीश भीतं मृत्युमहार्णवात्॥"
किञ्चागमे।
"दोर्भ्यां पद्भ्याञ्च जानुभ्यामुरसा शिरसा दृशा।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः॥
जानुभ्यामेव बाहुभ्यां शिरसा वचसा धिया।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवराविमौ॥"
इति॥
"गरुडं दक्षिणे कृत्वा कुर्य्यात्तदृष्टसो बुधः।
अवश्यञ्च प्रणामांस्तान् शक्तश्चेदधिकाधिकान्॥"
तथा च नारदपञ्चरात्रे।
"सन्धिं वीक्ष्य हरिं चाद्यं गुरून् स्वगुरुमेव च।
द्विचतुर्विंशदथवा चतुर्विंशत्तदर्द्धकम्।
नमेत्तदर्द्धमथवा तदर्द्धं सर्व्वथा नमेत्॥"
विष्णुधर्म्मोत्तरे।
"देवाश्चैवादृशेनादेव प्रणमेन्मधुसूदनम्।
स्थानपेक्षा न कर्त्तव्या दृष्टादृष्टौ द्विजोत्तमाः।
देवाश्चैवादृष्टपूतं हि शुचि सर्व्वं प्रकीर्त्तितम्॥"
अथ नमस्कारमाहात्म्यम्। नारसिंहे।
"नमस्कारः स्तुतो यज्ञः सर्व्वयज्ञेषु चोत्तमः।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"
स्कान्दे।
"दण्डप्रणामं कुरुते विष्णवे भक्तिभावितः।
रेणुसंख्यं वसेत् स्वर्गे मृतमन्वन्तरं नरः॥"
तत्रैव श्रीकृष्णनारदसंवादे।
"प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्च्चयेत्।
स याति गतिमवाप्नोति न तां क्रतुशतैरपि॥
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"
तत्रैव शिवोमासंवादे।
"भूमिमापीड्य जानुभ्यां शिर आरोप्य वै भुवि।
प्रणमेत् यो हि देवेशं सोऽश्वमेधफलं लभेत्॥"
तत्रैवान्यत्र।
"तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च।
नारायणप्रणामस्य कलां नार्हन्ति षोड़शीम्॥
प्राटेनापि नमस्कारं कुर्वतः प्रार्द्धजन्मिनः।
शतजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति॥
रेणुगुण्ठितगात्रस्य कथा देहे भवन्ति ये।
तावद्वर्षसहस्राणि विष्णुलोके महीयते॥"
विष्णुधर्म्मोत्तरे।
"अभिवाद्य जगन्नाथं कृतार्थश्च तथा भवेत्।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी॥
जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः।
कृत्वा प्रणामं देवस्य सर्व्वान् कामानवाप्नुयात्॥"
ब्रह्मपुराणे।
"अनादिनिधनं देवं दैत्यदानवदारणम्।
ये नमन्ति नरा नित्यं नहि पश्यन्ति ते यमम्॥
ये जना जगतां नाथं नित्यं नारायणं द्विजाः।
नमन्ति नहि ते विष्णोः स्थानादन्यत्र गामिनः॥"
नारदीये।
"एकोऽपि कृष्णस्य कृतप्रणामो
दद्यादश्वमेधावभृतेन तुल्यः।
दद्यादश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय॥"
भक्तिसुधोदये।
"विष्णोर्दण्डप्रणामार्थं भक्तेन पतता भुवि।
पतितं पातकं कृत्स्नं नोत्तिष्ठति पुनः सह॥
अपि पापं दुराचारं नरं त्वत्प्रणतं हरे।
नेक्षन्ते किङ्करा यास्या उलूकास्तपनं यथा॥"
श्रीविष्णुपुराणे। श्रीयमस्य निजभटानुशासने।
"हरिममरगणार्चिताङ्घ्रिपद्मं
प्रणमति यः परमार्थतो हि मर्त्यः।
तमपगतसमस्तपापबन्धं
व्रज परिहृत्य यथाधिमाज्यसिक्तम्॥"
ब्रह्मवैवर्त्ते।
"शूरणागतरक्षणोद्यतं
हरिमीशं प्रणमन्ति ये नराः।
न पतन्ति भवाम्बुधौ स्फुटं
पतितानुद्धरति स्म तानसौ॥"
अष्टमस्कन्धे च बलिवाक्ये।
"अहो प्रणामाय कृतः समुद्यमः
प्रपन्नभक्तार्थविधौ समाहितः।
यल्लोकपालैस्त्वदनुग्रहोऽमरै-
रलब्धपूर्व्वोऽसुरहेऽसुरैर्ऽपितः॥"
अतएव नारायणबृहत्सवे।
"अहो भाग्यमहो भाग्यमहो भाग्यं नृणामिदम्।
येषां हरिपदाम्भोजे शिरो न्यस्तं यथा तथा॥"
किञ्च नारसिंहे श्रीयमोक्तौ।
"तस्य वै नारसिंहस्य विष्णोरमिततेजसः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"
भविष्योत्तरे च जलधेनुप्रसङ्गे।
"विष्णोर्देवजगद्धातुर्जनार्द्दनजगत्पतेः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"
इत्यादि॥*॥

अथ प्रणामनित्यता। दृष्टनारदीये तु दीक्षापाखानारम्भे।
"सकृद्वा न नमेद्यस्तु विष्णवे शुभ्रमेकारिणे।
शुद्धोपमं विजानीयात् कदाचिदपि नाचमेत्॥"
किञ्च पाद्मे। वैशाखमाहात्म्ये यमब्राह्मणसंवादे।
"पश्यन्तो भगवद्द्वारं नामशुक्लपरिच्छदम्।
अकृत्वा तत्प्रणामादि यान्ति ते नरकौकसः॥"
अथ नमस्कारनिषिद्धानि। विष्णुस्मृतौ।
"जन्मप्रभृति यत्किञ्चित् पुमान् वै धर्म्ममाचरेत्।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात्॥"
वाराहे।
"वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत माम्।
श्वित्री स जायते मूर्खः सप्तजन्मनि भामिनि!॥"

क्विप्यत्वच ।
"अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे ।
अपहोमनमस्कारान् न कुर्य्यात् केशवालये ॥"
अपि च ।
"सकृद्भूमौ निपतितो न भूक्तः प्रणमेन्नृसुङ्नः ।
उत्थायोत्थाय कर्त्तव्यं दण्डवत् प्रणिपातनम् ॥
ततः प्रदक्षिणां कुर्य्यात् भक्त्या भगवतो हरेः ।
नामानि कीर्त्तयन् भक्तौ ताच्च साष्टाङ्गवन्दनाम् ॥"
इति हरिभक्तिविलासे ८ विलासः ॥ * ॥
अन्यत् नमस्कारशब्दे प्रणामशब्दे च द्रष्टव्यम् ॥
(विधविशेषः । यथा, ऋग्वेदे । ७ । ५१ । २ ।
"यद्विजामन् परवि वन्दनं भुवत् ॥"
असुरः । स्तोत्रविशेषः । इति ऋग्भाष्ये सायणः । ७ । २१ । ५ ॥)
वन्दनमाला, स्त्री, (वन्दनार्थां माला यत्र सा ।) तोरणम् । इति हलायुधः । २ । १४६ ॥ (वन्दनार्थां माला इति कर्म्मधारये ।) रम्भास्तम्भचतुष्टयवेष्टिताम्रपल्लवचितमाला । यथा,
"कुर्य्याद्वन्दनमालां यो रम्भास्तम्भैः सुशोभने ।
चतुष्टयोद्भवैः पत्रैर्जांगरे चक्रपाणिनः ॥
युगानि पञ्चसंख्यानां स्वर्गे तस्योत्सवो भवेत् ।
पूज्यते वासवाद्यैश्च क्रीड़ते चाप्सरोगृहैः ॥"
इति हरिभक्तिविलासे १३ विलासः ॥
वन्दनमालिका, स्त्री, (वन्दनमाला + स्वार्थे कन् ।) बहिर्द्वारोपरि शुभदा माला । यथा,—
"तोरणोर्द्वे तु मङ्गल्यं दामवन्दनमालिका ॥"
इति हेमचन्द्रः । ४ । ७४ ॥
वन्दना, स्त्री, (वन्द् + "घञ्वन्दिविदिभ्यश्चेति वाच्यम् ।" ३ । ३ । १०७ । इत्यस्य वार्त्तिकोक्त्या युच् । टाप् ।) स्तुतिः । तत्पर्य्यायः । समीची २ । इति त्रिकाण्डशेषः ॥ होमभस्मना तिलकम् । यथा,—
"ऐशान्यामाहरेद्भस्म शुचौ वाथ शुचेऽथ वा ।
वन्दनां कारयेत्तेन शिरःकण्ठांशकेषु च ।
कालपत्रेतिमन्त्रेण यथाशक्तिक्रमोगतः ॥"
इति तिथ्यादितत्त्वे वह्निपुराणवचनम् ॥
वन्दनी, स्त्री, (वन्द् + ल्युट् । ङीप् ।) नतिः । जीवातुः । वटी । याचनकर्म्म । इति मेदिनी । ने, ६७ ॥ क्वचित् पुस्तके वटीस्थाने कटी याचनकर्म्मस्थाने याचलकर्म्म इति च पाठः । तच्च तु पवर्गीयबकारादौ लिखितोऽयं ग्रन्थः । किन्तु वदि ङ तुल्यभिवादयोरित्यस्मात् अगट्प्रत्ययनिष्पन्नत्वात् अन्तःस्थवकारादौ लिखितः ॥
वन्दनीयः, त्रि, (वदि + अनीयर् ।) स्तवनीयः । वन्द्यः । वन्दितव्यः । वदधातोरनीयप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । ७ । ८०१ । ३० ।
"ततः शुद्धाग्नमासाद्य जानुभ्यां भूतले स्थितः ।
शिरसा वन्दनीयं तमभिवन्द्य जगत्पतिम् ॥")
वन्दनीयः, पुं, (वन्द्यते मेघनार्थं स्तूयते इति । वदि + अनीयर् ।) पीतभृङ्गराजः । इति राजनिर्घण्टः ॥
वन्दनीया, स्त्री, (वदि + कर्म्मणि अनीयर् । टाप् ।) गोरोचना । इति त्रिकाण्डशेषः ॥ (विस्तृतिरस्या गोरोचनाशब्दे विज्ञेया ॥)
वन्दा, स्त्री, (वन्द्यते अपरवृक्षमिति । वदि + अच् । टाप् ।) वृक्षोपरिवृक्षः । वाँदा इति परमाख्या । इति च भाषा । तत्पर्य्यायः । वृक्षादनी २ वृक्षरुहा ३ जीवन्तिका ४ । इत्यमरः ॥ वन्दाका ५ शैखरी ६ सेया ७ वन्दका ८ । इति भरतधृतहडुः ॥ वन्दकः ९ नीलवल्ली १० इति रत्नमाला ॥ वन्दाकी ११ परवासिका १२ इति शब्दरत्नावली ॥ वप्रिणी १३ पुत्रिणी १४ वन्द्या १५ परपुष्टा १६ पराभया १७ । इति शब्दचन्द्रिका ॥ लताविशेषः । भिन्तुकी । इति मेदिनी । दे, १० ॥ अस्याः पर्य्यायान्तरं गुणाश्च वन्दाकशब्दे द्रष्टव्याः ॥
वन्दाक, पुं, वृक्षोपरिवृक्षः । वाँदा इति हिन्दी भाषा । तत्पर्य्यायः । पादपरुहा २ शिखरी ३ तरुरोहिणी ४ वृक्षादनी ५ वृक्षरुहा ६ कामवृक्षः ७ शैखरी ८ केशरूपा ९ तरुरुहा १० तरुस्था ११ गन्धमादनी १२ कामिनी १३ तरुसुक् १४ श्यामा १५ उपदी १६ । अस्य गुणाः । तिक्तत्वम् । शिशिरत्वम् । कषायित्वम् । श्रमापहत्वम् । वह्न्यादिसिद्धिदत्वम् । वृष्यत्वम् । कषायत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वन्दाकः स्याद्हिमस्निग्धः कषायमधुरो रसे ।
मङ्गल्यः कफवातास्रदाहपित्तविषापहः ॥"
इति भावप्रकाशः ॥
वन्दाका, स्त्री, वन्दा । इति भरतधृतहडुः ॥
वन्दाकी, स्त्री, वन्दा । इति शब्दरत्नावली ॥
वन्दारु, त्रि, (वन्दते स्तौति अभिवादयतीति । वन्द् + "ग्रहवन्दोरारुः ।" ३ । २ । १७३ । इति आरुः ।) वन्दनशीलः । तत्पर्य्यायः । अभिवादकः २ । इत्यमरः । ३ । १ । २८ ॥ अभिवादयिता ३ । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । १ । १४७ । २ ।
"प्रीयति त्वो अतुलो गृणति वन्दारुस्त
तन्वं वन्दे अग्ने ॥"
स्तोत्रे, स्त्री । इति ऋग्वेदभाष्ये सायणः । ४ । ४३ । १ ॥)
वन्दि, स्त्री, (वन्दते स्तौति वृत्तादिकं स्वमुक्त्यर्थमिति । वदि + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) आस्थानमनुष्यभगवादिः । कयेदी इति भाषा । तत्पर्य्यायः । ग्रहः २ उपग्रहः ३ वन्दी ४ । इत्यमरभरतौ ॥ वन्दिका ५ । इति शब्दरत्नावली ॥ सोपानकः । इत्युणादिकोषः ॥ (ग्रहः । यथा, भागवते । ६ । १ । २२ ।
"वन्द्यर्थैः केतवैर्यैर्गर्हितां वृत्तिमाश्रितः ॥"
पुं, स्तुतिपाठकः । यथा, हरिवंशे । १११ । ५० ।
"स्तुतमागधवन्दीनामेकैकस्य सहस्रिकम् ॥")
व(ब)न्दिग्राहः, पुं, (वन्दिमिव गृह्यं गृह्णातीति । ग्रह + णः ।) अस्त्रागारायुधदैवतागारभेदकः । (डाकाइत इति भाषा ॥) यथा,—
"वन्दिग्राहांस्तथा वाणिकुङ्कुरार्गोघहारिणः ।
अस्त्रशस्त्रातिनष्टेषु शूलारोपयेन्नरान् ॥
वन्दिग्राहादीन् बलावष्टम्भेन घातकांश्च नरान् शूलारोपयेत् । अयञ्च वधप्रकारविशेषोपदेशः ।
"अस्त्रागारायुधागारदैवतागारभेदकान् ।
हस्त्यश्वरथहर्त्तॄंश्च हन्यादेवाविचारयन् ॥"
इति मनुस्मरणात् । इति मिताक्षराव्यवहारकाण्डे दण्डप्रकरणम् ॥
व(ब)न्दिचौरः, पुं, (वन्दिमिव विधाय चौरः अपहारकः । ग्रहस्यं वन्दिमिव कृत्वा समानदण्डाभापहारकत्वादस्य तथात्वम् ।) वन्दिग्राहः । तत्पर्य्यायः । माचलः २ । इति हारावली । १४५ ॥ वन्दीकारः ३ । इति त्रिकाण्डशेषः ॥
व(ब)न्दिपाठः, पुं, (वदि + भावे घञ् । वन्दिः स्तुतिरूपः पाठो यत्र ।) स्तुतिग्रन्थः । तत्पर्य्यायः । भोगावली २ । इति त्रिकाण्डशेषः ॥
व(ब)न्दी, स्त्री, (वन्दि + "कृदिकारादक्तिनः ।" इति ङीष् ।) वन्दिः । इत्यमरटीकायां भरतः ॥ (यथा, कुमारे । २ । ५२ ।
"गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित् ।
प्रत्यानेष्यति शत्रुभ्यो वन्दीभिव जयश्रियम् ॥")
व(ब)न्दी [न्], पुं, (वन्दते स्तौति वृत्तादीनिति । वदि स्तुतौ + णिनिः ।) राजादेर्यशःपाठी वीर्य्यादिस्तुतिकारकः । तत्पर्य्यायः । स्तुतिपाठकः २ । इत्यमरः ॥ मागधः ३ मगधः ४ । इत्यर्थे । इति तट्टीकायां भरतः ॥ (यथा, रघुः । ४ । ६ ।
"परिकल्पितसान्निध्या काले काले च वन्दिभिः ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥")
अस्योत्पत्तिर्यथा,—
"क्षत्रियादिप्रकन्यायां सूतो भवति जातितः ।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ॥"
इति मानवे १० अध्यायः ॥
आद्धोत्तरमस्य भुक्तितो दानस्याकरणे निन्दा यथा,—
"वन्दिभ्यश्चैवमर्थिभ्योऽप्यार्थिभ्यश्चप्रमर्थिनः ।
यदि तत्र न दद्यात्तु विफलं भुक्तितो भवेत् ॥"
वन्दिनो वैतालिकोत्तरः । अर्थिनः सन् यदि एभ्योऽन्नं न दद्यात् आद्धं विफलं भवेदित्यर्थः ।
"सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः ।
वन्दिनस्तुतिप्रज्ञाः प्रस्तावस्तवगोक्तयः ॥"
इत्युक्तेः । इत्यस्य आद्धोत्तरदाननिषेधात् आद्धे वन्दिप्रभृतिभ्यो दानाकरणे निन्दाश्रवणाच्च आद्धात् पूर्व्वं तदर्थं भोज्यादिकं उत्सृजेत् । इति आद्धतत्त्वम् ॥ (भृत्यः । यथा, भागवते । ११ । ४ । १५ ।
"ओमित्यादेशमादाय नत्वा तं सुरवन्दिनः ।

उर्वशीमेनकारम्भेडां पुरस्कृत्य दिवं ययुः ॥"
"सुरवन्दिनी देवभट्टाः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

व(ब)न्दीकारः, पुं, (वन्दीवत् ग्रहणं करोतीति । ञ+"कर्मणण्यण् ।" ३ । २ । १ । इत्यण् ।) वन्दिग्राहः । डाकाइत इति भाषा । तत्पर्य्यायः । माचलः २ प्रसह्यचौरः ३ चिल्लाभः ४ । इति त्रिकाण्डशेषः ॥

वन्द्या, स्त्री, (वन्द्यते स्तूयते इति । वदि+ण्यत् ।) वन्दा । इति शब्दचन्द्रिका ॥ गोरोचना । इति भावप्रकाशः ॥ (वन्दनीये, त्रि । यथा, साहित्यदर्पणे १ परिच्छेदे ।
"आज्ञाः परम्परां वन्द्यां कर्त्रे दत्त्वा ततः कृपां कुरु ॥"
यथा च भागवते । ४ । १२ । २६ ।
"श्लाघिष्ठ जगतां वन्द्यं तदिच्छोः परमं पदम् ॥"))

वन्द्यं, क्ली, (वन्द्यते स्तूयते इति । वदि स्तुतौ+"स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् ।) कल्याणम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वन्द्रः, त्रि, (वन्दते स्तौति देवादीन् पूजाकाले इति । वदि+रक् ।) पूजकः । इत्युणादिकोषः ॥

वन्यं, क्ली, (वने भवम् । वन+यत् ।) खचम् । इति राजनिर्घण्टः ॥ (कुटन्नटम् । तत्पर्य्यायो यथा,—
"कुटन्नटं परं वन्यं सुगन्धञ्च परीलवम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

वन्यः, त्रि, (वने भवः । वन+यत् ।) वनोद्भूतः । इति मेदिनी । ये, ५४ ॥ (यथा, रघुः । १ । ४५ ।
"हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥")

वन्यः, पुं, (वन+यत् ।) वनसूरणः । वाराहीकन्दः । देवनलः । इति राजनिर्घण्टः ॥ (क्षीरविदारी । तत्पर्य्यायो यथा,—
"क्षीरी प्रवरपर्ण्याख्यः क्षुक्षुन्दः कुक्षवाग्रवः ।
वन्यो मूलकमूलाभः क्षक्षन्दः स च कथ्यते ॥"
इति वैद्यकरत्नमालायाम् ॥)

वन्या, स्त्री, (वनानामरण्यानां जलानां वा संहतिः । वन+"प्राग्वतीयष्ठो यः ।" ४ । २ । ३८ । इति यः ।) वनसङ्घः । इत्यमरः । २ । ४ । ४ । जलसंहतिः । इति मेदिनी । ये, ५४ ॥ सुवर्णी । (तत्पर्य्यायो यथा, रत्नमालायाम् ।
"सुवर्णी स्वर्णसहा कासुम्भा सिंहपर्णिका ।
वन्या माञ्जरिगन्धेति सुपर्णयुभे च ते ॥")
गोपालकर्कटी । गुञ्जा । मिश्रेया । भद्रसुखा । गन्धपत्रा । इति राजनिर्घण्टः ॥ (अश्वगन्धा । तत्पर्य्यायो यथा,—
"हयगन्धाश्वगन्धाख्या वाजिगन्धाश्वगन्धकः ।
वन्या तुरगगन्धा च कनुकाश्वावरोहकः ॥"
वन्या कचित् दृश्यते । इति वैद्यकरत्नमालायाम् ॥)

वन्योपोदकी, स्त्री, (वन्या वनोद्भूता उपोदकी ।) लताविशेषः । वनपुँइ इति भाषा । तत्पर्य्यायः । वनजा २ वनसाह्वया ३ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । रोचनत्वञ्च । इति राजनिर्घण्टः ॥

वप्रः, पुं, (वपति भागमर्हतीति । वप सम्भक्तौ+"ऋज्येन्द्राग्रवज्रेति ।" उणा० २ । २८ । इति रप्रत्ययः ।) अंशौ । भागौ । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

वप, औ ण डु ऐ सुक्तनुबीजाग्नौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।) औ, वप्ता । ण, वपति वपते । डु, उप्तिमम् । सुक्तौ सुक्तिकरणम् । वपति मस्तकं नापितः । वपति तन्तुं तन्तुवायः । यदि वपति क्षेत्राणः क्षेत्रमासाद्य बीजम् । इति दुर्गादासः ॥

वपः, पुं, (वप्+घः ।) केशसुक्तनम् । बीजवपनम् । इति वपधातोर्भावेऽल्प्रत्ययेन निष्पन्नः ॥

वपनं, क्ली, (वप्+भावे ल्युट् ।) केशसुक्तनम् । (यथा, मनुः । ५ । १४० ।
"सूतायां मासिकं कार्य्यं वपनं न्यायवर्त्तिनाम् ॥") बीजाधानम् । इति मेदिनी । ने, १२२ ॥

वपनी, स्त्री, (उप्यते मस्तकादिकमस्यामिति । वप्+अधिकरणे ल्युट् । ङीप् ।) नापितशाला । इति हैमचन्द्रः । ४ । ६६ ॥ (तन्तुवायशाला । इति तत्तुधात्वर्थदर्शनात् ॥)

वपा, स्त्री, (उप्यतेऽसेति । वप्+भिदाद्यङ् । टाप् ।) छिद्रम् । (यथा, शतपथब्राह्मणे । ६ । ३ । १ । ५ ।
"अथ वल्मीकवपा सुषिरा भवति निहिता भवति ॥") मेदः । इत्यमरः । २ । ६ । ६४ ॥ (यथा, रामायणे । १ । १४ । ३६ ।
"पतत्त्रिराजस्य वपासुहृत्य नियतेन्द्रियः ।
ऋत्विक् परमसम्पन्नः क्षपयामास शार्वरम् ॥"
सा च हृदयस्थधातुः । यथा । "त्वक् च लोहितञ्च मांसञ्च मेदश्च नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधानञ्चामाशयश्च पक्वाशयश्चोत्तरगुदश्चाधरगुदश्च क्षुद्रान्त्रञ्च वपा च वपावहनञ्चेति माढरजातानि ।" इति चरके शारीरस्थाने सप्तमेऽध्याये ॥)

वपिजः, पुं, (वपति बीजमिति । वप्+इलच् ।) पिता । इत्युणादिकोषः ॥

वपुः, [स्] क्ली, (उप्यन्ते देहान्तरभोगसाधनबीजीभूतानि कर्म्माण्यत्रेति । वप्+"अर्त्तिमृवपियजीति ।" उणा० २ । ११८ । इति उसिः ।) शरीरम् । इत्यमरः । २ । ६ । ७० ॥ (यथा, रघुः । २ । ४७ ।
"एकातपत्रं जगतः प्रभुत्वं
नवं वयः कान्तमिदं वपुश्च ॥")
प्रशस्तरूपम् । इति मेदिनी । से, १६ ॥ (अंशुः । यथा, मनुः । ५ । ८६ ।
"अष्टानां लोकपालानां वपुर्धारयते नृपः ॥"
"वपुस्तेजोऽंशुः ।" इति मेधातिथिः ॥ स्त्री, स्वनामख्याता दक्षकन्या । सा तु धर्म्मराजस्य पत्नी । यथा, मार्कण्डेये । ५० । २१ ।
"बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिक्षमा दया ।
पत्न्यो दक्षस्य दुहितॄः प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ॥")

वपुःश्रवाः, पुं, (वपुषः शरीरात् श्रवः श्रवणं यस्य ।) शरीरश्रवणधातुः । इति राजनिर्घण्टः ॥

वपुनः, पुं, (वप+उनच् । वपुन+पृषोदरादित्वात् यस्य यः इति केचित् ।) देवता । इति शब्दरत्नावली ॥

वपुषा, स्त्री, हपुषा । इति भावप्रकाशः ॥ (रूपे, क्ली । यथा, ऋग्वेदे । ३ । २ । १५ ।
"रथं न चित्रं वपुषायं दर्शतं
मघुर्हितं यदमिदाय ईमहे ॥"
"वपुषाय रूपार्थं दर्शतं दर्शनीयम् ।" इति तद्भाष्ये सायणः ॥)

वपुष्मा, स्त्री, पद्मचारिणी । इति जटाधरः ॥ (काशीराजस्य कन्या । जनमेजयस्य पत्नी । सा तु रम्भा नामाप्सराः । जनमेजयकृताश्वमेधकाले इन्द्रोपेतमश्वमविशेन धर्षितासीदतो जनमेजयेनेयं परित्यक्तापि पुनर्गन्धर्वराजविश्वावसुवाक्येन गृहीता । एतद्विवरणन्तु हरिवंशे १८८ अध्याये द्रष्टव्यम् ॥)

वप्रा, [ऋ] पुं, (वपति बीजमिति । वप्+ष्ट्रन् ।) जनकः । इति मेदिनी ॥ कविः । इति जटाधरः ॥ (नापितः । यथा, ऋग्वेदे । १८ । १४२ । ४ ।
"यदा ते वातो अनुवाति शोचिर्
वप्रेव श्मश्रु वपसि प्र भूम ॥"
"यथा वप्रा नापितो वपति सुखयति तथा भूम भूमिं प्रवपसि प्रकर्षेण सुखयसि ॥" इति तद्भाष्ये सायणः ॥)

वप्रा, [ऋ] त्रि, (वपतीति ॥ वप् बीजौषधौ+ष्ट्रन् ।) वायकः । इति मेदिनी ॥ (कर्षकः । यथा, मनुः । ३ । १४२ ।
"यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम् ।
तथानृचे हविर्हुत्वा न दाता लभते फलम् ॥")

वप्रं, क्ली, पुं, (उप्यतेऽसेति । वप+"वृषिवपिभ्यां रन् ।" उणा० २ । २७ । इति रन् ।) दुर्गनगरे परिखाया उद्धृतमृत्तिकास्तूपवद्धे यदुपरि प्राकारो निवेश्यते तत् । तथा चार्य्यशास्त्रम् । खातादुद्धृतमृद्धा वप्रं कारयेत् तस्योपरि प्राकारमिति । तत्पर्य्यायः । क्ष्वः २ । इत्यमरभरतौ ॥ मृत्तिकास्तूपः ३ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । ५०५ ।
"लयं जघने तस्याः सुविशाले कलितकरिकरकीड़े ।
वप्रे सक्तं द्विपमिव मदङ्कारस्त्री विभूषयति ॥")

महावप्रो यथा,—
"महोद्यानां महावप्रां तड़ागशतशोभिताम्।
प्राकारगृहसम्बाधामिन्द्रस्येवामरावतीम् ॥"
महान् वप्रो यस्याः।
"प्राकाराधारभूता क्षत्रिमोच्छ्रिता भूमि-
र्वप्रसंज्ञा ॥"
इति विष्णुपुराणे ५ अंशे २३ अध्याये ॥ * ॥
वपति बीजमत्र। क्षेत्र इति भाषा। तत्-
पर्य्यायः। केदारः २ क्षेत्रम् ३। इत्यमरभरतौ॥
निष्कुटः ४ वनजम् ५ वाटिका ६ पाटीरः ७।
इति जटाधरः॥ (यथा, हरिवंशसंहितायाम्।
१६।१६।
"शालीक्षुमत्यपि धरा धरणीधराभ-
धाराधरोज्झितपयः परिपूर्णवप्रा॥")
रेणुः। तटः। इति मेदिनीकरहेमचन्द्रौ॥
(यथा, किराते। ७। ११।
"तत् पूर्व्वं प्रतिविदधे सुरापगाया
वप्रान्तस्खलितविवर्त्तनं पयोभिः॥"
पर्व्वतसानुः। यथा, किराते। ५। ३६।
"नानारत्नज्योतिषां सन्निपाते-
ष्वन्नेष्वन्तः सानुवप्रान्तरेषु॥")
वप्रं, क्ली, (वप्+"हृषिवपिभ्यां रन्।" उणा०
२। २७। इति रन्) सीसकम्। इति हेम-
चन्द्रः। ४। ४६॥ (तथास्य पर्य्यायान्तरम्।
"सीसं वप्रञ्च वप्रञ्च योगेष्टं नागनामकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वप्रः, पुं, (वपति बीजमिति। वप्+रन्।)
तातः। इति मेदिनी। रे, ८२॥ प्राकारः।
इति विश्वः। प्रजापतिः। इति संक्षिप्तसारो-
णादिवृत्तिः॥
वप्रा, स्त्री, (वप्+रन्। टाप्।) मञ्जिष्ठा।
इति राजनिर्घण्टः॥ (विवरणमस्या मञ्जिष्ठा-
शब्दे ज्ञातव्यम्॥)
वप्रिः, पुं, (वपति बीजमत्र। वप्+"वृङ्काद-
यश्च।" उणा० ४। ६६। इति क्रिन्प्रत्ययेन
साधुः।) क्षेत्रम्। इति सिद्धान्तकौमुद्या-
मुणादिवृत्तिः। दुर्गतिः। समुद्रः। इति संक्षिप्त-
सारोणादिवृत्तिः॥
वप्री, स्त्री, (वप्री+पृषोदरादित्वात् साधुः।)
वल्मीकः। इति हलायुधः॥
वभ्रुः, पुं, एकादशकरकश्यपगोत्रप्रवरकरभम्।
अस्याधिपतिरिन्द्रः। तत्र विहितानि यथा,—
"पौष्टिकस्थिरशुभानि वभ्रवे॥"
इति ज्योतिस्तत्त्वम्॥
अत्र जातफलम्।
"वभ्रवाभिधाने जननं हि यस्य
शूरोऽतिधीरो मनुजः कृती स्यात्।
पद्मालया तस्मिलये निवासं
करोति नित्यं सुविचक्षणः स्यात्॥"
इति कोष्ठीप्रदीपः॥
दाक्षिणात्यमते अस्य ग्रन्थस्य प्रथमवकारः
पवर्गीयः शेषवकारोऽन्तःस्थः॥

वभ्र, गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-
सक०-सेट्।) वकारादिः। ओष्ठ्यवर्गचतुर्थो-
पधः। वभ्रति। इति दुर्गादासः॥
वभ्रु, यं, (उ+यं+भ्रु।) शिवपूजाङ्गे कपोल-
वाद्यविशेषः। तन्तु उकाराकारभकारात्मकं
शिवप्रणवस्वरूपम्। यथा,—
"डिम् डिम् डिम् डिम् डिडिम् डिम् डिडिमरु
डमरुं वादयन् क्षुद्भानादं
वभ्रु वभ्रु वभ्रु वभ्रु वभ्रु वभ्रु भ्रमितदृग्भिरा-
क्षालमानेन वृत्यन्।
कर्पूरासिक्तभस्मापटितपटुजटाजम्बिरद्राक्ष-
मालो
मायायोगी दृशास्यो रघुरमणपुरः प्राङ्गणे
प्राडुरासीत्॥"
इति रामलीलातन्त्रकाव्यम्॥ * ॥
वमनबीजम्। यथा। नासापुटौ धृत्वा वमिति
वमनबीजस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा
तस्मात् ललाटस्थचन्द्रान्नलितसुधया मातृका-
वर्णात्मिकया वमन्तं देहं विरचय्य लमिति
पृथ्वीबीजस्य दार्ढ्यिंगुदारजपेन देहं सुदृढं
विचिन्त्य हस्तियोगेन वायुं रेचयेत्। इति भूत-
शुद्धिप्रकरणे तन्त्रसारः॥
वम, ण शु टु उगिरि। इति कविकल्पद्रुमः॥
(भ्वा०-पर०-सक०-सेट्।) वकारादिः। ण,
वेमतुः। ववमतुः। अन्ये तु ततुकार्य्यविधायक-
सूत्रे फलादौ चेमं न पठन्ति वेमुश्च केचिद्धुधिर-
मित्यादिसाधनाय ततुसूत्रे दन्त्यवकारादिवर्ज्जन-
स्यानित्यतां स्वीकुर्व्वन्ति। केचित् 'पुनर्व्वर्त्य-
वकारादिधात्वन्तरमध्यस्ति इति प्रलपन्ति।
ज, वामः वमः। उ, वमित्वा वान्त्वा। टु,
वमथुः। उगिरि वान्तौ। वमति अन्नमजीर्ण-
वान्। अमन्तत्वेऽपि नौ व्यवहृत इत्यादिना
केवलस्य दृश्यविकल्पनात् सोपसर्गस्य नित्यं
दृश्यः। वमयति वामयति प्रवमयति। इति
दुर्गादासः॥
वमः, पुं स्त्री, वमनम्। इति वमधातोरप्प्रत्ययेन
निष्पन्नम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
वमथुः, पुं, (वमनमिति। वम्+"इतोऽथुच्।"
३। ३। ८८। इति अथुच्।) वमिः। (यथा,
सुश्रुते उत्तरतन्त्रे ४५ अध्यायः।
"दौर्ब्बल्यश्वासकासज्वरवमथुमदाः पाण्डुता-
दाहमूर्च्छाः॥")
हस्तिशुण्डनिर्गतजलकणा। तत्पर्य्यायः। कर-
प्रीकरः २। इत्यमरः। २। ६। ५५॥ (यथा,
नैषधे। १६। ६।
"रजनिवमथुप्रालेयाम्भः कणक्रमसंभृते:
कुशकिशलयस्याक्षैरक्षैरवश्यमवेक्ष्यते॥")
वमनं, क्ली, (वम्+भावे ल्युट्।) छर्द्दनम्।
(यथा, सुश्रुते। १। १२।
"मधुराम्लौ रसौ वापि वमनाय प्रदापयेत्॥"
वमनद्रव्यमपि। यथा, कथासरित्सागरे।
६४। १७।

"स दत्त्वा वमनं क्षिप्रात् स्तकल्यमजी-
वयत्॥")
अर्द्दनम्। इति मेदिनी। ने, १२३॥ आकुलिः।
इति विश्वः॥ (आहरणम्। यथा, रघुः।
१५। २६।
"या सौराज्यप्रकाशाभिर्वभौ पौरविभूतिभिः।
स्वर्गाभिष्यन्दवमनं क्षत्त्रेणोपनिवेशिता॥"*॥
अथ वमनकल्पीयविधिः।
"वमने मदनं श्रेष्ठं त्रिफलूलं विरेचने।
तिलमन्यस्य तु व्याधि विशेषेण विशिष्यते॥
फलानि तानि पाक्यानि न चातिहरितान्यपि।
आदायाद्रि प्रयत्नेन मधौ शीतवसन्तयोः॥
प्रक्षाल्य कुशसुत्तोयां चिप्ता वस्त्रे प्रपेषयेत्।
गोमयेनानुसुत्तोयां धान्यमध्ये निधापयेत्॥
स्थूलभूतानि मध्यिष्टगन्धानि कुशवेष्टनात्।
निष्कृष्य निर्गतेऽष्टाहे शोषयेत्तान्यथातपे॥
तैर्यां ततः सुपुष्कारासुहृद्य फलपिण्डकी:।
दधिमध्याज्यपलले स्थैर्दत्त्वा शोषयेत् पुनः॥
ततः सुगुप्तं संस्थाप्य कार्य्यकाले प्रयोजयेत्।
अथादाय ततो मात्रां जर्ज्जरीकृत्य वासयेत्॥
मृर्व्वरीं मधुयष्ट्या वा कोविदारस्य वा जले।
कर्ब्बुदारस्य बिल्वस्य वा नीपस्य बिल्वस्य वा॥
मृत्पुष्प्याः सदा पुष्प्याः प्रत्यक्पुष्प्युद्भवेऽथवा।
ततः पिबेत् कषायं तं प्रातर्मुदितगालितम्॥
क्षत्रोदितेन विधिना साधु तेन तथा वमेत्।
शेषुष्करप्रतिश्यायगुल्मान्त्रिदधीश्च॥"
"पित्ते कफस्थानगते जीमूतादिजलेन तत्।
हृद्दाहेऽधोऽवपित्ते च क्षीरं तत्पिण्डकी
मृतम्॥
क्षीरेयीं वा कफच्छर्दिप्रसेकतमकेषु च।
दध्युत्तरं वा दधि वा ततुसुतक्षीरसम्भवम्॥
फलादिक्वाथकल्काभ्यां सिद्धं तत् सिद्धदुग्ध-
जम्।
सर्पिः कफाभिभूतेऽग्नौ शुष्यद्देहे च वा मतम्॥"
"वत्सकादिप्रतीवापः कषायः फलमञ्जनः।
निम्बार्कान्यतरक्वाथसमायुक्तो नियच्छति॥
वङ्गभूजानपि व्याधीन् सर्व्वान् सन्तर्पणोद्भवान्।
वाटपुष्पफलश्लक्ष्णचूर्णैर्भाव्यं सुरूक्षितम्॥
वमेच्चक्र वसादीनां क्षीरो जिघ्रन् सुखं सुखी॥"
"इक्ष्वाकुर्व्वमने शस्तः प्रताम्यति च मानवे।
फलपुष्पविहीनस्य प्रवालैस्तस्य साधितम्।
पित्तश्लेष्मज्वरे क्षीरं पित्तोद्रिक्ते प्रयोजयेत्॥"
"सक्तुभिर्वा पिबेन्मद्यं तुम्बीस्वरसभावितैः।
कफोद्भवे ज्वरे कासे गलरोगेष्वरोचके॥
गुल्मे ज्वरे प्रसक्ते च कल्कं मांसरसैः पिबेत्।
नरः साधु वमत्येवं न च दौर्ब्बल्यमश्नुते॥"
"जीवकर्षभकौवीरा कपिकच्छूः शतावरी।
काकोलीक्षीरशुक्लौ मेदा महामेदा मधूलिका॥
तदजोभिः पृथक्श्लोक्षा धामार्गवरजोन्विताः।
कासे हृदयदाहे च श्रस्ता मधुसिताप्लुताः॥"
"सर्षपाणां मधूकानां तोयेन लवणस्य वा।
पाययेत् कौटजं बीजं युक्तं क्षीरयवागुवा॥

मधूकं शर्कराक्षौद्रं सक्षीरं पाययेत् पृथक् ।
कल्याणघृतकेनाऽपि जीवन्तीजीवकोदनैः ॥
वमनौषधमुख्यानामिति कल्पदिगीरिता ।
बोधेनानेन मतिमानन्यान्यपि च कल्पयेत् ॥"
इति वाभटे कल्पस्थाने प्रथमेऽध्याये ॥)

वमनः, पुं, (वमनीव शुक्लवर्णमिति । वम्+ल्युः ।) गुग्गुलः । इति राजनिर्घण्टः ॥

वमनी स्त्री, (वमन+ङीप् ।) जलौका । इति राजनिर्घण्टः ॥ (विस्तरस्तु जलौकाशब्दे ज्ञातव्यः ॥)

वमनीया, स्त्री, (वमयतीति । वम्+ण्यर्थविवक्षायाम् । अभिधानात् कर्त्तरि अनीयर् ।) मक्षिका । इति राजनिर्घण्टः ॥ वमनयोग्ये, त्रि ॥

वमिः, स्त्री, (वमनमिति । वम्+सर्व्वधातुभ्य इन् । उणा० ४ । ११० ।) छर्द्दिः । इत्यमरः । १।६।५॥ (अस्याः सम्प्राप्तिलक्षणचिकित्सितं पथ्यापथ्यञ्च यथा,—

"आमजे शूलरोगार्त्तेः पर्व्वभेदो भ्रमः क्लमः ।
ग्रीवः शिरोग्रहो लोहो नेत्रे गम्भीरमिच्छति ॥
श्लेष्मा वा पैत्तकं वापि अजीर्णाज्जायते वमिः ।
गम्भीरनेत्रो वमते विड्वन्तो वातिसार्य्यते ॥
गात्रे खल्ली करं शूलं तथा ग्रीवोऽतिमूर्च्छना ।
विकलाङ्गो भ्रमार्त्तश्च भ्रमत्तरीक्षते जगत् ॥
शिरोविरेचनैरेतैरर्थं करपादौ हिमोपमौ ।
एतैर्लिङ्गैस्तु संयुक्तां छर्द्दिं दूरे परित्यजेत् ॥"

चिकित्सा ।

"स पञ्चमूलीकथितः कषायः
ससैन्धवश्चामलकश्च कल्कः ।
क्वाथं पिबेन्मिश्रितपिप्पलीकं
स याति छर्द्दिर्निवारणश्च ॥"

"आमलक्या रसेनाथ पृष्टं चन्दनकं मधु ।
गुटिकामलमानेन लेहो हन्ति वमिं ध्रुवम् ॥
चित्रककटुकरञ्जनीदयश्च फलत्रिकं मधुना च यावशूकश्च ।
वमकृतमिति चूर्णमेतन्मधुना युतं वमिं निवारयति ॥"

"काकोली काकमाची च क्वाथं शर्करया युतम् ।
लाजाशर्करमंयुक्तं हन्ति पित्तवमिं नृणाम् ॥
मातुलुङ्गरसश्चैव पथ्याशर्करया युतः ।
हन्ति कामं पित्तभवं वमिं शीघ्रं नियच्छति ॥
दृष्ट्वा पित्तवमिं घोरां सदाहभ्रमदायिनीम् ।
तत्रारग्वधपत्राणि मधुशर्करयान्वितम् ॥
क्षीरपानं प्रशस्तं वा सुखाशर्करयान्वितम् ।"

"जम्ब्वाम्रयोः प्रवालानि दाडिमामलकस्य वा ।
मस्तुनोपोषितं प्रातर्हन्याच्छर्द्दिं वमिं नृणाम् ॥
सक्तांश्चूर्णं धवकदम्बककोलचूर्णं
गुडेन च धान्यसहितं सगुडं प्रदद्यात् ।
श्रेष्मोद्भवं वमनमाशु निहन्ति पुंसां
मुस्तीकृता मधुविडङ्गयुतोऽपि लेहः ॥"

"ऊर्द्धभागगते दोषे विरेको हि प्रशस्यते ।
तस्मिन् जातेऽप्यधोभागं वमनं शाम्यति ध्रुवम् ॥
अथ द्विभागमामर्क्षेसदा देयामया मधु ।
क्रिमिजं वमनं ज्ञात्वा क्रिमीणां शमनक्रिया ॥
न चोष्णं नातिचाम्लञ्च नतीक्ष्णं न तथा लघु ।
तण्डुलीयकशाकं वा न मद्यं कार्ष्ण्यकं न तु ॥
वमिदोषे च कथितं पथ्यञ्चात्र प्रयुञ्ज मे ।
आनूपं ग्राम्यभक्ष्यञ्च घृतपुष्पा च वास्तुकम् ॥
आढकी सूपयूषञ्च दधि सर्पिर्गुडान्वितम् ।
अङ्गारमक्षका चाथ वमौ पथ्यं प्रशस्यते ॥
यथाबलं यथाकालं यथादोषं यथानलम् ।
तथा दृष्ट्वा प्रकुर्व्वन्ति पथ्यानां समुपक्रमम् ॥
दिवानिद्रां प्रयुञ्जीत वमौ श्वासेऽतिसारके ।
हिक्काग्रीवे तथा जीर्णे वमिक्लेदेऽथवा पुनः ॥
न चोष्णसेवनञ्च नातिभोजनमेव च ।
नधावनञ्च कर्त्तव्यं वर्ज्जयेदमनार्हते ॥"

इति वैद्यके ।)

अथ छर्द्द्यधिकारः । तत्र छर्द्दिविप्रकृष्टसन्निकृष्टनिदानं पूर्व्वरूपं संप्राप्तिश्चाह ।

"अतिस्निग्धैरतिस्निग्धैर्लवणैर्वमनैरपि ।
अकाले चातिमात्रेण तथा चात्रेण भोजनैः ॥
आमाद्वयात्तथोद्वेगादजीर्णात् कृमिदोषतः ।
नार्य्याश्चापन्नसत्त्वायास्तथानिष्टसमश्नतः ॥
दुष्टैर्दोषैः पृथक् सर्व्वैर्बीभत्सालोकनादिभिः ।
बीभत्सैरेहितुमिच्छाप्यैर्भुक्तसुत्क्लिश्यते बलात् ॥"

आमात् असम्यक्पक्वादन्नात् । अजीर्णात् यथास्वमनाकृष्टात् । आपन्नसत्त्वायाः प्राप्तगर्भायाः । अन्यैर्बीभत्सैर्विघ्नैर्हेतुभिः दृष्टाकारिभिः अनिष्टश्रवणस्पर्शनदर्शनभक्षणघ्राणैरुत्क्लिश्यते-ऊर्द्धं नीत्वा सुखादुद्वहिष्क्रियते ॥ * ॥ पूर्व्वरूपमाह ।

"क्षुत्प्रसेकोद्गाररोधौ च प्रसेको लवणास्यता ।
देहोऽन्नपाने च भृशं वमीनां पूर्व्वलक्षणम् ॥"

छर्द्देः सामान्यलक्षणमाह ।

"छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः ।
निरुध्यते छर्द्दिरिति दोषो वक्त्रं प्रधावितः ॥"

छादयन् पूरयन् अङ्गभञ्जनैः अङ्गभेदैः अर्दयन् व्यथानि पीडयन् । वक्त्रं प्रधावितः वक्त्रं प्रति धावितः दोषः छर्द्दिर्निरुध्यते ।"* ॥ वातजायाः लक्षणमाह ।

"हृत्पार्श्वपीडासुखशोषशीर्ष-
नाभ्यस्थिकासस्वरभेदतोदैः ।
उद्गारशब्दप्रबलं सफेनं
विच्छिन्नशब्दं तनुकं कषायम् ॥
लक्ष्येण चाल्पं महता च वेगे-
नार्त्तोऽनिलाच्छर्द्दयतीव दुःखम् ।"

कषायं कषायरसम् । दुःखं दुःखमिव छर्द्दयति । * ॥ पित्तजामाह ।

"मूर्च्छापिपासासुखशोषमर्द्द-
ताक्ष्णिसन्तापतमोभ्रमार्त्तः ।
पीतं भृशोष्णं हरितञ्च तिक्तं
धूम्रञ्च पित्तेन वमेत् सदाहम् ।"* ॥

कफजामाह ।

"तन्द्रास्यमाधुर्य्यकफप्रसेकं
सन्मोयनिद्रारुचिगौरवार्त्तः ।
स्निग्धं घनं स्वादु कफाङ्कि शुक्लं
सलोमहर्षोऽल्परुजं वमेत्तु ॥"

सन्मोयसृष्टिः ॥ * ॥ त्रिदोषजामाह ।

"शूलाविपाकारुचिदाहलक्षणा-
श्वासप्रमोहप्रबलाप्रसक्तम् ।
छर्द्दिस्त्रिदोषाल्लवणाम्लनील-
सान्द्रोष्णरक्तं वमतां नृणां स्यात् ॥"

आगन्तुजामाह ।

"असात्म्यजा च क्रिमिजामजा च
वीभत्सजा दौर्हृदजा च या हि ।
सा पञ्चमी तासु विभावयेच्च
दोषोत्क्लेशेनैव यथोक्तमादौ ॥"

एताः पञ्चागन्तुजत्वेन सामान्यादेकैव अतएव सा आगन्तुजा पञ्चमी विभावयेत् अनुबध्नीयेत् ॥*॥

उपद्रवानाह ।

"कासः श्वासो ज्वरस्तृष्णा हिक्का वैचित्त्यमेव च ।
हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्द्देरुपद्रवाः ॥
वैचित्त्यं विप्लुतचित्तत्वम् । तमकोऽत्र तमः । श्वासपदेनैव तमकाख्यस्यापि श्वासस्योक्तत्वात् ॥

असाध्यां साध्यानाह ।

"चीरस्य या छर्द्दिरतिप्रसक्ता
सोपद्रवा ग्रोथितरूपयुक्ता ।
सचन्द्रिकां तां प्रवदेदसाध्यां
साध्यां चिकित्सेत् निरुपद्रवाञ्च ॥"

सचन्द्रिका मयूरपिच्छचन्द्रिकाप्रभायुक्ता ॥*॥

अथ छर्द्दिचिकित्सा ।

"आमाशयोत्क्लेशभवा हि सर्व्वा-
श्छर्द्दो मता लंघनमेव तस्मात् ।
विधीयते मारुतजां विना तु
संग्रोधनं वा कफपित्तहारि ॥"

अत्र द्वितीयपादे छर्द्दीत्यन्तः ॥

"हन्यात् चीरोदकं पीतं छर्द्दिं पवनसम्भवाम् ।
सुन्नामलकयूषो वा ससर्पिष्कः ससैन्धवः ॥"

चीरोदकं नाग्निसह्य चीरस्य उदकम् ॥ २ ॥

"गुडूचीत्रिफलानिम्बपटोलैः कथितं जलम् ।
पिबेन्मधुयुतं तेन छर्द्दिर्नश्यति पित्तजा ॥ ३ ॥
हरीतकीनां चूर्णन्तु लिह्यान्माक्षिकसंयुतम् ।
अधोमार्गोन्नते दोषे छर्द्दिः शीघ्रं निवर्त्तते ॥४॥
विड्ङ्गत्रिफलाविश्वाचूर्णं मधुयुतं पिबेत् ।
विड्ङ्गप्रवशुण्ठीनां चूर्णं वा कफजां वमिम् ।"

अयं कैवर्त्तीसूक्तम् । गुडतर्जी इति लोके ॥ ५ ॥

"पिष्ट्वा धात्रीफलं लाजान् शर्करां च पलोन्मिताम् ।
दत्त्वा मधुपलद्वापि कुड्वं सलिलस्य च ।
वाससा गालितं पीतं हन्ति छर्द्दिं त्रिदोषजाम् ॥६॥
गुडूच्या रचितं हन्ति हिमं मधुसमन्वितम् ।
दुर्निवारामपि छर्द्दिं त्रिदोषजनितां बलात् ॥७
एलालवङ्गजलदशुरकोलमज्ज-
लाजप्रियङ्गु घनचन्दनपिप्पलीनाम् ।
चूर्णानि माक्षिकयितासहितानि शीघ्रा

कृद्दिं निहन्ति कफमारुतपित्तजातान् ।"
इति राजादिवर्गः ॥ ८ ॥
"अश्वत्थवल्कलं शुष्कं दग्धं निर्वापितं जले ।
तज्जलं पानमात्रेण कृद्दिं जयति दुर्जयाम् ॥९॥
पथ्याचित्रकटुधान्याकजीरकाणां रजो लिहन् ।
मधुना नाशयेच्छर्दिमरुचिञ्च त्रिदोषजाम् ॥१०॥
बिल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण संयुतः ।
कृद्दिं त्रिदोषजां हन्ति पर्य्युषितः पित्तजां
तथा ॥११॥
आम्रास्थिबिल्वनिर्यूहः पीतः समधुशर्करः ।
निहन्यात् कृद्यतीसारं वैश्वानर इवाहुतिम् ॥"
इति निर्यूहक्वाथः ॥१२॥
"जम्ब्वाम्रपल्लवग्रस्तं लाजरजःसंयुतं घृतम् ।
शमयति मधुना युक्तं वमिमतिसारं ह्यर्शि-
सामपि ॥१३॥
बीभत्सजां क्षुद्यतमेरिरैर्दीर्हृदजां फलैः ।
लङ्घनैरामजां कृद्दिं जयेत् सालेारसात्मा-
जाम् ॥१४॥
क्षमिक्षुद्रोगबहुत्वात् वमिं क्षमिसमुद्भवाम् ।
तत्र तत्र यथादोषं क्रियां कुर्य्यात् चिकित्-
सकः ॥"१५॥
इति कृद्यधिकारः । इति भावप्रकाशः ॥

वमिः, पुं, (वमति उद्गिरति धूमादिकमिति । टुवम उद्गिरणे + "इक् शक्यादिभ्यः ।" इतीक् ।) अग्निः । इति मेदिनी । मे, २६ ॥ धूमः । इति शब्दरत्नावली ॥

वमितः, त्रि, (वम् + क्तः ।) वान्तः । (यथा,—
"वमितं लङ्घयेत् प्राज्ञो लङ्घितं नतु वामयेत् ।
वमने क्लेशबाहुल्यात् हन्याल्लङ्घनकर्षितम् ॥"
शब्दमुक्तः ॥")
वमनकृतवस्तु । इति शुद्धबोधव्याकरणम् ॥

वम्रः, पुं, वंशः । इति शब्दरत्नावली ॥

वम्रीकूटः, पुं, वल्मीकः । इति हेमचन्द्रः ॥

वय, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, वयते । इति दुर्गादासः ॥

वयं, त्रि, अस्मदादिः । आमरा इति भाषा । अस्मच्छब्दस्य बयादेशे जसि रूपोऽयम् । इति व्याकरणम् । (यथा,—
"एको भवामि स भवेऽहमादौ
दारैरधोभौ स भवाव आवाम् ।
वयं भवामो बहवः स पुत्रै-
स्त्वमायथाद्यापि विभो प्रसीद ॥"
इति शुद्धबोधव्याकरणम् ॥)

वयः, [स्] क्लीं, (वयते वेति अजतीति वा । वय ङ गतौ वीगतौ अजगतौ वा + असुन् । अजतेर्वीभावः ।) पक्षी । (यथा, विष्णुपुराणे । २ । ५ । ३६ ।
"ततः स्वच्छन्दतोऽन्यानि वर्षाणि वयसो-
ऽनुभूत ॥")
बाल्यादिः । इत्यमरः । १ । १ । २२६ ॥ (यथा, महाभारते । ३ । ६८ । २३ ।
"तुल्यशीलवयोयुक्तां तुल्याभिजनसंयुताम् ।
नेवधोऽहंति वेदर्भीं तस्येयमसितेक्षणा ॥"
अन्नम् । इति निघण्टुः । २ । ७ ॥ यथा, ऋग्वेदे । २ । २० । १ ।
"वयं ते वय इन्द्र विद्धि पुरः प्रभरामहे वाजयु-
र्नरथम् ॥")
यौवनम् । इति मेदिनी । से, ३५ ॥ ❋ ॥ वयोविशेषे कर्त्तव्यानि यथा,—
"शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥"
इति रघुवंशे १ सर्गः ॥❋॥
अपि च ।
"प्रथमेनार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ॥"
इति चाणक्यशतकम् ॥
वयोविशेषाणां नियमा यथा,—
"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।
कैशोरमाषोडशात् यौवनञ्च ततः परम् ॥"
इति प्रायश्चित्ततत्त्वधृतवचनम् ॥❋॥
अपि च ।
"आषोडशाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्धः स्यात् सप्ततेरूर्द्धं वर्षीयान् नवतेः परम् ॥"
इति भरतधृता स्मृतिः ॥❋॥
अन्यच्च ।
"बाल्यं वृद्धिर्वयो रूपं चक्षुरुक्तं श्रोत्रेतरौ ।
दृग्रूपेण निवर्त्तन्ते मनः सर्व्वेन्द्रियाणि च ॥"
इति महाभारतम् ॥❋॥
("कालप्रमाणविशेषापेक्षिणी हि शरीरावस्था वयोऽभिधीयते । तद्वयो यथा स्थूलभेदेन त्रिविधम् । बाल्यं मध्यं जीर्णमिति । तत्र बाल्यमपरिपक्वधातुगुणमजातव्यञ्जनं सुकुमाराङ्गेश्लेष्मसम्भूयभूयं श्लेष्मधातुप्रायं आषोडशवर्षम् । विवर्द्धमानधातुगुणं पुनः प्राक्चत्वारिंशतस्तन्मात्रिंशद्वर्षमुपदिष्टम् । मध्यं पुनः समर्थागतबलवीर्यपौरुषपराक्रमयज्ञशस्त्रास्त्रवचनविज्ञानं सर्व्वधातुगुणं पित्तधातुप्रायमाषष्टिवर्षमुद्दिष्टम् । अतःपरं परिहीयमानधातुक्रियाबलपौरुषपराक्रमयज्ञधारणशस्त्रास्त्रवचनविज्ञानं भज्यमानधातुगुणं वातधातुप्रायं क्रमेण प्रजीर्यत्याषडशतवर्षम्।" इति चरके विमानस्थानेऽष्टमेऽध्याये।
"वयस्तु त्रिविधं बालं मध्यं वृद्धमिति । तत्रोनषोडशवर्षा बालाश्चापि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादा इति । तेषु संवत्सरपराः क्षीरपा द्विसंवत्सरपराः क्षीरान्नादाः परतोऽन्नादा इति । षोडशसप्तत्योरन्तरे मध्यं वयस्तस्य विकल्पो वृद्धिर्यौवनं सम्पूर्णता हानिरिति । तत्रापि चत्वारिंशतेर्द्विरात्रिंशतो यौवनमाचतुश्चत्वारिंशतः सर्व्वधातुक्रियाबलवीर्यसम्पूर्णता । अत ऊर्द्धं क्षीयमाणधातुक्रियाबलवीर्योत्साहमहत्त्वहानिवलीपलितखालित्यकृशं कासश्वासप्रभृतिभिरुपद्रवैरभिभूयमानं सर्व्वक्रियासु असमर्थं जीर्णागारमिवाभिवृष्टमवसीदन्तं वृद्धमाचक्षते ॥
तत्रोत्तरोत्तरासु वयोऽवस्थासूत्तरोत्तरा भेषजमात्राविशेषा भवन्त्यृते च परिहाये क्षत्राद्यापेक्षया प्रतिकुर्व्वीत । भवन्ति चात्र ।
बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु ।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्दोषभेषजं योजयेत् ॥
अधिकारिविशेषेषु बालवृद्धौ विवर्ज्जयेत् ।
तत्साध्येषु विकारेषु स्वयं कुर्य्यात् क्रियां
यत्नेः ॥"
इति सुश्रुते सूत्रस्थाने ३५ अध्यायः ॥

वयःस्थः, त्रि, (वयसि यौवने तिष्ठतीति । वयसु + स्था + कः ।) युवा । इति हेमचन्द्रः । ३ । ३ ॥ (यथा, महाभारते । १ । ४२ । ४ ।
"पिता पुत्रो वयःस्थोऽपि सततं वाच्य एव तु ॥")

वयस्यः, त्रि, युवा । इत्यमरः । २ । ६ । ४२ ॥ वयसि यौवने तिष्ठति इति वयस्यः ङः निपातात्ङिसर्गस्य वा लुक् वयःस्थश्च ॥ वयःपचिषि बाल्यादौ वयो यौवनमात्रके । इति विश्वः । इति भरतः ॥

वय(यः)स्था, स्त्री, (वयो यौवनं तिष्ठत्यनयेति । वयसु + स्था + घञर्थे कः । निपातनात् वा विसर्गस्य लोपः ।) आमलकी । हरीतकी । सोमवल्लरी । इत्यमरः । २ । ४ । १३० ॥ गुडूची । सप्तला । काकोली । आली । इति मेदिनी । ये, ३२ ॥ श्राद्धानि । इति हेमचन्द्रः ॥ क्षीरकाकोली । इति भावप्रकाशः ॥ अन्नपर्णी । (यथा, सुश्रुते उत्तरतन्त्रे । ३२ ।
"वचा वयस्था गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्ज्जरसश्चैव तैलार्थे वर्ग इष्यते ॥")
मत्स्याक्षी । युवती । इति राजनिर्घण्टः ॥

वयस्यः, पुं, (वयसा तुल्यः । वयसु + "नौवयो-धर्म्मेति ।" ४ । ४ । ९१ । इति यत् ।) समानवयस्कः । तत्पर्य्यायः । स्निग्धः २ सवर्यः ३ । इत्यमरः । २ । ८ । १२ ॥ (यथा, आर्य्यासप्तशत्याम् । ३०१ ।
"वधूर्योषिति जाघादक्षिरसि वयस्येन दयित
उपदृष्टिते ।
तत्काबकलितलज्जा पिशुनयति सखीषु सौभा-
ग्यम् ॥")

वयस्या, स्त्री, (वयस्य + टाप्) सखी । इत्यमरः । २ । ६ । १२ । (यथा, कथासरित्सागरे । १०१ । १४५ ।
"अकार्षं वा न वा दृष्टा त्वां जायते मदनातुरा ।
तां भजस्व वयस्यां मे ततः क्षेममवाप्स्यसि ॥"
दृष्टा । यथा, शतपथब्राह्मणे । १०।४।३।१५।
"एकया न विंशत्यैवयस्यया एकचत्वारिंशद्धितीया चितिः ।" तथाच, वाजसनेयसंहिताभाष्ये । १४ । ६ ।
"वयस्यासंज्ञका दृष्टा उपदधात्येकोविंशति-
मन्त्रैरित्यर्थः ॥")

वयुनं, स्त्री, (वीयते गम्यते प्राप्यते विषया अनेनेति । अत्र गतौ + "अचियमिहीड्भ्यश्च ।"

उणा० ३ । ६१ । इति उनण् । स च कित् । अजेर्व्वीभावः ।) ज्ञानम् । यथा,—
"हस्ताग्राह्ये रचयति विधिं पीठकोदूखलाद्ये-
ष्विद्धं ह्यन्तर्निहितवयुनः स्त्रिग्धभाण्डेषु तद्धि ।"
इति श्रीभागवते १० स्कन्धे ८ अध्यायः ।
स्त्रिग्धभाण्डेषु अन्तर्निहितदध्यादौ वयुनं ज्ञानं यस्य सः । इति तट्टीकायां श्रीधरस्वामी ॥
वयुनः, पुं, (वीयते गम्यते ऽनेति । अज गतौ + उनण् ।) देवतागारम् । इत्युणादिकोषः । (एतदर्थे स्त्रीलिङ्गः । इति उज्ज्वलदत्तः । ३ । ६१ ॥ विश्वाग्गर्भजातः ऋग्भाग्यस्य पुत्रः । यथा, भागवते । ६ । ६ । २० ।
"ऋग्भाभोऽर्चिषि भार्यायां धूमकेतुमजीजनत् ।
विश्वायां वेदशिरं देवलं वयुनं मनुम् ॥")
वयोधाः, [स्] पुं. (वयो यौवनं दधातीति । वयस् + धा + "वयसि धाः ।" उणा० ४ । २२८ । इति असिः । स च कित् ।) युवा । इत्युणादिकोषः ॥ (अन्नम् । यथा, वाजसनेयसंहितायाम् । १५ । ७ ।
"वयोधसावधीतेनाधीतं जिन्व ।"
"वयोधसा वयो दधाति पुष्णाति वयोधा अन्नं तेनाधीतेनाध्ययनायोपहिताधीतं जिन्व ।"
इति तद्भाष्ये महीधरः ॥ आयुर्दातरि, त्रि । यथा, वाजसनेयसंहितायाम् । २८ । २४ ।
"अग्निमिन्द्रं वयोधसम् ॥"
"देवो होता अग्निं वयोधसमिन्द्रञ्च यजतु वय आयुर्दधाति वयोधास्तमायुषो दातारं धारयितारं वा ।" इति तद्भाष्ये महीधरः ॥)
वयोवङ्गं, क्ली, (वयसा वङ्गमिव ।) सीसकम् । इति राजनिर्घण्टः ॥
वर, तृ क ईप्से । इति स्वविकल्पेदमः ॥ (अदन्तचुरा० पर० सक० सेट् ।) रेफोपधः । वरयति । इति दुर्गादासः ॥
वरं, क्ली, (वियते इति । वृ + कर्म्मणि अप् ।) कङ्कुमम् । मनाक्प्रियम् । इत्यमरः । तथा च ।
"वरं प्राह्याख्यान च ग्रिशुविनाशेष्वभिरतिर्वरं मौनं कार्य्यं न च वचनसत्यं यदशृतम् ।
वरं क्लीवं भाव्यं न च परकलत्राभिगमनं
वरं भिक्षाशित्वं न च परधनानां हि हरणम् ॥"
इति वामनपुराणे ५६ अध्यायः ॥
त्वचम् । बालकम् । आर्द्रकम् । इति राजनिर्घण्टः ॥
वरं [म्] अ, मनाक्प्रियम् । यथा,—
"मनागिष्टे वरं क्लीवं केचिदाहुस्तदव्ययम् ॥"
इति मेदिनी । रे, ६२ ॥
वरंवरा, स्त्री, (वरं वृणोतीति । वृ + अच् । सुम् च ।) चक्रपर्णी । इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ॥
वरः, पुं, (वृ + अप् ।) वरणम् । तत्पर्य्यायः । इतिः २ । इत्यमरः । ३ । २ । ८ ॥ हे वेष्टने । प्रार्थनाविशेषे इत्यन्ये । इति भरतः ॥ देवादृतः । देवसकाशात् याचितः । उक्तञ्च ।
"तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः ॥"
इति च भरतः ॥
जामाता । (यथा, रघुः । ६ । ८६ ।
"प्रसूतिवरपक्षमेकतस्तत्
क्षितिपतिमण्डलमन्यतो वितानम् ॥")
विहगः । इति मेदिनी । रे, ६२ । गुलगुलुः । इति शब्दरत्नावली ॥ पतिः । इति हेमचन्द्रः ॥ ३ । ८०० ॥ (निग्रहः । यथा, ऋग्वेदे । १ । १४३ । ५ ।
"न यो वराय मरुतामिव स्वनः सेनेव सृष्टा
दिवा यथाग्निः ॥"
"योऽग्निर्वराय वरणाय निग्रहाय भूतो न भवति ॥" इति तद्भाष्ये सायणः ॥)
वरः, त्रि, (वृ + अप् ।) श्रेष्ठः । इत्यमरः । ३ । ३ । १७२ ॥ (यथा, विष्णुपुराणे । १ । ११ । १८ ।
"राजासनं राजच्छत्रं वराश्वा वरवारणाः ।
यस्य पुण्यानि तस्यैते मत्वेतत् ग्राह्य पुत्रक ॥")
वरकं, क्ली, (वियते अनेन । वृ + अप् । ततः संज्ञायां कन् ।) प्रोताच्छादनम् । इति हारावली । ६६ ॥ धौताधौतसाधारणवस्त्रम् । इति शब्दरत्नावली ॥
वरकः, पुं. (वियते लोकैरिति । वृ + अप् । ततः कन् ।) वनसूकरः । इति हेमचन्द्रः । ४ । २३६ ॥ पर्ण्पटः । इति राजनिर्घण्टः ॥ लघुधान्यभेदः । पोना इति भाषा । तत्पर्य्यायः । क्षुद्रकङ्गुः २ रूक्षः ३ क्षुद्रप्रियङ्गुः ४ । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कषायत्वम् । वातपित्तकारित्वञ्च । इति राजनिर्घण्टः ॥ (वर + स्वार्थे कन् । प्रार्थनाविशेषः । यथा, महाभारते । ३ । १०७ । ५३ ।
"स वव्रे तुरगं तत्र प्रथमं यज्ञकारणात् ।
द्वितीयं वरकं वव्रे पितॄणां पावनेच्छया ॥")
वरक्रतुः, पुं, (वराः श्रेष्ठाः क्रतवो यस्य भूताभ्यमेधित्वात् तथात्वम् । यद्वा, वरः क्रतुर्यस्मात् । पूतक्रतुत्वात् तथात्वम् ।) इन्द्रः । इति हेमचन्द्रः । २ । ८७ ॥
वरचन्दनं, क्ली, (वरं श्रेष्ठं चन्दनम् ।) कालीयम् । देवदारु । इति मेदिनी । ने, २४२ ॥
वरटं, क्ली, (वियते इति । वृ + "ग्रकादिभ्योऽटन् ।" उणा० ४ । ८१ । इति अटन् ।) कुन्दपुष्पम् । इति शब्दरत्नावली ॥
वरटः, पुं, (वरति सेवते सरोवरमिति । वृ च सेवायाम् + "ग्रकादिभ्योऽटन् ।" उणा० ४ । ८१ । इति अटन् ।) हंसः । इति मेदिनी । टे, ५१ ॥ कीटविशेषः । बोलता इति भाषा । तत्पर्य्यायः । गन्धोली २ वरटा ३ । इत्यमरः । गन्धोलिः ४ वरजा ५ । इति शब्दरत्नावली । वरली ६ । इति जटाधरः ॥ क्षुद्रा ७ क्रूरा ८ क्षुद्रवर्च्चसा ९ । इति राजनिर्घण्टः ॥
वरटा, स्त्री, (वरट + टाप् ।) हंसी । (यथा, वैद्यके । १ । १३५ ।
"मदेकपुत्रा जननी जरातुरा
नवप्रसूतिर्वरटा तपस्विनी ।")
वरला । इत्यमरः । २ । ५ । २५ ॥ कुसुम्भबीजम् । इति भावप्रकाशः ॥ (अस्या गुणा यथा,—
"वरटा मधुरा स्निग्धा रक्तपित्तकफापहा ।
कषाया शीतला गुर्व्वी स्यादग्न्यानिलापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वरटी, स्त्री, (वरट + जातौ ङीष् ।) हंसी । इति मेदिनी । टे, ५१ ॥ गन्धोली । इति शिकाख्यशेषः ॥ (यथा, सुश्रुते कल्पस्थाने ६ अध्याये ।
"सूक्ष्मतुण्डोच्चिटिङ्गवरटीशृङ्गपदीभूकवलभिकाक्षङ्गीभ्रमराः शूकतुण्डविधाः ॥")
वरट्टिका, स्त्री, कुसुम्भबीजम् । तत्पर्य्यायः । वरटा २ । अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । रक्तपित्तकफापहत्वम् । कषायत्वम् । शीतलत्वम् । गुरुत्वम् । अग्न्यत्वम् । अनिलापहत्वञ्च । इति भावप्रकाशः ॥
वरणं, क्ली, (वृ + भावे ल्युट् ।) कन्यादिवरणम् । (यथा, महाभारते । १ । १६० । ७ ।
"न च विप्रेष्वधीकारो विद्यते वरणं प्रति ।
स्वयंवरः क्षत्रियाणामितीयं प्रथिता श्रुतिः ॥")
वेष्टनम् । इति मेदिनी । णे, ६५ ॥ पूजनादि । इति शब्दरत्नावली ॥ * ॥ अथ वरणविधिः । तेषामाचार्य्यादीनां होमसाध्ये कर्म्मणि होमारम्भात् पूर्व्वमानत्यर्थं यजमानेन स्वयं वरणं कार्य्यम् । दानवाचनान्वारम्भवरणव्रतप्रमाणेषु यजमानं प्रतीयात् । इति हरिस्वामिधृतकात्यायनसूत्रात् । तत्र ब्रह्मवरणं प्रथमतः । ज्योतिष्टोमे । ब्रह्मोद्गाष्टहोत्रध्वर्य्व्याद्यिक्रमदर्शनेनान्यत्राकाङ्क्षया दृष्टपरिकल्पनाया न्याय्यत्वात् । सुगतिसोपानप्रभृतयोऽप्येवम् । वरणन्तु । गन्धादिदानद्वारा प्रीतिसम्पाद्य कर्म्मकरणाय प्रेरणम् । तत्र च । सर्व्वत्र प्राङ्मुखो दाता गृहीता च उदङ्मुखः । इति वचनात् यजमानस्य प्राङ्मुखत्वं आचार्य्यादीनामुदङ्मुखत्वं प्रतीयते । वरणविधिमाह कात्यायनः । आसनमाहार्य्य आह साधु भवानास्तामर्च्चयिष्यामो भवन्तमिति । आसनमाहार्य्यानीय संस्थाप्याह साधु भवानास्तामिति । साध्वहमासे इति प्रतिवचनम् । अर्च्चयिष्यामो भवन्तमिति पुनरुक्ते अर्च्चय इति प्रतिवचनं सामर्थ्यात् । इति हरिस्वामी । इति संस्कारतत्त्वम् ॥ * ॥ मेदिनीमते यवर्गीयककारादिशब्दोऽयम् । किन्तु अन्तःस्थककारादिधातोरनट्प्रत्ययेन निष्पन्नत्वादत्र लिखितः ॥
वरणः, पुं, (वियते अनेन वृणोतीति वा । वृ + "सुयुवृञ्भ्यो युच् ।" उणा० २ । ७३ । इति युच् ।) प्राकारः । वरणवृक्षः । इत्यमरः । २ । २ । ३ । (यथा, किराते । ५ । २५ ।
"इह सिन्धवश्च वरणावरणाः
करिणां मदे सनलदानलदाः ।")
उदुम्बरः । इति हारावली । ८१ ॥ संक्रमः । इति हलायुधः ॥ सांको इति भाषा ॥

वरणसी, स्त्री, वाराणसी। इति शब्दरत्नावली॥
वरणा, स्त्री, (वरण+टाप्।) नदीविशेषः। इति शब्दरत्नावली। सा तु वाराणस्युत्तरसीमा। तस्या उत्पत्तिर्यथा,—
हरिरुवाच।
"महेश्वर शृणुष्वेमां मम वाचं कलस्वनाम्।
ब्रह्महत्यात्रयकरीं शुभदां पुण्यवर्द्धिनीम्॥
योऽसौ प्राङ्मुखले पुण्ये मदंशप्रभवोऽव्ययः।
प्रयागे वसते नित्यं योगग्रायी तु विश्रुतः॥
चरणाद्विष्णुगात्तस्य विनिर्यांता सरिद्वरा।
विश्रुता वरणेत्येवं सर्व्वपापहरा शुभा॥
सव्यादन्या द्वितीया च असिरित्येव विश्रुता।
ते उभे च सरिच्छ्रेष्ठे लोकपूज्ये बभूवतुः॥
ताभ्यां मध्ये तु यो देशस्तत् क्षेत्रं योगग्रायिनः।
त्रैलोक्यप्रभवं तीर्थं सर्व्वपापप्रमोचनम्॥
न तादृशोऽस्ति गगने न भूम्यां न रसातले।
तत्रास्ति नगरी पुण्या ख्याता वाराणसी शुभा।
यस्यान्तु भोगिनो नाशं प्रयान्ति भवतो लयम्॥"
इति वामने ३ अध्यायः॥
वरङ्गः, पुं, (वृणोतीति। वृ+"अङ्गनृवृदृभ्यः।" उणा० १।१२८। इति अङ्गन्।) अलरावेदिः। सन्निपातः। सुखरोगः। स तु ब्रण इति वयसि फोड़ा इति च भाषा। इति मेदिनी। डे, ३३॥ वस्तुतः पवर्गीयवकारादिरयं किन्तु अन्तःस्थवकारादिवृञ्धातोरौणादिक अङ्गन् प्रत्ययनिष्पन्नत्वादत्र लिखितः॥
वरङ्गकः, पुं, (वरङ्ग+स्वार्थे संज्ञायां वा कन्।) मातङ्गवेदिः। हातौर हाथोदा इति भाषा। यौवनकगण्डकः। वयसि फोड़ा इति भाषा, वर्त्तुलः। गोल इति ख्यातः। इति मेदिनी। के, २०३॥ भित्तिः। इति हेमचन्द्रः॥ मेदिनीकारेण अयं पवर्गीयवकारादौ लिखितः। किन्तु हेमचन्द्रेण वृञ्धातुनिष्पन्नत्वात् अन्तःस्थवकारादौ परिगणितः॥
वरङ्गकः, त्रि, (वरङ्ग+कन्।) विशालः। भयसम्पन्नः। क्षयः। इति शब्दरत्नावली॥
वरङ्गा, स्त्री, (वरङ्ग+टाप्।) सारिका। वर्त्तिः। ग्रन्थभेदः। इति मेदिनी। ते, ३६॥
वरङ्गातुः, पुं, (वरङ्ग इव आतुरत्र।) एरण्डवृक्षः। इति त्रिकाण्डशेषः॥
वरतिक्तः, पुं, (वरः श्रेष्ठस्तिक्तरसो यस्य।) कुटजवृक्षः। इति राजनिर्घण्टः॥ (पर्पटकः। तत्पर्य्यायो यथा,—
"पर्पटो वरतिक्तश्च स्मृतः पर्पटकश्च सः।
कथितः पांसुपर्य्यायस्तथाकवचनामकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वरतिक्तिका, स्त्री, (वरतिक्त+स्वार्थे कन्। टाप्। अत इत्वम्।) पाठा। इति राजनिर्घण्टः॥ आकनादि इति भाषा॥ (यथास्याः पर्य्यायः।
"पाठावृषवल्कीच प्राचीना पापचेलिका।
एकष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वरत्करी, स्त्री, रेणुकानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥
वरत्रा, स्त्री, (व्रियतेऽनयेति वृ+"वृञ्चिवृ।" उणा० ३।१०७। इति अत्रन्। टाप्।) हस्तिकशरज्जुः। काछड़ड़ी इति ख्याता। तत्पर्य्यायः। चूषा २ कक्षा ३ कक्षा ४। चर्म्मरज्जुः। तत्पर्य्यायः। नड़ी २ वड़ी ३ वड़ी ४ वाड़ी ५। इत्यमरभरतौ॥ (यथा, ऋग्वेदे। १०। ६०। ८।
"यथायुगं वरत्रया नह्यति धरुणायकम्॥")
वरत्रघ्नः, पुं, (वरा हितकरी त्वचा यस्य।) निम्बवृक्षः। इति रत्नमाला॥
वरदः, त्रि, (वरं ददातीति। दा+"आतोऽनुपसर्गेति।" ३।२।३। इति कः।) अभीष्टदाता। तत्पर्य्यायः। समर्हकः २। इत्यमरः। ३।१।७॥ समर्हः ३ वाञ्छितार्थदः ४। इति शब्दरत्नावली॥ (यथा, महाभारते। १।२।२१७।
"वरदं तं वरं वव्रे साहाय्यं क्रियतां मम।
ग्रस्यतस्ते प्रतिमुखं जगामोद्दिश्य पाण्डवान्॥")
प्रसन्नः। इति मेदिनी। दे, ३०॥
वरदा, स्त्री, (वरद+टाप्।) कन्या। इति मेदिनी। दे, ३०। आदित्यभक्ता। इति राजनिर्घण्टः॥ (पर्य्यायो यथा,—
"सुवर्चला सूर्य्यभक्ता वरदा वद्रापि च।
सूर्य्यवर्णा रविप्रीता परा ब्रह्मसुवर्चला॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
अश्वगन्धा। इति भावप्रकाशः॥ वरदात्री च। (यथा, भागवते। २।१६।२२।
"ब्रह्मंस्त्व ते भगवतस्त्रियुगत्रिभिः खैः
पड्भिश्चराचरमिदं द्विजदेवताधैम्।
वृङ्क्ते भुवं तदभिपासि रजस्तमश्च
सत्त्वेन नो वरदया तनुवानिरस्य॥")
वरदाचतुर्थी, स्त्री, (वरदाख्या चतुर्थी।) माघशुक्लचतुर्थी। तस्यां गौरी पूज्या। यथा। भविष्योत्तरे माघशुक्लपञ्चमविधौ।
"चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम्॥"
इति तिथ्यादितत्त्वम्॥
वरदातुः, पुं, (ददातीति। दा+तुन्। वरस्य दातुः।) वृक्षविशेषः। भूरुहह इति हिन्दी भाषा। तत्पर्य्यायः। भूमीरुहः २ द्वारदातुः ३ खरच्छदः ४। अस्य गुणौ। श्लिश्लिरत्वम्। रक्तपित्तप्रसादनत्वञ्च। इति भावप्रकाशः॥
वरपर्णाख्यः, पुं, (वराणि पर्णान्यस्य। वरपर्णेति आख्या यस्य।) चीरकचुकीवृक्षः। इति रत्नमाला॥
वरप्रदा, स्त्री, (वरं प्रददातीति। प्र+दा+कः।) लोपामुद्रा। इति हेमचन्द्रः। २। ३०॥ वरदातरि, त्रि॥
वरफलः, पुं, (वरं फलमस्य।) नारिकेलवृक्षः। इति शब्दचन्द्रिका। तत्फले श्रेष्ठफले च क्ली॥
वरसुखी, स्त्री, (वरं सुखमस्याः। ङीष्।) रेणुकानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥
वरयिता, [तृ] पुं, (वृ+णिच्। तृच्।) भर्त्ता। इति हेमचन्द्रः॥ वरणकारयिता च॥
वररुचिः, पुं, (वरा रुचिरस्य।) कविविशेषः। तत्पर्य्यायः। पुनर्वसुः २। इति त्रिकाण्डशेषः॥ स च विक्रमादित्यराजसभास्थनवरत्नान्तर्गतरत्नविशेषः यथा,—
"धन्वन्तरिः क्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"
इति नवरत्नम्॥
वरलः, पुं स्त्री, (वृणातीति। वृ+अलच्।) वरटः। बोल्ता इति भाषा। यथा,
"विवरङ्गी भृङ्गरोली वरलसृङ्गघट्पदः॥"
इति शब्दमाला॥
वरलक्षः, पुं, (वरः उत्कर्षो लक्षः पृथ्वीषु येन।) चम्पकवृक्षः। इति त्रिकाण्डशेषः॥ (वरेण लक्षः।) वरप्राप्ते, त्रि॥
वरला, स्त्री, (वृ+अलच्+टाप्।) भ्रंशी। इति मेदिनी। ले, ११६॥ तच्च पवर्गीयवकारादौ पठितोऽयम्। वरटा च॥
वरली, स्त्री, (वरल+ङीष्।) वरटा। इति जटाधरः॥
वरवल्लना, स्त्री, (वरे जामातरि वल्लना।) श्वशुरभार्य्या। इति शब्दमाला॥
वरवर्णिनी, स्त्री, (वरः श्रेष्ठो वर्णः प्रशस्तः पीतादिर्वास्त्यस्या इति। वरवर्ण+इनिः। ङीप्।) अनुत्तमा स्त्री। तत्पर्य्यायः। वरारोहा २ मत्तकाशिनी ३ उत्तमा ४। इत्यमरः। २। ६। ४॥ मत्तकाशिनी ५। इति भरतः॥ (यथा, विष्णुपुराणे। १।१५।
"रत्नभूता च कन्येयं वार्द्धेर्यो वरवर्णिनी।
भविष्यत् जानता पूर्व्वं मथा गोभिर्विवर्द्धिता॥")
लाक्षा। हरिद्रा। रोचना। फलिनी। साध्वी स्त्री। इति मेदिनी। ने, २४३। गौरी॥ (यथा, महाभारते। ६।२२।२१।
"भद्रकालि! नमस्तुभ्यं महाकालि नमोऽस्तु ते।
चण्डि! चण्डे! नमस्तुभ्यं तारिणि! वरवर्णिनि!॥")
सरस्वती। लक्ष्मीः। इति शब्दरत्नावली॥
वरवाञ्छीकं, क्ली, कुङ्कुमम्। इत्यमरटीका॥
वरवृक्षः, पुं, (वरः श्रेष्ठो वृक्षः पुरातनः।) ग्निवः। इति त्रिकाण्डशेषः॥
वरा, स्त्री, (वृ+अप्+टाप्।) फञ्जिकम्। इति मेदिनी। रे, ६१॥ रेणुकानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ गुडूची। मेदा। ब्राह्मी। विड्लवणम्। पाठा। हरिद्रा। इति राजनिर्घण्टः॥ श्रेष्ठा च॥
वराकः, पुं, (वृणीते तच्छील इति। वृ+"अन्यभिचरकृञ्वृञ्वृदृभ्यः वाकन्।" १।२।१५५।

इति घाकन्।) शिवः। इति मेदिनी। के, १२६। गुडत्वक्। इति हेमचन्द्रः॥

वराकः, त्रि, (वृ+"जल्पभिक्षेति।" ३। २। १५५। इति घाकन्।) श्रोचनीयः। इति मेदिनी। के, १२६॥ अवरः। इति शब्दमाला॥ (यथा, सुकुन्दमालायाम्। १०।

"नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेवे स्वस्य पदस्य दातरि परे नारायणे तिष्ठति।
यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे वरमहो मूढा वराका वयम्॥")

वराङ्गं, क्ली, (वरमङ्गानाम्।) मस्तकम्। गुह्यम्। इत्यमरः। ३। १। २६॥ गुडत्वक्। योनिः। इति त्रिकाण्डशेषः॥ श्रेष्ठावयवे, त्रि॥ (वराण्यङ्गान्यस्य।) तद्युक्ते, त्रि॥ (चोचम्। यथा, "लक्ष्मणश्च वराङ्गं स्वादृश्यङ्गश्चोचं तथोत्कटम्॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

वराङ्गः, पुं, (वराणि स्थूलान्यङ्गानि यस्य।) हस्ती। इति त्रिकाण्डशेषः॥ विष्णुः। यथा,—

"सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी॥"

इति तस्य सहस्रनामस्तोत्रम्॥

वराङ्गकं, क्ली, (वरमङ्गमस्य। कप्।) गुडत्वक्। इत्यमरः। २।४।१३४॥ श्रेष्ठावयवयुक्ते, त्रि॥

वराङ्गना, स्त्री, (वरा श्रेष्ठा अङ्गना।) अतिप्रशस्ताङ्गयुक्ता स्त्री। यथा,—

"शिरः सपुष्पं चरणौ सुपूजितौ
वराङ्गनासेवनमल्पभोजनम्।
अनग्न्यायित्वमपर्व्वमैथुनं
चिरप्रजीवं श्रियमानयन्ति षट्॥"

इति लक्ष्मीचरित्रम्॥

वराङ्गरूपोपेतः, त्रि, (अङ्गानां रूपाणि अङ्गरूपाणि। वराणि अङ्गरूपाणि तैरुपेतः।) श्रेष्ठरूपयुक्तः। सुन्दर इत्यर्थः। तत्पर्य्यायः। सिंहसंहननः १। इत्यमरः॥

वराङ्गी, स्त्री, (वरमङ्गमन्तरवयवो यस्याः।) हरिद्रा। इति राजनिर्घण्टः॥

वराङ्गी, [न्] पुं, (वराङ्गमस्त्यस्येति। इनिः।) अम्बवेतसः। वराङ्गाम्बवेतसं इति वा पाठः। इति रत्नमाला॥ श्रेष्ठाङ्गयुक्ते, त्रि॥

वराटः, पुं, (वरं मन्दमटतीति। अट्+कर्म्मणि अच्।) कपर्दकः। इति राजनिर्घण्टः॥ (अस्य शोधनादिविषयो यथा;—

"भूमर्त्ते च समे शुद्धे यत्नतो न्यापयेत् सुधीः।
तुषेण पूरयेत्तस्याः किञ्चिन्मध्यं भिषग्वरः॥
वराटैः पूरितां मध्यां तन्मध्ये विनिवेशयेत्।
कारीषाग्निं ततो दद्यात् पाचिका यत्नसुत्तमम्।
अनेन म्रियते मूर्खं वराटः सर्व्वरोगजित्॥"

अन्यच्च।

"वराटं तन्न चाङ्गेरी चमीरार्द्धा रसेन वा।
अन्येषामपि पाकानां यावत् पीतं न गच्छति।
प्रक्षाल्य दृढ़ं प्रक्षाल्य यत्नीयाच्च वराटकम्॥"

इति वराटशुद्धिः॥*॥

इति वैद्यकरत्नसारसंग्रहे जारणमारणाधिकारे॥) रज्जुः। यथा। रज्जुः शुल्का वराटो वा। इति स्त्रीकाण्डे रत्नकोषः। इत्यमरटीकायां भरतः॥

वराटकः, पुं क्ली. (वराट्+स्वार्थे कन्।) कपर्दकः। इत्यमरः॥ कड़ि इति भाषा। तस्य संख्याभेदेन संज्ञाभेदा यथा,—

"वराटकानां दशकद्वयं यत्
सा काकिनी ताश्च पणस्य षोडश।
ते षोड़श द्रम्म इवावगम्यो
द्रम्मैस्तथा षोड़शभिश्च निष्कः॥"

इति लीलावती॥*॥

अपि च। तान्त्रिकः कार्षिकः पणः। इति याज्ञवल्क्यवचनेन शुल्काः पञ्चाद्यमाषकस्ते षोड़शाद्याः कर्षोऽस्त्री। इत्यमरसिंहोक्तेन च अशीतिरत्तिकापरिमितताम्रे पणशब्दः सङ्केतितः स च तावत्संख्यकवराटकैर्लभ्यते इति वराटकैरपि तथा व्यवहारः। एतन्मूलकं भविष्यमत्स्यतन्त्रयोर्व्वचनं यथा,—

"अशीतिभिर्व्वराटकैः पण इत्यभिधीयते।
तैः षोड़शैः पुराणं स्याद्दशतं सप्तभिस्तु तैः॥"

इति प्रायश्चित्ततत्त्वम्॥*॥

ते च इच्छितार्थे विधीयन्ते। यथा,—

"हुतमग्नौत्रियं दानं हतो यज्ञस्तदर्द्धिजः।
तस्मात् पञ्च काकिनीं वा पञ्च पुष्पमथापि वा।
प्रदद्यात् इच्छितां यज्ञे तथा च सफलो भवेत्॥"

इति शुद्धितत्त्वम्॥

वराटकः, पुं, (वराट इव। स्वार्थे कन्।) रज्जुः। पद्मबीजम्। इति मेदिनी। के, २०२॥

वराटकरजाः, [स्] पुं, (वराटक इव रजो यस्य।) नागकेशरवृक्षः। इति शब्दमाला॥

वराटिका, स्त्री, (वराट्+स्वार्थे कन्। टाप्। अत इत्वञ्च।) कपर्दकः। इत्यमरटीकायां भरतः राजनिर्घण्टश्च॥ (यथा, नैषधे। २।८८।

"वहुकमुमञ्जिर्व्वराटिका
गजनाटल्लरकर्कटोत्करः॥")

तुच्छवाचिका च। यथा,—

"प्रयागे म्रियते येन तस्य गङ्गा वराटिका॥"

इत्युद्भटः॥

वराहः, पुं, (व्रियते इति। वृ+युच्। पृषोदरादित्वात् दीर्घः।) इन्द्रः। इति त्रिकाण्डशेषः॥ वरुणवृक्षः। इति शब्दरत्नावली॥

वाराणसी, स्त्री, (वाराणसी पृषोदरादित्वात् साधुः।) काशी। यथा,—

"काशी वाराणसी वाराणसी शिवपुरी च सा॥"

इति हेमचन्द्रः॥

वराहनं, क्ली, (वरैः राजभिरह्यते इति। अद्+ल्युट्।) राजादनम्। इति शब्दचन्द्रिका॥

वराभिधः, पुं, अम्बवेतसः। इति राजनिर्घण्टः॥ (वरा अभिधा यस्य।) श्रेष्ठनामा च॥

वरामः, पुं, (वरः श्रेष्ठः अम्बोऽम्भः यस्य लत्वम्।) करमर्दः। इति रत्नमाला॥ कराम्ल इति वा पाठः॥

वरारकं, क्ली, (वरं श्रेष्ठं धनिनं गच्छति गच्छति। गम्+खल्।) हीरकम्। इति हेमचन्द्रः। ४। १२१॥ (गुणादयोऽस्य हीरकशब्दे ज्ञातव्याः॥)

वरारोहः, पुं, (दक्षिणे उच्चत्वात् आयतत्वात्च वरः आरोहो यत्र।) हस्त्यारोहः। अवरोहः। इति विश्वः॥

वरारोहा, स्त्री, (वरः आरोहो नितम्बो यस्याः।) उत्तमा स्त्री। इत्यमरः। २। ६। ४॥ (यथा, महानिर्व्वाणतन्त्रे। ४। ४७।

"यदा तु वैदिकी दीक्षा दीक्षा पौराणिकी तथा।
न स्थास्यति वरारोहे! तदैव प्रबलः कलिः॥")

कटिः। इति हेमचन्द्रः॥

वरालिका, स्त्री, (वरा आलिका सखी जयादिर्यस्याः।) दुर्गा। इति त्रिकाण्डशेषः॥

वराशिः, पुं, स्थूलवस्त्रम्। मोटा कापड़ इति भाषा। तत्पर्य्यायः। स्थूलशाटकः २। इत्यमरः॥ वरासिः ३ स्थूलशाटकम् ४ स्थूलशाटिका ५। इति तट्टीकायां भरतः॥ स्थूलपट्टकः ६। इति शब्दरत्नावली॥ वराशि ७। क्लीवमिति जटाधरः॥

वरासनं, क्ली, (वरायै दुर्गायै अस्यते क्षिप्यते दीयते इति यावत्। अस्+ल्युट्।) ओड्रपुष्पम्। इति शब्दमाला॥ (वरमासनमिति।) उत्तमासनञ्च॥

वरासनः, पुं, (वरां स्त्रीयां नारीं अस्यति अवतीति। अस्+क्युः।) विड्गः। (वरानपि जनान् अस्यति दूरीकरोतीति।) द्वारपालः। इति विश्वः॥

वरासिः, पुं. (वरैः श्रेष्ठैः अस्यते क्षिप्यते इति। अस्+इन्।) स्थूलशाटकः। (वरोऽसिर्यस्य।) खड्गधरः। इति धरणिः॥

वरासी, स्त्री, स्नानवासः। इति शब्दमाला॥

वराहः, पुं. (वरान् आहन्ति इति दुर्गः। हन्तेः ४। ३। ४६। हन्+डः।) पशुविशेषः। वरा इति भाषा। तत्पर्य्यायः। शूकरः २ दृष्टिः ३ क्रोडः ४ पोत्री ५ किरिः ६ किटिः ७ दंष्ट्री ८ घोणी ९ लम्बरोमा १० क्रोड़ः ११ भूदारः १२। इत्यमरः॥ किरः १३ सुखारः १४ सुखलाङ्गूलः १५। इति जटाधरः॥ स्थूलनासिकः १६ दन्तायुधः १७ वक्रवक्त्रः १८ दीर्घतरः १९ आखनिकः २० भूचित्तः २१ बहुलः २२। इति शब्दरत्नावली॥ अस्य मांसस्य गुणाः। दृष्यत्वम्। वातघ्नत्वम्। बलवर्द्धनत्वञ्च। इति राजवल्लभः॥ बहुमूत्रत्वम्। विरूक्षत्वञ्च। इति तत्रैव पाठान्तरम्। अन्यत् शूकरशब्दे द्रष्टव्यम्॥ ७।

तन्मांसं विष्णवे न देयम्। यथा। "नाभक्ष्यं नैवेद्यार्थे भक्ष्येष्वनामहिषीक्षीरं वर्ज्ययेत्। यच्चनखमत्स्यवराहमांसानि चेति।" इत्याह्निकतत्त्वधृतविष्णुसूत्रम्। * ॥ वराहमांसं भुक्त्वा विष्णुपूजादिनिषेधो यथा,—

वराह उवाच।

"भुक्त्वा वाराहमांसन्तु यो वै मासुपसर्पति।
पतनं तस्य वक्ष्यामि यथा भवति सुन्दरि!॥
वराहो दश वर्षाणि भूत्वा तु चरते वने।
व्याधो भूत्वा महाभागे समाः सप्त च सप्ततिः॥
क्षमिर्भूत्वा समाः सप्त तिष्ठते तस्य पुष्कले।
अथोच्चैर्मूषिको भूत्वा वर्षाणाञ्च चतुर्दश॥
एकोनविंशवर्षाणि यातुधानश्च जायते।
ग्रहकश्चाष्टवर्षाणि जायते भवने वहु॥
व्याघ्रस्त्रिंशतिवर्षाणि जायते पिशिताशनः।
एवं संसारिताङ्गत्वा वाराहामिवभक्षकः॥
जायते विपुले विद्वे कुले भागवतस्तथा।
क्षुधीकेशवचः श्रुत्वा सर्वसम्पूर्णलक्षणम्॥
शिरसा चाञ्जलिं कृत्वा वाक्यचेदमुवाच ह।
एतन्मे परमं गुह्यं तव भक्तसुखावहम्।
वाराहमांसभक्षास्तु येन सुध्यन्ति किल्विषात्॥

वाराह उवाच।

तरन्ति मानवा येन तिर्यक्संसारसागरात्।
गोमयेन दिनं पञ्च कणाहारेण सप्त वै॥
पानीयन्तु ततो भुक्त्वा तिष्ठेत् सप्तदिनं ततः।
अष्टाहरात्रं सप्त भक्तुभिश्च तथा त्रयः॥
तिलभक्षो दिनान् सप्त सप्त पायसभक्षकः।
पयो भुक्त्वा दिनं सप्त कारयेच्छुद्धिमात्मनः॥
ध्यानस्थान्तपराः कृत्वा अहङ्कारविवर्जिताः।
दिनान्येकोनपञ्चाशच्चरेत कृतनिश्चयः॥
प्रमुक्तः सर्वपापेभ्यः सर्वज्ञो विगतज्वरः।
कृत्वा तु मम कर्माणि मम लोकाय गच्छति॥"
इति वाराहमांसभक्षणापराधप्रायश्चित्तम्।
इति वाराहपुराणम्। * ॥

वन्यवराहमांसं श्राद्धादौ विहितम्। यथा अत्रिसंहितायां हारीतः। महारण्यवराहिणञ्च वराहांश्चेति। एवञ्च विवदन्ते अन्यान्यमूकरांश्चेति वशिष्ठोक्तं श्वेताश्वेतया व्यवस्थितम्। कल्पतरुस्तु। आद्ये नियुक्तानि युक्ततयेति। विष्णूपासकस्य सर्वथा निषेधः। यथा वाराहे भगवद्वाक्यम्।

"भुक्त्वा वाराहमांसन्तु यस्तु मासुपसर्पति।
वराहो दशवर्षाणि भूत्वा वै चरते वने॥"
इत्येकादशीतत्त्वम्॥*॥

याज्ञवल्क्यः।

"हविष्यान्नेन वै मासं पायसेन च वत्सरम्।
मात्स्यहारिणकौरभ्रशाकुनिच्छागमार्षतैः॥
ऐणरौरवबाराहशशैर्मांसैर्यथाक्रमम्।
मासद्वयाभिवृध्यन्ति दत्तेनेह पितामहाः॥"
इति श्राद्धतत्त्वम्॥*॥

विष्णोरवतारविशेषः। यथा,—

सायम्भुव उवाच।

"कुत्र प्रजाः स्थास्यन्ति पृथिवी तावत् प्रलयार्णवे मया तस्या उद्धरणे यत्नः कृतः। इति श्रुत्वा ब्रह्मा भगवन्तं ध्यातवान्। ध्यायतस्तस्य नासाविवरात् अङ्गुष्ठप्रमाणो वराहपोतो निरगात्। स च आकाशस्थः सन् क्षणमात्रेण पर्वतोपमो बभूव। तं विष्णुं मत्वा ब्रह्मा तुष्टाव। स च तेन स्तुतः प्रलयार्णवजलमध्ये प्रविश्य दन्ताग्रेण पृथ्वीमुद्धृत्य निजधारणशक्त्या संस्थाप्य अन्तर्हितो बभूव। ततः पृथिव्यां राजा सायम्भुवमनुराजीत्।" इति श्रीभागवतमतम्॥*॥ तदवतारकर्तृकहिरण्याक्षवधो यथा,—

"वराहपर्वतो नाम यः पुरा हरिनिर्मितः।
स एव भूतो भगवानाजगामासुरान्तिकम्॥
ततश्चन्द्रप्रतीकाग्रमग्रङ्काच्छङ्खसत्तमम्।
सहस्रारं ततश्चक्रं सूर्यवह्निसमप्रभम्॥
यो वैकुण्ठः सुरेन्द्राणामनन्तो भोगिनामपि।
विष्णुर्यो योगविदुषां यो यज्ञो यज्ञकर्मणाम्।
विश्वं यस्य प्रसादेन सवनस्था दिवौकसः।
आद्यं महर्षिभिर्हृत्तमनुध्यन्ति सुधाहुतम्॥
ततो दैत्यध्वजकरं पुराणं गरुडध्वजम्।
वक्षसा दधौ वेगेन विक्षिपन् दैत्यजीवितम्॥
ततः संरक्तनयनो हिरण्याक्षो महासुरः।
क्रोधयन्निति वदन् रोषान्नारायणमुदैक्षत॥
वाराहरूपिणं देवं स्थितं पुरुषविग्रहम्।
गरुडध्वजोद्यतकरं देवानामार्तिनाशनम्॥
ररास गरुडध्वजाभ्यां ताभ्यामसुरसूदनः।
सूर्याचन्द्रमसोर्मध्ये पौर्णमास्यामिवासुदः॥

ततो हिरण्याक्षसुखाश्च सर्वे
समाद्रवन् दैत्यगणाः सुरेशम्।
निहन्तुकामाः सहसा वराहं
गृहीतशस्त्रा बलपूर्वदर्पाः॥
तैर्मथ्यमानोऽतिशयेन शूरै-
र्दैत्यासुरैर्दानवपुङ्गवैश्च।
नासौ चचालासुरसूदहा वै
मेरुः सुरेशः इव मन्दराद्रिः॥
दैत्यस्तनोऽसौ वृषराडमाहवे
निपातयामास रुषा ज्वलन्तीम्।
शक्तिं यथा विद्युतमाशु कृत्वे
प्रवर्षमाणोऽपि गिरिं सुमेघः॥
स हन्यमानो गदयाप्रमेयः
प्रोवाच दैत्यं वृषराडमूर्तिः।
प्रजायते सेतुमिमं निहत्य
व्रजेच्च क्षत्ति यथा सुरेन्द्रः॥
बलं समाश्रित्य परैरजेयं
विनाशयिष्याम्यहमेवमाजौ।
दैत्यांस्तथा साकमतो हि देवान्
हृतस्वकीयान् सुतयोपपन्नान्॥
संस्थापयिष्यामि न संशयोऽत्र
दैत्येन्द्रदर्पं क्व तु मत्समीपे।

एवं ब्रुवति वाक्यन्तु विष्णोर्दैत्यस्य घातवत्।
स बाहुमुत्तमस्यन्यं सर्वप्रहरणं रणे।

दानवाश्चापि समरे मयतारपुरोगमाः।
उद्यतायुधनिस्त्रिंशाः सर्वे तं समुपाद्रवन्॥
स ताड्यमानोऽतिबलैर्दैत्यैः सप्तायुधोद्यतैः।
न चचाल वराहस्तु मैनाक इव पर्वतः॥
क्रोधसंरक्तनयनः शङ्खचक्रधरो हरिः।
ववर्द्धत स वेगेन व्याप्नुवन् सर्वतो दिशम्॥
तं जयायासुरेन्द्राणां वर्द्धमानं नभस्तले।
ऋषयः सह गन्धर्वैस्तुष्टुवुर्मधुसूदनम्॥
दीप्तायिसदृशं घोरं दंष्ट्रणीयसुदर्शनम्।
सुवर्णरेणुपर्यन्तं वचनानां भयावहम्॥
मेदोऽस्थिमज्जारुधिरैः सिक्तं दानवसम्भवैः।
अद्रितीर्यं प्रहारेषु क्षुरपर्यन्तमण्डलम्॥
खड्गदामसमाकर्षितं कामगं कामरूपिणम्।
चक्रसुरुग्य समरे वाराहः स्वेन तेजसा॥
चिच्छेद वाङ्मूचक्रेण हिरण्याक्षस्य वै तथा।
स छिन्नबाहुर्विशिरा न प्राकम्पत दानवः॥
कबन्धवत्स्थितः संख्ये विग्राह इव पादपः॥
ततः क्षितस्थेव शिरस्तस्य भूमावपातयत्।
हिरण्मयं रुक्मचित्रं मेरोः शृङ्गमिवोत्तमम्॥
हिरण्याक्षे हते दैत्या ये शेषास्तेव दानवाः।
सर्वे तस्य भयात् त्रस्ता जग्मुरार्त्ता दिशो दश॥"

इति वह्निपुराणम्॥

अथ वराहावतारकारणम्। शूरभरूपिमहादेवकर्तृकतच्छरीरनाशश्च।

"त्रैलोक्यमखिलं दग्धं यदा कालाग्निना तदा।
अवस्थः पृथिवीं त्यक्त्वा विष्णोरन्तिकमागतः॥
तेन त्यक्ता तु पृथिवी क्षणमात्रादधोगता।
ततो वराहरूपेण निमग्ना पृथिवीं जले।
मग्नां समुद्धरार्थाय तत्सन्निवेशपरि॥
वराहोऽपि स्वयं गत्वा लोकालोकाश्रयं गिरिम्।
वाराह्या सह रेमे स पृथिव्या चारुरूपया॥
स तया रममाणस्तु सुचिरं पर्वतोत्तमे।
नावाप तोषं लोकेशः सोमो परमकासुकः॥
पृथिव्याः सोचिरूपाया रमयन्त्यास्ततः सुताः।
त्रयो जाता द्विजश्रेष्ठास्त्रयो नामानि वै शृणु॥
दुर्वृत्तः कनको घोरः सर्व एव महाबलाः।
ते तैः पुत्रैः परिवृतो वाराहो भार्यया स्वया॥
रममाणस्तदा कालमेवमगच्छिया।
एतस्मिंश्च शिशुभिः क्रीडद्भिः सोऽभिभिस्तदा॥
जग्मुस्तत्र भयानि नद्यः कल्पतरूंस्तथा।
ततो देवगणाः सर्वे सहिता देवयोनिभिः॥
शक्रेण सहिता मन्त्रं चक्रुः सम्यक् जगद्धितम्॥
ततो निश्चित्य ते सर्वे शक्राद्या मुनिभिः सह।
शूरस्यं शूरवं जग्मुर्नारायणमजं विभुम्॥
तं समासाद्य गोविन्दं वासुदेवं जगत्पतिम्।
प्रणम्य सर्वे विदधुस्तुष्टुवुर्गरुडध्वजम्॥

देवा ऊचुः।

नमस्ते देवदेवेश! जगत्कारणकारण।
कालस्वरूपिन् भगवन् प्रधानपुरुषात्मक॥
इति स्तुतो देवदेवो भूतभावनभावनः।
सेन्द्रैर्देवगणैरुचे तान् सर्वान् मेघनिस्वनः॥

श्रीभगवानुवाच ।
यदर्थमागता यूयं यद्दो भयमुपस्थितम् ।
यच्च यद्दा मया कार्य्यं तद्दैवासुरगुह्यताम् ॥
देवा ऊचुः ।
ग्रीर्य्यते वसुधा नित्यं क्रौड्या यज्ञपोत्रिणः ।
लोकाश्च सर्व्वे संक्षुब्धा नाप्नुवन्त्युपशान्तिताम् ॥
इति तेषां निगदतां श्रुत्वा वाक्यं जनार्द्दनः ।
उवाच शूकरं देवं ब्रह्माणञ्च विशेषतः ॥
यतन्ते देवताः सर्व्वाः प्रजाश्च सकला इमाः ।
प्राप्नुवन्ति महद्दुःखं ग्रीर्य्यते सकलं जगत् ॥
वाराहं तदहं कायं व्यक्तुमिच्छामि शूकर ।
निदेशग्रक्तं तत् व्यक्तुं खेच्छया नहि शक्यते ॥
खं त्राणय तत् कायं यत्रात्मा शूकरायुना ।
त्वमाप्यायस्व तेजोभिर्ब्रह्मन् मारहरं प्रभुः ॥
आप्यायन्तु तदा देवाः शूकरो हन्तु पोत्रिणम् ।
रजस्वलायाः संसर्गात् विप्राणां मारणात् तथा ॥
कायः पापकरो भूत्वं व्यक्तुं सुस्थतेऽधुना ।
प्रायश्चित्तैरुपैतैर्यैः प्रायश्चित्तमहं ततः ।
चरिष्यामि तदर्थं मे तनुर्यत्नेन पाल्यताम् ॥
प्रजा पाल्या मम सदा या हि सीदति नित्यशः ।
मत्कृते प्रत्यहं तस्मात् व्यक्ते कायं प्रजाकृते ॥
श्रीमार्कण्डेय उवाच ।
इत्युक्तौ वासुदेवेन तदा च ब्रह्मशूकरौ ।
त्वया यथोक्तं तत् कार्य्यमिति गोविन्दमूचतुः ॥
वासुदेवोऽपि तान् सर्व्वान् विसृज्य त्रिदशां-
स्तदा ।
वाराहं तेजसा हर्त्तुं स्वयं ध्यानपरोऽभवत् ॥
अग्नेः अग्नेर्यदा तेज आहरत्यैव माधवः ।
तदा देहन्तु वाराहं सत्त्वहीनं व्यजायत ॥
ब्रह्माद्याखिदशाः सर्व्वे महादेवसुमापतिम् ।
अनुजग्मुस्तथा तेज आधातुं शरनाग्नये ॥
ततः सर्व्वैर्दिवगणैः खं खं तेजो दृषध्वजे ।
आदधे तेन बलवान् सोऽतीव समजायत ॥
ततः शूरभरूपी च ततश्चाद्रिरिशोऽभवत् ।
ऊर्द्धाधोभावतश्चाष्टपादयुक्तः सुभैरवः ॥
द्विलक्षयोजनोच्छ्रायः सार्द्धलक्षैकविस्तृतः ॥
ऊर्द्धं वराहकायस्तु लक्षयोजनविस्तृतः ॥
लक्षार्द्धविस्तृतः पार्श्वे वर्द्धमानस्तदाभवत् ।
तमायान्तं ततो दृष्ट्वा क्रोधाद्दावन्तमञ्जसा ॥
सुदृप्तः कनको घोर आसेदुः क्रोधमूर्च्छितः ।
उच्चिक्षेपपुरुं युगपत् पोत्रघातैर्महाबलः ॥
ततस्तुरुप्रहारेण शूरभः कक्षमथ्यतः ।
भित्त्वा वपुर्वराहस्य पातयामास तज्जले ॥
तं पातयित्वा प्रथमं सुदृप्तं कनकं तथा ।
घोरञ्च कक्षदेशेषु भित्त्वा भित्त्वा जघान ह ॥
त्यक्तप्राणास्तु ते सर्व्वे पेतुस्तोये महार्णवे ।
जलशून्यं विनन्दागाः कालानलसमर्चिषः ॥
पतितेषु वराहेषु ब्रह्मा विष्णुर्हरस्तथा ।
हृष्टार्थं चिन्तयामासुः पुनरेव समागताः ॥"
इति कालिकापुराणीयाष्टात्रिंशत्तमेऽनुचिंशाध्याये वराहोत्पत्तिः ॥ * ॥ विष्णुः । मानभेदः । पर्व्वतभेदः । सुस्ता । इति मेदिनी । दे, २२ ॥

(पर्व्वतार्थे उदाहरणम् । यथा, महाभारते । २ । २१ । २ ।
"वैहारो विपुलः शैलो वाराहो वृषभस्तथा ।
तथा ऋषिगिरिश्चात्र चतुर्थश्चैत्यकपञ्चमः ॥")
शिशुमारः । वाराहीकन्दः । इति राजनिर्घण्टः ॥ अष्टादशद्वीपान्तर्गतक्षुद्रद्वीपविशेषः । यथा,—
"गन्धर्व्वो वरुणः सौम्यो वराहः कङ्क एव च ।
कुसुदश्च कसेरुश्च नागो भद्रारकस्तथा ॥
चन्द्रेन्द्रमलयाः शङ्खवाङ्गकगभस्तिमान् ।
ताम्राकुञ्च कुमारी च तत्र द्वीपाः दशाष्टभिः ॥"
इति शब्दमाला ॥
(क्षणपिङ्गोरः । तत्पर्य्यायो यथा,—
"वराहः क्षणपिङ्गोरः क्षणपिङ्गीतकस्तु सः ॥"
इति वैद्यकरत्नमालायाम् ॥)
वराहकन्दः, पुं, (वराहप्रियः कन्दो यस्य ।) वाराही । इति राजनिर्घण्टः ॥
वराहकान्ता, स्त्री, (वराहस्य कान्ता प्रियेति ।) वाराहीवृक्षः । इति शब्दरत्नावली ॥
वराहकाली, [न्] पुं. (वराहवत् कलते इति । कल्+णिनिः ।) सूर्य्यमभिपुष्यवृक्षः । तत्पर्य्यायः । सूर्य्यावर्त्तः २ । इति हारावली । ६४ ॥
वराहक्रान्ता, स्त्री, (वराहेण क्रान्ता अतिप्रियत्वात् ।) क्षुपविशेषः । इति शब्दमाला ॥ तत्पर्य्यायः, । लव्वालुः २ समङ्गा ३ लवकारिका ४ वराहनामा ५ वदरा ६ शूकरी ७ तिक्तगन्धिका ८ नमस्कारी ९ गण्डकाली १० खदिरी ११ । इति रत्नमाला ॥ लव्वालुका १२ अञ्जलिकारिका १३ लतांजलिः १४ गण्डकारी १५ समीच्छदा १६ । इति शब्दान्तरम् ॥ वाराही । चामाराशु इति ख्याते । इति भूरिः । इत्यमरटीकायां भरतः ॥
वराहनामा, [न्] पुं, (वराहस्य नाम इव नाम यस्य ।) वाराहीकन्दः । इति शब्दमाला ॥
वराहिका, स्त्री, कपिकच्छुः । इति राजनिर्घण्टः ॥
वाराही, स्त्री, (वराहो भक्षकत्वेनास्त्यस्येति । अच् । गौरादित्वात् ङीष् ।) भद्रमुस्ता । शूकरकन्दः । इति राजनिर्घण्टः ॥
वरिवसितः, त्रि, (वसु+"नमोवरिवश्चित्रङः क्यच् ।" ३ । १ । १९ । इति क्यच् । ततः क्तः । "क्यस्य विभाषा ।" ६ । ४ । ५० । इति पक्षे यलोपः ।) उपासितः । इत्यमरः । ३ । १ । १०२ ॥
वरिवस्या, स्त्री, (वरिवसः पूजायाः करणम् । वरिवस्+"नमोवरिवश्चित्रङः क्यच् ।" ३ । १ । १९ । इति क्यच् । "अ प्रत्ययात् । ३ । ३ । १०२ । इत्यः । टाप् ।) शुश्रूषा । इत्यमरः । २ । ७ । ३५ ॥ (यथा, ऋग्वेदे । १ । ९८ । १८ ।
"इन्द्रवे यद्वरिवस्या गृणानो
विद्यामेषं वृजनं जीरदानुम् ॥")

वरवस्थितः, त्रि, (वरिवस्या संजाता अस्य तारकादित्वादितच् । यद्वा, वरिवस्य+क्तः । "क्यस्य विभाषा ।" ६ । ४ । ५० । इति पक्षे यलोपाभावः ।) उपासितः । इत्यमरः । ३ । १ । १०२ ॥
वरिष्ठी, स्त्री, वरिष्ठा । इति शब्दरत्नावली ॥
वरिषं, क्ली, (वृ+सः । बाहुलकात् इट् ।) वत्सरः । इति शब्दरत्नावली ॥ ("वर्षः स्यात् वरिषोऽपि च ।" इत्युज्ज्वलदत्तधृतचन्द्रवचनम् । ३ । ९२ ॥)
वरिषाः, स्त्री भूम्नि, (वृ+सः । बहुवचनात् इट् ।) वर्षाः । इति भरतद्विरूपकोषः ॥
वरिषाप्रियः, पुं, (वरिषा वर्षा प्रिया यस्य ।) चातकपक्षी । इति शब्दरत्नावली ॥
वरिष्ठं, क्ली, (अतिशयेन वरम् । वर+इष्ठन् ।) ताम्रम् । इत्यमरः । ३ । २ । १९१ ॥ (यथा,—
"रक्तं वरिष्ठं खेच्छाख्यं ताम्रं मुख्यसुदुम्बरम् ॥"
इति वैद्यकरत्नमालायाम् ॥)
मरिचम् । इति मेदिनी । ठे, १५ ॥
वरिष्ठः, त्रि, (अयमेषामतिशयेन वर उरुर्वा अतिशायन इष्ठन् । प्रियस्थिरेति वरादेशः ।) इति याकरणम् ॥ वरतमः । (यथा, भागवते । १ । १० । १ ।
"हत्वा खरिक्थमधं ज्ञाततायिनो
युधिष्ठिरो धर्म्मभृतां वरिष्ठः ॥")
उत्तमः । इति मेदिनी । ठे, १५ ॥ (यथा, ऋग्वेदे । ४ । ५६ । १ ।
"यत्सीं वरिष्ठे बृहतो विमिश्रुभ
वह्नोरापप्रयानेभिरेवैः ॥")
वत्सः । इत्यमरः ॥
वरिष्ठः, पुं, (वर+इष्ठन् ।) तिन्तिरिपक्षी । इति मेदिनी । ठे, १५ ॥ नारङ्गवृक्षः । इति राजनिर्घण्टः ॥ (चाक्षुषमनुपुत्रः । यथा, महाभारते । १३ । १८ । २० ।
"वरिष्ठो नाम भगवांश्चाक्षुषस्य मनोः सुतः ॥"
धर्म्मसावर्णिमन्वन्तरस्य ऋषिविशेषः । यथा, मार्कण्डेये । ९४ । १६ ।
"इविर्म्मांस वरिष्ठश्च ऋष्टिरन्यस्तथाऽरुणिः ।
निश्चरश्चानघश्चैव रिष्टिश्चान्यो महामुनिः ।
सप्तर्षयोऽभवंस्तत्र मनिर्देवश्च सप्तमः ॥"
दैत्यविशेषः । तथा, हरिवंशे । २३२ । १३ ।
"वरिष्ठश्च गविष्ठश्च भूतलोत्थवनो विभुः ।
सुप्रसादः किरीटी च सुचीवक्त्रो महासुरः ॥")
वरिष्ठा, स्त्री, (वरिष्ठ+टाप् ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥
वरी, स्त्री, (वृणोतीति । वृ+पचाद्यच् । गौरादित्वात् ङीष् ।) घृतावरी । इत्यमरः । २ । ४ । १०० ॥ सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥
वरीयान्, [स्] त्रि, (अयमनयोरतिशयेन उरुर्वरो वा । ईयसुन् । प्रियस्थिरेति वरादेशः ।) श्रेष्ठः । (यथा, भागवते । २ । १ । १ ।
"वरीयानेष ते प्रश्नः कृतो लोकहितं नृप ! ॥")
वरिष्ठः । अतियुवा । इति मेदिनी । ठे, १५ ॥

वरीयान्, पुं, विष्क्रमादिसप्रविंशतियोगान्तर्गता-
ष्टादशयोगः। तत्र जातफलम्।
"दाता दयालुः सुतरां सुवेषः
सत्कर्मकर्मा मधुरस्वभावः।
नरो बलीयान् धनवान् जनाढ्यो
योगो वरीयान् यदि जन्मकाले॥"
इति कोष्ठीप्रदीपः॥
(पुलहस्य पुत्रः। इति भागवते।४।१।३४॥)
वरीवर्द्धः, पुं, बलीवर्दः। इत्यमरटीकायां रमा-
नाथः॥
वरीषुः, पुं, कामः। इति त्रिकाण्डशेषः॥
वरूटः, पुं, म्लेच्छजातिविशेषः। यथा,—
"पुलिन्दा गाहला निष्या: शबरा वरूटा भटाः।
माला भिल्लाः किराताश्च सर्व्वेऽपि म्लेच्छ-
जातयः॥"
इति हेमचन्द्रः॥
वरूड़ः, पुं, अन्त्यजजातिविशेषः। यथा,—
"रजकश्चर्म्मकारश्च नटो वरूड़ एव च।
कैवर्त्तभेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः॥"
एषां स्त्रीगमनादौ दोषो यथा,—
"एतेषान्तु स्त्रियो गत्वा भुक्त्वा च प्रतियह्य च।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति॥"
इति प्रायश्चित्ततत्त्वधृतयमवचनम्॥
अस्योत्पत्तिर्यथा,—
"कैवर्त्तस्य च कन्यायां प्रौष्किकादेव सौष्किकः।
सौष्किकात् प्रौष्किकाज्जातो नटो वरूड़
एव च॥"
इति पराशरपद्धतिः॥
वरुणः, पुं, (वृणोति सर्व्वं व्रियते अन्यैरिति वा।
वृ+"छन्दसीरिच्च उनन्।" उणा० ३।५३।
इति उनन्।) देवताविशेषः। स च कश्य-
पस्य अदितिनाम्न्यां पत्न्यां जातः। तस्य चर्षण्यां
पत्न्यां भृगुवाल्मीकी पुत्रौ जातौ। इति
श्रीभागवतमतम्॥ स च जलाधिपतिः पश्चिम-
दिक्पालश्च। तत्पर्य्यायः। प्रचेताः २ पाशी ३
यादसांपतिः ४ अप्पतिः ५। इत्यमरः॥ यादः-
पतिः ६ अपांपतिः ७। इति तट्टीकायां
भरतः॥ जम्बुकः ८ मेघनादः ९ जलेश्वरः १०
परञ्जयः ११ दैत्यदेवः १२ जीवनावासः १३
नन्दपालः १४। इति शब्दरत्नावली॥ वारि-
लोमः १५ कुक्कली १६ रामः १७ सुखाग्रः १८।
इति जटाधरः॥ *॥ जलाग्नियोत्सर्गादौ अस्य
पूजाविधिर्यथा। हयग्रीवपञ्चरात्रे।
"अथ वाप्यामतः कुर्य्यात् स्फटिकरत्नादिनिर्म्मि-
तम्।
द्विभुजं हंसपृष्ठस्थं दक्षिणेनाभयप्रदम्॥
वामेन नागपाशन्तु धारयन्तं सुभोगिनम्।
सलिलं वाममाभोगं कारयेदृयादसांपतिम्॥
वामे तु कारयेदृष्टिं दक्षिणे पुष्करं शुभम्।
नागैर्नदीभिर्याद्भिः सपुत्रैः परिवारितम्॥
ध्यात्वैवं वरुणं देवं प्रतिष्ठाविधिनार्च्चयेत्॥"
पुष्करं तत्पुत्रम्। ततो ध्यानम्।
"प्रसन्नवदनं सौम्यं हिमकुन्देन्दुसन्निभम्।
सर्व्वाभरणसंयुक्तं सर्व्वलक्षणलक्षितम्॥
किरीटैः प्रीतलैः सौम्यैः प्रीणयन्तमवस्थितम्।
लावण्यान्तधाराभिरुत्पर्यन्तमिव प्रजाः॥
राजहंससमारूढं पाशहस्तकरं शुभम्।
पुष्कराद्यैर्गणैः सर्व्वैः समन्तात् परिवारितम्॥
गौर्य्या कान्त्या चानुगतं नदीभिः परिवारितम्।
नागैर्यादोगणैर्युक्तं ब्रह्माणमिव चापरम्॥
वृद्धिसंहारकर्त्तारं नारायणमिवापरम्॥"
इति ध्यात्वा पूजयेत्। वरुणमन्त्रोद्धारस्तु तत्रैव।
"अर्द्धाविद्धान्तबीजेन चतुर्दशस्वरेण च।
अर्द्धेन्दुविन्दुयुक्तेन प्रणवोद्दीपितेन च॥"
तेन ॐ वौं इति मन्त्रः।
"प्रतिमायां स्थितिं कृत्वा प्रणवेन निबोधयेत्।
पूजयेन्नवपुष्पाद्यैः सान्निध्यं पाशमुद्रया॥"
स्थितिं प्रतिष्ठाम्। निबोधयेत् अन्तर्गतान्मुष्ट-
मुद्रिभ्यां निबोधमुद्रां दर्शयेत्। नमस्कारमन्त्रस्तु
"वरुणो धवलो जिष्णुः पुरुषो निम्नगाधिपः।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः॥"
इति जलाग्नियोत्सर्गतत्त्वम्॥*॥
दृष्टार्थं अस्य जपनीयमन्त्रा यथा,—
"पुष्करावर्त्तकैर्मेघैः शातयन्तं वसुन्धराम्।
विद्युद्गर्ज्जितसन्नद्धं तोयात्मानं नमाम्यहम्॥
यस्य केशेषु जीमूता नदाः सर्व्वाङ्गसन्धिषु।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः॥"
इति ध्यात्वा मानसैरुपचारैर्वरुणं आराध्य
मूलमन्त्रं जपेत्। प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दो
वरुणो देवता एतावद्राष्ट्रमभिषाय्य सुदृष्ट्यर्थे
जपे विनियोगः। मन्त्रस्तु गुरुमुखात् ज्ञेयः।
स यथा। ॐ वृष्टिरिहागच्छान्तरयो मरुता-
मृग्मतीं गच्छ वशामभिवर्षन्तीं दिवं गच्छत तेनो
वृष्टिमावह। इति मन्त्रस्य सहस्रजपानन्तरं
सुदृष्टिमती वसुमती भवति। अत्र सन्देहो न
कार्य्यः॥*॥ मन्त्रान्तरम्। कूर्च्चं लक्ष्मीं तथा
मायां तेन हुँ श्रीं ह्रीं इति चाक्षरमन्त्रं नाभि-
मात्रजलमध्ये प्रविश्य यदि जपति तदा अना-
वृष्टिं हरति महावृष्टिर्भवति। अष्टसहस्रजपः
संख्या चतुर्गुणा तेन दार्व्यिंशत्सहस्रजपः।
दिनत्रयानन्तरं चतुर्थदिने जपसमाप्तिः।
"नाभिमात्रजले स्थित्वा जपेन्मन्त्रं प्रसन्नधीः।
वसुसहस्रं जपेन्मन्त्रं त्रिदिनं याप्य यत्नतः॥"
अथवा।
"षट्सहस्रं जपेन्मन्त्रं तदा वृष्टिर्भवेत् ध्रुवम्।"
इति षट्कर्म्मदीपिका॥*॥
पुस्तकान्तरे तु इति एकाक्षरमन्त्रोऽपि जप्य-
त्वेन लिखितः॥*॥ महापातकिनो दत्तधनं
गृहीत्वा राजा वरुणाय प्रतिपादयेत्। यथा,—
"नादद्यात् नृपः साधुर्मद्दापातकिनो धनम्।
आददानस्तु तल्लोभात्तेन दोषेण लिप्यते॥
अप्सु प्रवेश्य तं दण्डं वरुणायोपपादयेत्।
श्रुतवृत्तोपपन्ने वा ब्राह्मणे प्रतिपादयेत्॥
उग्रो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः।
ईग्रः सर्व्वस्य जगतो ब्राह्मणो वेदपारगः॥"
इति मानवे ९ अध्यायः॥*॥
खनामख्यातवृक्षः। तत्पर्य्यायः। वरुणः २
सेतुः ३ सिक्तशाकः ४ कुमारकः ५। इत्यमरः।
२।४।२५॥ अरीष्यन्नः ६ सेतुकः ७ वराणः ८
श्लिष्मिमर्दनः ९। इति शब्दरत्नावली॥ श्वेत-
वृक्षः १० श्वेतद्रुमः ११ साधुवृक्षः १२ तमालः
१३ मारुतापहः १४। अस्य गुणाः। कटु-
त्वम्। उष्णत्वम्। रक्तदोषश्लीतवातहरत्वम्।
स्निग्धत्वम्। दीपनत्वम्। विद्रधिरोगजित्त्वञ्च।
इति राजनिर्घण्टः॥ अपि च।
"वरुणः पित्तलो भेदी श्लेष्मक्षाश्मसमीरनान्।
निहन्ति गुल्मवातार्शःक्रिमीन्मेदोऽग्निदीपनः।
कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः॥"
इति भावप्रकाशः॥
अन्यच्च।
"वरुणोऽनिलशूलघ्नो भेदी मेदोऽश्मरीहरः।
पुष्यं वरुणजं वाहि पित्तघ्नं श्रमवातजित्॥"
इति राजवल्लभः॥*॥
जलम्। इति मेदिनी। णे, ६५॥ सूर्य्यः। इति
विश्वः॥ (यथा, महाभारते।१।६५।१५।
"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा॥"
सुनिगर्भजातकश्यपपुत्रविशेषः। इति महाभार-
तम्।१।६५।४२॥)
वरुणात्मजा, स्त्री, (वरुणस्य जलस्य आत्मजा
तद्रूपत्वात्।) मद्यम्। इत्यमरः।२।२०।३६॥
(विवरणमस्या मद्यशब्दे ज्ञेया॥)
वरुणानी, स्त्री, (वरुणस्य पत्नी। वरुण+"इन्द्र-
वरुणभवेति।" ४।१।४९। इति ङीष् आनु-
आगमश्च।) वरुणपत्नी। इति जटाधरः॥
(यथा, ऋग्वेदे।१।२२।१२।
"इन्द्राणीमासु पत्नीषु वरुणानीं स्वस्तये।
अग्नायीं सोमपीतये॥")
वरुत्रं, क्ली, (वृणोति आवृणोत्यनेनेति। वृ+
"आधृग्भ्यादिभ्य इत्रोत्रौ।" उणा० ४।१७२।
इति उत्रः।) उत्तरीयवस्त्रम्। वृधातोरुत्र-
प्रत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुद्या-
मुणादिवृत्तिः॥
वरुलः, पुं, (वृ+उलः।) संभक्तः। इति संक्षिप्त-
सारोणादिवृत्तिः॥
वरूथं, क्ली, (वियते शत्रोरभनेनेति। वृ वरणे+
"वृञ्वृभ्यामथन्।" उणा० २।६। इति
अथन्।) तनुत्राणम्। इति हेमचन्द्रः॥ चर्म्म।
इति मेदिनी। थे, २१॥ तच्च पवर्गीयकारादौ
गणितोऽयं शब्दः॥ (गृहम्। इति निघण्टुः।
३।४॥ यथा, ऋग्वेदे।१।५८।६।
"भवा वरूथं गृणते विभावो
भवा मघवन् मघवद्भ्यः शर्म्म॥"
सैन्यम्। यथा, भागवते।६।१०।२०।
"सैनीकपा रघुपतेरभिपत्य सर्व्वे-
इन्द्रं वरूथमभपत्तिरयान्ययोधैः।

जम्बुर्मेर्गिरिगरेयुभिरङ्गदाढ्याः
मीताभिमर्षहतमङ्गलरावशेषान्।")

वरूथः, पुं, (वियते रथोऽनेनेति। वृञ् वरणे+"अर्तृस्तृभ्यामूथन्।" उणा० २। ६। इति ऊथन्।) परप्रहरणाभिघातरक्षार्थं रथस्य सन्नाहवद्दृषदावरणकादि द्रव्यं तत्। तत्पर्य्यायः। रथगुप्तिः २। इत्यमरभरतौ। २। ८। ५७॥ रथसंवृतिः ३। इति जटाधरः॥ (यथा, रामायणे। ६। ५७। २६।

"उरगध्वजदुर्ग्रहं सुवरूथं खपरूकरम्।"

ग्रामणिरुवाच। यथा, तत्रैव। २। ७१। ११।

"तोरणं दन्तिदार्ढेन जम्बूप्रस्थं समागमत्।
वरूथञ्च ययौ सम्यक् ग्रामं दशरथात्मजः॥")

वरूथिनी, स्त्री, (वरूथं तनुत्राणादिकमस्यास्या इति। वरूथ+इनिः। ङीप्।) सेना। इत्यमरः। २। ८। ७८॥ (यथा, रघुः। ११।५८।

"तस्य जातु मरुतः प्रतीपगाः
वर्त्मसु क्वचिदरुन्धतीपतेः।
चिक्षिपुर्भृगुलतेव वरूथिनी-
मत्तटा इव नदीरयाः स्खलीम्॥")

वरेण्यं, क्ली, (वियते लोकैरिति। वृ+"वृञ एण्यः।" उणा० ३। ८८। इति एण्यः।) कुङ्कुमम्। इति राजनिर्घण्टः॥

वरेण्यः, त्रि, (वृ+एण्यः।) प्रधानः। इत्यमरः। ३। १। ५७॥ (यथा, भट्टिः। १।४।

"पुण्यो महाब्रह्मसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः।"

वरणीयः। इति मल्लिनाथः॥ यथा, कुमारे। ७। ६०।

"संस्कारपूतेन वरं वरेण्यं
वधूं सुखग्राह्यनिबन्धनेन।"

पुं, पितृगणानामन्यतमः। यथा, मार्कण्डेये। ८६। ४५।

"वरो वरेण्यो वरदो पुष्टिदस्तुष्टिदस्तथा।"

भृगुपुत्रविशेषः। यथा, महाभारते। १३। ८५। १२६।

"भृगोस्तु पुत्रा: सप्तासन् सर्व्वे तुल्या भृगो-
र्गुणैः।
अवनो वज्रशीर्षश्च शुचिरौर्वस्तथैव च।
सुक्रो वरेण्यश्च विभुः सवनश्चेति सप्त ते॥"

महादेवः। यथा, तत्रैव शिवसहस्रनाम-कीर्त्तने। १३। १७। १३६।

"वरो वराङ्गो वरदो वरेण्यः सुमहास्वनः।")

वरेण्डी, स्त्री, गौड़देशः। इति त्रिकाण्डशेषः।

वरेश्वरः, पुं, (वरः श्रेष्ठ ईश्वरः।) शिवः। इति शब्दरत्नावली॥

वरोटं, क्ली, (वराणि श्रेष्ठानि उटानि दलानि अस्य।) मरुवकपुष्पम्। इति शब्दमाला॥

वरोलः, पुं स्त्री, (वृ+ओलच्।) वरटः। इति त्रिकाण्डशेषः॥

वर्करः, पुं, (वृक्यते यज्यते इति। वृक आदाने+बहुलवचनात् अरः। इदुज्ज्वलदत्तः। १। १११।) युवपशुः। इत्यमरः। २। १०। २३॥ मेघगावकः। इति तट्टीकायां भरतः॥ परिहासः। (यथा, अमरशतके। ७।

"कान्तः केलिरयुंवा सकुदयस्ताडक् पतिः कातरे
किम्नो वर्करकर्करैः प्रियशतैराक्रम्य विक्री-यते॥")

छागः। इति मेदिनी। रे, २१०॥

वर्कराटः, पुं, (वर्करं परिहासं अटति गच्छतीति। अट्+अच्।) कटाचः। तरुणादित्यरोचिः। नारीपयोधरोत्सङ्गकान्तदत्तनखक्षतः। इति मेदिनी। टे, ६५॥

वर्गः, पुं, (वृज्यते इति। वृजी वर्জ্জने+घञ्।) स्वजातीयसमूहः। (यथा, रघुः। २। ४।

"व्रताय तेनानुचरेण धेनो-
र्न्यषेधि शैलोऽप्यनुयाधिवर्गः॥")

समानधर्म्मभिः प्राणिभिरप्राणिभिरुपलक्षितं वृन्दम्। यथा कवर्गः। अत्र कत्वस्वादिना विजातीयत्वेऽपि स्थानसाम्यमस्ति। इत्यमरभरतौ॥ अन्यपरिच्छेदः। यथा,—

"सर्गो वर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमल्लिकायाम्।
स्यात् प्रकरणं पर्व्वाङ्गिकञ्च ग्रन्थसत्त्वयः॥"

इति त्रिकाण्डशेषः॥

समानाङ्कद्वयस्य पूरणम्। तत्पर्य्यायः। कृतिः २। वर्गे करणसूत्रं वृत्तद्वयम्।

"समद्विघातः कृतिरुच्यतेऽथ
स्याप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नः।
स्वोपरिष्टाच्च तथापरेऽङ्का-
स्त्यक्त्वान्त्यमुत्सार्य्य पुनश्च राशिम्॥
स्वद्वयस्याभिहतिर्द्विनिघ्नी
तत्स्ववर्गैक्ययुता कृतिर्वा।
रूपोनयुग्राशिवधः कृतिः स्या-
दिष्टस्य वर्गेण समन्वितो वा॥" *॥

अन्योद्देशकः।

"सखे नवानाञ्च चतुर्द्दशानां
वृन्दे त्रिहीनस्य शतत्रयस्य।
पञ्चोत्तरस्याप्ययुतस्य वर्गं
आचक्ष्व वेदगणितविधानमार्गम्॥"

न्यासः। ६। १४। २६०। १०००५। एषां यथोक्तकरणेन जाता वर्गाः। ८१। १६६। ८८२०६। १००१०००२५॥ अथवा नवानां खण्डे ४। ५। अनयोराहतिः। २०। द्विनिघ्नी ४०। तत्स्वखण्डवर्गैक्येन ४१। युता जाता सैव कृतिः ८१॥ अथवा चतुर्द्दशानां खण्डे ६। ८। अनयोराहतिः ४८। द्विनिघ्नी ६६। तत्स्वखण्डवर्गौ ३६। ६४। अनयोरैक्येन १००। युता जाता सैव कृतिः १६६॥ अथवा खण्डे ४। १०। तथापि सैव कृतिः १६६॥ अथवा राशिः २६०। अयं त्रिभिरूनः पृथग्युतश्च २६८। ३००। अनयोर्घातः ८८२००। त्रिवर्गं ६युतो जातो वर्गः स एव ८८२०६॥ एवं सर्व्वत्रापि इति लीलावत्यां वर्गः॥ (स्त्री, अप्सरोविशेषः। यथा, महाभारते। १। २१७। १५।

"अप्सराश्चि महाबाहो देवारण्यविहारिणी।
दृष्टा धनपतेर्नित्यं वर्गा नाम महाबल॥"

सुनिशातात्याहरूपिणीयं अर्জ্জुनात् ग्राम-सुत्रासीत्। एतद्वृत्तान्तन्तु तत्रैव द्रष्टव्यम्॥)

वर्गमूलं, क्ली, (वर्गस्य समानाङ्कद्वयस्य मूलम् आधाङ्कः।) पूरितसमानाङ्कद्वयस्याद्याङ्कः। यथा। वर्गमूले करणसूत्रं वृत्तम्।

"त्यक्त्वान्त्यादिषमात् कृतिं द्विगुणयेन्मूलं समे तद्धृते
त्यक्तालब्धकृतिं तदाद्यविषमाल्लब्धं द्विनिघ्नं न्यसेत्।
षड्क्यां षड्धृतिकृते समेऽन्त्यविषमात् त्यक्तान्नवर्गं मूलं
षड्क्यां तद्द्विगुणं न्यसेदिति मुहुः षड्भेदलं स्यात् पदम्॥"*॥

अन्योद्देशकः।

"मूलं चतुर्णाञ्च तथा नवानां
पूर्णे शतानाञ्च सखे शतीनाम्।
पृथक् पृथग्वर्गपदानि विद्वि
बुद्धेर्विबुद्धिर्यदि तेऽत्र जाता॥"

न्यासः। ४। ६। ८१। १६६। ८८२०६। १००१०००२५। लब्धानि क्रमेण मूलानि २। ३। ६। १४। २६०। १०००५। इति लीलावत्यां वर्गमूलम्॥

स्वजातीयाङ्कत्रयस्य घातः घनः। तस्य तन्मूलस्य च यदवयवयोदाहरणानि पूर्व्वं न लिखितानि प्रकरणात्र पुनर्लिख्यन्ते। घने करणसूत्रं वृत्तत्रयम्।

"समत्रिघातश्च घनः प्रदिष्टः
स्याप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः।
आदित्रिनिघ्नस्तत आदिवर्ग-
स्त्यक्त्वान्त्यादतोऽन्यादिघनश्च सर्व्वे॥
स्थानान्तरैक्येन युता घनः स्यात्
प्रकल्प्य ततः खण्डयुगं ततोऽन्त्यम्।
एवं मुहुर्व्वर्गघनप्रसिद्धा-
वाद्याङ्कतो वा विधिरेव कार्य्यः॥
खण्डाभ्यां वा हतो राशिस्त्रिघ्नः खण्डघनैक्ययुक्।
वर्गमूलघनस्त्रघ्नो वर्गराशेर्घनो भवेत्॥"*॥

अन्योद्देशकः।

"नवघनं त्रिघनस्य घनं तथा
कथय पञ्चघनस्य घनञ्च मे।
घनपदञ्च ततोऽपि घनात् सखे
यदि घनेऽस्ति घना भवतो मतिः॥"

न्यासः। ६। २७। १२५। जाताः क्रमेण घनाः ७२६। १६६८३। १६५३१२५॥ अथवा राशिः ६। अस्य खण्डे ४। ५। आभ्यां राशिर्हतः १८०। त्रिनिघ्नश्च ५४०। खण्डघनैक्येन १६६। युतो जातो घनः ७२६॥ अथवा राशिः २७। अस्य खण्डे २०। ७। आभ्यां हतस्त्रिघ्नश्च ११३४०। खण्डघनैक्येन ८३४३। युतो जातो घनः १६६८३॥ अथवा राशिः ४। अस्य

मूलम् २। घनः ८। अयं खण्डो जातश्चतुर्थो घनः ६४॥ अथवा राशिः ६। अस्य मूलम् ३। घनः २७। अस्य वर्गो नवानां घनः ७२६। य एव वर्गराशिघनः स एव वर्गमूलघनवर्गः॥ इतिघनः॥*॥ अथ घनमूले करणसूत्रं वृत्तद्वयम्।

"आद्यं घनस्थानमधोघने दे
पुनस्तथान्त्याद्दनतो विशोध्यम्।
घनं पृथक्स्थं पदमस्य कृत्वा
त्रिघ्ना तदाद्यं विभजेत् फलन्तु॥
षड्घ्नीं न्यसेत्तत्कृतिमन्त्यनिघ्नीं
त्रिघ्नीं त्यजेत्तत्प्रथमात् फलस्य।
घनं तदाद्याद्दनमूलमेवं
षड्भिर्भवेदेवमतः पुनश्च॥"

अत्रोद्देशकः। पूर्व्वघनानां मूलार्थं न्यासः ७२६। १६६८१। १६५३१२५। क्रमेण लब्धानि मूलानि ६। २७। १२५। इति लीलावत्यां घनमूलम्॥

वर्णोत्तमः, पुं, (वर्णेषु उत्तमः।) चराणां अर्थात् मेषकर्कटतुलामकरराशीनां प्रथमोंऽशः। स्थिराणां अर्थादृषसिंहवृश्चिककुम्भराशीनां पञ्चमोंऽशः। द्वात्मकानां अर्थात् मिथुनकन्याधनुर्मीनराशीनां नवमोंऽशश्च। यथा,—

"चराणां प्रथमे चांशे स्थिराणां पञ्चमे तथा।
नवमे द्वात्मकानाञ्च वर्गोत्तम इति स्मृतः॥"

अपि च। राशीनां स्वकीयनवांशः। यथा,—

"स्वनवांशस्तु राशीनां वर्गोत्तम इति स्मृतः॥"

इति ज्योतिस्तत्त्वम्॥

वर्च्च, ड दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ड, वर्च्चते। इति दुर्गादासः॥

वर्च्चः, [स्] क्ली, (वर्च्चते इति। वर्च्च+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) रूपम्। विड्। (यथा, सुश्रुते उत्तरतन्त्रे ४० अध्याये।

"मूलाविटः सक्तमूत्रोऽन्नकूजी
क्लेशापानः सन्नकट्यूरुजङ्घः।
वर्च्चो सुच्चल्यमर्थं सचेनं
रुच्चं स्नावं सानिलं मारुतेन॥")

तेजः। इति मेदिनी। से, ३५॥ (यथा, ऋग्वेदे। ६। ६६। २१।

"अग्ने पवस्व स्वपा अस्मे वर्च्चः सुवीर्य्यम्॥"

"वर्च्चः तेजः।" इति तद्भाष्ये सायणः॥ अन्नम्। यथा तत्रैव। ३। २४। १।

"अग्ने सहस्व एतना अभिमातीरपास्य।
दुष्टरस्तरन्नरातीर्व्वर्च्चोधायश्च वाहसे॥"

"वर्च्चोधाः अन्नं धेहि।" इति तद्भाष्ये सायणः॥)

वर्च्चस्कः, पुं क्ली, (वर्च्चस्+स्वार्थे कन्।) विड्। इत्यमरः। २। ६। ६८॥ (दीप्तिः। यथा, महाभारते। १३। २५। १६॥

"देविकायासुपस्पृश्य तथा सुन्दरिकाह्रदे।
अश्विभ्यां रूपवर्च्चस्कं प्रेत्य वै लभते नरः॥")

वर्च्चस्वी, [न्] पुं, (वर्च्चोऽस्यास्तीति। वर्च्चस्+

"अस्मायामेधेति।" ५। २। १२१। इति विनि।) चन्द्रः। यथा,—

"रोहिण्यामभवद्बुधो वर्च्चस्वी येन चन्द्रमाः॥"

इति वह्निपुराणम्॥

वर्च्चाः, [स्] पुं, (वर्च्चते इति। वर्च्च+असुन्।) चन्द्रपुत्रः। इति मेदिनी। से, ३६॥ अन्यच्च।

"रोहिण्यामभवद्बुधो वर्च्चस्वी येन चन्द्रमाः।"

इत्यादौ वह्निपुराणे सर्गाणुकीर्त्तने सतीदेहत्यागनामाध्यायः॥

वर्च्जनं, क्ली, (वृज्+ल्युट्।) त्यागः। हिंसा। इति मेदिनी। ने, १२२॥ मारणम्। इति हेमचन्द्रः॥

वर्च्जितः, त्रि, त्यक्तः। वृजधातोः क्तप्रत्ययेन निष्पन्नः। यथा,—

"अवज्ञातञ्चावधूतं सरोषं विलयान्वितम्।
गुरोरपि न भोक्तव्यमन्नं सत्कारवर्च्जितम्॥"

इति कौर्म्मे उपविभागे १६ अध्यायः॥

वर्च्जनीयं, त्रि, (वृज्+अनीयर्।) वर्च्जनयोग्यम्। त्यक्तयम्। वर्च्जनीयान्नं यथा,—

"राजान्नं नर्त्तकान्नञ्च तक्ष्णोऽन्नञ्चक्रकारिणः।
गणान्नं गणिकान्नञ्च वर्च्जान्नञ्चैव वर्च्जयेत्॥
चक्रीपजीविरजकतक्षकरञ्जिजनान्तथा।
गान्धर्व्वलोहकारान्नं सूतकान्नं विवर्च्जयेत्॥
कुलालचित्रकर्म्मान्नं वाहूंचेः पतितस्य च।
पौनर्भवच्छात्रिकयोरभिशस्तस्य चैव हि॥
सुवर्णकारशैलूषयाधितस्यातुरस्य च।
चिकित्सकस्य चैवान्नं पुंश्चल्या दाम्भिकस्य च॥
क्लेशनास्तिकयोरन्नं देवतानिन्दकस्य च।
सोमविक्रयिणश्चान्नं व्यापारस्य विशेषतः॥
भार्य्याजितस्य चैवान्नं यस्य चोपपतिर्गृहे।
उत्कृष्टस्य कदर्य्यस्य तथैवोच्छिष्टभोजिनः॥
अपाङ्क्तान्नञ्च संज्ञान्नं ग्रन्थाजीवस्य चैव हि।
क्लीवस्यान्त्यावसिक्तान्नं मत्तोन्मत्तस्य चैव हि॥
भीतस्य रहितस्यान्नमवक्रुष्टं परिक्षितम्।
ब्रह्मद्विषः पापरुचेः श्राद्धान्नं सूतकस्य च॥
वृथापाकस्य चैवान्नं श्वावान्नं श्वशुरस्य च।
अप्रजानान्तु नारीणां सूतान्नस्य तथैव हि॥
कदूकान्नं विशेषेण शुक्तविक्रयिणस्तथा।
शौल्कान्नं वटकान्नञ्च भिषजामन्नमेव च॥
विद्वज्जननिरस्तान्नं परिवित्तान्नमेव च।
पुनर्भुवो विशेषेण तथैव दिधिषूपतेः॥
अवज्ञातञ्चावधूतं सरोषं विलयान्वितम्।
गुरोरपि न भोक्तव्यं अन्नं सत्कारवर्च्जितम्॥
दुष्कृतं हि मनुष्यस्य सर्व्वमन्नेऽभिदुद्रुवे।
यो यस्यान्नं समश्नाति स तस्याश्नाति किल्बिषम्॥"

इति श्रीकूर्म्मपुराणे उपविभागे १६ अध्यायः॥

वर्च्यः, त्रि, (वृज्+ण्यत्।) वर्च्जनीयः। यथा,—

"अतः परं प्रवक्ष्यामि वर्च्यान्नान्यप्रतिक्रियाम्।
भोज्यमन्नं पर्य्युषितं स्नेहाक्तं चिरसंस्थितम्॥
अजेहाश्वापि गोधूमयवगोरसविक्रियाः।
ग्रामकः कृष्णपो गोधा सेधा मत्स्योऽथ ग्रञ्जकः॥

भक्ष्या श्लेष्मे सदा वर्ज्यौ ग्रामशूकरकुक्कुटौ।
पितृदेवादिशेषञ्च आद्धे ब्राह्मणकाम्यया।
प्रोक्षितञ्चौषधार्थञ्च खादन् मांसं न दोषभाक्॥"

इति मार्कण्डेयपुराणे सदाचाराध्यायः॥

वर्ण, क वर्णे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, वर्णयति। अयं कश्चिन्न मन्यते। वर्णः शुक्लादिक्रिया। इति दुर्गादासः॥

वर्ण, तृ क स्तुतिविस्तारशुक्लादुद्युक्तिदीपने। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-परे०-सक०-दीपने अक०-सेट्।) वर्णयति वर्णापयति कविः स्तौतीत्यर्थः। वर्णयति तनुं विस्तारयतीत्यर्थः। वर्णयति प्रतिमां शुक्लादिवर्णां करोतीत्यर्थः। वर्णयति उद्युङ्क्ते दीप्यते वेत्यर्थः। शुक्लाद्युक्तिदीपने इत्यपि पाठः। इति दुर्गादासः॥

वर्ण, क्ली, (वर्णयतीति। वर्ण+अच्।) कुङ्कुमम्। इति हेमचन्द्रः॥

वर्णः, पुं, (वृयते इति। वृ+"कृवृजिदृगुपन्यनिखपिभ्यो नित्।" उणा० ३। २०। इति नः। स च नित्।) जातिः। सा च ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च। एषामुत्पत्तिर्यथा। यदा भगवान् पुरुषरूपेण सृष्टिं कृतवान् तदास्य शरीरात् चत्वारो वर्णा उत्पन्नाः। मुखतो ब्राह्मणाः बाहुतः क्षत्रियाः ऊरुतो वैश्याः पादतः शूद्रा जाताः। एतेषां वर्णानां धर्म्माः ब्राह्मेषु निरूपिताः सन्ति। तत्र ब्राह्मणधर्म्मा उच्यन्ते। अध्ययनं यजनं दानञ्चेति। जीविकात्रयः। अध्यापनं याजनं प्रतिग्रहश्चेति। १। क्षत्रियस्य त्रयो धर्म्माः। अध्ययनं यजनं दानञ्च। प्रजानां रक्षणं जीविका। २। वैश्यस्य त्रयो धर्म्माः। अध्ययनं यजनं दानञ्च। पशवो जीविकाः। कृषिः गोरक्षणं वाणिज्यं कुसीदञ्चेति। ३। शूद्रस्य तु ब्रह्मक्षत्रविशां शुश्रूषा धर्म्मो जीविका च। ४। ब्राह्मणा आश्रमचतुष्टयवन्तो भवन्ति। ब्रह्मचारी गृहस्थः वानप्रस्थः सन्न्यासी च। तत्र उपनयनानन्तरं नियमं कृत्वा यो गुरोः सन्निधौ स्थित्वा साङ्गवेदाध्ययनं करोति स ब्रह्मचारीत्युच्यते। १। साङ्गवेदाध्ययनं समाप्य यो दारपरिग्रहं कृत्वा स्वधर्म्माचरणं करोति स गृहस्थ उच्यते। २। पुत्रमुत्पाद्य यो वनवासं कृत्वा अकृष्टपच्यफलादि भक्षयित्वा ईश्वराराधनं करोति स वानप्रस्थ उच्यते। ३। यः सर्व्वं गृहादिकं त्यक्त्वा सुस्थितसुखो गैरिककौपीनाच्छादनं दण्डं कमण्डलुञ्च बिभ्रत् भिक्षाशनिर्जनेऽरण्ये वा स्थित्वा केवलमीश्वराराधनं करोति स सन्न्यासीत्युच्यते॥ ४॥ क्षत्रियवैश्ययोस्तु प्रथमाश्रमत्रयं विहितम्। शूद्रस्यैक एव गृहाश्रमः। ईश्वराराधनन्तु सर्व्वेषां वर्णानामाश्रमाणाञ्च साधारणो धर्म्मः। तन्मध्ये यस्तु विष्णूपासकः स वैष्णव उच्यते। शिवोपासकः शैवः। दुर्गादिशक्त्युपासकः शाक्तः। सूर्य्योपासकः सौरः। गणेशोपासको गाणपत्य उच्यते। इति पुराणार्थप्रकाशः॥*॥ अपि च।

ब्रह्मोवाच ।

"सर्गादिकृद्धरिश्चैव पूज्यः स्वायम्भुवादिभिः ।
विप्राद्यैः स्वेन धर्मेण तद्धर्मं चास वै शृणु ॥
यजनं याजनं दानं ब्राह्मणस्य प्रतिग्रहः ।
अध्यापनं चाध्ययनं षट् कर्माणि द्विजोत्तमे ॥
दानमध्ययनं यज्ञो धर्मः क्षत्रियवैश्ययोः ।
रक्षस्तथा क्षत्रियस्य कृषिर्वैश्यस्य शस्यते ॥
शुश्रूषैव द्विजातीनां शूद्राणां धर्मसाधनम् ।
कारुकर्मस्तथाजीवः पाकयज्ञोऽपि धर्मतः ॥
भिक्षाचर्याय शुश्रूषा गुरोः स्वाध्याय एव च ।
सन्न्यासकर्मणिकार्यं च धर्मोऽयं ब्रह्मचारिणः ॥
सर्वेषामाश्रमाणान्तु द्वैविध्यन्तु चतुर्विधम् ।
ब्रह्मचार्युपकुर्वाणो नैष्ठिको ब्रह्मतत्परः ॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममावसेत् ।
उपकुर्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥
अग्नयोऽतिथिशुश्रूषा यज्ञो दानं सुरार्चनम् ।
गृहस्थस्य समासेन धर्मोऽयं द्विजसत्तमाः ॥
उदासीनः साधकश्च गृहस्थो द्विविधो भवेत् ।
कुटुम्बभरणे युक्तः साधकोऽसौ गृही भवेत् ॥
ऋजवः क्षौरस्नपनं ब्रह्मा भार्याधना-
दिकम् ।
एकाकी यस्तु विचरेत् उदासीनः स मौक्षिकः ॥
भूमौ मूलफलाग्निं स्वाध्यायस्तप एव च ।
संविभागो यथान्यायं धर्मोऽयं वनवासिनः ॥
तपस्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः ॥
तपसाकर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सन्न्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥
योगाभ्यासरतो नित्यमाहरन्नुर्जितेन्द्रियः ।
ज्ञानाय वर्तते भिक्षुः प्रोच्यते पारमेष्ठिकः ॥
यस्मात्परतिरेव स्यान्नित्यतृप्तो महामुनिः ।
सम्यक् च दमसम्पन्नः स योगी भिक्षुरुच्यते ॥
मैत्रं भूतेषु मौनित्वं तपोध्याने विशेषतः ।
सम्यक् च ज्ञानवैराग्यं धर्मोऽयं भिक्षुके मतः ॥
ज्ञानसन्न्यासिनः केचित् वेदसन्न्यासिनोऽपरे ।
धर्मसन्न्यासिनः केचित्त्रिविधः पारमेष्ठिकः ॥
योगी च त्रिविधो ज्ञेयो भौतिको मोक्ष एव च ।
तृतीयोऽन्त्याश्रमी प्रोक्तो योगमूर्तिसमाश्रितः ॥
प्रथमा भावना पूर्वं मोक्षे स्वरभावना ।
तृतीये चात्मिमा प्रोक्ता भावना पारमेश्वरी ।
धर्मात् संजायते मोक्षः अर्थात् कामोऽभि-
जायते ।
प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म वैदिकम् ॥
ज्ञानपूर्वं निवृत्तं स्यात् प्रवृत्तञ्चाविदेवतम् ।
क्षमा दमो दया दानमलोभोऽभ्यास एव च ॥
आर्जवञ्चानसूया च तीर्थानुसरणं तथा ।
सत्यं सन्तोष आस्तिक्यं तथा चेन्द्रियनिग्रहः ॥
देवताभ्यर्चनं पूजा ब्राह्मणानां विशेषतः ।
अहिंसा प्रियवादित्वमपैशुन्यमकृत्यता ॥
एष आत्मिका धर्मो ज्ञातुर्वर्ण्य ब्रवीम्यतः ।
प्राणापत्यं ब्राह्मणानां सृतं स्थानं क्रियावताम् ॥
स्थानमेकं क्षत्रियाणां संग्रामेष्वपलायिनाम् ।

वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्तताम् ।
गान्धर्वं शूद्रजातीनां परिचारे च वर्तताम् ॥"

इति गारुडे ३६ अध्यायः ॥ ● ॥

अन्यच्च ।

"ब्राह्मणस्य तु वक्ष्यामि शृणु कर्म वसुन्धरे ! ।
यानि कर्माणि कुर्वीत मम भक्तिपरायणः ॥
षट्कर्मनिरतो भूत्वा अहङ्कारविवर्जितः ।
लाभालाभं परित्यज्य भिक्षाहारो जितेन्द्रियः ॥
मम कर्मसमायुक्तः पैशुन्येन विवर्जितः ।
ग्राम्यानुचारी मध्यस्थो न दृष्टः स्त्रिशुचेतनः ॥
एतद्वै ब्राह्मणः कर्म एकचित्तो जितेन्द्रियः ।
दृष्टापूर्वेण कुरुते स मामेति वसुन्धरे ! ॥
क्षत्रियाणां प्रवक्ष्यामि मम कर्मसु निष्ठताम् ।
यानि कर्माणि कुर्वन्ति क्षत्रिया मध्यसंस्थिताः ॥
दानशूरश्च कर्मज्ञो यज्ञेषु कुशलः शुचिः ।
मम कर्मसु मेधावी अहङ्कारविवर्जितः ॥
अल्पभाषी गुणग्राह्यो नित्यं भागवतप्रियः ।
गुरुविद्यानसद्यात्मा शुद्धकर्मैवतन्द्रितः ॥
अभ्युत्थानादिकुशलः पैशुन्येन विवर्जितः ।
एतैर्गुणैः समायुक्तो यो मां व्रजति क्षत्रियः ॥
भक्तश्च मम यो नित्यं मम लोकाय गच्छति ।
वैश्यानान्तु प्रवक्ष्यामि मम कर्मसु निष्ठताम् ॥
यानि कर्माणि कुरुते मम भक्तिपथे स्थितः ।
एतैर्गुणैः स्वधर्मेण लाभालाभविवर्जितः ॥
ऋतुकालाभिगामी च शान्तात्मा मोह-
वर्जितः ।
शुचिर्दक्षो निराहारो मम कर्मरतः सदा ॥
गुरुसंपूजको नित्यं युक्तो भक्तानुवत्सलः ।
वैश्यस्त्वेवन्तु संयुक्तो यो तु कर्माणि कारयेत् ।
तस्याहं न प्रवक्ष्यामि स च मे न प्रवक्ष्यति ॥
अथ शूद्रस्य वक्ष्यामि कर्माणि शृणु माधवि ! ।
यानि कर्माणि कृत्वा तु शूद्रो मद्यं व्यवस्थितः ॥
दम्भतो मम भक्तो यो मम कर्मपरायणः ।
उभौ भागवतौ भक्तौ मत्परौ कर्मनिष्ठितौ ॥
देशकालौ च जानाति रजसा तमसोज्झितः ।
निरहङ्कारयुक्तात्मा अतिथेयो विनीतवान् ॥
अदम्भोऽतिपूतात्मा लोभमोहविवर्जितः ।
नमस्कारप्रियो नित्यं मम चिन्तान्वयस्थितः ॥
शूद्रकर्माणि मे देवि ! य एवं स समाचरेत् ।
तस्मा ऋषिसहस्राणि शूद्रमेव भजाम्यहम् ।"

इति वाराहे विधिकर्मोत्पत्तिनामाध्यायः ॥

अपरञ्च ।

सुकृतिरुवाच ।

"विप्राणां चातुराश्रम्यं विस्तरान्मे तपोधनाः ।
आचक्षध्वं न मे तृप्तिः श्रृण्वतः प्रतिवर्द्धते ॥

ऋषय ऊचुः ।

कृतोपनयनः सम्यक् ब्रह्मचारी गुरौ वसन् ।
तत्र धर्मोऽस्य यश्चैव कथ्यमानं निशामय ॥
स्वाध्यायोऽर्थोऽग्निशुश्रूषा स्नानं भिक्षाटनन्तथा ।
गुरौ निवेद्य तच्चाद्यमनुज्ञातेन नित्यशः ॥
धर्मार्थकाममोक्षाणां सम्यक् प्रत्युपवास्तम् ।
तेनाकृतः पठेच्चैव ततूपरीभूय नित्यशः ॥

अवाप्य सकलान् वेदान् शास्त्रं प्राप्य गुरो-
र्मुखात् ।
ततो वराननुज्ञातो दद्याद्गुरवे दक्षिणान्ततः ॥
गार्हस्थ्याश्रमकामस्तु गार्हस्थ्याश्रममाश्रयेत् ।
वानप्रस्थाश्रमञ्चापि चतुर्थं स्वेच्छया वसेत् ॥
तथैव च गुरोर्गेहे द्विजो निष्कामवाप्नुयात् ।
गुरोरभावे तत्पुत्रं तद्वदेव निषेवयेत् ॥
एवं जयति ऋत्वृं स द्विजः शास्त्रकूटकृत् ।
उपाहृतस्ततस्तस्मात् गृहस्थाश्रमकाम्यया ।
असमानकुलां कन्यामुद्वहेत निशाचर ! ॥
स्वकर्मणा धनं लब्ध्वा पितृदेवातिथीनपि ।
सम्यक् संपीजयेद्भक्त्या सदाचारस्तो द्विजः ॥
गार्हस्थ्यं ब्रह्मचर्यञ्च वानप्रस्थं तथाश्रमाः ।
क्षत्रियस्यापि गदिता य आचारा द्विजस्य हि ॥
वैश्यानस्तं गार्हस्थ्यमाश्रमद्वितयं विदुः ।
गार्हस्थ्यमुत्तमं लोकं शूद्रस्य सदाचार ! ॥
स्वानि वर्णाश्रमोक्तानि कर्माणीह न हापयेत्
यो हापयति तस्यासौ परिकुप्यति भास्करिः ॥"

इति वामनपुराणे १४ अध्यायः ॥ ● ॥

पुनश्च ।

श्रीउर्व्व उवाच ।

"ब्राह्मणक्षत्रियविशां शूद्राणाञ्च यथाक्रमम् ।
त्वमेकाग्रमना भूत्वा शृणु धर्मान् मयोदितान् ॥
दानं दद्यादृषिभ्यश्च देवान् यज्ञैः स्वाध्यायतत्परः ।
निर्योदकी भवेद्विप्रः कुर्याच्चाग्निपरिग्रहम् ॥
इत्यर्थं यानयेच्चाग्नानन्यानथापयेत्तथा ।
कुर्यात् प्रतिग्रहादानं शुक्लार्थांश्चायतो द्विजः ॥"
शुक्लार्थात् शुक्लः शुद्धो न्यायोपार्जितोऽर्थो यस्य
तस्मात् । इति तट्टीका ।
"सर्वलोकहितं कुर्यान्नाहितं कस्यचिद्विजः ।
मैत्री समस्तसत्त्वेषु ब्राह्मण्यस्योत्तमं धनम् ।
यावद्धि रक्षे च पारक्ये समवृद्धिर्भवेत् द्विजः ।
ऋतावभिगमः पत्न्यां शस्यते चास्य पार्थिव ! ॥१
दानानि दद्यादिच्छातो द्विजेभ्यः क्षत्रियोऽपि
हि ।
यजेच्च विविधैर्यज्ञैरधीयीत च पार्थिव ॥
शस्त्राजीवो महीरक्षाप्रवरा तस्य जीविका ।
तस्यापि प्रथमे कल्पे पृथिवीपरिपालनम् ॥
धरित्रीपालनेनैव कृतकृत्यो नराधिपः ।
भवन्ति नृपतेरंशा यतो यज्ञादिकर्मणाम् ॥
दुष्टानां शासनाद्राजा शिष्टानां परिपालनात् ।
प्राप्नोत्यभिमतालोकान् वर्णसंस्कारको नृपः ॥२॥
पाशुपाल्यं वाणिज्यञ्च क्षत्रिय मनुजेश्वर ।
वैश्याय जीविका ब्रह्मा ददौ लोकपितामहः ॥
तस्माच्चाध्ययनं यज्ञो दानधर्मश्च शस्यते ।
नित्यनैमित्तिकादीनामनुष्ठानञ्च कर्मणाम् ॥३॥
द्विजातिसंश्रयं कर्म तादर्थ्यं तेन पोषणम् ।
क्रयविक्रयजैश्चापि धनैः कार्यं तदेव वा ।
दानञ्च दद्यात् शूद्रोऽपि पाकयज्ञैर्यथेदपि ।
पित्रादिकञ्च सर्वं वै शूद्रः कुर्वीत तेन च ॥४॥
भृत्यादिभरणार्थाय सर्वेषाञ्च परिग्रहः ।
ऋतुकालाभिगमनं स्वदारेषु महीपते ॥

दया सर्वभूतेषु तितिक्षा नाभिमानिता ।
सत्यं शौचमनायासो मङ्गलं प्रियवादिता ॥
मैत्र्यार्जवं तथा तद्वदकार्पण्यं नरेश्वर ।
अस्पृहा च सामान्या वर्णानां कथिता गुणाः ॥
आश्रमाणाञ्च सर्वेषामेते सामान्यलक्षणाः ।
गुणास्तथापद्धर्माश्च विप्रादीनामिमान् शृणु ॥
शान्तं कर्म द्विजस्योक्तं वैश्यकर्म तथापदि ।
राजन्यस्य च वैश्योक्तं शौद्रं कर्म न चेतरौ ॥
सामर्थ्ये सति तत्तान्यत्सुभाष्यामपि पार्थिव ।
तद्वैवापदि कर्तव्यं न कुर्यात् कर्म सङ्करम् ॥
इत्येते कथिता राजन् वर्णधर्मा मया तव ।
धर्मैमाश्रमिणां सम्यगुद्यतो मे निगामय ॥*॥

श्रीउर्व उवाच ।

बालः शतोपनयनो वेदाहरहरुत्सरः ।
गुरुगेहे वसेद्भूप ब्रह्मचारी समाहितः ॥
शौचाचारवता तत्र कार्यं शुश्रूषणं गुरोः ।
व्रतानि चरता यत्नाद्वेदाञ्च शनैर्बुद्धिना ॥
उभे सन्ध्ये रविं भूप तथैवाग्निं समाहितः ।
उपतिष्ठेत्तथा कुर्याद्गुरोरभ्यभिवादनम् ॥
स्थिते तिष्ठेद्व्रजेद्यातिं नीचैरासीत चासति ।
शिष्यो गुरौ कृपश्रेष्ठ प्रतिकूलं न संभजेत् ॥
तेनैवोक्तः पठेच्चैनं नान्यचित्तः पुरस्थितः ।
अनुज्ञातश्च भिक्षान्नमन्नीयाद्गुरुणा ततः ॥
अवमानादिदं पूर्वमाचार्यैर्नावमानितः ।
समिच्छयादिकं चास्य कर्म कुर्यात्सुयन्त्रितः ॥
यद्गीतमस्यवेदस्य ततोऽनुज्ञामवाप्य वै ।
गार्हस्थ्यमावसेत् प्राज्ञो विधिवत्तदनिष्कृतिः ॥१॥
विधिना दारमाहृत्य धर्मं प्राप्य स्वकर्मजम् ।
यज्ञस्यकार्यमखिलं कुर्यादभूपाल ! शक्तितः ॥
निर्वपेच्च पितृयज्ञैर्देवयज्ञैर्द्विजातिषु ।
अन्नैर्मुनींश्च साध्यादीन्पशुना प्रजापतिम् ॥
बलिकर्मक्रिया च भूतानि वायुसङ्ख्यानाखिलं जगत् ।
प्राप्नोति लोकान् पुरुषो निजकर्मसमर्जितान् ॥
भिक्षासुश्च ये केचित् परिव्राट् ब्रह्मचारिणः ।
तेष्वप्येष प्रतिदिनं गार्हस्थ्यं तेन वै परम् ॥
वेदाहरहरकार्यञ्च तीर्थस्नानाय च प्रभो ! ।
अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च ॥
अनिकेता अनाहारा यच्च सायं गृहासु वै ।
तेषां गृहस्थः सर्वेषां प्रतिष्ठा योनिरेव च ॥
तेषां स्वागतदानादि वक्तव्यं मधुरं वचः ।
गृहागतानां दद्याच्च शयनासनभोजनम् ॥
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।
स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥
अवज्ञानमहङ्कारो दम्भश्चैव गृहे सतः ।
परितापोपघातौ च पारुष्यञ्च न शस्यते ॥
यस्तु सम्यक् करोत्येवं गृहस्थः परमं विधिम् ।
सर्वबन्धविनिर्मुक्तो लोकानाप्नोत्यनुत्तमान् ॥
वनं परिवृतो राजन् शक्तश्चेद्यज्ञमाप्नुयात् ।
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत् सहैव वा ॥२॥
पर्णमूलफलाहारः केशश्मश्रुजटाधरः ।
भूमौशायी भवेच्चात्र मुनिः सर्वातिथिर्नृप ॥
चर्मकाशकुशैः कुर्यात् परिधानोत्तरीयके ।
तद्वत्त्रिषवणं स्नानं शक्तस्य नरेश्वर ॥
देवताभ्यर्चनं होमः सर्वाभ्यागतपूजनम् ।
भिक्षा बलिप्रदानञ्च शक्तस्य नरेश्वर ॥
वन्यस्नेहेन गात्राणामभ्यङ्गश्चास्य शस्यते ।
तपस्यतश्च राजेन्द्र शीतोष्णादिसहिष्णुता ॥
यस्येतां नियतश्चर्यां वानप्रस्थस्मरेन्मुनिः ।
स दहत्यखिलंदोषान् जयेल्लोकांश्च प्राप्नुयात् ॥३॥
चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः ।
तस्य स्वरूपं गदतो मम श्रोतुं कृपार्हसि ॥
पुत्रेष्वग्न्यकलत्रेषु त्यक्तस्नेहो नराधिप ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतमत्सरः ।
त्रैवर्गिकांस्त्यजेत् सर्वानारम्भान्नवनीपते ।
मित्रादिषु समो मैत्रः समस्त्वेव जन्तुषु ॥
जरायुजाण्डजादीनां वाङ्मनःकर्मभिः क्वचित् ।
युक्तः कुर्व्वीत न द्रोहं सर्वसङ्गांश्च वर्जयेत् ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वास्य न जायते ॥
प्राणयात्रानिमित्तञ्च शरीरे शुक्लवस्त्रने ।
काले प्रशस्तवर्णानां भिक्षार्थं पर्यटेद्गृहान् ॥
कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये ।
तांस्तु दोषान् परिज्ञाय परिव्राट् निर्ममो भवेत् ॥
अभयं सर्वसत्त्वेभ्यो दत्त्वा चरति यो मुनिः ।
न तस्य सर्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥

लब्धामिक्षौकं स्वशरीरसंस्थं
शारीरमग्निं सुखे जुहोति ।
विप्रस्य भैक्षोपगतैर्हविर्भि-
श्चिताग्निना स व्रजतिह्म लोकान् ॥"

चिताग्नीनां अग्निचितामित्यर्थः । चिताग्निना इति वा पाठः । इति तृतीया ।

"मोक्षाश्रमं यश्चरते यथोक्तं
मुनिः सुसङ्क्षिप्तबहिर्युक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं व्रजति द्विजातिः ।" ४ ।

इति विष्णुपुराणे ३ अंशे ८ अध्यायौ ॥*॥

प्रकारान्तरेण तेषामादिसृष्टिर्यथा,—

"ततश्चोत्तमं दिव्यं पद्मं सृष्टं स्वयम्भुवा ।
तस्मात् पद्मात् समभवद्ब्रह्मा वेदमयो विधिः ॥
प्रजासिसृक्षे विविधं मानसो मनसाऽसृजत् ।
अक्षतेजोभिनिर्वृत्तान् भास्करासमप्रभान् ॥
आस्रतेजोभिनिर्वृत्तान् भास्करासमप्रभान् ।
ततः सत्यञ्च धर्मश्च तपो ब्रह्म च शाश्वतम् ॥
आचारश्चैव शौचञ्च सर्गादौ विदधे विभुः ।
देवदानवगन्धर्वा देवासुरमहोरगाः ॥
यक्षराक्षसनागाश्च पिशाचा मनुजास्तथा ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च नृपसत्तम ! ॥
ये चान्यभूतसंघानां वर्णास्तांश्च विनिर्ममे ।
ब्राह्मणानां सितो वर्णः क्षत्रियाणाञ्च लोहितः ॥
वैश्यस्य पीतको वर्णः शूद्राणामसितस्तथा ।

मान्धातोवाच ।

चातुर्व्वर्ण्यस्य वर्णेन यदि वर्णो विभज्यते ।
सर्वेषां खलु वर्णानां दृश्यते वर्णसङ्करः ॥
कामः क्रोधो भयं लोभः शोकश्चिन्ता क्षुधा श्रमः ।
सर्वेषां न प्रभवति कस्माद्वर्णो विभज्यते ॥
खेदस्त्रपूरीषाणि श्लेष्मापित्तं सशोणितम् ।
तनुः चरति सर्वेषां कस्माद्वर्णो विभज्यते ॥
जङ्गमानामसंख्येया: स्थावराणाञ्च जातयः ।
तेषां विविधवर्णानां कुतो वर्णविनिश्चयः ॥

नारद उवाच ।

न विशेषोऽस्ति वर्णानां सर्वं ब्रह्ममयं जगत् ।
ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्व्वर्णतां गतम् ॥
कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रिय-साहसाः ।
त्यक्तस्वधर्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां गताः ॥
गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः ।
स्वधर्म्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ॥
हिंसानृतप्रिया लुब्धाः सर्वकर्मोपजीविनः ।
कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥
इत्येते कर्मभिर्व्यस्ता द्विजा वर्णान्तरं गताः ।
इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती ॥
विधिता ब्रह्मणा पूर्वं लोभादज्ञानतां गताः ।
ब्राह्मणा धर्मतत्त्वज्ञास्ततस्तेषां न नश्यति ॥
ब्रह्म धारयतां नित्यं व्रतानि नियमांस्तथा ।
ब्रह्म चैव परं ह्यग्रं येन जानन्ति तद्विदः ॥
ऋषिभिः स्वेन तपसा सृष्यन्ते चापरे परैः ।
आदिदेवसमुद्भूता ब्रह्मब्रह्मार्षयश्च ये ।
सा ह्यस्मिन्नास्ति नाम धर्मैतत्परायणाः ॥

मान्धातोवाच ।

ब्राह्मणः केन भवति क्षत्रियो वा द्विजोत्तम ! ।
वैश्यः शूद्रश्च देवर्षे तद्ब्रूहि वदतांवर ।

नारद उवाच ।

जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः ।
वेदाध्ययनसम्पन्नः षट्सु कर्मस्ववस्थितः ॥
शौचाचारपरो नित्यं विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यरतः स वै ब्राह्मण उच्यते ॥
सर्वं दानमयो दक्षो नित्यं क्षान्तो दमान्वितः ।
तपश्च तप्यते यस्य स ब्राह्मण इति स्मृतः ॥
क्षत्रियं सेवते कर्म वेदाध्ययनसंयुतः ।
दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते ॥
पाशुपाल्यं पशुभ्यश्च कृष्यादानरतिः शुचिः ।
वेदाध्ययनसम्पन्नः स वैश्य इति संस्मृतः ॥
सर्वभक्षरतिर्नित्यं सर्वकर्मकरोऽशुचिः ।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥
शूद्रे चैव भवेच्छूद्रं द्विजे चैव न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥

मान्धातोवाच ।

के धर्माः सर्ववर्णानां चातुर्व्वर्ण्यस्य के पृथक् ।
चातुर्व्वर्ण्यस्याश्रमाणाञ्च राजधर्माश्च के मताः ॥

नारद उवाच ।

अक्रोधः सत्यवचनं संविभागः क्षमा तथा ।

प्रजनः खेषु दारेषु शौचमद्रोह एव च ।
आर्जवं भृत्यभरणं न वै ते सार्ववर्णिकाः ।
ब्राह्मणस्य तु यो धर्म्मस्तं ते वक्ष्यामि केवलम् ।
दममेव महाराज धर्म्ममाहुः पुरातनम् ।
स्वाध्यायाभ्यसनञ्चैव तत्र कर्म्म समाप्यते ।
नं चेद्वित्तमुपागच्छेदधर्म्मान कर्म्मणि ।
अकुर्व्वाणं विकर्म्माणि आर्त्तं प्रज्ञानतापंतम् ।
कुर्व्वीतोपेत्य सन्तानमथ दद्याद्यजेत च ।
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते ।
परिनिष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्राह्मणः ।
कुर्य्यादन्यत्र वा कुर्य्यान्नैवो ब्राह्मण उच्यते ।*।
क्षत्रियस्यापि यो धर्म्मस्तं ते वक्ष्यामि पार्थिव ।
दद्याद्राजा न याचेत यजेत न च याजयेत् ।
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत् ।
नित्योद्युक्तो दस्युवधे रणे कुर्य्यात् पराक्रमम् ।
ये तु क्रतुभिरीजानाः श्रुतवन्तश्च पार्थिवाः ।
ये तु युद्धे विजेतारस्ते तु लोकजितो नृपाः ।
अविक्षतशरीरो हि संग्रहादृयो निवर्त्तते ।
क्षत्रियस्य तु तत् कर्म्म नोभयत्र यशःप्रदम् ।
क्षत्रियाणामयं धर्म्मो निर्य्यातो मुनिभिः परैः ।
नास्य ज्ञात्यतमं किञ्चिद्राज्ञो दस्युविनिग्रहात् ।
दानमध्ययनं यज्ञो राज्ञां क्षेमोऽभिधीयते ।
तस्माद्राजा महाराज योद्धव्यं धर्म्मशीलिना ।
प्रजाः खेषु च धर्म्मेषु स्थापयेत महीपतिः ।
धर्म्माद्यर्थेष्व हि कर्म्माणि कारयेत् सततं प्रजाः ।
परमां सिद्धिमाप्नोति नृपतिः परिपालनात् ।
कुर्य्यादन्यत्र वा कुर्य्यान्नैवो राजन्य उच्यते ।*।
वैश्यस्य च प्रवक्ष्यामि यो धर्म्मो वेदसम्मतः ।
दानमध्ययनं शौचं यज्ञश्च धनसञ्चयः ।
पालयेच्च पशून् वैश्यः पितृवद्धर्म्ममन्वयन् ।
विकर्म्म तद्भवेदन्यत् कर्म्म यत् स समाचरेत् ।
रक्षया स हि तेषां वै महत् सुखमवाप्नुयात् ।
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे प्रजाः ।
ब्राह्मणेभ्यश्च राज्ञे च सर्व्वाः परिददे प्रजाः ।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम् ।
यस्यामेकां पिबेद्धेनुं प्रतश्च मिथुनं भवेत् ।
लक्ष्यञ्च सप्तमं भागं तथा प्रकुरुते कृषिम् ।
गृहस्थानां सर्व्वबीजानि एषा सांवत्सरी श्रुतिः ।
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूमिति ।
वैश्ये रक्षति वान्येन रक्षितव्याः कथञ्चन ।*।
शूद्रस्यापि हि यो धर्म्मस्तं ते वक्ष्यामि भूपते ।
प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत् ।
तस्माच्छूद्रस्य वर्णानां परिचर्य्या विधीयते ।
तेषां शुश्रूषयैवेह महत् सुखमवाप्नुयात् ।
शूद्र एतान् परिचरेत् त्रीन् वर्णानानुपूर्व्वशः ।
मन्त्रयज्ञैश्च न कुर्य्यान्नातु शूद्रः कथञ्चन ।
पापीयान् हि धनं लब्ध्वा यथा कुर्य्यादरीयसः ।
राज्ञा वा समनुज्ञातः कामं कुर्व्वीत धार्म्मिकः ।
तस्य वृत्तिं प्रवक्ष्यामि यत्र तस्योपजीवनम् ।
अवश्यं भरणीयो हि वर्णानां शूद्र उच्यते ।
कृत्तं वेष्टनमौशीरमुपानद्व्यजनानि च ।
यातयामानि देयानि शूद्राय परिचारिणे ।
अधार्य्याणि विशीर्णानि वसनानि द्विजातिभिः ।
शूद्रायैव प्रदेयानि तस्य धर्म्मधनं हि तत् ।
यच्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुराचरेत् ।
कल्पन्तेऽस्य तु तेनाहुर्वृत्तिं धर्म्मविदो जनाः ।
देयः पिण्डोऽपवित्राय भर्त्तव्यो हृदुर्म्बलौ ।
शूद्रेण च न हातव्यो भर्त्ता कस्याञ्चिदापदि ।
अतिरेकेण भर्त्तव्यो भर्त्ता दत्तपरिग्रहे ।
न हि स्वमस्ति शूद्रस्य भर्त्तृहार्य्यधनो हि सः ।
उत्कृष्टयाणां वर्णानां यच्चास्य च पार्थिव ।
स्वाहाकारवषट्कारौ मन्त्रः शूद्रे न विद्यते ।
तस्माच्छूद्रः पाकयज्ञैर्यजेत न च स्वयम् ।
पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम् ।*।

श्रीनारद उवाच ।

इदानीमाश्रमाणाञ्च धर्म्मं वक्ष्यामि भूमिप ।
ब्रह्मचर्य्याश्रमं तावत् शृणु सर्व्वाधिवासन ।
गत्वा गुरुकुलं शिष्यो नमस्कृत्य गुरुं शुचिः ।
ब्रूयादधीतुमागातः शिष्योऽहं तव भारिष ।
ततस्तस्याज्ञया नित्यमधीतव्यं नराधिप ।
सदा विचारः शास्त्रस्य गुरुपादाभिवादनम् ।
तदाज्ञापालनञ्चापि ध्यानं दैवतभावना ।
ज्ञानेन येन केनापि तुष्टिः सद्भिः समागमः ।
समाप्तविद्यो गुरवे दक्षिणां प्रतिपाद्य च ।*।
गृहाश्रमं ततो गच्छेदृगुरोराज्ञामधिव्रजन् ।
उद्वहेत् कुलजां कन्यां सुशीलां धर्म्मचारिणीम् ।
अनर्हदोषिणीं सौम्यां सुचरित्रां प्रियंवदाम् ।
गृहिणां प्रथमो धर्म्मोऽतिथिपूजैव पार्थिव ।
अप्राप्य पूजामतिथिर्यस्य गेहान्निवर्त्तते ।
स याति नरकं घोरं पुण्यं तस्मै प्रदाय च ।
प्रथमं स्वागतं कृत्वेदासनञ्चापि संविशेत् ।
पाद्यञ्च मधुपर्कञ्च दद्यात् प्रथमपूर्व्वकम् ।
संवादञ्च प्रियालापं कुर्य्यात्तेन सहासतः ।
भोजनञ्च यथाशक्ति कारयेदतिथिं नृप ।
देवाश्च पितरश्चापि प्रीयन्तेऽतिथिपूजने ।
आतिथ्यसदृशं कर्म्म गृहस्थानां न विद्यते ।
यस्य नित्यं स्थितिर्नास्ति सोऽतिथिःपरिकीर्त्तितः ।
सर्व्वाश्रमाणामधिको गृहाश्रम उदाहृतः ।
यस्मात्तस्मिन् समायान्ति भिक्षार्थमाश्रमाश्रयाः ।
पितृदेवार्चनं कार्य्यं गृहिणा सुखमिच्छता ।*।
वानप्रस्थाश्रमं वक्ष्ये तृतीयं जगतीपते ।
वानप्रस्थाश्रमं गच्छेत् ज्ञातत्यागो गृहाश्रमात् ।
तदारण्यकशास्त्राणि यमधीत्य च धर्म्मवित् ।
जर्जरेताः प्रव्रजित्वा गच्छत्यरसरात्मताम् ।
सुते भार्य्यां परिन्यस्य वनं गच्छेत् सहैव वा ।
शान्तः सुहृन्नरात्मा च सर्व्वभूतहिते रतः ।
चरित्वैवञ्चिरं यस्य ब्राह्मणस्य विशाम्पते ।
कर्म्मव्याधेर्महाराजेत्र कश्चन्मे मुनिपुङ्गवैः ।
भैक्ष्यचर्य्याखधीकारः प्रशस्त इह मोक्षिणः ।
यत्रास्तमितशायी स्यान्नित्यमिरिनिकेतनः ।
यथोपलब्धजीवी स्यान्मुनिर्दान्तो जितेन्द्रियः ।
निराशीः स्यात् सर्व्वसमो निर्य्यागो निर्व्विकारवान् ।
विवेकी धनपुत्रादौ विरक्तः करणः सदा ।
संसारं स्वप्नवद्वीक्ष्य शान्तः समुदितमानसः ।
पत्रमूलफलाहारी जलाशी वायुभोजनः ।
निराहारोऽथवा मुद्दोऽहर्निशं तप आचरेत् ।
एवं कुर्व्वन् महाभाग ब्राह्मणः सिद्धिमाप्नुयात् ।
चतुर्थमाश्रमं वक्ष्ये मुक्तिसोपानमेव हि ।
गुरोः पुरोधमासाद्य भिक्षुः सन्न्यासधर्म्मवित् ।
विचरेत् सकलां पृथ्वीं लब्धाशी ग्राम उत्सुकः ।
योगाभ्यासरतो नित्यं धर्म्मसञ्चयतत्परः ।
धर्म्माधर्म्मविहीनो वा भिक्षुकः सिद्धिमाप्नुयात् ।"

इति पाद्मे स्वर्गखण्डे २५।२६।२७ अध्यायाः ।*।
अथतृ नारसिंहपुराणे ५६ अध्याये मार्कण्डेयपुराणे मदालसोपाख्याने कूर्म्मपुराणे २।३ अध्याये च द्रष्टव्यम् ।*।*। गजश्चिकमलः । हालीर भुल् इति भाषा । तत्पर्य्यायः । प्रवेणी २ आस्तरणम् ३ परिस्तोमः ४ कुथः ५ कुथा ६ । रत्नमरः । प्रवेणिः ७ परिस्तोमः ८ कुथम् ९ । इति भरतः । शुक्लादिः । रङ् इति ख्यातः । स च बहुविधो यथा । श्वेतः १ पाण्डुः २ धूसरः ३ शस्यः ४ पीतः ५ हरितः ६ रक्तः ७ श्रोणः ८ अरुणः ९ पाटलः १० श्यावः ११ धूम्रः १२ पिङ्गलः १३ कर्व्बुरः १४ । इति चामरः । गर्भस्थबालकस्य षष्ठे मासि वर्णो भवति । इति सुबोधः । यशः । गुणः । स्तुतिः । इति मेदिनी । वे, २६ । स्वर्णम् । व्रतम् । रूपम् । आचरणम् । भेदः । गीतक्रमः । चिह्नम् । तालविशेषः । अङ्गरागः । इति हेमचन्द्रः ।

वर्णः, पुं क्ली, (वर्ण्यते भिद्यते इति । वर्ण्+घञ् ।) भेदः । (वर्ण्यते दीप्यतेऽनेनेति । वर्ण्+घञ् ।) रूपम् । (वर्णयति । वर्ण्+अच् ।) आचरणम् । (वर्ण्यते रच्यते इति । वर्ण्+घञ् ।) विशेषनम् । इति मेदिनी । वे, २६ ।*। वर्णश्च द्विविधः । ध्वन्यात्मकः अक्षरात्मकश्च । अक्षरोत्पत्तिप्रकारो यथा,—

"अग्नेर्व्याप्तसुखस्रोतमार्गस्थाविषदाचरम् ।
अव्यक्तं प्रलपति यदा सा कुण्डली तदा ।
मूलाधारे विजृम्भति सुषुम्णां वेष्टते मुहुः ।"

इति प्रपञ्चसारः ।

अस्यार्थः । सुखस्रोतमार्गस्थावेष्टनात् अग्नेर्म्लाधारोत्थिता सा कुण्डली अविषदाचरं अविस्पष्टमक्षरं यत्राक्षरे ध्वनौ तं प्रलपति अर्थात् कलभाषणादिकं करोति तदा मूलाधारे विजृम्भति ग्रन्थायते सुषुम्णाञ्च सुष्ठुर्वेष्टते । इति तट्टीका । *। अस्य कुण्डलीस्वरूपत्वं यथा,—

"कुण्डलीभूतसर्पाभामङ्गस्थियसुपेयुषी ।
विधामजननी देवी शब्दब्रह्मस्वरूपिणी ।
द्विपत्रारिंशदर्णाढ्या पञ्चाशद्वर्णरूपिणी ।
गुणिता सर्व्वगात्रेषु कुण्डली परदेवता ।
विश्वात्मनापबुद्धा सा सृते मन्त्रमयं जगत् ।
एवमेषा गुणिता शक्तिः सर्व्वविघ्नप्रभञ्जिनी ।

त्रिपुष्करं स्वरान् देवी ब्रह्मादीनां त्रयं त्रयम् ॥"
इति शारदातिलकः ॥

अस्यार्थः । त्रिधामेति चन्द्रसूर्याग्निरूपा । द्विचत्वारिंशदिति भूतलिपिमन्त्रमयी । पञ्चाशदिति मातृकामयीत्यर्थः । सर्वगात्रेण सर्ववर्णेन गुणिता परस्परमिलिता सती मन्त्रमयं जगत् क्षते प्रकाशयति इत्यर्थः । मूलाधारे सर्पवत् कुण्डलीभूता नाड़ी वर्तते तत्राध्यास्थाधिष्ठात्रादिवं कुण्डली । सर्वविद्येत्युभयोपादानात् ग्रन्थार्थरूपोभयप्रतिपादिकेति स्थितम् । त्रिपुष्करमिति ज्येष्ठमध्यमकनिष्ठत्वेन तीर्थत्रयम् । स्वरानिति उदात्तानुदात्तसमाहारान् । इति तट्टीका । * । अपि च ।

"द्विचत्वारिंशता मूले गुणिता विश्वनायिका ।
सा प्रसूते कुण्डलिनी ग्रन्थब्रह्ममयी विभुः ॥
शक्तिं ततो ध्वनिस्तस्मान्नादस्तस्मान्निबोधिका ।
ततोऽर्द्धेन्दुस्ततो बिन्दुस्तस्मादासीत् परा ततः ॥"
इति शारदायामाचार्याः ॥

मूले मूलाधारे द्विचत्वारिंशता गुणिता विश्वनायिका कुण्डलिनी अनेन क्रमेण अकारादिसकारान्तां द्विचत्वारिंशद्वर्णात्मिकां भूतलिपिमन्त्रात्मिकां वर्णमालिकां क्षते इत्यन्वयः । क्रमाह शक्तिमिति सा कुण्डलिनी शक्तिं क्षते ततः शक्तेर्ध्वनिरासीदिति योजना । ततो ध्वनेरित्यादि ज्ञेयम् । अयञ्च क्रमः सर्वाचरीत्यत्तौ ज्ञेयः । तत्र सत्त्वप्रविष्टा चिच्छक्तिग्रन्थब्राह्मा । पुनराकाशस्था सैव सत्त्वप्रविष्टा रजोऽनुविद्धा सती ध्वनिशब्दवाच्या । अक्षरावस्था सैव तमोऽनुविद्धा नादशब्दवाच्या । अव्यक्तावस्था सैव तमःप्राचुर्यान्निबोधिकाशब्दवाच्या । सैव तदुभयप्राचुर्यादर्द्धेन्दुशब्दवाच्या । उक्तञ्च पदार्थादर्शे ।

"इच्छाशक्तिबलोद्भूतो ज्ञानशक्तिप्रदीपकः ।
पुंरूपिणी च सा शक्तिः क्रियाख्या क्षणति प्रभुः ॥"

असावेव बिन्दुः स्थानान्तरगतः पराख्यो भवति ।

पश्यन्ती मध्यमा वाची वैखरी शब्दजन्मभूः ।
तत्र परा मूले पश्यन्ती स्वाधिष्ठाने मध्यमा हृदये वैखरी मुखे । तदुक्तं पदार्थादर्शे ।

"सूक्ष्मा कुण्डलिनी मध्ये ज्योतिर्मात्राखरूपिणी ।
अशेषविषया तस्माद्बृहच्छब्दोद्गमिनी ॥
स्वयं प्रकाशा पश्यन्ती सुषुम्नामाश्रिता भवेत् ।
सैव कृत्यङ्कं प्राप्य मध्यमा नादरूपिणी ॥
ततः संजल्पमात्रा स्यादविभक्तोद्गमिनी ।
सैवोरःकण्ठतालुस्था शिरोग्राग्ररदस्थिता ॥
जिह्वामूलौष्ठनिर्धूतसर्ववर्णपरिग्रहा ।
शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी ॥
इच्छाज्ञानक्रियात्मासौ तत्तद्रूपा गुणात्मिका ।
क्रमेणानेन क्षणति कुण्डली वर्णमालिकाम् ॥
अकारादिसकारान्तां द्विचत्वारिंशदात्मिकाम् ।
पञ्चाशद्भेदगुणितां पञ्चाशद्वर्णमालिकाम् ॥
क्षते तदर्थतो भिन्नाः कला रुद्रादिकान् क्रमात् ॥"
इति तट्टीका ॥

"अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालुका ॥"
इति शिक्षाशास्त्रम् ॥*॥

किञ्च ।

"यथा भवन्ति देहान्तरभेदा पञ्चाशदक्षराः ।
भेदा येन प्रकारेण तथा वक्ष्यामि तत्त्वतः ॥
समीरिताः समीरेण सुषुम्नारन्ध्रनिर्गताः ।
यक्तिं प्रयान्ति वदने कण्ठादिस्थानघट्टिताः ॥
उच्चैरुन्मार्गगो वायुरुदात्तं कुरुते स्वरम् ।
नीचैर्गतोऽनुदात्तश्च स्वरितं तिर्यगागतः ॥
अर्द्धैकद्वित्रिसंख्याभिर्मात्राभिर्लिप्यः क्रमात् ।
सयञ्जनह्रस्वदीर्घप्लुतसंज्ञा भवन्ति ताः ॥
अकारेकारयोर्योगादैकारो वर्ण इष्यते ।
तस्यैवैकारयोगेन स्यादैकाराक्षरं तथा ॥
उकारयोगात्तस्यैव स्यादौकाराक्ष्यः स्वरः ।
तस्यैवौकारयोगेन स्यादौकाराक्ष्यः स्वरः ॥
सन्ध्यक्षराः स्युश्चत्वारो मन्त्राः सर्वार्थसाधकाः ।
ऌवर्णवर्णयोर्यक्तिर्न वै सम्यक् प्रदृश्यते ॥
बिन्दुसर्गात्मनोर्यक्तिमनसोरत्रया वदेत् ।
कण्ठात्तु निःसरन् सर्गः प्रायोऽचात्मकतः-परः ॥
नश्वरः सर्ग एवं स्यात् सोच्छ्वासः प्राणकस्तु हः ।
स सर्गः स्थगितः कण्ठे वायुना कादिमीरयेत् ॥
वर्गस्यार्द्धेनमात्रेण कं खरस्यार्द्धतः खम् ।
लोकगम्भीरसंस्पर्शात् गघौ ङश्च बहिर्गतम् ॥
विसर्गस्तानुगः सोष्मा शं चवर्गश्च यं तथा ।
ऋटुरेफसकारश्च मूर्द्धगो दन्तगस्तथा ॥
ऌतवर्गलसानोष्ठावुपूपध्मानसंज्ञकान् ।
दन्तौष्ठाभ्यां वदेत् तत्तत्स्थानगोऽर्धांश समीरयेत् ॥"
इति प्रपञ्चसारे १ पटलः ॥

सर्गो विसर्ग एवं नश्वरो विद्यतः सोच्छ्वासः सकाररूपः उच्छ्वासोष्मप्रवेशग्राह्यो वायुः स्यादित्यन्वयः । एवं प्राणको बहिर्निर्गमनग्राह्यो वायुः स्यात् स एव उच्छ्वासः सोच्छ्वासः प्राणश्चासौ को वायुश्चेति प्राणकः । इति तट्टीका । * । अवर्णकवर्गहविसर्जनीयाः कण्ठ्याः । १ । इवर्णचवर्गयशास्तालव्याः । २ । ऋवर्णटवर्गरषा मूर्द्धन्याः । ३ । ऌवर्णतवर्गलसा दन्त्याः । ४ । उवर्णपवर्गोपध्मानीया ओष्ठ्याः । ५ । वो दन्त्यौष्ठ्यः । ६ । ए ऐ कण्ठतालव्यौ । ७ । ओ औ कण्ठ्यौष्ठ्यौ । ८ । इति शिक्षाशास्त्रम् । * । अपि च ।

"यदगुह्यं सर्वतन्त्रेषु वर्णोच्चारविधिं शिवे ! ।
तव स्नेहान्महेशानि ! तदद्य कथयामि ते ॥
पञ्चाशन्मातृकावर्णोच्चारणं गुरुतोऽभ्यसेत् ।
अ कु चु टु तु पु यु शु अष्टौ वर्गाः प्रकीर्तिताः ॥
अ कु ह्राः कण्ठतो ज्ञेया१ स्त्रासुतस्वयशाः ।
स्पृष्टाः । २ ।
ऋ टु रषास्तु मूर्द्धन्याः ३ दन्त्या ऌ तु लसा मताः ॥ ४ ॥
उपध्मौष्ठसंभूताः ५ स्थानानि कथितानि ते ।
विशेषं कथयाम्यद्य प्रोच्चार्यं कण्ठतः स्वराः ॥
हृदयं जिह्वया मूर्द्धा ह्रदयं जिह्वदन्तजम् ।
मुखस्थानाङ्गुलो वाय्वाः चकारः कण्ठघातजः ॥
यञ्जनहृदयसंयोगे भवेत् पूर्वस्वरो गुरुः ।
पदान्तादिमवर्णस्य संयोगेषु श्रुतिर्द्वयोः ॥
अपदान्तादिसंयोगे द्योरन्यत्र तथेष्यते ।
द्यौः श्रुतिस्तु तिरोभूय स्वरवत् श्रुतितां व्रजेत् ॥
श्रिया बीजे शकारस्य क्षश्रुतिः परमेश्वरि ! ।
क्षश्रुतिश्च रादिभ्यौ तथादिस्थे तु चश्रुतिः ॥
सहस इत्यादौ नमस्तस्ये आस्या इत्यादौ च ।
रेफादिके तदन्ते वा हकारे समवाप्यता ॥
वर्हः बृह इत्यादौ ।
किन्तु वैजात्यमाश्रित्य स्फुटं नाचास्य वाप्यता ॥
यु तूर्ध्वध्वनिमाप्नोति यादिस्थे परमेश्वरि ! ।
वाह्य इत्यादौ ।
प्र चतुर्थध्वनिं याति वादिस्थे तु विशेषतः ॥
आह्वानमित्यादौ ।
लादिस्थेऽप्यथ नादिस्थे वैजात्यं स्वल्पवाप्यता ।
प्रह्लाद अह्वाय इत्यादौ ।
मादिस्थे मे च मस्यापि नासिकामूलवाप्यता ॥
उ ङ ण न मा बिन्दुर्नासिकामूलजाः स्मृताः ।
यकारस्तु तृतीयत्वं पदादौ सर्वदा व्रजेत् ॥
केयूरादावपि तथा अन्यत्र कण्ठमात्रगः ।
नादिस्थग्रसयोश्चन्द्रं स्वरयोर्गान्तवर्गके ॥
ग्रन्थः ग्लान इत्यादौ ।
वर्गोत्तरेषु ङटयोर्व्यत्ययिक्षादिवाप्यता ।
वैजात्यमपि तत्रास्ति गुरोरेव समभ्यसेत् ।
आदिरेफस्तु संप्रोक्तो द्वयोरन्यो व्रजेद्वताम् ।
एवं ज्ञात्वा महेशानि ! पठेत् स्तोत्रं जपेन्मनुम् ॥
सर्वत्र महेशानि नान्यथा फलमाप्नुयात् ॥"
इति प्रपञ्चसारे ३ पटलः ॥*॥

अपि च ।

"ह्रस्वः स्वरेषु पूर्वोक्तः परो दीर्घः क्रमादिमे ।
शिवशक्तिमयास्ते स्युर्बिन्दुसर्गावसानकाः ॥
बिन्दुः पुमान् रविः प्रोक्तः सर्गः शक्तिर्निशाकरः ।
स्वराणां मध्यगं यत्तु तच्चतुष्कं नपुंसकम् ॥
विना स्वरैस्तु नान्येषां जायते शक्तिरञ्जसा ।
शिवशक्तिमयान् प्राहुस्तस्माद्वर्णान् मनीषिणः ॥
कारणात् पञ्चभूतानामुद्भूता मातृका यतः ।
ततो भूतात्मका वर्णाः पञ्च पञ्च विभागतः ॥
वायुमिभूजलाकाशाः पञ्चाशद्भिपयः क्रमात् ।
पञ्च ह्रस्वाः पञ्च दीर्घाः बिन्दन्ताः सन्धिसम्भवाः ।
पञ्चशः कादयः ङ च ञ ण न ह्रस्वान्ताः समीरिताः ॥"
इति शारदा ॥ * ॥

अक्षरस्थिकारं यथा,—

"बाह्यास्थिकेऽपि समये भ्रान्तिः संजायते यतः ।

धात्राक्षराणि सर्वाणि पत्राकूढान्यतः पुरा ।"
इति ज्योतिस्तत्त्वे दृष्टव्यम् ॥
वर्णोद्धरणप्रकारस्तु तत्तद्वर्णे द्रष्टव्यः ॥ * ॥ वर्णनामानि यथा,—
"तन्त्रसङ्केतबोधार्थमाकृत्य तन्त्रशास्त्रतः ।
वर्णनामानि कतिचित् वक्ष्यामि विदुषां मुदे ॥
ॐकारो वर्त्तुलाकारो वामश्च हंसकारकम् ।
मन्त्राद्यः प्रणवः सत्यं बिन्दुशक्तिस्त्रिदैवतम् ॥
सर्व्वजीवोत्पादकश्च पञ्चदेवो ध्रुवस्त्रिकः ।
सावित्री त्रिशिखो ब्रह्म त्रिगुणो गुरुजीवकः ॥
आदिबीजं वेदसारो वेदबीजमतः परम् ।
प्रणवस्त्रिस्त्रिकूटे च त्रिभवे भवनाशनः ॥
गायत्रीबीजपद्मांशो मन्त्रविद्याप्रभुः प्रभुः ।
अक्षरं मातृकासञ्चारादिरहैतमोचदौ ॥ ॐ ॥
अः श्रीकण्ठः सुरेशश्च ललाटश्चैकमात्रिकः ।
पूर्णोदरी रुद्रिमेधौ सारस्वतः प्रियंवदः ॥
महाज्वाला वासुदेवो धनेशः केशवोऽन्तकम् ।
कौशिनिर्दहनिर्वाणीशो नरकारिर्हरो मरुत् ॥
ब्रह्मा वामाश्रयो दक्षः करस्थः प्रणवात्मकः ।
ब्रह्माणी कामरूपश्च कामेशी वाग्भिनी वियत् ॥
विश्वेशः श्रीविष्णुकण्ठौ प्रतिपत्तिथिरग्निनी ।
अर्कमण्डलवर्णाद्यौ ब्राह्मणः कामकर्षिणौ ॥अः॥
आकारो विजयायन्तो दीर्घच्छायो विनायकः ।
क्षीरोदधिः पयोदश्च पाद्यो दीर्घास्यदन्तकौ ।
प्रणवश्च एकपो रुद्रो नारायण इमेश्वरः ।
प्रतिष्ठा मानदा कान्तो विश्वान्तकगणान्तकः ॥
पितामहो दिष्टान्तोऽभूः क्रिया कान्तिश्च सम्भवः ।
द्वितीया मानदा काग्नी विघ्नराजः कुजो वियत् ।
स्वरान्तकश्च हृदयमङ्गलो भगमालिनी ॥ आः ॥
इः सन्ध्या ग्राह्यली विद्या चन्द्रः पूषा सुगुह्यकः ।
सुमित्रं सुन्दरो वीरः कोटरः काटरः पयः ॥
भ्रूमध्यो माधवस्तुष्टिर्दहनेशश्च नासिका ।
ग्राह्यः कान्तः कामिनी च कामो विघ्नविनायकः ।
नेपाली भरणी रुद्रो जिह्वा क्लिन्ना च पावकः ॥इः॥
ईक्षिभूर्तिर्मन्त्रमाया लोलाक्षी वामलोचनम् ।
गोविन्दः शेखरः पुष्टिः सुभद्रा रत्नसञ्चयः ॥
विष्णुर्लक्ष्मीः प्रहासश्च वाग्विशुद्धः परापरः ।
कलोत्तरीयो भैरवश्च रतिश्च पौरुषर्हनः ॥
ग्निवोत्तमः शिवा तुष्टिश्चतुर्थी बिन्दुमालिनी ।
वैष्णवी वैन्दवी जिह्वा कामकला सनातका ।
पावकः कोटरः कौशिर्मोहिनी कालकारिका ।
कुचरन्द्रं तर्ज्जनी च ग्राह्यक्लिन्नपुरस्सरी ॥ईः॥
उः ग्रङ्कुरो वर्त्तुलाक्षी भूतःकल्पाङ्गवाचकः ।
अमरेशो दक्षकर्णः वह्नवक्त्रो मोहनः शिवः ॥
उग्रः प्रभुर्धृतिर्विष्णुर्विश्वकर्म्मा महेश्वरः ।
ग्रङ्कुशकोटिका पुष्टिः पञ्चमी वह्निवासिनी ॥
पेटिकास्थाने पेचिका इति वा पाठः ।
कामश्च कामना पेशो मोहिनी विघ्नहन्मही ।
उटजः कुटिला श्रोत्रं पारद्वीपो दृशो हरः ॥
उटज इति कुत्रचित् पाठः । ऊः ॥
ऊः कण्टको रतिः ग्राह्यः क्रोधनो मधुसूदनः ।
कामराजः कुलेशश्च महेशो वामकर्णकः ॥
कण्डकस्थाने कण्टक इति वा पाठः ।
अर्द्धीशो भैरवः सन्ध्यो दीर्घघोणा सरस्वती ।
विलासिनी विघ्नकर्त्ता लक्ष्मणो रूपकर्षिणौ ।
महाविद्येश्वरी वह्नी वक्त्रो भूः कान्यकुब्जकः ॥
॥ऊः॥
ऋः पूर्णोदरीसुखी रुद्रो देवमाता त्रिविक्रमः ।
भावभूतिः क्रिया क्रूरा रेचिका नासिका धृतः ॥
एकपादग्निरो माता मङ्गला ग्रान्तिनी जलम् ।
कर्त्ता कमलभा मेधो निर्वृत्तिर्गगनायकः ।
रौद्रिणी ग्निवदूती च पूर्णगिरिश्च सप्तमी ॥
मेघः स्थाने मेघ इति च पाठः । ॠः ॥
ॠः क्रोधोऽतिथिग्नो वाग्भी वामनोऽगोऽथ श्रीर्धृतिः ।
ऊर्द्धसुखी निग्रानाथः पद्ममाला विगन्धकः ॥
ग्निणी मोचिका श्रेष्ठा दैत्यमाता प्रतिष्ठिता ।
एकदन्ताङ्गयो माता हरिता मिथुनोदया ॥
माता स्थाने माया इति वा पाठः ।
कोमलः ग्रामला मेधी प्रतिष्ठा पतिरष्टमी ।
ब्रह्मण्यमिव कौलाले पावको गन्धकर्षिणी ॥
मिवस्थाने मवेति वा पाठः । ॠः ॥
ऌः स्थाणुः श्रीधरः शुद्धो मेघा धूम्रो वको वियत् ।
देवयोनिर्दहनगन्धो वह्नेयः कौन्तरक्तकौ ॥
वह्नेयस्थाने वाहन इति वा पाठः ।
विश्वेश्वरी दीर्घजिह्वा महेन्द्रो ग्राङ्गलिः परा ।
चन्द्रिका पार्थिवो घूम्रा द्विदन्तः कामवर्द्धनः ॥
शुचिस्मिता च नवमी कान्तिरावातकेश्वरः ।
चित्राकर्षिणी काग्नश्च तृतीयकुलसुन्दरी ॥
चित्राकर्षिणीस्थाने चित्राकर्षिणी इति वा पाठः । ॡः ॥
ॡकारः कमला हर्षा कुशीकेशो मधुव्रतः ।
लक्ष्मा कान्तिर्वामगन्धो वज्रः कामोदरी सुरा ॥
ग्राह्यिकृत् स्वस्तिका ग्रन्थो माधवी जीवुपो वियत् ।
कुग्नमी सुस्थिरो माता नीलपीतो गणानन ॥
कामिनी विश्वधा काली जिह्वा शुद्धः शुचिः शुची ॥
विश्वधास्थाने विजया इति वा पाठः ।
सन्ध्यो धैर्य्यकर्षणो ग्न एकाक्षी दशनग्रहः ॥ॡः॥
एकारो वासवः शक्तिर्भिण्टीशोष्ठौ भगं मरुत् ।
लक्ष्मा भूतोऽर्द्धकेशी च ज्योतिष्मा ब्रह्मा प्रमर्दनः ॥
भूतस्थाने ग्रत इति वा पाठः ।
भयं ग्रानं क्षमा धीरा जङ्घा सर्व्वमसुद्भवः ।
वह्निविष्णुर्भगवती कुण्डली मोहिनी वसुः ॥
योनिर्दाधारशक्तिश्च त्रिकोणा ईशसंज्ञकः ।
सन्धिरेकादशी भद्रा पद्मनाभः कुलाधिपः ॥ऐः॥
ऐर्द्धजा भौतिकः कान्ता वायवी मोहिनी विभुः ।
दक्षा कामोदरः प्रज्ञोऽधरो विलसत्सुखधिः ॥
चमालको जगद्योनिः परः परनिबोधकृत् ।
ग्रावास्तता कपर्दी श्रीः पीठेग्नाग्निः समाहकः ॥
त्रिपुरा लोहिता राज्ञी वाग्भवो भौतिकासनः ॥
महेश्वरो द्वादशी च विमलश्च सरस्वती ।
कामकोटी वामजानुरंशुमान् विजया जटा ॥
॥ऐः॥
ओकारः सत्यपीयूषौ पश्चिमास्यः श्रुतिःस्थिरा ।
सत्योनातो वासुदेवो गायत्री दीर्घजङ्घकः ॥
आप्यायनी चोर्द्धदन्तो लक्ष्मीवांशी सुखी द्विजः ।
उद्देश्यदर्शकस्त्रीशः कैलासो वसुधाधरः ॥
प्रणवांशो ब्रह्मरुद्रमजेशः सर्व्वमङ्गला ।
त्रयोदशी दीर्घनासा रतिनाथो दिगम्बरा ॥
त्रैलोक्यविजया प्रज्ञा प्रीतिर्बीजादिकर्षिणी ॥
॥ओः॥
औकारः शक्तिको नाग्नस्त्रैजसो वामनङ्घ्रिकः ।
मनुवह्नग्नदेशश्च ग्रङ्कुकर्णः सदाग्निवः ॥
अयोदन्तश्च कण्ठोष्ठौ सङ्घर्षश्च सरस्वती ।
आज्ञा चोर्द्धसुखी ग्रान्तो व्यापिनी प्रज्ञतः पयः ॥
अनन्ता ज्वालिनी सोमा चतुर्दशी रतिप्रियः ।
नेत्रमात्राकर्षिणी च ज्वालामालिनिका भृगुः ॥
सोमास्थाने रोमा इति वा पाठः । औः ॥
अङ्कारश्चतुरो दन्तो घटिका समगुह्यकः ।
प्रद्युम्नः श्रीसुखी प्रीतिर्बीजयोनिर्हृषध्वजः ॥
दन्तस्थाने दन्त इति वा पाठः ।
परं ग्रग्नी प्रमाथीग्नः सोमबिन्दुः कलानिधिः ।
अक्रूरचेतना नागपूर्णा दुःखहरः शिवः ॥
ग्निरः ग्रम्भुर्नरेशश्च सुखदुःखप्रवर्त्तकः ।
पूर्णिमा रेवती शुद्धः कथा सरवियद्रविः ॥
अन्तर्याकर्षिणी सूर्य्यं विचित्रा सोमरूपिणी ।
केदारो रात्रिनाथश्च कुलिका चैव बुद्बुदः ॥
॥अं॥
अः कण्ठको महासेनः शक्ता पूर्णान्विता हरिः ।
इच्छा भद्रा गणेशश्च रतिर्विद्यासुखी सुखम् ॥
द्विजिह्वरसना सोमोऽनिरुद्धो दुःखभञ्जकः ।
द्विजिह्व कुण्डलं वह्नः सर्गः शक्तिर्निशाकरः ॥
सुन्दरी सुयशानन्ता गणनाथो महेश्वरः ॥अः॥
कः क्रोधीग्नो महाकाली कामदेवः प्रकाशकः ।
कपाली तेजसः ग्रान्तिर्वासुदेवो जयानलः ॥
चक्री प्रजापतिः सृष्टिर्दक्षश्चन्द्रो विशाम्पतिः ।
अनन्तः पार्थिवो विन्दुव्यापिनी परमात्मकः ॥
दक्षस्कन्धस्थाने दक्षकन्धौ इति वा पाठः ।
वर्माद्यश्च सुखी ब्रह्मा सन्ध्याग्नोऽम्भः शिवो जलम् ॥
माहेश्वरी तुला पुष्या मङ्गलश्चरकं करः ।
जिह्वा कामेश्वरी सुखः कामरूपो गजेन्द्रकः ।
श्रीपुरं रमणो रङ्गः कुसुमा परमात्मकः ॥कः॥
खः प्रणवः कामरूपी ऋद्धिर्ब्रह्मेन्द्रः सरस्वती ।
आकाशमिन्द्रियं दुर्गा चक्रीग्नस्तापिनी गुरुः ॥
ग्निखण्डो दन्तजातोग्नः कपोलिर्गरुडो यदि ।
सूर्य्यं कपाली कल्याणी सूर्पकर्णोऽमरामरः ॥
सुधामेधां चक्रजिह्वो जगन्नाङ्गारखड्गकौ ॥
॥खः॥

गो गौरी गौरवो गङ्गा गणेशो गोकुलेश्वरः । ग्राङ्गौं पद्मान्तको गाथा गन्धर्वः सर्व्वगः स्मृतिः ॥
सर्व्वसिद्धिः प्रभा धूम्रा द्विजाक्षः शिवदर्शनः । विश्वात्मा गौः पृथग्रूपा बालबह्वक्षिलोचनः ॥
गीतं सरस्वती विद्या भोगिनी नन्दनो धरा । भोगवती च हृदयं ज्ञानं जालन्धरो लवः ॥
लवस्थाने नर इति वा पाठः । गः ॥
घः खड्गी घुर्घुरो घण्टी घण्टीग्रन्थिपुरान्तकः ।
वायुः शिवोत्तमः सत्या किङ्किणी घोरनायकः ॥
मरीचिर्ब्बरुणो मेधा कालरूपी च दाम्भिकः । लम्बोदरा ज्वालमुखं नन्देशो हननं ध्वनिः ।
चेतोव्यविद्या संहर्त्ता कामाख्यमनघामयः ॥घः॥
ङः शुद्धो भैरवश्चण्डो विघ्नध्वंसः शिवप्रियः । एकरुद्रो दक्षनखः खर्परो विषयसृहा ॥
कान्तिः श्वेताक्षयो धीरो द्विजात्मा ज्वालिनी वियत् ।
मन्त्रशक्तिश्च मदनो विघ्नेशो वात्मनायकः ॥
एकनेत्रो महानन्दो दुर्द्धरश्चन्द्रमा यतिः । शिवयोषा नीलकण्ठः कामेशी च मयांशुकौ ॥
॥ङः॥
चः पुष्करो हली वाणी चात्मशक्तिः सुदर्शनः । धर्म्मसुखधरो भूत्वा महिषाचारसेविनी ॥
भूत्वाख्याने भौम इति च पाठः ।
एकरूपो रुचिः कूर्म्मश्चासृङ्मा दीर्घबाहुकः । वामबाहुर्मूलमाया चतुर्म्मूर्त्तिस्वरूपिणी ॥
दयितश्च द्विनेत्रश्च लक्ष्मीस्थितयलोचनः । चन्दनं चन्द्रमा देवश्चेतनो वृष्णिको बुधः ॥
देवी केटसुखेच्छात्मा कौमारपूर्व्वफलगुनी । अनङ्गमेखला वायुर्मेदिनी च मूलावती ॥ चः ॥
छन्दश्छन्दं सुमुखा च प्रभुः पशुपतिर्म्मतिः । निर्म्मलं तरलं वह्निर्भूतमात्रा विलासिनी ॥
एकनेत्रश्च वृषली द्विशिरा वाग्मकूपरः । गोकर्णा लाङ्गली वामकाममत्ता सदाशिवः ॥
माता निशाचरः पायुर्व्विच्चतः स्थितिग्रन्थकः ॥छः॥
जः शुक्रो वानरः शूली भोगदा विजया स्थिरा । ललदेवो जयो जेता धातकी सुमुखी विभुः ॥
लम्बोदरी स्मृतिः शाखा सुप्रभा कर्णुका धरा । दीर्घबाहू रुचिर्हंसो नन्दी तेजाः सुराधिपः ॥
जवनो वेगितो वामो मानवाद्यः सदात्मकः । कृष्णारुतेश्वरो वेगी चामोदा मदविह्वलः ॥जः॥
झो झङ्कारी गुह्यो झञ्झावायुः सत्यः षड्व्रतः । अजेशो द्राविणी नादः पाशी जिह्वा जलं स्थितिः ॥
विराजेन्द्रो धनुर्हस्तः कर्कशो नादजः कुजः । दीर्घबाहुबलो रूपमाकन्दितः सुचञ्चलः ॥
दुर्मुखो नर आत्मा वान् विकटा कुचमण्डलः । कलहंसप्रिया वामा अङ्गुलीमध्यपर्व्वकः ।
दक्षहासाट्टहासश्च पाथात्मा व्यञ्जनः स्वरः ॥
॥झः॥

अकारो बोधनी विद्या कङ्कली मखदो वियत् । कौमारी नागविज्ञानी सव्याङ्गुलनखरो वकः ॥
कङ्कलीस्थाने कुङ्कली मखदस्थाने सुखद इति वा पाठः ।
सर्व्वेशचर्चिता बुद्धिः स्वर्गात्मा घर्घरध्वनिः ।
धर्म्मैकपादो सुमुखो विरजा चन्दनेश्वरी ॥
बुद्धिस्थाने सिद्धिः स्वर्गस्थाने सर्ग इति वा पाठः ।
गायनः पुण्यधन्वा च रागात्मा च वराङ्गिणी ॥ञः॥
टङ्कारः कपाली च सोमवाः खेचरी ध्वनिः । सुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नवः ॥
सोमवा स्थाने सोमेश इति क्वचित् पाठः ।
दक्षाङ्गकार्द्धचन्द्रश्च जरा भूतिः पुनर्भवः । दृष्टस्तर्पितदृष्टिश्च प्रमोदा विमला कटिः ।
राजा गिरिर्म्महाधनुर्ज्ञानात्मा सुमुखो मरुत् ॥ टः ॥
ठः शून्यो मञ्जरी बीजः पाणिनी लाङ्गली तथा ।
वनजो नन्दनो जिह्वा सुगन्धचूर्णकः सुधा ॥
वर्त्तुलः कुण्डली वह्निरन्दतं चन्द्रमण्डलः । दक्षजानूरुभावश्च देवभक्षो दृष्टहृनिः ॥
एकपादो विभूतिश्च ललाटं सर्व्वमित्यकः ।
दृषघ्नो नलिनी विष्णुर्म्मेदेशो ग्रामजीः शुभ्रो ॥ डः ॥
डः स्मृतिर्द्वारको नन्दिरूपिणी योगिनी प्रियः ।
कौमारी शङ्करख्यातिश्चिक्को नदको ध्वनिः ॥
दुरूढो जटिली भीमा द्विजिह्वः पृथिवी सती ।
कोरगिरिः क्षमा कान्तिर्नाभिः स्वाती च लोचनम् ॥
जटिलीस्थाने जटिल इति कान्तिस्थाने भ्रान्तिरिति वा पाठः ॥ ढः ॥
ढो ढक्का निर्भयः पूर्व्वो यज्ञेशादनदेश्वरः ।
अर्द्धनारीश्वरस्त्रोयमीश्वरी त्रिशिखी नवः ॥
यज्ञेशादनदेश्वर इत्यत्र यज्ञेशो धनदेश्वर इत्यपि पाठः ।
दक्षपादाङ्गुलेर्म्मूलं सिद्धिदक्षो विनायकः ।
प्रहासा त्रिवेरा ऋद्धिर्निर्गुणो निधनो ध्वनिः ॥
प्रहासा स्थाने प्रहास इति वा पाठः ।
विघ्नेशः पालिनी चक्रधारिणी क्रोडपुच्छकः ।
इलापुरं त्वगात्मा च विशाखा ग्रीष्मनो रतिः ॥
तक्रस्थाने त्वक्च इति वा पाठः ॥ ढः ॥
णो निर्गुणं रतिर्ज्ञानं जम्भनः पक्षिवाहनः ।
जया शुम्भो नरकजित् निष्कला योगिनीप्रियः ॥
दिव्यं कोटवी श्रोत्रं सन्द्रिर्बोधनो मता ।
त्रिनेत्रो मानुषी योमदक्षपादाङ्गुलेर्म्मुखम् ॥
माधवः शुद्धिनी वीरो नारायणश्च निर्भयः ॥
सुखस्थाने नखं इति वा पाठः ॥ णः ॥
तः पूतना हरिः शुद्धिः शुक्ती शक्तिर्जटी ध्वजा ।
वामस्फिक्शामकर्णी च कामिनी मध्यकर्णकः ॥

हरिस्थाने हरि: इति वा पाठः ।
आषाढ़ी तक्षतुरङ्गश्च कामिका पृष्ठपुच्छकः ।
रत्नकञ्च श्यामसुखी वाराही मकरोरुगा ॥
आषाढ़ीतक्षतुरङ्गस्थाने आषाढ़ान्तक्षदश्च इति रत्नकञ्चस्थाने रत्नकण्ठ इति वा पाठः ।
सुगतोर्द्धसुखा बुद्धजानुश्च क्रोड़पुच्छकः ।
गन्धो विश्वामरश्छत्रश्चानुराधा च सौरकः ॥
बुद्धस्थाने वृद्ध इति सौरकस्थाने सैविक इति वा पाठः ।
जयन्ति पुलको भान्तिरनङ्गमदनातुरा ॥ तः ॥
थः स्थिरामी महाग्रन्थिर्ग्रन्थियाहोभयानकः ।
थिली थिरथिलो दक्षी भद्रकाली थिलोदयः ॥
स्थलो बुद्धिर्विकर्म्मा च दक्षगाधाधियोऽमरः ।
वरदा भोगदा केशी वामजानू रसोऽनलः ॥
स्थलो बुद्धिर्विकर्म्मा स्थाने स्थलो बुद्धिर्विकर्णा इति वा पाठः ।
लोलोजज्वलिनी गुह्यः शरश्चन्द्रो विदारकः ॥
लोलौ इत्यादिस्थाने लोलोज्वलिनीपूर्णशशरश्चन्द्रदिवाकरौ इति वा पाठः । थः ॥
दोर्द्दण्डी धातकिर्धाता दाता दलं कलञ्चकम् ।
दीनं ज्ञानञ्च दानञ्च भक्तिराहवनी धरा ॥
दाता दलं स्थाने दानादनु इति वा पाठः ।
सुमुखा योगिनी सद्यः कुण्डली वामगुल्फकः ।
कात्यायनी शिवा दुर्गा लङ्घना नाक्षि कङ्कटी ॥
लङ्घनास्थाने सङ्घना कङ्कटीस्थाने कण्टकी इति वा पाठः ।
खड्गिकः कुटिला रूपः क्षमाक्षोमाजितेन्द्रियः ।
धर्म्मेशदामदेवश्च भ्रमा बहुसुचञ्चला ॥
धर्म्मेशतृस्थाने धर्म्मेशतृ बहुस्थाने वह इति वा पाठः ।
हरिद्रा पुरमत्रौ च दक्षपार्श्विश्चिरेखकः ॥दः॥
धो धनार्थो रुचिः स्याद्यः शान्तो योगिनीप्रियः ।
मीनेशः शुद्धिनी तोयं नागेशो विश्वपावनी ।
धनार्थस्थाने धनाख्य इति वा पाठः ।
धिषणा धरणा चिन्ता नेत्रयुग्मं प्रियो मतिः ।
पीतवासा त्रिवर्त्ता च धाता धर्म्मप्रवक्तमः ।
धरणाचिन्तास्थाने धरणी चित्रा इति वा पाठः ।
सन्दर्शो मोहनो लज्जा वज्रतुण्डा धरं धरा ।
वामपादाङ्गुलेर्म्मूलं ज्येष्ठा सुरपुरं भवः ।
सर्व्वात्मा दीर्घजङ्घा च धनेशो धनसञ्चयः ॥धः॥
नो गर्ज्जिनी क्षमा सौरिर्व्वारुणी विश्वपावनी ।
मेघश्च सविता नेत्रं दन्तुरो नारदोऽञ्जनः ॥
वारुणीस्थाने वरुणा इति वा पाठः ।
ऊर्द्धचामी हिरण्यश्च वामपादाङ्गुलेर्म्मुखम् ।
वैनतेयसुतिर्व्वर्त्म तरणिर्व्वालिरागमः ॥
वामनो ज्वालिनी दीर्घो निरीहः सुगतिर्व्वियत् ।
शुम्भात्मा दीर्घघोणश्च हस्तिनापुरमेचकौ ।
गिरिनायकनीलौ च शिवो नादिर्म्मेडा-मतिः ॥ नः ॥

वर्णः

पः पूरयिता तोक्त्या लोहितः पञ्चमो रमा।
गुह्यकर्त्ता निधिः ग्रैवः कालरात्रिः सुवाहिता॥
तपनः पालनः पाता पद्मरेणुर्निरञ्जनः॥
सावित्री पालिनी पानं वीरतत्त्वो धनुर्द्धरः॥
पालनस्थाने पावन इति तत्त्वस्थाने तत्त्व इति वा पाठः।
दक्षपार्श्वश्च सेनानी मरीचिः पवनः शनिः।
उड्डीशं जयनी कुम्भोऽलसं रेखा च मोहकः॥
कुम्भस्थाने कान्ता इति रेखास्थाने रेषा इति वा पाठः।
मूला द्वितीयमिन्द्राणी लोकात्मी मन आत्मनः॥
आत्मनः स्थाने आत्मक इति वा पाठः। पः॥
फः सखी दुर्गिणी धूम्रा वामपार्श्वो जनार्द्दनः।
जया पादः शिखा रौद्री फेत्कारः शाखिनी प्रियः॥
उमा विहङ्गमः कालकुञ्जिनीप्रियपावकौ।
प्रलयाग्निर्गौलपादोऽचरः पशुपतिः शशी॥
फुत्कारो यामिनी वक्ता पावनो मोहवर्द्धनः।
निष्फलत्यागहङ्कारः प्रयागो ग्रामणीः फलम्॥
वक्तास्थाने भक्षा इति प्रयागस्थाने प्रयाग इति वा पाठः। फः॥
बो वनी भूधरी मार्गो घर्घरी लोचनप्रियः।
प्रचेताः कलसः पक्षी स्थलगर्द्धः कपर्द्दिनी॥
दृष्टवंशो भया मातुः शिखिवाहो युगन्धरः।
सुखविन्दुर्बली चण्टा घोडा त्रिलोचनप्रियः॥
सुखविन्दुस्थाने सुखविन्दुरिति वा पाठः।
क्षेदिनी तापिता भूमिः सुपनिन्द्रवलिप्रियः।
सुरभिर्मुखविष्णुश्च संहारी वसुधाधिपः॥
सुपनिन्द्रस्थाने पुगन्धिश्चेति वा पाटः।
षष्ठी पुरश्च पेटा च मोदको गगनं प्रति।
पूर्व्वाषाढामध्यलिङ्गौ शनिः कुम्भलग्नतीयकौ॥यः॥
भः क्लिन्ना भ्रमरी भीमो विश्वमूर्त्तिर्निशातवम्।
हिरण्यो भूषणो मूर्त्त यज्ञस्तत्त्व वाचकः॥
निशातवस्थाने निशाभयं इति वा पाठः।
नक्षत्रं भ्रमणा दीप्तिर्वयो भूमिः पयो नभः।
नाभिभद्रं भद्राबाहुर्विश्वमूर्त्तिर्वितालकः॥
वयःस्थाने भय इति वितालकस्थाने विकूर्त्तक इति वा पाठः।
प्राणात्मा तापिनी वक्ता विश्वरूपी च चन्द्रिका।
भीमसेनः सुधासेनः सुखो मायापुरं हरः॥
वक्त्रस्थाने रुद्रा इति सुखस्थाने सुख इति वा पाठः। भः॥
मः काली क्लेशितः कालो महाकालो महात्मकः।
वैकुण्ठो वसुधा चन्द्रो रविः पुरुषराजकः॥
वसुधास्थाने वसुदा इति वा पाठः।
कालभद्रो जया मेधा विन्दवा दीप्रसंज्ञकः।
जठरश्च भमागानं लक्ष्मीमातोयबन्धनौ॥
दीप्रस्थाने दीप्र इति वा पाठः।
विधिं शिखी महावीरः शशिप्रभा जनेश्वरः।
प्रमत्तः प्रियश्च रुद्रः सर्व्वाङ्गो वह्निमण्डलम्॥

वर्णः

भातङ्गमालिनी विन्दुः श्रवणाभरणो वियत्॥
रथस्थाने मख इति वा पाठः। मः॥
यो वायौ वसुधा वायुर्विकृतिः पुरुषोत्तमः।
युगान्तः श्वसनः शीघ्रो धूमार्चिः प्राणिसेवकः॥
युगान्तस्थाने युगाभ इति वा पाठः।
शुक्रा भ्रमो जटी लोला वायुवेगी यशस्करी।
सङ्कर्षणः क्षमा वालो हृदयं कपिला प्रभा॥
आग्नेयो यापकास्यागो होमो यानं प्रभा सुखम्।
चक्रः सर्व्वेश्वरी धूमश्वासुखा सुखेश्वरी॥
प्रभास्थाने प्रभा इति वा पाठः।
त्वगात्मा मलयो माता हंसिनी भङ्गिनायकः।
तेनमः श्रोषको मीनो धनिष्ठानङ्गवेदिनी॥
त्वगात्मास्थाने विगात्मा इति तेनमस्थाने येमन इति वा पाठः।
मेष्ठः सोमः पक्षिनामा पापहा प्राणसंज्ञकः॥
मेष्ठस्थाने सेष्ट इति वा पाठः। यः।
रौ रक्तः क्रोधिनी रेफः पावकस्त्रोजसो मतः।
प्रकाशा दर्शनो दीपो रतक्षया परं बली॥
स्त्रोजसस्थाने त्रोजन इति रतक्षयास्थाने रक्तक्षय इति वा पाठः।
भुजङ्गेशो मतिः सूर्य्यो धातू रक्तः प्रकाशकः।
आपको रेवती दासं कुम्भेशो वह्निमण्डलम्॥
दासस्थाने दानमिति कुम्भेशस्थाने दर्पाग्र इति वा पाठः।
उग्ररेखा स्थूलदण्डो वेदकण्ठपला पुरा।
प्रकृतिः सुगलो ब्रह्मगन्धश्च गायको धनम्॥
वेदकण्ठपलास्थाने वेदकण्ठपला इति वा पाठः।
श्रीकण्ठ उमा हृदयं सुखी त्रिपुरसुन्दरी।
सविन्दुर्योनिजो ज्वाला श्रीग्रैलो विश्वतोसुखी॥
श्रीग्रैलस्थाने श्रीग्रोग इति वा पाठः। रः।
लक्ष्मीः पूतना पृथ्वी माधवः शुक्रवाचकः।
बलानुजः पिशाकीशो यापको मांससंज्ञकः॥
माधवस्थाने माधवी इति वा पाठः।
खड्गी नादोऽन्तं देवी लवणं वारुणी पतिः।
शिखा वामो क्रिया माता भामिनी कामिनी प्रिया॥
क्षतस्थाने क्षड्मिति लवणस्थाने मरञ्जमिति वा पाठः।
ज्वालिनी वेगिनी नादः प्रद्युम्नः शोषणो हरिः।
विश्वात्ममन्त्री बली चेतो मेरुर्गिरिः कला रसः॥
मन्त्रस्थाने मन्त्र इति कलास्थाने कला इति वा पाठः। लः।
वो वामो वारुणी क्षुब्धा वरुणो मेदसंज्ञकः।
खड्गीशो ज्वालिनी वङ्कः कलसध्वनिवाचकः॥
वङ्कस्थाने रङ्क इति कलसध्वनिस्थाने कलसंरव इति वा पाठः।
उल्कारीशस्तु ना वौतो वक्ता स्फिक् सागरः शुचिः।
त्रिधातुः शङ्करः श्रेष्ठो विश्वेशो यमसादनम्॥वः॥
शः सत्यश्च कामरूपी कामरूपो महामतिः।
सौख्यनामा कुमारोऽपि श्रीकण्ठो हृषकेतनः॥

वर्णः

हृषन्नः शयनं शान्ता सुभगा विस्फुलिङ्गिनी।
मृत्युर्देवो महालक्ष्मीर्महेन्द्रः कुलकौलिनी॥
बाहुर्हंसो वियद्वक्त्रं क्षुदनङ्गाङ्कुशः खलः।
वामोरुः पुष्करीकात्मा कान्तिः कल्याणवाचकः।
हंसस्थाने हिंसा इति वा पाठः। शः॥
षः श्वेतो वासुदेवश्च पीता प्रज्ञा विनायकः।
परमेष्ठी वामबाहुः श्रेष्ठो गर्भविमोचनः॥
पीतास्थाने प्रीता इति प्रज्ञास्थाने श्रद्धा इति वा पाठः।
लम्बोदरो यमौजेशः कामधुक् कामधूमकः।
सुश्रीरुषा दृषो लक्ष्मा मरुद्वश्यः प्रियः शिवः।
कामधूमकस्थाने कालधूमक इति वा पाठः।
सूर्य्यात्मा जठरः कोषो मत्ता वक्षोविदारिणी।
कलकण्ठो मध्यभिन्ना बुद्धात्मा मलपूः शिवः॥षः॥
सो हंसः सुयशा विष्णुर्भौमश्चन्द्रसंज्ञकः।
जगद्बीजं शक्तिनामा मोहं वेगवती भगुः॥
सुयशास्थाने सुजन इति मोहस्थाने सोऽहं इति वा पाठः।
प्रकृतिरीश्वरः शुद्धो प्रभा श्वेता कुलोज्ज्वलः।
दक्षपादो ऋतं ब्राह्मी परमात्मा परोऽचरः॥
सुरूपा च गुणेशो गौः कलकण्ठो दृकोदरौ।
प्राणात्माश्च पुरादेवी लक्ष्मीः सोमो हिरण्यपूः॥
दुर्गोत्तारिणि सन्मोहाज्जीवो मणिर्मनोहरः॥
दुर्गोत्तारिणिस्थाने दुर्गोत्तारिणी इति सम्मोहात्स्थाने सम्मोहा इति मनोहरस्थाने मनोयम इति वा पाठः। सः।
हः शिवो गगनं हंसो नागलोकोऽम्बिकापतिः।
नकुलीशो जगत्प्राणः प्राणेशः कपिला मलः॥
मलस्थाने मत इति वा पाठः।
परमात्मात्मजो जीवो यवाकः शान्तिदोऽङ्गनः।
शृगो भयो रुजास्थाणुः क्रुटकूपविरावयः॥
यवाकस्थाने वराक इति अङ्गनस्थाने अङ्गल इति क्रुटकूपविरावणस्थाने कूटकोपरिवारच इति वा पाठः।
लक्ष्मीर्भविहरः शम्भुः प्राणशक्तिर्ललाटजः।
खकोपवारणः शूली चैतन्यं पादपूरणः॥
भविहरस्थाने हरिहर इति खकोपस्थाने सकोप इति वा पाठः।
महालक्ष्मीः परं नादो मेघनादो हरिर्मतः।
विन्दुर्दुर्गा प्रिया देवी मेघश्यामेश्वरः पुमान्॥
दक्षपादः सदाशम्भुः शाखोटः सोममण्डलम्॥हः
ळः पृथ्वी विमला मोघोऽनन्तो हव्यवहा सिता।
व्यापिनी शिवदा केतुजगत्सारतरं हठः॥
स्त्रौण्डानी च वेदार्थः सारो नारायणः स्वयम्।
जठरो नकुलिः पीता शिवेशोऽङ्गमालिनी॥ळः॥
क्षः कोपसुमुखः कालो रूक्षः संवर्त्तकः परः।
वृसिंहो विद्युता माया महातेजा युगान्तकः॥
क्षुब्धुकस्थाने क्षुधुक इति रूक्षस्थाने वक्षमिति परस्थाने पर इति वा पाठः।
परात्मा क्रोधसंहारी बलान्तो मेरुवाचकः।
सर्व्वाङ्गः सागरः कामः संयोगान्धक्षिपूरकः॥

वलान्तस्थाने नलान्त इति सर्व्वाङ्गस्थाने सर्व्वांग इति वा पाठः।
क्षेत्रपालो महाघोभो मालकान्तानलक्षयः।
सुखं कथयहानन्ता कालजिह्वा गणेश्वरः।
छायापुत्रश्च संघातो मलयः श्रीललाटकः॥"इत्यः॥
इति नन्दनभट्टाचार्य्यविरचितं वर्णाभिधानं समाप्तम्॥

वर्णकं, क्ली, (वर्ण्यतीति। वर्ण+खुल्।) हरितालम्। इति रत्नमाला॥ गात्रानुलेपनयोग्य पिष्टं घृष्टं वा सुगन्द्रिद्रव्यम्। इत्यमरः॥ चन्दनम्। इति शब्दरत्नावली॥

वर्णकः, पुं, क्ली, (वर्ण+स्वार्थे संज्ञायां वा कन्।) विलेपनम्। चन्दनम्। इति मेदिनी। के, १५२॥ (यथा, महाभारते। १३।१११।१०७।
"वर्णकादीन्सथा गन्धांश्चोरयित्वेह मानवः।
कुष्ठकुन्दरित्वमाप्नोति राजन्! लोभपरायणः॥")

वर्णकः, पुं, क्ली, (वर्ण्यते रच्यतेऽनेनेति। वर्ण+घञ्। स्वार्थे कन्।) हिङ्गुलहरितालकाञ्चनीलीकादिः। इत्यमरभरतौ॥ (यथा, आर्य्यासप्तशत्याम्। १८६।
"कस्तां निन्दति लुम्पति कः खरपत्रकस्य वर्णकं सुधः।
को भवति रत्नकण्टकमन्तरते कस्यारुचिरुदेति॥")

वर्णकः, पुं, (वर्णयति भृत्यादीन् विस्तारयतीति। वर्ण+खुल्।) चारणः। इति मेदिनी। के, ५२। मङ्गलम्। इति शब्दरत्नावली॥

वर्णकविः, पुं, कुबेरपुत्रः। इति त्रिकाण्डशेषः॥

वर्णकूपिका, स्त्री, (वर्णानां कूपिकेव।) मसीधारः। यथा,—
"मसीधानी मसिमयिर्मेलान्युर्वर्णकूपिका॥"
इति त्रिकाण्डशेषः॥

वर्णचारकः, त्रि, (वर्णान् नीलादीन् चारयति विस्तारयतीति। चर+णिच्+खुल्।) चित्रकारः। इति शब्दमाला॥

वर्णज्येष्ठः, पुं, (वर्णेषु चतुर्षु मध्ये ज्येष्ठः प्रथमोत्पन्नात् गुणोत्तरत्वाच्च।) ब्राह्मणः। इति त्रिकाण्डशेषः॥

वर्णज्येष्ठः, त्रि, (वर्णेन ज्योतिष्टोमपारिभाषिकवर्णेन ज्येष्ठः श्रेष्ठः।) स्ववर्णापेक्षोत्तमवर्णः। पारिभाषिकहीनवर्णकर्तृकपारिभाषिकवर्णज्येष्ठकन्याविवाहनिषेधो यथा,—
"मौनकर्कटवृश्चिकविप्राः
सिंहतुलाधनुः क्षत्रिय उक्तः।
कुम्भनरद्वयमेववियः स्यु-
स्तेकरवृषकौ कथितावरजातिः॥
वर्णज्येष्ठा च या नारी वर्णहीनश्च यः पुमान्।
तयोर्विवाहे दोषः स्यात् वयसासाम्यतः संशयः॥"
इति ज्योतिस्तत्त्वे वर्णजोटनम्॥

वर्णतूलिः, स्त्री, (वर्णानां तूलिरिव।) लेखनी। इति शब्दरत्नावली॥

वर्णतूलिका, स्त्री, (वर्णानां तूलिकेव।) लेखनी। इति हारावली। २१२॥

वर्णतूली, स्त्री, (वर्णानां तूलीव।) लेखनी। इति त्रिकाण्डशेषः॥

वर्णदं, क्ली, (वर्णं ददातीति। दा+"आतोऽनुपसर्गे कः।"३।२।३। इति कः।) कालीयकम्। इति जटाधरः॥ वर्णदातरि, त्रि॥

वर्णदात्री, स्त्री, (वर्णं ददातीति। दा+तृच्+ङीप्।) हरिद्रा। इति राजनिर्घण्टः॥ वर्णदातरि, त्रि॥

वर्णदूतः, पुं, (वर्णा एव दूता यत्र।) लिपिः। तत्पर्य्यायः। लेखः २ वाणिक्प्रहारकः३ खस्तिसुखः४। इति त्रिकाण्डशेषः॥

वर्णधर्म्मः, पुं,क्ली, (वर्णानां ब्राह्मणादीनां धर्म्मः।) ब्राह्मणक्षत्रियवैश्यशूद्राणां कर्त्तव्यं कर्म्म। तद्यथा,—
"यजनं याजनं दानं ब्राह्मणस्य प्रतिग्रहः।
अध्यापनं चाध्ययनं षट्कर्म्माणि द्विजोत्तमाः॥
दानमध्ययनं यज्ञो धर्म्मः क्षत्रियवैश्ययोः।
दण्डो युद्धं क्षत्रियस्य क्षत्रियैर्वैश्यस्य गृह्यते॥
शुश्रूषैव द्विजातीनां शूद्राणां वर्णसाधनम्।
कारुकर्म्म तथाजीवः पाकयज्ञोऽपि धर्म्मतः॥
क्षमा दमो दया दानमलोभस्त्याग एव च।
आर्ज्जवं चानसूया च तीर्थानुसरणं तथा॥
सत्यं सन्तोष आस्तिक्यं श्रद्धा चेन्द्रियनिग्रहः।
देवताभ्यर्चनं पूजा ब्राह्मणानां विशेषतः॥
अहिंसा प्रियवादित्वमपैशुन्यमकल्कता।
समाधिकमिमं धर्म्मं चातुर्वर्ण्येऽब्रवीन्मनिः॥
प्राजापत्यं ब्राह्मणानां क्षत्रं स्यात् क्रियावताम्।
स्यानमेकं क्षत्रियाणां संग्रामेष्वपलायिनाम्॥
वैश्यानां मारुतं स्यानं स्वधर्म्ममनुवर्त्तताम्।
शान्त्यर्थं शूद्रजातीनां परिचारे तु वर्त्तताम्॥"
इति कौर्म्मे २ अध्यायः॥

अपि च।
मार्कण्डेय उवाच।
"हारीतस्त्वनुवाचाथ तैरेवं चोदितो मुनिः।
प्रवक्ष्यन्तु सुतः सर्व्वे धर्म्मान् वक्ष्यामि ब्राह्मणान्॥
वर्णानामाश्रमाणाञ्च योगक्षेमञ्च सत्तमाः।
यज्ञत्राता सुतो नित्यं सुखते जन्मबन्धनात्॥
ब्राह्मण्यां ब्राह्मणेनैव उत्पन्नो ब्राह्मणः स्मृतः।
तस्य धर्म्मं प्रवक्ष्यामि तं योग्यं देशमेव च॥
लक्षणसारो नृणो यत्र स्वभावात्तु प्रवर्त्तते।
तस्मिन् देशे वसन् धर्म्मं कुर्व्वते ब्राह्मणोत्तमः॥
अध्यापनं ब्राध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव कर्म्मषट्कमिहोच्यते॥
अध्यापनञ्च त्रिविधं धर्म्मार्थं चात्मकारणम्।
शुश्रूषाकारणञ्चेति त्रिविधं परिकीर्त्तितम्॥
नैषामन्यतमो यापि दृश्यते यत्र मानवे।
तत्र विद्या न दातव्या पुत्रशिष्ये कुतोऽन्यथा॥
श्रोत्रानध्यापयेच्छिष्यान् यज्ञानपि च याजयेत्।
विदितान् प्रतिग्रहानिच्छेद्दुग्धदधर्म्मप्रसिद्धये॥
वेदमेवाभ्यसेन्नित्यं शुचौ देशे समाहितः।
यजेद्यज्ञं यथाशक्त्या दद्याद्वित्तानुसारतः॥
नित्यं नैमित्तिकं धर्म्मं कर्म्म कुर्य्यात् प्रयत्नतः।
गुरुशुश्रूषणञ्चैव यथान्यायमतन्द्रितः॥
सायं प्रातरुपासीत विधिनाग्निं द्विजोत्तमः।
क्षतत्राणः प्रकुर्व्वीत वेदवेदौ दिने दिने॥
अतिथिश्चागतं भक्त्या पूजयेच्छक्तितो गृही।
अन्यानप्यागतान् विप्रान् पूजयेदविरोधतः॥
स्वदारनिरतो नित्यं परदारविवर्ज्जितः।
सत्यवादी जितक्रोधः स्वधर्म्मनिरतो भवेत्॥
अकर्म्मणि च संप्राप्ते प्रमादे नैव रोचयेत्।
प्रियां हितां वदेद्वाचं परलोकाविरोधिनीम्॥
एष धर्म्मः समुद्दिष्टो ब्राह्मणस्य समासतः।
धर्म्ममेवन्तु यः कुर्य्यात् स याति ब्रह्मणः पदम्॥
हारीत उवाच।
क्षत्रादीनां प्रवक्ष्यामि यथावदनुपूर्व्वशः।
येन येन प्रवर्त्तन्ते विधिना क्षत्रियादयः॥
राजा च क्षत्रियश्चैव प्रजा धर्म्मेण पालयेत्।
कुर्य्यादध्ययनं सम्यक् युगयुक्तो यथाविधि॥
दद्याद्दानं द्विजाग्र्येभ्यो धर्म्मवृद्धिसमन्वितः।
देवब्राह्मणभक्तश्च पितृकार्य्यपरस्तथा॥
धर्म्मेण वै जयाकाङ्क्षी अधर्म्मस्य विवर्जयेत्।
उत्तमां गतिमाप्नोति क्षत्रियो नैवमाचरन्॥*॥
शौर्य्यं क्षतिर्वाणिज्यं कुर्य्याद्वैश्यो यथाविधि।
दानं धर्म्मं यथाशक्त्या द्विजशुश्रूषणं तथा॥
लोभदम्भविनिर्म्मुक्तः सत्यवाग्गतसत्वरः।
स्वदारनिरतो दान्तः परदारविवर्ज्जितः॥
धनैर्विप्रान् समभ्यर्च्च यज्ञकाले यथोचितः।
अप्रमत्तः स्वधर्म्मेषु वर्त्तेत देहपातनात्॥
यज्ञाध्ययनदानानि कुर्य्यान्नित्यमतन्द्रितः।
पितृकार्य्यञ्च तत्काले नारसिंहार्च्चनं तथा॥
एतद्वैश्यस्य कर्म्मोक्तं स्वधर्म्ममनुतिष्ठतः।
एतदासेवमानस्तु मुक्तः स्यान्नात्र संशयः॥*॥
वर्णत्रयस्य शुश्रूषां कुर्य्यात् शूद्रः प्रयत्नतः।
दासवत् ब्राह्मणानान्तु विशेषेण समाचरेत्॥
अयाचितः प्रदाता स्यात् क्षतिं कृत्स्नर्थमाश्रयेत्।
पाकयज्ञविधानेन यजेद्देवानतन्द्रितः॥
शूद्राणां मासिकं कार्य्यं वपनं न्यायवर्त्तिनाम्।
भारकं जीर्णवस्त्रस्य विप्रोच्छिष्टभोजनम्॥
स्वदारेषु रतिश्चैव परदारविवर्ज्जितः।
पुराणश्रवणं विप्राभ्यर्चनं पूजनम्॥
तथा विप्रनमस्कारस्तथा सन्ध्यं दिने दिने।
सत्यं सद्भावकं चैव रागद्वेषविवर्ज्जनम्॥
इत्यं कुर्व्वंस्तथा शूद्रो मनोवाक्कायकर्म्मभिः।
स्थानमेकमवाप्नोति लब्धपापः प्रपद्यते॥"
इति नारसिंहे ५१।५४ अध्यायौ॥*॥
अन्यच्च।
मदालसोवाच।
"दानमध्ययनं यज्ञो ब्राह्मणस्य त्रिधोदितः।
धर्म्मो नान्यश्चतुर्थोऽस्ति धर्म्मलक्षणयोर्विदा॥
ब्राह्मणाध्ययने यद्वत्तथा पुत्र प्रतिग्रहः।

एतत् सम्यक् समाख्यातं चित्रयं चास्य जीविका ॥
दानमध्ययनं यज्ञः चत्रियस्यापि चिधा ।
धर्म्मः प्रोक्तः चिते रचा शस्त्राजीवस्य जीविका॥
दानमध्ययनं यज्ञो वैश्यस्यापि चिधैव सः ।
वाणिज्यं पाशुपाल्यच्च कृषिचैवास्य जीविका ॥
दानं यज्ञोऽथ शुश्रूषा द्विजातीनां चिधा मया ।
आख्यातः शूद्रधर्म्मोऽपि जीविका कारुकर्म्मणा॥
तद्द्विजातिशुश्रूषा पोषणं क्रयविक्रयैः ।
वर्णधर्म्माख्यिमे प्रोक्ताः श्रूयतामाश्रमाश्रयः ॥"
इति मार्कण्डेयपुराणे मदालसोपाख्यानाध्यायः ॥
अपरच्च ।
"ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिताः।
ते सम्यगुपजीवेयुः षट्कर्म्माणि यथाक्रमम् ॥
अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव षट् कर्म्माण्यग्रजन्मनः;
वस्त्रान्तु कर्म्मणामस्य त्रीणि कर्म्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥
त्रयो धर्म्मा निवर्त्तन्ते ब्राह्मणात् चत्रियं प्रति ।
अध्यापनं याजनच्च तृतीयच्च प्रतिग्रहः ॥
वैश्यं प्रति तथैवैते निवर्त्तेरन्निति स्थितिः ।
न तौ प्रति हि तान् धर्म्मान् मनुराह प्रजा-
पतिः ॥
शस्त्रास्त्रभृत्त्वं चत्रस्य वणिक्पशुकृषिर्विशः ।
आजीवनार्थं धर्म्मस्तु दानमध्ययनं यजिः ॥
वेदाभ्यासो ब्राह्मणस्य चत्रियस्य च रक्षणम् ।
वार्त्ताकर्म्मैव वैश्यस्य विशिष्टानि स्वकर्म्मसु ॥
अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्म्मणा ।
जीवेत् चत्रियधर्म्मेण स ह्यस्य प्रत्यनन्तरः ॥
उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् ।
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम् ॥
वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः चत्रियोऽपि वा ।
हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ॥
कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्विगर्हिता ।
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ॥
इदन्तु वृत्तिवैकल्यात् त्यजतो धर्म्मनैपुणम् ।
विट्पण्यमुद्धरोद्धारं विक्रेयं वित्तवर्द्धनम् ॥
सर्व्वान्नसानपोहेत क्षतान्नच तिलैः सह ।
अश्मनो लवणच्चैव पशवो ये च मानुषाः ॥
सर्व्वच्च ताम्रवं रक्तं ग्राम्यचौमाविकानि च ।
अपि चेत् स्युररक्तानि फलमूले तथौषधीः ॥
अपः शुक्लं विषं मांसं सोमं गन्धाश्च सर्व्वशः ।
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कृशान् ॥
आरण्यांश्च पशून् सर्व्वान् दंष्ट्रिणश्च वयांसि च ।
मद्यं नीलीञ्च लाक्षाञ्च सर्व्वांश्चैकशफांस्तथा ॥
कामसुत्पाद्य शक्त्यास्तु स्वयमेव कृषीवलः ।
विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिर-
स्थितान् ॥
भोजनाभ्यञ्जनाद्दानाद्यदन्यत् कुरुते तिलैः ।
कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ॥
उद्यः पतति मांसेन लाक्षया लवणेन च ।
त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात् ॥
इतरेषान्तु पण्यानां विक्रयादिह कामतः ।
ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥
रसा रसैर्निमातव्या न त्वेव लवणं रसैः ।
कृतान्नच्चाकृतान्नेन तिला धान्येन तत्समाः ॥
जीवेदेतेन राजन्यः सर्व्वेणाप्यनयङ्गतः ।
न त्वेव न्याय्यां वृत्तिमभिमन्येत कर्हिचित् ॥
यो लोभाद्यमो ज्ञात्वा जीवेदुत्तरकर्म्मभिः ।
तं राजा निर्द्धनं कृत्वा चिप्रमेव प्रवासयेत् ॥
वरं स्वधर्म्मो विगुणो न पारक्यः सुनुष्ठितः ।
परधर्म्मेण जीवन् हि सद्यः पतति जातितः ॥
वैश्योऽजीवन् स्वधर्म्मेण शूद्रवृत्त्यापि वर्त्तयेत् ।
अनाचरन्नकार्य्याणि निवर्त्तेत च शक्तिमान् ॥
अशक्नुवंस्तु शुश्रूषां शूद्रः कर्त्तुं द्विजन्मनाम् ।
पुत्रदारात्ययं प्राप्तो जीवेत कारुकर्म्मभिः ॥
वैकर्म्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः ।
तानि कारुकर्म्माणि शिल्पानि विविधानि च ॥
वैश्यवृत्तिमनातिष्ठन् ब्राह्मणः स्वे पथि स्थितः ।
अवृत्तिकर्शितः सीदन्निमं धर्म्मं समाचरेत् ॥
सर्व्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयङ्गतः ।
पवित्रं दुष्यतीत्येतत् धर्म्मतो नोपपद्यते ॥
नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् ।
दोषो भवति विप्राणां ज्वलनाम्बुसमा हि ते ॥
जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।
आकाशमिव पङ्केन न स पापेन लिप्यते ॥
अजीगर्त्तः सुतं हन्तुमुपासर्पदुदग्रचित्तः ।
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन् ॥
श्रमांसमिच्छन्नात्मानं धर्म्माधर्म्मविचक्षणः ।
प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान् ॥
भरद्वाजः क्षुधार्त्तस्तु सपुत्रो विजने वने ।
बह्वीर्गाः प्रतिजग्राह वृधोक्षण्यो महातपाः ॥
क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम् ।
चण्डालहस्तादादाय धर्म्माधर्म्मविचक्षणः ॥
प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि ।
प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ॥
याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम् ।
प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः ॥
अपध्नोमेरपैल्वेनो याजनाध्यापनैः कृतम् ।
प्रतिग्रहनिमित्तन्तु त्यागेन तपसैव च ॥
शिलोञ्छमप्याददीत विप्रो जीवन् यतस्ततः ।
प्रतिग्रहाच्छिलः श्रेयांस्तस्योञ्छः प्रशस्यते ॥
सीदद्भिः कृष्यमिच्छद्भिर्धनं वा पृथिवीपतिः ।
याच्यः स्यात् स्नातकैर्विप्रैरदित्संस्याममर्हति ॥
अव्रतस्य कृतात् क्षेत्राद्गौरजीविकमेव च ।
हिरण्यं धान्यमन्नच्च पूर्व्वं पूर्व्वमदोषवत् ॥
सप्तवित्तागमा धर्म्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥
विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः
कृषिः ।
धृतिर्भैक्षं कुसीदञ्च दश जीवनहेतवः ॥
ब्राह्मणः चत्रियो वापि वृद्धिं नैव प्रयोजयेत् ।
कामन्तु खलु धर्म्मार्थं दद्यात् पापीयसेऽल्पि-
काम् ॥
चतुर्थमाददानोऽपि चत्रियो भागमार्यहि ।
प्रजा रक्षन् परं शक्त्या किल्बिषात् प्रतिमुच्यते ॥
स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ।
शस्त्रेण वैश्यानृत्विजा धर्म्ममाहारयेद्बलिम् ॥
धान्येऽष्टमं विशां शुल्कं विंशं कार्यापणा-
वरम् ।
कर्म्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा ॥
शूद्रस्तु वृत्तिमाकाङ्क्षन् चत्रमाराधयेदृषिं ।
धनिनं वाप्युपाश्रित्य वैश्यं शूद्रो जिजीविषेत् ॥
स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः ।
जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यता ॥
विप्रसेवैव शूद्रस्य विशिष्टं कर्म्म कीर्त्यते ।
यदतोऽन्यद्धिकुरुते तद्भवत्यस्य निष्फलम् ॥
प्रकल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद्यथार्हतः ।
शक्तिञ्चावेक्ष्य दाक्ष्यञ्च भृत्यानाञ्च परिग्रहम् ॥
उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च ।
पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः ॥
न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति ।
नास्याधिकारो धर्म्मेऽस्ति न धर्म्मात् प्रतिषेध-
नम् ॥
धर्म्मैरेवन्तु धर्म्मज्ञाः सतां वृत्तमनुष्ठिताः ।
मन्वन्वयं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ॥
यथा तथाहि सद्वृत्तमातिष्ठन्नसूयकः ।
तथा तथेमं चामुञ्च लोकं प्राप्नोत्यनिन्दितः ॥
क्लेशेनापि हि शूद्रेण न कार्य्यो धनसञ्चयः ।
शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते ॥
एते चतुर्णां वर्णानामापद्धर्म्माः प्रकीर्त्तिताः ।
यान् सम्यगनुतिष्ठन्तो व्रजन्ति परमां गतिम् ॥
एष धर्म्मविधिः कृत्स्नश्चातुर्व्वर्ण्यस्य कीर्त्तितः ।
अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम् ॥"
इति मानवे धर्म्मशास्त्रे भृगुप्रोक्तायां संहितायां दशमोऽध्यायः ॥ * ॥ अन्यत् वर्णशब्दे द्रष्टव्यम् ॥

वर्णनं, क्ली, (वर्ण्यते स्तूयते विस्तारे रञ्जनादौ + ल्युट् ।) स्तवनम् । (यथा, भागवते । १० । ७४ । ३० ।
"इत्थं निशम्य दमघोषसुतः स्वपीठा-
दुत्थाय कृष्णगुणवर्णनजातमन्युः ।
उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी
संश्रावयन् भगवते परुषाण्यभीतः ॥")
विस्तरणम् । शुक्लादिवर्णयोजनम् । दीपनम् । इति वर्णधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥

वर्णना, स्त्री, (वर्ण + णिच् + युच् । टाप् ।) गुणकथनम् । तत्पर्य्यायः । स्तुतिः २ स्तवः ३ स्तोत्रम् ४ स्तुतिः ५ नुतिः ६ शंसा ७ प्रशंसा ८ अर्थवादः ९ । इति हेमचन्द्रः । २ । १६१ ॥ (यथा, कथासरित्सागरे । ३२ । १६६ ।
"विदग्धा अपि वर्ण्यन्ते विटवर्णनया स्त्रियः ॥")

वर्णनीयं, त्रि, (वर्ण + कर्म्मणि अनीयर् ।) वर्ण्यम् । वर्णितव्यम् । (यथा, साहित्यदर्पणे ६ परिच्छेदे ।

"वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥") वर्ण्याः पदार्था यथा,—
"अथ वर्ण्यानि कथ्यन्ते तानि यानि कवीश्वरैः।
महाकाव्यप्रभृतिषु प्रबन्धेषु बबन्धिरे ॥
राजा राजवधूपुरोहितकुमारामात्यसैन्याधिपाः
देशग्रामपुरीसरोऽब्धिसरिदुद्यानाद्रयरण्याश्रमाः।
मन्त्रो दूतरणप्रयाणमृगयाश्चेभर्तुनेन्द्रोदया
वीहारो विरहः स्वयंवरसुरा पुष्पाम्बुखेला रतम् ॥"
इति कविकल्पलतायाम् १ स्तवके १ कुसुमम् ॥ (स्तवाई:। वर्णधारयवर्णगात्। यथा, भागवते। ३। २२। ३७।
"एतत्ते आदिराजस्य मनोश्चरितमद्भुतम्।
वर्णितं वर्णनीयस्य तदपत्योदयं शृणु ॥")

वर्णपात्रं, क्ली, (वर्णस्य पात्रम्।) चित्रकारस्य नीलादिरागस्याधारः। यथा,—
"मल्लिका वर्णपात्रं स्यात् तूलिका लेखकूर्चिका ॥"
इति शब्दमाला ॥

वर्णपुष्पकः, पुं, (वर्णवन्ति नानावर्णानि पुष्पाणि यस्य। कप्।) राजतरुपुष्पवृक्षः। इति राजनिघण्टः ॥

वर्णपुष्पी, स्त्री, (वर्णवन्ति पुष्पाणि यस्याः। ङीष्।) उष्ट्रकाक्षीपुष्पवृक्षः। इति राजनिघण्टः ॥

वर्णप्रसादनं, क्ली, (वर्णस्य प्रसादनं यस्मात्।) अगुरु। इति राजनिघण्टः ॥

वर्णमाता, स्त्री, (वर्णस्य मातेव ककारादिवर्णप्रसूत्वात्।) लेखनी। इति हारावली ॥

वर्णमातृका, स्त्री, (वर्णानां वर्णमालानां मातृकेव।) सरस्वती। इति शब्दरत्नावली ॥

वर्णमाला, स्त्री, जातिभेदः। (वर्णानां माला समूहः।) अक्षरश्रेणी। तत्र संस्कृतवर्णाः५० अपभ्रंशमालायाम् ५१। द्रह्मदेशीयवर्णाः २६। फरासीयाः २३। हिब्रू अर्थात् इहुदीयाः २२। आरबीयाः २८। पारसीयाः ३१। तुरस्कीयाः ३१। ग्रीकीयाः ४१। ग्रिक् अर्थात् ग्रुनानीयाः २४। लाटिनदेशीयाः २२। रूष् अर्थात् ओलन्दाजीयाः२६। स्पानदेशीयाः२७। इटालिदेशीयाः २०। तातारीयाः २०२। ब्रह्मदेशीयाः १६। चीनदेशीयवर्णाः शब्दात्मकाः तच्छब्दसंख्याः ८०००० ॥ * ॥ अकारादिककारान्तवर्णरूपैकपञ्चाशद्वर्णमाला। यथा, सनत्कुमारसंहितायाम्।
"क्रमोत्क्रमगतैर्माला मातृकार्णैः समेरुकैः।
सबिन्दुकैः साष्टवर्गैरन्तर्यजनकर्मणि ॥"
आदि कु पु टु तु पु यु शवोऽष्टौ वर्गाः प्रकीर्तिताः। अकारादिवर्णान् सबिन्दून् प्रत्येकं कृत्वा घृतं संजप्य अकारादीनां कवर्गादीनाञ्च वर्णानां अन्तिमवर्णं सानुस्वारं कृत्वा पूर्ब्बसूचार्य्य मन्त्रजपः कार्य्यः। अनेन प्रकारेणाष्टोत्तरशतसंख्यो जपो भवति। अन्तर्यजनमित्युपलक्षणम्।
"सबिन्दुं वर्णमुच्चार्य पश्चान्मन्त्रं जपेत् सुधीः।
अकारादिककारान्तं बिन्दुयुक्तं विभाव्य च ॥
वर्णमाला समाख्याता अनुलोमविलोमिका।
चकारं मेरुमेवात्र तत्र मन्त्रं जपेन्नहि ॥"
इति नारदीयवचनात् ॥
प्रकारान्तरं विष्णुरुद्रेश्वरे।
"अनुलोमविलोमेन वर्णाष्टकविभेदतः।
मन्त्रेणान्तरितान् वर्णान् वर्णैरन्तरितान् मनून् ॥
कुर्य्यादूर्ध्वमयीं मालां सर्व्वतन्त्रप्रकाशिनीम्।
चरमार्णं मेरुरूपं लङ्घनं नैव कारयेत् ॥"
इति तन्त्रसारः ॥
अपि च।
"अनुलोमविलोमेन कूलप्रया वर्णमालया।
आदिलान्तलादि आन्तक्रमेण परमेश्वरि!।
चकारं मेरुरूपञ्च लङ्घयेन्न कदाचन ॥"
इति सुरूपमालातन्त्रम् ॥

वर्णरेखा, स्त्री, (वर्णा लिख्यन्तेऽनयेति। लिख+करणे घञ्। रलयोरैक्यम्।) कठिनी। इति चिकाकशेषः ॥

वर्णलेखिका, स्त्री, (वर्णलेखा+स्वार्थे कन्। टापि अत इत्वम्।) कठिनी। इति रत्नमाला ॥

वर्णवती, स्त्री, (वर्णोऽस्त्यस्यामिति। वर्ण+"रसादिभ्यश्च।" ५। २। ९५। इति मतुप्। मस्य वः।) हरिद्रा। इति जटाधरः ॥ वर्णविग्रिष्टे, त्रि ॥

वर्णविलोढकः, पुं, (वर्णान् विलोढयतीति। वि+लोढि+खुल्।) श्लोकस्तेनः। सन्धिचौरः। इति मेदिनी। के, २३६ ॥

वर्णसङ्करः, पुं, (वर्णतो ब्राह्मणादिभ्यः वर्णानां वा सङ्करो मिश्रणं यत्र।) मिश्रितजातिः। तद्विवरणं यथा,—
"बभूवुर्ब्रह्मणो वक्त्रादन्या ब्राह्मणजातयः।
ब्रह्मणो बाहुदेशाच्च जाताः क्षत्रियजातयः ॥
ऊरुदेशाच्च वैश्याश्च पादतः शूद्रजातयः।
तासां सङ्करजातेन बभूवुर्वर्णसङ्कराः ॥
गोपनापितलौलाश्च तथा मोदकमूलकौ।
ताम्बूलिपर्णकारौ च तथा वणिक्कजातयः ॥"
लीलास्थाने भाला इति मूलवस्थाने कूवर इति च पाठः।
"इत्येवमाद्या विप्रेन्द्र! सङ्कराः परिकीर्तिताः।
शूद्राविप्रोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः ॥
विप्रकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः।
ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः।
कुम्भकारः कंसकारः षड्ऐते शिल्पिनां वराः ॥
क्षत्रधारश्चित्रकरः स्वर्णकारस्तथैव च।
पतितास्ते ब्रह्मशापादजात्या वर्णसङ्कराः ॥"
अजात्या इत्यत्र अयाज्या इत्यपि पाठः।
"स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम।
बभूव सद्यः पतितो ब्रह्मशापेन कर्म्मणा ॥
सूत्रधारो द्विजातीनां शापेन पतितो भुवि।
ग्रीष्मश्च यज्ञकाष्ठञ्च न ददौ तेन हेतुना ॥
यतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा।
पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपतः ॥
कश्चिद्द्विजविशेषेण संसर्गात् स्वर्णकारिणः।
स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः ॥
कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्य्यतः।
बभूवाट्टालिकाकारः पतितो जारदोषतः ॥
अट्टालिकाकारवीर्य्यात् कुम्भकारस्य योषिति।
बभूव कोटिकः सद्यः पतितो ग्रहकारकः ॥
कुम्भकारस्य वीर्य्येण सद्यः कोटिकयोषिति।
बभूव तैलकारश्च कुटिलः पतितो भुवि।
सद्यः क्षत्रियवीर्य्येण राजपुत्रस्य योषिति।
बभूव तीवरश्चैव पतितो जारदोषतः ॥
तीवरस्य तु वीर्य्येण तैलकारस्य योषिति।
बभूव पतितो दस्युर्लेटश्च परिकीर्त्तितः ॥
लेटस्तीवरकन्यायां जनयामास षण्डरान्।
माहं मल्लं मातरञ्च भडं कोलञ्च कन्दरम् ॥"
कन्दरस्थाने कलन्दर इति वा पाठः।
"ब्राह्मण्यां शूद्रवीर्य्येण पतितो जारदोषतः।
सद्यो बभूव चाण्डालः सर्व्वसारधमोऽशुचिः ॥
तीवरेणैव चाण्डाल्यां चर्म्मकारो बभूव ह।
चर्म्मकार्य्याञ्च चाण्डालात् मांसच्छेदी बभूव ह ॥
मांसच्छेद्यां तीवरेण कौंचश्च परिकीर्त्तितः।
कौंचक्षत्रियात्तु केवर्त्तात् काङ्कारः परिकीर्त्तितः॥
सद्यश्चाण्डालकन्यायां लेटवीर्य्येण शौनक!।
बभूवतुर्द्वौ पुत्रौ हड्डिकशौल्किकौ तथा ॥"
हड्डिकशौल्किकावित्यत्र हुडौ हड्डिडमौ इत्यपि पाठः।
"क्रमेण हड्डिकन्यायां सद्यश्चाण्डालवीर्य्यतः।
बभूवुः पञ्चपुत्राश्च धरा वनचराश्च ते ॥
लेटात्तीवरकन्यायां गङ्गातीरे च शौनक।
बभूव सद्यो यो बालो गङ्गापुत्रः प्रकीर्त्तितः ॥
गङ्गापुत्रस्य कन्यायां वीर्य्येण वैश्यधारिणः।
बभूव वैश्यधारी च पुत्रो युक्ती प्रकीर्त्तितः ॥
वैश्यात्तीवरकन्यायां सद्यः शुक्ती बभूव ह।
शुक्तीयोषिति वैश्यात्तु पौल्कश्च प्रकीर्त्तितः ॥
क्षत्रात् करणकन्यायां राजपुत्रो बभूव ह।
राजपुत्रात्तु करणादागरीति प्रकीर्त्तितः ॥
क्षत्रवीर्य्येण वैश्यायां केवर्त्तः परिकीर्त्तितः।
कलौ तीवरसंसर्गाद्धीवरश्च प्रकीर्त्तितः ॥"
प्रकीर्त्तित इत्यत्र पतितो भुवि इति वा पाठः।
"तीवर्य्यां धीवरात् पुत्रो बभूव रजकः स्मृतः।
रजक्यां तीवरादापि कोदाली च बभूव ह ॥
गोपिताद्गोपकन्यायां सर्व्वस्वी तस्य योषिति।
क्षत्राद्बभूव आघश्च बलवान् खगहिंसकः ॥
तीवरात् मुक्तिकन्यायां बभूवुः सप्त पुत्रकाः।
ते सप्तौ हड्डिसंसर्गाद्बभूवुर्म्लेच्छवः सदा ॥

ब्राह्मण्यान्त्रिवीर्य्येण ऋतोः प्रथमवासरे ।
कुत्सितश्चोदरे जातः कूदरस्तेन कीर्त्तितः ॥
तदंशौचं विप्रतुल्यं पतित ऋतुदोषतः ।
मद्यः कोटिकसंसर्गादधमो जगतीतले ॥
ब्राह्मवीर्य्येण वैश्यायान्तृतोः प्रथमवासरे ।
जातः पुत्रो महादस्युर्बलवांश्च धनुर्द्धरः ॥
चकार वागतीतञ्च क्षत्रियो वारितस्तया ।
तेन जात्या स पुत्रश्च वागतीतः प्रकीर्त्तितः ॥
ब्राह्मवीर्य्येण शूद्रायान्तृतोर्दोषेण पापतः ।
बलवन्तो दुरन्ताश्च बभूवुर्म्लेच्छजातयः ॥
अविद्वत्कर्म्माः क्रूराश्च निर्भया रणदुर्ज्जयाः ।
शौचाचारविहीनाश्च दुर्ह्रषा धर्म्मवर्ज्जिताः ॥
म्लेच्छात् कुविन्दकन्यायां जोलाजातिर्बभूव ह ।
जोलात् कुविन्दकन्यायां शराकः परिकीर्त्तितः ॥
ब्रह्मसक्थ्नोदोषेण वक्त्राच्च पूतजातयः ।
तासां नामानि संख्याञ्च को वा वक्तुं द्विज
क्षमः ॥
वैद्योऽश्विनीकुमारेण जातश्च विप्रयोषिति ।
वैद्यवीर्य्येण शूद्रायां बभूवुर्म्लेच्छयो जनाः ।
ते च ग्राम्यगुरुज्ञाश्च मन्त्रौषधिपरायणाः ।
तेभ्यश्च जाताः शूद्रायां ते चालयाद्विजो
भुवि ।"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥*॥

अपि च ।

"अयं द्विजैर्हि विद्वद्भिः पशुधर्म्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेणे राज्यं प्रशासति ॥
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा ।
वर्णानां सङ्करं चक्रे कामोपहतचेतसः ॥
ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थे तं विगर्हन्ति साधवः ॥*॥
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥
सर्व्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु ।
आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते ।
स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान् ।
सदृशानेव तानाहुर्मातृदोषविगर्हितान् ॥
अनन्तरासु जातानां विधिरेष सनातनः ।
द्व्येकान्तरासु जातानां धर्म्ये विद्यादृषि
विधिम् ॥
ब्राह्मणात् वैश्यकन्यायामम्बष्ठो नाम जायते ।
विप्रादः शूद्रकन्यायां यः पारशव उच्यते ॥
क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान् ।
उग्रसूद्रवपुर्नृणुग्रो नाम प्रजायते ॥
विप्रस्य त्रिषु वर्णेषु नृपतेर्व्वैश्यतोऽधमे ।
वैश्यस्य वर्णे चैकस्मिन् षड्ते ऽपसदाः स्मृताः ॥*
क्षत्रियादिप्रकन्यायां क्रमतो भवति जातितः ।
वैश्याभागधवैदेह्यौ राजविप्राङ्गनासुतौ ।
शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम् ।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः ।
एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ ।
क्षत्तृवैदेहकौ सद्वत् प्रातिलोम्येऽपि जन्मनि ॥*॥
मूर्द्धा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम् ।

तानन्तरगान्वस्तु मातृदोषात् प्रचक्षते ॥
ब्राह्मणाद्दुग्रकन्यायामाहितो नाम जायते ।
आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वणः ॥
आयोगवश्च क्षत्ता च चण्डालश्चाधमो नृणाम् ।
प्रातिलोम्येन जायन्ते शूद्रादपसदाश्रयः ॥
वैश्याभागधवैदेह्यौ क्षत्रियात् सुत एव तु ।
प्रतीपमेते जायन्ते परेऽप्यपसदाश्रयः ॥
जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः ।
शूद्राज्जातो निषादात्तु स वै कुक्कुटकः स्मृतः ॥
क्षत्तुर्जातस्तथैवायां श्वपाक इति कीर्त्यते ।
वैदेहकेन तल्पस्त्रासुत्पन्नो वेण उच्यते ॥
द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान् ।
तान् सावित्रीपरिभ्रष्टान् व्रात्या इति विनि-
र्द्दिशेत् ॥
व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः ।
आवन्त्यवाटधानौ च पुष्पधः शैख एव च ।
झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च ।
नटश्च करणश्चैव खश्चो द्रविड़ एव च ॥
वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च ।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च ।
अभिचारेषु वर्त्तानामवैद्यावेदनेन च ।
स्वकर्म्मभ्यश्च त्यागेन जायन्ते वर्णसङ्कराः ॥*॥
सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः ।
अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः ॥
सूतो वैदेहकश्चैव चण्डालश्च नराधमः ।
मागधः क्षत्तृजातिश्च तथायोगव एव च ।
एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु ।
मातृजातां प्रसूयन्ते प्रवरासु च योनिषु ॥
यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते ।
आनन्तर्य्यात् स्वयोन्यान्तु तथा वाह्येष्वपि क्रमात् ॥
ते त्रापि बाह्यान् सुबहूंस्ततोऽप्यधिकदूषि-
तान् ।
परस्परस्य दारेषु जनयन्ति विगर्हितान् ॥*॥
यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते ।
तथा बाह्यतरं बाह्यश्चातुवर्ण्ये प्रसूयते ।
प्रतिकूलं वर्त्तमाना बाह्यबाह्यतरान् पुनः ।
हीना हीनान् प्रसूयन्ते वर्णान् पञ्चदशैव तु ।
प्रसाधनोपचारघ्नमदासं दासजीवनम् ।
सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे ।
मैत्रेयकन्तु वैदेह्यो माधूकं संप्रसूयते ।
नृत्तं प्रधानजीवं यो वण्टतालोपजीवके ।
निषादो मार्गवं सूते दासं नौकर्म्मजीविनम् ।
कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः ।
मृतवस्त्रभृतस्तु नारीषु गर्हितान्नाशनासु च ।
अवस्कायोगवीष्वेते जातिहीनाः पृथक्त्रयः ।
कारावरो निषादात्तु चर्म्मकारः प्रसूयते ।
वैदेहकादम्बष्ठ्यां बहिर्ग्रामप्रतिश्रयौ ।
चण्डालात् पाण्डुसोपाकक्षत्तृसारथ्यवहारवान् ।
आन्ध्रिकिको निषादेन वैदेह्यामेव जायते ।
चण्डालेन तु सोपाकौ मूलव्यसनवृत्तिमान् ।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥
निषादस्त्री तु चण्डालात् पुत्रमज्ञानजायिनम् ।

ज्ञानज्ञानगोचरं सूते ब्राह्मणामपि गर्हितम् ॥
सङ्करे जातयस्त्वेना; पितृमातृप्रदर्शिनाः ।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्म्मभिः ॥
स्वजातिजानन्तरजाः षट्सु ता द्विजधर्म्मिणः ।
शूद्राज्ञानु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः ॥
तपोबीजप्रभावास्तु ते गच्छन्ति युगे युगे ।
उत्कर्षञ्चापकर्षञ्च मनुष्येष्विह जन्मतः ॥
ब्राह्मणैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चोड्रद्रविड़ाः काम्बोजा यवनाः शकाः ।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः ॥
सुखबाहुरुपज्ञानां या लोके जातयो बहिः ।
म्लेच्छवाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः ॥
ये द्विजानामपसदा ये चाप्यध्वंसजाः स्मृताः ।
ते निन्दितैर्वर्त्तयेयुर्द्विजानामेव कर्म्मभिः ॥*॥
सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम् ।
वैदेहकानां स्त्रीकार्य्यं मागधानां वणिक्पथः ॥
मत्स्यघातो निषादानां त्वष्टस्त्वायोगवस्य च ।
मेदान्ध्रपुक्कसमृगुलुब्धकत्वमुदाहृतम् ॥
क्षत्तुश्चण्डालसानान्तु विलोकोवधबन्धनम् ।
धिग्वणानां चर्म्मकार्य्यं वेणानां भाण्डवादनम् ॥
शैलेयमद्यमद्यानेषु शौण्डेयूपवनेषु च ।
वसेयुरेते विज्ञाता वर्त्तयन्तः स्वकर्म्मभिः ॥*॥
चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः ।
अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्दभम् ।
वासांसि म्रतचेलानि भिन्नभाण्डेषु भोजनम् ।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन् ।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ।
अन्नमेषां पराधीनं देयं स्याद्विदुषां बहिः ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ।
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः ।
अबान्धवं शवं चैव निर्हरेयुरिति स्थितिः ।
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया ।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ।
वर्त्तयेतमविज्ञातं नरं कलुषयोनिजम् ।
आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत् ॥
अनार्य्यतानिष्ठुरताक्रूरतानिष्क्रियात्मताः ।
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ।
पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा ।
न कथञ्चनदुर्योनिः प्रकृतिं स्वां नियच्छति ।
कुले मुख्येऽपि जातस्य यस्य स्यादयोनिसङ्करः ।
संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ।
यत्र क्वेतेऽपिविध्वंसा जायन्ते वर्णदूषकाः ।
राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ।
ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः ।
स्त्रीबालाभ्युपपत्तौ च ब्राह्मणानां सिद्धिकारकम् ॥
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
एतं सामासिकं धर्म्मं चातुर्व्वर्ण्येऽब्रवीन्मनुः ॥*॥
शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत् प्रजायते ।
अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमादयुगात् ।
शूद्रो ब्राह्मणतामेति ब्राह्मणश्चेति शूद्रताम् ।

क्षत्रियाज्जातमेवन्तु विद्याद्वैश्यात्तथैव च ।
अनार्य्यायां समुत्पन्नो ब्राह्मणात् यदृच्छया ।
ब्राह्मण्यामप्यनार्य्यात्तु श्रेयस्त्वं क्रमेति चेद्भवेत् ।
जातो नार्य्यामनार्य्यायामार्य्यादार्य्यो भवेद्-
गुणैः ।
जातोऽप्यनार्य्यादार्य्यायामनार्य्य इति निश्चयः ॥
नाद्वभावप्यसंस्कार्य्यावितिधर्म्मो व्यवस्थितः ।
वैगुण्याज्जन्मनः पूर्व्व उत्तरः प्रतिलोमतः ॥
सुरोवक्त्रेव सुक्षेत्रे जातं सम्पद्यते यथा ।
तथार्य्याज्जात आर्य्यायां सर्व्वं संस्कारमर्हति ॥
बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः ।
बीजक्षेत्रे तथैवान्ये तत्रेयन्तु व्यवस्थितिः ।
अक्षेत्रे बीजसुत्सृष्टमन्तरैव विनश्यति ।
अबीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत् ॥
यस्माद्बीजप्रभावेण तिर्य्यग्जा ऋषयोऽभवन् ।
पूजिताश्च प्रशस्ताश्च तस्माद्बीजं प्रशस्यते ।
अनार्य्यमार्य्यकर्म्माणमार्य्यानार्य्यकर्म्मिणम् ।
सम्प्रधार्य्याब्रवीद्धाता न समौ नासमाविति ॥"
इति मानवे ९ । १० अध्यायौ ॥ * ॥

वर्णसङ्करस्य कारणं दोषाश्च यथा,—
"अधर्म्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥
सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदक क्रियाः ॥
दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः ।
उत्साद्यन्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वताः ॥
उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन ! ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥

वर्णसिः, पुं, (वृणोति स्थलमिति । वृञ आवरणे + "सानसिवर्णसिपर्णसीति ।" उणा० ४ । १०७ । इति असिः धातोर्नुक् च ।) जलम् । इत्युणादि-कोषः ॥

वर्षा, स्त्री, (वृण्यते भक्ष्यते इति । वृञ भक्षणे + कर्म्मणि घञ् । ततष्टाप् ।) व्याघ्रकी । इति हेमचन्द्रः ॥

वर्णाङ्गा, स्त्री, (वर्णा अक्षरलेखनायेति । अङ्ग + करणे घञ् । ततष्टाप् ।) लेखनी । इति शब्दरत्नावली ॥

वर्णाटः, पुं, (वर्णान् अटतीति । अट् + अच् ।) गायनः । चित्रकरः । क्षीणजीवनः । इति मेदिनी । टे, ५५ ॥

वर्णात्मा, [त्मन्] पुं, (वर्णः अक्षरं आत्मा स्वरूपं यस्य ।) शब्दः । इति जटाधरः ॥

वर्णाधिपः, पुं, (वर्णानां ब्राह्मणादीनामधिपः ।) ब्राह्मणक्षत्रियवैश्यशूद्राणामधिपतियद्यः । यथा,
"ब्राह्मणे शुक्रवागीशौ क्षत्रिये भौमभास्करौ ।
चन्द्रो वैश्ये बुधः शूद्रे पतिर्मन्दोऽन्यजे जने ॥"
इति ॥
"स्वाध्याये वेद वर्णाधिप इह सुमहे चौरमे-
धादितो च ।"
इति च ज्योतिस्तत्त्वम् ॥

वर्णाहः, पुं, (वर्णमर्हतीति । अर्ह + अण् ।) शुक्लः ।
इति राजनिर्घण्टः ॥

वर्णि, क्ली, (वर्ण्यते स्तूयते इति । वर्ण स्तुतौ + इन् ।) स्वर्णम् । इति सिद्धान्तकौमुदी ॥ ("वर्णेर्वलिश्चाहिरण्ये ।" उणा० ४ । १२३ । इत्युक्तेः अहिरण्ये तु वलिरित्येव ॥ क्वचित् पुंल्लिङ्गोऽपि ॥)

वर्णिकः, पुं, (वर्णा लेखनेन सन्ति अस्येति । वर्ण + ठन् ।) लेखकः । यथा,—
"लेखकोऽक्षरपूर्व्वाः स्युश्चणजवौकचषवः ।
वर्णिको लिपिकरश्चाक्षरन्यासे लिपिर्लिविः ॥"
इति हेमचन्द्रः । ३ । १४८ ॥

वर्णिका, स्त्री, (वर्णा अक्षराणि लेखनेन सन्त्यस्या इति । वर्ण + ठन् + टाप् ।) कठिनी । यथा,—
"लेखन्यां वर्णिकापि स्यात् कठिन्यामपि वर्णिका ॥"
इति हारावली । २६६ ॥
मसिः । इति त्रिकाण्डशेषः ॥ काञ्चनस्य उत्-कर्षः । यथा,—
"वर्णकाचारयोः स्त्री तु चन्दने च विलेपने ।
द्वयोर्नाट्यादिषु स्त्री स्यादुत्कर्षे काञ्चनस्य च ॥"
इति मेदिनी । के, १५२ ॥

वर्णितः, त्रि, (वर्ण + क्त ।) स्तुतियुक्तः । तत्-पर्य्यायः । ईलितः २ ग्रस्तः ३ पलायितः ४ पलायितः ५ प्रद्रुतः ६ पलितः ७ पलितः ८ गीर्णः ९ अभिद्रुतः १० ईडितः ११ स्तुतः १२ । इत्यमरः । ३ । २ । ११० ॥ स्तुतः १३ । इति जटाधरः ॥ (विस्तारितः । यथा, महाभारते । १ । २ । २०६ ।
"चतुर्थमेतद्विपुलं वेराटं पर्व्व वर्णितम् ॥"
कथितः । यथा, कथासरित्सागरे । १६ । ३६ ।
"स्वभर्त्तुश्च न मया दरिद्रस्यापि वर्णितम् ॥")

वर्णिनी, स्त्री, (वर्णोऽस्त्यस्या इति । वर्ण + इनिः । ङीप् ।) हरिद्रा । इति राजनिर्घण्टः ॥ वनिता । इति हेमचन्द्रः । ३ । १६८ ॥

वर्णी, [न्] पुं, (वर्णा अक्षराणि लेखनेन सन्त्य-स्येति । वर्ण + इनिः ।) लेखकः । (वर्णा नील पीतादयः लेखनेन सन्त्यस्येति । इनिः ।) चित्र-करः । (यथा, महाभारते । १२ । ६६ । ५७ ।
"अक्षरकुशलज्ञानां प्रजाश्चक्षुरवर्णिनाम् ।
यवसेक्षणदिक्षानां कारयेत च सञ्चयान् ॥"* ।
वर्ण + "वर्णादनङ्ब्रह्मचारिणि ।" ५ । २ । १३४ ॥"
इति इनिः ।) ब्रह्मचारी । यथा,—
"वर्णी स्यात् लेखके चित्रकरेऽपि ब्रह्म-
चारिणि ॥"
इति मेदिनी । ने, १२७ ॥
(यथा, कुमारे । ५ । ५२ ।
"सखी तदीया तमुवाच वर्णिनं
निबोध साधो ! तव चेत् कुतूहलम् ॥")

वर्णविशिष्टे, त्रि । (वर्णोत्तरपदात् तु "धर्म्मशील-वर्णान्नाच ।" ५ । २ । १३२ । इति इनिः स्यात् । यथा, कामन्दकीये नीतिसारे । २ । १६ ।
"याजनाध्यापने शुद्धे विशुद्धाच प्रतिग्रहः ।

इत्तिश्चयमिदं प्राहुर्मुनयो व्येष्ठवर्णिनः ॥"
व्येष्ठवर्णिनो ब्राह्मणस्येत्यर्थः ॥)

वर्णुः, पुं, (वृङ संभक्तौ + "अर्जिदृशीभ्यो नित्र ।" उणा० ३ । ६८ । इति णुः । स च नित् ।) नदविशेषः । इत्युणादिकोषः ॥ आदित्यः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (देशविशेषः । इत्युज्ज्वलदत्तः ॥)

वर्त्तकं, क्ली, (वर्त्तते इति । वृत् + ण्वुल् ।) वर्त्त-लोहम् । इति हेमचन्द्रः ॥ विदरि इति भाषा ॥ (पूजके, त्रि । यथा, गो० रामायणे । २ । १०७ । ९२ ।
"निवेश्य सेनां भरतः पद्भ्यां पादवतां वरः ।
अभिगन्तुं स काकुत्स्थमियेष गुरुवर्त्तकः ॥")

वर्त्तकः, पुं, (वृत् + ण्वुल् ।) पक्षिविशेषः । भारद इति भाषा ॥ (यथा, महाभारते । १३ । १११ । १०३ ।
"कौशिकस्तु ततो हत्वा नरो जायति वर्त्तकः ॥"
अस्य पर्य्यायो गुणाश्च यथा,—
"वर्त्तको वर्त्तकश्चित्रस्तलोऽन्या वर्त्तकाः स्मृताः ।
वर्त्तकोऽग्निकरः ग्रीवो ज्वरदोषत्रयापहः ।
सुरुचः शुक्रदो बल्यो वर्त्तकाख्यगुणान्वितः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
अश्वश्च खुरः । इत्यमरः । ३ । ३ । ११ ॥

वर्त्तका, स्त्री, (वर्त्तक + टाप् । "वर्त्तका शकुनौ प्राचाम् ।" इति वार्त्तिकोक्त्या न अत इत्वम् ।) वर्त्तकपक्षी । इत्यमरटीकायां रायमुकुटः ॥

वर्त्तजङ्घा, [न्] पुं, (वर्त्तनि आकाशपथे जङ्घा यस्य ।) मेघः । इति शब्दमाला ॥

वर्त्तनं, क्ली, (वर्त्तते ऽनेनेति । वृत् + करणे ल्युट् ।) वृत्तिः । इत्यमरः । २ । ६ । १ ॥ (यथा, भाग-वते । ७ । ११ । २६ ।
"सम्मार्ज्जनोपलेपाभ्यां गृहमण्डनवर्त्तनैः ;
स्वयञ्च मण्डिता नित्यं परिष्टहपरिच्छदा ॥")
साधारणवर्त्तनम् । इति शब्दरत्नावली ॥

वर्त्तनं, क्ली स्त्री, (वर्त्तते ऽनेनेति । वृत् + ल्युट् ।) तूलशाला । तकुपीठः । जीवनम् । इति मेदिनी । ने, १२६ । (यथा, मार्कण्डेये । ५० । ७१ ।
"देवतापितृमर्त्यानामतिथीनाञ्च वर्त्तनम् ।
यस्यावश्यिष्टेनान्नेन पुंसस्तस्य गृहं क्षय ॥")

वर्त्तनः, पुं, (वर्त्तते इति । वृत् + "अगुदात्तेतश्च हलादेः ।" ३ । २ । १४६ । इति युच् ।) वायनः । इति मेदिनी । ने, १२५ ॥ वर्त्तिनौ, त्रि । इत्यमरः । ३ । १ । २६ ॥ (यथा, भाग-वते । ३ । ११ । २६ ।
"एष देवर्षिभिः सर्गो ब्राह्मस्त्रैलोक्यवर्त्तनः ।
निर्म्मुक्तपितृदेवानां सम्भवो यत्र कर्म्मभिः ॥")

वर्त्तनिः, पुं, पूर्व्वदेशः । इति त्रिकाण्डशेषः ॥ (स्त्री, वर्त्तते ऽनयेति । वृत् + "वृतेश्च ।" उणा० २ । १०७ । इति अनिः । ङीप् । इत्युज्ज्वल-दत्तः ॥)

वर्त्तनी, स्त्री, (वर्त्तनि + ऋदिकारादिति ङीप् ।) पन्थाः । पेषणम् । इति शब्दरत्नावली ॥

वर्त्तमानः, पुं, (वर्त्तते इति। वृत्+शानच्। सुक्।) प्रयोगाधिकरणीभूतकालः। इति नैयायिकाः॥ तत्कालवृत्तौ, त्रि। तयोः पर्य्यायौ। अद्यतनः २ अधुनातनः ३। इति राजनिर्घण्टः॥ वैयाकरणमते तु। आरब्धापरिसमाप्तिर्वर्त्तमानः कालः। यथा। महाभारतं पठति। स तु चतुर्विधः। यथा,—

'प्रवृत्तोपरतश्चैव वृत्तावितर एव च।
नित्यप्रवृत्तः सामीप्यो वर्त्तमानश्चतुर्विधः॥'

क्रमेणोदाहरणानि। मांसं न खादति आदौ प्रवृत्तं मांसभोजनं निवर्त्तयति इत्यर्थः। इह कुमाराः क्रीडन्ति तदानीन्तनक्रीडनाभावेऽपि पूर्व्वक्रीडानां बुद्धौ वर्त्तमानत्वात्। पर्व्वतास्तिष्ठन्ति नित्यप्रवृत्तत्वात्। किञ्च पर्व्वतानां स्थितेः वर्त्तमानत्वेऽपि भूतभविष्यत्कालाभ्यां सम्बन्धविवक्षया पर्व्वतास्तस्थुः स्थास्यन्ति इत्यपि स्यात्। सामीप्यो द्विविधः। भूतसामीप्यो भविष्यत्सामीप्यश्च। भूतसामीप्ये यथा। कदा आगतोऽसि इति प्रश्ने अध्वखेदादेर्व्वर्त्तमानत्वात् एषोऽहमागच्छामि इति आगतोऽपि वदति। भविष्यत् सामीप्ये यथा। कदा गमिष्यसि इति प्रश्ने एषोऽहं गच्छामि इति गमनक्रियमाणोद्यमोऽपि वदति। इति सुबोधटीकायां दुर्गादासः॥

वर्त्तरुकः, पुं, (वर्त्तो वर्त्तनं राति गृह्णातीति। रा+बाहुलकात् ऊकः।) नदीभेदः। काकौड़ः। जलावटः। इति मेदिनी। के, २१२॥ द्वारपालः। यथा,—

"मन्त्री यन्त्रिहरोऽमात्यो दाःस्थितो वेत्रधारकः।
दौःसाधिको वर्त्तरुको गर्व्वाटो दण्डवासिनि॥"

इति त्रिकाण्डशेषः॥

वर्त्तलोहं, क्ली, (वर्त्तते इति। वृत्+अच्। ततः कर्म्मधारयः।) लौहविशेषः। विट्टरि इति भाषा। इति केचित्। तत्पर्य्यायः। वर्त्तलोहम् २ वर्त्तकम् ३ लोहसङ्करम् ४ नीलकम् ५ नीललोहम् ६ नीलजम् ७ वर्त्तलोहकम् ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। स्निग्धिरत्वम्। कफदाहपित्तनाशित्वम्। मधुरत्वम्। पित्तदाहश्रमनत्वञ्च। इति राजनिर्घण्टः॥

वर्त्तिः, स्त्री, (वर्त्ततेऽनया इति। वृत्+"कृपिवितनिवसिगमिवदिक्षिदिकौर्तिभ्यश्च।" उणा० ४। २१८। इति इन्।) भेषजनिर्म्मितम्। नयनाञ्जनम्। वेसः। गात्रानुलेपनी। दीपदशा। (यथा, भागवते। ५। २१। ८।

"यथा प्रदीपो घृतवर्त्तिमश्नन्
शिखाः सधूमा भजति क्षण्यदा खम्॥")

दीपः। इति मेदिनी। ते, ५५॥ * ॥ वर्त्तिविशेषो यथा,—

"कतकस्य पलं ग्राह्यं सैन्धवं त्रिगुणं तथा।
तेनैव रसगन्धं चौरं विड्गानि मनःशिला।
एषां वर्त्तिं क्षिपेत् कांसे तिमिरं पटलं तथा॥"

इति गारुडे १९८ अध्यायः॥

(वर्त्ततेऽनयेति। वृत्+"वृतेश्छन्दसि।" उणा० ४। १४०। इति इः। बाहुलकात् लोकेऽपि। योगकर्म्मद्वयम्। इत्युज्ज्वलदत्तः॥)

वर्त्तिकः, पुं, पक्षिविशेषः। बटेर इति हिन्दी भाषा। तत्पर्य्यायः। वार्त्तिकः २ वर्त्ती ३ गाङ्गिकायः ४। अस्य मांसगुणाः।

"तदच्च वार्त्तिकं मांसं स्निग्धोष्णं वीर्य्यपुष्टिदम्।"

तद्वत् सिद्धिरवत्। इति राजनिर्घण्टः॥

वर्त्तिका, स्त्री, वर्त्तकपक्षी। इत्यमरः॥ वर्त्तते वर्त्तत इत्यच् वर्त्तः। स्वार्थे कः वर्त्तकः। भारट इति ख्यातः। इतिलतिभ्यां तिकः वर्त्तिका स्त्रीलिङ्गः। बाटभार इति ख्याता। नामद्वयमिदमिमरशैषिका। वर्त्तिकेति स्त्रियामीत्वप्रतिषेधार्थं द्वयोरुपादानमिति माधवी। रूपभेदप्रदर्शनार्थमिति रायमुकुटः। इति तद्वीका सारसुन्दरी॥ सा च वटेर पक्षी इति भाषा ख्याता। अस्या मांसगुणाः।

"वर्त्तिका मधुरा रूक्षा कफमारुतनाशिनी॥"

इति राजवल्लभः॥

अजमोदकी। इति राजनिर्घण्टः॥ (वर्त्ति+स्वार्थे कन्। टाप्।) वर्त्तिः। वाति इति ग्लायति इति ग्लायति इति च भाषा। इत्युणादिकोषः॥ * ॥ सा पञ्चविधा। यथा,—

"पद्मसूत्रभवा दर्भगर्भसूत्रभवाथवा।
शालजा बादरी वापि फलकोशोद्भवाथवा।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधा स्मृता॥"

इति कालिकापुराणे ६८ अध्यायः॥

वर्त्तिष्णुः, त्रि, (वर्त्तते इति। वृत+"अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतमदरुच्यपत्रपतुदृधुसहचर इष्णुच्।" ३। २। १३६। इति इष्णुच्।) वर्त्तनशीलः। तत्पर्य्यायः। वर्त्तनः। इत्यमरः। ३। १। २८॥ वर्त्ती। इति हेमचन्द्रः। ३। ५३॥ (यथा, भट्टौ। ५। १।

"निराकरिष्णु वर्त्तिष्णु वर्द्धिष्णु परितो रयम्।
उत्पतिष्णु सहिष्णु च चेरतुः खरदूषणौ॥")

वर्त्तिष्यमाणः, त्रि, (वृत्+भविष्यति स्यमानप्रत्ययः।) भविष्यत्कालादिः। वर्त्तमानप्रागभावाश्रयः। इति राजनिर्घण्टः॥ (यथा, साहित्यदर्पणे। ६। ३०८।

"वृत्तवर्त्तिष्यमाणानां कथाङ्गानां निदर्शकः॥
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥")

वर्त्ती, स्त्री, (वर्त्ति+ऋदिकारादिति ङीष्।) वर्त्तिः। इत्यमरटीका॥ (यथा, महाभारते। ३। २१। २३।

"आसीदन्धयिका चास्य श्रीः श्रियं प्रसुसूचतः।
निर्व्वाणकाले दीपस्य वर्त्तीमिव दिधक्षतः॥")

वर्त्ती, [न्] (वर्त्तते इति। वृत्+णिनिः।) वर्त्तिष्णुः। इति हेमचन्द्रः। ३। ५३॥

वर्त्तुलं, त्रि, (वर्त्तते इति। वृत्+बाहुलकात् उलच्।) गोलवस्तु। तत्पर्य्यायः। निष्कलम् २ वृत्तम् ३। इत्यमरः। ३। १। ९। ६६॥

वर्त्तुलं, क्ली, गृञ्जनम्। इति राजनिर्घण्टः॥

वर्त्तुलः, पुं, कलायविशेषः। बाटुला। इति भाषा। यथा,—

"कलायस्य त्रयो भेदा खिपुटो वर्त्तुलोऽङ्कुटी।"

इति शब्दमाला॥

वर्त्तुला, स्त्री, (वर्त्तुल+टाप्।) तर्कुपाठी। इति हारावली। २१३॥ टेकोर वाँटुल इति भाषा॥

वर्त्तुली, स्त्री, (वर्त्तुल+गौरादित्वात् ङीष्।) गजपिप्पली। इति राजनिर्घण्टः॥ (विवरणमस्या गजपिप्पलीशब्दे ज्ञातव्यम्॥)

वर्त्म, [न्] क्ली, (वर्त्तते ऽनेनास्मिन् वेति। वृत्+मनिन्।) पक्ष्मणः। इत्यमरः। २। १। १५॥ (यथा, ऋग्वेदे। १। ८५। ३।

"गोमातरो यच्छुभयन्ते अञ्जिभि-
स्तनूषु शुभ्रा दधिरे विरुक्मतः।
बाधन्ते विश्वमभिमातिनमप-
वर्त्मान्येषामनुरीयते घृतम्॥"

"वर्त्मानि मार्गानसृजत्य।' इति तद्भाष्ये सायणः॥ यथा च रघौ। २। २०।

"पुरस्कृता वर्त्मनि पार्थिवेन
प्रलुप्तहृतपार्थिवधर्म्मपत्नी।
तदन्तरे सा विरराज धेनु-
र्दिनक्षपामध्यगतेव सन्ध्या॥")

नेत्रच्छदः। इति मेदिनी। ने, १२८॥ (यथा, अथर्ववेदे। २। १०।

"सितासितश्च तन्मध्ये नेत्रयोर्मङ्गलं हि तत्।
प्रच्छादनं भवेद् वर्त्म चाक्षिकूटमतः परम्॥")

वर्त्मनिः, स्त्री, (वर्त्तते इति। वृत्+"वृतेश्च" उणा० २। १०७। इति अनिः। चकारात् सुडागमोऽप्यत्रेति केचित्। वर्त्मनिरिति गोवर्द्धनः। इत्युज्ज्वलदत्तौक्या साधुः।) पक्ष्मणः। इत्युणादिकोषः॥

वर्ह, क पूर्त्तिच्छिदोः। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, वर्हयति। वृध क दीप्तावित्यत्रैव पूर्त्तिच्छिदोश्च पाठादिहेच्छा-

वस्य पाटचुरादिभ्यो णेरनित्यतां बोधयति। तेन कदाचित् णेरप्राप्तौ यगादौ वृध क इत्यस्य वृध्यते इत्यादि अस्य तु वर्द्धते इत्यादिभेदः। इति दुर्गादासः॥

वर्द्धं, क्ली, (वर्द्धयति पूरयतीति। वर्द्ध+अच्।) सीसकम्। इति हेमचन्द्रः। ३। १०६॥

वर्द्धः, पुं, (वर्द्धते इति। वृध् छेदने+अच्।) ब्राह्मणयष्टिका। इति जटाधरः॥ पूर्त्तिः। छेदः। इति वर्द्धात्वर्थदर्शनात्॥

वर्द्धकः, पुं, (वर्द्धते इति। वृध्+ण्वुल्।) ब्राह्मणयष्टिका। इत्यमरः। २। ४। ६०॥ (वर्द्धयतीति। वर्द्ध पूरणे छेदने च+ण्वुल्।) पूरके छेदके च, त्रि॥

वर्द्धकिः, पुं, (वर्द्धते छिनत्तीति। वर्द्ध+अच्। वर्द्धं करोतीति। कृञ हिंसायां+बाहुलकात् डिः।) त्वष्टा। इत्यमरः। २। १०। ६॥ (यथा, रामायणे। १। १३। ७।

"कर्म्मान्तिकान् शिल्पकरान् वर्द्धकीन् खनकानपि।
गणकान् शिल्पिनश्चैव तथैव नटनर्त्तकान्॥")

वर्द्धकी, [न्] पुं, (वर्द्धको वर्द्धोऽस्ति अस्येति। वर्द्धक+इनि।) वर्णसङ्करजातिविशेषः। बढ़ई इति हिन्दी भाषा। तत्पर्य्यायः। त्वष्टा २ वर्द्धकिः ३ तक्षा ४ सूत्रधारः ५ रथकारः ६ रथकरः ७ काष्ठतट् ८ काष्ठतक्षकः ९। इति शब्दरत्नावली॥ (यथा, वृहत्संहितायाम्। ४३। २२।

"अरभङ्गे बलभेदो
नेम्या नाशो बलस्य विज्ञेयः।
अर्थक्षयोऽक्षभङ्गे
तथाक्षिभङ्गे च वर्द्धकिनः॥")

वर्द्धनं, क्ली, (वृध् छेदपूर्त्त्योः+ल्युट्।) छेदनम्। (यथा, मनुः। २। २६।

"प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते॥")

वृद्धिः। इति मेदिनी। ने, १२३॥

वर्द्धनः, त्रि, (वर्द्धयतीति। वृध्+नन्द्यादित्वात् ल्युः। यद्वा, वर्द्धते तच्छील इति। वृध पूर्त्तौ+"अतृदासितसीति।" ३। २। १४६। इति युच्।) वर्द्धिष्णुः। इत्यमरः। ३। १। २८॥ (यथा, ऋग्वेदे। ३। ३२। १२।

"यज्ञो हि त इन्द्र वर्द्धनो भूदुत प्रियः सुतसोमो मियेधः॥")

वर्द्धनी, स्त्री, घटी। इति मेदिनी। ने, १२३॥ संमार्জ্জनी। इति हेमचन्द्रः। ३। ८२॥ सनालपात्रविशेषः। बटना इति भाषा। यथा,

"आलुः स्त्री कर्करी पारी वर्द्धनी च ललन्तिका॥"

इति जटाधरः॥ *॥

प्रतिष्ठादिकर्म्मणि तत्प्रयोजनं यथा,—

"प्रतिष्ठा यस्य देवस्य तदाख्यं कलसं न्यसेत्।
ऐन्द्र्यां पूजयेद्याम्ये अक्षतैश्च वर्द्धनीम्॥
कलसं वर्द्धनीश्चैव गृहान् वास्तोष्पतिं तथा।
आसनं तानि सर्व्वाणि प्रणवाद्यं जपेद्गुरुः॥
सूत्रगर्भं रत्नगर्भं वस्त्रयुग्मेन वेष्टितम्।
सर्व्वौषधीगन्धलिप्तं पूजयेत् कलसं गुरुः॥
देवस्य कलसे पूज्य वर्द्धन्या वस्त्रमुत्तमम्।
वर्द्धन्या तु समायुक्तं कलसं भ्रामयेदनु॥
वर्द्धनीं धारया सिक्तन्नयतो धारयेत्ततः।
अभ्यर्च्च्य वर्द्धनीकुम्भं स्थापिते देवमर्च्चयेत्॥"

इति गारुड़े ४८ अध्यायः॥

वर्द्धमानः, पुं, (वर्द्धते इति। वृध वृद्धौ+शानच्।) एरण्डवृक्षः। इत्यमरः। २। ४। ५१॥ (अस्य पर्य्यायो यथा,—

"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्वहस्तकः।
प्रचण्डो वर्द्धमानो दीर्घदण्डोऽण्डकः।
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

पशुभेदः। शराबः। (यथा, महाभारते। ७। ८०। १६।

"तथा गाः कपिला दोग्ध्रीः सवत्साः पाण्डुनन्दनः।
हेमशृङ्गीः रूप्यखुरा दत्त्वा चक्रे प्रदक्षिणम्।
स्वस्तिकान् वर्द्धमानांश्च नन्द्यावर्त्तांश्च काञ्चनान्॥"

अस्त्रिलार्थे स्त्रीवलिङ्गेऽपि दृश्यते। यथा, तत्रैव। १३। ६४। १२।

"मन्त्रासु तिलपूर्णानि वर्द्धमानानि मानवः।
प्रदाय पुत्रपशुमानिह प्रेत्य च मोदते॥"

तथा च सुश्रुते सूत्रस्थाने २६ अध्याये।

"स्त्री पुष्पिणी सवत्सा गौर्वर्द्धमानमलङ्कृता।
कन्या मत्स्याः फलं चामं स्वस्तिकं शोदकं दधि॥")

विष्णुः। इति मेदिनी। ने, २०८॥ (यथा, महाभारते। १३। १४६। ४१।

"वर्द्धनो वर्द्धमानश्च विविक्तः श्रुतिसागरः॥")

जिनविशेषः। तत्पर्य्यायः। वीरः २ चरमतीर्थङ्कृत् ३ महावीरः ४ देवार्य्यः ५ ज्ञातनन्दनः ६। इति हेमचन्द्रः। १। ३०॥ धनिनां ग्रहविशेषः। यथा,—

"स्वस्तिको वर्द्धमानश्च नन्द्यावर्त्तादयोऽपि च॥"

इति हलायुधः॥

(यथा, वृहत्संहितायाम्। ५३। ३३।

"द्वारालिन्दोऽन्तगतः प्रदक्षिणोऽम्भः शुभस्तत्स्थाप्यः।
तद्वच्च वर्द्धमाने द्वारेषु न दक्षिणं कार्य्यम्॥")

खनामख्यातदेशः। यथा,—

"प्रार्थ्या मागधशौण्डौ च वारेन्द्रीगौड़राढ़काः।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः॥"

इति ज्योतिस्तत्त्वे कूर्म्मचक्रम्॥

(भद्राश्ववर्षस्थ कुलपर्व्वतविशेषः। यथा, मार्कण्डेये। ५६। १२।

"विप्रालः कमलः कृष्णो जयन्तो हरिपर्व्वतः।
विप्रोको वर्द्धमानश्च सप्तैते कुलपर्व्वताः॥"

वृद्धिविशिष्टे, त्रि॥)

वर्द्धमानकः, त्रि, (वर्द्धमान+स्वार्थे संज्ञायां वा कन्।) वृद्धिविशिष्टः। पुं, शराबः। इत्यमरः। २।६।२१। (यथा, महाभारते। १४।६५।२०।

"भृङ्गाराणि कटाहानि कलसान् वर्द्धमानकान्॥")

स्वार्थे कप्रत्यये एरण्डवृक्षश्च॥ (आरात्रिकम्। इति महाभारतटीकायां नीलकण्ठः॥ यथा, महाभारते। ७। ५५। ४।

"नटनर्त्तकगन्धर्व्वैः पूर्णकैर्व्वर्द्धमानकैः।
नियोद्धृभिश्च क्रीड़द्भिश्च स परिहर्षितः॥")

वर्द्धापनं, क्ली, नाड़ीच्छेदनम्। यथा,—

"अर्द्धरात्रे वसोर्धारां पातयेद्गुड़सर्पिषा।
ततो वर्द्धापनं वह्नेर्नामादेः करणं मम॥
कर्त्तव्यं तत्सुतजातस्य प्रभाते नवमेऽहनि।
यथा मम तथा कार्य्यो भगवत्या महोत्सवः॥"

वर्द्धापनं नाड़ीच्छेदनम्। इति निघण्टिरत्नम्।

वर्द्धितं, त्रि, (वृध्+क्तः।) प्रवृत्तम्। छिन्नम्। पूरितम्। इति मेदिनी। ते, १४८॥ (यथा, मनुः। ३। २२४।

"प्राणिभ्यात्तूपसंगृह्य स्वयमन्नस्य वर्द्धितम्।
विप्राग्नौ प्रेतपूर्त्त्यर्थं श्राद्धकर्त्तोपनिक्षिपेत्॥"

"अन्नस्येति तृतीयार्थे षष्ठी। वर्द्धितं पूर्णं प्रेतादिपात्रम्।" इति तट्टीकायां कुल्लूकभट्टः॥ वृध+णिच्+क्तः। वृद्धिं प्रापितम्। यथा, भागवते। ४। २३। १।

"इष्ट्वात्मानं प्रयत्नेनेदं वेद्येष आत्मवान्।
आत्मना वर्द्धितायेषस्वानुसर्गः प्रजापतिः॥")

वर्द्धिष्णुः, त्रि, (वर्द्धते इति। वृध+"अलङ्खल्यर्त्तिभ्यः।" ३। २। १३६। इति इष्णुच्।) वर्द्धनशीलः। तत्पर्य्यायः। वर्द्धनः २। इत्यमरः। ३। १। २८॥ (यथा, भट्टिः। ५। २।

"निराकरिष्णु वर्षिष्णु वर्द्धिष्णु परितो रजः।
उत्पतिष्णु सहिष्णु च चेरतुः खरदूषणौ॥")

वर्द्धी, स्त्री, (वर्द्ध+गौरादित्वात् ङीष्।) चर्म्मरज्जुः। वद्दी इति भाषा। तत्पर्य्यायः। नद्धी २ वरत्रा ३। इत्यमरः॥ वद्धी ४। इति भरतः॥

वर्षः, [स] क्ली, (वृणोति संपृक्तं भवतीति। वृ+"वृङ्गीङ्भ्यां खरूपाङ्गयोः पुट् च।" उणा० ४। २००। इति असुन् पुडागमश्च।) रूपम्। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। १।१४०।५।

"आदस्य ते ध्वसयन्तो वृधेरते
शुष्मभ्वं महि वर्षः करिक्रतः॥"

स्तोत्रम्। यथा, तत्रैव। १। ३६। १।

"कस्य व्रता मरुतः कस्य वर्पसा कं याथ
कं ह धूतयः॥"

"कस्य यजमानस्य व्रता व्रतेन सङ्गच्छध्वे इति

शेषः। तथा कस्य यजमानस्य वर्षसः स्तोत्रेण सङ्गच्छते।" इति तद्भाष्ये सायणः।)

वर्त्म, गत्याम्। वर्त्मे। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) वर्त्मति। इति दुर्गादासः।

वर्त्म, [न्] क्ली, (वृणोति आच्छादयति शरीरमिति। वृ+मनिन्।) तनुत्रम्। इत्यमरः। २। ८। ६३। (यथा, रघुः। ३। ५६।

"अभ्यभूयत वाहानां चरतां गात्रशिक्षितैः।
वर्त्मभिः पवनोद्धूतराजसालीवनध्वनिः।"

गृहम्। इति निघण्टुः। ३। ४। यथा, हरिवंशसंहितायाम्। ५१। ३।

"छिन्नभिन्नक्रमिसातकराटकि-
प्रभृतरूक्षकुटीकैर्न सङ्कुलैः।
क्रूरपक्षियुतनिन्द्यनामभिः
गुप्तगूढैर्बहुपर्णवर्त्मभिः।")

वर्त्मकराटकः, पुं, पर्पटः। इति राजनिर्घण्टः। (विस्तृतिरस्य पर्पटशब्दे द्रष्टव्या।)

वर्त्मकषा, स्त्री (वर्त्म कषतीति। कष+अच्। टाप्।) वल्गला। इति शब्दरत्नावली। चामार कषा इति भाषा।

वर्त्मी, [न्] पुं, (वृ+मनिन्।) पथिक इति। यथा,—

"गर्म्मांशं ब्राह्मणस्य स्यादर्म्मांशं क्षत्रियस्य च।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः।"

इति आह्निकतत्त्वधृतगालवपद्यवचनम्।

वर्म्मिः, पुं, मत्स्यविशेषः। वानि इति भाषा। अस्य मांसगुणाः। गुरुत्वम्। वृष्यत्वम्। कषायत्वम्। रक्तपित्तनाशित्वञ्च। इति राजवल्लभः। (यथा, सुश्रुते। १। १३।

"वर्म्मिमत्स्यो हरेद्वातं पित्तं रुचिकरो लघुः।"

तथास्य गुणा यथा,—

"वर्म्मिमत्स्यो हरेद्वातं पित्तं रुचिकरो लघुः।"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।)

वर्म्मिन्, त्रि, (वर्म्म करोतीति। वर्म्म+णिच्। ततः अस्त्यर्थे इनिः। वर्म्म सञ्जातमस्येति। इतच् वा।) वर्म्मयुक्तः। कृतसन्नाहः। तत्पर्य्यायः। सन्नद्धः २ सज्जः ३ दंशितः ४ ऊढकक्षटः ५। इत्यमरः। २। ८। ६५। ऊढकक्षटः ६। इति सुभूतिः। (यथा, भो० रामायणे। २। ६१। १५।

"वाजिनां वर्म्मिणाञ्चानां क्रुद्धस्य मम सायकाः।
अद्य भित्त्वा प्रवेक्ष्यन्ति शरीराणि मयेरिताः।")

वर्म्मिणः, पुं, मत्स्यविशेषः। वामिरूप इति भाषा। अस्य मांसगुणाः। वातनाशित्वम्। स्निग्धत्वम्। गरदोषनाशित्वञ्च। इति राजवल्लभः।

वर्म्मि, त्रि, (वर्म्मते प्रार्थ्यते इति। वरत् क ईप्सायाम् + "अर्च्चो यत्।" ३। १। ६०। इति यत्।) प्रधानम्। इत्यमरः। ३। १। ५०। (यथा, भागवते। १। ५। ६।

"यथा धर्म्मादयश्चार्था मुनिवर्य्यानुकीर्त्तिताः।
न तथा वासुदेवस्य महिमा ह्यनुवर्णितः।")

श्रेष्ठम्। इति सुग्धबोधव्याकरणम्। (यथा, किराते। ७। २०।

"माहेन्द्रं नगमभितः करेणुवर्य्याः
पर्य्यन्तस्थितजलदा दिवः पतन्तः।")

वर्य्यः, पुं, (वर्य्यते प्रार्थ्यते इति। वर+यत्।) कामदेवः। इति मेदिनी। ये, ४०।

वर्य्या, स्त्री, (व्रियते इति। वृ+"अवद्यपण्यवर्य्येति।" ३। १। १०१। इति अप्रतिबन्धे यत्।) पतिंवरा। इत्यमरः। २। ६। ७। कन्या। इति सुग्धबोधव्याकरणम्।

वर्ल्लरी, स्त्री, (वरित्यव्यक्तशब्देन वर्णति शब्दायते इति। वर्ण शब्दे+अच्। टाप्।) नीलमक्षिका। इत्यमरः। २। ५। २७। नीलाकारवर्णा मक्षिका वर्ल्लरी। भनभनिया इति ख्याता। मक्षिकाख्यायां स्त्रीके। वरिति वर्णति वर्ल्लरी। प्रथ वर्ण भर्त्सने शब्दे पचाद्यच्त्वादत् आप्। किंवा वृणोति पूतिगन्धं भक्षते इति वृङो विचि वर्। वर्णतेरपि वर्णा ततः कर्म्मधारये वर्ल्लरी। इति तट्टीकायां भरतः।

वर्व्वरः, पुं, (वृणोति दोषानिति। वृ+अरच्।) श्यामरः। स च नीचजातिः। केशः। बाबरी इति भाषा। चञ्चलः। देशविशेषः। (तद्देशवासिनि, पुंभूमि। यथा, मार्कण्डेये। ५७। ६८।

"काम्बोजा दरदाश्चैव वर्व्वरा हर्षवह्नयः।")

पल्लिका। इति मेदिनी। रे, २०६। वृक्षविशेषः। काल बाबुर इति भाषा। तत्पर्य्यायः। सुसुखः २ मरुजः ३ क्षत्रवर्व्वरकः ४ सुकन्दजः ५ गन्धपत्रः ६ पूतिगन्धः ७ सुवाहकः ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। सुगन्धित्वम्। वान्तिविसर्पविषत्वमदोषनाशित्वञ्च। इति राजनिर्घण्टः।

वर्व्वरकं, क्ली, (वर्व्वर+स्वार्थे कन्।) चन्दनभेदः। तत्पर्य्यायः। वर्व्वरोत्थम् २ श्वेतवर्व्वरकम् ३ शीतम् ४ सुगन्धि ५ पित्तारि ६ सुरभि ७। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। कफभारुतपित्तकुष्ठकण्डूव्रणनाशित्वम्। विशेषाद्रक्तदोषजित्त्वञ्च। इति राजनिर्घण्टः।

वर्व्वरा, स्त्री, (वर्व्वरवृष्यस्येव आकृतिरस्यस्या इति। वर्व्वर+अच्। टाप्।) वृष्यभेदः। शाकभेदः। इति मेदिनी। रे, २०६। (वर्व्व इति शब्दं रातीति। रा+कः।) मक्षिकाभेदः। इति शब्दरत्नावली।

वर्व्वरा, } स्त्री, (वर्व्वर+टाप्। पक्षे विकल्पात्
वर्व्वरी, } ङीष्।) क्षुद्रक्षुपविशेषः। बाबुर इति भाषा। तत्पर्य्यायः। कवरी २ तुण्डी ३ खरपुष्पा ४ अजगन्धिका ५ अजगन्धा ६ कवरा ७ खरपुष्पिका ८। इत्यमरशब्दरत्नावल्यौ। तस्याः प्रकारा गुणाश्च।

"वर्व्वरी कवरी तुण्डी खरपुष्पाजगन्धिका।
पर्णासक्षत्र क्षुद्रौ तु कठिञ्जरकुठेरकौ।
कालसारः करालश्च मलूकः क्षत्रमल्लिका।
तत्र शुक्लोऽर्जकः प्रोक्तो वटपत्रस्तथोऽपरः।
वर्व्वरीचित्तयं रूक्षं शीतं कटु विदाहि च।
तीक्ष्णं रुचिकरं छर्दि दीपनं लघुपाकि च।
पित्तलं कफवातासृग्दहलमिविषापहम्।"

इति भावप्रकाशः।

वर्व्वरीकः, पुं, (वृणुते इति। वृञ् वरणे+"शृवृदृजां हे रुक् चाभ्यासस्य।" उणा० ४। २६। इति ईकन् हिर्वचनं अभ्यासस्य रुगागमश्च।) ब्राह्मणयष्टिकावृक्षः। कुटिलकुन्तलः। हेमचन्द्रादिकोषः। अजगन्धिका। बाबुर तुलसी इति भाषा। इति शब्दचन्द्रिका। महाकालः। इति हेमचन्द्रः। तत्र पवर्गीयबकारादौ पठितोऽयं किन्तु मेदिन्यां वर्व्वरीकशब्दस्यायमर्थः।

वर्व्वा, स्त्री, वर्व्वरी। इति शब्दचन्द्रिका।

वर्व्विः, त्रि, (वृ+"वृहेर्भावन्।" उणा० ४। ५३। इति विन्।) वक्ता। इत्युणादिकोषः।

वर्व्वुरः, पुं, (वृ+बाहुलकात् वुरच्।) वृक्षविशेषः। बावला इति भाषा। तत्पर्य्यायः। युगलाग्रः २ कण्टालुः ३ तीक्ष्णकण्टकः ४ मोघपुष्पः ५ पंक्तिबीजः ६ दीर्घकण्टः ७। कषायात्मकः ८ दृढ़बीजः ९ अजभक्षः १०। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। कफकासामरक्तातिसारपित्तदाहार्शोनाशित्वञ्च। इति राजनिर्घण्टः।

वर्ष, पुं, क्ली, (वृष्यते इति। वृषु सेचने+अधिकरणे भावादौ वा घञ्। यद्वा, व्रियते प्रार्थ्यते इति। वृ+"वृषिवृहिभ्यिकमिकमिभ्यः सः।" उणा० ३। ६२। इति सः।) वृष्टिः। (यथा, मनुः। ४। १०३।

"विद्युत्तनितवर्षेषु महोल्कानाञ्च संप्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्।"

जम्बुद्वीपांशः। वत्सरः। इत्यमरः। (यथा, मनुः। ५। ५३।

"वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम्।")

जम्बुद्वीपः। इति मेदिनी। षे, २३। (वर्षतीति। वृष+घञ्वाच्।) मेघः। इति हेमचन्द्रः। २। ७६। ७। अथ सप्तद्वीपानां वर्षवर्णनम्। तत्र जम्बुद्वीपस्य नववर्षविभागो यथा। यत एव क्षताः सप्त भुवो दीपा जम्बुप्लक्षाह्वशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञाः। तेषां परिमाणं पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो यथासंख्यं द्विगुणमानेन बहिः समन्तत उपकल्पाः। क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः। सप्तद्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकशश्च यथानुपूर्व्वं सप्तस्वपि बहिर्द्वीपेषु पृथक् परित उपकल्पिताः। तेषु पुनर्ज्जम्बुप्लक्षादिषु वर्षेष्वेतीक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदजलधिपरिखेषु जम्बुप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करद्वीपाह्वेषु सप्तसु भरतहरिवर्षकिम्पुरुषेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञानि नवनवलक्षयोजनविस्तराणि वर्षाणि भवन्ति। तेषु जम्बुद्वीपवर्षाणां मध्यमं वर्षमिलावृतं नाम यत्र मेरुर्मध्यतः कर्णिकाभूतः स्थितः। तस्य चतुर्दिक्षु चत्वारो मूलभूता गिरयो नीलश्वेतशृङ्गवन्तो माल्यवदानीलगन्धमादनाश्च मेरुं परितः पूर्व्वादिषु भद्राश्वकेतुमालयोर्वर्षयोर्द्वयोर्द्वयोर्मर्य्यादाभूता आयताः पूर्व्वापरयोरुभयतः समुद्रं स्पृशन्तो द्विसहस्रपृथवो भवन्ति। तैरेव चतुर्भिर्हिमवद्धेमकूटनिषधाख्यैर्दक्षिणेनेलावृतं मेरुं परितः पूर्व्वादिषु भद्राश्वहरिवर्षकिम्पुरुषभारतेषु पञ्चसु वर्षेषु पञ्चायता दक्षिणोत्तरयोरुभयतः समुद्रं स्पृशन्तो दशसहस्रपृथवो भवन्ति। तैरेव चतुर्भिर्नीलश्वेतशृङ्गवन्माल्यवदानीलगन्धमादनाख्यैः पूर्व्वादिषु भद्राश्वरम्यकहिरण्मयकुरुषु चतुर्षु वर्षेषु पञ्चायता उत्तरयोरुभयतः समुद्रं स्पृशन्तो द्विसहस्रपृथवो भवन्ति। तेषां मध्ये मेरुरिलावृतवर्षे पूर्व्वापरयोरुभयतः समुद्रं स्पृशन्नुत्तरतो नीलं दक्षिणतो निषधं चाभिस्पृशति। तथा माल्यवदानीलयोर्मध्ये नवसहस्रयोजनविस्तारो गन्धमादनश्च पूर्व्वापरायतौ समुद्रं स्पृशन्तौ मेरुमुपसंगम्य स्थितौ। एवमिलावृतं मेरुं परितः पूर्व्वादिषु भद्राश्वकेतुमालयोर्वर्षयोर्द्वयोर्द्वयोर्मर्य्यादाभूता माल्यवद्गन्धमादनसुपार्श्वकुमुदाख्याश्चत्वारो मेरुमूलभूता गिरयो

यथासंख्येन एकैकस्मिन्नेकमेवाधिपतिं विदधे। तस्य ह वा एते श्लोकाः।

"प्रियव्रतस्तं कर्म कोऽनुकुर्याद्दिनेश्वरम्।
यो नेमिनिम्नैरकरोच्छायां ध्रुवं सप्तवारिधीन्॥"

छायां ध्रुवं तमो निरस्यन्।

"भूसंस्थानं श्रुतं येन सरिद्गिरिवनादिभिः।
सीमा च भूतनिर्ह्लादे द्वीपे द्वीपे विभागशः॥"

एवं पितरि संप्रवृत्ते तद्वशासने वर्त्तमान आग्नीध्रो जम्बुद्वीपैकदेशः प्रजा औरसवद्धर्म्मावेक्षमाणः पर्य्यगोपायत्। तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्व्वचित्तिं नामाप्सरसमभिवापयामास। तस्यासुह यात्मजान् स राजवर्य्य आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यक-हिरण्मय-कुरुभद्राश्वकेतुमालसंज्ञान् नव पुत्रानजनयत्। आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाविभागं जम्बुद्वीपवर्षाणि बुभुजुः। यस्मिन्नव वर्षाणि नवयोजनसहस्रायामानि अष्टभिर्मर्य्यादागिरिभिः सुविभक्तानि भवन्ति। एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनवितते मूले षोडशसाहस्रं तावतान्तर्भूम्यां प्रविष्टः। उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः चारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्ये एवाद्दसन्ति। एवं हरिणेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्। तथैवेलावृतमपरेण पूर्व्वेण च माल्यवन्मुखमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते।

भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः। मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोकः सह्यो देवगिरिरृश्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमात्रृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नद्यो नद्यश्च सन्त्यसंख्याताः। एतासामपो भारतीः प्रजानामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति। चन्द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णवेणा भीमरथी गोदावरी निर्व्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती अन्धः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृशद्वती गोमती सरयूरोधवती सप्तवती सुषोमा शतद्रुचन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः। अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्लोहितकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिवमाशुघनारकगतयो वध्या आत्मन आनुपूर्व्वेण सर्व्वा ह्येव सर्व्वेषां विधीयन्ते। यथावर्णविधानमपवर्गश्च भवति॥१॥*॥

अतः परं भद्रादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते। भद्रो जम्बुप्रमाणो द्वीपाख्यातिकरो हिरण्मय उत्पितो यत्राधिरूपाख्ये सप्तशिखः। तस्याधिपतिः प्रियव्रतात्मज इमानिकल्पं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम। अग्निध्रं वर्षं सुभद्रं भ्राजं शैलमन्दलमभयमिति वर्षाणि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः। मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुवर्णो हिरण्यष्ठीवो मेघमाल इति शैलाः। अरुणा नृमणा आङ्गिरसी सावित्री सुभाता ऋतम्भरा सत्यम्भरेति महानद्यः॥२॥*॥ शृङ्गस्तु समानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि भ्राजिष्णुर्द्विगुणविशालः समानेन सुरोदेनावृतः परिवृङ्क्ते। यत्र ह वै भ्राजिष्णुर्भ्रजायामा। तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्तवर्षाणि व्यभजत्। सुरोचनं सौमनसं रमणकं देववर्षं पारिभद्रमाप्यायनमभिज्ञातमिति। तेषु वर्षाद्र्यो नद्यश्च सप्तैवाभिज्ञाताः। सुरसः शतशृङ्गो वामदेवः कुन्दः कुसुदः पुष्पवर्षः सहस्रश्रुतिरिति। अनुमती सिनीवाली सरस्वती कुहूरजनी नन्दा राकेति॥३॥*॥ एवं सुरोदादृक्षद्विगुणः समानेनाश्रुतोदेन यथा पूर्वः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्यापनो ध्वजभूतः सुशृङ्गव्यरोचिषा दिशो विराजयति। तद्द्वीपपतिः प्रियव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत्। वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविप्रनामदेवनामभ्यस्तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्तैव। वप्रश्रुतःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्द्धरोमा द्रविण इति। रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति॥४॥*॥ तथा बहिः क्रौञ्चद्वीपो द्विगुणः समानेन घौरोदेन परित उपक्लृप्तः। इतो यथा कुशद्वीपो इतोदेन। यस्मिन् क्रौञ्चनामा पर्व्वतराजो द्वीपनामनिर्व्वर्त्तक आस्ते। तस्मिन्नपि प्रियव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त ऋक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशसः आत्मभूतस्य हरेश्चरणारविन्दसुपजगाम। आत्मा मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितानो वनस्पतिरिति घृतपृष्ठसुताः। तेषां वर्षगिरयः सप्तैव नद्यश्चाभिख्याताः। शुक्लो वर्द्धमानो भोजन उपबर्हणो नन्दो नन्दनः सर्व्वतोभद्र इति। अभया अमृतौघा आर्य्यका तीर्थवती रूपवती पवित्रवती शुक्लेति॥५॥*॥

एवं परस्तात् घौरोदात् परित उपवेशितः शाकद्वीपो दाक्षिण्यक्षयोजनायामः समानेन दधिमण्डोदेन परीतः। यस्मिन् हि शाको नाम महीरुहः सप्तच्छदपदेशकः। यस्य हि महासुरभिगन्धस्तद्द्वीपमनुवासयति। तस्यापि प्रियव्रत एवाधिपतिर्म्मेधा मेधातिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वाधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश। एतेषां वर्षमर्य्यादागिरयो नद्यश्च सप्त सप्तैव। ईशान उरुशृङ्गो बलभद्रः शतकेशरः सहस्रस्रोता देवपालो महानस इति। अनघा आयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रश्रुतिर्निजधृतिरिति॥६॥*॥ एवमेव दधिमण्डोदात् परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपक्लृप्तः समानेन स्वादूदकेन समुद्रेण बहिरावृतः। तद्द्वीपमध्ये मानसोत्तरनामैक एवार्व्वाचीनपराचीनवर्षयोर्म्मर्य्यादाचलः अयुतयोजनोच्छ्रायायामः। यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानाम्। यदुपरिष्टात् सूर्य्यरथस्य मेरुं परिक्रामतः संवत्सरात्मकं चक्रं देवाहोरात्राभ्यां परिभ्रमति। तद्द्वीपस्याधिपतिः प्रियव्रतो वीतिहोत्रो नाम तस्यात्मजौ रमणकधातकनामानौ वर्षपती निधुण्य स्वयं पूर्व्वजवद्भगवत्कर्म्मशील आस्ते। तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्म्मकेण कर्म्मणाराधयन्ति॥७॥ इति श्रीभागवते ५ स्कन्धे १।२। १६।१९।२० अध्यायाः॥*॥ अपि च।

"कर्णे हे दश पुत्राश्च यस्माट् कुक्षिश्च ते उभे।
ते सर्व्वे भ्रातरः शूराः प्रजापतिसमा दश॥
अग्नीध्राधिबाहुश्च मेधा मेधातिथिर्व्वसुः।
ज्योतिष्मान् द्युतिमान् हव्यः सवनो मित्र एव वा।
मेधातिथिवाहुमित्रास्तु त्रयो योगपरायणाः।
जातिस्मरा महाभागा न राज्याय मनो दधुः॥
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान्।
द्वीपेषु तेषु धर्म्मेण द्वीपांश्चैव निबोध मे।
जम्बुद्वीपे तथाग्नीध्रं राजानं स्नातवान् पिता।
प्लक्षद्वीपेश्वरश्चापि तेन मेधातिथिः स्नुतः॥
भ्राजिष्ठे तु वपुष्मन्तं ज्योतिष्मन्तं कुशाग्नये।
क्रौञ्चद्वीपे द्युतिमन्तं हव्यं शाकाग्नये सुतम्।
पुष्कराधिपतिञ्चैव सवनं स्नातवान् सुतम्।
महावीतो धातुकिञ्च पुष्कराधिपतेः सुतौ।
द्विधा कृत्वा ततो वर्षं पुष्करे स व्यवेशयत्।
हव्यस्य पुत्राः सप्तासन्नामतस्तान्निबोध मे।
जलदश्च कुमारश्च सुकुमारो मणीवकः।

कुशोत्तरोऽथ मोदाकी सप्तमस्तु महाद्रुमः ॥
तन्नामाङ्कानि वर्षाणि शाकद्वीपे चकार सः ।
तथा द्युतिमतः सप्त पुत्रांश्चापि निबोध मे ॥
कुशलो मनोऽनुगश्चोष्णः प्रधानश्चान्धकारकः ।
मुनिश्च दुन्दुभिश्चैव सप्तमस्तु तथावरः ॥
तेषां स्वनामधेयानि क्रौञ्चद्वीपे तथाभवन् ॥
ज्योतिष्मतः कुशद्वीपे पुत्रनामाङ्कितानि वै ।
तत्रापि सप्त वर्षाणि तेषां नामानि मे शृणु ।
उद्भिदं वेणुमश्चैव द्वैरथं लम्बमेव च ॥
धृतिमत् प्रभाकरश्चैव कपिलश्चापि सप्तमम् ।
वपुष्मतः सुताः सप्त शाल्मलेश्च्यस्य वाभवन् ॥
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव महीभः सप्तमस्तथा ॥
तथैव शाल्मले तेषां स्वनामानि तु सप्त वै ।
सप्तमेधातिथेः पुत्राः प्रजद्वीपेश्वरस्य वै ॥
तेषां नामाङ्कितैर्देशैस्तदर्षं सप्तभिर्वृतम् ।
पूर्वं शान्तभयं वर्षं शिशिरन्तु सुखोदयम् ॥
आनन्दश्च शिवश्चैव क्षेमकश्च तथा ध्रुवम् ।
प्रजद्वीपादियुक्तेषु शाकद्वीपान्तिकेषु च ॥
ज्ञेयः पञ्चसु धर्म्मोऽथ वर्णाश्रमविभागजः ॥
यानि किंपुरुषाद्यानि वर्ष्याण्याह हिमाह्वयम् ॥
सुखमायुश्च रूपञ्च बलं धर्म्मश्च नित्यशः ।
पञ्चस्वेतेषु वर्षेषु सर्वं साधारणं स्मृतम् ॥
आग्नीध्राय पिता पूर्वं जम्बुद्वीपं ददौ द्विज ।
तस्य पुत्रा बभूवुर्हि प्रजापतिसमा नव ॥
ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोऽनुजः ।
हरिवर्षस्तृतीयस्तु चतुर्थोऽभूदिलावृतः ॥
रम्यश्च पञ्चमः पुत्रो हिरण्यः षष्ठ उच्यते ।
कुरुस्तु सप्तमस्तेषां भद्राश्चाष्टम एव च ॥
नवमः केतुमालस्तु तन्नाम्ना वर्षसंस्थितिः ॥
यानि किंपुरुषाद्यानि वर्ष्याण्याह हिमाह्वयम् ॥
तेषां स्वभावतः सिद्धिः सुखप्राया ह्युपस्थतः ।
विपर्य्ययो न तेष्वस्ति जराऽऽलस्यभयं न च ॥
धर्म्माधर्म्मौ न तेष्वास्तां नोत्तमाधममध्यमाः ।
न वै चतुर्युगावस्था त्रेताद्याः कृतयो न च ॥
आग्नीध्रस्यौरसेषूक्तो ऋषभोऽभूत् सुतो द्विज ।
ऋषभाद्भरतो जज्ञे वीरः पुत्रशताग्रजः ।
सोऽभिषिच्यर्षभः पुत्रं महाप्रव्रज्यमास्थितः ।
तपस्तेपे महाभागः पुलहाश्रमसंश्रयः ॥
हिमाह्वं दक्षिणं वर्षं भरताय ददौ पिता ।
तस्माच्च भारतं वर्षं तस्य नाम्ना महात्मनः ॥
भरतस्याप्यभूत् पुत्रः सुमतिर्नाम धार्म्मिकः ।
तस्मिन् राज्यं समावेश्य भरतोऽपि वनं ययौ ॥
एतेषां पुत्रपौत्रैश्च सप्तद्वीपा वसुन्धरा ।
प्रियव्रतस्य पुत्रेषु सुता स्वायम्भुवेऽन्तरे ।
एष स्वायम्भुवः सर्गः कथितस्ते द्विजोत्तम ।
पूर्वमन्वन्तरेऽस्यैव किमन्यत् कथयामि ते ॥"
इति मार्कण्डेयपुराणे स्वायम्भुवे मन्वन्तरे भुवनकोषः ॥ ॥ अन्यच्च ।

सूत उवाच ।

"केतुमाले नराः कामाः सर्व्वे प्रमदभोजनाः ।
स्त्रियश्चोत्पलपत्राक्ष्यो जीवन्ति च वर्षायुतम् ॥
भद्राश्वे पुरुषाः सर्व्वे स्त्रियश्चाप्सुसन्निभाः ।
दशवर्षसहस्राणि जीवन्ति वायुभोजनाः ॥
रम्यके पुरुषा नार्य्यो रमन्त्यारजतप्रभाः ।
दशवर्षसहस्राणि शतानि दशपञ्च च ॥
जीवन्ति तत्र सत्त्वस्था व्ययोधफलभोजनाः ।
हिरण्मये हिरण्याभाः सर्व्वे च सकुचाननाः ॥
एकादशसहस्राणि शतानि दशपञ्च च ।
जीवन्ति कुरुवर्षे तु श्यामाङ्गाः शीरभोजनाः ॥
सर्व्वे मिथुनजाताश्च नित्यं सुखनिषेविणः ।
चन्द्रद्वीपे महादेवं यजन्ति सततं शिवम् ॥
तथा किंपुरुषे विप्रा मानवा देवसन्निभाः ।
दशवर्षसहस्राणि जीवन्ति प्रेक्षभोजनाः ॥
यजन्ति सततं देवं चतुर्मूर्त्तिं चतुर्मुखम् ।
ध्याने मनः समाधाय सदा वा भक्तिसंयुताः ॥
तथा च हरिवर्षेऽपि महारजतसन्निभाः ।
दशवर्षसहस्राणि जीवन्त्योत्तरसाग्निजः ॥
तत्र नारायणं देवं विश्वयोनिं सनातनम् ।
उपासते सदा विष्णुं मानवा विष्णुभाविताः ॥
तत्र चन्द्रप्रभं शुभ्रं शुद्धस्फटिकनिर्म्मलम् ।
विमानं वासुदेवस्य पारिजातवनाश्रितम् ॥
चतुर्दारमनौपम्यं चतुस्तोरणसंयुतम् ।
प्राकारैर्दशभिर्युक्तं सुगन्धञ्च समुद्गमम् ॥
स्फाटिकैर्मणिभिर्युक्तं देवराजगृहोपमम् ।
स्वर्णस्तम्भसहस्रैश्च सर्व्वतः समलङ्कृतम् ॥
हेमसोपानसंयुक्तं नानारत्नोपशोभितम् ।
दिव्यसिंहासनोपेतं सर्व्वशोभासमन्वितम् ॥
सरोभिः स्वादुपानीयैर्नदीभिश्चोपशोभितम् ।
नारायणपरैः शुद्धैर्दैत्याद्यैर्वनसत्परैः ॥
योगिभिश्च समाकीर्णं ध्यायद्भिः पुरुषं हरिम् ।
स्तूयद्भिः सततं मन्त्रैर्नमस्यद्भिश्च माधवम् ॥
तत्र देवादिदेवस्य विष्णोरमिततेजसः ।
राजानः सर्व्वकालन्तु महिमानं प्रकुर्व्वते ॥
गायन्ति चैव तृत्यन्ति विलासिन्यो मनोरमाः ।
स्त्रियो यौवनशालिन्यः सदा मत्तनतत्पराः ॥
इलावृते पद्मवर्णा जम्बूफलरसाशिनः ।
वयोदशसहस्राणि वर्षाणां च स्थिरायुषः ॥
भारते तु स्त्रियः पुंसो नानावर्णाः प्रकीर्त्तिताः ।
नानादेवार्चने युक्ता नानाकर्म्माणि कुर्व्वते ॥
परमायुर्मतं तेषां शतं वर्षाणि सुव्रता ।
नवयोजनसाहस्रं वर्षमेतत् प्रकीर्त्तितम् ॥
कर्म्मभूमिरियं विप्रा नराणामाधिकारिणाम् ।
महेन्द्रो मलयः सह्यः शुक्तिमाञ्ऋक्षपर्व्वतः ॥
विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्व्वताः ।
इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गन्धर्व्वस्त्वथ वारुणः ।
अयन्तु नवमस्तेषां द्वीपश्च सागरावृतः ॥
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरः ।
पूर्वे किरातास्तस्यान्ते पश्चिमे यवनास्तथा ॥
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्रास्तथैव च ।
दस्युम्लेच्छविभिन्नाभिर्नद्यस्त्वत्र मानवाः ॥
सप्तसप्त पावना नद्यः पर्व्वतेभ्यो विनिःसृताः ।
शतद्रुश्चन्द्रभागा च सरयूर्वेदस्मृता तथा ॥
इरावती वितस्ता च विपाशा देविका कुहूः ।
गोमती धूतपापा च बाहुदा च दृषद्वती ॥
कौशिकी लोहिता चैव हिमवत्पादनिःसृताः ।
वेदस्मृतिर्वेदवती त्रसन्नी त्रिदिवा तथा ॥
पर्णाशा वन्दना चैव सदानीरा मनोरमा ।
चर्म्मण्वती तथानूपा विदिशा वेदवत्यपि ॥
शिप्रा शुक्तिमत्यपि तथा पारियात्राश्रयास्तथा ।
नर्म्मदा सुरसा शोणा दशार्णा च महानदी ॥
मन्दाकिनी चित्रकूटा तामसा च पिशाचिका ।
चित्रोत्पला विपाशा च माल्यना वाहुवाहिनी ॥
हिमवत्पादजा नद्यः सर्व्वपापहरा नृणाम् ।
तापी पयोष्णी निर्विन्ध्या शोणो नदा च महानदी ॥
वेत्रा वैतरणी चैव वलाका च कुमुद्वती ।
तोया चैव महागौरी दुर्गा चान्तःशिला तथा ॥
विन्ध्यपादप्रसूतास्तु नद्यः पुण्यजलाः शुभाः ।
ऋषिकुल्या त्रिसामा च मन्दगा मन्दगामिनी ॥
कृपा पालाशिनी चैव ऋषिका वंशकारिणी ।
शुक्तिमत्पादसंजाताः सर्व्वपापहरा नृणाम् ॥
आसां नद्युपनद्यश्च शतशो द्विजपुङ्गवाः ।
सर्व्वाः पापहराः पुण्याः स्नानदानादिकर्म्मसु ॥
तास्विमे कुरुपञ्चाला मध्यदेशादयो जनाः ।
पूर्व्वे देशादिकाश्चैव कामरूपनिवासिनः ॥
औड्राः कलिङ्गमगधा दाक्षिणात्याश्च सर्व्वशः ।
तथा परान्ताः सौराष्ट्राः शूद्राभीरास्तथाऽर्बुदाः ॥
मालका मालवाश्चैव पारियात्रनिवासिनः ।
सौवीराः सैन्धवा हूणाः शाल्वाः कन्यनिवासिनः ॥
मद्रा वासात्तथाम्बष्ठाः पारसीकास्तथैव च ।
आसां पिबन्ति सलिलं वसन्ति सरितां सदा ॥
चत्वारि भारते वर्षे युगानि कवयोऽब्रुवन् ।
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् ॥
यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महर्षयः ।
न तेषु शोको नायासो नोद्वेगः क्षुद्भयन्न च ॥
सुखाः प्रजा निरातङ्काः सर्व्वदुःखविवर्ज्जिताः ।
रमन्ते विविधैर्भावैः सर्व्वाश्च स्थिरयौवनाः ॥"

इति कूर्म्मपुराणे ४४ अध्यायः ॥

अपरं वामनपुराणे २९ अध्याये द्रष्टव्यम् ॥
प्रभवादिषष्टिवर्षाणि वत्सरशब्दे द्रष्टव्यानि । तत्र षष्टिधा पूज्या देवो यथा,—

"संवत्सरप्रभावेण देव्याः स्तुता पुरा हि सा ।
यष्टव्या विधिना तात सर्व्वकामप्रसिद्धिदा ॥
महाभयविनाशाय महारिपुवधाय च ।
महाभ्युदयकामाय महासिद्धिफलाय च ॥
पूजयेत् तद्यथान्यायं देवीं षष्टिधा परमेश्वरीम् ।
ऋतुनागशता पीडा यत्तरक्षोग्रहोद्भवा ।
संवत्सरमहादोषजन्मर्क्षसुपसर्दना ॥
केतूल्काग्निराहूत्थो भौमार्कस्तिभानुजाः ।
शमयेदृग्यजामास्य देवीहोमरतस्य च ॥
मङ्गलादिविधानेन महाशान्तिभिषेचनैः ॥
चक्रसंपूर्णपुण्यकैफलरत्नाभिपूजनैः ॥
मङ्गला मङ्गलं यत्ते विधिना पूजिता सुते ॥

उत्पातघोषनिर्घातविज्वलानां शमाय च ।
कथयामि महाप्राज्ञ शृणुष्वैकमनाधुना ॥ * ॥
मङ्गला विजया भद्रा शिवा शान्तिर्धृतिः क्षमा ।
ऋद्धिर्वृद्धिर्नतिः सिद्धिस्तुष्टिः पुष्टिः श्रिया उमा ॥
दीप्तिः कान्तिर्यशो लक्ष्मीरीश्वरीति प्रकीर्त्तिता ।
विघ्नतार्त्तोत्तमा देवः सत्त्वभावव्यवस्थिताः ॥
प्रथमं संस्थिता वत्स ! सर्व्वसिद्धिप्रदायिकाः ।२०
ब्राह्मी जयावती शाक्री अजिता चापराजिता ॥
नरस्ती मानसी माया दितिः श्वेता विमोहनी ।
शरण्या कौशिकी गौरी विमला ललितानसा ॥
अरुन्धती क्रिया दुर्गा राजसा इति वायुना ।
मध्यभागे स्थिता देवी युगानामशुभापहा ॥२०॥
काली रौद्री कपाली च चण्डाकर्णा मयूरिकी ।
बहुरूपा सुरूपा च जिनेत्रा रिपुहारिका ॥
माहेश्वरी कुमारी च वैष्णवी सुरपूजिताः ।
वैवस्वती तथा घोरा कराली विकटादिभिः ॥
चर्चिका चेति धातुस्था देवस्त्रैलोक्यविश्रुताः ।
पूजितास्तु सुनिश्रेष्ठ ! सर्व्वकामप्रसाधिकाः ॥२०॥
विदग्धासुरगन्धर्व्वयक्षरक्षोगणेर्नुताः ।
भावकालाश्रयाः कार्य्यग्रथरूपफलप्रदाः ॥
प्रत्येकशः समस्ता वा कर्त्तव्या सुनिसत्तम ! ।
अथवा युगभेदेन पञ्च पञ्च प्रपूजिताः ॥"
इति देवीपुराणे संवत्सरदेवतादिंशतिविधिनामाध्यायः ॥ (वर्षके, त्रि । यथा, भागवते ।
३ । २१ । २० ।
"नमाम्यभीक्ष्णं नमनीयपादं
सरोजमल्लीयसि कामवर्षम् ॥")

वर्षकरी, स्त्री, (वर्षं तत्सञ्चयं रवेश करोतीति । वर्ष + कृ + टः । ङीप् ।) भिक्षिका । इति हेमचन्द्रः । ४ । २८२ ॥

वर्षकेतुः, पुं, (वर्षस्य दृष्टेः केतुरिव । सति वर्षे भूरिश्च उत्पन्नत्वादस्य तथात्वम् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ (अनर्कवंशीयकेतुसुतः पुत्रः । यथा, हरिवंशे । ३२ । ४० ।
"क्षेम्यस्य केतुमान् पुत्रो वर्षकेतुस्ततोऽभवत् ॥")

वर्षकोषः, पुं, (वर्षस्य वत्सरस्य कोष इव । सर्व्ववर्षज्ञानवत्त्वात् तथात्वमस्य ।) देवज्ञः । इति शब्दरत्नावली ॥ (वर्षस्य अन्तःस्थितफलकोष इव कोषः ।) मासः । इति शब्दमाला ॥

वर्षजं, त्रि, (वर्षात् जातमिति । जन् + डः ।) दृष्टिजातम् । वत्सरजातम् । जम्बुद्वीपजातम् । द्वीपाद्यजातम् । मेघजातम् । इति वर्षशब्दपूर्व्वजनधातोर्डप्रत्ययेन निष्पन्नम् ॥

वर्षणं, क्लो, (वृष् + ल्युट् ।) दृष्टिः । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेयपुराणे । १०४।२१।
"तमेव सुचतः सर्व्वं रसं वै वर्षणाय यत् ।
रूपमाप्यायकं भास्वत्तस्मै मेघाय ते नमः ॥")

वर्षणिः, स्त्री, (वृष् + अनिः ।) वर्षणम् । क्षतिः । इत्युणादिकोषः ॥ क्रतुः । वर्षवम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

वर्षपर्व्वतः, पुं, (वर्षाणां भारतादीनां विभाजकः पर्व्वत इति मध्यलोपी समासः ।) वर्षविभाजकगिरिः । यथा,—
"हिमवान् हेमकूटश्च निषधो मेरुरेव च ।
नीलः कर्णी च शृङ्गी च सप्तैते वर्षपर्व्वताः ॥"
इति हारावली ॥

वर्षपाकी, [न्] पुं, (वर्षे वर्षाकाले पाकोऽस्यास्येति । वर्षपाक + इनिः ।) आम्रातकः । इति हेमचन्द्रः । ४ । २९८ ॥ (तथास्य पर्य्यायः । "आम्रातको वर्षपाकी ।" इति वैद्यकरत्नमालायाम् ॥)

वर्षपुष्पा, स्त्री, (वर्षे वर्षाकाले पुष्पं यस्याः ।) सहदेवीलता । इति राजनिर्घण्टः ॥ (सहदेवीलताशब्दे उक्ता विवृतिर्द्रष्टव्या ॥)

वर्षप्रियः, पुं, (वर्षे वर्षकं प्रियं यस्य ।) चातकपक्षी । इति त्रिकाण्डशेषः ॥

वर्षवरः, पुं, (वरतीति । वर आवरणे + अच् । वर्षस्य रेतोवर्षस्य वर आवरकः ।) मेघः । इत्यमरः । २ । ८ । ६ ॥ खोजा । इति भाषा ॥ (यथा, रत्नावल्याम् २ अङ्के ।
"नहं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपामस्मः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ॥")

वर्षवृद्धिः, स्त्री, (वर्षस्य वृद्धिराधिक्यं यत्र ।) जन्मतिथिः । इति स्मार्त्तभट्टाचार्य्यादर्शनात् । अथ जन्मतिथिकृत्यम् । तन्मलमासे न कर्त्तव्यं चान्द्रमासीयत्वेन सावकाशत्वात् । न च तस्य सौरमासीयत्वं तथात्वे तन्मासे तत्तिथेः कदाचित्प्राप्तौ तद्वर्षे तत्कृत्यलोपापत्तेः । न चेष्टापत्तिः प्रतिसंवत्सरश्रुतिविधानात् । यथा ब्रह्मपुराणं गर्गश्च ।
"सर्व्वेषु जन्मदिवसे ज्ञातिमङ्गलपाणिभिः ।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
स्नानञ्चात्र पितरौ तथा देवप्रजापतिः ।
प्रति संवत्सरञ्चैव कर्त्तव्यञ्च महोत्सवः ॥"
ज्ञातेस्त्रिभिर्ज्ञातेः । प्रजापतिर्ब्रह्मा । तथा च तत्तिथिमधिकृत्य ।
"तिलोदवर्त्ती तिलखायी तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च षट्तिली नावसीदति ॥
मङ्गलार्थिभिः अभिप्रेतार्थसिद्ध्यर्थं मङ्गलं तद्धेतुतया गोरोचनादिकमपि मङ्गलं तेन घृतगुग्गुलादिपात्रिभिरित्यर्थः । तथा च ज्ञात्यचिन्तामणौ ।
"गुडदुग्धतिलान्नाज्यमन्त्रेश्च वपनम् ।
गुग्गुलुं निम्बसिद्धार्थं धूपार्थं गोरोचनायुतम् ।
संपूज्य भानुविघ्नेशौ महर्षि प्रार्थयेदिदम् ।
चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ! ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ॥
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव ॥"
स्नानञ्चात्रेति स्नानञ्च अग्निन्यासान्तमंतत्रजन्यकालीनस्नानञ्च । नामकरणे तथा दर्शनाद् यज्ञमाब्रह्मपुराणोक्तप्रकारादिमोऽन्तं नान्दीश्राद्धं पूजाविधानाच्च । तदङ्गानि स्नानञ्चाय नम इत्युल्लेखम् ॥ * ॥ पूजायामर्घ्यानन्तरं पाद्यमाह मत्स्यपुराणम् । अर्घ्यं पाद्यादिकन्तच्च मधुपर्कं प्रयोजयेत् । पाद्यानन्तरं अर्घ्यमाह नरसिंहपुराणम् । पाद्यञ्चैव तृतीयया चतुर्थ्यार्घ्यं प्रदापयेत् । तृतीयया पुरश्चरणीयतृतीयया ऋचा । उभयक्रमदर्शनादिच्छाविकल्पः । इति श्रीदत्तः ॥ * ॥ श्रीपतिरुवहारनिर्णये ।
"नवाम्बरधरो भूत्वा पूजयेच्च चिरायुषम् ॥"
तथा ।
"हिंसनं जटिलं सौम्यं सुदृढं चिरजीविनम् ।
मार्कण्डेयं नरो भक्त्या पूजयेत्तु प्रयत्नतः ॥
ततो दीर्घायुषं यास्यं रामं द्रौणिं कृपं बलिम् ।
प्रह्लादञ्च हनूमन्तं विभीषणमथार्चयेत् ॥"
रामोऽत्र परशुरामः । चिरजीविसाहचर्य्यात् । द्रौणिरश्वत्थामा ॥ * ॥ तथा,—
"स्नानाङ्गं जन्मतिथिं प्राप्य सम्पूजयेन्नरः ।
षष्ठीञ्च दधिभक्तेन वर्षे वर्षे पुनः पुनः ॥"
योगियाज्ञवल्क्यः ।
"श्रायेन्नारायणं नित्यं स्नानादिषु च कर्म्मसु ।
तद्विष्णोरिति मन्त्रेण स्नानादिषु पुनः पुनः ॥
गायत्री वैष्णवी स्नेया विष्णोः संस्मरणाय वै ॥"
ध्यायेत् स्मरेत् । स च मन्त्रः ।
"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥"
वामनपुराणम् ।
"सर्व्वमङ्गलमङ्गल्यं वरेण्यं वरदं शुभम् ।
नारायणं नमस्कृत्य सर्व्वकर्म्माणि कारयेत् ॥" * ॥
सङ्कल्पकरणे निन्दामाह भविष्यपुराणम् ।
"सङ्कल्पेन विना राजन् ! यत्किञ्चित् कुरुते नरः ।
फलञ्चाप्याप्नुयं तस्य धर्म्मस्यार्द्धक्षयो भवेत् ॥"
ब्रह्मपुराणम् ।
"ब्रह्मादिसमायुक्तं नमस्काराग्निकीर्त्तितम् ।
सर्व्वकर्म्मसु सर्व्वत्र मन्त्र एवाभिधीयते ॥
अनेनैव विधानेन सत्पुरुषे निवेदयेत् ।
एकैकस्य प्रकुर्व्वीत यथोद्दिष्टं क्रमेण तु ॥"
गन्धपुष्पमाल्यं पञ्चोपचाराद्यसम्भवे ।
"मन्त्राच्चतगुणं प्रोक्तं भक्त्या तच्चगुणोत्तरम् ।
भक्तिमन्त्रसमेतन्तु कोटि कोटि गुणोत्तरम् ॥
सर्व्वत्र कर्म्मोपदेशकं दक्षिणादिभिरर्चयेत् ।
तथोपदेष्टारमपि पूजयेच्च ततो गुरुम् ।
न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया ॥"
इति मत्स्यपुराणवचनात् ॥ * ॥
ततः कर्म्मानन्तरं तिलहोमस्तु पूजितदेवसाग्निभिः कार्य्यः ।
"एकैकां देवतां राम समुद्दिश्य यथाविधि ।
चतुर्थ्यन्तेन धर्म्मेण नाम्ना च प्रणवादिना ॥
होमद्रव्यमथैकैकं घृतसंप्लुतं होमयेत् ॥"
इति विष्णुधर्म्मोत्तरदर्शनात् ॥
एवं होमे व्याहृतयश्च मन्त्राश्च ।

"खाद्वावसाने भुङ्क्ते यात् ध्यायन् वै मत्स्यदेवताम् ।"
इति स्मृतेः ॥
अग्रतो तु देवीपुराणम् ।
"होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते ।"*॥
स्कान्दे ।
"खण्डनं नखकेशानां मैथुनाध्वानमेव च ।
आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत् ।"
अध्वानं अध्वगमनम् । कलहमित्यत्र सङ्गरमिति क्वचित् पाठः । सङ्गरं युद्धम् । वर्षवृद्धौ अब्दिने । * । इति मनुः ।
"ऋते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा ।
अशुश्रूषाऽर्घ्यदाने चैव न दोषादुष्टवारिदा ।"
जन्मनि पुत्रजन्मनि । ज्योतिषे ।
"स्नात्वा जन्मदिने स्त्रियं परिहरन् प्राप्नोत्यभीष्टां श्रियं
मत्स्याभोजयतो द्विजाय ददतोऽप्यायुश्चिरं वर्द्धते ।
शूकरान् खादति यश्च तस्य रिपवो नार्थं प्रयान्ति ध्रुवं
सुस्थे यस्तु निरामिषं स हि भवेज्जन्मान्तरे पण्डितः ।"*॥
दीपिकायाम् ।
"जन्मर्क्षयुक्ता यदि जन्ममासे
यस्य ध्रुवं जन्मतिथिर्भवेच्च ।
भवन्ति तद्वत्सरमेव याव-
न्नैरुज्यसम्मानसुखानि तस्य ॥
शतान्तकृजयोर्वारे यस्य जन्मतिथिर्भवेत् ।
अमृतयोगसंप्राप्तौ विघ्नस्तस्य पदे पदे ।"
शतान्तकृजयोः शनिमङ्गलयोः ।
"तस्य सर्व्वौषधिस्नानं ग्रहविप्रसुरार्चनम् ।
ग्रहानुद्दिश्य होमो वा ग्रहाणां प्रीतिमिच्छता॥
सौरारयोर्दिने तप्ता देयाश्चैव तु काञ्चनम् ।
सुरा मांसो वचा कुष्ठं ग्रैवेयं रजनीद्वयम् ।
घृतो चम्पकसुस्नाच सर्व्वौषधिगणः स्मृतः ।"
रजनीद्वयं हरिद्रा दारुहरिद्रेति । एतेषां पञ्चादीनां ग्रहत्वम् । कषायावयवग्रहणे मत्स्यपुराणविष्णुधर्म्मोत्तरयोस्तथा दर्शनात् । तद्यथा,—
"एषां पञ्चापि सारादि मूलानि कुसुमानि च ।
एवमादीनि चान्यानि कषायाख्यो गणः स्मृतः ।"
आयुर्व्वेदोक्ता परिभाषा ।
"अङ्गेऽप्यनुक्ते विहितन्तु मूलं
भागेऽप्यनुक्ते समता विधेया ।"
तत्र क्रमः । तिलोद्वर्त्तनम् । तिलयुक्तजलेन स्नानम् । नववस्त्रपरीधानम् । गुग्गुलुनिम्बसिद्धार्थदूर्व्वा-गोरोचनात्मकजन्मग्रन्थिं दक्षिणे बाहौ बध्नीयात् । गुरुदेवाग्निविप्राच्च पूजनीयाः । स्वनक्षत्रं पूजनीयम् । अत्र च । हस्ता स्वाती श्रवणा अश्वीवे । रुगग्निरोगपुंषि स्यात् । पुंषि च पुनर्व्वसुपुष्यौ । मूलं तस्त्री स्त्रियां श्रेष्ठाः । रत्नेन लिङ्गनिर्णयः ॥*॥
जन्मनक्षत्रादीनां गोपनमाह विष्णुधर्म्मोत्तरे ।
"गोपयेज्जन्मनक्षत्रं धनसारं गृहे मलम् ।
प्रभोरप्यपमानञ्च तस्य दुश्चरितञ्च यत् ।"
धनसारं घनश्रेष्ठम् । मलं छिद्रम् ॥ पितरौ प्रजापतिः सूर्य्यो गणपतिर्मार्कण्डेयश्च पूजनीयाः । तत्र प्रार्थनमन्त्रौ ।
"चिरञ्जीवी यथा त्वं भो भविष्यामि तथा मुने ।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ।
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरिदार्यसिद्ध्यर्थमस्माकं वरदो भव ॥"
ततो व्यासपरशुरामाश्वत्थामबलिप्रह्लादहनूमद्विभीषणाः पूजनीयाः । यद्यपि पूजनीया ।
"त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्व्वन्तु तानि मे ॥"
इति मत्स्यपुराणीयं रक्षार्थे पठेत् । * ॥
पिष्टमाढपादग्रहयन्त्रमस्तु विष्णुपुराणादुन्नेयः । यथा,—
"छत्रोऽपि वसुदेवस्य पादौ जग्राह सत्वरः ।
देवस्यास्य महाबाहुर्वैनतेयसहायवान् ॥"
एवञ्च ।
"सहस्रन्तु पितुर्माता गौरवेणातिरिच्यते ॥"
इति मनुवचने पितुरपेक्षया यत् सहस्रं मातुर्गौरवमुक्तं यत् पौषस्तदार्थम् । अतएव मनुः ।
"ऋते भर्त्तरि पुत्रस्तु वाप्यो मातुररक्षिता ॥"
वाप्यो गर्हणीयः । * । गुडदुग्धतिलपाने तु मन्त्रः ।
"सतिलं गुडसंमिश्रमङ्गल्यहेमितं पयः ।
मार्कण्डेयवरं लब्ध्वा पिबाम्यायुष्यहेतवे ॥"
अत्र वैदिकेतरमन्त्रपाठे शूद्रादेरप्यधिकारः । जन्मतिथेः प्रागुक्तब्रह्मपुराणीयत्वात् पौर्णमास्यन्तमासादरः । * । जन्मतिथेरभयदिनलाभे तु देवीपुराणम् ।
"युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया ।
रवेरुदयमौख्यन्ते न तत्र तिथियुग्मता ॥
षष्ठ्यहये जन्मतिथिर्यदि स्यात्
पूज्या तदा जन्मभसंयुतैव ।
असङ्गता भैन दिनद्वयेऽपि
पूज्या परा वा भवतीह यत्नात् ।"
भं नक्षत्रम् । परवचनं हेमाद्रिमार्कण्डेयेऽपि । पूर्व्वाह्णे तिथिनक्षत्रलाभ एवेदं लभ्यते ।
"नक्षत्रे खण्डिते येन प्राप्तः कालस्तु कर्म्मणः ।
नक्षत्रकर्म्माण्यत्रैव तिथिकर्म्म तथैव च ॥"
इति हेमाद्रितिथिवचनात् ।
खण्डिते खण्डद्वययुक्ते येन नक्षत्रखण्डेन विहितकालः प्राप्तः । नक्षत्रहेथे तु सौधायनमार्कण्डेयौ ।
"तन्नक्षत्रमहोरात्रं यस्मिन्नस्तं गतो रविः ।
यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं स्मृतम् ॥"
इति तिथ्यादितत्त्वम् ।

वर्षाः, स्त्री भूमि, (वर्षो वर्षमस्यास्तु इति । वर्ष + अर्शआदित्वात् अच् । टाप् । यद्वा, व्रियन्ते इति । वृ + "वृतृवदीति ।" उणा० १ । ६२ । इति सः । ततष्टाप् ।) स्वनामख्यात ऋतुः । तत्पर्य्यायः । प्रावृट् २ । रत्नमरः ।१।४।१६ । घनकालः ३ जलार्णवः ४ प्रवृट् ५ मेघागमः ६ घनाकरः ७ । इति शब्दरत्नावली । प्रावृषा ८ । इति त्रिकाण्डशेषः । स च ऋतुः सौरश्रावणभाद्रमासद्वयात्मकः । आषाढादिमासचतुष्टयात्मकश्च । आद्यस्य प्रमाणम् । यथा । तपस्तपस्यौ ग्रैष्मिरार्त्तवः । मधुश्च माधवश्च वासन्तिकार्त्तवः । शुक्रश्च शुचिश्च शैशिरार्त्तवः । अयनेतदुत्तरायणं देवानां दिनम् । नभाश्च नभस्यश्च वार्षिकार्त्तवः । इषश्च ऊर्ज्जश्च शारदार्त्तवः । सहाश्च सहस्यश्च हैमन्तिकार्त्तवः । अयनेतद्दक्षिणायनं देवानां रात्रिः । इति मलमासतत्त्वधृता श्रुतिः । ग्रैष्मस्य प्रमाणं तत्र चातुर्म्मास्यव्रतनियमश्च यथा । वाराहे ।
"आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्म्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्केऽपि मन्त्रेणैव नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्धापि हि तत्रोक्तैः चातुर्म्मास्यं व्रतं नरः ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तदुसमापयेत् ॥"
मात्स्ये ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
मधुस्त्यजेन्निशं नरो गुडविवर्ज्जनात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्गः प्रजायते ।
कटुतैलपरित्यागात् सुचुनाशः प्रजायते ॥
लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन् ।
सदा सुखी सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निराधिर्नीरुगोजस्वी विष्णुभक्तश्च जायते ।
एकान्तरोपवासेन विष्णुलोकमवाप्नुयात् ॥
धारणान्नखलोमाच्च गङ्गास्नानं दिने दिने ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ॥
घृतत्यागात् सुलावण्यं सर्व्वं स्निग्धं वपुर्भवेत् ।
फलत्यागात्तु मतिमान् बहुपुत्रश्च जायते ॥
नमो नारायणायेति जपन्नामनमं फलम् ।
पादाभिवन्दनाद्विष्णोर्लभेद्दानफलं फलम् ॥
एवमादिव्रतैः पार्थ तुष्टिमायाति केशवः ॥"
सनत्कुमारः ।
"इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव ! ॥
गृहीतेऽस्मिन् व्रते देव यदपूर्णं तदद्य मे ।
तत्सर्व्वं भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥"
समाप्तौ च ।
"इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।
न्यूनं सम्पूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ।"*॥
अत्रैव यतिमधिकृत्य काठकयज्ञम् ।
"एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ।"

एतदग्रन्थविषयम्। ऊर्द्धं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी इति ग्रन्थोक्तेः। इति तिथ्यादितत्त्वम्। वर्षर्त्तौ वर्ज्जनीयानि यथा,—

"वर्षासु घनशिखिसस्यहंसगमाः पङ्ककन्दलोद्भेदौ।
जातीकदम्बकेतकभक्ष्यानिलनिम्नगाहलिप्रीतिः।"

इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम्॥

(एतत्कालजलचन्द्रादिकं यथा,—

"सघनवारिदवारिसमाकुला
निखिलभूः प्रबलोदकपूरिता।
शमदवातकरा विदिशो दिशो
मुदितकौटजभिप्रभवा मही॥
नीलगुल्महरितोप्तुला मही
कुल्यकासलिलसंप्लुता सरित्।
इन्द्रगोपकविराजिता धरा
पङ्कभूरुहविभूषिता च सा॥
पत्त्री कूजति कानने च सरसो स्वानाम्बुपूर्णा तथा
हंसा मानसमाव्रजन्ति कमलान्यम्लानतां यान्ति च॥
गर्ज्जन्मेघमहेन्द्रकन्दरदरीग्रस्यादृता श्यामला
भात्येवं प्रबलस्य कोपजकरो वर्षाऋतुः क्षोभितः॥"
"किञ्चिद्धर्म्मो भवेद्यत्र ग्रस्यानां दृढ़ता भवेत्।
बहुग्रस्या भवेद्यात्रौ वारिपूर्णा सरित्सुहृत्॥
बहूदकधरा मेघा बहुवृष्टा घनस्वनाः।
एवं गुणसमायुक्ता वर्षा ज्ञेया ऋतूत्तमाः॥
तासु वातकफौ कुप्यौ जायेते हि पृथग् भृशम्।
इति ज्ञात्वा भिषक् श्रेष्ठः कुर्य्यादस्य प्रतिक्रियाम्॥
खेदनं मर्द्दनं पथ्यं निर्म्मीते भ्रयतत्परः।
गौररामारतं ग्रस्यं व्यायामः क्रमविक्रमः॥
कट्वम्लक्षारसरसाः सेव्या वातकफापहाः।
निरूहा बस्तिकर्म्माद्याः कफवातरुजापहाः॥"

इति हारीते प्रथमे स्थाने चतुर्थोऽध्याये॥

"आदानस्यानवपुषामग्निः सन्नोऽपि सीदति।
वर्षासु दोषैर्दूष्यन्ति तेऽम्बुजाम्बुदेऽम्बरे॥
सतुषारेण मरुता सहसा शीतलेन च।
भूबाष्पेणाम्लपाकेन मलिनेन च वारिणा॥
वह्निनेव च मन्देन तेष्विलाद्योन्यदूषिषु।
भवेत् साधारणं सर्व्वमुग्रञ्चोल्बणमेव यत्॥
आस्थापनं शुद्धतनुर्जीर्णं धान्यं रसान् शृतान्।
जाङ्गलं पिशितं यूषान् मध्वरिष्टं चिरन्तनम्॥
मस्तु सौवर्चलाढ्यं वा पञ्चकोलावचूर्णितम्।
दिवा कौपं श्रृतशीतोदकं भोजनस्यादितुर्हिमे॥
अलाबुजवलक्केदं संशुष्कं शौद्रवल्लुरं।
अपादचारी सुरभिः सततं धूपिताम्बरः॥
हर्म्यपृष्ठे वसेद्वाप्यशीतशीकरवर्षिते।
नदीजलोदमन्थाद्यैः स्नानावासातपांश्चयेत्॥"

इति वाभटे सूत्रस्थाने ह्यतीयोऽध्याये॥)

वर्षाग्रः, पुं, (वर्षस्य वत्सरस्य अग्रः।) मासः। इति त्रिकाण्डशेषः॥

वर्षाघोषः, पुं, (वर्षासु घोषो महान् ग्रब्दोऽस्य।) महामण्डूकः। इति राजनिर्घण्टः॥

वर्षाङ्गः, पुं, (वर्षस्य वत्सरस्य अङ्गमिव। अभिधानात् पुंस्त्वम्।) मासः। इति हारावली। २८॥

वर्षाङ्गी, स्त्री, (वर्षासु अङ्गं यस्याः। तत्र जाताङ्कुरवद्वर्षादस्यास्तथात्वम्।) पुनर्नवा। इति ग्रब्दरत्नावली॥ (विषयोऽस्याः पुनर्नवाग्रब्दे ज्ञातव्यः॥)

वर्षाभवः, पुं, (वर्षासु भवतीति। भू+अच्। वर्षासु भव उत्पत्तिर्यस्य वा।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ वर्षाजाते, त्रि॥

वर्षाभूः, पुं, (वर्षासु भवतीति। भू+क्विप्।) भेकः। इत्यमरः। १। १०। २३॥ (अस्य पर्य्यायो यथा,—

"मण्डूकः प्लवगो भेको वर्षाभूर्दर्दुरो हरिः॥"

इति भावप्रकाग्रस्य पूर्व्वखण्डे द्वितीये भागे॥) इन्द्रगोपः। इति राजनिर्घण्टः॥ भूलता। इति मेदिनी। मे, १८॥

वर्षाभूः, स्त्री, (वर्षासु भवतीति। भू+क्विप्।) पुनर्नवा। इति मेदिनी। मे, १८॥ (यथा, सुग्रुते सूत्रस्थाने ४५ अध्याये।

"तिलपर्पटिकावर्षाभूचिरबिल्वकपोतिकाजमुनपलाण्डुकलायप्रभृतीनि॥") भेकी। इति भरतधृतरूपरत्नाकरः॥ वर्षाभवे, त्रि॥

वर्षाभ्वी, स्त्री, (वर्षाभूः+ङीप्।) भेकी। इत्यमरः। १।१०।२४॥ पुनर्नवा। इत्यमरमाला भागुरिश्च॥

वर्षामदः, पुं, (वर्षासु माद्यतीति। मद्+अच्।) मयूरः। इति केचित्॥

वर्षाम्भःपारव्रतः, पुं, (वर्षाम्भो दृष्टिजलं तस्य पारणं उपवासान्ते पानं व्रतमिव यस्य।) चातकपक्षी। इति केचित्॥

वर्षारात्रः, पुं, (वर्षाणां रात्रिः। ततः समासान्तोऽच्।) वर्षाकालीनरात्रिः। इति पुंलिङ्गसंग्रहटीकायां भरतः॥

वर्षार्घिः, [स्] पुं, (वर्षासु अर्घिर्दीप्तिरस्य।) मङ्गलग्रहः। इति ग्रब्दरत्नावली॥

वर्षालङ्घिका, स्त्री, (वृक्षा। इत्यमरटीकायां भरतः॥

वर्षावसानः, पुं, (वर्षाणामवसानमत्र।) ग्ररत्कालः। इति राजनिर्घण्टः॥

वर्षिकं, त्रि, (वर्षासम्बन्धि। वर्षसम्बन्धि। वर्षाग्रब्दात् वर्षग्रब्दाच्च परेण ठिकप्रत्ययेन निष्पन्नम्॥

वर्षिष्ठः, त्रि, (अतिग्रयेन वृद्धः। अयमनयोरतिग्रयेन वृद्धः इत्यर्थे वृद्धस्थाने वर्षादेशे इष्ठप्रत्ययेन निष्पन्नः॥

वर्षीयान्, [स्] त्रि, (अयमनयोरतिग्रयेन वृद्धः। वृद्ध+इयसुन्। वर्षादेशः।) अतिवृद्धः। तत्पर्य्यायः। दग्रमी २ व्याघ्रान् ३। इत्यमरः। ३। २। २३३॥ (यथा,—

"आयोऽग्राद् भक्तिदानसत्कारश्चात्र ग्रस्यते।
वृद्धः स्यात् सप्ततेरूर्द्धं वर्षीयान् नवतेः परम्॥"

इति स्मृतिः॥)

वर्षुकः, त्रि, (वर्षति तच्छील इति। वृष+"ग्रसृधृतपदस्याभूवृषहनकमगमशृभ्य उकञ्।" ३। २। १५४। इति उकञ्।) वर्षणकर्त्ता। वृषधातोर्ष्णुकप्रत्ययेन निष्पन्नः॥ (यथा, भट्टौ। २। ३७।

"जग्मुः प्रसादं द्विजमानसानि
द्यौर्वर्षुका पुष्पचयं बभूव।
निर्व्याजमिष्टा वहते वचस्व
भूयो बभावे सुनिना कुमारः॥")

वर्षुकाब्दः, पुं, (वर्षुकश्चासौ अब्दश्चेति कर्म्मधारयः।) वर्षणशीलमेघः। इति जटाधरः॥

वर्षेजः, त्रि, (वर्षे जायते इति। जन+डः। सप्तम्या अलुक्।) वर्षाकालजातः। वत्सरजातः। सप्तम्यन्तवर्षग्रब्दपूर्व्वकजनधातोर्डप्रत्ययेन निष्पन्नः॥

वर्षोपलः, पुं, (वर्षाकालोपलः।) मेघभवग्रिला। करका। इत्यमरः। १। ३। १२॥ (यथा, वृहत्संहितायाम्। ८९। २४।

"वर्षोपलवज्जातं वायुरुत्थाच्च सप्तमाद्भरम्।
द्रियते किल खाद्यैस्ताड्यभं मेघसम्भूतम्॥")

वर्ष्म, [न्] क्लीं, (वर्षति वृष्यते वेति। वृष्+मनिन्।) ग्ररीरम्। (यथा, कथासरित्सागरे। २। ५।

"ददर्ग्र च समीपेऽस्य पिग्राचानां ग्रतत्रयम्।
काममूर्त्तिं पिग्राचं तं वर्ष्मणा ग्रालसन्निभम्॥")

प्रमाणम्। इत्यमरः। ३। ३। २२३। प्रमाणमन्त्रोन्नतिरिति स्वामी। (यथा, महाभारते। १। ३१। ८।

"अथापग्यद्दतौ दूरात् ग्रालूरोदरवर्ष्मणः।
पलालतृणिकामेकां वहतः संहतान् पथि॥")

दृप्ता। इति भरतः॥ अतिसुन्दराकृतिः। इति मेदिनी। मे, १२८॥ (उन्नते स्थिरे च, त्रि। यथा, ऋग्वेदे। १०। २८। २।

"सरोरुवद्दृग्भिरस्मद्गो
वर्ष्मन्त्सखौ वरिमन्ना पृथिव्याः।"

"वर्ष्मन्ग्रब्द उन्नतवचनः स्थिरवचनो वा।" इति तद्भाष्ये सायणः। वर्षीयान्। यथा, भागवते। ५। १८। ३०।

"ॐ नमो भगवतेऽकूपाराय सर्व्वसत्त्वगुणविशेषायानुपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमोऽवस्थानाय नमस्ते॥" "वर्ष्मणे वर्षीयसे।" इति तट्टीकायां श्रीधरः॥)

वर्ष्मन्, क्लीं, ग्ररीरम्। इति द्विरूपकोषः॥

वर्ह, क वधे। दीप्तौ। इति कविकल्पद्रुमः॥ (चुरा०-परo-वधे सकo-दीप्तौ अकo-सेट्।) रेफोपधः। क, वर्हयति। इति दुर्गादासः॥

वर्ह, ड श्रेष्ठे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्मo-अकo-सेट्।) ड, वर्हते अग्नी श्रेष्ठः स्यादित्यर्थः॥

व(ब)र्हं, क्लीं, (वर्हयति दीप्यते इति। वर्ह+अच्।) मयूरपिच्छम्। इत्यमरः। २। ५। ३५॥ (यथा, महाभारते। १२। १२०। ३।

"यथा वर्हाणि चित्राणि बिभर्ति सुभगाग्रणः।
तथा बहुविधं राजा रूपं कुर्व्वीत धर्म्मवित्।")
ग्रन्थिपर्ब्बम्। इति भरतः। (वर्हतीति। वृह वृहौ+अच्।) पत्रम्। इति शब्दरत्नावली। (यथा, रघुः। ६। १७।
"विलासिनो विभ्रमदन्तपत्र-
मापाण्डुरं केतकवर्हमग्र्यः।
प्रियानितम्बोचितसन्निवेशै-
र्विपाटयामास युवा नखाग्रैः।")
परिवारः। इति हेमचन्द्रः।

वर्हणं, क्ली, (वर्हतीति। वृह वृहौ+ल्युः। वर्हयति शोभते इति। वर्ह दीप्तौ+ल्युवा।) पत्रम्। इति शब्दरत्नावली।

व(ब)र्हिः [स्], पुं, (वृंहति वर्द्धते इति। वृहि वृहौ+"वृंहेर्नलोपश्च।" उणा० २।११०। इति इसिः नलोपश्च।) अग्निः। इति मेदिनी। से, ३६। दीप्तिः। इत्युणादिकोषः। यज्ञः। इति हेमचन्द्रः। (यथा, ऋग्वेदे। ७। ७५। ८।
"नृणो गोमद्वीरवद्वर्हि रत्न-
मधो अश्ववत् पयसोजो अक्षरे।
माभो वर्हिः पुरुषता निदेक-
र्यूयं पातस्वस्तिभिः सदा नः।"
"गोऽस्माकं वर्हिर्यज्ञम्।"इति तद्भाष्ये सायणः।) चित्रकम्। इत्यमरः। (वृहन्नाजस्य पुत्रः। यथा, भागवते। ९। १२। १३।
"वृहन्नाजस्तु तस्यापि वर्हिस्तस्मात् कृत-
ञ्जयः।")

व(ब)र्हिः [स्], पुं, क्ली, (वृंहति वर्द्धते इति। वृहि वृहौ+"वृंहेर्नलोपश्च।" उणा० २। ११०। इति इसिः नलोपश्च।) कुशः। इति मेदिनी। से, ६३। (यथा, कुमारे। २। ६१।
"अवचितबलिपुष्पा वेदिसम्मार्गदक्षा
नियमविधिजलानां वर्हिषाञ्चोपनेत्री।")

वर्हिः [स्] क्ली, (वृंहतीति। वृहि वृहौ+इसिः नलोपश्च।) ग्रन्थिपर्ब्बम्। इति शब्दरत्नावली।

वर्हिःपुष्पं, क्ली, (वर्हिर्दीप्तिरुद्युक्तं पुष्पमस्य।) ग्रन्थिपर्ब्बम्। इत्यमरटीकायां भरतः।

वर्हिःपुष्पा [न्], पुं, (वर्हिषा कुशेन वर्हिषि यज्ञे वा पुष्पं तेजो यस्य।) अग्निः। इत्यमरः। १।१।५७।

वर्हिःस्थं, क्ली, (वर्हिरिव तिष्ठतीति। स्था+कः।) वर्हिष्ठम्। दीवेरम्। इत्यमरभरतौ।

वर्हिःकुसुमं, क्ली, (वर्हिः वर्हयुक्तं कुसुमं यस्य।) ग्रन्थिपर्ब्बम्। इति शब्दचन्द्रिका।

व(ब)र्हिणः, पुं, (वर्हमस्यस्येति। वर्ह+"वर्ह-वर्हाभ्यामिनच्।" इति इनच्। यद्वा "बहुल-मन्यत्रापि।" उणा० २।४६। इत्यत्र वर्ह बलं प्राधान्ये। वर्हिणो मयूरः। इत्युज्ज्वलदत्तोक्त्या इनच्।) मयूरः। इत्यमरः। २। ५। ३०। (यथा, मनौ। १२। ६५।
"क्रुङ्क्रुन्दरः शुनान् गत्वान् पत्रशाकन्तु वर्हिणः।
श्वावित् कृतान्नं पित्तिभमशल्यान्नन्तु शल्लकः।")

क्ली। तगरम्। तत्पर्य्यायो यथा,—
"कालानुसार्य्यं तगरं कुटिलं मधुरं मतम्।
अपरं पिण्डतगरं दण्डहस्ती च वर्हिणम्।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।)

वर्हिणवाहनः, पुं, (वर्हिणो मयूरो वाहनं यस्य।) कार्त्तिकेयः। इति हेमचन्द्रः।

वर्हिध्वजा, स्त्री, (वर्हिर्ध्वजो वाहनं यस्याः।) चण्डी। इति त्रिकाण्डशेषः।

वर्हिपुष्पं, क्ली, (वर्हिः वर्हांगानि पुष्पं यस्य।) ग्रन्थिपर्ब्बम्। इत्यमरः। २। ४। १३०।

वर्हिर्ज्योतिः, [स्] पुं, (वर्हिषि यज्ञे ज्योतिरस्य।) वह्निः। इति हेमचन्द्रः। ३। १६४।

वर्हिर्मुखः, पुं, (वर्हिरग्निर्मुखं यस्य।) देवता। इत्यमरः। १। १। ६।

वर्हिषदः, [द्] पुं, (वर्हिषि अग्नौ कुशासने वा सीदन्ति ये ते। वर्हिस्+सद्+क्विप्। पृषोदरादित्वात् साधुः।) पितृगणविशेषः। यथा,
"अयज्वानश्च यज्वानः पितरो ब्रह्मजाः सुताः।
अग्निस्वात्ता वर्हिषदो दिधा तेषां व्यवस्थितिः॥"
इति कौर्म्मे १२ अध्यायः।

अपि च।
"अपसव्यं ततः कृत्वा सर्व्यं जानु च भूतले।
अग्निस्वात्तांस्तथा सौम्यान् हविष्मन्तस्तथोष्म-
पान्॥
सुकालिनो वर्हिषद आज्यपांस्तर्पयेत्ततः।
तर्पयेच्च पितॄन् भक्त्या सतिलोदकचन्दनैः॥
दर्भपाणिस्तु विधिना हस्ताभ्यां तर्पयेत्ततः॥"
अत्र केचित् पितृधर्म्मातिदेशात् दिव्यपितॄणामपि अञ्जलित्रयदानम्। तदसत्।
"कव्यवाहं नलं सौम्यं यममर्य्यमणं तथा।
अग्निस्वात्ता: सोमपाश्च वर्हिषदः सकृत् सकृत्॥"
इति छन्दोगपरिशिष्टेन विशिष्टैकाञ्जलिविधानात्। इत्याह्निकतत्त्वम्। (एतद्वंशजस्य हविर्द्धानेः पुत्रः। यथा, भागवते। ४।२४।८-९।
"हविर्द्धानाद्धाविर्द्धानिर्बृहिषद सुतान्।
वर्हिषदं पयं शुक्लं लक्षं सत्यं जितव्रतम्॥
वर्हिषत्तु महाभागो हविर्द्धानिः प्रजापतिः।
क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह।"
वर्हिषि यज्ञे सीदतीति। यज्ञसे, त्रि। यथा, ऋग्वेदे। २। ३। ३।
"स आ वह मरुतां गृध्नो अच्युत-
मिन्द्रं नरो वर्हिषदं यजध्वम्।")

वर्हिश्चक्रः, पुं, (वर्हिर्दीप्तिरेव कैश्च इव यस्य।) अग्निः। इति शब्दचन्द्रिकायाम्।

वर्हिष्ठं, क्ली, (वर्हिषि तिष्ठतीति। स्था+कः। अम्बाम्बेति वलम्।) दीवेरम्। इत्यमरः। (यथा, सुश्रुते उत्तरतन्त्रे ११ अध्यायः।
"खेदं विदध्याद्यवागुवेपं
वर्हिष्ठशुष्कीसुरकाष्ठकृष्टैः।"
त्रि, दृढतमः। इति सायणः। यथा, ऋग्वेदे। ३। १३। १।
"प्रवो देवायाग्नये वर्हिष्ठमर्चाग्ने।")

व(ब)र्ही, [न्] पुं, (वर्हमस्यास्तीति। वर्ह+इनिः।) मयूरः। इत्यमरः। (यथा, ऋतुसंहारे। २। ६।
"सदा मनोज्ञाम्बुदनादसोत्सुकं
विभाति विस्तीर्णकलापशोभितम्।
सविभ्रमालिङ्गनचुम्बनाकुलं
प्रवृत्तसृष्टं कुलमद्य वर्हिणाम्।"
प्राग्गर्भसम्भूतः कश्यपपुत्रविशेषः। यथा, महाभारते। १। ६५। ४०।
"सिद्धः पूर्णश्च वर्ही च पूर्णायुश्च महा-
यशाः।")

वल, भि ङ संवरणे। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-सक०-सेट्।) भि, वलयति वालयति। ङ, वलते धनं लोकः संवृणोतीत्यर्थः। इति दुर्गादासः।

वलभिः, } स्त्री, (वलभि+ऋदिकारादिति वा
वलभी, } ङीष्।) वड़भी। इति शब्दरत्नावली अमरटीका च। (यथा, कथासरित्सागरे। ८७। १२।
"हर्म्यप्रासादवलभीष्वन्विष्यन् सोऽभ्रमन्निशि।"
पुरीविशेषः। यथा, भट्टिः। २३। ३५।
"काव्यमिदं विहितं मया वलभ्यां
श्रीधरसेननरेन्द्रपालितायाम्।
कीर्त्तिरतो भवतान्नृपस्य तस्य
क्षेमकरः क्षितिपो यतः प्रजानाम्।")

वलयः, पुं क्ली, (वलते आवृणोति हस्तादिकमिति। वल्+"वलिमलितनिभ्यः कयन्।" उणा० ४। ६६। इति कयन्।) स्वर्णादिरचितप्रकोष्ठाभरणम्। वाला इति भाषा। तत्पर्य्यायः। आवापकः २ परिहार्य्यः ३ कटकः ४। इत्यमरः। पारिहार्य्यः५ शंखकः६। इति शब्दरत्नावली। कम्बुः७ कङ्कणम् ८। इति जटाधरः। (यथा, रामायणे। २। ३२। ५।
"सहेमसूत्रैर्मणिभिः केयूरैर्वलयैरपि।"
मण्डलम्। यथा, मार्कण्डेये। २०। ४६।
"अश्रान्तः सकलं भूमेर्वलयं तुरगोत्तमः।
समर्थः क्रान्तुमर्केण तवायं प्रतिपादितः।"
अस्थिविशेषः। यथा, सुश्रुते शारीरस्थाने ५ अध्याये।
"कपालरुचकतरुणवलयनलकसंज्ञानि।"
"यान्यिपादपार्श्वपृष्ठोदरेषु वलयानि।"
वैद्यकोक्तायिकर्म्मविशेषः। यथा, सुश्रुते। १।१२।
"तत्र रोगाधिष्ठानभेदादग्निकर्म्म चतुर्धाभिद्यते। तद्यथा वलयबिन्दुरेखाप्रतिसारणानीति दहनविशेषाः।" *। वेष्टनम्। यथा, रघुः। १। ६०।
"सवेलावप्रवलयां परिखीकृतसागराम्।
अनन्यशासनामुर्व्वीं शशासैकपुरीमिव।")

वलयः, पुं, (वलयवदाकृतिरस्यस्येति। अर्श आदित्वात् अच्।) अष्टादशगलरोगान्तर्गत-गलरोगविशेषः। यथा,—

"वलास एवायतसुव्रतश्च
श्लेष्मं करोत्यन्नगतिं निवार्य्य ।
तं सर्व्वथैवाप्रतिवार्य्य वीर्य्यं
विवर्ज्जनीयं वलयं वदन्ति ।" ● ।

अथ गलरोगाणां चिकित्सा ।

"कण्ठरोगेष्वशेषेषु लेखनैर्न्नस्यादिकर्म्मभिः ।
चिकित्सकश्चिकित्स्यान्तु कुर्य्यालोऽत्र समाचरेत् ॥
काथं दद्याच्च दार्व्यौषड्निम्बतार्क्ष्यकलिङ्गजम् ।
हरीतकीकषायो वा क्षितो माक्षिकसंयुतः ॥
कटुकातिविषादारुपाठाशुण्ठ्याकलिङ्गकाः ।
गोमूत्रकथिताः पीताः कण्ठरोगविनाशनाः ॥
गुडूची कटुका श्वेता दार्व्यौ त्वक् त्रिफला घनम् ।
पाठा रसाञ्जनं दूर्व्वा तैलोक्षेति सुचूर्णितम् ॥
क्षौद्रयुक्तं विधातव्यं गलरोगे महौषधम् ।
योगाश्चेते त्रयः प्रोक्ता वातपित्तकफापहाः ॥
जवायजं तेजवतीं सपाठां
रसाञ्जनं दारु निशां सलज्जाम् ।
क्षौद्रेण कुर्य्यात् गुटिकां सुखेन
तां धारयेत् सर्व्वगलामयेषु ।"
इति भावप्रकाशः । ● ।

वेला । कङ्कुभम् । इति जटाधरः । (दक्षयूहविशेषः । यथा, कामन्दकीये नीतिसारे । १६ । ४५ ।

"सुखाख्यो वलयश्चैव दक्षभेदाः सुदुर्ज्जयः ।")

वलयितं, त्रि, (वलयवत् कृतमिति । वलय + तत्करोतीति णिच् ततः क्तः । यद्वा, वलयं तदाकृतिर्जातमस्येति । वलय + इतच् ।) वेष्टितम् । इत्यमरः । (यथा, गीतगोविन्दे । ११।२६।

"नीलनलिनमिव पीतपरागपटलभरवलयित-मूलम् ।"

यथा च वैराग्यशतके ।

"इत्यनमालावलयितबाहुः
परधनहरणे साचाद्राहुः ।
रक्षायौवनभञ्जनवीरः
कीर्त्तनपतने मङ्गुरशरीरः ।")

वलिरः, त्रि, (वलते संवृणोतीति चक्षुस्तारामिति । वल + बाहुलकात् किरच् ।) कैकरः । इत्यमरः ।

व(ब)लिशं, क्ली, (वलिना गन्धवद्द्रव्यादुपहारेण ग्रसति छिनत्ति मत्स्यानिति । ग्रो + कः ।) वड़िशम् । इति शब्दरत्नावली ।

व(ब)लिशिः, स्त्री, (वलिना आहारोपहारेण मत्स्यादीन् ग्रसति विनाशयतीति । ग्रो + बाहुलकात् किः ।) वड़िशम् । इति शब्दरत्नावली ।

व(ब)लिशी, स्त्री, (वलिशि + ङ्यादिकारादिति ङीष् ।) वड़िशम् । इति शब्दरत्नावली ।

व(ब)ल्कं, क्ली, (वलते इति । वल संवरणे + "वल्केल्कः ।" उणा० ४ । ४० । इति उकः ।) पद्ममूलम् । पश्चिविशेषे, पुं । इति सिद्धान्तकौमुद्यादिवृत्तिः उणादिकोषश्च ।

व(ब)ल्कः, पुं, (वल संवरणे + कः निपातितश्च ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ।

वल्कतरुः, पुं, (वल्कप्रधानस्तरुरिति मध्यलोपी समासः ।) पूगवृक्षः । इति राजनिर्घण्टः ।

वल्कद्रुमः, पुं, (वल्कप्रधानो द्रुमः ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः । (विवरणमस्य भूर्ज्जशब्दे ज्ञातव्यम् ।)

व(ब)ल्कलं, क्ली, (वलते संवृणोतीति । वल + बाहुलकात् कलन् ।) त्वचम् । इति राजनिर्घण्टः । छालचिनि इति भाषा ।

व(ब)ल्कलः, पुं क्ली, (वलते संवृणोतीति । वल + बाहुलकात् कलन् ।) वृक्षत्वक् । बाकल इति भाषा । तत्पर्य्यायः । त्वक् २ वल्कम् ३ । इत्यमरः । त्वचा ४ त्वचम् ५ चोचम् ६ चोलकम् ७ शल्कम् ८ छल्लकम् ९ छल्लिः १० छल्ली ११ चोलकम् १२ । इति शब्दरत्नावली । (यथा, महाभारते । १ । १५६ । २ ।

"तौ तु पूर्व्वेण कालेन तपोयुक्तौ बभूवतुः ।
क्षुत्पिपासापरिश्रान्तौ जटावल्कलधारिणौ ।")

वल्कला, स्त्री, (वल्कल + टाप् ।) शिलावल्का । इति राजनिर्घण्टः ।

वल्कलोध्रः, पुं, (वल्कप्रधानो लोध्रः ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ।

वल्कवान् [त्] पुं, (वल्कः शल्कोऽस्यास्तीति । वल्क + मतुप् । मस्य वः ।) मत्स्यः । इति त्रिकाण्डशेषः । वल्कयुक्ते, त्रि ।

वल्कलः, पुं, (वल्कोऽस्यास्तीति । वल्क + इलच् ।) कण्टकः । इति शब्दरत्नावली ।

वल्कुतं, क्ली, वल्कलः । इति शब्दचन्द्रिका ।

वल्ग, गतौ । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) वल्गति । अयं प्लुतगतावपि भट्टमल्लः । इति दुर्गादासः ।

वल्गनं, क्ली, (वल्ग + ल्युट् ।) प्लुतगमनम् । बहुभावश्चम् । वल्गधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ।

व(ब)लूलः, त्रि, वलवान् । वलग्रहात् गोढयेत्यादिना ऊलप्रत्ययेन निष्पन्नः । इति सुग्धबोधव्याकरणम् । अस्य पवर्गीयवकारादिलेऽपि तत्रालिखितत्वादत्र लिखनम् ।

वल्क, क भाषणे । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) क, वल्कयति । भाषणं कथनम् । इति दुर्गादासः ।

व(ब)ल्वं, क्ली, (वलते इति । वल संवरणे + "शूकवल्कोल्काः ।" उणा० ३ । ४२ । इति कप्रत्ययान्तो निपातितः ।) वल्कलः । (यथा, रघौ । ८ । ११ ।

"गुरुवत् सुतरोपितश्रियः
परिणामे हि दिलीपबन्धुना ।
पदवीं तरुवल्कवाससां
प्रयताः संयमिनां प्रपेदिरे ।")

शल्कः । इति मेदिनीशब्दरत्नावल्यौ । खड्गम् । इति विश्वः ।

व(ब)ल्वः, पुं, (वल संवरणे + कः । निपातितश्च ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ।

वल्वतरुः, पुं, (वल्वप्रधानस्तरुरिति मध्यलोपी समासः ।) पूगवृक्षः । इति राजनिर्घण्टः ।

वल्वद्रुमः, पुं, (वल्वप्रधानो द्रुमः ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः । (विवरणमस्य भूर्ज्जशब्दे ज्ञातव्यम् ।)

व(ब)ल्वलं, क्ली, (वलते संवृणोतीति । वल + बाहुलकात् वलन् ।) त्वचम् । इति राजनिर्घण्टः । डालचिनि इति भाषा ।

व(ब)ल्वलः, पुं क्ली, (वलते संवृणोतीति । वल + बाहुलकात् वलन् ।) वृक्षत्वक् । बाकल इति भाषा । तत्पर्य्यायः । त्वक् २ वल्कम् ३ । इत्यमरः । त्वचा ४ त्वचम् ५ चोचम् ६ चोलकम् ७ शल्कम् ८ छल्लकम् ९ छल्लिः १० छल्ली ११ चोलकम् १२ । इति शब्दरत्नावली । (यथा, महाभारते । १ । १५६ । २ ।

"तौ तु पूर्व्वेण कालेन तपोयुक्तौ बभूवतुः ।
क्षुत्पिपासापरिश्रान्तौ जटावल्कलधारिणौ ।")

वल्कला, स्त्री, (वल्कल + टाप् ।) शिलावल्का । इति राजनिर्घण्टः ।

वल्कलोध्रः, पुं, (वल्कप्रधानो लोध्रः ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ।

वल्कवान् [त्] पुं, (वल्कः शल्कोऽस्यास्तीति । वल्क + मतुप् । मस्य वः ।) मत्स्यः । इति त्रिकाण्डशेषः । वल्कयुक्ते, त्रि ।

वल्किलः, पुं, (वल्कोऽस्यास्तीति । वल्क + इलच् ।) कण्टकः । इति शब्दरत्नावली ।

वल्कुतं, क्ली, वल्कलः । इति शब्दचन्द्रिका ।

वल्ग, गतौ । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-सेट् ।) वल्गति । अयं प्लुतगतावपि भट्टमल्लः । इति दुर्गादासः ।

वल्गनं, क्ली, (वल्ग + ल्युट् ।) प्लुतगमनम् । बहुभावश्चम् । वल्गधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ।

वल्गा, स्त्री, (वल्ग्यतेऽश्वोऽनयेति । वल्ग + करणे घञ् । टाप् ।) दमनालिका । लागाम् इति भाषा । तत्पर्य्यायः । अवक्षेपणी २ रश्मिः ३ कुत्रा ४ । इति हेमचन्द्रः । (यथा, राजतरङ्गिण्याम् । ५ । ३४० ।

"वल्गन्नश्वोऽश्ववाराणां वृत्यते वाग्यवाग्निना ।
वल्गाङ्गेनोद्वहच्चक्रं शिरस्कं वामपाणिना ।")

वल्गितं, क्ली, (वल्ग + भावे क्तः ।) अश्वस्य विशेषगमनम् । तच्च वेगेन विचित्रगोपरिचरणम् । इत्यमरभरतौ । प्लुतगमनम् । (यथा, शिशुपालवधे । २ । २७ ।

"अनिर्लोडितकार्य्यस्य वाग्जालं वाग्मिनो वृथा ।
निमित्तादपराद्धेर्षाशुष्कस्रोत वल्गितम् ।")

बहुभावश्च ।

व(ब)ल्गुः, पुं, (वलते,इति । वल प्राणने + "वलेर्गुक्च ।" उणा० १ । २० । इति उप्रत्ययः । गुगागमश्च धातोः ।) छागः । सुन्दरे, त्रि । इति मेदिनी । गे, २५ । (यथा, रघौ ।५।६८ ।

"तद्वल्गुना युगपदुत्क्षिपतेन तावत्
सद्यः परस्परतुलामधिरोहतां ते ।
प्रस्पन्दमानपरुषेतरतारमन्तः
चक्षुस्तव प्रचलितभ्रमरञ्च पद्मम् ।")

व(ब)ल्गुकं, क्ली, (वल्गु + संज्ञायां स्वार्थे वा कन् ।) चन्दनम् । विपिनम् । पद्मम् । रुचिरे, त्रि । इत्यमरः । तत्र पवर्गीयवकारादौ लिखितोऽयं शब्दः । अस्माभिस्तु तत्रालिखितत्वादत्र लिखितः ।

वल्गुपत्रः, पुं, (वल्गु मनोज्ञं पत्रं यस्य ।) वनसूरः । इति शब्दचन्द्रिका ।

वल्गुला, स्त्री, (वल्गु लातीति । ला + कः । टाप् ।) वाकुची । पक्षिविशेषः । श्येनस्य पर्य्यायः । चक्रविष्ठा २ दिवान्धा ३ निशाचरी ४ खेरिकी ५ दिवाखापा ६ मांसेष्टा ७ माहवाहिकी ८ । इति राजनिर्घण्टः ।

वल्गुलिका, स्त्री, (वल्गुल + संज्ञायां कन् । टापि अत इत्वञ्च ।) तैलपायिका । यथा,—

"वल्गुलिका सुखविष्ठा परोक्षी तैलपायिका ।"
इति हेमचन्द्रः ।

(यथा, कथासरित्सागरे । ५५ । ७६ ।

"ततो वल्गुलिकातत्रं क्षिप्त्वा पटमदर्शयत् ।
स चित्रकर्त्तां चित्रस्थां राज्ञे मदनसुन्दरीम् ।")

वल्ग, ङ भक्षणे । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) वल्गते अन्नं लोकः । इति दुर्गादासः ।

वल्गथं, क्ली, (वल्ग भक्षणे + भावे ल्युट् ।) भक्षणम् । इति हेमचन्द्रः ।

वल्मिकः, पुं क्ली, वल्मीकः । इति शब्दरत्नावली ।

वल्मिकिः, पुं क्ली, वल्मीकः । इत्यमरटीकायां भरतः ।

व(ब)ल्मीकः, पुं, क्ली, (वलते इति । वल संवरणे + "अलीकादयश्च ।" उणा० ४ । २५ । इत्यत्र वलतेर्मागमश्चेति उज्ज्वलदत्तोक्त्या कीकसनो

निपातः ।) उपीकाञ्जतन्तन्तिकारूपः । तत्-पर्य्यायः । वामलूरः २ नाकुः ३ । इत्य-मरः । दस्मिकः ४ वाल्मीकः ५ वाल्मीकिः ६ वाल्मिकिः ७ । इति तट्टीकायां भरतः । पुग-लकः ८ शक्रमर्द्दा ९ क्षमिग्रेलकः १० । इति शब्दरत्नावली । * । (यथा, मेघदूते । १५ । "वल्मीकाद्यात् प्रभवति धनुःखण्डमाखण्ड-लस्य ।") तन्तन्तिकया शौचनिषेधो यथा । विष्णुपुरा-णम् । "वल्मीकमूषिकोत्खातां मृदमन्तर्जलां तथा । शौचावशिष्टां गेहाच्च नादद्यात्पेषसम्भवाम् । अन्तःप्राप्यवपन्नाच्च हलोत्खातां न कर्ह-चित् ।" इत्याह्निकाचारतत्त्वम् । * । देवप्रतिष्ठायां स्नानात् पूर्व्वं ग्रिव्यिदोषशान्त्यर्थं तन्तन्तिकया स्नानं यथा,— "वल्मीकन्तन्तिकाभिस्तु गोमयेन सुभस्मना । स्नापयेत् ग्रिव्यिसंसर्गदोषाशासुपशान्तये ।" वल्मीकन्तदादिस्नाने मन्त्रविशेषानुपादानात् मन्त्रानादेशे गायत्रीति मूलपाठिलिखितात् गायत्र्या तत्तन्मूलमन्त्रेण वा स्नानं कार्य्य-तत्त्वम् । तथा स्नानं यथा,— "स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि । पञ्चान्तैः पञ्चगव्यैः पञ्चन्तन्तिकैरपि । न्तन्तिका करिदन्तस्य पर्व्वताग्रस्य च । कुम्भवल्मीकसम्भूतं न्तन्तकसुदीरितम् ।" इति देवप्रतिष्ठातत्त्वम् ।

वल्मीकः, पुं, (वल्मीक उपीकाञ्जतन्तन्तिकारूपः उत्पत्तिकारणत्वेनास्त्यस्येति । च-च् ।) वाल्मीकि-मुनिः । रोगविशेषः । इति विश्वः । अथ वल्मीकरोगस्य लक्षणम् ।

"ग्रीवां सकक्षाकरपाददेशे
सन्धौ गले वा त्रिभिरेव दोषैः ।
ग्रन्थिः स वल्मीकवदक्रियाणां
जातः क्रमेणैव गतप्रवृद्धिः ॥
सुखैरनेकैस्त्वनितोदवद्भि-
र्विसर्पवत् सर्पति चोन्नताग्रैः ।
वल्मीकमाहुर्भिषजो विकारं
निम्नत्वनीकं चिरजं विशेषात् ॥"

ग्रीवा त्वकाटिका । अंसः स्कन्धः । कक्षा बाहुमूलम् । गलः कण्ठः । वल्मीकवदित्यनेन प्रचुरग्रिखरत्वसुश्चलमवगाढ़मूलत्वञ्च लक्ष्यते । निम्नत्वनीकं उपचारायोग्यम् । * । अथ तस्य चिकित्सा ।

"शस्त्रेणोत्कृत्य वल्मीकं क्षारायिभ्यां प्रदा-हयेत् ।
विधानेनार्व्बुदोक्तेन शोधयित्वा च रोहयेत् ।
वल्मीकन्तु भवेद्यस्य मांसपिण्डसमप्रभम् ।
तत्र संशोधनं कृत्वा शोणितं मोक्षयेद् भिषक् ।
कुलत्थिकाणां मूलेन गुडूच्या लवणेन च ।
आरेवतस्य मूलेन दन्तीमूलेन चैव च ।
श्लेष्मान्तकस्य मूलेन सप्तलायाश्च मूलकैः ।
सुस्निग्धेन सुखोष्णेन भिषक् तमुपनाहयेत् ।
पक्वं तद्वा विजानीयात्तती सर्व्वा यथाक्रमम् ।
अभिज्ञाय ततोच्छित्वा प्रदिह्यान्मतिमान् भिषक् ॥
संशोध्य दुष्टमांसानि क्षारेण प्रतिसारयेत् ।
व्रणं विशुद्धं विज्ञाय रोपयेन्मतिमान् भिषक् ॥
मनःशिलालभल्लातकुष्ठक्ष्वेलागुरुचन्दनैः ।
जातीपल्लवतक्रैश्च निम्बतैलं विपाचयेत् ।
वल्मीकं नाशयेत्तेन बहुच्छिद्रं बहुव्रणम् ।
पार्श्वपादोपरिष्टात्तु छिद्रैर्बहुभिराततम् ।
वल्मीकं यत् समुद्दिष्टं साङ्घ्र्यं तद्धि विजा-नता ।"

मनःशिलाद्यं तैलम् । इति भावप्रकाशः । (अस्य स्पर्शे सवहारेण रोगनाशित्वं यथा,— "गौद्रसर्षपवल्मीकन्तन्तिकासंयुतं भिषक् । गाढ़सूत्रादनं कुर्य्याद्रूक्षस्नेहे प्रलेपनम् ।" इति वैद्यकचक्रपाणिसंग्रहे ऊरुस्तम्भाधिकारे ।)

वल्मीकिः, पुं, वल्मीकः । इति शब्दमाला ।

वल्मीकग्रीवं, क्ली, (वल्मीकस्य ग्रीवमिव ग्रीवं-मस्य ।) स्रोतोऽञ्जनम् । इति राजनिर्घण्टः ।

वल्मीकूटं, क्ली, (वल्मीकस्य वल्मीकसदृशं वा कूटम् ।) वल्मीकः । इति हेमचन्द्रः ।

वल्गुल } तु क लुनिपूर्व्वो । इति कविकल्पद्रुमः ।
वल्गूल } (अदन्तपुरा॰-परः॰-सकः॰-सेट् ।)
वल्गूलयति अववल्गूलत् । इति दुर्गादासः ।

वल्ग, ङ संवरणे । इति कविकल्पद्रुमः । (भ्वा॰-आत्म॰-सकः॰-सेट् ।) ङ, वल्गते धर्मं लोकः संवृणोतीत्यर्थः । इति दुर्गादासः ।

वल्गः, पुं, (वल्गते संवृणोतीति । वल्ग + अच् ।) गुञ्जात्रयपरिमाणम् । यथा,— "वल्गस्त्रिगुञ्जो धरणश्च तेऽष्टौ ।" इति लीलावती । त्रिगुञ्जा । इति वैद्यकपरिभाषा । (यथा,— "विघटद्बलिश्लेष्मदन्तीबीजं क्रमाद्वृद्धु । दन्त्यमुमर्द्धितं यामं रसस्त्रिपुरभैरवः । वल्गं लोधेण चार्द्धस्य रसे च सितया सह ।" इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ।) सार्द्धगुञ्जा । यथा,— "गोधूमसक्तुसंयोजिता तु कथिता गुञ्जा तया सार्द्धया वल्गो वल्गचतुष्टयेन भिषजां मायां मतस्यात्तुः ।" इत्यादि राजनिर्घण्टः ।

वल्गकी, स्त्री, (वल्गते इति । वल्ग + कुञ् । गौरा-दित्वात् ङीष् ।) वीणा । इत्यमरः । (यथा, हरिवंशे । ८४ । १११ । "वल्गकीं वादयन्तो हि सप्तस्वरविमूर्च्छिताम् ।") वल्गकीतन्त्रः । इति राजनिर्घण्टः । (अस्याः पर्य्यायो यथा,— "वल्गकी गजभक्षा च सुवक्त्रा सुरभीरसा । मधुरस्वा कुन्दरुकी वल्गतो च बहुस्वरा ।" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

वल्गभः, पुं, (वल्ग संवरणे + "राशिवल्लिभ्यश्च ।" उणा॰ ३ । १२५ । इति अभच् ।) दयितः । अश्वतः । सल्लक्षणतुरङ्गमः । इति मेदिनी । मे, १८ । (जह्नुवंशीयवलाकाश्वस्य पुत्रः । स च कुशिक-स्य पिता । यथा, महाभारते । १३ । ४ । ५ । "वल्गभस्तस्य तनयः साक्षाद्धर्म्म इवापरः । कुशिकस्तस्य तनयः सहस्राक्षसमद्युतिः ।")

वल्गभः, त्रि, (वल्ग + अभच् ।) प्रियः । (यथा, कामन्दकीयनीतिसारे । ५ । १६ । "पुत्रेभ्यश्च नमस्कुर्य्यात् वल्गभेभ्यश्च भूपतिः ।") अश्वतः । इत्यमरः । अश्वतोऽत्र गवाश्वः । इति स्वामी ।

वल्गभपालकः, त्रि, (वल्गभानां अश्वविशेषाणां पालकः ।) अश्वरक्षकः । इति भूरिप्रयोगः ।

वल्गभा, स्त्री, प्रिया । यथा,— "प्रेयसी दयिता कान्ता प्राणेशा वल्गभा प्रिया । हृदयेशा प्राणसमा प्रेष्ठा प्रणयिनी च सा ।" इति हेमचन्द्रः ।

वल्गरं, क्ली, (वल्गते इति । वल्ग + अरन् ।) क्षणा-गुरुः । इति राजनिर्घण्टः । मञ्जरिः । इति शब्द-रत्नावली । गह्वनम् । कुञ्जम् । इति धरणिः ।

वल्गरिः } स्त्री, (वल्ग + किप् । वल्गं संवरणं
वल्गरी } करोतीति । कृ + अच इः । ङीप्-कारादिति वा ङीष् ।) मञ्जरी । इत्यमर-भरतौ । (लता । यथा, कुमारे । ४ । ३१ । "अवतंसितवल्गरीकमेतत्
गजभग्नं पतनाय वल्गरी ।")
चित्रमूलम् । मेथिका । इति राजनिर्घण्टः । (अस्याः पर्य्यायो यथा,— "मेथिका मिथिनिर्मेथिर्दीपनी बहुपुत्रिका । गोधिनी बहुबीजा च जातिगन्धफला तथा । वल्गरी चैव कामन्या मिश्रपुष्पा च कैरवी । कुक्षिका बहुपर्णी च पित्तजिद्वायुवृद्धिदा ।" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

वल्गवः, पुं, (वल्ग प्रीतौ + किप् । वल्गं प्रीतिं वातीति । वा + कः ।) गोपः । इत्यमरः । (यथा, माघे । ११ । ८ । "दुहतरकरदत्ता; क्षिप्रवेश्माक्षुण्णे दधति दधनि धीराग्रारवान् वारिजीव । ग्रथितमिव सुरौघाः सारसङ्घातमेते कलसितसुदधिगुर्व्वीं वल्गवो जोड़यन्ति ।") भीमसेनः । इति मेदिनी । वे, ४४ । (विराटनगरे छद्मवासकाले एवास्य एतन्नाम आधीत् । यथामहाभारते । ४ । २ । १ । "गौरीगवो नुवाचोच्चैः वल्गवो नाम वल्लभः । उपस्थास्यामि राजानं विराटमिति मे मतिः ।")

वल्गवः, त्रि, (वल्गमाज्यं वातीति । वा + कः ।) घृतकारः । इत्यमरः ।

वल्गवी, स्त्री, (वल्गव + ङीष् ।) वल्गवजातिस्त्री । वल्गवपत्नी । तत्पर्य्यायः । आभीरी २ गोपिका ३ गोपी ४ महाभूरी ५ गोपालिका ६ । इति शब्दरत्नावली । (यथा, किराते । ४ । १७ ।

"स मन्थरावलगित-पीवरस्तनीः
परिश्रमक्लान्तविलोचनोत्पलाः।
निरीक्षितुं नोपरराम वल्लवी-
रभिप्रवृत्ता इव वारयोषितः॥")

वल्लः, स्त्री, (वल्लते संवृणोति वृक्षादीनिति। वल्ल+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इतीन्।) लता। इत्यमरटीकायां भरतः॥ (यथा, महाभारते। १२। १८४। १३।
"वल्लिर्वेष्टयते वृक्षं सर्व्वतश्चैव गच्छति॥")
पृथिवी। इति शब्दमाला॥

वल्लिकण्टकारिका, स्त्री, (वल्लिरूपा कण्टकारिका।) अग्निमन्थवृक्षः। इति राजनिर्घण्टः॥

वल्लिदूर्व्वा, स्त्री, (वल्लिरूपा दूर्व्वा।) माषा-दूर्व्वा। इति राजनिर्घण्टः॥

वल्लिग्राकटपोतिका, स्त्री, (वल्लिप्रधाना ग्राकट-पोतिका।) मूलपोती। इति राजनिर्घण्टः॥

वल्लिसुरसः, पुं, (वल्लिप्रधानः सुरसः।) अन्यत्र-पर्णी। इति राजनिर्घण्टः॥

वल्ली, स्त्री, (वल्लि+ङीष्।) लता। इत्यमरः॥ सा च भूमिप्रसारा वर्षमात्रस्थायिनी कुष्माण्डादा। (यथा च।
"विदारीसारिवारजनीगुडुच्योऽजश्रृङ्गीचेतिवल्ली-संज्ञः॥" इति सुश्रुते सूत्रस्थाने ३८ अध्यायः॥ यथा च, रामायणे। २। ८०। ६।
"लतावल्लीश्च गुल्मांश्च स्थानूनश्मन एव च।
जनास्ते चक्रिरे मार्गं छिन्दन्तो विविधान् द्रुमान्॥")
अजमोदा। इति मेदिनी। ले, ३८॥ कैवर्त्तिका। चव्यम्। इति राजनिर्घण्टः॥

वल्लीगड़ः, पुं, (वल्लीरूपो गड़ः।) मत्स्यविशेषः। भोला इति वालिकड़ा इति च भाषा। अस्य गुणाः। लघुत्वम्। रूक्षत्वम्। अनभिष्यान्दित्वम्। मरुत्करत्वम्। सर्य्यत्वम्। कफनाशन-त्वञ्च। इति राजवल्लभः॥

वल्लीज, क्ली, (वल्ल्यां लतायां जायते इति। जन+डः।) मरीचम्। इति राजनिर्घण्ट-शब्दरत्नावलौ॥ (यथा, दृहत्संहितायाम्। ८।१३।
"भाद्रपदे वल्लीजं निष्पत्तिं याति पूर्व्वशस्यञ्च।")

वल्लीबदरी, स्त्री, (वल्लीरूपा बदरी।) भूबदरी। इति राजनिर्घण्टः॥

वल्लीसुतः, पुं, (वल्लीषु जातो सुद्गः।) मकुष्टकः। इति राजनिर्घण्टः॥

वल्लीवृक्षः, पुं, (वल्लीवत् दीर्घो वृक्षः।) सालवृक्षः। इति राजनिर्घण्टः॥

वल्लुरं, क्ली, (वल्ल्यते आव्रियते लतादिनेति। वल्ल+बाहुलकात्उरच्।) कुक्षम्। मञ्जरी। क्षेत्रम्। निर्जलस्थानम्। ग्राहलः। इति हेम-चन्द्रः। गहनम्। इति मेदिनी। रे, २१०॥ विश्वप्रकाशे वल्लूरमिति पाठः॥

वल्लूरं, त्रि, (वल्ल्यते संव्रियते इति। वल्ल+"खर्ज्जि-पिञ्जादिभ्य ऊरोलचौ।" उणा० ४। ६०। इति ऊरच्।) आतपादिना शुष्कमांसम्। इत्यमरः। २। ६। ६३॥ (तस्याभक्ष्यत्वं यथा, मनुः। ५।१३।
"निमज्जतश्च मत्स्यादान् सौनं वल्लूरमेव च॥")
"वल्लूरं शुष्कमांसम्।" इति तट्टीकायां कुल्लूक-भट्टः॥) शूकरमांसम्। इति मेदिनी। रे, २१०॥ वनक्षेत्रम्। वाहनम्। ऊषरभूमिः। इति हेमचन्द्रः॥

वल्ल्या, स्त्री, (वल्ल+भावे घञ्। वल्लाय संवरणाय साधुः। वल्ल+यत्।) धात्रीवृक्षः। इति हारावली॥

व(ब)ल्वजः, पुं, (वल्वे पर्व्वते जायते इति। जन्+डः।) उलपः। इति हेमचन्द्रः॥ वाव इति ख्यातलक्षणम्। इत्यमरः॥ वलते शुवं वेष्टयति विशृन्दिवात् वप्रत्यये वल्वः पर्व्वतः तत्र जाता वल्वजाः इत्यर्थे। स्वभावात् बहुत्वे वल्वजाः। एको वल्वज इति भाष्यकारवचनादेकत्वमपि अतएव सुमनोऽधरोवल्वजादेर्व्वेति पाक्षिक-बहुत्वार्थं क्रमदीश्वरसूत्रम्। इति तट्टीकायां भरतः॥ (यथा, मनुः। २। ४३।
"सङ्गालाभे तु कर्त्तव्या कुशाश्मान्तकवल्वजैः।
त्रिरहता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा॥")

व(ब)ल्वजा, स्त्री, (वल्वे पर्व्वते जायते इति। जन+डः। टाप्।) लक्षविशेषः। सावे वागे इति हिन्दी भाषा। तत्पर्य्यायः। दृढ़पत्री २ दृढ़शुः ३ दृढ़वल्वजा ४ मौञ्जीपत्रा ५ दृढ़पत्रा ६ पानीयाश्रा ७ दृढ़च्छदा ८। अस्या गुणाः। मधुरत्वम्। शीतत्वम्। पित्तदाहदृष्यापहत्वम्। वातप्रकोपकत्वम्। रुच्यत्वम्। कण्ठशुद्धिकारि-त्वञ्च। इति राजनिर्घण्टः॥

वल्ह, क त्विधि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) क, वल्हयति। त्विधि दीप्तौ। इति दुर्गादासः॥

वल्ह, ड श्रेष्ठे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ड, वल्हते धनी श्रेष्ठः स्यादित्यर्थः।

वश्, तु स्तृहि। इति कविकल्पद्रुमः॥ (अदा०-पर०-सक०-सेट्।) तु, वष्टि धनं लोकः। इति दुर्गादासः॥

वश्रं, क्ली, (वश्र+"वश्रिरण्योरुपसंख्यानम्।" ३। ३। ५८। इत्यस्य वार्त्तिकोक्त्या अप्।) इच्छा। प्रभुत्वम्। आयत्तता। इति शब्द-रत्नावली॥ (यथा, महाभारते। १२। १३४। ७।
"वश्ये बलवतां धर्म्मः सुखं भोगवतामिव॥")

वश्रंवद, त्रि, (वश्रं तवाहं वश्र इति वाक्यं वद-तीति। वश्र+वद्+"प्रियवशे वदः खच्।" ३। २। ३८। इति खच्। "अरुर्द्विषदजन्तस्य मुम्।" ६। ३। ६७। इति मुम्।) वश्रं वदति यः। आयत्तकरवाक्यवक्ता। इति सुग्धबोध-व्याकरणम्। (वश्रीभूतः। यथा, राजतरङ्गि-ण्याम्। ४। ३६५।
"स जहार दुराचारो भूभृत् कोभवश्रंवदः॥")

वश्रः, त्रि, (वष्टीति। वश्र+अच्।) आयत्तः। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ८।१७।
"गुणाढ्योऽपि तदाकर्ण्य सद्यः खेदवशो-ऽभवत्॥")

वश्रः, पुं, (वश्र+भावे अप्।) इच्छा। इति संकीर्णवर्गे अमरः॥ (उश्यते इष्यते इति। वश्र+कर्म्मणि अप्।) वेश्यागृहम्। आय-त्तता। प्रभुत्वम्। इति त्रिकाण्डशेषः॥ जन्म। इति हेमचन्द्रः।

वश्रका, स्त्री, (वशेन आयत्ततया कायति शोभते इति। के+कः।) वश्या नारी। इति शब्द-रत्नावली॥

वश्रक्रिया, स्त्री, (वश्रस्य क्रिया करणम्।) वशी-करणम्। तत्पर्य्यायः। संवदनम्२। इत्यमरः६ मन्त्रिमन्त्रौषधैर्व्वश्रीकरणं संवदनं संपूर्व्वो दृशि-र्व्वश्रीकरणे भावेऽनट्। संवदना च इति केचित्। करणेऽनटि वश्रक्रियासाधने मन्त्रि-मन्त्रादावपि। जयश्रियः संवदनं यतस्तदिति रघुः। संचलनं इति पाठान्तरम्। इति तट्टीकायां भरतः॥

वश्रगा, स्त्री, (वश्रं गच्छतीति। गम+डः।) वशीभूता। इति शब्दरत्नावली॥ (यथा, दृहत्संहितायाम्। ४३। ३२॥
"गाङ्गादिवाकरसुताजलचारुहारां
धात्रीं ससुन्दरसनां वश्रगां करोति॥")
अस्मिन्नर्थे वाचस्पतिरप्येवायं शब्दः। यथा, महाभारते। ४। ६। १२।
"इदानीं ते हन्त वरं ब्रवीमि
प्रशाधि मत्स्यान् वश्रगोऽस्म्यहं तव॥")

वश्रा, स्त्री, (वश्र स्तृहि+अच्। टाप्। "वश्रि-रण्योरुपसंख्यानम्।" इति अप् वा।) वन्ध्या। (अस्या धनं राज्ञा रक्षितव्यम्। यथा, मनुः। ८। २८।
"वश्राऽपुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च।
पतिव्रतासु च स्त्रीषु विधवासातुरासु च॥")
सुता। योषा। स्त्रीगवी। करिणी। इति मेदिनी। शे, १३॥ (यथा, कथासरित्सागरे। ६।१२०।
"असिञ्चत स ताभिश्च वश्राभिरिव वारणः॥")
वन्ध्या गवी। इत्यमरः॥ (यथा, ऋग्वेदे। २।७।५।
"त्वं नो असि भारताग्ने वश्राभिरुक्षभिः॥"
"वश्राभिर्वन्ध्याभिर्गोभिः।" इति तद्भाष्ये सायणः॥ वशीभूता। यथा, गाथायाम्। १८३ अध्याये।
"सप्तभिर्मन्त्रितं कृत्वा करवीरस्य पुष्पकम्।
स्त्रीणामग्रे भ्रामयेच्च याऽसौ सा वश्रा भवेत्॥")

वश्राढ्यकः, पुं, (वश्रया आढ्यकः। प्रचुरवश्रा-त्वात् तथात्वम्।) शिग्रुसारः। इति शब्द-रत्नावली॥

वश्रापायी [न्], पुं, (वश्रां पिबतीति। पा+णिनिः।) कुक्कुरः। इति शब्दमाला॥

वश्रि, क्ली, (वश्र+भावे इन्।) वश्रित्वम्। इति शब्दमाला॥

वश्रिकः, त्रि, शून्यम्। इत्यमरः। ३। १। ५६॥

वशिका, स्त्री, (वश्यो वशीकरणं साध्यत्वेनास्त्यस्या इति। वश्+ठन्।) अगुरुः। इति शब्दचन्द्रिका॥

वशिता, स्त्री, (वशिनो भावः। वशिन्+तल्।) वशित्वम्। इति हेमचन्द्रः॥ (यथा, भागवते। ११। २५। ३६।
"नारायणे तुरीयाक्षे भगवच्छब्दशब्दिते।
मनो मय्यादधद्योगी महिम्नो वशितामियात्॥")

वशित्वं, क्ली, (वशिनो भावः। वशिन्+त्व।) आयत्तत्वम्। (यथा, षड्विंशे। १।
"ग्राह्यं सुचिन्तितमपि प्रतिचिन्तनीय-
मारार्धितोऽपि नृपतिः परिशङ्कनीयः।
अङ्के स्थितापि युवतिः परिरक्षणीया
ग्राह्ये नृपे च युवतौ च कुतो वशित्वम्॥")
अणिमाद्यैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः। यथा,—
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावशायिता॥"
वशित्वं स्वातन्त्र्यं येन स्वतन्त्रश्चरति इत्यमरटीकायां भरतः॥

वशिनी, स्त्री, (वश्यो वशीकरणं साध्यत्वेनास्त्यस्या इति। वश्+इनिः। ङीप्।) वन्दा। ग्रन्थीवृक्षः। इति शब्दरत्नावली॥

वशिरं, क्ली, (उश्यते इष्यते इति। वश्+बाहुलकात् किरच्। यद्वा, वशिं वशत्वं राती ति। रा+कः।) सामुद्रलवणम्। इत्यमरः॥

वशिरः, पुं, (वश्+किरच्।) गजपिप्पली। इत्यमरः॥ (अस्य पर्य्यायो यथा,—
"करिपिप्पली करणा कपिवल्ली कपिल्लिका।
श्रेयसी वशिरश्चापि गजाह्वा गजपिप्पली॥"
सुजिटा इति ख्यातः। अस्य पर्य्यायो यथा,—
"पार्वतेयश्च करभो वशिरः कपिपिप्पली।
आमाताऽसौ क्वचित्प्रोक्तः सूर्य्यावर्त्तः सितोऽपरः॥"
इति वैद्यकरत्नमाला॥)
चव्यम्। इति राजनिर्घण्टः॥ अपामार्गः। इति मेदिनी। रे, २०८॥ वचा। इति शब्दचन्द्रिका॥

वशिष्ठः, पुं, (वशवतां वशिनां श्रेष्ठः। वशवत्+इष्ठन्। "विन्मतोर्लुक्।"५।३।६५। इति लुक्।) यद्वा, वरिष्ठः। पृषोदरादित्वात् साधुः। अस्य निरुक्तिर्यथा, महाभारते। १३। ६३। ८८।
"वशिष्ठोऽसि वरिष्ठोऽसि वशे वासश्च मेऽपि।
वशिष्ठत्वाच्च वासाच्च वशिष्ठ इति विद्धि माम्॥")
खनामख्यातमुनिः। तत्पर्य्यायः। अरुन्धतीजानिः २। इति हेमचन्द्रः॥ अरुन्धतीनाथः ३ वाशिष्ठः ४। इति शब्दरत्नावली॥ स तु ब्रह्मणः प्राणेभ्यो जातः। तस्य भार्य्या कर्दमकन्या अरुन्धती। पुत्राः सप्तर्षयः। इति श्रीभागवतमतम्॥ अपि च।
"वशिष्ठश्च तथोर्ज्जायां सप्त पुत्रानजीजनत्।
कन्याश्च पुष्करीकाख्यां सर्व्वशोभासमन्विताम्॥
रजो गात्रोर्द्ध्वबाहुश्च सवनश्चानघस्तथा।
सुतपाः शुक्र इत्येते सप्त पुत्रा महौजसः॥
सर्व्वे तपस्विनः प्रोक्ताः सर्व्वे यज्ञेषु भागिनः।
अयजन्वानश्च यज्वानः पितरो ब्रह्मणः सुताः॥"
इति कौर्म्मे १२ अध्यायः॥
मित्रावरुणयोः पुत्रः। यथा,—
"इति पृष्टा नरेन्द्रेण कथयामिति भूपते।
वशिष्ठं चोदयामासुः समस्तास्ते तपोधनाः॥
मुनिभिः प्रेरितः सोऽपि यथावद्यतमानसः।
योगमास्थाय सुचिरं मैत्रावरुणिरात्मवान्॥"
अन्यच्च।
"मित्रावरुणयोश्चैव कुक्षिगो ये परिश्रुताः।
एकार्षेयास्त्वथैवान्ये वशिष्ठा नाम विश्रुताः॥
एते पञ्चा वशिष्ठानां स्मृता ऋषिगणैव तु।
अष्टावेते समाख्याता ब्रह्मणो मानसाः सुताः॥"
इति वह्निपुराणे वृतधेनुविधिवाराहप्रादुर्भावाध्यायौ॥

वशीकरणं, क्ली, (वश्+इ+भावे ल्युट्। अभूततद्भावे च्विः।) मन्त्रिमन्त्रौषधैरायत्तीकरणम्। इति भरतमल्लाधरौ॥ अस्य पर्य्यायः वशक्रियाग्रन्थे द्रष्टव्यः॥ *॥ तत्साधनौषधानि यथा,—
"ब्रह्मदण्डी वचा कुष्ठं प्रियङ्गुनागकेशरम्।
दद्यात्ताम्बूलसंयुक्तं स्त्रीणां मन्त्रेण तद्वशम्॥"
ॐ नारायणाय स्वाहेति।
"ताम्बूलं दीयते यस्य स वशी स्यान्न संशयः।"
ॐ हरि हरि स्वाहा॥ १॥
"गोदन्तं हरितालञ्च संयुक्तं काकजिङ्घया।
चूर्णं कृत्वा यस्य शिरे दीयते स वशी भवेत्॥२॥
खञ्जरीटस्य मांसन्तु मधुना सह पेषयेत्।
ऋतुकाले योनिलेपात् पुरुषो दासतामियात्॥३॥
अगुरुं गुग्गुलुञ्चैव नीलोत्पलसमन्वितम्।
गुडेन धूपयित्वा तु राजद्वारे प्रियो भवेत्॥४॥
श्वेतापराजितामूलं पिष्टं रोचनया युतम्।
यं पश्येत्तिलकेनैव वशीकुर्य्यान् नृपालये॥५॥
काकजिङ्घा वचा कुष्ठं निम्बपत्रं सकुङ्कुमम्।
आत्मरक्तं समावेद्य वशी भवति मानवः॥६॥
ॐ नमः सर्व्वसत्त्वेभ्यो नमः। सिद्धिं कुरु कुरु स्वाहा।
*सप्तभिर्मन्त्रितं कृत्वा करवीरस्य पुष्पकम्।
स्त्रीणामग्रे भ्रामयेच्च चणाङ्गे सा वशा भवेत्॥७॥
ब्रह्मदण्डी वचा पत्रं मधुना सह पेषयेत्।
अङ्गलेपाच्च वनिता भर्त्तारमिच्छति॥८॥
मूलं जयन्त्या वक्त्रस्थं व्यवहारे जयप्रदम्॥९॥
भृङ्गराजस्य मूलन्तु पिष्टं शुक्लेन संयुतम्।
अक्षिगो चाञ्जयित्वा तु वशीकुर्य्यान्नरं किल॥१०
अपराजिताग्निशिखां दद्यान्नीलोत्पलसमन्विताम्।
ताम्बूलेन प्रदानाच्च वशीकरणमुत्तमम्॥११॥
चतुःषष्टिकलाः प्रोक्ताः कामशास्त्रे वशीकराः।
आलिङ्गनाद्या वृक्षीणां कुमार्य्यादेर्वशीकराः॥
१२॥
रोचना नागपुष्पाणि विल्वपुष्पं प्रियङ्गवः।
कुङ्कुमं चन्दनञ्चैव तिलकेन जगद्वशे॥१३॥
इरालभा वचा कुष्ठं कुङ्कुमञ्च घृतावरी।
तिलतैलेन संयुक्तं योनिलेपात् वशो नरः॥१४॥
निम्बकाष्ठस्य धूपेन धूपयित्वा भगं स्त्रियः।
सुभगा स्यात् सा च रुद्र पतिर्दासो भविष्यति॥
१५॥
माहिषं नवनीतञ्च कुष्ठस्य मधुयष्टिका।
सौभाग्यं भगलेपात् स्यात् पतिर्दासो भवेत्तदा॥
१६॥
पञ्च रक्तानि पुष्पाणि पृथग्जात्वा समाहरेत्।
कुङ्कुमेन समायुक्तमात्मरक्तसमन्वितम्॥
पुष्पेण तु स पिष्ट्वा च रोचनायां समेकतः।
स्त्रिया पुंसा कृतो रुद्र तिलकोऽयं वशीकरः॥
१७॥
ब्रह्मदण्डी तु पुष्पेण याने पाने वशीकरः॥१८॥
ॐ गं गणपतये स्वाहेति।
अयं गणपतेर्मन्त्रो धनविद्याप्रदायकः॥
दशसाहस्रञ्च जप्त्वा वह्नौ श्रियां ततः।
व्यवहारे जयः स्याच्च घृतजाप्यान्नृपाः प्रियः॥
१९॥
तिलानान्तु घृताक्तानां लक्षाणि रुद्र होमयेत्।
अष्टोत्तरसहस्रन्तु राजा वश्यस्त्रिभिर्दिनैः॥२०॥
ह्रींकारं सविसर्गञ्च प्रातःसूर्य्यसमद्युतिम्।
स्त्रीणां ललाटे विन्यस्य वश्यतां नयति ध्रुवम्॥
२१॥
यस्तु जुहुयादयुतं शुचिः प्रयतमानसः।
दृष्टिमात्रे सदा तस्य वश्यमायान्ति योषितः॥२२॥
मनःशिला पत्रकञ्च सगोरोचनकुङ्कुमम्।
एभिः कृते च तिलके सदा स्त्री वश्यतामियात्॥
२३॥
सहदेवी भृङ्गराजः सितापराजिता वचा।
क्षीरेण तिलकं कृत्वा त्रैलोक्यं वश्यतामियात्॥२४
गोरोचना मीनपित्तमाभ्याञ्च कृतवर्त्तिकाम्।
यः पुमांस्तिलकं कुर्य्यादामहस्तकनिष्ठया।
स करोति वशं सर्व्वं त्रैलोक्यं नात्र संशयः॥
२५॥
गोरोचना महादेव ऋतुशोणितभाविता।
ततः कृताच्च तिलकान्मानवं यं निरीक्षते।
तच्च सर्व्वं वशं कुर्य्यान्नात्र कार्य्या विचारणा॥
२६॥
नागेश्वरञ्च शैलेयं त्वक् पत्रञ्च हरीतकी।
चन्दनं काष्ठकल्कोला रक्तशालिसमन्विता।
एतैर्धूपो वशकरः सत्यवाग् इवेश्वर॥ २७॥
रतिकाले महादेव पार्व्वतीप्रिय शङ्कर।
निजशुक्रं गृहीत्वा तु वामहस्तेन यः पुमान्।
कामिनीचरणं वामं लिम्पेत् स स्यात् स्त्रियाः
प्रियः॥ २८॥
सैन्धवञ्च महादेव पारावतमलं मधु।
एभिर्लिप्तन्तु लिङ्गं वै कामिनीवशकृद्भवेत्॥२९॥
पुष्पाणि पञ्चरक्तानि गृहीत्वा यानि कानि च।
तण्डुलञ्च प्रियङ्गुञ्च पेषयेदेकयोगतः।
अनेन लिप्तलिङ्गस्य कामिनी वश्यतामियात्॥"
३०॥
इति गारुडे १८३। १८६। १८८ अध्यायाः॥
"अथान्यत् संप्रवक्ष्यामि वशीकरणमुत्तमम्।

येन विज्ञानमात्रेण मन्त्राः सिद्ध्यन्ति तत्त्वतः।
प्रतिमां कारयेद्देवि ! पलेन रजतस्य च।
पलार्द्धेन महेशानि ! साध्यस्य प्रतिमां शिवे॥
हरितालं पलार्द्धेन हरिद्राचूर्णकं तथा।
गर्त्तं कृत्वा सार्द्धहस्तं यत्र निःक्षिप्य सुन्दरि !॥
रक्तासनं तत्र दत्त्वा विशेत्तन्मतमानसः।
चतुर्हस्तु महेशानि ! पताका विनिवेशयेत्॥
रक्तासने चोपविश्य पूर्ब्बास्यो जपमारभेत्।
पूजायां नियमं देवि ! जानीहि नगनन्दिनि॥
तिलपूर्णघटं तत्र स्थापयेत्तत्र देशिकः।
प्राणप्रतिष्ठामन्त्रेण प्राणान् संस्थापयेद्बुधः॥
अधः कृत्वा पूजयित्वा प्रवालमालया जपेत्।
दशसाहस्रजापेन प्रयोगार्हो भवेत्ततः॥
प्रणवं पूर्ब्बमुच्चार्य्य मायाबीजं द्वितीयकम्।
का लं लक्ष्मीकीर्युक्तं वामकर्णेन्दुभूषितम्॥
ततो रक्तपदं ब्रूयाच्चासृङ्मे तदनन्तरम्।
साधयेति ततो न्यस्य वशमानय तत्परम्॥
वह्निजायावधिर्मन्त्रो जपेद्दशसहस्रकम्।
दशांशादिप्रमाणेन होमादींश्च समाचरेत्॥
प्रातः स्नात्वा हविष्याशी शुचिर्भूत्वा जितेन्द्रियः।
प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि॥
जपे समाप्ते देवेशि ! हुनेद्दिने दिने शुभे।
जातीपुष्पस्य होमेन वशयेन्नात्र संशयः॥
कर्पूरमिश्रितैस्तोयैस्तर्पयेत् परदेवताम्।
पूर्ब्बं प्रणवमुद्धृत्य चासृङ्मां प्रवदेत्ततः॥
तर्पयान्यमिजायान्तं मन्त्रं जानीहि सुन्दरि !।
अनेनैव विधानेन संतर्प्य परदेवताम्॥
सिद्धिः प्रयोगाद्देवेशि ! जायते नात्र संशयः।
अभिषेकं ततः कुर्य्यात् गुरुरिष्टे प्रागवक्त्रमे॥
प्रणवञ्च महेशानि ! चासृङ्मां तदनन्तरम्।
अभिषिञ्चामि तत्पश्चात् कृष्णेनाभिषिचेयेत्॥
तद्दशांशेन देवेशि ! ब्राह्मणान् भोजयेत्ततः।
एवं कृते महेशानि ! वशीकरबलोत्तमम्॥
जायते नात्र सन्देहः सत्यं सत्यं न संशयः।
कामतुल्यश्च नारीणां रिपूणां शमनोपमः॥
यावज्जीवितपर्य्यन्तं स्मरबाण इवेश्वरि !।
जायते नात्र सन्देहः सत्यं सुरगणार्चिते॥*॥
श्वेतापराजितामूलं पेषयेद्रोचनायुतम्।
पूतेनामन्त्रितं कृत्वा तिलकं कारयेत्ततः॥
वशयेन्नात्र सन्देहः सत्यं सत्यं महेश्वरि !।
चन्द्रसूर्य्यौ यदि दृश्यौ तदा निष्फलभाग्भवेत्॥
रक्तवस्त्रेण चासृङ्मां तोषयेद्बहुयत्नतः।
सुवर्णं दक्षिणा देया वित्तानुसारतः प्रिये !॥
आदौ मद्भक्तौ पूजां कुर्य्यात्तस्या वरानने !।
पक्षदिनंप्रयोगेण राजानं वशमानयेत्॥
तव प्रीत्यै महादेवि ! कथितं भुवि दुर्लभम्।"
इति रुद्रयामलतन्त्रम्॥

वशीभूतः, त्रि, वशतां प्राप्तः। अवशो वशो भूत इत्यर्थे च्विप्रत्ययेन निष्पन्नः॥

वशीरः, पुं, (वश्+ईरन्।) गजपिप्पली। इति जटाधरः॥

वश्य, क्ली, (वशाय वशीकरणाय साधु। "तत्र साधुः।" ४।४।९८। इति यत्।) खड्गम्। इति शब्दचन्द्रिका॥

वश्य, त्रि, (वशमधीनत्वं गत इति। वश्+"वशं गतः।" ४।४।८६। इति यत्।) आयत्ततां गतः। तत्पर्य्यायः। प्रणेयः २। इत्यमरः॥ वशः ३। इति शब्दरत्नावली॥ (यथा, मार्कण्डेयपुराणे। ३६।१७।
"स्रष्टुं सेयमानास्तु सिंहशार्दूलकुञ्जराः।
यथा यान्ति तथा प्रायो वश्यो भवति योगिनः॥"
अभिमन्युस्य पञ्चमः पुत्रः। यथा, मार्कण्डेये। ५३।३४।
"हरिर्वर्षसृतीयस्तु चतुर्थोऽभूदिलाहृतः।
वश्यश्च पञ्चमः पुत्रो हिरण्यः षष्ठ उच्यते॥")

वश्यका, स्त्री (वश्या+स्वार्थे कन्।) वशगा स्त्री। इति शब्दरत्नावली॥

वश्या, स्त्री, (वश्य+टाप्।) वशीभूता नारी। तत्पर्य्यायः। वशगा २ वशास्या ३ वश्यका ४। इति शब्दरत्नावली॥ (यथा, उत्तररामचरिते १ अङ्के। १।
"यं ब्राह्मणमियं देवी वाग्वश्येवानुवर्त्तते।
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते॥")

वष, वधे। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) वषति। इति दुर्गादासः॥

वषट्, व्य, देवोद्देशकहविस्त्यागमन्त्रः। इत्यमरः॥ स्वाहा औषट् वौषट् वषट् स्वधा एते पञ्चशब्दा देवहविर्दाने वह्निमुखहुतौ वर्त्तन्ते। देवाय हविषो दानं देवहविर्द्दानं तत्र देवा इन्द्रादयः। अत्र पितरो देवता इति श्रुतेस्तेऽपि देवाः हविर्द्दानं इत्यनेन एते मन्त्रा इति स्थितम्। इति भरतः॥ (यथा, ऋग्वेदे। १०।११५।६।
"इति त्वाग्ने ऋषिहोत्रस्य पुत्रा
उपस्तुतास ऋषयोऽवोचन्।
तांश्च पाहि गृणतश्च सूरीन्
वषट् वषट्कृत्यर्घासो अनशन्
नमो नम इत्यूर्ध्वासो अनशन्॥")

वषट्कारः, पुं, (वषट् इत्यस्य कारः करणं यत्र।) देवोद्देशकयागः। तत्पर्य्यायः। देवयज्ञः २ आहुतिः ३ होमः ४ होत्रम् ५। इति हेमचन्द्रः॥ (यथा कात्यायने श्रुतर्षष्ठे इत्युत्तादिकेषु कारशब्देन वा समासः। यथा वषट्कारः। स्वाहाकारः॥)

वषट्कृतं, त्रि, (वषडिति मन्त्रेण हुतम्।) हुतम्। इत्यमरः॥
"अग्नौ हुतन्तु यद्दत्तं तत् स्यादग्निषु वषट्कृतम्॥"
इति शब्दरत्नावली च॥

वष्क, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) क्विपि वट्। ङ, वष्कते। इति दुर्गादासः॥

वष्कयः, पुं, (वष्कते इति। वष्क गतौ+बाहुलकात् अयन्।) एकहायनो वत्सः। इत्यमरटीकायां रायमुकुटधृतशाकटायनः॥

वष्कयणी, **वष्कयिणी**, } स्त्री, (वष्कयः एकहायनो वत्सः। तेन नीयते इति। नी+क्विप्। गौरादित्वात् ङीष्। "पूर्ब्बपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्। वष्कयिनीति पाठे। वष्कयोऽस्यास्या इति। "अत इनि ठनौ।" इति इनिः। अट् कुप्वाङिति णत्वम्।) चिरप्रसूता गौः। इत्यमरः॥ "वष्कते परिक्रामति वष्कयश्चिरकालीनवत्सः वक्ना इति ख्यातः। वष्क ङ गतौ नान्नीति अयः वष्कयस्यैकहायनो वत्स इति कोषः तद्योगात् वष्कयिणी नैकाजादिति ङीन्। वष्कयनीति पाठे गोदण्डेत्यादिनापामादित्वात् नः नदादित्वादीप्। दुग्धसुघती गवेषितवष्कयिनीति मुहुश्चषमधे गदसिंहः।" इति तट्टीकायां भरतः॥

वस, ऐ औ निवासे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) ऐ, उस्यात्। औ, अवात्सीत्। इति दुर्गादासः॥

वस, क स्नेहच्छिदोश्च। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सक०-च सेट्।) स्नेह इह प्रीतिः। क, वासयति बन्धुः। चकारात् वधे च। इति दुर्गादासः॥

वस, त क वासे। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-अक०-सेट्।) वसयति। इति दुर्गादासः॥

वस, य उ इर् स्तम्भे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्। उदितात् क्त्वावेट्।) य, वस्यति। उ, वसित्वा वस्त्वा। इर्, अवसत् अवात्सीत् अवसीत्। अस्मात् पुषादित्वान्नित्यं ङ, इत्यन्ये। स्तम्भ इह नम्रसारहितीभावः। यो वस्यस्तरिभिति इलायुधः। इति दुर्गादासः॥

वस, ल ङ स्तुतौ। इति कविकल्पद्रुमः॥ (अदा०-आत्म०-सक०-सेट्।) स्तुतिरिह आच्छादनपूर्ब्बकधारणम्। ल ङ, वस्ते लोकः वस्त्रम्। इति दुर्गादासः॥

वसतिः, स्त्री, (वस निवासे+"वहिवस्यर्त्तिभ्यश्चित्।" उणा० ४।६०। इति भावाधिकरणादौ अतिः)। वासः। (यथा, अमरशतके। ११।
"धीरं वारिधरस्य वारि किरतः श्रुत्वा निशीथे ध्वनिं
दीर्घोच्छ्वासमदश्रुधा विरहिणी बाला चिरं ध्यायता।
अध्वन्येन विमुक्तकण्ठकरुणं रात्रौ तथा क्रन्दितं
यामीर्यैर्जनतो जनस्य वसतिर्यामे निशीथा यथा॥")
यामिनी। निकेतनम्। इति मेदिनी। ते, ९५०॥ (यथा, कुमारे। ४।११।

"रजनौतिमिरावगुण्ठिते
पुरमार्गे घनशब्दविक्लवाः।
वसतिं प्रिय! कामिनां प्रियाः
लहते प्रापयितुं क ईश्वरः॥")

वसती, स्त्री, (वसति+ङ्यादिकारादिति ङीष्।) वासः। यामिनी। निकेतनम्। इति मेदिनी। ते, १५०॥

वसनं, क्ली, (वस्यते आच्छाद्यतेऽनेनेति। वस्+ल्युट्।) वस्त्रम्। इत्यमरः॥ (यथा, गीतगोविन्दे। १। १२।

"वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम्।
केशवधृतहलधररूप!
जय जगदीश हरे!॥"

वसनमिति। वस्+भावे ल्युट्।) छादनम्। इति मेदिनी। ने, १२३॥ (वस+आधारे ल्युट्।) निवासः। (यथा, महाभारते। ५। ४३। ६०।

"मौनान्न स मुनिर्भवति नारण्यवसनान्मुनिः।
खलक्षयन्तु यो वेद स मुनिः श्रेष्ठ उच्यते॥")

स्त्रीकटीभूषणम्। इति शब्दरत्नावली॥

वसना, स्त्री, (वस+युच्।) स्त्रीकटीभूषणम्। यथा,—

"सारसनं सारशनं वसना वशना तथा।
वसनं वशनञ्चेति स्त्रीकटीभूषणे भवेत्॥"

इति शब्दरत्नावली॥

वसन्तः, पुं, (वसन्त्यत्र मदनोत्सवा इति। वस+"हृभूवहिवसिभासिसाधिगृहिमहिजिनन्दिभ्यश्च।" उणा० ३। १२८। इति झच्।) ऋतुविशेषः। स च चैत्रवैशाखमासद्वयात्मकः। यथा। मधुश्च माधवश्च वासन्तिकावृतुः। इति मलमासतत्त्वधृता श्रुतिः॥ (फाल्गुनचैत्रात्मकश्चेति केचित्। वसन्तः कुम्भमीनयोरितिप्रयोगदर्शनात्॥*॥) तत्पर्य्यायः॥ पुष्पसमयः २ सुरभिः ३। इत्यमरः॥ मधुः ४। इति शब्दरत्नावली॥ माधवः ५ फल्गुः ६। इति जटाधरः॥ ऋतुराजः ७ पुष्पमासः ८ पिकानन्दः ९ कान्तः १० कामसखः ११॥ तत्कालीनजन्तुगुणाः। कषायत्वम्। मधुरत्वम्। रूक्षत्वञ्च। इति राजनिर्घण्टः॥ (यथा, ऋतुसंहारे। ६। २।

"द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः।
सुखाः प्रदोषा दिवसाश्च रम्या
सर्वं प्रिये! चारुतरं वसन्ते॥"

यथा च।

"हेमन्ते शीयते श्लेष्मा वसन्ते च प्रकुप्यति।
प्रायेण प्रशमं याति स्वयमेव समीरणः।
शरत्काले वसन्ते च पित्तं प्रायेण कुप्यति।
प्रायेण प्रशमं याति स्वयमेव समीरणः॥"

इति पूर्व्वखण्डे द्वितीयेऽध्याये प्राङ्नरेबोक्तम्॥

"मुदितकोकिलकूजितकाननं
मदनदीपककिंशुकशोभितम्।
कुसुमसौरभरञ्जितभूधरं
कथितमत्तमधुव्रतसङ्गमम्॥
मकरकेतनबाणसमाकुलं
सुदितमेव समस्तमिदं जगत्।
मलयमारुतकल्पितगुणान्वितः
कफकरो हि वसन्तऋतुर्भवेत्।
कफजकोपविनाशनकारणं
वमनमावनरूक्षनिषेवणम्॥
विविधः सुरतानन्दः संश्रमः कफवारणः।
कटुक्षाराम्लकाः सेव्या ग्रीष्मनं कफसम्भवे॥
यायामश्रमसंरोधक्षिन्नो विश्रान्तमानसः।
एवं क्रियासमापन्नो नरः श्लीघ्रं सुखी भवेत्॥"

इति वसन्तोपचारः॥

इह हारीते प्रथमस्थाने चतुर्थेऽध्याये॥*॥

"कफक्षितौ हि शिशिरे वसन्तेऽर्कांशुतापितः।
हत्वाग्निं कुरुते रोगानतस्तं त्वरया जयेत्॥
तीक्ष्णैर्वमनखाद्यैर्लघुरूक्षैश्च भोजनैः।
यायामोद्वर्त्तनाघातैर्जित्वा श्लेष्माणमुल्बणम्॥
स्नातोऽनुलिप्तः कर्पूरचन्दनागुरुकुङ्कुमैः।
पुराणयवगोधूमशौरजाङ्गलशूल्यभुक्॥
सहकाररसोन्मिश्रानाखाद्य प्रियया पितान्।
प्रियास्यसङ्गसुरभीन् प्रियानेचोत्पलाङ्कितान्॥
सौमनस्यकृतो हृद्यान् वयस्यैः सहितो पिबेत्।
निर्मदानासवारिष्टसीधुमाद्वीकमाधवान्॥
मृद्वग्नेरामु सारासु मध्यमु जलदासु वा।
दक्षिणानिलशीतेषु परितो जलवाहिषु॥
अहरूढसुवर्ण्येषु मणिकुट्टिमकान्तिषु।
परपुष्टविघुष्टेषु कामकर्म्मान्तभूमिषु॥
विचित्रपुष्पवृक्षेषु काननेषु सुगन्धिषु।
गोष्ठीकथाभिश्चित्राभिर्मध्याह्नं गमयेत् सुखी॥
गुरुशीतदिवास्वप्नस्निग्धाम्लमधुरांस्त्यजेत्॥"

इति वाभटे सूत्रस्थाने तृतीयेऽध्याये॥

"हेमन्ते निचितः श्लेष्मा दिनकृद्भाभिरीरितः।
कायाग्निं बाधते रोगांस्ततः प्रकुरुते बहून्॥
तस्मादस्मिन् कर्म्माणि वमनादीनि कारयेत्।
गुर्व्वम्लस्निग्धमधुरं दिवास्वप्नञ्च वर्ज्जयेत्॥
व्यायामोद्वर्त्तनं धूमं कवड्यग्रहमञ्जनम्।
सुखाम्बुना शीतविधिं शीलयेत् कुसुमागमे॥
चन्दनागुरुदिग्धाङ्गो यवगोधूमभोजनः।
शारभं शशमैणेयं मांसं लावकपिञ्जलम्॥
मद्यवेल्लिगदं सीधुं पिबेन्माध्वीकमेव वा।
वसन्तेऽनुभवेत् स्त्रीणां काननानाञ्च यौवनम्॥"

इति चरके सूत्रस्थाने षष्ठेऽध्याये॥

"मधुमाधवौ वसन्तः। फाल्गुनचैत्रौ वसन्तः। ता एवौषधयः कालपरिणामात् परिणतवीर्य्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्नाः स्निग्धा अत्यर्थं गुर्व्वाम्ला उपयुज्यमाना मन्दकिरणलाङ्गलो; सतुषारपवनोपस्पर्शितदेहानां देहिनामविदग्धाः श्लेष्माणं लात्गौरवादुपक्लेपाच्च श्लेष्मणः सञ्चयमापादयन्ति स सञ्चयो वसन्तेऽर्करश्मिप्रविलापितः ईषत्स्रस्तदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति।" "पूर्व्वार्द्धे वसन्तस्य लिङ्गम्।"

"दिग्धौ वसन्ते विमलाः काननेरूपशोभिताः।
किंशुकाम्भोजबकुलचूताशोकादिपुष्पितैः॥
कोकिलाषट्पदगणैरुपगीता मनोहराः।
दक्षिणानिलसंवीताः सुस्वाः पल्वलोज्ज्वलाः॥"

इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥*॥)

अस्याधिष्ठातृदेवतोत्पत्तिर्यथा,—

मन्मथ उवाच।

"करिष्येऽहं तव विभो वचनाद्धरमोहनम्।
किन्तु योषिन्महास्त्रं मे ततः कान्तां भवान्
सृज॥
मया संमोहिते शम्भौ यया तस्यानुमोहनम्।
कार्य्यं मनोरमां कामां तां निर्दिश्य लोकभृत्॥
तामहं नहि पश्यामि यया तस्यानुमोहनम्।
कर्त्तव्यमधुना धातस्तोषायं ततः कुरु॥

मार्कण्डेय उवाच।

एवंवादिनि कन्दर्पे धाता लोकपितामहः।
कया संमोहनीयोऽयमिति चिन्तां जगाम ह॥
चिन्ताविष्टस्य तस्याथ निःश्वासो यो विनिःसृतः।
तस्मादसन्तः संजातः पुष्पव्रातविभूषितः॥
चूताङ्कुरांस्तत्कलिकां बिभ्रद्भ्रमरसंहतिम्।
किंशुकान् सारसा रेजे प्रफुल्ल इव पादपः॥
ग्रीवराजीवसङ्काशः फुल्लताम्रसरोरुहः।
सन्ध्योदितखद्योतप्रतिमास्यः सुनासिकः॥
गुच्छवच्छ्रवणावर्त्तः श्यामकुञ्चितमूर्द्धजः।
सन्ध्यांशुमालिसदृशः कुण्डलद्वयमण्डितः॥
प्रमत्तवारणगतिर्विस्तीर्णहृदयस्थलः।
पीनस्थूलायतभुजः कठोरकरयुग्मकः॥
सुवृत्तोरुकटीजङ्घः कम्बुग्रीवोन्नतांसकः।
गूढजत्रुः पीनवक्षः संपूर्णः सर्व्वलक्षणैः॥
ताडयेऽथ सुतोत्पन्ने सम्पूर्णे कुसुमाकरे।
ववौ वायुः सुरभिः पादपा अपि पुष्पिताः॥
पिकाश्च नेदुः सततं पञ्चमं मधुरस्वराः।
प्रफुल्लपद्मा अभवन् सरस्यः स्वच्छपुष्करः॥"

इति कालिकापुराणे ४ अध्यायः॥*॥

हरमोहनकाले अस्य कर्म्माणि यथा,—

"मधुश्च कुरुते कर्म्म यदुक्तस्य विमोहने।
तत् शृणुष्व महाभाग नित्यं तस्योचितं पुनः॥
चम्पकान् केशरानाम्रान् करञ्जान् पाटलांस्तथा।
नागकेशरपुन्नागान् किंशुकान् केतकान्
वकान्॥
माधवीमल्लिकापर्णसारान् कुरुवकांस्तथा।
उत्फुल्लयति तच्च स्म यत्र तिष्ठति वै हरः॥
सरांस्युत्फुल्लपद्मानि वीजयन् मलयानिलैः।
सुगन्धि कृतवान् यत्नात् अतीव शुकराश्रमम्॥
लताः सर्व्वाः सुमनसो नूतनाङ्कुरसञ्चयाः।
दृष्ट्वा रुचिरभावेन वेष्टयन्ति स्म तच्च ह॥
तान् वृक्षांश्चारुपुष्पाढ्यांस्ते सुगन्धिसमीरणैः।
दृष्ट्वा कामवशं यातो न तत्र मुनिरप्युत॥
तत्रस्था अपि लोकेश नानाभावैः सुशोभनैः।
रमन्ते स्म सुराः सिद्धा ये ये चापि तपोधनाः॥
न तस्य पुनरत्राभिर्दृष्टं मोहस्य कारणम्।

भावं न कुरुते कामं कायोत्थमपि ग्रहैः ॥"
इति कालिकापुराणे ७ अध्यायः ॥*॥
वसन्ते वर्णनीयानि यथा,—
"सुरभौ दोला कोकिलमारुतसङ्गतिरङ्ग-
दलोद्भिदाः ।
जातीतरपुष्पचयान्नमञ्जरीभ्रमरझङ्काराः ॥"
इति कविकल्पलतायां प्रथमस्तबकः ॥*॥
अतिसारः । इति शब्दरत्नावली ॥ षड्रागान्त-
र्गतद्वितीयरागः । यथा,—
"रागाः षडेव तु प्रोक्ता रागिण्यस्त्रिंशदेव तु ।
भैरवोऽथ वसन्तश्च नटनारायणस्तथा ॥"
इत्यादि । तस्य पञ्चरागिण्यो यथा,—
"आन्दोलिता च देशाख्या लोला प्रथममञ्जरी ।
मन्दारी चेति रागिण्यो वसन्तस्य सदानुगाः ॥"
अस्य ध्यानं यथा,—
"शिखण्डिबर्हाचयबद्धचूडः
पुष्णन् पिकं चूतलताङ्कुरैश्च ।
भ्रमन् सदा वाममनोज्ञमूर्त्ति-
र्मत्तङ्गमस्तः स वसन्तरागः ॥"
अस्य गानसमयो यथा,—
"श्रीपञ्चम्याः समारभ्य यावत् स्याच्छयनं हरेः ।
तावद्वसन्तरागस्य गानमुक्तं मनीषिभिः ॥"
इति सङ्गीतदामोदरः ॥
कल्लिनाथमते अस्य षड्रागिण्यो यथा ।
आन्धली १ गमकी २ पटमञ्जरी ३ गौड़करी
४ धानकली ५ देवग्राखा ६ ॥ हनुमन्मते
हिन्दोलरागपुत्रनामानोऽस्याष्टौ पुत्राः । किन्तु
तेषां मध्ये विभासस्थाने हिन्दोल इति लिखि-
तम् ॥ सोमेश्वरमते तस्य षड्रागिण्यो यथा ।
देशी १ देवगिरी २ वैराटी ३ टोड़िका ४
ललिता ५ हिन्दोली ६ ॥ तन्मते अस्य रागस्य
रागिणीसहितस्य वसन्तर्त्तुगानसमयः । इति
सङ्गीतग्राह्यम् ॥ * ॥ तालविशेषः । यथा,—
"जयमङ्गलगन्धर्वमकरन्दत्रिभङ्गभाः ।
रतितालो वसन्तश्च जगज्झम्पोऽथ गारुडिः ॥"
इत्यादि ॥
"वसन्ततालके कर्णयो नगयो मगश्चखघा ।
जगज्झम्पे गुरुश्चैको विरामान्तश्च खद्वयम् ॥"
इति सङ्गीतदामोदरः ॥
वसन्तकः, पुं, (वसन्त + संज्ञायां कन् ।) म्लेच्छ-
प्रभेदः । इति राजनिर्घण्टः ॥ (रमखतो नर्म्मे-
ख्वदः पुत्रः । यथा, कथासरित्सागरे १८।४४।
"सुप्रतीकस्य पुत्रश्च रमखानित्यजायत ।
योऽस्य नर्म्मसुहृत्तस्य पुत्रोऽजनि वसन्तकः ॥")
वसन्तकुसुमः, पुं, (वसन्ते कुसुमं यस्य ।) वृक्ष-
विशेषः । यथा,—
"वसन्तकुसुमः सेलुः शुषिरो द्विजकुत्सितः ॥"
इति शब्दमाला ॥
वसन्तकुसुमाकरः, पुं, औषधविशेषः । यथा,—
"प्रवालरसमौक्तिकाभ्रमिदं चतुर्भागभाक्
पृथक् पृथगथ क्षते रजतहेमतो ह्यग्रके ।
अयोमुनगरङ्गकं त्रिलवकं विमर्द्याखिलं
मुमेऽहनि विभावयेत् भिषगिदं धिया सप्रभः ॥
द्रवैर्वृषनिशोत्थजैः कमलमालतीपुष्पजैः
पयःकदलिकन्दजैर्मलयजैर्जनाभ्युद्भवैः ।
वसन्तकुसुमाकरो रसपतिर्दिवक्षोत्थितः
समस्तगदहृद्भवेत् किल निजानुपानैरयम् ॥"
इति वृहद्योगतरङ्गिणी ।
(अथापरश्च ।
"द्विभागं हाटकं चक्रं त्रयो वङ्गाहिकान्तकाः ।
चतुर्भागं शुद्धमभ्रं प्रवालं मौक्तिकन्तथा ॥
भावयेन्नयदुग्धेन भावनेक्षुरसेन च ।
वासालाक्षारसोद्दीप्तरम्भाकन्दप्रसूनकैः ॥
घृतपञ्चरसेनैव मालत्याः कुङ्कुमोदकैः ।
पञ्चाद्दन्तगमदैर्भाव्यं सुगन्धिरससम्भवम् ॥
कुसुमाकरविख्यातो वसन्तपदपूर्व्वकः ।
गुञ्जाद्वयेन संसेव्यः सितामध्याज्यसंयुतः ॥
मेहघ्नः कान्तिदश्चैव कामदः पुष्टिदस्तथा ।
वलीपलितनाशश्च स्मृतिभ्रंशं विनाशयेत् ।
पुष्टिदो बल्य आयुष्यः पुत्रप्रसवकारकः ॥
प्रमेहान् विंशतिश्चैव क्षयमेकादशग्रन्थयः ।
तथा सोमरुजं हन्ति साध्यासाध्यमथापि
वा ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे रसायनाद्यधि-
कारे ॥)
वसन्तघोषी [न्], पुं, (वसन्ते वसन्तकाले घोषति
विरौति वसन्तं घोषयति विज्ञापयतीति वा ।
घुष + णिनिः ।) कोकिलः । इति केचित् ॥
वसन्तजा, स्त्री, (वसन्ते जायते इति । जन + डः ।)
वासन्तीलता । इति राजनिर्घण्टः ॥ (वसन्त-
कालोद्भवे, त्रि ॥)
वसन्ततिलकं, क्ली, (वसन्तस्य तिलकमिव ।)
पुष्पविशेषः । चतुर्दशाक्षरपादच्छन्दोविशेषः ।
यथा,—
"स्यैयं वसन्ततिलकं त भ जा ज गौ गः ॥
फुल्लं वसन्ततिलकं तिलकं वनाल्या
लीलापरं पिककुलं कलमञ्च रौति ।
वाति एष पुष्पसुरभिर्मलयाद्रिवातो
यातो हरिः स मथुरां विधिना हताः स्मः ॥"
इति छन्दोमञ्जरी ॥ * ॥
औषधविशेषः । यथा,—
"अथारलूदहनसैन्धवविश्वशुक्ल-
चूर्णं करञ्जसहितं मथितेन पीतम् ।
नैवं प्ररोहति पुनर्गुदजः खदेतो-
स्तस्मै वसन्ततिलकैरपि कल्पकल्पम् ॥"
इति वृत्तरत्नावल्यां गुदजरोगचिकित्सा ॥
(अन्यविधमौषधम् । यथा,—
"हैन्वो भल्लकमभ्रकं द्विगुणितं जौहाख्यः
पारदा-
श्चत्वारो नियतन्तु वङ्गयुगलञ्चैकीकृतं मर्द्दयेत् ।
सूक्ताविद्रुमयो रसेन समता गोक्षुरवासेक्षुजा
सर्व्वं तन्मकरीध्वजेश शुदृढं गुप्तं पचेत् सप्रधा ॥
कक्षूरीघनसारमर्द्दितरयः पश्चात् सुसिद्धो
भवेत् ।
कासश्वासक्षयपित्तवातकफचित्तप्राक्षुचयादीन्
हरेत्
मूलादिग्रहणीं विषादिहरणो मेहांस्तथा
विंशतिम् ॥
हृद्रोगादिहरो ज्वरादिशमनो दृष्टो वयोवर्द्धनः
श्रेष्ठः पुष्टिकरो वसन्ततिलको रत्नुक्षयेनोदितः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे रसायनाद्यधिकारे ॥)
वसन्तदूतः, पुं, (वसन्तस्य दूत इव ।) आम्रवृक्षः ।
कोकिलः । पञ्चमरागः । इति विश्वमेदिनौ ॥
वसन्तदूती, स्त्री, (वसन्तस्य दूतीव ।) पाटली-
वृक्षः । माधवीलता । इति मेदिनी । ते, २३३॥
गल्लिकारी । पिकी । इति राजनिर्घण्टः ॥
वसन्तदुः, पुं, (वसन्तस्य दुर्वृक्षः ।) आम्रवृक्षः ।
इति शब्दमाला ॥
वसन्तपञ्चमी, स्त्री, (वसन्तस्य पञ्चमी ।)
श्रीपञ्चमी । यथा,—
"मकरस्थे सहस्रांशौ शुक्लपक्षे यशस्विनि ! ।"
इत्यारभ्य ।
"पक्षस्याद्य जगद्धात्रीं प्रातरेव नदीजले ।
स्नापयित्वा सलक्ष्मीकां कुम्भैर्मारकतैरपि ॥
वसन्तपञ्चमी नाम सर्व्वपापप्रमोचनी ।
वसन्तश्च समभ्यर्च्य कन्दर्पं रतिं प्रिये ! ॥
वसन्तरागसहिता श्रियमाप्नोत्यभीप्सिताम् ।
श्रीपञ्चमीन्तु केचित्तां सुतयः प्रवदन्ति वै ।
वर्णयेदेकभक्तेन श्रियो न विच्युतिर्भवेत् ॥"
इति मत्स्यसूक्ते ५५ पटलः ॥
अन्यच ।
"माघस्य शुक्लपञ्चम्यां महापूजां समाचरेत् ।
नवैः प्रवालैः कुसुमैरक्षतैर्श्चन्दनैर्युतैः ॥
नीराजनोत्सवं कृत्वा भक्त्या संमान्य वैष्णवान् ।
वसन्तरागं जनयन् गीतवाद्यादि कारयेत् ॥"
तदुक्तम् ।
"श्रीपञ्चमीं समारभ्य यावत् स्याच्छयनं हरेः ।
वसन्तरागः कर्त्तव्यो नान्यदा तु कदाचनेति ॥
कृत्वा वसन्तपञ्चम्यां श्रीकृष्णस्यार्चनोत्सवम् ।
स्याद्वसन्त इव प्रेयान् वृन्दावनविहारिणः ॥"
इति हरिभक्तिविलासे १४ विलासः ॥
वसन्तसखः, पुं, (वसन्तस्य सखा । "राजाहः
सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।)
कामदेवः । इति हलायुधः ॥
वसन्तोत्सवः, पुं, (वसन्तस्य उत्सवः ।) फाल्-
गुनोत्सवः । यथा,—
"फाल्गुन्यां पौर्णमास्यान्तु विद्यार्थिस्त्रीवेः सह
श्रीकृष्णप्रियभक्तस्य वसन्तस्यार्चनोत्सवम् ।
भविष्योत्तरतो ज्ञेयस्तद्विधिश्चेदृशेऽपि ते ।
यः श्रीयुधिष्ठिरस्योक्तो यत्तं भगवता स्वयम् ॥"
तस्माद्वाल्याच्च तत्रैव ।
"एवं यः कुरुते पार्थ प्राक्प्रोक्तं फाल्गुनोत्-
सवम् ।
मत्प्रसादाच्च सिद्ध्यन्ति तस्य सर्व्वे मनोरथाः ॥
दृष्टे तुषारसमये सितपक्षदशम्यां
प्रातर्व्वसन्तसमये वसुपल्लिते च ।

संप्राप्य चूतकुसुमं सह चन्द्रेण
सर्वं हि पार्थ पुरुषोऽभ्यगतं सुखी स्यात्।"
इति श्रीहरिभक्तिविलासे १४ विलासः॥
(वसन्तकालोद्भवोत्सवमात्रम्। यथा, कथासरित्सागरे। ४। ४६।
"अथ तस्मिन् महावेगो वसन्तोत्सववासरे।
आययौ प्रथमे यामे कुमारसचिवो निशि॥")

वसा, स्त्री, (वसति वस्ते वा। वस निवासे वस आच्छादने वा+अच्। स्त्रियामाप्।) मांसप्रभवधातुविशेषः। इत्यमरः॥ (यथा, सुश्रुते शारीरस्थाने ४ अध्याये।
"शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्तिता॥")
अस्या विवरणं मेदःशब्दे द्रष्टव्यम्। मांसरोहिणी। इति राजनिर्घण्टः॥

वसाढ्यः, पुं, (वसया आढ्यः। प्रकृतवसावत्त्वादस्य तथात्वम्।) ग्रिध्रसारः। इति चिकित्सकशब्दरत्नावली॥

वसिः, पुं, (वस्ते आच्छादयत्यनेन वस्ते आच्छादनपूर्व्वकं धियते इति वा। वस आच्छादने+"खनिकष्यञ्जीति।" उणा० ४। १३६। इति इः।) वसनम्। इत्युणादिकोषः॥

वसिरं, क्ली, (वसु+किरच्।) सामुद्रलवणम्। गजपिप्पली। इति धरण्यमरटीके॥ (अस्य गुणा यथा,—
"वसिरं शीतपाकञ्च सारुष्करनिबन्धनम्।
विष्टम्भि दुर्ज्जरं रूक्षं शीतलं वातकोपनम्॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥
पुं, रक्तापामार्गः। तत्पर्य्यायो यथा,—
"रक्तोऽन्यो वसिरो वृत्तफलोधामार्गवोऽपि च।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वसिष्ठः, पुं, (वशिष्ठः। पृषोदरादित्वात् शस्य सः।) वशिष्ठमुनिः। इति द्विरूपकोषः॥

वसु, क्ली, (वसत्यनेनेति। वस+"शॄस्वृस्निहीति।" उणा० १। ११। इति उः।) रत्नम्। धनम्। इत्यमरः॥ (यथा, रघुः। ८। ३१।
"वसुमार्गभयोपशान्तये
विदुषां सतृणतये बहुश्रुतम्।
वसु तस्य विभोर्न केवलं
गुणवत्तापि परप्रयोजनम्॥")
वृहौषधम्। शस्यम्। इति मेदिनी। से, ६। वाटकम्। इति विश्वः॥ जलम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

वसुः, पुं, (वसतीति। वस+उः।) वकवृक्षः। अनलः। रश्मिः। ग्रहदेवताविशेषः। इत्यमरः॥ स चाष्टसंख्यातः। यथा,—
"धरो ध्रुवश्च सोमश्च विष्णुश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ क्रमात् स्मृताः॥"
इति भरतः॥
दक्षो द्वितीयजन्मनि षष्ठमन्वन्तरे असिक्न्यां पत्न्यां षष्टिकन्या जनयामास। ताः प्रजापतिभ्यो दत्तवान्। धर्म्माय दश। तासां नामानि। भानुर्लम्बा ककुद्यामिर्विश्वा साध्या मरुत्वती वसुर्मुहूर्त्ता सङ्कल्पा। आसां मध्ये वसोरष्टौ वसवः पुत्रा यथा। द्रोणः प्राणः ध्रुवः अर्कः अग्निः दोषः वास्तुः विभावसुरिति। द्रोणस्य अभिमत्यां पत्न्यां हर्षशोकभयादयः पुत्राः।१। प्राणस्य ऊर्ज्जस्वत्यां द्वौ पुत्रौ सहस्रायुः पुरोजवश्च। २। ध्रुवस्य धारण्यां पुरः पुत्रः।३। अर्कस्य वासनायां तर्षादयः पुत्राः।४। अग्नेर्वसोर्धारायां द्रविणकादयः पुत्राः। ५। दोषस्य शर्व्वर्य्यां शिशुमारो हरेरंशः। ६। वास्तोराङ्गिरस्यां विश्वकर्म्मा। विश्वकर्म्मणः पुत्रचाक्षुषो मनुरभूत्। विभौ साध्या मनोः सुताः। ७। विभावसोरुषायां त्रयः पुत्राः व्युष्टश्चोषातपनामानः। ८। इति श्रीभागवतमतम्। *। मतान्तरे अष्टौ वसवो यथा,—
धरः १ ध्रुवः २ सोमः ३ सावित्रः ४ अनिलः ५ अनलः ६ प्रत्यूषः ७ प्रभासः ८। इति महाभारते दानधर्म्मः। अपि च।
"आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः॥
आपस्य पुत्रो वैतण्ड्यः श्रमः शान्तो ध्वनिस्तथा।
ध्रुवस्य पुत्रो भगवान् कालो लोकप्रकालनः॥
सोमस्य भगवान् वर्च्चा वर्च्चस्वी येन जायते।
धरस्य पुत्रो द्रविणो हुतो हव्यवहस्तथा॥
मनोहरायाः शिरसः प्राणोऽथ रमणस्तथा।
अनिलस्य शिवा भार्य्या तस्याः पुत्रः पुरोजवः॥
अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य तु।
अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत॥
तस्याः शाखो विशाखश्चानैगमेयश्च पृष्ठजाः।
प्रत्यूषस्य विदुः पुत्रं ऋषिं नाम्ना च देवलम्॥
द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ।
वृहत्यतेश्च भगिनी वरस्त्री ब्रह्मचारिणी॥
प्रभासस्य तु सा भार्य्या वसूनामष्टमस्य च।
विश्वकर्म्मा महाभागस्तस्यां जज्ञे प्रजापतिः॥"
इति वह्निपुराणे कश्यपीयप्रजासर्गनामाध्यायः कौर्म्मे १३ अध्यायश्च॥ *॥ (एते वशिष्ठस्य धेनुं नन्दिनीमपहृत्य तच्छापग्रस्ता पृथिव्यां शन्तनुपुत्रा आसन्। तेषु द्यौनामा वसुरेव कुरुवृद्धो भीष्मः। एतद्विवरणं यथा, देवीभागवते। २। ३। २४—४४।
"एतस्मिन् समये चाष्टौ वसवः स्त्रीसमन्विताः।
वशिष्ठस्याश्रमं प्राप्ता रममाणा यदृच्छया॥
पृथ्वादीनां वसूनाञ्च मध्ये कोऽपि बलोत्तमः।
द्यौर्नामा तस्य भार्य्याथ नन्दिनीं गां ददर्श ह॥
दृष्ट्वा पतिं सा पप्रच्छ कस्येयं धेनुरुत्तमा।
द्यौस्तामाह वशिष्ठस्य गौरियं शृणु सुन्दरि!॥
दुग्धमस्याः पिबेद्यस्तु नारी वा पुरुषोऽथवा।
अयुतायुर्भवेत्तूनं सदैवागतयौवनः।
तच्छ्रुत्वा सुन्दरी प्राह मर्त्यलोकेऽस्ति मे सखी।
उशीनरस्य राजर्षेः पुत्री परमशोभना॥
तस्या हेतोर्महाभाग! सवत्सां गां पयस्विनीम्।
आनयस्वाश्रमश्रेष्ठां नन्दिनीं कामदां शुभाम्॥
यावदस्याः पयः पीत्वा सखी मम सदैव हि।
मानुषेषु भवेदेका जरारोगविवर्ज्जिता॥
तच्छ्रुत्वा वचनं तस्या द्यौर्जहार च नन्दिनीम्।
अवमत्य मुनिं दान्तं पृथ्वाद्यैः सहितोऽनघः॥
हृतायामथ नन्दिन्यां वशिष्ठस्तु महातपाः।
आजगामाश्रमपदं फलान्यादाय सत्वरः॥
नापश्यत् स यदा धेनुं सवत्सां स्वाश्रमे मुनिः।
मृगयामास तेजस्वी गह्वरेषु वनेष्वपि॥
नासादिता यदा धेनुर्मुनिकोपातिभयं मुनिः।
वारुणिश्चापि विज्ञाय ध्यानेन वसुभिर्हृताम्॥
वसुभिर्मे हृता धेनुर्यस्मान्नामबलस्य वै।
तस्मात् सर्व्वे जनिष्यन्ति मानुषेषु न संशयः॥
एवं शशाप धर्म्मात्मा वसूंस्तान् वारुणिः स्वयम्।
श्रुत्वा विमनसः सर्व्वे प्रययुर्दुःखिताश्च ते॥
शप्ताः स्म इति जानन्तः ऋषिं तमुपचक्रमुः।
प्रसादयन्तस्तमृषिं वसवः शरणं गताः॥
मुनिस्तानाह धर्म्मात्मा वह्नन्दीनान् पुरःस्थितान्।
अनुसंवत्सरं सर्व्वे शापमोक्षमवाप्स्थ॥
येनेयं विहृता धेनुर्नन्दिनी मम वत्सला।
तस्माद्द्यौर्मानुषे देहे दीर्घकालं वसिष्यति॥
ते शप्ताः पथि गच्छन्तीं गङ्गां दृष्ट्वा सरिद्वराम्।
ऊचुस्तां प्रणताः सर्व्वे शप्ता चिन्तातुरा नदीम्॥
भविष्यामो वयं देवि! कथं देवाः सुधाशनाः।
मानुषाणाञ्च जठरे चिन्तयं महती हि नः॥
तस्मात्त्वं मानुषी भूत्वा जनयास्मान् सरिद्वरे!।
शन्तनुर्नाम राजर्षिस्तस्य भार्य्या भवानघे!॥
जातान् जातान् जले चास्मान् निक्षिपस्व सुरापगे!।
एवं शापविनिर्म्मोक्षो भविता नात्र संशयः॥
तथेत्युक्त्वा च ते सर्व्वे जग्मुर्लोकं स्वकं पुनः।
गङ्गापि निर्गता देवी चिन्त्यमाना पुनः पुनः॥")
योऽक्षम्। राजा। इति मेदिनी। से, ६॥ धनाधिपः। इति विश्वः॥ साधुः। इति शब्दरत्नावली॥ पीतसुरः। इति हेमचन्द्रः॥ पुष्करिणी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ शिवः। सूर्य्यः। इत्यनेकार्थकोषः॥ (विष्णुः। यथा, महाभारते। १३। १४६। ८७।
"वसुप्रदो वासुदेवो वसुर्वसुमना हविः॥"
"वसन्ति भूतान्यत्र एतेषु स्वयमपीति वसुः।"
इति तत्र शाङ्करभाष्यम्॥) कुलीनकायस्थस्य पद्धतिविशेषः। यथा शूद्राणां नामकरणे वसुघोषादिपद्धतियुक्तनामत्वञ्च बोध्यम्। इत्युद्वाहतत्त्वम्॥ अष्टसंख्या। यथा,—
"युग्मासिद्धतभूतानि वसुन्योर्वसुरन्ध्रयोः॥"
इति तिथ्यादितत्त्वम्॥
(वकुलः। इङ्गुदीवृक्षः सरीति च ख्यातः। अस्य पर्य्यायो यथा,—

"शिवमल्ली पाशुपत एकाष्ठीलो वृको वसुः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

वसुः, स्त्री, (वसु + उः ।) दीप्तिः । इति शब्दरत्नावली ॥ (दक्षस्य कन्याविशेषः । सा तु धर्म्मस्य पत्नीनामन्यतमा । इति विष्णुपुराणम् । १ । १५ । १०५ ॥)

वसुः, त्रि, (वस् + उः ।) मधुरम् । शुष्कम् । इति हेमचन्द्रः ॥

वसुकं, क्ली, (वसुवत् कायतीति । कै + कः ।) साम्भरिलवणम् । इत्यमरः ॥ पांशुवम् । वासूकम् । इति राजनिर्घण्टः ॥

वसुकः, पुं, (वसुः सूर्य्यस्तन्नाम्ना कायतीति । कै + आतोऽनुपसर्गे कः ।) अर्कवृक्षः । इत्यमरः ॥ शिवमल्ली । इति मेदिनी । के, १५२ ॥ पुष्पविशेषः । स तु श्वेतरक्तभेदेन द्विविधः । तत्पर्य्यायः । वसुः २ श्वेतः ३ वृकः ४ शिवमल्लिका ५ पाशुपतः ६ शिवमतः ७ सुरेष्टः ८ शिवशेखरः ९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । पाके शीतत्वम् । दीपनत्वम् । अर्शोऽर्वातगुल्मनाशित्वम् । श्वेतस्य रसायनत्वञ्च । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायान्तरं यथा,—

"वकपुष्पः काकशीर्षः शूलपुष्पः शिवप्रियः ।
वसुकः काकनामा च वसुहृद्वः खपूरकः ॥"
इति वैद्यकरत्नमालायाम् ॥)

वसुकोटः, पुं, (वसुनि धने कोट इव प्राचुर्य्यकत्वात् ।) याचकः । इति हारावली । ३८ ॥

वसुक्षिप्रा, स्त्री, महामेदाद्वयः । इति रत्नमाला राजनिर्घण्टश्च ॥ (तथास्याः पर्य्यायो यथा,—

"महामेदा वसुक्षिप्रा चिरन्ती देवतामणिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

वसुदः, पुं, (वसूनि ददातीति । दा + कः ।) कुबेरः । इति धनदशब्ददर्शनात् ॥ (यथा, हरिवंशे । ८२ । १५ ।

"सनन्दगोपस्य गृहं वासाय वसुदोपमः ।
अवतीर्य्य ततो यानात् प्रविवेश्य महाबलः ॥"

वसु धनं ददातीति । विष्णुः । यथा, महाभारते । १३ । १४६ । ४२ ।

"सुसुजो दुर्द्धरो वाग्मी महेन्द्रो वसुदो वसुः ॥")
धनदातरि, त्रि ॥ (यथा, महाभारते । १२ । १२० । ३० ।

"अमोघक्रोधहर्षस्य स्वयंकृत्यान्ववेक्षितुः ।
आत्मप्रत्ययकोषस्य वसुदेव वसुन्धरा ॥")

वसुदेवः, पुं, (वसुना धनेन दीव्यतीति । दिव् + अच् ।) श्रीकृष्णजनकः । तत्पर्य्यायः । आनकदुन्दुभिः २ । इत्यमरः ॥ शूरः ३ कृष्णपिता ४ । इति शब्दरत्नावली ॥ अस्य विवरणं यथा,—

नारायण उवाच ।

"कश्यपो वसुदेवश्च देवमाता च देवकी ।
पूर्व्वपुण्यफलेनैव संप्राप श्रीहरिं सुतम् ॥
देवमीढान्मारिषायां वसुदेवो महानभूत् ।
आनकश्च महाशूरः श्रीहरेर्ज्जनकश्च सः ।
सन्तः पुरातनाख्येन वदन्त्यानकदुन्दुभिम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः वह्निपुराणञ्च । (स्वनामख्यातः कलियुगराजविशेषस्य देवभूतेरमात्यः । स तु देवभूतिं निहत्य स्वयं राज्यमकार । यथा, भागवते । १२ । १ । १८ ।

"शुङ्गं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनम् ।
स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥"

वसवो देवता यस्य । धनिष्ठानक्षत्रे, क्ली । यथा, बराहसंहितायाम् । ७ । ११ ।

"घोरा अवसवस्तद्वं वसुदेवं वरुणञ्चैव ॥")

वसुदेवता, स्त्री, (वसवो देवता यस्याः ।) धनिष्ठानक्षत्रम् । इति हेमचन्द्रः । २ । ९८ ॥ (यथा, हरिवंशे । १२१ । ३५ ।

"देवपत्न्यस्तथैवान्या देवाश्च वसुदेवताः ॥")

वसुदेवभूः, पुं, (वसुदेवात् भवतीति । भू + क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः । १ । ३६१ ॥

वसुधा, स्त्री, (वसूनि रत्नानि दधाति धारयतीति । धा + कः । सुवर्णादीनामाकरत्वात् तथात्वम् ।) पृथिवी । इत्यमरः ॥ (यथा, साहित्यदर्पणे १० परिच्छेदे ।

"राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गना सर्व्वसम् ॥"

वसुधनं दधाति दत्ते इति । धा + क्विप् । धनदातरि, त्रि । यथा, वाजसनेयसंहितायाम् । २७ । १५ ।

"वसुश्चेतिष्ठो वसुधातमश्च ॥"

"वसुधातमः वसूनां धनानां दातृतमः । क्विबन्तात् तमप् ।" इति तद्भाष्ये महीधरः ॥)

वसुधाखर्ज्जूरिका, स्त्री, (वसुधाजाता खर्ज्जूरिका ।) भूखर्ज्जूरिका । इति राजनिर्घण्टः ॥

वसुधारा, स्त्री, (वसुवत् रत्नस्येव धारा यस्याः ।) जिनशक्तिविशेषः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरा १२ आत्मजा १३ खदूरवासिनी १४ भद्रा १५ वैश्या १६ गौतमसरस्वती १७ अक्षिणी १८ महातारा १९ धनंददा २० त्रिलोचना २१ अलोचना २२ । इति हेमचन्द्रः । (वसूनां रत्नानां धारा सन्ततिर्यत्र ।) कुबेरपुरी । इति शब्दमाला । (तीर्थविशेषः । यथा, महाभारते । ३ । ८२ । ७२ ।

"ततो गच्छेत धर्म्मज्ञ ! वसुधारामभिष्टुताम् ।
गमनादेव तस्यां हि दयमेधमवाप्नुयात् ॥"

वसोर्धेदिराजस्य प्रिया धारा । यथा,—

"वसु द्रव्यं घृतमाज्यमस्तं हविकामिकम् ।
तस्य धारा सदा देया वसोर्धारा हि सा मता ॥"
इति देवीपुराणोक्तवचनात् वसुनो घृतस्य धारा ।) वृद्धिश्राद्धपूर्व्वकर्त्तव्यवैदिराजवस्वैश्यकर्त्तृकघृतधारा । यथा । छन्दोगपरिशिष्टे काश्यपः ।

"कुर्य्यात्तां वसोर्धारां पञ्चवारान् घृतेन तु ।
कारयेत् पञ्चवारान् वा सप्तवारां न चोच्यताम् ॥
आयुष्मानिति ध्यात्वर्त्वं जप्त्वा तत्र समाहितः ।
बटुभ्यः पिटभ्यस्तदनु आद्धदानमुपक्रमेत् ॥"

वसोर्धेदिराजस्य वसोर्धारामिति वसोर्धाराधिपतेरेतादृशादिदर्शनात् अमुकसमासेनैव प्रयोगः कर्त्तव्यः । इति आद्धतत्त्वम् ॥ * ॥ सामगानां तत्प्रातरग्नौ यथा,—

"यद्वर्चो हिरण्यस्य यद्वा वर्चो गवासुत ।
सत्यस्य ब्रह्मणो वर्चसेन मांसं हृणामसि ॥"
यजुषां यथा । "वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ।" इति आद्धप्रयोगतत्त्वम् ॥ * ॥ ऋग्वेदिनां यथा ।

"अपसवर आगच्छन्ती भूरिधारे पयस्वती घृतप्रघाते सुव्रते शुचिव्रते । राजन्भ यस्य यस्य भुवनस्य रोदसी आसश्चन्ती रेतसा सिषिक्तं यज्जुहुतम् । १ ।

अश्वा इव वहतमे तवासुङ्गवा अभिषाकसोमि । यत्र सोमः श्रूयते यत्र यज्ञो घृतस्य धारा मधुमद्दुहे वधन्ते । २ ॥

घृतवती सुवनानामभिश्रियोर्व्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्म्मणा विष्कभिते अजरे भूरि रेतसा । ३ ॥

घृतधारसुतसोमाभं विपश्चितं पितरं रुक्मवाना अभिमदन्त पित्रोरुपस्थेतं रोदसी पिप्रुतं सत्यवाचम् ॥ ४ ॥

घृतधारं वायुमर्कैर्यविष्ठं वृषभिर्वृषेऽभिचक्षते हविः । ये च प्रयन्ति प्रयजन्ति सङ्गमेति दुद्दे सप्तधारम् । ५ ॥

वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु । वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः । ६ ॥

सुहानन्दिवोरतिं पृथिव्या वैश्वानर रत आजासथिं कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः स्वाहा ॥ ७ ॥

इत्येतैर्म्मन्त्रैः सप्तघृतधारा दद्यात् । इति काण्वेऽपि । * ॥ विशेषवसुधारा यथा,—

"शूना या वहते धारा मासात् सर्पिर्न सा शुभा ।
नाधिका ग्रस्यते विप्र दुर्भिक्षकलिकारिका ॥
स्रुच्यते वहमाना या भ्रमते च हुताशनम् ।
सवर्णा हेमवर्णा च धारा राज्यविवृद्धये ॥
सन्तता पतते या तु तनीयोव च पावकम् ।
तनोति नृपराष्ट्रञ्च वसोर्धारा न संशयः ॥
सुगन्धि स्वच्छविमलं क्रमिकीटविवर्ज्जितम् ।
ग्रस्यते च वसोर्धारा या सर्पिर्नैवपूजिता ॥
अभावात् गवलाजं वा होतव्यन्तु सुशोभनम् ।
घृतरोद्रयपयोधारा सर्व्वपीड़ानिवारिणी ॥
वसु द्रव्यं घृतमाज्यमस्तं हविकामिकम् ।
तस्य धारा सदा देया वसोर्धारा हि सा मता ॥

वसुना स्वर्गकामेन दत्तेयं च महात्मना।
मया च विष्णुना शक्र रुद्रेण च महौजसा॥
आत्मानञ्च स्वरूपेण धारायान्तु प्रपादितम्।
देवी सान्निध्यमायाता सर्व्वकामप्रदायिका॥
तस्मात्त्वमपि राजेन्द्र! वरोर्धारां प्रपातय।
नातः परतरं पुण्यं विद्यते नृपसत्तम!॥
वसोर्धारापदानस्य एकाहमपि यद्भवेत्।
नृपेणायुतकामेन पुत्र राज्यजिगीषुणा।
देया धारा सदा वत्स! रिपुनाशाय बुद्धिमन्॥
द्रव्याभावे घृताभावे नृप तस्करजे भये।
यदि नो वहते धारा तदा छिद्रं न विद्यते॥
महाश्वयुजमासे तु अष्टमीनवमीषु च।
कार्त्तिक्यां माघचैत्रे तु चित्रायां रोहिणीषु च॥
वैशाख्यान्तु प्रदातव्या ज्येष्ठ्यां ज्येष्ठस्य सत्तम!।
आषाढ़ादग्रहोमं अष्टमी पूर्णिमा नभे॥
नभस्ये रोहिणी वत्स! चतुर्थ्यां द्वादशीदिने।
संक्रान्तिषु च सर्व्वासु गुरुशौरिभवासु च॥
चन्द्रसूर्य्योपरागेषु प्रतिष्ठायज्ञकर्म्मणि।
अग्नोत्सृष्टे प्रदातव्या वस्तुपुष्पाभिषेचने॥
मार्गे व्रतनिवर्त्ते तु गृहे वास्तु तु दर्शने।
यद्दत्तलोपसर्गेषु धारा देया: शुभावहा:॥
एवं यो वाहयेद्धारा: श्राद्धदृष्टेन कर्म्मणा।
तस्य भू: सिद्धते सर्व्वा धनागा सहसागरा॥"
इति देवीपुराणे वसोर्धारानाम ३५ अध्याय:॥

वसुन्धरा, स्त्री. (वसूनि धारयतीति। धृ+"संज्ञायां भृतृवृजिधारिसहितपिदम:।" ३।२।४६। इति खच्। "खचि ह्रस्व:।६।४।९४। इति ह्रस्व:। "अरुर्द्विषदजन्तस्य मुम्।" ६।३।६७। इति मुम्।।) पृथिवी। इत्यमर:। (यथा, विष्णुपुराणे। १।४।११।
"निरीक्ष्य तं तदा देवी पातालतलमागतम्।
तुष्टाव प्रणता भूत्वा भक्तिनम्रा वसुन्धरा॥"
शूरसेनस्य कन्या। यथा, हरिवंशे।३८।५३।
"विश्रुता ग्राममहिषी कन्या चास्य वसुन्धरा।
रूपयौवनसम्पन्ना सर्व्वलक्षणशोभना॥"
पुं, प्लक्षद्वीपस्य वर्षपुरुषभेद:। यथा, भागवते।
५।२०।११। "प्लक्षवर्षपुरुषा: श्रुतिधरवीर्य्यधरवसुन्धरेषुन्धरसंज्ञा भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते।")

वसुप्राण:, पुं, (वसु दीप्ति: प्राणा इवास्य।) अग्नि:। इति शब्दरत्नावली॥

वसुमती, स्त्री, (वसूनि धनरत्नानि सन्त्यस्या इति। वसु+मतुप्। ङीप्।) पृथिवी। इत्यमर:॥ (यथा, रघौ। ८।८३।
"तदलं सदपायचिन्तया
विपदुत्पत्तिमतासुपस्थिता।
वसुधेयमवेक्ष्य तां यथा
वसुमत्ता हि नृपा: कलाचिद:॥)

वसुरोचि:, [स्] स्त्री, (वसव: रोचन्ते अस्मिन्निति। रुच दीप्तौ+"वसौ रुचे: संज्ञायाम्।" उणा० २।११२। इति इसिन्।) यज्ञ:। इति सिद्धान्तकौमुद्यामुणादिवृत्ति:॥

वसुल:, पुं, (वसुं दीप्तिं लाति गृह्णातीति। ला+क:।) देवता। इति त्रिकाण्डशेष:॥

वसुश्रेष्ठं, क्ली, (वसुना दीप्त्या श्रेष्ठम्।) रूप्यम्। इति राजनिर्घण्ट:॥

वसुसेन:, पुं, कर्णराज:। इति त्रिकाण्डशेष:। (यथा, महाभारते। १।६७।१४०।
"राधाया: कल्पयामास पुत्रं सोऽधिरथसुतम्।
चक्रतुर्नामधेयञ्च तस्य बालस्य तावुभौ।
दम्पती वसुसेनेति दिक्षु सर्व्वासु विश्रुतम्॥"
क्वचित् वसुषेणेति पाठ:।)

वसुस्थली, स्त्री, (वसूनां धनानां स्थली।) कुबेरपुरी। इति शब्दमाला॥

वसुहृद्, पुं, (वसूनां दीप्तीनां हृद इव।) वकवृक्ष:। इति रत्नमाला॥

वसुहृदक:, पुं, (वसुहृद+स्वार्थे कन्।) वकवृक्ष:। इति शब्दमाला॥

वस्त्रं, क्ली, सामरिलवस्त्रम्। इति हेमचन्द्र:॥ वकपुष्पम्। इति द्विरूपकोष:॥

वस्क, ङ गतौ। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-सक०-सेट्।) दन्त्यमध्य इत्येके। क्विप् वट्। ङ, वस्कते। इति दुर्गादास:॥

वस्क:, पुं, (वस्क्+भावे घञ्।) अध्यवसाय:। इति भूरिप्रयोग:॥

वस्कय:, पुं, (वस्कते इति। वस्क गतौ+बाहुलकात् अयन्।) एकहायनो वत्स:। इत्यमरटीकायां रायमुकुट:॥

वस्कयनी, स्त्री, (वस्कय एकहायनो वत्स:। तेन नीयते इति। नी+क्विप्। ङीष्।) चिरप्रसूता गौ:। इत्यमरटीकायां रायमुकुट:॥ अस्या दुग्धगुणा:।
"वस्कयिन्याश्चिरोद्यन्नं तर्पणं बलकृत् पय:।"
इति भावप्रकाश:॥

वस्करिटिका, स्त्री, वृश्चिक:। इति हारावली॥

वस्क, क ङ वधे। इति कविकल्पद्रुम:॥ (चुरा०-आत्म०-सक०-सेट्।) क ङ, वस्कयते। अतिहिंसायाञ्चेच्छिति रमानाथ:। इति दुर्गादास:॥

व(ब)स्त:, पुं, (वध्यते यज्ञार्थं वध्यते इति। वस्त+कर्म्मणि घञ्।) छाग:। इत्यमर:। २।९।७६। (यथा, मार्कण्डेये। ४३।१२।
"यस्य वत्सतमो गन्धो गात्रे शुक्लसमोऽपि वा।
तस्यार्द्धमाधिकं ज्ञेयं योगिनो नृप! जीवितम्॥")

वस्तकं, क्ली, कृत्रिमलवणम्। इति हेमचन्द्र:॥

वस्तकर्ण:, पुं, (वस्तस्य छागस्य कर्ण इति: यत्रावच्छेदे अस्त्यस्येति। वस्तकर्ण+अर्श-आदित्वात् अच्।) शालवृक्ष:। इति राजनिर्घण्ट:॥

वस्तगन्धा, स्त्री, (वस्तस्य गन्ध इव गन्धो यस्या:।) इति राजनिर्घण्ट:॥

वस्तमोदा, स्त्री, (वस्तं छागं मोदयतीति। मुद्+णिच्+अच्+टाप्।) अजमोदा। इति राजनिर्घण्ट:॥

वस्तय:, पुं स्त्री भूम्नि, (वस्+"वसेस्ति:।" उणा० ४।१७६। इति ति:, बहुवचनान्तोऽयम्।) वस्तस्य दृग्ना:। यथा, अमर:।२।६।११४।
"स्त्रियां बहुत्वे वस्तस्य दृग्ना: स्युर्वस्तयो द्वयो:॥"

वस्तान्त्री, स्त्री, (वस्तस्येव अन्त्रमस्या:। गौरादित्वात् ङीष्।) छगलान्त्रीक्षुप:। तत्पर्य्याय:। वृषगन्धाख्या २ मेषान्त्री ३ वृषवल्लिका ४ अजान्त्री ५ वोकड़ी ६। अस्या गुणा:। कटुरसत्वम्। कासदोषविनाशित्वम्। वीजदाहत्वम्। गर्भजनकत्वञ्च। इति राजनिर्घण्ट:॥

वस्ति:, पुं, स्त्री, (वसति मूत्रादिकमत्र। वस्+"वसेस्ति:।" उणा० ४।१७६। इति ति:।) नाभेरधोभाग:। इत्यमर:॥ वस्ते आच्छादयति मूत्राशयपुटं वस्ति:। वस ल स्तौ नाम्नीति तिक्। मूत्राशयपुटो वस्तिरिति रत्नमाला। इति तद्रोगायां भरत:॥ * ॥ अथ वस्तिविधि:।
"वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परः।
यः स्नेहैर्दीयते स स्यादनुवासननामकः॥
कषायक्षारतैलैर्यो निरूहः स निगद्यते।
वस्तिभिर्दीयते यस्मात् तस्माद्वस्तिरिति स्मृतः॥"
वस्तिभि: स्नग्दामीनां मूत्राशयै:।
"तत्रानुवासनाख्यो हि वस्तिर्यः सोऽत्र कथ्यते।
अनुवासनभेदश्च मात्रावस्तिरुदीरितः॥
फलद्वयं तस्य मात्रा तस्मादल्पेऽपि वा भवेत्।
अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिली॥
नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी।
नास्याध्मा नानुवास्याः सुरस्त्रीभिर्मदार्त्तयुताः॥
श्रीयस्मूर्च्छारुचिभयश्वासकासक्षयातुराः।
नेत्रं कार्य्यं सुवर्णादिधातुभिर्वृत्तवेणुभिः।
नलैर्दन्तैर्विषाणाद्यैर्मणिभिर्वा विधीयते॥"
नेत्रं गाड़ी। तथा च विश्वप्रकाशे।
नेत्रं पथि गुणे वस्त्रे तरुस्कन्धे विलोचने।
नेत्रवस्त्रे च नाड्याञ्च नेत्रो नेतरि भेदवदिति॥
"एकवर्षात्तु षड्वर्षं यावन्मानं षड़ङ्गुलम्।
ततो द्वादशकं यावन्मानं स्यादरुसंमितम्॥
ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता।
सुवृच्छिद्रं कलायाभं छिद्रं कोलास्थिरन्ध्रकम्॥
यथासंख्यं भवेन्नेत्रं शस्तं गोपुच्छसन्निभम्॥"
स्थूले स्थूलम्। ततः क्रमात् शस्तम्। सुवृच्छिद्रादिप्रमाणं नेत्रं क्रमेण षड्वर्षाय द्वादशवर्षाय तदूर्द्धवर्षाय ज्ञेयम्।
"आतुराङ्गुष्ठमानेन मूले स्थूलं विधीयते।
कनिष्ठिकापरीणाहमग्रे च गुटिकासुखम्॥"
परिणाहोऽत्र स्थौल्यम्।
"तन्मूले कर्णिके द्वे च कार्य्ये भागाच्चतुर्थकात्।
कर्णिका गवादिकर्णवत्। कर्णिका क्षुद्राकारा गुदाधिकान्तःप्रवेशरोधिनी कर्णिकेति। कर्णिकाकारत्वात् कर्णिकेति कथ्यते।

"योजयेत्तत्र वस्तिञ्च बन्धदयविधानतः।
मृगाजशूकरगवां महिषस्यापि वा भवेत्॥"
वस्तिरिति शेषः।
"मूत्रको यस्य वस्तिस्तु तदलाभे तु चर्मजः।
कषायरक्तः सष्टदुर्वस्तिःस्निग्धो दृढो हितः॥
द्रवस्तेषु नेत्रं स्यात् शल्यमशकुलोन्मितम्।
सुश्लक्ष्णं शुषपत्रनालिकापरिणाहि च॥
प्ररोहोपचयं वर्णं बलमारोग्यमायुषः।
कुरुते परिदृढ़श्च वस्तिः सम्यगुपासितः॥
दिवा प्रीते वसन्ते च स्नेहवस्तिः प्रदीयते।
शीतवर्षाशरत्काले रात्रौ स्यादनुवासनम्॥
नवातिस्निग्धमशूनं भोजयित्वानुवासयेत्।
मदं मूर्च्छां जनयेत् द्विधा स्नेहप्रयोजितः॥"
द्विधाभाजने वस्तौ च।
"रूक्षं शुक्रवतोऽत्यन्तं बलं वर्णञ्च हापयेत्।
युक्तस्नेहमतो जन्तुं भोजयित्वानुवासयेत्॥"
युक्तस्नेहं यथोचितस्नेहं भोज्यं भोजयित्वा इत्यर्थः।
"द्वौगमात्रावुभौ वस्तौ वातिकार्श्यकरौ स्मृतौ।
अतिमात्रौ तथानाहबलमातिसारकारकौ॥"
उभौ वस्तौ अनुवासननिरूहाख्यौ।
"उत्तमा स्यात् पलैः षड्भिर्मध्यमा स्यात्
पलैस्त्रिभिः।
पलद्वयेन हीना स्यादुक्ता मात्रानुवासने॥"॥
अथ स्नेहवस्तिः।
"घृतक्षारसैन्धवाभ्यां च देयं स्नेहे च चूर्णकम्।
तन्मात्रोत्तममध्यान्त्या षट्चतुर्थंशमात्रकैः॥
विरेचनात् सम्यगाजेर्गते ज्ञातबलाय च।
शुक्लान्नायानुवास्याय वस्तिर्देयोऽनुवासनः॥
अथानुवास्यं स्वभ्यक्तसुस्नानसुखेदितं ग्रासैः।
भोजयित्वा यथाग्नि घृतं पंक्तिमयं ततः॥
उत्तरङ्गानिलविण्मूत्रं भोजयेत् स्नेहवस्तिना॥"
उष्णाम्बुखेदितं उष्णाम्बुना स्नापितम्।
"सुप्तस्य वामपार्श्वेन वामजङ्घाप्रसारिणः।
कुंचितापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत्॥
ऊर्ध्वं वस्तिसुखं मूत्रैर्वामहस्तेन धारयेत्।
पीड़येद्दक्षिणेनैव मध्यवेगेन धीरधीः॥
शृंगाकाशशवादींश्च वस्तिकाले न कारयेत्।
स्निग्धस्यामितः कालः प्रोक्तो वस्तेस्तु पीड़ने॥
ततः प्रविष्टे स्नेहे उत्तानो वाक्यृतं भवेत्।
स्वजानुनः करावर्तं कुर्याच्छोटिकया युतम्॥
एवा मात्रा भवेदेका सर्वत्रैव निश्चयः।
निमेषोन्मेषकं पुंसामङ्गुल्या छोटिकाथ वा॥
गुल्मोदरौदावर्तं वा वाङ्मात्रेयं स्मृता बुधैः।
प्रसारितैः सर्वगात्रैर्यथावीर्यं प्रवर्तते॥"
यथावीर्यं स्नेहादि।
"ताड़येत्तत्रयोरेनं त्रींस्त्रीन् वारान् ग्रनैः
ग्रनैः।
स्निग्धोत्तेव तथा श्रोणीं ग्रन्याच्चैवोत्क्षिपेत्ततः॥
स्निग्धोत्तेनं जघाभ्यां पूर्वमुत्ताड़येद्बुधः।
ग्रन्याच्च पादतलञ्च त्रीन् वारानुत्क्षिपेत्ततः।
जाते विधाने तु ततः कुर्यान्निद्रां यथासुखम्॥
सानिलः सपुरीषश्च स्नेहः प्रच्यवते यस्य तु।
उपद्रवं विना शीघ्रं स सम्यगनुवासितः॥"
उपद्रवस्थाने उपशोषाविति सुश्रुते पाठः।
"नीरोगान्नमथ सायाह्ने स्नेहे प्रजागते पुनः।
लघ्वन्नं भोजयेत् कामं दीप्ताग्निस्तु नरो यदि॥
अनुवासिताय देयमितरेऽह्नि सुखोदकम्।
धान्यशुष्कीकषायं वा स्नेहापत्तिनाशनम्॥"
सुखोदकं सुखोष्णोदकम्। आपत्तिर्व्याधिः।
"अनेन विधिना षड्वा सप्त वाष्टौ नवापि वा।
विधेया वस्तयस्तेषामन्ते पेया निरूहणम्॥
दत्तस्तु प्रथमो वस्तिः स्नेहयेद्वस्तिवद्द्वयौ।
सम्यग्दत्तो द्वितीयस्तु मूर्द्धस्नमनिलं जयेत्॥
बलं वर्णञ्च जनयेत् तृतीयस्तु प्रयोजितः।
चतुर्थपञ्चमौ दत्तौ स्नेहयेतां वसाद्वयौ॥
षष्ठो मांसं स्नेहयति सप्तमो मेद एव च।
अष्टमो नवमश्चापि मज्जानञ्च यथाक्रमम्॥"
यथाक्रममिति वचनादष्टमोऽस्थि स्नेहयेत्।
"एवं शुक्रगतान् दोषान् द्विगुणः साधु साधयेत्॥
द्विगुणः अष्टादशदिवसाधिको वस्तिः।
"अष्टादशाष्टादशकात् वस्तीनां यो विधीयते।
स कुञ्जरबलोऽत्यन्तं रये तुल्योऽमरप्रभः॥
रूक्षाय बहुवाताय स्नेहवस्तिं दिने दिने।
दद्यादेवंसथान्येषामल्पावाधमशान्नाहतं॥
स्नेहोऽल्पमात्रो रूक्षाणां दीर्घकालमनल्पयः॥"
अनल्पयोऽबाधकः।
"तथा निरूहः स्निग्धानां मलमात्रः प्रशस्यते॥
अथवा यस्य तत्कालं स्नेहो निर्याति केवलः।
तस्यान्योऽपतरो देयो नहि स्निह्यति तिष्ठति॥"
स्निह्यति स्निग्धे तिष्ठति दत्तस्नेह इति शेषः।
"अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः।
तदाशुवेदनाध्माने शूलं श्वासश्च जायते॥
पक्वाशये गुदस्थश्च तत्र दद्यान्निरूहणम्।
तीक्ष्णं तीक्ष्णौषधैर्युक्तं मलवर्णेरितायवा॥
यथास्नेहोमगोवाशुमेषं स्नेहश्च जायते।
तथा विरेचनं दद्यात् तीक्ष्णं नस्यं च शस्यते॥
यस्य दोषप्रपं कुर्यात् स्नेहवस्तिर्विनिःसृतः।
सर्वोऽन्यो वा हतो रौक्ष्यादुपेक्ष्यः स विजानता॥
अनायातं अहोरात्रे स्नेहं संशोधनैर्हरेत्।
स्नेहस्तावत्तायाते नाम्नः स्नेहो विधीयते॥
गुडूचीरसपूतीकभार्गीपाठाकरौहिषम्।
घृतवरीसहचरं क्वाथनार्थं पलोन्मितम्॥
यवमाषतिलीकोलकुलत्थात् प्रस्थतोन्मितात्।
चतुर्द्रोणेऽम्भसः पक्त्वा दोषशेषेण तेन च॥
प्रचेत्तोलार्धकं पेय्यैर्वणीयैः पलोन्मितैः।
अनुवासनमेतद्धि सर्ववातविकारजित्॥"
पूतिकः करञ्जः। रौहिषं रोहिष इति सुश्रुतः।
क्वाथनार्थं क्वाथाय। प्रस्थतं पलद्वयम्।
"षट्पलप्रतिमापस्तु जायन्ते वस्तिसम्मिताः।
दूषितात् वसदोषेण तासिद्धिस्तासु सुश्रुतात्॥"
पलदादेन चतुर्विंशतिसंख्यात्।
"पानाहारविहाराद्य वस्तिकर्मणि सत्तमाः।
स्नेहपानसमाः कार्या नात्र कार्या विचारणा॥"॥
अथ निरूहवस्तिविधिः।
"निरूहवस्तिर्बहुधा भिद्यते कारणान्तरैः।
तैरेव तस्य नामानि लक्षणानि सुनिपुणैः॥"
कारणान्तरैः समवायिकारणभेदैः।
"निरूहस्यापरं नाम प्रोक्तमास्थापनं बुधैः।
स्वस्थानस्थापनाद्दोषधातूनां स्थापनं मतम्॥
निरूहस्य प्रमाणञ्च प्रस्थः पादोत्तरं परम्।
मध्यमं प्रस्थसुद्दिष्टं हीनश्च कुड़वाख्यः॥"
परं श्रेष्ठम्।
"अतिस्निग्धोऽक्लिष्टदोषः क्षतोरस्कः क्षयक्षया।"
अक्लिष्टदोषः अनुत्क्लिष्टदोषः। अदत्तोत्क्लेशन इति यावत्। क्षतोरस्कः उरःक्षतवान्।
"आध्मानच्छर्दिहिक्मार्थः श्रोथप्लीहप्रपीड़ितः।
गुदश्रोणातिसारार्त्तो विक्लेदोत्क्लेशयुतः॥
गर्भिणी मधुमेही च नास्थाप्याश्च जलोदरी।
वातवाधाद्दरावर्त्ते वाताष्ठिलिवमन्थरे॥
मूर्च्छाहृद्ग्रहमन्दाग्निप्रमेहेषु निरूहणम्।
मूर्धोरुपित्ते हृद्रोगे योजयेद्विधिवद्बुधः।
उत्क्लिष्टानिलविण्मूत्रस्निग्धं स्निग्धमभोजितम्॥
मध्याह्ने ग्रहमध्ये च यथायोग्यं निरूहयेत्।"
स्निग्धं स्नेहयुक्तम्। स्निग्धं उष्णाम्बुप्लावितम्।
"स्नेहवस्तिविधानेन बुधः कुर्यान्निरूहणम्॥
जाते निरूहे च ततो भवेदुत्क्लेशकारणम्।
तस्मिन्मुहूर्तमात्रन्तु निरूहागमनेक्षया॥"
अत्र मुहूर्तमात्रशब्दे नैतदपि श्रोषितम्॥
निरूहप्रत्यागमनकालो मुहूर्तमात्रः।
"अनायातं मुहूर्तान्तु निरूहं शोधनैर्हरेत्।
निरूहैरेव मतिमान् शारमूलाक्षसेन्धवैः॥
यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः।
साधुशोधनजावेत सुनिरूढं तमादिशेत्॥
विविक्तता मनस्तुष्टिः स्निग्धता व्याधिविग्रहः।
आस्थापनस्नेहवस्त्योः सम्यग्दाने तु लक्षणम्॥"
विविक्तता दत्तौषधविःसरणम्।
"अनेन विधिना युक्त्यानिरूहं वस्तिदानवित्।
द्वितीयं वा तृतीयं वा चतुर्थं वा यथोचितम्॥
सम्भवेत् एकः पवने पित्ते द्वौ पयसा सह।
कषायकटुका मूत्रा कफे क्षारास्त्रयो मिताः॥
पित्तश्लेष्मानिलाग्निघं क्षीरमूत्रैः क्रमात्।
निरूहं भोजयित्वा च ततस्तमनुवासयेत्॥
सुकुमारस्य दृढस्य बालस्य च मृदुर्हितः।
वस्तिर्दोषा प्रयुक्ता हि तैस्तैः स्थानाङ्गजा-
युषी॥
दद्यादुत्क्लेशनार्थं पूर्वं मध्ये दोषहरं ततः।
प्रधानं संशमनीयञ्च दद्याद्वस्तिं विचक्षणः॥
एरण्डबीजं मधुकं पिप्पली सैन्धवं वचा।
सुपुष्पा फलकल्पश्च वस्तिरुत्क्लेशनः स्मृतः॥"
उत्क्लेशनवस्तिः॥ ● ॥

"गुडाक्षा मधुकं बिल्वं कौटजं फलमेव च।
सक्षौद्रिकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः।"
इति दोषहरवस्तिः। ●।

"प्रियङ्गुमधुकं सुस्ता तथैव च रसाञ्जनम्।
सचीरः स्रस्ते वस्तिर्दोषाणां शमनः स्मृतः।"
इति शमनवस्तिः। ●।

"त्रिफलाक्षाथगोमूत्रचौद्रचारसमायुताः।
ऊषकादिप्रतीवाया वस्तयो लेखनाः स्मृताः।"
ऊषकादिप्रतीवायाः ऊषकादिगणविशेषचूर्ण-
प्रक्षेपाः। इति लेखनवस्तयः। ●।

"इंदुवत्रयणिःक्वाथैः कल्कैर्मधुरकैर्युताः।
सर्पिर्मांसरसोपेता वस्तयो बृंहणाः स्मृताः।"
इति बृंहणवस्तयः। ●।

"वर्ष्मैरावतीशेलुशाल्मलीपुष्पजाङ्कुराः।"
ऐरावती नाराङ्गी। शेलुः बहुवारः।
चीरसिद्धाः चौद्रयुक्ता वाजा पिच्छिलसंज्ञिताः।
अजोरभ्रैवरुधिरैर्युक्ता देया विचक्षणैः।"
अजश्छागः। उरभ्रो मेषः। एडः हस्वाजः।
"माजा पिच्छिलवस्तीनां पञ्चेन्द्रियभिर्मता।"
इति पिच्छिलवस्तयः। ●।

"दत्त्वादौ सैन्धवस्यार्धं मधुनः प्रकृतित्रयम्।
विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रकृतित्रयम्।
एकीभूते ततः स्नेहे कल्कस्य प्रकृतिं क्षिपेत्।
संवृद्धिते कषायस्तु चतुःप्रकृतिसम्मितम्।
यवागूयाश्च तदावापमन्ते दिप्रकृतोन्मितम्।
क्षिप्त्वा विमथ्य दद्याच्च निरूहं कुशलो भिषक्।
एवं प्रकल्पितो वस्तिर्द्वादशप्रकृतो भवेत्।
घृते चतुःप्रकं चौद्रं दद्यात् स्नेहस्य षट्प्रकम्।
पित्ते चतुःप्रकं चौद्रं स्नेहं दद्यात् प्रकत्रयम्।
कफे तु षट्प्रकं चौद्रं क्षिपेत् स्नेहं चतुः-
प्रकम्।"
इति निरूहमात्रा।

"एरण्डजातुल्यांशं मधु तैलं प्रकाष्टकम्।
घृतपुष्पाप्रकार्धेन सैन्धवार्धेन संयुतम्।
मधुतैलिकसंज्ञोऽयं वस्तिर्दोषविकोपितः।
मेदोगुल्मप्लीहमेहोदावर्तनाशनः।
बलवर्णकरश्चैव दृष्यो दीपनदंडकः।"
इति मधुतैलिकवस्तिः।

"चौद्राज्यचीरतैलानां प्रकृतं प्रकृतं भवेत्।
कृपणा सैन्धवाधोऽयो वस्तिः स्यादयापनः
परः।"
यापनः सारकः। इति यापनवस्तिः। ●।

"एरण्डमूलनिष्काथो मधु तैलं ससैन्धवम्।
एष युक्तरथो वस्तिः सप्तधाप्यग्निबलः।"
इति युक्तरथवस्तिः।

"प्रकमूलस्य निष्काथस्तैलं मागधिका मधु।
सर्वैश्वर्यः सयष्ट्याह्वः सिद्धवस्तिरिति स्मृतः।"
इति सिद्धवस्तिः।

"क्षीरसूक्ष्मोदके: कुर्याद्विधिवत्प्रमजीर्णताम्।
कर्मण्येवंपरं कर्म समाचरेत् स्नेहवस्तिवत्।"
अथोत्तरवस्तिविधिः।

"अतः परं प्रवक्ष्यामि वस्तिमुत्तरसंज्ञितम्।
निरूहादुत्तरो यस्मात्तस्मादुत्तरसंज्ञकः।
द्वादशाङ्गुलकं नेत्रं मध्ये च क्षतकर्णिकम्।
मालतीपुष्पवृन्ताभं छिद्रं सर्षपनिर्गमम्।
पञ्चविंशतिवर्षोणामधोमात्रा द्विकार्षिका।
तदूर्ध्वं प्रसमात्रा च स्नेहस्योक्ता भिषग्वरैः।
अथ स्थापनसुहृत्स्य क्षपस्य स्नानभोजनैः।
स्थितस्य जानुमात्रेण पीठेऽन्यिप्य शलाकया।
स्निग्धया मेढ्रमार्गन्तु ततो नेत्रं नियोजयेत्।
प्रनैः प्रनैर्घृताभ्यक्ते मेढ्रेऽङ्गुलानि षट्।
ततोऽवपीड्यवेद्यस्तिं प्रनैर्नेत्रं विनिर्हरेत्।
ततः प्रत्यागते स्नेहे स्नेहवस्तिक्रमो हितः।
स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्याद्यवाङ्गुलम्।
सुहुः प्रवेश्यं योन्यां च योन्यन्तश्चतुरङ्गुलम्।
द्व्यङ्गुलं मूत्रमार्गे च सूक्ष्मनेत्रं नियोजयेत्।
मूत्रक्षतकृविकारेषु बालानां लेकमङ्गुलम्।
प्रनैर्निष्कम्पमाधेयं सूक्ष्मं नेत्रं विचक्षणैः।"
मालतीपुष्पवृन्ताभं नेत्रमित्युक्तत्वात् पुनः सूक्ष्म-
ग्रन्थाभिधाने बालानां ततोऽपि नेत्रस्य सूक्ष्मता-
बोधनार्थम्।

"योनिमार्गेषु नारीनां स्नेहमात्रा द्विपालिका।
मूत्रमार्गे प्रयोक्तव्या बालानाच्च द्विकार्षिकी।
उत्तानायै स्त्रियै दद्यात् जङ्घाजानुे विचक्षणः।
अप्रत्यागच्छति भिषक् वस्त्युत्तरसंज्ञिते।
भूयो वस्तिं विदध्याच्च संयुक्तं शोधनैर्गुणैः।
फलवस्तिं विदध्याद्वा योनिमार्गे द्रुतं भिषक्।
स्नेहैर्विनिर्मितां स्निग्धां शोधनद्रव्यसंयुताम्।
दह्यमाने तथा वस्तौ दद्याद्वस्तिं विचारदः।
चीरिवृक्षकषायेण पयसा घृतेन वा।"
दह्यमाने वस्तौ चस्मिन् स्थाने वस्तिर्दत्तस्तस्मिन्
दह्यमाने।

"वस्तिः शुक्रकरः पुंसां स्त्रीणामार्तवजः स्मृतः।
हन्यादुत्तरवस्तिस्तु नोचितो मेहिनां क्वचित्।
सम्यग्दत्तस्य लिङ्गानि व्यापदश्चक्रम एव च।
वस्तेरुत्तरसंज्ञस्य समाः स्नेहवस्तिना।"● ।
अथ फलवर्तिविधिः।

"घृताभ्यक्ते गुदे क्षिप्त्वा सुस्ता खाङ्गुसन्निभा।
मलप्रवर्तिनी वर्तिः फलवर्तिश्च सा स्मृता।"
इति भावप्रकाशः। ●।

("चतुरङ्गुलां वेणुमयीं नाडीं प्रतिलक्ष्यं कृत्वा,
तया वस्तिप्रतिकर्म कुर्यात्।
नातिचोष्णे च काले च न प्रीते न च भोजिते।
न निद्रालौ च मूत्रार्ते विष्टार्ते न च वेदभाक्।
वस्तिकर्म निरूहच कारयेत्तं निरस्य च।
आदौ मूत्रविशोत्सर्गं कृत्वा गुदं प्रक्षाल्य नाति
शिथिलशय्यायां शाययित्वा वामाङ्गे वामपादं
दक्षिणाङ्गे दक्षिणपादञ्च सङ्कोच्य जङ्घोपरि-
संस्थाप्य गुदाभ्यन्तरे द्व्यङ्गुलमात्रां नाडीं सुधीः
सञ्चारयेत्। ततः प्रनैः प्रनैर्वस्तिं निष्पीड्य
द्विपलपरिमितस्नेहेन निरूहं कुर्यात्। निरूहा-
नन्तरं प्रनैः प्रनैरुत्तानं शाययित्वा जङ्घौ
कृत्वा च पश्चात् सङ्कोच्य पाणिभिः पञ्च वारान्
स्फिक्पिण्डान् चोटयेत्। ततः सुखं कृत्वा
शय्यानाप्यामाशयं मलस्थानं बोधयति। वस्त्यु-
दरवासान् दोषान् निवारयति। प्रक्षिप्तास्तं
वस्तिनिरूहं तद्वस्तिकर्म च विदुः।" इति
हारीते सूत्रस्थाने क्षतीयेऽध्याये।

"क्षतजन्यं शैलवरस्य रम्ये
स्थितं धनेशायतनस्य पार्श्वे।
महर्षिसंघैर्वृतमग्निवेश्यः
पुनर्व्यसुम्प्राञ्जलिरन्वपृच्छत्।
वस्तिर्नरेभ्यः किमपेक्ष्य दत्तः
स्यात् सिद्धिमान् किन्नयनस्य नेत्रम्।
कौटक् प्रमाणाकृति किङ्गुणञ्च
केषाञ्च किं योनिगुणश्च वस्तिः।
निरूहकर्म्म प्रणिधानमात्राः
स्नेहस्य वा काः प्रमणे विधिः कः।
के वस्तयः केषु मता इतीदं
शुश्रोत्तरं प्राह वचो महर्षिः।
समीक्ष्य दोषौषधदेशकाल-
सात्म्याग्निसत्त्वौकवयोबलानि।
वस्तिः प्रयुक्तो नियतं गुणाय
स्युः सर्व्वकर्म्माणि च सिद्धिमन्ति।
सुवर्णरूप्यत्रपुताम्रवीतिं
कांस्याश्मिशृङ्गद्रुमवेणुदन्तैः।
नलैर्विषाणैर्मणिभिश्च तैस्तैः
कार्य्याणि नेत्राणि सुकर्णिकानि।
षड्द्वादशाष्टाङ्गुलसम्मितानि
षड्विंशतिर्द्वादशवर्षकाणाम्।
स्थूलैर्दृगर्कैर्न्युसतीनषाड्-
छिद्राणि वर्त्मना पिहितानि चापि।
यथावयोऽङ्गुष्ठकनिष्ठिकाभ्यां
मूलाग्रयोः स्युः परिणाहवन्ति।
ऋजूनि गोपुच्छसमाकृतीनि
गुरूणि च स्थूलगुलिकासुखानि।
स्यात् कर्णिकैकाग्रचतुर्थभागे
मूलाश्रिते वस्तिनिबन्धने द्वे।
जरद्गवो माहिषहारिणो वा
स्यात् प्रौकरो वस्तिरजस्य वापि।
द्रुस्तनुर्नरश्चिरो विगन्धः
कषायरक्तः सुहृदुः सुशुद्धः।
वृषा वयो वीक्ष्य यथानुरूपं
नेत्रेषु योज्यस्तु सुवङ्गुलज्ञः।
वस्तेरभावे प्रवाणां गलो वा
स्यादङ्गुष्ठः सुघनः पटो वा।
आस्थापनार्हं पुरुषं विधिज्ञः
समीक्ष्य पूर्व्येऽहनि शुद्धपक्षे।
प्रशस्तनक्षत्रसुकूर्म्मयोगे
जीर्णान्नमेकाग्रमुपक्रमेत।
बालां गुरूणीं चपलां सरागां
द्वे पञ्च मूले च प्रलोभितानि।
अष्टौ पलान्यर्हतुलाच्च मांसा-
च्छागात् पचेदप्सु चतुर्थशेषम्।
पूतं यवागूफलविस्रकुल्थ-
दध्याप्लुताढ्या घनपिण्डलीनाम्।

कल्केगुंडूचीद्रयुते: स तैले-
र्युतं सुखोष्णं तु पिचुप्रमाणै: ।
गुडोत्थलं द्विप्रहतान्नु मात्रां
स्नेहस्य युक्त्या मधुसैन्धवादि ॥
प्रक्षिप्य वस्तौ मथितं खलेन
सुवङ्गसुच्छाद्य च निर्व्रणालीकम् ।
अङ्गुष्ठमध्येन सुखं पिधाय
नेत्राग्रसंस्थामपनीयवर्त्तिम् ॥
तेनात्तगात्रं कृतमत्र विद्वां
नातिक्षुधार्त्तं भुयने मनुष्यम् ।
समेऽथ वैद्यनतशैरसेवा
नात्युच्छ्रिते खात्तरजोपपन्ने ॥
सक्थ्ना पार्श्वेन सुखं भुयानं
कृत्वर्जुदेहं खमुजोपधानम् ।
निकुञ्चसक्थेतरमस्य सक्थि
वामं प्रसार्यं प्रणयेत्ततस्तम् ॥
स्निग्धे गुदे नेत्रचतुर्थभागं
स्निग्धं शनैर्दृजुपृष्ठवंशम् ।
अकम्पनावेपनलाघवादीन्
पाण्योर्गुणांश्चापि विदर्शयन् हि ॥
प्रपीड्य चैकाग्रहृदेन दत्तं
नेत्रं शनैरेव ततोऽवकर्षेत् ।
तिर्यक्प्रणीते तु न याति धारा
गुदव्रण: स्यात्तरिते च नेत्रे ॥
दत्त: शनैर्नाम्नयमेति वस्ति:
कष्टं प्रधावत्यतिपीडितश्च ।
प्रीतस्तिसम्भकरो विदाहं
मूर्च्छां च कुर्यादतिमात्रसङ्ग: ।
स्निग्धोऽतिजाड्यं पवनन्तु रूक्ष-
स्तन्वल्पमात्रा लवणस्नयोगम् ।
करोति मात्राभ्यधिकोऽतियोगं
क्षामन्तु सान्द्र: सुचिरेण चैति ।
दाहातिसारौ लवणोऽतिकृष्णा-
त्तस्मात् प्रयुक्तं सममेव दद्यात् ।
पूर्वं हि योज्यं मधुसैन्धवन्तु
स्नेहं विनिर्मथ्य ततोऽनुकल्कम् ॥
विमथ्य संयुज्य पुनर्द्रवैस्तत्
वस्तौ निदध्यान्मथितं खलेन ।
आमाशयोऽग्न्यर्हगुदश्च
तत्पार्श्वसंस्थस्य सुखोपलब्धि: ॥
लीयन्त एवं वलयश्च तस्मात्
सर्वं प्रयोगोऽरतिवस्तिदानम् ।
विड्वातवेगो यदि चाईदत्ते
निष्कृष्य दत्ते प्रणयेदशेषम् ॥
उत्तानदेहस्य कृतोपधान:
स्याद्वीर्य्यमाप्नोति तथास्य देहम् ।
एकोऽपकर्षत्यनिलं खमार्गात्
पित्तं द्वितीयस्तु कफं तृतीय: ।
प्रत्यागते कोष्णजलावसिक्त:
स्नाय्वग्नमद्यात्तनुना रसेन ।
ऊर्द्धं तु सायं लघु चाल्पमात्रं
भुक्तेऽनुवास्य: परिहृष्यवार्यम् ॥"

"स्निग्धोष्ण एक: प्रवने निरूहो
हौ स्वादुशीतौ पयसा च पित्ते ।
त्रय: समूत्रा: कटुकोष्णतीक्ष्णा:
कफे निरूहा न परं विधेया: ॥
रसेन वाते प्रति भोजनं स्यात्
क्षीरेण पित्ते तु कफे च यूषै: ।
तथानुवास्येषु च विस्रतैलं
स्याज्जीवनीयं पलसाधितञ्च ॥"

इति चरके सिद्धिस्थाने कृतीयेऽध्याये ॥

"तत्र स्नेहादीनां कर्म्मणां वस्तिकर्म्मप्रधान-
तममाहुराचार्य्या: । कस्मादनेककर्म्मकरत्वा-
दस्यैरिह वस्तिर्नानाविधद्रव्यसंयोगाद्दोषाणां
संशोधनसंशमनसंग्रहणानि करोति । शीघ्र-
शुक्रं वाजीकरोति क्लमं हंयति स्थूलं कर्षं-
यति चक्षु: प्रीणयति वलीपलितसुपहन्ति वय:
स्थापयति । शरीरोपचयं वर्णं वलमारोग्य-
मायुष: परिरक्षणञ्च करोति वस्ति: सम्य-
ग्युपयोजित: । तथा व्यरातीसारतिमिरप्रति-
श्यायशिरोरोगाधिमन्थार्दितानेकपक्षाघाते-
काङ्गसर्व्वाङ्गरोगाश्मानोदरशर्करास्तम्भहृद्ग्रह-
दंशनाहमूत्रकृच्छ्रगुल्मवातशोणितवातस्रव-
पुरीषोदावर्त्तशुक्रार्त्तवस्तन्यनाशप्रहर्षमण्याध्मा-
शोऽश्मरी मूढगर्भप्रभृतिषु चात्यर्थमुपयुज्यते ।"

"तत्र द्विविधो वस्ति: नैरूहिक: क्षैहिकश्च ।
आस्थापनं निरूह इत्यनर्थान्तरम् । तस्य
विकल्पो माधुतैलिक: । तस्य पर्य्यायशब्दो
यापनो युक्तरथ: सिद्धवस्तिरिति । सदोष-
निर्हरणाक्षरो रोगहरणाद्वा निरूह: । वय:
स्थापनादायु:स्थापनाद्वास्थापनम् । माधुतैलि-
कविधानञ्च निरूहक्रमचिकित्सिते वक्ष्याम: ॥

तत्र यथा प्रमाणगुणविहित: क्षैहवस्ति-
विकल्पोऽनुवासन: पादावशेष: । अनुवसन्नपि
न दुष्यत्यहरहर्यं दीयत इत्यनुवासन: ॥

तस्यापि विकल्पोऽर्द्धमात्रावशेषोऽपरि-
हार्य्योमात्रावस्तिरिति ॥" इति सुश्रुते चिकित्-
सितस्थाने ३५ अध्याय: ॥

"अत ऊर्द्धं प्रवक्ष्यामि यापद: स्नेहवस्तिजा: ।
वलवन्तो यदा दोषा: कोष्ठे स्युरनिलादय: ॥
अल्पवीर्य्यं तदा स्नेहमभिभूय पृथग्विधान् ।
कुर्व्वन्त्युपद्रवान् स्नेह: स चापि न निवर्त्तते ॥
तत्र वातादिभूते तु स्नेहे सुखकषायता ।
जृम्भावातरुजास्तम्भा वेपथुर्विषमज्वर: ॥
पित्ताभिभूते स्नेहे तु सुखस्य कटुता भवेत् ।
दाहस्तृष्णा ज्वर: स्वेदो नेत्रस्यचाङ्गपीतता ॥
श्लेष्माभिभूते स्नेहे तु प्रसेको मधुरास्यता ।
गौरवं छर्द्दिरुच्छ्वास: कण्डू: शीतज्वरोरुचि: ॥
तत्र दोषाभिभूते तु स्नेहे वस्तिं निधापयेत् ।
यथास्वं दोषशमनान्युपयोज्यानि यानि च ॥
अथाग्निते्नाभिभवात् स्नेहो नैति यदा
तदा ।
गुरुरामाशय: शूलं वायुश्चाप्रतिसञ्चर: ॥
क्लमोपेक्षासुखवैरस्यं श्वासो मूर्च्छा भ्रमोऽरुचि: ।

तत्रापतर्पणस्यान्ते दीपनो विधिरिष्यते ॥
अशुद्धस्य मलोल्लिश्र: स्नेहो नैति यदा पुन: ।
तदाङ्गसदनाध्माते श्वास: शूलश्च जायते ॥
प्रकाशयगुरुत्वञ्च तत्र दद्यान्निरूहणम् ।
अतितीक्ष्णौषधैरेवं सिद्धसाध्यनुवासनम् ॥
सुखस्य दूरानुगते स्नेहे स्नेहस्य दर्शनम् ।
गात्रेषु सर्व्वेन्द्रियाणामुपक्लेदोऽवसादनम् ॥
स्नेहगन्धिसुखत्वञ्च कासश्वासावरोचक: ।
अतिपीडितवर्त्मञ्च विविधा स्यापदस्तथा ॥
अक्षिन्नस्यावियुक्तस्य स्नेहोऽल्प: सम्यगो-
जित: ।
शीतो रूक्षश्च नाभ्येति ततो मन्दं प्रवाहयेत् ॥
विबन्धगौरवाध्मानशूला: प्रकाशयं प्रति ।
तत्रास्थापनमेवाशु प्रयोज्यं सानुवासनम् ॥
अल्पं युक्तवतोऽल्पो हि स्नेहोमन्दगुणस्तथा ।
दत्तो नैति क्षमोत्क्लेशौ भ्रंशं वा रतिमाव-
हेत् ॥
तत्र वास्थापनं कार्य्यं शोधनीयेन वस्तिना ।
अन्यथाक्षयजं स्नेहेन शोधनीयेन शस्यते ॥
अहोरात्रादपि स्नेह: प्रत्यागच्छेन्न दूष्यति ।
कुर्य्याद्वस्तिगुणांश्चापि जीर्णस्नेहगुणो भवेत् ॥
यस्य चोपद्रवं कुर्य्यात् स्नेहवस्तिरनि:सृत: ।
सर्व्वोऽल्पो वा कृतो रौक्षाद्विपेक्ष: स विजा-
नता ॥
अगायान्तस्नेहरात्रात् स्नेहं संशोधनैर्जयेत् ॥
स्नेहवस्तावनायाते नान्य: स्नेहो विधीयते ।
दृष्ट्वा यापद: सर्व्वा: सलक्षणचिकित्-
सिता: ॥"

इति च सुश्रुते चिकित्सितस्थाने ३०अध्याय: ॥)

वस्तिकर्म्माढ्य:, पुं, (वस्तिकर्म्मेव तच्छोधनव्यापा-
रेण आढ्य:। वस्तिशोधने एवास्य प्रचुरकार्य्य-
करत्वात् तथात्वम् ।) अरिष्टभेद: । भूरिष्टा
इति ख्यात: । यथा,—

"अरिष्टो वस्तिकर्म्माढ्यो वेगोर: फेनिल:
क्षुव: ।"

इति शब्दचन्द्रिका ।

वस्तिमल, क्ली, (वस्तेर्नाभ्यधोभागस्य मलम् ।)
मूत्रम् । इति हेमचन्द्र: । ३ । २६० ॥

वस्तु, क्ली, (वसतीति । वस + "वसेस्तुन् ।" उणा०
१ । ७६ । इति तुन् ।) द्रव्यम् । यथा,—

"वृक्षमूलं स्त्रीपिकं स्यात् सत्त्वं द्रव्यञ्च वस्तु च ।"

इति ॥

(तथा, भागवते । ६ । ४ । २७ ।

"यज्ञेषु दारेषु सुतेषु वस्तुषु
द्विपोत्तमस्यन्दनवाजिवस्तुषु ।
अक्षय्यरत्नाभरणाम्बरादि-
अनन्तकोष्वेऽकरोदसन्मतिम् ॥"

पात्रभूतम् । यथा, रघौ । ३ । २६ ।

"अथोपनीतैः विधिवद् विपश्चितो
विनिश्चुरेनं गुरवो गुरुप्रियम् ।
अवन्ध्यजन्मानि बभूवुरस्य ते
क्रिया हि वस्तूपहिता प्रचीदति ॥")

पदार्थः। यथा,—
"भावः पदार्थो धर्म्मः स्यात् सत्त्वं तत्त्वञ्च वस्तु च।"
इति त्रिकाण्डशेषः।
(यथा, शकुन्तलायाम् १ अङ्के।
"सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः।")
जगति वस्तुद्वयं भावोऽभावश्च। इति न्यायशास्त्रम्। सच्चिदानन्दाद्वयं ब्रह्म। इति वेदान्तसारः। (यथा, कथासरित्सागरे। २१। ४६।
"अहो वस्तुनि माहात्म्यमहो भक्तिरवस्तुनि।"
कार्य्यम्। यथा, कामन्दकीयनीतिसारे।१५।२५।
"वस्तुष्वग्र्येषु सत्सद्यमर्चेत्
अर्घेषु मोदादसत्सद्यमर्घ।
अर्घेषु कालेन सत्सद्यमर्घ
विधेव कार्य्यसवं वदन्ति।"
अर्घः। इति मल्लिनाथः। यथा, कुमारे। ६। ६५।
"अथाङ्गिरसमग्र्यसृष्टाहरद्यवस्तुषु।
ऋषयो गोदयामासुः प्रभुवाच स भूधरम्।"
इतिहत्तम्। यथा, विक्रमोर्व्वश्याम्।
"अहमस्यां कालिदासग्रथितवस्तुना नवेन त्रोटकेनोपस्थास्ये।")
वस्तुकं, क्ली, (वस्तु+संज्ञायां कन्।) वास्तूकम्। इति शब्दरत्नावली राजनिर्घण्टश्च।
वस्तुकी, स्त्री, (वस्तुक+गौरादित्वात् ङीष्।) श्वेतचिल्लीशाकः। इति राजनिर्घण्टः।
वस्त्यं, क्ली, (वस्+क्यञ्। वस्त्रिर्वासस्त्स्यां साधु। वस्त्रि+"तत्र साधुः।" ४। ४। ९८। इति यत्।) वस्त्रम्। इत्यमरः।
वस्त्रं क्ली, (वस्यते आच्छाद्यतेऽनेनेति। वस आच्छादने+"सर्व्वधातुभ्यः ष्ट्रन्।" उणा० ४। १५८ इति ष्ट्रन्।) परिधानाद्युपयुक्तकार्पासादिनिर्म्मितवस्त्र। कापड़ इति भाषा। तत्पर्य्यायः। आच्छादनम् २ वासः ३ पेलम् ४ वसनम् ५ अंशुकम् ६। इत्यमरः। क्षिपयः ७ प्रोतः ८ तन्तुकः ९ कर्पटः १० प्राटकः ११ कक्षिपुः १२। इति जटाधरः। वासनम् १३ क्षिपयम् १४ प्रोतम् १५ क्षौमम् १६ वासम् १७। इति शब्दरत्नावली।* अस्य परिधानविधिर्यथा, भृगुः।
"विकक्षोऽुत्तरीयञ्च नयञ्चावश्च एव च।
श्रौतं स्मार्त्तं तथा कर्म्म न नयञ्चिन्नयेदपि।"
विकक्षः परीधानार्थकृतकक्षः। तथा च।
"परीधानादहिःकक्षा निवद्धा ह्यासुरी भवेत्।"
स्मृतिः।
"वामे पृष्ठे तथा नाभौ कक्षाबन्धस्त्रिधा स्मृतः।
एभिः कक्षैः परीधत्ते यो विप्रः स शुचिः स्मृतः।"
बौधायनः।
"नाभौ धृतञ्च यद्वस्त्रमाच्छादयति आजुनौ।
अन्तरीयं प्रशस्तं तदच्छिन्नसमयोस्तयोः।"
प्रचेताः। दक्षः नाभौ प्रयोजयेत्। स्मृतिः। न स्यात् कर्म्मणि कच्छवतीति। उत्तरीयधारणं यज्ञोपवीतवत्।
"यथा यज्ञोपवीतञ्च धार्य्यते च द्विजोत्तमैः।
तथा सन्धार्य्यते यत्नादुत्तराच्छादनं शुभम्।"
इति स्मृतेः।
अत्र यथा द्विजोत्तमैः सयज्ञोपवीतत्वादिना उपवीतं धार्य्यते तथा उत्तराच्छादनमपि द्विजोत्तमैरिति प्रदर्शनमात्रम्। प्रागुक्तभृगुवचनेन सर्व्वेषां द्विजातीनामेतत्। पारस्करः। एकचेदासो भवति तस्य उत्तरार्द्धेन प्रच्छादयतीति। इत्याह्निकाचारतत्त्वम्।* अस्य धारणगुणाः। यथा,—
"काम्यं यशस्यमायुष्यमलक्ष्मीघ्नं प्रहर्षणम्।
श्रीमत्पारिषदं श्लक्ष्णं निर्म्मलाम्बरधारणम्।"
इति राजवल्लभः।*
अपि च।
"स्नातस्यानन्तरं सम्यक्वस्त्रेणैव तनुमार्जनम्।
कान्तिप्रदं शरीरस्य कण्डूयादोषनाशनम्।
कौषेयं चित्रवस्त्रञ्च रक्तवस्त्रं तथैव च।
वातश्लेष्महरं तत्तु पीतकाले विधारयेत्।"
कौषेयं पट्टाम्बरं तसरवस्त्रञ्च।
"मेधां सुपीतं पित्तघ्नं कषायं वस्त्रमुच्यते।
तद्धारयेदुष्णकाले तत्रापि लघु शस्यते।"
कषायं कोकची इति लोके। कषायरागरक्तं वा।
"शुक्लन्तु शुभदं वस्त्रं पीतातपनिवारणम्।
न शोभां न च वा प्रीतं तत्तु वर्षासु धारयेत्।
यशस्यं काम्यमायुष्यं श्रीमदागन्दवर्द्धनम्।
तत्त्वं वस्त्रीकरं रक्तं नवं निर्म्मलमम्बरम्।"
काम्यं कामोद्दीपकम्।
"कदापि न जनैः सङ्गिधार्य्यं मलिनमम्बरम्।
तत्तु कण्डूलमिकरं स्नान्यलक्ष्मीकरं परम्।"
अवलक्ष्मीशोभा दारिद्र्यं वा। इति भावप्रकाशः।* (अथ वह्नेः वस्त्रादिरक्षणात् शुभफलं यथा,—
"कन्यां कुमारकान् गौरान् शुक्लवस्त्रान् सुतेजसः।
यः पश्येज्जपते यो वा ह्यादर्शं विषमिश्रितम्।
सुखाः सुमनसो वस्त्रमेधान्नेपनं फलम्।
यस्य स्यादायुरारोग्यं वित्तं बहु च सोऽश्नुते।"
इति वाभटे शारीरस्थाने षष्ठेऽध्याये।)
अथ नववस्त्रपरीधानदिनम्।
"ब्रह्मानुराधवसुतिष्यविशाखहस्त-
चित्रोत्तराश्विपवनादितिरेवतीषु।
जन्मर्क्षजीवबुधशुक्रदिनोत्सवादौ
धार्य्यं नवं वसनमीश्वरदेवतादौ।"
इति ज्योतिस्तत्त्वम्।*
अपि च।
"स्वर्णे चाक्षयधर्मं स्यात् अग्निहिते क्षीरः सदा भूमिजे
वस्त्रार्थं बहुता बुधे सुरगुरौ विद्यागमः सम्मदः।
नागाभोगयुतः प्रमोदजयनं दिव्याङ्गना भार्गवे
शौरे स्युः सुखु रोगशोककलहा वस्त्रे धृते नूतने।"
इति कर्म्मलोचनम्।*
अस्य चारसंयोगनिषिद्धदिनानि यथा,—
"मन्दमङ्गलवर्षीशु द्वादश्यां राहुवासरे।
वस्त्राणां चारसंयोगो दहत्याश्रमं कुलम्।"
इत्याह्निकाचारतत्त्वम्।
तद्दानफलं यथा,—
"वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः।"
इति शुद्धितत्त्वम्।
अपि च।
"द्विजानां ये तु सततं शुभवस्त्रप्रदा नराः।
वस्त्रगन्धयुतः पन्थास्तेषां सुजलशीतलः।"
इत्याद्ये वह्निपुराणे यमशर्म्मिलोपाख्याननामाध्यायः।* तेन विष्णुपूजाविधिर्यथा,—
"दुकूलपट्टकौषेयवाल्कार्पासकादिभिः।
वाचोभिः पूजयेद्विष्णुं सुशुभैरात्मनः प्रियैः।"
इति तत्रैव क्रियायोगनामाध्यायश्च।
तद्यज्ञविधिर्यथा। विष्णुधर्म्मोत्तरम्।
"वस्त्रं दद्यात्तमादद्यात् परिधाय तथा पुनः।
आरुह्योपानहौ दानमारुह्यैव च पादुके।"
तस्याधिपतिर्यथा। तत्रैव।
"वार्द्धानसं स्मृतं वासः सौम्यानि रजतानि च।
पत्रिजञ्च तथा सर्व्वं वायव्याः परिकीर्त्तिताः।"
तत्प्रतिग्रहप्रायश्चित्तं यथा। हारीतः। मद्यिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टशतं जपेत्। अष्टसहस्रं अष्टोत्तरसहस्रम्। इति शुद्धितत्त्वम्।* अपि च।
श्रीभगवानुवाच।
"कार्पासं कामलं वाल्कं कौषेयं वल्कमिष्यते।
तत् पूर्व्वं पूजयित्वैव मन्त्रैर्देवाय चोत्सृजेत्।
निर्द्धौतं मलिनं जीर्णं छिन्नं गात्रावलिङ्गितम्।
परकीयं वासुदत्तं स्त्रीविद्धं तथोषितम्।
उष्ट्रकेशं विधौतञ्च श्लेष्मश्वादिदूषितम्।
प्रदाने देवताश्चैव देवे नैवेद्य च कर्म्मणि।
वर्ज्जयेत् त्रापयोगेन यज्ञादावुपवीतके।"
त्रापयोगेन रक्षण स्त्रीपयोगेन इति क्वचित् पुस्तके पाठः।
"उत्तरीयोत्तरासङ्गौ निचोलो मोदचेलकः।
परिधानञ्च पञ्चैतान्यस्तूनि प्रयोजयेत्।
ग्राह्यवस्त्रं नवीनारच्च तथैवातपवारणम्।"
क्वचित् पुस्तके ग्राह्यवस्त्रमित्यत्र मद्यिवस्त्रमिति पाठः।
"चक्रांतकं तथा दूष्यं पञ्च स्यूतान्यदूषके।
पताकाध्वजदण्डादौ स्यूतं वस्त्रं प्रयोजयेत्।
अन्यत्रावरणादौ च तद्विना प्रस्तरोऽपि च।
रक्तं कौषेयवस्त्रञ्च महादेवे प्रशस्यते।
पीतं तथैव कौषेयं वासुदेवाय चोत्सृजेत्।
रक्तन्तु कम्बलं दद्यात् शिवाय परमात्मने।
विचित्रं सर्व्वदेवेभ्यो देवीभ्यो दुकूलं निवेदयेत्।
कार्पासं सर्व्वतोभद्रं दद्यात् सर्व्वेभ्य एव तु।

नैकान्तरक्तं दद्यात्तु वासुदेवाय चैलकम् ।
तथा नैकान्तरक्तन्तु शिवाय विनिवेदयेत् ॥
नीलीरक्तन्तु यद्वस्त्रं तत् सर्व्वत्र विवर्ज्जितम् ।
देवे पैत्रे स्रोपयोगे वर्ज्जयेत्तद्विचक्षणः ॥
नीलीरक्तं प्रमादात्तु यो दद्याद्विष्णवे बुधः ।
निष्फला तस्य तत्पूजा तदा भवति भैरव ॥
विचित्रे वाससि पुनर्लब्धं नीलीविरञ्जितम् ।
वस्त्रं दद्यान्महादेवे नान्यस्मै तु कदाचन ॥
द्विपदां ब्राह्मणो यद्वत् देवानां वासवो यथा ।
तथा भूषणवर्गेषु वस्त्रमुत्तममुच्यते ।
वस्त्रेण जायते लक्ष्मीः वस्त्रेण जायते यशम् ।
वस्त्रात् स्यात् सर्व्वतः सिद्धिश्चतुर्व्वर्गप्रदश्च ततः ॥"

इति कालिकापुराणे ६८ अध्यायः ॥

राज्ञा सदा वस्त्राच्छादितशरीरं कर्त्तव्यम् । यथा,—

"सर्व्वदा मङ्गलं रत्नं धारयेत् सह दूर्व्वया ।
अवस्त्राच्छादितं गात्रं न विप्रेभ्यः प्रदर्शयेत् ॥"

इति तत्रैव ८६ अध्यायः ॥

नीलवस्त्रं परिधाय विष्णुपूजननिषेधो यथा,—

वराह उवाच ।

"भूषितो नीलवस्त्रेण यो हि मामुपसर्पति ।
वर्षाणाञ्च शतं पच्च क्षमिर्भूत्वा स तिष्ठति ॥
तस्य वक्ष्यामि सुश्रोणि अपराधविशोधनम् ।
प्रायश्चित्तं विशालाक्षि येन शुध्यति किल्बिषात् ॥
व्रतं चान्द्रायणं कृत्वा विधिदृष्टेन कर्म्मणा ।
शुध्यते किल्बिषात् भूमे एवमेतन्न संशयः ॥"

इति वाराहे नीलवस्त्रपरीधानप्रायश्चित्तनामाध्यायः ॥ * ॥ विष्णुपूजने रक्तवस्त्रपरीधाननिषेधो यथा,—

वराह उवाच ।

"रक्तवस्त्रेण संयुक्तो यो हि मामुपसर्पति ।
तस्यापि शृणु सुश्रोणि कर्म्म संसारमोचनम् ॥
रजस्वलासु नारीषु रजो यत्तत् प्रवर्त्तते ।
तेनासौ रजसा स्पृष्टो कर्म्मदोषेण जायते ॥
वर्षाणि दशपञ्चैव वसते तत्र निश्चयः ।
रजो भूत्वा महाभागे रक्तवस्त्रपरायणः ॥
प्रायश्चित्तं प्रवक्ष्यामि तस्य कायविशोधनम् ।
येन शुध्यन्ति वै भूमे पुरुषाः ब्राह्मवर्ज्जिताः ॥
एकाहारं ततः कृत्वा दिनानि दश सप्त च ।
वायुभक्षो दिनत्रीणि दिनमेकं जलाशनः ॥
एवं स शुध्यते भूमे मम विप्रियकारकः ।
प्रायश्चित्तं ततः कृत्वा ममासौ रोचते सह ॥
एतत्ते कथितं भूमे रक्तवस्त्रविभूषितम् ।
प्रायश्चित्तं महाभागे सर्व्वं संसारमोचनम् ॥"

इति तत्रैव रक्तवस्त्रपरीधानप्रायश्चित्तम् ॥

परिधृतक्षौमवस्त्रस्य विष्णूपासननिषेधो यथा,—

"यः पुनः क्षौमवस्त्रेण मम कर्म्मपरायणः ।
देवि कर्म्माणि कुर्व्वीत तस्य वै पतनं ध्रुवम् ॥
शुष्का वै पञ्चवर्षाणि काष्ठभक्षश्च जायते ।
मण्डूकश्चैव वर्षाणि कच्छपश्चैव च पञ्च च ।
न च गच्छति संसारं मम कर्म्मपरायणः ।
पारावतश्च जायेत नववर्षाणि पञ्च च ।
जातो ममापराधेन स्थितः पारावतो भुवि ।
निष्ठते मम पार्श्वेषु यत्रैवाहं प्रतिष्ठितः ॥
प्रायश्चित्तं प्रवक्ष्यामि तस्य संसारमोचनम् ।
येनासौ लभते सिद्धिं क्षौमवस्त्रापराधतः ॥
सप्ताहं यावकं भुक्त्वा त्रिरात्रं शक्तुपिण्डिकाम् ।
त्रीणि पिण्डान् त्रिरात्रन्तु एवं शुध्यत किल्बिषात् ॥
य एतेन विधानेन देवि कर्म्माणि कारयेत् ।
शुचिर्भागवतो भूत्वा मम मार्गानुसारकः ।
न स गच्छति संसारं मम लोकाय गच्छति ॥"

इति तत्रैव क्षौमवस्त्रपरीधानप्रायश्चित्तम् ॥

परिधृताधौतवस्त्रस्य विष्णुकर्म्मकरणनिषेधो यथा,—

वराह उवाच ।

"वाससा न च धौतेन यो मे कर्म्माणि कारयेत् ।
शुचिर्भागवतो भूत्वा मम मार्गानुसारकः ॥
तस्य दोषं प्रवक्ष्यामि अपराधं वसुन्धरे ।
पतन्ति येन संसारं वासोच्छिष्टकारिणः ॥
देवि भूत्वा गजोन्मत्तश्चिरञ्चैकं नरो भुवि ।
उष्ट्रश्चैकं भवेज्जन्म जन्म चैकं खरश्चथा ।
गोमायुरेकजन्मा वै जन्म चैकं हयश्चथा ।
सारङ्गश्चैकजन्मा वै श्वगो भवति चैकतः ।
सप्तजन्मान्तरं पश्चात्ततो भवति मानुषः ।
मद्भक्तश्च गुणज्ञश्च मम कर्म्मपरायणः ।
निरापराधो दक्षश्च अहङ्कारविवर्ज्जितः ॥

धरण्युवाच ।

श्रुतमेतत् प्रयत्नेन यत्त्वया समुदाहृतम् ।
संसारं वासोच्छिष्टं येन गच्छन्ति मानवाः ॥
प्रायश्चित्तञ्च मे ब्रूहि सर्व्वकर्म्मसुखावहम् ।
किल्बिषात् येन मुच्यन्ति तव कर्म्मपरायणः ॥

वाराह उवाच ।

शृणु तत्त्वेन मे देवि कथ्यमानं मयानघे ।
प्रायश्चित्तं प्रवक्ष्यामि मम भक्तिपरायणः ॥
यावकेन दिनं त्रीणि पिण्डाकेन पुनस्त्रयः ।
कणभक्षो दिनत्रीणि पायसेन दिनत्रयम् ।
एवं कृत्वा महाभागे वासोच्छिष्टकारिणः ।
अपराधं न विदुषे संसारञ्च न गच्छति ॥"

इति तत्रैव अधौतवासःपरिधानप्रायश्चित्तनामाध्यायः ॥ * ॥ अथ परिधितपरकीयवस्त्रस्य विष्णुपूजादिकरणे प्रायश्चित्तम् ।

वाराह उवाच ।

"यः पारक्येण वस्त्रेण नावधूतेन माधवि ।
प्रायश्चित्ती पुमान्भूयो मम कर्म्मपरायणः ॥
करोति मम कर्म्माणि शुद्धा ते मां तमःस्थितः ।
श्वगो वै जायते देवि वर्षाणि त्रीणि सप्त च ।
हीनपादेन जायेत त्रैकजन्म वसुन्धरे ।
मूर्खश्च क्रोधनश्चैव मद्भक्तश्चैव जायते ।
तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं महौजसम् ।
येन गच्छति संसारं मम भक्तो ह्यवस्थितः ॥
अरुक्षन्तं ततः कृत्वा मम कर्म्मपरायणः ।
माघस्यैव तु मासस्य शुक्लपक्षस्य द्वादशीं ।
तिलैश्चाज्याग्नये तत्र चान्नो दानो द्विजेन्द्रियः ।
अनन्यमानसो भूत्वा मम चिन्तापरायणः ॥
प्रभातायान्तु शर्व्वर्य्यां उदिते च दिवाकरे ।
पञ्चगव्यं ततः पीत्वा शीघ्रं शुध्यत किल्बिषात् ॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
सर्व्वपापविनिर्मुक्तो मम लोकाय गच्छति ॥"

इति वाराहे परकीयवस्त्रपरीधानप्रायश्चित्तनामाध्यायः ॥ * ॥ काञ्चननिर्म्मितवस्त्रप्रमाणं यथा,—

"यावत् काञ्चनवस्त्राणां वाहिका गोपकन्यकाः ।
काञ्चित्तत्यायुः शीघ्रं यत्र चन्द्रावली सुता ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २८ अध्यायः ॥

"आसनं वसनं शय्या आयापत्यं कमण्डलुः ।
आत्मनः शुचिरेतानि न परेषां कदाचन ॥"

ईषद्धौतादिवस्त्रस्य पश्चिमाग्रादिप्रसारितवस्त्रस्य च अधौतत्वं यथा,—

"ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकेन तु ।
अधौतं तद्विजातीयाद्यद्वा दक्षिणपश्चिमे ॥"

इति कर्म्मलोचनम् ॥ * ॥

सत्यतपाः ।

"प्रागग्रमुदगग्रं वा धौतं वस्त्रं प्रसारयेत् ।
पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालनात् शुचि ॥"

अक्षार्य्यं दग्धा दृष्टवत् ॥ * ॥ प्रयेताः ।

"स्वयं धौतेन कर्म्मणा क्रिया धर्म्मा विधीयते ।
न च राजकधौतेन नाधौतेन भवेत् क्वचित् ॥
पुत्रमित्रकलत्रेण स्वजातिबान्धवेन च ।
दासवर्गेण यद्धौतं तत् पवित्रमिति स्थितिः ॥"

स्नानोत्तरं उत्तरीयवस्त्रस्य धार्य्यत्वं यथा ।
उत्तरीयधारणं शिरोजलापनयनाय । तेन तदनन्तरं न धार्य्यम् । तथा महाभारतम् ।

"आसुतः साधिवासेन अक्षतेन च सुमन्त्रिना ।
राजहंसनिभं प्राप्य उत्तरीयं शिरिक्षापितम् ।
अलक्ष्मनिमित्तं वै वैदग्धामाच मूर्द्धनि ॥"

शिरिक्षापितं अगाढ़वद्धम् ॥ * ॥ लिङ्गवस्त्राणि यथा । भारते ।

"न क्षौमेण न दर्भेण शारक्षेण विशेषतः ।
मूषिकोतकीर्णजीर्णेन कर्म्म कुर्य्यादिचक्षणः ॥"

वाराहे ।

"न रक्तसूत्रं वासो न नीलञ्च प्रशस्यते ।
मलाक्तञ्च दशाहीनं वर्ज्जयेदन्तरं बुधः ॥"

उत्तरं उत्तटरक्तविशेषम् । आचाररत्ने उशनाः ।

"दशाहीनेन वस्त्रेण कुर्य्यात् कर्म्माण्यभावतः ॥"

विष्णुधर्म्मोत्तरे ।

"वस्त्रं नाच्छन्नं धार्य्यं न रक्तं मलिनं तथा ।
जीर्णं वापदशञ्चैव चैलं धार्य्यं प्रयत्नतः ॥
उपानहं नाच्छन्नं वस्त्रञ्चाच धारयेत् ।
न जीर्णमलवद्वासो भवेच्च विभवे सति ॥"

योगियाज्ञवल्क्यः ।

"क्षालयेत् वाससी धौते अग्निं परिधाय च ।
प्रक्षाल्योच्छन्नदृष्टिञ्च दक्षौ प्रक्षालयेत्ततः ॥
अभावे धौतवस्त्राणां शाटकौमादिकानि च ।
कृतधौतं नवमलं वा शिर्म्माणं येन वा भवेत् ॥

अधौतेन च वस्त्रेण नित्यनैमित्तिकीं क्रियाम्।
कुर्वन् फलं न चाप्नोति दत्तं भवति निष्फलम्॥"
कृतपो नेपालकम्बलः॥ * ॥ तर्पणात् पूर्व्वं स्नानवस्त्रनिष्पीड़ननिषेधो यथा,—
"निष्पीड़यति यः पूर्व्वं स्नानवस्त्रन्तु तर्पणात्।
निराशास्तस्य गच्छन्ति देवाः पितृगणैः सह॥"
याज्ञवल्क्यः।
"स्नानं कृत्वार्द्रवासास्तु विष्णुं कुरुते यदि।
प्राणायामत्रयं कृत्वा पुनः स्नानेन शुद्धयति॥ *॥
नार्द्रमेकञ्च वसनं परिदध्यात् कथञ्चन॥"
हारीतः। आर्द्रञ्च सप्तवासहतमपि शुद्धमिति॥ *॥ मदनपारिजाते पाराशरः।
एकवेदाधो भवति तस्योत्तरार्द्धेन प्रच्छादयतीति। इत्याह्निकतत्त्वम्॥ * ॥ संक्रान्त्यादौ वस्त्रनिष्पीड़ननिषेधो यथा। षट्त्रिंशन्मतनिगमौ।
"संक्रान्त्यां पञ्चदश्याञ्च द्वादश्यां श्राद्धवासरे।
वस्त्रं न पीड़येत्तत्र न च चारेण योजयेत्॥"
इति तिथ्यादितत्त्वम्॥
वस्त्रकृत्रिमं, क्ली, (वस्त्रनिर्म्मितं कृत्रिममिव।) क्षत्रम्। इति त्रिकाण्डशेषः॥ (वस्त्रस्य कृत्रिमं स्थानमिव यद्यत्।) वस्त्रगृहञ्च॥
वस्त्रगृहं, क्ली, (वस्त्रनिर्म्मितं गृहम्।) वस्त्रनिर्म्मितशाला। तাঁবু इति भाषा। तत्पर्य्यायः। पटवासः २ पटमयम् ३ कूपम् ४ खलम् ५। इति त्रिकाण्डशेषः॥
वस्त्रग्रन्थिः, पुं, (वस्त्रस्य ग्रन्थिः।) परिधानवस्त्रस्य ग्रन्थनम्। तत्पर्य्यायः। उच्चयः २ नीवी ३। इति त्रिकाण्डशेषः॥
वस्त्रपञ्जलः, पुं, कोलकन्दः। इति राजनिर्घण्टः॥
वस्त्रपुत्रिका, स्त्री, (वस्त्रनिर्म्मिता पुत्रिका पुत्तलिका।) वस्त्रनिर्म्मितपुत्तलिका। इति शब्दमाला॥
वस्त्रभूषणः, पुं, (भूषयतीति। भूष+ल्युः। वस्त्रस्य भूषणः रञ्जक इत्यर्थः।) साकरञ्जवृक्षः। इति राजनिर्घण्टः॥
वस्त्रभूषणा, स्त्री, (वस्त्रस्य भूषणं रागो यस्याः।) मञ्जिष्ठा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या मञ्जिष्ठाशब्दे ज्ञातव्याः।)
वस्त्रयोनिः, स्त्री, (वस्त्रस्य योनिरुत्पत्तिकारणम्।) वसनोत्पत्तिकारणम्। यथा,—
"त्वक्फलञ्छिरोमाणि वस्त्रयोनिर्हयश्च त्रिधु॥"
इत्यमरः॥
वस्त्ररञ्जनः, पुं, (रञ्जयतीति। रञ्ज+णिच्+ल्युः।) वस्त्राणां रञ्जनः। कुसुम्भः। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायः।
"स्यात् कुसुम्भं वह्निशिखं वस्त्ररञ्जनमित्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वस्त्रं, क्ली, (वस निवासे आच्छादने वा+"धाञ्वस्त्र्यतिभ्यो नः।" उणा० ३। ६। इति करणादौ यथायथं नः।) वेतनम्। सूक्ष्मम्। (यथा, ऋग्वेदे। ४। २४। ६।
"भूयसा वस्त्रमघरत् कनीयोऽविक्रीतो अकानिषं पुनर्यन्॥")
वसनम्। द्रव्यम्। इति विश्वः॥ धनम्। भृतिः। इति हेमचन्द्रः॥ (वस्त्रे आच्छादयति शरीरमिति। कर्त्तरि नः।) त्वक्। इत्यमरटीकायां रामाश्रमः॥
वस्त्रः, पुं, (वस्+न।) सूक्ष्मम्। इत्यमरः॥
वस्त्रनं, कटीभूषणम्। इति शब्दरत्नावली॥
वस्त्रसा, स्त्री, (वस्त्रं चर्म्म सीव्यति। वस्त्र+सिव+ड।) स्त्रियां टाप्।) सूचिः। इत्यमरः॥
व(खो)खोकसारा, स्त्री, (वखोकैश्च रत्नाकरैश्च सारा।) इन्द्रपुरी। (यथा, रघुः।१६।१०।
"वखोकसारामभिभूय साद्धं
सौराज्यवद्भोत्यवया विभूत्या।
समग्रशक्तौ त्वयि रक्षयित्रे
सति प्रपन्ना करुणामवस्याम्॥")
इन्द्रनदी। (यथा, महाभारते। ३। १८८। १०१।
"वखोकसारां ललितां नर्म्मदाञ्चैव भारत!॥")
कुबेरपुरी। (यथा, महाभारते। ७।६५।१५।
"नैतादृशं हृष्टपूर्व्वं कुबेरसदनेष्वपि।
धनञ्च पूर्य्यमाणं नः किं पुनर्मनुजेष्विति।
यक्षं वखोकसारेयमित्यूचुस्तत्र विस्मिताः॥")
कुबेरनदी। इति हेमचन्द्रः॥
वह, ऐ क ल्विप्। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) प्रापणमिह आत्मस्य रूपम्। ऐ, उह्यात्। क, वहति वहते भारं यामं जनः प्रापयतीत्यर्थः। औ, अवाक्षीत्। अर्थान्तरे अकर्म्मकोऽयम्। यथा। जम्बूः सरिद्वहति सौमनि कम्बुकक्षीति नैषधे। मन्दं मरुद्वहति गर्ज्जति वारिवाहः। इति महानाटके। ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः। इत्यादि सिद्धार्थमोक्षादिच वहधातुं मन्यते वर्ब्बदेशशरत्रदेवौ। वस्तुतस्तु वक्षाद्यसम्मतत्वादेवीक्षादिनैवोपेक्षितः। ववाह इति चक्रीप्रयोगस्य तु वाह ड यत्ने इत्यस्मात् गणकृतानित्यत्वात् परस्मैपदसिद्धिः। अनेकार्थत्वात् सुस्राव इत्यर्थः। अथवा वव इत्याह इत्येव व्याख्यानम्। इति दुर्गादासः॥
वहः, पुं, (वहति युगमनेनेति। वह+"गोचरसञ्चरेति।" ३। ३। ११६। इति घप्रत्ययेन साधु।) वृषस्कन्धप्रदेशः। इत्यमरः॥ (यथा, महाभारते। ४। २। २१।
"यस्य बाहू समौ दीर्घौ न्यग्रोधपरिमण्डलौ।
दन्तिहस्ते चैव सदृशौ च गवामिव वहः स्मृतः॥"
वहतीति। वह+अच्।) घोटकः। वायुः। इति मेदिनी। हे, ८। पन्थाः। इति त्रिकाण्डशेषः॥ नदः। इति हेमचन्द्रः॥ (वाहके, त्रि। यथा, मनुः। १। ७६।
"आकाशात्तु विकुर्व्वाणात् सर्व्वगन्धवहः शुचिः।
बलवान् जायते वायुः स वै स्पर्शगुणो मतः॥")
वहतः, पुं, (वहतीति। वह+अतच्।) वृषः। गाभ्यः। इत्युणादिकोषः॥
वहतिः, पुं, (वहतीति। वह+"वहिश्रिस्रुभ्यश्छित्।" उणा० ४। ६०। इति अतिः।) वायुः। इत्युणादिकोषः। गौः। सचिवः। इति मेदिनी। ते, १४८॥
वहती, स्त्री, (वहतीति। वह+अति। वा ङीष्।) नदी। इति केचित्॥
वहतुः, पुं, (वह+"रुधिवह्योर्नुक्।" उणा० १। ७६। इति क्तुः।) पथिकः। वृषभः। इति मेदिनी। ते, १४६॥ (विवाहकाले कन्यार्थे देयवस्तु। यथा, ऋग्वेदे। १०। ८५। १३।
"सूर्य्यायै वहतुः प्रागात् सवितायमवासृजत्।"
"वहतुः कन्याप्रियार्थं दातव्यो-गवादिपदार्थः।"
इति तद्भाष्ये सायणः॥ विवाहः। यथा, ऋग्वेदे। १०। ८५। १३।
"यदश्विना पृच्छमाना वयातं
त्रिचक्रेण वहतुं सूर्य्यायाः॥"
"सूर्य्यायाः वहतुं विवाहमित्यर्थः।" इति तद्भाष्ये सायणः॥ वहनकारके, त्रि। यथा, ऋग्वेदे। ७। १। १७।
"उभा क्षयतो वहतू मियेधे।"
"उभौ वहतू वहनकर्त्तृ स्त्रोतं गृहञ्च क्षयतः कुर्व्वन्तौ मियेधे।" इति तद्भाष्ये सायणः॥)
वहनं, क्ली, (उह्यतेऽनेनेति। वह+करणे ल्युट्।) होड़ः। हुड़ी इति भाषा। यथा,—
"तरणौ भेजके वारिरयौ नौरौरिकः प्लवः।
होड़स्तरान्तुर्व्वहनं वहित्रं वार्व्वटः पुमान्॥"
इति त्रिकाण्डशेषः॥
(यथा, कथासरित्सागरे। २५। ४५।
"चणान्तरे च वणिजामाक्रन्देस्त्रीव्रपूरितम्।
भरादिव तदुत्पत्य वहनं समभज्यत॥"
वह+भावे ल्युट्। प्रापणम्। धारणम्। यथा, महाभारते। २। ३१। ४१।
"पावनात् पावकत्वाच्च वहनात् हव्यवाहनः॥"
वहतीति। वह+ल्युः। वाहके, त्रि। यथा, कथासरित्सागरे। २१८। १८६।
"देव्यानामधिपो विमानवहनः सान्तःपुरः सानुगः॥")
वहन्तः, पुं, (वहति वातीति। वह+"तृभूवहिवसीति।" उणा० ३। १२८। इति झच्।) वायुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (उह्यते इति। कर्म्मणि झच्।) वाहे, त्रि। इत्युणादिकोषः॥
व(ब)हलः, पुं, (उह्यतेऽनेनेति। वह+बाहुलकात् अलच्।) गोतः। इति हारावली। १४२॥ दृढ़े, त्रि। इति हेमचन्द्रः॥ (बहुत्वे च यथा, उत्तरचरिते। १।

"रसावस्या: सप्तौ वपुषि वहतश्चन्दनरस: ॥"
यथा वा प्रबोधचन्द्रोदये । १ ।
"येन चि.सप्तलो नृपवहलवसामांसमस्तिष्कपङ्क-
प्राग्भारोऽकारि भूरिच्युतरुधिरसरिद्वारिपूरे-
ऽभिषिक: ॥")

वहलगन्धं, क्ली, (वहल: प्रचुरो गन्धो यस्य ।) श्वेतचन्दनम् । इति राजनिर्घण्ट: ॥

वहलचक्षु:, [स्] पुं, (वहलानि प्रचुराणि चक्षुंषीव पुष्पाण्यस्य ।) मेघशृङ्गी । इति रत्नमाला ॥ पुस्तकान्तरे ।
"नन्दीवृक्षो मेघशृङ्गी तथा मेघविषौलिका ।
चक्षुर्मेहकं चक्षुष मेघशृङ्गी गृहद्रुमा: ॥"
इत्यपि पाठ: ॥

वहलत्वच:, पुं, (वहला दृढा त्वचा वल्कलं यस्य ।) श्वेतलोध्र: । इति राजनिर्घण्ट: ॥

वहला, स्त्री, (वहलानि प्रचुराणि पुष्पाणि सन्त्यस्या इति । अर्शआदित्वादच् ।) घृतपुष्पा । इति राजनिर्घण्ट: ॥ स्थूलैला । इति भावप्रकाश: ॥ (अस्या: पर्य्यायो यथा,—
"एला तु वहला स्थूला मालेयं ताड्कफलम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

वहा, स्त्री, (वहतीति । वह+अच् । टाप् ।) नदी । इति हेमचन्द्र: । ४ । १४६ ॥

व(ब)हि:, [स्] अ, बाह्यम् । इत्यमर: ॥ (यथा, मनु: । १० । ४५ ।
"सुखवाक्पूरुषज्ञानां या लोके जातयो बहि: ।
म्लेच्छवाचार्य्यवाच: सर्व्वे ते दस्यव: स्मृता: ॥"
यथा च, रामायणे । २ । ५३ । २ ।
"अद्येयं प्रथमा रात्रिर्यातां जनपदात् बहि: ।
या सुमन्त्रेण रहिता तां नोत्कण्ठितुमर्हसि ॥")

व(ब)हि:कुटीचर:, पुं, (बहि:कुट्यां चरतीति । चर+ट: ।) कुटीर: । इति त्रिकाण्डशेष: ॥

वहित:, त्रि, (अवधीयते स्मेति । अव+धा+क्त: । अवस्यातो लोप: ।) अवहित: । इति हिरूपकोष: ॥

वहित्रं, क्ली, (वहति द्रव्यादीति । वह+"अशित्रादिभ्य इत्रोत्रौ ।" उणा० ४।१७२। इति इत्र: ।) पोत: । तत्पर्य्याय: । वाल्लट: २ । इति त्रिकाण्डशेष: ॥ (यथा, गीतगोविन्दे । १ । ५ ।
"प्रलयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम् ॥")

वहित्रकं, क्ली, (वहित्र+स्वार्थे कन् ।) जलयानम् । यथा, हेमचन्द्रे ।
"सांयात्रिक: पोतवणिक् यानपात्रं वहित्रकम् ।
वोहित्थं वहनं पोत: पोतवाहो नियामक: ॥"

व(ब)हिर्द्वारं, क्ली, (वहि:स्थं द्वारम् ।) तोरणम् । इत्यमर: ॥ (यथा,—
"धिगस्तेतां विद्यां धिगपि कविता धिक्सुजनतां
वयो रूपं धिक् धिगपि च यशो निर्द्धनमत: ।
असौ जीयादेक: सकलगुणहीनोऽपि धनवान्
बहिर्द्वारे यस्यात्तबलभसमा: सन्ति गुणिन: ॥"
इत्युद्भट: ॥)

व(ब)हिर्द्वारप्रकोष्ठकं, पुं, (बहिर्द्वारस्य प्रकोष्ठक: ।) गृहस्य द्वारादहि: प्रकोष्ठम् । तत्पर्य्याय: । प्रघाण: २ प्रघण: ३ अलिन्द: ४ । इत्यमर: । २ । २ । १२ ॥

व(ब)हिर्भूत:, त्रि, (बहिस्+भू+क्त: ।) बहिर्गत: । बहि:शब्दपूर्व्वकप्राप्त्यर्थभूधातो: कर्त्तरि क्तप्रत्ययेन निष्पन्न: । यथा । "पञ्चविधयिताबहिर्भूतसाध्यविषयिताघटितधर्म्मावच्छिन्नप्रतिबध्यताग्रालिङ्गय: पक्षता ॥" इति जगदीश: ॥

व(ब)हिर्मुख:, त्रि, (बहिर्वाह्यविषये सुखं प्रवणता यस्य ।) विमुख: । यथा, नरसिंहाचार्य्यधृतेज्ञानसंहितायाम् ।
"ग्रैवो वा वैष्णवो वापि यो वा स्यादन्यपूजक: ।
सर्व्वं पूजाफलं हन्ति शिवरात्रिबहिर्मुख: ॥"
इति तिथ्यादितत्त्वम् ॥

व(ब)हिश्चर:, पुं, (बहिश्चरतीति । चर+ट: ।) कर्कट: । इति हेमचन्द्र: ॥ (बहिश्चरत्यशौचे, त्रि । यथा, मार्कण्डेये । २३ । ७१ ।
"युवयोर्यन्मदीयं तन्मामकं युवयो: सकम् ।
एतत्सत्यं विजानीतं युवां प्राणा बहिश्चरा: ॥")

वहेडुक:, पुं, विभीतकवृक्ष: । इति राजनिर्घण्ट: ॥

वह्नि:, पुं, (वहति धरति हव्यं देवार्थमिति । वह+"वहिश्रिश्रुयुद्रुस्रुभ्यो नि:" उणा० ४ । ५१ । इति नि: ।) चित्रक: । भल्लातक: । (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।
"मञ्जिष्ठाश्वौ वासको देवदारु
पथ्यावह्नी ओषधाश्चौ विडङ्गम् ॥")
निम्बूक: । इति राजनिर्घण्ट: ॥ रेफ: । इति तन्त्रम् ॥ अग्नि: । इत्यमर: ॥* ॥ तस्य नामानि यथा,—
"ते जातवेदस: सर्व्वे कल्पाय: कुसुमस्तथा ।
दहन: शोषणश्चैव तर्पणश्च महाबल: ।
पिटर: पतग: सर्व्वभक्षोऽथ भाज एव च ॥"
अन्यत्र तु नामान्तराण्युक्तानि यथा,—
"शृङ्गकोद्दीपकश्चैव विश्वमुखभ्रमोद्भगा: ।
अवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च ।
अन्वाहार्य्यो गार्हपत्य इत्येते दश वह्नय: ॥"
अन्यैरन्यथोक्तानि यथा,—
"भ्राजको रञ्जकश्चैव क्लेदक: क्लेदकस्तथा ।
धारको वन्धकश्चैव द्रावकाख्यश्च सप्तधा ।
व्यापक: पावकश्चैव क्लेद्यको दशम: स्मृत: ॥"
शरीरस्यवह्नि: स्थानानि यथा,—
"वह्नयो दोषदूष्येषु संलीना दश देहिन: ॥"
दोषदूष्यौ यथा,—
"वातपित्तकफा दोषा दूष्या: स्यु: सप्त धातव: ॥"
इति शारदातिलक: ॥
तत्र निषिद्धकर्म्माणि यथा,—
"नाग्निहोत्रं परिचरेत् न देवान् कौर्म्मवेदधीन् ।
न चाग्निं जङ्घयेद्धीमान् नोपदध्यादध: क्वचित् ॥
न चैनं यादृत: कुर्य्यात् सुखेन न धमेदुदृध: ।
अग्नौ न नि:क्षिपेदग्निं नाङ्गि: प्रशमयेत्तथा ॥
न वह्निं मुखनिश्वासैर्व्यजयेन्नाशुचिर्म्मुध: ।

समग्निं नैव हस्तेन सृष्टेनाप्सु चिरं वसेत् ॥
नाग्नच्चिषेन्नोपधमे न स्पर्शेच्च पाणिना ।
सुखेनाग्निं समिन्नीतं सुखादग्निरजायत ॥"
इति कौर्म्मे उपविभागे १५ अध्याय: ॥

अस्योत्पत्तिर्यथा,—
शौनक उवाच ।
"सर्व्वं श्रुतं महाभाग परिपूर्णं मनो मम ।
अधुना श्रोतुमिच्छामि वह्नेरुत्पत्तिमीप्सिताम् ॥
सूत उवाच ।
एकदा ब्रह्मकाले च ब्रह्मानन्तमहेश्वरा: ।
श्वेतद्वीपं ययु: सर्व्वे द्रष्टुं विष्णुं जगत्पतिम् ॥
परस्परञ्च संभाष्य स्थित्वा सिंहासनेषु च ।
ऊचु: सर्व्वे सभामध्ये सुरर्षे पुरतो हरे: ॥
विष्णुगात्रोद्भवास्तत्र कामिन्य: कमलाकला: ।
तत्र नृत्यन्ति गायन्ति विष्णुगाथाश्च सुस्वरम् ॥
तासाञ्च कठिनं श्रोणिं कठिनं स्तनमण्डलम् ।
सस्मितं सुखपद्मञ्च दृष्ट्वा ब्रह्मा च कामुक: ॥
मनो निवारयं कर्त्तुं न शशाक पितामह: ।
वीर्य्यं पपात चच्छाद लज्जया वाससा विभु: ॥
तद्वीर्य्यं वह्निसहितं प्रतप्तं कामतापित: ।
क्षीरोदे प्रेरयामास सङ्गीते विरते द्विज ॥
जलादुत्थाय पुरुष: प्रज्वलन् ब्रह्मतेजसा ।
उवास ब्रह्मण: क्रोडे लज्जितस्य च संसदि ॥
एतस्मिन्नन्तरे रुद्रो जलादुत्थाय सत्वर: ।
प्रणम्य वरुणो देवान् बालं नेतुं ससृपतु: ॥
बालो दधार ब्रह्माणं बाहुभ्याञ्च भयाहरन् ।
किञ्चिन्नोवाच जगतां विधाता लज्जया द्विज ॥
बालकस्य करे धृत्वा चकारार्घ्यं रुषा ।
वरुणश्च सभामध्ये तं चिक्षेप प्रजापति: ॥
पपात दूरतो देवो वरुणो दुर्ब्बलस्तथा ।
मूर्च्छां संप्राप्य मृतवत् कोपदृष्ट्या विधेरहो ॥
चेतनं कारयामासाम्भस्तद्दृष्ट्या च शङ्कर: ।
संप्राप्य चेतनां तत्र तमुवाच जलेश्वर: ॥
वरुण उवाच ।
बालो जले ससृजुतो मम पुत्रोऽयमीप्सित: ।
अहं ग्रहीत्वा यास्यामि ब्रह्मा मां ताड्येत् कथम् ॥
ब्रह्मोवाच ।
बालक: शरणापन्नो मयि विष्णो महेश्वर ।
कथं दास्यामि भीतश्च वरुणं शरणागतम् ॥
शरणागतदीनार्त्तं यो न रक्षेदपण्डित: ।
पच्यते निरये तावद् यावच्चन्द्रदिवाकरौ ॥
उभयोर्व्वचनं श्रुत्वा प्रहस्य मधुसूदन: ।
उवाच सर्व्वतत्त्वज्ञ: सर्व्वज्ञश्च यथोचितम् ॥
भगवानुवाच ।
दृष्ट्वा सुकामिनीश्रोणिं वीर्य्यं धातु: पपात तत् ।
लज्जया प्रेरयामास क्षीरोदे निर्म्मले जले ॥
ततो बभूव बालश्च धर्म्मतो विधिपुत्रक: ।
चैत्रजश्च सुत: ग्राह्यो वरुणस्यापि गौरवत: ॥
महादेव उवाच ।
यो विद्यायोनिसम्बन्धो वेदेषु च निरूपित: ।
अग्नौ पुत्रे च समता चेति वेदविदो विदु: ॥

मन्त्रं ददातु वरुणो विद्याञ्च बालकाय च।
पुत्रो विधातुर्वह्निञ्च शिष्यञ्च वरुणस्य च।
विष्णुर्ददातु बालाय दाहिकां शक्तिसुखदाम्।
सर्व्वदग्धो हुताशश्च निर्म्माणो वरुणेन च।
विष्णुश्च दाहिकां शक्तिं ददौ तस्मै शिवाज्ञया।
मन्त्रं विद्याञ्च वरुणो रत्नमालां मणीश्वराम्।
क्रोधं त्यक्त्वा च तं बालं पुत्रं मायया सुरः।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे वह्न्युत्पत्तिर्नाम १३० अध्यायः। ●। तद्दाहनिवारकौषधानि यथा,—
"वासुदत्तैस्तथा विद्युद्दग्धा च मृत्तिका।
तयालिप्तं वटेवृक्षं नाग्निना दह्यते नृप!।"
इति मात्स्ये राजधर्म्मे राजरक्षानाम १६३ अः।
अग्निवेशजं तच्छान्तिश्च यथा,—
"यत्राग्निर्दीप्यते यत्र राष्ट्रे यस्य विरिञ्चनः।
न दीप्यते चैत्यगतात् च राष्ट्रः पीड्यते नृपैः।
ग्रन्थवेदमृषु मांसं वा तथाऽन्यापि किञ्चन।
प्राणादतोरक्षणार्थं नृपवेश्म सुराजयम्।
हतानि यत्र दह्यन्ते तत्र राजभयं भवेत्।
विद्युता वा प्रदह्यन्ते तत्रापि नृपतेर्भयम्।
धूमध्वजश्चाग्निको यत्र तत्र विद्याच्चतुर्भयम्।
विनाशिं विस्फुलिङ्गाश्च दह्यन्ते यत्र कुत्रचित्।
त्रिरात्रोपोषितश्चाद्य पुरोधाः सुसमाहितः।
अग्निभिः शीरहत्याञ्च सर्व्वमेधैः हुतेन च।
दद्यात् सुवर्णञ्च तथा द्विजेभ्यो
गाञ्चैव वस्त्राणि तथा शुचश्च।
एवं कृते पापमुपैति नाशं
यदग्निवेशजभयं द्विजेन्द्र!।"
इति तत्रैवाद्भुतशान्तिरग्निवेशजं नाम २०५ अध्यायः। ●। सुखायवो यथा,—
"गार्हपत्यो दक्षिणाग्निराहवनीयश्च।
एतेऽग्नयस्त्रयो सुखाः श्रेयाश्चोपदधत्तम।"
इति वह्निपुराणे गणभेदनामाध्यायः। ●।
वह्निविप्रभक्षणगमनविधेधो यथा,—
"द्वौ विप्रौ वह्निविप्रौ च दम्पत्योर्मुखशिष्ययोः।
दृष्ट्वाये च न गन्तव्यं ब्रह्महत्या पदे पदे।"
इति कर्म्मलोचनः। ●।
अपि च।
"नाग्निब्राह्मणयोरन्तरा व्रजेद्वातु गामुद्रोणं ब्राह्मणयोर्नं गुरुशिष्ययोरुभयोर्वा तु व्रजेत्।
इति तिथ्यादितत्त्वधृतवचनम्। ●। अथ वह्निस्तम्भनम्।
"मातुलस्य वसां यस्तु जलौकां तत्र पेषयेत्।
दग्धौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमम्।
शालजीरसमादाय खरमूत्रे निधाय तम्।
अभ्यागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमम्।
वायसी उदरं यस्य मक्षकवसया सह।
गुटिकां कारयेत्तेन ततोऽग्निं प्रक्षिपेद्बुधः।
एवमेतत्प्रयोगेण अग्निस्तम्भनमुत्तमम्।
सुकीतकवचाशुक्लं मरीचं नागरं तथा।
चर्व्वित्वा च इमं मन्त्रं जिह्वया जलजं
लिखेत्।
गोरोचना भृङ्गराजं चूर्णं कृत्वा घृतं समम्।
दिग्धस्तम्भश्च पीत्वा स्नात्वाग्नेयेन वै तथा।"
ॐ अग्निस्तम्भनं कुरु। इति गारुडे १८६ अध्यायः। (दैत्यविशेषः। यथा, महाभारते। १२। २२७। ५०।
"वाग्वः कार्णेश्वरो वह्निर्विश्वदंष्ट्रोऽथ नैर्ऋतिः।"
मित्रविन्दागर्भजातः कृष्णस्य पुत्रविशेषः। यथा, भागवते। १०। ६१। १६।
"महांशः पावनो वह्निर्मित्रविन्दात्मजाः
सुधीः।"
तुर्व्वसुपुत्रः। यथा, हरिवंशे। ३२। ११७।
"तुर्व्वसोस्तु सुतो वह्निर्गोभानुस्तस्य चात्मजः।"
कुकुरपुत्रः। यथा, भागवते। ६। २४। १६।
"कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः।")
वह्निकरी, स्त्री, (वह्निं देहस्थवह्निं करोतीति। वह्नि+टः। ङीप्।) शालीश्वरी। इति शब्दचन्द्रिका। धार फुल इति भाषा।
वह्निकाष्ठं, क्ली, (वह्निवत् दाहकं काष्ठम्।) दाहागुरुः। इति राजनिर्घण्टः।
वह्निगन्धः, पुं, (वह्निना वह्निसंयोगेन दहनेन गन्धो यस्य।) यवधूपः। इति शब्दचन्द्रिका।
वह्निगर्भः, पुं, (वह्निर्गर्भे यस्य।) वंशः। इति शब्दचन्द्रिका।
वह्निगर्भा, स्त्री, (वह्निरग्निर्गर्भे यस्याः।) शमीवृक्षः। इति शब्दचन्द्रिका।
वह्निचक्रा, स्त्री, (वह्निरिव चक्रं आवर्त्तवत् चिह्नं यस्याः।) कलिकारीवृक्षः। इति भावप्रकाशः।
वह्निज्वाला, स्त्री, (वह्निर्ज्वालेव दाहकत्वात्।) धातकीवृक्षः। इति राजनिर्घण्टः। (तथास्य पर्य्यायो यथा,—
"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
वह्निदमनी, स्त्री, (दमयति शमयतीति। दम+णिच्+ल्युः। ङीप्। वह्नेर्दमनी। अग्निदाहक्लेशप्रशमनकारित्वादस्यास्तथात्वम्।) अग्निदमनीक्षुपः। इति राजनिर्घण्टः।
वह्निदीपकः, पुं, (वह्निं दीपयतीति। दीप+णिच्+ण्वुल्। वह्नेर्दीपक इति वा।) कुसुम्भम्। इति शब्दरत्नावली। (गुणादिविशेषोऽस्य कुसुम्भशब्दे ज्ञेयः।)
वह्निदीपिका, स्त्री, (वह्नेर्जठरानलस्य दीपिका उत्तेजिका।) अजमोदा। इति राजनिर्घण्टः।
वह्निनामा [न्], पुं, (वह्नेर्नाम नाम यस्य।) चित्रकः। भल्लातकः। इति रत्नमाला।
वह्निनी, स्त्री, (वह्निं तद्दाह्यानि नयतीति। नी+डः। गौरादित्वात् ङीप्।) अटामांसी। इति रत्नमाला।
वह्निपुष्पी, स्त्री, (वह्निरिव दाहकं रक्तवर्णं वा पुष्पमस्याः। ङीप्।) धातकी। इति राजनिर्घण्टः।
वह्निबन्धूः, स्त्री, (वह्नेर्बन्धूः।) स्वाहा। इति शब्दरत्नावली।
वह्निबीजं, क्ली, (वह्नेर्बीजम्।) रंबीजम्। इति तन्त्रम्। (वह्निदायकं बीजमस्य।) निम्बूकम्। इति राजनिर्घण्टः। (वह्नेर्बीजं वीर्य्यम्।) स्वर्णम्। इति हेमचन्द्रः। तस्योत्पत्तिर्यथा,—
"एकदा सर्व्वदेवाश्च समयुः स्वर्गसंसदि।
तत्र स्थित्वा च वृत्यश्च गायन्त्यश्चरसां गणाः।
विलोक्य रम्भां सुश्रोणीं सकामो वह्निरेव च।
पपात वीर्य्यं चच्छाद लज्जया वासवा तथा।
उत्तस्थौ स्वर्णपुङ्खश्च वह्निं क्षिप्त्वा ज्वलत्प्रभः।
शब्देन वह्नेर्यामास स सुमेरुर्बभूव ह।
हिरण्यरेतसं वह्निं प्रवदन्ति मनीषिणः।
इति ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि।"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे हिरण्योत्पत्तिर्नाम १३० अध्यायः।
वह्निभोग्यं, क्ली, (वह्नेरग्नेर्भोग्यं भोगार्हं हव्यत्वात्।) घृतम्। इति शब्दचन्द्रिका।
वह्निमन्थः, पुं, (वह्नये अग्न्युत्पादनार्थं मथ्यते इति। मन्थ+घञ्।) गणिकारिकावृक्षः। इति जटाधरः। (अस्य पर्य्यायो यथा,—
"तेजोमन्थो हविर्मन्थो ज्योतिष्को पावकोऽरणिः।
वह्निमन्थोऽग्निमन्थश्च मथनो गणिकारिका।"
इति वैद्यकरत्नमालायाम्।)
अग्निमन्थः। इति राजनिर्घण्टः।
वह्निमारकं, क्ली, (वह्निं मारयति विनाशयतीति। वह्नि+णिच्+ण्वुल्।) जलम्। इति शब्दचन्द्रिका।
वह्निमित्रः, पुं, (वह्निर्मित्रं यस्य।) वायुः। इति शब्दचन्द्रिका।
वह्निरेताः [स्], पुं, (वह्नौ रेतो यस्य। अग्निनिक्तवीर्य्यत्वादेवास्य तथात्वम्।) शिवः। इति हलायुधः।
वह्निलोहकं, क्ली, (वह्निदेवताकं लोहकम्।) कांस्यम्। इति राजनिर्घण्टः।
वह्निवर्णं, क्ली, (वह्निरिव रक्तो वर्णो यस्य।) रक्तोत्पलम्। इति शब्दचन्द्रिका।
वह्निवल्लभः, पुं, (वह्नेर्वल्लभः प्रियः उद्दीपकत्वात्।) सर्ज्जरसः। इति त्रिकाण्डशेषः।
वह्निशिखं, क्ली, (वह्निरिव शिखा यस्य।) कुसुम्भम्। इत्यमरः। (अस्य पर्य्यायो यथा,—
"स्यात् कुसुम्भं वह्निशिखं वस्त्ररञ्जकमित्यपि।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
वह्निशिखरः, पुं, (वह्निरिव शिखरं यस्य।) लोचमस्तकः। इति शब्दरत्नावली।
वह्निशिखा, स्त्री, (वह्निरिव शिखा यस्याः।) कलिमारी। इति धरणिः। कलिकारी। धातकी। इति राजनिर्घण्टः। (जाङ्गलिकी। जाङ्गलिका विष इति ख्याता। तत्पर्य्यायो यथा,—
"गौरी जाङ्गलिकी दीप्ता ज्वलिनी गर्भघातिनी।
अग्निशिखेन्द्रपुष्पायिसुखी वह्निशिखा च सा।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

वह्निसंज्ञकः, पुं, (वह्नेः संज्ञा संज्ञा यस्य । ततः कन् ।) चित्रकः । इत्यमरः ॥

वह्निसखः, पुं, (वह्नेर्जठराग्नेः सखा । टच् समासे ।) जीरकः । इति राजनिर्घण्टः ॥ (वह्नेः सखा ।) वायुः । इति वह्निमित्रशब्ददर्शनात् ॥

वह्नं, क्ली, (वहतीति । वह + "अन्नादयश्च ।" उणा० ४ । १११ । इति यक् प्रत्ययेन साधुः ।) वाहनम् । इति हेमचन्द्रः ॥ (वहत्यनेनेति । वह + "वह्नं करणम् ।" ३ । १ । १०२ । इति यत् ।) प्रकटम् । इत्युणादिकोषः ॥ (यथा, अथर्ववेदे । ४ । २० । ३ ।

"सा भूमिमा रुरोहिथ वह्नं आत्नो वधूरिव ॥")

वह्या, स्त्री, सूतिपत्नी । इत्युणादिकोषः ॥

वा, क सुखाप्तिगतिसेवासु । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सुखाप्तौ अक०-अन्यत्र सक०-सेट् ।) क, वापयति । इति दुर्गादासः ॥

वा, ख गमनहिंसयोः । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-सेट् ।) ओऽवादिरप्यय-मित्येके । गमनमिह वायुकर्तृकमेव । ख, वाति वायुः । हिंसनं खण्डनमिति चतुर्भुजः । इति दुर्गादासः ॥

वा, य, (वा + क्विप् ।) विकल्पः । (यथा, मनुः । २ । ११२ ।

"धर्म्मार्थौ यत्र नश्यातां शुश्रूषा वापि तद्विधा । तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ॥")

उपमा । (इवार्थे । यथा, रघुः । १६ । ५१ ।

"व्योम पश्चिमकलास्थितेन्दु वा पङ्कजेषमिव घर्म्मपक्षलम् ॥")

वितर्कः । (यथा, महाभारते । १ । १५४ । २३ ।

"किं ते हिडिम्ब एतैर्वा सुखसुप्तैः प्रबोधितैः । मामासाद्य दुर्बुद्धे तरसा त्वं नराधम ! ॥")

प्रादपूरणम् । (यथा, रामायणे । १ । २५ । ३ ।

"देवासुरगणान् वापि सगन्धर्व्वोरगान् भुवि । येरमित्रान् प्रसह्याजौ वशीकृत्य जयिष्यसि ॥")

समुच्चयः । इति मेदिनी । वे, ७४ । इवार्थः । इति विश्वः ॥ (यथा, किरातार्जुनीये । ३ । १३ ।

"सुता न यूयं किमु तस्य राज्ञः सुयोधनं वा न गुरुर्जनीता ॥")

वांग्रः, त्रि, वंग्रसम्बन्धी । वंग्रस्यायमित्यर्थे यञ्(अञ्) प्रत्ययेन निष्पन्नः ॥

वांग्रिकः, पुं, (वंग्रीवादनं शिल्पमस्येति । वंग्र + ठक् ।) वंग्रीवादकः । इति जटाधरः ॥ (भारभूतान् वंग्रान् हरति वहति आवहति वा । "तद्धरति वहत्यावहति भाराद्यंग्रादिभ्यः ।" ५ । १ । ५० । इति ठक् । भारभूतवंग्रहारके तद्वाहके च त्रि ॥)

वांग्री, स्त्री, (वंग्रे भवा + वंग्र + अण् । ङीष् ।) वंग्ररोचना । इति राजनिर्घण्टः ॥ (तत्पर्य्यायो यथा,—

"तुगाचीरी शुभा वांग्री वंग्रजा वंग्रलोचना ।"

इति वैद्यकरत्नमाला ॥

"स्यादंग्ररोचना वांग्री तुगाचीरी तुगा शुभा । त्वक्चीरी वंग्रजा शुभ्रा वंग्रचीरी च वैद्यकी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वाः [र्], क्ली, (वार्य्यते क्षयानेनेति । वृ + क्विप् + क्विप् । यद्वा, "वृञ वरणे । स्वार्थिकोऽण् छान्दसः । तदन्तात् क्विप् । अणि लोपः । हल्ङ्यादिलोपः । रेफस्य विसर्जनीयः ।" इति निघण्टौ देवराजयज्वा । १ । १२ । ८ ।) जलम् । इत्यमरः ॥ (यथा, भागवते ।३।१३।१६।

"क्षत्तो मे चित्तिर्वाभिः स्रावयमाना रसाज्ञया ॥")

वाःकिटिः, पुं, वारो जलस्य किटिः शूकरः । शिशुमारः । इति केचित् ॥

वाःसदनं, क्ली, (वारो जलस्य सदनम् ।) जलाधारः । इति त्रिकाण्डशेषः ॥

वाक् [च्], स्त्री, (उच्यतेऽसौ अनया वेति । वच् + "क्विप् वचिप्रच्छीति ।" उणा० २ । ५७ । इति क्विप् दीर्घोऽसम्प्रसारणञ्च ।) वाक्यम् । (यथा, मनुः । २ । १५६ ।

"अहिंसयैव भूतानां कार्य्यं श्रेयोऽनुशासनम् । वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्ममिच्छता ॥")

सरस्वती । इत्यमरः ॥ (यथा, कथासरित्सागरे । १ । ३ ।

"प्रणम्य वाचं निःशेषपदार्थोद्योतदीपिकाम् । दृष्टकथायाः सारस्य संग्रहं रचयाम्यहम् ॥")

वाकं, त्रि, (वकस्येदमिति । वक + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वकसम्बन्धि । वकस्येदं इत्यर्थे व्यत्ययेन निष्पन्नम् । (क्ली, वकस्य समूहः । "तस्य समूहः ।" ४ । २ । ३७ । इत्यण् । वकसमूहः । उच्यतेऽसौ अनेनेति वा । वच् + घञ् । वाक्यम् । यथा, उत्तररामचरिते । १ । १ ।

"इदं कविभ्यः पूर्व्वेभ्यो नमो वाकं प्रशास्महे ॥"

वेदभागविशेषः । यथा, महाभारते । १२ । ४७ । २५ ।

"यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च । एकन्ति सत्यकर्म्माणं सर्व्वं सत्येषु सामसु ॥"

पुं, वकस्यावयवो विकारो वा । प्राग्वितादण् । वकावयवविशेषः ।)

वाकुची, स्त्री, (वातीति वा वायुं कुचति सङ्कोचयति पूतिगन्धित्वात् । कुच् + कः । गौरादित्वात् ङीष् ।) वृक्षविशेषः । हाकुच इति भाषा । तत्पर्य्यायः । सोमराजी २ सोमवल्ली ३ सुवल्लिका ४ सिता ५ सितावरी ६ चन्द्रलेखा ७ चन्द्री ८ सुप्रभा ९ कुष्ठघ्नी १० कालमेषी ११ पूतिगन्धा १२ वल्गुला १३ चन्द्रराजी १४ कालमेघी १५ त्वग्दोषापहा १६ कान्तिदा १७ अवल्गुजा १८ चन्द्रप्रभा १९ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कृमिकुष्ठकफवातदोषविषकण्डूखर्ज्जूनाग्नित्वञ्च । इति राजनिर्घण्टः । तत्पर्य्यायगुणाः ।

"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
अग्निलेखा कृष्णफला सोमा पूतिफलीति च ॥
सोमवल्ली कालमेघी कुष्ठघ्नी च प्रकीर्त्तिता ।
वाकुची मधुरा तिक्ता कटुपाका रसायनी ॥
विष्मन्दह्निमा रुच्या सरा श्लेष्मासपित्तनुत् ।
रूक्षा कृष्णा श्वासकुष्ठमेहव्रणकृमिप्रणुत् ॥
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ।
केश्यं लघ्वं कृमिश्वासकासप्लीहामपाण्डुहृत् ॥"

इति भावप्रकाशः ॥

वाकुलं, क्ली, (वकुलस्येदमिति । वकुल + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वकुलफलम् । अस्य गुणाः ।

"वाकुलं मधुरं ग्राहि दन्तस्थैर्य्यकरं परम् ॥"

इति राजवल्लभः ॥

वाक्कीरः, पुं, (वाचि कौतुकवाक्ये कीरः शुक इव प्रियत्वात् ।) श्लालकः । इति शब्दरत्नावली ॥

वाक्कूलं, क्ली, (वाचा छलम् ।) वाक्यघातः । यथा । वचनविघातोऽर्थविकल्पोपपत्त्या छलम् । तत्त्रिविधम् । वाक्छलम् । सामान्यच्छलम् । उपचारच्छलञ्च । अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् । १ । सम्भवतोऽर्थस्यातिसामान्ययोगात् असम्भूतार्थकल्पना सामान्यच्छलम् । २ । धर्म्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेध उपचारच्छलम् । ३ । इति गोतमसूत्रम् । अथवैकार्थशब्दबोधतात्पर्य्यैकशब्दस्य शक्त्या अर्थान्तरतात्पर्य्यकल्पकत्वनया दूषणाभिधानं वाक्कूलजत्वम् । यथा । नेपालादागतोऽयं नवकम्बलत्वात् । इत्युक्ते कुतोऽस्य नवसंख्काः कम्बलाः ॥१। सामान्यविशिष्टसम्भवदर्थाभिप्रायेण उक्तस्य सामान्ययोगादसम्भवदर्थकल्पनया दूषणाभिधानं सामान्यच्छलम् । यथा । ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पदं साधयति इति कथयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याचरणसम्पत् ब्राह्मे अभिधारात् । २ । शक्तिलक्षणयोरेकतरवृत्त्याश्रयः प्रतिषेधः स उपचारच्छलम् । यथा । मञ्चाः क्रोशन्ति इत्यत्र मञ्चस्था एव क्रोशन्ति न तु मञ्चाः । एवं अहं नित्य इति शक्त्या प्रयुक्ते असुकादुत्पन्नत्वं कथं नित्य इति प्रतिषेधोऽयुपचारच्छलम् । ३ । इति तट्टीका । अपि च ।

"सर्व्वेष्वर्थविवादेषु वाक्कूले नावसीदति ।
पशुस्त्रीभूम्यृणादाने प्राप्तोऽप्यर्थान्न हीयते ॥"

इति व्यवहारतत्त्वम् ॥

वाक्पतिः, पुं, (वाचां पतिः ।) बृहस्पतिः । इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । ८ । १५ ।

"उद्गारोग्यसुभिक्षक्षेमकरो वाक्पतिश्चरन् भागान् ॥")

वाक्पतिः, त्रि, (वाचां पतिरिव पटुत्वात् ।) उद्भावकवचनः । इति रायमुकुटः ॥ अनवद्यो-

दमादिपटुवचनः। इति भरतः। सदुद्गा वाक्यरचकः। इति शारसुन्दरी। पटुवचनः। इति पदार्थकौमुदी। वक्तृवागृजनः। इति गौडकक्षः। तत्पर्य्यायः। वागीशः २। इत्यमरः। अनवद्योद्यमवचाः ३। इति जटाधरः। "वाग्मी वाग्मिवावदूको वाचो युक्तिपटुस्तथा। वागीशो वाक्पतिश्चेति वदेते सुदुवक्तरि।"

इति शब्दरत्नावली।

(यथा, हरिवंशे। २१५। ३४।
"सम्भवं सर्व्वलोकस्य विदधाति स वाक्पतिः।")

वाक्पारुष्यं, क्ली, (वाचा कृतं पारुष्यम्।) अप्रियवाक्योच्चारणम्। तत्तु सप्तधाव्यसनान्तर्गतव्यसनविशेषः। यथा,—
"मृगयाद्याः स्त्रियः पानं वाक्पारुष्यार्थदूषणे। दण्डपारुष्यमित्येतत्सप्तकं व्यसनप्रकम्।"

इति हेमचन्द्रः।

तल्लक्षणं नारदेनोक्तम्।
"देशजातिकुलादीनामाक्रोशन्यङ्गसंयुतम्। यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते।"
देशादीनां आक्रोशन्यङ्गसंयुतम्। उद्वेगजननार्थं वाक्यं तद्वाक्पारुष्यं कथ्यते। तस्य च दण्डतारतम्यार्थं निष्ठुरादिभेदेन त्रैविध्यमभिधाय तल्लक्षणं तेनैवोक्तम्।
"निष्ठुराक्षीलतीव्रत्वात्तदपि त्रिविधं स्मृतम्। गौरवाद्युक्तमार्गस्य दण्डोऽपि स्यात् क्रमाद्गुरुः।
यत्रैषं निष्ठुरं ज्ञेयमश्लीलं श्लङ्गसंयुतम्। पतत्रीवेदपाक्रोशैस्त्रीत्रमाक्रुष्मनीषिणः।" इति।
तत्र निष्ठुराक्रोशे सर्व्वविषये दण्डमाह।
"सत्यासत्यान्यवाक्योर्व्वैगुण्यान्नैश्चिरोचिताम्। शैपक्षुरोति चेद्दण्ड्यः प्रजानर्हत्रयोदश।
काव्यशाप्यथवा श्लङ्गमन्यं वापि तथाविधम्। तत्रैनापि स्रुवन् दाप्यो दण्डं कार्षापणावरम्।"
इति यत्नुवचनं तदतिदुर्वृत्तसर्व्वविषयम्। यदा पुनः पुत्रादयो मात्रादीन् ब्रूयुस्तदा श्रुतं दण्डनीया इति तेनैवोक्तम्।
"मातरं पितरं जायां भ्रातरं सुहृदं गुरुम्। आचारयन् श्रुतं दाप्यः पन्थानमदतो गुरोः।"

इति च।

श्रुतेन सापराधेषु मात्रादिषु गुरुषु विरुपराधायाच्च जायायां प्रदण्डमाह। * । अश्लीलाक्षेपे दण्डमाह।
"अभिगन्ताऽसि भगिनीं मातरं वा तवेति च। ब्रुवन् तन्दापयेद्राजा पञ्चविंशतिकं दमम्।
दण्डप्रणयनं कार्य्यं सर्व्वत्राप्युत्तरापरैः। प्रातिलोम्यापवादेषु द्विगुणश्चिगुणो दमः।
वर्णानामानुलोम्येन तस्मादर्द्धार्द्धहानितः।"

मनुः।

"श्रुतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति। वैश्योऽप्यर्द्धश्रुतं ह्येव शूद्रस्तु वधमर्हति।
ब्रह्मणस्तूत्तमाङ्गस्य दण्डः क्षत्रियसाभिधंसने। वैश्ये स्यादर्द्धपञ्चाशत्कूते द्वादशको दमः।
वाक्पारुष्यानृतेऽसत्यविवाके वाचिके दमः। ग्रन्थस्तदर्द्धिकः पादो नासाकर्म्मकरादिषु।
अश्रुतस्तु वदन्नेव दण्डनीयः पशून् दश। तथा श्रुतः प्रतिभुवं दाप्यः क्षेमाय तस्य तु।
पतनीयहते क्षेपे दण्डो मध्यमसाहसः। उपपातकयुक्ते तु दाप्यः प्रथमसाहसः।
त्रैविद्यहृदेवानां क्षेप उत्तमसाहसः। मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः।"

इति मिताक्षरा।*।

वाक्पारुष्ये अभियोगमनिच्छन्नाह ग्रन्थभियोजने प्रतिप्रसवो यथा,—
"कुर्य्यात् ग्रन्थभियोगञ्च कलहे साहसेषु च।"
वाक्पारुष्ये ग्रन्थादिप्रहारेषु च यथा पूर्व्वमहमध्यनेनाक्रुष्टः ग्रन्थेन हतः इत्यपराधाभावाय ग्रन्थभियोगं कुर्य्यात्। इति व्यवहारतत्त्वम्।

वाक्य, क्ली, (उच्यते इति। वच्+ण्यत्। "चजोः कु घिण्यतोः।" ७।३।५२। इति कुत्वम्। ग्रन्थसंघातात् "वचोऽग्रन्थसंघायाम्।" ७।३।६७। इति निषेधो न।) पदसमुदायः। इति व्याकरणम्। तिङन्तचयः। सुबन्तचयः। कारकान्विता क्रिया। इत्यमरः। इह श्रुतिलोकयोरविविधं निरुक्तं वाक्यमुक्तम्। तिङ्सुबन्तयोश्चयः समुदायः कारकान्विता क्रिया च वाक्यम्। तिङ्ग्रहणेन तिवादीनि सार्व्वधातुकान्यतिङन्तानि वचनानि उच्यन्ते। एवं सुप्ग्रहणेन स्यादीन्येकविंशतिरुच्यन्ते इत्यतः परं यः श्रूयते लभतेऽसौ प्रत्येकं अभिसम्बन्धमिच्छन्नग्रन्थ उभयोरपि सम्बध्यते। अत्र तिङन्तसमूहो यथा। पचति भवति याको भवति इत्यर्थः। एतच्छान्दसमेव। सुबन्तसमूहो यथा। प्रकृतिविकृतिभिदं हि महात्मनाम्। धात्वर्थः क्रिया कारकैः कर्त्रादिभिरन्विता सम्बन्धार्था कारकान्विता अन्वितत्वञ्च क्रियाकारकाणां आकाङ्क्षायोग्यतासन्निधियशात् ज्ञेयम्। तिङ्सुबन्तचयात्मकेऽपि समूहार्थता बोध्या असमूहार्थस्याप्रयोगात् अतएव परस्पराभिसम्बन्धः पदसमूहो वाक्यमिति वृद्धाः। कारकान्विता क्रिया यथा। देवदत्तो ग्रामं गच्छति। इति तद्टीकायां भरतः।*। वाक्यस्वरूपमाह।
"वाक्यं स्यात् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः।
वाक्योच्चयो महावाक्यमित्थं वाक्यं द्विधा मतम्।"

उक्तञ्च।
"स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संभूय जायते।"

इति।

अत्र वाक्यं यथा। भूयं वासयगृहमित्यादि। महावाक्यं यथा। रामायणमहाभारतरघुवंशादिः। इति साहित्यदर्पणे २ परिच्छेदः।*।

अप्रियवाक्यभाषणनिषेधो यथा,—
"न हिंस्यात् सर्व्वभूतानि नाहृतञ्च वदेत् क्वचित्। नाहितं नाप्रियं वाक्यं न क्षेमः स्यात् कदाचन।*।

पारुष्यादिभिर्भाषणनिषेधो यथा,—
"पारुष्यिणो विकर्म्मस्थान् वामाचारांश्चवैव च। पञ्चरात्रान् पाशुपतान् वाङ्मात्रेणापि नार्चयेत्।"

इति कौर्म्मे उपविभागे १६ अध्यायः।*।

शुभाशुभवाक्यानि यथा,—
"नैव राज्ञेन महता न वै वार्धुष राशिभिः। प्राप्यते ज्ञानकथनं परलोकसुभावितम्।
स्वर्गापवर्गसिद्ध्यर्थभावितं यत् सुशोभनम्। वाक्यं मुनिवरैः प्राप्तैस्तद्विज्ञेयं सुभाषितम्।
रागद्वेषाकृतक्रोधकामदृष्ट्यानुसारि यत्। वाक्यं निरयहेतुत्वात् तदभाषितमुच्यते।
संस्कृतेनापि किं तेन दुष्टेन कलितेन वा। अविद्या रागवाक्येन संसारक्लेशहेतुना।
यत् श्रुत्वा जायते पुंसां रागादीनाञ्च संक्षयः। निरुद्यमपि तद्वाक्यं विज्ञेयमतिशोभनम्।"

इति वह्निपुराणे वैश्यधर्म्मे सुद्विजतनामाध्यायः। (अन्य वाक्यदोषो यथा,—
"वाक्यदोषो नाम यथा स्वरूपसिद्ध्यर्थे न्यूनमधिकमनर्थकमपार्थकं विरुद्धञ्चेति। तत्र हेतूदाहरणोपनयनिगमनानामन्यतमेनापि न्यूनं न्यूनं भवति यदा यद्यपदिष्टहेतुकमेकेन साध्यते हेतुना तत्र न्यूनं दृष्टान्तेनैव प्रज्ञातोऽर्थः। प्रज्ञप्तेः।" इति चरके विमानस्थानेऽष्टमेऽध्याये।)

वाच, ट काङ्क्षे। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) ट, वाङ्क्षति। नमध्यपाठेनैवेच्छौ दण्डवन्तो वेदितव्यारूपभेदार्थः। इति तट्टीकायां दुर्गादासः।

वागरः, पुं, (वाचा इयर्त्ति गच्छतीति। ऋ+अच्।) वारकः। ग्राहः। निर्णयः। वाङ्मयः। दृकः। सुसम्बद्धः। पण्डितः। परिव्राजकभेदः। इति हेमचन्द्रः।

वागारुः, त्रि, (वाचि आशावाक्ये आरुः कर्कट इव मर्म्मच्छेदकत्वात्।) आशाहन्ता। यथा,
"आशां बलवतीं दृष्ट्वा यो हन्ति विमुखो जनः। स जीवन्नोऽपि वागारुर्मृतो दाशरथिर्यथा।"

इति शब्दमाला।

वागाग्नेयः, पुं, बुद्धः। इति शब्दरत्नावली।

वागीशः, पुं, (वाचां ईशः।) बृहस्पतिः। इति शब्दरत्नावली। (यथा, हरिवंशसंहितायाम्। १०।१०
"अयं विग्रहोऽभिहितो दक्षाणां
कुलप्रथागोत्रधिषाधिषाणाम्।"

ब्रह्मा। यथा, कुमारे। २। १।
"वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे।")

वागीशः, त्रि, (वाचामीशः।) वाक्पतिः। सुवक्ता इति भरतः। इत्यमरः। (यथा, महाभारते। १०। ७। ४१।
"निशाम्य रूपप्रहिता वागीशा वीतमत्सराः।")

वाग्दुष्टः

वागीशा, स्त्री, (वाचामीशा।) सरस्वती। यथा,
"वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि।
यस्यास्ते हृदये संवित् तं वृसिंहमहं भजे॥"
इति श्रीमद्भागवतटीकायां श्रीधरस्वामी॥

वागीश्वरः, पुं, (वाचामीश्वर इव।) मञ्जुघोषः। इति त्रिकाण्डशेषः॥ (जैनविशेषः। इति च त्रिकाण्डशेषः। १। १। २१। हृहस्पतिः। ब्रह्मा। इति व्युत्पत्तिलभ्योऽर्थः।) वाचामीश्वरे, त्रि। यथा, गारुडे १९६ अध्याये।
"रुद्रामलकचूर्णं वै मधुतैलसमन्वितम्।
अभ्यङ्गान्मासं युवा स्याच्च नरो वागीश्वरो भवेत्॥"

वागीश्वरी, स्त्री, (वाचामीश्वरी।) सरस्वती। इति त्रिकाण्डशेषः॥ (यथा, तन्त्रसारे। "वागीश्वरीं ऋतुस्नाताम्॥")

वागुजी, स्त्री, सोमराजी। इत्यमरः। २।४।६॥ (यथा, वैद्यकचक्रपाणिसंग्रहे कुष्ठाधिकारे।
"चर्म्मसेवी कदुष्णेन वारिणा वागुजीं पिबेत्।
क्षीरभोजी चिरमाहात् कुष्ठरोगाद्विमुच्यते॥")

वागुरः, पुं, कर्म्मरङ्गः। इति शब्दमाला॥

वागुरा, स्त्री, (वागतीति। वा गतिबन्धनयोः+ "सृवृभूशुषिमुष्टिविदिभिदिच्छिदिजागृभ्यः कुरच्।" उणा० १।२४। इति उरच्-प्रत्ययेन गुणागमेन च साधुः।) मृगबन्धनार्थजालविशेषः। इत्यमरः। २।१०।२६॥ (यथा, कथासरित्सागरे। २१। १६।
"श्वानः शशा वने तस्मिंस्तस्य वर्त्मसु वागुराः॥")

वागुरिकः, पुं, (वागुरया चरतीति। वागुरा+ "चरति।" ४। ४। ८। इति ठक्।) व्याधः। वागुरया मृगादीन् बध्नातीति यः। इत्यमरः। २। १५। ४॥ (यथा, रघुः। ९। ५३।
"मृगमिवागुरिकेः प्रथमाक्षिप्तं
अपयतानलदस्तु विवेश सः॥")

वाग्गुदः, पुं, (वाचा गोदते क्रीडतीवेति। गुद क्रीडायाम्+कः।) पक्षिविशेषः। इति त्रिकाण्डशेषः। एतद्योनिकारकं यथा,—
"कौशेयं तित्तिरिर्हत्वा चौमं हत्वा तु दर्दुरः।
कार्पासतान्तवं क्रौञ्चो गोधा गां वाग्गुदो गुडम्॥"
इति मानवे १२ अध्यायः॥

वाग्गुलिः, पुं, (वाचा गुडति रचयतीति। गुड+ "इगुपधात् कित्।" उणा० ४। २१८। इति इन्। सच कित्।) ताम्बूली। राज्ञां ताम्बूलदाता। इति शब्दमाला॥

वाग्गुलिकः, पुं, (वाग्गुलि+स्वार्थे कन्।) ताम्बूलदः। इति त्रिकाण्डशेषः॥

वाग्दरिद्रः, त्रि, (वाचि दरिद्र इव।) मितभाषी। तत्पर्य्यायः। वाग्यः २। इति शब्दमाला॥

वाग्दलं, क्लीं, (वाचा दलमिव।) ओष्ठाधरौ। इति त्रिकाण्डशेषः॥

वाग्दुष्टः, पुं, (वाचा वाक्यमात्रेण दुष्टः।) व्राह्यः। इति जटाधरः॥

वाङ्मः

वाग्दुष्टः, त्रि, (वाचा शुद्धेऽपि वस्तुनि अशुद्धरूपत्वदुर्व्याक्येन दुष्टः।) वाचा दोषयुक्तः। यथा,—
"वाग्भावदुष्टाच्च तथा दुरुक्तोपहतात्तथा।
वाससा चावधूनानि वर्ष्माणि आहकर्म्मणि॥"
इति भाद्दतत्तम्॥ ७॥
तदप्रभक्षणप्रायश्चित्तम्। तत्र ग्रहः।
"वाग्दुष्टं भावदुष्टञ्च भाजने भावदूषिते।
भुक्त्वान्नं ब्राह्मणः पश्चात् चिरात्तन्तु व्रती भवेत्॥"
एतदभ्यासे व्रती यावकेन तत्र द्वादशप्रदा देयाः। इति प्रायश्चित्तविवेकः॥

वाग्देवता, स्त्री, (वाचां देवता।) सरस्वती। यथा,—
"पद्माग्रशिखिभिर्विभक्तसुखदोःपद्मध्वजः-
स्त्रजां
भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्ग-
स्तनौम्।
सद्रामाक्षगुणं सुधाढ्यकलसं विद्याञ्च हस्ता-
म्बुजै-
र्विभ्राणां विशदप्रभां त्रिनयनां वाग्देवता-
माश्रये॥"
इति तन्त्रसारः॥

वाग्देवी, स्त्री, (वाचां देवी।) सरस्वती। इति त्रिकाण्डशेषः॥ (यथा, राजतरङ्गिण्याम्। ५। १६३।
"द्विजस्त्रयोनायकाख्यो गौरीशसुरसद्मनोः।
धातुर्विदुः क्षतस्त्रेण वाग्देवी कुलमन्दिरम्॥")

वाग्मी, [न्] त्रि, (प्रशस्ता वागस्त्यस्येति। "वाचो ग्मिनिः।" ५। २। १२४। इति ग्मिनिः।) वक्ता। इत्यमरः॥ (यथा, कामन्दकीयनीतिसारे। ४। १५।
"वाग्मी प्रगल्भः स्मृतिमान्नयदो बलवान् वशी॥")
पटुः। इति मेदिनी। ने, १३०॥

वाग्मी, [न्] पुं. (प्रशस्ता वागस्त्यस्येति। वाच्+ग्मिनिः।) सुराचार्य्यः। इति मेदिनी। ने, १३०॥ (पुरुवंशीयमनस्योः पुत्रविशेषः। यथा, महाभारते। १। ९४। ७।
"प्रभुः संहननो वाग्मी सौवीरीतनयात्मजः।
मनस्योरभवन् पुत्राः शूराः सर्व्वे महारथाः॥")

वाग्यः, त्रि, (वाचं परिमितवाक्यं याति गच्छतीति। या+कः।) वाग्दरिद्रः। इति शब्दमाला। निर्व्वेदः। कलः। इत्यजयः॥

वाग्यतः, त्रि, (वाचि वाक्ये यतः संयतः।) वाक्यसंयतः। यथा,—
"प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत्।
प्रायश्चित्तमुपाशीनो वाग्यतस्त्रिसवनं स्पृशेत्॥"
इति प्रायश्चित्ततत्त्वधृतशङ्खलिखितवचनम्॥

वाग्यामः, त्रि, अग्रक्रादिना वाचं यच्छति यः। इति सिद्धान्तकौमुदी॥

वाङ्गः, पुं, वसुदः। इति त्रिकाण्डशेषः॥

वाङ्मयं

वाङ्गती, स्त्री, (स्तुतिरूपा वागस्त्यस्या इति। वाच्+मतुप्। ङीप्।) नदीविशेषः। यथा,—
"हिमाद्रिसुङ्गशिखरात् प्रोद्भूता वाङ्गती नदी।
भागीरथ्याः शतगुणं पवित्रं तज्जलं स्मृतम्।
तत्र स्नात्वा हरेर्लोकानुपसृत्य दिवस्पतेः।
ब्रह्मा देहं नरा यान्ति मम लोकं न संशयः॥"
इति वाराहे गोकर्णमाहात्म्ये जलेश्वरमाहात्म्यवर्णननामाध्यायः॥

वाङ्मयं, त्रि, (वाक्स्वरूपम्। वाच्+मयट्।) वाग्व्यात्मकम्। यथा,—
"स्वरस्तनभुवोर्लान्तैरभिन्नैरभिरचरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना॥"
अपि च।
"पद्यं गद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधाः।
प्रागुक्तलक्षणं पद्यं गद्यं संप्रति गद्यते॥"
पद्यं यथा,—
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्॥
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा।
समं समचतुष्पादं भवेदर्द्धसमं पुनः॥
आदिस्तृतीयवद्यस्य पादस्यौ द्वितीयवत्।
भिन्नविरुचतुष्पादं विषमं परिकीर्त्तितम्॥"
गद्यं यथा।
"अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम्।
चूर्णकोत्कलिकाप्रायवृत्तगन्धि प्रभेदतः॥
अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः।
तद्दीर्घैरक्षरैर्युक्तं गद्यं वृत्तवदुत्तरं भवेत्॥
भवत्युत्कलिकाप्रायं समासाढ्यं दृढाक्षरम्।
वृत्तैकदेशसम्बन्धाद्वृत्तगन्धि पुनः स्मृतम्॥"
इति छन्दोमञ्जरी॥ ७॥

वाङ्मयपापानि यथा,—
"पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः।
असम्बन्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्॥"
तथा परुषवचनमपवादः पैशुन्यमनृतं वृथालापो निष्ठुरवचनं इति वाङ्मयानि षट्।
परेषां देशजातिकुलविद्याशिल्परूपशरीराचारपरिच्छदप्रकृतिकर्म्मलोकविनां प्रत्यक्षदोषवचनं परुषम्।
"यच्चान्यत् क्रोधसन्तापत्रासजननं वचः।
परुषं तच्च विज्ञेयं यच्चान्यच्च तथाविधम्॥
चक्षुष्यानिन्द्यं देवात् परुषान्न विशिष्यते॥"
तेषामेव परुषवचनानां परोक्षसदाहरणमपवादः। गुरुनृपतिबन्धुभ्रातृभिक्षुकादीनां अर्थोपघातार्थं दोषोद्भावनं पैशुन्यम्।
अनृतं द्विविधं असत्यमसंवादश्चेति।
"देशराष्ट्रप्रसङ्गाच्च परार्थपरिकल्पनात्।
नर्म्महासप्रसङ्गाच्च भाषणं यत्तदीदृशम्॥
गुह्याङ्गामेध्यसंज्ञानां भाषणं निष्ठुरं विदुः।
यदन्यद्वा वचो नीचस्त्रीपुंसोर्मिथुनाश्रयम्॥
इत्येवं षड्विकल्पस्य दुष्टवाक्यस्य भाषणात्।
इह वासुत्र च क्रमशर्थं प्रतिपद्यते॥"

प्रशंसया निन्दनं प्रशंसानिन्दनम्। अत्र चतुर्विधषड्विधयोरविरोधः। समत्वात्समत्वभेदानादरेण पारुष्यापवादयोरैक्यात् निष्ठुरस्य परुषान्तर्भावाच्च। असम्भवप्रलापयथार्थभाषणयोः पर्य्यायत्वान्नार्थान्तरम्। इति तिथ्यादितत्त्वम्॥

वाङ्मयी, स्त्री, (वाङ्मय + + ङीष्।) सरस्वती। इति केचित्॥

वाङ्मुखं, क्ली, (वाचां मुखमिव।) उपन्यासः। इत्यमरः। १। ६। ६॥

वाच्यमः, पुं, (वाचो वाक्यात् यच्छति विरमतीति। यम उपरमे + "वाचि यमो व्रते।" ३। २। ४०। इति खच्। "वाच्यमपुरन्दरौ च।" ६। ३। ६६। इति अमन्तत्वं निपात्यते।) मुनिः। इत्यमरः। २। ७। ४२॥ मौनव्रती। इति केचिदिति भरतः॥ (यथा, छान्दोग्योपनिषदि। ५। २। ८।

"वाच्यमोऽप्रसादः स यदि स्त्रियं पश्येत् सन्दहं कर्मेति विद्यात्॥")

वाचः, पुं, (वाचयति गुणानिति। वच् + णिच् + अच्।) मत्स्यविशेषः। वाचा इति भाषा॥ (यथा,—

"ईलिषो चितपीयूषो वाचो वाचामगोचरः।
रोहितो नो हितः प्रोक्तो मङ्गुरो मङ्गुरोः प्रियः॥"
इत्युद्भटः॥)

अस्य गुणाः। स्वादुत्वम्। गुरुत्वम्। स्निग्धत्वम्। श्लेष्मलत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः॥

वाचकः, पुं, (वक्ति अभिधाशक्त्या बोधयत्यर्थान् इति। वच् + ण्वुल्।) शब्दः। यथा। शास्त्रे शब्दस्तु वाचकः। इत्यमरः॥ द्वे वाचके। प्रकृतिप्रत्ययद्वारेणार्थस्य वाचको गवादिरूपः शास्त्रे याकारणे तर्कादौ च शब्द उच्यते। लोके तु संस्कृतोऽसंस्कृतः शब्द उच्यते। वक्तीति वाचकः। वक्। इति भरतः। तत्पर्य्यायः। यथा। शब्दाभिधापौ त्वभिधाभिधानं वाचको ध्वनिः। हासः कुहरितञ्चेति त्रिकाण्डशेषः॥ * ॥ (तल्लक्षणं यदुक्तं सुग्धबोधटीकायां दुर्गादासः।

"वाचात् सङ्केतितं योऽर्थमभिधत्त स वाचकः॥*॥

वाचयतीति। वच् + णिच् + ण्वुल्।) कथकः। पुराणादिपाठकः। यथा,—

"ब्राह्मणं वाचकं विद्यान्मान्यवर्जनमादरात्।
श्रुत्वान्यवर्जनाद्राजन् वाचकान्नरकं व्रजेत्॥"
तथा।
"देवाश्चाभ्यगतं श्रुत्वा ब्राह्मणानां विशेषतः।
यस्मिंश्च ग्रथितं कुर्य्याद्वाचकं कुरुनन्दन!।
पुनर्ब्रूयात तत् सूत्रं न सूत्रा धारयेत् क्वचित्॥
हिरण्यं रजतं गाश्च तथा कांस्योपदोहनाः।
दत्त्वा तु वाचकायेह श्रुतस्याप्नोति तत्फलम्॥"
कांस्योपदोहनाः कांस्यक्रोड़ाः।

"वाचकः पूजितो येन प्रसन्नास्तस्य देवताः।" तथा।
"ज्ञात्वा पर्व्वसमाप्तिञ्च पूजयेद्वाचकं बुधः।
आत्मानमपि विक्रीय य इच्छेत् सफलं क्रतुम्॥"
तथा।
"विस्तरमहतं ग्राम्यं सदाचरपदं तथा।
कलस्वरसमायुक्तं रसभावसमन्वितम्॥
बुधस्तत्र सदा यत्नं यत्नार्थं क्षत्रसत्तम नृप।
ब्राह्मणादिषु सर्व्वेषु यत्नार्थं चार्पयेन्नृप!।
य एवं वाचयेद्ब्रह्मन् स विप्रो वास उच्यते॥"
तथा।
"सप्तस्वरसमायुक्तं काले काले विराजते।
प्रदर्शयन् रसान् सर्व्वान् वाचयेद्वाचको नृप!॥"
इति तिथ्यादितत्त्वम्॥

वाचनं, क्ली, (वच् + णिच् + ल्युट्।) पठनम्। यथा,—

"सुहृन्नानन्यचित्तेन पठितव्यं प्रयत्नतः।
न कार्य्यासक्तमनसा कार्य्यं स्रोतस्य वाचनम्॥"
इति वाराहीतन्त्रम्॥

तथा।
"दानवाचनान्वारम्भवरव्रतप्रमाणेषु यजमानं प्रतीयात्॥" इति कात्यायनसूत्रम्॥ (प्रतिपादनम्। यथा, साहित्यदर्पणे १० परिच्छेदे।
"शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्॥")

वाचनकं, क्ली, (वाचनेन कायतीति। कै + कः।) प्रहेलिका। इति हारावली॥ १ ५२॥

वाचस्पतिः, पुं, (वाचां सर्व्वविद्यारूपवाक्यानां पतिः। अभिधानात् षष्ठ्या अलुक्।) दृहस्पतिः। इति शब्दरत्नावली॥

वाचस्पतिः, पुं, (वाचः पतिः। "षष्ठ्याः पतिपुत्रेति।" ८। ३। ५३। इति षत्वविसर्गस्य सः।) दृहस्पतिः। इत्यमरः। १। ३। २४॥ (यथा, कुमारे। २। ३०।

"वाचस्पतिरयाचेदं प्राञ्जलिर्जलजासनम्॥"
शब्दप्रतिपादके, त्रि। यथा, ऋग्वेदे। १०। १६६। ३।

"वाचस्पते निषेधे मा त्वं मद्धरं वदान्॥"
"हे वाचस्पते वाचः शब्दस्य पालयितर्देव॥"
इति तद्भाष्ये सायणः॥)

वाचा, स्त्री, (वाच् + भागुरिमते टाप्।) वाक्। इति त्रिकाण्डशेषः॥ (यथा, कातन्त्रे।

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।
टापञ्चापि हलन्तानां क्षुधा वाचा निशा गिरा॥"

यथा च, पञ्चतन्त्रे। ४। ४८। "तत् श्रुत्वा ब्राह्मणेन शुचीभूय तिसृभिर्वाचाभिः स्वनीवितार्द्धं दत्तं॥")

वाचाटः, त्रि, (कुत्सितं बहु भाषते इति। वाच् + "आलजाटचौ बहुभाषिणि।" ५। २। १२५। इति आटच्।) वाचालः। इत्यमरः। ३। १। १६॥ (यथा, मनुः। ३। ८।

"नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्।
नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम्॥")

वाचालः, त्रि, (बहु कुत्सितं भाषते इति। वाच् + "आलजाटचौ बहुभाषिणि।" ५। २। १२५। इति आलच्।) बहुकुत्सितभाषी। तत्पर्य्यायः। जल्पाकः २ वाचाटः ३। इत्यमरः॥ सुबहुभाषिण्यपि जल्पाकादयस्त्रयो वर्त्तन्ते वाचाटो वाचालो जल्पाकः सुबहुभाषी स्यादिति शोकार्द्धपर्य्यायो बोपालितः। नित्यप्रगल्भवाचालमुपतिष्ठे सरस्वतीम्। इति मुरारिरिति तट्टीकायां भरतः॥ (यथा, कथासरित्सागरे। ४०। ३४।

"वाचाले! कलहः कोऽयं श्वेक्षणाद्वाङ्मुखालिनाम्॥")

वाचिकं, त्रि, (वाच् + ठक्।) वाचा कृतम्। यथा,—

"शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्॥"
इति प्रायश्चित्ततत्त्वम्॥

अपि च।

"कायिकं वाचिकञ्चैव मानसं यच्च दुष्कृतम्।
एकजप्येन तत् सर्व्वं प्रयाग्यति ममाग्यतः॥"
इति ग्राम्यपुराणे सूर्य्यस्तोत्रम्॥

अन्यच्च। कायिकं मानसञ्च नमस्कारं हित्वा आचार्य्येण कथं वाचिको नमस्कारः कृतः। इति सुग्धबोधटीकायां दुर्गादासः॥ (वागेव। वाक् + "वाचो व्याहृतार्थायाम्।" ५। ४। ३५। इति ठक्। सन्दिग्धोक्तौ, क्ली। इति हारावली। १६६॥ यथा, राजतरङ्गिण्याम्। ६। ३५।

"भल्लमेकं बलिगुवेक्ष प्राहिणोद्दत्तवाचिकम्॥")

वाचिकः, पुं, (वाचा निष्पन्नः। वाच् + ठक्।) वाक्यारम्भः। यथा,—

"आलापश्च विलापश्च संलापश्च प्रलापकः।
अनुलापोऽपलापश्च सन्देशश्चातिदेशिकः॥
अपदेशोपदेशौ च निर्देशो व्यपदेशकः।
कीर्त्तिता वचनारम्भादृहादग्रामी मनीषिभिः॥"
इत्युज्ज्वलनीलमणिः॥

वाचिकपत्रं, क्ली, (वाचिकस्य सन्देशस्य पत्रम्।) लिपिः। संवादपत्रम्। इति केचित्॥

वाचिकहारकः, पुं, (वाचिकस्य सन्देशस्य हारकः।) लेखनम्। इति त्रिकाण्डशेषः॥ (दूतः। इति व्युत्पत्तिलब्धोऽर्थः॥)

वाचोयुक्तिः, त्रि, (वाचि वाक्ये युक्तिर्यस्य।) वाग्मी। इत्यमरटीकायां रामाश्रमः॥ (स्त्री, वाचो वचसो युक्तिः। "वाग्दिक्पश्यङ्गो युक्तिदण्डहरेषु।" ६। ३। २१। इत्यस्य गार्गिकोक्त्या षष्ठ्या अलुक्। वाग्दर्शितन्यायः॥)

वाचोयुक्तिपटुः, त्रि, (वाचोयुक्तौ वाग्दर्शितन्याये पटुः।) वाग्मी। इत्यमरः। ३। १। ३॥

वाच्यं, त्रि, (उच्यते इति । वच्+ण्यत् । "वचोऽशब्दसंज्ञायाम् ।" इति न कुत्वम् ।) कुत्सितम् । हीनम् । वचनार्हम् । इति मेदिनी । ये, ५५ ॥ (यदुक्तम् ।

"गुरोरपि गुरा वाच्या दोषा वाच्या गुरोरपि ॥")

श्लक्ष्णम् । यथा,—

"न चाप्यत्वबहुत्वाभ्यां प्रयोगाणां विरुध्यते ।
वाच्यवाचकभावोऽयमक्षपादादिशब्दवत् ॥
विभीतकेऽप्यक्षशब्दो यथाक्षे प्रयुज्यते ।
तथापि वाचकस्तस्य ज्ञायते शकटाक्षवत् ॥"

इति मलमासतत्त्वधृतभट्टवार्त्तिकवचनम् ॥

अपि च ।

"अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्येति त्रिधा मतः ।"

एषां स्वरूपमाह ।

"वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया तास्तिस्रः शब्दस्य शक्तयः ॥"

इति साहित्यदर्पणे २ परिच्छेदः ॥

वाच्यं, क्ली, (वच्+ण्यत् ।) प्रतिपादनम् । दूषणम् । इति धरणिः ॥ (यथा,—

"परवाच्येषु निपुणः सर्व्वो भवति सर्व्वदा ॥")

वाञ्छ, इ कामे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, वाञ्छति । इति दुर्गादासः ॥

वाजं, क्ली, घृतम् । (यथा, वाजसनेयसंहितायाम् । ६ । १ ।

"वाचस्पतिर्वाजं नः स्वदतु ॥")

यज्ञः । अन्नम् । (यथा, ऋग्वेदे । ४ । २२ । ३ ।

"यो देवो देवतमो जायमानो
महो वाजेभिर्महद्भिश्च शुष्मैः ॥"

"वाजेभिरन्नैः ।" इति तद्भाष्ये सायणः ॥) वारि । इति मेदिनी । जे, १४ ॥ (संग्रामः । यथा, ऋग्वेदे । ५ । ३५ । १ ।

"अस्माभ्यं वर्षीयसीं सखिं वाजेषु दुष्टरम् ॥"

बलम् । यथा, तत्रैव । ५ । ८५ । २ ।

"वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पय उक्थ्येषु ॥")

वाजः, पुं, शरपक्षः । इत्यमरः । २ । ८ । ८७ ॥ (यथा, भागवते । १० । ५६ । १६ ।

"विचित्रवाजेनिर्गतैः श्लक्ष्णसुखैः ॥")

निम्नगः । पक्षः । वेगः । इति मेदिनी । जे, १६ ॥ सनिः । इति विश्वः ॥

वाजपेयं, क्ली पुं, (वाजमन्नं हुतं वा पेयमत्रेति ।) यागविशेषः । इत्यमरभरतौ ॥ स तु सौतसप्तसंस्थान्तर्गतपञ्चमयागः । यथा । अग्निष्टोमोऽत्यग्निष्टोमो उक्थ्यः षोड़शी वाजपेयश्च । इत्याश्वलायनसूत्रम् । ऐनः पौण्डरीकश्चेति सप्तयागाः ॥

वाजभोजी [न्], पुं, (वाजं भुङ्क्त इति । भुज+णिनिः ।) वाजपेययागः । इति शब्दरत्नावली ॥

वाजसनेयः, पुं, जनमेजयसर्पसत्रवेदार्थग्रन्थः । स तु वैशम्पायनप्रणीतः । इति मत्स्यपुराणम् ॥ (वाजसनेः सूर्य्यस्य छात्रः । वाजसनि+ढक् । याज्ञवल्क्यः । यथा, हरिवंशे । १४० । २ ।

"आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥")

वाजसनेयी, [न्] पुं, (वाजसनेयेन प्रोक्तं वेदमधीयेति । इनिः ।) यजुर्व्वेदी । यथा,—

"आर्यक्रमेण सर्व्वत्र शूद्रा वाजसनेयिनः ॥"

इति महाजनपरिग्रहीतवचनात् यजुर्व्वेदविधिनैव कर्म्म कुर्य्युः । इति मलमासतत्त्वम् ॥ (यथा, हरिवंशे । १४० । २ ।

"ब्राह्मणो याज्ञवल्क्यस्य ग्रिष्मो धर्म्मगुणान्वितः ।
ब्रह्मदत्तेति विख्यातो विप्रो वाजसनेयिनाम् ॥")

वाजिगन्धा, स्त्री, (वाजिनो घोटकस्य गन्धोऽस्यस्यामिति । अच् । टाप् ।) अश्वगन्धा । इति रत्नमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने ३० अध्याये ।

"सरला गुरुविख्याश्च वाजिगन्धाद्यिदृढिभिः ॥")

वाजिदन्तः, पुं, (वाजिनां दन्त इव पुष्पं यस्य ।) वासकः । इति रत्नमाला ॥

वाजिदन्तकः, पुं, (वाजिदन्त एव । स्वार्थे कन् ।) वासकः । इत्यमरः । २ । ४ । १०३ ॥

वाजिनं, क्ली, आमिक्षामस्तु । इति हेमचन्द्रनिकाक्षपौ ॥ छानार जल इति भाषा ॥ (यथा, वाजसनेयसंहितायाम् । १६ । २१ ।

"सोमस्य रूपं हविष आमिक्षा वाजिनं मधु ॥"

अस्य गुणाः प्रस्तुतिनियमश्च यथा,—

"दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा ।
नष्टदुग्धभवन्नीरं मोरटक्लेन्नटोऽब्रवीत् ॥
सुखशोषलघादाहरक्तपित्तज्वरप्रणुत् ।
लघुर्बलकरो रुच्यो मोरटः स्यात् सितायुतः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

हविः । यथा, वाजसनेयसंहितायाम् । २६ । १ ।

"वाजी वहन् वाजिनम् ।"

"वाजिनं हविः ।" इति तद्भाष्ये महीधरः ॥*॥

पुं, अर्थः । यथा, ऋग्वेदे । १० । ७९ । ५ ।

"नैनं हिन्वन्त्यपि वाजिनेषु ॥"

"वाक् इमा ईश्वरा येषाम् ।" इति सायणः ॥)

वाजिनी, स्त्री, अश्वगन्धा । घोटकी । ग्रैवस्य पर्य्यायः । वड़वा २ वामी ३ प्रसूका ४ आर्णवी ५ । अस्याः क्षीरगुणाः ।

"अश्वाक्षीरन्तु रूक्षाम्लं लवणं दीपनं लघु ।
देहस्थैर्य्यकरं बल्यं गौरवं कान्तिकृत् परम् ॥"

तद्धिगुणाः ।

"आम्रं दधि स्वाम्लमधुरं कषायं
कफार्शिमूर्च्छामयहारि रूक्षम् ।
वाताम्लपित्तं दीपनकारि नेत्र-
दोषापहं तत् कथितं पृथिव्याम् ॥"* ॥

तन्नवनीतगुणाः ।

"आम्रजं नवनीतं स्यात् कषायं कफकासजित् ।
चक्षुष्यं कटुकक्षोण्यमीषदातापहारकम् ॥"

तद्घृतगुणाः ।

"अश्वाक्षजं तु कटुकं मधुरञ्च कषायकम् ।
दीपनं पित्तदं मूर्च्छाहारि वाताम्लदं गुरु ॥"

इति राजनिर्घण्टः ॥ * ॥

अपि च ।

"रूक्षोष्णं वड़वाक्षीरं बल्यं श्वासानिलापहम् ।
अम्लं कटु लघु स्वादु सर्व्वमेकगुणं तथा ॥"

इति भावप्रकाशः ॥

वाजिपृष्ठः, पुं, (वाजिनः पृष्ठमिव आकृतिरस्येति ।) अम्लानवृक्षः । इति शब्दचन्द्रिका ॥

वाजिभक्षः, पुं, (वाजिभिर्भक्ष्यते इति । भक्ष+कर्म्मणि घञ् ।) चणकः । इति राजनिर्घण्टः ॥ (विवरणमस्य चणकशब्दे ज्ञातव्यम् ॥)

वाजिभोजनः, पुं, (वाजिभिर्भोज्यते इति । भुज्+कर्म्मणि ल्युट् ।) सुरः । इति राजनिर्घण्टः ॥

वाजिमान् [तृ], पुं, पटोलः । इति रत्नमाला ॥

वाजिशाला, स्त्री, (वाजिनां शाला गृहम् ।) घोटकगृहम् । आस्तबल् इति आरबी भाषा ॥ तत्पर्य्यायः । मन्दुरा २ । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ४ । १६६ ।

"काम्बोजानां वाजिशाला जायन्ते स्म हयोज्झिताः ॥")

वाजी [न्] पुं, (वाजो वेगोऽस्यास्तीति । वाज+इनिः ।) घोटकः । (यथा, रघुः । ३ । ४३ ।

"श्रुतेस्तमश्चामनिमेषवृत्तिभि-
र्हरिं विदित्वा हरिभिश्च वाजिभिः ॥"

वाजः पक्षोऽस्यास्तीति ।) बाणः । पक्षी । इत्यमरः ॥ वासकः । इति शब्दरत्नावली ॥ (वजति गच्छतीति । वज्+णिनिः । ञि, चलनवान् यथा, वाजसनेयसंहितायाम् । २६ । १ ।

"वाजी वहन्वाजिनं जातवेदो देवानां वक्षि-
प्रियमाधस्थम् ॥"

"वजति वाजी । वजगतौ चलनवान् ।" इति तद्भाष्ये महीधरः ॥ * ॥ वाजमन्नमस्यास्तीति अन्नवान् । यथा, ऋग्वेदे । ३ । २ । १४ ।

"तमीमहे नमसा वाजिनं हृहत् ॥"

"वाजिनं अन्नवन्तम् ।" इति तद्भाष्ये सायणः ॥ वाजः पक्षोऽस्यास्तीति । पक्षविशिष्टः । यथा, भागवते । ४ । ७ । १६ ।

"सुपर्णस्तेन उपागीतसामर्ग्भिश्च स्तोत्र-
वाजिना ॥")

वाजीकरणं, क्ली, (अवाजी वाजीव क्रियतेऽनेनेति । कृ+ल्युट् । अभूततद्भावे च्विः ।) वीर्य्यवर्द्धिकरम् । इति राजनिर्घण्टः ॥ वाजीकरणद्रव्यस्य लक्षणमाह ।

"यद्द्रव्यं पुरुषं कुर्य्यात् वाजिवत् सुरतक्षमम्
तद्वाजीकरणाख्यातं मुनिभिर्भिषजां वरैः ॥"

अत्र प्रसङ्गात् क्लैब्यस्य लक्षणं संख्या निदानञ्चाह ।

"क्लीबः स्यात् सुरताशक्तस्त्रिभावः क्लैब्यमुच्यते ।
तच्च सप्तविधं प्रोक्तं निदानं तस्य कथ्यते

तैस्तैर्भावैरहन्येषु रिरंसोर्मनसि क्षते ।
ध्वजः पतत्यतो नृणां क्लैब्यं यत्सम्पजायते ।
दैन्यक्लीसंप्लवोमाद्य क्लैब्यं तस्मान्मतं स्मृतम् ।"
तैस्तैर्भावैर्भयशोकक्रोधादिभिः । अहृदयैः हृदयाहितैः दुःखदत्वात् । क्षते पीडिते अवस्त्रोस्रत इति यावत् । ध्वजः शिश्नः । पतति न तूष्णमति । संप्लवोगो मैथुनम् ॥ १ ॥
"कटुकान्नोष्णलवणैरतिमात्रोपसेवितैः ।
पित्तात्कफक्षयो ऽदः क्लैब्यं तस्मात् प्रजायते ॥"
कटुकादिनातिमात्रेण प्रवृद्धेन पित्तेन शुक्रस्य दग्धत्वात् क्लैब्यं भवति । पित्तजमेतद्द्वितीयम् ॥ २ ॥
"अतिव्यवायग्लौलो यो न च वाजीक्रियारतः ।
अत्यभङ्गमवाप्नोति स शुक्रक्षयहेतुकम् ॥"
शुक्रक्षयजं तृतीयम् ॥ ३ ॥
"महता मेढ्ररोगेण चतुर्थो क्लीवता भवेत् । ४ ।
वीर्यवाहिशिराछेदान्मेहनानुप्रतिर्भवेत् ॥ ५ ॥
बलिनः क्षुब्धमनसो निरोधाद्ब्रह्मचर्यतः ।
षष्ठं क्लैब्यं स्मृतं तत्तु शुक्रस्तम्भनिमित्तकम् ॥"
बलिनः पुरुषस्य पुरुषस्य क्षुब्धमनसः कामात् सञ्चलितस्य । मनसः ब्रह्मचर्यतो निरोधात् क्लैब्यं भवति ॥ ६ ॥
"वज्रप्रभृति यत् क्लैब्यं सहजं तद्धि षण्ढकम् ॥"७
असाध्यं क्लैबमाह ।
"असाध्यं सहजं क्लैब्यं मर्मच्छेदाच्च यद्भवेत् ।"
मर्मच्छेदात् वीर्यवाहिशिराच्छेदात् ॥" * ॥
अथ क्लैब्यस्य चिकित्सायां वाजीकरणविधिमाह ।
"नरो वाजीकरान् योगान् सम्यक् शुद्धो निरामयः ।
सप्तत्यं प्रकुर्वीत वर्षादूर्ध्वन्तु षोडशात् ॥
न च वै षोडशादर्वाक् सप्तत्याः परतो न च ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्तुमर्हति ॥
वयसस्तुपदंशाद्या घोराश्चातीवदुर्जयाः ।
अकालमरणञ्च स्याद्भजतस्त्रियमन्यथा ॥
विलासिनामर्थवतां रूपयौवनशालिनाम् ।
नराणां बहुभार्य्याणां विधिर्वाजीकरो हितः ॥
स्थविराणां विरक्तानां स्त्रीणां वाक्लीब्यमिच्छताम् ।
योषित्प्रसङ्गात् स्त्रीणानां स्त्रीवानामव्यरेतसाम् ॥
हिता वाजीकरा योगाः प्रीत्यपत्यबलप्रदाः ।
एतेऽपि पुरुषेद्यानां सेव्याः कालाद्यपेक्षया ॥"
वाजीकरानाह ।
"भोजनानि विचित्राणि पानानि विविधानि च ।
वाचः श्रोत्राभिरामाश्च स्रजः सर्वसुखावहाः ।
यामिनी सेन्दुतिलका कामिनी नवयौवना ।
गीतं श्रोत्रमनोहारि ताम्बूलं मदिरा स्रजः ॥
गन्धा मनोज्ञा रूपाणि चित्राण्युपवनानि च ।
मनसश्चाप्रतीघातो वाजीकुर्वन्ति मानवम् ।
माक्षीकधातुमधुपारदलोहचूर्णं
पथ्याग्निलाजतुविडङ्गघृतानि लिह्यात् ।
एकाद्यविंशतिदिनानि मदार्दितोऽपि
सोऽग्नीतिकोऽपि रमयेत् प्रमदा युवेव ॥
गवां विरूढवत्सानां सिद्धं पयसि पायसम् ।
गोधूमचूर्णञ्च तथा सितामधुघृतान्वितम् ।
भुक्त्वा क्षुध्यति जीर्णोऽपि दशदारान् व्रजत्यपि ॥"
अथ रसाला ।
"दध्नार्द्धकर्षावदलमधुरं खण्डस्य चन्द्रद्युतेः
प्रस्थं चौद्रपलञ्च पञ्च हविषः शुण्ठ्याश्चतुर्मात्रकान् ।
एलामाक्षिकतुल्यं मरिचतः कर्षं लवङ्गं तथा
धृत्वा शुक्लपटे घृतेः करतलेनोन्मथ्य विस्रावयेत् ॥
स्निग्धार्द्धे मृगनाभिचन्दनरसस्फूरैरगुरुद्भूपिते
कर्पूरेण सुगन्धिकं तदखिलं संलोड्य संस्थापयेत् ।
स्वस्यार्थे मधुरेश्वरेण रचिता श्लेष्मा रसाला स्वयं
भोक्तुर्मन्मथदीपनी सुखकरी कान्तेव नित्यं प्रिया ॥ * ॥
गोक्षुरेक्षुरबीजानि वालिगन्धा घृतावरी ।
सुबली वानरीबीजं यष्टी नागबला बला ॥
एषां चूर्णं दुग्धसिद्धं गव्येनाज्येन भक्षितम् ।
सितया मोदकं कृत्वा भक्ष्यं वाजीकरं परम् ॥
चूर्णादष्टगुणं चीरं घृतं चूर्णसमं स्मृतम् ।
सर्वतो द्विगुणं खण्डं खादेदस्मिन्बलं यथा ॥
वाजीकरणि भूरीणि संदृश्य रचितो यतः ।
तस्माद्वक्ष्यते योगेषु योगोऽयं प्रवरो मतः ॥"
रतिवर्द्धनो मोदकः ॥ * ॥
"पिप्पलीलवणोपेते वस्त्रार्द्धे घृतसाधिते ।
कच्छपस्याथ वा खादेत्तु वाजीकरे भृशम् ॥
पूगं दधिगदेशजं दशपलोन्मानं भृशं कर्षयेत्
तच्छिन्नं जलयोगतो मृदुतरं संकुच्य चूर्णीकृतम् ।
तच्चूर्णं पटगोधितं वसुगुणे गोशुद्धदुग्धे पचेत्
गव्याज्याञ्जलिसंयुतेऽतिविविधे दद्यात्तुलार्द्धौ सिताम् ॥
पक्वं तज्ज्वलनात् क्षिपेत् प्रतिदयेत् तस्मिन् पुनः प्रक्षिपेत्
दद्यात्तत्तदुदाहरामि बहुला ढङ्कादरान् संहिताः ।
एषा नागबला बला सचपला जातीफलालिङ्गिका
जातीपत्रसुपत्रचित्रकयुतं तच्च त्वचा संयुतम् ॥
विश्वावीरबलावारिवारिदवरा वांशी वरी वानरी-
द्राक्षा क्षेक्षुरगोक्षुराश्च महती खर्जूरिका चौरिका ।
धान्याकं सकसेरुकं समधुकं शृङ्गाटकं चौरकं
एष्वौकाथयवानिका वरटिका मांसी मिसिर्मेथिका ॥
कन्देक्षुत्रिदारिकाश्च सुपली गन्धत्रिगन्धा तथा
कर्पूरं केरिकेशरं समरिचक्षारस्य बीजं नवम् ।
बीजं शालसिसभवं करिकणा बीजञ्च राजीबृहं
श्वेतं चन्दनमत्र रक्तमपि च श्रीसङ्गपुष्पैः समम् ॥
सर्वञ्चेति पृथक् पृथक् पलमितं संचूर्ण्य तत्र क्षिपेत्
क्षुतं वङ्गभुजङ्गलोहगगनं सम्मारितं खेच्छया ।
कस्तूरी घनसारचूर्णमपि च प्राग्वं यथा प्रक्षिपेत्
पश्चादस्य तु मोदकान् विरचयेद्विल्वप्रमाणान्वयान् ॥
तान् भोक्ष्यति सदा यथानलबलं सञ्जीत नार्यं रसं
पूर्वस्मिन्नजिते गते परिवर्तिं प्राग्भोजनात् भक्षयेत् ।
नित्यं श्रीरतिवल्लभाख्यकमिमं यः पूगपाकं भजेत्
स स्याद्वीर्यविवृद्धिदृढमदनो वाजीव शुक्लो रतौ ॥
दीप्ताग्निर्बलवान् बली विरहितो रुक्षः स पुरः सदा
वृद्धो योऽपि युवेव सोऽपि रुचिरः पूर्णेन्दुवत् सुन्दरः ॥"
वसुगुणे अष्टगुणे । अञ्जलिरर्द्धशरावम् । तुलार्द्धं पञ्चाशत्पलमितम् । संहिताः सुश्रुताद्याः । नागबला गुरसकरी गुरखड्डी इति च लोके । बला वहंलियार तस्या मूलत्वक् । चपला पिप्पली । जातीपत्रकं जाइपत्री । विश्वा शुण्ठी । वीरकं एतस्य मूलं उशीरं ग्राह्यम् । वारि सुगन्धवाला । वारिदः मुस्तकः । वरा त्रिफला वांशी वंशरोचना । वरी शतावरी । वानरी कपिकच्छूस्तस्या बीजं ग्राह्यम् । इक्षुरः कोकिलाक्षः तस्य बीजम् । गोक्षुरस्यापि बीजम् । महती खर्जूरिका छोहारा । चौरिका चोरी । एष्वौका कारवी मगरैला इति लोके । वराटिका वरटे इति लोके । ग्रालुकमेषां कन्दः स्वाहीजकोषो वराटिका । मांसी जटामांसी । मिसिः सौफः । गन्धत्रिगन्धा अम्बगन्धा तस्या मूलम् । श्रीसङ्गं लवङ्गम् । घनसारः कर्पूरः । विल्वप्रमाणान् पलप्रमाणान् । रतिवल्लभाख्यपूगपाकः ॥ * ॥
"एतस्मिन्रतिवल्लभे यदि पुनः सम्यक् खरा-
ग्राणिका धुस्तूरस्य तु बीजमर्कंकरभा यासोऽभ्रिशुण्ठीरसैः ।
सञ्जातूफलकं तथा क्षसपलत्वक् वापि निःक्षिप्यते
चूर्णार्द्धा विषया तदा स हि भवेत् कामेश्वरः संशयः ॥"
इति महाकामेश्वरः ॥७॥
"रक्तपित्ताधिकारोक्तः खण्डकुष्माण्डको महान् ।
रक्तपित्तादिरोगघ्नो महावाजीकरः स्मृतः ॥८॥
एकाम्रस्य रसे द्रोणे सितामाढकसंमिताम् ।
घृतप्रस्थमिदं दद्यान्मागस्य पलाष्टकम् ।
मरिचं कृष्णजीरञ्च पिप्पलीद्विपलोन्मितम् ।
सलिलस्याढकं दत्त्वा सर्वमेकत्र कारयेत् ॥
पचेत्तन्मृन्मयेपात्रे दारुदर्व्या प्रचालयेत् ।

चूर्णान्येषां क्षिपेत्तत्र घनीभूतेऽवतारिते ॥
धान्यकं जीरकं पत्रं चित्रकं मुस्तकं त्वचम् ।
इष्टक्षीरकमप्यत्र ग्रन्थिकं नागकेशरम् ॥
एलाबीजं लवङ्गञ्च पृथक् जातीफलं पलम् ।
सिद्धं घृतेन प्रक्षाच्च मधुनः कुड़वद्वयम् ॥
भक्षयेद्भोजनादर्ध्वाक् पलमात्रमिदं नरः ।
अथवा नियता मात्रा मात्रा खादेद्यथानलम् ॥
मागवः सेवनादस्य वाजीव सुरते भवेत् ।
समर्थो बलवान् पुष्टो हृष्टो नित्यं निरामयः ॥
यश्चैनं नाग्रयेदेष चयं त्रासमरोचकम् ।
अम्लपित्तञ्च पित्तञ्च रक्तपित्तञ्च पाण्डुताम् ॥"
इष्टक्षीरकं नागकेशरैला । इति आम्रपाकः ॥
"ग्रसयति गोक्षुरचूर्णं छागक्षीरेण साधितं
समधु ।
मुक्तं क्षपयति जाड्यं यच्चनितं कुप्रयोगेण ॥
द्रव्याणि चन्दनादिस्तु चन्दनं रक्तचन्दनम् ।
पत्तङ्गमथ कालीयागुरुलक्ष्यागुरूणि च ॥
देवदारुः सरलः पद्मकं तुरुष्कोऽपि च ।
कर्पूरो नखनाभिश्च लताकस्तूरिकापि च ॥
सिल्हकः कुङ्कुमं नखं जातीफलकमत्र च ।
जातीपत्रं लवङ्गञ्च लक्ष्मीला महती च सा ॥
कक्कोलफलकं त्वक् च पत्रकं नागकेशरम् ।
बालकञ्च तथोशीरं मांसी दारु सितापि वा ॥
सुरा कर्पूरकश्चापि शैलेयं भद्रमुस्तकम् ।
रेणुका च प्रियङ्गुश्च श्रीवासो गुग्गुलुस्तथा ॥
लाक्षा नखश्च रालश्च धातकीकुसुमं तथा ।
ग्रन्थिपर्णञ्च मञ्जिष्ठा तगरं सिक्थकं तथा ॥
एतानि घ्राणमात्राणि कल्कीकृत्य घृतैः पचेत् ।
तैलं प्रक्षमितं सम्यक् एतत्पात्रे शुभे क्षिपेत् ॥
अनेनाभ्यक्तगात्रस्तु दृढोऽग्नीतिग्नमोऽपि यः ।
मुग्धो भवति युक्ताढ्यः स्त्रीणामत्यन्तवल्लभः ॥
वन्ध्यापि लभते गर्भं षण्ढोऽपि तरुणायते ।
अपुत्रः पुत्रमाप्नोति जीवेच्च शरदां शतम् ॥
चन्दनादिमहातैलं रक्तपित्तं चयं ज्वरम् ।
दाहप्रस्वेददौर्गन्ध्यं कुष्ठं कण्डूं विनाशयेत् ॥"
पत्तङ्गं वकम् इति लोके । कालीयं कलमक
इति लोके । लताकस्तूरिका सुगुकस्तूरा इति
लोके । कक्कोलफलाभावे जातीपुष्पं ग्राह्यम् ।
तदभावेऽपि लवङ्गं ग्राह्यम् । दारुचिनी दार-
चिनी । शैलेयं छरा इति लोके । श्रीवासः
गुग्गुरो इति लोके । ग्रन्थिपर्णः मटिवन् इति
लोके । अग्नीतिसमः अग्नीतिवार्धिकः । इति
चन्दनादितैलम् । ❁ ॥
"बीजानि कोशकच्छाः कुड़वमितानि खेद्ये-
च्छनकैः ।
प्रस्थे गोभवदुग्धे दुग्धं यावद्भवेन्नाढ्यम् ॥
त्वगहितानि च क्षुण्णा खण्डं संपेषयेत्तानि ।
पिष्टिकया लघुवटिकाः कृत्वा मद्ये पचेदाढ्ये ॥
द्विगुणितशर्करया वा वटिकाः संपक्वया
क्षेप्याः ।
वटिका मात्रिकमध्ये मध्यवयोभ्योऽधिकाः
स्याप्याः ॥
पञ्चटकुमितास्तासु सायं प्रातश्च भक्षयेत् ।
अनेन ग्रीष्मवर्षी यो यश्च स्यात् पतितध्वजः ॥
सोऽपि प्राप्नोति सुरते सामर्थ्यमिति वाजिवत् ।
नाम्ना सदृशं किञ्चित् द्रव्यं वाजीकरं परम् ॥"
इति वानरीवटिका । ❁ ॥
"आकारकरभा शुण्ठी लवणं कुङ्कुमं कणा ।
जातीफलं जातिपुष्पं चन्दनं कार्षिकं पृथक् ॥
चूर्णयेदहिफेनन्तु तत्र दद्यात् पलोन्मितम् ।
सर्वमेकीकृतं माषमात्रं क्षौद्रेण भक्षयेत् ॥"
मुक्तस्तम्भकरं पुंसामिदमानन्दकारकम् ।
नारीणां प्रीतिजनकं सेवेत निशि कामुकः ॥"
इति भावप्रकाशः ॥
(यथा च ।
"विदारीकन्दं शुमतीदृढत्वौ ।
काकोलिकाभीरुपुनर्नवे द्वे ।
इक्षाटकं मागधिका बला च
चूर्णं सिताढ्यं सितया प्रयोज्यम् ॥
जीर्णे पयः पायसमेव योज्यं
करोति पुंसां बलमेवमोजः ।
स्त्रीणां सहस्रं भजतोऽपि षण्ढो
मासद्वयेनापि च सेवमानः ॥"
इति हारीते चिकित्सास्थाने ४६ अध्यायः ॥
"वाजीकरणमन्विच्छेत् सततं विषयी पुमान् ।
तुष्टिः पुष्टिरपत्यञ्च गुणवत्त्वञ्च संश्रितम् ॥
अपत्यसन्तानकरं यत् सद्यः संप्रहर्षणम् ।
वाजीवातिबलो येन याति प्रतिहतोऽङ्गना: ॥
भवत्यतिप्रियः स्त्रीणां येन येनोपचीयते ।
तद्वाजीकरणं तद्धि देहस्योर्जस्करं परम् ॥
धन्यं यशस्यमायुष्यं लोकद्वयरसायनम् ।
अहमोदामहे ब्रह्मचर्यमेकान्तनिर्मलम् ॥
अक्षयस्यस्य तु क्षेत्रे वीर्यमात्रस्य रागिणः ।
शरीरक्षयरक्षार्थं वाजीकरणमुच्यते ॥
कक्षस्रोतस्यवयसो वाजीकरणसेविनः ।
सर्वेष्वतुल्यहरहर्वयसो न विवार्यते ॥
अथ स्निग्धविशुद्धानां विरूक्षान् साधुवासितान् ।
घृततैलरसक्षीरशर्करामोदसंयुताम् ॥
योगविद्योजयेत् पूर्वं क्षीरमांसरसाशिनम् ।
सतां वाजीकरान् योगान् शुक्रापत्यविवर्द्धनान् ॥
अच्छायः पूतिकुसुमः पत्रेण रहितो द्रुमः ।
यथैकपत्रशाखश्च निरपत्रस्तथानरः ॥
स्खलन्नमन्मथस्तत्त्वचरं धृष्टिप्रसरम् ।
अपि ज्वालाविषसुखं हृदयाह्लादकारकम् ॥
अपत्यं तुल्यता केन दर्शनस्पर्शनादिषु ।
किंपुनर्यदृयशोधर्म्यमानश्रीकुलवर्द्धनम् ॥
शुद्धकाये यथायुक्ति वृष्य योगान् प्रयोजयेत् ।
प्ररोहकुसुमक्षीरां विदार्या क्षीरवल्लीञ्च ॥
मूलानि कण्टकार्याश्च क्षीरवर्षाभवो बलाम् ।
मेदे द्वे द्वे च काकोल्यौ मूर्वापर्ण्यौ घृतावरीम् ॥
अश्वगन्धामतिबलामात्मगुप्ता पुनर्नवाम् ।
क्षीरां पयस्यां जीवन्तीं सहिं राज्ञां विकट-
कम् ॥
मधुकं ग्रन्थिपर्णीञ्च भागांश्चिपिटिकान् पृथक् ।
माषाणामाढकञ्चैतद्विद्वान् साधयेदपाम् ॥
रसेनाढकशेषेण पचेत्तेन घृताढकम् ।
दत्त्वा विदारीधात्रीक्षुरसानामाढकाढकम् ॥
घृतात्चतुर्गुणं क्षीरं पेष्यान्यामानि चावपेत् ।
वीरां खगुप्तां काकोल्यौ यष्टीं फल्गूनि पिप्प-
लीम् ॥
द्राक्षां विदारी खर्जूरं मधुकानि घृतावरीम् ।
ततःसिद्धपूतं चूर्णस्य पृथक् प्रस्थेन योजयेत् ॥
शर्करायास्तुगायाश्च पिप्पल्याः कुड़वेन च ।
मरिचस्य प्रकुञ्चेन पृथगर्द्धपलोन्मितैः ॥
लवंगकाकेसरैः शुण्ठ्याः क्षौद्रादिकुड़वेन च ।
पलमात्रं ततः खादेत् प्रस्थं रसदुग्धशुक् ॥
तैलारोहति वाजीव कुञ्जिर इव हृष्यति ।
विदारीपिप्पलीशालिप्रियालेक्षुरकाम्रजः ॥
पृथक् खगुप्तामधुजाच्च कुड़वांशं तथा मधु ।
तुलार्द्धं शर्करायाश्चूर्णात् प्रस्थार्द्धं नवसर्पिषः ॥
सोऽयमाढकमतः खादेद् यस्य रामाशतं गृहे ।
बालगुप्ताफलान् क्षीरे गोधूमान् साधितान्
हिमान् ॥
माषान् वा सघृतक्षौद्रान् खादन् यद्विषयो
ऽनुयः ।
जागर्ति रात्रिं सकलामखिन्नः खेदयेत् स्त्रियः ॥
वस्त्रावसिक्ते पयसि भावितानसकृत्तिलान् ।
यः खादेत् सघृतान् गच्छेत् स स्त्रीशतमपूर्ववत् ॥
चूर्णं विदार्या बहुशः खरसेनैव भावितम् ।
क्षौद्रसर्पिर्युतं लीढ्वा प्रमदाशतमश्नुते ॥"
"क्षुण्णाधात्रीफलरसः खरसेन सुभावितम् ।
शर्करामधुसर्पिर्भिर्लीढ्वा योऽनुपयः पिबेत् ॥
स नरोऽप्रीतिवर्षोऽपि युवेव परिहृष्यति ।
कर्षं मधुकचूर्णस्य घृतक्षौद्रसमन्वितम् ॥
पयोऽनुपानं यो भिक्षाशिववेमः स वा भवेत् ॥"
"उक्तटाचूर्णमप्येवं घृतवर्षाय योजयेत् ॥
चक्रमुक्तं दधिसरं सर्पिर्तं दधिकौदनम् ।
पटे सुमार्जितं शुक्लं दृढोऽपि तरुणायते ॥"
"आचरेच्च वयसां रतिपर्यो
कामशास्त्रविहितामवयाम् ।
देशकालवलशस्त्रबुरोधाद्-
वैद्यतत्त्वसमयोक्तविरुद्धाम् ॥
अभ्यङ्गोद्वर्तनसेकस्नप-
स्रक्पत्रवस्त्राभरणप्रकाराः ।
मान्यमैक्यादिकथा प्रणीताः
समस्वभावा वयसावयस्याः ।
दीर्घिका स्वभवनान्तर्विविक्ता
पद्मरेणुमधुमत्तविहङ्गाः ।
गीतसाधुमिरिङ्गुटवित्ते
कानने पुरकलत्रमतानि ॥
इष्टिसुखा विविधा तरुजातिः
भोज्यसुखः कलकोकिलनादः ।
अङ्गसुखत्वं वयसेन विभूषा-
चित्रसुखः सकलः परिवारः ॥
ताम्बूलमच्छमदिरा कान्ता कान्ता निशा
शशाङ्काङ्का।

यदृच्छया किञ्चिदिदं मनसो वाजीकरं तत्तत् ।
मधुसुखमिव सोत्पलं प्रियायाः
कलरणनापरिवादिनी प्रियेव ।
कुसुमचयमनोरमा च शय्या
किसलयिनी लतिकेव पुष्पिताग्रा ॥
देहे शरीरे च न काचिदर्ति-
रर्थेषु नाल्पोऽपि मनोविघातः ।
वाजीकराः सन्निहिताश्च योगाः
कामस्य कामं परिपूरयन्ति ॥"
इति वाभटे उत्तरस्थाने ४० अध्यायः ॥

तथाच ।
"वाजीकरणमन्विच्छेत् पुरुषो नित्यमात्मवान् ।
तदायत्तौ हि धर्म्मार्थौ प्रीतिश्च यश एव च ॥
पुत्रस्यायतनं श्रेष्ठमिदमुक्तमृषेः सुताश्रयाः ।
वाजीकरणमग्र्यञ्च चेदं स्त्री वा प्रहर्षिणी ॥
इष्टा श्लोकेकशोऽप्यर्थाः परं प्रीतिकराः स्मृताः ।
किं पुनः स्त्रीशरीरे ये संघातेन व्यवस्थिताः ॥
सङ्गतो हीन्द्रियार्थानां स्त्रीत्व नान्यत्र विद्यते ।
स्त्र्याश्रयो हीन्द्रियार्थो यः सप्रीतिजननो-
ऽधिकः ॥"

"चित्रदीपः सरःशुष्कमधातुर्धातुसन्निभः ।
निष्प्रजस्त्रजपूलीति ज्ञातयः पुरुषाकृतिः ॥
अप्रतिष्ठश्च नश्यश्च शून्यश्चेकेन्द्रियश्च नः ।
मन्तव्यो निष्क्रियश्चैव यस्यापत्यं न विद्यते ॥
बहुमूर्त्तिर्बहुसुखो बहुयूथो बहुक्रियः ।
बहुचक्षुर्बहुघ्राणो बह्वात्मा च बहुप्रजः ॥
मङ्गल्योऽयं प्रशस्योऽयं धन्योऽयं वीर्य्यवानयम् ।
बहुघ्राणोऽयमिति च स्तूयते नो बहुप्रजः ॥
प्रीतिर्भयं सुखं तृप्तिर्विस्तारो विभवः कुलम् ।
यशोलोकाः सुखोदर्कास्तुष्टिश्चापत्यसंश्रिता ॥
तस्मादपत्यमन्विच्छेत् गुणवत्यपत्यसंश्रितान् ॥
वाजीकरणनित्यः स्यादिच्छेत् कामसुखानि च ।
मासाद्यामात्मगुप्तायां बीजनामाढ्यं नवम् ॥
जीवकर्षभकौवीरं मेदाद्यं घृतावरीम् ।
मधुकाश्वगन्धाश्च साधयेत् कुड़वोन्मिताम् ॥
रसे तस्मिन् घृतप्रस्थं गव्यं दशगुणं पयः ।
विदारीणां रसप्रस्थं प्रस्थमिक्षुरसस्य च ॥
दत्त्वा मृदग्निवासाढ्यं सिद्धं सर्पिर्निधापयेत् ।
शर्करायास्तुगाक्षीर्याः क्षौद्रस्य च पृथक् पृथक् ॥
भागांस्तुल्यांस्तत्र पिण्यत्वाचयेत् पलम् ।
पलं पूर्वमतो लीढ्वा ततोऽन्नमुपयोजयेत् ।
य इच्छेदचयं शुक्रं श्रेयश्चोत्तमं बलम् ।"
इति वाजीकरं घृतम् ॥

"चटकानां सहंसानां दत्त्वा शिखिना-
मथा ।
शिशुमारस्य नक्रस्य भिषक् शुक्राणि संहरेत् ॥
गव्यं सर्पिर्वराहस्य कुलिङ्गस्य वसामपि ।
वल्लिकायाश्च चूर्णानि चूर्णं गोधूममेव च ॥
एभिः पूपलिकाः कार्य्याः शुष्कुल्यो वर्त्तिका
स्तथा ॥
सूपाधानान्न विविधा भक्ष्याश्चान्ये पृथग्विधाः ।
एषां प्रयोगाङ्गस्याणां स्त्रैणेनापूर्य्यरेतसा ॥
श्रेयसा वाजिवद्याति यावदिच्छन् स्त्रियो
नरः ॥"
इति हस्त्यायुर्वेदे पालकाप्ययोगः ॥

"मद्गलेर्जातरूपस्य तस्या एव पयःघृतम् ।
अपत्यजननं सिद्धं सघृतक्षौद्रशर्करम् ॥"
"आर्द्राणि मत्स्यमांसानि भृष्टानि शफरीस्य वा ।
तप्ते सर्पिषि यः खादेत् स गच्छेत् स्त्रीषु न
क्षयम् ॥
घृतभृष्टान् रसे क्षीरे रोहितान् फलसाधिते ॥
अनुपीतरसान् सिद्धानपत्यार्थी प्रयोजयेत् ॥"
इति गर्भाधानकरो योगः ॥

"नर्त्तो वै षोड़शाद्वर्षात् सप्तम्याः परतो नरः ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
अतिबालो ह्यसम्पूर्णसर्व्वधातुः स्त्रियो व्रजन् ।
उपतप्येत सहसा तड़ागमिव काजलम् ॥
शुष्कदारुं यथाकाष्ठं जन्तुदग्धं विजर्ज्जरम् ।
सूक्ष्मास्तु विग्रहैर्यान्ति तथा ह्यल्पस्त्रियो व्रजन् ॥
जरया चिन्तया शुक्रं व्याधिभिः कर्म्मकर्षणात् ।
स्वयं गच्छत्यनङ्गत्वात् स्त्रीत्वाच्चातिनिषेवणात् ।
स्वयङ्गयादतिसम्भोक्तृ स्त्रीदोषदर्शनात् ।
नारीणामरसत्वादभिचारादसेवनात् ॥
दृष्टस्यापि स्त्रियो गन्तुं न शक्तिरुपजायते ।
देहसत्त्वबलापेक्षो हर्षः शक्तिश्च हर्षजा ॥"
इति चरके चिकित्सितस्थाने द्वितीयेऽध्याये ॥)

वाञ्छा, स्त्री (वाञ्छनमिति । वाञ्छि इच्छायाम् । गुरोश्चेत्यः । टाप् ।) आत्मवृत्तिगुणविशेषः । सा च द्विविधा यथा । उपायविषयिणी फलविषयिणी वा । फलं सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । उपायेच्छां प्रति इष्टसाधनताज्ञानं कारणम् । इति सिद्धान्तमुक्तावली ॥ तत्पर्य्यायः । इच्छा २ काङ्क्षा ३ स्पृहा ४ ईहा ५ लट् ६ लिप्सा ७ मनोरथः ८ कामः ९ अभिलाषः १० तर्षः ११ । इत्यमरः ।१।७।२७॥ आकाङ्क्षा १२ कान्तिः १३ अग्रचयः १४ दोहदः १५ आभिलाषः १६ । इति शब्दरत्नावली । दक् १७ रुचिः १८ मतिः १९ दोहलम् २० छन्दः २१ । इति जटाधरः ॥ (यथा, कथासरित्सागरे ।११।२७। "सन्दिदेश च यद्यस्ति वाञ्छा मच्छिष्यतां प्रति ।
तत्पुत्रान्नादिदेवैषा भवता प्रेष्यतामिति ॥")

वाञ्छितं, त्रि, (वाञ्छ + क्तः ।) अभिलषितम् । यथा,—
"अविच्छेदं पठेद्यो मान् ध्यात्वा देवीं सरस्वतीम् ।
शुक्लाम्बरधरां देवीं मुक्ताभरणभूषिताम् ॥
वाञ्छितं फलमाप्नोति च लोके नात्र संशयः ।
इति ब्रह्मा स्वयं प्राह सरस्वत्याः स्तवं शुभम् ॥"
इति तन्त्रसारः ॥

वाञ्छिनी, स्त्री, (वाञ्छतीति । वाञ्छ + णिनिः । ङीप् ।) वाञ्छनीया नारी । तत्पर्य्यायः । लङ्घिका २ कलतूलिका ३ । इति त्रिकाण्डशेषः । वाञ्छनीयमात्रे, त्रि ॥

वाटं, क्ली, वरटः । गात्रभेदः । इत्यमरटीका ॥ यथा,—
"वाटः पथि वृतौ वाटं वरटे गात्रभेदयोः ।"
इति हेमः ॥

वाटः, पुं, (वटयते वेष्टयते इति । वट + घञ् ।) मार्गः । वृतिस्थानम् । इति मेदिनी । टे, २८ ॥ अपि च ।
"सुखं निःसरणे वाटे प्राचीनावेष्टको वृतिः ॥"
इति हेमचन्द्रः ॥
(वास्तु । मण्डपः । यथा, भागवते । ८।१८।२३ ।
"छत्रं सदण्डं सजलं कमण्डलुं
विवेश विभ्रद्यजमेधवाटम् ॥"
वटस्येदमिति । वट + अञ् । वटसम्बन्धिनि, त्रि । यथा, मनुः । २ । ४५ ।
"ब्राह्मणो वैल्वपालाशौ क्षत्रियो वाटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्म्मतः ॥")

वाटपल्लवा, स्त्री, (वाटरोधिका पल्लवा । शाकपार्थिवादित्वात् मध्यपदलोपः ।) पयरोधकपल्लवा । तत्पर्य्यायः । लम्भा २ । इति हारावली ॥

वाटिका, स्त्री, (वटयते वेष्टयते प्राचीरादिभिरिति । वट वेष्टने + संज्ञायामिति खुल् । टाप् । अत इत्वम् ।) वास्तु । (यथा, कथासरित्सागरे । ७२ । २०६ ।
"सा खानाय गते तस्मिन् शाकार्थं शाकवाटिकाम् ।
प्रविष्टा धावकखरं खादन्तं शाकमैक्षत ॥")
बालालकः । इति शब्दरत्नावली ॥ हिङ्गुपत्री । इति शब्दचन्द्रिका ॥

वाटी, स्त्री, (वटयते वेष्टयते इति । वट वेष्टने + घञ् । गौरादित्वात् ङीष् ।) बालालकः । इति शब्दरत्नावली ॥ कुटी । वास्तु । इति मेदिनी । टे, २८ ॥ श्रेयस्य पर्य्यायः ।
"वाटस्त्री वेश्म भूर्वाटी वाटिका गृहपोतकः ॥"
इति शब्दरत्नावली ॥
तस्या लक्षणादिर्यथा,—
विश्वकर्म्मोवाच ।
"के ते वृक्षाः प्रशस्ताश्च निषिद्धाश्चापि केचन ।
भद्रा भद्रप्रदाश्चापि तान् वदस्व जगद्गुरो ॥
केषामन्तर्नियुक्तश्च शिविरश्च शुभाशुभम् ।
दिशि कुत्र वसेद्भद्रमशुभश्च वद प्रभो ॥
द्वाराणाञ्च गृहाणाञ्च प्राकाराणां प्रमाणकम् ।
भद्रप्रदञ्च को वृक्षो दिशि कुत्र प्रवर्त्तते ॥
किं प्रमाणं गृहाणाञ्च प्राङ्गणानां जगद्गुरो ।
मङ्गलं कुसुमोद्यानं दिशि कुत्र तरोस्तथा ॥
प्राकारं किंप्रमाणञ्च परिखाणां सुरेश्वर ।
द्वाराणाञ्च गृहाणाञ्च प्राकाराणां प्रमाणकम् ॥
कस्य कस्य तरोः काष्ठं प्रशस्तं शिविरे प्रभो ।
अमङ्गलं वा केषां वा सर्व्वं मां वक्तुमर्हसि ॥
श्रीभगवानुवाच ।
आश्रमे नारिकेलश्च गृहिणाञ्च धनप्रदः ।

शिविरस्य यदीशाने पूर्वे पुत्रप्रदस्तथा: ॥
सर्वत्र मङ्गलार्हश्च तरुराजो मनोहर:।
रसालवृक्ष: पूर्वस्मिन् वृणां सम्पत्प्रदस्तथा ॥
शुभप्रदश्च सर्वत्र सुरकारो ! निशामय।
विल्वश्च पनसश्चैव जम्बीरो बदरी तथा ॥
प्रजाप्रदश्च पूर्वस्मिन् दक्षिणे धनदस्तथा।
सम्पत्प्रदश्च सर्वत्र यतो हि वर्द्धते गृही ॥
जम्बुवृक्षश्च दाडिम: कदल्याम्रातकस्तथा।
बन्धुप्रदश्च पूर्वस्मिन् दक्षिणे मित्रदस्तथा ॥
सर्वत्र शुभदश्चैव धनपुत्रशुभप्रद:।
हर्षप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा ॥
ईशाने सुखदश्चैव सर्वत्रैव निशामय।
सर्वत्र चम्पक: शुद्धो सुवि भद्रप्रदस्तथा ॥
अलावुश्चापि कुष्माण्डं मायासुश्च सुकासुक:।
खर्जूरी कर्कटी चापि शिविरे मङ्गलप्रदा: ॥
वासुक: कारवेल्लश्च वार्ताकुश्च शुभप्रदा:।
लताफलश्च शुभदं सर्व्वं सर्वत्र निश्चितम्।
प्रशस्तं कथितं कारो निषिद्धश्च निशामय ॥
बन्धुवृक्षो निषिद्धश्च शिविरे नगरेऽपि च।
वटो निषिद्ध: शिविरे नित्यं चौरभयं तत:।
नगरेषु प्रसिद्धश्च दर्शनात् पुण्यदस्तथा।
हे कारो तिन्तिड़ीवृक्षो यत्नात्तं परिवर्जयेत्॥
शूरेभ्य धनहानि: स्यात् प्रजाहानिर्भवेत् ध्रुवम्।
शिविरेऽतिनिषिद्धश्च नगरे किंचिदेव च।
न निषिद्ध: प्रसिद्धश्च नगरेषु तथा पुरे।
वाम्यामतिनिषिद्धश्च प्राज्ञस्तं परिवर्जयेत्॥
खर्जूरश्च डहुरैव निषिद्ध: शिविरे तथा।
न निषिद्ध: प्रसिद्धश्च ग्रामेषु नगरेषु च॥
वृक्षश्च चम्पकादीनां धान्यश्च मङ्गलप्रदम्॥
ग्रामेषु नगरे चापि शिविरे च तथैव च॥
इक्षुवृक्षश्च शुभद: सन्ततं शुभदस्तथा।
अप्रोक्षश्च शिरीषश्च कदम्बश्च शुभप्रद:॥
कचूो हरिद्रा शुभदा शुभदश्चार्द्रकस्तथा।
हरीतकी च शुभदा ग्रामेषु नगरेषु च।
न वार्त्ता भद्रदा नित्यं तथा चामलकी ध्रुवम्॥
गजानामस्थि शुभदमश्वानाञ्च तथैव च।
कल्याणसुखै:अवसां वास्तौ स्थापनकारिणाम्॥
न शुभप्रदमश्वेभासुष्ट्रकारं परम्।
वानराणां नराणाञ्च गर्दभानां गवामपि॥
कुक्कुराणां शृगालानां मार्ज्जाराणामभद्रकम्।
भेड़कानां शूकराणां सर्व्वेषाञ्चाशुभप्रदम्॥
ईशाने चापि पूर्वस्मिन् पश्चिमे च तथोत्तरे।
शिविरस्य जलं भद्रमन्यत्राशुभमेव च॥
दीर्घे प्रस्थे समानञ्च न कुर्य्यान्मन्दिरं बुध:।
चतुरस्रे गृहे कारो गृहिणां धननाशनम्॥
दीर्घप्रस्थ: परिमितो नेत्राङ्गेनापि संयुतम्।
सूत्रेण रहितं भद्रं सूत्रं सूत्रप्रदं वृणाम्॥
प्रस्थे हस्तद्वयात् पूर्वं दीर्घे हस्तत्रयं तथा।
गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च॥
न मध्यदेशे कर्त्तव्यं किञ्चिन्नूनाधिके शुभम्।
चतुरस्रं चम्पकेभं शिविरं मङ्गलप्रदम्।
अभद्रदं सर्व्वदेशे प्राग्द्वाङ्गनं तथैव च॥*॥
शिविराभ्यन्तरे भद्रा स्थापिता तुलसी वृणाम्।
धनपुत्रप्रदात्री च पुण्यदा हरिभक्तिदा।
प्रभाते तुलसीं दृष्ट्वा स्वर्गदानफलं लभेत्॥
मालती यूथिका कुन्दमाधवी केतकी तथा।
नागेश्वरं मल्लिका च काञ्चनं बकुलं शुभम्॥
अपराजिता च शुभदा तेषामुद्यानमीप्सितम्।
पूर्वे च दक्षिणे चैव शुभदं नाट्य संश्रय:॥
ऊर्द्धं षोड़शहस्तेभ्यो नैवं कुर्य्यादृगयं गृही।
ऊर्द्धं विंशतिहस्तेभ्य: प्राकारं न शुभप्रदम्॥*॥
सूत्रधारं तैलकारं सर्व्वकारञ्च धीरकम्।
वाटीमूले ग्रामसध्ये न कुर्य्यात् स्थापनं बुध:॥
ब्राह्मणं क्षत्रियं वैद्यं सच्छूद्रं गणकं शुभम्।
भट्टं वैद्यं पुण्यकारं स्थापयेत् शिविरान्तिके॥*॥
प्रस्थे च परिखामानं शतहस्तं यशस्करम्।
परित: शिविराच्च गम्भीरं दण्डहस्तकम्॥
सङ्केतपूर्व्वकञ्चैव परिखाहारमीप्सितम्।
ग्रामोरगन्यं मित्रस्य गन्यमेव सुखेन च॥*॥
ब्राह्मणीनां तिन्तिड़ीनां हिन्तालानां
तथैव च।
निम्बानां सिन्धुवाराणां उदुम्बराणामभद्रकम्॥
शुष्कूराणां वटानाञ्चाप्येरण्डानामवाञ्छितम्।
एतेषामतिरिक्तानां शिविरे काष्ठमीप्सितम्॥
दृष्ट्वा वज्रहतकं दूरतो वर्ज्जयेद्बुध:।
पुन्नागारधनं हन्यात् दृष्ट्वाह कमलोद्भव:॥
कथितं लोकशिक्षार्थं कुरु काष्ठं विना पुरीम्।
शुभवस्तं चाप्यधुना गच्छ वत्स यथासुखम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अ:॥

वाटीदीर्घ:, पुं, (वाट्यां वास्तुभूमौ दीर्घ: सर्व्वो-ऽवयवात्।) दक्षटवृक्ष:। इति रत्नमाला॥

वाड्रकं, क्ली, भक्ष्यवि:। इति शब्दचन्द्रिका॥

वाणपुष्पी, स्त्री, (वाणं वाणां साधु वेष्टनीयं वा पुष्पं यस्या:। गौरादित्वात् ङीष्।) वाणाल-क:। इति रत्नमाला॥

वाणा, स्त्री, (वण्यते वेष्ट्यते इति। वट वेष्टने+ण्यत्। यद्वा, वाणां वास्तुप्रदेशे क्षिता। वाटी +यत्।) वाणालक:। इति रत्नमाला॥

वाणाल:, पुं, (वाटीं अलति भूषयतीति। अल+ अच्।) वाणालक:। इति शब्दरत्नावली॥ (गुणादयोऽस्य वाणालकशब्दे ज्ञातव्या:॥)

वाणालक:, पुं, (वाणाल एव। स्वार्थे कन्।) वाटीं अलति भूषयतीति। अल+ण्वुल् वा।) क्षुप-विशेष:। वाड़ियाला इति भाषा। तत्प-र्य्याय:। श्वेतपाकी २ वार्त्ता ३ भद्रोदनी ४ बला ५ वाटी ६ विनया ७ वाणाली ८ वाटिका ९। इति शब्दरत्नावली॥ अस्य पर्य्यायान्तरं गुणाश्च बलाशब्दे द्रष्टव्या:॥

वाणाली, स्त्री, (वाटीमलति भूषयतीति। अल +अच्। गौरादित्वात् ङीष्।) वाणालक:। इति शब्दरत्नावली॥

वाड, ऋ ड आप्रावे। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ, अववाड़त।

ड, वाड़ते लोक:। आप्राव: स्नानम्। उन्म-ज्जनम्। इत्येके। इति दुर्गादास:॥

वाड़:, पुं, (धातूनामनेकार्थत्वात् वाड़ वेष्टने+ भावे घञ्।) वेष्टनम्। इति शब्दमाला॥

वा(वा)णि:, स्त्री, (वण+णिच्+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) वप-नम्। तत्पर्य्याय:। वूनि: २। इत्यमर:। २। १४। २८॥ वुनि: ३। इति तट्टीकायां भरत:॥ (करणे इन्।) वापदण्ड:। इति हेमचन्द्र:। ३। ५०७॥

वा(वा)णिनी, स्त्री, (वण शब्दे+णिनि:। ङीप्।) नर्त्तकी। हेक:। मत्तस्त्री। इति हेमचन्द्र:॥ (यथा, रघु:। ६। ७५।

"यस्मिन् महीं शासति वाणिनीनां
निद्रां विहारार्द्धपथे गतानाम्।
वातोऽपि नास्रंसयदंशुकानि
को लम्बयेदाहरणाय हस्तम्॥"*॥

षोड़शाक्षरच्छन्दोविशेष:। तल्लक्षणं यथा,—
"नजभजरैर्यदा भवति वाणिनी गयुक्तै:॥")

वा(वा)णी, स्त्री, (वाणि+वा ङीष्।) सरस्वती। इत्यमर:। १। ६। २॥ वचनम्। (यथा, मार्क-ण्डेये। ४१। ७।

"चक्षु:पूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम्।
सत्यपूतां वदेद्वाणीं बुद्धिपूतञ्च चिन्तयेत्॥")

वपनम्। इति शब्दरत्नावली॥

वात, तृ क गतिसेवयो:। सुखे। इति कविकल्प-द्रुम:॥ (अदन्त चुरा०-पर०-सक०-सेट्।) अववातयत्। अयोऽर्थात्। रमानाथस्तु गति-सुखसेवयोरिति मत्वा गतौ सुखं गतिसुखम्। वातयति पाठ्यं वात: गच्छन्नं सुखयतीत्यर्थ:। इत्याह। सुखसेवनयोरिति जौमरा:। इति दुर्गादास:॥

वात:, पुं, (वातीति। वा+क्त:।) पञ्च-भूतान्तर्गतचतुर्थभूत:। वायास इति भाषा। तत्पर्य्याय:। गन्धवह: २ वायु: ३ पवमान: ४ मरुद्बल: ५ पवन: ६ सदागन: ७ गन्धवाह: ८ मरुत् ९ आशुग: १० श्वसन: ११ मातरिश्वा १२ नभस्वान् १३ मारुत: १४ अनिल: १५ समी-रण: १६ जगत्प्राण: १७ समीर: १८ सदागति: १९ जीवन: २० पृषदश्व: २१ तरस्वी २२ प्रभ-ञ्जन: २३ प्रधावन: २४ अनवस्थान: २५ धूनन: २६ मोटन: २७ खग: २८। अस्य गुणा:॥ खैरत्वम्। लघुत्वम्। शीतत्वम्। रूक्षत्वम्॥ सूक्ष्मत्वम्। संज्ञानकत्वम्। लोककारित्वञ्॥ तस्य कोपकारणं यथा। माधुर्य्यान्नभक्षणम्॥ सायंकाल:। अपराह्णकाल:। प्रदूषकाल:॥ अन्नजीर्णसमयश्च। इति राजनिर्घण्टे:॥*॥ रोगविशेष:। यथा। अथ वातव्याधिकार:॥ तत्र वातव्याधीनां सामान्यतो विप्रकृतिनिदाना-न्याह।

"कषायकटुतिक्तकप्रमितरूक्षलघ्वशन:
पुर:पवनजागरप्रतरवाभिघातश्रमै:।

हिमादनग्नगात्तथा निधुवनाच्च धातुक्षयात्
मलादिरपधारणात् मदनग्रोकचिन्ताभयैः ॥
अतिक्षतजमोक्षणात् गदक्षतातिमांसक्षया-
दतीव वमनाग्र्यामतिविरेचनादामतः ।
पयोदसमये दिनक्षपदयोस्तृतीयांशयो-
र्ज्वरामतिगतेऽग्नि शिथिरसंज्ञकाले।ऽपि च ॥
देहे स्रोतांसि रिक्तानि पूरयित्वानिलो बली ।
करोति विविधान् रोगान् सर्व्वाङ्गैकाङ्गसंश्र-
यान् ॥"

प्रमितत्वाच्च वैपरीत्ये प्रोपसर्गस्तेन अपरिमितमित्यर्थः। प्रकर्षेण मितमल्पं वा प्रलघ्वन्नमतिपुराणं ग्राह्यादि। कतिचिदहानि नवान्यपि वातलानि। यत आह। गुरुरन्नमाजायाम्।

नीवारक्षिपुटः सतीनचणकश्यामाकसुनाढ़की-
निष्पावाच्च मकुष्टकच्च वरटा मङ्गल्यकः
कोद्रवः ॥

एते वातकरा इति ग्रेषः। नीवारः प्रसाधिका सौनी इति लोके। क्षिपुटः यवारी। सतीनः कलायः। निष्पावो राजमाषः। वोड़ा इति लोके। मकुष्टकः मोढ़ः इति लोके। वरटा वरटिका वरटे इति लोके। मङ्गल्यकः मक्षरी इति लोके। पुरःपवनः प्राग्वातः। आमतः आमेन मार्गावरणात्। यत उक्तम्।

वायोर्हेतुत्रयात् कोपो मार्गस्यावरणेन चेति। पयोदसमये वर्षासु। जरामतिगतेऽग्नि शुक्ले-ऽतीव जीर्यताङ्गते। देहे स्रोतांसीत्यादिना संप्राप्तिरुक्ता। कषायादिभिर्हेतुभिर्व्वर्षादौ समये हेतुभूते वयो अनिलः प्रदुष्टो वायुः करोति विविधान् रोगान्। ते रोगाः कथ्यन्ते।

"शिरोग्रहोऽक्ष्णोः शूलं जम्भार्त्तिर्हनुग्रहः।
विड्भेदस्तम्भो गद्गदत्वं मिश्मिनत्वच मूकता ।
वाक्षालता प्रलापच रसानामनभिज्ञता ।
वाधिर्य्यं कर्णनादच सार्त्तिशूलं तथार्दितम् ॥
मन्याहनुभ्रोच्च गलितो बाहुग्रीवोपबाहुकः।
चर्व्विता चैव विश्वाची ऊर्द्ध्ववात उदीरितः ॥
आक्षेपक प्रत्याक्षेपं वातालीला प्रत्यलीला।
तूणी च प्रतितूणी च वद्धिर्वैस्म्यमेव च ॥
आटोपः पार्श्वशूलच क्रिकशूलं तथैव च ।
सङ्कुच सूत्रसंग्रहो मलगाढ़ता ।
पुरीषस्याप्रवृत्तिच ग्रथसो च ततः परः ॥
कलापखञ्जता चापि खञ्जता पङ्गुता तथा ।
क्रोष्टुशीर्षककल्यौ च वातकण्टक एव च ।
पादहर्षः पाददाहः आक्षेपो दण्डकाभिधः।
वातपित्तकृताक्षेपस्तथा दण्डापतानकः ॥
अभिघातकृताक्षेप आयामो द्विविधः स्मृतः।
आन्तरच तथा बाह्यो धनुर्वातच कुब्जकः ॥
अपतन्त्रोपतानच पक्षाघातोऽखिलाङ्गकः।
कम्पः स्तम्भो यथा लोदो भेदच स्फुरणं तथा ॥
रौक्षं काश्यंच कार्श्यच ग्लैत्यं लोम्नाच हर्ष-
णम्।
अङ्गमर्दोऽङ्गविभ्रंशः शिरासङ्कोच एव च ॥
अङ्गशोषच भीरुत्वं मोहश्चञ्चलचित्तता ॥
निद्रानाशः खेदनाशो बलहानिस्तथैव च ।
शुक्रक्षयो रजोनाशो गर्भनाशः परिश्रमः ॥
एत एवाशीतिसंख्या रोगा योगेन रूढ़िताः।
वातव्याधीति नामानो मुनिभिः परि-
कीर्त्तिताः ॥"

एत एव शिरोग्रहादय एव। योगेन वातेन। वातादा व्याधिर्व्वातव्याधिरिति निरुक्त्या तदा वातज्वरादिष्वपि प्रसङ्गः स्यादत आह रूढ़िताः प्रसिद्धिताः। शिरोग्रहादयोऽशीतिरेव वातव्याधिसंज्ञा प्रसिद्धा न तु वातज्वरादयः ॥*॥

अथ वातव्याधिनां सामान्यचिकित्सामाह।

"मधुरलवणस्नाग्धस्निग्धगुरुस्योष्णनिद्रा
गुरुरविकरवस्तिस्वेदसन्तर्पणानि।
दहनजलदसैकाभ्यङ्गसंमर्द्दनानि
प्रकुपितपवनानं शान्तमेतानि कुर्युः ॥"
इति भावप्रकाशः ॥ * ॥

अपि च।

"बलपुरिकरान्नेव वायुवीर्यं निगामय।
भोजनानन्तरं सद्यो गमनं धावनं तथा ॥
छेदनं वह्नितापच ग्रन्थदुर्भगमैथुनम्।
दृढस्त्रीगमनच्चैव मनःसन्ताप एव च ॥
अतिरूक्षमनाहारं युद्धं कलह एव च ।
कटुवाद्यं भयं शोकः केवलं वायुकारणम् ॥
आत्माश्रयक्रमे तज्ज्ञैर्निगामय तदौषधम् ॥
पक्वरम्भाफलच्चैव सवीजं शर्करोदकम्।
नारिकेलोदकच्चैव सद्यस्कं सुमिष्टकम् ॥
माक्षिकन्दधि मिश्रच केवलं वा सशर्करम्।
सद्यःपर्युषितान्नच सौवीरं घृतलोदकम् ॥
पक्वतैलविशेषच तिलतैलच केवलम्।
लाङ्गलीतालखर्জ্জूरमस्तकामलकीद्रवम् ॥
घृतलोष्णोदकस्नानं सुस्निग्धचन्दनद्रवम्।
स्निग्धपक्वान्नपत्रस्थं सुस्निग्धव्यञ्जनान्वितम् ॥
एतत्ते कथितं वत्से सद्यो वातप्रशान्तनम्।
वायवस्त्रिविधाः पुंसां श्लेष्मसन्तापकामनाः ॥"
इति श्रीब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥*॥

अन्यच।

"विस्वाग्निमन्थशोणाकपाटलापारिभद्रकम्।
प्रसारणीगन्धा च दृष्टतो कण्टकारिका ॥
वला चातिवला राला चदंष्ट्रा च पुनर्नवा।
एरण्डशारिवा पर्णीगुडूचीकपिकच्छवः ॥
एषां दशपलिकान् भागान् क्वाथयेत् सलिले-
ऽमले।
तेन पादावशेषेण तिलं पात्रे विपाचयेत् ॥
आजं वा यदि वा गव्यं क्षीरं दत्वा चतुर्गुणम्।
शृतावशेषचैव तैलतुल्यं प्रदापयेत् ॥*॥
द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि
तच्छृणु ॥
घृतपुष्पा देवदारु शालपर्णी वचागुरुः।
कुष्ठमांसी सैन्धवच पलमेकं पुनर्नवा ॥
पाले नखे तथाभ्यङ्गे तैलमेतत् प्रदापयेत्।
दुरालभा पार्श्वशूलच गलमालाच नाशयेत् ॥

अपस्मारं वातरक्तमायुष्मांच्च पुमान् भवेत्।
गर्भमस्थतरी विन्द्यात् किं पुनर्मानुषी स्त्रिय ॥
अन्यासां वातभङ्गानां कुञ्जराणां वृषां तथा।
तैलमेतत् प्रदातव्यं सर्व्ववातविकारिणाम् ॥"
पुनश्च।

"पलद्वयं सैन्धवच शुण्ठी चित्रकपञ्चकम्।
पञ्चप्रस्थं क्षारनालं तैलप्रस्थं पचेत्ततः।
यद्दग्धस्रवणोद्दीप्तसर्व्ववातविकारजुत् ॥"

इति गारुडे १६८ अध्यायः ॥

(तथास्य गुणादयः।

"वातस्तु रूक्षलघुशीतबहुशीतप्रकृतिविषदा-
स्तस्य रौक्ष्यादातलता रूक्षा पक्षिताल्पशरीराः
प्रततरूक्षश्यामभिन्नसक्तजर्জ্জरस्वराः जागरू-
काश्च लघुत्वाच्च लघुचपलगतिचेष्टाहारस्वप-
हाराः चलत्वादनवस्थितसन्धिभ्रूहनुोष्ठजिह्वा
शिरः स्कन्धपार्श्वपादाः बहुत्वाद्बहुप्रजापक्वकेशा
शिराप्रतानाः शीतत्वात् शीतसमारम्भक्षोभ-
विकाराः शीतोच्छ्वासरागविरागाः शुष्क-
ग्राहिणोऽल्पस्तुतयश्च शैत्यात् शीतासहिष्णवः
प्रततशीतकोपैकसभाः पारुष्यात् परुष-
केशश्मश्रुरोमनखदशनवदनपाणिपादाङ्गा वैष-
म्यात् स्फुटिताङ्गावयवाः सततसन्धिशब्दगामिनः
त एवं गुणयोगात् वातलाः प्रायेणाल्पबला-
ल्पायुषाल्पाल्पवाल्पसाधनाल्पाधयाश्च।"
इति चरके विमानस्थानेऽष्टमेऽध्याये ॥ अथास्य वृद्धिक्षयलक्षणं यथा।

"तत्र वातवृद्धौ लक् पारुष्यं कार्श्यं कार्श्यं गात्रस्फुरणसुप्तकामिता निद्रानाशोऽल्पबलत्वं गाढ़वर्चस्त्वच।"

"तत्र वातक्षये मन्दचेष्टताल्पवाक्त्वमल्पहर्षो मूढ़संज्ञा च।" इति सुश्रुते सूत्रस्थाने पञ्च-दशेऽध्याये ॥ * ॥ स्थानविशेषेऽवस्थितस्यास्य चिकित्सा यथा,—

"विशेषतस्तु कोष्ठस्थे वाते क्षारं पिबेन्नरः।
आमाशयस्थे गुदस्थ यथा दोषहरी क्रिया ॥
आमाशयगते वाते छर्द्दितायं यथाक्रमम्।
देयः षड्धरणो योगः सप्तरात्रं सुखाम्बुना ॥"
"पक्वाशयगते वाते हितं स्नेहविरेचनम्।
वस्तयः शोधनीयाच प्राग्वच्च लवणोत्तराः ॥"
स्नेहबस्तम्।

"क्षुद्दीलवश्ववाशीकुस्नेहान् क्षुण्णे घटे दहेत्।
गोमये स्नेहबस्तं ततपरं वातनाशनम् ॥
कार्य्यो बस्तिगते चापि विधिर्बस्तिविशोधनः।
लड्घनाद्रूक्षशिरा प्राप्ते कुर्य्याच्चोद्वृत्त-
विमोचयम् ॥
स्नेहोपनाहाग्निकर्म्मबस्तयोऽर्द्धनानि च।
आयुसन्धिषु संप्राप्ते कुर्य्यादार्ते विचक्षणः ॥
खेदाभ्यङ्गावगाहांच ह्रदच्चान्नस्य गाश्रिते।
शीताः प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम् ॥
विरेको मांसमेदःस्थे निरूहाः शमनानि च।
बाह्याभ्यन्तरतः स्नेहैरस्थिमज्जगतं जयेत् ॥
हर्षोऽन्नपानं शुक्रस्थे बलशुक्रकरं हितम्।

विवङ्गमार्गं मुक्त्वा तु दद्या द्विरेचनम् ।
गर्भे मुक्ते तु वातेन बालानाचापि मुच्यताम् ।
सितामधुककाश्मर्य्यैर्हितमुत्थापने पयः ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारः ॥)

वातकः, पुं, (वात इव चञ्चलः । इवार्थे कन् । यद्वा, वातं करोतीति । कृ + अन्येभ्योऽपीति डः ।) अश्वगन्धा । इत्यमरः । २ । ४ । १४६ ॥

वातकर्म्म [न्], (वातस्य कर्म्म ।) मरुत्क्रिया । यथा,—

वराह उवाच ।
"क्षुध्यमानेन मे भूमे ! वातकर्म्म प्रसूयते ।
एवं हि पुरुषो युक्तो वातपीड़ितमानसः ॥
मक्षिका पञ्च वर्षाणि त्रीणि वर्षाणि मूषकः ।
श्वा चैव त्रीणि वर्षाणि कूर्म्मो वै जायते नव ।
एतत् ते तापनं देवि ! मेहनं मम शंसति ।
यो वै घ्राणं विजानाति मम कर्म्मपरायणः ॥
श्रुत्वा वाक्यं भगवतो प्रत्युवाच वसुन्धरा ॥

धरण्युवाच ।
अतुलं लभते पापं तव कर्म्मपरायणः ।
तस्य देव सुखार्थाय विशुद्धिं वक्तुमर्हसि ॥

वराह उवाच ।
शृणु कार्त्तिकेय मे देवि ! कथ्यमानं मयानघे ।
अपराधमिमं ज्ञात्वा सत्वरेद्वेग कर्म्मणा ॥
यावत्तेन दिनत्रीणि नक्तेन च पुनस्त्रयः ।
कर्म्म चैवं ततः ज्ञात्वा स च मे नापराध्यति ॥
सर्व्वग्रहां परित्यज्य मम लोकाय गच्छति ।
एतत्ते कथितं भद्रे मरुत्कर्म्मापराधिनः ॥
दोषश्चैव गुणश्चैव यत्नया परिपृच्छितम् ।"
इति वराहपुराणे मरुत्कर्म्मप्रायश्चित्तम् ॥

वातकी, [न्] त्रि, (वातोऽतिशयितोऽस्यस्येति । वात + "वातातीसाराभ्यां कुक् च ।" ५ । २ । १२६ । इति इनिः । कुक् च ।) वातरोगयुक्तः । तत्पर्य्यायः । वातरोगी २ । इत्यमरः । २ । ६ । ५६ ॥

वातकुम्भः, पुं, (वातस्य कुम्भ इव ।) गजकुम्भाधोभागः । इति हेमचन्द्रः । ४ । २६३ ॥

वातकेतुः, पुं, (वातस्य केतुरिव ।) धूलिः । इति त्रिकाण्डशेषः ॥

वातकेलिः, पुं, (वात तु क सुखे + भावे घञ् । वातेन सुखेन केलिर्यत्र ।) कलाकापः । विहगदन्तशठः । इति मेदिनी । के, २६३ ॥

वातगामी, [न्] पुं, (वातेन वायुना सह गच्छतीति । गम + णिनिः ।) पक्षी । इति केचित् ॥

वातगुल्मः, पुं, वातजः । यथा,—
"वातजो वातगुल्मः स्याद्वायुर्निदावजः ।
भक्ष्यान्नजः प्रावृषिजो वासन्तो मलयान्नजः ॥"
इति त्रिकाण्डशेषः ॥
(वातेन जातो गुल्मः ।) रोगविशेषः । (यथा, मार्कण्डेये । ३८ । ५४ ।
"वातगुल्मप्रशान्त्यर्थमुदावर्त्ते तथोदरे ।
यवागूं वापि पयसं वायुघ्नैः प्रतिषेचयेत् ॥"
अस्य चिकित्सा यथा,—
"वचायवानीत्रिकटुदग्धमूलीजलं घृतम् ।
क्षाराम्बुभ्यां हितः पाने धान्यनागरकोऽथवा ॥
वातगुल्मेषु सर्व्वेषु ज्वरेषु विषमेषु च ।
राजाद्यपञ्चकं वापि वातगुल्मस्य पाचनम् ।
शुण्ठी सौवर्चलं शुण्ठी पाचनं वातगुल्मिने ॥"
"नागरं क्रिमिजित् पथ्या चित्रता त्रिगुणा-
युतम् ।
चूर्णं गुड़ान्वितं देयं वातगुल्मविरेचनम् ।
दन्त्याश्च भाग एकस्तु द्वौ भागौ च हरी-
तकी ।
त्रिवृतायास्त्रिभागः स्यात् सुरुग्राक्षत्वार
एव च ।
प्रक्षिप्य सर्व्वमेकत्र सर्व्वतुल्यगुड़ेन तु ॥
वटकं भक्षयेत् प्रातस्तस्योपरि जलं पिबेत् ।
क्षपितश्च विवेकश्च वातगुल्मोपशान्तये ॥"
इति वातगुल्मचिकित्सा । इति हारीते चिकित्सितस्थाने चतुर्थोऽध्यायः ॥) तस्य निदानादिर्गुल्मशब्दे द्रष्टव्यः ॥

वातघ्नी, स्त्री, (वातं हन्तीति । हन + टक् । ङीप् ।) शालपर्णी । अश्वगन्धा । श्लिष्टड़ोशुपः । इति राजनिर्घण्टः ॥

वातजूतं, क्ली, (वातेन उद्धूयमानं तूलम् ।) आकाशोद्धूयमानतूलम् । वुड़िर इति भाषा । तत्पर्य्यायः । वृहत्तूलकम् २ रक्ततूलम् ३ श्रीग्रहाख्यम् ४ वंशकपम् ५ मरुद्भवम् ६ । इति हारावली । २३ ॥

वातध्वजः, पुं, (वातो वायुर्ध्वजो यस्य ।) मेघः । इति शब्दमाला ॥

वातपित्तजमूलं, क्ली, (वातपित्ताभ्यां जायते इति । जन् + डः । तच्च तत् मूलञ्चेति ।) मूलरोगविशेषः । तस्य औषधं यथा,—
"मातुलुङ्गस्य निर्य्यासं गुड़ाज्येन समन्वितम् ।
वातपित्तजमूलानि हन्ति वै प्राणयोगतः ॥"
इति गारुड़े १८८ अध्यायः ॥
(तथास्यान्या चिकित्सा । यथा,—
"दुरालभा पर्पटकश्च विश्वा
पटोलनिम्बामृदतिक्तिड़ौकम् ।
सशर्करं कल्कमिदं प्रयोज्यं
सपित्तवातोद्भवमूलशान्त्यै ॥"
इति हारीते चिकित्सितस्थानेऽष्टमेऽध्याये ॥)

वातपुत्रः, पुं, (वातस्य पुत्रः ।) भीमसेनः । हनूमान् । महाधूर्त्तः । इति मेदिनी । रे, ६६ ॥

वातपोथः, पुं, (वातं वातरोगं पुथति हिनस्तीति । पुथ + अच् ।) पलाशवृक्षः । इत्यमरः । २ । ४ । २६ । (अस्य पर्य्यायो यथा,—
"वातपोथः पलाशः स्यादाग्रपस्यश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो वृक्षकर्णो दलोऽपरः ॥"
इति वैद्यकरत्नमालायाम् ॥)

वातप्रमी:, पुं, स्त्री, (वातं प्रमिमीते वाताभिसुखं गच्छतीति । वात + प्र + मा माने + "वातप्रमीः ।" उणा० ४ । १ । इति ईप्रत्ययेन साधुः ।) वातरुगः । इत्यमरः । २ । ५ । ७ ॥ वाप्नोट् हरिश्च इति भाषा ॥ नकुलः । अन्यः ।

इति संक्षिप्तसारोद्धारे वृत्तिः ॥ (वायुवङ्गगामिनि, त्रि । यथा, ऋग्वेदे । ४ । ५८ । ७ ।
"सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ॥")

वातफुल्लाण्डं, क्ली, (वातेन फुल्लं विकसितं यदण्डं तत् ।) पुप्फुसः । इति भूरिप्रयोगः ॥

वातभक्षः, पुं, (वातमभिसुखीकृत्य अत्ति गच्छतीति । वात + अद + "वातसुनीतिगन्धेर्व्वञ्घेट्तुदनहासीनां उपसंख्यानम् ।" ३ । २ । २८ । इत्यस्य वार्त्तिकोक्त्या खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) वातरुगः । इति जटाधरः ॥ (वातगामिनि, त्रि । यथा, भट्टिः । २ । १७ ।
"मेघात्ययोपात्तवनोपग्रोभं
कदम्बकं वातभरं रुगाणाम् ॥")

वातमण्डली, स्त्री, (वातस्य मण्डली ।) बाला । इति त्रिकाण्डशेषः ॥

वातरुगः, पुं, (वाताभिसुखगामी रुगः ।) वातप्रमीः । इत्यमरः । २ । ५ । ७ ॥

वातरक्तं, क्ली, (वातदूषितं रक्तं यत्र ।) रोगविशेषः । तस्य विप्रकृष्टं निदानमाह ।
"लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः ।
क्षिप्रमुष्णाम्बुपानूपमांसपिण्याकमूलकैः ॥
कुलत्थमाषतिल्यावशुष्काद्यैर्दधिमद्यकैः ।
दध्यारनालसौवीरशुक्ततक्रसुरासवैः ॥
विरुद्धाध्यशनक्रोधदिवास्वप्नातिजागरैः ।
प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम् ।
स्थूलानां सुखिनां चापि प्रकुप्यैर्वातशोणितम् ॥
हस्त्यश्वोष्ट्रैर्गच्छतश्चाशुतश्च
विद्राधाख्यं संविदाहाग्नयश्च ॥७॥
क्षारो यवक्षारादिः । अजीर्णभोजनैः अजीर्णाय भोजनैः । अतिमात्रभोजनैरित्यर्थः । क्षिप्रादीनि मांसस्य विशेषणानि । क्षिप्रं शीघ्रितम् । शुष्कमातपे शोषितम् । अम्लं मत्स्यादिमांसम् । आनूपं गौड़ादिपूर्व्वदेशजं मांसम् । पिण्याकं तिलखलिः । मूलकं प्रसिद्धमेव । तिल्यावः वोड़ाशाकम् । शाकं पत्रशाकम् । आदिशब्देन दृष्टाकादीनि फलशाकानि गृह्यन्ते । पक्वं शीघ्रितत्वादिदोषरहितमपि मांसं वातशोणितं प्रकोपयेत् । शीघ्रितादि तु मांसं विशेषतो वातशोणितं प्रकोपयेत् । आरनालं सन्धानभेदः । सुक्तं सन्धानभेदः । सौवीरं सन्धानभेदः । तक्रं चतुर्थांशजलयुक्तं मथितपूतं दधि । सुरा सन्धानभेदः । आसवः सन्धानभेदः । विरुद्धं क्षीरमत्स्यादि । अध्यशनम् । अजीर्णे सुप्यते यत्तु तदध्यशनसुच्यते ।
अतिजागरो निशि । प्रायशः बाहुल्येन । सुकुमाराणां अत्यन्तरकायव्यापाराणाम् । अथवा मिथ्याहारविहारिणाम् । अयथाहारविहाराणां स्थूलानां सुखिनाञ्च रक्तदुष्टयः । हस्त्यश्वोष्ट्रैर्गच्छतः यतो वायुर्व्विवर्द्धते रुधिरञ्चाधो गच्छति । हस्त्यादय उपलक्षणानि । पद्भ्या-

मध्यति चलतः । अस्रतः विदाह्यन्नम् । विदाहि निष्पावकुलत्थसर्षपप्राकादि । संविदाहाद्यन्नस्य । संविदाहेऽन्नं यस्य शुक्ते विदग्धे तदुपरि भुञ्जानस्येत्यर्थः । अथान्नमुक्ताप्येतद्वचनं विदग्धाजीर्णभोजनस्य विशेषतो हेतुत्वार्थम् । पश्चात् वातश्लोणितं प्रकुप्येदित्यनेनान्वयः । एतेषां कारणानां मध्ये केनचिदायुः केनचिदुभयमपि प्रकुप्येत् । * । संप्राप्तिमाह ।

"क्षतस्थं रक्तं विदहत्यशु तच्च
दुष्टं स्रस्तं पादयोश्चीयते तु ।
तत् संसृष्टं वायुना दूषितेन
तत्प्राबल्यादुच्यते वातरक्तम् ॥"

पूर्वोक्तैर्हेतुभिः क्षतस्थं स्रस्तं रक्तं विदहति अत्र दहधातुरविवक्षितकर्मकः । तेन विदहति विदग्धं भवतीत्यर्थः । तच्च दुष्टं रक्तम् । स्रस्तं अधोगतम् । पादयोश्चीयते सञ्चितं भवति । तदुधिरं दूषितेन स्वहेतुवायुना संसृष्टं मिलितं वातरक्तं उच्यते । नन्वेवस्य संप्राप्तिरक्ता सुश्रुतेन ।

"श्लैष्मं रक्तं दुष्टिमायाति तच्च
वायोर्मार्गं संरुणद्ध्याशु वातः ।
क्रुद्धोऽत्यर्थं मार्गरोधात् च वायु-
रत्युल्बणं दूषयेदुक्तमाशु ॥"

अत्र प्रथमं रक्तस्य दुष्टिरतो रक्तवातमिति व्यपदेशसुचितं भवत्यत आह । तत्प्राबल्यादिति । तस्य वातस्य दोषत्वेन प्राधान्यादातरक्तमिति व्यपदिश्यते । * । पूर्वरूपमाह ।

"खेदोऽत्यर्थं न वा कार्श्यं स्पर्शाज्ञत्वं क्षतेऽतिरुक् ।
सन्धिग्रैथिल्यमालस्यं सदनं पिडकोद्गमः ॥
आनुलोम्येऽरुकत्वं गुरुत्वं पादाङ्गसन्धिषु ।
निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव च ।
कण्डूः सन्धिषु रुक् दाहो भूत्वा नश्यति चासकृत् ।
वैवर्ण्यं मण्डलोत्पत्तिर्व्याताद्रुक्पूर्वलक्षणम् ॥"

अथाधिक्षतवातस्य वातरक्तस्य लक्षणमाह ।

"वातेऽधिकेऽधिकं तत्र शूलस्फुरणतोदनम् ।
शोफस्य रौक्ष्यं श्यावत्वं म्लानताऽङ्गविहानयः ॥
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः ॥"

तत्र पादयोः मूलादिकमधिकम् । यत आह सुश्रुतः ।

"स्पर्शोद्रियौ तोदभेदप्रशोषौ
स्वापोपेतौ वातरक्तेन पादौ ॥" इति ।

अत्र सुप्तिः स्पर्शाज्ञता । * । अधिकरक्तं वातरक्तमाह ।

"रक्ते शोथोऽतिरुक् तोदस्रावश्चिमिचिमायते ।
स्निग्धरुचैः समं नैति कण्डूत्क्लेदसमन्वितः ॥"

अधिकपित्तं तदाह ।

"पित्ते विदाहः संमोहः खेदो मूर्च्छा मदः कृषा ।
स्पर्शासहत्वं रागश्च शोथपाकौ भृशौ क्षता ॥
विदाहश्च पादावेव वोढव्यः । यत आह सुश्रुतः ।

पित्तास्रगभ्यासुग्यदाहौ भवेता-
मत्यर्थौ यौ रक्तशोथौ मृदू च ॥

पदाविति शेषः । अधिकफं तदाह ।

कफेनैमित्यगुरुतासुप्तिस्निग्धत्वशीतताः ।
गुरुतादयः पादयोरेव । यत आह सुश्रुतः ।

कण्डूमन्तौ खेदशीतौ सशोथौ
पीनस्तब्धौ श्लेष्मदुष्टे तु रक्ते ॥ * ॥

अतिक्रियमाणवातरक्तस्य उपद्रवानाह ।

"अस्वप्नारोचकश्वासमांसकोथग्निरोगदाः ।
मूर्च्छा च मन्दरुक् तृष्णा ज्वरमोहप्रकोपकाः ॥
हिक्कायाङ्गुल्यवीसर्पपाकतोदभ्रमक्लमाः ।
अङ्गुलीवक्रतास्फोटदाहमर्म्मग्रहार्त्तयः ॥"

मांसकोथो मांसगलनम् । * । असाध्यत्वादिकमाह ।

"एतैरुपद्रवैर्वर्ज्यं मोहेनैकेन वापि यत् ।
अक्षतक्षोपद्रवं याप्यं साध्यं स्यान्निरुपद्रवम् ॥
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् ।
त्रिदोषजमसाध्यं स्यादृग्यस्य च क्षुरोपद्रवाः ॥"

अथ वातरक्तस्य चिकित्सामाह ।

"वातश्लोणितिनो रक्तं स्निग्धस्य बहुशो हरेत् ।
अल्पाल्पं रूक्षयेद्वायुं यथादोषं यथाबलम् ॥
उष्णाङ्गदाहतोदेषु जलौकोभिर्विनिर्हरेत् ।
श्लक्ष्णतुण्डैश्चिमिचिमाकण्डूरुग्वेदनान्वितम् ।
प्रच्छितेन शिराभिर्वा देशाद्देशान्तरं व्रजेत् ।
अङ्गे स्थाने न तत् स्थाप्यं रूक्षे वातोत्तरेऽथ यत् ।
गम्भीरं क्षयशुं स्तब्धं कर्म ग्लानिं शिरा-
मयात् ।
रोगानन्यांश्च वातोत्थान् कुर्याद्वायुररक्षितः ।
विविधान् वातरोगान् वा स्मृत्वा वाग्भटशेषितम् ।
रक्तं कुर्यात्ततः स्निग्धात्तत्प्रमाणेन निर्हरेत् ।
विरेचयेत्तु पित्तादौ स्नेहयुक्तैर्विरेचनैः ।
वाग्भटाभेषजाभ्यङ्गपरिषेकोपनाहनैः ।
विरेकास्थापना स्नेहपानैर्गम्भीरमाचरेत् ।
दिवास्वप्नं च कोपं च यायामं मैथुनं तथा ।
कटूष्णं गुर्वभिष्यन्दि लवणाम्लौ च वर्जयेत् ।
पुराणा यवगोधूमशालयः षष्टिकास्तथा ।
भोजनार्थे रसार्थे तु विष्किराः प्रतुदा हिताः ।
आढकाढकिका मुद्गा मसूराः सकुलत्थकाः ।
यूषार्थे बहुसर्पिष्काः प्रशस्ता वातशोणिते ।
सुनिषण्णकवेचार्यं काकमाची शतावरी ।
वास्तूकोपोदिकाशाकं शाकं शौवर्चलं तथा ।
घृतमांसरसैर्भक्ष्यं शाकमत्स्या च दापयेत् ।
हितो गोधूमचूर्णेन छागक्षीरघृतप्लुतैः ।
लेपस्तदत्तिला भक्ष्याः पिण्डाः पयसि निर्वृताः ।
क्षीरपिण्डातसीभिर्वा वर्द्धमानपलैरपि ।
दुग्धपिष्टैः प्रदेहैः स्यादाहतः पवनशोणिते ।
गुडूचीशाल्मकक्काभ्यां सघृतं मद्यं हितम् ।
वातरक्तं निहन्त्याशु कुष्ठं हरति दुस्तरम् ।"

गुडूचीघृतम् । * ।

"तुलां पचेद्गुडूच्यास्तु जलद्रोणचतुष्टये ।
पादशेषः कषायस्तु गोदुग्धं द्रोणकस्तथा ।
तिलतैलाढकं साध्यं पचेन्मृद्वग्निना भिषक् ।
वस्त्रमार्द्रेस्तनौ द्रव्ये: सम्यक्कल्कीकृते: पचेत् ।
मञ्जिष्ठा मधुकं कुष्ठं जीवनीयगणस्तथा ।
एलागुरु च मदीका मांसी व्याघ्रनखौ नखौ ।
हरेणुः श्रावणी योषा स्थिरा त्वामलकी तथा ।
शृङ्गी श्यामा प्रसारा च विष्णुक्रान्ता च
पञ्चकम् ॥
नागकेशरबालत्वक्पद्मकोत्पलचन्दनम् ।
एतानि कल्कवस्तूनि कथितानीह कोविदैः ॥
पानेऽभ्यङ्गेऽनुवासे च तैलमेतन्निषेवितम् ।
वातरक्तं तदङ्गोपद्रवानाशु नाशयेत् ।
धन्यं पुंसवनं स्त्रीणां गर्भदं वातपित्तजुत् ।
स्वेदकक्षूरजायामशिरःकम्पार्दितामयान् ।
हन्याद्व्रजन्तान् दोषान् गुडूचीतैलमुत्तमम् ॥"

इति गुडूचीतैलम् । इति भावप्रकाशः ॥

(यथा च ।

"हुताग्निहोत्रमासीनमद्विमध्ये पुनर्व्रजम् ।
दृष्ट्वा गुरुमेकाग्रमग्निवेश्योऽग्निवर्चसम् ।
अग्निमारुततुल्यस्य संसर्गस्त्वनिलार्त्तयोः ।
हेतुलक्षणभेषज्यान्यथास्मै गुरुरब्रवीत् ॥"

"अभिघातादृतुस्राच्च प्रदुष्टे श्लोणिते नृणाम् ।
कषायकटुतिक्ताम्लरूक्षाहारादभोजनात् ।
क्षयोदृयानयानाभ्यक्रीड़ाध्ववलहनात् ।
उष्णे चात्यध्वगमनाद्वायावेहनियन्त्रणात् ।
वायुर्विदह्यते दुष्टेन रक्तेनावारितः पथि ।
कुद्धस्तदूषयेद्रक्तं तज्ज्ञेयं वातशोणितम् ।
खुड़ं वातबलासाख्यमाढ्यं वातज्च नामभिः ।
तस्य स्थानं करौ पादावङ्गुल्यः पर्वसन्धयः ।
सक्थ्यादौ दुस्तरादे तु मूलं देहो विधावति ।
शैत्यात् सर्वसत्वाच्च देहं गच्छन् शिरायवैः ।
पर्वस्वभिहतं क्षुब्धं वक्त्वादभिनिवर्त्तते ।
स्थितं पित्तादिसंदुष्टं तास्राः क्षुभति वेदनाः ।
करोति दुःखं तेनैव तस्मात् प्रायेण सन्धिषु ।"

"उत्तानमथ गम्भीरं द्विविधस्तत् प्रचक्षते ।
त्वङ्मांसाश्रयमुत्तानं गम्भीरस्त्वस्थ्यनाश्रयम् ।
कण्डूदाहरुजायासस्तोदस्फुरणकुञ्चने: ।
अन्वितं प्रावरक्तं स्यात्तास्रं तीव्रैस्तथेष्यते ।
गम्भीरे क्षयशुः स्तब्धः कठिनोऽन्तर्ज्वरान्वितः ।
प्रावस्राव्योऽथवा दाहतोदस्फुरणपाकवान् ।
सन्धिदाहान्वितोऽभीक्ष्णं वायुः सन्धिष्वधस्तिषु ।
छिन्दन्निव चरत्यन्तर्वक्रीकुर्वंश्च वेगवान् ।
करोति स्तब्धं पङ्गुं वा शरीरे सर्वतश्चरन् ।
सर्वैर्लिङ्गैश्च विज्ञेयं वातास्रमुभयाश्रयम् ।"

"रक्तमार्गं निहन्त्याशु शाखासन्धिषु मारुतः ।
निवेश्याग्न्योन्यमाबाध्य वेदनाभिर्दरदारुणम् ।
तत्र सुप्तेदरुक्शून्यजलौकः क्षुभ्यलालुभिः ।
पृच्छनैर्वा शिराभिर्वा यथादोषं यथाबलम् ।
रागदाहशूलतोदास्रदरुक्स्रावं जलौकसा ।
श्लक्ष्णैस्तमेहरेत् क्षतिकण्डूचिमिचिमायनात् ।
देशाद्देशं व्रजत् स्राव्यं शिराभिः पृच्छनेन वा ।"

"सर्पिस्तैलवसामज्जापानाभ्यञ्जनबस्तिभिः ।

सुखोष्णैरुपनाहैश्च वातोत्तरमुपाचरेत् ॥
विरेचनकृतक्षीरपानैः सेकैः सवस्तिभिः ।
प्रीतैर्निर्वापनैश्चापि रक्तपित्तोत्तरं जयेत् ॥
वमनं मृदुनात्यर्थं स्नेहसेकादिलङ्घनम् ।
कोष्णलेपाश्च मुञ्चन्ति वातरक्ते कफोत्तरे ॥
कफवातोत्तरे प्रीतैः प्रलिम्पे वातशोणिते ।
विदाहः प्रोथरुक्कण्डूविदृद्धिः स्तम्भनाद्भवेत् ॥
पित्तरक्तोत्तरे दाहः क्लेदोऽवदरणं भवेत् ।
उष्णोत्सन्नाङ्गिगदोक्तवलं वृद्धाचरेत् क्रियाम् ॥"
"दत्त्वापरूषकद्राक्षाकाश्मर्य्येक्षुरसान् समान् ।
पृथग्विदार्य्याश्च रसं तथा क्षीरचतुर्गुणम् ॥
एतत् प्रायोगिकं सर्पिः पारूषकमिति स्मृतम् ।
वातरक्ते चते क्षीणे वीसर्पे पैत्तिके ज्वरे ॥"
इति पारूषकं घृतम् ॥*॥
"मधुपर्य्याः पलं पिष्ट्वा तैलप्रस्थं चतुर्गुणे ।
क्षीरे साध्यं घृतक्षत्रक्षतेवं मधुकात् घृते ॥
सिद्धं देयं त्रिदोषे स्यात् वातासृश्वासकासनुत् ।
कृत्याकुरोगवीसर्पकामलादाहनाशनम् ॥
बलाकषायकल्काभ्यां तैलं क्षीरसमन्तथा ।
सहस्रघृतपाकं वा वातासृग्वातरोगनुत् ॥
रसायनं श्रेष्ठतमं इन्द्रियाणाम्प्रसादनम् ।
जीवनं दृंहणं स्वर्य्यं शुक्राङ्गदोषनाशनम् ॥"
"चन्द्रपादाम्बुसंसिक्ते चौमपद्मदलच्छदे ।
शयने पुलिनस्पर्शे शीतमारुतवीजिते ॥
चन्दनार्द्रकरार्द्राङ्ग्यः प्रिया नार्य्यः प्रियंवदाः ।
स्पर्शात् शीतसुखस्पर्शा घ्नन्ति दाहं रजं क्लमम् ॥"
"गम्भीरे रक्तमाक्रान्तं स्रावेद्वातुं विवर्जयेत् ।
रक्तपित्तातिवृद्धा तु पाकमाशु नियच्छति ॥
भिन्नं स्रवति वा रक्तं विदग्धं पूयमेव वा ।
तयोः क्रिया विधातव्या यथः शोधनरोपणी ॥
कुर्य्यादुपद्रवाणाञ्च क्रियां स्वाधिक्यितस्थितात् ॥"
इति चरके चिकित्सास्थाने २६ अध्यायः ॥
"गन्धकं पारदं लौहं वनं तालं मनःशिला ।
शिलाजतु पुरं शुद्धं समभागं विचूर्णयेत् ॥
विड्भं त्रिफला योषं वाशुजी च पुनर्नवा ।
चित्रकं देवकाष्ठञ्च द्राक्षा श्वेतापराजिता ॥
चूर्णमेषां पृथक् तुल्यं सर्व्वमेकत्र कारयेत् ।
त्रिफलाभृङ्गराजस्य रसेनैव पृथक् त्रिधा ॥
विभाव्य भक्षयेत् प्रातर्माषमात्रं दिने दिने ।
क्रमात्वुपानं निम्बस्य पत्रं पुष्पं त्वचं समम् ॥
ग्राह्यमात्रं हरेद्देयात् सर्व्ववातविकारनुत् ।
वातरक्तं महाघोरं गम्भीरं सर्व्वजञ्जयेत् ॥
सर्व्वोपद्रवसंयुक्तं साध्यासाध्यं निहन्त्यलम् ॥"
इति वातरक्तान्तको रसः ॥*॥
"अथ शुद्धेन तालेन गन्धतुल्येन मेलयेत् ।
द्वयोस्तुल्यं जीर्णताम्रं वालुकायन्त्रके पचेत् ॥
अयन्तालेश्वरो नाम रसः परमदुर्लभः ।
हन्यात् कुष्ठानि सर्व्वाणि वातरक्तमथापि वा ।
मूलमष्टविधं श्वित्रं रसस्तालेश्वरो महान् ॥"
इति महातालेश्वरो रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे वातरक्ताधिकारे ॥

अथात्र पथ्यापथ्यविधिः ।
"हयोरसभृति: सूचीजलौकाभ्यङ्गजाबुभिः ।
घृतधौतघृताभ्यङ्गो मेषीदुग्धावसेचनम् ॥
यवषष्टीकनीवारकलमारक्तशालयः ।
गोधूमाश्चणका मुद्गास्तुवर्य्योऽपि सकुष्टकाः ॥
अजानां महिषीणाञ्च गवामपि पयांसि च ।
लावतित्तिरिसर्पहिट्टिताम्रचूड़ादिविष्किराः ॥
प्रतुदाः शुकदात्यूहकपोतकटकादयः ।
उपोदिकाकाकमाची वेत्राग्रं सुनिषण्णकम् ॥
वास्तुकं कारवेल्लञ्च तण्डुलीयः प्रसारणी ।
पत्तूरो वृहत्कूष्माण्डं सर्पिः शाल्यन्नमेव च ॥
पटोलं रुचकं तैलञ्च वृद्धीकाश्चेतशर्करा ।
नवनीतं सोमवल्ली कस्तूरी सितचन्दनम् ॥
प्रियंग्वपागुरुदेवाङ्गसरलं स्नेहमर्दनम् ।
तिक्तञ्च पक्वसद्दिष्टं वातरक्तगदे नृणाम् ॥
दिवास्वप्नाग्निसन्तापव्यायामातपमैथुनम् ।
माषाः कुलत्था निष्पावाः कलायाः क्षारसेवनम् ॥
अम्लजान्नूपमांसानि विरुद्धानि दधीनि च ।
इक्षवो मूलकं मद्यं पिण्याकोऽम्लानि काञ्जिकम् ॥
कटुच गुर्व्वभिष्यन्दि लवणानि च शुक्तयः ।
इत्यपथ्यं निगदितं वातरक्तगदे नृणाम् ॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे वातरक्ताधिकारः ॥)

वातरक्तघ्नः, पुं, (वातरक्तं रोगविशेषं हन्तीति । हन+टक् ।) कुकुरदत्तः । इति शब्दचन्द्रिका ॥ कुकुरसुड़ा इति भाषा ॥

वातरक्तारिः, पुं, (वातरक्तस्य अरिर्नाशकः ।) पित्तघ्नी लता । इति शब्दचन्द्रिका ॥ गुलञ्च इति भाषा ॥

वातरङ्गः, पुं, (वातेन वायुना रङ्गो यस्य । निरन्तरचलदलत्वादस्य तथात्वम् ।) अश्वत्थः । इति शब्दरत्नावली ॥

वातरथः, पुं, (वातो वायू रथो यस्य ।) मेघः । इति त्रिकाण्डशेषः ॥ (वातो रथः प्रापको यस्येति वायुप्रापके, त्रि । यथा, भागवते । ३ । २६ । २० ।
"यथा वातरथो घ्राणमावृङ्क्ते गन्ध आशयात् ।
एवं योगरतं चेत आत्मानमविकारि यत् ॥")

वातरायणः, पुं, (वातेन वायुजनितरोगेण रायति शब्दायते इति । रै शब्दे + ल्युः ।) उन्मत्तः । नियोजनपूरुषः । काण्डम् । करपाचम् । कूटः । परसंक्रमः । इति मेदिनी । ने, ११६ ॥ सरलद्रुमः । इति शब्दरत्नावली ॥

वातरूषः, पुं, (वातेन रूष्यते भूष्यते इति । रूष + घञ् ।) वातूलः । उत्क्रोचः । शुक्रक्षयुः । इति मेदिनी । षे, ५७ ॥

वातरोगः, पुं, (वातजनितो रोगः ।) वायुव्याधिः । तत्पर्य्यायः । वातव्याधिः २ श्लेषाङ्गः ३ अनिलामयः ४ । इति राजनिर्घण्टः ॥ (यथा,
"वातरोगं निहन्त्याशु अर्हितं सापतन्त्रकम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याधौ खल्वरसोनपिण्डे ॥)

वातरोगी [न्] त्रि, (वातरोगोऽस्यास्तीति । वातरोग + इनिः ।) वातरोगयुक्तः । तत्पर्य्यायः । वातकी २ । इत्यमरः ॥ (यथा, हरीतसंहितायाम् । ८० । ११ ।
"परतोऽपि दर्शनं वातरोगिणां चन्दनागुरुप्राप्तिः ॥")

वातलिः, पुं, काष्ठलौहोभयनिर्म्मितपात्रम् । तत्पर्य्यायः । काष्ठलौही २ । इति त्रिकाण्डशेषः ॥

वातलः, पुं, (वातं लातीति । ला + कः ।) चणकः । इति शब्दचन्द्रिका ॥ वायुकारके त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अ० ।
"वातलाः शीतमधुराः सकषाया विरूक्षणाः ।
कफशोणितपित्तघ्नाश्चणकाः पुंस्त्वनाशनाः ॥")

वातलमञ्जरी, स्त्री, बाला । इति भूरिप्रयोगः ॥

वातवान् [त्] त्रि, वायुयुक्तः । वातो विद्यतेऽस्य इत्यर्थे वतुप्रत्ययेन निष्पन्नः ॥

वातवैरी [न्], पुं, (वातस्य वैरी ।) वातारिः । इति राजनिर्घण्टः ॥ वायुघ्नौ, त्रि ॥

वातव्याधिः, पुं, (वातजनितो व्याधिः ।) वातरोगः । इति राजनिर्घण्टः ॥ (यथा,
"मूलं सुमूलकं भक्षं कन्याभाननिपीडितम् ।
रजार्त्तिमन्तञ्च नरं वातव्याधिर्विनाशयेत् ॥"
इति माधवकरकृते रुग्विनिश्चये वातरोगाधिकारे श्लेष्मणि ॥)

वातश्रीर्षं, क्ली, (वातस्य श्रीर्षमिव ।) वस्तिः । इति राजनिर्घण्टः ॥

वातशोणितं, क्ली, (वातजं शोणितं दुष्टरक्तं यत्र ।) वातरक्तरोगः । इति भावप्रकाशः ॥ (अस्य सनिदानसम्प्राप्तिकं पूर्व्वरूपं लक्षणञ्च यथा,—
"विदाह्यन्नं विरुद्धञ्च तत्तत्कारकप्रदूषणम् ।
भजतां विधिहीनञ्च स्वप्नजागरमैथुनम् ॥
प्रायेण सुकुमाराणामत्यर्कमयशीलिनाम् ।
अभिघातादशुद्धेच्च वृणामहजि दूषिते ॥
वातलैः शीतलैर्वायुर्दुष्टः कुद्धो विमार्गगः ।
ताड़ग्नेनाहजा रुग्दः प्राक् तदेव प्रदूषयेत् ॥
आढ्यरोगं खुड़ं वातबलासं वातशोणितम् ।
तदाकुर्णमभिख्यञ्च पूर्व्वं पादौ प्रधावति ॥
विशेषाद्यानयानाद्धैः प्रलम्बौ तस्य लक्षणम् ।
भविष्यतः कुष्ठसमं तथा सादः श्रथाङ्गता ॥
जागुजङ्घोरुकट्यंसग्रहस्फुरणपादाङ्गसन्धिषु ।
कण्डूस्फुरणनिस्तोदभेदगौरवसुप्तताः ॥
भूत्वा भूत्वा प्रणश्यन्ति मुहुराविर्भवन्ति च ।
पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि ॥
आखोरिव विषं क्रुद्धं रक्तं देहं विधावति ।
त्वङ्मांसाश्रयसुप्तानं ततपूर्व्वं जायते ततः ॥
कालान्तरेण गम्भीरं सर्व्वान् धातूनभिद्रवत् ।
कण्डादिसंयुतोत्तापे त्वक्ताम्रश्यावलोहिता ॥
सायामा शूयदाहोष्मा गम्भीरोऽधिकपूर्व्वरुक् ।
व्यथयुर्गंधितः पाकी वायुः सन्धिमञ्जसु ॥
छिन्दन्निव चरत्यन्तर्वक्रीकुर्वंश्च वेगवान् ।

करोति खञ्जं पङ्गुं वा शरीरे सर्व्वतश्चरन्।
वातेऽधिकेऽधिकस्तत्र मूलस्थुरथतोदनम्।
शोफस्य रौक्षतनुत्वसुप्तत्वावताहृद्विद्रधय:॥
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक्।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तय:॥
रक्ते शोफोऽतिरुक्तोदस्तान्त्रिमिचिमायते।
क्षिप्यते: शूलं नेति कक्षूक्लेदसमन्वित:॥
पित्ते विदाह: सम्मोह: क्षेदो मूर्च्छामद: स-
ष्टट्।
श्लेष्मोत्थमलं रुग्गात्र: शोफपाको भृशोन्नत:।
कफेक्लेमिल्लगुरुता सुप्तिस्निग्धावशीतता:।
कण्डूमन्दा च रुग्दन्तसर्व्वलिङ्गच सङ्करे।
एकदोषानुगं साध्यं सर्व्वं याप्यं द्विदोषजम्।
त्रिदोषजं त्यजेत् स्राविं सन्धिमर्म्मोदकारि च।
रक्तमार्गं निहन्त्यासृ ग्राखासन्धिषु मारुत:।
त्रिविधाग्नेरमाचार्य्य वेदगाभिर्हरत्यसृक्।"
इति च वाभटे निदानस्थाने षोड़शेऽध्याये।
"वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत्।
अल्पाल्पं पाचयन् वायुं यथादोषं यथाबलम्।
चिकित्सितं हितं पथ्यं प्रायश्चित्तं भिषग्जितम्।
भेषजं शमनं शस्तं पर्य्यायै: स्रुतमौषधम्।"
इति च वाभटे चिकित्सितस्थाने द्वाविंशतितमे-
ऽध्याये। अन्यद्वातरक्तशब्दे ज्ञातव्यम्।७।)

वातसह:, त्रि, (वातं वातजनितरोगं सहते। सह+अच्।) अल्पवायुयुक्त:। यथा,—
"वातासही वातसहो वातुलो वातुलोऽपि च।"
इति शब्दरत्नावली।
(वायुवेगसहनशील:। यथा, महाभारते। १। १४२। ५।
"ततो वातसहा नार्य्य यत्नवत्तां पताकिनीम्।
ऊर्ध्वरेतसमां दृष्ट्वा कुन्तीमिदमुवाच च।")

वातसारथि:, पुं, (वात: सारथि: सहायो यस्य।) अग्नि:। इति केचित्।

वातस्कन्ध:, पुं, (वातस्य स्कन्ध इव।) आकाशस्य भागविशेष:। यत्र वायुर्व्वहति। इति केचित्।

वातघ्न, [न्] त्रि, (वातं हन्तीति। हन्+क्विप्।) वातघ्न:। वायुनाशकौषधम्। इति वैद्यकम्।

वाताट:, पुं, (वात इव अटति गच्छतीति। अट्+अच्।) सूर्य्यांश:। इति त्रिकाण्डशेष:।
वातण्ड:। इति शब्दरत्नावली।

वाताक:, पुं, (वातदूषितौ अकौ यस्मात्।) शुष्करोगविशेष:। तस्य लक्षणं यथा,—
"दृष्टौ दूषयेद्वायु: श्लेष्मणा यस्य संहत:।
तस्य शुष्कक्षयकरो रोगो वाताक्षसंज्ञक:।"
इति माधवकर:।

वाताद:, पुं, (वाताय वातनिवृत्तये अद्यते इति। अद्+घञ्।) फलवृक्षविशेष:। वादाम इति ख्यात:। तत्पर्य्याय:। वातवैरी २ नेत्रोपमफल: ३ वातान्न: ४। अस्य गुणा:। उष्णत्वम्। स्निग्धत्वम्। वातघ्नत्वम्। शुक्रकारित्वम्। गुरुत्वञ्च। अस्य मज्जगुणा:। मधुरत्वम्। दृष्यत्वम्। पित्तानिलापहत्वम्। स्निग्धत्वम्। उष्णत्वम्। कफकारित्वम्। रक्तपित्तविकारिणां श्रेष्ठत्वञ्च। इति भावप्रकाश:॥

वातारि:, पुं, असुरविशेष:। स च हादस्य धमनौ पत्न्यां जात:। अगस्त्येन भक्षित:। इति श्रीभागवतमतम्। कल्पान्तरे तु विप्रचित्ते: सिंहिकायां जात:। यथा,—
"सिंहिकायामथोत्पन्ना विप्रचित्तेश्चतुर्दश।
शूर: शूरव्रतश्चैव वातापी हरपो विक:।
हरकल्प: कालनाभो भौमश्च नरकस्तथा।
राहुर्ज्येष्ठश्च तेषां वै चन्द्रसूर्य्यप्रमर्द्दन:।
इत्येते सिंहिकापुत्रा देवैरपि दुरासदा:।"
इति वह्निपुराणे काश्यपीयवंश:॥
अपरञ्च।
"विप्रचित्ति: सैंहिकेयान् सिंहिकायामजीजनत्।
हिरण्यकशिपोर्यो वै भागिनेयाञ्जयोदग्र॥
बल: शूरश्च राजेन्द्रो तमो वातापिरेव च।
इल्वलो नमुचिश्चैव सूक्ष्मश्चाञ्जनकस्तथा।
नरक: कालनाभश्च वरमाञ्जस्यैव च।
कल्पवीर्य्यश्च विख्यातो दनुवंश्यविवर्द्धन:।"
इति मात्स्ये ६ अध्याय:।
(मुनिवरोऽगस्त्यस्तु एनं ब्रह्महरं भक्षितवान्। एतदृत्तान्तस्तु महाभारते वनपर्व्वणि ९६ अध्यायमारभ्य द्रष्टव्य:।)

वातापिद्विट्, [ट्] पुं, (वातापिं द्वेष्टीति। द्विष्+क्विप्।) अगस्त्यमुनि:। इति हेमचन्द्र:। २। ३६।

वातापिघ्न: पुं, (वातापिं हन्तीति। हन्+क्विप्।) अगस्त्य:। इति त्रिकाण्डशेष:।

वातापिहा [न्] पुं, (वातापिं हन्तीति। हन्+क्विप्।) अगस्त्य:। इति त्रिकाण्डशेष:।

वातामोदा, स्त्री, (वातेन प्रहृत आमोदो यस्या:।) कस्तूरी। इति शब्दमाला।

वातायनं, क्ली, (वातस्य अयनं गमनागमनमार्ग:।) गवाक्ष:। इत्यमर:। (यथा, आर्य्यासप्तशत्याम्। ५१०।
"लीलागारस्य बहि: सखीषु चरणातिथौ मयि प्रियया।
प्रकटीकृत: प्रसादो दत्ता वातायने नयनम्।")
तेन परवाधानिषेधो यथा,—
"परवार्धां न कुर्व्वीत जलवातायनादिभि:।
कारयित्वा तु कर्म्माणि कारं प्रयात्नं न वञ्चयेत्।"
इति कौर्म्मे उपविभागे १५ अध्याय:।

वातायन:, पुं, (वातस्येव अयनं गतिर्यस्य।) घोटक:। इति त्रिकाण्डशेष:।

वातायु:, पुं, (वातमयते इति। अय+वाहुलकात् उण्।) हरिण:। इत्यमर:।

वातारि:, पुं, (वातस्य वातरोगस्य अरि:।) एरण्डवृक्ष:। इति शब्दरत्नावली। (अस्य पर्य्यायो यथा,—
"युग्मपत्रक आमण्डखिनोगन्धर्व्वहस्तक:।
पत्रशून्यो वर्द्धमानो दीर्घदण्डोऽण्डदण्डक:।
वातारिस्तरुवर्य्यापि रुवूकश्च निगद्यते।१।
रक्तोऽपरो रुवूक: स्यादुरुवूको रुवस्तथा।
व्याघ्रपुच्छश्च वातारिश्चुरुत्तानपत्रक:।"२॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
घृतमञ्जरी। इति शब्दचन्द्रिका। पुत्रदात्री। गोपालिका। यवानी। भार्गी। खुही। विड़ङ्ग:। सूरण:। भल्लातक:। जतुका। इति राजनिर्घण्टे:॥

वाताली, स्त्री, (वातस्य आली यत्र।) वाट्या। इति त्रिकाण्डशेष:॥

वाताश:, पुं, (वात इव शीघ्रगोऽश्व:।) कुलीनाश्व:। तत्पर्य्याय:। हयोत्तम: २ आजि: ३ आजानेय: ४। इति त्रिकाण्डशेष:। (यथा, कथासरित्सागरे। ६६। १०४।
"तद्दिनं मां विजानीहि लक्ष्मीसेनं वरानने।
आनीतमिह वाताश्वेनाजस्याखेटनिर्गतम्।")

वातासह:, त्रि, (वातं वातजनितरोगं आसहते इति। आ+सह+अच्।) वातुल:। इति शब्दरत्नावली।

वाति:, पुं, (वाति गच्छतीति। वा+"वातेर्नित्।) उणा० ५। ६। इति अति:।) वायु:। यथा,
"वातिर्वायुर्मरुद्वात: श्वसन: पवनोऽनिल:।"
इत्यमरटीकायां भरतधृतसाहसाङ्क:।
सूर्य्य:। चन्द्र:। यथा। वातिरादित्यसोमयो:।
इति रभस:॥

वातिक:, पुं, (वातादागत:। वात+ठन्।) वायुजव्याधि:। यथा,—
"वातिको वातजो व्याधि: पैत्तिक: पित्तसम्भव:।
श्लैष्मिक: श्लेष्मसंभूत: सन्निपातिक:।"
इति राजनिर्घण्टे:॥
(क्ली, वातस्य शमनं कोपनं वा। "वातपित्तश्लेष्मभ्य: शमनकोपनयोरुपसंख्यानम्।"५। १। ३८। इत्यस्य वार्त्ति०। ठन्। वातिकरोगाक्रान्ते वाच्यवे, त्रि। यथा, महाभारते।३।२५६।३।
"अपरे तस्यवंशस्य वातिकास्तं महीपतिम्।
युधिष्ठिरस्य यज्ञेन न समो लोभ ते कृतु:।")

वातिग:, पुं, (वातिं वायुं गच्छतीति। गम्+ड:।) भण्टाकी। धातुवादिनि, त्रि। इति मेदिनी। गे, ४६॥

वातिगम:, पुं, (वातिं वायुं गमयतीति प्रापयति। गमि+अच्।) वार्त्ताकु:। इति शब्दरत्नावली॥

वातिङ्गन:, पुं, वार्त्ताकु:। इति त्रिकाण्डशेष:॥

वातीयं, क्ली, (वाताय वातनिवृत्तये हितं:। वात+छ:।) काञ्जिकम्। इति शब्दचन्द्रिका॥

वातुल:, पुं, वाट्या। इत्यमरटीकायां भरत:॥

वातुल:, त्रि, वातविकारासह:। उन्मत्त:। इत्यमरटीकायां भरत:॥

वातुलि:, स्त्री, तरुतूलिका। इति हारावली॥ वाडुड़ इति भाषा॥

वातूलः, पुं, (वातानां समूहः। "वाताद्गूलः।" ४।२।४२। इत्यस्य वार्त्तिकोक्त्या ऊलः। यद्वा, वाताः खल्वस्मिन्निति। वात+"सिध्मादिभ्यश्च।" ५।२।९७। इति लच्। "वातदन्तबलेति।" ऊङ्। यद्वा, वातानां समूहः वातं न सहते इति वा। वात+"वातात् समूढे च। वातं न सहते इति च।" ५।२।१२२। इत्यस्य वार्त्ति० ऊलच्।) वाट्या। वातासहे, त्रि। इत्यमरः। "वाट्या वातसमूहः। अत्र जनखलादिगोरथवातादिति ऊलः। वातासहो वातल्यशैत्यासहः। वाट्या इति ख्यातः। अत्र गोविकारादिना ऊलः वातूलः। वातेर्गान्तीति तुले ङ्खोकारवानपि वातुलः। वातूलो वातुलोऽपि स्यादिति द्विरूपकोषः। उन्मत्तेऽपि वातूलः।" इत्यमरटीकायां भरतः॥

वातोत्ना, स्त्री, (वातमूनयतीति। ऊन+अच्।) गोजिह्वाक्षुपः। इति राजनिर्घण्टः॥ वायुहीने, त्रि॥

वात्या, स्त्री, (वातानां समूहः। वात+"प्राग्वतिभ्यो यः।" ४।२।४८। इति यः।) वातसमूहः। यथा,—

"आवर्त्तिनी च वातानी स्यात् वात्या वातमण्डली॥"

इति त्रिकाण्डशेषः॥

(यथा, भागवते। ३।१७।५।

"ववौ वायुः सुदुस्पर्शः फेत्कारानीरयन् मुहुः। उन्मूलयन्नगपतीन् वात्यानीको रजोध्वजः॥")

वात्सर्क, क्ली, (वत्सानां समूहः। वत्स+"गोत्रोक्षोष्ट्रेति।" ४।२।३९। इति युञ्।) वत्ससमूहः। इत्यमरः। (वत्सकस्येदमिति। वत्सक+अण्। कुटजसम्बन्धिनि इत्ययसम्बन्धिनि च त्रि। यथा, सुश्रुते। ६।४०।

"नागरातिविषासप्तं पिप्पल्यो वात्सकं फलम्॥")

वात्सल्यः, पुं, (वत्सल एव। स्वार्थे ष्यञ्।) रसविशेषः। यथा,—

"वात्सल्यस्थायी तु रसो ब्रह्मन्! कौशिक! स्मृतः॥"

इति त्रिकाण्डशेषः॥

एतद्रसाधिकारी यथा,—

"ग्लानेऽब्राह्मण एव स्यात् प्रीते दासः प्रकीर्त्तितः।
प्रेयसि सुहृत् सखायो हि यशोदा वत्सले स्मृता॥
मधुरे राधिका ज्ञेया हास्ये स्यान्मधुमङ्गलः।
सखीयूथोऽद्भुते ज्ञेयो वीरे चारणगोष्ठगाः॥
करुणे वत्सट्यादिर्जटिलाद्यास्तु रौद्रके।
गोवर्द्धनेऽभिमन्युश्च भयानक उदाहृतौ॥
तपस्विन्याद्यो ज्ञेया बीभत्से परिकीर्त्तिताः।
व्रजस्था नियता ज्ञेया आलम्बनविभावकाः॥"

इत्युज्ज्वलनीलमणिः॥

(वत्सलस्य भावः। वत्सल+ष्यञ्।) वत्सलस्य भावे, क्ली। (स्नेहः। यथा, भागवते।४।६।३४।

"चरन्तं विश्वसुहृदं वात्सल्यादालोकमङ्गलम्॥")

वात्सीपुत्रः, पुं, नापितः। इति त्रिकाण्डशेषः॥

वात्स्यः, पुं, (वत्सस्य गोत्रापत्यम्। वत्स+"गर्गादिभ्यो यञ्।" ४।१।१०५। इति यञ्।) मुनिविशेषः। यथा। वात्स्यसावर्णिगोत्रयोरौर्व्वच्यवनभार्गवजामदग्न्याप्नुवत्यवराः। इत्युदाहृतत्वम्॥

वात्स्यायनः, पुं, (वत्सस्य गोत्रापत्यं युवा। वत्स+यञ्। ततो यूनि फक्।) मुनिविशेषः। तत्पर्य्यायः। मल्लनागः २ पक्षिलः ३ स्वामी ४। इति त्रिकाण्डशेषः॥ (अयं हि कामसूत्रकर्त्ता। यथा, कुट्टनीमते। ७७।

"वात्सायनमयमनघं
वात्स्यान्दूरेण दत्तकाचार्य्यान्।
गणयति मल्लयतन्त्रे
पशुतुल्यं राजपुत्रञ्च॥")

वादः, पुं, (वद्+घञ्।) यथार्थबोधेच्छोर्वाक्यम्। यथा,—

"विजिगीषोः कथा जल्पो वादस्तत्त्वविवेदिषोः।"

इति जटाधरः॥

अस्य लक्षणं यथा। प्रमाणतर्कसाधनोपालम्भः सिद्धान्তাविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः। इति गोतमसूत्रम्॥ * ॥

अपि च।

"सर्गाद्यामादिरन्तश्च मध्यश्चैवाहमर्জ্জুন!।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्॥"

इति भगवद्गीतायाम् १० अध्यायः॥

"प्रवदतां वादिनां सम्बन्धिनो वादजल्पवितण्डाख्यास्त्रिधः कथाः प्रसिद्धास्तासां मध्ये वादोऽहम्। यत्र हाभ्यामपि प्रमाणतर्कतत्त्व स्वपक्षः साध्यते परपक्षश्छलजातिनिग्रहस्थानैर्दूष्यते स जल्पो नाम। यत्र त्वेकः स्वपक्षं स्थापयति अन्यस्तु छलजातिनिग्रहस्थानैस्तत् पक्षं दूषयति न तु स्वपक्षं स्थापयति सा वितण्डा नाम कथा। तत्र जल्पवितण्डे विजिगीषमाणयोर्वादिनोः ग्लानिपरीप्सामात्रफले। वादस्तु वीतरागयोः ग्लिष्याचार्य्ययोरन्ययोर्वा तत्त्वनिरूपणफलः। अतोऽसौ श्रेष्ठत्वान्महिमूतिरित्यर्थः।" इति तट्टीकायां श्रीधरस्वामी॥ ("तत्र वादः। वादो नाम यः परस्परेण सह ग्राह्यपूर्व्वकं विषयं कथयति। स वादो द्विविधः संग्रहेण जल्पो वितण्डा च। तत्र पक्षाश्रितयोर्वचनं जल्पः। जल्पविपर्य्ययो वितण्डा।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)

वादकः, त्रि, (वादयतीति वद्+णिच्+ण्वुल्।) वाद्यकरः। (यथा, भागवते। १०।१८।१३।

"क्वचित् गृणत्सु चान्येषु गायको वादको स्वयम्।
प्रगृणंस्तुमंहाराज साधु साध्विति वादिनौ॥")

वक्ता। वदधातोः कर्त्तरि वक(ण्वुल्)प्रत्ययेन निष्पन्नः॥

वादनं, क्ली, (वद्+णिच्+ल्युट्।) वाद्यम्। (यथा, संगीतदर्पणे।११।

"वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः।
तालज्ञश्चप्रयासेन मोक्षमार्गं नियच्छति॥")

वा(बा)दरं, त्रि, (वदरात् वदराकारकार्पासफलाद्भवम्। वदर+अण्।) कार्पासनिर्म्मितवस्त्रादि। इत्यमरः। २।६।१११॥ वादरायाः कार्पासस्त्रा जातं इत्यर्थे ञ्यप्रत्ययेन निष्पन्नम्॥

वा(बा)दरः, पुं, (वदर+स्वार्थे अण्।) कार्पासवृक्षः। इति हेमचन्द्रः॥ (वदरीवृक्षः। कुलगाछ इति भाषा॥)

वादरङ्गः, पुं, अश्वत्थवृक्षः। इति त्रिकाण्डशेषः॥

वा(बा)दरा, स्त्री, (वदरवत् फलमस्यस्याः। वदर+अच्। ततः टाप्।) कार्पासवृक्षः। तत्पर्य्यायः। कार्पासी २ तूलपुष्पा ३ वदरी ४ सुभद्रान्ना ५ तुण्डिकेरी ६ कार्पासिका ७। इति शब्दरत्नावली॥ अस्याः पर्य्यायान्तरं गुणाश्च कार्पासीशब्दे द्रष्टव्याः॥

वादरायणः, पुं, (वदरायणे वदरिकाश्रमे निवसतीति। वदरायण+अण्।) वासदेवः। इति शब्दरत्नावली॥

वादरायणिः, पुं, (वादरायण एव। स्वार्थे इञ्।) वासदेवः। इति शब्दरत्नावली॥ (वादरायणस्यापत्यमिति अपत्यार्थे इञ्। शुकदेवः॥)

वादरिकः, त्रि, वदरचयनकर्त्ता। वदरं चिनोतीत्यर्थे णिकप्रत्ययेन निष्पन्नः॥

वादलं, क्ली, मधुयष्टिका। इति शब्दचन्द्रिका॥

वादवादी [न्], पुं, (वादं वदतीति। वद्+णिनिः।) जिनभेदः। तत्पर्य्यायः। आर्हतः २। इति हेमचन्द्रः॥

वादामं, क्ली, खनामख्यातफलम्। तस्य गुणाः। उष्णत्वम्। सुस्निग्धत्वम्। वातघ्नत्वम्। बलशुक्रकारित्वञ्च। इति राजवल्लभः॥

वादान्यः, त्रि, (वदान्य एव। स्वार्थे अण्।) वदान्यः। बहुप्रदः। इति भरतद्विरूपकोषः॥

वादाबः, पुं, मत्स्यभेदः। बोयालि इति भाषा। तत्पर्य्यायः। सहस्रदंष्ट्रः २। इति हेमचन्द्रः॥

वादिः, त्रि, (वादयति अन्यसुच्चारयतीति। वद्+णिच्+"वसिवपियजीति।" उणा० ४।१२४। इति इन्। यद्वा।) विद्वान्। इत्युणादिकोषः॥

वादित्रं, क्ली, (वाद्यते। वद्+णिच्+"भूवादिगृभ्यो त्रिन्।" उणा० ४।१७०। इति त्रिन्।) वाद्यम्। इत्यमरः॥ (यथा, भागवते। ३।२४।७।

"अवादयंस्तदा योषित् वादित्राणि घनावनाः॥")

वादिनोऽर्थिनश्चायते इति। जै+कः। अर्थिरक्षके, त्रि। यथा, वक्रोक्तिपञ्चाशिकायाम्।२६।

"ज्ञात्वा त्वां प्रणयवतिं नहि मया दूतेन न प्रेषितं
नेदं प्रेम्णः क्षणोदरि चितः प्रक्षो विधातुं त्वया।
किं वादित्रविचक्षणाय दयिते को वादिनश्चायते
कान्ता निर्जितशैलराजतनुत इत्यालाप्यगर्भः कटिः॥")

वादिरं, क्ली, बदरीसदृशफलवृक्षः। इति शब्दरत्नावली॥

वादिराट्, [ज्] पुं, (वादिषु वक्तृषु राजते इति। राज+क्विप्।) मञ्जुघोषः। इति त्रिकाण्डशेषः॥

वादिष्णुः, त्रि, साधुवादी। इति शब्दमाला॥

वादी, [न्] त्रि, (वदतीति। वद+णिनिः।) वक्ता। (यथा, मनुः। ७। ६१।

"न च हन्यात् स्थलारूढं न क्लीवं न कृताञ्जलिम्।
न सुप्तं न विसन्नाहं न नग्नं न निरायुधम्॥")

अर्थी। विवादकर्त्ता। फरियादी इति पारस्यभाषा॥ यथा, सभापर्वणि कर्मसमये कात्यायनः।

"अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिनः।
स रक्षितो दिनस्यान्ते दद्याद्भृत्याय वेतनम्॥"

वादिनौ भाषावादिनः उत्तरवादिनश्च॥ * ॥

स्वयं विवादाग्रकर्त्तौ प्रतिनिधिमाह नारदः।

"अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा।
यो यस्यार्थे विवदते तयोर्जयपराजयौ॥"

तयोर्व्यादिप्रतिवादिनोः। कात्यायनः।

"मनुष्यमारणे क्षेये परदाराभिमर्षणे।
अभक्ष्यभक्षणे चैव कन्याहरणदूषणे॥
पारुष्ये कूटकरणे नृपद्रोहे तथैव च।
प्रतिवादी न दातव्यः कर्त्ता तु विवदेत् स्वयम्॥"

भ्रात्रादीतरस्य पक्षस्थितस्य दण्डनीयत्वमाह नारदः।

"यो न भ्राता पिता वापि न पुत्रो न नियोजितः।
परार्थेवादी दण्ड्यः स्यात् व्यवहारेषु विद्ववान्॥"

नारदः।

"पूर्ब्बवादं परित्यज्य योऽन्यमालम्बते पुनः।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः॥"

प्रत्यर्थी यदि कञ्चित् कालं प्रार्थयते स लभते। अर्थी तु कालं प्रार्थयन् अर्थित्वमेव हन्यादिति तेन कालो न प्रार्थनीयः। तदाह।

"प्रत्यर्थी लभते कालं चाहं सप्ताहमेव च।
अर्थी तु प्रार्थयन् कालं तत्क्षणादेव हीयते॥"

क्वचित् प्रत्यर्थी कालं न लभते। याज्ञवल्क्यः।

"साहसस्तेयपारुष्यगोऽभिशापान्यवे स्त्रियाम्।
विवादयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृतः॥"

अथ भाषापादः। तत्र भाषास्वरूपमाहतुः कात्यायनदक्षौ।

"प्रतिज्ञादोषनिर्मुक्तं सार्थं सत्कारसान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिकारकैर्मुक्तो विरोधिप्रतिरोधकः॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्ब्बवादिना।
दद्यात्तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम्॥"

नारदेनापि।

"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
तद्धानौ हीयते वादी तरंस्तूत्तरो भवेत्॥"

तच्छोधनमाह दक्षः।

"न्यूनाधिकं पूर्ब्बपक्षं तावद्वादी विशोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"

इति व्यवहारतत्त्वम्॥

वाद्यं, क्ली, (वद्+णिच्+यत्।) वादयन्ति ध्वनयन्ति यत्। वाद्यना इति भाषा। तत्पर्य्यायः। वादित्रम् २ आतोद्यम् ३। तच्चतुर्विधं यथा,

"ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्।
वंशादिकन्तु सुषिरं कांस्यतालादिकं घनम्॥"

इत्यमरः॥

"इदं ततादि चतुर्विधं चतुःप्रकारं वाद्यादिशब्दवाच्यम्।

'इदं चतुर्विधं वाद्यं वादित्रादिदिनामकम्।'

वाद्यमितिसमस्तं प्रथमान्तं विशेष्यपदं इति कलिङ्गादयः। फलतो न विशेष्यः।" इति तट्टीकायां भरतः॥ * ॥

अथ वाद्यानि।

"तालेन राजते गीतं तालो वादित्रसम्भवः।
गरीयस्तेन वादित्रं तच्चतुर्विधमुच्यते॥
ततं सुषिरमानद्धं घनमित्यं चतुर्विधम्।
ततं तन्त्रीगतं वाद्यं वंशाद्यं सुषिरं तथा॥
चर्म्मावनद्धमानद्धं घनं तालादिकं मतम्॥"*॥

तत्र ततं यथा,—

"अलाबणी ब्रह्मवीणा किन्नरी लघुकिन्नरी।
विपञ्ची वल्लकी व्येष्टा चित्रा ज्येष्ठवती जया॥
हस्तिका कुब्जिका कूर्म्मी शारङ्गी परिवादिनी।
त्रिशवी शतचन्द्री च नकुलोष्ठी च टंकवी॥
औडुम्बरी पिनाकी च निबन्धः शुष्कलस्तथा।
गदावारणहस्तश्च रुद्रोऽथ शरमण्डलः।
कपिलासो मधुस्यन्दी घोणेत्यादि ततं भवेत्॥"

अलाबणी यथा,—

"कनिष्ठिका परिधर्ह्यिमध्यच्छिद्रेण संयुतः।
दण्डयष्टिमितो दक्षः खादिरो वैणवोऽथवा॥
अधःकरभवान्तर्हे कूर्चावल्याभिशोभितः।
नवाङ्गुलादधश्छिद्रोपरि चन्द्रार्द्धसन्निभाम्॥
निवेश्य तुम्बिकां भद्रालाबुखण्डं निवेशयेत्।
द्वादशाङ्गुलविस्तारं दृढपक्वं मनोहरम्॥
तुम्बिकावेधमध्येन दण्डच्छिद्रे तु निर्म्मिताम्।
अलाबुमध्यगां डोरीं कृत्वा खल्वान्तु काष्ठिकाम्॥

तथा संवेष्ट्य तन्मध्ये काष्ठिकां भ्रामयेत्ततः।
यथा स्यान्निश्चलालाबुर्ब्बन्धश्च करभोपरि॥
पक्षाङ्गुलिषु संत्यज्यालाबुं खल्वाच्च बन्धयेत्।
केशाग्रनिर्म्मिता षष्टमयी सूत्रकृताथवा॥
समा सूक्ष्मा दृढा तत्र तन्त्री देया विचक्षणैः।
एतल्लक्षणसंयोग्यालाबणी प्रकीर्त्तिता॥
विज्ञेना न समुपेतं तुम्बं निःक्षिप्य वक्षसि।
मध्यमाङ्गुलिकाभ्याञ्च वाद्या दक्षिणपाणिना॥
तारे मन्द्रे च घोषे च विस्थाने विन्यरिष्यते।
तुम्बीमूलं समुत्पल्य वामाङ्गुष्ठेन धारयेत्॥
ततस्तामिस्तु सर्व्वाभिः स्वरयुक्तिर्विधीयते।
त्रिस्वरो दक्षिणः पाणिर्वामश्चैव चतुःस्वरः॥
अलाबण्यां स्थिता ज्ञेयाः सप्त षड्जादयः स्वराः॥
रागयुक्तिर्यथा रागे भवेत् षड्जादिभेदतः॥
अंशन्यासविभेदाच्च तथात्रापि विधीयते।
इयमलाबणी प्रोक्ता मनःश्रवणरञ्जनी॥
प्रत्यक्षा सारदा देवी वीणारूपेण संस्थिता॥"

इत्यलाबणी॥ अन्येषां लक्षणं विस्तरभयान्नोक्तम्॥ * ॥ सुषिरं यथा,—

"वंशोऽथ पारीमधुरीतित्तिरीशृङ्गकाहलाः।
तोड़हीसुरलीवृक्षाग्रङ्गिकास्वरनाभयः॥
शृङ्गं कापालिकं वंशश्चर्म्मवंशस्तथापरः।
एते सुषिरभेदास्तु कथिताः पूर्ब्बसूरिभिः॥
वर्त्तुलः सरलश्चैकपर्व्वदोषविवर्ज्जितः।
वैणवः खादिरो वापि रक्तचन्दनजोऽथवा॥
श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽपि वा।
राजतस्ताम्रजो वापि लौहजस्स्फाटिकोऽथवा॥
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः।
शिल्पविद्याग्रबीजेन वंशः कार्य्यो मनोहरः॥
वंशेनैव मतोऽपीति मतङ्गमुनिनोदितम्।
ततोऽन्येऽपि तदाकारा वंशाः स्युः प्रकीर्त्तिताः॥
तत्र लक्षा शिरोदेशादधो द्विमितमङ्गुलम्।
फुत्कारतारन्ध्रं कुर्व्वीत मितमङ्गुलिपर्व्वणा॥
पक्षाङ्गुलानि संत्यज्य तावन्त्यङ्गानि कारयेत्।
कुर्य्यात्तथान्यरन्ध्राणि सप्तसंख्यानि कौशलात्॥
बदरीबीजतुल्यानि संत्यज्यार्द्धाङ्गुलम्।
प्रान्तयोर्व्वेधनं कार्य्यं खरार्द्धेनादहेत्तवे॥
शिक्थकेन कला देया तेन सुस्वरता भवेत्।
पक्षाङ्गुलोऽयं वंशः स्यादेकैकाङ्गुलिवर्द्धितः॥
षड़ङ्गुलानि नाना स्युरयावदष्टादशाङ्गुलम्।
फुत्कारतारन्ध्रस्य यावदङ्गुलिमन्तरम्॥
तदेव नाम वंशस्य वांशिकैः परिकीर्त्यते।
एकाङ्गुलो द्व्यङ्गुलश्च त्र्यङ्गुलश्चतुरङ्गुलः।
अतितारतरत्वेन वांशिकैः समुपेक्षितः॥
त्रयोदशाङ्गुलो वीणापरः।
निन्दितो वंशतत्त्वज्ञैस्तथा सप्तदशाङ्गुलः॥
महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा।
चत्वार उत्तमा वंशा मतङ्गमुनिसम्मताः॥
दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः।
द्वादशाङ्गुलमानस्तु विजयः परिकीर्त्तितः॥
चतुर्दशाङ्गुलमितो जय इत्यभिधीयते।
ब्रह्मा रुद्रो रविर्विष्णुः क्रमादत्र व्यवस्थिताः॥
नैर्विद्यं प्रौढ़ता चापि सुस्वरत्वञ्च शीघ्रता।
माधुर्य्यमिति पञ्चामी फुत्कृतेषु गुणाः स्मृताः॥
शीत्कारबहुलः स्त्रीणो विस्वरः स्फुटतो लघुः।
अमधुरश्च विज्ञेयः षड्दोषाः फुत्कृते क्रमात्॥
इति प्रयोगबाहुल्यमात्रता गीतवादने।
एभिर्दोषैर्युतोऽसौ च निन्दितो वंशिको मतः॥
स्थानकादिक्रियाभिज्ञो गमकाढ्यः स्फुटाक्षरः।
शीघ्रहस्तः कलाभिज्ञो वांशिको रक्त उच्यते॥
प्रसक्तिर्वेणुसृक्किश्च युक्तिश्चेत्यङ्गुलेर्गुणाः।
सुस्थानत्वं सुस्वरत्वं अङ्गुलीचालनक्रिया॥
समस्तगमकज्ञानं रागरागाङ्गवेदिता।
क्रियाभाषाविभाषासु दक्षता गीतवादने॥
स्वस्थाने चापि दुःस्थाने नादनिर्म्माणकौशलम्।
गातृणां स्थानदार्ढ्यं तद्दोषाच्छादनं तथा॥

वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः ।"
इति वंशः ॥

काहला स्त्री निषङ्गः । तोड़ही सुरली तुक्का इत्येते च स्त्रियां सप्तस्वराणां नाभिरिव स्वरनाभिः स्त्रियां वर्तते । इतरेषां विस्तरभयान्नोक्तम् । * । आनद्धं यथा,—

"आनद्धे मर्दलः श्रेयान् इत्युक्तं भरतादिभिः ।"
अपि च ।

"सुरजपटहढक्का विम्बकी दर्परवाद्यं
प्रणवघनसरुज्झा लावणाङ्गत्रिवल्यः ।
करटकमठभेरी स्यात् कुडुक्का हुड़क्का
झनसमुरलि झल्ली ढक्कली दौण्डिशाना ।
डमरुटसुकिमड्डुः कुल्लरीझल्लरीनामा
रणमभिघटवाद्यं दुन्दुभी च रणच्च ।
क्वचिदपि टुटुकी स्यात् दर्दुरं चाप्युपाङ्गं
प्रकटितमनवद्यं वाद्यमित्थं जगत्याम् ।
त्रिपुरमथनकर्तुस्ताण्डवे तत्प्रयोगे
ततमखमुषिरचानद्धमित्थं घनच्च । * ।

मर्दलः खादिरः श्रेष्ठो हीनः स्यादन्यदारुजः ।
रक्तचन्दनजो वाद्यो गभीरध्वनिरुच्यते ।
सार्द्धहस्तप्रमाणन्तु दैर्घ्यमस्य विधीयते ।
त्रयोदशाङ्गुलं वाममथवा द्वादशाङ्गुलम् ।
दक्षिणच्च भवेद्धीनमेकेनार्द्धाङ्गुलेन वा ।
करणानद्धवदनो मध्ये चैव पृथुर्भवेत् ।
षण्णाडीयो भवेत् वस्त्रस्तस्मै करणं मतम् ।
स्तुतिकानिर्म्मितश्चैव स्तदङ्गः परिकीर्त्तितः ।
पातयेत् खरलिं वाद्यं मादनार्थञ्च मर्दले ।
विभूतिर्गैरिकं भक्तं कैङ्कुकेन च सम्मतम् ।
यद्वा चिपीटकं देयं जीवनीसत्त्वमिश्रितम् ।
सर्व्वमेकत्र पिष्ट्वालेपः खरलिरुच्यते ।
वामास्ये पूरिकां कृत्वा लेपं दद्याच्च दक्षिणे ।
एवं मर्दलकः प्रोक्तः सर्व्ववाद्योत्तमो मतः ।
अस्य संयोगमासाद्य सर्व्वे वाद्याश्च शोभते ।
एतदङ्गे बीजकाष्ठे दलमद्धाङ्गुलं विदुः ।*।
तधिधोतेमिति ज्ञेयाः पाढ़वर्णा स्तदङ्गजाः ।
थों दं टें धिक्कटस्तद्वी तां दं दं धोगं धिधि ।
खर्भ भिं नं गटं दं था कूटपाढ़ा मता अमी ।
तथिं थों टें तक्क धी दीं दं दं धिग् वां ततं
तधि ।
तक्क तं धं धिर्दो तधि पाढ़खड्के त्वयं क्रमः ।*।
तथा च यतिमाने पाढ़खड्कः । द्रगतथेनां द्रगतथेनां धो धो धिक ताधिका थोनां थोनां तक्क तता धिका थोता द्रगत ताधि धि धिधिकतता कड़ना थोधिक थोनां धोता द्रगतता द्रगतता द्रगतता धि । इति यतिमानपाढ़खड्कः । * ।

"यतिरोढ़ाप्यवच्छेदो गजरो रूपकं ध्रुवम् ।
गलपः सारिगोत्थौ च नादश्च कथितं तथा ।
प्रहरणं छन्दनञ्च प्रवन्धा द्वादश स्मृताः ।"
यथा दं धात इत्येकताल्यां यतिः ।* ।

ओड़वाद्यं यथा । दां तथो तधिक तधिक दं धा दं धा धोधि धोधि तत्त तत्त धवि धवि दिग्धां दिग्धां टटुनकि टटुनकि तदटक्क तदटक्क खवटक्क खवटक्क तगिनगि तगिनगि दां दां दं दं दीं दीं दं ता तथा । इत्योड़वाद्यम् । * ।

अवच्छेदवाद्यं यथा । दं धातः दं धातः धिक्कि धिक्कि दिग्गं दं धातः । इत्यवच्छेदवाद्यम् ।*।

गजरवाद्यं यथा । थोकटे च नेञ्च टें डें गधो गधोङ्क टेङ्क योगतकि धिक्तकि धिक टेङ्गन धि धि कटतक थोक तधि कटतक्क कतथो गतङ्गौम् । इत्येकतालां गजरः । * । रूपकवाद्यं यथा । तक धिक तक धिक्क धवितकि धवितक्कि धिक्क दं धातः । इति रूपकवाद्यम् ।

ध्रुवकवाद्यं यथा । तक्क तक्कट धिक्क धिक्कट । इति निसारुतालेे ध्रुवकः । * । गलपो यथा । तधिद्धि धिकतक तधिगल गं धा धा दें तथा टेञ्चन । इत्येकतालां गलपः ।*। सारिगोत्थौ यथा । थोङ्क टेञ्च तक्क धिक्क तकाधक तकथो हटङ्गन हटङ्गन योगककथोः । इति प्रथमखण्डः । * । टेञ्चखोः धिखोहः टेञ्च टेञ्च दक्क तगदक्क धिक्क तदिदक्क दं गदं गखो गखोक तक तक धिकत धिकत धोटेञ्च धोटेञ्च घटेगल खोग गल खोग खोहट गें टगें खोहटञ्च इत्यस्य छन्दनम् । इति सारिगोत्थौ । * ।

नादो यथा,—

"दांकारत्रितयं पूर्व्वं दां धिगिति ततस्त्रयम् ।
दां दां धिक्कत्रयं यत्र इति नादः शुभप्रियः ।"
इति नादः ।

"हतं मानसमारब्धं शुद्धं कूटविनिर्म्मितम् ।
सप्तषण्मयं वाद्यं करिभं तदिहोच्यते ।"
हतमानद्धात् प्रतितालेे यथा । तत्त तत्त तक्कि तक्कि दिदं धिगनखो धिगनखो धिक्क धिक धिक्क धिक्क धिक नगि नगमि थो थो धि धि धिः दां दां धिक्क थो थो थो इत्योह नखिथो नखिथो थोह थोह डेटि डेटि थोह थोह तटि तटि तटुक गीं गीं धगि धगि तत तधे तधे तत तगि डीणडी थोग थोग थों थोग गथो गथो तत्तात ।

"इति सप्तपदान्याहुः कथितं वाद्यपण्डितैः ।
प्रतितालेन तालेन पादवर्णसमासतः ।
गन्धर्व्वपतिना पूर्व्वमुर्व्वीलास्यनर्त्तने ।
सुधर्म्मारङ्गनार्थञ्च करीभं प्रकटीकृतम् ।"
प्रहरणं यथा । थोगक्का तद्धिकाधा गकटग गों दं थोग दिद्धिक धिक्क धिकटेञ्च । इत्येकतालां प्रहरणम् ।

"वाद्यं विमुच्यते येन छन्दनं तन्निगद्यते ।"
यथा । तद्धिथो दिग्धटेञ्च तग्नः । इति छन्दनम् ।

"कलासी विकलाश्च ढाकली चार्द्धढाकली ।
जोलाटा कलिका चैव गोमुखी सुरजस्तथा ।"
अवाद्यजवाद्यं स्वेच्छवाद्यम् । मर्दलः त्रयोदशाङ्गुलवामसुखो द्वादशाङ्गुलदक्षिणमुखः । सुरजस्तदर्द्धाङ्गुलवामसुखः सप्तदशाङ्गुलदक्षिणमुखः । मर्दलसुरजयोरयं भेदः । * । घनं यथा,—

"अनुरक्तं विरक्तञ्च द्विविधं घनवाद्यकम् ।
गीतानुगमनुरक्तं विरक्तं तालसंश्रयम् ।
करतालः कांस्यवलो जयघण्टोऽथ शुक्तिका ।
कत्रिका पटवाद्यश्च मड्डातोद्यश्च घर्घरम् ।
झञ्झातालश्च मञ्जीरकर्त्तर्य्युडुर इत्यपि ।
द्वादशैते मुनीन्द्रैश्च कथिता घनसंज्ञकाः ॥
त्रयोदशाङ्गुलव्यासौ शुद्धकांस्यविनिर्म्मितौ ।
मध्यसुखौ स्त्रनाकारौ तन्मध्ये रज्जुगुम्फितौ ।
पञ्चिमीपञ्चसङ्ख्यौ कराभ्यां रज्जुयन्त्रितौ ।
करतालाबुभौ वाद्यौ पाढ़े झनटकैरिति ।
यद्वा त्रयोदशव्यवयामं वक्त्रयवोन्नितम् ।
यवपञ्चकगम्भीरं मध्ये च यवसप्तकम् ।
विस्तृतं वर्त्तुलं निम्नं यवत्रयमितं ततः ।
पृष्ठतो मध्यदेशे च शिवलिङ्गसमाकृतिम् ।
अत्यच्छपेष्टौनिर्दग्धशुद्धकांस्यविनिर्म्मितम् ।
संरक्ताङ्गुलिसुस्निग्धसुदीर्घमधुरध्वनिम् ।
घना निसा विसंरक्तं दृढं शुष्कं मनोहरम् ।
काश्मीरादिसमुद्भूतं तालमाहुर्मनीषिणः ।
सुनादं दक्षिणं तालं ततो हीनञ्च वामकम् ।
कुर्व्वीत तद्वयं कार्य्यं तर्ज्जन्यङ्गुष्ठयोर्गतैः ।
वामहस्तस्थतालस्य मध्यमं सन्निनादितम् ।
तिर्य्यग्दक्षिणतालस्य परिघंशेन ताडयेत् ।
तालादौ वादयेच्चैव मृतदीर्घलघुद्वुते ।"
इति करतालविशेषः । कर्त्तरीघनविशेषः । उड्डुरश्च घनविशेषोऽन्तरेघान्तपुंलिङ्गः । अन्येषां लक्षणं विस्तरभयान्नोक्तम् । * ।

"रुक्मिण्याः सत्यभामायाः कालिन्दीमित्रविन्दयोः ।
जाम्बवत्या नाग्नजित्या लक्ष्मणाभद्रयोरपि ।
लक्षणस्याष्टमहिषीणां पुरोद्वाहमहोत्सवे ।
ततं शुषिरमानद्धं घनञ्च युगपज्जगुः ।
अवाद्यन्नसंख्यातमिति पौराणिकी स्मृतिः ।
ततं वाद्यन्तु देवानां गन्धर्व्वाणाञ्च शौषिरम् ।
आनद्धं राक्षसानान्तु किन्नराणां घनं विदुः ।
निजावतारे गोविन्दः सर्व्वमेवाजयत् स्वितौ ।
यावन्ति वाद्यभाण्डानि रामरावणयोर्युधि ।
तावन्तो नाभवन् सैन्याः कुरुपाण्डवसङ्गरे ।"
किञ्च ।

"जिलिम्य झल्लम्यनतोमरेण
रणे सुरारेर्मथनात् सुरेण ।
अभूतताडैरपि सिंहनादैः
सा पञ्चशब्दैति कथादवादः ॥

युद्धे सैन्यानां योऽहङ्काररवः स सिंहनादः । ततादिभिरेभिश्चतुर्भिर्वाद्यैश्चन्नां सिंहनादैश्च पञ्चशब्दोवाद्यमभूत् । सिंहनादेन सह वाद्यं पञ्चविधं भवतीत्यर्थः । इति सङ्गीतदामोदरः ॥

विष्णुधर्म्मे वाद्यकरणफलं यथा,—

"अन्योपहारैर्विविधैर्घृतक्षीराभिषेचनैः ।
गीतवादित्रशब्दाद्यैस्तोषयस्वाच्युतं नृप ।
पुण्यरात्रिषु गोविन्दं गीतवाद्यरवोज्झितैः ।
भूपजागरणैर्भक्त्या तोषयाच्युतमव्ययम् ।
येषां न वित्तं तैर्भक्त्या मार्জ্জनाद्युपसेवनैः ।

तोषितो भगवान् विष्णुर्ददात्यभिमतं फलम् ॥
देवकर्मैव सत्कार्यं तेषां संस्कृतिसंस्तवैः ।
तोषितोऽभिमतान् कामान् प्रयच्छति जनार्दनः ॥"

इति वह्निपुराणे क्रियायोगनामाध्यायः ॥

देवप्रतिष्ठायां वाद्यविधिर्यथा,—

"ततः प्रासादे स्थाप्योऽहं गीतवाद्यैमङ्गलैः ।
सर्वमन्त्रांस्तनो एक्ष्य दमं मन्त्रमुदाहरेत् ॥"

इति वाराहे शैलाधीस्थापनाध्यायः ॥

देवतावियेषयज्ञे वाद्यविशेषनिषेधो यथा ।
योगिनीतन्त्रे ।

"शिवागारे भाङ्गकञ्च सूर्य्यागारे च गुडकम् ।
दुर्गागारे वंशीवाद्यं माधुरीञ्च न वादयेत् ॥"

भाङ्गकं कांस्यनिर्म्मितकरतालम् । मत्स्यपुराणे ॥

"गीतवाद्यनिर्घोषं देवस्थाने च कारयेत् ।
विरिञ्चेश यज्ञे टक्कां घण्टां लक्ष्मीयज्ञे त्यजेत् ॥
घण्टा भवेद्यज्ञस्य सर्ववाद्यमयी यतः ॥"

इति तिथ्यादितत्त्वम् ॥

वाद्यभाण्डं, क्ली, (वाद्यं वादनीयं भाण्डमिति ।) वादनीयपात्रम् । सुरजादि । यथा,—

"पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले ।"

इत्यमरश्लोकटीकायां भरतः ॥

अपि च ।

"वाद्यभाण्डमिदं देवि ! नानास्वरसमन्वितम् ।
भेरीपटहसंयुक्तं मया भक्त्या निवेदितम् ॥"

इति दक्षिणभिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतिः ॥

वाध, ऋ ङ विहतौ । इति कविकल्पद्रुमः । ऋ, अवबाधतं । ङ, बाधते । इति दुर्गादासः ॥

वाधुक्यं, क्ली, विवाहः । इति त्रिकाण्डशेषः ॥

वाधूः, पुं, वह्निवम् । इति शब्दरत्नावली ॥

वाध्रीणसः, पुं, वाद्रीणसः । खड्गी । इति हलायुधः ॥

वानं, त्रि, क्तौ वै शोषणे + क्तः । शोषितसंस्कृति नत्वम् ।) शुष्कफलम् । इत्यमरः । शुष्कम् । इति मेदिनी । ने, २० । (वनस्येदमिति । वन + अण् ।) वनसम्बन्धी ॥

वानं, क्ली, (वा + ल्युट् ।) सूतिकर्म्म । कटः । गतिः । इति मेदिनी । ने, २० । जलसंभृतवातोर्म्मिः । सुरङ्गा । सौरभः । इति हेमचन्द्रः ॥ गोचीरवं तक्रचीरम् । इति राजनिर्घण्टः ॥

वानप्रस्थः, पुं, (वनप्रस्थे जातः । अण् ।) मधूकवृक्षः । (अस्य पर्य्यायो यथा,—

"मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुश्रेणी जलजेष्ठमधूलकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पलाशवृक्षः । (अस्य पर्य्यायो यथा,—

"वानपोथः पलाशः स्यादानप्रस्थश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोत्करः ॥"

इति वैद्यकरत्नमालायाम् ॥)

तृतीयाश्रमः । इति विश्वमेदिन्यौ । ॥ । पुत्रसुत्पाद्य वनवासं कृत्वा अकृष्टपच्यफलादि भक्षयित्वा ईश्वराराधनं करोति यः स वानप्रस्थः । स च द्विविधः । अग्न्युक्तः दग्धोदूखलिकश्च । इति श्रीभागवतमतम् ॥ तस्य धर्म्मो यथा,—

"भूमौ मूलफलाग्निञ्च स्वाध्यायस्तप एव च ।
संविभागो यथान्यायं धर्म्मोऽयं वनवासिनः ॥
तप्यस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्यायसो मतः ॥
तपसा कर्शितोऽत्यर्थं वस्तु ध्यानपरो भवेत् ।
सन्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥"

इति गारुडे ६६ अध्यायः ॥

अपि च ।

याज्ञवल्क्य उवाच ।

"वानप्रस्थाश्रमं वक्ष्ये तत् शृणुध्वं महर्षयः ।
पुत्रेषु भार्य्यां निःक्षिप्य वनं गच्छेत् सहैव वा ॥
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनः क्षमी ।
अकालकृष्टैर्नाग्नींश्च पितृदेवातिथीन्यजेत् ॥
भक्त्यांस्तु तर्पयेत् श्मश्रुजटालोमभृदात्मवान् ।
दान्तस्त्रिषवणस्नायी निहुतश्च प्रतिग्रहात् ॥
स्वाध्यायवान् ध्यानशीलः सर्व्वभूतहिते रतः ।
अष्टौ ग्रासान् वसां वा कुर्य्याद्वानप्रस्थधर्म्मतः ॥
क्षत्रं त्यजेदाश्रयुजे नयेत् कालं व्रतादिना ।
पक्षे मासे तु वाग्नीयाद्दग्धोदूखलिको भवेत् ॥
चान्द्रायणी क्षपेद्भूमौ कर्म्म कुर्य्यात् फलादिना ।
ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः ।
आर्द्रवासास्तु हेमन्ते योगाभ्यासाद्दिनं नयेत् ॥"

इति गारुडे १०२ अध्यायः ॥

पुनरपि ।

"जटिलमग्निहोत्रिलं भूशय्याजिनधारणम् ।
वने वासः पयो मूलं नीवारफलवृत्तिता ॥
प्रतिषिद्धान्निवृत्तिश्च चिह्नानं व्रतधारिता ।
देवतातिथिपूजा च धर्म्मोऽयं वनवासिनः ॥"

इति गारुडे २१५ अध्यायः ॥

अन्यच्च ।

"वानप्रस्थाश्रमं धर्म्मं ते वक्ष्यामोऽवधार्य्यताम् ।
अपत्यसन्ततिं दृष्ट्वा प्राप्तो देहस्य चायतिम् ॥
वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणम् ।
तत्रारण्योपभोगेन तपोभिश्चात्मदर्शनम् ।
भूमौ शय्या ब्रह्मचर्य्यं पितृदेवातिथिक्रिया ॥
होमस्त्रिषवणस्नानं जटावल्कलधारणम् ।
वन्यक्लेहनिषेवित्वं वानप्रस्थविधिस्त्वयम् ॥"

इति वामने ९४ अध्यायः ॥

अपरञ्च ।

व्यास उवाच ।

"एवं गृहाश्रमे स्थित्वा द्वितीयं भागमायुषः ।
वानप्रस्थाश्रमं गच्छेत् सदारः साग्निरेव च ॥
निःक्षिप्य भार्य्यां पुत्रेषु गच्छेद्वनमथापि वा ।
दृष्ट्वापत्यस्य चापत्यं जर्जरीकृतविग्रहः ॥
शुक्लपक्षस्य पूर्व्वाह्णे प्रशस्ते चोत्तरायणे ।
गत्वाप्यरण्यनियमांस्तपः कुर्य्यात् समाहितः ॥
फलमूलानि पत्राणि नित्यमाहारमाहरेत् ।
यदाहारो भवेत्तेन पूजयेत् पितृदेवताः ॥
पूजयेदतिथिं नित्यं स्नात्वा चाभ्यर्चयेत् सुरान् ।
यामादागीय वाग्नीयादग्नौ यासान् समाहितः ॥
जटाश्च बिभृयान्नित्यं नखरोमाणि नो त्यजेत् ।
स्वाध्यायं सर्व्वदा कुर्य्यात् नियच्छेद्वाचमन्यतः ॥
अग्निहोत्रञ्च जुहुयात् पञ्चयज्ञं समाचरेत् ।
मुख्यैर्विधिवदेर्मेध्यैः प्राक्सूलफलैस्तु ॥
चीरवासा भवेन्नित्यं स्नायात् त्रिषवणं शुचिः ।
सर्व्वभूतानुकम्पी स्यात् प्रतिग्रहविवर्जितः ॥
दर्शेन पौर्णमासेन यजेत नियतं द्विजः ।
पक्षेष्टया श्रावणे चैव चातुर्म्मास्यानि चाहरेत् ॥
उत्तरायणञ्च क्रमशो दक्षस्यायनमेव च ।
वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहरेत् ॥
पुरोडाशं गुरूंश्चैव विधिवन्निर्व्वपेत् पृथक् ।
देवताभ्यश्च तद्बुद्ध्या वन्यं मेध्यतरं हविः ॥
शेषं समुपभुञ्जीत लवणञ्च स्वयं कृतम् ।
वर्ज्जयेन्मधुमांसादि भौमानि करकाणि च ॥
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च ।
न कालकृष्टमश्नीयात् उत्सृष्टमपि केनचित् ॥
न ग्रामजातान्यार्त्तो वा पुष्पाणि च फलानि च ।
आवसथ्ये चैव विधिना वह्निं परिचरेत् सदा ॥
न हिंस्यात् सर्व्वभूतानि निर्हन्दो निर्भयो भवेत् ।
न नक्तं किञ्चिदश्नीयात् रात्रौ ध्यानपरो भवेत् ॥
जितेन्द्रियो जितक्रोधस्तत्त्वज्ञानविचिन्तकः ।
ब्रह्मचारी भवेन्नित्यं न पत्नीमपि संस्पृशेत् ॥
यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् ।
तद्व्रतं तस्य लुप्येत प्रायश्चित्ती भवेत् द्विजः ॥
तत्र यो जायते गर्भो न संस्पृश्यो द्विजातिभिः ।
न हि वेदाधिकारोऽस्य तत्त्वमप्येवमेव हि ॥
अधः शयीत सततं सावित्रीजपतत्परः ।
शरण्यः सर्व्वभूतानां संविभागपरः सदा ॥
परिवादं मृषावादं निद्रालस्यञ्च वर्ज्जयेत् ।
एकाग्निरनिकेतः स्यात् प्रोक्षितां भूमिमाश्रयेत् ॥
मृगैः सह चरेद्दासं तैः सहैव च संवसेत् ।
शिलायां शर्करायां वा शयीत सुसमाहितः ॥
सद्यः प्रक्षालको वा स्यात् मासमक्षिकोऽपि वा ।
षष्ठाष्टमिचयो वा स्यात् समानिचय एव वा ॥
नक्तभक्तं समश्नीयात् दिवा वाप्तुल भुक्तिनः ।
चतुःकालिकको वा स्यात् स्याद्वा अष्टमकालिकः ॥
चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्ज्जयेत् ।
पक्षे पक्षे समश्नीयात् यवागूं कथितां तथा ॥
पुष्पमूलफलैर्वापि केवलैर्व्वर्त्तयेत् सदा ।
स्वाभाविकैः स्वयं शीर्णैर्श्वेखानसमते स्थितः ॥
भूमौ वा परिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम् ।
स्थानासनाभ्यां विहरेत् न क्वचिद्वैर्य्यमुत्सृजेत् ॥
ग्रीष्मे पञ्चतपाश्च स्याद्वर्षास्वभ्रावकाशिकः ।
आर्द्रवासास्तु हेमन्ते क्रमशो वर्द्धयंस्तपः ॥
उपसृज्य त्रिषवणं पितृदेवांश्च तर्पयेत् ।
एकपादेन तिष्ठेत मरीचीर्वा पिबेत् सदा ॥
पञ्चाग्निधूमपो वा स्याद्वायुभक्षः सोमपोऽथवा ।
पयः पिबेत् शुक्लपक्षे कृष्णपक्षे तु गोमयम् ॥
ग्रीष्मे पञ्चाग्नयो वा स्युः कृच्छ्रैर्वा वर्त्तयेत्सदा ।
योगाभ्यासरतो वा स्याद्दान्तो ब्रह्मचारी भवेत् सदा ॥

अथर्वशिरसोपेतो वेदान्ताभ्यासतत्परः ।
यमान् सेवेत सततं नियमांश्चाप्यतन्द्रितः ॥
कृष्णाजिनी सोत्तरीयः मुञ्जयज्ञोपवीतवान् ।
अथवाक्षीन् समारोप्य स्वात्मनि ध्यानतत्परः ॥
अनग्निरनिकेतः स्यान्मुनिर्मोक्षपरो भवेत् ।
तापसेष्वव विप्रेषु याचिकं भैक्षमाहरेत् ॥
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ।
ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन् ॥
प्रतिगृह्य पुटेनैव पाणिना सकलेन वा ।
विधिवाद्योपनिषद आत्मसंस्थिद्ये जपेत् ॥
विद्याविशेषान् सावित्रीं रुद्राध्यायं तथैव च ।
महाप्रस्थानिकञ्चासौ कुर्य्यादनशनन्तथा ॥
अग्निप्रवेशमन्यद्वा ब्रह्मार्पणविधौ स्थितः ॥
ये तु सन्यस्तमग्निमाश्रमं शिव-
माश्रयन्त्यशिवपुञ्जनाशनम् ।
ते विशन्ति पदमेश्वरं परं
यान्ति चैव जगतोऽस्य संस्थितिम् ॥"
इति कूर्म्मपुराणे उपविभागे २६ अध्यायः ॥
अन्यत् विष्णुपुराणे ३ अंशे ६ अध्याये द्रष्टव्यम् ॥

वानरः, पुं, स्त्री, (वा विकल्पितो नरः । यद्वा, वानं वने भवं फलादिकं राति ददाति । रा + कः ।) स्वनामख्यातपशुः । वाँदर इति भाषा । तत्पर्य्यायः । कपिः २ प्लवङ्गः ३ प्लवगः ४ शाखामृगः ५ वलीमुखः ६ मर्कटः ७ कीशः ८ वनौकाः ९ । इत्यमरः ॥ मर्कः १० प्लवः ११ प्रवङ्गः १२ प्रवगः १३ प्लवङ्गमः १४ प्रवङ्गमः १५ गोलाङ्गूलः १६ कपित्थास्यः १७ दधिग्रीवः १८ हरिः १९ तरुमृगः २० नगाटनः २१ भक्ष्यो २२ भक्ष्याशः २३ कजिक्षियः २४ । इति शब्दरत्नावली ॥ किखिः २५ शालावृकः २६ इति जटाधरः ॥ (एतद्भक्षणे प्रायश्चित्तं यथा, मनुः । ११ । १३६ ।
"हत्वा हंसं बलाकाञ्च वकं बर्हिणमेव च ।
वानरं श्येनभासौ च सपुंसं ब्राह्मणाय गाम् ॥")

वानरप्रियः, पुं, (वानराणां प्रियः ।) चीरिवृक्षः । इति रत्नमाला ॥

वानराक्षः, पुं, (वानराणामक्षिणीव अक्षिणी यस्य ।) वनच्छागः । इति हारावली ॥

वानराघातः, पुं, (वानराणामाघातो यत्र ।) लोध्रवृक्षः । इति शब्दचन्द्रिका ॥

वानरी, स्त्री, (वानरस्य स्त्री । ङीष् ।) मर्कटी । (यथा, कथासरित्सागरे । १२३ । ६२ ।
"अथावतीर्य वृक्षात् तौ वानरौ वानरीच सा ।
अवतीर्णस्य मे पादावग्रहीतामुभावपि ॥")
शूकशिम्बी । इति शब्दरत्नावली ॥ (वानरस्येयमिति । वानर + अण् + ङीष् । वानरसम्बन्धिनी । यथा, महानाटके ।
"सुग्रीवे करुणा न सा हि करुणा लभ्या धरा वानरी ।
मय्येषा करुणा तवैव भविता नो वा भवेत् कुत्रचित् ॥")

वानरेन्द्रः, पुं, (वानराणामिन्द्रः ।) सुग्रीवः । इति शब्दरत्नावली ॥

वानलः, पुं, वाडवः । इति शब्दचन्द्रिका ॥ क्षणवायुर इति ख्यातः ॥

वानस्पत्यः, पुं, (वनस्पतौ भवः । वनस्पति + "दित्यदित्यादित्येति ।" ४ । १ । ८५ । ण्यः ।) पुष्पजातफलवृक्षः । स तु आम्रजम्बादिः । इत्यमरः । (वनस्पतीनां समूहः । "दित्यदित्येति ।" ण्यः । वनस्पतिसमूहे, क्ली । इति काशिका । वनस्पतिजाते, त्रि । यथा, वाजसनेयसंहितायाम् । १ । १४ ।
"अद्रिरसि वानस्पत्यः ।"
"हे उदूखल त्वं यद्यपि वानस्पत्यः दारुमयस्तथापि दृढत्वात् अद्रिरसि ।" इति तद्भाष्ये महीधरः । यथाच, महाभारते । ३ । १२१ । ४ ।
"तस्य सप्तसु यज्ञेषु सर्व्वमाधीद्धिरक्षयम् ।
वानस्पत्यञ्च भौमञ्च यद्दृढं नियतं मखे ।
चषालयूपपत्नसाः स्रुक्त्राः पात्राः सुचः सुवाः ॥")

वाना, स्त्री, वर्त्तिकापक्षी । इति जटाधरः ॥

वानायुः, पुं, देशविशेषः । स तु भारतवर्षस्य उत्तरपश्चिमे वर्त्तते । इति शब्दरत्नावली ॥

वानायुजः, पुं, (वनायौ देशविशेषे जायते इति । जन् + डः ।) वनायुदेशोत्पन्नघोटकः । इत्यमरः ॥

वानीरः, पुं, वेतसवृक्षः । इत्यमरः । वाञ्जुल इति ख्यातश्च । तत्पर्य्यायः । वृत्तपुष्पः २ शाखालः ३ जलवेतसः ४ आधिघातः ५ परिव्याधः ६ नादेयः ७ जलसम्भवः ८ । अस्य गुणाः । तिक्तत्वम् । शीतलत्वम् । रक्तोष्णत्वम् । व्रणशोधनत्वम् । पित्तासृक्कफदोषनाशित्वम् । संग्राहित्वम् । कषायत्वञ्च । इति राजनिर्घण्टः ॥

वानीरकः, पुं, (वानीर इव प्रतिकृतिः । इवार्थे कन् ।) शुञ्जनम् । इति राजनिर्घण्टः ॥

वानीरजं, क्ली, कुष्ठम् । इति राजनिर्घण्टः ॥

वानेयं, क्ली, (वने जले भवम् । वन + ढक् ।) कैवर्त्तिमुस्तकम् । इत्यमरः ॥

वान्तः, त्रि, वमितवस्तु । वमधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥ (यथा, साहित्यदर्पणे ।
"क्षतप्रवृत्तिरन्यार्थे कविर्वान्तं समश्नुते ॥")

वान्ताद्यः, पुं, (वान्तं अत्तीति । अद् + अण् ।) कुक्कुरः । इति त्रिकाण्डशेषः ॥

वान्तिः, स्त्री, (वम् + क्तिन् ।) वमनम् । वाँति इति भाषा । यथा,—
"वान्तिरक्षिखनं छर्द्दिर्वमनं वमथुर्ज्वमिः ॥"
इति रत्नमाला ॥

वान्तिकृत्, पुं, (वान्तिं करोतीति । कृ + क्विप् ।) लौहकण्टकवृक्षः । इति शब्दचन्द्रिका ॥ मयना इति भाषा ॥

वान्तिदा, स्त्री, (वान्तिं वमनं ददातीति । दा + कः । टाप् ।) कटुकीवृक्षः । इति शब्दचन्द्रिका ॥

वान्या, स्त्री, (वनानां समूह इति । वन + यत् । टाप् ।) वनसमूहः । इति शब्दरत्नावली ॥

वापः, पुं, वपनम् । वपधातोर्घञ्प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । ३ । ३४ । १६ ।
"कालं प्रतीक्षञ्च सुखोदयस्य
षड्क्षिं फलानामिव बीजवापः ॥"
मुण्डनम् । यथा, मनौ । ११ । १०६ ।
"उपपातकसंयुक्तो गोघ्नो मांसं यवान् पिबेत् ।
क्षतवापी वसेन्नाके चर्म्मणा तेन संवृतः ॥"
उप्यते अस्मिन्निति । वप् + अधिकरणे घञ् । क्षेत्रं इति । ५ । २ । ४५ । पाणिनीयसूत्रे भट्टोजिदीक्षितः । तस्मादेवैतयं वापदण्डादिदर्शनात् ॥)

वापकः, त्रि, वपनकारयिता । आत्मवपधातोः कर्त्तरि ण्वुलप्रत्ययेन निष्पन्नः ॥

वापदण्डः, पुं, (वापाय वपनाय दण्डः ।) वपनार्थदण्डः । वेँउ इति भाषा । तत्पर्य्यायः । वेमा २ । इत्यमरः ॥ वेम ३ वेमः ४ वापदण्डः ५ । इति भरतः ॥

वापिः, स्त्री, (उप्यते पद्मादिकमस्यामिति । वप् + "वसिवपियजिराजिव्रजीति ।" उणा० ४ । १२४ । इति इन् ।) वापी । इति भरतहिरूपकोषः ॥

वापितं, त्रि, (वप् + णिच् + क्तः ।) बीजाक्षतम् । सुक्षितम् । इति मेदिनी । ते, १५० ॥ धान्यविशेषे, क्ली । वाओया धान इति भाषा । तस्य गुणः ।
"वापितं गुरु तद्वार्य्यं किञ्चिद्धीनमवापितम् ॥"
इति राजवल्लभः ॥

वापी, स्त्री, (वापि + ऋदिकारादिति ङीप् ।) दीर्घिका । इत्यमरः । १ । १० । २८ ॥ उप्यते पद्मादिकं अस्याम् । वाप्यां वापिरपि स्मृता । इति हिरूपकोषः ॥ इति टीकायां भरतः ॥*॥ तस्या लक्षणं यथा । नयवर्द्धमानधृतौ वशिष्ठः । शतेन धनुर्भिः पुष्करिणी । त्रिभिः शतैर्दीर्घिका । चतुर्भिर्द्रोणः । पञ्चभिस्तडागः । द्रोणाद्दशगुणा वापी । तेन चतुर्हस्तु पञ्चविंशद्धस्तान्यूनतायां हृदशतहस्तान्तरान्यूनत्वेन दीर्घिका । चतुर्हस्तु चत्वारिंशद्धस्तान्यूनतायां षोड़शशतहस्तान्तरान्यूनत्वेन द्रोणः । चतुर्हस्तु त्रिंशदधिकशतहस्तान्यूनतायां षोड़शसहस्रहस्तान्तरान्यूनत्वेन वापी । इति जलाशयोत्सर्गतत्त्वम् ॥ * ॥ तत्खननफलं यथा,—
"यो वापीमथवा कूपं देशे वारिविवर्ज्जिते ।
खानयेत् स दिवं याति बिन्दौ बिन्दौ शतं समाः ॥"
इति कल्पतरौ वायुपुराणम् ॥
तज्जलगुणाः ।
"वाप्यं गुरु कटु क्षारं पित्तलं कफवातजित् ।"
इति राजवल्लभः ॥
तत्खनने दिङ्निषेधो यथा,—
"वापीकूपतड़ागं वा प्रासादं वा निकेतनम् ।
न कुर्य्यादृद्धिकामस्तु अग्नेयानिलनैर्ऋते ॥

आपेयी मनवस्तापो नैर्ऋते क्रूरकर्मकृत्।
वायव्यां बलवित्तञ्च पीयमाने जले प्रिये॥
स्नानस्य पावके भागे वापीकूपतड़ागकम्।
अग्निदाहं सदा कुर्य्यात् समानुषचतुष्टयम्॥
नैर्ऋते पीयमानन्तु आत्मना दुःखितो भवेत्।
कन्यापि तज्जलं पीत्वा पतिं यजाति कामतः॥
इति देवीपुराणे नन्दाकुण्डप्रवेशाध्यायः॥
तत्करणफलं यथा,—
शुम्भिल उवाच।
"तड़ागोदकवापीनां कृतानामिह यत् फलम्।
विप्रेभ्यश्च विशेषेण वक्तुमर्हस्यशेषतः॥
यम उवाच।
धर्म्मस्यार्थस्य कामस्य यशसश्च द्विजोत्तम।
तड़ागं सुप्रभूतानु परमायतनं स्मृतम्॥
देवताः पितरो नागा गन्धर्व्वा यक्षराक्षसाः।
पशुपक्षिमनुष्याश्च संश्रयन्ति जलाशयम्॥
कृतज्ञं तारयते वंशं पञ्च खाते जलाशये।
गावः पिबन्ति पानीयं मनुष्याः पशवस्तथा॥
शुरढतौ तड़ागेषु सलिलं यस्य तिष्ठति।
अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः॥
येषां शिशिरकाले तु पानीयं प्रतितिष्ठति।
वाजपेयातिरात्राभ्यां फलं विन्दन्ति मानवाः॥
वसन्ते चैव ग्रीष्मे तु सलिलं यस्य तिष्ठति।
राजसूयाश्वमेधाभ्यां स फलं समुपाश्नुते॥
तड़ागं सर्व्वसत्त्वानां जीवनन्तु दिवानिशम्।
तस्मात् सर्व्वात्मना वत्स तड़ागमिह कारयेत्॥
कृतज्ञं हि तारयेद्वंशं पुरुषस्य न संशयः।
यावतारः कृतः कूपः सम्भूतजलसंस्थया॥
यस्य खादुजलं कूपे पिबन्ति सततं जनाः।
स नरो विरजो लोके देववद्दिवि मोदते॥
पौत्रैवेक्षुरसं क्षीरं दधि मधु सुरासवम्।
तावत् पिपासा नायेति यावत्तोयं न पीयते॥
जीवन्ति चामरहिता दिवसानि बहून्यपि।
क्षुधितस्तोयरहितो दिनमेकं न जीवति॥
तस्माद्ददाति यो नित्यं पानीयं प्राणिनामिह।
स ददाति नरः प्राणान् नास्मिन्नत्र संशयः॥
प्राणदानात् परं नाम नान्यद्दानं हि विद्यते।
तस्मात्तापीञ्च कूपांश्च तड़ागानि च कारयेत्॥
सप्तद्वीपां हि विप्रर्षे यदीच्छेत् श्रियमात्मनः।
मुक्तं परनिपानन्तु यः कारयति ग्रन्थितः।
सन्तारयति भूयोऽपि दिगुणं तस्य वै फलम्॥"
इति वह्निपुराणे तड़ागप्रशंसानामाध्यायः॥
वापीकः, पुं, (वापीं जहातीति। हा त्यागे + कः। यागे वापीजलवर्ज्जनादस्य तथात्वम्।) चातकपक्षी। इति त्रिकाण्डशेषः॥
वाप्यं, क्ली, (वाप्यां भवमिति। वापी + "दिगादिभ्यो यत्।"४। ३। ५४। इति यत्।) कुष्ठौषधम्। इत्यमरः। २। ४। १२६॥ वापीभवे, त्रि॥ (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये।
"तार्क्ष्यं वातहरं स्वाद्वि कषायं कटुपाकि च।
वातश्लेष्महरं वाप्यं सक्षारं कटुपित्तलम्॥"
वप् + ण्यत्।) वपनीये च, त्रि॥
वामं, क्ली, (वा + "अर्त्तिसृधृसृहृदृधृक्षीति।" उणा० १। १३६। इति मन्।) धनम्। इति मेदिनी। मे, २६॥ वास्तूकम्। इति शब्दरत्नावली॥
वामः, त्रि, (वमति वम्यते वेति। वम उद्गिरणे + "ज्वलितिकसन्तेभ्यो णः।"३। १। १४०। इति णः। यद्वा, वातीति। वा गतिगन्धनयोः + "अर्त्तिसृधृसृहृदृधृक्षिभ्यो मायावापदीति। उणा० १। १३६। इति मन्।) वल्गुः। (यथा, रघौ। ७। ५७।
"स दक्षिणं तूणमुखेन वामं
व्यापारयन् हस्तमलक्ष्यताजौ।
आकर्णकृष्टा सकृदस्य योद्धुः
मौर्व्वीव बाणान् ससृजे रिपुघ्नान्॥")
प्रतीपः। (यथा, वैराग्यशतके। ५३।
"दुःखेनोपार्ज्जितान् प्राज्ञान् प्रत्यक्षांश्च लालयन्।
वामाः स्त्रियो विमृद्नन्ति पशुवज्ज्ञानिनः सुखं विगुणम्॥"
यथाच, साहित्यदर्पणे। १०।
"वामा यूयमहो विडम्बरसिकः कौडक्क एषो वर्त्तते॥")
सव्यः। इत्यमरमेदिनीकारौ॥ (यथा, राजतरङ्गिण्याम्। १। २।
"भारं वह्निग्रिखाङ्कितं दधदधिश्रोत्रं वहन् सम्भृत-
क्रीड़त् कुण्डलिनूभितं जलधिजच्छायाच्छ-
कण्ठच्छविः।
वत्सो विम्बदलीनकच्छकचितं बह्वङ्गनार्द्धस्य वो
भागः पुङ्गवलक्षणोऽस्तु यशसे वामोऽथवा
दक्षिणः॥")
अधमः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ वामहस्तेन जलपानभोजननिषेधो यथा। हारीतः।
"न पिबेन्न च भुञ्जीत द्विजः सव्येन पाणिना।
नैकहस्तेन च जलं मूर्द्धावर्ज्जितं पिबेत्॥"
इति आह्निकतत्त्वम्॥
अपि च।
"न वामहस्तेनोद्धृत्य पिबेद्भक्ष्यं वा जलम्।
नोत्तरेदुपसृज्य नाप्सु रेतः ससृतद्धरेत्॥"
इति कौर्म्मे १५ अध्यायः॥
"वामः कायो ब्राह्मणोऽपि मांसमद्यादिभक्षये।
कृतो मया मोहनाय चार्व्वाकादिप्रवर्त्तकः॥"
इति कालिकापुराणे ७० अध्यायः॥
(वमनीयः। यथा, ऋग्वेदे। ६। ५३। २।
"अभिनो नर्य्यं वसु वीरं प्रयतदक्षिणम्।
वामं गृणन्तं नय।"
"वामं वमनीयम्।" इति तद्भाष्ये सायणः॥ वमनीयं याचनीयं वसु याचने इत्यस्य प्रयोगो ज्ञातव्यः॥)
वामः, पुं, (वातीति। वा गतिगन्धनयोः + मन्।) हरः। (यथा, भागवते। ४। ३। ८।
"प्रजापतेस्ते श्वशुरस्य साम्प्रतं
निर्य्यापितो यज्ञमहोत्सवः किल।
वयञ्च तत्राभिसराम वाम। ते
यद्यर्थितामी विबुधा व्रजन्ति॥")
कामदेवः। पयोधरः। इति मेदिनी। मे, २६॥ (श्रीकृष्णस्य भद्रागर्भोत्पन्नः पुत्रविशेषः। यथा, भागवते। १०। ६१। १७।
"संग्रामजित् बृहत्सेनः शूरप्रहरणोऽरिजित्।
जयः सुभद्रो भद्रायां वाम आयुश्च सत्यकः॥")
वामदृक् [ग्], क्ली, (वामा मनोहरा दृक् दृष्टिर्यस्याः।) नारी। इति राजनिर्घण्टः॥
वामदेवः, पुं, (वाम एव देवः।) शिवः। इत्यमरः। १। १। ३४॥ (यथा, महाभारते। १३। १७। ७०।
"वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः॥"
ऋषिप्रभेदः। यथा, पद्मपुराणे। ६। ४५।
"आगामिप्रतिवत्सश्च वामदेवो समीरितः।
एकेन जन्मना चौक्तो भरतस्य त्रिजन्मभिः॥")
वामनः, पुं, (वामयति वमति वा मदमिति। वम + णिच् + ल्युः।) दक्षिणदिग्गजः। (यथा, भागवते। ५। २०। ३६।
"तदुपरिष्टाच्चतस्रश्चाश्चात्मयोनिनाखिल-
जगद्गुरुणा विनिवेशिता ये द्विरदपतयः
ऋषभः पुष्करचूड़ो वामनोऽपराजित इति
सकललोकस्थितिहेतवः॥") ह्रस्वः। इत्यमरः। २। ६। ४६॥ (यथा, रघौ। १६।५१।
"व्योमपक्ष्मिकलाक्षितेन्दु वा
पङ्क्तेर्यमिव धर्म्मपक्ष्मलम्।
रात्रि! तत्कुलमभूत् त्वयातुरे
वामनार्चिरिव दीपभाजनम्॥"
यथाच तत्रैव। १। ३।
"प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥"
अकोटश्चः। हरिः। इति मेदिनी। ने, १२६॥ (यथा, महाभारते। १३। १३६। ३०।
"उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्জ্জितः॥"
शिवः। यथा, महाभारते। १३। १७। ७०।
"वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः॥"
अश्वभेदः। यथा, अश्ववैद्यके। ३। १५३।
"एकैकाङ्गेन हीनेन भिन्नेन च विशेषतः।
यमजं वाजिनं विन्द्याद्वामनाकृतिम्॥"
दनोः पुत्रभेदः। यथा, हरिवंशे। ३। ८२।
"अयोमुखः शम्बरश्च कपिलो वामनस्तथा॥"
भुजङ्गभेदः। यथा, महाभारते। १। ३५। ६।
"कालियो मणिनागश्च नागश्चापूरणस्तथा।
नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः॥"
गरुड़वंशीयः पक्षिविशेषः। यथा, महाभारते। ५। १०१। १०।
"पङ्क्तिश्चक्रनिष्कुम्भो वैनतेयोऽथ वामनः।
वातवेगो दिशाचक्षुर्निमिषोऽनिमिषस्तथा॥"
हिरण्यगर्भस्य सुतभेदः। यथा, हरिवंशे। २५३। ६।
"गार्गः पृथुश्रवैवाद्यो जात्यो वामन एव च॥"

क्रौञ्चद्वीपस्यपर्व्वतविशेषः। यथा, महाभारते। ६। १२। १७—१८।
"क्रौञ्चद्वीपे महाराज! क्रौञ्चो नाम महागिरिः।
क्रौञ्चात्परो वामनको वामनादन्धकारकः॥
अन्धकारात्परो राजन्! मैनाकः पर्व्वतोत्तमः।
मैनाकात्परतो राजन्! गोविन्दो गिरिरुत्तमः॥"
तीर्थभेदः। यथा, महाभारते।३।८४।१२२।
"ततस्तु वामनं गत्वा सर्व्वपापप्रमोचनम्।"
महापुराणान्यतमः। यथा, देवीभागवते। १। ३। ७।
"अयुतं वामनाख्यञ्च वायव्यं षट् शतानिच।
चतुर्विंशतिसंख्यातः सहस्राणि तु शौनक!॥")
विष्णोः पञ्चमावतारः। तस्य प्रादुर्भावो यथा।
श्रीसदाशिव उवाच।
"प्रह्लादस्य सुतो यज्ञे विरोचन इतीरितः।
तस्य पुत्रो महाबाहुर्बलिर्वैश्वानरप्रभः॥
स तु धर्म्मविदां श्रेष्ठः सत्यसंधो जितेन्द्रियः।
हरेः प्रियतमो भक्तो नित्यं धर्म्मरतः शुचिः॥
स जित्वा सकलान् देवान् सेन्द्रांश्च समरुद्गणान्।
त्रिलोकान् स्ववशे स्थाप्य राज्यं चक्रे महाबलः॥
इन्द्रादिचिदशास्तस्य किङ्कराः समुपस्थिताः।
भरराज्यं सुरपतिं दृष्ट्वा तस्य पितार्हितः॥
कश्यपो भार्य्यया सार्द्धं तपस्तेपे हरिं प्रति।
अदित्या सह धर्म्मात्मा पयोव्रतसमन्वितः॥
अर्चयामास देवेशं पद्मनाभं जनार्द्दनम्।
ततो वर्षसहस्रान्ते तेन संपूजितो हरिः॥
तथैवाविरभूत्तस्य देवा सह सनातनः।
तं दृष्ट्वा जगतामीशं हर्षनिर्भरचेतसा॥
यत्नात् सह नमस्कृत्य तुष्टाव च द्विजोत्तमः॥
कश्यप उवाच।
नमो नमस्ते लक्ष्मीश! सर्व्वज्ञ जगदीश्वर।
सर्व्वात्मन् सर्व्वदेवेश! सृष्टिसंहारकारक॥
इत्यादिस्तुतिभिः सम्यक् स्तूयमानो महर्षिणा।
प्राह गम्भीरया वाचा परितुष्टो जनार्द्दनः॥
सन्तुष्टोऽस्मि द्विजश्रेष्ठ! त्वया भक्त्या समर्चितः।
वरं वृणीष्व भद्रं ते करोमि तव वाञ्छितम्॥
ततः प्राह हृषीकेशं भार्य्यया सह कश्यपः।
पुत्रत्वं मम देवेश संप्राप्य त्रिदशां हितम्॥
कुरुष्व बलिना देव त्रैलोक्यं निर्ज्जितं बलात्।
इन्द्रस्यावरजो भूत्वा उपेन्द्र इति नामतः॥
येन केनात्ममार्गेण बलिं निर्ज्जित्य मायया।
त्रैलोक्यं मम पुत्राय देहि शक्राय शाश्वतम्॥
इत्युक्तस्तेन विप्रेण तथेत्याह जनार्द्दनः।
संस्तूयमानस्त्रिदशैस्तत्रैवान्तरधीयत॥
एतस्मिन्नन्तरे काले कश्यपस्य महात्मनः।
अदित्या गर्भमापेदे भगवान् भूतभावनः॥"
इति पाद्मोत्तरखण्डे ४८ अध्यायः॥
श्रीशिव उवाच।
"अथ वर्षसहस्रान्ते सर्व्वलोकमहेश्वरम्।
अदितिर्जनयामास वामनं विष्णुमच्युतम्॥
श्रीवत्सकौस्तुभोरस्कं पूर्णेन्दुसदृशद्युतिम्।
सुन्दरं पुष्करीकाक्षं अतिखर्व्वतरं हरिम्॥
वटुवेषधरं देवं सर्व्ववेदान्तगोचरम्।
मेखलाजिनदण्डादिचिह्नेनाङ्कितमीश्वरम्॥
तं दृष्ट्वा देवताः सर्व्वे शतक्रतुपुरोगमाः।
स्तुत्वा महर्षिभिः सार्द्धं नमश्चक्रुर्महौजसः॥
ततः प्रसन्नो भगवान् प्रोवाच सुरसत्तमान्।
किं कर्त्तव्यं मया वाद्य तद्ब्रवीत सुरोत्तमाः॥
ततः प्रहृष्टास्त्रिदशास्तमूचुः परमेश्वरम्।
अस्मिन् काले बलेर्यज्ञं वर्त्तते मधुसूदन॥
प्रथमं दानकालोऽयं तस्य दैत्यपतेः प्रभो।
याचित्वा त्रिदिवं लोकं ततस्तं दातुमर्हसि॥
इत्युक्तस्त्रिदशैः सर्व्वैराजगाम बलिं हरिः।
यागदेशे समासीनस्तद्विभिः सार्द्धमत्वयैः॥
अभ्यागतं वटुं दृष्ट्वा सहसोत्थाय दैत्यराट्।
अभ्यागतं स्वयं विष्णुं महाहर्षसमन्वितः॥
पूजयामास विधिना निवेश्य कुसुमासने।
प्रणिपत्य नमस्कृत्य प्राह गद्गदया गिरा॥
धन्योऽस्मि कृतकृत्योऽस्मि सफलं जीवितं मम।
त्वामर्चयित्वा विप्रेन्द्र! किं करोमि तव प्रियम्॥
आगतोऽसि यदर्थं त्वं मामुद्दिश्य द्विजोत्तम।
तत् प्रयच्छामि ते शीघ्रं ब्रूहि वेदविदां वर॥
ततः प्रहृष्टमनसा तमुवाच महीपतिम्।
शृणु राजेन्द्र! वक्ष्यामि ममागमनकारणम्॥
अधिकुरुष्व पृथिवीं देहि दैत्यपते मम।
मम त्रिविक्रमं पादं महीं संदातुमर्हसि॥
सर्व्वेषामेव दानानां भूमिदानमनुत्तमम्।
यो ददाति महीं राजन् विप्रायाकिञ्चनाय वै॥
अङ्गुष्ठमात्रमथवा स भवेत् पृथिवीपतिः।
न भूमिदानसदृशं पवित्रमिह विद्यते॥
तस्माद्भूमिं महीपाल प्रयच्छ त्वमिदं मम।
एतदल्पमहीं दातुं मा विशङ्क महीपते॥
जगत्त्रयप्रदानन्तत् मम भूप भविष्यति।
ततः प्रहृष्टवदनस्तथेत्याह महीपतिः॥
तस्मै महीप्रदानन्तु कर्त्तुं मेने विधानतः।
तं दृष्ट्वा दैत्यराजानं तदा तस्य पुरोहितः॥
उशना अब्रवीद्वाक्यं मा राजन् दीयतां महीं।
एष विष्णुः परेशो यो देवैः संप्रार्थितो नृप!॥
वञ्चयित्वा महीं सर्व्वां ततः प्राप्तुमिहागतः।
तस्माच्छ्रुत्वा न दातव्या तस्मै राजन् महात्मने॥
अन्यमर्थं प्रयच्छस्व वचनान्मम भूपते!।
ततः प्रहस्य राजासौ तं गुरुं प्राह धैर्य्यतः॥
प्रीतये वासुदेवस्य पुण्यं सर्व्वं कृतं मया।
अद्य धन्योऽस्म्यहं विष्णुः स्वयमेवागतो यदि॥
तस्मात्पर्याप्तं राज्यं हि जीवितञ्च महत्तमम्।
तस्मादस्मै प्रयच्छामि चीन् लोकानपि साचिरम्॥
इत्युक्त्वा भूपतिस्तस्य पादौ प्रक्षाल्य भक्तितः।
वाञ्छितां प्रददौ भूमिं वारिपूर्व्वं विधानतः॥
परिक्रम्य नमस्कृत्य दत्त्वा वै दक्षिणां वसु।
उवाच तं वटुं विप्रं प्रहर्षेणान्तरात्मना॥
धन्योऽस्म्यनुगृहीतोऽस्मि तव दत्त्वा महीं द्विज।
यथेष्टं तव विप्रेन्द्र तद्गृह्यतां महीमिमाम्॥
पञ्चाशत्कोटिविस्तीर्णां सकाननमहीधराम्।
सप्तसागरांश्च सद्वीपां सदेवासुरमानुषाम्॥
पादेनैकेन पुरुषो विक्रम्य मधुसूदनः।
उवाच तं दैत्यराजं किं करोमीति शाश्वतम्॥
तच्च त्रैविक्रमं रूपमीश्वरस्य महौजसः।
सम्मातुमपि देवानामृषीणाञ्च महात्मनाम्॥
न वक्तुमपि शक्यं स्यात् ब्रह्मणः शङ्करस्य च।
तत्पदं पृथिवीं सर्व्वामाक्रम्य गिरिजे शुभे॥
अतिरिक्तं समभवत् शतयोजनमायतम्।
दिव्यं चक्षुर्ददौ तस्मै दैत्यराजे सनातनः॥
तस्मै सन्दर्शयामास स्वकं रूपं जनार्द्दनः।
तद्विश्वरूपं देवस्य दृष्ट्वा दैत्येश्वरो बलिः॥
प्रहर्षमतुलं लेभे सानन्दाश्रुपरिप्लुतः।
दृष्ट्वा देवं नमस्कृत्य स्तुत्वा स्तुतिभिरेव च॥
प्राह गद्गदया वाचा प्रहर्षेणान्तरात्मना।
धन्योऽस्मि कृतकृत्योऽस्मि त्वां दृष्ट्वा परमेश्वरम्॥
लोकत्रयं ममैवेतत् गृहाण मधुसूदन।
अथ सर्व्वेश्वरो विष्णुर्द्वितीयं पदमात्मयम्॥
ऊर्द्धं प्रसारयामास ब्रह्मलोकान्तमच्युतः।
सत्यत्रयगृहीतं सर्व्वदेवसमाश्रितम्॥
पादेनापरिपूर्णोऽभूदच्युतः स शुभानने।
ततः पितामहो दृष्ट्वा चक्रपद्मादिचिह्नितम्॥
श्रीपादं देवदेवस्य हर्षसंभ्रमचेतसा।
धन्योऽस्मीति वदन् ब्रह्मा गृहीत्वा स्वं कमण्डलुम्॥
भक्त्या प्रक्षालयामास तच्च संस्थितवारिणा।
अत्यद्भुतमभवत्तोयं तस्य विष्णोः प्रभावतः॥
तत्तीर्थं मेरुशिखरे प्रापतद्विमलं जलम्।
जगतः पावनार्थाय चतुर्द्धा तु प्रवाहितम्॥
सीता चालकनन्दा च वङ्क्षुर्भद्रा यथाक्रमात्॥
प्रसङ्गादिदमाख्यातं गङ्गाजन्म त्वयुत्तमम्॥
ततो नारायणः श्रीमान् बलेर्दैत्यपतेः प्रभुः।
रसातलं शुभं लोकं प्रददौ भक्तवत्सलः॥
सर्व्वेषां दानवानाञ्च नागानां यादसाम्पतेः।
राजानञ्च बलिञ्चक्रे यावदाकृतसंप्लवम्॥
प्रतिगृह्य बलेर्लोकान् वटुवेषेण दैत्यहा।
महेन्द्राय ददौ प्रीत्या काश्यपिर्विष्णुरव्ययः॥
ततो देवाः सगन्धर्व्वा ऋषयश्च महौजसः।
तुष्टुवुः स्तुतिभिर्दिव्यैः पूजयामासुरच्युतम्॥
संक्षिप्य तन्महद्रूपं तेषां सन्दर्शनाय वै।
संपूज्यमानस्त्रिदशैरन्तर्धानं ययौ हरिः॥"
इति पाद्मोत्तरखण्डे ४९ अध्यायः॥ *॥
तदवतारप्रकारान्तरं यथा,—
नारद उवाच।
"साम्प्रतं भगवान् विष्णुस्त्रैलोक्याक्रमणं वपुः।
करिष्यति जगत्स्वामी बलेर्बन्धनमीश्वरः॥
तत् कथं पूर्व्वकालेऽपि विस्मरासीत् त्रिविक्रमः।
कस्य वा बन्धनं विष्णुः कृतवांश्च मे वद॥
पुलस्त्य उवाच।
शृणुतां कथयिष्यामि योऽयं प्रोक्तस्त्रिविक्रमः।
यस्मिन् काले सम्बभूव यच्च वञ्चितवानसौ॥

आसीत् धुन्धुरिति ख्यातः कश्यपस्यौरसः सुतः।
दनुगर्भसमुद्भूतो महाबलपराक्रमः॥
स समाराध्य वरदं ब्रह्माणं तपसासुरः।
अवध्यत्वं सुरैः सर्वैः प्रार्थयत् स तु नारद॥
तदरं तस्य च प्रादात् तपसा परितोषितः।
परितुष्टः स च बली निर्जगाम त्रिपिष्टपम्॥
चतुर्थस्य कलेरादौ जित्वा देवान् सवासवान्।
धुन्धुः शक्रत्वमकरोत् हिरण्यकशिपौ सति॥
तस्मिन् काले स बलवान् हिरण्यकशिपुसुतः।
चचार मन्दरगिरौ दैत्यं धुन्धुं समाश्रितः॥
ततोऽसुरा यथाकामं विहरन्ति त्रिपिष्टपे।
ब्रह्मलोके च त्रिदशाः संस्थिता दुःखसंयुताः॥
ततोऽमरान् ब्रह्मसदोनिवासिनः
श्रुत्वा च धुन्धुर्दितिजानुवाच ह।
गच्छाम दैत्या वयमद्य सर्वे
सदो विजेतुं त्रिदशान् सशक्रान्॥
ते धुन्धुवाक्यानु निशम्य दैत्याः
प्रोचुर्न नो विद्यति लोकपाल।
गतिर्यया याम पितामहाजिरं
सुदुर्गमोऽयं परतो हि मार्गः॥
इतः सहस्रैर्नवयोजनाख्ये-
ऽलोको महर्नाम महर्षिजुष्टः।
येषां हि नासापवनोदितेन
दह्यन्ति दैत्याः सहसोच्छितेन॥
तेषां वचनमाकर्ण्य धुन्धुः प्रोवाच दानवान्।
गन्तुकामः स सदनं ब्रह्मणो जेतुमीश्वरान्॥
कथन्नु कर्मणा केन गम्यते दानवर्षभाः।
कथं तत्र सहस्राक्षः संप्राप्तः सह दैवतैः॥
ते धुन्धुना दानवेन्द्राः पृष्टाः प्रोचुर्वचोऽधिपम्।
कर्म्म तत्र वयं विद्मः शुक्रस्तद्वेत्ति संयमम्॥
दैत्यानां वचनं श्रुत्वा धुन्धुर्दैत्यपुरोहितम्।
पप्रच्छ शुक्रं किं कर्म्म कृत्वा ब्रह्मसदोगतिः॥
ततोऽस्मै कथयामास दैत्याचार्यः कलिप्रियः।
शुक्रस्य चरितं श्रीमान् पुरा हरिहरोः किल॥
शुक्रः शतन्तु पुण्यानां क्रतूनामजयत् पुरा।
दैत्येन्द्र! वाजिमेधानां तेन ब्रह्मसदो गतः॥
तदाकर्ण्य दानवपतिः श्रुत्वा शुक्रस्य वीर्य्यवान्।
यजुं तुरगमेधानां चकार मतिमुत्तमाम्॥
आमन्त्र्याहासुरगुरुं दानवानाप्तमुत्तमान्।
प्रोवाच यक्ष्येऽहं यज्ञैरश्वमेधैः सदक्षिणैः॥
आहूयन्तां शिल्पकाश्चाप्यन्ताश्च गुरुकाः।
प्रयागो दैत्यिका यत्र गङ्गा प्राचीनवाहिनी॥
सा हि पुण्या सरिच्छ्रेष्ठा सर्वेषिद्धिकरी शिवा।
जलं प्राचीनमासाद्य वाजिमेधान् यजामहे॥
इत्थं सुरारिवचनं निशम्यासुरयाजकः।
बाढमित्यब्रवीद्धृष्टो विधयः सन्दिदेश सः॥
ततो धुन्धुर्दैत्यिकायाः प्राचीने पायनाग्रके।
भार्गवेन्द्रेण शुक्रेण वाजिमेधाय दीक्षितः॥
ततोऽग्निधूमेन महीं सशैला
व्याप्ता दिशः खं विदिशश्च पूर्णाः।
तेनोद्गमेनैव दिवस्पृशेन
मनश्चकौ ब्रह्मलोके महर्षे॥
तं गन्धमाघ्राय सुरा विषण्णा
जानन्त धुन्धुं हयमेधदीक्षितम्।
ततः सुरर्षयः सुरगणा जनार्दनं
जग्मुः सशक्रा जगतः परायणम्॥
प्रणम्य वरदं देवं पद्मनाभं जनार्दनम्।
प्रोचुः सर्वे सुरगणा भयगद्गदया गिरा॥
भगवन् देवदेवेश! चराचरपरायण!।
विघ्नमिः श्रूयतां विष्णो सुराणामार्तिनाशन!॥
धुन्धुर्नाम्ना सुरपतिर्बलवान् बलदर्पितः।
शुक्रस्य मतमास्थाय सोऽश्वमेधाय दीक्षितः॥
शतं क्रतूनामिष्ट्वासौ ब्रह्मलोकं महासुरः।
आरोढुमिच्छति बली विजेतुं त्रिदशानपि॥
तस्मादकालहीनन्तु चिन्तयस्व जगद्गुरो।
उपायं मखविध्वंसे भवामो येन निर्वृताः॥
श्रुत्वा सुराणां वचनं भगवान्मधुसूदनः।
दत्त्वाभयं महाबाहुः प्रेषयामास सोऽथ तान्॥
विसृज्य देवता सर्वा ज्ञात्वा जेतुं महासुरम्।
वचनाय मतिञ्चक्रे स धुन्धोरध्वरस्य वै॥
ततः स कृत्वा भगवान् वामनं रूपमीश्वरः।
देहं कृत्वा निराभासं काष्ठवद्दृढिकाजले॥
चक्राभ्यञ्जनयोगेन्द्रमुक्तकैशो यदृच्छया।
ढक्कोऽथ दैत्यपतिना दैत्येभ्यैः सुरर्षिभिः॥
ततः कर्म्म परित्यज्य यज्ञियं ब्राह्मणोत्तमाः।
समुत्तारयितुं विप्रमद्रवन्त समाकुलाः॥
सदस्या यजमानाश्च ऋत्विजश्च महौजसः।
निमज्यमानमुद्वृत्तं सर्वे तं वामनं द्विजम्॥
समुत्तार्य हसन्तस्ते पप्रच्छुः सर्व एव हि।
किमर्थं पतितोऽसीह केन चिह्नोऽसि वा वद॥
तेषामाकर्ण्य वचनं कथ्यमानो सुहुर्मुहुः।
प्राह धुन्धुपुरोगांस्तान् श्रूयतामत्र कारणम्॥
ब्राह्मणो गुणवानासीत् प्रभास इति विश्रुतः।
तस्य पुत्रद्वयं जातं मन्दप्रज्ञं सुदुःखितम्॥
तस्य ज्येष्ठो मम भ्राता कनीयानवरस्त्वहम्।
नेत्रभास इति ख्यातो ज्येष्ठो भ्राता ततो-
ऽसुराः॥
मम नाम पिता चक्रे इति भाषोऽतिकौतुकात्।
ततः कालेन महता आवयोः स पिता मृतः॥
तस्यौर्द्धदेहिकं कृत्वा गृहमावां समागतौ।
ततो मयोक्तः स भ्राता विभजामो गृहं वयम्॥
तेनोक्तो नैव भवतो विद्यते भाग इत्यहम्।
कुञ्जवामनखञ्जानां क्लीबानां श्वित्रिणामपि।
उन्मत्तानां तदान्यानां धनभागो न विद्यते॥
एवमुक्तो मया सोऽथ किमर्थं पैतृकादृहम्।
धनार्द्धभागमर्हामि नाहं न्यायेन केन वै॥
इत्युक्तवति वाक्येऽसौ भ्राता मे कोपसंयुतः।
समुत्पिपाठियन्नद्यामस्यां मामिति कारयात्॥
ममास्यां निम्नगायान्तु मध्ये च पुरतो गतः।
कालः संवत्सराख्यस्तु युष्माभिरिह चोद्धृतः॥
के भवन्तश्च संप्राप्ताः सर्वे हा बान्धवा इव॥
ते वामनवचः श्रुत्वा भार्गवा द्विजसत्तमाः।
प्रोचुर्दैत्यपतिं सर्वे वामनार्थकरं वचः॥
इति द्विजानां वचनं श्रुत्वा दैत्यपतिश्चवः।
प्राह द्विज ददामीति यावदिच्छसि वै धनम्॥
तदाकर्ण्य दानवपतेः श्रुत्वा देवोऽथ वामनः।
प्राहासुरपतिं धुन्धुं स्वार्थसिद्धिकरं वचः॥
सोदरेष्वपि हि भ्रात्रा क्रियते यस्य सम्पदः।
तस्याधमस्य यद्दत्तं किमन्यो न हरिष्यति॥
मम प्रमाणमालोक्य मामकञ्च क्रमत्रयम्।
संप्रयच्छस्व दैत्येन्द्र नाधिकं रचितुं क्षमः॥
दत्तेवमुक्ते वचने महात्मा
विरुद्धः दैत्याधिपतिः सशक्तिक्।
प्रादाद्विजेन्द्राय पदत्रयं तदा
यदा स नान्यत् जगृहे च किञ्चन॥
क्रमत्रये तोयमदेय दत्तं
महासुरेन्द्रेण विशुद्धबुद्धौ।
चक्रे ततो लङ्घयितुं त्रिलोकीं
त्रिविक्रमं रूपमनन्तशक्तिः॥
कृत्वा तु रूपं दितिजांश्च हत्वा
प्रणम्य चर्षीन् प्रथमक्रमेण।
महीं महीध्रैः सहितां सहार्णवां
जहार रत्नाकरपत्तनैर्युताम्॥
भुवं सनाकं त्रिदशाधिवासं
सोमार्कऋक्षैरभिमण्डितं नभः।
देवो द्वितीयेन जगाम वेगात्
क्रमेण देवप्रियलोकमीश्वरः॥
क्रमं तृतीयं न यदास्य पूरितं
तदातिकोपाद्दनुपुङ्गवस्य।
पपात पृष्ठे भगवांस्त्रिविक्रमो
मेरुप्रमाणेन तु विग्रहेण॥
पतता वासुदेवेन दानवोपरि नारद!।
त्रिंशद्योजनसाहस्री भूमिर्भूता घटीकृता॥
ततो देवं समुत्थाप्य तस्यां प्रक्षिप्य वेगतः।
वर्षसिक्ताभिरद्भिश्च तां गर्भभूमिमपूरयत्॥
ततः स्वर्गं सहस्राक्षो वासुदेवप्रसादतः।
सुराश्च सर्वे त्रैलोक्यमवापुर्निरुपद्रवाः॥
भगवानपि दैत्येन्द्रं प्रक्षिप्य सिकतार्णवे।
कालिन्द्यां रूपमाधाय तत्रैवान्तरधीयत॥"

इति वामने ७५ अध्यायः॥

वामनः, त्रि, (वामयतीति। वम+णिच्+ल्युः।) अतिक्षुद्रः। तत्पर्य्यायः। व्यङ् २ नीचः ३ खर्वः ४ ह्रस्वः ५। इत्यमरः॥ अनुचः ६ अनायतः ७। इति जटाधरः॥ (यथा, नैषधे। २२। ५७।

"विधिस्तुषारर्तुदिनानि कर्त्तुं
कर्त्तुं विनिर्म्मातु तदन्तभिन्नैः।
ज्योत्स्नीर्न चेत् ततृप्रतिमा इमा वा
कथं कथं तानि च वामनानि॥")

वामनव्रतं, क्ली, (वामनदेवताकं व्रतम्।) श्रवणद्वादश्यीकर्त्तव्यो वामनदेवस्य व्रतविशेषः।

अथ श्रीवामनव्रतविधिः।

"नत्वा गुरुमनुज्ञाप्य पश्चान्नियममाचरेत्।
न हि सिद्धेद्गुरोर्भक्तिं नियमश्च विना फलम्॥"

नियममन्त्रः।

"एकादश्यां निराहारः स्थित्वा चैवापरेऽहनि।

भोक्ष्ये श्रीवामनागच्छ शरणागतवत्सल ॥" इति ॥
"एकादश्यां रजन्यां वा द्वादश्यां वार्चयेत्
प्रभुम् ।
स्वर्णरूप्यमये पात्रे ताम्रवंशमयेऽपि वा ॥
कल्पिकां स्थापयेत् पार्श्वे कल्पिकापादुकास्तथा ।
शुभाश्च वैणवीं यष्टिमक्षसूत्रं पवित्रकम् ॥
पुष्पैर्गन्धैः फलैर्धूपैः प्रदीपैश्चार्चयेद्धरिम् ।
नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुडौदनैः ॥
जागरं निशि कुर्वीत गीतवादित्रनर्त्तनैः ।
एवमाराध्य देवेशं प्रभाते विमले सति ॥
आदावर्घं प्रदातव्यं पश्चाद्देवं प्रपूजयेत् ।
नारिकेलेन शुभ्रेण दद्यादर्घ्यं च पूर्ववत् ॥"
तत्र मन्त्रः ।
"वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ।
गृहाणार्घं मया दत्तं वामनाय नमोऽस्तु ते ॥"
वामनाय अर्घं नमः ।
"मत्स्यं कूर्मं वराहञ्च नरसिंहञ्च वामनम् ।
रामं रामञ्च कृष्णञ्च क्रमात् बौद्धकल्किनौ ॥
पादयोर्जानुनोर्गुह्ये नाभ्यामुरसि कण्ठयोः ।
भुजयोर्मूर्द्धि सर्व्वाङ्गेष्वर्चयेदायुधानि च ॥
महापूजां ततः कृत्वा गोमहीं काञ्चनादिकम् ।
प्रक्षाचार्य्याय दातव्यं ब्राह्मणेभ्यश्च मन्त्रतः ॥
ब्राह्मणश्चापि मन्त्रेण प्रतिगृह्णाति मन्त्रवित् ।
ददाति मन्त्रतो ह्येव दाता भक्तिसमन्वितः ॥"
तत्र दानमन्त्रः ।
"वामनो बुद्धिदो दाता ह्यस्मो वामनः स्वयम् ।
वामनञ्च प्रतिग्राही तेन मे वामने रतिः ॥
वामनः प्रतिगृह्णाति वामनोऽपि ददाति च ।
वामनस्तारको ह्यार्त्यां तेनेदं वामने नमः ॥"
इति ॥
"एवं कृत्वा विधानेन भोजनं पूजदाद्यकम् ।
पूर्वं दद्याद्ब्राह्मणेभ्यः पश्चाद्भुञ्जीत बन्धुभिः ॥
यदामनपुराणे च यद्भविष्योत्तरे व्रतम् ।
वामनस्योदितं तस्यानुसारालिखितं त्विदम् ॥"
ब्रह्मवैवर्त्ते ।
"गृहीत्वा नियमं प्रातर्गत्वा नद्यादि सङ्गमे ।
सौवर्णं वामनं कृत्वा सौवर्णमाषकेण वा ॥
यथाशक्त्याय वित्तस्य कुम्भोपरि जगत्पतिम् ।
स्वर्णपात्रे स्थापयित्वा मन्त्रैरेतैश्च पूजयेत् ॥
ॐ वामनाय नमः पादौ कटिं दामोदराय च ।
उरू श्रीपतये गुह्यं कामदेवाय पूजयेत् ॥
पूजयेज्जगतां पत्युरुदरं विश्वधारिणे ।
हृदयं योगनाथाय कण्ठं श्रीपतये नमः ॥
मुखञ्च पङ्कजाक्षाय शिरः सर्व्वात्मने नमः ।
इत्थं संपूज्य वासोभिराच्छाद्य च जगद्गुरुम् ।
दद्यात् सुश्रद्धया चार्घ्यं नारिकेलादिभिः फलैः ॥
ॐ नमो नमस्ते गोविन्द बुध श्रवणसंज्ञक ।
अघौघसङ्घयं कृत्वा प्रेतमोचप्रदो भव ॥"
इत्यर्घ्यमन्त्रः ॥
"कृत्वोपानद्गोदानं दद्यादत्र कमण्डलुम् ।
विशेषेण द्विजाढ्याय वामनः प्रीयतामिति ॥
दध्योदनसमायुक्तां वारिधानीं प्रदापयेत् ।
पूजयित्वा जगन्नाथं वामनः प्रीयतामिति ॥
यथाशक्त्या च दानानि द्विजाग्र्येभ्यः प्रदापयेत् ।
कुर्य्याज्जागरणं रात्रौ गीतशास्त्रसमन्वितम् ॥
अद्भुता परया युक्तो निशामतिमिनेच्छनः ।
प्रभाते भोजयेद्विप्रान् द्वादश्यां पारणं ततः ।
कुर्य्यात् सर्वं अद्भुतात् तत् सर्वं सफलतां व्रजेत् ॥"
तस्माद्दाक्षाय तत्रैव ।
"एवं कृते तु कालेय व्रतैरन्यैर्विजयादिभिः ।
न दुर्लभतरं किञ्चिदिह लोकेऽथवा परे ॥
फलमस्य व्रतस्योक्तं दत्त्वा पित्रोर्नरोत्तमः ।
वंशोद्धारकरो मुक्तिं याति वैकुण्ठादपि ॥
न पावनतरं किञ्चिदतः परमिहोच्यते ।
विजयाव्रततुल्यञ्च न परं परिपठ्यते ॥"
भविष्योत्तरे च ।
"समाप्ते तु व्रते तस्मिन् यत् पुण्यं तन्निबोध मे ।
चतुर्युगानि राजेन्द्र ! सप्तसप्ततिसङ्ख्यया ॥
प्राप्य विष्णुपुरं राजन् क्रीडते कालमक्षयम् ।
इहागत्य भवेद्राजा प्रतिपक्षभयङ्करः ॥
हस्त्यश्वरथयानानां दाता भोक्ता विमत्सरः ।
रूपसौभाग्यसम्पन्नो दीर्घायुर्निरुजो भवेत् ।
पुत्रपौत्रैः परिवृतो जीवेच्च शरदां शतम् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

वामनेत्रं, क्ली, (वर्णन्यासे वामं नेत्रं स्फूर्यं येन ।) दीर्घकारः । यथा,—
"ईक्षिस्फूर्त्तिर्म्महामाया लोलाक्षी वामलोचनम् ।"
इत्यादि वर्णाभिधानम् ॥
अपि च ।
"ईशो वैश्वानरस्यः प्रग्रथरविलसद्वामनेत्रेण युक्तो
बीजन्ते इन्दमन्यद्विगलितचिकुरे कालिके ये
जपन्ति ।"
इति तन्त्रसारे महाकालविरचितं श्यामास्तोत्रम् । (वामचक्षुश्च ।)

वामलूरः, पुं, (वामं यथा तथा लुनातीति । लू + बाहुलकात् रक् ।) वल्मीकः । इत्यमरः । २ । १ । १४ । (यथा, काशीखण्डे । २२ । १६ ।
"जटाटवीकोटरान्तःश्रुतनीड़ाण्डजाश्च ये ।
प्ररूढ़वामलूराङ्गाः स्थाणुहासिसचयाः ।")

वामलोचना, स्त्री, वामे चारुणौ लोचने यस्याः । स्त्रीभेदः । इत्यमरः । २ । ६ । १ । (यथा, हितोपदेशे । २ । १५६ ।
"नास्तिस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्व्वभूतानां न पुंसां वामलोचना ।")

वामवेधशुद्धिः, स्त्री, (वामे प्रतिकूले यो वेधस्तद्विषये शुद्धिर्विशोधनम् । यद्वा, वामेन विपरीतेन वेधेन शुद्धिः ।) खराश्वपैचया द्वादशचतुर्थनवमयहस्थो विरुद्धोऽपि चन्द्रः यदि शुक्रभृनिकुजजीवार्कयुक्तयहात् सप्तमयहे तिष्ठति तदा नराणां अभिलषितफलदाता भवति । यदि तु सितभृनिकुजजीवार्कयुक्तयहात् दशमपञ्चमाष्टमयहे तिष्ठति तदा नराणां खराश्वपैचया यथासंख्यं अष्टमपञ्चमद्वितीयगृहगोऽपि चन्द्रः प्रचुरफलदाता भवति । यथा,—
"सितभृनिकुजजीवार्काख्य दुष्टैर्नराणां
क्षयसुखनवमस्थोऽपीष्टदाता तथैषाम् ।
खसुतनिधनगश्चेन्दुस्तत्पुत्रार्थगोऽपि
प्रचुरशुभफलं स्यादृक्षवानवेधेन शुद्धिः ।"
वामवेधत्वञ्च दूषणज्ञमिति रत्नमालादर्पणयोर्वचनाभ्यामेकार्थत्वादवोध्यम् ॥ * ॥
अथ दक्षिणवेधः दामवेधप्रकरणम् ।
"लाभविक्रमखगस्तु स्थितः
शोभनो निगदितो दिवाकरः ।
खेचरैः सुतसपोजलान्त्यगै-
र्वार्किभिर्यदि न विध्यते तदा ॥
दूषणज्ञरिपुलाभखस्थिग-
श्चन्द्रमाः शुभफलप्रदस्तदा ।
खात्मजान्त्यसुतधर्म्मगै-
र्विध्यते न विबुधैर्यदि ग्रहः ॥
विक्रमाय रिपुगः शुभः कुजः
स्यात्तदान्त्यसुतधर्म्मगैः खगैः ।
चेन्न विद्ध इनसूनुरप्यसौ
किन्तु धर्म्मसुखिना न विध्यते ॥
स्वात्मसूनुसुहृत्तिस्थायगः शुभो
भूसुतो न खलु विध्यते यदा ।
आत्मजत्रिनवकाष्टगैर्धन-
प्रान्त्यगैर्विबुधिभिर्नभश्चरैः ॥
स्वायधर्म्मतनयद्यूनस्थितो
नाकनायकपुरोहितः शुभः ।
रिपुस्फरन्मुखजलत्रिगैर्यदा
विध्यते गगनचारिभिर्ग्रहैः ॥
आसुताष्टमनपोदयायगो
विद्ध आस्तु बिदशोभनः स्मृतः ।
नैधनास्ततनुकर्म्मधर्म्मधी-
लाभवैरिसहजस्थखेचरैः ।"
इति ज्योतिस्तत्त्वम् ॥

वामा, स्त्री, (वमति सौन्दर्यं इति । वम + ज्वलादित्वात् अण् । टाप् । यद्वा, वमति प्रतिकूलमेवार्थं कथयति । यद्वा, वामः कामोऽस्यास्या इति अर्शं आदिभ्योऽच् इत्यच् ।) सामान्या स्त्री । इत्यमरः । २ । ६ । २ । (यथा, गीतगोविन्दे । १ । ३६ ।
"श्लिष्यति कामपि चुम्बति कामपि कामपि
रमयति वामाम् ।
पश्यति सस्मितचारुपरामपरामनुगच्छति
रामाम् ।")
दुर्गा । यथा,—
"वामं विरुद्धरूपन्तु विपरीतन्तु गीतये ।
वामेन सुखदा देवी वामा तेन मता बुधैः ॥"
इति देवीपुराणे ४५ अध्यायः ॥
अपि च ।
"बालान्तु बाल्यदाक्षिण्यभावाभ्यामपि पूजयेत् ।
ब्रह्मानन्दभैरवीं देवीमुग्रतारां तथैव च ।
उच्छिष्टभैरवीं चण्डीं तारां त्रिपुरभैरवीम् ।

एतासु वामभावेन यजेत्त्रिपुरभैरवीम् ।
सर्व्वत्र पिष्टदेवादौ यस्मादुभवति दक्षिणः ।
देवो च दक्षिणा यस्मात्तस्मात् दाक्षिण्यमुच्यते ।
या पुनः पूज्यमाना तु देवादीनान्तु पूर्व्वतः ।
यज्ञभागं स्वयं धत्ते सा वामा तु प्रकीर्त्तिता ।"

इति कालिकापुराणे ७० अध्यायः ।

वामाक्षि, क्ली, (वाममक्षि ।) वामचक्षुः । (वर्ण-न्यासे न्यस्यं वाममक्षि येन ।) दीर्घ ईकारः । यथा,—

"कर्पूरं मध्यमान्यस्वरपरिरहितं सेन्दु
वामाक्षियुक्तं
बीजन्ते मातरेतत्त्रिपुरहरवधु निःसृतं ये
जपन्ति ॥"

इत्यादिकपूर्व्वाख्यस्तोत्रम् ।

वामाक्षी, स्त्री, (वामे मनोहरे अक्षिणी अस्याः । बच् । ङीष् ।) वामलोचना । इति हेमचन्द्रः ।

वामाचारः, पुं, (वामो विपरीतो वेदविरुद्धो वा आचारः ।) आचारविशेषः । यथा,—

"पञ्चतत्त्वं समुच्चय्य पूजयेत् कुलयोषितम् ।
वामाचारो भवेत्तत्र वामा भूत्वा यजेत्
पराम् ॥"

इत्याचारभेदतन्त्रम् ।

तदाचारवतां नरकगमनं यथा,—

"स्वधर्म्मरहिता विप्रा वेदान्यसेविनः सदा ।
भ्रष्टाचाराश्च वामाश्च ते यान्ति नरकं ध्रुवम् ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः ।

तत्प्रशंसा यथा,—

"चत्वारो देवि वेदाद्या: पशुभावे प्रतिष्ठिताः ।
वामाद्याश्च्य आचारा दिव्ये वीरे प्रतिष्ठिताः ॥"

इति नित्यातन्त्रम् ।

"सर्व्वेभ्योत्तमा वेदा वेदेभ्यो वैष्णवं महत् ।
वैष्णवादुत्तमं शैवं शैवाच्चक्रमनुत्तमम् ।
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम् ।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं नहि ॥"

इति कुलार्णवतन्त्रे २ खण्डम् । * ।

तदाचारयुक्तस्य निषिद्धकर्म्माणि यथा,—

"न दद्यात् ब्राह्मणो मद्यं महादेवे कथञ्चन ।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्ष-
येत् ॥"

तदनुकल्पो यथा । कुलचूड़ामणौ ।

"यत्रासवमवाप्तञ्च ब्राह्मणञ्च विशेषतः ।
तत्र गुड़ार्द्रकं दद्यात् ताम्रे वा विल्वजेऽम्बु ।
देवाग्रे दक्षिणे भागे चक्रपार्श्वे निवेदयेत् ।
एतद्वाक्यन्तु शूद्रस्य नान्येषान्तु कदाचन ।
वैश्यस्य माक्षिकं शुद्धं क्षत्रियस्य तु माध्यकम् ।
ब्राह्मणस्य गवां क्षीरं ताम्रे वा विल्वजेऽम्बु ।
नारिकेलोदकं कांस्ये सर्व्वेषां द्रव्यशोधनम् ॥"

क्षत्रियवैश्ययोस्तु गौड़ी माध्वी च दातव्या तत्र तयोरधिकारात् तदभावे अनुकल्पविधानम् । तथा च ।

"गोक्षीरं ब्राह्मणो दद्यात् द्रव्यमाध्यञ्च बाहुजः ।
वैश्यश्च माक्षिकं द्रव्यं शूद्रः पैष्टादिकं पुनः ॥"

तेन शूद्रस्य नानुकल्पः । * । कुलार्णवे ।

"जलं क्षीरं घृतं भद्रे मधु मैरेयमेक्षवम् ।
पौष्पं तरुभवं धान्यसम्भवं तक्रनिर्म्मितम् ॥
सहकारभवं देवि त्रिविधं बहुभेदकम् ।
मादकं धर्म्मसंभेदात् वर्ज्ज्यमासीत् सुलोचने ॥
ज्ञानेन संस्कृतन्तत्तु महापातकनाशनम् ।
तद्दाने पातकाभावो दिव्यभावविधयं वा । * ॥
माकन्दफलजं रम्यं द्रव्यं सेव्यं द्विजातिभिः ।
अमादकत्वाद्देवेशि ऐच्छिकं सेवते बुधैः ॥"

एतेन क्षत्रियादिभिरमादकं द्रव्यं सेव्यं मादकस्य पापहेतुकत्वमुक्तम् । भैरवतन्त्रे ;

"मद्यं मांसं विना वत्स यत्किञ्चित् कुलसा-
धनम् ।
शक्तये दत्त्वा ततः शेषं गुरवे तन्निवेदयेत् ।
तदनुज्ञां मूर्द्ध्नि कृत्वा शेषमात्मनि योजयेत् ॥"

तेन क्षत्रियादीनां सुखदाने अधिकारः । न पाने । यतः ।

"पीत्वा पीत्वा पुनः पीत्वा पतित्वा च महीतले ।
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ॥"

वस्तु चतुर्थाश्रमिपरम् । * । तद्व्यतिरेके जातिचिन्तां न कुर्य्यात् ।

"मदिरायां मैथुने च जातिचिन्तां न कार-
येत् ॥"

एतेषां शोधनस्यावश्यकत्वम् । तथा च ।

"संशोधनमनाचर्य्य स्त्रीषु मद्येषु साधकः ।
आचार्य्य सिद्धिहानिः स्यात् क्रुद्धा भवति
सुन्दरी ॥"

मद्येषु सुखानुकल्पेषु । * । तथा कुलपूजाया-मस्यावश्यकत्वम् । तथा च ।

"मधु मांसं विना देवि कुलपूजां समाचरेत् ।
जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति ॥"*॥

अथ मांसादिशोधनम् ।

"मांसन्तु त्रिविधं श्रेष्ठं जलखेचरभूचरम् ।
मांसन्तु त्रिविधं प्रोक्तं देवताप्रीतिकारकम् ॥
मत्स्यश्च त्रिविधं देवि उत्तमाधममध्यमम् ।
उत्तमं त्रिविधं मत्स्यं शालपाठीनरोहितम् ॥
प्रशस्यं कण्टकैर्हीनं तैलाक्तं वल्कलैर्युतम् ।
देव्याः प्रीतिकरञ्चैव मध्यमं तत्त्रिविधम् ।
क्षुद्राणि तानि सर्व्वाणि अधमानि विदुर्बुधाः ॥"

भूचरमांसञ्च ।

"गोमेषाश्वशुलाशोत्थगोधाजोष्ट्रगोद्भवम् ।
महामांसाष्टकं प्रोक्तं देवताप्रीतिकारकम् ॥"

मांसाभावे अनुकल्पः । समयाचारे ।

"लवणार्द्रकपिण्याकतिलगोधूममाषकम् ।
शशुनञ्च महादेवि मांसप्रतिनिधिः स्मृतः ॥"*॥

सुद्रा तु द्विविधा । कुलार्णवे ।

"क्षत्रं मद्यकाकारं चन्द्रपद्मनिभं शुभम् ।
चारु पङ्कजमनोहारि शर्करादीञ्च पूरितम् ।
पूजाकाले देवताया मुद्रेयं परिकीर्त्तिता ॥"

यामले ।

"भक्ष्यधान्यादिकं यावत् चर्व्वणीयं प्रकल्पयेत् ।
तेषां संज्ञा कृता मुद्रा महामोदप्रदायिनी ॥"

तेषां शोधनन्तु खतन्त्रतन्त्रे । ॐ प्रतिष्ठिणु-रित्यादि मांसम् । आमकमित्यादि मीनम् । तद्विष्णोरित्यादि मुद्राम् । * । अथ शक्ति-शोधनम् । तत्र भावचूड़ामणौ ।

"अदीक्षितकुलासङ्गात् सिद्धिहानिः प्रजायते ।
तत्कथाश्रवणं चेत् स्यात् तत्क्षणगमनं यदि ।
स कुलीनः कथं देवि पूजयेत् परमेश्वरीम् ॥"

श्रीक्रमे संशोधनमनाचर्य्येति । कौलिकतन्त्रे ।

"अभिषेकाद्यवेक्षुद्भिर्म्मन्त्रस्योद्धारविन्दुभिः ।
बलाद्वा यत्नतो वापि अभिषेकं समाचरेत् ॥"

अभिषेकमन्त्रस्तु ।

"आदौ वाणीं समुच्चार्य्य त्रिपुरायै समुद्धरेत् ।
नमःशब्दं समुच्चार्य्य इमां शक्तिं ततो वदेत् ।
पवित्रीकुरु शब्दान्ते मम सिद्धिं कुरु प्रिये ।
वह्निजायां समुच्चार्य्य शुद्धिमन्त्रः सुरेश्वरि ।
तस्याः कर्णेऽभेदबुद्ध्या मायाबीजं समुद्धरेत् ॥"

इति शक्तिशोधनम् । * ॥

ततः शोधितद्रव्यमर्घ्ये निक्षिपेत् । श्रीक्रमे अर्घ्य-विधौ ।

"पूर्व्वशोधितद्रव्यन्तु गुप्तेनैव च संक्षिपेत् ॥"

खतन्त्रतन्त्रे ।

"आद्यद्रव्यमर्घ्यपात्रे निःक्षिप्य प्रयतः सुधीः ।
कुङ्कुमोलोड्भवं द्रव्यं स्वयम्भुकुसुमं तथा ।
अर्घ्यं दत्त्वा महेशानि सर्व्वसिद्धीश्वरो भवेत् ॥
सुरया चार्घ्यदानेन योगिनीनां भवेत् प्रियः ।
महायोगी भवेद्देवि पीठप्रक्षालितेऽम्भसि ॥"

भैरवतन्त्रे ।

"पञ्चमात् तु परं नास्ति शाक्तानां सुखमोक्षयोः ।
केवलैः पञ्चमैर्ब्बापि सिद्धो भवति साधकः ॥"

तेन पञ्चमकारेण पूजा कर्त्तव्या । इति तन्त्र-सारः ॥

वामापीड़नः, पुं, पीलुवृक्षः । इति शब्दचन्द्रिका ॥

वामिका, स्त्री, (वामा + स्वार्थे कन् । टापि अत इत्वम् ।) चक्षिका । यथा,—

"वङ्क्रास्तु चक्षिका देया वामिका मूर्त्तयः
स्मृताः ।
लक्ष्मीरास्तु वामिका मूर्त्तिरक्ता दहनभैरवी ।
नासिदाहं पुरश्चामसन्दिरेषु करोत्यलम् ।
अपूजिता महालक्ष्मीर्दैहत्यां तासु पूजयेत् ॥
वाग्भैरवी सरस्वत्या वामिका मूर्त्तिरीरिता ।
तस्या मन्त्रं पुरा प्रोक्तं शुक्लवर्णा तु सा स्मृता ॥"

इति कालिकापुराणे ७० अध्यायः ॥

वामिकः, त्रि, (वाम + इलच् ।) दाम्भिकः । वामः । इति मेदिनी । के, १११ ।

वामी, स्त्री, शृगाली । बड़वा । (यथा, रघौ । ५ । ३२ ।

"अथोड्वामीशतवाहितार्थं
प्रजेश्वरं प्रीतमना महर्षिः ॥")

राक्षसी । करभी । इति मेदिनी । मे, ३० ।

वामोरूः, स्त्री, वामौ सुन्दरौ ऊरू यस्याः । ("संहितशफलक्षणवामादेश्च ।" ४ । १ । ७० ।

इति ऊङ्।) नारीविशेषः। इति मुग्धबोधव्याकरणम्॥ (यथा, माघे। ८। २४।

"त्रस्यन्ती चलशफरीविघट्टितोरु-
र्वामोरूरतिगुरयमाप विभ्रमस्य।
क्षुभ्यन्ति प्रसभमहो विनापि हेतो-
र्लोलाभिः किमु सति कारणे तरुण्यः॥")

वायकः, पुं, (वयतीति। वे+खुल्।) समूहः। इति शब्दचन्द्रिका। (तन्त्रवायः। यथा, भागवते। ५। २६। ३६।

"यत्र ह वित्तयहं पापपुरुषं धर्म्मराजपुरुषा वायका इव सर्व्वतोऽङ्गेषु सूत्रैः परिवयन्ति॥")

वायदण्डः, पुं, (वायस्य दण्डः। यद्वा, वायतेऽनेनेति वायः। वाय एव दण्ड इति कर्म्मधारयः।) वापदण्डः। इति भरतद्विरूपकोषः॥

वायनं, क्ली, पिष्टकविशेषः। तत्पर्य्यायः। व्रतोपायनम् २। प्रदेयकम् ३। इति त्रिकाण्डशेषः॥

वायवी, स्त्री, (वायोरियमिति। वायु+अण्। ङीप्।) उत्तरपश्चिमदिक्। इति जटाधरः॥ (कार्त्तिकेयस्यानुचरमातृगणभेदः। यथा, महाभारते। ९। ४६। ३०।

"वायव्यश्चाप कौमार्य्यो ब्राह्मश्च भरतर्षभ!।
वैष्णवश्च तथा सौर्य्यो वाराहश्च महाबलः॥")

वायव्य, त्रि, (वायुर्देवतास्येति। वायु+"वायृतुपित्रुषसो यत्।" ४। २। ३१। इति यत्।) वायुसम्बन्धिदिगादि। यथा। विश्वयुग्मसृपक्रम्य गवाक्षतन्त्रे।

"वायव्यस्थं नैर्ऋतस्थं न यच्छीयात् कदाचन॥"

इति तिथ्यादितत्त्वम्॥

(वायुदेवताकपशुहविरादि। यथा, ऋग्वेदे। १०। ६०। ८।

"तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम्।
पशूंस्ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये॥"

"वायव्यान् वायुदेवताकान्।" इति तद्भाष्ये सायणः॥ ॰॥ क्ली, षट्शतताधिकचतुर्विंशतिसहस्रश्लोकात्मकवायुनामकमहापुराणम्। यथा, देवीभागवते। १। ३। ७।

"अयुतं वामनाख्यञ्च वायवं षट्शतानि च।
चतुर्विंशतिः संख्याताः सहस्राणि तु श्लोकतः॥"

अस्त्रविशेषः। यथा, महाभारते। १।१६।१६।

"आग्नेयेनाहनद्वह्निं वारुणेनाहनज्जलं पयः।
वायव्येनाहनद्वायुं पार्জन्येनाहनद्घनान्॥")

वायसः, पुं, (वयते इति। वय गतौ। "वयश्च।" उणा० ३। १२०। इति असच्। वयश्च जित्।) अगुरुवृक्षः। श्रीवासः। काकः। इति मेदिनी। से, १८॥ (यथा, महाभारते। ३। २७०। ३१।

"मयूरकङ्ककोलभासगोमायुवायसाः।
अदृश्यन्तत्र वीराणां हतानां मांसगोधिनैः॥")

अस्योत्पत्तिर्यथा,—

"अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ।
सम्पातिश्च जटायुश्च प्रभूतौ पक्षिसत्तमौ।
सम्पातिर्जनयत् पुत्रान् काकाः पुत्रा जटायुषः॥"

इति वह्निपुराणे वाराहप्रादुर्भावः॥ ॰॥

अस्य एकाक्षिनाशकारणं यथा,—

मार्कण्डेय उवाच।

"गते तु भरते तस्मिन् रामः कमललोचनः।
लक्ष्मणेन सह भ्रात्रा भार्य्यया सीतया सह।
ग्राकन्दफलाहारो विचचार महावने॥
एकदा लक्ष्मणस्ते रामदेवः प्रतापवान्।
चित्रकूटे वने देशे वैदेह्या सङ्गमाश्रितः॥
सुप्याप सुसुकूर्म्मश्च ततः काको दुरात्मवान्।
सीताभिमुखमभ्येत्य विददार स्तनान्तरम्।
विदार्य्य तूण्डमारुह्य स्थितोऽसौ वायसाधमः॥
ततः प्रबुद्धो रामोऽसौ दृष्ट्वा रक्तं स्तनान्तरम्।
शोकाविष्टान्तु सीतां तामुवाच कमलेक्षणः॥
किमिदं स्तनान्तरे भद्रे तव रक्तस्य कारणम्।
इत्युक्ता सा च तं प्राह भर्त्तारं विनयान्विता॥
पश्य राजेन्द्र दुष्टात्मा वायसं दुष्टचेष्टितम्।
येनैतच्च कृतं कर्म्म सुप्ते त्वयि महामते॥
रामोऽपि दृष्ट्वा तं काकं तस्मिन् क्रोधमथाकरोत्।
ऐषिकास्त्रं समादाय ब्रह्मास्त्रेणाभिमन्त्रितम्॥
काकसुद्दिश्य चिक्षेप सोऽवधावद्भयान्वितः॥
स त्रिलोकं ततो राजन् इन्द्रलोकं विवेश ह।
रामास्त्रं प्रज्वलं दीप्तं तस्यानुप्रविवेश वै॥
विदितार्थश्च देवेन्द्रो देवैः सर्व्वैः समन्वितः।
निष्कासयच्च तं दुष्टं राघवस्यापकारिणम्॥
ततोऽसौ सर्व्वदेवैस्तु देवलोकाद्बहिष्कृतः।
पुनः सोऽभ्येत्य रामञ्च राजानं शरणं गतः॥
त्राहि राम महाबाहो ममानादपकारिणम्।

इति ब्रुवन्तं स प्राह रामः कमललोचनः॥
अमोघाय ममास्त्राय अक्षि एकं प्रयच्छ मे।
ततो जीवसि दुष्टात्मन् मेऽपराधो महान् कृतः॥
इत्युक्तोऽसौ स्वकं नेत्रमेकमस्त्राय दत्तवान्।
अस्त्रञ्च नेत्रमेकन्तु भक्षीकृत्य शमं ययौ॥
ततः प्रभृति सर्व्वेषां काकानामेकनेत्रता।
चक्षुषैकेन पश्यन्ति हेतुनानेन पार्थिव!॥"

इति नरसिंहपुराणे ३३ अध्यायः॥ (वायससम्बन्धिनि, त्रि। यथा, महाभारते। १२। ८२। ७—८।

"स काकं पञ्जरे बद्धा विषयं क्षेमदर्शिनः।
सर्व्वं पर्य्यचरद्युक्तः प्रहृष्टार्थो पुनः पुनः॥
अधीष्वं वायसीं विद्यां ब्रूयन्ति मम वायसाः।
अनागतमतीतञ्च यच्च संप्रति वर्त्तते॥")

वायसादनी, स्त्री, (वायसेन अद्यते इति। अद+कर्म्मणि ल्युट्+ङीप्।) महाज्योतिष्मती। काकतुण्डी। इति राजनिर्घण्टः॥

वायसारातिः, पुं, (वायसस्य अरातिः।) पेचकः। इत्यमरः। २। ५। १५॥

वायसाह्वा, स्त्री, (वायसस्य आह्वा नाम यस्याः।) काकनासा। काकमाची। इति राजनिर्घण्टः॥

वायसी, स्त्री, (वायसानामियमिति तत्प्रियत्वात्। वायस+अण्। ङीष्।) काकोडुम्बरिका। काकमाची। इति मेदिनी। से, ३८॥ महाज्योतिष्मती। काकनासा। काकतुण्डी। इति राजनिर्घण्टः॥

वायसेक्षुः, पुं, (वायसानामिक्षुरिव प्रियत्वात्।) काशः। इति राजनिर्घण्टः॥

वायसोलिका, स्त्री, (वायसोली+स्वार्थे कन्।) काकोली। इति शब्दरत्नावली॥

वायसोली, स्त्री, (वायसान् ओलम्बयतीति। ओलडि उत्क्षेपे+"अनेष्वपि दृश्यते।" इति ङः। ग्रकन्यादित्वात् अस्य लोपः।) काकोली। इत्यमरः। २। ४। १४४॥

वायुः, पुं, (वातीति। वा गतिगन्धनयोः+"ज्वरापाजिमिस्विदिसाध्यशूभ्य उण्।" उणा० १। १। इति उण्। "आतो युक्चिण्कृतोः।" ७। ३। ३३। इति युक्।) उत्तरपश्चिमकोणाधिपतिः। वाति यः। वातास इति भाषा। स च पञ्चभूतान्तर्गतभूतविशेषः। तद्विशेषविवरणं यथा। वायवः प्राणापानव्यानोदानसमानाः॥ प्राणो नाम प्राग्गमनवान् नासाग्रस्थानवर्त्ती। अपानो नाम अवाग्गमनवान् पायुादिस्थानवर्त्ती। व्यानो नाम विश्वग्गमनवानखिलशरीरवर्त्ती। उदानः कण्ठस्थानीय ऊर्द्धगमनवायुरूर्द्धगवायुः। समानः शरीरमध्यगताग्नितप्तीतान्नादिसमीकरणकरः। समीकरणन्तु परिपाककरणं रसरुधिरशुक्रपुरीषादिकरणम्। केचित्तु नागकूर्म्मकरकदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीत्याहुः। तत्र नागः उद्गिरणकरः। कूर्म्मः निमीलनादिकरः। कृकरः क्षुधाकरः। देवदत्तः जृम्भणकरः। धनञ्जयः पोषणकरः। एतेषां प्राणादिवन्नभावात् प्राणादयः पञ्चेवेति केचित्॥ इदं प्राणादिपञ्चकं आकाशादिसत्त्वरजोंऽशेभ्यो मिलितेभ्य उत्पद्यते। इदं प्राणादिपञ्चकं कर्म्मेन्द्रियसहितं सत् प्राणमयकोशो भवति। अस्य क्रियात्मकत्वेन रजोंऽशकार्य्यत्वम्। एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्त्तृरूपः। मनोमय इच्छाशक्तिमान् करणरूपः। प्राणमयः क्रियाशक्तिमान् कार्य्यरूपः। इति वेदान्तसारः॥ तत्पर्य्यायः। असनः २ स्पर्शनः ३ मातरिश्वा ४ सदागतिः ५ एजदश्वः ६ गन्धवहः ७ गन्धवाहः ८ अनिलः ९ आशुगः १० समीरः ११ मारुतः १२ मरुत् १३ जगत्प्राणः १४ समीरणः १५ नभस्वान् १६ वातः १७ पवनः १८ पवमानः १९ प्रभञ्जनः २०। इत्यमरः॥ जगत्प्राणः २१ श्वासः २२ वाहः २३ धूलिध्वजः २४ गन्धप्रियः २५ वातिः २६ नभःप्राणः २७ भोगिकान्तः २८ सदस्वनः २९ अयतिः ३० कम्पनप्राणः ३१ प्रसीतिः ३२ आवकः ३३ हरिः ३४। इति शब्दरत्नावली॥ वायुः ३५ सुखाग्रः ३६ नगवाहनः ३७ वारः

३८ चपल: ३९ विहग: ४० प्रकम्पन: ४१ नभ:-
सर: ४२ निश्वासक: ४३ सूनृत: ४४ एधतां-
पति:। इति जटाधर:॥ ॥ स च सृष्टि-
काले आकाशाच्जात:। यथा। तस्माद्वा
एतस्मादात्मन आकाश: संभूत आकाशा-
द्वायु:। इत्यादि तैत्तिरीयश्रुति:॥ ॥ जन-
पश्चादग्र्यायुरदिते: पुत्रा:। ते सर्वे अप्रजा:।
इन्द्रेण देवत्वं प्रापिता:। शरीरान्तर्वाह्यभेदेन
दशधा। यथा। प्राण: १। तस्य कर्म बहि-
र्गमनम्। अपान: २। तस्य कर्म अधोगम-
नम्। व्यान: ३। तस्य कर्म आकुञ्चनप्रसा-
रणादि। समान: ४। तस्य कर्म अशितपीता-
दीनां समं नयनम्। उदान: ५। तस्य कर्म
ऊर्ध्वनयनम्।
"उद्गारे नाग ६ आख्यात: कूर्म ७ उन्मीलने
स्मृत:।
हकर: ८ क्षुत्करो ज्ञेयो देवदत्तो९ विजृम्भणे।
न जहाति मृतस्यापि सर्वव्यापी धनञ्जय:१०॥"
इति भागवतटीकायां श्रीधरस्वामी॥ ॥
अन्यच्च।
"द्वितीयं मारुतो भूतं जगध्यात्मञ्च विश्रुता।
सर्वेषामधिभूतञ्च विद्युत्तत्राधिदैवतम्॥"
इति महाभारते आश्वमेधिकपर्व॥
तस्य गुणा:। यथा,—
"वायोरनियमस्पर्शो वादस्यानं खतन्त्रता।
बलं प्रेरयच मोक्षच कर्म चेष्टालता भव:॥"
इति महाभारते मोक्षधर्म:॥ ॥
अनियमस्पर्श:। अनुष्णाशीतस्पर्श:१। द्वादि-
स्थानम्। वाग्विन्द्रियगोलकानि२। खतन्त्रता।
गमनादौ३। बलम्४। प्रेरम्५। मोक्ष:
क्षुदादे:६। कर्म। उत्क्षेपणादि.७। चेष्टा
श्वासप्रश्वासादि ८। आत्मता प्राणरूपेण
चिदाधित्वम्९। भव:। जन्ममरणे १०। इति
तट्टीका॥ ॥ न्यायमते अस्य गुणादिर्यथा,—
"अपाकजानुष्णाशीतस्पर्शस्तु पवने मत:।
तिर्यग्गमनवानेष प्रेर: स्पर्शादिलिङ्गक:॥
पूर्ववन्नित्यतायुक्तं देहस्थापि त्वगिन्द्रियम्।
प्राणादिस्तु महावायुपर्यन्तविषयो मत:॥"
इति भाषापरिच्छेद:॥
"वायुं निरूपयति अपाकज इति। अनुष्णा-
शीतस्पर्शस्य पृथिव्यामपि सत्त्वात् अपाकज
इति। अपाकजस्पर्शस्य जलादावपि सत्त्वात्
उक्तमनुष्णाशीत इति। एतेन वायोर्विजा-
तीयस्पर्शो दर्शित:। तज्जन्यतावच्छेदकं वायु-
त्वमिति भाव:। एष वायु: स्पर्शादिलिङ्गक:।
वायुर्हि स्पर्शशब्दप्रतिकम्पैरनुमीयते। विजा-
तीयस्पर्शेन विलक्षणशब्देन ह्यादीनां ध्वजा
ग्राह्यादीनां कम्पनेन च वायोरनुमानात्।
तथा च वायुर्न प्रत्यक्षस्तथापि वक्ष्यते। वायु-
र्नित्योऽनित्यो वा परमाणुरूपो नित्यस्तदन्यो-
ऽनित्य: समवेतश्च। सोऽपि त्रिविध: शरीरे-
न्द्रियविषयभेदात्। अत्र शरीरमयोनिजं
पिण्डाचादीनाम्। देहस्थापीति। शरीरस्थापकं
स्पर्शग्राहकमिन्द्रियं त्वक्। तच्च वायवीयं
रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात्। अङ्ग-
संसर्गिसलिलशैत्यव्यञ्जकव्यजनवातवत्। विषयं
दर्शयति प्राणादिरिति। यद्यप्यनिलो वायु-
श्चतुर्विध: तस्य चातुर्विध्यं प्राणादिना ह्युक्त-
माकरे। तथापि संक्षेपात् अत्र त्रैविध्यमुक्तं
प्राणस्यैक एव हृदादिनानास्थानवृत्तात् सुख-
निर्गमादिनानाक्रियावत्त्वाच्च नानासंज्ञां लभते
इत्यर्थ:।" इति सिद्धान्तमुक्तावली॥ ॥ अस्योत्-
पत्तिर्यथा,—
पुलस्त्य उवाच।
"प्रविश्य जठरं शुद्धो दैत्यमातु: पुरन्दर:।
ददर्शार्हसुखं बालं कटिन्यस्तकरं महत्॥
तेनैव गर्भं दितिजं वज्रेण शतपर्वणा।
चिच्छेद सप्तधा ब्रह्मन् स रुरोद सुविस्वरम्॥
शक्रोऽपि प्राह मा रुद्र रुदस्वेति सचर्षरम्।
इन्द्रेवसुका यैकैकं भूयश्चिच्छेद सप्तधा॥
ते जाता मरुतो नाम देवा दित्या: सुतक्रतो:।
मातुरेवापचारेण बलवीर्यपुरस्कृता:॥"
इति वामने ६८ अध्याय:॥
"यदमी भवता प्रोक्ता मरुतो दितिसम्भवा:।
तत् केन पूर्वमासन् वै मरुन्मार्गेण कथ्यताम्॥
पुलस्त्य उवाच।
शृणुतां पूर्वमरुतामुत्पत्तिं कथयामि ते।
स्वायम्भुवं समारभ्य यावन्मन्वन्तरं त्विदम्॥
स्वायम्भुवस्य पुत्रोऽभून्नाम्नोत्तम प्रियव्रत:।
तस्यासीत् सवनो नाम पुत्रस्त्रैलोक्यपूजित:॥
खसृत्पतायां च कामचारी
समं महिष्यां वसुमानपुत्रान्।
ररास तस्यां सह कामचारी
ततोऽमरात् प्राप्यवतास्य शुक्रम्॥
पतिभि: समनुज्ञाता: पयु: पुष्करसंस्थितम्।
तं शुक्रं पार्थिवेन्द्रस्य मन्थमानास्तदाप्तम्॥
पीतमात्रेण शुक्रेण पार्थिवेन्द्रोद्भवेन च।
ब्रह्मतेजोविहीनास्ता जाता: पक्षच्युतपक्षिणाम्॥
सुषुवु: सप्त तनयांस्ते रुदन्तोऽथ भैरवम्।
तेषां रुदितशब्देन सर्वमापूरितं जगत्॥
अथाजगाम भगवान् ब्रह्मलोकात् पितामह:।
समभ्येत्याब्रवीद्वाक्यान् मा रुदध्वं महाबला:॥
मरुतो नाम यूयं वै भविष्यध्वं वियच्चरा:।
इन्द्रेवसुका देवेशो ब्रह्मा लोकपितामह:॥
तानादाय वियच्चारी मारुतानादिदेश ह।
ते चासन् मरुतस्तस्मा मनो: स्वायम्भुवान्तरे॥
स्वारोचिषे तु मरुतो वक्ष्यामि शृणु नारद।
स्वारोचिषस्य पुत्रश्च श्रीमानासीत् क्रतुध्वज:॥
तस्य पुत्रा अभवन् सप्त सप्तार्चि:प्रतिमा सुते!।
तपोऽर्थं ते गता: शैलं महामेरुं नभश्चरा:॥
आराधयन्तो ब्रह्माणं पद्मजन्मानमीश्वरं।
ततो विपश्चिन्नामाथ सहस्राक्षो भयातुर:।
शृतनामग्रतोसृक्षां प्राह नारद वाक्यवित्॥
यथा हि तपसो विघ्नं तेषां भवति सुन्दरि!।
तथा कुरुष्व मा तेषां सिद्धिर्भवतु वै यथा॥
इत्येवमुक्ता शृक्वेण शृतना रूपशालिनी।
तत्राजगाम त्वरिता यत्र तप्यन्ति ते तप:॥
आश्रमस्याविदूरे तु नदी मन्दोदवाहिनी।
तस्यां स्नातुं समायाता: सर्व एव सहोदरा:॥
सा तु स्नातुं सुचार्वङ्गी ह्लवतीर्णा महा-
नदीम्।
ददृशुस्ते शृपा: स्नातुं ततस्तुष्टुभिरे मुने॥
तैश्चाथ प्राप्यवत् शुक्रं तत् पपौ जलचारिणी।
शृङ्गिणो ग्राहसुखस्य महाशृङ्गस्य वल्लभा।
ते वै विनष्टतपसो जग्मू राज्यमु पैल्वकम्॥
अहो बहुतिथे काले सा ग्राही शृङ्गरूपिणी।
समृतुता महाजालैर्मत्स्यबन्धेन मानिनी॥
स तां दृष्ट्वा महाशृङ्गीं स्वसस्यां मत्स्यजीवन:।
निवेदयामास तदा क्रतुध्वजसुतेषु वै॥
तथाश्रेत्य महात्मानो योगिनो योगधारिण:।
नीत्वा स्वमन्दिरं सर्वे पुरवास्यां समृतृहुजन॥
तत: क्रमाच्छुक्रिणी सा सुषुवे सप्त वै शिशून्।
जातमात्रेषु पुत्रेषु मोक्षभावमगाच्च सा॥
अमाटपिण्डका बाला जलमध्यविचारिण:।
स्वन्यार्थिनो वै रुरुदुरथाभ्यामातृ पितामह:॥
मा रुदध्वमिति प्राह मारुतो नाम पुत्रका:।
यूयं देवा भविष्यध्वं वायवोऽम्बरचारिण:॥
इत्येवमुक्त्वादाय सर्वांस्तान् देवतान् प्रति।
नियोज्य च मरुन्मार्गे वैराजभवनं गत:॥
एवमार्षं च मरुतो मनो: स्वारोचिषान्तरे॥
औत्तमे मरुतो ये च तान् शृणुष्व तपोधन।
औत्तमस्यान्वये च राजासीन्नृषधाधिप:।
वपुष्मानिति विख्यातो वपुषा भास्करोपम:॥
तस्य पुत्रो गयश्रेष्ठो ज्योतिष्मान् धार्म्मिको-
ऽभवत्।
स पुत्रार्थी तपस्तेपे नदीं मन्दाकिनीमशु॥
तस्य भार्या च सुशीला देवाचार्यसुता शुभा।
तपश्चरणयुक्तस्य बभूव परिचारिका॥
तेनोयुक्ता सुचार्वङ्गी दृष्ट्वा सप्तर्षिभिर्वने।
तां तथा चारुसर्वाङ्गीं दृष्ट्वाथ तपसा शृताम्॥
पप्रच्छुस्तपसो हेतुन्तस्यास्तेऽङ्गर्षयश्च ह।
आचचक्षेतनयार्थाय आवाभ्यां वै तप:क्रिया॥
ते चास्ये वरदा ब्रह्मन् जाता: सप्त महर्षय:॥
व्रजध्वं तनया: सप्त भविष्यन्ति न संशय:।
युवयोर्गुणसंयुक्ता महर्षीणां प्रसादत:।
इत्येवमुक्ता जग्मुस्ते सर्व एव महर्षय:।
सोऽपि राजर्षिरगमत् सभार्यो नगरं निजम्॥
ततो बहुतिथे काले सा राज्ञो महिषी प्रिया।
अवाप गर्भं तन्वङ्गी तस्मान्नृपतिसत्तमात्॥
गुर्विण्यामथ भार्यायां समाराधो नराधिप:।
सा चाप्यारोढुमिच्छन्ती भर्तारं वै पतिव्रता॥
निवारिता तदामात्यैर्न तथापि व्यतिष्ठत।
तस्यामात्यैश्च भर्तारं चितायामारुहच्च सा॥
ततोऽग्निमध्यात् सलिले मांसपेश्यपतन्मुने।
साम्भसा सुखशीतेन संसिक्ता सप्तधाभवत्॥
तेऽजायन्ताथ मरुत औत्तमस्यान्तरे मनो:॥

तामसस्यान्तरे ये च मरुतोऽप्यभवन् पुरा ।
तानहं कीर्तयिष्यामि गीतवृत्तकलिप्रिय ! ॥
तामसस्य मनोः पुत्र ऋतध्वज इति श्रुतः ।
स पुत्रार्थी जुहावाग्नौ स्वमांसं रुधिरं तथा ॥
अस्थीनि रोम केशांश्च स्नायु मज्जा यकृद्धृदयम् ।
शुक्रं च विधिवो राजा सुतार्थी चेति नः
श्रुतम् ॥
सप्तार्चिर्मंथ्याच्च ततः शुक्रपानादनन्तरम् ।
मा मे क्षिपस्वेत्यसरत् शब्दः सोऽपि नृपो श्रुतः ॥
ततस्तस्माद्धुतवहात् सप्त तत्तेजसोपमाः ।
शिशवः समजायन्त ते रुदन्तश्च तस्तुने ॥
तेषान्तु ध्वनिमाकर्ण्य भगवान् पद्मसम्भवः ।
समागम्य निवार्यैनांश्च सप्त चक्रे मरुतः सुतान् ॥
ते त्वासन्मरुतोऽब्रह्मंस्तामसे देवतागणाः ॥
ये भवन्त्वेते तांश्च ब्रह्मन्त्व त्वं तपोधन ॥
रैवतस्यान्ववाये तु राजासीद्विपुजिद्बली ।
रिपुञ्जिन्नाम स ख्यातो न तस्यासीत् सुतः
किल ॥
स समाराध्य तपसा भास्करं तेजसां निधिम् ।
अवाप कन्यां सुरतिं तां प्रयच्छ इहं ययौ ॥
तस्यां पिण्डग्रहे ब्रह्मन् वसत्यान्च पिता श्रुतः ।
सापि दुःखपरीताङ्गी स्वां तनुं त्यक्तुमुद्यता ॥
ततस्तां वारयामासुर्ऋषयः सप्त मानसाः ।
तस्यामासक्तचित्तास्तु सर्व एव तपोधनाः ॥
अपारयन्तो तद्दुःखं प्रव्वाल्याग्निं विवेश ह ।
ते चापश्यन्त ऋषयस्तच्चित्ताभावितास्तथा ॥
तां श्रुतां ऋषयो दृष्ट्वा कष्टं कष्टेति वादिनः ।
प्रजगुर्व्वलनाच्चापि सप्तानायन्त दारकाः ॥
ते च मात्रा विना भूता रुरुदुस्तान् पितामहः ।
निवारयित्वा स्तवान् लोकनाथो मरुद्गणान् ॥
रैवतस्यान्तरे जाता मरुतोऽमी तपोधन ॥
ब्रह्मन्त्व कीर्तयिष्यामि चाक्षुषस्यान्तरे मनोः ॥
आसीन्नाड्वलेति विख्यातो तपस्वी सत्यवाक्
शुचिः ।
सप्त सारस्वते तीर्थे सोऽतप्यत महत्तपः ॥
विघ्नार्थं तस्य तपसो देवाः संप्रेरयन् वधूम् ।
सा चाभ्येत्य नदीतीरं क्षोभयामास भाविनी ॥
ततोऽस्य प्राप्यवक्त्रं सप्त सारस्वते जले ।
तां चेवाप्यप्सपद्मूढां मुनिर्नाड्वलिको वधूम् ॥
गच्छालब्धेति सढ़े त्वं पापस्यास्य फलं महत् ।
विध्वंसयिष्यति ह्यो भवतीं यज्ञसंसदि ॥
एवं शप्त्वा ऋषिः श्रीमान् जगामाथ स्वमाश्रयम् ।
सरस्वतोभ्यः सप्तभ्यः सप्त वै मरुतोऽभवन् ॥
एते तवोक्ता मरुतः पुरा यथा
जाता वियद्व्याप्तिकरा महर्षे ।
येषां श्रुते जन्मनि पापहानि-
र्भवेच्च धर्माभ्युदयो महान् वै ॥"
इति वामने मरुतोत्पत्तिर्नाम ६६ अध्यायः ॥*॥
अन्यच्च ।
"अतः परं प्रवक्ष्यामि मरुतोऽन्यान् पितॄन्
यहान् ।
प्राणादो निवहश्चैव उद्वहः संवहस्तथा ॥
विवहः प्रवहश्चैव परिवाहस्तथैव च ।
अन्तरीक्षे च वाह्ये ते पृथङ्मार्गविचारिणः ॥
महेन्द्रप्रविभक्ताङ्गा मरुतः सप्त कीर्तिताः ॥*॥
सूर्यांशिश्च शुचिर्नामा वैद्युतः पावकः स्मृतः ॥
निर्मथ्य पच्यमानोऽग्निस्त्रयः प्रोक्ता इमेऽग्नयः ।
अग्नीनां पुत्रपौत्राश्च चत्वारिंशन्नवैव तु ।
मरुतामपि सर्व्वेषां विज्ञेया सप्त सप्तकाः ॥"
इति देवीपुराणे कालवयवस्थानामाध्यायः ॥*॥
ऊनपञ्चाशद्वायुनामानि यथा,—
"एकज्योतिश्च द्विज्योतिस्त्रिज्योतिरेव च ।
एकशृङ्गो द्विशृङ्गश्च त्रिशृङ्गश्च महाबलः ॥
एकश्च सप्तहस्तश्च ततः पतिसुतस्वरः ।
मितश्च संमितश्चैव सुमितश्च महाबलः ॥
ऋतजित् सत्यजिच्चैव सुषेणः सेनजित्तथा ।
अन्तिमित्रोऽनमित्रश्च पुरुमित्रोऽपराजितः ॥
ऋतश्च ऋतवाहश्च धर्त्ता च धरणो ध्रुवः ।
विधारणो नाम तथा देवदेवो महाबलः ॥
ईदृक्षाश्चाप्यदृक्षश्च ऋते दश्च मिताग्निः ।
व्रतिनः प्रसहश्च सभरश्च महायशाः ॥
धाता दुर्गो धितिर्भौमश्चभियुक्तश्चपातृ सहः ।
द्युतिर्धरुणाख्योऽथ वासः कामो जयो विराट् ।
इत्येकोनाश्च पञ्चाशन्मरुतः पूर्वसंभवाः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥*॥
वायोर्विकारहेतुर्यथा,—
"व्यायामादपतर्षणात् प्रपतनाद्भङ्गात् क्षया-
ज्जागरात्
वेगाघात विधारणादतिशुचः शैत्यादति-
त्रासतः ।
रूक्षक्षारकषायतिक्तकटुकैरेभिः प्रकोपं व्रजेत्
वायुर्व्वारिधरात्मके परिवृते चान्नेऽपराह्णेऽपि
च ।"*॥
तस्य लक्षणम् ।
"आध्मानस्तम्भरौक्ष्यस्फुटनविमथनक्षोभकम्प-
प्रतोदाः
कण्ठध्वंसावसादो भ्रमकविजृम्भणं संसृतेः
प्रभेदाः ।
पार्श्वं कर्षणादो विषयपरिवृतिर्भंग्रहृद्वि-
प्रमोहा
विस्रन्दोहृद्ग्रहादिस्वपनमनशनं ताडनं पीड़-
नञ्च ॥
नामोन्नामौ विषादो भ्रमपरिवदनं जृम्भणं
रोमहर्षो
विक्षेपास्तेषणोष्यहृदयमुखिरता छेदनं वेदनञ्च ।
वर्णः श्यावोऽरुणो वा ह्यरुणि च महती खाप-
विश्लेषसङ्गा
विद्यात् कर्म्माण्यमूनि प्रकुपितपवनः स्यात्
कषायो रसश्च ॥"*॥
अन्यच्च ।
"वदनविरसता स्यादास्यः कर्कशत्वं
भवति वपुषि काश्यं राचिनिद्रानिवृत्तिः ।
त्वचि च परुषता स्यात् स्याच्च वैषम्यमक्षे-
रिति पवनविकारे लक्षणं प्रोक्तमेतत् ॥"*॥
तस्य प्रशमनाकारणम् । यथा,—
"रूक्षग्रीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः ।
विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति ॥
स्निग्धोष्णस्थिरदृश्यवल्लवणस्नाद्यम्लतैलातप-
स्नानाभ्यङ्गनवस्तिमांसमदिरासंवाहनोन्मर्दनैः ।
स्निग्धस्वेदनिरूहणोपशमनः स्नेहोपनाहादिकं
पानाहारविहारमेषजमिदं वातं प्रशान्तं
नयेत् ॥"*॥
ऋतुभेदेन विहारादिना च तस्य चयप्रकोप-
प्रशमनानि यथा,—
"ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति ।
प्रायेणोपशमं याति स्वयमेव समीरणः ॥
शरत्काले वसन्ते च पित्तं प्रावृड्तौ कफः ।
चयकोपशमान्दोषा विहाराहारसेवनैः ।
समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्ययः ॥"*॥
स च प्राणादिभेदेन पञ्चविधः । यथा,—
"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत् ॥
वायुरायुर्बलं वायुर्वायुर्धाता शरीरिणाम् ।
वायुर्विश्वमिदं सर्व्वं प्रभुर्व्वायुः प्रकीर्त्तितः ॥
वात्यमक्षत्यक्रेषु यथा राजा प्रशस्यते ।
तथा शरीरमध्येऽपि वायुरेकः परो विभुः ॥
वायुः प्राणादिभेदेन सच्च पञ्चविधः स्मृतः ।
हृदि प्राणो गुदेऽपानः समानो नाभिमध्यगः ॥
उदानः कण्ठदेशे तु व्यानः सर्व्वशरीरगः ।
योऽनिलो रक्तसञ्चारी स प्राणो नाम देहधृक् ॥
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चैवावलम्बते ।
कुपितः कुरुते रोगान् हिक्काश्वासादिकानपि ॥
उदानो नाम यस्तूर्द्ध्वमेति प्रवणोत्तमः ।
तेन भाषितगीतादिविशेषोऽपि प्रवर्त्तते ॥
ऊर्द्धजत्रुगतान् रोगान् करोति कुपितश्च सः ।
आमपक्वाशयचरः समानोऽग्निसहायवान् ॥
अन्नं पचति तत्रांश्च विकारान् विविनक्ति सः ।
गुल्माग्निसादातीसारान् कुपितश्च करोति सः ॥
पक्वाशयस्थोऽपानस्तु काले कर्षति चाध्वधः ।
वातमूत्रपुरीषाणि शुक्रगर्भाशयानि च ॥
कुद्धश्च कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ।
सर्व्वदेहचरो व्यानो रससंवाहनोद्यतः ॥
स्वेदासृक्स्रावणश्चापि प्रथमा वेदयत्यपि ।
क्रुद्धश्च कुरुते रोगान् प्रायशः सर्व्वदेहगान् ॥
शुक्रदोषाः प्रमेहाश्च व्यानापानप्रकोपजाः ।
युगपत् कुपितास्त्वामी देहं हन्युरसंशयः ॥"*॥
तत्प्रकृतिकस्य लक्षणं यथा,—
"अल्पकेशः क्षयो रूक्षो वाचालश्चलमानसः ।
आकाशचारी स्वप्नेषु वातप्रकृतिको नरः ॥"*॥
प्राणादिपञ्चवायूनां यथाक्रमं संज्ञान्तरमाह ।
"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ॥*॥
प्राणस्तु प्रथमो वायुर्नाम्नाधिपः प्रभुः ।
नित्यमापयेत् सर्व्वान् प्राणिनासुरसि स्थितः ॥
निःश्वासोच्छ्वासकश्चैव प्राणो जीवं समाश्रितः ।
प्रसाराकुञ्चनो वायुः प्रकाशो धारयत्यथा ॥

प्राणस्त्वेवंविधं कुर्य्यात् प्राणिनां प्राणधारकः।
प्राणनं कुरुते यस्मात् तस्मात् प्राणः प्रकीर्त्तितः॥
प्राणो हि भगवान् ईशः प्राणो विष्णुः पितामहः।
प्राणेन धार्य्यते लोकः सर्व्वं प्राणमयं जगत्॥
इन्द्रियाणि प्रवर्त्तन्ते यावत् प्राणास्तु हृदि।
नष्टे न दृश्यते सर्व्वं तस्मात् प्राणन्तु रक्षयेत्॥
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः।
गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते॥
अपानयंस्तथाहारं मनुष्याणां यतोऽधमः।
शुक्रमूत्रत्वजे वायुरपानस्तेन कीर्त्तितः॥*॥
पीतं भक्षितमात्रातं रक्तं पित्तकफानिलान्।
समं नयति यावेतु समानो नाम मारुतः॥
समानोऽग्निसमीपस्थः कोष्ठे च वाति सर्व्वतः।
अन्नं गृह्णाति पचति विरेचयति सुश्रुत॥*॥
सन्दधत्यधरं वक्त्रं नेत्रगात्रप्रकोपनः।
उद्गिरयति मर्म्माणि उदानो नाम मारुतः॥*॥
व्यानो विनामयत्यङ्गं व्यानो व्याधिप्रकोपनः।
प्रीतेर्विनाशनकृच्चायं वाङ्मनोत्पादकस्तथा॥"*॥
वायूनां स्थानानि।
"शिरसो नासिकाप्रान्तमुदानस्थानमुच्यते।
नाभेः पादतलं यावदपानस्य प्रकीर्त्तितम्॥
शरीरव्यापको व्यानः प्राणः सकलनायकः।
उद्गारे नाग इत्युक्तः कूर्म्मोन्मीलने स्थितः॥
कृकरः क्षुधिते चैव देवदत्तो विजृम्भिते।
धनञ्जयः स्थितो मेढ्रे मृतस्यापि न मुञ्चति।
भूतावाप्तिस्तत्तस्थानायतेन्द्रियगोचरात्॥*॥
उत्साहोच्छ्वसनिःश्वासचेष्टाधातुगतिः समाः।
समो मोक्षे गतिमतां वायोः कर्म्मविकारजम्॥"
इति सुश्रुतः॥*॥
अथ दिग्भेदवायुगुणाः।
"प्राग्वातो मधुरः शीतो वह्निमान्मधुरो गुरुः।
वैरस्यगौरवौष्ण्यानि करोत्यप्स्वोषधीषु च॥
भयोत्क्लिष्टच्छटाटोपं रागश्वयथुदाहकृत्।
सन्निपातज्वरश्वासलग्नदोषाग्निविक्रियीन्॥
कोपयेदामवातञ्च घनसंघातकारकम्॥
दक्षिणो मारुतो बल्यश्चक्षुष्यः शुक्रघातकः।
मधुरश्चाम्लदाही च कषायानुरसो लघुः॥
रक्तपित्तप्रशमनो न च मारुतकोपनः।
गर्भपुष्टादिकीटानां जनकः प्राणकारकः॥
पाश्चिमोऽग्निवपुर्वर्णबलारोग्यविवर्द्धनः।
कषायः शीतलः स्वर्य्यो रोचनो विशदो लघुः॥
अपां लघुत्ववैशद्यशैत्यवैमल्यकारकः।
सर्व्वद्रव्येष्वभिव्यक्तप्रभावरसवीर्य्यकृत्॥
व्रणसंरोपणश्चण्यो दाहश्रीयत्वपापहः॥
औत्तरो मारुतः स्निग्धो मृदुर्मधुर एव च।
कषायानुरसः शीतः सर्व्वदोषप्रकोपनः॥
शीघ्रक्षतविषार्त्तानां हितो दाहरुजापहः।
शीतोदकः सनीहारः सविद्युत्स्तनयित्नुमान्॥
विश्वव्यायुरनायुष्यः प्राणिनां नैकदोषकृत्।
सर्व्वर्त्तुनिन्दको हन्ता क्षयोत्पातपुरःसरः॥"*॥
यजनवायुगुणाः।
"मूर्च्छादाहक्लमस्वेदश्रमघ्नो यजनानिलः।
तालवृन्तमयो वातस्त्रिदोषघ्नश्च लघुः॥
वंशव्यजनजो वातो रूक्षोष्णो वातपित्तदः।
बालव्यजनसोत्थं मक्षिकादीन् व्यपोहति।
मायूरो वल्गना वैत्रो वाता दोषत्रयापहाः॥"
इति राजवल्लभः॥*॥
अपि च। तत्र वायोः स्वरूपमाह।
"दोषधातुमलादीनां नेता प्रेरः समीरणः।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः॥"
नेता स्थानान्तरे प्रापयिता। प्रेरः आशुकारी। अन्यच्च।
"उत्साहोच्छ्वसनिःश्वासचेष्टावेगप्रवर्त्तनैः।
व्यक्तीगत्वा च धातूनामिन्द्रियाणाञ्च पाटवैः।
अनुग्रहाच्चविज्ञानो हृदयेन्द्रियचित्तधृक्।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः॥
खरो मृदुर्योगवाही संयोगाद्भयार्थकृत्।
दाहश्लेष्मजरा युक्तः शीतकृत् सोमसंश्रयात्॥
विभागकरणाद्वायुः प्रधानं दोषसंग्रहे।
पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम्।
स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः॥"
एको वायुः पित्तवह्न्यामस्थानकर्म्मभेदैः पञ्चविधः॥*॥ तेषां वायूनां नामाद्याह।
"उदानश्चक्षुरु प्राणः समानोऽपान एव च।
व्यानश्चेमानि नामानि वायोः स्थानप्रभेदतः॥"
अथोदानादीनां स्थानाद्याह।
"कण्ठे हृदि तथाधस्तात् कोष्ठवह्निर्मलाशये।
सकलेऽपि शरीरेऽसौ क्रमेण पवनो वसेत्॥"
अथ तेषां कर्म्माण्याह।
"उदानो नाम यस्तूर्द्धमुपैति पवनोत्तमः।
तेन भाषितगीतादिप्रवृत्तिः कुपितस्तु सः।
कुर्य्याज्जत्रुगतान् रोगान् विदधाति विशेषतः॥
यो वायुः प्राणनामासौ मुखं गच्छति देहभृत्।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते॥
प्रायशः कुरुते दुष्टो हिक्कोच्छ्वासादिकान् गदान्।
आमपक्वाशयचरः समानो वह्निसङ्गतः॥
सोऽन्नं पचति तत्रांश्च विशेषान् विविनक्ति हि॥"
तत्रांशानाह अन्नसारान्। रसमलमूत्रादीन् पृथक्करोतीत्यर्थः।
"स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि।
पक्वाशयालयोऽपानः कालेकर्षति चाप्ययम्॥
समीरणः शुक्रमूत्रशुक्रगर्भांशवान्धवः।
कुद्धस्तु कुरुते रोगान् घोरान् वस्तिगुदाश्रयान्॥
शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान्॥"
स च।
"कृत्स्नदेहचरो व्यानो रससंदहनो यतः।
खेदाद्रक्तस्रवञ्चापि पञ्चधा चेष्टयत्यपि॥
गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः।
प्रायः सर्व्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम्॥
प्रस्पन्दनं चोद्वहनं पूरणञ्च विरेचनम्।
धारणञ्चेति पञ्चैताश्चेष्टाः प्रोक्ता मनीषिभिः॥
क्रुद्धः स कुरुते रोगान् प्रायशः सर्व्वदेहगान्।
युगपत् कुपिता यत्ते देहं भिन्युरसंशयम्॥"
देहं भिन्नं कुर्य्युर्मारयेयुरित्यर्थः। इति भावप्रकाशः॥*॥ (असुरविशेषः। यथा, हरिवंशे। २। ८५।
"दीर्घजिह्वोऽर्कनयनो मृदुचापो मृदुप्रियः।
वायुर्गरिष्ठो नमुचिः शम्बरो विजयो महान्॥")
वायुकेतुः, स्त्री, (वायुः केतुर्ध्वजो वाहनं वा यस्याः।) छुलिः। इति हारावली। १५८।
वायुगन्धः, पुं, अजमोदः। इति त्रिकाण्डशेषः।
वायुगुल्मः, पुं. (वायुना कृतो गुल्म इव।) अम्लपित्तभ्रमः। इति त्रिकाण्डशेषः।
वायुदारुः, पुं, (वायुना दीर्य्यते इति। दृ+उण्।) मेघः। इति त्रिकाण्डशेषः॥
वायुपुत्रः, पुं, (वायोः पुत्रः।) भीमः। इति धनञ्जयः॥ हनूमान्। यथा,—
"हनूमानञ्जनासूनुर्वायुपुत्रो महाबलः।"
इति तस्य द्वादशनामस्तोत्रम्॥
वायुफलं, क्ली, (वायुना फलति प्रतिफलतीति। फल्+अच्।) शुक्रधातुः। (वायोः फलमिव।) कस्तूरी। इति मेदिनी। ले, १६४॥
वायुभक्षः, पुं, (वायुर्भक्षोऽस्येति।) सर्पः। इति राजनिर्घण्टः॥ वातभक्षके, त्रि॥ (यथा, गो० रामायणे। ३। १५। ९२।
"स हि तेपे तपस्तीव्रं मन्दकर्णिर्महामुनिः।
दशवर्षसहस्राणि वायुभक्षः शिलाशयः॥")
वायुवर्त्म, [न्] क्ली, (वायोर्वर्त्म।) आकाशः। इति शब्दचन्द्रिका॥
वायुवाहः, पुं, (वायुना उह्यते इति। वह्+घञ्।) धूमः। इति हेमचन्द्रः। ४। १६८॥
वायुवाहिनी, स्त्री, (वायुं वहतीति। वह्+णिनिः। ङीप्।) वायुसञ्चारिणी शिरा। इति वैद्यकम्॥
वायुषः, पुं, मत्स्यविशेषः। कालवायुषयोना इति भाषा। तस्य गुणाः।
"वायुषो दृंहणो दृष्यो मधुरो धातुवर्द्धनः॥"
इति राजवल्लभः॥
वायुसखः, पुं, (वायोः सखा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) अग्निः। इति भरतः॥
वायुसखा, [खि] पुं, (वायुः सखा यस्येति विग्रहे टजभावात्। "अनङ् सौ।" ७। १। ९३। इति अनङादेशः।) अग्निः। इत्यमरः। १।१।५८॥
वायुस्खदं, क्ली, (वायूनामास्पदं सञ्चरत्स्थानम्।) आकाशः। इति धनञ्जयः॥
वार्, क्ली, (वारयतीति। वृञ्+क्विप्+किप्।) जलम्। इत्यमरः। १। १०। ३॥ (यथा, भागवते। १०। ३३। २२।
"गन्धर्व्वाप्सरसश्चैव सिद्धविद्याधरोरगाः।
आसन् सङ्कुलास्तत्र विमानैरर्कवर्चसः॥")

वारं, क्ली, (वार्य्यतेऽनेनेति। वृ+णिच्+घञ्।) मदिरापात्रम्। इति हेमचन्द्रः॥

वारंवारं, अ, पुनःपुनः। यथा। वारंवारं सुदुःप्रेक्ष्यमिति शब्दरत्नावली॥

वारः, पुं, (वार्य्यते त्रियते वेति। वृ+णिच्+अच्। वृ+घञ् वा।) समूहः। अवसरः। इत्यमरः॥ (यथा, महाभारते। १।१६१।७।
"एकैकस्यापि पुरुषस्तत्प्रयच्छति भोजनम्।
स वारो बहुभिर्वर्षैर्भवत्यसुतरो नरैः॥")
सूर्य्यादिवासरः। हारः। हरः। कुञ्जरघटः। जलम्। इति मेदिनी। रे, ६५॥ *॥ अथ वाराणां संज्ञा।
"चरः सौम्यो गुरुः स्थिरो रुद्रः शुक्रो रविर्ध्रुवः।
अग्निश्च दारुणो ज्ञेयो भौम उग्रः प्रकीर्त्तितः॥
चरस्थिरैः प्रयातव्यं प्रवेष्टव्यं रुद्रध्रुवैः।
दारुणोग्रैश्च योद्धव्यं क्षत्रियैर्जयकाङ्क्षिभिः॥
कृषाभिषेकोद्वाहिकार्य्यं सूर्य्यवारे प्रशस्यते।
सोमे तु सेवयानञ्च कुर्य्याच्चैव गृहादिकम्॥
सेनापत्यं गौर्य्ययुद्धं शस्त्राभ्यासः कुजे तथा।
सिद्धिकार्य्यञ्च मन्त्रञ्च याचा चैव बुधे स्मृता॥
पठनं देवपूजा च वस्त्राद्याभरणं गुरौ।
कन्यादानं गजारोहः शुक्रे स्यात् समयः स्त्रियाः॥
स्थाप्यं गृहप्रवेशञ्च गजवस्त्रः शनौ शुभः॥"
इति गारुडे ६२ अध्यायः॥
सावनदिनवद्वारप्रवृत्तिः सूर्य्योदयावधिरेव। सूर्य्यसिद्धान्ते।
"सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमग्रहसुस्पष्टैश्च सावनेन प्रकीर्त्तिताः॥"
अत्र दिनाधिपस्य रव्यादेर्भोग्यं दिनं वाररूपं सावनगणनोक्तं व्यवहारोऽपि तादृगेव। तिथिविवेकेऽपि। भवतु वारयोगे वस्तुतियेथं हरणं तस्य दिनदेवेऽस्मवादियुक्तम्। सावनदिनमाह सूर्य्यसिद्धान्तः।
"उदयादुदयं भानोर्भौमसावनवासरः॥"
भौमेति पित्रादिदिनव्यावृत्त्यर्थम्। यत्तु रेखापूर्व्वापरयोरित्यादिना ज्योतिषे वारप्रवृत्तिरुक्ता तज्ज्योतिःशास्त्रोक्तकालहोरादिज्ञापनार्थमिति ज्योतिस्तत्त्वे बहुधा विवृतम्।
"नैवास्तमनमर्कस्य नोदयः सर्व्वदा सतः।
उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः॥
येयेत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः॥"
इति विष्णुपुराणात् सूर्य्यदर्शनयोग्यकालादेव वारघटककर्म्मसु स एव कालः। इति ज्योतिस्तत्त्वम्॥ *॥ अथ शोभनवाराः।
"रविः सोमो मङ्गलश्च बुधो जीवः सितः शनिः।
एतेषां नामतो वारा विख्याताः सर्व्वकर्म्मसु॥
सितेन्दुबुधजीवानां वाराः सर्व्वत्र शोभनाः।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि॥"
इति ज्योतिःसागरः॥

अथ वारवेला।
"कृतसुनियमशरमङ्गल-
रामर्त्तुभु भास्करादियामार्द्धे।
प्रभवति हि वारवेला
न शुभाशुभकार्य्यकरणाय॥"
अथ कालवेला।
"कालस्य वेला रवितः शराब्धि-
कालानलागाम्बुधयो गजेन्दू।
दिने निशायाश्चतुर्वेदनेत्र-
नगेषु रामा विधुदन्तिनौ च॥"
इति ज्योतिस्तत्त्वम्॥ *॥
तयोर्व्वर्ज्यत्वं यथा,—
"रवौ वर्ज्यं चतुःपञ्च सोमे सप्तद्वयं तथा।
कुजे षड्द्वयञ्चैव बुधे बाणत्रितीयकम्॥
गुरौ सप्ताष्टकं चैव त्रिचत्वारि च भार्गवे।
शनावाद्यञ्च षष्ठञ्च शेषञ्च परिवर्ज्जयेत्॥ *॥
रवौ षष्ठं विधौ वेदं कुजवारे द्वितीयकम्।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम्॥
शनावाद्यं तथा चान्त्यं रात्रौ कालं विवर्ज्जयेत्॥"
इति सारसंग्रहः॥ *॥
अथ स्त्रीणां प्रथमरजस्वलायां वारफलम्।
"आदित्ये विधवा नारी सोमे चैव पतिव्रता।
वैश्या मङ्गलवारे च बुधे सौभाग्यमेव च॥
दृष्टस्तौ पतिः श्रीमान् शुक्रे पुत्रवती भवेत्।
शनौ वन्ध्या तु विज्ञेया प्रथमस्त्री रजस्वला॥"
इति मथुरेशप्रणतसारसंग्रहः॥
(वालः। यथा, ऋग्वेदे। २। ४। ४।
"वियोभरिभ्रदोषधीषु जिन्वा
मन्यो न रथ्यो दोधवीति वारान्॥"
"रथ्यो रथार्होऽश्वोऽन्य वाजी यथा वारान् दंशवारकसाधनात् वालान् दोधवीति कम्पयति।" इति तद्भाष्ये सायणः॥ वरणीये, त्रि,। यथा, ऋग्वेदे। १। १२८। ६। [दृश्यति॥"
"विश्वस्या इत्सुभगे वारमश्वस्यग्निर्वारान्
"वारं सर्व्वैर्वरणीयम्॥"इति तद्भाष्ये सायणः॥)
वारकं, क्ली, (वार्य्यतीति। वृ+णिच्+ण्वुल्।) कटस्थानम्। इति हारावली। १२८॥ द्वीपेरम्। इति हेमचन्द्रः। ३। २२४॥
वारकः, पुं, (वृ+णिच्+ण्वुल्।) अश्वविशेषः। इति विश्वः॥ अश्वगतिः। निषेधके, त्रि। इति मेदिनी। के, १३१॥ (यथा, महाभारते।१२। ३२१। ३६।
"पुरा सम्प्लवमाश्रित्य प्रसुप्तैरत्यदुःखवित्।
तवेह जीवितं यस्मो न चास्ति तस्य वारकः॥")
वारकी, [न्] पुं, (वारकोऽस्यस्तीति। इनिः।) चित्राश्वः। गुरुः। पर्णासीवी। पयोधिः। इति मेदिनी। नि, १६५॥
वारकीरः, पुं, (वारो वरणीयः कीरः पक्षीव। यद्वा, वारे अवसरे किरति कौतुकवाक्यमिति। कॄ+कः। निरुक्तलक्षणो दीर्घः। यद्वा, वारे अवसरे कीलति बध्नाति कौतुकार्थं रज्ज्वा प्रेम्णा वा। कील+कः। लस्य रत्वम्।) शुकः। इति त्रिकाण्डशेषः॥ वारयाही। वाडवः। यूका। वेणिवेधिनी। गोराजितहयः। इति मेदिनी। रे, २८८॥
वारटः, पुं, पक्षी। इति त्रिकाण्डशेषः॥
वारङ्गः, पुं, (वारयतीति त्रियते इति वा। वृ+"वृञ्शीङ्हिंस।" उणा० २। १२१। इति अङ्गच्। धातोर्हिंस्य।) खड्गादिमुष्टिः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ मुठ इति बाँट इति च भाषा॥ (यथा, सुश्रुते। २। ७।
"तत्र स्वस्तिकयत्नाभि ***मलेऽङ्गुष्ठवदा-
वृत्तवारङ्गाभि अस्थिविनष्टमूलोद्धरणार्थमुपदिश्यन्ते॥")
वारटं, क्ली, (वार् जलमटति प्राप्नोतीति। अट्+अच्।) क्षेत्रम्। इति त्रिकाण्डशेषः। क्षेत्रसमूहः। इति शब्दरत्नावली॥
वारटा, स्त्री, (वारि जले अटतीति। अट्+अच्+टाप्।) हंसी। इति हेमचन्द्रः। ४। ३६३॥
वारणं, क्ली, (वृ+णिच्+ल्युट्।) प्रतिषेधः। इति मेदिनी। णे, ६६॥ (यथा, हरिवंशे। १८०। ४५॥
"अस्त्राणां वारणार्थाय वासुदेवोऽप्यमुञ्चत॥")
हस्तवारणम्। इति जटाधरः॥ *॥ दानकाले वारणनिषेधो यथा,—
"न देवगुरुविप्राणां दीयमानन्तु वारयेत्।
न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्ज्जयेत्॥"
इति कौर्म्मे उपविभागे १६ अध्यायः॥
वारणः, पुं, (वारयति परबलमिति। वृ+ल्युः।) हस्ती। इत्यमरः। २। ८। ३४८। (यथा, कुमारे। ५। ७०।
"इयञ्च तेऽन्या पुरतो विडम्बना
बलूढया वारणराजहार्य्यया।
विलोक्य दूरोच्चमधिष्ठितं त्वया
महाजनः सौरसखो भविष्यति॥")
वाणवारः। इति शब्दरत्नावली॥ (यथा, महाभारते। ४। ४०। २।
"वारणा यस्य सौवर्णाः पृष्ठे भासन्ति दंशिताः।
सुपार्श्वं सुग्रहश्चैव कक्षेयश्चोत्तमम्॥"
वारि जले रणति चरतीति। वार्+रण+अच्। जलजाते, त्रि। यथा, हरिवंशे। ३१। ४८।
"ततो वैभ्राजकिल्लस्य वारणं शुक्रवारणम्।
अवतारयामास महीं मन्त्रैर्वाहनमुत्तमम्॥"
"वारि जले रणति चरतीति वारणः समुद्रोऽत्र दृष्टान्तः।" इति तट्टीकायां नीलकण्ठः।)
वारणपुष्पा, स्त्री, (पुष्पते इति। पुष्प उद्गमे+कः। वारणानां पुष्पा। यद्वा, वारणान् पुष्णातीति। पुष+कः। उपोदरादित्वात् पस्य वः।) कदली। इत्यमरः। २। ४। ११३॥
वारणवल्लभा, स्त्री, (वारणानां वल्लभा प्रिया।) कदलीवृक्षः। इति त्रिकाण्डशेषः॥
वारणसी, स्त्री, (वरणा च असी च नद्यौ यस्यां तस्या अदूरे भवा। "अदूरभवश्च।" ४। २। ७०। इत्यण्। ङीप्। पृषोदरादित्वात् साधुः।) वाराणसी। काशी। इति हेमचन्द्रः॥
वारणीयं, त्रि, (वृ+णिच्+अनीयर्।) वारणयोग्यम्। वृजधातोः स्यान्तादनीयप्रत्ययेन निष्पन्नम्। (यथा, कथासरित्सागरे। ५०। १।

"अवारणीयं रिपुभिर्वारणीयं करं गुमः।
हेरम्बस्य ससिन्दूरमसिं दूरमवच्छिदम्।")
वारत्रं, क्ली, चर्म्मबन्धनी। इति केचित्।
वारवधूः, स्त्री, (वाराणां जनसमूहानां वधूः।) वारमुख्या। इति हेमचन्द्रः। ३। १६७।
(यथा, आर्य्यासप्तशत्याम्। ३०८।
"निजगात्रनिर्म्मितेयस्यापितमपि सारमखिल-
मादाय।
निर्म्मोकच सृजन्ती सृजति पुरुषच वारवधूः।")
वारवाणः, पुं, क्ली, (वारं वारणीयं वाणं यस्मात्।) कञ्चुकः। इत्यमरः। २। ८। ६३।
(यथा, माघे। १५। ८४।
"पीनस्तनतटनिपीड़ित-
हरवारवाणसुरसा लिलिङ्गिरे।")
वारवृषा, स्त्री, (वारान् बालकान् पुष्णातीति। पुष्+कः। पृषोदरादित्वात् षस्य वः।) कदली। इति शब्दरत्नावली।
वारसुखा, स्त्री, (वारेषु वेश्यासमूहेषु सुखा श्रेष्ठा।) जनैः सतृष्णता वेश्या। इत्यमरः। २। ६। १६। (यथा, भागवते। २। ११। २०।
"वारसुखाच शृतग्रो यानेकदुर्गगोत्सुकाः।")
वारयिता, पुं, (वारयति दुर्नीतिरिति। वृ+णिच्+तृच्।) पतिः। इति हलायुधः।
वारला, स्त्री, (वारं लातीति। ला+कः।) वरटा। हंसी। इति हेमचन्द्रः। ४। १६३।
वारलोकः, पुं, वल्लजा। इति शब्दरत्नावली। बाउर इति ख्यातः।
वारवाणिः, पुं, (वारं शब्दसमूहं वणति इति। वण+इन्।) वंशीवादकः। इति त्रिकाण्डशेषः। उत्तमगायकः। इति शब्दरत्नावली। धर्म्माध्यक्षः। संवत्सरः। इत्यजयपालः। एतन्नामते पवर्गादिः।
वारवाणिः, स्त्री, (वारे अर्थदानावसरे वाणिः प्रियालापो यस्याः।) वेश्या। इति त्रिकाण्डशेषः।
वारवाणी, स्त्री, (वारवाणि+पचे ङीष्।) वारसुखा। इति शब्दरत्नावली।
वारविलासिनी, स्त्री, (वाराणां जनसमूहानां विलासिनी स्त्री। यद्वा, वारान् विलासयतीति। वि+लस+णिच्+णिनिः। ङीप्।) वेश्या। इति शब्दरत्नावली। (यथा, कथासरित्सागरे। १२। ७८।
"अस्तीह मथुरा नाम पुरीकंसारिजन्मभूः।
तस्यां रूपजिकेत्यासीत् ख्याता वारविला-
सिनी।")
वारवृणा, स्त्री, (वारान् हस्तिसमूहान् वर्णयतीति। वृ+कः। टाप्। हस्तिभक्षत्वेनास्यास्तथात्वम्।) कदली। इति शब्दरत्नावली।
वारसुन्दरी, स्त्री, (वाराणां नरसमूहानां सुन्दरी।) वेश्या। इति हारावली। १४४।
वारसेवा, स्त्री, (वारे अवसरे सेवा।) वेश्यानां क्रमः। तासां गवः। इति जटाधरः।

वारस्त्री, स्त्री, (वाराणां जनसमूहानां स्त्री।) वेश्या। इत्यमरः। २। ६। १६।
वारांनिधिः, पुं, (वारां जलानां निधिः। अलुक् समासः।) समुद्रः। इति शब्दरत्नावली।
वाराणसी, स्त्री, (वरणा च असी च। तयोर्नद्योरदूरे भवा। "अदूरभवच्च।" ४। २। ७०। इत्यण्। ङीप्। पृषोदरादित्वात् साधुः। अस्या निरुक्तिर्यथा,—
"वरणासी च नद्यौ द्वे पुण्ये पापहरे उभे।
तयोरन्तर्गता या तु सैषा वाराणसी स्मृता।")
मोक्षदपुरीविशेषः। बनारस् इति हिन्दी भाषा। तत्पर्य्यायः। वाराणसी २ काशी ३ शिवपुरी ४। इति हेमचन्द्रः। त्रिलोकी ५ तपःस्थली ६ वरणसी ७ तीर्थराजी ८ काशिका ९। इति शब्दरत्नावली। तस्या माहात्म्यं यथा,—
ईश्वर उवाच।
"परं गुह्यतमं क्षेत्रं मम वाराणसी पुरी।
सर्व्वेषामेव भूतानां संसारार्णवतारिणी।
तत्र भक्ता महादेवि! मदीयं व्रतमाश्रिताः।
निवसन्ति महात्मानः परं नियममास्थिताः।
उत्तमं सर्व्वतीर्थानां स्थानानामुत्तमञ्च यत्।
ज्ञानानामुत्तमं ज्ञानं अविमुक्तपुरं मम।
स्थानान्तरं प्रविष्टानि तीर्थान्यायतनानि च।
प्रच्छन्नानीतिहिखातमविमुक्तमिति श्रुतम्।
कालो भूत्वा जगदिदं संहराम्यत्र सुन्दरि!।
देवीदं सर्व्वगुह्यानां स्थानं प्रियतरं मम।
यद्गत्वात्र गच्छन्ति मामेव प्रविशन्ति ते।
दत्तं जप्तं हुतं घोरं तपस्तप्तं कृतञ्च यत्।
ध्यानमध्ययनं ज्ञानं सर्व्वं तत्राक्षयं भवेत्।
जन्मान्तरसहस्रेषु यत् पापं पूर्व्वसञ्चितम्।
अविमुक्तं प्रविष्टस्य तत्सर्व्वं व्रजति क्षयम्।
ब्राह्मणाः क्षत्रिया वैश्या शूद्रा ये वर्णसङ्कराः।
स्त्रियो म्लेच्छाश्च ये चान्ये संकीर्णाः पाप-
योनयः।
कीटाः पिपीलिकाश्चैव ये चान्ये स्थावरादयः।
कालेन निधनं प्राप्ताः सर्व्वे मुक्तिं वरानने!।
चक्रार्द्धमौलयश्चान्ये महाशूलभवादयः।
शिवे मम पुरे देवि! जायन्ते तत्र मानवाः।
नाविमुक्ते मृतः कश्चिन्नरकं याति किल्बिषी।
ईश्वरानुगृहीता हि सर्व्वे यान्ति परां गतिम्।
मोक्षं सुदुर्लभं मत्वा संसारक्षतिभीरुकम्।
अक्षमा चरणौ हत्वा वाराणस्यां वसेन्नरः।
दुर्लभा तपसा चापि पूतस्य परमेश्वरि!।
यत्र तत्र विपन्नस्य गतिः संसारमोचनी।
प्रसादाज्जायते क्षेत्रमम शैलेन्द्रनन्दिनि!।
अप्रबुद्धा न पश्यन्ति मम मायाविमोहिताः।
अविमुक्तं न पश्यन्ति मूढा ये तमसावृताः।
विष्मूत्ररेतसां मध्ये तेषां वासः पुनः पुनः।

हन्यमानोऽपि यो विद्वान् वसेदविमुक्तके नरः।
स याति परमं स्थानं यत्र गत्वा न शोचति।
जन्ममृत्युजरायुक्तं परं यान्ति शिवालयम्।
अपुनर्मरणानां हि सा गतिर्मोक्षकाङ्क्षिणाम्।
यां प्राप्य कृतकृत्याः स्मादिति मन्यन्ति पण्डिताः।
न दानैर्न तपोभिश्च न यज्ञैरपि विद्यया।
प्राप्यते मतिरुत्कृष्टा या विमुक्ते तु लभ्यते।
नानावर्णा विवर्णाश्च चाण्डालाद्या जुगुप्सिताः।
किल्बिषैः पूर्णदेहा ये विशिष्टैः पातकैस्तथा।
भेषजं परमं तेषामविमुक्तं विदुर्बुधाः।
अविमुक्तं परं ज्ञानमविमुक्तं परं पदम्।
अविमुक्तं परं तत्त्वमविमुक्तं परं शिवम्।
कृत्वा वै नैष्ठिकीं दीक्षामविमुक्ते वसन्ति ये।
तेषां तत् परमं ज्ञानं ददाम्यन्ते परं पदम्।
प्रयागं नैमिषं पुण्यं श्रीशैलोऽथ हिमालयः।
केदारं भद्रकर्णञ्च गया पुष्करमेव च।
कुरुक्षेत्रं कृतकोटिर्गङ्गासंगं खातकेश्वरम्।
शालग्रामश्च कुब्जाम्रं कोकामुखमनुत्तमम्।
प्रभासं विमलेशानं गोकर्णं भद्रकर्णकम्।
एतानि पुण्यस्थानानि त्रैलोक्ये विश्रुतानि तु।
न यास्यन्ति परं मोक्षं वाराणस्यां तथा मृताः।
वाराणस्यां विशेषेण गङ्गा त्रिपथगामिनी।
प्रविष्टा नाशयेत् पापं जन्मान्तरशतैः कृतम्।
अन्यत्र शुभगा गङ्गा आर्द्रं दानं तपो जपः।
व्रतानि सर्व्वमेवैतत् वाराणस्यां सुदुर्लभम्।
यत्रेत जुहुयान्नित्यं ददात्यर्चयतेऽमरान्।
वायुभक्षश्च सततं वाराणस्यां स्थितो नरः।
यदि पापो यदि भ्रष्टो यदि वा धार्म्मिको नरः।
वाराणसीं समासाद्य पुनाति सकलं नरः।
वाराणस्यां महादेवं येऽर्चयन्ति स्तुवन्ति वै।
सर्व्वपापविनिर्म्मुक्तास्ते विज्ञेया गणेश्वराः।
अन्यत्र योगज्ञानार्थं सन्न्यासादथ नान्यतः।
प्राप्यते तत् परं स्थानं सप्तजन्मैव जन्मना।
ये भक्ता देवदेवेशं वाराणस्यां वसन्ति वै।
ते विन्दन्ति परं मोक्षमेकेनैव तु जन्मना।
यत्र योगस्तथा ज्ञानं मुक्तिरेकेन जन्मना।
अविमुक्तं तदासाद्य नान्यत्रेच्छेत्तपोवनम्।
ज्ञानाज्ञानाभिनिष्ठानां परमानन्दमिच्छताम्।
या गतिर्विहिता शम्भु साविमुक्ते मृतस्य तु।
यानि चैवाविमुक्तस्य देहे मुक्तानि जन्तुभिः।
पुरी वाराणसी तेभ्यः स्थानेभ्योऽधिका शुभा।
यत्र साक्षान्महादेवो देहान्ते स्वयमीश्वरः।
आचष्टे तारकं ब्रह्म तत्रैव ह्यविमुक्तके।
तत्तत् परतरं तत्त्वमविमुक्तमिति श्रुतम्।
एकेन जन्मना देवि वाराणस्यां तदाप्नुयात्।
भ्रूमध्ये नाभिमध्ये च हृदये चैव मूर्द्धनि।
यथाविमुक्तमादित्ये वाराणस्यां व्यवस्थितम्।
वाराणस्यास्तथा चास्या मध्यं वाराणसी पुरी।
तत्रैव संस्थितं भद्रं नित्यमेवाविमुक्तकम्।
वाराणस्याः परं स्थानं न भूतं न भविष्यति।
यत्र नारायणो देवो महादेवाधिरीश्वरः।
तत्र देवाः सगन्धर्व्वाः सयक्षोरगराक्षसाः।

उपासते मां सततं देवदेवः पितामहः ॥
महापातकिनो ये च ये चान्ये पापकृत्तमाः ।
वाराणसीं समासाद्य ते यान्ति परमां गतिम् ।
तस्माच्चमुक्तुर्विश्वो वसेद्यै मरणान्तिकम् ॥
वाराणस्यां महादेवाज्ज्ञानं लब्ध्वा विमुच्यते ।
किन्तु विघ्ना भविष्यन्ति पापौघहतचेतसः ॥
यथा नारायणः श्रेष्ठो देवानां पुरुषोत्तमः ।
यथेश्वराणां गिरिशः स्थानानां वै तदुत्तमम् ॥
यैः समाराधितो रुद्रः पूर्व्वस्मिन्नेव जन्मनि ।
ते विन्दन्ति परं क्षेत्रमविमुक्तं शिवालयम् ॥
ये स्मरन्ति सदा कालं वदन्ति च पुरीमिमाम् ।
तेषां विनश्यति क्षिप्रमिहामुत्र च पातकम् ॥
आचक्ष्वमिदं स्थानं सेवितं मोक्षकाङ्क्षिणाम् ।
श्रुत्वानाच्च पुनर्जन्म न भूयो भवसागरे ॥
तस्मात् सर्व्वप्रयत्नेन वाराणस्यां वसेन्नरः ।
योगी वाप्यथवायोगी पापी वा पुण्यकृत्तमः ॥"

इति कौर्म्मे २८ अध्यायः ॥ * ॥

अन्यच्च ।

"वाराणसी नाम पुरी गङ्गातीरे मनोहरे ।
वरणायास्तथा वासेर्मध्ये चापाक्षतिः सदा ॥
स्वयं हृषध्वजश्चत्र नित्यं वसति योगिनाम् ।
सदा प्रीतिकरो योगी स्वयं चाप्यात्मचिन्तकः ॥
वियत्स्था सा पुरी नित्यं भर्गयोगबलाद्भृता ।
दिव्यं ज्ञानं ददात्येव तत्र यो म्रियते जनः ॥
तस्मै स्वयं महादेवः संसारव्यधिमुक्तये ।
स भूत्वा परमो योगी मृतस्तत्र भवान्तरे ॥
सुखमेनेव निर्व्वाणमाप्नोति सारहासमः ।
योगयुक्तो महादेवः पार्व्वत्या सहितः सदा ॥
देवगन्धर्व्वयक्षाणां मानुषाणाच्च नित्यशः ।
श्रेयो हरः प्रकाशश्च क्षेत्रं तच्च प्रकाशितम् ॥
न तत्र कामदो देवो न चिराच्च प्रसीदति ।
आराधितश्चिरं भक्त्या निर्व्वाणाय प्रसीदति ॥
गौर्य्यादिवर्ज्जिता सा तु पुरी तत्र न गच्छति ।
योगस्थानं महाक्षेत्रं कदाचिदपि शाङ्करी ॥
आसन्नं युवयोः क्षेत्रमिदं वाराणसी तु यत् ।
कथितं नातिदूरे च वर्त्तते ऽमरसत्तमौ ॥"

इति कालिकापुराणे ५० अध्यायः ॥ * ॥

अथ काशीयात्राविधिः ।

सूत उवाच ।

"यात्रापरिक्रमं ब्रूहि जनानां हितकाम्यया ।
यथावत् सिद्धिकामानां सत्यवत्या सुतो मम ॥

व्यास उवाच ।

निशामय महाप्राज्ञ लोमहर्षण वच्मि ते ।
यथा प्रथमतो यात्रा कर्त्तव्या यात्रिकैर्नरैः ॥
सचैलमादौ संस्नाय चक्रपुष्करिणीजले ।
सन्तर्प्य देवान् सपितॄन् ब्राह्मणांश्च तपस्विनः ॥
आदित्यं द्रौपदीं विष्णुं दण्डपाणिं महेश्वरम् ।
नमस्कृत्य ततो गच्छेत् द्रष्टुं ढुण्ढिविनायकम् ॥
ज्ञानवापीसमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं समभ्यर्च्च्य महाकालेश्वरं ततः ॥
ततः पुनर्द्दण्डपाणिमित्येषा पञ्चतीर्थिका ।
दैवनन्दिनी विधातव्या महाफलमभीप्सुभिः ॥*॥

ततो वैश्वेश्वरीं यात्रां कार्य्यां सर्व्वार्थसिद्धये ।
द्विसप्तायतनानाञ्च कार्य्या यात्रा प्रयत्नतः ॥
क्षण्णां प्रतिपदं प्राप्य भूतावधि यथाविधि ।
अथवा प्रतिभूतञ्च क्षेत्रसिद्धिमभीप्सुभिः ॥
तत्ततीर्थकृतस्नानस्तत्तल्लिङ्गकृतार्च्चनः ।
मौनेन यात्रां कुर्व्वाणः फलं प्राप्नोति यात्रिकः ॥
ॐकारं प्रथमं पश्येत् मत्स्योदर्य्यां कृतोदकः ।
विघ्नेशमथ हादेवं ततो वै कृत्तिवाससम् ॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः ॥
विश्वकर्म्मेश्वरञ्चाथ मणिकर्णीश्वरं ततः ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत् ।
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः ।
यस्तु क्षेत्रमुषितोऽपि नैतां यात्रां समाचरेत् ।
विघ्नास्तस्योपजायन्ते क्षेत्रोच्चाटनरूपकाः ॥*॥
अहायतनयात्रान्या कर्त्तव्या विघ्नशान्तये ।
दक्षेशः पार्व्वतीशश्च तथा पशुपतीश्वरः ।
गङ्गेशो नर्म्मदेशश्च गभस्तीशः सतीश्वरः ॥
अष्टमस्तारकेशश्च प्रत्यक्षमि विशेषतः ।
दृश्यान्येतानि लिङ्गानि महापापापशान्तये ॥*॥
अपरापि शुभा यात्रा योगक्षेमकरी सदा ।
सर्व्वविघ्नोपहन्त्री च कर्त्तव्या क्षेत्रवासिभिः ॥
श्रीशेशं प्रथमं वीक्ष्य वरणासङ्गमपूर्व्वकम् ।
स्नानन्तु सङ्गमे कृत्वा द्रष्टव्यः सङ्गमेश्वरः ॥
स्वर्नीलतीर्थे सुस्नातः पश्येत् स्वर्नीलमीश्वरम् ।
स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्यो मध्यमेश्वरः ॥
पश्येद्धिरण्यगर्भाख्यं तत्र तीर्थं कृतोदकः ।
पञ्चपूड्रदे स्नात्वा व्येष्टस्थानं ततोऽर्च्चयेत् ॥
चतुःसमुद्रकूपे तु स्नात्वा देवं ततोऽर्च्चयेत् ।
देवस्याग्रे तु या वापी तत्रोपस्पर्शने कृते ।
शुक्रेश्वरं ततः पश्येत्तत्कूपविहितोदकः ।
दक्षस्राते नरः स्नात्वा श्रीशेशं पूजयेत्ततः ॥
गौतमेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् ।
जम्बुकेशं महालिङ्गं कृत्वा याचामिमां नरः ॥
क्वचिन्न जायते भूयः संसारे दुःखसागरे ।
समारभ्य प्रतिपदं यावत् क्षण्णां चतुर्दशीम् ॥
एतत्क्रमेण कर्त्तव्यान्येतदायतनानि वै ।
इमां यात्रां नरः कृत्वा न भूयोऽप्यभिजायते ॥
अन्या यात्रा प्रकर्त्तव्येकादशायतनोद्भवा ।
अयोध्यकुण्डसुस्नातः पश्येदयोध्यमीश्वरम् ॥
उर्व्वशीशं ततो गच्छेत्ततस्तु नकुलीश्वरम् ।
आषाढीशं ततो दृष्ट्वा भावभूतेश्वरं ततः ॥
लाङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् ।
ततो मनःप्रकामेशं प्रीतिकेशमथो व्रजेत् ॥
मदालसेश्वरं तस्मात् तिलपर्णेश्वरं ततः ।
यात्रैकादशलिङ्गानामेषा कार्य्या प्रयत्नतः ॥
इमां यात्रां प्रकुर्व्वाणो रुद्रत्वं प्राप्नुयान्नरः ॥*॥
अतः परं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् ।
शुक्लपक्षचतुर्थ्यायां या यात्रा विश्वदृष्टिका ।
गोप्रेक्ष्यतीर्थे सुस्नाय सुखनिर्म्मालिकां व्रजेत् ॥
व्येष्टवाप्यां नरः स्नात्वा व्येष्टां गौरीं समर्च्चयेत् ।
सौभाग्यगौरी संपूज्या ज्ञानवाप्यां कृतोदकैः ॥

ततः ढुण्ढारगौरीञ्च तत्रैव च कृतोदकः ।
स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् ॥
सुस्नातो ललितातीर्थे ललितामर्च्चयेत्ततः ।
स्नात्वा भवानीतीर्थे तु भवानीं परिपूजयेत् ॥
मङ्गला च ततोऽभ्यर्च्या विन्दुतीर्थेकृतोदकैः ।
ततो गच्छेन्महालक्ष्मीं श्रिरलक्ष्मीसमन्विते ॥
इमां यात्रां नरः कृत्वा क्षेत्रेऽस्मिन्मुक्तिलक्षणे ।
न दुःखैरभिभूयेत इहामुत्रापि कुत्रचित् ॥*॥
कुर्य्यात् प्रतिचतुर्थीह पूजां विघ्नेशितुः सदा ।
ब्राह्मणेभ्यस्तदुद्दिष्टा देया वै मोदका मुदे ॥
भौमे भैरवयात्रा च कार्य्या पातकहारिणी ।
रविवारे रवेर्यात्रां षष्ठ्यां वा रविसंयुते ॥
तत्रैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये ।
नवम्यामथवा षष्ठ्यां चण्डीयात्रा शुभावहा ॥*॥
अन्तर्गृहस्य यात्रा वै कर्त्तव्या प्रतिवत्सरम् ।
प्रातःस्नानं विधायादौ नत्वा पञ्च विनायकान् ।
नमस्कृत्वा च विश्वेशं स्थित्वा निर्व्वाणमण्डपे ।
अन्तर्गृहस्य यात्रां हि करिष्येऽहौघशान्तये ॥
गृहीत्वा नियमञ्चेति गत्वाथ मणिकर्णिकाम् ।
स्नात्वा मौनेन चागत्य मणिकर्णीश्रमर्च्चयेत् ॥
कम्बलाश्वतरौ नागौ वासुकीशं प्रणम्य च ।
पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशमथव्रजेत् ॥
ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं ततः ।
ततो वै सोमनाथञ्च वराहञ्च ततो व्रजेत् ॥
ब्रह्मेश्वरं ततो नत्वा नत्वागस्त्येश्वरं ततः ।
कश्यपेशं नमस्कृत्य हरिकेशवनन्तथ ॥
वेदनाथं ततो गत्वा ध्रुवेशमथ वीक्ष्य च ।
गोकर्णेशं ततोऽभ्यर्च्च्य हाटकेशमथो व्रजेत् ॥
अस्थिक्षेपतटागेऽथ दृष्ट्वा वै कीकशेश्वरम् ।
भावभूतं ततो नत्वा चित्रगुप्तेश्वरं ततः ॥
चित्रघण्टां प्रणम्याथ ततः पशुपतीश्वरम् ।
पितामहेश्वरं गत्वा ततस्तु कलसेश्वरम् ॥
चन्द्रेशञ्चाथ वीरेशो विघ्नेशोऽयीश एव च ॥
नागेश्वरो हरिश्चन्द्रचिन्तामणिविनायकः ।
सेनाविनायकश्चाथ द्रष्टव्यः सर्व्वविघ्नहृत् ॥
वशिष्ठवामदेवौ च ऋषिरूपधरावुभौ ।
दृष्ट्वौ यत्नतः काश्यां महाविघ्नविनाशनौ ।
सीमाविनायकं नाथं करवेशं ततो व्रजेत् ॥
त्रिसन्ध्येशो विशालाक्षो धर्म्मेशो विश्वबाहुकः ।
आशाविनायकश्चाथ दृष्ट्वादित्यस्ततः पुनः ॥
चतुर्वक्त्रेश्वरं लिङ्गं ब्रह्मेशञ्च ततः परम् ।
ततो मनःप्रकाशेश ईशानेशस्ततः परम् ॥
चण्डीचण्डीश्वरौ दृष्ट्वौ भवानीशङ्करौ ततः ।
ढुण्ढिं प्रणम्य च ततो राजराजं समर्च्चयेत् ॥
लाङ्गलीशस्ततोऽभ्यर्च्चस्ततस्तु नकुलीश्वरः ।
परार्थेशमथो नत्वा परब्रह्मेश्वरं ततः ॥
प्रतिग्रहेश्वरञ्चापि निष्कलङ्केशमेव च ।
मार्कण्डेयेशमभ्यर्च्च्य ततः अक्षरसेश्वरम् ॥
गङ्गेशोऽर्च्चस्ततो ज्ञानवाप्यां स्नानं समाचरेत् ।
नन्दिकेशं तारकेशं महाकालेश्वरं ततः ॥
दण्डपाणिं महेशञ्च मोक्षेशं प्रणमेत्ततः ।
वीरभद्रेश्वरं नत्वा अविमुक्तेश्वरं ततः ॥

विनायकोक्तः पञ्च विघ्ननाथं ततो व्रजेत्।
ततो मौनं विधायाथ मन्त्रमेवमुदीरयेत्।
अन्तर्गृहस्य यात्रेयं यथावद्दृश्यमया कृता।
न्यूनातिरिक्तया शम्भुः प्रीयतामनया विभुः॥
इति मन्त्रं समुच्चार्य्य चत्वं वै सुक्तिमञ्जपेत्।
विश्राम्य यायाद्भवनं निष्पापः पुण्यवान्नरः॥७॥
संप्राप्य वासरं विष्णोर्विष्णुतीर्थेषु सर्व्वतः।
कार्य्या यात्रा प्रयत्नेन महापुण्यसमृद्धये॥
नवम्यां पञ्चदश्यां च कुलसंख्यं समर्थयेत्।
दुःखदारिद्र्यनाशत्वे न भवेदस्य पूजनात्।
श्रुत्वा पूर्व्वमिमा यात्राः कर्त्तव्याश्चौर्धवासिभिः।
पर्व्वस्वपि विशेषेण कार्य्या यात्राच सर्व्वतः॥
न वर्त्मं दिवसं कुर्य्यात् विना यात्रां क्वचित् क्वतौ।
यात्राहयं प्रयत्नेन कर्त्तव्यं प्रतिवासरम्।
आदौ स्वर्गेतरक्षिप्यात्ततो विष्णेयितुर्भुवम्॥
यस्य जन्म दिनं जातं काश्यां निवसतः सतः।
निराघ्राः पितरस्तस्य तस्मिन्नेव दिनेऽभवन्॥
स दृष्टः कालसर्पेण स दग्धो दहुना स्फुटम्।
स मुहूर्त्तत्र दिवसे विष्णोर्यो यत्र नेक्षितः॥
सर्व्वतीर्थेषु सस्नौ स सर्व्वयज्ञां यधात् स च।
मणिकर्ण्यांतु यः स्नातो यो विष्णुं निरेक्षत॥
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः।
दृष्टो विष्णेश्वरो नित्यं स्नातया मणिकर्णिका॥
व्यास उवाच।
सूत स्कान्दमिमं श्रुत्वा काश्यीमाहात्म्यमुत्तमम्।
नरो न निरयं याति लक्षाब्धयसहस्रकम्॥"
इति काश्यीखण्डे १०० अध्यायः॥

वाराजसेयः, त्रि, (वाराजस्यौ + "तद्धादिभ्यो ढक्।"४।२।६७। इति ढक्।) वाराजसीजातः। वाराजसी शब्दात् स्त्रियपत्यर्थेन निष्पन्नः॥

वाराजनं, क्ली. (वारां आसनम्।) जलाधारः। तत्पर्य्यायः। वाःसदनम् २। इति त्रिकाण्डशेषः॥

वाराहः, पुं, महापिङ्गीतकवृक्षः। इति राजनिर्घण्टः॥ वराह एव (वराह + स्वार्थे अण्।) वाराहः। (कश्यभेदः। यथा, भागवते। ३। २१। ३७।
"अथन्तु कथितः कश्यो द्वितीयस्यापि भारत!।
वाराह इति विख्यातो यज्ञासीत् शूकरो हरिः॥"
वराहस्येदमिति। वराह + तस्येदमित्यण्।) तत्सम्बन्धिनि, त्रि। (यथा, महाभारते। १।३।२।
"साध्येन पायसेनेव मधुना मिश्रितेन च।
भक्षयेन्मांसैः पक्वैश्च सार्द्धवाराहशात्रिभिः॥"
क्ली, तीर्थभेदः। यथा, महाभारते।३।८३।१८
"ततो गच्छेत धर्म्मज्ञ! वाराहं तीर्थमुत्तमम्।
विष्णुर्वराहरूपेण पूर्व्वं यत्र स्थितोऽभवत्॥"
पुराणविशेषः। यथा, देवीभागवते। १।३।८।
"चतुर्लक्षप्रमाणञ्च वाराहं परमाद्भुतम्॥")

वाराहकर्णी, स्त्री, (वाराहकर्ण इव पत्रमध्यमस्याः। वाराहकर्ण + अच्। गौरादित्वात् ङीष्।) अश्वगन्धा। इति राजनिर्घण्टः॥

वाराहपत्री, स्त्री, (वाराहस्तत्कर्ण इव पत्रमध्यमस्याः। अच्। गौरादित्वात् ङीष्।) अश्वगन्धा। इति राजनिर्घण्टः॥

वाराहाङ्गी, स्त्री, (वाराहमिवाङ्गमस्याः। ङीष्।) दन्तीवृक्षः। इति भावप्रकाशः॥

वाराही, स्त्री, (वाराह + ङीष्।) ब्रह्माण्याद्यष्टमातृकान्तर्गतमातृकाविशेषः। यथा,—
"वराहरूपधारी च वराहोपम उच्यते।
वाराहजननी चाथ वाराही वरवाहना॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५॥
योगिनीविशेषः। यथा,—
"दुर्गा चण्डेश्वरी चण्डी वाराही कार्त्तिकी तथा।
हरसिद्धा तथा काली इन्द्राणी वैष्णवी तथा॥
भद्रकाली विशालाक्षी भैरवी कामरूपिणी।
एताः सर्व्वाश्च योगिन्यो भङ्गारैः शापयन्तु ते॥"
तीर्थविशेषः। यथा,—
"वाराही यमुना गङ्गा करतोया सरस्वती।
कावेरी चन्द्रभागा च सिन्धुभैरवसागरः।
पशुस्नानविधानाय सान्निध्यमिह कल्पय॥"
इति हरभक्तिकल्पतरुपुराणोक्तदुर्गापूजापद्धतिः॥
वराहदेवस्य शक्तिः। यथा,—
"यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम्॥"
इति चण्डी॥

अपि च।
"वाराहरूपिणीं देवीं दंष्ट्रोद्धृतवसुन्धराम्।
शुभदां सुप्रभां शुभ्रां वाराहीं तां नमाम्यहम्॥"
इति हरभक्तिकल्पतरुपुराणोक्तदुर्गापूजापद्धतिः॥
वराहकान्ता। चामाण्डा इति ख्यातः। तत्पर्य्यायः। विष्वक्सेनप्रिया २ वृद्धिः ३ वरदा ४। इत्यमरः। ऋद्धिः ५। इति भरतः॥ शूकरी ६ क्रोडकन्या ७ विष्वक्सेनकान्ता ८ वराही ९ कौमारी १० जिनेशा ११ ब्रह्मपुत्री १२ क्रोडी १३ कन्या १४ ऋद्धिका १५ माधवेष्टा १६ शूकरकन्दः १७ क्रोडः १८ वनवासी १९ कुष्ठनाशनः २० बल्यः २१ अमृतः २२ महावीर्य्यः २३ महौषधम् २४ शूकरकन्दः २५ वराहकन्दः २६ वीरः २७ ब्राह्मीकन्दः २८ सूकरकन्दः २९ वृद्धिदः ३० वाधिहला ३१। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। विषपित्तकफकुष्ठप्रमेहक्रिमिनाशित्वम्। दृष्यत्वम्। बल्यत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः। अन्यच।
"वाराहीकन्द एवाग्नेयश्चर्म्मकाराह्वयो मतः।
अपूपे स भवेद्देये वाराह इव लोमवान्॥"
इति भावप्रकाशः॥
ग्रामापची। इति राजनिर्घण्टः। मेदिनीमते पवर्गीयवकारादिरयं शब्दः॥

वारि, क्ली, (वारयति क्षयमिति। वृ + णिच् + "वसिवपियजिराजिव्रजिसदिखनिवाशिभ्यश्चादिभ्य इन्।" उणा० ४। १२४। इति इन्।) जलम्। इत्यमरः। १। १०। ३॥ (यथा, मनौ। ४। ६३।
"न कुर्व्वीत वृथा चेष्टां न वार्य्यञ्जलिना पिबेत्।
नोत्सङ्गे भक्षयेद् भक्ष्यान् नातु खादेत् कृतूहली॥")
दिग्विशेषे तस्य निषेधविधी यथा,—
"ईशाने चापि पूर्व्वस्मिन् पश्चिमे च तथोत्तरे।
अग्निरस्य बलं भद्रमन्यत्राशुभमेव च॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः॥
जलक्रीड़ायां वर्ज्जनीयानि यथा,—
"जलक्रीड़ां सरःक्षोभचक्रहंसापसर्पणम्।
पद्मखानिपयोविद्धत्यागो भूषवच्युतिः॥"
इति कविकल्पलतायाम् १ स्तवके १ कुसुमम्॥
द्वीवेरम्। इति हेमचन्द्रः॥

वारिः, स्त्री, (वारयतीति। वारि + इन्।) वाक्। सरस्वती। गजबन्धनी। इक्षिबन्धनभूमिः। (यथा, रघौ। ५। ४५।
"संहारविक्षेपलघुक्रियेण
हस्तेन तीराभिमुखः सशब्दम्।
बभौ स भिन्दन् दृढतन्तुजालान्
वार्य्यर्गलाभङ्ग इव प्रवृत्तः॥")
वन्दिः। कण्डीति भाषा। इति मेदिनीकारहेमचन्द्रौ॥ (वरणीये, त्रि। यथा; वाजसनेयसंहितायाम्। २१। ४१।
"बहुभ्य आ सङ्गतेभ्य एष मे देवेषु वसु वार्य्यायते।"
"एषोऽग्निर्मेमन्नं देवेषु वारि वरीतुं योग्यं वारि वरणीयं वसु धनमायक्षते।" इति तद्भाष्ये महीधरः॥)

वारिकण्टकः, पुं, (वारिणः कण्टक इव।) शृङ्गाटकः। इति जटाधरः चिकाण्डशेषश्च॥

वारिकन्यिका, स्त्री, (वारिणः कन्या इव पत्राण्यस्याः। गौरादित्वात् ङीष्। स्वार्थे कन्। टाप् पूर्व्वह्रस्वश्च।) खस्नली। इति शब्दरत्नावली॥ पाना इति भाषा॥

वारिकर्पूरः, पुं, (वारिणः कर्पूर इव।) श्लक्ष्णमत्स्यः। इति चिकाण्डशेषः॥

वारिकुजः, पुं, (वारिणः कुज इव वक्रत्वात्।) शृङ्गाटकः। इति शब्दरत्नावली॥

वारिकुजकः, पुं, (वारिकुज + स्वार्थे कन्।) शृङ्गाटकः। इति चिकाण्डशेषः॥

वारिक्रिमिः, पुं, (वारिणः क्रिमिः।) जलौकाः। इति चिकाण्डशेषः॥

वारिचत्वरः, पुं, (वारिणि चत्वर इव।) कुम्भिका। इति चिकाण्डशेषः॥

वारिचरः, पुं, (वारिणि चरतीति। चर + टः।) मत्स्यः। इति धनञ्जयः॥ (यथा, भागवते। ६। ६। २१।
"यस्योरुशृङ्गे जगतीं सनावं
मनुर्यथावध्य तसार दुर्गम्।
स एव नस्त्वाद्भयादुद्वरन्नात्
ज्ञातात्मितान् वारिचरोऽपि नूनम्॥")

जलचरजन्तुमात्रे, त्रि। (यथा, महाभारते। १२। २४७। १८।
"यथा वारिचरः पक्षी न लिप्यति जले चरन्।
विमुक्तात्मा तथा योगी गुणदोषैर्न लिप्यते॥")
वारिचामरं, क्ली, (वारिणश्चामरमिव तदाकारपुञ्जवत्त्वात्।) शैवालः। इति त्रिकाण्डशेषः॥
वारिजं, क्ली, (वारिणि जायते इति। जन+डः।) द्रोणीलवणम्। गौरसुवर्णम्। पद्मम्। (यथा, अध्यात्मरामायणे। २। ६। २।
"स तत्र वज्राङ्कुशवारिजान्वित-
ध्वजादिचिह्नानि पदानि सर्वतः॥")
जलजन्तुमात्रम्। इति राजनिर्घण्टः॥ (वारिजातमात्रे, त्रि। यथा, महाभारते। १।८२।१४।
"केनास्यर्थेन नृपते! इमं देशमुपागतः।
जिघृक्षुर्वारिजं किञ्चिदथवा मृगलिप्सया॥"
"वारिजं मीनपद्मादि वेत्ति।" तट्टीकायां नीलकण्ठः॥)
वारिजः, पुं, (वारिणि जायते इति। जन+डः।) शङ्खः। इति हेमचन्द्रः॥ शम्बूकः। इति शब्दमाला॥
वारितस्करः, पुं, (वारिणस्तस्करः। अलक्षितभावेन तदपहारकत्वात्तथात्वम्।) मेघः। इति शब्दमाला॥ वारिशोषणकर्त्तरि, त्रि। यथा,
"स्वरूपधारिणीं चेमामानिनाय निजाश्रमम्।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः॥"
इति मार्कण्डेयपुराणम्॥
वारित्रा, स्त्री, (वारिणस्त्रायते इति। त्रै+डः। टाप्।) छत्रम्। इति त्रिकाण्डशेषः॥
वारित्रं, क्ली, बालः। इति शब्दरत्नावली॥
वारिदः, पुं, (वारि ददातीति। दा+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) मेघः। (यथा, मृच्छकटिकनाटके। ५ अङ्के।
"विद्युद्वारिदगर्ज्जितैः सचकिता तद्गर्जनाकाङ्क्षिणी।
पादौ नूपुरलग्नकर्दमधरौ प्रक्षालयन्ती स्थिता॥")
मुस्तकः। इत्यमरः॥ (यथा, सुश्रुते चिकित्सितस्थाने। ३८ अध्याये।
"राजादनखदिरवर्षाभूकटुकोशीरवारिदैः।
त्रायमाणान्तरत्वक्पत्रमूलविभीतकैः॥"
वारिदातरि, त्रि। यथा, मनौ। ४। २२६।
"वारिदस्तृप्तिमाप्नोति दीर्घमायुर्हिरण्यदः।
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम्॥")
वारिधिः, पुं, (वारीणि धीयन्ते अस्मिन्निति। धा+"कर्म्मण्यधिकरणे च।" ३। ३। ९३। इति किः।) समुद्रः। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। १८। ३०१।
"तद्ब्रह्मोद्वहनात्तारेव वारिधौ स विदूषकः।
न जातवसरे प्राप्ते मत्तवानवधीदति॥")
वारिनाथः, पुं, (वारीणां नाथः।) वरुणः। समुद्रः। मेघः। इति केचित्॥
वारिनिधिः, पुं, (वारीणि निधीयन्ते अत्रेति। नि+धा+किः।) समुद्रः। इति शब्दरत्नावली॥ (यथा, राजतरङ्गिण्याम्। ३। ७८।
"पाराद्वारिनिधेः प्राप्ताः काश्मीरेष्वधुनापि ये।
राज्ञां यात्रासु निर्यान्ति ख्याता वारिध्वजाः पुरः॥")
वारिपथिकः, त्रि, (वारिपथेन गच्छतीति। वारिपथ+"उत्तरपथेनाहृतञ्च।" ५। १। ७७। इत्यत्र "आहृतप्रकरणे वारिणङ्गलकान्तारपूर्व्वाद्रिपसंख्यानम्।" इति वार्त्तिकस्थत्वात् ठक्।) जलपथगामी। वारिपथं गच्छतीत्यर्थे णिकप्रत्ययेन निष्पन्नः॥ (वारिपथेन आहृतम्। इति काशिका॥)
वारिपर्णी, स्त्री, (वारिणि पर्णान्यस्या इति। वारिपर्ण+"पाककर्कपर्णपुष्पेति।" ४। १। ६४। इति ङीष्।) कुम्भिका। इत्यमरः। १। १०। ३८॥ अस्या गुणाः।
"वारिपर्णी हिमा तिक्ता मदी स्वाद्वी सरा पटुः।
दोषत्रयकरी रूक्षा ग्रीवितम्बरुजापहा॥"
इति राजवल्लभः॥
वारिपालिका, स्त्री, (वारीणि पालयति रक्षत्यरक्षणादिभ्यो रक्षतीति। पालि+ण्वुल्। टाप्। अत इत्वम्।) खनूलिका। इति शब्दमाला॥
वारिप्रवाहः, पुं, (वारिणः प्रवाहः।) निर्झरः। इति शब्दमाला॥
वारिप्रश्नी, स्त्री, (वारिणाता प्रश्नी।) वारिपर्णी। इति शब्दमाला॥
वारिवदरा, स्त्री, (वारिपरिपूर्णा बदरेव।) प्राचीनामलकम्। इति त्रिकाण्डशेषः॥
वारिवालकं, क्ली, (वारिणो वालकम्।) क्षीरेरम्। इति हारावली। १०८॥
वारिभवं, क्ली, (वारिणि नेत्रजलाय भवति प्रभवतीति। भू+अच्।) श्रोतोऽञ्जनम्। इति राजनिर्घण्टः॥ (जलभवमात्रे, त्रि॥)
वारिमषिः, पुं, (वारि मसिरिव श्यामताजनकं यस्य। सजलमेघस्येव कृष्णवर्णत्वात् तथात्वम्।) मेघः। इति त्रिकाण्डशेषः॥
वारिमुक्, [च्] पुं, (वारि मुञ्चतीति। मुच्+किप्।) मेघः। इति शब्दरत्नावली॥ (यथा, रघौ। ४। ७६।
"स विश्रमितमाजह्रे यन्नं सर्व्वस्वदक्षिणम्।
आदानं हि विसर्गाय सतां वारिमुचामिव॥")
वारिमूली, स्त्री, (वारिणि मूलं यस्याः। "पाकवर्कपर्णेति।" ४। १। ६४। इति ङीष्।) वारिपर्णी। इति शब्दरत्नावली॥
वारिरथः, पुं, (वारिणु रथ इव गमनसाधनत्वात्।) भेलकः। इति त्रिकाण्डशेषः॥
वारिराशिः, पुं, (वारीणां राशयो यत्र।) समुद्रः। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। ६३। ८८।
"तस्य भ्रमयतो हस्ताच्युतमेकमुदुम्बरम्।
जघास शिशुमारोऽथ वारिराशिजलाशयः॥"
वारीणां राशिः। जलसमूहश्च। यथा, रघौ। ४। ४६।
"शैलोपमः शैवलमञ्जरीणां
जालानि कर्षन्नुरसा स पश्चात्।
पूर्व्वं तटोद्दीर्णवारिराशिः
सरित्प्रवाहस्त्रुटसूत्रसर्पः॥")
वारिरुहं, क्ली, (वारिणि रोहति जायते इति। रुह+"इगुपधज्ञाप्रीकिरः कः।" ३। २। १३५। इति कः।) कमलम्। इति राजनिर्घण्टः॥ (यथा, किरातार्জ্জुनीये। ५। २१।
"विकचवारिरुहन्दधतं सरः
सकलहंसगणं शुचिमानसम्।
शिवमगात्मलया च ऋतैर्ध्रया
सकलहंसगणं शुचिमानसम्॥")
जलजाते, त्रि॥
वारिलोमा, [न्] पुं, (वारिणि लोमानि यस्य। यद्वा, वारि लोम्नि यस्य।) वरुणः। इति जटाधरः॥
वारिवदनं, क्ली, (वारिवृक्षं वदनं यस्मात्। तत्सेवनेन मुखे जलनिस्रावात्तथात्वम्।) प्राचीनामलकम्। इति भूरिप्रयोगः॥
वारिवरं, क्ली, करमर्दकम्। इति जटाधरः॥
वारिवल्लभा, स्त्री, (वारि वल्लभमस्याः। स्वजनकत्वात्।) विदारी। इति राजनिर्घण्टः॥
वारिवासः, पुं, (वारिसमीपे वासोऽस्य। यद्वा, वारि पर्य्युषितान्नादिजलं वासयति सुगन्धीकरोतीति। वास+अण्।) शौण्डिकः। इति हेमचन्द्रः। ३। ५६५॥
वारिवाहः, पुं, (वारि वहतीति। वह+"कर्म्मण्यण्।" ३। २। १। इति अण्।) मेघः। मुस्ता। इत्यमरः॥
वारिवाहनः, पुं, (वाहयतीति। वाहि+ल्युः। वारीणां वाहनः।) मेघः। इति शब्दरत्नावली॥
वारिशः, पुं, (वारिणि सागरजले शेते इति। शी+डः।) विष्णुः। इति त्रिकाण्डशेषः॥
वारिसम्भवं, क्ली, (वारिप्रधानदेशेषु सम्भव उत्पत्तिर्यस्य।) लवङ्गम्। सौवीराञ्जनम्। उशीरम्। इति राजनिर्घण्टः॥
वारिसम्भवः, पुं, (वारिप्रधानस्थानेषु सम्भव उत्पत्तिर्यस्य।) वाडवानलगरः। इति राजनिर्घण्टः॥ (वारिणु सम्भवोऽस्य। वारिजातमात्रे, त्रि। यथा, रामायणे। ५। ६६। ६।
"इतस्तु किं दुःखतरं यमिमं वारिसम्भवम्।
मन्ये पश्यामि सौमित्रे! वैदेहीमागतं विना॥")
वारी, स्त्री, (वार्य्यतेऽनयेति। वृ+णिच्+"वर्षिवपियजिराजिव्रजिसदिवृनिराग्यादिवारिभ्य इण्।" उणा०। ४। १२४। इति इण्। वा ङीष्।) गजबन्धिनी। (यथा, रघुवंशे। ५। ४५।

"वभौ स भिन्दन् दृढतत्तरङ्गान्
वार्यर्गलाभङ्ग इव प्रवृत्तः ॥")
कलसी। इति धरणिः ॥

वारीटः, पुं, (वार्यो गजबन्धनभूम्यामेटतीति। इट्+कः।) हस्ती। इति शब्दमाला ॥

वारीशः, पुं, (वारीणामीशः।) समुद्रः। इति हेमचन्द्रः। ४। १३६ ॥

वारुः, पुं, (वारयति रिपूनिति। वृ+णिच्+बाहुलकात् उण्।) विजयकुञ्जरः। इति हारावली। १६० ॥

वारुटः, पुं, खड्गिः। अन्त्यजः। इति त्रिकाण्डशेषः ॥

वारुणं, क्ली, (वरुणो देवतास्येति। वरुण+अण्।) जलम्। इति राजनिर्घण्टः ॥ (घृतभिधानत्वम्। यथा, तिथितत्त्वे।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा॥"
उपपुराणविशेषः। यथा, देवीभागवते। १। ३। १५।
"वारुणं कालिकाख्यञ्च ग्राम्यं नन्दितसंज्ञकं शुभम्।
सौरं पाराशरप्रोक्तमादित्यं चातिविस्तरम्॥"
पुं, भारतस्य खण्डविशेषः। यथा, विष्णुपुराणे। २। ३। ६।
'इन्द्रद्वीपस्तथा सौम्यो गन्धर्वस्तथ वारुणः॥")
वरुणसम्बन्धिनि, त्रि। यथा,—
"पश्चिमे पुष्पदन्तश्च वारुणश्च प्रशस्यते।
उत्तरेण तु भल्लाटं सौम्यश्च शुभदं भवेत्॥
उदुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः।
प्रत्यग्रोत्तरतो धन्यो विपरीतास्त्वसिद्धये॥"
इति मात्स्ये २२६ अध्यायः॥
(यथा च महाभारते। ३। १०२। १।
"समुद्रं ते समाश्रित्य वारुणं निधिमम्भसाम्।
कालेयाः संप्रवर्तन्ते त्रैलोक्यस्य विनाशने॥")

वारुणकर्म्म, क्ली, (वारुणं जलसम्बन्धि कर्म्म।) जलाशयखननादि। तस्य शुभाशुभकालादि यथा,—
यम उवाच।
"सुदिने शुभनक्षत्रे चन्द्रतारावलैर्युते।
सद्व्रतन्तु भवेद्यत्र काले तस्मिन् विधिः स्मृतः॥
सद्व्रतं तु कृतं कर्त्तुः संपूर्णस्तस्य वोरयः।
कर्कटे पुत्रलाभस्तु सौख्यं तु मकरे भवेत्॥
मीने यज्ञोऽर्थलाभस्तु कुम्भे च सुबहूदकम्।
वृषे च मिथुने वृद्धिर्वृश्चिके निर्ज्जलं भवेत्॥
पिप्पलप्रिस्तु कन्यायां तुलायां सत्यसङ्गतिः।
सिंहे मेषे धनं नाशं जलस्य कुरुते द्विज।
तथा चैतेषु लग्नेषु वारुणं कर्म्म नो दिशेत्॥"
इति वह्निपुराणे वारुणारामप्रतिष्ठानामाध्यायः॥

वारुणिः, पुं, (वरुणस्यापत्यं पुमान्। वरुण+इञ्।) अगस्त्यमुनिः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। १०५। १।
"समुद्रं स समासाद्य वारुणिर्भगवानृषिः।
उवाच सहितान् देवानृषींश्चैव समागतान्॥
अहं लोकहितार्थं वै पिबामि वरुणालयम्॥"
वशिष्ठः। यथा, महाभारते। १। ६६। ७।
"स वारुणिस्तपस्तेपे तस्मिन् भरतसत्तम!।
वने पुण्यवतां श्रेष्ठः स्वादुमूलफलोदके॥"
विजनापुत्रभेदः। यथा, महाभारते। १। ६५। ४०।
"तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुडारुणौ।
आरुणिर्वारुणिश्चैव वैनतेयाः प्रकीर्त्तिताः॥"
भृगुः। यथा, शतपथब्राह्मणे। ११। ६। १।
"भृगुर्ह वै वारुणिः। वरुणं पितरं विद्ययातिमेने। तह वरुणो विदाञ्चकार॥")

वारुणी, स्त्री, (वरुणस्येयम्। "तस्येदम्।" ४। ३। १२०। इत्यण्। ङीप्।) सुरा। (यथा, मनौ। ११। १४७।
"अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति।
मतिपूर्व्वमनिर्देशं प्राणान्तिकमिति स्थितिः॥"
मदिराधिष्ठात्री देवी। यथा, विष्णुपुराणे। १। ६। ६३।
"किमेतदिति सिद्धानां दिवि चिन्तयतां ततः।
बभूव वारुणी देवी मदाघूर्णितलोचना॥"
"वारुणी मदिराधिष्ठात्री देवी।" इति तट्टीकायां श्रीधरस्वामी॥ वरुणपत्नी। वारुणीवल्लभशब्दोदाहरणात्॥ यथा, महाभारते। २। ६। ६।
"यस्यामास्ते स वरुणो वारुण्या च समन्वितः।
दिव्यरत्नाम्बरधरो दिव्याभरणभूषितः॥"
नदीविशेषः। यथा, गो० रामायणे। २। ७०। १२।
"पूर्व्वेण वारुणीं तीर्त्वा कुरुक्षेत्रे सरस्वतीम्।
सरांसि च प्रफुल्लानि नदीञ्च विमलोदकाः॥")
पश्चिमदिक्। इत्यमरः। १। ३। ५१॥ (यथा, नैषधचरिते। ४। ६०।
"वद विधुमुदमासि मदीरितै-
स्त्वयजसि किं दिवराजधिया विधुम्।
किमु दिवं पुनरेति यदीदृशः
पतित एव निधेय हि वारुणीम्॥"
विद्याविशेषः। यथा, तैत्तिरीयोपनिषदि। ३ क्षतीयवल्ल्याम् ६ षष्ठानुवाके। "आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या॥"
अश्वानां छायाविशेषः। यथा, अश्ववैद्यके। ३। १०३।
"शुद्धस्फटिकसङ्काशा सुस्निग्धा चैव वारुणी॥")
घृतभिधानत्वम्। इति हेमचन्द्रः॥ गरुडपूर्व्वा। इति मेदिनी। णे, ६८॥ इन्द्रवारुणी। दूर्व्वा। इति राजनिर्घण्टः॥ घृतभिधानत्वञ्च युक्तवैद्यकृष्णत्रयोदश्यां। यथा, स्कन्दपुराणे।
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा॥"
वारुणं घृतभिधा।
"शनिवारसमायुक्ता सा महावारुणी स्मृता।
गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहैः समा॥
शुभयोगसमायुक्ता शनौ शतभिषा यदि।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत्॥
अत्र संज्ञाविधिः सार्थकत्वाय निमित्तत्वेन भाषापत्तिन्यूक्षेखानन्तरं महावारुणीमहामहावारुण्यायुक्षेखनीये। तेन चैत्रे मासि कृष्णपक्षे त्रयोदश्यां तिथौ महावारुण्यां महामहावारुण्यां यथायथं प्रयोज्यम्। न चाच।
"स्नानं कुर्व्वन्ति या नार्य्यश्चन्द्रे शतभिषां गते)
सप्तजन्म भवेद्युक्ता दुर्भगा विधवा ध्रुवम्॥"
इति॥
"त्रयोदश्यां तृतीयायां दशम्याञ्च विशेषतः।
शूद्रविट्क्षत्रिया: स्नानं नाचरेयुः कथञ्चन॥"
इति प्रचेतोजाबालिवचनाभ्यां स्त्रीणां शूद्रादीनाञ्च स्नाननिषेध इति वाच्यम्।
"भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः।
तन्निषिद्धं दशम्यादौ नित्यनैमित्तिकं न तु॥"
इति हेमाद्रिधृतवचनेन रागप्राप्तस्नान एव निषेधात् नक्षत्रेऽपि तथा कल्पनात्। अत्र त्रयोदश्यां पूर्णायां पूर्व्वाह्णेतरकाले नक्षत्रादिसत्त्वे परदिने पूर्व्वाह्णे तिथिनक्षत्रलाभेऽपि पूर्व्वदिन एव स्नानम्। रात्रावपि वारुण्यादिषु गङ्गायां स्नानम्।
"दिवा रात्रौ च सन्ध्यायां गङ्गायाञ्च प्रसङ्गतः।
स्नात्वाश्वमेधजं पुण्यं गृहेष्वुद्धृततत्त्वलैः॥"
इति ब्रह्मवैवर्त्तपुराणे सामान्यतः प्रतिप्रसवात्। इति तिथ्यादितत्त्वम्॥ *॥ वरुणप्रेरितवृन्दावनस्थकदम्बतरुकोटरनिःसृतबलदेवपीतवारुणी। यथा,—
पराशर उवाच।
"वने विचरतस्तस्य सह गोपैर्महात्मनः।
मातृवक्त्रारूपस्य गोपस्य धरणीधृतः॥
निष्पादितोरुकार्य्यस्य कार्य्यशेषं विचारिणः।
उपभोगार्थमत्यर्थं वरुणः प्राह वारुणीम्॥
अभीष्टा सर्व्वदा यस्य मदिरे त्वं महौजसः।
अनन्तस्योपभोगाय तस्य गच्छ सुदे शुभे।
इत्युक्ता वारुणी तेन सन्निधानमथाकरोत्।
वृन्दावनवनोत्पन्नकदम्बतरुकोटरे॥
विचरन् बलदेवोऽपि मदिरागन्धसुत्तमम्।
आघ्राय मदिरातर्षमवाप्याथ पुरातनम्॥
ततः कदम्बात् सहसा मद्यधारा स्राविणी।
पतन्तीं वीक्ष्य मैत्रेय प्रययौ परमां मुदम्॥
पपौ च गोपगोपीभिः समवेतो मुदान्वितः।
उपगीयमानो ललितं गीतवाद्यविशारदैः॥"
इति विष्णुपुराणे ५ अंशे ३५ अध्यायः॥

वारुणीवल्लभः, पुं, (वारुण्या वल्लभः। वारुणीवल्लभा यस्येति वा।) वरुणः। इति शब्दमाला॥

वारुण्डः, पुं, क्षत्रियो राजा। इति मेदिनी। डे, ३३॥ तन्त्रते पवर्गीयादिः। किन्तु धृषातोः उण्डप्रत्ययनिष्पन्नत्वात् अन्तःस्थादौ लिखितः॥

वारुण्डः, पुं क्ली, (वृ+उण्डः।) नौसैकपाषाम्। नेत्रमलम्। कर्णमलम्। इति मेदिनी। ते, ३३॥

वारण्डी, स्त्री, (वारण्ड + गौरादित्वात् ङीष् ।) द्वारपिण्डी । इति मेदिनी । ते, ३३ ॥

वारेन्द्री, स्त्री, देशविशेषः । इति शब्दरत्नावली ॥ यथा,—

"प्राच्यां मागधशौण्डौ च वारेन्द्रीगौड़राढ़काः । वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयादयः ॥"

इति ज्योतिस्तत्त्वम् ॥

अधुना राजशाहीनामकदेशैकदेशः ॥

वार्क्षं, क्ली, (वृक्षाणां समूह इति । वृक्ष + "तस्य समूहः ।" ४ । २ । ३७ । इति अण् ।) वनम् । इति हेमचन्द्रः ॥ (वृक्षस्येदमित्यण् ।) वृक्षसम्बन्धिनि, त्रि । यथा,—

"वार्क्षं वित्तप्रदं लिङ्गं स्फाटिकं सर्व्वकामदम् ॥"

इति तिथ्यादितत्त्वम् ॥

वार्ची, स्त्री, (वृक्षस्यापत्यं स्त्री । वृक्ष + अण् । ङीष् ।) स्त्रीविशेषः । (यथा, महाभारते । १ । १६७ । १५ ।

"तथैव मुनिना वार्ची तपोभिर्भावितात्मनः ।
सङ्गताभूद्दृढं भार्य्या नित्यमेकव्रताव्रतैः ॥"

इयं हि मारिषापरनाम्नी कण्डुमुनेरौरसात् प्रम्लोचागर्भगता सती पश्चात् वृक्षेभ्य उत्पन्ना । तत्कथा यथा, विष्णुपुराणे । २ । १५ । २—५३ ।

पराशर उवाच ।

"तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः ।
अरक्ष्यमाणामावव्रुर्व्वभूवाथ प्रजाक्षयः ॥
नाशकन्मारुतो वातुं वृतं खमभवद् द्रुमैः ।
दशवर्षसहस्राणि न शेकुस्चेष्टितुं प्रजाः ॥
तद् दृष्ट्वा ज्वलनिष्क्रान्ताः सर्व्वे क्रुद्धाः प्रचेतसः ।
मुखेभ्यो वायुमग्निञ्च तेऽसृजन् जातमन्यवः ॥
उन्मूलानथ तान् वृक्षान् कृत्वा वायुरशोषयत् ॥
तानग्निरदहद् घोरस्चाभूद् द्रुमसंक्षयः ॥
द्रुमक्षयमथो दृष्ट्वा किञ्चिच्छिष्टेषु शाखिषु ।
उपगम्याब्रवीदेतान् राजा सोमः प्रजापतीन् ॥
कोपं यच्छत राजानः श्रृणुध्वञ्च वचो मम ।
सन्धानं वः करिष्यामि सह चितिरुहैरहम् ॥
रत्नभूता च कन्येयं वार्च्ची वरवर्णिनी ।
भविष्यं जानता पूर्व्वं मया गोभिर्विवर्द्धिता ॥
मारिषा नाम नाम्नेयं वृक्षाणामिति निर्म्मिता ।
भार्य्या वोऽस्तु महाभागा ध्रुवं वंशप्रविवर्द्धिनी ॥
युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः ।
अक्षाम्यत्यक्षते विद्वान् दक्षो नाम प्रजापतिः ॥
मम चांशेन संयुक्तो युष्मत्तेजोमयेन वै ।
अग्निनाग्निसमो भूयः प्रजाः संवर्द्धयिष्यति ॥
कण्डुर्नाम मुनिः पूर्व्वमासीद् वेदविदां वरः ।
सुरम्ये गोमतीतीरे स तेपे परमं तपः ॥
तत्क्षोभाय सुरेन्द्रेण प्रम्लोचाख्या वराप्सराः ।
प्रयुक्ता क्षोभयामास तत्पुरं सा शुचिस्मिता ॥
क्षोभितः स तया सार्द्धं वर्षाणामधिकं शतम् ।
अतिष्ठन्मन्दरद्रोण्यां विषयासक्तमानसः ॥
सा तं प्राह महात्मानं गन्तुमिच्छाम्यहं दिवम् ।
प्रसादसुमुखो ब्रह्मन् अनुज्ञां दातुमर्हसि ॥
तयैवमुक्तः स मुनिस्तस्यामासक्तमानसः ।
दिनानि कतिचिद् भद्रे स्थीयतामित्यभाषत ॥
एवमुक्ता ततस्तेन सार्द्धं वर्षशतं पुनः ।
बुभुजे विषयांस्तन्वी तेन सार्द्धं महात्मना ॥
अनुज्ञां देहि भगवन् व्रजामि त्रिदिवालयम् ।
उक्तस्त्वेवं स मुनिः स्थीयतामित्यभाषत ॥
पुनर्गते वर्षशते साधिके सा शुभानना ।
यामीत्याह दिवं ब्रह्मन् प्रणयस्खलितोभनम् ॥
उक्तस्त्वेवं स मुनिरुपगृह्यायतेक्षणाम् ।
प्राहास्यतां क्षणं सुभ्रु चिरं कालं गमिष्यति ॥
तच्छापभीता सुश्रोणी सह तेनर्षिणा पुनः ।
शून्यहृदया किञ्चिदूनं वर्षाणामन्वतिष्ठत ॥
गमनाय महाभागो देवराजनिवेशनम् ।
प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत ॥
तं सा शापभयाद् भीता दाक्षिण्येन च दक्षिणा ।
प्रोक्ता प्रणयभङ्गार्त्तिवेदनी न जहौ मुनिम् ॥
तया च रमतस्तस्य महर्षेस्तदहर्निशम् ।
नवं नवमभूत् प्रेम मन्मथाविश्चेतसः ॥
एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मुनिः ।
निष्क्रामन्तञ्च कुत्रेति गम्यते प्राह सा शुभा ॥
इत्युक्तः स तया प्राह परिवृत्तमहः शुभे ।
सन्ध्योपास्तिं करिष्यामि क्रियालोपोऽन्यथा भवेत ॥
ततः प्रहस्य मुदिता तं सा प्राह महामुनिम् ।
किमद्य सर्व्वधर्म्मज्ञ परिवृत्तमहस्तव ॥
बहूनां विप्र वर्षाणां परिणाममहस्तव ।
गतमेतन्न कुरुते विस्मयं कस्य कथ्यताम् ॥

सुनिरुवाच ।

प्रातस्त्वमागता भद्रे नदीतीरमिदं शुभम् ।
मया दृष्टासि तन्वङ्गि प्रविष्टा च ममाश्रमम् ॥
इयञ्च वर्त्तते सन्ध्या परिणाममहर्गतम् ।
उपहासः किमर्थोऽयं सद्भावः कथ्यतां मम ॥

प्रम्लोचोवाच ।

प्रत्यूषस्यागता ब्रह्मन् सत्यमेतन्न ते मृषा ।
किन्त्वद्य तस्य कालस्य गतान्यब्दशतानि ते ॥

सोम उवाच ।

ततः ससाध्वसो विप्रस्तां प्रपृच्छायतेक्षणाम् ।
कथ्यतां भीरु कः कालस्त्वया मे रमतः सह ॥

प्रम्लोचोवाच ।

सप्तोत्तराण्यतीतानि नववर्षशतानि ते ।
मासाश्च षट् तथैवान्यत् समतीतं दिनत्रयम् ॥

ऋषिरुवाच ।

सत्यं भीरु वदस्येतत् परिहासोऽथ वा शुभे ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम् ॥

प्रम्लोचोवाच ।

वदिष्याम्यृतं ब्रह्मन् कथमन्यत तवान्तिके ।
विशेषेणाद्य भवता दृष्टा मार्गानुवर्त्तिना ॥

सोम उवाच ।

निशम्य तद् वचः सत्यं स मुनिर्मुमुदे भृशम् ।
धिङ्मां धिङ्मामतीवेत्यं निनिन्दात्मानमात्मना ॥

सुनिरुवाच ।

तपांसि मम नष्टानि हृतं ब्रह्मविदां धनम् ।
हतो विवेकः केनापि योषिल्लोहाय निर्म्मिता ॥
ऊर्ध्वमष्टकृतिगं ब्रह्म ज्ञेयमात्मजयेन मे ।
मतिरेषा हृता येन धिक् तं काममहाग्रहम् ॥
व्रतानि वेदविद्याग्निकार्य्याण्यखिलानि च ।
नरकप्राप्तमार्गेण सङ्गेनापहृतानि मे ॥
विनिन्द्येत्थं स धर्म्मज्ञः स्वयमात्मानमात्मना ।
तामम्बरसमासीनामिदं वचनमब्रवीत् ॥
गच्छ यापि यथाकामं यत् कार्य्यं तत्कृतं त्वया ।
देवराजस्य मत्क्षोभं कुर्व्वन्त्या भावचेष्टितैः ॥
न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना ।
सतां साप्तपदं मैत्रसुषितोऽहं त्वया सह ॥
अथवा तव को दोषः किं वा कुप्याम्यहं तव ।
ममैव दोषो नितरां येनाहमजितेन्द्रियः ॥
यया शक्रप्रियार्थिन्या हृतो मे तपसो व्ययः ।
त्वया धिक् तां महामोहमङ्गषां सुभ्रुगुच्यताम् ॥

सोम उवाच ।

यावदित्थं स विप्रर्षिस्तां ब्रवीति सुमध्यमाम् ।
तावद् गलत्स्वेदजला सा बभूवातिवेपथुः ॥
प्रवेपमानां सततं खिन्नगात्रलतां सतीम् ।
गच्छ गच्छेति मक्रोधं उवाच मुनिसत्तमः ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।
आकाशगामिनी खेदं ममार्ज्ज तरुपल्लवैः ॥
वृक्षाद् वृक्षं ययौ बाला तदग्रस्थपल्लवैः ।
निर्म्मार्ज्जमाना गात्राणि गलत्स्वेदजलानि वै ॥
ऋषिणा यत्तदा गर्भस्तस्या देहे समाहितः ।
निर्ज्जगाम स रोमाग्र स्वेदरूपी तदङ्गतः ॥
तं दृष्ट्वा जगृहुर्गर्भं एकं चक्रे तु मारुतः ।
मया चाप्यायितो गोभिः स तदा ववृधे भृशैः ॥
वृक्षाग्रगर्भसंभूता मारिषाख्या वरानना ।
तां प्रदास्यन्ति वो वृक्षाः कोप एष प्रशाम्यताम् ॥
कण्डोरग्रजमेवं सा वृक्षेभ्यश्च समुद्गता ।
ममापत्यं तथा वायोः प्रम्लोचा तनया च सा ॥
स चापि भगवान् कण्डुः क्षीरे तपसि सत्तमः ।
पुरुषोत्तमाख्यं मैत्रेय विष्णोरायतनं ययौ ॥
तत्रैकाग्रमतिर्भूत्वा चकाराराधनं हरेः ।
ब्रह्मपारमयं कुर्व्वन् जपमेकाग्रमानसः ।
ऊर्द्ध्वबाहुर्महायोगी स्थित्वासौ भूपनन्दना ॥*)

वार्चः, पुं, हंसः । वारि चरतीत्यर्थे डप्रत्ययेन निष्पन्नः । इति सुग्धबोधव्याकरणम् ॥

वार्त्तिकः, त्रि, (वर्त्तलेखनं शिल्पमस्य । वर्त्त + ठक् ।) लेखकः । इति शब्दमाला ॥

वार्त्तं, क्ली, अवसारम् । आरोग्यम् । इत्यमरः । ३ । ३ । ७५ ॥

वार्त्तः, त्रि, (वृत्तिरस्येति । "प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ।" ५ । २ । १०१ । इति णः ।) निरामयः । इत्यमरः । २ । ६ । ५७ ॥ वृत्तिशाली । इत्यजयपालः ॥

वार्त्तकः, पुं, पक्षिविशेषः । बटेर इति भाषा । यथा,—

"वार्ताकी वार्त्तकश्चित्रस्तोऽन्या वर्त्तका स्मृता।
वर्त्तकोऽग्निकरः प्रोक्तो ज्वरदोषत्रयापहः।
सुरूक्षः शुक्रदो बल्यो वर्त्तकात्यगुणा ततः॥"
इति भावप्रकाशः॥

वार्त्ता, स्त्री, (वृत्तिरस्यां अस्तीति। "प्रज्ञाश्रद्धार्वृत्तिभ्यो णः।"५।२।१०१। इति णः। ततष्टाप्।) दुर्गा। यथा,—
"पञ्चादिपालजाद्येवी क्षत्रियकर्म्मालङ्कारणात्।
वर्त्तनाद्वारणादापि वार्त्ता सा एव गीयते॥"
इति देवीपुराणे ४५ अध्यायः॥
वृत्तिः। जनश्रुतिः। इत्यमरः। १। ६। ६॥
उदन्तः। (यथा, मोहमुद्गरे। ८।
"यावद्वित्तोपार्जनशक्तः
तावन्निजपरिवारो रक्तः।
तदनु च जरया जर्जरदेहे
वार्त्तां कोऽपि न पृच्छति गेहे॥")
वार्तिकः। क्षत्रियादि। इति मेदिनी। ते, ५६॥
(यथा, मनौ। ९। ३२६।
"वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम्।
वार्त्तायां नित्ययुक्तः स्यात् पशूनाञ्चैव रक्षणे॥"
वार्त्तेयं चतुर्विधा। यथा, भागवते १०।२४।२१।
"क्षत्रियाग्निव्यगोरक्षाकुसीदं तुर्य्यमुच्यते।
वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम्॥")
वार्त्ताकः, पुं, (वर्त्तते इति। वृत्+"वृतेर्ण्वुच्च।" उणा० १। ७६। इति काकुः। "बाहुलकात् उकारस्यात्वे वार्त्ताकवार्त्ताकौ।" इत्यप्यमरटीकायां भरतः।) वार्त्ताकुः। इति त्रिकाण्डशेषः। वार्त्ताकफली। इति भावप्रकाशः॥
वार्त्ताकी, [न्] पुं, वार्त्ताकुः। इत्यमरटीकायां भरतः॥
वार्त्ताकी, स्त्री, वृक्षती। इति भावप्रकाशः॥
वार्त्ताकुः, स्त्री, (वर्त्तते इति। वृत्+"वृतेर्ण्वुच्च।" उणा० १। ७६। इति काकुः।) स्वनामख्यातफलवृक्षः। बैगुन इति भाषा॥ तत्पर्य्यायः। क्षिङ्गी २ सिंही ३ भण्टाकी ४ दुष्प्रधर्षिणी ५। वार्त्ताकी ६ वार्त्ता ७ वातिङ्गणः ८ वार्ताकः ९ भ्राकुचिल्लः १० राजभ्राष्टः ११। इति जटाधरः॥ वार्त्तिकः १२ वातिगमः १३ वृन्ताकः १४ वङ्गणः १५ अङ्गणः १६। इति शब्दरत्नावली॥ कण्टवृन्ताकी १७ कण्टालुः १८ कण्टपत्रिका १९ निद्रालुः २० मांसफला २१ वृन्ताकी २२ महौटिका २३ चित्रफला २४ कण्टकिनी २५ महती २६ कटुफला २७ मिश्रवर्णफला २८ नीलफला २९ रक्तफला ३० भ्राकश्रेष्ठा ३१ वृत्तफला ३२ नृपप्रियफला ३३। अस्या गुणाः। कटुत्वम्। रूक्षत्वम्। मधुरत्वम्। पित्तनाशित्वम्। बलपुष्टिकारित्वम्। वृद्धत्वम्। गुरुत्वम्। वातेषु निन्दितत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"अग्निप्रदा मारुतनाशिनी च
शुक्रप्रदा श्लेष्मितवर्द्धिनी च।
वृक्षासकासारुचिनाशिनी च
वार्त्ताकुरेषा गुणसप्रयुक्ता॥
सा वाला कफवातघ्नी एका सञ्चारपित्तला।
सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी॥
अङ्गारपक्का वार्त्ताकुः किञ्चित्पित्तकरी मता।
कफमेदोऽनिलहरा सरा लघुतरा परा॥"
इति राजवल्लभः॥

अन्यच्च।
"वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम्।
ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु॥
तद्वालं कफपित्तघ्नं वृद्धं पित्तकरं गुरु।
वृन्ताकं पित्तलं किञ्चिदङ्गारोपरिपाचितम्॥
कफमेदोऽनिलामघ्नमत्यन्तं लघु दीपनम्।
तद्वेव हि गुरु स्निग्धं सतैलं लवणान्वितम्॥
अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत्।
तदर्शःसु विशेषेण हितं हीनञ्च पूर्व्वतः॥"
इति भावप्रकाशः॥

वार्त्ताकुः, पुं. (वृत्+काकुः।) वार्त्ताकी। इति त्रिकाण्डशेषः॥
वार्त्तायनः, पुं, (वार्त्तानामयनमनेनेति।) प्रवृत्तिज्ञः। तत्पर्य्यायः। हैरिकः २ गूढपुरुषः ३ प्रणिधिः ४ यथार्हवर्णः ५ अवसर्पः ६ मन्त्रवित् ७ चरः ८ स्पृग्रः ९ चारः १०। इति हेमचन्द्रः। ३। ३६८॥
वार्त्ताव्रहः, पुं, धान्यतण्डुलादेर्वार्त्तां वहति यः। पसारी इति भाषा। तत्पर्य्यायः। वैदधिकः २। इत्यमरभरतौ। वार्त्तांवहः ३। इति शब्दरत्नावली। संवादवाहके, त्रि॥
वार्त्तिकः, पुं, (वृत्तिं वेत्ति। वृत्ति+उक्थादित्वात् ठक्।) प्रवृत्तिज्ञः। चरः। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। ३४। ७६।
"दुर्गतो वार्त्तिकजनो लोभात् किं नाम ना चरेत्॥"
(वार्त्ता क्षुद्यादित्वात्र साधुः। ठक्।) वैद्यः। (वार्त्ते आरोग्ये साधुरिति। ठक्।) वर्त्तिकपक्षी। इति राजनिर्घण्टः॥ वार्त्ताकी। इति शब्दरत्नावली। (वृत्तौ साधुरिति। वृत्ति+"कथादिभ्यष्ठक्।" ४। ४। १०२। इति ठक्। सूत्रवृत्तिनिपुणे, त्रि॥)
वार्त्तिकं, क्ली, (वृत्तिर्व्यञ्जनविवृतिः। तत्र साधुः। वृत्ति+"कथादिभ्यष्ठक्।" ४।४।१०२। इति ठक्।) उक्तानुक्तदुरुक्तार्थचिन्ताकारितु वार्त्तिकम्॥
इति हेमचन्द्रः॥
वार्त्तिका, स्त्री, (वार्त्तिक+टाप्।) पक्षिविशेषः। बटेर इति भाषा। तत्पर्य्यायः। विष्कुलिङ्गी २। इति हारावली॥
वार्त्रघ्नः, पुं. (वृत्रस्य इन्द्रस्यापत्यं पुमान्। वृत्रहन्+अण्।) अर्জुनः। इति त्रिकाण्डशेषः॥

जयन्तः। वृत्रघ्नसम्बन्धिनि, त्रि॥ (यथा, भागवते। ६। १२। ३३।
"तदा च खे दुन्दुभयो विनेदु-
र्गन्धर्वसिद्धाः समहर्षिसङ्घाः।
वार्त्रघ्नलिङ्गैस्तमभिष्टुवाना
मन्त्रैर्मुदा कुसुमैरभ्यवर्षन्॥")
वार्द्दरं, क्ली, (वृष्णालावीजम्। दक्षिणावर्त्तशङ्खः। काकचिञ्चा। भारती। इति मेदिनी। रे, २११॥ भूमिजम्। जलम्। आम्रबीजम्। इति विश्वः॥
वार्द्दलं, क्ली, (वार्भिः सलिलैर्दलतीति। दल+अच्। सदा मेघाच्छन्नवृष्टिपातान्वयात्वम्।) दुर्दिनम्। इति मेदिनी। ले, २१६। तच्च ते पर्व्वगीयादिः॥ (वादल इति भाषा॥)
वार्द्दलः, पुं, (वार्दलतेऽत्रेति। दल+"पुंसि संज्ञायां घः प्रायेण।" ३। ३। २१८। इति घः।) मेलाग्रन्था। सा तु मस्याधारः। इति मेदिनी। ले, २१६॥
वार्द्धकं, क्ली, (वृद्धायाः समूहः। "गोत्रोक्षोष्ट्रोरभ्रेति।" ४। २। ३९। इत्यत्र "वृद्धाचेति।" काशिकोक्तेः वुञ्।) वृद्धसंघातः। (वृद्धस्य भावः कर्म्म वेति। मनोज्ञादित्वात् वुञ्।) वृद्धस्य भावः। वृद्धस्य कर्म्म। इति मेदिनी। के, ५६॥ (यथा, मार्कण्डेयपुराणे। १०६। २४।
"बाल्ये बालक्रिया पूर्व्वं तदन्त कौमारके च या।
यौवने चापि या योग्या वार्द्धके वनसंश्रया॥"
त्रि, वृद्धः। यथा, नैषधे। १। ७७।
"फलानि पुष्पाणि च पल्लवे करे
वयोऽतिपातोद्गतवातवेपिते।
स्थितेः समादाय महर्षिवार्द्धकाद्
वने तदातिथ्यमगृह्णि ग्राह्यिभिः॥"
"महर्षीणां मुनिश्रेष्ठानां मध्ये यो वार्द्धको वृद्धस्तस्मात्। त्रिषु स्वार्थाद्वार्द्धको वृद्धे क्लीवं तद्भावसंश्रयोरिति बलः।" इति तट्टीका।)
वार्द्धकं, क्ली, (वार्द्धकमेव। वार्द्धक+चतुर्व्वादित्वात् स्वार्थे ष्यञ्।) वृद्धावस्था। तत्पर्य्यायः। वार्द्धकम् २ वृद्धत्वम् ३ स्थाविरम् ४। इति जटाधरः॥ (यथा, महाभारते। ८।५२।८।
"आत्मानं मन्यमानापि जरतञ्च अमान्विता।
वार्द्धकेन च राजेन्द्र! तपसा चैव कर्षिता॥")
वार्द्धिः, पुं, (वारि जलानि धीयन्तेऽत्रेति। धा+किः।) समुद्रः। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। ८। २०। ३१।
"सोऽनन्तो भगवान् देवोऽनन्तसत्त्वो महाद्युतिः।
अनन्तगुणवार्द्धित्वं आदिदेवो महाद्युतिः॥")
वार्द्धिभवं, क्ली, (वार्द्धौ समुद्रे भवतीति। भू+अच्।) द्रोणीलवणम्। इति राजनिर्घण्टः॥
वार्द्धुषिः, पुं, (वार्द्धुषिकः। वृधोदरादित्वात् कलोपः।) वृद्धाजीवः। इत्यमरः। २। ९। ५॥ (यथा, मनौ। ३। १५३।
"प्रेष्यो ग्रामस्य राज्ञश्च कुलस्य श्यावदन्तकः।
प्रतिरोद्धा गुरोश्चैव तल्पागिवार्द्धुषिस्तथा॥")

वार्द्धुषिकः, पुं, (वृद्ध्यर्थं द्रव्यं वृद्धिः तां प्रयच्छतीति। "प्रयच्छति गर्ह्यम्।" ४। ४। ३०। इति ठक्। "वृद्धेर्द्धुषिभावो वक्तव्यः।" इति वार्त्तिकोक्तेः वृद्धुषिभावः।) वृद्धिजीवी। तत्पर्य्यायः। कुसीदकः २ वृद्ध्याजीवः ३ वार्द्धुषिः ४। इत्यमरः॥ कुसीदः ५ कुसीदिकः ६। इति शब्दरत्नावली। तस्य लक्षणं यथा,—

"समर्घं धान्यमादाय महार्घं यः प्रयच्छति।
स वै वार्द्धुषिको नाम ह्यकथ्यवहिष्कृतः॥"
इति स्मृतिः॥

तस्य वृद्धियहणनियमो यथा, मनुः।

"अग्रीतिभागं गृह्णीयात् मासाद्वार्द्धुषिकः शतात्।
द्विकं शतं वा गृह्णीयात् सतां धर्म्ममनुस्मरन्॥
द्विकं शतस्य गृह्णानो न भवत्यर्थकिल्बिषी।
शतकार्षापणेऽग्रीतिभागं विंशतिकाः पणाः॥"

द्विकं पुराणोक्तमिदम्। एवंविधं नियममतिक्रम्य अनापदि स्वयमन्यद्वारा वा स्वाच्छन्द्येन यो व्यवहरति तस्यैव प्रायश्चित्तम्। आपदि तु स्वयं करणे नियमातिक्रमे च न दोषः। इति प्रायश्चित्तविवेकः। इत्याह्निकतत्त्वम्॥

वार्द्धुषं, क्ली, (वार्द्धुषेर्भावः। वार्द्धुषि+अण्।) धान्यवर्द्धनम्। इति त्रिकाण्डशेषः॥ (यथा, मनौ। ११। ६२।

"कन्याया दूषणञ्चैव वार्द्धुषं व्रतलोपनम्।
तडागारामदारागामपत्यस्य च विक्रयः॥")

वार्द्धेयं क्ली, (वार्द्धेः समुद्रस्येदमिति। वार्द्धि+ढञ्।) मौक्तिकम्। इति राजनिर्घण्टः॥

वार्द्ध्रं, क्ली, क्वी, (वर्द्ध्रेरिदमिति। वर्द्ध्रि+"चर्म्मणोऽञ्।" ५। १। १५। इति अण्।) चर्म्मरज्जुः। इत्यमरटीकायां रायमुकुटः॥

वार्द्धीणसः, पुं, (वार्द्धीण नासिकास्येति। "अण् नासिकायाः संज्ञायां नसं चास्यलोपः।" ५। ४। ११८। इति अच् नसादेशश्च। "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्।) पक्षिविशेषः। यथा,—

"चित्रवर्णं लिङ्गियचौञ्चं श्वेतं वृहमजापतिम्।
वार्द्धीणसं तु प्रोक्तोऽसौ हव्ये कव्ये च संस्तुतः॥"

पक्षिविशेषः। यथा,—

"नीलग्रीवो रक्तशीर्षः शुक्लपादः सितच्छदः।
वार्द्धीणसः स्यात् पक्षीशो मम विष्णोरतिप्रियः॥"

तेषां बलिदानफलम्। यथा,—

"रोहितस्य तु मत्स्यस्य मांसैर्वार्द्धीणसस्य च।
तृप्तिमाप्नोति वर्षाणां शतानि त्रीणि सप्तिया।
महिषाणाञ्च खड्गानां रुधिरैः शतवार्षिकैः,
कौम्।
तृप्तिमाप्नोति परमां वार्द्धूणरुधिरेणया॥"
इति कालिकापुराणे ६६ अध्यायः॥

तस्मिंस्तु पिण्डतृप्तिर्यथा,—

"वार्द्धीणसामिषं कौक्कं कालशाकं तथा मधु।
दौहित्रामिषमन्यच्च यद्दत्तं तत् कुलोद्भवैः॥
अनन्तां तां प्रयच्छन्ति तृप्तिं गौरीसुतस्तथा।
पितॄणां नात्र सन्देहो गयाश्राद्धं च पुत्रक॥"
इति मार्कण्डेयपुराणे श्राद्धकल्पाध्यायः॥

"त्रिविधं लिङ्गियचौञ्चं श्वेतं वृहमजापतिम्।
वार्द्धीणसन्तु तं प्राहुर्याज्ञिकाः श्राद्धकर्म्मणि॥
रक्तपादो रक्तशिरा रक्तचञ्चुर्विहङ्गमः।
कृष्णवर्णेन च तथा पक्षी वार्द्धीणसो मतः॥"
लौहं रक्तच्छागः।

"दौहित्रं खड्गमित्याहुरपत्यं दुहितुस्तिलाः।
कपिलायाः घृतञ्चैव दौहित्रमिति चोच्यते॥"
गौरीसुतः दग्धवर्षोढाजः। इति तट्टीका॥

वार्द्धी(ञ)नसः, पुं, वार्द्धीव नासिका यस्य। नासायाः नसादेशः।) गरुडः। गरुड़ इति भाषा। यथा,—

"वार्द्धीनसश्चक्रधरो गणोत्साहश्च गरुडः॥"
इति त्रिकाण्डशेषः॥

वार्भटः, पुं, (वारि जले भट इव।) कुम्भीरः। इति त्रिकाण्डशेषः॥

वार्म्मेयं, क्ली, (वर्म्मणां समूहः। वर्म्मन्+"भिक्षादिभ्योऽञ्।" ४। २। ३८। इति अञ्।) वर्म्मसमूहः। इत्यमरटीकायां सारसुन्दरी॥

वार्म्मेयं, क्ली, (वर्म्मणां समूहः। वर्म्मन्+अण्।) वर्म्मसमूहः। इत्यमरटीकायां क्षीरस्वामी॥

वार्म्मुक्, [च्] पुं, (वाः वारि सुचयतीति। सुच्+क्विप्।) मेघः। इति शब्दरत्नावली॥ (यथा, भागवते। १०। २४। ६।

"तं तात! वयमन्ये च वार्म्मुचां पतिमीश्वरम्।
द्रव्येणक्रतसा सिद्धैर्यजन्ते क्रतुभिर्नराः॥")

वार्म्मुद्गं, क्ली, (वारिणि उद्गव उत्पत्तिर्यस्य।) पद्मम्। इति धनञ्जयः॥ जलजे, त्रि॥

वार्य्यं, त्रि, (वारि+ष्यञ्।) वारिसम्बन्धि। वारिशब्दात् ष्यञ्प्रत्ययेन निष्पन्नम्॥ (वृद्ध सम्भक्तौ+"ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्। वरणीये, त्रि। यथा, ऋग्वेदे। ३। २१। २।

"स्वधर्म्मन् देववीतये श्रेष्ठं नो धेहि वार्य्यम्॥"
निवारणीयः। यथा, महाभारते। ५। १८६। ६।

"क्षीभारे परिनिश्चित्या पुंस्कार्थे कृतनिश्चया।
भीष्मे प्रतिचिकीर्षामि नास्ति वार्य्येति वै पुनः॥")

वाराग्निः, पुं, (वारां राशिर्यत्र।) समुद्रः। इति पुराणम्॥ (वारासनशब्दात् प्राग्वयं स्यात्॥)

वार्व्वटः, पुं, (वार्भिर्वर्द्धते वेष्टते इति। वट+घञर्थे कः।) वहित्रम्। इति त्रिकाण्डशेषः॥

वार्व्वणा, स्त्री, गौलोमचिका। इति शब्दरत्नावली॥

वार्षकं, क्ली, (वर्षस्येदम्। वर्ष+अण्। स्वार्थे कन्।) सुदुग्धलतपृथिवीदग्धभागान्तर्गतभागविशेषः। यथा,—

"दग्धधा विभजन् शैवमकरोत् पृथिवीमिमाम्।
इक्ष्वाकुर्ज्येष्ठदायादो मध्यदेशमवाप्तवान्।
कोटवे वार्षकं क्षेत्रं रत्नवृष्टिर्बभूव ह॥"
इति वह्निपुराणे सागरोपाख्यानाध्यायः॥

वार्षभाण्डी, स्त्री, (वृषभाण्डोरपत्यं स्त्री। वृषभाण्ड+अण्।) वृषभाण्डकन्या। श्रीराधा। यथा,—

"यथा परात्परः कृष्णस्तथेयं वार्षभाण्डवी॥"
इति पाद्मोत्तरखण्डे ६० अध्यायः॥

वार्षिकं, क्ली, (वर्षासु जातमिति। वर्षा+"वर्षाभ्यष्ठक्।" ४। ३। १८। इति ठक्।) आयमाषा। इति मेदिनी। के, १५६॥

वार्षिकः, त्रि, (वर्षे भवः। वर्ष+"कालात् ठञ्।" ४। ३। ११। इति ठञ्।) वर्षभवः। वात्सरिकः। इति मेदिनी। के, १५६॥ (यथा, भागवते। ११। ११। ३०।

"यात्रावलिविधानञ्च सर्व्ववार्षिकपर्व्वसु॥")

यथाच।

"शूरत्काले महापूजा क्रियते या च वार्षिकी।
तस्यां ममैतन्माहात्म्यं पठितव्यं समाहितैः॥"
इति मार्कण्डेयपुराणम्।

वर्षाकालोद्भवश्च॥ (यथा, अध्यात्मरामायणे। ४। ४। १।

"तत्र वार्षिकदिनानि राघवो
लीलया मणिगुहासु सञ्चरन्।
पक्वजम्बुफलभोगतोषितो
लक्ष्मणेन सहितोऽवसत् सुखम्॥")

वार्षिकी, स्त्री, (वर्षासु भवा। वर्ष+"वर्षाभ्यष्ठक्।" ४। ३। १८। इति ठक्। ङीष्।) आयमाषा। इति राजनिर्घण्टः॥

वार्षिला, स्त्री, (वार्जाता शिला। "शाकपार्थिवादिगणपसंख्यानं उत्तरपदलोपश्च।" २। १। ६०। इत्यस्य वार्त्तिकोक्त्या शाकपार्थिवादिवत् समासः। एषोदरादित्वात् शस्य षः।) करका। इति शब्दचन्द्रिका॥

वार्षुकः, त्रि, वर्षेऽवग्रीलः। वृषधातोर्णुकप्रत्ययेन निष्पन्नो वर्षुकः। ततः स्वार्थे अप्रत्ययः॥

वा(वा)र्हतं, क्ली, (वृहत्या फलमिति। "प्रस्थादिभ्योऽण्।" ४। ३। १६४। इति अण्। विधानसामर्थ्यात्तस्य फले न लुक्।) वृहतीफलम्। इत्यमरः॥

वा(वा)र्हद्रथः, पुं, (वृहद्रथस्यापत्यं पुमान्। वृहद्रथ+अण्।) जरासन्धः। इति शब्दरत्नावली॥ (यथा, देवीभागवते। ४। १६। १६।

"कंसः कुजोऽथ यवनेन्द्रसुतश्च केशी-
वार्हद्रथो बकबकीखरशाल्वमुख्याः॥")

वृहद्रथस्येदमिति अण्।) वृहद्रथराजसम्बन्धिनि, त्रि॥

वा(वा)र्हद्रथिः, पुं, (वृहद्रथस्यापत्यं पुमान्। वृहद्रथ+इञ्।) जरासन्धः। इति त्रिकाण्डशेषः॥

वा(वा)र्हकः, पुं, क्ली, पारिहार्य्यः। अश्वरीयके, त्रि। इति मेदिनी। के, १५३॥ अस्यार्थान्तराणि प्रवर्गीयवकारादौ द्रष्टव्यानि। (गन्धयुक्तद्रव्यविशेषे, पुं। यथा, वृहत्संहितायाम्। ७७। ५।

"त्वक्षुरेणुनलिका स्थूलारसतगरवालकेसुल्वेः।
केशरपत्रविभिन्नैर्नरपतियोग्यं शिरःस्नानम्॥")

वालवः, पुं, यदाद्येकादशकरणान्तर्गतद्वितीयकरणः। तच्च जातफलम्।
"कार्यस्य कर्त्ता सृजनस्य भर्त्ता
सेनाप्रणेता कुलशीलयुक्तः।
उदारबुद्धिर्बलवान् मनुष्य-
श्चेद्वालवाख्ये जननं हि यस्य॥"
इति कोष्ठीप्रदीपः॥

वाल्कं, त्रि, (वल्कस्य वल्कलस्य विकारः। वल्क+"तस्य विकारः।" ४।३।१३४। इति अण्।) वल्कसम्बन्धिवस्त्रम्। चौमादि। इत्यमरः॥ (यथा, मार्कण्डेयपुराणे। १५। २८।
"तथैवाजाविकं कृत्वा वस्त्रं चौमञ्च जायते।
कार्पासिके कृते क्षौमो वाल्कर्हेम्नो वकस्तथा॥")

वाल्कलं, त्रि, वल्कलनिर्म्मितम्। वल्कलस्येदं इत्यर्थे प्राग्वत्ययेन निष्पन्नम्॥

वाल्कली, स्त्री, मदिरा। इति त्रिकाण्डशेषः॥

वाल्मिकिः, पुं, (वल्मिके भवः। वल्मिक+इञ्।) वाल्मीकसुनिः। इति द्विरूपकोषः॥

वाल्मीकः, पुं, (वल्मीके भवः। वल्मीक+अण्।) रामायणकर्त्ता मुनिः। तत्पर्य्यायः। प्राचेतसः २ वाल्मीकिः ३ कविज्येष्ठः ४ कुक्षीवमः ५ वल्मीकः ६। इति त्रिकाण्डशेषः॥ कविः ७ आदिकविः ८। इति जटाधरः॥

वाल्मीकिः, पुं, (वल्मीके भवः। वल्मीक+इञ्।) भृगुवंशीयमुनिविशेषः। इति त्रिकाण्डशेषः॥ यथा—
"रावणान्तकरो राजा रघूणां वंशवर्द्धनः।
वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तमः॥"
इति मात्स्ये १२ अध्यायः॥
(यथा वा कादम्बर्याम्भूमिकायाम्।
"जाते जगति वाल्मीकौ कविरित्यभिधाभवत्।
कवी इति ततो व्यासे कवयस्त्वयि दृष्टिनि॥")

वावदूकः, त्रि, (पुनः पुनरतिशयेन वा वदतीति। वद+यङ् लुक्+"उलूकादयश्च।" उणा० ४। ४१। इति ऊकः। "सर्व्वेषे तु 'यजजपदशामिति।' ३। २। १६६। इति बहुलवचनादन्यतोऽपि भवत्यूकप्रत्ययः इति ज्ञात्वा वावदूक इति साधितम्।" इत्युज्ज्वलदत्तः।) अतिशयवचनशीलः। तत्पर्य्यायः। वाचोयुक्तिपटुः २ वाग्मी ३ वक्ता ४। इत्यमरः॥ वचाकः ५ सुवचाः ६ प्रवाक् ७। इति जटाधरः॥ (यथा, महाभारते। १२। १६। २४।
"अष्टतस्त्वावमन्तारो वक्तारो जनसंसदि।
चरन्ति वसुधां कृत्स्नां वावदूका बहुश्रुताः॥")

वावयः, पुं, तुलसीविशेषः। इति शब्दचन्द्रिका॥ क्षणवावृद इति भाषा॥

वावृटः, पुं, बर्हिःचम्। इति शब्दरत्नावली॥

वाव्रत, य ङ उ संभक्तौ। वरणे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-सेट्। क्रावेट्।) य ङ, वाव्रत्यते। उ, वावर्त्तिता वाव्रत्ता। संभक्तिःसेवनम्। इति दुर्गादासः॥ ("ततो वाव्रत्यमानाया विति भट्टिः॥")

वाव्रत्तः, त्रि, कृतवरणः। इत्यमरः। ३।१।६२॥

वाश्र, य ङ ऋ शब्दे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-आक्रोशे सक०-सेट्।) शब्द इह तिरश्चामेव। तिरश्चां वाश्रितं कृतमित्यमरात्। य ङ, वाश्रते पक्षी। ऋ, अवावाश्रत्। उद्वाश्रमाणः पितरं स राममिति भट्टौ। अनेकार्थत्वादाक्रोशार्थः। वाशितं सुरभीकृते। ज्ञानमात्रे खगारावे वाशितं वक्त्रवेदिते। इति विश्वप्रकाशाद्दन्त्यान्तोऽयमपीति। इति दुर्गादासः॥

वाश्रा, स्त्री, (वाश्रते इति। वाश्र शब्दे+"गुरोश्च हलः।" ३। ३। १०३। इति अः। स्त्रियां टाप्।) वासकः। इति शब्दरत्नावली॥

वाश्रिः, पुं, (वाश्रते इति। वश्र+क्विप्+"वसिवपियजिराजिव्रजिमदिहनिवाश्रिवादीति।" उणा० ४। १२४। इति इञ्।) अग्निः। इत्युणादिकोषः॥

वाश्रिका, स्त्री, (वाश्रा+स्वार्थे कन्। टाप्। अत इत्वम्।) वासकः। इति शब्दरत्नावली॥

वाश्रितं, स्त्री, (वाश्र शब्दे+भावे क्तः।) पशुपक्ष्यादीनां शब्दः। इत्यमरः॥ (यथा, महाभारते। ६। ३१। ५३।
"आर्त्तप्रलापान् मा तात! सलिलस्य प्रभाविणः।
नैतन् मनसि मे राजन्! वाश्रितं शकुनेरिव॥")

वाश्रितः, त्रि, (धातूनामनेकार्थत्वात् वाश्र सुरभीकरणे+क्तः।) सुरभीकृतः। इत्यमरटीकायां स्वामी॥

वाश्रिता, स्त्री, (वाश्र+क्त। टाप्।) क्षौमवस्त्रम्। करिणी। इत्यमरः॥

वाशिष्ठः, त्रि, वशिष्ठसम्बन्धी। वशिष्ठस्येदं इत्यर्थे प्राग्वत्ययेन निष्पन्नः॥ (यथा, महाभारते। ३। ११५। २।
"सोमग्रस्तस्य तान् सर्व्वानाचख्यौ तत्र तापसान्।
भृगूनङ्गिरसश्चैव वाशिष्ठानथ काश्यपान्॥"
क्ली, उपपुराणविशेषः। यथा, देवीभागवते। १। ३। १६।
"माहेश्वरं भागवतं वाशिष्ठञ्च सविस्तरम्।
एतान्युपपुराणानि कथितानि महात्मभिः॥"
तीर्थभेदः। यथा, महाभारते। ३। ८४। ४५।
"ऋषिकुल्यां समासाद्य वाशिष्ठञ्चैव भारत!।
वाशिष्ठं समतिक्रम्य सर्व्वे वर्णा द्विजातयः॥")

वाशिष्ठी, स्त्री, (वशिष्ठस्येयमिति। वशिष्ठ+अण्। ङीप्।) गोमतीनदी। इति हेमचन्द्रः॥

वाशुरा, स्त्री, (वाश्रते अस्यामिति। वाश्र शब्दे+"मन्दिवाश्रिमथिपतिपंक्यक्ष्मिभ्य उरच्।" उणा० १। ३६। इति उरच्। टाप्।) रात्रिः। इत्युणादिकोषः॥

वाश्यं, क्ली, (वाश्यतेऽस्मिन्निति। वाश्र+"स्कायितञ्चिवचिवश्रिगतीति।" उणा० २। १३। इति ण्यत्।) दिवसः। इति मेदिनी। रे, ८३॥

वाश्रः, पुं, (वाश्रतेऽस्मिन्निति। वाश्र+"स्कायितञ्चीति।" उणा० २। १३। इति रक्।) दिवसः। इति मेदिनी। रे, ८३॥

वाश्यः, पुं, (वाधते इति। वाध लोडने+"ख्यञ्यिख्यञ्यवाध्यरूपपर्पतल्याः।" उणा०। ३। २८। इति यप्रत्यये धस्य यत्वं निपातनात्।) उक्षा। (यथा, रघौ। ७। ६८।
"तस्याः प्रतिद्वन्द्वभवाद्विषादात्
सद्यो विमुक्तं सुखमाबभासे।
निश्वासबाष्पागमतः प्रपन्नः
प्रसाद मात्मीयमिवात्मदर्शः॥")
लोहः। इति मेदिनी। ये, ११॥ चक्षुः। इत्यमरः॥ (यथा, आर्य्यासप्तशत्याम्। ३६४।
"प्राङ्गण एव कदा मां श्वश्रूयन्ती मन्युकम्पि-
कुचकलसा।
अंशुनिषक्तसुखी सा क्षपयति वाश्येण मम
दृष्टम्॥")

वाश्यकः, पुं, (वाश्य+संज्ञायां कन्।) मारिषः। नटिया शाक इति भाषा। यथा,—
"मारिषो वाश्यको मार्षः श्वेतो रक्तश्च स स्मृतः।
मारिषो मधुरः शीतो विष्मभी पित्तदुद्गुरः॥
वातश्लेष्मकरो रक्तपित्तदुष्टिमामजित्।
रक्तमार्षो गुरुर्नाति सक्षारो मधुरः सरः।
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः॥"
इति भावप्रकाशः॥

वाश्यका, स्त्री, (वाश्य+संज्ञायां कन्। टाप्। अभिधानादिभावः।) हिङ्गुपत्री। इति शब्दरत्नावली॥

वाश्यिका, स्त्री, (वाश्य+संज्ञायां कन् टाप् अत इत्वम्।) हिङ्गुपत्री। तत्पर्य्यायः। कारवी २ पृथ्वी ३ कवरी ४ पृथुः ५। इत्यमरः॥ लक्पत्री ६ वाश्यीका ७ कर्व्वरी। इति तट्टीका॥

वाश्यी, स्त्री, (वाश्य+गौरादित्वात् ङीष्।) वाश्यिका। इति शब्दरत्नावली॥

वाश्यीका, स्त्री, हिङ्गुपत्री। इति राजनिर्घण्टः॥ रांधुनी इति ख्याता। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। उष्णत्वम्। कृमिश्लेष्मनाशित्वञ्च। इति राजवल्लभः॥

वास, तृ क उपसेवायाम्। इति कविकल्पद्रुमः। (अदन्त चुरा०-पर०-सक०-सेट्।) उपसेवा तु गुणान्तराधानाम्। अववासश्चन्दनः। इति दुर्गादासः॥

वासः, पुं, (वसन्त्यत्रेति। वस निवासे+"हलश्च।" ३। ३। १२१। इति घञ्।) गृहम्। इत्यमरः॥ (यथा, हरिवंशे। १७४। ३४।
"उत्तिष्ठोत्तिष्ठ भद्रन्ते विषादं मा कृथाः शुभे।
नैवं विधेषु वासेषु भयमस्ति वरानने!॥"
वास्यते इति। वास+घञ्।) वस्त्रम्। इति तट्टीका॥ (वस+भावे घञ्।) अवस्थानम्।

इति हैमचन्द्रः ॥ (यथा, महाभारते । १ । १२८ । ५० ।
"विहारावसथेष्वेव वीरा वासमरोचयन् ॥")
वासकः । इति शब्दरत्नावली । सुगन्धिः । इति वासधात्वर्थदर्शनात् ॥ * ॥ स्थानविशेषे वासस्य कर्त्तव्याकर्त्तव्यत्वं यथा,—
देवयान्युवाच ।
"वेदाहं तात बालापि कार्य्यागान्तु गतागतिम् ।
क्रोधे चैवाभिवादे वा वेद चापि बलाबलम् ॥
शिष्यस्याशिष्यवृत्तेर्हि न चन्तव्यं बुभूषता ।
तस्मात् सङ्कीर्णवृत्तेषु वासो मम न रोचते ॥
पुंसो येनाभिनन्दन्ति वृत्तेनाभिजनेन च ।
न तेषु च वसेत् प्राज्ञः श्रेयोऽर्थी पापबुद्धिषु ॥
ये त्वेवमभिजानन्ति वृत्तेनापि जनेन च ।
तेषु साधुषु वस्तव्यं स वासः श्रेय उच्यते ॥"
इति मात्स्ये २८ अध्यायः ॥ * ॥
अपि च ।
"धार्म्मिकैरावृते ग्रामे न व्याधिबहुले भृशम् ।
न शूद्रराज्ये निवसेत् न पाषण्डजनैर्वृते ॥
हिमवद्विन्ध्ययोर्मध्यं पूर्ब्बपश्चिमयोः शुभम् ।
सङ्गा समुद्रयोर्देशं नान्यत्र निवसेत् द्विजः ॥
अर्द्धक्रोशान्नदीकूलं वर्जयित्वा द्विजोत्तमः ।
नान्यत्र निवसेत् पुण्यं नान्त्यजग्रामसन्निधौ ॥
न संवसेच्च पतितैर्न चण्डालैर्न पुक्कशैः ।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्यावसायिभिः ॥"
इति कौर्म्मे उपविभागे २५ अध्यायः ॥
वासः, [स्] क्ली. (वस्तेऽनेनेति । वस आच्छादने + "वसेर्जित्" । उणा० ४ । २१७ । इत्यसुन् । स च जित् ।) वस्त्रम् । इत्यमरः ॥ (यथा, मनौ । ४ । ६६ ।
"उपानद्गौ च वासश्च धृतमन्येन धारयेत् ॥")
पत्रकम् । इति राजनिर्घण्टः ॥
वासकः, पुं, (वासयतीति । वासि + ण्वुल् ।) वृक्षविशेषः । वाकस इति भाषा । तत्पर्य्यायः । वैद्यमाता २ सिंही ३ वासिका ४ वृषः ५ अटरूषः ६ सिंहास्यः ७ वाजिदन्तकः ८ । इत्यमरः ॥ वाग्रा ९ वाग्रिका १० वृषः ११ अटरूषः १२ वाग्रकः १३ । इति तट्टीका ॥ वाघा १४ वासः १५ वाजी १६ वैद्यसिंही १७ माल्लसिंही १८ । इति शब्दरत्नावली ॥ वासका १९ सिंहपर्णी २० । इति जटाधरः ॥ सिंहिका २१ भिषङ्माता २२ वसादनी २३ सिंहमुखी २४ कण्टीरवी २५ शितकर्णी २६ वाजिदन्ती २७ नासा २८ पक्षमुखी २९ सिंहपत्री ३० मृगेन्द्राणी ३१ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । शीतत्वम् । कामरक्तप्रित्तकामलाकफवैकल्यज्वरश्वासक्षयनाशित्वञ्च । तत्पुष्पगुणाः । कटुपाकित्वम् । तिक्तत्वम् । कासक्षयहरत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वासको वासिका वासा भिषङ्माता च सिंहिका ।
सिंहास्यो वाजिदन्तः स्यादाटरूषोऽटरूषकः ॥
आटरूषो वृषो नासा सिंहपर्णश्च स स्मृतः ।
वासको वासकस्तत्र सर्य्यः कफपित्तासनाशनः ॥
तिक्तस्तुवरको हृद्यो लघुः शीतस्तृड्विषहृत् ।
श्वासकासज्वरच्छर्द्दिमोहकुष्ठक्षयापहः ॥"
इति भावप्रकाशः ॥ * ॥
नानाङ्गविशेषः । यथा,—
"मनोहरोऽथ कन्दर्पश्चारुनन्दन एव च ।
चत्वारो वासकाः प्रोक्ताः शङ्करेण स्वयं पुरा ॥"
केषाञ्चिन्मते नामान्यपि पृथक् ।
"विनोदो वरदश्चैव नन्दः कुसुद एव च ।
चत्वारो वासकाः प्रोक्ता गीतवाद्यविशारदैः ॥"
इति सङ्गीतदामोदरः ॥
(वासरः । इति वासकसज्ज्ञाशब्दार्थे आलङ्कारिकाः ॥)
वासकर्णी, स्त्री, यज्ञग्राम्या । इति शब्दरत्नावली ॥
वासकसज्जा, स्त्री, (वासके प्रियसमागमवासरे सज्जतीति । सज्ज् + अच् । टाप् । यद्वा, वासकं वासवेश्म सज्जयतीति । सज्जि + अण् । टाप् ।) स्त्रीयादिनायिकाभेदः । (यथा, गीतगोविन्दे । ६ । ८ ।
"भवति विलम्बिनि विगलितलज्जा
विलपति रोदिति वासकसज्जा ॥")
तस्या लक्षणं यथा । अद्य मे प्रियवासर इत्थं निश्चित्य या सुरतसामग्रीं सञ्जीकरोति सा वासकसज्जा । वासको वासरः । अस्याश्चेष्टा मनोरथसखीपरिहासदूतीप्रश्नसामग्रीविधानमार्गविलोकनादयः । सुग्धावासकसज्जा यथा,
"हारं गुम्फति तारकातिरुचिरं ग्रथ्नाति काञ्चीलतां
दीपं न्यस्यति किन्तु तत्र बहुलं स्नेहं न दत्ते पुनः ।
आलीनामिति वासकस्य रजनौ कामानुरूपाः क्रियाः
साचिस्मेरमुखी नवोढ़सुलभो दूरात् समुद्दीप्यते ॥"
मध्या वासकसज्जा यथा,—
"ग्रिष्मं दर्शयितुं करोति कुतुकात् कज्जार-हारस्रजं
चित्रप्रेक्षणकैतवेन किमपि द्वारं मुहुरीक्षते ।
गृह्णात्याभरणं नवं सहचरी भूषालिगीषामिषा-दित्थं पद्मदृशः प्रतीत्य चरितं स्मेराननोऽभूत् स्मरः ॥"
प्रौढ़ा वासकसज्जा यथा,—
"क्तं वपुषि भूषणं चिकुरघोरणी धूपिता
क्ता शयनसन्निधौ क्रमुकवीटिकासम्भृतिः ।
अकारि हरिणीदृशा भवनमेत्य देहत्विषा
स्फुरत्कनककेतकीकुसुमकान्तिभिर्दीपनम् ॥"
मनोरथश्च यथा,—
"आवयोरङ्गयोर्दैधे भूयो विरहपल्लवः ।
अद्यैते च क्षितस्फीतं न स्यादन्योन्यवीक्षणम् ॥"
परकीया वासकसज्जा यथा,—
"श्मश्रु स्नापयितुं क्षुरेण च तिरोधत्ते प्रदीपाङ्कुरान्
धत्ते सौधकपोतपोतजनितैः साङ्केतिकं चेष्टितम् ।
ग्रन्थत्पार्श्वविवर्त्तिताङ्गलतिकं लोलत्कपोल-द्युति
क्वापि क्वापि करास्बुजं प्रियधिया तल्पान्तिकं न्यस्यति ॥"
इति रसमञ्जरी ॥
(तथाच साहित्यदर्पणे । ३ । ८६ ।
"कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि ।
सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा ॥")
वासका, स्त्री, (वासक + टाप् ।) वासकवृक्षः । इति जटाधरः ॥
वासगृहं, क्ली, (वासाय गृहम् ।) गर्भागारम् । इत्यमरः ॥ "हे गृहमध्यभागे शयनगृहे च गृहान्तर्गृहे इक्षेके निर्व्यातत्वात् गर्भं इवागारं गर्भागारम् । वासाय गृहं वासगृहम् । वासवेश्मादि चात्र ।" इति भरतः ॥ (यथा, हरिवंशे । ५३ । ७० ।
"वासगृहाणि च विन्ध्याद्
विप्रादीनासुदग्दिगादीनि ।
विग्रहाश्च यथा भवनम्
भवन्ति तान्येव दक्षिणतः ॥")
वासतः, पुं. (वास्यते इति । वास शब्दे + बाहुलकात् अतच् ।) गृहैभः । इति शब्दरत्नावली ॥
वासतेयी, स्त्री, (वसतौ साधुरिति । वसति + "पथ्यतिथिवसतिस्वपतेर्ढञ् ।" ४ । ४ । १०४ । इति ढञ् ।) रात्रिः । इति त्रिकाण्डशेषः ॥ (वसतिसाधुमात्रे, त्रि । यथा, भट्टौ । ४ । ८ ।
"वनेषु वासतेयेषु निवसन् पर्णसंस्तरः ।
ग्रथ्नोत्यार्यं मृगान् विश्वग्रातिथेयो विचक्रमे ॥")
वासनं, क्ली, (वास्यते इति । वासि + ल्युट् ।) धूपनम् । वारिधानी । वस्त्रम् । इति मेदिनी । ने, १२६ ॥ वासः । इति शब्दरत्नावली ॥ ज्ञानम् । इति धरणिः ॥ निक्षेपाधारः । यथा, याज्ञवल्क्यः ।
"आधिसीमोपनिक्षेपजड़बालधनैर्विना ।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरिह ॥"
उपनिक्षेपस्तु ।
"वासनस्यमनाख्याय समुद्रं यद्विधीयते ॥"
इति नारदोक्तेः ॥
वासनं निक्षेपाधारभूतं सम्पुटादिकं समुद्रं ग्रन्थादियुतम् । इति व्यवहारतत्त्वम् ॥ वसनसम्बन्धिनि, त्रि ॥ (वसनेन क्रीतमिति । वसन + "ग्रतमानविंशतिकसहस्रवसनाद्यः ।" ५ । १ । २७ । इति यञ् । वसनेन क्रीते च, त्रि ॥)
वासना, स्त्री, (वासयति कर्म्मणा योजयति जीवमनांसीति । वस + णिच् + युच् । टाप् ।) प्राक्तनाग्रा । (यथा, भागवते । २ । २ । २ ।
"ग्राम्यस्य हि ब्रह्मण एष पन्था
यन्नामभिर्य्यायति धीरपार्थैः ।

परिश्रमंलब्ध न विन्दतेऽर्थान्
मायामये वासनया शयानः ॥")
ज्ञानम् । इति मेदिनी । ने, १३० । स्मृतिहेतुः ।
तत्पर्य्यायः । संस्कारः२ भावना ३ । इति जटाधरः । देहात्मबुद्धिजन्यमिथ्यासंस्कारः । इति न्यायशास्त्रम् ॥ दुर्गा । यथा,—
"वसत्यहरा सर्व्वेषु भूतेष्वन्तर्हिताय च ।
धातुर्व्वस निवासेति वासना तेन सा स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
(अर्कस्य भार्य्या । यथा, भागवते । ६।६।१३ ।
"अर्कस्य वासना भार्य्या पुत्रास्तर्व्वादयः
स्मृताः ॥")

वासन्तः, पुं. (वसन्ते भवः । वसन्त + "सन्धिवेलाद्यतुनक्षत्रेभ्योऽण् ।" ४।३।१६ । इति अण् । उष्ट्रः । इति मेदिनी । ते, १५२ । कोकिलः । इति राजनिर्घण्टः ॥ मलयवायुः । सुरः । इति त्रिकाण्डशेषः । कामसुरः । इति हेमचन्द्रः ॥ मदनवृक्षः । इति शब्दमाला । अवहित्थे, त्रि । इति मेदिनी । ते, १५२ । (वसन्तोऽस्मिन् च त्रि । इति सिद्धान्तकौमुदी । ४ । ३ । ३६ ॥)

वासन्तकं, त्रि, वसन्तसम्बन्धि । वसन्तस्येदमित्यर्थे कणप्रत्ययेन निष्पन्नम् । (वसन्ते उत्पन्नम् । वसन्त + "ग्रीष्मवसन्तादन्यतरस्याम् ।" ४ । ३ । ३६ । इति वुञ् । (वसन्तोऽस्मिन्, त्रि । इति सिद्धान्तकौमुदी ।)

वासन्तिकः, त्रि, (वसन्तमधीते वेद वेति । वसन्त + "वसन्तादिभ्यष्ठक् ।" ४।२।६३। इति ठक् ।) विदूषकः यथा । वासन्तिकः केलिकिलो वैहासिको विदूषकः । इति हेमचन्द्रः ॥ (वसन्तस्येदमिदि । "वसन्तात् च ।" ४ । ३ । ५० । इति ठञ् । वसन्तसम्बन्धिनि, त्रि । यथा, भागवते । ५ । ६ । ५ ।
"सप्तस्ववग्निरखिलपदां सावित्रीं वेद्मवासन्तिकान् मासानधीयानमप्यसमवेतरूपं याहयामास ॥")

वासन्ती, स्त्री, (वसन्तस्येयमिति । वसन्त + अण् । ङीष् ।) माधवी । यूथी । इति मेदिनी । ते, १५२ । (यथा, रामायणे । ४ । १ । ७७ ।
"मालतीमल्लिकापद्मकरवीराश्च पुष्पिताः ।
केतक्यः सिन्धुवाराश्च वासन्त्यश्च सुपुष्पिताः ॥")
पाटला । इति विश्वः ॥ कामोत्सवः । तत्पर्य्यायः । चैत्रावली २ मधूत्सवः ३ सुवसन्तः ४ कामभद्रः ५ कर्दमी ६ । इति त्रिकाण्डशेषः ॥ गणिकारी । पुष्पलताविशेषः । तत्पर्य्यायः । प्रहसन्ती २ वसन्तजा ३ माधवी ४ मल्लिजातिः ५ प्रीतसहा ६ मधुवल्लभा ७ वसन्तदूती ८ । अस्या गुणाः । स्निग्धरूक्षत्वम् । हृद्यत्वम् । सुरभित्वम् । श्रमभ्रान्तिहरत्वम् । धम्मिल्लामोदित्वम् । मन्दमदोन्मादनदायित्वञ्च । इति राजनिर्घण्टः ॥ नवमल्लिका । नेवारि इति हिन्दी भाषा । यथा,—
"नेपाली कथिता तज्ज्ञैः सप्तला नवमालिका ।
वासन्ती शीतला तिक्ता दोषत्रयान्नजित् ॥"
इति भावप्रकाशः ॥ ● ॥

अथ वासन्तीदुर्गापूजाप्रमाणम् । तत्र भविष्यपुराणम् ।
"मीनराशिस्थिते सूर्य्ये शुक्लपक्षे नराधिप ।
सप्तमीं दशमीं यावत् पूजयेदम्बिकां सदा ॥"
भविष्योत्तरे ।
"चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विधिवद्दुर्गां दशम्यान्च विसर्জ্জयेत् ॥"
कालकौमुद्यां जाबालिः ।
"चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विधिवद्दुर्गां वैल्वशाखकुसुमैस्तथा ॥
नानाविधैश्च बलिभिर्मेषाद्यैर्बलिवर्জ্জितैः ।
विचित्राभरणैः पार्थ पट्टवस्त्रादिभिस्तथा ।
एवं यः कुरुते पूजां वर्षे वर्षे विधानतः ।
ईप्सितान् लभते कामान् पुत्रपौत्रादिकान्नृप ॥"
अत्र भविष्योत्तरे निरूपपदमासशुक्लसप्तम्यादितिथित्रयस्य भविष्यपुराणवचने मीनराशिस्थित इति मीनस्थरव्यारब्धचान्द्रमासीयतिथिपरम् । सौरव्यारब्धे कदाचित् सप्तम्यादितिथित्रयालाभात् तद्वर्षे ततूतत्यलोपः स्यात् । न चैवापत्तिः भविष्यपुराणे सदापदोपादानात् जाबालिवचने वर्षे वर्षे इत्युपादानाच्च नित्यत्वम् । एतद्विवृतं कालविवेके । एवं जाबाली शैववचनपरार्द्धे पुत्रादिरूपफलश्रवणात् काम्यत्वच्च । ततश्च काम्यतया पूजने कृते प्रसङ्गात् नित्यत्वसिद्धिः ।
"सितास्वन्यासु चैत्रस्य पुण्येस्तत्कालसम्भवैः ॥
अघोरैरपि यः कुर्य्यात् मन्त्रेणानेन पूजनम् ।
न तस्य जायते शोको रोगो वाप्यथ दुर्गतिः ॥"
इति कालिकापुराणवचनात् केवलाष्टमीकल्प उक्तः । चैत्रमासमधिकृत्य ।
"नमस्यां पूजयेद्देवीं महिषासुरमर्দ্দिनीम् ।
कुङ्कुमागुरुकस्तूरीधूपामोदवतप्पणैः ।
दमनैर्मुरपत्रैश्च विजयाख्यपदं लभेत् ॥"
इत्यनेन केवलनवमीकल्प उक्तः । अवस्था तु शारदीयपूजाप्रकरणोक्ता ग्राह्या । विशेषस्तत्र बोधनप्रक्रिया नास्ति बोधिताया बोधनासम्भवात् । इति प्राक् विवृतम् । होमादिकञ्च पूर्ब्ववज्ज्ञेयमिति दिक् । इति दुर्गोत्सवविवेकः ॥●॥
अपि च ।
श्रीनारायण उवाच ।
"पुरा श्रुता सा गोलोके कृष्णेन परमात्मना ।
संपूज्य मधुमासे च प्रीतेन रासमण्डले ॥
मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा ।
तत्रैव काले सा दुर्गा ब्रह्मणा प्राणसङ्कटे ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६३ अध्यायः ॥
(चतुर्दशाक्षरवृत्तविशेषः । इति छन्दोमञ्जरी । अस्या लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

वासन्तीपूजा, स्त्री, (वासन्ती तदाख्या पूजा ।) चैत्रमासीयदुर्गापूजा । यथा,—
"चैत्रे मासि सिते पक्षे नवम्यादिदिनत्रये ।
प्रातः प्रातर्महादेवीं दुर्गां भक्त्या प्रपूजयेत् ॥"
इति ॥
तत्राष्टम्यां अन्नपूर्णापूजा यथा,—
"तत्राष्टम्यामन्नपूर्णां पूर्व्वाह्णे साधकोत्तमः ।
रक्तवासैरक्तपुष्पैर्बलिभिः पूजयेच्छिवाम् ॥"
इति च मायातन्त्रे ७ पटलः ॥
अपि च ।
"विशेषाच्चैत्रमासस्य या तिथिः स्यात् सिताष्टमी ।
तस्यां यः पूजयेद्भक्त्या प्रसाद्यति मां ध्रुवम् ॥"
इति ग्राम्यवीतन्त्रे १४ पटलः ॥

वासयोगः, पुं, (वासाय सुगन्धार्थं युज्यते इति । युज + घञ् ।) चूर्णम् । इत्यमरः । १ "हे आवीर इति ख्याते । पटरसा चोदे इत्यन्ये । चूर्ण्यन्ते प्रेर्य्यन्ते चूर्णानि चूर्ण प्रेरणे अल् । वासे सुरभीकरणे युज्यन्ते उपयुज्यन्ते इति घञि वासयोगः ।" इति तट्टीकायां भरतः ॥ तत्पर्य्यायः । गन्धचूर्णम् २ पटवासम् ३ चूर्णकम् ४ । इति शब्दरत्नावली ॥

वासरः, पुं क्ली, (वासयतीति । वस् + णिच् + "अर्त्तिकमिञ्जमिञ्जमिदेविवासिभ्यश्चित् ।" उणा० ३ । १३२ । इति अरः ।) दिवसः । इत्यमरः ॥ (यथा, कथासरित्सागरे । ४ । २३ ।
"प्रवृत्ते चावयोर्वादे प्रयाताः सप्त वासराः ॥")
नागप्रभेदे, पुं । इति मेदिनी । रे, २१३ ॥

वासवः, पुं, (वसूनामयम् । वसु + अण् ।) इन्द्रः । इत्यमरः ॥ (यथा, महाभारते । ३ । ४३ । २२ ।
"सङ्क्षयान्नियोगात् स पार्थः शक्रात्सनं गतः ।
अर्धशक्रमदमेयात्मा द्वितीय इव वासवः ॥")

वासवी, स्त्री, (वसोरपत्यं स्त्री । वसु + अण् । ङीप् ।) व्यासमाता । यथा,—
"व्यासस्यामा सत्यवती वासवी गन्धकालिका ।
योजनगन्धा दासेयी शौलं कायनजीवनः ॥",
इति हेमचन्द्रः ॥
(यथा, महाभारते । १ । ६३ । ७० ।
"दृष्ट्वा तां वासवीं कन्यां रम्भोरूं मुनिपुङ्गवः ।
सङ्गमं मम कल्याणि ! कुरुष्वेत्यब्रवीत ॥")

वासस्सज्या, स्त्री, (वासं गृहं सज्जयतीति । सज्ज + णिच् + अण् । टाप् ।) नायिकाभेदः । यथा,
"खण्डितोत्कण्ठिता लक्ष्मा तथा प्रोषितभर्तृका ।
कलहान्तरिता वाससज्या स्वाधीनभर्तृका ।
अभिसारिकाप्यष्टौ ता वन्द्यन्ते पांसुलासती ॥"
इति जटाधरः ॥
अस्या विवरणं वासकसज्याशब्दे द्रष्टव्यम् ॥

वासा, स्त्री, (वासयतीति । वस् + णिच् + अच् । टाप् ।) वासकः । इति शब्दरत्नावली ॥ (यथा, वैद्यके ।
"वासायां विद्यमानायामाघ्रायां जीवितस्य च ।
रक्तपित्ती त्यजेत् काशी किमर्थमवसीदति ॥")

वासागारं, क्ली, (वासाय वासस्य वा आगारम् ।) वासगृहम् । तत्पर्य्यायः । भोगगृहम् २ कान्याटः ३

३ पन्नागः ४ निष्कुटः ५। इति त्रिकाण्डशेषः॥

वासिः, पुं, (वसनिवासे+"वसिवपियजिराजीति।"उणा० ४।१२४। इति इन्। कुठारभेदः। वाइस इति भाषा। इत्युणादिकोषः॥

वासिका, स्त्री, (वासैव। स्वार्थे कन्। टाप्। अत इत्वञ्च।) वासकः। इति शब्दरत्नावली॥

वासितं, क्ली, (वास्यते स्मेति। वास+क्तः।) रुतम्। इति मेदिनी। ते, १५२॥ ज्ञानमात्रम्। इति हेमचन्द्रः॥ खगवरः। इति विश्वः॥

वासितः, त्रि, (वास्यते स्मेति। वासि सुरभीकरणे+क्तः।) सुरभीकृतः। तत्पर्य्यायः। भावितः २। इत्यमरः॥ दे सुगन्धिपुष्पादिवासितद्रव्ये। भाव्यते प्राप्यते भावितं भू क ङ प्राप्तौ कर्म्मणि क्तः। वासं सौरभं करोति इति ण्यन्तात्। कर्म्मणि क्ते वासितम्। इति तट्टीकायां भरतः॥ जलादौ वासितः। इति शब्दरत्नावली॥ ख्यातः। वस्त्रवेष्टितः। इति धरणिः॥

वासिता, स्त्री, (वासयतीति वस निवासे+णिच्+क्तः। टाप्।) स्त्रीमात्रम्। करिणी। इत्यमरः॥

वासिनी, स्त्री, (वासोऽस्या अस्तीति। वास+इनिः।) शुक्लभिण्टी। इति शब्दचन्द्रिका॥

वासिष्ठं, क्ली, रुधिरम्। इति हेमचन्द्रः॥

वासिष्ठं, त्रि, वसिष्ठकृतयोगग्रन्थादि। वसिष्ठेन कृतमित्यर्थे (अण्) प्रत्ययेन निष्पन्नम्॥ वसिष्ठसम्बन्धि च॥

वासी, स्त्री, (वासयतीति वासि अच्। गौरादित्वात् ङीष्।) तक्षणी। वाइस इति ख्यातास्त्रम्। इति त्रिकाण्डशेषः॥

वासुः, पुं, (सर्व्वोऽत्र वसति सर्व्वत्रासौ वसतीति वा। वस+वाहुलकात् उण्। इति १।१ संख्यक उणादिसूत्रवृत्तौ उज्ज्वलदत्तः।) नारायणः। इति त्रिकाण्डशेषः॥ श्रीनिवासोऽप्यजो वासुः। इति जटाधरश्च। विश्वरूपः। पुनर्व्वसुः। इत्युणादिकोषः॥

वासुकिः, पुं, वसुकस्यापत्यमिति। वसुक+इञ्।) अहिपतिः। तत्पर्य्यायः। सर्पराजः २। इत्यमरः॥ वासुकेयः ३। इति शब्दरत्नावली। तस्योत्पत्तिर्यथा,—

"सुरसा जज्ञिरे सर्पौस्तेषां राजा तु तक्षकः।
वासुकिश्चैव नागानां गणाः क्रोधवशोऽधिकः॥"
इति वह्निपुराणे काश्यपीयवंशः॥

(जरत्कारुमुनिपत्नी मनसादेवी तु अस्यैव भगिनी।

"आस्तीकस्य सुनेर्माता भगिनी वासुके स्तथा।
जरत्कारुसुनेः पत्नी नागमातर्नमोऽस्तु ते॥"
इति मनसाप्रणाममन्त्रः॥)

वासुकेयः, पुं, (वसुकस्यापत्यमिति। वसुक+ढक्।) वासुकिः। इति शब्दरत्नावली॥

वासुकेयसखा, [ऋ] स्त्री, (वासुकेयस्य वासुकेः सखा भगिनी।) मनसादेवी। इत्यमरः॥

वासुदेवः, पुं, (वसुदेवस्यापत्यमिति। वसुदेव+"ऋष्यन्धकवृष्णिकुरुभ्यश्च।" ४। १। ११४। इति अण्। यद्वा, सर्व्वत्रासौ वसत्यात्मरूपेण विश्वम्भरत्वादिति। वसु+वाहुलकात् उण्। वासुः। वासुश्चासौ देवश्चेति कर्म्मधारयः। अस्य नामनिरुक्तिस्तु परतो ज्ञेया।) श्रीकृष्णः। इत्यमरः॥ तत्पर्य्यायः। वसुदेवभूः २। इति हेमचन्द्रः॥ सत्यः २ सुभद्रः ४ वासुभद्रः ५ षड्गुणित् ६ षड्विधः ७ प्रश्निगुहः ८ प्रश्निभद्रः ९ गदाग्रजः १० मार्जः ११ वभ्रुः १२ लोहिताक्षः १३ परमाखङ्गकः १४। इति शब्दमाला॥ अन्यत् कृष्णशब्दे द्रष्टव्यम्॥

श्रीकृष्णशरीरस्य नित्यत्वं यथा,—

श्रीसनत्कुमार उवाच।

"भद्रं वो मुनयः श्रुत्वतपसां फलमीप्सितम्।
कृष्णस्य कुण्डलप्रश्नं शिवबीजस्य निष्फलम्॥
साम्प्रतं कुण्डलं वक्ष्ये दर्शनं परमात्मनः।
भक्तानुरोधादेहस्य परस्य प्रकृतेरपि॥
निर्गुणस्य निरीहस्य सर्व्वबीजस्य तेजसः।
भारावतारणायैव चाविर्भूतस्य साम्प्रतम्॥

श्रीकृष्ण उवाच।

शरीरधारिणश्चापि कुण्डलप्रश्नमीप्सितम्।
तत्कथं कुण्डलप्रश्नं मयि विप्र न विद्यते॥

सनत्कुमार उवाच।

शरीरे प्राकृते नाथ सन्ततञ्च शुभाशुभम्।
नित्यदेहे शिवबीजे शिवप्रश्नमनर्थकम्॥

श्रीभगवानुवाच।

यो यो विग्रहधारी च स च प्राकृतिकः स्मृतः।
देहो न विद्यते विप्र तां नित्यां प्रकृतिं विना॥

सनत्कुमार उवाच।

रक्तबिन्दूद्भवा देहास्ते च प्राकृतिकाः स्मृताः।
कथं प्रकृतिनाथस्य बीजस्य प्राकृतं वपुः॥
सर्व्वबीजस्य सर्व्वादिर्भवांश्च भगवान् स्वयम्।
सर्व्वेषामवताराणां प्रधानं बीजमव्ययम्॥
श्रुत्वा वदन्ति वेदास्त्वां नित्यं नित्यं सनातनम्।
ज्योतिःस्वरूपं परमं परमात्मानमीश्वरम्॥
मायया सगुणश्चैव मायेशं निर्गुणं परम्।
प्रवदन्ति च वेदाङ्गास्तथा वेदविदः प्रभो॥

श्रीकृष्ण उवाच।

साम्प्रतं वासुदेवोऽहं भक्तवीर्य्याश्रितं वपुः।
कथं न प्राकृतो विप्र शिवप्रश्नमभीप्सितम्॥

सनत्कुमार उवाच।

वासः सर्व्वनिवासश्च विश्वानि यस्य लोमसु।
तस्य देवः परं ब्रह्म वासुदेव इतीरितः॥
वासुदेवेति तन्नाम वेदेषु च चतुर्षु च।
पुराणेष्वितिहासेषु यात्रादिषु च दृश्यते॥
रक्तबीर्य्याश्रितो देहः कृते वेदे निरूपितः।
साक्षिणो सुनयश्चात्र धर्म्मः सर्व्वत्र एव हि।
साक्षिणो मम वेदाश्च रविचन्द्रौ च साम्प्रतम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८० अध्यायः॥

तस्य नामव्युत्पत्तिः।

"सर्व्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः।
ततः स वासुदेवेति विद्वद्भिः परिगीयते॥"
इति विष्णुपुराणे १ अंशे २ अध्यायः॥

अपि च।

"सर्व्वाणि तत्र भूतानि वसन्ति परमात्मनि।
भूतेष्वपि च सर्व्वात्मा वासुदेवस्ततः स्मृतः॥
खाण्डिक्यजनकायाह दृष्टः कैशिध्वजः पुरा।
नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः॥
भूतेषु वसते सोऽन्तर्व्वसन्त्यत्र च तानि यत्।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः॥"
इति तत्त्वैव। ६। ५। ८०—८२॥*॥

(तथा च महाभारते। ५। ७०। ३।

"वसनात् सर्व्वभूतानां वसुत्वात् देवयोनितः।
वासुदेवस्ततो वेद्यो दृढत्वात् विष्णुरुच्यते॥")

अस्य अङ्गप्रत्यङ्गमन्त्रा यथा,—

"बीजन्तु वासुदेवस्य पूर्व्वमेव प्रतिपादितम्।
तदङ्गमन्त्रं राजेन्द्र द्वादशाक्षरमुच्यते॥
ॐ नमो भगवते वासुदेवाय वै पदम्।
अङ्गमन्त्रं तथैतस्य वासुदेवस्य कीर्त्तितम्॥
अस्य प्रत्यङ्गरूपन्तु दधिवामनसंज्ञकम्।
तस्य मन्त्रं नरश्रेष्ठ शृणुष्व भाषितं मया॥
ॐ नमो विष्णवे पूर्व्वं पदं तस्य प्रकीर्त्तितम्।
पदन्तु सुरपतये चतुर्थ्यन्तं महाबलम्॥
स्वाहान्तं हृदयाख्यं प्रत्यङ्गं वैष्णवं मतम्।
मन्त्रहृदयन्तु यो वेद बीजं प्रत्यङ्गमन्त्रकम्॥
स पूजा देवकायस्तु न स भूयोऽभिजायते।
सर्व्वसूत्तरतन्त्रोक्तः क्रमो ग्राह्यः प्रपूजने॥
त्रिषु मन्त्रेषु च बुधो विशेषं शृणु भूपते।
रूपन्तु बीजमन्त्रस्य प्रथमं शृणु भूपते॥
पूर्णचन्द्रोपमः शुक्लः पञ्चिराजोपरिस्थितः।
चतुर्भुजः पीतवस्त्रैस्त्रिभिः संवीतदेहभृत्॥
दक्षिणोर्द्धे गदां धत्ते तदधो विकचाम्बुजम्।
वामोर्द्धे चक्रमत्युग्रं धत्तेऽधः शङ्खमेव च॥
श्रीवत्सवक्षाः सततं कौस्तुभं हृदि चाद्भुतम्।
धत्ते कण्ठे ह्यधो वामे तूणीरं बाणपूरितम्॥
दक्षिणे कोणगं खड्गं नन्दकं सप्तराजगम्।
शीर्षे किरीटं सद्योतं कर्णयोः कुण्डलद्वयम्॥
आजानुलम्बिनीं चित्रां स्वर्णमालां गलस्थिताम्।
दधानं दक्षिणे देवीं श्रियं पार्श्वे तु विभ्रतम्॥
सरस्वतीं वामपार्श्वे चिन्तयेदरदं हरिम्।
मन्त्रस्य बीजरूपन्तु कथितं तव पार्थिव॥
द्वादशाक्षरमन्त्रस्य रूपमन्यत् शृणुष्व मे।
नीलोत्पलदलश्यामं तथैव च चतुर्भुजम्॥
दक्षिणोर्द्धे स्थितं पद्मं गदाद्यधः प्रचोदयेत्।
वामेऽधश्चक्रमतुलमूर्द्धे शङ्खञ्च विभ्रतम्॥
चिन्तयेदरदं देवं सर्व्वमन्यच्च पूर्व्ववत्।
अष्टादशाक्षरस्यास्य प्रत्यङ्गस्य च विस्तरम्॥
शृणु राजन्नवहितो दारिद्र्यभयभञ्जनम्॥
पूर्णेन्दुसदृशं कामं शुक्लवस्त्रं विचिन्तयेत्।
करे विचिन्तयेद्धामे पीयूषापूरितं घटम्॥
दधानखड्गसंयुक्तं दक्षिणे स्वर्णभाजनम्।
पद्मासनगतं देवं चन्द्रमण्डलमध्यगम्॥

शुक्लवस्त्रधरं देवं प्रसादाहासनं सदा।
ईषद्धासससायुक्तं त्रिलोकेशं त्रिविक्रमम्।
चिन्तयेद्दरदं देवं सर्व्वकामफलप्रदम्॥"
इति कालिकापुराणे ८२ अध्यायः॥*॥

तस्योत्पत्तिर्यथा,—
"तत्रस्तु दशमे मासि विधौ ब्रह्मर्क्षसङ्गते।
अष्टम्यामर्द्धरात्रौ च तस्यां जातो जनार्द्दनः॥
इन्दीवरदलश्यामः पद्मपत्रायतेक्षणः।
चतुर्भुजः सुन्दराङ्गो दिव्याभरणभूषितः॥
श्रीवत्सकौस्तुभोरस्को वनमालाविभूषितः।
वसुदेवस्य जातोऽसौ वासुदेवः सनातनः॥
इति पाद्मोत्तरखण्डे ६० अध्यायः॥*॥

तस्य चतुर्धा मूर्त्तिर्यथा,—
"एकांशेन जगत् कृत्स्नं व्याप्य नारायणः स्थितः।
चतुर्द्धाविस्थितो यापी सगुणो निर्गुणोऽपि वा॥
एका भगवतो मूर्त्तिर्ज्ञानरूपा द्वितीयका।
वासुदेवाभिधाना सा गुणातीता सुविष्कला॥
द्वितीया कालसंज्ञान्या तामसी ग्रेयसंज्ञिता।
निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः॥
सत्त्वोद्रिक्ता तृतीयाख्या प्रद्युम्नेति च संज्ञिता।
जगत् स्थापयते सर्व्वं सा विष्णुप्रकृतिर्ध्रुवा॥
चतुर्थी वासुदेवस्य मूर्त्तिर्ब्राह्मी सुसंज्ञिता।
राजसी चानिरुद्धाख्या प्राद्युम्नी सृष्टि-
कारिका॥
यः स्वपित्यखिलं हत्वा प्रद्युम्नेन सह प्रभुः।
नारायणाख्यो ब्रह्मासौ प्रजासर्गकरो हि सः॥
या सा नारायणतनुः प्रद्युम्नाख्या सुनीश्वराः।
तया संमोहयेदिश्वं सदेवासुरमानुषम्॥
सैव सर्व्वजगत्सृष्टिः प्रकृतिः परिकीर्त्तिता।
वासुदेवो ह्यनन्तात्मा केवलो निर्गुणो हरिः॥
प्रधानं पुरुषः कालस्तद्वत् त्रयमनुत्तमम्।
वासुदेवात्मकं नित्यमेतत् विज्ञानमुच्यते॥
एकवेदं चतुर्व्यादं चतुर्द्धा पुनरच्युतः।
विभेद वासुदेवोऽसौ प्रद्युम्नो हरिरव्ययः॥"
इति कूर्म्मपुराणे ४८ अध्यायः॥

वासुदेवप्रियङ्करी, स्त्री, (वासुदेवस्य प्रियङ्करी।) घृतावरी। इति राजनिर्घण्टः॥ श्रीकृष्णप्रिय-कारिणी च॥

वासुपूज्यः, पुं, (वासुनारायण इव पूज्यः।) जिनविशेषः। इति हेमचन्द्रः॥ १। २७॥

वासुभद्रः, पुं, श्रीकृष्णः। इति शब्दमाला॥ (यथा, विष्णुपादादि-केशान्तवर्णनस्तोत्रे। ३१।
"या वायावानुकूल्यात् सरति सखिरुचा भास-
मानासमाना
साकं साकम्यमंसे वसति विदधती वासुभद्रं
सुभद्रम्॥")

वासुरा, स्त्री, स्त्रीमात्रम्। करिणी। रात्रिः। भूमिः। इति हेमचन्द्रः॥

वास्तः, स्त्री, (वास्तते स्वपदे इति। वास+वास्तु-सकात् रूः।) नाड्योक्तौ वाक्ता। इत्यमरः॥

वासौकः, [स्] क्ली, (वासाय ओकः स्थानम्।) वासगृहम्। यथा,—
"गर्भागारेऽपरको वासौकः शयनास्पदम्।"
इति हेमचन्द्रः॥

वास्तवं, क्ली, (वस्तुनि। वस्तु+अण्।) यथार्थ-भूतम्। यथा,—
"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।"
इत्यादि श्रीभागवते प्रथमस्कन्धे १ अध्यायः॥
"वास्तवं परमार्थभूतं वस्तु। यद्वा, वास्तव-शब्देन वस्तुगोऽर्थो जीवः वस्तुनः कार्य्यं जगच्च तत् सर्व्वं वस्तुन एव न ततः पृथक्।" इति तट्टी-कायां श्रीधरस्वामी॥

वास्तविकं, त्रि, (वस्तुन एव वस्तु+ठक्।) परमार्थ-भूतं वस्तु। वास्तवमेव इत्यर्थे वास्तवशब्दात् स्वार्थिकप्रत्ययेनापि निष्पन्नम्॥

वास्तवोषा, स्त्री, रात्रिः। इति त्रिकाण्डशेषः॥ किन्तु वास्तवा ऊषा इति नामद्वयमिति साधु-पाठः॥

वास्तव्यः, त्रि, वसतीति वस+"वसेस्तव्यत् कर्त्तरि च।" ३। १। ९९। इत्यस्य वार्त्तिकोक्त्या वासकर्त्ता। कर्त्तरितव्यत्। इति सिद्धान्त-कौमुदी॥ (यथा, कथासरित्सागरे। ३८। १०७।
"इहैवास्मि महीराज वास्तव्यो नगरे द्विजः॥")
वासयोग्यश्च। वसतौ, पुं॥

वास्तु, क्ली, वास्तूकशाकम्। इति राजनिर्घण्टः॥

वास्तु, क्ली पुं, (वसन्ति प्राणिनो यत्र। वस निवासे +"वसेरगारे णित्च।" उणा० १। ७०। इति तुण्। स च णित्।) गृहकरणयोग्यभूमिः। तत्-पर्य्यायः। वेश्मभूः २। इत्यमरः॥ पोतः ३ वाटी ४। इति जटाधरः॥ वाटिका ५ गृहपोतकः ६। इति शब्दरत्नावली॥ वास्तुकरणप्रमा-णादिर्यथा,—
श्रीहरिरुवाच।
"वास्तु संक्षेपतो वक्ष्ये गृहादौ विघ्ननाशनम्।
ईशानकोणादारभ्य क्षेत्रशौतिपदे यजेत्॥
ईशाने च शिरःपादौ नैर्ऋतेऽग्नानिले करौ।
आवासवासवेश्मादौ पुरे ग्रामे वणिक्पथे॥
प्रासादारामदुर्गेषु देवालयमठेषु च।
द्वात्रिंशत्तु सुरान् बाह्ये तदन्तश्च चतुर्दश॥
ईशश्चैवाथ पर्জ্জन्यो जयन्तः कुलिशायुधः।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च॥
पूषा च वितथश्चैव गृहक्षतयमावुभौ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जगाधिपः।
असुरः शेषपापौ च रोगोऽहिर्मुख एव च॥
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु॥
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः।
आपश्चैवाथ सावित्रो जयो रुद्रश्चैव च॥
मध्ये नवपदो ब्रह्मा तस्याधौ च समीपगान्।
देवानेकोत्तरानेतान् पूर्व्वादौ नामतः शृणु॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्षमान्॥
आपश्चापवत्सश्च परितो ब्रह्मणः स्तनाः।
ईशानकोणादारभ्य दुर्ज्ञेयो वंश उच्यते॥
आग्नेयकोणादारभ्य वंशो भवति दुर्द्धरः।
अदितिं हिमवन्तञ्च जयन्तञ्च इदं त्रयम्॥
नादिका कारिका नाम शृङ्गाद्यन्तर्व्वगा पुनः।
वास्तुदेवान् पूजयित्वा गृहप्रासादकृद्व्रती॥
सुरेभ्यः पुरतः कार्य्यं दिग्भागेष्वां महानसम्।
रूपनिर्गमणे येन पूर्व्वतः सत्रमण्डपम्॥
गन्धपुष्पगृहं कार्य्यमैशान्यां पट्टसंयुतम्।
भाण्डागारञ्च कौबेर्य्यां गोष्ठागारञ्च वायवे॥
उदगाश्रयञ्च वारुण्यां वातायनसमन्वितम्।
समित्कुशेध्मसस्थानमायुधानाञ्च नैर्ऋते॥
अभ्यागतालयं रम्यं शय्यासनसपादुकम्।
सोपानदीपसदृश्यैर्युक्तं दक्षिणतो भवेत्॥
गृहान्तराणि सर्व्वाणि सजलैः कदलीगृहैः।
पल्लवैश्च कुसुमैः शोभितानि प्रकल्पयेत्॥
प्राकारं तद्गृहिदेशात् पञ्चहस्तं प्रमाणतः।
एवं विष्णुाश्रमं कुर्य्याद्देवेशोपवनैर्युतम्॥
चतुःषष्टिपदो वास्तुः प्रासादादौ सुपूजितः।
मध्ये चतुष्पदो ब्रह्मा द्विपदास्तस्यर्षयः॥
कर्णे चैवाथ पक्ष्यास्तथा देवाः प्रकीर्त्तिताः।
तेष्वोष्वभयतः सार्द्धा अन्येऽपि द्विपदाः सुराः॥
चतुःषष्टिपदे देवा इत्येवं परिकीर्त्तिताः।
चरकी च विदारी च पूतना पापराक्षसी॥
ईशानाद्यास्तथा बाह्ये देवाद्या हेतुकादयः।
हेतुकश्चिपुरान्तश्च अग्निर्वेतालको यमः॥
अग्निजिह्वः कालरुद्रौ करालो क्षेत्रपालकः।
ईशान्यां भीमरूपस्तु पातालेऽथ प्रेतनायकः॥
आकाशे गन्धमाली स्यात् क्षेत्रपालस्तथा
यजेत्।
विस्तारार्द्धहतं दीर्घं राशिद्वारन्तु कारयेत्॥
वसुभिर्भागमुद्धृत्य शेषाद्वायमादिशेत्।
पुनर्गणितमष्टाभिर्भक्त्वभागन्तु भाजयेत्॥
यद्भवेत् तद्भवेद्वृत्तं भागैर्द्धृत्वा व्ययं भवेत्।
वृत्तं चतुर्गुणं कृत्वा नवभिर्भागहारितम्॥
शेषमंशं विजानीयात् देवस्य मतं यथा।
अष्टाभिर्गुणितं पिण्डं वह्निभिर्भागहारितम्॥
यद्भवेत्तु भवेच्छ्रीवं मरणं भूतहारितम्।
वास्तुकोड़े गृहं कुर्य्यात् न पृष्ठे मानवः सदा॥
वामपार्श्वेन खपिति नात्र कार्य्या विचारणा।
सिंहकन्यातुलायाञ्च द्वारं शुद्धेदथोत्तरम्॥
एवञ्च दक्षिकाष्ठी स्यात् पूर्व्वदक्षिणपश्चिमम्।
द्वारं दीर्घार्द्धविस्तारं द्वाराण्यष्टौ स्मृतानि च॥
सप्ताष्टप्रेष्यनीचत्वं सयानं क्षत्रभूषणम्।
पुत्रहीनन्तु रौद्रेण वीर्य्यघ्नं दक्षिणे तथा॥
बह्वोऽवन्त्यायुर्वृद्धिः पुत्रलाभसुखप्रिदे।
धनदं वृषपीड़ादमर्थघ्नं रोगदं जले॥
वृषभीतिर्न्दतापत्या अपत्यघ्न्य वैरिदम्।
अर्थदं वार्थहान्यैव दोषदं पुत्रघ्नद्रुमम्॥
द्वाराण्युत्तरसंज्ञानि पूर्व्वद्वाराणि वक्ष्यहम्।

अग्निभीतिर्बहुकन्या धनसम्मानकोपदम् ।
राजघ्नं कोपदं पूर्व्वे फलतो द्वारमीरितम् ।
ईशानादौ भवेत् पूर्व्वे आग्नेयादौ तु दक्षिणे ।
नैर्ऋत्यादौ पश्चिमे स्यात् वायव्यादौ तु चोत्तरे ।
अष्टभागे कृते भागे द्वाराणाञ्च फलाफलम् ।
अश्वत्थप्लक्षन्यग्रोधाः पूर्व्वादौ स्याद्बहुस्वरः ।
गृहस्य शोभनः प्रोक्त ईशाने चैव शाल्मलिः ।
पूजितो विघ्नहारी स्यात् प्रासादस्य गृहस्य च ।"

इत्यादि गारुडे वास्तुमानलक्षणं ३६ अध्यायः ।
प्रासादलक्षणन्तु प्रासादग्रन्थे द्रष्टव्यम् । * ।
अपि च ।

ऋषय ऊचुः ।

"प्रासादभवनादीनां निवेशं विस्तरान्नृप ।
कुर्य्यात् केन विधानेन कञ्च वास्तुरदाहृतः ।

सूत उवाच ।

भृगुरत्रिर्वसिष्ठश्च विश्वकर्म्मा यमस्तथा ।
नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः ।
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च ।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ।
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः ।
संक्षेपेणोपदिष्टं यन्मनवे मत्स्यरूपिणा ।
तदिदानीं प्रवक्ष्यामि वास्तुशास्त्रमनुत्तमम् ।
पुरान्धकवधे घोरे घोररूपस्य शूलिनः ।
ललाटस्वेदसलिलमपतद्भुवि भीषणम् ।
करालवदनं तस्मात् समुदभूतं समुक्षणम् ।
ग्रसमानमिवाकाशं सप्तद्वीपां वसुन्धराम् ।
ततोऽन्धकानां रुधिरमपिबत् पतितं क्षितौ ।
तेन तत्समरे सर्व्वं पतितं यच्चहीतले ।
तथापि क्षत्रियगणमक्षतं न तदा यदा ।
तदा शिवस्य पुरतस्तपश्चक्रे सुदारुणम् ।
क्षुधाविष्टन्तु तद्भूतमाहर्त्तुं जगतां क्षयम् ।
ततः कालेन सन्तुष्टो भैरवस्तस्य चादरात् ।
वरं ब्रूष्व भद्रं ते यदभीष्टं तवानघ ।
तमुवाच ततो भूतं त्रैलोक्यग्रसनक्षमम् ।
भवामि देवदेवेश तथेत्युक्त्वच शूलिना ।
ततस्तत् क्षितिवं सर्व्वं भूमण्डलमग्रेषतः ।
खदंष्ट्रेनान्तरीयच्च वस्त्रानं प्रापतद्भुवि ।
भीतभीतैस्ततो देवैर्ब्रह्मणा वाथ शूलिना ।
दानवासुररक्षोभिरवध्यं समन्ततः ।
येन यत्रैव चाक्रान्तं स तत्रैवाभवत् पुनः ।
निवासात् सर्व्वदेवानां वास्तुरित्यभिधीयते ।
अवध्येन तेनापि विघ्नाः सर्व्वदेवताः ।
प्रसीदध्वं सुराः सर्व्वे युष्माभिर्निश्चलीकृतः ।
ग्रस्यामि किं यदाहारमवश्यमधोमुखम् ।
ततो ब्रह्मादिभिः प्रोक्तं वास्तुमध्ये तु यो बलिः ।
आहारो वैश्वदेवान्ते न्यूनमस्मिन् भविष्यति ।
वास्तूपशमनो यज्ञस्तवाहारो भविष्यति ।
एवमुक्तस्ततो हृष्टः स वास्तुरभवत्तदा ।
वास्तुयज्ञः स्मृतस्तस्मात् ततः प्रभृति शान्तये ।"

इति मात्स्ये वास्तुभूतोद्भवो नाम २२६ अध्यायः । * ।

सूत उवाच ।

"अथातः संप्रवक्ष्यामि गृहकालविनिर्णयम् ।
यथाकालं शुभं ज्ञात्वा सदा भवनमारभेत् ।
श्वेते व्याधिमवाप्नोति धो गृहं कारयेन्नरः ।
वैश्याख्ये धनरत्नानि ज्येष्ठे मृत्युं तथैव च ।
आषाढे भृत्यरत्नानि पशुवर्ग्गमवाप्नुयात् ।
श्रावणे भृत्यलाभश्च हानिं भाद्रपदे तथा ।
पत्नीनाशोऽश्वयुजे विन्द्यात् कार्त्तिके धन-
धान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ।
लाभश्च बहुशो विन्द्यादग्निं माघे विनिर्दिशेत् ।
फाल्गुने काञ्चनं पुत्रानिति कालबलं स्मृतम् ।
अश्विनी रोहिणी मूलमुत्तराचयमेन्दवम् ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ।
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ।
वज्रव्याघातशूलेषु व्यतीपातातिगण्डयोः ।
विष्कम्भगण्डपरिघवर्ज्जं योगेषु कारयेत् ।
श्वेते मैत्रेय माहेन्द्रे गान्धर्व्वेऽभिजिदोहिणे ।
तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत् ।
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यच्च परिवर्ज्जयेत् ।
प्रासादेष्वेवमेव स्यात् कूपवापीषु चैव हि ।
पूर्व्वं भूमिं परीक्षेत पश्चाद्वास्तुं प्रकल्पयेत् ।
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ।
विप्रादेः ग्रस्यते भूमिरतः कार्य्यं परीक्षणम् ।
विप्राणां मधुराखादा कषाया क्षत्रियस्य च ।
कषायकटुका तद्वद्वैश्यशूद्रेषु ग्रस्यते ।
रत्निमात्रे तु वै गर्त्ते पूर्णे तु सर्व्वतः ।
घृतमामघृतावस्थं कृत्वा वर्त्तिचतुष्टयम् ।
ज्वालयेत् भूपरीक्षार्थं पूर्व्वं तत् सर्व्वदिक्सुखम् ।
दीप्तां पूर्व्वादि यक्षीयादर्णानामनुपूर्व्वशः ।
वास्तुः सामूहिको नाम दीप्यते सर्व्वतस्तु यः ।
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।
रत्निमात्रमधो गर्त्तं परीक्ष्यं खातपूरणे ।
अधिके श्रेयमाप्नोति न्यूने हानिः समे समम् ।
हस्तदृष्टेष्वथा देशे गर्त्तबीजानि वापयेत् ।
त्रिपञ्चसप्तमात्रेण यत्र रोहन्ति तान्यपि ।
ज्येष्ठोत्तमा कनिष्ठा भूर्व्वर्ज्जनीयतरा मता ।
पञ्चमयोधनिलैः परीक्षिला च सेचयेत् ।
एकाशीतिपदं कृत्वा रेखाभिः कनकेन तु ।
ब्रह्मात् पिष्टेन चालिप्येत् सूत्रेणाजोच सर्व्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ।
सर्व्वा वास्तुविभागेषु विज्ञेया नवका नव ।
एकाशीतिपदं कृत्वा वास्तुवित् सर्व्ववास्तुषु ।
पदस्थान् पूजयेद्देवांश्चिंशत् पञ्चदशैव तु ।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याभ्यन्तरयोदश ।
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत ।
ईशानकोणादिषु तान् पूजयेद्विधिना नरः ।
शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यसत्यौ भृशश्चैव आकाशो वायुरेव च ।
पूषा च वितथश्चैव गृहक्षतयमायुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शेषपापौ च रोगोऽहिर्मुख एव च ।
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशद्देते तु तद्वत्क्षत्तुर्बृहद्गणाः ।
ईशानादिचतुष्कोणे संस्थितान् पूजयेद्यथा ।
आपश्चैवाथ सावित्रो जयो भद्रश्चैव च ।
मध्ये नवपदो ब्रह्मा तस्यार्द्धौ च समीपगान् ।
साध्या नैकान्तरान् विद्यात् पूर्व्वाद्यान् नामतः
शृणु ।
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः स्मृतः ।
अपवत्साप्वत्सस्य पर्जन्योऽग्निरितिस्तथा ।
पदिकाश्च वर्गोऽयमेवं कोणेष्वग्रेषतः ।
तन्मध्ये तु बहिर्विंशत् द्विपदास्तु सर्व्वतः ।
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ।
वंशानिदानीं वक्ष्यामि क्रमेणापि पृथक् पृथक् ।
वायुं यावत्तथा रोगात् पिष्टेभ्यः स्निग्धिनं पुनः ।
सुखाद्भृशमथो शेषात् वितथं यावदेव तु ।
सुग्रीवाददितिं यावत् भृगोः पर्जन्यमेव च ।
एते वंशाः समाख्याताः क्वचिदुच्चय एव च ।
एतेषां यस्तु सम्पातः पदं मध्यं समन्ततः ।
मर्म्म चैतत् समाख्यातं त्रिशूलं कोणगञ्च यत् ।
स्तम्भास्ते तु वर्ज्यानि तुलाविधिषु सर्व्वदा ।
कीलोच्छिष्टोपघातानि वर्ज्ज्येद्दृयङ्गतो नरः ।
सर्व्वत्र वास्तुर्निर्दिष्टः पिष्टवैश्वानरायतः ।
सुहृन्मयि समाविष्टो सुखे चापः समाहितः ।
पृथ्वीधरोऽर्य्यमा चैव तथोक्तावदधिष्ठितौ ।
वक्षःस्थले चापवत्सः पूजनीयः सदा बुधैः ।
नेत्रयोर्दितिपर्जन्यौ श्रोत्रेऽदितिजयन्तकौ ।
सर्व्वेन्द्रा वंशसंस्थौ च पूजनीयौ प्रयत्नतः ।
सप्तरोगादयस्तद्वद्बाह्यः पञ्च च पञ्च च ।
रुद्रश्च राजयक्ष्मा च वामहस्ते समाश्रितौ ।
सावित्रः सविता तद्वद्दक्षिणमाश्रितौ ।
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च दक्षपादोरुसन्धिगौ ।
तथैवासुरसोमौ च वामपार्श्वे समाश्रितौ ।
पार्श्वे तु दक्षिणे सद्वदितयः सपृष्ठतः ।
ऊर्व्वोऽर्य्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्भृंगुसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः ।
जयशक्रौ तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये स तु पूज्यते ।
चतुःषष्टिपदो वास्तुः प्रासादे ब्रह्मणा स्मृतः ।
ब्रह्मा चतुष्पदस्तत्र कोणेष्वर्द्धपदास्ततः ।
बहिष्कोणे तु चत्वारो तु सार्द्धकोभयसंस्थिताः ।
विंशतिर्द्विपदाश्चैषां चतुःषष्टिपदे स्मृताः । * ।
गृहारम्भे तु कर्त्तृणां स्वाम्यङ्गे यत्र जायते ।
शूलशल्यमनर्थेतच्च प्रासादे भवनेऽपि वा ।
सशल्यं भयदं तस्मादशल्यं शुभदायकम् ।
होमाधिकाङ्गभावांस्तु सर्व्वथा तु विवर्ज्जयेत् ।
नगरग्रामदेशेषु सर्व्वत्रैवं प्रकल्पयेत् ।

चतुःशालं त्रिशालन्तु द्विशालञ्चैकशालकम् ।
नामतस्तानि वक्ष्यामि स्वरूपेण द्विजोत्तमाः ।"
इति मात्स्ये एकाशीतिपदवास्तुनिर्णयो नाम २२७ अध्यायः ॥ * ॥

सूत उवाच ।

"चतुःशालं प्रवक्ष्यामि स्वरूपान्नामतस्तथा ।
चतुःशालं हयदारैरलिन्दैः सर्वतोसुखम् ॥
नाम्नाः तत् सर्वतोभद्रं शुभं देवनृपालये ।
पश्चिमद्वारहीनन्तु गन्धावर्तं प्रचक्षते ॥
दक्षिणद्वारहीनं तद्दृश्यमानसुदाहृतम् ।
पूर्वद्वारविहीनन्तत् खस्तिकं नाम विश्रुतम् ॥
रुचकं चोत्तरद्वारविहीनं तत्प्रचक्षते ।
सौम्यशालाविहीनन्तु त्रिशालं धन्यकञ्च तत् ॥
क्षेमदृद्धिकरं नृणां बहुपुत्रफलप्रदम् ।
शालया पूर्वया हीनं सुक्षेत्रमिति विश्रुतम् ॥
धन्यं यशस्यमायुष्यं शोकमोहविनाशनम् ।
युक्तो तु याम्यया हीनं विशालं शालया तु यत् ॥
कुलक्षयकरं नृणां सर्वव्याधिभयावहम् ।
हीनं पश्चिमया यत्तु पद्मकं नाम तत् पुनः ॥
मित्रबन्धुसुतान् हन्ति तथा सर्पभयावहम् ।
याम्यापराभ्यां शालाभ्यां धनधान्यफलप्रदम् ॥
क्षेमदृद्धिकरं नृणां तथा पुत्रफलप्रदम् ।
यमं सूर्यञ्च विज्ञेयं पश्चिमोत्तरशालकम् ॥
राजाग्निभयदं नृणां कुलक्षयकरञ्च तत् ।
उदक्पूर्वे तु शाले द्वे दक्षाख्ये यत्र तद्भवेत् ॥
अकालमृत्युभयदं परचक्रभयावहम् ।
धनाख्यं यामपूर्वाभ्यां शालाभ्यां यद्विशालकम् ॥
तच्छस्त्रभयदं नृणां पराभवभयावहम् ।
युक्तो पूर्वापराभ्यान्तु सा भवेत् मृत्युसूचनी ॥
बधबन्धाय शस्त्राणामनेकभयकारकम् ।
काञ्चसुत्तरयाम्याभ्यां शालाभ्यां भयदं गृहाम् ।
सिद्धार्थवर्ण्ये वर्ण्यानि द्विशालानि सदा बुधैः ॥*॥
अथातः संप्रवक्ष्यामि भवनं पृथिवीपतेः ।
पञ्चप्रकारं तत् प्रोक्तमुत्तमादिविभेदतः ॥
अष्टोत्तरं हस्तशतं विस्तारश्चोत्तमो मतः ।
चतुर्वर्ज्येषु विस्तारो हीयते चाष्टभिः करैः ॥
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ।
युवराजस्य वक्ष्यामि तथा भवनपञ्चकम् ॥
षड्भिः षड्भिस्तथाशीतिर्हीयते तत्र विस्तरात् ।
त्र्यंशेन चाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ॥*॥
सेनापतेः प्रवक्ष्यामि सदा भवनपञ्चकम् ।
चतुःषष्टिन्तु विस्तारात् षड्भिः षड्भिस्तु हीयते ॥
पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत् ॥*॥
मन्त्रिणामथ वक्ष्यामि तथा भवनपञ्चकम् ॥
चतुश्चतुर्भिर्हीनं स्यात् करषष्टिः प्रविस्तरे ।
अर्धांशेनाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते ॥ * ॥
सामन्तामात्यलोकानां वक्ष्ये भवनपञ्चकम् ।
चत्वारिंशत्तथाष्टौ च चतुर्भिर्हीयते क्रमात् ॥
चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वेतेषु गद्यते । * ।
ग्रन्थिनां कञ्चुकीनाञ्च वैद्यानां गृहपञ्चकम् ।
अष्टाविंशत् कराणान्तु द्विहीनं विस्तरेण तत् ।
द्विगुणं दैर्घ्यमेवोक्तं मध्यमेष्वेवमेव तु ॥ * ॥
दूतकर्मान्तिकादीनां वक्ष्ये भवनपञ्चकम् ।
चतुर्थांशाधिकं दैर्घ्यं विस्तारो द्वादशैव तु ॥
अध्यर्धकरहानिः स्यात् विस्तारात् पञ्चसु क्रमात् । * ।
दैवज्ञगुरुवैद्यानां सभास्तारपुरोधसाम् ॥
तेषामपि प्रवक्ष्यामि सदा भवनपञ्चकम् ।
चत्वारिंशच्च विस्तारश्चतुर्भिर्हीयते क्रमात् ॥
पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत् ॥*॥
चतुर्वर्णस्य वक्ष्यामि सामान्यं गृहपञ्चकम् ।
द्वात्रिंशत्कं कराणान्तु चतुर्भिर्हीयते क्रमात् ।
आषोडशादिति परं नूनमन्त्यावसायिनाम् ॥
दशांशेनाष्टभागेन त्रिभागेणाथ पादिकम् ।
अधिकं दैर्घ्यमित्याहुर्ब्राह्मणाद्यैः प्रशस्यते ॥
सेनापतेर्नृपस्यापि गृहस्योत्तरेण तु ।
नृपवासगृहं कार्यं भाण्डागारन्तथैव च ।
सेनापतेर्गृहस्यापि चातुर्वर्ण्यस्य चान्तरम् ।
वासकोषगृहं कार्यं राजपूज्येषु सर्वदा ॥
अन्तरप्रभवाणाञ्च स्वपितुर्दूरमिष्यते ।
तथा हस्तशतादर्वाक् गदितं वनवासिनाम् ॥
सेनापतेर्नृपस्यापि सप्तधा सहितेऽन्विते ।
चतुर्दशगृहते व्यासे शालान्यासः प्रकीर्तितः ॥
पञ्चत्रिंशद्गृहते तस्मिन् शालिन्दः समुदाहृतः ।
तथा षट्त्रिंशद्गृहस्यान्तु सप्तहस्तसमन्वितः ॥
विप्रस्य महती शाला न देयं परतो भवेत् ।
दशाङ्गुलाधिका तद्वत् क्षत्रियस्य विधीयते ॥
पञ्चत्रिंशत् करा वैश्ये अङ्गुलानि त्रयोदश ।
तावत्करेषु शूद्रस्य युता पञ्चदशाङ्गुलैः ॥
शालायास्तु त्रिभागेन यस्याग्रे वीथिका भवेत् ।
सोपानं नाम तदास्तु पद्माच्छायोच्छ्रयम्भवेत् ॥
पार्श्वयोर्वीथिका यत्र सावष्टम्भतदुच्यते ।
समन्ताद्वीथिका यत्र सुस्थितं तदिहोच्यते ॥
शुभदं सर्वमेतत् स्यात् चातुर्वर्ण्यचतुर्विधम् ।
विस्तरात् षोडशो भागस्तथा हस्तचतुष्टयम् ॥
प्रथमो भूमिकोच्छ्राय उपरिष्टात् प्रहीयते ।
द्वादशांशेन सर्वासु भूमिकासु तथोच्छ्रयः ॥
पङ्क्तिके भवेच्छ्रितिः षोडशांशेन विस्तरात् ।
दामवेन विकल्पः स्यात् तथा हस्तमयभित्तिके ।
गर्भमानेन मानन्तु सर्वद्वास्तुषु गद्यते ।
गृहवासस्य पञ्चाग्रदशदण्डमितैः करैः ॥
संयुतो द्वारनिष्क्रान्तो द्विगुणश्चोच्छ्रयो भवेत् ।
द्वारशाखासु बाहुल्यसुच्छ्रायं करसम्मितैः ॥
अङ्गुलैः सर्ववास्तूनां पृथुत्वं गद्यते बुधैः ।
उदुम्बरोत्तराङ्गे च तदर्धार्धं प्रविस्तरैः ॥"
इति मात्स्ये वास्तुविद्यासु गृहमाननिर्णयो नाम २२८ अध्यायः ॥ * ॥

सूत उवाच ।

"अथातः संप्रवक्ष्यामि स्तम्भमानविनिर्णयम् ।
श्रुत्वा स्वभवनोच्छ्रायं सदा सप्तगुणं बुधः ॥
अशीत्यन्तं पृथुत्वं स्यादग्रे नवगुणैः सह ।
रुचकचतुरस्रः स्यादष्टांशो वज्र उच्यते ॥
द्विवज्रः षोडशास्रस्तु द्वादशास्रः प्रलीनकः ।
मध्यप्रदेशे यः स्तम्भो वृत्तो वृत्त इति स्मृतः ॥
एते पञ्च महास्तम्भाः प्रशस्ताः सर्ववास्तुषु ।
पद्मवल्लीलता कार्या पत्रदर्शनरूपिता ॥
स्तम्भस्य नवमांशेन पद्मकुम्भोत्तराणि च ।
स्तम्भतुल्या तुला प्रोक्ता हीनाच्चोपतुला मतः ॥
त्रिभागेणेह सर्वत्र चतुर्भागेण वा पुनः ।
हीनं हीनचतुर्थांशात्तथा सर्व्यासु भूमिषु ॥
वासगेहानि सर्वेषां प्रवेशे दक्षिणेन तु ॥ * ॥
द्वाराणि तु प्रवक्ष्यामि प्रशस्तानीह नानि तु ॥
पूर्वेणेन्द्रं जयन्तञ्च द्वारं सर्वत्र शस्यते ।
याम्यञ्च वितथञ्चैव दक्षिणेन विदुर्बुधाः ॥
पश्चिमे पुष्पदन्तञ्च वारुणञ्च प्रशस्यते ।
उत्तरेण तु भल्लाटं सौम्यञ्च शुभदं भवेत् ॥
तथा वास्तुषु सर्वत्र वेधं द्वारस्य वर्जयेत् ।
द्वारे तु रथ्यया विद्धे भवेत् सर्वकुलक्षयः ॥
तरुणा दीर्घबाहुत्यं शोकः पङ्क्तेन जायते ।
अपस्मारो भवेन्नूनं कूपवेधेन सर्वदा ॥
यथा प्रस्रवणेन स्यात् कीलेनाग्निभयम्भवेत् ।
विनाशो दैवताविद्धे स्तम्भेन स्त्रीहतो भवेत् ॥
गृहभर्तुर्विनाशः स्यात् गृहेण च गृहे क्षते ।
अमेध्यावस्करैर्विद्धे गृहिणीबन्धनम्भवेत् ॥
तथा शस्त्रभयं विद्यादन्त्यजस्य गृहेण तु ।
उच्छ्रायद्विगुणां भूमिं त्यक्त्वा वेधो न विद्यते ॥
स्वयमुद्घाटिते द्वारे उन्मादो गृहमेधिनाम् ।
स्वयञ्च पिहिते विन्द्यात् कुलनाशं विचक्षणः ॥
मानाधिके राजभयं नीचे तस्करतो भयम् ।
द्वारोपरि च यद्द्वारं तदन्तकसुखं स्मृतम् ॥
आध्मानं मध्यदेशे तु अधिको यस्य विस्तरः ।
वज्रन्तु प्रकटं मध्ये सद्यो भर्तृविनाशनम् ॥
तथान्यपीडितद्वारं बहुदोषकरम्भवेत् ।
मूलद्वारं तथान्यन्तु नाधिकं शोभनम्भवेत् ॥
कुम्भश्रीपर्णिवल्लीभिर्मूलद्वारन्तु शोभयेत् ।
पूजयेच्चापि तन्नित्यं बलिना चाक्षतोदकैः ॥*॥
भवनस्य वटः पूर्वे दिग्भागे सर्वकालिकः ।
उडुम्बरस्तथा याम्ये वारुणे पिप्पलः शुभः ॥
प्लक्षश्चोत्तरतो धन्यो विपरीतस्त्वसिद्धये ।
कण्टकी चीरवृक्षश्च आसन्नः सफलो द्रुमः ॥
भयं हानिं प्रजाहानिं कुर्वन्ति क्रमशः सदा ।
न च्छिन्द्यादृषयो तानन्यानन्तरे स्थापयेत् शुभान् ॥
पुन्नागाशोकवकुलशमीतिलकचम्पकान् ।
दाडिमी पिप्पली द्राक्षा तथा कुसुमसम्भवम् ॥
जम्बीरपूगपनसद्रुमकेतकीभि-
र्जातीसरोजशतपत्रिकमल्लिकाभिः ।
यन्नारिकेलकदलीदलपाटलाभि-
र्युक्तं तदत्र भवनं श्रियमातनोति ॥"
इति मात्स्ये वास्तुविद्यासु वेधपरिवर्जनो नाम २२९ अध्यायः ॥ * ॥

सूत उवाच ।

"उदगादिप्लवं वास्तु समानग्निरसन्तथा ।
परीक्ष्य पूर्ववत् कुर्यात् स्तम्भोच्छ्रायं विचक्षणः ॥

न देवधूर्तसचिवचत्वराणां समीपतः ।
कारयेद्भवनं प्राज्ञो दुःखशोकभयं यतः ॥
तस्य प्रवेशाच्चत्वारस्तोत्सङ्गोऽयतः शुभः ।
पृष्ठतः पृष्ठभङ्गस्तु सर्वावर्तः प्रशस्यते ॥
अपसव्यो विनाशाय दक्षिणे श्रीर्गृहस्तथा ।
सर्वकामफलो नृणां संपूर्णो नाम वामतः ॥
एवं प्रवेशमालोक्य यत्नेन गृहमारभेत् । * ।
अथ संवत्सरे पूर्णे मुहूर्ते शुभलक्षणे ॥
रत्नोपरि शिलां कृत्वा सर्वबीजसमन्विताम् ।
चतुर्भिर्ब्राह्मणैस्तम्भं वस्त्रालङ्कारपूजितम् ॥
शुक्लाम्बरधरः स्निग्धो सहितो वेदपारगैः ।
स्थापितं विन्यसेत् तद्वत् सर्वौषधिसमन्वितम् ॥
नानाचूतफलोपेतं वस्त्रताम्बूलसंयुतम् ।
ब्रह्मघोषेण वाद्येन गीतमङ्गलनिस्वनैः ॥
पायसं भोजयेद्विप्रान् होमस्तु मधुसर्पिषा ।
वास्तोष्पते प्रतिजानीहि मन्त्रेणानेन सर्वदा ॥
सूत्रपाते तथा कार्यमेवं स्तम्भोदये पुनः ।
द्वारवन्ध्योच्छ्रये तद्वत् प्रवेशसमये तथा ॥
वास्तूपशमने तद्वत् वास्तुयज्ञस्तु पञ्चधा ।
ईशाने सूत्रपातः स्यादाग्नेये स्तम्भरोपणम् ॥
प्रदक्षिणं च कुर्वीत वास्तोः पदविलेखनम् ।
तर्जनी मध्यमा चैव तथाङ्गुष्ठस्तु दक्षिणे ॥
प्रवालरत्नकनकं फलपिष्टकृतोदकम् ।
सर्ववास्तुविभागेषु शस्तम्यद्विलेखने ॥
न भस्माङ्गारकाष्ठेन न शस्त्रनखचर्मभिः ।
न च साग्निकपालेन क्वचिदास्तु प्रलेखयेत् ॥
एभिर्विलेखितं कुर्यात् दुःखशोकामयादिकम् ।
यदा गृहप्रवेशः स्याच्छिल्पी तत्रोपलेखयेत् ॥
स्तम्भसूत्रादिके तद्वत् शुभाशुभफलोदयम् । * ।
आदित्याभिमुखं रौति शकुनः परुषं यदि ॥
तुलाकाजं सुशीघ्रं गृहभर्तुः समात्मनः ।
वास्तुक्षे तद्विजानीयान्नरशस्यं भयप्रदम् ॥
शकुनानन्तरं तत्र दृश्यश्चाप्यपदम्भवेत् ।
तद्वत्सम्भवं विद्यात्तच्च शस्यं विचक्षणः ॥
प्रसार्यमाणे सूत्रे तु शृगोमायुर्विलङ्घिते ।
तत्र शस्यं विजानीयात् खरशब्दे च भैरवे ॥
यदीशान्तेऽथ दिग्भागे मधुरं रौति वायसः ।
धनलाभं विजानीयाद्वह्नौ वा स्वाग्न्यधिष्ठिते ॥
सूत्रच्छेदे भवेन्मृत्युर्व्याधिः कीले लघोः सुते ।
अङ्गारेषु तथोच्छ्राये कपालेषु च सम्भ्रमम् ।
कम्बुशब्दे च जानीयात् पुंस्त्वं स्त्रीषु वास्तुवित् ।
गृहभर्तुर्वयस्यापि विनाशः स्निग्धिसम्भवे ।
स्तम्भस्थाने च्युते कुम्भे शिरोरोगं विनिर्दिशेत् ।
कुम्भापहारे सर्वस्य कुलस्यापि क्षयो भवेत् ॥
भ्रष्टुं स्थानच्युते कुम्भे भये वक्त्रं विदुर्बुधाः ।
करसंख्याविनाशे तु नाशं गृहपतेर्विदुः ॥
बीजौषधिविहीने तु भूतेभ्यो भयमादिशेत् ।
प्राग्दक्षिणेन विन्यस्य स्तम्भं सूत्रं विवेशयेत् ॥
ततः प्रदक्षिणेनान्यसेत् स्तम्भं विचक्षणः ।
यस्माद्भयकरं नृणां योजितान्यप्रदक्षिणम् ॥
रक्षां कुर्वीत यत्नेन स्तम्भोपद्रवनाशिनीम् ।
तथा फलवतीं शाखां स्तम्भोपरि निवेशयेत् ॥

प्रागुदक्प्रवणं कार्यं द्विसुखन्तु न कारयेत् ।
स्तम्भंवा भवनं वापि द्वारंवा स्वगृहन्तथा ॥
दिङ्मूढे कुलनाशः स्यात् न च सम्वर्धयेद्गृहम् ।
यदि सम्वर्धयेद्गेहं सर्वंदिक्षु विवर्धयेत् ॥
पूर्वेण वर्धितं वास्तु कुर्याद्धेरागि वै सदा ।
दक्षिणे वर्धितं वास्तु क्षत्रये स्यान्न संशयः ॥
पश्चाद्वृद्धन्तु यद्वास्तु नरर्धत्वयकारकम् ।
वर्धायितं तथा सौम्ये बहुसन्तापकारकम् ॥
आग्नेये यत्र वृद्धिः स्यात् तदग्निभयदम्भवेत् ।
वर्धितं राक्षसे कोणे शिशुक्षयकरं भवेत् ॥
वर्धायितन्तु वायव्ये धान्याधिप्रकोपकृत् ।
ईशाने तु प्रजावृद्धिर्नाशौ सम्वर्धिते सदा ॥*॥
ईशाने देवतागारं तथा शान्तिगृहं भवेत् ।
महानसं तथाग्नेये तत्पार्श्वे चोत्तरं जलम् ॥
गृहस्योपस्करं सर्वं नैर्ऋते स्थापयेद्बुधः ।
वस्त्रस्थानं वहिःकुर्यात् स्नानमक्षमेव च ॥
धनधान्यञ्च वायव्ये कर्मशाला ततो वहिः ।
एवं वास्तुनिवेशः स्यात् गृहभर्तुः शुभावहः ॥"
इति मात्स्ये वास्तुविद्यायहनिर्णयो नाम २३० अध्यायः ॥ * ॥

सूत उवाच ।

"अथातः संप्रवक्ष्यामि दार्वाहरणमुत्तमम् ।
धनिष्ठापञ्चकं त्यक्त्वा विशाखादिक्रमः परम् ॥
ततः सामत्सरीदृष्टे दिने यात्राहनं बुधः ।
प्रथमं बलिपूजान्तु कुर्यात् वृक्षाय सर्वदा ॥
पूर्वोत्तरेण पतितं गृहे दारु प्रशस्यते ।
अन्यथा न शुभं विद्यादृयाम्यापरनिपातने ॥
क्षीरवृक्षोद्भवं दारु न गृहे विनिवेशयेत् ।
श्मशानाधिवासं विहगैरनिलानलपीड़ितम् ॥
गजाद्यभयञ्च तथा विद्युन्निर्घातपीड़ितम् ।
अर्द्धशुष्कं तथा दारु भयशुष्कं तथैव च ॥
चैत्यदेवालयोत्पन्नं नदीसङ्गमजन्तथा ।
श्मशानकूपनिलयं तड़ागादिसमुद्भवम् ॥
वर्जयेत् सर्वथा दारु यदीच्छेद्विपुलां श्रियम् ।
तथा कण्टकिनो वृक्षान्नीपनिम्बविभीतकान् ॥
श्लेष्मातकान् एलतरून् वर्जयेत् गृहकर्मणि ।
अश्मनं शाकमधुकसर्जशालाः शुभावहाः ॥
चन्दनं पनसं धन्यं सुरदारु हरिद्रका ।
द्वाभ्यामेकेन वा कुर्यात् त्रिभिर्वा भवनं शुभम् ॥
बहुभिः कारितं यस्मादनेकभयदं भवेत् ।
एकैकं शिंशपा धन्या श्रीपर्णी तिन्दुकी तथा ॥
एता नान्यसमायुक्ता कदाचिच्छुभकारिकाः ।
स्यन्दनः पनसश्चैव सरलार्जुनपद्मकाः ॥
एते नान्यसमायुक्ता वास्तुकार्ये शुभप्रदाः ।
तच्छेदे महापीडे गोर्धा विद्याद्विचक्षणः ॥
माञ्जिष्ठवर्णे भेकः स्यात् नीले सर्पं विनिर्दिशेत् ।
अरुणे सरटं विद्यात् सुक्ताभे शुकमादिशेत् ॥
कपिले मूषिकां विद्यात् खड्गाभे जलमादिशेत् ।
एवंविधं शुभैस्तु वर्जयेद्वास्तुकर्मणि ॥
पूर्वं छिन्नन्तु गृह्णीयात् निमित्तं शकुनैः शुभैः ।*।
वासेन दुष्टिते देहे अस्थिभिर्वै हते तथा ॥
यच्छेषमायतं विद्यादृहमेहं वदामि वः ।

ध्वजो धूमश्च सिंहश्च श्वा वृषः खर एव च ।
हस्ती श्वाङ्गुश्च पूर्वादाः क्रमशो भवन्त्यमी ।
ध्वजः सर्वसुखो धन्यः प्रत्यग्द्वारो विशेषतः ॥
उदक्सुखो भवेत् सिंहः पाक्सुखो वृषभो भवेत् ।
दक्षिणाभिमुखो हस्ती सप्तभिः स उदाहृतः ॥
एकेन ध्वज उद्दिष्टस्त्रिभिः सिंह उदाहृतः ।
पञ्चभिर्वृषभः प्रोक्तो विकोणगांस्तु वर्जयेत् ॥
तमेवाष्टगुणं कृत्वा विद्वानादाग्निं विचक्षणः ।
सप्तविंशद्धृते भागे ऋक्षं विद्याद्विचक्षणः ॥
अष्टभिर्भाजिते ऋक्षे यच्छेषं स व्ययो मतः ।
व्ययाधिकं न कुर्वीत यतो दोषकरम्भवेत् ।
आयाधिके भवेच्छान्तिरित्याह भगवान् हरिः ॥
कृत्वायतो द्विजवरानथ पूर्णकुम्भं
दध्यक्षताम्रदलपुष्पफलोपशोभम् ।
दत्त्वा हिरण्यवसनानि तथा द्विजेभ्यो
माङ्गल्यशान्तिनिलयाय गृहं विशेच ॥
एषोक्तहोमविधिना बलिकर्म कुर्यात्
प्रासादवास्तुशमने च विधिर्य उक्तः ।
सन्तर्पयेत् द्विजवरानथ भक्ष्यभोज्यैः
शुक्लाम्बरश्च भवनं प्रविशेत् सधूमम् ॥"
इति मात्स्ये वास्तुविद्यानुकीर्तनं समाप्तम् २३१ अध्यायः ॥ * ॥ अन्यच्च । अथ वास्तुयुक्तिः । तत्र स्थाननिर्णयः ।
"नदीश्मशानगोत्राणां वनस्य निकटे तथा ।
न वास्तुकर्म कुर्वीत न द्वन्द्व-नगरान्तयोः ॥"*॥
तत्र दिङ्निर्णयः ।
"राक्षसानिलवह्नीनां यमस्य दिशि वेश्मनः ।
नारम्भं कारयेद्राजा भीरुगृहाद्दयप्रदम् ॥"
तथा हि ।
"भोगः कीर्तिर्धनं रोगः स्थिरता च भयः क्षयः ।
दाह इत्येव कथितो दिशि वास्तुफलोद्भवः ॥"
भोजे च ।
"यस्मिन् जायते राजा तस्य लग्नस्य यः पतिः ।
या दिक् तस्य नृपस्यां वास्तारम्भं समाचरेत् ॥"
एवच ।
"कुजाधिपतिके मेषलग्ने जातस्य भूपतेः ॥"
कुजाधिपतिकायां दक्षिणस्यामपि वास्तुर्न दुष्यतीति । पराशरस्य ।
"यद्यत्राजनितो राजा वास्तुस्तस्मिन् तद्दिशि ।"
एतेन सूर्यादिजनितस्य नृपतेः पूर्वादिदिक्षु वास्तुकरणम् । तेन शुक्रदशायां जातस्यार्केऽप्यमि न दुष्यति ॥ * ॥ अथ लक्षणम् ।
"वास्तु कुर्याच्छुभैपालः सर्वसुस्निग्धस्थलिकम् ।
प्रागुदक्प्रवणं रम्यं रम्यवृक्षोपशोभितम् ॥
लक्ष्मीर्दाहः क्षयो भीतिर्धननाशोऽभ्यसूयता ।
सम्यदृष्टहरिति प्रोक्तं पूर्वादिककुभां फलम् ॥"
तथा हि प्रदनमन्यत् ।
"लग्नलग्नेन दिक् पश्चात् राज्ञां वास्तुन्नवोमतः ॥"
एतेन सूर्याधिपतितुलालग्ने जातस्य नृपतेः सूर्याधिपतेः पूर्वस्याः पश्चात् पश्चिमस्यामपि न दुष्यति । अन्ये तु ।

"यदज्ञानतितो राजा तद्विग्रोयत्नवो मतः ॥"
एतेन गुरुदत्राजातस्य नृपतेर्दैवियत्नवोऽपि न दुष्यति । अन्यत्र तु ।
"ब्रह्मक्षत्रियविट्शूद्राः पूर्व्वादिदिग्युगे क्रमात् ।
वास्तुत्रवनमिच्छन्ति निजसम्पत्तिहेतवे ॥"
नीतिशास्त्रे च ।
"वास्तुकर्म्मे नृपः कुर्य्याद्दलवद्दैरिणो दिशि ।
दीर्घा वा चतुरस्रा वा वास्तुभूमिर्म्महीप्सिताम् ।
एतयोर्लक्षणं तद्वत् फलञ्च नगरे यथा ॥"*॥
अथ मानम् ।
"राजकाष्ठेन नृपतिर्वास्तारम्भं समाचरेत् ।
जयो भङ्गः सुखं दुःखं प्रीतिर्भीतिश्च यः स्थिरः ।
इत्यष्टौ वास्तुनामानि राजकाष्ठेरनुक्रमात् ॥"
अन्यत्र तु ।
"जन्मलग्ने महीभर्तुर्दैर्घ्ययोरन्त एव हि ।
राजकाष्ठेस्तु तावद्भिर्वास्तु कुर्य्यान्महीपतिः ॥
सदर्य्याच्छन्दसंख्येन राजपट्टेन भूपतेः ।
वास्तुकर्म्मसमारम्भो धनधान्यजयप्रदः ॥"
एतयोरपि पूर्व्ववदाख्यानम् ।
"राजच्छत्रेण कुत्रापि वास्तुपत्तनमिष्यते ।
तस्यापि पूर्व्ववज्ज्ञानमिति भागुरिभाषितम् ॥"
अथ दोषशुद्धी ।
"परनिर्म्मितवास्तुस्थो न तिष्ठति चिरं नृपः ।
न सुखाय न धर्म्माय तत्तस्य भवि जायते ॥"
अन्यत्रापि ।
"राजान्यवीर्य्यप्रत्याप्ती परवास्तुकृतस्थितेः ।
न सुखाय भवेन्नृणां यदा परगृहे गृहः ॥
यः स्वनिर्म्मितवास्तुस्थो निजलग्नादिसंयुतः ।
विचारितपुरो राजा च चिरं सुखमश्नुते ॥"
अन्यत्रापि ।
"राजा स्ववाहुवीर्य्याप्तो निजनिर्म्मितवास्तु-
भाक् ।
स चिरं तनुते सौख्यं स्वगृहस्थो गृहो यथा ॥"
अथ कालः ।
"वर्षान्तेऽभ्युदिते शुक्रे केन्द्रे सुरगुरौ शुभे ।
वास्तुकर्म्मसमारम्भं शुक्रचन्द्रार्कभूमिजे ॥
गृहवृक्षो यः समयः कर्त्तव्यस्तत्र वै शुभे ।
वास्तारम्भः कार्य्यः शुभसम्पत्तिकामिना
राज्ञा ॥"
इति वास्तुयुक्तौ वासूद्देशः ॥*॥
अन्येषां यथा । यदाह वास्तुकुक्षौ ।
"खाभिहस्तैश्चतुर्भिः स्याद्दण्डस्तेनैव मापयेत् ।
क्षेमो भयङ्करो भव्यः शोकश्छिद्रजयः शुचिः ॥
वंशच्छत् पापकारी च विकारी शोभनः शिवः ।
कृपणः कामदो धून्यो धौम्यो धनहरस्तथा ॥
धनदः सुखदश्चेति वाच्योऽवादश कीर्त्तिताः ॥"
तद्यथा ।
"आयामपरिणाहाभ्यां योऽङ्गुलिष्टोऽभिजायते ।
ऊनविंशतिहस्ते मागे शेषेणेता यथाक्रमम् ॥
क्षेमे सर्व्वार्थसंसिद्धिर्भयकारी भयङ्करः ।
भव्यो भोगं प्रकुरुते शोकश्छिद्रमुनाशुभः ॥
विजयः कुरुते वृद्धिं शुचिः सर्व्वसुखं वदेत् ।
वंशच्छत् कुरुते वंशं पापकारी कुलापहः ॥
विकारी कुरुते दुःखं शोभनः शुभमावहेत् ।
शिवः सर्व्वार्थसिद्धिं स्यात् कृपणः सर्व्वनाशनः ॥
कामदोऽभीष्टलाभः स्यात् धून्यो दहति सर्व्वशः ।
धौम्ये धर्म्ममतिः सौख्यं दुःखं धनहरे भवेत् ॥
धनदे धनलाभः स्यात् सुखच्छत् सुखकारकः ।
इति प्रोक्तोऽतिसंक्षेपाद्वास्तुलक्षणसंग्रहः ॥"
भोजस्तु । दण्डमानं तथैव किन्तु युक्तिरन्या ।
स्वदण्डान्तो द्विगुणैस्तैः शुभावह-
श्चतुरस्र एव नववास्तु शिष्यते ।
किमु लग्नदण्डमितदण्डसंमितः
प्रकरोति वास्तुरतिसौख्यसम्पदम् ॥
ऊषरा वालुका क्लिन्ना त्रयमेतद्विनिन्दितम् ।
त्रिकोणो वर्त्तुलो दीर्घो यवमध्योऽष्टहस्रुधः ॥
तथा डमरुरूपश्च सर्पाकारस्तथैव च ।
छिन्नो भिन्नो मध्यनिम्नो वजनाभश्चतुष्पथः ॥
त्रिपथो जनदोषी च वृक्षदोषी तथा परः ।
गलशुष्काक्षतिसेवोपद्रवाः परिकीर्त्तिताः ॥
वास्तुखण्डे महादोषा हेयास्तस्माद्विचक्षणैः ।
चतुरस्रः शुभो दीर्घसुखः प्राग्दः समाश्रितः ।
दीर्घैर्विहीनो विज्ञेयो वास्तुखण्डः सुखावहः ॥"
इति युक्तिकल्पतरौ वास्तुयुक्तिः ॥*॥
तत्र कालनिर्णयः ।
"वैशाखश्रावणाषाढ़मार्गशीर्षफाल्गुनकार्त्तिकाः ।
सुप्रशस्ता गृहारम्भे पत्नीपुत्रसम्वर्द्धिदाः ॥
शुक्लपक्षे भवेत् सौख्यं कृष्णे च भवते भयम् ।
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ॥"
तथान्यत्र ।
"पूर्व्वभाद्रपदर्क्षं यावत् पूर्व्वास्यं वर्ज्जयेद्गृहम् ।
उत्तरास्यं न कुर्व्वीत नवम्यादिचतुर्द्दशीम् ॥
अमावास्याष्टमीं यावत् पश्चिमास्यं विवर्ज्जयेत् ।
नवम्यादि तथा याम्यं यावत् शुक्लचतुर्द्दशीम् ।
वज्रव्याघातशूले च व्यतीपातातिगण्डयोः ॥
विष्कम्भगण्डयोश्चैव गृहारम्भं न कारयेत् ॥
आदित्यहरयोहिण्यौ मृगशिरो ज्येष्ठा धनिष्ठो-
त्तरा
रेवत्याश्च मघानुराधहरिभिः शुद्धैः खभा-
दादिभिः ।
सौम्यानां दिवसेऽथ पापरहिते योगे विरिक्ते
तिथौ
विद्यात्तद्दिने वदन्ति मुनयो वेश्मादिकार्य्यं
शुभम् ॥"
मत्स्यपुराणेऽपि ।
"चन्द्रादित्यबलं लब्ध्वा सर्व्वं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र तु विवर्ज्जयेत् ॥
अश्विनी रोहिणी मूलमुत्तराचयभैन्द्रवम् ।
स्वातिर्हस्तानुराधा च वास्तुकर्म्मणि शस्यते ॥"
तथा च ।
"त्रिभिस्त्रिभिर्व्वसूनि स्युस्तिथ्याद्यै-
रशेषपुत्राग्निधनानि शोकाः ।
शून्योर्भयं राजभयञ्च मृत्युः
सुखं प्रवासश्च नव प्रभेदाः ॥
नाशं दिशन्ति मकरालिकुलीरलग्ने
मेषे घटे धनुषि कर्म्मसु दीर्घसत्रम् ।
कन्याभृषे मिथुनके ध्रुवमर्थलाभो
ज्योतिर्व्विदः कलसिंहवृषेषु वृद्धिम् ॥
लग्नेऽर्के वज्रसम्पातः कोपहानिश्च शीतगौ ।
क्षत्युत्पातसुन्दरापुत्रे चन्द्रे सुखसम्पदः ॥
जीवे धर्म्मार्थकामाश्च सुतोत्पत्तिश्च भार्गवे ।
शनैश्चरे तु दारिद्र्यं राहावस्वं प्रवर्त्तते ॥"*॥
अथ प्रवेशकालः ।
"शुद्धेर्द्वादशकेन्द्रगैर्निधनगैः पापैस्त्रिषष्ठायगै-
र्लग्ने केन्द्रगतेऽथवा सुरगुरौ दैत्येज्ये वा ।
सर्व्वारम्भफलप्रदिद्धिरुदये राज्ञो च भर्त्तुः शुभे
खस्थास्थिरतोदये च भवनं कार्य्यं प्रवेशोऽपि
वा ॥
पौष्णे धनिष्ठा अथ वारुणेषु
स्वायम्भुवर्क्षे त्रिषु चोत्तरेषु ।
अश्वीयचन्द्रे शुभवासरे च
तथा विरिक्ते च गृहप्रवेशः ॥
तिथिर्व्वारश्च लग्नादि समारम्भे यथोदितम् ।
प्रवेशेऽपि गृहस्याहुस्तथा ज्योतिर्व्विदो जनाः ॥"
अथ द्वारम् ।
"नैकद्वारं वास्तुखण्डं न चतुर्द्वारमारभेत् ।
एकद्वारं दुःखकरं चतुर्द्वारं दुरावरम् ॥
त्रिद्वारमेव नृपतेर्व्वास्तुकर्म्म प्रशस्यते ।
हे सुखे तत्र चान्यत् स्यादसुखमिति निर्णयः ॥
राजद्वारस्तु तत्रैको यमद्वारस्तथा परः ।
अपद्वारं तथान्यत् स्यादिति द्वारस्य निर्णयः ॥
ब्रह्मक्षत्रियवैश्यानां प्रागुदक्पश्चिमैः क्रमात् ।
सुखद्वारं दधिमुखं परं तस्यापि दुःखदं ॥
बलवद्वै वैरिसुखं द्वारमित्यन्यसम्मतम् ।
राजद्वारेऽन्यभूपानां शिष्टानांवा प्रवेशयेत् ॥
यात्राप्रसादपर्व्वाणि राजद्वारेषु कारयेत् ।
यमद्वारे छिद्रकर्म्म द्विषतान्च प्रवेशनम् ॥
निःसारं मृतानाञ्च दुष्टानाञ्च निवन्धनम् ।
अपद्वारेऽपरोधस्य गमनागमनक्रिया ॥
रात्रे विलासयात्रा च मर्म्मज्ञस्य प्रवेशनम् ॥"
अथ प्राचीरनिर्णयः ।
"मञ्जैरभेद्या मनुजैरलङ्घ्याः
प्राचीरखण्डा नृपतेर्भवन्ति ॥
राजदण्डोन्नताः सर्व्वे प्राचीराः पृथिवीभुजः ।
विंशतिस्ते तु पञ्चाग्रे पार्श्वयोः पञ्च पञ्च च ॥
पञ्चात् पञ्च च विज्ञेयाः प्राचीरा पृथिवीभुजः ।
सर्व्वप्रान्ते त्वावरणो नाम प्राचीर उच्यते ॥
प्रतिप्राकारसंस्थानं द्वारं नाभिसुखस्थितम् ।
तत्र यत्राग्रस्य दीर्घस्य वास्तुखण्डस्य निर्णयः ॥
तद्यथा ।
"राजच्छत्राग्रतः पञ्च राजद्वारे महीपतेः ।
राजदण्डत्रये सार्द्धजयद्वारे प्रतिष्ठिताः ॥
अद्वारे राजदण्डार्थे प्राचीराः पृथिवीपतेः ।
एवं व्यवस्थिते स्थाने मध्यमेतद्धि तिष्ठति ॥
राजच्छत्रत्रयं सार्द्धमायामे जयवास्तुनि ।
परिणाहे पञ्च राजदण्डास्तिष्ठन्ति मध्यतः ॥

राजपट्टाभिधानेन स्थानमेतन्निगद्यते ।
अस्मिन् गृहं नृपः कृत्वा सुचिरं सुखमश्नुते ॥
अज्ञानाद् दम्भतो राजा योऽन्यत्र गृहमारभेत् ।
सोऽचिरात् मृत्युमाप्नोति रोगं शोकं भयं तथा ॥
यमदण्डोदयदण्डौ केनाहतिरुपप्लवः ।
ये चान्ये वास्तुदोषाः स्युः स्थाने दोषाश्च ये पुनः ।
न सृज्यते राजपट्टैः सर्पैर्गरुडो यथा ॥
द्विगुणादिरतोऽपि स्यात् क्रमाद्भङ्गादिवास्तुषु ।
राजछत्रमितेऽप्येवं प्राचीरे गुणदोषकौ ॥"*॥
अथ जयाख्यस्य चतुरस्रस्य वास्तुखण्डनिर्णयः ।
"राजद्वारे हि प्राकारा राजच्छान्तरे मताः ।
यमद्वारे सार्द्धराजच्छान्तरे च ये नृपाः ॥
अपद्वारे राजदण्डं जिता आरभिताः पुनः ।
अद्वारे भूपतेस्तस्य राजदण्डत्रयान्तरे ॥
एवं व्यवस्थिते स्थाने मध्यमे तत् प्रदृश्यते ।
आयामे राजच्छत्राणि चत्वारि परिणाहतः ॥
राजच्छत्रैकमानेन राजदण्ड उदाहृतः ।
अयश्च सप्तमो भागो वास्तोर्भवति शोभनः ॥
अस्मिन् गृहं नृपः कृत्वा सुचिरं याति मेदिनीम् ।
अस्मिन् विजयवृद्धिश्च सौख्यञ्च समवाप्नुयात् ॥
यो राजा दम्भतोऽन्यत्र वेश्मारम्भं समाचरेत् ।
य उक्तो राजदण्डोऽयं तस्येदं स्थानपञ्चकम् ॥
गजो व्याघ्रश्च सिंहश्च मृगो भृङ्गो यथाक्रमम् ।
सिंहे सिंहासनं स्थानं व्याघ्रे स्यात् द्वारमन्दिरम् ॥
गजे यात्रालयं कुर्यात् मृगे केलिनिकेतनम् ।
भृङ्गेऽन्तःपुरं कुर्यात् क्रमेण पृथिवीपतेः ॥
तेन मध्यमेव सिंहासनं दीर्घस्य चतुरस्रकैः ॥"
तत्र भविष्योत्तरे ।
"मेषादिचक्रे जातस्य नृपतेः सुरतुङ्गभात् ।
द्वादशैव गृहान् वक्ष्ये तेषां लक्षणमग्रतः ॥
सुनन्दः सर्वतोभद्रो भद्रो नान्दीसुखस्तथा ।
विनोदश्च विलासश्च विजयो विमलस्तथा ।
रङ्गः कैलिर्जयो वीरो द्वादशैते प्रकीर्त्तिताः ॥"
अथैषां लक्षणानि ।
"यदृच्छयेवोच्यते मानं तस्य तेनैव कल्पना ।
राज्ञः खड्गसमेकन्तु दीर्घं सर्व्वत्र निक्षिपेत् ॥
आयामेन सुन्दरः स्यात् राजहस्तैश्च षड्भिः ।
परिणाहे चतुर्भिश्च राजहस्तैः प्रतिष्ठितः ॥
अस्याधिदेवता भौमो रक्तवर्णो वसुन्धरा ।
द्वाराणि विंशतिश्चास्य रक्तचित्राङ्कितानि च ॥
रक्तपट्टावृतो गेहः सकलार्थप्रसाधकः ।
अत्र स्थित्वा महीपालः सुचिरं याति मेदिनीम् ॥"
दीर्घम् ५१ । प्रस्थम् ४० । इति सुन्दरः ॥*॥
"द्वौ राजहस्तावायामे परिणाहे तथैव च ।
इत्थं सर्व्वतोभद्रः शुक्लश्चास्याधिदेवता ॥
दानवा रक्षकाश्चैव पूज्यास्तैश्च यत्नतः ।
चतुर्द्वारास्य द्वाराणि क्षत्रचित्राङ्कितानि च ॥
पीतपट्टावृतो ह्येष सर्व्वानिष्टविनाशनः ।
अत्र स्थित्वा महीपालः सर्व्वान् भृत्यान् निक्षत्रति ॥"
दीर्घम् २१ । प्रस्थम् २० । इति सर्व्वतोभद्रः ॥*॥
"अष्टकोणो भवेद्भद्रः कोणो हस्तचतुष्टयः ।
राजहस्तोन्नतः कार्य्यो बुधश्चास्याधिदेवता ॥
रक्षका वसवश्चास्य पूज्यास्तैश्च प्रयत्नतः ।
अष्टौ द्वाराणि चास्य स्युः पीतचित्राङ्कितानि च ॥
पीतपट्टावृतो ह्येष सर्व्वानिष्टविनाशनः ।
अत्र स्थाता क्षितिपतिर्न रिष्टैरवमृद्यते ॥
राजदण्डो भवेद्दीर्घः प्रस्थे राजहस्तकः ।
राजहस्ते राजहस्ते प्रकोष्ठाः स्युश्च कारयेत् ॥
अयं नान्दीसुखो नाम यक्षश्चास्याधिदेवता ।
नक्षत्रलोकः पूज्योऽत्र स यक्षादस्य रक्षकः ॥
द्वाविंशतिस्तु द्वाराणि दीर्घे दण्डे तथान्तरे ।
अन्यत्र दीर्घे एकं स्यात् प्रस्थे एकमेव च ॥"
दीर्घद्वितये दण्डे द्वाराणि प्रस्थद्वितये एकं कृत्वा द्वितयं एवं २२ द्वाराणि ।
"शुक्लचित्रेण सहितः शुक्लपट्टेन शोभितः ।
सर्व्वार्थसाधको राज्ञां लक्ष्मीविजयवर्द्धनः ॥"
दीर्घम् ११ । प्रस्थम् १० । इति नान्दीसुखः ॥*॥
"दीर्घे त्रयो राजहस्ताः प्रस्थे द्वौ प्रतिष्ठितौ ।
विनोद एव द्वाराणि विंशतिकोष्ठकं भवेत् ॥
रक्तचित्रेण चित्राङ्गो रक्तवस्त्रोपगूहितः ।
अत्र स्थाता नरपतिर्भवेत् कीर्त्तिप्रतापवान् ॥
सूर्य्याधिदेवता चास्य रक्षका अकलग्रहाः ॥"
दीर्घम् ३१ । प्रस्थम् २० । इति विनोदः ॥ * ॥
"दीर्घेण राजदण्डार्द्धं प्रस्थे राजहस्तकौ ।
विलास एव द्वाराणि चत्वारिंशद्बुधा विदुः ॥
गन्धर्व्वा रक्षकाश्चास्य प्रकोष्ठत्रितयं भवेत् ।
चित्रपट्टेन शुक्लेन चित्रवस्त्रेण शोभितः ।
दुर्भिक्षशमनो ह्येष शस्यसम्पत्तिकारकः ।
तत्र स्थित्वा नरपतिः प्रचुरं सुखमश्नुते ॥"
दीर्घम् ५१ । प्रस्थम् २० । इति विलासगृहम् ॥ * ॥
"द्वादशहस्ताः प्रस्थे दीर्घे द्वौ राजहस्तकौ कथितौ ।
विजये द्वादश भवनद्वाराणि सुजयप्रदान्यत्र ॥
सूर्य्याधिदेवता चास्य रक्षतीमं विहङ्गराट् ।
अरुणाम्भोजचित्राङ्गो अरुणाम्बरभूषितः ।
तत्र स्थित्वा नरपतिः क्षितृक्षां याति वसुन्धराम् ॥"
दीर्घम् २१ । प्रस्थम् १२ ॥ * ॥
"आयामे राजदण्डौ द्वौ प्रस्थे राजदण्डकः ।
शुक्लद्वारोपसहितः प्रकोष्ठैर्द्वादशभिर्युतः ॥
दिक्पालाः रक्षकाश्चास्य कुबेराद्याधिदेवताः ।
नानावर्णेन चित्रेण वसनेन विभूषितः ॥
अत्र स्थित्वा नरपतिः सुचिरं सुखमश्नुते ।
यस्मिन्नाद्ये प्रतिष्ठेत विमलो ग्रहसत्तमः ॥
दुर्भिक्षं नात्र आयेत नेतयोर्न च विप्लवः ।
न रोगो नापि शोकश्च नैवोत्पातभवन्तथा ।
इत्यादि गुणवाहुल्यमत्यन्त कथितं बुधैः ॥"
दीर्घम् २०० । प्रस्थम् १०० ॥ * ॥
"आयामपरिणाहाभ्यां राज्ञः षोड़शहस्तकः ।
द्वाराणि षोड़शैवास्य गुरुरस्याधिदेवता ॥
रक्षिका देवता चास्य शुक्लवस्त्रैर्विभूषणम् ।
अत्र स्थित्वा नरपतिः सर्व्वार्थान् भुवि साधयेत् ॥"
दीर्घम् १७ । प्रस्थम् १६ । इति रङ्गः ॥ * ॥
"आयामे राजदण्डः स्यात् प्रस्थे च तदर्द्धकम् ।
दण्ड प्रकोष्ठा द्वाराणि ग्रहनिरस्याधिदेवता ॥
मिश्राश्चा रक्षकाश्चास्य नीलवस्त्रादिभूषणम् ।
नाम्नायं कैलिराख्यातो भयरोगविनाशनः ।
अत्र स्थित्वा नरपतिः सुखं विजयते रिपून् ॥"
दीर्घम् १०० । प्रस्थम् ५० ॥ * ॥
"राजहस्तेन कोणः स्यादेवं कैलिश्चतुर्हस्रः ।
चतुर्हस्रैव द्वाराणि राहुरस्याधिदेवता ॥
नक्तञ्चरा रक्षकास्तु नानावर्णाम्बरादिकम् ।
अयं जयः प्रकटितः सर्व्वत्रैव जयप्रदः ॥
आयामे राजहस्तः स्यात् परिणाहोऽष्टहस्तकः ।
नानारूपः कुटीरूपो वीरो नाम यजप्रदः ॥
दृहस्पतिर्देवतास्य रक्षकाश्चास्य खेचराः ।
विचित्रवसनोपेतः सर्व्वकामार्थदायकः ॥"
दीर्घम् ११ । प्रस्थम् ८ । इति वीरः ॥ * ॥
"यो यस्य गदितो वर्णस्तथा स्याद्वासमरोऽपि च ।
राजहस्तान्तरे पञ्च चामराः सुर्म्मही सुताम् ॥
चन्द्रोऽपि दर्पणे हस्त उपरि क्रमतो न्यसेत् ।
पताकाध्वजयुक्ताश्च गृहरक्षक-रक्षसाम् ।
छत्रयुक्तं गृहं राज्ञां विज्ञेयं चक्रवर्त्तिनाम् ॥"
एषां नियमः परवत् ।
"इति द्वादशचिह्नानि गृहाणां कथितानि वै ।
विज्ञेयानि नृपतिर्गृहारम्भं समाचरेत् ॥
इति सिंहासनस्थानमिति राज्ञस्य मस्तकम् ।
इतोऽन्ये चित्तहर्त्तार्थाः प्रासादाः पृथिवीभुजः ॥
जयन्तादयो येऽन्ये तेषां नास्ति विनिश्चयः ।
स्वजन्मगेहसंस्थो यो नृपतिः शुभचेतनः ॥
स चिरं पृथिवीं भुक्ते सर्व्वार्थान् साधयन्नपि ।
यो वा तत्परगेहस्थो दुर्म्मोहात् धरणीपतिः ॥
न चिरं याति वसुधां घोरं रोगञ्च विन्दति ।
खलमप्रतिमित्रस्य गृहवारो न दुष्यति ॥"*॥
परञ्च ।
"हीरकस्य विशुद्धस्य ब्रह्मजातस्य मेदुतः ।
सूर्य्याङ्गारकसोमाभैर्वमतो दीप्तिमच्छिखाः ।
गृहाग्रे धारयेद्राजा तद्गृहं वज्रवारणम् ॥"
वास्त्यस्तु ।
"गृहेषु मणिविन्यासो विज्ञेयो न च दण्डवत् ।
विशुद्धहीरकन्यासो विधेयः सदनोपरि ।
तेन सर्व्वाणि नश्यन्ति अरिष्टानि महीभुजाम् ॥"
भोजोऽपि ।
"वास्तुखण्डोऽलरूपः स्यात् यथार्थैर्नामभिः खकैः ।
यमद्वारात् समारभ्य यावद्द्वारमिष्यते ॥"
तद्यथा,—
"मृत्युभयः स्थिरखण्डो धनं विभव एव च ।
वीरस्तापश्च इत्यष्टौ वास्तुभागा यथाक्रमम् ॥

यमनैर्ऋतनीरेशवायुयक्षेशग्रहराः ।
इन्द्रो वह्निरिति प्रोक्ता विभागानामधीश्वराः ।
स्त्री कारालयं कुर्यात् भयस्थाने च पशवः ।
स्थिरे सहस्रवरात् रत्नैः चले वाजिगजादयः ।
धने धान्यादिकं रत्नैः विभवे कोषरत्नयम् ।
राज्यपट्टे भवेद्वीरो नापि कश्चिन्नरालयम् ।
प्राचीरपरिभागान्ते इति भोजस्य सम्मतम् ।"

इति युक्तिकल्पतरौ राजगृहयुक्तिः । ७ ।

"वास्तुमानेन नियमो गृहमानेन निर्णयः ।"

तत्र वास्तुप्रवलक्षणम् ।

"पूर्व्वप्लवो वृद्धिकरो धनदक्षोत्तरप्लवः ।
दक्षिणो म्लयदो वास्तुर्दहनो पश्चिमप्लवः ।
कीले रेखाद्वयं कृत्वा मध्ये रेखाद्वयं तथा ।
ऐशानकोणतो रेखा दक्षिणादेर्धजाकृतिः ।
नाधामरो नामलिङ्ग नापनाकापि नाध्वजः ।
नाकुम्भादिर्नावित्रानो वा चित्रो नातिचित्रधृक् ।
नालुखो नातिनीचो वा नाग्रकीर्णप्रकीर्णकः ।
नो धातुनांगवाच्चैव न चैकानेकहारभाक् ।
नियमोऽस्तु महेन्द्राद्यां सर्व्वसम्पत्तिहेतवे ।"

इति राजगृहयुक्तिः । ७ ।

अन्येषान्तु यथा वास्तुमानेन नियमः ।
"ध्वजो धूमस्तथा सिंहः श्वा वृषो गर्दभो गजः ।
काक श्चैव गर्हितो वास्तुस्थानस्य निर्णयः ।
अग्रगे सुखसम्पत्तिर्युग्मश्च विपदालयम् ।"

एवमन्यत्रापि ।

"ध्वजे विभूतिर्विपदश्च धूमे
सिंहे विभोगः शुनि सर्व्वनाशः ।
वृषे सुखं गर्दभतो विनाशो
गजे धनं काकपदे च मृत्युः ।

कोणरेखा कोणवृद्धिः सुखसम्पत्तिनाशिनी ।
पूर्व्वपश्चिमतो दण्ड उदयास्तः सुखावहः ।
दक्षिणोत्तरतो दण्डो वंशहा यमदण्डकः ।
गृहादि प्रातवेद्वीमानेषां दण्डयधान्तरे । ७ ।
एका रेखा त्रिधा भूता दे च दक्षिणपश्चिमे ।
तिसश्चैव पूर्व्वतो हीनाश्चतुःशालं सुखावहम् ।
पश्चिमाग्रं ध्वजे वेश्म सिंहे दूरदृक्सुखं शुभम् ।
पूर्व्वाग्रायं वृषस्थाने दक्षिणाभिमुखं गजे ।
पदाघातः परिखाघातः प्रयाघातस्तथैव च ।
जलदोषो वृक्षदोषो दोषा इत्येवमादयः ।
गच्छतां पदनाशस्य अवश्यं यदि वेश्मनि ।
पदाघातो नाम दोषः पुत्रक्षयोच्चधनापहः ।
परिखादण्डयोर्घातो वास्तुनोः प्रतिवेश्मिनोः ।
परिखाघातो नाम दोषः कुलक्षीर्य्यधनापहः ।
प्रयाघातो नाम दोष आघातो वास्तुनः प्रथः ।
स हन्ति भोगं वंशञ्च तस्य भेदमतः शृणु ।
एकमार्गं सुखं कुर्यात् द्विपथं कुलवर्द्धनम् ।
त्रिपथं कुलनाशाय सर्व्वनाशश्चतुष्पथे ।
स्ववार्द्धा परवार्द्धाच यस्तिष्ठति जलाशयः ।
तद्दोषो जलदोषः स्यात् स हन्ति कुलसम्पदः ।
ऋद्धिमानसुखैश्वर्य्यमृत्युक्लेशभयामयाः ।
एते जलाशये दोषाः पूर्व्वादिदिक्षु च क्रमात् ।
स्ववास्तुवृक्षतो दोषः कुलसम्पत्तिनाशनः ।
वर्ज्जयेत् पूर्व्वतोऽश्वत्थं वृक्षं दक्षिणतस्तथा ।
ऐशान्यां रत्नवृक्षश्च आग्नेय्यां क्षीरिवृक्षतथा ।
यत्र तत्र स्थितो वृक्षो विल्वदाड़िमकेशराः ।
पनसो नारिकेलाश्च शुभं कुर्व्वन्ति निश्चयम् ।
निम्बो नीली पलाशश्च चिञ्चा श्वेतापराजिता ।
कोविदारश्च सर्व्वत्र सर्व्वं निघ्नन्ति मङ्गलम् ।७।
गृहपालनमिच्छन्ति नागस्य स्वपने क्रमात् ।
पूर्व्वादिषु शिरः कृत्वा नागः शेते त्रिभिस्त्रिभिः ।
भाद्राश्वेर्व्वामपार्श्वेन तस्य क्रोड़े गृहं शुभम् ।"

तत्र प्रमाणम् ।

"स्वामिहस्तप्रमाणेन ज्येष्ठपत्नीकरेण वा ।
गृहाभ्यन्तरसंस्थानं मापयेदभितो नरः ।"७।

तत्र सामान्यलक्षणम् ।

"गृहभूमिसमाहृतपिण्डपदं
वसुलोचनरन्ध्रगजैर्गणितम् ।
रविभूधरचिन्मृदयोगकृतं
भवनाय वयस्थितिऋक्षपदम् ।

एकाशीतिगुणे हस्ते दिवागेकहते च ते ।
वर्द्धिष्णुग्मसमक्षे पिण्डः स्यात् सर्व्ववेश्मनः ।"

तद्यथा ।

"ध्वजादिगेहसंस्थाने गृहमानं शुभावहम् ।
दीर्घे भागैः परीणाहे सप्त चैवाङ्गुलिहृयम् ।
इदं पुत्रफलं गेहं वृषस्थानेष्वुदीरितम् ।
दीर्घे षट्प्रसरे पञ्च चतस्रोऽङ्गुलयोऽपि च ।
इदं पुत्रफलं गेहं गजस्थाने प्रकीर्त्तितम् ।
दीर्घे त्रयोदश भुजाङ्गुलयश्चैकविंशतिः ।
प्रसरेऽष्टौ सुखफलं गजस्थाने गृहं विदुः ।
इति द्वादशकं प्रोक्तं गृहाणां सर्व्वसंमतम् ।
एवं गृहं समाचर्य्य गृहस्थः शुभमिच्छति ।"७।

भोजस्तु ।

"आयामपरिणाहाभ्यां योऽङ्गुलिष्को विजायते ।
येन केनापि चाङ्गेन शोधनीयः स इष्यते ।
एकद्विपञ्चसप्तानि शुभान्यन्यानि चान्यथा ।
आयामपरिणाहाभ्यां सार्द्धहादग्रहस्तकम् ।
इदन्तु मङ्गलं नाम गृहं सुखविवर्द्धनम् ।
आयामपरिणाहाभ्यां सार्द्धहस्तचतुर्हृतम् ।
इदं कमलकं नाम गृहं सम्पत्तिकारकम् ।
आयामपरिणाहाभ्यां सार्द्धहस्तास्तु षोड़श ।
इदं हि सर्व्वतोभद्रं स्वामिनः सुखकारकम् ।
आयामपरिणाहाभ्यां सार्द्धाष्टादशहस्तकम् ।
कल्याणनाम वेश्मेदं धनधान्यसुखप्रदम् ।
आयामपरिणाहाभ्यां सार्द्धविंशतिहस्तकम् ।
इदं हि सुखदं नाम भर्त्तुः सुखविवर्द्धनम् ।
मया यदिदमुद्दिष्टं गृहपद्मकमद्भुतम् ।
न तेषु स्थानियमः सर्व्वेष्वेतानि कारयेत् ।
स्थानं मानञ्च दोषाश्च ये प्रोक्तास्तु मया क्रमात् ।
तद्विचार्य्य गृहं कृत्वा गृहस्थः सुखमश्नुते ।
अज्ञानादथ मोहाद्वा योऽन्यथा गृहमाचरेत् ।
स विपीदति नश्येत तस्य कीर्त्तिः कृतं वसु ।
प्राचीरादां न नियमो गृहस्थानाच्च विद्यते ।
यथावासु यथाशक्ति प्राचीरानचयेद्गृही ।
गृहरोधो यथा न स्यात् तथा प्राचीरकल्पना ।"

इति युक्तिकल्पतरौ गृहयुक्तिः । ७ ।

अथ वास्तुयागप्रमाणम् । लैङ्गे ।

चतुःषष्टिपदं वास्तु सर्व्वदेवगृहं प्रति ।
एकाशीतिपदं वास्तु मानुषं प्रति सिद्धिदम् ।
अतः शोधयेद्वास्तुभूमिं यस्य पुरोदिताम् ।
चतुर्हस्तं द्विहस्तं वा जलान्तं वापि शोधयेत् ।
सुसमश्च तदा कृत्वा सदाचैकं ततो भवेत् ।"

पुरोदितां ब्राह्मणादिभेदेन प्रशस्तत्वेनोपपादिताम् । ७ । तथा च मत्स्यपुराणम् ।

"अरत्निमात्रे गर्त्ते वै अनुलिप्ते च सर्व्वशः ।
घृतमाक्षिकराजस्यं कृत्वा वह्निंचतुष्टयम् ।
ज्वालयेत्तु परीत्यार्थं पूर्व्वं तत् सर्व्वदिक्सुखम् ।
दीप्ता पूर्व्वादि गृह्णीयात् वास्तूनामनुपूर्व्वशः ।
वास्तुः सन्दृश्यते नाम दीप्यते सर्व्वतो दिशः ।
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।"

वास्तुकर्त्तुररत्निमात्रे गर्त्ते तत्रैव स्थापिते आमशरावे पूर्व्वादिक्रमेण वह्निंचतुष्टयं कृत्वा गव्यघृतेनापूर्य्य वह्निंचतुष्टयं प्रज्वालयेत् । तत्र प्राच्यां दीप्तशिखायां उच्छ्रिते गृहास्तु ब्राह्मणस्य प्रशस्तम् । एवं दक्षिणादिदिग्गि शिखायास्तथात्वे क्षत्रियादेः । सर्व्वशिखासमत्वे सर्व्ववर्णानां स वास्तुदेशः प्रशस्तः । जलान्तमिति तु मत्स्यपुराणपरिभाषितं प्रासादपरम् । ७ । तथा च मात्स्ये ।

"पुरुषाधःस्थितं शल्यं न गृहे दोषदं भवेत् ।
प्रासादे दोषदं शल्यं भवेद्यावज्जलान्तिकम् ।
प्रासादभवनादीनां निवेशं विस्तराद्वद ।
कुर्य्यात् केन विधानेन कश्च वास्तुरुदाहृतः ।"

इत्युपक्रम्य वाप्यादीनामभिधानादादिपदात् कूपादयो गृह्यन्ते । प्रासादेष्वेवमेव स्यात् कूपवापीषु चैव हि । इत्यभिधानाच्च कूपादावपि ।

वास्तुपुरुषश्च ।

"कक्षस्य गृहिणो तु सिंहिका
राहुवास्तुतनयावजीजनत् ।
पूर्व्वतो हरिनिशाचरेश्वरो
देवतेरवरजो निपातितः ।"

तथा ।

"चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्येष्ठे मृत्युमवाप्नुयात् ।
आषाढ़े भृत्यरत्नानि पशुवर्ज्जमवाप्नुयात् ।
श्रावणे मित्रलाभस्तु हानिर्भाद्रपदे तथा ।
आश्विने पत्नीनाशः स्यात् कार्त्तिके धनधान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ।
माघे चाग्निभयं विद्यात् काञ्चनं फाल्गुने सुतान् ।
शुक्लपक्षे भवेत् सौख्यं कृष्णे तस्करतो भयम् ।
अश्विनी रोहिणी मूलमुत्तरात्रयमेव च ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ।
आदित्यभौमवर्ज्यन्तु सर्व्वे वाराः शुभावहाः ।
वज्रव्याघातशूले च व्यतीपातातिगण्डयोः ।

विष्कम्भगण्डपरिघवर्ज्यं योगेषु कारयेत् ।
श्वेतमैत्रेयगान्धर्वेष्वभिजिद्रौहिणेऽपि च ॥
तथा विजयसावित्रे मुहूर्ते गृहमारभेत् ।
चन्द्रादित्यबलं लग्नं तथा शुभनिरीक्षितम् ।
प्रासादेष्वेवमेव स्यात् कूपवापीषु चैव हि ।"
रैन्द्रं रुद्राग्निः । * । मुहूर्ते संवर्त्तः ।
"रौद्रः श्वेतश्च मैत्रेयस्तथा ग्रानकटः स्मृतः ।
सावित्रश्च जयन्तश्च गान्धर्वः कुतपस्तथा ।
रौहिणश्च विरिञ्चिश्च विजयो नैर्ऋतस्तथा ।
माहेन्द्रो वारुणश्चैव वटः पञ्चदश स्मृताः ।"
तेन द्वितीयतृतीयसप्तमाष्टमनवमैकादशपञ्चमान्यतमसुमुहूर्ते श्वेतादौ वास्तुकर्म्म कुर्य्यात् ।
चैत्रादिफलन्तु नरयज्ञे देवयज्ञे तु प्रतिष्ठाकालवशात् तत्कालपरिग्रहः । * । तथा च कल्पतरौ देवीपुराणम् ।
"यस्य देवस्य यः कालः प्रतिष्ठाध्वजरोपणे ।
गर्भाधूरग्निशालान्यासे शुभदस्तस्य पूजितः ।"
यस्य देवस्य प्रतिष्ठाध्वजरोपणे यः कालः शुभदस्तस्य गर्भाधूरग्निशालान्यासे गृहारम्भे स कालः पूजित इति । * । प्रतिष्ठाकालश्च मात्स्ये ।
"चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ।
माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ।
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ।
पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ।
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृता बहुफला भवेत् ।"
प्रतिष्ठासप्तमये ।
"माघे वा फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्येष्ठाषाढ़कयोर्व्वापि प्रतिष्ठा शुभदा भवेत् ।"
कल्पतरौ देवीपुराणम् ।
"महिषासुरहन्त्राश्च प्रतिष्ठा दक्षिणायने ।"
ज्योतिषे ।
"गुरोरेगोरस्तवाल्पं वार्द्धके सिंहगे गुरौ ।
गुर्व्वादित्ये दशाहे तु वक्रिजीवार्द्धविग्रहे ।
पूर्व्वराशावनायातातिचारिगुरुवत्सरे ।
प्राग्राशिगन्तृजीवस्य चातिचारे चिपञ्चके ।
कन्याद्यङ्गतसप्ताहे नीचस्थेऽस्ते मलिम्लुचे ।
पौषादिकचतुर्म्मासे चरवाङ्गतवर्षके ।
एकेनाहा चैकदिने द्वितीयेन दिनत्रये ।
तृतीयेन तु सप्ताहे माङ्गल्यानि विवर्ज्जयेत् ।
व्रतारम्भप्रतिष्ठे च गृहारम्भप्रवेशने ।
प्रतिष्ठारम्भके देवकूपादेः परिवर्ज्जयेत् ।"*।
स्मृतिसागरे ।
"उल्कापाते च भूकम्पे अकालवर्षगर्जिते ।
वज्रकेतूदयोत्पाते ग्रहर्क्षे चन्द्रसूर्य्ययोः ।
प्रयाणञ्च त्यजेत् भूपः सप्तरात्रमतः परम् ।
ब्राह्मणः क्षत्रियो वैश्यस्त्यजेत् कर्म्म चिराचकम् ।
मूलस्यन्ता चैकरात्रं ततः कर्म्म समाचरेत् ।"
पराशरः ।
"प्रयाणे सप्तरात्रन्तु चिरात्रं व्रतबन्धने ।
एकरात्रं परित्यज्य कुर्य्यात् प्राज्ञियगं गृहे ।"
मत्स्यपुराणे ।
"नवग्रहमखं कृत्वा ततः कर्म्म समाचरेत् ।
अन्यथा फलदं पुंसां न कार्य्यं जायते क्वचित् ।"
नग्नजिन्मानभृतवचनम् ।
"पिलृभ्यो वृद्धये वृद्धिश्राद्धं दत्त्वा सदक्षिणम् ।
क्रूरभूतबलिञ्चैव संपूज्य वास्तुदेवताः ।"
एकादिने वास्तुयागगृहोत्सर्गयोः करणे सङ्कल्पदेव वृद्धिश्राद्धं करणीयम् ।
"गणेशः क्रियमाणे तु माहात्म्यः पूजनं सकृत् ।
सङ्कल्पदेव भवेत् श्राद्धमादौ न पृथगादिशेत् ।"
इति छन्दोगपरिशिष्टात् ।
मात्स्ये ।
"ऊहापोहार्थतत्त्वज्ञो वास्तुशास्त्रस्य पारगः ।
आचार्य्यश्च भवेन्नित्यं सर्व्वदा दोषवर्जितः ।"
देवीपुराणम् ।
"प्रासादे च चतुःषष्टिरेकाशीतिपदं गृहे ।
चतुरशीतिके चैत्रे चाष्टधा नवधा कृते ।
कोष्ठे रेखास्ततो दत्त्वा नव भागान् प्रकल्पयेत् ।
ईशः कोष्ठार्द्धतो ज्ञेयः पर्जन्यः पदसंस्थितः ।
द्विपदस्तो जयन्तश्च शक्रः स्यादेककोष्ठगः ।
भास्करश्च पदो ज्ञेयो द्विपदः सत्य उच्यते ।
भृशः पदस्तो ज्ञातव्यो व्योम चैव पदार्द्धकम् ।
हुताशनः पदार्द्धे तु पूषा च पदसंस्थितः ।
वितथो द्विपदो ज्ञेयः पदैकस्तो गृहक्षतः ।
वैवस्वतः पदैकस्तो गन्धर्व्वो द्विपदस्थितः ।
भृङ्गश्चैकपदो ज्ञेयो मृगश्चार्द्धपदस्थितः ।
पितरोऽर्द्धपदे ज्ञेयाः पदे दौवारिकस्तथा ।
सुग्रीवो हि पदे ज्ञेयः पदस्थः पुष्पदन्तकः ।
वरुणश्चैकपदस्तोऽसुरो द्विपदसंस्थितः ।
शोषश्चैकपदो ज्ञेयः पापोऽर्द्धपद उच्यते ।
रोगश्चार्द्धपदो ज्ञेयो नागश्चापि पदे स्थितः ।
द्विपदे मुख्यकर्म्मा तु भल्लाटः पदसंस्थितः ।
सोमश्चैकपदस्तोऽसौ ज्ञेयो नागराड् द्विपदस्थितः ।
पादस्था श्रीर्महादेवी दितिश्चार्द्धपदस्थिता ।
आपान्तपादसंस्थः स्यादापवत्सः पदस्थितः ।
चतुष्पदस्तो विज्ञेयश्चार्य्यमा मध्यपूर्व्वगः ।
सावित्रस्तु पदो ज्ञेयः सावित्री पदसंस्थिता ।
ततो विवस्वान् विज्ञेयश्चतुष्कैर्मध्यसंस्थितः ।
इन्द्रश्चेन्द्राजयोर्भावेकैकपदसंस्थितौ ।
मित्रश्चतुष्पदश्चैव पश्चिमे च व्यवस्थितः ।
रुद्रश्चैकपदो ज्ञेयो राजयक्ष्मा पदस्थितः ।
धराधरश्च विज्ञेय उत्तरे च चतुष्पदे ।
चतुष्पदश्चतुर्हस्तो मध्ये ज्ञेयः प्रजापतिः ।
देवताश्चरा बाह्ये सर्व्वे चाभ्यन्तरासुराः ।
एवं प्रयत्न कोष्ठानि रचयापूर्य्य देशिकः ।
एतेषामेव देवानां बलिं दद्यात्तु कामिकम् ।"
रचयेति पञ्चवर्णरजोभिः । तथा च नारदीयाम् ।
"उल्लासमपि देवानां पदान्यापूर्य्य पञ्चभिः ।
रजोभिस्तैर्यथोक्तेभ्यः पायसान्नैर्बलिं हरेत् ।"
तथा ।
"पीतं हरिद्रापूर्णं स्यात् सितं तण्डुलसम्भवम् ।
कुसुम्भचूर्णमरुणं कृष्णं दग्धपुलाकजम् ।
विल्वादिपत्रजं श्याममित्युक्तं वर्णपञ्चकम् ।"
स्यात् पुलाकस्तुच्छधान्ये दग्धमरोक्तेः तुच्छं अपक्वम् ।
"पूज्या मङ्गलवाक्ये तु पूर्व्वाग्न्यादिक्रमात् ।
स्कन्दश्चैव विदारी च अर्य्यमा पूतना तथा ।
जम्भका पापराक्षस्यौ पिलिपिञ्छश्चरस्यपि ।"
मङ्गलकरणासामर्थ्ये ग्रामस्यासन्नीपे सर्व्वे पूज्याः ।
"ग्रामग्रामगिलारूपी यत्र तिष्ठति केशवः ।
तत्र देवासुरा यज्ञा भुवनानि चतुर्दश ।"
इति पद्मपुराणवचनात् ।
तत्रावाहनविसर्ज्जने न स्तः ।
"ग्रामयामे स्थावरे च नावाहनविसर्ज्जने ।"
इति वचनात् ।
तदसम्भवे घटादिजले । प्रतिमास्थानेऽप्यस्य आवाहनविसर्ज्जनवर्ज्जम् । इति गौडावबन्धनात् ।*। एवं विश्वेश्वबलिर्मात्स्यपुराणदेवीपुराणाभ्यासक्तोऽपौदानीन्तनैर्न व्यवह्रियते । इति न लिखितः । किन्तु मत्स्यपुराणोक्तपायसबलिर्दीयते । तथा च ।
"पायसं वापि दातव्यं स्नानाद्या सर्व्वतः क्रमात् ।
नमस्कारेण मन्त्रेण प्रणवाद्येन सर्व्वतः ।"
अतएव प्रागुक्तप्रारदावाक्ये पायसमात्रसूक्तं तेन एष पायसबलिः ॐ ईशानाय नमः । इत्यादिना प्रयोगः । न च वाचस्पतिमिश्रोक्तमस्तकदेवतायै एष पायसबलिर्नम इत्यादि प्रणवादिनमस्कारान्तस्वनामरूपमन्त्रमध्ये देवप्रवेशस्यायुक्तत्वात् । तथा च ब्रह्मपुराणम् ।
"ॐकारादिसमायुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ।"
इति देवीपुराणम् ।
"एवं भूतगणानान्तु बलिर्देयस्तु कामिकः ।
एतान् प्रपूजयेद्देवान् कृष्णपुष्पाक्षतैर्नुपः ।
एवं प्रपूजिता देवाः शान्तिपुष्टिप्रदा नृणाम् ।
अपूजिता विनिघ्नन्ति कारकं स्थापकं तथा ।
एतान् प्रपूजयेद्देवान् कृष्णपुष्पाक्षतैस्तथा ।"
अत्र पूजाया नित्यत्वात् वस्त्रमाल्यमत्स्यपुराणवचने होमानन्तरं बलिदानाच्च वचेः काम्यत्वात् पूजा होमानन्तरं बलिदानाचारः । तथा च ।
"ब्रह्मस्थाने तथा कुर्य्यादासुदेवस्य पूजनम् ।
शिवाश्च पूजनं कुर्य्यादासुदेवगणस्य च ।
गन्धार्घपुष्पनैवेद्यधूपाद्यैः सुरसत्तम ।
ततः संपूजयेत् तस्मिन् सर्व्वलोकधरां महीम् ।
सुरूपां प्रमदारूपां दिव्याभरणभूषिताम् ।
स्थाप्य तामर्चयेद्देवीं परितुष्टां क्षितागमाम् ।
ततः स्वनाममन्त्रेण सर्व्वदेवमयं हरिम् ।
स्थाप्य समर्चयेत्तत्र यजेदासुतरं परम् ।
ब्रह्मस्थाने ततो विद्वान् कुर्य्यादाधारमच्युतेः ।
तस्मिन् संस्थापयेत् कुम्भं वर्द्धन्या सह पूरितम् ।
हैमं वा राजतं पात्रं ताम्रजं वा दृढं शुभम् ।
सर्व्वौषधीयुतं सुवर्णरजतान्वितम् ।

ब्रह्मस्थाने ततो मन्त्री कलसं स्थाप्य पूजयेत् ।
तस्मिंश्चतुर्मुखं देवं प्राचीग्रं मन्त्रविग्रहम् ॥
गन्धैः पुष्पैश्च धूपैश्च नैवेद्यैः सुमनोहरैः ।
ततो मण्डलबाह्ये तु प्रतीच्यां प्राङ्मुखः स्थितः ॥
आचार्यो गुरु सम्भारं ब्रह्मादींस्तर्पयेत् सुरान् ।
प्राचीग्रं तर्पयेद्विद्वान् आहुतीनां शतेन च ॥
इतरान् दशभिर्देवानाहुतिभिः प्रतर्पयेत् ।
ततः प्रणम्य विज्ञाप्य लब्ध्वा वै स्वस्तिवाचनम् ॥
गृहीत्वा कर्करीं सम्यङ्मण्डलान्तःप्रदक्षिणम् ।
खनमार्गेण देवेन तोयधारेण कारयेत् ॥
पूर्ववत् तेन मार्गेण सप्तबीजानि वापयेत् ।
आरम्भं तेन मार्गेण तस्य खातस्य कारयेत् ॥
ततो गर्त्तं खनेन्मध्ये हस्तमानप्रमाणतः ।
चतुरङ्गुलमानं तदधः खन्यात् सुसम्मितम् ॥
गोमयेन प्रलिप्याथ चन्दनेन विलेपितम् ।
मध्ये दत्त्वा तु पुण्यानि शुक्लान्यक्षतमेव च ॥
आचार्यः प्राङ्मुखो भूत्वा ध्यायेद्देवं चतुर्मुखम् ।
तूर्यमङ्गलघोषेण ब्रह्मघोषरवेण च ॥
अर्घ्यं दद्यात् सुरश्रेष्ठ कुम्भतोयेन मन्त्रवित् ।
प्रगृह्य कर्करीं तान्तु तत् खातं पूजयेच्छनैः ॥
सर्वरत्नसमायुक्तैर्विमलैश्च सुगन्धिभिः ।
तस्मिन् पुण्यानि शुक्लानि प्रक्षिपेदोमिति स्मरन् ॥
तदावर्त्तं परीक्षेत दधिभक्तान्वितं क्षिपेत् ।
शुभं स्याद्दक्षिणावर्त्तेऽशुभं वामे भवेत्ततः ॥
बीजैः शालियवादीनां गर्त्तं तं पूरयेत्ततः ।
क्षीरजाभिः पवित्राभिर्मृद्भिर्गर्त्तं प्रपूरयेत् ॥
एवं निष्पाद्य विधिना वास्तुयागं सुरोत्तम ।
सुवर्णं गाञ्च वस्त्रञ्च आचार्याय निवेदयेत् ॥"
इतरानीशादीन् होमस्तु प्रणवादिस्वाहान्ततत्तन्नामभिः । तथा च विष्णुधर्म्मोत्तरे ।
"एकैकां देवतां राम समुद्दिश्य यथाविधि ।
चतुर्थ्यन्तेन धर्म्मज्ञो नाम्ना च प्रणवादिना ।
होमद्वयमथैकैकं शतसङ्ख्यन्तु होमयेत् ॥"
शतसङ्ख्यमिति पूर्व्वोक्तवचनानुसारेण वास्तुयागेतरपरम् । स्मृतिः ।
"स्वाहावसाने जुहुयात् ध्यायन् वै मन्त्रदेवताम् ॥"
होमदक्षिणासम्प्रदानमाह छन्दोगपरिशिष्टम् ।
"ब्रह्मणे दक्षिणा देया यज्ञ या परिकीर्त्तिता ।
कर्म्मान्तेऽनुच्यमानायां पूर्णपात्रादिका भवेत् ॥
विद्धाहोमन्यूनदक्षिणार्द्धहरो भवेत् ।
स्वयंवेदुभयं कुर्य्यादन्यस्मै प्रतिपादयेत् ॥"
अन्यो यजमानभिन्नः । उभयं ब्रह्मकर्म्म होढकर्म्म च । उपसंहारे वास्तुयागमिति श्रुतेः सङ्कल्पवाक्ये तेनैवोल्लेखमाचरन्ति । अत्र मिलितामिलितदक्षिणादानात् फलतारतम्यम् । ॥ मात्स्ये ।
"ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत् ॥"
देवीपुराणम् ।
"कालज्ञस्यपतौ पूज्यो वैद्यवान् प्रीतितोऽर्चयेत् ।
ब्राह्मणान् भोजयित्वा तु वृत्तगीतादि कारयेत् ।
प्रासादं कारयेद्विद्वान् गृहं वापि मनोहरम् ।
कार्य्यस्तु पञ्चभिर्विल्वैर्विल्वबीजैरथापि वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुयागे बलिं हरेत् ॥"
इति मत्स्यपुराणे होमान्ते बलिविधानात् अत्रापि होमं कृत्वा बल्यादिप्रागुदितसर्व्वकर्म्मकरणाचारः । ॥ अत्र प्रजापतिनामानि ।
"प्रतिष्ठायां लोहितश्च वास्तुयागे प्रजापतिः ।
जलाशयप्रतिष्ठायां वरुणः समुदाहृतः ॥"
इति मत्स्यसूक्तवचनात् । एकाशीतिपदवास्तुयागे मत्स्यपुराणम् । भूम्यधिकारे ।
"पञ्चगव्यौषधिजलैः परीक्षित्वा तु सेचयेत् ।
एकाशीतिपदं कृत्वा रेखाभिः कनकेन तु ।
पञ्चाङ्गेन चालिख्य सूत्रेणाजोथ सर्व्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ।
सर्व्ववास्तुविभागे तु विज्ञेया नवधा नव ॥"
पञ्चगव्यमन्त्रमाह गरुडः ।
"गायन्त्रायाय गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्रावृति वै दधि ।
तेजोऽसीति घृतञ्चैव देवस्यत्वा कुशोदकम् ॥"
ओषधीराह काश्यपः ।
"व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः ।
यवाश्चौषधयः सप्त विप्रो ब्रूते धारिताः ॥"
व्रीहिः शरत्पक्षधान्यं षष्टिकाख्यम् । शालयो हैमन्तिकाः । दशेति वास्तुमण्डलवाचके उपविश्य पूर्व्वाभिमुखो गुरुः उत्तरत आरभ्य दशरेखाः प्राङ्मुखीर्यथादक्षिणं कुर्य्यात् । एवं नैर्ऋत्यासुपविश्य पश्चिमतः पूर्व्वापरगा दशोत्तरायता रेखाः कुर्य्यात् कनकशलाकादिना । रुद्रयामले तासां नामानि ।
"भ्रान्ता यशोवती कान्ता विशाला प्राग्वाहिनी ।
सुधी सुमनसा नन्दा सुभद्रा सुरथा तथा ॥"
इत्याद्या दश रेखाः ।
"हिरण्या सुव्रता लक्ष्मीर्विभूतिर्विमला प्रिया ।
जया कला विशोका च दृढा सन्ध्या दशोत्तराः ॥"
इत्यन्तदश रेखाः ।
"एकाशीतिपदं कृत्वा वास्तुकृत् सर्व्ववास्तुषु ।
पदस्थान् पूजयेद्देवान् चिंशत् पञ्चदशैव तु ।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्यास्तान्तत्त्वयोदश ।
नामतस्तानि वक्ष्यामि स्थानानि च निबोध मे ॥
ईशानकोणादिषु तान् पूजयेच्च विधानतः ।
शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः ॥
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ।
पूषा च वितथश्चैव गृहक्षतयमावुभौ ॥
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ।
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ॥
असुरः शोषपापौ च रोगोऽहिर्मुख्य एव च ।
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते च तदन्तश्चतुरः शृणु ।
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः ॥
आपश्चैवाथ सावित्रो जयो रुद्रश्चैव च ।
मध्ये नवपदे ब्रह्मा तस्याधौ च समीपगाः ॥
सर्व्वानेकान्तरान् विद्यात् पूर्व्वाद्यान्नामतः शृणु ।
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ॥
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ।
अपमाप्यवत्सश्च परितो ब्रह्मणः स्तुताः ॥
आपश्चैवापवत्सश्च पर्जन्योऽग्निदितिस्तथा ।
पादिकानाञ्च वर्गोऽयमेवं कोणेषु शोभतः ॥
तन्मध्ये तु बहिर्विंशद्विपदास्ते तु सर्व्वतः ।
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ॥"
एवमिति यथा ईशानकोणे कोष्ठचतुष्टये अन्तःस्थितैककोष्ठसहिते देवतापञ्चकमेवमाग्नेयादिकोणेष्वपीत्यर्थः । दिक्षु पूर्व्वादिदिक्षु । ॥
"वंशानिदानीं वक्ष्यामि नवधापि पृथक् पृथक् ।
वायुं यावत् तथा रोगात् पिलङ्ख्यः शिखिनं पुनः ॥
सुख्याद्भृङ्गमथो शोषादितिर्यं यावदेव तु ।
सुग्रीवाददितिं यावद्भल्लाञ्चयन्तमेव च ॥
एते वंशाः समाख्याताः क्वचिच्चैतर एव च ।
एतेषां चैव सम्पातः पदमध्ये समस्तथा ।
मर्म्म चैतत् समाख्यातं छिन्नमूलं कोणगं च यत् ।
स्तम्भन्यासेषु वर्ज्यानि तुलाविधिषु सर्व्वदा ॥
कीलोच्छिष्टोपघातानि वर्ज्येयेत् यत्नतो नरः ।
सर्व्वत्र वास्तुनिर्द्देशः पिलङ्वैश्वानरायतः ॥
मृद्गन्धर्व्वः समाविष्टो सुखे चापः समाश्रितः ।
पृथ्वीधरोऽर्य्यमा चैव स्तनयोस्तावधिष्ठितौ ॥
वक्षःस्थले चापवत्सः पूजनीयस्तथा बुधैः ।
नेत्रयोर्दितिपर्जन्यौ श्रोत्रे दितिजयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ च पूजनीयौ प्रयत्नतः ।
सोमसूर्य्योदयस्कन्धबाहवः पञ्च च पञ्च च ॥
रुद्रश्च राजयक्ष्मा च वामहस्तसमाश्रितौ ।
सावित्रः सविता तद्वद्दक्षिणमाश्रितौ ॥
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च पापयक्ष्मा च हस्तयोर्मध्यमान्वके ॥
तथैवासुरयक्ष्मौ च वामपार्श्वे समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वद्वितथः सग्रहक्षतः ॥
उर्व्वोर्यमाग्नुपौ श्रेयौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्भृङ्गसुग्रीवौ कक्षौ दौवारिको मृगः ॥
जयः शुक्रस्तथा मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये स तु पूज्यते ॥
चरकीञ्च विदारीञ्च पूतनां पापराक्षसीम् ।
ईशानमादिकोणेषु मण्डलाद्बाह्यतो यजेत् ॥"
पिलङ्ख्य इति पिलङ्खादारभ्य वह्निं यावत् यो वंशः प्रसारितस्तद्दायतो वास्तुपूरुषः । अमुपो वरुणः । पुष्पकः पुष्पदन्तः । तथा ।
"प्रदक्षिणन्तु कुर्व्वीत वास्तोः पदविलेखनम् ।"
कोष्ठानां लिखनं प्रदक्षिणं कार्य्यम् । तथा ।
"तर्जनी मध्यमा चैव तथाङ्गुष्ठश्च दक्षिणः ।
प्रवालरत्नकनकं फलपुष्पाक्षतोदकम् ।
सर्व्वत्र वामभागेषु ग्रस्तं पदविलेखने ॥" ॥
तथा ।
"वास्तौ परीक्षिते सम्यग्वास्तुदेहे विचक्षणः ।
वास्तूपशमनं कुर्य्यात् समिद्भिर्वैल्वकर्म्मणा ।

जीर्णोद्धारे तथोद्याने तथा गृहनिवेशने ।
द्वाराभिवर्द्धने तद्वत् प्रासादेषु गृहेषु च ॥
वास्तूपशमनं कुर्यात् पूर्व्वमेव विचक्षणः ।
एकाशीतिपदं लेख्यं लेखकैर्वास्तुपिण्डके ।
होमस्त्रिमेखले कार्य्यः कुण्डे हस्तप्रमाणके ॥"
विश्वकर्म्मा ।
"खाताधिके भवेद्रोगी हीने धेनुधनक्षयः ।
वक्रकुण्डे तु सन्तापो मरणं छिन्नमेखले ॥
मेखलारहिते शोको ह्यधिके वित्तसंक्षयः ।
भार्य्याविनाशकं कुण्डं प्रोक्तं योन्या विना क्षतम् ।
अपत्यध्वंसनं प्रोक्तं कुण्डं यत् कण्ठवर्ज्जितम् ॥"
वह्निसंहितायाम् ।
"तस्मात् सम्यक् परीक्ष्यैवं कर्त्तव्यं शुभवेदिकम् ।"
एवंविधकुण्डासम्भवे क्रियासारः ।
"कुण्डमेवंविधं न स्यात् स्फुटितं वा समाश्रयेत् ॥"
मत्स्यपुराणम् ।
"यवैः क्षीरतिलैश्चैव समिद्भिः क्षीरसम्भवैः ।
पालाशैः खादिरैरापामार्गोडुम्बरसम्भवैः ॥
कुशदूर्व्वामयैश्चापि मधुसर्पिःसमन्वितैः ।
कार्य्यस्तु पञ्चभिर्विल्वैर्विल्वबीजैरथापि वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुदेशे बलिं हरेत् ॥"
अत्र होमे मन्त्रानाह विष्णुधर्म्मोत्तरम् ।
"वास्तोष्पतेन मन्त्रेण यजेच्च गृहदेवताम् ।"
वास्तोष्पतेन वास्तोष्पतिदेवतेन पञ्चमन्त्रेण ।
बलिद्रव्यञ्च पायसं प्रागेव लिखितम् । * ।
ब्रह्मस्थाने ततः कुर्य्यादृत्विग्भ्यो दक्षिणामित्यादि । सुवर्णं गां वस्त्रयुगमाचार्य्याय निवेदयेत् । इत्यन्तमत्रापि बोध्यम् कल्पतरौ मत्स्यपुराणम् ।
"ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत् ।
द्विजांश्च पूजयेद्भक्त्या ये चान्ये गृहमागताः ॥
एतद्वास्तूपशमनं कृत्वा कर्म्म समाचरेत् ।
प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ॥
पुरवेशप्रवेशेषु सर्व्वदोषोपशान्तये ।
इति वास्तूपशमनं कृत्वा सूत्रेण वेष्टयेत् ॥"
इति मत्स्यपुराणे उपक्रमोपसंहारयोर्वास्तूपशमनत्वेनाभिधानात् वास्तूपशमनं कर्म्मणो नामधेयं इति तेनैवोल्लेखः सर्व्वदोषोपशान्तये इति स्मृतेश्च वास्तुसर्व्वदोषापनोदनं फलं संकल्पे तु तदुल्लेखः कार्य्यः । एतत्तु प्रारम्भप्रवेशान्यतरस्मिन्नवश्यं कर्त्तव्यम् । आवश्यकत्वे प्रमाणं प्रागेवोक्तम् । इति श्रीरघुनन्दनभट्टाचार्य्यविरचितं वास्तुयागतत्त्वं समाप्तम् ॥

वास्तूकं, क्ली, (वास्तु एव । वास्तु + स्वार्थे कन् ।) वास्तूकशाकम् । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते । १ । १६ ।
"तण्डुलीयकजीवन्तीसुनिषण्णकवास्तुकैः ॥")

वास्तुकी, स्त्री, चिल्लीशाकम् । इति राजनिर्घण्टः ॥

वास्तूकं, क्ली, (वसन्ति गुणा अत्रेति । वस + ऊलूकादयश्चेति साधुः ।) शाकविशेषः । वेतुया इति भाषा । तत्पर्य्यायः । वास्तू २ वास्तुकम् ३ वस्तुकम् ४ वस्तूकम् ५ छिन्नमोचिका ६ शाकराजः ७ राजशाकः ८ चक्रवर्त्ती ९ । अस्य गुणाः । मधुरत्वम् । सुशीतलत्वम् । चारत्वम् । मादनत्वम् । त्रिदोषजित्त्वम् । रोचनत्वम् । ज्वरहरत्वम् । महाशूलं नाशनत्वम् । मलमूत्रशुद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वास्तूकं वास्तुकञ्च स्यात् चारपत्रञ्च शाकराट् ।
तदेव तु दृढत्वत्वं रक्तं स्याद्रौढ़वास्तुकम् ।
प्रायशो यवमध्ये स्यात् यावत् शाकमतः स्मृतम् ।
वास्तूकद्वितयं स्वादु चारं पाके कटूदितम् ॥
दीपनं पाचनं रुच्यं लघु शुक्रबलप्रदम् ।
सरं श्लीहास्रपित्तास्रकफमिदोविषापहम् ॥"
इति भावप्रकाशः ॥

वास्तेयं, त्रि, वस्तिसम्बन्धि । वस्तसम्बन्धि । वस्तुसम्बन्धि । वास्तुसम्बन्धि । वस्तिवस्तवस्तुवास्तुशब्देभ्यः ष्ठीयप्रत्ययेन निष्पन्नम् । (वस्तौ भवम् । वस्ति + "हृतिकुक्षिकलशिवस्त्यस्त्यहेष्ठेञ् ।" ४ । ३ । ५६ । इति ठञ् । वस्तिभवम् । यथा, छान्दोग्योपनिषदि । ३ । १६ । २ ।
"तत् यत् रजतं सेयं पृथिवी यत् सुवर्णं सा द्यौर्यच्छरायु ते पर्व्वता यदुष्णं स मेघो नीहारो या धमनयस्ता नद्यो यदास्येयमुदकं स समुद्रः ।"
वस्तिरिव । वस्ति + "वस्तेष्ठेञ् ।" ५ । ३ । १०१ । इति ठञ् । वस्तिसदृशम् । इति सिद्धान्तकौमुदी ।)

वास्तोष्पतिः, पुं, (वास्तोर्गृहक्षेत्रस्य पतिरधिष्ठाता । "वास्तोष्पतिर्ध्रुवेलायां इन्द्रायाहावशिष्यते ।" इति निपातनात् असुक् तलच्च । यद्वा, "वास्त्वन्तरिक्षं तस्य पतिः पाता विष्णुर्वा ।" इति निघण्टुटीकायां देवराजयज्वा । ५ । ४ । ६ ।) इन्द्रः । इत्यमरः । (देवतामात्रम् । यथा, भागवते । १० । ५० । ५३ ।
"वास्तोष्पतीनाञ्च गृहैर्वलभीभिश्च निर्म्मितम् ।
भातुर्व्रजस्त्रीजनाकीर्णं यदुदेवगृहोत्तमम् ॥"
"किञ्च नगरग्रहादौ वास्तोष्पतीनां देवानाञ्च गृहैर्वलभीभिश्चन्द्रमालिकाभिश्च निर्म्मितम् ॥"
इति तट्टीकायां स्वामी । गृहपालयितरि, त्रि । यथा, ऋग्वेदे । ७ । ५४ । १ ।
"वास्तोष्पते प्रतिजानीह्यस्मान्
स्वावेशो अनमीवो भवानः ॥"
"हे वास्तोष्पते गृहस्य पालयितर्देव त्वं अस्मान् त्वदीयान् स्तोतॄनिति प्रतिजानीहि ।" इति तद्भाष्ये सायणः ॥)

वास्त्रः, पुं, (वस्त्रेण परिवृतो रथः । वस्त्र + "परिवृतो रथः ।" ४ । २ । १० । इति अण् ।) वस्त्रावृतरथः । इत्यमरः । २ । ८ । ५४ ॥ त्रि, वस्त्रसम्बन्धी ॥

वास्त्रः, त्रि, वारि तिष्ठति यः । वार्शब्दपूर्ब्बस्थाधातोर्डप्रत्ययेन निष्पन्नः ॥

वास्त्रः, पुं, उष्ट्रः । लोहम् । इति केचित् ॥ गृहेऽन्यमध्य इति साधुपाठः ॥

वास्त्रेयः, पुं, नागकेशरः । इति रत्नमाला ॥

वाह, ऋ ड यत्ने । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० अक० सेट् ।) ऋ, अववाहत । ड, वाहते । ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः इत्यादि सिद्धार्थमोष्ठादिश्च बहुधातुं मन्यते वर्णदेशशरत्वदेवौ । वस्तुतस्तु बहुवाद्यसम्मतत्वादेवोष्ठादिरनेनोपेक्षितः ववाहेति चङीप्रयोगस्य तु वाह ऋ ड यत्ने इत्यस्मात् गणसूत्रानित्यत्वात् परस्मैपदसिद्धिः अनेकार्थत्वात् सुसाधैवार्थः । अथवा वव इत्याह इत्येव व्याख्यानम् । इति दुर्गादासः ॥

वाहः, पुं, (उह्यतेऽनेनेति । वह + करणे घञ् ।) घोटकः । (यथा, अध्यात्मरामायणे । २ । ५ । ५६ ।
"इत्याज्ञप्तः सुमन्त्रोऽपि रथं वाहैरयोजयत् ॥")
परिमाणविशेषः । इत्यमरः ॥ यथाहुः ।
"प्रस्थं प्रकुञ्चकं सृष्टिः कुडवश्चतुरश्चयम् ।
चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमथाढ़कम् ॥
अष्टाढ़को भवेत् द्रोणो द्विद्रोणः शूर्प उच्यते ।
सार्द्धशूर्पो भवेत् खारी ह्येषां गोयुगदाहृता ।
तामेव भारं जानीयात् वाहो भारचतुष्टयम् ।"
इति भरतः ॥
चतुर्हस्तप्रमेदात् संख्यान्यथात्वम् । तथा च ।
"चतुराढ़को द्रोणः षोड़शद्रोणा खारी ।
विंशतिद्रोणः कुम्भः दशकुम्भो वाहः । इति स्वामी । * । भुजः । दृषः । वायुः । इति शब्दरत्नावली ॥ (प्रवाहः । यथा, कथासरित्सागरे । ६३ । ८१ ।
"यत्राश्विरात्र्यधूमादिमार्गाविव समागतौ ।
गङ्गायमुनयोर्वाही भातः सुगतये नृणाम् ॥"
वाहनम् । यथा, तत्रैव । ६२ । १५७ ।
"तच्छ्रुत्वा तत्र मैकानां राजा वाहसमुत्सुकः ।
जलादुत्तीर्य्य तत्पृष्ठमारोहत् गतभीर्मुदा ॥")

वाहकः, त्रि, (वहतीति । वह + खुल् ।) वहनकर्त्ता । वहति यः । इत्यर्थे णकप्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । १० । १८ । २१ ।
"आसेरुर्विविधाः क्रीड़ा वाह्यवाहकलक्षणाः ।
यत्रारोहन्ति जेतारो वहन्ति च पराजिताः ॥")

वाहद्विषन्, [त्] पुं, (वाहानां घोटकानां द्विषन् शत्रुः ।) महिषः । इत्यमरः ॥

वाहनं, क्ली, (वहत्यनेनेति । वह + करणे ल्युट् ।
"वाहनमाहितात् ।" ८ । ४ । ८ । इत्यत्र "वहेर्लुंटि वृद्धिरिडेव सूत्रे निपातनात् ।" इति भट्टोजिदीक्षितोक्त्या निपातनात् वृद्धिः ।) हस्त्यश्वरथदोलादिः । तत्पर्य्यायः । यानम् २ युग्यम् ३ पत्रम् ४ ओरणम् ५ । इत्यमरः । २ । ८ । ५८ ॥ * । (यथा, रघुः । ११ । १० ।
"पूर्व्ववृत्तकथितैः पुराविदः
सानुजः पितृसखस्य राघवः ।
उह्यमान इव वाहनोचितः
प्रादचारमपि न श्रमावयत् ॥")

देवा वाहनानि यथा,—
"विष्णुब्रह्माग्निवेर्हैवैर्ध्रियते सा जगन्मयी ।
सितप्रेतो महादेवी ब्रह्मा लोहितपङ्कजः ।
हरिर्हरिस्तु विज्ञेयो वाहनानि महौजसः ॥
खमूर्त्तया वाहनत्वन्तु तेषां यस्मान्न युज्यते ।
तस्मान्मूर्त्तान्तरं कृत्वा वाहनत्वं गताक्षयः ॥
यस्मिन् यस्मिन्महामाया प्रीयाति सततं
ध्रिया ।
तेन तेनैव रूपेण आसनान्यभवन् क्षयः ॥"
इति कालिकापुराणे ५७ अध्यायः ॥*॥
दैत्यदानवानां वाहनानि यथा,—
पुलस्त्य उवाच ।
"शृणुष्व कथयिष्यामि सर्व्वेषामपि नारद ।
वाहनानि समासेन एकैकस्यानुपूर्व्वशः ॥
रुद्रहस्ततलोत्पन्नं महाकायं महागजम् ।
श्वेतवर्णं महावीर्य्यं देवराजस्य वाहनम् ॥
रौद्रौजःसम्भवं भीमं कृष्णवर्णं मनोजवम् ।
पौष्करं नाम महिषं धर्म्मराजस्य नारद ॥
ब्रह्ममानस-सम्भूतं क्षामं जलधिसंक्रमम् ।
शिशुमारं दिव्यगतिं वाहनं वरुणस्य च ॥
रौद्रं शकटचक्राक्षं प्रेताकारनरोत्तमम् ।
अग्निकापादसम्भूतं वाहनं धनदस्य तु ॥
एकादशानां रुद्राणां वाहनानि महासने ।
गन्धर्व्वाश्च महावीर्य्या भुजगेन्द्राः सुदारुणाः ॥
श्वेतानि सौरभेयाणि वृषाणुग्रजवानि च ।
रथं चन्द्रमसश्चार्द्धं सहस्रहंसवाहनम् ॥
हयोष्ट्ररथवाहाश्च आदित्या मुनिसत्तम ।
कुञ्जरश्चाश्च वसवो यक्षाश्च नरवाहनाः ॥
किन्नरा भुजगारूढा हयारूढौ तथाश्विनौ ।
शरारूढाधिष्ठिता ब्रह्मन् मरुतो घोरदर्शनाः ॥
शुकारूढाश्च कवयो गन्धर्व्वाश्च पदातिनः ।
आरुह्य वाहनान्येवं खानि खान्यमरोत्तमाः ॥
सन्नह्य निर्य्ययुर्हृष्टा युद्धाय सुमहौजसः ॥*॥
नारद उवाच ।
गदितानि सुरादीनां वाहनानि महासने ।
दैत्यानां वाहनान्येवं यथावदनुमर्हसि ॥
पुलस्त्य उवाच ।
शृणुष्व दानवादीनां वाहनानि द्विजोत्तम ।
कथयिष्यामि तत्त्वेन यथावत् श्रोतुमर्हसि ॥
अन्यतस्य रथो युक्तः श्रेष्ठः परमवाजिभिः ।
कृष्णवर्णैः सहस्रारश्चिनस्वपरिमाणवान् ॥
प्रह्लादस्य रथो दिव्यः श्वेतवर्णैर्हयोत्तमैः ।
उह्यमानस्त्रयाष्टाभिः श्वेतरत्नमयः शुभः ॥
विरोचनस्य तु गजः कुम्भस्थो तुरङ्गमः ।
जम्भस्य तु रथो दिव्यो हयैः काञ्चनसन्निभैः ॥
शुक्रकर्म्मस्य तुरगो हयग्रीवस्य कुञ्जरः ।
रथो मयस्य विख्यातो दुन्दुभेश्च महोरगः ।
भ्रमरस्य विमानोऽभूद्वायोर्मृगाधिपः ॥"
इति श्रीवामनपुराणे ६ अध्यायः ॥
(वाहयतीति । वह+णिच्+ल्युः ।) वाहके, त्रि । यथा, कथासरित्सागरे । १२४ । २२०—२२२ ।

"स वाहनानां नागानां शीकरास्रुमहाभरैः ।
शूकरप्रेयसीपृष्ठे स्वयं चक्रे क्षणं वृपः ॥"
"नागानां वाहना मेघाः शूकरप्रेयसी क्षितिः ।
विष्णोः शूकररूपस्य सा हि प्रियतमोच्यते ।
तस्यां मेघाम्बुभिर्धान्यमुत्पन्नं चेत् किमद्भुतम् ॥")
वाहश्रेष्ठः, पुं, (वाहेषु वाहनेषु श्रेष्ठः ।) अश्वः । इति राजनिर्घण्टः ॥
वाहसः, पुं, (उह्यते इति । वह+"वहियुध्यां सित् ।" उणा० १ । ११६ । इति असच् । सच सित् ।) अजगरः । इत्यमरः ॥ (यथा, तैत्तिरीयसंहितायाम् । ५ । ५ । १४ । १ ।
"वाड्वाः प्रतिश्रुत्कायै वाहसः ॥")
वारिनिर्य्यासम् । गुग्गुलुरसकम् । इति मेदिनी । से, २७ ॥
वाहा, स्त्री, (वाह+अजादित्वात् टाप् ।) बाहुः । इत्यजयपालदिरूपकोषौ ॥
वा(वा)हावा(वा)हवि, च, (वाहुभिर्वाहुभिः प्रहृत्य इदं युद्धं प्रवृत्तं ततः ।) बाहुयुद्धम् । हाताहाति इति भाषा । इति सुग्धबोधव्याकरणम् ॥
वाहिकः, पुं, (वाहेन परिमाणविशेषेण क्रीतः । वाह+"असमासे निष्कादिभ्यः ।" ५ । १ । २० । इति ठक् ।) ठक्का । गोवाहः । प्रकटादि । इति धरणिः ॥ त्रि, भारवाहकश्च ॥
वाहित्थं, क्ली, गजकुम्भस्याधोभागः । इत्यमरः ॥
वाहिनी, स्त्री, (वाहा वाहनानि घोटकादीनि सन्त्यस्यामिति । वाह+इनिः । ङीप् ।) सेना । (यथा, रघुः । ११ । ६ ।
"लक्ष्मणानुचरमेव राघवं
नेतुमैच्छदधिरोप्यसौ वृपः ।
आश्रितं प्रयुयुजे न वाहिनीं
सा हि रक्षणविधौ तयोः क्षमा ॥" *॥
वाहः प्रवाहोऽस्यस्या इति ।) नदी । (यथा, रामायणे । २ । ८६ । ६ ।
"उत्तिष्ठत प्रबुध्यध्वं भद्रमस्तु हि वः सदा ।
नावः समुपकर्षध्वं तारयिष्याम वाहिनीम् ॥")
सेनाभेदः । तद्यथा । गजाः एकाशीतिः । रथाः एकाशीतिः । अश्वास्त्रिचत्वारिंशदधिकशतत्रयम् । पदातिकाः पञ्चाधिकचतुःशतम् । समुदायेन दशाधिकाष्टशतं वाहाः सन्त्यस्याम् । इत्यमरभरतौ । (यथा, महाभारते । १ । २ । १६—२१ ।
"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ।
पत्तिस्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ।
त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ।
स्मृतास्त्रिसस्तु वाहिन्यः एतनेति विचक्षणैः ॥"
प्रवाहशीला । यथा, मार्कण्डेये । ७८ । २६ ।
"यमुना च नदी यत्र कलिन्दान्तरवाहिनी ॥")
वाहिनीपतिः, पुं, (वाहिन्याः सेनायाः पतिः ।) सेनापतिः । इत्यमरः ॥ (यथा, महाभारते । ४ । २१ । ६ ।
"प्रवादेनेह मत्स्यानां राजा नाम्नायमुच्यते ।
अहमेव हि मत्स्यानां राजा वै वाहिनीपतिः ॥"
वाहिन्या नद्याः पतिः ।) समुद्रः । इति शब्दरत्नावली ॥
वाहीकः, पुं, देशभेदः । तत्पर्य्यायः । अश्वकः २ । इति हेमचन्द्रः ॥ अस्मिकजातिः । जाट् इति भाषा ॥ यथा,—
"तत्र वृद्धः पुरावृत्ता कथाः कश्चिद्विजोत्तमः ।
वाहीकदेशं मद्रांश्च कुत्सयन् वाक्यमब्रवीत् ॥
पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः ।
तान् धर्म्मबाह्यानशुचीन् वाहीकान् परिवर्ज्जयेत् ॥
शाकलं नाम नगरमापगानामनिम्नगा ।
जर्त्तिका नाम वाहीकास्तेषां वृत्तं सुनिन्दितम् ॥"
इति महाभारते कर्णपर्व्वणि २०० अध्यायः ॥
वा(वा)हुः, पुं, (बाधते प्रचुनिति । बाध लोड़ने +"अर्त्तिहृधिकमीति ।" उणा० । १ । २८ । इति कुः हकारादेशश्च ।) कक्षावधक्षुल्लग्पर्य्यन्तावयवः । यथा । भुजबाहुः प्रवेशो द्योरित्यमरः ॥ बहत्यनेन बाहुः नाम्नीति उण् । वक्षि बाहोऽदन्तः । बाहोऽप्यभुजयोः पुमान् । इति हेमोदरः । स्त्रियां बाहा च । बाहो बाहा भुजा बाहुर्दोषो दोषा च दोः पुमान् । इति कोषान्तरम् । इति तट्टीकायां भरतः ॥ कूर्परस्योर्द्धभागो बाहुरस्याधोभागः प्रबाहुः । यथा,—
"सुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च ।
रक्षत्यबाहतेऽत्यर्थं तस्य नारायणोऽव्ययः ॥"
इति विष्णुपुराणे ५ अंशे ५ अध्यायः ॥
बाहुप्रबाहू च कूर्परस्योर्द्धाधोभागौ । इति तट्टीका ॥ अन्यत् पवर्गीयबकारादिबाहुशब्दे द्रष्टव्यम् ॥ * ॥ अस्य शुभाशुभलक्षणं यथा,—
"निर्मांसौ चैव भग्नाक्षौ शिथौ च विपुलौ भुजौ ।
आजानुलम्बिनौ बाहू वृत्तौ पीनौ वृषेक्षणे ॥
निःखातौ रोमशौ हस्तौ श्रेष्ठौ करिकरप्रभौ ।
हस्ताङ्गुलय एव स्युरायुदीर्घा ललिताः शुभाः ॥
मेधाविनाश्च सूक्ष्माः स्युर्भ्रुवानां चिपिटाः स्मृताः ।
शूलाङ्कुशैर्भिनिःखाः स्युर्नताः स्युर्वृश्चिकन्दराः ॥
कपित्थकरा निःखा व्याघ्रतुल्यकरैर्धनम् ।
मणिवन्धैर्निगूढैश्च सुश्लिष्टशुभसन्धिभिः ॥
वृषा हीनैः करच्छेदः सङ्गन्थैर्धनवर्जिताः ।
पिप्पलीवित्तविहीनाश्च निखात करतलान्तराः ॥
संदष्टैश्चैव निम्नैश्च धनिनः परिकीर्त्तिताः ।
प्रोक्ता नरकदातारो विषमैर्विषमा नराः ॥
करैः करतलैश्चैव लाक्षाभैरीश्वरा नराः ।
परदाररताः पीतैः रूक्षैर्निःखा नरा मताः ॥
तुषतुल्यनखाः क्लीवाः कुटिलैः स्फुटितैर्नराः ।
निःखाश्चक्रनखैस्तद्वद्विवर्णैः परतस्कराः ॥
ताम्रैर्भूपा धनाढ्याश्च अरुणैः सपरैस्तथा ।
अङ्गुष्ठमूलजैः प्रेष्यः स्याद्दीर्घाङ्गुलिपर्व्वकः ॥

दीर्घायुः सुभगश्चैव निर्धनो विरलाङ्गुलिः । धनाङ्गुलिश्च सधनस्त्रिसो रेखाश्च यस्य वै ॥ नृपतेः करतलगा मणिबन्धे समुत्थिताः । युगमौनाङ्कितकरो भवेत् सत्यप्रदो नरः ॥ वज्राकाराश्च धनिनां मत्स्यपुच्छनिभा बुधे । गृहातपत्राग्निशिखागजपद्मोपमा नृपे ॥ कुम्भाङ्कुशपताकाभा दण्डालाभा निरीश्वरे । दामाभाश्च गवाढ्यानां खस्तिकाभा नृपेश्वरे ॥ चक्रासितोमरधनुःकुन्ताभा नृपतेः करे । उदूखलाभा यज्वानो वेदीभाश्चाग्निहोत्रिणि ॥ वापीदेशकुलाभाश्च त्रिकोणाभाश्च धार्मिके । अङ्गुष्ठमूलगा रेखाः पुत्राः सख्याश्च दारिकाः ॥ प्रदेशिनीगता रेखा कनिष्ठामूलगामिनी । भ्रातायुषश्च कुरुते छिन्नया तरुतो भयम् । निखाश्च बहुरेखाः स्युर्निर्द्रव्याश्चिपुके: क्षये: ॥"

इति गारुडे ६६ अध्यायः ॥

वा(वा`हुमूलं, क्ली, (बाह्वोर्मूलम् ।) भुजद्वयस्य आद्यभागः । काँक् इति वगल् इति च भाषा । तत्पर्य्यायः । कक्षः२ । इत्यमरः । भुजकोटरः ३ दोर्मूलम् ४ खण्डिकः ५ कक्षा ६ । इति हेमचन्द्रः ॥ (यथा, साहित्यदर्पणे । ३ । १२४

"कापि कुन्तलसंयानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥"

वा(वा)हुल:, पुं, कार्त्तिकमासः । इत्यमरः । अथ कार्त्तिकमाहात्म्यम् ।

नारद उवाच ।

"कार्त्तिकस्य तु माहात्म्यं मासस्य वक्तुमर्हसि ।
पूर्वं कार्त्तिकमाहात्म्यं यथावत् वक्तुमर्हसि ॥

ब्रह्मोवाच ।

साधु पृष्टं त्वया पुत्र लोकोद्धारव्रतैवे ।
कथयामि न सन्देहस्त्वत्समो नास्ति वैष्णवः ॥
एकतः सर्व्वतीर्थानि सर्व्वे यज्ञाः सदक्षिणाः ।
कार्त्तिकस्य च मासस्य कोट्यंशं नापि बिभ्रति ॥
एकतः पुष्करे वासः कुरुक्षेत्रे हिमाचले ।
एकतः कार्त्तिको वत्स ! सर्व्वपुण्याधिको मतः ॥
स्वर्णानि मेरुतुल्यानि सर्व्वदानानि चैकतः ।
एकतः कार्त्तिको वत्स ! सर्व्वदा केशवप्रियः ॥
हत्वा कोटिसहस्राणि पापानि सुबहून्यपि ।
निमेषार्द्धेन सर्व्वाणि विलयं यान्ति कार्त्तिके ॥
यत्किञ्चित् कुरुते पुण्यं विष्णुमुद्दिश्य कार्त्तिके ।
तदक्षयं भवेत् सर्व्वं सत्योक्तं तव नारद ! ॥
तस्य क्षयं न पश्यामि सत्यसूक्तं तवानघ ।
सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभम् ॥
तथात्मानं समादध्यात् यथा न स्यादितः पुनः ।
दुष्प्राप्यं प्राप्य मानुष्यं कार्त्तिकोक्तं चरेन्न यः ॥
धर्म्मं धर्म्मभृतां श्रेष्ठ स मातृपितृघातकः ।
कार्त्तिकं खलु वै मासं सर्व्वमासेषु चोत्तमम् ॥
पुण्यानां परमं पुण्यं पावनानाञ्च पावनम् ।
अस्मिन् मासे त्रयस्त्रिंशद्देवाः सन्निहिता ऋषे ।
अत्र स्नानानि दानानि भोजनानि व्रतानि च ।
तिलधेनुहिरण्यानां रजतं भूमिवाससाम् ॥
मोक्षदानानि कुर्व्वन्ति सर्व्वभावेन नारद ! ।
ब्राह्मणानाञ्च ये कन्यां दास्यन्ति विधिवन्नराः ।
दानानां फलमेतेषां प्राप्नुयुर्न्नात्र संशयः ।
तानि दानानि गृह्णन्ति दत्तानि विधिवत् सुराः ॥
यत्किञ्चित् कार्त्तिके दत्तं तपश्चैव तथा हुतम् ।
तदक्षयफलं प्रोक्तं विष्णुना लोककर्त्तृणा ।
वृथाणां मोक्षणं चैव कार्त्तिके मासि यैः कृतम् ।
अश्वमेधादिकं पुण्यं तेषां प्राप्तं न संशयः ॥
तस्मादयत्नेन विप्रेन्द्र कार्त्तिके मासि दीयते ।
यत्किञ्चित् कार्त्तिके दत्तं विष्णुमुद्दिश्य मानवैः ॥
हुतं दत्तञ्च विप्रेन्द्र तपश्चैव तथा कृतम् ।
तदक्षयं लभन्ते ते गृहदानं विशेषतः ॥
यथा नदीनां विप्रेन्द्र शैलानाञ्चैव नारद ।
उदधीनाञ्च विप्रर्षे क्षयो नैवोपपद्यते ।
तद्वत् कार्त्तिकमासे तु यत्किञ्चिद्दीयते सुने ।
न तस्यास्ति क्षयो विप्र पापं याति सहस्रधा ।
तस्मात् सर्व्वप्रयत्नेन कर्म्मणा मनसा गिरा ।
पापं समाचरेन्नैव कार्त्तिके विष्णुतत्परः ॥
ज्ञानाद्वा यदि वाज्ञानाद्दुष्कृतं येन यत्कृतम् ।
तत्तस्य नश्यति क्षिप्रं वायुना पांशवो यथा ॥
संप्राप्य कार्त्तिकं दृष्ट्वा परान्नं यस्तु वर्ज्जयेत् ।
दिने दिने च लक्षस्य फलं प्राप्नोत्यसंशयम् ॥
प्रदत्तानान्तु भक्ष्याणां कार्त्तिके नियमे कृते ।
अवश्यं विष्णुरूपत्वं प्राप्यते सुक्तिदं शुभम् ॥
न कार्त्तिकसमो मासो न कृतेन समं युगम् ।
न वेदसदृशं शास्त्रं न तीर्थं गङ्गया समम् ॥
न चान्नेन समं दानं न सुखं भार्य्यया समम् ।
न क्षयेस्तु समं वित्तं न लाभः सुरभीसमः ॥
न तपोऽनशनेस्तुल्यं न दमात् परमो जयः ।
न च धर्म्मो दयातुल्यो न ज्योतिश्चक्षुषा समम् ॥
न क्षुधो रसनातुल्या न प्रीतिस्तु सुतं विना ।
न कार्त्तिकसमो मासो वैष्णवानां प्रियः सदा ॥
अत्रैव चरेदृषस्तु मासं दामोदरप्रियम् ।
तिर्य्यग्योनिमवाप्नोति सर्व्वधर्म्मबहिष्कृतः ॥
दुर्ल्लभं वैष्णवं ज्ञानं दुर्ल्लभा वैष्णवी कथा ।
दुर्ल्लभा वैष्णवी दीक्षा दुर्ल्लभो जागरस्तथा ॥
दुर्ल्लभं कपिलादानं दुर्ल्लभं ताम्रबीजकम् ।
दुर्ल्लभो वैष्णवो विप्रो दुर्ल्लभं नीलमोक्षणम् ॥
दुर्ल्लभं पुष्करे दानं दुर्ल्लभाः कार्त्तिके तिलाः ।
दुर्ल्लभो जागरो विष्णोः पक्षयोरुभयोरपि ॥
दुर्ल्लभा कार्त्तिके विप्र द्वादशी हरिबोधिनी ।
दुर्ल्लभा मालतीपूजा दुर्ल्लभा तुलसी सुने ।
दुर्ल्लभं कार्त्तिके स्नानं दुर्ल्लभं साधुवन्दनम् ।
ग्रासग्रासग्रिलापूजा दुर्ल्लभा मुनिपुङ्गव ॥
सप्तद्वारा नदी यत्र दुर्ल्लभा स्नानशालिनाम् ।
कुलस्त्रीवर्त्तती कन्या दुर्ल्लभा दम्पती गृहाम् ॥
दुर्ल्लभा जननी लोके पिता चैव विशेषतः ।
दुर्ल्लभं साधुसङ्गानं दुर्ल्लभो धार्म्मिकः सुतः ॥
दुर्ल्लभैकादशी लोके दशमीसङ्गवर्ज्जिता ।
पञ्चाहयं व्रतं वत्स अयने दक्षिणोत्तरे ।
दुर्ल्लभं वैष्णवे दानं माघस्नानं नदीजले ।
ज्येष्ठाषाढे तु पानीयमित्यनं पौषमाघयोः ॥
ब्राह्मणं दुर्ल्लभं विप्र दुर्ल्लभं तीर्थसेवनम् ।
न्यायेनोपार्ज्जितं वित्तं दुर्ल्लभं कुलवर्द्धनम् ।
दुर्ल्लभं वत्स दयया पात्रे यत् प्रतिपादितम् ॥
पात्राणामपि तत्पात्रं सदाचारक्रियान्वितम् ।
संप्राप्य कार्त्तिकं मासं विमुखा ये जनार्द्दने ।
तेषां यमपुरे वासः पितृभिः सह नारद ! ॥"

इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये १४ अः ॥

ब्रह्मोवाच ।

"कार्त्तिकस्य तु माहात्म्यं पुनरेव शृणुष्व मे ।
यत् श्रुत्वा मुनिशार्दूल ! सर्व्वान् कामानवाप्नुयात् ॥
व्रतानामिह सर्व्वेषामेकभक्तमनुत्तमं फलम् ।
कर्त्तुर्विष्णुव्रतस्योक्तं शतजन्मानुगं फलम् ॥
आश्विनस्य सिते पक्षे एकादश्यां द्विजोत्तम ! ।
वैष्णवैर्वैष्णवं धर्म्मं प्रारभ्योऽस्य विधीयते ॥
यावत् कार्त्तिकशुक्लस्य पौर्णमासी तिथिर्भवेत् ।
तावदस्य व्रतस्योक्तं सम्यगाचरणं बुधैः ॥
अन्यथा तु कृतं विप्र व्रतमेतत् सुदुर्ल्लभम् ।
कार्य्यं सद्भिः प्रयत्नेन कार्त्तिके तु विशेषतः ॥
छिन्नपद्मानि पुण्यानि विप्रप्रीतिकराणि वै ।
कार्त्तिकस्य व्रतं विप्र ! श्रीविष्णुप्रीतिकारणम् ॥
तद्वर्द्धे भीष्मस्य व्रतं सुने तुष्टिकरं परम् ।
पुण्यं पञ्चदिनं प्रोक्तं दत्तं तस्मै च विष्णुना ॥
नरो वा यदि वा नारी कुरुते वैष्णवं व्रतम् ।
दिने दिने ऽश्वमेधस्य फलं प्राप्नोत्यसंशयम् ॥
अतस्त्वं विधिवत् पुत्र ! वैष्णवं व्रतमुत्तमम् ।
श्रीदामोदरतुष्ट्यर्थं प्रकुरुष्व समाहितः ॥
ऊर्ज्जे मासि मुनिश्रेष्ठ प्रातःकाले तथामले ।
मोक्षदेऽपि जले स्नानं स्वर्गदं प्रापिनामपि ॥"

इति पाद्मे उत्तरखण्डे ११५ अध्यायः ॥*॥

ब्रह्मोवाच ।

"पुराणश्रवणं यत्र कुर्व्वन्ति द्विजसत्तम ।
तेषां करस्थिता मुक्तिर्विद्यते नात्र संशयः ॥
कार्त्तिके मासि यो भक्त्या कुर्य्याद्ब्राह्मणभोजनम् ।
प्रत्यहं विष्णुलग्नार्थं स याति भवनं हरेः ॥
कार्त्तिके मासि यः कुर्य्यात् तिलतैलेन दीपकम् ।
अहोरात्रान् मुनिश्रेष्ठ स याति परमं पदम् ॥
कार्त्तिके मासि यो दद्यात् पादत्राणं द्विजन्मने ।
दद्याद्वस्त्रान्वितं वत्स यमं नैव स पश्यति ॥
यज्ञोपवीतं यो दद्यात् भूमिं वै ब्राह्मणाय तु ।
स याति ब्रह्मसदनं पुनरावृत्तिवर्ज्जितम् ॥
ताम्बूलञ्चैव यो दद्यात् सपूगं विधिवद्विज ।
गन्धर्व्वलोकमाप्नोति भुक्त्वा भोगान् मनोरमान् ॥
श्रीचन्दनञ्च यो दद्यात् देवपूजार्थमादरात् ।
विप्राय वेदविदुषे पुरन्दरपुरं व्रजेत् ॥
नारिकेलफलं वत्स सवस्त्रञ्च सदक्षिणम् ।
यो दद्याद्देवविदुषे स गृहवत् पुत्रवान् भवेत् ॥"

इति पाद्मे उत्तरखण्डे ११६ अध्यायः ॥

वा(वा)हुल्यं, क्ली, बहुलम् । बहुलस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

वाहुवारः, पुं, श्वेताम्लकवृक्षः । इति राजनिर्घण्टः ॥

अन्यत् पवर्गीयवकारादितशब्दे द्रष्टव्यम् ॥

वाह्यं, क्ली, (वाह्यते वाह्यते इति वाहि + ण्यत्।) यानम्। यथा, हेमचन्द्रे।
"यानं युग्यं पत्रं वाह्यं वह्यं वाहनधोरणे॥"
वाह्यः, त्रि, (वह + ण्यत्।) वहनीयः। (यथा, रघुः। ६। २०।
"मनुष्यवाह्यं चतुरस्रयान-
मध्यास्य कन्या परिवारशोभि।
विवेश मध्यान्तररामार्गं
प्रतिंवरा कल्पविवाहवेश्मा॥"
वहिस् + ष्यञ्।) वहिः। वाहिर इति भाषा। यथा, स्मृतिः।
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः॥"
वा(वा)ह्येन्द्रियं, क्ली, (वाह्यमिन्द्रियम्।) वहिरिन्द्रियम्। तद्यथा। चक्षुः। जिह्वा। नासिका। त्वक्। श्रोत्रम्। एतदेकैकगुणाः। यथा,—
"एते तु द्वीन्द्रियग्राह्या अथ सर्व्वार्थशब्दकाः।
वाह्येकैकेन्द्रियग्राह्या गुरुलाघवभावना॥"
इति भाषापरिच्छेदः॥
वाह्लिकः, पुं, वाह्लीकदेशः। इत्यमरटीकायां भरतः॥ (तद्देशजाते, त्रि। यथा, महाभारते। १। २२९। ४६।
"एष्यागामपि चाश्वानां वाह्लिकानां जनाधिपः।
ददौ शतसहस्राणि कन्याधनमनुत्तमम्॥");
वाह्लिकं, क्ली, कुङ्कुमम्। हिङ्गु। इत्यमरवाह्लीकं, मेदिनीकरौ॥
वाह्लीकः, पुं, देशभेदः। वलख इति आरवी भाषा। तद्देशजातघोटकः। इत्यमरमेदिनीकरौ॥ गन्धर्वविशेषः। इति शब्दरत्नावली॥ (प्रतीपपुत्रविशेषः। यथा, महाभारते। १। ९५। ४४।
"प्रतीपः खलु शैब्यासुपयेमे सुतन्दी नाम तस्यां पुत्रानुत्पादयामास देवापिं शान्तनुं वाह्लीकञ्चेति॥")
वि, अ, निग्रहः। नियोगः। पदपूरणम्। निश्चयः। असहनम्। हेतुः। अग्निः। विनियोगः। ईषदर्थः। परिभवः। गुह्यम्। अवलम्बनम्। विज्ञानम्। इति मेदिनी। वे, ७६॥ विशेषः। गतिः। आलम्भः। पालनम्। इति शब्दरत्नावली॥ उपसर्गविशेषः। अस्यार्थाः। वि विशेषवैरूप्यनानार्थगतिदानेषु। इति सुग्धबोधटीकायां दुर्गादासः॥
विः, पुं, स्त्री, (वाति गच्छतीति। वा + "वातेर्डिच्च।" उणा० ४। १३३। इति इ, स च डित्।) पक्षी। इत्यमरः॥ (यथा, साहित्यदर्पणे १० परिच्छेदे।
"के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाभयः।
किं ब्रूते विहगः स वा पतिपतिर्यत्रास्ति सुप्तो हरिः॥")
विंशः, त्रि, (विंशति + पूरणे डट्। तेलोपः।) विंशतेः पूरणः। इति सिद्धान्तकौमुदी॥ (यथा, मनुः। ८। ३६८।
"कुम्भीधान्यं यथापण्यं ततो विंशं नृपो हरेत्॥")
विंशकः, त्रि, (विंशत्या क्रीतः। विंशति + "विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम्।" ५। १। २४। इति ड्वुन्। "ति विंशतेर्डिति।" ६। ४। १४२। इति तिलोपः।) विंशतिक्रीतः। इति सिद्धान्तकौमुदी॥
विंशतिः, स्त्री, (द्वौ दश परिमाणस्य। पक्तिविंशतौति निपातनात् सिद्धम्।) संख्याविशेषः। विश इति कुड़ि इति च भाषा। यथा,—
"विंशत्यादाः सदैकत्वे सर्व्वाः संख्येयसंख्ययोः।
संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः॥"
इत्यमरः॥
तदाचकानि। रावणबाहवः १। अङ्गुलिः २। इति कविकल्पलता॥ नखम् ३। इति सतृकल्पसुलतावली॥
विंशतिकः, त्रि, विंशतियोग्यः। यथा। संख्यायाः कन् स्यादहीयेऽर्थे। विंशतित्रिंशद्भ्यां कन् संज्ञायाम्। अभ्यां कन् स्यात् असंज्ञायान्तु ड्वुन् स्यात्। विंशकः। संज्ञायान्तु विंशतिकः। इति सिद्धान्तकौमुदी॥
विंशतितमः, त्रि, (विंशतेः पूरणः। विंशति + डट्। "विंशत्यादिभ्यस्तमड्न्यतरस्याम्।" ५। २। ५६। इति तमड़ागमः।) विंशः। इति सिद्धान्तकौमुदी॥
विंशी, पुं, विंशतिः। इति सिद्धान्तकौमुदी॥
विकं, क्ली, सद्यःप्रसूतायाः गोः क्षीरम्। यथा,—
"क्षीरं सद्यःप्रसूतायाः पेयूषं पालनं विकम्।"
इति शब्दचन्द्रिका॥
विकङ्कटः, पुं, गोक्षुरः। इति शब्दमाला॥
विकङ्कतः, पुं, बदरीसदृशफलवृक्षः। वँइच इति भाषा। तत्पर्य्यायः। स्वादुकण्टकः २ सुवाहुवृक्षः ३ ग्रन्थिलः ४ आम्रपातः ५। इत्यमरः॥ शुकवारः ६ मधुपर्णी ७। इति रत्नमाला॥ कण्टपादः ८ वहुफलः ९ गोप्रघण्टा १० सुवाहुमः ११ स्थूलफलः १२ दन्तकाष्ठः १३ यज्ञीयवृक्षपादपः १४ पिण्डारः १५ हिमक्रः १६ पूतः १७ किङ्किणी १८ वैकङ्कतः १९ वृतिकरः २० कण्टिकारी २१। इति शब्दरत्नावली॥ किङ्किरी २२ सुगन्धारु २३। इति जटाधरः॥ अस्य गुणाः। अम्लमधुरत्वम्। पाकेऽतिमधुरत्वम्। लघुत्वम्। दीपनत्वम्। कामलासप्लीहनाशित्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"स एव यत्नतश्चास्य कण्टको वाम्रपादपि।
विकङ्कतफलं पक्वं मधुरं सर्व्वदोषजित्॥"
इति भावप्रकाशः॥
विकङ्कता, स्त्री, अतिवला। इति राजनिर्घण्टः॥
विकचः, पुं, (विगतः कचो यस्य केशभूम्न्यत्वात्। यद्वा, विश्लिष्टः कचो यस्य प्रभूतकेशत्वात्।) चपलः। केतुः। इति मेदिनी। चे, ॥ (यथा, हरिवंशसंहितायाम्। ११। १६।
"विकचा नाम गुरुसुताः
सितैकतारा ग्रहिपरित्यक्ताः।
यष्टिः पञ्चभिरधिका
स्निग्धा यास्याश्रिताः पापाः॥")
विकचः, त्रि, (विकचति विकशतीति। वि + कच् + अच्।) विकसितः। इत्यमरः॥ (यथा, माघे। ११। १६।
"विकचकमलगन्धैरन्वयुः भृङ्गमालाः
सुरभितमकरन्दं मन्दमावाति वातः।
प्रमदमदनमाद्यद्यौवनोद्यानरामा-
रमणरभसखेदस्वेदविच्छेददक्षः॥"*॥
विगतः कचो यस्य।) केशशून्यः। इति मेदिनी। चे, ॥ (यथा, महाभारते। ३। २५६। १२।
"विभ्रजानियतं वेषमुन्मत्त इव पाण्डव।
विकचः परुषा वाचो व्याहरन् विविधा मुनिः॥")
विकचा, स्त्री, महाश्रावणिका। इति राजनिर्घण्टः॥
विकच्छः, त्रि, (विगतः कच्छो यस्य।) कच्छरहितः। मल्लकच्छः। इति स्मृतिः॥
विकटः, पुं, (विकटति पूयरक्तादिकं वर्षतीति। वि + कट + पदाद्यच्।) विस्फोटकः। इति शब्दरत्नावली॥ साकुरुखट्टः। इति राजनिर्घण्टः॥ (धृतराष्ट्रस्य पुत्रविशेषः। यथा, महाभारते। १। ६७। ६६।
"दुर्मदो दुष्प्रधर्षश्च विवित्सुर्विकटः समः॥")
विकटः, त्रि, (वि + "संप्रोद्भ्यः कटच्।" ५। २। २६। इति कटच्।) विशालः। (यथा, माघे। १०। ४२।
"उत्तरीयविनयात्प्रमाणा
रुन्धती किल तदीक्षणमार्गम्।
आवरिष्ट विकटेन विवोढु-
र्वक्षसैव कृतमङ्गलमन्या॥")
विकरालः। इति मेदिनी। टे, ॥ सुन्दरः। इति विश्वः॥ दन्तुरः। इति धरणिः॥ (यथा, मार्कण्डेये। ४३। २०।
"करालैर्विकटैः क्रूरैः पुरुषैरुद्यतायुधैः।
पाषाणैस्ताड़िसः स्रग्वी सद्यो हन्तुं समैन्नरः॥")
विकृतः। इति त्रिकाण्डशेषः॥
विकटा, स्त्री, (विकट + टाप्।) मायादेवी। सा च बौद्धदेवीभेदः। तत्पर्य्यायः। मारीची २ त्रिमुखा ३ वज्रकालिका ४ वज्रवाराही ५ गौरी ६ पोत्तिरया ७। इति त्रिकाण्डशेषः॥
विकटकः, पुं, (विशिष्टः कण्टको यस्य।) यवासः। इति जटाधरः॥ वृक्षविशेषः। तत्पर्य्यायः। स्थूलफलः २ ग्रन्थिलः ३ स्वादुकण्टकः ४ गोकण्टकः ५ काकनासः ६ व्याघ्रपादः ७ घनद्रुमः ८ गर्जाफलः ९ घनफलः १० मेघस्तनितोद्भवः ११ सुदिरफलः १२ प्रावृष्यः १३ हास्यफलः १४ स्तनितफलः १५। अस्य गुणाः। कषायत्वम्। कटुत्वम्। उष्णत्वम्। रुचिप्रदत्वम्। दीपनत्वम्। कफहारित्वम्। वस्त्ररङ्गविधायकत्वञ्च। इति राजनिर्घण्टः॥
विकत्थनं, क्ली, (विकत्थ्यते इति। वि + कत्थ श्लाघायाम् + भावे ल्युट्।) मिथ्याश्लाघा। यथा,—

"शाखा प्रशंवार्थवादः सा तु मिथ्याविकत्थनम् ॥"
इति हेमचन्द्रः ॥
(यथा, भागवते । १ । १५ । १६ ।
"ग्रथ्यासनाटनविकत्थनभोजनादि-
ष्वैकाइयस्य ऋतवानिति विप्रलब्धः ॥"
विकत्थते आत्मानमिति । वि + कत्थ + घञ् । आत्मश्लाघाकारिणि, त्रि । यथा, महाभारते । २ । ७३ । ३२ ।
"अक्षयितारं द्वेष्टारं प्रवक्तारं विकत्थनम् ।
भीमसेननियोगात्ते हन्तारं कर्णमाहवे ॥"*॥
स्त्री, वि + कत्थ + णिच् + युच् । टाप् । आत्मश्लाघा । यथा, विश्वातविजयनाटके । २ ।
"सम्भावोक्तापि प्रज्ञानां न प्रशस्ता विकत्थना ।
प्रारदीयघनध्वानैर्व्याचोभिः किं भवाद्दशाम् ॥")
विकम्पितः, त्रि, विशेषेण कम्पविशिष्टः । विपूर्ब्बकम्पधातोः क्तप्रत्ययेन निष्पन्नः ॥
विकरः, पुं, (विकीर्य्यते इस्तपदादिकमनेनेति । वि + कृ + "ऋदोरप् ।" इत्यप् ।) रोगः । इति शब्दचन्द्रिका ॥
विकरालः, त्रि, (विशेषेण करालः ।) भयानकः । इति विकटशब्दार्थे मेदिनी ॥ (यथा, मार्कण्डेये । ११८ । ४८ ।
"विकरालं महावक्त्रमतिभीषणदर्शनम् ।
समुद्यतमहाशूलं प्रभूतमतिदारुणम् ॥")
विकर्णः, पुं, दुर्य्योधनपक्षीयशूरः । यथा,—
"अश्वत्थामा विकर्णश्च सोमदत्तिर्जयद्रथः ।
अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ॥"
इति भगवद्गीतायाम् १ अध्यायः ॥
(विगतौ कर्णौ यस्येति विग्रहे कर्णरहिते, त्रि ॥)
विकर्णिकः, पुं, सारस्वतदेशः । इति हेमचन्द्रः ॥
विकर्त्तनः, पुं, (विशेषेण कर्त्तनं यस्य । विश्वकर्म्मेयन्नखोदितत्वादस्य तथात्वम् ।) सूर्य्यः । अर्कवृक्षः । इत्यमरः ॥
विकर्म्मकृत, त्रि, (विकर्म्म विरुद्धं कर्म्म करोतीति । कृ + क्विप् ।) निषिद्धकर्म्मकारी । यथा,
"न साक्षी नृपतिः कार्य्यो न कारुककुशीलवौ ।
न श्रोत्रियो न लिङ्गस्थो न सङ्घेभ्यो विनिर्गतः ॥
नाधर्म्मिणो न वक्तव्यो न दस्युर्न विकर्म्मकृत् ।
न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः ॥"
इति मानवे । ८ । ६६ ॥
"विकर्म्मकृत् निषिद्धकर्म्मकारी ।" इति कुल्लूकभट्टः ॥
विकर्म्मस्थः, त्रि, (विकर्म्मणि विरुद्धाचारे तिष्ठतीति । स्था + कः ।) निषिद्धकृत् । यथा,—
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥
(तथा मनौ । ४ । ३० ॥)
विकर्षः, पुं, (विकृष्यतेऽसौ इति । यद्वा, विकृष्यन्ते परप्राणा अनेनेति । वि + कृष् + घञ् ।) वायुः । इति त्रिकाण्डशेषः ॥ (वि + कृष + भावे घञ् । विकर्षणम् ॥)
विकर्षणं, क्ली, (वि + कृष + ल्युट् ।) आकर्षणम् । विपूर्ब्बकृषधातोरनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, किरातें । ३ । ५७ ।
"अविलङ्घ्यविकर्षणं परैः
प्रथितव्यारवकर्म्मकार्म्मुकम् ॥"
विभागः । यथा, भागवते । ३ । ७ । ३० ।
"वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ।
ऋषीणां जन्मकर्म्माणि वेदस्य च विकर्षणम् ॥")
विकलः, त्रि, (विगतः कलो यस्येति विग्रहे ।) विरूपः । इति जटाधरः ॥ स्वभावहीनः । इति भरतः ॥ (यथा, महाभारते । १ । ७६ । १९ ।
"विधवानाथविकलान् रूपवतश्च बभार सः ।
सुदुर्गः सर्व्वभूतानामासीत् सोम इवापरः ॥")
विकलपाणिकः, पुं, (विकलः पाणिर्यस्य । कन् ।) स्वभावहीनपाणियुक्तः । यथा । कुणिर्विकलपाणिकः । इति हलायुधः ॥
विकला, स्त्री, (विगतः कलो मधुरालापो यस्याः । ऋतौ तु स्त्रिया मौनित्वविहितत्वात् ।) ऋतुहीना । इति शब्दरत्नावली ॥
विकलाङ्गः, त्रि, (विकलानि अङ्गानि यस्य ।) स्वभावतो न्यूनाङ्गः । तत्पर्य्यायः । अपोगण्डः २ । इत्यमरः ॥ पोगण्डः ३ अङ्गहीनकः ४ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ३१ । २४ ।
"जनयामास पुत्रौ द्वावरुणं गरुडं तथा ।
विकलाङ्गोरुणस्तत्र भास्करस्य पुरःसरः ॥")
विकली, स्त्री, (विगता कला यस्याः । गौरादित्वात् ङीष् ।) ऋतुहीना । इति शब्दरत्नावली ॥
विकल्पः, पुं, (विरुद्धं कल्पनमिति । वि + कृप + घञ् ।) भ्रान्तिः । (यथा, देवीभागवते । १ । १६ । ३२ ।
"विकल्पोपहतस्त्वं वै दूरदेशमुपागतः ।
न मे विकल्पसन्देहो निर्व्विकल्पोऽस्मि सर्व्वथा ॥")
कल्पनम् । इति मेदिनी । पे, ॥ (यथा, भागवते । ५ । १६ । २ ।
"तत्रापि प्रितव्रतरथचरणपरिखातैः सप्तभिः सप्त सिन्धवः उपकल्पिताः । यत एतस्याः सप्तद्वीपविशेषविकल्पसंज्ञया भगवान् खलु लक्षितः ॥"
संशयः । यथा, रघुः । १७ । ४६ ।
"राज्ञिन्दिवविभागेषु यथादिष्टं महीक्षिताम् ।
तस्मिंस्तेषां नियोगेन स विकल्पपराङ्मुखः ॥"
नानाविधः । यथा, मनुः । ६ । २२८ ।
"प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः ।
तस्य दण्डविकल्पः स्यात्तत्तथैवं नृपतेस्तथा ॥")
विविधकल्पः । स च द्विविधः । अवस्थितः । ऐच्छिकश्च । सोऽयाकाङ्क्षाविरहे युक्तः । तथा च भविष्ये ।
"स्मृतिग्राह्ये विकल्पस्तु आकाङ्क्षापूरणे सति ॥"
इच्छाविकल्पेऽदोषः । यथा,—
"प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना ।
प्रत्युच्चीवनहानिभ्यां प्रत्येकमदृष्टदोषता ॥"
व्रीहिभिर्यजेत यवैर्यजेत इति श्रूयते । तत्र व्रीहिप्रयोगे प्रतीतयवप्रामाण्यपरित्यागः । अप्रतीतयवाप्रामाण्यपरिकल्पनम् । इदन्तु पूर्व्वस्मात् पृथक् वाक्यं अन्यथा सप्तचयेऽपि यागसिद्धिः स्यात् । अतएव विकल्पे न उभयः शास्त्रार्थ इत्युक्तम् । प्रयोगान्तरे यवे उपादीयमाने परित्यक्तयवप्रामाण्योच्चीवनं व्रीहितयवाप्रामाण्यहानिरिति चत्वारो दोषाः । एवं व्रीहावपि चत्वारः । इत्यष्टौ दोषा इच्छाविकल्पे । तथा चोक्तम् ।
"एवमेवाष्टदोषोऽपि यद्व्रीहियववाक्ययोः ।
विकल्प आश्रितस्तत्र गतिरन्या न विद्यते ॥"
इति ॥
एकार्थतया विविधं कल्प्यते इति विकल्पः । तस्मादृष्टदोषभिया उपोह्य दे तिथी इत्यत्र न इच्छाविकल्पः किन्तु व्यवस्थितविकल्पः । इत्येकादशीतत्त्वम् ॥ (व्यवान्तरः कल्पः । यथा, भागवते । २ । ८ । ११ ।
"यावान् कल्पो विकल्पो वा यथा कालोऽनुमीयते ॥"
देवता । यथा, भागवते । १० । ८५ । ११ ।
"वैकारिको विकल्पानां प्रधानमनुशायिनाम् ॥"
"विविधं आधिदैवाध्यात्माधिभूतभेदेन कल्प्यन्ते इति विकल्पा देवास्तेषां कारणं वैकारिकः सात्त्विकोऽहङ्कारश्च त्वम् ॥" इति तट्टीकायां स्वामी ॥)
विकल्पनः, त्रि, (वि + कृप + ल्युट् ।) विकासी । इत्यमरटीकायां भरतः ॥ (यथा, नैषधे । २ । ५ ।
"अयमेत्य तडागनीडजै-
र्बहुपर्य्यन्नियताय गृह्यते ।
उदडीयत वेलतात् कर-
ग्रहजातस्य विकल्पनरवैः ॥")
विकषा, स्त्री, (विकषतीति । वि + कष गतौ + अच् । टाप् ।) मल्लिका । इत्यमरटीकायां रायमुकुटः । मांसरोहिणी । इति राजनिर्घण्टः ॥
विकल्पनः, त्रि, (वि + कष + ल्युट् ।) विकसनः । इत्यमरटीकायां भरतः ॥
विकषः, पुं, (विकषतीति । वि + कष + अच् ।) चन्द्रः । इति त्रिकाण्डशेषः ॥
विकषा, स्त्री, (विकषतीति । वि + कष + अच् । टाप् ।) मल्लिका । इत्यमरः ॥
विकसितं, त्रि, (वि + कस + क्तः ।) दलानामन्योन्यविश्लेषः । तत्पर्य्यायः । उज्जृम्भितम् २ उज्जृम्भम् ३ स्मितम् ४ उन्मिषितम् ५ विजृम्भितम् ६ उन्निद्रम् ७ उन्मीलितम् ८ विजृम्भितम् ९ उद्बुद्धम् १० उद्भिदुरम् ११ भिन्नम् १२ उद्भिन्नम् १३ हसितम् १४ विकसरम् १५ विकचम् १६ व्याकोषम् १७ फुल्लम् १८ संफुल्लम् १९

स्फुटम् २० उदितम् २१ दलितम् २२ दीर्णम् २३ स्फुटितम् २४ उत्पुल्लम् २५ प्रफुल्लम् २६। इति राजनिर्घण्टः। (यथा, आर्यासप्तशत्याम्। ४७६।

"यदवधिविहङ्गमाता विकसितकुसुमोत्करा व्रजत्रेणी।
पीतांशुकप्रियेयं तदवाध पक्षीपतेः पुत्री।")

विकसरः, त्रि, (विकसतीति। वि+कस गतौ+"स्रेग्भासपिसकसो वरच्।" ३। २। १७५। इति वरच्।) विकासशीलः। तत्पर्य्यायः। विकासी २। इत्यमरः। "विकसति कस ज गतौ दन्त्यान्तः यायाय भासकसेति वरे विकसरः।

विकासः स्फुटने यक्षाविति दन्त्यान्ते घरणिः।
'कुमुदप्रियेरत्र जलाशयोषिता
सुदा रमन्ते कलभा विकसरैः।
प्रगीयते सिद्धगणैश्च योषिता
सुदा रमन्ते कलभा विकसरैः।'

इति माघयमकेऽपि दन्त्यवत्त्वम्। (३।३३) कथ वधे मूर्द्धन्यान्त इत्यस्य रूपमिति केचित्। कथ ग्रन्थे इत्यस्य तालव्यान्तस्य रूपमिति केचित्।" इति तट्टीकायां भरतः। (यथा, कथासरित्सागरे। ४। १५।

"एकस्याः सोत्सुका दृष्टिर्द्वितीयस्या विकसरा।
युतेः पार्श्वमपश्यन्त्यास्तदाख्यातुमिवाययौ।")

विकसरा, स्त्री, (विकसर+टाप्।) रक्तपुनर्नवा। इति राजनिर्घण्टः। (विवरणमस्या रक्तपुनर्नवाशब्दे ज्ञातव्यम्।)

विकारः, पुं, (वि+कृ+घञ्।) प्रकृतेरन्यथाभावः। तत्पर्य्यायः। परिणामः २ विक्रतिः ३ विक्रिया ४। इत्यमरः। विक्रत्या ५। इति भरतः। केचित्तु पूर्व्वद्वयं प्रकृतिध्वंसजन्यविकारे यथा काष्ठस्य विकारो भस्म। मृत्पिण्डस्य घट इति। परद्वयं विकारमात्रे यथा मुखस्य विक्रतिः क्रोधरक्तता। काष्ठस्य भस्म च। इति भरतः। (यथा, कुमारे। ७। ६५।

"अपि ग्रयनसखिभ्यो दत्तवाचं कथञ्चित्
प्रमथसुखविकारैर्हर्षयामास गूढम्।"

प्रकृतिविक्रतिः। यथा, हरिवंशे। २४६। ३५।

"शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च।
प्रकृतिश्च विकारश्च यच्चान्यत्कारणं महत्।"

अस्य विशेषविवरणं विक्रतिशब्दे द्रष्टव्यम्।) रोगः। इति मेदिनी। रे, २१८। (यथा,—

"विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते।
सुखसंज्ञकमारोग्यं विकारो दुःखमेव च।"

इति चरके सूत्रस्थाने नवमेऽध्याये।

मत्स्यः। तत्पर्य्यायो यथा,—

"मत्स्यो मीनो विकारश्च झषो वैशारिको-ऽब्जः।
शकुलो पृथुरोमा च स सुदर्शन इत्यपि॥
रोहितास्तु ये जीवास्ते मत्स्याः परिकीर्त्तिताः।"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।)

विकालः, पुं, (विरुद्धः कार्य्यानर्हः कालः।) देवपैत्रादिकर्म्मणि विरुद्धकालः। वैकाल इति भाषा। तत्पर्य्यायः। सायः २ दिनान्तः ३ सायाह्नः ४ सायम् ५। इति शब्दरत्नावली। उत्सवः ६ विकालकः ७। इति त्रिकाण्डशेषः। (यथा, मार्कण्डेये। ३५। ३०।

"न लङ्घयेत् तथैवाह्नः स्त्रीवनोद्यानानि च।
नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत्कदाचन।")

विकालकः, पुं, (विकाल एव। स्वार्थे कन्।) विकालः। इति त्रिकाण्डशेषः।

विकालिका, स्त्री, (विज्ञातः कालो यया। कन्। टापि अत इत्वम्।) मानरन्ध्रा। ताम्बी। इति त्रिकाण्डशेषः। ताँबी इति भाषा।

विकाश्यः, पुं, (वि+काश दीप्तौ+घञ्।) रहः। प्रकाशः। इत्यमरटीकायां भरतः। विकाशो विजने स्फुटे। इत्यजयः। (यथा, राजतरङ्गिण्याम्। ४। १५५८।

"विकाशः केषाञ्चित् नयनविषमैर्विद्रुदयैः
परेषामुद्भूतिः श्रवणकटुभिर्दीर्घरसितैः।
नवेहा काप्यन्योपक्रमपरिहीना जलसुचो
जड़ो वर्षादन्यं गणयति गुणं नास्य तु जनः।")

विकाशनं, क्ली, (वि+काश+ल्युट्।) विकाशः। विपूर्ब्व-काश ङ दीप्तौ इत्यस्मात् अनट्प्रत्ययेन निष्पन्नम्।

विकाशी, [न्] त्रि, (विकाशोऽस्यास्तीति। विकाश+इनिः।) विकाशशीलः। इत्यमरटीकायां रायमुकुटः। (यथा, मार्कण्डेये।

"कात्यायनी तुष्टवुरिष्टलाभात्
विकाशिवक्त्रास्तु विकाशिताशाः।")

विकाशी, [न्] त्रि, (विकाश+इनिः।) विकाशशीलः। इत्यमरटीकायां भरतः।

विकाशी, [न्] त्रि, (विकास+इनिः। विकासते इति। वि+कास+विनिर्वा।) विकसरः। इत्यमरः।

विकिरः, पुं, (विकिरति क्षुत्तिकादीन् भोजनार्थमिति। वि+कृ+विक्षेपे+इगुपधेति कः।) पक्षी। इत्यमरः। (अस्य पर्य्यायो यथा,—

"पक्षी खगो विहङ्गश्च विहगश्च विहङ्गमः।
शकुनिर्विः पतत्री च विष्किरो विकिरोऽण्डजः।"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।) क्रूरः। इति त्रिकाण्डशेषः। (विकीर्य्यते इति। वि+कृ+घञर्थे कः।) पूजाकालीनविघ्नोत्सारणार्थक्षेपणीयतण्डुलादिः। यथा। पठिति सप्त जनान् विकिरानादाय।

"अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया।"

इति विकिरेत्।

यथा,—

"लाजचन्दनसिद्धार्थभस्मदूर्व्वाकुशाक्षताः।
विकिरा इति सन्दिष्टाः सर्व्वविघ्नौघनाशकाः।"

इति तन्त्रसारः।

अग्निदग्धादीनां पिण्डम्। यथा, मनुः। ३।२४५।

"असंस्कृतप्रमीतानां योगिनां कुलयोषिताम्।
उच्छिष्टं भागधेयं स्याद्यैश्च विकिरश्च यः।"

अपि च।

"पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते।
स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते।"

इति श्राद्धतत्त्वम्।

(यथा च मार्कण्डेये। ३१। १२।

"ये वा दग्धाः कुले बालाः क्रियायोग्या न संस्कृताः।
विपन्नास्तेऽन्नविकिरसम्मार्ज्जनजलाग्निगः।")*।

जलविशेषे, क्ली। तथा च चिन्तामणिधृतवचनम्।

"नद्यादिनिकटे भूमिर्या भवेद्बालुकामयी।
उद्धायते ततो यत्तु तज्जलं विकिरं विदुः।
विकिरं शीतलं स्वच्छं निर्दोषं लघु च स्मृतम्।
तुवरं खादु पित्तघ्नं मनाक् कफकरं स्मृतम्।")

विकिरणं, क्ली, (वि+कृ+ल्युट्। इत्वं रपरत्वम्।) विक्षेपणम्। विक्षिपनम्। विज्ञानम्। इति कृधात्वर्थदर्शनात्। (अर्कदृष्टे, पुं। इत्यमरः। २। ४। ८०।)

विकीरणः, पुं, अर्कवृक्षः। इत्यमरः। २।४।८०। (तथास्य पर्य्यायः।

"अलर्को गुणरूपः स्याच्छन्दारो वसुकोऽपि च।
श्वेतपुष्पः सदापुष्पः सवालार्कः प्रतीयसः।
रक्तोपरोऽर्कनामा स्यादर्कपर्णो विकीरणः।
रक्तपुष्पः शुक्लफलस्तथास्फोटः प्रकीर्त्तितः।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।)

विकीर्य्यः, त्रि, (विकीर्य्यते क्षिप्यते इति। वि+कृ+क्तः।) विक्षिप्तः। छड़ान इति भाषा। यथा,—

"अथ सा पुनरेव विह्वला
वसुधालिङ्गनधूसरस्तनी।
विललाप विकीर्य्यमूर्द्धजा
समदुःखामिव कुर्व्वती स्थलीम्।"

इति कुमारसम्भवे ४ सर्गः।

विकीर्णरोम, [न्] क्ली, (विकीर्य्यन्ति रोमाण्यस्मिन्निति।) स्त्रीयोनिः। इति राजनिर्घण्टः।

विकीर्णसंज्ञं, क्ली, (विकीर्णमिति संज्ञा यस्य।) स्त्रीयोनिः। इति राजनिर्घण्टः।

विकुक्षिः, पुं, इक्ष्वाकुराजपुत्रः। यथा,—

"वैवस्वतमनोराद्यो दिक्ष्वाकुः पृथिवीपतिः।
तस्य पुत्रशतज्येष्ठो दिक्ष्वाकुर्विकुक्षिश्च उच्यते।
सोऽयोध्याधिपतिर्वीरस्तस्य पञ्चदश स्मृताः।"

इति वह्निपुराणे सागरोपाख्याननामाध्यायः।

विकुर्व्वाणः, त्रि, (विकुरुते इति। वि+कृ+शानच्।) हर्षमाणः। इत्यमरः। (विक्षिपति प्राप्नोति च। यथा, सांख्यदर्शने। १। ६२।

"आकाशस्तु विकुर्व्वाणः शब्दमात्रं ससर्ज्ज ह।
बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः।")

विकुस्रः, पुं, (विकसतीति। वि+कस+"वौ कसेः।" उणा० २। १५। इति रक्। उत्वञ्च पृषोदरादित्वात्।) चन्द्रः। इत्युणादिकोषः।

विकूणिका, स्त्री नासिका। इति हेमचन्द्रः॥
विकृतं, त्रि, (वि+कृ+क्तः।) वीभत्सम्। रोगितम्। असंस्कृतम्। इति मेदिनी। ते, १५८॥ (अङ्गविहीनम्। यथा, मनुः। ६। २४७।
"बालाश्च न प्रमीयन्ते विकृतं न च जायते॥"
अप्रकृतिस्थः। यथा, महाभारते।३।१११।१८।
"अथर्ष्यशृङ्गं विकृतं समीक्ष्य
पुनः पुनः पौच्य च कायमस्य।
अवेक्ष्यमाणा शुनकैर्जगाम
कृत्वाग्निहोत्रस्य तदापदेशम्॥"*॥
मायावी। यथा, रघुः। १२। ३६।
"लक्ष्मणः प्रथमं श्रुत्वा कोकिलामञ्जुवादिनीम्।
ग्रिवाधीरस्वनां पश्चात् बुबुधे विकृतेति ताम्॥")
विकृतं, क्ली, विकारः। तस्य लक्षणम्। यथा,—
"क्षीभानेर्षादिभिर्यच्च नीयते खं विवक्षितम्।
व्यज्यते चेष्टयेदं विकृतं तद्विदुर्बुधाः॥"
इत्युज्ज्वलनीलमणिः॥
प्रभवादिषष्टिसंवत्सरान्तर्गतचतुर्विंशवर्षम्। यथा, भविष्यपुराणे।
भैरव उवाच।
"सर्व्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते।
ग्रिरोवक्षोऽक्षिरोगाश्च पापाद्धि विकृते जनाः॥"
इति ज्योतिस्तत्त्वम्॥
(नायिकालङ्कारविशेषः। यथा, साहित्यदर्पणे। ३। १४६।
"वक्तव्यकालेऽप्यवचो व्रीड्या विकृतं मतम्॥")
विकृतिः, स्त्री, (वि+कृ+क्तिन्।) विकारः। इत्यमरः॥ (यथा, कुमारे। ७। ३४।
"यथाप्रदेशं भुजगेश्वराणां
करिष्यतामाभरणान्तरत्वम्।
शरीरमात्रं विकृतिं प्रपेदे
तथैव तस्युः फणरत्नशोभाः॥")
रोगः। डिम्बः। मद्यादिः। इति हेमचन्द्रः॥
(सांख्योक्तविकृतिः। यथा, सांख्यकारिकायाम्। ३।
"मूलप्रकृतिरविकृति-
र्महदाद्याः प्रकृतिविकृतयः सप्त।
षोड्शकस्तु विकारो
न प्रकृतिर्न विकृतिः पुरुषः॥"
संक्षेपतः श्राद्धस्य चतस्रो विधाः। कस्मिन्नर्थे प्रकृतिरेव कस्मिन्नर्थे विकृतिरेव कस्मिंश्चिदुभयरूपः। तत्र का प्रकृतिरेवेत्यत उक्तं मूलप्रकृतिरविकृतिरिति। प्रकरोतीति प्रकृतिः प्रधानं सत्त्वरजस्तमसां साम्यावस्था सा प्रकृतिः प्रकृतिरेव प्रत्यर्थः। कस्मादित्यत उक्तम् मूलेति मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः विश्वस्य कार्य्यसंघातस्य सा मूलं न तस्या मूलान्तरमस्तीतिभावः। कतमाः पुनः प्रकृतिविकृतयः कियत्यश्च इत्यत उक्तं महदाद्याः प्रकृतिविकृतयः सप्तेति। प्रकृतयश्च ता विकृतयश्च ता इति। तथाहि महत्तत्त्वमहङ्कारस्य प्रकृतिर्विकृतिश्च मूलप्रकृतेः। एवमहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणाञ्च प्रकृतिर्विकृतिश्च महतः। एवं पञ्चतन्मात्राणि भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाहङ्कारस्य। अथ का विकृतिरेव कियती च इत्यत उक्तं षोड्शकस्तु विकार इति षोड्शसंख्यापरिमितो गणः षोड्शकः। तु शब्दोऽवधारणे भिन्नक्रमश्च। पञ्चमहाभूतान्येकादशेन्द्रियाणि चेति षोड्शको गणो विकार एव न प्रकृतिरिति। यद्यपि पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः एवं तद्विकारभेदानां दध्यङ्कुरादेश्चास्यापि गवाद्यो बीजाद्यो वा न पृथिव्यादिभ्य स्तत्त्वान्तरम्। तत्त्वान्तरोपादानत्वञ्च प्रकृतित्वमिहाभिप्रेतमिति न दोषः सर्व्वेषां गोघटादीनां स्थूलता इन्द्रियग्राह्यता च समेति न तत्त्वान्तरम्। अनुभयरूपमुक्तं तदाह न प्रकृतिर्न विकृतिः पुरुष इति तत्त्वकौमुदी॥ ३॥)
विकृष्टः, त्रि, विशेषेण कृष्टः। आकृष्टः। विपूर्ब्बकृषधातोः क्तप्रत्ययेन निष्पन्नः॥
विकृष्टकालः, पुं, (विकृष्टः कालः।) चिरकालः। यथा,—
"विकृष्टकालैर्यो वेगैर्मन्दैः समभिवर्त्तते।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधावति॥"
विकृष्टकालैः चिरेण। जत्रु कण्ठोरसोः सन्धिः। इति भावप्रकाशः॥
विकेशी, स्त्री, (विगतः केशो यस्याः। ङीष्।) केशवर्জ্জिता। पटवर्त्तिः। इति धरणिः॥ महीरूपग्रिवस्य पत्नी। यथा,—
"सूर्य्यो जलं मही वह्निर्वायुराकाशमेव च।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात्॥
सुवर्चला तथैवोषा विकेशी चापरा ग्रिवा।
स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमम्।
सूर्य्यादीनामिमाः पत्न्यो रुद्राद्यैर्नामभिः सह॥"
इति मार्कण्डेयपुराणे रुद्रसर्गः॥
विकोकः, पुं, दनुजासुरपुत्रः। स च कल्किदेवेन हतः। यथा,—
"कल्किः कोकविकोकाभ्यां गदापाणिर्युधां पतिः।
युयुधे विप्लवे विष्णुर्लोकानां जनयन् भयम्॥
दनुजासुरस्य पुत्रौ तौ नमारौ शुकुनेर्हरिः।
तयोः कल्किः संयुयुधे मधुकैटभयोर्यथा॥
तयोर्गदाप्रहारेण चूर्णिताङ्गस्य भूपतेः।
कराच्युतोऽपतद्भूमौ दृष्ट्वोदस्यिन्यो जनाः॥
ततः पुनः क्रुधा विष्णुर्जगृध्णुर्मेरुमाशुजः।
तेनैव ग्रिरसस्तस्य विकोकस्याच्छिनत् प्रभुः॥"
इति कल्किपुराणे २१ अध्यायः॥
विकोषः, त्रि, (विगतः कोषो यस्य।) कोषरहितः। निष्कोषः। इति पुराणम्॥ (यथा, महाभारते। ३। ६२। १८।
"परिधावत्यथ जले इतश्चेतश्च भारत।
आससाद सभोद्देशे विकोषं खड्गमुत्तमम्॥"
आच्छादनरहितः। यथा, मनोः। ११। ७६।
श्लोकटीकायां कुल्लूकः।
"गुरुभार्य्यागामी विकोषमेढ्रवृषणत्वमिति॥")
विक्रः, पुं, (विक् इति कायति शब्दायते इति। कै+कः।) करिशावकः। इति त्रिकाण्डशेषः॥
विक्रमः, पुं, (विशेषेण क्रामतीति। वि+क्रम+अच्।) विष्णुः। यथा, विष्णुसहस्रनामस्तोत्रे।
"ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः॥"
(वि+क्रम+घञ्।) शौर्य्यातिशयः। सत्पर्य्यायः। अतिग्रस्तिता २। इत्यमरभरतौ॥ (यथा, रघुः। १२। ८७।
"अन्योन्यदर्शनप्राप्तविक्रमावसरं चिरात्।
रामरावणयोर्युद्धं चरितार्थमिवाभवत्॥")
क्रान्तिमात्रम्। इति मेदिनी। मे,५४॥ (पादविक्षेपः। यथा, रामायणे। १। १। १०।
"आजानुबाहुः सुशिराः सुललाटः सुविक्रमः॥")
विक्रमादित्यराजा। यथा,—
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"
इति नवरत्नश्लोकः॥
चरणः। शक्तिः। इति राजनिर्घण्टः॥
(स्थितिः। यथा, भागवते। २। ८। २०।
"संभवः सर्व्वभूतानां विक्रमः प्रतिसंक्रमः।
इदापूर्णस्य कास्यानां त्रिवर्गस्य च यो विधिः॥"
"विक्रमः स्थितिः प्रतिसंक्रमो महाप्रलयः।"
इति तट्टीकायां श्रीधरस्वामी॥ *॥) प्रभवादिषष्टिसंवत्सरान्तर्गतचतुर्द्दशवर्षम्। यथा
"जायन्ते सर्व्वशस्यानि मेदिनी निरुपद्रवा।
सर्व्वं मधु गवाच्च महार्घ्यं विक्रमे प्रिये॥"
इति ज्योतिस्तत्त्वम्॥
(खनामख्यातकविविशेषः। स च नेमिदूताख्यकाव्यं विरचितवान्। तथा च नेमिदूते उक्तम्।
"तद्दःखाय प्रचरकवितुः कालिदासस्य काव्या-
दूर्ध्वं पादं सुपदरचितान् मेघदूतादृहीत्वा।
श्रीमन्नेमेश्चरितविशदं साङ्गवस्त्राङ्गजन्मा
चक्रे काव्यं बुधजनमनःप्रीतये विक्रमाख्यः॥"
वत्सप्रीपुत्रः। यथा, मार्कण्डेये। ११७। १।
"तस्य तस्यां सुनन्दायां पुत्रा द्वादश जज्ञिरे।
प्रांशुः प्रवीरः शूरश्च सुचक्रो विक्रमः क्रमः॥")
विक्रमादित्यः, पुं, (विक्रमेणादित्य इव।) खनामख्यातो राजा। स च उज्जयनीदेशाधिपतिः संवत्कर्त्ता च। तत्पर्य्यायः। साहसाङ्कः २ शकारिः ३। इति जटाधरः॥ अस्य विवरणं द्वात्रिंशत्पुत्तलिकाकथायां तथा विक्रमार्कशब्दे च द्रष्टव्यम्॥ (मोदकविशेषः। यदुक्तं चिन्तामणौ। यथा,—
"घृते गुन्द्रपलं विंशत् पचेत् सम्यगभिन्नवरः।
उत्तार्य्य च क्षिपेदेषां खण्डञ्च पलविंशतिः॥

तालमूली तुरङ्गी च शुण्ठी चेति पलार्द्धकम्।
जातीफलञ्च कङ्कोलं लवङ्गञ्चेति कार्षिकम्॥
मालतीञ्च कुलिञ्जञ्च कर्पूरं करभं त्वचम्।
एतेषां कोलमात्राञ्च आयसस्य पलद्वयम्॥
पञ्चैकं मोदकं कृत्वा एकैकं भक्षयेद् दिने।
धातुक्षीणोऽग्निहीनश्च बलानलकरं परम्॥
नेत्ररोगेषु सर्व्वेषु कासश्वासे च कामले।
प्रमेहान् विंशतिं हन्याद्विक्रमादित्यमोदकः॥")

विक्रमार्कः, पुं, (विक्रमेण अर्क इव।) विक्रमादित्यः। इति केचित्॥ (अथ विक्रमार्कवर्णनं सन्दर्भति ज्योतिर्व्विदाभरणसमाप्तौ श्रीकालिदासः।

"वर्षे श्रुतिस्मृतिविचारविवेकरम्ये
श्रीभारते खधृतिसम्मित-१८०- देशपीठे।
मत्तोऽधुनाकृतिरियं सति मालवेन्द्रे
श्रीविक्रमार्कनृपराजवरे समाकौत्॥"

प्रथमं नृपसभायां पण्डितवर्गं वर्णयति।

"शङ्कुः सुवाग् वररुचिर्म्मणिरंशुदत्तो
जिष्णुस्त्रिलोचनहरी घटकर्परारव्यः।
अन्येऽपि सन्ति कवयोऽमरसिंहपूर्व्वा
यस्यैव विक्रमनृपस्य सभासदोऽमी॥
सत्यो वराहमिहिरः श्रुतसेननामा
श्रीबादरायणमणित्थकुमारसिंहाः।
श्रीविक्रमार्कनृपसंसदि सन्ति चैते
श्रीकालतन्त्रकवयश्चपरे मदाद्याः॥
धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटखर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"

अथ परिजनान् वर्णयति।

"अन्यौ यस्य श्रुतानि भङ्गलधराधीशाः सभायां सदा
स्युः संस्तरिवाहकोटिसुभटाः सत्पण्डिताः षोड़श।
दैवज्ञा दश यज्ञिकाश्च भिषजो भट्टास्तथा द्वादशो
वेदज्ञा रसचन्द्रमा १६ विजयते श्रीविक्रमः सोऽधिपः॥"

अथास्य सैन्यं वर्णयति।

"यस्याष्टादशयोजनानि कटके पादातिकोटि-
त्रयम् ३०००००००
वाहानामयुतायुतञ्च १०००००००००नवतेश्चिह्नाङ्कति-२३३०० हस्तिनाम्।
नौकानञ्चचतुष्टयं ४००००० विजयिनो यस्य
प्रयाणे भवेत्
सोऽयं विक्रमभूपतिर्व्विजयते नान्यो धरित्रीतले॥"

अथास्य ग्रामप्रवृत्तिं दर्शयति।

"येनास्मिन् वसुधातले शकगणान् सर्व्वान्
दिशः सङ्करे
क्षिप्त्वा पञ्चनवप्रमान् ५५५५५५५५५ कलियुगे
ग्रामप्रवृत्तिः कृता।
श्रीमद्विक्रमभूभुजा प्रतिदिनं सत्तामधिस्वर्गतो
सभ्रीभाद्यपवर्ज्जनेन विहितो धर्म्मः सुवर्णा-
वनः॥"

अथास्य दिग्विजयमाह।

"उद्दामद्रविड़द्रुमैकपरशुर्लाटाटवीपावको
वङ्गाद्रङ्गभुजङ्गराजगरुड़ो गौड़ाब्धिकुम्भोद्भवः।
गर्ज्जद्गुर्ज्जरराजसिन्धुरहरिर्धारान्धकारार्यमा
काम्बोजाम्बुजचन्द्रमा विजयते श्रीविक्रमार्को
नृपः॥"

अथास्य प्रभुत्वादिगुणान् वर्णयति।

"येनाप्युग्रमहीधराग्रविषये दुर्गाग्र्यसत्त्वाश्रयो
नीत्वा यानि नतीकृतास्तदखिला दत्तानि तेषां
पुनः।
इन्द्राम्भोधमरद्दमस्मरसुरव्याभृत्कुबेराङ्गसा
श्रीमद्विक्रमभूभृताखिलजनाभोगेन तुल्यं
मण्डले॥"

अस्य पुरीं वर्णयति।

"यदाजधान्युज्जयिनी महापुरी
सदा महाकालमहेश्वयोगिनी।
समाश्रितप्राग्यपवर्गदायिनी
श्रीविक्रमार्कोऽवनिपो जयत्यपि॥
यो रुद्रदेशाधिपतिं शकेश्वरं
जित्वा गृहीत्वोज्जयिनीं महाहवे।
आनीय सम्भाव्य समोच तत्पदो
श्रीविक्रमार्कः समसत्त्वविक्रमः॥
तस्मिन् सदा विक्रमभेदिनीशे
विराजमाने समवन्तिकायाम्।
सर्व्वप्रजामण्डलसौख्यसम्प-
दभूव सर्व्वत्र च वेदकर्म्म॥
शङ्कादिपण्डितवराः कवयस्त्वनेके
ज्योतिर्व्विदः सगभवंश वराहपूर्व्वाः।
श्रीविक्रमार्कनृपसंसदि मान्यबुद्धि-
स्तैरप्यहं नृपसखा किल कालिदासः॥"

इति ज्योतिर्व्विदाभरणम्।)

विक्रमी, [न्] पुं, (विक्रमोऽस्यास्तीति। विक्रम+इनिः।) सिंहः। इति राजनिर्घण्टः। विष्णुः। यथा,—

"ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः।"

इति महाभारते अनुशासनपर्व्वणि तस्य सहस्रनामस्तोत्रे १४६ अध्याये २२ श्लोकः। अतिप्रवृत्तिविशिष्टे, त्रि। (यथा, महाभारते। १।१२८।२८।

"प्राज्ञवान् विक्रमी चैव श्रौर्य्येण महता-
न्वितः।
आहर्त्ता चापि सहितानज्ञानेको दृकोदरः॥")

विक्रयः, पुं, (विक्रयणमिति। वि+क्री+"एरच्।" ३।३।५६। इति अच्।) विक्रयक्रिया। बेचा इति भाषा। तत्पर्य्यायः। विपणः २। इत्यमरः। विपणनम् ३ पणनम् ४। इति शब्दरत्नावली। व्यवहारः ५ पण्याया ६। इति जटाधरः। अस्य विहितविहितत्वञ्चाह यथा,—

"यमाहिषगवाश्वोष्ट्रनाग्यपूर्व्वा
नेहाः क्रये विक्रयणे प्रशस्ताः।
पौष्णाग्निचित्राश्वतविन्दुवाताः
क्रये हिता विक्रयणे निषिद्धाः॥"

इति ज्योतिःसारसंग्रहः॥*॥

क्रयविक्रयनिर्णयो यथा। मूल्यं दास्यामीति कृत्वा गृहणादपि क्रयसिद्धिः। तथा च विवादचिन्तामणौ कात्यायनः।

"पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत्।
ऋतुत्र्यस्योपरिष्टात् तद्दनं दृढमाप्नुयात्॥"

अतएव दृढस्फतिः।

"गृहीत्वैवादिकं क्रीत्वा तुल्यमूल्याचरान्वितम्।
पत्रं कारयते यत्तु क्रयलेखं तदुच्यते॥"

क्रयविक्रये समयविशेषाभ्यन्तरे पश्चात्तापादसिद्धिः। यथा मनुः।

"क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत्।
सोऽन्तर्दशाहे तद्द्रव्यं दद्याच्चैवाददीत वा॥"

एतद्याज्ञवल्क्योक्तेतरपरम्। यथा याज्ञवल्क्यः।

"दशैकपञ्चसप्ताहमासत्र्यहार्द्धमासिकम्।
बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम्॥"

अत्र दृढस्फतिः।

"अतोऽर्व्वाक् पण्यदोषस्तु यदि संजायते क्वचित्।
विक्रेतुः प्रतिदेयन्तत् क्रेता मूल्यमवाप्नुयात्॥"

अतस्तद्द्रव्यपरीक्षणकालात्। कात्यायनः।

"अविज्ञातन्तु यत् क्रीतं दुष्टं पश्चाद्विभावितम्।
क्रीतं तत् स्वामिने देयं पण्यं कालेऽन्यथा न तु॥"

काले प्रागुक्तपरीक्षाकालाभ्यन्तरे। परीक्षिते तु दृढस्फतिः।

"परीक्षेत स्वयं पण्यं अन्येषाञ्च प्रदर्शयेत्।
परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत्॥"

अत्र विशेषयति नारदः।

"क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी।
विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्नि विक्षितम्॥
द्वितीयेऽह्नि ददत् क्रेता मूल्यात्त्रिंशांशमाहरेत्।
द्विगुणन्तु तृतीयेऽह्नि परतः क्रेतुरेव तत्॥"

आहरेत् दद्यात् विक्रेत्रे इति शेषः। द्विगुणं त्रिंशांशस्य। याज्ञवल्क्यः।

"राजदैवोपघातेन पण्ये दोष उपागते।
हानिर्विक्रेतुरेवासौ याचितस्त्वप्रयच्छतः॥"

नारदः।

"उपहन्येत वा पण्यं दह्येतापह्रियेत वा।
विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः॥
दीयमानं न गृह्णाति क्रीतं पण्यन्तु यः क्रयी।
स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः॥"

इति प्रायश्चित्ततत्त्वम्॥*॥

अपि च।

"न्यासं कृत्वा परत्राधिं कृत्वा वाधिं करोति च।
विक्रयं वा क्रियां तत्र पश्चिमा बलवत्तरा॥"

न्यासं कृत्वा आधिं करोति आधिं कृत्वा वा विक्रयं करोति। विक्रयपदं स्वत्वध्वंसकत्वात् दानं लक्षयति परा क्रिया सिद्ध्येदर्थः। एवञ्च विक्रेष्टदानोर्मरणादिना आधुत्तुद्धारे विक्रयदाने तत्कर्तृतुल्यस्वत्वजननात् तत्र तत्क्रेष्टप्रतिग्रहीष्टभ्यामाधुद्धारः कार्य्यः। इति तत्त्वं च।

"न च स्थावरस्य समस्तस्य गोत्रसाधारणस्य च।
नैकः कुर्य्यात् क्रयं दानं परस्परमतं विना॥
विभक्ता अविभक्ता वा सपिण्डाः स्थावरे समाः।
एको ह्यनीशः सर्व्वत्र दानाधमनविक्रये॥"

इति याज्ञवल्क्यवचनाभ्यामेकस्य दानबन्धकविक्रयाधिकारः इति वाच्यं यथेष्टविनियोगार्हत्वरूपस्य स्वत्वस्य द्रव्यान्तर इवात्राप्यविशेषात् वचनञ्च स्वामित्वेन दुर्व्वृत्तपुरुषगोचरविक्रयादिना कुटुम्बविरोधादधर्म्मजनापनार्थनिषेधरूपं न तु विक्रयाद्यनिष्पत्त्यर्थमिति दायभागः॥ * ॥ एवञ्च।

"स्थावरे विक्रयो नास्ति कुर्य्यादाधिमनुज्ञया।"

इति स्थावरस्य केवलविक्रयप्रतिषेधात् एवं भूमिं यः प्रतिगृह्णातीत्यादिवचने दानप्रशंसादर्शनाच्च विक्रयेऽपि कर्त्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपेण स्थावरविक्रय इति विज्ञानेश्वरः। वस्तुतस्तु स्थावरविक्रयनिषेधो अविभक्तस्थावरविषयः। तत्रापि यदि विक्रयं विना व्यवस्थितिर्न भवति तदा विक्रयः कर्त्तव्यः। पूर्व्वपुरुषार्ज्जितऋणोद्धारे विशेषयति मिताक्षरायाम्।

"स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितम्।
असम्भूय सुतान् सर्व्वान् न दानं न च विक्रयः॥"

इत्यादि॥

अस्यापवादमाह।

"एकोऽपि स्थावरे कुर्य्यादाधमनविक्रयम्।
आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः॥"

इति दायतत्त्वम्॥

द्रव्यविशेषविक्रयनिषेधो यथा। स्मृतिः।

"विक्रीणन् मद्यमांसानि ह्यभक्ष्यस्य च भक्षणम्।
कुर्व्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात्॥
कपिलाक्षीरपानेन ब्राह्मणीगमनेन च।
वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत्॥"

कालिकापुराणम्।

"विक्रयं सर्व्ववस्तूनां कुर्व्वन् शूद्रो न दोषभाक्।
मधु चर्म्म सुरां लाक्षां त्वक्कां मांसञ्च पञ्चमम्॥"

मनुः।

"सद्यः पतति लौहेन लाक्षया लवणेन च।
त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात्॥
अग्नौ भेषजसार्थे यज्ञहेतोस्तथैव च।
यद्यवश्यन्तु विक्रेयास्तिला धान्येन तत्समाः॥"

इत्याह्निकतत्त्वम्॥

"गवां विक्रयकारी च गवि लोमानि यानि च।
तावद्वर्षसहस्राणि गवां गोष्ठे किमिर्भवेत्॥"

इति यमवचनम्॥

"गोवधोऽयाज्ययाज्यपारदार्य्यात्मविक्रयाः।
तड़ागारामदाराणामपत्यस्य च विक्रयः।
भृताध्ययनादानमपण्यानाञ्च विक्रयः॥"

इत्यादि मानवे ११ अध्याये उपपातकमध्ये गणितम्॥

विक्रयणं, क्ली, (वि+क्री+ल्युट्।) विक्रयः। यथा,

"यमाहिषुष्ट्रक्रयिहुताग्रपूर्व्वा
नेष्टाः क्रये विक्रयणे प्रशस्ताः।
पौष्णाग्निचित्राश्वतविद्भवाताः
क्रये हिता विक्रयणे निषिद्धाः॥"

इति ज्योतिःसारसंग्रहः॥

विक्रयिकः, पुं, (विक्रयेण जीवतीति। विक्रय+"वस्त्रक्रयविक्रयात् ठन्।" ४।४।१३। इति ठन्। यद्वा, विक्रीणातीति। वि+क्री+"क्रिय इकन्।" उणा० २।४४। इति इकन्।) विक्रेता। इत्यमरः॥ (यथा, महाभारते। १२।३६।३०।

"दीक्षितस्य कदर्य्यस्य क्रतुविक्रयिकस्य च।
तस्यान्नमौपकर्त्तुञ्च पुंश्चल्या रजकस्य च।
चिकित्सकस्य यच्चान्नमभोज्यं रक्षिणस्तथा॥")

विक्रयी, [न्] त्रि, (विक्रीणातीति। वि+क्री+णिनिः।) विक्रयकर्त्ता। इति शब्दरत्नावली॥ (यथा, याज्ञवल्क्ये। २।१७३।

"क्रेता मूल्यमवाप्नोति तस्मात् यस्तस्य
विक्रयी॥")

विक्रान्तं, क्ली, (वि+क्रम+क्तः।) वैक्रान्तमणिः। इति राजनिर्घण्टः॥ (त्रिविक्रमावतारस्य विष्णोर्द्वितीयपादक्षेपेण अन्तरिक्षं विक्रान्तमिति ख्यातम्। तथा च वाजसनेयसंहितायाम्। १०।१६।

"विष्णोर्विक्रमणमसि। विष्णोर्विक्रान्तमसि। विष्णोः क्रान्तमसि।"

"हे द्वितीयप्रक्रम त्वं विष्णोर्विक्रान्तं द्वितीयपादप्रक्षेपेण जितमन्तरिक्षमसि।" "इमे वै लोका विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तमिति श्रुतेः।" इति तद्भाष्ये महीधरः॥)

विक्रान्तः, पुं, (वि+क्रम+क्तः।) शूरः। इत्यमरः॥ (वाच्यलिङ्गेऽपि दृश्यते। यथा, सुभाराक्षसे। १।

"विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीवैक्रनासादिभिः॥")

सिंहः। इति राजनिर्घण्टः॥ (महाभारतभागभजात-ऋतध्वजपुत्रः। यथा, मार्कण्डेये। २५।८।

"महालसायाः सञ्जज्ञे पुत्रः प्रथमजस्ततः।
तस्य चक्रे पिता नाम विक्रान्त इति धीमतः॥"

हिरण्याक्षपुत्रविशेषः। यथा, हरिवंशे। ३।७८—७६।

"हिरण्याक्षसुताः पञ्च विद्वांसः सुमहाबलाः।
भर्भरः शकुनिश्चैव भूतसन्तापनस्तथा।
महानाभश्च विक्रान्तः कालनाभस्तथैव च॥")

विक्रान्तिः, स्त्री, (वि+क्रम+क्तिन्।) अध्वगतिः। तत्पर्य्यायः। पुलायितम् २। इति त्रिकाण्डशेषः॥ विक्रमश्च॥ (यथा, राजतरङ्गिण्याम्। ४।१२६।

"पार्थिवः पृथुविक्रान्तिर्यूधि क्रोधं समोचयः॥"

पादन्यासः। यथा, श्रुतपथब्राह्मणे। १।१।२।१६।

"विष्णुर्व्याक्रमतामिति यज्ञो वै विष्णुः स देवेभ्य इमां विक्रान्तिं विचक्रमे यावाभिमं विक्रान्तिरिदमेव प्रथमेन पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैनां वेवेद एतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते॥")

विक्रायकः, पुं, (विक्रीणातीति। वि+क्री+ण्वुल्।) विक्रेता। इति हेमचन्द्रः। ३।५३२॥ (यथा, महाभारते। ५।३८।४।

"चिकित्सकः ग्रल्यकर्त्तावकीर्णी-
स्तेनः क्रूरो मद्यपो भ्रूणहा च।
सेनाजीवी श्रुतिविक्रायकश्च
भृशं प्रियोऽप्यतिथिर्नोदकार्हः॥")

विक्रिया, स्त्री, (विकरणमिति। वि+कृ+"क्षुधः श्यञ्च।" ३।३।१००। इति श्यः। टाप्।) विकारः। इत्यमरः॥ (यथा, रघुः। १३।७१।

"श्मश्रुप्रवृद्धिजनितानन विक्रियाञ्च
ज्ञात्वा प्ररोहजटिलानिव सन्निरुद्धान्॥"

प्रकृतेरन्यथाभावः। यथा, मार्कण्डेये। ३५।२।

"अन्नेष्वाद्यापि गोधूमयवगोरसविक्रियाः॥"

विरुद्धा क्रिया। विरुद्धकार्य्यम्। यथा, रघुः। १५।४८।

"इत्याप्तवचनादामो विनेष्यन् वर्णविक्रियाम्।
दिशः प्रपात यत्नेन वेगनिष्कम्पकेतुना॥")

विक्रीतः, त्रि, (वि+क्री+क्तः।) कृतविक्रयः। यथा, दक्षस्मृतिः।

"नाधिकञ्चैव कुरुते तद्धनं ज्ञातिभिः स्वकम्।
अदत्तत्यक्तविक्रीतं कृत्वा स्वं लभते धनी॥"

इति प्रायश्चित्ततत्त्वम्॥

विक्रुष्टं, त्रि, (वि+क्रुष+क्तः।) निष्ठुरम्। इति हेमचन्द्रः॥

विक्रेता, [तृ] त्रि, (विक्रीणातीति। वि+क्री+तृच्।) विक्रयकर्त्ता। तत्पर्य्यायः। विक्रयिकः २। इत्यमरः॥ विक्रयी ३। इति शब्दरत्नावली॥ विक्रायकः ४। इति हेमचन्द्रः॥ (यथा, याज्ञवल्क्यः। २।१७३।

"विक्रेतुर्दुर्धनात् शुद्धिः स्वामी द्रव्यं नृपो दमम्।
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी॥")

विक्रेयं, त्रि, (विक्रीयते इति। वि+क्री+"अचो यत्।" ३।१।९७। इति यत्।) विक्रययोग्यद्रव्यम्। तत्पर्य्यायः। पणितव्यम् २ पण्यम् ३। इत्यमरः॥ विक्रययोग्यायोग्यानि यथा,—

"इदन्तु दत्तिविक्रेयात्याजनो धर्म्मनैपुणम्।
विट्पण्यसुहृतोद्धारं विक्रेयं वित्तवर्द्धनम्॥
सर्व्वानुसानपोहेत क्षतान्नञ्च तिलैः सह।
अश्मनो लवणञ्चैव पशवो ये च मानुषाः॥
सर्व्वञ्च ताम्रवं रक्तं ग्राम्यचौमाविकानि च।
अपि चेत् क्षुररक्तानि फलमूले तथौषधीः॥
अपः शुष्कं विषं मांसं सोमं गन्धांश्च सर्व्वशः।

क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कृशान् ॥
अरण्यांश्च पशून् सर्व्वान् दंष्ट्रिणश्च वयांसि च।
मद्यं नीलीञ्च लाक्षाञ्च सर्व्वांश्चैकशफांस्तथा ॥
काममुत्पाद्य कृष्यास्तु स्वयमेव कृषीवलः।
विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिर-
स्थितान् ॥"
इति मानवे १० अध्यायः ॥

विक्लवः, त्रि, (विक्लवते इति। वि+क्लु+पचाद्यच्।) विह्वलः। इत्यमरः॥ (यथा, माघे। १२। ६३।
"नूनं सहायेन वियोगविक्लवा
पुरः पुरस्त्रीरपि निर्व्यथौ तदा ॥" *॥
क्लीबे, दुःखम्। यथा, रामायणे। २।४४।२५।
"किमिदानीमिदं देवि! करोति हृदि विक्लवम्॥")

विक्लिन्नः, त्रि, (वि+क्लिद्+क्तः।) जरसा जीर्णः। ग्लौर्णः। आर्द्रः। इति मेदिनी। ने, १३३॥

विक्षतः, त्रि, (वि+क्षण+क्तः।) विशेषेण क्षतः। (यथा, महाभारते। २। ४६। ३३।
"अङ्गारेण विनिर्गच्छन् द्वारसंस्थानरूपिणा।
अभिहत्य शिलां भूयो ललाटेनास्रि विक्षतः॥")

विक्षवः, पुं, (विक्षवयमिति। वि+क्षु+"वौ क्षुश्रुवः।" ३। ३। २५। इति वन्।) ग्रन्थः। इत्यमरः॥ (यथा, भट्टिः। ७। ३६।
"यात यूयं यमस्यायं दिशं नायेन दक्षिणाम्।
विक्षवैक्षोयविश्रावं तर्ज्जयन्तो महोदधेः॥")
कासः। इति स्वामिकलिङ्गौ। इति भरतः॥

विक्षिप्तः, त्रि, (वि+क्षिप्+क्तः।) व्यक्तः। (यथा, महाभारते। १। २७। ७।
"वायुविक्षिप्तकुसुमैस्तथान्यैरपि पादपैः॥"
क्षिप्तः। यथा, भागवते। ८। ८। ४६।
"स क्रीड़ितविक्षिप्तभ्रूविलासावलोकनैः।
दैत्यवध्वपचेतःसु कामसुद्दीपयन् मुहुः॥"
क्लीबे, चित्तवृत्तिविशेषः। यथा, पातञ्जलभाष्ये।१।
"क्षिप्तं मूढं विक्षिप्तमेकाग्रनिरुद्धमितिचित्त भूमयः॥" "क्षिप्तादिग्रहणं विक्षिप्तमितिमध्यप्रभा॥")

विक्षीरः, पुं, (विक्षिप्तं क्षीरं यत्र।) अर्कवृक्षः। इति राजनिर्घण्टः॥

विक्षेपः, पुं, (वि+क्षिप्+घञ्।) प्रेरणम्। त्यागः। विक्षेपणम्। यथा,—
"नैर्ऋत्यामिषुविक्षेपमतीत्य क्षधिकं भुवम्॥"
इत्यादादिकाचारतत्त्वम्॥
(कथनम्। यथा, कुमारे। १। १३।
"लाक्षारसविक्षेपविसर्पिशोभै-
रित्यस्तसन्ध्यातरुणारुणैः।
यस्यार्घ्ययुक्तं गिरिराजशृङ्गं
कुर्व्वन्ति बालातपजेन्द्रमर्घम्॥")
अद्वितीयवस्त्ववलम्बनेन चित्तस्य अन्यावलम्बनम्। इति वेदान्तसारः।

विक्षेपशक्तिः, स्त्री, (विक्षेपाय शक्तिः।) मायाशक्तिः। यथा। रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति। एवं अज्ञानमपि स्वावृतात्मनि तथा विक्षेपशक्त्या आकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम्। इति वेदान्तसारसुबोधिनीटीका॥

विखः, त्रि, (विख्यः। निपातनात् यलोपः।) गतनासिकः। इति भरतदिरूपकोषः॥

विखनाः, [स्] पुं, ब्रह्मा। यथा,—
"न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक्।
विखनसार्थितो विश्वगुप्तये
सख उदेयिवान् सात्वतां कुले॥"
इति श्रीभागवते। १०। ३१। ४॥

विखुः, त्रि, (विगता नासिका यस्य। बहुलवचनात् नासिकायाः खुः।) गतनासिकः। इति भरतदिरूपकोषः॥

विखुरः, पुं, राक्षसः। इति त्रिकाण्डशेषः॥ चौरः। इति संक्षिप्तसारोणादिवृत्तिः॥

विख्यः, त्रि, (विगता नासिकास्येति। "ख्यख।" ८। ४। २८। इत्यस्य वार्त्तिकोक्त्या नासिकायाः ख्यः।) गतनासिकः। इति केचित्॥

विख्यातः, त्रि, ख्याप्रापन्नः। विपूर्ब्बख्याधातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। १। ६०। ३२।
"चन्द्रवर्म्मेति विख्यातः कामोजानां नराधिपः॥")

विख्यातिः, स्त्री, प्रसिद्धिः। सुख्यातिः। विपूर्ब्बख्याधातोः क्तिप्रत्ययेन निष्पन्नः॥

विख्यापनं, क्लीबे, (वि+ख्या+णिच्+ल्युट्।) आख्यानम्। विपूर्ब्बण्यन्तख्याधातोरनट्प्रत्ययेन निष्पन्नम्॥

विखुः, } त्रि, (विगता नासिका यस्य। "खुविखुः, } खौ च वक्तव्यौ।" इति नासिकायाः खुः खुभ्च।) अनासिकः। इति हेमचन्द्रः॥ छिन्ननासिकः। इति शब्दरत्नावली॥

विगणनं, क्लीबे, (वि+गण+ल्युट्।) अवमुक्तिः। इति त्रिकाण्डशेषः॥ (यथा, पाणिनिः। १। ३। ३६।
"संमाननोत्सञ्जनाचार्य्यकरणज्ञानभृतिविगणनव्ययेषु नियः॥" "विगणनं अवज्ञादेर्निर्यातनम्।" इति काशिका॥)

विगतः, त्रि, (वि+गम+क्तः।) प्रभारहितः। तत्पर्य्यायः। निष्प्रभः २ अरोकः ३। इत्यमरः॥ वीतः ४। इति रुद्रः॥ विशेषेण गतः। इति हेमचन्द्रः॥ (यथा, माघे। ११। २६।
"विगततिमिरपङ्कं पश्यति व्योम यावत्
ध्रुवति विरहखिन्नः पक्षती यावदेव।
रथचरणसमाक्रान्तावदौत्सुक्यतुन्ना
सरिदपरतटान्तादागता चक्रवाकी॥")

विगतश्रीकः, त्रि, श्रीरहितः। विगता श्रीर्यस्य इति बहुव्रीहौ कप्रत्ययेन निष्पन्नः॥

विगतार्त्तवा, स्त्री, (विगतं आर्त्तवं रजो यस्याः।) पञ्चषष्टाब्दस्त्रीभ्य ऊर्द्धं निवृत्तरजस्का। तत्पर्य्यायः। निष्क्वली २ निष्क्वला ३ निष्क्वली ४ निष्क्वला ५ विकली ६ विकला ७। इति शब्दरत्नावली॥

विगमः, पुं, (वि+गम+"गमहनजनखनघसां लोपः क्ङिति यङि च।" ३। ३। ५८। इति अप्।) नाशः। यथा। एकदेशिनो वेदान्तिनस्तु यदुपाध्यनवच्छिन्नस्य ब्रह्मणो विशुद्धरूपता तादृशोपाधिविगम एव कैवल्यम्। त्रिदण्डिनस्तु आनन्दमयपरमात्मनि जीवात्मनो लयो मोक्षः। जीवात्मपरमात्मनोरभेदेऽपि उपाधिविशेषविशिष्टस्यात्मनो जीवरूपतया तस्यौपाधिकः परमात्मभेदः। इति भेदकोपाधिविगम एव जीवस्य परमात्मनि लयः। यथा घटाकाशस्य घटविगम एव मुद्ग आकाशे तस्य लयः। लिङ्गशरीरावच्छिन्नस्यैवात्मनो जीवभाव इति लिङ्गशरीरनाश एव पर्य्यवसितो मोक्षः। इति सुक्तिवादः॥ (विच्छेदः। यथा, भागवते। १। १३। ४३।
"यथा क्रीड़ोपस्कराणां संयोगविगमादिह।
इच्छया क्रीड़ितुः स्यातां तथैवेशेच्छया
नृणाम्॥")

विगन्धकः, पुं, (विगतो गन्धो यस्मिन्। बहुव्रीहिलक्षणात् कः।) इक्षुदीदृशः। इति राजनिर्घण्टः॥

विगन्धिका, स्त्री, क्षुपभा। इति राजनिर्घण्टः॥

विगर्हणं, क्लीबे, (वि+गर्ह+ल्युट्।) निन्दनम्। भर्त्सनम्। (यथा, हरिवंशे। ७६। २३।
"क्षमे च भवतो द्वेष्ये वसुदेवविगर्हणात्॥")

विगर्हणा, स्त्री, (वि+गर्ह+णिच्+युच्। टाप्।) निन्दनम्। भर्त्सनम्। (यथा, महाभारते। १२। ११४। २१।
"विगर्हणां परमदुरात्मना कृतां
सहेत यः संसदि दुर्ज्जनानरः॥")

विगर्हितः, त्रि, (विशेषेण गर्हितः।) निन्दितः। (यथा, नैषधे। १। १३१।
"न केवलं प्राणिवधो वधो मम
त्वदीक्षणादिप्सितान्तरात्मनः।
विगर्हितं धर्म्मधनैर्निषेवितं
विशिष्य विश्वासकृतां द्विषामपि॥")
निविड़ः। इति विपूर्ब्बगर्हधातोः क्तप्रत्ययेन निष्पन्नः॥

विगलितः, त्रि, (विशेषेण गलितः।) स्खलितः। यथा, गीतगोविन्दे ५ सर्गः।
"विगलितवसनं परिहृतरसनं
घटय जघनमपिधानम्।
किसलयशयने पङ्कजनयने
निधिमिव हर्षनिधानम्॥"

विगाढ़ः, त्रि, (विगाह्यते स्मेति। वि+गाह+क्तः।) स्नातः। अवगाहितः। विपूर्ब्बगाहधातोः क्तप्रत्ययेन निष्पन्नः॥ (प्रगाढ़ः। यथा, महाभारते। ३। ४६। ५।
"निर्गम्य चन्द्रोदयने विगाढ़े रजनीमुखे।
प्रस्थिता सा पृथुश्रोणी पार्थस्य भवनं प्रति॥")

विगानं, क्लीबे, (विरुद्धं गानं परस्य।) निन्दा। इति हेमचन्द्रः॥

विगाहमानः, त्रि, (वि+गाह+शानच्।) विलोड़नकर्त्ता। अवगाहनकर्त्ता। विपूर्ब्बगाहधातोः शानप्रत्ययेन निष्पन्नः॥ (यथा, रघुः। १३। १।

"अथात्मनः शब्दगुणं गुणज्ञः
पथे विमानेन निगाहमानः।
रत्नाकरं वीक्ष्य मिथः स जायां
रामाभिधानो हरिरित्युवाच॥")

विगुणः, त्रि, (विपरीतो गुणो यस्य।) गुणवैपरीत्यविशिष्टः। यथा,—

"यथा मनो ममाचष्ट नेयं माता तथा मम।
विगुणेऽपि पुत्रेषु न माता विगुणा भवेत्॥"

इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तराध्यायः॥ (स्तुत्यः। यथा, भागवते। ७। ६। ४८।

"सर्व्वं त्वमेव सगुणो विगुणश्च भूमन्
नान्यत् त्वदस्त्यपि मनो वचसा निरुक्तम्॥"

गुणहीनः। यथा, शिशुपालवधे। ६। १२।

"अवसन्ननतापमत्तमिश्रमभादपदोषतैव विगुणस्य गुणः॥")

विगूढः, त्रि, (विशेषेण गूढः।) गर्हितः। गुप्तः। इति मेदिनी। ढे, ६—१०॥

विग्रः, त्रि, (विगता नासिकास्य। "वेर्म्मो वक्तव्यः।" ८। ४। २८। इत्यस्य वार्त्तिकोक्त्या नासिकायाः ग्रः।) गतनासिकः। इत्यमरः॥* (त्रि,"विविधं गृह्णात्यर्थानिति विपूर्ब्बात् ग्रहातेः 'अन्येष्वपि दृश्यते।' इति डः।" इति देवराजयज्वा। मेघावी। इति निघण्टुः। ३।१५॥ यथा, ऋग्वेदे। १। ४। ४।

"परेहि विग्रमस्तृतमिन्द्रं पृच्छाविपश्चितम्॥")

विग्रहः, पुं, (विविधं सुखदुःखादिकं गृह्णातीति। वि+ग्रह+अच्। यद्वा, विविधैर्दुःखादिभिर्गृह्यते इति। वि+ग्रह+"ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) शरीरम्। (यथा, रघुः। ११। १३।

"विग्रहेण मदनस्य चारुणा
सोऽभवत् प्रतिनिधिर्न कर्म्मणा॥")

युद्धम्। इत्यमरः॥ (यथा, मनुः। ७। १६०।

"सन्धिञ्च विग्रहञ्चैव यानमासनमेव च।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा॥"

विरोधमात्रम्। यथा, रघुः। ६। ४७।

"त्यजत मानमलं वत विग्रहै-
र्न पुनरेति गतं चतुरं वयः।
परभृताभिरितीव निवेदिते
सरमते रमते स वधूजनः॥")

विभागः। इति मेदिनी। हे, २१॥ (यथा, भागवते। ३। ३१। ३।

"मासेन तु शिरो दाभ्यां बाहवूरुोदरेण तु। विग्रहः।
नखैर्लोमाक्षिमर्म्माणि लिङ्गच्छिद्रोद्भवं क्षिभिः॥")

वाक्यभेदः। स तु समासवाक्यम्। तत्पर्य्यायः। विस्तरः २। इत्यमरः॥ (वीणां पञ्चिमां यद्यो ग्रहणमिति वाक्ये विग्रहङ्गग्रहणम्। यथा, वक्रोक्तिपञ्चाशिकायाम्। ४।

"नो सन्त्या हितमत्सरा तव तनौ वत्स्याम्यहं सन्निना
न प्रीतासि वरोरु चेत्कथय तत् प्रस्तौमि किं विग्रहम्।
कार्य्यं तेन न किञ्चिदस्ति गृहे मे वीणां ग्रहेणेति वो
दिग्मात्रः प्रतिबद्धकेलिगिरयो श्रेयांसि वक्रोक्तयः॥")

देवविग्रहकरणादिप्रमाणं श्रीमूर्त्तिशब्दे द्रष्टव्यम्॥

विग्रहः, पुं क्ली, (विग्रह्यन्ते गृह्यन्ते यस्मिन्। वि+ग्रह+अप्।) युद्धम्। इत्यमरः॥ (यथा, मनुः। ७। १७०।

"यदा प्रहृष्टा मन्येत सर्व्वास्तु प्रकृतीर्भृशम्।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम्॥")

विग्रहावरं, क्ली, (विग्रहमाहृणोतीति। आ+हृ+अच्।) दृढम्। इति शब्दचन्द्रिका॥

विघटिका, स्त्री, (विभक्ता घटिका यया।) पलम्। इति राजनिर्घण्टः॥

विघट्टितं, त्रि, (विशेषेण चालितम्। विपूर्ब्बघट्टधातोः क्तप्रत्ययेन निष्पन्नम्। (यथा, हरिवंशे। ८७। ४५।

"सूर्य्यस्य विविधवर्णाः पवनेन विघट्टिताः करा साध्ये।
वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः॥"

विद्धम्। यथा, माघे। ८। २४।

"नखक्षतो चलग्नपरीविघट्टितोरु-
र्वामोरुरतिश्रयमाप विभ्रमस्य॥")

विघसं, क्ली, (विशेषेण अद्यते इति। वि+अद्+"उपसर्गेऽदः।" ३। ३। ५६। इति अप्। "घञपोश्च।" २। ४। ३८। इति घस्लआदेशः।) सिक्थकम्। इति राजनिर्घण्टः॥

विघसः, पुं, (वि+अद्+अप्।) भोजनशेषः। इत्यमरः॥ देवपितृतिथिगुर्व्वादिसुक्तस्य शेषः। इति भरतः॥ (यथा, मनुः। ३। २८५।

"विघसाशी भवेन्नित्यं नित्यं वाऽमृतभोजनः।
विघसो भुक्तशेषन्तु यज्ञशेषं तथामृतम्॥")

आहारः। इति शब्दरत्नावली॥ (यथा,—

"अयि वनप्रिय! विस्मृत एव किं
बलिभुजो विघसो भवताधुना।
यदनयैव कुहूरिति विद्यया
न पततश्चरणौ धरणौ तव॥"

इत्युद्भटः॥)

विघातः, पुं, (विशेषेण हननमिति। वि+हन+घञ्।) आघातः। यथा, अमरे।

"शस्त्रवर्षं तद्विघातेऽवग्रहावग्रहौ समौ॥"

आघातः। (यथा, महाभारते।

"चक्रे शरविघातञ्च क्रौञ्चस्येव पितामहः॥"

विनाशः। यथा महाभारते। १। २६। १३।

"क्षुत्पिपासाविघातार्थं भक्ष्यमाख्यातु मे भवान्॥")

विघातनी, [न्] त्रि, निवारकः। घातकः। विघानशब्दादिनिप्रत्ययेन विपूर्ब्बहनधातोर्ण्यन्तादिलास्निप्रत्ययेन वा निष्पन्नः॥ (यथा, हरिवंशे। ८७। ४५।

"एवमूर्ज्जितवीर्य्यस्य ममामरविघातिनः॥")

विघ्नः, पुं, (विहन्यते अनेनेति। वि+हन+"घञर्थे कविधानम्।" ३। ३। ५८। इत्यस्य वार्त्तिकोक्त्या कः।) व्याघातः। तत्पर्य्यायः। अन्तरायः २ प्रत्यूहः ३। इत्यमरः॥ (यथा सुदाराचरिते। २।

"प्रारभ्यते न खलु विघ्नभयेन नीचै-
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमाना
प्रारब्धमुत्तमगुणा न परित्यजन्ति॥"

लक्षणाकफला। इति शब्दचन्द्रिका॥ श्रेयार्थे अमरे अविघ्न इति पाठः॥

विघ्नकारी, [न्] त्रि, (विघ्नं कर्त्तुं शीलमस्येति। कृ+णिनिः।) घोरदर्शनः। विघातो। इति मेदिनी। ने, २५५॥

विघ्ननायकः, पुं, (विघ्नानां नायकः विघ्नाधीश्वरत्वात्।) गणेशः। इति शब्दरत्नावली॥

विघ्ननाशकः, पुं, (विघ्नानां नाशकः।) गणेशः। इति शब्दरत्नावली॥

विघ्ननाशनः, पुं, (नाशयतीति नाशनः विघ्नानां नाशनः।) गणेशः। इति शब्दरत्नावली॥

विघ्नराजः, पुं, (विघ्नानां राजा। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति टच्।) गणेशः। इत्यमरः॥ (यथा, कथासरित्सागरे। २०।१०१।

"आर्य्यपुत्र पुरा गत्वा विघ्नराजमपूजयत्॥")

विघ्नविनायकः, पुं, (विघ्नानां विनायकः।) गणेशः। इति काशीखण्डः॥

विघ्नहारी, [न्] पुं, (विघ्नं हर्त्तुं शीलमस्य इति। हृ+णिनिः।) गणेशः। इति त्रिकाण्डशेषः॥ विघ्ननाशके, त्रि॥

विघ्निनः, त्रि, (जातविघ्नः। विघ्नोऽस्य जात इत्यर्थे विघ्नशब्दादितच्प्रत्ययेन निष्पन्नः॥

विघ्नेशः, पुं, (विघ्नानां ईशः।) गणेशः। इति शब्दरत्नावली॥ (यथा कथासरित्सागरे। २०।८३।

"विघ्नोऽत्र तव जातोऽयं विना विघ्नेशपूजनम्॥")

विघ्नेशवाहनः, पुं, (विघ्नेशस्य वाहनः।) महामूषकः। इति राजनिर्घण्टः॥

विघ्नेशवल्लभा, स्त्री, (विघ्नेशस्य गणेशस्य वल्लभा प्रिया। तत् पूजायां एतस्याः प्राशस्त्यात्। श्वेतदूर्व्वा। इति राजनिर्घण्टः॥

विच्छः, पुं, अश्वखुरः। इति त्रिकाण्डशेषः॥

विच, इर् लि ग्र ओ न पृथक्करणे। इति कविकल्पद्रुमः॥ (अदा०-क्रा०-दधा०-च-उभ०-अक०-सकच-अनिट्।) इरं, अविचत्। अवेचीत्। लि, ग्न, वेवेक्ति वेविक्ते मुक्तान् पण्डितः पृथक् स्यादित्यर्थः। विच इति ज्ञानो यः स एव ज्ञानोऽपि पञ्चते कस्यचिदनुरोधात्

तेन निजां खेरेयुरित्यस्य वृत्तौ विजयग्रहणेनैवास्य ग्रहणात् खेर्गुणः। ध ञ, विनक्ति विङ्क्ते। विविनक्ष्मि दिवः सुरान् इति पृथक् करोमीत्यर्थः। ञौ, वेत्ता। इति दुर्गादासः॥

विचकिलः, पुं, मल्लीप्रभेदः। मदनकट्टनः। इति मेदिनी। ले, १६४॥ (यथा. राजेन्द्रकर्णपूरे। ७०।
"कुन्दः कन्दलितश्चयं विचकिलः कम्पाकुलं केतकः
सातङ्कं मृदनः सदैन्यमलसं सुक्लोऽतिसुक्लद्रुमः॥")

विचक्षणः, पुं, (विशेषेण चष्टे धर्म्मादिमुपदिशतीति। वि+चक्ष+"अनुदात्तेतश्च हलादेः।" ३। २। १४६। इति कर्त्तरि युच्।) पण्डितः। इत्यमरः॥ (यथा रघुवंशे। ५। १६।
"ततो यथावद् विहिताध्वराय
तस्मै सपर्यावनिवर्त्तिताय।
वर्णाश्रमाणां गुरवे सवर्णी
विचक्षणः प्रस्तुतमाचचक्षे॥")
निपुणे, त्रि। इति राजनिर्घण्टः॥ (यथा भागवते। १। ५। १६।
"विचक्षणोऽस्यार्हति वेदितुं विभो
अनन्तपारस्य निवृत्तितः सुखम्॥"
नानार्थदर्शी। यथा ऋग्वेदे। ४। ५३। २
"विचक्षणः प्रथयन्नापृणद्भुवं भुजेनानन्तं सविता सुनृम्णयुक्।"
"विचक्षणः विविधं द्रष्टा।" इति तद्भाष्ये सायणः॥)

विचक्षणा, स्त्री, नागदन्ती। इति राजनिर्घण्टः॥

विचक्षुः, [स्] त्रि, (विगतं प्रत्यक्षितेऽपि वस्तुनि अपगतं चक्षुर्यस्य।) विमनाः। इति त्रिकाण्डशेषः॥ (विगते नष्टे चक्षुषी यस्य।) विगतचक्षुषि, त्रि। (यथा, महाभारते। १२। ६५। ३४।
"अन्तरा विषयं यान्ति यथा पथि विचक्षुषः॥*"॥
विगिष्टे चक्षुषी यस्य सः। दृष्टिवर्ज्जीयः कश्चिद् योद्धा। यथा, हरिवंशे। १४१। ६।
"क्षतवर्म्मा सुदंष्ट्रश्च विचक्षुररिमर्दनः॥")

विचयनं, क्ली, (विशेषेण चयनम्।) मार्गणम्। इत्यमरः॥

विचर्च्चिका, स्त्री, (विशेषेण चर्च्यते पाणिपादस्य त्वक् विदार्य्यते अनया इति। चर्च्च तर्जने+"रोगाख्यायां ण्वुल् बहुलम्।" ३। ३। १०८। इति ण्वुल्। टापि अत इत्वम्।) रोगविशेषः। विकच इति भाषा। तत्पर्य्यायः। कच्छूः २ पामा ३ पामा ४। इत्यमरः॥ अपि च।
"कच्छुः कच्छूः पामा पामा पादरोगे विचर्च्चिका।"
इति शब्दरत्नावली॥*॥
तदौषधम् यथा,—
"करवीरं भृङ्गराजं लवणं कुष्ठकर्कटम्।
चतुर्गुणेन मूत्रेण पचेत्तैलं हरेत्ततः।
पामां विचर्च्चिकां कुष्ठमभ्यङ्गाद्धि व्रणानि वै॥"
इति गारुडे २८७ अध्यायः॥*॥
अन्यच्च।
"मरीचं त्रिफलं कुष्ठं हरितालं मनःशिला।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम्॥
विष्णाला करवीरश्च अर्कक्षीरं सकृत् पलम्।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत्॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत्।
मृत्पात्रे लौहपात्रे वा मृन्मर्द्दनेन पचेत्॥
पामा विचर्च्चिका चैव दद्रुविस्फोटकानि च।
अभ्यङ्गेन प्रणश्यन्ति कोमलत्वञ्च जायते॥
प्रसूतान्यपि चित्राणि तैलेनानेन त्रजयेत्।
चिरोत्थितमपि क्षिप्रं विवर्णं तत्क्षणाद्व्रजेत्॥"
इति गारुडे १६८ अध्यायः॥*॥
खल्यकुष्ठविशेषः। यथा।
"एकं कुष्ठं क्षुतं पूर्व्वं गजचर्म्मे ततः क्षुतम्।
ततश्चर्म्मदलं प्रोक्तं ततश्चापि विचर्च्चिका॥
विपादिकाभिधा सैव पामा कच्छूस्ततः परा।
ततो दद्रुश्च विस्फोटः किटिमश्च ततः परम्॥
ततश्चालमर्कं प्रोक्तं व्रतारुश्च ततः परम्।
क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः॥
सकण्डुः पिड़का श्यावा बहुस्रावा विचर्च्चिका॥"
पिड़का क्षुद्रपिड़का।
"दार्य्यते त्वक् खरा रूक्षा यान्योर्ज्ञेया विचर्च्चिका।
पादे विपादिका ज्ञेया स्थानभेदाद्विचर्च्चिका॥"
दार्य्यते विदार्य्यते। केचिद्विचर्च्चिकातो विपादिकां विभिन्नमाहुः। इति भावप्रकाशः॥ (सा च महापातकप्रेष्यभोगचिह्नं वैदिककर्म्मप्रतिबन्धिका च। यथा, शुद्धितत्त्वधृतभविष्यपुराणीयमध्यतन्त्रे षष्ठाध्याये।
"शृणु कुष्ठगणं विप्र उत्तरोत्तरतो गुरुम्।
विचर्च्चिका तु दुश्चर्म्मा चर्च्चरीयस्तृतीयकः॥
विकर्त्तव्रणताम्रौ च क्षुण्णश्चेते तथाष्टकम्।
एषां मध्ये तु यः कुष्ठी गर्हितः सर्व्वकर्म्मसु॥
व्रणवत् सर्व्वगात्रेषु गच्छेद्भाले तथानसि।
स्पृष्टे च प्रोपयेत् तीर्थे अथवा तरुमूलके॥"
कदाचित् अग्निजन्यभूमिकम्पेऽपि विचर्च्चिका उत्पद्यते। यथा बृहत्संहितायाम्। ३२। १४।
"आग्नेयेऽम्बुनाशः
सलिलाशयसङ्क्षयो नृपतिवैरम्।
दद्रुविचर्च्चिकाज्वर-
विसर्पिकाः पाण्डुरोगश्च॥")

विचलः, त्रि, अस्थिरः। विपूर्ब्बचलधातोरल्-प्रत्ययेन निष्पन्नः॥

विचलितः, त्रि, गतितः। स्खलितः। विपूर्ब्बचलधातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, मनुः। ७। २८।
"दण्डो हि सुमहत् तेजो दुर्द्धरश्चाकृतात्मभिः।
धर्म्माद्विचलितं हन्ति नृपमेव सबान्धवम्॥")

विचारः, पुं, (विशेषेण चरणं पदार्थादिनिर्णये ज्ञानमिति। वि+चर+घञ्।) तत्त्वनिर्णयः। इति व्यवहारतत्त्वम्॥ सन्दिग्धे वस्तुनि प्रमाणेन तत्त्वपरीक्षा। इति गोयीचन्द्रः। प्रमाणैरर्थपरीक्षणं विमर्शमात्रमिति केचित्। इति भरतः॥ तत्पर्य्यायः। तर्कः २ निर्णयः ३ ऊहा ४ चर्चा ५। इति त्रिकाण्डशेषः॥ संख्या ६ विचारणा ७। इत्यमरः॥ चर्चनम् ८ संख्यानम् ९। इति तट्टीका॥ विचारणम् १० वितर्कः ११ ऊहः १२ ऊहः १३ ऊहः १४ वितर्कणम् १५। इति शब्दरत्नावली॥ प्रणिधानम् १६ समाधानम् १७। इति जटाधरः॥ (यथा, कथासरित्सागरे। ३६। ८८।
"न चैवं क्रमते नारी विचारं मारमोहिता।
यदियं क्रमते राज्ञी तव कार्य्यं विपन्नतम्॥"
नाट्योक्तलक्षणविशेषः। तल्लक्षणं यथा, साहित्यदर्पणे। ६। ४४७।
"विचारो युक्तवाक्येर्यदप्रत्यक्षार्थसाधनम्॥")

विचारणं, क्ली, (वि+चर+णिच्+ल्युट्।) विचारः। इति शब्दरत्नावली॥ (यथा भागवते। १२। १३। १८।
"तच्च ज्ञानविरागभक्तिसहितं नैष्कर्म्मया विष्कृतम्।
तत्कृच्छ्रेण सुपठ्य विचारणपरो भक्त्या विसूयेन्नरः॥"
"एकस्मिन् धर्म्मिणि विरुद्धनानार्थविमर्शो विचारणम्। स च संशयस्त्रिधा स्यात् एको विशेषादर्शने समानधर्म्मदर्शनात्। अरण्ये रज्जुर्न्न। द्वितीयो विशेषादर्शनमात्रे। अत्र शब्दो नित्योऽनित्यो वा। तृतीयोऽसाधारणधर्म्मजः यथा भूर्नित्या अनित्या वा। अत्र गन्धोऽसाधारणधर्म्मः विशेषमपश्यन् संशेते गन्धाधिकरणं नित्यं अनित्यं वेति दिक्।" इति। "विचारणे पूर्व्वस्य।" इति श्रीपतिदत्तलक्षणतत्त्वपरिशिष्टे गोपीनाथतर्कार्च्चार्य्यः॥)

विचारणा, स्त्री, (वि+चर+णिच्+युच्। टाप्।) विचारः। इत्यमरः॥ (यथा, देवीभागवते। १। १८। ४२।
"जीवो ब्रह्म सदैवाहं नात्र कार्य्या विचारणा।
भेददृष्टिस्तु संसारे वर्त्तमाना प्रवर्त्तते॥")
मीमांसाशास्त्रम्। इति हेमचन्द्रः॥

विचारणीयं, त्रि, विचार्य्यम्। विपूर्ब्बण्यन्त(णिजन्त) चरधातोरनीयप्रत्ययेन निष्पन्नम्। क्ली, न्यायम्। इति हेमचन्द्रः॥

विचारितः, त्रि, (विचारः संजातोऽस्य इति विचार+"तदस्य संजातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) कृतविचारः। तत्पर्य्यायः। विज्ञः २ विद्वान् ३। इत्यमरः॥ (यथा, मनौ। ११। २८।
"आपत्कल्पेन यो धर्म्मं कुरुतेऽनापदि द्विजः।
स नाप्नोति फलं तस्य परत्रेति विचारितम्॥")

विचार्य्यं, त्रि, विचारितव्यम्। विचारणीयम्। विपूर्ब्बचरधातोर्ण्यान्तात् यप्रत्ययेन निष्पन्नम्॥ (यथा, मार्कण्डेये। ६६। १८।

"दाःखेनां दुरुदयामादाय विजने वने।
परित्यजाशु नैतत्ते विचार्य्यं वचनं मम॥"))

विचालं, त्रि, अभ्यन्तरम्। अन्तरालम्। इति हेमचन्द्रः॥ (पुं, संज्ञान्तरापादनम्। यथा, पाणिनौ। ५। ३। ४३। "अधिकरणे विचाले च॥")

विचिः, पुं स्त्री, (विवेक्ति जलानि पृथगिव करोति। विच+"इगुपधात् कित्।" उणा० ४। ११६। इन्। स च कित्।) वीची। तरङ्गः। इत्यमरटीकायां भरतः॥

विचिकित्सा, स्त्री, (विचिकित्सनमिति। वि+कित+सन्+अः। टाप्।) सन्देहः। इत्यमरः॥ (यथा, भागवते। ३। ६। ३६।
"तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोऽबहिः।
नालेन सलिले मूलं पुष्करस्य विचिन्वतः॥")

विचित्रं, क्ली, (विशेषेण चित्रम्।) कर्बुरवर्णः। इति शब्दरत्नावली॥ तद्वति, त्रि। (यथा, महाभारते। ३। ५४। १०।
"विचित्रमाल्याभरणैर्बलैर्दृप्तैः सलङ्कृतैः॥")
आश्चर्य्यम्। यथा,—
"विचित्रमिदमाख्यातं भगवन् भवता मम।
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम्॥"
इति देवीमाहात्म्यम्॥
(यथा च, उपदेशशतके। ३३।
"दुहिता विदेहभर्त्तुर्द्दाशरथेर्भामिनी सीता।
वधमाप राक्षसीनां विधेर्विचित्रा गतिर्ब्बोधा॥"

पुं, रौच्यमनुपुत्रः। यथा, मार्कण्डेये। ९४। ३१।
"चित्रसेनो विचित्रश्च नयतिर्निर्भयो दृढ़ः।
सुनेत्रः चित्रवृद्धिश्च सुव्रतश्चैव तत्सुताः॥"
अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ७२२।
"विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत्।
यथा,—
प्रणमत्युन्नतिहेतोर्जीवनहेतोर्विमुञ्चति प्राणान्।
दुःखीयति सुखहेतोः को मूढ़ः सेवकादन्यः॥")

विचित्रकः, पुं, (विविधानि चित्राणि यस्मिन्। बहुव्रीहौ कन्।) भूर्जवृक्षः। इति राजनिर्घण्टः॥

विचित्रदेहः, पुं, (विचित्रा देहा यस्य सः।) मेघः। इति शब्दचन्द्रिका॥ आश्चर्य्यशरीरे नानावर्णदेहे च, त्रि॥

विचित्रवीर्य्यः, पुं, (विचित्राणि वीर्य्याणि यस्य सः।) चन्द्रवंशीयराजविशेषः। स च शान्तनोर्दाशकन्यायां जातः। तस्य चित्रे सत्यवत्यामम्बया चाम्बालिकायां धृतराष्ट्रं पाण्डुञ्च जनयामास। इति श्रीभागवतमतम्॥

विचित्रवीर्य्यसूः, स्त्री, (विचित्रवीर्य्यस्य सूः प्रसूजननी।) सत्यवती। इति शब्दरत्नावली॥

विचित्रा, स्त्री, (विचित्रं नानाविधवर्णमस्त्यस्या इति। अर्शं आदित्वादच्। स्त्रियां टाप्।) रुगेलर्वारुः। इति राजनिर्घण्टः॥

विचित्राङ्गः, त्रि, (विचित्राणि अङ्गानि यस्य।) मयूरः। इति शब्दरत्नावली॥ व्याघ्रः। इति शब्दचन्द्रिका॥ आश्चर्य्यशरीरे, त्रि॥

विचित्रितः, त्रि, (विचित्रमस्य जातमिति। विचित्र+इतच्।) नानावर्णयुक्तः। यथा,—
"आसनं सर्व्वशोभाढ्यं सद्रत्नमणिनिर्म्मितम्।
विचित्रितञ्च चित्रेण शुशुभे श्रीहरेर्हरे॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः॥

विची, स्त्री, (विचि+ऋदिकारादिति ङीष्।) तरङ्गः। इति हिरूपकोषः॥

विचेताः, [स्] त्रि, (विगतं विरुद्धं वा चेतो यस्य।) विगतचित्तः। (यथा, भागवते। ६। ११। ६।
"एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून्।
अनदत् सुमहानादो येन लोका विचेतसः॥")
विरुद्धचित्तः। दुष्टचित्तः॥ तत्पर्य्यायः। दुर्म्मनाः २ अन्तर्म्मनाः ३ विमनाः ४। इति हेमचन्द्रः॥ (यथा, महाभारते। ३। ४६। १७।
"ये चास्य सचिवा मन्दाः कर्णशौबलकादयः।
ते तस्य भूयसो दोषान् वर्द्धयन्ति विचेतसः॥"*॥
विशिष्टं चेतो यस्मादिति। विशिष्टज्ञानहेतुभूतः। यथा, ऋग्वेदे। १। ८३। १।
"तमित् पृणन्ति वसुना भवीयसा
सिन्धुमापो यथाभितो विचेतसः॥"
"विचेतसः विशिष्टज्ञानहेतुभूता आपो यथा अभितः सर्व्वासु दिक्षु सिन्धुं समुद्रं पूरयन्ति तद्वत्।" इति तद्भाष्ये सायणः॥ *॥ विशिष्टं चेतो यस्येति। विशिष्टज्ञानः। यथा, ऋग्वेदे। १। ४५। २।
"शृण्वे वानो हि दाशुषे देवा अग्ने विचेतसः॥"
"हे अग्ने विचेतसो विशिष्टप्रज्ञाना देवाः।"
इति तद्भाष्ये सायणः॥)

विचेष्टितः, त्रि, (विशेषेण चेष्टितं गतिर्यस्य।) विगतः। (विशेषेण चेष्टितः।) ईहितः। इति मेदिन्यां चेष्टितशब्दार्थदर्शनात्॥ (विगतं चेष्टितमस्येति वाक्ये चेष्टाशून्यत्व॥*॥ क्ली, वि+चेष्ट+भावे क्तः। विशेषेण चेष्टा। यथा, भागवते। १। ५। १३।
"उरुक्रमस्याखिलबन्धमुक्तये
समाधिनानुस्मर तद्विचेष्टितम्॥")

विच्छ, क तिघि। इति कविकल्पद्रुमः (तुदा०-पर०-अक०-सेट्।) क, विच्छयति। तिघि दीप्तौ। इति दुर्गादासः॥

विच्छ, ग्र गतौ। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) विच्छायति विच्छायते आयन्तत्वादुभयमिति वोपदेवः। पक्षे विच्छति। ग्र, विच्छती विच्छन्ती। इति दुर्गादासः॥

विच्छन्दकः, पुं, ईश्वरसङ्घभेदः। इत्यमरः॥ विशिष्टश्चन्दोऽभिप्रायोऽत्र विच्छन्दकः। किंवा विशिष्टेच्छानिर्म्मितो विच्छन्दकः छे कादिति कः। एवं लक्षणमुपन्यस्तं साक्षेन। यथा,—
"उपर्य्युपरि यद्गेहं तद्विच्छन्दकसंज्ञकम्॥"
इति भरतः॥

विच्छर्दकः, पुं, विच्छन्दकः। इत्यमरटीकायां रायमुकुटः॥

विच्छायं, क्ली, पक्षिणां छाया। इत्यमरः॥ समासे षष्ठ्यन्तात् परा च्छाया क्लीबे स्यात्। सा चेत् बहूनां सम्बन्धिनी स्यात्। स्वयमुदाहरति। वीनां पक्षिणां छाया विच्छायम्। इत्यमरटीकायां भरतः॥ (यत्तु भागवते। १०। १२। ८।
"विच्छायाभिः प्रधावन्तो गच्छन्तः साधु हंसकैः॥"
इति दृश्यते तत्तु वेः पक्षिणश्छाया विच्छाया तत एकशेषद्वन्द्वे कृते विच्छायाशब्दाभिर्विच्छायाभिरिति सिद्धं स्यादिति सुधीभिर्विभाव्यम्॥*॥ विगता च्छाया यस्य।) छायारहिते, त्रि॥ (विगता च्छाया कान्तिर्यस्य। कान्तिरहिते च त्रि। यथा, भागवते। १। १४। २४।
"विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः।
पृच्छति स्म मुहुस्तत्र संस्मरन्नारदेरितम्॥")

विच्छायः, पुं, (विशिष्टा छाया कान्तिर्यस्य।) मणिः। इति यान्तवर्गे छायाशब्दटीकायां भरतः॥

विच्छित्तिः, स्त्री, (वि+छिद्+क्तिन्।) अङ्गरागः। विच्छेदः॥ (यथा, कामन्दकीयनीतिसारे। १४। ४४।
"लोभो धर्म्मक्रियालोपः कर्म्मणामप्रवर्त्तनम्।
सत्समागमविच्छित्तिरसद्भिः सह वर्त्तनम्॥")
हारभेदः। इति मेदिनी। ते, १८५॥ छेदः। विनाशः। इति चिकाण्डशेषः॥ (यथा, सुश्रुतसंहितायाम्। १२। ६।
"दिनकररथमार्गविच्छित्तयेऽभ्युद्यतं यच्चलदङ्गम्॥")
अङ्गहारः। गेहावधिः। इति हेमचन्द्रः॥ (वैचित्र्यम्। यथा, साहित्यदर्पणे। १०। ७११।
"अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्॥"
स्त्रीणां स्वाभाविकालङ्कारविशेषः।) यथा,—
"आकल्पकल्पनाल्पापि विच्छित्तिः कान्तिपोषकृत्॥"
इत्युज्ज्वलनीलमणिः॥
(यथा च साहित्यदर्पणे। ३। १३८।
"स्त्रीणामाकल्परचया विच्छित्तिः कान्तिपोषकृत्॥")

विच्छिन्नः, त्रि, (वि+छिद्+क्तः।) समाप्तः। विभक्तः। इति मेदिनी। ने, १३३॥ (यथा, शाकुन्तले १ अङ्के।
"यदालोके लक्ष्यं व्रजति सहसा तद्विपुलतां
यदन्तर्विच्छिन्नं भवति कृतसन्धानमिव तत्।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयोर्न मे पार्श्वे किञ्चित् चलमपि न दूरे रथजवात्॥")
कुटिलः। इति हेमचन्द्रः॥

विच्छेदः, पुं, (वि + छिद् + घञ् ।) वियोगः । विरहः । भेदः । यथा, ब्रह्मवैवर्ते गणपतिखण्डे ।
"कान्तायाः कान्तविच्छेदो मरणादतिरिच्यते ।"
(लोपः । यथा, रघुवंशे । १ । ६६ ।
"नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।
न प्रकामभुजः आद्धे स्वधासंग्रहतत्पराः ।")
विच्युतः, त्रि, विगतः । विपूर्ब्वच्युधातोः क्तप्रत्ययेन निष्पन्नः । विचरितः । विपूर्ब्वच्युतधातोः क्तप्रत्ययेन निष्पन्नः । (यथा, भागवते । ८ । १२ । २१ ।
विच्युतिः, स्त्री, (वि + च्यु + क्तिन् ।) वियोगः । यथा,—
"सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ।
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ।"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ।
विज, इर् लि ज औ वेके । इति कविकल्पद्रुमः । (अदा०-ङा०-उभ०-अक०-अनिट् ।) वेक इति विधिर्लि धौ च एधक्ते इत्यस्य घञि रूपम् । इर्, अविजत् अवेजीत् । लि ज, वेवेक्ति वेविक्ते सखीन् यक्षितः क्षपक स्वादित्यर्थः । औ, वेक्ता । इति दुर्गादासः ।
विज, इं ओ ध भीकम्पे । इति कविकल्पद्रुमः । (रुधा०-पर०-अक०-सेट् । अनिङ्निष्ठः ।) इं ओ, विग्रः । ध, विनक्ति । इति दुर्गादासः ।
विज, ड ग्र इं ओ भीकम्पे । इति कविकल्पद्रुमः । (तुदा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) ड ग्र, विजते । इं ओ, विग्रः । द्वावर्थौ । इति दुर्गादासः ।
विजनः, त्रि, (विगतो जनो यस्मात् ।) निर्ज्जनः । तत्पर्य्यायः । विविक्तः २ क्षुद्रः ३ निःशलाकः ४ रहः ५ उपांशु ६ । रत्नमरः । (यथा, महाभारते । १ । १५२ । १५ ।
"ततो भीमो वनं घोरं प्रविश्य विजनं महत् ।
व्यचोधं विपुलच्छायं रमणीयं ददर्श ह ।")
विजननं, क्ली, (वि + जन + ल्युट् ।) प्रसवः । इति हेमचन्द्रः ।
विजपिलं, क्ली, पद्मः । यथा,—
"पिच्छिलं स्यात् विजपिलं पद्मः ग्राही निषद्वरः ।"
इति हलायुधः ।
विजन्मा, [न्] त्रि, (विगतं जन्म यस्य ।) जारजः । विरुद्धजन्मविशिष्टः । इति लोकप्रसिद्धः ।
(पुं, वर्णसङ्करजातिविशेषः । यथा, मनुः । १० । २३ ।
"वैश्यात्तु जायते ग्राम्यात् सुधन्माचार्य्य एव च ।
कारूषश्च विजन्मा च मैत्रः सात्वत एव च ।")
विजयः, पुं, (वि + जि + भावे अच् ।) जयः । इत्यमरः । (यथा, मनौ । १० । ११८ ।
"स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ।
शस्त्रेण वैश्यान् रक्षित्वा धर्म्मसंदारयेदरिम् ।")
अर्জ্জुनः । इति मेदिनी । ये, १०३ । (यथा, महाभारते । ४ । ६२ । १४ ।

"अभिप्रयामि संग्रामे यदहं युद्धदुर्म्मदान् ।
नाजित्वा विनिवर्त्तामि तेन मां विजयं विदुः ।"
यथा च विख्यातविजयनाटके । २ ।
"इनो भीमः क्रूरो नृपतिसहजमानमवधीत्
इनः क्रुद्धो वनसं यथयति गुरौघेण विजयः ।
न मे चेतःस्थैर्य्यं दधति सखे कुत्र गमनं
विधेयं तद्ब्रूहि त्वमसि सदृशद्वाक्यविषयः ।")
इत्याहेतुपिता । जिनबलदेवः । विमानः । इति हेमचन्द्रः । यमः । इति शब्दचन्द्रिका ।
कल्किपुत्रः । यथा,—
"ततः कल्किश्च पद्मायां जयो विजय एव च ।
द्वौ पुत्रौ जनयामास लोकख्यातौ महाबलौ ।"
इति श्रीकल्किपुराणे १३ अध्यायः ।
भैरववंशीयकल्पराजपुत्रः । स काश्मीराजः खाण्डवनकर्त्ता च । यथा,—
"सुमतेरभवत् कल्पः सुतः सकलस्य डिम्भकः ।
विरूपक्षाभवद्गुणाधिर्गाधेर्म्मिचोऽभवत् सुतः ।
तेषां कल्पोऽभवद्राजा कल्पात्तु विजयोऽभवत् ।
यो विजित्य क्षितिं सर्व्वां पार्थिवान् भूरितेजसा ।
शक्रस्यानुमते चक्रे खाण्डवं शतयोजनम् ।
यत् सव्यसाची स्वदहत् पाण्डुपुत्रः प्रतापवान् ।
आवहत् परमां प्रीतिं ज्वलनस्य महात्मनः ।"
इति कालिकापुराणे भैरववंशानुकीर्त्तनम् ६० अध्यायः । विष्णुशरविशेषः । यथा । विष्णुशराक्षप्रपक्षजयविजयाद्यः । इति पुंलिङ्गसंग्रहे भरतः ।
विजयकुञ्जरः, पुं, (विजयाय यः कुञ्जरः ।) राजवाह्यहस्ती । इति त्रिकाण्डशेषः ।
विजयच्छन्दः, पुं, (विजयस्य छन्दो यस्मात् ।) यत्रयतिर्मौक्तिकहारः । इति हेमचन्द्रः ।
(यथा, वृहत्संहितायाम् । ८१ । ३१ ।
"सुरभूधरं लतानां सहस्रमष्टोत्तरं चतुर्हस्तम् ।
इन्द्रच्छन्दो नाम्ना विजयच्छन्दस्तदर्द्धेन ।")
विजयनन्दनः, पुं, इक्ष्वाकुवंशजराजविशेषः । तत्पर्य्यायः । जयः २ । इति हेमचन्द्रः ।
विजयमर्द्दलः, पुं, (विजयाय मर्द्दलः ।) ढक्का । इति त्रिकाण्डशेषः । जयढाक इति भाषा ।
विजया, स्त्री, तिथिविशेषः । सा विजयादशमीति ख्याता । तत्तत्कर्त्तव्यं दुर्गाशब्दे द्रष्टव्यम् । उमासखी । इति मेदिनी । ये, ४० । सा तु गौतमकन्या । यथा,—
"समागतां सतीं दृष्ट्वा जयामेकासुवाच ह ।
किमर्थं विजया नाम्ना ख्यातो चायं राजिता ।
सा देवी वचनं श्रुत्वा उवाच परमेश्वरीम् ।
गता निमन्त्रिता सर्व्वा मखे मातामहस्य ना ।
सभं पित्रा गौतमेन मात्रा चाप्यनुराधया ।"
इति वामनपुराणे ४ अध्यायः ।
कालिकापुराणे १० अध्यायेऽप्येवम् ।* विद्यामित्रोपासितविद्याविशेषः । यथा,—
"विद्यामयेन विजया जयाच्च
रथीमयं चित्रमविक्षताक्षा ।

अध्यापयिष्यत् गाधिसुतो यथाव-
न्निघातयिष्यन् युधि यातुधानान् ।"
इति भट्टिः । २ । २१ ।*
दुर्गा । इति हेमचन्द्रः । तथा च ।
"विजित्य पद्मनामानं दैत्यराजं महाबलम् ।
विजया तेन सा देवी लोके चैवापराजिता ।"
इति देवीपुराणे ४५ अध्यायः ।*
यमभार्य्या । हरीतकी । इति जटाधरः । वचा । इति रत्नमाला । जयन्ती । शेफालिका । मल्लिष्ठा । ग्रन्थीभेदः । अग्निमन्थः । इति राजनिर्घण्टः । मादकद्रव्यविशेषः । भाङ् इति सिद्धि इति च भाषा । तत्पर्य्यायः । त्रैलोक्यविजया २ भङ्गा ३ इन्द्रासनम् ४ जया ५ । इति शब्दचन्द्रिका । वीरपत्रा ६ गङ्गा ७ चपला ८ अजया ९ आनन्दा १० हर्षिणी ११ । अस्या गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । तिक्तत्वम् । वातकफापहत्वम् । संग्राहित्वम् । वाक्प्रदत्वम् । बल्यत्वम् । मेधाकारित्वम् । श्लेष्मदोषनत्वञ्च । इति राजनिर्घण्टः । अपि च ।
"भङ्गा गङ्गा मातुलानी मादिनी विजया जया ।
भङ्गा कषहरी तिक्ता याहिनी पाचनी लघुः ।
तीक्ष्णोष्णा पित्तला मोहमदवाक्यविवर्द्धिनी ।"
इति भावप्रकाशः ।
अपिच ।
"भृङ्गाभृङ्गं तु तीक्ष्णोष्णं मोहक्षतं कुष्ठनाशनम् ।
बलमेधाग्निकृत् श्लेष्मदोषहारि रसायनम् ।
जाता मन्दरमन्थनाब्धिजलधौ पीयूषरूपा पुरा
त्रैलोक्ये विजयप्रदेति विजया श्रीदेवराजप्रिया ।
लोकानां हितकाम्यया क्षितितले प्राप्ता नरैः कामदा
सर्व्वातङ्कविनाशहर्षजननी यैः सेविता सर्व्वदा ।"
इति राजवल्लभः ।*
अष्टमहादादश्यन्तर्गतद्वादशीविशेषः । यथा, अथ विजयाव्रतम् । ब्रह्मपुराणे ।
"यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत् ।
तदा सा तु महापुण्या द्वादशी विजया स्मृता ।
तस्यां स्नातः सर्व्वतीर्थे स्नातो भवति मानवः ।
संपूज्य वर्षपूजायाः सकलं फलमश्नुते ।
एकजप्यात् सहस्रस्य जप्यात्प्राप्नोति सत् फलम् ।
दानं सहस्रगुणितं तथा वै विप्रभोजनम् ।
होमस्तत्रोपवासश्च सहस्रगुणितो भवेत् ।"*
अथ व्रतविधिः ।
"आदौ गुरुं नमस्कृत्य ततः सङ्कल्पमाचरेत् ।
शरशार्ङ्गधरं देवं सौवर्णं रचयेच्छराम् ।"
सङ्कल्पमन्त्रः ।
"द्वादश्यामहं निराहारः स्थित्वाहमपरेऽहनि ।
भोक्ष्ये त्रिविक्रमानन्त शरणं मे भवाच्युत ।
सोपवीतन्तु कलसं पूर्ब्ववत् स्थापयेद्व्रती ।

पात्रं तदुपरि न्यस्येत्ताम्रं वैश्रवमेव वा ।
तत्रोपवेश्य स स्नाप्य देवं विश्वदचन्दनैः ।
आलिप्य शुभ्रं वसनं दद्याच्छत्रञ्च पादुके ।
वासुदेवायेति शिरः श्रीधरायेति वै मुखम् ।
हृषीकेशेति च कण्ठं वै वक्षः श्रीपतये इति ।
गदाखड्गधारिणे बाहू कट्यै च यापकाय वै ।
कवीन्द्रायोदरं मेढ्रं त्रैलोक्यजननाय च ।
जघनं चार्चयेद्विद्वान् सर्व्वाधिपतये इति ।
सर्व्वात्मने इति पदावेवमङ्गानि पूजयेत् ।
शङ्खचक्रगदापद्मशार्ङ्गशरविभूषितम् ।
गृहाणार्घ्यं मया दत्तं शार्ङ्गपाणे ! नमोऽस्तु ते ।
इत्यर्घ्यं पूर्ब्ववत् कृत्वा धूपदीपौ समर्प्य च ।
घृतपक्वप्रधानानि नैवेद्यानि निवेदयेत् ।
ताम्बूलादीनि दत्त्वाथ कृत्वा जागरणं निशि ।
प्रातःस्नात्वार्चयित्वेशं पुष्पाञ्जलिमथार्चयेत् ।
नमस्ते अस्तु गोविन्द बुध श्रवणसंज्ञक ।
अघोरं चास्त्रयं कृत्वा सर्व्वसौख्यप्रदो भव ।
इति प्रार्थ्य ततः सर्व्वं दत्त्वा चार्घ्यं प्रतोष्य
द्विजान् ।
भुक्त्वा विप्रान् भोजयित्वा सुखं पारणमाचरेत् ।
भाद्रे माघि बुधस्यर्क्षे यदि स्यादिजयाव्रतम् ।
तदा सर्व्वव्रतेभ्योऽस्य माहात्म्यमतिरिच्यते ।"

इति श्रीहरिभक्तिविलासे १३ विलासः ।

(सहदेवपत्नी । यथा, महाभारते ।१।९५।८०।
"सहदेवोऽपि माद्रीमेव स्वयंवरे विजयां नामोपयेमे मद्रराजस्य द्युतिमतो दुहितरं तस्यां पुत्रमजनयत् सुहोत्रं नाम ।"*।
पुरुवंशीयभूमन्योः पत्नी । यथा, तत्रैव । १ । ९५ । ३३ ।
"भूमन्युः खलु दाशार्हौसुषवेमे विजयां नाम तस्यामस्य जज्ञे सुहोत्रः ।")

विजयासप्तमी, (विजयाख्या सप्तमी ।) रविवारे शुक्लपक्षीया सप्तमी । यथा,—
"शुक्लपक्षस्य सप्तम्यां रुक्षर्क्षवारो यदा भवेत् ।
सप्तमी विजया नाम तत्र दत्तं महाफलम् ।"

इति तिथ्यादितत्त्वम् । *।

अथ विजयोत्सवविधिः ।
"रथमारोप्य देवेशं सर्व्वालङ्कारशोभितम् ।
सासितूबधनुर्व्वाणपाणिं नक्षत्रराजकम् ।
खलीलया जगत्त्रातुमाविर्भूतं रघूद्वहम् ।
राजोपचारैः श्रीरामं ग्रामोदृक्षतलं नयेत् ।
सीताकान्तं ग्रामीयुक्तं भक्तानामभयङ्करम् ।
अर्चयित्वा ग्रामोदृक्षमर्चयेद्विजयाप्तये ।"
तत्र मन्त्रः ।
"ग्रामी ग्रामयते पापं ग्रामी लोहितकण्टका ।
धरित्रार्जुनबाणानां रामस्य प्रियवादिनी ॥
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र निर्व्विघ्नकर्त्री त्वं भव श्रीरामपूजिता ।
गृहीत्वा साक्षतामार्द्रां ग्रामीमूलमृतां न्यदम् ।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् ।
केचिद्धोमेऽथ भाषं केचिद्भाषञ्च वासरैः ।
केचिदन्नसुखेभ्यं कोशवेन्द्रस्य तुष्टये ।
निर्जिता राक्षसा दैत्या वैरिणो जगतीतले ।
रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ।
आनीय स्थापयेद्देवं निजसिंहासने सुखम् ।
ततो नीराज्य देवेशं प्रणमेद्दण्डवद्भुवि ।
महाप्रसादवस्त्रादि धारयेद्दैवतैः सह ।
इति श्रीविष्णुधर्म्मोक्तानुसारेण यत्नेलेख्यम् ।
विधिः श्रीरामविजयोत्सवस्योत्सवकृत् सताम् ।
सीता हृष्टेति हनुमद्दाक्यं श्रुत्वाकरोत्प्रभुः ।
विजयं वानरैः सार्द्धं वासरेऽस्मिन् ग्रमीतलात् ।"

इति श्रीहरिभक्तिविलासे १५ विलासः ।

विजयिन्, त्रि, विजिलम् । इत्यमरटीकायां रायमुकुटः ।
विजयी, [न्] त्रि, (विशेषेण जेतुं शीलमस्य । वि + जि + "जिदृक्षिविश्रीति ।" ३ । २ ।१५७। इति इनिः ।) जयशीलः । यथा,—
"वज्रपञ्जरनामेदं यो रामकवचं पठेत् ।
स चिरायुः सुखी पुत्री विनयी विजयी भवेत् ।"

इति तन्त्रसारः ।

(पुं, अर्ज्जुनः । यथा,—
"अर्ज्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः ।
बीभत्सुर्व्विजयी कृष्णः सव्यसाची धनञ्जयः ।
एतान्यर्ज्जुननामानि प्रातरुत्थाय यः पठेत् ।
उद्यतेष्वपि शस्त्रेषु हन्ता तस्य न विद्यते ।"

इति सर्व्वजनप्रसिद्धम् ।)

विजयोत्सवः, पुं, (विजयायाश्चोत्सवः ।) आश्विनशुक्लदशमीविहितभगवदुत्सवविशेषः । यथा,
"आश्विनस्य सिते पक्षे दशम्यां विजयोत्सवः ।
कर्त्तव्यो वैष्णवैः सार्द्धं सर्व्वत्र विजयार्थिना ।"

अथ विजयोत्सवविधिः ।
"रथमारोप्य देवेशं सर्व्वालङ्कारशोभितम् ।
सासितूबधनुर्व्वाणपाणिं नक्षत्रराजकम् ।
खलीलया जगत्त्रातुमाविर्भूतं रघूद्वहम् ।
राजोपचारैः श्रीरामं ग्रामोदृक्षतलं नयेत् ।
सीताकान्तं ग्रामीयुक्तं भक्तानामभयङ्करम् ।
अर्चयित्वा ग्रामोदृक्षमर्चयेद्विजयाप्तये ।"
तत्र मन्त्रः ।
"ग्रामी ग्रामयते पापं ग्रामी लोहितकण्टका ।
धरित्रार्जुनबाणानां रामस्य प्रियवादिनी ॥
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र निर्व्विघ्नकर्त्री त्वं भव श्रीरामपूजिता ।
गृहीत्वा साक्षतामार्द्रां ग्रामीमूलमृतां न्यदम् ।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् ।
केचिद्धोमेऽथ भाषं केचिद्भाषञ्च वासरैः ।
केचिदन्नसुखेभ्यं कोशवेन्द्रस्य तुष्टये ।
निर्जिता राक्षसा दैत्या वैरिणो जगतीतले ।
रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ।
आनीय स्थापयेद्देवं निजसिंहासने सुखम् ।
ततो नीराज्य देवेशं प्रणमेद्दण्डवत् भुवि ।
महाप्रसादवस्त्रादि धारयेत् दैवतैः सह ।*।
इति श्रीविष्णुधर्म्मोक्तानुसारेण यत्नेलेख्यम् ।
विधिः श्रीरामविजयोत्सवस्योत्सवकृत् सताम् ।
सीता हृष्टेति हनुमद्दाक्यं श्रुत्वाकरोत् प्रभुः ।
विजयं वानरैः सार्द्धं वासरेऽस्मिन् ग्रमीतलात् ।"

इति श्रीहरिभक्तिविलासे १५ विलासः ।

विजरः, त्रि, जरारहितः । विगता जरा यस्येति बहुव्रीहिसमासनिष्पन्नः । (यथा, कथासरित्सागरे । ४९ । ११ ।
"यः सर्व्वविधिवृत्तिज्ञश्चक्रे सिद्धरसायनः ।
आत्मानं तच्च राजानं विजरं चिरजीवितम् ।")

विजलं, त्रि, विजिलम् । इति हेमचन्द्रः । (विगतं जलं यस्मात् ।) निर्जलञ्च । (यथा, हृहत्संहितायाम् । १६ । २० ।
"नक्षर्कचन्द्रकिरणातिरजोऽवनद्धा
तोयाशयाश्च विजलाः सरितोऽपि तन्वाः ।")

विजल्पः, पुं, (विशेषेण जल्पनमिति । वि + जल्प + घञ् ।) वाक्यविशेषः । यथा,—
"वक्रयाक्रुयया गूढमानसुदान्तरालया ।
अधद्विधि कटाक्षोक्तिर्विजल्पो विदुषां मतः ।"

इत्युज्ज्वलनीलमणिः ।

विजातः, त्रि, (विरुद्धं जातं जन्म यस्य ।) विजन्मा । इति लोकप्रसिद्धः ।

विजाता, स्त्री, (विशेषेण जातः पुत्रो यस्याः ।) जातापत्या । यथा,—
"विजाता च प्रजाता च जातापत्या प्रसूतिका ।"

इति हेमचन्द्रः ।

विजातीयः, त्रि, (विभिन्नां जातिमर्हतीति । विजाति + छः ।) विभिन्नधर्म्माक्रान्तः । यथा,
"प्रायश्चित्ताद्विजातीयात् तादृक्पापविनाशनम् ।"

इति प्रायश्चित्ततत्त्वम् ।

(यथा च साहित्यदर्पणे ७ परिच्छेदे ।
"एवं पददोषजातीया वाक्ये दोषा उक्ताः सम्प्रति तद्विजातीया उच्यन्ते ।") विशेषजातिविशिष्टः । यथा,—
"प्रवाही नादिमानेव न विजात्येकशक्तिमान् ।
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ।"

एष कार्य्यकारणप्रवाही नादिमान् अनादिः । विजातीयेषु तत्त्वादिषु एकशक्तिमान् न प्रवाहः । अन्वयव्यतिरेकयोस्तत्त्वे नियतत्वे नियतात्वनिर्व्वाहे यत्नवता भाव्यं यत्नः करणीयः वैजात्यमिति भावः । वह्निसामान्यं प्रति विजातीयोष्णस्पर्शवत्त्वेन एव कारणम् । इति हरिदासीयकुसुमाञ्जलिटीका ।

विजिगीषः, त्रि, (विजिगीषा अस्यास्तीति । अर्शआदित्वादच् ।) जयेच्छुः । इति विद्वान्तकौमुदी ।

विजिगीषा, स्त्री, (विजेतुमिच्छा । वि + जि + सन् + अः । स्त्रियां टाप् ।) क्षोदरपूरणाशक्तिनिमित्तकनिन्दात्यागेच्छा । इत्यमरटीकायां

रमानाथः। व्यवहारः। कश्चित् प्रकर्षः। इति तत्रैव भरतः॥ विजयेच्छा च॥ (यथा, कथासरित्सागरे। ३६। ७१।
"दारे विधिमिवान्यं तत्तद्रक्षा विजिगीषया।
आगतं पुरुषं कञ्चिद्दर्शार्घ्यदायकम्॥")
विजिगीषाविवर्ज्जितः, त्रि, (विजिगीषया विवर्ज्जितः।) केवलसुदराधीनः। तत्पर्य्यायः। आढ्यः २ औदरिकः ३। इत्यमरः॥ विजिगीषा व्यवहारः कश्चित् प्रकर्षो वा तेन विवर्ज्जितो विहीनो यः केवलसुदराधीनः तत्तद्विमौ तर्त्तयते इत्यर्थः। जिगीषा जेतुमिच्छायां व्यवहारप्रकर्षयोः। इति मेदिनी॥ तत्र स्वोदरपूरणाद्यशक्तिनिमित्तकनिन्दात्यागेच्छा विजिगीषा तया रहिते इयमिति रमानाथः। इति तट्टीकायां भरतः॥
विजिगीषुः, त्रि, (विजेतुमिच्छुः। वि+जि+सन्+"सनाशंसभिक्ष उः।" ३। २। १६८। इति उः।) जयेच्छाशीलः। यथा,—
"जेतुमेवंशशीलश्च विजिगीषुरिति स्मृतः॥"
इति शब्दमाला॥
(यथा, कामन्दकीयनीतिसारे। ८। ३।
"रोचते सर्व्वभूतेभ्यः शरीराखण्डमण्डलः।
सम्पूर्णमण्डलत्वमाद्विजिगीषुः सदा भवेत्॥")
विजितः, त्रि, (विशेषेण जितः।) पराजितः। यथा,—
"पथ्याशिनां शीलवतां नराणां
सद्वृत्तिभाजां विजितेन्द्रियाणाम्।
एवं विधानामिदमायुरुक्तं
चिरं यदा वृद्धमुनिप्रवादः॥"
इति मलमासतत्त्वम्॥
विजिता, [ऋ] त्रि, (विज+क्तच्।) पृथक्। भीतः। कम्पितः। इति विजधातोरर्थदर्शनात्॥
विजितिः, स्त्री, (वि+जि+क्तिन्।) विजयः। यथा,—
"क्षितिविजितिस्थितिविहितप्रततयः परगतयः।
उररुरधुर्गुरु दुधुपुर्युधि कुरवः खमरिकुलम्॥"
इति दर्गी॥
विजिनं, त्रि, विजिलम्। इत्यमरटीकायां रायमुकुटः॥
विजिलं, त्रि, ईषत् सरसयञ्जनादि। तत्पर्य्यायः। पिच्छिलम् २। इत्यमरः॥ विजयिनम् ३ विजिनम् ४ विज्वलम् ५ उज्ज्वलम् ६ लालसीकम् ७। इति वाचस्पतिः॥ विजिविलम् ८ विजलम् ९। इति हेमचन्द्रः॥
"पाकरूपरसगन्धे यत्नेन तु भवेत् त्रयम्।
तैलपाकसुसंस्कारे प्रायस्तुपसंस्कृतम्।
पिच्छिलं लालसीकञ्च विजिनं विज्वलञ्च तत्॥"
इति शब्दरत्नावली॥
विजिविलं, त्रि, विजिलम्। इति हेमचन्द्रः॥
विजिह्मः, त्रि, (विशेषेण जिह्मः।) वक्रः। कुटिलः। इति केचित्॥ (यथा, रघुः। १६। ३५।
"शिल्पकार्य्ये उभयेन वेजितास्तं विजिह्मनयना बलोभयन्॥")
विजुलः, पुं, शाल्मलीवृक्षः। इति राजनिर्घण्टः॥
विजृम्भणं, क्ली, (वि+जृम्भ+ल्युट्।) जृम्भणम्। (यथा, सुश्रुते। ५। २।
"निद्रागुरुत्वञ्च विजृम्भणञ्च
विश्लेषहर्षावयवाङ्गमर्दैः॥")
विकसनम्। इति केचित्॥ (यथा, रघुः। १६। ४०।
"वनेषु सायन्तनमल्लिकानां
विजृम्भणोन्मिश्रितपुष्पगन्धैः॥")
कम्पनम्। सङ्कोचः। यथा, भागवते। ७। ५। ४६।
"जितं त्वयैकेन जगन्मयं भुवो-
विजृम्भणत्रस्तसमस्तधिष्ण्यपम्॥")
विजृम्भितं, क्ली, (वि+जृम्भ+क्तः।) चेष्टा। इति मेदिनी। ते, २१०॥ (यथा, कथासरित्सागरे। ४। १३।
"अथागत्य समाख्यातं ततस्तस्या मन्त्रिबन्धनम्।
उद्गाढ़सुप्तकेशाया नवानङ्गविजृम्भितम्॥")
विजृम्भितः, त्रि, (वि+जृम्भ+क्तः।) विकसितः। इति मेदिनी। ते, २१०॥ यथा, भागवते। ४। २१। ८।
"तदादिराजस्य यशो विजृम्भितं
गुणैरशेषैर्गुणवत्सभाजितम्॥"
व्याप्तः। यथा, रघुः। ७। ४२।
"आदर्शतो लोचनमार्गमाजौ
रजोऽन्धकारस्य विजृम्भितस्य॥"
विजृम्भा सञ्जाता अस्येति। तारकादित्वादितच्।) जृम्भायुक्तश्च॥ (यथा, हरिवंशे। १८९। ६।
"सगरं सधनुष्कञ्च दृष्ट्वात्मानं विजृम्भितम्।
ततो ननाद भूतात्मा स्निग्धगम्भीरनिःस्वनः॥")
विज्ञं, त्रि, विजिलम्। इत्यमरटीकायां रायमुकुटः॥
विज्वलं, क्ली, वाद्यम्। यथा,—
"पञ्चवाद्यो विकर्षोऽथ तौरं विज्वलगायके।
लोहनालस्तु नाराचः प्रसरः काण्डगोचरः॥"
इति त्रिकाण्डशेषः॥
त्रि, विजिलम्। इति हेमचन्द्रः॥ (यथा, वृहत्संहितायाम्। ५५। २६।
"श्लेष्मातकस्य बीजानि
निष्कुलीकृत्य भावयेत् प्राज्ञः।
अक्षोल्लविज्वलाद्रि-
च्छायायां सप्तकृत्वश्च॥")
विज्विलं, त्रि, विजिलम्। इति शब्दरत्नावली॥
विज्वुलं, क्ली, लवणम्। इति राजनिर्घण्टः॥
विज्वुलिका, स्त्री, लवणम्। इति राजनिर्घण्टः॥
विज्ञः, त्रि, (विशेषेण जानातीति। वि+ज्ञा+"आतश्चोपसर्गे।" इति कः।) प्रवीणः। इत्यमरः॥ (यथा, भागवते। ६। १६। ६५।
"एवं विपर्य्ययं बुद्ध्वा वृथा वै विज्ञाभिमानिनाम्।
आत्मनश्च गतिं सूक्ष्मां ज्ञानत्ययविलक्षणाम्॥")
अस्य पर्य्यायो निपुणशब्दे द्रष्टव्यः॥ पण्डितः। इति राजनिर्घण्टः॥ (यथा, मनौ। ३। ६६।
"विज्ञेन विज्ञाप्यमिदं नरेन्द्रे
तस्मात्त्वयास्मिन् समयं प्रतीक्ष्य।
आत्यन्तिकासिद्धिविलम्बसिद्धोः
कार्य्यस्य कार्य्यस्य शुभा दिशन्ति॥")
विज्ञबुद्धिः, स्त्री, जटामांसी। इति शब्दचन्द्रिका॥
विज्ञातः, त्रि, (वि+ज्ञा+क्तः।) ख्यातः। इत्यमरः॥ (विदितः। यथा, हरिवंशे। १६५। १७।
"विज्ञातोऽपि मया चिह्नैर्विना चक्रं जनार्द्दनः॥")
विज्ञानं, क्ली, (वि+ज्ञा+ल्युट्।) ज्ञानम्। कर्म्म। इति मेदिनी। ने, २१३॥ कार्म्मणम्। इति हेमचन्द्रः॥
"मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः॥"
इत्यमरः॥
"विशेषेण सामान्येन वावबोधो मोक्षो मुक्तिः शिल्पं चित्रादिशास्त्रं व्याकरणादि। मोक्षे शिल्पे शास्त्रे च या धीः सा ज्ञानं विज्ञानमुच्यते एषा विशेषप्रवृत्तिः। अन्यत्र घटपटादौ या धीः सापि ज्ञानं विज्ञानमुच्यते। एषा सामान्यप्रवृत्तिः। मोक्षे धीर्ज्ञानं विज्ञानञ्च यथा। ज्ञानाच्छुक्तिरिति। सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति इति। अन्यत्र यथा। ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे इति। घटत्वप्रकारकज्ञानमिति। ये केचित् प्राणिनो लोके सर्व्वे विज्ञानिनो मता इति। ब्रह्मणो नित्यविज्ञानानन्दरूपत्वात् इति। एवं चित्रज्ञानं व्याकरणज्ञानं घटपटविज्ञानमित्यादिकं प्रयुज्यत एव। तद्विगमे गरुत्मदादिशब्दवत् गरुत्मच्छब्दो हि गरुड़े पक्षिमात्रे च वर्त्तते। मोक्ष इति निमित्तसप्तमी मोक्षनिमित्तं शिल्पशास्त्रयोर्धीर्ज्ञानमुच्यते। तन्निमित्तसोऽन्यनिमित्तं या तयोर्धीः सा विज्ञानमिति केचित्। मोक्षविषया मोक्षफला धीर्ज्ञानं अन्यधीर्विज्ञानम्। क्वान्यत्र इत्याह शिल्पशास्त्रयोरिति केचित्। अवबोध इत्यध्याहृत्य मोक्षविषयेऽवबोधो धीर्ज्ञानं अन्यत्र घटपटादिविज्ञानं शिल्पशास्त्रविषये विज्ञानमिति केचित्। जानातेरनट् ज्ञानं विविधं विरूपं वा ज्ञानं विज्ञानम्।" इत्यमरटीकायां भरतः॥
तत्तु ब्राह्मणस्य लक्षणविशेषः। यथा,—
"क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः।
अध्यात्मनित्यता ज्ञानमेतद्ब्राह्मणलक्षणम्॥"
ज्ञानविज्ञानयोर्लक्षणं यथा,—
"चतुर्दशानां विद्यानां धारणं हि यथार्थतः।
विज्ञानमितरं विद्यादृषेण धर्म्मो विवर्द्धते॥
अधीत्य विधिवद्विद्यामर्थञ्चैवोपलभ्य तु।
धर्म्मकार्य्यान्निवृत्तञ्च तद्विज्ञानमिष्यते॥
यया स देवो भगवान् विद्यते यत्र विद्यते।

साचादेव महादेवस्तज्ज्ञानमिति कीर्त्तितम्॥"
इति कौर्म्मे उपविभागे १४ अध्यायः॥
विज्ञानपादः, पुं, (विज्ञानमेव पादं लक्ष्यं यस्य।) वेदव्यासः। इति केचित्॥
विज्ञानमयकोषः, पुं, (विज्ञानमयस्तदात्मकः कोष इवाच्छादकत्वात्।) ज्ञानेन्द्रियैः सहिता बुद्धिः। इति वेदान्तसारः॥
विज्ञानमालकः, पुं, (विज्ञानं मालेव यस्य। बहुव्रीहौ कन्।) बुद्धः। इति हेमचन्द्रः॥
विज्ञानिकः, त्रि, (विज्ञानमस्त्यस्येति। विज्ञान+ठन्।) ज्ञानविशिष्टः। विज्ञः। इति वैज्ञानिकग्रन्थटीकायां भरतः॥
विज्ञापनं, क्ली, (वि+ज्ञा+णिच्+ल्युट्।) बोधनम्। जानान इति भाषा। विपूर्ब्बज्ञाङ्ज्ञाधातोरनट्प्रत्ययेन निष्पन्नम्॥ (यथा, कथासरित्सागरे। ३१। ५८।
"तया विज्ञापनायाहं प्रेषितः स्वीकुरुष्व ताम्।
युवयोरस्तु योगोऽयं कौमुदीचन्द्रयोरिव॥"*॥
स्त्री, वि+ज्ञा+णिच्+युच्। टाप्। विज्ञापना। यथा, रघुः। १७। ४०।
"ततः परमभिप्रयक्तसौमनस्यनिवेदितैः।
युयोज पाकाभिमुखैर्भृत्यान् विज्ञापनाफलैः॥")
विज्ञाप्तिः, स्त्री, (वि+ज्ञा+णिच्+क्तिन्।) विज्ञापनम्। विपूर्ब्बज्ञाङ्ज्ञाधातोः क्तिप्रत्ययेन निष्पन्ना॥ (विकल्पेन ह्रस्वे विज्ञप्तिरपि॥)
विज्ञेयं, त्रि, (विज्ञातुं योग्यम्। वि+ज्ञा+"अचो यत्।" ३। १। ९७। इति यत्। "ईद्यति।" ६। ४। ६५। इति आत ईत्।) विज्ञातव्यम्। विज्ञानीयम्। विपूर्ब्बज्ञाधातोर्थप्रत्ययेन निष्पन्नम्॥ (यथा, मनुः। २। १०।
"श्रुतिस्तु वेदो विज्ञेयो धर्म्मशास्त्रन्तु वै स्मृतिः॥")
विज्ञामरं, क्ली, चक्षुःशुक्लरोगम्। इति केचित्॥
विज्ञोली, स्त्री, पङ्क्तिः। इति त्रिकाण्डशेषः॥
विट, आक्रोशे। खने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-खने अक०-सेट्।) वेटति। आक्रोशः। केचित्तु पठन्ति। खनः शब्दः। इति दुर्गादासः॥
विटः, पुं, (वेटतीति। विट+कः।) विड्गः। इत्यमरः॥ (यथा, भागवते। १०। १३। २।
"सतामयं सारभृतां निसर्गो
यदर्थवाग्बुद्धिमनोवपुर्भिः।
प्रतिक्षणं नव्यवदच्युतस्य यत्
स्त्रियां विटानामिव साधु वार्त्ता॥")
कामुकानुचरः। धूर्त्तः। इति भरतः॥ कामतन्त्रकलाकोविदः। इति रसमञ्जरी॥ पर्व्वतविशेषः। लवणभेदः। खदिरविशेषः। सूचिकः। इति मेदिनी। टे, २८॥ नागरङ्गवृक्षः। इति शब्दमाला॥
विटङ्कः, पुं क्ली, (विशेषेण टङ्कयते सौधादिषु इति। वि+टङ्क बन्धने+घञ्।) कपोतपालिका। पायवार खोप इति भाषा। इत्यमरः॥ हे सौधादिषु प्रान्ते काष्ठादिरचिते गृहपक्षिस्थाने। कपोतान् पालयतीति कपोतपाली छात् षण् इति षण् स्वार्थे कः कपोत इत्युपलक्षणं पक्षिमात्रपालिकेति बोध्यम्। वीन् पक्षिणष्टङ्कयति बध्नाति विटङ्कं टङ्कि क वन्धे षण् विशेषेण टङ्कयत्यत्रेति वा अल् घञ् वा। इति भरतः॥ (यथा, माघे। ३। ५५।
"रसान्तरे यत्र गृहान्तरेषु
वितर्द्दिनिर्यूहविटङ्कगोढ़ः।
रसानि ग्रसन् वयसां गणोऽन्ते-
वासिलमाप स्फुटमङ्गनानाम्॥"*॥
सम्भरे, त्रि। यथा, भागवते। ३। १५। २७।
"देवावनद्धमणिहेमरथोऽग्निदत्त-
कैयूरकूबरकिरीटविटङ्कवेषौ॥")
विटङ्कः, पुं क्ली, (विटङ्क एव। स्वार्थे कन्।) विटङ्कः। इति शब्दरत्नावली॥
विटपः, पुं क्ली, (वेटति शब्दायते इति। विट+"विटपपिष्टपविभ्रिपोलपाः।" उणा० ३। १४५। इति कपत्ययेन निपातनात् साधुः।) शाखापल्लवसमुदायः। तत्पर्य्यायः। विस्तारः २। इत्यमरः॥ स्तम्बः ३। इति मेदिनी। पे, २२॥ शाखा। (यथा, रघुः। १०। ११।
"बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः।
आविर्भूतमपां मध्ये पारिजातमिवापरम्॥")
पल्लवः। इति शब्दरत्नावली॥ (यथा, ऋतुसंहारे। १। २१।
"तरुविटपलतालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन॥")
क्ली, शुष्कवृक्षमान्तरम्। यथा,—
"विटपन्तु महावीर्य्यमन्तरा शुष्कवृक्षयम्॥"
इति हेमचन्द्रः॥
(यथा, सुश्रुते। १। ६।
"वृक्षशुष्कत्वयोरन्तरे विटपं नाम तत्र वातप्रायमल्पशुक्रता वा भवति॥")
विटपः, पुं, (विटान् पातीति। पा+कः।) विटाधिपः। वारदारिकश्रेष्ठः। इति मेदिनी। पे, २२॥ आदित्यपत्रः। इति राजनिर्घण्टः॥
विटपी, [न्] पुं, (विटपः शाखादिरस्त्यस्येति। विटप+इनिः।) वृक्षः। इत्यमरः॥ (यथा, आर्य्यासप्तशत्याम्। ७८६।
"यूथपते तव कश्चिन्नहि मानस्यानुरूप इह विटपी।
प्रेरय दिनं निदाघज्वालाग्नीयः क खलु ते च्छाया॥")
वटः। इति राजनिर्घण्टः॥ (विटपयुक्ते, त्रि। यथा, महाभारते। १। ७३। १०।
"अङ्कुरं लतवांस्तत्र ततः पर्णैरवान्वितम्।
पलाशिनं शाखिनञ्च तथा विटपिनं पुनः॥")
विटप्रियः, पुं, (विटानां प्रियः।) सुन्दरवृक्षः। इति राजनिर्घण्टः॥
विटमाक्षिकः, पुं, (विटप्रियो माक्षिकः।) धातुविशेषः। तत्पर्य्यायः। ताप्यः २ नदीजः ३ कामारिः ४ तारारिः ५। इति हेमचन्द्रः॥
विटलवणं, क्ली, (विटसंज्ञकं लवणम्।) विड्लवणम्। इति केचित्॥
विटिः, स्त्री, (विटतीति। विट्+इन्। स च कित्।) श्वेतचन्दनम्। इति शब्दमाला॥
विट्, [ड्] पुं, (विश्+क्विप्।) वैश्यः। (यथा, मनुः। २। ३६।
"गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः॥")
मनुजः। इत्यमरः॥ (यथा, रघुः। १। ६३।
"अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम्।
सुनुः सुनृतवाक् स्रष्टुः विससर्जोदितश्रियम्॥")
प्रवेशः। इति विश्वः॥
विट्, [ष्] स्त्री, (विष्यतेऽग्नौ+क्विप्।) विष्ठा। इत्यमरः॥ कन्या। इति विट्पतिशब्ददर्शनात्॥ (अग्नौ, त्रि। यथा, ऋग्वेदे। ८। १६। ११।
"हव्या वा वेविषद्विषः।"
"विषः अग्नान् देवान् वेविषत् प्रापयेत्।" इति तद्भाष्ये सायणः॥)
विट्कारिका, स्त्री, पक्षिविशेषः। तत्पर्य्यायः। कुणपी २ गोराटी ३ गोकिराटिका ४। इति भूरिप्रयोगः॥ विट्मारिका ५। इति हारावली॥
विट्खदिरः, पुं, (विड्वत् दुर्गन्धः खदिरः।) विष्ठावद्गन्धखदिरः। गुयेवाबला इति भाषा॥ तत्पर्य्यायः। अरिमेदः २। इत्यमरः॥ हरिमेदः ३ असिमेदः ४। इति शब्दरत्नावली॥ हरिमेदः ५ कालस्कन्धः ६ अरिमेदकः ७। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। मुखदन्तगदासकत्वविषश्लेष्मकुष्ठव्रणक्षयहनाग्नित्वञ्च। इति भावप्रकाशः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ अरिमेदशब्दे द्रष्टव्यौ॥
विट्चरः, पुं, (विधि विष्ठायां चरतीति। चर+टः।) ग्राम्यशूकरः। इत्यमरः॥
विट्पतिः, पुं, (विशः कन्यायाः पतिः।) जामाता। इति जटाधरः॥ (यथा, मनुः। ३। १४८।
"मातामहं मातुलञ्च स्वसारीयं श्वशुरं गुरुम्।
दौहित्रं विट्पतिं बन्धुत्विग्याज्यौ च भोजयेत्॥"*॥
वैश्यानां पतिः। यथा, भागवते। ४। २३। ३२।
"वैश्यः पठन् विट्पतिः स्यात् शूद्रः सत्तमतामियात्॥"
"विशां पश्वादीनां वैश्यादीनां वा पतिः स्यात्।" इति तट्टीका॥)
विट्सारिका, स्त्री, (विट्प्रिया सारिका।) पक्षिविशेषः। इति जटाधरः॥ गुये सालिक् इति भाषा॥
विठरः, पुं, वाग्मी। इति संक्षिप्तसारोणादिवृत्तिः॥
विड, आक्रोशे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वेडति आक्रुष्टवती। इति दुर्गादासः॥

विड्लवणं, क्ली, (विड् आक्रोशे + दृग्पधेति कः ।) लवणविशेषः । विट्सुअ इति भाषा । यथा,—
"पाक्यं विड्च क्षतके दयम् ।" इत्यमरः ॥ ईषत्तीरासन्नभवां लवणमृत्तिकां पाचयित्वा निष्पादिते लवणे । विट्लवणे । इति केचित् । क्षतके क्षत्रिमे । पाक्यविड्लवणयोर्भेदेऽपि क्षतकत्वात् ऐक्यमिति स्वामी । पच्यते इति पाक्यम् । डु पच अर्थो पाके इदयासोरितिष्यञ् चजोर्घ इति कः पाकेन निष्पादितमिति व्याख्यो वा । वेड्रति भिनत्ति विड् विड्राड्भ्यि इसुडत्वात् कः । इति भरतः ॥ तत्पर्य्यायः । विड्गन्धम् २ काललवणम् ३ विड्लवणम् ४ । इति रत्नमाला ॥ द्राविड्कम् ५ खड्कम् ६ क्षतकम् ७ क्षारम् ८ आसुरम् ९ सुपाक्यम् १० खड्कलवणम् ११ घूर्णम् १२ क्षत्रिमकम् १३ । अस्य गुणाः । उष्णत्वम् । दीपनत्वम् । रुच्यत्वम् । वातानीर्यमूलगुल्ममेहनाग्नित्वच्च । इति राजनिर्घण्टः ॥ अपि च ।
"विड्लं सक्षारमुद्भेदि कफं वातानुलोमनम् ।
रूक्षं कफमधो वातं सक्षारयेदिदीपनः ।
दीपनं लघु तीक्ष्णोष्णं रूक्षं रुच्यं छवायि च ।
विबन्धानाहविष्टम्भशूलगौरवमूलजुत् ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"विड्लं लवणसुत्क्लेदि वह्नेर्बलविवर्द्धनम् ।
मलवातामविष्टम्भशूलाटोपविबन्धजुत् ॥"
इति राजवल्लभः ॥

विड्लं, क्ली पुं, (विड् आक्रोशे + "विड्लादिभ्यः कित्" उणा० १ । १२० । इति अलच् । सच कित् ।) खनामख्यातौषधम् । (यथा, सुश्रुतसंहितायाम् । ५५ । ७ ।
"घृतोशीरतिलक्षौद्रविड्लक्षीरगोमयैः ।
आम्लस्नेहान्वितैर्मांसैः सङ्कीर्णविरोधवत् ॥")
तत्पर्य्यायः । वेड्लम् २ अमोघा ३ चित्रतण्डुलाः ४ तण्डुलः ५ क्रिमिघ्नः ६ । इत्यमरः ॥ रसायनः ७ पावकः ८ भक्षकम् ९ । इति जटाधरः । वेड्लः १० मोघा ११ तण्डुलः १२ । इति रत्नमाला ॥ जन्तुघ्नम् १३ चित्रतण्डुलम् १४ क्रिमिघ्नम् १५ क्रिमिघ्नः १६ गर्हभम् १७ केवलम् १८ । इति रत्नमाला ॥ विड्ङ्गा १९ क्रमिहा २० चित्रा २१ तण्डुला २२ तण्डुलीयका २३ वातारितण्डुला २४ जन्तुघ्नी २५ मृगगामिनी २६ कैराली २७ गर्हरा २८ कापाली २९ वरासुः ३० चित्रबीजा ३१ जन्तुघ्नी ३२ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । लघुत्वम् । वातकफार्शोग्रहिमान्द्यारुचिश्वासान्तिकृमिदोषविनाशित्वच्च । इति राजनिर्घण्टः ॥ ईषत्तिक्तत्वम् । क्रिमिविषनाशित्वच्च । इति राजवल्लभः ॥
"विड्ङ्गं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु ।
शूलाध्मानोदरश्लेष्मक्रिमिवातविबन्धजुत् ॥"
इति भावप्रकाशः ॥

विड्ङ्गः, त्रि, (विड् + अङ्गच् ।) अभिन्नः । इति मेदिनी । गे, ४६ ॥

विड्मनं, क्ली, (वि + ड्मन + ल्युट् ।) अनुकरणम् । यथा,—
"न वेद कश्चिद्भगवंश्चिकीर्षितं
तवेहमानस्य नृणां विड्मनम् ।
न यस्य कश्चिद्दयितोऽस्ति कर्हिचि-
द्द्वेष्यश्च यस्मिन् विषमा मतिर्नृणाम् ॥"
इति श्रीभागवते । १ । ८ । २६ ॥
प्रतारणम् । यथा, तत्रैव ।
"अज्ञ कर्म्म च विज्ञाननञ्जसाकर्तुरात्मनः ।
तिर्यङ्नृषिषु यादःसु तदत्यन्तविड्मनम् ॥"३०॥

विड्मना, स्त्री, (वि + ड्मन + णिच् + युच् । टाप् ।) अनुकरणम् । (यथा, कुमारे । ४ । १२ ।
"असति त्वयि वारुणीमदः
प्रमदानामधुना विड्मना ॥")
प्रतारणम् । (यथा, पञ्चतन्त्रे । ४ । ४६ ।
"नो चेदेतेषां सकाशात् विड्मनां प्राप्य मरिष्यसि ॥"॥ परिहासः । यथा, कुमारे । ५ । ७० ।
"दृश्यश्च तेऽन्या पुरतो विड्मना
वदूढया वारवरानहार्य्यया ।
विलोक्य दह्येत मघिष्ठितं त्वया
महाजनः कौरसुखो भविष्यति ॥")

विड्मित, त्रि, (वि + ड्मन + क्तः ।) कृतविड्मनः । तत्पर्य्यायः । व्यस्तः २ आकुलः ३ दुर्गतः ४ । इति शब्दमाला ॥ (अनुकृतः । यथा, रघुः । ३ । ५२ ।
"अतिष्ठदालीढविशेषशोभिना
वपुःप्रकर्षेण विड्मितेश्वरः ॥")

विड़ारकः, पुं, (विड़ाल एव । स्वार्थे कन् । अस्य रः ।) विड़ालः । इति शब्दरत्नावली ॥

वि(वि)ड़ालः, पुं, (विड् आक्रोशे + "तमिविशिविड़ीति ।" उणा० १ । ११७ । इति कालन् ।) नेत्ररिपुः । इति मेदिनी । ले, १३३ ॥ नेत्रौषधविशेषः । इति भावप्रकाशः ॥ खनामख्यातपशुः । बिल्ली इति हिन्दीभाषा । तत्पर्य्यायः । ओतुः २ मार्ज्जारः ३ हव्यदंशकः ४ आखुभुक् ५ । इत्यमरः ॥ विरालः ६ विलालः ७ । इति त्रिकाण्डी ॥ दीप्राक्षः ८ नक्तञ्चरी ९ जाहकः १० विड़ारकः ११ । इति शब्दरत्नावली ॥ चित्रकुः १२ लिकायः १३ मेनादः १४ लुचकः १५ । इति जटाधरः ॥ भूषिकारातिः १६ ग्राखादकः १७ मायावी १८ दीप्तलोचनः १९ । इति राजनिर्घण्टः ॥ (यथा, मनुः । ११ । १६० ।
"विड़ालकाकाखुवधे निष्कृतिश्चान्द्रायणं चरेत् ।
केशकीटावपन्नञ्च पिबेदुष्णं सुसंयतः ॥")

वि(वि)ड़ालकं, क्ली, हरितालम् । इति हेमचन्द्रः ॥

वि(वि)ड़ालकः, पुं, (विड़ाल एव । स्वार्थे कन् ।) विड़ालः । नेत्ररोगस्य औषधविशेषः । यथा ।
अथ विड़ालकविधिः ।
"विड़ालको बहिर्लेपो नेत्रे पद्मविवर्द्धिते ।
तस्य मात्रा परिज्ञेयो सुखालेपविधानवत् ॥"
सुखालेपो यथा,—
"अङ्गुलस्य चतुर्थांशो सुखालेपः कनिष्ठिकः ।
मध्यमस्तु त्रिभागः स्यादुत्तमोऽर्द्धाङ्गुलो भवेत् ॥
स्थितिकालोऽपि तस्योक्तो यावत् कल्को न शुष्यति ।
तेनापि गुणहीनः स्यात्तथा दूषयति लक्ष्यम् ।"
स यथा ।
"यष्टिगैरिकसिन्धूत्थदार्व्वीतार्क्ष्यैः समांशकैः ।"
अलिप्टेर्बहिर्लेपः सर्व्वनेत्रामयापहः ॥"
तार्क्ष्यं रसाञ्जनम् ।
"रसाञ्जनेन बालेयः पथ्याविल्वदलैरपि ।
वचाहरिद्राविश्वैर्व्वा तथा नागरगैरिकैः ॥
इति भावप्रकाशः ॥

वि(वि)ड़ालपदः, पुं. तोलकद्वयपरिमाणम् । यथ
"तौलौ द्वौ पिप्पलस्यैव सुवर्णैकपलग्रहः ।
विड़ालपदकर्षौ च पाश्चौतलसङ्ख्यकम् ॥"
इति शब्दमाला ॥
मार्ज्जारपदके, क्ली ॥

वि(वि)ड़ालपदकं, क्ली. कर्षपरिमाणम् । इति वैद्यकपरिभाषा ॥

वि(वि)ड़ाली, स्त्री, विदारी । इति राजनिर्घण्टः ॥ (मार्ज्जारी ।)

विडीनं, क्ली, (वि + डी + क्तः ।) खगगतिविशेषः । यथा,—
"डीनं प्रडीनसुड्डीनं संडीनं परिडीनकम् ।
विडीनमवडीनञ्च निडीनं डीनडीनकम् ॥
गतागतप्रगतितत्परत्वाच्च पक्षिणाम् ।
गतिभेदाः पक्षियूथं कुलायो नीड़मस्त्रियाम् ॥"
इति जटाधरः ॥

विड़ुलः, पुं. वेतसवृक्षः । इति हेमचन्द्रः ॥

विड़ौजाः, [स्] पुं, (विष् आग्नौ + क्विप् । विट् आपक्वं ओजो यस्य ।) इन्द्रः । इत्यमरः ॥

विड़ौजाः, [स्] पुं. (विड़ं आक्रोशं प्रच्छर्दयति सहिष्णु ओजो यस्य ।) इन्द्रः । इति भरतीयद्विरूपकोषः ॥ (यथा, रघौ । ३ । ५६ ।
"रघुः प्रणाड्यार्द्धसुखेन पक्षिणा
प्रराजनन्यामनुनाद्रिड़ौजसः ॥")

विड्, [ग्] पुं, (विशतीति । विश् + क्विप् ।) वैश्यः । यथा विट् विड् विशौ विशः । इति सुग्धबोधव्याकरणम् ॥ (मनुजः । विशांपतिशब्ददर्शनात् ॥)

विड्, [ग्] स्त्री, विष्ठा । इति विड्गन्धादिशब्ददर्शनात् ॥

विड्गन्धं, क्ली, (विड्वत् गन्धो यस्य ।) विड्लवणम् । इति रत्नमाला ॥

विड्जः, त्रि, विष्ठाजातः । विश्शब्दपूर्व्वकजनधातोर्डप्रत्ययेन निष्पन्नः ॥

विड्लवणं, क्ली, (विड्वत् दुर्गन्धं लवणम् ।) विड्नम् । इति रत्नमाला ॥ विट्सुअ इति भाषा ॥

विड्वराहः, पुं, (विट्प्रियो वराहः ।) ग्राम्यशूकरः । इति जटाधरः ॥ (यथा, मनुः । ५ । १६ ।

"क्रुच्चाकं विड्राहच लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनञ्चैव मद्या जग्ध्वा पतेद्विजः॥")

वितंसः, पुं, (वि+तंस+घञ्।) वीतंसः। स्रग-पक्षिणां बन्धनोपकरणम्। इत्यमरटीकायां भरतः॥

वितङ्डा, स्त्री, (वितङ्ड्यते विहन्यते परपक्षो-ऽनयेति। वि+तङ्ड+गुरोश्चेत्यः। टाप्।) स्वपक्षस्थापना परपक्षदूषणम्। इत्यमर-भरतौ॥ (यथा, महाभारते। २। ३६। ३।

"एवमेतन्न चाप्येवमेवं चैतन्न चान्यथा।
प्रलपुर्बहवस्तत्र वितण्डां वै परस्परम्॥")

कपोताङ्गः। शिलाजयः। करवीरो। इति मेदिनी। डे, ३६॥ दर्वी। इति हारावली॥

वितत, त्रि, (वि+तन्+क्तः।) विस्तृतम्। (यथा, प्रबोधचन्द्रोदये। ३। ५।

"उद्गायन्ति यशांसि यस्य वितते र्नादैः प्रचण्डा-
निल-
प्रक्षुभ्यत्करिकुम्भकूटकुहरव्यक्ते रणच्चौ
रवैः॥")

वीणादिवाद्यम्। इत्यमरे ततशब्दार्थदर्शनात्॥

विततिः, स्त्री, विस्तारः। विपूर्ब्बतनधातोः क्तिप्रत्य-येन निष्पन्ना॥ (यथा, भागवते। ६।१०।१५।

"वप्नीहि सेतुमिह ते यशसो वितत्यै
गायन्ति दिग्विजयिनो यमुपेत्य भूपाः॥")

वितथं, त्रि, मिथ्या। इत्यमरः॥ (यथा, मनुः। ८। ६४।

"अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं
व्रजेत्।
यः प्रश्नं वितथं ब्रूयात् पृष्टः सन् धर्म्मनिश्चये॥"

निष्फलः। अर्थः। यथा, भागवते। ६।२०।३५।

"तस्यैवं वितथे वंशे तदर्थं यजतः सुतम्।
मरुत्तोमेन मरुतो भरद्वाजमुपाददुः॥"

पुं, भरद्वाजपुत्रः। स च दौष्मन्तेर्भरतस्य पौत्रः। यथा, हरिवंशे। ३२। १८—१६।

"ततोऽथ वितथो नाम भरद्वाजात् सुतोऽभवत्।
पौत्रेऽथ वितथे जाते भरतस्तु दिवं ययौ।
वितथञ्चाभिषिच्याथ भरद्वाजो वनं ययौ॥")

वितथ्यं, त्रि, असत्यम्। वितथशब्दात् स्वार्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥

वितर्दुः, स्त्री, (वितर्दोतीति। वि+तर्द+"जस्वा-दयश्च।" उणा० ४। १०२। इति उप्रत्ययेन साधुः।) नदीविशेषः। सा च पञ्चनदाख्यदेशे वर्त्तते। इत्युणादिकोषः॥

वितरणं, स्त्री, (वि+तॄ+भावे ल्युट्।) दानम्। इत्यमरः॥ (यथाह कश्चित्।

"वित्तेन किं वितरणं यदि नास्ति तस्य॥")

वितर्कः, पुं, (वि+तर्क+घञ्।) ऊहः। (यथा, भागवते। १०। ८६। १।

"सरस्वत्यास्तटे राजन् ऋषयः सत्रमासत।
वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान्॥")

संशयः। इति मेदिनी। के, १५७॥ (यथा, महाभारते। १। १६०। २३।

"यौ तौ कुमाराविव कार्त्तिकेयौ
द्वावश्विनेयाविति मे वितर्कः॥")

ज्ञानस्फुरणम्। इति शब्दरत्नावली॥ * ॥ आहो उताहो किमुत किं किमु उत एते षट् विकल्पवितर्कार्थे। यथा स्यादुताहो पुरुषः। इति अहो हरादि च। विकल्पे विस्मयेऽप्यहो इति रुद्रः। किमु हरात्मं उत हरादि। चकारात् उताहोस्वित् आहोस्वि-दिति च यथा भारते। "उताहोस्विद्बलेनाना नलः परपुरञ्जयः।" इति आहोस्विन्मुखमिति भारवौ। इति भरतः॥

वितर्कणं, स्त्री, (वि+तर्क+ल्युट्।) वितर्कः। इति शब्दरत्नावली॥

वित(र्ह्ये)र्हिः, स्त्री, (वि+तर्ह हिंसायाम्+"सर्व-धातुभ्य इन्।" उणा० ४। ११७। इति इन्।) वेदिका। इत्यमरः॥ (यथा, माघे। २।५५।

"रत्नान्तरे यत्र गृहान्तरेषु
वितर्हिनिर्य्यूहविटङ्कनीडः॥")

वित(र्ह्ये)र्हिका, स्त्री, (वितर्हिरेव। स्वार्थे कन्।) वेदिका। इति शब्दरत्नावली॥ (यथा, राज-तरङ्गिण्याम्। ८। २६८५।

"क्षेमराजाभिधानेन डामरेशेन सोऽन्वितः।
शिवां वितर्हिकातुल्यामध्यास्त स्वप्रमध्यगाम्॥")

वितर्ही, स्त्री, (वितर्हि+कृदिकारादिति ङीष्।) वेदिका। इति शब्दरत्नावली॥

वितर्ह्वी, स्त्री, वेदिका। इत्यमरटीकायां भरतः।

वितलं, क्ली, (विशेषेण तलम्।) पातालभेदः॥ यथा,—

"अतलं वितलञ्चैव वितलञ्च गभस्तिमत्।
तलं सुतलपातालं पाताला हि तु सप्त वै॥"

इति शब्दरत्नावली॥

(अस्य विवरणं यथा, देवीभागवते। ८। १६। ८—१२।

"द्वितीयविवरस्यास्य वितलस्य निबोधत।
भूतनाथस्य चैवेदं वितलं भगवान् भवः॥
हाटकेश्वरनामायं स्वपार्षदगणैर्वृतः।
प्रजापतिश्च तस्यापि सर्गस्य रक्षणाय च॥
भवान्या मिथुनीभूय आस्ते देवाधिपूजितः।
भवयोर्वीर्य्यसंभूता हाटकी सरिदुत्तमा॥
समिद्धो मरुता वह्निरोजसा पिबतीव हि।
तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं देवभक्षम्॥
दैत्यानागभूषणार्हं सदा सन्धारयन्ति हि॥")

वितस्तिः, पुं स्त्री, (वि+तसु उपक्षेपे+"वौ तसेः।" उणा० ४। १८१। इति तिः।) विस्तृतसकनिष्ठाङ्गुष्ठः। विगत इति भाषा॥ तत्पर्य्यायः। द्वादशाङ्गुलः २। इत्यमरः॥ (यथा, मार्कण्डेये। ४६। ३६।

"हे वितस्ती तथा हस्तो व्राजतीर्घादिदेह-
मम्॥")

वितानं, क्ली, (वितन्यते यत्। वि+तन+घञ्।) वृत्तिविशेषः। इति मेदिनी। ने, १३१॥ अव-सरः। इति विश्वः॥

वितानः, पुं क्ली, (वि+तन्+घञ्।) क्रतुः। (यथा, माघे। १४। १०।

"सोमपायिनि भविष्यते मया
दाक्षिलोत्तमवितानयाजिना॥")

विस्तारः। (यथा, भागवते। ३। ७। ३१।

"यज्ञस्य च वितानानि योगस्य च पथं प्रभो।
नैष्कर्म्मस्य च साङ्ख्यस्य तन्त्रं वा भगवत्-
स्मृतम्॥")

उल्लोचः। इत्यमरः॥ चाँदोया इति भाषा। अस्य पर्य्यायचन्द्रातपशब्दे द्रष्टव्यः॥ (यथा, रघुः। १७। २८।

"वितानसहितं तत्र मेने मैत्रकमासनम्।
चूडामणिभिरुद्दृष्टपादपीठं महीक्षिताम्॥"

समूहः। यथा, माघे। ११। ४३।

"नवकनकपिशङ्गं वासराणां विधातुः
ककुभि कुलिशपाणेर्भाति भासां वितानम्॥"

ब्रह्मबन्धनविशेषः। यथा, सुश्रुते। १। १८।

"तत्र कोशदामखत्तिकातुवेल्लितप्रतोलीमल्ल-
मल्लिकायमकखट्वाचीनविबन्धवितानगोपथाः
पञ्चाङ्गी चेति चतुर्दशब्रह्मबन्धविशेषाः॥")

वितानः, त्रि, (वि+तन+घञ्।) तुच्छः। (यथा, रघुः। ६। ५०।

"गगनमन्वखुरोद्धतरेणुभि-
र्दृसविता च वितानमिवाकरोत्॥")

मन्दः। इत्यमरः॥ शून्यः। इति धरणिः॥ (यथा, माघे। १। ५०।

"दृढगुलेरप्यतुलैर्वितान-
मालापिनद्धैरपि चावितानैः॥")

वितानकः, पुं क्ली, (वितान एव। स्वार्थे कन्।) चन्द्रातपः। इति शब्दमाला॥ (यथा, कथा-सरित्सागरे। ४८। ६६।

"तदा तैर्मुक्तमन्योन्यं बाणजालं बभौ दिवि।
रथचक्राग्रतप्तार्के वितानकमिवाततम्॥"

समूहः। यथा, माघे। ६। २७।

"अनुययौ विविधोपलकुञ्जल-
द्युतिवितानकसंवलितांशुकम्॥")

वितानकः, पुं, (वितान इव प्रतिज्ञतिः। वितान+कन्।) माढ़रवृक्षः। इति राजनिर्घण्टः॥

वितानमूलकं, क्ली, (वितानतुल्यं मूलं यस्य। बहु-व्रीहौ कन्।) उशीरम्। इति राजनिर्घण्टः॥

वितुन्नं, क्ली, (वि+तुद्+क्तः।) सुनिषण्णकम्। इत्यमरः॥ श्वेवालकम्। इति मेदिनी। ने, १३१॥

वितुन्नकं, क्ली, (वितुन्नमिव। स्वार्थे कन्।) धान्यकम्। तुत्थम्। इत्यमरः॥

वितुन्नकः, पुं, आमलकी। इत्यमरः॥

वितुन्ना, स्त्री, भूम्यामलकी। इति राजनिर्घण्टः॥

वितुन्निका, स्त्री, (वितुन्ना+स्वार्थे कन्। टापि अत इत्वम्।) भूम्यामलकी। इति राज-निर्घण्टः॥

वित्त, तृ क लाभे। इति कविकल्पद्रुमः॥ (अदन्त-पुराः-परः-सकः-सेट्।) वित्तयति। वित्ता-पयति। इति दुर्गादासः॥

वित्तं, क्ली, (विद + क्तः। "वित्तो भोगप्रत्यययोः।" ८। २। ५८। इति साधुः।) धनम्। इत्यमरः॥ (यथा, मनुः। ८। ३६।
"अदृतन्तु दहन् दण्ड्यः स्ववित्तस्यांशमष्टमम्।
तस्यैव वा निधानस्य संख्यायाल्पीयसीं कलाम्॥")

वित्तः, त्रि, (विद + क्तः। "गुरुविदेति।" ८। २। ५६। इति पक्षे नत्वाभावः।) विचारिनः। विज्ञातः। इत्यमरः॥ लब्धः। इति तट्टीकायां रामाश्रमः॥ (विज्ञातः। अत्र वित्तो भोगप्रत्यययोः इति साधुः। यथा च पाणिनिः। "तेन वित्तश्चुञ्चुप्चणपौ।" ५। २। २६॥)

वित्तदः, त्रि, धनदाता। वित्तं ददाति य इत्यर्थे डप्रत्ययेन निष्पन्नः॥

वित्तिः, स्त्री, (विद + क्तिन्।) विचारः। लाभः। (यथा, याज्ञवल्क्यसंहितायाम्। १८। १४।
"मे वित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे यज्ञेन कल्पन्ताम्॥") सम्भावना। इति मेदिनी। ते, ५६॥ ज्ञानम्। इति हेमचन्द्रः॥

वित्तेशः, पुं, (वित्तानामीशः।) कुबेरः। यथा,—
"त्वं ब्रह्मा हरिहरसंज्ञितस्त्वमिन्द्रो
वित्तेशः पितृपतिरम्बुपः समीरः।
सोमोऽग्निर्गगनमहीधरोऽखिरूपः
किंत्वं सकलतरस्वरूपधारी॥"
इति मार्कण्डेयपुराणे। १०४। ३०॥

वित्रस्तः, त्रि, त्रासयुक्तः। विपूर्ब्बत्रसधातोः क्तप्रत्ययेन निष्पन्नः॥

वित्रासः, पुं, भयम्। विपूर्ब्बत्रसधातोर्भावे घञ्प्रत्ययेन निष्पन्नः॥ (यथा, भागवते। १०। ५०। १६।
"ततोऽभूत परसैन्यानां हृदि वित्रासवेपथुः॥")

वित्सनः, पुं, वृषभः। इति शब्दचन्द्रिका॥

विद, ऋ ड याचे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-दिक०-सेट्।) वेद्यते। इति दुर्गादासः॥

विदुरः, पुं, (अद्यते इति। अद भक्षणयोः। "अदेः संप्रसारणं किच्च।" उणा० १। ४०। इति उरच्। सच किन् सम्प्रसारणञ्च धातोः।) मन्त्रिवरः। राक्षसः। इत्युणादिकोषः॥ (स्त्री, भर्तृवियुक्ता नारी। यथा, ऋग्वेदे। १। ८७। ३।
"प्रेषामजमेषु विधुरेव रेजते भूमिः॥
"विधुरेव यथा भर्त्रा वियुक्ता जाया राजोपद्रवादिषु सत्सु निरालम्बा सती कम्पते तद्वत्।"
इति तद्भाष्ये सायणः॥)

विद्या, स्त्री, गोजिह्वा। इति शब्दचन्द्रिका॥

विद, लृ प ग्र ऌ लाभे। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-अनिट्।) लृ, अविदत्। प ग्र ऋ, विन्दति विन्दते। ऌ, वेत्ता। इति दुर्गादासः॥

विद, क ड ञ चेतनाख्यानवासवादे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-उभ०-च-सक०-वासे स्थैर्ये च अक०-सेट्।) चेतना ज्ञानम्। वादः स्थैर्यम्। क ड, वेदयते ज्ञानं धीरः जानातीत्यर्थः। वेदयते स्वार्थं लोकः आख्यातीत्यर्थः। वेदयते तीर्थे साधुर्वसतीत्यर्थः। वेदयते दृढः स्थिरः स्यादित्यर्थः। ञ, वेदयति वेदयते। केचित्तु वादं न पठन्ति। चेतनास्थाने वेदनेति पठित्वा वेदयते दृढः यथते इत्यर्थः। इत्युदाहरन्ति। अस्माच्च परमेश्वरमन्यमाना जिनां सपत्नेन निवेदयिष्यत इति निवेदनं करोतीत्यर्थे णौ समादधते। इति दुर्गादासः॥

विद, ड घौ मीमांसे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) मीमांसा विचारणम्। ड घ, विन्ते ग्राह्यं धीरः। ञौ, वेत्ता। इति दुर्गादासः॥

विद, य ड ञौ भावे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक०-अनिट्।) भावः सत्ता स चेह विद्यमानतैव। य ड, विद्यते विष्णुः। ञौ, वेत्ता। इति दुर्गादासः॥

विद, ल मतौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-सक०-सेट्।) ल, वेत्ति। इति दुर्गादासः॥

विदंशः, पुं, (वि + दंश + घञ्।) अवदंशः। इति राजनिर्घण्टः॥

विदः, पुं, पण्डितः। विदधातोः कर्त्तरि क्विप्प्रत्ययेन निष्पन्नः॥

विदग्धः, त्रि, (वि + दह + क्तः।) नागरः। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। ६।
"विदग्धायां विदग्धेन सङ्गमो गुणवान् भवेत्॥")
निपुणः। इति त्रिकाण्डशेषः॥ (यथा आर्य्यासप्तशत्याम्। ५०६।
"लिम्पं न सुखं नाङ्गं न पश्यती चरणाः परागेण।
अस्पृशतेव नलिन्या विदग्धमधुपेन मधु पीतम्॥")
पण्डितः। इति शब्दरत्नावली॥ (विशेषेण दग्धः। यथा, सुश्रुते। ३। १।
"शोफयोरुपनाह्यस्तु कुर्य्यादामविदग्धयोः।
अविदग्धः शमं याति विदग्धः पाकमेति च॥")

विदग्धता, स्त्री, विदग्धत्वम्। विदग्धस्य भाव इत्यर्थे तल्प्रत्ययेन निष्पन्ना॥

विदग्धा, स्त्री, (विदग्ध + टाप्।) परकीयान्तर्गतनायिकाभेदः। यथा। मुग्धाविदग्धालक्षिताकुलटानुशयानामुदिताप्रभृतीनां परकीयायामेवान्तर्भावः। अस्या लक्षणम्। वाक्कौशलयुक्तत्वम्। सा च द्विविधा। वाग्विदग्धा क्रियाविदग्धा च। प्रथमा यथा,—
"निविड़तमतमालमल्लिवल्ली-
विचकिलराजिविराजितोपकण्ठे।
पथिकसमुचितस्त्वदाद्य तीव्रे
सवितरि तत्र सरित्तटे निवासः॥"
द्वितीया यथा,—
"दासाय भवनानाथे वदरीमपनेतुमादिशति।
हेमन्ते हरिणाक्षी पयसि कुठारं विनिक्षिपति॥"
इति रसमञ्जरी॥

विदथः, पुं, (वेत्तीति। विद + "कविदिभ्यां ठिन्।" उणा० ३। ११६। इति अथः। सच ठिन्।) योगी। ऋतौ। इति मेदिनी। थे, २४॥ (यज्ञः। इति निघण्टुः। ३। १७। "विद ज्ञाने विद विचारणे विदृलृलाभे विद सत्तायाम्। 'कविदिभ्यां ठिन्।' इति अथप्रत्ययः। ज्ञायते हि यज्ञः। लभते हि दक्षिणादिरत्नं। विचार्य्यते हि विद्वद्भिः। भावयत्यनेन फलम्॥" इति तत्र देवराजयज्वा॥*॥ वेदितव्ये, त्रि। यथा, ऋग्वेदे। ३। २७। ७।
"होता देवो अमर्त्यः पुरस्तादेति मायया।
विदथानि प्रचोदयन्॥")

विदन्, [त्] त्रि, पण्डितः। विदधातोः शतृप्रत्ययेन निष्पन्नः॥

विदरं, क्ली, (विदीर्य्यतीति। वि + दृ + अप्।) विश्वसारकम्। इति शब्दचन्द्रिका। फलीमनसा इति भाषा॥ (विदीर्णे, त्रि। यथा, कामन्दकीये नीतिसारे। १६। १०।
'अल्पदृश्योपला च्छिन्ना लतिका विदरा स्थिरा।
निःशर्करा च निःपङ्का सापसारा च वारिभूः॥')

विदरः, पुं, (वि + दृ + "ऋदोरप्।" ३। ३। ५७। इति अप्।) विदरणम्। फाटन इति चेरण इति च भाषा। तत्पर्य्यायः। स्फुटनम् २ भिदा ३। इत्यमरः॥ दारणम् ४ विदारणम् ५। इति शब्दरत्नावली॥

विदर्भः, पुं, स्त्री, (विशिष्टा दर्भाः कुशा यत्र।) कुण्डिननगरम्। इति हेमचन्द्रः॥ स तु वङ्गदेशस्य दक्षिणपश्चिमे वर्त्तते अधुना वऱ्हानागपुर इति ख्यातः॥*॥ यथा, पूर्ब्बनैषधे २ सर्गः।
"स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम्॥"
(यथा च रघुः। ५। ६०।
"एको ययौ चैदिरथप्रदेशान्
सौराज्यरम्यानपरो विदर्भान्।"*॥
पुं, नृपविशेषः। स च व्यामघात् शैब्यायां जातः। अस्य कुशक्रथलोमपादाः पुत्राः। यथा, भागवते। ६। २४। १।
"तस्यां विदर्भोऽजनयत् पुत्रौ नाम्ना कुशक्रथौ।
तृतीयं रोमपादञ्च विदर्भकुलनन्दनम्॥"
अस्य नाम्नैव विदर्भनगरी समुत्पन्ना॥ मुनिविशेषः। यथा, हरिवंशे। १६६। ८४।
"दैपायनो विदर्भश्च जैमिनिर्माठरः कठः॥")

विदर्भजा, स्त्री, (विदर्भे जायते इति। जन + डः।) अगस्त्यपत्नी। तत्पर्य्यायः। कौशीतकी २ लोपामुद्रा ३। इति त्रिकाण्डशेषः॥ दमयन्ती। यथा, पूर्ब्बनैषधे २ सर्गः।
"घृतलाञ्छनगोमयाक्षलं
विधुमालेपनपाण्डरं विधिः।

भमयत्नुचितं विदर्भजा-
ननीराजनवर्द्धमानकम् ।"
रुक्मिणी च ।

विदर्भराजः, पुं, (विदर्भाणां राजा । "राजाहः-सखिभ्यष्टच् ।" इति टच् ।) विदर्भदेशाधिपतिः । तस्य नामान्तरं भीमराजः । यथा,—
"स्मरोपतप्तोऽपि भृशं न स प्रभु-
र्विदर्भराजं तनयामयाचत ।
त्यजन्त्यसून् धर्म्मं च मानिनो वरं
त्यजन्ति न त्वेकमयाचितव्रतम् ॥
इति पूर्व्वनैषधे । १ । ५० ॥

विदर्भसुभ्रूः, स्त्री, (विदर्भस्य सुभ्रूरमणी ।) दमयन्ती । यथा,—
"विदर्भसुभ्रूस्तनतुङ्गताप्रय
घटानिवापश्यदसं तपस्यतः ।
फलानि धूमस्य घयानधोसुखान्
स दाडिमे दोहदधूपिनि द्रुमे ॥"
इति पूर्व्वनैषधे १ सर्गः ॥

विदर्भाधिपतिः, पुं, (विदर्भाणामधिपतिः ।) कुण्डिनपतिः । स च भीष्मकराजः रुक्मिणीपिता च । यथा,—
"तं ये विदर्भाधिपतिः समर्थ्येत्याभिवाद्य च ।
निवेद्ययामास मुदा कलिताञ्जलिपेशले ॥"
इति श्रीभागवतीयदशमस्कन्धे ५३ अध्यायः ॥

विदलं, क्ली, (विघट्टितं दलं यस्य ।) द्विदाल्लतकलायादि । दालि इति भाषा । खण्डैरेवयवः । दाड़िमकल्कः । वंशादिकृतपात्रविशेषः । इति क्लीवलिङ्गसंग्रहे अमरभरतौ ॥

विदलः, पुं, (विघट्टितानि दलानि यस्य ।) रक्तकाञ्चनः । इति शब्दरत्नावली ॥ पिप्पलः । इति शब्दचन्द्रिका ॥

विदला, स्त्री, (विघट्टितानि दलानि यस्याः ।) त्रिवृत् । इति राजनिर्घण्टः ॥ पत्रमूल्या । यथा,
"विशीर्णा विदला रूक्षा वक्रा स्थूला द्विधाकृता ।
क्रमिदष्टा च दीर्घा च समिधो नैव कारयेत् ॥"
इति तन्त्रम् ॥

विदा, स्त्री, (विद् ज्ञाने + "विद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इत्यङ् । टाप् ।) ज्ञानम् । बुद्धिः । इति मेदिनी । दे, १४ ॥

विदायः, पुं, (विगतो दायः साधारण्यादिरूपः स्वत्वं येन ।) गमनानुमतिः । यथा,—
"त्वं वा चम्पकवनं गच्छ वा तिष्ठ सुन्दरि ! ।
त्वं गृहञ्च यास्यामि विशिष्टं कार्य्यमस्ति मे ।
विदायं देहि संप्रीत्या त्वं मे प्राणवल्लभे ॥"
इति ब्रह्मवैवर्त्ते जन्मखण्डे श्रीराधां प्रति श्रीकृष्णवाक्यम् ॥

विदारः, पुं, (वि + दृ + घञ् ।) जलोच्छ्वासः । विदारणम् । इति मेदिनी । रे, ११६ । युद्धम् । इति हेमचन्द्रः ॥

विदारकं, क्ली, (विदृणातीति । वि + दृ + ण्वुल् ।) वज्रक्षारम् । इति राजनिर्घण्टः ॥

विदारकः, पुं, (विदृणाति जलयानादीनिति । वि + दृ + ण्वुल् ।) जलमध्यस्थिततरुगुल्मादिः । तत्पर्य्यायः । कूपकः २ । इत्यमरः ॥ जलबन्धकः । इति शब्दरत्नावली ॥ शुष्कनदादौ जलावस्थानार्थं गर्त्तः । इति सर्व्वधरः ॥ अतएव कूपा इव कूपकाः । कृत्सिताश्च कूपा इति वा । विदारयन्तीति विदारकाः । जलान्तर्गतास्तरुगुल्मादयोऽज्ञानाल्लोकादिविदारकाः कूपकाः । इति साक्षः । बहुत्वमतन्त्रम् । इति भरतः ॥

विदारणं, क्ली, (वि + दृ + णिच् + भावे ल्युट् ।) विदलम् । भेदः । इति मेदिनी । णे, १०७ ॥ (यथा, हरिवंशे । ६५ । ७६ ।
"आयुधावाप्तिरत्रैव वपुषो वैभवस्य च ।
लभ्याश्च तेजसश्चैव बृंहणाच्च विदारणम् ॥")
मारणम् । इति शब्दरत्नावली ॥

विदारणः, पुं क्ली, (विदार्य्यन्ते शत्रवोऽस्मिन्निति । वि + दृ + णिच् + ल्युट् ।) युद्धम् । इति मेदिनी । णे, १०७ ॥ (विदारयतीति । वि + दृ + णिच् + ल्युः । विदारके, त्रि । यथा, मार्कण्डेये । २० । २ ।
"तस्मात्सभो महावीर्य्यो बभूवारिविदारणः ॥")

विदारणः, पुं, (विदार्य्यतेऽसौ इति । वि + दृ + णिच् + कर्म्मणि ल्युट् ।) कर्म्मिकारवृक्षः । इति शब्दचन्द्रिका ॥

विदारिका, स्त्री, (वि + दृ + णिच् + ण्वुल् । टापि अत इत्वम् ।) शालपर्णी । इति शब्दरत्नावली ॥ (यथा, वृहत्संहितायाम् । ७६ । ५ ।
"विदारिकाया खरसेन चूर्णं
सुहुर्मुहुर्भावितशोधितञ्च ।
घृतेन दुग्धेन सशर्करेण
पिबेत् स यस्य प्रमदाः प्रभूताः ॥")

विदारिणी, स्त्री, (विदृणातीति । वि + दृ + णिनिः ङीप् ।) काश्मरी । इति राजनिर्घण्टः ॥ (विदारणकर्त्री । यथा, कथासरित्सागरे । ५३ । १०१ ।
"एकानंशे शिवे दुर्गे नारायणि सरस्वति ।
भद्रकाली महालक्ष्मि सिद्धे वृद्धविदारिणि ॥")

विदारी, स्त्री, (विदारयतीति । वि + दृ + णिच् + अच् । गौरादित्वात् ङीष् ।) शालपर्णी । इति मेदिनी ॥ भूमिकुष्माण्डः । तत्पर्य्यायः । क्षीरशुक्ला २ इक्षुगन्धा ३ क्रोष्ट्री ४ । इत्यमरः ॥ विदारिका ५ खादुकन्दा ६ धिता ७ शुक्ला ८ इक्षुगन्धिका ९ वृष्यकन्दा १० विढाली ११ वृष्यवल्लिका १२ भूकुष्माण्डी १३ स्वादुलता १४ गजेष्टा १५ वारिवल्लभा १६ गन्धपत्रा १७ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । गुरुत्वम् । स्निग्धत्वम् । असृपित्तनाशित्वम् । कफकारित्वम् । पुष्टिबलवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ विदारी वातपित्तघ्नी वृष्या बल्या रसायनी इति राजवल्लभः ॥ * ॥ अथादृग्-प्रकारकश्वरोगान्तर्गत-रोगविशेषः । यथा, अथ विदारीमाह ।

"सदाहतोदं सयथुं सुतान्त्र-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्दहने विदारीं
पार्श्वे विशेषात् स तु वेग याते ॥"
स पुरुषो येन पार्श्वेन विशेषाद्बाहुल्येन शेते तस्मिन् पार्श्वे सा विदारी भवति इत्यर्थः । इति भावप्रकाशः ॥ अस्याश्चिकित्सादि रोहिण्यां द्रष्टव्यम् ॥

विदारी, [न्] त्रि, विदारयत्यसौ । विपूर्व्वदृधातोः कर्त्तरि णिन्प्रत्ययेन निष्पन्नः ॥

विदारीगन्धा, स्त्री, (विदार्य्या भूमिकुष्माण्डस्येव गन्धो यस्याः ।) शालपर्णी । इत्यमरः ॥

विदारुः, पुं, ककचपादः । लकलासः । इति हारावली । २१८ ॥

विदाहि, [न्] क्ली, (विदहतीति । वि + दह + णिनिः ।) दाहजनकद्रव्यम् । अस्य गुणौ । पित्तरक्तप्रकारित्वे । इति राजवल्लभः ॥ (दाहजनकमात्रे, त्रि । यथा, गीतायाम् । १७ । ६ ।
"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥")

विदिक्, [श्] स्त्री, (दिग्भ्यो विगता ।) दिशोर्मध्यम् । अग्निनिर्ऋतिवायीशानकोणचतुष्टयम् । तत्पर्य्यायः । अपदिशम् २ । इत्यमरः ॥ प्रदिक् ३ । इति जटाधरः ॥ विदिशम् ४ । इति शब्दरत्नावली ॥ कोणः ५ । इति राजनिर्घण्टः ॥ (यथा, भागवते । ४ । १७ । १६ ।
"सा दिशो विदिशो देवी रोदसी यान्तरं तयोः ।
धावन्ती तत्र तत्रैनं ददर्शानुद्यतायुधम् ॥")

विदिक्चक्रः, पुं, हरिद्राङ्गपक्षी । इति शब्दचन्द्रिका ॥

विदितं, त्रि, (विद् + क्तः ।) अवगतम् । इत्यमरः ॥ (यथा, महाभारते । ७ । २८ । २२ ।
"सदाश्वः सधनुर्व्वाहं ससरासुरमानुषान् ।
शक्तो लोकानिमान् जेतुं तथापि विदितं तव ॥")
अर्थितम् । इति मेदिनी । ते, १०६ ॥ उपगम्यः । इति शब्दरत्नावली ॥

विदितः, पुं, (विदितं ज्ञानमस्यास्तीति । अर्शआदित्वात् अच् ।) कविः । इति जटाधरः ॥ (ज्ञानाश्रये, त्रि । यथा, किराते । १ । १ ।
"श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
सवर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥")

विदिधः, पुं, पण्डितः । योगी । इति शब्दरत्नावली हलायुधमेदिन्यौ च ॥ सुन्दरादित्तमेदिन्यां हेमचन्द्रे च विदध इति पाठः ॥

विदीर्णः, त्रि, (वि + दृ + क्तः ।) कृतविदारणः । चेरा इति भाषा । यथा,—
पितर ऊचुः ।
"आढानि नोऽधिदुभुजे प्रसभं तनूजै-
र्दत्तानि तीर्थसमयेऽप्यपिवत्तिलाम्बु ।

तस्योदरान्नखविदीर्णवपादय आर्च्छ-
त्तस्मै नमो नृहरयेऽखिलधर्म्मगोप्त्रे ।"
इति श्रीमद्भागवते ७ स्कन्धे ८ अध्यायः ।
अपि च ।
"अहौषे क्षिपतो समस्तजगतो यस्योकशोका-
मुधौ
राधा सम्भृतकाकुराकुलमसौ चक्रे तथा
क्रन्दनम् ।
येन स्पन्दननेमिनिर्म्मितमहासौमन्तदम्भादिदं
हा वर्त्मे सहयापि निर्भरमभूद्दूरादिदीर्घं
सुवा ।"
इत्युज्ज्वलनीलमणिः ।
विदुः, पुं, (वेत्ति संग्रामनेनेति । विद् + बाहु-
लकात् कुः ।) गजकुम्भदयमध्यभागः । इत्य-
मरः । (अन्यकर्म्माधोभागः । यथा, अश्व-
वैद्यके । २ । १४ ।
"विदुर्मर्म्मविदुश्चैव वर्त्मस्थाः षट्प्रकीर्त्तिते ।")
जानन्ति । इति क्रियापदम् । (यथा, महा-
भारते । १ । १२० । २८ ।
"अपत्यं नाम लोकेषु प्रतिष्ठा धर्म्मसंहिता ।
इति कुन्ति ! विदुर्धीराः प्राप्तवतं धर्म्म-
वादिनः ।")
विदूरः, पुं, (वेत्ति तच्छीलः । विद् + "विदिभिदि-
च्छिदेः कुरच् ।" ३ । २ । १६२ । इति कुरच् ।)
नागरः । धीरः । कौरवाणां मन्त्री । इति
मेदिनी । रे, ११५ । विदुरोत्पत्तिर्यथा,—
"देवेऽप्रजस्त्वे भ्रातुर्माद्रीस्तो बादरायणः ।
धृतराष्ट्रञ्च पाण्डुञ्च विदुरञ्चाप्यजीजनत् ।"
इति श्रीभागवते । ६ । २२ ।
भ्रातरि, त्रि । इत्यमरः । ४ ।
विदुषः, पुं, (विशेषेण दोषयतीति । वि + दुष +
कः ।) वेतसः । अम्बुवेतसः । इत्यमरः । गन्ध-
रसः । इति रत्नमाला ।
विदुषी, स्त्री, (वेत्तीति । विदेः शतृवेषुः । ङीप्-
क्षेति ङीप् ।) पण्डिता स्त्री । इति सुग्धबोध-
व्याकरणम् । (यथा, नैषधे । २ ।
"चिकुरप्रकरा जयन्ति ते
विदुषो मूर्द्धनि या विभर्त्ति यान् ।")
विदुषतो, त्रि, (विदांवक्ति अस्यामिति । विदस्
मतुप् । स्त्रियां ङीप् ।) पण्डितवती । यथा,—
"दौर्म्मात्यच्छतिनेव पन्नगपुरी ग्रैवाद्विनेवा-
भवद्-
देनेकेन विदुषतो वसुमतो सुखेन संस्थाव-
ताम् ।"
इति गोपदेवप्रशंसा ।
विदूः, पुं, विदुः । गजकुम्भयोर्मध्यम् । इत्यमर-
टीकायां भरतः ।
विदूरः, त्रि, (विगतं दूरं यस्य ।) अतिदूरस्थ-
देशादि । यथा,—
"मालानदी तव जलधरोत्कण्ठया शुष्ककण्ठः
सारङ्गोऽयौ मृगयुतमिव व्याधिनायातिक्ष-
प्तम् ।
आस्तां तावन्नवजलकणाभाजनत्वं विदूरे
वर्षारम्भप्रथमसमये दारुणो वज्रपातः ।"
इति शातकाष्टकम् ।
(पर्व्वतविशेषे, पुं । यथा, कुमारे । १ । २४ ।
"तया दुहित्रा सुतरां सवित्री-
स्फुरत्प्रभामण्डलया चकाशे ।
विदूरभूमिर्नवमेघगुह्या-
दुद्भिन्नया रत्नशलाकयेव ।")
विदूरगः, त्रि, अतिदूरगन्ता । विदूरे गच्छती-
त्यर्थे डप्रत्ययेन निष्पन्नः ।
विदूरजं, क्ली, (विदूरे पर्व्वते जायते इति । जन +
डः ।) विदूरपर्व्वतजरत्नम् । वैदूर्य्यमणिः ।
अतिदूरजाते, त्रि । इति केचित् ।
विदूरथः, पुं, राजविशेषः । यथा,—
"मनोस्तु दत्तपुत्रस्य द्वादशस्यात्मजान् शृणु ।
देववानुपदेवश्च देवश्रेष्ठो विदूरथः ।
मित्रवान् मित्रदेवश्च मित्रविन्दश्च वीर्य्यवान् ।
मित्रबाहुः सवर्च्चाश्च दत्तपुत्रमनोः सुताः ।"
इति गारुडे ८७ अध्यायः ।
(कुरुपुत्रः । यथा, महाभारते । १ । ६५ ।
३६—४० ।
"कुरुः खलु दाक्षायणीमुपयेमे सुभाङ्गीं नाम
तस्यामस्य जज्ञे विदूरथः । विदूरथस्तु माधवी-
मुपयेमे संप्रियां नाम तस्यामस्य जज्ञे अनश्वा
नाम ।"*। दृष्णिवंशीयानामन्यतमः । यथा,
भागवते । ६ । २४ । १८ ।
"पृथुर्विदूरथाद्याश्च बहवो दृष्णिनन्दनाः ।"
अस्य पुत्रः शूरः । यथा, तत्रैव ।६।२४।२६।
"शूरो विदूरथादासीत् भजमानस्तु तत्सुतः ।
शिनिस्तस्मात् स्वयं भोजो हृदिकस्तत्सुतो
मतः ।")
विदूरभूमिः, स्त्री, (विदूरस्य भूमिः ।) विदूर-
देशः । यत्र वैदूर्य्यमणिरुत्पद्यते । यथा,—
"तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकाशे ।
विदूरभूमिर्नवमेघगुह्या-
दुद्भिन्नया रत्नशलाकयेव ।"
इति कुमारसम्भवम् ।
विदूराद्रिः, पुं, (विदूरनामकोऽद्रिः ।) विदूर-
पर्व्वतः । इति जटाधरः ।
विदूषकः, त्रि, (विदूषयति आत्मानमिति । वि +
दूष + णिच् + ण्वुल् ।) कामुकः । तत्पर्य्यायः ।
विड्गः २ बलीकः ३ वटप्रज्ञः ४ कामकेलिः
५ पीठकेलिः ६ पीठमर्दः ७ भविलः ८ क्षिदुरः
९ विटः १० । इति त्रिकाण्डशेषः । चाटुवटुः
११ वासन्तिकः १२ केलिकिलः १३ वेहासिकः
१४ प्रहासी १५ प्रीतिदः १६ । इति हेम-
चन्द्रः । परनिन्दाकरः । इति मेदिनी । के, २१४ ।
तत्पर्य्यायः । खलः २ रङ्कः ३ अभीकः ४ क्रूरः
५ खुचकः ६ कण्टकः ७ नागः ८ मलिनाशयः
९ परदेवी १० । इति शब्दमाला । चतुर्था-
नायकान्तर्गतनायकविशेषः । तस्य लक्षणं
यथा । अङ्गादिवैकृत्यहांस्यकारी विदूषकः ।
अस्योदाहरणं यथा,—
"आनीय नीरजसखीं मयनोपकण्ठ-
सूत्कण्ठतोऽसि कुचकच्चुकमोचनाय ।
अत्रान्तरे सुहुरकारि विदूषकेण
प्रातस्तनस्तरलकुक्कुटकण्ठनादः ।"
इति रसमञ्जरी ।
(अयन्तु शृङ्गारसहायः । यथा, साहित्यदर्पणे ।
३ । ७७ ।
"शृङ्गारस्य सहाया विटचेटविदूषकाद्याः स्युः ।
भक्ता मर्म्मसु निपुणाः कुपितवधूमानभञ्जनाः
शुद्धाः ।"
दूषयकारके, त्रि । यथा, भागवते ।५।६।१०।
"येनेह वाव कलौ मनुजापसदा देवमाया-
विमोहिताः * * * * ब्रह्मब्राह्मणयज्ञपुरुष-
लोकविदूषकाः प्रायेण भविष्यन्ति ।")
विदूषणं, क्ली, विशेषेण दूषणम् । विपूर्ब्बाच्छ-
दुषधातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम् ।
विदेशः, पुं, (विप्रकृष्टो देशः ।) परदेशः । देशा-
न्तरम् । यथा । अशौचकालाभ्यरे विदेशस्था-
शौचश्रवणे ग्रैवाहैः शुद्धिः । इति शुद्धितत्त्वम् ।
अन्यच्च ।
"कोऽतिभारः समर्थानां किं दूरं व्यवसायि-
नाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ।"
इति चाणक्ये ।
अन्यत् देशान्तरशब्दे द्रष्टव्यम् ।
विदेहः, पुं, जनकान्वयभूमिपः । (यथा, देवी-
भागवते । १ । १६ । ५२ ।
"द्रष्टुमिच्छाम्यहं भूपं विदेहं नृपसत्तमम् ।
कथं तिष्ठति संसारे पद्मपत्रमिवाम्भसि ।"
विगतो देहो यस्मात् ।) कायशून्ये, त्रि । इति
मेदिनी । हे, २४ । (यथा, महाभारते ।
३ । १०७ । २६ ।
"छिन्नशीर्षा विदेहाश्च भिन्नत्वङ्मांसबन्धनाः ।
प्राणिनः समदृश्यन्त शतशोऽथ सहस्रशः ।")
निमिराजस्य विदेहत्वकारणम् । यथा,—
"असमाप्ते ततो यज्ञे वशिष्ठस्यागमद्विधः ।
तं दृष्ट्वा कुपितः प्राह प्रत्याख्यातोऽसि
यार्घ्यैव ।
यस्मात्तस्मात् शपेयं त्वां विदेहत्वं भविष्यसि ।"
इति वह्निपुराणे सूर्य्यवंशसमाप्त्याध्यायः ।
विदेहा, स्त्री, मिथिला । इति हेमचन्द्रः । (यथा,
रघुः । १२ । २६ ।
"बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता ।
प्रतिबिम्बापि कैकेय्या लक्ष्मीरिव गुणोज्ज्वलो ।")
विद्धः, त्रि, (विध्यते स्मेति । व्यध + क्तः ।)
छिद्रितः । इत्यमरः । क्षिप्तः । सदृशः ।
बाधितः । इति मेदिनी । धे, १६ । (यथा,
मार्कण्डेये । ५० । ७० ।
"तरुगुल्मादिभिर्द्वारं न विद्धं यस्य वेश्मनः ।
मर्म्मभेदोऽथवा पुंस्त्वात् श्रेयो भवनं न ते ।")

ताड़ितः। इत्यजयपालः॥ (यथा, विष्णुसंहितायाम्। २०। ४४।
"नाकाले म्रियते कश्चित् विद्धः शरशतैरपि।
कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति॥")

विद्धकर्णः, पुं, (विद्धः कर्ण इव पत्रमस्य।) विद्धकर्णी। इति भरतहिरूपकोषः॥ (विद्धौ कर्णौ यस्येति। ब्रतकर्णवेधे, त्रि॥)

विद्धकर्णा, स्त्री, विद्धकर्णी। इति भरतहिरूपकोषः॥

विद्धकर्णिका, स्त्री, (विद्धकर्णा। स्वार्थे कन्।) विद्धकर्णी। इति शब्दरत्नावली॥

विद्धकर्णी, स्त्री, (विद्धः कर्ण इव पत्रमस्याः।) वृक्षविशेषः। अकनादि इति भाषा॥ तत्पर्य्यायः। पाठा २ अम्बष्ठा ३ स्थापनी ४ श्रेयसी ५ रसा ६ एकाङ्गोला ७ पाषचेली ८ प्राचीना ९ वनतिक्तिका १०। इत्यमरः॥ अविद्धकर्णी ११ अविद्धकर्णा १२। इति तट्टीका॥ आविद्धकर्णिका १३ विद्धकर्णिका १४। इति शब्दरत्नावली॥ अन्यत् पाठाशब्दे द्रष्टव्यम्॥

विद्यमानः, त्रि, (विद्+आनच्।) वर्त्तमानः। इति सच्छब्दटीकायां भरतः॥ (यथा, वैद्यके।
"वाचायां विद्यमानायामाम्नायां जीवितस्य च॥")

विद्या, स्त्री, (विद्यतेऽसौ इति। विद्+"संज्ञायां समजनिषदनिपतेति।" ३। ३। ९९। इति क्यप्।) दुर्गा। इति शब्दरत्नावली॥ शक्तिकारिका। इति शब्दचन्द्रिका॥ ज्ञानम्। तत्तु मोक्षे धीः। इति जटाधरः॥ परमोत्तमपुरुषार्थसाधनीभूता विद्या ब्रह्मज्ञानरूपा। इति वागीशभट्टः॥ मन्त्रः। यथा। शारदायाम्।
"भान्तं वियत्सनयनं श्वेतो मर्द्दिनि ठद्वयम्।
अष्टाक्षरी समाख्याता विद्या महिषमर्द्दिनी॥"
विश्वसारे।
"प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत् सुधीः।"
महिषमर्द्दिनीमन्त्रः॥
"दशाक्षरी समाख्याता विद्या त्रिभुवनेश्वरी।
प्रणवश्च तथा माया भवेद्विद्या पुनर्दशः।
कामं प्रणवमित्युक्तं भवेद्विद्या पुनर्दशः॥"
दुर्गामन्त्रः।
"वाग्बीजाद्या यदा विद्या वागीशत्वप्रदायिनी।
कामाद्या च यदा विद्या सर्व्वकामप्रदायिनी॥
तारमायादिका विद्या भोगमोक्षैकदायिनी।
यद्वीजाद्या भवेद्विद्या तद्वीजैराङ्गकल्पना॥"
अन्नपूर्णामन्त्रः। इति तन्त्रसारः॥ *॥ महाविद्या। कलौ तस्या नानामन्त्रोक्ताऽसौ पूजा सर्व्वत्र भवति। अधुना सा वाराह्यारीपूजा इति ख्याता। यथा,—
"अस्मिन् काले सुरेशानि प्रकाशो जायते भुवि।
तमोधर्म्मेण सर्व्वत्र देवताप्रतिमा सदा॥
अष्टम्याञ्च चतुर्दश्यां नवम्यां शनिभौमयोः।
संक्रान्त्यां पञ्चदश्याञ्च पक्षयोरुभयोरपि॥
कृत्वा तु पूजयित्वन्ति महाविद्यां सभैरवाम्।
विद्याञ्च विविधां देवि तथान्यप्रतिमां शुभाम्॥
एवं हि तामसीं पूजामनिच्छाञ्च भवेत् कलौ।"
इति मायातन्त्रे १७ पटलः॥
शास्त्रम्। तच्तु अष्टादशविधम्। यथा। शिक्षा १ कल्पः २ व्याकरणम् ३ निरुक्तम् ४ ज्योतिषम् ५ छन्दः ६ ऋग्वेदः ७ यजुर्व्वेदः ८ सामवेदः ९ अथर्व्ववेदः १० मीमांसा ११ न्यायः १२ धर्म्मशास्त्रम् १३ पुराणम् १४ आयुर्व्वेदः १५ धनुर्व्वेदः १६ गान्धर्व्ववेदः १७ अर्थशास्त्रम् १८। यथा, विष्णुपुराणम्।
"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः
धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश॥
आयुर्व्वेदो धनुर्व्वेदो गान्धर्व्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थञ्च विद्या ह्यष्टादशैव ताः॥"
इति प्रायश्चित्ततत्त्वम्॥*॥
नीचादप्युत्तमा विद्या ग्राह्या यथा,—
"अश्रद्धानः शुभां विद्यामाददीतावरादपि।
अन्त्यादपि परं धर्म्मं स्त्रीरत्नं दुष्कुलादपि॥"
इति मानवे २ अध्यायः॥*॥
विद्याप्रशंसा यथा,—
"ये बालभावान्न पठन्ति विद्यां
ये यौवनस्था अधना अदाराः।
ते शोचनीया इह जीवलोके
मनुष्यरूपेण मृगाश्चरन्ति॥
भोजने भोजनं चित्तं न कुर्य्याच्छास्त्रसेवकः।
सुदूरमपि विद्यार्थे व्रजेत् गरुड़वेगवान्॥
ये बालभावान्न पठन्ति विद्यां
कामातुरा यौवनदत्तचित्ताः।
ते वृद्धकाले परिभूयमानाः
सन्दह्यमानाः शिशिरे यथाजम्॥
माता शत्रुः पिता वैरी बालो येन न पाठितः।
न शोभते सभामध्ये हंसमध्ये बको यथा॥
विद्या नाम कुरूपरूपमधिकं प्रच्छन्नमन्तर्द्धनं
विद्या साधुजनप्रिया शुचिकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनार्त्तिनाशनकरी विद्या परं देवता
विद्या भोग्ययशःसुखोन्नतिकरी विद्याविहीनः पशुः॥
इहे चाभ्यन्तरे द्रव्यं लभ्यं चैव तु दृश्यते।
अन्येषं हरणीयञ्च विद्या न ह्रियते परैः॥"
इति गारुड़े ११०।११५ अध्यायौ॥
अथ विद्यादानफलम्।
"यस्तु देया यदे नित्यं विद्यादानं प्रयत्नतेयेत्।
स भवेत् सर्व्वलोकानां पूज्यः पूजापदं व्रजेत्॥
विद्यादानं प्रवक्ष्यामि येन तुष्यन्ति मातरः।
लिख्यते दीयते येन विधिना तं शृणुष्व नः॥
सिद्धान्तमोक्षशास्त्राणि वेदान् स्वर्गादिसाधकान्।
तदङ्गानीतिहासानि देया धर्म्मविवृद्धये॥
गारुड़ं वास्तुतन्त्रञ्च भूततन्त्राणि भैरवम्।
शास्त्राणि पठनाद्दानात् मातरः फलदा नृणाम्॥
ज्योतिषं वेदशास्त्राणि कला कार्यं स्वभाग्यतः।
दानाद्दारोग्यमाप्नोति गन्धर्व्वं लभते परम्॥
विद्याभ्यो जायते लोको धर्म्माधर्म्मौ च वृद्धये।
तस्माद्विद्या सदा देया वृद्धाद्यक्षणार्थिभिः॥
महीदानञ्च गोदानं हेमवस्त्रतिला जलम्।
धान्यदीपान्नदानञ्च महादानानि दानसु॥
दत्तञ्च क्षीयते दानं दीपदानं नराधिप।
विद्या वृद्धिमवाप्नोति दीयमानापि नित्यशः॥
एकोच्चारेण भूदानं दत्तं भवति भूमिप।
नहि तद्विद्यते भूप देहपातादनन्तरम्॥
विद्यादानं न तद्वत्स एकधा दशधा भवेत्।
शतधा कोटिधा गच्छेदिहामुत्र च पारगः॥
राज्ञा तस्करदायादैर्जलवह्निसरीसृपैः।
सर्व्वदानानि क्षीयन्ते विद्या केनापि क्षीयते॥
विद्यादानात् परं दानं न भूतं न भविष्यति।
विद्यादानेन दानानि नहि तुल्यानि बुद्धिमन्॥
विद्या एव परं मन्ये यत्तत् पदमनामयम्।
यच्चलभ्यते भक्तिभंक्ष्या गुरुसुपासते॥
स च विद्यागमान् वक्ति विद्या पुस्ताश्रिता नृप।
विद्याविवेकबोधेन शुभाशुभविचारिणाम्॥
विद्यते सर्व्वकामाग्निस्तस्माद्विद्या परा मता॥
विद्यादानात् परं दानं न भूतं न भविष्यति।
येन दत्तेन चाप्नोति शिवं परमकारणम्॥
विद्याविचारतत्त्वज्ञा राज्ञः सन्मार्गगामिनः।
सुव्रतेऽपि हि भोगानि गच्छन्ति परमां गतिम्॥
अन्यजा अपि यां प्राप्य क्रीड़न्ते यद्वराननेः।
सा विद्या केन मीयेत यस्याः कोऽन्यः समोऽपि न॥
ध्वरेण कुञ्जरं हन्ति सर्षपेण सुरद्रुमम्।
मल्लिकापदमात्रस्य विषस्य विषमा गतिः॥
एवंविधं विधिं वत्स विद्यामन्त्रप्रभावतः।
जीर्णते भक्तिसंयुक्तैस्तस्माद्विद्या परात्परा॥
नहि विद्या कुलं जातिरूपं पौरुषपाचताम्।
वशते सर्व्वलोकानां पतिता उपकारिका॥
भूतैर्यक्षैता विश्वस्ता दत्ता वा महपन्नगैः।
विद्या उत्थापयेत् वत्स अन्यजस्यापि शूद्रक्षितेः।
सर्व्वेषामेव वृद्धानां विद्यावृद्धे हि मान्यता॥
यशोवृद्धो हि शूद्राणां विप्राणां धनवान् यशः।
क्षत्रियाणान्तु वीर्य्येण विप्राणां शास्त्रपारगः॥
वित्तं बन्धुर्वयश्चैव तपो विद्या यशोत्तरम्।
पूजनीयानि सर्व्वेषां विद्या तेषां गरीयसी॥
गुरुशुश्रूषया विद्यां पुष्कलेन धनेन वा।
विद्यया लभ्यते विद्या चतुर्थी नोपलभ्यते॥
यः शूद्रक्षान्तु महीं दद्यात् मेरुतुल्यञ्च काञ्चनम्।
स यदस्थायतः एकेन तस्योपरिश्रेत् क्वचित्॥
एवंविधं महाभाग विद्यारूपं हि वर्णितम्।

संक्षेपान्न च विस्तारात्तस्या दानफलं शृणु ।
श्रीताड़ीपत्रजे सद्मे समे पत्रसुशोभिते ।
विचित्रकं विपार्श्वे च चर्मेणां सवटोल्लते ।
रक्तेन अथ लाक्षेण मञ्जिष्ठाबद्धितेन च ।
दृढ़सूत्रसबन्धेन एवंविधव्रतेन च ।
यस्तु ग्राहयसाद्धर्मी संहितामुपवेक्षयेत् ।
ददाति चाभियुक्ताय स याति परमां गतिम् ।
पूर्वोत्तरप्रदेशे देशे सर्वबाधाविवर्जिते ।
गोमयेन शुभेनैव कुर्याच्चत्वरकं बुधः ।
चतुर्हस्तप्रमाणेन शुभच्च चतुरस्रकम् ।
तस्य मध्ये लिखेत् पद्मं सितरक्तरजादिभिः ।
सर्वतुंकमये: पूर्वैर्भूषयेत् सर्वतो दिशम् ।
वितानं दापयेच्चूर्ह्नि शुभचित्रविचित्रितम् ।
पार्श्वतः सितवस्त्रेषु सम्यक् शोभां प्रकल्पयेत् ।
कङ्कुकैरर्द्धचन्द्रैश्च दर्पणैश्चामरैस्तथा ।
घण्टाकिङ्किणिशब्दैश्च सर्वत्र उपकल्पयेत् ।
तस्य मध्ये न्यसेद्दण्डं नागदन्तमयं शुभम् ।
अधः कश्चिन्निबद्धन्तु पार्श्वतो हरिदन्तिभिः ।
ग्रोभितं दृढ़सूत्रेण वर्द्धं सूत्रेण बुद्धिमान् ।
तस्योर्द्धे विष्णवेदेवाः पुस्तकं लिखितं शुभम् ।
आवेष्टमपि तत्रैव पूजयेद्विधिना ततः ।
निरुदकैस्तथा पुष्पैः क्षमिकीटविवर्जितैः ।
चन्दनेन सदा तत्र भक्तया चार्च धूपयेत् ।
धूपञ्च गुग्गुलुं देयं तुरुष्कागुरुमिश्रितम् ।
दीपमालां तथा चाग्रे नैवेद्यं विविधं पुनः ।
खाद्यं पेयान्वितं लेह्यं चोष्यञ्चापि निवेदयेत् ।
पूजयेद्दिग्पालांस्तु लोकपालान् यथाक्रमम् ।
कन्याः स्त्रियस्तु संपूज्या मातरः कल्पयेच्च ताः ।
पुस्तकं देवदेवीञ्च विप्राणां दक्षिणां तथा ।
स्वशक्त्या चैव दातव्या नृपं पौरांश्च पूजयेत् ।
तथा संपूजयेदेतत्स लेखकं धर्मभागकम् ।
छन्दोलक्षणतत्त्वज्ञं सत्कविं मधुरस्वरम् ।
प्रथमं स्मरते यस्यं श्रेष्ठं पुस्तकलेखकम् ।
नातिस्थूलतविच्छिन्नैर्न शुष्कैर्न च कर्कशैः ।
नन्दिनागरकैर्वर्णैर्लेखयेच्छिवपुस्तकम् ।
प्रारम्भे पञ्चश्लोकानि पुनः शान्तिन्तु कारयेत् ।
रात्रौ जागरकं कुर्यात् सर्वोपेक्षं प्रकल्पयेत् ।
नटचारणवर्गेश्च देयाः कथनसम्भवैः ।
प्रत्यूषे पूजयेल्लोकांस्ततः सर्वं विसर्जयेत् ।
एकान्ते सुमनस्कैश्च विप्रवर्गैर्दिने दिने ।
नित्यादां विधिनानेन स्वर्गे च शुभवासरे ।
ततः पूर्वोक्तविधिना पुनः पूजां प्रकल्पयेत् ।
तथा विद्याविमानन्तु सप्तपक्षत्रिभूमिकम् ।
विचित्रवस्त्रशोभाढ्यं शुभलक्षणलक्षितम् ।
कारयेत् सर्वतोभद्रं किङ्किणीवरकान्वितम् ।
दर्पणैरर्द्धचन्द्रैश्च घण्टाचामरभूषितम् ।
तस्मिन्नृपं समुत्थाप्य सुमनं चन्दनागुरुम् ।
तुरुष्कं गुग्गुलुं दत्त्वा शर्करामधुमिश्रितम् ।
पूर्ववत् पूजयेत् सर्वान् कन्याब्राह्मणपौरवान् ।
तथा तं पुस्तकं वस्त्रे विष्णवेदेधिपूजितम् ।
एवं कृत्वा तथा चित्त्वा मातरः प्रीयतां मम ।
यस्येव शुक्लं तच्छास्त्रं पुस्ते पुरि विकल्पयेत् ।
तथा तपस्विनः पूज्याः सर्वशास्त्रार्थपारगाः ।
शिवव्रतधरा मुख्या विष्णुधर्मपरायणाः ।
महता जनसंघेन रथस्थं वाद्यवाहनैः ।
प्रधानैर्न्यापि तत्रैयं यस्य देवस्य अंशजम् ।
सामान्यं शिवतीर्थेषु मातरो भवनेषु च ।
तस्मिन् पूजां तथा कृत्वा देवदेवेन शूलिना ।
समर्पयेत् प्रयत्नेन मातरः प्रीयतां मम ।
सदाध्ययनयुक्ताय विद्यादानरताय च ।
विद्यासंग्रहयुक्ताय सर्वशास्त्रज्ञतात्मने ।
तेनैव वर्तते यस्तु तस्य तं विनिवेदयेत् ।
जगद्धिताय वै शास्त्रं सत्यार्थां वाचयेत्तथा ।
तेन लोकेन दातारं मूर्ह्नि समभिषिञ्चयेत् ।
वरमेतु ततः शब्दसुशार्थं जगतस्तथा ।
एवं कृते महाकान्तिर्देशस्य नगरस्य च ।
अनेन विधिना यस्तु सर्ववाधाः शमन्ति च ।
अनेन विधिना यस्तु विद्यादानं प्रयच्छति ।
स भवेत् सर्वलोकानां दर्शनादवनाशनः ।
मृतोऽपि गच्छते स्थानं ब्रह्मविष्णुनमस्कृतम् ॥
सप्त पूर्वापरान् पंक्त्यानात्मनः सप्त एव च ।
उद्धृत्य पापकलिलाद्विष्णुलोके महीयते ।
यावत् तत्पत्रसंख्यानमक्षराणि विधीयते ।
तावत् स विष्णुलोकेषु क्रीड़ते विविधैः सुखैः ।
तदा चितिं समायातो देवा भक्तिरतो भवेत् ।
समस्तभोगसम्पन्ने विद्वान् संजायते कुले ।
विद्यादानप्रभावेन योगशास्त्रं ददेद्यदि ।
आत्मविद्यानुरूपेण यः प्रयच्छति मानवः ।
अश्नाश्नात् फलमाप्नोति सत्यं सत्यं न संशयः ।
स्त्रिया दानेन विधिना विद्यादानफलं लभेत् ।
भर्तुर्ब्यानुमया दत्तं विधवा वा तदुद्दिशन् ॥*॥
विद्यार्थिने सदा देयं वस्त्रमभ्यङ्गभोजनम् ।
छत्रिका उदकं दीपं यस्मात्तेन विना नहि ।
लेखनीघटनं तीक्ष्णमसिपत्रन्तु लेखनीम् ।
दत्वा तु लभते वस्तु विद्यादानमनुत्तमम् ।
पुस्ताक्षरत्रयं दत्त्वा तत्प्रमाणं सुशोभनम् ।
विद्यादानमवाप्नोति सत्यवक्तु बुद्धिमान् ।
पञ्चकामासनञ्चैव दक्षासनमथापि वा ।
विद्याधारणशीलाय दत्तं भवति राज्यदम् ।
अन्नदं नेत्रपादानां दत्तं विद्यापरायणे ।
भूमिं गृहन्तु क्षेत्रन्तु स्वर्गेराज्यप्रजप्रदाम् ।
यस्य भूम्यां स्थितो नित्यं विद्यादानं प्रवर्तते ।
तस्यापि भवते स्वर्गं तत्प्रभावान्नराधिप ।
तस्मात् सर्वप्रयत्नेन विद्या देया सदा नरैः ।
इह कीर्तिमवाप्नोति स्तुतो याति परां गतिम् ।"
इति देवीपुराणे विद्यादानमहाभाग्यफलाध्यायः ॥ * ॥ अपि च ।
"दशवापीसमा कन्या भूमिदानञ्च तत्समम् ।
भूमिदानाद्गुरुतरं विद्यादानं विशिष्यते ।
यथा सुराणां सर्वेषां रामश्च परमेश्वरः ।
तथैव सर्वदानानां विद्यादानन्तु देहिनाम् ।
राजसूयसहस्रस्य सम्यगिष्टस्य यत् फलम् ।
तत् फलं लभते विप्रो विद्यादानेन पुण्यवान् ।
सर्वशास्त्रसमापूर्णां सर्वरत्नोपशोभिताम् ।
विप्राय वेदविदुषे महीं दत्त्वा शुचिव्रते ।
यत्फलं लभते विप्रो विद्यादानेन तत् फलम् ।
कपिलानां सहस्रेण सम्यग्दत्तेन यत् फलम् ।
तत् फलं समवाप्नोति पुस्तकस्य प्रदानतः ।
यावच्च पातकं तेन कृतं जन्मशतैरपि ।
तत् सर्वं नाशयत्याशु विद्यादानेन भो द्विज ।
धर्मोपदेशं यः कुर्यात् शास्त्रं शास्त्रा तु वैष्णवे ।
कृत्स्नां धरित्रीं यो दद्यात् उभयोस्तत्समं फलम् ।
विद्यादानात् परं दानं न भूतं न भविष्यति ।
येन दत्तेन चाप्नोति शिवं परमकारणम् ।
विद्या च श्रूयते लोके सर्वधर्मप्रदायिका ।
तस्माद्विद्या सदा देया पण्डितैर्धार्मिकैर्द्विजैः ।
आत्मविद्याप्रदातारो ये भवन्ति सदा सुने ।
न पुनस्तेऽपि निरयं प्रविशन्ति सुनिश्चयम् ।
विप्राय पुस्तकं दत्त्वा धर्मशास्त्रस्य च द्विज ।
पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात् ।
शास्त्रदृष्ट्या जगत् सर्वं सुश्रुतञ्च शुभाशुभम् ।
तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्मिके ।
वेदविद्याञ्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत् ।
आत्मविद्याञ्च यो दद्यात् तस्य संख्या न विद्यते ।
त्रीणि तुलाप्रदानानि त्रीणि तुलापलानि च ।
शास्त्रं कामदुघा धेनुः पृथिवी चैव शाश्वती ।
यत्किञ्चित् कार्मिके दत्तं विष्णुमुद्दिश्य मानवैः ।
तदक्षयञ्च लभते तत्प्रदानादिहेश्वरः ।
इह लोके बहून् भोगान् भुक्त्वा याति शिवालयम् ।"
इति पाद्मोत्तरखण्डे १२७ अध्यायः ॥

अथ विद्यारम्भादिनानि ।

विष्णुधर्मोत्तरे ।
"संप्राप्ते पञ्चमे वर्षे अप्रसुप्ते जनार्द्दने ।
महीं प्रतिपदश्चैव वर्ज्ययित्वा तथाष्टमीम् ॥
रिक्तां पञ्चदशीञ्चैव सौरिभौमदिनं तथा ।
एवं सुनिश्चिते काले विद्यारम्भन्तु कारयेत् ॥
पूजयित्वा हरिं लक्ष्मीं देवीञ्चापि सरस्वतीम् ।
स्वविद्याशास्त्रकारांश्च स्वाच्च विद्यां विशेषतः ॥
नमस्ते बहुरूपाय विष्णवे परमात्मने ।
खाहेत्यनेन हरिं त्रिः पूजयेत् ।
भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च ॥
खाहेति ब्रह्मपुराणीयेन च त्रिः पूजयेत् ।"*॥
लिखनविधिमाह नन्दिपुराणम् ।
"शुभे नक्षत्रदिवसे शुभे वारे दिनत्रये ।
लेखयेत् पूज्य देवेशान् रुद्रब्रह्मजनार्द्दनान् ॥
पूर्वदिग्वदनो भूत्वा लिपिज्ञो लेखकोत्तमः ।
निरोधो हस्तमाङ्गोष्ठ मसीपत्रावधारवे ।"
मत्स्यपुराणञ्च ।
"त्रीर्वोपेतान् सुसंपूर्णान् समभेलीगतान् समान् ।
अक्षरान् विलिखेद्यस्तु लेखकः स वरः स्मृतः ।"

नाधीयीतेत्यनुवृत्तौ मनुः ।
"रुधिरे च स्रुते गात्रात् व्रणेभ्य च परीक्षते ।"
रुधिरमवं विना व्रणेभ्य क्षतमात्रेऽपि । दीपिकायाम् ।
"लघुचरग्निवमूलाधोमुखत्वदृपौष्ण-
ग्निषु च हरिबोधे शुक्लजीवाकवारे ।
उदितवति च जीवे कैरकोणेषु सौम्ये-
रुपठनदिनवर्ज्यं पाठयेत् पक्षमेऽन्दे ।"
मदनपारिजाते ।
"विद्यारम्भे गुरुः श्रेष्ठो मध्यमौ भृगुभास्करौ ।
मरकं व्रणिभौमाभ्यामविद्या बुधसोमयोः ॥
विद्यारम्भः सुरगुरुसितश्रेष्ठभौद्यार्थदायौ
कर्त्तुं चाशुचिरमपि करोत्यंशुमान् मध्यमोऽत्र ।
नीहारांशौ भवति जडता पक्षता भूमिपुत्रे
ह्यायाम्नावपि च सुनयः कौलयज्ञेवमाद्याः ॥
रवेर्गुरोश्चंगोर्लभे तत्सूर्यैऽपीन्दुरुद्वितः ।
गुर्वर्केन्दूदयुद्धौ च विद्यारम्भः प्रशस्यते ॥"*॥
हरिवंशतिः ।
"प्राङ्मुखो गुरवाशीनो वरवाभिमुखं शिष्यम् ।
अध्यापयेच्च प्रथमं दिनाग्नौर्भिः प्रपूजितम् ।"
कूर्मपुराणम् ।
"स्वाध्यायस्य त्रयो भेदा वाचिकोपांशु-
मानसाः ।"
शिवधर्मे ।
"संस्कृतैः प्राकृतैर्वाक्यैः शिष्यमनुरूपतः ।
देशभाषानुपायेन बोधयेत् स गुरुः स्मृतः ।"
आदिः यत्यकरणादिः । *। नन्दिपुराणम् ।
"प्रशस्तशब्दसंयोगे कुर्यात् यतिविरामकम् ।"
विरामकं तद्दिनपाठसमाप्तिम् । *।
"समाप्ते वाचकाभीष्टं कुर्यादेव विचक्षणः ।
सुव्रतं सुव्रतं भूयादस्तु स्वाध्या तु नित्यदा ।
लोकः प्रवर्त्ततां धर्म्मे राजा चास्तु सदा जयी ।
धर्म्मवान् धनसम्पन्नो गुरुश्चास्तु निरामयः ।*॥
इति प्रोच्य यथान्यायं गन्धाद्यैश्च विभावितैः ।
शिष्यैः परस्परं ग्राह्यं चिन्तनीयं विचक्षणैः ।
कथावसुप्रसङ्गेन नानाख्यानसम्भवैः ।
युक्तिभिश्च स्वरैर्दृश्यां चिट्टैश्चापि स्वयंकृतैः ।
एवं दिने दिने ग्राह्यं ग्रन्थवान्नियतो नरः ।"
विष्णुपुराणम् ।
"पुत्रैरध्यापिता ये च ते पतन्ति नभोजने ।"
क्षत उवाच ।
"प्रागल्भ्यहीनस्य नरस्य विद्या
ग्रन्थं यथा कापुरुषस्य खड्गे ।
न क्षत्रियुत्पादयते शरीरे
अन्यस्य दारा इव दर्शनीयाः ।"*।
लिङ्गपुराणम् ।
"यो गुरुं पूजयेन्नित्यं तस्य विद्या प्रसीदति ।
तत्प्रसादेन यस्मात् स प्राप्नुते सर्वसम्पदः ।"
दुर्गादासः ।
"सन्ध्यायां सन्ध्यते मेधी ग्राह्यचिन्तां करोति यः ।
चत्वारि तस्य गच्छन्ति चायुर्विद्या यशो बलम् ।"
अधीतस्यार्थिने दानमावश्यकं तथा च श्रुतिः ।
योऽधीत्यार्थिभ्यो विद्यां न प्रयच्छेत् स कार्मणा
स्यात् श्रेयसो द्वारमावृणुयात् इति । *।
तदानञ्च अध्यापनेन वाच्यया विनिष्क्रयार्पणेन
च सम्भवतीत्यतो धीमद्भिर्निबन्धः क्रियते ॥ *॥
तथा च विष्णुपुराणम् ।
"प्राणिनामुपकाराय यदेवेह परत्र च ।
कर्म्मणा मनसा वाचा तदेव मतिमान् भवेत् ।"
हरिस्मृतिरपि ।
"अज्ञानतिमिरोपेतान् सन्देहपटलान्वितान् ।
निरामयान् यः कुरुते ग्राह्याञ्जनशलाकया ॥
इह कीर्त्तिं राजपूजां लभते सद्गतिञ्च सः ।
वाक्साक्षिके तु समये भ्रान्तिः सञ्जायते यतः ॥
धारावाहिकि हृदयानि पत्रारूढान्यतः पुरा ।
उपदेशानुमन्ता च लोके तुल्यफलौ स्मृतौ ।"
एवञ्च । एकलव्येनानुपदेशादपि द्रोणाचार्यो गुरुः
स्मृतः; अतो यत्कर्त्तुः सुतरां गुरुत्वम् । यथा,
महाभारते ।
"अरण्यमनुसंप्राप्य स्मृत्वा द्रोणं महीपतिम् ।
तस्मिन्नाचार्यवृत्तिञ्च परमामास्थितस्तदा ।
दृष्ट्वा योगमास्थाय परं विस्मयमागतः ।"*॥
शब्दकल्पद्रुमधृतौ ।
"न वेदमनधीतानां विद्यामधीतास्तु वेदाङ्ग-
स्मृतिभ्यः ।" *। अङ्गानि च ।
"शिक्षा कल्पो व्याकरणं छन्दो ज्योतिषमेव च ।
निरुक्तञ्चेति चाङ्गानि वेदानां गदितानि षट् ।"
स्मृतिस्तु धर्म्मसंहितेत्यमरः । *। शिष्यस्य
गुरुश्च लक्षितमाह लघुहारीतः ।
"एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चोऽनृणी भवेत् ।"
नन्दिपुराणम् ।
"यश्च श्रुत्वाग्रतः ग्राह्यं संस्कारं प्राप्य वै दृढम् ।
अन्यस्य जनयेत् कीर्त्तिं गुरोः स ब्रह्महा भवेत् ।
विस्मरेच्च तथा मौढ्यादृषोऽपि ग्राह्यमनुत्तमम् ।
स याति नरकं घोरमत्यं भीमदर्शनम् ।"*॥
अतएव ब्रह्मचारीनामपि पुनरध्ययनमाह
आपस्तम्बः । यथा विद्यया न विरोधेत पुनराचार्यमुपेत्य साधयेदिति । *। विष्णुः । यच्च
विद्यामासाद्य तया जीवेत् न च या तस्य परलोकफलप्रदा भवति यच्च विद्यया परेषां वधो
हन्तीति । *। देवलः ।
"दृष्टं दत्तमधीतं यदनश्नत्यनुकीर्त्तनात् ।
ग्राह्यानुशोचनाभ्याच्च भयतेजो विभिद्यते ।
तस्मादात्महितं पुण्यं दृष्ट्वा न परिकीर्त्तयेत् ।"
अनुकीर्त्तनं कथनम् । ग्राह्या प्रशंसा । अनुशोचनं धनव्ययेन पश्चात्तापः । भयतेजः बलवीर्यशक्तिहीनम् । दृष्ट्वा रथादिप्रलोभनं
विना । *। वैद्यवाग्भटे भविष्यपुराणम् ।
"उपाध्यायस्य यो वृत्तिं दत्त्वाध्यापयति
द्विजान् ।
विघ्न दत्तं भवेत्तेन धर्म्मकामार्थमिच्छता ।"
इति ज्योतिस्तत्त्वम् ।

विद्याचक्षुः, } (विद्यया चित्तः । विद्या + "तेन-
विद्याचक्षुः, } चित्तचक्षुष्यचप्यौ ।" ५। २ । २६ ।
इति चक्षस् चक्षुष् च ।) विद्यया ख्यातः । इति
भरतः ।
विद्यादलः, पुं, भूम्नेदृच्चः । इति शब्दमाला ।
विद्यादाता, [तृ] त्रि, (विद्यां ददातीति । दा +
तृच् ।) विद्यादानकर्त्ता । यथा,—
"अन्नदाता भयत्राता पत्नीतातस्तथैव च ।
विद्यादाता जन्मदाता पञ्चैते पितरो नृणाम् ।"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
अपि च ।
"न च विद्यासमो बन्धुर्न्नास्ति कश्चित् गुरोः
परः ।
विद्यादातुः पुत्रदारौ तत्समौ नात्र संशयः ।"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः ॥
विद्यादानं, क्ली, (विद्याया दानम् ।) अध्यापनम् ।
पुस्तकदानम् । यथा,—
वह्निरुवाच ।
"विद्यादानं प्रवक्ष्यामि यथातथ्यात्तवाधुना ।
तथा देयं फलं यच्च तच्छृणुष्व नृपोत्तम ! ॥
पुण्येऽह्नि शुभनक्षत्रे मण्डपं शुभवेदिकम् ।
चतुरस्रं वितानं वा कृत्वा तत्रोपवेशयेत् ।
गोमयेनोपलिप्ते तु पुण्यप्राकरशोभिते ।
तत्र न्यस्यासनं दिव्यं दिव्यगन्धादिवासितम् ।
संस्थाप्य पुस्तकं तत्र धर्म्मशास्त्रस्य धीमतः ।
ब्राह्मणान् वेदसंपूर्णान् छन्दोलक्षणपारगान् ॥
वेष्टयित्वा तु वस्त्रेण तत्समन्तं सुभाचरैः ।
चन्द्रसूर्योपरागे वा संक्रान्त्ययनवासरे ।
पुण्येऽह्नि ततः सुसंपूज्य ब्राह्मणद्वारभूवकैः ।
हृतधेनुं सुतं दत्त्वेदात् गुरुवते ततः ॥
ग्राह्यशास्त्रविदुषे वाचकेऽतिप्रियंवदे ।
तच्छास्त्रं ग्रहतां नित्यं जगतां नाशयत्यथ ।
दातुस्तस्माच्च यत्नेन फलं तच्छृणु भूपते ।
यत् पुण्यं सर्व्वतीर्थानां विधिवद्दृयजतां तथा ।
तत् पुण्यं समवाप्नोति विधिवच्छास्त्रदः पुमान् ॥
कपिलानां सहस्रेण सम्यगुद्दत्तेन यत् फलम् ।
तदाप्नुयात् सकलं देवे धर्म्मशास्त्रप्रदायकः ॥
पुराणं भारतं वापि रामायणमथापि वा ।
दत्त्वा यत् फलमाप्नोति न तत् सर्व्वेर्मखैरपि ॥
देवागाराजये नित्यं धर्म्मशास्त्राणि यः पुमान् ।
अध्यापयति धर्म्मात्मा तस्य दानफलं शृणु ।
धनभूमिहिरण्यानां दानेन यदवाप्यते ।
फलं तत् सकलं राजन् नित्यं कारापकस्य च ।
योऽधीते धर्म्मशास्त्राणि देवानां पुरतोऽनिशम् ।
द्विजो वीपुरुषार्थानामेवमेवार्हति ध्रुवम् ॥
प्रातरुत्थाय यो वेदं वेदाङ्गं शास्त्रमेव वा ।
पृथिवीदानतुल्यं स्यात् फलं तस्य नृपोत्तम ।
दानैर्योऽपि विमर्त्तीह नवीभूसुर्धर्म्मतत्परः ।
द्विगुणं पृथिवीदानात् फलं तस्य भवेन्नृप ! ।
यो भृतं पठमानानां करोत्यन्नदिनं नृप ! ।
स यज्ञफलमादत्ते दानाच्छादनभोजनैः ।
विवेको जीवितं दीर्घं धर्म्मकामार्थसम्पदः ।

सर्व्वं तेन भवेद्दत्तं ब्राह्मणाय पयस्विने ॥
वाजपेयसहस्रस्य सम्यगिष्टस्य यत् फलम् ।
तत् फलं समवाप्नोति विद्यादानान्न संशयः ॥
तस्माद्देवालये नित्यं धर्म्मशास्त्रस्य वा श्रुतेः ।
पठनं कारयेद्राजन् यदीच्छेद्धर्म्ममात्मनः ॥
गोभूहिरण्यवासांसि ग्रयनान्यासनानि च ।
प्रत्यहं तेन दत्तानि भवन्ति नृपसत्तम ! ॥
धर्म्माधर्म्मं न जानाति लोकोऽयं विद्यया विना ।
तस्मात् सदैव धर्म्मात्मन् विद्यादानरतो भव ॥"

इति वह्निपुराणे विद्यादाननामाध्यायः ॥

विद्यादेवी, स्त्री, (विद्याया देवी ।) जिनषोड़श-देवान्तर्गतदेवीविशेषः । इति हेमचन्द्रः ॥ सरस्वती च ॥

विद्याधनं, क्ली, विद्यया अर्ज्जितधनम् । यथा । विद्याधनमाह कात्यायनः ।

"उपन्यस्तं तु यल्लब्धं विद्यया यशपूर्ब्बकम् ।
विद्याधनन्तु तद्विद्यात् विभागे न नियोजयेत् ॥
ग्रिष्यादार्त्विज्यतः प्राप्तात् सन्दिग्धप्रश्ननिर्णयात् ।
स्वज्ञानग्रंसनाद्दाक्षाल्लब्धं प्राध्ययनात्तु यत् ॥
विद्याधनन्तु तत् प्राज्ञैर्विभागे न प्रयोजयेत् ।
ग्रिष्येष्वपि हि धर्म्मोऽयं मूल्याद्यच्चाधिकं भवेत् ॥
परं निरस्य यल्लब्धं विद्यया दूतपूर्ब्बकम् ।
विद्याधनन्तु तद्विद्यात् न विभाज्यं दृष्टस्मृतिः ॥"

यदि भवाद् भद्रमुपन्यस्यति तदा भवत एव मयेतद्देयमिति पण्डितं यत्रोपन्यासं निह्नीय लभते तत्र विभाज्यम् । ग्रिष्याद्ध्यापितात् आर्त्विज्यतः यजमानाद्ग्रिष्यया लब्धं धनं न प्रतिग्रहलब्धं वेतनरूपत्वात्तस्य । तथा यत्किञ्चिद्विद्याप्रश्ने निह्नीयोपचितं यदि कश्चित् परितोषाद्ददाति । तथा यो ग्रन्थिन् ग्राह्यार्थे अस्माकं संग्रयमपनयति तस्मै धनमिदं ददामीत्युपस्थितस्य संग्रयमपनीय यल्लब्धम् । तथा वादिनोर्व्वादसन्देहे न्यायकरणार्थमागतयोः सभ्यनिरूपणे यल्लब्धं वस्त्रादिकम् । तथा ग्राह्यादिप्रश्नज्ञानं सभाय्य यत् प्रतिग्रहादिना लब्धम् । तथा ग्राह्यज्ञानविवादे अन्यत्रापि यत्र कुत्रचिदन्योऽन्यज्ञानविवादे निर्ज्जित्य यल्लब्धम् । तत्रैकस्मिन् देये बहूनामुपवदे येन प्रदृश्यात् यल्लब्धम् । तथा ग्रिष्यादिविद्यया चित्रकरसुवर्णकारादिभिर्यल्लब्धम् । तथा द्यूतेनापि परं निर्ज्जित्य यल्लब्धं तत् सर्व्वमविभाज्यमितरैः । तस्माद्यया कयाचित् विद्यया लब्धमर्ज्जकस्यैव तन्न इतरेषामिति । प्रदर्शनार्थन्तु कात्यायनेन विस्तारितमिति दायभागः ॥ नारदः ।

"कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ।
भागं विद्याधनात्तस्मात् स लभेताग्रतोऽपि सन् ॥"

बिभृयादित्येकवचननिर्द्देशान्न बहवः । यदि विद्यामधीयानतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययप्ररोरायासाभ्यां संवर्द्धयति तदा तद्विद्यार्ज्जितधने तस्याधिकारः । अन्यतो मूर्खः । कल्पतरुमिताक्षरादीपकलिकासु कात्यायनः ।

"परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या ।
तया लब्धं धनं यत्तु विद्यालब्धं तदुच्यते ॥"

अन्यतः पितृमातृकुलव्यतिरिक्तात् । अत्र विशेषयति स एव ।

"नाविद्यानान्तु वैद्येन देयं विद्याधनं क्वचित् ।
समविद्याधिकानान्तु देयं वैद्येन सङ्गतम् ॥"

सच्चोचरितविद्यापदसभाभ्यां सम्बध्यते । तेन समविद्याधिकविद्यानां भागो न तु न्यूनविद्या-विद्ययोः । वैद्येन विदुषा । पुनर्विशेषयति ।

"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा ।
ग्रौर्य्यप्राप्तन्तु यद्दत्तं विभाज्यं तद्दृढस्मृतिः ॥"

कुले स्वकुले पितामहपितृव्यादिभ्यः पितृत एव वा ग्रिक्षितविद्यानां भ्रातॄणां यद्दिद्याग्रौर्य्यप्राप्तं धनं तदविभजनीयमिति कल्पतरुरत्नाकरौ । इति दायतत्त्वम् ॥

विद्याधरः, पुं, देवयोनिविशेषः । इत्यमरः ॥ विद्यां मन्त्रादिकं धरति पचाद्यच् । पृषोदरादिः । कामरूपी खेचरः । इति भरतः ॥ (यथा, रघुः । २ । ६० ।

"तस्मिन् क्षणे पालयितुः प्रजाना-
मुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता ॥")

तस्योत्पत्त्यादिर्यथा,—

"नैकैर्यज्ञशतैर्य्यान्ति त्रैलोक्यममरोगणैः ।
तेषामुत्पादिताश्चान्ये महागन्धर्व्वनायकाः ॥
उत्पादिताः पुनस्तैर्ये विक्रान्ता युद्धदुर्म्मदाः ।
विद्याधरेश्वरास्ते तु खेचराः कामचारिणः ॥
हिरण्यरोमा कपिलः सुलोमा माधवस्तथा ।
इन्द्रकेतुश्च पिङ्गाक्षो नादश्चैव महाबलः ॥
गय इत्येवमादिस्तु हे चान्ये वै सुलोचने ।
ग्रिवा च सुमनाश्चैव ताभ्यामपि च विश्रवाः ॥
पुनश्चोत्पादयामास विद्या सौमनसं गयम् ।
एतैर्व्याप्तो ह्ययं लोको विद्याधरगणैस्त्रिभिः ॥
एभ्योऽनेकानि जातानि खचरान्तरचारिणाम् ।
लोकेऽस्मिन् गयग्रस्तानि मन्त्रविद्याविचारिणाम् ।
विद्याधरास्तथान्येऽपि विद्याबलसमन्विताः ॥"

इति वह्निपुराणे काश्यपीयवंग्रः । ७ ॥ षोड़ग्रप्रतिबन्धान्तर्गतषष्ठमबन्धः । तस्य लक्षणं यथा, रतिमञ्जर्य्याम् ।

"नार्य्या ऊरुयुगं धृत्वा कराभ्यां ताड़येत् पुनः ।
कामयेन्निर्भरं कामी बन्धो विद्याधरो मतः ॥"

विद्यावान्, [त्] त्रि, (विद्याऽस्यास्तीति । विद्या + मतुप् । मस्य वः ।) विद्याविशिष्टः । विद्या-शब्दात् वतुप्प्रत्ययेन विष्पन्नः । (यथा, प्रबोध-चन्द्रोदये । २ । ३१ ।

"विद्यावत्त्वमपि कौर्त्तिमत्त्वमपि सदाचारावदा-
तान्यपि ।

प्रौढ़ैः पौरुषभूषणान्यपि कुलान्युद्धर्त्तुमीशः
क्षणात् ॥")

विद्युज्जिह्वः, पुं, (विद्युदिव चञ्चला जिह्वा यस्य ।) राक्षसविशेषः । यथा,—

"अग्निकेतुश्च दुर्म्मर्षो रश्मिकेतुश्च वीर्य्यवान् ।
विद्युज्जिह्वो द्विजिह्वश्च सूर्य्यशत्रुश्च राक्षसः ॥"

इति रामायणे उत्तरकाण्डे ६० सर्गः ॥ (स्त्री, कुमारानुचरमातृगणविशेषः । यथा, महाभारते । ६ । ४६ । ८ ।

"मेघस्वना भोगवती सुभ्रूश्च कनकावती ।
ज्वालाजिह्वी वीर्य्यवती विद्युज्जिह्वा च भारत ! ॥")

विद्युज्ज्वाला,, स्त्री, (विद्युत इव ज्वाला यस्याः ।) कलिकारीवृक्षः । इति राजनिर्घण्टः । (विद्युतो ज्वाला ।) तड़ित्प्रभा च ।

विद्युत्, स्त्री, (विशेषेण द्योतते इति सञ्ज्ञायां वा । वि + द्युत + "आजभासेति ।" ३ । २ । १७७ । इति क्विप् ।) सञ्ज्ञा । इति मेदिनी । ते, १५५ । विद्योतते या । सत्यभ्यायः । ग्रभ्या २ ग्रतह्रदा ३ ह्रादिनी ४ ऐरावती ५ चञ्चप्रभा ६ तड़ित् ७ सौदामिनी ८ चपला ९ चपला १० । इत्यमरः । वीणा ११ सौदामनी १२ चित्र-मौलिका १३ सञ्ज्ञूः १४ अचिरप्रभा १५ सौदामनी १६ अस्थिरा १७ मेघप्रभा १८ अग्निः १९ । इति शब्दरत्नावली । चटुला २० अचिररोचिः २१ राधा २२ नीलाञ्जना २३ । इति जटाधरः ॥ सा चतुर्व्विधा । यथा,—

"अरिष्टनेमिपत्नीनामपत्यानीह षोड़श ।
बहुपुत्रस्य विदुषस्ततो विद्युतः स्मृताः ॥"

इति विष्णुपुराणे १ अंशे १५ अध्यायः ॥

ततश्च विद्युतस्तु ।

"वाताय कपिला विद्युदातपाय हि लोहिता ।
पीता वर्षाय विज्ञेया दुर्भिक्षायासिता भवेत् ॥"

इति ज्योतिःग्राह्ये प्रसिद्धाः । इति तट्टीका ॥

विद्युत्, त्रि, (विगता द्युत् कान्तिर्यस्य ।) निष्प्रभः । इति मेदिनी । ते, १५५ । (विशिष्टा द्युत् दीप्तिर्यस्येति विग्रहे । विशेषेण दीप्तिग्राही । यथा, ऋग्वेदे । १ । २३ । १२ ।

"हस्कारादिद्युतस्पर्य्यतो जाता अवन्तुनः ।"

"हस्कारात् दीप्तिकारात् विद्युतो विशेषेण दीप्यमानात् ।" इति तद्भाष्ये सायणः ॥)

विद्युत्केशः, पुं, (विद्युत इव दीप्तिग्राहिणः केशा यस्य ।) राक्षसविशेषः । यथा,—

"स कालभगिनीं कान्तां भयां नाम महा-
भयाम् ।
उदावहदमेयात्मा स्वयमेव महामतिः ॥
स तस्यां जनयामास हेती राक्षसपुङ्गवः ।
पुत्रं पुत्रवतां श्रेष्ठो विद्युत्केशमिति श्रुतम् ॥"

इति रामायणे उत्तरकाण्डे ४ सर्गः ॥

विद्युत्प्रियं, क्ली, (विद्युतः प्रियम् । तदाकर्षक-त्वात् ।) कांस्यम् । इति हेमचन्द्रः ॥

विद्युत्वान्, [त्] त्रि, (विद्युतः सञ्ज्ञास्त्रिति । विद्युत् + मतुप् ।) विद्युद्विशिष्टः । विद्यु-

च्छन्दात् वसुप्रत्ययेन निष्पन्नः । (यथा, मेघदूते । ६६ ।
"विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।"
पुं, पर्व्वतविशेषः । यथा, हरिवंशे ।२२८।६१।
"विद्युत्वान् पर्व्वतः श्रीमानायतः प्रतयोजनम् ।
विद्युतां यत्र सम्पाता निपात्यन्ते नगोत्तमे ।")
विद्युन्माला, स्त्री, अष्टाक्षरपादच्छन्दोविशेषः । यथा । "मो मो गो गो विद्युन्माला ।"
"वासो वह्नो विद्युन्माला वर्हश्रेणी शाक्रचापः ।
यस्मिन्नास्तां तापोच्छित्तौ सोमश्रस्यः क्षणाम्भोदः ।"
इति छन्दोमञ्जरी ।
अपि च ।
"सर्व्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्दैर्घैर्दैः ।
विद्वद्वृन्दैर्वीणावादि ! व्याख्याता सा विद्युन्माला ।"
इति श्रुतबोधः ।
विद्युन्माली, [न्] पुं, राक्षसविशेषः । यथा ।
विद्युन्मालीनाम कश्चिद्राक्षसो माहेश्वरः तस्मै रुद्रेण सौवर्णं विमानं दत्तं ततोऽकैस्य पृष्ठतो भ्रमन् विमानदीप्त्या रात्रिं विलोपितवान् ततोऽर्केण निजतेजसा द्रावयित्वा तद्विमानं पातितं तच्छ्रुत्वा कुपिते रुद्रे भयादर्कः पराद्रवत् ततो रुद्रस्य क्रूरया दृष्ट्या दह्यमानः पतन् वाराणस्यां पतितो लोलार्कनाम्ना विख्यातः । इति श्रीभागवते ९ स्कन्धे ७ अध्यायटीकायां श्रीधरस्वामी । अपि च ।
"धर्म्मस्य पुत्रो बलवान् सुवेष इति विश्रुतः ।
स विद्युन्मालिना सार्द्धं अयुध्यत महाकपिः ।"
इति रामायणे युद्धकाण्डे ४३ सर्गः ।
विद्रं, क्ली, छिद्रम् । इति शब्दचन्द्रिका ।
विद्रधिः, पुं, रोगविशेषः । तत्पर्य्यायः । विदरथम्० सुश्रुतः । २ सुदरथः ३ सुदरथः ४ । इति राजनिर्घण्टः ।
तत्र विद्रधेः संप्राप्तिपूर्व्वकं सामान्यं लक्षणमाह ।
"त्रयस्त्रिंशमेदांसि प्रदुष्यास्थिसमाश्रिताः ।
दोषाः शोथं ग्रथ्नन्तो रुजयन्त्यधिकां भृशम् ।
महान्मूलं रुजावन्तं वृत्तं वाप्यथ वायतम् ।
स विद्रधिरिति ज्ञातो विज्ञेयः षड्विधश्च सः ।"
अस्थिसमाश्रिता दोषा इति वक्ष्यमाणाद्व्रणशोथादिव्यवच्छेदार्थम् । यतो व्रणा ये दोषा अस्थिसमाश्रयनियमो नास्ति । शेषं व्रणशोथाद्याख्यम् । आयतं दीर्घम् । । षड्विधत्वं विवृणोति ।
"पृथग्दोषैः समस्तैश्च सन्निपातेन सप्तमः ।
रक्तात्मापि हि तैष्वन्तर्लक्षणं संप्रपद्यते ।" ।
तत्र वातिकस्य लक्षणमाह ।
"क्षतोऽरुणो वा विषमो भृशमत्यर्थवेदनः ।
क्षिप्तोत्थानप्रपाकश्च विद्रधिर्वातसम्भवः ।"
विषमो भग्नं चलमस्यः सर्यं महान् । क्षिप्तोत्थानप्रपाकः । चिरौ नानाविधौ उन्नमप्रपाकौ यस्य सः ।* । पैत्तिकमाह ।
"पक्वोदुम्बरसङ्काशः स्रावो वा ज्वरदाहवान् ।
क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः ।"
श्लैष्मिकमाह ।
"श्वयथावरुजः पाण्डुः शीतस्निग्धोऽल्पवेदनः ।
चिरोत्थानप्रपाकश्च विद्रधिः श्लेष्मसम्भवः ।
तनुपीतसितास्रेषामासावः क्रमशो मताः ।"
सान्निपातिकमाह ।
"नानावर्णरुजः स्रावो घाटालो विषमो महान् ।
विषमं पच्यते वापि विद्रधिः सान्निपातिकः ।"
नाना अनेकविधाः । वर्णाः लक्षणरक्तपाण्डुरूपाः । रुजः तोददाहकण्डादिरूपाः । स्रावाः तनुपीतसिता यस्य । घाटालः घाटा इत्याटिकास्यात् इति घाटालः । अत्युच्छ्रिताय इत्यर्थः । विषमः निम्नोन्नतः । विषमं पच्यते वापि चिराच्चिरगभीरोत्थानोद्दाहभेदेन विषमं यथा स्यात्तथा पच्यते । * । अभिघातजस्यागन्तोः संप्राप्तिपूर्व्वकं लक्षणमाह ।
"तैस्तैर्भावैरभिहिते क्षते वापथकारिणः ।
क्षतोष्मा वायुविहतः सरक्तं पित्तमीरयेत् ।
ज्वरस्तृष्णा च दाहश्च जायते तस्य देहिनः ।
आगन्तुविद्रधिर्ह्येवं पित्तविद्रधिलक्षणः ।"
तैस्तैर्भावैः काष्ठलोष्टपाषाणादिभिर्हते यथा रक्तस्रावो न भवति तथाभिहते क्षते क्षते वा । अथवा खड्गशूलादिभिः क्षते यथा रक्तस्रावो भवति तथा क्षते क्षते क्षतोष्मा अत्र क्षतशब्देन हतमात्रमुच्यते । तेनाभिहतक्षतयोरप्युष्मवायुविहतः । अभिहतः अभिघातात् क्षते रक्तक्षयात् कुपितेन वायुना प्रहतः प्रेरयेत् कोपयेत् ।* । रक्तजमाह ।
"लक्षास्फोटाहतः स्रावस्तीव्रदाहरुजाज्वरः ।
पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते ।"* ।
अधिष्ठानविशेषेण लिङ्गविशेषं बोधयितुमाभ्यन्तरान् विद्रधीनाह ।
"आभ्यन्तरानतसूर्द्ध्नि विद्रधीन् परिचक्षते ।
गुर्व्वसात्म्यविरुद्धान्नशुष्कशाकान्नभोजनात् ।
अतिसञ्चीयमानासृगवेगाघातविदाहिभिः ।
पृथक् समस्य वा दोषाः कुपिता गुल्मरूपिणम् ।
वल्मीकवत् ससुग्रन्थिमन्तः कुर्व्वन्ति विद्रधिम् ।
गुदे वस्तिमुखे नाभ्यां कुक्षौ वंक्षणयोस्तथा ।
युक्तयोः प्रीहि यकृति हृदि वा क्लोम्नि वाप्यथ ।
येषां चिह्नानि जानीयात् बाह्यविद्रधिलक्षणैः ।
सम्भूय वा मिलित्वा वा ससुग्रन्थं तदुन्नतम् ।"* ।
स्थानविशेषेण रूपविशेषमाह ।
"गुदे वातविरोधस्तु वस्तौ क्षच्छ्रास्यमूत्रता ।
नाभ्यां हिक्का तथाटोपः कुक्षौ मारुतकोपनम् ।
कटीपृष्ठग्रहस्त्रोत्रो वंक्षणोत्थे च विद्रधौ ।
युक्तयोः पार्श्वसंकोचः प्रीह्नः श्वासनिरोधनम् ।
सर्व्वाङ्गप्रग्रहस्त्रोत्रो हृदि कासश्च जायते ।
स्रावो यकृति हिक्का च क्लोम्नि पेपीयते पयः ।"
स्रावमार्गमाह ।
"नाभेरुपरिजाः पक्वा यान्त्यूर्द्ध्वमितरे त्वधः ।
अधः सुतेषु जीवेच्च सुतेष्वूर्द्ध्वं न जीवति ।"
नाभेरुपरिजा युक्तादिजाताः । यान्ति ऊर्द्ध्वमूर्द्ध्वसुखात् । इतरे वस्त्यादिजाः । अधः गुदात् । नाभिजस्तूभाभ्यां मार्गाभ्याम् । तथा च हारीतः ।
"ऊर्द्ध्वप्रभिन्नेषु सुखान्नराणां
प्रवर्त्तते रुक्सहितो हि पूयः ।
अधःप्रभिन्नेषु तु पायुमार्गाद्-
द्वाभ्यां प्रवृत्तिर्भवति नाभिजेषु ।"*।
साध्यत्वादिकमाह ।
"अधःसुतेषु जीवेत्तु सुतेष्वूर्द्ध्वं न जीवति ।
क्षुद्राभिवस्तिपर्य्याये तेषु भिन्नेषु वाक्षतः ।
जीवेत् कदाचित् पुरुषो नेतरेषु कदाचन ।"
क्षुद्राभिवस्तिपर्य्याये क्षीद्रक्षोमादिजातेषु । वाक्षतः शस्त्रवैद्यव्यापारेण भिन्नेषु पुरुषः कदाचित् जीवेत् । इतरेषु क्षुद्राभिवस्तिजेषु तथा भिन्नेषु न जीवेत् । हृदादीनां मर्म्मत्वात् । अतएव भोजः ।
"असाध्यो मर्म्मजो ज्ञेयः पक्वोऽपक्वश्च विद्रधिः ।
सन्निपातोत्थितोऽप्येवं पक्व एव हि वक्षिजः ।
कुक्षौ नाभेरधोजश्च साध्यो मर्म्मसमीपगः ।
अपक्वश्चैव पक्वश्च साध्यो नोपरि नाभितः ।
आध्मानं वह्निसन्धानं हृद्दिक्काटोपसन्नितम् ।
वलाश्वासयमायुक्तं विद्रधिर्नाशयेन्नरम् ।"*।
वाह्यविद्रधीनां साध्यासाध्यत्वमाह ।
"साध्या विद्रधयः पञ्च विवर्ज्ज्याः सान्निपातिकः ।
आमं पक्वं विदग्धञ्च तेषां श्रीथवदादिशेत् ।"
श्रीथवत् वक्ष्यमाणव्रणश्रीथवत् । * ।
अथ विद्रधेश्चिकित्सा ।
"जलौकापातनं ग्रस्तं सर्व्वस्मिन्नपि विद्रधौ ।
स्रुद्भिरेको लघ्वन्नं खेदः पित्तोत्तरं विना ।
अपक्वविद्रधौ युक्त्यादूव्रणश्रीथवदौषधम् ।
वातघ्नमूलकल्कैर्वा वसातैलघृतान्वितैः ।
सुखोष्णो वहलो लेपः प्रथोष्णो वातविद्रधौ ।
यवगोधूमसक्तूनां पिण्डैरान्येन लेपयेत् ।
विलीयते यथैवेह क्षपिण्डस्तु विद्रधिः ।
पैत्तिकं विद्रधिं वैद्यः प्रविध्येत् सर्पिषा युतैः ।
पयस्योशीरमधुकचन्दनैर्दुग्धपेषितैः ।
पयस्यानेकार्थत्वात् अत्र क्षीरकाकोली गुडूचीग्रहणात् । तस्या अलाभे अन्यत्या ग्राह्या ।
"पक्वलक्षलकल्केन घृतमिश्रेण लेपयेत् ।
पिबेद्वा त्रिफलाक्वाथं चिरबिल्वक्षाक्षसंयुतम् ।
इष्टिकासिकतालोष्टकीटैर्गोग्रहता सह ।
मूत्रैः सुखोष्णैर्लेपन खेदयेत् श्लेष्मविद्रधिम् ।
इग्मूलीकषायेण सक्षौद्रेण घृतेन च ।
श्रीथं व्रणं वा कोष्णेन सम्यूलं परिषेचयेत् ।
पित्तविद्रधिवत् सर्व्वा क्रिया निरवशेषतः ।
विद्रधौ कुशलः कुर्य्यात् रक्षाङ्गस्तु निमित्तयोः ।
रक्तचन्दनमञ्जिष्ठाविशुद्धमधुकैरिकैः ।
क्षीरेण विद्रधौ लेपो रक्षाङ्गस्तु निमित्तके ।

कृष्णाजाजी विशाला च धामार्गवफलं तथा।
धौतं क्षौते निहन्त्याशु विद्रधीन् कोष्ठसम्भवान्॥"
धामार्गवफलं कोयातकीफलम्।
"श्वेतवर्षाभुवो मूलं मूलं वरुणकस्य च।
जलेन कथितं पीतमन्तर्विद्रधिहृत् परम्॥
गायत्रीत्रिफलानिम्बकटुका मधुकं समम्।
निहत्यटोलमूलाभ्यां चत्वारोऽमा: पृथक् पृथक्॥
मरुरग्निसुतान् दद्यात् एष क्वाथो हताभ्येत्।
विद्रधिगुल्मवीसर्पदाहमोहज्वरापह:।
दण्मूर्च्छाच्छर्दिदुष्टौगपित्तास्रक्कुष्ठकामला:॥"
वाग्भटात्।
"ग्रियुमूलं जले धौतं पिष्टं वस्त्रेण गालयेत्।
तद्रसं मधुना पीत्वा हन्यन्तर्विद्रधिं नर:॥
श्रीभाञ्जनकनिर्यूहो हिङ्गुसैन्धवसंयुत:।
हन्यन्तर्विद्रधिं जन्तो: प्रात: प्रातर्निषेवित:॥"
निर्यूह: क्वाथ:। इति विद्रध्यधिकार:। इति भावप्रकाश:॥

विद्रधिनाशन:, पुं, (विद्रधिं रोगविशेषं नाशयतीति। नश+णिच्+ल्यु:।) श्रीभाञ्जनवृक्ष:। इति त्रिकाण्डशेष:॥

विद्रव:, पुं, (विद्रवणमिति। वि+द्रु+"ऋदोरप्।" ३।३।५७। इत्यप्।) पलायनम्। इत्यमर:॥ (यथा, महाभारते। ७।१०६। ३८।
"तै: शूरैरेव सैन्यस्य विद्रव: सुमहानभूत्॥")
वृद्धि:। इति मेदिनी। वे, ५१॥ निन्दा। इति शब्दरत्नावली॥ चरणम्। इति केचित्॥ (विनाश:। यथा, बृहत्संहितायाम्। ३७।१२।
"भौमे कुमारबलपति-
सैन्यानां विद्रवोऽग्निशस्त्रभयम्॥")

विद्राव:, पुं, विद्रव:। विपूर्व्वद्रुधातोर्घञ्प्रत्ययेन निष्पन्न:॥

विद्रावित, त्रि, (वि+द्रु+णिच्+क्त:।) पलायितम्। यथा,—
"विद्राविते भूतगणे ज्वरस्तु त्रिशिराभ्ययात्॥"
इति श्रीभागवते बाणयुद्धम्॥

विद्रुत:, त्रि, (वि+द्रु+क्त:।) प्राप्तद्रवीभावघृतादि:। तत्पर्य्याय:। विलीन: २ द्रुत: ३। इत्यमर:॥ पलायितश्च॥ (यथा, रघु:।११।७४।
"विद्रुतक्रतुमृगानुसारिणं
वेत्रवान् वरणमस्यतं वृषध्वज:॥"
पीड़ित:। यथा, मनु:। ७। ३।
"अराजके हि लोकेऽस्मिन्सर्व्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभु:॥")

विद्रुम:, पुं, (विशिष्टो द्रुम:। यद्वा, विशिष्टो द्रुर्वृक्षोऽस्यस्येति। "द्रुद्भ्यां म:।" ५।२। १०८। इति म:।) प्रवाल:। (यथा, ऋतुसंहारे। ६। १७।
"आस्रलम्बो विद्रुमरागताम्रा:
सपल्लवं पुष्पचयं दधाना:।
कुर्व्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम्॥")

रत्नवृक्ष:। इति मेदिनी। मे, ५१॥ (यथा, रघु:। १३। १३।
"तथाधरस्पर्द्धिषु विद्रुमेषु
पर्य्यस्तमेतत् सहसोर्म्मिवेगात्।
लक्ष्मा क्षुरप्रोन्नसुखं कथञ्चित्
क्षेत्रादपक्रामति शस्ययूथम्॥")

विद्रुमलता, स्त्री, (विद्रुम इव लता।) नलीनामगन्धद्रव्यम्। इत्यमर:॥

विद्रुमलतिका, स्त्री, (विद्रुमलता। स्वार्थे कन्। टापि अत इत्वम्।) नलिका। इति राजनिर्घण्ट:॥

विद्वत्कल्प:, त्रि, (विद्वस्+कल्प:।) ईषदूनो विद्वान्। इति सुग्धबोधव्याकरणम्॥

विद्वत्तम:, त्रि, (विद्वस्+तम:।) अयमेषामतिशयेन विद्वान्। इति व्याकरणम्॥

विद्वत्तर:, त्रि, (विद्वस्+तर।) अयमनयोरतिशयेन विद्वान्। इति व्याकरणम्॥

विद्वद्देश्य:, त्रि, (ईषदूनो विद्वान्। विद्वस्+देश्यर्।) विद्वत्कल्प:। इति व्याकरणम्॥

विद्वद्देश्य:, त्रि, (ईषदूनो विद्वान्। विद्वस्+देश्य:।) विद्वत्कल्प:। इति सुग्धबोधव्याकरणम्॥

विद्वान्, [स्] त्रि, (वेत्तीति। विद्+शतृ। "विदे: शतुर्वसु:।" ७।१। ३६। इति शतुर्वसुरादेश:।) आत्मवित्। प्राज्ञ:। पण्डित:। इति मेदिनी॥ (यथा, मनु:। १। ८७।
"ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धय:।
कृतबुद्धिषु कर्त्तार: कर्त्तृषु ब्रह्मवेदिन:॥")

विद्विष:, पुं, (विशेषेण द्वेष्टीति। वि+द्विष्+क्विप्, षस्य डत्वमिति, क:।) शत्रु:। विद्वेषके, त्रि। विपूर्व्वकद्विषधातो: कप्रत्ययेन निष्पन्न:॥

विद्वेष:, पुं, (वि+द्विष्+घञ्।) शत्रुता। तत्पर्य्यायम्। वैरम् २ विरोध: ३। इत्यमर:॥ अनुशय: ४ द्वेष: ५ असूक्क्रिय: ६ वैरत्वम् ७। इति जटाधर:॥ द्वेषणम् ८। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ६०२।
"सुभग खभवनभित्तौ भवता संमर्द्द पीड़िता सुतनु:।
सा पीड़येव जीवति दशती वेद्मेषु विद्वेषम्॥")

विद्वेषक:, त्रि, विद्वेष्टा। द्वेषकर्त्ता। विरोधक:। वैरी। विद्वेष्टीति विपूर्व्वद्विषधातोर्ण्वुल्(ण्वुल्)प्रत्ययेन निष्पन्न:॥ (यथा, महाभारते। १३। ७१। १४।
"न मित्रध्रुङ्नैकृतिक: कृतघ्न:
भ्रष्टोऽवृत्तिर्धर्म्मविद्वेषकश्च॥")

विद्वेषण, क्ली, विद्वेष:। विपूर्व्वद्विषधातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते। ३। १८५। ३।
"विद्वेषणं परमं लोकेऽस्मिन्
कुर्य्यान्न: पार्थिव याच्यमान:।
तत्त्वां पृच्छामि कथयस्व राजन्
दद्यान्नवान् देयितञ्च मेऽद्य॥")

अभिचारकर्म्मविशेष:। तस्य विहितदिनादि यथा,—
"सूर्य्योदयं समारभ्य घटिकादण्डकं क्रमात्।
ऋतव: स्युर्व्वसन्ताद्या अहोरात्रं दिने दिने॥
वसन्तग्रीष्मवर्षाश्च शरद्धेमन्तशैशिरा:।
हेमन्त: शान्तिके प्रोक्तो वसन्तो वश्यकर्म्मणि॥
शिशिर: स्तम्भने ज्ञेयो विद्वेषे ग्रीष्म ईरित:।
यौगमासो मन्दभानुयुक्ता विद्वेषकर्म्मणि॥
वश्यं पूर्व्वाह्णि मध्याह्ने विद्वेषोच्चाटनं तथा।
शान्तिपुष्टी दिनस्यान्ते सन्ध्याकाले च मारणम्॥
कुर्य्याच्च स्तम्भनं कार्य्यं दर्शचतुष्किकोदये।
द्वेषोच्चाटादिकं कर्म्म कुलीरे वा तुलोदये॥"
भूतोदयनियममाह।
"जलं शान्तिविधौ शस्तं वश्ये वह्निरुदीरित:।
स्तम्भने पृथिवी शस्ता विद्वेषे व्योम कीर्त्तितम्॥"
दिङ्नियममाह।
"याम्ये रक्तसि विद्वेषं शान्तिं वारुणवायवे॥
नक्षत्रनियममाह।
"विद्वेषोच्चाटनं वह्निवायुयोगे च कारयेत्॥"
अथ विद्वेषणं वक्ष्ये मिथो विद्वेषणं रिपो:।
करवीरं महेशानि! यदुक्तं मालिनीमते॥
अन्योन्ययुद्धसंरम्भरतिलौ समरे युतौ।
तदीयनखरोन्मीलधूलिमादाय साधक:॥
धूलिना तेन विद्वेषस्ताड़नादभिजायते॥
परस्परं रिपोर्व्वैरं मिथश्चैव सह लिखितम्।
महिषान्यपरीषाभ्यां गोमूत्रेण समालिखेत्॥
यस्य नाम तयो: शीघ्रं विद्वेषश्च परस्परम्।
रक्तेन महिषाक्षेण श्मशानवस्त्रके लिखेत्॥
यस्य नाम भवेत्तस्य काकपक्षेण लेखितम्।
वेष्टयेत् द्विजचाण्डालकैरेकतरेक्षत:॥
गर्त्ते आमशरावस्तु पिलकाननमध्यत:।
षट्कोणचक्रमध्ये तु रिपोर्नामसमन्वितम्॥
मन्त्रराजं प्रवक्ष्यामि महाभैरवसंज्ञकम्।
ॐ नमो महाभैरवाय रुद्ररूपाय श्मशानवासिने अमुकामुकयोर्व्विद्वेषं कुरु कुरु सुर सुर हुँ हुँ फट्।
एतन्मन्त्रं लिखेत्तत्र विद्वेषो जायते ध्रुवम्॥"
इति षट्कर्म्मदीपिका॥
(विशेषेण द्वेष्टीति। वि+द्विष्+ल्यु:। विद्वेषके, त्रि। यथा, हरिवंशे। २८। ३०।
"वास्ति-वादार्थशास्त्रं हि धर्म्मविद्वेषणं परम्॥"
तथा च महाभारते। १३। १२६। २।
"ब्राह्मणानां परीवादो मम विद्वेषणं महत्।
ब्राह्मणै: पूजितैर्नित्यं पूजितोऽहं न संशय:॥")

विद्वेष(षि)णी, स्त्री, स्त्रीविशेष:। यथा,—
"विद्वेषणी तु या कन्या भ्रकुटीकुटिलानना।
तस्या द्वौ तनयावास्तामयकारप्रकाशकौ॥"
इति मार्कण्डेयपुराणे दु:सहवंशोत्पत्ति:॥

विद्वेषी, [न्] त्रि, (विशेषेण द्वेष्टीति। वि+द्विष्+णिनि:।) यदा, विद्वेषशब्दादस्त्यर्थे इनिप्रत्ययेन निष्पन्न:। विद्वेषविशिष्ट:। वैरी। (यथा,

महाभारते । १३ । १४५ । ५८ ।
"अपरे खल्पविज्ञाना धर्म्मविद्वेषिणो नराः ।
ब्राह्मणान् वेदविदुषो नेच्छन्ति परिसर्पितुम् ॥")
विध, ग्र विधौ । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) विधिर्विधानम् । ग्र, विधति वेधा जगत् । अनेकार्थत्वात् छिद्रकरणेऽप्ययम् । विधितच्छिद्रितौ विद्धे । इत्यमरः ॥ कर्म्मवेधः । इति दुर्गादासः ॥
विधः, पुं, (विध्यते क्रियते इति । विध + घञर्थे क ।) विमानम् । हस्त्यश्वम् । प्रकारः । वेधनम् । ऋद्धिः । इति भरतधृतरभसपालयौ ॥
विधवनं, क्ली, कर्म्मणम् । विपूर्ब्बधूधातोर्भावे अनट् (ल्युट्)प्रत्ययेन निष्पन्नम् ॥
विधवा, स्त्री, (विगतो धवो भर्त्ता यस्याः ।) मृतभर्त्तृका । तत्पर्य्यायः । विश्वस्ता २ । इत्यमरः ॥ जालिका ३ रण्डा ४ यतिनी ५ यतिः ६ । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे १०।४०।२।
"को वां शयुत्रा विधवेव देवरं
मर्यं न योषा कृणुते सधस्थ आ ॥")
तस्याः कर्म्मव्याकर्म्मस्थानि यथा । विष्णुः ।
"मृतेभर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा इति ।"
ब्रह्मचर्य्यं मैथुनवर्জ্জनं ताम्बूलादिवर्জ্জनञ्च । यथा, प्रचेताः ।
"ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्জ্জयेत् ॥"
अभ्यञ्जनं आयुर्वेदोक्तं पारिभाषिकम् । स्मृतिः ।
"एकाहारः सदा कार्य्यो न द्वितीयः कदाचन ।
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् ॥
गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तया पुनः ।
तर्पणं प्रत्यहं कार्य्यं भर्त्तुः कुशतिलोदकैः ॥"
एतत्तु तर्पणं पुत्रपौत्रादभाव इति मदनपारिजातः ॥
"वैशाखे कार्त्तिके माघे विशेषनियमञ्चरेत् ।
स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं सुतः ॥"
इति शुद्धितत्त्वम् ॥*॥
अपि च ।
"ब्राह्मणी पतिहीना या भवेन्निष्कामिनी सदा ।
एकभक्ता दिनान्ते सा हविष्यान्नरता सदा ॥
न धत्ते द्विश्वस्त्रञ्च गन्धद्रव्यं सुतैलकम् ।
स्रजञ्च चन्दनञ्चैव गृह्णन्दूरभूषणम् ॥
त्यक्ता मलिनवस्त्रा स्यान्नित्यं नारायणं स्मरेत् ।
नारायणस्य सेवाञ्च कुरुते नित्यमेव च ॥
तन्नामोच्चारणं ग्रन्थन् कुरुतेऽनन्यभक्तितः ।
पुत्रवत्तुल्यञ्च पुरुषं सदा पश्यति धर्म्मतः ॥
मिष्टान्नं न च भुङ्क्ते सा न कुर्य्याद्विभवं व्रजम् ।
एकादश्यां न भोक्तव्यं कृष्णजन्माष्टमीदिने ॥
श्रीरामस्य नवम्याञ्च शिवरात्रौ पवित्रया ।
अघोरायाञ्च प्रेतायां चन्द्रसूर्य्योपरागयोः ॥
अष्टम्यं परित्याज्यं भुज्यते परमेव च ।
ताम्बूलं विधवाक्षीणां यतीनां ब्रह्मचारिणाम् ।
सन्ध्यासिनाञ्च गोमांसं सुरातुल्यं श्रुतौ श्रुतम् ॥
रक्तवस्त्रं मक्षरञ्च जमीरं पर्व्वमेव च ।
अलाबुवर्त्तुलाकारा वर्জ্জनीया च तैरपि ॥
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् ।
यान आरोहणं कृत्वा विधवा नरकं व्रजेत् ॥
न कुर्य्यात् केशसंस्कारं गात्रसंस्कारमेव च ।
केशग्रहणीजटारूपं तत्तौरं तीर्थकं विना ॥
तैलाभ्यङ्गं न कुर्व्वीत न हि पश्यति दर्पणम्
सुखञ्च परपुंसाञ्च यात्रा नृत्यं महोत्सवम् ॥
नर्त्तकं गायनञ्चैव सुवेषं पुरुषं शुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः ॥
(विधवायास्तु पत्यन्तर-ग्रहणं निषिद्धं न तद्विवाहशब्दवाच्यञ्च । तत्तु विशेषतो विचारेण यत्रविस्तृतिर्भवेदत्रत्तज्ज्ञेयं; केवलं कतिपयानि वचनान्युदृश्य दर्शयामि तानि सुधीभिर्विचारणीयानीति ॥ तत्र याज्ञवल्क्यः ।
"अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ॥"
अनन्यपूर्विकां दानेनोपभोगेनवा पुरुषान्तरापरिग्रहीताम् ॥ व्यासः । २ । ३ ।
"सवर्णामसमानार्षामसाङ्गपिङ्गलोद्भवाम् ।
अनन्यपूर्विकां लक्ष्मीं शुभलक्षणसंयुताम् ॥"
गौतमः । ४ । १ ।
"गृहस्थः सदृशीं भार्य्यां विन्देतानन्यपूर्विकाम् ॥"
वशिष्ठः । ८ । १ ।
"गृहस्थो विनीतक्रोधहर्षो गुरुवानुज्ञातः स्नात्वा असमानार्षां असृष्टमैथुनां भार्य्यां विन्देत ॥" हारीतः । ४ । १ ।
"असमानार्षगोत्रां हि कन्यां सभ्राट्कां शुभाम् ।
सर्व्वावयवसम्पन्नां सुदृश्यामुद्वहेन्नरः ॥"
पारस्करगृह्यसूत्रम् ।
"अग्निमुपधाय कुमार्याः पाणिं गृह्णीयात् चित्रु चित्रूत्तरादिषु ॥"
कन्याशब्दार्थः कथ्यते । "कन्या कुमारी" इत्यमरः । "कन्यापदस्यादत्तस्त्रीमात्रवचनेन ।" इत्यादि दायभागटीकायां आचार्य्यचूडामणिः । "कन्यापदस्यापरिणीतामात्रवचनात् ।" इति रघुनन्दनः ॥ "अनूढात्वेन कन्यापदस्य सपत्नीकन्या बोधकतया असुस्थलप्रसक्तेः तदूपेणैव कन्यापदस्य ग्रहणेः ।" इति श्रीकृष्णतर्कालङ्कारः ॥ पूर्ब्बोक्तैर्व्वचनैः कुमारीत्वामेव परिणये विवाहशब्दवाच्यत्वं नतूढात्वाम् ॥
मनुः । ५ । १५१—१५२ ।
"यस्मै दद्यात् पिता त्वेनां भ्राता वानुमते पितुः ।
तं शुश्रूषेत जीवन्तं संस्थितञ्च न लङ्घयेत् ॥
मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः ।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारकम् ॥"
तत्रैव । १६०—१६३ ।
"मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता ।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ।
अपत्यलोभात् या तु स्त्री भर्त्तारमतिवर्त्तते ।
सेहनिन्दामवाप्नोति पतिलोकाच्च हीयते ॥
नान्योत्पन्ना प्रजास्तीह न चाप्यस्य परिग्रहे ।
न द्वितीयश्च साध्वीनां क्वचिद्भर्त्तोपदिश्यते ॥
पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते ।
निन्द्यैव सा भवेल्लोके परपूर्व्वेति चोच्यते ॥"
लघुहारीतः ।
"स्वगोत्राद् भ्रश्यते नारी विवाहात् सप्तमे पदे ।
पतिगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया ॥"
मनुः । ९ । ४७ ।
"सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाहुर्द्ददानीति त्रीण्येतानि सतां सकृत् ॥"
तत्रैव । ५९—६५ ।
"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन ।
द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः ॥
अनिर्दृशं नियोगार्थे पश्यतो धर्म्मतस्त्रयोः ॥
विधवायां नियोगार्थे निर्वृते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम् ॥
नियुक्तौ यौ विधिं हित्वा वर्त्तेयातान्तु कामतः ।
तावुभौ पतितौ स्यातां स्नुषागुरुतल्पगौ ॥
नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्म्मं हन्युः सनातनम् ॥
गोदादिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं क्वचित् ॥"
"न च विवाहविधायकशास्त्रे अन्येन पुरुषेण सह पुनर्व्विवाह उक्तः ॥" इति कुल्लूकः ॥
तत्रैव । ६८—७० ।
"ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥
यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
यथाविधाभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथोभजेदप्रसवात् सकृत् सकृदृतौ ॥"
"आगमभ्यहणात् सकृद्गमनोपदेशाच्च यस्मै वाग्दत्ता तस्मैवापत्यं भवति ।" इति कुल्लूकभट्टः ॥ तत्रैव । ७१ ।
"न दत्वा कस्यचित् कन्यां पुनर्द्याद्विचक्षणः ।
दत्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ॥"
तत्रैव । ७६ ।
"उन्मत्तं पतितं क्लीवमवीजं पापरोगिणम् ।
न त्यागोऽस्ति द्विषन्तञ्च न च दायापवर्त्तनम् ॥"
तत्रैव । ६७ ।
"कन्यायां दत्तशुल्कायां म्रियते यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्यामुमन्यते ॥"
आश्वलायनगृह्यसूत्रम् । ४ । २ । २१ ।
तामुत्यापयेत् देवरः पतिस्थानीयः अन्तेवासी ज्यरहासः । उदीर्ष्वनार्षभि जीवलोकम् ॥ अथ पत्नीमुत्थापयेत् कः देवरः पतिस्थानीयः स पतिस्थानीव इत्युच्यते । अनेन ज्ञायते पतिकर्त्तृकं कर्म्म पुंसवनादि पत्यसम्भवे देवरः

कुर्य्यात्। अन्नेवासी शिष्यः स वा यो बहुकालं दासं कृत्वा दृष्टोऽभूत् स वा॥ ॥ पराशरः। ४। २५—२६।

"ज्येष्ठभ्राता यदा तिष्ठेत् आधानं नैव कारयेत्। अनुज्ञातस्तु कुर्वीत गुरुस्य वचनं यथा॥ मृते मृते प्रव्रजिते क्लीवे च पतिते पतौ। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥" पराशरः। १०। २५—३०।

"वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा। एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी॥ स्त्रीप्रसूश्च स्त्रीजननी वन्ध्याष्टम्यधिवेदने। एकादशे तु मृतप्रजननी सप्तमे स्त्रीप्रसूर्मृता॥" इति पाराशरोक्तवन्ध्यादिलक्षणाक्रान्तायां पत्न्यां सत्यां पुनर्विवाहविधिः। तत्र प्रथमं पत्न्यै दोषं निवेद्य तदनुज्ञया पुनर्विवाहः कार्य्यः। तदुक्तं पराशरेण। "

धातुर्गतिर्विचित्रा च दुर्ज्ञेया भुवनत्रये ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः ॥
अपि च ।
भगवन्तं उवाच ।
"सम्बन्धो हि विधिवशो न मे साध्वो व्रजाधिप ।
प्रणापतियोगकर्त्ता जन्मदाताहमेव च ॥
का कस्य पत्नी कन्या वा वरः को वा ससाधनः ॥
कर्म्मानुरूपफलदः सर्व्वेषां कारणं विधिः ।
भवितव्यं कृतं कर्म्म तदभोघं श्रुतौ श्रुतम् ॥
अन्यथा निष्फलं सर्व्वमनीश्वरोक्तमो यथा ।
वृषभानुप्रिया धात्रा लिखिता चेत् सुता मम ॥
पुरा भूतेव को वाहं केनान्येन निवार्य्यते ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अः ॥*॥
अन्यच्च ।
"त्यागे दोषः कासकीनां ग्रापभाक् पापभाक् ग्रहो ।
ब्रह्मा जगद्विधातापि न विरक्तः कलत्रवान् ।
त्यागे दोषस्तु कदाचिन्नास्माकं व्यक्तयोषिताम् ॥"*॥
अपरच्च ।
"स्वान्तर्दुःखेन दुःखार्त्तो योयं ग्रपति निश्चितम् ।
तं ग्रापं खण्डितुं ग्रक्तो न विधाता जगत्प्रभुः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २० अः ॥*॥
असौ जगतां पतिर्यथा,—
"द्वौ धाता च विधाता च पौराणौ जगतां पतौ ।
द्वौ शास्तारौ त्रिलोकेऽस्मिन् धर्म्माधर्म्मौ प्रकीर्त्तितौ ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
(त्रि, मेधावी । इति निघण्टुः । ३ । १५ ॥
विहितकर्म्मानुष्ठाता । यथा, मनुः । ११ । ३५ ।
"विधाता शासिता वक्ता मेत्ता ब्राह्मण उच्यते ।
तस्मै नाकुशलं ब्रूयात् न शुष्कां गिरमीरयेत् ॥"
स्रष्टा । सर्व्वसमर्थः । यथा, रघुः । १ । ७० ।
"तया हीनं विधातर्मा कथं पश्यन्न दूयसे ।
सिक्तं स्वयमिव स्नेहादन्यमात्रमपादपम् ॥"
जनयिता । दाता । यथा, कुमारे । १ । ५७ ।
"स्वयं विधाता तपसः फलानां
केनापि कामेन तपश्चचार ॥")
विधातृभूः, पुं, (विधातुर्ब्रह्मणो भूरुत्पत्तिर्यस्य ।) नारदमुनिः । इति त्रिकाण्डशेषः ॥
विधात्रायुः, [स्] पुं, (विधातुरायुर्व्वीवितकालपरिमाणं यस्मात् । सूर्य्यक्रियां विना वत्सरादिज्ञानासम्भवादेषास्य तथात्वम् ।) सूर्य्यः । यथा,—
"वेगप्रदानो विधात्रायुर्द्दिव्यवस्त्रो दिवाकरः ॥"
इति शब्दचन्द्रिका ॥
क्ली, ब्रह्मणो वयः । तद्यथा । चतुर्द्दशमन्वन्तरैर्ब्रह्मणः एकं दिनं भवति । तन्मनुष्यमानेनैकः कल्पस्त्रिंशत्कल्पे ब्रह्मण एको मासो भवति । एतादृशैर्द्वादशमासैर्ब्रह्मणः संवत्सरो भवति । एवं वर्षशतं ब्रह्मण आयुः । तत्र पञ्चाशत् वर्षा व्यतीताः । एकपञ्चाशदारम्भेऽधुना श्वेतवाराहकल्पः । अत्र मन्वन्तराणि व्यतीतानि षट् अधुना वैवस्वतमन्वन्तरं वर्त्तते । इति श्रीभागवतमतम् ॥
विधात्री, स्त्री, (वि + धा + तृच् । ङीप् ।) प्रियङ्गुः ।
इति शब्दचन्द्रिका ॥ विधानकर्त्री । यथा,—
"गतास्तनां बाहुप्रकरकृतकाञ्चीपरिलसन्नितम्बां दिवस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् ।
श्मशानस्थे तल्पे शवहृदि महाकालसुरतप्रयुक्तां त्वां ध्यायन् जनति जडचेता अपि कविः ॥"
इति तन्त्रसारे कर्पूरास्यस्तोत्रम् ॥
विधानं, क्ली, (वि + धा + ल्युट् ।) विधिः । इति जटाधरः ॥ (यथा, मनुः । ७ । १८१ ।
"यदातु यानमातिष्ठेत् परराष्ट्रं प्रति प्रभुः ।
तदानेन विधानेन यायादरिपुरं शनैः ॥")
करणम् । इति नानार्थविधिशब्दटीकायां भरतः ॥ (यथा, रघुः । ७ । १४ ।
"परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां वितथोऽभविष्यत् ॥")
करिकलभः । इति हारावली ।१६१ ॥ (वेदादिशास्त्रम् । यथा, मनुः । १ । ३ ।
"त्वमेको ह्यस्य सर्व्वस्य विधानस्य स्वयम्भुवः ।
अचिन्त्यस्याप्रमेयस्य कार्य्यतत्त्वार्थवित् प्रभो ! ॥"
नाटकाङ्गविशेषः । यथा, साहित्यदर्पणे । ६ । ३४६ ।
"सुखदुःखफलको योऽर्थस्तद्विधानमिति स्मृतम् ॥"
यथा, राजचरिते ।
"उत्साहातिशयं वक्ष्ये तव बाल्यच्च पश्यतः ।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः ॥")
विधानकं, क्ली, यथा । इति शब्दरत्नावली ॥ (विधिः । यथा, कथासरित्सागरे । ४६ । १८० ।
"ततस्तुष्टो भद्रशीलोऽसौ तस्मायादित्यशर्म्मणे ।
ददौ सुलोचनामन्त्रमर्घितं सविधानकम् ॥")
विधानज्ञः, त्रि, विधानकर्त्तरि, त्रि ॥
विधानगः, पुं, (विधानं गायतीति । गै + टक् ।) पण्डितः । इति शब्दरत्नावली ॥
विधायकः, त्रि, विपूर्ब्बधाञ्धातोर्ण्वुल्(ष्वुल्)प्रत्ययेन निष्पन्नः ॥ विधानकर्त्ता । (यथा, राजतरङ्गिण्याम् । १ । १६६ ।
"स विहारस्य निर्म्माता शुष्को शुष्कपुरस्य यः ।
जयस्वामिपुरस्यापि शुद्धधीः स विधायकः ॥")
विधिग्राहकः ॥
विधायी, [न्] त्रि, विधानकर्त्ता । विपूर्ब्बकधाञ्धातोर्णिनिप्रत्ययेन निष्पन्नः ॥ (यथा, कथासरित्सागरे । ४२ । ११३ ।
"भार्य्याच कायालङ्कारां तादृक्कार्य्यविधायिनीम् ।
भूयश्चे स निचिक्षेप पापां तां पुत्रघातिनीम् ॥")

विधार्य्यं, क्ली, कर्म्मनाम । विपूर्ब्बधूधातोर्ण्यत्प्रत्ययेन निष्पन्नम् ॥
विधिः, पुं, (विधति विदधाति विश्वमिति । विध विधाने + "इगुपधात् कित् ।" उणा० ४ । ११६ । इति इन् । स च कित् ।) ब्रह्मा । (यथा, नैषधे । २२ । ४० ।
"विधिर्विधत्ते विधुना वधूनां
किमानन्दं काञ्चनसञ्चकेन ॥"*॥
विधीयेते सुखदुःखे अनेनेति । वि + धा + "उपसर्गे घोः किः ।"३ । ३ । ९२ । इति किः ।) भाग्यम् । (यथा, मार्कण्डेये । ८ । १८२ ।
"राज्यनाशं सुहृत्त्यागो भार्य्यातनयविक्रयः ।
हरिश्चन्द्रस्य राजर्षेः किं विधे ! न कृतं त्वया ॥")
क्रमः । विधानम् । इत्यमरः ॥ कालः । इति मेदिनी । धे, १७ । विधिवाक्यम् । (यथा, गीतायाम् । १६ । २३ ।
"यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥")
प्रकारः । नियोगः । इति हेमचन्द्रः । विष्णुः । इति हलायुधः । कर्म्म । इति त्रिकाण्डशेषः ॥ (यथा, देवीपुराणे ।
"तस्मात् सूर्य्यः ग्रशाङ्कस्य क्षयवृद्धिविधेर्विभुः ॥")
गणाग्रम् । इति जटाधरः । वैद्यः । इति राजनिर्घण्टः ॥ यागोपदेशकक्यत्यः । इति भरतधृतकोषः ॥ षड्विधलक्षणलक्षणान्तर्गतलक्षणविशेषः । यथा,—
"संज्ञा च परिभाषा च विधिर्विध्यम एव च ।
अतिदेशोऽधिकारश्च षड्विधं लक्षणं स्मृतम् ॥"
अप्राप्तप्रापको विधिः । स तु द्विविधः । वर्णोत्पादनरूपोऽभावरूपश्च । वर्णोत्पादनरूपो यथा सहर्षे र्घ इत्यादि । अभावरूपो द्विविधः । नाग्नो निषेधरूपश्च । नाग्नविधिर्यथा । लोपोऽश्नोमाङोरित्यादि । निषेधविधिर्यथा । नाणोऽम इत्यादि । सामान्यप्राप्तस्य विशेषावधारणं नियमविधिः । यथा । रङो वः सुपि इत्यादि । अन्यधर्म्मस्यान्यत्रारोपणमतिदेशविधिः । यथा । इन्वहिक् इत्यादि । पूर्व्वसूत्रस्थितपदस्य परसूत्रेषूपस्थितिरधिकारविधिः । स तु त्रिविधः ।
"सिंहावलोकितञ्चैव मण्डूकप्लुतिरेव च ।
गङ्गास्रोत इति ख्यातश्चाधिकारास्त्रयो मताः ॥"
सिंहावलोकितो यथा । यावगोदान्ते इत्यस्मात् दान्ते इति पदस्य ऋक्यग्नित्यन्तेषूपस्थितिः । मण्डूकप्लुतिर्यथा । टाभिस्ङेङसीत्यस्मात् अत इति पदस्य आत्तिमभवि इत्यत्रोपस्थितिः । गङ्गास्रोतो यथा । ङेः सि औ जस् इत्यस्मात् ङेरिति पदस्य तद्धितपर्य्यन्तेषूपस्थितिरिति । एवच्च ।
"कार्य्यो कार्य्यं निमित्तञ्च त्रिभिः सूत्रसदाकृतम् ।
कदाचित् कार्य्यिकार्य्याभ्यां क्वचित् कार्य्यनिमित्ततः ॥
यस्य निर्द्दिश्यते कार्य्यं स कार्य्यी गदितो बुधैः ।

क्रियते यत्तु तत् कार्य्यमादेयप्रत्ययागमम् ॥
यस्मात् परं परे यस्मिन् तन्निमित्तं द्विधा मतम् ।
आकाङ्क्षायान्तु सर्व्वेषामनुवृत्तिः परे भवेत् ।"
इति ।

एवञ्च ।

"बहिरङ्गविधिभ्यः स्यादन्तरङ्गविधिर्बली ।
प्रत्ययाश्रितकार्य्यन्तु बहिरङ्गमुदाहृतम् ॥
प्रत्ययाश्रितकार्य्यं स्यादन्तरङ्गमिति ध्रुवम् ।
प्रकृतेः पूर्ब्बपूर्ब्बं स्यादन्तरङ्गतरं तथा ॥
सावकाशविधिभ्यः स्याद्बली निरवकाशकः ।
कस्यचिद्विप्रकार्य्यस्य प्रथमे परतस्तथा ।
सम्भवेद्विषयो यस्य स भवेत् सावकाशकः ॥
आदौ हि विषयो यस्य परतो न हि संभवेत् ।
स पश्चिमगवेरुक्तो विधिर्निरवकाशकः ॥
तथा सामान्यकार्य्येभ्यो विशेषकविधिर्बली ।
बहवो विषया यस्य स सामान्यविधिर्भवेत् ॥
स्वल्पः स्याद्विषयो यस्य स विशेषविधिस्मृतः ।
आगमादेशयोर्मध्ये बलीयानागमो विधिः ॥
प्रकृतिं प्रत्ययञ्चापि यो न हन्ति स आगमः ।
आदेशः उपघातो यः प्रकृतेः प्रत्ययस्य वा ॥
सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा ।
लोपस्वरादेशयोस्तु स्वरादेशो विधिर्बली ।"
इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥*॥

अथ विधिभेदाः । तत्र कश्चित् प्रधानविधिः । स तु स्वतः फलहेतुक्रियाबोधकः । यथा । यजेत स्वर्गकाम इत्यादि । कश्चिदङ्गविधिः । स तु स्वतः फलहेतुक्रियायां कथमित्याकाङ्क्षायां विधायकः । यथा । दर्शो यजति इत्यादि । कश्चित् प्रयोगविधिः । स तु यावदङ्गयुक्तक्रियाबोधकः । यथा । यावदङ्गयुक्तं यजेत विलक्षस्वर्गकाम इत्यादि । कश्चिदुभयविधिः । स तु आकाङ्क्षानिवृत्तौ अधिकफलाय प्राप्तकर्म्मणि गुणविधिः । यथा । गोदोहेनापः प्रणयेत् पशुकाम इत्यादि । प्रधानविधिश्च द्विविधः । उत्पत्तिर्नियोगश्चेति । तत्रोत्पत्तिस्तु कर्म्मस्वरूपबोधकः । यथा आग्नेयोऽष्टाकपालः अमावास्यायां पौर्णमास्याञ्चाश्रुतो भवति इत्यादि । नियोगश्च स्वर्गकामाद्यधिकारिबोधकः । यथा । स्वर्गकामो यजेत इत्यादि । अङ्गविधिस्तु कालदेशकर्त्रादिबोधकतया अनियत एव । प्रधानाङ्गविध्योर्विधेयाप्राप्तिप्राप्तिभ्यां वैविध्यम् । तत्र अप्राप्तितो द्वैविध्यम् । तत्राप्यत्यन्ताप्राप्तौ अपूर्ब्बविधिः । पक्षतोऽप्राप्तौ नियमविधिः । विधेयतत्प्रतिपक्षयोः प्राप्तौ परिसङ्ख्याविधिः । अतएवोक्तम् ।

"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्या विधीयते ॥"

तत्र प्रधानस्य विधिभेदो यथा । अहरहः सन्ध्यामुपासीत इत्यादिरपूर्ब्बविधिः । अत्र विधेयस्य सन्ध्यादेः शास्त्रतो रागतो न्यायतो वा कचिदप्यप्राप्तेः । तथा ऋतौ भार्य्यामुपेयात् इत्यादिर्नियमविधिः । विधेयस्य भार्य्याभिगमनस्य रागतः प्राप्तावपि रागाभावात् पक्षतोऽप्राप्तेः । तथा । प्रोक्षितं मांसं भक्षीत इत्यादिः परिसङ्ख्याविधिः । विधेयस्य प्रोक्षितमांसभक्षणस्य च रागतः प्राप्तेः । अङ्गस्य विधिभेदो यथा । आग्रहायणीयपूजायामरण्यामुपवसेत् इत्यादिरपूर्ब्बविधिः । अत्र विधेयस्योपवासस्य एतदन्यशास्त्रतो रागतो न्यायतो वा कचिदप्राप्तेः । तथा आर्द्धे भुञ्जीत पिण्डसेवितमित्यादिर्नियमविधिः । विधेयस्य आर्द्धैकभोजनस्य रागतः प्राप्तावपि रागाभावात् पक्षतोऽप्राप्तेः । तथा । दध्निश्राद्धे प्रातरामन्त्रितान् विप्रान् इत्यादिः परिसङ्ख्याविधिः । तत्र विधेयस्य प्रातर्निमन्त्रणस्य तत्प्रतिपक्षस्य पूर्ब्बदिनसायं निमन्त्रणस्य च पार्ब्बणवन्न्यायतः प्राप्तेरिति स्मृतेरुदाहरणम् । इति धर्म्मदीपिका ॥*॥ न्यायमते विधिर्यथा,—

"प्रवृत्तिः श्रुतिरेवात्र सा चेच्छ्रोतो यतश्च सा ।
तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥"

विधिजन्यज्ञानात् प्रवृत्तिर्दृश्यते सा इच्छातः चिकीर्षातः चिकीर्षा च श्रुतिसाध्यसेष्टसाधनत्वज्ञानात् तज्ज्ञानस्य विषयः कार्य्यत्वं इष्टसाधनत्वञ्च विधिरिति प्राचीनमतम् । स्वमतमाह तज्ज्ञापकोऽथवेति इष्टसाधनत्वानुमापक आप्ताभिप्रायो विधिप्रत्ययार्थः । इति हरिदासीयकुसुमाञ्जलिः ॥*॥ अपि च आश्रयत्वसम्बन्धेन प्रत्ययोपस्थापितेष्टसाधनत्वान्वितस्वार्थपरपदघटितवाक्यत्वं विधित्वम् । मीमांसकमते इष्टसाधनत्वं श्रुतिसाध्यत्वञ्च पृथग्विध्यर्थः ।
इति गदाधरभट्टाचार्य्यश्रुतविधिस्वरूपः ॥

विधिदर्शी, [न्] पुं, (विधिं द्रष्टुं शीलमस्य । दृश्+णिनिः ।) सदस्यः । इत्यमरः ॥

विधिदेशकः, पुं, (विधिं दिशतीति । दिश्+ण्वुल् ।) सदस्यः । इति शब्दरत्नावली ॥

विधिवत्, व, यथाविधि । विध्यनुसारेण । यथा,—

"तोषयेत् सततं भार्य्यां विधिवत् पाणिपीडिताम् ।"
इति कालिकापुराणे १६ अध्यायः ॥*॥

अपि च ।

"सन्ध्यामुपास्य विधिवत् विल्वपत्राद्युपार्च्चयेत् ।"
इति शिवरात्रिव्रतकथा ॥*॥

अन्यच्च ।

"पूजयेद्वत्सरविष्णुकेदवस्वात्मकं शिवम् ।
व्रतोपवासैर्विधिवत् श्रद्धया च विमत्सरः ॥"
इति मत्स्यपुराणे योगमाहात्म्यम् ६६ अध्यायः ॥

अपरञ्च ।

"इति गच्चपुरुषमुपोष्य विधिवत् स्वयम् ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ।"
इति तत्रैव ५१ अध्यायः ॥

विधुः, पुं, (विधयति विरहिणं विध्यते राहुणेति वा । अथ तुदे + "तृभिदिबुधीति ।" उणा० १ । २४ । इति कुः ।) चन्द्रः । (यथा,—

"पिक ! विधुस्तव हन्ति सखं तमः-
त्वमपि चन्द्रविरोधिकुहूरवः ।
तदुभयोरनिशं हि विरोधिता
कथमहो समता मम तापने ।"*॥

विधयति असुरानिति ।) विष्णुः । कर्पूरः । इति मेदिनी । धे, १६ । ब्रह्मा । इति शब्दरत्नावली । राक्षसः । इति त्रिकाण्डशेषः । आयुधः । वायुः । इति संक्षिप्तसारोणादिवृत्तिः ॥*॥

चन्द्रस्य द्वादशावस्थात्वफलादिञ्च यथा,—

"चन्द्रस्य द्वादशावस्था भवन्ति ग्रहवत्तया अपि ।
त्रिषु त्रिषु च ऋक्षेषु अस्मिन्नादि वदाम्यहम् ॥
प्रवासस्यं पुनर्नष्टं स्नानस्यं जयावहम् ।
हास्यावस्यं क्रीड़ावस्यं प्रमोदावस्यमेव च ।
विषादावस्यभोगस्थे ज्वरावस्यं ववस्थितम् ॥
कम्पावस्यं सुप्तावस्यं द्वादशावस्यगं भवेत् ।
प्रवासो हानिर्मृत्युश्च जयो हासो रतिः सुखम् ।
शोको भोगो ज्वरः कम्पः सुप्तावस्थाक्रमात्-
फलम् ॥
जन्मस्थः कुरुते हानिं द्वितीये नास्ति निर्वृतिः ।
तृतीये राजसम्मानं चतुर्थे कलहागमः ।
पञ्चमेन सुखाकूतं स्त्रीलाभो वै तथा भवेत् ॥
धनधान्यागमः षष्ठे रतिः पूजा च सप्तमे ।
अष्टमे प्राणसन्देहो नवमे कोषसञ्चयः ॥
दशमे कार्य्यनिष्पत्तिर्ध्रुवमेकादशे जयः ।
द्वादशेन शशाङ्केन स्तब्धरेव न संशयः ।"
इति गारुड़े । ६१ । ३—६ ॥*॥

चन्द्रस्य क्षयवृद्धिकारणम् यथा,—

ब्रह्मोवाच ।

"राका चानुमती चैव द्विविधा पूर्णिमा मता ।
सिनीवाली कुहुश्चैव अमावास्या द्विधैव तु ॥
अमा नाम रवे रश्मिश्चन्द्रलोके प्रतिष्ठिता ।
यस्मात् सोमो वसत्यस्यामभावासौ ततः स्मृता ॥
पूर्व्वोदितकलाभिन्नपौर्णमास्या निशाकरे ।
पूर्णिमानुमती ज्ञेया पञ्चास्तमितभास्करे ॥
यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह ।
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता ॥
यदा चास्तमिते सूर्य्ये पूर्णचन्द्रस्य चोदयः ।
युगपत् सोत्तरा रात्रस्तदानुमतिपूर्णिमा ।
राकास्तामनुमन्यन्ते देवताः पितृभिः सह ।
रक्षनार्थञ्च चन्द्रस्य राकेति कवयोऽब्रुवन् ॥
सिनीवालीप्रमाणन्तु चौदयेनो निशाकरः ।
अमावास्या विशत्यर्कं सिनीवाली ततः स्मृता ॥
कुहेति कोकिलेनोक्तो यः कालस्तु समाप्यते ।
तत्कालसंज्ञा सेवा वै अमावास्या कुहूः स्मृता ।
अनुमत्याश्रवाः कार्य्या सिनीवाल्याः कुहूं
विना ।
एतासां विरजः कालः कुमार्य्यंति कुहूः स्मृता ॥
कला षोड़श्य सोमस्य शुक्ले वर्द्धयते रविः ।
अन्तर्गतास्तं लक्ष्मीं पीयते देवतैः क्रमात् ॥
प्रथमां पिबते वह्निर्द्वितीयां पवनः कलाम् ।
विश्वेदेवास्तृतीयान्तु चतुर्थीन्तु प्रजापतिः ॥
पञ्चमीं वरुणश्चापि षष्ठीं पिबति वासवः ।

विधुः

सप्तमीन्दुमयो दिव्या वसवोऽष्टौ तथाष्टमीम् ॥
नवमीं लक्ष्मणपत्नस्य पिबन्तीन्द्रः कलामपि ।
दशमीं मरुतश्चापि रुद्रा एकादशीं कलाम् ।
द्वादशीन्तु कलां विष्णुर्धनदश्च त्रयोदशीम् ।
चतुर्दशीं पशुपतिः कलां पिबति नित्यशः ।
ततः पञ्चदशीश्चैव पिबन्ति पितरः कलाम् ॥
कलावशिष्टो निष्पीतः प्रविष्टः सूर्यमण्डलम् ।
अमायां विशते रात्रौ अमावासी ततः स्मृता ॥
पूर्वाह्णे विशते चार्कं मध्याह्ने तु वनस्पतिम् ।
अपराह्णे विशत्यप्सु स्वयोनिवारिसम्भवः ॥
आपः प्रविष्टः सोमस्य शैत्यया कलयैकया ।
त्रयगुल्मलतौषध्यान्निष्पादयति चौषधीः ॥
तमोवधिं स्थितं गावश्चरन्त्याद्याः पिबन्ति च ।
तद्दुग्धगतं गोभ्यः क्षीरत्वमुपगच्छति ॥
तत्क्षीरमन्नतं भूत्वा मन्त्रभूतं द्विजातयः ।
स्वाहाकारवषट्कारैर्भुञ्जन्त्याहुतयः क्रमात् ॥
हुतमग्निषु देवाय पुनः सोमं विवर्द्धयेत् ।
एवं संक्षीयते सोमः क्षीणक्षाप्यायते पुनः ।
तस्मात् सूर्यः ग्रहाङ्गस्य क्षयवृद्धिविधिर्विभुः ॥"
इति देवीपुराणे चन्द्रक्षयवृद्धिः ॥ * ॥
ब्रह्मोवाच ।
"यदयं वदते लोको वालिशत्वान्महामते ।
तदहं संप्रवक्ष्यामि चन्द्रसूर्योपरागिकम् ॥
यदि सत्यमयं यस्तसेजोराशिर्दिवाकरः ।
तत्कथं नोदरस्थेन राहुणा भक्षणात् क्षतः ॥
अथवा राहुणाक्रम्य मुखवक्त्रं प्रवेशितः ।
तत् कथं दग्धनेत्रोक्तेः घृतघा न विखण्डितः ॥
विमुक्तश्च पुनर्देहस्तथैवाखण्डमण्डलः ।
न चास्यापहृतं तेजो न स्यान्मादपचारितः ॥
यदि वा क्षेम निष्पीतः कथं दीप्ततरोऽभवत् ।
तस्मान्न तेजसा राज्ञो राहोर्वक्त्रं गमिष्यति ॥
भक्ष्यार्थं सर्वदेवानां सोमः सृष्टः स्वयम्भुवा ।
तत्रस्थमन्नतत्वापि सम्भूतं सूर्यतेजसा ॥
पिबन्त्यमुमयं देवाः पितरश्च सुधान्नतम् ।
त्रयश्च त्रिंशतश्चैव त्रयस्त्रिंशत्तथैव च ॥
त्रयश्च त्रिंशतश्चाथ देवाः भोमं पिबन्ति ये ।
राहोरप्यन्नतं भाग्यं पुरा दत्तं स्वयम्भुवा ॥
तस्मात्तद्राहुरागत्य पातुमिच्छति पर्वसु ।
उद्धृत्य पार्थिवीं छायां महाकायान्तमोमयः ॥
पातुमिच्छन् ततश्चन्द्रमाच्छादयति छायया ।
शुक्ले च चन्द्रमभ्येति कृष्णे पर्वणि भास्करम् ॥
सूर्यमण्डलसंस्थन्तु चन्द्रमेव निषेवते ।
तस्मात् पिबति तं राहुस्तमस्याविनाशयन् ॥
अविहिंसन् यथा पद्मं पिबति भ्रमरो मधु ।
चन्द्रस्थमन्नतं तद्वदेभिर्दाद्राहुरश्नुते ॥
चन्द्रकान्तो मणिर्यद्वद्दिनं चरते चयात् ।
चरन्नपि न हीयेत तेजसा नैव सुध्यते ॥
यथा सूर्यमणिः सूर्यादुत्पाद्य पावकं शुभम् ।
न भवत्यङ्गहीनोऽपि तेजसा नैव सुध्यते ॥
एवं चन्द्रश्च सूर्यश्च छादितावपि राहुणा ।
स्वतेजसा न सुध्येत नाङ्गहीनौ बभूवतुः ॥
पर्वस्वेव च चन्द्रस्य मानिक्यकलसाकृतिः ।

विधुतिः

सोमो दैवतसंयोगात् छायायोगाच्च पार्थिवात् ।
राहोश्च वरलब्धेर्दे पञ्चदेवत्वं प्रपद्यते ॥
खद्योतकाले संप्राप्ते वत्सं दृष्ट्वा च गौर्यथा ।
स्वाङ्गादेव चरेत् क्षीरं तथेन्दुः चरतेऽन्नतम् ।
पितेव सूर्यो देवानां सोमो मातेव लक्ष्यते ॥
यथा मातुः स्तनं पीत्वा जीवन्ते सर्वजन्तवः ।
पीत्वान्नतं तथा सोमात् क्षयन्ते सर्वदेवताः ॥
सम्भृतं सर्वयोगेषु तथायं चरते ग्रहः ।
तं चरन्तं यथाभागमुपजीवन्ति देवताः ॥
तस्मिन् काले समभ्येति राहुरप्यवकर्षति ।
सर्वमर्हन्ति भागञ्च पादं पादार्द्धमेव च ॥
आक्रम्य पार्थिवीं छायां यावती चन्द्रमण्डलम् ।
स्रुतः स भागो राहोस्तु देवभागास्तु शैवकाः ॥
लब्धिं विधाय देवानां राहोः पर्वगतस्य च ।
चन्द्रो न क्षयमायाति तेजसा नैव सुध्यते ॥
तिथिभागाश्च यावन्तः पुनस्यर्कं प्रमाणतः ।
सर्वच्छायास्थितः कालस्तावानेव प्रकीर्तितः ॥
अतो राहुमुखः सोमः सोमादृद्धिं दिवाकरः ।
पर्वकाले स्थितिस्त्वेवं विपरीता पुनः पुनः ॥
अतश्छादयते राहुरभवच्छशिभास्करौ ।
राहुरभ्रकसंस्थानः सोममाच्छाद्य तिष्ठति ॥
उद्धृत्य पार्थिवीं छायां धूममेघ इवोत्थितः ।
चन्द्रस्य यदवस्त्रं राहुणा भास्करस्य च ॥
गात्रावस्त्रस्थितं तस्य कैवल्यं श्यामलोज्ज्वलम् ।
कर्दमेन यथा वस्त्रं शुक्लमप्युपलभ्यते ॥
एकोदेशेऽथ सर्वत्रा राहुणा चन्द्रमास्तथा ।
प्रचालितं तदेवेह पुनः शुक्लतरं भवेत् ॥
राहुयुक्तं भवेत्तद्वन्मण्डलं चन्द्रमण्डलम् ।
राहुणाच्छादितौ वापि दृष्ट्वा चन्द्रदिवाकरौ ॥
विप्राः भ्रान्तिपरा भूत्वा पुनराप्याययन्ति तम् ।
एवं न ग्रस्यते सूर्यचन्द्रमाभ्यां च ग्रस्यते ॥
अनुद्धाक्षं न पश्यन्ति मानुषा मांसचक्षुषः ।
जगत्सम्मोहनं चैतत् ग्रहणं चन्द्रसूर्ययोः ॥"
इत्याद्ये देवीपुराणे ग्रहणविकल्पः ॥ * ॥
विधोर्देवपित्राद्यन्नकारत्वं राजयक्ष्मादिकारणत्वञ्च कालिकापुराणे २०।२१ अध्याययोर्द्रष्टव्यम् ॥ * ॥ (कर्मणि, त्रि । यथा, ऋग्वेदे । १० । ५५ । ५ ।
"विधुं दधानं वपुषां
युवानं सन्तं पलितो जगार ॥"
"विधुं विधातारं सर्वस्य जगदादेः कर्त्तारं विपूर्व्वो दधातिः करोत्यर्थे ।" इति तद्भाष्ये सायणः ॥)

विधुतः, त्रि, (वि+धु+क्तः ।) त्यक्तः । इत्यमरः ॥ (यथा, भागवते । ६ । १६ । २५ ।
"स तत्र निर्मुक्तसमस्तसङ्ग
आत्मानुभूत्या विधुतत्रिलिङ्गः ।
परेऽमले ब्रह्मणि वासुदेवे
लेभे गतिं भागवतीं प्रतीतः ॥")
कम्पितञ्च ॥

विधुतिः, स्त्री, कम्पनम् । विपूर्व्वधुधातोः क्तिप्रत्ययेन निष्पन्ना । (यथा, भागवते । १० । ३३ । ८ ।

विधूतं

"पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासै-
र्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः ॥"
निराकृतिः । यथा, तत्रैव । ४ । २२ । ३८ ।
"यस्मिन्निदं सदसदात्मतया विभाति-
मायाविवेकविधुतिस्मृति वाहिबुद्धिः ॥")

विधुननं, क्लो, (वि+धू+ल्युट् । ल्युट् । नुक् च । पृषोदरादित्वात् ह्रस्वः ।) कम्पनम् । इति जटाधरः ॥

विधुन्तुदः, पुं, (विधुं तुदति पीड़यतीति । विधु+तुद+"विध्वरुषोस्तुदः ।" ३ । २ । ३५ । इति खश् । मुम् ।) राहुः । इत्यमरः ॥ (यथा, माघे । २ । ६१ ।
"नीतिरापदि यन्नृणः परलक्ष्मानिगो द्विषे ।
विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्तमाय सः ॥")

विधुपक्षरः, पुं, (विधोः पक्षर इव वक्त्रमिव तत्सादृश्यात् ।) खड्गः । इति शब्दमाला ॥

विधुप्रिया, स्त्री, (विधोश्चन्द्रस्य प्रिया ।) चन्द्रपत्नी । यथा । दाक्षायण्यो विधुप्रिया । इति कोषान्तरम् ॥

विधुरं, क्लो, (विगता धूर्भारो यस्मात् । समासे चः ।) प्रविश्लेषः । इत्यमरः ॥ कैवल्यम् । इति चिकाण्डशेषः ॥ (प्रत्यवायः । कष्टम् । यथा, किरातटीकायां मल्लिनाथधृतवैजयन्ती ।
"विधुरं प्रत्यवाये स्यात् कष्टविश्लेषयोरपि ॥"
तथा च किराते । २ । ७ ।
"विधुरं किमतः परं परे-
रवगीतां गमिते दृशामिमाम् ।
अवसीदति वत्त सुरेरपि
त्वयि सम्भावितदृत्ति पौरुषम् ॥")

विधुरः, त्रि, (विगता धूः कार्य्यभारो यस्मात् । ऋक्पूरित्वात् ।) विकलः । इति मेदिनी । रे, २१६ । (यथा, कुमारे । ४ । ३२ ।
"तदिदं क्रियतामनन्तरं
भवता बन्धुजनप्रयोजनम् ।
विधुरां ज्वलनातिसर्जनात्
तनु मां प्रापय पत्युरन्तिकम् ॥")

विधुरा, स्त्री, रसाला । इति मेदिनी । रे, २१६ । (जघूर्हस्यायुमत्ते । यथा, सुश्रुते । २ । ६ ।
"जघूर्हे मर्म्मणि चतस्रो धमन्योऽधो माहका हे ललाटिके हे विधुरे ॥")

विधुवनं, क्लो, (वि+धु+ल्युट् । कुटादित्वात् धातुः ।) कम्पनम् । इत्यमरः । ३ । २ । ३ ॥

विधूतं, त्रि, (वि+धू+क्तः ।) कम्पितम् । (यथा, कलाविलासे । २ । २८ ।
"तं वदति सोऽन्यदृष्टिः सभूभङ्गं विधूतहस्ताग्रः ।
वक्रकवचनः प्रापो दृत्तिलोभः कृतोऽयमाघातः ॥")
त्यक्तम् । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ ।
"योगं योगविदां विधूतविविधव्यावल्गुमुद्राग्रय-
प्रादुर्भूतसुधारसप्रहसमरभ्राणाग्रहाध्यायिनाम् ॥")

विधूतिः, स्त्री, कम्पनम्। विपूर्व्वधूधातोः क्तिप्रत्ययेन निष्पन्नमिति॥

विधूननं, क्ली, (वि+धू+ल्युट्। युक् च।) कम्पनम्। तत्पर्य्यायः। विधुवनम् २। इत्यमरः। ३। २। ४॥ विधुननम् ३। इति शब्दरत्नावली॥ (यथा, साहित्यदर्पणे। ३। १४२।
"केशग्रहनखाघातादीनां यद्दे हर्षेऽपि सम्भ्रमात्।
प्राहुः कृत्रिमितं नाम शिरःकरविधूनम्॥")

विधूनितं, क्ली, कम्पितम्। विपूर्व्वधूधातोः क्तप्रत्ययेन निष्पन्नम्॥

विधृतं, क्ली, विशेषेण धृतम्। यथा,—
"अथावरुह्य विमलं जोष्टकाष्ठलतादिना।
उदस्तवासा उत्तिष्ठेदूर्द्धं विधृतमेहनः॥"
इत्याह्निकतत्त्वम्॥

विधेयः, त्रि, विधातुं शक्यः। (वि+धा+"अचो यत्।"३।१।९७। इति यत्। "ईद्यति।" ६।४। ६५। इति आत ईत्।) वाक्यस्थः। तत्पर्य्यायः। विनयग्राही २ वचनेस्थितः ३ आज्ञप्तः ४। इत्यमरः॥ (यथा, महाभारते। ५। २३। १३।
"कर्णोऽमात्यः कुरुपतेस्तात कश्चित्
सुयोधनो यस्य मन्दो विधेयः॥")
विधिजन्यबोधविषयः। यथा,—
"अनुवाद्यमलब्धा तु न विधेयमुदीरयेत्।
न ह्यज्ञातार्थकं किञ्चित् कुत्रचित् प्रतितिष्ठति॥"
इत्येकादशीतत्त्वम्॥
अपि च। प्रमाणान्तरासन्निहितं कर्म्म प्रथमं बुद्धौ न विधेयीभवति शब्दादेव तस्य कर्म्मत्व उपस्थितिरित्युपादेये विधेये कर्म्मणि पूजादौ शुचितत्कालजीविनः कर्म्माधिकारात् प्रमाणान्तरलभ्यत्वेनाविधेयत्वात्तिथ्यादिर्गुणः। इति तिथ्यादितत्त्वम्॥ (कर्त्तव्यम्। यथा, हरिभक्तिविलासे। ६। ४५।
"ह्रीत्रिंशद्गतप्रविभक्ते दिक्चक्रे यद्यथा सस्थितं
तत्तथा विधेयं गुरुदोषपतं विद्यारुनाम्॥"॥
अधीनः। यथा, रघुः। १६। ४।
"सन्निवेश्य सचिवेष्वतः परं
क्षौतिपेयनवयौवनोऽभवत्॥"
तथा च तत्रैव। ७। ६२।
"तस्थौ भुजस्तम्भनिषक्तदेहं
निद्राविधेयं नरदेवसैन्यम्॥")

विधेयता, स्त्री, (विधेयस्य भावः। विधेय+तल्।) विधेयत्वम्। विधिजन्यबोधविषयत्वम्। यथा। यथा ब्रह्मवधादिषु प्रायश्चित्तस्य निषिद्धतयोपयुक्तब्राह्मणादिज्ञाने हेतुत्वं तथा गङ्गास्नानादिषु पुण्यस्य विधेयतावच्छेदकगङ्गादिज्ञाने हेतुत्वम्। इति प्रायश्चित्ततत्त्वम्॥ (अधीनता। यथा, किरातेः। ११। ३३।
"परवानर्थसंसिद्धौ नीचैरुत्तिरपत्रपः।
अविधेयेन्द्रियः पुंसां गौरिवेति विधेयताम्॥")

विध्वंसः, पुं, (वि+ध्वंस+घञ्।) विनाशः। यथा, तिथ्यादितत्त्वे।
"हरिते रोगोऽनुतापः शुक्लानामौतिभिश्च विध्वंसः।
कपिले श्रीघ्रगसत्त्वक्षध्वंसोऽथ दुर्भिक्षम्॥"
(अपकारः। यथा, किरातेः। ३। १६।
"विधाय विघ्नं समनात्मनीनं
ग्रमैकहेतोर्भवतश्छलेन।
प्रकाशितत्वन्नतिगूढसारा:
हतोपकारा इव विद्विषन्ति॥")

विनतः, त्रि, (वि+नम+क्तः।) प्रणतः। (यथा, आश्वमेधिके ६१६।
"सखि दुरवगाहगहनो विदधानो विप्रियं प्रियजनेऽपि।
खल इव दुर्लक्ष्यस्तव विनतभुजस्योपरि स्थितः कोपः॥")
नम्रः। (यथा, हरिवंशसंहितायाम्। ६१। ३।
"दृश्यसप्तचतुर्दन्तः प्रलम्बभुग्नाननो विनतपृष्ठः।
कृशस्थूलग्रीवो यवमध्यो हरितखुराग्रः॥")
ग्रीवितः। इति मेदिनी। ते, १५६॥ (सङ्कुचितः। यथा, रामायणे। १। ४३। २४।
"विनतं क्वचिदुद्भूतं क्वचिद्यान्ति शनैः शनैः।
सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः॥"
पुं, खगामख्यातवानरविशेषः। यथाः, भट्टिः। ७। ५२।
"प्राचीं तावद्भिरव्यग्रः कपिभिर्विनतो ययौ।
अप्रयाद्भिरिवादित्यो वाजिभिर्दूरपातिभिः॥")

विनता, स्त्री, गरुड़माता। (सा तु दक्षप्रजापतेः कन्या। यथा, महाभारते। १। ६५। १२।
"क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः।
कद्रुश्च मनुजव्याघ्र दक्षकन्येव भारत॥")
पिड़काभेदः। इति मेदिनी। ते, १५६॥ (यथा, सुश्रुते। २। ६।
"मक्षती पिड़का नीला पिड़का विनता स्मृता॥")

विनताक्षनुः, पुं, (विनतायाः स्नुः पुत्रः।) अरुणः। इति हेमचन्द्रः॥ गरुड़श्च॥

विनदः, पुं, (विशेषेण नदति शब्दायते पत्रफलादिनेति। नद्+अच्।) विश्वाकदम्बः। इति शब्दचन्द्रिका॥ छातियान् इति ख्यातः॥

विनन्नकं, क्ली, तगरपुष्पम्। इति राजनिर्घण्टः॥

विनयः, त्रि, वणिक्। शिष्टः। निभृतः। विजितेन्द्रियः। इत्यजयपालः॥ (विशेषेण नयतीति। नी+अच्। विशेषेण प्रापकः। पृथक्कर्त्ता। यथा, ऋग्वेदे। २। २४। ६।
"स संनयः स विनयः पुरोहितः
सस्मृतः सयुधि ब्रह्मशस्यतिः॥"
"विनयः संगतानां विविधं नेता पृथक्कर्त्ता स एव।" इति तद्भाष्ये सायणः॥)
विनयः, पुं, (वि+नी+अच्।) शिक्षा। (यथा, रघुः। १। २४।
"प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥")

प्रणतिः। इति मेदिनी। ये, १०५॥ (यथा,
"जितेन्द्रियत्वं विनयस्य कारणं
गुणप्रकर्षो विनयाद्वाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः॥"
रघुटः॥)
अथ विनयप्रशंसा।
"वृद्धांश्च नित्यं सेवेत विप्रान् वेदविदः शुचीन्।
तेभ्यो हि शिक्षेत् विनयं विनीतात्मा हि नित्यशः॥
समयां वशगां कुर्य्यात् पृथिवीन्नात्र संशयः।
बहवोऽविनयाद्भ्रष्टा राजानः सपरिच्छदाः।
वनस्थाश्चैव राज्यानि विनयात् प्रतिपेदिरे॥"
इति मत्स्यपुराणे १८६ अध्यायः॥
(विशिष्टो नयः।) दण्डः। यथा। "मनुः।
'पूर्व्वमाचारयेद्यस्तु नियतं स्यात् स दोषभाक्।
पश्चादयः सोऽप्यसत्कारी पूर्व्वं तु विनयो गुरुः॥'
इति नारदवचनम्॥
तत्पूर्व्वापत्त्या परस्याधिकवाक्पारुष्योत्पादकस्यापि स्वल्पदण्डविधायकम्। युगपत्संप्रयोगे अधिकदण्डाभावमाह स एव।
'पारुष्ये साहसे चैव युगपत्संवर्त्तयोः।
विशेषश्चेन्न लभ्येत विनयः स्यात् समस्तयोः॥'
विनयो दण्डः।" इति अवहारतत्त्वम्॥

विनयग्राही, [न्] त्रि, (विनयं गृह्णातीति। ग्रह+णिनिः।) वचनेस्थितः। इत्यमरः॥

विनयस्थः, त्रि, (विनये तिष्ठतीति। स्था+कः।) आज्ञाकारी। तत्पर्य्यायः। विधेयः २ आज्ञप्तः ३ वचनस्थितः ४ वश्यः ५ प्रणेयः ६। इति हेमचन्द्रः। ३। ६६॥

विनया, स्त्री, बाह्यालकः। इति मेदिनी॥

विनयनं, क्ली, (विनयति अन्तर्दधाति सरस्वत्यत्रेति। वि+नय+अधिकरणे ल्युट्।) कुरुक्षेत्रम्। तच्च हस्तिनाया उत्तरपश्चिमे वर्त्तते। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। ८२। १०५।
"ततो विनयनं गच्छेन्नियतो नियताशनः।
गच्छत्यन्तर्हिता यत्र मेरुपृष्ठे सरस्वती॥"
वि+नय+भावे ल्युट्।) विनाशश्च॥

विनष्टः, त्रि, (वि+नश+क्तः।) नाशाश्रयः। ध्वंसविशिष्टः। यथा। ग्रिखो विनष्टः पुरुषो न नष्टः। इति विशेषव्याप्तिटीकायां मथुरानाथः॥ पतितः। यथा नारदः।
"विनष्टे वाप्यथ प्रव्रजितेऽमुष्मिन्नरत्नसृष्टे॥"
विनष्टे पतिते। इति दायभागः॥

विनष्टिः, स्त्री, विनाशः। इति विपूर्व्वनशधातोर्भावे क्तिप्रत्ययेन निष्पन्नमिति। इति सिद्धान्तकौमुदी॥ (यथा, भागवते ३। १। २०।
"तस्याथ शुश्राव सुहृद्विनष्टिं
वैरं यथा वैश्रवणव्रह्मसंश्रयम्।

संस्तुवंश्च जगन्मथानुशोचन्
सरस्वतीं प्रत्युवाच तूष्णीम् ॥")

विनसः, त्रि, (विगता नासिका यस्य । नसादेशः।) गतनासिकः। तत्पर्य्यायः। विग्रः २ विखुः ३ विनासकः ४। इति जटाधरः॥

विना, अ, (वि+"विनञ्भ्यां नानाञौ न सह।" ५।३। २७। इति ना।) वर्জ্জনम्। तत्पर्य्यायः। पृथक् २ अन्तरेण ३ ऋते ४ हिरुक् ५ नाना ६। इत्यमरः॥ (ग्रन्थेनानेन योगे "पृथग्-विनेति।" २। ३।३२। इत्यनेन तृतीया पञ्चमी च स्यात्। एवं "पृथङ्मिना नानाभिरिति योगविभागो द्वितीयार्थः॥" इति काशिकोक्त्या द्वितीयापि। यथा, तत्रैव।

"विना वातं विना वर्षं विद्युत्प्रपतनं विना।
विना हस्तिसहस्तान्दोषान् केनेमौ पातितौ द्रुमौ॥"

तृतीयाप्रयोगो यथा, रघुवंशे २। १४।

"ग्रसिष्ये द्रष्टापि विना दवाग्निः॥"

पञ्चमीप्रयोगो यथा, सांख्यकारिकायाम् ।४१।

"चित्रं यथाश्रयमृते
स्थाण्वादिभ्यो विना यथा छाया।
तद्वद्विना विशेषै-
र्न तिष्ठति निराश्रयं लिङ्गम्॥")

विनाकृतं, त्रि, (विना अन्तरेण कृतम्।) त्यक्तम्। इति त्रिकाण्डशेषः॥

विनायकः, पुं, (विशिष्टो नायकः।) बुद्धः। गणेशः। इत्यमरः॥ (यथा, कथासरित्सागरे ।३०। ५५।

"अस्तीह प्रमदोद्याने तरुमण्डलमध्यगः।
दृष्टप्रभावो वरदो देवदेवो विनायकः॥")

गरुडः। विघ्नः। (यथा, हरिवंशे ।१८१।५५।

"राक्षसाश्च पिशाचाश्च भूतानि च विना-
यकाः॥")

गुरुः। इति मेदिनी। के, ११२॥ * ॥ विनायकगणो यथा,—

"गाङ्गेयो विघ्नराजश्च द्वौ विघ्नेशौ विनायकौ॥"
इति वह्निपुराणे गणभेदनामाध्यायः॥*॥

विनायकस्योत्पत्तिर्यथा,—

प्रजापतिरुवाच।

"कथं गजपतेर्जन्म मूर्त्तिमत्त्वञ्च सत्तम!।
एतन्मे संशयं छिन्धि धृतिकरं व्यवस्थितम्॥

महातपा उवाच।

पूर्व्वं देवगणाः सर्व्वे ऋषयश्च तपोधनाः।
कार्य्यारम्भे यथा प्राप्ताः सिद्धिं ते च न संशयः॥
सज्जागांवस्थिते यथा सिध्यन्ते विघ्नतः क्रियाः।
असत्कार्य्येषु विघ्नार्थे सर्व्व एवाभ्यमन्त्रयन्॥
ततस्तेषां तदा मन्त्रं कुर्व्वतां त्रिदिवौकसाम्।
बभूव बुद्धिर्गमने रुद्रं प्रति महामते॥
ते तत्र रुद्रमामन्त्र्य कैलासनिलयं गुरुम्।
ऊचुः सविनयं सर्व्वे प्रणिपातपुरःसरम्॥

देवा ऊचुः।

देवदेव महादेव मृडयाशु त्रिलोचन।
विघ्नार्थमविघ्नितानां उत्पादयितुमर्हसि॥
एवमुक्तस्तदा देवैर्भवः परमया मुदा।
उमां निरीक्ष्यामास चक्षुषानिमिषेण ह॥
देवानां सन्निधौ तस्य पश्यतो मां महात्मनः।
चिन्ताभूद्योनि मूर्त्तेभ्यो दृश्यते केन हेतुना॥
पृथिव्या विद्यते मूर्त्तिरपां मूर्त्तिस्तथैव च।
तेजसः खलनस्यापि मूर्त्तिरेषा तु दृश्यते॥
आकाशस्य कथं नेति मत्वा देवो जहास च।
ज्ञानशक्तिः परान् दृष्ट्वा यद्दृश्यं योनि मृन्मयम्॥
यच्चोक्तं ब्रह्मणा पूर्व्वं शरीरन्तु शरीरिणाम्।
यद्यपि हसितं तेन देवेन परमेष्ठिना॥
एतत्कार्य्यचतुष्केण पृथिव्यादिचतुर्ष्वपि।
मूर्त्तिमानतितेजस्वी हसतः परमेष्ठिनः॥
प्रदीप्तास्यो महादीप्तः कुमारो भासयन् दिशम्।
परमेष्ठिगुणैर्युक्तः साक्षाद्रुद्र इवापरः॥
उत्पन्नमात्रो देवानां बोधितः संभ्रमोद्यतः।
कान्त्या दीप्त्या तथा मूर्त्त्या रूपेण च
महात्मवान्॥
तं दृष्ट्वा परमं रूपं कुमारस्य महात्मनः।
उमा निमिषनेत्राभ्यां तमपश्यत भामिनी॥
तं दृष्ट्वा कुपितो देवस्तीव्रकोपसमन्वितः।
मत्वा कुमाररूपन्तु क्षोभनं मोहनं दृशाम्।
ततः शशाप तं देवो गणेशं परमेश्वरः॥
कुमार गणवक्त्रं त्वं प्रलम्बजठरस्तथा।
भविष्यति तथा सर्व्वैरुपवीतगतिर्भुवम्॥
एवं शशाप तं देवस्तीव्रकोपसमन्वितः।
धुन्वन् शरीरमुत्थाय ततो देवो रुषान्वितः॥

यथा यथासौ च शरीरमाद्यं
धुनोति देवस्त्रिशिखास्त्रपाणिः।
तथा तथा चाङ्गरुहाश्चकाश
जलं चितौ संन्यपतत्तस्याग्रे॥
विनायकानेकमुखा गजास्या-
स्तमालनीलाञ्जनसन्निकाशाः।
उत्तस्थुरुग्रैर्विविधास्त्रहस्ता-
स्ततस्तु देवा मनसाकुलेन॥
किमेतदित्यद्भुतकर्म्मकारी
श्लोकः करीत्यप्रतिमं महच्च।
कार्य्यं सुराणां कृतमेतदिदं
भवेत्तथेतं परितं कृतज्ञ॥
दिवौकसां चिन्तयतां तथा तु
विनायकैः खा क्षुभिता बभूव।
चतुर्मुखाप्रतिमो विमान-
मारुह्य खे वाक्यमिदं जगाद॥
धन्यास्तु देवा सुरनायकेन
त्रिलोचनेनाद्भुतरूपिणा च।
अनुग्रहीताः परमेश्वरेण
सुरद्विषां विघ्नकृतां मतौ च।
इत्येवमुक्ता प्रणिपात्य हस्ता-
वुवाच देवस्त्रिशिखास्त्रपाणिम्॥
यस्ते विभो वक्त्रमुखद्भवः प्रभु-
र्विनायका नाम बभूविवेऽनुगाः।
भवन्त्वयास्यात्मभवेन चाम्बरे
त्वया च तुल्यस्तु शरीरचारी।
आकाशमेतद्बहुधा व्यवस्थितं
त्वया चैको वहतां ते प्रयाताः।
प्रभुर्भवत्वप्रतिमास्त्रपाणिना
इमान् हि पाशैः सुवरांश्च देहि॥
इत्येवमुक्ताभिगते पितामहे
त्रिलोचनस्तात्मभवं जगाद।
विनायको विघ्नकरो गजास्यो
गणेशनामा तु भवस्य पुत्रः॥
एते च सर्व्वे तपयानु भक्त्या
विनायकाः क्रूरदृशः प्रचण्डाः।
उच्छ्रुद्दानादिविहतद्विषद्देहाः
कार्य्येषु सिद्धिं प्रतिपादयन्तः॥
भवांश्च देवेषु तथा मखेषु
कार्य्येषु चान्येषु महानुभावात्।
अग्रेषु पूजां लभतेऽन्यथा च
विनाग्रविघ्नस्य च कार्य्यसिद्धिम्॥
इत्येवमुक्तः परमेश्वरेण
सुरैः समं काञ्चनकुम्भसंज्ञैः।
जलैस्तथासावभिषिक्तगात्रो
रराज राजेन्द्रः विनायकानाम्॥
दृष्ट्वाभिषिच्यमानं तु देवास्तं गणनायकम्।
तुष्टुवुः प्रयताः सर्व्वे त्रिमूलाग्रस्य सन्निधौ॥

देवा ऊचुः।

नमस्ते गणवक्त्राय नमस्ते गणनायक!।
विनायक नमस्तेऽस्तु नमस्ते चण्डविक्रम॥
नमोऽस्तु ते विघ्नकर्त्रे नमस्ते सर्व्वमेखल।
नमस्ते रुद्रवक्त्रोत्थ प्रलम्बजठराश्रित।
सर्व्वदेवनमस्कारादविघ्नं कुरु सर्व्वदा॥
एवं स्तुतस्तदा देवैर्महात्मा गणनायकः।
अभिषिक्तस्तु रुद्रेण सोमस्यापत्यतां गतः॥
एतच्चतुर्थ्यां सम्यग्गणाध्यक्षस्य पार्थिव।
व्रतस्तवोऽयं महती तिथीनां परमा तिथिः॥
एतस्यां यस्तिलान् भक्त्या सुक्ता गणपतिं नृप।
आराधयति तस्यासु तुष्यते नात्र संशयः॥
यश्चैतत् पठते श्लोकं यश्चैतत् शृणुयान्नरः।
तस्य विघ्ना न जायन्ते न पापं सर्व्वथा नृप॥"
इत्यादि वाराहे विनायकोत्पत्तिनामाध्यायः॥*॥

विनायकस्य नामाष्टकस्तोत्रं यथा,—

श्रीविष्णुरुवाच।

"गजेशमेकदन्तञ्च हेरम्बं विघ्ननायकम्।
लम्बोदरं सूर्पकर्णं गणवक्त्रं गुहाग्रजम्॥
नामाष्टकार्थं पुत्रस्य शृणु मत्तो हरप्रिये।
स्तोत्राणां सारभूतञ्च सर्व्वविघ्नहरं परम्॥
ज्ञानार्थवाचको गश्च णश्च निर्व्वाणवाचकः।
तयोरीशं परं ब्रह्म गणेशं प्रणमाम्यहम्॥१॥
एकशब्दः प्रधानार्थो दन्तश्च बलवाचकः।
बलं प्रधानं सर्व्वस्मादेकदन्तं नमाम्यहम्॥२॥
हीनार्थवाचको हेश्च रम्बः पालनवाचकः।
परिपालकं तं हीनानां हेरम्बं प्रणमाम्यहम्॥३॥
विपत्तिवाचको विघ्नो नायकः खण्डनार्थकः।
विपत्खण्डनकारन्तं नमामि विघ्ननायकम्॥४॥

विद्युद्दत्तेन नैवेद्येनैव लम्बोदरं पुरा।
पित्रा दत्तेन विधिवदेवन्दे लम्बोदरञ्च तम् ॥५॥
धूपाकारो च तत्कर्त्ता विघ्नवारणकारणौ।
सम्यदास्यालरूपौ च सुपर्णकर्णं नमाम्यहम् ॥६॥
विष्णुप्रसादपुष्पञ्च यन्मूर्द्ध्नि सुशिदत्तकम्।
तद्गजेन्द्रवक्त्रयुक्तं गजवक्त्रं नमाम्यहम् ॥ ७ ॥
गुरुस्याग्रे च जातोऽयमाविर्भूतो हरयहे।
वन्दे गुरुाग्रजं देवं सर्व्वदेवाग्रपूजितम् ॥ ८ ॥
एतन्नामाष्टकं दुर्गे नामार्थसंयुतं परम्।
पुत्रस्य पद्म वेदे च तदा कोपं तथा कुरु ॥
एतन्नामाष्टकं स्तोत्रं नामार्थसंयुतं शुभम्।
त्रिसन्ध्यं यः पठेन्नित्यं च सुखी सर्व्वत्र जयी।
ततो विघ्नाः पलायन्ते वैनतेयादयथोरगाः।
गजेश्वरप्रसादेन महाज्ञानी भवेद्ध्रुवम्।
पुत्रार्थी लभते पुत्रं भार्य्यार्थी विपुलां स्त्रियम्।
महाजड़ः कवीन्द्रश्च विद्यावांश्च भवेद्ध्रुवम्।"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः ॥

अस्य कवचं यथा,—

नारद उवाच।

"संसारमोचनस्यास्य कवचस्य प्रजापतिः।
ऋषिश्छन्दश्च दृहती देवो लम्बोदरः स्वयम्॥
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः।
सर्व्वेषां कवचानाञ्च सारभूतमिदं मुने॥
ॐ गौं गें श्रीं गणेशाय स्वाहा मे पातु मस्तकम्।
द्वात्रिंशदक्षरो मन्त्रो ललाटं मे सदावतु॥
ॐ हूँ क्लीं श्री ग्लमिति च सततं पातु लोचनम्।
तारकां पातु विघ्नेशः सततं धरणीतले॥
ॐ हूँ श्रीं क्लीमिति सततं पातु नासिकाम्।
ॐ गौं गं हुपर्णकर्णाय स्वाहा पात्वधरं मम॥
दन्तांश्च तालुकां जिह्वां पातु मे षोड़शाक्षरः।
ॐ श्रीं लम्बोदरायेति स्वाहा गण्डं सदावतु॥
ॐ गां गं गजाननायेति स्वाहा स्कन्धं सदावतु॥
श्रीं क्लीं क्लीमिति कण्ठं पातु षडक्षरः स्कन्धं च।
पादौ पादौ सदा पातु सर्व्वाङ्गं विघ्ननिघ्नहृत्॥
प्राच्यां लम्बोदरः पातु आग्नेय्यां विघ्ननायकः।
दक्षिणे पातु विघ्नेशो नैर्ऋत्यान्तु गजाननः॥
पश्चिमे पार्व्वतीपुत्रो वायव्यां शङ्करात्मजः।
लक्ष्मस्याग्रकोत्तरे तु परिपूर्णतमस्य च॥
ऐशान्यामेकदन्तश्च हेरम्बः पातु चोर्द्धतः।
गजाधिपोऽधः पातु सर्व्वपूज्यश्च सर्व्वतः।
स्वप्ने जागरणे चैव पातु मे योगिनां गुरुः॥
इति ते कथितं वत्स! सर्व्वमन्त्रौघविग्रहम्।
संसारमोहनं नाम कवचं परमाद्भुतम्॥
श्रीकृष्णेन पुरा दत्तं गोलोके रासमण्डले।
वृन्दावने विनीताय मह्यं दिनकरात्मज॥
मया दत्तञ्च तुभ्यञ्च यस्मै कस्मै न दास्यसि।
परं वरं सर्व्वपूज्यं सर्व्वसङ्कटतारणम्॥
गुरुमभ्यर्च्च्य विधिवत् कवचं धारयेत्तु यः।
कण्ठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न संशयः॥
अश्वमेधसहस्राणि राजसूयशतानि च।
यत्फलं कवचस्यास्य कलां नार्हन्ति षोड़शीम्॥
इदं कवचमज्ञात्वा यो भजेच्छङ्करात्मजम्।
शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे गणेशकवचं नाम १३ अध्यायः॥ * ॥ अथ विनायकशान्तिः।

याज्ञवल्क्य उवाच।

"विनायकोपहृष्टस्य लक्षणानि निबोधत।
स्वप्नेऽवगाहतेऽत्यर्थं जलं सुरुचिरं पश्यति।
विमना विषयारम्भः स दीर्घमनिमित्ततः॥
राजा राज्यं कुमारी च पतिं पुत्रञ्च गर्भिणी।
नाप्नुयात् स्वपनस्यास्य पुण्येऽह्नि विधिपूर्व्वकम्॥
गौरसर्षपकल्केन सर्व्वेनोत्सादितस्य च।
सर्व्वौषधैः सर्व्वगन्धैर्विलिप्तस्नानसत्तथा॥
भद्रासनोपविष्टस्य क्षत्रियाद्य द्विजान् शुभान्।
हस्तिकां रोचनां गत्वान् गुग्गुलुं चापि निक्षिपेत्॥
या आहुता स्रुक्स्रुवैश्चतुर्भिः कलसैर्हृदात्।
चर्म्मण्यानुष्ठुहे रक्ते स्थाप्य भद्रासनं तथा॥
सहस्राक्षं घृतधारं ऋषिभिः पारयं हुतम्।
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते॥
भगन्तु वरुणो राजा भगं सूर्य्यो हरत्यतिः।
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः॥
यत्ते कोषसुसौभाग्यं स्त्रीषु यच्च सुदुर्लभम्।
ललाटे कर्णयोरक्ष्णोरापस्तत् प्रनु ते सदा॥
ज्ञातस्य सार्षपं तैलं स्त्रवेणौड़म्बरेण तु।
कुहुयान्मूर्द्धनि कुम्भान् सर्वेण परिषेच्य च॥
मित्रश्च संमितश्चैव तथा शालकटंकटाः।
कुम्भाश्चा राजपुत्राश्चैवन्ते स्नानसमन्विते॥
दद्याच्चतुर्थ्यां रूपं कुम्भानाक्षीं सर्व्वशः।
लताक्षतांस्तण्डुलांश्च पललौदनमेव च॥
पुष्पं चित्रं सुगन्धिञ्च सुरां च विविधामपि।
मूलकं पूरिका पूपास्तथैवेक्षिका रसः॥
दधि पायसमन्नञ्च गुड़पिष्टं समोदकम्।
एतान् सर्व्वानुपाहृत्य भूमौ स्थित्वा ततः शिरः॥
अम्बिकासुपतिष्ठेच्च दद्याद्यं क्षतात्मने॥
दूर्व्वासर्षपपुष्पेण पुत्रजन्मभिरन्तत॥
क्षतस्यस्थयनं चैव प्रार्थयेदम्बिकां सतीम्।
रूपं देहि यशो देहि भगं भगवति देहि मे॥
पुत्रान् देहि श्रियं देहि सर्व्वकामांश्च देहि मे।
ब्राह्मणान् भोजयेत् पश्चात् शुक्लवस्त्रानुलेपनैः॥
वस्त्रयुग्मं गुरोर्दद्यादाचार्य्यं पूज्य यत्नतया।
श्रेयःकर्म्मफलं विद्यात् सूर्य्याचैनरतस्तथा॥"

इति गारुड़े १०० अध्यायः॥*॥

अथ गणेशमन्त्राः।

"पश्चान्तकं ग्रन्थिधरं बीजं गजपतेर्विदुः।"

पश्चान्तको गकारः। ध्यानन्तु गणेशग्रन्थे द्रष्टव्यम्। अस्य पुरश्चरणं चतुर्लक्षजपः॥*॥

अथ महागणपतिमन्त्रः। निबन्धे।

"श्रीशक्तिसंरभूषिन्नवीजानि प्रथमं वदेत्।
हेरम्बं गणपतिं पश्चात् वराग्नि वरदं पदम्॥
उद्धा सर्व्वजनं मेऽन्ते वश्यमानय तदयम्।
अष्टाविंशत्यक्षरोऽयं ताराद्यो मनुरीरितः॥"

भूबीजमाह।

"स्तुतिस्तं मांसमौविन्दुयुक्तं भूबीजमीरितम्।"

स्तुतिर्गकारः। मांसं लकारः॥*॥ अस्य ध्यानम्।

"नवरत्नमयं द्वीपं स्मरेदिक्षुरसाम्बुधौ।
तदौचिधौतपर्य्यन्तं मन्दाकिनीविवेष्टितम्॥
मन्दारपारिजाताद्यिकल्पवृक्षलताकुलम्।
उद्यन्नरत्नच्छायाभिरञ्जीकृतभूतलम्॥
उद्यद्दिनकरैरुद्भासितदिगन्तरम्॥
तस्य मध्ये पारिजातं नवं रत्नमयं स्मरेत्
ऋतुभिः सेवितं बहुभिर्नित्यं प्रीतिवर्द्धनम्॥
तस्याधस्तात् महापीठे रचिते माहकामुजे।
षट्कोणान्तस्त्रिकोणस्थं महागणपतिं स्मरेत्॥
हस्तीन्द्रानन्तमिन्दुपूड़मरुणच्छायं त्रिनेत्रं रसादाश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया
सन्ततम्।
बीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पलं
प्रीत्यग्रस्वविषाणगक्षकलसात् हस्तैर्बहन्तं
भजे॥
गण्डपाल्लिगलद्दानपूरलालसमानसान्।
द्विरेफान् कर्णतालाभ्यां वारयन्तं मुहुर्मुहुः॥
कराग्रधृतमाणिक्यकुम्भवक्त्रविनिःसृतैः।
रत्नवर्षैः प्रीणयन्तं साधकं मदविह्वलम्॥
माणिक्यमुकुटोपेतं रत्नाभरणभूषितम्॥"

अस्य पुरश्चरणं चतुर्लक्षजपः॥*॥ अपि च।

"शक्तिरुद्धृत्य बीजं महागणपतिं वदेत्।
हेरम्बमपि वधूप्रीतो मन्त्रोऽयं दादशाक्षरः॥"

अस्य ध्यानम्।

"शुक्लागौरं मदगजमुखं चन्द्रचूड़ं त्रिनेत्रं
हस्तैः स्रोयैर्दधतमरविन्दद्वयौ रत्नकुम्भम्।
अङ्कन्यायाः सरसिजरुचेरुद्वहन्तमपि पार्श्वे-
र्देव्या योनौ विनिहितकरं रत्नमौलिं
भजामि॥"

अस्य पुरश्चरणं लक्षजपः॥*॥ मन्त्रान्तरम्।

"शक्तिरुद्धृत्य बीजं वश्यमानय तदयम्।
ताराद्यो मनुराख्यातो दशवर्णाक्षरान्वितः॥"

अस्य ध्यानम्।

"हस्तैर्विभ्रतमिक्षुदण्डवरदौ पाशाङ्कुशौ पुष्करं
शृङ्खप्रमदावराङ्गमनघाश्लिष्टं श्रियाग्रस्थया।
श्यामाढ्या विधृताब्जया त्रिनयनं चन्द्रार्द्धचूड़ं
भजे-
रक्तं हस्तिमुखं स्मरामि सततं भोगातिलोलं
विभुम्॥"

अस्य पुरश्चरणं लक्षत्रयजपः॥*॥ अथ हेरम्बमन्त्रः। स च ककारयुक्तो गकारः सविन्दुः प्रणवादिनमोऽन्तश्चतुरक्षरः। निबन्धे।

"पश्चान्तको बिन्दुयुक्तो वामकर्णविभूषितः।
तारादिर्हृदयान्तोऽयं हेरम्बमनुरीरितः।
चतुर्वर्गात्मको नृणां चतुर्वर्गफलप्रदः॥"

अस्य ध्यानम् ।
"सुक्ताकाञ्चनगौरकुन्दधुरुधवच्छायैस्त्रिनेत्रान्वितै-
र्गांगाखेदैरिवाहतं शुचिधरं हेरम्बमर्कप्रभम् ।
दन्तं दानमभीतिमोदकरदान् दण्डं शिरोऽक्षा-
लिकां
मालां सुन्दरमङ्कुशं त्रिशिखकं दोर्भिर्दधानं
भजे ।"
अस्य पुरश्चरणं त्रिलक्षसंख्यकजपः ।* । मन्त्रा-
न्तरम् । गं क्षिप्रप्रसादनाय हृत् । तथा च
विवर्से ।
"संवर्मको नेत्रयुतः पार्श्वो वह्नासने स्थितः ।
प्रसादनाय कुम्भस्थः खबीजाद्यो दशाक्षरः ।"
अस्य ध्यानम् ।
"पाशाङ्कुशौ कल्पलतां विषाणं
दधत् स्वशुण्डाहितबीजपूरः ।
रक्तस्त्रिनेत्रश्चरणेन्दुमौलि-
र्हारोज्ज्वलो हस्तिसुखोऽवतान्नः ।"
अस्य पुरश्चरणं लक्षजपः । * । अथ हरिद्रा-
गणेशमन्त्रः ।
"पञ्चान्तको धराबीजो बिन्दुभूषितमस्तकः ।
एकाक्षरो महामन्त्रः सर्वकामफलप्रदः ।"
ध्यानम् ।
"हरिद्राभं चतुर्बाहुं हारिद्रवसनं विभुम् ।
पाशाङ्कुशधरं देवं मोदकं दन्तमेव च ।"
अस्य पुरश्चरणं चतुर्लक्षजपः । इति तन्त्र-
सारः ॥ * ॥ (पीठस्थानविशेषः । यथा,
देवीभागवते । ७ । ३० । ७१ ।
"करवीरे महालक्ष्मीरुमादेवी विनायके ।
आरोग्या वैद्यनाथे तु महाकाले महेश्वरी ।"
विगतो नायको यस्येति विग्रहे अनाथे, त्रि ।)
विनायिका, स्त्री, (विनायकस्य स्त्री । भार्य्यार्थे
ङीप् ।) गरुड़पत्नी । इति शब्दमाला ।
विनायका, स्त्री, (विना आश्रयं रोहतीति ।
रुह + कः । स्त्रियां टाप् ।) त्रिपर्णिका । इति
राजनिर्घण्टः ।
विनाशः, पुं, (विनशनमिति । वि + नश + घञ् ।)
विनशनम् । (यथा, गीतायाम् । २ । १७ ।
"अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति ।")
तत्पर्य्यायः । अदर्शनम् २ । इत्यमरः । हृच्छट्
३ । यथा, श्रीभागवते ।
"एषा घोरतमा सन्ध्या लोकहृच्छट्करी
विभो ।"
हृच्छब्दिलयार्थं विनाशे वर्त्तते । इति श्रीधर-
स्वामी ॥
विनाशकः, त्रि, विनाशकर्त्ता । विपूर्ब्बकनशधातो-
र्ण्वुल्(ण्वुल्)प्रत्ययेन निष्पन्नः । (यथा, महा-
भारते । १२ । ६१ । ६ ।
"राजैव कर्त्ता भूतानां राजैव च विनाशकः ।
धर्म्मात्मा यः स कर्त्ता स्यादधर्म्मात्मा विना-
शकः ।")
विनाशी, [न्] त्रि, विनाशकरणशीलः । विपूर्ब्ब-
नशधातोर्णिनिप्रत्ययेन निष्पन्नः । (यथा, महा-
भारते । १२ । १०७ । ११ ।
"लोभमेको हि दशुते ततोऽमर्षमनन्तरम् ।
तौ क्षयव्ययसंयुक्तावन्योन्यञ्च विनाशिनौ ।"
यथा च मनौ । १ । २७ ।
"अक्षरा मात्राविनाशिन्यो दशार्द्धवान्तु याः
स्मृताः ।
ताभिः सार्द्धमिदं सर्व्वं सम्भवत्यनुपूर्व्वशः ।")
विनाशोन्मुखं, त्रि, (विनाशाय प्रतनाय उन्मु-
खम् ।) प्रकम् । इत्यमरः । नाशोन्मुखत्व ॥
विनासकः, त्रि, (विगता नासा यस्य । बहुव्रीहौ
कन् हृस्वश्च ।) गतनासिकः । इति जटाधरः ॥
विनाहः, पुं. (विशेषेण नह्यते अनेन । वि + नह
+ "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।)
कूपाच्छादनपिधानकः । इति शब्दरत्नावली ॥
विनिक्षिप्तः, त्रि, विनिक्षेपाश्रयः । परित्यक्तः ।
विनिपूर्ब्बकक्षिपधातोः क्तप्रत्ययेन निष्पन्नः ।
(यथा, देवीभागवते । २ । ८ । २७ ।
"पितुः कण्ठेऽर्पय मे येन विनिक्षिप्तो व्रतो-
रगः ।")
विनिगमना, स्त्री, एकतरपक्षपातिनी युक्तिः ।
एकतरावधारणा । यथा । उच्यते । एकदेशो-
त्पन्नस्येव भूहिरण्यादावुत्पन्नस्य खलस्य विनि-
गमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया
अव्यवस्थितस्य गुटिकापातादिना यत्नेन
विभागः । इति दायभागः । उच्यत इति
भूहिरण्यादावुत्पन्नस्य एकदेशोपात्तस्य तत्तद्-
भावच्छिन्नस्य विनिगमना इदमस्यैवेत्यव-
धारणरूपा तत्प्रमाणाभावेन वैशेषिक-
व्यवहारः परस्परनैरपेक्ष्येण दानविक्रयादि-
लक्षणस्तदनर्हतया अव्यवस्थितस्य सतोऽप्यस-
त्कल्पस्य गुटिकापातादिना यत्नेन इदं अमुक-
स्यैवावधारणं विभाग इत्यर्थः । इति तट्टीकायां
श्रीकृष्णतर्कालङ्कारः ॥
विनिद्रः, त्रि, (विगता निद्रा सुप्तता यस्य ।)
उन्मीलितः । इति शब्दमाला । (यथा, नैषधे ।
१ । ३४ ।
"विनिद्ररोमाञ्चि हसन्ती गलम् ।"
तथा च साहित्यदर्पणे । १० परिच्छेदे ।
"उत्पत्तिरिन्दोरपि निष्कलेव
दृष्टा विनिद्रा बलिनो न येन ।")
निद्रारहितः । (यथा, महाभारते । ३ ।
२८५ । २१ ।
"खस्थमासीनमव्यग्रं विनिद्रं राघवाधिपः ।
ततोऽब्रवीद्दशग्रीवः कुम्भकर्णं महाबलम् ।")
विनिद्रत्वं, क्ली, (विनिद्रस्य भावः ।) प्रबोधः ।
इति हेमचन्द्रः । निद्रारहितत्वञ्च ॥
विनिपातः, पुं, (विशेषेण निपतनम् । वि + नि +
पत + घञ् ।) निपातः । देवादिदिवसम् । इति
मेदिनी । ते, २१७ । अवसानः । इति हेम-
चन्द्रः । (यथा, मनौ । ४ । १४६ ।
"मङ्गलाचारयुक्तानां नित्यञ्च प्रयतात्मनाम् ।
जपतां जुह्वतां चैव विनिपातो न विद्यते ।")
विनिमयः, पुं, (वि + नि + मी + अप् ।) परि-
दानम् । प्रतिदानम् । इति शब्दरत्नावली ॥
(यथा, रघुः । १ । २६ ।
"दुदोह गां स यज्ञाय शस्याय मघवा दिवम् ।
सम्यग्विनिमयेनोभौ दधतुर्भुवनद्वयम् ।")
वल्कः । इति शब्दमाला । यथा,—
"विक्रयेणाऽविनिमयैर्दत्त्वा गोमांसखादके ।
व्रतं चान्द्रायणं कुर्य्याद्वृषे सोपाधयो भवेत् ।"
इति प्रायश्चित्ततत्त्वधृतगोभिलवचनम् ।
विनियोगः, पुं, (वि + नि + युज् + घञ् ।) पदे
अर्पणम् । इति हेमचन्द्रः ॥ विनियोजनम् ।
यथा,—
"अनेनेदन्तु कर्त्तव्यं विनियोगः प्रकीर्त्तितः ।"
इत्यादिकृतत्वम् ॥
(यथा, सन्ध्याविधौ ।
"ॐकारस्य ब्रह्मऋषिर्गायत्रीच्छन्दः सविता
देवता प्राणायामे विनियोगः ।")
विनियोजितः, त्रि, विनियुक्तः । विनिपूर्ब्बयुज्-
धातोः क्तप्रत्ययेन निष्पन्नः ॥
विनिर्धूतः, त्रि, (वि + निर् + धू + क्तः ।) इतस्त-
स्यथा चलितः । यथा,—
"ततो देवा विनिर्धूता असुराज्ञा: पराजिताः ।
हृताधिकाराश्चिदशास्ताभ्यां सर्व्वे निराकृताः ।"
इति मार्कण्डेये देवीमाहात्म्यम् ॥
विनिर्भयः, पुं, (विशेषेण निर्गतं भयं यस्य ।)
साधुगणविशेषः । यथा,—
"मनो मन्ता तथा प्राणो नरो यानश्च वीर्य्य-
वान् ।
विनिर्भयो नयश्चैव हंसो नारायणो हरः ।
प्रभुश्चेति समाख्याताः साध्याः द्वादश
पौर्विकाः ।"
इति वह्निपुराणे काश्यपीवंशजः ॥
भयरहितश्च ॥
विनिर्मोकः, पुं, अतिरेकः । यथा । दिवाकरवार-
विनिर्मोके तु गर्गः । इति चूड़ाप्रकरणे ज्योति-
स्तत्त्वम् । (विगतो निर्म्मोको यस्य इति विग्रहे
सुक्तकचुके, त्रि ॥)
विनिर्वृत्तः, त्रि, समाप्तः । निष्पन्नः । विनिर्
पूर्ब्बकृतधातोः क्तप्रत्ययेन निष्पन्नः ॥
विनिवृत्तः, त्रि, निवृत्तिविशिष्टः । शान्तः ।
निरस्तः । विनिपूर्ब्बकृतधातोः क्तप्रत्ययेन
निष्पन्नः । (यथा, गीतायाम् । १५ । ५ ।
"निर्म्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ।")
विनिहतः, त्रि, विनष्टः । विनिपूर्ब्बकहनधातोः
क्तप्रत्ययेन निष्पन्नः ॥
विनीतः, त्रि, (वि + नी + क्तः ।) विनयान्वितः ।
विनयः शास्त्रतः संस्कारः इन्द्रिययमो वा ।

तत्पर्य्यायः। निभृतः २ प्रश्रितः ३। इत्यमरभरतौ॥ (यथा, रघुवंशे। १४। ७५।
"तपस्विसंसर्गविनीतसत्त्वे
तपोवने वीतभया वसाद्रिन्।")
जितेन्द्रियः। (यथा, तत्रैव।
"ग्राम्यो दान्तः कुलीनश्च विनीतः शुद्धवेशवान्॥")
अपनीतः। (यथा, महाभारते। ७।११०।५५।
"विनीतशल्यांस्तुरगांश्चतुरो हेममालिनः॥")
हृतः। इति मेदिनीकारहेमचन्द्रौ॥ क्षिप्तः। इत्यजयपालः॥ क्षतदक्षः। इति क्षीरस्वामी॥ (अशुद्धतनः। यथा, मनौ। ८। ४१।
"तत्साक्षिणो विनीतेन शानविज्ञानवेदिना॥")
विनीतः, पुं, (वि+नी+क्तः।) सुवाहाश्वः। तत्पर्य्यायः। साधुवाही २। इत्यमरः। सुशुवाहनश्चौलकः ३। इति शब्दरत्नावली॥ (यथा, महाभारते। ७। ११०। ५६।
"तांस्तदा रूप्यवर्णाभान् विनीतान् शीघ्रगामिनः॥")
वैशिक्। इति मेदिनी। ते, १५४॥ दमनकवृक्षः। (अस्य पर्य्यायो यथा,—
"उक्तो दमनको दान्तो सुनिपुन्नस्तपोधनः।
गन्धोत्कटो ब्रह्मजटी विनीतः फलपत्रकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) शिक्षितदृषभादिः। इति राजनिर्घण्टः॥
विनीतकं, क्ली पुं, वैनीतकम्। परस्परावाहनम्। इत्यमरटीकायां रायमुकुटः॥
विनीयः, पुं, (वि+नी+"विपूयविनीयजित्रेति।" ३। १। ११७। क्यप्प्रत्ययेन निपातितः।) कल्कः। इति मुग्धबोधव्याकरणम्॥ (यथा,—
"एकातुरुष्कलघुलाभतया विनीयः।"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याधौ एलातैले॥) पापम्। इति सिद्धान्तकौमुदी॥
विनेता, [तृ] पुं, (वि+नी+तृच्।) राजा। आदेष्टरि, त्रि। इति मेदिनी। ते, १५६॥ (यथा, रघुवंशे। १४। २३।
"तेनास लोकः पितरीव विनेत्रा॥")
गुरुः। शिक्षकः। यथा, महाभारते। ११।२६।
"अर्जुनस्य विनेतारमाचार्य्यं साल्वकेतुना।
तं पश्य पतितं द्रोणं कुरूणां द्विजसत्तमम्॥"
यथाच रघुवंशे। ८। ६१।
"स तत्रेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज्ज मुनिम्॥")
विनेयः, त्रि, (वि+नी+यत्।) नेतव्यः। विपूर्ब्बनीधातोर्यत्प्रत्ययेन निष्पन्नः॥ दण्डनीयः। यथा,
"ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृणाम्।
आवयन्त्यर्थलोभेन विनेयास्तेऽपि यान्तः॥"
विनेयाः दण्डनीयाः। इति ज्योतिस्तत्त्वम्॥
विनोदः, पुं, (वि+नुद+घञ्।) कौतूहलम्। इति हलायुधः॥ (यथा, कथासरित्सागरे। १५। १२५।
"बाधते तच्च नैकत्राद् सर्व्वं स मगधेश्वरः।
तत्तत्र रत्नादितोऽस्य विनोदायतनस्य ताम्॥")
क्रीड़ा। इति भूरिप्रयोगः॥ (यथा, भागवते। ३। १६। २४।
"नैतावता ह्याधिपतेर्वत विश्वभर्तुः
स्तोत्रः:तं तव न तस्य स ते विनोदः॥"
अपनयनम्। यथा, शिशुपालवधे। १। ४८॥
"विनोदमिच्छन्नथ दर्पजन्मनो
रथेन कक्षाखिदशैः समं पुनः॥"
प्रमोदः। यथा, हितोपदेशे।
"काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥")
आलिङ्गनविशेषः। तल्लक्षणं यथा। नायको नायिकायाः दक्षिणपार्श्वं वामपार्श्वं वा स्वमध्यदेशे स्वदक्षिणपार्श्वं वामपार्श्वं वा नायिकामध्यदेशे निधाय वक्षसि वक्षः ओष्ठे ओष्ठं दत्त्वा यदाश्लिष्यति ततः। इति कामशास्त्रम्॥ राजगृहविशेषः। यथा,—
"दीर्घे त्रयो राजहंसाः प्रसरे द्वौ प्रतिष्ठितौ।
विनोद एव द्वारार्द्धे त्रिंशत् कोष्ठद्वयं भवेत्॥"
इति युक्तिकल्पतरुः॥
"द्वारशैते गृहान् वक्ष्ये तेषां लक्षणमञ्जसा।
सुनन्दः सर्व्वतोभद्रो भद्रो नान्दीसुखस्तथा॥
विनोदश्च विलासश्च विजयो विमलस्तथा।
रङ्गः केलिर्जयो वीरो द्वारशैते प्रकीर्त्तिताः॥"
इति भविष्योत्तरपुराणम्॥
वि(वि)न्दुः, पुं, (विदि अवयवे+बाहुलकादुः।) जलकणा। तत्पर्य्यायः। एषत् २ एषतः ३ विप्रुट् ४। इत्यमरः॥ एषन्ति ५ विप्रुडित्। इति तट्टीका॥ (यथा, पञ्चतन्त्रे।
"जलबिन्दुप्रपातेन क्रमशः पूर्य्यते घटः।
स हेतुः सर्व्वशास्त्रस्य धर्म्मस्य च धनस्य च॥")
इन्द्रवरुणविशेषः। भ्रुवोर्मध्यम्। रूपकार्थप्रकृतिः। इति मेदिनी। दे, १०-११॥ अनुस्वारः। यथा। "बिन्दुद्विबिन्दुमात्रौ वर्णौ क्रमान्नवौ संज्ञौ स्तः।" इति मुग्धबोधव्याकरणम्॥ अपि च।
"शिवो वह्निसमायुक्तो वामाक्षिबिन्दुभूषितः।
एकाक्षरो महामन्त्रः श्रीसूर्य्यस्य प्रकीर्त्तितः॥"
इति सूर्य्यकवचम्॥
बिन्दूत्पत्तिर्यथा,—
"सच्चिदानन्दविभवात् सकलात् परमेश्वरात्।
आसीच्छक्तिस्ततो नादो नादाद्बिन्दुसमुद्भवः॥"
इति शारदातिलके १ पटलः॥
अपि च।
"आसीद्बिन्दुस्ततो नादो नादाच्छक्तिः समुद्भवा।
नादरूपा महेशानी चिद्रूपा परमा कला।
नादाद्वेव समुत्पन्नः सार्द्धबिन्दुर्महेश्वरि।
सार्द्धचित्रयबिन्दुभ्यो भुजङ्गी कुलकुण्डली॥"
इति कुब्जिकातन्त्रे १ पटलः॥
"बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः।
बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः।
समवायः समाख्यातः सर्व्वागमविशारदैः॥"
इति शारदातिलकः॥

अन्यच्च।
"बिन्दुः शिवात्मकश्चैव बीजं शक्त्यात्मकं स्मृतम्।
तयोर्योगे भवेन्नादस्ताभ्यो जातास्त्रिशक्तयः॥"
इति क्रियासारः॥
वि(वि)न्दुः, त्रि, (वेत्ति तच्छीलः। विदज्ञाने+"विन्दुरिच्छुः।" ३। २। १६६। इति उप्रत्ययो नुमागमश्च निपात्यते।) ज्ञाता। इत्यमरः॥ दाता। इत्यजयपालः॥ वेदितव्यः। इति शब्दरत्नावली॥
वि(वि)न्दुचिबकः, पुं, (बिन्दुभिश्चिबुकविशेषैश्चिबुकः इव।) रोगभेदः। इति शब्दरत्नावली॥
वि(वि)न्दुजालं, क्ली, (बिन्दूनां जालम्।) हस्तिशुण्डोपरिविचित्रबिन्दुसमूहः। इति हेमचन्द्रः॥
वि(वि)न्दुजालकं, क्ली, (बिन्दूनां जालकम्।) गजस्य सुखादिस्थो बिन्दुसमूहः। तत्पर्य्यायः। पद्मकम् २। इत्यमरः। पद्मम् ३। अतएव पद्मी हस्तीति भरतः॥
वि(वि)न्दुतल्लः, पुं, (बिन्दुचिह्नं तल्लं यस्य।) अक्षः। इति हारावली॥ तुरङ्गकः। यथा,—
"बिन्दुतल्लः पुमान् शारिफलके च तुरङ्गके॥"
इति पवर्गीयवर्णादौ मेदिनी॥
वि(वि)न्दुपत्रः, पुं, (बिन्दुः पत्रे यस्य।) भूर्जवृक्षः। इति रत्नमाला॥
वि(वि)न्दुरेखकः, पुं, (बिन्दुविशिष्टा रेखा यत्र। कन्।) पक्षिभेदः। इति शब्दचन्द्रिका॥
वि(वि)न्दुवासरः, पुं, (बिन्दूपातस्य वासरः।) गर्भे सन्तानोत्पत्तिकारकशुक्रपातदिनम्। इति ज्योतिषम्॥
वि(वि)न्दुसरः, [स्] क्ली, (बिन्दुनामकं सरः।) सरोवरविशेषः। यथा,—
"अभ्युत्तरेण कैलासं शिवं सर्व्वौषधिं गिरिम्।
गौरन्तु पर्व्वतश्रेष्ठं हरितालमयं प्रति॥
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः।
तस्य पादे महद्दिव्यं सरः काञ्चनसन्निभम्॥
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः।
गङ्गार्थे स तु राजर्षिरवास बहुलाः समाः॥
दिव्यं यास्यन्ति ये पूर्व्वं गङ्गातोयपरिप्लुताः।
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता॥
सोमपादात् प्रसूता सा सप्तधा प्रतिभज्यते।
यूपा सप्तमयास्तत्र चितयश्च हिरण्मयाः॥
तत्रेष्ट्वा क्रतुभिः सिद्धः शक्रः सुरगणैः सह।
दिव्यस्थापयतश्चत्र नक्षत्राणान्तु मण्डलम्॥
दृश्यते भास्वरा रात्रौ देवी त्रिपथगा तु सा।
अन्तरीक्षं दिवञ्चैव भावयित्वा भुवं गताः॥
भवस्य खार्द्धे पतिता संरुद्धा योगमायया।
तस्या ये बिन्दवः केचित् च्युतायाः पतिता भुवि।
ऋतस्तु तैर्बिन्दुसरस्ततो बिन्दुसरः स्मृतम्॥"
इति मात्स्ये। १२०। २७—३१॥
विन्ध्यपत्री, स्त्री. ज्वरापहा। इति शब्दचन्द्रिका॥ बेलगुंटा इति भाषा॥

विन्धसः, पुं, चन्द्रः। इति त्रिकाण्डशेषः॥
विन्ध्यः, पुं, पर्व्वतविशेषः। इत्यमरः॥ (यथा, मनौ। २। २१।
"हिमवद्विन्ध्ययोर्मध्यं यः प्राग्विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः॥")
बाधः। इति मेदिनी॥ विन्ध्यपर्व्वतस्य निम्नग्रहणत्वकारणम्। यथा,—
नारद उवाच।
"किमर्थमद्रिं भगवानगस्त्य-
स्तं निम्नगं छलवान् महर्षिः।
कस्मै कृते केन च कारणेन
तन्नस्तदस्याखिलसत्त्ववृत्तेः॥
पुलस्त्य उवाच।
पुरा हि विन्ध्येन दिवाकरस्य
गतिर्निरुद्धा गगनेचरस्य।
रविस्ततः कुम्भभवं समेत्य
होमावसाने वचनं बभाषे॥
समागतोऽहञ्च द्विजवर्य्य त्वां
कुरुष्व मय्युद्धरणं मुनीन्द्र।
ददस्व दानं मम यन्मनीषितं
चरामि येन त्रिदिवे सुनिर्वृतः॥
इत्थं दिवाकरवचो गुरुसङ्गयोगि
श्रुत्वा तदा कलसजो वचनं बभाषे।
दानं ददामि तव यन्मनसा त्वभीष्टं
नार्थी प्रयाति विमुखो मम कश्चिदेव॥
श्रुत्वा वचोऽमृतमयं कलशोद्भवस्य
प्राह प्रभुः करपुटं प्रणिधाय मूर्द्ध्नि।
एतोऽस्त मे गिरिवरः प्रदहन्हि मार्गं
विन्ध्यस्य निम्नकरणे भगवान् यतस्व॥
इति रविवचनादुवाच कुम्भजन्मा
छलमिति तद्धि मया हि नीचसङ्गम्।
तव किरणजितो भविष्यतीति मद्दीप्तो
मम हि शरणमागतस्य का व्यथा ते॥
इत्येवमुक्त्वा कलशोद्भवस्तु
सूर्य्यञ्च संस्तूय विनम्य भक्त्या।
जगाम संलक्ष्य हि दक्षकं हि
विन्ध्याचलं दृढवपुर्महर्षिः॥
गत्वा वचः प्राह मुनिर्महीध्रं
वाञ्छे महातीर्थवरं सपुण्यम्।
दृढोऽप्यशक्तश्च तवाधिरोढुं
तस्माद्भवान् नीचतरोऽस्तु सद्यः॥
इत्येवमुक्तो मुनिसत्तमेन
स नीचसङ्गच्छलभवन् महीध्रः।
समाक्रमच्चापि महर्षिमुख्यः
प्रोल्लङ्घ्य विन्ध्यं द्विज आह शैलम्॥
यावन्न भूयो निजमाव्रजामि
महाश्रमं धौतवपुः सुतीर्थात्।
तथा न तावत्त्विह वर्द्धितव्यं
न चेत् प्रपिण्ड्योऽहमवज्ञया ते।
इत्येवमुक्त्वा भगवान् जगाम
दिशं स यामीं सहसान्तरीक्षम्।
आक्रम्य तस्थौ स हि तां तदाशां
काले व्रजन्यच्च यदा मुनीन्द्र॥
तत्राश्रमं रम्यतरं हि कृत्वा
संशुद्धजाम्बूनदतोरणान्तम्।
तत्राथ निःक्षिप्य विदर्भपुत्रीं
स्वमाश्रमं सौम्यसुयाजगाम॥
ऋतावृतौ कार्य्यपरो मुनीशो
नित्यं तदा स्वाश्रममावसत् सः।
ग्रीष्मञ्च कालं स हि दक्षकस्य-
स्तपश्चचारामितकान्तिमान्मुनिः॥
विन्ध्योऽपि दृष्ट्वा गगने महाश्रमं
वृद्धिं न यात्येव भयान्महर्षेः।
नासौ निवृत्तेऽभिमतिं निधाय
स संस्थितो नीचतरोग्रसङ्गः॥
एवं त्वगस्त्येन महाचलेन्द्रः
स नीचसङ्गो हि कृतो महर्षे।
तस्योर्द्धसङ्गे मुनिसंस्तुता सा
दुर्गा स्थिता दानवशासनार्थे॥
देवाश्च सिद्धाश्च महोरगाश्च
विद्याधराभूतगणाश्च सर्व्वे।
सर्व्वास्त्रोभिः सहिता दिवानिशं
कालायनीं तस्थुरुपेतशोकाः॥"
इति वामनपुराणे देवीमाहात्म्ये ११ अध्यायः॥
"आर्य्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमाद्रयोः॥"
इत्यमरः॥
"विन्ध्यस्य पश्चिमे भागे मनुष्यश्चुक् पतितो भवेत्॥"
इति प्राचीनाः॥
विन्ध्यकूटः, पुं, (विन्ध्ये कूटं माया कैतवं वा यस्य। यद्वेन तस्यावलोकरत्वादस्य तथात्वम्।) अगस्त्यमुनिः। इति त्रिकाण्डशेषः॥
विन्ध्यवासी, [न्] पुं, (विन्ध्ये वसतीति। वस+णिनिः।) बाणासुरः। इति हेमचन्द्रः॥
विन्ध्यवासिनी, स्त्री,(विन्ध्ये वसतीति। वस+णिनिः। ततस्त्रियां ङीप्।) दुर्गा। यथा,—
"सहसाप्योऽपि तां यस्य विन्ध्ये वेगाज्जगाम ह।
तत्र गत्वा तपोवाच तिलकाच्च महावने॥
पूज्यमाना सुरैर्नित्या ख्याता त्वं विन्ध्यवासिनी।
तत्र स्थाप्य हरिर्देवीं दत्वा सिंहञ्च वाहनम्।
भवामरारिहन्नीति मुक्त्वा स्वर्गमवाप्नुयात्॥"
इति वामने ५१ अध्यायः॥ ७॥
अन्यच्च देवीपुराणे ३५ अध्याये।
"विन्ध्येऽवतीर्य्य देवार्थे हतो घोरो महाभटः।
अद्यापि तत्र सा यात्रा तेन सा विन्ध्यवासिनी॥"
विन्ध्यस्थः, पुं, (विन्ध्ये विन्ध्यपर्व्वते तिष्ठतीति। स्था+कः।) बाड़ुसुविः। इति जटाधरः॥
विन्ध्या, स्त्री, लवलीवृक्षः। इति मेदिनी॥ जुटिः। इति हेमचन्द्रः॥ एलापि इति भाषा॥
विन्ध्यावली, स्त्री, बलिपत्नी। बाणराजमाता। इति पुराणम्। (यथा, भागवते। ८। २०। १७।
"विन्ध्यावली तदागत्य पत्नीभाजकमाविशत्।")
विन्ध्यावलीपुत्रः, पुं, (विन्ध्यावल्याः पुत्रः।) बाणराजः। इति त्रिकाण्डशेषः॥
विन्ध्यावलीसुतः, पुं, (विन्ध्यावल्याः सुतः।) बाणराजः। इति जटाधरः॥
विन्नः, त्रि, (विद्+क्तः। "गुदविदेति।"८।२।५६। नत्वम्।) विचारितः। प्राप्तः। इत्यमरः॥ ज्ञातः। स्थितः। इति विश्वः॥
विन्यस्तः, त्रि, (वि+नि+अस+क्तः।) न्यस्तविन्यासः। यथा,—
"सद्भक्त्या गुरुगुल्फिता सुरुचिरां यत्कर्म्मभां
शापिका
सत्सामान्यविशेषनिश्चयमिलिता भावप्रकर्षोज्ज्वला।
विद्योर्वैद्यधि विश्वनाथचरितैर्विद्वान्मुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम्॥"
इति सिद्धान्तमुक्तावली॥
विन्यासः, पुं, (वि+नि+अस+घञ्।) विन्यासः। इति शब्दचन्द्रिका॥ न्यासियान् इति भाषा॥
विन्यासः, पुं, (वि+नि+अस+घञ्।) न्यासनम्। रचनम्। यथा, भागवते। वैष्णवे तु।
"एकैकवर्णसुधार्थं मूलाधाराच्छिरोऽन्तकम्।
नमोऽन्तमिति विन्यास आन्तरः परिकीर्त्तितः॥"
अपि च।
"ओमाद्यन्तो नमोऽन्तो वा सबिन्दुर्बिन्दुवर्জ्जितः।
षडाद्यष्टार्णविन्यासः क्रमादुक्तो मनीषिभिः॥"
इति भद्रः। इति तन्त्रसारः॥
अन्यच्च।
"यत्रेषु सन्धिविन्यासो विज्ञेयो न च दण्डवत्।
विसृष्टजीरकन्यासो विधेयः सदनोपरि।
तेन सर्व्वाणि नश्यन्ति अरिष्टानि मही-
भुजाम्॥"
इति युक्तिकल्पतरुः॥
किञ्च।
"तया कवितया किंवा तया वनितया च किम्।
पदविन्यासमात्रेऽपि यया नायकृतं मनः॥"
इत्युद्भटः॥
विप, क क्षेपे। इति कविकल्पद्रुमः॥ (चुरा०-परo सकo-सेट्।) क, वेपयति। इति दुर्गादासः॥
विपक्षः, पुं, (विरुद्धः पक्षो यस्य।) शत्रुः। इत्यमरः॥ (यथा, हरिवंशे। ५२। ५४।
"तत्र यंस्ता विभज्यन्तां विपक्षः पक्ष एव च।
पुत्राणां हि तयो राज्ञो भविता विग्रहो महान्॥"
यथा च रघुवंशे। १७। ७५।
"इन्दोरंशतयः पद्मे सूर्य्यस्य कुमुदेऽग्रयः।
गुणास्तस्य विपक्षेऽपि गुणिनो वेभिरेऽन्तरम्॥"
न्यायमते साध्याभाववत्पक्षः। यथा, भाषापरिच्छेदे। ७१।

"यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः।"
"सपक्षविपक्षवृत्तिः साधारणः। सपक्षः साध्यवान्। विपक्षः साध्याभाववान्।" इति सुक्तावली। विकल्पः पक्षः। उत्कारकरणम्। यथा, आर्य्यासप्तशत्याम्। ३५४।
"प्रतिभूः सुकवौ विपक्षे दक्षः प्रहारसंकथा गुरुषु॥"
विगतः पक्षो यस्य। पक्षहीने, त्रि।)
विपक्षिका, स्त्री, (वि+पक्षि विस्तारे+खुल्। स्त्रियां टाप् अत इत्वञ्च।) वीजा। इति शब्दरत्नावली।
विपक्षी, स्त्री, (वि+पक्ष+अच्। स्त्रियां गौरादित्वात् ङीष्।) वीजा। इत्यमरः। (यथा, कथासरित्सागरे। ६६। २०।
"अहं श्वेतद्विजानामि तन्नीमद्दारजन्मजे:। इत्युक्ता गुरुशर्म्माद्दानां विपक्षीं सुमोच सः॥") केलिः। इति मेदिनी। के, १७।
विपणः, पुं, (वि+पण व्यवहारे+घञ्। संज्ञापूर्व्वकत्वात् न वृद्धिः।) विक्रयः। इत्यमरः। (यथा, मनौ। १। १५२।
"विपणेन च जीवन्तो वर्ज्ज्याः स्युर्वैद्यकस्तथा॥"
विशेषेण पण्यतेऽस्मिन्निति। विपणिः। यथा, महाभारते। १२। ६८। ५३।
"विश्रामान् राजमार्गेषु कारयेत नराधिपः। प्रपाश्च विपणांश्चैव यथोद्देशं समादिशेत्॥")
विपणिः, पुं स्त्री, (विपण्यतेऽस्मिन्निति। वि+पण+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) पण्यविक्रयस्थानम्। इति हेमचन्द्रः। वृद्धः। इत्यजे। विक्रयार्थेप्रसारितनानाद्रव्यायां श्रेणिरथ्यायां वणिग्वीथ्यां वाणियावीथी इति बाजार इति च ख्यातायामिति केचित्। वृद्धमल्पः। इति केचित्। वृद्धमध्यस्थपण्यविक्रयवीथी। इति केचित्। इति भरतः। तत्पर्य्यायः। पण्यवीथिका २। इत्यमरः। आपणः ३ पण्यवीथी ४ पण्यम् ५। इति रभसः। निषद्या ६ वणिक्पथम् ७। इत्यमरदत्तः। विपणम् ८ वीथी ९। इति कोषः।
"निषद्या विपणिः पण्यवीथिका त्वापणिश्चथा। पण्यविक्रयशालायां भवेद्देशचतुष्टयम्॥"
इति शब्दरत्नावली।
"विपणिः पण्यवीथ्याञ्च भवेदापणपण्ययोः।"
इति मेदिनी। णे, ७८।
(यथा, महाभारते। ६। ३५। ३०।
"विपणध्वापणपण्यानां नानाजनगृहैर्वृतः॥"
वाणिज्यम्। यथा, मनौ। १०। ११६।
"विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः कृषिः।
धृतिर्भैक्षं कुसीदञ्च दश जीवनहेतवः॥")
विपणी, [न्] पुं, (विपण्यः विक्रयोऽस्यास्तीति। विपण+इनिः।) वणिक्। इति जटाधरः। (यथा, शिशुपालवधे। ५। २४।
"पूर्णापणा विपणिनो विपणीर्विमेदुः॥")
विपत्नी, स्त्री, (विपति+वा ङीष्।) हृद्रः। इति हिरूपकोषः। (यथा, कथासरित्सागरे। २०। ६५।
"ययौ भोजनमल्याथौ विपत्नीमात्मलक्षकः॥")
विपत्तिः, स्त्री, (वि+पद+क्तिन्।) आपत्। विपत्। इत्यमरः। यातना। इति मेदिनी। ते, १५६। यथा,—
भृगुरुवाच।
"श्रुतं सर्व्वं सुरश्रेष्ठ मारोदीर्व्वचनं मृषा। न कातरो हि नीतिज्ञो विपत्तौ च कदाचन। सम्पत्तिर्व्वा विपत्तिर्व्वा नश्वरा स्वप्नरूपिणी। पूर्व्वकर्म्मायत्ता च स्वयं कर्त्ता तयोरपि॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३४ अध्यायः।
विनाशः। यथा,—
"यस्मिन राष्ट्रिगते भावौ विपत्तिं यान्ति मानवाः।
तेषां तत्रैव कर्त्तव्या पिण्डदानोदकक्रिया॥"
इति मलमासतत्त्वम्।
विपथः, पुं, (विरुद्धः पन्थाः। "ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। इत्यकारप्रत्ययः।) निन्दितपथः। तत्पर्य्यायः। अध्वः २ दुरध्वः ३ कदध्वा ४ कापथः ५। इत्यमरः। कुपथः ६ असत्पथः ७ कुत्सितवर्त्म ८। इति शब्दरत्नावली। (यथा, महाभारते। १२। ३५६। ११।
"सत्यं कथमृतं ब्रूयां यास्यामि विपथं वद॥")
विपत् } स्त्री, (वि+पद्+सम्पदादित्वात् क्विप्।)
विपद् } विपत्तिः। इत्यमरः। (यथा,—
"कैवर्त्तकर्क्कशकरात् सफरच्युतोऽपि जाले पुनर्निपतितः सफरो विपाकः।
दैवात्ततो विगलितो गिलितो बकेन वामे विधौ वद कथं विपदां निवृत्तिः॥"
इत्युद्भटः।
यथा च माघवे। १। ६। १५।
"यत्र धर्म्मसुतो राजा गदापाणिर्व्वृकोदरः।
ज्ञातोऽन्धो गाण्डिवं चापं सुहृत् ज्ञातस्ततो विपत्॥")
विपदा, स्त्री, (विपद्+भागुरिमते इलज्ञानां टाप्।) विपत्। इत्यमरटीकायां रायमुकुटः।
विपन्नः, त्रि, (वि+पद+क्तः।) विपदाक्रान्तः। इति मेदिनी। ने, १३४। नष्टः। इति शब्दरत्नावली।
विपन्नः, पुं, सर्पः। इति मेदिनी। ने, १३४।
विपरीतः, त्रि, (वि+परि+इ+क्तः।) विपर्य्ययः। उल्टा इति भाषा। तत्पर्य्यायः। प्रतिसख्यः २ प्रतिकूलः ३ अपसव्यः ४ अपष्टुः ५ विलोमकः ६। इति जटाधरः। प्रसव्यम् ७ पराचीनम् ८ प्रतीपम् ९। इति शब्दरत्नावली। (यथाच शङ्करदिग्विजये।
"मत्तो जातः कलङ्काग्नौ विपरीतानि भाषसे। सत्यं ब्रवीषि पिङ्गत्वं त्वत्तो जातः कलङ्गसुक्॥"
सुम्भुः। यथा, रामायणे। ६। १०। १५।
"स च न प्रतिजग्राह रावणः कालचोदितः। उच्यमानं हितं वाक्यं विपरीत इवौषधम्॥")
घोरङ्गरतिबन्धान्तर्गतदण्डमबन्धः। यथा,—
"पादमेकमधरौ कृत्वा द्वितीयं कटिसंस्थितम्। नारीषु रमते कामी विपरीतस्तु बन्धकः॥"
इति रतिमञ्जरी।
अपि च।
"पादमेकमधरौ कृत्वा द्वितीयं स्कन्धसंस्थितम्। कामिन्याः कामयेत् कामी बन्धः स्यादविपरीतकः॥"
इति स्मरदीपिका।
विपरीता, स्त्री, वासुकी। इति धनञ्जयः।
विपर्व्वगः, पुं, (विगतानि पर्व्वाणि यस्य।) पलाशवृक्षः। इति शब्दचन्द्रिका। (पर्व्वरहिते, त्रि।)
विपर्य्ययः, पुं, (वि+परि+इ+"अरच्।" इत्यच्।) व्यतिक्रमः। तत्पर्य्यायः। व्यत्ययः २ विपर्य्यासः ३ व्यत्ययः ४। इत्यमरः। विपर्य्यायः ५। इति भरतः। (यथा, भागवते। १०। १। ५०।
"विपर्य्ययो वा किं न स्यादगतिर्धातुर्दुरत्यया। उपस्थितो निवर्त्तेत निवृत्तः पुनरापतेत्॥"
सांख्यनये विपर्य्ययाः पञ्च। ते च सांख्यकारिकायां दृष्टव्याः।)
विपर्य्यायः, पुं, (विगतः पर्य्यायो यस्य। यद्वा, वि+परि+इ+घञ्।) विपरीतमयनम्। अन्यस्यान्यरूपत्वम्। इति भरतः।
"विपर्य्याये कुलं नास्ति न कुलं रक्तपित्तयोः।"
इति कुलाचार्य्यकारिका।
विपर्य्यासः, पुं, (वि+परि+अस+घञ्।) विपर्य्ययः। इत्यमरः। (यथा, उत्तरचरिते। २
"पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम्। बहोर्दूरं काजादपरमिव मन्ये वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं दृढयति॥"
अप्रमात्मकबुद्धिभेदः। यथा, भाषापरिच्छेदे।
"तच्छून्ये तत्प्रतियोत्सादप्रमा सा निरूपिता। तत्प्रकारो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः। आद्यो देहे ह्यात्मबुद्धिः शुक्त्यादौ रौप्यतामतिः॥"
"आद्यो विपर्य्यासः।" इति मुक्तावली।)
विपर्व्वं, त्रि, (वि+पू+"अर्च्चो यत्।" इति यत्।) शोधनीयम्। विपूर्व्वपूधातोर्यप्रत्ययेन निष्पन्नम्।
विपर्व्वा, [न्] पुं, वृक्षभेदः। इति हेमचन्द्रः।
विपश्चित्, त्रि, (विशेषं पश्यति विपश्यं चेतति चिनोति चिन्तयति वा। पृषोदरादित्वात् साधुः।) पण्डितः। इत्यमरः। (यथा, मनौ। ७। ५८।
"सर्व्वेषान्तु विदित्वेदं ज्ञानेन विपश्चिता।")
विपाकः, पुं, (वि+पच+भावे कर्म्मणि वा घञ्।) पचनम्। (यथा, भागवते। ५। १६। २०।
"तावदुभयोरपि रोधसोर्या न्तिका तरसेनाशु-विध्यमाना वायुकृतसंयोगविपाकेन सहामरलोकाभरणं आम्बूनदं नाम सुवर्णं भवति॥")

खेदः। कर्म्मणो विषदृक्फलम्। इति मेदिनी॥ (फलमात्रम्। यथा, भागवते।१०।८१।१०।
"जरासन्धवधः क्षत्रं भूम्यर्थायोपकल्पते।
प्रायःपाकविपाकेन तव चाभिमतः क्रतुः॥"
चरमोत्कर्षः। यथा, तत्रैव। ४।६।२।
"सर्वे धिया योगविपाकतीव्रया
हृत्पद्मकोषे स्फुरितं तडित्प्रभम्॥")
परिणामः। दुर्गतिः। स्वादुः। इति हेमचन्द्रः॥ आनिः। आयुः। भोगः। इति कृसुमाञ्जलिः॥ ●॥ (कर्म्मफलरूपस्यैव विपाकस्य चैविध्यम्। यथाच पातञ्जले। २।१३।
"सति मूले तद्विपाको जात्यायुर्भोगाः॥"
"सतस्तु क्लेशेषु कर्म्माशयो विपाकारम्भी भवति नोच्छिन्नक्लेशमूलोऽपि। यथैव तुषावनद्धाः प्रालितस्तुषा दग्धबीजभावाः प्ररोहसमर्था भवन्ति नापनीततुषा दग्धबीजभावा वा। तथा क्लेशावनद्धः कर्म्माशयो विपाकप्ररोही भवति नापनीतक्लेशोन्मूलनप्रलयानदग्धबीजभावो वेति। स च विपाकस्त्रिविधो जातिरायुर्भोगश्चेति॥"
इति तद्भाष्यम्॥)
"जाठरेणाग्निना योगात् यदुद्देति रसान्तरम्।
रसानां परिणामान्ते स विपाक इति स्मृतः॥"
इति सुश्रुतः॥
अपि च।
"मिथः कटुश्च मधुरमम्लोऽम्लं पचते रसः।
कटुतिक्तकषायाणां पाकः स्यात् प्रायशः कटुः॥"
तथा च वाग्भटः।
"त्रिधा रसानां पाकः स्यात् स्वाम्लकटुकात्मकः॥"
प्रायः पदेन स्त्रीहिः स्वादुरम्लविपाकः। स्त्रिया कषाया मधुपाका। मुस्ता कटुकमधुरपाकेत्यादिः॥ ●॥ अथ विपाकानां गुणाः।
"स्निग्धमधुरः पाको वातपित्तहरो मतः।
अम्लस्तु कुरुते पित्तं वातश्लेष्मप्रदापहः॥
कटुः करोति पचनं कर्म पित्तच वाग्यवेत्।
विद्ग्धे एव रसतो विपाकानां निदर्शितः॥"
इति भावप्रकाशः॥
(तथास्य विवरणम्।
"नेलाकुरम्बे। विपाकः प्रधानमिति कस्मात् सम्यङ्मिथ्याविपाकत्वादिह सर्व्वप्राण्यभ्यवहृतानि सम्यङ्मिथ्याविपक्वानि गुरूणि दोषं वा जनयन्ति। तत्राकुरम्बे प्रतिरसं पाक इति। केचित्त्रिविधमिच्छन्ति मधुरमम्लं कटुकञ्चेति तत्तु न सम्यक् भूतगुणादागमाच्चान्यो विपाको नास्ति पित्तं हि विदग्धमम्लतासुपैत्यम्लमेन्दवात्। यद्येवं सर्व्वोऽन्यः पाको भविष्यति स्निग्धादिविदग्धो लवणतासुपैति मधुरो मधुरस्नाय्वोऽम्लस्त्वेवं सर्व्वेषामिति। केचिदाकुर्द्दारान्तं चोपदिशन्ति यथा तावत् चीरं स्वाभीगतमभिमानं मधुरमेवस्थास्तथा स्नायिवसुक्षादयः प्रकीर्णाः स्वभावसुत्तरकालेऽपि न परित्यजन्ति तदिति।"
"किञ्चिद्रसविपाकाभ्यां दोषं हन्ति करोति वा॥"
इति सुश्रुते सूत्रस्थाने ४० अः॥)
विपाट्, [ट्] स्त्री, विपाशानदी। इत्यमरः॥ (यथा, ऋग्वेदे। ३।३३।१।
"गावेव शुभ्रे मातरा रिहाणे
विपाट्छुतुद्री पयसा जवेते॥"
"विपाट् कूलविपाटनात् विपाशनात् श्रुतपुत्रमरणोद्भूततमोहतेर्मूलधातोर्विशिष्टस्य पाशा अस्यां विपाशन्त विमोचनाद्वा विपाट्। शुतुद्री शुचिप्रं तुना तुमेव द्रवति गच्छतीति शुतुद्री एतन्नाम्न्यौ नद्यौ। प्रजवेते वसुदं प्रति शीघ्रं गच्छतः। ●●● विपाट् पटगतौ। पशुबाधनसर्ज्जनयोरितिवा ख्यन्तावेतौ विपूर्व्वौ अकारस्य ह्रस्वादिका वलम्॥" इति तद्भाष्ये सायणः॥)
विपा(ट)ठः, पुं, वाजः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। २७०। १७।
"एकेकेन विपाठेन अग्ने माद्रवतीसुतः॥"
स्त्री, दुर्गमराजभार्य्या। यथा, मार्कण्डेये। ७५। ३६।
"विपाठां नन्दिनीञ्चैव वैश्नि भार्य्यां यशे द्विज॥")
विपादिका, स्त्री, पादस्फोटः। इत्यमरः॥ (यथा, राजतरङ्गिण्याम्। ८। १६०।
"छिन्नोपानत कण्टकव्रण शतं चर्म्मस्पृशेऽपितम्।
विपादिकाक्षते दाक्षा नीतं पद्माशतो हृतम्॥")
"वैपादिकं पादविपादे स्फुटनं तीव्रवेदनम्।
कर्कुमञ्जिः वरागेच गर्द्दैरक्षवकं चितम्॥"
विपादिका वातश्लेष्मक्षया। इति माधवकरः॥ अयं कुष्ठरोगः॥ (अस्या लक्षणम्। यथा,—
"कर्कूमती दाहरुजोपपन्ना
विपादिका पादगतैवमेव॥"
इति सुश्रुते निदानस्थाने पञ्चमेऽध्याये॥)
प्रदेशिका। इति शब्दमाला॥ ●॥
विपाश्, स्त्री, (पाशं विमोचयतीति। पाश+"सत्यापपाशेति।" ३।१।२५। विमोचने क्विप्। ततः पचाद्यच्।) नदीविशेषः। इत्यमरः॥ पुत्रशोकादेव गते पाशं वद्धा प्रविष्टं वशिष्ठं पाशच्छेदात् विपाशितवती विसृतवती पाशं यस्यां सा विपाशा। निः कस्यादेरिति पार्श्वं विमोचयति इत्यर्थे निः पचाद्यिलादच् आप्। एवं क्विपि विपाट्। इति तट्टीकायां भरतः॥●॥ (यथा, हरिवंशे। २६६। २०।
"इरावती विपाशाच सरयूर्यमुना तथा॥")
तस्या जलगुणाः।
"श्रुतस्तोर्विपाशायाजलः सिन्धुसमाः
सुशीतं लघु स्वादु सर्व्वामयहरम्।
जलं निर्म्मलं दीपनं पाचनच
प्रदत्ते बलं बुद्धिमेधायुषच॥"
इति राजनिर्घण्टः।
(अस्या नामनिरुक्तादि विशेषविवरणं महाभारते। १। १७८। अध्याये द्रष्टव्यम्। अस्याः क्षीरे पौढस्थाने अमोघाक्षीदेवी वर्णते। यथा, देवीभागवते। ७। ३०। ४५।
"विपाशायाममोघाक्षी पाटला पुरुहूतने॥"
तथा अत्र यशस्करनामकविष्णुमूर्त्तिरपि वर्णते। यथा, नरसिंहपुराणे ६२ अध्याये।
"यशस्करं विपाशायां माहिष्मत्यां हुताशनम्॥"
विगतः पाशो यस्य।) पाशवर्ज्जिते, त्रि। इति धरणिः॥ (यथा, महाभारते।३।२३०।६।
"अत्र वै पुत्रशोकेन वशिष्ठो भगवानृषिः।
महात्मानं निपतितो विपाशः पुनरुत्थितः॥"
पाशाच्छेदने च त्रि। यथा, हरिवंशे। ३७। ३८।
"निर्व्यापारः क्षतस्नेह विपाशो वरजो भव॥")
विपिनं, स्त्री, (वेपन्ते जना यत्रेति। "वेपितृसृभ्यः इनच्।" उणा० २। ५२। इनच्। ह्रस्वश्च।) वनम्। इत्यमरः॥ (यथा, महाभारते।
"यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसा न च कृतं तदिहाभ्युपैति।
प्रातर्भवामि वसुधाधिपचक्रवर्त्ती
सोऽहं व्रजामि विपिने जटिलस्तपस्वी॥"
औतिप्रदे, त्रि। यथा, भागवते।६।१५।२३।
"स एकदा तुं रुगयां विचरन् विपिने वने।
वृकस्त्रयाममपदं ममदमेरुपाविशत्॥"
विजने वने इत्यपि क्वचित् पाठः॥)
विपुलः, त्रि, (विशेषेण पीवतीति। वि+पुष मह्रस्वे+कः।) दृढतः। इत्यमरः॥ (यथा, साहित्यदर्पणे। १०।
"विपुलेन सागरगम्भस्य कुक्षिणा॥")
अगाधम्। इति मेदिनी। ले, १३२।
विपुलः, पुं, (वि+पुष+कः।) मेरुपश्चिमभूधरः। इति मेदिनी। ले, १३२। (अयं हि सुमेरोर्विष्कम्भपर्व्वतानामन्यतमः। यथा, विष्णुपुराणे। २। ३। १७।
"विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः॥"
अस्मिंस्तु पौढस्थाने विपुलेति पीठदेवी वर्णते। यथा, देवीभागवते। ७। ३०। ६६।
"विपुले विपुला देवी कल्याणी मलयाचले॥")
सुमेरुः। हिमाचलः। इति धरणिः॥ (वसुदेवपुत्रः। यथा, भागवते। ६। २४। ३६।
"सत्यं शौचं दयाक्षान्तिस्त्यागः सन्तोष आर्জवम्।
शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम्॥
ज्ञानं विरक्तिरैश्वर्य्यं शौर्य्यं तेजो बलः स्मृतिः।
स्वातन्त्र्यं कौशलं कान्तिर्धैर्य्यं मार्द्दवमेव च॥
प्रागल्भ्यं प्रश्रयः शीलं सहो ऊर्জा बलं भगः।
गाम्भीर्य्यं स्थैर्य्यमास्तिक्यं कीर्त्तिर्मानोऽनहंकृतिः॥
एते चान्ये च भगवन्नित्या यत्र महागुणाः।
प्रार्थ्या महत्त्वमाकाङ्क्षद्भिर्न वियन्ति स आश्रयः॥")
विपुलरसः, पुं, (विपुलो रसो यत्र।) रम्भः। इति केचित्॥
विपुला, स्त्री, (वि+पुष मह्रस्वे+कः। ततस्त्रियां टाप्।) पृथिवी। आर्य्याछन्दोभेदः। इति हेमचन्द्रः। अस्या लक्षणादिर्यथा,—
"यस्या विपुला चपला मुखचपला जघन-
चपला च।
गौलुपगौलुदृगौलय आर्य्यागीतिच सवर्णाम्॥

संकल्प गयत्रयमादिमं सकलयोर्दयोर्भवति पादः ।
यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ॥
पुंसां कलिकालबालहतानां नाख्युपहतिरस्यापि ।
वीर्यविपुला सुखे चेत् स्यात् गोविन्दाख्यमन्त्रकला ॥"
इति छन्दोमञ्जरी ॥
(विपुलपर्वतस्यादेवी । इति देवीभागवतम् । ७ । ३० । ६६ ॥)

विपुलास्रवा, स्त्री, (विपुलं रसं आस्रवतीति । आ + स्रु + अच् । टाप् ।) गुडकन्या । इति राजनिर्घण्टः ॥

विपूयः, पुं, (वि + पू + "विपूयविनीयेति ।" ३ । १ । ११७ । इति कर्म्मणि क्यबन्तनिपातः ।) सुक्षः । इति सुग्धबोधव्याकरणम् । यथा,—
"वासांसां वस्त्रवे शुद्धे विपूये: क्षतमेखलाम् ।
श्यामामञ्जनपिङ्गाभां दक्षिणीमजिनाक्षराम् ॥"
इति भट्टिः । ६ । ६० ॥

विप्रः, पुं, (वप + "ऋषेरन्द्रायवर्षेति ।" उणा० २ । २८ । निपातनात् रप्रत्ययेन साधुः ।) ब्राह्मणः । इत्यमरः । विद्यैर्याति प्राप्नोति पूरयति षट् कर्म्माणि विप्रः । प्रा ल पूर्त्तौ इत्यस्मात् डप्रत्ययः । किंवा । उप्यते धर्म्मबीजमत्र इति वपेर्ण्वीति रे निपातनादत्वम् । इति भरतः । तस्य लक्षणं यथा,—
"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियलक्षणम् ॥"
इति प्रायश्चित्तविवेकः ॥
(यथाच मनौ । १ । ९३ ।
"उत्पत्तिरेव विप्रस्य मूर्त्तिर्धर्म्मस्य शाश्वती ।
स हि धर्म्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ॥"
अस्य पादोदकमाहात्म्यं यथा, ब्रह्मवैवर्त्ते । १ । ११ । १६—३६ ।
"पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे ।
सागरे यानि तीर्थानि विप्रपादेषु तानि च ॥
विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी ।
तावत् पुष्करपात्रेषु पिबन्ति पितरो जलम् ।
विप्रपादोदकं पुण्यं भक्तियुक्तश्च यः पिबेत् ॥
स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
महारोगी यदि पिबेत् विप्रपादोदकं द्विज ।
मुच्यते सर्व्वरोगेभ्यो मासमेकन्तु भक्तितः ॥
अविद्वो वा सविद्वो वा सत्स्वापूतो हि यो द्विजः ।
स एव विष्णुषड्भो मा हरौ विमुखो यदि ॥
ब्रह्मं विप्रं प्रपन्नं वा न हन्यान्नच तं शपेत् ।
गोभ्यः शतगुणं पूज्यो हरिभक्तश्च ब्राह्मणः ॥
पादोदकञ्च नैवेद्यं भुङ्क्ते विप्रस्य यो द्विज ।
नित्यं नैवेद्यभोजी यो राजसूयफलं लभेत् ॥
एकादश्यां न भुङ्क्ते यो नित्यं विष्णुं समर्चयेत् ।
तस्य पादोदकं प्राप्य स्नातं तीर्थं भवेद्ध्रुवम् ॥")
अग्रजः । इति राजनिर्घण्टः । (त्रि, मेधावी । यथा, ऋग्वेदे । १० । ११२ । ६ ।
"निषसाद गणपते गणेषु त्वा माहुर्विप्रतमं कवीनाम् ॥")
"विप्रतमं अतिशयेन मेधाविनम् ।" इति तद्भाष्ये सायणः ॥ स्तवकर्त्ता । यथा, ऋग्वेदे । १० । ४० । ९४ ।
"विप्रस्य वा यजमानस्य वा गृहम् ।"
"विप्रस्य मेधाविनः स्तोतुर्वा ।" इति तद्भाष्ये सायणः ॥)

विप्रकारः, पुं, (वि + प्र + कृ + भावे घञ् ।) अपकारः । तत्पर्य्यायः । निकारः २ । इत्यमरः ॥ (यथा, महाभारते । ९ । ६२ । १४ ।
"तेषान्तु विप्रकारेषु तेषु तेषु महामतिः ।
मोचयो प्रतिकारे च विदुरोऽवहितोऽभवत् ॥")
खलीकारः । इति स्वामी । तिरस्कारः । इति हेमचन्द्रः ॥ (विविधप्रकारः । यथा, महाभारते । ३ । २७५ । ३ ।
"स बाधते प्रजाः सर्व्वा विप्रकारैरसंशयम् ।
ततो नश्यातु भगवान्नाश्यमाना हि विद्यते ॥")

विप्रकाष्ठं, क्ली, तूलवृक्षः । इति राजनिर्घण्टः ॥

विप्रकृतः, त्रि, (वि + प्र + कृ + क्तः ।) तिरस्कृतः । तत्पर्य्यायः । निकृतः २ । इति हेमचन्द्रः ॥ (यथा, कुमारसम्भवे । २ । १ ।
"तस्मिन् विप्रकृता: काले तारकेण दिवौकसः ।
तुराषाहं पुरोधाय धाम स्वायम्भुवं ययुः ॥")

विप्रकृतिः, स्त्री, विप्रकारः । विप्रपूर्व्वकृधातोः क्तिप्रत्ययेन निष्पन्नमिदम् ॥

विप्रकृष्टः, त्रि, (वि + प्र + कृष + क्तः ।) दूरः । इति हलायुधः ॥ (यथा,—
"सन्निकृष्टविप्रकृष्टयभिचारिप्राधानिकमेदाचतुर्धा इति । तच्च ते चयादिकमपेक्ष्यन्ते । विप्रकृष्टो यथा । हेमन्ते निचितः शेष्मा वसन्ते कफरोगकृत् । किंवा सन्निकृष्टो ज्वरस्य रुग्दादिसेवा विप्रकृष्टो दृक्कोपः ।" इति माधवकृत रुग्विनिश्चयव्याख्याने विजयः ॥)

विप्रकृष्टकं, त्रि, (विप्रकृष्ट एव । स्वार्थे कन् ।) दूरम् । इत्यमरः ॥

विप्रचित्तिः, पुं, दनुपुत्रः । यथा,—
सूत उवाच ।
"अभवन्दनुपुत्राश्च वंशे ख्याता महासुराः ।
विप्रचित्तिप्रधानास्ते शृणु तेजःपराक्रमाः ॥"
इति वह्निपुराणे काश्यपीयवंशः ॥
(तथाच महाभारते । १ । ६५ । २१ ।
"चत्वारिंशद्दनोः पुत्राः ख्याताः सर्व्वत्र भारत ।
तेषां प्रथमजो राजा विप्रचित्तिर्महाबलः ॥")

विप्रतिपत्तिः, स्त्री, (वि + प्रति + पद + क्तिन् ।) विरोधः । यथा,—
"परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु ।
वाक्यान्यायादवस्थानं व्यवहार उदाहृतः ॥
भावोत्तरक्रियासाध्यविद्विभिः क्रमवद्भिभः ।
आर्त्तिप्रत्यतुरंशस्तु चतुष्पादभिधीयते ॥"
इति मिताक्षरायां व्यवहारमातृकाः ॥
विस्तृतिः । यथा प्रथमाध्याये कात्यायनसूत्रम् । शब्देऽविप्रतिपत्तिरिति । प्रतिनिर्दिष्टशब्दे सूत्रशब्दः प्रयोज्यः । सूत्रशब्दबुद्ध्या प्रतिनिर्दिष्टपदादानात् शब्दान्तरप्रयोगे द्रव्यान्तरबुद्धिप्रसङ्गात् । इत्यतीतसूत्रम् । (अन्यथाभावः । अरिष्टविशेषः । यथा, सुश्रुते । १ । ३० । "अथातः पञ्चेन्द्रियार्थविप्रतिपत्तिमध्यायं व्याख्यास्यामः ।" एवं छायाविप्रतिपत्तिः । स्वभावविप्रतिपत्तिः ॥)

विप्रतिसारः, पुं, (वि + प्रति + सृ + घञ् ।) विप्रतीसारः । इत्यमरटीकायां रायमुकुटः ॥ (यथा, शिशुपालवधे । २० । २० ।
"प्राप्ति चैतसि स विप्रतिसारे
सुभ्रुवामवसरः सरकैश ॥"
"विप्रतिसारे पश्चात्तापयुक्ते । पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि । इत्यमरः ।" इति तट्टीकायां मल्लिनाथः ॥)

विप्रतिषिद्धं, त्रि, (वि + प्रति + षिध + क्तः ।) निषिद्धम् । इति स्मृतिः ॥

विप्रतीसारः, पुं, अनुतापः । इत्यमरः । कौत्कृत्यम् । अनुशयः । रोषः । इति मेदिनी । रे, ३०७ ॥

विप्रदृष्टः, पुं, (विशेषेण प्रकारेण दृश्यते इति । दृश + घः ।) पलमूलादिशुष्कद्रव्यम् । इति शब्दचन्द्रिका ॥

विप्रप्रियः, पुं, (विप्राणां प्रियः । यद्वीयदुमलात् ।) पलाण्डुवृक्षः । इति केचित् । ब्राह्मणवल्लभे, त्रि । यथा,—
"रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं धार्म्मिकम् ।"
इति रामायणम् ॥

विप्रयाणं, क्ली, (विशेषेण प्रयाणम् ।) पलायनम् । इति केचित् ॥

विप्रयुक्तः, त्रि, (प्र + युज् + भावे क्तः । विगतं प्रयुक्तं प्रयोगो यस्मात् ।) विश्लिष्टः । विभिन्नः । इति केचित् ॥

विप्रयोगः, पुं, (विगतः प्रकृष्टो योगो यत्र ।) विप्रलम्भः । इत्यमरः । विरहो विसंवादो वा । इति स्वामी । रागिणोर्विच्छेदः । इति भरतः ॥ (यथा, मनौ । ९ । १ ।
"पुरुषस्य स्त्रियाश्चैव धर्म्मो वर्त्मनि तिष्ठतोः ।
संयोगे विप्रयोगे च धर्म्मान् वक्ष्यामि शाश्वतान् ॥"
संयोगाभावः । यथा, साहित्यदर्पणे । २ ।
"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता ॥")

विप्रलब्धः, त्रि, (वि + प्र + लभ + क्तः ।) वञ्चितः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ५ । १६९ । २१ ।
"इत्याह राजा राजेन्द्रमिदंवचनमब्रवीत् ।
अभिषङ्गात् प्रकुपितो विप्रलब्धश्चयानघ ॥")

विप्रलब्धा, स्त्री, (विशेषेण प्रलब्धा प्रतारिता ।) स्त्रीयादिनायिकाभेदः । तस्या लक्षणं यथा,— सङ्केतनिकेतने प्रियमनवलोक्य समाकुलहृदया विप्रलब्धा । अस्याश्चेष्टा निर्वेदनिश्वाससखी-जनोपालम्भभयमूर्च्छाचिन्ताश्रुपातादयः । ॥ ॥ सुग्धा विप्रलब्धा यथा,— "आलीभिः प्रपयेरनेककपटैः कुञ्जोदरं नीतया सूर्यं तत्र निरीक्ष्य विप्लुभितया न प्रस्थितं न स्थितम् । मुग्धाः किन्तु नवोढ़नीरजदृशा कुञ्जोपकण्ठे रुषा भाग्यद्भङ्गकदम्बडम्बरचमत्कारशृङ्गो हरः ।" ॥ । मध्या विप्रलब्धा यथा,— "सङ्केतकेलिगृहमेत्य निरीक्ष्य सून्य-मेकौदृशो निभृतनिश्चितताधरायाः । अह्नाय वचनमर्हविकाग्नि नेयं ताम्बूलमर्हकवलीकृतमेव तस्याः ।"॥ प्रगल्भा विप्रलब्धा यथा,— "सूर्यं कुञ्जगृहं निरीक्ष्य कुटिलं विज्ञात-चेतोभवं दूती नापि निवेदिता सहचरी दृष्टापि नो वा तया । ग्रस्तो ग्रहुर चन्द्रशेखर हरश्रीकण्ठ भूयिन् शिव त्रायस्वेति परन्तु पङ्कजदृशा भर्गस्य चक्रे स्तुतिः ।"॥ । परकीया विप्रलब्धा यथा,— "दत्त्वा धैर्यभुजङ्गमद्रि चरणावुल्लङ्घ्य लज्जा-नदी-मज्जौल्लङ्घ्य घनान्धकारपटलं तन्वा न दृष्टः प्रियः । सन्तापाकुलया तया च परितः पाथोधरे गर्ज्जति क्रोधाक्रान्तलताल्तमत्तमहिषध्वान्त्या दृशौ योजिते ।" सामान्या विप्रलब्धा यथा,— "कपटवचनभाजा केनचिद्वारयोषा सकलरसिकगोष्ठीवञ्चिका वञ्चितासौ । इति तरलितरिङ्गद्भङ्गविच्छिन्नचञ्चु-र्हसति विकचकुन्दच्छद्मना केलिहंसः ।" इति रसमञ्जरी ।

विप्रलम्भः, पुं, (वि + प्र + लभ + घञ् । शृङ्गा-रस्य विप्रलम्भः ।) विसंवादः । (यथा, महाभारते । ३ । ३१ । २० । "विप्रलम्भोऽयमत्यन्तं यदि स्यादफला क्रिया; ।") वञ्चनम् । (यथा, महाभारते । ५ । १६१ । १६ । "ततो दशार्णाधिपतेः प्रेष्याः सर्व्वा न्यवेदयन् । विप्रलम्भं यथा दत्तं स च चुक्रोध पार्थिवः ।") विप्रयोगः । विच्छेदः । इत्यमरः । शृङ्गाररस-भेदः । यथा, मुग्धरत्नावल्याम् । "नामान्येतानि शृङ्गारे कैशिकः शुचिरुज्ज्वलः । सम्भोगो विप्रलम्भश्च तस्य भेदद्वयं भवेत् ।"

शृङ्गाराङ्गविशेषः । यथा,— "यूनोरयुक्तयोर्भावो युक्तयोर्वाथ यो मिथः । अभीष्टालिङ्गनादीनामनवाप्तेः प्रवृध्यते । स विप्रलम्भो विज्ञेयः सम्भोगोन्नतिकारकः ।" इत्युज्ज्वलनीलमणिः ।

विप्रलापः, पुं, (वि + प्र + लप + घञ् ।) विरो-धोक्तिः । इत्यमरः । परवचनविरोधिवचनं विप्रलापः । अन्योन्यविवदनमिति यावत् । यथा एको ब्रूते आगतः कल्याणीति अन्यो ब्रूते नहीति । तथाभ्युदाहरन्ति सर्व्वानन्दः । "एकः स्रवन्मधुसरोजमवैति वक्त्र-मन्यः सुधाकिरणबिम्बमदो न्वगाख्यत् । यूनोर्मुहुर्विवदतोर्व्वदने बभूवुः सिद्धान्तवन्मधुपराजिगतागतानि ।" विरुद्धः प्रलापो विप्रलापः घञ् । विरोधे उक्तिर्वचनं विरोधोक्तिः । इति भरतः । (यथा, महाभारते । ६ । ८२ । २५ । "स धर्मराजस्य वचो निशम्य रूक्षाक्षरं विप्रलापाभिरूपम् ।") अनर्थकवाक्यम् । इति हेमचन्द्रः । (यथा, महाभारते । ३ । ५ । २१ । "सत्यं श्रेयः पाण्डव विप्रलापं तुल्यक्षान्तं सह भोज्यं सहार्थैः ।")

विप्रलोभी, [न्] पुं, किंकिरातवृक्षः । इति राज-निर्घण्टः ।

विप्रश्निका, स्त्री, (विविधः प्रश्नोऽस्यस्या इति । विप्रश्न + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) दैवज्ञा । इत्यमरः ।

विप्रियः, पुं, (विरुद्धं प्रीणातीति । प्री + कः ।) अपराधः । तत्पर्य्यायः । मन्युः २ अलीकम् ३ आगः ४ । इति हेमचन्द्रः । (यथा, भाग-वते । ६ । ५ । ४२ । "यन्नस्यं कर्म्मसन्तानां साधूनां गृहमेधिनाम् । क्षतवानसि दुर्म्मर्षं विप्रियं तव मर्षितम् ।") अप्रिये, त्रि । (यथा, महाभारते । १ । १६० । ८ । "पिण्डं पितॄणां युष्मिद्वेत्तत्तेषां विप्रियं भवेत् ।")

विप्रुट्, [ष्] स्त्री, (विशेषेण प्रीणति दहति पापानि । वि + प्रुष् + क्विप् ।) बिन्दुः । इत्य-मरः । (यथा, महाभारते । १३ । १०७ । १३५ । "विप्रुषश्चैव यावन्त्यो नियन्ति नखलात् ।") वेदपाठे विप्रुषो सुखनिर्गतजलबिन्दवो ब्रह्म-बिन्दव उच्यन्ते । ते शुद्धाः । यथा,— "मक्षिका विप्रुषश्छाया गौरश्च सूर्य्यरश्मयः । रजो भूर्वायुरग्निश्च सूर्य्ये नेक्षणि निर्दिशेत् ।" इति शुद्धितत्त्वे मनुवचनम् । (यथा च मनौ । ५ । १४१ । "नोच्छिष्टं कुर्व्वते सुखा विप्रुषोऽङ्गे पतन्ति याः । न स्रस्रभूमि मृतान्यास्यं च दन्तान्तरधिष्ठितम् ।") आचमनकाले सुखनिर्गता विप्रुषो न उच्छिष्ट-जनिकाः । यथा,—

"गोच्छिष्टं कुर्व्वते सुखा विप्रुषोऽङ्गं नयन्ति याः । दन्तवद्दन्तलग्नेषु जिह्वास्पर्शेऽप्युच्छिष्टभवेत् ।" इति कौर्म्मे उपविभागे १३ अध्यायः ।

विप्रोषितः, त्रि, प्रवासितः । विप्रपूर्ब्बकवसधातोः क्तप्रत्ययेन निष्पन्नः ।

विप्लवः, पुं, (वि + प्लु + अप् ।) परचक्रादिभयम् । इति भरतः । राष्ट्राद्युपद्रवः । इति सार-सुन्दरी । तत्पर्य्यायः । डिम्बः २ डमरः ३ । इत्यमरः । (यथा, राजतरङ्गिण्याम् । ८ । १०४९ । "सर्व्वा मण्डलराज्योर्व्वीं वीरः भ्रमितविप्ल-वाम् ।") अस्वकलहः । इति स्वामी । (क्लेशः । उप-द्रवः । यथा, भागवते । ४ । २६ । ६ । "विप्लवोऽभूद्दुःखितानां दुःसहः करुणात्मनाम् । विनाशः । यथा, कथासरित्सागरे । १३ । ८२ । "संमन्त्र्य कौतुकात् यापास्तङ्गार्य्याग्नीलविप्लवम् । चिकीर्षवो ययुः शीघ्रं ताम्रलिप्तीमलक्षिताः ।" विप्लवते इति अच् । जलीयपर्य्यवस्थितः । यथा, महाभारते । ६ । ३ । ५ । "वणिजो नावि भग्नायामगाधे विप्लवे इव ।") विप्लावः, पुं, अश्वस्य प्लुतगतिः । इति विप्लु-प्लुषातोर्घञ् प्रत्ययेन निष्पन्नम् ।

विप्लुट्, [ष्] स्त्री, (विशेषेण प्लोषतीति । वि + प्लुष् + क्विप् ।) विप्रुट् । बिन्दुः । इत्यमर-टीकायां रामाश्रमः ।

विप्लुतः, त्रि, (वि + प्लु + क्तः ।) व्यसनार्त्तः । तत्-पर्य्यायः । पच्यभद्रः २ व्यसनी ३ । इति हेम-चन्द्रः ।

विफलं, त्रि, (विगतं फलं यस्य ।) निरर्थकम् । तत्पर्य्यायः । मोघम् २ वर्थम् ३ । इति जटा-धरः । (यथा, कुमारसम्भवे । ७ । ६६ । "परस्परेण शृङ्गाणि योर्भं न चेदिदं द्वन्द्वमयोजयिष्यत् । अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत् ।")

विफला, स्त्री, (विगतं फलं यस्याः ।) केतकी । इति राजनिर्घण्टः ।

विवन्धः, पुं, आनाहरोगः । इत्यमरः । तस्य चिकित्सा ।

"तुल्यकारणकार्य्यत्वात् उदावर्त्तहरीं क्रियाम् । आनाहेऽपि च कुर्व्वीत विशेषश्चाभिधीयते । चित्रकस्नुक्षा हरीतक्यो द्विपञ्चमूलपञ्चभागिकाः । गुडेन तुल्या वटिका हरन्त्यानाहमुल्बणम् । वत्सकेङ्गिकटुसैन्धवयवक्षारयुक्तमकुलदन्तफलैः । मधुसिन्धुगुडेन वा पक्वैर्निहिता खादुरसपरिभाव्या । वर्त्तिरियं हरफला अग्नेः प्रविधिता गुदे क्षणा-द्भक्ते । आनाहोदावर्त्तौ भ्रमयति जठरं तथा गुल्मम् ।" चिकटुकाद्या वर्त्तिः । इति भावप्रकाशः । (विशेषेण बन्धः । विशेषबन्धनम् । यथा, मह-भारते । ८ । १४० । ४४ । "पादौदरविबन्धेषु भूमावुद्भ्रमणेषु तथा ।")

विबाधा, स्त्री, विशेषेणबाधनम्। इति चिकाण्डशेषः॥
विबुधः, पुं, (विशेषेण बुध्यते इति। बुध+कः।) देवः। इत्यमरः॥ (यथा, मनौ। १२। ४७।
"गन्धर्व्वा गुह्यका यक्षा विबुधानुचराश्च ये॥") पण्डितः। इति मेदिनी। धे, २६॥ (यथा, कथासरित्सागरे। ६३। १०५।
"ब्रवीमि विबुधः खेदं जनानां निभृते कथम्॥" अस्मिन्नर्थे बाधलिङ्गोऽपि दृश्यते॥*॥) चन्द्रः। इति हलायुधः॥
विबुधानः, पुं, (वि+बुध+आनच्।) आचार्य्यः। पण्डितः। देवः। इति संक्षिप्तसारोणादिवृत्तिः॥
विबोधः, पुं, (विगतो बोधः।) अनवधानता। इति केचित्॥ (विशिष्टो बोधः।) प्रबोधश्च॥ (यथा, भागवते। ३। ४। २०।
"स एवमाराधितपादतीर्था-
दवीत तत्त्वात्मविबोधमार्गम्॥"
बोधपचिपुत्रः। यथा, मार्कण्डेये। १। २१।
"पिङ्गाक्षश्च विबोधश्च सुपुत्रः सुमुखस्तथा।
बोधपुत्राः खगश्रेष्ठास्तत्त्वज्ञाः ग्राह्यचिन्तकाः॥")
विबोधनं, क्ली, (वि+बुध+ल्युट्।) प्रबोधनम्। यथा,—
"सुप्ताव योगनिद्रान्तामेकाग्रहृदयस्थितः।
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम्॥"
इति देवीमाहात्म्यम्॥
(जागरणम्। यथा, महाभारते। १।१००।८५
"वीतशोकभयाबाधाः सुखसुप्तविबोधनाः॥"
प्राप्तिबोधके, त्रि। यथा, ऋग्वेदे। ३८। २२।
"अदाद्रायो विबोधनम्।"
"रायो धनस्य विबोधनं विशेषेण बोधकं बहुधनप्राप्तिहेतुमित्यर्थः।"इति तद्भाष्ये सायणः॥)
विभक्तः, त्रि, (वि+भज्+क्तः।) प्राप्तविभागः। विभिन्नः। पृथक्। यथा। दक्षस्मृतिः।
"पित्रा सह विभक्ता ये सापत्न्या वा सहोदराः॥
अपत्यजाश्च ये तेषां पिण्डभागहरास्तु ते।
अनीशः पूर्व्वजः पित्रोराद्यभागे विभक्तजः॥"
विभक्तजो विभागानन्तरं गर्भाधानेन जातः॥
अपि च। व्यासः।
"भ्रातॄणां त्रीवतोः पित्रोः सहवासो विधीयते।
तदभावे विभक्तानां धर्म्मस्तेषां विवर्द्धते॥"
विभक्तानां क्षमाद्यधने वैदिककर्म्मकरणात्तत्साध्यधर्म्मलेन तद्वृद्धिरित्यर्थः।
"विभक्ता अविभक्ता वा सपिण्डाः स्थावरे समाः।
एको ह्यनीशः सर्व्वत्र दानाधमनविक्रये॥"
अपि च।
"दानग्रहणपत्यन्नयज्ञक्षेत्रपरिग्रहाः।
विभक्तानां पृथक् श्रेया धाकधर्म्मागमव्ययाः॥
साक्षित्वं प्रातिभाव्यञ्च दानं यज्ञक्रमेव च।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम्॥
येषामेताः क्रिया लोके प्रवर्त्तन्ते स्वकृतयः।
विभक्तानवगच्छेयुर्वेधर्म्मण्यन्तरेण तान्॥"
इति नारदवचनानि॥
तथा।
"भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि।
प्रातिभाव्यन्तु साक्ष्यमविभक्ते न तत् स्मृतम्॥"
इति याज्ञवल्क्यवचनम्॥*॥
तथा।
"विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः।
पिण्डयेद्यावदा प्रौढ्या स तु संसृष्ट उच्यते॥",
इति दक्षस्मृतिवचने येषामेव हि पिण्डभाक्पिण्डयादीनां पिण्डपितामहोपाधिसंबन्धेन विभक्तत्वसुत्पत्तिः सम्भवति त एव विभक्ताः सन्तः परस्परप्रौढ्या पूर्व्वकृतविभागध्वंसेन यत्तव धनं तन्मम धनं यन्मम धनं तत्तवापि इत्येकस्मिन् कार्य्ये एकपिण्डरूपतया स्थिताः संसृष्टाः। न तेषां रूपाद्या धनसंसर्गमात्रेण। नापि विभक्तानां प्रीतिपूर्व्वकाभिसन्धानं विना॥*॥ तथा।
"बन्धूनामविभक्तानां भोगं नैव प्रदापयेत्॥"
इति कात्यायनवचनम्॥
तथा।
"भ्रातृणामविभक्तानामेको धर्म्मः प्रवर्त्तते।
विभागे सति धर्म्मोऽपि भवेत्तेषां पृथक्पृथक्॥"
तथा।
"भ्रातृणामविभक्तानां यद्युत्थानं भवेत् सह।
न तत्र भागं विषमं पिता दद्यात् कथञ्चन॥"
इति मनुवचनम्॥
तथा। कात्यायनः।
"अविभक्ते मृते पुत्रे ततसुतं ऋक्थभागिनम्।
कुर्व्वीत जीवनं येन लब्धं नैव पितामहात्।
लभेतांशं स पित्र्यं च पितृव्यात् तस्य वा सुतात्॥"
तथा। विष्णुः। पितृविभक्ता विभागानन्तरोत्पन्नस्य विभागं दद्युः॥*॥ अपि च।
"अविभक्तविभक्तानां कुलानां वसतां सह।
भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः॥"
इति कात्यायनवचनम्॥
अविभक्तानां सह वसतां संसृष्टानां वा पुनर्विभागो भ्रातृततसुततसुतपर्य्यन्तमेव ततसुताचतुर्थान्निवर्त्तते। इति॥ तथा।
"अविभक्तं स्थावरं यत् सर्व्वेषामेव तद्भवेत्।
विभक्तं स्थावरं प्राज्ञो नाद्योर्द्वयोः कदाचन॥"
इति यमवचनम्। एतानि वचनादीनि दायतत्त्वधृतानि॥*॥ अपि च।
"अविभक्ता विभक्ता वा कुर्य्युः श्राद्धमदैविकम्।
मघासु च तथाश्वत्र नाधिकारः पृथक् विना॥"
इति श्राद्धतत्त्वम्॥
अन्यच्च।
"बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः।
सर्व्वेषान्तु मतं ज्ञात्वा व्येष्ठेनैव तु यत् कृतम्।
प्रत्येण चाविभक्तेन सर्व्वैरेव कृतं भवेत्॥"
इति शुद्धितत्त्वम्॥

(पुं. कार्त्तिकेयः। यथा, महाभारते। ३।२११।६।
"वसोरिवश्च धर्म्मात्मा पवित्रो माहवत्सलः।
कन्याभर्त्ता विभक्तश्च खाडवेयो रेवतीसुतः॥")
विभक्तजः, पुं, (विभक्ते सति जायते इति। जन+डः।) विभागानन्तरं गर्भाधानेन जातः। यथा। दक्षस्मृतिः।
"पित्रा सह विभक्ता ये सापत्न्या वा सहोदराः।
अपत्यजाश्च ये तेषां पिण्डभागहरास्तु ते।
अनीशः पूर्व्वजः पित्रोराद्यभागे विभक्तजः।
यथा धने तथर्णेऽपि मृता प्रौढोदकक्रियाः॥"
इति दायतत्त्वम्॥
विभक्तिः, स्त्री, (विभजनमिति। संख्याकर्म्मादयो ह्यर्था विभज्यन्ते आभिरिति वा। वि+भज+क्तिन्।) विभागः। स्यादिः आदिश्च। यथा।
"संख्यात्वाद्याश्रयसामान्यैः शक्तिमान् प्रत्ययस्तु यः।
सा विभक्तिर्द्विधा प्रोक्ता सुप्तिङ् मेति प्रभेदतः॥"
संख्यात्वाद्यान्तरजात्यवच्छिन्नशक्तिमान् यः प्रत्ययः सा विभक्तिः। सुप् तिङ् इति भेदाद्द्विविधा। इति शब्दशक्तिप्रकाशिका॥ (उभयार्थोदाहरणम्। यथा, नैषधे। ३। २१।
"क्रियेत चेत् साधु विभक्तिचिन्ता
शक्तिस्तदा सा प्रथमाभिधेया।
वा खौजसां साधयितुं विशेषे-
च्छावत् क्षमा नाम पदं बहु स्यात्॥")
विभजनीयं, त्रि, विभाज्यम्। विभागयोग्यम्। यथा। यदृक्थस्य प्रयोजनार्हं पुस्तकादि तन्मुख्यादिभिः सह पण्डितादिभिर्न विभजनीयम्। इति दायतत्त्वम्॥ भजनार्हम्। विपूर्व्वभजधातोरनीयप्रत्ययेन निष्पन्नम्॥
विभवः, पुं, धनम्। (यथा, मनौ। ४। ३४।
"न जीर्णमलवद्वासा भवेच्च विभवे सति॥")
मोक्षः। ऐश्वर्य्यम्। इति मेदिनी। वे, ५१॥ (यथा, भागवते। ७। ८। ५५।
"भवता हरे स इजितोऽवसादितो
नरसिंह नाथ विभवाय नो भव॥")
प्रभवादिषष्टिसंवत्सराणामेतद्वितीयवर्षम्। यथा, भविष्यपुराणे।
भैरव उवाच।
"सुभिक्षं क्षेममारोग्यं सर्व्वे आधिविवर्जिताः।
प्रजाश्चा मानवास्तत्र बहुधान्या वसुन्धरा।
हृष्टास्तुष्टा जनाः सर्व्वे विभवे च वरानने॥"
इति ज्योतिस्तत्त्वम्॥
विभा, स्त्री, (वि+भा+क्विप्।) किरणः। इति हेमचन्द्रः॥ प्रकाशः। शोभा। इति राजनिघण्टः॥ (यथा, साहित्यदर्पणे। १०।६६०।
"कमलेव मतिर्मतिरिव कमला
तनुरिव विभा विभेव तनुः।
धरणीव धृतिर्धृतिरिव धरणी
सततं विभाति वत यस्य तव॥"
प्रकाशके, त्रि। यथा, ऋग्वेदे। १०।५५।३।

"यदुप औच्छः प्रथमा विभानाम् ।"
"विभानां विभासकानां यद्वनत्वादीनाम् ।"
इति तद्भाष्ये सायणः ।)

विभाकरः, पुं, (वि+भा+क+"दिवाविभानिशेति ।" ३ । २ । २१ । इति टः ।) सूर्य्यः । (यथा, साहित्यदर्पणे । १० । अर्थशैथे ।
"सहसा भूयसाविष्टो विभाति च विभाकरः ।") अर्कवृक्षः । चित्रकवृक्षः । इत्यमरः । अग्निः । इति मेदिनी । रे, २६०। (वि, प्रकाशयतीति ।)

विभागः, पुं, (वि+भज+घञ् ।) भागः । अस्य पर्य्यायः अंशशब्दे द्रष्टव्यः । अस्य लक्षणं यथा ।
"एकदेशोपात्तस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना यद्वनं विभागः । विशेषेण भजनं स्वत्वज्ञापनं वा विभागः ।" इति दायभागः ।
अपि च ।
"विभागोऽयंस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ।"
इति नारदवचनम् ।
पूर्व्वसामिस्वत्वोपरमे सत्यन्यविशेषात् सम्बन्धिनां सर्व्वधनप्रस्तुतस्य स्वत्वस्य गुटिकापातादिना प्रादेशिकस्वत्वव्यवस्थापनं विभागः । ॥ ॥
अपि च । काव्यायनः ।
"जीवद्विभागे तु पिता नैकं पुत्रं विशेषयेत् ।
निर्भाजयेत् न चैवैकमकस्मात् कारणं विना ॥"
उक्तकारणभूयस्त्वे तु नारदः ।
"व्याधितः कुपितश्चैव विषयासक्तचेतनः ।
अयथाशास्त्रकारी च न विभागे पिता प्रभुः ॥"
निवृत्तरजस्कायामेव मातरि पितामहधनविभागमाह बृहस्पतिः ।
"पित्रोरभावे भ्रातॄणां विभागः संप्रदर्शितः ।
मातुर्निवृत्ते रजसि जीवतोरपि दृश्यते ॥"
अन्यच्च । याज्ञवल्क्यः ।
"विभागंचेत् पिता कुर्य्यादिच्छया विभजेत् सुतान् ।
ज्येष्ठं वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः ॥"
अपि च देवलः ।
"अविभक्तविभक्तानां कुल्यानां वसतां सह ।
भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः ॥"
विष्णुः । पित्रविभक्ता विभागानन्तरोत्पन्नस्य विभागं दद्युरिति ।
"गोत्रभागविभागार्थं सन्देहे समुपस्थिते ।
गोत्रजैरापरिज्ञाते कुलं साक्षित्वमर्हति ।"
इति ग्रन्थवचनम् । इति दायतत्त्वम् ॥
सामान्यधर्म्मावच्छिन्नानामेव बहूनां परस्परविरुद्धतदाप्यधर्म्मप्रकारेण प्रतिपादनं हि विभागः । इति आह्निकविवेकटीकायां श्रीरघुनाथतर्कालङ्कारः ॥ ॥ न्यायमते चतुर्विंशतिगुणान्तर्गतगुणविशेषः । स त्रिविधः । यथा,—
"ग्रन्थादेतुर्द्वितीयः स्यात् विभागोऽपि त्रिधा भवेत् ।
एककर्म्मोद्भवस्त्वाद्यो द्वयकर्म्मोद्भवः परः ॥
विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत् ।
हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥"
इति भाषापरिच्छेदः ॥ ॥
विभक्तप्रत्ययकारणं विभागं निरूपयति विभाग इति एककर्म्मेति । उदाहरणन्तु । श्येनश्येनविभागादिकं पूर्व्ववत् बोध्यं तृतीयो विभागजः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति आद्यस्तावत् यत्र कपालकर्म्म ततः कपालद्वयविभागस्ततो घटारम्भकसंयोगनाशस्ततो घटनाशः ततश्चैव एककपालविभागेन सकर्म्मकः कपालस्य देशान्तरविभागो जन्यते तत उत्तरदेशसंयोगः ततः कर्म्मनाश इति । न च तेन कर्म्मणैव कथं देशान्तरविभागो न जन्यते इति वाच्यं एकस्य कर्म्मण आरम्भकसंयोगप्रतिबन्धिविभागजनकत्वानारम्भकसंयोगप्रतिबन्धिविभागजनकत्वविरोधात् अन्यथा विकल्पलाघवकूटगौरवभङ्गप्रसङ्गात् तस्मादृष्टादीदं अनारम्भकसंयोगप्रतिबन्धिविभागं जनयेत्तदा आरम्भकसंयोगप्रतिबन्धिविभागं न जनयेत् । न च कारणविभागेनैव द्रव्यनाशात् पूर्व्वं कृतो देशान्तरविभागो न जन्यते इति वाच्यं आरम्भकसंयोगप्रतिबन्धिविभागवतः अवयवस्य सति द्रव्ये देशान्तरविभागासम्भवात् यत्र हस्तक्रियया हस्ततरुविभागः ततः शरीरेऽपि विभक्तप्रत्ययो भवति तत्र च शरीरतरुविभागे हस्तक्रिया न कारणं अधिकरणत्वात् शरीरे तु क्रिया नास्ति अवयविकर्म्मणो यावद्द्रव्यवकर्म्मनियतत्वात् । अतस्तत्र कारणाकारणविभागेन कार्य्याकार्य्यविभागो जन्यते इति अतएव विभागो गुणान्तरं अन्यथा शरीरे विभक्ताविभक्तप्रत्ययो न स्यात् अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति । इति सिद्धान्तमुक्तावली ॥ ("सामान्यधर्म्मावच्छिन्नानामेव वस्तूनां परस्परविरुद्धतद्दाप्यधर्म्मप्रकारेण प्रतिपादनम् ॥" यथा द्रव्यत्वधर्म्मावच्छिन्नानां क्षित्यादीनां परस्परविरुद्धेन क्षितित्वजलत्वादिना अथ द्रव्यत्वव्याप्येन विशेषेण तथा प्रतिपादनं नवधा द्रव्यविभागः ॥ यागः । । यथा, ऋग्वेदे । ५ । ७७ । ४ ।
"यो भूयिष्ठं नासत्याभ्यां विवेष च निष्ठं मित्ररते विभागे ।"
"यो यजमानो विभागे हविर्व्विभागवति यागे ।"
इति तद्भाष्ये सायणः ॥")

विभाज्यं, त्रि, विभजनीयम् । विभागार्हम् । यथा,
"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा ।
शौर्य्यप्राप्तन्तु यद्वित्तं विभाज्यं तदृणादृते स्यात् ॥
शिष्येष्वपि हि धर्म्मोऽयं मूल्याद्यत्राधिकं भवेत् ।
परं निरस्य यज्ञस्वं विद्यया द्यूतपूर्व्वकम् ।
विद्याधनन्तु तद्विद्यान्न विभाज्यं कदाचन ॥"
तथा ।
"शौर्य्यभाग्यार्जने चोभे यच्च विद्याधनं भवेत् ।
चौर्य्येतान्यविभाज्यानि प्रसादो यच्च पैतृकः ॥"
इति दायतत्त्वम् ।

विभाण्डकः, पुं, मुनिविशेषः । स तु ऋष्यशृङ्गपिता । इति रामायणम् । (यथा, महाभारते । ३ । ११९ । २१ ।
"सोऽपश्यदासीनमुपेत्य पुत्रं
ध्यायन्तमेकं विपरीतचित्तम् ।
विनिश्वसन्तं सुदुरूर्द्धदृष्टिं
विभाण्डकः पुत्रमुवाच दीनम् ।")

विभाण्डी, स्त्री, आवर्त्तकीलता । इति राजनिर्घण्टः ॥

विभातं, क्ली, (वि+भा+क्तः ।) प्रभातम् । इति शब्दरत्नावली ॥

विभावः, पुं, (विशेषेण भावयति रसं सामाजिकानिति । वि+भावि+अच् ।) परिचयः । रसस्योद्दीपनादिः । इति मेदिनी । तल्लक्षणादिर्यथा,—
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम् ॥"
विभावादयो वक्ष्यन्ते । विभावादीनां यथासंख्यं कारणकार्य्यसहकारिले कथं चयाणामपि रसोद्बोधे कारणत्वमित्युच्यते ।
"कारणकार्य्यसञ्चारिरूपा अपि हि लोकतः ।
रसोद्बोधे विभावाद्याः कारणान्वेव ते मताः ।
सङ्कावाच्च विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते ॥
विभावादिपरामर्शविषयत्वात् सचेतसाम् ।
परानन्दमयत्वेन संवेद्यत्वादपि स्फुटम् ।" ॥
"अथ के ते विभावानुभावव्यभिचारिण इत्यपेक्षायां विभावमाह ।
रत्यादेरुद्बोधका लोके विभावाः काव्यनाट्ययोः ।
ये हि लोके रामादिगतरतिहासादीनां उद्बोधकारणानि सीतादय एव काव्ये नाट्ये च निबेशिताः सन्तो विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिरिति विभावा उच्यन्ते ।
आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ।"
इति साहित्यदर्पणे ३ परिच्छेदे ।
(विविधप्रकारेण प्रकाशयति, वि । यथा, ऋग्वेदे । १ । १४८ । १ ।
"न चित्रं वपुषे विभावम् ।"
"विभावं विविधप्रकाशवन्तम् ।" इति तद्भाष्ये सायणः ॥)

विभावनं, क्ली, ((विभावयति कारणं विना
विभावना, स्त्री,) कार्य्योत्पत्तिं चिन्तयति पण्डितमिति । वि+भावि+ल्युः । युच् वा ।) अलङ्कारविशेषः । स च विनाकारणं उपनिबध्यमानोऽपि कार्य्योदयरूपः । यथा,—
"विभावना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते ।

उत्पादयुक्तनिमित्तत्वात् द्विधा सा परिकीर्त्तिता ।"

उक्तहेतौ यथा,—
"अनायासकृशं मध्यमग्रद्वयतरङ्गितौ ।
अभूषणमनोहारि वपुर्वयसि सुभ्रुवः ।"
अयुक्तहेतौ यथा,—
"स एव चीवि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं तस्य शम्भुना न हुतं बलम् ।"
इति साहित्यदर्पणे १० परिच्छेदे ।
(पालनम् । यथा, भागवते । ४ । ८ । २० ।
"यस्याङ्घिपद्मं परिचर्य्य विश्व-
विभावनायात्तगुणाभिपत्तेः ।")
विभावरी, स्त्री, रात्रिः । इत्यमरः । (यथा, राजतरङ्गिण्याम् । ३ । २०७ ।
"प्रभातायां विभावर्यां यथास्थानस्थितो नृपः ।
आकार्य्यतां माढगुप्त इति चत्तारमादिशत् ।"
मन्दारविद्याधरकन्या । यथा, मार्कण्डेये । ६१ । १७ ।
"मन्दारविद्याधरजा सखी मम विभावरी ।"
सुमेरुत्तरस्यां पुरी । यथा, भागवते । ७५ । २१ । ७ ।
"उत्तरतः सौध्यां विभावरीं नाम ।")
हरिद्रा । कट्फली । वक्रयोषित् । विवादवक्षसुखी । इति मेदिनी । रे, २६६ । मौख्यनिरतस्त्री । इति शब्दरत्नावली । मेदाढ्यः । इति रत्नमाला ।
विभावसुः, पुं, (विभा प्रभा एव वसु सम्पद्यस्य ।) सूर्य्यः । (यथा, महाभारते । १ । ८६ । ७ ।
"वह्नेः कुरुवंशस्य विभावसुसमद्युतिः ।")
अर्कवृक्षः । अग्निः । (यथा, महाभारते । ३ । ६८ । ७ ।
"निवर्हा धूमजालेन प्रभामिव विभावसोः ।")
चित्रकवृक्षः । इत्यमरः । चन्द्रः । हारभेदः । इति हेमचन्द्रः । (वसुपुत्रविशेषः । यथा, भागवते । ६ । ६ । १०, १६ ।
"वसोरापस्य वसवः पुत्रास्तेषां निबोध मे नामानि मे मुख्य ।
द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वास्तुर्विभावसुः ।
विभावसोरसूतोषा व्युष्टं रोचिषमातपम् ।"
सुरासुरपुत्रः । यथा, तत्रैव । १० । ५६ । १२ ।
"ताम्रोऽन्तरिक्षः श्रवणो विभावसुः
वसुर्नभस्वानरणश्च सप्तमः ।"
दनुपुत्रोऽसुरविशेषः । यथा, तत्रैव । ६ । ६ । ३० ।
"त्रिमूर्द्धा शूरशेऽरिष्टो दयग्रीवो विभावसुः ।")
विभावित, त्रि, विचिन्तितः । विशेषेण उत्पादितः । विशेषेण प्रापितः । विशेषेण श्रयितः । इति व्याख्याभूषणतोः क्तप्रत्ययेन निष्पन्नः । (यथा, शूरशुपालवधे । १ । २ ।
"चयस्त्रिंशामित्यवधारितं पुरा
ततः शूरीरीति विभावितागतिः ।")
विभाषा, स्त्री, (विकल्पत्वेन भाष्यते इति । भाष् + "गुरोश्च हलः ।" ३ । ३ । १०३ । इत्यः । ब्रतष्टाप् ।) विकल्पः । यथा । द्वयोर्विभाषयोर्मध्ये विधिर्नित्यः । इति सुग्धबोधव्याकरणम् । ("नवेति विभाषा ।" इति पाणिनिः । १ । १ । ४४ ।)
विभिन्न, त्रि, (वि + भिद् + क्तः ।) विभक्तः । विदीर्णः । यथा,—
"गदापरशुखड्गैश्च चक्रतोमरशायकैः ।
विभिन्ने वेदना या हि क्षुधया सापि निर्ज्जिता ।"
इति इतिहाससमुच्चयः ।
(विकृतः । यथा, शिशुपालवधे । १ । ५५ ।
"विभिन्नगृह्यः कलुषीभवन्मुहु-
र्मदेन दन्तीव मधुव्रतव्रजैः ।")
विभीतक, त्रि, वृक्षविशेषः । बहेड़ा इति भाषा । तत्पर्य्यायः । अक्षः २ तुण्डः ३ कर्षफलः ४ भूतवासः ५ कलिद्रुमः ६ । इत्यमरः । कक्षवृक्षः ७ संवर्त्तः ८ । इति रत्नमाला । तैलफलः ९ भूतावासः १० संवर्त्तकः ११ वासन्तः १२ कलिद्रुमः १३ बहेड़कः १४ हार्य्यः १५ विषमः १६ अनिलघ्नः १७ कासघ्नः १८ । (यथा, महाभारते । ३ । ६४ । ५ ।
"प्रियालतालखर्ज्जूरहरीतकविभीतकैः ।")
अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । उष्णत्वम् । कफपित्तहत्वम् । चक्षुष्यत्वम् । पलितघ्नत्वम् । विपाके मधुरत्वञ्च । तस्याभ्यगुणाः । दृष्ट्याक्ष्णोः कफवातहरत्वम् । लघुत्वम् । मधुरत्वम् । मदकारित्वञ्च । तत्तैलगुणाः । स्वादुत्वम् । हिमत्वम् । केश्यत्वम् । गुरुत्वम् । पित्तानिलार्त्तिनाशित्वञ्च । इति राजनिर्घण्टः । * । अपि च । अथ विभीतकनामानि गुणाश्च ।
"विभीतकक्षिलिङ्गः स्यादक्षः कर्षफलस्तु यः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः ।
विभीतकं स्वादुपाकं कषायं कफपित्तजुत् ।
उष्णवीर्य्यं हिमस्पर्शं भेदनं चाक्षुषाग्र्यम् ।
रूक्षं नेत्रहितं केश्यं श्लेष्मवैस्वर्य्यनाशनम् ।
विभीतमज्जा लघ्वक्ष्णोः कफवातहरो लघुः ।
कषायो मदकृच्चाथ धात्रीमज्जापि तद्गुणः ।"
इति भावप्रकाशः । * ।
अन्यच्च ।
"विभीतं भेदि तीक्ष्णोष्णं वैस्वर्य्यं क्रिमिनाशनम् ।
चक्षुष्यं स्वादुपाकञ्च कषायं कफपित्तजुत् ।"
इति राजवल्लभः । * ।
अस्य कलिद्रुमत्वकारणं यथा,—
पुलस्त्य उवाच ।
"ततो गतेषु देवेषु ब्रह्मलोकं प्रति द्विज ।
त्रैलोक्यं पालयामास बलिर्धर्म्मान्वितः सदा ।
कलिस्तदा धर्म्मयुतं जगद्दृष्ट्वा ह्रते यथा ।
ब्रह्माणं शरणं मेने स्वभावस्य निबोधनात् ।
प्रविवेश तमाहाथ तिष्ठो ब्रह्मा मनीश्वरम् ।
मम स्वभावो बलिना नाशितो देवसत्तम ।
तं प्राह भगवान् योगी स्वभावो जगतोऽपि हि ।
न केवलं हि भवतो ह्रतस्तेन बलीयसा ।
पश्याद्य तिष्ठ देवेन्द्रं वरुणञ्च समागतम् ।
भास्करोऽपि हि दीनत्वं प्रयातो हि बलादले ।
इत्येवमुक्तो देवेन ब्रह्मणा कलिरब्रवीत् ।
दीनान् दृष्ट्वा च शक्रादीन् विभीतकवनं गतः ।"
इति वामने १० अध्यायः ।
(अन्यच्च । यथा, महाभारते । ३ । ७२ अध्याये ।
"एवमुक्ता ददौ विद्यान्तपर्व्वो बलाय वै ।
तस्याश्चहृदयाच्चस्य शरीरान्निःसृतः कलिः ।"
"तं शप्तुमैच्छत् कुपितो निषधाधिपतिर्नलः ।
तमुवाच कलिर्भीतो वेपमानः कृताञ्जलिः ।
कोपं संयच्छ नृपते कीर्त्तिं दास्यामि ते पराम् ।"
"एवमुक्तो नलो राजा नियच्छत् कोपमात्मनः ।
ततो भीतः कलिः शीघ्रं प्रविवेश विभीतकम् ।"
"विभीतकाश्रयग्रहः संवृत्तः कलिसंश्रयात् ।")
विभीषणः, पुं, (विभीषयतीति । वि + भीष् + "नन्दिग्रहिपचादीति ।" ३ । १ । १३४ । इति ल्युः ।) रावणभ्राता । इति रामायणम् । (यथा, भागवते । ४ । २ । ३४ ।
"रावणः कुम्भकर्णश्च तथाप्यस्यो विभीषणः ।
पुलहस्य गतिर्भार्य्या त्रीनसूत सतो सुतान् ।")
नलदम् । इति राजनिर्घण्टः । भयानके त्रि । (यथा, ऋग्वेदे । ५ । ३३ । ६ ।
"इन्द्रो विश्वस्य दमिता विभीषणः ।"
"विभीषणः भयजनकः ।" इति तद्भाष्ये सायणः ।)
विभीषिका, स्त्री, (विभीषा + स्वार्थे कन् । स्त्रियां टाप् अत इत्वञ्च ।) भयप्रदर्शनम् । यथा,—
"क्षत्वा ग्रस्तविभीषिकां कतिपयग्रामेषु दीनाः प्रजाः
मयुक्तो विटजल्पितेऽपहृताः चौरीभुजङ्गे ऽखिलाः ।
विद्वांसोऽपि वयं परं त्रिजगतां सर्गस्थितिव्यापदा-
मीशस्तृपरिचर्य्यया न गणितो येरेष नाराधनः ।"
इति भ्रान्तिशतकम्
विभुः, पुं, (वि + भू + "विप्रसंभ्यो डुसंज्ञायाम् ३ । २ । १८० । इति डुः ।) प्रभुः । (यथा शिशुपालवधे ।
"विभुर्विभक्तावयवं पुमानिति
क्रमादमुं नारद इत्यबोधि सः ।")
सर्व्वगतः । ईश्वरः । (यथा, महाभारते । १३ । १७ । १६ ।
"त्रिजटश्चिरवासश्च रुद्रः सेनापतिर्विभुः ।")
ब्रह्मा । इति मेदिनी । मे, ७ । भवः । इति त्रिकाण्डशेषः । विष्णुः । इति शब्दमाला । (यथा, महाभारते । १३ । १४६ । १०७ ।
"विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।")
जीवात्मा । यथा,—
"न शक्यश्चक्षुषा द्रष्टुं देहे सूक्ष्मतमो विभुः ।
दृश्यते ज्ञानचक्षुर्भिस्तत्त्वदर्शिभिरेव च ।"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ।)
नित्यः । अर्हन् । इति हेमचन्द्रः ।

विभुः, त्रि, सर्व्वमूर्त्तसंयोगी। परममहत्त्ववान्। स तु आत्मादिः। यथा,—

"आत्मेन्द्रियाद्यधिष्ठाना करणं हि सकर्त्तृकम्।
विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता॥"

इति भाषापरिच्छेदः॥

विभुरिति विभुत्वं परममहत्त्ववत्त्वम्। इति सिद्धान्तमुक्तावली॥

"कालखात्मदिशां सर्व्वगतत्वं परमं महत्।"

इति भाषापरिच्छेदः॥

दृढः। दृत्वजयपालः॥ आपकः। इति हेमचन्द्रः॥ (यथा, ऋग्वेदे। १०। ३०। १।

"प्रातर्यावाणं विभ्वं विशे विशे॥"

"विभ्वं विभुं व्यापिनम्।" इति तद्भाष्ये सायणः॥ व्याप्तः। यथा, ऋग्वेदे। १। ३३। १।

"चित्रिणो अद्याभवतं न वेद सा
विभुर्व्यायाम उत रासि दक्षिणा॥"

"विभुः व्याप्तः।" इति तद्भाष्ये सायणः॥ सर्व्वत्र गमनशीलः। यथा, ऋग्वेदे।१।१६५।१०।

"एकस्य चिन्मे विभ्वस्त्वोजो
या तु दृष्ट्वानृक्षयवे मनीषा॥"

"विभु सर्व्वत्र गमनशीलम्।" इति तद्भाष्ये सायणः॥ ईश्वरः। यथा, ऋग्वेदे। ४। ७। १।

"यमग्निवानो भृगवो विरुरुचुर्व्वनेषु चित्रं विभ्वं
विशे विशे॥"

"विभ्वं विभुं ईश्वरम्।" इति तद्भाष्ये सायणः॥ मरुत्। यथा, ऋग्वेदे। ५। ३८। १।

"उरोष इन्द्र राधसो विभ्वी रातिः शतक्रतो॥"

"विभ्वी महती।" इति तद्भाष्ये सायणः॥)

विभूतिः, स्त्री, (वि+भू+क्तिन्।) अणिमादिकमष्टधा। तत्पर्य्यायः। भूतिः २ ऐश्वर्य्यम् ३। इत्यमरः॥ (यथा, ऋग्वेदे। १। ८। ६।

"एवाहिते विभूतय ऊतयो वाजसातये॥"

"विभूतयः ऐश्वर्य्यविशेषाः।" इति तद्भाष्ये सायणः॥) ग्रिवधृतभस्म। अस्य ग्रिवस्य अणिमाद्यष्टप्रकारं वैभवं विभूत्यादिपदत्रयं वाच्यं केचित्तु विभूतिर्भूतिरिति इयं ग्रब्दश्रुतभस्मनि अणिमाद्यष्टके तु ऐश्वर्य्यमित्याहुः। विभवत्वनया विभूतिः क्तिः भवतेः क्तिः भूतिः विग्रहगमन्योपसर्गनिरासार्थं ईश्वरगुणैश्वर्य्यं भावे ष्याञ्। अणिमादि लघिमादि। तथा च।

"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईग्रित्वञ्च वग्रित्वञ्च तथा कामावसायिता॥"

इति॥

अणुतममिमा येन सूक्ष्मो भूत्वा विचरति। लघुत्वं लघिमा येन वायुरिव लघुतरो भवति। प्राप्तिरौन्मित्यप्राप्यं प्राकाम्यमिच्छानभिघातः। महिमा महत्त्वं येन चतुर्दग्रभुवनान्यखोदरे वर्त्तन्ते। ईग्रित्वं प्रभुता येन स्थावरजङ्गमादिभूतान्यादेग्रकारीणि भवन्ति। वग्रित्वं स्वातन्त्र्यं येन स्वतन्त्रश्चरति। कामेन इच्छया अवसायितुं स्थातुं ग्रीलमस्य कामावसायी तस्य भावः कामावसायिता। सर्व्वानन्दस्तु अनेकार्थत्वाद्धातूनां स्तुतिरिह तिष्ठत्यर्थः। अवसायी दन्तमध्य इत्याह। इति भरतः॥ *॥ अपि च।

श्रीभगवानुवाच।

"परात्परतरं तत्त्वं परं ब्रह्मैकमव्ययम्।
नित्यानन्दं स्वयं ज्योतिरद्वयं तमसः परम्।
ऐश्वर्य्यं तस्य यन्नित्यं विभूतिरिति गीयते॥"

इति कौर्म्मे १ अध्यायः॥

(लक्ष्मीः। यथा, ऋग्वेदे। १। ३०। ५।

"विभूतिरस्तु सूनृता।"

"विभूतिर्लक्ष्मीः।" इति तद्भाष्ये सायणः॥ विभवहेतुः। यथा, तत्रैव। ६। २१। १।

"रयिर्व्विभूतिरीयते वचस्या॥"

"विभूतिर्व्विभवहेतुः॥" इति तद्भाष्ये सायणः॥ विविधसृष्टिः। यथा, भागवते। ४। २४। ४३।

"ग्रक्तित्रयसमेताय मौढ्यवैरूपकर्म्मणे।
चेत आकूतिरूपाय नमो वाचोविभूतये॥"

सम्पत्। यथा, रघुवंग्रे। ८। ३६।

"अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिग्रयेन वीरुधाम्॥")

विभूतिद्वादग्री, स्त्री, (विभूतिर्वर्द्धिका द्वादग्री।) व्रतविग्रेषः। यथा,—

नन्दिकेश्वर उवाच।

"ग्रृणु नारद! वक्ष्यामि विष्णोर्व्रतमनुत्तमम्।
विभूतिद्वादग्रीनाम सर्व्वपापनिसूदनम्॥
कार्त्तिके चैव वैग्राखे मार्गग्रीर्षेऽथ फाल्गुने।
आषाढ़े वा दृग्यन्तु ग्रुक्लायां लघुसुन्दरः।
कृत्वा सायन्तनीं सन्ध्यां यज्ञीयान्नियमं बुधः।
एकादग्र्यां निराहारः समभ्यर्च्च्य जनार्द्दनम्।
द्वादग्र्यां विधिसंयुक्तः करिष्ये भोजनं विभो।
तदविघ्नेन मे यातु सापत्न्यं मधुसूदन॥
ततः प्रभाते चोत्थाय कृतस्नानजपः ग्रुचिः।
पूजयेत् पुण्डरीकाक्षं गुक्लमाल्यानुलेपनैः॥
विभूतिदाय नमः पादावग्रोकाय च जानुनी।
नमः ग्रिवायेत्यूरू च विश्वमूर्त्तये नमः कटिम्॥
कन्दर्पाय नमो मेढ्रमादित्याय नमः करौ॥
दामोदरायेत्युदरं वासुदेवाय च स्तनौ।
माधवायेति हृदयं कण्ठसूत्रकल्पिते नमः॥
ग्रीधराय मुखं केग्रान् केग्रवायेति नासिके।
पद्मं ग्राङ्गधरायेति अक्ष्णौ च स्वयम्भुवे॥
खनान्ता गदचक्राब्जिगदापरग्रुपाणयः।
सर्व्वात्मने ग्रिरो ब्रह्मन् नम इत्यभिपूजयेत्॥
मत्स्यसूत्रसंयुक्तं हेमं कृत्वा तु ग्रक्तितः।
उदक्यमसमायुक्तमग्नतः स्थापयेद्विभोः॥
गुड़पात्रं तिलैर्युक्तं सितवस्त्राभिवेष्टितम्।
रात्रौ जागरणं कुर्य्यादितिहासकथादिना॥
प्रभातायाञ्च शर्व्वर्य्यां ब्राह्मणाय कुटुम्बिने।
सकाञ्चनोतपलं देवं सोदकुम्भं निवेदयेत्॥
यथा न सृज्यसे विष्णो! सदा सर्व्वविभूतिभिः।
तथा मामुद्धरात्रीवदुःखसंसारसागरात्॥
ग्रह्मादित्वासिन् तस्य भावः कामावसायिता। सर्व्वानन्दस्तु अनेकार्थत्वाद्धातूनां स्तुतिरिह तिष्ठत्यर्थः। अवसायी दन्तमध्य इत्याह। इति भरतः॥ *॥ अपि च।

श्रीभगवानुवाच।

"परात्परतरं तत्त्वं परं ब्रह्मैकमव्ययम्।
नित्यानन्दं स्वयं ज्योतिरद्वयं तमसः परम्।
ऐश्वर्य्यं तस्य यन्नित्यं विभूतिरिति गीयते॥"

इति कौर्म्मे १ अध्यायः॥

(लक्ष्मीः। यथा, ऋग्वेदे। १। ३०। ५।

"विभूतिरस्तु सूनृता।"

"विभूतिर्लक्ष्मीः।" इति तद्भाष्ये सायणः॥ विभवहेतुः। यथा, तत्रैव। ६। २१। १।

"रयिर्व्विभूतिरीयते वचस्या॥"

"विभूतिर्व्विभवहेतुः॥" इति तद्भाष्ये सायणः॥ विविधसृष्टिः। यथा, भागवते। ४। २४। ४३।

"ग्रक्तित्रयसमेताय मौढ्यवैरूपकर्म्मणे।
चेत आकूतिरूपाय नमो वाचोविभूतये॥"

सम्पत्। यथा, रघुवंग्रे। ८। ३६।

"अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिग्रयेन वीरुधाम्॥")

विभूतिद्वादग्री, स्त्री, (विभूतिर्वर्द्धिका द्वादग्री।) व्रतविग्रेषः। यथा,—

नन्दिकेश्वर उवाच।

"ग्रृणु नारद! वक्ष्यामि विष्णोर्व्रतमनुत्तमम्।
विभूतिद्वादग्रीनाम सर्व्वपापनिसूदनम्॥
कार्त्तिके चैव वैग्राखे मार्गग्रीर्षेऽथ फाल्गुने।
आषाढ़े वा दृग्यन्तु ग्रुक्लायां लघुसुन्दरः।
कृत्वा सायन्तनीं सन्ध्यां यज्ञीयान्नियमं बुधः।
एकादग्र्यां निराहारः समभ्यर्च्च्य जनार्द्दनम्।
द्वादग्र्यां विधिसंयुक्तः करिष्ये भोजनं विभो।
तदविघ्नेन मे यातु सापत्न्यं मधुसूदन॥
ततः प्रभाते चोत्थाय कृतस्नानजपः ग्रुचिः।
पूजयेत् पुण्डरीकाक्षं गुक्लमाल्यानुलेपनैः॥
विभूतिदाय नमः पादावग्रोकाय च जानुनी।
नमः ग्रिवायेत्यूरू च विश्वमूर्त्तये नमः कटिम्॥
कन्दर्पाय नमो मेढ्रमादित्याय नमः करौ॥
दामोदरायेत्युदरं वासुदेवाय च स्तनौ।
माधवायेति हृदयं कण्ठसूत्रकल्पिते नमः॥
ग्रीधराय मुखं केग्रान् केग्रवायेति नासिके।
पद्मं ग्राङ्गधरायेति अक्ष्णौ च स्वयम्भुवे॥
खनान्ता गदचक्राब्जिगदापरग्रुपाणयः।
सर्व्वात्मने ग्रिरो ब्रह्मन् नम इत्यभिपूजयेत्॥
मत्स्यसूत्रसंयुक्तं हेमं कृत्वा तु ग्रक्तितः।
उदक्यमसमायुक्तमग्नतः स्थापयेद्विभोः॥
गुड़पात्रं तिलैर्युक्तं सितवस्त्राभिवेष्टितम्।
रात्रौ जागरणं कुर्य्यादितिहासकथादिना॥
प्रभातायाञ्च शर्व्वर्य्यां ब्राह्मणाय कुटुम्बिने।
सकाञ्चनोतपलं देवं सोदकुम्भं निवेदयेत्॥
यथा न सृज्यसे विष्णो! सदा सर्व्वविभूतिभिः।
तथा मामुद्धरात्रीवदुःखसंसारसागरात्॥
दृग्यावतारकृत्यानि प्रतिमासं क्रमाज्जने।
दत्तात्रेयं ततो यासमुत्पत्तेन समन्वितम्।
दद्यादेवं समा यावत् पाषण्डानभिवर्द्धयेत्॥
समाप्तेवं यथाग्रक्त्या द्वादग्रद्वादग्रीं नरः।
संवत्सरान्ते लवणपर्व्वतेन समन्वितम्।
भूम्यां दद्यान्मुनिग्रेष्ठ गुरवेऽमरसंयुताम्॥
ग्रामञ्च भक्तिमान् दद्यात् क्षेत्रमाभरणान्वितम्।
गुरुं संपूज्य विधिवत् वस्त्रालङ्कारभूषणैः॥
अन्यानपि यथाग्रक्त्या भोजयित्वा द्विजोत्तमान्
तर्पयेद्धेनुगोदानैरन्यच्च धनसञ्चयात्॥
अक्षयवित्तो यथाग्रक्त्या स्त्रोकं स्त्रोकं समाचरेत्।
यज्ञानिग्रः पुरुषो भक्तिमान् माधवं प्रति।
पुण्याचैनविधानेन स कुर्य्याद्व्रतरक्षयम्॥
अनेन विधिना यस्तु विभूतिद्वादग्रीव्रतम्।
कुर्य्यात् स पापनिर्म्मुक्तः प्रिलृक्षान्तारयेच्छतम्॥
जन्मनां ग्रतसाहस्रं न स्त्रीकुलभाग्भवेत्।
न च व्याधिर्भवेत्तस्य न दारिद्र्यं न बन्धनम्॥
वेद्यावो वाथ ग्रैवो वा भवेज्जन्मनि जन्मनि।
यावद्युगसहस्राणां ग्रतमष्टोत्तरं भवेत्।
तावत् स्वर्गे वसेद्ब्रह्मन् भूपतिश्च पुनर्भवेत्॥"

इति मात्स्ये ८२ अध्यायः॥

विभूषणं, क्लो, (विग्रेषेण भूषयत्यनेनेति। वि+भूष+ल्युट्।) आभरणम्। इत्यमरः॥ (यथा, कथासरित्सागरे। १७। ६४।

"अस्ति पाटलिपुत्राख्यं पुरं पृथ्वीविभूषणम्॥")

विभूषा, स्त्री, (वि+भूष् भूषणे+"गुरोश्च हलः।" ३। ३। १०३। इत्यः। स्त्रियां टाप्।) ग्रोभा। इति हेमचन्द्रः॥ (यथा, कामन्दकीये। १५। ४६।

"ततः प्रबुद्धः ग्रुचिरुदेवः
ग्रीमद्विभूषोल्लसितः प्रहृष्टः॥")

आभरणञ्च॥ (यथा, आर्य्यासप्तग्रत्याम्। ४५६।

"मानग्रहगुरुकोपादनुदयितायेव रोचते मलम्।
काञ्चनमयी विभूषा दारुघटितगुल्मभावेव॥")

विभूषितः, त्रि, (वि+भूष+क्तः। यद्वा, विभूषा संजाताऽस्य इति। विभूषा+इतच्।) अलङ्कृतः। यथा,—

"विग्रुद्धरत्नांग्रुविभूषिताङ्गी
ग्रिलातले हेममये सुरम्ये।
सुखोपविष्टं मदनाङ्गनाग्नं
जगाद वाक्यं गिरिराजपुत्री॥"

इति स्कान्दे नीलकण्ठस्तोत्रम्॥

विभ्रतः, त्रि, भृतः। पुष्टः। विपूर्व्वभृधातोः क्तप्रत्ययेन निष्पन्नः॥

बि(वि)भ्रत्, त्रि, (भृ+ग्रतृ।) बिभर्त्तीति यः। धारणपोषणकर्त्ता। यथा,—

"चतुर्दग्यं नारसिंहं बिभ्रद्दैत्येन्द्रमर्द्दितम्।
ददार करजैरूरावेरकां कटकृद्यथा॥"

इति ग्रीभागवते २ स्कन्धे २ अध्यायः॥

अपि च।

"तरुणग्रुकलमिन्दोर्बिभ्रती ग्रुभ्रकान्तिः।"

इत्यादि तन्त्रसारे सरस्वतीध्यानम्॥

(पवर्गीयवकारादिः साधुरेव॥)

विभ्रमः, पुं, (वि + भ्रम + घञ् ।) हावभेदः । स तु स्त्रीणां भ्रूव्यापारभावव्यक्रियाविशेषः । इत्यमरः ॥ (यथा, मेघदूते । २६ ।
"स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥")
मदरागहर्षजनितविपर्य्यासो विभ्रमः । यथा अन्यनिमित्तमानसादुत्थायान्यत्र गमनं प्रियारब्धकथामाविष्य सखी सहालपनसूचेर्हसितक्रीडौ पुष्पादीनां याच्ञा सहसैव तत्परित्यागः । वस्त्राभरणमाल्यानामकारणतः खण्डनं माननञ्च । यदुक्तम् ।
"क्रोधः स्मितञ्च कुसुमाभरणादियाच्ञा
तद्भर्त्सनञ्च सहसैव विमर्दनञ्च ।
आक्षिप्य कान्तवचनं रुदितं सखीभिर्निष्कारणोत्थितगतं वद विभ्रमं तत् ॥" इति ।
"चित्तवृत्तेरनवस्थानं भ्रूभङ्गादिभ्रमो भवेत् ॥" इत्यत्रच च । तथान्यत्र ।
"विभ्रमश्चरया काचे भूषास्थानविपर्य्ययः ।" यथा,—
"श्रुत्वायातं बहिः कान्तमसमाप्तिभूषया ।
भावेऽङ्गं दर्शोलांक्षा कपोले तिलकः कृतः ॥"
इति ।
योषितां यौवनजो विकारो विभ्रमः । इत्येके । विभ्रान्तिर्विभ्रमः घञ् । इति भरतः ॥ अपि च ।
"वल्लभप्राप्तिवेलायां मदनावेशसंभ्रमात् ।
विभ्रमो हारमाल्यादिभूषास्थानविपर्य्ययः ॥"
इत्युज्ज्वलनीलमणिः ॥*॥
भ्रान्तिः । इति मेदिनी । मे, ५२ ॥ (यथा, भागवते । ४ । २१ । १२ ।
"तमत्रिभगवानेत्य त्वरमार्यं विहायसा ।
आसुक्तमिव पार्श्वस्थं योऽधर्म्मे धर्म्मविभ्रमः ॥")
क्षोभः । (यथा, राजतरङ्गिण्याम् । ३ । ३६७ ।
"ललाटे मूलसुप्ताङ्गे जरामुक्ताः शिरोरुहाः ।
तस्य भ्रूभ्रुभ्रमासङ्गङ्गाम्भोविभ्रमं दधुः ॥"
यथा च अमरशतके । १ ।
"व्याकृष्टिविह्वलकटाक्षसुखप्रणिष्ठे
प्रेङ्खन्नखांशुचयसंवलितोऽधिकायाः ।
त्वां पातुमक्षरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥")
संशयः । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । १६ । ६५ ।
"पूरयन् बहुनादाभिर्व्याहिनीभिर्भुवस्तलम् ।
कुर्व्वन्नकाण्डनिर्म्मेघवर्षासमयविभ्रमम् ॥")
भ्रमणम् । इति शब्दरत्नावली ॥ (विकारविशेषः । यथा,—
"तीव्रार्त्तिरपि नाजीर्णे पिबेच्छूलघ्नमौषधम् ।
आमसन्नोऽनलो नालं पक्तुं दोषौषधाशनम् ॥
निहन्यादपि चैतेषां विभ्रमः सहसातुरम् ।
जीर्णान्ने तु भवेद्व्यं युञ्जात् स्वस्थगुरूदरे ॥"
इति वाभटे सूत्रस्थानेऽष्टमेऽध्याये ॥)
विभ्रमा, स्त्री, वाहुल्यम् । इति शब्दरत्नावली ॥

विभ्राट्, [ज्] } त्रि, (विशेषेण भ्राजते इति ।
विभ्राड्, [ज्] } वि + भ्राज् + "अन्येभ्योऽपि दृश्यते ।" ३ । २ । १७७ । इति क्विप् ।) अलङ्कारादिना दीप्तिशीलः । तत्पर्य्यायः । भ्राजिष्णुः २ रोचिष्णुः ३ । इत्यमरः ॥ (यथा, ऋग्वेदे । १० । १७० । १ ।
"विभ्राड् बृहत्पिबतु सोम्यं
मध्वायुर्दधद्यज्ञपतावविहुतम् ॥"
"विभ्राड् विभ्राजमानः विशेषेण दीप्यमानः ।" इति तद्भाष्ये सायणः ॥)

विभ्रान्तः, त्रि, विभ्रमयुक्तः । विपूर्व्वभ्रमधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, गीतायाम् । १६ । १६ ।
"अनेकचित्तविभ्रान्ता मोहजालसमावृताः ॥")

विभ्रान्तिः, स्त्री, (वि + भ्रम + क्तिन् ।) विभ्रमः । इति विभ्रमशब्दटीकायां भरतः ॥ (यथा, प्रबोधचन्द्रोदये । "स्फुरदहैतविभ्रान्तिसन्तानसन्तप्तवन्दारुसंसारनिद्रापहारैकदक्षेति ॥")

विमतः, त्रि, विरुद्धमतिविशिष्टः । विपूर्व्वमनधातोः क्तप्रत्ययेन निष्पन्नः ॥

विमनस्कः, त्रि, विमनाः । विनियृहीतं मनोऽस्येति बहुव्रीह्यर्थे कप्रत्ययेन निष्पन्नः ॥ (यथा, भागवते । ७ । १० । ६१ ।
"विलोक्य भयसङ्क्षुब्धं विमनस्कं वृषध्वजम् ॥")

विमनाः, [स्] त्रि, (विरुद्धं मनो यस्य ।) चिन्तादिव्याकुलचित्तः । तत्पर्य्यायः । दुर्म्मनाः २ अन्तर्म्मनाः ३ । इत्यमरः ॥ दुःखितमानसः ४ ॥ इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । १६ । १० ।
"मिष्टमस्मि सदा राजन् सुदितो विमनास्तथा ।
मालायाञ्च तथा सर्पे समदृक् च नृपोत्तम ! ॥")

विमयः, पुं, (वि + मी + "एरच् ।" इत्यच् ।) विनिमयः । इति हेमचन्द्रः ॥

विमर्द्दः, पुं, (विम्रद्यतेऽसौ इति । वि + मृद् + घञ् ।) कालकृतवृक्षः । इति रत्नमाला । कालकासुन्दिया इति भाषा ॥ विमर्द्दनम् । इति शब्दरत्नावली ॥ (यथा, रघुः । ५ । ६५ ।
"तं कर्णभूषणनिपीडितपीवरांस-
ग्रथ्योत्तरच्छदविमर्द्दलभाङ्गरागम् ॥"
सम्पर्कः । यथा, रघुः । १३ । २० ।
"असौ महेन्द्रद्विपदानगन्धि-
स्त्रिमार्गगावीचिविमर्द्दशीतः ॥"
"त्रिमार्गगा गङ्गा तस्या वीचीनां विमर्द्देन सम्पर्केण शीतः ।" इति तट्टीकायां मल्लिनाथः ॥*॥ युद्धम् । यथा, रामायणे । ३ । ३२ । ७ ।
"देवासुरविमर्द्देषु यथाग्रनिहतप्लवम् ॥"
कलहः । यथा, तत्रैव । ७ । ६३ । २४ ।
"कार्य्यार्थिनां विमर्द्दो हि राज्ञां दोषाय कल्पते ॥")

विमर्द्दकः, पुं, (विमर्द्द एव । स्वार्थे कन् ।) चक्रमर्द्दः । इति राजनिर्घण्टः ॥ (चक्रमर्द्दशब्देऽस्य गुणादयो विज्ञेयाः ॥)

विमर्द्दनं, क्ली, (वि + मृद् + ल्युट् ।) कुङ्कुमादिमर्द्दनम् । तत्पर्य्यायः । परिमलः २ । इत्यमरः ॥ विमर्द्दः ३ । इति शब्दरत्नावली ॥ विशेषेण मर्द्दनञ्च ॥ (यथा, महाभारते । ३ । २६ । ३ ।
"धर्म्मस्य जायमानोऽहं गतिमग्र्यां सुदुर्व्विदाम् ।
कथं बलात्करिष्यामि मेरोरिव विमर्द्दनम् ॥"
त्रि, विशेषेण मृद्नातीति । वि + मृद् + ल्युः । मर्द्दनकारी । पीड़ादायकः । यथा, कथासरित्सागरे । ११३ । १६ ।
"अभूच्च वारणस्तस्य परसैन्यविमर्द्दनः ।
महान् कुवलयापीड़ इति ख्यातो महीतले ॥"
यथा च साहित्यदर्पणे । ४ । २६६ ।
"अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥")

विमर्द्दोत्थः, पुं, (विमर्द्दादुत्तिष्ठतीति । उत् + स्था + कः ।) मर्द्दनाज्जातसुगन्धादिः । यथा,—
"अथ गन्धे परिमलो विमर्द्दोत्थे मनोहरे ।
दूरगामी मनोहारी गन्ध आमोद ईरितः ॥"
इति शब्दरत्नावली ॥

विमर्शनं, क्ली, (वि + मृश् + ल्युट् ।) परामर्शः । वितर्कः । यथा,—
"वितर्कः स्यादुन्नयनं परामर्शो विमर्शनम् ।
अध्याहारस्तर्क ऊहोऽपोहयाथ्यगुणदूषणम् ॥"
इति हैमचन्द्रः ॥
(विम्रशतेऽनेनेति । करणे ल्युट् । ज्ञानम् । यथा, भागवते । ६ । १ । २१ ।
"कर्म्मणा कर्म्मनिर्हारो न ह्यात्यन्तिक इष्यते ।
अविद्वदधिकारित्वात् प्रायश्चित्तं विमर्शनम् ॥")

विम(र्ग्)र्षः, पुं, (वि + मृ(र्ग्)ष + घञ् ।) विचारणा । इति जटाधरः ॥ (यथा, कथासरित्सागरे । २० । १२४ ।
"प्रलयः क्षीणे सत्त्वाति विम(र्ग्)र्षे विदुषामपि ॥")

विमलं, क्ली, (विगतो मलो यस्मात् ।) तारहैमद्विधालक्तम् । तत्पर्य्यायः । निर्म्मलम् २ स्वच्छम् ३ अमलम् ४ स्वच्छधातुकम् ५ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । त्वग्दोषव्रणनाशित्वम् । रसवीर्य्यादौ तुल्यत्वम् । वैद्ये भिन्नवीर्य्यकत्वञ्च । इति राजनिर्घण्टः ॥ (तथास्य शोधनमारणविधिः ।
"क्षारनालतैलेषु गोदुग्धे कदली रसे ।
कौलत्थे कोद्रवक्वाथे माक्षिकं विमलन्तथा ॥
सप्तधा मूरणकन्दस्य स्वेदयेद्वरवर्णिनि ! ।
चाराम्लवर्गे चैवं तैलसर्पिःसमन्वितम् ॥
पुटत्रयं प्रदातव्यं ततस्तु शोधितं भवेत् ।
जम्बीरस्य रसे स्निग्धे मेषशृङ्गीरसेऽथवा ।
रम्भातोयेन वा पाच्यं घसं विमलशुद्धये ॥"
इति विमलशुद्धिः ॥ इति वैद्यकरसेन्द्रसारसंग्रहे सारणमारणाधिकारे ॥)

विमलं, त्रि, (विगतो मलो यस्मात् ।) निर्म्मलम् । तत्पर्य्यायः । धौतम् २ । इत्यमरः ॥ प्रयतम् ३ । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ४८ । १४ ।

"प्रस्रविष्यन्ति तोयानि विमलानि महीधराः।
विदर्शयन्तो विविधान् भूयश्चित्रांश्च निर्झरान्।")
चारुः। इति च शब्दरत्नावली॥ (यथा, माघे। ६। १२।
"रुचिधान्नि भर्मरि भृशं विमलाः
परलोकमभ्युपगते विविशुः॥")
विमलः, पुं, (विगतो मलः पापं यस्मात्।) अर्हन्। इति हेमचन्द्रः॥ (सुदत्त्वपुत्रः। यथा, भागवते। ६। १। ४१।
"तस्योत्कलो गयो राजन् विमलश्च त्रयःसुताः॥")
विमलदानं, क्ली, (विमलं विशुद्धं दानम्।) नित्यनैमित्तिककाम्यदानम्। ईश्वरप्रीत्यनार्थदानञ्च। यथा,—
"नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम्।
अहन्यहनि यत्किञ्चिद्दीयतेऽनुपकारिणे।
अनुद्दिश्य फलं तत् स्यात् ब्रह्मणाय तु नित्यकम्॥
यत्तु पापापशान्त्यै च दीयते विदुषां करे।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम्॥
अपत्यविजयैश्वर्यस्वर्गार्थं यत् प्रदीयते।
दानं तत् काम्यमाख्यातमृषिभिर्ब्रह्मचिन्तकैः॥
चेतसा सत्त्वयुक्तेन दानं तद्विमलं स्मृतम्।"
इति गारुड़े ५१ अध्यायः॥
विमलमणिः, पुं, (विमलः स्वच्छो मणिः।) स्फटिकः। इति राजनिर्घण्टः॥
विमला, स्त्री, (विमल+टाप्।) सप्तला। इत्यमरः॥ चामरकषा इति भाषा॥ (अस्याः पर्य्यायो यथा,—
"प्रातला सप्तला सारा विमला विदुला च सा।
तथा निगदिता भूरिफेना चर्म्मकषेत्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
भूमिभेदः। इति मेदिनी। ले, १३१॥ देवीभेदः। यथा,—
"यूथाख्या विमला कार्य्या शुद्धहारेन्दुवर्चसा।
सुक्ताक्षस्रक्धरी च कमण्डलुकरा वरा॥
नावासनसमारूढा श्वेतमाल्याम्बरप्रिया।
दधिचीरोदनाहारा कर्पूरमदचर्चिता।
चितपङ्कजहोमेन राज्यायुर्नृपवर्द्धिनी॥"
इति देवीपुराणे संवत्सरदेवताद्वितीयविंशतिकाविधिः॥ * ॥ अन्यच्च।
"पूजयेत् कर्णिकामध्ये वासुदेवन्तु नायकम्।
विमला नायिका तस्य वासुदेवस्य कीर्त्तिता॥"
इति कालिकापुराणे ८२ अध्यायः॥ * ॥ अपरञ्च।
"उत्कले नाभिदेशश्च विरजाक्षेत्र उच्यते।
विमला सा महादेवी जगन्नाथस्तु भैरवः॥"
इति तन्त्रचूड़ामणौ ५१ पीठनिर्णयः॥ (यथा च देवीभागवते। ७। ३०। ६४।
"गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे॥")
विमलात्मकः, त्रि, (विमलो निर्म्मल आत्मा यस्य।) निर्म्मलः। इत्यमरटीकायां रायमुकुटः॥
विमलाद्रिः, पुं, (विमलः अद्रिः।) शत्रुञ्जयपर्व्वतः। इति हेमचन्द्रः॥
विमलार्थकः, त्रि, निर्म्मलः। इत्यमरटीकायां रायमुकुटः॥
विमांसं, क्ली, (विरुद्धं मांसम्।) असुद्धमांसम्। तत्तु कुक्कुरादिमांसम्। इति केचित्॥
विमाता, [ऋ] स्त्री, (विरुद्धा माता।) माल्लसपत्नी। सतमा इति भाषा। सा कनीयस्यपि नमस्या। यथा, स्मृतिः।
"मातुः पितुः कनीयांसं न नमेद् वयसाधिकः।
नमस्कुर्य्यात् गुरोः पत्नीं भ्रातृजायां विमातरम्॥"
स्त्रीत्वधर्म्मसारे।
"स्त्रियो नमस्या ब्रह्मश्च वयसा पत्युरेव ताः॥"
यतः पत्युर्व्वयसा ताः स्त्रियो वृद्धा अतः कनिष्ठा अपि नमस्याः। इति मलमासतत्त्वं॥ *॥
विमातरञ्चोनिष्टत्तावपि पितामहधनविभागकर्त्तव्यत्वम्। यथा ब्रह्मस्मृतिः।
"पित्रोरभावे भ्रातॄणां विभागः संप्रदर्शितः।
मातुर्निवृत्ते रजसि जीवतोरपि दृश्यते॥"
अत्र माल्लपदं विमाल्लपरमपि पुत्रान्तरोत्पत्तिसम्भावनातोऽस्यात्। इति दायतत्त्वम्॥ *॥
अस्या अनंशित्वं यथा। सोदरभ्रातृभिर्विभागे क्रियमाणे मात्रे पुत्रसमांशो दातव्यः। समांशहारिणी माता इति वचनात्माल्लपदस्य जननीपरत्वात् न सपत्नीमाल्लपरत्वमपि। सपत्नीसुतस्य सख्यगौणत्वानुपपत्तेः। इति दायभागः॥
विमातृजः, पुं, (विमातुर्जायते इति। विमातृ+जन+ड।) माल्लसपत्नीपुत्रः। तत्पर्य्यायः। वैमात्रेयः २। इत्यमरः॥ वैमात्रः ३। इति जटाधरः॥
विमानः, पुं क्ली, (विगतं मानमुपमा यस्य।) देवरथः। तत्पर्य्यायः। व्योमयानम् २। इत्यमरः॥ (यथा, कुमारसम्भवे। २। ४५।
"भुवनालोकनप्रीतैः खर्गिभिर्गामुपस्थितैः।
खिलीभूते विमानानां तदापातभयात् पथि॥")
सार्व्वभौमगृहम्। (तत्तु सप्तभूमियुतगृहम्। यथा, रामायणे। १। ५। १६।
"सर्व्वरत्नसमाकीर्णं विमानगृहशोभिताम्॥"
"विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि॥"
इति तट्टीकाधृतमेदिनीधरः॥)
घोटकः। यानमात्रम्। इति मेदिनी। ने, १३२॥ (त्रि, परिच्छेदकम्। यथा, ऋग्वेदे। २। ४०। ३।
"सोमापूषण्ना रजसो विमानं
सप्तचक्रं रथमविश्वमिन्वम्॥"
"विमानं परिच्छेदकं सर्व्वमानमित्यर्थः।" इति तट्टीकायां सायणः॥ साधनम्। यथा, तत्रैव। ३। ३। ४।
"पिता यज्ञानामसुरो विपश्चितां
विमानमग्निर्दिवयुनञ्च वाघताम्॥")
"विमानं विमीयतेऽनेन फलमिति विमानं यज्ञादिकर्म्मसाधनम्।" इति तट्टीकायां सायणः॥
विगतो मानो यस्येति विग्रहे। अवज्ञातः। यथा, भागवते। ५। १२। १०।
"कर्हिचित् क्षुद्ररसाग् विचिन्वंस्तस्मक्षिकाभिर्व्यथितो विमानः।
तच्चाति क्षुद्रं प्रति लब्धमानो
बलादिमुष्यन्त्यथ तांस्ततोऽन्ये॥")
विमार्गः, पुं, विपूर्व्वमृजधातोर्घञ्प्रत्ययेन निष्पन्नः॥ सम्मार्জ্জनी। (विरुद्धो मार्गः।) कुपथः। (यथा, भ्राकुलत्वे ५ अङ्के।
"नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय।")
विसृक्तः, त्रि, (वि+सृच्+क्तः।) विशेषेण सृक्तः। यथा,—
"येऽम्भोरविन्दाक्ष विमुक्तमानिन-
स्त्वय्यस्तभावादविशुद्धबुद्धयः।
आरुह्य कृच्छ्रेण परं पदं ततः
पतन्त्यधो नादृतयुष्मदङ्घ्रयः॥"
इति श्रीभागवते १० स्कन्धे १४ अध्यायः॥
मुक्तः। (यथा, महाभारते। ७। २८। ३५।
"विसृक्तं परमास्त्रेण जहि पार्थ महासुरम्।
देहित्रं युधि दुर्द्धर्षं भगदत्तं सुरद्विषम्॥"
पुं, माधवी। तत्पर्य्ययो यथा,—
"माधवी स्यात्तु वासन्ती पुष्पकोऽपि च।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)
विसृक्तिः, स्त्री, (वि+सृच्+क्तिन्।) विमोचनम्। मोचः। यथा, प्रायश्चित्ततत्त्वे।
"पितृभक्तिं दिवि ये च मर्त्याः
स्वधासुतः काम्यफलाभिसन्धौ।
प्रदानशक्ताः सकलेप्सितानां
विसृक्तिदा येऽनभिसंहितेषु॥"
विसुखः, त्रि, (विरुद्धं अननुकूलं सुखं यस्य।) वक्रिमुखः। विरतः। यथा,—
"खागमैः कल्पितैस्त्वं हि जगाद्मदिसुखान्
कुरु।
माञ्च गोपय येन स्यात् हरिरेवोत्तरोत्तरा॥"
इति पाद्मोत्तरखण्डे शिवं प्रति विष्णुवाक्यम्॥
विसुदः, त्रि, (विगता सुदा सप्तभावो यस्य।) प्रफुल्लः। इति हेमचन्द्रः॥ सुदारहितश्च॥
विमोचनं, क्ली, (वि+मोच+ल्युट्।) विमोचनम्। परित्यजनम्। यथा,—
"यं धर्म्मकामार्थविमुक्तिकामा
भजन्त इष्टां गतिमाप्नुवन्ति।
किञ्चाशिषो रात्यपि देहमव्ययं
करोतु मेऽदभ्रदयो विमोचनम्॥"
इति श्रीभागवते १०।८६ अध्यायः॥
विमोचनं, क्ली, (वि+सृच्+ल्युट्।) दूरीकरणम्। विसृक्तिः। विपूर्व्वमुचधातोरनट्प्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते। १। १६०। १३।
"अथवाहं करिष्यामि कुलस्यास्य विमोचनम्।
फलसंख्या भविष्यामि त्वत्वा कर्म्म सुदुष्करम्॥"

तीर्थविशेषः। यथा, महाभारते ।३।८३।१५०।
"विमोचनमुपस्पृश्य जितमन्युर्जितेन्द्रियः।
प्रतिग्रहकृतैर्दोषैः सर्वैः स परिमुच्यते॥"
पुं, महादेवः। यथा, महाभारते ।१३।१७।५६।
"विमोचनः सुस्रुतो हिरण्यकवचोद्भवः॥")

विमोहनं, क्ली, वैचित्त्यकरणम्। विपूर्व्वमुह-धातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम्॥ (विमोहयतीति। वि+मुह+णिच्+ल्युः। विमोहके, त्रि। यथा, भागवते। ११। २४। ६।
"ततो विकुर्व्वतो जातो योऽहङ्कारो विमोहनः॥")

विमोहितः, त्रि, (वि+मुह+णिच्+क्तः।) मोहयुक्तः। मोहितः। यथा,—
"तावप्यतिबलोन्मत्तौ महामायाविमोहितौ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम्॥"
इति देवीमाहात्म्यम्॥

बि(बि)म्बं, क्ली, (बी गत्यादिषु+"उखास्यद्यच।" उणा० ४। ६५। इति बन् प्रत्ययेन निपातनात् साधुः।) प्रतिबिम्बम्। कमण्डलुः। इति संक्षिप्तसारोणादिवृत्तिः॥ (मूर्त्तिः। यथा, भागवते। ३। २। ११।
"प्रदर्शनीयप्रवपसामविलम्बदृशां नृणाम्।
आदायान्तर्दधात् यस्तु स्वबिम्बं लोकलोचनम्॥"
तथाच राजतरङ्गिण्याम्। ३। ४६६।
"मेघवाहनभूभर्तृपत्नी भिन्नाख्या कृते।
विहारेऽपि तया बुद्धबिम्बं साधु निवेशितम्॥")
बिम्बिकाफलम्। तेलाकुचा इति भाषा। इति मेदिनी। बे, ७॥ (यथा, कुमारे। ३। ६७।
"उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि॥")
अस्य पर्य्यायः। तुण्डिकेरी २ रक्तफला ३ बिम्बिका ४ पीलुपर्णी ५। इत्यमरः॥ ओष्ठी ६ बिम्बी ७। इति रत्नमाला। बिम्बा ८ बिम्बकम् ९ बिम्बजा १०। इति शब्दरत्नावली॥ अस्य गुणाः। पित्तकफच्छर्द्दिव्रणदुष्टव्रणकुष्ठनाशित्वम्। इति राजवल्लभः॥ अपि च।
"बिम्बी रक्तफला तुण्डी तुण्डिकेरी च बिम्बिका।
ओष्ठोपमफला प्रोक्ता पीलुपर्णी च कथ्यते॥
बिम्बीफलं खादु शीतं गुरु पित्तास्रवातजित्।
स्वादनं लेखनं रुच्यं विबन्धाध्मानकारकम्॥"
इति भावप्रकाशः॥

बि(बि)म्बः, पुं क्ली, (बी+"उखास्यद्यच।" उणा० ४। ६५। इति बन्प्रत्ययेन साधुः।) सूर्य्यचन्द्रमण्डलम्। इत्यमरः॥ (यथा, प्रबोधचन्द्रोदये ६ अङ्के।
"असौ त्वदन्यो न सनातनः पुमान्
भवान् न देवात् पुरुषोत्तमात् परः।
स एव भिन्नस्वमनादिमायया
द्विधेव बिम्बं सलिले विवस्वतः॥"
यथाच मार्कण्डेये। ८४। ११।
"ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम्॥"
मण्डलमात्रेऽपि। यथा, ऋतुसंहारे। १। ४।
"नितम्बबिम्बैः सुदुकूलमेखलैः
स्तनैः सहाराभरणैः सचन्दनैः।
शिरोरुहैः स्नानकषायवासितैः
स्त्रियो निदाघं शमयन्ति कामिनाम्॥"
यथाच कुमारे। ७। २२।
"आत्मानमालोक्य च क्षोभमान-
मादर्शबिम्बे स्तिमितायताक्षी।
हरोपयाने त्वरिता बभूव
स्त्रीणां प्रियालोकफलो हि वेषः॥")

बि(बि)म्बः, पुं, (बी+बन्प्रत्ययेन साधुः।) शकलासः। इति मेदिनी। बे, ७॥

बि(बि)म्बकं, क्ली, (बिम्ब+स्वार्थे कन्।) चन्द्रसूर्य्यमण्डलम्। बिम्बिकाफलम्। इति शब्दरत्नावली॥ (सचकः। सॉंच इति भाषा॥ यथा, नैषधे। २२। ४७।
"विधिर्विधर्त्ते विधिना वधूनां
किमाननं काञ्चनसञ्चकेन॥"
अत्र। "काञ्चनस्य सञ्चकेन बिम्बकेन॥" इति नारायणीटीका॥)

बि(बि)म्बजा, स्त्री, (बिम्बं फलं जायतेऽस्यामिति। जन्+डः।) बिम्बिका। इति शब्दरत्नावली॥

बि(बि)म्बटः पुं, सर्षपः। इति शब्दचन्द्रिका॥

बि(बि)म्बा, स्त्री, (बिम्बं फलमस्यस्यामिति। बिम्ब+अच्। टाप्।) बिम्बिका। इति शब्दरत्नावली॥

बि(बि)म्बिका, स्त्री, बिम्बम्। इत्यमरः॥ (यथा,—
"तुम्बी रक्तफला बिम्बी तुण्डीकेरी च बिम्बिका॥"
इति वैद्यकरत्नमालायाम्॥)
चन्द्रसूर्य्यमण्डलम्। इति शब्दरत्नावली॥

बि(बि)म्बी, स्त्री, (बिम्ब+गौरादित्वात् ङीष्।) बिम्बिका। इति शब्दरत्नावली॥ (यथा,—
"काकादनीं चित्रफलां बिम्बीं गुञ्जाञ्च
धारयेत्॥"
इति सुश्रुते उत्तरतन्त्रे ३२ अध्यायः॥)

बि(बि)म्बुः, स्त्री, गुवाकः। इति केचित्॥

बि(बि)म्बोष्ठः, त्रि, (बिम्ब+ओष्ठः। "ओष्ठो-
बि(बि)म्बौष्ठः, ष्ठयोः समासे वा।" इति पाचि-
कोऽकारलोपः।) बिम्ब इव ओष्ठौ यस्य। इति सुग्धबोधव्याकरणम्॥

बियच्चारी, [न्] पुं, (बियति आकाशे चरतीति। चर+णिनिः।) सिद्धः। इति शब्दमाला॥ आकाशगामिनि, त्रि॥

बियत्, क्ली, (बियच्छति न विरमतीति। वि+यम+"अन्येभ्योऽपि दृश्यते।" ३। २। १७८। इति क्विप्। क्लौ चमादीनामिति मलोपे तुक्।) आकाशम्। इत्यमरः॥ (यथा, भागवते। ३। ८। ३३।
"तस्यैव तस्याभिसरःसरोज-
मात्मात्मभूः सममः स्वसर्ज बियच्च।
ददर्श देवो जगतो विधाता
नातः परं लोकविसर्गदृष्टिः॥"
द्यावापृथिव्यौ। अत्र द्विवचनस्य प्रयोगः स्यात्। यथा, तैत्तिरीयब्राह्मणे। १। १। ३। २।
"द्यावापृथिवी सहास्ताम्। ते बियती अवृताम्।"
तथाच शतपथब्राह्मणे। ७। १। २। २३।
"तयोर्विय्यद्योर्व्योरन्तरेणाकाश आसीत् तदन्तरिक्षमभवत्॥" *। वि+या+क्विप्। गमनशीले, त्रि। यथा, भागवते। ७। ६। १४।
"कुटुम्बपोषाय वियन्निजायु-
र्न बुध्यतेऽर्थं विहतं प्रमत्तः॥"
तथा, तत्रैव। ६। २१। ३।
"वियद्वित्तस्य दक्षस्य लब्धं लब्धं बुभूषतः।
निष्किञ्चनस्य धीरस्य सकुटुम्बस्य सीदतः।
यतोयुरुच्चावरिग्रहान्यप्रिबतः किल॥"
"वियद्वित्तस्य वियतो गगनादिव उत्तमं विनैव देवादुपस्थितं वित्तं भोग्यं यस्य। यद्वा वियत् स्वयं प्राप्नुवद्वित्तं भोग्यं यस्य।" इति तट्टीकायां श्रीधरस्वामी॥)

बियद्गङ्गा, स्त्री, (वियतो गङ्गा।) स्वर्गगङ्गा। इत्यमरः॥

बियद्भूतिः, स्त्री, (वियतो भूतिर्भस्मेव।) अन्धकारः। इति त्रिकाण्डशेषः॥

बियन्मणिः, पुं, (वियतो मणिः।) सूर्य्यः। इति हारावली॥

बियमः, पुं, (वि+यम+"यमः समुपनिविषु च।" ३। ३। ९१। इत्यप्।) संयमः। इत्यमरः॥ दुःखम्। इति स्वामी॥

बियातः, त्रि, (विरुद्धं निन्दां यातः प्राप्तः।) निर्लज्जः। इत्यमरः॥

बियामः, पुं, (वि+यम+घञ्।) संयमः। इत्यमरः॥

बियुक्तः, त्रि, बियोगविशिष्टः। विपूर्व्वयुजधातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, देवीभागवते।२। ६। १३।
"किं करोमि क्व गच्छामि मृतामे प्राणवल्लभा।
न वै जीवितुमिच्छामि वियुक्ता प्रिययानया॥")

बियोगः, पुं, (वि+युज+घञ्।) विच्छेदः। तत्पर्य्यायः। विप्रलम्भः२ विप्रयोगः३ विरहः४। इति हेमचन्द्रः॥ (यथा, भागवते ।६।१३। ६।
"यस्य योगं न वाञ्छन्ति वियोगभयकातराः।
भजन्ति चरणाम्भोजं सुनयो हरिमेधसः॥")

बियोगभाक्, [ज्] त्रि, (बियोगं भजते इति। भज+विच्।) विच्छेदयुक्तः। यथा, नैषधे।
"वियोगभाजोऽपि नृपस्य पश्यतो
तदैव साक्षादन्तर्तामुमाननम्।
पिकेन रोषारुणचक्षुषा मुहुः
कुहूरुतात्कूयत चन्द्रवैरिणी॥"

बियोगी, [न्] पुं, (वियोगोऽस्यास्तीति। वियोग+इनिः।) चक्रवाकः। इति शब्दचन्द्रिका॥ वियोगयुक्ते, त्रि॥ (यथा, मार्कण्डेये ।२२।२५।
"ताः स्त्रीणां या वियोगिन्यो न स्त्रीणां या
मृताः सह।
भर्त्तृविश्लेषजनया नानुभूतः क्षतव्यया॥")

वियोजितः, त्रि, वियोगं प्रापितः। विपूर्ब्बयुज्-घातोः क्तप्रत्ययेन निष्पन्नः॥

विरक्तः, त्रि, (वि+रञ्ज+क्तः।) विरागयुक्तः। अनुरक्तः। यथा,—

"ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः। खलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः॥"

इति श्रीभागवते ११ स्कन्धे १८ अध्यायः॥

(यथा च।

"त्वयि प्रसन्ने मम किं गुणेन
त्वय्यप्रसन्ने मम किं गुणेन।
रक्ते विरक्ते च वरे वधूनां
निरर्थकः कुङ्कुमरागएषः॥"

इत्युद्भटः॥)

विरक्ता, स्त्री, दुर्भगा। इति त्रिकाण्डशेषः॥ अननुकूला। यथा, नीतिशतके। १।

"यां चिन्तयामि सततं मयि सा विरक्ता
सा चान्यमिच्छति जनं स जनोऽन्यरक्तः।
अस्मत्कृतेऽपि परितुष्यति काचिदन्या
धिक् ताञ्च तञ्च मदनञ्च इमाञ्च माञ्च॥"

विरक्तिः, स्त्री, (वि+रञ्ज+क्तिन्।) विरागः। यथा,—

"देहो गुरुर्मम विरक्तिविवेकहेतु-
र्बिभ्रत् सत्त्वनिधनं सततार्त्तिदर्कम्।
तत्त्वान्यनेन विमृशामि यथा तथापि
प्रारब्धमित्यवशितो विचराम्यसङ्गः॥"

इति श्रीभागवते। ११। ६। २५॥

विरङ्गं, क्ली, कङ्कुष्ठम्। इति राजनिर्घण्टः॥

विरचितः, त्रि, (वि+रच+क्तः।) विशेषेण रचितः। निर्म्मितः। यथा,—

"एष श्रीहनूमता विरचिते श्रीमन्महानाटके वीरश्रीयुतरामचन्द्रचरिते प्रत्युद्भूते विक्रमैः॥"

इत्यादि महानाटकम्॥

विरजस्कमाः, [स्] पुं, सत्त्वगुणविशिष्टः। तत्पर्य्यायः। द्व्यातिगः २। इत्यमरः।२।७।४५॥

"विगते रजस्तमसौ येषां ते रजस्तमोगुणशून्याः सत्त्वैकनिष्ठाः साचात्कृततन्नाम्नो जीवन्मुक्ता व्यासादयो द्व्यातिगा उच्यन्ते। द्वयं द्वैतं अतिक्रम्य गच्छन्ति इति वः।" इति भरतः॥

विरजाः, [स्] स्त्री, (विनिवृत्तं रजः शोणितं यस्याः।) विगतार्त्तवा। इति जटाधरः॥ (नास्ति रजो धूलिर्यत्र। धूलिरहिते, त्रि। यथा, महाभारते। १। ६३। १५।

"सर्व्वैरिहानीं गन्तव्यं सह स्वर्गजितो वयम्। एष नो विरजाः पन्था दृश्यते देवसद्मनः॥"

निर्म्मलः। यथा, महाभारते। २। ७। ५।

"विरजोऽम्बरसंवीताञ्जो स्त्रीकोटिभूतिभिः सह॥"

पुं, नागविशेषः। यथा, महाभारते।१।३५।१४।

"विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्यवान्॥")

विरजा, स्त्री, कपित्थागोवृक्षः। इति रत्नमाला॥ दूर्व्वा। इति हारावली॥ ययातिमाता। यथा,

उत्पन्नाः पिप्पलकन्यायां विरजायां महाबलाः।
यतिर्य्ययातिः स्वयातिरायातिः पञ्चमो लुकः।
तेषां ययातिः पञ्चानां महाबलपराक्रमाः॥"

इति कौर्म्मे २० अध्यायः॥

श्रीकृष्णसखी। सा राधाभयात्तत्क्षणात्प्राप्ता सती सरिद्रूपाभवत्। तस्याः सप्त पुत्राः तप्त समुद्रा अभवन्। यथा,—

"एकदा राधिकायाञ्च गोलोके श्रीहरिः स्वयम्।
विजहार महारण्ये निर्ज्जने रासमण्डले॥
ज्ञात्वा विहारं श्रीकृष्णस्यासह्यां विहाय च।
गोपिकां विरजामग्र्यां शृङ्गारार्थं जगाम ह॥
दृष्ट्वा च श्रीहरिस्तूर्णं विजहार तया सह।
तयासक्तं श्रीहरिञ्च रत्नमञ्चसंस्थितम्॥
दृष्ट्वा च राधिकायाञ्च चक्रुस्तास्च निवेदनम्।
जगाम सहसा देवी तं रत्नमञ्चं सुने॥
द्वारे नियुक्तं ददर्श द्वारपालं मनोहरम्।
तमुवाच रुषा देवी रक्तपङ्कजलोचना॥
दूरं गच्छ गच्छ दूरं रतिलम्पटकिङ्कर!।
कौडघ्नीं मत्परां कान्तां द्रक्ष्यामि ततप्रभोरहम्॥
श्रुत्वा कोपाकुलं शब्दं गोपिकानां हरिः स्वयम्।
ज्ञात्वा च कोपितां राधामन्तर्धानं चकार ह॥
विरजा राधिकाशब्दात् अन्तर्धानं हरेरपि।
दृष्ट्वा राधाभयाच्छी सा जग्मौ प्राणांश्च योगतः॥
सद्यस्तत्र सरिद्रूपं तच्छरीरं बभूव ह॥
शाम्रश्च वर्त्तुलाकारं तया गोलोकमेव च॥
कोटियोजनविस्तीर्णं प्रस्थेऽतिनिम्नमेव च॥
दैर्घ्ये दशगुणं चारु नानारत्नाकरं परम्।
राधा रतिगृहं गत्वा न ददर्श हरिं सुने॥
विरजाञ्च सरिद्रूपां दृष्ट्वा गेहं जगाम सा।
श्रीकृष्णो विरजां दृष्ट्वा सरिद्रूपां प्रियां सतीम्॥
उच्चै रुरोद विरजातीरे नीरमनोहरे।
त्वया विनाहं सुभगे कथं जीवामि सुन्दरि!॥
नद्यधिष्ठातृदेवी त्वं भव मूर्त्तिमती सति।
पुरातनं शरीरं ते सरिद्रूपमभूत् सति॥
जलादुत्थाय चागच्छ विधाय नूतनं तनूम्।
आजगाम हरेरग्रं साचाद्राधेव सुन्दरी॥
पश्यन्तं प्राणनाथञ्च पश्यन्ती वक्त्रचक्षुषा।
ताञ्च रूपवतीं दृष्ट्वा प्रेमगोदेकां जगत्पतिः॥
चकारालिङ्गनं तूर्णं चुचुम्ब च मुहुर्मुहुः।
नानाप्रकारशृङ्गारविपरीतादिकं प्रभुः॥
रहसि प्रेयसीं प्राप्य चकार च पुनः पुनः।
विरजा सा रजोयुक्ता दृष्ट्वा वीर्य्यमनोभवम्॥
सद्यो बभूव तच्चैव धृत्वा गर्भवती सती।
तस्यौ तत्र सुखासीना सार्द्धं पुत्रैश्च सप्तभिः॥
एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्ज्जने।
विजहार पुनः साध्वी शृङ्गारासक्तमानसा॥
एतस्मिन्नन्तरे तत्र मातुः क्रोडं जगाम ह।
कनिष्ठपुत्रस्तस्याश्च भाग्यैः पीडितो भिया॥
भीतं खतनयं दृष्ट्वा तत्याज तां कृपानिधिः।
क्रोडे चकार बालं सा त्यक्तो राधाग्रहं ययौ॥

प्रबोध्य बालं सा साध्वी न ददर्शान्तिकं प्रियम्।
विललाप भृशं तत्र शृङ्गारात्प्रमानसा॥
शशाप स्वसुतं कोपात् लवणोदो भविष्यसि।
शशाप सर्व्वान् बालांश्च यान्तु यूयं रसातलम्॥
श्रुत्वा विवरणं सर्व्वे प्रजग्मुर्धरणीतलम्।
सप्तद्वीपे समुद्राश्च सप्त तत्पुत्रविभागगाः॥
कनिष्ठादृष्टपर्य्यन्तं द्विगुणं द्विगुणं सुने।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः।
एतेषाञ्च जलं पृथ्व्यां पुण्यार्थञ्च भविष्यति॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २।३ अध्यायौ॥

जगन्नाथक्षेत्रम्। यथा,—

"उत्कले नाभिदेशश्च विरजाक्षेत्रमुच्यते।
विमला सा महादेवी जगन्नाथस्तु भैरवः॥"

इति तन्त्रचूड़ामणौ ५१ पीठनिर्णये॥*॥ तत्र स्नानोपवासौ न कर्त्तव्यौ। यथा। स्कन्दे।

"स्नानोपवासयत्नस्तु सर्व्वतीर्थेष्वयं विधिः।
वर्जयित्वा गयां गङ्गां विरजां तथा॥"

इति प्रायश्चित्ततत्त्वम्॥

विरञ्चः, पुं, ब्रह्मा। इति हेमचन्द्रः॥

विरञ्चिः, पुं, ब्रह्मा। इति हेमचन्द्रः॥

विरणं, क्ली, वीरणस्तम्बम्। इति शब्दरत्नावली॥

विरतः, त्रि, (वि+रम+क्तः।) निवृत्तः। यथा—

"आत्तविद्यो सुनेर्जातो भ्रातुस्त्रासो निजैर्भवात्।
विरतोऽन्तर्हितो दुष्टाच्छोकाद्रामेण वारितः॥"

इति सुग्धबोधव्याकरणम्॥

विरतिः, स्त्री, (वि+रम+क्तिन्।) निवृत्तिः। तत्पर्य्यायः। आरतिः २ अपरतिः ३ उपरामः ४। इत्यमरः॥ उपरमः ५ विरामः ६। इति भरतः॥ (यथा, कथासरित्सागरे। २०१। ६।

"तस्याश्च दुःखदीर्घायां गतायां विरतिं निशि॥")

विरलं, क्ली, दधि। इति राजनिर्घण्टः॥

विरलः, त्रि, अवकाशः। फाक् इति भाषा। तत्पर्य्यायः। पेलवः २ तनुः ३। इत्यमरः॥ (यथा, दृष्टान्तकथायाम्। ६०। ३।

"सूपाकारविरूक्षपाण्डुरवपुर्वक्त्रो शिरासन्ततौ संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःखप्रदौ॥")

विरलद्रवा, स्त्री, (विरलो निर्म्मलो द्रवो यस्याः।) अत्यवागूः। यथा,—

"यवागूरुष्णिका आण्ढा सेव तु दृढसिक्थिका।
विलेपी तरला च स्यात् सा ज्ञेया विरलद्रवा॥"

इति जटाधरः॥

विरहः, पुं, (वि+रह त्यागे+घः।) विच्छेदः। तत्पर्य्यायः। विप्रलम्भः २ विप्रयोगः ३ वियोगः ४। इति हेमचन्द्रः॥*॥ (यथा, साहित्यदर्पणे। १०।

"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः।

सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे ॥"
भर्तृविरहस्तु स्त्रीणां दोषाय भवति। यथा,
मनौ। ६। १३।
"प्रायं दुर्जनसंसर्गः पत्या च विरहोऽटनम्।
स्वप्नोऽन्यगेहे वासश्च नारीणां दूषणानि षट्॥")
विरहे वर्जनीयानि यथा। तापः। निश्वासः।
चिन्ता। मौनम्। क्षुधाक्षता। वस्त्वरतुल्यरात्रिदैर्घ्यम्। जागरणम्। ग्लौतवे उन्मत्तज्ञानम्। इति कविकल्पलता॥
विरहिणी, स्त्री. (विरहोऽस्या अस्तीति। विरह + इनि + स्त्रियां ङीप्।) विच्छेदविग्निष्टा नारी। यथा,—
"रतिः पुंसो विरहिणो स्त्रियः स्त्रीविरहिणो चिरम्।
द्वयोर्द्वयोश्च संप्राप्तौ किं बभूव द्वयोः सुखम्॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ४६ अध्यायः॥
भूतिः। इति शब्दमाला॥
विरहितः, त्रि, (वि + रह + क्तः।) त्यक्तः। विहीनः। यथा,—
"अभिभूतत्वावमतं त्यक्तस्तु स्यात् ससज्जितम्।
हीनं विरहितं धूतसृतृद्धरविधुते अपि॥"
इति जटाधरः॥
(यथा, साहित्यदर्पणे। १०।
"इदं वक्त्रं यत्राद्रिरहितकलङ्कः प्रियधरः
सुधाधाराधारश्चिरपरिचितं बिम्बमधरः॥
इमे नेत्रे रात्रिन्दिवमधिकशोभे कुवलये
तनुर्लावण्यानां जलधिरवगाहे सुखतरः॥")
विरही, [न्] पुं, (विरहोऽस्त्यस्मीति। इनिः।) विरहविग्निष्टः। वियोगी। यथा,—
"विहरति हरिरिह सरसवसन्ते।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते॥"
इति जयदेवः॥
विरागः, पुं, (वि + रञ्ज + घञ्।) अनुरागः। रागशून्यः। यथा,—
"विषयेष्वतिसंरागो मानसो मल उच्यते।
तेष्वेव हि विरागो हि नैर्मल्यं समुदाहृतम्॥"
इति प्रायश्चित्ततत्त्वम्॥
(त्रि, विविधवर्णविग्निष्टः। यथा, महाभारते। २। २१। २५।
"बलादुपहृत्य माल्यानि मालाकारान्महाबलाः।
विरागवसनाः सर्वे स्रग्विणो हृष्टकुण्डलाः॥"
विगतो रागो विषयवासना यस्येत्यर्थे। वीतरागः। यथा, भागवते। ३। १५। ४७।
"यत्तेऽनुतापविदिते हृदि भक्तियोगैः
कृदयन्त्यपो हृदि विदुर्मुनयो विरागाः॥")
विरागार्हः, त्रि, (विरागं अर्हतीति। अर्ह + अण्।) विरागयोग्यः। तत्पर्यायः। वैरङ्किकः २। इति हेमचन्द्रः॥
विराजः, पुं, (विशेषेण राजते इति। वि + राज + अच्।) विराट्। यथा,—
"इन्द्राग्नी वदनात्तुभ्यं पशवो मलसम्भवाः।
ओषधयो रोमसम्भूता विराजस्त्वं नमोऽस्तु ते॥"
इति वामने ८३ अध्यायः॥
विराजमानः, त्रि, (वि + राज + शानच्।) दीप्तिविग्निष्टः। यथा,—
"जटाकटाहसम्भ्रमद्भ्रमन्निलिम्पनिर्झरी
विलोलवीचिवल्लरीविराजमानमूर्द्धनि।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम॥"
इति काशीखण्डे रावणकृतशिवताण्डवस्तोत्रम्॥
विराजितः, त्रि, (वि + राज + क्तः।) शोभितः। दीप्तः। यथा,—
"अतीव निर्मलं सारं सूर्य्यभासविनिन्दकम्।
परिष्कृतञ्च मानिक्यैर्हीरकैश्च विराजितम्॥"
इति ब्रह्मवैवर्ते गणपतिखण्डे १० अध्यायः॥
विराट्, [ज्] पुं, (विशेषेण राजते इति। राज दीप्तौ + क्विप्।) क्षत्रियः। इत्यमरः॥ स्थूलशरीरसमष्ट्युपहितचैतन्यम्। इति वेदान्तसारः॥ *॥ (ब्रह्मणो विराड्मूर्त्तिवर्णनं यथा, ब्रह्मवैवर्ते ६ प्रकरणे। "यूहमूर्त्तिर्विराट् चतुर्दशलोकात्मकः। तस्य ब्रह्माण्डकपर्यन्तमाकाशः शिरः, चन्द्रसूर्य्यौ नेत्रे, प्रागादिदिशः श्रोत्रे, अन्तरीक्षलोको घ्राणं, मेरुः पृष्ठवंशः, शिखरत्रयं भुजकण्डाः, प्रत्यन्तपर्वताः पृष्ठपार्श्ववक्षांसि, उपपर्वताः श्रोण्यादीनि, वसुधा रक्तं, लता स्नायूनि, वृक्षवृक्षाः रोमाणि, भूमिः क्षुधिः, द्वीपा वलयः, भूरेखा रोमराजिः, भूमध्यप्रदेशो वक्षिः, शेषः शिश्नं, दिग्दन्तिपङ्क्तिर्नितम्बोरुभागः, अतलादिसप्तकं कटिपादान्तराजः, कूर्मः पादौ इति।"*॥) महाविराजुत्पत्तिर्यथा,—
श्रीनारायण उवाच।
"अथ ह्यम्भो जले तिष्ठन् यावद्वै ब्रह्मणो वयः।
ततः स काले सहसा द्विधा भूतो बभूव ह॥
तन्मध्ये ग्रिग्नुरेकश्च शतकोटिरविप्रभः।
क्षुधं रोरूयमाणश्च स्तनन्धयः पीड़ितः क्षुधा।
पिप्पलाद्परित्यक्तो जलमध्ये निराश्रयः।
ब्रह्माण्डसंघनाथो यो दरग्रोर्द्दमनाथवत्॥
स्थूलात् स्थूलतमः सोऽपि नाम्ना देवो महाविराट्।
परमाणुर्यथा सूक्ष्मात् परः स्थूलात्तथाप्यसौ॥
तेजसा षोड़शांशो यः कृष्णस्य परमात्मनः।
आधारोऽसंख्यविश्वानां महान् विष्णुश्च प्रोक्तः।
प्रत्येकं लोमकूपेषु विश्वानि निखिलानि च।
तस्यापि तेषां संख्याश्च कृष्णो वक्तुं न हि क्षमः॥
संख्या चैतेजसामस्ति विश्वानां न कदाचन।
ब्रह्मविष्ण्वग्निवादीनां तथा संख्या न विद्यते॥
प्रतिविश्वेषु सन्त्येवं ब्रह्मविष्ण्वग्निवादयः।
पातालाद्ब्रह्मलोकान्तं ब्रह्माण्डं परिकीर्त्तितम्॥
अत ऊर्द्धं च वैकुण्ठो ब्रह्माण्डाद्बहिरेव च।
स च सत्यस्वरूपश्च ग्रन्थनारायणो यथा॥
अत ऊर्द्धञ्च गोलोकः पञ्चाशत्कोटियोजनात्।
नित्यं सत्यस्वरूपश्च यथा कृष्णस्तथाप्ययम्॥
सप्तद्वीपमिता पृथ्वी सप्तसागरसंयुता।
ऊनपञ्चाशदुपदीपासंख्यशैलसमन्विता॥
ऊर्द्धं स्वर्गाः सप्त लोका ब्रह्मलोकसमन्विताः।
पातालानि च सप्ताधश्चैवं ब्रह्माण्डमेव च॥
ऊर्द्धं धरायाः भूर्लोको भुवर्लोकस्ततः परः।
ततः परश्च स्वर्लोको जनो लोकस्ततः परः॥
ततः परस्तपोलोकः सत्यलोकस्ततः परः।
ततः परो ब्रह्मलोकस्तप्तकाञ्चननिर्म्मितः॥
एवं सर्वं कृत्रिमश्च धराभ्यन्तरमेव च।
तद्विनाशे विनाशश्च सर्वेषामेव नारद॥
जलबुद्बुदवत् सर्वं विश्वसंघमनित्यकम्।
नित्यौ वैकुण्ठगोलोकौ सत्यौ ग्रन्थदकृत्रिमौ॥
प्रतिलोमकूपे ब्रह्माण्डं प्रत्येकमस्य निश्चितम्।
एषां संख्या न जानाति कृष्णोऽन्यस्यापि का कथा॥
प्रत्येकं प्रतिब्रह्माण्डे ब्रह्मविष्ण्वग्निवादवः।
तिस्रः कोट्यः सुराश्चाश्च संख्याः सर्वत्र पुत्रक॥
दिगीशाश्चैव दिक्पाला नक्षत्राणि ग्रहादयः।
भुवि वर्षाश्च चत्वारोऽप्यधो नागाश्चराचराः॥
अथ काले च स विराट् ऊर्द्धं दृष्ट्वा पुनः पुनः।
द्वितीयान्तरञ्च शून्यञ्च न द्वितीयञ्च कञ्चन।
चिन्तामवाप चतुर्युक्तो हरोऽपि च पुनः पुनः।
ज्ञानं प्राप्य तदा दध्यौ कृष्णं परमपूरुषम्॥
ततो ददर्श तत्रैव ब्रह्मज्योतिः सनातनम्।
नवीनजलदश्यामं द्विभुजं पीतवाससम्॥
सस्मितं सुलीलरूपं भक्तानुग्रहकारकम्।
जहास बालकस्तुष्टो दृष्ट्वा जनकमीश्वरम्॥
वरं तस्मै ददौ तुष्टो वरेण्यः समयोचितम्।
मत्समो ज्ञानयुक्तश्च क्षुत्पिपासादिवर्ज्जितः॥
ब्रह्माण्डसंख्यनिलयो भव वत्स मयावधि।
निष्कामो निर्भयश्चैव सर्वेषां वरदो वरः॥
जराजन्मरुगशोकपीड़ादिवर्ज्जितो भव।
इत्युक्त्वा च हरिर्ब्रह्मे महामन्त्रं षड़क्षरम्॥
त्रिःकृत्वश्च प्रजजाप वेदागमवरं परम्।
प्रणवादिचतुर्थ्यन्तं कृष्ण इत्यक्षरद्वयम्॥
वह्निजायान्तमित्यश्च सर्वविघ्नहरं परम्।
मन्त्रं दत्त्वा तदाहारं कथयामास स प्रभुः॥
श्रूयतां मद्वचः श्रुत्वा निबोध कथयामि ते।
प्रतिविश्वेषु यन्नैवेद्यं ददाति विश्वदे जनः॥
तत्षोड़शांशं विधयिणो विष्णोः पञ्चदशस्य वै।
निर्गुणस्यात्मनश्चैव परिपूर्णतमस्य च॥
नैवेद्येन च कृष्णस्य नहि किञ्चित् प्रयोजनम्।
यद्यद्ददाति नैवेद्यं यस्मै देवाय यो जनः॥
स च खादति तत् सर्वं लक्ष्मीदृष्ट्या पुनर्भवेत्।
तच्च मन्त्रं वरं दत्त्वा तमुवाच पुनर्विभुः॥
वरमन्यं किमिच्छन्ते तन्मे ब्रूहि ददामि च।
कृष्णस्य वचनं श्रुत्वा तमुवाच महाविराट्॥
अदन्तो बालकस्तत्र वचनं समयोचितम्।
श्रीमहाविराडुवाच।
वरं मे त्वत्पदाम्भोजे भक्तिर्भवतु निश्चला।
सन्ततं यावदायुर्मे क्षणं वा सुचिरं हि वा॥

लक्ष्मक्तियुक्तो यो बालो जीवन्मुक्तश्च सन्ततम् ।
तद्भक्तिहीनो मूर्खश्च जीवन्नपि मृतो हि सः ॥
किन्तज्जपेन तपसा यज्ञेन पूजनेन च ।
कृष्णभक्तिविहीनस्य मूर्खस्य जीवनं वृथा ॥
येनात्मना जीवितश्च तमेव नहि मन्यते ।
यावदात्मा शरीरेऽस्ति तावत् स भक्तिसंयुतः ॥
पश्चाद्यान्ति गते तस्मिन् न सतत्वाश्च भक्तयः ।
स च लाभ्य महाभाग सर्व्वात्मा प्रकृतेः परः ॥
स्वेच्छामयश्च सर्व्वेभ्यो ब्रह्मज्योतिः सनातनः ।
इत्युक्त्वा बालकस्तत्र विरराम च नारद ॥
उवाच कृष्णः प्रस्तुत्तिं मधुरां श्रुतिसुन्दरीम् ॥

श्रीकृष्ण उवाच ।

सुचिरं सुस्थिरं तिष्ठ यथार्हं त्वं तथा भव ।
ब्रह्मणोऽसंख्यपाते च पातस्ते न भविष्यति ॥
अंशेन प्रतिब्रह्माण्डे त्वच्च क्षुद्रविराड्भव ।
तन्नाभिपद्मे ब्रह्मा च विश्वस्रष्टा भविष्यति ॥
ललाटे ब्रह्मणश्चैव रुद्राश्चैकादशैव तु ।
शिवांशेन भविष्यन्ति संहारस्यादयाय वै ॥
कालाग्निरुद्ररूपेणैको विश्वसंहारकारकः ।
पाता विष्णुश्च विश्वयी क्षुद्रांशेन भविष्यति ॥
मद्भक्तियुक्तः सततं भविष्यसि वरेण मे ।
ध्यानेन कमनीयं मां नित्यं द्रक्ष्यसि निश्चितम् ॥
मातरं कमनीयाश्च मम वक्षःस्थलस्थिताम् ।
यामि लोकं तिष्ठ वत्सेत्युक्त्वा सोऽन्तरधीयत ॥
गत्वा स्वलोकं ब्रह्माणं शङ्करं स उवाच ह ।
स्रष्टारं स्रष्टुमीशञ्च संहर्त्तारञ्च ततश्चयम् ॥

श्रीकृष्ण उवाच ।

सृष्टिं स्रष्टुं गच्छ वत्स नाभिपद्मोद्भवो भव ।
महाविराड्लोमकूपे क्षुद्रस्य च विधे शृणु ॥
गच्छ वत्स महादेव ब्रह्मभालोद्भवो भव ।
अंशेन च महाभाग स्वयञ्च सुचिरं तपः ॥
इत्युक्त्वा जगतां नाथो विरराम विधिस्तुतः ।
जगाम ब्रह्मा तं नत्वा शिवश्च शिवदायकः ॥
महाविराड्लोमकूपे ब्रह्माण्डे गोलोके जले ।
बभूव च विराट् क्षुद्रो विराडंशेन साम्प्रतम् ॥
श्यामो युवा पीतवासाः शयानो जलतल्पके ।
ईषद्धास्यः प्रसन्नास्यो विश्वव्यापी जगार्हणः ॥
तन्नाभिकमले ब्रह्मा बभूव कमलोद्भवः ।
संभूय पञ्चदशकञ्च बभ्राम युग-लक्षकम् ॥
नान्तं जगाम दृष्ट्वस्य पद्मनाभस्य पद्मजः ।
नाभिजस्य च पद्मस्य चिन्तामाप पिता तव ।
स्वस्थाने पुनरागत्य ददर्श क्षुद्रः पद्मभुजम् ।
ततो ददर्श क्षुद्रन्तं कालेन दिव्यचक्षुषा ॥
शयानं जलतल्पे च ब्रह्माण्डे गोलकाश्रिते ।
यज्ञोमकूपे ब्रह्माण्डे तच्च तत् परमेश्वरम् ।
श्रीकृष्णञ्चापि गोलोकं गोपगोपीसमन्वितम् ॥
तं संस्तुत्य वरं प्राप ततः सृष्टिचकार सः ।
बभूवुर्ब्रह्मणः पुत्रा मानसाः सनकादयः ॥
ततो रुद्राः कपालाश्च शिवांशैकादश स्मृताः ।
बभूव पाता विष्णुश्च क्षुद्रस्य वामपार्श्वतः ॥
चतुर्भुजश्च भगवान् श्वेतद्वीपनिवासकृत् ।
क्षुद्रस्य नाभिपद्मे च ब्रह्मा विष्णुं ससर्ज्ज च ॥

स्वर्गं मर्त्यञ्च पातालं त्रिलोकं सचराचरम् ।
एवं सर्व्वं लोमकूपे विश्वं प्रत्येकमेव च ॥
प्रतिविश्वे क्षुद्रविराट् ब्रह्मविष्णुशिवादयः ।
इत्येवं कथितं वत्स श्रीकृष्णकीर्त्तनं परम् ॥
सुखदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३ अध्यायः ॥

स्वायम्भुवमनुः । यथा,—
"गतेषु तेषु दक्षार्थं प्रजासर्गसमाप्तिमाम् ।
उपयेमे स विश्वात्मा प्रसूरूपामनिन्दिताम् ॥
सम्भूय तया सार्द्धमतिकामातुरो विभुः ।
सलज्जां चकमे देवः कमलोदरमन्दिरे ॥
यावदब्दशतं दिव्यं यथान्यः प्राकृतो जनः ।
ततः कालेन महता ततः पुत्रोऽभवन्मनुः ॥
स्वायम्भुव इति ख्यातः स विराड्रिति नः श्रुतम् ।
तद्रूपगुणसामान्यादधिपूरुष उच्यते ॥
वैराजा यत्र ते जाता बहवः प्रांशुतव्रताः ।
स्वायम्भुवा महाभागा सप्त सप्त तथापरे ॥
स्वारोचिषाद्या सर्व्वे ते ब्रह्मतुल्याः सरूपिणः ।
औत्तमिप्रमुखास्तद्वदृषेयां त्वं सप्तमोऽधुना ॥"

इति मात्स्ये ३ अध्यायः ॥

विराट्, पुं, देशविशेषः । इति शब्दरत्नावली ॥
(अत्रैव पञ्चपाण्डवाः सह द्रौपद्या अज्ञातसुवितवन्तः । यथा, महाभारते ।४ । १ । १ ।
"कथं विराटनगरे मम पूर्व्वपितामहाः ।
अज्ञातवासमुषिता दुर्य्योधनभयार्दिताः ॥")
तद्देशीयराजा । यथा,—
"अत्र शूरा महेष्वासा भीमार्জ্জুनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥"

इति श्रीभगवद्गीतायाम् १ अध्यायः ॥

विराटकः, पुं, राजपट्टः । इति हेमचन्द्रः ॥
विराटजः, पुं, (विराटे जायते इति । जन् + डः ।) विराटदेशीयहीरकः । तत्पर्य्यायः । राजपट्टः २ राजावर्त्तः ३ । इति हेमचन्द्रः ॥
विराटराजजाते, त्रि ॥ (यथा, महाभारते । १४ । ६२ । ८ ।
"सवर्षूनि च राजेन्द्र दिवसानि विराटजा ।
नाशयुङ्क्त पतिदुःखार्त्ता तदाभूत्करुणं महत् ॥")
विराड्वी, [न्] पुं, हस्ती । इति शब्दमाला ॥
विराधः, पुं, (विराधयति लोकान् पीड़यतीति । वि + राध + अच् ।) राक्षसभेदः । यथा,—
"लक्ष्मणस्य तु तद्वाक्यं श्रुत्वा रामं ततोऽब्रवीत् ।
पिता मेऽभूत् सुपर्ज्ञ्यो माता मे च शतह्रदा ॥
विराध इति मामाहु पृथिव्यां सर्व्वराक्षसाः ।
उत्सृज्य प्रमदामेनां पलायेतां पराङ्मुखौ ॥
तच्छ्रुत्वा राममाहेदं लक्ष्मणः किं प्रतीक्षसे ॥
इत्युक्तो लक्ष्मणो वीर आगम्य सुमहद्धनुः ।
उत्ससर्ज्ज शरं घोरं कालदण्डोपमं ततः ॥
तच्छरीरं महाकायं भित्त्वा पातालमाविशत् ॥
पपात भू गतप्राणः सपेनं रुधिरं वमन् ।
ततोऽसौ राममाहेदं प्राञ्जलिर्विनयान्वितः ॥
तुम्बुरुर्नाम गन्धर्व्वः प्रविष्टो राक्षसीं तनुम् ।
अभिशापादहं घोरं प्राप्तो वैश्रवणेन वै ॥

प्रसाद्यमानः स मया शापस्यान्तं पुनः पुनः ।
यदा दाशरथी रामो भविष्यति महाबलः ॥
शापस्यान्तोऽभविष्यत्ते तेन रामेण संयुगे ।
प्रसादात्तव सुक्तोऽहं गमिष्यामि स्वमालयम् ॥"
इति वह्निपुराणे खरवधाख्यानाधिकीर्त्तनं नामाध्यायः ॥

विराधनं, क्ली, (वि + राध + ल्युट् ।) पीड़ा । इति शब्दरत्नावली ॥
विराधानं, क्ली, पीड़ा । इति शब्दरत्नावली । विराधानमिति च पाठः ॥
विरामः, पुं, (वि + रम + घञ् ।) श्लेषः । निवृत्तिः । विरतिः । तत्पर्य्यायः । अवसानः २ समाप्तिः ३ । इति जटाधरः ॥ मध्यम् ४ । इति त्रिकाण्डशेषः ॥ (यथा, मनौ । २ । ७३ ।
"अधीष्व भो इति ब्रूयात् विरामोऽस्यवधारणम् ॥")
परवर्णाभावः । इति व्याकरणम् ॥ (यथा, पाणिनौ ।१।४। ११० । "विरामोऽवसानम् ॥")
विरालः, पुं, बिड़ालः । इत्यमरटीका ॥
विरावः, पुं, (वि + रु + घञ् ।) शब्दः । इत्यमरः ॥ (यथा, महाभारते । ३ । १४६ । ६४ ॥
"सिंहनादभयत्रस्तैः कुञ्जरैरपि भारत ! ।
सृक्तो विरावः सुमहान् पर्व्वतो येन पूरितः ॥"
इत्यत्रप्रदेशान्तरः । यथा, महाभारते । ३ । ६६ । १७ ।
"विरावश्च सुरावश्च तस्मिन् युक्तौ रथे स्थौ ॥")
विरावी, [न्] त्रि, विरावविशिष्टः । विरावो विद्यतेऽस्येति इनिप्रत्ययेन निष्पन्नः ॥ (यथा, हलायुधसंहितायाम् । ५३ । ६ ।
"दिशि प्राप्तायां शुकुनो मधुरविरावी यदा तदा वाच्यः ।
अर्थस्तस्मिन् स्थाने गृहेश्वराधिष्ठितोऽङ्गेवा ॥")
विरिक्तः, त्रि, कृतविरेकः । यथा,—
"दुर्विरिक्तस्य नासिस्तु स्रवता कुत्सितं मुहुरक् ।
पुरीषवातसङ्गश्च कण्डूमण्डलगौरवम् ॥"

इति भावप्रकाशः ॥

विरिञ्चः, पुं, ब्रह्मा । (यथा, भागवते ।८।५।३६।
"बलाद्भवेन्द्रस्त्विदृशाः प्रसादा-
न्मन्योर्गिरीशो विभवादिरिञ्चः ॥")
विष्णुः । शिवः । इति शब्दरत्नावली ॥
विरिञ्चनः, पुं, ब्रह्मा । इति हेमचन्द्रः ॥
विरिञ्चिः, पुं, शिवः । विष्णुः । विधाता । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १६ । १७ ।
"एवमस्त्विति तं देवाः पितामहमथाब्रुवन् ।
उक्त्वैवं वचनं देवान् विरिञ्चिस्त्रिदिवं ययौ ॥")
विरिञ्चः, पुं, स्वरः । इति सुग्धबोधव्याकरणम् ॥
विरुदः, पुं, गुणोत्कर्षादिवर्णनम् । यदुक्तम् ।
"वाग्मिकः कम्पितश्चेति विरुदो द्विविधो मतः ।
संयुक्तनियमो ह्यत्र वर्ज्जितः पूर्व्ववद्वुधैः ॥

दिश्चतुःषड्दशभ्यश्च कलास्तु विरुदे मताः।
दशभ्यो नाधिकाः कार्य्याः कलासु विरुदे बुधैः॥
कलिकाभ्यस्तु विरुदे भिदासावेव कीर्त्तिता।
विरुदं कवयः प्राहुर्गुणोत्कर्षादिवर्णनम्।
विरुदः कलिका यान्ते धीरवीरादिशब्दभाक्॥
इत्युपोद्घातः। इति श्रीरूपगोस्वामिभक्तश्रीगोविन्दविरुदावलीभाष्ये श्रीबलदेवविद्याभूषणः।

विरुदावली, स्त्री, (विरुदानामावली।) विरुदश्रेणी। स्तवमाला। तल्लक्षणादि यथा,—
"अधीत्य विरुदावल्या लक्षणं ग्रन्थसम्मतम्।
एतच्चेत् पठति प्राज्ञस्तदा बोधोऽस्य पुष्कलः॥
सामान्यविरुदावल्या गोविन्दविरुदावली।
योऽभ्यधायि विशेषैस्तैः स तावदिह लिख्यते॥
कलिका श्लोकविरुदैर्युता विविधलक्षणैः।
कीर्त्तिप्रतापप्रौढीर्य्यसौन्दर्य्योन्मेषशालिनी॥
कलिकाद्यन्तसंसर्गिपद्या दोषविवर्जिता।
शब्दाडम्बरसंवृद्धा कन्यैव विरुदावली॥"
इति श्रीरूपगोस्वामिभक्ते श्रीगोविन्दविरुदावलीभाष्ये श्रीबलदेवविद्याभूषणः॥ * ॥ कलिकालक्षणं कलिकाशब्दे लिखितम्। विरुदलक्षणं तत्रैव द्रष्टव्यम्॥

विरुद्धः, त्रि, (वि+रुध+क्तः।) विरोधविशिष्टः। यथा। विरुद्धधर्म्मसमवाये भूयसां स्यात् सधर्म्मकत्वम्। इति जैमिनीसूत्रम्॥
"विरुद्धं गुरुवाक्यस्य यदत्र भाषितं मया।
तत् सन्तः बुधैरेव स्तुतितत्त्वबुभुत्सया।
स्तुतितत्त्वे प्रमादादृयद्विरुद्धं बहुभाषितम्।
गुरुलेशानुरागेण तच्छोध्यं धन्यैरधिभिः॥"
इति निष्पादितस्तवम्॥
(दशममनोर्म्मन्वन्तरावर्त्तः देवतान्यतमः। यथा, भागवते। ८। १३। २९।
"इविष्मान् सुकृतः सत्यो जयो मूर्त्तिरनुत्तमा द्विजाः।
सुवासना विरुद्धाद्या देवाः शम्भुः सुरेश्वरः॥"
क्ली, विचारासहीयदोषविशेषः। यथा। "विरुद्धं नाम यद्दृष्टान्तसिद्धान्तसमयैर्विरुद्धं तत्र दृष्टान्तसिद्धान्तावुक्तौ। समयः पुनर्यथायुर्वैदिकसमयो याज्ञिकसमयो मोक्षप्राप्तिकसमय इति। तत्रायुर्वैदिकसमयः चतुष्पादसिद्धिः। बालभाषयत्व इति याज्ञिकसमयः। सर्व्वभूतेष्वहिंसेति मोक्षप्राप्तिकसमयस्तत्र स्वसमयविपरीतमुच्यमानं विरुद्धमिति॥" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)

विरूढः, त्रि, अङ्कुरितः। (यथा, "विरूढशालं अङ्कुरितधान्यक्षेत्रमम्।" इति माधवक्षेत्रनिरूपये मूलव्याख्याने विजयरक्षितः॥) जातः। इति मेदिनी। ढे, ६॥ (यथा, रघुवंशे। २। २६।
"गङ्गाप्रपातान्तविरूढशष्पं
गौरीगुरोर्गह्वरमाविवेश॥")
आरोहणविशिष्टः। यथा।
"सन्तुष्टे तिरुणां पुरामपि रिपौ कक्षीकृतो मेखली
लीलालूनपुनर्विरूढशिरसो वीरस्य लिप्सुर्वरम्।"
इत्यादि मुरारिः॥

विरूपं, क्ली, पिप्पलीमूलम्। इति राजनिर्घण्टः॥

विरूपः, त्रि, (विकृतं रूपं यस्य।) कुत्सितः। कुरूपः। यथा,—
"विरूपोक्षतनिस्त्रिंशमकृत्वापूर्व्वकं हि यत्।
पूरुषं दानमाज्याभ्यामुपहन्ति उदाहृतः॥"
इति रामतर्कवागीशः॥
(यथा, हरिवंशे। ७०। २३।
"या तूत्तरोष्ठेन समुन्नतेन
रूक्षाग्रकेशी कलहप्रिया सा।
प्रायो विरूपासु भवन्ति दोषा
यत्राकृतिस्तत्र गुणा वसन्ति॥"
परित्यक्तरूपः। यथा, ऋग्वेदे। १०। ६५। १६।
"यद्दिरूपाचरं मर्त्तेष्ववसंरात्रीः प्रुरुदक्षतम्।"
"यदुयदा विरूपा परं मनुष्यस्य सम्यक्तां विगतसहजभूतदेवरूपाः।" इति तद्भाष्ये सायणः॥ नानारूपः। यथा, ऋग्वेदे। १। ५३। ७।
"इमे भोजा अङ्गिरसो विरूपा
दिवस्पुत्रासो असुरस्य वीराः॥"
"हे इन्द्र इमे यामं कुर्व्वाणा भोजाः सौदासाः क्षत्रियाः तेषां यागका विरूपाः विविधरूपा मेधातिथिप्रभृतयः॥" इति तद्भाष्ये सायणः॥ विरुद्धः। यथा, साहित्यदर्पणे। १० परिच्छेदे।
"विरूपयोः संघटना या च तद्विषमं मतम्॥"
उदाहरणं यथा,—
"क्व वनं तरुवल्कभूषणं
नृपलक्ष्मीः क्व महेन्द्रवन्दिता॥")
स्वार्थे क। विरूपकञ्च॥

विरूपः, पुं, सुमनोराजपुत्रः। यथा,—
"जाताः सुमनसः पुत्रास्त्रयः शूरा महाबलाः।
सुमतिश्च विरूपश्च सत्यः श्राद्धार्थपारगाः॥"
इति कालिकापुराणे ६० अध्यायः॥

विरूपा, स्त्री, दुरालभा। अतिविषा। इति राजनिर्घण्टः॥

विरूपाक्षः, पुं, (विरूपे अक्षिणी यस्य। "सक्थ्यक्ष्णोः स्वाङ्गात् षच्।" इति षच्।) शिवः। इत्यमरः॥ (यथा, साहित्यदर्पणे। १०।
"इज्या दर्भं मनसिजं जीवयन्ति दशैव याः
विरूपाक्षस्य जयिनीस्तासुमो वामलोचनाः॥")
रुद्रभेदः। इति जटाधरः॥ तस्य पुरी सुमेरोर्नैर्ऋतकोणे वर्त्तते। यथा,—
"तथा चतुर्थे दिग्भागे नैर्ऋताधिपतेः स्मृता।
नाम्ना कृष्णावती नाम विरूपाक्षस्य धीमतः॥"
इति वाराहे रुद्रगीता॥
(विरूपे, त्रि। यथा, कुमारे। ५। ७२।
"वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु॥")

विरूपिका, स्त्री, (विकृतं रूपं यस्याः। कन्। टापि अत इत्वम्।) कुरूपा। यथा,—
"नाप्नुयः परिविन्दन्ति न यज्ञा न तपांसि च।
न च आहुः कनिष्ठस्य या च कन्या विरूपिका॥"
इत्युदाहृतस्तवम्॥

विरूपी, [न्] पुं, (विरूपं रूपमस्यास्तीति। इनिः।) जाहकजन्तुः। इति राजनिर्घण्टः॥
कुरूपविशिष्टे, त्रि॥

विरेकः, पुं, (वि+रिच+घञ्।) मलभेदः। तत्पर्य्यायः। रेचनम् २ रेकः ३ रेचना ४ विरेचनम्५। इति शब्दरत्नावली॥ प्रस्कन्दनम् ६। इति रत्नमाला॥ (यथा, वैद्यके।
"धूमात्युष्णशिरो विरेकवमनस्वेदोपनाहादिकं
यानाहारविहारभेषजमिदं श्लेष्मागमुग्रं जयेत्॥"
अस्य योग्यायोग्या यथा,—
"बालवृद्धकृशस्त्रीक्षपीनसार्त्तभयार्हिताः।
रूक्षग्रीवहृदास्युक्ता गर्भिणी च नवज्वरी॥
अधो गच्छति यस्याहक्सृतिकातङ्करोगिणी।
नैते विरेकयोग्याः स्युरन्येभ्यश्च बलाबलम्॥
नवज्वरे च ये योगा भेदकाः परिकीर्त्तिताः।
ते तथैव प्रयोक्तव्या बीक्ष्य देहमवादिकम्॥"
इति वैद्यकरत्नसारसंग्रहे विरेकाधिकारे॥)

विरेचकः, त्रि, रेचकः। विरेककारकः। सारकः। मलभेदकः। जोलाब इति आरबीभाषा॥ विपूर्ब्बकरिच्धातोर्ण्वुलप्रत्ययेन निष्पन्नः। (यथा, वैद्यके।
"पटोलपत्रं पित्तघ्नं नाड़ी तस्य कफापहा।
फलं तस्य त्रिदोषघ्नं मूलं तस्य विरेचकम्॥")

विरेचनं, क्ली, (वि+रिच+ल्युट्।) विरेकः। इति शब्दरत्नावली॥ तत्कारकौषधं यथा,—
"हरीतकी समगुड़ा मधुना सह पेषिता।
विरेचनकरी रुद्र भवतीति न संशयः॥
त्रिफला चित्रकं चित्रं तथा कटुकरोहिणी।
उरुस्तम्भहरो ह्येष उत्तमस्तु विरेचनम्॥"
अपि च।
"त्रिफला वदरं द्राक्षा पिप्पली च विरेचनात्।
हरीतकी सोष्णनीरा लवणञ्च विरेचनात्॥"
इति गारुड़े १८०। १६६ अध्यायौ॥ * ॥
अन्यच्च। अथ विरेचनविधिः।
"स्निग्धस्विन्नाय वान्ताय दद्यात् सम्यग्विरेचनम्।
अवान्तस्य लघुःसन्नो यदग्नौ क्षोदयेत् कफः॥
मन्दाग्निगौरवं कुर्य्याज्जनयेद्वा प्रवाहिकाम्।
अथवा प्राचनैरामं बलासं परिपाचयेत्॥
अन्यदात्ययिके कार्य्ये ग्रीवनं ग्रीवयेद्बुधः॥"
आत्ययिके प्राणसङ्कटे।
"पित्ते विरेचनं युक्त्यादामोद्भूते गदे तथा।
उदरे च तथाध्माने कोष्ठशुद्धौ विशेषतः॥
दोषाः कदाचित् कुप्यन्ति जिता लङ्घनपाचनैः।
शोधनैः शोधिता ये तु न तेषां पुनरुद्भवः॥
बालो वृद्धो भृशं स्निग्धः स्वतश्चीणो भयान्वितः।
आनाहसृष्टार्त्तः सूतश्च गर्भिणी च नवज्वरी॥

अधोगरक्तपित्ती च न विरेच्या विजानता।
नवप्रसूता नारी च मन्दाग्निश्च मदात्ययी॥
शूल्यादिनश्च रूक्षश्च न विरेच्या विजानता।
जीर्णज्वरी गरव्याधी वातरक्ती भगन्दरी॥
अर्शः प्राक्षूदरग्रन्थिकृद्रोगारुचिपीड़िताः।
योनिरोगप्रमेहार्शगुल्मप्लीहव्रणार्दिताः॥
विदग्धिच्छर्दिविस्फोटविसूचीकुष्ठसंयुताः।
कर्णनासाक्षिरोवक्त्रगुदमेढ्रामयान्विताः॥
प्लीहग्रीथाग्निरोगार्ताः क्रमिचारानलार्दिताः।
मूलिनो मूत्रघातार्ता विरेकार्हा नरा मताः॥
बहुपित्तो मृदुः प्रोक्तो बहुश्लेष्मा च मध्यमः।
बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते॥
मृद्वी मात्रा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा।
क्रूरे तीक्ष्णा मता दद्येन्दुमध्यामतीक्ष्णके॥
मृदुर्दोषापयश्चयुतैलैरपि विरिच्यते।
मध्यमस्त्रिवृतातिल्वाराजवृक्षैर्विरिच्यते।
क्रूरः सुकृपयसा हेमक्षीरीदन्तीफलादिभिः॥"
चयुतैलमेरण्डतैलम्। राजवृक्षः धनवेहरा।
हेमक्षीरी चोकम्। दन्तीफलं दहदन्तीफलं जयपाल इति प्रसिद्धम्।
"मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफात्मिका।
वेगैर्विंशतिभिर्मेध्या हीनोक्ता दशवेगिका।
द्विपलं श्रेष्ठमाख्यातं मध्यमश्च पलं भवेत्।
पलार्द्धश्च कषायार्थं कनीयस्तु विरेचनम्॥
कल्कमोदकचूर्णानां कर्षमभ्यञ्जलेहतः।
कर्षद्वयं पलं वापि वयोरोगाद्यपेक्षया॥
पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत्।
त्रिफलाक्वाथगोमूत्रैः पिबेत् क्षौद्रं कफार्दितः॥
त्रिवृत्तैस्त्रवशुण्ठीनां चूर्णमक्षे पिबेन्नरः।
वातार्दितो विरेकाय जाङ्गलानां रसेन वा॥
एरण्डतैलं त्रिफलाक्वाथेन द्विगुणेन वा।
युक्तं पीतं पयोभिर्वा न चिरेण विरिच्यते॥"
शीघ्रमेव विरिच्यत इत्यर्थः।
"त्रिवृता कोटजं बीजं पिप्पली विश्वभेषजम्।
सन्दीकारसं क्षौद्रं वर्षाकाले विरेचनम्॥
त्रिवृद्दुरालभासुस्तशुण्ठीदीप्यचन्दनम्।
द्राक्षामृता सपुष्पाङ्गं शीतलं च घनात्यये॥"
उदीच्यं वाला। घनात्यये शरदि।
"पिप्पली नागरं सिन्धुश्यामात्रिवृतया सह।
लिह्यात् क्षौद्रेण शिशिरे वसन्ते च विरेचनम्॥"
श्यामा त्रिवृत्।
"त्रिवृता शर्करातुल्या ग्रीष्मकाले विरेचनम्।
अभया मरिचं गुडौविड्गामलकानि च।
पिप्पली पिप्पलीमूलं चव्यपत्रं सुरभेव च।
एतानि समभागानि दन्ती तु द्विगुणा भवेत्॥
त्रिवृतादशगुणा ज्ञेया वहुगुणा वात्र शर्करा।
मधुना मोदकान् कृत्वा कर्षमात्रान् प्रमाणतः॥
एकैकं भक्षयेत् प्रातः शीतक्षीरानुपिबेज्जलम्।
तावद्विरिच्यते जन्तुर्यावद्वृक्षं न सेवते।
पानाहारविहारेषु भवेन्नियमवान् सदा॥
विषमज्वरमन्दाग्निपाण्डुकासभगन्दरान्।
दुर्नामकुष्ठयक्ष्मार्शोगुल्मश्लीपदारुभान्॥
विदाहज्वीहमेहांश्च यक्ष्मार्थं वयसामयान्।
वातरोगांस्तथाध्मानं नृचक्षुःक्षुत्क्षयाश्मरीम्॥
पृष्ठपार्श्वोरुजघनजङ्घोदररुजं जयेत्।
सततं शीलनादेषां प्रलितानि प्रणाशयेत्।
अभया मोदका ह्येते रसायनवराः स्मृताः॥"
अभयामोदको रसायनः॥ * ॥
"पीत्वा विरेचनं शीतजलैः संसिच्य चक्षुषी।
सुगन्धि किंचिदाघ्राय ताम्बूलं शीलयेदरम्।
निर्वातस्थो न वेगांश्च धारयेन्न प्रयोजयेत् च।
शीतास्तु न शृणुयेत् क्षापि कोष्णनीरं पिबेच्छुचः॥
बलासौषधपित्तानि वायुर्वान्ति यथा व्रजेत्।
रेकान्तया मलं पित्तं भेषजं च कफो व्रजेत्॥
दुर्विरिक्तस्य नाभिस्थ क्षयता कुक्षिमूलरुक्।
पुरीषवातसङ्गश्च कण्डूमण्डलगौरवम्॥
विदाहोरुरुचिराध्मानं भ्रमश्छर्दिश्च जायते।
तं पुनः पाचनैः स्नेहैः पक्वं संसृज्य रेचयेत्॥
तेनास्योपद्रवा यान्ति दीप्तामिर्लघुता भवेत्।
विरेकस्यातियोगेन मूर्च्छा भंशो गुदस्य च॥
शूलं कर्षातियोगः स्यान्मांसधारणसन्निभम्।
मेदोनिभं जलाभासं रक्तश्चापि विरिच्यते॥
तस्य शीतास्बुभिः सिक्ता शरीरं तण्डुलाम्बुभिः।
मधुसिक्थैस्तथा शीतैः कारयेदमनं मृदु॥
सहकारत्वचः कल्को दधा सौवीरकेण वा।
पिण्डो नाभिप्रलेपेन हन्त्यतीसारसृक्प्रवम्॥
सौवीरन्तु यवैरामैः पक्वैर्वा निस्तुषीकृतम्॥"
सौवीरं सन्धानम्।
"आजं क्षीरं रसश्चापि वेष्किरं हारिणं तथा।
ग्राम्यैः पशुभिः सिद्धा

अपि च ।
"न कुर्य्याद्बहुभिः सार्द्धं विरोधं बन्धुभिस्त्वया ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
न्यायमते साध्याभावाप्रकाभावप्रतियोगित्वम् । इति चिन्तामणिः । साध्यासामानाधिकरण्यम् । इति दीधितिः । * । प्रभवादिषष्टिसंवत्सरान्तर्गतत्रयस्त्रिंशद्वर्षम् । यथा, भविष्यपुराणे ।
भैरव उवाच ।
"विषमस्थं जगत् सर्व्वं विरोधे भयसंभवम् ।
विकारी सर्व्वतोऽपायो मम वाक्यन्तु नान्यथा ।"
इति ज्योतिस्तत्त्वम् ॥
अनैक्यम् । विपरीतार्थः । यथा,—
"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत् सता ।"
इति स्मृतिः ॥
(नाशः । यथा, महाभारते । ३ । ३०० । ३ ।
"यस्यं प्राप्यविरोधेन कौत्तिमिच्छसि प्राप्तवीम् ।
सा ते प्राणान् समादाय गमिष्यति न संशयः ॥"
नाटकोक्तप्रतिमुखाङ्गान्यतमः । यथा, साहित्यदर्पणे । ६ । ३५१ ।
"विरोधश्च प्रतिमुखे तथा स्यात् पर्य्युपासनम् ॥"
तल्लक्षणोदाहरणे यथा, तत्रैव । ३५८ ।
"विरोधो व्यसनप्राप्तिः । यथा, चण्डकौशिके राजा । नूनमसमौक्ष्यकारिणा मयान्धेनेव क्षुरच्छिन्नाकलापो व्यसनः पन्नगो समाक्रान्तः ।" * । अलङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ७१८ ।
"क्रियाक्रियाद्रलाभ्यां यद्वयं द्रव्येण वा मिथः ।
विरुद्धमिव भाषेत विरोधोऽसौ दयाशतिः ॥")
विरोधनं, क्ली, (वि + रुध + ल्युट् ।) विरोधः । इत्यमरः । (यथा, कथासरित्सागरे । ५६ । १६६ ।
"दुष्कृतापफलं पुत्र मातापित्रोर्विरोधनम् ॥"
नाशः । यथा, रामायणे । २ । ३६ । २६ ।
"अदुष्टस्य हि संत्यागः सत्यस्य निरतस्य च ।
निर्दोषेऽपि प्रकृष्टस्य त्रुतिं धर्म्मविरोधनात् ॥"
नाटकोक्तविमर्शाङ्गान्यतमः । यथा, साहित्यदर्पणे । ६ । ३०८ ।
"शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम् ॥"
तल्लक्षणादिकं यथा, तत्रैव । ३८७ ।
"कार्य्यात्ययोपगमनं विरोधनमिति स्मृतम् ॥")
विरोधिनी, स्त्री, (विरुणद्धि या । वि + रुध + णिनि । ङीप् ।) विरोधकारिका । यथा,—
"विरोधं कुरुते चात्मा द्रव्ययोः प्रीयमाणयोः ।
बधूनां सुहृदां पित्रोः पुत्रैः सारक्षिकेण वा ।
विरोधिनी सा तद्रक्षां कुर्व्वीत बलिकर्म्मणा ॥"
इति मार्कण्डेयपुराणे दुःसहवंशोत्पत्तिः ॥
विरोधी, [न्] पुं, (विरुणद्धीति । वि + रुध + णिनि ।) शत्रुः । इति हलायुधः ॥ (यथा, मनुः । ४ । १७ ।
"सर्व्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः ॥"
विरोधोऽस्यस्तीति । विरोध + इनिः ।) प्रभवादिषष्टिसंवत्सरान्तर्गतत्रयोविंशवर्षम् । यथा, भविष्यपुराणे । भैरव उवाच ।
"जगत्प्रबला लोका धान्यौषधिप्रपोषणम् ।
जायते मानुषे कष्टं विरोधिनि न संशयः ॥"
इति ज्योतिस्तत्त्वम् ॥
विरोधविशिष्टे, त्रि । (यथा, कुमारे । ५ । ४७ ।
"विरोधिसत्त्वोज्झितपूर्व्वमत्सरं
द्वयेरभीष्टप्रसवार्थितातिथि ॥")
विरोधोक्तिः, स्त्री, (विरोधस्य उक्तिः ।) परवचनविरोधिवचनम् । तत्पर्य्यायः । विप्रलापः २ विरोधवाक् ३ क्रोधोक्तिः ४ प्रलापः ५ । इति शब्दरत्नावली ॥
विल, ग्र स्तुतौ । इति कविकल्पद्रुमः । (तुदा० पर० सक० सेट् ।) स्तुतिरिह आच्छादनम् । ग्र, विलति वस्त्रं लोकः परिदधाति इत्यर्थः । वेलिता । अयं कैश्चिन्न मन्यते । इति दुर्गादासः ॥
वि(बि)लं, क्ली, (विल + कः ।) छिद्रम् । इत्यमरः । (यथा, महाभारते । ९ । १४६ । १७ ।
"पाण्डवाश्चापि ते सर्व्वे सह माद्र्या सुदुःखिताः ।
विलेन तेन निर्गत्य जग्मुर्दुःखसमन्विताः ॥")
गुहा । इति मेदिनी । (यथा, कुमारे । ६ । ३६ ।
"जितसिंहभया नागा यत्राम्भो विलयोनयः ।
यत्राः किंपुरुषाः पौरा योषितो वनदेवताः ॥")
वि(बि)लः, पुं, उच्चैःश्रवा हयः । इति मेदिनी । वेतसः । इति शब्दचन्द्रिका ॥
वि(बि)लकारी, [न्] पुं, (विलं करोतीति । ल + णिनिः ।) मूषकः । इति राजनिर्घण्टः ॥ गर्त्तकारके, त्रि ॥
विलक्षः, त्रि, (विगतेन लक्षयतीति । वि + लक्ष + घञ्यप् ।) विलक्षयान्वितः । इत्यमरः । (यथा, कथासरित्सागरे । ३६ । १५ ।
"इत्युक्ता स विलक्षं तं वेद्यं स्वप्नमृषोऽब्रवीत् ।
किं तस्य च्छगलस्यापि मांसमेषोऽपि कश्चन ॥")
विलक्षणं, क्ली, (विगतं लक्षणं आलोचनं यत्र ।) हेतुसूच्याख्या । निष्प्रयोजनस्थितिः । यथा,—
"विलक्षणं मतं स्थानं यद्भवेन्निष्प्रयोजनम् ॥"
इति भागुरिः । इत्यमरभरतौ ॥
(यथा, भागवते । १० । ७० । ३८ ।
"यदित्थमागात्मतयावभासते
तस्मै नमस्ते स्वविलक्षणात्मने । * ॥")
विलक्षः, त्रि, (विभिन्नं लक्षणं यस्य ।) भिन्नः । इति जटाधरः । (यथा, भागवते । ५ । ६ । ६ ।
"अथेवमखिललोकपालसभो विलक्षणैर्जडवदभूतवेषभाषाचरितैरविलक्षितभगवत्प्रभाव इति ।" * । यथा च भाषापरिच्छेदे । ११७ ।
"अस्मात् पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥"
विगतं लक्षणं यस्याः ।) विगतलक्षणयुक्तः । यथा, मत्स्यपुराणे ।
"अग्नौचान्ताद्वितीयेऽह्नि ग्रह्यां दद्यादिलक्षणाम् ।
काञ्चनं पुरुषं तद्वत् फलपुष्पसमन्वितम् ॥
संपूज्य द्विजदम्पत्यं नानाभरणभूषणैः ।
दृषोत्सर्गञ्च कर्त्तव्यो देया च कपिला शुभा ॥"
द्विजदम्पतीं पूजयित्वा काञ्चन प्रेतप्रतिकृतिरूपं पुरुषं फलवस्त्रयुतं ग्रह्यायामारोप्य भूषितद्विजदम्पतीभ्यां ग्रह्यां दद्यात् । इति शुद्धितत्त्वम् ॥
विलग्नं, क्ली, (विशेषेण लग्नम् ।) मध्यः । यथा,—
"मध्योऽवलग्नं विलग्नं मध्यमोऽथ कटः कटिः ॥"
इति हेमचन्द्रः ॥
जन्मलग्नम् । यथा,—
"गोचरे वा विलग्ने वा ये ग्रहा रिष्टसूचकाः ।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥
गोचरे स्वराश्यपेक्षया यदा कदापि । विलग्ने जन्मलग्ने । इति संस्कारतत्त्वम् ॥ मेषादिलग्नमात्रम् । यथा,—
"शुभग्रहार्कवारे च रुद्रदृष्टिप्रबुद्धयोः च ।
शुभराशिविलग्ने च शुभं शान्तिकपौष्टिकम् ॥"
इति दीपिका ॥
संलग्ने, त्रि । यथा,—
"विलग्नं न स्त्रियां मन्ये चिबुकं स्यात्तयमाचके ॥"
इति मेदिनी ॥
विलज्जः, त्रि, (विगता लज्जा यस्य ।) लज्जारहितः । निर्लज्जः । यथा,—
"तनयगतदिनेशे ग्रैग्रवे सौख्यभागी
न भवति फलभागी यौवने व्याधियुक्तः ।
अनयति सुतमेकं निर्व्वयं नाशयित्वा
चपलमतिविलज्जः क्रूरकर्म्मा कुचेलः ॥"
इति ज्योतिषे पञ्चमस्थानस्थरविफलम् ॥
विलपनं, क्ली, (वि + लप + ल्युट् ।) विलापः । भाषणम् । विपूर्ब्बलपधातोः अनट्प्रत्ययेन निष्पन्नम् ॥
विलम्बः, पुं, (वि + लम्ब + घञ् ।) लम्बनम् । गौणः । यथा, देवीपुराणे ।
"अकालेऽप्यथवा काले तीर्थश्राद्धं तथा नरैः ।
प्राप्तैरेव सदा कार्य्यं कर्त्तव्यं पितृतर्पणम् ॥
पिण्डदानं तत्र मुख्यं पितृणामाप्तादुर्लभम् ।
विलम्बो नैव कर्त्तव्यो न च विघ्नं समाचरेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
प्रभवादिषष्टिसंवत्सरान्तर्गतद्वाविंशवर्षम् । यथा, भविष्ये ।
"तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत् ।
अर्घो भवति सामान्यो विलम्बे तु भयं महत् ॥"
इति ज्योतिस्तत्त्वम् ॥
विलम्बनं, क्ली, (वि + लम्ब + ल्युट् ।) अशीघ्रम् ।
इति विलम्बितशब्दटीकायां भरतः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ४१ । २२ ।
"आगच्छ त्वरितं कन्ये न ते कार्य्यं विलम्बनम् ॥")
विलम्बितं, त्रि, (वि + लम्ब + क्तः ।) अशीघ्रम् ।
इत्यमरे शीघ्रपर्य्यायेऽविलम्बितशब्ददर्शनात् ॥

(यथा, रघुवंशे । १ । ३३ ।
"विलम्बितफले: काले स निनाय मनोरथै: ।")
मन्दत्वे, क्ली । यथा,—
"विलम्बितं द्रुतं मध्यं तत्त्रयोदो घनं क्रमात् ॥"
इत्यमर: ॥
मन्दत्वप्रीप्सत्व उभयेतरत्वयुतेषु वृत्यविषयक-गमनविशेषेषु क्रमात्तत्त्वादिनामत्रयं विलम्बिता-दीनां त्रयाणां त्रयाणां तत्त्वादिका: संज्ञा: । इति मधु: ॥ साङ्गे ।
"द्रुतामध्ययने वृत्तं प्रयोगार्थे तु मध्यमाम् ।
शिष्याणासुपरोधार्थे विलम्बितां समाचरेत् ॥"
इति वेदव्यास: ॥
वृत्यगीतादौ च प्रत्येकमवसरबोधार्थं कण्ठ-स्वरादि विलम्बनात् । विलम्बन्ते करचरणादय: प्रत्येकं गतिविशेषप्रदर्शनायात्रेति विलम्बितम् । लबि ड लंसने औणादिकत्वदनाथादिति आधारे क्त: । भावे क्त: इति सुकुट: । इति भरत: ॥
विलम्बगमनशीलपशु: । तदृथा । द्विरद-खड्गोक्षमहिषगोगवयचमरवराहा: । इति राजनिर्घण्ट: ॥
विलम्बी, [न्] त्रि, विलम्बविशिष्ट: । इति विलम्ब-शब्दादिनिप्रत्ययेन निष्पन्न: ॥ (यथा, गीत-गोविन्दे । ६ । ८ ।
"भवति विलम्बिनि विगलितलज्जा
विलपति रोदिति वासकसज्जा ॥"
विशेषेण लम्बते इति । वि + लम्ब + णिनि: । लम्बमान: । यथा, किराते । ५ । ६ ।
"उदितपक्षमिवारतनि:स्वनै:
पृथुनितम्बविलम्बिभिरम्बुदै: ॥"
पुं, क्ली । वत्सरविशेष: । यथा, बृहत्संहितायाम् । ८ । १६ ।
"हेमलम्ब इति सप्तमे युगे
स्यादिलम्बि परतो विकारि च ।
शब्दरीति तदनु प्लव: स्मृतो
वत्सरो गुरुवशेन पञ्चम: ॥")
विलम्भ:, पुं, (वि + लभ + घञ् । नुम् ।) अति-दानम् । तत्पर्य्याय: । अतिसर्ज्जनम् २ । इत्य-मर: ॥
विलय:, पुं, (विशेषेण लीयन्ते पदार्था अस्मि-न्निति । वि + ली + "एरच् ।" इत्यच् ।) प्रलय: । इति शब्दरत्नावली ॥ (यथा, भाग-वते । ७ । ६ । ३२ ।
"नश्येदमात्मनि जगद्विलयाम्बुमध्ये
शेषे त्वया निजसुखानुभवो निरीह: ॥"
विनाश: । यथा, माघे । ६ । १७ ।
"दिवसोऽनुमितक्रमागमहितयं
किमिहास्यते वत मयावलया ॥")
विलला, स्त्री, श्वेतबला । इति रत्नमाला ॥
वि(बि)लवास:, पुं, (बिले वासो यस्य ।) आहुक-जन्तु: । इति राजनिर्घण्ट: ॥
वि(बि)लवासी, [न्] पुं, (बिले वसतीति । वस + णिनि: ।) सर्प: । इति शब्दरत्नावली ॥ (रत्न-वासिनि, त्रि । यथा, महाभारते । १४ । ४३ । २ ।
"अवि: पशूनां सर्व्वेषामहिश्च बिलवासिनाम् ॥)
श्रेष्ठ इति श्रेष: ॥)
वि(बि)लशय:, पुं, (बिले शेते इति । शी + अच् ।) सर्प: । इति शब्दरत्नावली ॥ (बिलवासिनि, त्रि । यथा, महाभारते । १४ । ६० । ६ ।
"सङ्गदुष्टस्य तं नाशं चासयानो मृगद्विजान् ।
मानुषं वचनं प्राह दृष्टो बिलशयो महान् ॥")
विलसन्, [त्] त्रि, (वि + लस + शतृ ।) विलास-युक्त: । यथा,—
"व्रजसुभ्रुवो विलसत्कला: ।
अभवन् प्रिया सुरवैरिण: ॥"
इति छन्दोमञ्जरी ॥
विलाप:, पुं, (वि + लप + घञ् ।) अनुशोच-नोक्ति: । तत्पर्य्याय: । परिदेवनम् २ । इत्यमर: ॥ अपि च ।
"क्रन्दनादौ विलाप: स्यात् परिदेवनमित्यपि ।"
इति शब्दरत्नावली ॥
विलापो दु:खजं वच: । इत्युज्ज्वलनीलमणि: ॥ (यथा, गीतगोविन्दे । १ । २६ ।
"उन्मादमदनमनोरथपथिक-
वधूजनजनितविलापे ।
अलिकुलसङ्कुलकुसुमसमूह-
निराकुलवकुलकलापे ॥")
विलास:, पुं, यन्त्रम् । इति शब्दचन्द्रिका ॥ विड्राल: । इत्यमरटीका ॥
विलास:, पुं, (वि + लस + घञ् ।) हावभेद: । इत्यमर: ॥ (यथा, कुमारे । ५ । १५ ।
"लतासु तन्वीषु विलासचेष्टितं
विलोलदृष्टं हरिणाङ्गनासु च ॥")
लीला । इति मेदिनी ॥ (यथा, भागवते । ३ । २५ । ३५ ।
"तैर्दुर्नीयावधवैरुदार-
विलासहासेक्षितवाममल्लै: ॥")
"स्त्रीणां विलासादय: शृङ्गारभावजा: क्रिया हावशब्देनोच्यन्ते । प्रियसमीपगमने य: स्थाना-सनगमनविलोकनेषु विकारोऽकस्माच्च क्रोध-क्षितचमत्कारसुखविकूजनं स विलास: । तथा च ।
'यो वल्लभां चानुगतो विकारो
गत्यासनस्थानविलोकनेषु ।
तथा स्मृतं क्रोधचमत्कृतौ च
विकूजनं चास्यगतं विलास: ॥'
तथान्यत्र ।
'तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु ।' तात्कालिको दयितालोकनादिभव: ।" इति भरत: ॥ * ॥ अपि च ।
"गतिस्थानासनादीनां मुखनेत्रादिकर्म्मणाम् ।
तात्कालिकस्तु वैशिष्ट्यं विलास: प्रियसङ्गजम् ॥"
इत्युज्ज्वलनीलमणि: ॥
अन्यच्च ।
"यद्रूपं तदभेदेन स्वरूपेण विराजते ।
आलस्यादिभिरन्याद्दक् स तदैकात्मरूपक: ।
स विलास: स्मांग्र इति धत्ते भेदद्वयं पुन: ॥"
तत्र विलास: ।
"स्वरूपमन्याकारं तत्तस्य भाति विलासत: ।
प्रायेणात्मसमं प्रक्षा स विलासो निगद्यते ॥
परमयोमनाथस्तु गोविन्दस्य यथा स्मृतम् ।
परमयोमनाथस्य वासुदेवस्य याद्दग्: ॥"
स्मांग्र: ।
"तादृशो यूनग्रस्तिं यो यनक्ति स्मांग्र ईरित: ।
सङ्घर्षणादिर्मस्यादिर्यथा तत्तत् यधामसु ॥"
इति भागवतान्तम् ॥
विलासमन्दिरं, क्ली, (विलासस्य मन्दिरम् ।) क्रीड़ागृहम् । इति केचित् ॥
विलासविपिनं, क्ली, (विलासस्य विपिनम् ।) क्रीड़ावनम् । यथा,—
"यदीयहसतो विलोक्य विपदं
कलिन्दतनया अलोहतगति: । .
विलासविपिनं विवेशु सहसा
करोतु कुशलं हली स जगताम् ।"
इति छन्दोमञ्जरी ॥
विलासविभवान्वित:, त्रि, युक्त: । इति जटाधर: ॥
विलासिनी, स्त्री, (विलासोऽस्या अस्तीति । विलास + इनि: । ङीप् ।) नारी । इति राज-निर्घण्ट: ॥ (यथा, ऋतुसंहारे । ४ । ३ ।
"न बाहुयुग्मेषु विलासिनीनां
प्रयान्ति सङ्गं वलयाङ्गदानि ॥")
वेश्या । इति धनञ्जय: ॥ (यथा, महाभारते । ३ । ४६ । १४ ।
"सिद्धचारणगन्धर्व्वै: सा प्रयाता विलासिनी ।
बहाचर्य्येऽपि वै स्वर्गे दर्शनीयतमाभवति: ॥"
विलासशालिनी । यथा, गीतगोविन्दे ।१।४०।
"विलासिनि ! विलसति केलिपरे ॥")
विलासी, [न्] पुं, (विलासोऽस्यास्तीति । विलास + इनि: ।) भोगी । काम: । (उभयार्थे प्रमाणं यथा, कुट्टनीमते । १८ ।
"तस्यां खगपतिसुरिव विलासिनां हृदय-प्रोत्कर्षजननी ॥"
"बिले आसत इति विलासिन: सर्पा: पचे विल-सनशीला भोगिन: ।" इति तट्टीका । * ।)
क्षपा: । अहि: । चन्द्र: । इति मेदिनी ॥ क्षर: । हर: । इति शब्दरत्नावली ॥ (विलास-शीले, त्रि । यथा, रघु: । ६ । ४३ ।
"परिभृताविरतेन विलासिन:
सरवलेरवलेकरसा: लता: ॥")
विलीन:, त्रि, (वि + ली + क्त: ।) प्राप्तद्रवीभाव-घृतादि: । तत्पर्य्याय: । विद्रुत: २ द्रुत: ३ । इत्यमर: ॥ विशिष्ट: । विशेषेण लीन: । यथा,—
"करादस्य भ्रष्टे मधु शिखरिणो दुश्यति शिखो-र्विलीना: क्ष: सद्यं नियतमवधेयं तदखिलै: ।
इति त्रस्यन्नोपाकुचितनिभृतालापजनित-स्मितं विभ्रद्देवो जगदवतु गोवर्द्धनधर: ॥"
इति छन्दोमञ्जरी ॥

विलेखनं, क्ली, लेखनम्। विपूर्व्वकलिखधातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम्॥

विलेप:, पुं, लेप:। विपूर्व्वकलिपधातोर्घञ्प्रत्ययेन निष्पन्न:॥ (यथा, भागवते। १०। ४२। ९।

"अथ व्रजन् राजपथेन माधव:
स्त्रियं गृहीताङ्गविलेपभाजनाम्।
विलोक्य कुब्जां युवतीं वरानना
पपच्छ यान्तीं प्रहसन् रसप्रद:॥")

विलेपनं, क्ली, (विलिप्यन्तेऽङ्गान्यनेनेति। वि+लिप+ल्युट्।) गात्रानुलेपनयोग्यं पिष्टं घृष्टं वा सुगन्धिद्रव्यम्। तत्पर्य्याय:। गात्रानुलेपनी २ वर्त्ति: ३ वर्त्तकम् ४। इत्यमर:॥ "दे गात्रानुलेपनयोग्ये वर्त्तिविलेपने।

'वर्त्तकादिद्वयं घृष्टचन्दनादिविलेपने॥'

इति केचित्। विलिप्यतेऽनेन करणेऽनटि विलेपनम्।" इति तट्टीकायां भरत:॥ कुङ्कुमादिलेपनम्। तत्पर्य्याय:। समालभ: २। इति च संक्षोभवर्गे अमर:॥

विलेपनी, स्त्री, (वि+लिप्+कर्म्मणि करणे वा ल्युट्। ङीप्।) यवागू:। सुवेधच्छो। इति मेदिनी॥

विलेपी, स्त्री, (विलिप्यतेऽसाविति। वि+लिप+कर्म्मणि घञ्। स्त्रियां ङीष्।) यवागू:। इत्यमर:॥

"अन्नं पञ्चगुणे साध्यं विलेपी च चतुर्गुणे।
मण्डस्त्वनुद्धृतगुणे यवागू: षड्गुणेऽम्भसि॥"

इति वैद्यकोक्तो भेद इह नाद्रत:। इति तट्टीकायां भरत:॥ अस्य गुणा:।

"विलेपी तर्पणी लघ्वी ग्राहिणी क्षुत्तृषापहा॥"

इति राजवल्लभ:॥

विलेपी, [न्] त्रि, लेपनकर्त्ता। विलेपयति य: इत्यर्थे इनिप्रत्ययेन निष्पन्न:॥ (यथा, कथासरित्सागरे। ३७। २५।

"तत: प्राग्नुरागेण रञ्जित: स्वान्तरात्म मम।
पश्चात् पृक्तविलेपिन्या अङ्गरागेण ते कर:॥")

विलेप्य:, पुं, (वि+लिप्+यत्।) यवागू:। इति शब्दरत्नावली॥ विलेपनीये, त्रि॥ (यथा, भागवते। ११। २७। १४।

"स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनम्॥")

वि(बि)लेवासी, [न्] पुं, (बिले गर्त्ते वसतीति। वस+णिनि:। "शयवासेति॥" ६। ३। १८। वप्रत्ययो लुक्।) सर्प:। इति शब्दरत्नावली॥

वि(बि)लेशय:, पुं, (बिले शेते इति। बिले+शी+"अधिकरणे शेते:॥" ३।२।१५। डच्। शयवासेत्यलुक्।) सर्प:। इत्यमर:॥ मूषिक:। इति जटाधर:॥ मोथा। शग:। शल्लकी। यथा,—

"मोथाशग्रसुशल्लाशल्लकशाखा विलेशया:।
विलेशया वातहरा मधुरा रसपाकयो:।
ईषच्चा बहुविण्मूत्रा वीर्य्योष्णा अपि कीर्त्तिता:॥"

इति भावप्रकाश:॥

(गर्त्तेशयिनि, त्रि। यथा, महाभारते। १।४५।३।

"स ददर्श पितॄन् गर्त्ते लम्बमानानधोमुखान्।
एकतस्त्ववशिष्टं वै वीरणस्तम्बमाश्रितान्।
तं तत्तुच्च मूषकैराखुमाददानं विलेशयम्॥")

विलोकनं, क्ली, आलोकनम्। विपूर्व्वलोकधातोरनट्-(ल्युट्)-प्रत्ययेन निष्पन्नम्। (यथा, किराते। ३। १६।

"अनुचरैश्च धनाधिपतेरथो
नगविलोकनविस्मितमानस:॥")

विलोकितं, त्रि, आलोकितम्। विपूर्व्वलोकधातो: क्तप्रत्ययेन निष्पन्नम्॥

विलोचनं, क्ली, (विलोक्यते दृश्यतेऽनेनेति। वि+लोचि+ल्युट्।) चक्षु:। इति जटाधर:॥ (यथा, कुमारे। ३। ६७।

"उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि॥")

दर्शनञ्च॥ (विरुद्धे लोचने यस्येति। विलक्षनयने, त्रि। यथा, देवीभागवते। ५। ३१। ४३।

"यदि ते मञ्जरेक्षास्ति कृपया भव भामिनि।
लम्बोष्ठी कुनखी क्रूरा श्यामवर्णा विलोचना॥")

विलोटक:, पुं, (विशेषेण लुटतीति। वि+लुट्+ण्वुल्।) नलमीन:। इति शब्दचन्द्रिका॥ वेले माछ इति भाषा॥

विलोड़नं, क्ली, (वि+लुड़+ल्युट्।) मन्थनम्। आलोड़नम्। यथा,—

"राधिका दधिविलोड़नस्थिता
लम्बवेणुनिनदैरथोद्गता।
यासुनं तटनिकुञ्जमञ्जसा
सा जगाम सलिलाहृतिच्छलात्॥"

इति छन्दोमञ्जरी॥

विलोड़ितं, क्ली, (वि+लुड़+क्त:।) तक्रम्। इति राजनिर्घण्ट:॥ आलोड़िते, त्रि॥

विलोप:, पुं, विशेषेण लोप:। विपूर्व्वलुपधातोर्घञ्प्रत्ययेन निष्पन्न:॥ (यथा, कामन्दकीयनीतिसारे। ५। ६५।

"काले स्नाने च पात्रे च न हि वृत्तिं विलोपयेत्।
एतद्वृत्तिविलोपेन राजा भवति गर्हित:॥")

विलोभ:, पुं, विलोभनम्। विशेषेलोभ:। विपूर्व्वकलुभधातोर्घञ्प्रत्ययेन निष्पन्न:॥

विलोमं, क्ली, अरघट्टक:। इति मेदिनी॥

विलोमं, त्रि, विपरीतम्। तत्पर्य्याय:। प्रतिकूलम् २ अपसव्यम् ३ अपद्धुरम् ४ वामम् ५ प्रसव्यम् ६ प्रतीपम् ७ प्रतिलोमम् ८ अपद्धु ९। इति हेमचन्द्र:॥ सव्यम् १० विलोमकम् ११। इति जटाधर:॥ (यथा, हरिवंशे। ६४। १२।

"हतसङ्कुलितद्वृष्टि: स्वप्रशीलो विलोमो
भयजतर्हितभर्त्ता नैकशोऽरुक्कृच्च॥")

विलोम:, पुं, सर्प:। वरुण:। कुक्कुर:। इति मेदिनी॥

विलोमक:, त्रि, (विलोम एव। स्वार्थे कन्।) विपरीत:। इति जटाधर:॥

विलोमजिह्व:, पुं (विलोमा जिह्वा यस्य।) दक्षो। इति त्रिकाण्डशेष:॥

विलोमवर्ण:, पुं. (विलोम: प्रतिलोमो वर्ण:।) वर्णसङ्करजाति:। इति स्मृति:॥

विलोमी, स्त्री, आमलकी। इति मेदिनी॥

विलोल:, त्रि, (विशेषेण लोल:।) चञ्चल:। यथा,—

"कापि विलासविलोलविलोचनखेलनजनितमनोजम्।
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम्॥"

इति श्रीगीतगोविन्दे। १। ३२॥

वि(बि)ल्वं, क्ली, आलवालम्। यथा,—

"अवघट्टावटौ तुल्यौ तल्लं विल्वं तलञ्च तत्।
द्विजप्रणालवाकं स्यात् केदार: पांशुमर्य्यद:॥"

इति त्रिकाण्डशेष:॥

विल्लु:। इति शब्दचन्द्रिका॥

वि(बि)ल्वमूला, स्त्री, वाराहीकन्द:। इति शब्दचन्द्रिका॥

वि(बि)ल्वस:, स्त्री, प्रस्तरदग्धपुत्रा। यथा,—

"सप्तपुत्रप्रसूतायां सप्तस: सुतवत्करा।
विल्वसर्दग्धपुत्रा स्यादेकाधिका तु रुद्रस:॥"

इति शब्दरत्नावली॥

वि(बि)ल्वं, क्ली, बिल्ववृक्षस्य फलम्। इति मेदिनी॥ (यथा,—

"खल: सर्षपमात्राणि परच्छिद्राणि पश्यति।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति॥"

इत्यादि:॥) फलपरिमाणम्। इति शब्दमाला॥ (यथा, सुश्रुते। ६। १८।

"अत ऊर्द्धं प्रवक्ष्यामि पुटपाकप्रसाधनम्।
द्वौ बिल्वमात्रौ श्लक्ष्णस्य पिण्डौ मांसस्य पेषितौ।
द्रव्याणां बिल्वमात्रन्तु द्रवाणां कुडवौ मत:॥")

वि(बि)ल्व:, पुं, (बिल भेदने+उल्वादयश्चेति साधु:।) फलवृक्षविशेष:। वेलगाछ इति भाषा॥ तत्पर्य्याय:। शाण्डिल्य: २ शैलूष: ३ मालूर: ४ श्रीफल: ५। इत्यमर:॥ महाकपित्थ: ६ गोहरीतकी ७ पूतिवात: ८ अतिमङ्गल्य: ९ महाफल: १०। इति रत्नमाला॥ शल्य: ११ सुगन्धगन्ध: १२ शाकाटु: १३ कर्कटाह्व: १४ शैलपत्र: १५ शिवेष्ट: १६ पत्रश्रेष्ठ: १७ त्रिपत्र: १८ गन्धपत्र: १९ जम्बीफल: २० गन्धफल: २१ दुराधर्ष: २२ त्रिशाखपत्र: २३ त्रिशिख: २४ शिवद्रुम: २५ महाफल: २६ सत्यफल: २७ सुभूतिक: २८ समीरसार: २९। अस्य फलगुणा:। मधुरत्वम्। लघुत्वम्। कषायत्वम्। गुरुत्वम्। पित्तकफव्यरातिसारनाशित्वम्। रुचिकारित्वम्। दीपनत्वञ्च। अस्य मूलगुणा:। त्रिदोषघ्नत्वम्। मधुरत्वम्। लघुत्वम्। वातनाशित्वञ्च॥ अस्य कोमलफलगुणा:। स्निग्धत्वम्। गुरुत्वम्। संग्राहित्वम्।

दीपनत्वञ्च । अस्य पक्वफलगुणाः । मधुरत्वम् । गुरुत्वम् । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । उष्णत्वम् । संग्राहित्वम् । त्रिदोषनाशित्वञ्च । इति राजनिर्घण्टः । * । अपि च ।

"श्रीफलस्तुवरस्तिक्तो ग्राही रूक्षोऽग्निपित्तजित् ।
वातः श्लेष्महरो बल्यो लघुरुष्णश्च पाचनः ।"

इति भावप्रकाशः । * ।

किञ्च ।

"विल्वं बालं कषायोष्णं पाचनं वह्निदीपनम् ।
संग्राहि तिक्तकटुकं तीक्ष्णं वातकफापहम् ।
पक्वं सुगन्धि मधुरं दुर्जरं ग्राहि दोषजम् ।
फलेषु परिपक्वेषु यो गुरुः सम्प्रदाहतः ।
विल्वादन्यत्र स ज्ञेयो विल्वमामं गुणोत्तरम् ।
कफवातामपित्तघ्नो ग्राहिणी विल्वपेशिका ।"

इति राजवल्लभः ।

अन्यच ।

"कान्तिके संस्थितं विल्वमग्निसन्दीपनं परम् ।"

इति वैद्यकम् । * ।

विल्वोत्पत्त्यादिर्यथा,—

"विल्वादिपालनं कुर्यात् शुभं भवदमन्यथा ।
श्रीवृक्षान् रोपयेत् पञ्च यदि स्वर्गान्न हीयते ।
श्रीर्वृक्षोऽपि या धेनुर्गोरूपा सा गता महीम् ।
तन्नोमयभवो विल्वः श्रीवृक्षस्तस्मादजायत ।
विराजन्तिं पतिं दृष्ट्वा क्रोधेन महता ततः ।
ग्रस्ता सा उमया देवी सर्व्वभोग्या भवाधमे ।
ततः संग्रसता भानां मामेवं भवतु प्रिये ।
प्रियत्वं सर्व्वलोकेषु सुरासुरनमस्कृता ।
माता त्वं सर्व्वलोकानामवजानां विशेषतः ।
एवमाश्वास्य तां देवीं ग्रासमोक्षमयाचत ।
वरं ददौ च सा कामं ग्रासमोक्षप्रदं नृप ।
श्रीवृक्षौ त्वं भगाक्षेण सह गोभिर्धनेन च ।
वसस्व मथने यावत् ततो विष्णुभवाब्धिषु ।
पतिं त्वं सर्व्वलोकानां पूज्यं श्रेष्ठं महाबलम् ।
तस्य वक्षःस्थिता भद्रे दृष्टा त्वं विचरिष्यसि ।
लोकभोग्या च भूतित्वादन्यत्रेषु वृषेषु च ।
न जातिरूपशौर्य्यादि न वेषं न शुभा मतिः ।
भविष्यति यदा चैव चञ्चला जलबिन्दुवत् ।
विल्ववृक्षः प्रियः श्रीमांस्तव योनिर्भविष्यति ।
सर्व्वपुण्योत्तमश्रेष्ठो देवाहारो मनोरमः । * ।
अक्षयैः सर्व्वलोकानां क्षेत्रान्नाद्यः सदा वृताम् ।
ये च पापा दुराचाराः श्रीतरोश्छेदकारिणः ।
ते त्रयोविंशादिनरके पात्यन्ते ब्रह्मणो दिनम् ।
सुदुःखिता भविष्यन्ति नरा दुष्कृतिनः सदा ।
तत्र देशे भयं नित्यं चिरं राजा न जीवति ।
न च ग्रहपतिः कश्चिद्विल्ववृक्षस्य छेदकः ।
क्रियते यत्र विच्छेदः सपुष्पफलशाखरोः ।
अनावृष्टिभयं घोरं तस्मिन् देशे प्रजायते ।"

इति वह्निपुराणे वामनप्रादुर्भावनामाध्यायः । *

मतान्तरे तस्योत्पत्तिर्यथा,—

श्रीर उवाच ।

"मातः समुद्रतनये मा मा च्छिन्धि त्वनं परम् ।
यस्ते च्छिन्नस्तनो वामो जायतां पुनरेव सः ।
ग्राता ते परमा भक्तिः पूर्णस्तेन मनोरथः ।
यच्च च्छिन्नस्तनो दत्तो मल्लिङ्गोपरि ते शुभे ।
सोऽस्तु वृक्षः श्रितौ पुण्यो नाम्ना श्रीफल इत्युत ।
मूर्त्तिमांस्त्वं वै भक्तिर्वृक्षः श्रीफलनामकः ।
त्वत्कीर्त्तये श्रितावास्तां यावच्चन्द्रदिवाकरौ ।
स तरुर्मम वै लक्ष्मि परमः सुप्रियो भवेत् ।
तत्पत्रैरेव मे पूजा भविष्यति न चान्यथा ।
स्वर्णसुक्तप्रवालादि पुष्पाण्यन्यानि च ध्रुवम् ।
श्रीफलच्छदलेशस्य कलां नार्हन्ति कोटिकाम् ।
यथा मे श्रीफलतरुर्यथा गङ्गाजलं मम ।
तथा प्रियतमं लक्ष्मि त्रिपत्रः श्रीफलच्छदः ।
इत्युक्तः स तथेत्युक्त्वा महेशोऽन्तर्दधे सखि ।
कथासमोचनक्षेत्रे वृक्षः श्रीफलकोऽर्च्यते ।"

इति बृहद्धर्म्मपुराणे १० अध्यायः ।*।

तस्य गोमयोद्भवत्वं यथा,—

"यज्ञानां वेद संभूते यथा हरिहरस्य च ।
गोमयो रोचना क्षीरं मूत्रं दधि घृतं गवाम् ।
षड़ङ्गानि पवित्राणि तथा सिद्धिकराणि च ।
उत्थितो विल्ववृक्षस्तु गोमयाम्बुनिसंगम ।
तत्रासौ वसते लक्ष्मीः श्रीवृक्षत्वेन चोच्यते ।"

इति वह्निपुराणे वैष्णवधर्म्मे सुहिव्रतनामाध्यायः । * ।

ईश्वर उवाच ।

"वैशाखशुक्लपक्षस्य तृतीयायां सखि स्वयम् ।
ज्ञातो वै श्रीफलतरुर्माहात्म्यं तस्य कथ्यते ।
जाते तु श्रीफलतरौ देवाः सर्व्वे सवासवाः ।
ब्रह्मा नारायणश्चापि देवपत्न्याः समागताः ।
ददृशुः क्षिप्तविटपं त्रिपत्रैर्मृदुलैर्युतम् ।
दीप्यमानं तेजसैव शिवरूपं शिवप्रदम् ।
प्रणेमुः सिद्धिमुख्यश्च वासवश्च सुखान्विताः ।
तदर्चनाय भगवानुवाच विष्णुरव्ययः ।

विष्णुरुवाच ।

अयं नाम्ना विल्व इति मालूर श्रीफलस्तथा ।
ग्राकिल्यनाथ शैलूष शिवः पुण्यः शिवप्रियः ।
देवावासस्तीर्थपदः पापघ्नः कोमलच्छदः ।
जयो विजयनामा च विष्णुक्षिनयनो वरः ।
धूम्राक्षः शुक्लवर्णश्च संयमी ग्राहदेवकः ।
एतैर्विंशतिं नाम्नां दधात्येव तरुत्तमः ।
धनुःशतत्रयं हरो ज्ञेयः पत्रं वामं विधेः स्वयम् ।
अर्द्धं दक्षिणपत्रञ्च त्रिपत्रदलमिष्यते ।
अस्य छायाच्च पत्रञ्च कल्पवेन्न पदा स्पृशेत् ।
हरते ब्रह्मनादायुः पदा स्पृशति श्रियं हरेत् ।
पद्मपुष्पसहस्रस्य फलपत्रसमापि च ।
दर्शने प्रथमे चार्घे स्नानसम्मार्ज्जने तथा ।
पूजने चयने दाने क्रमाज्जन्मायुदीरयेत् ।
विल्ववृक्षः महाभाग महेशस्य सदा प्रियः ।
शिवदर्शनकज्योतिः प्रसीदाम्बिसुताकान्त ॥
नर एतेन मन्त्रेण प्रपूजाच्च प्रगे शुभम् ।
प्रपश्येत् स श्रियं पश्येत् प्रणमेत्तदनन्तरम् ।
ॐ नमो विल्वतरवे सदा शङ्करमूर्त्तये ।
सफलानि ममाङ्गानि कुरुष्व शिवहर्षद ।
मन्त्रेणानेन मालूरमष्टाङ्गैः प्रणमेत् सुधी ।
स वैष्णवो मतो भक्तः स मे प्रियतरः परः ।
शिवपूजक मालूर प्रियस्त्वं महातरो ।
पृच्छामि त्वां महाप्राज्ञस्त्वयान्मे प्रणाशय ।
देवदेवप्रियश्रेष्ठ ख्यातस्ते सुमनोहरम् ।
क्रीड़न्त्यागत्य विबुधा मार्ज्जये तत् प्रसीद मे ।
मन्त्रेणानेन विल्वस्य दग्धहस्तस्थलं स्पृशेत् ।
सगोमयजलैः प्रातःसमये स तु वैष्णवः ।
ॐ हुमाय श्रीफलाय नमो दग्धैरचरैः ।
मन्त्रेण पूजयेद्विल्वं अपेक्षक्तिक्रमात्तथा ।
पुण्यतरु महाभाग मालूर श्रीफल प्रभो ।
महेशपूजनार्थाय तत्पत्राणि चिनोम्यहम् ।
मन्त्रेणानेन विष्णुयाद्विल्वपत्राणि भक्तितः ।
पश्चान्नदाद्गौरीयं मध्याह्नाभिमुखकालतः ।
ग्राखाभङ्गो न कर्त्तव्यो नैवारोहेत्तथा तरुम् ।
परमारुह्य विष्णुयान्न ग्राखाभङ्गं क्वचित् ।
खण्डितैश्च शिवः पूज्यः पत्रैरन्यैश्च खण्डितैः ।
यस्मात्तावत्तरं विल्वपत्रं पर्य्युषितं भवेत् ।
पूज्या एतेन वै देवाः सूर्य्यलक्ष्मीदरौ विना ।
विल्ववृक्षवनं यत्र सा तु वाराणसी पुरी ।
पद्म विल्वद्रुमा यत्र तत्र तिष्ठेत् स्वयं हरिः ।
सप्त विल्वद्रुमा यत्र तत्र दुर्गायुतो हरः ।
एको विल्वतरुर्यत्र तत्र शम्भुर्मया सह ।
विल्ववृक्षा यत्र दश तत्र शम्भुर्गणैः सह ।
एतान्युक्तानि तीर्थानि देवाः सर्व्वे मरुद्गणैः ।
यत्र वाऽयं ग्रहस्थस्य कोऽप ईशानसंज्ञके ।
जायते श्रीफलतरुर्न तत्र विपदः क्वचित् ।
पूर्व्वस्यां सुखदः स स्याद्दक्षिणे यमभीतिहा ।
पश्चिमे च प्रजादायी वृक्षो विल्व उदाहृतः ।
श्मशाने च नदीतीरे प्रान्तरे वा वनान्तरे ।
विल्ववृक्षतलं प्रोक्तं सिद्धपीठस्थलं सुधीः ।
न मध्याह्नेऽपि वृक्षं स्थापयेत् श्रीफलाख्यकम् ।
देवादृषिं प्रजायेत तदा शिववदर्च्चयेत् ।
चैत्रादिचतुरो मासान् ग्रस्मदे परमात्मने ।
दत्तं स्याद्विल्वपत्रैकं लक्षप्रेतुसमं सुराः ।
मध्याह्नकाले ये मर्त्या विल्वं कुर्युः प्रदक्षिणम् ।
ते सुमेरुगिरिवरः कृत एव प्रदक्षिणम् ।
न च्छिन्द्यात् श्रीफलतरुं न दहेत् कालमेव च ।
विना ब्राह्मणयज्ञार्थं पतितो विल्वविक्रयी ।
पक्वविल्वसमुद्भूतं यो धत्ते मूर्द्ध्नि मानवः ।
यमाधिकारो नाम्नः स्यात् कृतः पापोपपातकैः ।
तिलपत्रं फलं बीजं भूमौ पतितमोषधिः ।
स्वयं गृह्णाति शिरसा वैश्वर्थभयशङ्कितः ।
चैत्रादिचतुरो मासान् विल्वेश्विल्वतरुं क्षती ।
यथा स्निग्धो भवेद्वृक्षस्तथा तत्पितरोऽपि च ।
चैत्रादिचतुरो मासान् सदा भ्रमति शङ्करः ।
नवीनविल्वपत्राणां मुक्तिमुक्तिप्रदायकः ।
हरिभाद्रपदे शुक्ल वैद्यनाथो महेश्वरः ।
तस्माच्चयो विल्ववृक्षः सर्व्वदश्च उदाहृतः ॥

कामरूपे कामतरः काम्यासुक्तस्तथादिमः ।
काश्यीपुरे पुरः प्रोक्तः श्रीफलोऽत्ययपुण्यदः ।
तेऽपि तीर्थविशेषाः स्युस्तीर्थेष्वपि सदातुलाः ॥

देव्युवाच ।

एतस्मिन्नेव काले तु ग्रम्भुरागत्य वै सहि ।
ब्रह्मणा विष्णुना पत्रैः पूजितः श्रीफलैरभूत् ॥
ततः सर्व्वे यथास्थानं जग्मुर्नाराधवादयः ।
कथितोऽयं मया सख्यौ विल्ववृक्षस्तरूत्तमः ॥
अयं वां संप्रोक्तः शिवतरुकथापुण्यनिचयः
पवित्रः श्रोतव्यः अवणरमणीयः खलु सताम् ।
शिवे विष्णौ भेदापहरण उदारः सुमनसां
सुसेव्यः संपाद्यः प्रभवति शिवस्यापि निकटः ॥"
इति च इदहर्म्मपुराणे विल्ववृक्षमाहात्म्यम्
११ अध्यायः ॥*॥ तन्त्रमते तस्योत्पत्तिर्यथा,—

देव्युवाच ।

"कथं सा विष्णुवनिता विल्ववृक्षो बभूव ह ।
ज्योतीरूपं महत्पुण्यं प्रार्थितं ब्रह्मादिभिः सदा ॥
तत्र मेऽनुग्रहाद्यो सर्व्वेषां प्रियता गता ।
विष्णोरतिप्रिया नित्यं साभूत् सरस्वती सदा ॥
तादृक् प्रीतिर्न लक्ष्म्याश्च जायते केशवस्य च ।
रतिचिन्तापरा लक्ष्मीर्ययौ श्रीशैलमन्दिरम् ॥
प्राप्य मल्लिकमेकाग्रं तपस्तेपेऽतिदारुणम् ।
तथापि यदि नैवाभूत् कृपा मे परमेश्वरि ॥
तदा सा वृक्षरूपेण स्थिता लिङ्गप्रिया सती ।
यत्नैः पुष्पैः फलैः स्नेहैः पूजयामास सन्ततम् ॥
कोटिवर्षं महादेवि ततो मेऽनुग्रहोऽभवत् ।
तेनैवानुग्रहेणैव विष्णोवक्षःस्थिताभवत् ॥
सदैव परमेशानि विप्रवक्त्रा सदैव हि ।
अतस्तु कारणाद्देवि तद्रूपेण हरिप्रिया ॥
सदैव पूजयेन्नित्यं सा मङ्गला सातुला शिवे ।
अतस्तं वृक्षमाश्रित्य तिष्ठामि च दिवानिशम् ॥
सर्व्वतीर्थमयो देवि सर्व्वदेवमयः सदा ।
श्रीवृक्षः परमेशानि अतएव न संशयः ॥*॥
ततः फलैस्तत्प्रसूनैर्वा तत्पत्रैर्यः पूजयेत् ।
सत्काष्ठचन्दनैर्व्वापि स मे भक्तः स मे प्रियः ॥
तत्काष्ठचन्दनं भाले यो धारयति सन्नरः ।
तत्तनुं शिवदुर्गा सा नमेद्देवी सदान्विता ॥
अतस्तच्चन्दनं देवि न धारयति कश्चन ।
तत्पत्रं तत्फलं वा कदापि धारयेन्नहि ॥
विल्वमूले महेशानि प्राणांस्त्यजति यो नरः ।
रुद्रदेहो भवेत् सद्यः पापकोटियुतोऽपि सन् ॥"
इति योगिनीतन्त्रे पूर्व्वखण्डे ५ पटलः ॥*॥
अपि च ।
"विल्ववृक्षं तथा देवि भगवान् शङ्करः स्वयम् ।
विल्ववृक्षतले स्थित्वा यदि प्राणांस्त्यजेत् सुधीः ॥
ततःशताब्दोद्भवमाप्नोति किमस्य तीर्थकोटिभिः ।
यत्र ब्रह्मादयो देवास्तिष्ठन्ति शक्तिहेतवे ॥
विल्ववृक्षतले स्नानं यदि विल्वादिपूरितम् ।
तदेव शाङ्करं क्षेत्रं सर्व्वतीर्थमयं सदा ।
सर्व्वपीठमयं तत्तु सर्व्वदेवमयं सदा ।
न त्यजेत् शाङ्करं क्षेत्रं न च गङ्गां त्यजेत् प्रिये ॥
समीपे स च चाम्बष्ठि विल्ववृक्षो यदि प्रिये ।
काशीपुरसमं तत्तु तत्र प्राणान् त्यजेद्यदि ।
किमस्य कोटितीर्थेन काशीवासेन किं प्रिये ॥"
इति पुरश्चरणरत्नाकरे १० पटलः ॥*॥
तद्दानविधिर्यथा,—
"पत्रं वा यदि वा पुष्पं फलं नैवेद्यमधोमुखम् ।
यथोत्पन्नं तथा देयं विल्वपत्राण्यधोमुखम् ॥"
इति माधवकालिके ५५ पटलः ॥
श्रीशिव उवाच ।
"शृणु देवि प्रवक्ष्यामि रहस्यं त्रिजटात्मकम् ।
पत्रं ब्रह्ममयं देवि अद्भुतं वरवर्णिनि ॥
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः ।
विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा ॥
ब्रह्मविष्णुशिवाः पत्रे तस्यां शक्तिरूपिणी ।
तस्मात्ते तु वक्ष्यं स्यात् पत्रे ब्रह्मपदं प्रिये ॥
त्रिजटापत्रकैकेन हरं वा हरिमर्चयेत् ।
कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः ॥
पत्रं पुष्पं फलं तोयं नैवेद्यं धूपदीपकम् ।
दत्त्वा यदृयत् फलं प्राप्नं तस्मात् कोटिगुणं भवेत् ॥
सर्व्वैरर्चनतो देवि त्रिजटामेकमर्पणम् ।
कैवल्यदो हरस्यैव दास्येऽहं त्वां स्वरूपताम् ॥
त्वयि कैवल्यदं ज्ञानं धर्म्मकामार्थदं प्रिये ।
वज्रहीनमिदं देवि प्राप्नुयाद्दाम्भिकं फलम् ॥
सवर्ज्यं म्रियते नूनं वज्राघातेन पार्व्वति ।
तस्मात्त्वं साधकैर्नित्यं वज्रहीनं प्रदापयेत् ॥"*॥
विल्वपत्रग्राह्यग्रहणानन्तरगमनफलम् । यथा,
"घ्राणं गृहीत्वा यो गच्छेत् सर्व्वसिद्धिमवाप्नुयात् ।
ऊर्द्धं सुदर्शनं रक्षेदधः पाशुपतस्तथा ।
पुरो माहेश्वरो रक्षेत् पृष्ठे च शूलधारिणी ।
दक्षपार्श्वे च श्रीनाथो वामपार्श्वे प्रजापतिः ।
चन्द्रसूर्य्यौ धृतौ हृत्वमहं पादौ करौ सदा ॥"
इति ज्ञानभैरवतन्त्रे शिवपार्व्वतीसंवादे ६ पटलः ॥ (अस्य गुणाः यथा,—
"बालं विल्वफलं ग्राहि दीपनम्याचनङ्कटु ।
कषायोष्णं लघु स्निग्धं तिक्तं वातकफापहम् ॥
पक्वं गुरु त्रिदोषं स्यादृदुर्ज्जरं पूतिमारुतम् ।
विदाहि विष्टम्भकरं मधुरं बह्निमान्द्यकृत् ॥
फलेषु परिपक्वं यद्गुणवत्तदुदाहृतम् ।
विल्वादन्यत्र विशेषमामन्तहि गुणाधिकम् ।
द्राक्षाविल्वग्निवादीनां फलं शुष्कं गुणाधिकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वि(वि)ल्वपेषिका, स्त्री, (विल्वस्य पेषिका ।) शुष्कविल्वखण्डम् । बेलगुँठा इति भाषा । यथा,—
"कफवातामयमूलघ्नी ग्राहिणी विल्वपेषिका ।"
इति राजनिर्घण्टः ॥

वि(वि)ल्वा, स्त्री, (विल्व + टाप् ।) हिङ्गुपत्री । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या हिङ्गुपत्रीशब्दे ज्ञातव्याः ॥)

विवक्षा, स्त्री, वक्तुमिच्छा । सनन्तवधधातोरप्रत्ययेन निष्पन्नमिदम् । यथा । विवक्षावशात् कारकाणि भवन्ति । इति व्याकरणटीका ॥ शक्तिः । यथा,—
"प्रक्रम्यमाणेऽपि खलूक्तेदृद्दिश्यस्य विशेषणम् ।
संख्यया तुल्यनीतित्वादविवक्षां प्रपद्यते ॥"
इत्येकादशीतत्त्वम् ॥

विवक्षितः, त्रि, वक्तुमिष्टः । सनन्तवधधातोः क्तप्रत्ययेन निष्पन्नमिदम् । शब्दार्थः । यथा । उपादेयगतायाः संख्यायाः विवक्षितत्वं युक्तम् । अनुपादेयगता संख्या न विवक्षिता । इति माधवाचार्य्यः । इत्येकादशीतत्त्वम् ॥

विवदमानः, त्रि, विवादकर्त्ता । विपूर्ब्बवदधातोः शानचप्रत्ययेन निष्पन्नः ॥

विवधः, पुं, (विविधो वधो हननं गमनं वा यत्र ।) पर्य्यायहारः । स तु धान्यतण्डुलादिः । मार्गः । पन्थाः । इत्यमरभरतौ । श्रीहिट्टालादेः पर्य्यायहारत्वम् । इति स्वामी । उपरितो बहुशिक्यस्कन्धवाह्यकाष्ठम् । बाँक् इति ख्यातम् । इति भानुदीक्षितः । भारः । इति मुकुटधृतविश्वः ॥

विवधिकः, पुं, (विवधेन हरतीति । विवध + "विभाषा विवधवीवधात् ।"४ । ४ । १७ । इति ठन् ।) वैवधिकः । इत्यमरटीका सारसुन्दरी ॥

विवरं, क्ली, (विवृणोतीति । वि + वृ + पचाद्यच् ।) छिद्रम् । इत्यमरः ॥ (यथा, रघुः ।११।१८।
"यत्तकार विवरं शिलाघने
ताडकोरसि स रामसायकः ।
अप्रविष्टविषयस्य रक्षसां
द्वारतामगमदन्तकस्य तत् ॥")
दोषः । इति मेदिनी ॥ (यथा, महाभारते । १ । १४१ । १७ ।
"एकाग्रः स्यादविहतो नित्यं विवरदर्शकः ।
राजन्नाद्यं सपत्नेषु नित्योद्विग्नः समाचरेत् ॥"
अवकाशः । यथा, भागवते । ५ । १० । १२ ।
"विशेषबुद्धेर्विवरं मनाक् न
पश्याम यत्र व्यवहारतोऽन्यत् ॥")

विवरणं, क्ली, (वि + वृ + ल्युट् ।) व्याख्या । इति हलायुधः ॥

विवरनालिका, स्त्री, (विवरयुक्तं नालं यस्याः ।) वेणुः । इति त्रिकाण्डशेषः ॥

विवर्णः, पुं, (विरुद्धो वर्णः ।) गौरः । इत्यमरः ।२।९०।१६। (यथा, मार्कण्डेये । ४१।१० ।
"भैक्षचर्य्या विवर्णेषु जघन्या वृत्तिरिष्यते ॥"
वि, विरुद्धो वर्णो यस्य ।) मलिनः । (यथा, रामायणे । २ । २६ । ८ ।
"विवर्णवदनं दृष्ट्वा तं प्रश्लिष्यमभर्षणम् ।
आह दुःखाभिसन्तप्ता किमिदानीमिदं प्रभो ॥")

विवर्त्तः, पुं, (वि + वृत् + घञ् ।) समुदायः । अपवर्त्तनम् । वृत्तम् । इति विश्वः ॥ (प्रतिपक्षः । यथा, नैषधे । ३ । ६४ ।
"ईशानिमेशैश्वर्य्यविवर्त्तमध्ये
लोकैश्चलोकैश्चयलोकमध्ये ॥"

समवायिकारणविसदृशकार्य्योत्पत्तिः । यथा, सांख्यतत्त्वकौमुद्याम् ।
"एकस्य सतो विवर्त्तः कार्य्यजातं नतु वस्तु सत् ।")

विवर्त्तनं, क्ली, परिभ्रमणम् । विपूर्ब्बकवृतधातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम् । (यथा, किराते । ५ । ४० ।
"कथयति श्रियोः श्रीरयोगं
विषमपदा पदवी विवर्त्तनेषु ।")

विवग्रः, त्रि, (विरुद्धं वष्टीति । वि + वग्र + अच् ।) अवश्यात्मा । अरिष्टदृष्टधीः । इति मेदिनी । हे आसन्नमरणसूचितलक्षणेन दूषितबुद्धौ । विरुद्धं वष्टि विवग्रः अल् । आसन्नमरणसूचापकं लिङ्गमरिष्टम् । तेन दुष्टा धीर्यस्य स तथा । इत्यमरटीकायां भरतः ।

विवस्वती, स्त्री, सूर्य्यनगरी । इति मेदिनी ।

विवस्वान्, [त्] पुं, (विशेषेण वस्ते आच्छादयतीति । वि + वस् + क्विप् । विवस्त्रेणोऽस्यास्तीति । विवस् + मतुप् । मस्य वः । "तदस्यास्त्यस्मिन्मतुप्" । १ । ४ । ९ । इति भत्वादुत्वाभावः ।) सूर्य्यः । (यथा, किराते । ५ । ३८ ।
"भवति दीप्तिरदीपितकन्दरा
तिमिरसंवलितेव विवस्वतः ।")
अर्कवृक्षः । इत्यमरः । देवता । इति मेदिनी । अरुणः । इति शब्दरत्नावली । वैवस्वतमनुः । इत्यजयः । (मनुष्यः । इति निघण्टुः । २ । ३ । २४ ।
"वस निवासे इत्यस्मात् 'अन्येभ्योऽपि दृश्यन्ते' इति क्विप् । दृश्यग्रहणात् भावे भवति । विविधं वसनं विवस्त्रः । तद्भवो विवस्वान् । सर्व्वस्यापि मनुष्यस्य यत्किञ्चित् विवसनमस्ति ;" इति तट्टीका ॥ * ॥ परिचरणप्रीतौ, त्रि । यथा, ऋग्वेदे । १० । ६५ । ६ ।
"देवेभ्यो दाशद्धविषा विवस्वते ॥"
"हविषा अग्नेन देवान् विवस्वते परिचरते ।" इति तद्भाष्ये सायणः ॥)

विवाकः, त्रि, विवेचनकर्त्ता । यथा,—
"अर्थिप्रत्यर्थिनोर्व्वचनं विरुद्धाविरुद्धं सभ्यैः सह विविनक्ति विवेचयति वा विवाकः ।" इति मिताक्षरा ॥

विवादः, पुं, विरुद्धो वादो विवादः । स च धनविभागादिविषयन्यायादिः । इति भरतः । तत्पर्य्यायः । व्यवहारः २ । इत्यमरः । ऋणादिन्यायः ३ । इति जटाधरः ॥
"ऋणादिदायकलहे द्वयोर्म्मिथ्युत्तरस्य वा ।
विवादो व्यवहारश्च द्वयमेतन्निगद्यते ।"
इति शब्दरत्नावली ॥*॥
मात्रादिना विवादनिषेधो यथा,—
"आचरेत् सर्व्वधर्म्मं तद्विरुद्धन्तु न चाचरेत् ।
मातापित्रतियोत्युक्तैर्विवादं नाचरेत् गृही ॥"
इति गारुडे ६६ अध्यायः ॥*॥
अष्टादश विवादस्थानानि यथा,—
"तेषामाद्यस्त्वृणादानं निक्षेपोऽस्वामिविक्रयः ।
सम्भूय च समुत्थानं दत्तस्यानपकर्म्म च ॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः ॥
सीमाविवादधर्म्मश्च पारुष्ये दण्डवाचिके ।
स्तेयञ्च साहसञ्चैव स्त्रीसंग्रहणमेव च ॥
स्त्रीपुंधर्म्मो विभागश्च द्यूतमाह्वयमेव च ।
पदान्यष्टादशैतानि व्यवहारस्थिता विदुः ॥"
इति मनुः ॥
अस्यार्थः । स्वधनस्यान्यस्मिन्नर्पणरूपो निक्षेपः । अस्वामिना च कृतो विक्रयः । सम्भूय वणिगादीनां क्रियानुष्ठानम् । दत्तस्य धनस्यापात्रबुद्ध्या क्रोधादिना वा ग्रहणम् । कर्म्मकारस्य भृतेरदानम् । कृतव्यवस्थातिक्रमः । क्रये विक्रये च कृते पश्चात् या विप्रतिपत्तिः । स्वामिपशुपालयोर्विवादः । ग्रामादिसीमाविप्रतिपत्तिः । वाक्पारुष्यं आक्रोशनादि । दण्डपारुष्यं ताडनादि । स्तेयं निह्नवेन धनग्रहणम् । साहसं प्रसह्य धनहरणादि स्त्रियाश्च परपुरुषसम्पर्कः । स्त्रीसहितस्य पुंसो धर्म्मव्यवस्था । पैशुन्यादिधनस्य विभागः । द्यूतं अक्षादिक्रीड़ा । आहूय पण्यव्यवस्थापूर्ब्बकं पक्षिमेषादिप्राणियोधनम् । इति कुल्लूकभट्टः ॥ (कलहः । यथा, रघुः । ७ । ५३ ।
"परस्परेण क्षतयोः प्रहर्त्तो-
रुत्क्रान्तवायोः समकालमेव ।
असर्त्तृभावेऽपि कयोश्चिदासी-
देकाक्षरः प्रार्थितयोर्विवादः ।")
विवादानुगतः, त्रि, (विवादं अनु गतः ।) विवादकर्त्ता । यथा, मिताक्षरायाम् ।
"विवादानुगतं दृष्ट्वा सभ्यस्तत्र प्रयत्नतः ।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः ॥"
विवादी, [न्] त्रि, (विवादोऽस्यास्तीति । विवाद + इनिः ।) विवादकर्त्ता । यथा,—
"अनुभावी च यः कश्चित् कुर्य्यात् साक्ष्यं विवादिनाम् ॥"
इति व्यवहारतत्त्वम् ॥
विवाहः, पुं, (विशिष्टं वहनम् । वि + वह + घञ् ।) उद्वाहः । दारपरिग्रहः । तत्पर्य्यायः । उपयमः २ परिणयः ३ उद्वाहः ४ उपयामः ५ पाणिपीड़नम् ६ । इत्यमरः । दारकर्म्म ७ करग्रहः ८ । इति शब्दरत्नावली । पाणिग्रहणम् ९ निवेशः १० पाणिकरणम् ११ । इति जटाधरः । स चाष्टविधः । यथा,—
"ब्राह्मो विवाह आहूय दीयते शक्तालङ्कृता ।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥
यज्ञस्थायर्त्विजे देवमादायार्षन्तु गोयुगम् ।
चतुर्दशप्रथमजः पुनात्युत्तरजश्च षट् ॥
इत्युक्ता चरतां धर्म्मं सह या दीयतेऽर्थिने ।
सकायः पावयेत्तज्जः षड्वंश्यांश्च सप्तमान् ॥
आसुरो द्रविणादानात् गान्धर्व्वः समयान्मिथः ।
राक्षसो युद्धहरणात् पैशाचः कन्यकाछलात् ॥
चत्वारो ब्राह्मक्षत्रियविशां भार्य्या वा शूद्रजन्मनः ।
ब्राह्मो विवाह आहूय दीयते शक्तालङ्कृता ।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥
यज्ञस्थायर्त्विजे देवमादायार्षन्तु गोयुगम् ।
चतुर्दशप्रथमजः पुनात्युत्तरजश्च षट् ॥
इत्युक्ता चरतां धर्म्मं सह या दीयतेऽर्थिने ।
सकायः पावयेत्तज्जः षड्वंश्यांश्च सप्तमान् ॥
आसुरो द्रविणादानात् गान्धर्व्वः समयान्मिथः ।
राक्षसो युद्धहरणात् पैशाचः कन्यकाछलात् ॥
चत्वारो ब्राह्मक्षत्रियविशां भार्य्या वा शूद्रजन्मनः ।
राक्षसश्चासुरो वैश्ये शूद्रे चान्त्यस्तु गर्हितः ॥
पाणिर्यास्याः सवर्णासु गृह्णीत क्षत्रिया शरम् ।
वैश्या प्रतोदमादद्याद्वेदने चाग्रजन्मनः ॥
अपि च ।
"गृहीतविद्यो गुरवे दत्वा च गुरुदक्षिणाम् ।
गार्हस्थ्यमिच्छन् भूपाल कुर्य्याद्दारपरिग्रहम् ॥
वर्षैरेकगुणां भार्य्यामुद्वहेत्त्रिगुणः स्वयम् ।
नातिकृष्णामकृष्णां वा नातिह्रस्वां न पिङ्गलाम् ॥
निसर्गतोऽधिकाङ्गीं वा न्यूनाङ्गीमपि नोद्वहेत् ।
अविस्पष्टां सरोगां वाकुलजां वातिरोगिणीम् ॥
न दुष्टां दुष्टवाचाटां वाङ्मिनीं पिङ्गलाक्षतः ।
न क्षश्मश्रुयज्ञनवतीं न चैव पुरुषाकृतिम् ॥
न घर्घरस्वरां श्यामवर्णां काकस्वरां न च ।
नातिवृद्धिञ्चां तद्वदृक्षाचीं नोद्वहेद्बुधः ॥
यस्याश्च रोमशे जङ्घे गुल्फौ चैव तथोन्नतौ ।
कूपौ यस्या हसन्त्याश्च गण्डयोस्ताञ्च नोद्वहेत् ॥
नातिरूक्षचक्षुषं पाण्डुकरनासरुगेक्षणाम् ।
आपीनश्रोणिपादाञ्च न कन्यामुद्वहेद्बुधः ॥
न वामनां नातिदीर्घां नोद्वहेत् संहतभ्रुवम् ।
न चातिच्छिद्रदशनां न करालमुखीं नरः ॥
पञ्चमीं मालपञ्चाञ्च पितृपञ्चाञ्च सप्तमीम् ।
यश्चोद्वहेत् कन्यां न्यायेन विधिना नृप ॥
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ।
गान्धर्व्वराक्षसौ वाऽपि पैशाचश्चाष्टमोऽधमः ॥
एतेषां यस्य यो धर्म्मो वर्णस्योक्तो मनीषिभिः ।
कुर्व्वीत दाराहरणं तेनाग्न्यं परिचर्य्येत् ॥
स धर्म्मचारिणीं प्राप्य गार्हस्थ्यं सहितस्तया ।
समुद्वहेद्दारवितत्तं सम्यगूढं महाफलम् ॥"
इति विष्णुपुराणे ३ अंशे १० अध्यायः ॥*॥
अन्यच्च ।
याज्ञवल्क्य उवाच ।
"गृहस्थस्तु सुतयो धर्म्मान् गृहस्थस्य यतव्रताः ।
गुरवे च धनं दत्वा स्नात्वा च तदनुज्ञया ॥
अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्व्विकां कान्तामसपिण्डां यवीयसीम् ॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ।
पञ्चमात् सप्तमादूर्द्धं मातृतः पितृतस्तथा ॥
दिपञ्चनवविख्यातात् श्रोत्रियाणां महाकुलात् ।
सवर्णः श्रोत्रियो विद्वान् वरदोवान्वितो न च ॥
यदुच्यते द्विजातीनां शूद्रादारोपसंग्रहः ।
न तन्मम मतं यस्मात्तत्रायं जायते स्वयम् ॥
तिस्रो वर्णानुपूर्व्वेण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्य्या वा शूद्रजन्मनः ॥
ब्राह्मो विवाह आहूय दीयते शक्तालङ्कृता ।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥
यज्ञस्थायर्त्विजे देवमादायार्षन्तु गोयुगम् ।
चतुर्दशप्रथमजः पुनात्युत्तरजश्च षट् ॥
इत्युक्ता चरतां धर्म्मं सह या दीयतेऽर्थिने ।
सकायः पावयेत्तज्जः षड्वंश्यांश्च सप्तमान् ॥
आसुरो द्रविणादानात् गान्धर्व्वः समयान्मिथः ।
राक्षसो युद्धहरणात् पैशाचः कन्यकाछलात् ॥
चत्वारो ब्राह्मक्षत्रियविशां भार्य्या वा शूद्रजन्मनः ।
राक्षसश्चासुरो वैश्ये शूद्रे चान्त्यस्तु गर्हितः ॥
पाणिर्यास्याः सवर्णासु गृह्णीत क्षत्रिया शरम् ।
वैश्या प्रतोदमादद्याद्वेदने चाग्रजन्मनः ॥

पिता पितामहो भ्राता सकुल्यो जननी तथा।
कन्यादः पूर्व्वनाशे प्रकृतिस्थः परः परः॥
अप्रयच्छन् समाप्नोति भ्रूणहत्यास्तावतीः।
एषामभावे दातॄणां कन्या कुर्य्यात् स्वयंवरम्॥
सङ्गत् प्रदीयते कन्या हरंस्तां चौरदण्डभाक्।
अदुष्टां हि त्यजन् दण्ड्यः सुदुष्टां हि परि-
त्यजेत्।"
इति गारुडे ८५ अध्यायः॥ *॥

अपरञ्च।

यम उवाच।

"कन्यां ये तु प्रयच्छन्ति यथाशक्त्या खल-
कृताम्।
ब्रह्मदेयां द्विजाग्र्य ब्रह्मलोकं व्रजन्ति ते।
कन्यादानन्तु सर्व्वेषां दानानामुत्तमं स्मृतम्॥
महान्त्यपि सदृक्षाणि गोऽजाविकधनान्यतः।
स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्ज्जयेत्॥
हीनक्रियातिषु पापरुक् सुने उद्वेगकारिणाम्।
कृष्णानयसदावाक्यचित्रिकुष्ठिकुलानि च।
यस्यास्तु न भवेद्भ्राता न च विज्ञायते पिता।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्म्मशङ्कया॥
चतुर्णामपि वर्णानां प्रेत्य चेह हिताय च।
अष्टाविमान् समासेन स्त्रीविवाहान्निबोधत॥
ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथासुरः।
गान्धर्व्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥
प्रदाय चार्च्चयित्वा च श्रुतशीलवते स्वयम्।
दद्यात् कन्यां यथान्यायं ब्राह्मो धर्म्मः प्रकी-
र्त्तितः॥ १॥
यज्ञे तु वितते सम्यगृत्विजे कर्म्म कुर्व्वते।
अलङ्कृत्य तथा दानं दैवो धर्म्मः प्रशस्यते॥२॥
एकं गोमिथुनं द्वे वा वरादाय धर्म्मतः।
कन्यादानन्तु विधिवदार्षो धर्म्मः स उच्यते॥३॥
सहोभौ चरतां धर्म्ममिति चैवानुभाष्य तु।
कन्याप्रदानमभ्यर्च्च्य प्राजापत्यो विधिः स्मृतः॥४॥
ज्ञातिभ्यो द्रविणं दत्वा कन्यायै चैव शक्तितः।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म्म उच्यते॥५॥
इच्छयान्योन्यसंयोगात् कन्यायाश्च वरस्य च।
गान्धर्व्वः स तु विज्ञेयो मिथुनः कामसम्भवः॥६॥
हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्।
प्रसह्य कन्यां हरणं राक्षसो विधिरुच्यते॥ ७॥
सुप्तां मत्तां रहः कन्यां कृत्वा यौनं व्रजत्यसौ।
स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः॥ ८॥
यत्रानाद्य त्रयो धर्म्मा यावद्धर्म्मो द्विजोत्तम।
पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन॥
चतुर्णामपि वर्णानामेष धर्म्मः सनातनः।
एषमा वदि वा मिथ्या कन्यैषा नात्र संशयः॥
कन्यां ये तु प्रयच्छन्ति यथाशक्त्या खलङ्कृताम्।
विवाहकाले संप्राप्ते यथोक्ते सदृशे वरे।
क्रमात् क्रमं क्रतुशतमनुपूर्व्वं व्रजन्ति ते॥
श्रुत्वा कन्याप्रदानन्तु पितरः प्रपितामहाः।
विमुक्ताः सर्व्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते॥
ब्राह्मेण तु विवाहेन यस्तु कन्यां प्रयच्छति।
ब्रह्मलोकं व्रजेच्छीघ्रं ब्रह्माद्यैः पूजितः सुरैः॥
दिव्येन तु विवाहेन यस्तु कन्यां प्रयच्छति।
भित्त्वा द्वारन्तु सूर्य्यस्य स्वर्गलोकञ्च गच्छति।
गान्धर्व्वेण विवाहेन यस्तु कन्यां प्रयच्छति।
गन्धर्व्वलोकमासाद्य क्रीडते देववच्चिरम्॥
शुल्केन दत्त्वा यो कन्यां तां पश्चात् सम्यगर्च्चयेत्।
स किन्नरेषु गन्धर्व्वैः क्रीडते कालमक्षयम्॥
न मन्युं कारयेत् तासां पूज्याश्च सततं गृहे।
ब्रह्मदेया विशेषेण ब्राह्मभोग्या सदा भवेत्॥
कन्यायां ब्रह्मदेयायामसुज्ञन् सुखमश्नुते।
अथ सृजति यो मोहात् सृक्का न नरकं व्रजेत्॥*
अप्रदायाञ्च कन्यायां न सृजीयात् कदाचन।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि॥
महाश्वमेधसमाकीर्णान्नास्ति ते नरकाद्भयम्।
तीर्थस्नं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि॥"
इत्यादौ वह्निपुराणे तडागवृक्षप्रशंसानामाध्यायः॥*॥ विवाहकाले मिथ्याभाषणे दोषाभावो यथा,—

ऋष्यशृङ्गोवाच।

"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन् न विवाहकाले।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि॥"
इति मात्स्ये ३१ अध्यायः॥*॥

विवाहे वर्ज्जनीयानि यथा,—

"विवाहे स्नानभुग्भाङ्गभूषोलूखलुतयोरवाः।
देवी संगीततारेज्या लाजमङ्गलवर्त्तनम्॥"
इति कविकल्पलतायाम् १ स्तवके २ कुसुमम्॥*॥

अथ विवाहोक्तदिनानि। तत्रान्दादिशुद्धिर्यथा,—

"प्रस्तुत्याधानतः शुद्धिर्विषमेऽब्दे समे क्रमात्।
विवाहे योषितां चन्द्रार्केज्यशुद्धिर्न योषितोः॥
सभर्तृकक्रियारम्भे भर्त्तुर्गोचरशुद्धितः।
यात्रोद्वाहे गर्भलग्ने स्वशुद्ध्याप्नोति तत् फलम्॥
प्रारभ्य जन्मसमयात् युवतेर्विवाह-
मोजाब्दकेषु तनयः शुभमादिशन्ति।
आधानतः प्रभृतितः समवत्सरेषु
प्रोक्तस्तयोर्न शुभदस्तु विलोमवर्षे॥*॥
अयुग्मे दुर्भगा नारी युग्मे च विधवा भवेत्।
तस्मात्प्रशस्यते युग्मे विवाहे सा पतिव्रता।
मासत्रयादूर्द्धमयुग्मवर्षे
युग्मे च मासत्रयमेव यावत्।
विवाहशुद्धिं प्रवदन्ति सर्व्वे
वाल्याद्यो ज्योतिषि जन्ममासात्॥
युग्माब्दकेषु युवतेरपि जन्ममासात्
मासत्रयं विवहने परमब्दशुद्धिम्।
प्राहुः समस्तसुनयो विषमे तु वर्षे
मासत्रयादुपरितः खलु जन्ममासात्।"*॥
राजमार्त्तण्डे।
"मान्द्येषु विवाहेषु कन्यासंवरणेषु च।
दश मासाः प्रशस्यन्ते चैत्रपौषविवर्ज्जिताः॥"
कन्यासंवरणे दक्षोदकविधौ।
"दम्पत्योर्दिनवारराशिरहिते दारानुकूले रवौ
चन्द्रे चार्ककुजार्किशुक्रविबुधे मध्येऽथवा
पापयोः।
लग्ने च द्यतिपातवैधृतिदिनं विष्टिञ्च रिक्तां
तिथिं
क्रूराहायनचेन्दुपौररहिते लग्नांशके मानुषे॥"*
योगविशेषे दोषविशेषानाह रत्नमालायाम्।
"कुलोच्छेदो यतीपाते परिघे स्वामिघातिनी।
वैधृतौ विधवा नारी विषदाहोऽतिगण्डके।
आधाते व्याधिसंघातः शूलाशनौ दुर्भगे तथा।
मूले च श्वशुरं हन्ति गण्डे रोगभयं तथा।
विष्कम्भेऽप्यतिदुःखः स्यात् वज्रके मरणं भवेत्।
एते वै दारजाः सर्व्वे दश योगाः प्रकीर्त्तिताः॥"
आश्वलायनः। उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चौड़कर्म्मोपनयनगोदान-विवाहाः। विवाहः सार्व्वकालिक इत्येक इति।
"आषाढ़े धनधान्यभोगरहिता नष्टप्रजा श्रावणे
वेश्या भाद्रपदे हरे च मरणं रोगान्विता
कार्त्तिके।
पौषे प्रेतवती वियोगबहुला चैत्रे मदोन्मादिनी
अन्येष्वेव विवाहिता पतिरता नारी सदा
भवेत्॥
हरौ च सुप्ते न च दक्षिणायने
तिथौ च रिक्ते ग्रहिनि स्वयं गते।
राजयक्ष्मा तथा युद्धे पितॄणां प्राक्संग्रये।
अतिप्रौढ़ा च या कन्या नानुकूलं प्रतीक्षते॥
अतिप्रौढ़ा च या कन्या कुले धर्म्मविरोधिनी।
अविशुद्धापि सा देया चन्द्रलग्नबलेन तु॥
अयनस्योत्तरस्यादौ मकरं याति भास्करः।
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम्॥"
इति विष्णुपुराणोक्तस्य चूड़ादावयनस्य परिग्रहः दिनमानादिबोधे तु सिद्धान्तादयनपरिग्रहः॥*॥
सार्व्वकालिक इत्यस्य विषयमाह मुनयजभीमे।
"ग्रहशुद्धिमब्दशुद्धिं शुद्धिं मासायनर्त्तुदि-
नानाम्।
अर्व्वाक् दशवर्षेभ्यो सुनयः कथयन्ति कन्य-
कानाम्॥
एतत्परन्तु विज्ञेयमङ्गिरोवचनं यथा।
कालात्यये च कन्यायाः कालदोषो न विद्यते॥
मलमासादिकालानां विवाहादौ प्रयत्नतः।
पुंसः प्रति सदा दोषात् सर्व्वदैव हि वर्ज्जिता॥"
ज्ञानचिन्तामणौ।
"वापीकूपतड़ागयागगमनक्षौरप्रतिष्ठाव्रतं
विद्यामन्दिरकर्णवेधनमहादानं वनं सेवनम्।
तीर्थस्नानविवाहदेवभवनं मन्त्रादिदेवेक्षणं
दूरेणैव जिनोविधुः परिहरेदर्कं गते भार्गवे॥"
वृहद्दानमार्त्तण्डे।
"सर्व्वाणि शुभकर्म्माणि कुर्य्यादर्कं गते सिते।
विवाहं मेखलाबन्धं यात्राञ्च परिवर्ज्जयेत्॥"
यात्राञ्चेति चकारो वचनान्तरोक्तप्रातिष्विक-निषिद्धकर्म्मान्तरं समुच्चिनोति।
"बाले शुक्रे वृद्धे शुक्रे नष्टे शुक्रे जीवे नष्टे।

बाले जीवे वृद्धे जीवे सिंहादित्ये गुर्वादित्ये ।
तथा मलिम्लुचे मासि सुराचार्येऽतिचारगे ।
वापीकूपतडागादिक्रियाः प्रागुदितास्त्यजेत् ॥
अतीचारं गते जीवे वक्रे चैव दृहस्पतौ ।
कामिनी विधवा प्रोक्ता तस्मात्तौ परिवर्जयेत् ॥
अतीचारं गतो जीवः पूर्वभं नैव गच्छति ।
समचारेऽपि कर्म्माणि नैव तत्रैव संस्थिते ॥"*॥
देवलः ।
"बाले वृद्धे तथैवास्ते कुरुते दैत्यमन्त्रिणि ।
उद्वाहितायां कन्यायां दम्पत्योरेव नाशनम् ॥
प्रागुद्गतः शिशुरुद्धस्तितयं सितः स्यात्
पश्चाद्गाहमिति पञ्चदिनानि वृद्धः ।
प्राक् पञ्चमेव कथितोऽत्र वशिष्ठगर्गै-
र्जीवस्तु पञ्चमपि वृद्धशिशुर्विवर्ज्यः ॥"
अत्यन्ताशक्तौ राजमार्त्तण्डः ।
"बाले वृद्धे च सन्ध्यांशे चतुःपञ्चदिवासरान् ।
जीवे च भार्गवे चैव विवाहादिषु वर्जयेत् ॥
वक्रे चैवातिचारे चिदशपतिगुरौ देवपूज्ये च सुप्ते
गुर्वादित्येऽधिमासे दिवसकररिपौ वाक्पतौ चैत्रपौषे ।
विद्यां कैतूद्गमे वा ग्रहदि सुरगुरौ सिंहसंस्थे मनोज्ञे
वर्षादाप्नोति चोढ़ा सुनियतमरणं देवकन्यापि भर्त्तुः ॥"*॥
शुक्रमधिकृत्य राजमार्त्तण्डे ।
"बाले च दुर्भगा नारी वृद्धे नष्टप्रजा भवेत् ।
नष्टे च म्रियते भर्त्ता सर्वमेतद्गुरावपि ॥
सिंहे गुरौ परिणीता पतिमात्मानमात्मजान् हन्ति ।
क्रमशस्त्रिषु पित्रादिषु वशिष्ठगर्गादयः प्राहुः ॥
गुरौ हरिस्थे न विवाहमाहु-
र्हारीतगर्गप्रमुखा मुनीन्द्राः ।
यदा न माघौ मघसंयुता स्यात्
तदा तु कन्योद्वहनं वदन्ति ॥"
अत्रैव माधवः ।
"मघाऋक्षं परित्यज्य यदा सिंहे गुरुर्भवेत् ।
तत्रान्दे कन्यका चोढ़ा सुभगा सुप्रिया भवेत् ॥"
हारीतः ।
"अतीचारं गते जीवे वृषे वृश्चिककुम्भयोः ।
यज्ञोद्वाहादिकं कुर्य्यात् तत्र कालो न लुप्यते॥"
कृत्यचिन्तामणौ ।
"अतीचारं गते जीवे वृषे वृश्चिककुम्भयोः ।
तत्र चोढ़ाहिता कन्याः संपृणीयात् कुलद्वयम् ॥"
सद्भूतकौस्तुभे भौमपराक्रमे ।
"यदातिचारं सुरराजमन्त्री
करोति गोमन्मथमीनसंस्थः ।
न याति चेदूर्ध्वमपि पूर्वराशिं
शुभाय पाणिग्रहणं वशिष्ठः ॥
अतीचारं गते जीवे स्थिरराशौ च संस्थिते ।
तत्र न लुप्यते कालो वदत्येवं पराशरः ॥
वापीकूपतडागादिनिषिद्धं सिंहगे गुरौ ।
मकरस्थे च तत् कार्य्यं न दोषः कालसोपजः ॥"
यत्तु ।
"कन्यावृश्चिकमेषेषु मन्मथे च भृगे वृषे ।
अतिचारेऽपि कर्त्तव्यं विवाहादि बुधैः सदा ॥"
इत्येतन्मूलं ह्येतन्निर्णयेऽप्युक्तम् ॥*॥ दीपिकायाम् ।
"त्रिकोणजाया धनलाभराशौ
वक्रातिचारेण गुरुः प्रयातः ।
यदा तदा प्राह शुभे विलग्ने
हिताय पाणिग्रहणं वशिष्ठः ॥"
देवीपुराणम् ।
"मकरस्थो यदा जीवो वर्ज्यते पञ्चमांशकम् ।
शेषेष्वपि च भागेषु विवाहः शोभनो मतः ॥"
भोजराजः ।
"यो जन्ममासे क्षुरकर्म्म याचां
कर्णस्य वेधं कुरुते च मोहात् ।
नूनं स रोगं धनपुत्रनाशं
प्राप्नोति मूढो वधबन्धनानि ॥
जातं दिनं दूषयते वशिष्ठ-
श्चौलं च गर्गो जनको दशाहम् ।
जन्माख्यमासं किल भागुरिश्च
चौढ़े विवाहे क्षुरकर्णवेधे ॥"
श्रीपतिसमुच्चये ।
"स्नानं दानं तपो होमः सर्वमङ्गल्यवर्द्धनम् ।
उद्वाहश्च कुमारीणां जन्ममासे प्रशस्यते ॥"
कृत्यचिन्तामणौ ।
"जन्ममासे च पुत्राढ्या धनाढ्या च धनोदये ।
जन्मभे जन्मराशौ च कन्या हि ध्रुवसन्ततिः ॥"
गर्गः ।
"ज्येष्ठे मासि तथा मार्गे चौरं परिणयं व्रतम् ।
ज्येष्ठपुत्रदुहितोश्च यत्नतः परिवर्जयेत् ॥"
अत्र ज्येष्ठत्वमादिगर्भजातत्वम् । तथा च ।
"जन्ममासि न च जन्मभे तथा
नैव जन्मदिवसेऽपि कारयेत् ।
आद्यगर्भभवपुत्रकन्ययो-
र्ज्येष्ठमासि न च जातु मङ्गलम् ॥"
अत्र जन्ममासादौ पुत्रमात्रस्य निषेधः ज्येष्ठमासे तु ज्येष्ठपुत्रस्येति विशेषः ।
"कृत्तिकास्थं रविं त्यक्त्वा ज्येष्ठे ज्येष्ठस्य कारयेत् ।
उत्सवेषु च सर्व्वेषु दिगादि दश वर्जयेत् ॥*॥
रेवत्युत्तरोहिणीमृगशिरोमूलानुराधामघाहस्तास्वातिषु तौलिवृषभमिथुनेद्वयतासु पाणिग्रहः।
सप्ताहात्यवहिः शुभैरुडुपतावेकादशस्थे त्रिगे
क्रूरैस्त्र्याद्यषडष्टगैर्न तु भृगौ षष्ठे कुजे चाष्टमे ॥"
ज्योतिस्त्रैहितनक्षत्रात् अधिकं चित्राश्रवणाधनिष्ठाश्विनीनक्षत्रं पारस्करोक्तं यथा.—
"कुमार्याः पाणिं गृह्णीयात् त्रित्रि त्रिभूत्तरादिषु ॥"
उत्तरफल्गुन्यादित्रयोत्तराषाढ़ादित्रयोत्तरभाद्रपदादित्रयेषु नवसु नक्षत्रेष्वित्यर्थः ॥*॥ भौमपराक्रमे ।
"पूर्व्वात्रये विशाखायां शिवाद्ये भचतुष्टये ।
ऊढ़ा चाशु भवेत् कन्या विधवासौ विवर्जयेत् ॥
विष्णुभाद्ये त्रिके त्रिके ज्येष्ठायां ज्वलने यमे ।
एभिर्विवाहिता कन्या भवत्येव सुदुःखिता ॥"
एवञ्च पारस्करोक्तं यत्तुर्व्वेदिविषयमापद्विषयं वा बोध्यम् ॥*॥
"आद्ये मघाचतुर्भागे नैर्ऋतस्याद्य एव च ।
रेवत्यन्तचतुर्भागे विवाहः प्राणनाशकः ॥
कर्णवेधे विवाहे च व्रते पुंसवने तथा ।
प्राशने चाद्यचूड़ायां विद्धर्क्षं विवर्जयेत् ॥"
विद्धर्क्षाणि ।
"तिथ्यृक्षद्वयवेदैश्चकरुद्रैश्चोनविंशतिः
भैरष्टकादशभिरष्टादशभिश्चविंशतिः संख्याः ।
रुद्रोनाः सूर्य्ययुताश्च
योगादन्धत्वेदशयोगभङ्गः ॥"
कर्म्मकालीननक्षत्रसूर्य्यभुज्यमाननक्षत्रयोर्मेलने यदि पञ्चदशान्यतमसंख्या भवति तदा न कर्म्मयोग्यमित्यर्थः । सप्तविंशाधिकत्वे सप्तविंशतिमपहाय शेषात् फलं अन्यथैकसंख्यानुपपत्तेः ॥*॥ अपवादस्तु ।
"आद्यपादे स्थिते सूर्य्ये तुरीयांशं प्रदुष्यति ।
द्वितीयस्थे तृतीयन्तु विपरीतमतोऽन्यथा ॥"
यत्तुमाह खरोदये ।
"आद्यांशेन चतुर्थांशं चतुर्थांशेन चादिमम् ।
द्वितीयेन तृतीयन्तु तृतीयेन द्वितीयकम् ॥"
अत्रैव खर्ज्जूरवेधः । तथा च रत्नमाला ।
"एकाग्रहंगतां त्रयोदश तथा तिर्य्यग्गताः स्त्रापयेत्
रेखाश्चक्रमिदं बुधैरभिहितं खार्ज्जूरिकं तच्च तु ।
आघातादि तु सूर्क्षं भन्तु कथितं तत्रैकरेखास्थयोः
सूर्य्याचन्द्रमसोर्मिथो निगदिता ह्यृक्षात् एकार्गलः ॥"
आघातादीतिआघातयोगसंख्याऋक्षयोरग्राह्यम् । तथा च ऋक्षादीनि नक्षत्राणि देयानीत्यर्थः ॥*॥ अथ सप्तशलाकावेधः । दीपिकायाम् ।
"शलिकादिचतुःसप्तरेखाराशौ परिभ्रमन् ।
यद्भवेदेकरेखासौ वेधः सप्तशलाकजः ॥
सप्त सप्त विलिखेत् प्ररेखिका-
स्तिर्य्यगूर्द्धमथ शलिकादिकम् ।
वेधयेदभिजिता समन्वितं
चैकरेखगखगेन विद्धते ॥
वेधस्य चतुर्थेंऽशे अश्वयादौ त्रिप्रिकाचतुष्के च ।
अभिजित्सहिते खेचरे विज्ञेया रोहिणीविद्धा ॥"
त्रिप्रिकादयः ॥*॥
"यस्याः शृङ्गी सप्तशलाकाभिद्धः
यापैरपापैरथवा विवाहे ।
रक्तांशुकेनैव तु रोदमाना
प्रेम्णानभूमिं प्रमदा प्रयाति ॥"

अस्यापवादो यथा, राजमार्त्तण्डे।
"विषप्रदिग्धेन हतस्य मत्रिणा
मृगस्य मांसं शुभदं यतादृते।
यथा तथाऽप्युद्वयाद एव
प्रदूषितोऽन्योद्वयदं शुभावहम्॥"
अथ पञ्चशलाकाचक्रम्।
"ऊर्द्धं रेखास्थिता: पञ्च तिर्यक् पञ्च तथैव च।
दे दे च कोष्ठयो रेखे साभिजित् ऋक्षिका-
दिकम्॥
शम्भुकोष्ठे द्वितीये तु लेखयेत् सर्व्वकर्म्मणि।
क्रूरैर्भिन्नमधो सौम्यैर्नक्षत्रं परिवर्ज्जयेत्॥
नलायाते च ये दोषा ये च सप्तशलाकके।
ते सर्व्वे प्रभवन्त्यत्र नात्रा पञ्चशलाकके॥
अथ चक्रान्वये कश्चित् पादवेध उदेष्यते॥"
तदुक्तं रत्नमालायाम्। केचित्तत्रायीष्यते पाद-
वेध इति। इति पञ्चशलाकाचक्रम्॥ *॥
रत्नमालायाम्।
"ऋक्षं दादशसप्तमरश्मिरवनीसुतस्तृतीयं गुरुः
षष्ठं चाष्टममर्कजस्तु पुरतो हन्ति स्फुटं नलया।
पश्चात् सप्तममिन्दुजस्तु नवमं राहुः सितः
पञ्चमम्।
द्वाविंशं परिपूर्णमृक्षतिरुदुपः सन्ताड़येन्नेतरत्॥"
नलायातोऽयम्॥ *॥
"यायात् सप्तमगः शुक्रो यदि भवेत् यायेन
युक्तोऽथवा
यस्मात् तं परिवर्ज्जयेत् सुविमलो दोषो ह्ययं
कथ्यते।
यात्रायां विपदो ग्रहे सुतवधः चौरेषु रोगोद्-
भवो-
ऽप्युद्वाहे विधवा व्रते च मरणं मूलेच पुंस्क-
र्म्मणि॥" *॥
"रविमन्दकुजाक्रान्तं मृगाद्भात् सप्तमं
त्यजेत्।
विवाहयात्राचूड़ासु यज्ञकर्म्मव्रतेषु च॥"
यामित्रवेधः॥ *॥
"मूलत्रिकोणनिजमन्दिरगोऽथ पूर्णो
मित्रर्क्षसौम्यगृहगोऽथ तदीक्षितो वा।
यामित्रवेधविहितानपहृत्य दोषान्
दोषाकरः शुभमनेकविधं विधत्ते।"*॥
भोजराजः।
"त्रिषड्दशैकादशगो दिनेशः
सुतार्थसौभाग्यशुभप्रदः स्यात्।
वैधव्यदाताष्टमराशिसंस्थः
शेषेषु रुग्दुःखसुतः करोति।"
रविशुद्धिः॥ *॥
"कन्यानक्षत्रशुद्धौ स्याद्विवाहः शुभलग्नयोगाम्।
पञ्चाङ्गशुद्धिसुद्धा तु यात्रापुण्योदयवाद्यः॥"
विद्याधरीविलासे।
"पुंसामर्कः स्मृतो योनिर्योषितामन्दतद्युतिः।
अतः पुंयोषितोः प्रशस्तं बलमर्कशशाङ्कजम्॥
गोचरशुद्धाविन्दुं कन्याया यत्नतः शुभं वीक्ष्य।
तस्मिंकरणञ्च पुंसः शेषैरबलैरपि विवाहः॥
द्वितीयपुत्राङ्गगतः प्रभाकरः
त्रयोदशाद्दातृ परतः शुभप्रदः।
न जन्मसप्तव्ययरन्ध्रगस्तथा
करोति पुंसामपि ताद्दशं फलम्॥"
तथा त्रयोदशाद्दातृ परतः॥*॥
"त्रयोदशद्दिनान्यर्को दश षड्धरणीसुतः।
सार्द्धं दिनञ्च शीतांशुर्मासमेकादशं तमः॥
चौरिः पादाधिकं वर्षं मासानष्टौ हरस्मृतिः।
भवनार्द्धं भृगुः सौम्यो यावन्नाशशुभाः फलम्॥
कर्त्तृ व्रतादिके दद्युर्न तथा शेषभागगाः॥ *॥
लग्ने तत्पञ्चमे तूर्य्ये नवमे दशमे तथा।
गुरुर्भृगुर्व्वा दोषघ्नो विवाहे वर्हते शुभम्॥"
अयमेव सुतद्विचक्रयोगः॥ *॥
"गोधूलिं त्रिविधां वदन्ति मुनयो नारीविवा-
हादिके
हेमन्ते शिशिरे प्रयाति मृदुतां मिष्टीकृते
भास्करे।
शैत्ये हर्षसमिते वसन्तसमये भानौ गते
दक्षतां
सूर्ये चास्तमुपागते च नियतं प्राट्टग्धरत्-
कालयोः॥*॥
लग्नं यदा नास्ति विशुद्धमन्यद्-
गोधूलिकां तत्र शुभां वदन्ति।
लग्ने विशुद्धे सति वीर्य्ययुक्ते
गोधूलिका नैव फलं विधत्ते॥*॥
नास्मिन् ग्रहा न तिथयो न च विष्टिवारा
ऋक्षाणि नैव जनयन्ति कदापि विघ्नम्।
अत्याहतः सततमेव विवाहकाले
यात्रासु चायमुदितो भृगुजेन योगः॥*॥
मार्गे गोधूलियोगे प्रभवति विधवा माघमासे
तथैव
पुत्रायुर्धनयौवनेन सहिता कुम्भे स्थिते
भास्करे।
वैशाखे सुखदा प्रजाधनवती ज्येष्ठे मतेर्म्मानदा
आषाढ़े धनधान्यपुत्रबहुला याणिग्रहे
कन्यका॥"*॥
विवाहपटले।
"ढूढ़ा धनुषि च कुलटा ततपूर्व्वार्द्धे सतीत्यपरे
अगुः॥"*॥
ज्योतिःसारसंग्रहे।
"विवाहे तु दिवाभागे कन्या स्यात् पुत्र-
वर्ज्जिता।
विरहानलदग्धा सा नियतं स्वामिघातिनी॥*॥
महाभारते।
"रात्रौ दानं न शंसन्ति विना चाभयदक्षि-
णाम्।
विद्यां कन्यां द्विजश्रेष्ठा दीपमन्नं प्रतिश्रयम्॥"*
व्यासः।
"रिक्तासु विधवा कन्या दर्शेऽपि स्याद्विवा-
हिता।
शनैश्चरदिने चैव यदा रिक्ता तिथिर्भवेत्।
तस्मिन् विवाहिता कन्या पतिसन्तानवर्द्धिता॥"
स्मृतिः।
"धर्म्मार्थकाममोक्षाणां दारा: संप्राप्तिहेतवः।
परीक्ष्यन्ते प्रयत्नेन पूर्व्वमेव करग्रहात्॥"*॥
मनुः।
"अयङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्।
तनुलोमकेशदशनां मृदङ्गीसुहृदेत् स्त्रियम्॥"*
प्रातातपः।
"हंसस्वनां मेघवर्णां मधुपिङ्गललोचनाम्।
ताद्दशीं वरयेत् कन्यां यदिच्छेत् सुखमेधते॥"*॥
भविष्ये।
"प्रतिष्ठिततलाः सम्यक् रक्ताम्भोरुहसन्निभाः।
ताद्दशाश्चरणा धन्या योषितां भोगवर्द्धनाः॥"
प्रतिष्ठितौ भूमौ समः समस्तलोऽधोभागो येषां
ते तथा॥ *॥ मनुः।
"नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न
रोगिणीम्।
नालोमिकां नातिलोमीं न वाचाटां न पिङ्ग-
लाम्॥
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्व्वतनामिकाम्।
न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम्॥"
प्रतिप्रसवमाह मत्स्यसूक्ते।
"गङ्गा च यमुना चैव गोमती च सरस्वती।
नदीष्वासां नाम वृक्षे मालती तुलसी अपि।
रेवती चाश्विनी भेषु रोहिणी शुभदा भवेत्॥"
ज्योतिश्चिन्तामणौ।
"नेत्रे यस्याः कैकरे पिङ्गले वा
स्याद्दृङ्नीला श्यावलोलेक्षणा च।
कूपौ यस्या गण्डयोः सस्मिताया
निःसन्दिग्धं बन्धकीं तां वदन्ति॥"*॥
नन्दिकेश्वरपुराणे।
"श्यामा सुकेशी तनुलोमराजी
सुभ्रूः सुशीला सुगतिः सुदन्ता।
वेदीविमध्या यदि पङ्कजाक्षी
कुलेन हीनापि विवाहनीया॥
दृष्टा कुदन्ता यदि पिङ्गलाक्षी
लोम्ना समाकीर्णसमाङ्गयष्टिः।
मध्ये च पृष्ठा यदि राजकन्या
कुलेऽपि योग्या न विवाहनीया॥"*॥
हारीतः।
"तस्मात् कुलनक्षत्रविज्ञानोपपन्नां वरयेत्।"
नक्षत्रोपपन्नां नाड़ीनक्षत्रहीनाम्॥ *॥
नाड़ीनक्षत्रमाह खरोदये।
"अश्विन्यादि लिखेच्चक्रं सर्पाकारं त्रिनाड़िकम्।
तत्र वेधवशाज्ज्ञेयं विवाहादि शुभाशुभम्॥
त्रिनाड़ीवेधनक्षत्रमश्विन्यार्द्रायुगोत्तरा।
हस्तेन्द्रमूलवारुण्यः पूर्व्वभाद्रमदास्तथा॥
याम्यः सौम्यो गुरुर्योनिश्चित्रा मित्रजलाश्रयम्।
धनिष्ठा चोत्तराभद्रा मध्यनाड़ीव्यवस्थिताः॥*॥
कृत्तिका रोहिणी सर्पो मघा स्वातीविशा-
खके।
उत्तरा श्रवणा पौष्णं पृष्ठनाड़ीव्यवस्थिताः॥*॥
अश्व्यादिनाड़ीवेधर्क्षे षष्ठं द्वितीयकं क्रमात्।

धाम्यादितूर्य्यतूर्य्यञ्च क्षत्रिकादिद्विषट्ककम् ॥
एवं निरीक्ष्यवेद्यैर्ध कन्यामन्ये सुरे गुरौ ।
पण्यस्त्रीस्वामिमित्रेषु देशे ग्रामे पुरे गृहे ॥
एकनाड़ीस्थधिष्ण्यानि यदि स्युर्वरकन्ययोः ।
तदा वेद्यं विजानीयात् गुर्व्वादिषु तथैव च ॥
प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतो वधः ।
प्रनष्टं जन्मभं यस्य तस्य नामर्क्षतो वदेत् ॥
द्वयोर्जन्मभयोर्वेधो द्वयोर्नाममयोस्तथा ।
नामजन्मर्क्षयोर्वेधो न कर्त्तव्यं कदाचन ॥
एकनाड़ीस्थिता चेत् स्यात् भर्त्तुर्नाशाय भाङ्गना ।
तस्मान्नाड़ीवधो वीक्ष्यो विवाहे शुभमिच्छता ॥
प्राङ्नाथा वेधतो भर्त्ता मध्यनाथोभयं तथा ।
पृष्ठनाड़ीवधे कन्या म्रियते नात्र संशयः ॥
एकनाड़ीस्थिता यत्र गुरुर्मन्त्रश्च देवताः ।
तत्र हेयं रजं रुत्वं क्रमेण फलमादिशेत् ॥
प्रभुः पण्याङ्गनामित्रं देशो ग्रामः पुरं गृहम् ।
एकनाड़ीगता भर्त्ता अभर्त्ता वेधवर्ज्जिताः ॥"
प्रतिप्रसवमाह ज्योतिषे ।
"एकराश्यादियोगे तु नाड़ीदोषो न विद्यते ॥"
स यथा ।
"एकराश्यौ च दम्पत्योः शुभं स्यात् समसप्तके ।
चतुर्थे दशमे चैव त्रितीयैकादशे तथा ॥"
समसप्तकाद्विषमसप्तके दोषः । तथा च ।
"षोटके सप्तके मेषतुले युग्मधनौ तथा ।
सिंहघटौ सदा वर्ज्यौ रुतिं तत्रान्यवीक्ष्यः ॥"
श्रीपतिव्यवहारनिर्णये ।
"सुहृदेकाधिपत्ययोगे तारावले वश्यराश्यौ वा ।
अपि नाड्यादिवेधे भवति विवाहो हितार्थाय ॥"
राजमार्त्तण्डे ।
"न राजयोगे महवैरिता च
न तारशुद्धिर्न गणत्रयं स्यात् ।
न नाड़िदोषो न च वर्णदुष्टि-
र्गर्गादयस्ते मुनयो वदन्ति ॥"*॥
राजयोगस्तु एकराश्यादियोग एव तत्रैव नाड्यादिप्रतिप्रसवात् । श्रीपतिरत्नमालायाम् ।
"अन्त्ये भाजनखण्डित्रयञ्च वृषभुङ्मेषोद्भवर्क्षं धिक्-
ष्वाखुर्गौः क्रमशस्ततोऽपि महिषी व्याघ्रः पुनः सौरभी ।
व्याघ्रेभौ मृगकुक्कुरौ कपिरथोरभ्रश्वं वानरः
सिंहोऽश्वो मृगराट् पशुश्च करटी योनिश्च भानामियम् ॥
गोव्याघ्रं गजसिंहमश्वमहिषं श्वेभञ्च वभ्रूरगं
वैरं वानरमेषकञ्च सुमहत्तद्दंष्ट्रालोद्भूरुम् ।
लोकानां व्यवहारतोऽन्यदपि च ज्ञात्वा प्रयत्नादिदं
दम्पत्योर्हृदयत्रयोरपि सदा वर्ज्यं शुभस्वार्थिभिः ॥
मकरसमेतं मिथुनं कन्याकलसौ मृगेन्द्रगोनौ च ।
वृषभतुलेऽलिमेषौ कर्कटधनुषी च मित्रविधौ ॥"
षड़ष्टकादिनियमः ॥ * ॥ अरिषड़ष्टकमाह ।
"मकरः करिकुलरिपुणा
कन्या मेषेण सह भवेत्सुतया ।
कर्कटघटौ वृषधनुषी
वृश्चिकमिथुने चारिविधौ ॥ * ॥
यदि कन्याहमे भर्त्ता भर्त्तुः षष्ठे च कन्यका ।
षड़ष्टकं विजानीयादत्यन्तं चिरशत्रुभिः ॥*॥
पुंसो गृहात् सुतगृहे सुतहा च कन्या
धर्म्मे स्थिता सुतवती पतिवल्लभा च ।
द्विद्वादशे धनगृहे धनहा च कन्या
ऋक्षे स्थिता धनवती पतिवल्लभा च ॥"
षड़ष्टकादौ तारानियममाह भीमपराक्रमः ।
"सौहृद्ये शुभयोर्द्वयोरपि तयोरैकाधिपत्येऽपि वा
तारा षष्ठसमित्रमित्रदहनक्षेमार्थसम्पद्यदि ।
षट्काष्टे नवपञ्चमे व्ययधने योगे च पुंयोषितोः
प्रीत्यायुःसुखवृद्धिपुष्टिजनकः कार्य्यो विवाहस्तदा ॥" * ॥
गर्गः ।
"मरणं तारविरोधे ग्रहरिपुभावे चिरेण ।
रोगादि नरनार्य्योः षट्काष्टके वैरमवश्यं भवेदाशु ॥"*॥
व्यासः ।
"मैत्रादियोगेऽपि षड़ष्टकादौ
तारा विपत्प्रत्यरिनैधनाख्याः ।
वर्ज्या विवाहे पुरुषोऽतो हि
प्रीतिः परा जन्मसु तारकासु ॥
नक्षत्रमेकं यदि भिन्नराशि-
र्नं दम्पती तत्र सुखं लभेताम् ।
विभिन्नरुक्षं यदि चैकराशि-
स्तदा विवाहः सुतसौख्यदायी ॥
एकर्क्षा च यदा कन्या राश्येका च यदा भवेत् ।
धनपुत्रवती नारी साध्वी भर्त्तृप्रिया सदा ॥
षड़ष्टके गोमिथुनं प्रदेयं
कांस्यं सरूप्यं नवपञ्चके तु ।
द्विद्वादशाख्ये कनकान्वितान्नं
विप्रार्चनं हेम च नाड़ीदोषे ॥
मरणं नाड़ीदोषे कलहः षट्काष्टके विपत्तिर्वा ।
अनपत्यता त्रिकोणे द्विद्वादशे च दारिद्र्यम् ॥"*॥
क्षत्रचिन्तामणौ ।
"हस्तास्वातिमृतिन्मृगाग्निः पुष्यमैत्राश्विभानि
पौष्णादित्ये जमुरिज्ञ बुधा देवसंज्ञानि भानि ।
पूर्व्वात्तिस्रः शिवभभरणीरोहिणी चोत्तराश्च
प्राहुर्मर्त्याक्षयसुडुगणं नूनमेतं मुनीन्द्राः ॥
चित्राश्लेषानिर्ऋतिपितृभे वासवं वासवर्क्षं
शक्राग्नीर्भे वरुणदहनर्क्षे च रक्षोगणोऽयम् ॥"
फलमाह श्रीपतिः ।
"स्वकुले चोत्तमा प्रीतिर्मध्यमा देवमानुषे ।
देवासुरे कनिष्ठा च मृत्युर्मानुषराक्षसे ॥
राक्षसी च यदा कन्या मानुषश्च वरो भवेत् ।
तदा मृत्युर्न दूरस्थो निर्घृनत्वमथापि वा ॥"
राजमार्त्तण्डे ।
"यदि स्याद्राक्षसो भर्त्ता कन्यका मानुषी भवेत् ।
विवाहे सुखमाप्नोति वैपरीत्यं विवर्ज्जयेत् ॥"
युद्धजयार्णवे ।
"देवा जयन्ति युद्धेन सर्व्वथा नात्र संशयः ।
रक्षसां मानुषाणाञ्च संग्रामे निश्चया रुतिः ॥
कर्किमीनालयो विप्राः क्षत्राः सिंहतुलाहयाः ।
वैश्या युग्माजकुम्भाख्याः शूद्रा वृषद्यूगाङ्गनाः ॥
सर्व्वाः परिणयेद्विप्रः क्षत्रियो नवभाग्भवेत् ।
षड़ाश्रयो भवेद्वैश्यस्त्रिसः शूद्रे प्रकीर्त्तिताः ॥
वर्णश्रेष्ठा च या नारी हीनवर्णश्च यः पुमान् ।
महत्यपि कुले जाता नासौ भर्त्तरि रज्यते ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
अन्यत् उद्वाहशब्दे द्रष्टव्यम् ॥*॥* तन्त्रयोग यथा । अथ क्षतदृद्धिश्राद्धः संप्रदाता जन्मलग्ने संप्रदानशालायां गत्वा उत्तरतः स्त्रीगर्भं वह्नादिस्थरादिकं संस्कृत्य पश्चिमाभिमुखोऽनुप्रविशेत्तिष्ठेत् । ततोऽग्नेत उपस्थिते वरे संप्रदाता क्षताक्षतिवरणं कुर्य्यात् । ॐ साधु भवानास्तामिति पृच्छेत् । जामाता ॐ साध्वहमासे इति वदेत् । संप्रदाता ॐ अर्चयिष्यामो भवन्तं इति पृच्छेत् । जामाता ॐ अर्चय इति वदेत् । ततः संप्रदाता पाद्यार्घ्याचमनीयगन्धमाल्ययथाशक्त्यङ्गुरीयसपट्टकयज्ञोपवीतसपर्णपूगादिकं प्रदाय जामातरमर्चयेत् । ततः संप्रदाता दक्षिणं जानु स्पृष्ट्वा ॐ अद्येत्यादि अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः प्रपौत्रं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पौत्रं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पुत्रं अमुकगोत्रं अमुकप्रवरं अमुकदेवशर्म्माणं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः प्रपौत्रीं अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः पौत्रीं अमुकगोत्रस्यामुकप्रवरस्य अमुकदेवशर्म्मणः पुत्रीं अमुकगोत्रां अमुकप्रवरां श्रीअमुकीदेवीं एनां कन्यां शुभविवाहेन दातुं एभिः पाद्यादिभिः अभ्यर्च्य भवन्तमहं वृणे । जामाता ॐ वृतोऽस्मि इति वदेत् । संप्रदाता यथाविहितं विवाहकर्म्म कुरु । जामाता ॐ यथाज्ञानतः करवाणीति वदेत् । ततः स्वाचारादिकं कारयित्वा सुखचन्द्रिकां कारयेत् । ततोऽग्ने उपस्थिते वरे संप्रदाता अमुं मन्त्रं जपति । प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽर्हणीया गौर्देवता गवीपस्थापने विनियोगः । ॐ अहेना पुत्रवाससा धेनुरभवद्यमे सा नः पयस्वती दुहा सत्तरा सत्तरां समाम् । ततो जामाता प्रजापतिर्ऋषिर्गायत्री छन्दो विराड्देवता उपविशदर्हणीवजपे विनियोगः । ॐ इदमहमिमां पत्नीं विराजमन्नाद्यायाधितिष्ठामि । इमं मन्त्रं जपन्नासने प्राङ्मुख उपविशति । ततः संप्रदातापि पश्चिमाभिमुख उपविशेत् । ततो दासा साग्रपञ्चविंशतिकुशपत्रैः दिर्वामाधोमुखमन्थिं रचितं

विष्टरं उत्तरायं उत्तानहस्ताभ्यां गृहीत्वा ॐ विष्टरो विष्टरो विष्टरः प्रतिगृह्णतामित्याद-धानो विष्टरमर्पयति। जामाता च ॐ विष्टरं प्रतिगृह्णामि इति विष्टरं गृहीत्वा प्रजापति-र्ऋषिरनुष्टुप् छन्द ओषधो देवता विष्टरासन-दाने विनियोगः।

"ॐ या ओषधीः सोमराज्ञीर्बह्वीः शतविच
चखाः।
ता मह्यमस्मिन्नासने अच्छिद्राः शर्म्मे यच्छत।"

इत्यासने विष्टरमुत्तराग्रं दत्त्वा उपविशति। ततः सम्प्रदाता पुनस्तादृशमेव विष्टरं गृहीत्वा ॐ विष्टरो विष्टरो विष्टरः प्रतिगृह्णतामिति तथैव पुनरर्पयति। जामाता च ॐ विष्टरं प्रतिगृह्णामीति तथैव गृहीत्वा प्रजापतिर्ऋषि-रनुष्टुप् छन्द ओषधो देवता विष्टरस्य पादयो-रधस्ताद्दाने विनियोगः।

"ॐ या ओषधीः सोमराज्ञीर्बिभ्रिताः
पृथिवीमनु।
ता मह्यमस्मिन् पादयोरच्छिद्राः शर्म्मे यच्छत।"

इति पादयोरधस्तादुत्तराग्रं विष्टरं स्थापयेत्॥ ततः सम्प्रदाता पानीयपात्रं गृहीत्वा ॐ पाद्याः पाद्याः पाद्याः प्रतिगृह्णन्तामिति पानीयपात्र-मर्पयति। जामाता ॐ पाद्यं प्रतिगृह्णामीति गृहीत्वा प्रजापतिर्ऋषिर्विराड्गायत्री छन्द आपो देवता पादप्रक्षालनार्थोदकपात्रे विनियोगः। ॐ यतो देवीः प्रतिपस्याव्यापस्ततो मा अङ्गिरागच्छतु। अनेनोदकं क्षिपेत्। ततो जामाता तस्मात् पात्रादुदकं गृहीत्वा प्रजापतिर्ऋषिर्विराड्गायत्री छन्दः श्रीर्देवता सव्यपादप्रक्षालने विनियोगः ॐ सव्यं पादमवने-निक्षे अग्निनाहं श्रियं दधे। अनेन वामपादे उदकाञ्जलिं दद्यात्। ततोऽपरमञ्जलिं गृहीत्वा प्रजापतिर्ऋषिर्विराड्गायत्री छन्दः श्रीर्देवता दक्षिणपादप्रक्षालने विनियोगः। ॐ दक्षिणं पादमवनेनिक्षे अग्निनाहं श्रियमावेशयामि। अनेन दक्षिणपादे उदकाञ्जलिं दद्यात्। ततः पुनरुदकाञ्जलिं गृहीत्वा प्रजापतिर्ऋषिर्विराड्-गायत्री छन्दः श्रीर्देवता उभयपादप्रक्षालने विनियोगः। ॐ पूर्व्वमन्यमपरमन्यमुभौ पादावव-नेनिक्षे राष्ट्रमस्मा अभयमस्यावरुन्धे। अनेन पादद्वये उदकाञ्जलिं दद्यात्। ततः सम्प्रदाता साक्षतदूर्व्वापल्लवान् गृहादिपात्रे निधाय। ॐ अर्घमर्घमर्घं प्रतिगृह्णताम्। इत्यभि-धायार्घमर्पयति। जामाता च ॐ अर्घं प्रति-गृह्णामीति गृहीत्वा प्रजापतिर्ऋषिरर्घो देवता अर्घप्रतिग्रहणे विनियोगः। ॐ अन्नस्य राद्धि-रसि राद्धिरसि भूयासम्। अनेनार्घं शिरसि दद्यात्। ततः सम्प्रदाता उदकपात्रं गृहीत्वा। ॐ आचमनीयमाचमनीयमाचमनीयं प्रति-गृह्यतां इत्युदकपात्रमर्पयति। जामाता च ॐ आचमनीयं प्रतिगृह्णामीति गृहीत्वा प्रजा-पतिर्ऋषिराचमनीयं देवता आचमनीयाचमने विनियोगः। ॐ यशोऽसि यशो मयि धेहि। अनेनोत्तराभिमुखीभूयाचामेत्। ततः सम्प्र-दाता घृतदधिमधुयुक्तं कांस्यपात्रं कांस्यपात्रा-न्तरेणापिधाय गृहीत्वा ॐ मधुपर्कों मधुपर्कों मधुपर्कः प्रति गृह्यतामिति मधुपर्कं समर्पयति। जामाता च ॐ मधुपर्कं प्रतिगृह्णामीति गृहीत्वा प्रजापतिर्ऋषिर्मधुपर्कों देवता अर्हणीयमधु-पर्कप्रहणे विनियोगः। ॐ यशसो यशोऽसि। अनेन मधुपर्कं गृहीत्वा भूमौ निधाय प्रजा-पतिर्ऋषिर्मधुपर्कों देवता अर्हणीयमधुपर्क-प्राशने विनियोगः। ॐ यशसो भक्षोऽसि मह्यसो भक्षोऽसि श्रीभक्षोऽसि श्रियं मयि धेहि। अनेन मन्त्रेण वारत्रयं भक्षयित्वा सकृत् तूष्णीं भक्षयेत्। ततो जामाता आचान्तो मङ्गलौ-षधिलिप्तेन दक्षिणहस्तेन तादृशमेव कन्याया दक्षिणहस्तं स्वहस्तोपरि निदध्यात्। ततः सौभाग्यपतिपुत्रवती नारी मङ्गलपूर्व्वकं कुशेन हस्तद्वयं बध्नाति। ततः सम्प्रदाता तिलकुश-सहितसुदकपात्रं गृहीत्वा वामहस्तेनार्चितां कन्यां धृत्वा ओमद्यामुकेमासि अमुकराशिस्थे भास्करे अमुके पक्षे अमुकतिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुककामः अमुकगोत्रस्या-मुकप्रवरस्य अमुकदेवशर्म्मणः प्रपौत्राय अमुक-गोत्रस्य अमुकप्रवरस्य अमुकदेवशर्म्मणः पौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकदेव-शर्म्मणः पुत्राय अमुकगोत्राय अमुकप्रवराय श्रीअमुकदेवशर्म्मणे ब्राह्मणाय वराय अर्चि-ताय अमुकगोत्रस्यामुकप्रवरस्यामुकदेवशर्म्मणः प्रपौत्रीं अमुकगोत्रस्यामुकप्रवरस्यामुकदेव-शर्म्मणः पौत्रीं अमुकगोत्रस्य अमुकप्रवरस्य अमुकदेवशर्म्मणः पुत्रीं अमुकगोत्रां अमुक-प्रवरां श्रीअमुकदेवीं इति चिरुच्चार्य एनां कन्यां सवस्त्रालङ्कृतां प्रजापतिदेवताकां तुभ्य-महं सम्प्रददे। इति हस्तद्वयोपरि सतिल-जलकुशप्रदानमर्पयति। जामाता ॐ स्वस्तीत्यभि-धाय कन्येयं प्रजापतिदेवताका इति वदेत्। गायत्रीं कामस्तुतिञ्च पठेत्। ॐ क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिगृहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते।॥ ततः ॐ अदोऽद्यादि इतीतत्कन्यादानकर्म्मणः साङ्गतार्थं दक्षिणामेतत् सुवर्णं अमुकगोत्रायामुकदेवशर्म्मणे ब्राह्मणाय वराय तुभ्यमहं सम्प्रददे। ततो जामाता ॐ स्वस्तीति वदेत्। ततः प्रतिपुत्रवती नारी दाम्पत्योर्वस्त्रेण ग्रन्थिं बध्नाति। ततः कुशग्रन्थिं मुक्त्वा वस्त्रेणाच्छाद्यान्योन्यावलोकनं कारयेत्। ततो भर्त्तुर्दक्षिणपार्श्वे वधूमुपवेशयेत्। ततो नापितेन गौर्गौरित्युक्ते जामाता पठति। प्रजा-पतिर्ऋषिर्बृहती छन्दो गौर्देवता पूर्व्वबद्धगवी-मोचने विनियोगः। ॐ सुप्त गां वरुणपाशा-द्विमध्यं मेऽभिधेहि त्वं जन्यस्य चोभयोरुत्तरस्य गामस्तु लक्षणि पिबतूदकम्। इति पठेत्। ततो नापितेन शुक्लायां गवि जामाता पठति। प्रजा-पतिर्ऋषिस्त्रिष्टुप् छन्दो गौर्देवता गवानुमन्त्रणे विनियोगः। ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकि-तुषे जनाय मा गामनागामदितिं वधिष्ट। अनेन गां विसर्জ্জयेत्। ततो मङ्गलं कुर्य्यात्। ततो भर्त्तुर्वामपार्श्वे वधूमुपवेशयेत्। इति सम्प्रदानं समाप्तम्॥ इति भवदेवभट्टः॥

विवाहितः, पुं स्त्री, (वि + वह + णिच् + क्तः।) कृतविवाहः। यथा,—

"ग्रनैश्चरदिने चैव यदि रिक्ता तिथिर्भवेत्।
तस्मिन् विवाहिता कन्या पतिसन्तानवर्द्धिता॥"
अपि च।
"विष्णुभाद्वे चिके चित्रे ज्येष्ठायां ज्वलने यमे।
एभिर्विवाहिता कन्या नित्यमेव सुदुःखिता॥"
इति ज्योतिस्तत्त्वम्॥

विवाह्यः, पुं, (वि + वह + णिच् + यत्।) जामाता। इति केचित्। विवाहयोग्ये, त्रि। (यथा, कथासरित्सागरे। ६३। १६०।

"पद्मावत्या ऋते राज्ञा न विवाह्यापरेति यत्।
प्रोक्तं देवि प्रतिज्ञातं मया निर्भूढमद्य तत्॥")

विविक्तं, त्रि, (वि + विच + क्तः।) पवित्रम्। विजनम्। इत्यमरः॥ (यथा, गीतायाम्। १३। १०।

"विविक्तदेशसेवित्वमरतिर्जनसंसदि।")

असम्पृक्तः। (यथा, माघे। ११। १७।

"पुनरुषसि विविक्तैर्मौक्तिकस्रिग्धवर्णं
ज्वलयति मदनाग्निं मालतीनां रजोभिः॥")

विवेकी। इति मेदिनी॥

विविक्ता, स्त्री, दुर्भगा। इति त्रिकाण्डशेषः॥ सुद्राङ्कितपुस्तके विरिक्ता इति पाठः॥

विविधं, त्रि, नानाप्रकारम्। इत्यमरः॥ (यथा, कौतुकसर्व्वस्वे। २।

"कृतं विविधदुष्कृतं सततमेव प्रत्यूहतः॥")

विवीतः, पुं, भूमिविशेषः। यथा,—

"सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम्।
विवीतः प्रचुरत्रणकाष्ठो रक्ष्यमाणः परियहीतो भूप्रदेशः तदुपघातेऽपीनरज्जेचसमं दण्डं एषां महिष्यादीनां दद्यात्। इति मिताक्षरायां स्वामिपालविवादप्रकरणम्॥

विवीतभर्त्ता, [ऋ] पुं, विवीतभूस्वामी। इति मिताक्षरा॥

विवृत्ता, स्त्री, (वि + वृत + क्तः। स्त्रियां टाप्।) दुर्भगा। इति भूरिप्रयोगः॥

विवृतं, त्रि, (वि + वृ + क्तः।) विस्तृतम्। इति मेदिनी। (यथा, श्राकुन्तले १ अङ्के।

"दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः
कीर्णवर्त्मा॥"

वर्णोच्चारणे प्रयत्नविशेषः। यथा, सिद्धान्तकौ-मुद्याम्। १। १। ६। "सृष्टेयत्सृष्टविवृतसंवृत-भेदात्।" "विवृतसञ्ज्ञानां स्वराणाञ्च। हस्वस्या-वर्णस्यप्रयोगे संवृतम्। प्रक्रियादशायान्तु विवृत मेव॥")

विवृता, स्त्री, क्षुद्ररुग्भेदः। इति मेदिनी॥ तल्लक्षणं यथा,—
"विवृतास्यां महादाहां पक्वोदुम्बरसन्निभाम्।
विवृतामिति तां विद्यात् पित्तोत्थां परिमर्ज्जनाम्॥"
परितः ग्रोथवतीम्॥ *॥ अस्याश्चिकित्सा।
"विवृतामिन्द्रवृद्धाग्र गर्दभीं जालगर्दभम्।
पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक्।
पाके तु रोपयेदाश्वेः पक्केभ्यस्तुरभेषजैः॥"
इति भावप्रकाशः॥
(विवृत्तेति क्वचित् पाठः॥)

विवृताक्षः, पुं, (विवृते अक्षिणी यस्य।) कुक्कुटः। इति हेमचन्द्रः॥

विवृतिः, स्त्री, व्याख्या। विपूर्ब्बवृधातोः क्तिप्रत्ययेन निष्पन्नमिदम्। विवरणम्। यथा,—
"ग्रक्तिग्रहं व्याकरणोपमान-
कोषाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषात् विवृतेर्व्वदन्ति
सान्निध्यतः सिंहपदस्य दृष्टाः॥"
इति मलमासतत्त्वम्॥

विवृत्तं, त्रि, (वि+वृत्+क्तः।) चलितम्। यथा,—
"विवृत्तपार्श्वं रुचिराङ्गहावं
सस्पन्दहारुं नितम्बरम्यम्।
आमन्द्रमन्थध्वनिदत्ततालं
गोपाङ्गनानृत्यमनन्दयत्तम्॥"
इति भट्टिः॥
विवृत्तं तिर्य्यक्चलितं पार्श्वं यत्र। इति तट्टीका॥

विवृत्तिः, स्त्री, चक्रवद्भ्रमणम्। घूर्ण्णनम्। विपूर्ब्बवृतधातोः क्तिप्रत्ययेन निष्पन्नमिदम्॥ (विविधवृत्तिः। यथा, भागवतटीकायां श्रीधरः।३।६।१०।
"विश्वस्जां विवृत्तये विविधवृत्तिलाभाय॥")

विवेकः, पुं, परस्परव्यावृत्ता वस्तुस्वरूपनिश्चयः। प्रकृतिपुरुषयोर्विभागेन ज्ञानं इत्यन्ये। इति भरतः॥ तत्पर्य्यायः। पृथग्भावता २। इत्यमरः॥ विवेचनम् ३। इति शब्दरत्नावली॥ पृथग्भावः ४। इति धरणिः॥
"विवेको वस्तुनो भेदः प्रकृतेः पुरुषस्य वा॥"
इति जटाधरः॥
यथा। नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम्। इति वेदान्तसारः॥ (यथा, मनौ। १। २६।
"कर्म्मणाञ्च विवेकार्थं धर्म्माधर्म्मौ व्यवेचयत्॥")
जलद्रोणी। विचारः। इति मेदिनी॥ (यथा, मनौ। १। ११२।
"तस्य कर्म्मविवेकार्थं शेषाणामनुपूर्ब्बशः॥")

विवेकिता, स्त्री, (विवेकिन्+तल्।) विवेकित्वम्। विवेकिनो भावः। यथा,—
"यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।
एकैकमप्यनर्थाय किमु तत्र चतुष्टयम्॥"
इति हितोपदेशः॥

(यथा, याज्ञवल्क्ये। ३। १५६।
"आचार्य्योपाधयं वेदग्राह्यार्थेषु विवेकिता॥")

विवेकी, [न्] पुं, (विवेकोऽस्यास्तीति। विवेक+इनिः।) देवसेनराजपुत्रः। यथा,—
"देवसेनोऽपि कैग्रिन्यां जनयामास पुत्रकान्।
सप्त ग्रश्रुत तान् यूयं नामतः कीर्त्तितांस्तथा॥
सुमना वसुदानश्च ऋतध्वग्यवनः क्षती।
गोलो विवेकीत्येते वै सर्व्वग्राह्यविग्रारदाः॥"
इति कालिकापुराणे भैरवर्व्वग्राह्मकौर्त्तने ६० अध्यायः॥ विचारकर्त्ता। इति मेदिन्यां विवेकग्रब्दार्थदर्ग्रनात्॥ विवेकविग्रिष्टे, त्रि॥ (यथा, मार्कण्डेये। ६६। ३४।
"दक्षादक्षांस्तथा भोगान् वाञ्छमाना विवेकिनः।
दानानि च प्रयच्छन्ति पूर्व्वधर्म्मांश्च कुर्व्वते॥")

विवेचकः, पुं, (वि+विच्+ण्वुल्।) विवेचनकर्त्ता। विवेचयति य इत्यर्थे ण्वुलप्रत्ययेन निष्पन्नमिदम्॥

विवेचनं, क्ली, (वि+विच्+ल्युट्।) विवेकः। इति ग्रब्दरत्नावली॥ (यथा, हरिवंग्रे भविग्यपर्व्वणि। ४३। १८।
"विदङ्गिर्गीयसे विग्रो त्वमेव जगतीपते।
इच्छया सर्व्वमाप्नोषि दक्षादक्षविवेचनम्॥"*॥
निर्णयः। यथा, मनुः। ८। २१।
"यस्य मूढस्तु कुरुते राज्ञो धर्म्मविवेचनम्।
तस्य सीदति तद्राष्ट्रं पङ्केगौरिव पग्यतः॥")

विवेचनीयः, त्रि, विवेच्यः। विवेचितव्यः। इति विपूर्ब्बविचधातोरनीयप्रत्ययेन निष्पन्नमिदम्॥

विवृ(ङ्)वन्, [तृ] त्रि, (वि+ब्रू+ग्रट।) विरुद्धवक्ता। यथा,—
"यो न भ्राता पिता वापि न पुत्रो न नियोजितः।
परार्थवादी दक्षः स्यात् व्यवहारेषु विङ्वन्॥"
विङ्वन् विरुद्धं ब्रुवन्। इति व्यवहारतत्त्वम्॥

विवोढ़ा, [ऋ] पुं, (वि+वह+तृच्।) वरः। पतिः। इति हेमचन्द्रः॥

विव्योकः, पुं, स्त्रीणां ग्रृङ्गारभावजा क्रिया। इत्यमरः॥ अभिमतवस्तुप्राप्तावपि गर्व्वादनादरः सापराधस्य च संयमनं ताड़नञ्च विव्योकः। यदुक्तम्।
"गर्व्वाभिमानादिष्टेऽपि विव्योकोऽनादरक्रिया।"
तथा।
"अभिमतवस्तूपकृतावपि मुखगर्व्वादनादरस्तम्भाः।
स्खलति प्रियस्य हृदयं संयमताड़नमथनु विव्योकः॥"
इति भरतः॥
"विव्योकस्तिगर्व्वेण वस्तुनीष्टेऽप्यनादरः।
न त्वरार्घवागादेर्दयितागमनादिषु॥"
इति सारसुन्दरी॥
"इष्टेऽपि गर्व्वमानाभ्यां विव्योकः स्यादनादरः॥"
इत्युज्ज्वलनीलमणिः॥

विश्र, औ ग्र प्रवेग्रे। इति कविकल्पद्रुमः। (तुदा०-पर०-सक०-अनिट्।) ग्र, विग्रति। औ, अविग्रत्। विवेग्र कश्चिच्चटिलस्तयोवनम्। विपराजिपरिग्रयक्रीनिविग्रेत्यादिनात्मनेपदविधानेऽपि भर्त्तुरङ्के निविग्रती भयादिति रघौ। केवलात् ग्रदित्यय विधाय यस्यादुपसर्गयोगादिति दुर्घटवृत्तिः। विग्रब्द इह उपसर्गप्रतिरूपको वा। यस्यादिदमिदं सर्व्वं तस्य ग्रक्तया महात्मनः। तस्मादेवोच्यते विष्णुर्विग्रधातोः प्रवेग्रनादिति पुराणे विष्णुग्रब्दव्युत्पादनात् मूर्द्धन्यान्तोऽयमिति केचित् तच्चिन्त्यम्। तालव्यान्तस्यैव सर्व्वसम्मतत्वात्। इति दुर्गादासः॥

विग्रं, क्ली, (विग्र+कः।) गृहम्। इत्यमरटीकायां रायमुकुटः॥ (तत्पर्य्यायो यथा,—
"यद्गृहं स्याद्गृहं स्यात्तद्यविग्रमिति स्मृतम्।")
इति भावप्रकाग्रस्य पूर्व्वखण्डे प्रथमे भागे॥

विग्रंवरा, स्त्री, (विग्रं मनुष्यं वृणोतीति। वृ+अच्। अभिधानात् द्वितीयाया अलुक्।) पत्नी। इति राजनिर्घण्टः॥

विग्रकण्ठी, स्त्री, (विग्रमिव कण्ठो यस्याः। विग्रकण्ठ+ङीष्।) बलाका। इति राजनिर्घण्टः॥

विग्रङ्कः, त्रि, विगता ग्रङ्का यस्य बहुव्रीहिः। ग्रङ्कारहितः। (यथा, रघुः। २। ११।
"धनुर्भृतोऽप्यस्य दयार्द्रभाव-
माख्यातमन्तःकरणैर्विग्रङ्कैः॥")

विग्रङ्कटः, त्रि, (वि+"वेः ग्राल्लङ्कटचौ।" ५। २। २८। इति ग्रङ्कटच्।) विग्राल्लः। इत्यमरः॥ (यथा, भट्टिः। २। ५०।
"विग्रङ्कटो वक्षसि बाणयाणिः
सम्पन्नतालहृदयस्तुरस्तात्॥"
भयानकः। यथा, कथासरित्सागरे। १०८। १०७।
"मांसाहङ्मुक्तवेतालतालवाद्यविग्रङ्कटः।
अभूद्वृत्यत्कबन्धोऽसौ भूतप्रीत्यै रणोत्सवः॥")

विग्रदः, पुं, (वि+ग्रद्+अच्।) श्वेतवर्णः। इत्यमरः॥ (जयद्रथपुत्रः। यथा, भागवते। ६। २१। २३।
"दृढहस्तायस्तनस्य पुत्र आसीज्जयद्रथः।
ततसुतो विग्रदस्तस्य स्वेनजित् समजायत॥")

विग्रदः, त्रि, (वि+ग्रद्+अच्।) विमलः। इति हेमचन्द्रः॥ (यथा, रघुः। ४। १८।
"प्रसादसुमुखे तस्मिन् चन्द्रे च विग्रदप्रभे।
तदा चक्षुष्मतां प्रीतिरासीत् समरसा द्वयोः॥")
यक्तः। इति मेदिनी॥ (यथा, रघुः। ८। ३।
"विग्रदोच्छ्वसितेनेव मेदिनी
कथयामास कृतार्थतामिव॥")
शुक्लगुणयुक्तः। इत्यमरः॥ (उज्ज्वलः। यथा, माघे। ८। ७०।
"स्वच्छाभ्रःस्नपनविधौतमङ्गमोष्ठ-
स्ताम्बूलद्युतिविग्रदो विलासिनीनाम्।
वासश्च प्रतनु विविक्तमक्षितीया-
नाकल्पो यदि कुसुमेषुणा न सूत्यः॥")

विश्वयः, पुं. (वि + श्री + अच् ।) संशयः । यथा, "विषयो विषयश्चैव पूर्व्वपक्षस्तथोत्तरम् । निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥" विषयो विचारार्हवाक्यम् । विश्वयोऽस्यायमर्थो न वा इति संशयः । इति तिथ्यादितत्त्वम् ॥ आश्रयः । इति केचित् ॥

विश्वयी, [न्] त्रि, (विश्वयोऽस्यास्तीति । विश्वय + इनिः ।) संशयी । इति विश्वयशब्दार्थदर्शनात् ॥

विश्वरः, पुं, (वि + श्रु हिंसायाम् + अप् ।) वधः । इत्यमरः ॥

विश्वरणं, क्ली. (वि + श्रु + ल्युट् ।) मारणम् । इति हेमचन्द्रः ॥

विश्वल्यः, त्रि, (विगतं श्वल्यं यस्मात् ।) शल्यरहितः । यथा,—
"सशल्यः स समाधाय लक्ष्मणः परवीरहा । विश्वल्यो विरुजः श्रीघ्रमुदतिष्ठन् महीतलात् ॥"
इति श्रीरामायणे युद्धकाण्डे १०२ सर्गः ॥

विश्वल्यकरणी, स्त्री, (विश्वल्यं क्रियतेऽनयेति । विश्वल्य + कृ + ल्युट् । ङीप् ।) औषधिविशेषः । यथा,—
"पूर्व्वन्तु कथितो योऽसौ वीर जाम्बवता तव । दक्षिणे शिखरे जातां महौषधिमिहानय ॥ विश्वल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा । संजीवकरणीं वीर सन्धानीञ्च महौषधीम् ॥"
इति रामायणे वाल्मीकीये युद्धकाण्डे १०३ सर्गः ॥

विश्वल्यकृत्, पुं, (विश्वल्यं तत्प्रहारजन्यवेदनादिनाशं करोतीति । कृ + क्विप् ।) विशल्यकरणीवृक्षः । हापरमालीति ख्यातः । तत्पर्य्यायः । अचोडकः २ सुकल्कः ३ भूपलाशः ४ । इति रत्नमाला ॥ आस्फोतः ५ आचरित्रियः ६ । इति शब्दचन्द्रिका । विश्वल्यकारिणि, त्रि ॥

विश्वल्या, स्त्री, (विगतं श्वल्यमस्त्रप्रहारादिजनितवेदनादिनाशो यया ।) गुडूची । (अस्याः पर्य्यायो यथा,—
"गुडूची मधुपर्णी स्यादमृतास्तवयस्करी । छिन्ना छिन्नरुहा छिन्नरुहावल्लादनीति च ॥ जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली । चक्रलक्षणिका धीरा विश्वल्या च रसायनी ॥ चन्द्रहासी वयःस्था च मण्डली देवनिर्मिता ।"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)
अग्निशिखाद्वयः । (अस्याः पर्य्यायो यथा,—
"कलिहारी तु हलिनी लाङ्गली शक्रपुष्पिका । विश्वल्याग्निशिखानन्ता वह्निवक्त्रा च गर्भणुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)
इन्द्री । इत्यमरः ॥ (अस्याः पर्य्यायो यथा,—
"लगुडन्दी विश्वल्या च स्वादुदुम्बरपर्णिका । तथैरण्डफला गृध्रा श्येनघण्टाघुणप्रिया ॥ वारङ्गासी च कथिता निकुम्भश्च मकूलकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
त्रिपुटा । इति मेदिनी ॥ कलिकारी । अजमोदा । इति राजनिर्घण्टः ॥ (नदीविशेषः । यथा, महाभारते । २ । ६ । २० ।
"किम्पुना च विश्वल्या च तथा वैतरणी नदी ॥")

विश्वसनं, क्ली, (वि + श्वस हिंसायाम् + ल्युट् ।) मारणम् । इत्यमरः ॥ (यथा, हरिवंशे । ६६ । ४३ ।
"तस्मिन् विश्वसने घोरे चक्रलाङ्गलसंप्लवे । दारुणानि प्रवृत्तानि रक्षांस्योत्पातिकानि च ॥"
नरकविशेषः । यथा, भागवते । ५ । २६ । ७ ।
"प्राणरोधो विश्वसनं लालाभक्षः सारमेयादनमरीचिरयःपानमिति ॥"७॥ विनाशकारिणि, त्रि । यथा, महाभारते । ६ । ५६ । ६० ।
"यमदण्डोपमां गुर्व्वीमिन्द्राग्निसमसत्वनाम् । अपश्याम महाराज रौद्रीं विश्वसनीं गदाम् ॥")

विश्वसनः, पुं, (विश्वसति हिनस्तीति । वि + श्वस हिंसायाम् + ल्युः ।) खड्गः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १२ । १६६ । ८३—८४ ।
"असेरत्नौ हि नामानि रहस्यानि निबोध मे । प्राणदेयं सदा यानि कीर्त्तयन् लभते जयम् ॥ असिर्विश्वसनः खड्गस्तीक्ष्णधारो दुरासदः । श्रीगर्भो विजयश्चैव धर्म्मपालस्तथैव च ॥")

विश्वसितः, त्रि, मारितः । विपूर्व्वश्वसधातोः क्तप्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

विश्वस्तः, त्रि, अविनीतः । धृष्टश्चासौ वैधार्य्ये । एतौ निष्ठायामविनये एवानिटौ स्तः । धृष्टो विश्वस्तः । अन्यत्र धर्षितः । विश्वसितः । इति सिद्धान्तकौमुदी ॥

विश्वस्रा, [ऋ] पुं, (वि + श्वस हिंसायाम् + ष्ट्रच् ।) चाण्डालः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (हिंसाकारके, त्रि । यथा, महाभारते । १२ । ११५ । ४६ ।
"आहर्त्ता चानुमन्ता च विश्वस्ता क्रयविक्रयी । संस्कर्त्ता चोपभोक्ता च खादकः सर्व्व एव ते ॥"
पापिन इति श्रेषः ॥)

विश्वाकरः, पुं, भद्रचूडः । इति शब्दचन्द्रिका ॥ लङ्घासिङ् इति भाषा ॥

विश्वाखः, पुं. कार्त्तिकेयः । इत्यमरः ॥ (यथा, महाभारते । ३ । २३१ । ७ ।
"प्रभुर्नेता विशाखश्च नैगमेयः सुदुश्चरः ॥")
धन्विनां वितस्त्यन्तरेण पादसंस्थानम् । इति भरतः ॥ याचकः । इति मेदिनीकरहेमचन्द्रौ ॥ पुनर्नवा । इति राजनिर्घण्टः ॥ (विगता शाखा यस्य । शाखाविहीने, त्रि । यथा, हरिवंशे । ४८ । ५२ ।
"कबन्धोऽवस्थितः संख्ये विशाख इव पादपः ॥")

विश्वाखजः, पुं, नारङ्गः । इति शब्दचन्द्रिका ॥ विशाखजाते, त्रि ॥

विश्वाखलं, क्ली, युद्धकाले मध्ये विन्यस्तपादद्वयम् । यथा,—
"विशालान्तरविन्यस्ते पादयुग्मे विशाखलम् ॥"
इति शब्दमाला ॥

विश्वाखा, स्त्री, कठिल्लकः । इति मेदिनी ॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतषोड़शनक्षत्रम् । तत्पर्य्यायः । राधा २ । इत्यमरः ॥"विशाखे द्वे । 'पत्नीर्मध्यगतस्तत्र सुग्रीवः प्लवगेश्वरः । विशाखयोर्मध्यगतः संपूर्ण इव चन्द्रमाः ॥'
इति रामायणम् ॥
अतएव हितसुचितं किन्तु एकतारापेक्षया एकवचनमिहोक्तम् ॥" इति भरतः ॥ तस्यारूपं तोरणाकारचतुस्तारामयम् । इति सुचूर्णचिन्तामणिः ॥
"तोरणाकृतिनि पञ्चतारके तारकेशवदने विशाखमे । तन्वि यान्ति विबुधाध्वमध्यगे कुम्भतो रसभुजाः कलाः प्रिये ॥"
दं । ०।२६ । इति कालिदासकृतराशिलग्ननिरूपकग्रन्थः ॥ अस्या अधिदेवते शक्राग्नी । इयं मिश्रगणान्तर्गता । इति ज्योतिस्तत्त्वम् ॥ * ॥ तत्र जातफलम् ।
"सदानुरक्तो विविधक्रियायां सुवर्णकारेरपि सख्यमेति । यस्य प्रसूतौ च भवेत् विशाखा सस्या न कस्यापि भवेत् प्रसूतः ॥"
इति कोष्ठीप्रदीपः ॥

विश्वातनः, त्रि, (वि + श्वत + णिच् + ल्युः ।) मोचनकर्त्ता । (यथा, महाभारते ।७।८१।१८।
"नमस्ते देवदेवेश सनातन विश्वातन । विष्णो जिष्णो हरे कृष्ण वैकुण्ठ पुरुषोत्तम ॥")
यथा च ।
"साधु वीर त्वया दृष्टमवतारकथां हरेः । यस्यं दृक्षसि मर्त्यानां मृत्युपाशविश्वातनीम् ॥"
इति श्रीभागवते ३ स्कन्धे १४ अध्यायः ॥
"मृत्योः पाशं विश्वातयति मोचयतीति तथा ।" इति तट्टीकायां श्रीधरस्वामी ॥ (वि + श्वत + णिच् + ल्युट् । पातने, क्ली । यथा, महाभारते । ७ । १२ । १६ ।
"यतमानाः प्रयत्नेन द्रोणानीकविश्वातने । न शेकुः रक्षया युद्धे तद्धि द्रोणेन पालितम् ॥")

विश्वायः, पुं. (वि + श्री + "युपयोः श्रीतेः पर्य्याये ।" ३ । ३ । २६ । इति घञ् ।) प्रहरिकादीनां क्रमेण शयनम् । यथा, अमरे ।
"उपशायो विश्रायश्च पर्य्यायशयनार्थकौ ॥"

विश्वारणं, क्ली, - (वि + शृ + णिच् + ल्युट् ।) मारणम् । इति हेमचन्द्रः ॥

विश्वारदः, त्रि, विद्वान् । (यथा, मनुः । ७ । ६३ ।
"दूतञ्चैव प्रकुर्व्वीत सर्व्वशास्त्रविशारदम् ॥")
प्रगल्भः । इत्यमरः ॥ प्रसिद्धः । इति हारावली ॥ श्रेष्ठः । इत्यजयपालः ॥ वकुले, पुं । इति राजनिर्घण्टः ॥

विश्वारदा, स्त्री, क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

विश्वालः, त्रि, (वि + "देः शालच्कटचौ ।" इति शालच् । यद्वा, विश्व प्रवेशने + "तमिविशि-

विड़ौति।" उणा० १। ११७। इति कालन्।) वृहत्। इत्यमरः॥ (यथा, रघुः। ६। ३२।
"अवन्तिनाथोऽयमुदग्रबाहु-
र्विशालवक्षास्तनुवृत्तमध्यः॥"
विगतः शालः सभो यस्य। सभारहितः। यथा, शिशुपालवधे। ३। ५०।
"गृहैर्विशालैरपि भूरिशालैः॥")
विशालः, पुं, (विश+कालन्।) मृगभेदः। पक्षिभेदः। इति मेदिनी॥ नृपभेदः। वृक्षभेदः। इति शब्दरत्नावली॥
विशालता, स्त्री, (विशालस्य भावः। विशाल+तल्।) पार्श्वविस्तारः। ओसार इति ख्यातः॥ तत्पर्य्यायः। परिणाहः २। इत्यमरः॥ (यथा, वृहत्संहितायाम्। ४। ८।
"उन्नतभीषच्छृङ्गं नौसंस्थाने विशालता
चोक्ता॥")
सामान्यविशालत्वम्। इति शब्दरत्नावली॥
विशालतैलगर्भः, पुं. (विशालं प्रचुरं तैलं गर्भे यस्य।) अक्षोटवृक्षः। इति राजनिर्घण्टः॥
विशालत्वक्, [च्] पुं, (विशाला त्वक् यस्य।) सप्तपर्णवृक्षः। इत्यमरः॥ (यथास्य पर्य्यायः।
"सप्तपर्णो विशालत्वक् शारदो विषमच्छदः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
विशालपत्रः, पुं, (विशालानि पत्राणि यस्य।) कासालुः। श्रीताल इति राजनिर्घण्टः॥
विशालफलिका, स्त्री, (विशालं फलं यस्याः। ततः स्वार्थे कन्। टापि अत इत्वम्।) निष्पावी। इति राजनिर्घण्टः॥
विशाला, स्त्री, (विशाल+टाप्।) इन्द्रवारुणी। इत्यमरः॥ यथाच।
"विशाला कफवातघ्नी हैमकुष्ठहरा सरा॥"
इति राजवल्लभः॥
उज्जयनी। इति मेदिनी॥ उपोदकी। महेन्द्रवारुणी। इति राजनिर्घण्टः॥ (यथा,—
"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी।
वारुणी च गवाक्षुण्णा सा विशाला महाफला।
श्वेतपुष्पा गवाक्षी च गवेधुरुद्गादनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
तीर्थविशेषः। यथा,—
"सुस्नानोपवासश्च सर्व्वतीर्थेष्वयं विधिः।
वर्ज्जयित्वा गयां गङ्गां विशालां विरजां तथा॥"
इति प्रायश्चित्ततत्त्वम्॥
दक्षकन्या। यथा,—
"मनोरमां भानुमतीं विशालां बाहुदामघ।
दक्षः प्रादान्महादेव ततस्तोऽरिष्टनेमिने॥"
इति गारुड़े ६ अध्यायः॥
विशालाक्षः, पुं, (विशाले अक्षिणी यस्य। समासे षच्।) हरः। (यथा, महाभारते। १३।५६।८०।
"ततस्तां भगवान्नीतिं पूर्व्वं जग्राह शङ्करः।
बहुरूपो विशालाक्षः शिवः स्थाणुरमायतिः॥")
गरुड़ः। (तद्गोत्रविशेषः। यथा, महाभारते। ५। १०१। ६।
"अनिलश्चानलश्चैव विशालाक्षोऽथ कुक्कुरो॥")
सुनेत्रे, त्रि। इति मेदिनी॥ (यथा, महाभारते। ३। ३६। ७०।
"ददामि ते विशालाक्ष चक्षुः पूर्व्वऋषि-
र्भवान्॥")
विष्णुः। इति केचित्॥ (धृतराष्ट्रपुत्रः। यथा, महाभारते। १। ११७। ६।
"अपराजितः कुक्कुशायी विशालाक्षो दुराधरः॥")
विशालाक्षी, स्त्री, (विशाले अक्षिणी यस्याः।) वरस्त्री। इति विश्वः॥ (यथा, महाभारते। १। ७७। १३।
"यत्नोषितं विशालाक्षि त्वया चन्द्रनिभानने।
तत्राहमुषितो भद्रे कुक्षौ कायस्य भामिनि॥")
नागदन्ती। इति राजनिर्घण्टः॥ पार्व्वती। यथा, आदित्यपुराणे।
ईश्वर उवाच।
"ध्रुवमाद्यं समुद्धृत्य मायाबीजं समुद्धरेत्।
विशालाक्ष्यैपदं ङेऽन्तं हृदन्तं मन्त्रमुद्धरेत्॥
अघोराचरी महाविद्या अष्टसिद्धिप्रदा शिवे।
प्रसङ्गात् कथिता विद्या त्रैलोक्यदुर्ल्लभा प्रिये।
ऋषिरस्या महेशानि सदाशिवो महाप्रभुः।
पंक्तिश्च छन्दः कथितं विशालाक्षी च देवता।
शक्तिः प्रणवमित्युक्तं लज्जाबीजञ्च बीजकम्।
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः॥
अङ्गन्यासकरन्यासौ यथावदभिधीयते।
षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत्॥
मूलेन व्यापकं न्यस्य ध्यायेद्देवीं परां शिवाम्।
ध्यायेद्देवीं विशालाक्षीं तप्तजाम्बूनदप्रभाम्॥
द्विभुजामम्बिकां चर्ब्बीं खड्गखर्परधारिणीम्।
नानालङ्कारसुभगां रक्ताम्बरधरां शुभाम्॥
सदा षोड़शवर्षीयां प्रसन्नास्यां त्रिलोचनाम्।
मुक्तमालावतीं रम्यां पीनोन्नतपयोधराम्॥
शिवोपरि महादेवीं जटासुकुटमण्डिताम्।
शत्रुक्षयकरीं देवीं साधकाभीष्टदायिकाम्॥
सर्व्वसौभाग्यजननीं महासम्पत्प्रदां स्मरेत्।
एवं ध्यात्वा महादेवीमुपचारैः प्रपूजयेत्॥
पुरश्चरणकाले तु वर्णलक्षं जपेत् सुधीः।
यन्त्रमध्ये समावाह्य प्रतिष्ठां कारयेत्ततः॥
त्रिकोणचाष्टपत्रञ्च ततो वृत्तं समालिखेत्।
चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत्॥
तत्रावाह्य यजेद्देवीं सर्व्वसौभाग्यसुन्दरीम्।
विशालाक्षीं विशालाक्षीं यथाविधि प्रपूजयेत्॥
त्रिकोणान्तर्महादेवीं संपूज्य मातरः क्रमात्।
पङ्गुजाक्षी विरूपाक्षी रक्ताक्षी चण्डलोचना॥
एकनेत्रा द्विनेत्रा च कोटराक्षी त्रिलोचना।
एताः पूज्या महेशानि पत्राग्रेष्वष्टयोगिनीः॥
पश्चिमादिक्रमेणैव अष्टसिद्धिस्वरूपिणीः।
चतुरस्रे महादेवि लोकपालान् समर्चयेत्॥
तद्बहिश्चैव वज्राद्यान् पूजयेदायुधैस्तवे।
ततो यथाशक्ति जप्त्वा पूर्व्ववच्च समोचरेत्॥"
इति तन्त्रसारः॥ *॥
चतुःषष्टियोगिन्यन्तर्गतयोगिनीविशेषः। इति दुर्गाचोपनिषत्॥
विशाली, स्त्री, अजमोदा। इति राजनिर्घण्टः॥
विशिखः, पुं, (विशिष्टा शिखा यस्य।) शरवृक्षः। इति राजनिर्घण्टः॥ बाणः। इत्यमरः॥ (यथा, भागवते। ४। १७। १३।
"सन्दधे विशिखं भूमेः क्षुद्रक्षिपुरहा यथा॥")
तोमरः। इति मेदिनी॥ (विगता शिखा यस्य।) शिखारहिते, त्रि॥ यथा,—
"विशिखोऽनुपवीती च क्षतं कर्म्म न तन्
क्षतम्॥"
इति स्मृतिः॥
विशिखा, स्त्री, खनित्री। रथ्या। (यथा, माघे। १५। १७।
"विशिखान्तरारण्यतिपपात
सपदि जवनैः स वाजिभिः॥")
नासिका। इति मेदिनी॥
विशिपं, क्ली, (विशन्त्यत्रेति। विश+"विटपिशिरुषविशिपोलपाः।" उणा० ३।१४५। इति कपत्ययेन निपातनात् साधुः।) मन्दिरम्। इत्युणादिकोषः॥
विशिष्टः, त्रि, (वि+शिष्+क्तः। यद्वा, शास+क्तः।) युक्तः। यथा। हस्तानक्षत्रगङ्गारूपगुणद्वयविशिष्टदशमीविधेर्यस्मिन् अहनि तल्लाभस्तत्र स्नानम्। इति तिथ्यादितत्त्वे स्मार्त्तभट्टाचार्य्यलिखनम्। विशेषेण शिष्टश्च॥ (यथा, हितोपदेशे।
"समेत्य समतां याति विशिष्टेन विशिष्टताम्॥")
विशिष्टः, पुं, विष्णुः। यथा। विशिष्टः शिष्टकृत् शुचिः। इति तस्य सहस्रनामस्तोत्रम्॥
विशिष्टाद्वैतवादी, [न्] त्रि, (विशिष्टं युक्तं अद्वैतं वदतीति। वद्+णिनिः।) प्रकृतिपुरुषयोर्भिन्नत्वेऽपि मिलितयोस्तयोर्ब्रह्मत्ववादी। तस्य मतं यथा। पुरुषस्तदतिरिक्ता प्रकृतिः किन्त्वभयमिलितं ब्रह्म चणकदलवत्। इत्थं ब्रह्मण एकत्वं व्यवस्थितम्। चित् परमाणुस्वरूपो जीवः समस्तविश्वं ब्रह्मांशः। इति माधवभाष्यादिः॥ *॥ अद्वैतवादिमतं यथा। ब्रह्मैव सत्यं प्रत्यक्षादिसिद्धं विश्वं ब्रह्मणि आरोपितम्। यथा रज्जुः रज्जुस्वरूपाज्ञानात् सर्पवत् प्रतिभाति। तथा ब्रह्मस्वरूपाज्ञानात् विश्वं वस्तुवत् प्रतिभाति। प्रकृतिर्जीवश्चापि पर्य्यवसाने ब्रह्मैव ब्रह्मान्यत् सदस्तु नास्ति। अत्र प्रमाणं शारीरिकसूत्रस्य प्रकृताचार्य्यकृतभाष्यतदीकाकल्पतरुभाष्यरत्नप्रभादि॥
विशीर्णः, त्रि, (वि+शॄ+क्तः।) शुष्कः। यथा,
"विशीर्णा विदला रूक्षा वक्राः स्थूला द्विधाकृताः।
क्रिमिदष्टाश्च दीर्घाश्च समिधो नैव कारयेत्॥"
इति तन्त्रसारः॥
विशीर्णपर्णः, पुं, (विशीर्णानि पर्णानि यस्य।) निम्बवृक्षः। इति राजनिर्घण्टः॥

विशुद्धं, त्रि, विशेषेण शुद्धम्। तत्पर्य्यायः। उज्ज्वलम् २ विमलम् ३ विप्रदम् ४ वीरम् ५ अवदातम् ६ अनाविलम् ७ शुचि ८। इति हेमचन्द्रः। निष्टप्तम्। सत्यम्। इत्यजयपालः। षट्चक्रान्तर्गतपञ्चमचक्रम्। तत्तु कण्ठस्थं अकारादिषोड़शस्वरयुक्तधूम्रवर्णषोड़शदलपद्मम्। तन्मध्ये शिव आकाशव्याप्ति। यथा,—

"तदूर्द्धन्तु विशुद्धाख्यं दलषोड़शपङ्कजम्।
स्वरैश्च षोड़शैर्युक्तं धूम्रवर्णैर्मनोरमम्।
विशुद्धपद्ममाख्यातमाकाशाख्यं महादृसतम्।"

इति तन्त्रसारः।

आगस्त्यसंहितायाम्। अकारादिषोड़शस्वरान् सविन्दून् षोड़शदलकमले कण्ठसंज्ञे न्यसेत्। विशुद्धे षोड़शदले धूम्राभे स्वरभूयिते। इति तन्त्रसोरः।

विशुद्धिः, स्त्री, (वि+शुध+क्तिन्।) समः। शोधनम्। इति त्रिकाण्डः।

"सर्व्वकर्म्मेष्वयुपादेया विशुद्धिश्चन्द्रतारयोः।"

इति ज्योतिषम्।

विशृङ्खलः, त्रि, शृङ्खलारहितः। (यथा, कथासरित्सागरे। ५। ३।

"अचिन्तयं ततश्चाहं राजा तावद्विशृङ्खलः।
तत्कार्य्यचिन्तयाक्रान्तः स्वधर्म्मो मेऽवसीदति।")

अवहुः। विगता शृङ्खला यस्येति बहुव्रीहिनिष्पन्नमिदम्।

विशेषः, पुं, (वि+शिष+घञ्।) प्रभेदः। (यथा, मनुः। ६। २६।

"प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन।")

प्रकारः। इति जटाधरः। व्यक्तिः। इति हेमचन्द्रः। तिलकः। इति हारावली। सप्तपदार्थान्तर्गतपदार्थविशेषः। यथा,—

"द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकम्।
समवायस्तथाभावः पदार्थाः सप्त कीर्त्तिताः।"

इति भाषापरिच्छेदः।

विशेषं निरूपयति। अन्तो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तितः। अन्तेऽवसाने वर्त्तते इति अन्त्यः यदपेक्षया विशेषो नान्योऽर्थः। घटपटादीनां द्व्यणुकपर्य्यन्तानां तत्तदवयवभेदात् परस्परभेदः। परमाणूनां भेदको विशेष एव स तु स्वत एव व्यावृत्तः। तेन तत्र विशेषान्तरापेक्षा नास्ति इत्यर्थः। इति सिद्धान्तमुक्तावली। *। अलङ्कारप्रभेदः। यथा,—

"विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम्।
गते सूर्य्येऽपि द्वीपस्याभ्यन्ति तत्करा॥१
विशेषः सोऽपि यत्रैकं वस्त्वनेकत्र वर्ण्यते।
अन्तर्बहिः पुरः पश्चात् सर्व्वदिक्ष्वपि सैव मे॥२॥
किञ्चिदारभ्यतोऽन्यत्रवस्त्वन्तरकृतिश्च सः।
त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणम्॥३

इति चन्द्रालोकः।

(पृथिवी। यथा, भागवते। २। ५। २६।

"विशेषस्तु विकुर्व्वाणादम्भसो गन्धवानभूत्॥"

तथाच तत्रैव। ३। २१। ४०।

"विकारैः सहितो युक्तैर्विशेषादिभिराहृतः॥"

अतिशयिते, त्रि। यथा, रघुः। २। १४।

"गृहाम हृष्टापि विना हवाभि-
राशीर्विशेषा फलपुष्पवृद्धिः॥")

विशेषकः, पुं क्ली. (विशेष एव। स्वार्थे कन्।) ललाटकृततिलकः। इत्यमरः। (यथा, माघे। २। ६३।

"विशेषको वा विशिशेष यस्याः
श्रियं त्रिलोकीतिलकः स एव॥")

तिलकवृक्षे, पुं। इति राजनिर्घण्टः॥ (क्ली, पद्यविशेषः। स तु त्रिभिः श्लोकैरन्वितश्चेत् तदा भवति। यथा,—

"द्वाभ्यान्तु युग्मकं प्रोक्तं त्रिभिः श्लोकैर्विशेषकम्॥")

विशेषयितरि, त्रि। इति मेदिनी॥

विशेषकच्छेद्यं, क्ली, (विशेषकैश्छेद्यम्।) चतुःषष्टिकलान्तर्गतषष्ठकला। इति श्वेतलम्॥ सा तु तिलकेषु नानाविच्छेदरचना। इति दशमस्कन्धीयपञ्चचत्वारिंशाध्यायटीकायां श्रीधरस्वामी॥

विशेषगुणः, पुं, (विशेषो गुणः।) बुद्ध्यादिषट्कम्। रूपादिचतुष्टयः। स्नेहः। स्वाभाविकद्रवत्वम्। अदृष्टः। भावना। शब्दः। इति भाषापरिच्छेदः॥

विशेषविधिः, पुं, (विशेषो विधिः।) अल्पविषयकविधिः। यथा,—

"तथा सामान्यकार्य्येभ्यो विशेषकविधिर्बली।
बहवो विषया यस्य स सामान्यविधिर्भवेत्।
अल्पः स्याद्विषयो यस्य स विशेषविधिर्मतः॥"

इति दुर्गादासः॥

सामान्यविशेषयोर्मध्ये विशेषविधिर्बलवान्। इति स्मृतिः॥

विशेषणं, क्ली, (विशिष्यतेऽनेनेति। वि+शिष+ल्युट्।) विशेष्यधर्म्मः। स तु गुणादिः। यथा। नीलोत्पलमित्यादि। विशिष्यते सम्बुध्यते अनेन। कृवेश्च कृत्यमद्राक्षीदिति। भेदयति अन्यपदार्थं पृथक् करोति इति भेदकम्। नाना शिवः गोत्रेषु गार्ग्यः। विशेषणं दण्डमेव भेदयति। भेदकन्तु अदण्डमेव भेदयति। इति विशेषणभेदकयोर्भेदः। इति सुग्धबोधटीकायां दुर्गादासः।

विशेषवह्निः, स्त्री, (विशेषो असामान्यो वह्निः।) वह्निभेदः। तल्लक्षणं यथा। प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम्। इति चिन्तामणिः।

विशेषितं, त्रि, (वि+शिष्+णिच्+क्तः।) भिन्नम्। व्यवच्छिन्नम्। इति जटाधरः॥

विशेषोक्तिः, स्त्री, (विशेषेणोक्तिः।) अलङ्कारभेदः। तल्लक्षणोदाहरणे यथा,—

"कार्य्यजननिर्व्विशेषोक्तिः सति पुष्पलकारणे।
हृदि खेदचयो नाभूत् स्मरदीपे ज्वलत्यपि॥"

इति चन्द्रालोकः॥

विशेष्यः, त्रि, (विशिष्यते गुणादिभिरिति। वि+शिष+ण्यत्।) धर्म्मिपदार्थः। स च द्रव्यादिः। विशिष्यते यः। घटपटादिः। भासमानवैशिष्ट्यानुयोगी। अस्य लक्षणं यथा। भासमानवैशिष्ट्यानुयोगित्वं अस्ति च घट इति ज्ञाने घटादौ तत् तत्र हि भासमानवैशिष्ट्यं घटघटत्वयोः सम्बन्धस्तदनुयोगित्वस्य घटादौ सत्त्वात्। अनुयोगित्वमपि स्वरूपसम्बन्धविशेषः प्रतियोगित्वमनुयोगित्वञ्चातिरिक्तपदार्थं इत्यपेक्षैयिनः। इति कणादः॥

विशोकः, पुं, (विगतः शोको यस्मात्।) अशोकवृक्षः। इति राजनिर्घण्टः॥ (शोकाभावः। यथा, भागवते। १। ६०। ७।

"उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः।
सुहृदाञ्च विशोकाय स्वसुश्च प्रियकाम्यया॥"

युधिष्ठिरस्यानुचरविशेषः। यथा, महाभारते। २। ३३। ३०।

"इन्द्रसेनो विशोकश्च पुरुषाञ्जनसारथिः॥")

शोकरहिते, त्रि॥ (यथा, भागवते। २। २६। ३२।

"लोकं परं विरजस्कं विशोकं
वास्वत्ययं भागवतप्रधानः॥"

क्ली, संप्रज्ञानसमाधेः पूर्व्वकालीना चित्तवृत्तिः। यथा, पातञ्जले। १। ३६।

"विशोका वा ज्योतिष्मती॥")

विशोधनी, स्त्री, (विशोध्यतेऽनयेति। वि+शुध+ल्युट्। ङीष्।) इन्द्रवृक्षः। इति राजनिर्घण्टः॥

विशोधिनी, स्त्री, नागदन्ती। इति राजनिर्घण्टः॥

विशोधिनीबीजं, क्ली, जयपालः। इति केचित्॥

विश्वः, पुं, (विश्च दीर्घौ+"यजयाचयतविच्छेति।" ३। ३। ९०। इति क्वप्।) दीर्घिः। इति सिद्धान्तकौमुदी। गतिः। इति सुग्धबोधटीकायां दुर्गादासः॥

विश्रमणं, क्ली, (वि+श्रम+ल्युट्।) दानम्। इति शब्दरत्नावली॥

विश्रब्धः, त्रि, (वि+श्रम्भ+क्तः।) अनुद्विग्नः। शान्तः। विश्वस्तः॥ (यथा, राजतरङ्गिण्याम्। ८। २१२१।

"विश्रब्धभृत्यः शृङ्गारनामा चाप्यब्रवीत् प्रभोः।
तं दृष्ट्वांसूनपीयेऽहं शूर्पणेऽवगतं स्थितम्॥")

अत्यर्थः। इति हेमचन्द्रः। गाढः। इति मेदिनी॥ (निर्विशङ्कः। यथा, रामायणे। २। १६। ५।

"नियुज्यमानो विश्रब्धः किं न कुर्य्यामहं प्रियम्॥")

विश्रब्धनवोढ़ा, स्त्री, (विश्रब्धा विश्वस्ता नवोढ़ा।) सुग्धानवोढ़ाभेदः। यथा। स्त्रीया त्रिविधा सुग्धा मध्या प्रगल्भा च। यथा अङ्कुरितयौवना सुग्धा। सा च ज्ञातयौवना अज्ञातयौवना च। सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढ़ा। सैव क्रमशो जातप्रश्रया विश्रब्ध-

नवोढ़ा। अस्याश्चेष्टा क्रिया मनोहरा कोपे मार्दवं नवविभूषणे सभीहा च। विश्रब्धनवोढ़ा यथा,—

"ईषत्कुलितनेत्रपाणिनीवी-
नियमितबाहुलतोरुयुग्मबन्धम्।
करकलितकुचस्थलं नवोढ़ा
स्वपिति समीपमुपेत्य कस्य यूनः॥"

इति रसमञ्जरी॥

विश्रमः, पुं, (वि+श्रम+घञ्। ह्रस्वाभावः।) विश्रामः। इति भरतद्विरूपकोषः॥ (यथा, कातन्त्रव्याकरणस्य। १। ६।

"अविश्रमं यावदिदं शरीरं-
यतत्त्ववश्यं परिणामदुर्वहम्॥")

विश्रम्भः, पुं, (वि+श्रम्भ+घञ्।) विश्वासः। इत्यमरः॥ (यथा, भागवते। ३। २६। २।

"नित्यं पर्यचरत् प्रीत्या भवानीव भवं प्रभुम्।
विश्रम्भेणात्मशौचेन गौरवेण दमेन च॥")

केलिकलहः। प्रणयः। इति मेदिनी। मे, २०॥ वधः। इति विश्वः॥

विश्रामनं, क्ली, (वि+श्रम+णिच्+ल्युट्।) दानम्। इत्यमरः॥ (यथा, रघुः। २। ५४।

"कथं नु शक्योऽनुनयो महर्षे-
र्विश्रामनात्त्वय्यपयस्विनीनाम्॥")

विश्रान्तः, त्रि, श्रान्तियुक्तः। विपूर्व्वश्रमधातोः क्तप्रत्ययेन निष्पन्नमिदम्॥

विश्रान्तिः, स्त्री, विश्रामः। विपूर्व्वश्रमधातोः क्तिप्रत्ययेन निष्पन्नमिदम्। (यथा, रामायणे। २। २। ८।

"जीर्णस्यास्य शरीरस्य विश्रान्तिमभिरोचये॥")

तीर्थविशेषः। यथा,—

राक्षस उवाच।

"पुरी उज्जयनी नाम तस्यां वासो हि मे सदा।
कस्मिंश्चिदथ कालेन गतोऽहं विष्णुमन्दिरम्॥
तस्याग्रे तिष्ठते विप्रो वाचको वेदपारगः।
विश्रान्तितीर्थमाहात्म्यं श्रावयेत् स दिने दिने॥
यस्य श्रवणमात्रेण मम भक्तिर्दृढा स्थिता।
सा संज्ञा च स्मृता तत्र विश्रान्तेश्च मयानघ॥
वासुदेवो महाबाहुर्जगत्स्वामी जनार्द्दनः।
विश्रामं कुरुते तत्र तेन विश्रान्तिसंज्ञिका॥"

इति वाराहे विश्रान्तिमाहात्म्यनामाध्यायः॥

विश्रामः, पुं, (वि+श्रम+घञ्।) विरामः। इति भरतद्विरूपकोषः॥ अस्य गुणाः।

"विश्रामो वलजत्वं खेदश्रमजित् स्वास्थ्यदः शुभः॥"

इति राजवल्लभः॥

विश्रावः, पुं, (विश्रवणमिति। वि+श्रु+"वौ कुषश्रुवः।" ३। ३। २५। इति घञ्।) अतिप्रसिद्धिः। इत्यमरः॥ (भवतिः। यथा, भट्टिः। ७। २६।

"विश्रावैस्तोयविश्रावं तर्ज्जयन्तो महोदधेः॥")

विश्विः, पुं, क्लीबः। इति संक्षिप्तसारोणादिवृत्तिः॥

विश्रुतः, त्रि, (वि+श्रु+क्तः।) ख्यातः। इत्यमरः॥ (यथा, कथासरित्सागरे। २। ५६।

"विद्वान् सुभगो मानी
विश्रुतकर्म्मा कुलोन्नतः शूरः।
वित्तेन भवति सर्व्वो
वित्तहीनस्तु सहजोऽप्यगुणः॥")

ज्ञातः। संकुचितः। इति विश्वः॥

विश्रुतिः, स्त्री, विख्यातिः। विपूर्व्वश्रुधातोः क्तिप्रत्ययेन निष्पन्नमिदम्॥ (यथा, भागवते। ३। २५। २।

"विश्रुतौ श्रुतदेवस्य भूवि ह्यस्यन्ति मे यशः॥")

विश्वेदेवः, पुं, (वि+श्विच्+घञ्।) विधुरः। अयोगः। इति मेदिनी॥ (यथा, रघुः। १३।२३।

"सेवा स्वली यत्र विचिन्वता त्वां
भरं मया नूपुरमेकमुज्झ्यताम्।
अदर्शयत् त्वच्चरणारविन्द-
विश्लेषदुःखादिव बद्धमौनम्॥")

विश्वं, क्ली, (विशति खकारवमिति। विश्लृ प्रवेशने+"अशूप्रुषिलटिकणीति।" उणा० १।१५१। इति क्वन्।) जगत्। इति मेदिनी। वे, २३॥ (यथा, भागवते। ३। १०। १२।

"विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया।
ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्त्तिना॥")

शुण्ठी। (अस्य पर्य्यायो यथा,—

"विश्वं महौषधं शुण्ठी नागरं विश्वभेषजम्॥"

इति वैद्यकरत्नमालायाम्॥

"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम्।
ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

गोलम्। इति राजनिर्घण्टः।

विश्वः, पुं, गणदेवताविशेषः। इत्यमरः॥

"वसवो क्रतुदक्षौ कालकामौ धृतिः कुरुः।
पुरूरवा माद्रवाश्च विश्वेदेवाः प्रकीर्त्तिताः॥"

इति भरतः॥

"दक्षिणाहे क्रतुर्दक्षः सत्यो नान्दीमुखे वसुः।
नैमित्तिके कालकामौ काम्ये च धूरिलोचनौ।
पुरूरवा माद्रवाश्च पार्व्वणे वसुदाक्षुतौ॥"

इति स्मृतिः॥

ते तु धर्म्मात् दक्षकन्यायां विश्वायां जाताः। इति मात्स्ये ५ अध्यायः॥ नागरः। इति विश्वः॥ स्थूलशरीरव्यष्ट्युपहितचैतन्यम्। इति वेदान्तसारः॥ परिमाणविशेषः। यथा,—

"गुञ्जाचतुष्टयसितोलो दशभ्नं तद्वेत् पलम्।
विश्वा विंशपलं प्रोक्तं दृतिं कोटिगुणं हि तत्।
सैव कोटिगुणा ज्ञेया विश्वाः शुल्वादि-
सम्भवाः॥"

इति ज्योतिस्तत्त्वे॥

विश्वः, त्रि, (विश्व+क्वन्।) सकलम्। इत्यमरः॥ (यथा, महाभारते। ३। २१८। १६।

"यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति।
तं प्राहुरध्यात्मविदो विश्वजिन्नाम मानवम्॥"

बहु। इति त्रिकाण्डः। ३। १॥)

विश्वकद्रुः, पुं, ऋक्षभल्लुकसूकरः। इत्यमरः॥ ज्ञानः। इति मेदिनी। रे, २६६॥

विश्वकद्रुः, त्रि, खलः। इति मेदिनी। रे, २६६॥

विश्वकर्म्मजा, स्त्री, (विश्वकर्म्मणः जायते इति। जन+डः।) सूर्य्यभार्य्या। संज्ञा। इति शब्दरत्नावली॥

विश्वकर्म्मजसुता, स्त्री, (विश्वकर्म्मणः सुता।) सूर्य्यभार्य्या। संज्ञा। इति शब्दरत्नावली॥

विश्वकर्म्मा, [न्] पुं, (विश्वेषु कर्म्म यस्य।) सूर्य्यः। देवशिल्पी। इत्यमरः॥ तत्पर्य्यायः। स्वष्टा २ विश्वकृत् ३ देववर्द्धकिः ४। इति हेमचन्द्रः॥ (यथा, महाभारते। १। २१२। १०

"दृष्ट्वा च विश्वकर्म्माणं वादिदेश पितामहः॥")

सुनिभेदः। इति मेदिनी। ने, २३०॥ स प्रभासस्य वसोः पुत्रः। यथा,—

"विश्वकर्म्मा प्रभासस्य पुत्रः शिल्पप्रजापतिः।
प्रासादभवनोद्यानप्रतिमाभूषणादिषु।
तक्षागारायुधानां च स्मृतः सोऽमरवर्द्धकिः॥"

इति मात्स्ये ५ अध्यायः॥

अन्यच्च।

"प्रत्यूषस्य विदुः पुत्रन्ह्यषिं नाम्ना तु देवलम्।
विश्वकर्म्मा प्रभासस्य विख्यातो देववर्द्धकिः॥"

इति गारुड़े ६ अध्यायः॥

अपि च।

"दक्षस्यतेषु भगिनी वरस्त्री ब्रह्मचारिणी।
योगसिद्धा जगत् कृत्स्नमसक्ता विचरत्युत॥
प्रभासस्य तु भार्य्या सा वसूनामष्टमस्य तु।
विश्वकर्म्मा महाभागस्तस्यां जज्ञे महामतिः॥
कर्त्ता शिल्पसहस्राणां त्रिदशानाञ्च वर्द्धकिः।
भूषणानाञ्च सर्व्वेषां कर्त्ता शिल्पवतां वरः॥
यः सर्व्वेषां विमानानि देवतानां चकार ह।
मनुष्याश्चोपजीवन्ति यस्य शिल्पं महात्मनः॥"

इति विष्णुपुराणे १ अंशे १५ अध्यायः॥

अन्यच्च।

"द्वौ प्रोक्तौ विश्वकर्म्माणौ मयस्त्वष्टा च योगवित्।
द्वौ धाता च विधाता च पौराणौ जगतः-
पतौ॥"

इति वह्निपुराणे गणभेदो नामाध्यायः॥ (चेतनाधातुः। तदिहतिर्यथा। "तत्र पूर्व्वं चेतनाधातुः सत्त्वकरणो गुणग्रहणाय प्रवर्त्तते। स हि हेतुः कारणं निमित्तमक्षरं कर्त्ता मन्ता वेदिता बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्म्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यो ध्रुवो ग्रहणं प्राधान्यमव्यक्तं जीवो ज्ञः प्रतुलश्चेतनावान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मेति।" इति चरके शारीरस्थाने चतुर्थेऽध्याये॥)

विश्वका, स्त्री, गङ्गाधिष्ठात्री। यथा,—

"गङ्गाधिष्ठात्री तु देवी विश्वका जनकुक्षुटी।"

इति हारावली॥

विश्वकृत्, पुं, (विश्वं करोतीति। कृ+क्विप्।) विश्वकर्म्मा। इति हेमचन्द्रः॥ (यथा, महाभारते। १। २१२। ११।

"किञ्चु लोकेषु किञ्चित् भूतं स्थावरजङ्गमम्।

समानयद्ग्नीयं तत्तदत्र स विश्वहृत् ।"
ब्रह्मा । यथा, भागवते । ६ । १४ । ८ ।
"निवेदितोऽथाङ्गिरसा धीमं निर्भेत्स्य विश्व-
हृत् ।
मारां स्वभर्त्रे प्रायच्छदन्तर्वत्नीमवेत्यति: ।")
विश्वकेतु:, पुं, (विश्वमेव केतुर्यस्य । विश्वथापी वा केतुर्यस्य ।) अनिरुद्ध: । इत्यमर: ।
विश्वक्, व्य, सर्व्वत: । इत्यमरटीका ।
विश्वक्सेन:, पुं, विष्णु: । इत्यमरटीकायां भरत: ॥
त्रयोदशमनु: । यथा,—
"मनुर्भूते: सुतस्त्वष्टृ भौत्यो नाम भविष्यति ।
ततस्तु मेरुसावर्ण्यब्रह्मसूनुर्मनु: स्मृत: ।
ऋतुश्च ऋतुधामा च विश्वक्सेनो मनुस्त्रया ।
अतीतानागताश्चैते मनव: परिकीर्त्तिता: ॥"
इति मात्स्ये ९ अध्याय: ॥ ● ॥
विष्णोर्निर्माल्यधारिदेवता । यथा,—
"निर्माल्यधारी विष्णोस्तु विश्वक्सेनश्चतुर्भुज: ।
शङ्खचक्रगदापाणिर्दीर्घस्रग्वनमालधर: ।
रक्तपिङ्गलवर्णस्तु सितपद्मोपरिस्थित: ।
प-ञ्चलौयस्वरान्तेन संयुतो विन्दुनेन्दुना ।
कीर्त्तितस्तस्य मन्त्रोऽयं तेन तं परिपूजयेत् ।
विसर्ज्जनं तथा विष्णोरेतस्यां परिकल्पयेत् ॥"
इति कालिकापुराणे ८२ अध्याय: ॥
(कचित् विश्वक्सेव इति पाठोऽपि दृश्यते ॥)
विश्वक्सेना, स्त्री, प्रियङ्गुवृक्ष: । इति केचित् ॥
(केचित् द्वितीयशकारस्थाने सकारं पठन्ति ॥
यथा,—
"विश्वक्सेना प्रियाकान्ता प्रियङ्गु: फलिनी
फली ॥"
इति वैद्यकरत्नमालायाम् ॥
"प्रियङ्गु: फलिनी कान्ता लताच महिलाह्वया ।
गुन्द्रायुन्द्रफला श्यामा विश्वक्सेनाङ्गनाप्रिया"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
विश्वग:, पुं, (विश्वं गच्छतीति । गम+ड: ।) ब्रह्मा । इति हेमचन्द्र: ॥
विश्वगन्धं, क्ली, (विश्वे सर्व्वस्थाने गन्धो यस्य ।) गोलम् । इति राजनिर्घण्ट: ॥
विश्वगन्ध:, पुं, (विश्वे सर्व्वदेहे गन्धो यस्य ।) पलाण्डु: । इति राजनिर्घण्ट: ॥
विश्वगन्धा, स्त्री, (विश्वेषु समस्तपदार्थेषु मध्ये गन्धा गन्धविशिष्टा । स्त्रियामेव गन्ध इति न्यायादस्यास्त्रीत्वम् ।) पृथिवी । इति शब्दचन्द्रिका ॥
विश्वगोप्ता, [तृ] पुं, (विश्वस्य गोप्ता ।) विष्णु: । इन्द्र: । इति केचित् । (विश्वपालके, त्रि । यथा, हरिवंशे । २५१ अध्याये ।
"त्वमेव विश्वगोप्तासि विश्वम्भर पवित्रमसि ।")
विश्वगन्धि:, स्त्री, हंसपदी । इति राजनिर्घण्ट: ॥
विश्वगवायु:, पुं, (विश्वगालो वायु: ।) सर्व्वतोगामिपवन: । अस्य गुणा: ।
"विश्वगवायुरनायुष्यं प्राणिनां नैकदोषकृत् ।
सर्व्वधातुक्षिङ्को हन्ता ज्वलोत्पातपुर:सर: ।"
इति राजवल्लभ: ॥

विश्वह्, [ट्] त्रि, सर्व्वत्रगामी । विश्वं अश्नुते इत्यर्थे क्विप्प्रत्ययेन निष्पन्नमिदम् ॥
विश्वहर:, पुं, (विश्वं सर्व्वं करोति प्रकाशयतीति । हृ+बाहुलकात् ट: द्वितीयाया अलुक् च ।) चक्षु: । इति केचित् ॥
विश्वचक्रं, क्ली, (विश्वत: सर्व्वत्र चक्रं यस्य ।) महादानविशेष: । यथा,—
मत्स्य उवाच ।
"अथात: संप्रवक्ष्यामि महादानमनुत्तमम् ।
विश्वचक्रमिति ख्यातं सर्व्वपातकनाशनम् ।
तपनीयस्य शुद्धस्य विश्वचक्रन्तु कारयेत् ।
श्रेष्ठं पलसहस्रेण तदर्द्धेन तु मध्यमम् ।
तस्यार्द्धेन कनिष्ठं स्याद्विश्वचक्रमुदाहृतम् ।
अन्यद्विंशृतपलादूर्द्धमशक्तोऽपि निवेदयेत् ।
षोड्शारं ततचक्रं भूमिनेम्यष्टकान्वितम् ।
नाभिपद्मे स्थितं विष्णुं योगारूढं चतुर्भुजम् ।
शङ्खचक्रस्य पार्श्वे तु देवयुक्तसमाहृतम् ।
द्वितीयावरणे तद्वत् पूर्व्ववतो जलशायिनम् ।
अग्निर्भृगुर्वशिष्ठश्च ब्रह्मा काश्यप एव च ।
मत्स्य: कूर्म्मो वराहश्च नरसिंहोऽथ वामन: ।
रामो रामश्च रामश्च बुद्ध: कल्की च ते दश ।
तृतीयावरणे गौरी माद्यभिर्बहुभिर्युता ।
चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च ।
पञ्चमे पञ्चभूतानि रुद्राश्चैकादशैव तु ।
लोकपालाष्टकं षष्ठे दिक्पालाश्चैव च ।
सप्तमेऽस्त्राणि सर्व्वाणि सङ्ख्यानि च कारयेत् ।
अन्तराल्लतो देवान् विन्यसेदष्टमे पुन: ।
तुलापुरुषवत् शेषं समन्तात् परिकल्पयेत् ।
ऋत्विक्छत्रोपसंभारभूषणाच्छादनादिकम् ।
विश्वचक्रं तत: कुर्य्यात् छत्राद्यिवतितोपरि ।
तथाष्टादश धान्यानि रसाश्च लवणादय: ।
पूर्णकुम्भाष्टकश्चैव वस्त्राणि विविधानि च ।
माल्येक्षुफलरत्नानि वितानं चापि कल्पयेत् ।
ततो मङ्गलशब्देन स्नात: शुक्लाम्बरो गृही ।
होमाधिवासनान्ते तु गृहीतकुसुमाञ्जलि: ।
इमसुत्तारयेन्मन्त्रं चि: कृत्वा तु प्रदक्षिणम् ।
नमो विश्वमयायेति विश्वचक्रात्मने नम: ।
परमानन्दरूपि त्वं पाहि न: पापकर्द्दमात् ।
तैजोमयमिदं यस्मात् सदा पश्यन्ति योगिन: ।
हृदि तत् चिन्तयात्मानं विश्वचक्रं नमाम्यहम् ।
वासुदेवे स्थितचक्रं चक्रमध्ये च माधवम् ।
अन्योन्याधाररूपेण प्रणमामि स्थितावुभौ ।
विश्वचक्रमिदं यस्मात् सर्व्वपापहरं परम् ।
आयुधर्द्धाधिवासस्य भवादुद्धर मामित: ॥
इत्यामन्त्र्य च यो दद्यात् विश्वचक्रममत्सर: ।
विमुक्त: सर्व्वपापेभ्यो विष्णुलोके महीयते ।
वैकुण्ठलोकमासाद्य चतुर्व्बाहु: सनातन: ।
सेवतेऽमरसंघैस्तिष्ठेत् कल्पशतत्रयम् ।
प्रथमेहाथ य: कुर्य्यात् विश्वचक्रन्दिने दिने ।
तस्यायुर्व्वर्द्धते नित्यं लक्ष्मीश्च विपुला भवेत् ॥
इति सकलजगत्सुराधिवासं
विनरति यस्त्वपनीयषोड्शारम् ।

हरिभवनमुपागत: स सिद्धै-
श्चिरमधिगम्य नमस्यते शिरोभि: ॥
असुदर्शनता प्रयाति मृत्यो-
र्मदनसुदर्शनताच कामिनीनाम् ।
सुदर्शनकेशवानुरूपं
कनकसुदर्शनदानदम्भपाप: ॥
क्षतगुरुदुरितारिषोड्शारं
प्रवितरजप्यवरात्मितं सुरारे: ।
अभिभवति भवोद्भवानि भित्त्वा
भवमभितो भवने भवानि भूय: ॥"
इति मात्स्ये महादानानुकीर्त्तने विश्वचक्रप्रादानिको नाम २५६ अध्याय: ॥
विश्वचक्रात्मा, [त्मन्] पुं, (विश्वचक्रं ब्रह्माण्डमेव आत्मा स्वरूपं यस्य ।) विष्णु: । यथा,—
"नमो विश्वमयायेति विश्वचक्रात्मने नम: ।
परमानन्दरूपो त्वं पाहि न: पापकर्द्दमात् ।"
इति मात्स्ये २५६ अध्याय: ॥
विश्वजित्, पुं, (विश्वं जयतीति । जि+क्विप् । तुक् च ।) यज्ञभेद: । इति जटाधर: ॥ (यथा, रघु: । ५ । १ ।
"तमध्वरे विश्वजिति क्षितीश्वरं
नि:शेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी
कौत्स: प्रपेदे वरतन्तुशिष्य: ॥")
न्यायविशेष: । यथा । यत्तु फलाश्रुतेर्नित्यत्वमभिहितं तत् फलाश्रुतौ विश्वजिन्न्यायात् स्वर्ग: कल्प्यते । इत्यनेन विरुद्धमिति । स च न्याय: यथा । विश्वजिता यजेत इत्यादि श्रूयते । इत्येकादशीतत्त्वम् । वरदराज: । इति केचित् ॥ (अग्निविशेष: । यथा, महाभारते । ३ । २१८ । १६ ।
"यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति ।
तं प्राहुरध्यात्मविदो विश्वजिन्नामपावकम् ।"
दानवविशेष: । यथा, तत्रैव । १२ । २२७ । ५१ ।
"विश्वजित् प्रतिरूपश्च दृप्तो विष्करो
मधु: ।"
दृढ़रथस्य पुत्र: । यथा, हरिवंशे । ३१ । ५१ ।
"आसीद्दृढ़रथस्यापि विश्वजिज्जनमेजय ।"
सत्यजित्तनय: । यथा, तत्रैव । २० । २६ ।
"सत्यजित्तनयस्यास्य विश्वजित्तस्य चात्मज: ॥"
विश्वजयिनि, त्रि । यथा, भागवते । ७ । ४ । ७ ।
"सर्व्वस्वपतीन् जित्वा यज्ञमाजीय विश्वजित् ।
जहार लोकपालानां स्थानानि सह तेजसा ।")
विश्वत:, [स्] अ, (विश्व+तसिल् ।) सर्व्वत: । इत्यमरटीका । (यथा, भागवते । १० । ३१ । ३ ।
"दृषभयात्मजाद्विश्वतो भयात्
ऋषभ ते वयं रक्षिता मुहु: ॥")
विश्वदेव:, पुं, (विश्वे दीव्यतीति । दिव+अच् ।) गणदेवताविशेष: । इत्यमरटीका ॥
"विश्वदेवौ क्रतुदचौ सर्व्वाख्यिदेव विश्रुतौ ।
नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च मैत्रके ॥
नवान्नाशनमने देवौ कामकालौ यदैव हि ।
अपि कन्यागते सूर्य्ये श्राद्धे च ध्वनिरोचकौ ।

पुरुरवाश्चाद्भवाच्च विश्वदेवौ च पर्व्वणि ।"
इति वह्निपुराणे गयभेदनामाध्यायः ।
(विश्वस्य देवताखरूपे, त्रि । यथा, हरिवंशे । १८६ । १६ ।
"श्रुतं मे विश्वदेवानां यद्रहस्यं महर्षिभिः ।
तदिदं सर्व्वदेवानां तत्त्वतस्तत्त्ववादिनाम् ।")
विश्वदेवा, स्त्री, वृक्षगवेधुका । गोरक्षचाकुलिया इति भाषा । इति जटाधरः । नागबला । अदनपुष्पदक्षोत्पलः । इति रत्नमाला ।
विश्वद्राङ्, [ञ्] त्रि, सर्व्वत्रगमनकर्त्ता । विश्वक् समन्तात् अञ्चति गच्छति विश्वद्राङ् सर्व्वतोगामी । ऋहोर्यमध्यः तालव्यमध्योऽपीत्येके । इत्यमरभरतौ ।
विश्वधारिणी, स्त्री, (विश्वं सर्व्वं धरतीति । धृ+णिनिः । ङीप् ।) पृथिवी । इति केचित् ।
विश्वनाथः, पुं, (विश्वस्य नाथः ।) शिवः । इति शब्दरत्नावली । (यथा, वैराग्यशतके । १०९ ।
"न गृहीतं स्मृतिहृदयं
न च गृहीतं परिदेवं हृदयम् ।
इच्छामि च धाम परं
गच्छामि तु विश्वनाथपुरीम् ।"
साहित्यदर्पणप्रणेता पण्डितविशेषः । यथा, साहित्यदर्पणे ।
"श्रीचन्द्रशेखरमहाकविचन्द्रसूनु-
श्रीविश्वनाथकविराजकृतं प्रबन्धम् ।
साहित्यदर्पणमसुं सुधियो विलोक्य
साहित्यतत्त्वमखिलं सुखमेव वित्त ।"
विद्यानिवासभट्टाचार्य्यपुत्रः पक्षाननोपाधिकः भाषापरिच्छेदसिद्धान्तसुक्तावलीप्रणेतापरपण्डितविशेषः ।)
विश्वपर्णी, स्त्री, भूम्यामलकी । इति राजनिर्घण्टः ।
विश्वपाः, पुं, (विश्वं पातीति । पा+विच् ।) विश्वपालनकर्त्ता । स तु परमेश्वरः । इति सुधबोधव्याकरणम् । (यथा, हरिवंशे । २५१ अध्याये ।
"विश्वस्य पते भूताधिप अनन्तकर्म्मन् हृषभवंशप्रागर्य्य विश्वपाल्यम् ।")
विश्वपा, [तृ] पुं, (विश्वं पातीति । पा+भ्वादौ +"सृतृधञ्जसिशुधिनक्षिभ्यः ।" उणा० १ । १५८ । इति कनिन्प्रत्ययेन साधुः ।) अग्निः । चन्द्रः । इति हेमचन्द्रः । देवः । विश्वकर्म्मा । इति संक्षिप्तसारोणादिवृत्तिः । सूर्य्यः । इति शब्दरत्नावली ।
विश्वबोधः, पुं, (विश्वस्य बोधो यस्य ।) बुधः । इति त्रिकाण्डशेषः ।
विश्वभूः, पुं, बुधभेदः । इति हेमचन्द्रः ।
विश्वभेषजं, क्ली, (विश्वेषां भेषजम् ।) शुण्ठी । इत्यमरः । (यथा, सुश्रुते । १ । ४४ ।
"विश्वभेषजमङ्गीकाधिपत्यकैर्गुभाविते: ।"
तस्यास्य गुणाः ।
"सर्व्वदोषहरं द्रव्यमग्नेर्दीपनं परम् ।
विपाके मधुरं स्निग्धं रोचनं विश्वभेषजम् ।"
इति चरके सूत्रस्थाने २७ अध्यायः ।)
विश्वभोजाः, [स्] पुं, सर्व्वभुक् । विश्वशब्दपूर्व्वकभुजधातोः औणादिकासिप्रत्ययेन निष्पन्नमिदम् ।
(विश्वरक्षके, त्रि । यथा, ऋग्वेदे । ५ । ४२ । ४ ।
"पूषाभागःप्रभृथे विश्वभोजाः ।"
"विश्वभोजा विश्वरक्षकाः ।" इति तद्भाष्ये सायणः ।)
विश्वमदा, स्त्री, अग्निजिह्वा । यथा,—
"काली कराली च मनोजवा च
सुलोहिता चैव च धूम्रवर्णा ।
स्फुलिङ्गिनी विश्वमदार्चिषोऽग्नेः
सप्तैव जिह्वाः कथिता मुनीन्द्रैः ।"
इति शब्दमाला ।
विश्वम्भरः, पुं, (विश्वं बिभर्त्तीति । भृ+"संज्ञायां भृञृतृजीति ।" ३ । २ । ४६ । इति खच् । "अरुर्द्विषदिति ।" ६ । ३ । ६७ । इति सुम् ।) विष्णुः । (यथाह कश्चित् ।
"विश्वम्भर ! भरास्माकं विश्वगाढा बहिःकुरु ।
अथ पक्षद्वयाभावे त्वञ्च विश्वम्भरत्वकम् ।")
इन्द्रः । इति मेदिनी । रे, २८५ ।
विश्वम्भरा, स्त्री, (विश्वं बिभर्त्तीति । भृ+खच् । सुम् । टाप् ।) पृथिवी । इत्यमरः । अस्या व्युत्पत्तिर्यथा,—
"विश्वम्भरा तद्धरणाच्चानन्तानन्तरूपतः ।
पृथिवी पृथुकन्यात्वाद्विस्तृतत्वोर्व्वहेतुने ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्यायः ।
(यथा, उत्तरचरिते । १ अङ्के ।
"विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते ।")
विश्वयुः, पुं, वायुः । इति केचित् ।
विश्वरूपः, पुं, (विश्वमेव रूपं यस्य ।) विष्णुः । इति हेमचन्द्रः । (महादेवः । यथा, महाभारते । ७ । २०० । १२४ ।
"विश्वे देवाश्च यत्तस्मिन् विश्वरूपस्ततः स्मृतः ।"
त्वष्टपुत्रः । यथा, विष्णुपुराणे । १ । १५ । १२९ ।
"त्वष्टुराप्यात्मनः पुत्रो विश्वरूपो महायशाः ।"
सर्व्वरूपे, त्रि । यथा, भागवते । ६ । ४ । २८ ।
"स सर्व्वनाथा स च विश्वरूपः
प्रसीदतामनिरुक्तात्मशक्तिः ।")
विश्वरूपकं, क्ली, लक्षागुरु । इति राजनिर्घण्टः ।
विश्वरेताः, [स्] पुं, (विश्वे रेतः शक्तिर्यस्य ।) ब्रह्मा । इति हेमचन्द्रः ।
विश्वरोचनः, पुं, (विश्वान् रोचयतीति । रुच्+ल्युः ।) गाढ़ीचश्चाकः । यथा,—
"केचुकं पेचुलो पेचुर्गाढ़ीचो विश्वरोचनः ।"
इति त्रिकाण्डशेषः ।
विश्ववेदाः, [स्] त्रि, सर्व्वज्ञः । विश्वं वेत्ति इत्यर्थे विश्वशब्दपूर्व्वविदधातोरसुप्रत्ययेन निष्पन्नमिदम् । यथा,—
"स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः
स्वस्ति नो बृहस्पतिर्दधातु ।"
इति यजुर्व्वेदिस्वस्तिवाचनमन्त्रः ।
(यथाच भागवते । ८ । ३ । २६ ।
"सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम् ।
विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ।")
विश्वसहा, स्त्री, अग्निजिह्वाविशेषः । यथा,—
"हेतिः शिखा च सप्तास्येर्जिह्वास्ता एव कीर्त्तिताः ।
काली कराली सुहिता धूम्रवर्णा मनोजवा ।
स्फुलिङ्गिनी विश्वसहा सप्तजिह्वासुदाहृताः ।"
इति जटाधरः ।
विश्वसारं, क्ली, (विश्वेषां सारम् ।) तन्नामविशेषः । इति प्रसिद्धम् ।
विश्वसारकं, क्ली, (विश्वसार+संज्ञायां कन् ।) विदरद्रव्यः । इति शब्दचन्द्रिका । कबिमनसा । इति भाषा ।
विश्वसितः, त्रि, (वि+श्वस+क्तः ।) विश्वस्तः । इति सुधबोधव्याकरणम् । (यथा, नैषधे । १ । १३१ ।
"न केवलं प्राणिवधो वधो मम
त्वदीयशब्दश्रवणेऽपि निश्चितः ।")
विश्वस्रष्टृ, [ञ्] पुं, (विश्वं सृजतीति । सृज्+क्विप् ।) ब्रह्मा । इत्यमरः । (विश्वसृष्टरि, त्रि । यथा, रघुः । १० । १६ ।
"नमो विश्वसृजे पूर्व्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं भगवते नमः ।")
विश्वस्तः, त्रि, (वि+श्वस+क्तः ।) जातविश्वासः । इति मेदिनी । ते, २५५ । यथा,—
"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलादपि निकृन्तति ।"
इति गारुड़े ११४ अध्यायः ।
विश्वस्ता, स्त्री, विधवा । इत्यमरः । (यथा, साहित्यदर्पणे । २० परिच्छेदे ।
"क्षतयुगसुक्ताभरणाः
कण्टककलिताङ्गयष्टयो देव्यः ।
त्वयि कुपितेऽपि विश्वस्ताः
प्रागेव रिपुस्त्रियो जाताः ।")
विश्वस्था, स्त्री, (विश्वतः सर्व्वतः तिष्ठतीति । विश्व+स्था+कः ।) वृतावरी । इति राजनिर्घण्टः ।
विश्वा, स्त्री, (विश्व+कृ । स्त्रियां टाप् ।) अतिविषा । इत्यमरः । वृतावरी । इति राजनिर्घण्टः । पिप्पली । इति शब्दचन्द्रिका । (दक्षकन्याविशेषः । यथा, महाभारते । १ । ६५ । १२ ।
"क्रोधा प्राधा च विश्वा च बलिता कपिला सुनिः ।")
विश्वाची, स्त्री, अप्सरोविशेषः । यथा,—
"उर्व्वशी मेनका रम्भा मिश्रकेशी ह्यलम्बुषा ।
विश्वाची च घृताची च पञ्चचूड़ा तिलोत्तमा ।

भानुमत्यवला वर्षा दादशाक्षरतः शुभा ।"
इति वह्निपुराणे गन्धभेदनामाध्यायः ।
(बाहुरोगविशेषः । तल्लक्षणादिकं यथा,—
"अथ विश्राचीलक्षणमाह ।
'तलं प्रलम्बुलीनां या कक्करा बाहुपृष्ठतः ।
बाहोः कर्म्मक्षयकरी विश्राची नाम सा स्मृता ।"
कक्करा महाशायुः तलं हस्तस्योपरिभागः ।
तलग्रन्थोश्च उपरिवाचकः यथा भूमितलमिति । तैनायमर्थः । बाहुपृष्ठतः बाहोः पृष्ठं बाहुपृष्ठमारभ्य तलं प्रतिहस्ततलं यावच्चौलञ्च कक्करास्थाः सन्दृश्य बाहोः प्रसारणाकुञ्चनादिकर्म्मक्षयकरी भवति सा दृष्ट वातव्याधिषु विश्राचीत्युच्यते बाहोरिति द्विवचनं सम्भवपरम् । एकस्मिन्नपि बाहौ विश्राची भवति ।" इति भावप्रकाशः ।)
विश्वात्मा, [न्] पुं, (विश्वमेव आत्मा यस्य विश्वस्य आत्मा इति वा ।) विष्णुः । यथा,—
"अज्ञ कर्म्म च विश्वात्मन्नस्माकर्त्तुरात्मनः ।
तिर्य्यङ्नृषिषु यादःसु तदत्यन्तविडम्बनम् ।"
इति श्रीभागवते १ स्कन्धे ८ अध्यायः ।
(महादेवः । यथा, कुमारे । ६ । १ ।
"अथ विश्वात्मने गौरी चन्द्रदेशं मिथः सखीम् ।
दासा मे भूयतां नाथः प्रमाणीक्रियतामिति ।")
विश्वाधाया: [स्] पुं, देवता । इति सिद्धान्तकौमुदी ।
विश्वामित्रः, पुं, (विश्वमेव मित्रमस्य । "मित्रे चर्षौ ।" ६ । ३ । १३० । इति विश्वस्य दीर्घः ।) ब्रह्मर्षिविशेषः । तत्पर्य्यायः । गाधिजः २ । इति त्रिकाण्डशेषः । विश्वरथाजौ ३ गाधेयः ४ कौशिकः ५ । इति हेमचन्द्रः । गाधिभूः ६ । इति शब्दरत्नावली । तस्योत्पत्तिर्यथा,—
"शतदारं सुतं श्रुत्वा द्रष्टुं पुत्रं स्वयं भृगुः ।
अथाजगाम मतिमान् स्नुषां द्रष्टा ननन्द च ।
दम्पती तं समासीनं भृगुं देवगणार्चितम् ।
पूजयित्वा समासीनं तथ्यतुष्टौ शताञ्जलौ ।
ततो भृगुः स्नुषां स्नेहात् सुप्रीत इदमब्रवीत् ।
वरं वृणीष्व दास्यामि वाञ्छितं वरवर्णिनि ।
अदेयं दुष्करं वापि यत्र ते वर्त्तते स्पृहा ।
ततः सत्यवती पुत्रं तपश्चाध्यायपारगम् ।
मातुश्च गोरमतुलं पुत्रं वरमयाचत ।
स चैवमस्त्वितुक्त्वैव भूत्वा ध्यानपरस्तदा ।
विश्वमावर्त्तयं मनसा यजातृ त्वाहं सखर्ज्ञ सः ।
तस्य विश्वावसातासु वि:सुतं वै चतुष्टयम् ।
तस्मै तत् हितयं दत्त्वा भृगुस्तामिदमब्रवीत् ।
चतुष्टयं गृहाण त्वं सुधे सत्यवति स्वयम् ।
ज्ञात्वा ऋतौ ऋतौ माता तदा त्वञ्च करिष्यथः ।
आलिङ्गाश्वत्थदृष्टं ते माता पुंसवनाय वै ।
चरुमारब्धकं चैमं वा भोक्ष्यति सुतस्ततः ।
मन्त्रौदुम्बरहस्तस्तु समालिङ्गा सितं चरुम् ।
भोक्ष्यतेन पुत्रस्ते भविष्यति सनातनः ।
दत्त्वैतद्भृगुर्याते यत्नेऽहं वापि संसदम् ।
जगाम माता सहिता भर्त्रा पित्रा च भाविनी ।
अथ ज्ञानदिनेऽत्यन्तमालिङ्गारब्धकं चरुम् ।
अद्यात् सत्यवती तस्या माता फल्गु सितं चरुम् ।
परिवर्त्तेतु तं ध्यात्वा दिव्यज्ञानो भृगुर्मुनिः ।
अथागत्य स्नुषां तान्तु वचनञ्चेदमब्रवीत् ।
विपर्य्ययक्रिया भद्रे कृतालिङ्गनकर्म्मणि ।
तथा चरुप्राश्ने च तत्रेदन्ते भविष्यति ।
ब्राह्मणः क्षत्रियाचारस्तव पुत्रो भविष्यति ।
क्षत्रियो ब्राह्मणाचारो मातुस्ते भविता सुतः ।
इत्युक्ता भृगुणा साध्वी तदा सत्यवती भृगुम् ।
पुनः प्रसादयामास पौत्रो मेऽस्त्विति तादृशः ।
एवमस्त्विति प्रोक्ता च तत्रैवान्तर्दधे भृगुः ।
अथ काले सुतं दीप्तं यमदग्निञ्च गाधिजा ।
सुषुवे जगती तस्या विश्वामित्रं तपोनिधिम् ।
यमदग्निसुतो वेदान् चतुरः प्राप माचिरम् ।
प्रादुरासद्बहुर्ब्रह्मः स्वयं तस्मिन् महात्मनि ।
विश्वामित्रोऽपि सकलान् वेदानपि तथाचिरात् ।
धनुर्ब्रह्मेदं तथा शस्त्रं विप्रज्ञाभूत्तपोधनः ।
जाज्वल्यमानस्तेजस्वी यमदग्निर्महातपाः ।
देवैस्तपोभिः स मुनीनत्यक्रामच्च सूर्य्यवत् ।"
इति कालिकापुराणे ८३ अध्यायः ।
(आयुर्व्वेदपारदर्शी सुश्रुतोऽस्य पुत्रः । यथा,—
"अथ ज्ञानदृशा विश्वामित्रप्रभृतयोऽब्रुवन् ।
अयं धन्वन्तरिः काश्यां काशिराजोऽयमुच्यते ।
विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमब्रवीत् ।
वत्स ! वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ।
तत्र नाम्ना दिवोदासः काशिराजोऽस्ति वाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्व्वेदविदांवरः ।
आयुर्व्वेदं ततोऽधीत्य लोकोपक्रतिहेतवे ।
सर्व्वप्राणिदयातीर्थैसुपकारी महामखः ।
पितुर्व्वचनमाकर्ण्य सुश्रुतः काशिकां गतः ।
तेन सार्द्धं समधीत्य मुनिभिस्तुल्यतां ययौ ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"विश्वामित्रसुतः श्रीमान् सुश्रुतः परिपृच्छति ।"
इत्युत्तरतन्त्रे षट्पञ्चाशत्तमेऽध्याये सुश्रुतेनोक्तम् ।
विश्वस्मिन्नात्मिमित्रं यस्मात्। परममित्रम्। यथा,
"जनकेनाभिरामाय दत्तौ राज्यमकण्टकम् ।
'मन्त्रामित्रं पुरस्कृत्य वनवासं ततो ययौ ।"
इत्युद्भटः ।)
विश्वामित्रप्रियः, पुं, (विश्वामित्रस्य प्रियः ।) नारिकेलः । इति शब्दरत्नावली । (कार्त्तिकः । यथा, महाभारते । ३ । २३१ । ८ ।
"विश्वामित्रप्रियश्चैव देवसेनाप्रियस्तथा ।")
विश्वाराट्, [ज्] पुं, विश्वेषु राजते यः । विश्वेषां राट् राजा इति वा । इति सुग्धबोधव्याकरणम् । ("विश्वस्य वसुराटोः ।" ६ । ३ । १२८ । इति दीर्घः ।)
विश्वावसुः, पुं, (विश्वं वसु यस्य । "विश्वस्य वसुराटोः ।" ६ । ३ । १२८ । इति पूर्व्वपदस्य दीर्घः ।) गन्धर्व्वभेदः । इति मेदिनी । यथा,—
"अथाजोऽङ्गारिवभारी सूर्य्यवर्चास्तथा ऋधुः ।
हस्तः सुहस्तः खाशैव मृडन्तांश्च महामनाः ।
विश्वावसुः क्षत्रयाताश्च गन्धर्व्वैकादशो गणः ।"
इति वह्निपुराणे गन्धभेदनामाध्यायः ।
(विष्णुः । यथा, महाभारते । ६ । ६२ । ३५ ।
"विश्वावसुर्विश्वमूर्तिर्विश्वेशो
विश्वक्सेनो विश्वकर्म्मा वशी च ।"७।
वत्सरविशेषः । यथा, बृहत्संहितायाम् ।८।३१।
"क्रोधी तृतीयः परतः क्रमेण
विश्वावसुश्चेति पराभवश्च ।"
तत्पर्य्यायं यथा, चिन्तामणिधृतवचनम् ।
"सर्व्वत्र जायते क्षेमं सर्व्वशस्यमहार्घता ।
विश्वावसौ वरारोहे कार्पासस्य महार्घता ।")
निघ्नि स्त्री । इति मेदिनी ।
विश्वासः, पुं, (वि + श्वस + घञ् ।) प्रत्ययः । तत्पर्य्यायः । विस्रम्भः २ । इत्यमरः । आश्वासः ३ आश्रमः ४ । इति शब्दरत्नावली । ७ ।
"लोभप्रमादविश्वासैः पुरुषो नश्यति क्षिप्रम् ।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ।
सा श्रीर्या न मदं कुर्य्यात् स सुखी दक्षयोऽक्षितः ।
तस्मिन्नं यस्य विश्वासः पुरुषः स जितेन्द्रियः ।"
इति गारुडे नीतिसारे ११५ अध्यायः ।
"यस्य यावांश्च विश्वासस्तस्य सिद्धिश्च तावती ।
एतावानिति लक्ष्यस्य प्रभावः परिमीयते ।"
इति तत्रैव २३४ अध्यायः ।
"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलादपि निकृन्तति ।"
इति च गारुडे ११४ अध्यायः ।७।
"नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम् ।
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च ।
न विश्वसेदविश्वस्तं मित्रञ्चापि न विश्वसेत् ।
कदाचित् कुपितं मित्रं गुप्तदोषं प्रकाशयेत् ।"
इति चाणक्यम् ।
विश्वासघातकः, त्रि, विश्वासं हन्ति यः । (विश्वास + हन् + ण्वुल् ।) विश्रम्भनाशकः । यथा,—
"न भाराः पर्व्वता भारा न भाराः सप्त सागराः ।
निष्कला हि महाभारा भारा विश्वासघातकाः ।"
इति कर्म्मलोचनम् ।
विश्वेदेवाः, पुं, अग्निः । शाहदेवः । इति संक्षिप्तसारोणादिवृत्तिः ।
"क्रतुर्दक्षो वसुः सत्यः कामः कालस्तथा पुरुरवाः ।
रोचकश्चार्द्रवाक्चैव तथा चान्ये पुरूरवाः ।
विश्वेदेवा भवन्त्येते दश सर्व्वत्र पूजिताः ।"
इति वह्निपुराणे गन्धभेदनामाध्यायः ।
अन्यद्विश्वशब्दे द्रष्टव्यम् ।
विश्वेश्वः, पुं, (विश्वस्य ईशः ।) शिवः । इति शब्दरत्नावली । (विष्णुः । यथा, भागवते । १ । ८ । ४१ ।
"अथ विश्वेश विश्वात्मन् विश्वमूर्त्ते स्वकेषु मे ।
स्नेहपाशमिमं छिन्धि दृढं पाण्डुषु वृष्णिषु ।")

विश्वेश्वरः, पुं, (विश्वस्य ईश्वरः।) काम्रीश्वर-महादेवः। यथा,—
"सर्व्वतीर्थेषु स्नातो य सर्व्वयात्रां यथात् स च।
मणिकर्ण्यान्तु यः स्नातो यो विश्वेशं निरीक्षत॥
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः।
इत्थो विश्वेश्वरो नित्यं स्नातया मणिकर्णिका॥"
इति काम्रीखण्डम्।
(यथाच तत्रै।
"सुखेन वासं सलिलेन पाद्यं
मूर्त्तिन्दधा विल्वदलेन पूजा।
फलं पुनस्तस्य भवेदनन्तं
निःसंशयं विश्वेश्वर एव देवः॥")

विश्वौषधं, क्ली, (विश्वेषामौषधम्।) शुण्ठी। इति राजनिर्घण्टः॥

विश, इर् लि च औ ड आप्नौ। इति कविकल्पद्रुमः॥ (क्रया०-उभ०-आत्म०-इत्येके-सक०-अनिट्।) इर्, अविशत् अविक्षत्। लि ण, वेवेष्टि वेविष्टे। औ, वेक्षा। ड, वेविशे। उभयपदीत्यन्ये। अपनवत् कर्त्तरि आत्मने पदार्थो डकारः। इति दुर्गादासः॥

विश, उ सेचने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्त्वेट्।) उ, वेशित्वा विष्ट्वा। इति दुर्गादासः॥

विश, ग औ विप्रयोगे। इति कविकल्पद्रुमः॥ (क्रया०-पर०-अक०-अनिट्।) ग, विशाति भ्राता पुत्रादिभ्यो वियुक्तः स्यात् इत्यर्थः। औ, अविक्षत्। इत्यात्मोऽयमिति। विश्युत्पत्तौ सुभूतिः। इति दुर्गादासः॥

विषं, क्ली, (विष सेचने+कः।) जलम्। इत्यमरः। पद्मकेशरम्। इति तट्टीकायां सुकूटः॥ वोलम्। वत्सनाभः। सामान्यविषम्। इति राजनिर्घण्टः॥

विषः, पुं, क्ली, (विष+कः।) विषम्। तत्पर्य्यायः। भूरिः २ गरलम् ३। इत्यमरः॥ आहेयम् ४ अन्नदम् ५ गरदम् ६ कालकूटम् ७ कलाकूटम् ८ हारिद्रम् ९ रक्तशृङ्गिकम् १० गौलम् ११ गरम् १२ घोरम् १३ हालाहलम् १४ हलाहलम् १५ शृङ्गी १६ भूगरम् १७। इति राजनिर्घण्टः॥ जाङ्गलम् १८ तीक्ष्णम् १९ रसः २० रसायनम् २१ गरः २२। इति जटाधरः॥ जङ्गुलम् २३ जाङ्गुलम् २४। इति शब्दरत्नावली॥ काकोलः २५ वत्सनाभः २६ प्रदीपनः २७ शौल्किकेयः २८ ब्रह्मपुत्रः २९। इति रत्नमाला॥ तद्भेदा यथा,—
"पुंसि क्लीवे च काकोलकालकूटहलाहलाः।
सौराष्ट्रिकः शौल्किकेयो ब्रह्मपुत्रः प्रदीपनः॥
दारदो वत्सनाभश्च विषभेदा अमी नव॥"
इति पातालवर्गे अमरः॥ ७॥
अपि च।
"विषः शुष्को रसस्तीक्ष्णो गरलोऽथ हलाहलः।
वत्सनाभः कालकूटो ब्रह्मपुत्रः प्रदीपनः॥
सौराष्ट्रिकः शौल्किकेयः काकोलो दारदोऽपि च।
अहिच्छत्रो मेषशृङ्गकुष्ठवालुकनन्दनाः॥
कैराटको हैमवतो मर्कटः करवीरकः।
पर्षपो मूलको गौरार्द्धकः सक्तुककर्दमौ॥
शृङ्गोत्सारः कालिङ्गः शृङ्गिको मधुसिक्थकः।
इन्द्रो लाङ्गलिको विस्फुलिङ्गपिङ्गलगौतमाः।
सुक्तको दालवश्चेति स्थावरा विषजातयः॥"
इति हेमचन्द्रः॥
अथ विषस्य नामलक्षणगुणाः।
"विषं तु गरलं चुक्रं हलाहलभिदादुदाहरेत्।
वत्सनाभः सहारिद्रः सक्तुकश्च प्रदीपनः॥
सौराष्ट्रिकः शृङ्गकश्च कालकूटस्तथैव च।
हालाहलो ब्रह्मपुत्रो विषभेदा अमी नव॥"
तत्र वत्सनाभस्य स्वरूपनिरूपणम्।
"सिन्धुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा।
यत्रार्थे न तरोर्वृद्धिर्वत्सनाभः स भाषितः॥"
अथ हारिद्रस्य स्वरूपम्।
"हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः॥"
अथ सक्तुकस्य स्वरूपम्।
"यदृच्छयाः सक्तुकेनैव पूर्णमधः स सक्तुकः॥"
अथ प्रदीपनस्य स्वरूपम्।
"प्रदीपकोद्दीपनो यः स्याद्दीप्तिमान् दलनप्रभः।
महादाहकरः पूर्व्वैः कथितः स प्रदीपनः॥"
अथ सौराष्ट्रिकस्य स्वरूपम्।
"सुराशृविषये यः स्यात् स सौराष्ट्रिक उच्यते॥"
अथ शृङ्गकस्य स्वरूपम्।
"यस्मिन् गोशृङ्गके वह्नेर्दुग्धं भवति लोहितम्।
स शृङ्गक इति प्रोक्तो द्रव्यतत्त्वविशारदैः॥"
अथ कालकूटस्य स्वरूपम्।
"देवासुररणे देवैर्हतस्य एणुमालिनः।
दैत्यस्य रुधिराज्जातस्तरुरत्यसन्निभः॥
निर्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः।
सोऽच्छिन्ने शृङ्गवेरे कोकणे मलये भवेत्॥"
अथ हालाहलस्य स्वरूपम्।
"गोस्तनाभमलो गुच्छस्तालपत्रच्छदस्तथा।
तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः॥
असौ हालाहलो ज्ञेयः किल्किन्धायां हिमालये।
दक्षिणाश्रितटे देशे कोलगोऽपि च जायते॥"
अथ ब्रह्मपुत्रस्य स्वरूपम्।
"वर्णतः कपिलो यः स्यात् तथा भवति साधकः।
ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले॥
ब्राह्मणः पाण्डुरस्तेषु क्षत्रियो लोहितप्रभः।
वैश्यः पीतोऽसितः शूद्रो विष उक्तश्चतुर्विधः।
रसायने विषं विप्रं क्षत्रियं देहपुष्टये।
वैश्यं कुष्ठविनाशाय शूद्रं दध्याद्वशाय हि॥"
अथ विषस्य गुणाः।
"विषं प्राणहरं प्रोक्तं वयसि च विकाशि च।
आग्नेयं वातकफहृद्दोषवाहिमदावहम्॥
वयसि सकलकायगुणव्यापनपूर्व्वकपाकागमन-शीलम्। विकाशि ओजःशोषणपूर्व्वकं सन्धिबन्धग्रन्थिलीकरणशीलम्। आग्नेयं अधिकाग्नेयम्। योगवाहि संसर्गगुणवाहकम्।
"मदावहं तमोगुणाधिक्येन बुद्धिविध्वंसकम्। तदेव युक्तियुक्तन्तु प्राणदायि रसायनम्॥
योगवाहि परं वातश्लेष्मजित् सन्निपातहृत्।
योगवाहि त्रिदोषघ्नं दृष्टघ्नं वीर्य्यवर्द्धनम्॥
ये दुर्गुणा विषेऽशुद्धे ते सुद्दोषा विशोधनात्।
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत्॥"
अथोपविषाणां निरूपणम्।
"अर्कक्षीरं स्नुहीक्षीरं तथैव कञ्जिहारिका।
करवीरोऽथ धुस्तूरः पञ्च चोपविषाः स्मृताः॥"
उपविषा गौणविषाः। एषां गुणास्तत्र द्रष्टव्याः। अपि च।
"अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः।
गुल्मादिपेगो धुस्तूरः सप्तोपविषजातयः॥"
एतेषां शोधनं चिन्त्यम्। गुणास्तत्र द्रष्टव्याः॥
अथ विषाणां शोधनविधिः।
"गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुद्धयति।
रक्तसर्षपतैलाक्तं तथा वार्य्यथ वासयेत्॥
येगुणा गरले प्रोक्तास्ते स्नुहीवा विशोधनात्॥
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत्॥"
इति भावप्रकाशे पूर्व्वखण्डः॥
अथ विषाधिकारः। तत्र विषस्य त्रैविध्यमाह।
"स्थावरं जङ्गमञ्चैव त्रिविधं विषमुच्यते।
दशाधिष्ठानमाद्यन्तु द्वितीयं षोड्शाश्रयम्॥"
स्थावरविषस्य दशाश्रयानाह।
"मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सारभेद च।
निर्य्यासो धातवस्कन्दः स्थावरस्याश्रया दश॥"
तद्यथा। मूलविषं करवीरादि १। पत्रविषं विषपत्रिकादि २। फलविषं कर्कोटकादि ३। पुष्पविषं वेत्रादि ४। त्वक्सारनिर्य्यासविषाणि करभादीनि ५। ६। ७। क्षीरविषं स्नुह्यादि ८। धातुविषं हरितालादि ९। कन्दविषं वत्सनाभसक्तुकादि १०॥ ७॥ जङ्गमविषस्य षोड्शाश्रयानाह।
"दृष्टिनिश्वासदंष्ट्रास्य नखमूत्रपुरीषकाः।
शुक्रं लाला सृक्क शृङ्गं संदंशत्वगमर्हितम्।
गुदास्थिपित्तशुक्राणि दश षट् जङ्गमाश्रयाः॥"
तद्यथा। दृष्टिविषा सर्पविद्या दिग्धाः सर्पाः १।२। दंष्ट्राविषाः भौमाः सर्पाः ३। दंष्ट्रानखविषा व्याघ्रादयः ४। मूत्रपुरीषविषा मण्डूकोधिकादयः ५।६। शुक्रविषा मूषिकादयः ७। लालाविषा लूताटङ्कादयः ८। लालाशृङ्गनखपुरीषदंष्ट्रशुक्रसृक्कसंदंशगुदास्थिपित्तमर्हितगुदपुरीषविषाश्चिप्रशोफादयः ९।१०।११।१२।१३। अस्थिविषाः पार्श्वादयः १४। पित्तविषा मकुलमत्स्यादयः १५। शुक्रविषा भ्रमरादयः १६॥ ७॥ स्थावरविषाणां सामान्यानां कार्य्याण्याह।
"स्थावरन्तु ज्वरं हिक्कां दन्तहर्षं मलग्रहम्।
शिरश्छर्दिरुचिश्वासमूर्च्छाश्च कुरुते विषम॥"

आश्रयभेदेन विशिष्टानां विषाणां कार्य्याण्याह। तत्र मूलविषस्य कार्य्यमाह।
"उद्वेष्टनं मूलविषैर्मोहः प्रलपनं भवेत्॥"
पत्रविषस्य कार्य्यमाह।
"जृम्भणं वेपनं श्वासो वृणां पत्रविषैर्भवेत्॥"
फलविषस्य कार्य्यमाह।
"मुष्कशोथः फलविषैर्दाहो द्वेषश्च भोजने॥"
पुष्पविषस्य कार्य्यमाह।
"भवेत् पुष्पविषैर्हिक्काध्मानं मूर्च्छनं तथा॥"
त्वक्सारनिर्य्यासविषाणां कार्य्याण्याह।
"त्वक्सारनिर्य्यासविषैरुपयुक्तैर्भवन्ति हि।
आस्यदौर्गन्ध्यपारुष्यशिरोरुक्कफसंस्रवाः॥"
क्षीरविषकार्य्यमाह।
"फेनागमः क्षीरविषैर्विड्भेदो गुरुशिक्रता॥"
धातुविषकार्य्यमाह।
"क्लमोड्डनं धातुविषैर्मूर्च्छा दाहश्च तानुनि।
पायेत् कालघातीनि विषाण्येतानि निर्दिशेत्॥
एतानि मूलादीनि विषाणि नव कालघातीनि कालान्तरे मारकाणि॥*॥ कन्दविषस्य कार्य्यमाह।
"कन्दजान्युग्रवीर्य्याणि यान्युक्तानि त्रयोदश।
सर्व्वाण्येतानि कुशलैर्ज्ञेयानि दशभिर्गुणैः॥
स्थावरं जङ्गमञ्चापि कृत्रिमञ्चापि यद्विषम्।
सद्यो निहन्ति तत् सर्व्वं गुणैरेतैर्दशभिर्युतम्॥"
तान् दशगुणानाह।
"रूक्षतीक्ष्णं तथा तीक्ष्णं सूक्ष्ममाशु व्यवायि च।
विकाशि विशदं चैव लघ्वपाकि च ते दश॥"
तेर्गुणैर्विषस्य कार्य्यमाह।
"तदौक्षात् कोपयेदायुर्मेद्यात् पित्तं सशोणितम्।
तेक्ष्ण्यान्नस्यति मोहयति मर्म्मबन्धांश्छिनत्ति हि॥
शरीरावयवान् सौक्ष्म्यात् प्रविशेदिकरोति च।
आशुत्वादाशु तद्धन्ति व्यवायात् प्रकृतिं हरेत्॥
विकाशित्वात् क्षपयति दोषान् धातून् मलानपि।
अतिरिच्यते वेगत्वादुच्चिकित्स्यत्व लाघवात्।
दुर्ज्जरं चाविपाकित्वात्तस्मात् क्लेद्यते चिरम्॥"
विषलिप्तशस्त्रक्षतस्य लक्षणमाह।
"सद्यः पाकं याति यस्य क्षतं तत्
सवेदरुक्तं पच्यते चाप्यभीक्ष्णम्।
क्षयीभूतं क्लिन्नमत्यर्थपूति-
क्षतान् मांसं क्षीयते यस्य चापि॥
क्षयातापौ दाहमूर्च्छे च यस्य
दिग्धाविद्धं तं मनुष्यं त्यजेत्।
लिङ्गान्येतान्येव कुर्य्यादभिचे-
र्दंष्टः कृष्णो वा व्रणे यस्य चापि॥"
पच्यते चाप्यभीक्ष्णं पुनः पाकमेति। तापो बहिस्तप्तता। दाहोऽभ्यन्तरे। कुर्य्यादित्यत्र क्षतं कर्त्तृपदं बोद्धव्यम्। प्रायेण राजादीनामन्नादौ व्रणवो विषं ददति॥*॥ तेषां ज्ञानार्थं लक्षणमाह।
"इङ्गितज्ञो मनुष्याणां वाक्चेष्टासुखवैक्लवैः।
जानीयाद्विषदातारमेभिर्लिङ्गैश्च बुद्धिमान्॥
न ददात्युत्तरं दृष्टो विवक्षुर्मोहमेति च।
अपार्थं बहु संकीर्णं भाषते चापि मूढवत्॥
अङ्गुलीः स्फोटयेद्भूमीं विलिखेत् प्रहसेदपि।
वेपथुश्चास्य भवति वक्त्रञ्चैवैकमीक्षते॥
विवर्णवक्त्रो ध्मायच्च नखैः किञ्चिच्छिनत्ति च।
आलभेत सतृष्णः करेण च शिरोरुहान्॥
निर्य्यियासुरपद्वारं वीक्षते च पुनः पुनः।
वर्त्तते विपरीतञ्च विषदाता विचेतनः॥"
इङ्गितमभिप्रायसूचक आकारः। सुखवैक्लवं सुखवैवर्ण्यादिः। एभिर्लिङ्गैः वक्ष्यमाणैः। न ददात्युत्तरं दृष्टः स्त्रीयासत्कर्म्मजनितव्यामोहात्। संकीर्णं अस्फुटम्। भयजवायुजनितपर्य्यायथापनोदायाङ्गुलीः स्फोटयेत्। प्रहसेत् अहेतावपि। ध्मायः दग्धसमानवर्णः। आलभेत स्पृशेत्। विपरीतं यथा स्यादेवं वर्त्तते। जङ्गमविषाणां सामान्यानां कार्य्यमाह।
"निद्रातन्द्राक्लमं दाहं सन्धाकं लोमहर्षणम्।
शोथञ्चैवातिसारञ्च कुरुते जङ्गमं विषम्॥"
जङ्गमेषु तीक्ष्णतरत्वेन सर्पानाह।
"वातपित्तकफात्मानो भोगिमण्डलिराजिलाः।
यथाक्रमं समाख्याता ह्यन्तरा इन्द्रुरूपिणः॥"
भोगिनः फणिनः। ते च विंशतिः।
"मण्डलैर्विविधैश्चित्राः पृथवो मन्दगामिनः।
षट् ते मण्डलिनो ज्ञेया ज्वलनार्कसमा विषैः॥
स्निग्धा विविधवर्णाभिस्त्वग्भिश्च राजिभिः।
विचित्रा इव ये भान्ति राजिलास्ते हि तेऽपि षट्॥"
एते यथाक्रमं वातपित्तकफात्मानः। ह्यन्तरा हे अन्तरे भेदौ येषां ते ह्यन्तराः। यथा भोगिनो मण्डलिभ्यां जाताः इत्यादि॥*॥
भोगिप्रभृतिसर्पदंशलक्षणभेदमाह।
"दंशो भोगिकृतः क्षय्यः सर्व्ववातविकारकृत्।
पीतो मण्डलिनः श्वोथोल्पदुः पित्तविकारवान्॥
राजिलोत्थो भवेद्दंशः स्निग्धश्वोथश्च पिच्छिलः।
पाण्डुः स्निग्धोऽतिसान्द्रोष्णसर्व्वश्लेष्मविकारवान्॥"
देशविशेषे कालविशेषे च दष्टस्यासाध्यत्वमाह।
"अश्वत्थदेवायतनप्रपान-
वल्मीकसन्ध्यासु चतुष्पथेषु।
याम्ये सपित्रेऽ परिवर्ज्जनीया
ऋक्षे नरा मर्म्मसु ये च दष्टाः॥"
याम्ये भरण्याम्। पित्र्ये मघायाम्।
"दार्व्वीकराणां विषमाशु हन्ति
सर्व्वाणि चोष्णे द्विगुणीभवन्ति॥"
उष्णे उष्णसंयोगे। दार्व्वीकरलक्षणमाह।
"रथाङ्गनाङ्गलच्छत्रखस्तिकाङ्कुशधारिणः।
ज्ञेया दार्व्वीकराः सर्पाः फणिनः श्वेतभोगिनः॥"
अपरेषु येषु विषमाशु मारकं भवति तानाह।
"अजीर्णपित्तातपपीड़ितेषु
वान्तेषु दष्टेषु वृषस्थितेषु।
चीर्णे व्रते मेहिनि कुष्ठजुष्टे
रूक्षे वले गर्भवतीषु चापि॥
ग्रस्तव्रते यस्य न रक्तमस्ति
राज्यो लताभिश्च न संभवन्ति
ग्रीताभिरङ्गेषु न रोमहर्षो
विषाभिभूतं परिवर्ज्जयेत्तम्॥
जिह्मं मुखं यस्य च केशग्रहणो
नासावसादश्च सकण्ठभङ्गः।
क्षाम्यञ्च रक्तः व्यथयुश्च दंशो
हन्वोः स्थिरत्वञ्च स वर्ज्जनीयः॥"
केशग्रहणः आकर्षणात्। नासावसादः नासाया नतत्वम्। कण्ठभङ्गः ग्रीवाधारणाशक्तिः। हन्वोः स्थिरत्वं हनुद्वयस्तम्भः॥*॥ अपरञ्च।
"वर्त्तिर्यस्य निरेति वक्त्रा-
द्रक्तं श्वेदूर्द्धमधश्च यस्य।
दंष्ट्रानिपातोऽचतुरश्च यस्मिन्
यस्यापि वैद्यैः परिवर्ज्जनीयः॥"
वर्त्तिः रुधिरस्यम्। रक्तं श्वेदूर्द्धमधश्च यस्य यस्य च नासासुखलिङ्गगुदादिभ्यो रक्तं श्वेत्।
"उच्चत्तमत्यर्थसुपद्रुतं वा
हीनस्वरं वाप्यथवा विवर्णम्।
सारिष्टमत्यर्थमवेगिनञ्च
जह्यान्नरं तस्य न कर्म्म कुर्य्यात्॥"
अत्यर्थसुपद्रुतं वा ज्वरातिसारादिभिरतिग्रथितोपद्रुतम्। हीनस्वरं वक्तुमशक्तम्। विवर्णं क्षयवर्णम्। सारिष्टं नासाभङ्गादियुक्तम्। अवेगिनं वेगो विषवेगः लहरि इति लोके तद्रहितम्॥*॥ स्थावरं जङ्गमं विषमेव जीर्णत्वादिभिः कारणैर्दूषीविषसंज्ञां लभते। तदाह।
"जीर्णं विषघ्नौषधिदूषितं वा
दावाग्निवातातपशोषितं वा।
स्वभावतो वा गुणविप्रहीनं
विषं हि दूषीविषतामुपैति॥"
जीर्णं अतिपुराणम्। विषघ्नौषधिदूषितं विषघ्नाभिरोषधीभिर्व्वीर्य्यहीनीकृतम्। स्वभावतो वा गुणविप्रहीनं स्वभावादेव दशानां गुणानां मध्ये द्वित्रादिगुणहीनम्॥*॥ दूषीविषस्य कार्य्यमाह।
"वीर्य्याल्पभावान्न विपातयन्तं
कफान्वितं वर्षगुणानुबन्धि।
तेनार्दितो भिन्नपुरीषवर्च्चो
विगन्धवैरस्यगुतः पिपासी॥
मूर्च्छां भ्रमं गद्गदवाग्वमिञ्च
विचेष्टमानोऽरतिमाप्नुयाद्वा॥"
न निपातयेत् न मारयति। कफान्वितं कफेन मन्दीकृतौष्ण्यादिगुणम्। वर्षगुणानुबन्धि कफेनामेनान्यादीत्यनाक्षिरमास्थायि। भिन्नपुरीषवर्च्चः भिन्नपुरीषो द्रुतमलः भिन्नवर्च्चश्च। विचेष्टमानो विरुद्धा चेष्टा कुर्वन् मूर्च्छादीन् व्याधीन् लभते॥*॥ स्थावरविशेषस्थिते दूषीविषे लिङ्गविशेषमाह।

"आमाशयस्थे कफवातरोगौ
पक्वाशयस्थेऽनिलपित्तरोगौ।
भवेत् ससुङ्मांसगिरोऽङ्गरुट्को
विलूनपक्षश्च यथा विहङ्गः।"

ससुङ्मांसगिरोरुहः केशाः अङ्गरुहाश्च रोमाणि यस्य सः। एतदपि लिङ्गं पक्वाशयस्थे दूषीविषे बोद्धव्यम्। स्थिरं रसादिव्यं तदूषयोक्तान् करोति धातुप्रभवान् विकारान्। तत् दूषीविषम्। यथोक्तान् सुश्रुते व्याधिसमुद्देशीयोक्तान्। *। दूषीविषस्य प्रकोपसमयमाह।

"कोपस्तु शीतानिलदुर्दिनेषु
आद्यासु पूर्वं ग्रसते तस्य रूपम्।"*।

कुपितस्य तस्य दूषीविषस्य पूर्वरूपमाह।

"निद्रागुरुत्वं विजृम्भणञ्च
विश्लेषहर्षावयवाङ्गमर्दः।"

विश्लेषः गात्रशैथिल्यम्। हर्षः रोमाञ्चः। *। रूपमाह।

"ततः करोत्यन्नमदाविपाका-
वरोचकं मण्डलकोटजञ्च।
मांसक्षयं पाणिपदास्यशोथं
मूर्च्छां तथा कृच्छ्रमथातिसारम्।"

दूषीविषं श्वासज्वरौ ज्वरांश्च कुर्यात् प्रकृद्धि जठरस्य चापि। अन्नमदः अन्ने भुक्ते पुरुषस्येव मदः अविपाकः। *। अन्नस्य दूषीविषभेदेन विकारभेदमाह।

"उन्मादमन्यज्जनयेत्तथान्य-
दानाहमन्यत् क्षपयेच्च शुक्रम्।
गाढ़गुदत्वमन्यज्जनयेच्च कुष्ठं
तांस्तान् विकारांश्च बहुप्रकारान्।"

अन्यत् दूषीविषम्। तांस्तान् विकारान् विसर्पविस्फोटादीन्। *। दूषीविषस्य निरुक्तिमाह।

"दूषितं देशकालान्नं दिवास्वप्नैरभोक्तृभिः।
यस्मात् संदूषयेद्धातुं तस्मात् दूषीविषं स्मृतम्।"

देशः अनूपादिः। कालो दुर्दिनादिः। अन्नं कुलत्थतिलमसुरादि। धातुदूषकत्वाद्दूषीविषम्। *। दूषीविषस्य साध्यत्वादिकमाह।

"साध्यमाशुवतः सद्यो याप्यं संवत्सरोषितम्।
दूषीविषमसाध्यं स्यात् क्षीणस्याहितसेविनः।"

लूचिमं विषं द्विविधम्। एकं सविषं दूषीविषसंज्ञम्। अपरमविषं तदेव गरसंज्ञम्। तथा च काश्यपसंहितायाम्।

"संयोगजञ्च द्विविधं द्वितीयं विषमुच्यते।
दूषीविषन्तु सविषमविषं गर उच्यते।"

संयोगजं लूचिमं विषम्। द्वितीयं स्वाभाविकात्। तच्च द्विविधम्। *। तत्र दूषीविषमभिधाय गरं दर्शयितुमाह।

"सौभाग्यार्थं स्त्रियः खेदरजोगात्राङ्गजान् मलान्।
शत्रुप्रयुक्तांश्च गरान् प्रयच्छन्त्यन्नमिश्रितान्।"*

गरकार्यमाह।

"तैः स्यात् पाण्डुग्रहोऽप्यश्मिर्ज्वरश्चास्योपजायते।
मर्मप्रधमनाभानं हृत्तयोः शोथसम्भवः॥
जठरं यकृच्छोथो यच्मा गुल्मः क्षयो ज्वरः।
एवंविधस्य चान्यस्य व्याधेर्लिङ्गञ्च जायते॥"

तैर्गरैः खेतरजःप्रभृतिभिः। ज्वरश्चास्योपजायत इति व्यपदेशात्। मर्मप्रधमनं मर्मव्यथाम्। क्षयो धातुक्षयः। *। लूतानां जन्तुविशेषाणामुत्पत्तिं संख्यामाह।

"यस्मात्कृतं लूतं प्राप्ता सुतैः प्रस्वेदबिन्दवः।
तेभ्यो जातास्ततो लूता इति ख्यातास्तु षोड़श।"

तत्र सुश्रुतः।

"विश्वामित्रो नृपवरः कदाचिद्वनमागतः।
वसिष्ठं कोपयामास गत्वाश्रमपदं किल॥
कुपितस्य मुनेस्तस्य ललाटात् स्वेदबिन्दवः।
अपतन्दर्शनादेव क्षुधत्तास्तीव्रवर्चसः।
क्षुत्ते क्षुधे मक्षयेत्तु धेन्वर्थे सम्भृतेऽपि च॥
ततो जातास्त्रिमे घोरा नानारूपा महाविषाः।
तासामष्टौ कक्षसाध्या वर्ण्यन्ते नाम एव हि॥
तत्र क्षुद्रमण्डलाप्रभृतयोऽष्टौ कक्षसाध्याः। सौवर्ष्टिकाप्रभृतयोऽष्टावसाध्याः॥*। तासां सामान्यानां दंशलक्षणमाह।

"साभिदष्टे दंशकोष्ठः प्रदृप्तिः क्षतजस्य च।
ज्वरो दाहोऽतिसारश्च मदाः क्षुच्च त्रिदोषजाः॥
पिड़का विविधाकारा मण्डलानि महान्ति च।
शोथो महान्तो भ्रष्टवो रक्ताः श्यावाश्चलास्तथा॥
सामान्यं सर्वलूतानामेतद्दंशस्य लक्षणम्।"

दंशकोष्ठः दंशमध्ये पूतिभावः।

"दंशमध्ये तु यत् क्षतं श्यावं वा आशमाहतम्।
दग्धातीव भृशं पाकं क्लेदशोथज्वरान्वितम्।
दूषीविषाभिलूतानामिदं दष्टमिति निर्दिशेत्।"

सौवर्ष्टिकादयोऽष्टावसाध्याः प्राणहरास्तासां लक्षणमाह।

"शोथः श्वेता सिता रक्ता पीता वः पिड़का ज्वरः।
प्राणान्तिको भवेद्दाहः श्वासहिक्का शिरोग्रहः॥"

आखुदूषीविषलक्षणमाह।

"आदंशाच्छोणितं पाण्डुमण्डलानि ज्वरोऽरुचिः।
लोमहर्षश्च दाहश्चाप्याखुदूषीविषार्दिते॥"

प्राणहरमूषकविषकार्यमाह।

"मूर्च्छाङ्गशोथवैवर्ण्यं क्लेदशब्दाश्रुतिज्वराः।
शिरोगुरुत्वं लालाश्च कृच्छ्रं श्वासाश्मूषकात्।"

अङ्गशोथोऽत्र मूषकाकारो बोद्धव्य इति तन्त्रान्तरे। *। ककलासदष्टस्य लक्षणमाह।

"शोथस्य कार्श्यमथवा नानावर्णत्वमेव च।
मोहोऽथ वर्चसो भेदो दष्टस्य ककलासकैः॥"

दृष्टिकविषस्य लक्षणमाह।

"दष्टश्चिरिवादौ च भिनत्तीवोर्ध्वमाशु च।
दृष्टिकस्य विषं याति प्रश्वात् दंशोऽवतिष्ठते॥"

असाध्यदृष्टिकदष्टस्य लक्षणमाह।

"दष्टोऽसाध्यैस्तु हृद्घ्राणरसनोपहतो नरः।
मांसैः पतद्भिरत्यर्थं वेदनार्तो जहात्यसून्॥"

असाध्यैर्दृष्टिकैस्तेषामेवानुवृत्तेः। हृदादिषूपहतः हृदादिकार्यरहितो भवति। अत्यर्थं वेदनार्त इत्यन्वयः। कणभदष्टस्य लक्षणमाह।

"विसर्पः श्वयथुः शूलं ज्वरश्छर्दिरथापि च।
लक्षणं कणभैर्दष्टे दंशश्चैवावगूर्यते।"

कणभः कीटविशेषः। उचिटङ्गदष्टस्य लक्षणमाह।

"क्षणरोमोचिटङ्गेन लक्ष्यलिङ्गो भृशार्तिमान्।
दष्टः शीतोदकेनेव सिक्तान्यङ्गानि मन्यते।"

क्षणरोमा अधिकतरक्षणरोमा। उचिटङ्गकीटाकीटविशेषः। *। सविषमक्षूकदष्टस्य लक्षणमाह।

"एकदंष्ट्रार्दितः शूनः सरुजः पीतकः सटट्।
सनिद्रश्छर्दिमान् दष्टो मक्षूकैः सविषैर्भवेत्।"

एकदंष्ट्रार्दितः स्वभावादेकयैव दंष्ट्रया दष्टो भवति। *। मत्स्यविषस्य कार्यमाह।

"मत्स्यास्तु सविषाः कुर्युर्दाहं शोथं रुजं तथा।"

जलौकोविषकार्यमाह।

"कण्डूशोथं ज्वरं मूर्च्छां सविषास्तु जलौकसः।"

कुर्युरिति शेषः। *। गृहगोधिकाविषकार्यलक्षणमाह।

"विदाहं श्वयथुं तोदं प्रस्वेदं गृहगोधिकाः।"

कुर्युः। इति शेषः।*। शुतपदीविषकार्यमाह।

"दंशे खेदं रुजं दाहं कुर्यात् शुतपदीविषम्।"

शुतपदी झिल्लिका इति लोके।*। मशकविषकार्यमाह।

"कण्डूमान् मशकैरीषच्छोथः स्याच्छ्वेदनः।"

असाध्यमशकलक्षणमाह।

"असाध्यकीटसदृशमसाध्यं मशकैश्चतम्।"

असाध्यकीटसदृशं असाध्यैः कीटैर्लूताभिः क्षतं यत् क्षतं तत्सदृशवेदनम्। *। मक्षिकादंशस्य लक्षणमाह।

"सद्यःसंस्राविणो श्यावा दाहमूर्च्छाज्वरान्विता।
पिड़का मक्षिकादंशे तासामुत्स्यन्दिकाशुकृत्।"

तासामित्यादि। तासां सुश्रुतोक्तानां षण्णां मक्षिकाणां मध्ये स्यन्दिकानाम्नी शीघ्रं प्राणं हरतीत्यर्थः। व्याघ्रादिविषाणां कार्यमाह।

"चतुष्पाद्विद्विपाद्भिर्वा नखैर्दन्तैश्च यत् क्षतम्।
स्रवते पच्यते तत्तु स्रवते ज्वरयत्यपि।"

चतुष्पाद्भिर्व्याघ्रादिभिः। द्विपाद्भिर्वनमानुषादिभिः। स्रवते स्रवं भवति।*। विषोज्झितस्य लक्षणमाह।

"प्रसन्नदोष प्रकृतिस्थधातु-
मन्नाभिकामं समसूचविट्कम्।
प्रसन्नवर्णेन्द्रियचित्तचेष्टं
वैद्योऽवगच्छेदविषं मनुष्यम्।"

प्रसन्नदोषं प्रकृतिस्थदोषं श्रेष्ठं सुनयम्। *।

अथ विषाणां चिकित्सा। तत्र स्थावरविषस्य चिकित्सा।
"स्थावरेण विषेणार्त्तनरं यत्नेन वामयेत्।
वमनेन समं नास्ति यतस्तस्य चिकित्सितम्॥
विषमत्यर्थसुक्ष्मत्वात् तीक्ष्णत्वात् क्षपितं यतः।
अतः सर्व्वविषे युक्तः परिषेकस्तु शीतलः॥
औषधान्नेक्षणाद्यैश्च विषं पित्तं प्रकोपयेत्।
वामितं सेचयेत्तस्माच्छीतलेन जलेन च॥
पाययेन्मधुसर्पिर्भ्यां विषघ्नं भेषजं हितम्।
भोक्तुमन्नं रसं दद्यात् चर्व्वयेन्नरिचानि च॥
यस्य यस्य च दोषस्य पश्येल्लिङ्गानि भूरिशः।
तस्य तस्यौषधैः कुर्य्यादिपरीतगुणैः क्रियाम्॥
शालयः षष्टिकाश्चैव कोरदूषाः प्रियङ्गवः।
भोजनार्थे विषार्त्तानां हिताः पटुरसैर्यवम्।"
प्रियङ्गुः कङ्गुः।
"मूलत्वक्पत्रपुष्पाणि बीजश्चेति गिरीषतः।
सर्वं मूत्रेण संपिष्टं लेपाद्विषहरं भवेत्॥
दूषीविषार्त्तैः सुस्निग्धमूर्द्धं चाधश्च शोधितम्।
पाययेदगदं सुखमिदं दूषीविषापहम्॥
पिप्पलीश्यामकं मांसी लोध्रमेला सुवर्चिका।
मरिचं बालकं चैला तथा कनकगैरिकम्॥
चौद्रयुक्तः कषायोऽयं दूषीविषमपोहति।"
श्यामकं रोहिषम्। तदलाभे उशीरं देयम्।
कनकगैरिकं सोनागेरू इति लोके। अत्यन्तमारक्तम्॥ अथ जङ्गमविषस्य चिकित्सा।
"अभयां रोधनां कुष्ठमर्कपुष्पं तथोत्पलम्।
बलवेतसमूलानि गरलं सुरसा तथा॥
सकपित्थं समञ्जिष्ठामनन्ताञ्च घृतावरीम्।
शङ्खाटकं समङ्गाञ्च पद्मकेशरमित्यपि॥
कल्कीकृत्य पचेत् सर्पिः पयो दद्याच्चतुर्गुणम्।
सम्यक्पक्वेऽवतीर्णे च शीते तस्मिन् विनिःक्षिपेत्॥
सर्पिस्तुल्यं भिषक् चौद्रं क्षतरक्षं विधापयेत्।
विषाणि हन्ति दुर्गाणि गरदोषहतानि च॥
आघ्राणान्हन्ति विषं सर्व्वं गरैरुपहितं लघाम्।
योगजन्तमकं कल्कं मांसवादं विसंज्ञताम्॥
नाशयत्यञ्जनाभ्यङ्गपानवस्तिषु योजितम्।
सर्पकीटाखुलूतादिदष्टानां विषहृत् परम्॥"
स्वल्पपाठश्छेदि हृतम्॥
"धुस्तूरस्य शिफां पेया चीरेण परिपीडिता।
अङ्कोटवर्षभा चापि सविषघ्नी प्रयत्नतः॥
रजनीद्वयपत्तङ्गमञ्जिष्ठानागकेशरैः।
घृतामधुभिरालेपः सद्यो मूतां विनाशयेत्॥
चीरकस्य क्षतः कल्को घृतसैन्धवसंयुतः।
सुखोष्णो मधुना लेपो वृश्चिकस्य विषं हरेत्॥
मन्थमाप्राय सुदितद्वयीवर्षाभूदलस्य तु।
वृश्चिकेन नरो विद्धः सद्यो भवति निर्व्विषः॥"
इति विषाधिकारः। इति भावप्रकाशः॥

पारिभाषिकविषा यथा,—
"न विषं विषमित्याहुरगदं विषमुच्यते।
देशकालापि यत्नेन सदा परिहरेत्ततः॥"
इति कौर्म्मे उपविभागे १५ अध्यायः।

अपि च।
"दुरधीता विषं विद्या अजीर्णे भोजनं विषम्।
विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम्॥
विषं चंक्रमणं रात्रौ विषं राज्ञोऽनुकूलता।
विषं स्त्रियोऽप्यसद्वृत्ता विषं व्याधिरवौचिनः॥"
इति चागस्त्यम्॥

विषकण्टकिनी, स्त्री, (विषयुक्तः कण्टकोऽस्या अस्तीति। इनिः। ङीष्।) वन्ध्याकर्कोटकी। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—
"वन्ध्याकर्कोटकी देवी कन्यायोगीश्वरीति च।
नागारिनक्रदमनी विषकण्टकिनी तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

विषकन्दः, पुं, (विषयुक्तः कन्दो यस्य।) नीलकन्दः। इति राजनिर्घण्टः॥

विषघा, स्त्री, गुडूची। इति शब्दचन्द्रिका॥

विषघातो, [न्] पुं, (विषं हन्तीति। हन+णिनिः।) शिरीषवृक्षः। इति शब्दमाला॥ विषनाशके, त्रि॥

विषघ्नः, पुं, (विषं हन्तीति। हन+टक्।) शिरीषवृक्षः। इति शब्दचन्द्रिका॥ यवासः। विभीतकः। इति राजनिर्घण्टः॥ चम्पकवृक्षः। इति शब्दार्णवः॥ विषनाशके, त्रि॥ (यथा, मनुः। ७। २१८।
"विषघ्नैरगदैश्चास्य सर्व्वद्रव्याणि योजयेत्।
विषघ्नानि च रत्नानि नियतो धारयेत् सदा॥")

विषघ्नौषधानि यथा,—
मनुरुवाच।
"रक्षोघ्नानि विषघ्नानि यानि धार्य्याणि भूभुजा।
अगदादि समाचक्ष्व तानि धर्म्मभृतांवर॥"
मत्स्य उवाच।
विश्वाढ्यकायवचारं पाटला वाडिकोषजा।
श्रीपर्णी शुक्लकोशुक्ला निष्काथ्य प्रोक्षयं परम्।
सविषं प्रोक्षितं तेन सद्यो भवति निर्व्विषम्॥१॥
यवसैन्धवपानीयवस्त्रग्व्यासनोदनम्।
कवचाभरणं छत्रं बालव्यजनवेश्मनी॥
श्वेतुः पाटल्यतिविषा मोपी भार्गी पुनर्नवा।
समङ्गाद्वयमूलत्वक्कपित्थवृषबोधितम्।
सहदन्तशठन्तदत् प्रोक्षयं विषनाशनम्॥२॥
लाक्षा प्रियङ्गु मञ्जिष्ठा समभेला हरेणुका।
सयष्ट्या मधुना युक्ता वभुपित्तेन कल्किता॥
लिखनेद्गोविषाक्रान्तं सप्तरात्रं महीतले।
ततः क्षता मक्षिं क्षेत्रा वहं हस्तेन धारयेत्।
संस्पृष्टं सविषस्तेन सद्यो भवति निर्व्विषम्॥३॥
मधौ जलं ग्रमोपुष्पं दुर्ब्बा चैव कर्षकाः।
कपित्थकुष्ठमञ्जिष्ठाः पित्तेन शृङ्गाक्लिताः॥
शुनो गोः कपिलायाश्च सौम्याक्षोयापरोऽगदः।
विषजित् परमं कार्यं मणिरत्नञ्च पूर्व्ववत्।
सूर्यिका जतुका वापि हस्ते बद्धा दिवाकरा॥४॥
हरेणु मांसी मञ्जिष्ठा रजनी मधुका मधु।
अजलक् सुरसं लाक्षामुपित्तं पूर्व्ववद्भवि॥
वादित्राणि पताकाश्च पिष्टैरेतैः प्रलेपिताः।
श्रुत्वा हृष्टाय चाप्राय सद्यो भवति निर्व्विषः॥५

शुक्लपर्णं पद्मजवं मञ्जिष्ठा रजनीद्वयम्।
लक्ष्मणा चित्रतापत्रं विडङ्गमिक्ष्वाकवी॥
मधुकं वेतसं चौद्रं गोविषाग्ने निधापयेत्।
तस्मादुद्धाम्रया मात्रा प्रागुक्तं योजयेत्तथा।
विषं शुक्रं जारयति निर्व्विषेऽपि न दोषकृत्॥६॥
सक्तुं सर्ज्जरसोपेतं सर्पपा एलवालुकैः।
सुवर्णा तस्करतरोः कुसुमैरर्ज्जुनस्य तु॥
धूपो वाससृहे हन्ति विषं स्थावरजङ्गमम्।
न तत्र कीटाः सविषा न दृश्यंसरीसृपाः।
न क्षता कर्म्मजस्तत्र धूपोऽयं यत्र दृश्यते॥७॥
कल्कितैश्च क्षणैर्मूलाग्रहृद्भवल्कजैः।
दूर्व्वैलवालुसुरसानाकुलीतरुकीयकैः।
क्षायः सर्व्वैदकार्य्येषु काकमाचीयुतैर्हितः॥८॥
रोधनापत्रनेपालीकुङ्कुमैस्त्रिलकोऽन्वहम्।
विषेण बाध्यते स्नाच नरनारीवृषप्रियः॥९॥
पर्व्वैर्हरिद्रामञ्जिष्ठाकिणिहीकणनिम्बजैः।
दिग्धं निर्व्विषतामेति गात्रं सर्व्वविषार्दितम्॥१०॥
शिरीषस्य फलं पत्रं पुष्पं त्वङ्मूलमेव च।
गोमूत्रपेषो व्रणगः सर्व्वकर्म्मकरः स्मृतः॥११॥
एकवीरमहौषध्यः श्रेष्ठा ज्ञाताः परं द्विज।
वन्ध्याकर्कोटकी राजन् विष्णुक्रान्ता तथोत्कटा।
श्वेतमूली श्वेतानन्दी बला मोचा पटोलिका॥
सोमा सिन्धुनिशा चैव तथा दग्धरुहा च या।
स्थले कमलिनी या च विशाली गृहधूमिका॥
षष्ठाली हस्तिषष्ठाली गोषष्ठाली च गन्धिका।
रक्ता चैव महारक्ता तथा वह्निशिखा च या।
कोशातकी नक्तमाला प्रियाला शुभलक्षणा।
वारुणी च सुगन्धा च तथा वै गन्धनाकुली॥
ईश्वरी च शिलीन्ध्री च सोमवल्ली वंशपत्रिका।
जतुकाली महाश्वेता श्वेता च मधुयष्टिका॥
वर्जटः पारिभद्रश्च तथा वै सिन्धुवारिका।
जीवनन्दा वसुमती नर्म्मनागरकण्टकी॥
ताम्रता जालयातोला तथा च वटपत्रिका।
कार्म्मुकी महानीला कट्फलं हंसपादिका॥
मण्डूकपर्णी वाराही हे तथा तण्डुलीयके।
सर्पाक्षी लवणा ब्राह्मी विश्वरूपा सुखङ्करी॥
रजापहा वृद्धिकरी तथा शुक्लापहा च या।
पत्रिका रोहिणी चैव रक्तमाला महौषधी॥
तथामलकवन्दाकं या च चित्रा पटोलिका।
काकोली क्षीरकाकोली पीलुपर्णी तथैव च॥
केशिनी वृश्चिकाली च महानागा घृतावरी।
तथा गरुडवेगा च स्थले कुसुदिनी तथा॥
स्थले पोत्पलिनी या च महाभूमिलता च या।
उन्मादिनी सोमराजी सर्व्वरत्नानि यानि च॥
विशेषान्मरकतान्यत्र कीटपत्रं विशेषतः।
जीवजाताश्च मण्यः सर्व्वे धार्य्या विशेषतः॥१०॥
रक्षोघ्नाश्च यशस्याश्च ज्ञात्वा वेतालनाशनाः।
विशेषान्नरनागाश्च गोखरोष्ट्रवधूद्भवाः॥
सर्पतित्तिरिगोमायुवभुमद्गूकजाश्च ये।
सिंहव्याघ्रर्क्षमार्ज्जारदीपिवानरसम्भवाः॥
कपिञ्जलाजगोधाहिमहिषेषु भवाश्च ये।

इत्येषमेतैः सकलैरुपेते-
र्द्वेषेण सर्वैः खपुरं सुरक्षितम्।
राजा वसेत्तत्र गृहञ्च शुभ्रं
गुणान्वितं लक्षणसंप्रयुक्तम्॥"
इति मात्स्ये १९२ अध्यायः॥
(तण्डुलीयः। तत्पर्य्यायो यथा। अथ च वराहः। अस्यमरुश इति च।
"तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः।
भण्डीरस्तण्डुलीनोऽयं विषघ्नश्चाल्पमारिषः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
विषघ्नी, स्त्री, (विषं हन्ति या। हन+टक्। स्त्रियां ङीप्।) हिलमोचिका। इति त्रिकाण्डशेषः॥ (अस्याः पर्य्यायो यथा,—
"मारी विषघ्नी मत्स्याक्षी चक्राङ्गी हिल-
मोचिका॥"
इति वैद्यकरत्नमालायाम्॥)
इन्द्रवारुणी। वनवल्लरिका। खल्पफला। भूम्यामलकी। रक्तपुनर्नवा। हरिद्रा। दृष्टिकाली। (अस्याः पर्य्यायो यथा,—
"दृष्टौषधी दृष्टिकाली विषघ्नी नागदन्तिका।
सर्पदंष्ट्रामराकाली चोदुधूपर्णिका॥"
इति वैद्यकरत्नमालायाम्॥)
महाकरञ्जः। इति राजनिर्घण्टः॥ (दुष्टुधा। तत्पर्य्यायो यथा,—
"दुष्टुधा पुण्यवल्ली च परात्मत्यफला मता।
मत्स्यगन्धा श्रीदुष्टी विषघ्नी व्याङ्गनाग्निनी॥"
देवदाली। तत्पर्य्यायो यथा,—
"देवदाली तु वेणी स्यात् कर्कटी च गरागरी।
देवताडी दृष्टकोशस्तथा जीमूत इत्यपि।
पीतापरा खरस्पर्शा विषघ्नी गरनाशिनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
विषजिद्भः, पुं, देवताड़वृक्षः। इति रत्नमाला।
विषज्वरः, पुं, (विषवत् प्राणनाशको ज्वरो यस्य।) महिषः। इति शब्दरत्नावली। विषज्वरघ्नः।
विषटं, क्ली, ग्वालम्। इति शब्दरत्नावली॥
विषण्णः, त्रि, (वि+षद+क्तः।) विषादप्राप्तः। यथा,—
"इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम्।
विवत्सा भयसङ्कल्पा चिन्तामापुर्दुरत्ययाम्॥"
इति श्रीभागवते १० स्कन्धे २८ अध्यायः॥
विषण्णता, स्त्री, (विषण्णस्य भावः। तल्।) अवृता। यथा,—
"आर्द्यं मौर्ख्यं विषादोऽवसादः सादो विष-
ण्णता॥"
इति हेमचन्द्रः॥
विषतिन्दुः, पुं, कारस्करवृक्षः। इति राजनिर्घण्टः॥ कुपीलुः। इति भावप्रकाशः॥
विषदं, क्ली, (विषं ददातीति। दा+कः।) पुष्पकासीसम्। इति राजनिर्घण्टः॥ शुक्लवर्ब्बे, पुं। इत्यमरटीका॥ (निर्म्मले प्रसन्ने च त्रि। यथा, रघुः। १०। १४।
"योगनिद्रान्तविशदैः पावनैरवलोकनैः॥")
विषदंष्ट्रा, स्त्री, (विषं दंष्ट्रायां यस्याः।) सर्पकङ्काली। इति रत्नमाला॥
विषदन्तकः, पुं, (विषं दन्ते यस्य। कन्।) सर्पः। इति शब्दचन्द्रिका॥
विषदर्शनमृत्युकः, पुं, (विषदर्शने मृत्युर्यस्य। कन्।) चकोरपक्षी। इति हेमचन्द्रः॥
विषद्रुमः, पुं, (विषयुक्तो द्रुमः।) कारस्करवृक्षः। इति राजनिर्घण्टः॥
विषधरः, पुं, (धरतीति। धृ+अच्। विषस्य धरः।) सर्पः। इत्यमरः॥ (यथा, गीतगोविन्दे। १। १६।
"कालियविषधरगञ्जनजनरञ्जन॥"
स्त्रियां विषधरी। यथाह कश्चित्।
"धावद्घोरविभावरी विषधरीभोगस्य भौमो
मणिः॥")
विषधर्म्मा, स्त्री, कुलत्थया। इति शब्दचन्द्रिका॥ आलकुशी इति भाषा॥
विषधात्री, स्त्री, (विषाणां विषधरसर्पाणां धात्री मातेव।) जरत्कारुमुनिपत्नी। इति शब्दमाला॥
विषनाशनः, पुं, (विषं नाशयति। ल्युः।) शिरीषवृक्षः। इति हारावली॥ विषनाशके, त्रि॥
विषनाशिनी, स्त्री, (विषं नाशयतीति। नाशि+णिनिः।) सर्पकङ्काली। इति शब्दचन्द्रिका॥ (अथ राजा भेदनाह इति लोके। तत्पर्य्यायो यथा,—
"नाकुली सरसा नागसुगन्धा गन्धनाकुली।
नकुलेष्टा सुगन्धाढ्या सर्पाक्षी विषनाशिनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
विषनुत्, पुं, (विषं नुदति दूरीकरोति। नुद+क्विप्।) श्लोवांकवृक्षः। इति शब्दचन्द्रिका॥
विषपुष्पं, क्ली, नीलपद्मम्। इति शब्दमाला॥ विषयुक्तपुष्पञ्च॥
विषपुष्पः, पुं, (विषयुक्तं पुष्पं यस्य।) कदंबवृक्षः। इति रत्नमाला॥ मनपसल इति भाषा॥
विषपुष्पकः, पुं, (विषयुक्तं पुष्पं यस्य बहुव्रीहौ कन्।) मदनवृक्षः। इति भावप्रकाशः॥ विषपुष्पभक्षजन्यरोगः। इति केचित्॥
विषभिषक्, [ज्] पुं, (विषस्य विषचिकित्सको वा भिषक्।) विषवैद्यः। इति हेमचन्द्रः॥
विषमुञ्जः, पुं, विषयुक्तसर्पः। इति केचित्॥
विषमं, त्रि, असमानम्। यथा, मनुः।
"भ्रातॄणामविभक्तानां यद्युत्थानं भवेत् सह।
न तत्र भागं विषमं पिता दद्यात् कथञ्चन॥"
इति दायतत्त्वम्॥
(सङ्कटः। यथा, गीतायाम्। २। २।
"कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्॥"
अगतिक्रमणीयः। यथा, साहित्यदर्पणे। १०।
"का विषमा दैवगतिः किं दुर्व्वापं जनः खलो
लोके॥")
विषमं, क्ली, पद्यस्य त्रिविधवृत्तान्तर्गतवृत्तविशेषः। यथा,—
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्॥
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः॥
आदिस्तृतीयवद्यस्य पादस्तूर्य्यो द्वितीयवत्।
भिन्नच्छिन्नचतुष्पादं विषमं परिकीर्त्तितम्॥"
इति छन्दोमञ्जर्य्यां प्रथमस्तबकः॥
वर्णभूलोलोर्द्धरेखा। यथा,—
"व्यक्तान्याद्यिषमात् ज्ञातिं द्विगुणयेन्मूलं समे तद्धृते
व्यक्ता लक्षजातिस्तदाद्यविषमाल्लक्ष्यं द्विनिघ्नं न्यसेत्।
षड्क्यां षड्क्षिहृते समेऽन्यविषमात् व्यक्ताग्रवर्गं फलं
षड्क्यान्तद्विगुणं न्यसेदिति मुहुः षड्क्तेर्दलं स्यात् पदम्॥"
इति लीलावती॥
(अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे। १०।
"यद्वारभ्यस्य वैकल्यं अनर्थस्य च सम्भवः।
विरूपयोः सङ्घटना या च तद्विषमं मतम्॥"
उदाहरणम्।
"क्व वयं तरुवल्कभूषणं
नृपलक्ष्मीः क्व महेन्द्रवन्दिता॥")
विषमः, पुं, अयुग्मराशिः। स तु मेषः मिथुनः सिंहः तुला धनुः कुम्भश्च। यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"
इति ज्योतिस्तत्त्वम्॥
तालविशेषः। यथा, सङ्गीतदामोदरे।
"चतुर्भिधः परिक्षेयस्तालः कङ्कणनामकः।
पूर्णः खञ्जः समश्चैव विषमश्चेव कथ्यते॥
लघुत्वं गुरौ पूर्णे खञ्जे विन्द्वयं गुरुः।
यगयस्तु समे ज्ञेयस्तगणो विषमे भवेत्॥"
(जठराग्निविशेषः। यथा,—
"मन्दक्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः।
विषमो वातजान् रोगान् तीक्ष्णः पित्तसमुद्भवान्॥"
इति वैद्यकरत्निनिचये मन्दाग्न्यधिकारे॥)
विषमच्छदः, पुं, (विषमः अयुग्मः छदो यस्य।) सप्तच्छदवृक्षः। इत्यमरः॥
विषमज्वरः, पुं, (विषमः ज्वरः।) ज्वररोगविशेषः। तस्य निदानकथनपूर्व्वकं संप्राप्तिमाह।
"दोषोऽल्पोऽहितसम्भूतो ज्वरोत्कृष्टस्य वा पुनः।
धातुमन्यतमं प्राप्य करोति विषमज्वरम्॥"
अयमर्थः। ज्वरोत्कृष्टस्य ज्वरेण त्यक्तस्य। सन्निकृष्टं लक्षयमाह। दोषः अल्पः ज्वरसम्भवो ऽल्पोऽपि। विप्रकृष्टं हेतुमाह। अहितमाहारविहारादि तेन सम्भूतः संपूर्णो जातः। अन्यतमं धातुं रसरक्तादिकं प्राप्य दूषयित्वा

पुनः विषमज्वरं करोति। ज्वरोतृहृदस्य वेति वाशब्देनेति बोध्यते। प्रथमतोऽपि विषमज्वरो भवति। यत उक्तम्। आरम्भादिषमो यक्ष्मादिकम्। धातुं दूषयित्वा कं विषमज्वरं करोतीत्यपेक्षायामाह।

"सततं रसरक्तस्थः सततं रक्तधातुगः।
दोषः क्रुद्धो ज्वरं पुंसां सोऽन्येद्युः पित्तसंश्रितः॥
मेदोगतस्तृतीयेऽह्नि अस्थिमज्जगतः पुनः।
कुर्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम्।"

अन्तकं अन्तकमिव भारकत्वात्। * । विषमज्वरस्य सामान्यलक्षणमाह।

"यः स्यादनियतात् कालाच्छीतोष्णाभ्यां तथैव च।
वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः।"

यस्त्वनियतात् कालात् स्यादित्यस्यायमर्थः। यथा, वातिको ज्वरः सप्तदिनानि पैत्तिको दश दिनानि श्लैष्मिको द्वादश दिनानि दोषाणां प्राबल्ये वातिकश्चतुर्दश दिनानि पैत्तिको विंशतिदिनानि श्लैष्मिकश्चतुर्विंशतिदिनानि स्यात् तथा विषमज्वरो नियतं कालं व्याप्य न स्यादित्यर्थः। शीतोष्णाभ्यां गुणाभ्यां स्यात्। "वेगतश्चापि विषमः कदाचिदपि वेगवान्।" कदाचिदपि प्राप्तवेगः। विषमज्वरस्य भेदानाह।

"सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ।"

तत्र सन्ततस्य लक्षणमाह।

"सप्ताहं वा दशाहं वा द्वादशाहमथापि वा।
सन्तत्या योऽविसर्गी स्यात् सन्ततः स विमुच्यते।"

विकल्पो वातिकादिभेदात्। सन्तत्या नैरन्तर्येण अविसर्गी अपरित्यागी। ननु सुश्रुतोक्तमिदं विषमलक्षणं तदत्र न घटत इति कथमयं विषमेषु पठ्यते। घटत एव इति न दोषः। यत उक्तं चरकेण।

"विसर्गं द्वादशे ज्ञात्वा दिवसेऽल्पबलज्वरम्।
दुर्ज्ञेयोपशमः कालं दीर्घमप्यनुवर्तते॥"

यत्तु खरनादः।

"ज्वराः पञ्च च ये प्रोक्ताः पूर्वं सततकादयः।
चत्वारः सन्ततं हित्वा श्रेयान्ते विषमज्वराः॥"

इति। तच्चिरेण त्यागाभिप्रायेण। * । सततलक्षणमाह।

"अहोरात्रे सततको द्वौ कालावनुवर्तते।"

द्वौ कालौ अहन्येककालं रात्रावेककालम्। यतो दोषाणामहोरात्रे प्रत्येकं द्वौ द्वौ प्रकोपकालौ। यत उक्तं वाग्भटेन।

"वयोऽहोरात्रिभुक्तानामन्तमध्यादिका:
क्रमात्।" इति।

अन्येद्युष्कलक्षणमाह।

"अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्तते।"

एककालं दोषापेक्षया एककालमपि द्वितीयं प्रथमकाले इत्येव दोषस्थितेः। * । तृतीयकचतुर्थकयोर्लक्षणमाह।

"तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः।"

तृतीयेऽह्नि इत्यागमनदिनं गृहीत्वा। यत उक्तम्।

"दिनमेकमतिक्रम्य यो भवेत् स तृतीयकः।
दिनद्वयं व्यतिक्रम्य यः स्यात् स हि चतुर्थकः॥"

इति।

अत्राह सुश्रुतः।

"कफस्थानविभागेन यथासंख्यं करोति हि।
सततान्येद्युष्कत्र्याख्यचतुर्थकप्रवेपकान्।
अहोरात्राद्दोरात्रात् स्थानात् स्थानं प्रपद्यते।

दोष आमाशयं प्राप्य करोति विषमज्वरम्।"

अयमर्थः। आमाशययोः कण्ठशिरःसन्धयः पञ्च कफस्थानानि एषु तिष्ठन् दोषो यथासंख्यं सततादीन् करोति। तत्रामाशये स्थितो दोषः सततं करोति द्वौ कालौ अहोरात्रे कालद्वये दोषप्रकोपात्। हृदये स्थितो दोष आमाशयमागत्य अन्येद्युष्कं करोति। एककालं नैकत्र्या-देकस्मिन्नेवाहोरात्रे दोष आमाशयमायाति। तत्र द्वौ दोषकोपकालौ एकस्मिन् काले हृदये तिष्ठत्यपरस्मिन्नामाशय इति। कण्ठे स्थितो दोषोऽहोरात्रात् हृदयमायाति। तृतीये दिने आमाशयमागत्य स्वप्रकोपकाले तृतीयकं ज्वरं करोति एककालं न तु द्वौ कालौ स्वभावात्। एवं शिरःस्थितो दोषोऽहोरात्रात् कण्ठमायाति। ततः पुनरहोरात्राद्धृदयमायाति चतुर्थदिने आमाशयमागत्य स्वप्रकोपकाले चतुर्थकं ज्वरं करोति। एककालं न तु द्वौ कालौ स्वभावादेव। * । ननु दोषस्यागमनक्रमेण निजस्थानगमनक्रमात् कथं तृतीयचतुर्थदिवसयोर्व्यत्यागमनम्। उच्यते। दोषो हि प्रकोपशमये वेगवत्तया लाघवात् स्वस्थानतो वेगादिव याति। यत आह।

"दोषः प्रकोपकाले हि वेगवत्त्वेन लाघवात्;
वेगवानेव एवायं स्वस्थानमभिगच्छति।"

सन्धिषु स्थितः प्रवेपं करोति। सन्ध्यपक्षामाशयेऽपि सन्धिषु स्थितः प्रवेपकं सर्वदा करोति। * ।

"निहतः पुनरायाति विषमो नियते दिने।
स्वभावं कारणं तत्र मन्यन्ते मुनिपुङ्गवाः।"

स्वभावस्य कारणत्वे कफस्थानविभागनिरपेक्षा-चतुर्थकादिविपर्यया अपि ज्वराः स्वस्य काले भवन्ति।

"अधिशेते यथा भूमिं बीजं काले प्ररोहति।
अधिशेते तथा धातून्दोषः काले प्रकुप्यति।"

सुश्रुतोऽप्याह।

"स चापि विषमो देहं न कदाचित् प्रमुञ्चति।
ग्लानिर्गौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते।
वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते।
धातूनारक्षो बीजत्वात् सौम्याग्नेरुपलभ्यते।"

द्विदोषोल्बणस्य तृतीयकस्य लक्षणमाह।

"कफपित्तात्मिकयाहो रूक्षाहारतकफात्मकः।
वातपित्तात्मिरोयाहो त्रिविधः स्यात्तृतीयकः।"

त्रिकयाहो वेदनया त्रिकं ग्रहाति इत्यर्थः। *। ननु कफपित्तात्मिकयाहो वेदनया त्रिकयायो त्रिकस्य वातस्थानं तत्क्षयं तद्ग्रहौ तौ पित्तकफौ अन्यस्थानगतेन दुर्बलेन दुर्बलौ वेगं कुरुते। उच्यते दोषाणां स्थानियमः न तु कुपितानाम्। तथा च सुश्रुतः।

"कुपितानां हि दोषाणां शरीरे परिधावताम्।
यत्र सङ्गः स वैगुण्याद्व्याधित्वेनोपजायते।"

एवं अन्यस्थानगतेन चतुर्थकोऽपि वाच्यम्। वातकफात्मकः पृष्ठात् यथया पृष्ठं व्याप्य भवति इत्यर्थः। यत्लोमकर्मण्यधिकरणे चेति सूत्रेण पञ्चमी। * । कफोल्बणस्य वातोल्बणस्य च चतुर्थकस्य लक्षणमाह।

"चतुर्थको दूषयति स्वभावं द्विविधं ज्वरः।
जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरसोऽनिलसंभवः।"

श्लैष्मिकः श्लेष्मोल्बणः तथा अनिलसंभवः वातोल्बणः। सन्ततादीनां त्रिदोषजत्वात्। उक्तञ्च चरकेण।

"प्रायशः सन्निपातेन पञ्च स्युर्विषमज्वराः।"

इति।

प्रायशो ग्रहणादेकदोषजाः द्विदोषजा अपि न भवन्ति इति जेज्जटः। पूर्वं प्रथमं जङ्घाभ्यां यथया जङ्घे व्याप्य पश्चात् सकलं शरीरं व्याप्नोति। एवमुल्बणवातजातः शिरसः पूर्वं यथया शिरो व्याप्य सकलं शरीरं व्याप्नोतीत्यर्थः।

"विषमज्वर एवान्यश्चतुर्थकविपर्ययः।
अस्थिमज्जगतो दोषश्चतुर्थकविपर्ययः।"

अन्यः सन्ततादिपञ्चकादपरश्चतुर्थकविपर्ययाख्यो ज्वरः सोऽपि विषमज्वर एव। स किंधातुस्थ इत्यपेक्षायामाह अस्थीत्यादि। तस्य चतुर्थकविपर्ययस्य लक्षणमाह।

"स मध्ये ज्वरयत्यन्ते च विमुञ्चति।"

चतुर्थकविपर्यय इत्युपलक्षणम्। सततादिविपर्ययोऽपि बोद्धव्यः। यथा, अहोरात्रे द्वौ कालौ मुञ्चति श्रेयं सर्वमहोरात्रं तिष्ठतीति सततविपर्ययः। अहोरात्रे एकं कालं मुञ्चति श्रेयं सर्वमहोरात्रं तिष्ठति इत्यन्येद्युष्कविपर्ययः। मध्ये एकं दिनं ज्वरयति आदावन्ते च दिने मुञ्चति इति तृतीयकविपर्ययः। एते विषमज्वरा उपलक्षकाः अन्ये राविन्ध्यरादयोऽपि विषमज्वरा बोद्धव्याः। यथा,—

"समौ वातकफौ यस्य शौचपित्तस्य देहिनः।
रात्रौ प्रायो ज्वरस्तस्य दिवा हीनकफस्यतु।"

प्रायो बाहुल्येन। * । सन्ततादीनां शीतपूर्वत्वे दाहपूर्वत्वे च हेतुमाह।

"लक्ष्यौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरम्।
तयोः प्रशान्तयोः पित्तमन्तर्दाहं करोति च।"

शीतं शीतसहितं प्रशान्तयोः प्रशान्तवेगयोः।

अन्तः अभ्यन्तरे ।
"करीत्यादौ तथा पित्तं लक्ष्यं दाहमतीव च ।
तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्तगः ।"
अन्ततः हस्तपादादिनः । * । शीतादिदाहादिज्वरयोस्त्रिदोषजत्वमाह ।
"द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्वस्तयोः कष्टः सुखसाध्यतमोऽपरः ।"
संसर्गजौ सान्निपातिकौ । कष्टः कष्टसाध्यः ।*। विषमज्वरविशेषानाह ।
"विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनार्द्रं शीतलं देहं चार्द्रसुप्तं प्रजायते ।"
अन्नरसे विदग्धे आहारजे रसे दुष्टे श्लेष्मपित्ते च व्यवस्थिते दुष्टे स्थिते तेन हेतुना शीतलं कफेन उष्णं पित्तेन अर्द्रत्वं चार्द्रनारीश्वराकारेण नरसिंहाकारेण वा ।
"काये दुष्टं यदा पित्तं श्लेष्मा चाग्ने व्यवस्थितः ।
तेनोष्णत्वं शरीरस्य शीतलं हस्तपादयोः ।"
अग्ने हस्तपादादौ ।
"काये श्लेष्मा यदा दुष्टः पित्तञ्चाग्ने व्यवस्थितः ।
शीतलं तेन गात्रे स्यादुष्णत्वं हस्तपादयोः ।"
विषमज्वरविशेषस्य प्रवेपकस्य लक्षणमाह ।
"प्रसिध्यन्निव गात्राणि घर्म्मेण गौरवेण च ।
मन्नज्वरविवेपी च सशीतः स्यात् प्रवेपकः ।"
गौरवेण उपलक्षितः । मन्दज्वरविवेपी मन्दवेगस्य ज्वरस्य सदा सम्भवोऽस्तीति मन्दज्वरविवेपी अयं विषमज्वरः । यथाच सुश्रुतः ।
प्रवेपकाख्यो विषमः प्रायः क्लेशाय शीघ्रवामिति । * । अथ विषमज्वराणां सामान्यचिकित्सा ।
"ज्वराश्च विषमाः सर्व्वे सन्निपातसमुद्भवाः ।
अधोक्तस्य दोषस्य तेषु कार्य्यं चिकित्सितम् ।
विषमेष्वथ कर्त्तव्यमूर्द्धं बाधश्च शोधनम् ।
स्निग्धोद्वेजनपानेन श्रमयेद्विषमज्वरम् ।*।
कालिङ्गकः पटोलस्य पत्रं कटुकरोहिणी ।
पटोलं सारिवा मुस्तं पाठा कटुकरोहिणी ।
बिल्वः पटोलस्त्रिफला गुडूची मुस्तवत्सकौ ।
किराततिक्तमञ्जिष्ठा चन्दनं विश्वभेषजम् ।
गुडूच्यामलकं मुस्तमर्द्धश्लोकसमापनाः ।
कषायाः श्रमयन्त्याशु पञ्च पञ्चविधज्वरम् ।"
कालिङ्गकः इन्द्रयवः । वत्सकः कुटजः । चन्दनमत्र रक्तचन्दनम् । कषायाः पञ्च । पञ्चविधं सन्ततसततान्येद्युष्कद्वयीयचतुर्थकरूपम् । * ।
"महावत्सात्मजमहौषधाभ्यां
कायो निहन्यादिषमज्वरं हि ।
शीतं सकम्पं परिदाहयुक्तं
विनाशयेत् दिविदिनं प्रयोगात् ।*।
क्षुदाम्रतानागरपुष्करार्द्रैः
क्षतः कषायः कफमारुतोत्तरे ।
सन्धावकासारुचिपार्श्वरुग्ज्वरे
सदा त्रिदोषप्रभवेऽपि शस्यते ।"*।
क्षुदादि । * ।
"क्षुदाम्रतापद्मकचन्दनेधने-
भूनिम्बपर्पटपटोलपौष्करैः ।
तिक्ताकलिङ्गपिचुमर्दवासकै-
र्महौषधं भार्गिविशुन्नकैः समैः ।
घृतं पिबेत् पूर्व्वदिनं कषायं
निहन्ति दुष्टज्वरसुप्तशीतम् ।
सन्धास्थिशूलारुचिदाहसुप्तत्वं
हृत्पार्श्वबस्तिं कासमतीव शूलकम् ।
प्राणाहिक्कादिषु सन्निपाते
गलग्रहे तन्द्रिशिरोरुहायाम् ।"
दुष्टज्वरादिविषमज्वरे । * ।
"सुस्तामलकगुडूचीविश्वौषधकणट्टकारिकाथः ।
पीतः सकणाचूर्णः समधुर्विषमज्वरं हन्ति ।*।
तिलतैलक्षारयुक्तकल्को लवणसेवितः प्रातः ।
विषमज्वरमपहरते वातश्लेष्माधीनग्रेषांश्च । * ।
कालाजाजी तु सगुडा विषमज्वरनाशिनी ।
मधुनाढ्याभया जीर्णा हन्त्यामुविषमज्वरान् ।"
कालाजाजी मगरैला इति लोके । सा च किञ्चिदभ्रष्टा गुडतुल्या कर्त्तमिता भक्षयेत् ।*
"पीतो मरीचचूर्णेन तुलसीपत्रजो रसः ।
द्रोणपुष्पीभवो वापि निहन्ति विषम-
ज्वरान् । * ।
अन्ततायाः घृतं चूर्णं वासया परिशोधितम् ।
पृथक् षोडशभागाः स्युर्गुडूमार्द्रकपर्पयोः ।
यथाग्नि भक्षयेदेतन्नरो हितमिताशनः ।
नास्य कश्चिद्भवेद्व्याधिर्न जरा पलितं न च ।
न ज्वरो विषमो नैव मेहनाग्निरक्तकम् ।
न च नेत्रगता रोगाः परमेतद्रसायनम् ।
मेधाकरं त्रिदोषघ्नं प्रयोगादस्य बुद्धिमान् ।
जीवदर्षभृतं सार्यं यथैवादितिजस्तथा ।"
गुडूचीकल्कः । * । अथान्नमाह ।
"तक्रमांसं पयोमांसं दधिमांसमथापि वा ।
मात्रयांसञ्च भुञ्जानो मुच्यते विषमज्वरात् ।"*
अथिवैद्यच ।
"सुरा समक्षा पानाय भोजने चरणायुधाः ।
तित्तिरा विष्किराः पथ्याः कुक्कुटा विषमज्वरे ।
चरणायुधा यूथकुक्कुटाः । कुक्कुटा वनकुक्कुटाः ।
विष्किराः वर्त्तिकालावविगिरचकोराद्याः । *।
अथ सन्ततादीनां विशिष्टा चिकित्सा ।
"त्रायन्तीकटुकानन्तासारिवाभिः घृतं जलम् ।
सन्ततार्त्ते ज्वरे देयं वातादीनां निदर्शने ।"
अनन्ता दुरालभा । * ।
"पटोलान्दवितिक्तासारिवाभिः घृतं जलम् ।
सन्ततार्त्ते ज्वरे देयं वातादीनां निदर्शने ।"
इषा दुरालभा एरण्डवत्पत्रविटपा तदलाभे दन्ती च ग्राह्या समागुणत्वात् । * ।
"पटोलेन्द्रयवानन्तापथ्यारिष्टनालजम् ।
क्वथितं तज्जलं पीतं ज्वरं सन्ततकं जयेत् ।"
अनन्ता सारिवा । अरिष्टः निम्बः । जलं वालकम् । * ।
"द्राक्षापटोलनिम्बान्द्रयवक्वाथैश्चिरक्षाहृतम् ।
जलं जन्तुः पिबेत् क्षौद्रमन्येद्युर्ज्वरशान्तये ।"
द्रयवः । * ।
"कर्म्मसाधारणं त्यक्त्वा तृतीयकचतुर्थकौ ।
भिषजा प्रतिकर्त्तव्यौ विशेषोक्तचिकित्सितैः ।
उशीरं चन्दनं मुस्तं गुडूचीधान्यनागरम् ।
अम्भसा क्वथितं पेयं शर्करामधुयोजितम् ।*।
ज्वरे तृतीयके पुंसां तृष्णादाहसमन्विते ।
अपामार्गजटा कल्या लोहिते; सप्तसप्तभिः ।
वहा वारे रवेर्मूर्ध्ने ज्वरं हन्ति तृतीयकम् ।*।
स्थिरातामलकीदारुगुडूचीवृषमहौषधैः ।
सिताममुयुतः क्वाथश्चतुर्थकहरः परः ।"
स्थिरा शालिपर्णी । तामलकी भूम्यात्री । शिवा हरीतकी । वृषो वासा । * ।
"अगस्त्यपत्रस्य रसेन नस्यं
निहन्ति चातुर्थकसप्तवीर्य्यम् ।
शिरीषपुष्पस्य निशाद्वयस्य
कल्केन वा तत्कृतसंयुतेन ।"
तत् नस्यम् । * ।
"ज्वरस्य वेगकालञ्च चिन्तयन् ज्वर्य्यते तु यः ।
तस्येदृङ्मृतेर्व्वापि विषयेणाधियेत् स्मृतिम् ।
सन्ततं विषमञ्चापि चीयस्य सुचिरोत्थितम् ।
ज्वरं सभोजने; पथ्यैर्ज्वरघ्नैः समुपाचरेत् ।"*।
सततादिविपर्य्ययाणां विषमज्वराणां चिकित्सा सततादीनामिव कर्त्तव्या ।
"ग्रीष्माभिभूते पुरुषे क्षुधाच्छीतहरीं क्रियाम् ।
दाहाभिभूते तु विधिं विदध्याद्दाहनाशनम् ।
आच्छादनैरद्भुतैर्गुरुभिः कम्बलादिभिः ।
तूलवत्या महाशीतं शीतादिज्वरिणो हरेत् ।"
तूलवती तुलाई इति लोके ।
"तं स्नानाभ्यां सुपीनाभ्यां पीवरोरुनितम्बिनी ।
युवतिर्गाढमालिङ्ग्य शीतं प्रशाम्यति ।
कान्ताङ्गसङ्गसंजातं तस्य प्रीतेर्निवारिते ।
प्रज्वलं चास्य विज्ञाय पृथक् तां कारयेत्
स्त्रियम् ।
ततो दाहे तु संजाते पत्त्रैरेरण्डसम्भवैः ।
शीतलैर्धारितैर्देहे दाहं तस्यापनोदयेत् ।
तालकं शुक्तिकाचूर्णं तुल्यं तत्रोभयोरपि ।
नवमांसञ्च तुल्यं स्यात् मर्द्दयेत् कन्यकाद्रवैः ।
ततु संशुष्कसुपक्वैर्व्वन्यैर्गजपुटैः पचेत् ।
शीतं तच्चूर्णयेच्चूर्णं शुण्ठ्यामाक्षं सितायुतम् ।
प्रभाते भक्षयेत्तेन याति शीतज्वरक्षयम् ।
वाल्लिर्भवति कस्यापि कस्यापि न भवत्यपि ।
एकेन दिवसेनैव शीतज्वरहरं परम् ।
मध्याह्नसमये पथ्यं शिखरिणी भक्तकं च ।"*।
शीतज्वरे भूतभैरवचूर्णम् ।
"एला जातीफलं बोधत्रिफलाजीरकं घनः ।
सविङ्गं सितायुक्तं चूर्णं शीतज्वरापहम् ।
कायस्थानाकुलीतिक्तावयस्थापूरचोरकैः ।
सहदेवाबचाकुष्ठैः शीतघ्नैर्धूपवेपनैः ।
एतैरेवौषधैः पिष्टैर्लेपक्षारसंयुतैः ।
सान्द्रैर्घृतापचितं तैलमभ्यङ्गाच्छीतनाशनम् ।"
कायस्था हरितकी । नाकुली राला । मेदयार्द्र इति लोके । वयस्था गुडूची । पूरो गुग्गुलुः । चोरकः । भटिउर । तदलाभे गटिवन । सह-

देवा इहाहुता। चारो यवचारः। कायस्यादिधूपं लेपनं तैलञ्च।
"एरण्डस्य तु पञ्चाङ्गि छिन्नभूमौ निधापयेत्।
दाहादिज्वरिणो देहे तानि पञ्चाङ्गि धारयेत्।
तेन नश्यति दाहोऽस्य ज्वरश्चैवोपशाम्यति।
दाहे ग्राम्ये यदा शैत्यं तत्र युक्त्या निवारयेत्।
जघनचक्रचलन्मणिमेखला
सरसचन्दनचक्रविलेपना।
वनजतेव तरं परिवेष्टयेत्
प्रबलदाहनिपीडितमङ्गना।"
चक्रः कर्पूरः।
"तदङ्गसङ्गसंजातशैत्यैर्दाहे निवारिते।
प्रज्ञादक्षास्त्र विज्ञाय तां क्षीमपनयेत् पुनः।"*।
सुवर्षिकागरुकुङ्कुमकर्पू-
रावानिशाकोशितयष्टिकाभिः।
सिद्धं हरेत् षड्गुणतक्रपङ्कं
तैलं ज्वरं दाहसमन्वितञ्च।"
षट्तक्रतैलम्। ●।
"राक्षागागरकुङ्कुचन्दननिशायष्ट्याकृष्णावला
लाचासैन्धवसारिवामधुरसादेवद्रुरोहीतकैः।
सोशीरास्मुधिपेनरौहिषजलैस्तैलं पचेत् षड्गुणे
तक्रेतच्छमयेज्ज्वरं दृढतरं दाहादिशीतादिकम्।"
चन्दनमत्र श्वेतम्। मधुरसा मूर्व्वा। रोहीतकः रोहिञ्च इति लोके। रौहिषं रोहिष इति ख्यातविशेषः। जलं वालकम्। षड्गुणतक्रतैलम्। ●।
"पद्मकोत्पलकञ्जारग्वधवालविषपौष्करैः
कुसुदोशीरमञ्जिष्ठापद्मगैरिककट्फलैः।
सारिवाद्वयलोध्राब्दचीरीखर्जूरमस्तकैः।
धात्रीशृतावरीयुक्तैः क्वाथे कल्के प्रयोजितैः।
क्षीरसर्पिषः शुक्लमस्तुभिः सह काञ्जिकैः।
पक्वतैलमिदं स्वर्यं दाहज्वरहरं परम्।"
क्षीरसर्पिः पृथक् तैलतुल्यः पद्मकादितैलम्। ●।
"प्रलेपके प्रयुञ्जीत शैत्यज्वरहरीं क्रियाम्।
जटाजटो मोघजङ्घ विडालविडोरगस्य निर्म्मोकः।
मदनफलभूतकेशौ वंशत्वग्युक्तनिर्म्मोकाम्।
धृतयवमयूरचन्द्रकशकरोमाणि सर्षपाः
सवचाः।
चिङ्गुवाक्षिमरीचाः समभागान्नागमद्य-
संपिष्टाः।
धूपनविधिना ग्रसयन्त्येते सर्व्वान् ज्वरान्नियतम्।
यद्डाकिनीपिशाचप्रेतविकारानयं धूपः।"
जटाजटो जटाधारी। भूतकेशी जटामांसी। वंशनिर्म्मोकं वंशनिर्म्मोकत्वग्वा। मयूरचन्द्रः मयूरपुच्छचन्द्रकम्। माहेश्वरो धूपः। ●।
"सोमं साधुचरं देवं समाङ्गलमहेश्वरम्।
पूजयन् प्रयतः शीघ्रं मुच्यते विषमज्वरात्।"
सोमं उमादिसहितम्। साधुचरं गन्धादिगणसहितम्। प्रयतः पवित्रः। ●।

"विष्णुं सहस्रमूर्द्धानं चराचरपतिं विभुम्।
स्तुवन्नामसहस्रेण ज्वरान् सर्व्वान् व्यपोहति।"
सहस्रमूर्द्धानमिति सहस्रशीर्षेत्यादि वेदाभिहितम्। नामसहस्रेण भारतोक्तेनेत्यर्थः। ●।
ज्वरस्यापि देवतात्वात् पूजा कार्य्या। यत आह विदेहः।
"तीर्थायतनदेवाग्निगुरुद्विजोपसर्पणैः।
अहया पूजनैश्चापि सहसा याम्यति ज्वरः।"
तीर्थं ऋषिजुष्टं जलम्। आयतनं देवाधिष्ठितं पुरुषोत्तमक्षेत्रश्रीशैलादि। ●।
"निम्बपत्रं वरा बोधं यवानी लवणत्रयम्।
चारो दिग्वद्विरामेषुत्रिनेत्रक्रमशोऽग्रकाः।
सर्व्वमेकीकृतं चूर्णं प्रलुधे भक्षयेन्नरः।
एकाहिकं द्व्याहिकञ्च तथा त्रिदिवसज्वरम्।
चातुर्थिकं महाघोरं सन्ततं सततं हि वा।
धातुस्थञ्च त्रिदोषोत्थं ज्वरं हन्ति च मानवम्।"
निम्बादि चूर्णम्। इति विषमज्वराधिकारः।
इति भावप्रकाशः।

विषमनयनः, पुं, (विषममयुग्मं नयनं यस्य। त्रिनेत्रत्वात्तथात्वम्।) शिवः। इति हारावली।

विषमन्नः, पुं, (विषनिवर्णको मन्नो यत्र।) सर्पधारकः। वादिया इति ख्यातः। तत्पर्य्यायः। जाङ्गली २। इति जटाधरः।

विषममयं, त्रि, (विषम+मयट्।) विषमादागतम्। इति सिद्धान्तकौमुदी।

विषमरूप्यं, त्रि, (विषम+रूप्यः।) विषमादागतम्। इति सिद्धान्तकौमुदी।

विषमर्द्दिनिका, विषमर्द्दनी, } स्त्री, (विषं मर्द्दयतीति। मर्द्द+ल्युः। ङीप्। स्वार्थे कन् च।) गन्धनाकुली। इति राजनिर्घण्टः।

विषमविभागः, पुं, (विषमो विभागः।) असमानांशः। यथा, यत्र तु भ्रातर एव विभागमर्थयन्ते तत्र विषमविभागाभावमाह मनुः।
"भ्रातृणामविभक्तानां यद्युत्थानं भवेत् सह।
न तत्र भागं विषमं पिता दद्यात् कथञ्चन।"
इति दायतत्त्वम्।

विषमस्थः, त्रि, (विषमे तिष्ठतीति। स्था+कः।) असमानस्थितः। इति केचित्। उपग्रहदेशस्थः। यथा नारदः।
"अप्राप्तव्यवहारश्च दूतो दानोद्यतो व्रती।
विषमस्थाश्च नासेध्या न चैतान्राजसेवयेन्नृपः।"
विषमस्थाः उपग्रहदेशस्थाः। इति व्यवहारतत्त्वम्।

विषमग्रहः, पुं, दोषविशेषः। स च अनुचितग्रासरूपः। महदैश्वर्य्यम्। यथा, अत्र कामत एव चान्द्रायणतप्तकृच्छ्रयोर्विषमग्रहत्वेन इच्छाविकल्पासम्भवात् कामतश्चान्द्रायणं अकामततप्तकृच्छ्रम्। इति प्रायश्चित्ततत्त्वम्।

विषमाक्षः, पुं, (विषमं अयुग्मं अक्षि यस्य। त्रिनयनत्वादस्य तथात्वम्।) शिवः। इति त्रिकाण्डशेषः।

विषमायुधः, पुं, (विषमा अयुग्मा आयुधा यस्य। तस्य पञ्चबाणत्वात्तथात्वम्। यद्वा, विषमः अद्भुत अस्त्र इत्यर्थः आयुधो यस्य।) कामदेवः। इति हलायुधः।

विषमीयं, त्रि, (विषम+"महादिभ्यश्च।" ४। २। १३८। इति छः।) विषमादागतम्। इति सिद्धान्तकौमुदी।

विषमुष्टिः, पुं, क्षुपविशेषः। विषदोड़ि इति कड़ुविछे इति च हिन्दीभाषा। तत्पर्य्यायः। केशमुष्टिः २ मुसुटिः ३ रणमुष्टिका ४ क्षुपडोड़मुष्टिः ५। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। दीपनत्वम्। कफवातकण्डूमयरक्तपित्तादिदाहनाशित्वम्। रत्नमाला। इति राजनिर्घण्टः।

विषलुः, पुं, (विषेण तद्भक्षणमात्रेण लुनाति यः।) जीवञ्जीवपक्षी। इति जटाधरः। चकोर इति ख्यातः।

विषयः, पुं, ("विशिष्यन्ति विषयिणं स्वेन रूपेण निरूपणीयं कुर्व्वन्ति।" इति सांख्यतत्त्वकौमुदी। वि+षि+अच्।) चक्षुरादिग्राह्यः। स तु शब्दस्पर्शरूपरसगन्धरूपः। तत्पर्य्यायः। गोचरः २ इन्द्रियार्थः ३। देशः। (यथा, रघुः। ११। १८।
"यक्षकार विवरं शिलाघने
ताडकोरसि स रामसायकः।
अप्रविष्टविषयस्य रक्षसां
दारतामभवदन्तकस्य सत्।")
आशयः। इत्यमरः। न्यायमते चित्यप्रतियोग्यायूना विषया यथा,—
"तत्र चितिर्गन्धहेतुर्गुणाश्रयवती मता।
षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः।
स्पर्शस्तस्यापि विज्ञेयो ह्युष्णाशीतपाकजः।
नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा।
अनित्या तु तदन्या स्यात् संघावयवयोगिनी।
सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा।
योनिजादिर्भवेद्देह इन्द्रियं ग्राह्यलक्षणम्।
विषयो द्व्यणुकादिस्तु ब्रह्माकान्त उदाहृतः।
वर्णः शुक्लो रसस्तार्क्ष्यो जले मधुरशीतलौ।
स्नेहस्तत्र द्रवत्वन्तु सांसिद्धिकमुदाहृतम्।
नित्यादि प्रथमवत् किन्तु देहमयोविधम्।
इन्द्रियं रसनं सिन्धुर्हिमादिर्विषयो मतः।●।
स्पर्शः उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्।
नैमित्तिकद्रवत्वन्तु नित्यादि तु पूर्ब्बवत्।
इन्द्रियं नयनं वह्निस्तार्क्ष्यादिर्विषयो मतः। ●।
अपाकजाणुष्णाशीतस्पर्शस्तु पवने मतः।
तिर्य्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः।
पूर्ब्ववन्नित्यतायुक्तं देहत्वापि लिङ्गितम्।
प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः।"
इति भाषापरिच्छेदः।
विषय इति। भोगसाधनं विषयः। सर्व्वमेव हि कार्य्यं जडाधीनं यच्च कार्य्यं यदजडाधीनं

तत्तदुपभोगं साक्षात्परम्परया जनयत्येव नहि भोजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति तेन इत्युत्काद्यनिक्षाक्रान्तं सर्व्वमेव विषयो भवतीत्यर्थः। इति सिद्धान्तमुक्तावली। *। निसेवितः। इति भरतमृताजयः। अवक्तः। शुक्रः। इत्यप्ययपालः। जनपदः। इति मेदिनी। कान्तादिः। इति शब्दरत्नावली। नियामकः। यथा,—

"विशब्दो हि विशेषार्थः सिनोतेर्बन्ध उच्यते। विशेषेण सिनोतीति विषयोऽतो नियामकः।"

इति भट्टकारिका। *।

आरोपाश्रयः। यथा,—

"सारोपान्या तु यत्रोक्तौ विषयौ विषयस्यया। विषयस्यनः क्षतेऽन्यस्मिन् सा स्यात् साध्यवसानिका।"

यथा, गौर्व्वाहीकः। इति काव्यप्रकाशे २ उल्लासः। ("भोगसाधनं विषयः।" इति तर्ककौमुदी।)

विषयाक्षागं, क्ली, (विषयस्याक्षागं यस्याम्।) तन्द्रा। इति राजनिर्घण्टः।

विषयाधीशः, [न्] पुं, (विषयान् अयते प्राप्नोतीति। अय गतौ + क्विनिः।) राजा। वैषयिकजनः। इन्द्रियः। कामदेवः। विषयासक्तपुरुषः। इति मेदिनी। ने, २३६।

विषयि, [न्] क्ली, (विषयाः सन्त्यस्येति। विषय + इनिः।) इन्द्रियम्। इति मेदिनी। ने, २११।

विषयी, [न्] त्रि, (विषयोऽस्यास्तीति। इनिः।) विषयासक्तः। इति मेदिनी। ने, २११।

विषयी, [न्] पुं, (विषयोऽस्यास्तीति। इनिः।) कृपणः। कामदेवः। वैषयिकः। इति मेदिनी। ने, २११। ध्वनिः। इत्यजयपालः। आरोप्यमाणः। यथा,—

"विषयस्यन्तःक्षतेऽन्यस्मिन् सा स्यात् साध्यवसानिका।"

विषयिणा आरोप्यमाणेन अन्तःक्षते निगीर्णेऽन्यस्मिन् आरोपविषये सति सा स्यात् साध्यवसानिका। इति काव्यप्रकाशः।

विषरूपा, क्ली, अतिविषा। इति राजनिर्घण्टः।

विषर्षं, क्ली, विषम्। इति शब्दचन्द्रिका।

विषलता, क्ली, (विषस्य लता।) इन्द्रवारुणी। इति राजनिर्घण्टः। (विषप्रधानलतामात्रे। यथा, गीतायां श्रीधरः। २। ४२। "विषलतावदापातरमणीयाम्।")

विषविद्या, क्ली, विषघ्नमन्त्रः। इति विषवैद्यशब्दटीकायां भरतः।

विषवैद्यः, पुं, (विषस्य वैद्यः।) विषघ्नमन्त्रवेत्ता। ओझा इति ख्यातः। यथा। विषविद्यां वेत्ति अधीते वा विषवैद्यः ब्राह्मणाद्याकाशादित्वादण्यप्रत्ययः। विषस्य वैद्यचिकित्सकः इति वा। इति भरतः। तत्पर्य्यायः। आङ्गुलिकः २। इन्द्रजालः। आङ्गुलिकः ३ नरेन्द्रः ४ कौशिकः ५ कथाप्रबन्धः ६ चक्राटः ७। इति जटाधरः। व्यालग्राही ८ आङ्गुलिः ९ आङ्गलिः १० अहितुण्डिकः ११ व्यालग्राहः १२ गारुडिकः १३। इति शब्दरत्नावली।

विषवैरिणी, स्त्री, (विषस्य वैरिणी।) निर्विषा। इति राजनिर्घण्टः।

विषशालूकः, पुं, (विषस्य शालूकः।) पद्मकन्दः। अस्य गुणाः। गुरुत्वम्। विदग्धित्वम्। शीतलत्वञ्च। इति राजवल्लभः।

विषशूकः, पुं, (विषं शूके यस्य।) भृङ्गरोगः। इति भूरिप्रयोगः।

विषशृङ्गी, [न्] पुं, (विषं विषयुक्तं शृङ्गं तदस्यास्तीति। विषशृङ्ग + इनिः।) भृङ्गरोगः। इति हारावली।

विषसूचकः, पुं, (विषं सूचयति विषयुक्तान्नादिदर्शने सतः सन् ज्ञापयतीति। सूच् + णिच् + ण्वुल्।) चरोकपक्षी। इति हेमचन्द्रः।

विषहस्ता, [न्] पुं, (विषं हस्तेन यस्य।) भृङ्गरोगः। इति त्रिकाण्डशेषः।

विषहन्त्री, स्त्री, (विष + हन + ट्रच्। स्त्रियां ङीष्।) अपराजिता। निर्विषा। इति राजनिर्घण्टः।

विषहरः, त्रि, (हरतीति। हृ + अच्। विषस्य हरः।) गरलनाशकौषधादिः। यथा। ॐ हूं फट्।

"मन्त्रोऽयं हरते रुद्र सर्व्वदष्टिकगं विषम्। पिप्पली नवनीतञ्च शृङ्गवेरञ्च सैन्धवम्। मरीचं दधि कुष्ठञ्च नस्ये पाने विषं हरेत्। त्रिफला टङ्कणञ्च चन्दनं घृतसंयुतम्। एतत्पानाच्च लेपाच्च विषनाशो भवेच्छिव। पारावतस्य पाक्षीञ्च हरितालं मनःशिला। एष योगो विषं हन्ति वैनतेय रवोरगान्। सैन्धवं घृतञ्च चूर्णं दधिमध्याज्यसंयुतम्। दष्टिकस्य विषं हन्ति लेपोऽयं वृषभध्वज।"

इति गारुडे १८६ अध्यायः।

विषहरा, स्त्री, मनसादेवी। इति शब्दरत्नावली। (यथा, देवीभागवते। ६। ३०। ५२।

"जरत्कारुप्रियास्त्रीकमाता विषहरेति च।")

विषहरी, स्त्री, मनसादेवी। इति शब्दरत्नावली। (यथा, देवीभागवते। ६। ३०। ३०।

"विषं संहर्त्तुमीशा या तस्माद्विषहरी स्मृता।")

विषहा, स्त्री, (विषह + टाप्।) देवदालीलता। निर्व्विषा। इति राजनिर्घण्टः।

विषा, स्त्री, अतिविषा। इत्यमरः। वृद्धिः। इत्युज्ज्वलदत्तकोषः। (अस्याः पर्य्यायो गुणाश्च यथा,

"काश्मीरातिविषा श्वेता श्यामा गुञ्जा विषा स्मृता।"

इति वैद्यकरत्नमालायाम्।

"विषात्रतिविषा विश्वा शृङ्गी प्रतिविषारुणा। शुक्लकन्दा घोषविषा भङ्गुरा घुणवल्लभा। विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत्। कफपित्तातिसारामविषकासक्षयमिक्रमीन्।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

विषाङ्कुरः, पुं, (विषस्याङ्कुरः।) शल्याङ्गम्। इति त्रिकाण्डशेषः।

विषाणं, क्ली, कुष्ठौषधम्। पशुशृङ्गम्। (यथा, साहित्यदर्पणे। १०।

"स्त्रियसि शुकं दृषदंशुकवदने मृगमर्पयसि मृगादनरदने। वितरसि तुरगं महिषविषाणे विदधासेतो भोगविताने।")

हस्तिदन्तः। इति मेदिनी। णे, ७७। (यथा, शिशुपालवधे। १। ६०।

"न जातु वैनायकमेकसङ्गतं विषाणमद्यापि पुनः प्ररोहति।")

कोलदन्तः। इति हेमचन्द्रः। (विशेषेण मदोदातरि, त्रि। यथा, ऋग्वेदे। ५। ४४। ११।

"विषाणं परिपानमन्ति ते।"

"विषाणं विशेषेण मदस्य दातारम्।" इति तद्भाष्ये सायणः।)

विषाणिका, स्त्री, मेषशृङ्गी। इति रत्नमाला। (अस्याः पर्य्यायो यथा,—

"शृङ्गी कर्कटशृङ्गी स्यात् कुलीरश्च विषाणिका। अजशृङ्गी च रक्ता च कर्कटाख्या च कीर्त्तिता।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

वातला। कर्कटशृङ्गी। आवर्त्तकी। इति राजनिर्घण्टः।

विषाणी, स्त्री, चीरकाकोली। अजशृङ्गी। इति मेदिनी। णे, ७७। वृश्चिकाली। इति राजनिर्घण्टः। तिन्तिड़ी। इति शब्दचन्द्रिका।

विषाणी, [न्] पुं, (विषाणमस्यास्तीति। विषाण + इनिः।) हस्ती। शृङ्गी। इत्यजयपालः। (यथा, हरिवंशे। २०४। २२।

"शल्लकी विषाणिनश्चैव वृषभाश्च मृगास्तथा।")

ऋषभगाख्यौषधम्। शृङ्गाटकः। इति राजनिर्घण्टः।

विषादः, पुं, (वि + षद + घञ्।) अवसादः। यथा,—

"आर्त्तं मौर्ख्यं विषादोऽवसादः सादो विषण्णता।"

इति हेमचन्द्रः।

(यथा, भागवते। १। ११। १।

"दृष्ट्वा दरवरं तेषां विषादं भ्रमयन्निव।")

विषादनी, स्त्री, पक्षाग्रीलता। इति राजनिर्घण्टः।

विषानलः, पुं, (विषमानले यस्य।) सर्पः। इति शब्दमाला।

विषान्तकः, पुं, (विषस्य अन्तकः नाशकः। णीतविषत्वात्।) शिवः। इति हेमचन्द्रः। विषनाशके, त्रि।

विषापहः, पुं, (विषं अपहन्तीति। हन + डः।) शुष्ककदलः। इति राजनिर्घण्टः। (विषनाशके, त्रि। यथा, मनौ। ७। २१०।

"सुपरीक्षितमन्नाद्यमश्वाभ्यन्नेर्विषापहैः।")

विषापहा, स्त्री, इन्द्रवारुणी। निर्व्विषा। इति राजनिर्घण्टः। नागदमनी। इति भावप्रकाशः।

अर्कपत्रा सुनन्दा स्यादर्कमूला विषापहा ।"
इति वैद्यकरत्नमालायाम् ॥)
सर्पेक्षणकारिका । इति रत्नमाला ।
विषाभावा, स्त्री, (विषस्याभावो यत्र सा ।) निर्विषा । इति राजनिर्घण्टः ॥
विषायुधः, पुं, (विषमेवायुधं यस्य ।) सर्पः । इति शब्दरत्नावली । विषयुक्तास्त्रे, क्ली ॥
विषारः, पुं. (विशेष अलतीति । अल + अच् । वस्य रत्वम् ।) सर्पः । इति शब्दचन्द्रिका ॥
विषारातिः, पुं, (विषस्यारातिः नाशकः ।) छत्राकशूरकः । इति राजनिर्घण्टः ।
विषारिः, पुं, (विषस्यारिः ।) महाश्वेतच्छत्राकः । घृतकरञ्जः । इति राजनिर्घण्टः ॥ (विषनाशकमात्रे, त्रि ।)
विषाख्यः, पुं, (विषमाख्या यस्य ।) सर्पः । इति शब्दरत्नावली । विषयुक्तशस्त्रे, त्रि ॥
विषाख्या, स्त्री, भल्लातकः । इति शब्दचन्द्रिका । (भल्लातकशब्दे ऽस्या विषयो विज्ञेयः ।)
विषु, य, साम्यम् । इति विश्वकृच्छब्दटीकायां भरतः । नानारूपम् । इति रामाश्रमः ॥
विषुवः, पुं, (विषु साम्यमश्नुतीति । "सोमादौति ।" ५ । २ । १०० । इति वः । पक्षात् वत्वम् ।) विषुवम् । यथा । "विषु नानारूपं गमनं विश्वक् तदस्नोति व्याप्नोति यस्मिन् अग्निचित्तरपदलोपश्चात्तत्वम्नेरिति णमादि सूत्रेण नः वत्वम् ।" इत्यमरटीकायां रामाश्रमः ॥ (नानारूपम् । यथा, ऋग्वेदे । ३ । ५४ । ८ ।
"चरत्पतङ्गे विषुवं विजातम् ।"
"विषुवं विश्वक् नानारूपम् ।" इति तद्भाष्ये सायणः ॥ सर्वगः । यथा, ऋग्वेदे ।८।२८।९।
"वसुरेको विषुवः ।"
"विषुवः विश्वगचनः ।" इति तद्भाष्ये सायणः ॥ विप्रकीर्णः । यथा, ऋग्वेदे । ५ । १२ । ५ ।
"सखायस्ते विषुवा ह्रस्व एते ।"
"विषुवाः विप्रकीर्णाः सर्वत्यागाः ।" इति तद्भाष्ये सायणः ॥ पराङ्मुखः । यथा, ऋग्वेदे । ५ । ३४ । ६ ।
"वितत्नसः सवृतो चक्रमासो-
ऽमुष्मतो विषुवः सन्नतो दृषः ।"
"विषुवः पराङ्मुखः ।" इति तद्भाष्ये सायणः ॥)
विषुवं, क्ली, विषुवम् । इत्यमरटीकायां भरतः ॥
विषुवत्, क्ली, समरात्रिन्दिवकालः । तत्पर्य्यायः । विषुवत् २ । इत्यमरः ॥ विषुपम् ३ विश्वक् ४ विश्वक् ५ । इति शब्दरत्नावली । विषुवः ६ । इति रामाश्रमः ॥ विषुवः ७ । इति सुकुटः ॥ तत्तु मेषतुलयोः संक्रान्तौ । यथा,—
"मृगकर्कटसंक्रान्तौ ये तूदग्दक्षिणायने ।
विषुवती तुलामेषे गोलमध्ये तथापरः ॥"
इति तिथ्यादितत्त्वम् ॥*॥
तौ तु महाविषुवज्जविषुवनामभ्यां क्रमेण ख्यातौ ।

यथा,—
"विषुवाभ्यां वत्सरः स्यादिति शब्दविदां मतम् ।
महाविषुवमाख्यातं ज्ञातिभिश्चैत्रचिह्नितम् ।
तथा स्याच्छ्रविषुवं क्रमादाश्विनचिह्नितम् ।"
इति शब्दरत्नावली ॥७॥
विषुवारम्भकालो यथा,—
"मृगसंक्रान्तितः पूर्वं पश्चात् तारा दिनान्तरे ।
एकवर्षे चतुःपञ्चपलमानक्रमेण तु ।
षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः ।
एवं चतुःपञ्चदिनमयनारम्भकं क्रमात् ।
युगक्रमेण च तद्वत् स्यादुदग्दक्षिणायनं रवेर्ध्रुवम् ।
कर्किसंक्रमके तद्वदभितो दक्षिणायनम् ।
अयनाग्रक्रमेणैव विषुवारम्भकं तथा ।
रविसंक्रान्तितो मेषतुलयोरभितः पुनः ।
विषुवं मीनकन्यार्द्धे लेखाचीक्रमकाण्डके ।
दिनमानाय मीनार्द्धाब्धेर्द्धे पालिकं शतम् ।
ततो दशार्द्धपर्य्यन्तमग्रीतिः पलभाजिनी ।
मिथुनार्द्धे चतुस्त्रिंशत्पलानां वर्द्धते क्रमात् ।
ककटार्द्धेषु षट्त्रिंशत् सिंहार्द्धेषु द्वयग्रीतकम् ।
कन्यार्द्धेषु द्विनवतिः क्रमात् क्षयति वासरे ।
कन्यार्द्धदिनवीमानं बोध्यं पूर्वक्रमेण हि ।
दिने दिने भागहारान्मानं बोध्यं दिवानिशोः ।
एकमानं दक्षषष्ट्या लक्षान्यमानविनिर्णयः ।
षट्षष्टिवत्सरानेवं ततः स्यात् मोक्षग्रांशके ।
पुनस्तद्वत्सरांस्तद्वत् एवं सप्तदशादिके ।"
इति ज्योतिस्तत्त्वम् ॥७॥
अन्यच्च
"मेषसंक्रमतः पूर्वं पश्चात्तारा दिनान्तरे ।
प्रातिलोम्याच्चतुर्योन्येन विषुवारम्भकं भवेत् ।
त्रयोदशदिने सौरे चैत्रे नक्षत्रतिथौ शुक्ले ।
विषुवारम्भकं तत्र समं मानं दिवानिशोः ॥
ततः प्रतिदिनं वेला सपादत्रिपलालिका ।
वर्द्धते मेषविंशांशपर्य्यन्तं स्थूलमानतः ॥
तथा त्र्यस्रान्तपर्य्यन्तं पादोनत्रिपलालिका ।
ताडगाषाढपर्य्यन्तं पलैकप्रमिता मता ।
ततः कर्कटविंशांशपर्य्यन्तं ह्रस्वतां क्रमात् ।
सपादपलमानेन वेला त्यजति निश्चितम् ॥
ताडगभाद्रान्तपर्य्यन्तं पादोनत्रिपलालिका ।
ताडगाश्विनशेषान्तं हरनेत्रपलालिका ।
दिवामानं दक्षषष्ट्यक्षा रात्रेः प्रमाणकम् ।
वैशाखादौ दिवामानं रात्रिमानं तुलादिषु ।
षट्षष्टिवत्सरानेवं ततः स्यात् द्वादशांशके ।
पुनस्तद्वत्सरांस्तद्वत् ततः एकादशादिके ।"
इति सप्तशत्यसूत्रावली ॥
विषुवत्, क्ली, विषुवम् । इत्यमरः ॥ (यथा, महाभारते । १ । १६६ । १२१ ।
"भवति सहस्रगुणं दिनस्य रात्रौ-
र्विषुवति चाप्ययमश्नुते फलम् ॥"
वाचकः । यथा, ऋग्वेदे । १ । ८४ । १० ।
"स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः ॥"
"विषूवत इत्यनेन प्रकारेण सर्व्वेषु यज्ञेषु यान्नियुक्तस्य * * * विषूवत् यानो अस्मादौणादिकः कुप्रत्ययः । ततो मतुप् ह्रस्वहृद्भ्यामतुदिति मतुप उदात्तत्वम् । अन्येषामपि दृश्यत इति संहितायां दीर्घः यज्ञयेन मतोर्व्वत्वम् ।" इति तद्भाष्ये सायणः ॥)
विषौषधी, स्त्री, (विषस्यौषधी ।) नागदन्ती । इति रत्नमाला ॥
विष्कम्भः, पुं, सप्तविंशतियोगान्तर्गतप्रथमयोगः । शुभकर्म्मणि तस्य पञ्च दण्डाश्चाद्याः । यथा,—
"त्रयादौ पञ्च विष्कम्भे सप्त शूले च नाडिकाः ।
गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः ।
वैधृतिव्यतिपातौ च समस्तौ परिवर्ज्जयेत् ॥"
इति सप्तशत्यसूत्रावली ॥ ● ॥
तत्र जातफलम् ।
"विष्कम्भयोगो यदि जन्मकाले
कार्य्ये खतन्त्रो मनुजस्तदानीम् ।
सुहृत्कलत्रात्मजसौख्यसुखं
एतस्य निर्म्मोचविधौ समर्थः ॥"
इति कोष्ठीप्रदीपः ॥●॥
विष्कारः । (यथा, हृदतसंहितायाम् ।५३।२७।
"उच्छ्रायोऽङ्गुलतुल्यो द्वारस्यार्द्धेन विष्कम्भः ।")
प्रतिबन्धः । रूपकाङ्गप्रभेदः । योगिनां बन्धभेदः । इति मेदिनी । मे, १६ । हेमः । रत्नत्रयः । अर्गला । इति भरतः ॥
विष्कम्भी, [न्] पुं, (विष्कम्भाति रुणद्धीति । वि + ष्कम्भ + णिनिः ।) अर्गला । यथा । "तद्विष्कम्भोऽर्गलं न ना । इत्यमरोक्तौ कपाटधारणकाष्ठं अर्गलं कुड्कादश्च इति खातम् । तत् कपाटं विष्कम्भाति रुणद्धि इति अच्प्रत्ययेन तद्विष्कम्भी मूर्द्धन्यवत् स्वार्थेकयनमेतत् विष्कम्भीति नाम च दृश्यते । तद्विष्कम्भोऽर्गलमिति मूलपाठः । विष्कम्भो बन्धननिमित्तदण्डः । इति भट्टः । इति सुकुटः ॥
'विष्कम्भो योगभेदे स्यात् विस्तारप्रतिबन्धयोः ।
कपाटाङ्गप्रभेदे च ।' इति मेदिनीदीर्घान्तात् विष्कम्भ इति पाठः ।"इति तट्टीकायां भरतः ॥
विष्कम्भः, पुं, (विषं विद्वां कलयति भक्षयतीति । कल + अच् ।) म्लेच्छभूकरः । इति राजनिर्घण्टः ॥
विष्किरः, पुं, (विकिरतीति । वि + कृ ग विक्षेपे + इगुपधेति कः । "विष्किरः शकुनिर्विकिरो वा ।" ६ । १ । १५० । इति सुट् । परिनिविभ्य इति वत्वम् ।) पक्षी । इत्यमरः । विष्किराश्चित्तिरिमयूरकुक्कुटादयः ।
"लावाद्या वैष्किरो वर्गः प्रतुदा जाङ्गला खगाः ।
लघवः शीतमधुराः सकषाया हिता दृशाम् ॥"
इति राजवल्लभः ॥ ● ॥
अथ विष्किराणां गणना गुणाश्च ।
"वर्त्तकालावविष्किरकपिञ्जलकतित्तिराः ।
कलिङ्गकुक्कुटाद्याश्च विष्किराः सप्तदाहृताः ॥
विकीर्य्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किराः ।
कपिञ्जल इति प्राज्ञैः कथितो मौरतित्तिरः ॥"
कुलिङ्ग गर्वटेया इति लोके ।

विष्टम्भः

"विष्किरा मधुराः स्निग्धाः कषायाः कटु-
पाकिनः ।
वल्या वृष्याक्षिदोषघ्नाः पथ्यास्ते लघवः स्मृताः।"
इति भावप्रकाशः ॥

("यावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तक-
नप्तृकावातीकचकोरकलविङ्कमयूरकुक्कुटपक्षकु-
कुटसारङ्गशतपत्रककुलिङ्गित्तिरिकुरवाकुकयव-
लकप्रभृतयश्चाहला विष्किरा लघवः स्निग्धाः
मधुराः कषाया दोषघ्नमनाश्च ।" इति सुश्रुते
सूत्रस्थाने ४६ अध्यायः ॥ ● ॥ दर्व्याकरात्मगंत-
सर्पविशेषः । यथा,— "पुष्करीको भुजगो
सखो विष्किरः पृथ्यभिकर्णो गिरिसर्पः ऋजु-
सर्पः श्वेतोदरो महाशिरा अलगर्दो अग्नीवि-
ष इति ।" इति च सुश्रुते कल्पस्थाने चतुर्थे-
ऽध्याये ॥)

विष्टः त्रि, प्रविष्टः । विश्पूधातोः क्तप्रत्ययेन
निष्पन्नमिदम् ॥

विष्टपं, क्ली, ("विटपविष्टपविश्निपोलपाः ।" इत्यु-
णादिसूत्रे पिष्टपस्थाने विष्टपपाठेन विश्पूधातोः
कपनप्रत्ययेन साधुः इति केचित् ।) भुवनम् ।
इत्यमरः ॥ पिष्टपं पिष्टपः । इति तट्टीकायां
भरतः ॥ (यथा, रघुः । ११ । १६ ।
"बाणभिन्नहृदया निपेतुषो
या खगानगनसर्व न केवलाम् ।
विष्टपत्रयपराजयश्रियो
रावणस्य विजयमपि व्यकम्पयत् ॥")

विष्टम्भः, पुं, (वि + स्तृभ + क्तः ।) प्रतिबन्धः ।
(यथा, भागवते । ५ । २२ । १२ ।
"स दृष्टिविष्टम्भयहोपगमनः ॥"● ॥
आक्रमणम् । यथा, भारविः । १३ । १६ ।
"प्रविकर्षणिनादभिन्नरन्ध्रः
पदविष्टम्भनिपीडितक्षितीनाम् ॥")
रोगविशेषः । इति मेदिनी । मे, २० ॥ स तु
आनाहरोगः । तस्य लक्षणमाह ।
"आमं सङ्गदा निचितं क्रमेण
भूयो विवद्धं विगुणानिलेन ।
प्रवर्त्तमानं नयथाक्षमेनं
विकारमानाहमुदाहरन्ति ॥"
आमं अपक्वमाहारसारं श्लेष्मतं पुरीषं वा
क्रमेण निचितं सञ्चितम् । भूयो विगुणानिलेन
दुष्टवायुना विवद्धं आमग्रोथितं वा यथाक्षं
पूर्ब्ववदप्रवर्त्तमानं एनं विकारं आनाह-
माहुः ॥ ● ॥ तत्रामजमानाहमाह ।
"तस्मिन् भवत्यामसमुद्भवे तु
छर्द्या प्रतिश्यायशिरोविदाहाः ।
आमाशये मूलमथो गुरुत्वं
कुक्षेस्तथा उद्गारविघातनञ्च ॥"
विघातनं अप्रवृत्तिः ॥● ॥ श्लेष्मतसञ्चयजमाह ।
"स्तम्भः कटीपृष्ठपुरीषमूत्रे
मूलोऽथ सन्धौ श्लेष्मतो वमिश्च ।
श्वासश्च पक्वाशयजे भवन्ति
तथाऽलसोक्तानि च लक्षणानि ।"
पक्वाशयजे श्लेष्मतसञ्चयजे । अलसोक्तानि
आध्मानवातनिरोधादीनि ॥ ● ॥ आनाहोदा-
वर्त्तयोश्चिकित्साया साम्यात्तदुभयचिकित्सा अत्र
लिख्यते । अथोदावर्त्तानां चिकित्सा ।
"अधोवातनिरोधेन क्षुदावर्त्ते हितं मतम् ।
स्नेहपानं तथा स्वेदो बस्तिर्यश्चानुलोमनम् ॥
विड्विघातसमुत्थे तु विड्भेद्यं तद्यौषधम् ।
वर्त्मभ्यङ्गावगाहश्च स्वेदो बस्तिर्हितो मतः ॥"
वर्त्तिः फलवर्त्तिः ।
"मूत्रावरोधजनिते क्षीरवारिचरा पिबेत् ।
दुष्यर्शाःस्वरसं चापि कषायं कक्षुभस्य च ।
दुष्यर्शा कण्टकारी दुरालभा च तुल्यगुणत्वात् ।
एलाबीजं तोयेन पिबेद् वा लवणीकृतम् ।
क्षितासिक्षुरसं क्षीरं क्षाराम्बुसमथापि वा ।
सर्व्वमेव प्रकुर्व्वीत मूत्रकृच्छ्राश्मरीविधिम् ।
जृम्भाभिघातजे स्नेहं स्वेदं चापि प्रयोजयेत् ।
अन्यानपि प्रयुञ्जीत समीरणहरान् विधीन् ।
नेत्रदीर्घावरोधोत्थे सुखैरुद्वेर्त्तनं हितम् ॥
सुप्यात् सुखेन तस्याग्रे कथयेच्च कथाः प्रियाः ।
क्षिक्षाभिघातजे तीक्ष्णाश्चाञ्जनस्यार्कदर्शने: ।
प्रवर्त्तयेत् क्षुतं सक्तं स्नेहस्वेदौ प्रयोजयेत् ॥"
तीक्ष्णं मरीचराजिकादि ।
"उद्गारस्यावरोधे तु स्नेहिकं धूममाचरेत् ।
हृद्विनिग्रहसंजाते वमनं लङ्घनं हितम् ।
विरेचनं चात्र मतं तैलेनाभ्यञ्जनं तथा ।
वस्तिभुद्धिकरैः सिद्धं चतुर्गुणजलं पयः ।
आवारिणाग्नात् क्वथितं पीतवन्तं प्रकामतः ॥
रमयेयुः प्रिया नार्य्यः शुक्रोदावर्त्तिनं नरम् ।
तस्याभ्यङ्गोऽवगाहश्च मदिरा चरबायुषः ।
ग्राम्यः पयो निरूहश्च हितं मैथुनमेव च ।
क्षुद्विघातसमुद्भूते स्निग्धमुष्णं तथा लघु ।
रूक्षमल्पं हितं भक्ष्यं पुष्यं सेव्यं सुगन्धि यत् ।
कृपाविघातसंभूते प्रीतः सर्व्वो विधिर्हितः ।
कर्पूरश्चिरिरं स्वप्नं पिबेत्तोयं अनेः अनेः ।
श्रमश्वासे श्रुते श्रान्तो विश्रामः सरसौदनः ।
निद्रावेगविघातोत्थे पिबेत्क्षीरं सिताप्लुतम् ।
सुवाद्यं सुप्रभ्यात्र हिताः श्रोत्रप्रियाः कथाः ॥"
वातादिवेगविघातजनितानामुदावर्त्तानां चिकि-
त्सामभिधाय रूक्षादिकुपितवातजनितस्य उदा-
वर्त्तस्य चिकित्सामाह ।
"हिङ्वादिकैः सिद्धघृते: पिबेद्वर्त्तिविमिश्रिताम् ।
दृताभ्यक्तां गुदे अस्थेदुदावर्त्तविनाशिनीम् ॥"
फलवर्त्तिः ।
"मदनं पिप्पली कुष्ठं वचा गौराश्च सर्षपाः ।
गुडक्षीरसमायुक्ता फलवर्त्तिरियोदिता ।"
मदनफलादिवर्त्तिः ॥ ● ॥
"खण्डपक्वं त्रिदोषघ्नं क्षुद्व्याधिं हृयोच्चूर्णम् ।
प्राग्भोजनस्य मधुना विड्भेदपटुं नरो
लिह्यात् ॥
एतद्धाट्पुरीषे देयं विशेषदावर्त्ते ।
मधुरं नरपतियोग्यं चूर्णं नाराचकं नाम्ना ।"
इति नाराचचूर्णम् ॥ ● ॥

विष्टम्भः

"सर्षपं पिप्पलीमूलं त्रिवृद्दन्ती च त्रिच-
कम् ।
तच्चूर्णं गुडसंमिश्रं भक्षयेत् प्रातरुत्थितः ॥
एतद्गुडाष्टकं नाम्ना बलवर्णाग्निवर्द्धनम् ।
उदावर्त्तप्लीहगुल्मश्लीपदार्शोमयापहम् ॥"
इति गुडाष्टकम् ॥ ● ॥
"मूलकं शुष्कमार्द्रञ्च वर्षाभूपत्रमूलकम् ।
क्षतमात्रफलं वापसु पक्वा तैल घृतं
पचेत् ।
तत् पीतं श्रमयेत् क्षिप्रमुदावर्त्तमशेषतः ॥"
पत्रमूलकमत्र दृष्टम् । शुष्कमूलकाद्यदृतम् ॥●॥
अथ आनाहस्य चिकित्सा ।
"सूक्ष्मकारणकार्य्यत्वादुदावर्त्तहरीं क्रियाम् ।
आनाहेऽपि च कुर्व्वीत विशेषश्चाभिधीयते ॥
चित्रकस्नुह्यपामार्गतण्डुलीयकदन्तिकाः ।
गुडेन तुल्या वटिका हरन्त्यानाहमुल्बणम् ॥
वर्त्तिर्विकटुसैन्धवसर्षपपत्रधूमकुष्ठमदनफलैः ।
मधुनि गुडे वा पक्वैर्निहिता जाहुरुपरि-
भागाः ।
वर्त्तिरियं दृष्टफला अग्नेः प्रविहिता गुदे दृता-
भ्यक्ते ।
आनाहोदावर्त्तौ शममति जठरं तथा
गुल्मम् ।"
त्रिकटुकाद्या वर्त्तिः । इति भावप्रकाशः ॥
(त्रि, विशेषेण स्तम्भयिता । यथा, ऋग्वेदे ।
६ । ८६ । ३५ ।
"दिवो विष्टम्भ उपमो विचक्षणः ॥")

विष्टम्भी, [न्] त्रि, (विष्टम्भोऽस्तीति । वि + स्तृभ
+ इनिः ।) विष्टम्भरोगजनकः । यथा,—
"वेदना गुरवो भक्ष्या विष्टम्भिन्यश्च मारुताः ॥"
इति राजवल्लभः ॥
(यथा च सुश्रुते । १ । ४५ ।
"प्रायः प्राभातिकं क्षीरं गुरु विष्टम्भि शीत-
लम् ॥"
विष्टम्भोऽस्यास्तीति । विष्टम्भ + इनिः ।)
विष्टम्भरोगविशिष्टश्च ॥

विष्टरः, पुं, (विस्तीर्य्यते इति । वि + स्तृ + अप् ।
"दृषाशनयोर्विष्टरः ।" ८ । ३ । ६१ । इति
निपातनात् षत्वम् ।) पिटपौ । दर्भमुष्टिः ।
पीठाद्यासनम् । इत्यमरः । आदिना कुशा-
सनादिग्रहः । इति भरतः ॥ ● ॥ (यथा,
भागवते । १ । २८ । १६ ।
"काश्यो गुरुर्लब्धपतिर्ब्रह्मा विष्टरमाप्तवान् ।
दर्भो गौरवतमं ग्रामं मनोनयनवर्द्धनम् ॥")
विष्टरलक्षणमाह । विष्टरस्तु बाहुन्तिसवयामा-
वर्त्तवलिताधोमुखाग्रा असंख्यातदर्भाः । तथा
च यज्ञासंग्रहः ।
"ऊर्द्धकेशो भवेद्ब्रह्मा ब्रह्मकेशस्तु विष्टरः ।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ॥"
इति ॥
छन्दोगपरिशिष्टम् ।
"दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि ॥"

एवच ।
"पञ्चाग्निभिर्भवेद्ब्रह्मा तद्दर्शेन तु विष्टरः ।"
इति यदि सत्यं तदा ग्राह्यमत्रीयम् । एतेन विष्टरे पञ्चविंशतिसंख्या भवदेवभट्टोक्ता निरस्ता । एवं विष्टरयज्ञकं हस्ताभ्यामपि वदुक्तं तदपि निरस्तम् ।
"यत्नोपदिश्यते कर्म्म कर्त्तुरङ्गं न चोच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्म्मणां पारगः करः ।"
इति छन्दोगपरिशिष्टात् । इति संस्कारतत्त्वम् ।

विष्टरश्रवाः, [स्] पुं, ("विष्टराविव श्रवसी यस्येति ।" शिशुपालवधस्य १३ । १२ । टीकायां मल्लिनाथः । "विष्टरेऽन्यत्पृष्टे श्रूयते नित्यं तच्च वसतीति ।" उणा० ४ । २२६ । इत्यत्र उज्ज्वलदत्तः ।) विष्णुः । इत्यमरः । (यथा, हरिवंशे भविष्यपर्व्वणि । ५१ । १७ ।
"उत्थाप्य दक्षं दैत्येन्द्रः शतयज्ञं महाद्युतिम् ।
तेन तं योधयामास विष्टरश्रवसं प्रभुम् ।")

विष्टरा, स्त्री, गुडाचिनी । इति राजनिर्घण्टः ।

विष्टरश्रा, स्त्री, सर्व्वकेतकी । इति राजनिर्घण्टः ।
विष्टारश्रा इति च क्वचित् पाठः ।

विष्टारः, पुं, छन्दोविशेषः । यथा, विष्टारः प्रस्तिरुष्णिक् । इति वृत्तप्रकरणे दुर्गादासः ।

विष्टिः, स्त्री, (विश् + क्तिन् ।) वेतनं विना हठाद्धारोद्दहनादिश्रमः । बेगार इति ख्यातः । तत्पर्य्यायः । आयूः २ । इत्यमरः । हठाद्भृतिकः श्रेणी विजातरूपो विष्टिरिति भट्टस्वामी । इह वेतनमन्तरेण कर्म्मकरणे कर्म्मकारिणि चेत्यन्ते । विशु कर्म्मकरे विष्टिः स्त्रियामष्टतिकर्म्मणीति वरः । इति भरतः । ● ।
(यथा, रामायणे । २ । ८२ । २० ।
"विष्टिकर्म्मान्तिकाः सर्व्वे मार्गशोधकरक्षकाः ।")
वेतनम् । कर्म्म । इति मेदिनी । टे, २६ । (यथा, भागवते । ७ । ८ । ५५ ।
"वयमौग्रकिमरगन्धर्व्ववानुमा
दितिजेन विष्टिमसृजाद्यकारिताः ।")
भद्रा । पर्व्वभम् । इति विश्वः । प्रेतभम् । इति हेमचन्द्रः । सा च भद्रा ववादेकादशकरणात्मकसप्तमकरणं यत्रिकायां तस्या अधः सूत्रम् । यथा,—
"ववबालवकौलवतैतिल
गरवणिजाः सवितृयः सप्त ।
शकुनिचतुष्पदागाः
किंघ्नश्च ध्रुवादि करणानि ।
शुक्लादितिथिशेषार्द्धात् पञ्चमे तत्तुरीयके ।
आद्यन्तार्द्धात् क्रमेण स्युरष्टम्यादा ववादयः ।
एकादश्याश्चतुर्थ्याश्च शेषार्द्धे शकुनिश्चके ।
अष्टमीपौर्णमास्योश्च पूर्व्वार्द्धे किंस्तुघ्नकौ ।
कृष्णपक्षे तृतीयाया दशम्याश्च परार्द्धतः ।
सप्तम्याश्च चतुर्दश्याः पूर्व्वार्द्धे विष्टिसम्भवः ।
विष्टाय विष्टरीत्यादि विष्टिं सर्व्वत्र वर्ज्जयेत् ।
विष्टिशेषे चिरञ्जे हि पृच्छे कार्य्यं जयावहम् ।"
कर्म्मप्रकाशे ।
"नाभेरुर्द्ध पञ्च वदनं गजकर्णयेका
पञ्चो दक्षैकसहिता नियतं चतस्रः ।
नाभिः कटिः षड्थ पृच्छगता च तिस्रो
विष्टेर्ध्रुवं विगदितोऽङ्गविभाग एषः ।
मुखे कार्य्यश्चलिर्भवति मरणं चाथ गलके
धनस्थानिर्वक्षस्थ कटितटे बुद्धिविजयः ।
कलिर्नाभौदेशे विजयमथ पुच्छे च जगदुः
शरीरे भद्रायाः एथगिति पञ्चं पूर्व्वसुनयः ।
मनुवसुमुनितिथियुगदृग्-
शिवगुणसंख्यासु तिथिषु पूर्व्वाद्यगोः ।
१४ । ८ । ७ । १५ । ४ । ९ । ११ । २ ।
आयाति विष्टिरेषा पृष्ठे शुभदा पुरस्तु शुभदा ।"
पूर्व्वाद्यगोः पूर्व्वाद्यादिदिङ्मुखो भवति इत्यर्थः ।
"एकेन हीना द्विगुणा तिथिषु
सप्तावशिष्टं करणं ववादि ।
पूर्व्वे परेऽप्येवमयं विशेषो
दिक्संगुणा चन्द्रविवर्जिता च ।
किंस्तुघ्नसंज्ञं करणं प्रदिष्ट-
मादेस्तिथेरादिदले सदैव ।
उपान्त्यशेषे शकुनिस्तु दर्शे
पूर्व्वे चतुष्पादपरे च नागः ।
इत्थंकमलजचित्राद्यंमभूभृयः सयमा ववादेः ।
कलिष्टपञ्चिमारूढाः पतयः शकुन्यादेः ।"
ववादयधिपकथनम् ।
"प्रौष्ठिकस्थिरशुभानि ववाख्ये
बालवे द्विजहिताद्यपि कर्म्म ।
कौलवे प्रमदमित्रविधानं
तैतिले शुभगताश्रयकर्म्म ।
गरे च बीजाश्रयकर्षणानि
वणिज्यपि स्त्रीयैर्वणिक्क्रिया च ।
न विद्धिमाप्नोति शुभेषु तत्त्व विद्यां
विवाहाभिघातादिषु तत्र विद्धिः ।
मन्त्रौषधानि शकुनौ च सधौष्टिकानि
गोविप्रराज्यपिशुकर्म्म चतुष्पदे तु ।
बौभाग्यदारवणतिद्युषकर्म्मनागे
किंस्तुघ्नजानि शुभपौष्टिकमङ्गलानि ।"
इति ज्योतिस्तत्त्वम् ।
(यथा, कथासरित्सागरे । २ । ११ ।
"कश्चिद्दहति समेत्य द्रविणं निःक्षिप्य हन्त गलाक्षि ।
भातःपरं प्रभाते विष्टिदिनं किं करोम्यद्य ।")

विष्टिः, त्रि, (विश् + क्तिच् ।) कर्म्मकरः । इति मेदिनी । टे, २६ ।

विष्ठवं, क्ली, (विष्ठूरं स्रवम् ।) दूरस्रावम् । यथा । विष्ठवमिपरिभ्यः स्रवस्य । अभ्यः स्रवस्य सस्य वः स्यात् । विष्ठवं कुष्ठवं भ्रमिष्ठवं परिष्ठवम् । इति सिद्धान्तकौमुदी ।

विष्ठा, स्त्री, (विविधप्रकारेण तिष्ठति उदरे इति । वि + स्था + कः । उपसर्गादिति षः ।) विविधप्रकारेणोदरे तिष्ठति या । तत्पर्य्यायः । उच्चारः २ अवस्करः ३ शमलम् ४ शकृत् ५ गूथम् ६ पुरीषम् ७ वर्च्चस्कम् ८ विट् ९ । इत्यमरः । वर्च्चः १० । इति जटाधरः । च्यमेथम् ११ दूषम् १२ कल्कम् १३ मलम् १४ । इति शब्दरत्नावली । किट्टम् १५ पूतिकम् १६ । इति राजनिर्घण्टः । (यथा,—
"गुरोर्हितं प्रकर्त्तव्यं वाङ्मनःकायकर्म्मभिः ।
अहिताचरणादेव विष्ठायां जायते क्रिमिः ।"
इति ज्ञानसङ्कलिततन्त्रसारे ।)
तद्दर्शननिषेधो यथा,—
"न नग्नां स्त्रियमीक्षेत पुरुषं वा कदाचन ।
न च मूत्रं पुरीषं वा न च संहृष्टमैथुनम् ।"
अन्ये तदुत्सर्गनिषेधो यथा,—
"गोष्ठे क्रीड़ेन्न धावेत नाप्सु विण्मूत्रमाचरेत् ।
गोच्छिरः संविशेन्नित्यं न नग्नः स्नानमाचरेत् ।"
इति कौर्म्मे उपविभागे १५ अध्यायः ।
तदुत्सर्गविधानं पुरीषप्रातःस्नानशब्दयोर्द्रष्टव्यम् ।

विष्णुः, पुं, अग्निः । इति शब्दमाला । शुद्धः । वसुदेवतः । इति धरणिः । (द्वादशादित्यानामन्यतमः । यथा, महाभारते । १ । ६५ । १६ ।
"एकादश्यान्तथा त्वष्टा द्वादश्यो विष्णुरुच्यते ।
अपरस्यन्तु सर्व्वेषामादित्यानां गुणाधिकः ।")
धर्म्मशास्त्रकर्त्तृमुनिविशेषः । यथा,—
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोङ्गिराः ।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती ।
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ।"
इति याज्ञवल्क्यसंहिता ।
तत्त्वज्ञो रूपविशेषः । तस्य व्युत्पत्तिर्यथा ।
वेवेष्टि व्याप्नोति विश्वं यः । वेवेष्टि विश्वति व्याप्यायते विश्वमिति वा । विश्नाति विशुनक्ति भक्तान् मायापसारणेन संसारादिति वा । विशति सर्व्वभूतानि विशन्ति सर्व्वभूतानि अत्रेति वा ।
"यस्मादिदमिदं सर्व्वं तस्य शक्त्या महात्मनः ।
तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनात् ।"
इति विष्णुपुराणम् । इत्यमरटीकायां भरतः ।
("डुकृञ्करणे विष्णुरुच्यते ।" इति महाभारते । ५ । ७० । ३ ।) तत्पर्य्यायः । नारायणः २ शङ्खः ३ वैकुण्ठः ४ विष्टरश्रवाः ५ दामोदरः ६ हृषीकेशः ७ केशवः ८ माधवः ९ स्वभूः १० दैत्यारिः ११ पुष्करीकाक्षः १२ गोविन्दः १३ गरुड़ध्वजः १४ पीताम्बरः १५ अच्युतः १६ शार्ङ्गी १७ विश्वक्सेनः १८ जनार्द्दनः १९ उपेन्द्रः २० इन्द्रावरजः २१ चक्रपाणिः २२ चतुर्भुजः २३ पद्मनाभः २४ मधुरिपुः २५ वासुदेवः २६ त्रिविक्रमः २७ देवकीनन्दनः २८ श्रौरिः २९ श्रीपतिः ३० पुरुषोत्तमः ३१ वनमाली ३२ बलिध्वंसी ३३ कंसारातिः ३४ अधोक्षजः ३५ विश्वम्भरः ३६

कैटभजित् ३७ विधुः ३८ श्रीवत्सलाञ्छनः ३९। रत्नगर्भः। पुराणपुरुषः ४० वृषी ४१ शुचिः ४२ सोमपः ४३ अमृतपः ४४ सोमः ४५ पुरुजित् ४६ पुरुसत्तमः ४७ विनयः ४८ जयः ४९ सत्यसंधः ५० दाशार्हः ५१ सात्वतां पतिः ५२ जीवः ५३ विनयितासाक्षी ५४ मुकुन्दः ५५ अमितविक्रमः ५६ अम्भोनिधिः ५७ अनन्तात्मा ५८ महोदधिशयः ५९ अन्तकः ६० अजः ६१ महार्हः ६२ स्वाभाव्यः ६३ जितामित्रः ६४ प्रमोदनः ६५ आनन्दः ६६ नन्दनः ६७ सत्यधर्मा ६८ त्रिविक्रमः ६९ महर्षिकपिलाचार्यः ७० कृतज्ञः ७१ मेदिनीपतिः ७२ त्रिपदः ७३ त्रिदशाध्यक्षः ७४ महाशृङ्गः ७५ कृतान्तकृत् ७६ महावराहः ७७ गोविन्दः ७८ सुषेणः ७९ कनकाङ्गदी ८० गुह्यः ८१ गभीरः ८२ गहनः ८३ गुप्तः ८४ चक्रगदाधरः ८५ वेधाः ८६ स्वाङ्गः ८७ अजितः ८८ कृष्णः ८९ दृढः ९० संकर्षणोऽच्युतः ९१ वरुणः ९२ वारुणः ९३ वृक्षः ९४ पुष्कराक्षः ९५ महामनाः ९६ भगवान् ९७ भगहा ९८ आनन्दी ९९ वनमाली १०० हलायुधः १०१ आदित्यः १०२ ज्योतिरादित्यः १०३ सहिष्णुः १०४ गतिसत्तमः १०५ सुधन्वा १०६ खण्डपरशुः १०७ दारुणः १०८ द्रविणप्रदः १०९ दिवःस्पृक् ११० सर्वदृग्व्यासः १११ वाचस्पतिरयोनिजः ११२ त्रिसामा ११३ सामगः ११४ साम ११५ निर्वाणं ११६ भेषजं ११७ भिषक् ११८ संन्यासकृत् ११९ शमः १२० शान्तः १२१ निष्ठा १२२ शान्तिः १२३ परायणम् १२४ शुभाङ्गः १२५ शान्तिदः १२६ स्रष्टा १२७ कुमुदः १२८ कुवलेशयः १२९ गोहितः १३० गोपतिः १३१ गोप्ता १३२ वृषभाक्षः १३३ वृषप्रियः १३४ अनिवर्ती १३५ निवृत्तात्मा १३६ संक्षेप्ता १३७ क्षेमकृत् १३८ शिवः १३९ श्रीवत्सवक्षाः १४० श्रीवासः १४१ श्रीपतिः १४२ श्रीमतां वरः १४३ श्रीदः १४४ श्रीशः १४५ श्रीनिवासः १४६ श्रीनिधिः १४७ श्रीविभावनः १४८ श्रीधरः १४९ श्रीकरः १५० पद्मी १५१ पद्मनिभेक्षणः १५२ पद्मनाभः १५३ अरविन्दाक्षः १५४ पद्मगर्भः १५५ शरीरभृत् १५६ महर्द्धिः १५७ ऋद्धः १५८ वृद्धात्मा १५९ महाक्षः १६० गरुडध्वजः १६१ अतुलः १६२ शरभः १६३ भीमः १६४ समयज्ञः १६५ हविर्हरिः १६६ सर्वलक्षणलक्षण्यः १६७ लक्ष्मीवान् १६८ समितिञ्जयः १६९ विक्षरः १७० रोहितः १७१ मार्गः १७२ हेतुः १७३ दामोदरः १७४ सहः १७५ महीधरः १७६ महाभागः १७७ वेगवान् १७८ अमिताशनः १७९ उद्भवः १८० क्षोभणः १८१ देवः १८२ श्रीगर्भः १८३ परमेश्वरः १८४ करणं १८५ कारणं १८६ कर्ता १८७ विकर्ता १८८ गहनः १८९ गुहः १९० व्यवसायः १९१ व्यवस्थानः १९२ संस्थानः १९३ स्थानदः १९४ ध्रुवः १९५ परर्द्धिः १९६ परमस्पष्टः १९७ तुष्टः १९८ पुष्टः १९९ शुभेक्षणः २०० रामः २०१ विरामः २०२ विरजः २०३ मार्गः २०४ नेयः २०५ नयः २०६ अनयः २०७ वीरः २०८ शक्तिमतां श्रेष्ठः २०९ धर्मः २१० धर्मविदुत्तमः २११ वैकुण्ठः २१२ पुरुषः २१३ प्राणः २१४ प्राणदः २१५ प्रणवः २१६ पृथुः २१७ हिरण्यगर्भः २१८ शत्रुघ्नः २१९ व्याप्तः २२० अन्नं २२१ अन्नादः २२२ संवृतः २२३ सम्प्रमर्दनः २२४ अहः संवर्तकः २२५ वह्निः २२६ अनिलः २२७ धरणीधरः २२८ सुप्रसादः २२९ प्रसन्नात्मा २३० विश्वधृक् २३१ विश्वभुक् २३२ विभुः २३३ सत्कर्ता २३४ सत्कृतः २३५ साधुः २३६ जह्नुः २३७ नारायणः २३८ नरः २३९ असंख्येयः २४० अप्रमेयात्मा २४१ विशिष्टः २४२ शिष्टकृत् २४३ शुचिः २४४ सिद्धार्थः २४५ सिद्धसंकल्पः २४६ सिद्धिदः २४७ सिद्धिसाधनः २४८ वृषाही २४९ वृषभः २५० विष्णुः २५१ वृषपर्वा २५२ वृषोदरः २५३ वर्धनः २५४ वर्धमानः २५५ विविक्तः २५६ श्रुतिसागरः २५७ सुभुजः २५८ दुर्धरः २५९ वाग्मी २६० महेन्द्रः २६१ वसुदः २६२ वसुः २६३ नैकरूपः २६४ बृहद्रूपः २६५ शिपिविष्टः २६६ प्रकाशनः २६७ ओजस्तेजोद्युतिधरः २६८ प्रकाशात्मा २६९ प्रतापनः २७० ऋद्धः २७१ स्पष्टाक्षरः २७२ मन्त्रः २७३ चन्द्रांशुः २७४ भास्करद्युतिः २७५ अमृतांशूद्भवः २७६ भानुः २७७ शशबिन्दुः २७८ सुरेश्वरः २७९ औषधं २८० जगतः सेतुः २८१ सत्यधर्मपराक्रमः २८२ भूतभव्यभवन्नाथः २८३ पवनः २८४ पावनः २८५ अनलः २८६ कामहा २८७ कामकृत् २८८ कान्तः २८९ कामः २९० कामप्रदः २९१ प्रभुः २९२ युगादिकृत् २९३ युगावर्तः २९४ नैकमायः २९५ महाशनः २९६ अदृश्यः २९७ व्यक्तरूपः २९८ सहस्रजित् २९९ अनन्तजित् ३०० इष्टः ३०१ विशिष्टः ३०२ शिष्टेष्टः ३०३ शिखण्डी ३०४ नहुषः ३०५ वृषः ३०६ क्रोधहा ३०७ क्रोधकृत् ३०८ कर्ता ३०९ विश्वबाहुः ३१० महीधरः ३११ अच्युतः ३१२ प्रथितः ३१३ प्राणः ३१४ प्राणदः ३१५ वासवानुजः ३१६ अपांनिधिः ३१७ अधिष्ठानं ३१८ अप्रमत्तः ३१९ प्रतिष्ठितः ३२० स्कन्दः ३२१ स्कन्दधरः ३२२ धुर्यः ३२३ वरदः ३२४ वायुवाहनः ३२५ वासुदेवो बृहद्भानुः ३२६ आदिदेवः ३२७ पुरन्दरः ३२८ अशोकः ३२९ तारणः ३३० तारः ३३१ शूरः ३३२ शौरिः ३३३ जनेश्वरः ३३४ अनुकूलः ३३५ शतावर्तः ३३६ पद्मी ३३७ पद्मनिभेक्षणः ३३८ पद्मनाभः ३३९ अरविन्दाक्षः ३४० पद्मगर्भः ३४१ शरीरभृत् ३४२ महर्द्धिः ३४३ ऋद्धः ३४४ वृद्धात्मा ३४५ महाक्षः ३४६ गरुडध्वजः ३४७ अतुलः ३४८ शरभः ३४९ भीमः ३५० समयज्ञः ३५१ हविर्हरिः ३५२ सर्वलक्षणलक्षण्यः ३५३ लक्ष्मीवान् ३५४ समितिञ्जयः ३५५ विक्षरः ३५६ रोहितः ३५७ मार्गः ३५८ हेतुः ३५९ दामोदरः ३६० सहः ३६१ महीधरः ३६२ महाभागः ३६३ वेगवान् ३६४ अमिताशनः ३६५ उद्भवः ३६६ क्षोभणः ३६७ देवः ३६८ श्रीगर्भः ३६९ परमेश्वरः ३७० करणं ३७१ कारणं ३७२ कर्ता ३७३ विकर्ता ३७४ गहनः ३७५ गुहः ३७६ व्यवसायः ३७७ व्यवस्थानः ३७८ संस्थानः ३७९ स्थानदः ३८० ध्रुवः ३८१ परर्द्धिः ३८२ परमस्पष्टः ३८३ तुष्टः ३८४ पुष्टः ३८५ शुभेक्षणः ३८६ रामः ३८७ विरामः ३८८ विरजः ३८९ मार्गः ३९० नेयः ३९१ नयः ३९२ अनयः ३९३ वीरः ३९४ शक्तिमतां श्रेष्ठः ३९५ धर्मः ३९६ धर्मविदुत्तमः ३९७ वैकुण्ठः ३९८ पुरुषः ३९९ प्राणः ४०० प्राणदः ४०१ प्रणवः ४०२ पृथुः ४०३ हिरण्यगर्भः ४०४ शत्रुघ्नः ४०५ व्याप्तः ४०६ अन्नं ४०७ अन्नादः ४०८ संवृतः ४०९ सम्प्रमर्दनः ४१० अहः संवर्तकः ४११ वह्निः ४१२ अनिलः ४१३ धरणीधरः ४१४ सुप्रसादः ४१५ प्रसन्नात्मा ४१६ विश्वधृक् ४१७ विश्वभुक् ४१८ विभुः ४१९ सत्कर्ता ४२० सत्कृतः ४२१ साधुः ४२२ जह्नुः ४२३ नारायणः ४२४ नरः ४२५ असंख्येयः ४२६ अप्रमेयात्मा ४२७ विशिष्टः ४२८ शिष्टकृत् ४२९ शुचिः ४३० सिद्धार्थः ४३१ सिद्धसंकल्पः ४३२ सिद्धिदः ४३३ सिद्धिसाधनः ४३४ वृषाही ४३५ वृषभः ४३६ विष्णुः ४३७ वृषपर्वा ४३८ वृषोदरः ४३९ वर्धनः ४४० वर्धमानः ४४१ विविक्तः ४४२ श्रुतिसागरः ४४३ सुभुजः ४४४ दुर्धरः ४४५ वाग्मी ४४६ महेन्द्रः ४४७ वसुदः ४४८ वसुः ४४९ नैकरूपः ४५० बृहद्रूपः ४५१ शिपिविष्टः ४५२ प्रकाशनः ४५३ ओजस्तेजोद्युतिधरः ४५४ प्रकाशात्मा ४५५ प्रतापनः ४५६ ऋद्धः ४५७ स्पष्टाक्षरः ४५८ मन्त्रः ४५९ चन्द्रांशुः ४६० भास्करद्युतिः ४६१ अमृतांशूद्भवः ४६२ भानुः ४६३ शशबिन्दुः ४६४ सुरेश्वरः ४६५ औषधं ४६६ जगतः सेतुः ४६७ सत्यधर्मपराक्रमः ४६८ भूतभव्यभवन्नाथः ४६९ पवनः ४७० पावनः ४७१ अनलः ४७२ कामहा ४७३ कामकृत् ४७४ कान्तः ४७५ कामः ४७६ कामप्रदः ४७७ प्रभुः ४७८ युगादिकृत् ४७९ युगावर्तः ४८० नैकमायः ४८१ महाशनः ४८२ अदृश्यः ४८३ व्यक्तरूपः ४८४ सहस्रजित् ४८५ अनन्तजित् ४८६ इष्टः ४८७ विशिष्टः ४८८ शिष्टेष्टः ४८९ शिखण्डी ४९० नहुषः ४९१ वृषः ४९२ क्रोधहा ४९३ क्रोधकृत् ४९४ कर्ता ४९५ विश्वबाहुः ४९६ महीधरः ४९७ अच्युतः ४९८ प्रथितः ४९९ प्राणः ५०० प्राणदः ५०१ वासवानुजः ५०२ अपांनिधिः ५०३ अधिष्ठानं ५०४ अप्रमत्तः ५०५ प्रतिष्ठितः ५०६ स्कन्दः ५०७ स्कन्दधरः ५०८ धुर्यः ५०९ वरदः ५१० वायुवाहनः ५११ वासुदेवो बृहद्भानुः ५१२ आदिदेवः ५१३ पुरन्दरः ५१४ अशोकः ५१५ तारणः ५१६ तारः ५१७ शूरः ५१८ शौरिः ५१९ जनेश्वरः ५२० अनुकूलः ५२१ शतावर्तः ५२२ पद्मी ५२३ पद्मनिभेक्षणः ५२४ पद्मनाभः ५२५ अरविन्दाक्षः ५२६ पद्मगर्भः ५२७ शरीरभृत् ५२८ महर्द्धिः ५२९ ऋद्धः ५३० वृद्धात्मा ५३१ महाक्षः ५३२ गरुडध्वजः ५३३ अतुलः ५३४ शरभः ५३५ भीमः ५३६ समयज्ञः ५३७ हविर्हरिः ५३८ सर्वलक्षणलक्षण्यः ५३९ लक्ष्मीवान् ५४० समितिञ्जयः ५४१ विक्षरः ५४२ रोहितः ५४३ मार्गः ५४४ हेतुः ५४५ दामोदरः ५४६ सहः ५४७ महीधरः ५४८ महाभागः ५४९ वेगवान् ५५० अमिताशनः ५५१ उद्भवः ५५२ क्षोभणः ५५३ देवः ५५४ श्रीगर्भः ५५५ परमेश्वरः ५५६ करणं ५५७ कारणं ५५८ कर्ता ५५९ विकर्ता ५६० गहनः ५६१ गुहः ५६२ व्यवसायः ५६३ व्यवस्थानः ५६४ संस्थानः ५६५ स्थानदः ५६६ ध्रुवः ५६७ परर्द्धिः ५६८ परमस्पष्टः ५६९ तुष्टः ५७० पुष्टः ५७१ शुभेक्षणः ५७२ रामः ५७३ विरामः ५७४ विरजः ५७५ मार्गः ५७६ नेयः ५७७ नयः ५७८ अनयः ५७९ वीरः ५८० शक्तिमतां श्रेष्ठः ५८१ धर्मः ५८२ धर्मविदुत्तमः ५८३ वैकुण्ठः ५८४ पुरुषः ५८५ प्राणः ५८६ प्राणदः ५८७ प्रणवः ५८८ पृथुः ५८९ हिरण्यगर्भः ५९० शत्रुघ्नः ५९१ व्याप्तः ५९२ अन्नं ५९३ अन्नादः ५९४ संवृतः ५९५ सम्प्रमर्दनः ५९६ अहः संवर्तकः ५९७ वह्निः ५९८ अनिलः ५९९ धरणीधरः ६०० सुप्रसादः ६०१ प्रसन्नात्मा ६०२ विश्वधृक् ६०३ विश्वभुक् ६०४ विभुः ६०५ सत्कर्ता ६०६ सत्कृतः ६०७ साधुः ६०८ जह्नुः ६०९ नारायणः ६१० नरः ६११ असंख्येयः ६१२ अप्रमेयात्मा ६१३ विशिष्टः ६१४ शिष्टकृत् ६१५ शुचिः ६१६ सिद्धार्थः ६१७ सिद्धसंकल्पः ६१८ सिद्धिदः ६१९ सिद्धिसाधनः ६२० वृषाही ६२१ वृषभः ६२२ विष्णुः ६२३ वृषपर्वा ६२४ वृषोदरः ६२५ वर्धनः ६२६ वर्धमानः ६२७ विविक्तः ६२८ श्रुतिसागरः ६२९ सुभुजः ६३० दुर्धरः ६३१ वाग्मी ६३२ महेन्द्रः ६३३ वसुदः ६३४ वसुः ६३५ नैकरूपः ६३६ बृहद्रूपः ६३७ शिपिविष्टः ६३८ प्रकाशनः ६३९ ओजस्तेजोद्युतिधरः ६४० प्रकाशात्मा ६४१ प्रतापनः ६४२ ऋद्धः ६४३ स्पष्टाक्षरः ६४४ मन्त्रः ६४५ चन्द्रांशुः ६४६ भास्करद्युतिः ६४७ अमृतांशूद्भवः ६४८ भानुः ६४९ शशबिन्दुः ६५० सुरेश्वरः ६५१ औषधं ६५२ जगतः सेतुः ६५३ सत्यधर्मपराक्रमः ६५४ भूतभव्यभवन्नाथः ६५५ पवनः ६५६ पावनः ६५७ अनलः ६५८ कामहा ६५९ कामकृत् ६६० कान्तः ६६१ कामः ६६२ कामप्रदः ६६३ प्रभुः ६६४ युगादिकृत् ६६५ युगावर्तः ६६६ नैकमायः ६६७ महाशनः ६६८ अदृश्यः ६६९ व्यक्तरूपः ६७० सहस्रजित् ६७१ अनन्तजित् ६७२ इष्टः ६७३ विशिष्टः ६७४ शिष्टेष्टः ६७५ शिखण्डी ६७६ नहुषः ६७७ वृषः ६७८ क्रोधहा ६७९ क्रोधकृत् ६८० कर्ता ६८१ विश्वबाहुः ६८२ महीधरः ६८३ अच्युतः ६८४ प्रथितः ६८५ प्राणः ६८६ प्राणदः ६८७ वासवानुजः ६८८ अपांनिधिः ६८९ अधिष्ठानं ६९० अप्रमत्तः ६९१ प्रतिष्ठितः ६९२ स्कन्दः ६९३ स्कन्दधरः ६९४ धुर्यः ६९५ वरदः ६९६ वायुवाहनः ६९७ वासुदेवो बृहद्भानुः ६९८ आदिदेवः ६९९ पुरन्दरः ७०० अशोकः ७०१ तारणः ७०२ तारः ७०३ शूरः ७०४ शौरिः ७०५ जनेश्वरः ७०६ अनुकूलः ७०७ शतावर्तः ७०८ पद्मी ७०९ पद्मनिभेक्षणः ७१० पद्मनाभः ७११ अरविन्दाक्षः ७१२ पद्मगर्भः ७१३ शरीरभृत् ७१४ महर्द्धिः ७१५ ऋद्धः ७१६ वृद्धात्मा ७१७ महाक्षः ७१८ गरुडध्वजः ७१९ अतुलः ७२० शरभः ७२१ भीमः ७२२ समयज्ञः ७२३ हविर्हरिः ७२४ सर्वलक्षणलक्षण्यः ७२५ लक्ष्मीवान् ७२६ समितिञ्जयः ७२७ विक्षरः ७२८ रोहितः ७२९ मार्गः ७३० हेतुः ७३१ दामोदरः ७३२ सहः ७३३ महीधरः ७३४ महाभागः ७३५ वेगवान् ७३६ अमिताशनः ७३७ उद्भवः ७३८ क्षोभणः ७३९ देवः ७४० श्रीगर्भः ७४१ परमेश्वरः ७४२ करणं ७४३ कारणं ७४४ कर्ता ७४५ विकर्ता ७४६ गहनः ७४७ गुहः ७४८ व्यवसायः ७४९ व्यवस्थानः ७५० संस्थानः ७५१ स्थानदः ७५२ ध्रुवः ७५३ परर्द्धिः ७५४ परमस्पष्टः ७५५ तुष्टः ७५६ पुष्टः ७५७ शुभेक्षणः ७५८ रामः ७५९ विरामः ७६० विरजः ७६१ मार्गः ७६२ नेयः ७६३ नयः ७६४ अनयः ७६५ वीरः ७६६ शक्तिमतां श्रेष्ठः ७६७ धर्मः ७६८ धर्मविदुत्तमः ७६९ वैकुण्ठः ७७० पुरुषः ७७१ प्राणः ७७२ प्राणदः ७७३ प्रणवः ७७४ पृथुः ७७५ हिरण्यगर्भः ७७६ शत्रुघ्नः ७७७ व्याप्तः ७७८ अन्नं ७७९ अन्नादः ७८० संवृतः ७८१ सम्प्रमर्दनः ७८२ अहः संवर्तकः ७८३ वह्निः ७८४ अनिलः ७८५ धरणीधरः ७८६ सुप्रसादः ७८७ प्रसन्नात्मा ७८८ विश्वधृक् ७८९ विश्वभुक् ७९० विभुः ७९१ सत्कर्ता ७९२ सत्कृतः ७९३ साधुः ७९४ जह्नुः ७९५ नारायणः ७९६ नरः ७९७ असंख्येयः ७९८ अप्रमेयात्मा ७९९ विशिष्टः ८०० शिष्टकृत् ८०१ शुचिः ८०२ सिद्धार्थः ८०३ सिद्धसंकल्पः ८०४ सिद्धिदः ८०५ सिद्धिसाधनः ८०६ वृषाही ८०७ वृषभः ८०८ विष्णुः ८०९ वृषपर्वा ८१० वृषोदरः ८११ वर्धनः ८१२ वर्धमानः ८१३ विविक्तः ८१४ श्रुतिसागरः ८१५ सुभुजः ८१६ दुर्धरः ८१७ वाग्मी ८१८ महेन्द्रः ८१९ वसुदः ८२० वसुः ८२१ नैकरूपः ८२२ बृहद्रूपः ८२३ शिपिविष्टः ८२४ प्रकाशनः ८२५ ओजस्तेजोद्युतिधरः ८२६ प्रकाशात्मा ८२७ प्रतापनः ८२८ ऋद्धः ८२९ स्पष्टाक्षरः ८३० मन्त्रः ८३१ चन्द्रांशुः ८३२ भास्करद्युतिः ८३३ अमृतांशूद्भवः ८३४ भानुः ८३५ शशबिन्दुः ८३६ सुरेश्वरः ८३७ औषधं ८३८ जगतः सेतुः ८३९ सत्यधर्मपराक्रमः ८४० भूतभव्यभवन्नाथः ८४१ पवनः ८४२ पावनः ८४३ अनलः ८४४ कामहा ८४५ कामकृत् ८४६ कान्तः ८४७ कामः ८४८ कामप्रदः ८४९ प्रभुः ८५० युगादिकृत् ८५१ युगावर्तः ८५२ नैकमायः ८५३ महाशनः ८५४ अदृश्यः ८५५ व्यक्तरूपः ८५६ सहस्रजित् ८५७ अनन्तजित् ८५८ इष्टः ८५९ विशिष्टः ८६० शिष्टेष्टः ८६१ शिखण्डी ८६२ नहुषः ८६३ वृषः ८६४ क्रोधहा ८६५ क्रोधकृत् ८६६ कर्ता ८६७ विश्वबाहुः ८६८ महीधरः ८६९ अच्युतः ८७० प्रथितः ८७१ प्राणः ८७२ प्राणदः ८७३ वासवानुजः ८७४ अपांनिधिः ८७५ अधिष्ठानं ८७६ अप्रमत्तः ८७७ प्रतिष्ठितः ८७८ स्कन्दः ८७९ स्कन्दधरः ८८० धुर्यः ८८१ वरदः ८८२ वायुवाहनः ८८३ वासुदेवो बृहद्भानुः ८८४ आदिदेवः ८८५ पुरन्दरः ८८६ अशोकः ८८७ तारणः ८८८ तारः ८८९ शूरः ८९० शौरिः ८९१ जनेश्वरः ८९२ अनुकूलः ८९३ शतावर्तः ८९४ पद्मी ८९५ पद्मनिभेक्षणः ८९६ पद्मनाभः ८९७ अरविन्दाक्षः ८९८ पद्मगर्भः ८९९ शरीरभृत् ९०० महर्द्धिः ९०१ ऋद्धः ९०२ वृद्धात्मा ९०३ महाक्षः ९०४ गरुडध्वजः ९०५ अतुलः ९०६ शरभः ९०७ भीमः ९०८ समयज्ञः ९०९ हविर्हरिः ९१० सर्वलक्षणलक्षण्यः ९११ लक्ष्मीवान् ९१२ समितिञ्जयः ९१३ विक्षरः ९१४ रोहितः ९१५ मार्गः ९१६ हेतुः ९१७ दामोदरः ९१८ सहः ९१९ महीधरः ९२० महाभागः ९२१ वेगवान् ९२२ अमिताशनः ९२३ उद्भवः ९२४ क्षोभणः ९२५ देवः ९२६ श्रीगर्भः ९२७ परमेश्वरः ९२८ करणं ९२९ कारणं ९३० कर्ता ९३१ विकर्ता ९३२ गहनः ९३३ गुहः ९३४ व्यवसायः ९३५ व्यवस्थानः ९३६ संस्थानः ९३७ स्थानदः ९३८ ध्रुवः ९३९ परर्द्धिः ९४० परमस्पष्टः ९४१ तुष्टः ९४२ पुष्टः ९४३ शुभेक्षणः ९४४ रामः ९४५ विरामः ९४६ विरजः ९४७ मार्गः ९४८ नेयः ९४९ नयः ९५० अनयः ९५१ वीरः ९५२ शक्तिमतां श्रेष्ठः ९५३ धर्मः ९५४ धर्मविदुत्तमः ९५५ वैकुण्ठः ९५६ पुरुषः ९५७ प्राणः ९५८ प्राणदः ९५९ प्रणवः ९६० पृथुः ९६१ हिरण्यगर्भः ९६२ शत्रुघ्नः ९६३ व्याप्तः ९६४ अन्नं ९६५ अन्नादः ९६६ संवृतः ९६७ सम्प्रमर्दनः ९६८ अहः संवर्तकः ९६९ वह्निः ९७० अनिलः ९७१ धरणीधरः ९७२ सुप्रसादः ९७३ प्रसन्नात्मा ९७४ विश्वधृक् ९७५ विश्वभुक् ९७६ विभुः ९७७ सत्कर्ता ९७८ सत्कृतः ९७९ साधुः ९८० जह्नुः ९८१ नारायणः ९८२ नरः ९८३ असंख्येयः ९८४ अप्रमेयात्मा ९८५ विशिष्टः ९८६ शिष्टकृत् ९८७ शुचिः ९८८ सिद्धार्थः ९८९ सिद्धसंकल्पः ९९० सिद्धिदः ९९१ सिद्धिसाधनः ९९२ वृषाही ९९३ वृषभः ९९४ विष्णुः ९९५ वृषपर्वा ९९६ वृषोदरः ९९७ वर्धनः ९९८ वर्धमानः ९९९ विविक्तः १००० श्रुतिसागरः १००१ सुभुजः १००२ दुर्धरः १००३ वाग्मी १००४ महेन्द्रः १००५ वसुदः १००६ वसुः १००७ नैकरूपः १००८ बृहद्रूपः १००९ शिपिविष्टः १०१० प्रकाशनः १०११ ओजस्तेजोद्युतिधरः १०१२ प्रकाशात्मा १०१३ प्रतापनः १०१४ ऋद्धः १०१५ स्पष्टाक्षरः १०१६ मन्त्रः १०१७ चन्द्रांशुः १०१८ भास्करद्युतिः १०१९ अमृतांशूद्भवः १०२० भानुः १०२१ शशबिन्दुः १०२२ सुरेश्वरः १०२३ औषधं १०२४ जगतः सेतुः १०२५ सत्यधर्मपराक्रमः १०२६ भूतभव्यभवन्नाथः १०२७ पवनः १०२८ पावनः १०२९ अनलः १०३० कामहा १०३१ कामकृत् १०३२ कान्तः १०३३ कामः १०३४ कामप्रदः १०३५ प्रभुः १०३६ युगादिकृत् १०३७ युगावर्तः १०३८ नैकमायः १०३९ महाशनः १०४० अदृश्यः १०४१ व्यक्तरूपः १०४२ सहस्रजित् १०४३ अनन्तजित् १०४४ इष्टः १०४५ विशिष्टः १०४६ शिष्टेष्टः १०४७ शिखण्डी १०४८ नहुषः १०४९ वृषः १०५० क्रोधहा १०५१ क्रोधकृत् १०५२ कर्ता १०५३ विश्वबाहुः १०५४ महीधरः १०५५ अच्युतः १०५६ प्रथितः १०५७ प्राणः १०५८ प्राणदः १०५९ वासवानुजः १०६० अपांनिधिः १०६१ अधिष्ठानं १०६२ अप्रमत्तः १०६३ प्रतिष्ठितः १०६४ स्कन्दः १०६५ स्कन्दधरः १०६६ धुर्यः १०६७ वरदः १०६८ वायुवाहनः १०६९ वासुदेवो बृहद्भानुः १०७० आदिदेवः १०७१ पुरन्दरः १०७२ अशोकः १०७३ तारणः १०७४ तारः १०७५ शूरः १०७६ शौरिः १०७७ जनेश्वरः १०७८ अनुकूलः १०७९ शतावर्तः १०८० पद्मी १०८१ पद्मनिभेक्षणः १०८२ पद्मनाभः १०८३ अरविन्दाक्षः १०८४ पद्मगर्भः १०८५ शरीरभृत् १०८६ महर्द्धिः १०८७ ऋद्धः १०८८ वृद्धात्मा १०८९ महाक्षः १०९० गरुडध्वजः १०९१ अतुलः १०९२ शरभः १०९३ भीमः १०९४ समयज्ञः १०९५ हविर्हरिः १०९६ सर्वलक्षणलक्षण्यः १०९७ लक्ष्मीवान् १०९८ समितिञ्जयः १०९९ विक्षरः ११०० रोहितः ११०१ मार्गः ११०२ हेतुः ११०३ दामोदरः ११०४ सहः ११०५ महीधरः ११०६ महाभागः ११०७ वेगवान् ११०८ अमिताशनः ११०९ उद्भवः १११० क्षोभणः ११११ देवः १११२ श्रीगर्भः १११३ परमेश्वरः १११४ करणं १११५ कारणं १११६ कर्ता १११७ विकर्ता १११८ गहनः १११९ गुहः ११२० व्यवसायः ११२१ व्यवस्थानः ११२२ संस्थानः ११२३ स्थानदः ११२४ ध्रुवः ११२५ परर्द्धिः ११२६ परमस्पष्टः ११२७ तुष्टः ११२८ पुष्टः ११२९ शुभेक्षणः ११३० रामः ११३१ विरामः ११३२ विरजः ११३३ मार्गः ११३४ नेयः ११३५ नयः ११३६ अनयः ११३७ वीरः ११३८ शक्तिमतां श्रेष्ठः ११३९ धर्मः ११४० धर्मविदुत्तमः ११४१ वैकुण्ठः ११४२ पुरुषः ११४३ प्राणः ११४४ प्राणदः ११४५ प्रणवः ११४६ पृथुः ११४७ हिरण्यगर्भः ११४८ शत्रुघ्नः ११४९ व्याप्तः ११५० अन्नं ११५१ अन्नादः ११५२ संवृतः ११५३ सम्प्रमर्दनः ११५४ अहः संवर्तकः ११५५ वह्निः ११५६ अनिलः ११५७ धरणीधरः ११५८ सुप्रसादः ११५९ प्रसन्नात्मा ११६० विश्वधृक् ११६१ विश्वभुक् ११६२ विभुः ११६३ सत्कर्ता ११६४ सत्कृतः ११६५ साधुः ११६६ जह्नुः ११६७ नारायणः ११६८ नरः ११६९ असंख्येयः ११७० अप्रमेयात्मा ११७१ विशिष्टः ११७२ शिष्टकृत् ११७३ शुचिः ११७४ सिद्धार्थः ११७५ सिद्धसंकल्पः ११७६ सिद्धिदः ११७७ सिद्धिसाधनः ११७८ वृषाही ११७९ वृषभः ११८० विष्णुः ११८१ वृषपर्वा ११८२ वृषोदरः ११८३ वर्धनः ११८४ वर्धमानः ११८५ विविक्तः ११८६ श्रुतिसागरः ११८७ सुभुजः ११८८ दुर्धरः ११८९ वाग्मी ११९० महेन्द्रः ११९१ वसुदः ११९२ वसुः ११९३ नैकरूपः ११९४ बृहद्रूपः ११९५ शिपिविष्टः ११९६ प्रकाशनः ११९७ ओजस्तेजोद्युतिधरः ११९८ प्रकाशात्मा ११९९ प्रतापनः १२०० ऋद्धः १२०१ स्पष्टाक्षरः १२०२ मन्त्रः १२०३ चन्द्रांशुः १२०४ भास्करद्युतिः १२०५ अमृतांशूद्भवः १२०६ भानुः १२०७ शशबिन्दुः १२०८ सुरेश्वरः १२०९ औषधं १२१० जगतः सेतुः १२११ सत्यधर्मपराक्रमः १२१२ भूतभव्यभवन्नाथः १२१३ पवनः १२१४ पावनः १२१५ अनलः १२१६ कामहा १२१७ कामकृत् १२१८ कान्तः १२१९ कामः १२२० कामप्रदः १२२१ प्रभुः १२२२ युगादिकृत् १२२३ युगावर्तः १२२४ नैकमायः १२२५ महाशनः १२२६ अदृश्यः १२२७ व्यक्तरूपः १२२८ सहस्रजित् १२२९ अनन्तजित् १२३० इष्टः १२३१ विशिष्टः १२३२ शिष्टेष्टः १२३३ शिखण्डी १२३४ नहुषः १२३५ वृषः १२३६ क्रोधहा १२३७ क्रोधकृत् १२३८ कर्ता १२३९ विश्वबाहुः १२४० महीधरः १२४१ अच्युतः १२४२ प्रथितः १२४३ प्राणः १२४४ प्राणदः १२४५ वासवानुजः १२४६ अपांनिधिः १२४७ अधिष्ठानं १२४८ अप्रमत्तः १२४९ प्रतिष्ठितः १२५० स्कन्दः १२५१ स्कन्दधरः १२५२ धुर्यः १२५३ वरदः १२५४ वायुवाहनः १२५५ वासुदेवो बृहद्भानुः १२५६ आदिदेवः १२५७ पुरन्दरः १२५८ अशोकः १२५९ तारणः १२६० तारः १२६१ शूरः १२६२ शौरिः १२६३ जनेश्वरः १२६४ अनुकूलः १२६५ शतावर्तः १२६६ पद्मी १२६७ पद्मनिभेक्षणः १२६८ पद्मनाभः १२६९ अरविन्दाक्षः १२७० पद्मगर्भः १२७१ शरीरभृत् १२७२ महर्द्धिः १२७३ ऋद्धः १२७४ वृद्धात्मा १२७५ महाक्षः १२७६ गरुडध्वजः १२७७ अतुलः १२७८ शरभः १२७९ भीमः १२८० समयज्ञः १२८१ हविर्हरिः १२८२ सर्वलक्षणलक्षण्यः १२८३ लक्ष्मीवान् १२८४ समितिञ्जयः १२८५ विक्षरः १२८६ रोहितः १२८७ मार्गः १२८८ हेतुः १२८९ दामोदरः १२९० सहः १२९१ महीधरः १२९२ महाभागः १२९३ वेगवान् १२९४ अमिताशनः १२९५ उद्भवः १२९६ क्षोभणः १२९७ देवः १२९८ श्रीगर्भः १२९९ परमेश्वरः १३०० करणं १३०१ कारणं १३०२ कर्ता १३०३ विकर्ता १३०४ गहनः १३०५ गुहः १३०६ व्यवसायः १३०७ व्यवस्थानः १३०८ संस्थानः १३०९ स्थानदः १३१० ध्रुवः १३११ परर्द्धिः १३१२ परमस्पष्टः १३१३ तुष्टः १३१४ पुष्टः १३१५ शुभेक्षणः १३१६ रामः १३१७ विरामः १३१८ विरजः १३१९ मार्गः १३२० नेयः १३२१ नयः १३२२ अनयः १३२३ वीरः १३२४ शक्तिमतां श्रेष्ठः १३२५ धर्मः १३२६ धर्मविदुत्तमः १३२७ वैकुण्ठः १३२८ पुरुषः १३२९ प्राणः १३३० प्राणदः १३३१ प्रणवः १३३२ पृथुः १३३३ हिरण्यगर्भः १३३४ शत्रुघ्नः १३३५ व्याप्तः १३३६ अन्नं १३३७ अन्नादः १३३८ संवृतः १३३९ सम्प्रमर्दनः १३४० अहः संवर्तकः १३४१ वह्निः १३४२ अनिलः १३४३ धरणीधरः १३४४ सुप्रसादः १३४५ प्रसन्नात्मा १३४६ विश्वधृक् १३४७ विश्वभुक् १३४८ विभुः १३४९ सत्कर्ता १३५० सत्कृतः १३५१ साधुः १३५२ जह्नुः १३५३ नारायणः १३५४ नरः १३५५ असंख्येयः १३५६ अप्रमेयात्मा १३५७ विशिष्टः १३५८ शिष्टकृत् १३५९ शुचिः १३६० सिद्धार्थः १३६१ सिद्धसंकल्पः १३६२ सिद्धिदः १३६३ सिद्धिसाधनः १३६४ वृषाही १३६५ वृषभः १३६६ विष्णुः १३६७ वृषपर्वा १३६८ वृषोदरः १३६९ वर्धनः १३७० वर्धमानः १३७१ विविक्तः १३७२ श्रुतिसागरः १३७३ सुभुजः १३७४ दुर्धरः १३७५ वाग्मी १३७६ महेन्द्रः १३७७ वसुदः १३७८ वसुः १३७९ नैकरूपः १३८० बृहद्रूपः १३८१ शिपिविष्टः १३८२ प्रकाशनः १३८३ ओजस्तेजोद्युतिधरः १३८४ प्रकाशात्मा १३८५ प्रतापनः १३८६ ऋद्धः १३८७ स्पष्टाक्षरः १३८८ म

कर्णिकायां तथा मेरुस्तन्मध्ये ब्रह्मणो भवः ॥
एवं हृद्दा परं तस्य शरीरस्य तु सम्भवम् ।
ततस्ते तच्छरीरस्थो वायुर्वायुसमं व्रजत् ॥
अविद्याविजयश्चेमं शुद्धरूपेण धारय ।
अज्ञानच्छेदनार्थाय खड्गं तेऽस्तु तथा करे ॥
कालचक्रमयं घोरं चक्रं त्वं धारयाच्युत ।
अधर्मेराजवातार्थं गदां धारय केशव ॥
मातेयं भूतमाता ते कण्ठे तिष्ठतु सर्व्वदा ।
श्रीवत्सकौस्तुभौ चेमौ चन्द्रादित्यच्छलेन हि ॥
मारुतस्ते गतिर्वीरः गरुत्मांस्तव कीर्त्तितः ।
जेतोद्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदा प्रिया ॥
द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते ।
हृताशनो भवेद्यस्तु द्वादशी तत्परायणः ॥
स्वर्गवासी च भवतु पुमान् स्त्री वा विशेषतः ।
एव विष्णुस्वाक्यातो मूलमंत्रो देवदानवा ॥
हन्ति पाति शरीराणि स्थावरजङ्गमानि चालम् ।
युगे युगे सर्व्वगोऽयं वेदान्ते पुरुषो ह्ययम् ।
न हीनवृद्धा वक्तव्यो मनुष्योऽयं कदाचन ॥"
इति वाराहे परापरनिर्णयनामाध्यायः ॥७॥

ब्रह्मविष्णुशिवानामेकत्वं यथा,—
"ततो ब्रह्मा शरीरं तत् त्रिधा चक्रे महेश्वरः ।
प्रधानेच्छावशाच्छम्भोस्त्रिगुणं त्रिगुणोद्गतम् ॥
तदूर्द्धभागः संजातश्चतुर्वक्त्रश्चतुर्भुजः ।
स्फटिकाभश्चमः कायः शुक्लः स च चन्द्रशेखरः ॥
ईशस्ततो ब्रह्मकाये हरिश्चक्रं न्ययोजयत् ।
स्वयमेवाभवत् सद्यो ब्रह्मरूपेण लोकभृत् ॥
स्थितिशक्तिं निजां मायां प्रजलाक्षां न्ययोजयत् ।
महेशे वैष्णवे काये ज्ञानशक्तिं निजां तथा ॥
स्थितिकर्त्ताभवद्विष्णुरहमेव महेश्वरः ।
सर्व्वशक्तियोगेन सदा तद्रूपता मम ॥
अम्बशक्तिं तथा काये शम्भवे स न्ययोजयत् ।
अम्बकर्त्ताभवच्छम्भुः स एव परमेश्वरः ॥
अतश्चिद्रु शरीरेषु स्वयमेव प्रकाशते ।
ज्ञानरूपं परं ज्योतिरनादर्भगवान् प्रभुः ॥
हरिश्चित्तमकरोदेक एव महेश्वरः ।
ब्रह्मा विष्णुः शिवश्चेति संज्ञामात्र पृथक् पृथक् ॥
अतश्चैव विधाता च तथाहमपि नो पृथक् ।
एवं शरीरं रूपञ्च ज्ञानमस्माकमस्तराम् ॥"
इति कालिकापुराणे १२ अध्यायः ॥७॥

अन्यच्च ।
"शुद्धातीतः स भगवान् व्यापकः पुरुषः परः ।
अनन्तभोगशायी च यन्नाभिकमलादभूत् ॥
विष्णुश्च स च गोविन्द ईश्वरश्च सनातनः ।
यस्तं वेद महात्मानं स जीवन्मुक्त उच्यते ॥"
इति वामनपुराणे ४२ अध्यायः ॥७॥

तेन गजेन्द्रमोचनं यथा,—
पुलस्त्य उवाच ।
"भक्तिं तस्याथ संचिन्त्य नागस्तामोघदर्शनः ।
प्रीतिमानभवद्विष्णुः शुद्धचक्रगदाधरः ॥
सन्निधं कल्पयामास तस्मिन् सरसि केशवः ।
गरुडस्थो जगन्नाथो लोकाधारस्तपोधनः ॥
याहयस्तं गजेन्द्रं तं तच्च याहं जलाशयात् ।
उज्जहारप्रमेयात्मा तरसा मधुसूदनः ॥
स्मरन्तं दारयामास याहं चक्रेण माधवः ।
मोचयामास नागेन्द्रं पापेभ्यः शरणागतम् ॥
स हि देवलशापेन कुञ्जरत्वमवाप्तवान् ।
याहस्तमगमत् कृष्णाद्धरं प्राप्य दिवङ्गतः ।
गजोऽपि विष्णुना शूरो जातो दिव्यवपुः पुमान् ।"
इति वामनपुराणे ८१ अध्यायः ॥७॥

अस्य मन्त्रपूजादिर्यथा,—
"अथ वक्ष्ये महामन्त्रान् विष्णोः सर्व्वार्थसाधकान् ।
यस्य संस्मरणात् सद्यो भवाब्धेः पारमाश्रिताः ।
तारं नमः पद्म वूयात् नरो दीर्घसमन्वितौ ।
पवनो याय मन्त्रोऽयं प्रोक्तो वक्त्रैः परः ॥"
अस्य पूजाप्रयोगः । प्रातःस्नात्वादिस्नानान्तं कर्म्म कृत्वा पूजामण्डपमागत्य वैष्णवाचमनं कुर्य्यात् । तद्यथा गौतमीये ।
"केशवाद्यैस्त्रिभिः पौत्वा द्राभ्यां प्रक्षालयेत् करौ ।
द्राभ्यामोष्ठौ च संमृज्य द्राभ्यां नाभ्यादिसूर्द्धकं ततः ॥
एकेन हस्तं प्रक्षाल्य पादावपि ततैकतः ।
संप्रोक्ष्यैकेन मूर्द्धानं ततः सङ्कर्षणादिभिः ॥
आत्मनासाच्चिकर्षौच नाभ्युरस्कं भुजौ क्रमात् ।
मूर्द्धेदेवं भवेदाचमनञ्च वैष्णवात्मके ।
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ॥"
केशवादयस्तु केशवनारायणमाधवगोविन्द-विष्णुमधुसूदनत्रिविक्रमवामनश्रीधरहृषीकेश-पद्मनाभदामोदरसङ्कर्षणवासुदेवप्रद्युम्नानिरुद्ध-पुरुषोत्तमाधोक्षजनृसिंहाच्युतजनार्द्दनोपेन्द्र-हरिकृष्णाः । वाक्यन्तु प्रणवादि केशवाय नमः इत्यादि । तथा च ।
"सचतुर्थीनमोऽन्तैश्च नामभिर्विन्यसेत् सुधीः ।"
ततः सामान्यार्घ्यादिमात्रकान्तं कर्म्म विधाय केशवकीर्त्त्यादिन्यासं कुर्य्यात् । अस्य ऋष्यादिन्यासः । शिरसि प्रजापतये ऋषये नमः । मुखे गायत्रीच्छन्दसे नमः । हृदि अर्द्धलक्ष्मीहरये देवतायै नमः ॥ ॥ ततः करन्यासौ । श्रीं अङ्गुष्ठाभ्यां नमः इत्यादि । श्रीं हृदयाय नमः इत्यादि । तथा च गौतमीये ।
"ऋषिः प्रजापतिश्छन्दो गायत्री देवता पुनः ।
अर्द्धलक्ष्मीहरिः प्रोक्तः श्रीबीजेन षडङ्गकम् ॥"
ततो ध्यानम् ।
"उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम् ।
नागारातिक्षितिविविधाकल्पमापीतवस्त्रं
विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ॥"
एवं ध्यात्वा न्यसेत् । यथा । ॐ केशवाय कीर्त्त्यै नमः ललाटे । वर्णानुक्रा सार्द्धचन्द्रान् पुरस्कृत्यादित्यादिदुर्गान्तं सर्व्वत्र सानुस्वारः । ॐ नारायणाय कान्त्यै नमो मुखे । ॐ माधवाय तुष्ट्यै नमो दक्षनेत्रे । ॐ गोविन्दाय पुष्ट्यै नमो वामनेत्रे । ॐ विष्णवे धृत्यै दक्षकर्णे । ॐ मधुसूदनाय शान्त्यै वामकर्णे । ॐ त्रिविक्रमाय क्रियायै दक्षनासापुटे । ॐ वामनाय दयायै वामनासापुटे । ॐ श्रीधराय मेधायै दक्षगण्डे । ॐ हृषीकेशाय हर्षायै वामगण्डे । ॐ पद्मनाभाय श्रद्धायै ओष्ठे । ॐ दामोदराय लज्जायै अधरे । ॐ वासुदेवाय लक्ष्म्यै ऊर्द्धदन्तपंक्तौ । ॐ सङ्कर्षणाय सरस्वत्यै अधोदन्तपंक्तौ । ॐ प्रद्युम्नाय प्रीत्यै मस्तके । ॐ अनिरुद्धाय रत्यै मुखे । ॐ पुरुषोत्तमाय क्षुधायै । ॐ गदिने दुर्गायै । ॐ शार्ङ्गिणे प्रभायै । ॐ खड्गिने सत्यायै । ॐ शङ्खिने चण्डायै दक्षकरमूलसन्ध्यग्रकेषु । ॐ चक्रिणे वाण्यै । ॐ सुशार्ङ्गिणे विद्यायै । ॐ मुसलिने विजयायै । ॐ पाशिने विरजायै । ॐ अङ्कुशिने विघ्नायै वामकरमूलसन्ध्यग्रकेषु । ॐ सुकन्दाय विनदायै । ॐ नन्दजाय सुनन्दायै । ॐ नन्दिने सुभद्रे । ॐ नराय ऋद्ध्यै । ॐ नरकजिते सन्नत्यै दक्षपादमूलसन्ध्यग्रकेषु । ॐ हरये गुह्यै । ॐ कृष्णाय दुर्ग्गायै । ॐ सत्याय भूम्यै । ॐ सात्वताय मह्यै । ॐ सौराय क्षमायै वामपादमूलसन्ध्यग्रकेषु । ॐ शूराय रमायै दक्षपार्श्वे । ॐ जनार्द्दनाय उमायै वामपार्श्वे । ॐ भूधराय क्लेदिन्यै पृष्ठे । ॐ विश्वमूर्त्तये क्लिन्नायै नाभौ । ॐ वैकुण्ठाय तुदायै उदरे । ॐ यज्ञात्मने पुरुषोत्तमाय वसुधरायै हृदि । ॐ अच्युतात्मने बलिने परायै दक्षांसे । ॐ नारसिंहात्मने बलानुजाय परायणायै वक्षसि । ॐ मेदआत्मने बलाय रत्यायै वामांसे । ॐ अश्वात्मने हयग्रीवाय सन्ध्यायै हृदादिदक्षकरे । ॐ मज्जात्मने हयाय प्रज्ञायै हृदादिवामकरे । ॐ शुक्रात्मने हंसाय प्रभायै हृदादिदक्षपादे । ॐ प्राणात्मने वराहाय निशायै हृदादिवामपादे । ॐ जीवात्मने विमलाय अमोघायै हृदाद्युदरे । ॐ क्रोधात्मने नृसिंहाय विद्युतायै हृदादिमुखे । इति न्यसेत् ॥ ॥ तथा च । गौतमीये ।
"केशवादिरयं न्यासो न्यासमात्रेण देहिनाम् ।
अच्युतत्वं ददात्येव सद्यः सद्यो न संशयः ॥
मातृकार्णैः समुद्धार्य्य केशवाय इति स्मरेत् ।
कीर्त्तिं च मनसा युक्तमित्यादि न्यासमाचरेत् ।
केशवाय ततः कीर्त्तिं कान्त्यै नारायणाय च ॥"
इत्यादिगरुडसंहितावचनाच्चायं क्रमः । न तु केशवकीर्त्तिभ्यां नमः इति । तथा मुक्तिमुक्तिमिच्छता अयं न्यासः कर्त्तव्यः श्रीबीजादिकः । यथा । श्रीं अं केशवाय कीर्त्त्यै नमः इत्यादि । तथा च गौतमीये ।
"एवं प्रविन्यसेन्न्यासं लक्ष्मीबीजपुरःसरम् ।
स्मृतिं धृतिं महालक्ष्मीं प्राप्यान्ते हरितां व्रजेत् ॥"
ततस्तत्त्वन्यासपीठन्यासमूर्त्तिन्यासविष्णुपञ्जरादिन्यासान् कुर्य्यात् । तत्त्वन्यासादयस्तु ग्रन्थ-

गौरवभिया नोक्ताः । * । ततो ध्यायेत् ।
"उद्यत्कोटिदिवाकराभमनिशं शङ्खं गदां
पङ्कजं
चक्रं बिभ्रतमिन्दिरावसुमतीसंशोभिपार्श्वद्वयम् ।
कोटीराङ्गदहारकुण्डलधरं पीताम्बरं कौस्तुभो-
द्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे ।"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं
कुर्यात् । तत्र वैष्णवपात्रं गौतमीये ।
"ताम्रपात्रन्तु विप्रर्षे विष्णोरतिप्रियं मतम् ।
तथैव सर्वपात्राणां मुखं शङ्खं प्रकीर्तितम् ॥
रूप्यात्रञ्च तथा प्रोक्तं स्वर्णं वा राजतं तथा ।
मध्यपात्रं हरेः शुद्धं नान्यत्तत्र नियोजयेत् ।"
नैवेद्यदाने तु तत्रैव ।
"स्वर्णे वा ताम्रपात्रे वा रौप्ये वा पङ्कजे दले ।"
आगमकल्पद्रुमे ।
"हैरण्यं राजतं कांस्यं ताम्रं मृन्मयमेव वा ।
पात्राद्यं श्रीहरेः पात्रं नैवेद्ये कल्पयेद्बुधः ।"
पुरश्चरणचन्द्रिकायाम् । सुवर्णे राजते रैत्ये
इत्यादि । * । ततः सामान्यपीठपूजा-
नन्तरं विमलादिशक्तिसहितपीठमन्त्रं पूजां
कृत्वा पुनर्ध्यात्वा मूलेन कल्पितन्यासावावाह-
नादिपाद्यपुष्पाञ्जलिदानपर्यन्तं विधाय आव-
रणपूजां कुर्यात् । अग्न्यादिचतुष्कोणेषु दिक्षु च ॐ क्रूरोल्काय हृदयाय नमः इत्यादिना
पूजयेत् । * । ततः केशरेषु पूर्वादि ॐ नमः
नं नमः मों नमः नां नमः रां नमः यं नमः
वां नमः यं नमः । ततो दलेषु पूर्वादिदिक्षु
ॐ वासुदेवाय नमः । एवं सङ्कर्षणाय प्रद्युम्नाय
अनिरुद्धाय । अग्न्यादिकोणदलेषु ॐ ग्रान्वे
नमः एवं श्रिये सरस्वत्यै रत्यै । ततः पत्राग्रेषु
पूर्वादि ॐ चक्राय नमः एवं गदायै पद्माय कौस्तुभाय सुवत्साय खड्गाय वन-
मालायै । तद्बहिरग्रे ॐ गरुडाय नमः ।
दक्षिणे ॐ शङ्खनिधये नमः । वामे ॐ पद्म-
निधये नमः । पश्चिमे ॐ क्षमाय नमः । अग्नि-
कोणे ॐ विघ्नाय नमः । नैर्ऋते ॐ आर्यायै
नमः । वायुकोणे ॐ दुर्गायै नमः । ईशाने
ॐ क्षेत्रपाल्यै नमः । एवं सर्वत्र । तद्बहि-
रिन्द्रादीन् वज्रादींश्च पूजयित्वा धूपदीपौ दत्त्वा
नैवेद्यं दद्यात् । * । यथा । नैवेद्यमादाय
देवतायै मूलेन पाद्यार्घाचमनीयं दत्त्वा मूलेन
नैवेद्यं संप्रोक्ष्य चक्रमुद्रयाभिरक्ष
यमिति मन्त्रेण दोषसमूहं संप्रोक्ष्य रमिति दोषं
संदह्य वामकरसौधधाराभिपूर्णं वमिति मन्त्रेण
अन्तरीक्षत मूलमन्त्रमष्टधा जपेत् । ततो
वमिति धेनुमुद्रयाऽमृतीकृत्य तत्पुष्पाभ्यां संपूज्य
कृताञ्जलिः सन् हरिं प्रार्थयेत् । अस्य सुखतो
महः प्रवेदिति विभाव्य खाहान्तं मूलमुच्चार्य
नैवेद्ये जलं दद्यात् । ततो मूलमुच्चार्य एतन्नैवेद्यं
अमुकदेवताये नमः । ततो नैवेद्यं हस्ताभ्या-
मुद्धृत्य ॐ निवेदयामि भवते सुखायेदं हवि-
र्हरं इति नैवेद्यं समर्प्य अमुकदेवताये एतत्सक-
मन्त्रतोयप्रस्तरणमसीति जलं दत्त्वा वामहस्ते
आचमुद्रां प्रदर्श्य दक्षिणहस्तेन प्राणादिमुद्राः
प्रदर्शयेत् । * । यथा । ॐ प्राणाय स्वाहेति
कनिष्ठानामिके अङ्गुष्ठेन अर्घयेत् । ॐ अपा-
नाय स्वाहेति तर्जनीमध्यमे अङ्गुष्ठेन अर्घयेत् ।
ॐ व्यानाय स्वाहेति मध्यमानामे अङ्गुष्ठेन
अर्घयेत् ॐ उदानाय स्वाहेति तर्जनीमध्यमा-
नामा अङ्गुष्ठेन अर्घयेत् । ॐ समानाय
स्वाहेति सर्वाङ्गुलीरङ्गुष्ठेन अर्घयेत् । ततः
अङ्गुष्ठाभ्यामनामिकाग्रं धृत्वा त्रीं नमः पराय
अन्तरात्मने अनिरुद्धाय नैवेद्यं कल्पयामीति
नैवेद्यमुद्रां प्रदर्श्य मूलमुच्चार्य अमुकदेवतां
तर्पयामीति चतुर्धा संतर्प्य अमुकदेवताये
एतज्जलमन्त्रतापिधानमसि इति जलं दत्त्वा
आचमनीयादिकं दद्यात् । * । वैष्णवे तु
नैवेद्यदाने सर्वत्रायमेव विधिः । ततः सामान्य-
पूजापद्धत्युक्तक्रमेण विसर्जनान्तं कर्म समा-
पयेत् । अस्य पुरश्चरणं षोडशसहस्रजपः ।
तथा च ।
"विकारजयं प्रजपेन्मनुमेनं समाहितः ।
तद्दशांशं वरारिचैर्जुहुयान्मधुराप्लुतैः ।"
इति तन्त्रसारः ।
स्वयुक्तविष्णुपूजा आह्निकतत्त्वादौ द्रष्टव्या ।
शिवस्याष्टमूर्तिपूजानन्तरं तत्रैव विष्णोरष्टमूर्ति-
पूजा यथा,—
"कृता पूजा मया देवि अष्टमूर्तेः शिवस्य च ।
यथा हि परमेशानि तच्छृणुष्व वरानने ।"
इत्युपक्रम्य ।
"कृता पूजा महेशानि कृष्णस्य वासुदेवने ।
अष्ट विष्णोर्महेशानि नामानि शृणु कामिनि ।
उग्रं विष्णुं महाविष्णुं ज्वलन्तं संप्रतापनम् ।
वृषिंहं भीषणं भीमं भद्रमृत्युं प्रकीर्त्तितम् ।
एतान् विष्णून् महेशानि यथा संपूज्य तच्छृणु ।
सप्तमुखादिक्रमाद्देवि पूजयेद्विष्णुमव्ययम् ।
तस्मान्मं शृणु चार्वङ्गि ज्ञानसारं वरानने ।"
ॐ उग्राय विष्णवे नमः । ॐ महाविष्णवे
नमः । ॐ ज्वलन्ताय विष्णवे नमः । ॐ संप्र-
तापनाय विष्णवे नमः । ॐ वृषिंहाय विष्णवे
नमः । ॐ भीषणाय विष्णवे नमः । ॐ भीमाय
विष्णवे नमः । ॐ भद्रमृत्यवे विष्णवे नमः ।
"इति पूजां महेशानि कृता हि परमेश्वरि ।
विष्णुज्ञानं मया प्रोक्तं सर्वसिद्धिसमन्वितम् ।"
इति विष्णार्चनतन्त्रे ७ पटलः ।
तस्य नमस्कारस्तुत्यादिश्च यथा,—
ईश्वर उवाच ।
"मुक्तिहेतुमनाद्यन्तमजमव्ययमव्ययम् ।
यो नमेत् सर्वलोकस्य नमस्यो जायते नरः ॥
विष्णुमानन्दमद्वैतं विज्ञानं सर्वगं प्रभुम् ।
प्रणमामि सदा भक्त्या चेतसा हृदयालयम् ।
योऽन्तश्चित्तमग्नेयस्य पश्यतोहः शुभाशुभम् ।
तं सर्वसाक्षिणं विष्णुं नमस्ये परमेश्वरम् ॥
साधीनापि नमस्कारप्रयुक्तक्रमपाठये ।
संसारदुःखवर्गाणामुद्वेजनकरो हि यः ॥
ह्रस्वे स्फुरच्छ्वधरोदरचारुरन्ध्रे
लोकाधिकारिपुरुषे परमेऽप्रमेये ।
एकोऽपि चारुगुणमात्रजनप्रकाशः
सद्यः त्रपाकमपि शोधयितुं समर्थः ॥
प्रणम्य दण्डवद्भूमौ नमस्कारेण यो जपेत् ।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि ॥
दुर्गसंसारकान्तारकूपारमभिधावताम् ।
एकः शरणमस्कारः अस्ति तीरस्थ देशकः ॥
आर्योनो वा म्लेच्छानो वा तिष्ठन् वा यत्र तत्र वा ।
नमो नारायणायेति मन्त्रैकशरणो भवेत् ॥
नारायणेति शब्दोऽस्ति वाचि यस्य वर्त्तिनी ।
तथापि नरके घोरे पतन्तीति किमद्भुतम् ॥
चतुर्मुखायुर्वर्षाणि कोटिवारो
भवेन्नरः कोऽपि विशुद्धचेताः ।
सर्वे शुभानामुतैकदेशं
वदेन्न वा देवपरस्य विष्णोः ॥
वासांसा सुतः सर्वे स्तुवन्तो मधुसूदनम् ।
मतिभ्रमान्निवर्त्तन्ते न गोविन्दगुणक्षयात् ॥
अवशेनापि यन्नाम्नि कीर्त्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥
म्लेच्छेऽपि नामस्फुरितादिपुंसः
सद्यं करोत्यघपराशिम् ।
प्रज्वलतः किं पुनरत्र पुंसां
संकीर्त्तिते वाचि जगद्गुरुस्य ॥
नमः कल्याणतानन्त वासुदेवेत्युदीरितम् ।
वैभावभावितैर्विप्र न ते यमपुरं नरः ॥
प्रमाणाभावं जगं वह्नेस्तमसो भास्करोदयः ।
वाग्निः कलेरघौघस्य नामसंकीर्त्तनं हरेः ॥
न नाकपृष्ठगमनं पुनरायाति यत्नवम् ।
न जपो वासुदेवेति मुक्तिबीजमनुत्तमम् ॥
गच्छतां दूरमध्वानं क्षुत्क्षामश्रान्तचेतसाम् ।
पाथेयं पुष्करीकाक्षनामसंकीर्त्तनाद्भवेत् ॥
नम इत्येव यो नूनाक्षरैः सहयान्वितः ।
तस्याप्ययो भवेल्लोकः त्रपाकस्यापि शोधक ॥
संसारसर्पदष्टस्य निर्विषेष्टैकमेषजम् ।
हरेति वैद्यवर्य मन्त्रं जप्ता सुखी भवेन्नरः ॥
ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥
नूनं तत्कण्ठतालूकमयवाग्पाशयन्त्रिका ।
रोगाधारा न सा जिह्वा या न वक्ति हरे-
र्गुणान् ॥
कुरुषेणेव किं तस्य काम्या वा शान्तिकेण वा ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥
विज्ञातदुष्कृतसहस्रसमाहतोऽपि
श्रेयः परन्तु परिशुद्धिमभीप्समानः ।
स्वप्नान्तरेऽपि किल योनिभयं न पश्ये-
न्नारायणस्तुतिकथाश्रवणो मनुष्यः ।"
इत्यादि गारुडे नारायणभक्तिनमस्कारो नाम
२३२ अध्यायः । * ।

सूत उवाच ।
"असारभूते संसारे सारमेकं विनिर्दिशेत् ।
असारादेवलोकस्य सारमाराधनं हरेः ॥
दद्यात् पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
अर्चितं स्यात्तदा चैव तेन सर्वं चराचरम् ॥
मातृवत् परिरक्षन्तं हरिसंहारकारकम् ।
यो न पूजयते विष्णुं तं विद्यादब्रह्मघातकम् ॥
यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दन्ति मानवाः ॥
नरके पच्यते यस्तु यमेन परिभाषितः ।
किं त्वया नार्चितो देवः केशवः केशिनाशनः ॥
उदकेनाप्यभावेन ह्यात्मानमर्चितः प्रभुः ।
यो ददाति स्वकं लोकं न त्वया किं न चार्चितः ॥
न तत् करोति सा माता न पिता नापि बान्धवाः ।
यत् करोति हृषीकेशः सन्तुष्टः श्रद्धयार्चितः ॥
वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥
न दानैर्विविधैर्दत्तैर्न पुण्यैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्दनः ॥
सम्यग्देवार्थमाहात्म्यज्ञानसन्ततिकर्मणाम् ।
विसृष्टैकेकतालभ्यं मूलमाराधनं हरेः ॥
प्रसादमेत्युतो विष्णुरेतद्धि परमं धनम् ।
अन्यथा वा विशेषेण कस्तमर्चितुमर्हति ॥"
इति गारुडे पूजास्तुतिः २२३ अध्यायः ॥*॥

सूत उवाच ।
"आलोक्य बहुशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥
किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।
यो नित्यं ध्यायते देवं नारायणमनन्यधीः ॥
यद्वितीर्थसहस्राणि यद्वितीर्थशतानि च ।
नारायणप्रणामस्य कलां नार्हन्ति षोडशीम् ॥
प्रायश्चित्तान्यशेषाणि तपःकर्मादिकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तन्तु तस्येकं हरिसंस्मरणं परम् ॥
सकृन्नमपि यो ध्यायेन्नारायणमतन्द्रितः ।
सोऽपि तत्फलमाप्नोति किं पुनस्तत्परायणः ॥
आयुःक्षयमसुमेषु योगस्तस्य च योगिनः ।
या काचिन्मनसो वृत्तिः सा भवच्युताश्रयात् ॥
उत्तिष्ठन्निपतन्विष्णुं व्रजन् वै विवशंस्तथा ।
भुञ्जन् जपंश्च जायंश्च गोविन्दं माधवं स्मरेत् ॥
स्वे स्वे कर्मण्यभिरतः कुर्याच्चित्तं जनार्दने ।
एषा ह्याज्ञानुसारोक्तिः किमन्यैर्बहुभाषितैः ॥
ध्यानमेव परो धर्मो ध्यानमेव परं तपः ।
ध्यानमेव परं शौचं तस्मात् ध्यानपरो भवेत् ॥
नास्ति विष्णोः परं ध्येयं तपो ध्यानसमात् परम् ।
तस्मात् प्रधानमन्त्रोक्तं वासुदेवस्य चिन्तनम् ॥
यद्दुर्लभं परं प्राप्यं मनसो यन्न गोचरम् ।
तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः ॥
प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥
ध्यानेन सदृशं नास्ति शोधनं पापकर्मणाम् ।
आगामिदेहहेतूनां दाहकोऽप्येष पावकः ॥
विनिष्पन्नसमाधिस्तु मुक्तिमत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्मचयोऽचिरात् ॥
यथाग्निरुद्धतशिखः कक्षं दहति मारुतः ।
तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम् ॥
यथाग्निर्हाटकं कनकमपदोषं प्रणयति ।
संश्लिष्टं वासुदेवेन मनुष्याणां तथा मनः ॥
गङ्गास्नानसहस्रेषु पुष्करस्नानकोटिषु ।
यत् पापं विलयं याति स्मृते नश्यति तद्धरौ ॥
प्राणायामसहस्रेषु यत् पापं नश्यति ध्रुवम् ।
शमनाच्चैव तत् पापं हरेर्ध्यानात् प्रणश्यति ॥
एकक्षिप्रव्यतिक्रान्ते सुहूर्ते ध्यानवर्जिते ।
इन्द्रियैर्म्मथितेनेव युक्तमाक्रन्दितं भृशम् ॥
कलिप्रभावो दुर्वृत्तैः पाषण्डानां तथोक्तयः ।
न क्रमेरन् मनस्तस्य यस्य चेतसि केशवः ॥
सा तिथिस्तद्धोरात्रं स योगः स च चन्द्रमाः ।
तमं तदेव विख्यातं यत्र प्रध्यायते हरिः ॥
सा ह्यानिस्तन्महच्छिद्रं सा चान्यवदकृत्यता ।
यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते ॥
कलिः शतगुणस्तस्य कलिस्तस्य क्षते युगे ।
हृदये यस्य गोविन्दो यस्य चेतसि माधवः ॥
यस्याग्रतस्तथा पृष्ठे गच्छतस्तिष्ठतोऽपि वा ।
गोविन्दे नियतं चित्तं कृतकृत्यः सदैव सः ॥
वासुदेवे मनो यस्य जपहोमार्चनादिषु ।
तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥
अयंलभ्य च गार्हस्थ्यमतन्द्रश्च महातपः ।
छिनत्ति वैष्णवीं मायां केशवार्पितमानसः ॥
क्षमां कुर्वन्ति क्रुद्धेषु दयां सर्वेषु मानवाः ।
सदैव धर्मशीलेषु गोविन्दे हृदयस्थिते ॥
ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु ।
प्रायश्चित्तं हि सर्वस्य दुष्कृतस्येति विश्रुतम् ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥
कीटपक्षिमृगाणाञ्च हरौ संन्यस्तचेतसाम् ।
अहमेव गतिं मन्ये किं पुनर्ज्ञानिनां नृणाम् ॥
वासुदेवतरुच्छाया नातिशीता न घर्मदा ।
नरकक्लेशशमनी सा किमर्थं न सेव्यते ॥
न च दुर्व्यसनः शापो वज्रञ्चापि शचीपतेः ।
हन्तुं समर्थो हि सखे हृद्गते मधुसूदने ॥
वरतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः ।
गायत्यति यदा चित्ता सिद्धा मन्ये च धारणाम् ॥
ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
किमत्र बहुनोक्तेन युष्माकमधुना हरिम् ।
स्मरताहर्निशं विष्णुमशेषदुरितापहम् ॥
न हि ध्यानेन सदृशं पवित्रमिह विद्यते ।
श्वपाकेष्वपि सुस्नातः पापं नैवात्र लिप्यते ॥
यदा चित्तं समासक्तं जन्तोर्विषयगोचरे ।
यदि नारायणोऽयेति को न मुच्येत बन्धनात् ॥
प्रत्यक्षमितमेतद् यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥
तज्ज्ञानया धारणया योगिनो यान्ति मे जयम् ।
संसारकर्मबन्धोऽयेति यान्ति निर्बीजतां द्विजाः ॥"
इति गारुडे ध्यानस्तुतिः २२४ अध्यायः ॥
तस्य माहात्म्यं यथा,—
सूत उवाच ।
"विष्णुचित्तो भवेन्नित्यं यजेत नमेत् सदा ।
तमेवैष्यति सुस्नेहमात्मानं हरितत्परः ॥
तज्ज्ञानं यत्र गोविन्दः सा कथा यत्र केशवः ।
तत् कर्म यत्तदर्थाय किमन्यैर्बहुभाषितैः ॥
सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पितम् ।
तावेव केवलौ बाह्यौ यौ तत्पूजाकरौ करौ ॥
प्रणामसीमुग्रशिरः फलं विदु-
स्तदर्चनं पाणिफलं दिवौकसः ।
मनःफलं तद्गुणकर्मचिन्तनं
वाचस्तु गोविन्दगुणस्तवः फलम् ॥
मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्मजः ।
केशवं वेदमासाद्य दुर्वाधिरिव नश्यति ॥
यत्किञ्चित् कुरुते कर्म पुरुषः साध्वसाधु वा ।
सर्वं नारायणे न्यस्य कुर्वन्नपि न लिप्यते ॥
ह्रस्वादिचतुरास्यान्तं भूतग्रामं चतुर्विधम् ।
चराचरं जगत् सर्वं प्रसुप्तं मायया तव ॥
यस्मिन्यस्तमतिर्नं याति नरकं स्वर्गोऽपि यज्ञि-
यानां
विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोऽपि
लोकोऽष्टकः ।
सृष्टिं चेतसि संस्थितो जडधियां पुंसां दया-
मयः
किञ्चिन्नं दुरितं प्रयाति विलयं तत्राच्युते
कीर्तिते ॥
महता पुण्यपण्येन येन क्रीतोऽखिलं ध्रुवम् ।
तस्य विष्णोः प्रसादेन इह किञ्चित् प्रवृह्यति ॥
अधिकार्यं जपं ज्ञानं विष्णोर्ध्यानञ्च पूजनम् ।
गन्तुं दुःखोदधेः पारं कुर्युर्यत्र भवन्ति ते ॥
राज्ञस्य शरणं राजा पितरौ बालकस्य च ।
धर्मश्च सर्वमर्त्यानां सर्वस्य शरणं हरिः ॥
ये नमन्ति जगद्योनिं वासुदेवं सनातनम् ।
न तेभ्यो विद्यते तीर्थमधिकं मुनिसत्तम ॥
अनर्घरत्नपूजान्तु कुर्यात् स्वाध्यायमेव च ।
तं सर्वहृद्म गोविन्दं ध्यानं नित्यमतन्द्रितः ॥
भूमं वा भगवद्भक्तं निधनं श्वपचं तथा ।
द्विजातिसमं मन्ये न याति नरकं नरः ॥
आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथा दृष्ट्वा कर्तारं को न मुच्येत बन्धनात् ॥
यथा जातवलो वह्निर्दहत्यार्द्रमपीन्धनम् ।
तथाविधः स्मृतो विष्णुर्योगिनां सर्वकिल्बिषम् ॥
प्रदीप्तं पर्वतं यद्वत् गात्रयन्ति दृगादयः ।

तदत् पापानि सर्व्वाणि योगाभ्यासरतं नरम् ॥
यस्य यावांच विश्वासस्तस्य सिद्धिश्च तावती ।
एतावानिति ज्ञानस्य प्रभावः परिमीयते ॥
विदेशादपि गोविन्दं दमघोषात्मजः स्मरन् ।
शिशुपालो गतस्तत्त्वं किं पुनस्तत्परायणः ॥
अयं देवो मुनिवन्द्य एष ब्रह्मा दृहस्पतिः ।
इत्याख्या जायते तावद्यावन्नार्च्चयते हरिम् ॥"
इति गारुड़े विष्णुमाहात्म्यं २३५ अध्यायः ॥
तस्य पादोदकपानादिफलम् ।
"हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकञ्च निर्म्माल्यं मस्तके यस्य सोच्युतः ॥
नैवेद्यमन्नं तुलसीविमिश्रं
विशेषतः पादजलं पिबेच ।
योऽश्नाति नित्यं पुरतो मुरारेः
प्राप्नोति सुप्रेमयुतां स भक्तिम् ॥
हत्या हन्ति यदङ्घ्रिसङ्गतुलसी स्पृष्टञ्च पादोदकं
नैवेद्यं बहुमद्यपानदुरितं गुर्व्वङ्गनागङ्गमम् ॥"
इति पाद्मोत्तरखण्डे १० अध्यायः ॥ * ॥
तस्य नाम्नां व्युत्पत्तयो यथा,—
पृथिव्युवाच ।
"जातेषु ग्रीषो भवसि तस्माच्छेषोऽपि कीर्त्तितः ॥
वसनोत्पत्तियुक्तेषु ब्रह्मेन्द्ररुद्रादिषु ।
यस्मात्त्वं वससे स्थानात्तस्मात् कीर्त्यसेऽच्युत; ॥
ब्रह्माणमिन्द्रं रुद्रञ्च यमं वरुणमेव च ।
नियम्य हरसे यस्मात्तस्माद्धरिरिहोच्यसे ॥
सम्मानयसि भूतानि वसुधा यशसा श्रिया ।
चिरेण वसुधा देव तस्माद्वासि सनातनः ॥
यस्माद्ब्रह्मादयो देवा सुनयश्चोग्रतेजसः ।
न तेऽन्तं लब्धिमच्छन्ति तेनानन्तस्त्वमुच्यसे ॥
न क्षीयसे नं चरसे कल्पकोटिशतैरपि ।
तस्मात्त्वमक्षरत्वाच्च विष्णुर्वेति प्रकीर्त्यसे ॥
विश्वञ्च त्वया सर्व्वं जगत् स्थावरजङ्गमम् ।
जगद्विश्वमनाद्येव विष्णुर्वेत्ति प्रकीर्त्यसे ॥
विश्वम्य तिष्ठसे नित्यं त्रैलोक्यं सचराचरम् ॥
सयक्षगन्धर्व्वनरं समहद्भूतपन्नगम् ।
व्याप्य त्वामेव विशसे त्रैलोक्यं सचराचरम् ।
तस्माद्विष्णुरिति प्रोक्तः स्वयमेव स्वयम्भुवा ॥
नारा इत्युच्यते आपः ऋषिभिस्तत्त्वदर्शिभिः ।
अयनं तस्य तत्पूर्व्वं तेन नारायणः स्मृतः ॥
युगे युगे प्रनष्टां गां विष्णो विन्दसि तत्त्वतः ।
गोविन्देति ततो नाम्ना प्रोच्यसे ऋषिभिस्तथा ॥
हृषीकाणीन्द्रियाण्याहुस्तत्त्वज्ञानविशारदाः ।
ईशिषे वर्त्तसे त्वं वा हृषीकेशस्ततोच्यसे ॥
वसन्ति त्वयि भूतानि ब्रह्मादीनि युगक्षये ।
त्वं वा वससि भूतेषु वासुदेवस्ततुच्यसे ॥
सङ्कर्षयसि भूतानि कल्पे कल्पे पुनः पुनः ।
ततः सङ्कर्षणः प्रोक्तस्तत्त्वज्ञानविशारदैः ॥
प्रद्यूम्नेन न तिष्ठन्ति सदेवासुरराक्षसाः ।
प्रतिद्युः सर्व्वधर्म्माणां प्रद्युम्नस्तेन चोच्यते ॥
निरोधो विद्यते यस्मान्न ते भूतेषु कश्चन ।
अनिरुद्धस्ततः प्रोक्तः पूर्व्वमेव महर्षिभिः ॥"
इति मात्स्ये २२२ अध्यायः ॥ * ॥

विष्णुलोकगमनकारणं यथा,—
"कर्म्मभोगी सकामः स्यान्निष्कामो निरुपद्रवः ।
स याति देहं त्यक्त्वा च पदं विष्णोर्निरामयम् ।
पुनरागमनं नास्ति तेषां निष्कामिणां सति ॥
ये सेवन्ते च हरिभुजं ज्ञानमात्मानमेव च ।
गोलोकं ते नरा यान्ति दिव्यरूपविधारिणः ॥
ये च नारायणं भक्त्या सेवन्ते च चतुर्भुजम् ।
वैकुण्ठं यान्ति ते सर्व्वे दिव्यरूपविधारिणः ॥
सकामिनो वैष्णवाश्च गत्वा वैकुण्ठमेव च ।
भारतं पुनरायान्ति तेषां जन्म द्विजातिषु ॥
कालेन ते च निष्कामा भवन्त्येव क्रमेण च ।
भक्तिञ्च निर्म्मलां बुद्धिं तेभ्यो दास्यति निश्चितम् ॥
हरिभक्ताश्च निष्कामाः स्वधर्म्मरहिता द्विजाः ।
तेऽपि यान्ति हरेर्लोकं क्रमाद्भक्तिबलाद्दृढ़ाः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः ॥
विष्णुकृच्छ्रं, क्ली, (विष्णुर्देवताकं कृच्छ्रम् ।) अवश्यानकृच्छ्रम् । यथा,—
"उपोष्य द्वादशीं पुण्यां विष्णुकृच्छ्रेण संयुताम् ।
एकादशव्रतं पुण्यं नरः प्राप्नोत्यसंशयः ॥"
इति तिथ्यादितत्त्वम् ॥
विष्णुकन्दः, पुं, (विष्णुप्रियः कन्दः ।) मूलविशेषः । तत्पर्य्यायः । विष्णुगुप्तः २ सुपुटः ३ बहुसंपुटः ४ जलवासः ५ दृढ़कन्दः ६ दीर्घपत्रः ७ हरिप्रियः ८ । अस्य गुणाः । मधुरत्वम् । स्निग्धरत्वम् । पित्तदाहश्रोफहरत्वम् । रुच्यत्वम् । सन्तर्पणकारित्वञ्च । इति राजनिर्घण्टः ।
विष्णुक्रान्ता, स्त्री, अपराजिता । इत्यमरः । अपराजितायां अन्यां स्त्रियामुपजातिः । तत्पर्य्यायः । हरिक्रान्ता २ नीलपुष्पा ३ अपराजिता ४ नीलक्रान्ता ५ सुनीला ६ विक्रान्ता ७ कृष्णिका ८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कफवातामयविषदोषनाशित्वम् । मेधाकारित्वम् । पावनित्वम् । शुभदत्वञ्च । इति राजनिर्घण्टः ।
विष्णुगुप्तः, पुं, (विष्णुना गुप्तः ।) वात्स्यायनमुनिः । यथा,—
"विष्णुगुप्तस्तु कौडिन्यश्चाणक्यो द्रोमिलोऽङ्गुलः ।
वात्स्यायनो मल्लनागः पक्षिलस्वामिनावपि ॥"
इति त्रिकाण्डशेषः ॥
विष्णुकन्दः । इति राजनिर्घण्टः ॥
विष्णुगुप्तकं, क्ली, चाणक्यमूलकम् । इति राजनिर्घण्टः ॥
विष्णुगृहं, क्ली, (विष्णवे प्रतिष्ठितं गृहम् ।) विष्णुमन्दिरम् । स्वम्पुरम् । इति हेमचन्द्रः ॥
विष्णुगृहकरणफलं यथा,—
"अदेवकासमायुक्तं यः कुर्य्याद्देव्यं गृहम् ।
न तस्य फलसम्पत्तिर्वक्तुं शक्येत केनचित् ॥"
इति हरिभक्तिविलासे । २० । १४ ॥
"येस्तु देवालयं विष्णोः शुभं दारुमयं कृतम् ।
कारयेन्नूतनमयं वापि शृणु तस्य फलं मुने ॥
अहन्यहनि योगेन यजतो यज्ञहाफलम् ।
प्राप्नोति तत् फलं विष्णोर्यः कारयति मन्दिरम् ॥
कुलानां शतमागामि समतीतं तथा शतम् ।
कारयेद्गरुडाङ्क नयत्यच्युतलोकताम् ॥
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ।
विष्णोरालयविन्यासप्रारम्भादेव नश्यति ॥
सप्तलोकमयो विष्णुर्यस्तस्य कुरुते गृहम् ।
प्रतिष्ठां समवाप्नोति स नरः सप्तलौकिकीम् ॥
प्रशस्तदेशे भूभागे प्रशस्तं भवनं हरेः ।
कारयत्यखिलात् लोकान् स नरः प्रतिपद्यते ॥
इष्टकाभाश्च विन्यासो यावदर्थाणि तिष्ठति ।
तावदर्षसहस्राणि तत्कर्त्ता दिवि संस्थितः ॥
चिकीर्षोरपि ज्ञानस्य मन्दिरं पुण्यकारिणः ।
नरस्य क्षयमायाति पापं जन्मशतोद्भवम् ॥
ये ध्यायन्ति सदा कृत्या करिष्यामि हरेर्गृहम् ।
तेषां विलीयते पापं पूर्व्वजन्मशतोद्भवम् ॥
येऽनुमोदन्ति ज्ञानस्य क्रियमाणं हरेर्गृहम् ।
तेऽपि पापविनिर्म्मुक्ता वैष्णवं लोकमाप्नुयुः ॥
कनिष्ठं मध्यमं श्रेष्ठं कारयित्वा हरेर्गृहम् ।
स्वर्गञ्च वैष्णवं लोकं मोक्षञ्च लभते क्रमात् ॥
समतीतं भविष्यञ्च कुलानामयुतं नरः ।
विष्णुलोकं नयत्याशु कारयित्वा हरेर्गृहम् ॥
दुग्धाप्यं यत् फलं विप्रा वाजिमेधादिभिर्म्मखैः ।
प्राप्यते तत् सुखेनैव निवेश्य भवनं हरेः ॥
ये हताभिमुखाः शूरा गोविप्रार्थे रणाजिरे ।
स तत्फलमवाप्नोति कारयित्वा हरेर्गृहम् ॥
पक्केष्टकचितं रम्यं पद्मप्रासादसंयुतम् ।
कारयित्वा हरेर्धाम धूतपापो बलेरिव ॥
लक्षेणार्द्धसहस्रेण शतेनार्द्धेन वा हरेः ।
तुल्यं फलं समाख्यातं तदीश्वरदरिद्रयोः ॥
पतितं पतमानन्तु तथार्द्धपतितं तथा ।
समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात् ॥"
इति वह्निपुराणे वैष्णवक्रियायोगे यमानुग्राहनामाध्यायः ॥
विष्णुचक्रं, क्ली, (विष्णोश्चक्रमिव ।) हस्तस्थरेखामयचक्रविशेषः । यथा,—
"विष्णुचक्रं करे चिह्नं सर्व्वेषां चक्रवर्त्तिनाम् ।
भवत्यव्याहतो यस्य प्रभावस्त्रिदशैरपि ॥"
इति विष्णुपुराणे १ अंशे १९ अध्यायः ॥
रेखान्तरानाकुलं रेखामयचक्रम् । इति तट्टीकायां सुदर्शनचक्रम् ॥
विष्णुतैलं, क्ली, (विष्णुनामकं तैलम् ।) अश्विनीकुमारकृततक्रतैलविशेषः । यथा,—
"क्षीरोदं विष्णुतैलञ्च सर्व्वैद्येन विनिर्म्मितम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १३ अध्यायः ॥ * ॥
अथ स्वल्पविष्णुतैलम् ।
"भृङ्गपर्णीपत्रिपर्णीबलागोरक्षतण्डुलाः ।
एरण्डस्य च मूलानि दृढ़स्य पूतिकस्य च ॥
घृतावरी सहचरं पचेदेतैः पलोन्मितैः ।
तैलप्रस्थं पयो दत्त्वा गव्यं वाजं चतुर्गुणम् ॥
अस्य तैलस्य पक्वस्य दद्यात् वीर्य्यमतः परम् ।
वासार्कौ नरनागाक्षौ पीत्वा दृढ़तनुत्वचः ॥
कृतपार्श्वशूले वातासे गलगण्डेऽर्हिते क्षये ।
भृङ्गराजसरिपाण्डुलकामलार्द्धावभेदके ॥

क्षीरेन्द्रियेऽन्नद्वौ च जराजर्ज्जरिते हितम्। स्त्रीणामनुलोमाच्च गर्भस्थितिकरं परम्। एतद्वरं तैलं विष्णुना परिकीर्त्तितम्।"

तण्डुलः गोरचनतुल्यः। दग्ध्वोष्ट्रस्तीक्ष्णकाय्यौः। पूतिको नाटाकरञ्जः। सहचरो झिण्टी। अत्र क्वाथान्तराभावात् क्षीरस्य चतुर्गुणं जलं कल्पिदर्शनात्।

"खरमक्षीरमाक्षीकः पाको यत्रेरितः क्वचित्। जलं चतुर्गुणं तत्र क्षीरार्थाधानार्थमारपेत्।"

इति परिभाषावचनात्।

क्वचिदिति पाठात् क्वाथान्तररहिते केवलक्षीरादिसहिततैलादिपाके ज्ञातव्यं न तु सर्व्वत्र।

"एलाचन्दनकुङ्कुमागुरुसुराकक्कोलमांसीशटी-श्रीवासस्पृक्यनिपर्णग्रन्थ्यृचौशीरशोभाञ्जनैः। रक्तम्। कस्तूरिनखपूतिगैरिकजलव्याघ्रादिकं गन्धद्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु।"

अथ दग्धद्विष्णुतैलम्।

"जलधरमन्थगन्धाजीवकर्षभकौ शटी। काकोली क्षीरकाकोली जीवन्ती मधुयष्टिका। मधूरिका देवदारु पद्मकाष्ठञ्च सैन्धवम्। मांसी पेला लवङ्गं कुष्ठं रक्तचन्दनगैरिकम्। मञ्जिष्ठा नखनामिश्च श्वेतचन्दनकुङ्कुमम्। पर्णौ कुन्दुरु खोटिश्च ग्रन्थिकश्च नखी तथा। एतेषां पञ्चिकेभागैस्तैलस्यापि तथाष्टकम्। घृतावरीरससमं दुग्धञ्चापि समं भवेत्॥ विष्णुतैलवरं श्रेष्ठं सर्व्ववातविकारनुत्। कर्णवाते शूलवाते अङ्गविग्रह एव च। शिरोमध्यगता ये च मन्या स्नायुगलग्रहे। यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विक्लवा॥ ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः। सर्व्वांस्तान्नाशयत्याशु सूर्य्यस्तम इवोदितः।"

इति भैषज्यरत्नावली।

विष्णुदैवतं, त्रि, (विष्णुर्दैवतं देवता यस्य।) विष्णुदेवत्यं, विष्णुधिष्ठाद्देवताकम्। यथा,—

"प्रतोपकरणं सर्व्वं कथितं सर्व्वदैवतम्। ग्रहणं सर्व्वदैवत्यं यदुक्तं द्विजोत्तमाः। तज्ज्ञेयं विष्णुदैवत्यं सर्व्वं वा विष्णुदैवतम्।"

इति शुद्धितत्त्वे विष्णुसंहितावचनम्।

क्ली, अयनानक्षत्रम्। इति ज्योतिषम्।

विष्णुदैवत्या, स्त्री, (विष्णुर्दैवतमस्याः।) एकादश्यौतिथिः। द्वादश्यौतिथिः। यथा,—

"एकादशी द्वादशी च प्रोक्ता श्रीचक्रपाणिना। एषोदश्यौ तनङ्गस्य श्रियस्योक्ता चतुर्द्दशी।"

इति स्मृतिः।

"एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्। न चात्र विधिलोपः स्याद्दमयोर्द्देवता हरिः।"

इति तिथ्यादितत्त्वम्।

विष्णुधर्म्मः, पुं, (विष्णुप्रधानो धर्म्मोऽस्मिन्।) ग्रन्थविशेषः। यथा। "ब्रह्मवाराहकाले भविष्यपुराणम्।

'अष्टादश पुराणानि रामस्य चरितं तथा। विष्णुधर्म्मादिशास्त्राणि शिवधर्म्मांश्च भारत। कार्त्तिकेय पञ्चमो वेदो यन्महाभारतं स्मृतम्। सौरांश्च धर्म्मा राजेन्द्र मानवोक्ता महीपते। जयेति नाम एतेषां प्रवदन्ति मनीषिणः।' जयत्यनेन संसारमिति जयस्तत्तद्ग्रन्थः।" इति तिथ्यादितत्त्वम्।२। विद्याविशेषः। यथा,—

"अवाप अम्बा चेन्द्रत्वं विष्णुधर्म्माख्यविद्यया। सर्व्वान् शत्रून् विनिर्जित्य राज्यं चक्रे महेश्वर। पादयोर्जानुगोरूर्व्वोरुदरे हृदयोरसि। मुखे शिरस्यनुपूर्व्वादोङ्कारादिं विनिर्द्दिशेत्। ॐ नमो नारायणायेति विपर्य्ययमथापि वा। करन्यासं ततः कुर्य्यात् द्वादशाक्षरविद्यया। प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्व्वसु। न्यसेत् हृदय ॐकारं नकारं मम मूर्द्धनि। मोकारन्तु भ्रुवोर्म्मध्ये शिखायामादिमूर्द्धतः। ॐ विष्णवे नम इति रमं मन्त्रमुदाहरेत्। आत्मानं परमं ध्यायेच्छेषषट्शक्तिभिर्युतम्। मम रक्षां ततः कुर्य्यान्नृसिंहस्तूग्रजंबवतु। विविक्रमस्तथाकाशे खड्गे रक्षतु वामनः। अटव्यां नरसिंहस्तु रामो रक्षतु पर्व्वते। भूमौ रक्षतु वाराहो हंसो गारायणोऽवतु। कर्म्मबन्धाच्च कान्त्यिल्यदत्तो योगात्तु रक्षतु। हयग्रीवो देवतायाः कुमारो मकरध्वजात्। नारदोऽभ्यर्चनात् मायात् कूर्म्मो वै नैर्ऋतेः सदा॥ धन्वन्तरिरपथ्याच्च नागः क्रोधवशात् किल। यज्ञलोकाद्दलः कालाद्व्यासो ज्ञानाच्च रक्षतु। बुद्धः पापक्षयंचालात् कल्किरन्यात् कलेः समम्। पायान्मध्यं दिने विष्णुः प्रातर्नारायणोऽवतु। मधुहा चापराह्णे च सायं रक्षतु माधवः। हृषीकेशः प्रदोषेऽव्यात् प्रत्यूषेऽव्याज्जनार्द्दनः। श्रीधरोऽव्यादर्द्धरात्रे पद्मनाभो निशान्तके। चक्रकौमोदकीवाणाः शत्रुं शत्रूंश्च राक्षसान्। शङ्खशब्दश्च शत्रुभ्यः शार्ङ्गो वै गरुडस्तथा। बुद्धीन्द्रियमनःप्राणान् पान्तु पार्षदभूषणाः। शेषे सर्व्वमुदापन्नः सदा सर्व्वत्र पान्तु माम्। विदिक्षु दिक्षु च सदा नरसिंहश्च रक्षतु। एतद्धारयमाणश्च यं यं पश्यति चक्षुषा। स वशी स्याद्विपाप्मा च रोगाभावो दिवं व्रजेत्।"

इति गारुडे २०१ अध्यायः।

विष्णुधर्म्मोत्तरं, क्ली, संहिताविशेषः। तत्र प्रश्नकर्त्ता वज्रमेजयसुतः। वक्तारः शौनकाद्या ऋषयः। तत्र १०० शतान्यध्यायानां दृश्यन्ते दृष्टाः।

विष्णुपञ्जरं, क्ली, (विष्णुरेव पञ्जरमिव यस्मिन्। तद्वारयितुर्निर्भयरक्षाकारित्वादस्य तथात्वम्।) विष्णुकवचविशेषः। यथा,—

"प्रवक्ष्याम्यधुना सौनद्दैष्णवं पञ्जरं शुभम्। नमो नमस्ते गोविन्द चक्रं शस्त्रं सुदर्शनम्। प्राच्यां रक्षतु मां विष्णो त्वामहं शरणं गतः। गदां कौमोदकीं शस्त्रं पद्मनाभामितद्युते। याम्यां रक्षतु मां विष्णो त्वामहं शरणं गतः। हलमादाय सौनन्दं नमस्ते पुरुषोत्तम। प्रतीच्यां रक्षतु मां विष्णो भवन्तं शरणागतम्। पाञ्चजन्यं तथा शङ्खं शार्ङ्गाख्यञ्च धनुत्तमम्। प्रयच्छ रक्ष मां विष्णो आग्नेय्यां यज्ञसूकर। चर्म्म सूर्य्यसुतं शस्त्रं खड्गं चन्द्रसमं तथा। नैर्ऋत्यां माधव रक्षस्व दिव्यमूर्त्ते वृकोदरि। वैजयन्तीं प्रयच्छ त्वं श्रीवत्सकृतभूषण। वायव्यां रक्ष मां देव अनन्तशौर्य नमोऽस्तु ते। वैनतेयं समारुह्य अन्तरीक्षे जनार्द्दन। मां त्वं रक्षाजित सदा नमस्तेऽस्त्वपराजित। विघ्नान्नाशं समारुह्य रक्ष मां त्वं रसातले। अकूपार नमस्तुभ्यं महामीन नमोऽस्तु ते। करशीर्षाङ्घ्रिसर्व्वेषु तथाष्टभुजपञ्जरम्। लात्वा त्वं रक्ष मां देव नमस्ते पुरुषोत्तम। एतदुक्तं भगवता वैष्णवं पञ्जरं महत्। पुरा रक्षार्थमीशेन कात्यायन्या द्विजोत्तम। यदा सा नाशयामास दानवं महिषासुरम्। चामरं रक्तबीजञ्च तथान्यान् सुरकण्टकान्।"

इति वामने १० अध्यायः।

विष्णुपदं, क्ली, (विष्णोः पदम्।) आकाशम्। इत्यमरः। (यथा, रघुवंशे। १६। २८।

"वसुन्धराविष्णुपदं हितीय-मध्यारुरोहेव रजःप्लवेन।")

क्षीरोदः। इति मेदिनी। पद्मम्। इति हेमचन्द्रः। (तीर्थविशेषः। यथा, महाभारते। ७। ८३। ६५।

"तत्र विष्णुपदे स्नात्वा अर्च्चयित्वा च वामनम्। सर्व्वपापविशुद्धात्मा विष्णुलोकं स गच्छति।"

कैलासपर्व्वतस्य स्थानविशेषः। यथा, महाभारते। ५। १११। २२।

"यत्र विष्णुपदं नाम क्रमता विष्णुना कृतम्।"

पर्व्वतविशेषः। यथा, हरिवंशे। ३१। ४३।

"तेन चित्ररथेनाथ तदा विष्णुपदे गिरौ।")

विष्णोः स्थानम्। यथा,

"अपुण्यपुण्योपरमे शौचाग्नेयाग्निहोत्रतः। यत्र गत्वा न शोचन्ति तद्विष्णोः परमं पदम्। धर्म्मध्रुवाद्यास्तिष्ठन्ति यत्र ते लोकसाक्षिणः। ततस्तादात्म्यमापन्नयोगेहास्तद्विष्णोः परमं पदम्। यच्चैतदोतं प्रोतं च यद्भूतं सचराचरम्। भाव्यञ्च विश्वं मैत्रेय तद्विष्णोः परमं पदम्। दिवीव चक्षुरातंतं वितंतं तन्महात्मनाम्। विवेकज्ञानदृष्टञ्च तद्विष्णोः परं पदम्।"

इति विष्णुपुराणे २ अंशे ८ अध्यायः।

भ्रूमध्यम्। यथा,—

"अरुन्धती ध्रुवश्चैव विष्णोस्त्रीणि पदानि च। आसन्नस्तमनौ पश्चे चतुर्थं साष्टमण्डलम्। अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते। विष्णोः पदानि भ्रूमध्ये नेत्रयोर्म्माष्टमण्डलम्।"

इति काशीखण्डे ४२ अध्याये १३।१४ श्लोकौ।

विष्णुपदी, स्त्री, (विष्णोः पदं स्थानं यस्याः। गौरादित्वात् ङीष्।) गङ्गा। इत्यमरः। (यथा, भागवते। २। १६। ७।

"इति यदिच्छत्य स पाञ्चवेयः
प्रायोपवेशं प्रति विष्णुपद्याम् ।
दर्भौ मुकुन्दाङ्घ्रिमनन्यभावो
मुनिव्रतो मुक्तसमस्तसङ्गः ॥")

अस्याः कारणं यथा,—

नारद उवाच ।

"कल्पे: पञ्चसहस्राब्दे समतीते सुरेश्वरी ।
क्व गता सा महाभाग तन्मे व्याख्यातुमर्हसि ॥

नारायण उवाच ।

गङ्गा सरस्वती लक्ष्मीश्चेताश्चिस्रो हरेः प्रियाः ।
तुलसीसहिता ब्रह्मन् चतस्रः कीर्तिताः श्रुतौ ॥

नारद उवाच ।

बभूव सा मुनिश्रेष्ठ गङ्गा नारायणप्रिया ।
अहो केन प्रकारेण तन्मे व्याख्यातुमर्हसि ॥

नारायण उवाच ।

पुरा बभूव गोलोके गङ्गा सा द्रवरूपिणी ।
राधाकृष्णाङ्गसंभूता तदंशा तत्स्वरूपिणी ॥
द्रवाधिष्ठातृदेवी सा रूपेणाप्रतिमा भुवि ।
सा सकामा कृष्णपार्श्वे ससुवास सलज्जिता ॥
प्रफुल्लवदना हर्षान्नवसङ्गमलालसा ।
मूर्च्छिता प्रभुरूपेण पुलकाङ्कितविग्रहा ॥
एतस्मिन्नन्तरे तत्र विद्यमाना च राधिका ।
गोपीचिंशत्कोटिवृता कोटिचन्द्रसमप्रभा ॥
कोपेन रक्तपद्माक्षा रक्तपङ्कजलोचना ।
सञ्चाररागसंयुक्तभोष्ठं कम्पयती रुषा ॥
ताञ्च दृष्ट्वा समुत्तस्थौ कृष्णः सादरपूर्वकम् ।
उत्थाय गङ्गा सहसा सभायाञ्च चकार सा ॥
कुशलं परिपप्रच्छ भीतातिविनयेन च ।
ध्यानेन प्रेरणापन्ना श्रीकृष्णचरणाम्बुजे ॥
तद्दृत्यङ्गस्थितो विष्णुर्भीतायै चाभयं ददौ ।
बभूव स्थिरचित्ता सा सर्वैश्वर्यरतेश्च ॥
ऊर्ध्वसिंहासनस्थाञ्च राधां गङ्गा ददर्श सा ।
एतस्मिन्नन्तरे राधा जगदीशमुवाच सा ॥
केयं प्राणेश कल्याणी सस्मिता तनुसुखाम्बुजम् ।
पश्यन्ती सस्मितं पार्श्वे सकामा वक्रलोचना ॥
त्वय्यापीमां सन्निरीक्ष्य सकामः सस्मितः सदा ।
मयि जीवति गोलोके भूता दुर्वृत्तिरीदृशी ॥
त्वमेवैवञ्च दुर्वृत्तं वारंवारं करोषि च ।
क्षमां करोमि प्रेम्णा च स्त्रीजातिः स्निग्धमानसा ॥
संगच्छेमां प्रियामिष्टां गोलोकाद्रुच्छ लम्पट ।
अन्यथा न हि ते भद्रं भविष्यति व्रजेश्वर ॥
इत्येवमुक्ता सा राधा रक्तपङ्कजलोचना ।
गङ्गां वक्तुं समारेभे तच्छ्रुत्वा लज्जितां सतीम् ।
गङ्गा रहस्यं विज्ञाय योगेन सिद्धयोगिनी ।
तिरोभूय सभामध्यात् स्वजलं प्रविवेश सा ॥
राधा योगेन विज्ञाय सर्वत्रावस्थिताञ्च ताम् ।
यानं कर्तुं समारेभे गच्छन्तीं सिद्धयोगिनीं ।
गङ्गा रहस्यं विज्ञाय योगेन सिद्धयोगिनी ।
श्रीकृष्णचरणाम्भोजं विवेश शरणं ययौ ।
गोलोकञ्चैव वैकुण्ठं ब्रह्मलोकादिकं तथा ।
ददर्श राधा सर्वत्र नैव गङ्गां ददर्श सा ॥

ब्रह्मविष्णुशिवानन्तधर्मेन्द्रेन्दुदिवाकराः ।
मनवो मुनयः सर्वे देवाः सिद्धाश्चपक्षिणः ॥
गोलोकञ्च समाजग्मुः शुष्ककण्ठोष्ठतालुकाः ।
सर्वे प्रणेमुर्गोविन्दं सर्वेशं प्रकृतेः परम् ।
विज्ञाय तदभिप्रायं तानुवाच सुरेश्वरः ॥

श्रीभगवानुवाच ।

आगताः सुमहाभागा गङ्गानयनकारणात् ।
गङ्गा मच्चरणाम्भोजे भयेन शरणं गता ॥
राधेमां पातुमिच्छन्ती दृष्ट्वा मां सन्निधानतः ।
दास्यामीमां बहिष्कृत्य यूयं कुरुत निर्भयाम् ॥
श्रीकृष्णस्य वचः श्रुत्वा सस्मितः कमलोद्भवः ।
तुष्टाव सर्वाराध्यां तां राधां श्रीकृष्णपूजिताम् ॥
वक्त्रैश्चतुर्भिः संस्तूय भक्तिनम्रात्मकन्धरः ।
धाता चतुर्णां वेदानामुवाच चतुराननः ॥
गङ्गा त्वदङ्गसंभूता प्रभोश्च रासमण्डले ।
युवयोर्द्रवरूपा सा सुन्दर्योः शङ्करस्वरात् ॥
कृष्णांशा च त्वदंशा च त्वत्कन्यासदृशी प्रिया ।
त्वन्नामग्रहणं श्रुत्वा करोतु पूजनं तव ॥
भविष्यति पतिस्तस्या वैकुण्ठेशश्चतुर्भुजः ।
ब्रह्मणो वचनं श्रुत्वा स्वीचकार च सस्मिता ।
बहिर्बभूव सा कृष्णपादाङ्गुष्ठनखाग्रतः ।
तत्रैव संस्थिता ग्लाना तस्थौ तेषाञ्च मध्यतः ॥
उवास तोयादुत्थाय तदधिष्ठातृदेवता ।
तत्तोयं ब्रह्मणा किञ्चित् स्थापितञ्च कमण्डलौ ।
किञ्चिद्धार शिरसि चन्द्रार्द्धं चन्द्रशेखरः ।
गङ्गायै राधिकामन्त्रं ददौ कमलोद्भवः ।
गङ्गा तामेव संपूज्य वैकुण्ठं प्रययौ सती ।
गोलोके च स्थिता गङ्गा वैकुण्ठे शिवलोककै ।
ब्रह्मलोके तथान्यत्र यत्र तत्र पुरा स्थिता ।
तत्रैव सा गता गङ्गा चाज्ञया परमात्मनः ।
निर्गता विष्णुपादाब्जात् तेन विष्णुपदी स्मृता ।"
इति श्रीब्रह्मवैवर्ते प्रकृतिखण्डे गङ्गोपाख्यानं ६ अध्यायः ॥*॥ दृषद्वत्यिकसिंहकुम्भसंक्रान्तयः ।
यथा, भविष्यमातृस्त्र्योतिषेषु ।
"धनुर्मिथुनकन्यासु मीने च षड्गतीतयः ।
दृषद्वत्यिककुम्भेषु सिंहे विष्णुपदी स्मृता ॥"
अपि च ।
"एवञ्च षड्गतीत्यादिव्यवकाशमलभमानम् ।
अर्वाक् षोड्शः विज्ञेया नाथः पञ्चाश षोड्श ।
कालः पुण्योऽर्कसंक्रान्तेर्विद्वद्भिः परिकीर्तितः॥"
इति भ्रातातपीयं दिवा विष्णुपदीविषयम् ।
अतएव जावालीदृष्टद्वयग्रिष्ठौ ।
"पुण्यायां विष्णुपद्याञ्च प्राक् पश्चादपि षोड्श ।"
तत्र स्नानादिफलम् ।
"अयने कोटिगुणितं लक्षं विष्णुपदीषु च ।
षड्गतीतिसहस्रन्तु षड्गतीत्यासुदाहृतम् ॥"
इति तिथ्यादितत्त्वम् ॥

विष्णुपदीचक्रं, क्ली, (विष्णुपद्याश्चक्रम् ।) ज्येष्ठाश्रवणधनिष्ठाशतभाद्रपदाफल्गुनरासीयरविसंक्रमकालीननक्षत्रविन्यासाङ्कचक्रभानुभफलज्ञापकनराकारचक्रम् । यथा,—
"अत्रे संक्रमयं यत्र विष्णुपद्यां सुखे तु तत् ।

चत्वारि दक्षिणे बाहौ त्रीणि त्रीणि पदद्वये ॥
चत्वारि वामबाहौ च हृदये पञ्च निर्दिशेत् ।
अश्लोर्दयं हयं योन्यं मूर्ध्नि द्वौ चैककं गुदे ॥"
फलं यथा,—
"रोगो भोगस्तथा यानं वस्त्रं लाभ एव च ।
ऐश्वर्यं राजपूजा च अपमृत्युरिति क्रमात् ॥"
इति ज्योतिस्तत्त्वम् ॥

विष्णुभक्तिः, स्त्री, (विष्णौ भक्तिः ।) भगवत्सेवा । यथा,—

सूत उवाच ।

"विष्णुभक्तिं प्रवक्ष्यामि यथा सर्वमवाप्यते ।
यथा भक्त्या हरिस्तुष्येत्तथा नान्येन केनचित् ॥
महतः श्रेयसो मूलं पवित्रं पुण्यसन्ततेः ।
जीवितस्य फलं स्वादु ददाति स्मरणं हरेः ॥
भज इत्येव वै धातुः सेवायां परिकीर्तितः ।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिसाधनभूयसी ॥
ते भक्ता लोकनाथस्य नामकर्मादिकीर्तने ।
सञ्चलन्त्यश्रुणि संहर्षात् ये च हृष्टतनूरुहाः ॥
जगद्धातुर्मम देवस्य दिष्ट्या चरणयोर्यः ।
इह नित्यक्रियाः कुर्युः स्निग्धा ये वैष्णवास्तु ते ॥
प्रणामपूर्वकं शान्त्या यो वदेद्वैष्णवो हि सः ।
तद्वक्त्रजलवातृवल्म्यम्बुजायाश्चानुमोदनम् ।
तत्कथाश्रवणे प्रीतिः स्मरणेत्राङ्गविक्रिया ॥
येन सर्वात्मना विष्णौ भक्त्या भावो निवेशितः ।
विप्रेन्द्रीश्वरदृष्टिश्च महाभागवतो हि सः ॥
विष्णोश्च कारणं नित्यं तदन्नं दम्भवर्जितम् ।
स्वयमभ्यर्चनञ्चैव यो विष्णुं चोपजीवति ॥
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्तते ॥
स विप्रेन्द्रो मुनिः श्रीमान्स जातः स च पण्डितः ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा हरिः॥
सूतः संभाषितोऽद्यापि पूजितोवा द्विजोत्तमः।
पुनाति भगवद्भक्तस्तपसोऽपि यदृच्छया ॥
प्रणताय प्रपन्नाय तवास्मीति च यो वदेत् ।
अभयं सर्वभूतेभ्यो दद्यादेतद्व्रतं हरेः ॥
मन्त्रयज्ञिसहस्रेभ्यः सर्ववेदान्तपारगः ।
सर्ववेदान्तवित् कोट्या विष्णुभक्तो विशिष्यते ।
ऐकान्तिकाश्च पुरुषा गच्छन्ति परमं पदम् ॥
एकान्तिनामसौ विष्णुर्यस्मादेषां परायणः ।
तस्मादैकान्तिनः प्रोक्तास्तद्भागवतचेतसः ॥
प्रियाणामपि सर्वेषां देवदेवस्य सुप्रियः ।
आपत्स्वपि सदा यस्य भक्तिरव्यभिचारिणी ॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
विष्णुं संस्मरतः सा मे हृदयान्मोपसर्पतु ॥
अन्तर्गतोऽपि वेदानां सर्वशास्त्रार्थवेदिषु ।
यो न सर्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम् ॥
नाधीतवेदशास्त्रोऽपि न कृताध्वरसंग्रहः ।
यो भक्तिं वहते विष्णौ तेन सर्वं कृतं भवेत् ॥
यज्ञानां क्रतुसङ्घानां सर्वेषां पारगा अपि ।
न तां यान्ति गतिं भक्ता यां यान्ति सुनिशं तम् ॥
यः कश्चिद्वेष्यवो लोके मिथ्याचारोऽप्यनात्मवी ।
पुनाति सकलान् लोकान् सहस्रांशुरिवोदितः ॥
ये मूढ़ंसा दुरात्मानः पापाचाररतास्तथा ।

तेऽपि यान्ति परं स्थानं नारायणपरायणाः ॥
दृढा जनार्दने भक्तिर्यदैवाव्यभिचारिणी ।
तदा किमत्र स्वर्गसुखं सैव निर्वाणहेतुकी ॥
भाग्यतां तत्र संसारे नराणां कर्मदुर्गमे ।
दुस्तावबन्धनो लोको भक्तिमुक्तो जनार्दनः ॥
न ब्रूयोति गुणान् दिव्यान् देवदेवस्य चक्रिणः ।
स नरो बधिरो ज्ञेयः सर्वधर्मबहिष्कृतः ॥
नाम्नि संकीर्तिते विष्णोर्यस्य पुंसो न जायते ।
शरीरं पुलकोद्भासि तद्भवेत् कुणपोपमम् ॥
यस्मिन् स्मृते द्विजश्रेष्ठ सुस्थिरत्वमिहाक्षयम् ।
विष्णौ निविष्टमनसां किं पुनर्वृजिनक्षयः ॥
स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥
अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं नियच्छति ।
विप्रेन्द्र प्रतिजानीहि विष्णुभक्तो न नश्यति ॥
धर्मार्थकामैः किन्तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा हरौ ॥
दैवी ह्येषा गुणमयी हरेर्मायाऽतिदुरत्यया ।
तामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
किमदाराधने पुंसामिष्यते हरिमेधसः ।
भक्त्यैवाराधिते विष्णुर्नान्यत्तत्तोषकारणम् ॥
न दानैर्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्दनः ॥
संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।
कदाचित् केशवे भक्तिस्तद्भक्तैर्वा समागमः ॥
पत्रेषु पुष्पेषु फलेषु तोये-
ष्वकृत्रिमेषु सदैव सत्सु ।
भक्त्यैकलभ्ये पुरुषे पुराणे
मूढैः कथं न क्रियते प्रयत्नः ॥
आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः ।
वैष्णवोऽस्मत्कुले जातः स नः सन्तारयिष्यति ॥
अज्ञानिनः सुरवरं समधिरूढपन्ति
ये पापिनोऽपि शिशुपालसुयोधनाद्याः ।
मुक्तिं गताः स्मरणमात्रविधूतपापाः
कः संशयः परमभक्तिमतां जनानाम् ॥
शरणं तं प्रपन्ना ये ध्यानयोगविवर्जिताः ।
तेऽपि मृत्युमतिक्रम्य यान्ति तद्वै परं पदम् ॥
भवोद्भवक्लेशशताहतस्तथा
परिभ्रमन्निन्द्रियवन्यकैः पथैः ।
नियम्यतां माधव मे मनोदय-
स्त्वदङ्घ्रिशब्दौ दृढभक्तिबन्धने ॥
विष्णुरेव परं ब्रह्म त्वमेवेह पठ्यते ।
वेदसिद्धान्तमार्गेषु तं न जानन्ति मोहिताः ॥
वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः ।
स्थितिवसनमतिरन्यमात्मनोऽन्तः
कथयति चारुतयैव मानुषेषु ॥"
इति गारुडे २११ अध्यायः ॥

विष्णुमाया, स्त्री, (विष्णोर्माया ।) दुर्गा । यथा,—
नारद उवाच ।
"दुर्गा नारायणी प्रोक्ता विष्णुमाया शिवा सती ।
नित्या सत्या भगवती सर्व्वाणी सर्व्वमङ्गला ॥
अम्बिका वैष्णवी गौरी पार्व्वती च सनातनी ।
नामानि कौथुमोक्तानि शुभानि शुभदानि च ॥
अर्थं षोढ़शनामाद्यैः सर्व्वैरभीप्सितं वरम् ।
ब्रूहि वेदविदां श्रेष्ठ वेदोक्तं सर्व्वसम्मतम् ॥
नारायण उवाच ।
सृष्ट्वा मायां पुरा सृष्टौ विष्णुना परमात्मना ।
मोहितं मायया विश्वं विष्णुमाया च
कीर्त्तिता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥
अपि च ।
ब्रह्मोवाच ।
"विष्णुमायास्तवे दत्त महामायां जगन्मयीम् ।
नाम्ना संमोहकर्त्रीं स्यात् सन्ध्यां सावित्र्य-
धिष्ठिकां ॥
तस्मादहं विष्णुमायां योगनिद्रां जगत्प्रसूम् ।
स्तौमि सा चारुरूपेण ब्रह्मरं मोहयिष्यति ॥
भवांश्च दत्त तामेव यजतां विश्वरूपिणीम् ।
यथा तव सुता भूत्वा हरजाया भविष्यति ॥"
इति कालिकापुराणे ५ अध्यायः ॥

विष्णुयशाः, [स्] पुं, (विष्णु यशः कीर्त्तिर्यस्य । नारायणपिङ्गलत्वादेवास्य तथात्वम् । यद्वा, विष्णुना गृहीतयज्ञसूत्रेण यशो यस्य ।) ब्रह्मयशःपुत्रः । स च कल्किपिता । यथा,—
नारद उवाच ।
"अहो बलवती माया सर्व्वाश्चर्य्यमयी शुभा ।
पितरं मातरं विष्णोर्नैव मुञ्चति कर्हिचित् ॥
पूर्णो नारायणो यस्य सुतः कल्किर्जगत्पतिः ।
तं विहाय विष्णुयशा मत्तो मुक्तिमभीप्सति ॥
विविक्तेत्यं ब्रह्मसुतः प्राह ब्रह्मयशःसुतम् ।
विविक्ते विष्णुयशसं ब्रह्मसम्भवविर्द्धनम् ॥"
इति कल्किपुराणे ३० अध्यायः ॥

विष्णुरथः, पुं, (विष्णो रथः ।) गरुड़ः । इत्यमरः ॥
विष्णोः स्यन्दनश्च ॥

विष्णुरातः, पुं, (विष्णुना रातो रक्षितः ।) परीक्षिद्राजः । यथा,—
"दैवेनाप्रतिघातेन मृते संस्यासुपेयुषि ।
रातो बीऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥
तस्मान्नाम्ना विष्णुरातो लोके ख्यातिं गमिष्यति ।
न सन्देहो महाभाग महाभागवतो महान् ॥"
इति श्रीभागवते ९ स्कन्धे १२ अध्यायः ॥

विष्णुलिङ्गी, स्त्री, वल्मीकापत्नी । इति त्रिकाण्डशेषः ॥

विष्णुवल्लभा, स्त्री, (विष्णोर्वल्लभा ।) तुलसी ।
इति राजनिर्घण्टः ॥ लक्ष्म्याः । यथा,—
"त्रैलोक्यपूजिते मातः कमले विष्णुवल्लभे ।
यथा त्वमचला कृष्णे तथा भव मयि स्थिरा ॥"
इति तन्त्रसारः ॥
अग्निशिखातरुः । इति शब्दचन्द्रिका ॥

विष्णुवाहनं, क्ली, (विष्णोर्वाहनम् ।) गरुड़ः ।
इति हेमचन्द्रः । २ । १४४ ॥
विष्णुवाह्यः, पुं, (विष्णुर्वाह्यो येन ।) गरुड़ः ।
इति शब्दरत्नावली ॥
विष्णुशिला, स्त्री, (विष्णुनाधिष्ठिता शिला ।) शालग्रामशिला । कस्यां तस्य स्थितिकालो यथा,—
"अयुताब्दे कलेर्याते त्यजेद्विष्णुशिला महीम् ।
तदर्द्धाच्चाङ्गवीतोयं तदर्द्धाद्देवताशिला ॥"
इति मेरुतन्त्रे ५ प्रकाशः ॥
विष्णुसङ्कलः, पुं, योगविशेषः । यथा, भारते ।
"द्वादश्यो श्रवणसृष्टा सृष्टेरेकादशी यदा ।
स एष वैष्णवो योगो विष्णुसङ्कलसंज्ञितः ॥
तस्मिन्नुपोष्य विधिवन्नरः सङ्कीर्णकल्मषः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥"
इति ॥
विष्णुधर्म्मोत्तरे द्वितीयविष्णुसङ्कलयोगमाह ।
"एकादशी द्वादशी च वैष्णवमपि भं भवेत् ।
तद्विष्णुसङ्कलं नाम विष्णुसायुज्यदं भवेत् ।
तस्मिन्नुपोष्य वाग्रच्छेच्छतद्वीपपुरं ध्रुवम् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥
विष्फारः, पुं, (वि + स्फुर स्फुरणे + घञ् ।"स्फुरतिस्फुलत्योर्घञि ।"६।१।४७। इत्यात्वम् । "स्फुरति स्फुलत्योर्निर्निविभ्यः ।"८।३।७६। इति षत्वञ्च ।) धनुर्गुणशब्दः । इत्यमरः ॥ धनुर्गुणस्य स्वानुकारो विष्फारः । स्फुर ग्रि च स्फुर्त्तौ चले धनुषस्तेषावोदेति निपातः । किंवा स्फुरधातोः रूपं विष्फभेत्यादिना पाक्षिकषत्वात् विष्फारो ऽन्यतो मूर्द्धन्यश्च । इति भरतः ॥
विष्यः, त्रि, (विषेय वध्यः । विष + "नौवयोधर्म्मेति ।"४ । ४ । ६१ । इति यत् ।) विषेय यो वध्यः । इत्यमरः ॥ (विषेय क्रीतः । विषाय हित इति वा । इत्यर्थे "उगवादिभ्यो यत् ।" ५ । १ । २ । इति यत् ॥)
विष्वः, त्रि, हिंसकः । इत्युणादिकोषः ॥
विष्वक्, व्य, परितः । सर्व्वतः । इत्यमरः ॥ (यथा, भागवते । ६ । ६ । १३ ।
"ज्ञातान्त एव लोकानां युगान्तसमये यथा ।
विध्वंसिष्यन्ति मामेकं तमिमुमाद्यं दिने दिने ॥")
विष्वक्, क्ली, विषुवम् । इति शब्दरत्नावली ॥ विश्वं अश्नुते इत्यर्थे त्रिलिङ्गम् ॥ (यथा, भागवते । २ । ६ । ३४ ।
"युधि तुरगरजोविधूम्रविष्वक्-
कचलुलितश्रमवार्यलङ्कृतास्ये ॥")
विष्वक्सेनः, पुं, विष्णुः । इत्यमरः ॥ (यथा, शिशुपालवधे । १० । ५५ ।
"साम्यमाप कमलासखविष्वक्-
सेनसेवितयुगान्तपयोधेः ॥")
विष्णोर्निर्म्माल्यधारी । यथा,—
"निर्म्माल्यधारी विष्णोस्तु विष्वक्सेनश्चतुर्भुजः ।
शङ्खचक्रगदापाणिर्दीर्घश्मश्रुर्जटाधरः ॥
रक्तपिङ्गलवर्णस्तु सितपद्मोपरिस्थितः ।

पञ्चतीयः स्वरान्तेन संयुतो विन्दुनेन्दुना ।
कीर्त्तितस्तस्य मन्त्रोऽयं तेन तं परिपूजयेत् ।"
इति कालिकापुराणे ८२ अध्यायः ॥
त्रयोदशमनुः । यथा,—
"ततश्च मेरुसावर्णः ब्रह्मसनुर्मनुः स्मृतः ।
ऋतुश्च ऋतुधामा च विष्वक्सेनो मनुस्तथा ॥"
इति मात्स्ये ६ अध्यायः ॥
विष्वक्सेनप्रिया, स्त्री, (विष्वक्सेनस्य प्रिया ।) वाराही । इत्यमरः ॥ चामार आलु इति भाषा ॥ लक्ष्मीः । इति मेदिनी । ये, १३४ ॥
विष्वक्सेना, स्त्री, प्रियङ्गुः । इत्यमरः ॥
विष्वग्वणं, क्ली, भोजनम् । इति जटाधरः ॥ शब्दकरणम् । यथा । विष्वग्वति वीणा । इति सुग्धबोधव्याकरणम् ॥
विष्वद्रङ्, [च्] त्रि, (विष्वगञ्चतीति । अच् + क्विप् । "विष्वग्देवयोश्चेति ।" ६।३।९२। इति टेः स्थाने अदीर्घादेशः ।) सर्व्वतोगामी । इत्यमरः ॥ (यथा, माघे । १८ । २५ ।
"विष्वद्वीचीर्विचिपन् सैन्यवीची-
राजावन्तः क्षापि दूरं प्रयातम् ॥")
विष्वाणः, पुं, भक्षणम् । इति हेमचन्द्रः ॥
विसं, क्ली, नवालम् । इत्यमरः ॥ (यथा, कथासरित्सागरे । ६ ।
"नवविसकिसलयकवलन-
कषायकलहंसकसरवो यत्र ।
कमलवनेषु प्रसरति
लक्ष्मा इव नूपुरारावः ॥")
विसंवादः, पुं, (वि + सं + वद + घञ् ।) विप्रलम्भः । इत्यमरः ॥ (यथा, महाभारते ।१२ । २५८ । ११ ।
"अद्रोहमविसंवादं प्रवर्त्तन्ते तदाश्रयाः ॥")
विसकच्छिका, स्त्री, (विसवद्गुः शुभः कच्छो यस्या इति बहुव्रीहौ कन् टापि अत इत्वम् ।) वलाका । इत्यमरः ॥
विसकुसुमं, क्ली, (विसस्य कुसुमम् ।) कमलम् । इति राजनिर्घण्टः ॥
विसकृटः, पुं, सिंहः । इति शब्दचन्द्रिका ॥ इक्षुदीक्ष्यः । इति राजनिर्घण्टः ॥
विसजं, क्ली, (विसाज्जायते इति । जन् + डः ।) पद्मम् । विसं नवालं तत्र जातत्वात् ॥
विसनाभिः, पुं, (विसं नाभिरुत्पत्तिस्थानं यस्य ।) यज्ञिनी । पद्मसमूहः । इति त्रिकाण्डशेषः ॥
विसप्रसूनं, क्ली, पद्मम् । इत्यमरः ॥ (यथा, शिशुपालवधे । ५ । २८ ।
"अलुलिसं धृतविकासिविसप्रसूनाः ॥")
विसरः, पुं, (विसरतीति । वि + सृ + पचाद्यच् ।) समूहः । इत्यमरः ॥ प्रसरः । इति मेदिनी । रे, २१७ ॥
विसर्गः, पुं, (वि + सृज + घञ् ।) दानम् । (यथा, रघुवंशे । ४ । ८६ ।
"आदानं हि विसर्गाय सतां जलमुचामिव ॥")
त्यागः । (यथा, महाभारते । १ । ३२ । १३ ।
"नानाशस्त्रविसर्गैस्तैर्व्यथ्यमानः समन्ततः ॥")
मलनिर्गमः । विसर्ज्जनीयः । (यथा, भागवते । ६ । ८ । १० ।
"सविसर्गं फडन्तं तत् सर्व्वदिक्षु विनिर्हिंधेत् ॥")
सृष्यैस्यायवभेदः । इति मेदिनी । गे, ५० ॥ मोक्षः । इति हलायुधः ॥ विद्वेषः । इति शब्दरत्नावली ॥ विशेषद्वेषः । यथा,—
"पुरुषानुगृहीतानामेतेषां वासनामयः ।
विसर्गोऽयं समाहारो बीजाद्वीजं चराचरम् ॥"
इति श्रीभागवतम् ॥
विसर्ज्जनीयस्य पर्य्यायः ।
"यः सर्गो रसना वक्रं विसर्गश्च द्विविन्दुकः ।
नादोर्द्धेन्दुरर्द्धमात्रा कला राज्ञी सदाशिवः ।
अनुस्वार्य्या तुरीया च विश्वमातृकला परा ॥"
इति बीजाभिधानम् ॥
अपि च ।
"यः कण्ठको महासेनः कला पूर्णान्तरा हरिः ।
इच्छा भद्रा गणेशश्च रतिर्विद्यासुखी सुखम् ॥
द्विविन्दुरसना सोमोऽनिरुद्धो दुःखशत्रुकः ।
द्विजिह्वः कुण्डलं वक्रं सर्गः शक्तिर्निशाकरः ।
सुन्दरी सुयशानन्ता गजनाथो महेश्वरः ॥"
इति बीजवर्णाभिधानान्तरम् ॥
अन्यच्च ।
"विसर्गः सर्गमाख्यातो विषद्विषयमाश्रयः ।
अनिरुद्धो महेशानि कालाग्निरपि रमापि च ॥"
इति वर्णाभिधानम् ॥
(प्रयोगः । यथा, भागवते । १ । ५ । ११ ।
"तदाम्बिसर्गो जगतामविप्लवः ॥")
विसर्ज्जनं, क्ली, (वि + सृज् + ल्युट् ।) दानम् । परित्यागः । इत्यमरः ॥ (यथा, रघुवंशे ।८।२५।
"श्रुतदेहविसर्ज्जनं पितु-
श्चिरमश्रूणि विसृज्य राघवः ॥")
संप्रेषणम् । इति मेदिनी । ने,२०५॥ (पुं, यदुवंशीयानामन्यतमः । यथा,भागवते ।११।३०।१८।
"विसर्ज्जना: कुकुराः कुन्तयश्च
मिथस्तु जह्नुः सुविहस्य सौहृदम् ॥"
विशेषेण सृज्यते इति । वि + सृज + कर्म्मणि ल्युट् । उत्पादिते, त्रि । यथा, भागवते । १० । १६ । ५७ ।
"त्वया सृष्टमिदं विश्वं धातुर्गुणविसर्ज्जनम् ॥")
विसर्पः, पुं, (वि + सृप + घञ् ।) रोगविशेषः । तत्पर्य्यायः । विसर्पिः २ सन्धिवातः ३ । इति राजनिर्घण्टः । तस्य विप्रकृष्टं निदानं संख्या निरुक्तिञ्चाह ।
"लवणाम्लकटूष्णादिसेवनाद्दोषकोपनैः ।
विसर्पः सप्तधा ज्ञेयः सर्व्वतः परिसर्पणात् ॥"
आदिशब्दाच्चरकोक्तहरितशाकक्षिप्रशाकप्रभृतीनां ग्रहणम् । * । सप्तधात्वं विवृणोति ।
"एकत्रयस्त्रिभिश्चैको विसर्पो द्वन्द्वजाह्वयः ।
वातिकः पैत्तिकश्चैव कफजः सान्निपातिकः ।
चत्वार एते वीसर्पा वक्ष्यन्ते द्वन्द्वजाह्वयाः ॥
आग्नेयौ वातपित्ताभ्यां ग्रन्थाख्यः कफवातजः ।
यस्तु कर्दमको घोरः स पित्तकफसम्भवः ॥"* ।
विसर्पदोषदूष्याणि संग्रहाह ।
"रक्तं त्वसृक्का त्वङ्मांसं दूष्यं दोषाश्रयो मलाः ।
विसर्पाणां समुत्पत्तौ हेतवः सप्त धातवः ॥"
त्रयो मलाः वातपित्तकफाः । दोषाः दूषका इत्यर्थः । अन्यथा दोषा मला इत्यत्र पुनरुक्तिदोषोऽनिवार्य्यः । * । वातिकस्य लक्षणमाह ।
"तत्र वातात् परीसर्पो वातज्वरसमन्वयः ।
शीतस्फुरणनिस्तोदभेदायामार्त्तिहर्षवान् ॥"
परीसर्पो विसर्पः । वातज्वरसमन्वयः शिरोहृद्गात्रोदरभूयादियुक्तः । भेदः विदारणेनेव व्यथा । आयामः आकर्षणेनेव व्यथा । * ॥
पैत्तिकमाह ।
"पित्ताद्दुतगतिः पित्तज्वरलिङ्गोऽतिलोहितः ॥"
द्रुतगतिः शीघ्रप्रसरणशीलः । * । श्लैष्मिकमाह ।
"कफात् कण्डूयुतः स्निग्धः कफज्वरसमानरुक् ॥"
सान्निपातिकमाह ।
"सन्निपातसमुत्थश्च सर्व्वरूपसमन्वितः ॥"*॥
वातपैत्तिकस्यापि विसर्पाख्यस्य च लक्षणमाह ।
"वातपित्तज्वरच्छर्द्दिमूर्च्छातीसारहृद्भ्रमैः ।
अक्षिमेदाग्निसदनतमकारोचकैर्युतः ॥
करोति सर्व्वमङ्गञ्च दीप्ताङ्गारावकीर्णवत् ।
यं यं देशं विसर्पश्च संस्पर्शति भवेत् स सः ॥
शान्ताङ्गारावसितो नीलो रक्तो वा रूपचीयते ।
अग्निदग्ध इव स्फोटैः शीघ्रगत्वात् द्रुतश्च सः ॥
मर्म्मानुसारी वीसर्पः स्यादतीवातिवञ्चनः ।
अर्थेताङ्गं हरेत् संज्ञां निद्राञ्च श्वासमोरयेत् ॥
हिक्काञ्च संगतोऽवस्थामीदृशीं लभते नरः ।
क्वचिच्छर्मारतिग्रस्तो भूमिशय्यासनादिषु ॥
चेष्टमानस्ततः क्षिप्रो मनोदेहसुखद्विषाम् ।
दुःप्रबोधोऽभुते निद्रां सोऽग्निवीसर्प उच्यते ॥"
स्फोटैः उपचीयत इत्यन्वयः । मर्म्मानुसारी हृदयानुसारी । हरेत् वीसर्प इत्यन्वयः । हिक्काम् । हरयेत् उत्पत्तुं प्रेरयेत् । मनोदेहसुखद्विषां निद्रां मरणरूपाम् । अभुते प्राप्नोति ॥*
वातश्लैष्मिकग्रन्थिविसर्पमाह ।
"कफेन रुद्धः पवनो भित्त्वा तं बहुधा कफम् ।
रक्तं वा दूषयित्वा तु दीर्घावृत्तस्थूलखरात्मनाम् ।
ग्रन्थीनां कुरुते मालां रक्तानां तीव्ररुग्ज्वराम् ॥
श्वासकाशास्यवैरस्यशीर्षहृल्लाघवभ्रमैः ।
मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाङ्गसदनैर्युतः ।
इत्ययं ग्रन्थिवीसर्पो वातश्लैष्मप्रकोपनः ॥"
कफेन स्वहेतुदुष्टेन पवनोऽपि स्वहेतुदुष्टः । तेनायं वातश्लैष्मिकः । तं कफं बहुधा भित्त्वा रक्तं वा दूषयित्वा इत्यन्वयः । त्वगादिकमिति रक्तविशेषणम् । * । पित्तश्लैष्मिकं कर्दमाख्यं विसर्पमाह ।
"कफपित्तज्वरास्यो निद्रातन्द्राग्निरोरुजा ।
अङ्गावसादविक्षेपप्रलापारोचकक्षमाः ।
मूर्च्छायिद्वानिर्भेदोऽस्यां पिपासेन्द्रियगौरवम् ।

ग्रामोपवेशनं लेपस्नोतसाञ्च विसर्पति ॥
प्रायेणामाशये श्लेष्मैकदेशं न चातिरुक् ।
पिड़कैरवकीर्य्यते पीतलोहितमाक्षुरैः ॥
स्निग्धोऽसितो मेचकाभो मलिनः शीफवान् गुरुः ।
गम्भीरपाकः प्राच्योष्मा क्लिन्नः क्लिद्यो विदीर्य्यते ।
पक्वत्वक् श्लीर्य्यमांसस्य सदृक्षायुग्निरागमः ।
ग्रवगन्धिश्च वीसर्पः कर्दमाख्यमुदाहृतम् ॥"
स च सर्पति एकदेशमित्यन्वयः । पिड़कैः पिड़काभिः । अवकीर्य्यः व्याप्तः । असितः कृष्णः । मेचकः रूक्षकृष्णः । प्राच्योष्मा प्रभूतोष्मा । स्फुटः क्लिन्नोऽवदीर्य्यते स्फुटः सन्नार्द्रो भवति विदीर्य्यते च । पक्वत्वक् कर्दमवर्णा त्वग्यस्य सः । श्लीर्य्यमांसः गलितमांसः । अतएव सदृक्षायुग्निरागमः । * । सान्निपातिकमाह ।
"सन्निपातसमुत्थस्तु सर्व्वरूपसमन्वितः ॥"*॥
चतस्रश्च विसर्पमाह ।
"बाह्यहेतोः क्षतात् क्रुद्धः सरक्तं पित्तमीरयन् ।
वीसर्पमारुतः कुर्य्यात् कुलत्थसदृशैश्चितः ।
स्फोटैः श्लोषज्वररुजा दाहाद्यं श्यावशोणितम् ॥"
बाह्यहेतोः शस्त्रप्रहारव्यालदन्तनखाद्यागन्तुहेतोः । श्यावशोणितं धूम्रवर्णरक्तम् । * ॥
उपद्रवानाह ।
"ज्वरातीसारवमथुतृष्णांसदरणक्लमाः ।
अरोचकविपाकौ च विसर्पाणामुपद्रवाः ॥"*॥
साध्यत्वादिकमाह ।
"सिध्यन्ति वातकफपित्तकृता विसर्पाः
सर्व्वात्मकक्षतकृतश्च न सिद्धिमेति ।
पित्तात्मकोऽञ्जनवपुश्च भवेदसाध्यः
क्रुद्धाश्च मर्म्मसु भवन्ति च सर्व्व एव ॥"
पित्तात्मकोऽञ्जनवपुः पित्तजः सन् कज्जलवर्णः । सर्व्व एवासाध्या अपि । * । अथ विसर्पस्य चिकित्सा ।
"विरेकबमनालेपसेचनास्रविमोक्षणैः ।
उपाचरेदृषयादोषं विसर्पानविदाहिभिः ॥
राजा नीलोत्पलं दारु चन्दनं मधुकं बला ।
घृतं क्षीरयुतो लेपो वातवीसर्पनाशनः ॥"
चन्दनमत्र रक्तं ग्राह्यम् ।
"कसेरुदृङ्नाटकपद्मगुन्द्रैः
सशैवलैः सोत्पलकर्दमैश्च ।
वल्लान्तरैः पित्तकृते विसर्पे
लेपो विधेयः सघृतः सुशीतः ॥*॥
त्रिफलापद्मकोशीरसमङ्गाकरवीरकम् ।
नलमूलमनन्ता च लेपः श्लेष्मविसर्पहा ॥
समङ्गा लज्जालुः ।
"वातपित्तप्रशमनमग्निवीसर्पजे हितम् ।
वातश्लेष्महरं कर्म्म ग्रन्थिवीसर्पजे हितम् ॥
पित्तश्लेष्मप्रशमनं हितं कर्दमसंज्ञके ।
त्रिदोषजक्रियां कुर्य्यात् विसर्पे त्रिमलापहाम् ॥*
शिरीषयष्टीनतचन्दनेला
मांसीहरिद्रादयकुष्ठवालैः ।
लेपो दृषाङ्गः सघृतः प्रयोज्यो
विसर्पकुष्ठज्वरशोथहारी ॥"
नतं तगरम् । चन्दनमत्र रक्तं ग्राह्यम् । दृषाङ्गो लेपः । * ॥
"परिषेकाः प्रलेपाश्च ग्रस्यन्ते पत्रवल्कलैः ।
पद्मकोशीरमधुकं चन्दनेला विसर्पजे ॥
भूनिम्बवासा कटुका पटोल-
फलत्रयं चन्दननिम्बसिद्धः ।
विसर्पदाहज्वरशोथकर्त्तृ
विस्फोटलज्जावमिकृत् कषायः ॥
कुष्ठानि यानि सर्पिंषि त्रयेषु विविधेषु च ।
विसर्पे तानि योज्यानि सेकालेपनभोजने ॥*॥
करञ्जसप्तच्छदलाङ्गलीक-
क्षुद्रार्कदुग्धानलभृङ्गराजैः ।
तैलं निशास्नुक्त्रिवृदर्कपक्वं
विसर्पविस्फोटविचर्चिकाघ्नम् ॥
इति करञ्जादितैलम् ॥* ॥
"कुष्ठामयस्फोटमसूरिकोक्त-
चिकित्सयाप्याशु हरेद्विसर्पान् ।
सर्व्वान् विकारान् परिशोथ धीमान्
व्रणं क्रमेणोपचरेद्व्रणोक्तम् ॥"
इति विसर्पाधिकारः । * । इति भावप्रकाशः ॥
(वेगः । यथा, उत्तरचरिते ।
"प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ॥"
नाट्यालङ्कारविशेषः । तल्लक्षणादिकं यथा, साहित्यदर्पणे । ६ । ४८५ ।
"विसर्पो यत्नमारब्धं कर्म्मानिष्फलप्रदम् ॥"
यथा वेण्याम् । एकस्य तावत् प्राकोऽयमित्यादि ॥)
विसर्पणं, क्ली, (वि+सृप+ल्युट् ।) प्रसरः । इत्यमरः ॥ तन्नृत्यविटपादेर्विसर्पणम् । इति भरतः ॥ (निक्षेपः । यथा, महाभारते । ७ । ८ । १३ ।
"शोषणं सागरस्येव मेरोरिव विसर्पणम् ।
पतनं भास्करस्येव न स्यो द्रोणपातनम् ॥")
विसर्पिः, पुं, विसर्पः । इति राजनिर्घण्टः ॥
विसलं, क्ली, (विसं लातीति । ला+कः ।) पल्लवः । इति त्रिकाण्डशेषः ॥
विसारः, पुं, (विशेषेण सरतीति : सृ गतौ+ "याधिमत्स्यबलेष्विति वक्तव्यम् ।" ३ । ३ । १७ । इत्यस्य वार्त्तिकोक्त्या घञ् ।) मत्स्यः । इत्यमरः ॥ (भावे घञ् । निर्गमः । यथा, ऋग्वेदे । १ । ७६ । १ ।
"हिरण्यकेशो रजसो विसारे
ऽहिर्धुनिर्वात इव ध्रजीमान् ॥"
"रजस उदकस्य विसारे विसरणे मेघार्त्तिर्गमने ।" इति तद्भाष्ये सायणः ।)
विसारिणी, स्त्री, (विशेषेण सरतीति । सृ+णिनिः । ङीप् ।) मापपर्णी । इति राजनिर्घण्टः ॥) प्रसरणशीला । यथा, राजतरङ्गिण्याम् । ८ । ६८२ ।
"निर्घृणस्य विसारिण्यो ज्वाला इव भुजो दधुः ॥")
विसारितः, त्रि, प्रसारितः । विपूर्ब्बणान्तसृधातोः क्तप्रत्ययेन निष्पन्नमिदम् ॥
विसारी, [न्] त्रि, (वि+सृ+णिनिः ।) प्रसरणशीलः । तत्पर्य्यायः । विसृमरः २ विसृमरः ३ प्रसारी ४ । इत्यमरः ॥ (यथा, रघुः । ३ । १५ ।
"अरिष्टगुप्यां परितो विसारिणा
सुजम्भनस्तस्य निजेन तेजसा ॥")
विसिनी, स्त्री, (विसमस्त्यस्या इति । विस+"पुष्करादिभ्यश्च ।" इति इनिः । ङीप् ।) पद्मिनी । इत्यमरः ॥ मृणालम् । इति राजनिर्घण्टः ॥
विसूचिका, स्त्री, (विसूची+स्वार्थे कन् ।) अजीर्णरोगविशेषः । इति भावप्रकाशः ॥ (अस्या विशेषविवृतिस्तु अजीर्णविसूचीशब्दयोर्द्रष्टव्या ॥)
विसूची, स्त्री, (विशेषेण सूचयति गच्छतीति । वि+सूच्+अच् । स्त्रियां ङीष् । यद्वा, विशिष्टा सूचीव ।) अजीर्णरोगविशेषः । ओलाउटा इति भाषा ॥ तस्य निरुक्तिर्यथा,—
"सूचीभिरिव गात्राणि तुदन् सन्तिष्ठतेऽनिलः ।
यस्माज्जीर्णेन सा वेद्यैर्विसूचीति निगद्यते ॥"
तस्या निदानमाह ।
"न तां परिमिताहारा लभन्ते विदितागमाः ।
मूढास्तामतितात्मानो लभन्तेऽशनलोलुपाः ॥"
विदितागमा ज्ञाततुर्व्वेदाः ॥*॥
तस्या लक्षणमाह ।
"मूर्च्छातिसारो वमथुः पिपासा
शूलं भ्रमोद्वेष्टनजृम्भदाहाः ।
वैवर्ण्यकम्पौ हृदये रुजश्च
भवन्ति तस्यां शिरसश्च भेदः ॥"
उद्वेष्टनं हस्तपादयोः । शिरसो भेदः शिरःशूलम् ॥*॥ तस्या उपद्रवानाह ।
"निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता ।
अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः ॥"
अमी उपद्रवा घोराः अमी निद्रानाशाद्या उपद्रवाः सर्व्वेषामेव रोगाणां घोरा भयङ्कराः । विसूच्याः पञ्च दारुणाः विसूच्यास्तु पञ्चापि यदि स्युस्तदा दारुणाः प्राणभयङ्कराः ॥ * ॥
तस्या अरिष्टमाह ।
"यः श्यावदन्तौष्ठनखोऽल्पसंज्ञ-
श्छर्द्याहितोऽभ्यन्तरयातनेत्रः ।
श्वासक्षरः सर्व्वविसृक्तसन्धि-
र्यायान्नरः सोऽपुनरागमाय ॥"
सर्व्वविसृक्तसन्धिः सर्व्वे विसृक्ताः शिथिलीभूताः सन्धयो यस्य सः ॥ इति भावप्रकाशः ॥ * ॥
अस्याश्चिकित्सा अजीर्णशब्दे द्रष्टव्या ॥
विसृतं, क्ली, अनुतापः । इति जटाधरः ॥
विसृतं, त्रि, (वि+सृ+क्तः ।) विस्तृतम् । इत्यमरः ॥
विसृत्वरः, त्रि, (विसरति तच्छीलः । वि+सृ+"इगुपधज्ञिसृभ्यः क्वरप् ।" ३ । २ । १६३ ।

इति करप् । इषस्येति तुक् ।) प्रसरणशीलः । इत्यमरः । "विसरथम् । गतिविशेषः । विस्वरो नदः । विस्वरी नदी । विस्वरं तैलमित्यादि । विसरति विस्वरः इ गतौ चुरप् इजौषधीति चुरप् खस्य तन् पिति तन् ।" इति भरतः ॥

विस्मरः, त्रि. (विशेषेण सरति तच्छीलः । वि+इ+"इषसदः क्मरच् ।" ३ । २ । १६० । इति क्मरच् ।) प्रसरणशीलः । इत्यमरः ॥

विस्रष्टः, त्रि, (वि+स्रज्+क्तः ।) निश्चिप्तः । इति जटाधरः । (यथा, ऋक्षकटिके । १ अङ्के ।

"उद्दियचक्रलकटाक्षविस्रष्टदृष्टि-
र्याधानुसारचकिता हरिणीव याचि ।")

विशेषेण स्रष्टश्च । (अक्तः । यथा, भागवते । १ । १६ । २४ ।

"अस्तर्हितस्य सरती विस्रष्टा
कर्मोणि निर्वाणविलम्बितानि ।"

प्रेषितः । यथा, रघुः । ५ । ३६ ।

"आप्तः कुमारानयनोत्सुकेन
भोगेन दूतो रघवे विस्रष्टः ।"

पुं, विसर्गः । निस्सृष्टयरूपः । यथा, कातन्त्रे । ८ । २ ।

"रषकारयोर्विस्रष्टः ।")

विस्रः, पुं, स्त्री, (विस उत्सर्गे+क्तः ।) हैन्यो-ऽवः । अष्टौतिरत्तिकापरिमितखर्णम् । इत्यमरः ॥

विस्रारः, पुं, (वि+स्रृ+"प्रथने वावशब्दे ।" ३ । ३ । ३३ । इति घञ् ।) ग्रन्थस्य विस्तारः । इत्यमरः । (यथा, शिशुपालवधे । २ । २४ ।

"सुविस्तरतरा वाचो भाव्यभूता भवन्तु मे ।"

वेदाङ्गम् । यथा, भागवते । ३ । ३ । २ ।

"सान्दीपनेः सङ्गत्योक्तं ब्रह्माधीत्य सविस्तरम् ।")

विस्तारः । (यथा, गीतायाम् । १० । १६ ।

"प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ।")

प्रबन्धः । इति मेदिनी । पीठः । समूहः । इति शब्दरत्नावली । (त्रि, बहुः । यथा, साहित्यदर्पणे । ६ । ३१४ ।

"अपेक्षितं परित्यज्य गौरवं वस्तु विस्तरम् ।
यदा सन्दर्भयेच्छीघ्रमासुखानन्तरं तदा ।")

विस्तारः, पुं, (वि+स्तृ+"प्रथने वावशब्दे ।" ३ । ३ । ३३ । इति घञ् ।) विटपः । विस्तीर्णता । तत्पर्य्यायः । विषहः २ व्यासः ३ । इत्यमरः । (यथा, आर्य्यासप्तशत्याम् । ५५८ ।

"बंशावलम्बनं यद्वो विस्तारो गुरुरस्य यावनतिः ।
तच्चालस्य खलस्य च निजाङ्गसमप्रणाशाय ॥")

स्तम्बः । इति मेदिनी । रे, २१५ ॥

विस्तीर्णः, त्रि, (वि+स्तृ+क्तः । "दरादभ्यामिति ।" ८ । २ । ४२ । इति नः ।) विपुलम् । विस्तृतम् । यथा,—

"विस्तीर्णे विकटं बहुं विशालं विपुलं पृथु ।"

इति जटाधरः ॥

(यथा,—

"पर्याप्तानि सुवर्णवर्णानि विस्तीर्णाकर्णलोचने ।
तूर्णमागीयतां चूर्णं पूर्णचन्द्रनिभानने ॥"

इत्युद्भटः ॥)

विस्तीर्णपर्णी, स्त्री, (विस्तीर्णं पर्णं पत्रमस्याः ।) मानकम् । इति शब्दचन्द्रिका ॥

विस्तृतः, त्रि, (वि+स्तृ+क्तः ।) लब्धविस्तारः । तत्पर्य्यायः । विस्तृतम् २ ततम् ३ । इत्यमरः ॥ (यथा, भागवते । २ । २४ । ६० ।

"तत्त्वं ब्रह्मपरं ज्योतिराकाशमिव विस्तृतम् ।")

विस्रष्टः, त्रि, (विशेषेण स्रष्टः ।) सुस्रष्टः । यथा,

"विस्रष्टमहतं ग्राम्यं सष्टाक्षरपदं तथा ।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥"

इति तिथ्यादितत्त्वम् ॥

विस्फारः, पुं, (वि+स्फुर+घञ् । "स्फुरतिस्फुलत्योर्घञि ।" ८ । ३ । ७६ । इत्यात्वम् ।) धनुर्गुणशब्दः । इत्यमरः ॥ अस्य विवरणं मूर्द्धन्यषकारमध्यविस्फारशब्दे द्रष्टव्यम् । (यथा, महाभारते । ३ । २७६ । ३६ ।

"विस्फारस्तस्य धनुषो यत्तस्येव तदा बभौ ॥"

विस्तृतिः । यथा, साहित्यदर्पणे । ३ । २०७ ।

"विस्फारस्तेतसो यस्तु स विस्मय उदाहृतः ॥")

विस्फारितः, त्रि, प्रकाशितः । चलितः । विपूर्व्वस्फालस्मरणयोः कर्त्तरि क्तेन निष्पन्नमिदम् ॥ (यथा, महाभारते । ३ । ११ । २० ।

"स नष्टमायोऽतिबलो क्रोधविस्फारितेक्षणः ।
कामरूपधरः क्रूरः कालरूपो व्यदृश्यत ॥"

निर्घोषितः । यथा, किरातें । १४ । ३० ।

"उद्भूवचःखगतिकदिङ्मुखो
विस्रष्टविस्फारितचापमण्डलः ॥")

विस्फुरितः, त्रि, (वि+स्फुर+क्तः ।) स्फूर्त्तियुक्तः । चञ्चलः । यथा,—

"रक्तरक्तोत्पलाक्षञ्च रक्तविस्फुरितेक्षणम् ।
वेष्टितं नागपाशेन भुकुटीभीषणाननम् ॥"

इति दग्धसुजादुर्गाध्यानैकदेशः ॥

विस्फुलिङ्गः, पुं, विषभेदः । इति हेमचन्द्रः ॥ (विशिष्टः स्फुलिङ्गः ।) अग्निकणश्च ॥

विस्फोटः, पुं, (विस्फोटतीति । वि+स्फुट+घञ् ।) विस्रष्टस्फोटकः । विस्फोटा इति भाषा । तत्पर्य्यायः । पिटकः २ पिटका ३ पिटकम् ४ । इत्यमरः । विटकः ५ विटका ६ विटकम् ७ । इति तट्टीका ॥ स्फोटकः ८ स्फोटः ९ । इति राजनिर्घण्टः ॥ (यथा, कथासरित्सागरे । ८५ । १८ ।

"किमेतदिति संभ्रान्तः प्रबुद्धोऽथ ददर्श सः ।
उत्थाय राजा विस्फोटानङ्गे तस्या विनिर्गतान् ॥")

तस्य विप्रस्रष्टनिदानपूर्व्विकां संप्राप्तिमाह ।

"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्षारैरजीर्णाध्यशनातपैश्च ।
तयर्त्तुदोषैश्च विषर्पणेन
कुप्यन्ति दोषा पवनादयस्तु ॥

त्वचमाश्रित्य ते रक्तमांसास्थीनि प्रदुष्य च ।
घोरान् कुर्व्वन्ति विस्फोटान् सर्व्वज्वरपुरःसरान् ॥"

ऋतुदोषैश्च ऋतुहेतुकप्रकोपोष्णादीनामतियोगेन । ऋतूचिताहारविहारवैपरीत्येन त्वचमाश्रित्य विस्फोटान् कुर्व्वन्तीत्यर्थः । ज्वरपुरःसरान् ज्वरपूर्व्वान् । * । रूपमाह ।

"अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्तजाः ।
क्वचित् सर्व्वत्र वा देहे विस्फोटा इति ते स्मृताः ॥"

रक्तपित्तजाः एतेन सर्व्वेषु विस्फोटेषु रक्तपित्तयोः प्रधानकारणत्वम् । यथा शूलेषु वातस्य तथा वातानुगतिरपि बोद्धव्या । तथा च भोजः ।

"यदा रक्तञ्च पित्तञ्च वातेनानुगतं त्वचि ।
अग्निदग्धनिभान् स्फोटान् कुरुतः सर्व्वदेहगान् ॥"* ॥

वातिकमाह ।

"शिरोरुक्शूलभूयिष्ठज्वरलट्पर्व्वभेदनम् ।
सङ्कुण्ठवर्णतां चेति वातविस्फोटलक्षणम् ॥"

शूलमत्र तोदरूपम् ॥* ॥ पैत्तिकमाह ।

"ज्वरदाहरुजापाकः सावसृष्णासमन्वितम् ।
पीतलोहितवर्णश्च पित्तविस्फोटलक्षणम् ॥"

रक्तादिवयं स्फोटेषु ॥* ॥ वातपैत्तिकमाह ।

"वातपित्तज्वरो यस्तु तत्र स्फुलीवदेदवाः ।
क्लेमित्यं गौरवं कण्डुर्भवेद्वातबलासजे ॥"* ॥

पित्तश्लैष्मिकमाह ।

"कण्डूर्दाहो ज्वरश्छर्द्दिर्जायते कफपैत्तिके ॥"

सान्निपातिकमाह ।

"मर्म्मशिरोव्रणस्फोटः कठिनः खल्पपाकवान् ।
रागदाहरुजाभोहश्छर्द्दिमूर्च्छारुजाज्वरः ।
प्रलापो वेपथुर्यत्र सोऽसाध्यश्च त्रिदोषजः ॥"

मोहो विपरीतज्ञानम् । मूर्च्छा सर्व्वथा ज्ञानशून्यता । * रक्तजमाह ।

"वेदितव्याश्च रक्तेन पैत्तिकेन च हेतुना ।
गुञ्जाफलसमा रक्ता रक्तस्रावा विदाहिनः ।
न ते सिद्धिं समायान्ति सूढैर्योगशतैरपि ॥"

पैत्तिकेन च हेतुना पित्तस्यहेतुना कट्वादिना रक्तस्य पित्तस्य तुल्यत्वात् न च ते साध्याः ।

"एते चाष्टविधा बाह्या आन्तरोऽपि भवेदयम् ।
तस्मिन्नन्तर्ज्वरा तीव्रा ज्वरयुक्ताभिजायते ।
तस्मिन् बहिर्गते स्वास्थ्यन्तु यावस्य बहिर्गतिः ।
तत्र वातिकविस्फोटक्रिया कार्य्या विजानता ॥"

उपद्रवानाह ।

"कट्यास्यमांसस्रोतोदाहदिक्कामदज्वराः ।
विसर्पमर्म्मसंरोधाश्चेषामुक्ता उपद्रवाः ॥"

मांसस्रोतः मांसस्य ग्रथितत्वम् । मर्म्मसंरोधो मर्म्मव्यथा । तेषां विस्फोटकानाम् ॥ * ॥

केचिदुपद्रवाणां लक्षणान्तरं पठन्ति ।

"हिक्का श्वासोऽतिसृष्णा स्याद्भमर्हो हृदि व्यथा ।
विसर्पज्वरमूत्रासृग्विस्फोटानामुपद्रवाः ॥"

साध्यत्वादिकमाह ।

"एकदोषोत्थितः साध्यः सकृत्साध्यो द्विदोषजः।
सर्वरूपान्वितो घोरो दुःसाध्यो भूर्णुपद्रवः।"
अथ विस्फोटस्य चिकित्सा।
"विस्फोटे लङ्घनं कार्यं वमनं पथ्यभोजनम्।
यथादोषबलं पीत्वा प्रयुञ्जीताथ विरेचनम्॥"
जीर्णाः शालियवा मुद्गा मसूराश्चाढकी तथा।
एतान्यन्नानि विस्फोटे हितानि सुनयोऽब्रुवन्॥
द्वे पञ्चमूल्यौ राजा च दार्वी शृङ्गी दुरालभा।
गुडूची धान्यकं मुस्तमेषां कार्थं पिबेन्नरः।
विस्फोटान्नाशयत्याशु समीरणनिमित्तकान्॥
द्राक्षाकाश्मर्यखर्जूरपटोलारिष्टवासकैः।
कटुकालाबुदुग्धैः पैत्तिके सर्पिषं घृतम्॥
भूनिम्बसप्तपाशासाच्छिन्नोद्भवबलाकैः।
पिचुमर्दपटोलाभ्यां कफजे मधुयुक् घृतम्॥
किराततिक्तकारिष्टयष्टीकाम्बुदवासकैः।
पटोलपर्पटोशीरत्रिफलाकोटजान्वितैः॥
क्वथितैर्द्वांदशाङ्गन्तु सर्वविस्फोटनाशनम्॥
विस्फोटव्याधिनाशाय तक्तकाम्बुदपेषितैः।
बीजैः कुटजवृक्षस्य लेपः कार्यो विजानता॥
छिन्ना पटोलभूनिम्बवासकारिष्टपर्पटैः।
खदिराब्दयुतैः काथो हन्ति विस्फोटकं ज्वरम्॥
चन्दनं नागपुष्पञ्च सारिवा तक्तुलीयकम्।
शिरीषवल्कलं जाती लेपः स्याद्दाहनाशनः॥"
"उत्पलं चन्दनं लोध्रसुशीरं शारिवाद्वयम्।
जलेन पिष्टं लेपेन स्फोटदाहार्तिनाशनम्॥
पुत्रजीवस्य मज्जानं जले पिष्ट्वा प्रलेपयेत्।
कालस्फोटं विषस्फोटं सद्यो हन्यात् सवेदनम्॥
कदाचन्निं गजचन्निं कर्कचन्निञ्च नाशयेत्।
अन्यच्च स्फोटकं ताम्रं पुत्रजीवो विनाशयेत्॥"
इति विस्फोटकाधिकारः। इति भावप्रकाशः॥
अन्यच्च।
"मरीचं त्रिफलं कुष्ठं हरितालं मनःशिला।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम्॥
विशाला करवीरश्च अर्कक्षीरं सकल्कलम्।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत्॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत्।
लक्षपाके लौहपात्रे वा मृन्मयेनाथवा पचेत्॥
यामा विचर्चिका चैव दद्रुविस्फोटकानि च।
अभ्यङ्गेन प्रणश्यन्ति रोमसप्तच जायते॥
प्रसृतान्यपि स्थानानि तैलेनानेन लङ्घयेत्।
चिरोत्थितमपि स्थैर्यं विवर्णं ततक्षणात् भवेत्॥"
अपि च।
"भूनिम्बनिम्बत्रिफलापर्पटैश्च हृतं जलम्।
पटोलसुस्तकाथाभ्यां वासकेन च नाशयेत्।
विस्फोटकानि सर्वाणि नाशं कार्यो विचारदः॥"
इति गारुड़े १६८ अध्यायः॥

विस्फोटकस्य स्वरूपं यथा, भावप्रकाशे।
"स्फोटाः स्रावरुजाभासा विस्फोटाः स्युस्तदुल्बणाः॥"

विस्मयः, पुं, (वि+स्मि+"एरच्।" इत्यच्।) आश्चर्यम्। तत्पर्य्यायः। अद्भुतं २ ह्यौ ३। इत्यमरः॥ "अन्यदद्भुतशब्दे द्रष्टव्यम्। 'अद्भुतो विस्मयस्थायिभावो गन्धर्वदेवतः। पीतवर्णो वसु लोकातिगमालम्बनं मतम्॥' इति भावरसयोः पर्य्यायत्वं अद्भुतस्य विस्मयस्थायिभावात्मकत्वात्।" इति भरतः॥ ॥ तस्य लक्षणम्। यथा,—
"विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु।
विस्मारस्तेतसो वस्तु स विस्मय उदाहृतः॥"
इति साहित्यदर्पणम्॥
(अस्मात्तपःक्षयो भवति। यथा, मनुः। ४।२३०।
"यज्ञोऽनृतेन चरति तपः चरति विस्मयात्॥")
दर्पः। इति मेदिनी॥ सन्देहः। इति शब्दरत्नावली॥ (विगतः स्मयो गर्वो यस्मिन्निति। बहुव्रीहौ, त्रि। यथा, भागवते। ३। १७। ३०।
"तं वीरमारादभिपद्य विस्मयः
ग्रथिष्यसे वीरगये यथाभवैः॥")

विस्मयान्वितः, त्रि, (विस्मयेन अन्वितः युक्तः।) विस्मययुक्तः। आश्चर्यविशिष्टः। तत्पर्य्यायः। विस्मयः २। इत्यमरः॥

विस्रम्भ(य)नः, पुं, (विस्रम्भ(य)यतीति। वि+स्रि+णिच्+ल्युः।) कुहकः। गन्धर्वनगरम्। कामदेवः। इति मेदिनी॥ क्लीं, विस्रम्भनम्॥ (यथा, हरिवंशे। १२६। २६।
"पारिजाततरोः पुष्पं तस्य दत्तं मयानघ।
विस्रम्भनार्थं देवेश पत्नीनामतुलप्रभः॥"
विस्मयकारके, त्रि। यथा, भागवते। १। १५। ५।
"वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा।
येन मेऽपहृतं तेजो देवविस्रम्भणं महत्॥")

विस्रित्तः, त्रि, (वि+स्रि+क्तः।) विस्रम्भान्वितः। यथा,—
"महापाशुपतान् दृष्ट्वा समुत्थाय महेश्वरः।
संपरिष्वजत यत्नं ते प्रीत्यासुरमहेश्वरम्॥
ततस्तदद्भुततमं दृष्ट्वा सर्वगणेश्वराः।
सुविस्रित्तास्तदा सन्तः किमिदं चिन्तयन्निति॥
विस्रित्तांस्तान् गणान् दृष्ट्वा श्रीलादिर्योगिनांवरः।
प्राह प्रहस्य देवेशं भूतपालिं गणाधिपः॥
विस्रित्तामी गणा देव सर्व एव महेश्वर।
महापाशुपतानां हि यतस्त्वयालिङ्गनं कृतम्॥"
इति वामने ६७ अध्यायः॥

विस्रित्तिः, स्त्री, विस्रम्भम्। विपूर्व्वस्रिधातोर्भावे क्तिन्प्रत्ययेन निष्पन्नमिदम्॥

विस्मृतः, त्रि, (वि+स्मृ+क्तः।) स्मरणाविषयः। तत्पर्य्यायः। अन्तर्गतम् २। इत्यमरः॥ (यथा, "पठित्वा सर्वशास्त्राणि विस्मृतान्यक्षराणिच। आस्ते किञ्चित् मम स्वान्ते टवर्गस्तु तु पञ्चमः॥" इत्युद्भटः॥)

विस्मृतिः, स्त्री, विस्मरणम्। विपूर्व्वस्मृधातोः क्तिन् प्रत्ययेन निष्पन्नमिदम्॥ (यथा, कथासरित्सागरे। ४४। ६६।
"जामातरञ्च स तथा सूर्य्यप्रभमुपाचरत्।
यथा तस्य निजा भोगाः सर्व्वे विस्मृतिमाययुः॥")

विस्रं, क्लीं, आमगन्धः। इत्यमरः॥ इदं चिताधूमादिगन्धे अपक्वमांसगन्धे इत्यन्ये। इति भरतः॥ (यथा, कथासरित्सागरे। ७४। १६६।
"समाश्विषच्च धाविता सिषेच धरान्तुभिः
स तम्।
मीनोदरदरीवासविस्रं प्रक्षालयन्निव॥"
तद्विशिष्टे, त्रि। यथा, कथासरित्सागरे। ८२। ७।
"अहमेनं न शक्नोमि ग्रहीतुं विस्रमिच्छतम्॥")

विस्रगन्धा, स्त्री, (विस्रं गन्धो यस्याः।) हपुषा। इति राजनिर्घण्टः॥

विस्रगन्धिः, पुं, (विस्रमिव गन्धो यस्य।) हरितालम्। इति हेमचन्द्रः॥

विस्रब्धः, त्रि, (वि+स्रभ+क्तः।) विश्रब्धः। इति केचित्॥ (यथा, साहित्यदर्पणे। १। ७।
"विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य
गण्डस्थलीम्॥")

विस्रम्भः, पुं, (वि+स्रभ+घञ्।) विश्वासः। (यथा, उत्तरचरिते। १।
"विस्रम्भादुरसि निपत्य लब्धनिद्राम्॥")
प्रणयः। इत्यमरः॥ प्रणयः परिचयः प्रहृष्टारार्थना वा।
परिचयप्रार्थनयोः प्रणयः परिकीर्त्तितः॥
इत्यमरमाला॥
प्रणयः क्रीड़ापारतन्त्र्यम्। इति रमानाथः॥"
इति तट्टीकायां भरतः॥ (यथा, रामायणे। २। ६०। ७।
"विजनेऽपि वने सीता वासं प्राप्य यदृच्छया।
विस्रम्भं लभतेऽभीता रामे विस्रब्धमानसा॥")
केलिकलहः। वधः। इति हेमचन्द्रः॥

विस्रम्भी, [न्] त्रि, (विस्रम्भते विश्वसितीति। वि+स्रभ+"वौ कषलसकत्थस्रभः।" ३। २। १४१। इति घिनुण्।) विश्वासी। (यथा, भागवते। ६। ५। २०।
"कथं तदनुरूपाय गुरवेऽस्मद्गुरुक्रमेत्॥")
प्रणयी। विस्रम्भशब्दादस्यर्थे घिनुप्रत्ययेन निष्पन्नमिदम्॥

विस्रसा, स्त्री, जरा। इत्यमरः॥

विस्रा, स्त्री, (विस्रं गन्धोऽस्यस्या इति। अच् ततष्टाप्।) हपुषा। इति राजनिर्घण्टः॥

विस्रुतः, त्रि, (वि+स्रु+क्तः।) विस्रुतः। विपूर्व्वकस्रुधातोः क्तप्रत्ययेन निष्पन्नमिदम्।

विहगः, पुं, (विहायसा गच्छतीति। गम्+"प्रियवशेति।" ३। २। ३८। इत्यत्र "डेप्र विहायसो विहादेशो वक्तव्यः।" इति काशिकोक्तेः डप्रत्यये विहायःशब्दस्य विहादेशः।) पक्षी। इत्यमरः॥ (यथा, भागवते। ४। १८। २४।
"सुपर्णबर्हा विहगाधरश्चाधरमेव च॥")
बाणः। (यथा, महाभारते। ७।१६१।४०।

"अयोमुखेश्च विहगैर्व्रणयिष्ये महारथान् ।") सूर्य्यः । चन्द्रः । इति शब्दरत्नावली । यज्ञः । इति धरणिः ॥

विहङ्गः, पुं, (विहायसा गच्छतीति । ३।२।३८ । इत्यत्र "गमेः सुपीति ।" खच् । "विहायसो विह च ।" इति विहादेशः । "खचडिदा वक्तव्यः ।" इति डित्व ।) पक्षी । इत्यमरः ॥ (यथा, रघुवंशे । १ । ५१ ।

"सैकान्ते मुनिकन्याभिस्तत्क्षणोज्झितदृष्टकम् । विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ।") बाणः । (यथा, महाभारते । ८ । ६६ । ३५ ।

"तत्प्रेरितैर्लोहितार्द्रैर्विहङ्गैः ।") मेघः । चन्द्रः । सूर्य्यः । इति शब्दरत्नावली । (नागविशेषः । १ । ५७ । ११ ।

"विहङ्गः शरभो मेदः प्रमोदः संहतोपनः ।") विहङ्गमः, पुं, (विहायसा गच्छतीति । ३।२।३८ । इत्यत्र । "खचप्रकरणे गमेः सुप्युपसंख्यानम् ।" इति काशिकोक्त्या खच् । "विहायसो विह च ।" इति विहादेशः ।) पक्षी । इत्यमरः ॥ (यथा, महाभारते । ३ । २७३ । ३६ ।

"आक्रम्य रत्नान्यहरत्कामरूपी विहङ्गमः ।" सूर्य्यः । यथा, मार्कण्डेये । १०६ । ६७ ।

"छन्दोभिरश्वरूपेण सप्तदृग्युक्तैर्विहङ्गमम् ।") विहङ्गमा, स्त्री, भार्य्याष्टिः । इति शब्दरत्नावली । वाँक इति भाषा ॥

विहङ्गराजः, पुं, (विहङ्गानां राजा । समासे टच् ।) गरुडः । इति हलायुधः ॥ (यथा, शिशुपालवधे । १ । ७ ।

"विहङ्गराजाङ्गरुहैरिवायते- र्हिरण्मयोर्व्वीरुहवल्लितन्तुभिः ।") विहङ्गिका, स्त्री, भार्य्याष्टिः । इत्यमरः ॥ वाँक इति भाषा ॥

विहत, स्त्री, गर्भोपघातिनी गौः । इति संक्षिप्तसारोणादिवृत्तिः ॥

विहतः, त्रि, विशेषेण हतः । विनष्टः । विपूर्व्वकहनधातोः क्तप्रत्ययेन निष्पन्नमिदम् ।

विहननं, क्ली, (वि + हन + ल्युट् ।) विघ्नः । हिंसा । तूलपिञ्जनः । इति मेदिनी । ने, २१ ॥

विहरः, पुं, (वि + हृ + अप् ।) वियोगः । इति हलायुधः ॥

विहरणं, क्ली, विहारः । विपूर्व्वकहृधातोरनट्प्रत्ययेन निष्पन्नमिदम् । (यथा, भागवते । १० । ३१ । १० ।

"विहरणञ्च ते ध्यानमङ्गलम् ।" प्रसारणम् । यथा, पाणिनौ । १ । ३ । २० ।

"आङो दोऽनास्यविहरणे ।" आहरणम् । यथा, मार्कण्डेये । १६ । ३७ ।

"नामिविहरणञ्चैव क्रतुभावश्च लक्ष्यते । नवाध्वायनमस्माकं विना होमेन जायते ।") विहसितं, क्ली, (वि + हस् + क्तः ।) मध्यमहास्यम् । इत्यमरः ॥

विहस्तः, त्रि, आकुलः । इत्यमरः ॥ (यथा, रघुः । ५ । ४६ ।

"रामापरित्राणविहस्तयोधं सेनानिवेशं तुमुलं चकार ।") प्रस्खलितः । इति मेदिनी ॥ (यथा, हरिवंशे । २३० । २८ ।

"नानायुधविहस्तानां त्वरितानां प्रधावताम् । क्ष्वेडितोत्क्रुष्टनिनदैर्गजहेषितनिस्वनैः ॥") विकरः । (यथा, विख्यातविजये । २ अङ्के ।

"विगतरथविहस्तन्यस्तशस्त्रप्रमत्त- स्खलितगतिभयार्त्तान् नैव जातु प्रहर्त्ता ॥") यक्षे, पुं । इति शब्दरत्नावली ॥

विहा, अ, (ओहाक् त्यागे + "विषाविहा ।" उणा० ४ । ३६ । इति निपातनात् आ ।) स्वर्गः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

विहापितं, क्ली, (वि + हा + णिच् + क्तः ।) दानम् । इत्यमरः ॥

विहायः, [स्] क्ली पुं, आकाशः । इत्यमरः ॥ (यथा, साहित्यदर्पणे । १० ।

"कान्तायते स्वर्गसुखेन वारि वारीयते स्वच्छतया विहायः ।" च, महान् । यथा, निरुक्ते । ४ । १५ । "विहायसस्त्वेभिरिन्द्रम् ।" "विहायसो महान्तः ।" इति यास्कः । यथा च निघण्टुटीकायाम् । ३ । ३।१२ । "विहायाः । बहिहाधाञ्भ्यश्छन्दसि । उणा० ४ । २१५ । इति अहातेर्जिहीतेर्व्वा बाहुलकात् गुणभावेऽपि गुणागमो निपात्यते ।" यथा, ऋग्वेदे । ४ । ११ । ४ ।

"तङ्काजी वाजंभरो विहायाः ।" "विहायाः महान् ।" इति तद्भाष्ये सायणः ॥) विहायाः, [स्] पुं, पक्षी । इत्यमरः ॥

विहायसं, क्ली पुं, आकाशः । इत्यमरटीकायां भरतः ॥

विहायसा, अ, आकाशः । इत्यमरटीकायां मथुरेशः ॥ (यथा, महाभारते । २।६३।१४।

"आतिष्ठस्व रथं राजन् विक्रमस्व विहायसम् ।") विहायसः, पुं, पक्षी । इत्यमरटीकायां भरतः ॥

विहायसा, अ, आकाशः । इत्यमरटीकायां मथुरेशः हैमचन्द्रश्च । (पाणिनौ च "खरादिनिपातमव्ययम् ।" १।१।३७। इत्यत्र गणितम् ॥)

विहारः, पुं, (वि + हृ + घञ् ।) क्रीड़ार्थं पद्भ्यां गमनम् । तत्पर्य्यायः । परिक्रमः २ । इत्यमरः ॥ (यथा, गीतायाम् । ११ । ४९ ।

"यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।") भ्रमणम् । स्वस्थः । लीला । (यथा, रघुवंशे । ६ । ४८ ।

"प्रत्यालब्धाङ्गविहारकाले ।") सुगतालयः । इति मेदिनी ॥ विष्टरश्रवकपक्षी । इति शब्दचन्द्रिका ॥ वेश्यागृहम् । इति शब्दमाला ॥

विहारी, [न्] त्रि, (विहर्त्तुं शीलमस्येति । वि + हृ + णिनिः ।) परिक्रमी । विहारकर्त्ता । विहारशब्दादस्यर्थे इनिप्रत्ययेन निष्पन्नमिदम् ॥ (यथा, नैषधे । ३ । १५ ।

"धार्य्यः कथङ्कारमहं भवत्या वियद्विहारी वसुधैकगत्या ।") विहितः, त्रि, (वि + धा + क्तः ।) विधेयः । यथा, "विहितस्याननुष्ठानात् निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥" इति प्रायश्चित्ततत्त्वम् ॥

विहितिः, स्त्री, (वि + धा + क्तिन् ।) विधानम् । यथा,—

"स्थितिविधिस्थितिस्थितिविहितिव्रतरतेयः परगतयः । जरद्रथधुर्गुरद्गुधुर्युधि कुरवः समरिकुलम् ॥" इति दण्डी ॥

विहीनः, त्रि, (वि + हा + क्तः ।) विशेषेण हीनः । यथा, तन्त्रसारे ।

"घोरान्धासविहीनो यः प्रणमेद्देवि पार्व्वतीम् । सोऽचिरान्नृत्युमाप्नोति नरकञ्च प्रपद्यते ॥" त्यक्तः । यथा,—

"विहीनश्च धनैर्दारैः पुत्रैराद्याय मे धनम् । वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥" इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

विहृतं, क्ली, (वि + हृ + क्तः ।) स्त्रीणां स्वाभाविकदशविधालङ्कारान्तर्गतालङ्कारविशेषः । यथा, "लीला विलासो विच्छित्तिर्व्विब्बोकः किलकिञ्चितम् मोट्टायितं कुट्टमितं ललितं विहृतं तथा । विभ्रमश्चेत्यलङ्काराः स्त्रीणां स्वाभाविका दश ॥" इति हैमचन्द्रः ॥

विहृतिः, स्त्री, विशेषेण हरणम् । विशेषेण बलात्कारः । विपूर्व्वहृधातोः क्तिप्रत्ययेन निष्पन्नमिदम् ।

विहेठः, पुं, (वि + हेठ + अच् ।) विहेठनम् । विपूर्व्वहेठधातोरल्प्रत्ययेन निष्पन्नमिदम् ।

विहेठनं, क्ली, (वि + हेठ + ल्युट् ।) हिंसा । महनम् । विहननम् । इति मेदिनी ॥ विबाधा । इति त्रिकाण्डशेषः ॥

विह्वलः, त्रि, (वि + ह्वल + अच् ।) भयादिनाभिभूतः । स्खलद्धारणाशक्तः । तत्पर्य्यायः । विक्लवः २ । इत्यमरः ॥ (यथा, रघुः । ८।६७।

"शयनमाचरसौ सुखातयोः स्तनयोस्तामवलोक्य विह्वला । निमिमीलनरोत्तमप्रिया कृतचन्द्रा तमसेव कौमुदी ॥") विह्वलनम् । इति हैमचन्द्रः ॥

वी, ल ट्वलत् । कान्तिगतिव्याप्तिक्षेपप्रजनखादने । इति कविकल्पद्रुमः ॥ (अदा०-पर०-कान्तौ अक०-गतौ व्याप्तौ क्षेपे प्रजने खादने च सक०-अनिट् ।) ल, वेति । इति दुर्गादासः ॥

वीः, पुं, (वयनमिति । वी गतौ + व्यृहादित्वात् भावे क्विप् । अभिधानात् पुंस्त्वम् ।) गमनम् । इत्येकाक्षरकोषः ॥

वीक:, पुं, (अञ्चतीति। अञ्च+"अञ्चियुधूनीभ्यो दीर्घश्च।"उणा० ३।४७। कन्। अञ्चे र्वीभाव:।) वायु:। यज्ञी। इत्युणादिकोष:। मन:। इति संक्षिप्तसारोणादिवृत्ति:।

वीकाश:, पुं, (विकाशनमिति। वि+काश+घञ्। "इक:काशे।"६।३।१२३। इति वैदपसर्गस्य दीर्घ:।) दृष्टि:। प्रकाश:। इत्यमर:।

वीक्ष:, पुं क्ली, (ईक्षि:। विपूर्व्वेक्षधातोरल्प्रत्ययेन निष्पन्नमिदम्।

वीक्षणं, क्ली, विशेषेण ईक्षणम्। दर्शनम्। विपूर्व्वेक्षधातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम्। (यथा, भागवते। ६। १८। २८।

"मनो जगाह भावज्ञा सङ्गितागाङ्गवीक्षणै:।")

वीक्षापन्न:, त्रि, (वीक्षामापन्न:।) विस्मयापन्न:। इति हेमचन्द्र:।३।८७। (वीक्षापन्न:। इत्येवमेव।)

वीक्षित:, त्रि, (वि+ईक्ष+क्त:।) विशेषेण ईक्षित:। दृष्ट:। यथा,—

"पापर्द्धे प्रजलभे तु पापसंयुतवीक्षिते।
तथैव चाष्टमस्थाने रोगिणां मरणं दिशेत्।"

इति दीपिका।

वीक्ष्यं, क्ली, (वीक्ष्यते इति। वि+ईक्ष+ण्यत्।) विस्मय:। इक्षणम्। इति मेदिनी। ये, ५६।

वीक्ष्य:, पुं, (वि+ईक्ष दर्शने+ण्यत्।) लालक:। चोटक:। इति मेदिनी। दर्शनीये, त्रि।

वीङ्खा, स्त्री, (वीङ्खनमिति। वि+इङ+"गुरोश्च हल:।" इति अ:। टाप्।) झूकक्रिया। गतिभेद:। नर्त्तनम्। इति हेमचन्द्र:। अश्वगतिभेद:। सन्धि:। इति शब्दरत्नावली।

वीचि:, पुं,स्त्री, (वयति जलं तटे वर्द्धयतीति। वे+"वीजो डिच्च।"उणा० ४। ७२। ईंचि:। स च डित्।) तरङ्ग:। इत्यमर:। (यथा, रघुवंशे। १। ४३।

"सरयूरवतिन्दानां वीचिविक्षोभशीतलम्।
आमोदसूचिभिन्नानां खनिचासानुकारिभम्।")

खण्डतरङ्ग:। अवकाश:। सुखम्। इति मेदिनी। चे, १०। अन्ध:। इति हेमचन्द्र:। किरण:। इति जटाधर:।

वीची, स्त्री, (वीचि+ङादिकारादिति ङीष्।) वीचि:। इत्यमरटीकायां भरत:। (यथा, हरिवंशे। ५६। ४।

"सरासु नलिनीपत्रनिरन्तरविरिञ्चिषु।
हंसांसालिङ्गकण्डूयवीचीविभजनादिषु।")

वीचीतरङ्ग:, पुं, न्यायविशेष:। स तु श्रोत्रे शब्दस्य उत्पत्तिकारणरूप:। यथा,—

"वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता।
कदम्बगोलकन्यायादुत्पत्ति: कस्यचिन्मते।"

इति भाषापरिच्छेद:।

ननु शब्दस्याद्यवच्छेदेनोत्पन्ने शब्दे श्रोत्रे कथमुत्पत्तिरित्यत आह वीचीति आद्यशब्दस्य बहिर्देशावच्छिन्नोऽन्य: शब्दस्तेनैव शब्देन जन्यते तेन चापरस्तदाद्यक एवं क्रमेण श्रोत्रोत्पन्नो यद्भवत इति। कदम्ब इति आद्यशब्दाद्यदिक्षु दश शब्दा उत्पद्यन्ते तेचान्ये दश शब्दा उत्पद्यन्ते इति भाव:। अस्मिन् कल्पे गौरवादुक्तं कस्यचिन्मते इति। सिद्धान्तमुक्तावली।

वी(वी)र्य्यं, क्ली, (विशेषेण कार्य्यरूपेण अपत्यतया च जायते इति। वि+जन+"उपसर्गे च संज्ञायाम्।" इति ड:। "अन्येषामपीति।" उपसर्गस्य दीर्घ:। यद्वा विशेषेण ईर्ज्यते कुक्षिं गच्छति शरीरं वा। ईर्ज गतिकुत्सनयो:+पचाद्यच्। यद्वा, वीजते गच्छति गर्भाशयमिति। वीज्+अच्। यद्वा, "वीजप्रजननकान्त्यसनखादनेषु। इत्यसादक्प्रत्यय:। तथा च भोजराजीये विद्यो जक् इति युत्पादितम्। वयोरभेद:। वेति प्रजायते गच्छत्यनेनार्त्तव्यं पितेति वा। अत्र चीरस्वामी वीर्य्यते वेति वा वीर्यं वाजिलौकिक: इति। वीज: स्यात् प्रेरणक्रिया इति माधव:। प्रेर्य्यते हि कार्य्यकरणाय वा वीर्यम्।" इति निघण्टौ देवराजयज्वा। २। २। १५।) कारणम्। (यथा, गीतायाम्। ७। १०।

"वीर्यं मां सर्व्वभूतानां विद्धि पार्थ सनातनम्।"

यथा च मनौ। १। ५६।

"यदाद्यमाद्यको भूत्वा वीर्यं स्वाक्षु चरिष्णु च।")

शुक्रम्। इत्यमर:। (यथा मनौ। १। ८।

"अप एव ससर्ज्जादौ तासु वीजमवासृजत्।"

वीर्यं शुक्रम्। इति मेधातिथि:। वीर्यं शक्तिरूपम्। इति कुल्लूक:। यथा च तत्रैव।१०।७२।

"यस्मादोजप्रधानेव तिर्य्यग्गत्वा व्यवोऽभवन्।
पूजिताश्च प्रशस्ताश्च तस्माद्वीर्यं प्रशस्यते।")

श्रीकृष्णस्य सर्व्वावतारबीजत्वं यथा,—

दानव उवाच।

"अधुना कृष्णरूपस्थं परिपूर्णतम: स्वयम्।
सर्व्वेषामवताराणां बीजरूप: सनातन:।"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २२ अध्याय:।

अङ्कुर:। (यथा, महाभारते। ५। १२। १६।

"न तस्य बीजं रोहति बीजकाले
न चास्य वर्षं वर्षति वर्षकाले।
भीतं प्रपन्नं प्रददाति यश्चदे
न त्रातारं लभते त्रासमिच्छन्।")

तत्त्वाधानम्। इति मेदिनी। मज्जा। इति राजनिर्घण्टः। गणितविशेष:। यथा,—

"उत्पादकं यत्प्रवदन्ति बुद्धे-
रधिष्ठितं सत्पुरुषेण सांख्या:।
यक्तस्य तत्तस्य तदेकबीज-
मव्यक्तमीशं गणितं च वन्दे॥
पूर्व्वं प्रोक्तं यक्तमव्यक्तबीजं
प्राय: प्रश्ना नो विना यक्तयुक्त्या।
ज्ञातुं शक्या मन्दधीभिर्नितान्तं
यस्मात्तस्मादुच्यते बीजक्रियाच।"

इति भास्कराचार्य्यविरचिते सिद्धान्तशिरोमणौ बीजगणिताध्यायस्य प्रथमद्वितीयश्लोकौ।*।

मन्त्र:। यथा। अथ भुवनेश्वरीमन्त्र:।

"नकुलीशोऽग्निमारूढो वामनेत्राङ्कचन्द्रवान्।
बीजं तस्या: समाख्यातं सेवितं सिद्धि-
कारिभि:।"

नकुलीशो हकार:। अग्नी रेफ:। वामनेत्रमीकार:। अर्द्धचन्द्रोऽनुस्वार:। ह्रीं।*। अन्नपूर्णाया बीजम्। ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा।*। अथ त्रिपुटाबीजम्। श्रीं ह्रीं क्लीं।*। त्वरिताबीजम्। ॐ ह्रीं हुं खे च हे च स्त्री हूं वे ह्रीं फट्।*। अथ तिलाबीजम्। ऐं क्लीं तिलक्लिन्ने मदद्रवे स्वाहा।*। वश्यप्रस्तारिण्या:। ऐं ह्रीं तिलक्लिन्ने मदद्रवे स्वाहा।*। अथ दुर्गाबीजम्। ॐ ह्रीं दुं दुर्गायै नम:।*। महिषमर्दिनीबीजम्। ॐ महिषमर्दिनि स्वाहा।*। जयदुर्गाबीजम्। ॐ दुर्गे दुर्गे रक्षणि स्वाहा।*। शूलिनीबीजम्। ज्वल ज्वल शूलिनि दुष्टग्रह हुं फट् स्वाहा।*। वागीश्वरीबीजम्। वद वद वाग्वादिनि स्वाहा।*। पारिजातसरस्वतीबीजम्। ॐ ह्रीं ह्सौं ॐ ह्रीं सरस्वत्यै नम:।*। गणेशबीजम्। गं।*। हेरम्बबीजम्। ॐ गूं नम:।*। हरिद्रागणेशबीजम्। ह्लीं।*। लक्ष्मीबीजम्। श्रीं।*। महालक्ष्मीबीजम्। ॐ ऐं ह्रीं श्रीं क्लीं ह्सौं जगत्प्रसूत्यै नम:।*। सूर्य्यबीजम्। ॐ घृणि सूर्य्य आदित्य।*। श्रीरामबीजम्। रां रामाय नम:। जानकीवल्लभाय हुं स्वाहा।*। विष्णुबीजम्। ॐ नमो नारायणाय।*। श्रीकृष्णबीजम्। गोपीजनवल्लभाय स्वाहा।*। वासुदेवस्य। ॐ नमो भगवते वासुदेवाय।*। बालगोपालस्य। ॐ क्लीं कृष्णाय।*। लक्ष्मीवासुदेवस्य। ॐ ह्रीं ह्रीं श्रीं श्रीं लक्ष्मीवासुदेवाय नम:।*। दधिवामनस्य। ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा।*। हयग्रीवस्य।

ॐ उद्गिरत्प्रणवोद्गीथसर्व्ववागीश्वरेश्वर।
सर्व्ववेदमयाचिन्त्य सर्व्वं बोधय बोधय।*।

नृसिंहस्य।

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्व्वतोमुखम्।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्।*।

नरहरिबीजम्। क्ष्रौं ह्रीं क्ष्रौं हुं फट्।*। हरिहरस्य। ॐ ह्रीं हौं शङ्करनारायणाय नम: ह्रौं ह्रौं ॐ।*। वराहस्य। ॐ नमो भगवते वराहरूपाय भूर्भुवस्वःपतये भूपतित्वं मे देहि दापय स्वाहा।*। शिवस्य। हौं।*। मृत्युञ्जयस्य। ॐ जुं स:।*। दक्षिणामूर्त्तिबीजम्। ॐ नमो भगवते दक्षिणामूर्त्तये मह्यं मेधां प्रयच्छ स्वाहा।*। चिन्तामणिबीजम्। र च म र य औं ङं।*। नीलकण्ठस्य। ग्रीं नीं ठ: नम: शिवाय।*। चण्डस्य। रूच्च फट्।*। क्षेत्रपालस्य ॐ क्षौं क्षेत्रपालाय नम:।*। बटुकभैरवस्य। ॐ ह्रीं बटुकाय आपदुद्धरणाय कुरु कुरु बटुकाय

ह्रीं ।*। त्रिपुराबाः। ह्सरैं। ह्सकलरीं। ह्सरौं:।*। सम्पत्प्रदाभैरव्याः। ह्सरैं। ह्सकलरीं। ह्सरौं।*। कौलेशभैरव्याः। सहरैं। सहकलरीं। सहरौं।*। भयविध्वंसिनीभैरव्याः। ह्सहैं। ह्सकलरीं। ह्सहौं।*। सकलसिद्धिदाभैरव्याः। सहैं। सहकलरीं। सहौं।*। चैतन्यभैरव्याः। सहैं। सकलह्रौं। सहरौः।*। कामेश्वरीभैरव्याः। सहैं। सकलह्रीं। नित्यक्लिन्ने मदद्रवे सहरौः। षट्कूटाभैरव्याः। डरलकसहैं। डरलकसह्रीं। डरलकसह्रौं।*। नित्याभैरव्याः। ह्सकलरडैं। ह्सकलरडीं। ह्सकलरडौं।*। रुद्रभैरव्याः। ह्सखफरैं। ह्सकलरीं। ह्सरौः।*। भुवनेश्वरीभैरव्याः। ह्सहैं। ह्सकलह्रीं। ह्सरौः।*। सकलैश्वर्यः। सहैं। सहकलह्रीं। सहरौः।*। त्रिपुराबालायाः। ऐं क्लीं सौः।*। नवकूटाबालायाः। ऐं क्लीं सौः। ह्सहैं। ह्सकलरीं। ह्सरौं:। ह्सरैं ह्सकलरीं ह्सरौं:।*। अन्नपूर्णाभैरव्याः। ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा।*। श्रीविद्यायाः। कएईल ह्रीं। ह्सकहलह्रीं। सकलह्रीं।*। छिन्नमस्तायाः। श्रीं क्लीं हूं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा।*। श्यामायाः। क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।*। गुह्यकालिकायाः। क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं गुह्ये कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।*। भद्रकाल्याः। क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं भद्रकाल्यै क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।*। श्मशानकालिकायाः। क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं श्मशानकालि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।*। महाकाल्याः। क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं महाकालि क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा।*। तारायाः। ह्रीं स्त्रीं हूं फट्।*। चक्षोग्रशूलपाणेः। ॐ ह्रीं हूं शिवाय फट्।*। मातङ्ग्न्याः। ॐ ह्रीं क्रीं हूं मातङ्ग्न्यै फट् स्वाहा।*। उच्छिष्टचाण्डालिन्याः। उच्छिष्टचाण्डालिनी सुमुखीदेवी महापिशाचिनी ह्रीं ठः ठः ठः।*। धूमावत्याः। धूं धूं स्वाहा।*। भद्रकाल्याः। ह्रीं कालि महाकालि किलि किलि फट् स्वाहा।*। उच्छिष्टगणेशस्य। ॐ हस्तिपिशाचि लिखे स्वाहा।*। धनदायाः। धं ह्रीं श्रीं देवि रतिप्रिये स्वाहा।*। श्मशानकालिकायाः। ऐं ह्रीं श्रीं क्लीं कालिके ऐं ह्रीं श्रीं क्लीं।*। वगलायाः। ॐ क्लीं वगलामुखि सर्वदुष्टानां वाचं मुखं स्तम्भय जिह्वां कीलय कीलय बुद्धिं नाशय क्लीं ॐ स्वाहा।*। कर्णपिशाच्याः। ॐ कर्णपिशाचि वदातीतानागतम्ब्रूं ह्रीं स्वाहा।*। मञ्जुघोषस्य। क्रीं ह्रीं श्रीं।*। तारिण्याः। क्रीं क्रीं जयदेवि ह्रीं क्रीं ऐं।*। सारस्तवीजम्। ऐं।*। काल्यायन्याः। ऐं ह्रीं श्रीं चौं चण्डिकाय नमः।*। दुर्गायाः। दूं।*। विघ्नालाख्याः। ॐ ह्रीं विघ्नालाख्ये नमः।*। गौर्यः। ह्रीं गौरि रुद्रदयिते योगेश्वरि हूं फट् स्वाहा।*। ब्रह्मश्रीमन्त्रः। ह्रीं नमो ब्रह्मश्रीराजिते राजपूजिते जये विजये गौरि गान्धारि त्रिभुवनशङ्करि सर्वलोकवशङ्करि सर्वस्त्रीपुरुषवशङ्करि सुमुखदुर्धरारावे ह्रीं स्वाहा।*। इन्द्रस्य। इं इन्द्राय नमः।*। गरुडस्य। त्रिपं ॐ स्वाहा।*। विषहरायविबीजम्। खः खं।*। वृश्चिकविषहरबीजम्। ॐ सरह स्फुः। ॐ हिलि हिमि चिलि हस्फुः। ॐ हिलि हिलि चिलि चिलि स्फुः। ब्रह्मणे फुः। सर्वेभ्यो देवेभ्यस्फुः।*। मूषिकविषहरबीजम्। ॐ गें ह्रूं ठं। आगमचन्द्रिकायां ॐ गं गां ठः।*। मूषिकनाशमन्त्रः। ॐ सरखे फुः असरखे फुः विसरखे फुः। एतन्मन्त्रं जपन् श्वेतसर्षपप्रक्षेपात् मूषिकनाशो भवति।*। लूताविषहरमन्त्रः। ॐ ह्रीं ह्रीं हूं जलतु ॐ स्वाहा गरुड हूं फट्।*। सर्वकोटविषहरबीजम्। ॐ नमो भगवते विष्णवे सर सर हन हन हुं फट् स्वाहा।*। सुखप्रसवमन्त्रः। ॐ मन्मथ मन्मथ वाहि वाहि लम्बोदर सुख सुख स्वाहा। ॐ सुक्ताः पाशा विपाशाश्च सुक्ताः सूर्यस्य रश्मयः। सुक्तः सर्वभयादुग्रभैरवेहि मारीच मारीच स्वाहा। एतयोरन्यतरेणाश्वारं जलमभिमन्त्र्य देयं पीत्वा सुखप्रसवा भवति।*। हनूमतः। हं हनूमते रुद्रात्मकाय हुं फट्।*। वीरसाधनस्य। हं पवननन्दनाय स्वाहा।*। अथ आर्द्रपटी। ॐ नमो भगवति चासुरुद्धे रक्तवाससे अप्रतिहतरूपपराक्रमे असुरवधाय विचेतसे स्वाहा। आर्द्ररक्तपटेनावृतः समुद्रगामिनीनदीतटे ऊषरभूमौ वा दक्षिणामुख ऊर्ध्वबाहुर्जपेत्। यावत् पटः शुष्यति तावत् प्राणाः शुष्यन्ति प्रत्यहं।*। श्मशानभैरव्याः। श्मशानभैरवि नररुधिरास्थिवसाभक्षणि सिद्धिं मे देहि मम मनोरथान् पूरय हुं फट् स्वाहा।*। ज्वालामालिन्याः। ॐ नमो भगवति ज्वालामालिनि सर्वशत्रुपरिहृते हुं फट् स्वाहा।*। महाकाल्याः। ॐ फ्रें फ्रें क्रीं क्रीं प्रभूतं ग्रहाय हुं फट् स्वाहा।*। अथ निगडबन्धनमोचनस्य। ॐ नमः ऋते निर्ऋते तिग्मतेजो यत्तयं चिन्नेता बन्धमेतं यमेन दत्तं तस्या संविदानोत्तमे नाके अधोवोऽवैरम्।*। अथ चिटिमन्त्रः। ॐ चिटि चिटि चाण्डालि महाचाण्डालि असुकं मे वशमानय स्वाहा।*।

त्र्यम्बकस्य।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमाऽमृतात्॥
अथ मृतसंजीवनीमन्त्रः। ह्रौं ॐ जुं सः ॐ भूर्भुवः स्वः।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमाऽमृतात्॥
ॐ भूर्भुवः स्वः। इत्यादि तन्त्रसारः। आकर्षणादिबीजानि वाङ्मयभयान्नोक्तानि।*।

(अथ बीजाभिधानम्। यथा,—

"बीजसङ्केतबोधार्थमाहत्य तन्त्रगुह्यतः।
बीजनामानि कतिचित् वक्ष्यामि विदुषां मुदे।
माया लज्जा परा संवित् त्रिगुणा भुवनेश्वरी।
कृष्णेखा ब्रह्मभुवनिता शक्तिर्देवीश्वरी शिवा।
महामाया पार्व्वती च संख्यानक्षतरूपिणी।
परमेश्वरी च भुवना धात्री जीवनमध्यगा।ह्रीं।
वह्निहीनेऽन्त्ययुक्ताया स्थिरमाया प्रकीर्त्तिता।
क्रीं।

शशिशान्तिर्बिन्दुनादैर्वेष्ट्योप्रणव उच्यते।
श्रीर्लक्ष्मीर्विष्णुवनिता रमा क्षीरसमुद्रजा।श्रीं।
षोढ्यन्यञ्जनं वह्निवामाक्षिबिन्दुसंयुतम्।
चन्द्रबीजसमारूढं वधूबीजमिदं स्मृतम्।
वधूबामेक्षणा योषिदेकाक्षी स्त्रीच कामिनी।स्त्रीं
नादबिन्दुसमायुक्तो हृदयञ्चसुसुरो भगम्।
योनिः सरस्वतीबीजमधरं वाग्भवच्च वाक्।ऐं
हकारो वामकर्णाढ्यो नादबिन्दुविभूषितः।
कूर्च्चं क्रोध उग्रदर्पो दीर्घहुङ्कार उच्यते।
ग्रन्थश्च दीर्घकवचं तारा प्रसव इत्यपि।हूं।
कामाक्षरं वह्निसंस्थं रतिबिन्दुविभूषितम्।
कालीबीजमिदं प्रोक्तं रतिबीजं तदेव हि।क्रीं।
कामाक्षरं धरासंस्थं रतिबिन्दुविभूषितम्।
गुह्यकालीबीजमिदं गोपालबीजमित्यपि।
तत्कामबीजं कामेशी बीजं शक्तिस्त्रयी परा।क्लीं।
सत्यान्तयुक्थोमसेन्द्रग्नेर्वं प्रासादमुच्यते।हौं।
कलाद्यं क्लेदिनीबीजं क्रोडारस्थडुग्राभिधः।क्रों।
आकारो बिन्दुमान् पाशः शेषश्च समुदीरितः।
सकला भुवनेशानी कामेशी बीजमुच्यते।
नमस्तु हृदयं स्वाहा द्विठद्वयुगलं शठः।
नमः। स्वाहा।
चन्द्रयुग्मं शिवो वेदमाता ज्वलनसुन्दरी।
स्वाहा परा देवभोज्यं शठयं चन्द्रयुग्मकम्।
शुवो हविर्व्वेदमाता दैवास्यं वह्निसुन्दरी।स्वाहा।
शिखा वषट् शिरोमध्य शक्रमाता हरप्रिया।
शिखा वषट् च। वषट् कवचं क्रोधो वर्म्मभूमिरपि।
क्रोधास्त्रोहं तनुस्त्रच शस्त्रादौ रिपुसंशकः।हूं।
अस्त्रनेत्रयुगं वौषट्। वौषट्। फडस्त्रं शस्त्रमायुधम्। फट्।
तार्त्तीयन्तु हृत्सौः प्रेतबीजम्। हृत्सौः। हंसोऽजपामनुः। हंसः।
गकारो बिन्दुमान् विघ्नबीजं गणेशबीजकम्।गं।
स्तुतिस्थं मांसमौबिन्दुयुतं भूबीजमीरितम्।लं।
ठाग्नं दहनसंबेन्दुयुतन्तु विश्वबीजकम्। ह्रीं।
अथ कामकलावामनयनं बिन्दुसंयुतम्।
अर्कमाचाकलावाह्वीनारीर्हेन्दुः सदाशिवः।
अनुचार्य्यतुरीया च विश्वमाल्लकला परा।ँ।
नादः।

भूतडामरसङ्केतबोधार्थं भूतडामरीयबीजनामान्यपि लिख्यन्ते ।
प्रणवो विश्ववीजं स्यात् ध्रुवं हालाहलं स्मृतम् । कालमृत्युपदं ज्ञेयं बहुरूपी निरञ्जनम् ।प्रणवम्।
चतनञ्जं चोमवक्त्रं धूम्रभैरवसङ्गतम् ।
नादविन्दुसमायुक्तं बीजं प्राणात्मकं स्मृतम् ।ह्रीं
क्रोधीशं चतमारूढं धूम्रभैरवसङ्गतम् ।
विद्या जिह्वा विन्दुयुतं पिङ्गभूषासिनी स्मृतम्।क्रीं
क्रोधकालात्मकं कूर्म्याद्यौतिकं वाग्भवं स्मृतम् ।
नादविन्दुसमायुक्तं समाधाबोयभैरवौम् ।
बीजमेतत्तु कथितं मुद्गदृष्टिप्रवर्त्तकम् । ऐं ।
क्रोधीशं वलभद्रधूम्रभैरवौनादविन्दुभिः ।
चिमूर्त्तसमन्वयं कामराजस्त्रैलोक्यमोहनम् ।
इन्द्रासनगतो ब्रह्म सम्पत्तिंसु समन्वयः ।क्लीं ।
संयुक्तं धूम्रभैरवारक्तस्थं बलिभोजनम् ।
नादविन्दुसमायुक्तं किङ्किनी बीजसुत्तमम् ।ह्रीं।
नादविन्दुसमायुक्तं रक्तस्थं बलिभोजनम् ।
कालराज्ञासनोपेतं विघ्निखाख्यं महामनुम्।ह्रां।
विदार्य्यालिङ्गितोग्रात्रोवसिक्तचतजोचतः ।
नादविन्दुसमायुक्तो विज्ञेयः पिसिताशनम् ।ह्रुं।
धूम्रध्वजाधः कालाग्निः सोङ्कैश्वीन्दुविन्दुभिः ।
युगान्तकारकं बीजं भैरवेन प्रकाशितम् ।स्त्रीं।
कपर्दिनं समादाय चतजः चितिवियद्दम् ।
संयुक्तं धूम्रभैरव्या चोद्दयं नादविन्दुमान् ।प्रौं।
कपालोद्दयमादाय महाकालेन मन्थितम् ।
समासनमिति प्रोक्तं चण्डिकाटोप्रयोजयेत् ।
ठं ठं ठः ठः ।
चतनञ्जं चोमवक्त्रं चन्द्रचतविभूषितम् ।
खद्योतमिति संप्रोक्तं व्याघिनी कालराज्ञियुक् ।
ह्रूं ह्रूं ।
चतजो चतमाकाग्रं नादविन्दुविभूषितम् ।
विदारी भूषितश्चैव बीजं वैवस्वतोदकम् ।ह्रूं॥
कौमार्य्याख्या कालवक्त्रा च महाकालेन साधितम्।
तदनादिपरब्रह्म: सच्चिदानन्ततद्विधिः । ॐ ।
चोमस्थं तालजङ्घास्थं विन्दुनादविभूषितम् ।
कूर्च्चं कालो महाकालः क्रोधबीजं निरञ्जनम्।ह्रूं।
इति प्राणतोषिणी ।)

बीजकः, पुं, मातुलुङ्गकः इति जटाधरः । वृक्षविशेषः । विजयासार इति हिन्दी भाषा । तत्पर्य्यायः । पीतसारः २ पीतशालकः ३ वन्धुकपुष्पः ४ प्रियकः ५ सर्ज्जकः ६ आसनः ७ । अस्य गुणाः । कुष्ठवीसर्पपित्तमेहगुदक्रिमिश्लेष्मास्रपित्तनाशित्वम् । लघुत्वम् । केशल्यम् । रसायनत्वञ्च । इति भावप्रकाशः । (यथा, हरिवंशे । १५५ । २० ।
'अथकेलीवकैश्चैव मन्दारैश्चोपशोभितम् ।")
बीजे, क्ली ।

बीजकृत्, क्ली, (बीजं बीजं करोति वहेयतीति । कृ + क्विप् ।) वाजीकरणम् । इति राजनिर्घण्टः ।

बीजकोशः, पुं, (बीजानां कोश आधार इव ।)
बीजकोषः, पद्मबीजाधारचक्रिका । कोँयल इति ख्यातः । इति भरतः । तत्पर्य्यायः । वराटकः २ । इत्यमरः । कर्णिका ३ । इति जटाधरः । वारिकुम्भः ४ घण्टाटकः ५ । इति शब्दरत्नावली ।

बीजगर्भः, पुं. (बीजानि गर्भेऽभ्यन्तरे यस्य ।) पटोलः । इति राजनिर्घण्टः ।

बीजग्नि: क्ली, (बीजानां गुग्निर्यत्र ।) ग्निर्नो । इति राजनिर्घण्टः ।

बीजधान्यं, क्ली, (बीजप्रधानं धान्यम् ।) धान्यकम् । इति राजनिर्घण्टः ।

बीजनं, क्ली, (बीज्यतेऽनेनेति । वि + इज + करणे ल्युट् ।)व्यजनम् । (यथा,आर्य्यासप्तशत्याम् ।३५०।
"मलयजमपसार्य्य घनं बीजनविज्ञं विधाय बाहुभ्याम् ।
सारस्वतापादग्रथितनिदाघमालिङ्गते मिथुनम् ।")
वस्तु । कोके जीवञ्जीवे च पुं । इति मेदिनी । ने, २८ ।

बीजपादपः, पुं, (बीजप्रधानः पादपः ।) भल्लातकः । इति राजनिर्घण्टः । (बीजोत्पन्नवृक्षमात्रञ्च ।)

बीजपुष्पं, क्ली, (बीजप्रधानं पुष्पं यस्य ।) मरुवकः । मदनवृक्षः । इति मेदिनी । पे, २८ ।

बीजपूरः, पुं, (बीजानां पूरः समूहो यत्र ।) फलपूरः । इत्यमरः । टावा लेबु इति बङ्गभाषा । विजौरा इति हिन्दी भाषा । तत्पर्य्यायः । बीजपूर्णः २ पूर्णबीजः ३ सुकेशरः ४ बीजकः ५ केशरान्वः ६ मातुलुङ्गः ७ सुपूरकः ८ रुचकः ९ बीजफलकः १० जन्तुघ्नः ११ दन्तुरच्छदः १२ पूरकः १३ रोचनफलः १४ । अस्य फलगुणाः । अम्लत्वम् । कटुत्वम् । उष्णत्वम् । श्वासकासवमनश्रमनत्वम् । कण्ठशोधनकरत्वम् । लघुत्वम् । हृद्यत्वम् । दीपनत्वम् । रुचिकारित्वम् । पावनत्वम् । आध्मानगुल्महृद्रोगप्लीहोदावर्त्तनाशित्वम् । विवन्धे हिक्कायां शूले हृद्रोगे च अस्यलत्वञ्च । इति राजनिर्घण्टः । ● ।
अपि च ।
"बीजपूरफलं स्वादु रसेऽम्लं दीपनं लघु ।
रक्तपित्तहरं कण्ठजिह्वाहृदयशोधकम् ।
श्वासकासारुचिहरं हृद्यं हृद्याहरं स्मृतम् ।"
तद्भेदमधुकर्कटी । यथा,—
"बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ।
मधुकर्कटिका स्वादो रोचनी शीतला गुरुः ।
रक्तपित्तक्षयश्वासकाग्रहिक्काभ्रमापहा ।"
इति भावप्रकाशः ।
(यथा, महाभारते । ३ । १५८ । ३२ ।
"सुस्नातकांस्तथा जीवान् दाडिमान् बीजपूरकान् ।")

बीजपूर्णः, पुं, (बीजेन पूर्णः ।) होलङ्गः । इति रत्नमाला । बीजपूरः । इति राजनिर्घण्टः ।

बीजपैष्पिका, स्त्री, (बीजस्य शुक्रस्य पैष्पिकैव ।) अश्वकोशः । इति राजनिर्घण्टः ।

बीजफलकः, पुं, (बीजप्रधानं फलं यस्य । कन् ।) बीजपूरः । इति राजनिर्घण्टः ।

बीजमाल्लिका, स्त्री, (बीजानां बीजमन्त्राणां मालेव जपमालात्वादस्यास्तथात्वम् ।) पद्मबीजम् । यथा,—
"पद्माक्षं पद्मबीजञ्च कर्णिका बीजमाल्लिका ।"
इति हारावली ।

बीजरत्नः, पुं, (बीजं रत्नमिव यस्य ।) मातुलुङ्गवृक्षः । इति हेमचन्द्रः ।

बीजरुहः, पुं, (बीजात् रोहतीति । रुह + डुप्रत्यये कः । ।) व्रीह्यादिः । यथा,—
"क्षुरपट्टाद्या अग्रबीजा मूलजास्तूपलादयः ।
पर्व्वयोनय इक्ष्वाद्याः स्कन्धजाः शल्लकीमुखाः ।
व्रीह्यादयो बीजरुहा सम्मूर्च्छजास्तृणादयः ।
स्नुक्स्नुक्सप्तिका यस्य वल्लीते मूलजातयः ।"
इति हेमचन्द्रः ।
(क्वचित् वाच्यलिङ्गोऽपि दृश्यते ।)

बीजरेचनं, क्ली, (बीजं रेचनं रेचकं यस्य ।) जयपालः । इति राजनिर्घण्टः ।

बीजवपनं, क्ली, (बीजानां वपनम् ।) क्षेत्रे बीजस्य क्षेपणम् । तस्य दिनं दीपिकायाम् ।
"पूर्व्वास्विन्द्राग्न्यपक्षित्रिव्राह्मिवान्धेषु रिक्ताष्टमीविगतचन्द्रतिथिं विहाय ।
इन्द्राग्नित्रिगोसुदये विकुजार्किवारे शुक्लेन्दुयोगकरणेषु हलप्रवाहः ।
हलप्रवाहवहीनवपनस्य विधिः स्मृतः ।
चित्रायाञ्च शुभे क्षेत्रे स्थिरलग्नमुदीरये ।
हैमवारिविलिप्तस्य बीजस्योन्नयतः शुचिः ।
इत्थं चित्ते निधायाथ स्वयं सुस्थितयं वपेत् ।
ज्ञात्वा चान्योन्यप्रोत्साहं नर्मको हृष्टमानसः ।
प्राङ्मुखः कलसं गृह्य इमं मन्त्रमुदीरयेत् ।
त्वं वै वसुन्धरे सौते बहुपुण्यफलप्रदे ।
नमस्ते मे शुभं नित्यं क्षितिं मेधां शुभे कुरु ।
रोहन्तु सर्व्वशस्यानि कामे देवः प्रवर्षतु ।
कर्षकास्तु भवन्त्वग्र्या धान्येन च धनेन च
स्वाहा ।
उमा बीजन्तु तत्रैव भोक्तव्यं बान्धवैः सह ।
बीजवपनं प्राजापत्यतीर्थेन । यथा, हारीतः ।
कनिष्ठायाः पश्चात् प्राजापत्यभावपनम् । होमतर्पणे प्राजापत्येन कुर्य्यादिति । होमतर्पणे लाजहोमप्रणकादितर्पणे । पराशरः ।
"वैशाखे वपनं श्रेष्ठं मध्यमं रोहिणीरवौ ।
अतः परञ्जिनधर्मं न जातु आवणे शुभम् ।"
ज्योतिषे ।
"पूर्व्वभाद्रपदा मूलं रोहिण्युत्तरफल्गुनी ।
विशाखा श्रुतभिषा वाथ धान्यानां रोपणे वरा ।
सदोम्ना रजनीं नीतौ पुत्रवित्तैर्वियुज्यते ।
स्वयंजाते पुनस्ते हे पाचयन् नैव दुष्यति ।
आरामे गृहमध्ये वा मोहात् सर्षपमावपन् ।
पराभवं रिपोर्याति ससाधनधनक्षयम् ।
निशा नीली पलाशश्च चिपा श्वेतापराजिता ।
कोविदारश्च सर्व्वत्र सर्व्वे निघ्नन्ति मङ्गलम् ।"
निशा हरिद्रा । कोविदारको रक्तकाञ्चनः ।

"हेमाम्भसा दृष्टबीजं स्नातो मन्त्रेण रोपयेत्।
वसुधेति सुधीतेति पुण्यदेति धरेति च।
नमस्ते शुभगे नित्यं द्रुमोऽयं वर्द्धतामिति॥"
इति ज्योतिस्तत्त्वम्॥

वीजदृश्यः, पुं, (बीजादेव दृश्यो यस्य। बीजप्रधानो दृश्यो वा।) अशनः। इति राजनिर्घण्टः॥

वीजसञ्चयः, पुं, (बीजानां सञ्चयः।) बीजसंग्रहः। तच्छुभाशुभदिनादिर्यथा,—

"हस्ताश्विचित्रादितिस्वातीरेवत्यां श्रवणद्वये।
स्थिरे लग्ने गुरौ शुक्रे बीजं धार्य्यं शुभवासरे॥
माघे वा फाल्गुने वापि सर्व्वबीजानि संग्रहेत्।
शोषयेत्तापयेद्भूमौ रात्रौ चोपनिधापयेत्॥
ततश्च पुटिकां बद्ध्वा शोषयेच्च पुनः पुनः।
स्थापयेच्च प्रयत्नेन यथा भूमिश्च न स्पृशेत्॥
दीपाग्निना च संस्पृष्टं दृष्ट्वा चोपहतञ्च यत्।
वर्जनीयं तथा बीजं यत् स्यात् कीटसमन्वितम्॥"

याम्याहिरुद्राग्निविधात्रवस्वर्क्षे-
माहेन्द्रपित्र्येतरभे: शुभाहे।
धान्यादिसंस्थापनमेव शस्तं
मृगाश्विरङ्गाङ्गयहोदयेषु॥

सौम्यादितिमघाज्येष्ठोत्तरेषु च कारयेत्।
मौने लग्ने शुभे चन्द्रे निधनक्रूरवर्জ्जिते॥
शैलूषं कोष्ठके धान्यं गर्गो वदति सर्व्वदा।
धनदाय सर्व्वलोकहिताय देहि मे धान्यं स्वाहा।
नम ईहायै ईहादेवी सर्व्वलोकविवर्द्धनी कामरूपिणि धान्यं देहि स्वाहा।
लेखयित्वा इमं मन्त्रं धान्यागारे विनिक्षिपेत्॥"
पुराणसर्व्वस्वे।

"मन्त्रं लिखित्वा पत्रे च मध्ये धान्यस्य धारयेत्।
पत्रञ्च धान्यराशौस्तु मूषिकादिनिवृत्तये॥
दक्षिणदिङ्मुखगमनं स्वादभिनवासु नारीषु।
अयमपि शस्यफलानां न बुधो बुधवासरे कुर्य्यात्॥
त्रिपूत्तरेषु रेवत्यां धनिष्ठावारुणेषु च।
एतेषु षट्सु विज्ञेयं धान्यनिष्क्रयणं बुधैः॥
श्रवणात्त्रयं विशाखाभुवपौष्णपुनर्व्वसूनि पुष्यश्च।
अश्विन्यथ ज्येष्ठा धनधान्यविवर्द्धिनी कथिता॥"
इति ज्योतिस्तत्त्वम्॥

वीजस्तः, स्त्री, (बीजानि स्तते इति। स्त+क्विप्।) पृथ्वी। इति हेमचन्द्रः॥

वीजाक्षतं, त्रि, (बीजेन सह क्षतं क्षरमिति। "क्षतो द्वितीयतृतीयशम्बबीजात् क्षयौ।"५।४। ५८। इति डाच्।) उप्तक्षेत्रम्। इत्यमरः॥ द्वे बीजेन सह क्षरे क्षेत्रे। बीजेन सह क्षतं क्षरं वीजाक्षतम्। तौयशम्बबीजेति डाच्। आदावुप्तं पश्चात् क्षरं उप्तक्षेत्रम्। इति भरतः॥

वीजाढ्यं, क्ली, (बीजे अव्योऽवरसो यस्य।) दृश्याम्लम्। इति राजनिर्घण्टः॥

वीजी, [न्] पुं, (वीजमस्त्यस्येति। वीज+इनिः।) पिता। इति हेमचन्द्रः॥ (यथा, उद्भटतत्त्वे।

"अतएव हेतुनिर्णयेऽपि सांपिण्ड्यगमने वीजिनमारभ्येत्युक्तम्।" यथा च गोतमसंहितायाम्। ४। १।

"असमानप्रवरैर्विवाह ऊर्द्धं सप्तमात् पिण्डबन्धुभ्यो वीजिनश्च मातृबन्धुभ्यः पञ्चमात्॥")

वीजविशिष्टे, त्रि॥ (यथा, मनौ। ६। ५१।

"तथैवाक्षत्रियो वीजं परक्षेत्रप्रवापिणः।
कुर्व्वन्ति क्षेत्रिणामर्थं न वीजी लभते फलम्॥")

वीजोदकं, क्ली, (वीजमिव कठिनमुदकम्। तस्य कठिनत्वात्तथात्वम्।) करका। इति त्रिकाण्डशेषः॥

वीजोन्निचक्रं, क्ली, (वीजानामुन्नये शुभाशुभसूचकं चक्रम्।) वीजवपनजन्यशुभाशुभज्ञानार्थसर्पाकारचक्रम्। यथा,—

"सूर्य्यभाद्रुरगः स्याच्चित्रार्धे कान्तरक्रमात्।
सुखे चोत्थि गले त्रीणि भानि हृदग्र तूदरे॥
पुच्छे चतुर्व्वहिः पञ्च दिनभाच्च फलं वदेत्।
वदने चोत्थकं विद्यात् गलकेऽङ्गारकस्तथा॥
उदरे धान्यवृद्धिः स्यात् पुच्छे धान्यक्षयो भवेत्।
इतिरोगभयं राज्ये चक्रे वीजोन्निसम्भवे॥"

सूर्य्यभात् सूर्य्यसुख्यमानगणनात्। त्रिनाड्यै कान्तरक्रमादिति यत्रचित्रां रविस्तदा तामारभ्य गणयेत्। त्रिनाड़ीषु अश्विनीभरणीकृत्तिकासु दृश्या रोहिणी बहिः कार्य्या मृगशिरस आर्द्रापुनर्व्वसुनाड़ीषु दृश्या पुष्यो बहिः कार्य्यः। एवं क्रमेणान्या लेख्याः। चोत्थकं मुखमूत्यताम्। इतयः।

"अतिवृष्टिरनावृष्टिः मूलभा मूषिकाः खगाः।
प्रत्यासन्नाश्च राजानः षड्ऽते इतवः स्मृताः॥"
इति ज्योतिस्तत्त्वम्॥

वीज्यः, त्रि, (विशेषेण इज्यः पूज्यः। अथवा वीजाय हितः इति। "उगवादिभ्यो यत्।"५।१।२। इति यत्।) यस्य कस्यचित् कुलभवः। तत्पर्य्यायः। कुलसंभवः २। इत्यमरः॥ पंक्तिः३ कौलकेयः ४ कुलजः ५। इति शब्दरत्नावली॥ कुलीनः ६ कुल्यः ७ कुलभवः ८। इति जटाधरः॥

वीटिः, स्त्री, (विशेषेण इटति छायानिखातयष्ट्यादिं वेष्टयित्वा प्रवर्द्धते। वि+इट+"इगुपधात् कित्।" उणा०४।११८। इति इन्। स च कित्।) ताम्बूलवल्ली। इति केचित्॥ सुसज्जीकृततामूलम्। पानेर बीड़ा इति भाषा। इति केचित्॥

वीटिका, स्त्री, (वीटिरेव। स्वार्थे कन् ह्रियामाप्।) ताम्बूलवल्ली। इति केचित्। सुसज्जीकृततामूलम्। पानेर बीड़ि इति भाषा। इति केचित्॥ (यथा, राजतरङ्गिण्याम्। ४। ४३०।

"भूसंज्ञयापि कस्य स्वं दृष्टाया इति सभ्रुवः।
दत्त्वा वीटिकामस्त्रा दृष्ट्वाप्तसुपलब्धवान्॥")

वीटी, स्त्री, (वीटि+वा ङीष्।) ताम्बूलवल्ली। इति केचित्॥ सुसज्जीकृततामूलम्। पानेर बीड़ि इति भाषा। इति केचित्॥

वीत्या, स्त्री, (वेति इष्टिमात्रमगच्छतीति। वी गतौ+"राज्ञाशास्त्रास्त्रुणावीत्याः।" उणा० ३। १५। इति नः निपातनाद्गुणाभावो बलच्च।) विद्युत्। इति मेदिनी। ते, २८॥ (वेति श्रोतुमिच्छं आप्नोतीति। वी आप्तौ+नः।) खनामख्यातवाद्यम्। तत्पर्य्यायः। वल्लकी २ विपञ्ची ३। सा तु सप्ततन्त्रीयुक्ता चैत्यपरिवादिनी ४। इत्यमरः॥ अलिमाला ५। इति जटाधरः। षड्जमञ्जी ६ विपञ्चिका ७। इति शब्दरत्नावली॥ घोषवती ८ कच्छकूर्मिका ९। (यथा, महाभारते। ६। १३४। १४।

"सप्तस्वरः सप्त चाप्यर्थजानि
सप्ततन्त्री प्रथिता चैव वीणा॥")

तद्भेदा यथा। शिवस्य वीणा शक्तौ १ सरस्वत्याः कच्छपी २ नारदस्य महती ३ गन्धर्वाणां प्रभावती ४ विश्वावसोः कूर्म्मवती ५ तुम्बुरोः कलावती ६ चाक्षालानां कच्छोलवीणा चाक्षालिका च ७। तस्याङ्गादीनां नामादि यथा। तस्याः कायः कोलम्बकः। तस्या निबन्धनं उपनाहः। तस्या दण्डः प्रवालः। तस्याः प्रान्तवक्त्रकाष्ठं कुकुभः प्रसेवकश्च। तस्या मूर्द्धे वंशशलाका कणिका कूर्णिकापि च। तस्या वादनं कोणः। इति हेमचन्द्रादयः। अस्या विवरणं वाद्यशब्दे द्रष्टव्यम्॥

वीणादण्डः, पुं, (वीणाया दण्डः।) वीणास्थितावादूपरिकाष्ठम्। तत्पर्य्यायः। प्रवालः २। इत्यमरः॥

वीणानुबन्धः, पुं, (वीणाया अनुबन्धः।) उपनाहः। इति हारावली॥

वीणावादः, त्रि, (वीणां वादयतीति। वद्+णिच्+अण्।) वीणावादकः। तत्पर्य्यायः। वैणिकः २। इत्यमरः॥ (यथा, वाजसनेयसंहितायाम्। ३०। १६।

"शब्दायाडम्बराघातं महसे वीणावादमिति।")

वीणावादकः, पुं, (वीणाया वादकः।) वीणावाद्यकर्त्ता। इति शब्दरत्नावली॥

वीणास्यः, पुं, (वीणा आस्यमिव यस्य। तत्रैव स्फुटागमकरणात्।) नारदः। इति जटाधरः॥

वीतं, क्ली, (वेति स्म। वी+क्तः। अथवा अयति स्म। अण्+गत्यर्थेति क्तः।) असारदृश्यवस्त्रम्। तुच्छाद्यमभिधेयं। इत्यमरः॥ अशुभकर्म्म। इति मेदिनी। ते, ५८॥ (यथा, भागे। ५। ४०।

"निर्धूतवीतमपि वालकसुब्रजन्तं
यन्नाक्रमेण परिसान्त्वयतर्ष्णाभिः॥"

सांख्योक्तानुमानविशेषः। यथा, सांख्यतत्त्वकौमुद्याम्। ५।

"प्रथमं तावद्विविधं वीतमवीतञ्च। अन्वयसुखेन प्रवर्त्तमानं विधायकं वीतम्॥" अस्य विशेषविवरणं तत्रैव द्रष्टव्यम्॥ त्रि। कमनीयः। यथा, ऋग्वेदे। ४। ७। ६।

"तं शुभ्रतीषु मादयु वन आ वीतमश्रितम्॥"

"वीतं कान्तम्।" इति तद्भाष्ये सायणः॥)

वीतिः

वीतंसः, पुं, (विशेषेण बहिरेव तस्यते भृज्यते इति। वि+तनुस+घञ्। "उपसर्गस्य घञ्यमनुष्ये बहुलम्।" ६।३।१२२। इति दीर्घः।) मृगपक्षिणां बन्धनोपकरणम्। इत्यमरः। मृगपक्षिणां विश्वासहेतोः प्रावरणम्। इति मेदिनी। से, ४०॥

वीतः, त्रि, (विशेषेण इति स्म। वि+इण्+क्तः।) प्राप्तः। इति हेमचन्द्रः। गतः। विपूर्व्वो नघातोः क्तप्रत्ययेन निष्पन्नमिदम्। (यथा, रघौ। ५। २।

"स मृत्तिके वीतहिरण्मयत्वात्
पात्रे निधायार्घ्यमनर्घशीलः॥")

वीतदम्भः, त्रि, (वीतस्त्यक्तो दम्भो येन सः।) त्यक्तदम्भः। तत्पर्य्यायः। अवल्कनः २। इति जटाधरः॥

वीतनः, पुं, शकपार्थिवभेदम्। यथा, हेमचन्द्रे।

"शकस्तु कन्थरामर्थ्यं शकपार्थ्वौ तु वीतनौ॥"

वीतभयः, पुं, (वीतं भयं यस्य यस्माद्वा।) विष्णुः। यथा,—

"अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्त्तनः॥"

इति तस्य सहस्रनामस्तोत्रम्॥

वीतरागः, पुं, (वीतो रागो विषयवासना यस्य।) बुद्धः। इति त्रिकाण्डशेषः॥ विगतरागे, त्रि। यथा,—

"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥"

इति भगवद्गीता॥

(यथा च महाभारते। १२। ३४६। ४७।

"वीतरागश्च पुत्रस्ते परमात्मा भविष्यति।
महेश्वरप्रसादेन नैतद्वचनमन्यथा॥")

वीतशोकः, पुं, अशोकवृक्षः। इति शब्दमाला॥ (वीतः शोको यस्मात्। अशोकाख्यां सत्यानेन शोकनाशकत्वात्तस्य तथात्वम्। तथा च तिथितत्त्वे।

"त्वामशोक हराभीष्ट मधुमासससुद्भव।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु॥"

विगतः शोको यस्य।) विगतशोके, त्रि। (यथा, महाभारते। ३। १७३। १०।

"सर्व्वकामगुणोपेतं वीतशोकमनामयम्॥")

वीतिः, स्त्री (वयनमिति। वी+क्तिन्।) गतिः। दीप्तिः। (यथा, गो० रामायणे। २। १००। ४०।

"सुवर्णवीतिप्रतिमाः पद्मकिञ्जल्कसप्रभाः।
दिव्या विभ्रति वाहसाः कुबेरप्रहिताः स्त्रियः॥")

प्रजननम्। अन्नम्। धावनम्। इति मेदिनी। ते, ५६॥ (यानम्। यथा, ऋग्वेदे। ७।६८।२।

"प्रवामन्वांसि मध्वान्धस्सुरत्नं गन्तं हविषो वीतये मे॥"

'हविषो वीतये पानाय।' इति तद्भाष्ये सायणः॥ प्राप्तिः। यथा, ऋग्वेदे। १। १६। ४।

"स नः शर्म्माणि वीतयेऽग्नियेच्छतु शन्तमा॥"

"वीतये सम्भजनाय अग्निहोत्रादिकर्म्म प्राप्नुयाम्।" इति तद्भाष्ये सायणः॥ यज्ञः। यथा, ऋग्वेदे। ८। १। ४।

"अध्वर्यमहानां देवानां वीतिमन्धसा॥"

"वीतिं यज्ञं अन्धसा घानाद्यन्नेन सह अध्वर्यं अभिगच्छ।" इति तद्भाष्ये सायणः॥)

वीतिः, पुं, घोटकः। इति हेमचन्द्रः॥ (यथा, राजतरङ्गिण्याम्। ७। ३७७।

"अस्मिंस्तु वीतिमारूढे वीतिहोत्रसमे नृपे।
कल्याता च लक्ष्मीयानां ख्यातानामिव ग्रन्थिनाम्॥")

वीतिहोत्रः, पुं, (वी गतिकान्त्यसनखादनेषु+कर्म्मणि क्तिन्। वीतिः पुरोडाशादिः हूयते अस्मिन्निति। "हुयामाशुभसिभ्यक्ष्नन्।" उणा० ४। १६०। इति त्रन्। अथवा वीतये पानाय होत्रं हव्यं यस्य।) अग्निः। इत्यमरः॥ सूर्य्यः। इति मेदिनी। ते, २६०॥ (यथा, राजतरङ्गिण्याम्। ७। ३७७।

"अस्मिंस्तु वीतिमारूढे वीतिहोत्रसमे नृपे॥"

प्रियव्रतपुत्रान्यतमः। यथा, भागवते।५।१।२५।

"अग्निमेधमग्निजिह्वमग्निबाहुमहावीरहिरण्यरेतो घृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व्व एवाग्निनामानः॥" राजविशेषः। यथा, महाभारते। ७। ६८। १०।

"रथोदारान् वीतिहोत्रान् विमर्त्तान् मार्त्तिकावतान्॥"

हैहयवंशीयराजविशेषः। यथा, हरिवंशे। ३३। ५०।

"तेषां कुले महाराज हैहयानां महात्मनाम्।
वीतिहोत्राः सुजातास्च भोजास्चवन्तयः स्मृताः॥"

त्रि, प्रापयन्नः। यथा, ऋग्वेदे। १।८४।९८।

"कस्ते देवा आवहानासु होम-
को मंसते वीतिहोत्रः सुदेवः॥"

"वीतिहोत्रः प्रापयन्नः। * * *। वीतिहोत्रः वीगत्यादिषु असात् कर्म्मणि मन्ने वृषेत्यादिना क्तिन् स चोदात्तः। होत्रं होमः हुयामाशुभसिभ्यक्ष्नन् इति त्रन्प्रत्ययः। वीतिः प्राप्तो होमो येन बहुव्रीहौ पूर्व्वपदप्रकृतिस्वरत्वम्॥" इति तद्भाष्ये सायणः॥ कान्तयज्ञः। यथा, ऋग्वेदे। २। ३८। १।

"नूनं देवेभ्यो विहिधाति रत्न-
मथाभजद्वीतिहोत्रं स्वस्तौ॥"

"वीतिहोत्रं कान्तयज्ञं यजमानं स्वस्तौ अविनाशे क्षेमे वा अभजद्भागिनं करोतु।" इति तद्भाष्ये सायणः॥)

वीथिः, स्त्री, (विथ्यतेऽनया। विथ+इगुपधात् किदितीन्। बाहुलकादीर्घः।) वीथी। यथा,—

"षड्क्तिवर्त्मगृहाङ्गेषु वीथिर्वीथी च वीथिका॥"

इति रत्नकोषः॥

(यथा, राजतरङ्गिण्याम्। १। ३६२।

"तदिना नगरं कृत्स्न पवित्रा सुलभा भुवि।
सुभगाः सिन्धुसम्भेदाः क्रीड़ावसथवीथिषु॥"

वीथी

वर्त्मनि यथा, राजतरङ्गिण्याम्। ३। ३०७।

"चिरं खलु खिलीभूताः क्षतक्षत्रस्य वीथयः।
धीर लक्ष्येण नास्तु सञ्चारो यदि दृश्यते॥")

वीथिका, स्त्री, (वीथिरेव। स्वार्थे कन् ततष्टाप्।) वीथिः। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ७३। ६०।

"अस्ति दक्षिणदिक्प्रान्ते प्राहृषो जन्मभूरिव।
पिहिताकां घनश्यामा तमालवनवीथिका॥")

वीथी, स्त्री, (वीथि+वा ङीष्।) पङ्क्तिः। यज्ञाङ्गम्। (यथा, हरिवंशे। ८३। १८।

"तावद्युभौ सुवर्णौ जन्मतुर्मोक्षकारणात्।
वीथीं माल्यापणानां वै गन्धाढ्यानां दिपाविव॥")

नाट्यरूपकः। वर्त्म। इति मेदिनी। थे, ११॥ (यथा, महाभारते। ५। ५१। ३२।

"वीथीं कुर्व्वन् महाबाहुर्बाहुवीर्यन् मम द्विषाम्।
मृत्युमिव गदापाणिर्युगान्तं दर्शयिष्यति॥"*।)

अथ वीथी।

"वीथ्यामेको भवेदङ्कः क्वचिदेकोऽत्र कल्प्यते।
आकाशभाषितैरुक्तैश्चिन्ता प्रत्युक्तिमाश्रिता॥
स्वयमेवापरे प्रह्लारं किञ्चिदन्यान् रसानपि।
सूचनिर्व्वहणे सन्धी अर्थप्रकृतयोऽखिलाः॥
क्वचिदित्युत्तमो मध्यमोऽधमो वा प्रह्लारबहुलमाश्रयाः कैशिकीवृत्तिबहुलत्वम्॥ *॥
अस्यास्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः।
उद्घात्यकावलगिते प्रपञ्चस्त्रिगतं छलम्॥
वाक्केल्यधिबले गण्डमवस्यन्दितनालिके।
असत्प्रलापव्याहारास्तदवानि च तानि तु॥*॥
तत्रोद्घात्यकावलगिते प्रस्तावनाप्रस्तावे सोदाहरणं लक्षिते॥ *॥
मिथोवाक्यसमुद्भूतं प्रपञ्चो हास्यलक्षणः॥
यथा, विक्रमोर्व्वश्याम्। वङ्कीस्यविदूषकयोरन्योन्यवचनम्। *।
त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः॥
यथा। तत्रैव राजा।

सर्व्वाङ्गितिभृतां नाथ दृष्टा सर्व्वाङ्गसुन्दरी।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया॥

नेपथ्ये तत्रैव प्रतिशब्दः राजा कथं दृष्टेत्याह। अत्र शब्दवाक्यमेवोत्तरवाक्यत्वेन योजितम्। नटादिक्षितयविषयमेवेदमिति कश्चित्॥ *॥
प्रियाभेरप्रियैर्व्वाक्यैर्विलोभ्य च्छलनात् छलम्।
यथा, वेण्यां भीमार्জ্জुनौ।

कर्त्ता छतच्छलानां जतुमयशरणोद्दीपनः
सोऽभिमानी
राजा दुःशासनादेर्गुरुरनुजगृहस्याङ्गराजस्य
मित्रम्।
छद्माक्षैर्गोत्तरीयव्यपनयनपटुः पाण्डवा यस्य
दासाः
क्वासौ दुर्य्योधनोऽसौ कथयतु न यथा द्रष्टुमभ्यागतौ स्वः॥

अन्यैस्त्वाहुश्छलं किञ्चित् कार्य्यमुद्दिश्य कस्यचित्।

उदीर्यते यद्वचनं वचनाद्हास्यरोधकृत् । ● ।
वाक्केलिर्हास्यसम्बन्धो द्विविधप्रवृत्तिलोभवेत् ।
द्वितीयमुपलक्षणं यथा,—
भिन्नो मांसनिवेशनं प्रकुरुषे किन्तच्च मद्यं विना
मद्यचापि तव प्रियं प्रियमहो वाराङ्गनाभिः
सह ।
तासामर्थरुचिः कुतस्तव धनं द्यूतेन चौर्येण वा
चौर्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या
गतिः ।
केचित् प्रक्रान्तवाक्यस्य साकाङ्क्षत्वेन निर्वृत्ति-
र्वाक्केलिरित्याहुः । अन्ये चानेकस्य प्रस्तावे-
कमुत्तरम् । ● ।
अन्योन्यवाक्याधिक्योक्तिः सङ्ख्याधिक्यं मतम् ॥
यथा, मम प्रभावत्यां वचनाभः ।
अस्य वचः श्रवणेनैव निर्मथ्य गदयानया ।
लीलयोन्मूलयिष्यामि भुवनद्वयमद्य वः ॥
प्रद्युम्नः । अरे रे असुरापसद अलमसुना बहु-
प्रलापेन मम खलु ।
अद्य प्रचण्डभुजदण्डसमर्पितोरु-
कोदण्डनिर्गलितकाण्डसमूहघाते: ।
आस्तां समस्तदितिजत्वतनोचितेयं
चौरी चयेन पिशितस्य तनोर्भनीया । ● ।
गर्भं प्रस्तुतसम्बन्धि भिन्नार्थं सत्वरं वचः ।
यथा वेण्यां राजा ।
अध्यासितुं तव चिराच्चपलस्य
पर्य्यायमेव करभोरु ममोरुयुग्मम् ।
अनन्तरं प्रविश्य कञ्चुकी देव भयं भयमित्यादि ।
अत्र रथकेतनभङ्गार्थं वचनमूरुभङ्गार्थे सम्बन्धे
सम्बद्धम् । ● ।
आक्षानं स्वरसोक्तस्यान्यथावस्थापितं भवेत् ।
यथा जानकीरामे सीता । जादे काहं कधु उ
अम्हा एव्व गन्तव्वं तहिं सो राया विअरअ
पआयिदव्वो । लवः । अथ किमावाभ्यां राजो-
पजीविभ्यां भवितव्यम् । सीता । जादसो
तुह्माहं पिदा । लवः । किमावयो रघुपतिः
पिता । सीता । साअङ्कं मा अम्हधा सङ्घटवं
कधु तुह्माहं स आआत्ते एव्व पुहवीएत्ति । ● ।
प्रहेलिकैव हास्येन युक्ता भवति नालिका ।
संवरणकार्यानुत्तरं प्रहेलिका । यथा रत्नावल्याम् ।
सुसङ्गता सहि जस्स कदे तु मं आअदा सो
दक्खेव्व चिट्ठदि साअरिआ कस्स कदे अहं
आअदा सुसंगं चित्तफलअस्स । अत्र तं राज्ञः
क्षते आगतेत्यर्थः संवृतः । ● ।
असत्प्रलापो यद्वाक्यमसम्बद्धं तथोत्तरम् ।
अयत्नोऽपि सुखस्य पुरो यच्च हितं
वचः ।
तत्राद्यं यथा मम प्रभावत्याम् । प्रद्युम्नः सह-
कारवल्लीमवलोक्य सानन्दं अहो कथमिदैव ।
अलिकुलमञ्जुलकेशी
परिमलबहुला रसावहा तन्वी ।
किंशुलयपेशलपाणिः
कोकिलकलभाविवी प्रियतमा मे ॥
एवमसम्बन्धोत्तरेऽपि । द्वितीयं यथा । वेण्यां
दुर्योधनं प्रति गान्धारीवाक्यम् ।
आहारो यत् परस्यार्थे हास्यलोभकरं वचः ।
यथा मालविकाग्निमित्रे । हास्यप्रयोगावसाने
मालती निर्गन्तुमिच्छति विदूषकः सादरं उप-
देशं सुधा गमिष्यसि । इत्युपक्रमेण हासः ।
विदूषकं प्रति आर्य उच्यतां यस्या क्रममेदो
लक्षितः । विदूषकः पउमं । वच्छअ पूआभोदि
साए माए लक्खिदा मालती अवत इत्यादिना ।
नायकस्य विदूषकनायिकादर्शनप्रयुक्तेन हास-
लोभकारिणा वचसा आहारः । ● ।
दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत् ।
क्रमेण यथा,—
प्रियजीवितता क्रौर्यं नक्षेहत्वं कृतघ्नता ।
भूयस्तद्दर्शनादेव ममेते गुणतां गताः ॥
तस्मात्तदुपसौन्दर्यं भूषितं यौवनश्रिया ।
सुखैकायतनं जातं दुःखायैव ममाधुना ॥
एतानि चाङ्गानि नाटकादिषु संभवन्त्यपि
वीथ्यामवश्यं विधेयानि निष्प्रकृतया नाटकादिषु
विनिविष्टान्यपि दृष्टोदाहृतानि । वीथी च
नानारसानाश्रित्य मालारूपतया स्थितत्वाद्-
वीथीयम् । यथा मालविका ।" इति साहित्य-
दर्पणम् । ● । ● । सूर्य्यगमनपथः । यथा,—
"नागवीथ्युत्तरा वीथी अजवीथ्याश्च दक्षिणे ।
उभे आषाढ़मूलन्तु अजवीथ्युदयाक्षयः ॥
अभिजित् पूर्व्वतः स्वाती नागवीथ्युत्तराक्षयः ।
अश्विनी क्षत्तिका याम्या नागवीथ्युत्तराः स्मृताः ॥
रोहिण्यार्द्रा मृगशिरो नागवीथिरिति स्मृता ॥
पुष्याश्लेषापुनर्व्वसोर्वीथिरैरावती स्मृता ।
तिस्रस्तु वीथयो ह्येता उत्तरो मार्ग उच्यते ॥
पूर्व्वा उत्तरफल्गुण्योर्मघाश्चैरावती भवेत् ।
पूर्व्वोत्तरे प्रोष्ठपदे गोवीथी रेवती स्मृता ॥
श्रवणा च धनिष्ठा च वारुणश्च जरद्गवम् ।
एताश्च वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥
हस्ता चित्रा तथा स्वाती नागवीथिरिति स्मृता ॥
विशाखामित्रदैवत्यं नागवीथिरितीष्यते ।
मूलपूर्व्वोत्तराषाढ़ा वीथिर्वैश्वानरी तथा ।
स्मृतास्तिस्रस्तु वीथ्यस्ता मार्गे वै दक्षिणे बुधैः ॥"
इति मात्स्ये १०१ अध्यायः । ● ।
अपि च ।
"उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणम् ।
पितृयानं च वै पन्था वैश्वानरपथाहृहिः ॥
तत्रासते महात्मान ऋषयो येऽग्निहोत्रिणः ॥"
इति विष्णुपुराणे २ अंशे ८ अध्यायः । ● ।
तत्र ज्योतिश्चक्रे वीथीक्रमो वायुनोक्तः ।
"सर्व्वग्रहाणां वीथ्येव स्थानानि द्विजसत्तमाः ।
स्थानं जारद्गवं मध्यं तथैरावतसुत्तरम् ।
वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ॥"
तदेव मध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथि-
त्रयेण त्रिधा भिद्यते । तथा हि त्रिभिस्त्रिभि-
रश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती
चेत्युत्तरमार्गे वीथित्रयम् । आर्क्षभी गोवीथी
जारद्गवी चेति वैश्वानरे मध्यमार्गे वीथित्रयम् ।
अजवीथी मृगवीथी वैश्वानरी चेति दक्षिण-
मार्गे वीथीत्रयम् । तदुक्तं तत्रैव ।
"अश्विनी क्षत्तिका याम्या नागवीथीति
ग्रन्थिता ।
रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते ॥
पुष्याश्लेषे तथादित्या वीथी चैरावती स्मृता ।
एतासु वीथयस्तिस्र उत्तरो मार्ग उच्यते ॥
तथा हे चापि फल्गुन्यौ मघा चैवार्क्षभी
मता ।
हस्ता चित्रा तथा स्वाती गोवीथीति तु
ग्रन्थिता ॥
ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता ।
एतासु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥
मूलाषाढ़ोत्तराषाढ़ा अजवीथीति ग्रन्थिता ।
श्रवणश्च धनिष्ठा च मार्गौ द्वावभिधस्तथा ॥
वैश्वानरी भाद्रपदे रेवती चैव कीर्त्तिता ।
एतासु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते ॥"
याम्या भरणी । आदित्या अदितिदेवताका
पुनर्व्वसुः । मार्गौ मृगवीथी । एवं स्थिते
अगस्त्यादुत्तरमजवीथ्यासु दक्षिणम् । किन्तु
अगस्त्यनिरूढ़वर्त्मिनो वैश्वानरपथाद्दक्षिणैश्वा-
नरवीथीं विहाय मृगवीथीमार्गं पितृयान-
मित्यर्थः । इति तट्टीकायां श्रीधरस्वामी ।
वीथ्यङ्गः, त्रि, (वीथ्या अङ्गमिवाङ्गं यस्य ।)
नाटकभेदः । इति हेमचन्द्रः । अस्य विवरणं
वीथीशब्दे द्रष्टव्यम् ।
वीर्य्यं, क्ली, (विशेषेण इन्यते दीप्यते इति । वि+
इन्+"वावित्रे ।" उणा० २ । २५ । इति
क्रन् ।) नभः । (यथा, अथर्ब्ववेदे ।४ । २० । ७।
"वीर्य्यं सूर्य्यमिव सर्पन्तं मा प्रियार्चं तिर-
स्करः ।")
वायुः । अग्निः । इति संक्षिप्तसारोणादि-
वृत्तिः ।
वीर्य्यः, त्रि, (वि+इन्+क्रन्।) विमलः । इत्यमरः ॥
वीर्य्याङ्गः, पुं, (विशेषेण गच्छते इति । वि+गम्+
क्विप् । उपसर्गस्य दीर्घः ।) कूपस्य सुखबन्ध-
नम् । इत्यमरः । अस्य कूपस्य यत्सुखबन्धनं
येन सुखं वध्यते तत्र वीर्य्याङ्गः शब्दोपङ्क इति
ख्यातः । विशेषेण गच्छते कूपसुखमनेन ।
वीर्य्याङ्गः । गम् औ वर्त्मे चण् मनीषादित्वात्
वेर्य्यं दीर्घः विर्य्याङ्गः कूपसुखबन्ध-
पङ्क इति साक्षात् । इति भरतः ।
वीर्य्या, स्त्री, विद्युत् । इति शब्दरत्नावली ।
वीप्सा, स्त्री, क्रियागुणद्रव्येर्युगपद्व्याप्तुमिच्छा ।
यथा,—
"सुक्तिर्नर्त्तेऽच्युतोपास्तिं भूतं भूतमभि प्रभुः ।
भक्तो विभुमभि प्राप्तो गोविन्दमभितिष्ठति ।"
अच्युतोपास्तिं ऋते सुक्तिर्न स्यादित्यर्थः ।
प्रभुरीश्वरः भूतं भूतं अभि सर्व्वप्राणिषु अस्ति
इत्यर्थः । वीप्सायां प्रयुक्तस्य पदस्य द्विर्भावः ।
इति मुग्धबोधटीकायां दुर्गादासः ।

वीर, ङ तृ क शौर्ये। इति कविकल्पद्रुमः। (अदन्तपुरा०-आत्म०-अक०-सेट्।) ङ, अविवीरत। शौर्यसदृशम्। इति दुर्गादासः।

वीरं, क्ली, (अज्+"स्फायितञ्चिवञ्चीति।" उणा० १। १३। इत्यादिना रक्। अजेर्वीभावः। वीर+अच् वा।) मद्यम्। गड़ः। इति मेदिनी। रे, ६०। मरिचम्। पुष्करमूलम्। काञ्चिकम्। उशीरम्। आरूकम्। इति राजनिर्घण्टः। वीरशब्दो मेदिन्यां पवर्गीयकारादौ डलीऽपि वीरघातोरन्तःस्थकारादौ दर्शनादत्र लिखितः।

वीरः, पुं, (वीरयतीति। वीर विक्रान्तौ+पचाद्यच्। यद्वा, विशेषेण ईरयति दूरीकरोति शत्रून्। वि+ईर+इगुपधात् कः। यद्वा, अजति क्षिपति शत्रून्। अज+स्फायितञ्चीत्यादिना रक्। अजेर्वीः।) शौर्यविशिष्टः। तत्पर्य्यायः। शूरः २ विक्रान्तः ३। इत्यमरः।२।८। ७७। गम्भीरः ४ तरस्वी ५। इति जटाधरः। (यथा, महाभारते। १। १४१। ४५।

"नगराजो वृकश्चैव बुद्धिमानपि मूषिकः।
निर्ज्जिता यत्नतो वीरास्तस्मादीरतरो भवान्॥"

यथा च ऋग्वेदे। १। ११४। ८।

"वीराज्ञानी ब्रह्मभामितो वधी-
र्हविष्मन्तः सदमित्वा हवामहे।"

"वीरान् वीराक्रान्तान्।" इति सायणः। पुत्रः। यथा, ऋग्वेदे। ५। २०। ४।

"वीरैः स्याम सधमादः॥"

"वीरैः पुत्रैश्च सधमादः सहमादनाः स्याम तथा कुरु।" इति तद्भाष्ये सायणः। ॥

पतिः। पुत्रश्च। यथा, मार्कण्डेये। ३५। ३१।

"न चाप्यपेक्षन्तदिदं वीरहीनां तथा स्त्रियम्।
यदादुच्छ्वसविष्णूपपादाम्भांसि क्षिपेद्वहिः॥"

यथा च अवीरा निर्ऋतिसुता। इत्यमरदर्शनाच्च॥ दनायुदैत्यपुत्रः। यथा, महाभारते। १। ६५। ३१।

"दनायुषः पुनः पुत्राश्चत्वारोऽसुरपुङ्गवाः।
विप्रचित्तो बलवीरौ च वृत्रश्चैव महासुरः॥")

जिनः। वटः। इति हेमचन्द्रः। विष्णुः। यथा, वीरोऽनन्तो धनञ्जयः। इति विष्णुसहस्रनाम। ङ्गारादरस्यान्तर्गतस्वरविशेषः। तत्पर्य्यायः। उत्साहवर्द्धनः २। इत्यमरः॥

"उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः।
महेन्द्रदेवतो हेमवर्णोऽयं वसुदाहृतः॥"

उत्साहं वर्द्धयति इति उत्साहवर्द्धनः नन्द्यादित्वात्। दानधर्म्मयुद्धेषु जीवनपेक्षोत्साहकारी रसो वीरः। वीरयत्ने अत्र वीरः। वीर सङ्घातौ शौर्ये च स्वीततवेद आदते इति सर्व्वरसलक्षणं कटाक्षितम्। इति भरतः॥ ॥

तान्त्रिकभावविशेषः। यथा,—

"तत्रैव त्रिविधो भावो दिव्यवीरपशुक्रमः।
दिव्यवीरैक्यः प्रोक्तः सर्व्वसिद्धिप्रदायकः॥"

इति रुद्रयामले ११ पटलः।

अपि च।

"भावस्तु त्रिविधः प्रोक्तो दिव्यवीरपशुक्रमात्।
गुरवश्च त्रिधा प्राज्ञ तथैव मन्त्रदेवता॥"

इति तत्रैव ६ पटलः॥

अन्यच्च।

"पशुभावं हि प्रथमे द्वितीये वीरभावकम्।
तृतीये दिव्यभावश्च इति भावत्रयं क्रमात्॥
आदौ दशमदक्षेण पशुभावमथापि वा।
मध्याह्ने दशदक्षेण वीरभावमुदाहृतम्।
सायाह्ने दशदक्षे तु दिव्यभावं शुभप्रदम्॥"

इति च तत्रैव १९ पटलः॥

अन्यच्च।

"जन्ममात्रं पशुभावं वर्षषोडशकावधि।
ततश्च वीरभावस्तु यावत् पञ्चाशतो भवेत्॥
द्वितीयांशे वीरभावस्तृतीये दिव्यभावकः।
एवं भावत्रयेणैव भावमेकं भवेत् प्रिये॥"

इति वामकेश्वरतन्त्रे ५१ पटलः॥

वीराचारविशिष्टः। यथा,—

"कुलाचाररतो वीरः कुलसङ्गी सदा भवेत्।
संविदासेवनं कुर्य्यात् सोमपानं महेश्वरि॥
सर्व्वथा कुरुते देवि वीरश्चोद्धतमानसः।
दिव्यस्तु देवता प्रायश्चन्दनागुरुलेपनैः।
रक्तचन्दनगन्धेश्च सुस्निग्धो नात्र संशयः॥
भस्माङ्गधूसरो वीर उन्मत्तवद्विचेष्टितः।
सुरापायरतो नित्यं बलिपूजापरायणः॥
नरश्चागश्च महिषो मेषः शूकर एव च।
गृध्रकः शुल्कको गोधा खड्गी कूर्म्मो दशस्मृताः॥
वागरश्च खरश्चैव गजाश्वादिविहङ्गमाः।
इत्यादिभिर्म्बलैर्दानैः पूजयेत् खेटदेवताम्॥
सिद्धमन्त्रो भवेत् वीरो न वीरो मद्यपानतः।
कलौ तु भारते वर्षे लोका भारतवासिनः।
यदे यदे सुरां पीत्वा वर्षभरा भवन्ति हि॥"

इत्युत्पत्तितन्त्रम्॥ ॥

कलौ तदाचारनिषेधो यथा,—

"दिव्यवीरमयो भावः कलौ नास्ति कदाचन।
केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्॥"

इति महानिर्व्वाणतन्त्रम्॥ ॥

तक्षणीयः। वराहकन्दः। कताकरञ्जः। करवीरः। अर्ज्जुनः। इति राजनिर्घण्टः। वह्निः। इति वीरशब्दटीकायां भरतः॥ उत्तरः। सुभटः। इति मेदिनी॥

वीरः, त्रि, श्रेष्ठः। इति हेमचन्द्रः। (कर्म्मठः। यथा, ऋग्वेदे। ८। २३। १९।

"इमं धा वीरो अन्तमं वीरं शक्वीतमर्भगः॥"

"वीरः कर्म्मसु समर्थः।" इति तद्भाष्ये सायणः॥ यथा च। तत्रैव। ६। २९। ३।

"कर्णा वीराय सुभगा उलोकं
दाता वसु स्तुवते कीरये चित्॥"

"वीराय यज्ञादि कर्म्मसु दक्षाय।" इति तद्भाष्ये सायणः। प्रेरयिता। यथा, तत्रैव। ६। ६५। ४।

"इदा हि वो विधते रत्नमस्तीदा
वीराय दाशुष उषासः॥"

"वीराय प्रेरयित्रे।" इति तद्भाष्ये सायणः॥)

वीरकः, पुं, (वीर एव। स्वार्थे कन्।) करवीरः। इति राजनिर्घण्टः॥ (विक्रान्तः। समर्थः। यथा, ऋग्वेदे। ८। ८०। २।

"असौ य एषि वीरको गृहं गृहं विचाकशत्॥"

"वीरको वीरः समर्थश्चरम्।" इति तद्भाष्ये सायणः॥ अपभ्रष्टदेशविशेषवासी। यथा, महाभारते। ८। ४४। ४२।

"कारस्करान् माहिषकान् कालिङ्गान् केरलांस्तथा।
कर्कोटकान् वीरकांश्च दुर्गमांश्च विवर्ज्जयेत्॥"

चाक्षुषमन्वन्तरीयसुनाभ्यतमः। यथा, भागवते। ८। ५। ८।

"सुनयश्चत्र वै राजन् हर्य्यक्षवीरकादयः॥")

वीरजयन्तिका, स्त्री, (वीराणां जयन्तिकेव।) रथे वीराणां नृत्यम्। इति हेमचन्द्रः॥

वीरत्वं, क्ली, उशीरलक्षणम्। तत्पर्य्यायः। वीरत्वम् २ कटायनम् ३। इति शब्दरत्नावली। वीरतरम् ४। इत्यमरः॥ वीरभद्रम् ५। इति रत्नः॥ (यथा, भागवते। १०। ५१। ५१।

"तमापतन्तं स निगृह्य तुल्ययो-
र्दोर्भ्यां वृकं कंसखलं सतां गतिः।
पश्यत्सु बालेषु ददार लीलया
सुदावहो वीरवरद्विषौकसाम्॥")

अपि च।

"स्यादीरत्वं वीरतरं वीरत्वं वह्निमूलकम्।
वीरत्वं पाचनं प्रीतं स्तम्भनं लघु तिक्तकम्॥
मधुरं ज्वरतृष्णान्तिमेदश्लित्कफपित्तहृत्।
व्रणास्रविषवीसर्पकृच्छ्रदाहव्रणापहम्॥
वीरतस्य तु मूलं स्यादुशीरमभयं तथा।
अन्नपानस्य सेव्यत्वे समगन्धिकमित्यपि॥
उशीरं पाचनं प्रीतं स्तम्भनं लघु तिक्तकम्।
मधुरं ज्वरतृष्णान्तिमदहृत् कफपित्तहृत्।
व्रणास्रविषवीसर्पदाहकृच्छ्रव्रणापहम्॥"

इति भावप्रकाशः॥

(पुं, प्रजापतिविशेषः। यथा, महाभारते। १२। ३४८। ४९।

"सनत्कुमारादपि च वीरणो वै प्रजापतिः।
ततादौ कुरुशार्दूल धर्म्ममेतदधीतवान्॥"

यथा च माल्ये। ३। ४०।

"वीरस्यात्मजायानु पक्ष्मोष्णमजीजनत्॥")

वीरतरं, क्ली, वीरत्वम्। इत्यमरः॥

वीरतरः, पुं, नरः। इति भूरिप्रयोगः॥ (त्रि, सामर्थ्यवान्। यथा, ऋग्वेदे। ८। २४। १५।

"नक्षन्न पुराचन जग्ने वीरतरस्वत्॥"

"वीरतरः सामर्थ्यवान्।" इति तद्भाष्ये सायणः॥ अयमनयोरतिशयेन वीरः। वीरश्रेष्ठः। यथा, महाभारते। ४। ५२। १४।

"नरवर्य्यास्ते तु नरर्षभेण
वीरा रवे वीरतरेण भग्नाः॥")

वीरासनं, क्ली, (वीरासनानां साधकश्रेष्ठानां आसनम् ।) आसनविशेषः । यथा,—
"स्तृतं कोमलमास्तीर्णं संग्रामपतितं हि यत् ।
अनुद्यापादितं वापि स्तृतं वा नरमासनम् ॥
गर्भच्युतं त्वचं वापि नारीणां योनिजां त्वचम् ।
सर्व्वसिद्धिप्रदं देवि सर्व्वतोऽतिसमृद्धिदम् ।
त्वचं वा यौवनस्थानां कुर्य्याद्वीरासनम् ॥"
इति सुखमालातन्त्रे ३ पटलः ॥

वीरासुरः, पुं, (वीरस्यासुरः ।) अर्जुनवृक्षः । इत्यमरः । कोकिलाक्षवृक्षः । इति रत्नमाला । विख्यातवृक्षः । भल्लातकः । इति राजनिर्घण्टः ॥

वीरपर्णी, क्ली, सुरपर्णम् । इति राजनिर्घण्टः ॥

वीरपत्नी, स्त्री, (वीराणां पत्नी । यद्वा, वीराः पतयोऽस्याः । "नित्यं सपत्न्यादिषु ।" ४।१।३५। इति पत्युर्नकारादेशः । "ऋन्नेभ्यो ङीप् ।" ४।१।५। इति ङीप् ।) वीरभार्य्या । इत्यमरः ॥ (यथा, मार्कण्डेये । १२५ । ७ ।
"तेषामेतद्वचः श्रुत्वा वीरा वीरप्रजावती ।
वीरगोत्रसमुद्भूता वीरपत्नी प्रहर्षिता ॥"
नदीविशेषः । यथा, ऋग्वेदे ।१।१०४।८।
"अक्ष्णयो क्लिन्नी वीरपत्नी
पयो दुह्राना उदभिर्भरन्ती ॥"
"वीरपत्नी वीरस्य पालयित्री एतत्संज्ञितास्त्रियो नद्यः ।" इति तद्भाष्ये सायणः ॥)

वीरपत्रा, स्त्री, (वीरप्रियाणि पत्राणि यस्याः ।) विजया । इति राजनिर्घण्टः ॥

वीरपानं, क्ली, वीराणां अमनाशाय पानम् । यथा,—
"वीरपानन्तु यत् पानं दृष्टे भाविनि वा रणे ।"
इत्यमरः ॥
("वा भावकरणयोः ।" ८ । ३ । १० । इति विकल्पेन षत्वमपि । यथा, रामायणे । ३ । ६ । ७२ ।
"मत्तोऽयमिति दुर्बुद्धे मोहान्मामवमन्यसे ।
मदीये संप्रहारेऽस्मिन् वीरपानं समर्प्यताम् ॥")

वीरपुष्पी, स्त्री, सिन्दूरपुष्पी । इति राजनिर्घण्टः ॥

वीरबाहुः, पुं, (वीराः समर्थाः बाहवो यस्य ।) विष्णुः । यथा, "वीरबाहुर्विदारणः ।" इति तस्य सहस्रनामस्तोत्रम् । (धृतराष्ट्रपुत्राणामन्यतमः । यथा, महाभारते । १ । ६७ । १०१ ।
"उग्रो भीमरथो वीरो वीरबाहुरलोलुपः ।"
रावणपुत्रः । इति रामायणम् । वानरविशेषः । यथा, रामायणे । ६ । १७ । १५ ।
"वीरबाहुः सुबाहुश्च नलश्च वनगोचरः ।")

वीरभद्रः, पुं, (वीराणां भद्रं येन ।) अश्वमेधाश्वः । वीरश्रेष्ठः । वीरयज्ञम् । इति मेदिनी । शिवगणविशेषः । तस्योत्पत्तिर्यथा,—
"दक्षाध्वरे महाकालः सम्यक् ज्ञात्वा सतीक्षयम् ।
सद्यं सुते सती देवी ह्यपोचक्रे स्वजीवितम् ।
जोषं स्थिते मुनौ तत्र तत्सहाकालसाध्यसात् ।
रुद्रस्यातीवरौद्रोऽभूत् बहुकोपाग्निदीपितः ।
ततस्तत्क्रोधजाद्वीरादविरासीन्महाद्युतिः ।
प्रत्यक्षः प्रतिमाकारः कालदण्डः प्रकम्पनः ।
उवाच च प्रणम्येशं भूमुखीं महतीं दधत् ।
आज्ञां देहि पितः किन्ते करवै दासमुत्तमम् ।
ब्रह्माण्डमेककवलं करवाणि त्वदाज्ञया ।
इति प्रतिज्ञां तस्येशः श्रुत्वा प्रीतमभ्यत ।
प्रीतस्तत्यभिवाल्यन्तं तं सदा प्रत्युवाच ह ।
महावीरोऽसि रे भद्र मम सर्व्वगणेष्विह ।
वीरभद्राख्या हि त्वं प्रथितिं परमां व्रज ।
कुरु मे सत्वरं कार्य्यं दक्षयज्ञं त्वयं नय ॥"
इति काशीखण्डे ८६ अध्यायः ॥
(यथा च महाभारते । १२ । २८३ । ५१ ।
"वीरभद्र इति ख्यातो रुद्रकोपाद्विनिःसृतः ।
भद्रकालीति विख्याता देव्याः कोपाद्विनिःसृता ॥")

वीरभद्रकं, क्ली, (वीरभद्रमेव । स्वार्थे कन् ।) वीरयज्ञम् । इति जटाधरः ॥

वीरभार्य्या, स्त्री, (वीराणां भार्य्या ।) वीरपत्नी । इत्यमरः ॥

वीरमाता, [त्र्] स्त्री, (वीराणां माता ।) वीरजननी । तत्पर्य्यायः । वीरसूः २ । इत्यमरः ॥ (यथा, भागवते । ६ । १४ । ४० ।
"अन्तर्व्वत्नीमुपालक्ष्य देवौ सा प्रययौ पुरीम् ।
पुनस्तत्र गतोऽब्दान्ते उर्व्वशीं वीरमातरम् ॥")

वीररजः, [स्] क्ली, (वीराणां वीरभावितां धारणार्थं रजः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥ वीरस्य धूलिश्च ॥

वीररेणुः, पुं, (वीरा रेणव इव यस्य ।) भीमसेनः । इति त्रिकाण्डशेषः ॥

वीरवती, स्त्री, मांसरोहिणी । इति भावप्रकाशः ॥ (विक्रमपुराधीश्वरविक्रमतुङ्गनृपकर्म्मचारिवीरवरस्य कन्या । यथा, कथासरित्सागरे । ५३ । ६० ।
"यस्य धर्म्मवती नाम भार्य्या वीरवती सुता ।
पुत्रः सत्यवरश्चेति त्रयं परिकरो यदे ॥")

वीरवत्सा, स्त्री, (वीरो वत्सः पुत्रो यस्याः ।) वीरजननी । इति जटाधरः ॥

वीरविद्रावकः, पुं, शूद्रवर्णेन होमकर्त्ता । यथा,—
"वीरविद्रावको नुङ्न् धनैः शूद्रसमाहितैः ।"
इति हेमचन्द्रः ॥

वीरवृक्षः, पुं, (वीरनामको वृक्षः ।) भल्लातकः । इत्यमरः । अर्जुनवृक्षः । इति हेमचन्द्रः । विख्यातरः । इति राजनिर्घण्टः । वृक्षविशेषः । देधान इति भाषा । तत्पर्य्यायः । वीरतरः २ दृढद्रुतः ३ अक्षयरोहरः ४ । इति रत्नमाला ॥

वीरसूः, स्त्री, (वीरान् पुत्रानेव सूते इति । वीर + सू + क्विप् ।) वीरमाता । इत्यमरः ॥ (यथा, महाभारते । १ । २०० । ७ ।
"जीवद्वत्सवीरसूर्भद्रे बहुसौख्यसमन्विता ।
सुभगा भोगसम्पन्ना यज्ञपत्नी पतिव्रता ॥"
पुत्रप्रसविनी । यथा, ऋग्वेदे ।१०।८५।४४।
"वीरसूर्देवकामा स्योना श्वशो भवद्विपदे शं चतुष्पदे ॥"
"वीरसूः पुत्राणामेव सवित्री ।" इति तद्भाष्ये सायणः ॥)

वीरसेनं, क्ली, आरूकवृक्षः । इति राजनिर्घण्टः ॥

वीरसेनः, पुं, नलराजपिता । इति नैषधम् ॥ (यथा, महाभारते । ७ । ५२ । ५४ ।
"निषधेषु महीपालो वीरसेन इति श्रुतः ।
तस्य पुत्रोऽभवन्नाम्ना नलो धर्म्मार्थकोविदः ॥")

वीरसेनजः, पुं, (वीरसेनात् जायते इति । जन + डः ।) नलराजः । इति नलोदयः ॥

वीरहा, [न्] पुं, (वीरान् हन्तीति । हन + क्विप् ।) नदाग्निब्राह्मणः । इत्यमरः ॥ यस्याग्निहोत्रिय प्रमादादिना कारणान्तरेण वा अग्निर्नष्टो निर्व्वाणः स्यात् स वीरहोच्यते । वीरयति शौर्य्यं कारयति इति वीर ङ तृ क सु शौर्य्ये इत्यस्मात् सुरादि णिः प्रेरणे ज्ञानात् पचाद्यचि वीरो यज्ञाग्निः तं हतवान् इति क्विपि वीरहा । इति भरतः ॥ (यथा, वाजसनेयसंहितायाम् । ३० । ५ । "नरकाय वीरहणम् ।" "वीरहणं नदाग्निं शूरं वा ।" इति तद्भाष्यम् ॥) विष्णुः । यथा । वीरहा माधवो मधुः । इति विष्णुसहस्रनाम । वीरघ्नतरि, त्रि ॥

वीरा, स्त्री, सुरा । चोरकाकोली । तामलकी । एलवालुका । पतिपुत्रवती । रम्भा । विदारी । दुग्धिका । मलपूः । चोरविदारी । इति मेदिनी । रे, ६८ ॥ पुस्तकान्तरे सुराख्याने सुरा विदारीस्थाने गम्भारी इति पाठः । काकोली महाश्रावणी । गुडकन्या । ब्राह्मी । अतिविषा । मदिरा । इति राजनिर्घण्टः ॥ शिंशपावृक्षः । इति रत्नमाला ॥ (करभमरालपत्नी । यथा, मार्कण्डेये । १२३ । १ ।
"वीर्य्यचन्द्रसुता सुभ्रूर्वीरा नाम सुभद्रता ।
स्वयंवरे सा जगृहे महाराजं करम्भमम् ॥"
नदीविशेषः । यथा, महाभारते ।६।८।२२।
"पूर्व्वाभिरामां वीराञ्च भीमां मोघवतीं तथा ।"
विक्रमशालिनी । यथा, मार्कण्डेये ।१२५।७।
"तेषामेतद्वचः श्रुत्वा वीरा वीरप्रजावती ।
वीरगोत्रसमुद्भूता वीरपत्नी प्रहर्षिता ॥")

वीराज्वः, पुं, अम्बष्ठेतरः । इति राजनिर्घण्टः ॥

वीरारुकं, क्ली, आरूकम् । इति राजनिर्घण्टः ॥

वीरार्ग्गलं, क्ली, (वीरान् आर्ग्गलयति अद्य स्थास्यामि वा नवेति चिन्तां जनयतीति । आ + र्ग्गल + णिच् + क्विप् ।) अतिभयप्रदा युद्धभूमिः । इत्यमरः ॥

वीरासनं, क्ली, (वीराणां साधकानामासनम् ।) भिन्नाद्यासनाश्रित्योपवेशनम् । यथा,—
"दिवाशुगच्छेत्ता मास्तु तिष्ठन्मूर्द्ध्नि रजः शिवेत् ।

सुप्त्वित्वा नमस्कृत्वा रात्रौ वीरासनं वसेत् ।"
इति प्रायश्चित्ततत्त्वे मनुः ॥
अन्यच्च ।
"एकपादमथैकस्मिन् विन्यसेदुरु संस्थितम् ।
इतरस्मिन् तथा पश्चाद्वीरासनमिदं विदुः ॥"
इति घेरण्डसंहिता ।
(यथा, रघुवंशे । १३ । ५२ ।
"वीरासनेऽथानुजवान्यबाहु-
रसौ समध्यासितवेदिमध्याः ।
निर्वातनिष्कम्पतया विभान्ति
योगाधिरूढा इव प्राक्षिणोऽपि ॥")
वीरिणी, स्त्री, अस्त्रिणी । यथा,—
"उपयेमे वीरवस्य तनयां दक्ष ईप्सिताम् ।
वीरिणी नाम तस्यान्तु अस्त्रिण्यपि सत्तमाः ॥"
इति कालिकापुराणे ८ अध्यायः ॥
(यथा च महाभारते । १ । ७५ । ५ ।
"वीरिणञ्च सह सङ्गम्य दक्षः प्राचेतसो मुनिः ।
आत्मतुल्यानजनयत् सहस्रं संशितव्रतान् ॥"
वीरः पुत्रोऽस्या अस्तीति । वीर + इनि । ङीप् ।
पुत्रवती । यथा, ऋग्वेदे । १० । ८६ । ६ ।
"उताहमस्मि विरिणीन्द्रपत्नी ॥"
"विरिणी पुत्रवती ।" इति तद्भाष्ये सायणः ॥)
वीरुत्, [ध्] स्त्री, (विशेषेण रुणद्धि इत्यनन्यात् ।
वि + रुध + क्विप् । "अन्येषामपीति ।" दीर्घः ।
अथवा विरोहतीति वीरुत् । विपूर्व्वस्य रुहेः
क्विपि धकारो विधीयते इति कात्यिका ।०।३।
५१ ।) विस्तृता लता । तत्पर्य्यायः । गुल्मिनी २
उलपः ३ । इत्यमरः ॥ वीरुधा ४ । इति शब्द-
रत्नावली ॥ प्रतानाः ५ कक्षः ६ । इति जटा-
धरः ॥ (यथा, रघुवंशे । ८ । ३६ ।
"अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम् ॥"
ओषधिः । यथा, ऋग्वेदे । २ । ६० । ५ ।
"विधो वीरुत् सुरोधस्यहिलोत प्रजा उतप्रस्व-
स्वन्तः ॥"
"वीरुत्सु ओषधीषु ।" इति तद्भाष्ये सायणः ॥
वृक्षमात्रे, पुं । यथा, महाभारते । १ । ४५ । २४ ।
"यानि पश्यसि वै ब्रह्मन् मूलानीहास्य वीरुधः ।
एते नक्षत्रवक्षात् कालेन परिभक्षिताः ॥"
यथा च ऋग्वेदे । ६ । ११३ । २ ।
"सोमं मन्यस्व राजानं यो जज्ञे वीरुधां पतिः ॥"
"वीरुधां वनस्पतीनामिति ।" इति तद्भाष्ये
सायणः ॥ लतानां वीरुधाच्च कथञ्चिद्भेदमाह ।
यथा, भागवते । ३ । १० । १८ ।
"वनस्पत्योषधिलता त्वक्सारा वीरुधो द्रुमाः ॥"
"ये पुष्पं विना फलन्ति ते वनस्पतयः । ओषधयः
फलपाकान्ताः । लता आरोहव्यापेक्षाः । त्वक्-
सारा वेल्लादयः । लता एव काठिन्येनारोहव्या-
नपेक्षा वीरुधः । ये पुष्पैः फलन्ति ते द्रुमाः ।"
इति तट्टीकायां श्रीधरस्वामी ॥)
वीरुधा, स्त्री, (विशेषेण रुणद्धीति । वि + रुध +
रुगुपधादिति कः । ततस्त्रियां टाप् । अथवा
वीरुध् शब्दात् भागुरिमते टाप् । यथा,—
"वह्नि भागुरिरल्लोपः अवाप्योरुपसर्गयोः ।
टापञ्चापि हलन्तानां क्षुधा वाचा निशा
गिरा ॥")
वीरुत् । इति शब्दरत्नावली ॥
वीरेशः, पुं, (वीराणामीशः ।) शिवः । यथा,—
"अथ त्रयोदशे मासि स्नात्वा त्रिपथगाम्भसि ।
प्रत्यूष एव वीरेशं यावदायाति स द्विजः ॥"
इति वीरेश्वरक्षेत्रम् ॥
वीरेश्वरः, पुं, (वीराणामीश्वरः ।) महादेवः ।
यथा,—
"तिलान्तरोऽपि नो काश्यां भूमिर्लिङ्गं विना
क्वचित् ।
परं वीरेशषड्भ्यं न लिङ्गन्त्वाशु सिद्धिदम् ॥
धर्म्मदश्चार्थदं सम्यक् कामदं मोक्षदं तथा ।
यथा वीरेश्वरं लिङ्गं काश्यां नान्यत्तथा ध्रुवम् ॥"
इति काशीखण्डे १० अध्यायः ॥
(मैथिलानां दशकर्म्मपद्धतिकर्त्ता । तत्पद्धतिश्च ॥)
वीरोज्झः, पुं, होमाकर्त्ता । यथा,—
"अभ्युदिताभिनिर्मुक्तौ वीरोज्झो न जुहोति
यः ॥"
इति हेमचन्द्रः ॥
वीरोपजीविकः, पुं, अग्निहोत्रमुपजीविका यस्य ।
यथा,—
"अग्निहोत्रच्छलाद्यापरो वीरोपजीविकः ॥"
इति हेमचन्द्रः ॥
वीर्य्य, क्ली, (वीरे साधु । तत्र साधुः इति यत् । यद्वा,
वीर्य्यतेऽनेनेति वीर विक्रान्तौ + "अचो यत्" ।
३।१।९७। इति यत् । यदा वीरस्य भावः । यत् ।)
चरमधातुः । तत्पर्य्यायः । शुक्रम् २ तेजः ३
रेतः ४ बीजम् ५ इन्द्रियम् ६ । इति मनुष्य-
वर्गे अमरः ॥ वीर्य्यं शक्तिः सा च पृथिव्यादीनां
यः सारभागः तदतिशयरूपा । सा द्विविधा
चिन्त्याचिन्त्यक्रियाहेतुत्वेन । तत्र चिन्त्यक्रिया-
हेतुर्यथा द्रव्यरसादीनां स्वस्वकर्म्मसु स्वभाव-
सिद्धा शक्तिः । अचिन्त्यक्रियाहेतुश्च प्रभापर-
पर्य्यायः । द्रव्याणां रसाद्यनुरूपकार्य्यकरण-
शक्तिः । उक्तञ्च ।
"भूतप्रभावातिशयो द्रव्ये पाके रसे स्थितः ।
चिन्त्याचिन्त्यक्रियाहेतुर्वीर्य्यं धन्वन्तरेर्मतम् ॥"
इति चक्रदत्तोपरि शिवदासीयटीका ॥ * ॥
परवीर्य्योदरपातदोषो यथा,—
"परवीर्य्यं यदुदरं कामतोऽकामतोऽपि वा ।
अहल्यो याति दैवेन तदुपायं निशामय ॥
अकामतो न दुष्टा सा प्राजापत्येन शुद्ध्यति ।
कामभोगेन त्वाप्या सा कृच्छ्रेणैव शुद्ध्यति ॥
पिण्डपाके दैवपाके पूजायां नाधिकारिणी ।
यदि वर्षसहस्राणि चर्यं कृत्वा सुकर्म्मजः ।
प्रयाति भोगदेहं सा तस्यान्ते पापकर्म्मजः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३० अध्यायः ॥
अतिशयशक्तिभागुत्साहः । इति स्वर्णवर्गे
अमरः ॥ कर्म्मसु शूरः प्रत्ययः उत्साहः ।
इति मधुः । कर्म्मसु दृढ़यत्नकारको भाव
उत्साहः । इति रमानाथः । कर्म्मसु प्रत्यय
उत्साह इति नयनानन्दः । अग्रन्थे बलोद्यम
उत्साह इति केचित् । स उत्साहः अतिशय-
शक्तिभाक् वीर्य्यम् । अतिशयितोऽध्यवसायो
वीर्य्यं साधु वीर्य्यमित्यर्थः । वीर्य्या स्त्री च वीर्य्यं
वीर्य्य इति कोषान्तरम् । इति भरतः ॥ * ॥
बलम् । प्रभावः । इति नानार्थे अमरः ॥
(यथा, ऋग्वेदे । १ । २५ । २ ।
"अग्निः सनोति वीर्य्याणि विद्वान्
सनोति वाजममृताय भूषन् ॥"
"वीर्य्याणि पशुपुत्रादिसम्पदूपाणि सामर्थ्यानि ।"
इति तद्भाष्ये सायणः । यथा च भागवते । ६ ।
१० । ३१ ।
"ज्ञानवैराग्यवीर्य्याणां नहि कश्चिदुपाश्रयः ॥"
शरीरसामर्थ्यम् । यथा, ऋग्वेदे । ४ । ५० । ७ ।
"स इद्राजा प्रतिजन्यानि विश्वाशुश्नेन तस्था-
वभि वीर्य्येण ॥"
"वीर्य्येण शरीरसामर्थ्येन ।" इति तद्भाष्ये
सायणः । शक्तिः । यथा, मनौ । ११ । ३१ ।
" न ब्रह्मणो वेदयते किञ्चिद्राजनि धर्म्मवित् ।
स्ववीर्य्येणैव तान् स्निग्धाञ्छासनवानपकारिणः ॥
स्ववीर्य्याद्राजवीर्य्याच्च स्ववीर्य्यं बलवत्तरम् ।
तस्मात् स्वेनैव वीर्य्येण नियङ्क्षीयादरीन् द्विजः ॥"
मनःशक्तिः । यथा, भागवते । ४ । १८ । १५ ।
"स्नात्वा वतुर्षं सुरराजा इन्द्रं सोममदूदुहन् ।
हिरण्मयेन पात्रेण वीर्य्यमोजो बलं पयः ॥")
ओषधानां वीर्य्यस्य स्थितिकाला यथा,—
"यामं कषायवीर्य्यमखिलं चूर्णञ्च पञ्चत्वयं
यक्षाधान् घृतमोदकौ सहगुडौ मात्रत्रयं
गुग्गुलोः ।
सिद्धानां रसभस्मनां सुविपुलं वीर्य्यञ्च वर्षत्रयं
किञ्चिन्न्यूनविवर्द्धितं गुणपरं तेजं पुराणं महत् ॥"
इति नारायणदासकृतपरिभाषा ॥
तेजः । इति मेदिनी । घृतम् । दीप्तिः । इति
शब्दरत्नावली ॥
वीर्य्यजः, पुं, (वीर्य्यात् जायते इति । जन + डः ।)
पुत्रः । इति केचित् । (यथा, भागवते । ६ ।
५ । १६ ।
"दैवेच्छया त्वयि यदुत्तमवंशजन्म ॥")
वीर्य्यवान्, [त्] त्रि, (वीर्य्यमस्यास्तीति । मतुप् ।)
मांसलः । इति शब्दरत्नावली । वीर्य्ययुक्तञ्च ॥
(यथा, किरातार्जुनीये । २ । ४ ।
"अतिवीर्य्यवतीव भेजिरे
बहुरत्नाऽपि दधत्ते गुरुः ॥")
वीर्य्यवृद्धिकरं, क्ली, (वीर्य्यस्य वृद्धिकरम् ।) शुक्र-
वृद्धिकरौषधादि । तत्पर्य्यायः । वृष्यम् २
वाजीकरणम् ३ बीजवृत् ४ । इति राज-
निर्घण्टः ॥
वीर्य्या, स्त्री, (वीर्य्यतेऽनयेति । वृ + "अचो यत् ।"
इति यत् । टाप् ।) वीर्य्यम् । इत्यमरटीकायां
भरतः ॥

वीवध:, पुं. पर्य्याहार:। परित आह्रियतेऽसौ धान्यतण्डुलादि:। (यथा, माघे। २। ६४।
"निरङ्कवीवधासारप्रसारा गा इव व्रजम्।
उपरुन्धन्तु दाशार्हा: पुरीं माहिष्मतीं दिव:।")
मार्ग:। पन्था:। इत्यमरभरतौ॥ भार:। इति शब्दरत्नावली॥

वीवधिक: त्रि, (वीवधेन हरतीति। वीवध+"विभाषा विवधवीवधात्।" ४। ४। ९०। इति ठन्।) भारवाहक:। इति सिद्धान्तकौमुदी॥

वीहार:, पुं, (विहरन्त्यत्रेति। वि+हृ+घञ्। उपसर्गस्य दीर्घ:।) महालय:। स तु बुद्धमन्दिरम्। इति शब्दमाला॥ विहार:। इत्यमरटीका॥

वृग, र त्यागे। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-सक०-सेट्।) र, वृङ्गते। इति दुर्गादास:॥

वृट, र क छिद्याम्। इति कविकल्पद्रुम:॥ (चुरा०-पर०-सक०-सेट्।) पद्मसुन्दरी। र, वृण्टयते। क, वृण्टयति। छित्तिर्हिंसा। इति दुर्गादास:॥

वृ(वृ)द्धि:, स्त्री, (वृध+क्तिन्।) आत्मनो गुणविशेष:। सा त्रिविधा यथा,—
"प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये।
बन्धं मोक्षञ्च या वेत्ति बुद्धि: सा पार्थ सात्त्विकी॥
यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च।
अयथावत् प्रजानाति बुद्धि: सा पार्थ राजसी॥
अधर्म्मं धर्म्ममिति या मन्यते तमसावृता।
सर्व्वार्थान् विपरीतांश्च बुद्धि: सा पार्थ तामसी॥"
इति श्रीभगवद्गीतायाम् १८ अध्याय:॥

वृ, क च वृतौ। इति कविकल्पद्रुम:॥ (चुरा०-पर०-सक०-सेट्।) क, वारयति। इति दुर्गादास:॥

वृ, ङ ग संभक्तौ। इति कविकल्पद्रुम:॥ (क्र्या०-आत्म०-सक०-सेट्।) संभक्ति: सेवनम्। ङ ग, वृणीते। वृणते हि विम्लष्यकारिणं गुणबुभुक्षा: स्वयमेव सम्पद:। इति दुर्गादास:॥

वृ, ञ वृतौ। इति कविकल्पद्रुम:॥ (भ्वा०-उभ०-सक०-सेट्।) ञ, वरयि वरते। इति दुर्गादास:॥

वृ, न ग ञ वृतौ। इति कविकल्पद्रुम:॥ (स्वा०-क्र्या०-च-उभ०-सक०-सेट्।) न ञ, वृणोति वृणुते। ग ञ, वृणाति वृणीते। वकारस्य दन्त्यत्वात् संवृणोति इत्यादौ नानुस्वारस्य मकार:। ओष्ठ्यत्वाच्च युवुर्वृतीत्यादौ ऋदिरयाविष्यूर्। न च दन्त्यस्य कथमोष्ठ्यकार्य्यमिति वाच्यं यत: स्वभावादोष्ठ्यस्य वकारस्य ओष्ठ्यकार्य्यं स्वाभाविकमेव। क्वचिद्दन्त्यमध्ये पाठ: नञ्चैकवर्णस्योभयस्यानं सम्भवति। इति दुर्गादास:॥

वृंहक:, त्रि, (वृहि+ण्वुल्:।) पुष्टिकारक:। यथा। संयावो वृंहको गुरु:। इति शब्दचन्द्रिका॥

वृंहितं, क्ली, (वृहि+क्त:।) हस्तिगर्জ্জनम्। तत्पर्य्याय:। करिगर्জ্জितम् २। इत्यमर:॥ (यथा, महाभारते। ६। १८। २।
"शङ्खदुन्दुभिघोषेण वारणानाञ्च वृंहितै:।
नेमिघोषेण रथानाञ्च दीर्य्यतीव वसुन्धरा॥")

वृक, ड आदाने। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-सक०-सेट्।) ड, वर्कते। वरोवृक्यते। इति दुर्गादास:॥

वृक:, पुं, (वृणोतीति। वृ+"वृञ्भृञ्मृविसृधिभ्य: कक्।" उणा० ३। ४१। इति कक्।) कुक्कुरप्रमाणहरिणभक्षणशीलप्रियो:। चौंच इति ख्यात:। हुड्डार इति हिन्दी भाषा। तत्पर्य्याय:। कोक:२ ईहामृग:३। इत्यमर:॥ वत्सादन:४ विरुक्५ गोवत्सादी६ छागभोजी७ छागलाजी८ जनाश्रय:९। इति राजनिर्घण्टः॥ (यथा, भागवते। ३। १०। २३।
"त्वा शृगालो वृको व्याघ्रो मार्জ্জार: श्वघ्र-
श्वभक्षकौ॥")
काक:। इत्युत्तरादिकोष:॥ (पोतक:। इत्युत्तरादिटीकाधृतविश्व:। ३। ४१॥) वकवृक्ष:। इति शब्दरत्नावली॥ शृगाल:। इति हारावली॥ (यथा, मनु:। ८। २३५।
"अजाविके तु संरुद्धे वृके: प्राप्ते त्वजायति।
यां प्रसह्य वृको हन्यात् प्राणे तत्र किल्बिषं
भवेत्॥")
"वृके: शृगालप्रभृतिभि:।"इति मेघातिथि:॥) क्षत्रिय:। अनेकधूप:। सरलद्रव:। इति भरतधृतरभस:॥ (तस्कर:। इति निघण्टु:। ३। २४॥* वर्कते ग्रन्थप्राणानादत्ते इति। वृक आदाने+क:। वज्र:। इति निघण्टु:। २। २०॥)

वृकदंशा:, पुं, (वृकान् दशतीति। दंश+अच्।) कुक्कुर:। इति हेमचन्द्र:॥

वृकधूप:, पुं, (वृकोऽनेकधूप: एव धूप:। वृक: सरलद्रवस्तत्प्रधानो धूपो वा।) नानासुगन्धिद्रव्यसंयुतदशाङ्गादिधूप:। तत्पर्य्याय:। कृत्रिमधूपक:२। इत्यमर:॥ वकधूप:३। इति तट्टीका॥ सरलवृक्षरस:। टारपिन् इति भाषा। तत्पर्य्याय:। पायस:२ श्रीवास:३ श्रीवेष्ट:४ सरलद्रव:५। इत्यमर:॥

वृकधूर्त:, पुं, (धूर्त्तो वृक: राजदन्तादित्वात् पूर्व्वनिपात:।) शृगाल:। इति हारावली॥

वृका, स्त्री, अम्बष्ठा। इति रत्नमाला॥

वृकाक्षी, स्त्री, (वृकस्याक्षीव अक्षि चिह्नं यस्या:।) त्रिवृत्। इति रत्नमाला॥

वृकारात:, पुं, (वृकस्यारात:।) कुक्कुर:। इति शब्दमाला॥

वृकारि:, पुं, (वृकस्यारि:।) कुक्कुर:। इति राजनिर्घण्टः॥

वृकी, स्त्री, पाठा। इति राजनिर्घण्टः॥

वृकोदर:, पुं, (वृकस्येवोदरो यस्य। यद्वा, वृक: वृकनामकोऽग्निरुदरे यस्य।) भीमसेन:। तत्पर्य्याय:। भीम:२ मरुत्सुत:३ किर्म्मीरनिसूदन:४ कीचकनिसूदन:५ बकनिसूदन:६ हिडिम्बनिसूदन:७। इति हेमचन्द्र:॥ बकवैरी८ मारुति:९। इति जटाधर:॥ अस्य व्युत्पत्तिर्यथा,—
"कथासु भीमसेनेन परिदृष्ट: प्रतापवान्।
त्वया दृष्टस्य धर्म्मस्य रहस्यस्यास्य भेदनम्॥
भविता स तदा ब्रह्मन् कर्त्ता चैव वृकोदर:।
प्रवर्त्तकोऽस्य धर्म्मस्य पाण्डुसूनुर्महाबल:॥
यस्य तीक्ष्णो वृको नाम जठरे हव्यवाहन:।
मया दत्त: स धर्म्मात्मा तेन चासौ वृकोदर:॥"
इति मात्स्ये ६५ अध्याय:॥

वृक्ण, त्रि, (व्रश्च+क्त:।) छिन्नम्। इत्यमर:॥ (यथा, सांख्यतत्त्वकौमुद्याम्।
"नहि पाणौ वृक्णे सति वा जाते कुमारी कृता-
जाता वेति॥")

वृक्ष, ड वृतौ। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-सक०-सेट्।) सप्तमस्वरी। ड, वृक्षते वरं कन्या। इति दुर्गादास:॥

वृक्ष:, पुं, (व्रश्च छेदने+"वृक्षिस्वपियजिभ्य: कित्।"उणा० ३।६६। इति स:। स च कित्। "वृक्ष वरणे। अतोऽयाद्गोतीति वृक्ष इति सिद्धे प्रपञ्चार्थं ब्रश्चियहणम्।"इति तट्टीकायासुज्ज्वलदत्त:।) स्थावरयोनिविशेष:। गाछ इति भाषा। तत्पर्य्याय:। महीरुह:२ द्रुमो३ विटपी४ पादप:५ तरु:६ अगोकह:७ कुट:८ साल:९ पलाशी१० हु:११ द्रुम:१२ आगम:१३। इत्यमर:॥ अगच्छ:१४ विटप:१५ महीरुट्१६ कुचि:१७ शिर:१८ कारस्कर:१९ नग:२० अग:२१ कुटार:२२। इति शब्दरत्नावली॥ विटप:२३ कुज:२४ वनस्पति:२५ अद्रि:२६ शिखरी२७ कुठ:२८। इति जटाधर:॥ कुञ्ज:२९ क्षितिरुह:३० अङ्घ्रिप:३१ भूरुह:३२ भूज:३३ महीज:३४ धरणीरुह:३५ क्षितिज:३६ शाल:३७। इति राजनिर्घण्टः॥ तस्य बहुजातित्वेन,—
"कुरण्टाद्या अयवीजा मज्जजालूखलादय:।
पर्व्वयोनय इक्ष्वाद्या: खन्यजा: शल्लकीमुखा:॥
शाल्यादयो बीजरुहा: संमूर्চ্ছजास्तृणादय:।
स्नुव्वनस्पतिकायस्य भवेते मूलजातय:॥"
इति हेमचन्द्र:॥
"संखेदजापि विज्ञेया वृक्षगोपगुलञ्जय:।"
इत्यग्निपुराणम्॥
भद्रप्रदवृक्षा यथा,—
श्रीभगवानुवाच।
"आश्रमे नारिकेलश्च गृहिणाञ्च धनप्रद:।
शिविरस्य बदीग्रामे पूर्व्वे पुत्रप्रदस्तरु:॥
सर्व्वत्र मङ्गलार्हश्च तरुराजो मनोहर:।
रक्षालवृक्ष: पूर्व्वस्मिन् वृषो सम्पत्प्रदस्तथा॥
शुभप्रदश्च सर्व्वत्र सुरकारो निशामय।
विल्वश्च पनसश्चैव जम्बीरो बदरी तथा।
प्रजाप्रदश्च पूर्व्वस्मिन् दधिणे धनदस्तथा॥

सम्पत्प्रदश्च सर्व्वत्र यतो हि वर्द्धते सदा।
जम्बूवृक्षश्च दाड़िम्बः कदल्यास्त्रानकस्तथा।
वस्तुप्रदश्च पूर्व्वस्मिन् दक्षिणे मिश्रदस्तथा।
सर्व्वत्र शुभदश्चैव धनपुत्रशुभप्रदः॥
दर्शनप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा।
ईशाने सुखदश्चैव सर्व्वत्रैवं निगद्यते॥
सर्व्वत्र चम्पकः शुद्धो भुवि भद्रप्रदस्तथा।
अलाबूञ्चापि कुष्माण्डो मायामुच्च सुकासुकः॥
खर्ज्जूरी कर्कटी चापि गिरिरे मङ्गलप्रदा।
वार्त्ताकः कारविल्लश्च वार्ताकुश्च शुभप्रदा।
लताफलश्च शुभदः सर्व्वं सर्व्वत्र निश्चितम्॥"
निम्बवृक्षा यथा,—
"प्रशस्तं कथितं कारो! निम्बश्च निगद्यते।
वन्यवृक्षो निम्बश्च गिरिरे नगरेऽपि च।
वटो निम्बः गिरिरे नित्यं चौरभयं ततः।
नगरेषु प्रसिद्धश्च दर्शनात् पुण्यदस्तथा।
हे कारो! तिन्तिड़ीवृक्षो यत्नात्तं परिवर्ज्जयेत्।
गृहेच्च धनहानिः स्यात् प्रजाहानिर्भवेद्ध्रुवम्॥
गिरिरेऽतिनिम्बश्च नगरे किञ्चिदेव च।
न निम्बः प्रसिद्धश्च नगरेषु तथा पुरे।
वाद्यामतिनिम्बश्च प्राज्ञस्तं परिवर्ज्जयेत्।
खर्ज्जूरश्च कदुश्चैव निम्बः गिरिरे तथा।
न निम्बः प्रसिद्धश्च ग्रामेषु नगरेषु च।
वृक्षश्च चम्पकादीनां धान्यश्च मङ्गलप्रदम्॥
ग्रामेषु नगरे चापि गिरिरे च तथैव च।
रक्तवृक्षश्च शुभदः शस्तं शुभदस्तथा॥
अशोकश्च गिरीषश्च कदम्बश्च शुभप्रदः।
कर्ण्णी हरिद्रा शुभदा शुभदश्चार्द्रकस्तथा॥
हरीतकी च शुभदा ग्रामेषु नगरेषु च।
न वार्त्ता भद्रदा नित्यं तथा चामलकी ध्रुवम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अः॥
अपि च।
"अपुत्रस्य च पुत्रत्वं पादपा इह कुर्व्वते।
यत्नेनापि च राजेन्द्र! अश्वत्थारोपणं कुरु॥
स ते पुत्रसहस्राणां कार्य्यमेकः करिष्यति।
धनी चाश्वत्थवृक्षेण अशोकः शोकनाशनः॥
प्लक्षो यज्ञप्रदः प्रोक्तो निम्बश्चासुप्रदः स्मृतः।
जम्बुकी नाकदा प्रोक्ता भार्य्यादा दाड़िमी तथा॥
डुम्बरो रोगनाशाय पलाशो ब्रह्मदस्तथा।
अर्कपुष्पारोपकार्त्ता नित्यं तुष्येद्दिवाकरः॥
श्रीवृक्षः शल्लकी देवः पाटलायान्तु पार्व्वती।
शिंशपायामशोकः कुन्दे गन्धर्व्वसत्तमाः॥
विभीतके दासवृद्धिर्व्वकुलो दासदस्तथा।
अपत्यनाशकस्तालो बकुलः कुलवर्द्धनः॥
बहुभार्य्यो नारिकेली द्राक्षः सर्व्वाङ्गसुन्दरः।
रतिप्रदा तथा केली केतकी सर्व्वनाशिनी।
प्रतिष्ठां ते गमिष्यन्ति ये नराः वृक्षरोपकाः॥"
इति पाद्मे सृष्टिखण्डे वृक्षारोपणं नाम २६ अध्यायः॥* अस्य रोपणफलम्।
यम उवाच।
"वृक्षगुल्मलतावल्लास्तृक्सारास्तृजातयः।
वर्द्धते वृक्षजातीयास्तासां रोपे फलं शृणु।
यः पुमान् रोपयेद्वृक्षान् छायापुष्पफलोपगान्।
सर्व्वसत्त्वोपभोगाय स याति परमां गतिम्॥
छायापुष्पोपगांस्तिंश्च फलपुष्पद्रुमांस्तथा।
रोपयित्वा दशान्वापि नरो न नरकं व्रजेत्॥
देवदानवगन्धर्व्वाः किन्नरोरगगुह्यकाः।
पशुपक्षिमनुष्याश्च संश्रयन्ति सदा द्रुमान्॥
पुष्पैः सुरगणाः सर्व्वे फलैश्च पितरः सदा।
छायया मे मनुष्यास्तु पशुपक्षिण्यगास्तथा।
पुष्पोपगन्धांश्च फलोपगन्धान्
यः पादपान्रोपयते मनुष्यः।
सप्तद्वदेशे वरवेश्मवेद्यां
लभेदधिष्ठानवरं स विप्रः॥
तस्मात् सुवहवो वृक्षा रोप्याः श्रेयोऽभिवाञ्छता।
पुत्रवत् परिपाल्याश्च ते पुत्रा धर्म्मतः स्मृताः॥
किं धर्म्मविसुखैर्म्मर्त्यैः केवलं स्वार्थहेतुभिः।
तरुपुत्रा वरं ये तु परार्थैकानुवृत्तयः॥
पत्रपुष्पफलच्छायामूलवल्कलदारुभिः।
परेषामुपकुर्व्वन्ति तारयन्ति पितामहान्॥
छेत्तारमपि संप्राप्तं छायापुष्पफलादिभिः।
पूजयन्त्येव तरवो सुनिर्द्वेषवर्जिताः॥
पितरं नोपहिंसन्ति द्रुमा द्रविणलोभतः।
तारयन्ति च मे सन्यक् सर्व्वस्मात्तिथ्यदायकाः॥
तस्मात्ते पुत्रवत् स्थाप्या विधिवद्विजपुङ्गव।
द्विजैः पितृमनुष्याणामभोज्याः स्युर्यदा सदा॥
अलक्तृ वृक्षरोपी यः प्रतिग्राहारुचिर्द्विजः।
एते स्वर्गान्न हीयन्ते ये चान्ये सत्यवादिनः॥"
इत्यादौ वह्निपुराणे तड़ागवृक्षप्रशंसानामाध्यायः॥* अपि च।
"भूमिदानेन ये लोका गोदानेन च कीर्त्तिताः।
ते लोकाः प्राप्यते पुंभिः पादपानां प्ररोहणे॥
अश्वत्थमेकं पिचुमर्द्दमेकं
न्यग्रोधमेकं दश पुष्पजातीः।
द्वे द्वे तथा दाड़िममातुलुङ्गे
पञ्चाम्ररोपी नरकं न याति॥
यथा सुपुत्रः कुलमुद्धरेद्धि
यथानिवृत्तस्त्रानियमप्रयत्नात्।
तथाम्र वृक्षाः फलपुष्पभूताः
खं खामिनं नरकाद्धरन्ति॥
गोकर्ण उवाच।
इत्यर्थं यथा नीतमधिष्ठेयं तदुच्यते।
छायाविश्रामपथिकैः पक्षिणां निलयेन च।
पञ्चमूलत्वगादीनां औषधार्थन्तु देहिनाम्॥
उपकुर्व्वन्ति वृक्षस्य पञ्चयज्ञः स उच्यते।
गृहक्षत्यानि कठानि क्षुद्रजन्तुगृहास्तथा।
सन्निर्व्वर्त्तनं प्रोक्तं भिक्षा पञ्चैः समाहृता।
फलन्ति वत्सरे मध्ये द्विवारं ग्राकुनादयः॥
सांवत्सरं पितुर्मातुरुपकारं फलैः कृतम्।
एवं पुत्र समारोप्या एवं तत्त्वविदो विदुः॥"
इत्यादि वाराहपुराणे गोकर्णमाहात्म्यनामाध्यायः॥* अक्षेयवृक्षा यथा,—
"अश्वत्थो वटवृक्षश्च न च्छेत्तव्यः कदाचन।
न च्छेत्तव्यो विल्ववृक्ष उडुम्बरश्च कदाचन।
कर्म्मण्याश्चैव ये वृक्षा न च्छेत्तव्याः कदाचन॥"
इति च वाराहपुराणे ब्राह्मणदीक्षासूत्रं नामाध्यायः॥* वृक्षोत्पाता यथा,—
"पुरेषु येषु दह्यन्ते पादपाश्चैव रोदिताः।
रुदन्तो वा हसन्तो वा स्रवन्तो वा बहूनसून्॥
अरोगा वा विना वातं शाखा सुचन्त्यथ द्रुमाः।
फलं पुष्पं तथा काले दर्शयन्ति हिंशायनाः॥
पूर्व्ववस्थां दर्शयन्ति फलं पुष्पं तथा भवेत्।
क्षीरं क्षेद्रं मदं रक्तं मधु तोयं स्रवन्ति च॥
शुष्यन्त्यरोगाः सहसा शुष्का रोहन्ति वा पुनः।
उत्तिष्ठन्तीह पतिताः पतन्ति च तथोन्नताः॥
एवं वक्ष्यामि ते ब्रह्मन् विपाकफलमेव च।
रोदने व्याधिमभ्येति हसने देशविभ्रमम्॥
शाखाप्रपतने कुर्य्यात् संग्रामे योधपातनम्।
बालानां मरणं कुर्य्याद्बालानां फलपुष्पिता॥
खराद्रुभेदं कुरुते फलपुष्पमनन्तरम्।
क्षयं सर्व्वत्र गोचीरे क्षेद्रे दुर्भिक्षलक्षणम्॥
वाहनापत्यं मद्यं रक्तं संग्राममादिशेत्।
मधुस्रावे भवेद्व्याधिर्जलस्रावे न वर्षति॥
अरोगं शोषणं क्षेयं ब्रह्मन् दुर्भिक्षलक्षणम्॥
शुष्केषु संप्ररोहस्तु वीर्य्यमत्यन्त हीयते।
उत्थाने पतितानाञ्च भयभेदकरं भवेत्॥
स्थानात् स्थानन्तु गमने देशभङ्गस्तथादिशेत्॥
स्खलत्यपि च वृक्षेषु रोदत्सु च धनक्षयम्॥
एतत् पूजितवृक्षेषु सर्व्वं राज्ञो विपद्यते॥
पुष्पे फले वा विज्ञते राज्ञो मृत्युं तथादिशेत्॥
अन्येषु देवयुक्तेषु वृक्षोत्पातेषु मन्त्रितः॥
आच्छादयित्वा तं वृक्षं गन्धमाल्यैर्विभूषयेत्॥
वृक्षोपरि तथा च्छत्रं कुर्य्यात् पापप्रशान्तये॥
शिवमभ्यर्च्चयेद्देवं पशुचाम्ने निवेदयेत्॥
भूतेभ्य इति यद्धोमा हुत्वा वृक्षं जपेत्तथा॥
मध्वाज्ययुक्तेन तु पायसेन
संपूज्य विप्रांश्चतुरश्च दद्यात्।
गीतेन वृक्षेण तथार्च्चनेन
देवं हरं पापविनाशहेतोः॥"
इति मात्स्ये अद्भुतशान्तिवृक्षोत्पातप्रशमनं नाम २०६ अध्यायः॥* अथ वृक्षप्रतिष्ठा।
भीष्म उवाच।
"पादपानां विधिं ब्रह्मन् यथावदिह राद्द।
विधिना येन कर्त्तव्यं पादपोद्यापनं बुधैः।
ये च लोकाः स्मृतास्तेषां तानि चैव वदस्व मे॥
पुलस्त्य उवाच।
पादपानां विधिं वक्ष्ये तथैवोद्यानभूमिषु।
तड़ागविधिवत् सर्व्वं समाप्तिं जगदीश्वर॥
स्नात्वा मखसमाभारं स्नात्वा प्रयतमानसः।
पूजयेद्ब्राह्मणं तद्वद्वस्त्रालङ्कारभोजनैः॥
सर्व्वौषधिजुष्टके सिक्तान्नानापुष्पविभूषितान्।
वृक्षान्मालीरलंकृत्य वाद्यैरभिवेष्टयेत्॥
सूत्रा चैव तथा कार्य्यं सर्व्वेषां कर्त्तवेधनम्।

कुङ्कुमचापि दातव्यं तद्वद्धेमशृङ्गाकया ॥
फलानि सप्त चाष्टौ वा कलधौतानि कारयेत् ।
प्रत्येकं सर्ववृक्षाणां वेद्यां तानधिवासयेत् ॥
धूपयन्तु गुग्गुलुं श्रेष्ठं ताम्रपात्रेरधिष्ठितम् ।
सर्व्वान् धान्यभृतः कृत्वा गन्धमाल्यानुलेपनैः ॥
कुम्भान् स सर्व्ववृक्षेषु स्थापयित्वा व्रती स्वयम् ।
पूजयित्वा दिनान्ते च कुर्य्याद्विज्ञानिमन्त्रणम् ॥
यथा च लोकपालानामिन्द्रादीनां विधानतः ।
वनस्पतेरधिवासमेवं कार्य्यं द्विजातिभिः ॥
ततः शुक्लाम्बरधरः सौवर्णकृतशेखराम् ।
सर्व्वालङ्कारसंयुक्तां गां दद्याच्छुभशालिनीम् ॥
पयस्विनीं वृक्षमध्यादुत्सृजेन्नासदृक्सुखीम् ।
ततोऽभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः ॥
ऋग्यजुःसामाथर्व्वाणां धारकैरभिसंस्तुता ।
तैश्च कुम्भैः संस्नपनं कुर्य्याद्ब्राह्मणपुङ्गवैः ॥
शुक्लाम्बरधरः शुद्धो यजमानः स्वयं जपेत् ।
गोभिर्व्विभवतः सार्व्वानृत्विजस्तु समाहितः ॥
हेमरूप्यैः सकटकैरङ्गुलीयैः पवित्रकैः ।
वासोभिः प्रायणीयैश्च सहोपस्करपादुकैः ॥
क्षीरान्विघैर्व्वलिं दद्यादाबद्धिनचतुष्टयम् ।
होमश्च सर्पिषा कार्य्यो यवैः क्षत्रातिलैरपि ॥
पलाशसमिधः शस्ताश्चतुर्थेऽह्नि तथोत्सवः ।
दक्षिणा च पुनस्तद्वत् श्रेष्ठा तत्रापि शक्तितः ॥
यदृच्छयागतं किञ्चित्तत्तद्दद्यादमत्सरः ।
आचार्य्ये द्विगुणं दत्त्वा प्रतिपत्त्र समापयेत् ॥
अनेन विधिना यस्तु कुर्य्याद्वृक्षोत्सवं सदा ।
सर्व्वान् कामानवाप्नोति तत् तदानन्त्यमश्नुते ॥
यश्चैकमपि राजेन्द्र वृक्षं संस्थापयेद्बुधः ।
सोऽपि स्वर्गे वसेद्राजन् यावदिन्द्राश्चतुर्दश ॥
भूतभव्यांश्च मनुजांस्तारयेदोमसंमितान् ।
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥
य इदं शृणुयान्नित्यं श्रावयेदापि मानवः ।
सोऽपि संपूज्यते देवैर्ब्रह्मलोके महीयते ॥"

इति पाद्मे सृष्टिखण्डे २६ अध्यायः ॥ * ॥

वृक्षच्छेदने दोषो यथा,—
"तस्मान्न च्छेदयेत् वृक्षान् सुपुष्पफलितान् क्वचित् ।
बदीच्छेत् कुलवृद्धिञ्च धनवृद्धिञ्च शाश्वतीम् ।
सन्निधौ देवतानाञ्च शिवेश्वरचितानपि ।
छेदितान्छेदयेल्लोकान् मरकवृक्षिकुक्कुरैः ॥
कृपवृक्षानिर्व्वेच्छौघं चिक्षादृक्षे निपातिते ।
सन्नियोगी हयं याति सौमादृक्षे निपातिते ।
तस्मान्न च्छेदयेद्वृक्षं देवताधिष्ठितं क्वचित् ।
वापीकूपतडागानां छेदने रोधने कृते ।
कुलान्यकुलतां यान्ति नराणां सुदुरात्मनाम् ।
तद्वृक्षं छेदयेद्यस्तु वृक्षान् छायासुशीतलान् ।
असिपत्रवने घोरे पीड्यते यमकिङ्करैः ॥
नगरोपवने वृक्षान् प्रमादाद्यो विनाशति यः ।
स गच्छेन्नरकं नाम कृमिभक्षं रौद्रदर्शनम् ।
विघ्नादिपालनं कुर्य्याच्छुभं भयदमन्यथा ।
श्रीवृक्षानुपयेत् पञ्च यदि स्वर्गान्न हीयते ॥"

इत्याद्ये वह्निपुराणे वास्तुवारामप्रतिष्ठाध्यायः ॥

अथ वृक्षारोपणनक्षत्राणि । श्रुतभिषा मूलं विशाखा मृगशिरः उत्तरफल्गुनी उत्तराषाढा उत्तरभाद्रपत् रोहिणी हस्ता पुष्यः रेवती च ॥*॥
राजमार्त्तण्डे ।
"प्राजेशश्रवणोत्तरादितिमघामार्त्तण्डतिष्याश्विनी-
पौष्णाशुक्रमरीचयः श्रुतभिषा स्वातिर्विशाखा तथा ।
शिवार्केन्द्वसितेन्द्रनन्दनदिने वारे स्थिरस्योदये
शस्यानां वपने भवन्ति लवने शस्ते तिथौ रोपणे ॥*॥
हेमाम्भसा वृक्षबीजं स्नातो मन्त्रेण रोपयेत् ।
वसुधेति सुप्रीतेति पुण्यदेवीति धरेति च ।
नमस्ते सुभगे नित्यं हुमोऽयं वर्द्धतामिति ।"* ॥
अथ वृक्षप्रतिष्ठानक्षत्राणि । पूष्यः अश्विनी ज्येष्ठा पूर्व्वफल्गुनी धनिष्ठा मृगशिरः स्वाती आर्द्रा मघा रोहिणी मूलं हस्ता रेवती अनुराधा श्रवणा पुनर्व्वसुश्च । यथा हि ।
"पुष्याश्विशक्रभगदैवतवासवेषु
चन्द्रानिलेशगुमधरोद्विभमूलहस्ते ।
पौष्णानुराधहरिभेषु पुनर्व्वसौ च
कार्य्याभिषेकतरुभूतपतिप्रतिष्ठा ॥" *॥
अथ विद्धतिथ्यादिः । भविष्ये ।
"प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा ।
दशमी त्रयोदशी चैव पौर्णमासी च कौर्त्तिता ।
सोमो वृहस्पतिश्चैव शुक्रश्चैव तथा बुधः ।
एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठायागकर्म्मणि ॥"

इति ज्योतिस्तत्त्वम् ।

वृक्षकः, पुं, कुटजवृक्षः । इति रत्नमाला । वृक्षमाचष्टे । (यथा, रघुवंशे । ९ । ३० ।
"सिक्तं स्वयमिव स्नेहादन्यमाश्रमवृक्षकम् ।")

वृक्षचरः, पुं, (वृक्षे चरतीति । चर + टः ।) वानरः । इति धनञ्जयः ।

वृक्षच्छायं, क्ली, वकूनां वृक्षाणां छाया । यथा । वृक्षस्य वृक्षयोर्वा छाया वृक्षच्छाया वृक्षच्छायम् । बहुत्वे तु वृक्षच्छायमिति । षष्ठ्याश्छाया बहुनार्थेति क्लीवत्वम् । इति क्षी नपुंसकविज्ञानसंग्रहे भरतः ।

वृक्षधूपः, पुं, श्रीवेष्टः । इति राजनिर्घण्टः ।

वृक्षनाथः, पुं, (वृक्षाणां नाथः ।) वटवृक्षः । इति शब्दरत्नावली ।

वृक्षपाकः, पुं. वटवृक्षः । इति शब्दचन्द्रिका ।

वृक्षभवनं क्ली, (वृक्षस्थितं भवनम् ।) वृक्षकोटरम् । इति शब्दचन्द्रिका ।

वृक्षभक्षा, स्त्री, (वृक्षं भक्षयतीति । भक्ष + अच् । ततष्टाप् ।) वन्दाकः । इति भावप्रकाशः ।

वृक्षभित्, } स्त्री,(वृक्षं भिनत्तीति । भिद् + क्विप् ।)
वृक्षभिद्, } वासौ । इति हेमचन्द्रः ।

वृक्षभेदी, [न्] पुं, (वृक्षं भिनत्तीति । भिद् + णिनिः ।) वृक्षादनः । इत्यमरः । नेहालि इति भाषा । टङ्कः । इति हेमचन्द्रः ।

वृक्षमर्कटिका, स्त्री, (वृक्षस्य मर्कटिका ।) जन्तुविशेषः । काठबिड़ाल इति भाषा । इति केचित् ।

वृक्षरुहः, पुं, (वृक्षरुहि भवतीति । भू + क्विप् ।) जलवेतसः । इति शब्दचन्द्रिका ।

वृक्षवटा, स्त्री, (वृक्षे रोहतीति । रुह + कः । ततष्टाप् ।) वन्दा । इत्यमरः । अश्वत्थवृक्षः । इति राजनिर्घण्टः ।

वृक्षवाटिका, स्त्री, (वृक्षस्य वाटिका ।) आम्रादिगणिकागेहोपवनम् । इत्यमरः ।

वृक्षादनः, पुं, (वृक्षमत्ति नाशयतीति । अद् + ल्युः ।) वृक्षभेदी । इत्यमरः । नेहालि इति भाषा । (यथा, महाभारते । ५ । १५४ । ८ ।
"सकीलकवचाः सर्व्वे बाणी वृक्षादनान्विताः ॥")
अश्वत्थवृक्षः । मधुच्छत्रम् । कुठारः । इति मेदिनी । पियाल; । इति धरणिः ।

वृक्षादनी, स्त्री, (वृक्षमत्तीति । अद + ल्युः । स्त्रियां ङीष् ।) वन्दा । विदारीकन्दः । इति मेदिनी । ने, २१३ ।

वृक्षादिरुहकं, } क्ली, आलिङ्गनम् । इति शब्द-
वृक्षादिरुढ़कं, } माला ।

वृक्षाम्लं, क्ली, (वृक्षस्याम्लम् ।) महाम्लम् । तेन्तुलीति ख्यातम् । इति रायमुकुटः । महादा । इति भरतादयः । अम्लकुटा । इति शब्दसुन्दरी । चुका । इति भानुदीक्षितादयः । तत्पर्य्यायः । तिन्तिड़ीकम् २ चुक्रम् ३ । इत्यमरः । अम्लशाकम् ४ चुक्राम्लम् ५ तिन्तिड़ीफलम् ६ शाकाम्लम् ७ अम्लपूरम् ८ पूराम्लम् ९ रक्तपूरकम् १० चुक्राम्लम् ११ वीजाम्लम् १२ फलाम्लकम् १३ अम्लवृक्षम् १४ अम्लफलम् १५ रसाम्लम् १६ श्रेष्ठाम्लम् १७ अम्लम् १८ अम्लबीजम् १९ चुक्रफलम् २० । अस्य गुणाः । कटुत्वम् । क्षायत्वम् । उष्णत्वम् । कफार्शःकृच्छ्रासमीरोदरकृन्नदादिगुल्मातिसारव्रणदोषनाशित्वञ्च । इति राजनिर्घण्टः । अपि च ।
"वृक्षाम्लमाममम्लोष्णं वातघ्नं कफपित्तलम् ।
पक्वन्तु गुरु संग्राहि कटुकं तुवरं लघु ।
अम्लोष्णं रोचनं रूक्षं दीपनं कफवातजित् ।
वृक्षाम्लीगुडजीशुक्लभूनक्वम्लीगजभुक्तजित् ।"

इति भावप्रकाशः ।

वृक्षाम्लः, पुं, (वृक्षे अम्लो यस्य ।) आम्रातकः । इति शब्दचन्द्रिका ।

वृक्षायुर्व्वेदः, पुं, (वृक्षस्यायुर्व्वेदः ।) तद्विधिप्रतिपादिकशास्त्रम् । तद्यथा,—
धन्वन्तरिरुवाच ।
"वृक्षायुर्व्वेदमाख्यास्ये शक्रयोत्तरतः शुभः ।
प्राग्वटो याम्यतस्त्वाम्रं आग्नेय्यत्थं क्रमेण तु ।
दक्षिणां दिशमुत्पन्ना; समीपे कण्टकद्रुमः ।
उदग्वासे स्थातु तिलान् वाप्यथ
पुष्पितान् ।
शक्रोवाचोपयेद्वृक्षान् द्विजं चक्रं पपूजयेत् ।
पुनाति पञ्च वायव्यं हस्तं प्राजेशवैश्वम् ।

नक्षत्राणि तथा सूर्यं ग्रस्यन्ते हुमरोपये ।
प्रवेशयेन्नदीवाहात् पुष्करिण्यान्तु कारयेत् ।
हत्वा मत्वा तथा मेषमादं पुण्यं सवासवम् ।
जलाश्रयसमारम्भे वारुणक्षोत्तराचयम् ।
संपूज्य वरुणं विष्णुं पर्ज्जन्यं तत् समारभेत् ।
अरिष्टाशोकपुन्नागशिरीषाश्च प्रियङ्गवः ।
अशोककदलीजम्बुस्तथा वकुलदाडिमाः ।
सायं प्रातस्तु धर्म्मार्त्तौ ग्रीतकाले दिनान्तरे ।
वर्षाराने शुचौ क्षेत्रे सेक्तव्या रोपिता इमाः ।
उत्तमं विंशतिर्हस्ता मध्यमं षोड़शान्तरम् ।
स्थानात् स्थानान्तरं कार्य्यं वृक्षाणां द्वादशान्तरम् ।
विफलाः स्युर्घना वृक्षाः सूक्ष्मेऽादौ हि प्रोद्यनम् ।
विड़ङ्गवृतपक्वान्नान् सेचयेच्छीतवारिणा ।
फलनाशे कुलत्थैश्च माषैर्मुद्गैर्यवैस्तिलैः ।
घृतग्रीतपयःसेकः फलपुष्पाय सर्व्वदा ।
आविकाजग्रन्थिचूर्णं यवचूर्णं तिलानि च ।
गोमांसमुदकक्षेत्रे सप्तरात्रं निधापयेत् ।
उत्सेकः सर्व्ववृक्षाणां फलपुष्पादिवृद्धिदः ।
मत्स्याम्भसा तु सेकेन वृद्धिर्भवति शाखिनः ।
विड़ङ्गतण्डुलीपेतं मत्स्यं मांसं हि दोहदम् ।
सर्व्वेषामविशेषेण वृक्षाणां रोहवर्द्धनम् ।"

इत्यग्नेये महापुराणे वृक्षायुर्व्वेदः ॥

(अस्मान्यद्विवरणं बृहत्संहितायां ५५ अध्याये द्रष्टव्यम् ।)

वृक्षार्हा, स्त्री, (वृक्षे अर्हतीति । अर्ह + अच् । टाप् ।) महामेदा । इति राजनिर्घण्टः ॥

वृक्षालयः, पुं, (वृक्ष आलयो यस्य ।) पक्षी । इति शब्दमाला ॥

वृक्षावासः, पुं, (वृक्षे आवासो यस्य ।) वृक्षकोटरवासी । इति केचित् ॥

वृक्षाश्रयी, [न्] पुं, (वृक्षमाश्रयतीति । आ + श्रि + णिनिः ।) क्षुद्रोलूकः । इति राजनिर्घण्टः ॥

वृक्षोत्पलः, पुं, कर्णिकारः । इति रत्नमाला ॥

वृच, ईं ध वृतौ । इति कविकल्पद्रुमः ॥ (रुधा०-पर०-सक०-सेट् । अनिड़निष्ठः ।) ईं, वृक्तः । ध, वृक्ति । वरीवृच्यते । वर्ज्जनार्थोऽयमित्येके । इति दुर्गादासः ॥

वृज, ईं कि त्यागे । इति कविकल्पद्रुमः ॥ (चुरा०-भ्वा० च-पर०-सक०-सेट् । अनिड़निष्ठः ।) ईं, वृक्तः । कि, वर्ज्जयति वर्ज्जति । इति दुर्गादासः ॥

वृज, ईं ध वृतौ । त्यागे । इति कविकल्पद्रुमः ॥ (रुधा० पर०-सक०-सेट् । अनिड़निष्ठः ।) ईं, वृक्तः । ध, वृञ्जक्ति । वरीवृज्यते । इति दुर्गादासः ॥

वृज, ल ड ई त्यागे । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-सक०-सेट् ।) सप्तमस्वरौ । ल, ड, वृड़क्ते । ई, वृञ्जाते । इति दुर्गादासः ॥

वृज, ल ड ईं त्यागे । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-सक०-सेट् । अनिड़निष्ठः ।) सप्तमस्वरौ । ल, ड, वृक्ते । ईं, वृक्तः । इति दुर्गादासः ॥

वृजनं, क्ली, (वृज + "कृवृजीति ।" उणा० २।८१। इति क्युः ।) पापम् । इत्यादिकोषः ॥ आक्रामम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ निराकरणम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (संग्रामः । यथा, ऋग्वेदे । १ । ६३ । ३ ।

"त्वं शुष्णं वृजने पृक्षे ।"

"वृजनं इत्यादीनि त्रीणि संग्रामनामानि अत्र पूर्व्वे विशेषणे वृजने वर्ज्जनयुक्ते संग्रामे हि वीराः पुरुषा वर्ज्जयन्ते हिंसन्ति ।" इति तद्भाष्ये सायणः ॥ बलम् । इति निघण्टुः । २ । ६ ॥ यथा, ऋग्वेदे । १ । १६६ । १५ ।

"विद्यामेषं वृजनं जीरदानुम् ।"

"वृजनं बलम् ।" इति तद्भाष्ये सायणः ॥ प्राणिजातम् । यथा, ऋग्वेदे । १ । ४८ । ५ ।

"जरयन्तौ वृजनं पद्वतीयते ।"

"वृजनं गमनशीलं जङ्गमं प्राणिजातं जरयन्तौ * * * वृजनं वृजी वर्जने । वर्ज्यते इति वृजनं प्राणिजातम् । कृवृजिमन्दिनिधान्भ्यः क्युरिति क्युप्रत्ययः । कित्त्वाल्लघूपधगुणाभावः योरनादेशे प्रत्ययस्वरः ।" तद्भाष्ये सायणः ॥)

वृजनः, पुं, (वृज + क्युः ।) केशः । कुटिले, त्रि । इत्यादिकोषः ॥ (बाधके च त्रि । यथा; ऋग्वेदे । ६ । ३५ । ५ ।

"तमागूनं वृजनमन्यथा चिच्छूरो ।"

"वृजनं बाधकम् ।" इति तद्भाष्ये सायणः ॥)

वृजिः, स्त्री, व्रजभूमिः । इति केचित् ॥

वृजिनं, क्ली, (वृजी वर्ज्जने + "वृजेः किच्च ।" उणा० २ । ४७ । इति इनच् । स च कित् ।) पापम् । इत्यमरः ॥ (यथा, भागवते । १० । २६ । ३८ ।

"तन्नः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलम् ।"

दुःखम् । यथा, तत्रैव । १ । ७ । ४६ ।

"वृजिनं नार्हति प्राप्तुं पूज्यं वन्द्यमभीक्ष्णशः ।"

पापविशिष्टे, त्रि । यथा, महाभारते । २ । २२ । ४ ।

"वृजिनां गतिमाप्नोति श्रेयसोऽप्युपहन्ति च ।")

रक्तचर्म्मे । सुयम् । इति हेमचन्द्रः ॥

वृजिनः, पुं, केशः । कुटिले, त्रि । इति मेदिनी । ने, १३६ । (यथा, ऋग्वेदे । ६ । ४६ । १३ ।

"त्वमग्ने अध्वनि वृजिने पथि क्षेमो देव अवसृतः ।"

"वृजिने कुटिले पथि ।" इति तद्भाष्ये सायणः ॥)

वृञ्, ट भ उ भक्षे । इति कविकल्पद्रुमः ॥ (तना० उभ०-सक०-सेट् । क्रावेट् ।) ट भ, वृणोति वर्णोति वृणुते वर्णुते । उ, वर्णित्वा वृत्वा । इति दुर्गादासः ॥

वृत, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, वर्त्तयति । इति दुर्गादासः ॥

वृत, ड उ व ल वर्त्तने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-स्वसनोः उभ०-अक०-सेट् । क्रावेट् ।) ड, वर्त्तते । उ, वर्त्तित्वा वृत्वा । व, वर्त्स्यति विवृत्सति । ल, अवृतत् । इति दुर्गादासः ॥

वृत, य ड उ सम्भक्तौ । वरणे । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-सेट् । क्रावेट् ।) य ड, वृत्यते । उ, वर्त्तित्वा वृत्वा । सम्भक्तिः सेवनम् । इति दुर्गादासः ॥

वृतः, त्रि, (वृ + क्तः ।) कृतवरणः । तत्पर्य्यायः । वृत्तः २ वावृत्तः ३ । इत्यमरः ॥ (यथा, हरिवंशे । १२७ । १७ ।

"तथा वृत्तवधे प्राप्ते साहाय्यार्थं वृतो मया ।")

आवृतश्च ॥

वृतपत्रा, स्त्री, (वृतानि पत्राण्यस्याः ।) पुत्रदात्री । इति राजनिर्घण्टः ॥

वृतिः, स्त्री, (वृ + क्तिन् ।) वेष्टनम् । तत्पर्य्यायः । वरः २ । इत्यमरः ॥ (यथा,—

"न हि च्छायादानैः पथिकजनसम्भोगविरसं फलैर्वा पुष्पैर्वा न सुरमनुजप्रीणनमपि ।
अरे रे मन्दारद्रुम सहजमेतत्त्वयुचितं वृतीभूतो रक्तस्त्वपरमपरेषां फलमपि ॥"

इत्युद्भटः ॥)

प्रार्थनाविशेषः । इत्यमरः । इति भरतः । वरणम् । इति मेदिनी ॥ गोपनम् । इति शब्दरत्नावली ॥

वृतिकरः, पुं, विकङ्कतवृक्षः । इति शब्दरत्नावली ॥ वृतिकारके, त्रि ॥

वृत्तं, क्ली, (वृत + क्तः ।) चरित्रम् । (यथा, कथासरित्सागरे । ३ । १४ ।

"तत्र तत्पुत्रिकानृ भर्त्तॄन् ध्यायन्त्यः क्लिष्टवृत्तयः ।
आपद्यपि सतीवृत्तं किं सुचन्ति कुलस्त्रियः ॥")

पद्यम् । इत्यमरः ॥ यथा, छन्दोमञ्जर्य्याम् ।

"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ।
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा ।"

वृत्तिः । इति मेदिनी ॥ वेदबोधितस्याचारस्य परिपालनम् । इति वृत्ताध्ययनहेतुग्रन्थटीकायां भरतः ॥ (वार्त्ता । यथा, कथासरित्सागरे । ५८ । ९१६ ।

"न मार्गवृत्तमेतस्मै वाच्यं प्रियसुहृदे त्वया ।"

आचारः । यथा, मनौ । ४ । २६० ।

"अनेन विप्रो वृत्तेन वर्त्तयन् वेदशास्त्रवित् ।
अपेतकल्मषो नित्यं ब्रह्मलोके महीयते ॥")

वृत्तः, त्रि, (वृत् + क्तः ।) अतीतः । (यथा, रामायणे । २ । ६० । ७ ।

"जानन् दशरथं वृत्तं न राजानमुदाहरत् ।"

"वृत्तमतीतम् ।" इति तट्टीका ॥) वृढः । वर्त्तुलः । (यथा, भागवते । ४ । २५ । २४ ।

"स्त्रग्वी बद्धितकेशोरो समवृत्तो निरन्तरौ ।")

छतावरणः । इत्यमरटीका । अधीतः । स्नातः । इति मेदिनी ॥ (निष्पन्नः । यथा, रघुः । ३ । २८ ।

"स वृत्तचूड़ालकाकपक्षकै-
रमात्मपुत्रैः सवयोभिरन्वितः ॥"

जातः । यथा, रघुवंशे । २ । ५८ ।

"सम्बन्धमाभाषणपूर्व्वमाहु-
र्वृत्तः स नौ सङ्गतयोर्व्वनान्ते ।")

अथ वृत्तवस्तूनि । यथा,—
"वृत्तानि बाहुनारङ्गस्कन्धधम्मिल्लमोदकाः ।
रथाङ्गलावकककुत्कुम्भिकुम्भाब्जकादयः ॥
कर्णेषाग्रभुजापाशाक्षरुचापघटाननम् ।
मुद्रिकापरिखायोगपट्टहारसगादयः ॥"*॥
संपूर्णगर्भवृत्तानि यथा,—
"संपूर्णगर्भवित्तानि सुखपद्मेन्दुदर्पणाः ।
चक्रावहृतिलकन्दद्रपुटग्रायकाः ॥
आवर्त्तः कमठो लूताण्डं कूचमपूपकम् ।
आलवालमहीजालचर्म्मकं सागकादयः ॥"
इति कविकल्पलतायाम् २ स्तवके प्रकीर्णं नामैकुसुमम् ॥

वृत्तः, पुं, (स्वार्थे वृत्तः । स्वार्थे कन् ।) कूर्म्मः । इति राजनिर्घण्टः ॥ (नागविशेषः । यथा, महाभारते । १ । ३५ । १० ।
"वृत्तस्तथैको नागौ द्वौ च पद्मावितिश्रुतौ ॥")

वृत्तकर्कटी, स्त्री, (वृत्ता वर्त्तुला कर्कटी ।) वह्वृचा । इति राजनिर्घण्टः ॥

वृत्तगन्धि, क्ली, (वृत्तस्य पद्मस्य गन्धो लोध्र इव गन्धो यस्मिन् ।) गन्धविशेषः । तस्य लक्षणं यथा,—
"भवत्युत्कलिकाप्रायं समासार्द्धं दृढाक्षरम् ।
वृत्तेकदेशसम्बन्धात् वृत्तगन्धि पुनः स्मृतम् ॥"
तस्य उदाहरणं यथा । जय जय जनार्द्दन सुकृतिजनमनस्तड़ागविकसरचरणपद्मपद्मनयन-पद्मापद्मिनीविनोदराजहंसभासुरयशःपटल-परिपूरितभुवनकुहर । हरकमलासनादिदेन्द्रा-रकवृन्दवन्दनीयपादारविन्ददन्दनिर्मुक्तयोगीन्द्र-हृदयमन्दिरावितसुनिरञ्जनज्योतिःस्वरूपनाथ नाथ जगन्नाथ मामनवधिभवदुःखयाकुलं रक्ष रक्ष । इति छन्दोमञ्जर्य्याम् ६ स्तवकः ॥

वृत्तगुडः, पुं, (वृत्तश्चासौ गुडश्च ।) वृत्तविशेषः । तत्पर्य्यायः । वृत्तः १ दीर्घनालः २ जलाश्रयः ३ । द्विधायं एकः स्थूलः द्वितीयो लघुः । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । कफपित्तातिसारदाहरक्त-नाशित्वम् । तेषां मध्ये स्थूलतरस्याधिकगुणत्वञ्च । इति राजनिर्घण्टः ॥

वृत्ततः, [स्] अ, (वृत्त + तसिल् ।) वृत्तेन । यथा,
"अतिग्रहव्यथनक्षेपेष्वकर्णेरि लतीयाद्याः ।
अकर्णेरि लतीयान्तात् वा तसिः स्यात् । अव्यथनं अचलनम् । वृत्तेन न व्यथते वृत्ततो न व्यथते । वृत्तेन न चलतीत्यर्थः । क्षेपे । वृत्तेन क्षिप्तः वृत्ततः क्षिप्तः । वृत्तेन निन्दित इत्यर्थः । क्षीयमाणपापयोगाच्च । क्षीयमाणपापप्रयुक्ताद-कर्णेरि लतीयान्तादा तसिः । वृत्तेन क्षीयते वृत्तेन पापः वृत्ततः । इति सिद्धान्तकौमुदी ॥

वृत्ततण्डुलः, पुं, (वृत्तस्तण्डुलः ।) यावनालः । इति राजनिर्घण्टः ॥

वृत्तनिष्पाविका, स्त्री, नखनिष्पावी । इति राजनिर्घण्टः ॥

वृत्तपर्णी, स्त्री, (वृत्तं वर्त्तुलं पर्णं यस्याः । ङीष् ।) महाशणपुष्पिका । पाठा । इति राजनिर्घण्टः ॥

वृत्तपुष्पः, पुं, (वृत्तं वर्त्तुलं पुष्पं यस्य ।) शिरीषः । कदम्बः । वाणीरः । कुजजः । सुन्दरः । इति राजनिर्घण्टः ॥

वृत्तफलं, क्ली, (वृत्तं वर्त्तुलं फलं यस्य ।) मरीचम् । इति राजनिर्घण्टः ॥ गोलफलमात्रञ्च ॥

वृत्तफलः, पुं, (वृत्तं फलं यस्य ।) दाड़िमः । बदरः । इति राजनिर्घण्टः ॥

वृत्तफला, स्त्री, (वृत्तं वर्त्तुलं फलं यस्याः ।) वार्त्ताकी । शृङ्गाटकी । आमलकी । इति राजनिर्घण्टः ॥

वृत्तबीजः, पुं, (वृत्तं बीजं यस्य ।) भिण्डा । इति राजनिर्घण्टः ॥

वृत्तबीजका, स्त्री, (वृत्तं वर्त्तुलं बीजं यस्याः । कन् ततष्टाप् ।) प्राकुरफली । इति राजनिर्घण्टः ॥

वृत्तबीजा, स्त्री, (वृत्तं बीजं यस्याः ।) आढ़की । इति राजनिर्घण्टः ॥

वृत्तमल्लिका, स्त्री, (वृत्ता मल्लिकेव ।) श्वेताकः । मोदिनी । इति राजनिर्घण्टः ॥

वृत्तस्थः, त्रि, (वृत्त + स्था + कः ।) वृत्ते तिष्ठति यः । यथा, मनुः ।
"गुरौ वृत्तं समाप्याय ब्रह्मचर्य्यं गुरौ स्थितः ।
वेदमेवाधीयानो वृत्तस्थे मूले श्रेयस्तु वीदृशः ॥"
वृत्तं यथा,—
"गुरुपूजा दया शौचं सत्यमिन्द्रियनिग्रहः ।
प्रवर्त्तनं हितानाञ्च तत् सर्व्वं वृत्तमुच्यते ॥"
इति गोपालपचाननधृतस्मृतिसंग्रहः ॥

वृत्ता, स्त्री, भिण्डिरिटाख्यः । रेणुका । प्रियङ्गुः । मांसरोहिणी । इति राजनिर्घण्टः ॥

वृत्ताध्ययनर्द्धिः, स्त्री, (वृत्ताध्ययनयोर्द्धिः ।) ब्रह्मवर्च्चसम् । इत्यमरः । वेदबोधितस्याचारस्य परिपालनं वृत्तम् । व्रतयज्ञपूर्व्वकं गुरुमुखेन वेदाभ्यासः अध्ययनम् । तयोर्द्धिरित्यनेन परि-पालनजततेजस उपचयो ब्रह्मवर्च्चसं स्यात् । ब्रह्महस्तिराजेति अः । इति भरतः ॥

वृत्तान्तः, पुं, संवादः । तत्पर्य्यायः । वार्त्ता २ प्रवृत्तिः ३ उदन्तः ४ । इत्यमरः ॥ श्रुतिः ५ । इति जटाधरः ॥ उदन्तकः ६ । इति शब्द-रत्नावली ॥ (यथा, कथासरित्सागरे । २।२६ ।
"सर्व्वमाजन्म वृत्तान्तं विस्तरादिदमब्रवीत् ॥")
प्रक्रिया । कार्त्स्न्यम् । वार्त्ताप्रभेदः । प्रस्तावः । इति मेदिनी । (यथा, मनौ । ३ । १४ ।
"न ब्राह्मक्षत्रियस्यैरा प्यापि हि तिष्ठतोः ।
कस्मिंश्चिदपि वृत्तान्ते सूद्रा भार्य्योपदिश्यते ॥"
"वृत्तान्ते इतिहासाख्याने ॥" इति कुल्लूक-भेधातिथी ॥) अवसरः । भावः । एकान्त-वाचकः । इति विश्वः ॥

वृत्तिः, स्त्री, (वृत + क्तिन् ।) जीविका । इत्यमरः ॥ (यथा, मनौ । ४ । २५६ ।
"एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शास्त्रतो ॥")
विवरणम् । (यथा, कालिके । "कृत्यस्यार्थ-विवरणं वृत्तिः ॥") कौमिल्यादिः । प्रवर्त्तनम् । इति मेदिनी ॥ (यथा, शाकुन्तले । ४ ।
"उत्पक्ष्मणोर्नयनयोरपरूढवृत्तिं
बाष्पं कुरु स्थिरतया विरतानुबन्धम् ॥")
विश्रुतिः । इति धरणिः ॥ * ॥ कौमिल्यादि-वृत्तयो यथा,—
"शृङ्गारे कौशिकी वीरे सात्वत्यारभटी पुनः ।
रसे रौद्रे च वीभत्से वृत्तिः सर्व्वत्र भारती ।
चतस्रो वृत्तयो ह्येताः सर्व्वनाट्यस्य मातृकाः ॥"
इति साहित्यदर्पणे ६ परिच्छेदः ॥
वृत्तिहरणे दोषा यथा,—
श्रीनारायण उवाच ।
"ब्रह्मदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत् यः ।
स कृतघ्न इति ज्ञेयः फलं तस्य शृणु भूमिप ! ॥
यावन्तो रेणवः सिक्ता विधातुं नैव शक्यते ।
तावद्वर्षसहस्राणि वृत्तघ्नोऽपि च तिष्ठति ॥
तस्माद्धारश्च तद्ग्राह्यं यागश्च तस्मद्भवेत् ।
तस्माद्धारे च यत्नं साद्रितो यमकिङ्करैः ॥
तद्दत्तं च महापापी विड्यां जायते कृमिः ।
षष्टिवर्षसहस्राणि दिवसानेन भारते ।
ततो भूमिविहीनश्च प्रजाहीनश्च मानवः ।
दरिद्रः क्षयगो रोगी मूढो निन्द्यस्ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे ६६ अध्यायः ॥
(व्यवहारः । यथा, मनौ । २ । २०५ ।
"गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ॥")
वर्त्ततेऽस्मिन्निति वृतुप्रत्ययात् । आधेयः । यथा, ज्ञानिप्रत्यके । १ । "साध्याभावेऽवृत्तित्वम् ॥"
यथा च भाषापरिच्छेदे ।
"सिद्धाधिधिया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥"
चित्तस्यावस्थाविशेषः । यथा, पातञ्जले । २ ।
"योगश्चित्तवृत्तिनिरोधः ॥" "चित्तवृत्तिप्रकारास्तु तत्रैव द्रष्टव्याः ॥ * ॥ व्यापारः । यथा, सांख्य-तत्त्वकौमुद्याम् । ५ ।
"अर्थवत्त्वेऽप्यस्य इन्द्रियस्य वृत्तौ सत्यां तमो-ऽभिभवे यः सत्त्वसुद्रेकः ॥" युक्तार्थः । यथा, कातन्त्रव्याकरणादौ ।
"कारकप्रतियोगित्वं यद्यदन्यदपेक्षते ।
अपेक्षैकत्ववाचित्वाद्वृत्तिस्तत्र तु नेष्यते ॥")

वृत्तिस्थः, पुं, (वृत्तये तिष्ठतीति । स्था + कः ।) खरटः । इति राजनिर्घण्टः ॥ वृत्तौ तिष्ठति, त्रि ॥

वृत्तेर्ब्बीजः, पुं, (वृत्तो वर्त्तुल इर्ब्बीजः ।) वह्वृचा । इति राजनिर्घण्टः ॥

वृत्तं, त्रि, वरणीयम् । वृतधातोः क्तया वृण-धातोश्च क्तपृतुक्प्रत्ययाभ्यां निष्पन्नमिदम् । इति सिद्धान्तकौमुदी ॥

वृत्र(त्रं)त्रः, पुं, (वृतृ + "स्फायितञ्चिवञ्चीति।" उणा० २ । १३ । इति रक् ।) अन्धकारः । शत्रुः । (यथा, ऋग्वेदे । ७ । ४८ । २ ।
"इन्द्रेण युजा तरुषेम वृत्रम् ।"
"वृत्रं शत्रुम् ।" इति तद्भाष्ये सायणः ॥)
दानवविशेषः । स तु त्वष्टृपुत्र इन्द्रेण हतः । इत्यमरः ॥ (यथा, हरिवंशे । १२७ । १७ ।

"तथा वृत्रवधे प्राप्ते साहाय्यार्थं वृतो मया ।"
अस्य विशेषविवरणन्तु देवीभागवते षष्ठस्कन्धे १ अध्यायमारभ्य द्रष्टव्यम् । * ।) मेघः । (यथा, ऋग्वेदे । ३ । ३३ । ६ ।
"इन्द्रो अस्मा अरदद्वज्रमाहु-
रपाहन् वृत्रं परिधिं नदीनाम् ।"
"वृत्रं वृणोति आकाशमिति वृत्रो मेघस्तं मेघमपाहन् जघान ।" इति तद्भाष्ये सायणः ।)
पर्व्वतविशेषः । इति मेदिनी । इन्द्रः । इति विश्वः । ग्रन्थिः । इति विद्वान्तकौमुद्यामुणादिवृत्तिः ।

वृत्रहन्, [न्] पुं, (वृत्रं हंतीति । हन् + क्विप् ।) इन्द्रः । इति हेमचन्द्रः ।

वृत्रभोजनः, पुं, गवयोरः । समठ इति ख्यातः । इति शब्दचन्द्रिका ।

वृत्रहा, [न्] पुं, (वृत्रं हतवान् । हन् + "ब्रह्मभ्रूणवृत्रेषु क्विप् ।" ३ । २ । ८७ । इति क्विप् ।) इन्द्रः । इत्यमरः । (यथा, भागवते । ६ । ७ । १६ ।
"अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाह वृत्रहा ।"
यथा च ऋग्वेदे । १ । १०१ । ६ ।
"इन्द्रं कुत्सः वृत्रहत्यं ग्रभीपतिम् ।"
"वृत्रहत्यं वृत्राणां ग्रभूणां हन्तारम् ।" इति तद्भाष्ये सायणः ।)

वृत्रारिः, पुं, (वृत्रस्यारिः ।) इन्द्रः । इति वृत्रायुधः ।

वृथा, अ, निरर्थकः । तत्पर्य्यायः । मृषा २ अर्थकम् ३ अविधिः ४ । इत्यमरः । यथा,—
"अदत्तग्राहिको यामो अदासीकश्च यद्गृहम् ।
अनाद्यभोजनं यच्च वृथा तद्धि मे मतिः ।"
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ।
अपि च ।
"वृथा वृष्टिः समुद्रस्य वृत्तस्य भोजनं वृथा ।
वृथा दानं सन्तृप्तस्य नीचस्य सुकृतं वृथा ।"
इति गारुडे ११५ अध्यायः ।

वृथाजन्मन्, [न्] क्ली, (वृथा निरर्थकं जन्म ।) निरर्थकजननम् । यथा,—
"वृथा जन्मानि चत्वारि वृथा दानानि षोड्श ।
तान्यहं संप्रवक्ष्यामि यथावदनुपूर्व्वशः ।
अपुत्रस्य वृथा जन्म धर्म्महीना नराः सदा ।
परपाकं सदाश्नन्ति परतापरताश्च ये ।"
इत्यादौ वह्निपुराणे दानावस्थानिर्णयनामाध्यायः । अपि च ।
"येन श्रुतं भागवतं पुराणं
नाराधितो यैः पुरुषः प्रधानम् ।
मुखे हुतं येन नरामराणां
तेषां वृथा जन्म नराधमानाम् ।"
इति पुराणम् ।

वृथादानं, क्ली, (वृथा निरर्थकं दानम् ।) निष्फलदानम् । तत् षोड्शविधम् । यथा,—
"देवपित्रविहीनं यदीश्वरेभ्यः सदोषतः ।
दत्तायुर्व्वीर्य्यनाशेन वैदाग्निव्रतत्यागिने ।
अन्यायोपार्ज्जितं दानं वृथा ब्रह्महत्ये तथा ।
गुरवेऽनृतवक्त्रा यः स्तेनाय पतिताय च ।
क्षतघ्नाय च यद्दत्तं सर्व्वदा ब्रह्मविद्विषे ।
पाचकाय च सर्व्वस्य हव्यानां पतये तथा ।
परिचारकाय भृत्याय सर्व्वत्र पिशुनाय च ।
इत्येतानि तु राजेन्द्र वृथादानानि षोड्श ।"
इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः ।
अन्यच्च । आयुर्मार्गेण यद्दत्तं तत् सप्तविधमपि पुनर्नापहरणीयम् । यत् पुनरन्यायेन दत्तं तद्दत्तं षोड्शमपि प्रत्याहरणीयमेव । इत्यर्थादुक्तं भवति । नारदेन च ।
"दत्तं सप्तविधं प्रोक्तमदत्तं षोड्शात्मकम् ।"
इति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विहृतम् ।
"पथ्यमूलं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः ।
स्त्रीमुल्कात्तुष्टहार्थेच दत्तं दानविदो विदुः ।
अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः ।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ।
बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्ज्जितम् ।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत् ।
अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते ।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतम् ।"
इति मिताक्षरा ।

वृथामांस, क्ली, (वृथा निरर्थकं मांसम् ।) देवपित्रुद्दिष्टमांसम् । तद्भक्षणे प्रेतत्वं भवति । यथा,
"वृथारेता वृथामांसो वृथावादी वृथामतिः ।
निन्दको द्विजदेवानां च प्रेतो जायते नरः ।"
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ।

वृद्ध, क्ली, श्लेष्मजनामगन्धद्रव्यम् । इत्यमरः ।

वृद्धः, पुं, वृद्धदारकः । इति राजनिर्घण्टः ।

वृद्धः, त्रि, (वृधु वृद्धौ + क्तः । "वस्व विभाषा ।" ७ । २ । १५ । इति नेट् ।) गतयौवनः । प्रवृद्धः । (यथा, मनुः । २ । १५६ ।
"न तेन वृद्धो भवति येनास्य पलितं शिरः ।
यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः ।")
पलितः । इति मेदिनी । आद्यस्य पर्य्यायः । प्रवया: २ स्थविरः ३ जीर्णः ४ जीर्त्तः ५ जरन् ६ । इत्यमरः । यातयामः ७ जर्जरः ८ । इति राजनिर्घण्टः । पलितः । इति जटाधरः ।

वृद्धकाकः, पुं, (वृद्धः काकः ।) काकविशेषः । दाँड़काक इति भाषा । तत्पर्य्यायः । द्रोणकाकः २ दग्धकाकः ३ क्षयकाकः ४ पर्व्वतकाकः ५ वनाश्रयः ६ काकोलः ७ । इति हेमचन्द्रः ।

वृद्धगङ्गा, स्त्री, (वृद्धा गङ्गा ।) नदीविशेषः । बुड़ीगङ्गा इति ख्याता । यथा,—
"अस्ति नाटकशैले तु सरो मानससन्निभम् ।
यत्र सार्द्धं शैलपुत्र्या जलक्रीड़ां सदा हरः ।
कुरुते नरशार्दूल सर्व्वपङ्कजशोभिते ।
तस्य पश्चाच्चपूर्व्वभागेभ्यश्च सरिच्छ्रयम् ।
अवतीर्य्य प्रयात्येव दक्षिणं सागरं प्रति ।
तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया ।
हिमाद्रेः शैलसंजाता: तेन दिक्करिका स्मृता ।
मध्यभागात् स्रुता या तु शृङ्गेरेवावतारिता ।
वृद्धगङ्गाह्वया सा तु गङ्गैव भवदाविनी ।
या निःसृता पूर्व्वभागात्तस्माद्गिरिवरान्नदी ।
सर्व्वयोनेति विख्याता सा गङ्गासदृशी मता ।"
इति कालिकापुराणे कामरूपपीठनिर्णयनाम ८२ अध्यायः ।

वृद्धत्वं, क्ली, (वृद्ध + त्व ।) वृद्धस्य भावः । तत्पर्य्यायः । स्थाविरम् २ । इत्यमरः । वार्द्धक्यम् ३ वार्द्धकम् ४ । इति शब्दरत्नावली । (यथा, रघुः । १ । २१ ।
"अनाद्यस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्म्मरतेरासीद्वृद्धत्वं जरसा विना ।")
बाल्यादेरवधिमाह सुश्रुतः ।
"बयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा ।
ऊनषोड़शवर्षन्तु नरो बाल्ये निगद्यते ।
त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथान्नभुक् ।
दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्वयम् ।
तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधा मतः ।
मध्ये षोड़शसप्तत्योर्मध्यमः कथितो बुधैः ।
चतुर्धा मध्यमं प्राहुर्युवा दार्ढ्यगतो मतः ।
चत्वारिंशत्समा यावत्तिष्ठेद्धीर्य्यादिपूरितः ।
ततः क्रमेण वीर्य्यः स्यादृद्धावस्थति सन्निधः ।"
वीर्य्यादीत्यादिशब्देन रसादिसर्व्वधात्विन्द्रियबलोत्साहा उच्यन्ते । वीर्य्यः सर्व्वधात्विन्द्रियबलोत्साहैर्हीनः ।
"ततस्तु सप्ततेरूर्द्धं वीर्य्यधातुरसादिकः ।
वीर्य्यमांसेन्द्रियबलः वीर्य्यरेता दिने दिने ।
वलीपलितखालित्ययुक्तः कर्म्मसु चाक्षमः ।
कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः ।
बाल्ये विवर्द्धते श्लेष्मा पित्तं स्वाम्लमध्यमे-
ऽधिकम् ।
वार्द्धक्ये वर्द्धते वायुर्विपर्य्येतदुपक्रमेत् ।"
उपक्रमेत् चिकित्सेत् । तन्त्रान्तरे तु ।
"बाल्यं वृद्धिश्च विर्मेधा त्वग्दृष्टिः शुक्रविक्रमौ ।
बुद्धिः कर्म्मेन्द्रियं चेष्टा जीवितं दृश्यते दृशेत् ।"
इति भावप्रकाशः ।

वृद्धदारकः, पुं, (वृद्धो दारको बालक इव यस्मात् ।) वीरतालकवृक्षः । इति भरतः । विहड़क् इति बीजताड़का इति च बङ्गभाषा । विधारा इति हिन्दीभाषा । तत्पर्य्यायः । ऋक्षगन्धा २ क्षुरलाङ्गी ३ आवेगी ४ क्षुद्रः ५ । इत्यमरः । ऋक्षगन्धा ६ क्षुरताड़ी ७ क्षुरला ८ अम्बी ९ क्षुद्रा १० । इति तट्टीका । क्षुरली ११ क्षुद्रकः १२ श्यामः १३ । इति जटाधरः । ऋक्षगन्धा १४ क्षुरलान्निका १५ । इति शब्दरत्नावली । दीर्घवालुका १६ क्षुरलान्निका १७ वृद्धः १८ कोटरपुष्पी १९ अजान्ती २० वृद्धदारु २१ । यत्रान्तरे कोटरपुष्पीस्थाने वृद्धकोटरपुष्पीति पाठः । अस्य गुणाः । मौक्ष्ण्यम् । पिच्छिलत्वम् । कफवातकासामदोषनाशित्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः । अन्यच्च ।
"रसायनो वृद्धदारुः श्लेष्मवातामनाशनः ।"
इति राजवल्लभः ।

वृद्धदारु, क्ली, (वृद्धत्वनाशकं दारु यस्य।) वृद्धदारुकवृक्षः। यथा, राजनिर्घण्टे।
"वृद्धदारुदयं गौल्यं पिच्छिलं कफवातनुत्।
वल्यं कासामदोषघ्नं हितीयं स्वल्पवीर्य्यदम्॥"

वृद्धनाभिः, त्रि, (वृद्धः प्रवृद्धो नाभिर्यस्य।) उन्ननाभिः। गोड़नाभियुक्तव्यक्ति इति भाषा। तत्पर्य्यायः। तुङ्गिलः २ तुङ्गिभः ३। इत्यमरः॥

वृद्धप्रपितामहः, पुं, (प्रपितामहाद्वृद्धः।) प्रपितामहतातः। इति शब्दरत्नावली। तत्र कन्यायाः सपिण्डता नास्ति। यथा। तेनात्मपञ्चमे वृद्धप्रपितामहे सापिण्ड्यं निवर्त्तते इति प्रतिपादितम्। अतएव प्रपितामहभ्राता ततसन्ततिभिः सह सापिण्ड्याभावात् कन्याजननमरणयोस्तेषां सपिण्डाशौचं नास्ति किन्तु समानोदकनिमित्तमेवाशौचमिति। इति शुद्धितत्त्वम्॥

वृद्धबला, स्त्री, (वृद्धा बला।) महाबलङ्गा। इति राजनिर्घण्टः॥

वृद्धराजः, पुं, अम्लवेतसः। यथा,—
"अम्लश्चो वृद्धराजश्च द्वावेतौ तत्र कीर्त्तितौ॥"
इति केचित्॥

वृद्धवाहनः, पुं, आम्रवृक्षः। यथा। सुपक्को वृद्धवाहनः। इति केचित्॥

वृद्धविभीतकः, पुं, (वृद्धः प्रवृद्धो विभीतक इव।) आम्रातकः। इति शब्दमाला॥

वृद्धश्रवाः, [स्] पुं, (वृद्धात् वृद्धस्यते: श्रवोतीति। श्रु+असुन्।) "वृद्धेभ्यः श्रवोतीति वृद्धश्रवाः।" इत्युज्ज्वलदत्तः। ४। २२६। "वृद्धं प्रभूतं श्रवः श्रवणं स्तोत्रं हविर्लक्षणमन्नं वा यस्य।" इति ऋग्भाष्ये सायणः। १। ८६। ६। "वृद्धं श्रवो धनं कीर्त्तिर्वा यस्य।" इति वेददीपे महीधरः। १०। ६।) इन्द्रः। इत्यमरः॥

वृद्धसंघः, पुं, वृद्धानां समूहः। तत्पर्य्यायः। वार्द्धकम्। इत्यमरः। २। ६। ४०॥

वृद्धसूचकं, क्ली, (वृद्धस्य सूचकम्। ततः स्वार्थे कन्।) इक्षुतूलम्। बुड़ीर खता इति भाषा। यथा, हारावल्याम्।
"वृद्धसूचकमिक्षुरिक्षुतूलं मनीषिभिः।
शीघ्रहारं वंशकर्पं वाततूलं मरुद्भवम्॥"

वृद्धा, स्त्री, (वृद्ध+टाप्।) गतयौवना। बुड़ी इति भाषा। तत्पर्य्यायः। पलिक्नी २। इत्यमरः॥ पलिता ३। इति भरतः॥ स्थविरा ४ निष्कला ५ जरती ६ गतार्त्तवा ७। इति राजनिर्घण्टः॥ तदवस्थाकालो यथा,—
"आषोड़शाब्दवेद्वाला तरुणी त्रिंशता मता।
पञ्चपञ्चाशतः प्रौढ़ा वृद्धा भवति तत्परम्॥"
इति कालिदासः॥ *॥

अपि च।
"बालेति गीयते नारी यावद्वर्षाणि षोड़श।
ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि।
तदूर्द्धमधिरूढ़ा स्यात् पञ्चाशद्वत्सरावधि।
वृद्धा तूत्परतो ज्ञेया सुरतोत्सवर्जिता॥"
इति भावप्रकाशः॥ *॥

तस्याः सम्भोगे दोषो यथा,—
"बाला तु प्राणदा प्रोक्ता युवती प्राणहारिणी।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत्॥
निदाघशरदोर्मध्याला प्रौढ़ा वर्षावसन्तयोः।
हेमन्ते शिशिरे योग्या न वृद्धा कापि शस्यते॥
नार्त्तवे षोड़शाद्वर्षात् सप्तत्या: परतो न च।
आदुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति॥
पञ्चपञ्चाशतो नारी सप्तसप्ततितः पुमान्।
द्वावेतौ न प्रशस्येते प्रशस्येते विपर्य्ययात्॥"
इति राजवल्लभः॥ *॥

"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि।
प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट्॥"
इति चाणक्यम्॥ *॥

अक्रूरः। इति शब्दरत्नावली। महाश्रावणिका। इति राजनिर्घण्टः॥

वृद्धाङ्गुलिः, स्त्री, (वृद्धा अङ्गुलिः।) हस्तपादयोः स्थूलाङ्गुलिः। बुड़ आङ्गुल इति भाषा। तत्पर्य्यायः। अङ्गुष्ठः २ वृद्धा ३। इति शब्दरत्नावली॥

वृद्धिः, स्त्री, (वृध+क्तिन्।) अष्टवर्गान्तर्गतौषधविशेषः। तत्पर्य्यायः। योग्या २ ऋद्धिः ३ सिद्धिः ४ लक्ष्मीः ५। इत्यमरः॥ युष्टदा ६ वृद्धिदात्री ७ मङ्गल्या ८ श्रीः ९ सम्पत् १० आप्तीः ११ जनेष्टा १२ भूतिः १३ सुत् १४ सुखम् १५ जीवभद्रा १६। अस्या गुणाः।
"ऋद्धिर्वृद्धिश्च मधुरा सुस्निग्धा तिक्तशीतला।
रुचिमेधाकरी श्लेष्मकुष्ठक्रिमिहरा परा॥
प्रयोगेऽनयोरेकं यथालाभं प्रयोजयेत्।
तत्र यद्दातुमिष्टिः स्यात्तदयमत्र योजयेत्॥"
इति राजनिर्घण्टः॥ *॥

ऋद्धिवृद्धोरुत्पत्तिलक्षणनामगुणाः।
"ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोशयामलौ।
श्वेतलोमान्वितः कन्दो जतावातः सरन्धकः॥
स एव ऋद्धिर्वृद्धिश्च भेदमप्येतयोर्ज्ञवे।
तूलयन्थिसमा ऋद्धिर्वार्षावर्त्तफला च सा।
वृद्धिस्तु दन्तिजावर्त्तफला प्रोक्ता महर्षिभिः।
ऋद्धिर्योग्या सिद्धिलक्ष्मी वृद्धेरप्यनुजा इमे।
ऋद्धिर्वल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः।
प्राणैश्वर्य्यकरी मूर्च्छारक्तपित्तविनाशिनी।
वृद्धिर्गर्भप्रदा शीता वृंहणी मधुरा स्मृता।
तृष्णा पित्तास्रशमनी क्षतक्षयविषापहा॥
राज्ञामप्यष्टवर्गस्तु मतोऽयमतिदुर्लभः।
तस्मादस्य प्रतिनिधिं शास्त्रोक्तादृद्युधं भिषक्।"
सुश्रुतस्तद्यथः प्रतिनिधिः।*। एतस्य प्रतिनिधिमाह।
"मेदा जीवककाकोली ऋद्धिवृद्ध्योश्च यावति।
वरीविदार्य्यश्वगन्धावाराहीश्च क्रमात् क्षिपेत्॥"
मेदा महामेदास्थाने शतावरीमूलं जीवकर्षभकस्थाने विदारीमूलं काकलीक्षीरकाकोलीस्थाने ऽश्वगन्धामूलं ऋद्धिवृद्धिस्थाने वाराहीकन्दं गुडैस्तुल्यं क्षिपेत्। इति भावप्रकाशः॥ *॥
नीतिवेदिनां चयादिचिवर्गान्तर्गतवर्गविशेषः। इत्यमरः॥ नीतिवेदिनां नीतिशास्त्रज्ञानां चयादिभिस्त्रिवर्गः। अन्येषान्तु धर्म्मकामार्थः पूर्व्वसूक्तः। अष्टवर्गस्यापचयः क्षयः। तस्येवोपचयो वृद्धिः। तस्य नोपचयो वाप्यपचयः स्थानम्। अष्टवर्गो यथा,—
"ऋद्धिर्वृद्धिश्च पथो दुर्गं सेतुः कुञ्जरबन्धनम्।
कन्याकरबलादानं सैन्यानाञ्च निवेशनम्॥
अष्टवर्गः स्मृतो राज्ञामिति भरतः॥ *॥
वर्द्धनम्। तत्पर्य्यायः। स्फातिः २। इत्यमरः॥ (यथा, मनुः। १२। १२४।
"एष सर्व्वाणि भूतानि पञ्चभिर्याप्य मूर्त्तिभिः।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत्॥")
विष्कम्भादिसप्तविंशतियोगान्तर्गतेऽष्टाविंशयोगः। तत्र जातफलं यथा,—
"प्रस्तुतिकाले यदि वृद्धियोगो
नरः सुभोगो विनयान्वितश्च।
धनप्रयोगग्रहणेषु दक्षो
विचक्षणः स्यात् क्रयविक्रयाभ्याम्॥"
इति कोष्ठीप्रदीपः॥ *॥
कलान्तरम्। सुद् इति भाषा। अभ्युदयः। सम्वृद्धिः। इति मेदिनी॥ (यथा, शिशुपालवधे। १५। १।
"अथ तत्र पाण्डुतनयेन
सदसि विहितं मधुद्विषः।
मानमसहत न चेदिपतिः
परवृद्धिमत्सरिषु मनो हि मानिनाम्॥")
वृद्धिग्रहणनियमो यथा,—
"अग्नीतिभागो वृद्धिः स्यान्मासि मासि सवन्धके।
वर्द्धकमाक्षतं द्विश्चतुष्पञ्चकमन्यथा॥"
मासि मासि प्रतिमासं वन्धकं विश्वासार्थं यदाधीयते आधिरिति यावत्। वन्धकेन सह वर्त्तत इति सवन्धकः प्रयोगस्तस्मिन् सवन्धके प्रयोगे प्रयुक्तस्य द्रव्यस्याग्नीतितमो भागो वृद्धिर्ग्राह्या भवति। अन्यथा वन्धकरहिते प्रयोगे वर्षाणां ब्राह्मणादीनां क्रमेण द्विश्चतुःपञ्चकं शतं धर्म्म्यं भवति। ब्राह्मणेऽधमर्णे द्विकं शतम्। क्षत्रिये त्रिकम्। वैश्ये चतुष्कम्। शूद्रे पञ्चकम्। मासि मासीत्येव। द्वौ वा त्रयो वा चत्वारो वा पञ्च वा इति द्विश्चतुःपञ्चाः। द्विश्चतुःपञ्चानां समाहारो द्विश्चतुःपञ्चकं शतम्। तदस्मिन् वृद्ध्या यल्लाभमुल्कोपदा दीयते इति कन्। इयं वृद्धिर्मासि मासि गृह्यत इति कालिका। एवमेव वृद्धिर्दिवसगणनया विभज्य प्रतिदिवसं गृह्यमाणा कालिका भवति। तथा च नारदेन।
"कालिका कालिका चैव कारिता च तथा परा।
चक्रवृद्धिश्च ग्राह्येषु तस्य वृद्धिचतुर्विधा॥"
इत्युक्तोक्तम्॥
"कालाविरोधिनी ग्रह्यात् पञ्चपादादि कालिका।
प्रतिमासं सवन्धो वा वृद्धिः सा कालिका मता॥
वृद्धिः सा कारिता नाम वन्धिकेन यथं कृता।
वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति॥"

यद्दीक्षतिप्रभेदेन वृद्धेः प्रकारान्तरमाह। कान्तारगास्तु दशकं शासद्रा विंशकं शतम्। कान्तारमरण्यं तत्र गच्छन्तीति कान्तारगाः। ये वृद्धा धनं गृहीत्वा अधिकलाभार्थं अन्यि-गच्छन्तं प्राग्धनविनाशशङ्कयास्थानं प्रविशन्ति ते दशकं शतं ददुः। ये च शासद्रागास्ते विंशकं शतं मासि मासीव्येव। एतदुक्तं भवति कान्तारगेभ्यो दशकं शतं शासद्रेभ्यश्च विंशकं शतं उत्तमर्णं आदद्यात्। मूलविनाशस्यापि ग्रन्थितत्वात् इति। *। इदानीं कारितां वृद्धि-माह।

"ददुर्या स्वकृतां वृद्धिं सर्व्वे सर्व्वासु जातिषु।" सर्व्वे ब्राह्मणादयोऽधमर्णा अन्यत्के सबन्धके वा स्वकृतां स्वाभ्युपगतां वृद्धिं सर्व्वासु जातिषु ददुः। क्वचिदकृतापि वृद्धिर्भवति यथाह नारदः।

"न वृद्धिः प्रीतिदत्तानां खादनाकारिता क्वचित्।
अनाकारितमप्यूर्द्धं वत्सराद्दापिवर्द्धते।" इति।

यस्तु याचितकं गृहीत्वा देशान्तरं गतस्तं प्रति कात्यायनेनोक्तम्।

"यो याचितकमादाय तमदत्त्वा दिशं व्रजेत्।
ऊर्द्धं संवत्सरात्तस्य सद्यं वृद्धिमाप्नुयात्।" इति।

यश्च याचितकमादाय याचितोऽपदत्त्वा देशान्तरं याति तं प्रति तेनैवोक्तम्।

"क्षतोद्धारमदत्त्वा यो याचितस्तु दिशं व्रजेत्।
ऊर्द्धं मासत्रयात्तस्य तद्यं वृद्धिमाप्नुयात्।" इति।

यः पुनः स्वदेशे स्थित एव याचितो याचितकं न ददाति तं याचनकालादारभ्य वृद्धिं दापयेद्-राजा। यथाह।

"स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित्।
तं ततो कारितां वृद्धिमनिच्छन्तञ्च दापयेत्।" इति।

अनाकारितवृद्धेरपवादो नारदेनोक्तः।

"प्रथमन्तु भृतिर्न्यासो दत्तो यच्च प्रकल्पितः।
दानाधिकप्रया वर्द्धन्ते नाविवक्षिताः।
अविवक्षिता अनाकारिता इति। *। अधुना द्रव्यविशेषे वृद्धिविशेषमाह। सन्ततिस्तु प्रसू-क्षीराम्। पशूनां स्त्रीणां सन्ततिरेव वृद्धिः। पशूनां स्त्रीणां दोहवाहसमर्थस्य तत्पुष्टिसन्तति-कामस्य प्रयोगः सम्भवति। यद्दाच्च क्षीर-परिचर्य्यार्थिनः। अधुना प्रयुक्तस्य द्रव्यस्य वृद्धियद्यमन्तरेण चिरकालावस्थितस्य कस्य द्रव्यस्य कियती परा वृद्धिरित्यपेक्षित आह। रसस्याष्टगुणा परा।

"वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा।"

रसस्य तैजसतादेर्वृद्धियद्यमन्तरेण चिर-कालावस्थितस्य स्वकृतया वृद्धया वर्द्धमान-स्याष्टगुणा वृद्धिः परा मातःपरं वर्द्धते। तथा वस्त्रधान्यहिरण्यानां यथासंख्यं चतुर्गुणा; त्रिगुणा द्विगुणा च वृद्धिः परा। वस्त्रादेन तु रसस्य त्रैगुण्यमुक्तम्। द्विगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः पुष्पमूल-फलानि च। तुला वृत्तं चितयमष्टगुणमिति। मदना तु धान्यस्य पुष्पमूलफलादीनाच्च पञ्च-गुणत्वमुक्तम्। "धान्ये शदे लवे वाह्ये नातिक्रा-मति पञ्चतामिति।" शदः क्षेत्रफलं पुष्पमूल-फलादि। लवो मेषोर्णाचमरीकेशादि। वाह्यो बलीवर्दतुरगादि। धान्यशदलववाह्यविषया वृद्धिः पञ्चगुणत्वं नातिक्रामतीति। तत्राधमर्णयोग्य-तावशेन दुर्भिक्षादिकालवशेन च व्यवस्था द्रष्टव्या। एतच्च सकृत्प्रयोगे सकृदाहरणे च वेदितव्यम्। पुरुषान्तरसंक्रमणेन प्रयोगान्तर-करणे तस्मिन्नेव वा पुरुषे अनेकशः प्रयोगा-न्तरकरणे सुवर्णादिकं द्वैगुण्यादितिक्रम्य पूर्व्व-वद्वर्द्धते। सकृत्प्रयोगेऽपि प्रतिदिनं प्रति-मासं प्रतिवत्सरं वा वृद्ध्याहरणेऽधमर्णदेयस्य द्वैगुण्यसम्भवात्। पूर्व्वोक्तवृद्ध्या सह द्वैगुण्य-मतिक्रम्य वर्द्धत एव। यथाह मनुः। कुसी-दवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता। सकृदाहि-तेत्यपि पाठोऽस्ति। उपचयार्थं प्रयुक्तं द्रव्यं कुसीदं तस्य वृद्धिः कुसीदवृद्धिर्द्वैगुण्यं नात्येति नातिक्रामति। यदि सकृदाहिता सकृत्प्रयुक्ता पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे द्वैगुण्यमत्येति सकृदाहृतेति पाठे शनैः शनैः प्रतिदिनं प्रतिमासं प्रतिवत्सरं वाधमर्णादा-हृता द्वैगुण्यं नात्येतीति व्याख्येयम्। तथा गौतमेनाप्युक्तम्। चिरस्थाने द्वैगुण्यं प्रयोग-स्येति प्रयोगस्येत्येकवचननिर्देशात् प्रयोगान्तर-करणे द्वैगुण्यातिक्रमोऽभिप्रेतः। चिरस्थान इति निर्देशात् शनैः शनैर्वृद्धियद्यमे द्वैगुण्याति-क्रमो दर्शितः। इति मिताक्षरा। कुरुक्ष-रोगः। हर्षः। इति हैमचन्द्रः। समूहः। इति शब्दचन्द्रिका। त्रैवेद्यम्। धनम्। इति राजनिर्घण्टः। *।

वृद्धिका, स्त्री, (वृद्धिरेव : स्वार्थे कन्।) वृद्धिना-मौषधम्। इति शब्दमाला।

वृद्धिजीविका, स्त्री, (वृद्ध्या जीविका।) ऋणदान-जीविका। तत्पर्य्यायः। अर्थप्रयोगः २ कुसी-दम् १। इत्यमरः। कलाम्बिका ४। इति शब्दरत्नावली।

वृद्धिदः, पुं, (वृद्धिं ददातीति। दा+कः।) जीवकः। शूकरकन्दः। इति राजनिर्घण्टः। वृद्धिदातरि, त्रि। (यथा, वृहत्संहितायाम्। ५१। १०। "प्राक्प्राग्वया विमुक्तं सुचेलं वृद्धिदं वासु।")

वृद्धिश्राद्धं, क्ली, (वृद्धये यत् श्राद्धम्।) वृद्धिनिमि-त्तकश्राद्धम्। तत्तु अभ्युदयनिमित्तं पित्राद्यृद्धेन अहया अन्नादेर्दानम्। तत् कर्म्मविशेषात् पूर्व्वं कर्त्तव्यं यथा। निर्णयाब्धौ मत्स्यपुराणम्।

"अन्नप्राशे च चौलान्ते पुत्रोत्पत्तिनिमित्तके।
पुंसवने विवाहे च नववेश्मप्रवेशने।
देवदत्तजलादीनां प्रतिष्ठायां विशेषतः।
तीर्थयात्रादशेतुत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितम्।" इलायुधधृतकूर्म्मपुराणम्।

"तीर्थयात्रासमारम्भे तीर्थात् प्रत्यागमेऽपि च।
वृद्धिश्राद्धं प्रकुर्व्वीत बहुवर्षैःसमन्वितम्।"

इति श्राद्धतत्त्वम्।

आभ्युदयिकश्राद्धम्। नान्दीमुखश्राद्धम्। यथा,—

"वृद्धिश्राद्धं प्रवक्ष्यामि पूर्व्वैरुक्तद्विजैरकम्।
जातपुत्रसुखदर्शनादौ वृद्धिश्राद्धम्। पूर्व्वाभि-मुखेन दक्षिणोपवीतिना मधुयवदरकुशै-र्देवतीर्थेन नमस्कारान्तेन दक्षिणोपचारेण कर्त्तव्यम्। दक्षिणजानु गृहीत्वा ॐ अद्या-स्मदीयासुकवृद्धौ असुकसगोत्राणामसुकप्रवि-पितामहप्रपितामह-मातामहप्रमातामहवृद्ध-प्रमातामहानां असुकप्रसर्म्मणां सपत्नीकानां नान्दीमुखानां श्राद्धे कर्त्तव्ये वसुरुद्रादित्यस्वरूपकानां विश्वेषां देवानां श्राद्धे विद्वान्नेन युष्मासु मया कर्त्तव्यमिति देवब्राह्मणामन्त्रणम्। ॐ करिष्य-सीति तैरुक्ते इत्यमेव मातृपितामहीप्रपिता-महीनां देवब्राह्मणामन्त्रणम्। तत ॐ अद्य असुकसगोत्राया मत्प्रपितामह्या असुकीदेव्या नान्दीमुखाः श्राद्धं विद्वान्नेन युष्मासु मया कर्त्तव्यमिति प्रपितामहीब्राह्मणामन्त्रणम्। करिष्यतीति तैरुक्ते इत्यमेव मातामह्यादि-ब्राह्मणामन्त्रणम्। देवपितृसर्व्वदेवब्राह्मणश्राद्ध-करणानुज्ञापनम्। आसने ॐ विश्वेदेवास आगत शृणुतामं हवं ये मे अन्तरीक्षे य उपद्यविष्ट ये अग्निजिह्वा उत वा यजत्रा आ सद्मानि बर्हिषि मादयध्वम्। ॐ आगच्छन्तु इति विश्वेदेवाबाहनं गन्धादिदानं अच्छि-द्रावधारणवाचनम्। ततः प्रपितामहीप्रभृतीनामहज्ञापनम्। आसनम् आवाहनं गन्धादि-दानञ्च। अच्छिद्रावधारणवाचनम्। इत्थं पितामह्या मातुः। ततः प्रपितामहादीनामनुज्ञापनमासनमावाहनं गन्धादिदानम्। एवं वृद्धप्रपितामहादीनां अनुज्ञापनादिकरणम्। ॐ वसुरुद्रादित्यस्वरूपकेभ्यो विश्वेभ्य देवेभ्य एतदर्घं सहतं सपाणीवं सवङ्गुलं सवदरं सदधि प्रति-ष्ठितवर्ज्जितं नमः। इति अन्नकल्पनम्। ॐ असुकगोत्रे मत्प्रपितामहि असुकि देवि नान्दीमुखि एतदर्घं सवदरं सदधि नमः। एवं मातामहप्रमातामहेभ्यः।" इति नारदे २२१ अध्यायः। अन्यच्च।

"तृतीयमाभ्युदयिकं वृद्धिश्राद्धं तदुच्यते।
उत्सवानन्दसम्भारे यशोद्वाहादिमङ्गले।
मातरः प्रथमं पूज्याः पितरस्तदनन्तरम्।
ततो मातामहा राजन् विश्वेदेवास्तथैव च।
प्रदक्षिणोपचारेण दक्षवत्तपसोदकैः।
प्राङ्मुखो निजयेत् पित्र्यान् पूर्व्वया चतुरो युतान्।
सव्यन्नमित्यभ्युदये दद्यादर्घं इयोर्द्वयोः।

युग्मा हि जातयः पूज्याः वल्लकाक्षेखरादिना ।
तिलार्थेन्तु यवैः कार्य्या नान्दीश्राद्धानुपूर्व्वकम् ।
मङ्गलानि च सर्व्वाणि वाचयेत् द्विजपुङ्गवान् ।
एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धञ्च सर्व्वदा ।
नमस्कारेण मन्त्रेण कुर्य्यादामान्नवान् बुधः ॥
दानप्रधानः शूद्रः स्यादित्याह भगवान् प्रभुः ।
दानेन सर्व्वकामाप्तिरस्य संजायते यतः ॥"
इति मात्स्ये साधारणाभ्युदयकौणपो नाम १७ अध्यायः । विस्तारस्तु आह्निकतत्त्वे आह्निकविवेके च द्रष्टव्यः ॥

वृद्धोक्षः, पुं, (वृद्धश्चासौ उक्षा चेति । "अचतुरेत्यादि ।" ५ । ५ । ७७ । इत्यादिना अच् प्रत्ययः ।) वृद्धवृषः । तत्पर्य्यायः । जरद्गवः २ । इत्यमरः ॥ (यथा, कुमारसम्भवे । ५ । ७० ।
"विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः खेरसुखो भविष्यति ॥")

वृद्धाजीवः, त्रि, (वृद्धया आजीवतीति । आ + जीव + अच् ।) वृद्ध्युपजीवी । तत्पर्य्यायः । वार्द्धुषिः २ वार्द्धुषिकः ३ कुषीदः ४ कुषीदिकः ५ । इति शब्दरत्नावली ॥ साधुः ६ । इति जटाधरः ॥

वृध, उ ङ व ल्ट वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० अक० सेट् । क्लावेट् ।) उ, वर्द्धिला वृद्धा । ङ, वर्द्धते जनः । व, वर्त्स्यति विवृत्सति । ल्ट, अवृधत् । इति दुर्गादासः ॥

वृध, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरा० पर० अक० सेट् ।) क, वर्द्धयति । इति दुर्गादासः ॥

वृधवानः, पुं. (वृध + "ऋतृजिवृधीति ।" उणा० २ । ८७ । इत्यनेन असानच् । स च कित् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (वर्द्धनशीले, त्रि । यथा, ऋग्वेदे । २ । २ । ५ ।
"इरिग्निग्रो वृधसानास जर्भुरत् ।"
"वृधसानास प्रवर्द्धमानास ।" इति तद्भाष्ये सायणः । यथा च तत्रैव । ४ । ३ । ६ ।
"कद्दिष्ट्यास वृधसानो
अयै कदहाय प्रतवसे सुभं वो ॥"
"वृधसानः वृताद्याहुतिभिर्वर्द्धमानस्वम् ।" इति तद्भाष्ये सायणः ।)

वृधसानुः, पुं, (वृध + बाहुलकात् असानुच् । स च कित् ।) पुरुषः । पशुम् । क्षतिः । इत्युणादिकोषः ॥

वृध्न, त्रि, (वृध + "ऋदुपधाकृक्लपिवृतिः ।" ३ । १ । ११० । इति क्यप् ।) वर्द्धनीयम् । वृधधातोः क्यप्प्रत्ययेन निष्पन्नमिदम् ॥

वृन्त, क्लो, फलपुष्पपत्रादिर्येन धार्य्यते सतु । वोटा इति भाषा । तत्पर्य्यायः । प्रसववन्धनम् २ । इत्यमरः ॥ (यथा, रघुवंशे । ५ । ६६ ।
"वृन्तच्युतं हरति पुष्पमनोकहानाम् ॥")
घटीधारा । कुचाग्रम् । इति मेदिनी ॥

वृन्ताकः, पुं, वार्त्ताकी । इति शब्दरत्नावली ॥

वृन्ताकी, स्त्री, वार्त्ताकी । इति राजनिर्घण्टः ॥

वृन्तिता, स्त्री, कटुका । इति शब्दचन्द्रिका ॥

वृन्दं, क्लो, (वृन्द् + "अन्दादयश्चेति ।" उणा० ४ । ६८ । इति दन् नुम् गुणाभावश्च निपात्यते ।) समूहः । इत्यमरः ॥ (यथा, भागवते । ३ । २८ । ३० ।
"भृत्या खया कुटिलकुन्तलवृन्दजुष्टम् ॥")

वृन्दः, पुं, दशार्ब्बुदः । शतकोटिरिति यावत् । इति ज्योतिषम् ॥ अस्य नामान्तरं महार्ब्बुदः ॥

वृन्दा, स्त्री, तुलसी । इति शब्दरत्नावली ॥ जलन्धरपत्नी । अस्या विवरणं तुलसीशब्दे द्रष्टव्यम् ॥ केदारराजकन्या । राधाषोड़शनामान्तर्गतनामविशेषः । एतद्विवरणं वृन्दावनशब्दे द्रष्टव्यम् ॥

वृन्दारः, त्रि, मनोज्ञम् । इति शब्दमाला ॥

वृन्दारकः, पुं, (वृन्दमस्यास्तीति । वृन्द + "अङ्गवृन्दाभ्यामारकन् वक्तव्यः ।" ५ । २ । १२२ । इत्यस्य वार्त्तिकोक्त्या आरकन् ।) देवता । इत्यमरः ॥ (यथा, भागवते । ६ । १० । ३० ।
"अपि वृन्दारका यूयं न जानीथ शरीरिणाम् ॥")
यूथपाता । यथा,—
"वृन्दारकः सुरे श्रेष्ठे मनोज्ञे यूथपातरि ॥"
इति भरतधृतवाहिः ॥

वृन्दारकः, त्रि, (वृन्दार + स्वार्थे कन् ।) मनोज्ञः । (यथा, महाभारते । ११ । १६ । ५ ।
"युवा वृन्दारकः शूरोविक्रमे पुरुषर्षभः ॥")
श्रेष्ठः । इति मेदिनी ॥ तत्सदृशे पदार्थादिः । वृन्दारकौ ऋषिसुतौ । इत्यमरः ॥

वृन्दावनं, क्लो, स्वनामख्याततीर्थम् । तन्नामकारणं यथा,—
श्रीनारायण उवाच ।
"पुरा केदारनृपतिः सप्तद्वीपपतिः स्वयम् ।
आसीत् सत्ययुगे ब्रह्मन् सत्यधर्म्मरतः सदा ।
स रेमे सह नारीभिः पुत्रपौत्रगणैः सह ।
पुत्रानिव प्रजाः सर्व्वाः पालयामास धार्म्मिकः ॥
लब्ध्वा ऋतक्रतुं राजा लेभे त्रिब्रह्मभोजितम् ।
लब्ध्वा नानाविधं पुण्यं फलकाङ्क्षी न च स्वयम् ।
नित्यं नैमित्तिकं सर्व्वं श्रीकृष्णप्रीतिपूर्व्वकम् ।
केदारतुल्यो राजेन्द्रो न भूतो भविता पुनः ॥
पुत्रेषु राज्यं संन्यस्य प्रिया त्रैलोक्यमोहिनी ।
जगौ यथोपदेशेन जगाम तपसे वनम् ॥
हरेरेकान्तिको भक्तो ध्यायते सन्ततं हरिम् ।
शृण्वतः सदर्शनं चक्रमस्ति यस्याग्रियो सुने ॥
चिरं तप्त्वा नृपश्रेष्ठो गोलोकञ्च जगाम सः ।
केदारनामतीर्थं तत्तन्नाम्ना च बभूव ह ॥
तत्राद्यापि नृतः प्राणी सद्यो मुक्तो भवेत् भुवम् ।
कमलांशा तस्य कन्या नाम्ना वृन्दा तपस्विनी ॥
न वव्रे सा वरं कञ्चित् योगशास्त्रविशारदा ।
दत्तं दुर्व्वाससा तस्यै हरेर्मन्त्रं सुदुर्ल्लभम् ॥
सा विरक्ता यदा ब्रह्मा जगाम तपसे वनम् ।
वर्षं वर्षसहस्राणि तपस्तेपे सुनिर्ज्जने ॥
आविर्बभूव श्रीकृष्णस्तत्पुरो भक्तवत्सलः ।
प्रसन्नवदनः श्रीमान् वरं वृणित्युवाच सः ।
दृष्ट्वा सा राधिकाकान्तं प्राप्तं सुन्दरविग्रहम् ।
मूर्च्छां संप्राप सा सद्यः कामबाणप्रपीड़िता ॥
सा च श्रीघ्रं वरं वव्रे पतित्वं मे भवेति च ।
ओमित्युक्ता च रहसि चिरं रेमे तया सह ॥
सा जगाम च गोलोकं कृष्णेन सह कौतुकात् ।
राधासमा सा सौभाग्यात् गोपीश्रेष्ठा बभूव सा ॥
वृन्दा यत्र तपस्तेपे तत्तु वृन्दावनं स्मृतम् ।
वृन्दा यत्र कृता क्रीड़ा तेन वा मुनिपुङ्गव ॥*॥
अथान्यच्चेतिहासञ्च शृणुष्व वक्ष्म पुण्यदम् ।
येन वृन्दावनं नाम निबोध कथयामि ते ॥
कुशध्वजस्य कन्ये द्वे धर्म्मशास्त्रविशारदे ।
तुलसीवेदवत्यौ च विरक्ते भक्तकर्म्मणि ॥
तपस्तप्त्वा वेदवती प्राप नारायणं परम् ।
सीता जनककन्या सा सर्व्वत्र परिकीर्त्तिता ॥
तुलसी च तपस्तप्त्वा वाञ्छां कृत्वा हरिं पतिम् ।
दैवाद्दुर्व्वाससः शापात् प्राप्य शङ्खासुरं पतिम् ॥
पश्चात् संप्राप कमलाकान्तं कान्तं मनोहरम् ।
तस्याश्च तपसः स्थानं उदितञ्च तपोधन ।
तेन वृन्दावनं नाम प्रवदन्ति मनीषिणः ॥*॥
अथवा ते प्रवक्ष्यामि परं शैलतरं शृणु ।
येन वृन्दावनं नाम पुण्यक्षेत्रञ्च भारते ॥
राधाषोड़शनाम्नाञ्च वृन्दा नाम श्रुतौ श्रुतम् ।
तस्याः क्रीड़ावनं रम्यं तेन वृन्दावनं स्मृतम् ॥
गोलोके प्रीतये तस्याः कृष्णेन निर्म्मितं पुरा ।
क्रीड़ार्थं भुवि तन्नाम्ना वनं वृन्दावनं स्मृतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे वृन्दावनप्रस्तावः १७ अध्यायः ॥*॥

अथ वृन्दावनवर्णनम् ।

ईश्वर उवाच ।
"गुह्याद्गुह्यतरं गुह्यं परमानन्दकारणम् ।
अत्यद्भुतं रहस्यानां रहस्यं परमं परम् ॥
दुर्ल्लभानाञ्च परमं दुर्ल्लभं मोहनं परम् ।
सर्व्वशक्तिमयं देवि सर्व्वस्यानेन गोपितम् ॥
सात्वतां स्वात्मनूर्द्धन्यं विष्णोरत्यन्तवल्लभम् ।
नित्यं वृन्दावनं नाम ब्रह्माण्डोपरि संस्थितम् ॥
पूर्णब्रह्मसुखैश्वर्य्यनित्यमानन्दमव्ययम् ।
वैकुण्ठादि तदंशांशं स्वयं वृन्दावनं शुचि ॥
गोलोकैश्वर्य्यं यत्किञ्चित् मोक्षे तत्प्रकीर्त्तितम् ।
वैकुण्ठादिवैभवं यत् द्वारकायां प्रकाश्यते ॥
यद्ब्रह्मपरमैश्वर्य्यं नित्यं वृन्दावनाश्रयम् ।
तस्मात् त्रैलोक्यमध्ये तु पृथ्वी धन्येति विश्रुता ॥
यत् स्यान्माथुरकं धाम विष्णोरेकान्तवल्लभम् ।
स्वस्थानमधिकं नास्त्येव माथुरमण्डलम् ।
निगूढं परमं स्थानं पूर्णब्रह्मान्तरं स्थितम् ।
सहस्रपत्रकमलाकारं माथुरमण्डलम् ।
विष्णुचक्रपरिभ्रामद्धाम वैष्णवमङ्गलम् ।
कर्णिकापत्रविस्तारं रहस्यक्रममीरितम् ।
प्रधानं द्वादशारण्यं माहात्म्यं कथितं क्रमात् ।
भद्रश्रीलौहभाण्डीरमहातालखदीरकाः ॥
बहुलं कुमुदं काम्यं मधु वृन्दावनं तथा ।
द्वादशैता वने संख्याः कालिन्द्याः सप्त पश्चिमे ॥

पूर्वे पद्मवनं प्रोक्तं तत्रास्ति गुह्यमुत्तमम् ।
महावनं गोकुलाख्यं रम्यं मधुवनं तथा ।
पूर्वे तु पद्म भद्राद्यास्तालाद्याः सप्त यद्यिमे ।
अम्बुजोपवनं प्रोक्तं क्रीडारसस्थलम् ।
कदम्बखण्डिकं नन्दवनं नन्दीश्वरं तथा ।
नन्दानन्दखण्डञ्च पाताग्र्याग्र्योकजेतकम् ।
सुगन्धिमादनं केलमन्दतं भोजनस्थलम् ।
सुखप्रसाधनं वत्सहरणं धेपशायनम् ।
श्यामपुञ्ज दधियामं चक्रभानुपुरं तथा ।
ग्रन्थितं विपदश्चैव बालक्रीड़ञ्च धूसरम् ।
केसुदमं खरो वीरसुसुकचापि नन्दनम् ।
इत्यमेव वने संख्यास्त्रिंशद्गोपवनं स्मृतम् ।
पूर्वोक्तं द्वादशारण्यं प्रधानं वनसुत्तमम् ।
तत्रोत्तरे चतुर्थञ्च वनञ्च समुदाहृतम् ।
नानाविधरसक्रीड़ानानालीलामयस्थलम् ।
दलविस्तृतविस्तारदृश्यक्रममीरितम् ।
सहस्रपत्रकमलं गोकुलाख्यं महत् पदम् ।
कर्णिका तन्महद्धाम गोविन्दस्थानमुत्तमम् ।
तत्रोपरि खर्णपीठे मणिमण्डपमण्डितम् ।
तत्र तत्र क्रमाद्दिक्षु विदिक्षु दलमीरितम् ।
यद्दलं दक्षिणे प्रोक्तं परं गुह्योत्तमोत्तमम् ।
तस्मिन् दले महापीठं निगमागमदुर्गमम् ।
योगीन्द्रैरपि दुष्प्रापं सर्व्वात्मा यत्र गोकुलम् ।
द्वितीयं दलमाग्नेयं तद्दक्षं द्विधा तथा ।
निकुञ्जककुटीवीरकुटीरौ तद्दले स्थितौ ।
पूर्वदलं तृतीयं यत् प्रधानं स्थानमुच्यते ।
गङ्गादिसर्व्वतीर्थानां सर्ग्राच्छतगुणं भवेत् ।
चतुर्थदलमैशान्यां सिद्धपीठेस्थितप्रदम् ।
कामयन् गूनना गोपी तत्र क्षणपतिं लभेत् ।
वस्त्रालङ्कारहरणं तद्दले समुदाहृतम् ।
उत्तरे पञ्चमं प्रोक्तं दलं सर्व्वदलोत्तमम् ।
द्वादशाद्यिमत्रैव दलञ्च कर्णिकासमम् ।
वायव्यन्तु दलं यद्यं तत्र कालीह्रदः स्मृतः ।
दलोत्तमोत्तमत्रैव प्रधानस्थानमुच्यते ।
सर्व्वोत्तमदलं श्रेष्ठं पश्चिमे सप्तमं दलम् ।
यत्रपत्नीगणानाञ्च तदीप्सितवरप्रदम् ।
अघासुरस्य निर्व्वाणं चक्रे त्रिदशदुर्गमम् ।
ब्रह्ममोहनमत्रैव दलं ब्रह्मह्रदावहम् ।
नैर्ऋत्यान्तु दलं प्रोक्तमष्टमं व्योमघातनम् ।
धेनुकासुरवधस्तत्र नानाकेलिरसस्थलम् ।
श्रुतमष्टदलं प्रोक्तं वृन्दारण्यान्तरस्थितम् ।
श्रीमद्वृन्दावनं धन्यं यमुनायाः प्रदक्षिणम् ।
शिवलिङ्गमधिष्ठाता ह्रदो गोपीश्वराभिधः ।
तद्दक्षे षोड़शदलं श्रिया पूर्वं तदीरितम् ।
सर्व्वासु दिक्षु यत् प्रोक्तं प्रादक्षिण्यादृषयाकृमम् ।
महत् पदं महद्धाम प्रधानं षोड़शं दलम् ।
प्रथमैकदलं श्रेष्ठं माहात्म्यं कर्णिकासमम् ।
तस्मिन् मधुवनं प्रोक्तं तत्र प्रादुरभूत् स्वयम् ।
चतुर्भुजो महाविष्णुः सर्व्वकारणकारणम् ।
तत्राधिष्ठिततद्दैवं सुनिश्रेष्ठ सनातनम् ।
दलं द्वितीयमाख्यातं किञ्जल्कीलारसस्थलम् ।
खदिरारण्यमत्रैव दलञ्च समुदाहृतम् ।

सर्व्वश्रेष्ठदलं प्रोक्तं माहात्म्यं कर्णिकासमम् ।
तत्र गोवर्द्धने रम्ये नित्यानन्दरसाश्रये ।
कर्णिकायां महालीला तल्लीला रसगह्वरे ।
यत्र कृष्णो नित्यवृन्दाकाननस्य पतिर्भवेत् ।
कृष्णो गोविन्दतां प्राप्तः किमन्यैर्बहुभाषितैः ।
दलं तृतीयमाख्यातं सर्व्वश्रेष्ठोत्तमोत्तमम् ।
चतुर्थदलमाख्यातं महाद्भुतरसस्थलम् ।
हरिर्यस्य पतिः साक्षान्नित्यं गोवर्द्धनः स्वयम् ।
कदम्बखण्डो तत्रैव पूर्णानन्दरसाश्रयः ।
स्निग्धं स्निग्धं प्रियं रम्यं दलञ्च समुदाहृतम् ।
नन्दीश्वरदलं रम्यं तत्र नन्दालयः स्मृतः ।
कर्णिकादलमाहात्म्यं पञ्चमं दलमुच्यते ।
अधिष्ठाताच गोपालो धेनुपालस्ततः परम् ।
दलं षष्ठं यदाख्यातं तत्र नन्दवनं स्मृतम् ।
सप्तमं बकुलारण्यं दलं रम्यं प्रकीर्त्तितम् ।
दलाष्टमं तालवनं तत्र धेनुवधः स्मृतः ।
नवमं कुसुदारण्यं दलं रम्यं प्रकीर्त्तितम् ।
काम्यारण्यं दलं स्निग्धं दशमं सर्व्वकारणम् ।
ब्रह्मप्रसादनं तत्र विष्णुस्तन्द्रं प्रदर्शितम् ।
कृष्णक्रीड़ारसस्थानं प्रधानं दलमुच्यते ।
दलमेकादशं प्रोक्तं भक्तानुग्रहकारणम् ।
निर्व्वाणं सेतुबन्धस्य नानारसमयस्थलम् ।
भाण्डीरं द्वादशदलं वनं रम्यं मनोहरम् ।
कृष्णक्रीड़ारसस्तत्र श्रीदामादिभिरावृतः ।
त्रयोदशदलं श्रेष्ठं तत्र भद्रवनं स्मृतम् ।
चतुर्दशदलं प्रोक्तं सर्व्वसिद्धिप्रदं स्थलम् ।
श्रीवनं तत्र रुचिरं सर्व्वैश्वर्य्यस्य कारणम् ।
कृष्णलीलामयदलं श्रीकीर्त्तिकान्तिवर्द्धनम् ।
पञ्चदशदलं श्रेष्ठं तत्र लौहवनं स्मृतम् ।
कथितं षोड़शदलं माहात्म्यं कर्णिकासमम् ।
महावनं तत्र गीतं तत्रास्ति गुह्यमुत्तमम् ।
बालक्रीड़ारसस्तत्र वत्सपालैः समावृतः ।
पूतनादिवधस्तत्र बमलार्জ্জुनभञ्जनम् ।
अधिष्ठाता तत्र बालगोपालः पञ्चमान्दिकः ।
गाथा दामोदरः प्रोक्तः प्रेमानन्दरसार्णवः ।
दलं प्रविद्धमाख्यातं सर्व्वश्रेष्ठदलोत्तमम् ।
कृष्णक्रीड़ा च किञ्जल्की विहारदलमुच्यते ।
सिद्धप्रधानं किञ्जल्कं दलञ्च समुदाहृतम् ॥७॥

पार्व्वत्युवाच ।

वृन्दावनस्य माहात्म्यं रहस्यं परमाद्भुतम् ।
तदहं श्रोतुमिच्छामि कथयस्व महाप्रभो ।

ईश्वर उवाच ।

कथितं ते प्रियतमे गुह्याद्गुह्यतमोत्तमम् ।
रहस्यानां रहस्यं यद्दुर्लभानाञ्च दुर्लभम् ।
त्रैलोक्यगोपितं देवि ! देवैश्वरसुपूजितम् ।
ब्रह्मादिवाञ्छितं स्थानं सुरसिद्धादिसेवितम् ।
योगीन्द्रादिमुनीन्द्रादिसदाह्यानततत्परम् ।
अप्सरोभिश्च गन्धर्व्वैर्नित्यगीतनिरन्तरम् ।
श्रीमद्वृन्दावनं रम्यं पूर्णानन्दरसाश्रयम् ।
भूमिश्चिन्तामणिस्तोयममृतं रसपूरितम् ।
वृक्षाः सुरद्रुमास्तत्र सुरभिवृन्दसेविताः ॥
श्री लक्ष्मीः पुरुषो विष्णुस्तदंशांशसमुद्भवः ।

तत्र कैशोरवयसं नित्यमानन्दविग्रहम् ॥
गतिर्नाथं कथागानं स्मितवक्त्रं निरन्तरम् ।
सुहृत्सखैः प्रेमपूर्णैर्व्वेष्टितद्वनाश्रयम् ॥
पूर्णब्रह्मसुखे मग्नं स्फुरत्सूर्त्तिसमन्वयम् ।
प्रमत्तकोटिभृङ्गाढ्यैः कूजत्कलमनोहरम् ॥
कपोतशुकसंगीतसुमत्तालिसङ्कुलम् ।
भुजङ्गप्लुचृद्याढ्यं सकान्ताभोदविभ्रमम् ॥
नानावर्णैश्च कुसुमैस्तल्पेष्वपरिपूरितम् ।
स्निग्धसौरभ्याघ्रातसुगन्धीकृतजगत्त्रयम् ॥
मन्दमारुतसंस्पृष्टवसन्तऋतुसेवितम् ।
पूर्णेन्दुनिभाभ्युदयं सूर्य्यमन्दांशुसेवितम् ।
अदुःखसुखविच्छेदं जरामरणवर्জ্জितम् ।
अक्रोधगतमात्सर्य्यं अभिन्नमनहंकृतम् ।
पूर्णानन्दाप्तरसं पूर्णप्रेमसुखावहम् ।
गुणातीतं परं धाम पूर्णप्रेमस्वरूपकम् ॥
यत्र कृष्णादिपुलकैः प्रेमानन्दाश्रुवर्षितम् ।
किं पुनश्चेतनायुक्तैर्विष्णुभक्तैः किमुच्यते ।
गोविन्दाङ्घ्रिरजस्पर्ग्रान्नित्यवृन्दावनं भुवि ।
सहस्रदलपद्मस्य वृन्दारण्यं वराटकम् ॥
यस्य स्पर्ग्रनमात्रेण पृथ्वी धन्या जगत्त्रये ।
गुह्याद्गुह्यतमं रम्यं मेधं वृन्दावनस्थितम् ।
अक्षरं नित्यमानन्दं गोविन्दस्थानमव्ययम् ।
गोविन्ददेहतोऽभिन्नं पूर्णब्रह्म सुखाश्रयम् ।
सृष्टिस्तत्र यतः स्पर्ग्रात्तन्माहात्म्यं किमुच्यते ।
तस्मात् सर्व्वात्मना देवि ! वृन्दिरं कुरु तद्वनम् ।
वृन्दावनविहारेषु लभ्यं कैशोरवित्रहम् ।
अन्यारण्येषु स्थानेषु बाल्यपौगण्डयौवनम् ।
कालिन्दीमकरन्दोऽस्य कर्णिकायाः प्रदक्षिणम् ।
नानाविभ्रमगम्भीरं जलसौरभमोहनम् ।
आनन्दाहतसन्निश्रमकरन्दधनालयम् ।
पद्मोत्पलाद्यैः कुसुमैर्नानावर्णैः समुज्ज्वलम् ।
चक्रवाकादिविहगैर्मञ्जुनानाकलस्वनैः ।
शोभमानं जलं रम्यं तरङ्गातिमनोहरम् ।
तस्योभयतटी रम्या शुद्धकाञ्चननिर्म्मिता ।
गङ्गाकोटीगुणः प्रोक्तो यत्र स्पर्ग्रवराटकः ।
कर्णिकायां कोटिगुणो यत्र क्रीड़ारतो हरिः ।
कालिन्दीकर्णिकाक्षेत्रमभिन्नमेकविग्रहम् ।"

इति पाद्मे पातालखण्डे १ अध्यायः ।

(इदमेव भगवत्याः पीठस्थानानामत्युत्तमम् । यथा, देवीभागवते । ७ । ३० । ६६ ।
"कर्णिकी द्वारवत्यान्तु राधा वृन्दावने वने ।")

वृन्दावनेश्वरः, पुं, (वृन्दावनस्य ईश्वरः ।) श्रीकृष्णः । यथा,—
"यन्नखेन्दुरुचिर्ब्रह्म ध्येयं ब्रह्मादिभिः सुरैः ।
गुणत्रयमतीतं तं वन्दे वृन्दावनेश्वरम् ।"
अपि च ।
"पुरुषः प्रकृतिश्चाद्यौ राधावृन्दावनेश्वरौ ।
प्रकृतिर्विकृतिः सर्व्वे विना वृन्दावनेश्वरम् ।"

इति पाद्मे पातालखण्डे ६ अध्यायः । ॥ ।

अपिच ।
"यदा नित्यः स्वयं कृष्णः सच्चिदानन्दविग्रहः ।
यस्यां गुणानां श्रीलौ तु भगवच्छब्दसंज्ञितः ।

नित्यधामा गुणातीतः साक्षाद्वृन्दावनेश्वरः ।
असौ प्रकटलीलायां वासुदेवोऽभवत् प्रभुः ॥
गोपीनां कामपूर्त्यर्थं नित्यानां रमणाय च ।
गोपालानां विनोदाय स्वयं नन्दसुतोऽभवत् ॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥

वृन्दावनेश्वरी, स्त्री (वृन्दावनस्येश्वरी ।) राधा । यथा,—
"राधयत्यभवत् सीता रुक्मिणी क्षत्रजन्मनि ।
साक्षाल्लक्ष्मीषु विज्ञेया प्राकल्पेनैव पार्व्वति ! ॥
वृषभानुसुता या तु नित्यानन्दस्वरूपिणी ।
गान्धर्व्विकान्तलीलायां श्रीः श्यामा क्षत्रवल्लभा ।
वृन्दावनेश्वरी राधा साक्षात् क्षत्रात्मिका परा ॥"
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥

वृन्दिष्ठः, त्रि, (अयमेषामतिशयेन वृन्दारकः श्रेष्ठः । वृन्दारक + इष्ठन् । "प्रियस्थिरेति ।" ६।४।१५७ । वृन्दादेशः ।) अयमनयोरेषां वा अतिशयेन वृन्दारको देवो मुख्यो वा । इति मुग्धबोधटीकायां दुर्गादासः ॥

वृन्दीयान्, [स] त्रि, (अयमनयोरतिशयेन वृन्दारकः । वृन्दारक + इयसुन् । प्रियस्थिरेति वृन्दादेशः ।) वृन्दिष्ठः । अयमनयोरेषां वा अतिशयेन वृन्दारकः इत्यर्थे ईयसुप्रत्ययेन निष्पन्नमिदम् । इति मुग्धबोधव्याकरणम् ॥

वृश्च, इट् य वृत्वाम् । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) इट्, अवृश्चत् अवर्श्चीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यर्थे । य, वृश्चति वरं कन्या । इति दुर्गादासः ॥

वृश्चः, पुं, (वृ + "जनिदाचुवृदमदीति ।" उणा० ४ । १०४ । इति श्चक् ।) उन्दुरुः । इति शब्दरत्नावली ॥ वायकः । इत्यमरटीकायां भरतः ॥

वृश्चा, स्त्री, ओषधीविशेषः । इत्युणादिकोषः ॥

वृश्चिकः, पुं, (व्रश्च छेदने + "वृश्चिव्रश्चोः किकन् ।" उणा० २ । ४० । इति किकन् ।) शूककीटः । इत्यमरः ॥ शुयापोका इति भाषा ॥ तत्पर्य्यायः । शूककीटकः २ । इति शब्दरत्नावली ॥ कीटविशेषः । विछा इति भाषा । तत्पर्य्यायः । अलिः २ दंशः ३ दृष्टजः ४ । इति राजनिर्घण्टः ॥ दृढः ५ । इति शब्दरत्नावली ॥ एदाकुः ६ अरुषः ७ अलो ८ । इति जटाधरः ॥ * ॥ वृश्चिकविषस्य लक्षणमाह ।
"दष्टस्थिरिवादौ च भिनत्तीवोर्द्ध्वमासु च ।
वृश्चिकस्य विषं याति पश्चाद्दंशोऽवतिष्ठते ॥"
असाध्यवृश्चिकदष्टस्य लक्षणमाह ।
"दष्टोऽसाध्येषु हृद्ध्राणरसगोपहतो नरः ।
मांसैः पतद्भिरत्यर्थं वेदनार्त्तो जहात्यसून् ॥"
असाध्यैर्वृश्चिकैरेषामेवानुवृत्तेः । हृदादिशूपहतः हृदादिकार्य्यरहितो भवति । अत्यर्थं वेदनार्त्त इत्यन्वयः ॥ * ॥ अस्य चिकित्सा ।
"गोरक्तस्य कृतः कल्को घृतसैन्धवसंयुतः ।
सुखोष्णो मधुना लेपाद्वृश्चिकस्य विषं हरेत् ॥
गन्धमाघ्राय रुदितसूर्य्यावर्त्तदलस्य तु ।
वृश्चिकेन नरो विद्धः क्षणाज्जीवति निर्व्विषः ॥"
इति भावप्रकाशः ॥*॥
अथ वृश्चिकविषहरमन्त्रः । ॐ सर स्फुः ह ॐ हिलि मिलि चिलि चिलि स्फुः ब्रह्मणे स्फुः सर्व्वेभ्यो देवेभ्यः स्फुः । इति तन्त्रसारः ॥ * ॥ (यथा, ऋग्वेदे । १ । १६१ । १६ ।
"वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषम् ॥"
"वृश्चिकस्येतदिदं अरसमसारं बाधकं न भवति ।"
इति तद्भाष्ये सायणः ॥ विषस्य विशेषविवरणन्तु अत्रैव १—१६ मन्त्रेषु द्रष्टव्यम् ॥ * ॥) मेषादिद्वादशराश्यन्तर्गतेऽष्टमराशिः । अस्याधिष्ठाती देवता वृश्चिकः । विशाखाशेषपादानुराधाज्येष्ठासमुदायेनैतद्राशिर्भवति । स च शीर्षोदयः । श्वेतवर्णः । जलराशिः । उत्तरदिक्पतिः । कफप्रकृतिः । जलचरः । बहुपुत्रः । बहुक्लीवसङ्गः । चित्रतनुः । विप्रवर्णश्च । अस्य विशेषसंज्ञाः । सौम्यः । अङ्गना । युग्मम् । समः । स्थिरः । पुष्करः । सरीसृपजातिः । ग्राम्यः । तद्राशिजात एतादृशो भवति । मौनी । मन्दगतिः । कृपालुः । कुबुद्धिः । नीचसङ्गश्च । इति वृश्चिजातकादयः ॥ * ॥ तल्लग्नजातफलम् ।
"वृश्चिकोदयसंजातः शौर्य्यवानतिदुष्टधीः ।
भवेद्विज्ञानसम्पन्नो विग्रही सुभगः सुधीः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
ओषधीभेदः । इति मेदिनी ॥ व्रालिकः । व्राजः । इति संक्षिप्तसारोणादिवृत्तिः ॥ मदनवृक्षः । कर्कटः । गोमयकीटः । इति भरतः ॥ अयद्दायवमासः । इति सारसुन्दरी ॥

वृश्चिकप्रिया, स्त्री, (वृश्चिकस्य प्रिया ।) पूतिका । इति शब्दमाला ॥

वृश्चिकवर्षी, स्त्री, आखुकर्णी । इति राजनिर्घण्टः ॥

वृश्चिका, स्त्री, क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । नखपर्णी २ पिच्छिला ३ अलिपत्रिका ४ । अस्या गुणाः । पिच्छिलत्वम् । अश्मत्वम् । अन्तर्वृद्ध्यादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

वृश्चिकाली, स्त्री, (वृश्चिकानामालिर्यत्र ।) क्षुपविशेषः । विछाटी इति भाषा । तत्पर्य्यायः । वृश्चिपत्री २ विषघ्नी ३ नागदन्तिका ४ सर्पदंष्ट्रा ५ अमरा ६ काली ७ उद्धूधूसरपुच्छिका ८ । इति रत्नमाला ॥ विषाली ९ नेचरोगहा १० उद्विका ११ अलिपर्णी १२ वृश्चिवर्षभकी १३ कालिका १४ आगमावर्षा १५ देवताडूलिका १६ करभी १७ भूरिदुग्धा १८ कर्कशा १९ सर्व्वदा २० युग्मफला २१ क्षीरविषाणिका २२ भासुरपुष्पा २३ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । हृद्रुक्शुद्धिकारित्वम् । रक्तपित्तविबन्धारोचकापहत्वम् । वल्यत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"वृश्चिकाली विषघ्नी तु कासमारुतनाशिनी ॥"
इति राजवल्लभः ॥

वृश्चिपत्री, स्त्री, वृश्चिकाली । इति रत्नमाला ॥

वृश्चीरः, पुं, श्वेतपुनर्नवा । इति रत्नमाला ॥

वृष, उ सेचने । प्रजनेश्वर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अक० च-सेट् । क्लावेट् ।) उ, वर्षित्वा वृष्ट्वा । इति दुर्गादासः ॥

वृष, क ड प्रजनेश्वर्य्ये । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-अक०-सेट् ।) क ड, वर्षयते । अस्य पञ्चमस्वरानुबन्धो लेखकप्रमादजनः सुधीभिर्हेयः । आम्नायेभ्यः सर्व्वत्र नित्यैः साम्प्रदायिकत्वात् । न च प्राचामनुरोधात् पाठ्य इति वाच्यम् । तर्हि अवृक् अवृक्षौ । क ड वृङ् वरणे । वृत क ड दीप्तौ । दिव क ड परिकूजने । कदि वर्षे । वृष क ड शक्तिबन्धे । अवक् वर्षेऽनादरे । इत्येषामष्टानामपि पञ्चमस्वरानुबन्धापत्तेः वस्तुतस्तु एषां पञ्चमस्वरानुबन्धः प्राचीनपठितोऽन्यार्थः । अतएव रमानाथोऽपि एषामुदनुबन्धः पूर्व्वपठितधातवोऽर्थान्तरेषु चुरादयः स्वार्थेऽते वृषन्धातव इति ज्ञापनार्थं इत्याह । प्रजनो गर्भग्रहणं ऐश्वर्य्यमैश्वर्य्यम् । इति दुर्गादासः ॥

वृषं, क्ली, (वृष ऐश्वर्य्ये + कः ।) वर्षम् । इति शब्दमाला ॥

वृषः, पुं, (वर्षति सिञ्चति रेत इति । वृष सेचने + कः ।) पुरुषगवः । एँड़ इति भाषा । तत्पर्य्यायः । उक्षा २ भद्रः ३ बलीवर्दः ४ ऋषभः ५ वृषभः ६ अनड्वान् ७ सौरभेयः ८ गौः ९ । इत्यमरः ॥ धूर्व्वी १० कक्षुद्वान् ११ । इति शब्दरत्नावली ॥ शिखी १२ गन्धमेधुनः १३ पुङ्गवः १४ । इति जटाधरः ॥ * ॥ अस्य लक्षणादि यथा,—
"अष्टभक्तयुते शुक्ला वक्त्रान्तेऽङ्के चतुष्पदाः ।
गावः कृतयुगे सृष्टाः स्वयमेव स्वयम्भुवा ।
ब्रह्मक्षत्रियविट्शूद्रजातिभेदाश्चतुर्विधाः ॥
शुक्लाङ्गाः शुचयोऽक्रूरा वृषदः शुद्धचेतसः ।
अष्टाग्निगो बहुबला वृषभा ब्रह्मजातयः ॥
द्वयोर्लक्षणसम्बन्धात् द्विजातिर्व्वृषभो भवेत् ।
त्रिलक्षणसमावेशात् त्रिगुणः स वृषाधमः ॥
पीताङ्गा वृषदः शुद्धा अक्रोधा भारवाहिनः ।
यज्ञाङ्गभोजिनः शीघ्रा वृषभा वेश्यजातयः ॥
कृष्णाङ्गाः क्रूरहृदया अपवित्राः सदाग्निनः ।
वृषद्वृषवरोधाश्च वृषभाः शूद्रजातयः ॥
द्वयोर्लक्षणसम्पर्कात् द्विजातिर्व्वृषभो भवेत् ॥"*॥
वात्स्यस्तु ।
"पृथ्वीतले समुत्पन्ना गजाश्वा ये चतुष्पदाः ।
गुणत्रयविभेदेन तेषां भेदत्रयं भवेत् ।
एतन्मतानुसारेण भोजः प्राह महीपतिः ॥
ये शुक्लाः शुचयः शुद्धा भृशं भारवहा अपि ।
यज्ञाग्निनः खलूपरोधास्ते वृषाः सात्त्विका मताः ॥
यक्षायक्षरुषः शुद्धा दृढा भारवहाः शुभाः ।
बह्वग्निनो बहुबलास्ते वृषा राजसा मताः ॥
विवर्णा विकृताङ्गाश्च निर्बला खलभोजिनः ।
अपवित्रा दृढद्रोहास्ते वृषास्तामसा मताः ॥
लक्षणद्वयसम्बन्धात् द्विगुणो वृषभो भवेत् ।

त्रिलक्षणसमावेशात् त्रिगुणः स वृषाधमः ।"*।
अथ गुणाः ।
"नीलः शुभो ध्वजो वामः क्षेमो भद्रः शिवः स्थिरः ।
भोजदेवेन लिखिता रत्नदौ वृषभे गुणाः ।"
तद्यथा,—
"श्वेतादन्यतरो वर्णः श्वेतः खुरविषाणयोः ।
ललाटपुच्छयोः श्वेतः स नीलः शुभमावहेत् ।१।
यो ह्रस्वपृष्ठो रम्यात्मा सुविभक्ततनुः शुभः ।
कुरुते धनवृद्धिं स दोषैर्मुक्तो यदा त्वयम् ।२।
वर्णस्तु सदृशः पुच्छो रम्यश्च ध्वज उच्यते ।
भर्तुः कुलं धनं धान्यं विवर्द्धयति निश्चयम् ।३।
पूर्व्वार्द्धे चोन्नतो यस्तु परार्द्धे चैव नीचकः ।
निर्द्दोषो वाम इत्येव कुरुते रिपुसंक्षयम् ।४।
चक्रकं दक्षिणे यस्य ललाटे देवनिर्म्मितम् ।
क्षेमनामा वृषः कुर्य्याद् धनधान्यविवर्द्धनम् ।५।
आवर्त्ताश्च शुभा यस्य मुक्तयश्चाधि वा शुभाः ।
भद्रनामा वृषः कुर्य्यात् भर्तुः सर्व्वार्थसाधनम् ।
६ ।
आवर्त्तयुक्तिविज्ञानं हयेषु वृषभेष्वपि ।
पादाः सर्व्वे सिता यस्य पुच्छभालौ सितौ तथा ।
महोच्चा चायते नेत्रे कर्णौ चातिलघू स्थिरौ ।
सुश्रवोः श्रवणौ चैव दक्षे चातिशुभे दृढे ।
तनुरोमा महावेगः स्निग्धगम्भीरनिस्वनः ।
शिव इत्येव कथितः शिवं प्रकुरुते ध्रुवम् ।७।
चरणाः पक्ष्मराः स्थूलाः शिरः शुभं भवेत्तदुः ।
आपुच्छादायता शुभा रेखा मस्तकगामिनी ।
रक्तताम्रोष्ठजिह्वस्तु स्थिरः स्थैर्यकरः श्रियाः ।
नाल्पपुण्येन लभ्योऽयं वृषभः शुभलक्षणः ।"८।
गर्गस्तु ।
"महत्त्वं तनुलोमत्वं पृष्ठता भारवाहिता ।
कुमारकत्वमित्येते वृषभाणां गुणा मताः ।"*।
अथ दोषाः ।
"शृङ्गो विवर्त्तो विषमः स्निग्धो धूम्रश्च खरः ।
एते सप्त महादोषा वृषभाणामुदीरिताः ।
विषाणौ विषमौ यस्य खुराश्च विषमास्तथा ।
नेत्रकान्तोऽथवा गात्रे पक्ष्मरे वेष्टतं भवेत् ।
यत्र त्रयेण कथितो धनधान्यविनाशनः ।१।
पूर्व्वार्द्धमन्यवर्त्तन्तु परार्द्धं चान्यवर्त्तकम् ।
पृष्ठं क्रोडो विवर्त्तो वा विवर्त्तः कुलनाशनः ।२।
परार्द्धमुन्नतं यस्य पूर्व्वार्द्धं चातिनीचकम् ।
गच्छतश्चरणौ भग्नौ शब्दायेते खरस्वरः ।
विषमो नाम वृषभः सन्ततित्रयकारकः ।३।
हिमकुन्देन्दुसङ्काशा गात्रेषु लोमबिन्दवः ।
स्निग्धो नाम महादोषो दूरतस्तं परित्यजेत् ।४।
शृङ्गाग्रे दीपिकाकारं ज्वलते केकरे दृशौ ।
कपिलः पुच्छभागश्चेत् स धूम्रो ह्यशुभावहेत् ।५
दन्तशृङ्गखुरादीनां यद्येकोऽपि चलेत् स्वयम् ।
सुश्रो वा चलते यस्य स चलः कुलनाशनः ।६।
आवर्त्ताः मुक्तयो रेखा विषमाश्च विसंस्थिताः ।
न्यूनाधिकाः पक्ष्मरास्तु खुरास्तु विषमास्तथा ।
गुदान्मेढ्रान्तरे यावद्रेखा वक्रेव दृश्यते ।

विस्तृते विषमे घोरे जिह्वा चैवासिता भवेत् ।
स खरो दूरतस्त्याज्यो भर्तुः सर्व्वार्थनाशनः ।
७ ।
स्वल्पता दीर्घरोमत्वं स्त्रीयता भारवाहिता ।
शृङ्गत्वं मारकत्वञ्च वृषदोषा उदाहृताः ।*।
ब्रह्मादिजातिभेदेन चत्वारो ये वृषा मताः ।
चतुर्विधानां लोकानां त एव स्युः शुभावहाः ।
यो मोहादन्यजातीयं कुरुते वृषभं नरः ।
तस्य नश्यन्ति वित्तानि धनमायुः कुलं बलम् ।
वातपित्तकफोद्रेका आधयो ये वृषे मताः ।
तेषामुपशमः कार्य्यो यथास्वं विधिना बुधैः ।"
इति वृषपरीक्षा । इति भोजराजसमयुक्तिकल्पतरुः ।*। अस्य लक्षणं उत्सर्गविधिश्च यथा,—
मनुरुवाच ।
"भगवन् श्रोतुमिच्छामि वृषभस्य च लक्षणम् ।
वृषोत्सर्गविधिञ्चैव तथा पुण्यफलं महत् ।
मत्स्य उवाच ।
धेनुमादौ परीक्षेत सुशीलां लक्षणान्विताम् ।
अव्यङ्गामपरिक्लिष्टां जीववत्सामरोगिणीम् ।
स्निग्धवर्णां स्निग्धखुरां स्निग्धशृङ्गां तथैव च ।
मनोहराकृतिं सौम्यां सुप्रमाणामनुद्धताम् ।
आवर्त्तैर्दक्षिणावर्त्तैर्मुक्तां दक्षिणतश्च सा ।
वामावर्त्तैर्वामतश्च विस्तीर्णजघना तथा ।
मृदुसंहततास्त्रोष्ठीं रक्तजिह्वां सुपूजिताम् ।
अम्लावदीर्घस्फुटितां रक्तजिह्वां तथा च याम् ।
अम्लावाविलनेत्रां च सर्व्वैरविरलैर्दृढैः ।
वैदूर्य्यमधुवर्णैश्च जलबुद्बुदसन्निभैः ।
रक्तस्निग्धैश्च नयनैस्तथा रक्तकनीनिकैः ।
सप्त चतुर्दश दन्तास्तथा चाष्टामतासुका ।
षड्नता सुपार्श्वोरू एणु पञ्च समायताः ।
अष्टायतशिरोग्रीवाधरान्त्रसुलक्षणा ।
मनुरुवाच ।
षड्नताः के भगवन् ! के च पञ्च समायताः ।
आयताश्च तथैवाष्टौ धेनूनां के शुभावहाः ।
मत्स्य उवाच ।
उरः पृष्ठं शिरः कुक्षिः श्रोणी च वसुधाधिप ।
षड्नतानि धेनूनां पूजयन्ति विचक्षणाः ।
कर्णनेत्रललाटाश्च पञ्च भास्करनन्दन ! ।
समायतानि शंसन्ति पुच्छं साक्षा च सक्थिनी ।
चत्वारश्च समा राजन्नेवमष्टौ मनीषिभिः ।
शिरोग्रीवायताख्याते भूमिपाल सुता दश ।
तस्याः सुतं परीक्षेत वृषभं लक्षणान्वितम् ।
उन्नतस्कन्धकुकुदस्थूलाङ्गूलकम्बलम् ।
महाकटितटस्कन्धं वैदूर्य्यमणिलोचनम् ।
प्रवालगर्भशृङ्गाग्रं सुदीर्घपृथुवालधिम् ।
नवारद्वयसंख्यैर्वा तीक्ष्णाग्रैर्दशनैः शुभैः ।
मल्लिकाश्च मोक्षयो यद्येकोऽपि धनधान्यदः ।
वर्त्तन्तस्तान्त्रकपिलो ब्राह्मणस्य प्रशस्यते ।
श्वेतो रक्तश्च शस्यश्च गौरः पाटल एव च ।
भद्रियस्तास्यपृष्ठश्च सबलः पञ्चकालकः ।
पृथुकर्णो महास्कन्धः सूक्ष्मरोमा च यो भवेत् ।

रक्ताक्षः कपिलो यश्च रक्तशृङ्गतलो भवेत् ।
श्वेतोदरः शुक्लपृष्ठो ब्राह्मणस्य प्रशस्यते ।
स्निग्धरक्तेन वर्णेन क्षत्रियस्य प्रशस्यते ।
काञ्चनाभेन वैश्यस्य शुक्लेनाप्यन्यजन्मनः ।
यस्य प्रागायते शृङ्गे भूमुखाभिमुखे सदा ।
सर्व्वेषामेव वर्णानां स च सर्व्वार्थसाधकः ।
माञ्जरिपादः कपिलो धन्यः कपिलपिङ्गलः ।
श्वेतोमाञ्जरिपादस्तु धन्यो मणिनिभेक्षणः ।
करटः पिङ्गलश्चैव श्वेतपादस्तथैव च ।
सर्व्वपादशिरो यस्य द्विपादश्वेत एव च ।
कपिञ्जलनिभो धन्यस्तथा तित्तिरिसन्निभः ।
आकर्णमूलात् श्वेतस्तु मुखं यस्य प्रकाशते ।
नन्दीमुखः स विज्ञेयो रक्तवर्णो विशेषतः ।
श्वेतश्च जठरं यस्य भवेत् पृष्ठश्च गोपतेः ।
ऋषभः स समुद्दिष्टः सततं कुलवर्द्धनः ।
मल्लिकापुष्पचित्रस्तु धन्यो भवति पुङ्गवः ।
कमलेभेक्षलेखापि चित्रो भवति भाग्यदः ।
श्वेतसीपुष्पवर्णस्तु तथा धन्यतरः स्मृतः ।*।
एते धन्यास्तथाधन्यान् कीर्त्तयिष्यामि तेऽनघ ।
कण्यताक्षोदरशृङ्गाः रूक्षशृङ्गशृकाश्च ये ।
अयक्तवर्णा दुष्टाश्च याम्रभक्षनिभाश्च ये ।
भाङ्गुरध्वजवर्णाश्च तथा मूषिकसन्निभाः ।
कुष्ठाः काणास्तथा खञ्जाः केकराश्चास्तथैव च ।
विषमश्वेतपादाश्च उद्भ्रान्तनयनास्तथा ।
नैते वृषाः प्रमोक्तव्या न च धार्य्यास्तथा गृहे ।
मोक्षयाताश्च धार्य्यार्थां भूयो वक्ष्यामि लक्षणम् ।*।
खस्तिकाकारशृङ्गाश्च मेघौघसदृशस्वनाः ।
महाप्रमाणाश्च तथा मत्तमातङ्गगामिनः ।
महोरस्का महोत्साहा महाबलपराक्रमाः ।
शिरः कर्णौ ललाटञ्च वालधिश्चरणानि च ।
नेत्रे पार्श्वे च लक्ष्माणि शुस्यन्ते चन्द्रभासि च ।
श्वेताश्वेतानि शुस्यन्ते लक्ष्मस्य तु विशेषतः ।
भूमौ कर्षति लाङ्गूलं प्रलम्बसूजवालधिः ।
पुरस्तादुन्नते गोलदृषभश्च प्रशस्यते ।
शुक्तिध्वजपताकाभा येषां राजी विराजते ।
अनड्वाहश्च ते धन्या वित्तसिद्धिजयावहाः ।
प्रदक्षिणं निवर्त्तन्ते स्वयं ये विनिवर्त्तिताः ।
सप्तोन्नतशिरोग्रीवा धन्यास्ते यूथवर्द्धनाः ।
रक्तशृङ्गाग्रनयनः श्वेतवर्णो भवेद्यदि ।
सर्पेः प्रवालसदृशैर्नासि धन्यतरस्तदा ।
एते धार्य्याः प्रयत्नेन मोक्तव्या यदि वा वृषाः ।
धारिता यदि वा मुक्ता धनधान्यविवर्द्धनाः ।
चरणाः सुखं पुच्छं यस्य श्वेतानि गोपतेः ।
लाचारससवर्णश्च तन्नीलमिति निर्द्दिशेत् ।
वृष एव स मोक्तव्यो न स धार्य्यो गृहे भवेत् ।
तदर्थमेवाचरति लोके गाथा पुरातनी ।
एकेन बहवः पुत्रा यदेकोऽपि मया व्रजेत् ।
गौरीं वापि प्रदेहार्य्यां नीलं वा वृषमुत्सृजेत् ।
एवं वृषं लक्षणसंप्रयुक्तं
एवोद्भवं कीर्त्तमथापि राजन् ।

सुक्ता न ग्रीवेन्मरणं महात्मा
मोक्षे मतिश्चाहमतोऽभिधास्ये ॥"
इति मात्स्ये वृषभलक्षणं नाम १८१ अध्यायः ॥
जलपानार्थमागतवृषस्य निवारणे दोषो यथा,
"गवां तृष्णाभिभूतानां पानार्थमभिधावताम् ।
अन्तरायो भवेद्यस्तु स भवेद्ब्रह्मघातकः ॥"
इति कर्म्मलोचनम् ॥*॥
अस्य दानविधिर्यथा,—
वह्निरुवाच ।
"यश्चेश्वरो दरिद्रो वा करोति विधिना वृष ।
दानं सर्व्वगुणोपेतं तच्छृणुष्व यथातथम् ॥
भाराद्विंशपलान्तञ्च वृषं कृत्वा विधानतः ।
युतं धेन्वाथवा दद्याच्छक्तितो वृषसत्तम ॥
यज्ञया धेनवः प्रोक्ता वृषास्तावन्त एव हि ।
हरावेते नियोज्याः स्युर्हराय च तथा वृषाः ॥
सर्व्वाभावात्ततो राजन् तिलपात्राणि निक्षिपेत् ।
सर्व्वपापविनाशाय दीयन्ते वृषसत्तम ॥
गोमयेन समालिप्य यवव्रीहिसमाहते ।
वृषं हैममयं तत्र रौप्यं वा रत्नसंयुतम् ॥
तस्य नीलमयैः शृङ्गैर्मौक्तिकाक्षिसमन्वितः ।
दार्चिंग्रच्छुभवस्त्राणि विद्रुमौष्ठौ सुनासिकौ ॥
मारकतौ विनिर्दिष्टौ कर्णौ चैवास्य कौ मतौ ।
पद्मरागस्य वै पादाः खुराः रौप्यमयास्तथा ॥
राजतान्यस्य रोमाणि चौमवस्त्रेण कम्बलम् ।
पट्टेन पुच्छसुहृदं सर्व्वेषामप्ययं विधिः ॥
वृषौ स्फटिकस्यापि लिङ्गे मणिः प्रकीर्त्तितः ।
यथा धेनुस्तथानड्वान् सुवर्णस्य तु कारयेत् ।
सर्व्वेषां फलमाप्नोति धेनूनां वृषभप्रदः ।
राज्ञः स विभवाद्दानं भक्त्या यः प्रतिपादयेत् ॥
वृषभस्याप्यशक्तौ हि तदर्द्धफलं स्मृतम् ।
निःस्वो वाप्येवमेवं हि कृत्वा व्रतमतन्द्रितः ।
तत्तुल्यं समवाप्नोति स्वल्पदानान्न संशयः ॥"
इति वह्निपुराणे वृषदानाध्यायः ॥*॥
तद्दानफलं यथा,—
"कन्यादानं वृषोत्सर्गं तीर्थसेवां श्रुतं तथा ।
ये कुर्व्वन्ति गृहस्थास्तु न ते तद्विषयोपगाः ॥"
इति तत्रैव कन्यादाननामाध्यायः ॥*॥
अपि च ।
ब्रह्मोवाच ।
"वृषभौ समादाय युवानौ बलवान्वितौ ।
हेमशृङ्गौ शुभे रौप्ये सवस्त्रौ पूजयेन्मुने ! ॥
ग्रिवोमां पूजयित्वा तु तद्दिने यः प्रयच्छति ।
ग्रिवभक्ताय विप्राय रोहिण्यां वा शुभेऽथ वा ॥
न वियोगो भवेत्तस्य सतपत्नीपतेः क्वचित् ।
वातरंहसवैमानैर्मनोज्ञैश्चिवपुरं व्रिज ॥
तत्र भोगांश्चिरं भुक्त्वा इह आगत्य जायते ।
सद्गृहौ धनधान्याभ्यां पुत्रमित्रसमाकुलः ॥
यो वा रत्नसमायुक्तं गोयुगं पूजयेन्मुने ।
प्रयच्छति ग्रिवोमा च प्रीयेतां भावितात्मनः ॥
स सर्व्वपापदुःखाभ्यां विमुक्तः क्रीडते सदा ।
इह लोके भवेद्धन्यो देहान्ते परमं पदम् ॥"
इति देवीपुराणे गोरत्नव्रतनामाध्यायः ॥*॥

ग्रिवव्रतकारकं यथा,—
श्रीकृष्ण उवाच ।
"अथ गर्व्वान्वितो रुद्रो हन्तुं त्रिपुरमुद्यतम् ।
मत्वा मनसि संहर्षं सर्व्वेषां जगतामिति ।
कोऽयं पतङ्गवद्देह इति मत्वा ययौ रणम् ।
विहाय मूलं महत्तं महीयं कवचं परम् ।
चिरं बभूव समरं वर्षमेकं दिवानिशम् ।
न कोऽपि जेतुं कं शक्तो द्वौ समौ समरे सदा ॥
पृथिव्याश्च रथं कृत्वा शैलेन्द्रो मायया प्रिये ।
अक्षौहिणीसप्तयुतौ पक्षावग्रकोटियोजनम् ।
उत्तस्थौ शङ्करस्तूर्णं हन्तुं दैत्यं जगत्प्रभुः ।
जघान सुदृढेन रुद्रो दानवेन्द्रं प्रकोपतः ॥
वज्रमुष्टिप्रहारेण सद्यो मूर्च्छामवाप सः ।
क्षणेन चेतनां प्राप्य कोपाद्दानवपुङ्गवः ।
ग्रिवं सयानमुत्तोल्य पातयामास भूतले ॥
तदाहं कलया शीघ्रं वृषरूपं विधाय च ।
सयानं शङ्करं कृत्वा विषाणाभ्यामुरःक्रमम् ।
ददौ तस्मै स्वकवचं स्वशूलमरिमर्दनम् ॥
मया दत्तेन शूलेन जघान त्रिपुरं हरः ।
मामेव दर्पेणाहन्तारं तुष्टाव व्रीडितः पुनः ॥
तत्याज शङ्करो दर्पं विज्ञबीजं ततो विभुः ।
ज्ञानानन्दस्वरूपञ्च निर्लिप्तः सर्व्वकर्म्मसु ॥
ततोऽहं वृषरूपेण वहामि तेन तं प्रियम् ।
मम प्रियतमो नास्ति त्रैलोक्येषु ग्रिवात् परः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३६ अध्यायः ॥
मेषादिदादशराश्यन्तर्गतद्वितीयराशिः । तत्पर्य्यायः । तावुरिः २ । अस्य विशेषसंज्ञा ।
सौम्यः । अङ्गना । युग्मम् । समः । स्थिरः ।
पुष्करः । अयं चतुष्पात् । निशासु चाग्यः ।
दिवा चरः । कृषाक्षः । दक्षिणदिक्पतिः ।
निशाक्षः । पृष्ठोदयाक्षः । अस्याधिष्ठात्री देवता वृषः । कृत्तिकापादचतुरोहिणीमृगशिरोऽर्द्धनैतद्राशिर्भवति । स च स्त्रीस्वभावः ।
सुन्दरभूमिस्वामी । वातप्रकृतिः । श्वेतवर्णः ।
वैश्यजातिः । महाशब्दकरः । मध्यमस्त्रीवशः ।
मध्यमसन्तानश्च । एतद्राशिजात एतादृग्भवति । दाता । बागदुःखरः । निर्भयः । परदाराभिलाषी । इति वृहज्जातकादयः ॥ * ॥
एतद्राशिजातफलम् ।
"स्थिरमतिं सुमतिं कमनीयतां
कृषकतां हि वृषासुपभोगताम् ।
वृषगतो हिमगुर्भृगुमादिशेत्
सुकृतिनः कृतिनश्च सुखान्वितान् ॥"*॥
तज्जन्मजातफलम् ।
"वृषभगे भवेज्जातो गुरुभक्तः प्रियंवदः ।
सुखी कृती धनी शूरः सर्व्वजनप्रियः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
चतुर्व्विधपुरुषमध्ये पुरुषविशेषः । (यथा,—
"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।
शूद्रो म्लेच्छो वृषोऽन्यश्च स्त्रीपुंसोर्जातिलक्षणम् ॥"
इति रतिमञ्जरी ।)

तस्य लक्षणं यथा,—
"बहुगुणबहुबन्धुः शीघ्रकामी नताङ्गः
सकलरुचिरदेहः सत्यवादी वृषोऽयम् ॥"
इति च रतिमञ्जरी । * ॥
एकादशमन्वन्तरीयेन्द्रः । यथा,—
"रुद्रपुत्रस्य ते पुत्रान् वक्ष्याम्येकादशस्य तु ।
सर्व्वत्रगः सुशर्म्मा च देवानीकः पुरुषुकः ।
चित्रबर्हा दृढायुश्च आर्द्रकः पुत्रकस्तथा ।
विहङ्गमाः कामगमा निर्म्माणरतयस्तथा ॥
एकैकस्मिंश्चकस्येषां गणाश्चैव त्रयस्त्रयः ।
दशग्रीवो रिपुस्तस्य स्त्रीरूपी घातयिष्यति ॥"
इति गारुडे ८७ अध्यायः ॥
(कामान् वर्षतीति । वृष + कः ।) धर्म्मः । (यथा, मनुः । ८ । १६ ।
"वृषो हि भगवान् धर्म्मस्तस्य यः कुरुते ह्रलम् ।
वृषलं तं विदुर्देवास्तस्माद्धर्म्मं न लोपयेत् ॥")
शुक्लः । उत्तरपदस्थश्चेत् श्रेष्ठः । (यथा, हरिवंशे । १४१ । ६८ ।
"आरटं वर्षभं यद्वत् सहेद्वीरो गवांपतिः ।
तद्वदुद्वह वै वाजवर्षभरिन्दम ॥")
स्फटिकः । शुक्लः । वास्तुशाकभेदः । इति मेदिनी । वासकः । इति विश्वः । श्रीवृक्षः ।
इति त्रिकाण्डशेषः । शुक्रः । इति जटाधरः ।
कामः । बलवान् । रत्नमेकार्थकोषः । ऋषभनामौषधम् । इति राजनिर्घण्टः । (पतिः ।
यथा, काशीखण्डे ।
"स्वदृशं या परित्यज्य परदृशे वृषायते ।
वृषली सा हि विज्ञेया न भूमौ वृषली भवेत् ॥")
वृषकर्म्मा, स्त्री, सदृशेना । इति रत्नमाला ।
सदृशेनगुणश्च इति भाषा ।
वृषगन्धा, स्त्री, (वृषस्य गन्धो यस्याः ।) वल्गाकी ।
इति राजनिर्घण्टः ।
वृषचक्रं, क्ली, (वृषाकारं चक्रम् ।) क्षत्रियकर्म्मोक्तवृषाकारचक्रम् । यथा,—
"वृषचक्रं वृषाकारं सर्व्वावयवसंयुतम् ।
लिखित्वा विन्यसेद्राशीन् वृषनामक्षपूर्व्वकम् ॥
सुखाधिकर्क्षशीर्षेषु भद्रे स्वस्थे दिवं दिवम् ।
भौमे पृष्ठे धनं पुच्छेऽर्थौ पादे तूदरे चिरम् ॥
ह्रलप्रवाहवीर्य्योग्निप्रारम्भादिदिनक्षयम् ।
यदङ्गेषु स्थितं तस्मादङ्के सर्व्वं शुभाशुभम् ॥
आस्ये हानिः सुखं नेत्रे कर्णे भिक्षाटनं तथा ।
शीर्षे धृतिस्तथा भद्रे सौख्यं स्वस्थे च मङ्गलम् ॥
पृष्ठे कष्टं शुभं पुच्छे भयं पादे सुखं हृदि ।
चक्रयोगादिदं प्रोक्तं वृषचक्रं फलं बुधैः ॥"
इति ज्योतिस्तत्त्वम् ॥
वृषणः, पुं, अण्डकोषः । इत्यमरः ॥ तस्य लक्षणं यथा,—
"स्थूललिङ्गो दरिद्रः स्यादृजुः स्थूलवृषणो भवेत् ।
विषमे स्त्रीसमो वै नृपः स्यादृषणे समे ।
प्रलम्बवृषणोऽप्यायुर्निर्द्धनो मणिभिर्भवेत् ॥"
अपि च ।
"जलान्ते एकवृषणो वृषणाभ्यां बलः स्त्रियाम् ।

समाभ्यां चितिपः प्रोक्तः प्रलम्बेन मृताब्दवान्।"
इति गारुडे ६३।६५ अध्यायौ।

वृषणकच्छूः, स्त्री, (वृषणस्य कच्छूः।) शुक्ररोग-विशेषः। तल्लक्षणं यथा,—
"स्नानोत्सादनहीनस्य मलो वृषणसंश्रितः।
प्रक्लिद्यते तदा स्वेदात् कच्छूं जनयते तदा।
ततः कण्डूयनात् क्षिप्रं स्फोटाः सावश्च जायते।
प्राहुर्वृषणकच्छूं तां श्वेतरक्तप्रकोपनाम्।
उत्सादनं उद्वर्त्तनम्। मलः मैल् इति लोके।
प्रक्लिद्यते आर्द्रो भवति। *। तच्चिकित्सा यथा,—
"सर्ज्जार्ज्जुनकुष्ठसैन्धवसितविहार्यैः प्रकल्पितो योगः।
उद्वर्त्तनेन नियतं शमयति वृषणस्य कच्छूतिम्।
भिषगतृषणकच्छूषु चिकित्सेत् प्रामरोगवत्।
अहिपूतनानिर्हरक्रिययापि च तां हरेत्॥"
इति भावप्रकाशः॥

वृषणाश्वः, पुं, इन्द्रस्य घोटकः। इति त्रिकाण्डशेषः॥
(एतन्नामकवृषविशेषः। यथा, ऋग्वेदे। १। ५१। १३।
"मेनाभवो वृषणश्वस्य सक्रतौ।"
"वृषणश्वस्य एतदाख्यस्य राज्ञः मेनाभवो मेनानाम कन्या भूः।" इति तद्भाष्ये सायणः॥*॥
सेचनसमर्थाश्वयुक्ते, त्रि। यथा, ऋग्वेदे। ८। २०। १०।
"वृषणश्वेन मरुतो वृषभेण तुराषाहा।"
"वृषणश्वेन वृषभिः सेचनसमर्थैरश्वैरुपेतेन।" इति तद्भाष्ये सायणः॥)

वृषणस्, क्ली, इन्द्रस्य धनम्। इति जटाधरः॥
(त्रि, वर्षणकर्त्ता। यथा, ऋग्वेदे। २। ३१। ८।
"न यत्परो नान्तर आदधर्षद्वृषणस्।"
"वृषणस्वं हि धनस्य वर्षितारौ।" इति तद्भाष्ये सायणः॥)

वृषदंशकः, पुं, (वृषं मूषिकं दशतीति। दंश+ण्वुल्।) विड़ालः। इत्यमरः॥ (यथा, साहित्यदर्पणे १० परिच्छेदे।
"क्षिपसि मुखं वृषदंशकवदने।")

वृषध्वजः, पुं, (वृषो ध्वजो वाहनं यस्य।) शिवः। इत्यमरः॥ (यथा, कादम्बर्यां २ खभावाख्याने।
"जटाभिःस्निग्धताम्राभिरावितासौवृषध्वजः॥")
हेरम्बः। पुण्यकर्म्मा। इति विश्वः॥

वृषध्वाङ्क्षी, स्त्री, नागरमुस्ता। इति राजनिर्घण्टः॥

वृषनाग्नः, पुं, (वृषस्य नाग्नं यस्मात्।) विड़ङ्गः। इति शब्दमाला॥

वृषपतिः, पुं, (वृषस्य पतिः।) यमः। शिवः। इति केचित्॥

वृषपत्निका, स्त्री, वसान्नी। इति राजनिर्घण्टः॥

वृषपर्णी, स्त्री, (वृषस्य मूषिकस्य कर्ण इव पर्णं यस्याः। ङीष्।) आखुपर्णी। इति रत्नमाला॥

वृषविशेषः। पुरातो इति भाषा। तत्पर्य्यायः। दध्याजी २ चक्राङ्गी ३ सुदर्शना ४। इति राजनिर्घण्टः॥

वृषपर्व्वा, [न्] पुं, शिवः। दैत्यभेदः। (यथा, महाभारते। १। ६०। १६।
"वृषपर्व्वेति विख्यातः श्रीमान् यस्तु महासुरः।"
अस्य विवरणन्तु तत्रैव द्रष्टव्यम्। *।) भङ्गारवृक्षः। कपोतः। इति विश्वः। (विष्णुः। यथा, महाभारते। १३। १४६। ४१।
"वृषाही वृषभो विष्णुर्वृषपर्व्वा वृषोदरः॥"
राजविशेषः। यथा, मार्कण्डेयपुराणे। १२४। ५।
"जगाहे नरराजस्य सकाशाद्वृषपर्व्वणः॥")

वृषभः, पुं, (वृष सेचने। वृष+"ऋज्रेन्द्राग्रवज्रेति।" उणा० २। १२३। इति अभच्। स च कित्।) वृषः। (यथा, मनौ। ६। ५०।
"यदन्यगोषु वृषभो वत्सानां जनयेच्छतम्।")
श्रेष्ठः। (यथा, महाभारते। ३। ३३। ८०।
"इक्ष्वाकुभिः सह कैकेयैर्वृष्णीनां वृषभेण च।")
वेदभौतिभेदः। इति मेदिनी। आदित्यजः। इति हेमचन्द्रः। कर्णरन्ध्रम्। ऋषभनामौषधम्। इत्युणादिकोषः॥*॥ (चतुर्विधपुरुषान्तर्गतपुरुषविशेषः। यथा,—
"शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम्।
वृषभे हस्तिनी तुष्टा हस्तिनी रमते हयम्।"
इति रतिमञ्जरी।)
गोशब्दे अलिखनात् प्रसङ्गादत्र आतिदेशिकगोहत्या लिख्यते।
"गामाहारं प्रकुर्व्वन्तं पिबन्तं यो निवारयेत्।
याति गोविप्रयोर्मध्ये गोहत्याञ्च लभेत्तु सः॥
दण्डैर्गोताड़यन्मूढो यो विप्रो वृषवाहनः।
दिने दिने गवां हत्यां लभते नात्र संशयः॥
ददाति गोभ्य उच्छिष्टं भोजयेद्वृषवाहकम्।
भोजयेद्वृषवाहान्नं स गोहत्यां लभेद्ध्रुवम्॥
वृषलीपतिं याजयेद्यो शूद्रस्यान्नं तस्य यो नरः।
गोहत्याशतकं सोऽपि लभते नात्र संशयः॥
पादं ददाति वह्नौ यो गाञ्च पादेन ताड़येत्।
यष्टिं विशेद्धौताङ्घ्रिः स्नात्वा गोवधमाप्नुयात्॥
यो शूद्रस्योच्छिष्टपादेन स्पृशेत् स्निग्धाङ्घ्रिरेव च।
सूर्य्योदये च हिर्भाजी स गोहत्यां लभेत् ध्रुवम्॥
अवीरान्नञ्च यो शूद्रे योगिनीवी च ब्राह्मणः।
यज्ञिसन्ध्याविहीनश्च स गोहत्यां लभेद्ध्रुवम्॥
पितॄंश्च पर्व्वकाले च तिथिकाले च देवताः।
न सेवतेऽतिथिं यो हि स गोहत्यां लभेद्ध्रुवम्॥
खभर्त्तरि च क्रुद्धे वा भेदबुद्धिं करोति या।
कटूक्त्या ताड़येत् कान्तं सा गोहत्यां लभेत् ध्रुवम्।
गोमार्गं खननं कृत्वा ददाति ग्रस्तमेव च।
तड़ागे वा तटूर्द्धे वा स गोहत्यां लभेद् ध्रुवम्॥
प्रायश्चित्तं गोवधस्य यः करोति यतिक्रमम्।
अर्थलोभादथाज्ञानात् स गोहत्यां लभेत् ध्रुवम्॥
राजके दैवके यज्ञाद्रोखामी गां न पालयेत्।
दुःखं ददाति यो मूढो गोहत्यां लभते ध्रुवम्॥
प्राश्निकं लङ्घयेद् यो हि देवार्थीमन्त्रणं जलम्।
नैवेद्यं पुष्पमन्नञ्च स गोहत्यां लभेद्ध्रुवम्॥
ग्रन्थन्नाक्षीति यो वादी मिथ्यावादी प्रतारकः।
देवदेवी गुरुदेवी स गोहत्यां लभेद्ध्रुवम्॥
देवताप्रतिमां दृष्ट्वा गुरुं वा ब्राह्मणं सति।
न सम्भ्रमान्नमेद्यो हि स गोहत्यां लभेत् ध्रुवम्॥
न दद्याद्यो ग्रिषं कोपात् प्रणताय च याचते द्विजः।
विद्यार्थिने च विद्याञ्च स गोहत्यां लभेत् ध्रुवम्॥
गोहत्या ब्रह्महत्या च कथिता चातिदेशिकी।
यथा श्रुतं सूर्य्यवक्त्रात् किं भूयः श्रोतुमिच्छसि॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

वृषभगतिः, पुं, (वृषभेव गतिर्यस्य।) शिवः। इति हारावली॥

वृषभध्वजः, पुं, (वृषभः ध्वजो वाहनं यस्य।) शिवः। इति केचित्॥ (यथा, रघुः। २। ३६।
"असुं पुरः पश्यसि देवदारुं
पुत्रीकृतोऽसौ वृषभध्वजेन॥")

वृषभाक्षी, स्त्री, इन्द्रवारुणी। इति राजनिर्घण्टः॥

वृषभक्षुधि, क्ली॥

वृषभानुः, पुं, सुरभानुपुत्रः। स च राधिकापिता। यथा,—
"सुचन्द्रो वृषभानुश्च ललाभ यज्ञ गोकुले।
पद्मावत्याञ्च जठरे सुरभानस्य रेतसा॥
जातिस्मरो हरेरंशः शुक्लपक्षे यथा शशी।
ववर्द्धातुदिनं तत्र व्रजराजे व्रजाधिपः॥
कलावती कान्यकुब्जे बभूवायोनिसम्भवा।
जातिस्मरा महासाध्वी सुन्दरी कमलाकला॥
कान्यकुब्जे वृषश्रेष्ठो भगवन्दन उरुक्रमः।
स तां संप्राप योगाग्नौ यज्ञकुण्डसमुत्थिताम्॥
ज्ञात्वा वक्षसि राजेन्द्र स्वकान्तायै ददौ मुदा।
मालावती स्वसं दत्त्वा तां पुपोष प्रहर्षिता॥
ददर्श नन्दः पथि तां गच्छतीच सुदान्वितः॥
नन्द उवाच।
शृणु राजेन्द्र वक्ष्यामि विशेषवचनं शुभम्।
सम्बन्धं कुरु कन्याया विप्रेणैव च साम्प्रतम्॥
सुरभानसुतः श्रीमान् वृषभानुर्व्रजाधिपः।
नारायणांशो गुणवान् सुन्दरश्च सुपण्डितः॥
कन्या तेऽयोनिसंभूता यज्ञकुण्डसमुद्भवा।
त्रैलोक्यमोहिनी ज्ञात्वा कमलांशा कलावती॥
स च योग्यस्तदुहितुस्तद्योग्या ते च कन्यका॥
भगवन्दन उवाच।
सम्बन्धो हि विधिवशो न मे साध्यो व्रजाधिप।
प्रजापतिर्योगकर्त्ता जन्मदाताहमेव च॥
वृषभानुप्रिया धात्रा लिखिता चेत् सुता मम।
पुरा भूतैव को वाहं केनान्येन निवार्य्यते॥
वृषभानुमनुज्ञाप्य व्रजश्रेष्ठो व्रजं गतः।
गत्वा स कथयामास सुरभानस्य संसदि॥
सुरभानश्च यत्नेन नन्देन च समादरम्।
सम्बन्धं योजयामास गर्गद्वारा च सत्वरम्॥
वृषभानुर्मुदा युक्तः प्राप्य तांच कलावतीम्।

रेमे सुनिर्ज्जने रम्ये वृषभे न दिवानिशम् ॥
तयोः कन्या च कालेन राधिका सा बभूव ह ।
देवात् श्रीदामशापेन श्रीकृष्णस्याज्ञया पुरा ।
अयोनिसम्भवा सा च लक्ष्मीप्राणाधिका सती ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥

वृषभासा, स्त्री, (वृषेण धर्म्मेण भासते इति । भास + अच् । स्त्रियां टाप् ।) अमरावती । इति त्रिकाण्डशेषः ॥

वृषयः, पुं, (वृ + "वृङो: सुग्दुकौ च ।" उणा० ४ । १००। इति कयन् सुगागमश्च ।) आश्रयः । इत्युणादिकोषः ॥

वृषलः, पुं, यज्वनः । शूद्रः । (यथा, मनौ । ४ । १४० ।
"नाग्नातेन समं गच्छेन्नैको न वृषलैः सह ॥"
अस्य नामनिरुक्तिर्यथा, तत्रैव । ८ । १६ ।
"वृषो हि भगवान् धर्म्मस्तस्य यः कुरुते ह्रासम् ।
वृषलं तं विदुर्देवास्तस्माद्धर्म्मं न लोपयेत् ॥")
चन्द्रगुप्तराजः । वाजी । इति मेदिनी ॥ अधार्म्मिकः । इति जटाधरः ॥

वृषलात्मजः, त्रि, (वृषलस्यात्मजः ।) अधार्म्मिकजातः । इति केचित् ॥ शूद्रोद्भवश्च ॥

वृषली, स्त्री, निश्चयेन अविवाहिता रजस्वला कन्या । यथा । अत्रिकाश्यपौ ।
"पितुर्गेहे च या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥"
इत्युद्वाहतत्त्वम् ॥
स्वपतिं परित्यज्य या परपतिगामिनी । यथा,—
"स्वपतिं या परित्यज्य परपत्ये वृषायते ।
वृषली सा हि विज्ञेया न शूद्री वृषली भवेत् ॥"
इति काशीखण्डः ॥
(वृषलस्य भार्य्या । ङीप् ।) शूद्री च ॥ (यथा, महानिर्व्वाणतन्त्रे । १ । ४७ ।
"शूद्रान्नभोजिनः क्रूरा वृषलीरतिकासुकाः ॥")

वृषलीपतिः, पुं, (वृषल्याः पतिः ।) वृषलीविवाहकर्त्ता । यथा,—
"यस्तु तां वरयेत् कन्यां ब्राह्मणो ह्यगदुर्म्मतिः ।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ॥"
इत्युद्वाहतत्त्वम् ॥
"यदि शूद्रां व्रजेत् विप्रो वृषलीपतिरेव सः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥

वृषलोचनः, पुं, (वृषस्य लोचने इव लोचने यस्य ।) मूषिकः । इति हेमचन्द्रः ॥ वृषनयने, स्त्री ॥

वृषवाहनः, पुं, (वृषो वाहनं यस्य ।) शिवः । इति केचित् ॥

वृषघ्नः, पुं, (वृषस्यासुरविशेषस्य घ्नः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

वृषस्कन्धः, [न्] पुं, भृङ्गराजः । इति शब्दमाला ॥

वृषस्यन्ती, स्त्री, (वृषं नरं शुक्रलं वा इच्छति मैथुनाय । वृष + "सुप आत्मनः क्यच् ।" ३ । १ । ८ । इति क्यच् । "अश्वबीरेति ।" ७ । १ । ५१ । इति सुगागमः । ततः । "अट: शतृशानचाविति ।" ३ । २ । १२४ । इति शतृ ।
"उगितश्च ।" ४ । १ । ६ । इति ङीप् ।) कामुकी । इत्यमरः ॥ वृषेण जन्तुमिच्छन्ती गौः । इति व्याकरणम् ॥ तथा च ।
"लक्ष्मणं सा वृषस्यन्ती महोक्षं गौरिवागमत् ।
मन्मथायुधसम्पातव्यथमानमतिः पुनः ॥"
इति भट्टिः ॥

वृषा, स्त्री, मूषिकपर्णी । इत्यमरः ॥ कपिकच्छूः । इति हेमचन्द्रः ॥

वृषा, [न्] पुं, (वर्षतीति । वृष सेचने + "कनिन् युवृषितक्षीति ।" उणा० १ । १५६ । इति कनिन् ।) इन्द्रः । (यथा, रघुः । १० । ५२ ।
"प्राजापत्योपनीतं तत् अग्र्यं प्रत्यग्रहीन्नृपः ।
वृषेव प्रयसां सारमाविष्कृतसुदन्वता ॥")
कर्णः । वेदनाशनम् । दुःखम् । इति मेदिनी ॥ वृषः । (यथा, ऋग्वेदे । १० । ४३ । ८ ।
"वृषा न क्रुद्धः पतयत् रजःसु ॥"
"रजःसु लोकेषु वृषा न यथा वृषभः क्रुद्धः सन् प्रतिवृषभवधाय पतयत् गच्छति ।" इति तद्भाष्ये सायणः ॥) घोटकः । इति हेमचन्द्रः ॥ (यथा, ऋग्वेदे । ७ । ६८ । १ ।
"आर्वा रथो रोदसी वद्धानो
हिरण्ययो वृषभिर्वातरंहाः ॥"
"हे अश्विनौ वां रथो वृषभिः युवभिरश्वैर्युक्तः सन्नायातु ।" इति तद्भाष्ये सायणः ॥ पिता । यथा, ऋग्वेदे । ७ । २० । ५ ।
"वृषा जजान वृषणं रेवाय ॥"
"वृषा सेक्ता पिता कश्यपो वृषणं कामानां वर्षितारमिन्द्रम् ।" इति तद्भाष्ये सायणः ॥ त्रि, वर्षकः । यथा, ऋग्वेदे । १० । ६० । ७ ।
"ब्रह्मजासतिर्वृषभिर्वराहैः ॥"
"वृषभिर्वर्षुकैर्वराहैर्वराहारैः ।" इति तद्भाष्ये सायणः ॥)

वृषाकपायी, स्त्री, (वृषाकपेः विष्णोः प्रियस्य अग्नेरिन्द्रस्य वा भार्य्या । वृषाकपि + "वृषाकपायीति ।" ४ । १ । ३७ । इति ङीप् । ऐकारादेशश्च ।) लक्ष्मीः । गौरी । इत्यमरः ॥ स्वाहा । इति भरतः ॥ शची । इति स्वामी ॥ (यथा, ऋग्वेदे । १० । ८६ । १३ ।
"वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे ॥"
"हे वृषाकपायि कामानां वर्षकत्वादभीष्टदेवागमनाच्चेन्द्रो वृषाकपिस्तस्य पत्नि ।" इति तद्भाष्ये सायणः ॥) जीवन्ती । शतावरी । इति मेदिनी ॥

वृषाकपिः, पुं, ("वृषः कपिरस्येति । अन्येषामपीति दीर्घः ।" इति उणा० ४ । १४३ । इत्यस्य वृत्तौ उज्ज्वलदत्तः ।) विष्णुः । (यथा हरिवंशे । २१६ । ४७ ।
"ततो विभुः प्रवरवराहरूपधृक्
वृषाकपिः प्रबलमथैकदंष्ट्रया ॥")
शिवः । (यथा, हरिवंशे । १ । ५२ ।
"वृषाकपिश्च भगवान् कपर्द्दी रैवतस्तथा ॥")
अग्निः । इति मेदिनी ॥ इन्द्रः । इति वृषाकपायीशब्दस्य प्रथीवाचकत्वदर्शनात् । (यथा, भागवते । ६ । १६ । १० ।
"एवं सञ्चोदितो विप्रैर्मरुत्वानहनद्रिपुम् ।
ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥"
स्वर्गः । यथा, महाभारते । ३ । ३ । ६१ ।
"त्वं हंसः सविता भानुरंशुमाली वृषाकपिः ॥")

वृषाकरः, पुं, मायः । इति राजनिर्घण्टः ॥

वृषाङ्गः, पुं, (वृषोऽङ्गोऽस्य ।) शिवः । (यथा, भागवते । ८ । ८ । १ ।
"पीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवाः ॥")
साधुः । भल्लातकः । यक्षः । इति मेदिनी ॥

वृषाङ्गजः, पुं, डमरुः । इति शब्दरत्नावली ॥

वृषाचलः, पुं, (वृषेण अचलति गच्छतीति । अचुगतौ + क्युः ।) शिवः । इति त्रिकाण्डशेषः ॥

वृषाजकः, पुं, शिवः । इति त्रिकाण्डशेषः ॥

वृषाजकः, पुं, (वृषस्यासुरस्याजकः ।) विष्णुः । इति शब्दरत्नावली ॥

वृषायणः, पुं, चटकः । इति हारावली ॥ (वृषेण अयनं गमनं यस्य ।) शिवश्च ॥

वृषाहारः, पुं, (वृष उन्दूर आहारो यस्य ।) विड़ालः । इति हारावली ॥

वृषी, [न्] पुं, मयूरः । इति शब्दमाला ॥

वृषी, स्त्री, व्रतिनां कुशादिमयासनम् । इत्यमरः ॥ (यथा, देवीभागवते । ५ । ३२ । ३० ।
"ग्रन्थौ दर्भौ वृषौ तस्मै गुरुणा नोदितस्तदा ॥")

वृषोत्सर्गः, पुं, (वृषस्योत्सर्गः ।) अग्नौचान्नद्वितीयदिनादिकर्त्तव्यत्रिशूलचक्राङ्कितवत्सतरीचतुष्टययुक्तवृषत्यागः । वृषाभावे तत्प्रतिनिधिर्यथा,—
"एकादशेऽहि सम्प्राप्ते वृषाभावो भवेद्यदि ।
दर्भैः पिष्टैस्तु संपाद्य तं वृषं मोचयेद्बुधः ॥
वृषोत्सर्ज्जनवेलायां वृषाभावः कथञ्चन ।
मृत्तिकाभिस्तु दर्भैर्वा वृषं कृत्वा विमोचयेत् ॥"
इति गारुड़े प्रेतकल्पे ६ अध्यायः ॥
तस्य विधिर्यथा । कालविवेकेऽग्निपुराणम् ।
"एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः ।
प्रेतलोकं परित्यज्य स्वर्गलोकं स गच्छति ॥
आद्यश्राद्धे त्रिपक्षे वा षष्ठे मासि च वत्सरे ।
वृषोत्सर्गश्च कर्त्तव्यो यावन्न स्यात् सपिण्डना ।
सपिण्डीकरणादूर्द्धं कालोऽन्यः श्राद्धचोदितः ॥"
यस्य प्रेतस्थिति सामान्यतः स्मृतेः पिण्डभिन्नस्यापि वृषोत्सर्गः प्रतीयते ॥ * ॥ अथ वृषोत्सर्गे व्याख्यासामः । कार्त्तिक्यां पौर्णमास्यां रेवत्यामाश्वयुज्यां दशाहे गते संवत्सरेऽतीते वेति । अत्र ह्यततिथिमादाय संवत्सरगणना दशाहवदविरोधः । एकादशाह इति आद्यश्राद्ध इति चाग्नौचान्नद्वितीयदिनपरम् ।
"अग्नौचान्नाद्वितीयेऽह्नि ग्रह्यां दर्भादिलक्षणाम् ।
काञ्चनं पुरुषं तद्वत् फलवस्त्रसमन्वितम् ॥
संपूज्य द्विजदाम्पत्यं नानाभरणभूषणैः ।
वृषोत्सर्गश्च कर्त्तव्यो देया च कपिला शुभा ॥"
इति मत्स्यपुराणेनैकवाक्यत्वात् ॥
प्रेतवृषोत्सर्गे वृद्धिश्राद्धं न कर्त्तव्यम् ।

"नाब्दात् संवत्सराद्वृद्धिर्वृषोत्सर्गे विधीयते।
संपिण्डीकरणादूर्द्धं वृद्धिश्राद्धं विधीयते॥"
इत्यृग्वसो वचनात्। * ॥
वृषलक्षणमाह काश्यपः।
"अयुजो जीवत्साया: पयस्विन्या: सुतो बली।
एकवर्णो द्विवर्णो वा यो वा स्यादरुकासुतः॥
यूथादुत्तमरो यस्तु समो वा नीच एव वा।
सम्भावनात् सन्न परावृत्तदृष्टत्वारयेद्वृषः॥"
अरुकासुतः अरुकासु जातः। कामधेनुप्रभृतिषु मत्स्यपुराणम्।
"चरणानि सुवर्णं पुच्छं यस्य चैतानि गोपते।
लाङ्गूलसदृशवर्णं तं गोलमिति निर्दिशेत्॥
वृष एव च मोक्तव्यो न सन्धार्यो वृषे वसन्।
तदर्थमेषा चरति लोके गाथा पुरातनी॥
एकश्चा बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
गौरीं वापुद्वहेद्वार्यां गौलंवा वृषमुत्सृजेत्॥"
वत्सतरीविशेषयति।
"अयतो लोहिता पत्नी पार्श्वाभ्यां गौलपाण्डरे।
पृष्ठतश्च भवेत् श्यामा वृषभस्य च मोचके॥"*॥
वैधकर्मार्थमङ्गपान्तश्चिताग्नसूक्तं हयग्रीवपञ्चरात्रम्। "नवेन चित्रवस्त्रेण वितानं कल्पयेद्बुधः।" अत्र च।
"शुक्लवासाः शुचिर्भूत्वा ब्राह्मणात् स्वस्तिवाच्य च।
कौर्त्तयेद्भारतञ्चैव तथा स्यादर्चयं हविः॥"
इति दानधर्मस्थवृषोत्सर्गप्रकरणीयवचनात् अत्रयङ्विङ्कारेण स्वस्तिवाचनानन्तरं भारतनामोच्चारणं कार्य्यम्।
"यद्वा कुरुते पापं ब्राह्मणस्त्रिन्द्रियेश्वरः।
महाभारतमाख्याय पूर्वां सन्ध्यां विमुच्यति॥"
इत्यादि-पुराणोक्त-प्रातर्महाभारतोच्चारवत्परादेशीयासु विराटपर्व्व पाठयन्ति। भविष्ये।
"वृषोत्सर्गश्च द्विविधो जीवतो वा मृतस्य च।"
इत्युपक्रम्य।
"अनुज्ञां यज्ञ च पुनर्नत्वेशं पूजयेद्वटे।
यद्वांचैव यजेत् पश्चात् विष्णुं संपूजयेत् ततः॥"
छन्दोगपरिशिष्टम्।
"गोग्रासायां प्रवीयाथिं संस्कृत्य श्रोत्रियेष्वपि।
अग्निपूर्वेन्द्रेश्वरेभ्यो निर्वपेत् पायसं चरुम्॥"
गोग्रासायामिति प्रधानकल्पः। वृषभ इत्युपक्रम्य।
"उत्सर्गश्चो विधानेन श्रुतिस्मृतिनिदर्शनात्।
प्राशुदक्प्रवणे देशे मनोज्ञे निर्जने वने॥"
सङ्कल्पानन्तरं यजमान एव प्रथमं ब्रह्मवरणादिकं कुर्य्यात् तत्र ब्रह्मवरणं प्रथमतः। ज्योतिष्टोमे ब्रह्मोद्गातृहोतृध्वर्य्यु इत्यादिदर्शनेन। यज्ञसंग्रहे।
"द्यूते च व्यवहारे च प्रवृते यज्ञकर्म्मणि।
यानि पश्यन्त्युदासीना: कर्त्ता तानि न पश्यति।
एक: कर्म्मनियुक्त: स्यात् द्वितीयस्तत्प्रधारक:॥
तृतीय: पश्यात् प्रश्नं ततः कर्म्म समाचरेत्॥"
वरणानन्तरं कुशग्रन्थिकां समाप्य यथाविधिना चरुपाकञ्च कृत्वा चरुहोमं कुर्य्यात्। ततः स्विष्टिकृद्धोममहाव्याहृतिहोमौ कार्य्यौ॥*॥ततः
"वृषस्य दक्षिणे पार्श्वे त्रिशूलाङ्कं समुल्लिखेत्।
वृषा त्वमीति सक्थेस्य चक्राङ्कमपि दर्शयेत्॥
तप्तेन पञ्चादयसा ऋषौ तावेव कारयेत्।
अथैनं कलसस्थाभिरद्भिरेको वृषेश वा।
सर्व्वौषधिसुगन्धीभि: स्नापयेदत्विजा अपि॥
परिधाप्याहते शुक्ले वाससी हेमभूषितम्।
सत्यमित्यादिशब्देन मन्त्रेणाभ्यर्च्य शिरसि न्यसेत्॥"
ततो वृषवत्सतरीभ्यामलङ्कारादिकं दत्वा विश्वकर्मनिर्म्मितयूपे उपयूपे च बद्ध्वा एनं युवानं इति मन्त्रं पठित्वा वत्सतरीचतुष्टयसहितं वृषं तत्तत्फलकामो अष्टोत्तरादिवाक्येनोत्सृजेत्॥*॥ ततो यूपादुत्सृज्य वत्सतरीचतुष्टयसहितं वृषमेकाग्र्यां चालयित्वा प्रार्थयेत्। यथा,—
"न खादेत् परशस्यानि नाक्रामेदृगभिणीञ्च याम्।
धर्म्मोऽसि सं चतुष्पादस्तत्सखे प्रियाक्षिमाः।
चतुर्थो योक्त्रयार्थाय मयोत्सृष्टस्त्वया सह॥
देवानाञ्च पितॄणाञ्च मनुष्याणाञ्च योषितः।
भूतानां प्रतिजनमाख्या वार्द्धं व्रजन्त्विमाः॥
नमो ब्रह्मण्यदेवेभ्य पितृभूतपतिभ्यो नमः।
त्वयि सुखेऽस्तु वा लोका मम सन्तु निरामयाः॥
मा मे ऋणोऽस्तु देवेभ्य ऋषेभ्यो मातृपितृभ्यो मानुषेभ्यः।
धर्म्मोऽसि सत्यप्रतिज्ञस्य या गतिः सास्तु मे ध्रुवा।
यत्किञ्चित् दुष्कृतं कर्म्म लोभमोहात् कृतं भवेत्।
तत्सर्वं दृष्ट्य देवेश पितुः स्वर्गं प्रयच्छ मे॥
यावन्ति तव लोमानि शरीरे सम्भवन्ति च।
तावद्वर्षसहस्राणि स्वर्गे वासोऽस्तु मे पितुः॥"
इति मत्स्यपुराणोक्तं पठेत्। तत आचारादृषपुच्छगलितोदकेन ब्रह्मपुराणोक्तपर्वं कुर्य्यात् ततः प्रकृतदक्षिणां दत्वा कर्म्मकारयित्रृभ्यो दक्षिणां दद्यात्। इति वृषोत्सर्गतत्त्वम्॥*॥
अपि च।
"कार्त्तिक्यां कारयेत् पूजां यागं देवीप्रियं सदा।
गोत्सर्गन्तु प्रकर्त्तव्यं गोलं वा वृषमुत्सृजेत्॥
सर्व्वयज्ञफलं ब्रह्म प्राप्नुयादविचारयन्॥
मनुरुवाच।
अश्वमेधसमं पुण्यं वृषोत्सर्गादवाप्यते।
रेवत्यादिनि मासि कार्त्तिक्यां कार्त्तिकस्य वा॥
गोविवाहोऽथवा कार्य्यो माघ्यां वै फाल्गुनेऽपि वा॥
शिवीमामङ्गलचैत्रे ऋतीयायां महाफलम्।
अश्वत्थोदुम्बरीयाणां विवाहविधिना भवेत्॥
सतीरयं भवेत्तीर्थे उत्सर्गो गोकुलेऽपि वा।
पतत्रो वत्सिका भद्रा द्वौ वा संभवतोऽपि वा॥
वत्सं धर्म्माङ्गसंपूर्णं कन्या सा वत्सिका भवेत्।
अलंकृत्य यथाशोभसुत्सर्गं कारयेन्मुने॥
विवाहमेकवत्सीयमेवमेव भवेत् सदा।
वृषेण अश्वमेधस्य यागस्य फलदायकम्॥
जायेरन् बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेद्वा अश्वमेधेन गोलं वा वृषमुत्सृजेत्॥
रोहितो यस्तु वर्णेन शुक्लवर्णखुरो वृषः।
लाङ्गूलशिरसश्चैव स वै गोलवृषः स्मृतः॥
अङ्कितोत्सृज्यते पूर्वं गाचालंकृत्य सर्व्वतः।
तप्तेन दामतप्तञ्च वाम्ये शूलं समालिखेत्॥
श्रोत्रेण हेमतारेण आयसेनाथवाङ्कयेत्।
एवं कृत्वा अवाप्नोति फलं वाजिमखोदितम्॥
यस्तद्विधोत्सृज्येद्वृषवृषं स नमेतावचारणात्।
यथा शिवीमया अश्वो पूजिता सर्व्वकामदा।
एवं देवमयं यद्वा अगन्नं लभते फलम्॥
मङ्गलाविहितं यच्च यच्च गोदानजं फलम्।
सहस्रक्रतुयज्ञेन वृषोत्सर्गादवाप्नुयात्॥"
इति देवीपुराणे पूजाविधि नामाध्यायः॥
वृष्टिः, स्त्री, (वृष+क्तिन्।) मेघाज्जलविन्दुपतनम्। तत्पर्य्यायः। वर्षम् २। इत्यमरः॥ गोष्पतम् ३ पराग्घतम् ४ वर्षथम् ५। इति शब्दरत्नावली। तत्कारणं यथा,—
"अस्तादित्ये यत्र भवन्ति सर्व्वेचराः।
तदा वृष्टिः क्रमाज्ज्ञेया शुक्लकेवलवासरैः॥"
इति स्वरोदयः॥ * ॥
अपि च।
"ब्रूहन्तु परमार्थञ्च किमिन्द्रादृष्टिरेव च।
सूर्य्याद्धि जायते तोयं तोयात् शस्यानि प्राणिनः॥
तेभ्योऽन्नानि फलान्येव तेभ्यो जीवन्ति जीविनः।
सूर्य्यश्चन्द्रश्च मेघश्च काले तस्मात् समुद्भवः।
सूर्य्यो मेघादयः सर्व्वे विधात्रा ते निरूपिताः॥
यत्राब्दे यो जलधरो गर्जञ्च सागरो मरुत्।
शस्याधिपो वृषो मन्त्री विधात्रा ते निरूपिताः॥
जलाढ्कानां शस्यानां शुक्लानाञ्च निरूपितम्।
अब्देऽब्देऽस्मिन् तत् सर्व्वं कल्पे कल्पे युगे युगे॥
इन्द्रो वसुप्रदादाय करेण जलमोचितम्।
दत्त्वाहनाय तद्वाहातेन प्रेरितो घनः।
स्थाने स्थाने पृथिव्याञ्च काले काले यथोचितम्॥
ईश्वरेच्छयाविर्भूतं तूर्णं भूतं प्रतिवस्तुकम्।
भूतं भवं भविष्यञ्च महत् क्षुद्रञ्च मध्यमम्।
धात्रा निरूपितं कर्म्म केन तात निवार्य्यते॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २१ अः॥
आसन्नवृष्टिसूचकानि यथा,—
"मयूरा: स्वानधिकृत्य शब्देन वृषिता मुहुः।
केकायन्ति प्रतिवने सततं वृष्टिसूचकाः॥
मेघोत्सुकानां मधुरचातकानां मनोहरः।
श्रूयतामतिमत्तानां वृष्टिसन्निधिसूचकः॥
गगने शक्रचापेन कृतं साम्मुतमादृतम्।
धारासारशरैस्तापं हेतुं प्रति यथोचितः॥"
इति कालिकापुराणे १५ अध्यायः॥*॥

दृष्टिफलं यथा,—
"पतिव्रताया वचनान्नोल्लङ्घति दिवाकरः।
सूर्य्योदयं विना नैव स्नानदानादिकाः क्रियाः॥
नार्य्येवंविधरत्नैव क्रतभावच लक्ष्यते।
नैवाप्यायनमस्माकं विना होमेन जायते॥
वयमाप्यायिता मर्त्यैर्यज्ञभागैर्यथोदितैः।
दृष्टादिनाशयच्छामो मर्त्यान् ग्रस्यादिसिद्धये॥
निष्पादितास्रोषधीषु मर्त्या यज्ञैर्यजन्ति नः।
एवं वयं प्रयच्छामः कामान् यज्ञादिपूजिताः॥
अधो हि वर्षाम वयं मर्त्यानोर्ध्वप्रवर्षिणः।
तोयवर्षेण हि वयं हविर्वर्षेण मानवाः॥
येऽस्माकं न प्रयच्छन्ति विधा नैमित्तिकीः
क्रियाः।
क्रतुभागं दुरात्मानः स्वयं येऽश्नन्ति लोलुपाः॥
विनाशाय वयं तेषां तोयसूर्य्यामिमारुतैः।
क्षितिच संदूषयामः पापानामपकारिणाम्॥
दुस्तोयादिदोषेण तेषां दुष्कृतकारिणाम्।
उपसर्गाः प्रवर्त्तन्ते मरणाय सुदारुणाः॥
ये चास्मान् प्रीणयित्वा तु भुञ्जते ग्रैवमात्मना।
तेषां पुण्यादयं लोकान् वितरामो महात्मनाम्॥"
इति मार्कण्डेयपुराणे पतिव्रतामाहात्म्यनामाध्यायः॥ ॥ दृष्टिजलगुणाः।
"गगनाम्बु त्रिदोषघ्नं ग्रहीतं यत् सुभाजने।
वल्यं रसायनं मेध्यं पाचनापेचि च तत्परम्॥
दिवाकरकरैर्जुष्टं सृष्टमिन्दुकरैर्निशि।
अरुच्यमगमिष्यन्ति तत्तुल्यं गगनाम्बुना॥
वर्षासु चरन्ति घनैः सहोरगा विषति कीटवृताच।
तद्विवृतमपेयं खजलमगस्त्योदयात् पूर्व्वम्॥
कार्त्तेन पक्षं निर्दोषमगस्त्येनाविषीकृतम्।
हंसोदकमितिख्यातं शारदं विमलं जलम्॥"
इति राजवल्लभः॥

अथ तस्य भेदाः।
"पात्रीयं सुत्रिभिः प्रोक्तं दिव्यं भौममिति
द्विधा।
दिव्यं चतुर्विधं प्रोक्तं धारात्रं करकाभवम्।
तौषारच तथा हैमं तेषु धारं गुणाधिकम्॥"
तत्र धारस्य लक्षणं गुणाच।
"धाराभिः पतितं तोयं गृहीतं स्फोतवासया।
शिलायां वसुधायां वा शौतायां पतितं च यत्॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्म्मिते।
भाजने स्थापितं धारमुच्यते॥
धारनीरं त्रिदोषघ्नमग्निदीप्तं रसे लघु।
सौम्यं रसायनं वल्यं तर्पणं ह्रादि जीवनम्॥
पाचनं मतिदृग्भूक्तिबन्धारोचकमेधकृत्।
दृष्यो हरति तत् पथ्यं विशेषात् प्रातरुत्थितम्॥"

अथ धाराजलस्य भेदौ।
"धाराजलच द्विविधं गाङ्गसासुद्रभेदतः।"
तत्र गाङ्गसासुद्रयोर्लक्षणं गुणाच।
"आकाशगङ्गासम्भूतं जलमादाय हिमनगाः।
मेघैरन्तरिता दृष्टाः कुर्व्वन्तीति वचः सताम्॥
गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः।
सर्व्वथा तज्जलं देयं तथैव चरके वचः॥
स्थापितं हेमपात्रे राजते स्फटिकेऽपि वा।
ग्राह्यन्नं येन संसिक्तं भवेदक्लेदिवर्जितम्॥
तत् गाङ्गं सर्व्वदोषघ्नं ज्ञेयं सासुद्रमन्यथा।
तत्तु सचारजलयं शुक्लदृष्टिजलापहम्॥
विशेष दोषकं तोक्तं सर्व्वकर्म्मसु गर्हितम्।
सासुद्रं त्वाश्विने मासि शुक्लेगाङ्गवदादिशेत्॥
यतोऽगस्त्यस्य विप्रर्षेरुदयात् सकलं जलम्।
निर्म्मलं निर्विषं स्वादु शुक्लं स्यादोषवर्जितम्॥"
अनुवादः।
"फुल्लारविन्दवासेन नागानां घोषचारिणाम्।
वर्षासु सविषं तोयं दिव्यमप्याश्विनं विना॥"
इति भावप्रकाशः॥

दृष्टिनी, स्त्री, भृङ्गपर्णिका। इति शब्दचन्द्रिका॥ गुजराटी एलारच इति भाषा। दृष्टिनाशके, त्रि॥

दृष्टिजीवनः, पुं, (दृष्टा दृष्टिर्व्वा जीवनं यस्मिन्।) देवमाहकदेशः। इति हेमचन्द्रः॥ दृष्टिजीवने, त्रि॥

दृष्टिभूः, पुं, (दृष्टौ वर्त्मकाचे भूरुत्पत्तिर्यस्य।) मेकः। इति हारावली॥ दृष्टिभवे, त्रि॥

दृष्णिः, पुं, (दृष्य+"दृष्टविभ्यां कित्।" उणा० ४ ४६। इति निः। सच कित्।) मेघः। इत्यमरः॥ यादवः। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। ७२।४।
"यथा हि सर्व्वसापत्नु पाति दृष्णीनरिन्दम।
तथा ते पाण्डवा रक्ष्याः पाञ्चालाश्चाहतो भयात्॥")
दृष्यः। इति त्रिकाण्डशेषः॥

दृष्णिः, त्रि, पापकः। चक्रः। इति शब्दरत्नावली॥

दृष्णिगर्भः, पुं, श्रीकृष्णः। इति हारावली॥

दृष्यं, क्ली, (दृष्य+"विभाषा दृष्टेः।" २।१। १२०। इति ष्यञ्।) वाजीकरम्। इति राजनिर्घण्टः॥

दृष्यः, पुं, (दृष्याय हितः। दृष्य+यत्।) मासः। इति हेमचन्द्रः॥

दृष्यः, त्रि, (दृष्याय मांसाय हितः। दृष्य+"खलयवमाषेति।"५।१।७। इति यत्।) शुक्रदृद्धिकारकौषधादिः। इति भावप्रकाशः॥

दृष्यकन्दा, स्त्री, (दृष्यो वल्यकारकं कन्दं यस्याः।) विदारी। इति राजनिर्घण्टः॥

दृष्यगन्धा, स्त्री, (दृष्यो गन्धो यस्याः।) दृद्धदारकः। इति शब्दरत्नावली॥

दृष्यगन्धिका, स्त्री, (दृष्यो गन्धो यस्याः। स्वार्थे कन्। टापि अत इत्वम्।) अतिबला। इति राजनिर्घण्टः॥

दृष्यवल्लिका, स्त्री, विदारी। इति राजनिर्घण्टः॥

दृष्या, स्त्री, अङ्गिनामौषधम्। इति रत्नमाला॥ घृतावरी। आमलकी। इति राजनिर्घण्टः॥

दृह, दृहौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) वर्द्धते। दृहिर्व्वर्द्धनहर्षोरित्यनेनैवेटसिद्धेऽस्य पाठो दृहौ दृढत्वबलाधानार्थः। किन्तु अनेनैवेटसिद्धे तच्च दृढि ग्रहणं परत्वादुत्तरार्थमेव। अयं धातुः कैश्चिन्न मन्यते। इति दुर्गादासः॥

दृह, दृ भये। दृहौ। सप्तमस्वरी॥ (भ्वा०-पर०-अक०-सेट्।) दृ, दृंह्यते। बबृंहिरे गजपतयः। इति माघः॥ आत्मनेपदं प्रमादादिति वल्लभः॥ अनयेति दुक्किकपुंक्तः। दृंहितं करिगर्জितमित्यमरविंहात्। दृंहितं करिगर्জायां शब्दमात्रेऽपि कथ्यते। इति शब्दमहार्णवात्। कदाचिदन्यकर्तृकोऽपि। तेन श्रीहर्षचरिते सिंहदृंहितमिति बाणभट्टप्रयोगः। इति दुर्गादासः॥

दृह, दृ कि लिधि। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-अक०-सेट्।) सप्तमस्वरी। दृ, दृंह्यते। कि, दृंहयति दृंहति। इति दुर्गादासः॥

दृह, दृ ङ दृहौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) दृ, दृंह्यते। ङ, दृंहते। इति दुर्गादासः॥

दृह, दृर् भये। दृहौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) दृर्, अदृहत्। अवर्हीत्। अन्यः शब्दः। अदृर्हृहिः। इति दुर्गादासः॥

दृह, ग्रु ङ उद्यमे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-वेट्।) ग्रु, दृहति। ङ, अवर्हीत्। अदृहत्। इति दुर्गादासः॥

दृ(द्र)दृक्षुः, पुं. (दृदृक्षती चक्षुः प्राकविशेषः।) महाचक्षुराकः। इति राजनिर्घण्टः॥ (दृदृक्षती चक्षुर्यस्येति दीर्घचक्षुस्के, त्रि॥)

दृ(द्र)दृक्षित्तः, पुं, वज्रपूरः। इति शब्दचन्द्रिका॥

दृ(द्र)दृक्षस्कः, पुं, (दृदृक्षु ग्रस्को यस्य।) चिङ्गटमत्स्यः। इति जटाधरः॥

दृ(द्र)दृक्षीवन्ती, स्त्री, दृदृक्षीवन्तिकादृश्यः। तत्पर्य्यायः। पञ्चभद्रा २ प्रियङ्गुरी ३ मधुरा ४ जीवपुत्रा ५ दृदृक्षीवा ६ यष्टाह्वरी ७। अस्या गुणाः। बहुदोषवाताहतम्। भूतविद्राव्यवल्यम्। वेगाग्रवनियामकच्च। इति राजनिर्घण्टः॥

दृ(द्र)दृद्धा, स्त्री, (दृदृती द्धा।) द्धाविशेषः। यथा,—
"दृदृद्धा तु भेरी स्त्री प्रमाणं दुन्दुभिराकः।
प्रमदः प्रतिपत्तूर्य्यमानकः पटहोऽस्त्रियाम्॥"
इति जटाधरः॥

दृ(द्र)दृतिका, स्त्री, (दृदृती+"दृदृभ्रा आच्छादने।"५। ४।६। इति स्वार्थे कन्।) उत्तरीयवस्त्रम्। इत्यमरः॥ दृदृती। इति रत्नमाला॥

दृ(द्र)दृती, स्त्री, (दृदृत्+गौरादित्वात् ङीष्।) क्षुद्रवाद्यभेदौ। चाङ्ग इति भाषा। तत्पर्य्यायः। मदृती २ भ्रामा ३ वार्त्तावी ४ सिंहिका ५

कुली ६ राट्रिका ७ शूलकण्टा ८ भण्टाकी ९ मण्टोटिका १० वहुपत्री ११ कण्टतनुः १२ कण्टालुः १३ कटुफला १४ डोरडी १५ वनभण्टाकी १६। इति राजनिर्घण्टः। सिंही १७ प्रसहा १८ रक्तपाकी १९ लताबृहतिका २०। इति रत्नमाला। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातज्वरारोचककासश्वासकृच्छ्रदोषनाशित्वञ्च। इति राजनिर्घण्टः। अपि च।

"बृहती प्राचनी वीणा श्लेष्मिणी वातनाशिनी॥"

इति राजवल्लभः॥ *॥

महती। इत्यमरः॥ (इयन्तु नारदस्य वीणा। केचित्तु विश्वावसोर्गन्धर्वराजस्य वीणां बृहतीमाहुः। तथा च।

"विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती। महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी॥" इति माघटीकायां मल्लिनाथधृतवैजयन्ती। १। १०॥ *॥) उत्तरीयवस्त्रम्। वारिधानी। वाक्। कण्टकारी। इति मेदिनी॥ (मर्म्मस्थानविशेषः। यथा, सुश्रुते। ३। ६।

"स्तनरोहितोभयतः पृष्ठवंशस्य बृहती नाम तत्र श्लेष्मिताभिप्रवृत्तिनिवृत्तिनिमित्तेरुपद्रवैर्विद्यते॥") छन्दोभेदः। स तु नवाक्षरपादः। यथा,—

"उक्त्यालुक्त्या तथा मध्या प्रतिष्ठान्या सुपूर्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च॥

इत्यादि। तल्लक्षणमाह। बृहती नवाक्षरा यथा,

भुजगशिशुसुता नौ मः।
बृहतटनिकटचौली भुजगशिशुसुता यासीत्।
सुरतिपुदलिते नागे व्रजजनसुखदा साभूत्॥

पृतेत्येवं ग्रन्थप्रभृतिषु पाठः। श्रुतेत्येवमाधुनिकाः पठन्ति। स्याच्छिमध्यं चेद्भगसाः। कालियभोगा भोगगतस्तच्छिमध्यस्फीतरुचा। शिखयदा भो नन्दसुतचारु नगर्णं क्षीरसुखः॥ मत्तरेभुंजङ्गसङ्गता।

तरला तरङ्गरिङ्गितैर्यमुना भुजङ्गसङ्गता।
कथमेतु वल्लचारकच्छफलः सदैव तां हरिः॥"

इति छन्दोमञ्जरी॥

बृ(ब्रृ)हतीपतिः, पुं, (बृहतीनां वाचां पतिः।) बृहस्पतिः। इति हेमचन्द्रः॥

बृ(ब्रृ)हत्, त्रि, (वृहि वृद्धौ + "वर्षमाने पृषद्बृहन्महज्जगच्छतृवच्च।" उणा० २।८४। इति अतिप्रत्ययेन निपातनात् साधुः।) महत्। इत्यमरः॥ (यथा, माघे। २। १०।

"बृहत्सहायः कार्य्यान्तं चोदीयानपि गच्छति। संभूयाम्भोधिमभ्येति महानद्या नगापगा॥")

बृ(ब्रृ)हत्कः, त्रि, (बृहत्प्रकारः। बृहत् + "चरूपबृहतोरुपसंख्यानम्।" ५।३।७०। इत्यस्य वार्त्तिकोक्त्या कन्।) बृहत्। बृहच्छब्दात् कनूप्रत्ययेन निष्पन्नमिदम्॥

बृ(ब्रृ)हत्कन्दः, पुं, (बृहत् कन्दं यस्य।) यज्ञनः। इति रत्नमाला। विष्णुकन्दः। इति राजनिर्घण्टः॥

बृ(ब्रृ)हत्कालशाकः, पुं, (बृहन् महान् कालशाकः।) श्वेतजिङ्गः। इति त्रिकाण्डशेषः॥ बृहत्कालकासुन्दिया इति भाषा॥

बृ(ब्रृ)हत्काशः, पुं, (बृहन् काशः।) खड्गटः। इति हारावली॥ खागड़ा इति भाषा॥

बृ(ब्रृ)हत्कुक्षिः, त्रि, (बृहन् कुक्षिर्यस्य।) तुन्दिलः। इत्यमरः॥

बृ(ब्रृ)हत्तालः, पुं, (बृहन् तालः।) हिन्तालः। इति राजनिर्घण्टः॥

बृ(ब्रृ)हत्तिक्ता, स्त्री, (बृहन् तिक्ता यस्याः।) पाठा। इति राजनिर्घण्टः॥

बृ(ब्रृ)हत्तृणः, पुं, वंशः। इति शब्दचन्द्रिका॥ (क्वचित् स्त्रीत्वेऽपि दृश्यते॥)

बृ(ब्रृ)हत्त्वक्, [च्] पुं, (बृहती त्वक् यस्य।) यवनाग्नवृक्षः। इति रत्नमाला। छातियान् इति भाषा॥

बृ(ब्रृ)हत्पत्रः, पुं, (बृहत्पत्रं यस्य।) हस्तिकन्दः। इति राजनिर्घण्टः॥

बृ(ब्रृ)हत्पत्रा, स्त्री, (बृहत्पत्रं यस्याः।) भिण्डिका। इति राजनिर्घण्टः॥

बृ(ब्रृ)हत्पाटलिः, पुं, धुस्तूरः। इति त्रिकाण्डशेषः॥

बृ(ब्रृ)हत्पादः पुं, (बृहन् पादो यस्य।) वटवृक्षः। इति शब्दचन्द्रिका॥

बृ(ब्रृ)हत्पारेवतं, क्ली, (बृहत् महत् पारेवतम्।) महापारेवतम्। इति राजनिर्घण्टः॥

बृ(ब्रृ)हत्पालो, [न्] पुं, वनवीरः। इति राजनिर्घण्टः॥

बृ(ब्रृ)हत्पीलुः, पुं, (बृहन् पीलुः।) महापीलुः। इति राजनिर्घण्टः॥

बृ(ब्रृ)हत्पुष्पी, स्त्री, (बृहत् पुष्पं यस्याः। ङीष्।) वराहकरा। इति जटाधरः॥

बृ(ब्रृ)हत्फलः, पुं, (बृहत् फलं यस्य।) पनसवृक्षः। इति राजनिर्घण्टः॥

बृ(ब्रृ)हत्फला, स्त्री, (बृहत् फलं यस्याः।) कटुतुम्बी। महेन्द्रवारुणी। कुष्माण्डी। महाजम्बूः। इति राजनिर्घण्टः॥

बृ(ब्रृ)हदङ्गः, पुं, (बृहदङ्गं यस्य।) मतङ्गजः। इति शब्दचन्द्रिका॥

बृ(ब्रृ)हदम्भः, पुं, (बृहन् अम्भो यस्य।) समुद्रः। इति शब्दचन्द्रिका। कामरांङ्गा इति भाषा॥

बृ(ब्रृ)हदेला, स्त्री, (बृहती एला।) स्थूलैला। इति राजनिर्घण्टः॥

बृ(ब्रृ)हद्गयः, पुं, (बृहद्गयं यस्मिन्।) कान्यकुब्जदेशः। स तु विन्ध्यपर्व्वतस्य पश्चात् मालवदेशस्य निकटे वर्त्तते। इति हेमचन्द्रः॥ त्रिकाण्डशेषे बृहद्गुह इति पाठः॥

बृ(ब्रृ)हद्गोलं, क्ली, (बृहत् गोलं गोलाकारफलं यस्य।) श्वेतशृङ्गम्। इति शब्दचन्द्रिका। तरमुज इति भाषा॥

बृ(ब्रृ)हद्दलः, पुं, (बृहद्दलं यस्य।) पट्टिकालोध्रः। हिन्ताल इति राजनिर्घण्टः॥

बृ(ब्रृ)हद्दलं, क्ली, (बृहत् दलं यस्य।) महालाङ्गलम्। तत्पर्य्यायः। हलि २। इति त्रिकाण्डशेषः॥

बृ(ब्रृ)हद्बीजः, पुं, (बृहत् बीजं यस्य।) आम्रातकः। इति शब्दचन्द्रिका॥

बृ(ब्रृ)हद्भैरविका, स्त्री, दुर्गा। इति शब्दमाला॥

बृ(ब्रृ)हद्भानुः पुं, (बृहन् भानू रश्मिर्यस्य।) अग्निः। (यथा, महाभारते। ३। २२०। ८।

"तपसश्च सुतं पुत्रं भानुमाप्यङ्गिराः ददौ। बृहद्भानुन्तु तं प्राहुर्ब्राह्मणा वेदपारगाः॥") चित्रकवृक्षः। इत्यमरः॥ (सत्यभामापुत्रः। यथा, भागवते। १। ६१। १०।

"चन्द्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः॥" सत्यायपुत्रः। यथा, भागवते। ८।१३।३५।

"सत्यायस्य तनयो बृहद्भानुरुदारधीः॥" पृथुलाक्षस्य पुत्रः। यथा, भागवते। ८।२३।१९।

"चतुरङ्गो रोमपादात् पृथुलाक्षस्य तत्सुतः। बृहद्रथो बृहत्कर्म्मा बृहद्भानुश्च तत्सुताः॥" बृहदश्विविशिष्टे, त्रि। यथा, ऋग्वेदे। १। ३६। १५।

"बृहद्भानो यविष्ठ्य॥"

"हे अग्ने हे बृहद्भानो बृहन्तो भानवो यस्य तादृश॥" इति तद्भाष्ये सायणः॥)

बृ(ब्रृ)हद्रथः, पुं, (बृहन् रथो यस्य।) रुद्रः। यज्ञयानम्। मन्त्रविशेषः। सामवेदांशः। नदीविशेषे, स्त्री। इति कैचित्॥ (तिग्मपुत्रः। यथा, मात्स्ये। ५०। ८५।

"तिग्माद्बृहद्रथो भाव्यो वसुदामा बृहद्रथात्॥" शतधन्वपुत्रः। यथा, भागवते। १२।१।१३।

"शतधन्वा ततस्तस्य भविता तद्बृहद्रथः॥" देवरातपुत्रः। यथा, भागवते। ९। १३। १५।

"तस्माद्बृहद्रथस्तस्य माहावीर्य्यः सुधृतपिता॥" तिमिराजपुत्रः। यथा, तत्रैव। ९।२२। ४३।

"तिमेर्बृहद्रथस्तस्मात् शतानीकः सुदासजः॥" पृथुलाक्षस्य पुत्रः। यथा, तत्रैव। ९।२३।११।

"बृहद्रथो बृहत्कर्म्मा बृहद्भानुश्च तत्सुताः॥" प्रभूतरये, त्रि। यथा, ऋग्वेदे। ५। ८०। २।

बृहद्रथा बृहती विश्वमिन्वा।"

"बृहद्रथा प्रभूतरथा।" इति तद्भाष्ये सायणः॥)

बृ(ब्रृ)हद्रावी, [न्] पुं, (बृहद्रवतीत्यं द्रवतीति। द्रु + णिनिः।) श्वेतोलूकः। इति राजनिर्घण्टः॥

बृ(ब्रृ)हद्वल्कः, पुं, (बृहद्वल्कः वल्कलं यस्य।) पट्टिकालोध्रः। इति राजवल्लभः॥

बृ(ब्रृ)हद्वातः, पुं, (बृहन् वातो यस्मात्। अक्षरीहरः। इति रत्नमाला। देयाल इति भाषा॥

बृ(ब्रृ)हद्वारवी, स्त्री, महेन्द्रवारुणी। इति राजनिर्घण्टः॥

बृ(ब्रृ)हन्नलः, पुं, (बृहन् नलः।) महापोटगलः। इति मेदिनी॥ अर्জ্জुनः। यथा,—

"पार्थः किरीटी गाण्डीवी गुडाकेशो बृहन्नलः। अर्জ্জुनः फाल्गुनो जिष्णुर्विजयश्च धनञ्जयः॥

सव्यसाची सुभद्राग्रः शब्दभेदी कपिध्वजः ।
बाभ्रवाहनापि बीभत्सुः ।" इति त्रिकाण्डशेषः ॥
अपि च ।
"अर्जुनः फाल्गुनः पार्थः सव्यसाची धनञ्जयः ।
राधावेधी किरीटेन्द्रो जिष्णुः श्वेतहयो नरः ।
बृहन्नला गुडाकेशः सुभद्रेशः कपिध्वजः ।
बीभत्सुः कर्णजित्तस्य गाण्डीवं गाण्डिवं धनुः ।"
इति हेमचन्द्रः ॥

बृहन्नला, स्त्री, अर्जुनः । इति मेदिनी ॥ द्वादशवर्षवनवासानन्तरमज्ञातवासे विराटभवने विराटकन्यायां उत्तरगीतादिशिक्षार्थं स्त्रीरूपधरेण नार्जुनो बृहन्नलेति नाम्ना ख्यातोऽभूत् । यथा,
अर्जुन उवाच ।
"गायामि वृत्यान्यथ वादयामि
भद्रोऽस्मि वृत्ते कुशलोऽस्मि गीते ।
तत्सुतरायै प्रदिशस्व मां स्वयं
भवामि देव्या नरदेव ! नर्तकः ॥
इदन्तु रूपं मम येन किन्नव
प्रकीर्त्तयित्वा भयशोकवर्द्धनम् ।
बृहन्नलां मां नरदेव विद्धि
सुतां सुतां वा पिठमाढवर्जिताम् ॥
विराट उवाच ।
ददामि ते हन्त वरं बृहन्नले
सुताच मे नर्त्तय याच ताडयीः ॥"
इति भट्टभारते विराटपर्व्व ॥

बृ(ब्रह)स्पतिः, पुं. (बृहतां वाचां पतिः । "पारस्करेति ।"१ । १।१५७ । इति सुट् निपात्यते ।) अङ्गिरसः पुत्रः । स च देवानां गुरुः धर्म्मशास्त्रप्रयोजकः नवग्रहमध्ये पञ्चमग्रहश्च । तत्पर्य्यायः । सुराचार्य्यः २ गीष्पतिः ३ धिषणः ४ गुरुः ५ जीवः ६ आङ्गिरसः ७ वाचस्पतिः ८ चित्रशिखण्डिजः ९ । इत्यमरः ॥ उतथ्यानुजः १० गोविन्दः ११ चारुः १२ द्वादशरश्मिः १३ गिरीशः १४ दिविजः १५ पूर्व्वफल्गुनीभवः १६ । इति जटाधरः ॥ सुरगुरुः १७ वाक्पतिः १८ वचसांपतिः १९ इन्द्रेज्यः २० देवेज्यः २१ बृहतामधिपतिः २२ इज्यः २३ वाणीशः २४ धीषणः २५ दीदिविः २६ द्वादशकरः २७ प्राक्फाल्गुनः २८ गीरथः २९ । इति शब्दरत्नावली ॥ स च पीतवर्णः । ईशानकोणपुरुषब्राह्मणजातिऋग्वेदसत्त्वगुण-मधुररसधनुर्मीनराशिपुष्यनक्षत्रपुष्यरागमणिसिन्धुदेशानां अधिपतिः । षड्भुजशरीरः । पद्मस्थः । चतुर्भुजः । अक्षवटकमण्डलुदण्डधारी । अस्याधिदेवता ब्रह्मा । प्रत्यधिदेवता इन्द्रः । स तु सूर्य्यास्तः । अङ्गिरोसुतिपुत्रः । प्रातःकाले प्रबलः । शुभग्रहः । देवग्रहस्वामी । वृद्धः । रक्तद्रव्यस्वामी । वातपित्तकफात्मकः । बस्तिकर्म्मकर्त्ता । अङ्गिरोगोत्रः । इति ग्रहयागतत्त्वादयः ॥ * ॥ तद्दानजातफलम् ।
"नृपेन्द्रमन्त्री नृपलब्धकामो
विद्याविनोदी चतुरः प्रगल्भः ।
आचार्य्यपूज्यो मधुरस्वभावो
वारे भवेद्देवगुरोर्मनुष्यः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥

स च अङ्गिरस गुरुपुत्रः यथा,—
महेन्द्र उवाच ।
"कथं वा देवकर्त्तुश्च सिद्धानां योगिनां गुरोः ।
ब्रह्मपुत्रस्य पुत्रोऽयं गुरुपुत्रो बृहस्पतिः ।
ततो ज्ञानी महादेवः कथं शिष्यो गुरोः पितुः ॥
ब्रह्मोवाच ।
कथ्यमतिगुप्तं च पुराणेषु पुरन्दर ।
इमां पुरा प्रवृत्तिञ्च कथयामि निशामय ॥
स्तवतत्सा कर्म्मदोषाच्छापाद्यो अङ्गिरसः पुरा ।
व्रतं चकार महाक्रतु क्षयस्य परमात्मनः ॥
व्रतं पुंसवनं नाम वर्षमेकं चकार सा ।
सनत्कुमारो भगवान् कारयामास तां व्रतम् ॥
स्वेच्छामयः परं ब्रह्म भक्तानुग्रहविग्रहः ।
तदागत्य च गोलोकात् परमात्मा क्षणामयः ॥
स व्रतानुग्रहचीर्णां तासुवाच क्षणानिधिः ।
प्रयतां साध्वनेत्राच्च विनीताच्च तया स्तुतः ॥
श्रीकृष्ण उवाच ।
यदाशीर्दं यत्फलं मम तेजःसमन्वितम् ।
भुङ्क्ष्व मद्वरपुत्रस्ते भविष्यति मदंशतः ॥
पतिर्गुरुश्च देवानां बृहतां ज्ञानिनां वरः ।
पुत्रस्ते भविता साध्वि ! मद्वरेण भविष्यति ॥
मद्वरेण भवेद्यो हि स च मद्वरपुत्रकः ।
ब्रह्मणे मम पुत्रोऽयं चिरजीवी भविष्यति ॥
वरुणो वीर्य्यजश्चैव क्षेत्रजः पालकस्तथा ।
विद्यामन्त्रसुतानाञ्च गृहीतः सप्तमः सुतः ॥
इत्युक्त्वा राधिकानाथः स्वलोकञ्च ययौ पुरा ।
श्रीकृष्णवरपुत्रोऽयं ज्ञानी सुरगुरुः स्वयम् ।
स्तवुक्तयं महाज्ञानं शिवाय प्रददौ पुरा ।
दिव्यं वर्षसहस्रञ्च तपःकर्त्ता हिमालये ।
सुयोगज्ञानसमजं तेजः स्वात्मा समं परम् ।
स्वशक्तिविष्णुमायाच स्वांशञ्च वाहनं ध्वजम् ।
स्वभूषणं स्वकवचं स्वमन्त्रं द्वादशाक्षरम् ।
क्षणामयः स्तुतस्तेन श्रीकृष्णश्च परात्परः ।
शिवलोके शिवा सा च विष्णुमाया शिवप्रिया ।
शक्तिर्नारायणस्येयं तेन नारायणी स्मृता ।
तेजःसु सर्व्वदेवानां साविर्भूता सनातनी ।
ज्वलन्ती देवनिकरं देवेभ्यः प्रददौ पदम् ।
कन्याग्नौ दक्षकन्या च सा सतीप्रकृतिः सती ।
पितर्यज्ञे तनुं त्यक्त्वा योगेन सिद्धयोगिनी ।
बभूव शैलकन्या सा साध्वी च भर्तृनिन्दया ।
कालेन क्षयतपसा शङ्करं प्राप शङ्करी ।
श्रीकृष्णो हि गुरुः शम्भोः परमात्मा परात्परः ।
क्षणस्य वरपुत्रोऽयं स्वयमेव बृहस्पतिः ।
अतो हेतोः सुरगुरुर्गुरुपुत्रः शिवस्य च ।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥
(पुरोहितः । मन्त्रपाठके तु त्रि । यथा, ऋग्वेदे । ४ । ५० । ७ ।
"बृहस्पतिं य: सुभृतं बिभर्त्ति ॥"

"बृहस्पतिं बृहतां महतां मन्त्राणां पालयितारं देवं उत्तमत्वयं पुरोहितं वा ।" इति तद्भाष्ये सायणः ॥)

बृ(ब्रह)स्पतिचक्रं, क्ली, (बृहस्पतेः चक्रम् ।) वृष्टौ शुभाशुभज्ञानार्थं बृहस्पतिसञ्चारकालीनअश्विन्यादिसप्तविंशतिनक्षत्रयुक्तनराकारचक्रम् । यथा,—
"भौमे चत्वारि राज्यं जलधिरपि करे दक्षिणे
चापि सौख्यं
चैकं कण्ठे विभूतिं मदनशरमितं वक्षसि
प्रीतिसंघम् ।
पादस्थाः षट् च पीड़ां पुनरपि जलधिर्मस्तके
च मृत्युं
नेत्रे चोभि प्रदद्युः सुखमय निजभे वाक्पतेः
संक्रमणात् ॥"
इति ज्योतिस्तत्त्वम् ॥

बृ, गि ञ वृत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) गि. ञ, वृणाति वृणीते । वूर्णः । वूर्णिः । इति दुर्गादासः ॥

वे, ऐ ञ स्तूतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।) स्तूतिस्तुसन्तानम् । ऐ, क्वयात् । ञ, वयति वयते तन्त्रं तन्त्रवायः । इति दुर्गादासः ॥

वेकटः, पुं. वैकटिकः । मत्स्यभेदः । भेटकी इति भाषा । युवा । इति मेदिनी ॥ विदूषकः । इति शब्दरत्नावली ॥ तत्र पवर्गीयबकारादौ लिखितः ॥

वेगः, पुं. (विज + घञ् ।) प्रवाहः । तत्पर्य्यायः ओघः २ वेगी ३ धारा ४ । इति हेमचन्द्रः ॥ जवः । तत्पर्य्यायः । रंहः २ तरः ३ रयः ४ स्वदः ५ । इत्यमरः ॥ (यथा, मनौ । ५ । १०८ ।
"स्त्रीणां ये: मुध्यते ग्रीष्मे नदी वेगेन सुध्यति ।")
महाकालबलम् । इति मेदिनी । रेतः । इति हेमचन्द्रः ॥ स्त्रवद्विद्यादिनिर्गमप्रवृत्तिः । इति भरतः ॥ संस्कारविशेषः । यथा,—
"सूर्य्यादयोऽष्टौ वेगाख्यसंस्कारो मनसो गुणाः ॥
अष्टौ सूर्य्यादयो रूपं त्रयो वेगश्च तेजसः ।
सूर्य्यादयोऽष्टौ वेगश्च त्रयस्त्र गुणसंज्ञकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥"
इति भाषापरिच्छेदः ॥ * ॥
(यथा, भागवते । ७ । ८ । २५ ।
"ततोऽभिपद्याभ्यहनन्महासुरो
यथा वृषिंहं गदयोरुवेगया ॥")
वेगधारणनिषेधो यथा,—
"वेगरोधो न कर्त्तव्यश्चाध्वन्यश्च क्रोधवेगतः ॥"
इति आह्निकतत्त्वधृतविष्णुधर्म्मोत्तरवचनम् ॥
अपि च ।
"स्वभावतः प्रवृत्तानां मलादीनां जितेन्द्रियः ।
न वेगान्धारयेद्धीरः कामादीनाञ्च धारयेत् ॥"
इति राजवल्लभः ॥

वेगनाशनः, पुं, (वेगस्य नाशनं येन ।) श्रेष्मा । इति शब्दरत्नावली ॥

वेगसरः, पुं, (वेगेन सरति गच्छतीति । सृ + अच् ।) वेगगामिहयः । तत्पर्य्यायः । वेसरः २ अश्वतरः ३ । इति हेमचन्द्रः ॥

वेगितः, त्रि, (वेगः सञ्जातोऽस्य । तारकादित्वादितच् ।) वेगविशिष्टः । यथा, आयुर्व्वेदीये ।

"न वेगितोऽन्यचित्तः स्यात् गत्वित्वा साध्यमामयम् ॥"

इत्याह्निकतत्त्वम् ॥

वेगिहरिणः, पुं, (वेगी वेगवान् हरिणः ।) श्रीकारी मृगः । इति राजनिर्घण्टः ॥

वेगी, [न्] त्रि, (वेगोऽस्यास्तीति । वेग + इनिः ।) वेगवान् । तत्पर्य्यायः । जङ्घाकारिकः २ आह्निकः ३ तरस्वी ४ त्वरितः ५ प्रजवी ६ अवनः ७ जवः ८ । इत्यमरः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । २० । ९४ ।

"अश्वाश्च वेगिनः सन्ति रथा वायुजवा मम ॥") श्येनपक्षी । इति राजनिर्घण्टः ॥

वेघा, स्त्री, (विध एषक्भावे + अच् । टाप् ।) मूल्यम् । विधिर्विधौ च एषक्त्वे इत्यमरात् अन् तत आप् । यथा । वेघा मूल्यञ्च वेतनम् । इति हलायुधः ॥

वेचानी, स्त्री, (विच + अच् । तमानयतीति । आ + नी + ङः । गौरादित्वात् ङीष् ।) सोमराजी । इति शब्दचन्द्रिका ॥

वेड़ं, क्ली, (विड़ + अच् ।) सान्द्रविच्छिन्नचन्दनम् । इति राजनिर्घण्टः ॥

वेड़ा, स्त्री, (वेड़ + टाप् ।) नौका । इति हेमचन्द्रः । वेड़ेति क्वचित् पाठः ॥

वेढ़मिका, स्त्री, रोटिकाविशेषः । यथा,—

"भाषपिष्टिकया पूर्णगर्भा गोधूमचूर्णतः ।
रचिता रोटिका सैव प्रोक्ता वेढ़मिका बुधैः ॥
भवेद्वेढ़मिका वल्या हृद्या रुच्यानिलापहा ।
उष्णा संतर्पणी गुर्व्वी दृंहणी शुक्रला परम् ॥
भिन्नमूत्रमलास्तन्यमेदःपित्तकफप्रदा ।
गुदकीलार्दितश्वासयकृच्छूलानि नाशयेत् ॥"

इति भावप्रकाशः ॥

वेद, ऋ ज्ञ निश्चामने । वादित्रादानगमनज्ञानचिन्तासु । इति कविकल्पद्रुमः । (भ्वा०-उभ०-सक०-सेट् ।) ऋ, अविवेदत् । ज्ञ, वेत्ति वेदते । विश्चामनं चाक्षुषज्ञानम् । वादित्रं सुरचादि तस्यादानं वादित्रादानम् । वादित्रं वादित्रविषयक्रिया इत्येकोऽर्थः इत्येके । इति दुर्गादासः ॥

वेदः, पुं, (वेद + अच् ।) सर्व्वसद्गरजातिविशेषः । स तु अम्बष्ठात् वैदेहकान्नातः । यथा,—

"वैदेहकेन जम्बष्ठात्सुतो वेद उच्यते ॥"

इति मानवे । १० । १९ ॥

त्रेतायुगीयसप्तर्य्यन्वीयचतुर्थनृपः । स तु पृथुराजपिता । यथा, विष्णुपुराणे ।

"सतपुत्रेण तु जातेन वेणोऽपि त्रिदिवं ययौ ।
पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना ॥"

तेन सुपुत्रेण मृतवेनदक्षिणहस्तमन्थनजातेन पृथुना । इति शुद्धितत्त्वम् ॥

वेदि, स्त्री, (वी + "वीज्याज्वरिभ्यो निः ।" उणा० ४ । ४८ । इति निः । पृषोदरादित्वात् जत्वम् ।) प्रोक्षितभूम्यादिधार्य्यकैश्वरचनाविशेषः । इति भरतः ॥ विरञ्चिजीवहृत्कचः । इति जटाधरः ॥ (यथा, माघे । १४ । ३० ।

"तत्र निश्चयविहितोपकृतिषु
प्रोक्षितेषु पतिषु द्युयोषिताम् ।
गुम्फिताः शिरसि वेणयोऽभव-
न्न प्रफुल्लसुरपादपस्रजः ॥")

तत्पर्य्यायः । प्रवेदिः २ । इत्यमरः ॥ वेद्यौ ३ प्रवेद्यौ ४ । इति भरतः ॥ वेदिका ५ । इति शब्दमाला ॥ जलसमूहः । इति जटाधरः ॥ यथा । प्रयागे गङ्गायमुनासरस्वतीमेलनं त्रिवेणी ॥

वेदिका, स्त्री, (वेदि + कन् । टाप् ।) केशबन्धनविशेषः । इति शब्दमाला ॥

वेदिवेषनी, स्त्री, जलौका । इति त्रिकाण्डशेषः ॥

वेदिमाधवः, पुं, प्रयागस्थपाषाणमयचतुर्भुजदेवताविशेषः । इति लोकप्रसिद्धः ॥

वेद्यौ, स्त्री, (वेदि + वा ङीष् ।) प्रवेणी । चुवेर विउली इति भाषा । इति भरतः ॥ तत्पर्य्यायो वेदिशब्दे द्रष्टव्यः । (यथा, कुमारे । २ । ६१ ।

"तस्यात्मा मूर्त्तिकल्पस्य सेनापत्यसुपेत्य वः ।
मोक्षते सुरवन्दीनां वेणीर्वीर्य्यविभूतिभिः ॥")

देवताड़म्बः । इत्यमरः ॥ मेखी । प्रवाहः । इति हेमचन्द्रः ॥ नदीविशेषः । इति मेदिनी ॥

तस्या उत्पत्तिर्यथा,—

पृथुरुवाच ।

"कस्यावेण्योस्तटाद्यस्माच्छिवविष्णुगजैः पुरा ।
वह्निकश्यपौरात् कलहा निरस्ता कथिता त्वया ॥
प्रभावस्तु तयोर्नद्योः किंवा क्षेत्रस्य तस्य वा ।
तन्मे कथय सर्व्वज्ञ ! विस्मयोऽत्र महान् मम ॥

नारद उवाच ।

श्रुत्वा श्रुत्वतनुः साध्वाड्डेवी साध्वान्महेश्वरः ।
तत्प्रश्नप्रभावन्तु नार्हं वक्तुं चतुर्म्मुखः ॥
तथापि तत्प्रसुत्पत्तिं कौर्त्तयिष्यामि ते शृणु ।
चाक्षुषस्यान्तरे पूर्व्वं मनोर्दैवपितामहः ॥
स ऋक्षगिरिशिखरे रम्ये यजनायोद्यतोऽभवत् ।
स श्रुत्वा यज्ञसम्भारान् सर्व्वदेवगणैर्वृतः ॥
युक्ता हरिहरार्थां हि तत्रिरे: शिखरं ययौ ।
भृग्वादयो मुनिगणा मुहूर्त्ते ब्रह्मदेवते ।
तस्य दीक्षाविधानाय समाजं चक्रुराहृताः ।
अथ ज्येष्ठां सरां पत्नीमाहूयाचक्रुरीश्वराः ॥
सा श्रुत्वैरायथौ तावत् भृगुविष्णुसुवाच ह ॥

भृगुरुवाच ।

विष्णो सरा त्वयाहूता साध्यायाति च हि त्वरम् ।
मुहूर्त्तातिक्रमे चैव कार्य्यो दीक्षाविधिः कथम् ॥

विष्णुरुवाच ।

नायाति चेत् सरा शीघ्रं गायत्र्याश्च विधीयताम्
एषापि न भवेदस्य भार्य्या किं पुण्यकर्म्मणि ॥

नारद उवाच ।

एवमेव हि ब्रह्मोऽपि विष्णुवाक्यममन्यत ।
तच्छ्रुत्वा स भृगुर्व्वाक्यं गायत्रीं ब्रह्मवल्लभाम् ॥
निवेश्य दक्षिणे भागे दीक्षाविधिमथाकरोत् ।
यावद्दीक्षाविधिं तस्य विधेश्चक्रुर्मुनीश्वराः ॥
तावदभ्यायथौ तत्र सरा यज्ञस्थले नृप ।
ततस्तां दीक्षितां दृष्ट्वा गायत्रीं ब्रह्मणा सह ।
सपत्नी सा परा क्रोधात् सरा वचनमब्रवीत् ॥

सरोवाच ।

अपूज्या यत्र पूज्यन्ते पूज्यानाञ्च व्यतिक्रमः ।
वीजि तत्र भविष्यन्ति दुर्भिक्षं मरकं भयम् ॥
मदासने कल्पितेयं भवद्भिः सन्निवेशिता ।
तस्मात् सर्व्वे जड़ीभूता नदीरूपा हि निश्चितम् ॥
इयञ्च दक्षिणे भागे स्त्रीपविष्टा मदासने ।
तस्माल्लोके सदाऽस्माकं तनुरूपास्तु निम्नगा ॥

नारद उवाच ।

ततस्तच्छापमाकर्ण्य गायत्री कम्पिताधरा ।
सस्तम्भायाग्रपद्देवीर्य्यमाप्यापि तां सराम् ॥

गायत्र्युवाच ।

तव भर्त्ता यथा ब्रह्मा ममाप्येष तथा खलु ।
तथा ह्यपसि यस्माच्चां भव त्वमपि निम्नगा ॥

नारद उवाच ।

ततो हाहाकृताः सर्व्वे ग्रिषविष्णुसुरेश्वराः ।
प्रणम्य दण्डवत् भूमौ सरां तत्र विजिज्ञपुः ॥
देवा ऊचुः ।
देवि ब्रह्मा वयं सर्व्वे ब्रह्माद्याश्च त्वयाधुना ।
यदि सर्व्वे जड़ीभूता भविष्यामोऽत्र निम्नगाः ॥
तदा लोकत्रयं चैतत् विनश्यति च निश्चितम् ।
अविवेककृतस्तस्मात् शापोऽयं विनिवर्त्यताम् ॥

सरोवाच ।

नार्हितो हि गुरुर्व्वाक्यो भवद्भिर्यत् सुरोत्तमाः ।
तस्माद्दिव्यं सप्तत्यब्दमवोधनमितं खलु ॥
नापि मद्वचनं क्षेत्रेदत्तं खलु जायते ।
तस्मात् खांशैर्जड़ीभूता यूयं भवत निम्नगाः ॥
आवामपि सपत्नी च खांशाभ्यामपि निम्नगे ।
भविष्यावोऽत्र भो देवाः पश्चिमाभिमुखावहे ॥

नारद उवाच ।

इति तद्वचनं श्रुत्वा ब्रह्मविष्णुमहेश्वराः ।
जड़रूपाभवन्नद्यः खांशेनैव तदा नृप ।
तस्माद्विष्णुरभूत् क्षेत्रा वेणी देवी महेश्वरः ॥
ब्रह्मा कमण्डलिनी चाप्या एषगैव बभूव तु ॥"

इति पाद्मोत्तरखण्डे १५६ अध्यायः ॥

अन्यच ।

"सरस्वती रजोरूपा तमोरूपा कलिङ्गजा ।
सत्त्वरूपा च गङ्गाच नयन्ति ब्रह्मणिर्गमम् ॥
इयं वेणी हि निःश्रेणी ब्रह्मवर्त्म प्रयास्यतः ।
जन्तोर्विगुहदेहस्य ब्रह्मा ब्रह्मामृतस्य च ।
काशीति काचिदवला सुवनेषु रूढ़ा
लोकार्कैरयंविलोकविलोचना च ।

तद्दीर्युगस्य वरणासिरियं तदीया
वेत्रवतीति याम्र गदिताभयग्रन्थभूमिः ।"
इति काशीखण्डे ७ अध्यायः ।

वेणोरः, पुं, अरिष्टवृक्षः । इति शब्दचन्द्रिका ।

वेणीसंहारः, पुं. (वेण्याः द्रौपदीवेणिकायाः संहारो भीमेन मारितदुर्य्योधनशोणितेन मोचनं यत्र ।) भट्टनारायणकृतसप्ताङ्कयुक्तनाटकविशेषः । तत्र दुर्य्योधनकर्तृकद्रौपदीकेशाकर्षणादिवधि तद्भानन्तरं तस्या वेणीबन्धनपर्य्यन्तविवरणमस्ति । तस्यायमाद्यश्लोकः ।

"निर्विन्धैरपि भिन्नलिप्तमकरन्दो मधुकरैः
करेरिन्दोरन्तश्चरित इव सन्भिन्नसुकुलः ।
विधत्तां विघ्नं नो नयनसुभगामस्य सदसः
प्रकीर्णः पुण्यानां हरिचरणयोरङ्गरुचिरयम् ।"

वेणुः, पुं, (अन+"अनिदरीभ्यो निच ।" उणा० ३। ९८ इति णुः। सच नित्। अनेर्वोभावो गुणश्च।) वंशः । इत्यमरः । (यथा, रामायणे । ४।४३।१७।
"तं तु देशमतिक्रम्य शोणोदा नाम निम्नगा ।
उभयोस्तीरयोस्तस्याः कीचका नाम वेणवः ।")
वंशी । इति शब्दरत्नावली । वेणोरुत्पत्तिर्यथा,—

"वेणुर्वः शृणु तं विप्र तथापि विदितं तथा ।
द्विज आसीच्छ्रान्तमनाः क्षतसान्तपनादिभिः ।
ज्ञात्वा देवव्रतो दान्तः कर्म्मकाण्डविशारदः ।
अवेक्ष्यवज्ञनव्रातमध्यवर्त्ती क्रियापरः ।
एकदापि न शुश्राव यज्ञेशोऽस्तौति भूपते ।
तस्य गेहमथाभ्यागादेदान्तक्षतनिश्चयः ।
मङ्क्तः कोऽपि पूजां स तुलसीदलवारिजा ।
हृतवांस्तु गृहे किञ्चित् फलमूलं न्यवेदयत् ।
स्नानवारि पयः किञ्चित् तस्मै प्रीत्या ददौ सुधीः ।
अश्रद्धयानितं ज्ञात्वा सोऽप्यगात् द्विजमन्दिरम् ।
तेन पापेन संजातं वेणुत्वमतिदारुणम् ।
तेन पुण्येन तस्यार्थो मदीयप्रियतां गतः ।
अधुना सोऽपि राजेव केतुमाले विराजते ।
युगान्ते तु विष्णुपरो भूत्वा ब्रह्मत्वमाप्स्यति ।"
इति पाद्मे पातालखण्डे ५ अध्यायः ।

नृपविशेषः । इति मेदिनी ।

वेणुकं, क्ली, तोत्रम् । इति हेमचन्द्रः । (पुं, द्विजो वेणुः । "संज्ञायां कन् ।" ५।३।८०। इति कन् । सुनवेणुः । यथा, हरिवंशे भविष्यपर्व्वणि । ३६ । ५६ ।
"पश्येदं बहुधा देव भिन्नं भिन्नं सहस्रशः ।
शिल्पञ्च दारवं भाण्डं द्विजानां वेणुकानि च ।")

वेणुकर्करः, पुं, करीरवृक्षः । इति त्रिकाण्डशेषः ।

वेणुजः, पुं, (वेणोर्जायते इति । जन+डः ।) वेणुयवः । इति राजनिर्घण्टः । (वेणुजातमात्रे, त्रि । यथा, भागवते । १ । १ । २० ।
"वर्त्म यथा वेणुजवह्निसंश्रयम् ।")

वेणुधमः, पुं. (वेणुं धमतीति । धम+डः ।) वेणुवादकः । इत्यमरः ।

वेणुनं, क्ली, मरिचम् । इति रत्नमाला । वेणुजमिति च पाठः ।

वेणुपत्री, स्त्री, (वेणोरिव पत्रं यस्याः ।) वंशपत्रीवृक्षः । तत्पर्य्यायः । हिङ्गुपर्णी २ नाड़ी ३ हिङ्गुशिराटिका ४ । इति रत्नमाला ।

वेणुबीजं, क्ली, (वेणोर्बीजम् ।) वेणुयवः । इति राजनिर्घण्टः ।

वेणुयवः, पुं, (वेणोर्यवः ।) वंशफलम् । वाँशेर चाउल इति भाषा । (यथा,विष्णुपुराणे ।१६।२५।
"तथा वेणुयवाः प्रोक्ताश्चणका मर्कटा मुने ।")
तत्पर्य्यायः । वेणुजः २ वेणुबीजम् ३ वंशजः ४ वंशतण्डुलः ५ वंशधान्यम् ६ वंशाह्वः ७ । अस्य गुणाः । रूक्षत्वम् । कषायत्वम् । कटुपाकित्वम् । बहुमूत्रत्वम् । कफघ्नत्वम् । वातपित्तकरत्वम् । सारकत्वञ्च । इति राजनिर्घण्टः । अपि च ।
"तद्यवास्तु सरा रूक्षाः कषायाः कटुपाकिनः ।
वातपित्तकरा उक्ता बहुमूत्राः कफापहाः ।"
इति भावप्रकाशः ।

वेणुवादः, पुं, (वेणुं वादयतीति । वद+णिच्+अण् ।) वेणुकः । इति रत्नमाला ।

वेतः, पुं, वेत्रः । इति राजनिर्घण्टः ।

वेतनं, क्ली, (वी+"वीपतिभ्यां तनन् ।" उणा० ३ । १५० । इति तनन् ।) कर्म्मदक्षिणा । माहिना इति मथुरि इति च भाषा । तत्पर्य्यायः । कर्म्मण्या २ विधा ३ भृता ४ भृतिः भर्म्मे ६ भरण्यम् ७ भरत्रम् ८ मृत्काम् ९ निर्व्वेशः १० पण्यः११ । इत्यमरः । विष्टिः १२ । इति जटाधरः । (यथा, मनौ । ७ । १२६ ।
"पञ्चो देयोऽवज्ञस्य वहुतृज्ञस्य वेतनम् ।")
जीवनोपायः । तत्पर्य्यायः । आजीवः २ जीवनम् ३ वार्त्ता ४ जीविका ५ वृत्तिः ६ । इति हेमचन्द्रः । रूप्यम् । इति शब्दचन्द्रिका ।

वेतसः, पुं, (वे+"वेञस्तुट् च ।" उणा० ३।३३८। इति असच् । तुट्चागमश्च ।) लताविशेषः । वयसा इति भाषा । इति भरतः । वेति जलमवतां गच्छति इति वेतसः । वीज इंवयत् गाच्छति तसः । इत्यमरटीकायां भरतः । तत्पर्य्यायः । रथः २ अम्बुपुष्पः ३ विदुलः ४ शीतः ५ वानीरः ६ वञ्जुलः ७ । इत्यमरः । प्रियः ८ । इति रत्नमाला । गन्धपुष्पः ९ रथाभः १० वेतसी ११ । इति शब्दरत्नावली । निचुलः १२ दीर्घपत्रकः १३ कलमः १४ मञ्जरीनम्रः १५ सुषेणः १६ गन्धपुष्पकः १७ । (यथा, भागवते ।३।२।१७।
"कदम्बवेतसनलनीपवञ्जुलकैर्वृतम् ।")
अस्य गुणाः । स्वादे कटुत्वम् । शीतत्वम् । भूतरक्तपित्तोष्णवरोगकुष्ठदोषनाशित्वञ्च । इति राजनिर्घण्टः । अस्य पर्य्यायगुणाः ।
"वेतसो नम्रकः प्रोक्तो वानीरो रञ्जनस्तथा ।
अम्बुपुष्पश्च विदुलो रथः शीतश्च कीर्त्तितः ।
वेतसः शीतलो दाहशोथार्शोयोनिरुगव्रणान् ।
हन्ति वीसर्पकृच्छ्रासपित्तास्रकफानिलान् ।"
इति भावप्रकाशः ।

जलवेतसस्य पर्य्यायगुणाः । अथ जलवेतसः ।
"निकुचकः परिव्याधो नादेयो जलवेतसः ।
जलजो वेतसः शीतः संग्राही वातकोपनः ।"
इति भावप्रकाशः ।
(जलजातादयः । यथा, ऋग्वेदे । ४ । ५८ । ५ ।
"हिरण्ययो वेतसो मध्य आसाम् ।"
"वेतसोऽम्बुसम्भवोऽयं ।" इति तद्भाष्ये सायणः ।")

वेतसाम्लः, पुं, (वेतसप्रधानोऽम्लः ।) अम्लवेतसः । इति जटाधरः ।

वेतसी, स्त्री, वेतसः । इति शब्दरत्नावली । (यथा, साहित्यदर्पणे । १ ।
"रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ।")

वेतस्वान्, [त्] त्रि, (वेतसाः सन्त्यत्र । "कुसुदनडवेतसेभ्यो ड्मतुप् ।" ४ । २ । ८७। इति ड्मतुप् । "मादुपधायाः ।" ८ । २ । ९ । इति मस्य वत्वम् ।) वेतसलतावहुलदेशः । इत्यमरभरतौ ।

वेताल:, पुं, द्वारपालकः । इति शब्दरत्नावली । भूताधिष्ठितशवः । इत्यमरः । मज्जभेदः । इति भरतः । शिवगणाधिपविशेषः । यथा,—

सगर उवाच ।
"कोऽसौ भैरवनामाभूत् को वा वेतालसंज्ञकः ।
कथं वा तौ शरीरेण मानुषेण गणाधिपौ ।
अभूतां द्विजशार्दूल तन्मे वद महामुने ।
श्रीऔर्व्व उवाच ।
शृणु राजन् प्रवक्ष्यामि महाकालस्य भङ्गिनः ।
भैरवस्यापि चरितं वेतालस्य महात्मनः ।
सोऽसौ भङ्गी हरसुतौ महाकालोऽपि भर्गजः ।
तावेव गौरीशापेन संभूय नरयोनिजौ ।
वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि ।"
इति कालिकापुराणे ४५ अध्यायः ।

तस्योत्पत्त्यादि यथा,—

श्रीदेव्युवाच ।
"ममैव मानुषो मूर्त्तिरियं वृषभकेतन ! ।
विशामि तेऽत्र वचनादुत्पाद्य सुतद्वयम् ।
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः ।
ततः सापर्व्वयावित्वा देवी तारावती सती ।
कामयानं महादेवं स्वयमेवाभवत्सुदा ।
तस्मिन् काले भवद्गर्भः कार्त्तिकी चास्मिन्मास्य-
भूत् ।
कामावसाने तस्यान्तु सद्यो जातं सुतद्वयम् ।
अभवन्नृपशार्दूल तथा शाखाच्छगाननम् ।
अथ तारावती देवी सुतौ दृष्ट्वा चिन्तिस्थितौ ।
भूमौ मलिनवेषेण मनुना समुपाविशत् ।
भर्त्तुरागमनं श्रुत्वा काङ्क्षन्ती भर्गभाषितम् ।
अथ शप्ताम्बहाभागः स राजा चन्द्रशेखरः ।
प्रासादशृङ्गे आगच्छद्दृष्टुं तारावतीं तदा ।
ददर्श्य पतितां भूमौ सुतकेशीं निरम्बराम् ।
सुतौ च पतितौ भूमौ चन्द्रसूर्य्यसमप्रभौ ।
वानरास्यौ स दृष्ट्वा तौ क्षोभं दृष्टस्य च ।
ततः स राजा न्यगदत् तं मुनिं ब्रह्मसुतं सुदा ।
पालयिष्ये ह्यम्भसुतौ यथा लभ्यं सदैव हि ।
किन्त्वेतौ मुनिशार्दूल त्वं संस्कुरु यथाविधि ।

और्व्व उवाच।
ततस्तयोर्नाम चक्रे नारदो वचनान्नृप।
ज्येष्ठो भैरवनामाभूत् वीरः पुत्रो भयङ्करः।
वेतालसङ्घः क्षत्रो वेतालोऽभूत्तथापरः।
इति चक्रे तयोर्नाम देवर्षिर्ब्रह्मणः सुतः।"
इति कालिकापुराणे ४६ अध्यायः।

वेतालभट्टः, पुं, राजविक्रमादित्यस्य नवरत्नान्तर्गतरत्नविशेषः। यथा,—
"धन्वन्तरिः क्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य।"
इति नवरत्नशोकः।

वेत्ता, [क्तृ]-त्रि, ज्ञाता। वेत्तीति विदधातोस्तृच्-प्रत्ययेन निष्पन्नमिदम्। (यथा, हितोपदेशे।
"यथा खरश्चन्दनभारवाही
भारस्य वेत्ता नतु चन्दनस्य।")

वेत्रः, पुं, (वी+"गुधृवीपचीति।" उणा० ४। १६६। इति त्रः।) खनामख्यातवृक्षः। तत्पर्य्यायः। वेतः २ योगिदण्डः ३ सुदण्डः ४ नदुपर्व्वकः ५। (यथा, भागवते। ५।
"आचार इत्यधिगतेन मया गृहीता
या वेत्रयष्टिरवरोधपरेषु राज्ञः।")
स तु पञ्चविधः। तेषां गुणाः। शीतत्वम्। कषायत्वम्। भूतपित्तहरत्वञ्च। इति राजनिर्घण्टः। तस्यार्य्यं वेताग् इति ख्यातम्। तद्गुणाः। दीपनत्वम्। रूक्षत्वम्। तिक्तत्वम्। पित्तकफनाशित्वञ्च। तत्फलगुणाः। वातपित्तनाशित्वम्। अम्लत्वञ्च। इति राजवल्लभः। असुरविशेषः। तस्य प्रभावं वेत्रासुरशब्दे द्रष्टव्यम्।

वेत्रकीयः, त्रि, (वेत्र+"नडादीनां कुक् च।"४। २।९१। इति कुक् छश्च।) वेत्रसमूहयुक्तदेशादिः। इति सिद्धान्तकौमुदी। (एकचक्रा नगरी तु वेत्रप्राचुर्य्यवत्त्वेन तदाख्ययापि प्रसिद्धा। यथा, महाभारते। १। १६१। ६।
"वेत्रकीयपते राजा नायं नयमिहास्थितः।
उपायं तं न कुरुते यतोऽपि स मन्दधीः।")

वेत्रधरः, पुं, (वेत्रस्य धरः।) द्वारपालः। इति हलायुधः। यष्टिधारके, त्रि।

वेत्रधारकः, पुं, (वेत्रस्य धारकः।) द्वारपालः। इति जटाधरः।

वेत्रवती, स्त्री, नदीविशेषः। इत्यमरः। सा तु मालवदेशात् कालपीनामनगरे यमुनायां मिलिता। वेत्रासुरमाता। यथा, वराहपुराणे।
"वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत्।"

वेत्रहा, [न्] पुं, (वेत्रं हतवान्। हन+क्विप्।) इन्द्रः। इत्यमरः।

वेत्रावती, स्त्री, वेत्रवती नदी। यथा,—
"तत्राम्बा दृश्यते जम्बूः सुमधुरं कान्तिप्रदं पुष्टिदं
दृष्टं दीपनपाचनं बलकरं वेत्रावती तापिनी।"
इति राजनिर्घण्टः।

वेत्रासनं, क्ली, (वेत्रस्यासनम्।) वेत्रनिर्म्मितासनम्। तत्पर्य्यायः। आसन्दी २। इति हेमचन्द्रः।

वेत्रासुरः, पुं, (वेत्रनामकोऽसुरः।) स्वनामख्यातासुरः। तस्योत्पत्तिर्यथा,—
महातपा उवाच।
"आसीद्राजा पुरा राजन् सिन्धुद्वीपः प्रतापवान्।
वारुणाग्नो महाराजोऽसौऽरण्ये तपसि स्थितः॥
पुत्रो मे भूयुनाश्वाय भवेदिति नराधिपः।
एवं कृतमतिः सोऽथ महता तपसा स्वकम्।
कलेवरं स्थिरो भूत्वा शोषयामास सुव्रतः॥
प्रजापाल उवाच।
कथं तस्य द्विजश्रेष्ठ भृङ्गेणापहृतं भवेत्।
येनासौ तद्विनाशाय पुत्रमिच्छन् व्रते स्थितः॥
महातपा उवाच।
सोऽन्यजन्मनि पुत्रोऽभूत् त्वदुर्बलवतां वरः।
अवध्यः सर्व्वशस्त्रौघैरपां फेनेन निर्म्मितः॥
जलफेनेन निहितस्तस्मिन्नयमवाप्नुयात्।
पुत्रत्वेनान्वयो जातः सिन्धुद्वीपेतिसंज्ञितः॥
स तेपे परमं तीव्रं भृङ्गवैरमनुस्मरन्।
ततः कालेन महता नदी वेत्रवती शुभा॥
मानुषं रूपमास्थाय सालङ्कारा मनोरमम्।
आजगाम यतो राजा तेपे परमकं तपः॥
तां दृष्ट्वा रूपसम्पन्नां स राजा क्षुब्धमानसः।
उवाच कासि सुश्रोणि सत्यं कथय भामिनि॥
नद्युवाच।
अहं जलपतेः पत्नी वरुणस्य महात्मनः।
नाम्ना वेत्रवती पुण्या त्वामिच्छन्ती ह आगता॥
साभिलाषां परस्त्रीं यो भजमानां विसर्ज्जयेत्।
स पापपुरुषो ज्ञेयो ब्रह्महत्याञ्च विन्दति॥
एवं ज्ञात्वा महाराज भजमानां भजस्व माम्।
एवमुक्तस्तया राजा साभिलाषोपसृक्तवान्॥
तस्य सत्योऽभवत् पुत्रो द्वादशार्कसमप्रभः।
वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत्॥
बलवानतितेजस्वी प्राग्ज्योतिषः पतिर्भवेत्।
स कालेन युवा जातो बलवान् दृढविक्रमः।
महायोगेन संयुक्तो जिगाय च वसुन्धराम्।
सप्तद्वीपवतीं पश्चान्मेरुपर्व्वतमारुहत्।
तत्रेन्द्रं प्रथमं जिग्ये पश्चादग्निं यमं ततः॥"
इति वराहपुराणे देवोत्पत्तिनामाध्यायः।

वेत्री, [न्] पुं, (वेत्रोऽस्यास्तीति। वेत्र+इनिः।) द्वारपालकः। इति हेमचन्द्रः। वेत्रयुक्ते, त्रि।

वेध, ऋ ङ याचे। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-दिक०-सेट्।) ङ; वेधते। इति दुर्गादासः।

वेदः, पुं, (विद+घञ्।) विष्णुः। यथा,—
"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः।"
इति विष्णुसहस्रनामस्तोत्रम्।
ज्ञानम्। इति मेदिनी। क्वचित् पुस्तके वित्तमित्यपि पाठः। यज्ञाङ्गम्। इति नागार्थरत्नमाला। मौनशरीरारोग्यहेतवे भगवद्वाक्यम्।
इति न्यायशास्त्रम्। धर्म्मब्रह्मप्रतिपादकमपौरुषेयवाक्यम्। इति वेदान्तशास्त्रम्। ब्रह्मसुखनिर्गतधर्म्मोपायकशास्त्रम्। इति पुराणम्। तत्पर्य्यायः। श्रुतिः २ आम्नायः ३। इत्यमरः। छन्दः ४ ब्रह्म ५ निगमः ६। इति शब्दरत्नावली। प्रवचनम् ७। इति जटाधरः।* वेदस्य प्रादुर्भावो। यथा। कदाचित् कथं रक्षामीति ध्यायतो ब्रह्मणो मुखचतुष्टयेभ्यश्चत्वारो वेदाः प्रादुरासन्। यथा। एकविंशतिशाखात्मक-ऋक् १ शतशाखात्मक-यजुः २ सहस्रशाखामयसाम ३ नवशाखामयाथर्व्व ४। इति पुराणम्। अपि च।
श्रीमार्कण्डेय उवाच।
"तस्मादहाद्दिनिर्भिन्नाद्ब्रह्मणोऽव्यक्तजन्मनः।
ऋचो बभूवुः प्रथमं प्रथमाद्दनाज्ञने।
जवापुष्पनिभाः सद्यस्तेजोरूपा ह्यसंहताः।
पृथक् पृथग्विभिन्नाश्च रजोरूपा महात्मनः॥
यजूंषि दक्षिणाद्वक्त्रादनिवह्नानि कानिचित्।
याद्दक्त्वं तथा वर्णान्यसंहतिचराणि वै।
पश्चिमं यद्विभोर्व्वक्त्रं ब्रह्मणः परमेष्ठिनः।
आविर्भूतानि सामानि ततः कुन्देसितान्यथा॥
अथर्व्वाख्यमथोवेश भृङ्गाञ्जनचयप्रभम्।
घोराघोररूपं तदाभिचारिकशान्तिमत्।
उत्तरात् प्रकटीभूतं वदनात्तस्य वेधसः।
सुखं सत्त्वतमःप्रायं सौम्यासौम्यस्वरूपवत्।
ऋचो रजोगुणाः सत्त्वं यजुषाञ्च गुणो सुने।
तमोगुणानि सामानि तमःसत्त्वमथर्व्वसु।
एतानि ज्वलमानानि तेजसाप्रतिमेन वै।
पृथक् पृथगवस्थानं भान्ति पूर्व्वमिवाभवत्॥
ततस्तदादां यत्तेज ओमित्युद्गाभिगच्छते।
तस्यानुभावाद्वक्त्रेभ्यस्त्रीन्लोकान्व्याहृतं संस्थितम्।
यथा यजुर्म्मयं तेजो यच्च साम्नां महामुने।
एकत्वमुपयातानि परतेजसि संश्रयात्।
शान्तिकं पौष्टिकञ्चैव तथा चैवाभिचारिकम्।
ऋगादिषु तथा ब्रह्मन्निश्चितार्थं निबोधागमत्।
ततो विश्वमिदं सद्यस्तमोनाशात् सुनिर्म्मलम्।
बभावतीव विप्रर्षे तिरश्चोर्द्धमधस्तथा।
ततस्तन्मण्डलीभूतं छान्दसं तेज उत्तमम्।
परेण तेजसा ब्रह्मन्! एकत्वमुपगम्य तत्।
आदित्यसंज्ञामगमदादावेव यतोऽभवत्।
विश्वस्यास्य महाभाग कारणाध्यायमेव तत्॥
प्रातर्मध्यन्दिने चैव तथा चैवापराह्णिके।
त्रयी तपति सा काले ऋग्यजुःसामसंज्ञिता॥
ऋचस्तपन्ति पूर्व्वाह्णे मध्याह्ने च यजूंषि वै।
सामानि चापराह्णे तु तपन्ति सुनिसत्तम।
शान्तिकं ऋक्षु पूर्व्वाह्णे यजुः स्वस्त्यौपचारिकम्।
अपराह्णे स्थितं नित्यं सामस्वेवाभिचारिकम्॥
स्रष्टा च ऋक्षयो ब्रह्मा स्थितौ विष्णुर्यजुर्मयः।
रुद्रः साममयोऽन्ते च तस्मात्तस्या शुचिर्व्वपुः॥
तदेवं भगवान् भास्वान् वेदात्मा वेदसंस्थितः।
वेदविद्यात्मकश्चैव परः पुरुष उच्यते।
स्वर्गस्थित्यन्तहेतुः स रजःसत्त्वादिकैर्गुणैः॥

आश्रित्य ब्रह्मविष्णादिसंज्ञामश्नुते शाश्वतः ॥
वेदैः स वेद्यः स तु वेदमूर्ति-
रमूर्ति-राद्योऽखिलविश्वमूर्तिः ।
विश्वाश्रयं ज्योतिरवेद्यवर्त्मा
धर्मावदातः परमः परेभ्यः ॥"
इति श्रीमार्कण्डेयपुराणे सूर्यमाहात्म्ये सूर्योत्पत्तिनामाध्यायः ॥ ● ॥ अथच ।
"अष्टाविंशे पुनः प्राप्ते सञ्जिन् वै द्वापरे द्विजाः ।
पराशरसुतो व्यासः कृष्णद्वैपायनोऽभवत् ॥
ए सब सर्ववेदानां पुराणानां प्रदर्शकः ।
पाराशर्यो महायोगी कृष्णद्वैपायनो हरिः ॥
आराध्य देवमौशानं दृष्ट्वा सर्वं त्रिलोचनम् ।
तत्प्रसादादसौ व्यासो वेदानामभवत् प्रभुः ॥
अथ शिष्यान् प्रजग्राह चतुरो वेदपारगान् ।
जैमिनिञ्च सुमन्तुञ्च वैशम्पायनमेव च ॥
पैलं तेषां चतुर्थञ्च पञ्चमं मां महामुनिः ।
ऋग्वेदग्राहकं पैलं प्रजग्राह महामुनिः ॥
यजुर्वेदप्रवक्तारं वैशम्पायनमेव च ।
जैमिनिं सामवेदस्य ग्राहकं सोऽन्वपद्यत ॥
तथैवाथर्ववेदस्य सुमन्तुमभिसत्तमम् ।
इतिहासपुराणानि प्रवक्तुं समयोजयत् ॥
एवं व्यासोदयजुर्वेदस्तत्रतुर्द्धा चकल्पयत् ।
चातुर्होत्रमभूदयस्मिंस्तेन यज्ञमथाकरोत् ॥
अध्वर्यवे यजुर्भिः स्याद्ऋग्भिर्होत्रं द्विजोत्तमाः ।
औद्गात्रं सामभिश्चक्रे ब्रह्मत्वञ्चाथर्वभिः ॥
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूंषि च यजुर्वेदं सामवेदञ्च सामभिः ॥
एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा ।
शाखानान्तु शतेनाथ यजुर्वेदमथाकरोत् ॥
सामवेदं सहस्रेण शाखानाञ्च विभेदतः ।
अथर्वाणमथो वेदं विभेद नवकेन तु ॥
भेदैरष्टादशैर्व्यासः पुराणं कृतवान् प्रभुः ।
योऽयमेकश्चतुष्पादो वेदः पूर्वं पुरातनात् ॥
ओंकारो ब्रह्मणो जातः स दोषविषमोषधम् ।
वेदवेद्यो हि भगवान् वासुदेवः सनातनः ॥
स गीयते वरो देवो यो वेदैर्वं च वेदवित् ।
एतत् परतरं ब्रह्मज्योतिरानन्दसत्तमम् ॥
वेदवाक्योदितं तत्त्वं वासुदेवं परं पदम् ।
वेदवेद्यमिदं वेत्ति वेदं वेदपरो मुनिः ॥
अवेदं परमं वेत्ति वेदनिष्ठः सदेश्वरः ।
स एव वेदो वेदश्च तमेवाश्रित्य मुच्यते ।
इत्येतदक्षरं वेद्यमोङ्कारं वेदमव्ययम् ।
अवेदश्च विजानाति पाराशर्यो महामुनिः ॥"
इति कौर्मे ४८ अध्यायः ॥●॥
वेदाध्ययनपात्रं यथा,—
व्यास उवाच ।
"एवं दक्षादिभिर्युक्तं शौचाचारसमन्वितः ।
आहूतोऽध्ययनं कुर्यादौत्तराशो गुरोर्मुखम् ।
नित्यमुद्यतपाणिः स्यात् साध्वाचारः सुसंयतः ।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः ॥
प्रतिश्रवसमाप्ते त्वध्यायी न समाचरेत् ।
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥
नीचं शय्यासनं चास्य सर्वदा गुरुसन्निधौ ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ॥
गोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ॥
गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥
दूरस्थो नार्चयेदेनं न क्रुद्धो नान्तिके स्थितः ।
न चैवास्योत्तरं ब्रूयात् स्थितो नासीत सन्निधौ ॥
उदक्कुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् ।
आहरेद्यावदर्थानि भैक्षचाहारमाचरेत् ॥
कृतञ्च लवणं सर्वं वर्ज्यं पर्युषितञ्च यत् ।
अगृहदर्शी सततं भवेन्नैतादृशिकृद्विजः ॥
नादित्यं वै समीक्षेत नाचरेन्नग्नधावनम् ।
एकान्तमशुचिस्थानैः शूद्रान्त्यैरभिभाषणम् ॥
गुरुरुच्छिष्टं भैक्षवार्हं प्रभुञ्जीत न कामतः ।
मलापकर्षणं स्नानं नाचरेद्धि कथञ्चन ॥
न कुर्यादात्मनः सभं विप्र गुरोरग्रागे कथञ्चन ।
मोहाद्वा यदि वा लोभात्तत्रस्थे पतितो भवेत् ॥
लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तत्र हुर्य्येत् कदाचन ॥
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य मनुरब्रवीत् ।
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ।
न चाविदितगुरुणा स्यात् गुरूनभिवादयेत् ॥
विद्यागुरुष्वेतदेव वृत्यवृत्तिस्वयोनिषु ।
प्रतिषेधान्न चाधर्म्यो द्विजश्चोपदिशत्यपि ॥
ज्ञेयः स्वगुरुवद्वृत्तिं नित्यमेव समाचरेत् ।
गुरुपुत्रेषु दारेषु गुरोरेव स्वबन्धुषु ॥
बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि ।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति ॥
उत्सादनं वा गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्य्याद्गुरुपुत्रस्य पादयोः शौचमेव च ॥
गुरुवत् प्रतिपूज्यास्तु सवर्णा गुरवस्तथा ।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम् ॥
गुरुपत्नीन्तु युवतीं नाभिवाद्येत पादयोः ।
कुर्वीत वन्दनं भूमावेषोऽहमिति च ब्रुवन् ॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् ॥
माद्रवसा मातुलानी श्वश्रूश्चाथ पितुः स्वसा ।
प्रपूज्या गुरुपत्नी च समास्ता गुरुभार्य्यया ॥
भ्रातृभार्य्योपसंग्राह्या सवर्णाह्यहन्यहन्यपि ।
विप्रस्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः ॥
पितुर्भगिन्यां मातुश्च ज्यायस्याञ्च स्वसर्य्यपि ।
मातृवद्वृत्तिमातिष्ठेन्माता तास्यो गरीयसी ॥
एवमाचारसम्पन्नमात्मवन्तमदाम्भिकम् ।
वेदमध्यापयेद्धर्म्यं पुराणाङ्गानि नित्यशः ॥
तथा चिरोषिते शिष्ये गुरुर्ज्ञानमनिर्दिशन् ।
हरते दुष्कृतं तस्य शिष्यस्यैव ततो गुरुः ॥
आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः ।
आप्तः शक्तोऽर्थदः साधुरध्याप्या दश धर्मतः ॥
ज्ञातञ्च तथाद्रोही मेधावी शुभलक्षणः ।
आप्तः शिष्योऽथ विधिवत् षड्ध्याप्या द्विजातयः ।
एतेषु ब्रह्मदो दानमग्र्यञ्च तु यथोदितात् ॥"●॥
वेदाध्ययनविधिर्यथा,—
"आचार्यं संयतो नित्यमधीयीत उदङ्मुखः ।
उपसंग्रह्य तत्पादौ वीक्षमाणो गुरोर्मुखम् ॥
अधीष्व भो इति ब्रूयादिरामोऽस्तिति चारमेत् ।
प्राङ् भूतान् पर्युपासीन पवित्रैश्चैव पावितः ॥
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।
ब्राह्मणः प्रणवं कुर्य्यादन्ते च विधिवद्द्विजाः ॥
कुर्य्यादध्यापनं नित्यं स ब्रह्मादीनि पूर्वतः ।
सर्वेषामेव भूतानां देवश्चक्षुः सनातनः ॥
अधीतानध्ययनित्यं ब्राह्मण्याद्धीयतेऽन्यथा ।
अधीयीत ऋचो नित्यं घोरव्याहृतयः सदैवताः ॥
प्रीयाति तर्पयन्नेनं कामैस्तृप्तः सदेवताः ।
यजूंष्यधीते नियतं दध्ना प्रीयाति देवताः ॥
सामान्यधीते प्रीयाति हुताहुतिभिरन्वहम् ।
अथर्वाङ्गिरसो नित्यं मध्वा प्रीयाति देवताः ॥
धर्मार्थञ्च पुराणानि मांसैस्तर्पयते सुरान् ।
अपां समीपे प्रयतो नैत्यिकं विधिमास्थितः ॥
गायत्रीमप्यधीयीत गत्वारण्यं समाहितः ।
सहस्रपरमां देवीं शतमध्यां दशावराम् ॥
गायत्रीं वै जपेन्नित्यं जपयज्ञः प्रकीर्तितः ।
गायत्रीञ्चैव वेदांश्च तुलयातोलयत् प्रभुः ।
एकतश्चतुरो वेदान् गायत्रीञ्च तथैकतः ॥
ओंकारमादितः कृत्वा व्याहृतीस्तदनन्तरम् ।
ततोऽधीयीत सावित्रीमेकाग्र्यान्वितः ॥
पुराकल्पे सहस्रन्ना भूर्भुवःस्वःसनातनाः ।

महाव्याहृतयश्चिस्रः सर्व्वाघौघनिवर्हणाः ॥
प्रधानं पुरुषः कालो ब्रह्मविष्णुमहेश्वराः ।
सत्त्वं रजस्तमश्चिस्रः क्रमाद्व्याहृतयः स्मृताः ॥
ओंकारस्तत्परं ब्रह्म सावित्री स्यात्तदक्षरम् ।
एष मन्त्रो महाभागः चतुरक्षर उदाहृतः ॥
योऽधीतेऽहन्यहन्येतां सावित्रीं वेदमातरम् ।
विधायार्थं ब्रह्मचारी स याति परमां गतिम् ॥
गायत्री वेदजननी गायत्री लोकपावनी ।
न गायत्र्याः परं जप्यं एतदित्याह सूयते ॥
श्रावणस्य च माघस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां पौष्टपद्यां वा वेदोपाकरणं स्मृतं ॥
उत्सृज्य यामनगरं मासान् विप्रोऽर्द्धपञ्चमान् ।
अधीयीत शुचौ देशे ब्रह्मचारी समाहितः ॥
पुष्ये तु छन्दसां कुर्य्याद्बहिरुत्सर्ज्जनं द्विजः ।
माघशुक्लस्य तु प्राप्ते पूर्व्वाह्णे प्रथमेऽहनि ॥
छन्दांस्यूर्द्धं मघो जप्यात् शुक्लपक्षे तु वै द्विजः ।
वेदाङ्गानि पुराणानि कृष्णपक्षे तु मानवः ॥
इमान्नित्यमनध्यायानधीयानो विचक्षणः ।
अध्यापनञ्च कुर्व्वाणो अभयस्यापि यत्नतः ॥
कर्णश्रवेनिशे रात्रौ दिवा पांसुसरूषणे ।
विद्युत्स्तनितसर्व्वेषु महोल्कानाञ्च संप्लवे ॥
आकालिकमनध्यायमेतेष्वाह प्रजापतिः ।
एतानभ्युदितान् विद्यादृषयो प्रादुष्कृतास्विह ॥
तदा विद्यादनध्यायमृतौ चात्र दर्शने ।
सन्ध्योतः स्यादनध्यायः ग्रेषे रात्रौ यथा दिवा ॥
नित्यानध्याय एव स्यादृषामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धेषु नित्यशः ॥
अन्तःशवगते ग्रामे हयलस्येव सन्निधौ ।
अनध्यायो रुद्यमाने समवाये जनस्य च ॥
उदके मध्यरात्रे च विण्मूत्रस्य विसर्ज्जने ।
उच्छिष्टः श्राद्धं भुक्त्वा मनसापि न चिन्तयेत् ॥
प्रतिग्रस्य द्विजो विद्वानैकोद्दिष्टस्य केतनम् ।
श्राद्धं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥
यावदेकान्वदुष्टस्य स्नेहो लेपश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत् ॥
ग्रयाणः प्रौढ्पादश्च तथा चैवावशूकिकः ।
नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च ॥
निराहारे वाग्यते सन्ध्ययोरुभयोरपि ।
अमावास्यांचतुर्दश्योः पौर्णमास्यष्टमीषु च ॥
उपाकर्म्मणि चोत्सर्गे चिरात्रं चपलं स्मृतम् ।
अष्टकासु त्रिरात्रन्तत्सन्धासु च रात्रिषु ॥
मार्गशीर्षे तथा पौषे माघमासे तथैव च ।
तिस्रोऽष्टकाः समाख्याताः सर्व्वपापेषु सूरिभिः ॥
श्वेताश्वतरस्य छायायां श्वाल्लर्क्षस्य च ।
कदाचिदपि नाधीयं कोविदारकपित्थयोः ॥
समानविद्ये तु व्रते तथा सब्रह्मचारिणि ।
आचार्य्ये संस्थिते वापि चिरात्रं चपलं स्मृतम् ।
छिद्राण्येतानि विप्राणां येऽनध्यायाः प्रकीर्त्तिताः ।
हिंसन्ति राक्षसास्तेषु तस्मादेतानि वर्ज्जयेत् ।
नित्यके नास्त्यनध्यायः सन्ध्योपासन एव च ।
उपाकर्म्मणि कर्म्मान्ते होममन्त्रे तथैव च ।
एकान्वष्टमयेकं वा यजुः सामाथवा पुनः ।
अष्टकाद्यास्वधीयीत मारुते चातिवायति ।
अनध्यायस्तु नाक्षेषु नैतिहासपुराणयोः ।
न धर्म्मशास्त्रेवन्येषु पर्व्वस्वेतानि वर्ज्जयेत् ॥७॥
एष धर्म्मः समासेन कीर्त्तितो ब्रह्मचारिणाम् ।
ब्रह्मणाभिहितः पूर्व्वमृषीणां भावितात्मनाम् ।
योऽन्यत्र कुरुते यत्नमनधीत्य श्रुतिं द्विजाः ।
स संन्मूढो न संभाष्यो वेदबाह्यो द्विजातिभिः ॥
न वेदपाठमात्रेण सन्तुष्टो वै भवेत् द्विजः ।
पाठमात्रावसन्नस्तु पङ्के गौरिव सीदति ।
अधीत्य विधिवद्वेदं वेदार्थं न विचारयेत् ।
स सान्वयः शूद्रकल्पः पात्रतां न प्रपद्यते ।
पतित्वात्मन्तिकं वासं कर्त्तुमिच्छति वै गुरोः ।
युक्तः परिचरेदेनं न शरीरविमोचणम् ॥
गत्वा वनं यो विधिवच्चतुर्थ्यात्मातवेदसम् ।
अधीयीत सदा नित्यं ब्रह्मनिष्ठः समाहितः ॥
सावित्रीं श्रुतरूपीयं वेदान्तांश्च विशेषतः ।
अभ्यसेत् सततं सुक्तो भस्मस्नानपरायणः ॥

एतद्विधानं परमं पुराणं
वेदागमे सम्यगिरेरितं वः ।
पुरा महर्षिप्रवराभिपृष्टः
स्वयम्भुवो यन्मनुराह देवः ॥
एतन्मीश्वरसमीरितं नरो
योऽनुतिष्ठति विधिं विधानवित् ।
मोहजालमपहाय सोऽन्ततो
याति तत्पदमनामयं शिवम् ।"

इति कौर्म्मे उपविभागे १६ अध्यायः ॥

अथ ऋग्वेदस्य संहिता ।

"विभेद प्रथमं विप्र शैल ऋग्वेदपादपम् ।
इन्द्रप्रमितये प्रादात् वाष्कलाय च संहिते ॥
चतुर्द्धा सा विभेदाथ वाष्कलो निजसंहिताम् ।
बोध्यादिभ्यो ददौ तासु शिष्येभ्यः स महामतिः ॥
बोध्यामित्रातुरौ तद्वत् जातुकर्ण्यपराशरौ ।
प्रतिशाखास्तु शाखायास्तस्यास्ते जगृहुर्मुने ॥
इन्द्रप्रमितिरेकान्तु संहितां स्वसुतं ततः ।
माण्डूकेयं महात्मानं मैत्रेयाध्यापयत्तदा ॥
तस्य शिष्यप्रशिष्येभ्यः पुत्रशिष्यक्रमाद्ययौ ।
वेदमित्रस्तु शाकल्यः संहितां तामधीतवान् ॥
चकार संहिताः पञ्च शिष्येभ्यः प्रददौ च ताः ।
तस्य शिष्याश्च ये पञ्च तेषां नामानि मे शृणु ।
मुद्गलो गालवश्चैव वात्स्यः शालीय एव च ।
शैशिरः पञ्चमश्चासौ मैत्रेय समहामतिः ॥
संहिताश्चतयश्चक्रे शाकपूर्णिरयेतरः ।
निरुक्तमकरोत्तद्वच्चतुर्थं मुनिसत्तम ।
क्रौञ्चो वैतालिकस्तद्वल्लोकश्च महामतिः ।
निरुक्तञ्चतुर्थोऽभूदेदवेदाङ्गपारगः ॥
रथीतराः प्रतिशाखाभ्यो ऋगृशाखा द्विजोत्तम ।
वाष्कलिशाखापराश्चिस्रः संहिताः श्रुतवान् द्विजः ॥
शिष्यः काण्वायनिर्गार्ग्यस्तृतीयश्च तथा जवः ।
ऋचेते बह्वृचाः प्रोक्ताः संहिता यैः प्रवर्त्तिताः ॥"

इति विष्णुपुराणे ३ अंशे वेदविभक्तिर्नाम ४ अध्यायः ॥ ॥ यजुर्व्वेदस्य संहिता यथा,—
"यजुर्व्वेदतरोः शाखाः सप्तविंशत्प्रभामतेः ।
वैशम्पायननामासौ याज्ञशिष्यश्चकार वै ।
शिष्येभ्यः प्रददौ ताश्च जगद्गुरुरुदारधीः ॥
याज्ञवल्क्यास्तु तस्याभूद्ब्रह्मरातसुतो द्विज ।
शिष्यः परमधर्म्मज्ञो गुरुवृत्तिपरः सदा ॥
ऋषिर्योऽथ महामेरोः समाजे नागमिष्यति ।
तस्य वै सप्तरात्रन्तु ब्रह्महत्या भविष्यति ।
पूर्व्वमेव मुनिगणैः समयोऽयं कृतो द्विज ॥
वैशम्पायन एकस्तु तं अतिक्रान्तवांस्ततः ।
स्वसीयं बालकं सोऽथ पदा क्षुण्णमघातयत् ॥
स शिष्यानाह भोः शिष्याः ब्रह्महत्याप्रदं व्रतम् ।
चरध्वं मत्कृते सर्व्वे न विचार्य्यमिदं तथा ॥
अथाह याज्ञवल्क्यस्तं किमेभिर्भगवन्द्विजैः ।
क्षत्रियैरल्पतेजोभिरस्थिरैरहमिदं व्रतम् ।
ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामतिम् ।
सृज्यतां यत् त्वयाधीतं मत्तो विप्रावमन्यक ! ॥
निस्तेजसो वदस्येतान् यस्त्वं ब्राह्मणपुङ्गवान् ।
तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा ॥
याज्ञवल्क्यस्ततः प्राह भक्षयेतत्ते मयोदितम् ।
ममाप्यलं त्वयाधीतं यन्मया तद्दिदं द्विज ॥

श्रीपराशर उवाच ।

दृष्ट्वा रुधिराक्तानि स्वरूपाणि यजूंषि सः ।
छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः ॥
यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज ।
जग्रहुस्तित्तिरा भूत्वा तैत्तिरीयास्ततः ततः ॥
ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तु यैः ।
चरकाध्वर्य्वस्ते तु चरणाद्मुनिसत्तम ॥
याज्ञवल्क्योऽपि मैत्रेय प्राणायामपरायणः ।
तुष्टाव प्रयतः सूर्य्यं यजूंष्यभिलषंस्ततः ॥

श्रीयाज्ञवल्क्य उवाच ।

नमः सवित्रे दाराय सुस्थिरमिततेजसे ।
ऋग्यजुःसामभूताय त्रयीधामवते नमः ॥

श्रीपराशर उवाच ।

स्तूयमानस्तदा तस्मै स्तुवे रविः ।
वाजिरूपधरः प्राह ब्रियतामभिवाञ्छितम् ।
याज्ञवल्क्यस्ततः प्राह प्रणिपत्य दिवाकरम् ।
यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ ।

श्रीपराशर उवाच ।

एवमस्तु ददौ तस्मै यजूंषि भगवान् रविः ।
अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः ॥
यजूंषि यैरधीतानि तानि वेद्मि द्विजोत्तम ।
वाजिनस्ते समाख्याताः सूर्य्योऽभ्यः सोऽभवद्यतः ॥
शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम् ।
काण्वाद्याः सुमहाभाग याज्ञवल्क्यप्रवर्त्तिताः ॥"

इति श्रीविष्णुपुराणे ३ अंशे वाजिनामाख्यानं ५ अध्यायः ॥ ॥ सामवेदस्य संहिता यथा,—
"सामवेदतरोः शाखा व्यासशिष्यः स जैमिनिः ।
क्रमेण येन मैत्रेय विभेद शृणु तन्मम ॥

सुमन्तुस्तस्य पुत्रोऽभूत् सुकर्म्मास्याप्यभूत् सुतः।
अधीतवन्तावेकैकां संहितां तौ महामुनी ॥
माहस्रं संहितामेदं सुकर्म्मा ततसुतस्ततः।
चकार तच्च तच्छिष्यौ जग्राहाते महाव्रतौ ॥
हिरण्यनाभिः कौशल्यः पौष्यञ्जिश्च द्विजोत्तमः।
उदीच्याः सामगाः शिष्यास्तस्य पञ्चशताः
स्मृताः ॥
हिरण्यनाभशिष्यास्तु चतुर्विंशतिसंहिताः।
प्रोवाच स्मृतिनामासौ शिष्येभ्यः सुमहामतिः ॥
तैश्चापि सामवेदोऽसौ शाखाभिर्बहुलीकृतः ॥"*
अथर्ववेदस्य संहिता यथा,—
"अथर्वणामथो वक्ष्ये संहितानां समुच्चयम्।
अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः ॥
शिष्यमध्यापयामास कबन्धं सोऽपि तद्विधा।
कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान् ॥
वेददर्शस्य शिष्यास्तु मोदो ब्रह्मबलिस्तथा।
शौल्कायनिः पिप्पलादस्तथान्यो मुनिसत्तमः ॥
पथ्यस्यापि त्रयः शिष्याः कृता येर्हि न संहिताः।
जाजलिः कुमुदादिश्च तृतीयः शौनको द्विज ॥
शौनकस्तूद्विधा कृत्वा ददावेकान्तु बभ्रवे।
द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने ॥
सैन्धवो मुञ्जकेशाच्च भिन्नवेदा द्विधा पुनः।
नक्षत्रकल्पो वेदानां संहितानान्तथैव च ॥
चतुर्थः स्यादङ्गिरसः शान्तिकल्पश्च पञ्चमः।
एष्टाचार्यब्रह्मभेते संहितानां विकल्पकाः ॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः ॥
अन्यत् कूर्म्मपुराणवत् ॥ * ॥ अपरञ्च।
"वेदो हरेर्व्वाक् सावित्री वेदमाता प्रतिष्ठिता।
त्रिगुणश्च त्रिदृत्सत्रं तेन विप्राः प्रतिष्ठिताः ॥
दशयज्ञैः संस्कृता ये ब्राह्मणा ब्रह्मवादिनः।
तत्र वेदाश्च लोकानां त्रयाणामिह पोषकाः ॥
यज्ञाध्ययनदानादितपःस्वाध्यायसंयमैः।
प्रीणयन्ति हरिं भक्त्या वेदतन्त्रविधानतः ॥"
इति कल्किपुराणे २ अध्यायः ॥ * ॥
वेदोक्तकर्म्म कर्त्तव्यं यथा,—
"श्रुतिस्मृतिसदाचारविहितं कर्म्म केवलम्।
सेवितव्यं चतुर्व्वर्णैर्भक्तिभिः केशवं सदा ॥
अन्यथा निरयं याति कुमार्गगमसेवनात्।
अतो वेदविरुद्धार्थं शास्त्रोक्तं कर्म्म संत्यजेत् ॥"
इति पाद्मोत्तरखण्डे १७ अध्यायः ॥ * ॥
वेदाचाराल्लौकिकाचारो बलवान् यथा,—
पार्व्वत्युवाच।
"केवलं वेदमाश्रित्य कः करोति विनिर्णयम्।
बलवान् लौकिको वेदाल्लोकाचारश्च कथ्यतेऽ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ७ अध्यायः ॥*॥
अथ वेदस्य स्थितिकालः।
"कलेर्दशसहस्रान्ते ययौ त्यक्ता हरेः पदम्।
वेदाश्च पुराणानि गृहानि श्राद्धतर्पणम्॥
वेदोक्तानि च कर्म्माणि यज्ञस्तैः सार्द्धमेव च।
हरिपूजा हरेर्नाम तत्कीर्त्तिगुणकीर्त्तनम् ॥
वेदाङ्गानि च शास्त्राणि यज्ञस्तैः सार्द्धमेव च।
सत्यञ्च धर्म्मः सत्यञ्च वेदाश्च ग्रामदेवताः।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः ॥*॥
आयुर्व्वेदस्योत्पत्तिस्तत्रैव यथा,—
"यदङ्गेभ्यः पञ्चसंख्यागतेभ्यो
वेदा जाता ऋग्यजुःसामभेदाः।
आयुर्व्वेदोऽथर्व्ववेदश्चेति कणादः ॥
आस्ते वेदः पञ्चमो वैद्यकाख्यो
वेत्ता कश्चित्तस्य नास्ते महेशात्।
तस्माद्धातार्थेत तस्मात्पुराघाट-
तस्माज्ज्ञात्वा वक्तुमर्हामि शास्त्रम्।"
इति गूढ़बोधः ॥
"हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते ॥"
इति सुखबोधः ॥ * ॥ * ॥
चतुर्व्वेदानां विवरणं यथा। अथातश्चरणव्यूहं व्याख्यास्यामः। तत्र यदुक्तं चातुर्व्वैद्यम्। चत्वारो वेदा विज्ञाता भवन्ति। ऋग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्ववेदश्चेति। तत्र ऋग्वेदस्याष्टौ स्थानानि भवन्ति। चक्षैश्रावकः १ चर्चकः २ अवशीयपारः ३ क्रमपारः ४ क्रमरथः ५ क्रमजटः ६ क्रमघटः ७ क्रमदण्डश्चेति ८। चतुष्पारायणमेतेषाम्। शाखाः पञ्चविधा भवन्ति। आश्वलायनी १ संख्यायनी २ शाकला ३ वाष्कला ४ माण्डूकेयाश्चेति ५। तेषामध्ययनम्। अध्यायाश्चतुःषष्टिः। मण्डलानि च दशैव तु।
"एकार्द्धं एकवर्गस्यादेकञ्च नवकस्तथा।
द्वौ वर्गौ द्वे ऋचौ ज्ञेये त्रीणि त्रीणि ऋतशतं
स्मृतम् ॥
चतुरृचं समाख्यातं षट्सप्तत्युत्तरं शतम्।
पञ्चर्चं द्वादश शतान्यष्टाविंशोत्तराणि च ॥
शतत्रयं षड्वर्चञ्च सप्तपञ्चाशदुत्तरम्।
सप्तर्चमेकान्न त्रिंशदुत्तरं शतमेककम् ॥
अष्टर्चाः पञ्चपञ्चाशद्वर्गाः स्युर्नाधिकोत्तराः।
वर्गाणां परिसंख्यातं द्वे सहस्रे षडुत्तरे ॥
सहस्रमेकं सूक्तानां निर्व्विशद्भिः विकल्पनाम्।
दशसप्तसु पञ्चत्वे संख्यातं वै परक्रमम् ॥
एकशतं सहस्रं वा द्विपञ्चाशत् सहस्राहम्।
एतानि च चतुर्दश वाग्विष्ठानाम्। इतरेषां पञ्चाशीतिक्रमकाले तु वेदयम्। चतुस्त्रिंशत्सहस्राणि द्विसप्तानां सहस्राणां द्वात्रिंशत् षोढ़शोत्तराः। चत्वारिंशत्सहस्राणि द्वात्रिंशत्शतसहस्राणि।
ऋचां दशसहस्राणि ऋचां पञ्चशतानि च।
ऋचामशीतिपादश्चेतत्परायणमुच्यते ॥
एक ऋचेकवर्गश्च एकस्य नवकस्तथा।
द्वौ वर्गौ द्वे ऋचौ ज्ञेये त्रीणि त्रीणि शत-
मृचाम् ॥
सहस्रमेकं सूक्तानां पञ्चानां शतमानविंशतिः।
सप्तकानां द्वे च सप्तोत्तरे शते। चतुर्ऋचे त्रीणि शतानि षट्कानां त्रीण्याः षष्टिरष्टकानाम् ॥*॥
यजुर्व्वेदस्य षड्शीतिर्भेदा भवन्ति। तत्र चरकाणां द्वादशभेदा भवन्ति। चरकाः १ आध्वरकाः २ कठाः ३ प्राच्यकठाः ४ कपिष्ठलकठाः ५ औपमन्याः ६ आरुणकठाः ७ चारायणीयाः ८ वाराहयणीयाः ९ वार्त्तान्तवेयाः १० श्वेताश्वतराः ११ श्वेताश्वतरा इति वा पाठः। मैत्रायणीयाश्चेति १२। तत्र मैत्रायणीयानां सप्तभेदा भवन्ति। मानवाः १ दुन्दुभाः २ वैकेयाः ३ वाराहाः ४ हारिद्रवेयाः ५ श्यामाः ६ श्यामायनीयाश्चेति ७। तेषामध्ययनमष्टौ। यजुःसहस्राण्यधीत्य शाखापारो भवति। तान्येव द्विगुणान्यधीत्य पदपारो भवति। तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति। षड्ङ्गान्यधीत्य षड्ङ्गविद्भवति। शिक्षा१ कल्पो २ व्याकरणम् ३ निरुक्तम् ४ छन्दो ५ ज्योतिषमित्यङ्गानि ६। तत्र प्राच्योदीच्यां नैर्ऋत्यां निर्ऋत्यः। तत्र वाजसनेयानां सप्तदशभेदा भवन्ति। जाबालाः १ औधेयाः २ काण्वाः ३ माध्यन्दिनाः ४ शापीयाः ५ तापायनीयाः ६ कापालाः ७ पौण्ड्रवत्साः ८ आवटिकाः ९ परमावटिकाः १० परमावटिकापि पाठः। पाराशरीयाः ११ वैधेयाः १२ वैनेयाः १३ ओधेयाः १४ गालवाः १५ वैजवाः १६ कात्यायनीयाश्चेति १७। प्रतिपदमनुपदं छन्दो भाषा धर्म्मो मीमांसा न्यायस्तर्कं इत्युपाङ्गानि॥ उपज्योतिषम्। साङ्गलक्षणम्। प्रतिज्ञानवाक्यम्। परिसंख्या। चरणव्यूहम्। आढ्यकल्पः। प्रवराध्यायश्च। श्राद्धम्। क्रतुः। संस्थानः। आगमः। यज्ञम्। प्रायश्चित्तम्। होत्रकम्। पारण्याग्निहोत्रकमपि पाठः। पशवः। उक्थानि। कूर्म्मलक्षणमित्यष्टादश परिशिष्टानि।
"द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके।
इत्युक्तं परिसंख्यातमेतत् सकलं सशुक्लियम्॥
यत्र्याश्च परिसंख्यातं ब्राह्मणञ्च चतुर्गुणम्।
आदावारभ्य वेदान्तं ब्रह्मणाद्भुतिपूर्व्वकम्।
वेदमध्याय एतेषां होमान्ते तु समारभेत्॥"
तत्र तैत्तिरीयकाणाम् द्विभेदा भवन्ति। औख्याः १ खमध्योऽपि पाठः। खाण्डिकेयाश्चेति २। तत्र खाण्डिकेयानाम् पञ्चभेदा भवन्ति। आपस्तम्बी १ बौधायनी २ सत्याषाढ़ी ३ हिरण्यकेशी ४ औधेयाश्चेति ५ औधेयी च पाठः। तत्र कठानान्तूपगानविशेषाः। चतुश्चत्वारिंशत्पथ्यान्।
"मन्त्रब्राह्मणयोर्व्वेदस्त्रिगुणं यत्र पठ्यते।
यजुर्व्वेदः स विज्ञेयः शेषः शाखान्तराः
स्मृताः॥"*॥
सामवेदस्याखिलसहस्रभेद आसीत्। अखिलशाने किञ्च इति भाष्यसम्मतः। अनध्यायेष्वधीयानास्ते शतक्रतुवत्तेनाभिहताः गणदाः।

तेषां प्रवक्ष्याम्यासुरायणीया वासुरायणीया वार्षागणवेया प्राङ्गला ऋग्वर्णभेदा प्राचीनयोग्या ज्ञानयोग्या राज्ञायनीयाश्चेति। तत्र राज्ञायनीयानां नव भेदा भवन्ति। राज्ञायनीयाः। ग्राज्ञायनीयाः। ग्रावायनीयाः इति ग्राज्ञसुग्याः इति च पाठः। बालजाः। बालसुङ्गवा इति वा पाठः। मौङ्गजाः। इति तु भाष्ये नास्ति। खल्वजाः। मद्राखल्वजाः। काङ्गजाः। कौथुमाः। गौतमाः। जैमिनीयाश्चेति। तेषामध्ययनमस्ती सामसहस्राणि सामानि च चतुर्हेयं अस्ती ग्रुतानि। दशेति दशसप्तस्र बालखिल्याः वसुपर्वप्रेक्ष्याः। क्वचित् पुस्तके नवतिदशतिबालखिल्याः वसुपर्वप्रेक्ष्याः इति च पाठः। एतत् सामगर्वं स्मृतम्। ॥ अथर्ववेदस्य नव भेदा भवन्ति। पैप्पलाः। दान्ताः। प्रदान्ताः। स्नाताः। स्नौता इति च पाठः। सौब्राः। ब्रह्मदावजाः। ग्रौनकी। देविदर्शनी। चरणविद्याश्चेति। दाता प्रदाता स्नौता ब्रह्मदीपश्री वेदश्री इति भाष्ये नामान्तरम्। तेषामध्ययनं पञ्च कल्पानि भवन्ति। नक्षत्रकल्पो विधानकल्पो विधिविधानकल्पः संहिता ग्राम्निकल्पश्चेति। सर्वेषामेव वेदानामुपवेदा भवन्ति। ऋग्वेदस्यायुर्वेदः। यजुर्वेदस्य धनुर्वेद उपवेदः। सामवेदस्य गान्धर्ववेद उपवेदः। अथर्ववेदस्य ग्रस्त्रशास्त्राणि भवन्ति। ॥ (अथर्ववेदस्य तन्त्रशास्त्रोक्तौ सुष्ठु मन्यते। तथा च शुक्रनीतौ। ४। १। २७।
"ऋग्यजुःसामचार्यश्च वेदा आयुर्धनुःक्रमात्।
गान्धर्वश्चेव तन्त्राणि उपवेदाः प्रकीर्तिताः।")
ऋग्वेदस्याश्वमेधयोगो ब्रह्मदेवतं गायत्रं छन्दः। ऋग्वेदो रक्तवर्णः पद्मपत्रायताक्षः सुविभक्तगौरः कुञ्चितकेशः स्रस्तुग्वेतवर्णः हिरण्मिश्रयुतः ॥ यजुर्वेदस्य भारद्वाजगोत्रं रुद्रदेवतं जैदुभं छन्दः। यजुर्वेदः श्यामो दीर्घः कपाली ताम्रवर्णः काञ्चनमयः आदित्यवर्णो वर्णेन षड्रत्निमात्रः ॥ सामवेदस्य काश्यपगोत्रं विष्णुदेवतं जागतं छन्दः। सामवेदो नित्यस्त्री शुचिः शुचौ वासौ शुचिवासाः इति च पाठः। चौमी इत्यपि पाठः। दान्तो चर्मी दण्डी काञ्चनमयः आदित्यवर्णो वर्णेन षड्रत्निमात्रः ॥ अथर्ववेदस्य वैखानसगोत्रं रुद्रदेवतं आनुष्टुभं छन्दः। अथर्ववेदस्तीक्ष्णदण्डः श्यामः कामरूपी क्षुद्रकर्मी क्षीव साध्यः क्षुद्रकर्मैकसेव साध्य इति वा पाठः। सविग्रहः सकलहः सर्धि गालवः सदानदण्डः परस्त्रियान्धश्चेति नवरत्निमात्रः। यत्रान्तरे विश्वात्मा विश्वकर्मा स्वशाखाध्यायी। प्राज्ञो महानीलोत्पलवर्णो वर्णेन दशरत्निमात्र इति च पाठः। ॥ अथ ध्यानम्।

"ध्यायामि त्वां पद्मपत्रायताक्षं
कुञ्चितकेशं ब्रह्मदेवत्यमाद्यम्।
गायत्रं ऋग्वेदमाद्येयगोत्रं
रक्तवर्णं स्रस्तुलोमप्रमाणम्।
वन्दे रौद्रं जैदुभं ताम्रवर्णं
भारद्वाजं दक्षनेत्रं क्षुराङ्गम्।
यजुर्वेदं दीर्घमादित्यवर्णं
कपालिनं पञ्च चारत्निमात्रम्।"॥
य इदं देवतं रूपं गोत्रप्रमाणं छन्दोवर्णं वर्णयति स विद्यां लभते स विद्यां लभते। जन्म जन्म वेदपारो भवति अव्रतो व्रती भवति अप्रयतः प्रयतो भवति अब्रह्मचारी ब्रह्मचारी भवति जातिस्मरो जायते। ॥
"य इदं चरणयूहं पर्वसु आवयेद्विजः।
धौतपाप्मा शुचिर्विप्रो ब्रह्मभूयाय कल्पते।
य इदं चरणयूहं आहकाले सदा पठेत्।
अक्षयमभवत् आद्यं पितृणामुपतिष्ठते।
योऽधीते चरणयूहं स विप्रः षड्क्तिपावनः।
पावयत्यखिलान् पूर्वान् पुरुषान् सप्त सप्त च।
य इमा विपुला देवा अन्ततश्च गच्छति।
लोकातीतं महाज्ञानं अन्ततश्च गच्छति।"
गच्छेयं गम इत्याह भगवान् व्यासः पाराशरीयो व्यासः पाराशरीयः। इति व्यासरचितं चरणयूहं समाप्तम्। (धनम्। यथा, ऋग्वेदे। ८। ७२। १।
"अग्निं रयिं न वेदम्।"
"वेद्यं वेदो धनम् धनहितम्।" इति तद्भाष्ये सायणः। चतुःसंख्यावाचकः। यथा, साहित्यदर्पणे। ३। २६४।
"तदेवमेकपञ्चाशद्भेदास्तस्य धनेर्मताः।
सङ्करेण विरूपेण संख्या चैकरूपया।
वेदस्याभिप्रराः शुद्धेरिडवाद्याभिधायकाः।"
दर्भसुष्टिः। यथा, मनुः। ४। ३६।
"वेदावेदौ धारयेद्यर्थिः शौचकर्म कमण्डलुम्।
यज्ञोपवीतं वेदश्च शुभे रौक्मे च कुण्डले।")
वेदगर्भः, पुं, (वेदा गर्भे अन्तरे यस्य।) ब्रह्मा। (यथा, भागवते। २। ४। २४।
"एतदेवात्मभू राजन् नारदाय विपृच्छते।
वेदगर्भोऽभ्यधात् साक्षाद्यदाह हरिरात्मनः॥")
ब्राह्मणः। इति हेमचन्द्रः॥
वेदगुप्तिः, स्त्री, (वेदानां गुप्तिः।) ब्राह्मणादिकर्णकवेदरक्षा। इति केचित्॥
वेदनं,) क्ली, स्त्री, (विद्+ल्युट्। पक्षे। "चङ्रि-
वेदना,) दन्धिविदिभ्य उपसंख्यानम्।" १। ३। १०७। इत्यस्य वार्त्तिकोक्त्या युच्।) अनुभवः। तत्पर्य्यायः। संवेदः २। इत्यमरः। ज्ञानम्। दुःखम्। इति मेदिनी। विवाहः। यथा,—
"पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि॥
ग्रहः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया।
वसनस्य दशा ग्राह्या शूद्रयोत्तरवेदने॥"
इति मानवे ३ अध्यायः। ॥
पाणीति। समानजातीयासु यज्ञमानासु इत्यन्यत्रलक्षणः संस्कारो यज्ञादिग्राह्येण विधीयते। विजातीयासु पुनरुद्वहमानासु विवाहकर्मणि पाणिग्रहणाख्ये अयमनन्तरोक्तो वक्ष्यमाणो विधिर्ज्ञेयः। ग्रह इति। क्षत्रियया पाणिग्रहणाख्ये ब्राह्मविवाहे ब्राह्मग्रहणपरिग्रहीतकाण्डेदेशो ग्राह्यः। वैश्यया ब्राह्मक्षत्रियविवाहे ब्राह्मक्षत्रियविधृतप्रतोदैकदेशो ग्राह्यः। शूद्रया पुनर्हि जातित्रयविवाहे प्राकृतवसनदशा ग्राह्या। इति कुल्लूकभट्टः॥
वेदनिन्दकः, पुं, (वेदं निन्दतीति। निन्द+ण्वुल्।) नास्तिकः। इति जटाधरः॥ (यथा, यमः। १०।
"दुर्भगो हि तथा यज्वा पापकृद्वेदनिन्दकः॥")
वृद्धच॥
वेदपारगः, त्रि, (वेदस्य पारं गच्छतीति। गम+ड।) वेदवेत्ता। ब्रह्मज्ञानी। यथा,—
"चक्रवाकाः ग्रहदीपे हंसाः सरसि मानसे।
तेऽभिजाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः॥"
इति आहृतत्त्वे पितृगाथा॥
वेदमाता, [ऋ] स्त्री, (वेदानां माता।) गायत्री। यथा,—
"योऽधीतेऽहन्यहन्येतां सावित्रीं वेदमातरम्।
विधायार्थं ब्रह्मचारी स याति परमां गतिम्॥
गायत्रीं वेदजननीं गायत्रीं लोकपावनीम्।
न गायत्र्याः परं जप्यं एतद्विज्ञाय सुच्यते॥"
इति कौर्म्मे उपविभागे १३ अध्यायः। ॥
दुर्गा। यथा,—
"ब्रह्मिष्ठा वेदमाताद्यायत्री चरणायना।
वेदेषु चरते यस्तेन सा ब्रह्मचारिणी॥"
इति देवीपुराणे ४५ अध्यायः॥
वेदवती, स्त्री, (वेदं ज्ञानमस्त्यस्या इति। वेद+मतुप्। मस्य वः। स्त्रियां ङीप्।) कुशध्वजराजकन्या। सा जन्मान्तरे सीता। यथा,
वह्निरुवाच।
"त्वं गच्छ तपसे देवि! पुष्करञ्च सुपुण्यदम्।
तत्रा तपस्या तत्रैव स्वर्गलक्ष्मीर्भविष्यति॥
सा च तद्वचनं श्रुत्वा प्रतस्थे पुष्करे तपः।
दिव्यं त्रिलक्षवर्षञ्च स्वर्गलक्ष्मीर्बभूव ह।
सा च कालेन तपसा यज्ञकुण्डसमुद्भवा।
जातिमती पाण्डवानाञ्च द्रौपदी द्रुपदात्मजा॥
सते युगे वेदवती कुशध्वजसुता शुभा।
जेतायां रामपत्नी सा सीतेति जनकात्मजा॥
तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा।
विद्यावतीति सा प्रोक्ता विद्यमानयुगत्रये॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १२ अध्यायः॥
(पारियात्रपर्व्वतस्थनदीविशेषः। यथा, मार्कण्डेये। ५७। १६।
"वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च।")
वेदवदनं, क्ली, (वेदानां वदनमिव।) आकरग्रन्थम्। यथा,—
"यो वेद वेदवदनं सदनं हि सत्यग्-
ब्राह्मणः स वेदमपि वेद किमन्यग्राह्यम्।
यस्मादतः प्रथममेतदधीत्य धीमान्
ग्राह्यान्तरस्य भवति श्रवणेऽधिकारी॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः॥

(वेदा वदन्ति यस्येति विग्रहे ब्रह्मणि, पुं । यथा, देवीभागवते । ७ । ३० । ८१ ।
"गायत्री वेदवदने पार्व्वती शिवसन्निधौ ॥")
वेदवासः, पुं, (वेदानां वासो यस्मिन् ।) ब्राह्मणः । इति शब्दरत्नावली ॥
वेदवित्, [द्] पुं, (वेदान् वेत्तीति । विद्+क्विप् ।) विष्णुः । यथा,—
"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥"
इति तस्य सहस्रनामस्तोत्रम् ॥
वेदविद्, वि । (यथा, मनुः । २ । ७८ ।
"एतदक्षरमेताञ्च जपन् व्याहृतिपूर्व्विकाम् ।
सन्ध्ययोर्व्वेदविद्विप्रो वेदपुण्येन युज्यते ॥")
वेदव्यासः, पुं, (वेदं व्यस्यति पृथक् करोतीति । वि+अस्+अण् । निरुक्तिस्तु परत्र द्रष्टव्या ।) मुनिविशेषः । तत्पर्य्यायः । माठरः २ द्वैपायनः ३ पाराशर्य्यः ४ कानीनः ५ बादरायणः ६ व्यासः ७ । इति हेमचन्द्रः ॥ कृष्णद्वैपायनः ८ सत्यभारतः ९ पाराशरिः १० सात्यवतः ११ । इति त्रिकाण्डशेषः ॥ बादरायणिः १२ सत्यवतीसुतः १३ सत्यरतः १४ पाराशरः १५ । इति शब्दरत्नावली ॥ (यथा, विष्णुपुराणे ।
"वेदमेकं चतुर्भेदं कृत्वा शाखाप्रभेदतः ।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक् ।
द्वापरे तु युगे विष्णुर्व्यासरूपी महामुने ।
वेदमेकं स बहुधा कुरुते जगतो हितः ॥
यथा च कुरुते तन्वा वेदमेकं पृथक् प्रभुः ।
वेदव्यासाभिधाना तु सा सा मूर्त्तिर्मधुद्विषः ॥")
अस्यान्यत् विवरणं व्यासशब्दे द्रष्टव्यम् ॥
वेदाग्रणीः, स्त्री, (वेदानामग्रणीः ।) सरस्वती । इति राजनिर्घण्टः ॥
वेदाङ्ग, क्ली, (वेदस्य अङ्गम् ।) शुल्बषडक्षरप्रकारशास्त्रम् । तद्यथा । शिक्षा १ कल्पः २ व्याकरणम् ३ निरुक्तम् ४ ज्योतिषम् ५ छन्दः ६ । यदुक्तम् ।
"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतः ।
छन्दोविचितिरित्येतैः षड्भिर्वेद उच्यते ॥" इति ॥
तत्र अकारादिवर्णानां स्थूलकरणप्रयत्नबोधिका अकु ए ह विसर्জ्जनीयाः कण्ठ्या इत्यादिका शिक्षा । यागक्रियाणामुपदेशः कल्पः । साधुशब्दान्वाख्यानं व्याकरणम् । वर्णागमो वर्णविपर्य्ययश्च इत्यादिना निश्चयेनोक्तं निरुक्तम् । ग्रहनक्षत्रादिगणनाशास्त्रं ज्योतिः । श्रुतिच्छन्दसां प्रत्यायकं शास्त्रं छन्दोविचितिः । इत्यमरभरतौ ॥ (यथा, मनुः । ३ । ६८ ।
"वेदाङ्गानि च सर्व्वाणि कृत्वापचयेषु सम्पठेत् ॥")
वेदादि, क्ली, (वेदानामादि । "क्वचिदौपचारिकाः शब्दाः स्वलिङ्गमपि त्यजन्तीति" न्यायादस्य क्लीबत्वम् ।) प्रणवम् । यथा,—
"वेदादि सुवनेशीञ्च श्रीबीजं ङेयुतं भृगुम् ।
कारयित्वा वदेन्मन्त्रं शुक्रस्य च षडक्षरम् ॥"
इति रुद्रयामलम् ॥
(वेदस्य पूर्व्वे, पुं । यथा, तैत्तिरीयारण्यके ।
"यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ॥")
वेदादिबीजं, क्ली, (वेदस्यादौ प्रयुक्तं बीजम् ।) प्रणवम् । यथा,—
"वेदादि सुवनेशीञ्च श्रीबीजं ङेयुतं भृगुम् ।
कारयित्वा वदेन्मन्त्रं शुक्रस्य च षडक्षरम् ॥
ॐ ह्रीँ श्रीशुक्राय । इति रुद्रयामलम् ॥
"वेदादिबीजं हूँ बीजं स्त्रीबीजं तन्निकेतनम् ।
शक्तिबीजं रमाबीजं मायाबीजं सुखाकरम् ॥"
इति राजराजेश्वरीतन्त्रम् ॥
वेदाधिपः, पुं, (वेदानामधिपः ।) चतुर्व्वेदाधिपतिग्रहः । यथा,—
"ऋग्वेदाधिपतिर्ज्ञेयो यजुर्व्वेदाधिपः स्मृतः ।
सामवेदाधिपो भौमः शनिर्ज्ञेयोऽथर्व्ववेदराट् ॥"
इति ज्योतिस्तत्त्वम् ॥
वेदान्तः, पुं, (वेदानां अन्तः ।) उपनिषत् । इति हेमचन्द्रः । वेदव्यासप्रणीतदर्शनशास्त्रविशेषोऽपि । यथा । वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च । इति परमहंसपरिव्राजकाचार्य्यश्रीसदानन्दयोगीन्द्रविरचितवेदान्तसारः ॥ * ॥ "इदानीं सर्व्वस्यापि वस्तुविचारोहेयोपपूर्व्वकत्वात् प्रतिज्ञातं वेदान्तं नामतो निर्दिशति वेदान्त इति । उपनिषद एव प्रमाणं उपनिषत्-प्रमाणम् । उपनिषदो यच्च प्रमाणमिति वा । तदुपकारीणि वेदान्तवाक्यसंग्राहकाणि शारीरकसूत्रादीनि च । शरीरमेव शारीरं तत्र भवो जीवः शारीरकः सूत्र्यते याथातथ्येन निरूप्यते यैः तानि शारीरकसूत्राणि 'अथातो ब्रह्मजिज्ञासा' इत्यादीनि । आदिशब्दो भाष्यादिसंग्रहार्थः । चशब्दो वेदान्तशब्दानुवङ्गार्थः । यद्वा शारीरकसूत्राणि तदुपयार्थवादिवेदान्तार्थसंग्राहकवाक्यानि । 'अथातो ब्रह्मजिज्ञासा' इत्यादिसूत्रादीनि । आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यन्ते । तेषामपि उपनिषच्छब्दवाच्यत्वादिति भावः ।" इति श्रीनृसिंहसरस्वतीकृता तत्त्वदीपिका सुबोधिनी ॥ अस्य नामान्तरं उत्तरमीमांसा । तत्र चत्वारः अध्यायाः । तेषु ब्रह्मनिरूपणम् । तद्विवरणं यथा,—
"अथ तस्मादहंभूदहङ्कारात्ब्रह्मा ततः प्रजासर्गः ।
मायामयी प्रवृत्तिः संदृश्यते पुनः पुनः क्रमशः ॥
मायामयोऽप्यचेता गुणकरणगणः करोति कर्म्माणि ।
तदधिष्ठाता देही सचेतनोऽपि न करोति किञ्चिदपि ॥
यद्वदचेतनमपि सन्निकटस्थे भ्रामके भ्रमति लोहम् ।
तद्वत् करणसमूहश्चेष्टति चिदधिष्ठिते देहे ॥
यद्वत् सवितर्युदिते करोति कर्म्माणि जीवलोकोऽयम् ।
न च तानि करोति रविर्न कारयति तद्वदात्मापि ॥
मनसोऽहंकारविमूर्च्छितस्य चैतन्यबोधस्येह ।
पुरुषाभिमानसुखदुःखभावना भवति मूढस्य ॥
कर्त्ता भोक्ता द्रष्टास्मि कर्म्मणामुत्तमादीनाम् ।
इति तत्स्वभावविमलोऽभिमन्यते सर्व्वगोऽप्यात्मा ॥
नानाविधवर्णानां वर्णान् धत्ते यथामलस्फटिकः ।
तद्वदुपाधिर्गुणभावितस्य भावं विभुर्धत्ते ॥
गच्छति गच्छति सलिले दिनकरबिम्बं स्थिते स्थितिं याति ।
अन्तःकरणे गच्छति गच्छत्यात्मापि तद्वदिह ॥
राहुरदृश्योऽपि यथा ग्रसति विम्बस्थः प्रकाशते जगति ।
सर्व्वगतोऽपि तथात्मा बुद्धिस्थो दृश्यतामेति ॥
आदर्शे मलरहिते यद्वद्रूपं विलिप्यते लोकैः ।
आलोकयति तथात्मा विशुद्धबुद्धौ स्वमात्मानम् ॥
सर्व्वगतं तत्त निरूपममदेतं तच्च चेतसा गम्यम् ।
यद्बुद्धिगतं ब्रह्मोपलभ्यते शिष्यबोधं तत् ॥
बुद्धिमनोऽहंकारास्तन्मात्रेन्द्रियगणाः सभूतगणाः ।
संसारसर्गपरिरक्षणक्षमाः प्राकृता हेयाः ॥
धर्म्माधर्म्मौ सुखदुःखफल्पना स्वर्गनरकवासश्च ।
उत्पत्तिनिधनवर्णाश्रमा न सन्तीह परमार्थे ॥
दृगटग्याभासुदकं शुक्तौ रजतं भुजङ्गमो रज्ज्वाम् ।
तैमिरिकचन्द्रयुगवत् भ्रान्तं निखिलं जगद्रूपम् ॥
यद्वद्दिनकर एको विभाति सलिलाशयेषु सर्व्वेषु ।
तद्वत् सकलोपाधिष्ववस्थितो भाति परमात्मा ॥
खमिव घटादिष्वन्तर्बहिःस्थितं ब्रह्म सर्व्वपिण्डेषु ।
देहोऽहमित्यनात्मनि बुद्धिः संसारबन्धाय ॥
सर्व्वविकल्पनहीनः शुद्धोऽहं शिवोऽमरः प्राज्ञः ।
अमलः सकलहिभातचेतन आत्मा खवद्व्यापी ॥
रसकाथितशर्करिका गुडखण्डा विकृतयो यथैवेक्षोः ।
तद्वदवस्थाभेदाः परमात्मन्येव बहुरूपाः ॥
विज्ञानान्तर्यामिप्राणविराट्देहजाति-पिण्डाज्ञाः ।
व्यवहारस्यस्थात्मन एतेऽवस्थाविशेषाः खुः ॥
रज्ज्वां नास्ति भुजङ्गः सर्पभयं भवति हेतुना केन ।
तद्धेतुविकल्पभ्रान्तिरविद्या न सत्यमिदम् ॥
एतत्तदन्धकारं यदनात्मन्यात्मताभ्रान्त्या ।
न विदन्ति वासुदेवं सर्व्वात्मानं नरा मूढाः ॥
प्राणाद्यन्तर्भेदैरात्मानं संवितत्य जालमिव ।
संहरति वासुदेवः स्वविभूत्या क्रीड़मान इव ॥
त्रिभिरेव विश्वतैजसप्राज्ञैरेवादिमध्यनिधनाख्यैः ।
जाग्रत्स्वप्नसुषुप्तैर्भ्रमभूतैश्चादितं तुर्य्यम् ॥
मोहयतीवात्मानं स्वमायया हैतरूपया देवः ।
उपलभते स्वयमेवं गुहागतं पुरुषमात्मानम् ॥

ज्वलनादृधूमोद्गतिभिर्विधाकृतिरम्बरे यथा भाति ।
तद्दिष्टेः सृष्टिः स्वमाययाहैतविस्तरो भाति ॥
भ्रान्त इव मनसि भ्रान्ते दुष्ट इव रूढ इव रूढे ।
व्यवहारस्थो न पुनः परमार्थेन ईश्वरो भवति ॥
जलधरधूमोद्गतिभिर्मलिनीक्रियते यथा न गगनतलम् ।
तद्वत् प्रकृतिविकारैरपरामृष्टः परः पुरुषः ॥
एकस्मिन्नपि च घटे धूमादिमलाद्दृते घटाः श्लेषाः ।
न भवन्ति मलोपेता यद्वज्जीवोऽपि तद्वदिह ॥
देहेन्द्रियेषु नियताः कर्मगुणाः कुर्वते स्वभोगार्थम् ।
नाहं कर्ता न ममेति ज्ञानतः कर्म नैव बध्नाति ॥
अन्यशरीरेण कृतं कर्म भवे येन देह उत्पन्नः ।
तदवश्यं भोक्तव्यं भोगादेव क्षयोऽस्य निर्दिष्टः ॥
प्राक् ज्ञानोत्पत्तिचितं यत् कर्म ज्ञानाग्निशिखाक्षीढम् ।
बीजमिव दहनदग्धं जन्मसमर्थं न तद्भवति ॥
ज्ञानोत्पत्तेरूर्ध्वं क्रियमाणं कर्म यत्तदपि ।
न श्लिष्यति कर्तारं पुष्करपर्णं यथा वारि ॥
वाग्देहमानसैरिह कर्मोच्चयः क्रियत इति वृथा प्राहुः ।
एकोऽपि नाहमेषां कर्ता तत्कर्मनामास्मि ॥
कर्मफलबीजनाशाज्जन्मविनाशो न चाच सन्देहः ।
बुद्धेवमपगततमाः सवितेव विभाति भास्वरूपः ॥
यद्दिक्षीकातूलं पवनोद्धूतं दग्ध दिशो याति ।
ब्रह्मवि तत्त्वज्ञानात्तथैव कर्माणि तत्त्वविदः ।
क्षीराद्धृतमाज्यं चित्रं यद्वन्न पूर्ववत्तस्मिन् ।
प्रकृतिगुणेभ्यस्तद्वत् पृथक्कृतश्चेतनोऽप्यात्मा ॥
गुणमयमायामहनं निर्धूय यथा तमः सहस्रांशुः ।
बाह्याभ्यन्तरचारी वैद्यवघनवत् भवेत् पुरुषः ॥
यद्वद्देहोऽवयवा ह्यदेव तस्या विकारजातानि ।
तद्वत् स्थावरजङ्गममद्वैतं द्वैतवद्भाति ॥
एकस्मात् चैत्रज्ञाद्वयः चैत्रजातयो जाताः ।
जीवगतादिव दृष्टाः समस्ततो विस्फुलिङ्गकणाः ॥
ते गुणसङ्गमदोषाद्धता इव धान्यजातयः खतुषैः ।
जन्म लभन्ते तावद्यावन्न ज्ञानवह्निना दग्धाः ॥
त्रिगुणा चैतन्यात्मनि सर्वगतेऽवस्थिताखिलाधारे ।
कुरुते सृष्टिमविद्या सर्वत्र स्पृश्यते तया नात्मा ॥
रज्ज्वां भुजङ्गहेतौ प्रभवविनाशौ यथा न स्तः ।
जगदुत्पत्तिविनाशौ न च कारणमस्ति तद्वदिह ॥
जन्मविनाशागमनागमनमलं, सङ्गवर्जितो नित्यम् ।
आकाश इव घटादिषु सर्वात्मा सर्वतोपेतः ॥
कर्मशुभाशुभजनितैः सुखदुःखैर्वन्धो भवत्युपाधीनाम् ।
तत्संसर्गाद्दुष्टस्करसङ्गादतस्करवत् ।
देहगुणकरणगोचरसङ्गात् पुरुषस्य यावदिह भावाः ।
तावन्मायापाशैः संसारे रूढ इव भाति ॥
माल्यचित्रान्नवधनभोगसंमूढः ।
जन्मजरामरणभये चक्र इव भ्राम्यते जन्तुः ॥
लोकव्यवहारज्ञतां य इहाविद्यासुपासते मूढाः ।
ते जननमरणधर्माणो ध्वान्तमनेत्य खिद्यन्ते ॥
हिमफेनबुद्बुदा इव जलस्य धूमो यथा वह्नेः ।
तद्वत् स्वभावभूता मायेयं कीर्तिता विष्णोः ॥
एवं हेतुविकल्पां भ्रमरूपां विमोहिनीं मायाम् ।
उत्सृज्य सकलं निष्कलमद्वैतं भावयेद्ब्रह्म ॥
यद्वत् सलिले सलिलं क्षीरे क्षीरं समीरणे वायुः ।
तद्वद्ब्रह्मणि विमले भावनया तन्मयत्वमुपयाति ॥
इत्थं द्वैतसमूहे भावनया ब्रह्मभूयमुपयाति ।
को मोहः कः शोकः सर्वं ब्रह्मावलोकयतः ॥
विगतोपाधिस्फटिकः स्वप्रभया भाति निर्मलो यद्वत् ।
चिद्दीपः स्वप्रभया तथा विभात्येष निरुपाधिः ॥
गुणकरणगणशरीरप्राणेक्षणमात्रजातिसुखदुःखैः ।
अपरामृष्टो व्यापी चिद्रूपोऽयं सदा विमलः ॥
द्रष्टा श्रोता घ्राता स्पर्शयिता रसयिता गृहीता च ।
देही देहेन्द्रियधीविवर्जितः स्यान्न कर्तासौ ॥
एको नैकत्रावस्थितो महेश्वर्यं योगतो व्याप्तः ।
आकाशवदखिलमिदं न कञ्चिदत्यत्र सन्देहः ॥
व्याप्तेवेदं सर्वं निष्कलसकलं यदेव भावयति ।
मोहगहनादविमुक्तस्तदैव परमेश्वरीभूतः ॥
यदृषयः चिद्व्याप्तागमतर्कैर्यु प्रभ्रमन्ति रागान्धाः ।
अणुमोदामक्षत्तत्तेषां सर्वात्मवादिधियाम् ॥
सर्वाकारो भगवानुपास्यते येन येन भावेन ।
तं तं भावं भूत्वा चिन्तामणिवत् समभ्येति ॥
नारायणमात्मानं ज्ञात्वा सर्गस्थितिप्रलयहेतुम् ।
सर्वज्ञः सर्वगतः सर्वः सर्वेश्वरो भवति ॥
आत्मन्यस्मरति शुचं यस्माद्विद्वान्न बिभेति कुतश्चित् ।
मृत्योरपि मरणभयं न भवत्यन्यदृभयं कुतस्तस्य ॥
क्षयदृद्धिव्यधघातकबन्धनमोक्षैर्विवर्जितं नित्यम् ।
परमार्थतत्त्वमेतत् यद्दोऽन्यत्तदृतं सर्वम् ॥
एवं प्रकृतिपुरुषं विज्ञाय निरस्तकल्पनाजालः ।
आत्मारामः प्रशमं समाश्रितः केवली भवति ॥
नलकदलिवेणुवाणा नश्यन्ति यथा स्वपुष्पमासाद्य ।
तद्वत्स्वभावभूताः स्वभावतां प्राप्य नश्यन्ति ॥
भिन्ने ज्ञानमयग्रन्थौ छिन्ने संशयगणे शुभाशुभे क्षीणे ।
दग्धे च जन्मबीजे परमानन्दं हरिं याति ॥
मोक्षस्य नैव किञ्चिद्द्वारमास्ति न चापि गमनमन्यत्र ।
अज्ञानमयग्रन्थेर्भेदो यस्तं विदुर्मोक्षम् ॥
बुद्धेवमसत्यमिदं विष्णोर्मायात्मकं जगद्रूपम् ।
विगतद्वन्द्वोपाधिकभोगासङ्गो भवेच्छान्तः ॥
बुद्धा विमुक्तां प्रकृतिं पुरुषः संसारमध्यगो भवति ।
निर्मुक्तः सर्वकर्मभिरम्बुपत्रं यथा सलिलैः ॥
अश्नन् बुद्धा तद्वा संवीतो येन केनचिच्छान्तः ।
यत्र क्वचन च शायी विमुच्यते सर्वभूतात्मा ॥
इयमेकगुप्तसद्भावाख्यैव कुरुते ब्रह्मघातलक्षाणि ।
परमार्थविन्न पुण्येन च पापः स्पृश्यते विमलः ॥
मदकोपहर्षमत्सरविषादभयपरुषवर्ज्यवाग्बुद्धिः ।
निस्तोत्रवषट्कारो जडवद्विचरेदगाधमतिः ॥
उत्पत्तिनाशवर्जितमेवं परमार्थमुपलभ्य ।
कृतकृत्यः सफलजनुः सर्वगतस्तिष्ठति यथेष्टम् ॥
व्यापिनमभिन्नमित्थं सर्वात्मानं विधूतनानात्वम् ।
निरुपमपरमानन्दं यो वेद स तन्मयो भवति ॥
तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम् ।
ज्ञानसमकालं मुक्तः कैवल्यं याति हतशोकः ॥
पुण्याय तीर्थसेवा निरयाय श्वपचसदननिषेवणगतिः ।
पुण्यापुण्यकलङ्कस्पर्शाभावे तु किं तेन ॥
दृष्ट्वाश्रुतपादो यद्वदनिच्छन्नरः क्षितौ पतति ।
तद्वदगुणपुरुषयोरनिच्छन्नपि केवली भवति ॥
परमार्थमार्गसाधनमारभ्याप्राप्य योगमपि नाम ।
सुरलोकभोगभोगी सुदितमना मोदते सुश्लोकम् ॥
विषयेषु सार्वभौमः सर्वजनैः पूज्यते यथा राजा ।
सुरनेषु सर्वदेवैर्योगभ्रष्टस्तथा पूज्यः ।
महता कालेन महान् मानुष्यं प्राप्य योगमभ्यस्य ।
प्राप्नोति दिव्यमद्भुतं यत्तत् परमं पदं विष्णोः ॥
वेदान्तज्ञाप्तमखिलं विलोक्य श्रेषोऽखिलाधारः ।
आर्यापञ्चाशीतीं ववन्द परमार्थसारमिदम् ॥"
इति श्रीशेषनागविरचितं परमार्थसारं समाप्तम् ॥

वेदान्ती, [न्] पुं, (वेदान्तोऽस्यास्तीति । वेदान्त + इनिः ।) वेदान्तशास्त्रवेत्ता । तत्पर्यायः । ब्रह्मवादी २ । इति जटाधरः ॥

वेदारः, पुं, शकलम् । इति त्रिकाण्डशेषः ॥

वेदाभ्यासः, पुं, (वेदस्य अभ्यासः ।) वेदानुशीलनम् । स च पञ्चविधः । यथा, दक्षः ।
"द्वितीये च तथा भागे वेदाभ्यासो विधीयते ।
वेदाभ्यासो हि विप्राणां परमं तप उच्यते ॥
ब्रह्मयज्ञपरं ज्ञेयः षड़ङ्गसहितञ्च यः ।
वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः ।
तद्ज्ञानञ्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥
ग्रन्थलिखितौ । न वेदमनधीत्यान्यं विद्यामधीयीतान्यत्र वेदाङ्गस्मृतिभ्यः ।" इत्याह्निकतत्त्वम् ॥

वेदि, स्त्री, (विद् + इन् ।) अम्बष्ठा । इति शब्दचन्द्रिका ॥

वेदिः, स्त्री, (विद्यते पुण्यमस्यामिति । विद् + "कृपिवितृहिदृतिविदीति ।" उणा० ४ । ११८ । इति इन् ।) परिष्कृता भूमिः । इत्यमरः ॥ परिष्कृता यज्ञार्थं पशुबन्धनाय यज्ञपात्रासादनाय चातिसंस्कारा भूमिर्वेदिरुच्यते । सा च डमरुकाद्याकारा पिण्डिका । वेदयति निवारयति द्रव्यजातं वेदिः । विद ङ क च चेतनाख्याने वाचवादे गान्धीति ङः । वेदिः स्त्री वेदी च । इति भरतः ॥ (यथा, रघुः । ११ । २५ ।
"वीक्ष्य वेदिमथ रक्तबिन्दुभिः-
र्बन्धुजीवसदृशैः प्रदूषिताम् ॥")
अङ्गुलिमुद्रा । इति मेदिनी ॥ (यज्ञोपकरणविशेषः । यथा, भागवते । १० । ४१ । २१ ।
"वेदूर्ध्ववामजघनीमविदामेसुं
तां ताहरिद्विवसनौ वेदिषु ॥")

वेदिः, पुं, (वेत्तीति । विद् + इन् ।) पण्डितः । इति मेदिनी ॥

वेदिका, स्त्री, (वेदिरेव । स्वार्थे + कन् ।) मङ्गलकर्म्मार्थं निर्म्मितवेदिः । तत्पर्य्यायः । वितर्हिः २ । इत्यमरः ॥ वितर्हीं ३ वेदिः ४ वेदी ५ । इति तट्टीका ॥ दे आरामाङ्गनादिमध्यस्थवेदिकायाम् । देवागारादौ काष्ठादिचतुष्किकायामित्यन्ये । दारुपरिष्टता चतुरस्रा विश्रामभूर्वितर्हिरित्यपरे । स्तम्भसंलग्नपीठिका वितर्हिरिति केचित् । मङ्गल्याङ्गनमध्यस्थचतुष्किकेति केचित् । मङ्गलस्थानार्थं निर्म्मितवेदिकेति केचित् । अशुभं वितर्दयति वितर्हिः । तर्द हिंसे गान्नीति ङः । वेदिका साहचर्य्यात् स्त्री इत्यन्तात् पक्षे ईप् वितर्ही च । वितर्हिः काष्ठलोष्ठी स्यादिति रत्ने । वितर्हिरपीति मधुः । विदन्ति विद्यते वा अस्यामिति वेदिः पूर्व्ववदिः स्वार्थे कः । अतएव वेदिर्वेदी च । इति भरतः ॥ (यथा, कुमारे । ३ । ४४ ।
"स देवदारुद्रुमवेदिकायां
शृङ्गैर्निशाभेद्यवधानवद्भ्याम् ॥")

वेदिका, स्त्री, (वेदा जायते इति । जन + डः ।) द्रौपदी । इति हेमचन्द्रः ॥

वेदितः, त्रि, ज्ञापितः । ज्ञान्तविद्धातोः क्तप्रत्ययेन निष्पन्नमिदम् ॥

वेदितव्यं, त्रि, (विद् + तव्य ।) वेद्यम् । ज्ञातव्यम् । यथा,—
"आर्षं छन्दश्च दैवतं विनियोगस्तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥"
इति तिथ्यादितत्त्वम् ॥

वेदिता, [ऋ] त्रि, (विद् + तृच् ।) ज्ञाता । तत्पर्य्यायः । विदुरः २ विन्दुः ३ । इति हेमचन्द्रः ॥ यथा, महाभारते । ५ । ३३ । ५२ ।
"न वेदानां वेदिता कश्चिदस्ति
वेद्येन वेदं न विदुर्न वेद्यम् ।")

वेदी, [न्] पुं, (वेत्तीति । विद् + णिनिः ।) पण्डितः । इति शब्दरत्नावली ॥ ब्रह्म । इति केचित् । ज्ञातरि, त्रि । (यथा, रघुः । ८।२७ ।
"स पराङ्मुखतेरग्रोत्थितां
पितुरुद्दिश्य सदर्थवेदिभिः ॥")

वेदी, स्त्री, (वेदि + ङादिकारादिति वा ङीष् ।) वेदिः । इत्यमरटीकायां भरतः ॥ वरस्त्री । इति शब्दमाला ॥

वेदीशः, पुं, (वेदीनां पण्डितानामीशः ।) ब्रह्मा । इति त्रिकाण्डशेषः ॥

वेदोक्तः, त्रि, (वेदे उक्तः ।) श्रुतिकथितः । यथा,
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितुमीश्वरे ।
नैष्कर्म्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥"
इति मलमासतत्त्वम् ॥

वेदोदयः, पुं, (वेदः विषयज्ञानसुदये यस्य ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥

वेदोदितः, त्रि, (वेदे उदितः ।) वेदोक्तः । यथा,—
"वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥"
इति मलमासतत्त्वम् ॥

वेद्यं, त्रि, (विद् + ण्यत् ।) वेदितव्यम् । यथा,—
"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सताम्
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः ॥
(धनाय हितम् । यथा, ऋग्वेदे । २ । २ । ३ ।
"रथमिव वेद्यं शुक्रशोचिषमग्निम् ।"
"वेद्यं वेदो धनम् । तस्मै हितम् ।" इति तद्भाष्ये सायणः ॥ स्तुत्यम् । तथा, तत्रैव । ५ । १५ । १ ।
"प्रवेधसे कवये वेद्याय गिरम् ।"
"वेद्याय स्तुत्याय ।" इति तद्भाष्ये सायणः ॥ लभ्यम् । यथा, वाजसनेयसंहितायाम् । १८ । ११ ।
"वित्तं च मे वेद्यञ्च मे ।"
"वेद्यं लभ्यम् ।" इति तद्भाष्ये महीधरः ॥ वेदाय हितमिति वेद + यत् । वेदहितम् । वेदप्रतिपाद्यम् । यथा, महाभारते । १३ । १५८ । ३६ ।
"वेद्यश्च यत् वेदयते च वेदं
विधिश्च यश्चाश्रयते विधेयम् ।
धर्म्मे च वेदे च फले च सर्व्वं
चराचरं कृत्स्नं त्वं प्रतीहि ॥")

वेधः, पुं, (विध + घञ् ।) वेधनम् । बँधा इति भाषा । तत्पर्य्यायः । बधः २ । इत्यमरः ॥ (यथा, महाभारते । १२ । १६८ । ३६ ।
"बालवेधी परं यत्नमकरोच्चेव गौतमः ॥")
गभीरता । गहरा इति चाड़ा इति च भाषा ॥ यथा,—
"गत्वयित्वा विस्तारं बहुशः स्थानेषु तद्युति-
भाव्या ।
स्थानकमित्यासममितिरेवन्दैर्घ्ये च वेधे च ।
क्षेत्रफलं वेधगुणं खाते घनहस्तसंख्या स्यात् ।"
इति लीलावत्यां खातव्यवहारः ॥७॥
अथ सप्तशलाकवेधः ।
"क्षत्तिकादिपतुःसप्तरेखाराशौ परिभ्रमन् ।
यद्यत्रैकरेखास्थो वेधः सप्तशलाकजः ॥"
इति दीपिका ॥ ८ ॥
अथ खर्ज्जूरवेधः ।
"एकाम्बुदंगतां त्रयोदश्र तथा तिर्य्यग्गताः
स्थापयेत्
रेखाचक्रमिदं बुधैरभिहितं खार्ज्जूरिकं तच्च तु ।
याचातादि तु मूर्द्धि भन्तु कथितं तत्रैक्यरेखा-
स्थयोः
सूर्य्याचन्द्रमसोर्मिथो निगदिता ङक्पात एका-
गंजः ॥"
इति रत्नमाला ॥७॥
अथ युतवेधः ।
"पापात् सप्तमगः शुभो यदि भवेत् पापेन वा संयुतो
यत्रास्तं परिवर्ज्जयेत् सुनिपुणो दोषो न स्यं
कथ्यते ॥"
अथ यामित्रवेधः ।
"रविमन्दकुजाक्रान्तं भगाद्यात् सप्तमं त्रजेत् ।
विवाहपात्रापूढासु यद्दुष्टमप्रवेद्यगे ॥"
इति रत्नमाला ॥
वामदक्षिणवेधौ वामवेधशब्दे द्रष्टव्यौ ॥

वेधकं, क्ली, (विध + ण्वुल् ।) धान्यकम् । इति राजनिर्घण्टः ॥

वेधकः, पुं, (विध + ण्वुल् ।) कर्पूरः । इति त्रिकाण्डशेषः ॥ अन्यदेतत्सः । इति राजनिर्घण्टः ॥ (मक्षिसृक्षादिवेधोपजीवी । यथा, रामायणे । २ । ८४ । १३ ।
"मायूरिकाः क्राकचिका वेधका रोचकास्तथा ॥")

वेधकर्त्तरि, त्रि । (यथा, महाभारते । १३ । २३ । ८० ।
"अप्राप्तदमकाश्चैव नासानां वेधकाश्च ये ।
बन्धकाश्च पशूनां ये ते वै निरयगामिनः ॥")

वेधनिका, स्त्री, (विध्यतेऽनयेति । विध + करणे ल्युट् । ततः स्वार्थे कन् ।) मक्षिसृक्षादिवेधनोपकरणम् । भोमरी इति भाषा । तत्पर्य्यायः । आस्फोटनी । इत्यमरः ॥ आस्फोटनी १ स्फोटनी २ ध्वदंशिका ३ । इति भरतधृतवाचस्पतिः ॥

वेधनी, स्त्री, (विध्यतेऽनयेति । विध + ल्युट् । स्त्रियां ङीप् ।) हस्तिकर्णवेधनास्त्रम् । इति त्रिकाण्डशेषः । मेथिका । इति भावप्रकाशः ।

वेधसुखः, पुं, (वेधे वेधने सुखः श्रेष्ठः ।) कर्पूरः । इति राजनिर्घण्टः ।

वेधसुखकः, पुं, (वेधसुख + स्वार्थे कन् ।) हरिद्रावृक्षः । काँचा हलदि इति ख्यातः । तत्पर्य्यायः । कर्पूरकः २ द्राविडकः ३ काल्यकः ४ काल्यकः ५ । इत्यमरभरतौ ॥

वेधसुखा, स्त्री, (वेधे सुखा ।) कस्तूरी । इति राजनिर्घण्टः ।

वेधसं, क्ली, ब्राह्मतीर्थम् । अङ्गुष्ठमूलम् । इति शब्दचन्द्रिका ।

वेधाः, [स्] पुं, (विदधातीति । वि + धा + "विधाञो वेध च ।" उणा० ४ । २२४ । इति असिः । वेधादेशश्च सोपसर्गधातोः ।) ब्रह्मा । (यथा, रघुः । १ । २६ ।

"तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथाहि सर्व्वे तस्यासन् परार्थैकफला गुणाः ॥")

विष्णुः । इत्यमरः । (शिवः । यथा, हरिवंशे भविष्यपर्व्वणि । १५ । १२ ।

"नमस्ते प्रीतिकण्ठाय नीलग्रीवाय वेधसे ।")

सूर्य्यः । इति शब्दरत्नावली । पण्डितः । इति विश्वः । श्वेतार्कवृक्षः । इति शब्दचन्द्रिका । अनन्तपुत्रः । यथा,—

"इक्ष्वाकुर्व्वंशदायादो मध्यदेशमवाप्तवान् ।
सुतुम्बस्य प्रतिष्ठानं तस्य पुत्राः पुरूरवाः ॥
नरिष्यतः शुकाः पुत्राः प्राक्तं चक्षसदाहृतम् ।
नाभागस्याम्बरीषोऽभूत् सत्यव्रतः पार्थिवः ततः ॥
कोदवे पार्थकं चैत्रं रक्तदृष्टिर्बभूव ह ।
ग्रर्यातेर्मिथुनन्त्वासीदनन्तो नाम विश्रुतः ॥
सुकन्या नाम कन्या च या पत्नी यादवस्य च ।
अनन्तस्य च पुत्रोऽभूत् वेधो नाम महाप्रभुः ।
आनर्त्तविषये तेन पुरी कुशस्थली कृता ॥"

इति वह्निपुराणे सागरोपाख्याननामाध्यायः ॥ (प्रजापतिर्दक्षादिः । यथा, कुमारे । २ । १४ ।

"परतोऽपि परस्माच्च विधाता वेधसामपि ॥"

त्रि, मेधावी । इति निघण्टुः । ३ । १५ । विविधकर्म्मा । यथा, ऋग्वेदे । ५ । ४३ । १२ ।

"आ वेधसं नीलपृष्ठं बृहन्तम् ।"

"कौडुग्रं देवं वेधसं विविधकर्त्तारम् ।" इति तद्भाष्ये सायणः ॥)

वेधितः, पुं, (विध + णिच् + क्तः ।) कारितविद्धः । छिद्रितः । इत्यमरः ॥

वैधिनी, स्त्री, (विधति स्वयमिति । विध छिद्रीकरणे + णिनिः । ङीप् ।) रक्तपा । इति शब्दरत्नावली । जोंक इति भाषा । मेथिका । इति राजनिर्घण्टः ॥

वेधी, [न्] त्रि, (विध्यतीति । विध छिद्रीकरणे + णिनिः ।) वेधकर्त्ता । (यथा, महाभारते । ५ । ८६ । ३० ।

"तेषामपीषवः कर्णांश्च नासिकाश्चैव मायया ।
निमित्तवेधी स मुनिरीषीकाभिः समर्पयत् ॥")

वेधविशिष्टः । विधधातोर्णिनिप्रत्ययेन वेधशब्दादस्यर्थे इनिप्रत्ययेन वा निष्पन्नः ॥ अस्त्यर्थेतसिः, पुं । इति राजनिर्घण्टः ॥

वेध्यं, क्ली, (विध + ण्यत् ।) लक्ष्यम् । इति जटाधरः ॥ (यथा, मार्कण्डेये । ४२ । ७ ।

"प्राणो धनुः शरो ह्यात्मा ब्रह्म वेध्यमुदाहृतम् ।
अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत् ॥")

वेधनीये, त्रि । यथा,—

"षट्कर्णोत्पत्तिमाग्रह्य भानोः शुद्ध्या समेऽपि च ।
कर्णौ वेध्यौ न दोषः स्यादन्यथा मरणं भवेत् ॥"

इति मलमासतत्त्वम् ॥

वेनः, पुं, (अञ्चतीति । अञ्च गतौ + "धाञ्वस्यतिभ्यो नः ।" उणा० ३ । ६ । इति नः । अञ्चतेर्वीभावः ।) प्रजापतिः । इत्युणादिकोषः ॥ (पृथुराजपिता । यथा, मार्कण्डेये । २७ । १५ ।

"इतमेलं तथा लोभात् मदाद्वेनं द्विजैर्हतम् ॥"

अस्यान्यद्विवरणं मृत्युकन्यातवेनशब्दे द्रष्टव्यम् ॥ ॥ देवविशेषः । इति निघण्टुः । ५ । ४ । २४ । यथा, ऋग्वेदे । १० । १२३ । १ ।

"अयं वेनश्चोदयत् पृश्निगर्भा ॥"

"वेनः कान्तः एतत्संज्ञो मध्यमस्थानो देवः ।" इति तद्भाष्ये सायणः ॥ ॥ अञ्चति गच्छत्यनेन स्वर्गमिति । यज्ञः । इति निघण्टुः । ३ । १७ । त्रि, मेधावी । इति निघण्टुः । ३ । १५ । १५ । यथा, वाजसनेयसंहितायाम् । १३ । ३ ।

"सोमतः सुरुचो वेन आवः ॥"

"वेनः कामनीयो मेधावी वा ।" इति तद्भाष्यम् । कामयमानः । यथा, ऋग्वेदे । ८ । ८६ । ५ ।

"आयन्मा वेना अरुहन्नृतस्य ॥"

"वेनाः कामयमानाः ।" इति तद्भाष्ये सायणः ॥)

वेन्ना, स्त्री, (वन ग्रन्थे संभक्तौ वा + "वनेरिच्चोपधायाः ।" उणा० ३ । ८ । इति नः उपधायाश्चत्वञ्च ।) नदीविशेषः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । (यथा, महाभारते । ३ । ८८ । ३ ।

"वेन्ना भीमरथीं चोभे नदीं पापभयापहे ॥")

वेप, ट् ऋ ड चले । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० अक० सेट् ।) चलः कम्पनम् । टु, वेपथुः । ऋ, अविवेपत् । ड, वेपते वायुना वृक्षः । इति दुर्गादासः ॥

वेपः, [स्] क्ली, (वेप कम्पने + "सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८ । इत्यसुन् ।) अनवद्यम् । यथा,—

"स्वाद्वन्नज्योतिषोः क्लीवं वचो वाच्यच धातुषु ।
मेदो वेपोऽनवद्येऽथ सभायाञ्च सदो न ना ॥"

इत्युणादिकोषः ॥

(विरेपः । इति साधुपाठः ॥ इत्युज्ज्वलः । ४ । १८६ । ॥ । कर्म्म । इति निघण्टुः । २ । १ । ५ । यथा, ऋग्वेदे । १० । ४६ । ८ ।

"प्रजिह्वया भरते वेपो अग्निः ॥"

"वेपः कर्म्मनामैतत् ।" इति तद्भाष्ये सायणः ॥)

वेपथुः, पुं, (वेपनमिति । वेप + "इनोऽथुच् ।" ३ । ३ । ८६ । इति अथुच् ।) कम्पः । इत्यमरः ॥ (यथा, गीतायाम् । १ । २६ ।

"वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥")

वेपनं, क्ली, (वेप + ल्युट् ।) कम्पनम् । इति शब्दरत्नावली ॥ (यथा, सुश्रुते शारीरस्थाने १० अध्यायः । "तत्र विद्धस्य क्रोशनविनमनमोहनभ्रमणवेपनानि मरणं वा भवति ॥")

वेमः, पुं, वापदक्षः । यथा,—

"वापदक्षः पुंसि वेमा वेमो ना वेम न द्वयोः ॥"

इति शब्दरत्नावली ॥

वेमा, [न्] पुं, (वयत्यनेनेति । वे + "वेञः सर्व्वञ्च ।" उणा० ४ । १४६ । इति ममनिन् ।) वापदक्षः । इत्यमरभरतौ ॥ (यथा, नैषधे । १ । १२ ।

"सितांशुवर्णैर्व्वयति स्म तद्गुणै-
र्म्महासिवेश्मः सङ्कलत्वरी वधूम् ॥"

अर्च्चादित्वात् ङीषभावेऽपि । इति वाजसनेयसंहितायाम् । १६ । ८६ ।

"नमस्तुधीरस्तसरं न वेम ॥")

वेरं, क्ली, शरीरम् । वार्त्ताकुः । कुङ्कुमम् । इति मेदिनी ॥

वेरकं, क्ली, कर्पूरम् । इति हारावली ॥

वेल, ऋ चाले । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) ऋ, अविवेलत् । इति दुर्गादासः ॥

वेल, तृ क कालार्थे । इति कविकल्पद्रुमः ॥ (अदन्तपुरा० पर० अक० सेट् ।) कालार्थः कालोपदेशः । अविवेलत् । कालमियत्तया गतवान् एतावती वेलेति कथितवानित्यर्थः । इति दुर्गादासः ॥

वेलं, क्ली, उपवनम् । यथा, हेमचन्द्रे ।

"अपोपाभ्यां वनं वेलमारामः क्षत्रिमे वने ॥"

वेला, स्त्री, (वेलतेऽनयेति । वेल + गुरोश्च हलः इत्यः । ततष्टाप् ।) कालः । तत्पर्य्यायः । समयः २ क्षणः ३ वारः ४ अवसरः ५ प्रस्तावः ६ प्रक्रमः ७ अन्तरम् ८ । इति हेमचन्द्रः ॥ तत्परिमाणानि यथा,—

"अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्त्तितः ।
द्वौ निमेषौ त्रुटिर्नाम द्वे त्रुटी तु लवः स्मृतः ॥
द्विलवः क्षण इत्युक्तः काष्ठा प्रोक्ता दश क्षणाः ।
दश काष्ठाः किला नाम ततसंख्या स्याच्च नाडिका ॥
घटिके द्वे मुहूर्त्तः स्यात्तैस्त्रिंशत्या दिवानिशम् ।
चतुर्व्विंशतिवेलाभिरहोरात्रं प्रचक्षते ॥
सूर्य्योदयादि विज्ञेयो मुहूर्त्तानां क्रमः सदा ।
पश्चिमादर्द्धरात्रादि होरात्रां विद्यते क्रमः ॥
श्रेयं पित्र्यमहोरात्रं पक्षौ कृष्णसितासितौ ।
त्रिंशता च दिनैर्मासो दिमास ऋतुरुच्यते ।
भवेद्दिव्यमहोरात्रं षड्भिरुत्तरदक्षिणौ ।
वर्षं द्वादशभिर्मासैर्मलमासक्षयोदयः ॥"

इति वह्निपुराणे ग्रहभेदनामाध्यायः ॥ ॥ मर्य्यादा । इत्यमरः ॥ (यथा, महाभारते । २ । ६३ । ३६ ।

"धिगस्तु नष्टः खलु भारतानां
धर्म्मस्तथा क्षत्रविदाञ्च वृत्तम्।
यत्र स्थितौ कुरुधर्म्मवेलां
प्रेक्षन्ति सर्व्वे कुरवः सभायाम्॥")

समुद्रकूलम्। (यथा, रघुः। १। ३०।
"स वेलावप्रवलयां परिखीकृतसागराम्।
अनन्यशासनामुर्व्वीं शशासैकपुरीमिव॥")

समुद्रजलविकारः। (यथा, रघुः। १२। ३६।
"संरम्भं मैथिलीहासः क्षणसौम्यं निनाय ताम्।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः॥")

अखिलमरकम्। रागः। ईश्वरस्य भोजनम्। इति मेदिनी। अत्र पवर्गीयबकारादौ लिखितः। रागस्थाने रोगः। वाक्। बुधस्त्री। इति विश्वः। दन्तमांसम्। इति हारावली॥

वेलाकूलं, क्ली, (वेला एव कूलं यस्य।) तामलिप्तदेशः। यथा,—
"वेलाकूलं तामलिप्तं तामलिप्ती तमालिका॥"
इति त्रिकाण्डशेषः॥
(समुद्रकूलम्। यथा, भागवते। १०। ६७। ५।
"कचित् समुद्रमध्यस्थो दोर्भ्यां सन्तरति प्लवम्।
देशान् नागायुतप्राणो वेलाकूले व्यमज्जयत्॥")

वेलिसुक्प्रियः, पुं, सौरभयुक्ताम्रः। यथा,—
"————रसाब्धे त्रितिसौरभे।
महाकालश्च किम्पाक उर्व्वटो वेलिसुक्प्रियः॥"
इति शब्दरत्नावली॥
(वलिसुक्प्रिय इत्येव पाठः साधुः।)

वेल्ल, ऋ चाले। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अविवेल्लत्। चालः सञ्चलनम्। उद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः स्मरं वार्य्यताम्। गतावित्येके। इति दुर्गादासः॥

वेल्लं, क्ली पुं, (वेल्लतीति। वेल्ल चलने+पचाद्यच्।) विड्गः। इत्यमरः॥ (भावे घञ्।) गमने, पुं। इति वेल्लधात्वर्थदर्शनात्॥

वेल्लज, क्ली, (वेल्लवत् जायते इति। जन+डः।) मरिचम्। इत्यमरः॥

वेल्लनं, क्ली, (वेल्ल+ल्युट्।) भूमौ अश्वस्य लुण्ठनम्। तत्पर्य्यायः। लुण्ठनम् २। इति त्रिकाण्डशेषः॥ (सञ्चलनम्। यथा, राजतरङ्गिण्याम्। ८। १५६५।
"धरा सरित् खवसतेर्वेलधिप्रवेशे
वेलोर्म्मिवेल्लनवशेन शिवर्त्तमाना॥")
रोटिकादिनिर्म्माणार्थस्थूलवर्त्तुलकाष्ठविशेषः। इति भावप्रकाशः॥ बेलन् इति भाषा॥

वेल्लनी, स्त्री, (वेल्लति लुठति अन्नादिरत्रेति। वेल्ल+ल्युट्। ङीष्।) माखादूर्व्वा। इति राजनिर्घण्टः॥

वेल्लन्तरः, पुं, वीरतरुः। यथा, भावप्रकाशे।
"वेल्लन्तरो जगति वीरतरुः प्रसिद्धः
श्वेताभिधानविलोहितनीलपुष्पः।
स्याच्छ्वेतपुष्पकुसुमः शमिसञ्ज्ञकश्च
स्यात् कण्टकी च जयदेशज एव वृक्षः॥"
अस्य गुणाः।
"वेल्लन्तरो रसे पाके तिक्तस्तुण्डाकफापहः।
व्रणाघातास्रजिद्ग्राही योनिरक्तानिलार्त्तिजित्॥"

वेल्लहलः, पुं, कैलिनागरः। इति जटाधरः॥

वेल्लिः, स्त्री, (वेल्लति सञ्चलतीति। वेल्ल+इन्।) लता। इति शब्दरत्नावली॥

वेल्लिकाख्या, स्त्री, (वेल्लिका आख्या यस्याः।) वृक्षविशेषः। वेलसुटा इति भाषा। यथा,—
"मरुन्माला वेल्लिकाख्या विल्लपत्री ज्वरापहा॥"
इति शब्दचन्द्रिका॥

वेल्लितं, क्ली, (वेल्ल+क्तः।) गमनम्। इति मेदिनी॥

वेल्लितः, त्रि, (वेल्ल+क्तः।) कुटिलः। कम्पितः। इत्यमरः॥

वेवी, र च लु ड कान्तिगतिव्याप्तिक्षेपप्रजनखादने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-कान्तौ अक०-अन्यत्र सक०-सेट्।) र, वेदिकः। च, अवेवयुः। बहुलं ब्रह्मणीति परस्मैपदे असुस् विहेरित्वन् उसु शुरुस्थ्यामिति गुणः। लु ड, वेवीते। इति दुर्गादासः॥

वेश्मः, पुं, (विशन्ति नयनमनांस्यत्रेति। विश्+अधिकरणे घञ्। यद्वा, विशति अङ्गमिति। "पदरुजविशस्पृशो घञ्।" ३।३।१६। इति घञ्।) अलङ्काररचनादिकृतशोभा। तत्पर्य्यायः। आकल्पः २ नेपथ्यम् ३ प्रतिकर्म्म ४ प्रसाधनम् ५। इत्यमरः॥ वेषः ६। इति तट्टीकायां भरतः॥ (यथा, भागवते। १। २७। ५।
"नरदेवोऽसि वेशेन नटवत् कर्म्मणा द्विजः॥"
विशन्ति कामुका यत्रेति। अधिकरणे घञ्।) वेश्यागृहम्। गृहमात्रम्। इति मेदिनी॥ (वस्त्रगृहम्। तांबु इति भाषा॥ यथा, महाभारते। ५। १५१। ५३।
"शकटापणवेशाश्च यानयुग्यञ्च सर्व्वशः।
* * *
तत् संगृह्य ययौ राजा ये चापि परिचारकाः॥")
प्रवेशः। इति विशधात्वर्थदर्शनात्॥ (पण्यस्त्रिया भृतिः। यथा, मनुः। ४। ८४—८५।
"न राज्ञः प्रतियृह्णीयादराज्ञश्चार्त्तिकर्षितः।
स्वराष्ट्रक्षयवृद्धिज्ञो वेशनेव च जीवताम्॥
दशस्थानाद्यं चक्रं दशचक्रसमो ध्वजः।
दशध्वजसमो वेशो दशवेशसमो नृपः॥")

वेश्मकः, पुं, (वेश्म एव। स्वार्थे कन्।) गृहम्। इति शब्दरत्नावली॥ वेश्मकारके, त्रि॥

वेश्मदानः, पुं, सूत्रधारशोभा। इति शब्दचन्द्रिका॥

वेश्मधारी, [न्] पुं, (वेश्मं तापसलिङ्गं धरतीति। धृ+णिनिः।) हलतपस्वी। इति शब्दरत्नावली॥ (सङ्करजातिविशेषः। यथा, ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १०। अध्यायः।
"गङ्गापुत्रस्य कन्यायां वीर्य्येण वेशधारिणः।
बभूव वेशधारी च पुत्रो युक्तो प्रकीर्त्तितः॥")
वेशधारके, त्रि॥

वेश्यन्तः, पुं, (विशन्त्यत्र मेकादय इति। विश्+"ऋविशिभ्यां भन्।" उणा०। ३। १२६। इति भन्। पृषोदरादित्वात् साधुः।) क्षुद्रसरोवरः। इत्यमरः॥ अग्निः। इत्युणादिकोषः॥

वेश्वरः, पुं, अश्वतरः। इति त्रिकाण्डशेषः॥

वेश्यवारः, पुं, वेसवारः। इत्यमरटीकायां रायमुकुटः॥

वेश्यीजाता, स्त्री, पुत्रदाचीलता। इति राजनिर्घण्टः॥

वेश्म, [न्] क्ली, (विशन्त्यत्रेति। विश्+मनिन्।) गृहम्। इत्यमरः॥ (यथा, मनुः। ३य ७३।
"अदारेषु च नातीयात् स्त्रियं वा वेश्म वासतम्॥")

वेश्मकलिङ्गः, पुं, (वेश्मनः कलिङ्गः।) चटकः। अस्य मांसगुणौ। सन्निपातनाशित्वम्। अतिशुक्रकारित्वञ्च। इति राजवल्लभः॥

वेश्मकूलः, पुं, (वेश्म गृहं कूलयतीति। कूल+कः।) चञ्चेखा। इति राजनिर्घण्टः॥

वेश्मनकुलः, पुं, (वेश्मनो गृहस्य नकुलः।) गन्धमूषिकः। यथा,—
"चिक्कः स्याद्वेश्मनकुलश्चिक्का च बालमूषिका।
गन्धस्रवी गन्धमूषी गिरिका स्याच्छुन्दरी॥"
इति शब्दरत्नावली॥

वेश्मभूः, स्त्री, (वेश्मनो भूः।) गृहकरणयोग्यभूमिः। तत्पर्य्यायः। वास्तु २। इत्यमरः॥

वेश्यं, क्ली, (वेश्मे भवम्। वेश्म+"दिगादिभ्यो यत्।" ४। ३। ५४। इति यत्। यद्वा, वेश्मायै हितम्। वेश्मा+यत्।) वेश्मालयः। इति मेदिनी॥ (प्रवेशार्हे, त्रि। यथा, ऋग्वेदे। ४। २६। ३।
"शृततमं वेश्यं सर्व्वताता दिवोदासमतिथिग्वं यदावम्॥"
"वेश्यं दिवोदासनाम्ने प्रवेशार्हम्।" इति तद्भाष्ये सायणः॥)

वेश्या, स्त्री, टुकुकाहृत्यः। आकनादि इति भाषा। इति शब्दचन्द्रिका॥ (वेश्मर्हति वेश्मेन दीव्यत्याचरति वेश्मेन पण्ययोगेन जीवति वा। वेश्म+यत्।) खनामख्यातनारी। खानकी इति भाषा। तत्पर्य्यायः। वारस्त्री २ गणिका ३ रूपाजीवा ४। इत्यमरः॥ वेष्या ५। इति तट्टीका॥ क्षुद्रा ६ शालभञ्जिका ७। इति जटाधरः॥ भर्भरा ८ शूला ९ वारविलासिनी १० वारवाणि; ११ भक्तहासिनी १२। इति शब्दरत्नावली॥ लङ्गिका १३ वसुरा १४ कुम्भा १५ कामरेखा १६ वर्व्वटी १७। इति शब्दमाला॥ साधारणस्त्री १८ पण्याङ्गना १९ पताङ्गना २० भुजिष्या २१ वारबधूः २२। इति हेमचन्द्रः॥ भोग्या २३ खरवीथिका २४। इति राजनिर्घण्टः॥ तस्या लक्षणगमनफलादि यथा,—
"पतिव्रता चैकपत्नी द्वितीये कुलटा स्मृता।
तृतीये वृषली ज्ञेया चतुर्थे पुंश्चली स्मृता॥

वेश्या च पञ्चमे षष्ठे युङ्गी च सप्तमेऽष्टमे।
तत्र जन्मे महावेश्या सा भ्रष्टा सर्व्वजातिषु ॥
यो द्विजः कुलटाङ्गच्छेत् दृष्टां पुंश्चलीमपि।
युङ्गीं वेश्यां महावेश्यां अष्टोदं प्रयाति सः॥
भ्रष्टाम्बं कुलटागामी दृष्टागामी चतुर्युगम्।
षड्युगं पुंश्चलीगामी वेश्यागामी युगाष्टकम्॥
युङ्गीगामी दशयुगं वसेत्तत्र न संशयः।
महावेश्यागामुकश्च ततः भ्रष्टयुगं भवेत्॥
तदेव सर्व्वगामी चैवमाह पितामहः।
तत्रैव यातनां भुङ्क्ते यमदूतेन ताडितः॥
तित्तिरिः कुलटागामी दृष्टागामी च वायसः।
कोकिलः पुंश्चलीगामी वेश्यागामी टकस्तथा॥
युङ्गीगामी शूकरः स्यात्तज्जन्मसु भारते।
महावेश्यागामुकश्च जायते ग्रामलिप्सरः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २८ अध्यायः॥*॥
वेश्यागमनपापं प्रकीर्त्तनम्। तस्य प्रायश्चित्तम्।
तत्र सम्मतिः।
"पशुवेश्याभिगमने प्राजापत्यं विधीयते।"
तेन वेश्यागमने प्राजापत्यम्। तदशक्तौ धेनुरेका। एतत् सकृद्गमने। अभ्यासे तु। चान्द्रायणेन चैकेन सर्व्वपापक्षयो भवेदिति आपस्तम्बवचनाच्चान्द्रायणम्। इति प्रायश्चित्तविवेकः॥*॥ तदन्नादिकं निषिद्धम्। यथा,—
"पुंश्चल्यन्नञ्च यो भुङ्क्ते पुंश्चल्याजीवनोजनः।
स्त्रीममभावदर्षञ्च जालाकृच्छ्रे वसेद्ध्रुवम्॥
ताडितो यमदूतेन तद्दोषी तत्र तिष्ठति।
ततश्चिज्जन्मनि भवेत् क्षत्रवर्णः पशुः शुचिः॥
त्रिजन्मनि भवेच्छागस्ततो भवेत् सुदुःखितः।
ततश्चतुःशूकरोगी ततः शुद्धः क्रमेण च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥*॥
अपि च।
"पुंश्चल्यन्नञ्च यो भुङ्क्ते वेश्यान्नञ्च पतिव्रते।
तद्भक्षणेन द्विजो यो हि कालसूत्रं प्रयाति सः॥
भ्रतवर्षं कालसूत्रे स्थित्वा शूद्रो भवेद्ध्रुवम्।
तत्र जन्मनि रोगी च ततः शुद्धो भवेद्द्विजः॥"
इति तत्रैव २८ अध्यायः॥*॥
यात्राकाले तस्या दर्शनं शुभम्। यथा,—
"धेनुर्वत्सप्रयुक्ता दधतुरगरथा दक्षिणावर्त्तवह्निर्दिव्यस्त्रीपूर्णकुम्भा द्विजवृषभशिखाः पुष्पमाला पताकाः।
सद्योमांसं घृतं वा दधि मधु रजतं काञ्चनं शुक्लधान्यं
दृष्ट्वा भुक्त्वा पठित्वा फलमिह लभते मानवो गन्तुकामः॥"
इति समयप्रदीपः॥
वेश्यागर्ब्भः, पुं, (वेश्यानां गर्ब्भः।) वेश्यासमूहः। तत्पर्य्यायः। वेश्यावारः २। इति शब्दमाला॥
वेश्याचार्य्यः, पुं, (वेश्यानां आचार्य्यः।) पीठमर्दः। इति हेमचन्द्रः॥
वेश्याजनसमाश्रयः, पुं, (वेश्याजनानां समाश्रयः आश्रयस्थानम्।) वेश्यालयः। तत्पर्य्यायः। वेशः २। इत्यमरः॥ वेश्याश्रयः ३ पुरम् ४। इति हेमचन्द्रः॥ वेश्मम् ५। इति जटाधरः॥
वेश्वरः, पुं, अश्वतरः। यथा। वेश्वरोऽश्वतरः खरः। इति भूरिप्रयोगः। त्रिकाण्डशेषे वेश्वर इति पाठः॥
वेषः, पुं, वेवेष्टि आप्नोति अङ्गं वेषः पचाद्यच् मूर्द्धन्यान्तः। विभ्रत्ति नयनमनांस्यत्रेत्याधारे घञि वेशस्तालव्यान्तश्च। इति भरतः॥ नेपथ्यम्। (यथा, मनुः। ८। २।
"विनीतवेषाभरणः पञ्चेत्कार्य्याणि कार्य्यवान्॥")
वेश्माजनाश्रयः।"हे दारिकाणां निवासस्थाने। विशति यूनां मनः कासुको वा वेशः स्त्री विश प्रवेशे घञ्।
'नेपथ्ये गृहमात्रे च वेशो वेश्माग्रहेऽपि च।'
इति तालव्यान्ते रभसः॥
'गृहमात्रे गणिकायाः सद्मनि वेशो भवेत्तु तालवः।
तालवो मूर्द्धन्योऽलङ्कारे कथित आचार्य्यैः॥'
इत्युज्ज्वलदत्तः।
वेविशति आप्नुवन्ति जनमनांसीति घञि वेशो मूर्द्धन्यान्तोऽपि दृश्यते तत्तु न क्वचं मूर्द्धन्यान्तेषु सर्व्वत्र कोषादावनुपात्तत्वादिति सुकटः।" इति च भरतः॥ (संस्थानविशेषः। यथा, रामायणे। १। १७। १६।
"यस्य देवस्य यद्रूपं वेषो यच्च पराक्रमः॥"
"वेषः संस्थानविशेषः।" इति तट्टीका॥*॥ वेवेष्टि आप्नोति कर्त्तृमिति। पचाद्यच्। कर्म्म। इति निघण्टुः। २। १॥ *॥ विष व्याप्तौ+घञ्। व्याप्तिः। यथा, वाजसनेयसंहितायाम् १। ६।
"कर्म्मणे वां वेषाय वाम्।"
"वेषायच। विषूल व्याप्तौ। घञ् वेषो व्याप्तिः। सूचितकर्म्मसु व्याप्त्यर्थं च वां युवामहमाददे।" इति तद्भाष्ये महीधरः॥)
वेषणः, पुं, (विष व्याप्तौ+ल्युः।) कासमर्दः। इति हारावली॥ (स्त्री, विष+ल्युट्।) प्रवेशश्च॥ (परिचर्य्या। यथा, ऋग्वेदे। ५। ७। ५।
"अवसेयस्य वेषणे खेदं पथिषु जुह्वति॥"
"यस्यादेर्वेषणे परिचर्य्यायाम्।" इति तद्भाष्ये सायणः॥)
वेषणा, स्त्री, (वेवेष्टि आप्नोतीति। विष+ल्युः। टाप्।) विषुत्रकटुचः। इति रत्नमाला॥ धन्या इति भाषा॥
वेषधारः, पुं, वेषधारः। इत्यमरटीकायां रायमुकुटः॥
वेष्ट, ङ वेष्टे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, वेष्टते। इति दुर्गादासः॥
वेष्टः, पुं, (वेष्ट+घञ्।) वेष्टनम्। इति शब्दमाला॥ (यथा, महाभारते। ७। २५। २७।
"ग्रीवायां वेष्टयित्वैनं स गजो हस्तुमैच्छत।
करवेष्टं भीमसेनो भ्रमं दत्वा व्यमोचयत्॥")
ग्रीवेष्टः। इति राजनिर्घण्टः॥ निर्य्यासः। आटा इति भाषा। इति वैद्यकम्॥ (सुखरोगविशेषः। यथा, सुश्रुते। २। १६।
"दन्तास्खलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते॥")
वेष्टकं, क्ली, (वेष्टते इति। वेष्ट+ण्वुल्।) उष्णीषः। इति शब्दरत्नावली॥ निर्य्यासः। इति शब्दमाला॥ ग्रीवेष्टः। इति राजनिर्घण्टः॥
वेष्टकः, पुं, (वेष्टते इति। वेष्ट+ण्वुल्।) प्राचीरः। यथा प्राचीनावेष्टको इति। इति हेमचन्द्रः॥ कुष्माण्डः। यथा,—
"कुष्माण्डकः पुष्पफलो घनवासश्च वेष्टकः॥"
इति हारावली॥
ग्रीवेष्टः। इति राजनिर्घण्टः॥ वेष्टनकारके, त्रि॥ (यथा, महाभारते। ७। १३६। २१।
"बलयैरपरिद्वैश्च तथैवाङ्गुलिवेष्टकैः॥")
वेष्टनं, क्ली, (वेष्टते इति। वेष्ट+ल्युः।) कर्णभूस्फुली। उष्णीषः। (यथा, रघुः। ८। १२।
"समरण्यसमाश्रयोन्मुखं
शिरसा वेष्टनशोभिना सुतः॥")
सुकुटः। इतिः। इति मेदिनी॥ गुग्गुलुः। इति शब्दचन्द्रिका॥ (वेष्ट+ल्युट्। वलयनम्। यथा, रघुः। ४। ४८।
"भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम्॥")
वेष्टनकः, पुं, (वेष्टनेन कायतीति। कै+कः।) रतिबन्धविशेषः। यथा,—
"ऊर्द्धं पादमेकञ्च भुजाभ्यां वेष्टयेद्यदि।
कान्तकण्ठाश्रितां नारीं बन्धो वेष्टनकः स्मृतः॥"
इति रतिमञ्जरी॥
वेष्टनवेष्टकः, पुं, (वेष्टनेन वेष्टते इति। वेष्ट+ण्वुल्।) रतिबन्धविशेषः। यथा,—
"ऊर्द्धं पादद्वयं नार्य्या भुजाभ्यां वेष्टयेद्यदि।
कराभ्यां कण्ठमालिङ्ग्य बन्धो वेष्टनवेष्टकः॥"
इति रतिमञ्जरी॥
वेष्टवंशः, पुं, (वेष्टः वेष्टनकारी वंशः।) कण्टकिनः। इति शब्दचन्द्रिका॥ वेड়ুবাঁশ इति भाषा॥
वेष्टसारः, पुं, (वेष्टानां सारो यत्र।) ग्रीवेष्टः। इति राजनिर्घण्टः॥
वेष्टितं, क्ली, (वेष्ट+क्तः।) रुद्धम्। लासकः। करणान्तरम्। इति मेदिनी॥
वेष्टितः, त्रि, (वेष्ट+क्तः।) नदीप्राचीरादिना कृतवेष्टनः। वेड়া इति भाषा। तत्पर्य्यायः। वलयितम् २ संवीतम् ३ रुद्धम् ४ आवृतम् ५। इत्यमरः॥
वेष्यः, पुं, (वेवेष्टीति। विष व्याप्तौ+"यावेषिभ्यः घः।" उणा० ३। २३। इति घः।) पानीयम्। इत्युणादिकोषः॥
वेस, ऋ इतौ। इति कविकल्पद्रुमः॥ (भ्वा०-परः-सक०-सेट्।) ऋ, अविवेसत्। विवेसतुः। इतौ गत्याम्। इति दुर्गादासः॥

वेसनं, क्ली, (वेस + ल्युट्।) द्विदलचूर्णम्। यथा,—
"दालयच्चणकानान्तु निस्तुषा यत्नपेषिताः।
तच्चूर्णं वेसनं प्रोक्तं पाकशास्त्रविशारदैः।"
तट्टिकागुणाः।
"वटिका वेसनस्यापि कथितायां निमज्जति।
रुच्या विष्टम्भजननी बल्या पुष्टिकरी स्मृता।"
इति भावप्रकाशः॥

वेसरः, पुं, अश्वतरः। इति हेमचन्द्रः॥ (यथा, माघे। १२। १६।
"तूर्णं प्रयोक्ता क्षतनादमुच्चकैः
प्रणोदितं वेसरयुग्यमध्वनि॥")

वेसवारः, पुं, धन्याकसर्षपादिपिष्टः। वेसार इति वाटना इति च ख्यातः। तत्पर्य्यायः। उपस्करः २। इत्यमरः। वेसवारः ३। इति भरतः॥ वेशवारः ४। इति सुकुटः॥ (यथा, सुश्रुते। १। ४६।
"सुन्नादिवेसवाराणां पूर्णा विष्टम्भिनी मताः।
वेसवारैः सपिण्डितैः सम्पूर्णा गुरुदृंहणाः।")
अस्य गुणविशेषः। यथा,—
"निरस्थि पिण्डितं पिष्टं सिद्धं गुडघृतान्वितम्।
क्षीराभरिचसंयुक्तं वेसवार इति स्मृतम्।"
अस्य गुणाः।
"वेसवारो गुरुः स्निग्धो बलोपचयवर्द्धनः।"
इति राजवल्लभः॥
द्विद्व्यर्द्धकमरीचजीरकहरिद्राधन्याकाः क्रमेण द्विगुणपरिमाणैर्नवकचौलता। इति पाकराजेश्वरे पाकपरिभाषा॥

वेह, क्ष ड यत्ने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) क्ष, अविवेहत्। ड, वेहते। विवेहे। इति दुर्गादासः॥

वेहत्, क्ली, (विशेषेण हन्ति गर्भमिति। वि + हन + "संज्ञायां भृदृहत्।" उणा०२।८५। इति अतिप्रत्ययेन निपातनात् साधुः।) गर्भोपघातिनी गौः। इत्यमरः॥ अयमौ वृषोपगमनादिवशात् यस्या गर्भपातो भवति सा। विहन्ति गर्भं अत्यन्तं वेहत्। हन हौ गतौ वधे क्विप् निपातः। इति भरतः॥ (यथा, वाजसनेयसंहितायाम्। १८।२७।
"वशा च मे ऋषभश्च मे वेहच्च मेऽनड्वांश्च मे॥")

वेहारः, पुं, स्वनामख्यातदेशः। यथा,—
"वेहारे चैव श्रीहट्टे कोशले ग्रथकर्णिके।
अष्टादशभुजा कार्य्या माहेन्द्रे च हिमालये।"
इति मत्स्यसूक्ते ५०। पटलः॥

वेञ्, क्ष चाखे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) क्ष, अविवेञ्चत्। क्षदनुबन्धः वेदेषूच्चारणभेदार्थः। चाखः सम्यक्गमनं गतावित्येके। इति दुर्गादासः॥

वे, ओ ग्रोषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) वकारादिः। वायति। ओ, वानः। इति दुर्गादासः॥

वै, व्य, पादपूरणम्। यथा। तु हि च स्म ह वै पादपूरणे। इत्यमरः॥ (यथा, भागवते। ४। १। २८।
"सतृषस्कल्पस्य ते ब्रह्मन्! यद्वै ध्यायति ते वयम्॥")
सम्बोधनम्। अनुनयः। इति मेदिनी॥ (निश्चयः। यथा, मनुः। १। १००।
"सर्वं स्वं ब्राह्मणस्येदं यत्किञ्चित् जगतीगतम्।
श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति॥")

वैंग्रतिकः, त्रि, विंशत्या क्रीतः। विंशतिकग्रब्दादण्प्रत्ययेन निष्पन्नमिदम्। इति सिद्धान्तकौमुदी॥ (पा ५। २। २०॥)

वैकर्त्तं, क्ली, (विगर्हितः कर्त्तः विकर्त्त उरसत्त्व भवम्। विकर्त्त + अण्।) तिर्य्यग्वलोलम्बिमाल्यम्। इति हेमचन्द्रः॥

वैकक्षकं, क्ली, (वैकक्षमेव। स्वार्थे कन्।) उरसि तिर्य्यक् उपवीतवत् कक्षात् चिह्नमाल्यम्। इत्यमरः॥

वैकङ्कतः, पुं, (विकङ्कत एव। स्वार्थे अण्।) वृक्षविशेषः। वैंच इति भाषा। तत्पर्य्यायः। वृन्दिकरः २ सुवावृक्षः ३ ग्रन्थिलः ४ खादुकण्टकः ५ व्याघ्रपातः ६ कण्टिकारी ७ विकङ्कतः ८। इति ग्रब्दरत्नावली॥ (विकङ्कतस्यावयवो विकारो वा। "प्लक्षाग्रादिभ्यो वा।" ४। ३। १४१। इत्यण्। विकङ्कतनिर्म्मितसुवादौ, त्रि। यथा, ग्रतपथब्राह्मणे। ५। २। ३। १५।
"स पालाग्रे वा सुवे वैकङ्कते वा॥")

वैकर्तिकः, पुं, मणिकारः। इति हेमचन्द्रः॥

वैकर्त्तः, पुं, (विकर्त्तस्यापत्यमिति। विकर्त्त + "विकर्णशुङ्गच्छगलात् वत्सभरद्वाजाच्चिण्।" ४। १। ११७। इत्यण्।) वात्स्यमुनिः। इति सिद्धान्तकौमुदी॥ (जनपदविशेषः। यथा, ऋग्वेदे। ७। १८। ११।
"वैकर्त्तयोर्जनाजाना न्यस्तः।"
"वैकर्त्तयोर्जनपदयोर्विद्यमानान्।" इति तद्भाष्ये सायणः॥)

वैकल्पिकः, त्रि, विकल्पेन भवः। विकल्पग्रब्दात् ठिकप्रत्ययेन निष्पन्नमिदम्॥

वैकल्यं, क्ली, विकलस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम्॥ (यथा, कथासरित्सागरे। ७४। ३१०।
"मृगाङ्कदत्तसचिवं चक्षुर्वैकल्यमागतम्॥")

वैकुण्ठः, पुं, क्लीबः। (यथा, भागवते। २। १५। ४६।
"ते साधुकृतसर्व्वार्था ज्ञात्वात्यन्तिकमात्मनः।
मनसा धारयामासुर्वैकुण्ठचरणाम्बुजम्॥")
इन्द्रः। इति मेदिनी॥ सितार्जकः। इति राजनिर्घण्टः। अस्य व्युत्पत्तिर्यथा। "विकुण्ठाया अपत्यं वैकुण्ठः वाह्वादित्वात् ष्यञ्।
'चाक्षुषस्यान्तरे देवो वैकुण्ठः पुरुषोत्तमः।
विकुण्ठायामजो जज्ञे वैकुण्ठो देवतैः सह॥'
इति विष्णुपुराणम्।
किंवा कुण्ठत्वनया कुण्ठा माया। कुटि खोटनवैकल्यालस्ये सेमन्तात् सरोरिति यः। विविधा कुण्ठा माया विद्यतेऽस्य वैकुण्ठः विकारसंघैरित्यर्थेषः। विष्णुसहस्रनामटीकायां शङ्कराचार्य्यस्त्वाह विविधा कुण्ठा गतिः प्रतिबन्धिलक्षणा कर्त्तृ इति वैकुण्ठः। जगदारम्भे विग्रिहाणि भूतानि परमपुरं संक्षेषयन् तेषां गतिं प्रत्यवघातीति वा वैकुण्ठः।
'मायासंज्ञेयिता भूमिरङ्गियोन्मिश्र वायुना।
वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो मम॥'
इति ग्रान्तिपर्व्वणीति।"
इत्यमरटीकायां भरतः॥ * ॥ अपि च।
"कुण्ठं जडञ्च विश्वौघं विग्रिष्टञ्च करोति या।
विकुण्ठा प्रकृतिं वेदाश्चत्वारस्तद्वदन्ति ताम्॥
गुणात्ययेन भगवान् तस्यां जातः स्वलीलया।
परिपूर्णतमं तेन वैकुण्ठञ्च विदुर्बुधाः॥"*।
अस्य नाम्नो माहात्म्यम्। यथा,—
"राम नारायणानन्त मुकुन्द मधुसूदन।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन॥
इत्येतानि नामानि पठेद्वा पाठयेदपि।
जन्मकोटिसहस्राणां पातकादवमुच्यते॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः॥
"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः॥"
इति श्रीभागवते अजामिलोपाख्यानाध्यायः॥*
विष्णुधामविशेषः। तदर्थनं यथा,—
"उपरिष्टात्तितेरस्तौ कोटयः सत्यसंमितम्।
सत्याद्उपरि वैकुण्ठो योजनानां प्रमाणतः॥
भूर्लोकात् परिसंख्यातः कोटिरष्टाग्र प्रभो।
यत्रास्ते श्रीपतिः साक्षात् सर्व्वेषामभयप्रदः॥
वैकुण्ठाद्उत्तरे ग्रैवो लोकः षोड्ग्रकोटयः।
तिर्य्यगेव महाराज कैलासाख्यस्तु पर्व्वतः।
पार्व्वत्या सहितः ग्रम्भुर्यत्रास्ते खगणैर्वृतः॥"
इति पाद्मे स्वर्गखण्डे ६ अध्यायः॥ * ॥
अपि च।
"अन्तं ग्राश्वतं नित्यमनन्तं परमं पदम्।
हिरण्मयं मोक्षपदं ब्रह्मानन्दसुखाग्रयम्॥
एवमादिगुणोपेतं तद्विष्णोः परमं पदम्।
यद्गत्वा न निवर्त्तन्ते तद्धाम परमं हरेः॥
नहि वर्त्तयितुं ग्रक्यं कल्पकोटिग्तैरपि।
अपि द्रष्टुमग्रक्यं तद्ब्रह्मरुद्रादिदेवतैः॥
ज्ञानेन ग्राश्वमार्गेण ब्रह्मते योगिपुङ्गवैः।
तत् स्थानमुपभोक्तुमयत्नब्रह्मसेविनाम्॥
ग्रीग्राङ्घ्रिभक्तिसेवैकरसाभोगविवर्द्धिताः।
महात्मानो महाभागा भगवत्पदसेवकाः॥
तद्विष्णोः परमं धाम यान्ति ब्रह्मसुखप्रदम्।
नानाजनपदाकीर्णं वैकुण्ठं तद्धरेः पदम्॥
प्राकारैश्च विमानैश्च सौधै रत्नमयैर्युतम्।
तन्मध्ये नगरी दिव्या सायोध्येति प्रकीर्त्तिता॥
चतुर्द्वारसमायुक्ता हेमगोपुरसंयुता।
चक्रादिद्वारपालेषु कुसुदाद्यैः सुरक्षिता॥
चक्रप्रचक्रौ प्राग्द्वारे याम्ये भद्रसुभद्रकौ।

वाहरण्यां जयविजयौ सौम्ये धातृविधातरौ ॥
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ।
शङ्कुकर्णः सर्वनिद्रः सुमुखः सुप्रतिष्ठितः ॥
तस्मिन् वस्त्रविनिर्मुक्ताः प्राप्यन्ते सुमुखं परम् ।
यं प्राप्य न निवर्तन्ते तस्माच्चोच्च उदाहृतः ॥
मोक्षं परं पदं लिङ्गमन्तं विष्णुमन्दिरम् ।
अक्षरं परमं धाम वैकुण्ठं शाश्वतं परम् ॥
नित्यञ्च परमव्योम सर्व्वोत्तमं सनातनम् ।
पर्य्यायवाचकान्यस्य परं धाम्नोऽच्युतस्य हि ।"

इति पाद्मे उत्तरखण्डे २८ अध्यायः ॥*॥

अन्यच्च ।

"अन्तःपुरनिवासिन्यः सर्व्वलक्षणभूषिताः ।
ताभिः परिवृतो देवः सुशुभे परमः पुमान् ॥
एवं वैकुण्ठनाथोऽसौ नाथते परमे पदे ।
तद्गृहभेदाल्लोकांश्च वक्ष्यामि गिरिजे शुभे ॥
प्राच्यां वैकुण्ठलोकस्य वासुदेवस्य मन्दिरम् ।
आग्नेय्यां लक्ष्मीलोकस्तु याम्यां सङ्कर्षणालयः ॥
सारस्वतस्तु नैर्ऋत्यां प्राद्युम्नः पश्चिमे तथा ।
रतिलोकस्तु वायव्यासुदीच्यामनिरुद्धभूः ॥
ऐशान्यां शान्तिलोकः स्यात् प्रथमावरणं स्मृतम् । १ ।
कौमुदकीर्त्यादिलोका द्वितीयावरणं तथा ।२॥
मल्लकूर्म्मादिलोकास्तु तृतीयावरणं परम् । ३ ।
सत्ययुतानन्दुर्गाविष्वक्सेनगणानगाः ॥
शङ्खपद्मनिधीलोकाश्चतुर्थावरणं स्मृतम् । ४ ।
ऋग्यजुःसामाथर्व्वाणो लोकादिषु महत्सु च ।
सावित्र्या विहगेशस्य धर्म्मस्य च सुखस्य च ।
पञ्चमावरणं प्रोक्तमेतत्सर्व्वाद्भुतम् । ५ ॥
शङ्खचक्रगदापद्मखड्गशार्ङ्गहलं तथा ।
मौषलञ्च तथा लोकाः सर्व्वशस्त्रास्त्रसंयुताः ॥
षष्ठमावरणं प्रोक्तं शस्त्रास्त्रमयमव्ययम् । ६ ।
ऐन्द्रपाशक्रियाश्चैव नैर्ऋतं वरुणं तथा ।
वायव्यं सौम्यमैशानं तन्नमं मुनिभिः स्मृतम् ।
साध्या मरुद्गणाश्चैव ये चान्ये च दिवौकसः ।
नित्याः सर्व्वे परे धाम्नि विश्वेदेवास्तथैव च ।
ते वै प्राकृतनाकेऽस्मिन् नित्यास्त्रिदिवेश्वराः ॥
तेनाहं वच्मि माये न सन्निन्द्य इति वै स्मृतिः ।
एवं परं पदेनित्यैर्नित्यैर्भोगपरायणैः ॥
दिव्याभिर्महिषीभिश्च राजते विष्णुरीश्वरि ।
न तद्भासयते सूर्य्यो न शशाङ्को न पावकः ॥
यद्गत्वा न निवर्त्तन्ते योगिनः संशितव्रताः ।
दृश्यैकमन्त्रनिष्ठा ये ते वै यान्ति तदव्ययम् ॥
न वेदयज्ञाध्ययनैर्न वेदैर्न व्रतैः शुभैः ।
न तपोभिर्निराहारैर्न च साधनकर्म्मभिः ॥
एकेन हृदयमन्त्रेण तथा भक्त्या त्वनन्यया ।
तद्गन्तुं शाश्वतं दिव्यं प्रपद्ये वै सनातनम् ॥"

इति पाद्मोत्तरखण्डे ३० अध्यायः ॥

(तच्चस्थदेवगणे, पुं भूम्नि । यथा, भागवते । ८ । ५ । ४ ।

"पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः ।
तयोः स्वकलया जज्ञे वैकुण्ठो भगवान् स्वयम् ॥")

वैक्लवं, क्ली, (विक्लवमेव । "सान्नाय्यान्नुञ्चेति ।" ५ । ४ । ३६ । इत्यस्य वार्त्तिकोक्त्या अण् । विकारः । यथा, रामायणे । ६ । ४८ । ३२ ।

"प्रायेण गतसत्त्वानां पुरुषाणां गतायुषाम् ।
दृश्यमानेषु वक्त्रेषु परं भवति वैक्लवम् ॥"

दुर्निमित्तम् । यथा, रघुः । ११ । ६२ ।

"तत्प्रतीपपवनादिवैक्लवं
प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित् ॥"

तथाच महाभारते । ३ । १३७ । ३ ।

"वैक्लवं त्वमिहोत्रे स लक्षयित्वा महातपाः ।
तमब्रवं शूद्रमासीनं गृहपालमथान्नवीत् ॥")

वीभत्सरसः । तदालम्बने मांसशोणितादौ, त्रि । इत्यमरटीकायां भरतः ॥ तथाच ।

"विक्लवं वैक्लवञ्च स्यात्तच्च वैक्लव्यसूचये ॥"

इति भरतहृदयकोषः ॥

(विकारजाते । यथा, भागवते । २ । १० । ४५ ।

"अयञ्तु ब्रह्मणः कल्पः सविकल्प उदाहृतः ।
विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥")

वैक्लव्यं, क्ली, (विक्लवमेव । स्वार्थे ष्यञ् ।) वीभत्सरसः । तदालम्बने, त्रि । यथा,—

"त्रिषु वीभत्सविक्लवं वैक्लव्यं विततन्तथा ॥"

इति शब्दरत्नावली ॥

वैक्रान्तं, क्ली, (विक्रान्त्या दीव्यति । विक्रान्ति+अण् ।) मणिविशेषः । तत्पर्य्यायगुणौ ।

"वैक्रान्तश्चैव विक्रान्तं नीचवर्णं कुवर्णकम् ।
गोनासः क्षुद्रकुलिप्रं जीर्णवर्णश्च गोनसः ॥
वज्राभावे च वैक्रान्तं रसवीर्य्यादिके समम् ।
क्षयकुष्ठविषघ्नञ्च पुष्टिदं सुरसायनम् ॥
वैक्रान्तं वज्रसाहस्रं वज्रवद्रसवीर्य्यकम् ।
तथाप्यभावे वज्रस्य ग्राह्यं वैक्रान्तमुत्तमम् ॥
वज्राकारतयैव प्रसह्य हरणाय सर्व्वरोगाणाम् ।
यद्विक्रान्तिं धत्ते तद्वैक्रान्तं बुधैरिदं कथितम् ॥"

इति राजनिर्घण्टः ॥

वैखरी, स्त्री, वृहत्प्रयितकण्ठगतनादरूपवर्णः । यथा,—

"मूलाधारात् प्रथमसुदितो यस्तु तारः पराख्यः
पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः ।
वक्त्रे वैखर्य्यथ गुरुदितोरस्थ जन्तोः सुषुम्ना-
वह्नस्साङ्गवति पवनप्रेरितो वर्णसंघः ॥"

इत्यलङ्कारकौस्तुभः ॥

अस्यार्थः । यस्तु तारो नादः वर्णरूपः स नाभिरूपमूलाधारात् प्रथमसुदयप्राप्नुयात् पर इति आख्या संज्ञा यस्य तथाभूतो भवति । अथानन्तरं स एव हृदयं चित्तं गतश्चेत् रोदनसमये नासिकाद्वारा यथाकथञ्चित् भवति । गुरुदितोर्जन्तोर्नासामध्यस्थितसुषुम्नानाम्ना वहः । तथा च नासाद्वारैव यथाकथञ्चित् नादरूपः प्रत्यक्षमभवतीत्यर्थः । तस्मात् वैखरीदशापन्नात् नादात् पवनप्रेरितो वर्णसमूहो बहिः सर्व्वेषां प्रत्यक्षविषयो भवतीत्यर्थः । परा पश्यन्ती दशापन्नस्य तु योगिनामेव प्रत्यक्षे न तु सर्व्वेषामित्यपि बोध्यम् । इति तट्टीका ॥

वैखानसः, पुं, (विखनसं ब्रह्माणं वेत्ति तपसा । विखनस्+अण् ।) वानप्रस्थः । यथा । वानप्रस्थो वैखानसोऽग्रहः । इति चिकाण्डशेषः ॥ (यथा, देवीभागवते । १ । १६ । १७ ।

"वैखानसा ये मुनयो मिताहारा जितव्रताः ।
तेऽपि मुह्यन्ति संसारे जानन्तोऽपि ह्यसत्त्वताम् ॥"

वैखानसस्येदमित्यर्थेऽपि . वैखानसमन्त्रिणि, त्रि । यथा, श्राद्धकल्पे । १ ।

"वैखानसं किमनया व्रतमाप्रदानात्
व्यापाररोधि मदनस्य निषेवितव्यम् ॥")

वैगुण्यं, क्ली, (विगुणस्य भावः । विगुण+ष्यञ् ।) विगुणत्वम् । विगुणस्य भावः । यथा,—

"यात्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य च ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विगुतं दमः ॥"

मनुः ।

वैचक्षण्यं, क्ली, विचक्षणत्वम् । विचक्षणस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् । (यथा, साहित्यदर्पणे । १ ।

"धर्म्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ॥")

वैचित्र्यं, क्ली, विचित्रता । विचित्रस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् । (यथा, राजेन्द्रकर्णपूरे । २८ ।

"वैचित्र्यं वितनोति वाचकविधौ वाचस्पते-
रन्तिके
देव त्वद्गुणवर्णनाय कुरुते किं किं न वाग्-
देवता ॥")

वैजनः, पुं, (विजायतेऽस्मिन्निति । जन्+आधारे घञ् । ततः स्वार्थे अण् ।) प्रसवमासः । तत्पर्य्यायः । सूतिमासः २ । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । १ । ७४ ।

"अथ वैजनने मासि सा देवी दिव्यलक्षणम् ।
निर्दग्धस्यान्वयतरोरङ्कुरं सुषुवे सुतम् ॥")

वैजयन्तः, पुं, (वैजयन्ती अस्त्यत्रेति । अर्शआद्यच् ।) इन्द्रप्रासादः । इत्यमरः ॥ इन्द्रध्वजः । इति मेदिनी । (यथा, महाभारते । २ । २२ । १६ ।

"एष ह्येन्द्रो वैजयन्तो गुणैर्नित्यं समाहितः ।
येनासुरान् पराजित्य जगत्पतिरगच्छतु ॥")

गृहः । इति हेमचन्द्रः ।

वैजयन्तिकः, त्रि, (वैजयन्त्यस्येति । प्रज्ञादिभ्यश्चेति ठञ् । यद्वा, वैजयन्त्या चरतीति । चरतीति ठक् ।) पताकाधारी । इत्यमरः ॥

वैजयन्तिका, स्त्री, (वैजयन्ती+स्वार्थे कन् ।) जयन्तीवृक्षः । पताका । इत्यमरः ॥ (यथा,

"निर्धनं निधनमेतयोर्द्वयो-
स्तारतम्यविधिसुग्रथेतसा ।
बोधनाय विधिना विनिर्म्मिता
रेफ एव जयवैजयन्तिका ॥"

इद्रुद्भटः ॥)

अग्निमन्थः । इति राजनिर्घण्टः ॥

वैजयन्ती, स्त्री, पताका । इत्यमरः ॥ (यथा, रघुः । ६ । ८ ।

"सञ्चारिते चागुरसारयोनौ
धूपे ससृक्वपैति वैजयन्तीः ।")
जयन्तीवृक्षः । इति मेदिनी । अग्निमन्थवृक्षः । इति हेमचन्द्रः । पञ्चवर्णमयी जानुपर्य्यन्तलम्बिता माला । यथा,—
"उद्गीयमान उद्गायन् वनिताशतयूथपः ।
मालां बिभ्रद्वैजयन्तीं व्यचरन् मण्डयन् वनम् ।"
इति श्रीभागवते १० स्कन्धे ३९ अध्यायः ।
वैजयिः, पुं, मघवा । स तु जिनचक्रवर्त्तिविशेषः । इति हेमचन्द्रः ।
वैजयिकं, त्रि, (विजयस्य निमित्तं विजयेन संयोग इति वा । विजय + "तस्य निमित्तमिति ।" ५ । १ । ३८ । इति ठञ् ।) विजयसम्बन्धि । इति सिद्धान्तकौमुदी । (यथा, हरिवंशे । २४२ । ३१ ।
"रणे प्रवेशसदृशं कर्म्म वैजयिकं कृतम् ।")
वै(बे)जिकं, क्ली, (वीजादुत्पन्नम् । वीज + ठक् ।) शिश्नुनेलम् । हेतुः । इति मेदिनी । आत्मा । इति शब्दमाला ।
वै(बे)जिकः, पुं, सद्योऽङ्कुरः । इति मेदिनी । बीज, सम्बन्धिनि, त्रि । (वैर्य्यसम्बन्धिनि च त्रि । यथा, मनौ । २ । २७ ।
"गार्भैर्होमैर्जातकर्म्मचौडमौञ्जीनिबन्धनैः ।
वैजिकं गार्भिकञ्चैनो द्विजानामपमृज्यते ।")
वैज्ञानिकः, त्रि, (विज्ञाने युक्तः । विज्ञान + "तत्र नियुक्तः ।" ४ । ४ । ६९ । इति ठक् ।) निपुणः । इत्यमरः ।
वै(बे)ड़ालव्रतं, क्ली, (वैड़ालं विड़ालसम्बन्धि व्रतम् ।) दुराचारविशेषः । यथा,—
"यस्य धर्म्मध्वजो नित्यं प्रकाशञ्च दवोच्छ्रितः ।
प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम् ।"
इति दानसागरे यमवचनम् ।
वै(बे)ड़ालव्रतिः, पुं, अङ्गनाद्यभावात् छतव्रह्मचर्य्यः । इति जटाधरः ।
वै(बे)ड़ालव्रतिकः, पुं, (विड़ालव्रतेन चरतीति । विड़ालव्रत + ठक् ।) छद्मतपस्वी । तत्पर्य्यायः । छद्मतापसः २ सर्व्वाभिसन्धी ३ । इति त्रिकाण्डशेषः । तस्यासंभाव्यत्वं यथा,—
"पावण्डिनो विकर्म्मस्थान् वैड़ालव्रतिकान् शठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ।"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ।
"यस्य धर्म्मध्वजो नित्यं सुरुचश्च दवोच्छ्रितः ।
प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम् ।"
तद्वान् वैड़ालव्रतिकः । इति तट्टीका ।
वै(बे)ड़ालव्रती, [न्] पुं, (वैड़ालव्रतमस्त्यस्येति । इनिः ।) भण्डतापसः । विड़ालतपस्वी । इति भाषा । यथा, कौर्म्मे उपविभागे ५ अध्याये ।
"छद्मना चरितं तच्च व्रतं रक्षसि गच्छति ।
अलिङ्गी लिङ्गवेषेण यो लिङ्गमुपजीवति ।
स लिङ्गिनां हरेद्देनस्तिर्य्यग्योनौ च जायते ।
वैड़ालव्रतिनः पापाः सर्व्वधर्म्मविनाशकाः ।
सद्यः पतन्ति पापेषु कर्म्मणस्तस्य तत्फलम् ।
पावण्डिनो विकर्म्मस्थान् वामाचारांस्तथैव च ।
पञ्चरात्रान् पाशुपतान् वाङ्मात्रेणापि नार्चयेत् ।"
वैणवः, पुं, वेणुजीवी । वेणुशब्दादण्प्रत्ययेन उकारस्य लोपेन च निष्पन्नमिदम् । इति सिद्धान्तकौमुदी । (यथा, याज्ञवल्क्ये । १ । १६१ ।
"वैणाभिग्रसवार्द्धुषिगणिका गणदीक्षिताः ।")
वैणवं, क्ली, (वेणोरिदम् । वेणु + अण्) वेणुफलम् । इत्यमरः । वेणुसम्बन्धिनि, त्रि । (यथा, भागवते । ११ । ३० । २४ ।
"ब्रह्मण्यो पशान्तानां त्यक्तमायाहृतात्मनाम् ।
स्वर्गाक्रोधः त्रयं नित्यं वैणवोऽग्निर्यथा वनम् ।")
वैणवः, पुं, (वेणोरवयवो विकारो वा । वेणु + "विल्वादिभ्योऽण् ।" ४ । ३ । १३६ । इत्यण् ।) उपनयने वेणुदण्डः । तत्पर्य्यायः । राम्भः २ । इत्यमरः । (वेणुः । यथा, महाभारते । ५ । ६० । १६ ।
"भेरीमृदङ्गनिनदैः शङ्खवेणुनिस्वनैः ।")
वैणविकः, त्रि, (वैणवो वेणुस्तद्वादनं शिल्पमस्य । वैणव + "शिल्पम् ।" ४ । ४ । ५५ । इति ठक् ।) वेणुवादकः । तत्पर्य्यायः । वेणुघ्मा २ । इत्यमरः । वेणुकः ३ । इति शब्दरत्नावली ।
वैणवी, स्त्री, (वेणोर्विकृतिः । वेणु + "विल्वादिभ्योऽण् ।" ४ । ३ । १३६ । इत्यण् । ततो ङीष् ।) वंशलोचना । इति राजनिर्घण्टः । (वेणुसम्बन्धिनी । यथा, मनुः । ४ । ३६ ।
वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम् ।")
वैणिकः, त्रि, (वैणवादनं शिल्पमस्य । वैणा + "शिल्पम् ।" ४ । ४ । ५५ । इति ठक् ।) वीणावादकः । इत्यमरः । (यथा, कथासरित्सागरे । ६३ । १६२ ।
"तच्छ्रुत्वा विहताशोऽपि हसित्वा वैणिको ययौ ।")
वैणुकं, क्ली, गजस्य तोदनदण्डम् । तत्तु हस्तिचालनार्थं लौहसुखदण्डम् । तत्पर्य्यायः । तोत्रम् २ । इत्यमरः । वैणुकम् ३ । इति भरतः ।
वैणुकः, पुं, (वेणुना कार्य्यति शब्द्यते इति । कै + कः । ततः स्वार्थे अण् ।) वेणुवादकः । इति शब्दरत्नावली ।
वैणुकीयः, त्रि, (वेणुकस्यायमिति । "वेणुकादिभ्यश्छण् ।" ४ । २ । १३८ । इत्यस्य वार्त्तिकोक्त्या छण् ।) वेणुसम्बन्धीयः । इति सिद्धान्तकौमुदी ।
वैण्यः, पुं, (वेणोरपत्यमिति । वेणु + यञ् ।) पृथुः । स तु सूर्य्यवंशीयपञ्चमराजः । यथा,—
"आदिराजः पृथुर्वैण्यो मान्धाता यौवनाश्वकः ।"
इति जटाधरः ।
वैतंसिकः, त्रि, (वैतंसो न्यग्रोधादिवन्यग्रोधोपायस्तेन चरतीति । वितंस + "चरति ।" ४ । ४ । ८ । इति ठक् ।) मांसविक्रेता । तत्पर्य्यायः । कौटिकः २ मांसिकः ३ । इत्यमरः । कौटिकः ४ । इति शब्दरत्नावली । न्यग्रोधादिवन्यग्रोधोपायो वैतंसः तेन चरतीति वैतंसिकः । इति भरतः । (यथा, महाभारते । ३ । २२ । २२ ।
'इमान् शकुनकान् राजन् हन्ति वैतंसिको यथा ।
एतद्रूपमधर्म्मस्य भूतेषु हि विहिंसता ।")
वैतनिकः, त्रि, (वेतनेन जीवतीति । वेतन + "वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठक् ।) वेतनभुग्भृत्यः । तत्पर्य्यायः भृतकः २ भृतिभुक् ३ कर्म्मकरः ४ । इत्यमरः । (यथा, उपदेशशतके । २० ।
"वीरो वैतनिकः सन्निराटनगरीक्षितः कुमारीणाम् ।
नर्त्तयिताञ्जुनं आसीत् भक्तेदवस्त्रोचितां वृत्तिम् ।")
वैतरणिः,) स्त्री, नरकसिन्धुः । इत्यमरः । "वैत-
वैतरणी,) रणेन दानेन तीर्य्यते वैतरणी । ङ्याः विल्वादीत्व ङ्यौ वैतरणिश्च । अटविपटिचाटीवैतरण्यर्षिगुप्तौरिति दुर्गान्तु रुद्रः । ततोऽपि पाच्छोवादीति वा ईत्वं । विरुद्धं तरणं वितरणं तदस्यामस्तीति वैतरणीत्यन्ये । वितरणौ विलूर्ये पाताले भवा वैतरणीत्यन्ये । वितरणिर्विनौका तरण्यभूत्येर्थः स्वार्थे णो वैतरणीत्येके । विश्वकोषः ।
'नारका जन्तवः प्रेता नदी वैतरणी स्मृता ।'
इति चिकाण्डम् ।"
इति भरतः । * । सा नदी दुर्गन्धा तप्तजला महावेगा अस्थिकेशरक्तपरिपूर्णा यमद्वारे वर्त्तते । यथा,—
"नदी वैतरणी नाम दुर्गन्धा रुधिरावहा ।
उष्णतोया महावेगा अस्थिकेशरतरङ्गिणी ।"
इति प्रायश्चित्तविवेकधृतयमदम्भिवचनम् ।*।
अस्या उत्पत्तिर्यथा,—
मार्कण्डेय उवाच ।
"ततो ब्रह्मादयो देवाः सर्व्वे ते शङ्करान्तिकम् ।
गत्वा हरं संस्तुवुः सांख्यो योगमायया ।
शूनेश्वरोऽपि भूतशमासाद्यान्तर्हितस्तदा ।
वाप्यवृष्टिं दुरापर्षामवनग्याह मायया ।
यदा स नाशकद्वाप्यान् सन्धारयितुमर्णवः ।
तदा महागिरौ चिप्रा वाप्यस्ते जलधारके ।
लोकालोकस्य निकटे जलधाराह्वयो गिरिः ।
पुष्करद्वीपपृष्ठस्थलोयसागरपश्चिमे ।
स तु सर्व्वप्रमाणेन मेरुपर्व्वतसन्निभः ।
तस्मिन् विन्यस्तवान् वाप्यान् न धर्त्तुं क्षम ईश्वितुः ।
विदीर्य्यन्तेषु वाप्यीघेर्भग्नमध्योऽभवद्दृतम् ।
ते वाप्याः पर्व्वतं भित्त्वा विविशुस्तोयसागरम् ।
सागरोऽपि यद्दोतुं तान् प्रयाक खरानति ।
ततस्तु सागरं मध्ये भित्त्वा वाप्याः समागताः ।
तोयधेः प्राग्भवां वेलां स्वयंमाचाद्दिभेद ताम् ।
विभिद्य वेलां ते वाप्याः पुष्करद्वीपमध्यगाः ।
नदी वैतरणी भूत्वा पूर्व्वसागरगाभवन् ।
जलधारस्य वेगेन संसर्गात् सागरस्य च ।
अवाप्य सौम्यतां किञ्चिदाप्यार्क्षे नाभिदन् स्थितिम् ।
तद्वाप्यवाकुला पृथ्वी विदीर्णा स्वान वेच्छतिः ।

अवतस्याद्रे ते वाक्षं सोऽपि क्षणोऽभवद्वृहात्।
शनैश्चरेण ते वोढ्मसमर्थेन लोतके:॥
ग्रिम्नेर्विदारितः सोऽसौ जलधारो महागिरिः।
विभिद्य पर्वतं शृङ्गोर्व्वाशास्ते सागरं ययुः॥
वैवस्वतपुरद्वारे योजनद्वयविस्तृता।
अद्यापि तिष्ठत्यपगा हरजोलकसम्भवा॥
भित्त्वा वेलां ततः पृथ्वीं विभिद्याशु तरङ्गिणीम्।
चक्रुर्वैतरणीनाम्ना पूर्व्वसागरगामिनीम्॥
नानायानविमानेन न द्रौण्या स्यन्दनेन च।
तर्त्तुं शक्या सा तु नदी तप्ततोया विभीषणा॥
दुःखेन तां तु पृथिवी बिभर्त्ति महताधुना।
सदा घोरैर्गतैर्वाय्वैर्विक्षिपन्ति नभश्चराः॥
तस्या उपरि गो यान्ति देवा अपि भयाकुलाः।
यमद्वारं समाश्रित्य योजनद्वयविस्तृता।
विश्वं वहति संपूर्णा भीषयन्ती जगत्त्रयम्॥"

इति कालिकापुराणे १८ अध्यायः॥ *॥

आसन्नप्रसवायां वैतरणीगवीदानं यथा,—

"आसन्नप्रसवा देया गौः सवत्सा च पूर्ब्बवत्।
तदभावे च गौरेका नरकोद्धारणाय वै॥
तदा यदि न शक्नोति दातुं वैतरणीञ्च गाम्।
शक्तोऽन्योऽपक् तदा दत्त्वा श्रेयो दद्यान्नृपस्य च॥"

पूर्ब्बवद्देवलादिना। अत्र नृपस्य चेति अवज्ञादेवादग्राहेऽपि वैतरणीदानाचारः। इति शुद्धितत्त्वम्॥ *॥ वैतरणीगोदानानन्तरं प्रार्थनामन्त्रो यथा,—

"यमद्वारे महाघोरे तप्ता वैतरणी नदी।
ताञ्च तर्त्तुं ददाम्येनां शान्तां वैतरणीञ्च गाम्॥"

इति तत्प्रयोगः। अन्यत् सुगमत्वान्नोक्तम्॥

पिण्डकन्या। यथा,—

"अयज्वानश्च यज्वानः पितरो ब्रह्मजः स्मृताः।
अग्निष्वात्ता बर्हिषदो दिक्षा तेषां भवक्षितिः।
तेभ्यः स्वधा सुतां कन्ये मेनां वैतरणीं तथा॥"

इति कौर्म्मे १२ अध्यायः॥ *॥

(कलिङ्गदेशस्थ-नदीविशेषः। यथा, महाभारते। ३। ११४। ४।

"एते कलिङ्गाः कौन्तेय! यत्र वैतरणी नदी।
यज्ञायजत धर्म्मोऽपि देवाञ्छरणमेत्य वै॥")

वैतसः, पुं, (वेतस एव। स्वार्थे अण्।) अम्लवेतसः। इति शब्दरत्नावली॥ (पुंस्त्वजननम्। स्निग्धत्वम्। इति निघण्टुः। १। २६। यथा, ऋग्वेदे। १०। ६५। ४।

"दिवा नक्तं श्रथिता वैतसेन।"

"वैतसेन श्रेणो वैतस इति पुंस्त्वजननस्नेहेति निरुक्तम्। ३। २१। पुंस्त्वजननेन श्रथिता ताडिता भवति।" इति तद्भाष्ये सायणः॥ *॥ वेतसस्यायमिति। तस्येदमिति अण्। वेतससम्बन्धिनि, त्रि। यथा, रघुः। ४। ३५।

"आत्मा संरक्षितः सुस्थैर्दृत्तिमाश्रित्य वैतसीम्॥")

वैतानिकः, पुं, (वितानि भवः। वितान+ठक्।) श्रौतहोमः। यथा,—

"मरणादेव कर्त्तव्यं संयोगो यस्य नाग्निना।
दाहादूर्द्धमशौचं स्यादस्य वैतानिको विधिः॥"

इति शुद्धितत्त्वम्॥

वितानसम्बन्धीये, त्रि। वितानशब्दात् ष्ठिकप्रत्ययेन निष्पन्नमेतत्। (यज्ञादिकार्य्यकारी। यथा च भागवते। १०। ४०। ५।

"अथा च विद्यया केचित् त्वां वै वैतानिका द्विजाः।
यजन्ते वितताँयज्ञैर्नानारूपामराख्यया॥")

वैतालिकः, पुं, (विविधेन तालेन चरतीति। वेताल+ठक्।) बोधकरः। इत्यमरः॥ ते निशान्ते बोधकारके। विविधो मङ्गलगीतिवाद्यादिस्तालशब्दः तेन व्यवहरन्ति वैतालिकाः। ढ्ये कादिति ष्ठिकः। निशान्तं निर्वेदयन्तो ये शृणं बोधयन्ति आगरयन्ति ते बोधकराः शुद्धुर इति टः। इति भरतः॥ (यथा, शिशुपालवधे। ५। ६७।

"वैतालिकाः स्फुटपदप्रकटार्थसूक्ते-
र्भोगावलीः कलगिरोऽवसरेषु पेठुः॥")

खेड्डिताशब्दः। यथा,—

"वैतालिकः प्रमाद् खेड्डिताख्ये बोधकरे त्रिषु॥"

इति मेदिनी॥

हेमचन्द्रे तु पाठान्तरं यथा,—

"वैतालिकः खड्डताख्ये मङ्गलपाठकेऽपि च॥"

वेतालसम्बन्धिनि, त्रि।

वैत्रकः, त्रि, वेत्रसम्बन्धी। वेत्रशब्दात् कण्प्रत्ययेन निष्पन्नमिदम्।

वैत्रकेयः, त्रि, वेत्रसम्बन्धीयः। वेत्रशब्दात् ढ्यप्रत्ययेन निष्पन्नमेतत्।

वैदः, त्रि, पण्डितसम्बन्धी। विद्वच्छब्दात् ष्यञ्प्रत्ययेन निष्पन्नमेतत्।

वैदग्धं, क्ली, (विदग्धस्य भावः। अण्।) विदग्धत्वम्। यथा। वैदग्धमपि वैदग्धी। इति भरतद्विरूपकोषः॥ (यथा, साहित्यदर्पणे। १।

"वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्॥")

वैदग्धी, स्त्री. (विदग्धस्येयमिति। विदग्ध+अण्। स्त्रियां ङीप्।) भङ्गिः। यथा,—

"कृतं मिषच्च वैदग्धी भङ्गिश्चेभनिभीलिका॥"

इति त्रिकाण्डशेषः॥

(यथा, कथासरित्सागरे। २०। १०६।

"वाग्वा वैरूप्यनिर्म्माणवैदग्धीं दृष्टिंतामिव॥")

वैदग्ध्यं, क्ली, (विदग्ध+ष्यञ्।) विदग्धस्य भावः। विदग्धशब्दात् ष्यञ्प्रत्ययेन निष्पन्नमेतत्। (यथा, कथासरित्सागरे। १। १२।

"वैदग्ध्यख्यातिलोभाय मम नैवायसुद्यमः॥")

वैदर्भ, क्ली, वाक्यवक्त्रम्। इति मेदिनी। विदर्भसम्बन्धिनि, त्रि।

वैदर्भः, पुं, (विदर्भो निवासोऽस्येति। विदर्भ+अण्।) विदर्भदेशीयराजः। (यथा, रघुः। ५। ६२।

"मेने यथा तत्र जनः समेतो
वैदर्भमागन्तुमनं गृहेभ्यः॥")

एमयन्तीपिता भीमसेनः। रुक्मिणीपिता भीष्मकश्च। वाक्यवक्रिमा। इति धरणिः॥

वैदर्भी, स्त्री, वाक्यरीतिभेदः। इति मेदिनी। यथा, रीतिमाह।

"पदसंघटना रीतिरङ्गसंस्था विशेषवत्।
उपकर्त्री रसादीनां————।"

रसादीनामर्थात् शब्दार्थशरीरस्य काव्यस्यात्मभूतानाम्।

"————सा पुनः स्याच्चतुर्व्विधा।
वैदर्भी चाथ गौड़ी च पाञ्चाली लाटिका तथा॥"

सा रीतिः। तत्र।

"माधुर्य्यव्यञ्जकैर्व्वर्णै रचना ललितात्मिका।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते॥"

यथा। अनङ्गमङ्गलमुख इत्यादि। रुद्रटस्त्वाह।

"असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी।
वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया॥

अत्र दशगुणास्तत्सम्मतोक्ताः श्लेषादयः।

"ओजःप्रकाशकैर्व्वर्णैर्बन्ध आडम्बरः पुनः।
समासबहुला गौड़ी————॥"

यथा। चपलनेत्रेत्यादि। पुरुषोत्तमस्त्वाह।

बहुतरसमासयुक्ता सुभगा प्राञ्चाक्षरा च गौड़ीया।
रीतिरतुप्रासमहिमपरतन्त्रा क्षोभवक्त्रा च॥"

"————वर्णैः श्लेषैः पुनर्दयोः।
समस्तपञ्चषपदो बन्धः पाञ्चालिका मता॥"

द्वयोर्वैदर्भीगौड्योः। यथा,—

"मधुरया मधुबोधितमाधवी-
मधुषडङ्घ्रिसमेधितमेधया।
मधुकराङ्गनया सुकुरुन्मद-
ध्वनिभृता निभृताक्षरसुभगे॥" *॥

भोजस्त्वाह।

"समस्तपञ्चषपदामोजःकान्तिसमन्विताम्।
मधुरां सुकुमाराक्षां पाञ्चालीं कवयो विदुः॥"
"लाटी तु रीतिर्व्वैदर्भी पाञ्चाल्योरन्तरा स्थिता॥"

यथा,—

"अयमुदयति मुग्धभृङ्गः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम्।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोडताम्रस्तमांसि॥"

कश्चिदाह।

"ऋदुपदसमासमुभगा युक्तैर्व्वर्णैर्न चातिभूयिष्ठा।
उचितविशेषपूरितवस्तुन्यासा भवेल्लाटी॥"

अन्ये त्वाहुः।

"गौड़ी डम्बरबन्धा स्यात् वैदर्भी ललिता क्रमात्।
पाञ्चाली मिश्रभावेन लाटी तु ऋदुभिः पदैः॥"

क्वचित्तु वक्त्रौचित्यादन्यथा वचनादयः। वक्त्रादौत्यादिशब्दाद्यप्रबन्धौ वचनादौत्यादिशब्दादृत्तिवर्त्तौ। तत्र वक्त्रौचित्यादयथा। मन्त्यायस्तार्थबन्ध इत्यादि। अत्र वाक्यस्य

क्रोधाशयवल्लकत्वेऽपि भीमसेनवत्कृत्वेनोद्धता वचनादयः। वाच्यौचित्यादृयोदाहृते। मूर्द्धाधूयमानेत्यादौ। ● । प्रबन्धौचित्यादृयथा। नाटकादौ रौद्रेऽप्यभिनयप्रतिकूलत्वेन न दीर्घसमासादयः। एवमाख्यायिकायां शृङ्गारेऽपि न महागद्यादयः। कथायां रौद्रेऽपि नात्यन्तसुहृदः। एवमन्यदपि ज्ञेयम्। इति साहित्यदर्पणे रीतिविवेको नाम ९ परिच्छेदः। ● । अगस्त्यपत्नी। इति शब्दरत्नावली। दमयन्ती। यथा,—

"वैदर्भी विपुलानुरागकलना सौभाग्यमत्राखिल-
लोकोत्तरकृतकृती निजगदे तद्वृत्तवृत्तक्रमैः।
किंचासाकनरेन्द्रभूसुभगता संभूतये लक्ष्मकं
देवेन्द्रावरजप्रसादितशचीविश्राणिताशीर्वचः॥
इति उत्तरनैषधे १५ सर्गः॥

रुक्मिणी। यथा,—

"वैदर्भ्याः स तु सन्देशं निशम्य यदुनन्दनः।
प्रयत्नं पाणिना प्राप्तं प्रहसन् इदमब्रवीत्।"
इति श्रीभागवते १० स्कन्धे ५३ अध्यायः॥

वैदलं, क्ली, भिक्षुकस्य त्वक्सदृशादिपात्रम्। यथा,

"पात्रन्तु दारवालाबुत्वक्सदृशान्यपि वैदलम्।"
इति जटाधरः॥

वैदलः, पुं, (विदलो दालिस्तस्मात् जातः। विदल + अण्।) पिष्टकः। यथा,—

"पूपोऽपूपः पिष्टकः स्यादैदलो विदलोऽपि च।"
इति शब्दचन्द्रिका॥

विदलो दालिस्तन्निर्मितपिष्टको वैदलः। तद्गुणाः।

"वैदला गुरवो भक्षा विष्टम्भिन्यश्च मारुताः॥"
इति राजवल्लभः॥

वैदिकः, पुं, (वेदं जानातीति। वेद + ठक्।) वेदज्ञब्राह्मणः। वेदोक्ते, त्रि। यथा, तन्त्रसारे।

"वैदिकी तान्त्रिकी सन्ध्या यथाक्रममयोगतः॥"

वैदिशं, त्रि, विदिशाया अदूरभवं नगरम्। इति सिद्धान्तकौमुदी॥

वैदुष्यं, क्ली, (विदुषः कर्म्म भावो वा। विद्वस् + ष्यञ्।) विदुषो भावः। विद्वसुग्रन्थात् स्वार्थप्रत्ययेन निष्पन्नमिदम्॥ (यथा, राजतरङ्गिण्याम्। १। १२।

"पाटवं दुरवैदुष्यतीव्रा सुव्रतभारती॥")

वैदूर्य्यं, क्ली, (विदूरात् प्रभवतीति। विदूर + "विदूरात् ञ्यः।" ४। ३। ८४। इति ञ्यः।) मणिविशेषः। स तु ज्ञेयपीतवर्णः। लहसुनीया इति हिन्दी भाषा। अस्य देवता केतुः। तत्पर्य्यायः। बालवायनम् २। इति हेमचन्द्रः॥ केतुरत्नम् ३ केतवम् ४ प्राढ्यम् ५ अभ्रोदम् ६ खराब्दाङ्कुरकम् ७ विदूररत्नम् ८ विदूरजम् ९। अस्य गुणाः। अम्लत्वम्। उष्णत्वम्। कफवायुनाशित्वम्। गुल्ममूलप्रशमनत्वम्। भूषितत्वेन शुभावहत्वञ्च। इति राजनिर्घण्टः। अपि च।

"सुस्निग्धविद्रुमजेन्द्रवैदूर्य्यस्फटिकादिकम्।
मणिरत्नं सरं शीतं कषायं स्वादु लेखनम्।
चक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम्॥"
इति राजवल्लभः॥ ● ।

तच्छायलक्षणं यथा,—

"एकं वेणुपलाशकोमलरुचा मायूरकण्ठत्विषा
मार्जारेक्षणपिङ्गलच्छविभुवा ज्ञेयं त्रिधा च्छायया।
यद्गात्रं गुरुतां दधाति नितरां स्निग्धन्तु
दोषोषितं
वैदूर्य्यं विपदं वदन्ति सुधियः स्वच्छञ्च तच्छो-
भनम्॥"

तस्य कुलक्षणं यथा,—

"विच्छायं रुक्षजागर्भं लघु रूक्षञ्च सच्छतम्।
सत्राणं परुषं क्षय्यं वैदूर्य्यं दूरतो नयेत्॥"

तत्परीक्षा यथा,—

"दृष्टं यदात्मना स्वच्छं स्वच्छायां निकषाश्मनि।
स्फुटं प्रदर्शयेदेतद्वैदूर्य्यं जात्यसुच्यते॥"
इति राजनिर्घण्टः। ● ।

सूत उवाच।

"वैदूर्य्यपुष्परागाणां कर्केतभौमके वदे।
परीक्षा लक्षणा प्रोक्ता व्यासेन कथिता द्विज॥
कल्पान्तकालक्षुभिताम्बुराशि-
निर्घातकल्पादुदितिलस्य गादात्।
वैदूर्य्यसुत्पन्नमनेकवर्णं
शोभाभिरामं द्युतिवर्द्धनौजम्॥
अविदूरे वैदूर्य्यस्य गिरयस्तुङ्गरोधसः।
कामभूतिकसौमानमनु तस्माकरोऽभवत्॥
तस्य गादसुत्यत्वादाकरः सुमहागुणः।
अभूदुत्तरितो लोके लोकत्रयविभूषणः॥
तस्यैव दानवपतेर्निनदाद्गुरूप-
प्रावृट्पयोदवरदर्शितचारुरूपाः।
वैदूर्य्यरत्नमययो विविधावभासा-
स्तस्मात् स्फुलिङ्गनिवहा इव सम्बभूवुः॥
पद्मरागमुपादाय मणिवर्णा हि ये स्थितौ।
सर्व्वांस्तान् वर्णशोभाभिर्वैदूर्य्यमनुगच्छति॥
तेषां प्रधानं स्निग्धिकण्ठगौरं
यद्वा भवेदेरुदलप्रकाशम्।
चाषाग्रपक्षप्रतिमश्रियो ये
न ते प्रशस्ता मणिशास्त्रविद्भिः॥
गुणवान् वैदूर्य्यमणिर्योजयति स्वामिनं वरभाग्ये॥
दोषैर्युक्तो दोषैस्तत्सादृश्यजात् परीक्षेत॥
गिरिकाचश्रिशुपालौ काचस्फटिकाच भूमि-
निर्भिन्नाः।
वैदूर्य्यमणेरेते विजातयः सन्निभाः सन्ति॥
लिक्षाभावात् काचं लघु-भावाच्छैशुपालकं
विद्यात्।
गिरिकाचमदीप्तित्वात् स्फटिकं वर्णोज्ज्वलत्वेन॥
यदिन्द्रगोपस्य महागुणस्य
सुवर्णसंख्याकलितस्य मूल्यम्।
तदेव वैदूर्य्यमणेः प्रदिष्टं
पलद्वयोन्मापितगौरवस्य॥
जातस्य सर्व्वेऽपि मणीषु यादृग्-
विजातयः सन्ति समानवर्णाः।
तथापि नानाकरजानुमेय-
भेदप्रकारः परमः प्रदिष्टः॥
सुखोपलक्ष्यश्च सदा विचार्य्यो
ह्ययं प्रभेदो विदुषा नरेण।
क्षेदप्रभेदो लघुना गुरुत्वं
विजातिलिङ्गं खलु सार्व्वजन्यम्॥
कुशलाकुशलैः प्रयुज्यमानाः
प्रतिबद्धाः प्रतिसृक्रियाप्रयोगैः।
गुणदोषसमुद्भवं लभन्ते
मणयोऽर्थान्तरमूल्यमेव भिन्नाः॥
क्रमशः समतीतवर्त्तमानाः
प्रतिबद्धा मणिबन्धकेन यत्नात्।
यदि नाम भवन्ति दोषहीना
मणयः षड्गुणमाप्नुवन्ति मूल्यम्॥
आकरात् समतीतानासुदधेरौरसन्निधौ।
मूल्यमेतन्मणीनान्तु न सर्व्वत्र महीतले॥
सुवर्णो मणुना वस्तु प्रोक्तः षोड्शमाषकः।
तस्य सप्तनिमो भागः संज्ञारूपं करिष्यति॥
ग्राह्यचतुर्भावमानो माषकः पञ्चशाल्वलः।
पलस्य दशमो भागो धरणः परिकीर्त्तितः॥
इति मानविधिः प्रोक्तो रत्नानां मूल्यनिश्चये।"
इति गारुडे वैदूर्य्यपरीक्षा ७३ अध्यायः॥ ● ।

अन्यच्च।

"खितञ्च धूम्रसङ्काशमौषत्तुङ्गाश्चितं भवेत्।
वैदूर्य्यं नाम तन्नीलं रत्नविद्भिरुदाहृतम्॥
ब्रह्मक्षत्रियविट्शूद्रजातिभेदाच्चतुर्व्विधम्।
खितनीलो भवेद्विप्रः खितारक्तस्तु बाहुजः॥
पीतानीलस्तु वैश्यः स्यात् नील एव हि शूद्रकः॥"

अथ गुणाः।

"माञ्जिष्ठरजसप्रख्यं रसोनप्रतिमं हि वा।
कलिङ्गं निर्म्मलं यच्च वैदूर्य्यं देवभूषणम्॥
सुतारं घनमत्यच्छं कलिङ्गं यच्च मेचकम्।
वैदूर्य्यानां समाख्याता एते पञ्च महागुणाः॥"

तद्दोषा यथा,—

"उदुम्बरनिभं दीप्तिं योऽसौ सुतार इति स्मृतः।
प्रमाणतोऽल्पं गुरु यत् घनमित्यभिधीयते॥
कलङ्कादिविहीनं तदच्छमिति कीर्त्तितम्।
ब्रह्मभूमं कणाकारचक्षलो यत्र दृश्यते॥
कलिङ्गं नाम तदाहुः सर्व्वसम्पत्तिकारकम्।
विच्छिदाङ्गन्तु वैदूर्य्यं यच्छमित्यभिधीयते॥ ● ।
कर्करं कर्कशं त्रासः कलङ्को देह एव च।
एते पञ्च महादोषा वैदूर्य्यानासुदीरिताः॥
शर्करायुक्तमिव यत् प्रतिभाति च कर्करम्।
सर्व्वेऽपि च यत्तज्ज्ञेयं कर्कशं बन्धुनाशनम्॥
भिन्नभ्रान्तिकरत्रासः स कुर्य्यात् कुलसंक्ष-
यम्॥
विरङ्गवर्णो यस्याङ्गे कलङ्कः क्षयकारकः।
मलदिग्ध इवाभाति देहो देहविनाशनः॥
जयति यदि सुवर्णं त्यागहीनो यदा वा
बहुविधमणिहारी भूपतिर्व्या यतिर्वा।

दधदपि धृतदोषं जातु वैदूर्यरत्नं
प्रतिशुतपलरूपः प्रातमेथ्यत्वयुग्मम् ।"
इति युक्तिकल्पतरौ वैदूर्यपरीक्षा ।
अन्यत् गरुड़पुराणवत् ।

वैदेहः, पुं, वणिक् । इत्यमरटीकायां भरतः । (विदेहस्यापत्यमिति । विदेह + अण् ।) निमिराजपुत्रः । अस्योत्पत्तिर्यथा । अपुत्रस्य तस्य भूभुजः शरीरमरणकभीरवस्ते सुताः अरण्यां ममन्थुः । तत्र च कुमारो जज्ञे । जननाज्जनक-संज्ञां चाप्यवाप । अभूद्विदेहोऽस्य पितेति वैदेहः । मथनाभिधिरभूत्तस्योदावसुः पुत्रोऽभवत् । इति विष्णुपुराणे ४ अंशे निमिवंश-कथनं नाम ५ अध्यायः । तस्य विदेहनाम-कारणं निमिशब्दे द्रष्टव्यम् । (वर्णसङ्करजाति-विशेषः । स तु वैश्यात् ब्राह्मण्यां जातः । यथा, मनुः । १० । ११ ।
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ।")

वैदेहकः, पुं, (वैदेह एव । स्वार्थे कन् ।) वणिक् । इत्यमरः । शूद्रात् वैश्यासुतः । इति मेदिनी । (वैश्याद्ब्राह्मण्यां जातो वर्णसङ्करविशेषः । यथा, मनुः । १० । १६ ।
"वैदेहकेन लम्बोष्ठ्यासुतपन्नो वेण उच्यते ।"
अस्यात्मपरिचयं कार्यम् । यथा, तत्रैव । १० । ४७ ।
"वैदेहाकारणं स्त्रीकार्ये मागधानां वणिक्-पथः ।")

वैदेहिकः, पुं, वणिक् । इत्यमरटीकासारसुन्दरी । (वर्णसङ्करविशेषः । यथा, मनुः । १० । २६ ।
"वैदेहिकाद्बन्धुमेदौ बहिर्यामप्रतिश्रयौ ।")

वैदेही, स्त्री, (विदेहेषु भवा विदेहस्यापत्यं स्त्री वा । विदेह + अण् । ङीप् ।) रोचना । सीता । (यथा, रघुः । १२ । २० ।
"रामोऽपि सह वैदेह्या वने वन्येन वर्तयन् ।
चचार सानुजः प्राप्तो दण्डिचापकृतं युवा ।"
यथा च ।
"वैदेहि ! याहि कलसोद्भवधर्मपत्नीं
तस्याः पुरः कथय पूर्वकथाः समस्ताः ।
दृष्टापि मा वद पयोनिधिबन्धनं मे
सेयं पुनश्चुलुकिताम्बुनिधेः कलत्रम् ।"
रघुवंशः ।)
वणिक्स्त्री । पिप्पली । इति मेदिनी । (वैदेह-पत्नी । यथा, मनुः । १० । ३७ ।
"आहिण्डिको निषादेन वैदेह्यामेव जायते ।"
विदेहदेशोत्पन्नमात्रे च । यथा, महाभारते । १ । ६५ । २३ । "देवातिथिः खलु वैदेहीसुत-येमे मर्यादां नाम तस्यामस्य जज्ञे अरिहो नाम ।")

वैद्यः, पुं, (विद्यां वेदेति । विद्या + "तदधीते तद्वेद ।" ४ । २ । ५९ । इति अण् ।) पण्डितः । यथा । कात्यायनः ।
"नाविद्यानान्तु वैद्येन देयं विद्याधनं क्वचित् ।
समविद्याधिकानान्तु देयं वैद्येन तद्धनम् ।"
वैद्येन विदुषा । इति दायतत्त्वम् ॥ वाचकदृष्टः । इति शब्दचन्द्रिका ॥ आयुर्वेदवेत्ता । स चामष्ठ-जातिचिकित्साहतित्वात् । तत्पर्यायः । रोगहारी २ अगदङ्कारः ३ भिषक् ४ चिकित्सकः ५ । इत्यमरभरतौ । सद्यः ६ विधः ७ विद्वान् ८ आयुर्वेदी ९ । इति राजनिर्घण्टः । स चतु-र्विधः । रोगहरः १ विषहरः २ शस्त्रहरः ३ क्षत्राहरः ४ । इति महाभारते राजधर्मः । अस्योत्पत्तिर्यथा,—
"वैद्यावश्विनीकुमारौ च जातौ विप्रयोनिषु ।
वैद्यवीर्य्येण शूद्रायां बभूवुर्ब्रह्मवो जनाः ।
ते च यामगुणज्ञाश्च मन्त्रौषधिपरायणाः ।
तेभ्यश्च जाताः शूद्रायां ते आत्रेयाद्विजो भुवि ।
शौनक उवाच ।
कथं ब्राह्मणपत्न्यान्तु सूर्यपुत्रोऽश्विनीसुतः ।
अहो केन विपाकेन वीर्य्याधानं चकार सः ।
सौतिरुवाच ।
गच्छन्तीं तीर्थयात्रायां ब्राह्मणीं कुरुनन्दन ।
ददर्श कामुकीं कान्तः पुष्पोद्याने मनोहरे ।
तया निवारितो यत्नात् बलेन बलवान् सुरः ।
अतीव सुन्दरीं दृष्ट्वा वीर्य्याधानं चकार सः ।
हृतं तत्याज गर्भं सा पुष्पोद्याने मनोरमे ।
सद्यो बभूव पुत्रश्च तप्तकाञ्चनसन्निभः ।
सपुत्रा स्वामिनो गेहं जगाम व्रीडिता तदा ।
स्वामिनं कथयामास यस्माद्देवादिसङ्कटम् ।
विप्रो रोषेण तत्याज तत्र पुत्रं स्वकामिनीम् ।
परित्यक्तभूद योगेन सा च गोदावरी स्मृता ।
पुत्रं चिकित्साशास्त्रञ्च पाठयामास यत्नतः ।
गालाग्निश्च ग्रन्थञ्च स्वयं स रविनन्दन ।
विप्रश्च ज्योतिर्गणनातु वेदनाच्च निरन्तरम् ।
वेदधर्म्मपरित्यक्तो बभूव गणको भुवि ।"
इति ब्रह्मवैवर्ते ब्रह्मखण्डे १० अध्यायः ॥
नरकभोगान्ते वैद्यजन्म यथा,—
"यः करोत्यपहारञ्च देवब्राह्मणयोर्धनम् ।
पातयित्वा स्वपुरुषान् दग्ध्वा पूर्व्वान् दशापरान् ।
स्वयं याति च धूमान्धं धूमध्वान्तसमन्वितम् ।
धूमभक्षी धूमभोगी वसेत्तत्र चतुर्युगम् ।
ततो म्लेच्छकुलेषु प्रतजन्मनि भारते ।
ततो नानाविधाः पक्षिजातयः क्षुद्रजातयः ।
ततो नानाविधा वृक्षजातयश्च ततो नरः ।
भार्य्याहीनो वंशहीनः प्रवरो व्याधिसंयुतः ।
ततो भवेत् स्वर्णकारः स सुवर्णवणिक् ततः ।
ततो जायते वैद्यो ब्राह्मणो गणकस्ततः ।
विप्रो देवद्विजोपजीवी वैद्यजीवी चिकित्सकः ।"
अपि च ।
"वाचालोऽतिविवादारो रसादिविक्रयी च यः ।
स याति नागवेश्यत्वं नागैर्मैत्रिश्च एव च ।
वसेत् च लोममात्रान्तं तत्रैव नागदंशितः ।
ततो भवेत् च गणको वैद्यश्च वणजस्तथा ।
गोपश्च कर्म्मकारश्च रङ्गकारस्ततः शुचिः ।"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे २८ अध्यायः ॥
राजवैद्यस्य लक्षणं यथा,—
"परं पारं गतो यः स्यादष्टाङ्गे तु चिकित्सिते ।
अनाहार्य्यः स वैद्यः स्याद्धर्म्मात्मा च कुलो-द्गतः ।
प्राज्ञवार्य्यः स विज्ञेयो वचनं तस्य भूभुजः ।
राजन् राज्ञा सदा कार्य्यं यथा कार्य्यं पृथग्-जनैः ।"
इति मात्स्ये १८८ अध्यायः ॥
सामान्यवैद्यलक्षणं यथा,—
"चिकित्सां कुरुते यस्तु स चिकित्सक उच्यते ।
स च यादृक् समीचीनस्तादृशोऽपि निगद्यते ।
तत्राधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ।
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी प्रियंवदः ।
सत्त्वधर्म्मपरो यश्च वैद्य ईदृक् प्रशस्यते ।"
दृष्टकर्म्मा दृष्टा परेण कृता चिकित्सा येन सः ।
स्वयंकृती स्वयंचिकित्साकुशलः । लघुहस्तः सिद्धिमद्धस्तः ॥ निषिद्धवैद्यो यथा,—
"कुशैलः कर्कशः स्तब्धो ग्रामीणः स्वयमागतः ।
एते वैद्या न पूज्यन्ते धन्वन्तरिसमा अपि ।"
कर्कशः अप्रियवादी । स्तब्धः साभिमानः ।
ग्रामीणः व्यवहारानभिज्ञः ॥
अथ वैद्यस्य कर्म्म आह ।
"व्याधिस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः ।
एतद्वैद्यस्य वैदग्धं न वैद्यः प्रभुरायुषः ॥"
अस्यायमर्थः । व्याधेः सम्यक् परिचयः । व्याधि-ग्लानिकरत्वं वैद्यस्य कर्म्म । न तु वैद्यः आयुषः प्रभुरित्यर्थः । अपरे त्वेवं व्याचक्षते । व्याधे-स्तत्त्वपरिचयः । वेदनायाः ग्लानिकरत्वञ्च । एतदेव वैद्यस्य वैदग्धं न किन्तु वैद्य आयुषः प्रभुरित्यर्थः ॥
अथ वैद्यानयनदूतस्य लक्षणम् ।
"यश्चिकित्सकमानेतुं याति दूतः स कथ्यते ।
स च यादृक् समुचितस्तादृगत्र निगद्यते ।
दूताः सुजातयोऽवज्ञाः प्रटवो निर्भयाम्बराः ।
सुस्निग्धोऽश्वतरारूढाः शुभपुष्यफलैर्युताः ।
सजातयः सुचेष्टाश्च स्वयोर्वहिणि सङ्गताः ।
भिषजं समये प्राप्ता रोगिणः सुखहेतवः ।"
सजातयः रोगिसमानजातयः ।
"यस्यां प्राणमरुद्वाति सा नाड़ी जीव-संज्ञिता ।"
अथ दूतयात्रायां शकुनविचारः ।
"वैद्यज्ञानाय दूतस्य गच्छतो रोगिणः क्षते ।
न शुभं सौम्यशकुनप्रदीप्तान्तु सुखावहम् ।"
प्रदीप्तमग्निः । दूतो रोगी च रिक्तहस्तो वैद्यं न पश्येत् । तथा च ।
"रिक्तहस्तो न पश्येत्तु राजानं भिषजं गुरुम् ।"
अथ आयुर्विदां प्रादुर्भावः । तत्रादौ ब्रह्म-प्रादुर्भावः ।
"विधाताथर्वसर्वस्वमायुर्वेदं प्रकाशयन् ।
स्मरणाच्च संहितां चक्रे लक्षश्लोकमनौपम्याम् ।
ततः प्रजापतिं दक्षं दक्षं सकलकर्म्मसु ।
विधिधौरेयः साङ्गमायुर्वेदमुपादिशत् ।"

अथ दक्षप्रादुर्भावः ।
"अथ दक्षः क्रियादक्षः सर्व्वज्ञौ वेदमाययुः ।
वेदयामास विदांवौ सर्व्वज्ञौ सुरसत्तमौ ।"*॥
अथाश्विनीसुतप्रादुर्भावः ।
"दक्षादधीत्य दक्षौ वितेनतुः संहितां स्वीयाम् ।
सकलचिकित्सकलोकप्रतिपत्तिविवृद्धये धन्याम् ॥
स्वयम्भुवः शिरश्छिन्नं भैरवेण रुषाथ तत् ।
अश्विभ्यां संहितं तस्मात्तौ जातौ यज्ञभागिनौ ॥
देवासुररणे देवा दैत्यैर्यै सचिताः क्षताः ।
अक्षतास्ते कृताः सद्यो दक्षाभ्यामद्भुतं महत् ॥
वज्रिणोऽभूद्भुजस्तम्भः स दक्षाभ्यां चिकित्सितः ।
सोमाग्निपतितचन्द्रस्ताभ्यामेव सुखीकृतः ॥
विप्रीर्णा दशनाः पुष्णो नेत्रे नष्टे भगस्य च ।
अश्विनो राजयक्ष्माभूदश्विभ्यां ते चिकित्सिताः ॥
भार्गवश्यवनः कामी वृद्धः सन् विकृतिं गतः ।
वीर्य्यवर्णस्वरोपेतः कृतोऽश्विभ्यां पुनर्युवा ॥
एतैश्चान्यैश्च बहुभिः कर्म्मभिर्भिषजां वरौ ।
बभूवतुर्भृशं पूज्यावित्यादीनां दिवौकसाम् ॥"*
अथेन्द्रप्रादुर्भावः ।
"संहृत्य दक्षयोरिन्द्रः कर्म्माण्येतानि यत्नवान् ।
आयुर्व्वेदं निरहेगं तौ ययाचे ऋचीपतिः ॥
नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ ।
आयुर्व्वेदं ययाधीतं ददतुः शतमन्यवे ॥
नासत्याभ्यामधीत्यैव आयुर्व्वेदं शतक्रतुः ।
अध्यापयामास बहूनात्रेयप्रमुखान् सुतान् ॥"*
अथात्रेयप्रादुर्भावः ।
"एकदा जगदालोक्य गदाकुलमितस्ततः ।
चिन्तयामास भगवानात्रेयो मुनिपुङ्गवः ॥
किं करोमि क्व गच्छामि कथं लोका निरामयाः ।
भवन्ति सामयानेतान् शक्नोमि निरीक्षितुम् ॥
दयासुरद्रुमस्यार्थे स्वभावो दुरतिक्रमः ।
एतेषां दुःखतो दुःखं ममापि हृदये धिकम् ॥
आयुर्व्वेदं पठिष्यामि नैरुज्याय शरीरिणाम् ।
इति निश्चित्य गतवानात्रेयच्छदशालयम् ॥
तत्र मन्दिरमिन्द्रस्य गत्वा शक्रं ददर्श सः ।
सिंहासनसमासीनं स्तूयमानं सुरर्षिभिः ॥
भास्वन्तं दिशो भासा भास्करप्रतिमं विभा ।
आयुर्व्वेदमहाचार्य्यं शिरोधार्य्यं दिवौकसाम् ॥
शक्रस्तु तं निरीक्ष्यैव त्यक्तसिंहासनो ययौ ।
तस्मै पूजयामास अर्घ्यं भूरितपःक्षमम् ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ।
स मुनिर्व्वक्तुमारेभे निजागमनकारणम् ॥
देवराज न रात्रावि दिव एव यतो भवान् ।
विधात्रा विहितो वज्रत्रिलोकी लोकपालकः ॥
व्याधिभिर्व्वेधिता लोकाः शोकाकुलितचेतसः ।
भूतैर्व्वै बलिभिः शक्राप तेषां हर्तुं कृपां कुरु ।
आयुर्व्वेदोपदेशं मे कुरु कारुण्यतो वृथाम् ।
तथेत्युक्त्वा सहस्राक्षोऽध्यापयामास तं मुनिम् ॥
मुनीन्द्र इदतः साङ्गमायुर्व्वेदमधीत्य सः ।
अभिनन्द्य तमाशीर्भिरारुरोह पुनर्महीम् ॥
अथात्रेयो मुनिश्रेष्ठो भगवान् करुणापरः ।
स्वनाम्ना संहितां चक्रे नरचक्रानुकम्पया ॥

ततोऽग्निवेशं भेड़च जातूकर्णं पराशरम् ।
हीरपाणिञ्च हारीतमायुर्व्वेदमपाठयत् ॥
तत्रास्य कर्णो प्रथममग्निवेशोऽभवत् पुरा ।
ततो भेड़ादयश्चक्रुः स्वं स्वं तन्त्रं कृतानि च ॥
आवयामासुराचार्य्यं मुनिवृन्देन वन्दितम् ।
श्रुत्वा च तानि तन्त्राणि हृष्टोऽभूदत्रिनन्दनः ॥
यथावत् सुचितं तस्मात् प्रहृष्टा मुनयोऽभवन् ।
दिवि देवर्षयो देवाः श्रुत्वा साधिति चाब्रुवन् ॥"
अथ भरद्वाजप्रादुर्भावः ।
"एकदा हिमवत्पार्श्वे देवादागत्य संगताः ।
मुनयो बहवस्तांश्च नामभिः कथयाम्यहम् ॥
भरद्वाजो मुनिवरः प्रथमं समुपागतः ।
ततोऽङ्गिरास्ततो गर्गो मरीचिर्भृगुभार्गवौ ॥
पुलस्त्योऽगस्तिरसितो वशिष्ठः सपराशरः ।
हारीतो गोतमः सांख्यो मैत्रेयश्चाववोऽपि च ॥
यमदग्निश्च गार्ग्यश्च काश्यपोऽपि च ।
नारदो वामदेवश्च मार्कण्डेयः कपिञ्जलः ॥
आङ्गिरस्यः सङ्कृतिज्याः प्राकृतेयः सगौतमः ।
आश्वलायनसांकृत्यौ विश्वामित्रः परीक्षितः ॥
देवलो गालवो धौम्यः काप्यकात्यायनावुभौ ।
काङ्कायनो वैजवापः कुम्भिको बादरायणिः ॥
हिरण्याक्षश्च लोकाक्षिः शरलोमा च गोभिलः ।
वैखानसा वालखिल्यास्तथैवान्ये महर्षयः ॥
ब्रह्मज्ञानस्य निधयो यमस्य नियमस्य च ।
तपस्तेजसा दीप्ता दृश्यमाना इवाग्नयः ॥
सुखोपविष्टास्ते तत्र सर्व्वे चक्रुः कथामिमाम् ।
धर्म्मार्थकाममोक्षाणां मूलसुत्तमकलेवरम् ॥
तत्र सर्व्वार्थसंसिद्धेरभवेद्यदि निरामयम् ।
तपःस्वाध्यायधर्म्माणां ब्रह्मचर्य्यव्रतायुषाम् ॥
हर्त्तारः प्रबला रोगा यत्र तत्र च सर्व्वतः ।
रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टा-
हरा-
ङ्गाक्षीन्द्रियग्लानिसंक्षयकराः सर्व्वाङ्गपीड़ा-
कराः ।
धर्म्मार्थाखिलकामसुस्थितिषु महाविघ्नस्वरूपा बलात्
प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः
प्राणिनाम् ॥
तत्तेषां प्रशमाय कश्चन विधिर्विद्यो भवद्भि-
र्भुवि-
र्योगैरित्यभिधाय संसदि भरद्वाजं मुनिं तेऽब्रु-
वन् ।
त्वं योग्यो भगवान् सहस्रनयनं याचस्व तज्ज्ञं
क्रमात्
आयुर्व्वेदमधीत्य यं गदभयाद्वृत्तस्त्रा भवामो
वयम् ॥
रत्नं च मुनिभिर्योग्यैः प्रार्थितो विनयान्वितैः ।
भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयम् ॥
तत्रेन्द्रभवनं गत्वा सुरर्षिवरमध्यगम् ।
ददर्श हव्यवहनारं दीप्यमानमिवानलम् ॥
दृष्ट्वैव च मुनिं प्राह भगवान् मघवा मुदा ।
धन्योऽद्य स्वागतं तेऽस्य मुनिं तं समपूजयत् ॥

सोऽधिगम्य जयाशीर्भिरभिवन्द्य सुरेश्वरम् ।
ऋषीणां वचनं सम्यगाश्रावयत सत्तमम् ॥
व्याधयो हि समुत्पन्नाः सर्व्वप्राणिभयङ्कराः ।
तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि ॥
तमुवाच मुनिं साक्षमायुर्व्वेदं शतक्रतुः ।
जीवैर्द्वर्षसहस्राणि देही नीरुदनिशम्य यत् ॥
सोऽनलागारं चिस्कत्यमायुर्व्वेदं महामतिः ।
यथावदचिरात् सर्व्वं बबुधे तत्कना मुनिः ॥
तेनायुः सुचिरं लेभे भरद्वाजो निरामयम् ।
अन्यानपि मुनीँश्चक्रे नीरुजः सुचिरायुषः ॥
तत्तत्र जनितज्ञानचक्षुषा ऋषयोऽखिलाः ।
गुणान् दृष्ट्वा कर्म्माणि दृष्ट्वा तद्विधि-
माश्रिताः ॥
आरोग्यं लेभिरे दीर्घमायुश्च सुखसंयुतम् ।
आयुर्व्वेदोक्तविधिनान्येऽपि सुमुनयो यथा ॥"
अथ चरकप्रादुर्भावः ।
"यदा मत्स्यावतारेण हरिणा वेद उद्धृतः ।
तदा पीत्वा तत्रैव वेदं साङ्गमवाप्तवान् ॥
अथर्व्वान्तर्गतं सम्यगायुर्व्वेदञ्च लब्धवान् ।
एकदा स महद्वृत्तं द्रष्टुं चर इवागतः ॥
तत्र लोकान् गदैर्यस्तान् व्यथया परिपीड़ितान् ।
स्वजेषु बहुषु व्यग्रान् म्रियमाणांश्च दृष्टवान् ॥
तान् दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः ।
अनल्पचिन्तयामास रोगोपशमकारणम् ॥
सञ्चिन्त्य स स्वयं तत्र मुनेः पुत्रो बभूव ह ।
यतश्चर इवायातो न ज्ञातः केनचिद्यतः ॥
तस्माच्चरकनामासौ विख्यातः क्षितिमण्डले ।
स भाति चरकाचार्य्यो देवाचार्य्यो यथा दिवि ॥
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ।
आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन् ॥
मुनयो बहवस्तेन कृतं तन्त्रं स्वकं स्वकम् ।
तेषां तन्त्राणि संस्कृत्य समाकृत्य विपश्चिता ।
चरकेणाल्पतो ज्ञात्वा यत्नोऽयं चरकः कृतः ॥"
अथ धन्वन्तरिप्रादुर्भावः ।
"एकदा देवराजस्य हरिर्नियतिता भुवि ।
तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीड़िताः ॥
तान् दृष्ट्वा हृदयं तस्य दयया परिपीड़ितम् ।
यदाशेहृदयः शक्रो धन्वन्तरिमुवाच ह ।
धन्वन्तरे सुरश्रेष्ठ भगवन् किञ्चिदुच्यते ।
योग्यो भवति भूतानामुपकारपरो भव ॥
उपकाराय लोकानां केन किं न कृतं पुरा ।
त्रैलोक्याधिपतिर्विष्णुरभूच्छस्त्रादिरूपधान् ॥
तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपो भव ।
प्रतीकाराय रोगाणामायुर्व्वेदं प्रकाशय ।
इत्युक्त्वा सुरशार्दूलः सर्व्वभूतहितेच्छया ।
समस्तमायुषो वेदं धन्वन्तरिमुपादिशत् ॥
अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा ।
आगत्य पृथिवीं काश्यां जातो वाहुजवेश्मनि ॥
ज्ञात्वा तु सोऽभवत् ख्यातो दिवोदास इति
क्षितौ ।
बाल एव विरक्तोऽभूच्चचार च महत्तपः ॥
यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम् ।

ततो धन्वन्तरिर्लोके: काशीराजोऽभिधीयते ।
हिताय देहिनां स्रोयसंहिता विहितासुना ।
अयं विद्यार्थिनो लोकान् संहितां तामपाठ-
यत् ।"

अथ सुश्रुतप्रादुर्भावः ।

"अथ ग्राणदृग् विश्वामित्रप्रभृतयोऽवदन् ।
अयं धन्वन्तरिः काश्यां काशीराजोऽयमुच्यते ।
विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमुक्तवान् ।
वत्स ! वाराणसीं गच्छ तां विश्वेश्वरवल्लभाम् ।
तत्र गत्वा दिवोदासः काशीराजोऽस्ति
बाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्वेदविदां वरः ।
आयुर्वेदं ततोऽधीत्य लोकोपक्रतिहेतवे ।
सर्वप्राणिदया तीर्थमुपकारो महामखः ।
पितुर्वचनमाकर्ण्य सुश्रुतः काशिकां गतः ।
तेन सार्द्धं समध्येतुं मुनिसङ्घमुपेतं ययौ ।
अथ धन्वन्तरिं सर्व्वेवानप्रस्थाश्रमे स्थितम् ।
भगवन्तं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम् ।
काशीराजं दिवोदासं तेऽपश्यन् विनयान्विताः ।
स्वागतञ्च इति प्राह दिवोदासो यशोधनः ।
कुशलं परिपप्रच्छ तपोगमनकारणम् ।
ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम् ।
भगवन् मानवान् दृष्ट्वा व्याधिभिः परिपीड़ितान्।
क्रन्दतो स्त्रियमाणांश्च जातास्माकं हृदि व्यथा ।
आमयानां शमोपायं विज्ञातुं वयमागताः ।
आयुर्वेदं भवानस्मानध्यापयतु यत्नतः ।
अङ्गीकृत्य वचस्तेषां कृपतिस्तानुपादिशत् ।
व्याख्यातं तेन ते यत्नाच्छ्रुत्वा सर्व्वे मुदान्विताः ।
काशीराजं नमश्चक्रुरभिनन्द्य मुदान्विताः ।
सुश्रुताद्याः सुविद्वांसो जग्मुर्गेहं स्वकं स्वकम् ।
प्रथमं सुश्रुतस्तेषु स्वं तन्त्रं श्रुतवान् स्फुटम् ।
सुश्रुतस्य सकाशोऽपि पृथक् तन्त्राणि तेनिरे ।
सुश्रुतेन श्रुतं तन्त्रं सुश्रुतं बहुभिर्यतः ।
तस्मात्तं सुश्रुतं नाम्ना विख्यातं क्षितिमण्डले ।"

इति भावप्रकाशः ।

अथ मतान्तरे वैद्योत्पत्तिकथनम् ।

"सत्ययेतास्वपरेषु युगेषु ब्राह्मणः क्षिप्र ।
ब्रह्मक्षत्रियविट्शूद्रकन्यका उपयेमिरे ।
तत्र वैश्यसुतायां ये जज्ञिरे तनया अमी ।
सर्व्वे ते सुतयः ख्याता वेदवेदाङ्गपारगाः ।
तेषां सुखोऽम्बष्ठताचार्यस्तस्यावन्त्या कुले हि ततः ।
अम्बष्ठ इत्यसावुक्तस्ततो जातिप्रवर्त्तनात् ।
परे सर्व्वेऽपि चाम्बष्ठा वैद्या ब्राह्मणसम्भवाः ।
जननीतो जनुर्लब्धा यज्ञाता वेदसंस्कृते: ।
अम्बष्ठास्ते ते सर्व्वे द्विजा वैद्याः प्रकीर्त्तिताः ।
अथ रक्षप्रतिकारित्वाद्विद्यलक्षे प्रकीर्त्तिताः ।
सर्व्वे वैद्याः पितुस्तुल्याश्चेतायाञ्च तथा स्मृताः ।
द्वापरे क्षत्रवत्प्रोक्ताः कलौ वैश्योपमाः स्मृताः ।
अथाम्बष्ठेषु सर्व्वेषु विख्याता अभवन्नमी ।
सेनो दासश्च गुप्तश्च दत्तो देवः करो धरः ।
राजः सोमश्च नन्दिश्च कुरुक्षत्रश्च रक्षितः ।
एषां वंशाः समुत्पन्ना एतत्पड़तयो मताः ।
अन्यपड़तयोऽप्येवं सन्ति वैद्या न ते श्रुताः ।
बहवश्चैकनामानो नानागोत्रसमुद्भवाः ।
यथाऽऽहे विश्रुताः सेना इत्येवमपरे मताः ।
यस्य यस्य सुतेर्यो यः सन्तानः स स विश्रुतः ।
तत्तद्गोत्रादिना वैद्यः श्रेष्ठाद्यास्तु स्वकर्म्मणा ।"

तथा हि ।

"तिस्रो वर्णानुपूर्व्वेण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्य्याः स्वाः शूद्रजन्मनः ।
यदुच्यते द्विजातीनां शूद्रादारोपसंग्रहः ।
नैतन्मम मतं यस्मात्तत्रात्मा जायते स्वयम् ।
पाणिं भर्तुः सवर्णासु गच्छेयातु क्षत्रिया शरम् ।
वैश्या प्रतोदमाद्याद्दैन्ये लग्नजघन्यजः ।
सवर्णेभ्यः सवर्णासु जायन्ते च सजातयः ।
अनिन्द्येषु विवाहेषु पुत्राः सन्तानवर्द्धनाः ।
विप्रान्मूर्द्धाभिषिक्तो हि क्षत्रियायां विशः
स्त्रियाम् ।
जातोऽम्बष्ठस्तु शूद्रायां निषादः पार्श्वगोऽपि वा ।
वैश्यात्तु करणः शूद्रां विन्नाखस्य विधिः स्मृतः ।"

एते षट् श्लोका याज्ञवल्क्यीयाः ।

"शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते ।
ते च स्वा चैव राज्ञस्तास्च स्वा चाग्रजन्मनः ।
पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते ।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्म्मणि ।
शूद्रः क्षत्रियया याह्यः प्रतोदी वैश्यकन्यया ।
वसनस्य दशा याह्याः शूद्रयोत्कृष्टवेदने ।"

इति पद्यत्रयम् ।

"ब्राह्मणाद्ब्रह्मकन्यायामम्बष्ठो नाम जायते ।"

इति च पद्यार्द्धं मानवीयम् ।

"वैश्यायां ब्राह्मणाज्जातोऽम्बष्ठो हि मुनि-
सत्तम ।
ब्राह्मणानां चिकित्सार्थं निर्द्दिष्टो मुनिपुङ्गवैः ।"

इति पराशरः ।

"वेदाभ्यासो हि वैद्यः स्यादम्बष्ठो ब्रह्मपूरकः ।"

इति गरुड़ः ।

ब्रह्मा मूर्द्धाभिषिक्तश्च वैद्याः क्षत्रविशावपि ।
अमी पञ्च द्विजा एषां यथापूर्व्वञ्च गौरवम् ।"

इति हारीतः ।

"मातुर्यदा प्रजायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ।"

इति याज्ञवल्क्यवचनम् ।

मूर्द्धाभिषिक्ताम्बष्ठयोरपि पिट्टवच्चात् द्विजत्वम् ।

इति टीकाः ।

"आयुर्व्वेदोपनयनादेषो द्विज इति स्मृतः ।"

इति वैद्यकेऽप्येवम् ।

"तपोयोगात् पुरा वैद्यस्तेजसा पिट्टवत् स्मृताः ।
विप्रात् क्षत्राद्वयतो न्यूनाः क्रियया वैश्यवत्
स्मृताः ।
ग्रन्थे: ग्रन्थे: क्रियाभेदश्च तां वैद्यजातयः ।
कलौ शूद्रत्वमापन्ना यथा क्षत्रा यथा विशः ।"

इति विष्णुः ।

"युगे युगे ह्यधर्म्ये हे जाती ब्राह्मणः शूद्र एव च ।"

इति यमः ।

"शूद्रकल्पा क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वङ्गता लोके ब्राह्मणादर्शनेन च ।"

इति मनुवचनं धृत्वा एवमम्बष्ठादीनामपि कलौ शूद्रत्वमिति स्वस्वग्रन्थेषु वाचस्पतिमिश्रादिभिस्तथा मुद्रितत्वे सार्त्तभट्टाचार्य्येणाप्युक्तम् । अतएव कुलपञ्जिकायामुक्तम् । अतिदिष्टं हि वैद्यस्य शूद्रत्वं क्षत्रियादिवदिति । तस्मात् क्षत्रविशोस्तुल्यो वैद्यः शूद्रस्य पूजित इति ।*।

"युगे युगे कर्म्मभेदोक्तधर्म्मवाह मनुः ।
तपोरीतिप्रभावेण ते गच्छन्ति युगे युगे ।"

मनुष्येष्विह जन्मत इति ।

"अम्बष्ठेष्वन्तताचार्य्यः ख्यातोऽभूद्भुवनत्रये ।
सिद्धविद्याऽऽख्यां कन्यां स्वर्वैद्यस्य तु मानसीम् ।
उपयेमे महौजा यश्चिकितसतकया श्रुतः ।
अथैतस्य वरेणैव ख्याता वैद्या महौजसः ।
सेनो दासश्च गुप्तश्च दत्तो देवः करो धरः ।
राजः सोमश्च नन्दिश्च कुरुक्षत्रश्च रक्षितः ।
सन्ताना बहवश्चैषां बभूवुश्च चिकित्सकाः ।
कुलानुरूपतश्चैषां जाताः षड़तयोऽभवः ।
तेषां प्रशंसा निन्दा च बभूव स्वेन कर्म्मणा ।
उत्तमौ सेनदासौ च गुप्तदत्तौ तथैव च ।
देवः करश्च मध्यस्थौ राजसोमौ कुलाधमौ ।
नन्दिप्रभृतयो निन्द्या क्षुद्रषड़तयोऽपि च ।
केचिन्नाम्ना परिख्याताश्चत्तावुशारतः ।
सर्व्वासामेव जातीनां वृत्तिरेव गरीयसी ।
वृत्तिः स्वर्म्या च पथ्या च वृत्त्या जातिः प्रव-
र्त्तते ।"

इति प्राचीनकुलपञ्जिकावृत्तव्यासवचनानि ।

इति वैद्योत्पत्तिकथनम् । * । अथ वैद्यानां गोत्राणि ।

"अष्टाविंशदमी गोत्राः सर्व्वेषां भिषजामपि ।
यत्रैकस्मिन् विलिख्यन्ते सेनदासादितः क्रमात् ।
धन्वन्तरिश्च अत्रिश्च तथा वैश्वानरात्मजौ ।
मौद्गल्यकौशिकौ शाण्डिल्यश्चेव आङ्गिरसोऽपि च ।
अष्टौ गोत्राणि सेनानां दासानां तदनन्तरम् ।
मौद्गल्योऽथ भरद्वाजः शालङ्कायन एव च ।
शाकिल्यश्च वशिष्ठश्च वात्स्यश्च वडमी मताः ।
गुप्तानां चैव गोत्राणि काश्यपो गौतमस्तथा ।
सावर्णिरपि दत्तानां चत्वारः परिकीर्त्तिताः ।
कौशिकः काश्यपश्चैव शाकिल्यश्चापि तत्परः ।
मौद्गल्य इति विज्ञेयाश्चत्वारो देवसम्भवाः ।
आत्रेयश्चाण्डिल्यौ च शाकिल्य आलमायकः ।
धरस्य काश्यपः प्रोक्तो भरद्वाजश्च कुरुजः ।
काश्यपो रक्षितस्यैको गोत्रा एते प्रकीर्त्तिताः ।
दत्तानामाद्यगोत्राणां देशभेदेऽस्ति सन्ततिः ।
एवमात्रेयगोत्रोऽपि दत्तो देशान्तरे श्रुतः ।
दत्ताः क्षत्रात्रेयगोत्रा ह्यभवन्ति बहवस्तथा ।
तस्माद्दत्तस्य गोत्राणि सप्त ज्ञेयानि पण्डितैः ।
कराणां काश्यपो गोत्रो वात्स्यमौद्गल्यकावपि ।
देशभेदे हि विद्यन्ते तत्तद्गोत्रकः ।

राजः काश्यपगोत्रोऽप्यस्ति तद्राजस्त्रिगोत्रकः।
श्रूयन्ते च नामदेयगोत्रा देशान्तरे धराः।
बहवोऽपि भरद्वाजगोत्रजाः सन्ति रक्षिताः।
इन्द्रादित्यौ परौ यौ द्वौ वैद्यौ गोत्रास्तयोरिमे॥
इन्द्रस्य काश्यपो गोत्र एक एव प्रकीर्तितः।
आदित्यानामिमौ गोत्रावादित्यकौशिकौ स्मृतौ।
यद्यादेशे विख्यातास्तन्नामगोत्रा भिषक्कुले।
यत्तु देशान्तरे गोत्रमन्यत् किमपि च श्रुतम्।
दत्तादीनां न तत् प्रोक्तमप्रसिद्धमतीव तत्॥"*

अथ पञ्जिकान्तरोक्तराढ़ीयवैद्यकुलाष्टकीय-गोत्रसंख्याश्रेष्ठत्वादि लिख्यते।

"काश्यपोद्वृषिसेनस्य गोत्राण्यष्टौ भवन्ति च।
धन्वन्तरौ श्रेष्ठौ मध्यौ वैश्वामित्रावकौशिकौ।
मौद्गल्यकौशिकौ ज्ञेयावाङ्गिरसोऽधमः॥"

अथ राढ़ीयाष्टवैद्यानां प्रवरानाह।

"प्रवराः पञ्च सेनानां धन्वन्तरिकुलोद्भवाम्।
विनिर्दिष्टा यथा ते च धन्वन्तर्यप्रवराग्रणी॥
नैयध्रुवश्चाङ्गिरसो वार्हस्पत्य इति क्रमात्।
धन्वन्तरिगोत्रे त्रयः धन्वन्तरिप्रवरत्रिकाः॥
प्रवराः पञ्च दासानामौर्व्यच्यवनभार्गवाः।
जामदग्न्याप्नुवानः प्रोक्ता मौद्गल्यगोत्रजाः॥
गुप्तानां त्रय एवैते काश्यपोऽप्यसितः।
नैयध्रुवोऽभौ प्रवराः काश्यपान्यवसम्भुवाम्॥
दत्ते त्रयं कौशिकानां गार्ग्यकाश्यपदेवलाः।
ज्ञेयाग्नेयो वशिष्ठश्च आग्नेयश्चेति ते त्रयः॥
दत्तानां प्रवरा एते दत्तात्रेयकुलोद्भवाम्।
आग्नेयगोत्रजातानां देवानाञ्च तथा त्रयः॥
आग्नेय आङ्गिरसको बार्हस्पत्य इति क्रमात्।
करे भरद्वाजगोत्रे त्रयोऽभौ प्रवराः स्मृताः॥
भरद्वाजो भार्गवश्च अवत्सश्च क्रमादभौ।
राघवंशे वात्सगोत्रे कथिताः प्रवराश्चयः॥
वात्सेऽसितस्तथा मार्कण्डेय एवं क्रमादिति।
अथ कौशिकगोत्रस्य सोमस्य प्रवराश्चयः॥
कौशिकः काश्यपश्चैव भार्गवश्चेत्यभौ क्रमात्।
सेनादीनामनुक्ता ये आद्यगोत्रादिसम्भुवाम्॥
प्रवरास्तेऽपि विज्ञेयास्तत्तत्कुलसुखं सुखात्।
गन्धादीनां वरेन्द्रेषु चतुर्णां प्रवराश्च ये।
विज्ञेयास्ते च विख्यातास्तेषां कुलसुखं सुखात्॥"

इति वैद्यानां प्रवराः॥*॥

अथ वैद्येषु राढ़ीयादिकथनम्।

"सेनो दासश्च गुप्तश्च दत्तो देवः करस्तथा।
राजसोमावपौरुष्टौ राढ़ीयाः परिकीर्तिताः॥
बन्द्यिघरो घरः कुण्डो रक्षितश्चेति पञ्च ये।
ते वरेन्द्रेषु विख्याता दासदत्तकरा अपि॥
राढ़ीया भिषजो ये ये प्रायस्ते बङ्गगा अपि।
गन्धादयो महाराढ़े विवसन्ति च केचन॥"

तथा च पञ्जिकान्तरे।

"सेनो दासश्च गुप्तश्च पञ्च दत्तादयस्तथा।
अष्टौ राढ़ासु विख्याताः प्रायोऽभौ बङ्गगा अपि॥"

तथान्यत्र।

"नन्दिचन्द्रधरदत्तरक्षिता-
स्ते खनामनि वरेन्द्रविश्रुताः।
बीजिपूरुष इहैव वक्ष्यते
तत्कुलं खलु वरेन्द्रजं पुनः॥"

तथा हि नारायणदासोऽन्तरङ्गखानश्च।

"दासो दत्तो धरश्चैव नन्दिकुण्डौ करस्तथा।
चन्द्रश्च रक्षितश्चेति वरेन्द्रकुलमष्टकम्॥"इति॥

तथान्यत्र।

"अष्टौ सेनादयो राढ़े बङ्गेष्वपि वसन्त्यमी।
गन्धादयो महाराढ़े गुप्तपङ्क्तयोऽपि च॥
केचिन्नाना परिख्याता इहा देशान्तरेष्वपि॥"

इति॥

"सम्बन्धः श्रूयते सर्व्वैरेकदेशनिवासिनोः।
निन्द्यते किल सम्बन्धो भिन्नदेशनिवासिनोः॥"

इति वैद्येषु राढ़ीयादिकथनम्॥*॥

अथ सेनादीनां पूर्व्वस्थानमाह।

"श्रीकाञ्चीग्रा गोलगरं करङ्कोट एव च।
मोरग्रासनकान्तारौ समासुस्थानमेव च॥
मेठाग्रासनमण्यो यावयामस्तथैव च।
अष्टानां सेनसुखानां राढ़ायां स्थानमष्टकम्॥"

तथाह दुर्ज्जयः।

"काञ्ची गोरं करङ्कश्च मोरकान्तासमासुकाः।
मेठ्यो मालञ्च राढ़ायां वैद्यानां कुलमष्टकम्॥"

इति वैद्यानां पूर्व्वस्थानकथनम्॥*॥

अथ स्थानभेदेन सेनादिभेदमाह।

"जनविंशतिधा सेना अष्टाविंशतिधा पुरम्।
भवन्ति भेदैर्नैतेषां वक्ष्यते कुलसञ्चयम्॥
एको विनायकः सेनो भेदेन नवधाभवत्।
मालञ्चो धनहट्टीयः खागाः सेनहाटिकः॥
गारहट्टो गिरोलीयस्तथा मङ्गलकोटजः।
राधियाभौ वैतनीयो नव वैनायका अमी॥
विज्ञेयतो विनिर्दिष्टा ज्ञेयाश्चान्यस्थलोद्भवाः।
सामान्यस्थानकथने सम्बन्धभाषणे तथा।
सर्व्वेषामेव वैद्यानामितरेषामयं क्रमः॥"

इति विनायकसेनवंश्यनिर्णयः॥

"एकः पुनर्गयीसेनो भेदेनैव चतुर्विधः।
विषपाढ़ाभवः श्रेष्ठस्त्रिकायिपुरजस्तथा।
अन्यः कङ्कविसम्भूतो धाढ़ायामौ ततः परः॥"

इति गयीसेनवंश्यनिर्णयः॥

"एको राघवसेनोऽभूत् खड्यामेव विश्रुतः।
स खड्ज इति ख्यातो नापरा तस्य च ख्यातिः॥"

इति राघवसेनवंश्यनिर्णयः॥

"राजा विमलसेनोऽभूत् सेनभूमिप्रजाश्रयः।
स सेनभूमौ विख्यातो नापरं तस्य च स्थलम्॥"

इति राज्ञो विमलसेनस्य वंश्यनिर्णयः॥

"पाचदामोदरः सेनः पाचः शिखरभूपतेः।
अयौ शिखरभूजातौ नापरं तस्य च स्थलम्॥"

इति पाचदामोदरवंश्यनिर्णयः॥

"विनसेनोऽपि यत्रैको धनभूमिप्रजाश्रयः।
स एव धनभूमिष्ठो नापरा तस्य च ख्यातिः॥"

इति विनसेनवंश्यनिर्णयः॥

"सप्तमो वृषिसेनो यो बङ्गभूमौ प्रतिष्ठितः।
हाड्यिायामसम्भूतस्तन्नाम्ना तस्य तत्कुलम्॥"

इति हाड्यिावृषिसेनवंश्यनिर्णयः॥

इति धन्वन्तरिगोत्रजातानां सप्तविधानां सेनानां भेदेनाष्टादशप्रकारनिर्णयः॥

"श्रीवत्ससेनप्रमुखाः षड्भौ शङ्खिगोत्रजाः।
भेदेन सप्तधा ज्ञेया यथाक्रममभौ पुनः॥
एकः श्रीवत्ससेनोऽभूत्तेषड्यामविश्रुतः।
तेषड्ज इति ख्यातो नापरं तस्य च स्थलम्॥"

इति श्रीवत्ससेनवंश्यनिर्णयः॥

"एकः प्रियालसेनोऽसौ भेदेन द्विविधोऽभवत्।
पोड़ागाङ्गाभवः श्रेष्ठः परः पोखरियाभवः॥"

इति प्रियालसेनवंश्यनिर्णयः॥

"एको यः पुरुसेनोऽभूद्भुठिनागढ़िमाश्रितः।
भूठिनागढ़िनत्वेन ख्यातोऽसौ नापरं स्थलम्॥"

इति पुरुसेनवंश्यनिर्णयः॥

"चन्द्रसेनोऽपरस्त्वेकचन्द्रद्वीपनिवासतः।
शङ्खिगोत्रसमुद्भूत इदीलपुरमाश्रितः॥"

इति चन्द्रसेनवंश्यनिर्णयः॥

"एको सुक्षीरसेनोऽसौ खर्व्वपीठीनृपाश्रयात्।
स एव खर्व्वपीठीति विख्यातो मल्लभूभवः॥"

इति सुक्षीरसेनवंश्यनिर्णयः॥

"रामसेनः परस्त्वेवान्तर्भूतो बभूव यः।
स मल्लभूमिवसतो विदितानेकपौरुषः॥"

इति शङ्खिगोत्रजातानां श्रीवत्ससेनप्रमुखानां सप्तप्रकारनिर्णयः॥

"आद्यसेनस्तु बङ्गीजो भेदेन विविधोऽभवत्।
नपाढ़सम्भवस्त्वेकः ज्ञानग्रामभवोऽपरः॥
मानकरीय एवान्यश्चय आद्याः प्रकीर्तिताः।
आद्यविंशोद्भवसुताः खतन्त्राः सर्व्व एव हि॥"

इति सकलसेनानां भेदनिर्णयः॥*॥

अथ दासानां भेदमाह।

"पञ्चदशविधा दासास्त्रिभौ विंशतिधा पुनः।
एकः पुनश्चायुदासो भेदेन द्विविधोऽभवत्।
एकस्तेषड्जसम्भूतो मालिकाहारजः परः॥"

इति चायुवंश्ये द्विविधनिर्णयः॥

"पञ्चदासः पुनस्त्वेको भेदेन पञ्चधाभवत्।
वालिनाड़ीभवश्चैकः परो मङ्गलजालिकः।
मौड़ेश्वरभवः पालियामजः पाचनौरजः॥"

इति पञ्चवंश्ये पञ्चविधनिर्णयः॥

"एकोऽपरः कायुदासो बङ्गभूमौ प्रतिष्ठितः।
कोयामौज इति ख्यातो दासो मौद्गल्यगोत्रजः॥"

इति कायुदासवंश्यनिर्णयः॥

भोयीदासोऽपि ततपुत्रौ ख्यातौ दीघलकेकरौ।
अभौ त्रयो बङ्गभूमौ प्रसिद्धाः सर्व्व एव हि॥"

इति भोयीदासस्य ततपुत्रत्रयोश्च वंश्यनिर्णयः॥

"एको वराहदासोऽसौ बौहारियाभवासतः।
स बौहारिजदासोऽपि मतो मौद्गल्यगोत्रजः॥"

इति बौहारीयवराहदासवंश्यनिर्णयः॥

"कृसिंहनामदासौ द्वौ बङ्गदेशे प्रतिष्ठितौ।
तौ बङ्गजाविति ख्यातौ कुलकार्य्यपरायणौ॥"

इति कृसिंहदासयोर्वंश्यनिर्णयः॥

"वीरदासोऽपि यस्तेक: स वङ्गज इति स्मृत:।
तत्रैव वङ्गे सम्बन्धस्तस्याभूद्वरकन्ययो:॥"
इति वीरदासवंशनिर्णय:॥
"ख्यात: पाथरड़ाग्रामे रामदासोऽपि तादृश:।
सुनयस्तस्य चत्वारो बीजिनस्तेऽपि विश्रुता:॥
ख्याता डमेड़-गामेड़-धाड़-धौड़ालदासका:।
मौद्गल्यगोत्रसम्भूता: सतन्त्रा: सर्व्व एव हि॥"
इति रामदासस्य ततपुत्राणाञ्च वंशनिर्णय:॥
इति मौद्गल्यगोत्रजानां सकलदासानां पञ्च-
ट्यप्रकाराणां भेदेन विंशतिप्रकारनिर्णय:॥*
अथ गुप्तानां भेदमाह।
"गुप्ताश्च षड्विधा भेदास्त्रयोदशविधा: पुन:।
काश्यपान्वयसंभूता: सतन्त्रा: सर्व्व एव हि॥
एक: पुन: कायगुप्तो भेदेनाष्टविधोऽभवत्।
वराह नगरीयश्च श्रेष्ठोऽभूत् कुलकर्म्मणि॥
यज्ञिनानाभवस्तस्यस्तेषेव कुलशीलवान्।
वाराहगुप्तसंज्ञस्तत्सुतीयस्तदनन्तरम्॥
मौलगुप्तभवा ये ते निरोलचिपुराश्रिता:।
भद्रवाल्लीनिवासस्था: कायगुप्तोद्भवाश्च ये॥
माटियारीभवा: केचिल्लोकगुप्तस्य वंशजा:।
पश्चिमस्थानमाश्रित्य केचित्सन्ति निजेच्छया॥"
इति कायगुप्तवंशेऽष्टविधनिर्णय:॥
"परमेश्वरगुप्तो य: श्रेष्ठस्तद्वंशसम्भव:।
योऽभूच्चिपुरगुप्तोऽसौ धौड़ालाविहितस्थिति:॥"
इति धौड़ालीयचिपुरगुप्तवंशनिर्णय:॥
"परमेश्वरगुप्तस्य वंशजौ द्वौ प्रतिष्ठितौ।
भौंपुरीखाड़ियामस्थौ महत्सख्याधि-
कारिणौ॥"
इति महाधिकारिसख्याधिकारिणोर्वंशनिर्णय:॥
"अड़ालगुप्तो य: प्रोक्त: स तु शिङ्गानसम्भव:।
काश्यपान्वयसंभूत: कुलकार्य्यपरायण:॥"
इत्यड़ालगुप्तवंशनिर्णय:॥
"वीरगुप्तस्तु य: प्रोक्तो भौंपुरग्रामवासकृत्।
भौंपुरीय इति ख्यात: स च काश्यपगोत्रज:॥"
इति वीरगुप्तवंशनिर्णय:॥ इति काश्यपगोत्र-
जातानां सकलगुप्तानां षड्विधानां भेदेन त्रयो-
दशप्रकारनिर्णय:॥
"दत्तौ च द्विविधौ भेदौ रामदत्तश्च पावित।
पूर्व्व: प्राङ्खिल्लगोत्रीयो वटग्रामसमुद्भव:॥
अपर: पावित दत्त: खाँगड़ीय: स एव हि।
जात: कौण्डिन्यगोत्रे च सतन्त्रौ द्वौ गुणान्वितौ॥"
इति दत्तवंशनिर्णय:॥
"विकारकस्य देवस्य वंशजा आत्रेयगोत्रजा:।
समानस्थानसंभूता: केतुग्रामेऽधुना तु ते॥
केतुग्रामीयदेवोऽसौ विकारककुलोद्भव:।
निजेच्च पौरुषेरेव कुलकार्य्यपरायण:॥
कृष्णाचेयभवा ये च ये च प्राङ्खिल्लगोत्रजा:।
ग्रामसामन्तभवा ये च ते नानादेशवासिन:॥"
इति देववंशनिर्णय:॥
"एक: कान्तारवासी च करो भेदादभौ त्रय:।
शाण्डिल्यगोत्रिगोत्रे द्वौ वङ्गदेशे च विश्रुतौ॥
यस्तु धर्म्मकरो बौद्धो भरद्वाजकुलोद्भव:।
तद्वंशा: साम्प्रतं सन्ति हिमोड़ायाजिगाँपुरे॥"
इति करवंशनिर्णय:॥
"मेदाग्राशनसंभूतौ राजवंशोद्भवावुभौ।
अग्निराजमहीराजौ वात्स्यगोत्रसमुद्भवौ॥
एलाचिधामनगरे अग्निराज: कृताश्रय:।
मही राज: खेपड़ीयो वङ्गभूमौ च संस्थित:॥"
इति राजवंशे द्विविधनिर्णय:॥
"मालव्यामसमुद्भूतो धर्म्मशीलो महामति:।
जात: कौशिकगोत्रे च तद्वंशा बहुदेशगा:॥"
इति सोमवंशनिर्णय:॥ इति राढ़ाप्रसिद्धाना-
मष्टानां सेनाधीनां भेदेन वंशनिर्णय:॥*॥
"अपरे ये नन्दिचन्द्रौ धरकुण्डौ च रक्षित:।
वारेन्द्रा अपि पश्यन्ते प्रसिद्धास्तत्र ते पुन:॥"
इति त्रयोदशप्रकाराणां वैद्यानां यथाक्रमभेदेन
कुलनिर्णय:॥*॥ अथ सेनादीनां सामान्यत:
सम्बन्धलिखनानुरोधादसतिस्थानमाह।
"श्रीखण्डनामनगरी राढ़ि वङ्गे च विश्रुता।
सर्व्वेषामेव वैद्यानामाश्रयो यत्र विद्यते॥
यत्र गोष्ठी कृता वैद्यैर्य: खण्डोऽभूद्भिषक्प्रिय:।
विशेषत: कुलीनानां सर्व्वेषामेव वासभू:॥"
इति सामान्यत: सकलवैद्यानां वासस्थान-
सूत्रम्॥*॥ इति गौराङ्गमल्लिकात्मजभरत-
सेनसूनवैद्यकुलतत्त्वम्।
वैद्य:, त्रि, वेदसम्बन्धीय:। वेदशब्दात् ष्याप्रत्ययेन
निष्पन्नमेतत्।
वैद्यक, क्ली, आयुर्व्वेद:। चिकित्साशास्त्रम्।
यथा,—
"यस्य शाकरणे वरेण्यघटनास्फीता: प्रवन्धा दश
प्रख्याता नव वैद्यकेऽपि तिथिभिर्द्वारार्थमेकोऽद्भुत:।
साहित्ये त्रय एव भागवततत्त्वोक्तौ त्रयस्तस्य सु-
श्लक्ष्णत्वादि शिरोमणेरिह गुणा: के के न
लोकोत्तरा:॥"
इति सुग्धबोधव्याकरणवृत्तौ दोषदेवप्रशंसा-
श्लोक:॥*॥ तच्छास्त्रलक्षणादि यथा,—
"ऋग्यजु:सामाथर्व्वाख्यान् दृष्ट्वा वेदान् प्रजा-
पति:।
विचिन्त्य तेषामर्थञ्चेवायुर्व्वेदं चकार स:॥
ज्ञात्वा तु पञ्चमं वेदं भास्कराय ददौ विभु:।
सतन्त्रसंहितां तस्माद्भास्करश्च चकार स:॥
भास्करश्च खग्निभ्य आयुर्व्वेदं ससंहिताम्।
प्रददौ पाठयामास ते चक्रु: संहितास्तत:॥
तेषां नामानि विदुषां तन्त्राणि ततन्त्रतानि च।
व्याधिप्रशान्तबीजानि साध्वि मत्तो निशामय॥
धन्वन्तरिर्दिवोदास: काशीराजस्तथाश्विनौ।
नकुल: सहदेवोऽर्किचयवनो जनको बुध:॥
जाबालो जाजलि: पैल: कवधोऽगस्त्य एव च।
एते वेदाङ्गवेदज्ञा: षोड़श व्याधिनाशका:॥*॥
चिकित्सातत्त्वविज्ञानं नाम तन्त्रं मनोरमम्।
धन्वन्तरिश्च भगवांश्चकार प्रथमे सति॥
चिकित्सादर्पणं नाम दिवोदासश्चकार स:।
चिकित्साकौमुदीं दिव्यां काशीराजश्चकार स:॥
चिकित्सासारतन्त्रञ्च भग्नं चाश्विनीसुतौ।
तन्त्रं वैद्यकसर्व्वस्वं नकुलश्च चकार स:॥
चकार सहदेवश्च व्याधिसिन्धुविमर्द्दनम्।
ज्ञानार्णवं महातन्त्रं यमराजश्चकार स:॥
अथनो जीवदानञ्च चकार भगवानृषि:।
चकार जनको योगी वैद्यसन्देहभञ्जनम्॥
सर्व्वसारं तन्त्रसुनो जाबालस्तन्त्रसारकम्।
वेदाङ्गसारं तन्त्रञ्च चकार जाजलिर्मुनि:॥
पैलो निदानं कवधस्तन्त्रं सर्व्वग्रहं परम्।
वैद्यनिर्णयतन्त्रञ्च चकार कुम्भसम्भव:॥
चिकित्साप्राणबीजानि तन्त्राण्येतानि षोड़श।
व्याधिप्रशान्तबीजानि बलाधानकराणि च॥
मथित्वा ज्ञानमन्यानेरायुर्व्वेदपयोनिधिम्।
ततस्तन्त्राण्युद्धरन्वैनीतानि कोविदा:॥
एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहिताम्।
आयुर्व्वेदं सर्व्वबीजं सर्व्वं जानामि सुन्दरि!॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्याय:॥
वैद्यनाथ:, पुं, देशविशेष:। यथा,—
"करवीरे महालक्ष्मीरुमादेवी विनायके।
अरोगा वैद्यनाथे तु महाकाले महेश्वरी॥"
इति मात्स्ये गौरीनामाष्टशतं १३ अध्याय:॥
(तथा देवीभागवते पीठस्थान माहात्म्ये। ७।
३०। ७१।) अपि च।
"वैद्यनाथं समारभ्य भुवनेशान्तगं शिवे!
तावदङ्गाभिधो देशो याचार्य्या न हि दुष्यति॥"
इति शक्तिसङ्गमतन्त्रे ७ पटल:॥
भैरवविशेष:। यथा,—
"हार्द्दपीठं वैद्यनाथे वैद्यनाथस्तु भैरव:।
देवता जयदुर्गाख्या नेपाले जातुनो मम॥"
इति तन्त्रचूड़ामणौ पीठनिर्णय:॥
अपि च।
"हरिद्रानगरे यत्र वैद्यनाथो महेश्वर:।
तत्राशयो विखट्वश्च सर्व्वदश्च उदाहृत:॥"
इति दक्षब्रह्मपुराणे २१ अध्याय:॥
अन्यच्च।
"भारखण्डे वैद्यनाथो वक्त्रेश्वरस्तथैव च।
वीरभूमौ सिद्धिनाथो राढ़ि च तारकेश्वर:॥"
इति महालिङ्गेश्वरतन्त्रे पीठादिक्रमेण शिव-
मूर्त्तनामसोत्तमम्।
वैद्यबन्धु:, पुं, (वैद्यानां बन्धुरिव।) आरग्वधवृक्ष:।
इति शब्दचन्द्रिका। वैद्यस्य बन्धुश्च।
वैद्यमाता, [त्] स्त्री, (वैद्यानां मातेव।) वासक:।
इत्यमर:। भिषग्जननी च।
वैद्यसिंही, स्त्री, (वैद्ये वैद्यशास्त्रोक्तौषधादौ
सिंहीव प्रभूतवीर्य्यवत्त्वात्।) वासकवृक्ष:।
इति शब्दरत्नावली।
वैद्या, स्त्री, काकोली। इति शब्दचन्द्रिका।
वैध:, त्रि, (विधिना बोधित:। विधि+अण्।)
विधिबोधित:। यथा। अदृष्टार्थैकजातीय-
कर्म्मण: कालदेशैकचोदितस्य प्रयोगानुबन्धबन्ध-
हेतुभूतानामभेदे उद्दिश्याविशेषाग्रह:। इति

प्रायश्चित्ततत्त्वम् ॥*॥ अथ वैधहिंसाविचारः। "मा हिंस्यात् सर्व्वा भूतानि इत्यत्र सर्व्वशब्दस्य आपकार्थपरतया एतद्विधिमनुक्रम्य वायव्यं श्वेतमालभेत। इत्यादिविधेर्विषयाप्राप्तेरगत्या वैधातिरिक्तविषयत्वम्। सर्व्वाः सर्व्वाणि छन्दांसि वा इत्यनेन तत् पदं सिद्धम्। यद्यपि नानादर्शनटीकाकृद्भिर्व्वाचस्पतिमिश्रैस्तत्त्वकौमुद्यामभिहितम्। 'न च मा हिंस्यात् सर्व्वा भूतानि इति सामान्यशास्त्रं विशेषशास्त्रेण अग्नीषोमीयं पशुमालभेत इत्यनेन बाध्येत इति वाच्यं विरोधाभावात्। विरोधे हि बलीयसा दुर्ब्बलं बाध्यते। न चात्ति विरोधः भिन्नविषयत्वात्। तथा हि। मा हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरकृतार्थत्वमपि। न चानर्थहेतुत्वकृतोपकारकत्वयोः कश्चिदस्ति विरोधः। हिंसा हि पुरुषस्य दोषमावक्ष्यति कृतोच्च उपकरिष्यति' इत्यत्रेव। तदपि सांख्यनये। मीमांसकमते तु विरोध एव। तथा हि। गुरुनये न खलु सर्व्वभूतहिंसाभावविषयकं कार्य्यमिति निषेधविध्यर्थस्य बाधं विना अग्नीषोमीयपशुवालम्भनविषयकं कार्य्यमिति भावविध्यर्थे उपपद्यते। भट्टनये तु अङ्गे यथा तथास्तु। न च सूक्ष्मपशुयागे पुरुषार्थे पशुहिंसनस्यार्थसाधनत्वमनर्थ-साधनत्वञ्चोपपद्यते विरोधात्। वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव कृतः विधेरेव स्वभावो यः स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति। अन्यथा अङ्गानां प्रधानोपकारकत्वमपि नाङ्गीक्रियते। अर्थसाधनत्वं बलवदनिष्टानुबन्धीष्टसाधनत्वं अनर्थसाधनत्वं बलवदनिष्टसाधनत्वं न चानयोरेकत्र समावेश इति। अतएवोक्तं तस्मादयज्ञे वधोऽवधः इति। नन्वेवं श्येनेनाभिचरन् यजेत इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वमवश्यतम्। अभिचारो मूलकर्म्म च इति मनुना उपपातकगणमध्ये पाठादनिष्टसाधनत्वमवगतम्। तदेतत् कथमुपपद्यतामिति चेन्नैवम्। आततायिनमायान्तं हन्यादेवाविचारयन् इत्येकवाक्यतया आततायित्वादे रिष्टसाधनत्वं अनाततायित्वादे तूपपातकत्वेन बलवदनिष्टसाधनत्वमित्यविरोध इति। गुरुचरणा अप्येवम्।" इति तिथ्यादितत्त्वम्॥

वैधाभ्रः, पुं, (विधातुरपत्यं पुमान्। विधाह+अण्।) सनत्कुमारः। स च विधातृपुत्रः। इत्यमरः॥

वैधात्री, स्त्री, (विधातुरियमिति। विधाह+अण्। ङीप्।) ब्राह्मी। इति राजनिर्घण्टः॥ (विधातृसम्बन्धिनि, त्रि। यथा, राजतरङ्गिण्याम्। ४। ४१३।

"अभङ्गुरास्तेऽभिमानास्तस्यैवासन् मनस्विनः। अभ्यवर्त्तत यैरेव वैधात्रोरपि वामता॥")

वैधूमाग्नी, स्त्री, ब्राह्मदेशीयनगरी। इति सिद्धान्तकौमुदी॥

वैधृतिः, पुं, विष्कम्भादिसप्तविंशतियोगान्तर्गतत्रयोदशयोगः। तस्य ज्ञाप्यत्वं यथा,—

"परिघस्य त्यजेदर्द्धं सप्त शूले च नाडिकाः।
गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः।
वैधृतिव्यतिपातौ च समस्तौ परिवर्ज्जयेत्॥"

इति ज्योतिस्तत्त्वम्॥*॥

तत्र जातफलं यथा, कोष्ठीप्रदीपे।

"मैत्रीविहीनः कुटिलः खलश्च
मूर्खो दरिद्रः परवञ्चकश्च।
कुकर्म्मकर्त्ता परदारभर्त्ता
भवेन्नरो वैधृतिलग्नजन्मा॥"

अन्ततयोगे तस्य वर्ज्यत्वमवर्ज्यत्वञ्च यथा,—

"यदि वृश्चिकतोपान्तौ दिनं वाप्यशुभं भवेत्।
हन्यतेऽन्ततयोगेन भास्करेण तमो यथा॥
हन्त्यन्ताख्यो योगः सर्व्वाण्यशुभानि हेलया नियतम्।
न भवति पुनरिह शुक्लो वैधृतिरुदियतीयाते॥"

इति ज्योतिस्तत्त्वम्॥

(देवताविशेषः। यथा, भागवते। ८।१।२६।

"देवा वैधृतयो नाम विधृतेस्तनया नृप।
नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा॥")

वैधेयः, त्रि, (विधिं पद्धतिमेवानुरुध्य व्यवहरति। विधि+ठक्। यद्वा, विधेये कर्म्मणे अनभिज्ञः। विधेय+अण्। यद्वा, विरुद्धं धेयमस्य। ततः स्वार्थे अण्। पद्धतिमाश्रित्य क्रियाकारित्वात् युक्तायुक्तविवेकशून्यत्वाच्च तथात्वमस्य।) मूर्खः। इत्यमरः। ३। १। ४८॥ (यथा, राजतरङ्गिण्याम्। ६। १५६।

"पुंश्चली जाल्मवैधेयबालकाद्रोग्धृनिर्भरा।
समभूद्यत्र वेश्याहां राजपर्षन्मनस्विनाम्॥")

विधिसम्बन्धी विधेयसम्बन्धी च॥

वैधृतः, पुं, यमप्रतीहारः। इति हेमचन्द्रः॥

वैनतेयः, पुं, (विनतायाः अपत्यमिति। विनता+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) गरुडः। इत्यमरः॥ (यथा, देवीभागवते। २। १२। २६।

"समानीयाग्रतं मात्रे वैनतेयः समर्पयत्॥")

अरुणः। इति मत्स्यपुराणम्॥ (विनतापत्यमात्रे। यथा, महाभारते। १। ६५। ४०।

"तार्ष्यश्चारिष्टनेमिश्च तथैव गरुडाग्रजौ।
आरुणिर्वारुणिश्चैव वैनतेयाः प्रकीर्त्तिताः॥")

वैनयिकः, पुं, शुश्रूषाभ्यासरतः। तत्पर्य्यायः। योग्यरथः २। इति हेमचन्द्रः। ३। ४१६॥ (विनय एव। "विनयादिभ्यष्ठक्।" ५। ४। ३४। इति स्वार्थे ठक्। विनयः॥) विनयसम्बन्धिनि, त्रि॥ (यथा, महाभारते। १२। ६८। ४।

"सर्व्वं वैनयिकं कृत्वा विनयज्ञो दृढव्रतिम्।
इष्ट्वाजानन्तरो भूत्वा प्रणम्य विधिपूर्व्वकम्।
विधिं पप्रच्छ राज्यस्य सर्व्वलोकहिते रतः॥")

वैनायिकः, पुं, बौद्धः। इति त्रिकाण्डशेषः॥ यथा,

"भिक्षुकः क्षपणोऽदृष्टो बौद्धो वैनायिकः स्मृतः॥"

इति त्रिकाण्डशेषः॥

वैनाशिकं, क्ली, (विनाशं सूचयतीति। विनाश+ठक्।) नाड़ीनक्षत्रविशेषः। स तु जन्मर्क्षाधिष्ठयोर्विंशनक्षत्रम्। यथा। जन्मात्तं कर्म्म ततोऽपि दशमं सांघातिकं षोड़शभम्। समुदयमादशभं विनाशसंज्ञं क्षयोर्विंशं आद्यात्तु पञ्चविंशं मानसमेव नरः षड़ृक्षः स्यात्॥ तत्फलं यथा.—

"ईहाहेहार्थहानिः स्याज्जन्मर्क्षे उपतापिते।
कर्म्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे॥
सम्पन्नविभवबन्धूनां हानिः सांघातिके तथा।
संतप्ते सासुदयिके मित्रभृत्यार्थसंक्षयः॥
वैनाशिके विनाशः स्यात् देहद्रविणसम्पदाम्॥"

इति ज्योतिस्तत्त्वम्॥

निधनतारा। यथा,—

"वैनाशिकर्क्षे दृष्टं ग्रहणं सुधांशुभास्करयोः।
जनयति रोगं बहुधा क्लेशं वित्तक्षयञ्चाशु॥"

वैनाशिकर्क्षे क्षयोर्विंशनक्षत्रे। इति केचित्। वस्तुतस्तु वैनाशिकपदं निधनतारापरम्। निधनेऽपि वैनाशिकव्यवहारात्। इति तिथ्यादितत्त्वम्॥

वैनाशिकः, पुं, (विनाशो मतमस्य। विनाश+ठक्। सर्व्वं दृश्यं क्षणिकमिति क्षणिकविज्ञानवादित्वादस्य तथात्वम्।) क्षणिकः। परतत्त्वः। ऊर्णनाभः। इति मेदिनी॥ विनाशसम्बन्धीये, त्रि॥

वैनीतकः, पुं, क्ली, परम्परावाहनम्। इत्यमरः॥ आरूढं वाह्यं यत् साक्षात् न वहति परम्परयैव वहति तद्वैनीतकम्। यथा दोलां वहन् दोलावाहकः; विनीयते क्षिप्यते क्षात् विकारसंघैरिति के विनीतकः; तेनैव स्वार्थे ण्के हृदौ वैनीतकम्। इति भरतः॥ विनीतसम्बन्धिनि, त्रि॥

वैन्यः, पुं, (वेनस्यापत्यं पुमान्। वेन+"कुर्व्वादिभ्यो ण्यः।" ४। १। १५१। इति ण्यः।) वेनपुत्रः। स तु पृथुराजः। यथा.—

"वेनस्य मथिते पाणौ स बभूव महापुमान्।
वैन्यो नाम महीपालो यः पृथुः परिकीर्त्तितः।
येन दुग्धा मही पूर्व्वं प्रजानां हितकारणात्॥"

इति वह्निपुराणे सर्गानुशासननामाध्यायः॥

(यथाच ऋग्वेदे। ८। ८। १०।

"पृथी यद्वैन्यः सादनेष्वेव।"

"वैन्यो वेनस्य पुत्रः पृथो एतत्सूक्तो राजर्षिः।"

इति तद्भाष्ये सायणः॥)

वैपरीत्यं, क्ली, (विपरीत+ष्यञ्।) विपरीतस्य भावः। तत्पर्य्यायः। व्यत्ययः २ विपर्य्यासः ३ विपर्य्ययः ४ व्ययः ५। इति हेमचन्द्रः॥ (यथा, मार्कण्डेये। ४१। ३४।

"स्वभाववैपरीत्यन्तु प्रकृतेश्च विपर्य्ययः॥")

वैपरीत्यलज्जालुः, स्त्री, पुं, (वैपरीत्या लज्जालुः।) स्वयंस्पृष्टहतपत्रा लज्जालुः। यथा,—

"लज्जालुर्वैपरीत्याख्या स्वयंस्पृष्टहतत्रपा।
वैपरीत्या च लज्जालुर्त्त्याभिधाने प्रयोजयेत्॥
लज्जालुर्वैपरीत्याक्षः कटुरुष्णः कषायगुत्।
रसे नियामकश्चैव नानाविज्ञानकारकः॥"

इति राजनिर्घण्टः॥

वैभवं, क्ली, विभवस्य भावः। विभवशब्दात् ष्यञ्प्रत्ययेन निष्पन्नमिदम्। (यथा, कथासरित्सागरे। ६६। १६१।
"सोऽप्यावेद्य यथार्थमस्वरूपराधीशः शनात् कल्पिता-
शेषस्वोचितदिव्यवैभवविधिः सिद्धिप्रभावात्ततः॥"
अतिशयः। यथा, भागवते। ५। १८। ११।
"यत्सङ्गलब्धं निजवीर्यवैभवं
तीर्थं सुहृत्संसृतां हि मानसम्॥"
विभोर्भाव इत्यर्थे ष्यञ्प्रत्यये ऐश्वर्यम्। यथा, भागवते। १०। १४। ३८।
"जानन्त एव जानन्तु किं बहूक्त्या न मे प्रभो।
मनसो वपुषो वाचो वैभवं तव गोचरः॥")

वैभाजित्रं, क्ली, (विभाजयितुर्धर्म्यम्। विभाजयितृ+"ऋतोऽञ्।" ४। ४। ३६। इति ष्यञ्। विभाजयितुर्णिलोपश्चेति काशिकोक्त्या णिलोपः।) विभाजयितुर्धर्म्यम्। इति सिद्धान्तकौमुदी॥

वैभ्राजं, क्ली, देवोद्यानम्। इति त्रिकाण्डशेषः॥ (यथा, मार्कण्डेये। ५५। २।
"पूर्वं चैत्ररथं नाम दक्षिणे नन्दनं वनम्।
वैभ्राजं पश्चिमे पार्श्वे सावित्र्यौत्तराचले॥"
विभ्राजराजस्य तपःस्थानम्। यथा, हरिवंशे। २३। १४।
"ततो विभ्राजितं तेन वैभ्राजं नाम सद्मनम्॥"
पुं, पर्व्वतविशेषः। यथा, मार्कण्डेये। ५६। १६।
"तरक्षुरिति विख्याता वैभ्राजं साचलं ययौ।"
लोकविशेषः। यथा, हरिवंशे। १८। ४६।
"वैभ्राजा नाम ते लोका दिवि भान्ति सुदर्शनाः॥")

वैमात्रः, पुं, (विमातुरपत्यमिति। विमातृ+अण्।) वैमात्रेयः। इति जटाधरः॥

वैमात्रा, स्त्री, (विमातुरपत्यं स्त्री।) विमातृकन्या। वैमात्रशब्दादाप्प्रत्ययेन निष्पन्नम्॥

वैमात्रेयः, पुं, (विमातुरपत्यम्। विमातृ+"शुभ्रादिभ्यश्च।"४।१।१२३। इति ढक्।) विमातृपुत्रः। तत्पर्य्यायः। विमातृजः २ वैमात्रः ३। इति जटाधरः। ("तयोरभावे तथाविधौ वैमात्रेयौ।" इति शुद्धितत्त्वे प्रेतश्राद्धाधिकारिप्रस्तावे।)

वैमात्रेयी, स्त्री, (विमातुरपत्यं स्त्री। विमातृ+ढक्। ततो ङीप्।) विमातृकन्या। वैमात्रेयशब्दादीप्प्रत्ययेन निष्पन्नमिदम्॥

वैमुक्तः, त्रि, विमुक्तिविशिष्टः। तद्भावे, क्ली। विमुक्तशब्दात् ष्यञ्प्रत्ययेन निष्पन्नमिदम्॥

वैमेयः, पुं, विनिमयः। इति हेमचन्द्रः॥

वैयाकरणः, त्रि, (व्याकरणं वेत्ति अधीते वा। व्याकरण+"व्याकरणादिभ्यः।"४। २। ७२। इति अण्। "नद्यृतश्च।"७। ३। १। इति यकारात् पूर्वं ऐच्।) व्याकरणवेत्ता। व्याकरणाध्येता। व्याकरणशब्दात् ष्यञ्प्रत्ययेन योर्युमेति इमा त्रिस्रो त्रिरिति दृढौ च निष्पन्नमिदम्। व्याकरणसम्बन्धी च॥ (यथा, पाणिनौ। ६। ३। ७।
"वैयाकरणाख्यायां चतुर्थ्याः॥"
यथा च महाभारते। ५। ४३। ६१।
"सर्व्वार्थानां व्याकरणाद्वैयाकरण उच्यते।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा॥")

वैयाकरणभार्य्यः, पुं, वैयाकरणी भार्य्या यस्य। इति सुग्धबोधव्याकरणम्॥

वैयाघ्रः, पुं, (व्याघ्रस्य विकारः। व्याघ्र+"प्राणिरजतादिभ्यः।" ४। ३। १५४। इति अण्। ततः वैयाघ्रेण चर्म्मणा परिवृतो रथः। "हैपवैयाघ्रादण्।"४।२।१२। इति अण्।) व्याघ्रचर्म्माच्छादितरथः। तत्पर्य्यायः। हैपः२। इत्यमरः।२।८।५२। (यथा, महाभारते।२।५८।४।
"अयं सहस्रसमितो वैयाघ्रः सुप्रतिष्ठितः।
सुचक्रोपस्करः श्रीमान् किङ्किणीजालमण्डितः॥")

व्याघ्रसम्बन्धिनि, त्रि। यथा,—
"उत्तराभिमुखी भूत्वा निराहारा निरन्तरम्।
वैयाघ्रचर्म्मवसना सोर्द्धमूर्द्धानना सती॥
ज्योतिर्मयं शिवं शान्तं परं शिवकरं परम्॥"
इति कालिकापुराणे ४४ अध्यायः॥
(यथा च हरदत्तसंहितायाम्। ४४। १३।
"पूर्व्वाभिमुखः श्रीमान् वैयाघ्रे चर्म्मणि स्थितो राजा॥")

वैयाघ्रपद्यः, पुं, (व्याघ्रपदोऽपत्यमिति। व्याघ्रपद्+ष्यञ्। यद्वा, व्याघ्रस्येव पादावस्य इति बहुव्रीहौ "पादस्य लोपः इति।" ५।४।१३८। इति अकारलोपे गर्ग्यादित्वात् यञ्। "पादः पत्।" ६।४।१३०। इति पदादेशः। "न याभ्यामिति।" ७। ३। ३। यकारात् पूर्व्वमैच्।) गोत्रकारकमुनिविशेषः। यथा, तिथ्यादितत्त्वे।
"वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे॥"
(यथा, महाभारते। ४। ६। ११।
"युधिष्ठिरस्यासमहं पुरा सखा
वैयाघ्रपद्यः पुनरस्मि विप्रः॥")

वैयासकिः, पुं, (व्यासस्यापत्यम्।"व्यासवरुड़निषादेति।" ४। १। ६७। इत्यस्य काशिकोक्त्या इञ् अकञादेशश्च। न याभ्यामिति ऐच्।) व्यासस्यापत्यम्। इति सुग्धबोधव्याकरणम्॥ (यथा, भागवते। १०। ९। १४।
"एवं निगद्य भृगुनन्दन साधुवादं
वैयासकिः स भगवानथ विष्णुरातम्।
प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं
व्याहर्त्तुमारभत भागवतप्रधानः॥")

वैयासिकः, त्रि, (व्यासेन कृतः। व्यास+ठञ्। तत ऐच्।) व्यासकृतसंहितादिः। इति श्रीभागवतम्॥

वेयुष्टः, त्रि, (युष्टे दीयते कार्य्यम्। "युष्टादिभ्यो ठञ्।" ५।१।८७। इति अण्। नद्यृभ्यामित्यैच्।) प्रातर्भवः। इति सिद्धान्तकौमुदी॥

वैरं, क्ली, (वीरस्य कर्म्म भावो वा। वीर+अण्।) विरोधः। इत्यमरः॥ (यथा, भागवते। ८। ७। ३६।
"बहुवैरेषु भूतेषु मोहितेष्वात्ममायया॥")
तस्य समुत्थानं पञ्च। स्त्रीजनम् १ यथा कृष्णशिशुपालयोः। वास्तुजम् २ यथा कौरवपाण्डवानाम्। वाग्जनम् ३ यथा द्रौपदुपदयोः। सापत्नम् ४ यथा मूषिकमार्জারयोः। अपराधजम् ५ यथा पूजनीयब्रह्मदत्तयोः। इति महाभारतम्॥

वैरक्तं, क्ली, (विरक्तस्य भावः। विरक्त+अण्।) विरक्तता। विरक्तशब्दाद्भावार्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम्॥

वैरङ्किकः, त्रि, (विरङ्कं नित्यमर्हतीति। "छेदादिभ्यो नित्यम्।" ५। १। ६४। इति ठञ्।) विरागार्हः। इति हेमचन्द्रः॥

वैरनिर्यातनं, क्ली, (वैरस्य निर्यातनम्।) कृतापकारस्य प्रत्यपकारः। तत्पर्य्यायः। वैरशुद्धिः २ प्रतीकारः ३। इत्यमरः॥

वैरप्रतिक्रिया, स्त्री, (वैरस्य प्रतिक्रिया।) वैरनिर्यातनम्। इति हेमचन्द्रः॥

वैरशुद्धिः, स्त्री, (वैरस्य शुद्धिः।) वैरनिर्यातनम्। इत्यमरः॥

वैराङ्किकः, त्रि, (विरागं नित्यमर्हतीति। विराग+ठञ्।) विरागार्हः। इति सिद्धान्तकौमुदी॥

वैरागी, [न्] त्रि, (विरागस्य भावो वैरागम्। तदस्यास्तीति इनिः।) विषयेच्छारहितः। वैराग्ययुक्तः। यथा,—
"सनकश्च सनन्दश्च तृतीयश्च सनातनः।
सनत्कुमारो वैरागी चतुर्थः पुत्र एव च॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २४ अध्यायः॥

वैराग्यं, क्ली, (विरागस्य भावः। विराग+ष्यञ्।) विषयतुच्छधीः। यथा,—
"ज्ञानवैराग्ययोर्भक्तिप्रवेशायोपयोगिता।
ईषत् प्रथममेवेति बाहुल्यसूचितं तयोः॥
यदुभे चित्तकाठिन्यहेतू प्रायः सतां मते।
सुकुमारस्वभावेयं भक्तिस्तद्धेतुरीरिता॥"
यथा एकादशस्कन्धे।
"तस्माज्जक्तियुक्तस्य योगिनो वै मदात्मनः।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह॥"
इति॥
किन्तु ज्ञानविरक्त्यादिसाध्यं भक्त्येव सिद्ध्यति। यथा तत्रैव।
"यत् कर्म्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्।
योगेन दानधर्म्मेण श्रेयोभिरितरैरपि॥
सर्व्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा।
स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छति॥
कचिद्धरदृढस्नेह जनस्य भजने हरेः।
विषयेषु गरिष्ठोऽपि रागः प्रायो विलीयते॥
अनासक्तस्य विषयान् यथार्हमुपयुञ्जतः।
निर्ब्बन्धः कृष्णसम्बन्धे युक्तं वैराग्यमुच्यते॥
प्रापञ्चिकतया बुद्ध्या हरिसम्बन्धिवस्तुनः॥

सुमुक्षुभिः परित्यागो वैराग्यं फल्गु कथ्यते ।" इति भक्तिरसामृतसिन्धौ पूर्व्वभागे साधनलहरी ।

वैराटः, पुं, इन्द्रगोपकीटः । इति हेमचन्द्रः ॥ विराटसम्बन्धिनि, त्रि । (स्त्री, विराटपर्व्व । यथा, महाभारते । १ । २ । ५७ ।

"आरण्येयन्तत: पर्व्व वैराटन्तदनन्तरम् ॥"

विराटकन्यायां स्त्री । यथा, तत्रैव । १।२।५८ ।

"अभिमन्योश्च वैराट्या पर्व्व वैवाहिकं स्मृतम् ॥"

तथा च देवीभागवते । २ । ७ । ४ ।

"अभिमन्योर्वैरा भार्य्या वैराटी चाति-
सुन्दरी ॥"

विस्तृते च त्रि । यथा, महाभारते ।१३।७६।२१।

"वैराटपृष्ठसुच्चार्य सर्व्वरत्नैरलङ्कृतम् ।
प्रदाय मरुतां लोकान् स राजन् प्रतिपद्यते ॥")

वैराट्या, स्त्री, जिनयोड्शविद्यादेवयन्तर्गतदेवीविशेषः । इति हेमचन्द्रः ॥

वैरातङ्कः, पुं, अर्ज्जुनवृक्षः । इति राजनिर्घण्टः ॥

वैरी, [न्] पुं, (वैरमस्यास्तीति । इनिः ।) शत्रुः । इत्यमरः ॥ (यथा, मनौ । ४ । १३३ ।

"वैरिणं नोपसेवेत सहायश्चैव वैरिणः ॥")

वीरसम्बन्धिनि, त्रि ॥

वैरूप्यं, क्ली, (विरूपस्य भावः ।) विरूपता । यथा,—

"वैरूप्यमङ्गेषु कृशानिपातो
मौण्ड्यं तथा लक्ष्मणसन्निवेशः ।
एतान् वधानर्हति रूक्षवादी
शास्त्रेषु दूतस्य वधो न दृष्टः ॥"

इति महानाटके ५ अङ्कः ॥

(असाधारणत्वम् । यथा, महाभारते । ५ । ४३ । ७ ।

"निर्दिश्य सम्यक् प्रवदन्ति वेदा-
स्तं विश्ववैरूप्यमुदाहरन्ति ॥"

विसदृशत्वम् । यथा, तत्रैव । १२ । २४० । २ ।

"एतद्वामोन्यवैरूप्यं वर्त्तते प्रतिकूलतः ॥")

वैरोचनः, पुं, (विरोचनस्यापत्यम् । विरोचन + अण् ।) बुद्धः । बलिराजः । (यथा, महाभारते । ३ । २८ । १७ ।

"अथ वैरोचने दोषानिमान् विद्वत्तमावताम् ॥")

अग्निपुत्रः । सूर्य्यपुत्रः । सिद्धगणः । इति शब्दरत्नावली ॥

वैरोचननिकेतनं, क्ली, (वैरोचनस्य बलेर्निकेतनम् ।) पातालम् । इति हलायुधः ॥

वैरोचनिः, पुं, (विरोचनस्यापत्यम् । विरोचन + इञ् ।) बुद्धः । बलिराजः । (यथा, विष्णुपादादिकेशवर्णनस्तोत्रे । १ ।

"याभ्यां वैरोचनीन्द्रौ युगपदपि विपत्संपदोरेकधाम ॥")

सूर्य्यपुत्रः । इति मेदिनी ॥

वैरोचिः, पुं, बाणदैत्यः । यथा । वैरोचिर्बलिनन्दनः । इति शब्दरत्नावली ॥

वैरोद्धारः, पुं, (वैरस्योद्धारः ।) कृतापकारस्य प्रत्यपकारः । यथा,—

"प्रतिकारः प्रतीकारो वैरनिर्यातनं तथा ।
निर्यातनं वैरशुद्धिर्वैरोद्धारो निगद्यते ॥"

इति शब्दरत्नावली ॥

वैलक्षण्यं, क्ली, (विलक्षणस्य भावः । विलक्षण + ष्यञ् ।) विलक्षणत्वम् । विलक्षणस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् । (यथा, भागवते । १० । ५५ । २६ ।

"अवधार्य्य मुनेरीषदैलक्षण्येन योषितः ॥"

विभिन्नत्वम् । यथा, मनौ कुल्लूकः । १ । ८५ ।

"चैतादिष्वपि युगापचाररूपेण धर्म्मवैलक्षण्यम् ॥")

वैल्वं, क्ली, (विल्वस्येदम् । अण् ।) विल्वफलम् । इत्यमरटीका ॥ विल्वसम्बन्धिनि, त्रि ॥ (यथा, मनौ । २ । ४५ ।

"ब्राह्मणो वैल्वपालाशौ क्षत्रियो वाटखादिरौ ॥")

वैवधिकः, त्रि, (विवधेन धान्यतण्डुलादिना व्यवहरति । "विभाषा विवधबीवधात् ।" ४ । ४ । ९७ । इति ठक् ।) विवधेन धान्यतण्डुलादिना व्यवहरति यः । पसारि इति भाषा । (यथा, राजतरङ्गिण्याम् । ६ । ३०८ ।

"वल्गाभिधा वैवधिकी वल्गामठमकारयत् ॥")

तत्पर्य्यायः । वार्त्ताहरः २ । इत्यमरभरतौ ॥ वार्त्तोवहः ३ । इति शब्दरत्नावली ॥

वैवर्ण्यं, क्ली,) विवर्णस्य भावः ।) विवर्णता । विवर्णस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नमिदम् । (यथा, कथासरित्सागरे ।९६।६८।

"सा वार्त्ता कर्णमागत्य तस्या वैवर्ण्यदायिनी ॥"

तत्तु स्त्रीणां सात्त्विकभावानामन्यतमम् । यथा, साहित्यदर्पणे । ३ । १६६ ।

"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥")

वैवस्वतः, पुं, (विवस्वतोऽपत्यमिति । अण् ।) यमः । इत्यमरः ॥ (यथा, हरिवंशे ।६८।२३।

"एवं शृणु: सप्रतिहायनोऽयं
वैवस्वतस्यालयमभ्युपैति ॥"

यथा च ऋग्वेदे । १० । १४ । १ ।

"वैवस्वतं संगमनं जनानां
यमं राजानं हविषा दुवस्य ॥"

"वैवस्वतं विवस्वतः सूर्य्यस्य पुत्रम् ।"इति तद्भाष्ये सायणः ॥ यथा च राजतरङ्गिण्याम् । ४ । ९५१ ।

"वनराजिश्यामलेन दिग्यं वैवस्वताङ्कितम् ॥")

रुद्रविशेषः । इति जटाधरः ॥ अग्निः । सप्तमो मनुः । (यथा, रघुवंशे । १ । ११ ।

"वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ॥")

वर्त्तमानोऽयम् । अस्मिन्मन्वन्तरे वामनोऽवतारः । पुरन्दरः इन्द्रः । आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः । अश्विनावृषभः । इत्याद्या देवाः । कश्यपः अत्रिः वशिष्ठः विश्वामित्रः गोतमः जमदग्निः भरद्वाजः एते सप्तर्षयः । इक्ष्वाकुः धृष्णः शर्य्यातिः दिष्टः धृष्टः करूषकः नरिष्यन्तः पृषधः नाभागः कविः एते मनुपुत्रा दश । इति श्रीभागवतमतम् ॥*॥

अपि च ।

"सप्तमश्च प्रवक्ष्यामि यद्वैवस्वतमुच्यते ।
अत्रिश्चैव वशिष्ठश्च कश्यपो गौतमस्तथा ॥
भरद्वाजस्तथा योगी विश्वामित्रः प्रतापवान् ।
यमदग्निश्च सप्तैते सांप्रतं ये महर्षयः ॥
साध्या विश्वाश्च रुद्राश्च मरुतो वसवोऽश्विनौ ।
आदित्याश्च सुराश्चैतत् सप्त देवगणाः स्मृताः ॥
इक्ष्वाकुप्रमुखाश्चास्य दशपुत्राः स्मृता भुवि ।
मन्वन्तरेषु सर्व्वेषु सप्त सप्त महर्षयः ॥
कृत्वा धर्म्मव्यवस्थानं प्रयान्ति परमं पदम् ॥"

इति मात्स्ये मन्वन्तरानुकीर्त्तनो नाम ६ अः ॥

अन्यच्च ।

श्रीमार्कण्डेय उवाच ।

"आदित्या वसवो रुद्राः साध्या विश्व मरुद्गणाः ।
भृगवोऽङ्गिरसश्चाष्टौ यत्र देवगणाः स्मृताः ॥
आदित्या वसवो रुद्रा विज्ञेयाः कश्यपात्मजाः ।
साध्याश्च मरुतो विश्वे धर्म्मपुत्रा गणास्त्रयः ॥
भृगोस्तु भृगवः पुत्रा ह्यङ्गिरोऽङ्गिरसः सुताः ।
एष सप्तस्तु मारीचो विज्ञेयः सांप्रताधिपः ॥
तेजस्वी नाम चेन्द्रोऽपि महात्मा यज्ञभागभुक् ।
अतीतानागता ये च वर्त्तन्ते ये च सांप्रतम् ॥
सर्व्वे ते त्रिदशेन्द्रास्तु विज्ञेयास्तुल्यलक्षणाः ।
सहस्राक्षाः कुलिशिनः सर्व्व एव पुरन्दराः ॥
मघवन्तो वृषाः सर्व्वे ह्यङ्गिरो गणगामिनः ।
ते श्रुतक्रतवः सर्व्वे भूताभिभवतेजसः ॥
धर्म्मादेः कारणैरेतैराधिपत्यगुणान्विताः ।
भूतभव्यभवन्नाथाः श्रद्धत्व चैतत् त्रयं द्विज ॥
भूर्लोकोऽयं स्मृतो भूमिरन्तरीक्षं भुवः स्मृतम् ।
स्वराख्यश्च तथा स्वर्गस्त्रैलोक्यमिति गद्यते ॥
अत्रिश्चैव वशिष्ठश्च कश्यपश्च महातपाः ।
गौतमश्च भरद्वाजो विश्वामित्रश्च कौशिकः ॥
तत्रैव पुत्रो भगवान्नृचीकस्य महात्मनः ।
जमदग्निश्च सप्तैते सप्तयोऽत्र तथान्तरे ॥
इक्ष्वाकुर्नभगश्चैव धृष्टः शर्य्यातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभागो दिष्ट एव च ॥
करूषश्च पृषध्रश्च भूमिपा लोकविश्रुताः ।
मनोर्वैवस्वतस्यैते नव पुत्राः प्रकीर्त्तिताः ॥
वैवस्वतमिदं देवि ! कथितं ते मयान्तरम् ।
अस्मिन् श्रुते नरः सद्यः प्रतिते चैव सत्तम ।
मुच्यते पातकैः सर्व्वैः पुण्यञ्च महदश्नुते ॥"

इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरं समाप्तम् ॥

वैवस्वती, स्त्री, (वैवस्वतस्य इयम् । अण् । ततो ङीप् ।) दक्षिणदिक् । इति राजनिर्घण्टः ॥

वैवाहिकः, पुं, (विवाहाङ्गः । विवाह + ठञ् ।) कन्यापुत्रयोः श्वशुरः । वेयाइ इति बङ्गभाषा ॥ समधी इति हिन्दीभाषा । (तत्पर्य्यायः । सम्बन्धी २ ॥ यथा, कौतुकसर्व्वस्वे । १ ।

"असन्नामसमानतासखसुतावैवाहिक-
ग्रालक-
स्थूकासुकरथया गतवती न्याया तदेया मम।")
विवाहसम्बन्धिनि, त्रि। यथा,—
"पञ्चमे सप्तमे चैव येषां वैवाहिकी क्रिया।
ते च वात्यानिनः सर्व्वे पतिताः शूद्रतां गताः।"
इत्युद्वाहतत्त्वम्॥

अपि च।
"कन्याश्च पितृदत्ताहेयं वैवाहिकं वसु।
अपुत्रकस्य कन्या स्वा धर्म्मेजा पुत्रवद्धरेत्।"
इति दायतत्त्वे देवलः॥
(यथा च मनुः। २। ६७।
"वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः॥")
वैशम्पायनः, पुं, (विशम्पस्य गोत्रापत्यम्। "अश्वादिभ्यः फञ्।" ४। १। ११०। इति फञ्।) मुनिविशेषः। यथा,—
"अथ शिष्यान् प्रजग्राह चतुरो वेदपारगान्।
जैमिनिञ्च सुमन्तुञ्च वैशम्पायनमेव च॥
पैलं तेषां चतुर्थञ्च परमं मां महामुनिः।
ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः।
यजुर्व्वेदप्रवक्तारं वैशम्पायनमेव च॥"
इति कौर्म्मे ४६ अध्यायः॥
स च वचवारकः। यथा,—
"जैमिनिञ्च सुमन्तुञ्च वैशम्पायन एव च।
पुलस्त्यः पुलहश्चैव पञ्चैते वचवारकाः॥"
इति पुराणम्॥
वैशम्पं, क्ली, (विशम्पतिर्धर्म्मोऽस्य। विशम्पति+"ऋतोऽण्।" ४। ४। ३६। इति अण्। तत्र "विशम्पतिरिड्लोपश्च।" इति काशिकोक्त्या इड्लोपः।) अधिकारः। शूद्राभावविशिष्टत्वम्। विगतं शूद्रं यत्र। विपूर्व्वशूद्रशब्दादण्प्रत्ययेन निष्पन्नमिदम्। इति सिद्धान्तकौमुदी॥
वैशाखं, क्ली, (विशाख एव। स्वार्थे अण्।) धनुर्विद्या संस्थानभेदः। यथा,—
"स्थानान्यालीढवैशाखप्रत्यालीढानि मण्डलम्।
समपादश्च————————।"
इति हेमचन्द्रः॥
(यथा, हरिवंशे। २२०। ३३।
"वज्रपातनिभं वेगं पातयित्वा ममोपरि।
भूयः प्रहर्त्तुकामो मां वैशाखेनास्थितो महीम्॥"
पुरविशेषः। यथा, कथासरित्सागरे। ६७।५।
"वैशाखाख्ये पुरे राज्ञः पुत्रावावां हिमाद्रिकौ॥")
वैशाखः, पुं, (विशाखा प्रयोजनमस्य। विशाखा+"विशाखाषाढादिति।" ५। १। ११०। इति अण्।) मत्स्यानदक्षः। (यथा, शिशुपालवधे। १९। ८।
"इतस्तरकरदण्डाः शिखिवैशाखशैले॥"
वैशाखी पौर्णमासी अस्मिन्। "सास्मिन् पौर्णमासीति।" ४। २। २१। इति अण्।)
द्वादशमासान्तर्गतप्रथममासः। तत्पर्य्यायः। माधवः २ राधः ३। इलमरः॥ चान्द्रस्य तस्य लक्षणम्।
"विशाखातारकायुक्ता वैशाखी पूर्णिमा भवेत्।
सा वैशाखी यत्र मासि स वैशाखः प्रकीर्त्तितः॥"
इति शब्दरत्नावली॥
स तु मेषस्थरविकः सौरः। तत्र स्नानफलम्।
"पुमान् विनीतो द्विजदेवभक्तो
धर्म्मस्य कर्त्ता सुजनस्य भर्त्ता।
गुणाभिरामोऽथ जगत्प्रियः स्यात्
वैशाखमासे खलु जन्म यस्य॥"
इति कोष्ठीप्रदीपः॥*॥
अथ वैशाखस्नानम्। तत्र पद्मपुराणम्।
"तुलामकरमेषेषु प्रातःस्नानं विधीयते।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम्॥"
वैद्यवाग्भटे।
"गवामर्द्धप्रसूतानां लक्षं दत्त्वा तु यत् फलम्।
तत् फलं लभते राजन् मेषे स्नात्वा तु भास्करीम्॥"
पितामहः।
"कार्त्तिकस्य तु यत् स्नानं माघे माघि विशेषतः।
लक्षादित्यमागाच्च चान्द्रमानप्रमाणतः॥"
आश्वां कार्त्तिकादिस्नाने सौरचान्द्रयोर्व्विकल्पेनानुष्ठानम्। तच्च चान्द्रमपि द्विविधम्। तथा च विष्णुः।
"दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत्।
पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे॥"
दर्शं दर्शान्तयागसम्बन्धिनीं प्रतिपदमारभ्य त्रिंशत्तिथिम्। नारायणोपाध्यायस्तु दर्शपौर्णमासीति पूर्व्वदिनसङ्ख्यपरमिति। तच्च सौरक्षत्ये राश्युक्तेः कार्य्यः।
"संक्रान्तिविहिते कार्य्ये संक्रान्तिः परिकीर्त्तिता।
मासोक्तेऽपि चैतरस्मिन् रविराशिस्थितिस्तथा॥"
इति गारुडात्॥*॥
ततस्नानोदयकाले मध्यन्दं कृत्वाचम्य उदङ्मुखः ॐ तत् सदित्युच्चार्य्य अद्य वैशाखे मासि अमुकपक्षे अमुकतिथावारभ्य मेषस्थरविं यावत् प्रत्यहं अमुकगोत्रः श्रीअमुकदेवशर्म्मा श्रीविष्णुप्रीतिकामः प्रातःस्नानमहं करिष्ये। इति। गङ्गायान्तु अर्द्धप्रसृतगवीलक्षदानजन्यफलसमफलप्राप्तिकामो विष्णुप्रीतिकामो वा इति सङ्कल्प्य यथोक्तविधिना स्नायात्। प्रतिदिनसङ्कल्पे तु आरभ्य मेषस्थरविं यावत् प्रत्यहमिति न वक्तव्यं किन्तु मासीत्यनन्तरं मेषराशिस्थरवौ इत्यधिकं वक्तव्यम्। चान्द्रे तु मास्यनन्तरं शुक्लपक्षे प्रतिपदि तिथावारभ्य दर्शपर्य्यन्तमित्यूहनीयम्। प्रतिदिनसङ्कल्पे त्वारभ्य प्रत्यहमित्यन्तं न वक्तव्यम्। एवं कृष्णप्रतिपदारम्भे ऊहनीयम्। एवं मासान्तरे योजनीयम्। सङ्कल्पाकरणे फलहानिमाह भविष्यपुराणम्।
"सङ्कल्पेन विना राजन् यत्किञ्चित् कुरुते नरः।
फलञ्चाल्पाल्पकं तस्य धर्म्मस्यार्द्धक्षयो भवेत्॥"*
महार्णवे।
"यो ददाति हि मेषादौ शुक्लानम्बुघटान्वितान्।
पितॄनुद्दिश्य विप्रेभ्यः सर्व्वपापैः प्रमुच्यते॥
विप्रेभ्यः पादुकां छत्रं पितृभ्यो विष्णवे शुभम्।"
पितृभ्यः पितृनुद्दिश्य। अत्र विष्णुरहस्यम्।
"अयने कोटिगुणितं लक्षं विष्णुपदोदृ च।
षड्शीतिसहस्रन्तु षड्शीत्यामुदाहृतम्॥
शूलमिन्दुक्षये पुण्यं सहस्रन्तु दिनक्षये।
विषुवे शतसाहस्रमा-का-मा-वैधनन्तकम्॥"
इति मत्स्यपुराणोक्तशतसहस्रगुणितसत्कर्म्मफलजनकत्वेन विवक्षणीयत्वान्मेषादाविवापि विषुवसंक्रान्तिपुण्यकालपरम्। अन्यथा कालद्वयकल्पनापत्तेः। व्यवहारोऽपि तथा॥*॥ संक्रमणपुण्यकालस्तु दिनसंक्रमणे क्षतृत्वं दिनम्।
"षड्शीतिमुखेऽतीते वृत्ते च विषुवद्वये।
भविष्यत्ययने पुण्यमतीते चोत्तरायणे॥"
इति तु पुण्यतरकालपरं दिनवृत्तोत्तरायणादि विहितविष्णुसिद्धादीनां रात्रिप्रविष्टभागस्यापि पुण्यत्वम्। रात्रिसंक्रमे तु दण्डन्यूनप्रथमयामद्वयाभ्यन्तरे तद्दिवसीयशेषयामद्वयं पुण्यम्। दण्डद्वयात्मकमध्यरात्रे तद्दिवसीयतिथेरभेदे तद्दिवसीयशेषयामद्वयं पुण्यम्। भेदे तु तद्दिवसीयशेषयामद्वयं पुण्यं परदिवसीयाद्ययामद्वयञ्च। तिथ्यभेदभेदयोर्दृश्यायने तद्दिवसीयशेषयामद्वयम्। उत्तरायणे परदिवसीयशेषयामद्वयम्। दण्डाधिकशेषार्द्धरात्रिसंक्रमणे परदिनाद्ययामद्वयम्। सन्ध्यासंक्रमणे तु दिनदण्डे दिनस्य रात्रिदण्डे रात्रेर्व्यवस्थेति॥*॥ संक्रान्त्यां स्नानमाद्यक्षणम्। अनिष्टसंक्रमणे तु तद्दोषशान्त्यर्थं धुस्तूरबीजसलिलेन सर्व्वौषधिजलेन च स्नानं विष्णुपूजनं तन्मन्त्रजपः। संक्रान्तिकाल एव क्षौतैलमांसवर्জ্জनम्। इन्दुक्षयेऽमावास्यायाम्। दिनक्षये तिथिक्षये। आ-का-मा-वैषु आषाढकार्त्तिकमाघवैशाखपौर्णमासीषु॥*॥ ततः स्नातस्नानादिः प्राङ्मुखं उदङ्मुखं ब्राह्मणं गन्धपुष्पाभ्यां पूजयित्वा जलघटान्वितशूलुंश्च जलघटान्वितशूलुभ्यो नमः इति पूजयित्वा ब्राह्मणहस्ते जलं दत्त्वा घटं संप्रोक्ष्य वामहस्ते कृत्वा कुशत्रयतिलजलान्यादाय ॐ तत् सदित्युच्चार्य्य ॐ अद्य वैशाखे मास्यमुकपक्षेऽमुकतिथौ महाविषुवसंक्रान्त्यां अमुकगोत्रस्य पितुरमुकदेवशर्म्मणः सर्व्वपापविमुक्तिकामः एतान् जलघटान्वितशूलून् विष्णुदेवताकान् अमुकगोत्राय अमुकदेवशर्म्मणे ब्राह्मणाय तुभ्यमहं संप्रददानीति ब्राह्मणहस्ते जलं दद्यात् ब्राह्मणस्तु दक्षिणहस्ततलमध्यभागमेयतीर्थेन ओमित्यनेन गृहीत्वा स्वशीर्षोक्षा गायत्रीं कामस्तुतिञ्च पठेत्। जलघटान्विताः शूलवो विष्णुदेवताकाः। इति वदेत्। ततो दक्षिणां दद्यात्। यथा ॐ अद्ये-

त्यादि ब्रूनेतत् जलघटान्वितशक्तुदानकर्मणः प्रीतयर्थं दक्षिणां किंचित् काञ्चनसूत्रं ब्राह्मणायाहं ददानीति। ततः अच्छिद्रावधारणम्। ब्राह्मणविशेषानुपदेशे यथासम्भवमोजनार्थं ब्राह्मणायेति विशेषः। तत्र ब्राह्मणासन्निधाने तुभ्यमिति न देयम्। भूमौ त्यागजलप्रक्षेपः। एवमन्यत्रापि सम्प्रदेय इति वाक्ये विशेषः। सत्पात्राभावे तत्सत्त्वेऽपि तत्तत्कामो विष्णुप्रीतिकामो वा विष्णवे दत्त्वा ब्राह्मणाय पश्चात् प्रतिपादयेत्।

"देवे दत्त्वा तु दानानि देवे दत्त्वा तु दक्षिणाम्।
तत् सर्वं ब्राह्मणे दद्यादन्यथा निष्फलं भवेत्।"
इति मत्स्यसूक्तात्॥

दत्त्वेत्यत्र देयानीति वाराहीये पाठः॥ * ॥

"वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने।
ददात्यशुङ्का राजेन्द्र स याति परमां गतिम्॥"

अत्रापि यथायोग्यं संपूज्य पूर्ववद्वाक्येन मनोरथफलार्थिना सभोज्यघटो देयः॥* स्मृतिः।

"मेषादौ शक्तवो देया वारिपूर्णा च गर्गरी।"

तत्रापि यथायोग्यं संपूज्य पूर्ववत् वाक्यं श्रुत्वा पठेत्

"ॐ एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः॥"
इति मन्त्रलिङ्गान्मनोरथफलत्वं ज्ञेयम्॥*॥ श्रुतिचिन्तामणौ।

"मस्करं निम्बपत्राभ्यां योऽत्ति मेषगते रवौ।
अपि रोगान्वितस्तस्य तक्षकः किं करिष्यति॥"

उत्तरार्द्धं तु।

"मेषस्थे च विधौ तत्र नास्यङ्गे विषजं भयम्॥"
इति संवत्सरप्रदीपे पाठः॥

ततश्च मेषस्थरविस्थितिकाले मस्करं निम्बपत्रद्वयञ्च भक्षयेत्॥ * ॥ भविष्ये।

"या शुक्ला नरशार्दूल वैशाखे मासि वै तिथिः।
तृतीया साक्षया ख्याता गौर्व्याजैरपि वन्दिता॥
योऽस्यां ददाति करकान् वारिवाजसमन्वितान्।
स याति पुरुषो वीर लोकान् वै हेममालिनः॥"

वाजमन्नम्। हेममालिनः सूर्यस्य। ततो जलान्नसमन्वितकरकदाने सूर्यलोकगमनं फलम्। दानानुष्ठानं पूर्ववत्॥ * ॥ ब्रह्मपुराणम्।

"वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम्।
कार्त्तिके शुक्लपक्षे च त्रेता च नवमेऽहनि॥
अथ भाद्रपदे मासि त्रयोदश्यान्तु द्वापरम्।
माघे तु पौर्णमास्यान्तु घोरं कलियुगं स्मृतम्॥
युगारम्भास्तु तिथयो युगाद्याख्येन विश्रुताः॥"

तत्र वैशाखादयः पौर्णमास्यन्ता एव तथैव तिथिशब्दाभिधानात्। सुखबोधिन्यां कार्त्तिके नवमेऽहनीति सिद्धौ शुक्लपक्ष इति वर्णं स्यात्॥* आसां प्रशंसामाह विष्णुपुराणम्।

"एता युगाद्याः कथिताः पुराणै-
रनन्तपुण्याक्षयकारणत्वात्।
उपप्लवे चन्द्रमसो रवेश्च-
व्यतीपाताक्षयनद्वये च॥

पानीयमप्यत्र तिलैश्च मिश्रं
दद्यात् पितृभ्यः प्रणतो मनुष्यः।
आद्यं कृतं तेन समाः सहस्रं
रहस्यमेतत् पितरो वदन्ति॥"

उपप्लवे ग्रहणे। * ॥ देवीपुराणम्।

"युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता॥"*॥

अक्षयतृतीयामधिकृत्य ब्रह्मपुराणम्।

"तस्यां कार्य्यो यवैर्होमो यवैर्विष्णुं समर्चयेत्।
यवान् दद्यात् द्विजातिभ्यः प्रयतः प्राश्नयेद्यवान्॥
पूजयेच्छङ्करं गङ्गां केलासञ्च हिमालयम्।
भगीरथञ्च नृपतिं सागरार्थं सुखावहम्॥"*॥

स्कान्दे।

"वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता।
तत्र मां लेपयेन्नित्यैर्लेपनैरतिशोभनैः॥"
मां जगन्नाथम्॥ * ॥ अन्यत्रापि।

तथा च जगन्नाथस्नानमधिकृत्य भविष्ये।

"संवत्सरफलं राजन् नवम्यां कार्त्तिके तथा।
मन्वादौ च युगादौ च मासत्रयफलं भवेत्॥"*

मन्वादयस्तु भविष्यमात्स्ययोः।

"अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा।
तृतीया चैत्रमासस्य यथा भाद्रपदस्य च।
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा।
आषाढ़स्यापि दशमी तथा माघस्य सप्तमी॥
श्रावणस्याष्टमी कृष्णा तथाषाढ़स्य पूर्णिमा।
कार्त्तिकी फाल्गुनी चैत्री ज्येष्ठी पञ्चदशी
तिथाः॥

मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः॥"

अमावास्याष्टमीव्यतिरिक्ताः शुक्लाः; उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनात्॥ * ॥ नारदीये।

"वैशाखे शुक्लपक्षे तु द्वादशी रेवती तिथिः।
तस्यां शीतलतोयेन स्नापयेत् केशवं शुचिः॥"

इयं पितृतीकद्वादशी। नात्र युग्मादरापेक्षा। तत्र विष्णुपूजने उपवासोत्तरविधानात्॥ * ॥

अथ यवान्नमाह। तत्र वैशाखशुक्लपक्षे कृत्तिकाभिशुक्रेतरवारे गन्दारिस्त्रीक्षयोदशीतरतिथौ जन्मचन्द्राष्टमचन्द्रजन्मतिथिजन्मनक्षत्रक्षयपक्षमनाराक्षयेतरेषु पूर्वफल्गुनीपूर्वभाद्रपदपूर्वाषाढ़ामघाभरण्यश्लेषार्द्रेतरनक्षत्रेषु यवस्नानं कर्त्तव्यम्। तत्रैवभोजनन्तु एतादृगतिथिद्वायां विष्णुवसंक्रान्तौ अक्षयतृतीयायाञ्च विशेषतः कर्त्तव्यम्। वैशाखाकरणे ज्येष्ठशुक्लपक्षे आषाढ़शुक्लपक्षे च हरिशयनेतरत्र कर्त्तव्यम्। इति श्रुततत्त्वम्॥ * ॥ * ॥ अथ वैशाखमाहात्म्यम्।

"ये कार्त्तिकव्रतपरा ये माघपरिनिष्ठिताः।
ये वैशाखव्रताश्चक्रुस्तेषां तुष्टः सदा हरिः॥
सर्वेषामेव मासानां वैशाखः प्रवरः स्मृतः।
पुरा हरिसखे राजन् श्रुतमेतन्न संशयः॥
तत्र स्नानं जपो होमः स्नाद्यं दानादि यत् कृतम्।

तत् सर्वं भूपतिश्रेष्ठ सत्यमक्षयमुच्यते॥
एकतः सर्वतीर्थानि सर्वे यज्ञाः सदक्षिणाः।
भूप वैशाखमासाद्य कोट्यंशेनापि नो समाः॥
मेरुतुल्यानि हेमानि सर्वदानानि चैकतः।
एकतः सर्वदा भूप माधवो माधवप्रियः॥
असंख्यानि च पापानि बहुजन्मार्जितानि च।
निमेषार्द्धेन राजेन्द्र विलयं यान्ति माधवे॥
वैशाखमागतं दृष्ट्वा पितृणामासुतो भवेत्।
पुत्रो नियममाचर्य्य अक्षय्यमुदकरिष्यति॥
आगतं माधवं दृष्ट्वा कम्पन्ते पापसञ्चयाः।
अस्माकं नाशकालोऽयं भूपते ध्रुवमागतः॥
वैशाखं परमं मासं माधवस्येति हे प्रियम्।
नियमेन समाचर्य्य न भूयो जायते नरः॥
मनसा संस्मरेद्यस्तु नियमं माधवोद्भवम्।
पूयते पातकैः सर्वैः शक्रेण सह मोदते॥
वचसा यो वदेद्भूप वैशाखं माधवप्रियम्।
अहं समाचरिष्यामि स गच्छेद्ब्रह्मणः पुरम्॥
यः समाचरते भूप नियमेन तु माधवम्।
स विष्णो रूपमासाद्य विष्णुना सह मोदते॥
नियमेन समाचर्य्य एकाहमपि भूपते।
पितरस्तारितास्तेन यास्यन्ति परमां गतिम्॥
तस्मिन् स्नात्वा विशुद्धात्मा दम्भमात्सर्यवर्जितः।
ईप्सितान् लभते कामान् श्रीविष्णोर्देयितो भवेत्॥
ब्रह्महो वा कृतघ्नो वा मित्रघ्नश्चैवविधातकः।
नियमेन नयेन्मासं स मुक्तः सर्वपातकात्॥
पातकानामेकमेव प्रायश्चित्तं विदुर्बुधाः।
सर्वपापसमूहानां नात्र कार्य्या विचारणा॥
वैशाखस्नायिनो लोकाः श्रीविष्णुसेवनोत्सुकाः।
पापं न तेषां मतिमाश्रित्य लोके परत्र च॥
सर्वस्वदानं विधिवत् सर्वदा परिशोधनम्।
चान्द्रायणञ्च विधिना कृच्छ्रं चैवातिकृच्छ्रकम्॥
पुण्यक्षेत्राभिगमनं सर्वपापप्रणाशनम्।
देवताभ्यर्चनं चैव तथैवातिथिसेवनम्॥
कदापि यैर्नाचरितं वाङ्मनःकायकर्मभिः।
संप्राप्य ते तु कुर्वन्तु माधवे नियमं नराः॥
समाचरन्ति ये मासं माधवं कृतभुक्तयः।
सदा प्रीतिमवाप्नोति श्रीस्त्रियो देवकीसुतः॥
या नारी विधवा भूत्वा माधवे नियमं चरेत्।
कुलायुतसहस्राणि नयते परमं पदम्॥
पुत्रेणापीह किं कार्यं येन नाचरितं नृप।
वैशाखं पुत्रशतकात् नारी धन्या हरिप्रिया॥
यो माधवेऽर्चयेद्राजन् गोविन्दं गोपवल्लभम्।
न तस्य विद्यते संख्या पूजनस्य फलस्य च॥
वैष्णवस्य तु धर्मस्य पारं गन्तुं यदीच्छसि।
नरेन्द्र माधवं मासं नियमेन समाचर॥
किं करिष्यति सांख्येन योगेन नरनायक।
मुक्तिमिच्छसि चेद्राजन् माधवं माधवोद्भवम्॥
अभक्तसम्भवं राजन् कुप्रतिग्रहसम्भवम्।
तत्पापं संक्षयं याति माधवे नियमे कृते॥
रवौ यदि रिपुं हेतुं लभिच्छसि नराधिप।
नियमेन सदा विष्णोः प्रियं माधवमाचर॥
यदि सांसारिकं दुःखं हन्तुमिच्छसि भूमिप।

तदा नियममास्थाय माधवे माधवं भज ॥
राज्यभोगांश्च विपुलान् पुत्रमित्रादिसम्पदम् ।
यदिच्छसि तदा विष्णोः प्रियं माधवमाचर ॥
त्यक्तुमिच्छसि राजेन्द्र जन्मदुःखजरादिकम् ।
भयं यदि तदा विष्णोः प्रियं माधवमाचर ॥
यैर्नाचरितो मासो माधवः पापबुद्धिभिः ।
नरकान्न निवर्त्तन्ते दग्धाः कोपाग्निना हरेः ॥
न वैशाखसमो मासो विष्णोः केशवप्रियः ।
अव्रतेन त्वियेदृस्तु तं विद्यान्निष्फलात्मज ॥
यतिश्च विधवा चैव विष्णोर्यश्च वनाश्रमी ।
वैशाखे नरकं याति लङ्घित्वा नियमं नरः ॥
तस्मादाजन् प्रयत्नेन कुरु त्वं माधवव्रतम् ।
यस्याचरणमात्रेण हरिस्तुष्टो भविष्यति ॥
तावद्गर्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले ।
यावन्नायाति राजेन्द्र माधवो माधवप्रियः ॥
अणुमात्रन्तु यत्किञ्चिद्दयो ददाति च माधवे ।
काले वा यदि वाकाले कोटिकोटिगुणं भवेत् ॥
ययोदधीनां राजर्षे ! क्षयो नैवोपपद्यते ।
तथैव माधवे मासि न क्षयं पापपुण्ययोः ॥
नाचरि धर्म्माचरणेन माधवं
नाराधितो यैः पुरुषप्रधानः ।
यैर्न श्रुता भूप कथा सुरारे-
स्तेषां वृथा जन्म नराधमानाम् ॥
न पीडयन्ति यद्दाक्षसा गणा
यक्षाः पिशाचोरगभूतदानवाः ।
यो माधवे मासि नरेन्द्रवर्य
ध्रुवं सुरारेर्दयितं चरन्ति ह ॥"

इति पाद्मोत्तरखण्डे वैशाखमाहात्म्यकथने १६८ अध्यायः ॥

वैशाखी, स्त्री, (विशाखया युक्ता पौर्णमासी । "नक्षत्रेण युक्तः कालः ।" ४ । २ । ३ । इत्यण् । ततो ङीप् ।) वैशाखमासस्य पूर्णिमा । यथा,

"विशाखातारकायुक्ता वैशाखी पूर्णिमा भवेत् ।"

इति शब्दरत्नावली ॥

तत्र तर्पणफलम् । वैशाखीसुपक्रम्य यमः ।

"गौरान् वा यदि वा छागान् तिलान् चौद्रेण संयुतान् ।
प्रीयतां धर्म्मराजेति पितॄन् देवांश्च तर्पयेत् ॥
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ।
अन्दायुतञ्च तिष्ठेत्तु स्वर्गलोके न संशयः ॥"

इति तिथ्यादितत्त्वम् ॥*॥

रक्तपुनर्नवा । इति राजनिर्घण्टः । (वसुदेवस्य स्त्रीभामन्यतमा । यथा, हरिवंशे । ३५ । २ ।

"वैशाखी च तथा भद्रा सुनामा चैव पञ्चमा ॥")

वैशिकः, पुं, (वेशेन जीवतीति । वेश्य + "वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठक् ।) त्रिविधनायकान्तर्गतनायकविशेषः । यथा,—

शृङ्गारस्य उभयसाध्यत्वान्नायकोऽपि निरूप्यते । स च त्रिविधः । पतिरुपपतिर्वैशिकश्च । बहुवेष्याभोगोपरसिको वैशिकः । यथा,—

"काञ्चीकलक्वणितकोमलगाङ्गिकान्तिं
प्रारावतध्वनिविचित्रितकण्ठपालिम् ।
उद्भ्रान्तलोचनचकोरमनङ्गरङ्ग-
माग्नाशते कमपि वारविलासवत्या ॥"*॥

वैशिकसूत्रमध्यमाधममेदात् त्रिविधः । दयिताऽमप्रकोपे अपि उपचारपरायणः उत्तमः । यथा,—

"चक्षुःप्रान्तसुदीक्ष्य पक्ष्मलदृशः श्रोणारविन्दश्रियं
नोचैर्जल्पति न क्षितं वितनुते यद्याति वीर्द्धीं न वा ।
तल्पोपान्तसुपेत्य किन्तु पुलकव्याजत्कपोलद्युतिः
कान्तः केवलमानतेन शिरसा सुक्ताञ्जलं गुम्फति ॥"*॥

प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं जानाति स मध्यमः । यथा,—

"आस्यं यद्यपि हास्यवर्ज्जितमिदं लास्येन हीनं वचो
नेत्रं श्रोणसरोरुहान्तिरुचिरे नापि भ्रुवं क्षीयते ।
मालायाः करशोभनो न कविकारम्भः कुचाभोगयो-
र्धूपः कुन्तलधोरणीषु सुतनोः सायन्तनो दृश्यते ॥"*॥

अयत्नपालब्धामूल्यः कामक्रीडायामत्यन्तलज्जाऽत्यविचारोऽधमः । यथा,—

"उद्यति हृदि नैव यस्य लज्जां
न च करुणा न च कोऽपि भीतिलेशः ।
वकुलसुकुलकोमलां मां
पुनरपि तस्य करेण ताडयेथाः ॥"*॥

मानी चतुरः प्रौढ एवान्तर्भवति । मानी यथा,

"बाह्याकूतपरायणं तव वचो वक्षोरुहौ मत्सखी
श्रुत्वा वाचमिमामपास्य विनयं याताद्दृढिः
प्रस्थिते ।
प्रातर्व्वक्त्रविलोकने परिहृतालापे विवृत्ताननै
प्राणेशे नियतं पतन्ति हृदया वामभ्रुवो
दृढयः ॥"

वाक्चेष्टायङ्गसमागमस्तुरः । वचनयङ्गसमागमो यथा,—

"तमोजटाले हरिदन्तराले
काले निशायाश्च निगर्ततायाः ।
तटे नदीनां निकटे वनानां
घटेत प्रातोदरि ! कः सहायः ॥"

चेष्टायङ्गसमागमो यथा,—

"कान्ते कनकचम्पकैः करे कमपि कुर्व्वति ।
अगारलिखिते भानौ बिन्दुभिस्तुखौ दधौ ॥"

इति रसमञ्जरी ॥

(वेशसम्बन्धिनि, त्रि । यथा, मृच्छकटिके । १ अङ्के ।

"ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षां
ज्ञात्वा शूद्रकप्रासादात् अपगततिमिरे चक्षुषी चोपलभ्य ॥")

वैशिष्टं, क्ली, (विशिष्टस्य भावः ।) विशिष्टत्वम् । तत्तु सम्बन्धपदार्थः । विशिष्टधीनियामक इति यावत् । यथा । "विशिष्टवैशिष्ट्यात्प्रत्युपगमवादः ।" इति शिरोमणिः । दण्डसंयोगवान् इति ज्ञानबोधो न विशिष्टवैशिष्ट्यावगाही । खले कपोतन्यायेनैव तत्स्वीकारात् । इति भावः । इति जागदीशी सामान्यलक्षणा ॥ * ॥ (असाधारणत्वम् । यथा, महाभारते । १३ । १५८ । ४९ ।

"त्रिषु लोकेषु तावच्च वैशिष्टं प्रतिपत्स्यसे ।
सुप्रियः सर्व्वलोकस्य भविष्यसि जनार्द्दन ॥")

वैशेषिकः, पुं, (विशेषं वेत्ति अधीते वा । विशेष + ठक् ।) कणादमुनिप्रणीतदर्शनशास्त्रवेत्ता । तत्पर्य्यायः । औलुक्यः २ । इति हेमचन्द्रः ॥ (विशेषमधिकृत्य कृतो ग्रन्थः । विशेष + "अधिकृत्यकृते ग्रन्थे ।" ४ । ३ । ८७ । इति ठक् ।) कणादमुनिप्रणीतदर्शनशास्त्रविशेषः । स तु विशेषपदार्थनिरूपकग्रन्थः । अस्य मतं न्यायदर्शनमततुल्यम् । अत्र जगतः कारणं परमाणुपर्य्यन्तं निरूपितम् ॥ * ॥ इह खलु निखिलप्रेक्षावन्निसर्गप्रतिकूलवेदनीयतया निखिलात्मसंवेदनसिद्धं दुःखं जिहासतत्तद्धानोपायं जिज्ञासुः परमेश्वरसाक्षात्कारमुपायमाकलयति ।

"यदा चर्म्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥"

इत्यादिवचनविषयप्रामाण्यात् । परमेश्वरस्य साक्षात्कारश्च श्रवणमननभावनाभिर्भावनीयः । यदाह ।

"आगमेनानुमानेन ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥"

इति ॥

तत्र मननमनुमानाधीनम् । अनुमानञ्च व्याप्तिज्ञानाधीनम् । व्याप्तिज्ञानञ्च पदार्थविवेकसापेक्षम् । अतः पदार्थषट्कम् "अथातो धर्म्मं व्याख्यास्यामः ।" इत्यादिकार्य्यां दशलक्षण्यां कणभक्षेण भगवता व्यवस्थापि । तच्चाह्निकद्वयात्मके प्रथमेऽध्याये समवेतार्थेषपदार्थकथनमकारि । तत्रापि प्रथमाह्निके जातिमन्निरूपणम् । द्वितीयाह्निके जातिविशेषयोर्निरूपणम् । आह्निकद्वयात्मके द्वितीये भूतदिक्कालनिरूपणम् । तत्रापि प्रथमाह्निके भूतविशेषनिरूपणम् । द्वितीये दिक्कालप्रतिपादनम् । आह्निकद्वयात्मके तृतीये आत्मान्तःकरणनिरूपणम् । तत्राप्यात्मनिरूपणं प्रथमे । द्वितीये अन्तःकरणनिरूपणम् । आह्निकद्वयोपेते चतुर्थे शरीरतदुपयोगिविवेचनम् । तत्रापि प्रथमे तदुपयोगिविवेचनम् । द्वितीये शरीरविवेचनम् । आह्निकद्वयवति पञ्चमे कर्म्मप्रतिपादनम् । तत्रापि प्रथमे शरीरसम्बन्धिकर्म्मचिन्तनम् । आह्निकद्वयशालिनि षष्ठे औषधर्म्मनिरूपणम् । तत्रापि प्रथमे दानप्रति-

यहधर्म्मविवेकः। द्वितीये चातुराश्रम्योचितधर्म्मनिरूपणम्। तथाविधे सप्तमे गुणसमवायप्रतिपादनम्। तत्रापि प्रथमे बुद्धिनिरूपेच्छागुणप्रतिपादनम्। द्वितीये तत्प्रयत्नगुणप्रतिपादनं समवायप्रतिपादनञ्च। अष्टमे निर्व्विकल्पकसविकल्पकप्रत्यक्षप्रमाणचिन्तनम्। नवमे बुद्धिविशेषप्रतिपादनम्। दशमे अनुमानप्रतिपादनम्। तत्र उद्देशो लक्षणं परीक्षा चेति त्रिविधास्य ग्रन्थस्य प्रवृत्तिः। इति वैशेषिकग्रन्थविवरणम्॥ *॥

(न्यायमते आत्मादिगतपारिभाषिकगुणः। यथा, भाषापरिच्छेदे।

"बुद्ध्यादिवाद्यं सङ्ख्यान्ता: खेदः सांसिद्धिकोद्रवः।
अदृष्टभावना ग्रन्थाः अमी वैशेषिका गुणाः॥")

विशेष एव। "विनयादिभ्यष्ठक्।" ५। ४। ३४। इति स्वार्थे ठक्॥ असाधारणे, त्रि। यथा, महाभारते। ७। ५। १५।

"युगपत्तु ते शक्या कर्त्तुं सर्व्वे पुरःसरा।
एक एव तु कर्त्तव्यो यस्मिन् वैशेषिका गुणाः॥")

वैश्यः, पुं, (विश् + ष्यञ्।) ब्रह्मोरुदेशजातस्तृतीयवर्णः। (यथा, ऋग्वेदे। १०। ९०। १२।

"ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥")

तत्पर्य्यायः। ऊरजः २ ऊरुजः ३ अर्य्यः ४ भूमिस्पृक् ५ विट् ६। इत्यमरः॥ द्विजः ७। इति जटाधरः॥ भूमिजीवी ८। इति शब्दरत्नावली। अथवर्शो ९ वार्त्तिकः १० वणिकः ११ पणिकः १२। इति राजनिर्घण्टः॥ प्लक्षद्वीपे अस्य संज्ञा ऊर्जायनः। शाल्मलद्वीपे वसुन्धराः। कुशद्वीपे अभिभुक्तः। क्रौञ्चद्वीपे द्रविणः। शाकद्वीपे दानव्रतः। पुष्करद्वीपे सर्व्वे एकवर्णाः। इति भागवतमतम्॥ अस्य शास्त्रनिरूपितधर्म्माश्चयः। अध्ययनम् १ यजनम् २ दानम् ३। पशवो जीविकाः। कृषिः १ गोरक्षणम् २ वाणिज्यम् ३ कुशीदम् ४। अस्याश्रमाश्चयः। ब्रह्मचर्य्यम् १ गार्हस्थ्यम् २ वानप्रस्थम् ३। तस्य कर्त्तव्यादिर्यथा,—

"विप्रवत्त्वापि पशुभिश्च कृष्यादानरुचिः शुचिः।
वेदाध्ययनसम्पन्नः स वैश्य इति संज्ञितः॥
वैश्यस्य च प्रवक्ष्यामि यो धर्म्मो वेदसम्मतः।
दानमध्ययनं शौचं यज्ञश्च धनसञ्चयः॥
पालयेच्च पशून् वैश्यः पितृवद्धर्म्ममास्थितः।
विकर्म्म तद्भवेदन्यत् कर्म्म यत् स समाचरेत्॥
रक्षया स हि तेषां वै महत् सुखमवाप्नुयात्।
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे प्रजाः॥
ब्राह्मणेभ्यश्च राज्ञे च सर्व्वाः परिददे प्रजाः।
तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्॥
यस्यामेका पिबेद्धेनुं धृताक्तं मिथुनं भवेत्।
जन्माद्य सप्तमं भागं तथा षड्भिकलञ्चरेत्॥
धान्यानां सर्व्वबीजानि एवा सांवत्सरी भृतिः।
न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति॥
वैश्यो रक्षति नान्येन रक्षितव्याः कथञ्चन।"
इति पाद्मे स्वर्गखण्डे वर्णविभागः २६ अः॥

अन्यच्च।

"दानमध्ययनं यज्ञो धर्म्मः क्षत्रियवैश्ययोः।
रक्षणन्तथा क्षत्रियस्य कृषिर्वैश्यस्य शस्यते॥
स्थानमैन्द्रं क्षत्रियाणां संग्रामेष्वपलायिनाम्।
वैश्यानां मारुतं स्थानं स्वधर्म्ममनुवर्त्तताम्॥"
इति गारुडे ४६ अध्यायः॥

(वैश्यसम्बन्धिनि, त्रि। यथा, महाभारते। १२। ६२। ४।

"क्षात्राणि वैश्यानि च सेवमानः
शौद्राणि कर्म्माणि च ब्राह्मणः सन्।
अस्मिल्लोके निन्दितो मन्दचेताः
परे च लोके निरयं प्रयाति॥")

वैश्या, स्त्री, (वैश्य + टाप्।) वैश्यजातिस्त्री। तत्पर्य्यायः। अर्य्याकी २ अर्य्या ३। इति जटाधरः॥ (यथा, मनौ। ८। ३८२।

"वैश्यावेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्॥")

वैश्रवणः, पुं, (विश्रवणस्यापत्यम्। "शिवादिभ्योऽण्।" ४। १। ११२। इति अण्।) कुबेरः। इत्यमरः॥ (यथा, महाभारते। २। १०।२।

"तपसा निर्म्मिता राजन् स्वयं वैश्रवणेन सा॥"

शिवः। यथा, महाभारते। १३। १७। १०३।

"धन्वन्तरिर्धर्म्मकेतुः स्कन्दो वैश्रवणस्तथा॥")

वैश्रवणालयः, पुं, (वैश्रवणस्यालयः।) वटवृक्षः। इति हैमचन्द्रः॥ (यथा, देवीभागवते। ७। ३०। ८१।

"अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये॥")

कुबेरपुरी च॥

वैश्रवणावासः, पुं, (वैश्रवणस्यावासः।) वटवृक्षः। इति जटाधरः॥ कुबेरगृहञ्च॥

वैश्रवणोदयः, पुं, (वैश्रवणस्योदयो यस्मिन्।) पटवृक्षः। इति रत्नमाला॥

वैश्वदेवः, पुं, (विश्वदेवस्यायम्। विश्वदेव + अण्।) विश्वदेवसम्बन्धिनीमादिः। यथा,—

ब्रह्मोवाच।

"वैश्वदेवं प्रवक्ष्यामि होमलक्षणमुत्तमम्।
पर्य्युप्तमग्निं पर्य्युक्ष्य। क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः। इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्। ॐ पावक वैश्वानर इदमासनम्। अवनीगर्भसंस्कृतः तेजोरूपो महाब्रह्मब्रह्मसंस्कृतांश्चिद्धि वैश्वानरं प्रतिबोधयामि। वैश्वानरोऽव उभयं प्रावातु परावतः। अग्निर्मुखातृतीयपृष्ठे दिवि पृष्टोऽग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश। वैश्वानरः सहसा पृष्टोऽग्निः स नोऽग्निः सं दिवा सं क्षत्रात्तु नक्तं ॐ प्रजापतये स्वाहा। सोमाय स्वाहा। इन्द्रसूतये स्वाहा। अग्नीषोमाभ्यां स्वाहा। इन्द्राग्नीभ्यां स्वाहा। द्यावापृथिवीभ्यां स्वाहा। धन्वन्तरये स्वाहा। इन्द्राय स्वाहा। विश्वेभ्यो देवेभ्यः स्वाहा। भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। भूर्भुवः स्वः स्वाहा। दैवकृतस्यैनसोऽवयजनमसि स्वाहा। मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा। पितृकृतस्यैनसोऽवयजनमसि स्वाहा। आत्मकृतस्यैनसोऽवयजनमसि स्वाहा। एनस एनसोऽवयजनमसि स्वाहा। यद्वाह मे विदांश्चकार यद्वाविदांस्तस्य सर्व्वस्यैनसोऽवयजनमसि स्वाहा। अग्नये क्षिप्रिकृते स्वाहा। सूर्य्याय स्वाहा। प्रजापतये स्वाहा। वनस्पतये स्वाहा। अद्भ्यः स्वाहा। ओषधिवनस्पतिभ्यः स्वाहा। गृहाय स्वाहा। देहदेवताभ्यः स्वाहा। वास्तुदेवताभ्यः स्वाहा। इन्द्राय स्वाहा। इन्द्रपुरुषेभ्यः स्वाहा। यमाय स्वाहा। यमपुरुषेभ्यः स्वाहा। वरुणाय स्वाहा। वरुणपुरुषेभ्यः स्वाहा। सोमाय स्वाहा। सोमपुरुषेभ्यः स्वाहा। ब्रह्मणे स्वाहा। ब्रह्मपुरुषेभ्यः स्वाहा। विश्वेभ्यो देवेभ्यः स्वाहा। सर्व्वेभ्यो भूतेभ्यः स्वाहा। दिवाराचिभ्यः स्वाहा। रक्षोभ्यः स्वाहा। स्वधा पितृभ्यः स्वाहा। ये भूताः प्रचरन्ति दिवा चरन्ति दिवाचरमिच्छन्तो भुवनस्य मध्ये तेभ्यो बलिं पृथिवीमो ददामि। मयि पृथिं पृथिपतिर्ददातु। स्वाहाकालपतितवायसेभ्यः।" इति गारुडे वैश्वदेवविधिः २१६ अध्यायः॥ *॥ तस्य प्रयोगो यथा। पूर्व्वाभिमुखः शुचिरुपवीती कुशहस्तः कुशासनोपविष्टः कर्त्ता घृताक्तं दुग्धाक्तं तैलाक्तं जलाक्तं अन्नं आमान्नं वा फलं जलं वा जुहुयात्। यथा जले ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। ॐ भूर्भुवः स्वः स्वाहा। ॐ दैवकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ पितृकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ आत्मकृतस्यैनसोऽवयजनमसि स्वाहा। ॐ यद्दिवा च नक्तञ्चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ यत् स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ एनसः एनसोऽवयजनमसि स्वाहा। ॐ अग्नये क्षिप्रिकृते स्वाहा। इत्यनेन जुहुयात्। इति वैश्वदेवकर्म्म। इत्याह्निकप्रयोगतत्त्वम्॥

(विश्वदेव एव। स्वार्थे अण्। गणदेवतादिशब्दः। बन्धुभिरकृतविवाहश्चैव वैश्वदेवलोकप्राप्तिः। यथा, मनौ। ३। १८२।

"यामयोऽश्वसां लोके वैश्वदेवस्य बान्धवाः।
सम्बन्धिनो ऋषां लोके पृथिव्यां मातृमातुलौ॥"

विश्वदेवसम्बन्धिनि, त्रि। यथा, महाभारते। १२। ३०१। ८।

"आसुरान् विषयान् ज्ञात्वा वैश्वदेवांस्तथैव च॥")

वैश्वानरः, पुं, (विश्वस्यासौ नरश्चेति। "नरे संज्ञायाम्।" ६। ३। १२८। इति दीर्घः। ततो

विश्वानर एव। स्वार्थे अण्। यद्वा, "विश्वान् नरान् इनो लोकात् लोकान्तरं नयति। इदमर्थेन विश्वानराग्नौ मेहनेन सम्पद्यते वा कर्म्मार्थेप्रयोहनेन सम्पादितोऽस्य वैश्वानरः। 'अन्येषामपि दृश्यते।' ६। ३। १३७। इति दीर्घः। अपि वा विश्वान् नयनून् अरः। ऋगतौ रलयोरभेदात्। पदात्यच् उपपदविभक्तेश्चालुक्। सर्व्वाणि भूतानि अरः प्रकृतः प्रतिगतः प्रविष्टति विश्वानरः प्राणः। तेन जन्यमानत्वात् तस्यापत्यं वैश्वानरः।" इति निघण्टुटीकायां देवराजयज्वा।५।२।) अग्निः। (यथा, गीतायाम्। १५। १४।

"अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥")

चित्रकदृक्षः। इत्यमरः। अग्नेस्तन्नामकारकं यथा,—

"तथापि दृष्टि वो रूपं हे ई प्रज्वलयोधुना।
भूतकार्य्येस्वभूतेन देवकोके तु मूर्त्तिना॥
तिष्ठध्वमपि कालाग्नेर्जयं स्वाविशत हुतम्।
शरीराणि पुनर्न्नैवं कर्त्तव्योऽहमिति क्वचित्॥
मूर्त्तानाञ्च तथा तुभ्यं दृष्टि नामानि वोधुना।
अग्निर्व्वैश्वानरो नाम प्राणापानौ तथाग्निनौ।
भविष्यति तथा गौरी हिमशैलसुता तथा।
एषियादिगणस्त्वेव गजवक्त्रो भविष्यति॥
शरीरधारणस्त्वेते नानाभूतानि एव तु।
अहङ्कारस्तथा स्कन्दः कार्त्तिकेयो भविष्यति।"
इति वाराहे आदित्येतायां महातपोपाख्यानामाध्यायः॥

वैशी, स्त्री, उत्तराषाढानक्षत्रम्। इतिहेमचन्द्रः॥

वैश्यं, क्ली, (विश्य+भावे ष्यञ्।) विश्यमलम्। विश्यशब्दात् भावे ष्यञ्प्रत्ययेन निष्पन्नम्। (यथोक्तमलम्। यथा, महाभारते। १२। ५६। ११३।

"समतां वसुधायाञ्च न सम्यगुदपादयत्।
वैश्यं हि परं भूमेरादौदिति च नः श्रुतम्॥"
तारतम्यम्। यथा, महाभारते।१।२०८।२१।
"महच्च फलवैश्यं दृश्यते कर्म्मसम्बन्धि॥"
दुःखम्। यथा, तत्रैव। ३। ४१। २०।
"वैश्यं परमं प्राप्तो दुःखितो मतचेतनः।
भर्त्ता तेऽहं निबोधेदं वचनं हितमात्मनः॥")

वैषयिकः, त्रि, विषयसम्बन्धी। विषयशब्दात् ठिकप्रत्ययेन निष्पन्नः॥ (यथा, साहित्यदर्पणे। १। २१०।

"यत्रास्मिन् सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः॥")

वैसूतं, क्ली, होमभस्म। इति हेमचन्द्रः॥

वैहं, क्ली, (विश्व+"अमूत्रिशमिनमिहनिविश्वाग्र्यां दृहिच्च।" उणा० ४। १५६। इति दृन् दृहिच्च।) पिष्टपम्। रत्नमालादिकोषः॥ द्यौः। वायुः। विष्णुः। इति संक्षिप्तसारोणादिवृत्तिः॥

वैष्णवं, क्ली, (विष्णोरिदम्। विष्णु+अण्।) होमभस्म। इति शब्दरत्नावली॥ (महापुराण-

विशेषः। यथा, देवीभागवते। ३। १। ८।

"अयोविंशतिसाहस्रं वैष्णवं परमाद्भुतम्॥")

विष्णुसम्बन्धिनि, त्रि। (यथा, रघुः।१२।५।

"गां गतस्य तव धाम वैष्णवं
कोपितो क्षपि मया दिदृक्षुना।")

वैष्णवः, पुं, (विष्णुर्देवता अस्य। अण्।) विष्णुमन्त्रोपासकः। विष्णुभक्तः। तत्पर्य्यायः। काणः। २ हारः। ३। तस्य लक्षणं यथा,—

"गृहीतविष्णुदीक्षाको विष्णुसेवापरो नरः।
वैष्णवश्चाभिधातव्यः स्कान्दादुत्तानुसारतः॥"
तथा च स्कान्दे।
"परमापदमापन्नो हर्षे वा समुपस्थिते।
नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी॥
समात्मा सर्व्वजीवेषु निजाचारादविच्युतः।
विष्णुर्पितास्विलाचारः स हि वैष्णव उच्यते॥"
इति श्रीहरिभक्तिविलासे १२ विलासः॥ *॥
अथ श्रीवैष्णवनिरूपणम्। स्कान्दे मार्कण्डेयभगीरथसंवादे।
"यो हि भागवतं लोकमुपहासं नृपोत्तमः।
करोति तस्य नश्यन्ति अर्थधर्म्मयशःसुताः॥"*
अथ वैष्णवसमागमविधिः। तत्रोद्वाहतत्त्वे।
"वैष्णवो वैष्णवं दृष्ट्वा दण्डवत् प्रणमेद्भुवि।
उभयोरन्तरा विष्णुः गृहचक्रगदाधरः॥"*॥
अथ वैष्णवसम्भाषणविधिता। स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।
"दृष्ट्वा भागवतं दूरात् संस्तुते यो न याति हि।
न यशाति हरिस्तस्य पूजां दादशवार्षिकीम्॥"
अथ वैष्णवस्तुतिः। स्कान्दे।
"धन्योऽहं कृतकृत्योऽहं यदयूयं गृहमागताः।
दुर्लभं दर्शनं नूनं वैष्णवानां यथा हरेः॥"*॥
अथ वैष्णवाभिगमनमाहात्म्यम्। स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।
"संस्तुतं ब्रजमानस्य वैष्णवानां नराधिप।
पदे पदे यज्ञफलं प्राहुः पौराणिका द्विजाः॥"
अथ वैष्णवस्तुतिमाहात्म्यम्। तत्रैव।
"प्रणतं वा परोक्षं वा यः पश्यति वैष्णवम्।
ब्रह्महा मद्यपः स्तेयी गुरुतल्पगो यदा भवेत्॥
सद्यते पातकात् सद्यो विष्णुराह नृपोत्तम॥"*
अथ वैष्णवसम्भाषणमाहात्म्यम्। तत्रैवाम्बरीषोद्धारे।
"महया दत्तमन्नञ्च वैष्णवानिह भोक्ष्यते।
तदन्नं मेरुवा तुल्यं भवते च दिने दिने॥"*
अथ वैष्णवश्राद्धमाहात्म्यम्। स्कान्दे श्रीब्रह्मनारदसंवादे।
"वैष्णवानि च श्राद्धानि ये श्रद्दधन्ति पठन्ति च।
धन्यास्ते मानवा लोके तेषां हस्तः प्रवर्द्धते॥"
इति च श्रीहरिभक्तिविलासे १० विलासः॥
तस्य लक्षणमाहात्म्यादि यथा,—
"लक्षसन्त्यागरहिता विष्णुभक्ताश्च वैष्णवाः।
मन्त्रौतिभक्तिकामास्ते सर्व्वदा सर्व्वकर्म्मसु॥
गुरुवक्त्रादिष्णुमन्त्रो यस्य कर्णे प्रवेक्ष्यति।

जीवन्मुक्तं वैष्णवन्तं वेदाः सर्व्वे वदन्ति च॥
पुरुषाणां शतं पूर्व्वं पैतृकञ्च शतं परम्।
मातामहस्य च शतं मातरं माक्षमातरम्॥
भगिनीं भ्रातरञ्चैव भागिनेयञ्च मातुलम्।
श्वश्रूञ्च श्वशुरञ्चैव गुरुपत्नीं गुरोः सुतम्॥
गुरुञ्च ज्ञानदातारं मित्रञ्च सहचारिणम्।
भृत्यं शिष्यं तथा पैत्रीं प्रजाः स्वाश्रमसन्निधौ॥
उद्धरेदात्मना सार्द्धं मन्त्रग्रहणमात्रतः।
मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः॥
तस्य संस्पर्शमात्रेण पूतं तीर्थञ्च भारतम्।
तस्यैव पादरजसा सद्यः पूता वसुन्धरा॥
पादोदकप्लुतं स्थानं तीर्थमेव भवेन् ध्रुवम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः॥ *॥
अपि च।

श्रीशिव उवाच।

"शिवमस्तु च साधूनां वैष्णवानां सतामिह।
अवैष्णवानामसतामशिवञ्च पदे पदे॥
ददाति वैष्णवेभ्यश्च यो दुःखं मूर्च्छितो नरः।
श्रीलक्ष्म्यास्त्यजते सद्यो विघ्नस्तस्य पदे पदे॥
अवैष्णवानां दुर्दृश्यं न हि शुद्धं सदा मलम्।
श्रीलक्ष्ममन्त्रस्मरणं मनोनैर्म्मल्यकारणम्॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः।
विष्णुमन्त्रोपासनया क्षीयते कर्म्म वै नृणाम्॥
ये ब्राह्मणा वैष्णवाश्च स्वतन्त्राः परमं पदम्।
यान्त्यन्योपासकाश्चान्ये सार्द्धञ्च प्रकृतेर्लये॥
वर्णानां ब्राह्मणाः श्रेष्ठाः साधवो वैष्णवा यदि।
विष्णुमन्त्रविहीनेभ्यो द्विजेभ्यः श्वपचो वरः॥
परिपक्वाश्चाविपक्वा वैष्णवाः साधवश्च ते।
सन्ततं पतितांश्चैव विष्णुचक्रं सुदर्शनम्॥
यथा वह्नौ शुष्कदग्धं भस्मीभूतं भविष्यति।
तथा पापं वैष्णवेषु तेजस्विषु हुताशवत्॥
गुरुवक्त्रादिष्णुमन्त्रो यस्य कर्णे प्रवेक्ष्यति।
तं वैष्णवं महापूतं प्रवदन्ति मनीषिणः॥
प्रपितामहं पितृव्यञ्च भ्रातरं मातामहस्य च।
स्वसोदरांश्च जननीसुहृदश्चैव वैष्णवाः॥
गयायां पिण्डदानेन पितरः पिण्डभोजिनम्।
सप्तजन्मन्ति पुंसाञ्च वैष्णवाश्च भ्रतं भ्रतम्॥
मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः।
यमस्तस्याग्रहाभीतो वैक्षतेयादयोरगः॥
विष्णुवत्त्वेव तीर्थानि गङ्गादीनि च भारते।
लक्ष्ममन्त्रोपासकाश्च सम्पर्कमात्रेण वाक्पते॥
पापानि पापिनां तीर्थे यावन्ति प्रभवन्ति च।
नश्यन्ति तानि सर्व्वाणि वैष्णवस्पर्शमात्रतः॥
लक्ष्ममन्त्रोपासकानां रजसा पादपद्मयोः।
सद्यो मुक्ता पातकेभ्यो हृष्टा पूता वसुन्धरा॥
वायुश्च वरुणो वह्निः सूर्य्यः सर्व्वं पुनाति च।
एते पूता वैष्णवानां सम्पर्कमात्रेण लीलया॥
अहं ब्रह्मा च शेषश्च साक्षी धर्म्मश्च कर्म्मणाम्।
एते हृष्टाश्च वाञ्छन्ति वैष्णवानां समागमम्॥
फलं कर्म्मानुसारेण सर्व्वेषां भारते भवेत्।
न भवेद्वैष्णवे च सिद्धाग्नौ यथाङ्कुरम्॥
हन्ति तेषां कर्म्म पूर्व्वं भक्तानां भक्तवत्सलः।

कृपया स्वपदं तेभ्यो ददात्येव कृपानिधिः ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ५७ अध्यायः ॥*॥
अन्यच्च ।
श्रीभगवानुवाच ।
"अहं प्राणा वैष्णवानां मम प्राणाश्च वैष्णवाः ।
तानेव हन्ति यो मूढो ममाङ्गानां स हिंसकः ॥
पुत्रान् पौत्रान् कलत्रांश्च राजलक्ष्मीं विधाय च ।
ध्यायन्ते सन्ततं ये मां को मे तेभ्यः परः प्रियः ॥
परा भक्ता तु मे प्राणा न च लक्ष्मीर्न शङ्करः ।
न भारती न च ब्रह्मा न दुर्गा न गणेश्वरः ॥
न ब्राह्मणा न वेदाश्च न देवजननी सुराः ।
न गोपी न च गोपाला न राधा प्राणतः प्रिया ॥
इत्येवं कथितं सर्वं सत्यं सारश्च वास्तवम् ।
न प्रशंसापरं तेषां ते च प्राणाधिकाः प्रियाः ॥
मां द्विषन्ति च ये मूढा ज्ञानहीनाश्च वञ्चिताः ।
स्वात्मानञ्च न जानन्ति ते यान्ति निरयं चिरम् ॥
ये द्विषन्ति च मद्भक्तान् प्राणानामधिकप्रियान् ।
तेषां शास्ताहं तूर्णञ्च परत्र निरयं चिरम् ॥
प्रभवोऽहञ्च सर्वेषामीश्वरः परिपालकः ।
तथापि न स्वतन्त्रोऽहं भक्ताधीनो दिवानिशम् ॥
गोलोके वाथ वैकुण्ठे द्विभुजञ्च चतुर्भुजम् ।
रूपमात्रमिदं सर्वं प्राणा मे भक्तसन्निधौ ॥
यद्भक्तं भक्तदत्तञ्च भक्षणीयञ्च तन्मम ।
अभक्ष्यं त्रयमन्येन दत्तेदत्तोपमम् ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे २५ अध्यायः ॥
अपि च ।
"सर्वान् कामान् परित्यज्य इष्टभक्तिञ्च साधयेत्
स एव वैष्णवाचारः कामसङ्कल्पवर्जितः ॥"
इत्याचारभेदतत्त्वम् ॥*॥
अपरञ्च ।
"रजस्वलायाः संभोगे कर्म्मचैत्रे च भारते ।
त्वयोक्तञ्च भवेत् पापं नाच स्वर्गे च सुन्दरि ।
कर्म्मचैत्रे च तत् कर्म्म यदुक्तं शुभाशुभम् ।
न भवेद्वैष्णवानाञ्च ज्वलतां ब्रह्मतेजसा ॥
यथा प्रदीपवह्नौ च शुष्काणि च तृणानि च ।
भवन्ति भस्मीभूतानि तथा पापानि वैष्णवे ॥
वह्निसूर्य्यब्राह्मणेभ्यस्तेजीयान् वैष्णवः सदा ।
रक्षितो विष्णुचक्रेण स्वतन्त्रो भक्तकङ्करः ॥
न विचारो न भोगश्च वैष्णवानां स्वकर्म्मणाम् ।
लिखितं सान्ति कौशुन्यां कुरु पत्रं दृष्टसंतिम् ॥
असांश्च सर्वे जानन्ति चन्द्रवंशांश्च वैष्णवान् ।
देवमन्यं न सेवन्ते चन्द्रवंशा हरिं विना ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥
अपि च ।
सूत उवाच ।
"अथ वेणुरयाजाथ सोऽश्वमेधेन भूपतिः ।
ब्राह्मणेभ्यो ददौ दानं नानारूपमनेकधा ॥
जगाम वैष्णवं लोकं सकायो जगतीपतिः ।
विष्णुना सह धर्म्मात्मा नित्यमेव प्रवर्त्तते ।
एतत्ते सर्वमाख्यातं चरितं तस्य भूपतेः ॥
यदेको वैष्णवदेवो सर्वधर्म्मबहिष्कृतः ।
एतेन पुत्रतीर्थेन पवित्रोऽगात् परं पदम् ॥
सत्पुत्रं परमं तीर्थं प्राप्य मुच्यन्ति पूर्वजाः ।
पितापि ऋणमुक्तः स्यात् जाते पुत्रे महात्मनि ।
वैष्णवो यदि पुत्रः स्यात् स तारयति पूर्वजान् ।
पितृनधस्तना वंशास्तारयन्त्यतिपावनाः ॥"
इति पाद्मे भूमिखण्डे १२० अध्यायः ॥*॥
अथ वैष्णवधर्म्मसत्कर्म्मषष्ठविधपूजे । यथा,—
श्रीपार्व्वत्युवाच ।
"वैष्णवानाञ्च यद्धर्म्मं कर्म्मापि तस्य तद्वद ।
यत् कृत्वा मानवाः सर्वे भवाम्भोधौ तरन्ति वै ॥
ईश्वर उवाच ।
अथ द्वादश शुद्धिश्च वैष्णवानामिहोच्यते ।
गृहोपसर्पणञ्चैव तथानुगमनं हरेः ॥
भक्त्या प्रदक्षिणञ्चैव पादयोः शोधनं पुनः ॥१॥२
पूजार्थं पत्रपुष्पाणां भक्त्यैवोत्तोलनं हरेः ।
करणीः सर्व्वशुद्धीनामियं शुद्धिर्विलिख्यते ॥३॥४॥
तन्नामकीर्त्तनञ्चैव गुणानाञ्चैव कीर्त्तनम् ।
भक्त्या श्रीकृष्णदेवस्य वचसः शुद्धिरिष्यते ॥ ५ ॥
तत्कथाश्रवणञ्चैव तस्योत्सवनिरीक्षणम् ।
श्रोत्रयोर्नेत्रयोश्चैव शुद्धिः सम्यगिहोच्यते ॥ ६ ।
७ । ८ । ९ ॥
पादोदकञ्च निर्म्माल्यं मालानामपि धारणम् ।
उच्यते शिरसः शुद्धिः प्रणतस्य हरेः पुनः ॥१०॥
आघ्राणं गन्धपुष्पादेर्निर्म्माल्यस्य तपोधने ।
विशुद्धिः स्यादनन्तस्य घ्राणस्यापि विधीयते ॥११॥
१२ ॥
तत्र पुष्पादिकं यच्च कृष्णपादयुगार्पितम् ।
तदेव पावनं लोके तद्धि सर्वं विशोधयेत् ॥*॥
पूजा च षड्विधा प्रोक्ता तासां भेदान् शृणुष्व मे ।
अभिगमनमुपादानं योगः स्वाध्याय एव च ॥
इज्या च षड्विधा प्रोक्ता क्रमेण कथयामि ते ।
तत्राभिगमनं नाम देवतास्थानमार्जनम् ॥
उपलेपननिर्म्माल्यदूरीकरणमेव च ॥ १ ॥
उपादानं नाम गन्धपुष्पादिचयनं यथा ॥ २ ॥
इज्या नाम हि चेष्टादेः पूजनञ्च यथार्थतः ॥३॥
स्वाध्यायो मन्त्ररूपस्य अर्थसन्धानतो जपः ॥
स्तवस्तोत्रादिपाठश्च हरेः संकीर्त्तनं तथा ।
तन्नामशास्त्राभ्यासश्च स्वाध्यायः परिकीर्त्तितः ॥
४ ॥
योगो नाम सुदेवस्य चात्मने चैव भावना ॥५॥
इति षड्प्रकारार्चा: कथितास्तव सुव्रते ॥"
इति पाद्मे पातालखण्डे १० अध्यायः ॥*॥
अथ वैष्णवानां खाद्याखाद्यम् ।
"सायं प्रातर्दिनातीतं शुष्कमग्नं तथा ।
विष्णुभुक्तावशिष्टेन दिनमापात् प्रसुध्यते ॥
अन्नं ब्रह्मा रसो विष्णुः खादयन्नाम चोच्चरन् ।
एवं ज्ञात्वा तु यो भुङ्क्ते सोऽन्नदोषेण लिप्यते ॥
अलाबुं वर्त्तुलाकारं मस्तञ्च सवल्कलम् ।
तालं शुक्तञ्च वार्त्ताकुं न खादेद्वैष्णवो जनः ॥
वटाश्वत्थार्कपत्रेषु कुम्भीतिन्दुकपत्रयोः ।
कोविदारकदम्बे च न खादेद्वैष्णवो नरः ॥
आवये वर्जयेच्छक्तुं दधि भाद्रपदे त्यजेत् ।
दुग्धञ्च आश्विने मासि कार्त्तिके चामिषं त्यजेत् ॥
दुग्धमन्नञ्च जम्बीरं यद्विष्णोरनिवेदितम् ।
बीजपूरञ्च शाकञ्च प्रत्यक्षलवणन्तथा ॥
यदि देवाय मुच्यन्ते तदा तन्नामकं हरेत् ॥
कलायं कङ्गुधान्यानि शाकञ्च हिलमोचिकाम् ।
वटिकाकालशाकञ्च सुस्तकं क्रसुकं तथा ॥
लवणे सैन्धवं प्रोक्तं वर्ज्या च दधिसर्षपौ ।
पयोऽगुडघृतसारञ्च पनसान्ने हरीतकी ॥
पिप्पलीजीरकञ्चैव नागरङ्कतिन्तिड़ी ।
कदलीलवलीधात्रीफलान्यगुड़मैक्षवम् ।
अतैलपक्वं शुक्लौत हविष्येषु प्रचक्षते ॥"
इति पाद्मे पातालखण्डे ११ अध्यायः ॥*॥
अथ वैष्णवलक्षणविशेषादिः ।
"माहात्म्यमथ भक्तानां यत् कार्य्यं यच्च लक्ष्यम् ।
करणीयं हरेर्विप्र सावधानमनाः शृणु ॥
हरिरेव सदा सेव्यो नान्यो यस्य महात्मनः ।
लोकस्य जगदाराध्यो हरिभक्तः स उच्यते ॥
अनन्यनिर्म्माल्यभुजो भक्तास्तेऽनन्यमानसाः ।
गोविन्दोपासका ये तु नित्यं देवान्तरं विना ॥
अनन्यधिषणोऽनन्यहृदयोऽनन्यसेवकः ।
केवलं हरिसेवञ्च स भक्तः परिकीर्त्तितः ॥
सत्त्वं सत्त्वाश्रयं सत्त्वगुणं सेवेत केशवम् ।
योऽनन्यत्वेन मनसा सात्वतः समुदाहृतः ॥
सर्व्वदेवान् परित्यज्य नित्यं भगवदाश्रयः ।
रतस्तदीयसेवायां स भागवत उच्यते ॥
विहाय काम्यकर्म्मादीन् भजेदेकाकिनं हरिम् ।
सत्यं सत्त्वगुणोपेतो भक्त्या तं सात्वतं विदुः ॥
मुकुन्दपादसेवायां तन्नामश्रवणेऽपि च ।
कीर्त्तने च रतो भक्तो नान्यः स्यात् स्मरणे हरेः ॥
वन्दनार्चनयोर्भक्तिरनिशं दास्यसख्ययोः ।
रतिरात्मार्पणे यस्य दृढानन्तस्य सात्वतः ॥
स्मर्त्तव्यः कीर्त्तनीयश्च श्रोतव्यः पूज्य एव च ।
यस्यैको विष्णुराराध्यो वैष्णवः समुदाहृतः ॥
यथालब्धोऽपि सन्तुष्टः समचित्तो जितेन्द्रियः ।
हरिपादाश्रयो लोके विप्रः साधुरिहोच्यते ॥
निर्व्वैरः सदयः शान्तो दम्भाहङ्कारवर्जितः ।
निरपेक्षो मुनिर्वीतरागः साधुरिहोच्यते ॥
लोभमोहमदक्रोधकामादिरहितः सुखी ।
क्षमाङ्गिप्रियरत्नः साधुः सहिष्णुः समदर्शनः ॥
यद्विष्णूपासना नित्यं विष्णुर्यस्येश्वरो गुरुः ।
पूज्यो यस्यैकविष्णुः स्यादिहो लोके स वैष्णवः ।
हरेः सर्व्वावतारांश्च मत्स्यादीनामुपासकाः ।
तन्मन्त्रेज्या अनन्याश्चैवैष्णवास्ते न संशयः ॥
यदिहो रघुनाथस्तु वृष्णिंहो वामनो हरिः ।
एतन्नामो वराहादिर्वासुदेवः स वैष्णवः ॥
विष्णोरुपासको दासस्तन्मन्त्रेक्षदाश्रयः ।
तमाहुर्वैष्णवं लोके विष्णुसेवापरायणम् ॥
साध्वी यथा पतिं नारी नान्यं जानाति तं विना ।

जगदीशं तथानन्यो यदि विष्णुं स वैष्णवः ॥
समचित्तो मुनिः पूतो गोविन्दचरणाश्रयः ।
सर्वभूतदयः कार्यो विवेकी साधुरुत्तमः ॥
क्षमार्पितप्राणशरीरवृद्धिः
प्रान्तेन्द्रियक्षोभसुतसम्पदादिः ।
आसक्तचित्तः श्रवणादिभक्ति-
ष्वस्नेह वायुः सततं हरेर्यः ॥
क्षमाश्रयः क्षमाकथायुक्तः
क्षमैकमन्त्रस्तुतिपूजनीयः ।
क्षमानिमग्नाममनाक्षनन्यो
यो वै स साधुर्मुनिवर्य कार्यः ॥
यस्येदं श्रीभागवतं ग्रन्थं श्रीभगवान् हरिः ।
भगवत्या समं कन्याग्रा भक्त्या भागवतश्च सः ॥
ये क्षमाश्रवणाद्दार्हा ये तदुच्छिष्टभोजिनः ।
ये क्षमोपासका लोका दासास्ते परि-
कीर्तिताः ॥"
इति पाद्मे उत्तरखण्डे ६६ अध्यायः ॥*॥
अपि च ।
ब्रह्मोवाच ।
"अहो ध्यानैरपि ध्यातुं देवेशं न हि शक्यसे ।
स त्वं वैष्णवदेहेषु तिष्ठसीत्यद्भुतं महत् ।
चक्रमात्रमपि स्वामिंस्तुष्टे त्वयि न किं भवेत् ।
स त्वं वैष्णवसङ्गेन भ्रमसीत्यद्भुतं महत् ।
के वैष्णवाः कैटभारे ! किं वा तेषाञ्च लक्षणम् ।
कथं ज्ञेयाश्च ते सर्वे तन्मे कथय केशव ॥
भगवानुवाच ।
वैष्णवानां लक्षणानि कल्पकोटिशतैरपि ।
सम्यक्तुं न शक्नोमि संक्षेपात् शृणु सत्तम ।
संसारो वैष्णवाधीनो देवा वैष्णवपालिताः ।
अहञ्च वैष्णवाधीनस्तस्मात् श्रेष्ठाश्च वैष्णवाः ।
चक्रमात्रमपि ब्रह्मन् विहाय वैष्णवं जनम् ।
तिष्ठामि नाहमन्यत्र वैष्णवो मम बान्धवः ॥
कामक्रोधविहीना ये हिंसादम्भविवर्जिताः ।
लोभमोहविहीनाश्च ते ज्ञेया वैष्णवा जनाः ॥
अमत्सरा दयायुक्ताः सर्वभूतहितैषिणः ।
सत्योक्तिभाषिणश्चैव ज्ञेयास्ते वैष्णवा जनाः ॥
पित्रभक्ता मात्रभक्ता जातिपोषणतत्पराः ।
धर्मोपदेशिनो ये च ज्ञेयास्ते वैष्णवा जनाः ॥
उमानं ये च पश्यन्ति लक्ष्मीं माधवमीश्वरम् ।
कुर्वन्ति पूजामतिथेर्ज्ञेयास्ते वैष्णवा जनाः ॥
वेदविद्यानुरक्ता ये द्विजभक्तिरताः सदा ।
नपुंसकाः परस्त्रीषु ज्ञेयास्ते वैष्णवा जनाः ॥
एकादशीव्रतं ये च भक्तिभावेन कुर्वते ।
गायन्ति मम नामानि ज्ञेयास्ते वैष्णवा जनाः ॥
देवायतनकर्त्तारस्तुलसीमाल्यधारिणः ।
रुद्राक्षधारिणो ये च ज्ञेयास्ते वैष्णवा जनाः ॥
मत्पादसलिलैर्येषां सिक्तानि मस्तकानि वै ।
मम नैवेद्यमश्नन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
शङ्खचक्रगदापद्मैरङ्कितानि ममायुधैः ।
ब्रह्मन् येषां शरीराणि ज्ञेयास्ते वैष्णवा जनाः ॥
कर्णयोश्चैव शीर्षेषु तुलसीपत्रसत्तमम् ।
सततं दृश्यते येषां ज्ञेयास्ते वैष्णवा जनाः ॥
ललाटे तुलसीमूलाद्ये चिन्वन्ति नरोत्तमाः ।
सिञ्चन्ति तुलसीं ये च विज्ञेयास्ते च वैष्णवाः ॥
तुलसीमूलजद्विश्च तिलकानि वयन्ति ये ।
तुलसीकाष्ठपट्टैश्च विज्ञेया वैष्णवा जनाः ॥
गङ्गास्नानपरा ये च गङ्गानामपरायणाः ।
गङ्गामाहात्म्यवक्तारो विज्ञेयास्ते च वैष्णवाः ॥
धात्रीफलजलो येषां गण्डेषु कमलासन ।
यजन्ति ये च तत्पत्रैर्विज्ञेयास्ते च वैष्णवाः ॥
प्रालेयाग्निला येषां दृष्टे वसति सर्वदा ।
ग्राह्यं भागवतञ्चैव ज्ञेयास्ते वैष्णवा जनाः ॥
सम्मार्जयन्ति ये नित्यं मम स्थानानि सर्वदा ।
दीपं यच्छन्ति तत्रैव ज्ञेयास्ते वैष्णवा जनाः ॥
श्रीर्णं मन्दिरं ये च कुर्वते नूतनं पुनः ।
तत्रायनञ्च शोभाञ्च ज्ञेयास्ते वैष्णवा जनाः ॥
अभयं ये च यच्छन्ति भीरुभ्यश्चतुरानन ।
विद्यादानञ्च विप्रेभ्यो ज्ञेयास्ते वैष्णवा जनाः ॥
क्षुत्तृट्श्रमपीडितेभ्यश्च ये यच्छन्त्यन्नमम्बु च ।
कुर्युर्ये रोगिशुश्रूषां ज्ञेयास्ते वैष्णवा जनाः ॥
आरामकारिणो ये च पिप्पलारोपिणोऽपि च ।
गोसेवां ये च कुर्वन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
अत्यन्तभक्ता ये ब्रह्मन् पितृयज्ञं प्रकुर्वते ।
कुर्वन्ति दीनशुश्रूषां ज्ञेयास्ते वैष्णवा जनाः ॥
तडागारामकर्त्तारः कन्यादानप्रदाश्च ये ।
सेवन्ते सद्गुरौ ये च ज्ञेयास्ते वैष्णवा जनाः ॥
सेवन्ते ज्येष्ठभगिनीं ज्येष्ठं भ्रातरमेव च ।
परनिन्दां न कुर्वन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
देवस्वं ब्राह्मणद्रव्यं परस्वञ्च चतुर्मुख ।
पश्यन्ति विषवद्ये च ज्ञेयास्ते वैष्णवा जनाः ॥
पाषण्डसङ्गरहिताः शिवभक्तिपरायणाः ।
चतुर्दशीव्रतरता ज्ञेयास्ते वैष्णवा जनाः ॥
बहुनात्र किमुक्तेन भावितेन पुनः पुनः ।
मद्भक्तां ये च कुर्वन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
वैष्णवेषु गुणाः सर्वे दोषलेशो न विद्यते ।
तस्माच्चतुर्मुख त्वञ्च वैष्णवो भव साम्प्रतम् ।
समाराधय मां नित्यं क्रियायोगैः प्रजापते ।
सर्वमेव शुभं ते भविष्यति न संशयः ॥
भूयः पूर्वस्थितमिव द्रष्टव्यं सकलं जगत् ।
इत्युक्तान्तर्दधे देवस्तत्रैव जगदीश्वरः ।
ततस्तु पूर्ववद्ब्रह्मा दृष्टवान् सकलं जगत् ।
क्रियायोगैर्हरिं यष्ट्वा जगाम परमं पदम् ।
ये पठन्ति समाध्यायं भक्त्या नारायणाश्रयाः ।
सर्वपापविनिर्मुक्ता अन्ते यान्ति हरेः पदम् ।"
इति पाद्मे क्रियायोगसारे २ अध्यायः ॥*॥
कालिङ्ग उवाच ।
"रहस्यमेकमक्षरेण कथितो रहस्यः परमो मम ।
वैष्णवानि त्र्यर्थोऽभूत् संवादस्तं ब्रवीमि ते ।
प्राप्ते स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ।"
इति श्रीविष्णुपुराणे द्वितीयेंऽशे यमगीतं ७ अध्यायः ॥*॥ अपि च ।
"कर्म्मत्रयाणि कर्म्माणि यतः साधुर्हरिः
स्वयम् ।
मन्ये न भौतिको देहो वैष्णवस्य जगत्त्रये ।"
इति कल्किपुराणे ३० अध्यायः ॥
वैष्णवाचमनं, क्ली, (वैष्णवस्याचमनम् ।) विष्णु-
पूजादिपूर्व्वकर्त्तव्यकर्त्तृसंस्कारकाङ्ग--ॐकारादि-
नमोऽन्तचतुर्थ्यन्ततत्तन्नामोच्चारणपूर्व्वकत्रिर्जल-
पानादि । यथा,—
"त्रिःपाने केशवं नारायणं माधवमप्यथ ।
प्रक्षालने द्वयोः पाण्योर्गोविन्दं विष्णुमप्युभौ ॥
मधुसूदनमेकञ्च माङ्गल्येऽन्यं त्रिविक्रमम् ।
उन्मार्ष्टनेऽप्यधरयोर्व्वामनश्रीधरावुभौ ॥
प्रक्षालने पुनः पाण्योर्हृषीकेशञ्च पादयोः ।
पद्मनाभं प्रोक्षणे तु मूर्द्ध्नि दामोदरं ततः ॥
वासुदेवं मुखे सङ्कर्षणं प्रद्युम्नमिमुभौ ।
नासयोर्नेत्रयुगले ऽनिरुद्धं पुरुषोत्तमम् ॥
अधोक्षजं हृषिकेशञ्च कर्णयोर्नारसिंहमच्युतम् ।
जनार्द्दनञ्च हृदये उपेन्द्रं मस्तके ततः ॥
दक्षिणे तु हरिं बाहौ वामे कृष्णं यथाविधि ।
नमोऽन्तञ्च चतुर्थ्यन्तमाचामेत् क्रमतो जपन् ॥
अशक्तः केवलं दद्यं स्पृशेत् कर्णं तथा च वाक् ।
कुर्व्वीतालभनं वापि दक्षिणश्रवणस्य वै ।"
तथा च वाक् इति यतस्तत्रैव वचनमस्ति ।
कुर्व्वीतालभनं वापीति मार्कण्डेयपुराणवचन-
मतो न मौनरूक्तम् । इति श्रीहरिभक्तिविलासे
२ विलासः ॥
वैष्णवाचारः, पुं, (वैष्णवानामाचारः ।) विष्णु-
भक्तानामाचरणम् । यथा,—
"अथाचारा बहुविधाः श्रुत्याचारानुसारतः ।
श्रीवैष्णवानां कर्त्तव्या लिख्यन्तेऽत्र समासतः ॥"
अथाचाराः श्रीविष्णुपुराणे और्व्वसगरसंवादे
गृहस्थाचारकथनारम्भे ।
"देवगोब्राह्मणान् सिद्धान् वृद्धाचार्य्यांस्तथा-
र्चयेत् ।
द्विकालञ्च नमेत् सन्ध्यामग्नीनुपचरेत्तथा ॥
सदानुपहते वस्त्रे प्रयुक्तञ्च तथौषधीः ।
मारुक्षाणि च रत्नानि विभृयात् प्रयतो नरः ॥
प्रसिद्धमलकेशश्मश्रुनखलोमावसेदृक् ।
किञ्चित् परस्य न हरेत् नाल्पमप्यप्रियं वदेत् ॥
प्रियञ्च नानृतं ब्रूयान्नान्यदोषानुदीरयेत् ।
नात्याश्रयं तथा वैरं रोचयेत् पुरुषेश्वरः ॥
न दुष्टयानमारोहेत् कुलस्त्रीर्या न संश्रयेत् ।
विद्विष्टपतितोन्मत्तबहुवैरातिकीटकैः ॥
वन्धकीवन्धकीभर्तृक्षुद्रातृतकवैः सह ।
तथातिव्ययशीलैश्च परिवादरतैः शठैः ॥
बुधो मैत्रीं न कुर्व्वीत नैकः पन्थानमाश्रयेत् ।
नावगाहेच्चलौघस्य वेगमग्ने कदाचन ॥
प्रदीप्तं वेश्म न विशेन्नारोहेच्छिखरं तरोः ।
न कुर्य्याद्दन्तसङ्घर्षं न क्ष्वेडाञ्च नासिकाम् ॥
नासंवृतमुखो जृम्भेत् श्वासकासौ विवर्जयेत् ।
नोच्चैर्हसेत् सशब्दञ्च न सुचेत् पवनं लघुः ॥
नखान्न वादयेच्छिन्द्यान्न दन्तं न महीं लिखेत् ।

न स्नस्य भक्षयेल्लोहान्न यज्ञीयाद्विचक्षणः ।
ज्योतींष्यमेध्याग्नस्तानि नाभिवीक्षेत च प्रभो ।
न दुष्कुर्याच्छवं चैव शवगन्धो हि दोषदः ।
चतुष्पथं चैत्यतरुं श्मशानोपवनानि च ।
दुष्टस्त्रीसन्निकर्षंच वर्ज्ययेन्निशि सर्वदा ।
पूज्यदेवद्विजज्योतिश्छायां नातिक्रमेद्बुधः ।
नैकः शून्याटवीं गच्छेन्न च शून्यं गृहं व्रजेत् ।
केशास्थिकण्टकामेध्यबलिभस्मतुषांस्तथा ।
स्नानार्द्रां धरणीं चैव दूरतः परिवर्जयेत् ।
नाग्न्यगाराश्रयेत् कांचिन्न जिह्मं रोचयेद्बुधः ।
उपसर्पेन्न च व्यालांश्चिरं तिष्ठेन्न चोत्थितः ।
यथेष्टभोजकांश्चैव तथा देवपराङ्मुखान् ।
वर्णाश्रमक्रियातीतान् दूरतः परिवर्जयेत् ।
अतीवजागरस्वप्नौ सङ्गतं स्नानासने बुधः ।
न सेवेत तथा ग्रथ्यां यायाच्च नरेश्वर ।
दंष्ट्रिणः शृङ्गिणश्चैव प्राणी दूरेण वर्जयेत् ।
अवघ्रायेच्च राजेन्द्र पुरोवातातपौ तथा ।
न स्नायान्न स्पृशेन्नग्नो न चैवोपस्पृशेद्बुधः ।
सुक्तकच्छश्च नाचामेदाद्यश्चैव वर्जयेत् ।
नैकवस्त्रः प्रवर्तेत द्विजवाचनके जपे ।" * ।
किंच ।
"न च निर्धूनयेत् केशान्नाचामेन्नैव चोत्थितः ।
पादेन नाक्रमेत् पादं न पूज्याभिमुखं नयेत् ।
अपसव्यं नैव गच्छेद्देवागारचतुष्पथान् ।
मङ्गल्यपूज्यांश्च तथा विपरीतान्न दर्शयेत् ।
सोमार्कांग्न्यम्बुवायूनां पूज्यानाञ्च न संमुखम् ।
कुर्यात् क्षौरविण्मूत्रशवसूतसर्गंच पण्डितः ।
तिष्ठन्न मूत्रयेत्तद्वत् पन्थानं नावलम्बयेत् ।
श्लेष्मविण्मूत्ररक्तानि सर्वदैव न लङ्घयेत् ।
श्लेष्मशौचनकोत्सर्गो नाम्नकाले प्रशस्यते ।
बलिमङ्गलजप्यादौ न होमे न महाजने ।
योषितो नावमन्येत न चासां विश्वसेद्बुधः ।
न चैवेर्षां भवेत्तासु नाधिकुर्यात् कदाचन ।
मङ्गल्यपुष्पस्रक्चान्यपूज्यानभिवाद्य च ।
न निष्क्रामेत् गृहात् प्राज्ञः सदाचारपरो नरः ।
आकालमर्च्यतादौ तु पर्वस्वप्यौपकादिषु ।
अनध्यायं बुधः कुर्यादुपरागादिके तथा ।
वर्षातपादिके क्षत्री दक्षो राज्याटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ।
नोर्ध्वं न तिर्यक् दूरं वा निरीक्षेत् पर्यटेद्बुधः ।
युगमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन् ।"*।
किंच ।
"प्रियमुक्तं हितं नैतदिति मत्वा न तद्वदेत् ।
श्रेयस्तद्धितं वाक्यं यद्यप्यत्यन्तमप्रियम् ।
प्राणिनामुपकाराय यदेवेह परत्र च ।
कर्मणा मनसा वाचा तदेव मतिमान् भजेत् ।" * ।
इत्यग्नारदीये सदाचारप्रसङ्गे ।
"असावहमिति ब्रूयाद्विप्रो वै क्षत्रियादने ।
आद्यं व्रतं जपं दानं देवताभ्यर्चनं तथा ।
यज्ञंच तर्पणंचैव कुर्वन्तं नाभिवादयेत् ।
तथा स्नानं प्रकुर्वन्तं धावन्तमशुचिंतथा ।
सुप्तानंच प्रयानंच अभ्यक्तशिरसंतथा ।
भिक्षान्नधारिणं चैव रमन्तं जलमध्यगम् ।
कृताभिवादनो यो न कुर्यात् प्रत्यभिवादनम् ।
नाभिवाद्यः स विज्ञेयो यथा शूद्रस्तथैव सः ।"*
मार्कण्डेयपुराणे मदालसालर्कसंवादे ।
"असत्प्रलापमनृतं वाक्पारुष्यञ्च वर्ज्ययेत् ।
असच्छास्त्रमसद्वादमसत्सेवाञ्च पुत्रक ।
केशग्रसाधनादर्शदर्शनं दन्तधावनम् ।
पूर्वाह्ण एव कार्याणि देवतानाञ्च तर्पणम् ।
उदक्यादर्शनं स्पर्शं वर्जयेत् संभाषणं तथा ।
न चाभीक्ष्णं शिरःस्नानं कुर्यान्निष्कारणं नरः ।
शिरःस्नातस्य तैलेन गात्रं किञ्चिदपि स्पृशेत् ।
पत्न्या देयो ब्राह्मणानां राज्ञो दुःखातुरस्य च ।
विद्याधिकस्य गुर्विण्या भारार्तस्य महीयसः ।
सूक्ष्मान्त्यवधिराजाच मत्तस्योन्मत्तकस्य च ।
पुंश्चल्याः क्षतवैरस्य बालस्य पतितस्य च ।
उपानद्वस्त्रमाल्यानि धृतान्यन्यैर्न धारयेत् ।
उपवीतमलङ्कारं करकञ्चैव वर्जयेत् ।
न क्षिप्तवाङ्मनश्चक्षुः प्राज्ञस्क्षेत् कदाचन ।
न चापि विक्षिपेत् पादौ वासयेन्न च धूनयेत् ।
मूर्खोन्मत्तव्यसनिनो विरूपान् मायिनस्तथा ।
न्यूनाङ्गानधमांश्चैव नोपहासेन दूषयेत् ।
परस्य दुष्टं नोद्घट्टयेत् शिष्टार्थं पुत्रशिष्ययोः ।
नानुशेयमनादद्यादज्ञातः ज्ञातको क्वचित् ।
न चापि रक्तवासाः स्याच्छिन्नवाससधरोऽपि वा ।
क्षुरकर्म्मणि चान्ते च स्त्रीसम्भोगे च पुत्रक ।
स्नायीत तैलवान् प्राज्ञः कटभूमिमुपेत्य च ।
युगपच्चलमप्यिच्छ विश्वस्यान्न विचक्षणः ।"
कटभूमिं श्मशानम् ।
"नाचक्षीत घयन्तीं गां जलं नाञ्जलिना पिबेत् ।"
धयन्तीं पिबन्तीम् ।
"शौचकालेषु सर्वेषु गुरुव्यक्तेषु वा पुनः ।
न विलम्बेत शौचार्थं न सुखेनानलं धमेत् ।
विप्रुषो मक्षिकाद्याश्च दुष्टसङ्गादहेतिवत् ।
अजाश्वौ सुखतो मेध्यौ न गोर्वैतुस्य चाननम् ।
मातुः प्रसवने मेध्यं शकृतः पतनेऽपि ।
उदक्याशौचिकर्मायं सूतिकान्यावसायिनः ।
दृष्ट्वा स्पृशेत् शौचार्थं सचैल स्नातमारिवः ।
नारं स्पृष्ट्वाक्षि सक्लेदं स्नातः शुध्यति मानवः ।
आचम्यैव तु निःस्नेहं गात्राण्यभ्यक्तमेव वा ।
न चाक्षपेत् जलं क्षिप्तं वीरहीनां तथा स्त्रियम् ।
देवतातिथिसच्छास्त्रयज्ञविघ्नादिनिष्कृतेः ।
ज्ञात्वा तु सूर्यनाशार्थं शुद्धोदर्कावलोकनात् ।
अवलोक्य तथोदक्यामन्त्यजान् प्रतितं ग्रहम् ।
विधर्म्मिसूतिकाधर्मविक्षान्त्यावसायिनः ।
मृतनिर्यातकाश्चैव परदाररताश्च ये ।
एतदेव हि कर्मैषां प्राहुः शौचनमात्मनः ।"*।
किंच ।
"यद्यपि कुर्वतो नाम्ना कुशमामेति पुत्रक ।
तत् कर्मैषामशुद्धेन यन्न गोप्यं महाजने ।"*।
भविष्योत्तरे श्रीकृष्णयुधिष्ठिरसंवादे ।
"उपासते न ये पूर्वां द्विजाः सत्यां न पश्चिमाम् ।
सर्वांस्तान् धार्मिको राजा शूद्रकर्मणि योजयेत् ।
दूरादावसथान्मूत्रं दूरात् पादावसेचनम् ।
उच्छिष्टोत्सर्जनं भूप सदा कार्यं हितैषिणा ।
उच्छिष्टो न स्पृशेच्छीर्षं सर्वे प्राणास्तदाश्रयाः ।
केशग्रहान् प्रहारांश्च शिरस्येतानि वर्ज्ययेत् ।
न पाणिभ्यामुभाभ्यान्तु कण्डूयाच्चातु वै शिरः ।"
किंच ।
"सुवासिनीं गुर्विणीञ्च वृद्धं बालातुरौ तथा ।
भोजयेत् संस्कृतान्नेन प्रथमं चरमं गृही ।
अर्धं स केवलं भुङ्क्ते यो भुङ्क्ते पाञ्चयज्ञिकम् ।
वर्ज्ययेद्धि गृहस्थश्च रात्रौ धानाश्च वासरे ।"
किंच ।
"सजप्य नावकर्षेत न वहिर्धारयीत च ।
एते पारावता धन्याः शुकाश्च सहकारिकाः ।"
कौर्म्मे वायवीयायाम् ।
"छत्रं वा यदि वा ग्राव्णं मूत्रं वा जलमेव वा ।
परस्यापहरन् जन्तुर्नरकं प्रतिपद्यते ।
न राज्ञः प्रतिगृह्णीयान्न शूद्रात् पतितादपि ।
नान्यस्मादयाचकत्वञ्च निन्दितार्ज्जनवेदनम् ।
नित्यं याचनको न स्यात् पुनस्तञ्चैव याचयेत् ।
प्राज्ञानपहरत्येव याचकस्तस्य दुर्मतिः ।
न देवद्रव्यहारी स्याद्विप्रेषैव द्विजोत्तमाः ।
ब्रह्मस्वञ्च नापहरेदापदापि कदाचन ।
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
देवस्वं वापि यत्नेन सदा परिहरेन्नरः ।
न धर्मोस्यापदेशेन पापं कृत्वा व्रतं चरेत् ।
व्रतेन पापं प्रच्छाद्य कुर्वन् स्त्रीशूद्रदम्भनम् ।
प्रेत्येह चेदृशो विप्रो गर्ह्यते ब्रह्मवादिभिः ।
देवद्रोहाद्गुरुद्रोहः कोटिकोटिगुणाधिकः ।
ब्राह्मणापवादो नास्तिक्यं तस्मात् कोटिगुणाधिकम् ।"*।
किंच ।
"हिमवद्विन्ध्ययोर्मध्ये पूर्वपश्चिमयोः शुभम् ।
सत्त्वा सप्तदयोर्देशं गान्धर्वं निवसेद्विजः ।
कृष्णो वा यत्र चरति मृगो नित्यं स्वभावतः ।
पुण्याश्च विश्रुता नद्यस्तत्र वा निवसेद्विजः ।
अङ्गमोग्रान्नदीकूलं वर्ज्ययित्वा द्विजोत्तमाः ।"
किंच ।
"अग्निना भस्मना चैव बलिना विप्रेषतः ।
दारैश्च सप्तभिर्गार्ग्यैश्च षड्भिः पङ्क्तिर्विभिद्यते ।
परक्षेत्रे चरन्तीं गां न वारयीत कस्यचित् ।
न सूर्य्यपरिवेषं वा नेन्द्रचापं न चाग्निकम् ।
परस्मै कथयेद्विद्वान् ग्रहणं वा कथञ्चन ।
तिथिं पक्षस्य न ब्रूयान्नक्षत्राणि विनिर्दिशेत् ।
न देवगुरुविप्राणां दीयमानन्तु वारयेत् ।
निन्देद्यो गुरून् देवान् वेदं वा सोपबृंहणम् ।
कल्पकोटिशतं सत्यं रौरवे पच्यते नरः ।
तूष्णीमासीत निन्दायां न ब्रूयात् किञ्चिदुत्तरम् ।

कर्णौ पिधाय गन्तव्यं न चैनमवलोकयेत् ।
वर्त्मभेदं वै रहस्यञ्च परेषां गूहयेद्बुधः ॥
विशादं खजनैः सार्द्धं न कुर्य्याद्दे कदाचन ।
न पापं पापिनां ब्रूयादपापं वा द्विजोत्तमाः ॥
नेक्षेतोद्यन्तमादित्यं अग्निं वानिमित्ततः ।
नास्तं यान्तं न वारिस्थं नोपरुद्धं न मध्यगम् ॥
तिरोहितं वाससा वा न दद्यान्तरगामिनम् ।
नग्नां स्त्रियं पुमांसं वा पुरोधं मूत्रमेव वा ॥
पतितश्वक्षचाण्डालादुच्छिष्टान्नावलोकयेत् ।
न युक्तवन्नवाङ्गं वा नोक्षन्तं मत्तमेव वा ॥
क्षुण्णेन भोजने पत्नीं नेक्षेतामौचेत मेहतीम् ।
क्षुवन्तीं जृम्भमाणां वा नासनस्थां यथासुखम् ॥
नोदके चात्मनो रूपं न कुलं व्रतमेव वा ।
न शूद्राय मतिं दद्यात् क्षवरं पायसं दधि ॥
नोच्छिष्टं वा हुतमधु न च क्षाणिनं हविः ।
न कुर्य्यात् कस्यचित् पीडां सुतं शिष्यञ्च ताड-
येत् ॥
नात्मानमवमन्येत दैवं यत्नेन वर्जयेत् ।
न च शिष्यान्न सत् कुर्य्यान्नात्मानं शंसयेद्बुधः ॥
न नद्याश्च नदीं ब्रूयात् पर्वतेषु न पर्वतम् ।
आवसेत्तेन नैवापि यद्व्रजेत् सहवासिनम् ॥
शिरोऽभ्यङ्गावशिष्टेन तैलेनाङ्गं न लेपयेत् ।
रोमाणि च रहस्यानि खानि खानि च न
स्पृशेत् ॥
न पाणिपादवाहूनेत्रदलानि समाश्रयेत् ।
नाभिहन्याच्छलं पद्भ्यां पाणिना न कदाचन ॥
न घातयेद्दिधिकाभिः फलानि न फलेन च ।
न नीचभाषणं शिष्येन कर्षेच्च परासनम् ॥
नोत्सङ्गे भक्षयेद्भक्ष्यान् गाश्च संवेशयेन्न हि ।
नार्द्रैः क्रीडेन्न धावेत स्त्रीभिर्व्यर्दं न चाचरेत् ॥
न दन्तैर्नखलोमानि छिन्द्यात् सूत्रं न बोधयेत् ।
न बालातपमासेवेत् प्रेतधूमं विवर्जयेत् ॥
नैकः सुप्यात् शून्यगेहे स्वयं नोपानहौ वहेत् ।
नाकारणाद्वा निष्ठीवेन्न बाहुभ्यां नदीं तरेत् ॥
न पादस्वाजनं कुर्य्यात् पादेनैव कदाचन ।
नापौ प्रतापयेत् पादौ न कांस्ये धावयेद्बुधः ॥
नाभिप्रतारयेद्देवान् ब्राह्मणान् गामथापि वा ।
न क्षुण्णेत् पाणिनोच्छिष्टो विप्रगोब्राह्मणा-
नलान् ॥
न चैवान्नं पदा चापि न देवप्रतिमां स्पृशेत् ।
नोत्तरेदुपवस्त्रञ्च स्वस्त्रीं नो व्यतिक्रमेत् ॥
चैत्यं वृक्षं नैव छिन्द्यान्नाप्सु क्षीवनसृष्टजेत् ।
न चास्थिं लङ्घयेद्धीमान् नोपदध्याद्यः क्वचित् ॥
न चैवं पादतः कुर्य्यात् तिलवह्निं निशि त्यजेत् ।
न कूपमवरोहेत नाचक्षीतायुषिः क्वचित् ॥
अग्नौ न प्रक्षिपेदस्थि नाङ्घ्रिः प्रशमयेत्तथा ।
सृङ्मूत्रशमलादीनि वा न स्वयं आवयेत् परान् ॥
अवध्यमथ पण्यं वा विक्रयं न प्रयोजयेत् ।
पुण्यस्थानोदकस्थाने सीमान्तं वा क्षयेन्न तु ॥
न भिन्द्यात् पूर्वसमयं सत्योपेतं कदाचन ।
परस्परं पशून् व्यालान् पक्षिणो न च
बोधयेत् ॥

कारयित्वा स्वकर्माणि कारून् विद्वान् न
वञ्चयेत् ।
बहिर्गन्धञ्च कुदारप्रवेशञ्च विवर्जयेत् ॥
नैकश्चरेत् सभां विप्रः समवायञ्च वर्जयेत् ।
न बीजयेद्वा वक्त्रेण न देवायतने स्वपेत् ।
नाग्निगोब्राह्मणादीनामन्तरेण व्रजेत् क्वचित् ।
नाक्रामेत् कामतश्छायां ब्राह्मणानां गवामपि ॥
स्नातु नाक्रामयेच्छायां पतितार्द्धैर्नरोगिभिः ।
वर्जयेन्मार्जनीरेणुं वस्त्रस्नानघटोदकम् ॥
नाश्नीयात् पयसा तक्रं न बीजान्युपवीजयेत् ।
विवत्सायाश्च गोः क्षीरमौष्ट्रं वा निर्दशस्य च ।
आविकं सन्धिनीक्षीरमपेयं मनुरब्रवीत् ॥
हन्तकारमथार्द्रं वा भिक्षां वा याचितो द्विजः ।
दद्यादतिथये नित्यं वृथेत परमेश्वरम् ॥
भिक्षामाहुर्यतिसमाव्रतस्थं तस्माच्चतुर्गुणम् ।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमिष्यते ॥"
मार्कण्डेये ।
"भोजनं हन्तकारं वा अर्घ्यं भिक्षामथापि वा ।
अदत्त्वा तु न भोक्तव्यं यथा विभवमात्मनः ॥"*
काशीखण्डे ।
"नैवोल्लटासनेऽश्नीयान्नार्यौ वस्त्रशुचि क्षिपेत् ।
आर्द्रं ज्ञात्वा परार्थे योऽश्नीयात् शाकवर्जितः ।
दातुः आर्द्रफलं नास्ति भोक्ता किल्बिषमृग्-
भवेत् ॥
नोत्पाटयेल्लोमनखं दशनेन कदाचन ।
करजैः करजच्छेदं करेणैव विवर्जयेत् ॥
अपद्वारे न गन्तव्यं स्वेच्छमपरवेश्मनोः ।
उत्क्रोचदूतदेवार्थद्रव्यं दूरात् परित्यजेत् ॥
निष्ठीवनञ्च श्लेष्माणं रुधात् दूरे विनिःक्षिपेत् ।
उद्धृत्य पक्वन्तत्पिण्डान् खायात् परजलाशये ।
अनुद्धृत्य च तत्कर्त्तुरेनसः स्यात्तुरीयभाक् ॥"
ब्राह्मे ।
"यस्तु प्राणितले मुक्ते यस्तु फुत्कारसंयुतम् ।
प्रहृताङ्गुलिभिर्यस्तु तस्य गोमांसवच्च तत् ॥"
अत्रिस्मृतौ ।
"न्यूनाधिकनखी या गौर्याथवाभक्षचारिणी ।
तयोर्दुग्धं न होतव्यं न पातव्यं कदाचन ॥
अजा गावो महिष्यश्च यामेध्यमपि भक्षयेत् ।
हव्ये कव्ये च तद्दुग्धं गोमयञ्च विवर्जयेत् ॥
अकृत्या दन्तकाष्ठञ्च प्रत्यक्षलवणन्तथा ।
श्लेष्मिकाप्राश्यनञ्चैव तुल्यं गोमांसभक्षणैः ॥"
अत्रापवादो मनुस्मृतौ ।
"सानुद्रं सैन्धवञ्चैव लवणं परमादृतम् ।
प्रत्यक्षे अपि ते ग्राह्ये निषेधस्वन्यगोचरः ॥"
अत्रिस्मृतौ ।
"दिवा कपित्थच्छायां च निशायां दधिभो-
जनम् ।
कार्पासं दन्तकाष्ठञ्च शूकादपि हरेत् श्रियम् ॥"
विष्णुस्मृतौ च ।
"कपिलायाः पयः पीत्वा शूद्रस्तु नरकं व्रजेत् ।
होमधेनुं पिबेद्विप्रो विप्रः स्यादन्यथा पशुः ॥
पारक्यं पुनर्लेखं तत्तस्कारोक्तमन्यथा ।

यदत्र लिखितं किञ्चित्तत् ज्ञातव्यं महात्मभिः ॥
आचाराच्छेदजाः सन्ति परेऽपि बहुलाः सताम् ।
ते लोकशास्त्रतो ज्ञेया अपेक्ष्या यदि वैष्णवैः ॥
नित्यलक्षेषां माहात्म्यमप्यत्र लिखितात् पुरा ।
सदाचारस्य नित्यत्वान्माहात्म्याच्च सुसिद्ध्यति ॥"
इति श्रीहरिभक्तिविलासे नित्यकृत्यसमापनो
नाम ११ विलासः ॥

वैष्णवी, स्त्री, (विष्णोरियम् । विष्णु + अण् । स्त्रियां ङीप् ।) विष्णुशक्तिः । यथा,—
"एषा त्रिशक्तिरुद्दिष्टा नयसिद्धान्तगामिनी ।
एषा श्वेता परा दृष्टिः सात्त्विकी ब्रह्मसंज्ञिता ॥
एषैव ज्ञाना तमसि रौद्री देवी प्रकीर्त्तिता ।
अष्टादश यथा कोट्यो वैष्णव्या भेद उच्यते ।
या विष्णो राजसी शक्तिः पालिनी चैव
वैष्णवी ॥"
इति वाराहे त्रिशक्तिमाहात्म्यनामाध्यायः ॥
अपि च ।
"शङ्खचक्रगदाधारी विष्णुमाता तथारिहा ।
विष्णुरूपाथवा देवी वैष्णवी तेन गीयते ॥"
इति देवीपुराणे ४५ अध्यायः ॥
अपरञ्च ।
"विष्णुभक्ता विष्णुरूपा विष्णोः शक्तिस्वरूपिणी ।
सृष्टौ च विष्णुना सृष्टा वैष्णवी तेन कीर्त्तिता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥
दुर्गा । इति शब्दरत्नावली । गङ्गा । यथा,
पद्मपुराणम् ।
"विष्णोः पादप्रसूतासि वैष्णवी विष्णुपूजिता ।
पाहि नस्तेनसस्तस्मादाजन्ममरणान्तिकात् ॥"
इत्यादि आह्निकाचारतत्त्वे स्नानार्थगङ्गावाहन-
मन्त्रः । अन्यच्च ।
"विष्णुपादप्रसूतासि वैष्णवीनामधारिणी ।
सर्व्वत्र त्वं मां नित्यं गङ्गा त्रिपथगामिनी ॥"
इति गङ्गाकवचम् ॥
अपराजिता । इति शब्दचन्द्रिका । शतावरी ।
इति राजनिर्घण्टः । तुलसी । इति शब्द-
माला ॥

वैसारिणः, पुं, (विशेषेण सरतीति विसारी मत्स्यः
स एव । "विसारिणो मत्स्ये ।" ५ । ४ । १६ ।
इति अण् ।) मत्स्यः । इत्यमरः ॥

वैस्रचनं, क्ली, (विशेषेण स्रचयतीति विस्रचनम् ।
तदेव । स्वार्थे अण् ।) गार्हे पुरुषस्य स्त्रीवेश-
धारणम् । इति केचित् ॥

वैहार्य्यः, त्रि, (विशेषेण हरीयते इति । वि + हृ +
ण्यत् । विहार्य्य एव । स्वार्थे अण् ।) परि-
हासेन ज्ञातव्यः । ज्ञालसमन्यादि । इत्य-
ञ्जनमिश्रः । यथा,—
"यथा बालेषु नारीषु वैहार्य्येषु तथैव च ।
सङ्गरेषु निपातेषु तथापद्व्यसनेषु च ।
अनृतं नोक्तपूर्व्वं मे तेन सत्येन खं व्रज ।"
इति महाभारते उद्योगपर्व्व ।

वैहासिकः, पुं, (विहास + ठक् ।) विहासं
करोति यः । भक्ड इति ख्यातः । तत्पर्य्यायः ।

वासन्तिकः २ केलिकिलः ३ विदूषकः ४ प्रहासी ५ प्रीतिदः ६। इति हेमचन्द्रः॥ (यथा, नैषधे। १६। ६४।
"दूरारूढतिमिरजलधेर्बाडवश्चित्रभानु-
र्भोगुप्तान्यहनरहवनीकेलिवेहासिकोऽयम्॥")

वोटा, स्त्री, दासी। यथा,—
"पोटा वोटा च चेटी च दासी च कुट-
हारिका॥"
इति हेमचन्द्रः॥

वोड़ः, पुं, गुवाकः। इति शब्दरत्नावली॥ जटाधरे भूरिप्रयोगे च झोड़ इति पाठः॥

वोड्रः, पुं, गोनसवर्णः। वोड़ा इति भाषा। यथा। गोनासो मक्कली वोड्रः। इति भरतधृत-विक्रमादित्यः॥ मत्स्यविशेषः। इति मेदिनी॥

वोड्री, स्त्री, पञ्चचतुर्यांग्रः। इति मेदिनी॥ बुड़ि इति भाषा॥

वोढव्यः, त्रि, वहधातोस्तव्यप्रत्ययेन निष्पन्नमेतत्। वहनीयः। वाह्यः। इति सुग्धबोधव्याकरणम्॥ (यथा, हरिवंशे। ७५। ८८।
"वोढव्या पुङ्गवेनेव धूःसदा रथमूर्द्धनि॥"
परिणेतव्यः। यथा, महाभारते।१२।४४।४५।
"न चैतेभ्यः प्रदातव्या न वोढव्या तथाविधा॥")

वोढ़ा, [ऋ] पुं, (वहतीति। वह+तृच्। "सहिवहोरोदवर्णस्य।" ६। ३। ११२। इति अकारस्यौकारः।) भारिकः। (यथा, भागवते। ५। १०। २।
"विषमगतां खड्गिविकां रहूगण उपधार्य्य पुरुषवानधिवहत आह हे वोढ़ारः साध्वतिक्रामत॥") मूढ़ः। परिणेता। इति शब्दरत्नावली॥ (यथा, मनुः। ८। २०४।
"अन्यां चेद्दर्शयित्वान्या वोढुः कन्या प्रदीयते।
उभे ते एकशुल्केन वहेदित्यब्रवीन्मनुः॥")
बलदः। इति मेदिनी॥ अनड्वान्। ऋषभः। इति राजनिर्घण्टः॥ (यथा, महाभारते। ११। २६। ५।
"तपोऽर्थीयं ब्राह्मणी धत्ते गर्भं
गौर्वोढ़ारं धावितारं तुरङ्गी॥"
वहनकर्त्तरि, त्रि। यथा, कुमारे। १। १५।
"भागीरथीनिर्झरशीकराणां
वोढ़ा मुहुः कम्पितदेवदारुः॥")

वोढुः, पुं, मुनिविशेषः। यथा,—
"सनकश्च सनन्दश्च तृतीयश्च सनातनः।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा।
सर्व्वे ते ब्रह्मणः पुत्रा मानसा विधिनिर्म्मिताः॥"
इत्याह्निकाचारतत्त्वम्॥

वोण्टः, पुं, वृन्तम्। इति शब्दरत्नावली॥ वोंटा इति भाषा॥ किन्तु लिपिकरप्रमादपाठोऽयम्। वण्ट इति मूलग्रन्थे।
"तथा वोंट इति ख्याते वृन्तं प्रसवबन्धनम्॥"

वोदः, त्रि, आर्द्रः। इति त्रिकाण्डशेषः॥

वोदाजः, पुं, (वोदः आर्द्रः सन् अलतीति। अल+अच्।) मत्स्यविशेषः। घोयालि इति भाषा॥

तत्पर्य्यायः। सहस्रदंष्ट्री २ पाठीनः ३ वदालकः ४। इति शब्दरत्नावली॥

वोरकः, पुं, लेखकः। इति त्रिकाण्डशेषः॥

वोरटः, पुं, कुन्दपुष्पम्। इति त्रिकाण्डशेषः॥

वोरपट्टी, स्त्री, मन्दरा। इति शब्दमाला॥ माडुर इति भाषा॥

वोरवः, पुं, धान्यविशेषः। वोरो इति भाषा। अस्य गुणाः।
"वोरवस्तु बुधैः प्रोक्तस्त्रिदोषस्य प्रकोपकः।
मधुरस्वाम्लपाकश्च ग्राही पित्तकरो गुरुः॥"
इति राजवल्लभः॥

वोरुखानः, पुं, पाटलवर्णाश्वः। इति हेमचन्द्रः॥

वोलं, क्ली, (वोलयति प्रायशो निमग्नं भवतीति। वुल+अच्। यद्वा वलतीति पिञ्जादित्वात् ऊलच्।) खनामख्यातवणिग्द्रव्यम्। तत्पर्य्यायः। रक्तापद्मम् २ सुक्षम् ३ सुरसम् ४ पिच्छकम्५ विषम् ६ निर्ज्जीहम् ७ वर्ब्बरम् ८ पिच्छम् ९ सौरभम् १० रक्तगन्धकम् ११ रसगन्धम् १२ महागन्धम् १३ विषम् १४ शुभगन्धम् १५ विश्वगन्धम् १६ गन्धरसम् १७ ब्रह्मारिः १८। अस्य गुणाः।
"वोलश्च कटु तिक्तोष्णं कषायं रक्तदोषजुत्।
कफपित्तामयान् हन्ति प्रदरादिरुजापहम्॥"
इति राजनिर्घण्टः॥

तत्पर्य्यायगुणाः।
"वोलं गन्धरसः प्राज्ञपिच्छगोपरसाः समाः।
वोलं रक्तहरं शीतं मेध्यं दीपनपाचनम्।
मधुरं कटु तिक्तञ्च यद्दं खेदविदोषजित्।
ज्वरापस्मारकुष्ठघ्नं गर्भाशयविशुद्धिकृत्॥"
इति भावप्रकाशः॥

वोलः, पुं, (वातीति। वा+ऊलच्।) रसगन्धः। इत्यमरः॥

वोलकः, पुं, लेखकः। इति शब्दरत्नावली॥

वोल्लाहः, पुं, अश्वविशेषः। यथा,—
"वोल्लाहस्त्वयमेव स्यात् पाण्डुकेशरवालधिः॥"
इति हेमचन्द्रः॥

वोहित्थं, क्ली, यानपात्रम्। इति हेमचन्द्रः॥ जाहाज इति भाषा॥

वौ(बौ)ह्नं, क्ली, (वृद्धेन कृतम्। वृद्ध+अण्।) वृद्धकृतनिरीश्वरशास्त्रम्। तत् सर्व्वैः शास्त्रकारैः खण्डितं अतएवाशास्त्रम्। जिनधर्म्मः। यथा,
"ततो दृढ़व्रतिः शक्रमकरोद्बलदर्पितम्।
यद्दशान्तिविधानेन पौष्टिकेन च कर्म्मणा॥
गत्वाथ मोहयामास राजपुत्रान् दृढ़व्रतिः।
जिनधर्म्मं समाख्याय वेदवाह्यं स वेदवित्॥
वेदत्रयीपरिभ्रष्टांश्चकार विषयाधिपः।
वेदवाह्यान् परिज्ञाय हेतुवादसमन्वितान्।
जघान शक्रो वज्रेण सर्व्वधर्म्मबहिष्कृतान्॥"
इति मात्स्ये सोमवंशानुकीर्त्तनं नाम २४ अः॥
वृद्धसम्बन्धिनि, त्रि॥

वौषट्, व्य, (उह्यतेऽनेन हविरिति। वह+बाहुलकात् डौषट्।) देवहविर्दानमन्त्रः। तत्पर्य्यायः। स्वाहा २ औवट् ३ वषट् ४ स्वधा ५। इत्यमरः॥ एते पञ्च शब्दा देवहविर्दाने वह्निमुखाहुतौ वर्त्तन्ते। देवाय हविषो दानं देवहविर्दानम्। तत्र देवा इन्द्रादयः अत्र पितरो देवता इति स्मृतेस्तेऽपि देवा हविर्दान इत्यनेन एते मन्त्रा इति सूचितम्। अमन्त्रे स्वाहयेव हविर्भुंजमिति रघुः। स्वाहायुतं मन्त्रमेदे स्त्रियां स्वाहाग्नियोषितीति कोषान्तरम्। स्वाहा दन्त्यादि। औवट् तालव्यादि मूर्द्धन्यमध्यम्। वौषट् वषट्वयं मूर्द्धन्यमध्यम्। स्वधा दन्त्यादि। इन्द्राय स्वाहा इत्यादिप्रयोगः। इति भरतः॥

व्यंशकः, पुं, (विगतोऽंशो विभागो यस्य। हेदादिना प्रायो विभागानर्हत्वादस्य तथात्वम्।) पर्व्वतः। इति त्रिकाण्डशेषः॥

व्यंसकः, पुं, (वि+अंस+खुल्।) धूर्त्तः। इति हेमचन्द्रः॥

व्यंसितः, त्रि, (वि+अंस+क्तः।) प्रतारितः। इति त्रिकाण्डशेषः॥

व्यक्तः, त्रि, (वि+अञ्जू व्यक्तौ+क्तः।) प्राज्ञः। इत्यमरः॥ स्फुटः। इति मेदिनी॥ (यथा, साहित्यदर्पणे। १। १।
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्॥")
पुं, विष्णुः। यथा,—
"व्यक्तो वायुरधोक्षजः।"
इति तस्य सहस्रनामस्तोत्रम्॥

व्यक्तदर्थः, पुं, (व्यक्तं स्फुटं यथा स्यात् तथा दर्शोऽर्थो येन।) साक्षी। तत्पर्य्यायः। प्रत्यक्षी २। इति त्रिकाण्डशेषः॥

व्यक्तरूपः, पुं, (व्यक्तं रूपं यस्य।) विष्णुः। यथा,
"अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित्।"
इति तस्य सहस्रनामस्तोत्रम्॥
स्पष्टरूपयुक्ते, त्रि॥

व्यक्तिः, स्त्री, (व्यज्यतेऽनयेति। वि+अञ्ज+क्तिन्।) एधगात्रिका। इत्यमरः॥ जनः। इति हेमचन्द्रः॥ स्पष्टता च॥ (यथा, रघुः। १।१०।
"तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥"
भूतमात्रम्। यथा, गीतायाम्। ८। १८।
"अव्यक्ताद्व्यक्तयः सर्व्वाः प्रभवन्त्यहरागमे॥"
"व्यक्ताव्यक्तराचराणि भूतानि।" इति तट्टीकायां स्वामी॥ न्यायशास्त्रोक्तलक्षणार्थः। यथा, साहित्यदर्पणे। २। २५।
"सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥")

व्यग्रः, त्रि, (विरुद्धं अगतीति। अग+ऋजेन्द्रेति साधुः।) आसक्तः। (यथा, महानिर्व्वाणतन्त्रे। ३। १२४।
"शुश्रूषा धनार्जने व्यग्राः सदा चञ्चलमानसाः॥")
आकुलः। इत्यमरः॥ (यथा, कुमारे। ७। २।
"वैवाहिके कौतुकसंविधाने-
ष्वेके यदे व्यग्रपुरन्ध्रिवर्गम्॥"

सम्भ्रमः। इति श्रीधरस्वामी॥ यथा, भागवते। ३। १६। ५।
"तं अयत्नकं दितिजाधमेन
खपार्षदमुख्येन विसर्ज्यमानम्॥")
पुं, विष्णुः। यथा,—
"प्रद्युम्नो नियतो यतो नैकमूर्त्तो महामनाः।"
इति तस्य सहस्रनामस्तोत्रम्॥
अङ्गः, पुं, (विद्यन्ते अङ्गानि यस्य।) मेकः। इति मेदिनी॥ (विद्यन्ते अङ्गानि यस्मात्।) सुस्वरोगविशेषः। तस्य लक्षणं यथा,—
"क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः।
सुखमार्गस्थ सहसा मस्तकं विकलत्वतः।
गौरवं तनुकं ग्लानिं सुखे यत्नं तमादिशेत्॥"
इति माधवकरः॥७॥
तस्य चिकित्सा।
"घटाङ्कुरा मरुराच्च प्रलेपाद्व्यङ्गनाशनः।
यत्नं मल्लिकया लेपः प्रपुन्नो मधुयुक्तया॥
अथवा लेपनं यूथ्यं प्रपुन्नस्य रुधिरेण च।
जातीपलस्य लेपस्तु हरेद्व्यङ्गञ्च नीलिकाम्॥
वटस्य पाण्डुपत्राणि मालती रक्तचन्दनम्।
कुष्ठं कालीयकं लोध्रं एभिर्लेपं प्रयोजयेत्॥"
इति भावप्रकाशः।
(त्रि, विगतं अङ्गं यस्य।) हीनाङ्गः। इति मेदिनी॥ (यथा, महाभारते। १। १६। २०।
"यद्येनमपि मातङ्गं मामिवाक्रमविभेदनात्।
न करिष्यसनङ्गं वा अङ्गं वापि यशस्विनम्॥")
व्यङ्गः, त्रि, व्यञ्जनया बोध्योऽर्थः। यथा,—
"वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।
व्यङ्ग्यो व्यञ्जनया तास्तिस्रः शब्दस्य शक्तयः॥"
इति साहित्यदर्पणे २ परिच्छेदः॥
अञ्च, गतौ वाक्ये। सम्पूजने। इति कविकल्पद्रुमः॥ (तुदा०-कुटा०-पर०-सक०-सेट्।) आज्यञ्जलः। अक्, विषति सर्वं क्षणः। क्षणयति हत्यर्थः। अविचौत् विव्याच। इति दुर्गादासः॥
अञ्जः, पुं, (अञ्जत्यनेनेति। वि+अञ्ज+"गोचरसञ्चरेति।"३। ३। ११९। इति घञ्। निपातनादञ्जेर्वपनपोरिति वीभावो न भवति।) अञ्जनम्। विपूर्व्वाज्यधातोरल्प्रत्ययेन निष्पन्नमिदम्।
अञ्जनं, क्ली, (अञ्जत्यनेनेति। वि+अञ्ज+ल्युट्। 'वा यौ।'२।४।५०। इति पक्षे वीभावो नास्ति।) तालहिन्तालम्। इत्यमरः॥ पाखा इति भाषा॥ (यथा, ऋतुसंहारे। १। ८।
"सचन्दनाम्बुव्यजनोशनालैः
सहारयष्टिस्तनमण्डलाभैः।
सवल्लकीकाकलिगीतनिस्वनैः
प्रबुध्यते सम्प्रति रावमन्थः॥")
अस्य सामान्यगुणः। मूर्च्छादाहक्लमाधर्म्मश्रमनाशित्वम्। तालव्यञ्जनगुणः। त्रिदोषघ्नत्वम्। लघुत्वञ्च। वंशव्यञ्जनगुणः। रूक्षत्वम्। उष्णत्वम्। वायुपित्तकारित्वञ्च। वेत्रव्यञ्जनमयूरपुच्छव्यञ्जनगुणः। त्रिदोषनाशित्वम्। बालव्यञ्जनगुणः। तेजस्करत्वम्। मक्षिकादिनिवारकत्वञ्च। इति राजवल्लभः॥
व्यञ्जकः, पुं, (अनक्तीति। वि+अञ्ज+ण्वुल्।) अभिनयः। इत्यमरः॥ दे क्षुद्रतक्रोषादिभावाभिव्यञ्जके। अनक्तीति व्यञ्जकः। अनुत्र घञि गति त्वचयि व्यक्तः। आङ्गिकसात्त्विकवाचिकाहार्य्यभेदात् व्यञ्जकस्तुर्विधः। अभिसुखं नीयते अर्थोऽनेन इति अभिनयः। नी ज प्रापणे अच्। हस्तादिभिः मुखप्रसादादिसूचनमभिनयः। घटाद्याकारस्वकं करादिसंस्थानमभिनयः इत्यन्येऽपि। इति भरतः॥ व्यञ्जनया प्रतिपादकः। (यथा, साहित्यदर्पणे।२।३१।
"अभिधाद्यास्त्रयोपाधिर्विश्रान्तास्त्रिविधो मतः।
मुख्योऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा॥"
प्रकाशके, त्रि। यथा, मनुः। २। ६८।
"उत्पत्तिव्यञ्जकः पुण्यः कर्म्मस्वोमं निबोधत॥")
व्यञ्जनं, क्ली, (व्यज्यते व्यक्तते अनेन संयोज्यतेऽनेनेति। वि+अञ्ज+ल्युट्।) अन्नोपकरणम्। तत्तु सूपशाकादि। इति राजनिर्घण्टः॥ तत्पर्य्यायः। तेमनम् २ निष्ठानम् ३। इत्यमरः॥ तेमः ४। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८। ६७। २।
"आनो भर व्यञ्जनं गामश्वमभ्यञ्जनम्॥")
अस्य गुणाः।
"व्यञ्जनं शाकमत्यम्लं क्षुद्यं दृष्यञ्च पुष्टिदम्।
द्रव्येण येन येनेह व्यञ्जनं मतुरस्मयोः।
तस्य तस्य तयोस्तेनदृगुणदोषविभावयेत्॥"
इति राजवल्लभः॥
व्यञ्जनविशेषगुणाः तत्तच्छब्दे द्रष्टव्याः॥ ७॥
चिह्नम्। (व्यञ्जना। यथा, साहित्यदर्पणे।२।५८।
"अवाच्यलक्ष्यादिकं तस्य वस्तु व्यञ्जनरूपणे॥")
ग्रन्थः। (यथा, महाभारते। १। १५८। १४।
"कृत्स्न एव परिक्लेशः सुतं ग्राह्यान्वयं स्वयम्।
बालमज्ञानवयसमजातव्यञ्जनाकृतिम्॥")
अवयवः। चिह्नम्। इति मेदिनी॥ स्त्रीपुंसयोरप्युद्भेदः। स तु उपसर्गः। अर्द्धमात्रकम्। स तु ककारादिषकारान्तवर्णः। इति धरणिः। (यथा, साहित्यदर्पणे। १०। ६४०।
"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते॥")
व्यञ्जना, स्त्री, (वि+अञ्ज+णिच्+युच्। टाप्।) शब्दस्य वृत्तिविशेषः। तस्या लक्षणं यथा,—
"विरताखभिधाद्यासु ययार्थो बोध्यतेऽपरः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥"
शब्दवृद्धिकर्म्मेतां विरम्य व्यापाराभाव इति नयेनाभिधा लक्षणा तात्पर्य्याख्यास्तिस्रो वृत्तिषु स्वं स्वमर्थं बोधयित्वा उपरतासु ययार्थोऽर्थो बोध्यते सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश वृत्तिर्व्यञ्जन-ध्वनन-गमन-प्रत्यायनादिशब्दैरुद्देश्यविषया व्यञ्जना नाम। तत्र।
"अभिधामूलमाश्रित्य शब्दस्य व्यञ्जना द्विधा॥"
अभिधामूलामाह।

"अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया॥"
आदिशब्दादिप्रयोगादयः। उक्तं हि।
"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।"
इति॥
सम्युक्तचक्रो हरिरित्यत्र शब्दचक्रसंयोगेन हरिशब्दो विष्णुमेवाभिधत्ते। असम्युक्तचक्रो हरिरिति तद्वियोगेन तमेव। भीमार्ज्जुनाविति अर्ज्जुनः पार्थः। कर्णार्ज्जुनाविति कर्णः सूतपुत्रः। स्याङ्कं वन्दे भवच्छिदे इति स्याङ्कः शिवः। सर्व्वं जानाति देव इति देवो भवान्। कुपितो मकरध्वज इति मकरध्वजः कामः। देवः पुरारिरिति पुरारिः शिवः। मधुना मत्तः पिक इति मधुर्वसन्तः। पातु वो दयितासुखमिति सुखं सांमुख्यम्। विभाति गगने चन्द्र इति चन्द्रः शशी। निशि चित्रभानुरिति चित्रभानुर्वह्निः। भाति रथाङ्गमिति नपुंसकत्वात् रथाङ्गं चक्रम्। खरस्तु वेद एव विशेषप्रतीतिलक्षण काव्य इति तस्य विषये नोदाहृतम्। इदञ्च केषाञ्चिन्मतम्। आहुः खरोऽपि काव्यादिरूपः काव्ये विशेषप्रतीतिलक्षदेव। उदात्तादिरूपोऽपि सुनेः पाठोक्तदिशा शब्दालङ्कारादिरसविशेषप्रतीतिलक्षदेवेति। एतद्विषये उदाहरणसूचितमेव इति तन्न तथाहि खराः काकादय उदात्तादयो वा वाच्यरूपमेव विशेषं प्रत्याययन्ति न खलु प्रकृतोक्तमनेकार्थशब्दस्यैकार्थनियन्त्रणरूपं विशेषम्। किञ्च यदि यत्र क्वचिदनेकार्थशब्दानां प्रकरणादिनियमाभावादनियन्त्रितयोरप्यर्थयोरन्यतररूपस्मरणेनैकत्र नियमनं वाच्यं तदा तथाविधस्थले शैषिकस्वीकारप्रसङ्गः न च तथा अतएवाहुः शैषिकरूपप्रस्तावे काव्यमार्गे खरो न गण्यते इति च नय इत्थमुपजीव्यानां मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेण। आदिशब्दादेतावन्मात्रलक्षणौ वीप्सादौ हस्तादिचेष्टादिभिः स्तनादीनां कमलकोरकाद्याकारत्वम्। एवमेकस्मिन्नर्थेऽभिधया नियन्त्रिते या शब्दस्यान्यार्थबुद्धिहेतुः शक्तिः सा अभिधामूला व्यञ्जना। यथा मम तातपादानां महापात्रचतुर्दण्डिप्रभावावारविलासिनीभुजङ्गमहाकवीश्वरश्रीरत्नेश्वरसान्धिविग्रहिकाणाम्।
"दुर्गाजङ्घितविग्रहो मनसिजं संमीलयंश्चेजसा
प्रोद्यद्राजकलो गृहीतगरिमा विश्वग्वृतो
भोगिभिः।
नव्यश्रेणितरैश्चयो गिरिगुरौ गाढां रुचिं
धारयन्।
गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः॥"
अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्य उमानाम्नी महादेवी तद्वल्लभभाद्रदेवभूपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपो-

र्थो बोध्यते । एवमन्यत् । ● । लक्षणामूलामाह ।
"लक्ष्योपास्यते यस्य स्फुटे तत्तु प्रयोजनम् ।
यया प्रत्याय्यते सा स्याद्व्यञ्जना लक्षणाश्रया ।"
गङ्गायां घोष इत्यादौ जलमयादर्थबोधनादभिधायां विरतायां तटाद्यर्थबोधनाच्च लक्षणायां विरतायां यया शीतत्वपावनत्वादतिशयादिर्बोध्यते सा लक्षणामूला व्यञ्जना । ● । एवं ग्राम्यौ व्यञ्जनासङ्का आर्थीं व्यञ्जनामाह ।
"वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः ।
प्रस्तावकालदेशानां काकोश्चेष्टादिकस्य च ।
वैशिष्ट्यादन्यमर्थं या बोधयेत् सार्थसम्भवा ।"
व्यञ्जना इति संबध्यते । तत्र वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्ये यथा मम ।
"कालो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहराः समीराः ।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु-
दूरे पतिः कथय किं करणीयमद्य ।"
अत्र एतं देशं प्रति शीघ्रं प्रच्छन्नकामुकस्त्वया प्रेष्यतामिति सखीं प्रति कयाचित् द्योत्यते ।●।
बोद्धव्यवैशिष्ट्ये यथा,—
"निःश्वेष्यतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याग्रातपौड़ागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ।"
अत्र तदन्तिकमेव गतासीति विपरीतलक्षणया तस्यं तस्य च रन्तुमिति वाच्यं प्रतिपाद्य दूतीवैशिष्ट्यादबोध्यते । ● । अन्यसन्निधिवैशिष्ट्ये यथा,—
"उच्चं निचल निचुम्बाभिसिनी पत्तम्मि रेहइ बलाआ ।
णिम्मल मरगअ भाअण परिट्ठिआ संख सुत्तिव्व ।"
अत्र बलाकाया निष्यन्दत्वेन विश्लत्वं तेनास्य देशस्य विजनत्वमतः सङ्केतस्थानमेतदिति कयापि सन्निहितप्रच्छन्नकामुकं प्रत्युच्यते । अत्रैव स्थाननिर्जनत्वरूपयोग्यार्थवैशिष्ट्ये प्रयोजनम् ।
"भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते ।"
इत्युक्तप्रकारायाः काकोर्भेदा आकारादिभ्यो ज्ञातव्याः । ● । एतद्वैशिष्ट्ये यथा,—
"गुरुपरतन्त्रतया वत
दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिललालिते
नेष्यति सखि ! सुरभिसमयेऽसौ ।"
अत्र नेष्यतीत्यपि तर्हि एष्यतीव इति काक्वा व्यज्यते । ● । चेष्टावैशिष्ट्ये यथा,—
"सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ।"
अत्र सन्ध्या सङ्केतकाल इति पद्मनिमीलनादिचेष्टया कयाचित् द्योत्यते । एवं वक्त्रादीनां यत्तत्समस्तानां वैशिष्ट्ये बोद्धव्यम् । ● ।
"वैधिध्यादियमर्थानां प्रत्येकं त्रिविधा मता ।"
अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्व्वा अप्यक्षरोक्ता व्यञ्जनास्त्रिविधाः । तत्र वाच्यार्थस्य व्यञ्जना यथा । कालो मधुरित्यादि । लक्ष्यार्थस्य यथा । निःश्वेष्युतचन्दनमित्यादि । व्यङ्ग्यार्थस्य यथा । उच्चं निचल इत्यादि ।●।
प्रकृतिप्रत्ययादिरूपव्यञ्जनन्तु प्रपञ्चविष्यते ।
"ग्रन्थबोधो यतस्तस्यै ग्रन्थोऽप्यर्थान्तरायते ।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ।"
यतः ग्रन्थो व्यञ्जकत्वेऽर्थान्तरमपीक्षते । अर्थोऽपि ग्रन्थं तदेकस्य व्यञ्जकत्वेऽन्यस्य सहकारित्वमवश्यमङ्गीकरणीयम् ।
"अभिधादित्रयोपाधिर्वैशिष्ट्यात्त्रिविधो मतः ।
ग्रन्थोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा ।"
अभिधोपाधिको वाचकः । लक्षणोपाधिको लक्षकः । व्यञ्जनोपाधिको व्यञ्जकः । किञ्च ।
"तात्पर्य्याख्या वृत्तिमाहुः पदार्थान्वयबोधने ।
तात्पर्य्यार्थं तदर्थेन वाक्यं तद्बोधकं परे ।"
अभिप्राया एकैकपदार्थबोधनविरमात् वाक्यार्थरूपस्य पदान्वयस्य बोधिका तात्पर्य्या नाम वृत्तिस्तदर्थेन तात्पर्य्यार्थेनाऽन्वयबोधकत्वेन वाक्यमित्यभिहितान्वयवादिनां मतम् । इति साहित्यदर्पणे वाक्यस्वरूपनिरूपणो नाम द्वितीयः परिच्छेदः ।
व्यञ्जकः, पुं, एरण्डः । इत्यमरः ।
व्यतिकरः, पुं, (वि + अति + कृ + अप् ।) व्यसनम् । (यथा, कथासरित्सागरे । ७४ । ८६ ।
"अस्मिन् व्यतिकरे वृत्ते प्रभुतामेव ते गतः ।")
व्यतिषङ्गः । इति मेदिनी । (विनाशः । यथा, भागवते । १ । ७ । ३२ ।
"प्रजोपप्लवमालक्ष्य लोकव्यतिकरञ्च तम् ।
मतञ्च वासुदेवस्य संजहारार्जुनो द्वयम् ।"
मिश्रणम् । यथा, माघे । ४ । ५१ ।
"अन्योन्यव्यतिकरचारुभिर्विचित्रै-
रत्नस्रग्नवमणिजन्मभिर्मयूखैः ।")
व्यतिक्रमः, पुं, (वि + अति + क्रम + घञ् ।) क्रमविपर्य्ययः । यथा,—
"सर्व्वत्र प्राङ्मुखो दाता ग्रहीता च उदङ्मुखः ।
एष एव विधिर्दाने विवाहे च व्यतिक्रमः ।"
इत्युद्वाहतत्त्वम् ।
व्यतिरिक्तः, त्रि, व्यतिरेकविशिष्टः । भिन्नः । (व्यति-पूर्ब्बरिचधातोः क्तप्रत्ययेन निष्पन्नमेतत् । (अधिकः । यथा, कातन्त्रचतुष्टयस्य प्रथमाविभक्तिर्लिङ्गार्थवचने द्रव्यस्य पञ्चमी । "विशेषेणातिरिक्तोऽधिको व्यतिरिक्तः ।")
व्यतिरेकः, पुं, (वि + अति + रिच + घञ् ।) विना । अभावः । यथा । यदव्यतिरेकज्ञानं यदुत्पत्तिप्रतिबन्धकं तत् तन्निश्चयसाध्यम् । इति परामर्शग्रन्थः । (यथा, कथासरित्सागरे । ३६ । १६६ ।
"न प्रतियतिरेकेण सुखोद्धारमपरा गतिः ।")
अलङ्कारविशेषः । यथा,—
"व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।
श्लेषो यद्येभयतः सन्तु किन्तु प्रकृतिकोमलाः ।"
इति चन्द्रालोकः ।
व्यतिषङ्गः, पुं, (वि + अति + षञ्ज + घञ् ।) परस्परमेलनम् । (यथा, महाभारते । १२ । १०३ । ५ ।
"सेनयोर्व्यतिषङ्गेण जयः साधारणोऽभवत् ।")
विनिमयः । यथा, भागवते । ५ । १३ । १३ ।
"अन्योन्यविषयव्यतिषङ्गदुर-
वैराद्युक्तो विहरन् मिथश्च ।")
व्यतिहारः, पुं, (वि + अति + हृ + घञ् ।) विनिमयः । यथा,—
"परिदानं विनिमयो नैमेयः परिवर्त्तनम् ।
व्यतिहारः परावर्त्तो वैमेयो विमयोऽपि च ।"
इति हैमचन्द्रः ।
(यथा, रघुः । १२ । ६२ ।
"विक्रम-व्यतिहारेण सामान्यामूद्वयोरपि ।
जयश्रीरन्तरावेदिर्मैत्रवारुण्योरिव ।")
व्यतीतः, त्रि, (वि + अति + इ + क्तः ।) अतीतः । गतः । यथा,—
"अहोरात्रे व्यतीते तु संक्रान्तिर्यदहर्भवेत् ।
पूर्ब्बे व्रतादिकं कुर्य्युः परेद्युः स्नानदानयोः ।
इति तिथितत्त्वे भीमपराक्रमीयम् ।
व्यतीपातः, पुं, (वि + अति + पत + घञ् । "उपसर्गस्य घञीति ।" ६ । ३ । १२२ । इति उपसर्गस्य दीर्घः ।) महोत्पातः । अपयायम् । इति मेदिनी । विष्कम्भादिसप्तविंशतियोगान्तर्गतसप्तदशयोगः । तत्र सर्व्वकर्म्मवर्জ্জनं यथा,—
"निरयं दिवसं विष्टिं व्यतीपातञ्च वैधृतिम् ।
केचिद्वापि शुभैर्हीनं यात्राद्यमपि वर्জयेत् ।
परिघस्य त्यजेदर्द्धं शुभकर्म्म ततः परम् ।
गण्डव्याघातयोः षट् च नव वर्ज्यत्रयोदश ।
वैधृतिव्यतिपातौ च समस्तौ परिवर्জयेत् ।"●।
अस्य प्रतिप्रसवमाह भीमपराक्रमे ।
"न विष्कम्भो नवा गण्डो न व्यतीपातवैधृतौ ।
चन्द्रताराबले प्राप्ते दोषा गच्छन्त्यसंशयाः ।
नवव्यङ्गारको विष्टिः प्रेतेश्वरदिनं तथा ।
व्यतीपातो न दूष्येच्च यस्यार्कौ दक्षिणे स्थितः ।
यदि विष्टिव्यतीपातौ दिनं वाप्यशुभं भवेत् ।
हन्यतेऽखिलयोगेन भास्करेण तमो यथा ।"
इति ज्योतिस्तत्त्वम् । ● ।
तत्र जातफलम् ।
"कठोरवाक्यः पिशुनस्वभावो
गदातुरो माढहितो मनुष्यः ।
परस्य कार्य्ये कृतपक्षपातो
यस्य प्रसूतौ व्यतिपातयोगः ।"
इति कोष्ठीप्रदीपः ।
पारिभाषिकयोगविशेषः । यथा, हर्षलग्नतः ।
"अवशाब्धिनिखाङ्गागदेवतमस्तके ।
यद्यमा रविवारेण व्यतीपातः स उच्यते ।"
तत्र गङ्गास्नानफलं यथा । ब्रह्मवैवर्त्ते ।

"संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्ययोः।
पुण्ये स्नात्वा तु जाह्नव्यां कुलकोटीः समुद्धरेत्॥"
इति प्रायश्चित्ततत्त्वम्॥
(यथा च भागवते। ४। १२। ४८।
"दिनक्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा।
श्रावयेत् श्रद्दधानानां तीर्थपादप्रियाश्रयः॥")
व्यतीहारः, पुं, (वि+अति+हृ+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) परीवर्त्तः। इति जटाधरः॥ परस्परमेककर्तृकक्रियाकरणम्। यथा, केशाकेशि। दण्डादण्डि। इत्यादि। इति व्याकरणम्॥
व्यतीपातः, पुं, (व्यतिपतनमिति। वि+अति+पत+"एरच्।"३।३।५६। इत्यच्।) व्यतिक्रमः। तत्पर्य्यायः। व्यत्ययः २ विपर्य्यासः ३ विपर्य्ययः ४। इत्यमरः॥ (यथा, भागवते। ७। १०। ४४।
"परावरेषां स्थानानां कालेन व्यतिपर्ययं महान्॥")
व्यत्ययः, पुं, (व्यत्ययनमिति। वि+अति+अय्+घञ्।) विपर्य्ययः। इत्यमरः॥ (यथा, हरिवंशे। २७। २६।
"मात्राधि वचिता भद्रे! चरव्यत्ययहेतुना।
भविष्यति हि पुत्रस्ते क्रूरकर्म्मातिदारुणः॥")
व्यथ, ध भ इ दुःखे। चाले। भये। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) दुःखं दुःखानुभवः। चालः। कम्पनम्। ध, यथा। म, व्यथयति। इ, व्यथते लोकः। दुःखमनुभवति। कम्पते विभेति वेत्यर्थः। केचित्तु दुःखभयचलनयोरिति पठित्वा भये चलनं भयचलनमित्याहुः। दुःखभयचलने इति पठित्वा दुःखभययोश्चलनसूत्रपादनमिति गोविन्दभट्टः। इति दुर्गादासः॥
व्यथकः, त्रि, (व्यथयति पीड़यतीति। व्यथ+ण्वुच्+खुल्।) व्याधाकारी। यथा,—
"अवृत्यानं व्यथकस्तु स्यान्मर्म्मशृगरुन्नुदः॥"
इति हैमचन्द्रः॥
(यथा, किराते। २। ४।
"परिणामसुखे गरीयसि
व्यथकेऽस्मिन् वचसि क्षतौजसाम्।
अतिवीर्य्यवतीव मेधसे
बहुरत्नौषधि दृश्यते गुरुः॥")
व्यथा, स्त्री, (व्यथ+अङ्। टाप्।) दुःखम्। इत्यमरः॥ (यथा, उत्तरचरिते। १।
"स्नेहं दयां तथा सौख्यं यदि वा जानकीमपि।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा॥")
व्यथितः, त्रि, (व्यथ+क्तः।) पीड़ितः। (यथा, ऋतुसंहारे। ६। १६।
"कान्तानना द्युतिसुधामधिरोहतानां
श्रोभां परां कुरवकद्रुममञ्जरीणाम्।
दृष्ट्वा प्रिये हि यधिकस्य भवेन्न कस्य
कन्दर्पबाणनिकरैर्व्यथितं हि चेतः॥")
दुःखितः। यथा,—
"ततः प्रव्यथितो बाणो दुहितुः श्रुतदूषणः।
त्वरितः कन्यागारं प्राप्तोऽद्राक्षीत् यदूद्वहम्॥"
इति श्रीभागवते बाणयुद्धे ६२ अध्यायः॥

व्यध, व्यौ य ताड़े। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-अनिट्।) य, विध्यति शत्रुं शूरः। व्यौ, अव्याक्षीत्। कश्चित्तु दिर्भूतस्यानिकारीभूतयकारस्य व्यधेर्वकारो वर्ण्यः अन्यत्र तु दन्त्य इति मत्वानः यनि विव्यत्सतीत्याह। इति दुर्गादासः॥
व्याधः, पुं, (व्यधनमिति। व्यध ताड़े+"व्याधजपोरनुपसर्गे।" ३। ३। ६१। इत्यप्।) वेधः। इत्यमरः॥ (यथा, सुश्रुते। १। ३।
"शिराव्याधो धमनीनां गर्भिण्या व्याकृतिस्तथा॥")
व्याधः, पुं, (व्यधाय हितः। व्यध+यत्।) धनुर्गुणः। यथा,—
"व्याधस्तु प्रतिकायः स्याज्जीवाव्या भारवं गुणः॥")
इति त्रिकाण्डशेषः॥
व्याध्यः, पुं, (विरुद्धो व्यधो व्याधिसमासः। उपसर्गादध्वनः। इत्यच्।) कुत्सितपथः। तत्पर्य्यायः। दुरध्वः २ विपथः ३ कदध्वा ४ कापथः ५। इत्यमरः॥ कुपथः ६ असत्पथः ७ कुत्सितवर्त्म ८। इति शब्दरत्नावली॥ (यथा, महाभारते। २। ७०। २३।
"तूर्णं प्रत्यायनस्तेन कामं व्याध्यगतेनपि॥")
व्याप, कृ व्याप्तौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) अन्तःस्थादियुक्तः॥ क, व्यापयति। इति दुर्गादासः॥
व्यपदेशः, पुं, (वि+अप+दिश+घञ्।) कपटः। इति हैमचन्द्रः॥ (यथा, साहित्यदर्पणे। ३। १५५।
"कापि कुन्तलसंव्यानसंयमव्यपदेशतः।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम्॥")
नाम। इति त्रिकाण्डशेषः॥ वाक्यविशेषः। यथा,—
"व्याजेनात्माभिधावोक्तिर्व्यपदेश इतीर्य्यते॥"
इत्युज्ज्वलनीलमणिः॥
व्यपाकृतिः, स्त्री, अपह्नवः। अस्वीकारः। वि-अप-आङ् पूर्ब्बकधातोः क्तिप्रत्ययेन निष्पन्नम्॥
व्यभिचारः, पुं, (वि+अभि+चर+घञ्।) कदाचारः। असदाचारः। यथा,—
"व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम्।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते॥"
इति मानवे ५ अध्यायः॥
दोषविशेषः। तस्य लक्षणम्। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः। इति व्यधिकरणधर्म्मावच्छिन्नाभावचिन्तामणिः॥ स त्रिविधः। साधारणः १ असाधारणः २ अनुपसंहारी ३। तत्र विपक्षवृत्तित्वं साधारणत्वम्। सर्व्वसपक्षव्यावृत्तत्वमसाधारणत्वम्। व्याप्तिग्रहानुकूलैकधर्म्मोपसंहाराभावो यत्र सहेतुभिमतोऽनुपसंहार्यः। इति तत्त्वचिन्तामणिः॥

व्यभिचारिणी, स्त्री, (व्यभिचरति या। वि+अभि+चर+णिनिः। ङीप्।) परपुरुषगामिनी। यथा,—
"कृताधिकारां मलिनां पिण्डमात्रोपसेविनीम्।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम्॥
सोमः शौचं ददौ तासां गन्धर्व्वश्च शुभां गिरम्।
पावकः सर्व्वभक्षित्वं मेध्या वै योषितो ह्यतः॥"
इति याज्ञवल्क्यः। १। ७०-७१॥
इति तु स्त्रीसामान्यविषयम्।
"व्यभिचाराद्ऋतौ शुद्धिर्गर्भे त्यागो विधीयते।
गर्भभ्रूणवधे तासां तथा महति पातके॥"
इति गारुड़े ६५ अध्यायः॥ *॥
तस्याः परित्यागादि यथा। हारीतः। गर्भिणीमधोवर्ज्जगां स्त्रियमुत्तमगामिनीं पापव्यसनासक्तां धनधान्यक्षयकरीं वर्জ्जयेत्। यमः।
"स्वच्छन्दगा हि या नारी तस्यास्त्यागो विधीयते।
न चैव स्त्रीवधः कार्य्यो न चैवाङ्गवियोजनम्॥"
दक्षस्मृतिः।
"हीनवर्णोपसृक्ता या त्याज्या वध्यापि वा भवेत्॥"
विशेषयति मिताक्षरायां स्मृतिः।
"ब्राह्मण्यक्षत्रियविशां भार्य्याः शूद्रेण सङ्गताः।
अप्रणाश्या विशुद्ध्यन्ति प्रायश्चित्तेन नेतराः॥"
एतत् बलात्कारविषयम्। इत्युद्वाहतत्त्वम्॥*॥
तस्याः पुण्यकर्म्मादि निष्फलानि धनाधिकारित्वञ्च यथा। हरिवंशीयपुण्यकव्रतोपाख्याने।
"दानोपवासपुण्यानि सुव्रतान्यप्यरुन्धति!।
निष्फलान्यसतीनां हि पुण्यकानि तथा शुभे॥"
इत्युद्वाहतत्त्वम्॥
"अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता।
पत्नीव दद्यात्तु पिण्डं कृतस्वमंशं लभेत च॥"
भर्तुः शयनं पालयन्ती नान्यगामिनी। इति दायतत्त्वम्॥
व्यभिचारी, [न्] पुं, (व्यभिचरतीति। वि+अभि+चर+णिनिः।) चतुस्त्रिंशत्प्रकारभङ्गारभावविशेषः। तद्यथा। निर्व्वेदः २ ग्लानिः २ शङ्का ३ असूया ४ मदः ५ श्रमः ६ आलस्यम्७ दैन्यम्८ चिन्ता ९ मोहः१० स्मृतिः ११ धृतिः १२ व्रीड़ा १३ चपलता १४ हर्षः १५ आवेगः १६ जड़ता १७ गर्व्वः १८ विषादः १९ औत्सुक्यम् २० निद्रा २१ अपस्मारः २२ सुप्तः २३ विबोधः २४ अमर्षः २५ अवहित्थः२६ उग्रता २७ मतिः २८ उपलब्धः २९ व्याधिः३० उन्मादः ३१ मरणम् ३२ त्रासः ३३ वितर्कः३४। इति हैमचन्द्रः॥ (अस्य लक्षणादिकं यथा, साहित्यदर्पणे। ३। १४८।
"विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः।
स्थायिन्युन्मज्जननिर्म्मग्नास्त्रयस्त्रिंशच्च तद्विदाः॥"
के ते इत्याह।

"निर्व्वेदाविगदैत्यश्रममदजड़ता औग्र्यमोहौ विबोधः
स्वप्नापस्मारगर्व्वा मरणमसवतामर्षनिद्रा-वहित्थाः ॥
औत्सुक्योन्मादशङ्का स्मृतिमतिसहिता व्याधिवित्रासलज्जा
हर्षाक्रूयाविषादाः सधृतिचपलताव्रीडनिश्चिन्तावितर्काः ॥"
एतेषां लक्षणादिकं तत्रैव विशेषतो द्रष्टव्यम् ॥)

त्रि, व्यभिचारविशिष्टः । (स्वमार्गच्युतः । यथा, कथासरित्सागरे । १५ । ५५ ।
"तत्रापि मन्त्रिताख्यातिरक्षाकं वान्यथा भवेत् ।
स्वामिसंभावनायाञ्च भवेम व्यभिचारिणः ॥"
अनित्यः । आगमापायी । यथा, भागवते । ११ । ३ । ३८ ।
"नात्मा जज्ञान न मरिष्यति नैधतेऽसौ
न क्षीयते सवनविद्व्यभिचारिणां हि ॥")

व्यच्, क तुदि । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) अन्तःस्थादियुक्तः । क, व्याययति । तुदि प्रेरणे । इति दुर्गादासः ॥

व्यय, अ गतौ । इति कविकल्पद्रुमः । (भ्वा०-उभ०-सक०-सेट् ।) अ, व्ययति व्ययते । इति दुर्गादासः ॥

व्यय, तृ क गतौ । त्यागे । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) व्याययति । इति दुर्गादासः ॥

व्ययं, क्ली, (व्यय गतौ + अच् ।) तस्मात् हादशस्थानम् । यथा,—
"व्ययं धनं भ्रातृबन्धुपुत्रशत्रुकलत्रकाः ।
मरणं धर्म्मकर्म्मायव्ययाद्यादशराशयः ॥"
इति ज्योतिस्तत्त्वम् ॥
(व्ययति गच्छतीति । व्यय गतौ + अच् । नश्वरे, त्रि । यथा, मनुः । १ । १६ ।
"सूक्ष्माभ्यो मूर्त्तिमात्राभ्यः संभवत्यव्ययाद्व्ययम् ॥")

व्यग्रः, पुं, (वि + ङ + अच् ।) अर्थस्यापगमः । वित्तसमुत्सर्गः । इति शब्दरत्नावली ॥ खरच् इति पारस्यभाषा ॥ (यथा, मनुः । ६ । ११ ।
"अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ॥"
नाशः । यथा, भागवते । ४ । १ । ४६ ।
"ताविमौ वै भगवतो हरेर्व्वेष्णविदागतौ ।
भारव्यायाय च भुवः क्षत्रौ यदुकुरूद्वहौ ॥"
परित्यागः । दानम् । यथा, रघुः । १२ । २३ ।
"आत्मानं सुसुचे तस्मात् एकनेत्रव्ययेन सः ॥"
हरणातिचारगतवर्षविशेषः । यथा, हरतुसंहितायाम् । ८ । ३६ ।
"यत्तमं व्ययमुग्रन्ति शोभनं
मन्मथप्रबलसत्त्ववाकुलम् ॥"
नागविशेषः । यथा, महाभारते । १ । ५७ । १६ ।
"अमाहठः कामठकः सुषेणो मानसो व्ययः ॥")

व्यथितः, त्रि, (व्यथ + क्तः ।) क्षतव्ययः । व्यथ्यादितप्रत्ययेन व्ययधातोः क्तप्रत्ययेन वा निष्पन्नम् ॥

व्ययी, [न्] त्रि, (व्ययोऽस्यास्तीति । व्यय + इनिः ।) व्यययुक्तः । यथा,—
"द्रविणं परिमितमधिकव्ययिनं जनमाकुलीकुरुते ।
क्षीराप्लवमिव पीनस्तनजघनायाः कुलीनायाः ॥"
इत्युद्भटः ॥

व्यर्थं, त्रि, (विगतोऽर्थो यस्मात् ।) निरर्थकम् । तत्पर्य्यायः । मोघम् २ विफलम् ३ । इति शब्दरत्नावली ॥ (यथा, कुमारे । ३ । ७५ ।
"ग्लौरात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ॥")

व्यलीकं, क्ली, (विशेषेण अलतीति । वि + अल + "अलीकादयश्च ।" उणा० ४ । २५ । इति कीकन्प्रत्ययेन निपातनात् साधुः ।) पीड़ार्थः । इत्यमरः ॥ गतिविपर्य्ययः । कामजापराधः । इति तट्टीकायां भरतः ॥ यथा,—
"ज्ञातं नैव विजानाति परेणाप्रज्ञतं क्वचित् ।
ज्ञात्वा च संस्मरेदेतदसत्यञ्च न भाषते ॥
व्यलीकेषु निवृत्तो यः पर्य्येति क्षतनिश्चयः ।
विस्रब्धं धृतिमान् किञ्चित् परोक्षेऽपि न तं क्षिपेत् ॥

ऋतुकालेऽभिगच्छेत व्यलीकार्थं स्वकां स्त्रियम् ।
ईदृशास्तु नरा भद्रे मम कर्म्मपरायणाः ॥"
इति वाराहे योनिगर्भसोद्भवनामाध्यायः ॥
अप्रियम् । (यथा, महाभारते । ३ । ६ । ६ ।
"न हि तेन मम भ्रात्रा सूक्ष्ममपि किञ्चन ।
व्यलीकं क्षतपूर्व्वं वै प्राज्ञेनामितबुद्धिना ॥")
अकार्य्यम् । वैलक्ष्यम् । इति मेदिनी । (यथा, किरातार्जुनीये । ३ । १६ ।
"यस्मिन्ननैश्वर्य्यकृतव्यलीकः
पराभवं प्राप्य दवान्तकोऽपि ।
ध्रुवन्धनुः कस्य रुषे न कुर्य्यात्
मनो भवैकप्रवणं स भोग्यः ॥")
अपराधः । इति हेमचन्द्रः ॥ (यथा, शिशुपालवधे । ६ । ८५ ।
"सुदृग्भः सरसव्यालोकतन्न-
स्तरसा श्लिष्टवतः सयौवनोन्मा ॥")
प्रतारणा । इति हलायुधः ॥ (दुःखम् । इति वैजयन्ती । यथा, कुमारे । ३ । २५ ।
"दिग् दक्षिणा गन्तव्यैषा सुखेन
व्यलीकनिश्वासमिवोत्ससर्ज्ज ॥")

तद्वति, त्रि । (यथा, भागवते । ८ । २२ । २ ।
"यदुत्तमःश्लोक भवान् ममेरितं
वचो व्यलीकं सुरवर्य्य मन्यते ।
करोम्यृतं तन्न भवेत् प्रजल्पितं
पदं क्षतीयं कुरु शीर्ष्णि मे निजम् ॥") .

व्यलीकः, पुं, (वि + अल पर्य्याप्तौ + कीकन् ।) नागरः । इति मेदिनी । तत्पर्य्यायः । विदूषकः २ षट्प्रश्नः ३ कामकेलिः ४ विदूषकः ५ पीठमर्दः ६ भण्डिलः ७ छिद्रुरः ८ विटः ९ । इति त्रिकाण्डशेषः ॥

व्यवकलनं, क्ली, (वि + अव + कल + ल्युट् ।) वियोगः । हीनः । अङ्कस्यान्तरकरणम् । बाकिकाटा इति भाषा । यथा,—
"अये बाले लीलावति ! मतिमति ! ब्रूहि सहितान्
द्विपञ्चद्वात्रिंशत्रिनवतिशतान्यष्टादशदश ।
शतोपेतानेतानयुतवियुतांश्चापि वद मे
यदि व्यक्तेर्युक्तिव्यवकलनमार्गेऽसि कुशला ।"
इति लीलावती ॥

व्यवकलितः, त्रि, (वि + अव + कल + क्तः ।) क्षतव्यवकलनः । वियोजितः । हीनितः । व्यवकलने, क्ली । यथा । अथ सङ्कलितव्यवकलितयोः करणसूत्रं दृत्तार्द्धम् ।
"कार्य्यं क्रमादुत्क्रमतोऽथवाङ्क-
योगो यथास्थानकमन्तरं वा ॥"
इति लीलावती ॥

व्यवच्छिन्नं, त्रि, (वि + अव + छिद् + क्तः ।) भिन्नम् । यथा । भिन्नन्तु व्यवच्छिन्नं विशेषितम् । इति त्रिकाण्डशेषः ॥

व्यवच्छेदः, पुं, (वि + अव + छिद् + घञ् ।) वाक्शक्तिः । इति हेमचन्द्रः ॥ एथकत्वम् । (विरामः । निवृत्तिः । यथा, भागवते । ४ । २६ । ३२ ।
"जीवस्य न व्यवच्छेदः स्याच्चेत्तत्प्रतिक्रिया ॥")

व्यवधा, क्ली, (वि + अव + धा + "आतश्चोपसर्गे । इत्यङ । टाप् ।) व्यवधानम् । इत्यमरः ॥

व्यवधानं, क्ली, (वि + अव + धा + ल्युट् ।) आच्छादनम् । तत्पर्य्यायः । तिरोधानम् २ अन्तर्द्धिः ३ अपवारणम् ४ छदनम् ५ व्यवधा ६ अन्तर्द्धा ७ पिधानम् ८ स्थगनम् ९ । इति हेमचन्द्रः ॥ व्यवधिः १० अपिधानम् ११ । इति शब्दरत्नावली ॥ (यथा, रघुः । १३ । ४३ ॥
"दृष्टिं विमानव्यवधानसक्तां
पुनः सहस्रार्चिषि संनिधत्ते ॥"
भेदः । यथा, भागवते । ४ । २२ । २७ ।
"परात्मनोर्यदुव्यवधानकं पुरस्तात्
स्वप्ने यथा पुरुषस्तद्विनाशे ॥"
विच्छेदः । यथा, शिशुपालवधे । ६ । ५१ ।
"वपुरन्वलिप्त परिरम्भसुख-
व्यवधानभीरुकतया न वधूः ॥"
समाप्तिः । यथा, भागवते । ४ । २६ । ७७ ।
"यावदर्थं न विद्वेत व्यवधानेन कर्म्मणाम् ॥")

व्यवधायकः, त्रि, (व्यवदधातीति । वि + अव + धा + ण्वुल् ।) व्यवधानकर्त्ता । यथा । स्वर्गकामो यजेत सप्तदशावरा ऋद्धिकामाः सप्तदशोपसीदन्तीति वैदे कामिनां कर्त्तृत्वावगतेस्तदनुपपत्त्या ऋत्विग्व्यापारान्तर्भावो न व्यवधायकः । इति प्रायश्चित्तविवेकः ॥

व्यवधिः, पुं, (वि + अव + धा + "उपसर्गे धोः किः ।" ३ । ३ । ९२ । इति किः ।) व्यवधानम् । इति शब्दरत्नावली ॥ (यथा, वेणीसंहारे । २ । १६ ।

"व्यवधावपि वा विधोः कलां
न्दुचूडालिलयां न वेद कः ॥")

व्यवसायः, पुं, (वि+अव+सो+घञ्।) उपजीविका। पेशा इति पारस्यभाषा। यथा,—

"करोति नाम नीतिज्ञो व्यवसायमितस्ततः।
पर्वं पुरुषदेव स्यादृद्यदिष्टेर्मवसि स्थितम्॥"

इति हितोपदेशे २ परिच्छेदः॥

अपि च।

"आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः॥"

इति चाणक्यशतकम्॥

अनुष्ठानम्। इति व्यवसायिशब्दार्थदर्शनात्। (यथा, रामायणे। २। ३०। ४१।

"सर्वथा सदृशं वीते! मम त्यक्तस्य कुलस्य च।
व्यवसायमनुक्रान्ता कान्ते! त्वमतिशोभनम्॥")

निश्चयः। यथा,—

"व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥"

इति भगवद्गीतायाम् २ अध्यायः॥

व्यवसायात्मिकेति। इह ईश्वराराधनलक्षणे कर्म्मयोगे व्यवसायात्मिका परमेश्वरभक्तैव ध्रुवं सरिष्यामीति निश्चयात्मिका एकैव एकनिष्ठैव बुद्धिर्भवति। अव्यवसायिनामीश्वराराधनवहिर्मुखानां कामिनां कामनायत्त्वादनन्तास्तत्रापि कर्म्मफल-सुखफलत्वादि-प्रकारभेदाद्बहुशाखाश्च बुद्धयो भवन्ति। इति तट्टीकायां स्वामी॥

विष्णुः। यथा,—

"व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः॥"

इति महाभारते तस्य सहस्रनामस्तोत्रे। १३। १४८। ५५॥ (महादेवः। यथा, तत्रैव। १३। १७। ५०।

"सहस्रहस्तो विजयो व्यवसायो धृतव्रतः॥")

व्यवसायी, [न्] त्रि, (व्यवसायोऽस्त्यस्येति। इनिः।) व्यवसायविशिष्टः। कार्य्यकारकः। यथा,—

"कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम्।
को विदेशः सविद्यानां कः परः प्रियवादिनाम्॥"

इति चाणक्यशतकम्॥

अनुष्ठाता। यथा,—

"अग्नेश्चो यन्त्रिणः श्रेष्ठा यन्त्रिभ्यो धारिणो वराः।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः॥"

इति मानवे १२ अध्यायः॥

अग्नेश्च इति। उभयोः प्रशस्यत्वे सति अन्यतरस्यातिशयविवक्षया श्रेष्ठतेतीष्टिनोविधानादीवदल्पयना अल्पाः तेभ्यः समधिकसंख्याश्रेष्ठाः श्रेष्ठाः। तेभ्योऽधीतबह्वध्यापनसमर्थाः श्रेष्ठाः। तेन यन्त्रिणः पठितविस्मृतबह्वया बोद्धव्याः। धारिभ्योऽधीतबह्वर्थाः प्रशस्ताः। तेभ्योऽनुष्ठातारः। इति तट्टीकायां कुल्लूकभट्टः॥

व्यवसित, त्रि, (वि+अव+सो+क्तः।) प्रतारितः। इति भूरिप्रयोगः। अनुष्ठितः। निश्चितः। इति व्यवसायिशब्दव्यवसायशब्दार्थदर्शनात्। (यथा, रामायणे। २। २३। १।

"तं समीक्ष्य व्यवसितं पितुर्निर्देशपालने।
कौशल्या बाष्पसंरुद्धा वचो प्रस्खलितमब्रवीत्॥")

व्यवस्था, स्त्री, (वि+अव+स्था+"आतश्चोपसर्गे।" इत्यङ्। तत्रस्त्राप्।) शास्त्रविरूपितविधिः। यथा,—

"दीर्घकालं ब्रह्मचर्य्यं धारणञ्च क्रमक्रमौ।
देवरेण सुतोत्पत्तिर्दत्तकन्या प्रदीयते॥"

इत्यादीन्यभिधाय॥

"एतानि लोकगुप्त्यर्थं कवेरादौ महात्मभिः।
निबन्धितानि कर्म्माणि व्यवस्यापूर्व्वकं बुधैः॥"

इत्युद्वाहतत्त्वे हेमाद्रिपराशरभाष्ययोरादिपुराणम्। (नियमः। यथा, कथासरित्सागरे। १०६। ७१।

"एवं श्रुतगुरोर्वाचो महारम्भानि शृण्वतः।
उत्पाद्य भगवांस्तस्य व्यवस्थामादिदेश सः॥")

व्यवस्थानः, पुं, विष्णुः। यथा,—

"व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः॥"

इति महाभारते तस्य सहस्रनामस्तोत्रे। १३। १४८। ५५॥ (वि+अव+स्था+ल्युट्।) व्यवस्थितौ, स्त्री। यथा,—

"चातुर्व्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते।
तं म्लेच्छदेशं जानीयादार्य्यावर्त्तमतः परम्॥"

इत्यार्य्यावर्त्तशब्दटीकायां भरतः॥

व्यवस्थितः, त्रि, (वि+अव+स्था+क्तः।) विधिपूर्व्वकस्थितः। व्यवस्थापितः। यथा,—

"अथ व्यवस्थितान् दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः॥"

इति श्रीभगवद्गीतायाम् २ अध्यायः॥

व्यवहर्त्ता, [र्] पुं, (वि+अव+हृ+तृच्।) व्यवहारकर्त्ता। प्राड्विवाक इति यावत्। यथा। उत्तराभिधानानन्तरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रिया स्यादिति परामर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वेनाभिधानात् व्यवहर्तृसमन्वाभावाच्च न व्यवहारपादत्वमिति स्थितम्। इति मिताक्षरायां व्यवहारमातृका। कायस्थस्योपाधिविशेषश्च॥

व्यवहारः, पुं, (वि+अव+हृ+घञ्।) विवादः। रत्नमरः। इत्यभेदः। न्यायः। पथः। स्थितिः। इति मेदिनीशब्दरत्नावल्यौ॥ (कर्म्म। क्रिया। यथा,—

"न कश्चित् कस्यचिन्मित्रं न कश्चिकस्य चिद्रिपुः।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा॥"

यथा च रघुः। ३। ६२।

"तथापि शुश्रूषव्यवहारविद्धुरे
विधत्तभावे चिरमस्य तिष्ठतः।
तुतोष वेधोऽतिशयेन दक्षता
यदं हि सर्गस्य गुणेषु वीयते॥")

अथ व्यवहारदर्शनम्। तत्र याज्ञवल्क्यः।

"स्मृत्याचारव्यपेतेन मार्गेणाचरितः परैः।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्॥"

स्मृतिसदाचारवहिर्भूतेन वर्त्मना परैरचरितः प्रतीतो वा पीड़ितश्चेद्राजानि निवेदयेत्तद्व्यवहारदर्शनस्थानम्। चेदित्यत्र यदिति मेधिथिः। आवेदयति चेदित्यनेन स्वयं विवादोत्थापनं राज्ञा न कर्त्तव्यमिति मूलपाठिमहामहोपाध्यायः। राज्ञीति व्यवहारप्रदर्शकपरम्। तथा च हारीतः।

"राजा कार्य्याणि संपश्येत् प्राड्विवाकोऽथवा द्विजः॥"

प्राड्विवाकलक्षणमाह स एव।

"विवादे पृच्छति प्रश्नं प्रतिपन्नं तथैव च।
क्रियापूर्व्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः॥"

कात्यायनः।

"व्यवहारार्थितं प्रश्नं पृच्छति प्राड्विति स्थितिः।
विवेचयति यस्तस्मिन् प्राड्विवाकस्ततः स्मृतः॥"

अर्थिनं प्रति भाषा ते कौद्यप्ती प्रत्यर्थिनं प्रति च तवापि कौद्यप्तुत्तरं इति पृच्छतीति प्राट् श्रुत्वा च युक्तायुक्तत्वेन जयं पराजयं वा विविनक्ति इति विवाकः प्राट् च स विवाकश्चेति प्राड्विवाकः॥ ● ॥ कात्यायनः।

"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः।
स्वयं स राजा विदुषास्तेषां जयपराजयौ॥
यदा कार्य्यवशाद्राजा न पश्येत् कार्य्यनिर्णयम्।
तदा विद्वद्ब्राह्मणं ब्राह्मणं वेदपारगम्॥
यदि विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत्।
वैश्यं वा धर्म्मशास्त्रज्ञं शूद्रं यत्नेन वर्ज्जयेत्॥"

स विनीतवेषः। मनुः।

"जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणव्रुवः।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन॥
नाध्यापयति नाधीते स ब्राह्मणव्रुवः स्मृतः॥"

व्यासः।

"द्विजान् विहाय यः पश्येत् कार्य्याणि शूद्रजैः सह।
तस्य प्रक्षुभ्यते राज्यं सकोशश्च प्रणश्यति॥
यः शूद्रो वेदिकं धर्म्मं स्मार्त्तं वा भाषते यदि।
तस्य दण्डं हि सहस्रं क्षत्रियो वैव मेदयेत्॥
दुःशीलोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः।
दुष्टा गौः किं परित्यज्य क्षीरवतीं हरीम्॥"

व्यवहारमाह कात्यायनः।

"वि नानार्थेऽव सन्देहे हरणं हार उच्यते।
नानासन्देहहरणाद्व्यवहार इति स्थितिः॥"

नानाविवादविषयः संग्रन्थो क्रियतेऽनेन इति व्यवहारः। भाषोत्तरक्रियानिबन्धकत्वं व्यवहारत्वम्। तथा च हारीतः।

"अक्षानतिमिरोपेतान् सन्देहपटवार्हितान्।
निरामयान् यः कुरुते प्राज्ञाञ्जनशलाकया॥
इह कीर्त्तिं राजपूजां लभते सद्गतिञ्च सः।
तस्मात् संग्रन्थकरणं कार्य्यञ्च विनिर्णयः॥"

अतएव वार्द्धः।

"अनियुक्तो नियुक्तो वा ब्राह्मणो वक्तुमर्हति।
देवीं वाचं स वदति यः ब्राह्मणमपजीवति॥"
देवीं देवानुमताम्॥ *॥ धर्म्मशास्त्रयोस्तु विरोधे लोकव्यवहार एवादरणीयः। दक्षाह
स एव।
"धर्म्मशास्त्रविरोधे तु युक्तियुक्तो विधिः स्मृतः।
व्यवहारोऽपि बलवान् धर्म्मस्तेनावहीयते॥"
अवहीयते अवगम्यते हि गतावित्यस्माद्धातोः।
अतएव दक्षस्मृतिः।
"केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः।
युक्तिहीनविचारे तु धर्म्महानिः प्रजायते॥"
युक्तिर्न्यायः। स च लोकव्यवहार इति व्यवहारमाह्लकः। अतएव कात्यायनः।
"कुलशीलवयोवृत्तवित्तवद्भिरधिष्ठितम्।
परिषद्भिः स्मृतं कतिपयैः कुलमुद्देरधिष्ठितम्॥"
सद इति शेषः। कात्यायनः।
"सभ्येनाव्यक्तवक्तव्यं धर्म्मार्थसहितं वचः।
शृणोति यदि नो राजा स्यात्तु सभ्यस्तदा दृशः॥"
सभ्यः सभायां साधुः॥ *॥ तथाविधमाह याज्ञवल्क्यः।
"श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः।
राज्ञा सभासदः कार्य्याः शुचौ मित्र च ये समाः॥"
श्रुताध्ययनसम्पन्नाः धर्म्मशास्त्रज्ञाः। कुलीनाः सङ्करादिदोषशून्यमातापितृवंशपरम्पराकाः। एवंभूताः सभासदः सभायां यथा क्षीदन्ति उपविशन्ति तथा दानमानसत्कारैः राज्ञा कर्त्तव्याः॥*॥ तथाविधस्थानेष भूमेः सभामाह मनुः।
"यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः।
राज्ञः प्रतिष्ठितो विद्वान् ब्राह्मणस्तां सभां विदुः॥"
विदस्त्रयंहतावपि सभापर्य्यायपरिषच्छब्दमाह स एव;
"त्रैविद्यो हैतुकस्तर्की निरुक्तो धर्म्मपाठकः।
त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावराः॥"
त्रैविद्यः त्रिवेदपारगः। हैतुकः। तद्युक्तिव्यवहारी। अतएवामरसिंहः। सभा सदस्मि सभ्ये च। अत्र भा दीप्तिः प्रकाशो ज्ञानमिति यावत् तया सह साक्षात् परम्परया वा वर्त्तते इति सभा॥ *॥ कात्यायनः।
"दिवसस्याष्टमं भागं मुक्त्वा भागत्रयं तु यत्।
न कालो व्यवहाराणां ग्राह्यस्तदः परः स्मृतः॥"
अष्टमयामाद्यार्द्धप्रहरम्। भागत्रयं प्रहरद्वयपर्य्यन्तम्। मनुः।
"धर्म्मासनमधिष्ठाय संनीवीक्षः समाहितः।
प्रणम्य लोकपालेभ्यः कार्य्यदर्शनमारभेत्॥"
मनुनारदबौधायनहारीताः।
"पादोऽधर्म्मस्य कर्त्तारं पादः साक्षिणमृच्छति।
पादः सभासदः सर्व्वान् पादो राजानमृच्छति।
राजा भवत्यनेनासु मुच्यन्ते च सभासदः।
एनो गच्छति कर्त्तारं निन्दार्हो यत्र निन्द्यते॥"
कर्त्तारं वादिनम्। राजपादं विवेचकपरम्॥
अनेनाः निष्पापः॥ अर्थेत्यादिनारदबौधायनहारीतौ।
"यस्य चाभ्यधिका पीडा कार्य्ये वाप्यधिकं भवेत्।
तस्यार्थिभावो दातव्यो न यः पूर्व्वं निवेदयेत्॥"
अत्रैव पूर्व्वपक्षो भवेत्तस्य इति काात्यायनीये तृतीयपादः। न यः पूर्व्वं निवेदयेदिति तस्योत्तरः पक्ष इति शेषः। स यः पूर्व्वमिति पाठे यः प्रथमं निवेदयति स पूर्व्ववादीत्यर्थः। दक्षस्मृतिः।
"अहं पूर्व्विकया मातावर्थिप्रत्यर्थिनौ यदा।
वादो वर्त्तानुपूर्व्वेण याह्यः पीडामवेक्ष्य वा॥"
यत्र द्वावेव वदतः प्रभो मदार्थं ग्रस्त इति तत्र ब्राह्मणादिक्रमेणाधिकपीडादर्शनेन वा वादो याह्यः॥*॥ स्वयं विवादाप्रवृत्तौ प्रतिनिधिमाह नारदः।
"अर्थिना सन्नियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा।
यो यस्यार्थे विवदते तयोर्जयपराजयौ॥"
तयोर्जयादिप्रतिपादिनोः। दक्षस्मृतिरपि।
"ऋत्विक् वादी नियुक्तश्च समौ सभ्यदिकीर्त्तितौ।
यत्ते साध्यामुयात् पुण्यं हानिं वादेऽथवा जयम्॥"
कात्यायनः।
"मनुष्यमारणे स्तेये परदाराभिमर्शने।
अभक्ष्यभक्षणे चैव कन्याहरणदूषणे॥
पारुष्ये कूटकरणे वृषदोषे तथैव च।
प्रतिवादी न दातव्यः कर्त्ता तु विवदेत् स्वयम्॥"
कुलस्त्रीप्रभृतीनां प्रतिनिधिमाह व्यासः।
"कुलस्त्रीबालकोन्मत्तश्रोत्रियाणाञ्च वान्धवाः।
पूर्व्वपक्षोत्तरे वृत्तिर्युक्तो भृतकवत्तथा॥"
भाषादीतरस्य पक्षस्थितस्य दक्षणीयत्वमाह नारदः।
"यो न भ्राता पिता वापि न पुत्रो न स्त्रियोऽपि वा।
परार्थवादी दक्षः स्यात् व्यवहारेषु विद्वान्॥"
विद्वान् विदर्हं जानन्॥ *॥ नारदः।
"निर्व्वेष्टुकामो रोगार्त्तो व्यसनासक्तमानसः।
अभियुक्तस्तथान्येन राजकर्म्मोद्यतस्तथा॥
गवां प्रचारे गोपालाः ग्रस्यमाने हवीवले।
ग्रिष्मिणश्चापि तत्काले आयुधीयाश्च विग्रहे॥
अप्राप्तव्यवहारश्च दूतो दानोद्यतो व्रती।
विषमस्थाश्च नासेध्या न चैतान्राजयेन्नृपः॥"
निर्व्वेष्टुकामो विवाहप्रवृत्तः। अन्येन वादान्तरेण। अप्राप्तव्यवहारः षोडशवर्षावरवयस्कः। तत्काले विवाहादिसमाप्तिपर्य्यन्तकाले। एते विषमस्थाश्च उपप्लवदेशस्थाश्च उत्तमर्णादिना नासेध्या नावधारणीयाः एतान् प्रागुक्तान् वादिना निवेदितानिति शेषः॥*॥ याज्ञवल्क्यः।
"अभियोगमनिक्षीर्य्य नैनं प्रत्यभियोजयेत्॥"
अभियुक्तः बलुत्तरमदत्त्वा भाषावादिनमेतं स्वाभियोगानुपमर्दकेन विवादान्तरेण न योजयेत्। युगपदनेकव्यवहारासम्भवात्। नारदोऽपि।
"पूर्व्वदानं परित्यज्य योऽन्यमालम्बते पुनः।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः॥"
हीनवादीत्यनेन दक्षस्मृतेरुत्तरं न तु प्रस्तुतार्थाहीनता अन्यथा कृतापत्तेः॥ *॥ पारुष्ये प्रतिप्रसवमाह स एव।
"कुर्य्यात् प्रत्यभियोगञ्च कलहे साहसेषु च।"
वाक्पारुष्ये ग्रस्तादिप्रहारेषु च। यथापूर्व्वमदमप्यनेनाकृष्टः ग्रस्तेन हत इत्यपराधाभावाय प्रत्यभियोगं कुर्य्यात्। तथा च दक्षस्मृतिः।
"आकृष्टस्तु यदाक्रोशंस्ताडितः प्रतिताडयन्।
कलावतायिनञ्चैव नापराधी भवेन्नरः॥"
एतेन वाक्पारुष्यदण्डपारुष्ययोः प्रस्तुताभियोगेऽपि न दोषः। यत्तु।
"पूर्व्वमाचारयेद्दण्डं नियतं स्यात्तु स दोषभाक्।
पश्चादृणः सोऽप्यसत्कारी पूर्व्वं तु विनयो गुरुः॥"
इति नारदवचनं तत् पूर्व्वापेक्षया परस्याधिक्यवाक्पारुष्योत्पादकस्यापि स्वल्पदण्डविधायकम्॥ *॥ युगपत्संप्रवर्त्तने अधिकदण्डाभावमाह स एव।
"पारुष्ये साहसे चैव युगपत्संप्रवर्त्तयोः।
विशेषश्चेन्न लभ्येत विनयः स्यात् समस्तयोः॥"
विनयो दण्डः। एवञ्च दण्डोऽयमनपराधे मयि कृतः पीडितत्वादिति भावार्थो प्रत्यभियोगः कार्य्य एव। प्रत्यवस्कन्दनोत्तरेण युगपदनेकव्यवहारापत्तिदोषस्याभावात्॥ *॥ सभापतेः कर्त्तव्यमाह कात्यायनः।
"अथ चैतं प्रतिभूर्व्वाक्ति वादयोग्यस्तु वादिनः।
स रक्षितो दिनस्यान्ते दद्यात् भृत्याय वेतनम्॥"
प्रतिभवति तत्कार्य्ये तद्द्रव्ये इति प्रतिभूर्लक्षकः। वादयोग्यः विवादपदस्य साधितधनादिदानस्य दक्षदानस्य च क्षमः। वादिनोः भाषावादिन उत्तरवादिनश्च। तथाच याज्ञवल्क्यः।
"उभयोः प्रतिभूर्व्वाक्यः समर्थः कार्य्यनिर्णये।
प्रतिभुवस्त्वभावे च राज्ञा संग्रहणं तयोः॥"
राज्ञा संग्रहणं दक्षतुल्याधिकरणं निर्णयस्य कार्य्ये धनाद्दाने राजदण्डादित्यतः कार्य्यशब्दस्य पूर्व्वनिपातः। भृत्यः तत्पक्षको राजनियुक्तः॥ *॥ प्रत्यर्थी यदि कञ्चित् कालं प्रार्थयते स लभते अर्थी तु कालं प्रार्थयन् अर्थित्वमेव याहन्यादिति तेन कालो न प्रार्थनीयः। तदाह।
"प्रत्यर्थी लभते कालं याहं सप्ताहमेव च।
अर्थी तु प्रार्थयन् कालं तत्क्षणादेव हीयते॥"
क्वचित् प्रत्यर्थी कालं न लभते। याज्ञवल्क्यः।
"साहसस्तेयपारुष्यगोभिशापात्ययेषु स्त्रियाम्।
विवादयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृतः॥"
साहसं मनुष्यमारणम्। गौरत्र दोग्ध्री।

अभिप्रायो महापातकादिना । अत्यये द्रव्य-नाशे । स्त्रियां कुलस्त्रियां चारित्रावबादविषय-प्राप्तायां दास्यां स्वस्वविवादे वा । हन्त सत्य एव उत्तरं दापयेदिति मूलपाणिः । विशेषयति कात्यायनः ।

"यस्मात् कार्यसमारम्भश्चिरात्तेन विनिश्चितः ।
तस्मान्न लभते कालमभियुक्तस्तु कालभाक् ॥"

अपवादमाह बृहस्पतिः ।

"अभियोक्ता प्रगल्भत्वात् वक्तुं नोत्सहते यदि ।
तदा कालः प्रदातव्यः कार्यगुरुत्वतः ॥"

अत्रापि विशेषयति व्यासः ।

"राजदैवकृतो दोषस्तस्मिन् काले यदा भवेत् ।
अवश्ययोगमाश्रित्य न भवेत् स पराजितः ॥"

स कृतसमयबन्धोऽभियुक्तः ।

"राजदैवकृतं दोषं साक्षिभिः प्रतिपादयेत् ।
लेखेन वर्त्मागस्तु दण्ड्यो दाप्यस्तु तद्धनम् ॥"

अवश्यतिक्रमहेतो राजदैविकदोषस्य प्रमिती न तदतिक्रामकोऽपराध्यति जैक्षाच्च तदति-क्रमेण दण्ड्यो भङ्गी च भवतीत्यर्थः । छद्म-काठिन्यादियुक्तो जिह्मः । तथा च हारीतः । छद्म माया तत्रयुक्ता निकृतिः । कौटिल्य-काठिन्यग्राह्यवैरस्यसङ्गावयुक्तं जैक्ष्यमिति युक्तं योगः ॥ * ॥

अथ व्यवहारपादनिर्णयः । तत्र बृहस्पतिः ।

"पूर्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः ॥
मिथ्योत्तरे च चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा ।
प्राड्न्याये च स विज्ञेयो द्विपात्संप्रतिपत्तिषु ॥"

यद्यपि संप्रतिपत्तावपि निर्णयोऽस्ति तथाप्यु-त्तरवादिनैव भाषार्थस्वाङ्गीकृतत्वेन क्रियासाध्यो न भवति इति द्विपादतोक्ता ॥ * ॥

अथ भाषापादः ।

तत्र भाषास्वरूपमाहतुः कात्यायनबृहस्पती ।

"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारभान्वितम् ।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः ॥
स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः ।
विरोधिकारकैर्मुक्तो विरोधिप्रतिरोधकः ॥
यदा त्वेवंविधः पक्षः कल्पितः पूर्ववादिना ।
दद्यात् तत्पक्षसम्बन्धं प्रतिवादी तदुत्तरम् ॥"

प्रतिज्ञा साध्याभिधायिका वाक् । तस्या दोषैः परस्परविरुद्धार्थपदादिभिर्यत्साध्यं साधनाङ्गाभिमतं पक्षं विदुः । अन्यथा प्रतिज्ञादोषेण साध्यदोषः स्यात् । अतएवोक्तम् ।

"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता ।
अवश्यमेव वक्तव्यो व्यवहारेषु वादिभिः ॥"

वक्तव्यो पक्षप्रतिज्ञे पूर्वोक्ते । नारदेनापि ।

"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता ।
सङ्गानो ह्रीयते वादी तरंस्तासुत्तरो भवेत् ॥"

उत्तरो विजयी । यद्यप्यन्यत्र साध्यं साध्यं तद्-विशिष्टधर्मी पक्ष इति भेदः तथाप्यत्र वाक् प्रज्ञाव्यवहारधर्मविशेषविशिष्टस्य पक्षतया धर्मिणोऽधमर्णादेरेव साध्यत्वात् साध्यपक्षयोर-भेदाभिधानम् । उपसंहारे च एवंविधः पक्ष इति । मिताक्षरायान्तु भाषा प्रतिज्ञापक्ष इति नार्थान्तरमित्युक्तम् । भाषार्थस्तूक्ता भाषास्वरूप-प्रपञ्चमाह स्वल्पाक्षर इति । निराकुलः पौर्वापर्यविपर्यासादिशून्यः । तत्र ।

"द्यूते च व्यवहारे च प्रवृते यत्कर्मणि ।
यानि पश्यन्त्यदासीनाः कर्त्ता तानि न पश्यति ॥"

इति यत्सर्वसंव्यवहारेषु दासौनेभ्यो ज्ञात्वा प्रोधयेत् । तच्छोधनमाह बृहस्पतिः ।

"न्यूनाधिकं पूर्वपक्षं तावद्वादी विशोधयेत् ।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ ॥"*॥

तल्लिखनप्रकारमाह व्यासः ।

"प्राङ्मुखेखेन फलके भूमौ वा प्रथमं लिखेत् ।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥"

फलकं काष्ठादिपट्टकम् । कात्यायनः ।

"पूर्वपक्षं स्वभाषोक्तं प्राड्विवाकोऽथ लेखयेत् ।
प्राङ्मुखेखेन फलके ततः पत्रेऽभिलेखयेत् ॥
शोधयेत् पूर्वपक्षन्तु यावन्नोत्तरदर्शनम् ।
उत्तरेऽवसरस्थस्य निहृत्तं शोधनं भवेत् ॥
अन्यदुक्तं लिखेदूर्ध्वोऽन्यदर्थिप्रत्यर्थिनोर्लेखः ।
चौरवक्त्रासयेत्तन्तु धार्मिकः पृथिवीपतिः ॥"

स्वभाषोक्तमलक्षितमम् । एतच्च स्वरविशेषादिना सञ्ज्ञेयम् । * । अतएव याज्ञवल्क्यः ।

"कूटं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥"

भूतं तत्त्वार्थसम्बन्धम् । नारदः ।

"भूतं तत्त्वार्थसम्बन्धं प्रमादाभिहितं कृतम् ।
किन्तु राज्ञा विशेषेण स्वधर्ममभिरक्षता ॥
मनुष्यचित्तवैचित्र्यात् परीक्षा साध्यसाधु वा ।
सर्वेष्वर्थविवादेषु वाक्छले नावसीदति ॥
प्रभुत्वोभूम्यृणादाने प्राप्तोऽप्यर्थान्न हीयते ।"

सर्वेष्वर्थविवादेषु प्रमादाभिधानेऽपि नावसी-दति अत्रोदाहरणं प्रभुत्वोत्यादि । अर्थविवाद-यहणात् मनुष्यत्वविवादेषु प्रमादाभिधाने प्रकृतार्थादप्यर्थान्तरीयत इति गम्यते । यथाह-मनेन शिरसि पादेन ताडित इत्यभिधाय केवलं हस्तेन ताडित इति वदन् न केवलं दण्ड्यः प्रतीयते च । ततश्च त्वं मत्सदृशं धारयसि मत्त ऋणत्वेन यद्गृहीतवद्वन-कत्वादिति भाषाशरीरं एतच्च संस्कृतदेश्य-भाषान्यतरेण यथाबोधं वक्तव्यं लेख्यं वा । मूर्खाणामपि वादिप्रतिवादिवादग्लानात् अत-एवाध्यापनेऽपि तथोक्तं विष्णुधर्मोत्तरे ।

"संस्कृतैः प्राकृतैर्म्लेच्छैः शिल्पिभ्यश्च यथोचितम् ।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः ॥"*॥

अथोत्तरपादः । तत्र कालमाह कात्यायनः ।

"सद्यःकृतेषु कार्येषु सद्य एव विवादयेत् ।
कालातीतेषु वा कालं दद्यात् प्रत्यर्थिने प्रभुः ॥"

वादिनोक्तस्य साध्यस्य प्रतीपमर्थयते इति प्रत्यर्थी । नारदः ।

"गृहीत्वादिवादानामसामर्थ्यात् स्मृतेरपि ।
कृत्वादिष्टं हरेत् कालं कामं तत्त्वमुसत्त्वया ॥"

इत्यसामर्थ्यात् । बृहस्पतिः ।

"यदा त्वेवंविधः पक्षः कल्पितः पूर्ववादिना ।
दद्यात् तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम् ॥"

सम्बन्धमुपयुक्तम् । अन्यथा अन्यवादित्वेन भङ्ग-प्रसङ्गात् ।

"अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आकूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥
प्रपलायी त्रिपक्षेण मौनक्षत् सप्तभिर्दिनैः ।
क्रियाद्वेषी तु मासेन साक्षिभिस्तु तत्-क्षणात् ॥"

इति नारदोक्तेः ॥

क्रिया लेख्यादिका । साक्षिभिः साक्षिभिः पराजितः । वादिनोक्तस्य साध्यस्य प्रतीपं वदतीति प्रतिवादी । उत्तीर्यते निस्तीर्यते प्रकृताभियोगोऽनेन इति उत्तरम् । याज्ञ-वल्क्यः ।

"श्रुतार्थस्योत्तरं लेख्यं पूर्वापेक्षसन्निधौ ॥"

लेख्यमिति वाक्यस्याप्युपलक्षकम् ॥ * ॥ उत्तर-स्वरूपं तल्लक्षणं चाह नारदः ।

"पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।
अव्याख्यागम्यमित्येवमुत्तरं तद्विदो विदुः ॥
मिथ्यासंप्रतिपत्तिश्च प्रत्यवस्कन्दनन्तथा ।
प्राड्न्यायाश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्र-वेदिभिः ॥"

अभियुक्तोऽभियोगस्य यदि कुर्यादपह्नवम् ।
मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः ॥"

पक्षस्य भाषार्थस्य व्यापकं आच्छादकं अभि-योगप्रतिकूलमिति यावत् । अतएव पूर्वपक्षार्थ-सम्बन्धं प्रतिपक्षं निवेदयेदित्युक्तम् । न च विप्रतिपन्नस्याप्यायार्थमागतस्य धारयसीत्यभि-युक्तस्य धारयामीति संप्रतिपत्तेः कथमुत्तरत्वं अभियोगाप्रतिकूलत्वादिति वाच्यम् । भावा-वादिनो मूर्खत्वेनापटुतया वा कदाचिद्भावाभि-वादादेवायं ह्रीयते इति भावाविसंवेदनार्थत्वं विप्रतिपन्नस्याप्युत्तरवादिनो भावार्थे सम्यगवगम्य तन्निषेधार्थं सम्यगुत्तरासम्भवात् विदत्यभावार्थं वासत्यवचनमत्यन्ताधर्मकारकं परोक्तिपराजये च दण्ड्यत्वं वादिना च वैरमित्यादि प्रतिसन्द-धतः संप्रतिपत्तेरुत्तरत्वं सम्भवत्येव । एवं एतेभ्य एवानिस्तारात् साध्यत्वनोपदिष्टस्य पक्षस्य सिद्धत्वेनोपन्यासेन साध्यत्वनिवारणात् सिद्ध-साधनेनापि वादिनः प्रत्यवस्थानाच्चोत्तरत्वं संप्रतिपत्तेः सिद्धमिति । सारं प्रकृतोपयोगि । अनाकुलं पूर्वापरविरोधशून्यम् । अव्याख्या-गम्यमध्याहारादिकं विनैव प्रतीतं अभियोगस्य अभियुज्यते इत्यभियोगः सहेतुकं साध्यं तस्या-पह्नवमित्यर्थः ॥*॥ उत्तराभावमाह कात्यायनः ।

"प्रकृतेन तत्सम्बन्धं अत्यल्पमतिभूरि च ।
पक्षैकदेशव्याप्येवं तच्च नैवोत्तरं भवेत् ॥
असंश्लक्षपदाप्यर्थं निगूढार्थं तथाकुलम् ।

व्याख्यागम्यमसारत्व नोत्तरं प्रस्थते बुधैः ।"
अस्वयस्तपदत्वापि अननिवतार्थपदत्वान्नमिति व्यवहारतिलके भवदेवभट्टाः ॥ * ॥ मिथ्योत्तरभेदमाहतुः पुनर्व्यासनारदौ ।
"मिथ्येतन्नाभिजानामि मम तत्र न सन्निधिः ।
अजातत्वास्मि तत्काले इति मिथ्या चतुर्विधम् ॥"
मिथ्येतदिति ग्रन्थतो नाभिजानामीत्यादिकमर्थतोऽनुवदः । तथा च कात्यायनः ।
"श्रुत्वा भाषार्थमन्यस्तु यदि तं प्रतिषेधति ।
अर्थतः ग्रन्थतोऽपि मिथ्या तज्ज्ञेयमुत्तरम् ॥"
त्वं मह्यं धारयसीति प्रतिज्ञायां न गृहीतमिति ग्रन्थतः । कालविशेषगर्भायां तस्यां सत्यां तदा नाहं जात इति अर्थतः । देशकालविशेषगर्भायां तदा तत्र नाहमासं इत्यर्थतः । देशादिमत्यां तच्छून्यायां वा न जानामीत्यर्थत एव योग्यासरयेनार्थतस्तदग्रहणप्रतिपादनात् अत्र चरमत्रयं ग्रहणावस्कन्दनसुखेन ग्रहणाभावप्रतिपादकं सापदेशमिथ्योत्तरमात्रं आद्यं मिथ्योत्तरमात्रम् ॥ * ॥ इदमृषिः ।
"श्रुत्वाभियोगं प्रत्यर्थी यदि तत् प्रतिपद्यते ।
सा तु संप्रतिपत्तिः स्याच्छास्त्रविद्भिरुदाहृता ॥
अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तं तथा ।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत् ॥
आचारेणावसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभियोज्यो जितः पूर्वं प्राड्न्यायस्तु स उच्यते ।"
अभियुज्यते इत्यभियोगः । प्रतिपद्यतेऽङ्गीकरोति । तं साध्यार्थम् । तथा प्रपद्य सत्यत्वेनाङ्गीकृत्य । कारणं तत्प्रतिकूलरूपं कारणं ब्रूयात् तदा तदुत्तरं प्रत्यवस्कन्दनम् । वादुक्तस्य प्रतिकूलत्वेन प्रत्यवस्कन्दनमित्यर्थः । प्रतिपक्षावस्कन्दनात् प्रत्यवस्कन्दनमिति जीमूतवाहनः । तच्च कारणोत्तरं त्रिविधम् । बलवत् तुल्यबलं दुर्बलच्च । तत्र बलवदुत्तरं यथा । त्वत्तः ग्रतं गृहीतमिति सत्यं किन्तु परिशोधितमिति । अत्र उत्तरवादिन एव क्रियानिर्देशः । तथा च नारदः ।
"आधर्म्यं पूर्वपक्षस्य यस्मिन्नर्थेऽग्रहेत् ।
विवादे साक्षिणस्तत्र प्रष्टव्या प्रतिवादिनः ॥"
आधर्म्यं दुर्बलत्वं पूर्वपक्षस्य । ततश्च स्थापकसाध्यस्य धार्यमाणत्वस्य ध्वंसकारणं निर्यातनादि तदुपसुत्तरं कारणोत्तरम् । अतएव मिथ्योत्तरादस्य भेदः । तद्धि धार्यमाणत्वस्यात्यन्ताभावप्रयोजकमग्रहणरूपं न तु ध्वंसरूपम् ॥ * ॥ तुल्यबलकारणोत्तरं यथा । मदीयेयं भूमिः क्रमागतत्वादिति वादुक्ते मदीयेयं भूमिः क्रमागतत्वादिति प्रतिवादिना तथोत्तरमिति तत्र पूर्ववादिनः साक्ष्युपन्यासः । तदसामर्थ्ये प्रतिवादिनः । तथा च याज्ञवल्क्यः ।
"साक्षिभूयतः सतस्तु साक्षिणः पूर्ववादिनः ।
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ॥"
दुर्बलकारणोत्तरं यथा । ममेयं भूः क्रमागतत्वादिति वादुक्ते ममेयं भूर्ईश्वरभुज्यमानत्वादिति प्रत्युत्तरं तत्तु धनमात्रप्रयुक्तम् ।
"पश्यतोऽनुवतो हानिर्धनस्य दशवार्षिकी ॥"
इति याज्ञवल्क्यीयं बीजम् ।
किन्तु नेतदृयुक्तम् ।
"परेण भुज्यमानाया भूमेर्विंशतिवार्षिकी ॥"
इति भूमिमात्रविषयकं तत्परार्हेणापोदितत्वादिति भवदेवभट्टाः ॥
"पश्यतोऽनुवतो हानिर्भूमेर्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥"
इति मूलपाठिष्ठतपाठोऽपि तत्रार्थे प्रमाणम् । ततश्च क्रमागतत्वं पूर्ववादिनः प्रमाणोपन्यासः । तथा चोक्तम् ।
"गुरावभिहिते हेतौ प्रतिवादिक्रिया भवेत् ।
दुर्बले वादिनः प्रोक्ता क्रिया तुल्येऽपि वादिनः ॥"
आचारेण व्यवहारेण । अवसन्नो भग्नः । लेखयते भाषामिति शेषः स वादी अस्मिन्नर्थे मया पूर्वं पराजितः वाच्यः प्राड्न्यायो हि धार्यमाणत्वसामान्याभावज्ञापकः ॥*॥ एतेषां सङ्करे विशेषमाहतुर्व्यासनारदौ ।
"मिथ्योत्तरं कारणञ्च स्यातामेकत्र चेदुभे ।
सत्यत्वापि सहानेन तत्र स्याद्यं किमुत्तरम् ।
मिथ्याकारणयोर्व्वापि स्याद्यं कारणमुत्तरम् ॥
यत्प्रभूतार्थविषयं यत्र वा स्यात् क्रियाफलम् ।
उत्तरं तत्तु विज्ञेयमसंकीर्णमतोऽन्यथा ॥"
ग्रतमभियोगे ग्रतग्रहणं मिथ्या पश्चाग्रहेण गृहीतास्त्वया परिशुद्धा इति मिथ्याकारणं ग्रथोत्सृत्यरूपत्वे कारणोत्तरं याद्यं आदौ विचारणीयं परिशोधनस्यार्वाचीनत्वेन स्मरणार्हत्वात् पश्चान्मिथ्योत्तरं तत्र ग्रहणस्य चिरातीतस्य कष्टप्रतिपाद्यत्वात् । एवञ्च सत्यभियोगे मिथ्येतत् षष्टिपुराणा एव मया गृहीतास्त्वयापि त्रिंग्रत् परिशुद्धास्त्रिंग्रद्धारयामि इति मिथ्याकारणसत्वे: सङ्कीर्णोत्तरेऽपि पूर्ववत् कारणोत्तरमेव याद्यं मिथ्याकारणयोर्न्यायौति वापिग्रब्दाभ्यां तथा दर्शितत्वात् सत्योत्तरस्य स्वयंस्वीकृतत्वेन निर्णयानर्हत्वादिति भावः । प्राड्न्यायेन सह सर्वत्रैव सङ्करानुपपत्तिरिति तन्नोक्तं यदि ग्रतं मिथ्यापञ्चविंग्रतिपुराणा गृहीतास्ते च परिशुद्धास्तथा मिथ्याग्रस्य प्रचुरार्थविषयस्य विचार उपक्रमणीयः । भूयोऽनुरोधस्याभ्यर्हितत्वात् पश्चात् स्वल्पार्थस्य विचार इति । तुल्यार्थविषयत्वे तु यत्र क्रियायाः साध्यादेः फलं निर्णयः शीघ्रं भवति तदंग्रस्यैव प्रमाणं याद्यं तथा यदि ग्रतग्रहणे पत्रमस्ति ग्रतापहृवे च पश्चाग्रत्परिशोधने साक्षिणस्तदा मिथ्योत्तर एवादौ ततस्तज्ज्ञानाय ग्रहणपत्रं याद्यं लिखितस्य साक्षिभ्यो बलवत्त्वेन सम्यङ्निर्णयकारित्वात् पश्चात्परिशोधनं साक्षिणः प्रष्टव्याः । सङ्करोत्तरमप्यसङ्कीर्णमदुष्टं अतो भिन्नमन्यथा सङ्कीर्णदुष्टमित्यर्थः । अत्र चावच्छेदभेदेन मिथ्योत्तरसङ्करे सदुत्तरत्वमेकावच्छेदेन । सङ्करे तु असदुत्तरत्वमाह कात्यायनः ।
"पक्षैकदेशे यत् सत्यमेकदेशे च कारणम् ।
मिथ्या चैवैकदेशे स्यात् सङ्करात् तदनुत्तरम् ॥"
एकदेशे इत्यत्र एकस्मिन्नेव देशे न भिन्नदेशे यथा ग्रतं मयाम्बैव परिशोधितं न गृहीतं वा इति ॥ * ॥

अथ क्रियापादः ।

उत्तराभिधानानन्तरं याज्ञवल्क्यः ।
"ततोऽर्थी लेखयेत् सत्यं प्रतिज्ञातार्थसाधकम् ।"
अर्थी वादी प्रतिवादी च स्वपक्षार्थित्वात् । तयोरधिकारे नियममाह व्यासः ।
"प्राड्न्याये कारणोक्तौ च प्रत्यर्थी साधयेत् क्रियाम् ।
मिथ्योत्तरे पूर्ववादी प्रतिपत्तौ न सा भवेत् ॥"
मिथ्योत्तरे न गृहीतं मयेत्यादिरूपे पूर्ववादी भाषावादी साक्ष्यादिकं निर्दिशेदुत्तरवादी तत्र तस्य मानुष्याः क्रियाया असम्भवादिति न्यायो मूलं अत्रापि साक्ष्याद्यभावे उत्तरवादिन एव क्रियम् ।
"न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत् ।
अभियुक्ताय दातव्यं दिव्यं दिव्यविचारदैः ॥"
इति कात्यायनोक्तेः ॥
अत्र पूर्वार्हेणार्थिनो दिव्यनिषेधेऽर्थात् प्रत्यर्थिनस्तत्प्राप्तौ पराङ्मुखाभिधानं सिद्धे सत्कारभो नियमाय इति न्यायान्नियमार्थं न च याज्ञवल्क्येन क्रियापदं कारणोत्तरमात्रबोधपरमेकं मिथ्योत्तरेऽनुयुज्यते इति तत्रापि अर्थिन एव दिव्यमिति वाच्यं ग्रयमाणपदस्य हि पुनरन्वयार्थमेवानुषङ्गः । नन्वर्थवैषम्यसहितस्य गौरवात् पूर्वोक्तन्यायमूलकविषयलाभो कात्यायनोक्तदिव्यविषयनियमभङ्गार्हत्वाच्च यत्र विवादविषये प्रत्यर्थी सन्दिहानः सत्योत्तरानर्हतया अर्थिन एव दृढक्रिया तदसम्भवे तस्यैव दिव्यं न तु प्रत्यर्थिनः अधिकारनियमाभावात् अर्थिनस्तत्प्राप्तात् न च न कश्चिदभियोक्तारमित्यादिना विरोधस्तत्रोत्तरार्हप्रतियोगिविषयत्वात् एतद्विषय एव धनस्वामिनो दिव्यमिति लोकप्रवादः ॥ * ॥ लिखितात्मभावेनापि दिव्यमाह याज्ञवल्क्यः ।
"प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥"*॥
अथ दिव्यम् । दिव्यान्याह स एव ।
"तुलाग्न्यापो विषं कोषो दिव्यानीह विशुद्धये ।
महाभियोगेष्वेतानि ग्रीर्षकस्थेऽभियोक्तरि ॥
रुग्या वान्यतरः कुर्यादितरो वर्षयेच्छरः ।
विनापि ग्रीर्षकं कुर्यात् नृपतोऽथ ग्रातके ॥"
महाभियोगेषु महापातकादिगुरुतराभियोगेषु । ग्रीर्षकस्थः ग्रीर्षकं प्रधानं व्यवहारस्य चतुर्थपादो जयपराजयलक्षणः तेन दग्धो लक्ष्यते । तत्र तिष्ठति वर्तते तदङ्गीकरोतीत्यर्थः । अत्राभि-

योक्तुः श्रोत्रियोक्तैरभियोज्यस्य दिव्यकर्तृत्वं प्रतीयते। प्रत्यर्थीच्छया अर्थिनो दिव्यमाह रुचेति। इतरोऽभियुक्तः। एतच्चैवं दिव्यतत्त्वे विघ्नम्। प्रतिज्ञातार्थसाधकमिति साधकं साक्ष्यादिकम्। तदाह बृहस्पतिः।

"दिव्यकारा क्रिया प्रोक्ता मानुषी दैविकी तथा।
साक्षिलेख्यानुमानञ्च मानुषी त्रिविधा स्मृता।
धर्षाद्या धर्मशास्त्रज्ञा च दैविकी त्रयधा स्मृता॥"

तत्रानुमानन्तु मुक्त्यादि। *। तत्र साक्ष्यमाह मनुः।

"समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति।"

एतत् प्रमाणमात्रोपलक्षणम्।

"अनुभावी च यः कश्चित् कुर्य्यात् साक्ष्यं विवादिनाम्।"

इति बृहस्पतिवचनात्।

अतएवाङ्गतमपि साक्षिणमाह मनुः।

"एकानिरङ्गो वीक्षेत ब्रूयुरङ्गापि किञ्चन।
वृद्धस्त्रीबालमत्तार्त्तान् यथार्हं यथाश्रुतम्॥"

अनिरङ्गस्यापि साक्षित्वेनानियुक्तः। परस्परायापि श्रवणमाह विष्णुः।

"उद्दिष्टसाक्षिणि मृते देशान्तरगतेऽपि वा।
तदभिहितश्रोतारः प्रमाणं नात्र संशयः॥"

अस्योत्तरसंग्रामाह नारदः।

"साक्षिणामपि यत् साक्ष्यं स्वमर्थं परिभाषताम्।
श्रवणात् श्रावणाद्वापि स साक्ष्युत्तरसंज्ञकः॥"

स्वपक्षसम्बन्धि साक्ष्यं परिभाषतां साक्षिणां यः स्वयं ब्रूतेऽर्थिना आहूत वा स श्रवणात् श्रावणादुत्तरसाक्षीत्यर्थः। एवं योऽर्थिना गूढतया प्रत्यर्थिवचनं श्रावितः स गूढसाक्षीत्याह स एव।

"अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम्।
यः श्रावयते तदा गूढो गूढसाक्षी स उच्यते॥"

तेनान्यतरवाक्याभिहितार्थविषयकडुक्कारणार्जं विज्ञापनं साक्ष्यमिति स्थितम्। तत्र नारदः।

"तेषामपि न बालः स्यान्नैको न स्त्री न दुष्टलतु।
न बान्धवो न सापत्नो नृपेणोक्ते कथञ्चन॥"

कार्यं सदपि अन्यथा सद्विरुद्धत्वेन। एवञ्च यदि परमधार्मिकत्वेन बालत्वादीनामपि सत्यवादित्वं निश्चीयते तदा तेषामपि साक्षिणो भवितुमर्हन्तीति। तेषां साक्ष्यविधायकं वक्ष्यमाणमनुवचनमपि इतरविषयम्। याज्ञवल्क्यः।

"त्रयवराः साक्षिणो ग्राह्याः श्रौतस्मार्तक्रियारताः।
यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः॥"

त्रयोऽवरा निकृष्टा येषां ते त्रयवराः त्रिभ्योऽल्पना भवन्तीत्यर्थः। यथेति यो यज्जातीयस्तस्य तज्जातीयः साक्षी। स्त्रीणां स्त्रियोऽन्यजातीनामन्यजाः। यथावर्णं ब्राह्मणानां ब्राह्मणाः क्षत्रियादीनां क्षत्रियादयः। अभावे तु तत्र क्रमेण विना सर्वे एव। त्रयवरा इत्यस्यापवादमाह स एव।

"उभयानुमतः साक्षी भवेदेकोऽपि धर्मवित्।"

उभयानुमतत्वं धर्मवित्त्वञ्च नियतं तत्त्वम्। तदाह विष्णुः। अभिमतगुणसम्पन्नस्तूभयानुमतस्त्वेकोऽपि इति। अतएव श्रोत्रियमप्येकं निषेधयति बृहस्पतिः।

"नव सप्त पञ्च वा स्युश्चत्वार एव वा।
उभौ तु श्रोत्रियौ ग्राह्यौ नैकं पृच्छेत् कदाचन॥"

एको मिलितगुणसम्पन्नः प्रधानकल्पः तदभावे उभयानुमतमात्रोऽपि ग्राह्यस्तदाह नारदः।

"उभयानुमतो यः स्याद्ब्रूयोर्विवदमानयोः।
भवत्येकोऽपि साक्षित्वे प्रत्ययः स्यात् स संसदि॥"

उभयानुमत एकोऽलुब्धत्वादिना सर्वजनप्रसिद्धश्चेत्तदा साक्षित्वे संसदि बहुजनसन्निधौ प्रत्ययः तथात्वे क्वचिद्वैरादिसम्भेऽप्यकीर्तिभयात् सत्याभिधानसम्भवादित्याशयः। विचारस्य तत्त्वनिर्णयार्थत्वात्तदाह मनुः।

"एकोऽप्यलुब्धः साक्षी स्यात् बहवः श्रुत्योऽपि न स्त्रियः।
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्योऽपि ये स्मृताः॥"

एकोऽलुब्धस्तु साक्षी स्यादिति कुल्लूकभट्टधृतपाठः। एको लुब्धस्तु साक्षी स्यादिति जीमूतवाहनधृतपाठस्तु न युक्तः। लुब्धाया बहवोऽप्यसाक्षिणो भवितुमर्हन्तीति एकपदव्यर्थतापत्तेः। भवतु वा तत्पाठः तथाप्येक इत्यनुरोधात् तन्निषेधमुखेनालुब्धस्यैकस्यानुमतिसत्त्वे धर्मवित्त्वमन्तरेण साक्षित्वं बोध्यं इत्यर्थतो न विरोधः। अतएव विश्वरूपप्रभृतीनां उभयानुमत एक एव साक्षीति व्याख्याने धर्मवित्त्वमन्तरेण नोक्तम्। दोषैश्चेत्यादिभिः। तथा च नारदः।

"क्लेना साहसिका धूर्त्ताः कितवा योधकाश्च ये।
असाक्षिणस्तु ते दृष्टाः सत्यं न विद्यते॥"

कितवा द्यूतकराः॥*॥ अपवादमाह उशनाः।

"दोषोक्तो बधिरः कुष्ठी क्लीबान्धस्थविरादयः।
एतेऽप्यनभिसम्बन्धाः साहसे साक्षिणो मताः॥"

स्थविरो ज्ञानेन्द्रियग्रामः। आदिशब्दात् कितवादयः। उभयानुमताभावे शुचित्वादिगुणश्चैको ग्राह्यः। तथा च व्यासः।

"शुचित्वञ्च धर्मज्ञो योऽन्यत्राप्यनुभूतवाक्।
प्रमाणमेकोऽपि भवेत् साहसेषु विशेषतः॥"

अनुभूतवाक् स्वानान्तरे सत्यवेनेति। भवदेवभट्टोऽप्येवम्। साहसमाह नारदः।

"मनुष्यमारणं स्तेयं परदाराभिमर्षणम्।
पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम्॥"

कात्यायनः।

"अन्यक्षरस्तु निःक्षेपे साक्षमेकोऽपि दापयेत्।
अर्थिना प्रहितः साक्षी भवेदेकोऽपि याचिते॥
संस्कृतं येन यत् पत्रं तत्तेनैव विभावयेत्।
एक एव प्रमाणं स विवादे परिकीर्तितः॥"

संस्कृतं गठितं पत्रं कूटलेखादि। विष्णुः। स्तेयसाहसवाग्दण्डपारुष्यसंग्रहणेषु साक्षिणो न परीक्षा इति स्तेयपरदारगमनादिकार्य्याणां निह्नवेनैव क्रियमाणत्वात् दैवादेव परं साक्षिणो भवन्तीति न परीक्षा इत्युक्तम्। तेषां वाक्यन्तु मित्रारिभावादिनिरूपणेनोपपत्त्युपपत्तिभ्यामालोचनीयम्। न तु वाक्यमात्रादिति व्यवहारमातृका। अतएव कात्यायनः।

"ऋणादिषु परीक्षेत साक्षिणः स्थिरकर्मसु।
साहसास्थायिकेष्वेव परीक्षा कुत्रचित् स्मृता॥"

इति॥*॥

श्रोत्रियादीनामसाक्ष्यमाह नारदः।

"श्रोत्रियाज्ञापसा दृष्टा ये च प्रव्रजिता नराः।
वचनात्तेष्वसाक्षित्वं नात्र हेतुरदाकृतः॥"

दानरत्नाकरे श्रोत्रियमाह देवलः।

"एकां ग्राह्यां सकल्पां वा वद्भिरग्नैरधीत्य वा।
षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्॥"

सकल्पां कल्पमात्राङ्गसहिताम्। वद्भिरिति बहुत्वार्थे द्वयोक्तिः। वचनादिति श्रोत्रियत्वादिरूपाभिधानात् न च तच्छ्रुतौ हेतुरित्यर्थः। तथा च स्त्रीयदैविककर्मैकरक्षणव्यग्रतया परकीयकार्ये विस्मरणसम्भवात् साक्षित्वरूपलघुकार्य्यनियोगे सच्छ्रापभयेन व्यवहारमहारोऽपि तान् न प्रच्छतीति तत्साक्ष्यकरणार्थत्वाच्च न ते साक्षिणः कर्त्तव्याः किन्त्वज्ञताः स्वयं साक्षिणो भवन्तीव। उभौ तु श्रोत्रियौ स्नातामिति स्मृतेः। बृहत्स्नातसाक्षित्वं बृहत्त्वादेव स्नानेन्द्रियत्वादित्यर्थः। मनुः।

"स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः॥
अन्तर्वेश्मन्यरण्ये वा शरीरस्यात्ययेऽपि च।
स्त्रियाश्यसम्भवे कार्ये बालेन स्थविरेण वा॥
शिष्येण बन्धुना वापि दासेनाथ भृतकेन वा।
देवब्राह्मणसन्निध्ये साक्ष्यं पृच्छेद्धितं द्विजान्॥
उदङ्मुखान् प्राङ्मुखान् वा पूर्वाह्णे वै शुचिः शुचीन्।
ब्रूहीति ब्राह्मणं पृच्छेत् सत्यं ब्रूहीति पार्थिवम्॥
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः॥"

गोबीजकाञ्चनापहारे यत् पापं तत्तुल्यानृताभिधाने स्यादिति वैश्यम्। एतत्साक्ष्यानृताभिधाने भवान् सर्वैः पातकैः संबध्यत इत्युक्त्वा शूद्रञ्च पृच्छेत्।

"ब्रह्मघ्ने ये स्मृता लोका ये च स्त्रीबालघातिनः।
मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रूहतो मृषा॥"

इति मनूक्तं दूषणम्। सतुफलञ्च।

"अश्वमेधसहस्रन्तु सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते॥"

इति मनुनारदोक्तं आवयेत्॥

याज्ञवल्क्यः।

"न दृष्टानि हि यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्ड्यश्च एव हि॥"

कात्यायनः ।
"अशीतिवरके वर्षे वसेयुः कूटसाक्षिणः ।"*।
याज्ञवल्क्यः ।
"सभां प्रतिज्ञां यस्त्रीयुः साक्षिणः स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ।
दर्शनं हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ।
तत्प्रायश्चित्ताय निर्वाप्यश्चरुः सारस्वतो द्विजे ।"
गौतमः । नानृतवचने दोषो जीवनक्षेत्रतदधीनं न तु पापीयसो जीवनमिति ।
"दृष्टे बहूनां वचनं समेषु गुणिनां तथा ।
गुणिदृष्टे तु वचनं साक्ष्यं ये गुणवत्तराः ।"
तेषामिति शेषः । यत्तु ।
"साक्षिणां लिखितानाञ्च निर्दिष्टानाञ्च वादिनाम् ।
तेषामेकोऽन्यथावादी भेदात् सर्वेऽप्यसाक्षिणः ।"
इति कात्यायनवचनम् ॥
तत्रयाणां तुल्यरूपाणां मध्ये एकस्याप्यन्यथावादे अपरस्य तत्तुल्यस्य तत्प्रतिपन्नतया द्वितीयस्य किञ्चिद्वादिनि तत्र भेदात् परस्परविरुद्धार्थाभिधाने भेदात् साक्षिभ्यो न निर्णय इति परम् । दृष्टस्तिस्तु साक्षिदृष्टे कर्मनिष्ठानां यद्वचनमाह गुणिदृष्टे क्रियावसामित्यनेन । तथा ।
"साक्षिणोऽर्थिसमुद्दिष्टान् सतश्च दोषेण दोषयेत् ।
अदुष्टं दूषयन् वादी तत्समं दण्डमर्हति ॥"
इति ॥
तत्समं विवादसमम् । सभासदादिविदितसाक्षिदूषणमेव साक्ष्यं न तु चावरादिसाक्षिभिः प्रतिपाद्यम् । *। अनवस्थापातादित्याह नारदः ।
"सभासदां प्रसिद्धं यल्लोकसिद्धमथापि वा ।
साक्षिणां दूषणं साक्ष्यमसाध्यं दोषवर्जनात् ॥
अन्येश्च साक्षिभिः साध्ये दूषणे पूर्वसाक्षिणाम् ।
अनवस्था भवेद्दोषस्तेषामप्यन्यसम्भवात् ॥"
असाध्यं साधनानर्हं सिद्धत्वादेवदर्जनात् । अनवस्थाविरहात्तस्मात् प्रसिद्धदूषणमेव साक्ष्यम् ।* दूषणमाह कात्यायनः ।
"बालोन्मादात्सदात्यन्तं स्त्री पापाभ्यासाच्च कूटकृत् ।
विद्यूयात् बान्धवः स्नेहात् वैरनिर्यातनादरिः ।
यः साक्षी नैव निर्दिष्टो नाभूनो नैव दर्शितः ।
ब्रूयान्मिथ्येति तथ्यं वा दण्ड्यः सोऽपि नराधमः ।"
यदुत्तरे येन क्रिया प्रदर्श्यते तदाह ।
"मिथ्याक्रिया पूर्ववादे कारणे प्रतिवादिनः ।
प्राङ्न्याये विधिसिद्धौ तु जयपत्रं विनिर्दिशेत् ।"
मिथ्योत्तरे सति पूर्ववादे पूर्ववादिनि क्रिया प्रदर्श्या इति शेषः । *। तदानीं सन्धिमाह बृहस्पतिः ।
"पूर्वोत्तरेऽभिलिखिते प्रक्रान्ते कार्यनिर्णये ।
द्वयोरुक्तप्रयोः सन्धिः स्यादयःपिण्डयोरिव ॥"
उक्तापकारकमाह स एव ।
"साक्षिसभ्यविरुद्धस्तु भवेद्दृष्यश्चयोरपि ।
दोलायमानौ यौ सन्धिं कुर्यातां तौ विचक्षणौ ॥"
कात्यायनः ।
"क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु ।
लेख्ये च सति वादेषु न दिव्यं न च साक्षिणः ।
समत्वं साक्षिणां यत्र दिव्येस्तत्र 'विशोधयेत् ॥"
एतत् संग्रयानुच्छेदे बोध्यम् । याज्ञवल्क्यः ।
"निह्नुते लिखितानेकमेकदेशे विभावितः ।
दाप्यः सर्वान् तृणेनार्थान् याज्ञस्यनिवेदितः ॥"
यो लिखितानेकं सुवर्णादिकं अपलपति स एकस्मिन् साक्ष्यादिभिर्विभाविते सति सर्वान् दद्यात् । यद्येकदेशविभावनेन वादिनोऽवसादमवगम्य इदमपरं मया लेखयितुं विस्मृतमिति ब्रूते स तस्मै भावाकाले अनुपन्यस्तं न दद्यादेतच्च न केवलं वाचनिकं किन्त्वेकदेशविभावगादिजानत एवास्य तदपलापे दुःग्रीवत्वावधारणादपरार्थेऽपि तथात्वमेव सम्भाव्यते सत्यविभावकस्यापि प्रक्रान्तविषये यथा वस्तुवादावधारणादविभावितार्थेऽपि सत्यवादित्वसम्भावनमिति रूपसर्वपरम्परा सम्भावना प्रत्ययानुग्रहीतात्सादेव योगीश्वरवचनात् सर्वं दापनीयमिति निर्णयः । एवञ्च तर्कवाक्यानुसारेण निर्णये क्रियमाणे वस्तुनोऽन्यथात्वेऽपि अवहारदर्शिनां न दोषः । तथा च गौतमेनापि न्यायाधिगमे तर्कोऽभ्युपायः तेनापि संयस्य यथान्यायं गमयेदिति । उक्ता तस्मान्नाचार्यावनिन्द्यविद्युपसंहृतम् । एवचास्य न्यायस्य वादिहृदयसाधारण्यात् दुरुपविषयत्वं वचनानाम् । अतएव कात्यायनः ।
"यद्येकदेशप्राप्तापि क्रिया विहेत मानुषी ।
सा याच्या न तु पूर्णापि दैविकी वदतां वृथा ।"
वदतां विवदतामित्यविशेषेण दर्शयति । पूर्णापि दैविकी समयविषयिकापि न याच्या तैनैकदेशप्रतिपादिकया मानुष्या क्रियया समस्तसाध्यसिद्धिरिति । न च यद्येषां मध्ये एकमपि मया गृहीतं विभावयसि तदा सर्वमेव दातव्यमिति । प्रतिज्ञाविषयकत्वमेकदेशविभावितत्वं वचनस्येति लोल्लोकमतानुसारिमैथिलमतं युक्तमिति वार्थं प्रतिज्ञाविषयते ।
"अनेकार्थाभियुक्तेन सर्वार्थेषु फलार्थिना ।
विभावितैकदेशेन देयं यदभियुज्यते ॥"
इत्यनयैकं प्रौढिवादेनाभियुज्य मानादधिकस्यापि प्रतिज्ञातस्य दानावश्यकत्वात् न याज्ञस्यनिवेदित इत्यपि अर्थे अनिवेदितस्यापि प्राग्ज्ञातत्वेनाप्रतिज्ञातस्य सर्वस्यैव देयत्वात् । न च विभावितैकदेशवचनं व्याप्यभूतैकदेशविषयं तस्मिंस्तु प्रतिपादिते व्यापकैकदेशप्रतीतिरनुमानात् सम्भवतीति वार्थं विभावितैकदेशानुमितव्यापकस्यापि न्यायनोऽन्यात्यत्वे सिद्धे न याज्ञस्यनिवेदित इत्यभिधानानुपपत्तेः । एवच ।
"साध्यार्थांशे निगदिते साक्षिभिः सकलं भवेत् ।
क्षीरेऽर्धे साहसे चौर्ये यत्साध्यं परिकल्पितम् ॥"
इति कात्यायनवचनम् ॥
तद्विषयपदर्शकं याज्ञस्यनिवेदितपदमपि योज्यमिति । यत्तु ।
"अनेकार्थाभियोगे तु याज्ञं संशोधयेद्बुधः ।
साक्षिभिस्तावदेवासौ लभते साधितं धनम् ॥"
तद्याज्ञस्यनिवेदितपूर्वादिविषयकम् । तथा हि नानाविधपत्रवर्णाद्यभियुक्तेनाज्ञानता नार्थं आनामीति उत्तरवादिना साक्ष्यादिभिर्यावद्धनं प्रतिपादयति तावदेव पूर्वेण दातव्यम् एवमेव विश्वरूपजीमूतवाहनप्रभृतयः । कात्यायनः ।
"अनुमानाद्गरः साक्षी साक्षिभ्यो लिखितं गुरु ।
अनिरुद्धा त्रिपुरुषी भुक्तिस्तेभ्यो गरीयसी ॥"
अनुमानं प्रत्यासङ्गलिङ्गं तदाह मनुः ।
"वाक्चक्षुर्विभावचेष्टाकृतिभावसमन्वयं नृणाम् ।
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च ॥"
स्वरो गद्गदादिः वर्णोऽस्वाभाविकः । इङ्गितं खेदवेपथुरोमाञ्चादि । आकारो विकृतः । चक्षुषा कातरेण । चेष्टितेन स्खलनत्यागादिना । एषाञ्चान्यथासिद्धेर्दुर्निरूपत्वादेभ्यः साक्षी बलवान् इत्यर्थः ॥ *॥ सुखनिरूपणे तु याज्ञवल्क्यः ।
"देशाद्देशान्तरं याति सकलो परिलेढि च ।
ललाटं लिखते भस्म मुखं वैवर्ण्यमेति च ॥
परिशुष्यत्मुखबदनो विरुद्धं बहु भाषते ।
वाक् चक्षुः पूजयति नो तथौष्ठौ निर्भुजत्यपि ॥
स्वभावात् विकृतिं गच्छेन्मनोवाक्कायकर्मभिः ।
अभियोगे च साक्ष्ये च स दुष्टः परिकीर्तितः ॥"
न परोक्षां वाचं प्रतिवचनेन पूजयति तथौष्ठचक्षुश्च परकीयवीक्षणेन निर्भुजति कुटिलीकरोति यदा मनोवाक्कायकर्मभिः स्वभावात् पूर्वोक्तां यथायोग्यां विकृतिं गच्छेत्तदा स दुष्ट इत्यर्थः । अनएव रामायणे ।
"आकारस्त्वाद्यमानोऽपि न शक्योऽसौ निगूहितुम् ।
बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम् ॥"
आकारो देहधर्मः सुखाप्रसादवैवर्ण्यरूपः । नारदः ।
"सुदीर्घेणापि कालेन लिखितं सिद्धिमाप्नुयात् ।
संजानन्नात्मनो लेख्यमजानंस्तु लेखयेत् ॥"
सुदीर्घेणेति संस्कारोद्बोधकत्विखसत्त्वादयं चिरेणापि साक्ष्यं दातुं शक्नोतीत्यर्थः । *। लिपिज्ञं स्वहस्तेन लेखयेत् तदज्ञं परहस्तेनेत्याह व्यासः ।
"अलिपिज्ञो भवेद्यः स्यात् लेखयेत् स्वमतन्तु सः ।
साक्षी वा साक्षिजाग्येन सर्वसाक्षिसमोगरः ॥"
बृहस्पतिः ।
"सुखितं घातितं यच्च सीमायाञ्च समन्ततः ।
अज्ञतोऽपि भवेत् साक्षी ग्रामस्तत्र न संशयः ॥"

अकृता अपि साक्षिणो भवन्तीत्याहतुर्मनु-कात्यायनौ।
"अन्ये पुनरनिर्दिष्टाः साक्षिणः समुदाहृताः।
ग्रामश्च प्राड्विवाकश्च राजा च सर्वहारिणाम्॥
कार्य्यस्यभ्यन्तरो यः स्यादर्थिना प्रहितश्च यः।
कुल्याः कुलविवादेषु भवेयुस्तेऽपि साक्षिणः॥"
स्मृतिः।
"दत्तादीनेव भृत्यानां स्वामिनां निर्गमे सति।
विक्रयादानसम्बन्धे क्रीत्वा धनमिच्छति॥
मृते समाक्षये चैव विवादे समुपस्थिते।
साक्षिणः साधनं प्रोक्तं न दिव्यं नच लेखकम्॥
प्रकाशे साहसे वापि पारक्ये दत्तवाचिके।
बलोद्भवेषु कार्येषु साक्षिणो दिव्यमेव च॥"
बृहस्पतिः।
"लेखं वा साक्षिणो वापि विवादे यस्य दूषिताः।
तस्य कार्यं न सिध्येत यावत्तन्न विशोधयेत्॥"
तल्लक्षसाक्षिरूपप्रमाणम्॥*॥ लेखशोधनमाह कात्यायनः।
"स्वहस्तलेखसन्देहे जीवतो वा मृतस्य च।
तत्स्वहस्तकृतैरन्यैः पत्रैस्तल्लेखनिर्णयः॥"
तथा।
"समवेतेन यद्दृष्टं वक्तव्यं तत्तथैव च।
विभिन्नेनैव कार्य्यं तु तद्वक्तव्यं पृथक् पृथक्॥
नाप्टैरनियुक्तैर्वा समं सत्यं प्रयत्नतः।
वक्तव्यं साक्षिभिः साक्ष्यं विवादस्थानमागतैः॥
अनुद्दिष्टेन चित्तेन दृष्टं सम्यग्विदा तु यत्।
प्रत्यक्षं तत् स्मृतं कार्यं साक्ष्यं साक्षी तु तद्वदेत्॥"
नारदः।
"यः परार्थेऽपहरति स्वां वाचं पुरुषाधमः।
आत्मार्थे किं न कुर्य्यात् स पापो नरकभिरुयः॥
अर्था वै वाचि नियता वाङ्मूला वाग्विनिःसृताः।
यस्तु तांस्तेनयेद्वाचं स सर्वस्तेयकृन्नरः॥"
बौधायनः।
"पञ्च पञ्चनृते हन्ति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते॥
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन्।
सर्वं भूम्यनृते हन्ति साक्ष्ये साक्षी त्वया वदन्॥"
बृहस्पतिः।
"यस्य यैर्यं प्रतिज्ञातं साक्षिभिः प्रतिपादितम्।
स जयी स्यादन्यथा तु साध्यार्थं न समाप्नुयात्॥"
याज्ञवल्क्यः।
"उक्तेऽपि साक्षिभिः साक्ष्ये यत्रान्ये गुणवत्तराः।
द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः॥"
अन्यथा पूर्वविपरीतार्थप्रकारेण। कूटा अनादेयवचनाः। तथा।
"यः साक्ष्यं भाषितोऽन्येभ्यो निह्नुते तमसावृतः।
स दाप्योऽष्टगुणं दण्डं ब्राह्मणश्च विवासयेत्॥"
तमन्येभ्यः साक्ष्यं भाषयेतिवादिना प्रयुक्तो यः भाषितः कारितश्चेत्यादिभिः पदसन्धिः एवम्भूतोऽपि सभायां निगदकाले साक्ष्यं निह्नुते यस्तस्याष्टगुणो दण्डः॥*॥

अथ लिखितम्।
तत्र बृहस्पतिः।
"वाक्साधिकेऽपि समये भ्रान्तिः संजायते यतः।
धात्राक्षराणि दृष्टानि पत्रारूढान्यतः पुरा॥"
नारदः।
"लेख्यं तु द्विविधं प्रोक्तं स्वहस्तान्यहस्तकं तथा।
असाक्षिकं साक्षिकञ्च सिद्धिर्देशस्थितेस्त्रयोः॥
मृतासु साक्षिणो यत्र धनिकर्णिकलेखकाः।
तदप्यपार्थकरणं दृष्टे त्वधिः स्थिरमाश्रयात्॥
दर्शितं प्रतिकालञ्च पाठितं सारितञ्च यत्।
लेख्यं सिध्यति सर्वत्र मृतेष्वपि च साक्षिषु॥
लेखे देशान्तरस्थे च दग्धे दुर्लिखिते हृते।
सतस्तत्कालहरणमसतो दृष्टदर्शनम्॥
छिन्नभिन्नहृतोन्मृष्टनष्टदुर्लिखितेषु च।
कर्तव्यमन्यलिखितं स्वैर्व लेख्यविधिः स्मृतः॥
लेख्यं यत्रान्यनामाङ्कं हैत्वन्तरकृतं भवेत्।
विप्रतिपन्नौ परीक्ष्यं तत् समन्त्यागमहेतुभिः॥"
स्वलेख्यमसाक्षिकमपि प्रमाणं अन्यद्वारा लेख्यं साक्षिमदिति यथासंख्येनान्वयः। देशस्थितेर्यस्मिन् देशे यादृशलेख्यस्थितिः प्रवर्त्तते तत्र तादृश्याः। तयोः स्वहस्तान्यहस्तकृतलेख्ययोः। मृता इति साक्ष्यादौ मृते पुत्रादिसंज्ञं लेख्यपत्रं न सिध्यति। यद्याधिभोगोक्तौ तदा तदपि प्रमाणमित्यर्थः॥*॥ यत्तमाह कात्यायनः।
"यत्र पत्रत्वमापन्नो लेखकः सह साक्षिभिः।
ऋणिको धनिकश्चैव नैनं पत्रं प्रमापयेत्॥"
दर्शितमिति तथाविधमपि पूर्वमृणिकादिसन्निधौ स्वयमन्येन वा दर्शितं सारितं वा तदपि सिध्यतीत्यर्थः। सतो देशान्तरस्थपत्रस्य तत्कालहरणं पत्रानयनकालप्रतीक्षणम्। असतो दग्धादेः तदवलोककोपन्यासः। लेख्यमिति यत् पत्रं कैश्चिदपि हेतुना अन्यनामचिह्नितं तत्र विप्रतिपन्नौ यत्रान्यो पत्रं तेन सहास्य विश्वासहेतुभूतसम्बन्धावगमरूपकारणैर्निर्णेतव्यमिति। बृहस्पतिः।
"सुन्दरग्निप्रभीतार्त्तैः स्त्रीमत्तव्यसनातुरैः।
निग्रापनैस्तु बलात्कारैः कृतं लेख्यं न सिध्यति॥"
व्यासः।
"दासाप्तबन्धुबालेषु स्त्रीकृतेषु यदृच्छया।
प्रमाणं नैव तल्लेख्यमिति ग्राह्यविदो विदुः॥"
मिताक्षरायां स्मृतिः।
"पूगश्रेणीगणादीनां या स्थितिः परकीर्त्तिता।
तस्मात्तु साधनं लेख्यं न दिव्यं न च साक्षिणः॥"
पूगस्तु।
"समूहो वणिगादीनां पूगः स परिकीर्त्तितः।"
इति कात्यायनवचनोक्तः।
आदिशब्दात् विजातीयलाभः। तेन ग्रामगणादिः। श्रेणी तु सजातीयसमूहः ताम्बूलिककुविन्दकर्मकारकादिः। गण एकक्रियार्थोद्यतः। लेख्यस्य चाप्रामाण्यग्रहणाय लेख्यादिकां प्रागुक्तशोधनप्रकारेण तन्निरसनीयं तत्पुरुषेण तु लेख्याधीनो भोग एव उपन्यासो न तु लेख्यसुहरणीयम्। तदाह कात्यायनः।
"आहर्त्ता मुक्तियुक्तोऽपि लेख्यदोषान् विशोधयेत्।
तत्सुतो मुक्तिदोषांस्तु लेख्यदोषांस्तु नाप्नुयात्॥"
बृहस्पतिः।
उद्धरेल्लेख्यमाहर्त्ता तत्सुतो मुक्तिमेव हि।
अभियुक्तः प्रमीतश्चेत् तत्सुतोऽपि तदुद्धरेत्॥"
अभियुक्त इति लेख्यस्य साधुत्वज्ञापनार्थं अभियुक्ते लेख्यग्रहीतरि तदविज्ञाप्येव मृते तत्पुत्रेण साधुत्वं साध्यमित्यर्थः तत्साधनञ्च स्वहस्तलिखनादिनेति प्रागुक्तम्॥*॥

अथ मुक्तिः।
तत्र याज्ञवल्क्यः।
"पश्यतोऽव्यवतो हानिर्भूमेर्विंशतिवार्षिकी।
परेण भुज्यमानाया धनस्य दशवार्षिकी॥"
विवादमकुर्व्वतः समक्षं भूस्वामिनः परेणासन्निहितादिना भुज्यमानाया भूमेर्विंशतिवर्षनिर्दृष्टा स्वत्वहानिः। अत्र लोकव्यवहारकर्म्मत्वाद्वर्षगणना सावनेन। तथा च विष्णुधर्म्मोत्तरम्।
"सवासगुपास्यान्यत्र सावनेन
लौकिकञ्च यत् स्यात् व्यवहारकर्म्म॥"
तत्रैव।
"सावने च तथा मासि विंशत्तु सूर्य्योदयाः स्मृताः॥"
विशेषयति व्यासः।
"वर्षाणि विंशतिर्यस्य भूर्भुक्ता तु परैरिह।
सति राज्ञि समर्थस्य तस्य सेह न सिध्यति॥"
समर्थस्य बालत्वादिदोषरहितस्य। धनस्य दशवर्षनिर्दृष्टा स्वत्वहानिः। तथा च मनुनारदौ।
"यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति॥"
यत्किञ्चित् धनजातं समक्षमेव प्रीत्यादियतिरेकेण परैर्दश वर्षाणि भुज्यमानं स्वामी तूष्णीं प्रेक्षते मा भुज्यतामिति न प्रतिषिध्यति नासौ तल्लब्धुं योग्यो भवति तच्च तस्य स्वाम्यं नश्यतीत्यर्थः। गोतमः। अजडापौगण्डधनं दशवर्षमुक्तं परैः सन्निधौ भोक्तुः इति। जडो विकलेन्द्रियः पौगण्डः पूर्णोऽनुत्पन्नश्मश्रुर्गण्डः कपोलो यस्य सः। तदाह नारदः।
"बाल आषोडशाद्वर्षात् पौगण्डश्चापि
ग्रन्थते॥"
अजापौगण्डः प्रकीर्त्तित इति कुल्लूकभट्टेन लिखितम्। तत्पाठेऽपि अपौगण्डस्तु पौगण्डः इति विरूपकोषादविरुद्धः। तस्माद्व्यासवचनादिवर्षदशवर्षादिकालैर्भोग एव स्वत्वं जनयति। यथा। कालप्राप्तिवशेन बीजमङ्कुरं जनयति तरवश्च कुसुममिति स्वामिना चापरित्यक्तेऽपि ग्राह्योक्तकालीनभोगात् स्वाम्यमन्यस्य भवति। यथा जयेन राज्ञः पररादृघने इति। एवमेव श्रीकरवालकलोलोकभवदेवभट्टभूषणपाक्षिकुल्लूकभट्टचक्रेश्वरमल्लिनाथवर्द्धमानोपाध्यायप्रभृतयः अव-

हारोऽपि तादृगेव। एतद्विरुद्धवचनान्यथा व्याख्येयानि ॥*॥ तत्रोपेक्षया स्वत्वहानिं सूक्ष्मा च स्वत्वमाह नारदः।

"भुज्यमानात् परैरर्थात् यस्त्वभोहादुपेक्षते। समक्षं तिष्ठतोऽप्यस्य तान् भुक्तिः कुरुते वशे ॥"

यत्तमाह बृहस्पतिः।

"स्थावरं विंशमाप्नोति भुक्ता हानिमुपेक्षया।"

उपेक्षया क्षमया तत्कारश्च स्वामिनः सुशीलत्वमहेच्छत्वदयालुत्वादि। एवञ्च विंशतिवर्षात् पूर्वं स्वक्षतिसाध्यकर्षणयाचनादेरुत्पन्नदुःखादेव स्वत्वं तत्तत्कालपरतस्तु भूमौ गवादिधनेऽपि स्वत्वमिति। पूर्वं तत्तन्नाशकभोगे तु चौर्यदोषो भवत्येव। भोगे तु स्वत्वहानिमाधादीनां व्यावर्त्तयति ॥*॥ पक्षतोऽवत इत्यभिधाय याज्ञवल्क्यः।

"आधिसीमोपनिक्षेपजडबालधनैर्विना। तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरिह ॥"

आधिर्बन्धकद्रव्यम्। उपनिक्षेपस्तु वासनस्यमनाख्याय यद्यस्मै यन्निधीयते इति नारदोक्तः। वासनं निक्षेपाधारभूतं सम्पुटादिकम्। यद्यस्मै यत्न्यासादियुतम्। जड़ो बुद्धिविकलः। बालः अप्राप्तषोड़शवर्षः। उपनिधिः प्रीत्या भोगार्थं मर्पितः। ततश्च आध्यादिभिर्जड़ादिधनैश्च विनान्यानि धनानि उक्तभोगकाले स्वामिनो नश्यन्ति एतानि तु स्वामिनो न नश्यन्ति न वा भोक्तुर्भवन्ति। मिताक्षरायां स्मृतिः।

"द्वारमार्गक्रियाभोगबलवाहादिषु क्रिया। भुक्तिरेवं तु गुर्व्वी स्यान्न दिवं न च साक्षिणः॥"

याज्ञवल्क्यः।

"आगमो ह्यधिको भोगादिना पूर्वक्रमागतात्। नागमः कारणं तत्र भुक्तिः स्तोकापि यत्र न। आगमस्तु कृतो येन सोऽभियुक्तस्तदुद्धरेत्। न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी॥ योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तदुद्धरेत्। न तत्र कारणं भुक्तिरागमेन विना कृता।"

भूम्यादावागमः पूर्व्वपुरुषक्रमानागतभोगादबलवान् अतः क्रमागतभोग आगमादबलवान्। तथा च बृहस्पतिः।

"अनुमानात् गुरोः साक्षी साक्षिभ्यो लिखितं गुरु।
अप्याहृता त्रिपुरुषी भुक्तिस्तेभ्यो गरीयसी॥"

त्रिपुरुषभोगमाह व्यासः।

"प्रपितामहेन यद्भुक्तं तत्पुत्रेण विना च तम्। तौ विना यस्य पित्रा च तस्य भोगस्त्रिपूरुषः॥ पिता पितामहो यस्य जीवेच्च प्रपितामहः। त्रयाणां जीवतां भोगो विज्ञेयस्त्रैकपूरुषः॥"

आगमोऽपि बलवान् न भवति यत्र स्तोकापि भुक्तिर्वर्त्तते। तथा च नारदः।

"विद्यमानेऽपि लिखिते जीवत्सु च साक्षिषु। विज्ञेयतः स्थावराणां यन्न भुक्तं न तत् स्थिरम्॥"

इति दीपकलिका॥

यत्र वादिनौ स्वस्वागमबलप्रवृत्तौ आगमयोश्च पूर्व्वापरभावो नास्ति तत्र यस्य भुक्तिस्तस्यागमो बलीयान् न त्वन्यस्येत्यर्थः इति मिताक्षरा॥ अर्थादयत्रागमपौर्व्वापर्यनिश्चयस्तत्र।

"सर्व्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया। आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरा॥"

इति याज्ञवल्क्यवचनान्निर्णयः।

आगम्यतीति आ सम्यक् गम्यते प्राप्यते स्वीक्रियते येन स आगमः क्रयादिरिति व्यवहारमालिका॥ आगमः साक्षिपत्रादिकमिति दीपकलिका॥ आगमो धनोपार्ज्जनोपायः क्रयादिरिति मैथिलाः॥ तत्रार्थेनाभियुक्तस्तत्कूटतासुद्धरेत् तत्पुत्रपौत्रौ नागमसुद्धरेतां किन्तु भुक्तिरेव। तत्र प्रमाणं विज्ञेयमिति बृहस्पतिः।

"आहर्त्ता शोधयेत् भुक्तिमागमस्थापि संसदि। ततस्तु भुक्तिमेवैकां पौत्रादिषु न किञ्चन॥"

इदं मूलपाठिधृतं तत्पुत्रादिनं किञ्चनेति मैथिलधृतम्। आहर्त्ता अर्जनकर्त्ता अत्र पुत्रस्य भुक्तिशोधनमात्रम्॥*॥ भुक्तिशोधनमाहतुर्व्यासकात्यायनौ।

"आगमो दीर्घकालश्च निश्चिद्रोऽस्खलितोज्ज्वलः। प्रत्यर्थिसन्निधानश्च भोगः पञ्चाङ्ग इष्यते॥"

इष्यते प्रमाणत्वेन। आगमः क्रयादियुक्तः। एष च भूमिविषयकविंशतिवर्षधनविषयकदशवर्षान्यूनकालभोगपरः। योऽभियुक्त इत्यादि यो भोगे क्रियमाणे परेणाभियुक्तः सन् परेतो मृतः स्वागमसुद्धृतवान् तदा तत्पुत्रादिरागमसुद्धरेत्। तथा च नारदः।

"अयारूढविवादस्य प्रेतस्यायव्यवहारिणः। पुत्रेण सोऽर्थः संशोध्यो न तु भोगो निवर्त्तयेत्॥"

विवादे सति ज्ञेयः। भोगः केवलभोगः। तथा च स एव। आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमा इति एव सविवादभोगः षष्ठान्तेतरपरः। तथाविधभोगस्यागमं विनापि प्रामाण्यात्। तथा व्यासः।

"वर्षाणि विंशतिं भुक्ता स्वामिना बाधिता सती। भुक्तिः सा पौरुषी भूमेर्द्विगुणा तु द्विपौरुषी। त्रिपौरुषी तु त्रिगुणा न तत्रान्वेष्य आगमः॥"

एतद्वचनमसमञ्जभोगविषयकमिति समञ्जविंशतिवर्षभोगविषयकवचनेनाविरोधः। एतादृक् स्वल्पकाल एव। कात्यायनः।

"स्वल्पकाले क्रिया भूमेः सागमा भुक्तिरिष्यते। अस्वामिके त्वागमाभावात् क्रमान्निपुरुषागता॥"

षष्टिवर्षैकपुरुषभुक्तौ त्रिपुरुषभुक्तिप्रदेशस्य फलमाह न तत्रेत्यादि। अतएव नारदः।

"अन्यायेन तु यद्भुक्तं पित्रा पूर्व्वतनैरपि। न तत् शक्यमपाकर्त्तुं क्रमान्निपुरुषागतम्॥"

अन्यायेनेत्यनागममिति मूलपाठिधृतपाठः। तुरप्यर्थः। पित्रा सह पितरमादाय त्रिभिरित्यर्थः। यतु।

"अनागमन्तु यो भुङ्क्ते बहून्यब्दशतानि च। चौरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः॥"

इति तस्य वचनं दण्डविधायकं न तन्मुख्यार्थपरं धर्म्मशास्त्रविरोधात्। तदाह स एव।

"यत्र विप्रतिपत्तिः स्यात् धर्म्मशास्त्रार्थ-
शास्त्रयोः।
अर्थशास्त्रार्थमुद्धृत्य धर्म्मशास्त्रार्थमाचरेत्॥"

एवमेव मूलपाठ्युपाध्यायाः। वस्तुतस्तु अनागममिति दण्डविधायकवचनं स्त्रीधनतृणधनपरम्।

"स्त्रीधनञ्च नृपेन्द्राणां न कदाचन जीर्य्यति। अनागमं भुज्यमानमपि वर्षशतैरपि॥"

इति स्वत्वनिषेधकवचनान्तरैकवाक्यत्वात्। तत्र विप्रतिपत्तिः स्यादिति वचनस्याप्येतदुदाहरणम्। यत्रैकस्य जयेऽवधार्य्यमाणे मित्रलब्धिरपरस्य जयेऽवधार्य्यमाणे धर्म्मलब्धिस्तत्र।

"हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः।
अतो यतेत तत्प्राप्ताविति वेदविदां मतम्॥"

इति याज्ञवल्क्योक्तार्थशास्त्रार्थमुद्धृत्य क्रोधक्षोभविवर्जित इति धर्म्मशास्त्रार्थमवलम्ब्य व्यवहारं पश्येत्। अतएव सभ्येनावश्यवक्तव्यं धर्म्मार्थसहितं वचः। इति कात्यायनोक्तम्। भवदेवभट्टास्तु व्यासवचनं प्रतिवादिनोऽसन्निधाने पुरुषैकदेयभोगाभिप्रायम्। त्रैपुरुषभोगस्य तत्रैव प्रमाणत्वादित्याहुः॥

अथ भुक्तिस्खलापवादः।

बृहस्पतिः।

"भुक्तिस्त्रैपुरुषी सिध्येदपरेषां न संशयः। अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिध्यति॥ अस्वामिना च तद्भुक्तं यद्दत्तेनापवादिकम्। सुहृदन्वयसम्बन्धस्य न तद्भोगेन हीयते॥ विवाह्यश्रोत्रियैर्भुक्तं राज्ञामात्यैस्तथैव च। सुदीर्घेणापि कालेन तेषां तत्तु न सिध्यति॥"

आपद्यो विक्रयस्त्यागं विवाह्यो जामाता॥*॥

अथ युक्तिः।

नारदः।

"उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः।
केशाकेशि बहिश्चैव युगपत् पारदारिकः॥
कुठालपाणिर्विज्ञेयः सेतुभेत्ता सभीषगः।
तथा कुठारहस्तश्च वनच्छेत्ता प्रकीर्त्तितः॥
प्रत्यक्षचिह्नैर्विज्ञेयो दण्डपारुष्यतस्करः।
असाक्षिप्रत्ययं क्षेत्रे पारुष्ये तु परीक्षणम्॥"

प्रत्यक्षचिह्नैः रुधिरास्रखड्गादिभिः। पारुष्ये वाक्पारुष्ये। शस्त्रः। क्षीरहस्तश्च चौर इति। नारदः।

"अभीक्ष्णं दृश्यमानोऽपि प्रतिदृश्यान्न तद्वशः। त्रिपञ्चपञ्चलो वा परतोऽर्थं तमावहेत्॥"

यदा धनिकेनाधमर्णिकस्त्रिपञ्चपञ्चलो वा त्वं मे ऋणं धारयसीति पुनः पुनर्दृश्यमानोऽपि न तद्वाक्यं प्रतिदृशति तदोत्तरकालमनेनाभ्युपगतोऽयमर्थ इत्यवधार्य्य तमर्थमधमर्णिकाय दापयेदित्यर्थः॥*॥

अथ ग्रपथः ।

नारदः ।

"युक्तिव्यवसन्नासु ग्रपथैरेनमर्हयेत् ।
अर्थकालबलापेक्षमन्यासुकृतादिभिः ॥"

एवं विचार्यमाणमर्थं अर्हयेत् पीडयेन्निर्णयेदित्यर्थः । अर्थस्य विवादास्पदस्य बलं बहुत्वाभावः कालस्य च बलं पुण्यापुण्यत्वं तदपेक्षं यथा स्यादित्यर्थः । भूदूर्वाकरतस्य पुत्रादिशिरःस्पर्शस्य चार्थे दर्शनीयत्वात् । अत्र मयेतत् कृतं न वेति प्रतिज्ञासुवार्थाभावे जले वा दृश्यं प्रक्षिपेत् । एतन्मिथ्यात्वे मम सुकृतं नश्यदिति वा ब्रूयात् । न त्वन्यपरीक्षां जलपरीक्षां वा कुर्यात् स्वल्पमिथ्याववर्जनं युक्तं तस्या महाभियोगविषयकत्वेन ग्रपथसमभिव्याहारानर्हत्वात् । सुश्रुतादिभिरित्यादिना दूर्वासत्याद्युपग्रहः । तथा च विष्णुः ।

"सर्वत्रैवार्थजातेषु मूल्यं स्वयं प्रकल्पयेत् ।"

तत्र ज्वलोने भूमं दूर्वाकरं ग्रापयेत् । द्विज्वलोने तिलकरं त्रिज्वलोने जलकरं चतुःज्वलोने सर्षपकरं पञ्चज्वलोने दीप्तोद्धृतमहीकरं सुवर्णार्हेऽर्थे कोशो देयः मूढस्य यथासमये विहिता क्रिया तथा द्विगुणेऽर्थे राजन्यस्य त्रिगुणेऽर्थे वैश्यस्य चतुर्गुणेऽर्थे ब्राह्मणस्येति । ज्वलः काञ्चनरत्तिका तन्मूल्यादूने ज्वलोने । एवमन्यत्र । मनुः ।

"सत्येन ग्रापयेद्विप्रं क्षत्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्वैश्यं भूमं सर्वैस्तु पातकैः ।
पुत्रदारस्य वाप्येवं शिरांसि स्पर्शयेत् पृथक् ॥"

ब्राह्मणेन मयेतत् कृतं न कृतं वेति प्रतिज्ञासुवार्थं सत्यमिति वक्तव्यम् । तथैव क्षत्रियेण वाहनायुधं स्पृश्यम् । तथैव वैश्येन गोबीजकाञ्चनानामन्यतमं स्पृश्यम् । भूमेस्तु पूर्वोक्तं सर्वमेव स्पृश्यं तेषां यथाक्रमस्पर्शानां पातकहेतुत्वात् पातकशब्देन निर्देशः । ज्वलायुधोऽप्येवम् ॥ * ॥ दैवक्रियाविषयमाह नारदः ।

"अरण्ये निर्जने रात्रावन्तर्वेश्मनि वा दिवा ।
न्यासापहारे चैव दिव्या सम्भवति क्रिया ॥"

दक्षः ।

"देवब्राह्मणपादांश्च पुत्रदारशिरांसि च ।
एते तु ग्रपथाः प्रोक्ता मनुना स्वयमेव हि ।
साहसेष्वभिशापे च दिव्यानि तु विशोधनम् ॥"

अत्र ग्रपथदिव्ययोः पृथक्प्रतीतेः । ग्रपथे न दिव्यधर्मः किन्तु वैधे कर्मणि तत्र शौचार्थं स्नानाचमनादिमात्रं कार्यम् । दिव्यानि तु दिव्यतत्त्वे कथितानि नात्र लिखितानि । अत्राभियुक्तेन ग्रपथः कर्तव्य इत्युत्सर्गः ॥ * ॥ उभयेच्छयाभियोक्तापीत्याह नारदः ।

"अभियोक्ता शिरोवर्ती सर्वत्रैव प्रकीर्तितः ।
रक्षत्यात्मनरः कुर्यादितरो वर्णयेच्छिरः ॥"

इतरः ग्रपथकर्तृभिन्नः । तथा कात्यायनः ।

"याचतुर्दैवकादन्यो यस्य नो राजदैविकम् ।
असत्यं जायते घोरं स ज्ञेयः ग्रपथे शुचिः ॥"

असत्यमापत् । घोरमतिपीडाकरम् । तथा च कोषाधिकारे यस्य पञ्चेदित्यनुवृत्तौ विष्णुः ।

"रोगोऽग्निर्ज्ञातिमरणं राजातङ्कामथापि वा ।
तमशुद्धं विजानीयात् तथा शुद्धं विपर्ययात् ॥"

कात्यायनः ।

"तस्यैकस्य न सर्वस्य जलस्य यदि सम्भवेत् ।
रोगोऽग्निर्ज्ञातिमरणमन्यं दद्यात् दमञ्च सः ॥
ज्वरातिसारविस्फोटगूढास्यिपरिपीडनम् ।
नेत्ररुग्मलरोगश्च तथोन्मादः प्रजायते ।
शिरोरुगगुदभङ्गश्च देविका व्याधयो नृणाम् ॥"

तस्यैकस्येति न तु देशग्रापकमरणादिः । मनुः ।

"न वृथा ग्रपथं कुर्यात् स्वल्पेऽप्यर्थे नरो बुधः ।
वृथा हि ग्रपथं कुर्वन् प्रेत्य चेह च नश्यति ॥
कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने ।
ब्राह्मणाभ्युपपत्तौ च ग्रपथे नास्ति पातकम् ॥"

कामिनीष्विति रहसि कामिनीसम्भोगार्थं वृथाग्रपथे एवं विवाहसिद्ध्यर्थं गोग्रासार्थं आवश्यकहोमेन्धनार्थं ब्राह्मणरक्षार्थमकृतधनादौ । यमः ।

"वृथा तु ग्रपथं कृत्वा कौटस्थ्यं वधसंयुतम् ।
अनृतेन च युज्यते वधेन च तथा नरः ।
तस्मान्न ग्रपथं कुर्यान्नरो मिथ्याविधिस्थितम् ॥"

कौटस्थ्यमिति प्राड्मिमात्रोपलक्षणं तद्वधपापेन वृथाग्रपथकर्त्ता युज्यत इत्यर्थः ॥

अथ निर्णयः ।

तत्र नारदः ।

"यस्योभुः साक्षिणः सन्ति प्रतिज्ञा स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ॥
स्वयमभ्युपपन्नोऽपि स्वकर्म्मावस्थितोऽपि सन् ।
क्रियावसन्नोऽप्यर्हेत परं सभ्यावधारणम् ।
सभ्यैरवकृतः पश्चात् स ग्राह्यः ग्राह्यमार्गतः ॥"

यस्य वादिनः प्रतिवादिनो वा साक्षिणः सन्त्युपलक्षणम् । साक्षिलिखितमुक्तिग्रपथानां मध्येऽन्यतमप्रमाणं यस्य प्रतिज्ञायाः सत्यत्वप्रतिपादकं स एव जयी अन्यथा पराजित इति प्रत्येतव्यम् । स्वयमभ्युपपन्नः आत्मनैवाङ्गीकृतस्वपराजयः स्वकर्म्मावस्थितः कन्यस्वैरवैवर्ण्यादिना पराजितत्वेनावधृतः । क्रियावसन्नः साक्ष्यादिना प्राप्तपराजयः । परमनन्तरं सभ्यावधारणमर्हेत सभासदां मिलितानामयं पराजित इति निर्णयमर्हेत । आकाङ्क्षित स ग्राह्यविधिना ग्राह्यः ॥ * ॥ निर्णयस्य फलमाह दक्षः ।

"प्रतिज्ञाभावनाद्यादौ प्राड्विवाकादिपूजनात् ।
जयपत्रस्य चादानात् जयी लोके निगद्यते ॥"

जयपत्रस्य लिखनप्रकारमाह स एव ।

"यदुक्तं व्यवहारेषु पूर्वपक्षोत्तरादिकम् ।
क्रियावधारणोपेतं जयपत्रेऽखिलं लिखेत् ।
पूर्वोक्तक्रियायुक्तं निर्णयान्तं यदा नृपः ।
प्रदद्याज्जयिने पत्रं जयपत्रं तदुच्यते ॥"

कात्यायनः ।

"अर्थिप्रत्यर्थिवाक्यानि प्रतिसाक्षिवचस्तथा ।
निर्णयश्च तथा तस्य यथा वावधृतं स्वयम् ॥
एतदृग्यवाक्षरं लेख्यं यथापूर्वं निवेशयेत् ।
सभासदश्च ये तत्र धर्मज्ञाश्चविदस्तथा ॥"

ततश्च भाषोत्तरे क्रिया च पत्रसाक्ष्यादिकं निर्णयो जयपराजयावधारणं निर्णयकालावस्थितमध्यस्थाचेलादिकं सर्वं लेखनीयं निरूपणस्य सम्यक्त्वप्रदर्शनार्थम् । तथाहि भाषोत्तरलिखनं हेत्वन्तरेण पुनर्न्यायप्रत्यवस्थाननिषेधार्थं नहि न गृहीतमिति मिथ्योत्तरेण पराजितस्य पुनः परिशोधितं मयेति प्रत्यवस्थानं सम्भवति । प्रमाणलिखनन्तु पुनः प्रमाणान्तरेण न्यायनिषेधार्थम् । तदाह कात्यायनः ।

"क्रियां बलवतीं त्यक्त्वा दुर्बलां योऽवलम्बते ।
स जयेऽवसृते सभ्यैः पुनस्तां नाप्नुयात् क्रियाम् ॥
निर्णीते व्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो वापि पूर्वमावेदितं न चेत् ॥
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः ।
निर्णीतव्यवहारायां प्रमाणमफलं तथा ॥"

निर्णयोत्तरत्वमाह मनुः ।

"अर्थेऽपचयमानन्तु कारणैर्विभावितम् ।
दापयेद्वणिकस्यार्थं दण्डं वेद्यश्च शक्तितः ॥"

अपचयमानं अपलपन्तं कारणैः साक्ष्यादिप्रमाणैः । याज्ञवल्क्यः ।

"ज्ञात्वापराधं देशञ्च कालं बलमथापि वा ।
वयः कर्म्म च वित्तञ्च दण्डं दण्ड्येषु दापयेत् ॥"

मनुः ।

"तीरितं चानुशिष्टञ्च यत्र क्वचन सम्भवेत् ।
कृतं तद्धर्म्मतो विद्यात् न तत् भूयो निवर्तयेत् ॥"

अनुशिष्टं साक्ष्यादिनिर्णीतं अतएव तीरितं प्राड्विवाकादिभिः समापितम् । तद्विवादपदं पुनर्न निवर्तयेदित्यर्थः । यत्र तीरितानुशिष्टयोरप्यधर्म्मेऽकृतत्वं प्रत्यवतिष्ठते । तत्र पुनर्न्यायदर्शनमाह नारदः ।

"तीरितं चानुशिष्टञ्च यो मर्त्यः विधर्म्मतः ।
द्विगुणं दण्डमादाय तत् कार्यं पुनरुद्धरेत् ॥"

असद्विचारे तु विचारान्तरमाह स एव ।

"असाक्षिकन्तु यद्दृष्टं विमार्गेण च तीरितम् ।
असम्मतमतेर्दृष्टं पुनर्दृश्यनमर्हति ॥"

असाक्षिकमित्यप्रमाणकोपलक्षणम् । याज्ञवल्क्यः ।

"दृष्टेऽप्यसु पुनर्दृष्टा व्यवहारानृपेण तु ।
सभ्याः सजयिनो दण्ड्या विवादाद्विगुणं दमम् ॥
साक्षिसभ्यावसन्नानां दूषणे दर्शनं पुनः ।
सुवर्ण्यावसितानान्तु नास्ति पौनर्भवो विधिः ॥"

साक्षिवचनेन सभ्यावधारणेन च प्राप्तावसादानां पुनर्न्यायदर्शनम् । स्वव्यापारेण विरहभावादिना प्राप्तावसादानान्तु नास्ति पुनर्न्यायः । दक्षस्मृतिरपि ।

"पलायनानुत्तरत्वादन्यपक्षाश्रयेण च ।
दोनस्य ग्रहणे वादो न खवाक्यजितस्य च ॥"
मनुः ।
"बलाद्दत्तं बलाद्भुक्तं बलाद्यो लिखितञ्च यत् ।
सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीत् ॥"
याज्ञवल्क्यः ।
"बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्त्तयेत् ।
स्त्रीबालमत्तरागारवहिर्ग्रामकृतांस्तथा ॥
मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः ।
असम्बन्धकृतञ्चैव व्यवहारो न सिध्यति ॥"
उपाधिश्छलमिति मूलपाणिः । उपाधिर्भयादिरिति विज्ञानेश्वरः । तत्र भीतादियोजित इत्युक्तवचनेन पौनरुक्त्यम् । बहिर्ग्रामः बहिर्देशः । मत्तो मद्यादिना । उन्मत्तो वातादिना । व्यसनी द्यूनाद्यासक्तः । असम्बन्धो वादिनियुक्तयतिरिक्त उदासीनः । आदिपदादसतन्त्रदासपुत्रादेर्ग्रहणम् । तथा च नारदः ।
"सतन्त्रोऽपि हि यत् कार्य्यं कुर्य्याच्चाप्रकृतिं गतः ।
तदप्यतनमेवाहुरसतन्त्रस्य चेतुतः ॥
कामक्रोधाभिभूता वा भयव्यसनपीड़िताः ।
रागद्वेषपरीताश्च नेयास्त्वप्रकृतिं गताः ॥
तथा दासकृतं कार्य्यमकृतं परिचक्षते ।
अन्यत्र स्वामिसम्बन्धान्न दासः प्रभुरात्मनः ॥
पुत्रेण च कृतं कार्य्यं यत् स्यादज्ञानतः पितुः ।
तदप्यतनमेवाहुर्दासपुत्रौ च तौ समौ ॥"
एतच्च कुटुम्बभरणातिरिक्तविषयम् ।
"कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत् ।
स्वदेशे वा विदेशे वा तं न्याय्यं विचालयेत् ॥"
इति मनुवचनात् कुटुम्बमवश्यभरणीयम् ।
अध्यधीनः परतन्त्रः पुत्रदासादिः । व्यवहारन्न्यायादिकं न्यायान् स्वतन्त्रः न विचालयेत् अनुमन्यते । तथा च नारदः ।
"स्वातन्त्र्यन्तु स्मृतं ज्येष्ठे ज्येष्ठं गुरुवयःकृतम् ।
अस्वतन्त्राः प्रजाः सर्व्वाः स्वतन्त्रः पृथिवीपतिः ॥
अस्वतन्त्रः स्मृतः शिष्य आचार्य्यस्य स्वतन्त्रता ।
अस्वतन्त्राः स्त्रियः सर्व्वाः पुत्रा दासाः परिग्रहाः ॥
स्वतन्त्रश्च तु यद्दो यस्य तत् स्यात् क्रमागतम् ।
गर्भस्थैः सदृशो ज्ञेयः अष्टमाद्वत्सरात् शिशुः ॥
बाल आषोड़शाद्वर्षात् पौगण्डोऽपि निगद्यते ।
परतो व्यवहारज्ञः स्वतन्त्रः पितराहृते ॥
जीवतोर्न स्वतन्त्रः स्याच्छरण्यापि समन्वितः ।
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात् ।
अभावे बीजिनो माता तदभावे च पूर्व्वजः ॥"
परिग्रहा अनुजीविप्रभृतयः । तथा च दक्षः ।
"पितृव्यभ्रातृपुत्रस्त्रीदासश्रिष्याननुजीविभिः ।
यदृणीतं कुटुम्बार्थे तद्ग्रहो दातुमर्हति ॥"
कात्यायनः ।
"कुटुम्बार्थमगूर्त्तेन गृहीतं याचितेन वा ।
उपप्रवनिमित्तञ्च विद्यादापत्कृतन्तु तत् ॥
कन्यावैवाहिकञ्चैव प्रेतकार्य्ये च यत् कृतम् ।
एतत् सर्व्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ॥"
प्रभोरिति कर्त्तरि षष्ठी तेन प्रभुणा दातव्यमिति रत्नाकरः । दक्षस्मृतिः ।
"यः स्वामिना नियुक्तोऽपि धनाय व्ययपालने ।
कुसीदकृषिवाणिज्ये निरूप्यार्थैस्तु स स्मृतः ॥
प्रमाणं तत्र कृतं सर्व्वं लाभालाभव्ययोदयम् ।
खदेशे वा विदेशे वा स्वामी तत्र विसंवदेत् ॥"
इति श्रीरघुनन्दनभट्टाचार्य्यविरचितं व्यवहारतत्त्वं समाप्तम् ॥ * ॥

व्यवहारज्ञः, पुं, (व्यवहारं जानातीति । ज्ञा + कः ।) प्राप्तव्यवहारः । (बालक इति भाषा ॥) स तु षोड़शवर्षानन्तरं भवति । यथा,—
"बाल आषोड़शाद्वर्षात् पौगण्डोऽपि निगद्यते ।
परतो व्यवहारज्ञः स्वतन्त्रः पितराहृते ॥"
इति व्यवहारतत्त्वधृतनारदवचनम् ॥
व्यवहारज्ञातरि, त्रि ।

व्यवहारदर्शनं, क्ली, (व्यवहारस्य दर्शनम् ।) न्यायदर्शनम् । विचारकरणम् । इति मिताक्षरा ।

व्यवहारपदं, क्ली, (व्यवहारस्य पदम् ।) वादिना राज्ञि निवेदनम् । (नालिश इति भाषा ॥) यथा, याज्ञवल्क्यः ।
"स्मृत्याचारव्यपेतेन मार्गेणाधर्षितैः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥"
स्मृतिसदाचारबहिर्भूतेन वर्त्मना परैरर्थतः शरीरतो वा पीड़ितश्चेद्राजानि निवेदयेत् तद्व्यवहारदर्शनस्थानम् । चेदित्यत्र यदिति मैथिलाः । आवेदयति चेद्विज्ञेन स्वयं विवादोत्थानं राज्ञा न कर्त्तव्यमिति मूलपाणिप्रभृतयः । राज्ञीति व्यवहारप्रदर्शकपरं तथा च दक्षस्मृतिः ।
"राजा कार्य्याणि संपश्येत् प्राड्विवाकोऽथ वा द्विजः ।"
कात्यायनः ।
"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः ।
स्वयं स राजा विचिनुयात् तेषां व्ययपराजयौ ॥
यदा कार्य्यवशाद्राजा न पश्येत् कार्य्यनिर्णयम् ।
तदा नियुञ्ज्यात् विदांसं ब्राह्मणं वेदपारगम् ॥
यदि विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्म्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ॥"
स विनीतवेशः । मनुः ।
"जातिमात्रोपजीवी वा कामं स्यादनाश्रमवृत्तः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥"
व्यासः ।
"द्विजान् विहाय यः पश्येत् कार्य्याणि वृषलैः सह ।
तस्य प्रच्युध्यते राज्यं वलं कोषश्च नश्यति ॥
दुःश्रोत्रोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः ।
दुष्टां गां कः परित्यज्याधेयेच्छीलवतीं खरीम् ॥"
इति व्यवहारतत्त्वम् ॥

व्यवहारपादः, पुं, (व्यवहारस्य पादः ।) व्यवहारांशः । यथा । अथ व्यवहारपादनिर्णयः । तत्र दक्षस्मृतिः ।
"पूर्व्वपक्षः स्मृतः पादो द्वितीयादुत्तरः स्मृतः ।
क्रियापादस्तथा चान्यस्तुर्यो निर्णयः स्मृतः ॥"
इति व्यवहारतत्त्वम् ॥
अपि च ।
"परम्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु ।
वाक्याभ्यायाद्व्यवस्थानं व्यवहार उदाहृतः ॥
भाषोत्तरक्रियाध्यक्षविद्विद्भिः क्रमवृत्तिभिः ।
आश्रित्यचतुरंशस्तु चतुष्पादभिधीयते ॥"
इति मिताक्षरा ॥

व्यवहारमातृका, (व्यवहारस्य मातृकेव ।) व्यवहारोपयोगिक्रिया । तदुयथा । व्यवहारदर्शनम् १ व्यवहारलक्षणम् २ सभासदः ३ प्राड्विवाकादिः ४ व्यवहारविषयः ५ राज्ञः कार्य्यानुत्पादकत्वम् ६ कार्य्यार्थिनि प्रश्नः ७ आज्ञानाज्ञाने ८ आसेधः ९ प्रत्यर्थिन्यागते लेख्यादिकर्त्तव्यता १० पञ्चविधो दोषः ११ क्रोड़पं लेख्यं १२ पञ्चाभावाः १३ अनादेयाः १४ आदेयः १५ नियुक्तव्यपराजये वादिव्यपराजयौ १६ शोधितलेख्यनिवेदनम् १७ उत्तरावधिशोधनम् १८ शोधिते पत्राऽरूढे उत्तरकर्त्तव्यम् १९ उत्तरलक्षणम् २० सम्बोत्तरलक्षणम् २१ मिथ्योत्तरलक्षणम् २२ प्रत्यवस्कन्दनोत्तरम् २३ प्राड्न्यायोत्तरम् २४ उत्तराभासः २५ सङ्कराकुत्तरम् २६ प्रत्यर्थिक्रियानिर्देशः २७ उत्तरे पत्रेऽभिनिवेशिते साधननिर्देशः २८ ततसिद्धौ सिद्धिः २९ चतुष्पादव्यवहारः ३० । इति मिताक्षरायां व्यवहारमातृका ॥

व्यवहारमार्गः, (व्यवहारस्य मार्गः ।) व्यवहारविषयः । व्यवहारपदम् । इति मिताक्षरा ।

व्यवहारविधिः, पुं, (व्यवहारस्य विधिः ।) व्यवहारस्य विधानम् । धर्म्मशास्त्रम् । इति मिताक्षरा ।

व्यवहारविषयः, पुं, (व्यवहारस्य विषयः ।) व्यवहारपदम् । तत्तु अष्टादशविधम् । यथा । ऋणादानम् १ निक्षेपः २ अस्वामिविक्रयः ३ सम्भूयससुत्थानम् ४ दत्तस्यानपकर्म्म ५ वेतनादानम् ६ संविदो व्यतिक्रमः ७ क्रयविक्रयानुशयः ८ स्वामिपालयोर्विवादः ९ सीमाविवादधर्म्मः १० वाक्पारुष्यम् ११ दण्डपारुष्यम् १२ स्तेयम् १३ साहसम् १४ स्त्रीसंग्रहणम् १५ स्त्रीपुंधर्म्मः १६ विभागः १७ द्यूतम् १८ । इति मानवे ८ अध्यायः ॥

व्यवहारस्थानं, क्ली, (व्यवहारस्य स्थानम् ।) व्यवहारपदम् । व्यवहारविषयः । इति मिताक्षरा ।

व्यवहारिक:, त्रि, (व्यवहारमर्हतीति। व्यवहार+ठक्।) व्यवहारयोग्य:। यथा। इयं बुद्धि: ज्ञानेन्द्रियै: सहिता सती विज्ञानमयकोषो भवति। अयं कर्तृत्वभोक्तृत्वाभिमानित्वेन इहलोकपरलोकगामी व्यवहारिकोजीव उच्यते। इति वेदान्तसार:॥

व्यवहारिका, स्त्री, (व्यवहारेण चरतीति ठक्। स्त्रियां टाप्।) लोकयात्रा। सम्मार्ज्जनी। इक्षुदण्ड:। इति मेदिनी॥

व्यवहारी, [न्] त्रि, (व्यवहारोऽस्यास्तीति। इनि:।) व्यवहारविशिष्ट:। व्यवहारशब्दादस्यर्थे इनिप्रत्ययेन निष्पन्नमिदम्॥

व्यवहार्य्य:, त्रि, (वि+अव+हृ+ण्यत्।) व्यवहरणीय:। व्यवहर्त्तव्य:। वि-अव-पूर्ब्बहृधातोर्ण्यत्प्रत्ययेन निष्पन्नमेतत्॥ (यथा, याज्ञवल्क्य:। २। २२६।

"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्।
कामतो व्यवहार्य्यस्तु वचनादेव जायते॥")

व्यवहित:, त्रि, (वि+अव+धा+क्त:।) अवधानविशिष्ट:। यथा,—

"कर्तृकर्म्मव्यवहितामसाक्षाद्धारयेत् क्रियाम्।
उपकुर्व्वत् क्रियासिद्धौ ग्राम्येऽधिकरणं मतम्॥"

इति सुग्धबोधटीकायां रामतर्कवागीश:॥

व्यवाय, क्लीं, (वि+अव+अय+अच्।) तेज:। इति मेदिनी॥

व्यवाय:, पुं, (विशेषेण व्यवायनं अध: संक्षेपणम्। वि+अव+इ+घञ्।) मैथुनम्। इत्यमर:॥ (तथा, वैद्यके।

"व्यायामञ्च व्यवायञ्च स्नानं चङ्क्रमणं तथा।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत्॥")

अन्तर्द्धानम्। इति मेदिनी:। (यथा, पाणिनौ।

"अड्भ्यास व्यवायेऽपि।" ६। १। १३६।)

शुद्धि:। इति धरणि:। (परिणामे। तथा, भागवते। ८। ६। ११।

"पश्यन्ति युक्ता मनसा मनीषिणो
गुणव्यवायेऽप्यगुणं विपश्चित:॥")

व्यवायी, [न्] पुं स्त्री, (व्यवेतुं शीलमस्य। णिनि:।) कामुक:। यथा,—

"श्राद्धे नियुक्तो भुक्त्वा वा भोजयित्वा नियुज्य च।
व्यवायी रेतसो गर्त्ते मज्जयत्यात्मन: पितॄन्॥"

इति आह्निकतत्त्वम्॥

(व्यवधानकर्त्ता। यथा, पाणिनौ। "व्यवायिनोऽन्तरम्।" ६। २। १६६। "व्यवायी व्यवधाता।" इति काशिका॥)

व्यसनं, क्लीं, (वि+अस+ल्युट्।) विपत्। (यथा, महाभारते। १२। २२७। ७।

"दुष्टदारै: सुतैश्चैव विप्रलुप्तस्य धनेन वा।
मयस्य व्यसने लुप्ते इति: श्रेयस्करी नृप!॥")

भंग्ग:। (यथा, मनौ। ७। ६३।

"व्यसनाभ्यासजप्राप्तं नार्त्तं नातिपरीक्षितम्॥")

कामजकोपजदोष:। इत्यमर:॥ (यथा, कथासरित्सागरे। ११। २५।

"यन्मुखं व्यसनानि त्वं सुखेन हि परेनृपा:।
सीदन्त्यस्मिंस्तु यज्ञस्ते खातेष्विव वनद्विपा:॥"

यथा च भागवते। ४। २६। २६। ४।

"विहाय जाया मतदर्हं स्नगव्यसनलालस:॥")

"व्यसनं भोगासक्ति:।" इति श्रीधर:॥) विपत्। विपत्ति:। अंशोऽपाय: पतनम्। मृगयाद्यूतस्त्रीमद्यपानरूपे चतुर्व्वर्गे प्रसक्ति: कामजो दोष:। इच्छाप्रभवत्वात्। वाक्पारुष्यं अर्थपारुष्यञ्चेति त्रिवर्ग: कोपजो दोष:। कोपप्रभवत्वात्। मृगु व्यसनम्। व्यस्यति श्रेयोमार्गात् व्यसनं कर्त्तरि अनट्। भंग्गे तु भावे। इति भरत:॥ (अत्यासक्ति:। यथा, कथासरित्सागरे। ११। ३२।

"ग्रथिलो लुप्तकैलासनिवासव्यसनो हर:॥")

अशुभम्। दैवानिष्टफलम्। पापम्। निष्फलोद्यम:। इति मेदिनी॥* राज्ञां व्यसनानि यथा,

"मृगयाक्षा: स्त्रिय: पानं वाक्पारुष्यार्थदूषणे।
दण्डपारुष्यमित्येतद्वयं व्यसनसप्तकम्॥"

इति हेमचन्द्र:॥*॥

व्यसनासक्ते दोषो यथा,—

"एकैकविषयासक्ता: सर्व्वे मृत्युवशं गता:।
य: पुन: संहतान् सेवेत् विषयान् विषयी नर:।
स पतेन्महदैश्वर्य्याच्छिन्नमूल इव द्रुम:॥
स्त्रिय: पानं दिवास्वप्नं तथा वादित्रनर्त्तनम्।
द्यूताटनन्दागेयकामजानि तथा परे॥
एकैर्व्वाचा दृश्यांस्तया क्रोधपैशुन्यसाहसम्।
अर्थदूषणक्रोधोऽर्थे अष्टकोपं विनाग्रजत्॥
देवा विद्याधरा यक्षा: किन्नरोरगमानुषा:।
पशव: पक्षिण: सर्व्वे विषये निधनं गता:॥
एवं विवेकमासक्तं बुद्ध्वा घोरं नराधिप।
यथामार्गं समास्थाय विषयै: सन्निवेश्यताम्॥"

इति देवीपुराणे ८ अध्याय:॥

व्यसनार्त्त:, त्रि, (व्यसनेनार्त्त:।) दैवीमानुषीपीड़ार्त्त:। तत्पर्य्याय:। उपरक्त: २। इत्यमरभरतौ॥

व्यसनी, [न्] त्रि, (व्यसनमस्यास्तीति। व्यसन+इनि:।) व्यसन-विशिष्ट:। (यथा, शिशुपालवधे। २।

"चिरस्य मित्रव्यसनी सुदमो दमघोषज:॥")

तत्पर्य्याय:। पक्षभ:२ विप्लुत:१। इति हेमचन्द्र:॥

व्यस्त: (वि+अस्+क्त:।) व्याकुल:। व्याप्त:। इति मेदिनी। प्रत्येकम्। पृथक् पृथक्। यथा, विश्वामित्र:।

"लक्ष्यलक्षणायज्ञादीनि शुद्ध्यभ्युदयकारकम्।
प्रकाशे च रहस्ये च संप्रयोगुक्तकेऽस्फुटे॥
प्राजापत्य: साम्यपन: शिशुलक्ष्य: पराकक:।
अतिलक्ष्य: पर्णलक्ष्य: सौम्य: लक्ष्यातिलक्ष्यक:॥
महासाम्यपन: शुद्धो तप्तलक्ष्यस्तु पावन:।
अलोपवासलक्ष्यस्तु ब्रह्मकूर्चस्तु शोधक:॥
एते व्यस्ता: समस्ता वा प्रत्येकमेकशोऽपि वा।
पातकादिषु सर्व्वेषु पातकेषु प्रयत्नत:।
कार्य्याश्चान्द्रायणैर्युक्ता: केवला वा विशुद्धये।"

इति प्रायश्चित्ततत्त्वम्॥

विपरीत:। यथा,—

"प्रतिपदाद्यमावास्या तिथ्योर्युग्मं महाफलम्।
एतद्व्यस्तं महाघोरं हन्ति पुण्यं पुराकृतम्॥"

इति तिथ्यादितत्त्वम्॥

व्यस्तपदं, क्लीं, (व्यस्तं पदं यस्मिन्।) शब्दादानाभियोगे पदान्तरेणोत्तरम्। यथा। सुवर्णग्रहणाभियोगे अनेनाहमादिष्ट इति। इति मिताक्षरा॥

व्यस्तारं, क्लीं, हस्तिमदप्रयोग:। इति त्रिकाण्डशेष:॥

व्याकरणं, क्लीं, (व्याक्रियन्ते अर्था येनेति। वि+आ+कृ+ल्युट्।) वेदाङ्गविशेष:। इति शब्दरत्नावली॥ तत्र साध्यसाधनकर्तृकर्म्मक्रियासमासादिनिरूपणम्। तस्य व्युत्पत्तिर्यथा। व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दा अस्मिन् अनेनेति वा। इति दुर्गादास:॥*॥

"अथ व्याकरणं वक्ष्ये कात्यायन समासत:।
सिद्धशब्दविवेकाय बालव्युत्पत्तिहेतवे॥
सुप्तिङन्तं पदं ज्ञातं सुप: सप्तविभक्तय:।
स्यौजस: प्रथमा प्रोक्ता सा प्रातिपदिकात्मके॥
संबोधने च लिङ्गादावुक्ते कर्म्मणि कर्त्तरि।
अर्थवत् प्रातिपदिकं धातुप्रत्ययवर्জ्जितम्॥
अमोट्यशो द्वितीया स्यात् तत्कर्म्मणि क्रियते च यत्।
द्वितीया कर्म्मणि प्रोक्ता उक्तानुक्तविभेदत:॥
टा भ्यां भिस्तृतीया स्यात् करणे कर्त्तरीरिता।
येन क्रियते करणं तत् कर्त्ता य: करोति स:॥
ङे भ्यां भ्यस्चतुर्थी स्यात् संप्रदाने च कारके।
यस्मै दित्सा धारयते रोचते संप्रदानकम्॥
पञ्चमी स्यात् ङसि भ्यां भ्यो ह्यपादाने च कारके।
यतोऽपैति समादत्ते अपादानं ध्रुवं यत:॥
ङसोसामथ षष्ठी स्यात् स्वामिसम्बन्धसूचके।
ङोसुप्यथ सप्तमी स्यात् सा चाधिकरणे भवेत्॥
आधारश्चाधिकरणं स्वाश्रयाणां प्रयोगत:।
ईप्सितं चानीप्सितं यत्तदुपादानकं क्षुतम्॥
पञ्चमी पर्य्युपाङ्योग इतरर्त्तोऽन्यदिङ्मुखे।
एनयोगे द्वितीया स्यात् कर्म्म प्रवचनीयकै:॥
अध्यधीष्टेत्यंभूतेऽभिभागे च परिप्रती।
अन्तरेषु सहार्थे च हीनेऽनुपध कथ्यते॥
द्वितीया च चतुर्थी स्याद्धेतायां गतिकर्म्मणि।
अप्राणे हि विभक्ती द्वे मन्यकर्म्मण्यनादरे॥
नम:स्वस्तिस्वधास्वाहालंवषड्योग ईरिता।
चतुर्थी चैव तादर्थ्ये तुमर्थाङ्भाववाचिन:॥
तृतीया सहयोगे स्यात् कुत्सितेऽङ्गे विशेषके।
लक्षे भावे सप्तमी स्यादेतैर्योगे च षष्ठ्यपि॥
स्वामीश्वराधिपतिभि: साक्षिदायादसूतकै:।
निर्द्धारणे द्वे विभक्ती षष्ठी हेतुप्रयोगके॥
तुल्यार्थकर्म्मणि तथा करोते: प्रतियत्नके।

हिंसार्थानां प्रयोगे च क्तिः कर्म्मणि कर्त्तरि ।
न कर्त्तृकर्म्मणोः षष्ठी निष्ठादौ प्रतिपादिता ।
द्विविधं प्रातिपदिकं प्रातिपदिकमञ्झलम् ॥*॥
सुबादिश्चस्त्रिडोलः स्याल्लकारा दश वै स्मृताः ।
तिप्तस्झि प्रथमो मध्यः सिप्थस्थोत्तमपूरुषः ।
मिप्वस्मस् परस्मै तु पदानाच्चात्मनेपदम् ।
तामातामन्ता प्रथमो मध्यस्थाथांध्वमुत्तमः ।
आदेशा दश्चहिमह्वन्ता अनिजादपि धातुतः ।
नान्ति प्रयुज्यमानेऽपि प्रथमः पुरुषो भवेत् ।
मध्यमो युष्मदि प्रोक्त उत्तमः पुरुषोऽस्मदि ।
सुत्राद्या धातवः प्रोक्ता भगाद्यन्तास्तु धातवः ।
लङ्लोरितो वर्त्तमाने क्षीणातीते च धातुतः ।
भूतानद्यतने लट् च लोङाशिषि च धातुतः ।
विधादावेवानुमतौ लिङ्विधिर्मन्त्रके भवेत् ।
निमन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु तथाशिषि ।
लिङ्तीते परोक्षे स्याल्लङ् लुङ् लट् लङ् भविष्यति ।
स्यादद्यतने लट् च भविष्यति च धातुतः ।
धातोर्लिङ्क्रियाभिपत्तौ लिङर्थे लोट् प्रकीर्त्तितः ।
क्तस्त्रिष्वपि वर्त्तन्ते भावे कर्म्मणि कर्त्तरि ।
शृङ्खलानतयङ्ण्यङन्तीयङ्लटादयः ।"
इति गारुड़े कुमारव्याकरणे २०६ अध्यायः ।

कुमार उवाच ।

"सिद्धोदाहरणं वक्ष्ये संहितादि परस्परम् ।
विप्राग्नं सागतान् धीदं सूक्तमं स्यात् पिङ्गषभः ।
होढ्रकारो विश्नुनेयं लाङ्गलीषा मनीषया ।
गङ्गोदकं तवत्कार ऋणार्णे प्राङ्मित्यपि ।
प्रीतार्त्तश्च तवत्कारः सैन्द्री सौकार इत्यपि ।
मध्वासनश्च पित्रग्ने नन्वयं गाय्ययोजयेत् ।
नायको लवकं नावस्त एते तेन ईश्वराः ।
देवीयहमधोऽसुभ्र यशुरेहि पटू इमौ ।
अमी अश्वाः षड्भ्येति तनुराखुस्तृणानि च ।
तत्तरेत्तल्लु नातीति तल्लवं तच्छ्रुश्रूणाकम् ।
सुगन्नश्च पथन्नश्च भवांस्कादयतीति दिक् ।
भवांछकुरकश्चैव भवांस्तरति संस्तिम् ।
भवाँल्लिखति ताञ्छते भवाञ्छरोऽन्यदीदृशम् ।
भवाञ्छीनं स्वत्तरसि तद्वरोषि सदार्चनम् ।
कस्करेत् कटकारेण कः कुर्य्यात् कः खले क्षिपेत् ।
कः श्वेते चैव कः पङ्के कोऽर्थः को याति गौरवम् ।
क इहार्थश्च एवाहुर्देवा आहुश्च भो व्रज ।
प्रभूर्विष्णुर्व्रजति च गौष्यतिश्चैव धूष्यतिः ।
तस्मान्नैव व्रजेत् स स्यान्न कर्त्तव्यमुगच्छति ।
कुटीच्छाया तथाच्छाया साधवोऽन्ये तथैवाहुः ।
समासाः षट् पुरार्थे ये सन्निज्ञः कर्म्मधारयः ।
द्विगुश्चिवेदी ग्रामश्चा अयं ततपुरुषः स्मृतः ।
ततुल्यतश्च तदर्थं च दृकभीतिश्च बहुनम् ।
ज्ञानदृच्चिन्तत्तत्पो बहुव्रीहिरथाययौ ।
भावोऽधिच्छि यथोक्तिलं इन्दो देवर्षिमानवाः ।
तन्निताः प्राज्ञवः शैवो ब्राह्मश्च ब्रह्मतादयः ।
देवाभिसखिपत्यं शुक्रोष्टस्वयं सुवः पिता ।
गा प्रश्नास्था च रा मौर्ख्यौ रूढ़ाजन्ताश्च पुंस्यपि ।*।
हलन्ताश्चाव्ययुक् प्रासुस्रुरत्क्रयाश्चागविधः ।
आत्मा राजा युवा पन्थाः पूषन्नहर्यौ शुचौ ।
विड्वेधा उशनानड्वान् मधुलिट् काष्ठतट् तथा ।*।
वनवार्य्यस्त्रिवस्तूनि जगत्सामाहनी तथा ।
कर्म्म सर्पिर्वपुस्तेज अम्भलन्ता नपुंसके ।*।
जाया जरा नदी लक्ष्मीः श्रीः स्त्री भूमिर्वधूरपि ।
भूः पुनर्भूस्त्रया धेनुः स्वसा माता च नौः स्त्रियः ।
वाक् त्वक् धीः क्षुत् स्रुषः पामा युवतिः शकुभस्तथा ।
दौर्हृतिः प्राहृषश्चैव सुमन उच्चिहौ स्त्रियाम् ।
शुक्लत्रयक्रियायोगान्निलिङ्गांश्च वदामि ते ।
शुक्लः कौलालपाचैव शुचिश्च श्यामलो सुधीः ।
पटुः कमलभूः कर्णो सुमतो बहवः सुनौ ।
सखो नाश्वस्तथा ध्वंसो मधुभत्तमदीर्घपात् ।
घनार्थौ च सुकृत् सोमौ वागङ्खादिकस्तथा ।*।
सुवर्णे बहुपाच्छेया चैवा लवडुडा तथा ।*।
सर्व्वविश्वोभये चोभौ अन्यान्यरेतरावि च ।
इतरडतरे नेमः समोऽथ सिम इत्ययम् ।
पूर्व्वापरावराश्चैव दक्षिणश्चोत्तराधरौ ।
अपरश्चान्तरोऽन्ये तदयत्तत्किमदसौ इयम् ।
युष्मदस्मत् प्रथमस्वरमाख्ये तथार्द्धके ।
एकः कतिपयो द्वौ च त्रयः सर्व्वादयस्तथा ।*।
सुविदिदिपविच्छिदिधार्य्यश्च यतिः क्षदिः ।
गौर्दुर्विद्या जुहोतिश्च जहातिश्च दधात्यपि ।
दीप्यति स्तूयतिर्वेत्ति पुत्रग्निर्दक्षिणोत्यपि ।
भुटिक्षात्रयति स्वपि रुधि गुर्व्वी स्त्री तनिः ।
सभिः करोति क्रीणाति दृणोतिर्दुनोति वर्षति ।
कलीडक्षपराजीवा धातवश्च युगा तथा ।*।
भवत् भवान् भवन्तौ च श्रेयं कर्त्तव्यमेव च ।
कार्य्यं कृतश्च कृत्वा च प्रत्ययः स्युस्तथापरे ।
सूर्य्याहरौ सुरा सन्ति देवविप्रवनाग्नयः ।
नरेण कार्य्यं वेदेन क्रियते देहि भोजनम् ।
द्विजाय च वरिष्ठाभ्यां मा तेभ्योऽस्तु समागतः ।
तीर्थात्तथाश्रमाभ्याच्च सत्रेभ्यः शुभस्य च ।
गन्तव्ययोः करणाच्च ज्ञानं सिद्धमशेषतः ।
ज्ञानतस्त्रिषु पैत्रेयमन्ये नेया यथामति ।
सर्व्वे तिष्ठन्ति सर्व्वस्मे सर्व्वस्मात् सर्व्वतो गतः ।
सर्व्वेषाश्चैव सर्व्वस्मिन्नेवं विग्रादयस्तथा ।
पूर्व्वः पूर्व्वाच्च पूर्व्वस्मात् पूर्व्वस्मिन् पूर्व्व इत्यलम् ।

सूत उवाच :

सुग्रिडस्तं सिद्धरूपं नाममात्रेण दर्शितम् ।
काश्यायनः कुमारात्तु श्रुत्वा विस्तरमब्रवीत् ॥"
इति गारुड़े कुमारव्याकरणे २१० अध्यायः ॥*
एतद्ग्रन्थं अग्निपुराणे कार्त्स्न्येनोक्तव्याकरणमस्ति । एवं मदेशप्रचलितमाहेश्वराकरणं पाणिनिमुनिप्रणीतपाणिनीयव्याकरणं ग्रन्थगौरवप्रचलितकलापव्याकरणं क्रमदीश्वरप्रणीतसंक्षिप्तसारव्याकरणं

पद्मनाभदत्तप्रणीतसुपद्मव्याकरणं बोपदेवप्रणीतमुग्धबोधव्याकरणं गोस्वामिप्रणीतहरिनामामृतव्याकरणं भट्टोजीदीक्षितप्रणीतसिद्धान्तकौमुदीव्याकरणं अनुभूतस्वरूपाचार्य्यादिप्रणीतसारस्वतादिव्याकरणानि च सन्ति ।*। (विस्तारः । यथा, महाभारते । १२ । २५१ । ११ ।
"अवसायात्मिका बुद्धिर्मनो व्याकरणात्मकम् ।")
व्याकुलः, त्रि, (विशेषेण आकुलः ।) शोकादिभिरितिकर्त्तव्यतामूढ्यः । तत्पर्य्यायः । विह्वलः २ । इत्यमरः । (यथा, महाभारते । ५ । १७७ । २५ ।
"हरोद सा शोकवती बाष्पव्याकुललोचना ।"
उपहृतः । यथा, भागवते । १ । ३ । २८ ।
"एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ।")
व्याकुलात्मा, [न्] त्रि, (व्याकुलः आत्मा यस्य ।) शोकाभिहतचित्तः । यथा,—
"भो दृष्टाः पर्व्वतस्थं बहुकुसुमयुता वायुना घूर्णमाना
रामोऽहं व्याकुलात्मा दशरथतनयः पृच्छते शोकदग्धः ।
विम्बोष्ठी चारुनेत्रा गजपतिगमना दीर्घकेशी सुमध्या
हा सीता केन नीता मम हृदयगता केन वा कुत्र दृष्टा ।"
इति महानाटकम् ।
व्याकृतिः, स्त्री, (विशिष्टा आकृतिः ।) भङ्गिः ।
इति हलायुधः ।
व्याकोशः, त्रि, (व्याकुश्यति प्रस्फुटतीति । वि + आ + कुश + कः ।) विकशितः । इत्यमरटीकायां रामाश्रमः । (यथा, माघे । ४ । ४६ ।
"दोषापि नूनमहिमांशुरसौ किमेति
व्याकोशकोकनदतां दधते बलिन्यः ।"
भावे घञ् । प्रस्फुटनम् । यथा, स्फटिके ।
२ अङ्के ।
"पद्मव्याकोशं भास्करं बालचन्द्रं
वापीविस्तीर्णं स्वस्तिकं पूर्णकुम्भम् ।
तत्तस्मिन् देशे दर्शयाम्यात्मशिल्पं
दृष्ट्वा यो यदिच्छेयं यान्ति पौराः ।")
व्याकोषः, त्रि, (व्याकुश्यति सुकुलीभावाद्विनिःसरतीति । वि + आ + कुष + कः ।) प्रफुल्लः । इत्यमरः । (यथा, महाभारते । ७ । ३० । २२ ।
"तं पद्मनिकराकारं पद्मपत्रनिभेक्षणम् ।
व्याकोषपद्माभिमुखो ननो विव्याध सायकैः ।")
व्याख्या, स्त्री, (व्याख्यानमिति । वि + आ + ख्या + "आतश्चोपसर्गे ।" इत्यङ् । ततष्टाप् ।) विवरणम् । इति हलायुधः । (यथा, भागवते । ७ । १२ । ८ ।
"न ग्रियानुपयुञ्जीत यत्यानेवाभ्यसेद्बहून् ।
न व्याख्यामुपयुञ्जीत नारम्भानारभेत् क्वचित् ।"
ग्रन्थः । यथा, तन्त्रसारे वागीश्वरीप्रकरणे ।
"शुभां स्वच्छविशेषमाख्यवसनां प्रीतांशुखण्डोज्ज्वलां

व्याख्यामयुक्तं सुधाटीकलसं विद्याच हस्ताम्बुजैः ।
बिभ्राणां कमलासनां कुचलतां वाग्देवतां सञ्चिंतां
वन्दे वाञ्छितमन्त्रदां त्रिनयनां सौभाग्यसम्पत्करीम् ।")

व्याख्यानम्, क्ली, (व्याख्यया गम्यम् ।) उत्तराभासभेदः । व्याख्यया विवरणेन मन्यते ज्ञायते यत् । यथा,—

"अस्तव्यस्तपदव्यापि निगूढार्थं तथाकुलम् ।
व्याख्य यमसारच्च नोत्तरं मुखते बुधैः ।"

इति व्याख्यारत्नम् ।

व्याख्यातः, त्रि, विवृतः कथितः । वि-आङ्पूर्व्वकख्याधातोः क्तप्रत्ययेन निष्पन्नमिदम् ।

व्याघातः, पुं, (व्याहन्यतेऽनेनेति । वि+आ+हन+घञ् ।) विघ्नभाविशुभप्रतिबन्धियोगान्तर्गतत्रयोदशयोगः । यथा,—

"परिघस्य त्रयोदण्डं शुभकर्म्म ततः परम् ।
त्रयाणां पञ्च विघ्नानि सप्त शूले च नाड़िकाः ।
गण्डव्याघातयोः षट् च नव वज्रहर्षणव्रयोः ।
वैधृतिव्यतिपातौ च समौ परिवर्जयेत् ।"

इति ज्योतिस्तत्त्वम् ।७।

तत्र ज्ञातफलम् ।

"व्याघातजन्मा च सतां हिताय
व्याघातजन्मा मनुजः कठोरः ।
असत्स्वभावी कृपया विहीनो
मन्देक्षको दीर्घतनुः कृशाङ्गः ।"

इति कोष्ठीप्रदीपः ।७।

अन्तरायः । (यथा, महाभारते १।२।२८८।

"तेन व्याघातमन्त्राणां क्रियामात्रमवेक्ष्य च ।")

प्रहारः । इति मेदिनी । अलङ्कारविशेषः । तस्य लक्षणं यथा,—

"यदुपायो साधितं केनाप्यपरेण तदन्यथा ।
तत्रैव यदिधीयेत स व्याघात इति स्मृतः ।"

येनोपायेन यत् एकेन उपकल्पितं तस्यान्येन जिगीषुतया तदुपायकमेव यदन्यथाकरणं न स्वसाधितत्वसुत्प्राहतिहेतुत्वात् व्याघातः । उदाहरणम् ।

"इत्था दग्धं मकरिकं जीवयन्ति दग्धैव याः ।
विरूपाक्षस्य जयिनीस्ता स्तुमो वामलोचनाः ।"

इति काव्यप्रकाशे १० उल्लासः ।

व्याघ्रः, पुं, (व्याघ्रिणोतीति । वि+आ+घ्रा+कः ।) जन्तुविशेषः । बाघ इति भाषा । (यथा, छान्दोग्ये । ६ । ८ । ३ ।

"न इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा वदूयङ्कुर्वन्ति तदा भवन्ति ।") तत्पर्य्यायः । ग्राहूलः २ दीपी ३ । इत्यमरः । एदाकुः ४ वनश्वः ५ चित्रकः ६ पुष्करीकः ७ । इति जटाधरः । हिंसपशुः ८ व्याड़ः ९ हिंसकः १० हिंसारुः ११ श्वापदः १२ । इति शब्दरत्नावली । पञ्चनखः १३ व्यालः १४ गुहाशयः १५ तीक्ष्णदंष्ट्रः १६ भीरुः १७ नखायुधः १८ । अस्य मांसगुणाः ।

"ग्राहूलसिंहशरभर्क्षतरक्षुमुख्या
येऽन्ये प्रसह्य विनिहन्त्यभिवर्त्तयन्ते ।
ते कौशिता; प्रहसनाः; पललं तदीयमर्थ्यः प्रमेहजठरामयबाधहारि ।"

इति राजनिर्घण्टः ।

स तु कश्यपभार्य्यादंष्ट्रासम्भवः । यथा,—

"दंष्ट्रा व्यजनयत् पुत्रान् व्याघ्रसिंहांश्च भामिनी ।
दीपिनश्च सुतांश्चक्षा व्याघ्र्याद्याश्चामिषप्रियाः ।"

इत्यादौ वह्निपुराणे काश्यपीयवंशनामाध्यायः ।

नरादिशब्दोत्तरस्थः श्रेष्ठार्थवाचकः । (यथा, महाभारते । १ । १५२ । २६ ।

"किमतः खतरं मृत्युं मया द्रष्टुमतः परम् ।
योऽहमद्य नरव्याघ्रान् सुभ्रान् पश्यामि भूतले ।")

रक्तैरण्डः । करञ्जः । इति मेदिनी ।

व्याघ्रदलः, पुं, एरण्डवृक्षः । इति शब्दमाला ।

राजनिर्घण्टे रक्तैरण्डपर्य्याये व्याघ्रपत्र इति पाठः ।

व्याघ्रनखं, क्ली, (व्याघ्रस्य नखमिव ।) नखीनामगन्धद्रव्यम् । तत्पर्य्यायः । व्याड़ायुधम् २ करजम् ३ चक्रकारकम् ४ । इत्यमरः । नखायुधम् ५ नखी ६ नखम् ७ व्याघ्रनखी ८ । इति शब्दरत्नावली । (यथा, हरीतसंहितायाम् ।७७।६।

"मञ्जिष्ठया व्याघ्रनखेन शुक्ला
त्वया सुकुष्ठेन रसेन चूर्णः ।
तैलेन युक्तोऽर्कमयूखतप्तः
करोति तत्पुष्पकगन्धितैलम् ।")

तत्पर्य्यायगुणाः ।

"नखं व्याघ्रनखं व्याघ्रायुधं नखकरकारकम् ।
नखं खड्गं नखी प्रोक्ता हरदुर्दृविलासिनी ।
नखद्वयं गरहरं व्रणवासव्वरकुष्ठहृत् ।
लघुकं शुक्लकं वर्ण्यं स्वादु व्रणविषापहम् ।
अल्पमीषत्कटुस्नेहं व्रणहृत् पाकरसयोः कटुः ।"

इति भावप्रकाशः ।

कन्दविशेषः । नखक्षतविशेषः । इति मेदिनी ।

व्याघ्रनखः, पुं (व्याघ्रस्य नखमिव कण्टकं यस्य ।) क्षुद्रोदृक्षः । व्याघ्रनखः । इति राजनिर्घण्टः । व्याघ्रस्य नखश्च ।

व्याघ्रनखकं, क्ली, (व्याघ्रनखमेव । स्वार्थे कन् ।) नखक्षतम् । इति शब्दमाला ।

व्याघ्रनायकः, पुं, (व्याघ्रस्य नायक इव ।) ग्रहभालः । इति राजनिर्घण्टः ।

व्याघ्रपात्, [द्] पुं, (व्याघ्रस्य पाद इव मूलिन युक्तमूलानि यस्य । "पादस्य लोपोऽह्याद्यिभ्यः ।"५। ४ । १३८ । इत्यलोपः ।) विकङ्कतवृक्षः । इत्यमरः । मुनिविशेषः । इति पुराणम् । व्याघ्रतुल्यचरणे, त्रि । इति सुग्धबोधव्याकरणम् ।

व्याघ्रपादः, पुं, (व्याघ्रस्य पाद इव मूलानि यस्य ।) विकङ्कतवृक्षः । विकङ्कटवृक्षः । इति राजनिर्घण्टः । (मुनिविशेषः । यथा, महाभारते । १३ । १४ । १०६ ।

"पुराकृतयुगे तात ऋषिरासीत् महायशाः ।
व्याघ्रपाद इति ख्यातो वेदवेदाङ्गपारगः ।")

व्याघ्रपुच्छः, पुं, (व्याघ्रस्य पुच्छमिव सदृशदलमस्य ।) एरण्डवृक्षः । इत्यमरः । व्याघ्रस्य लाङ्गूलञ्च ।

व्याघ्राटः, पुं, (व्याघ्र इव अटतीति । अट गतौ + पचाद्यच् ।) भरद्वाजपक्षी । इत्यमरः ।

व्याघ्रादनी, स्त्री निर्ऋता । इत्यमरः ।

व्याघ्रास्यः, पुं, (व्याघ्रस्य आस्यमिव आस्यमस्य ।) विड़ालः । इति शब्दचन्द्रिका । व्याघ्रमुखे, क्ली ।

व्याघ्री, स्त्री, (व्याघ्र+ङीष् ।) कण्टकारी । इत्यमरः । व्याघ्रपत्नी च । (यथा, रघुः । १२ । ३० ।

"हन्याः परिभवो व्याघ्र्यामित्यवेहि त्वयाहृतम् ।")

व्याज, पुं, (व्यजति यथार्थंयवहारादपगच्छत्यनेनेति । वि+अज+घञ् । यद्वा विभावो नास्ति ।) कपटः । स तु अयथार्थव्यवहारः । वञ्चनमात्रफलम् । इति सर्व्वानन्दो मधुश्च । अपदेशः । स कारणान्तरप्रवृत्तेः कारणान्तरोद्भावनम् । व्याजोऽत्र स्वरूपाच्छादनम् । यथा ध्यानव्याजमुपेत्य चिन्तयसि कामिति । व्याजोऽयमभिप्रायगोपनफलः । पूर्व्वोक्तन्तु परापकारफलः । इत्ययथार्थव्याजयोर्भेदः । अन्यसुद्दिश्य अन्यपतिपादनमिह व्याज इत्यर्थः । यदाह अन्यसुद्दिश्य अन्यार्थमनुष्ठानं अपदेशः । यथा, जलक्रीड़ासुद्दिश्य आरावलोकनार्थं यातीति । इत्यमरभरतौ ।

व्याजनिन्दा, स्त्री, (व्याजेन निन्दा ।) कपटकृत्या । अलङ्कारविशेषः । यथा,—

"निन्दाया निन्दया उक्तिर्व्याजनिन्देति गीयते ।"

इति चन्द्रालोकः ।

(उदाहरणं यथा,—

"विधेरविज्ञो यस्तेऽप्रागेकमेवाहरच्छिरः ।")

व्याजस्तुतिः, स्त्री, (व्याजेन स्तुतिः । व्याजरूपा स्तुतिश्च ।) कपटप्रशंसा । अलङ्कारभेदः । यथा,

"उक्तिव्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः ।"

इति चन्द्रालोकः ।

(उदाहरणं यथा,—

"कः स्वर्भानो! विवेकस्ते यापिनी नयसे दिवम् ।")

व्याजोक्तिः, स्त्री, (व्याजेन उक्तिः ।) छलवाक्यम् । अलङ्कारविशेषः । यथा,—

"व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम् ।"

इति चन्द्रालोकः ।

(उदाहरणं यथा,—

"सखि! पश्य यदायाम परागैरक्षि धूसरा ।")

व्याड़ः, पुं, सर्पः । मांसभक्षकपशुः । इत्यमरः ।

(यथा, मार्कण्डेये । । १५ । ९० ।

व्याधः

"श्वा शृगाली वृको गृध्रो व्याघ्रः कङ्कस्तथा-
क्रमात् ॥")
रुद्रः । इति शब्दरत्नावली ॥ वधकः । इति
रायमुकुटः ॥

व्याघ्रायुधं, क्ली, (व्याघ्रस्य व्याघ्रस्यायुधं नख-
मिव ।) व्याघ्रनखाख्यनखम् । इत्यमरः ॥

व्याघ्रिः, पुं, कोषकारमुनिविशेषः । तत्पर्य्यायः ।
विन्ध्यवासी २ नन्दिनीतनयः ३ । इति हेम-
चन्द्रः ॥ विन्ध्यस्थः ४ नन्दिनीसुतः ५ । इति
त्रिकाण्डशेषः ॥

व्याप्तं, त्रि, (वि + आ + दा + क्तः ।) प्रसारितम् ।
विस्तृतम् । यथा,—
"लम्बोर्द्धकर्णं गिरिकन्दराद्भुत-
व्याप्तास्यनासं हनुमेदभीषणम् ।
दिवि स्पृशत्पार्श्वमहोर्ध्वपीवर-
ग्रीवोरुवक्षःस्थलमल्पमध्यमम् ॥"
इति श्रीभागवते ७ स्कन्धे ८ अध्यायः ॥
गिरिकन्दरवत् अद्भुतं व्याप्तं प्रसृतमास्यं नासि
च यस्मिन् । इति तट्टीकायां श्रीधरस्वामी ॥

व्याप्तुची, स्त्री, (व्याप्तिहारेण उच्यते । वि + आ + अप्ति + उच + "कर्म्मण्यतीहारे क्यप्
स्त्रियाम् ।"३।३।१३३। इति क्यप् । ततः "क्यः
स्त्रियामन् ।"५।३।१३। इति अन् । "टिड्ढाण-
ञिति ।" ४ ।१।१५। इति ङीप् ।) रसिकानाम-
ख्यातं जलक्रीड़नम् । इति संक्षिप्तसारोणादि-
वृत्तिः ॥ तत्पर्य्यायः जलक्रीड़ाशब्दे द्रष्टव्यः ॥

व्याप्रिघ्रः, पुं, (विघ्रेषेणादिशति स्वकर्म्मणि
नियोजयति जगत् । वि + आ + दिघ्र + कः ।)
विष्णुः । यथा,—
"अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरश्रो गभीरात्मा विदिशो व्याप्रिशो दिशः ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥

व्याधः, पुं, (विध्यति मृगादीन् । व्यध + "स्फाय्य-
धेति ।" ३ । १ । १४१ । इति कः ।) मृग-
हिंसकजातिः । ग्रिकारी इति भाषा । स तु
सर्व्वेषिषक्षां क्षत्रियाज्जातः । यथा,—
"नापितात्तोपकन्यायां सर्व्वस्वी तस्य योषिति ।
क्षत्राद्बभूव व्याधश्च बलवान् मृगहिंसकः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
तत्पर्य्यायः । मृगवधाजीवः २ मृगयुः ३
लुब्धकः ४ । इत्यमरः । मृगाविद्धः ५ ब्रोहाटः ६ ।
इति जटाधरः । मृगजीवनः ७ बलपांशुलः ८ ।
इति शब्दरत्नावली ॥ (यथा,—
"विद्धा मृगी व्याधशिलीमुखेन
मृगोऽपि तत्कातरशीक्षणेन ।
अक्षन् परित्यज्य गतव्यथा सा
मृगस्य जीवावधिराधिराशीत् ॥"
रघुवंशे ।) दुष्टः । इति मेदिनी ॥ (यथा, भागवते । ३ ।
१४ । ३४ ।
"व्याधस्याप्यनुकम्प्यानां स्त्रीणां देवः सतीं-
मतिः ॥")

व्याधिः

व्याधभीतः, पुं, (व्याधाद्भीतः ।) मृगः । इति
शब्दचन्द्रिका ॥ (व्याधभीते, त्रि ॥)

व्याधामः, पुं, वज्रम् । इति हेमचन्द्रः ॥

व्याधिः, पुं, (विविधा आधयोऽस्मात् । यद्वा, वि +
आ + धा + "उपसर्गे धोः किः ।"३ । ३ । ९२ ।
इति किः ।) कुष्ठम् । रोगः । इत्यमरः ॥
(यथा, महाभारते । १२ । १४ । ८ ।
"द्विविधो जायते व्याधिः शारीरो मानस-
स्तथा ।
परस्परं तयोर्जन्म निर्द्वन्द्वं नोपलभ्यते ॥")
कामव्याधासन्तापजन्यक्लमता । इति रसमञ्जरी ॥
कुष्ठस्य निदानं यथा,—
"बालोकनमनस्यौत्सुक्यक्रीड़ाविषयचेष्टितैः ।
विरोधरूक्षभीहर्षविषादाद्यैश्च दूषितः ॥
पुंस्त्वोत्साहबलभ्रंशग्रीष्मचिन्ताध्वकर्शनात् ।
सर्व्वाकाराङ्गनिर्लोदं रोमहर्षं सुप्तनताम् ।
कुष्ठं विसर्पमन्यच्च कुर्य्यात् सर्व्वाङ्गमार्द्दवम् ॥"
इति गारुड़े १७२ अध्यायः ॥
अन्यत् कुष्ठशब्दे द्रष्टव्यम् ॥ * ॥ अथ कुष्ठस्य
चिकित्सा ।
"वातोत्तरेषु सर्पिर्व्वमनं कफोत्तरेषु कुष्ठेषु ।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं श्रेष्ठम् ॥
पथ्याकरञ्जखिड़ार्यनिम्बावल्गुजसैन्धवैः ।
विड्भक्षसहितैः पिष्टैर्लेपो मूत्रेण कुष्ठघ्नः ॥"
अवल्गुजः वाकुचीति लोके । पथ्यादिभि-
र्लेपः ॥ * ॥
"सोमराजीभवचूर्णं भल्लातेरसमन्वितम् ।
उष्ट्रमूत्रमिदं हन्ति कुष्ठरोगं ज्ञतास्रदम् ॥"
सोमराजी वाकुचीति लोके । सोमराज्युद्-
वर्त्तनम् ॥ * ॥
"रसायनं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ।
मार्कण्डेयप्रभृतिभिर्यत् प्रयुक्तं महर्षिभिः ॥
पुष्यकाले तु पुष्याणि फलकाले फलानि च ।
संगृह्य पिप्पलीमर्द्दस्य त्वङ्मूलानि दलानि च ।
द्विरंशानि समाहृत्य भागिकानि प्रकल्पयेत् ।
त्रिफला चूर्णयं ब्राह्मी खदिरश्चक्रराश्वयः ॥
विड्भक्षसारवाराह्यो लोहचूर्णाः क्षुताः समाः ।
निम्बादयावल्गुजकत्र्याधिघाताः सप्तकराः ॥
कुष्ठमिन्द्रयवाः पाठाः चूर्णमेषान्तु संयुतम् ।
खदिरासननिम्बानां घनं क्वाथेन भावयेत् ।
सप्तधा पञ्चनिम्बन्तु मार्कवस्वरसेन च ।
स्निग्धः शुद्धतनुर्धीमान् योजयेत्तच्छुभे दिने ।
मधुना सिक्तहविषा खदिरासनवारिणा ।
क्षेत्रसुखाम्भसा वापि कोलदृढा पलं भवेत् ।
जीर्णे तस्मिन् समश्नीयात् स्निग्धं लघु हितं च
यत् ॥

विचर्चिकोडुम्बरपुष्करीक-
कपालदद्रुकिटिभालसादि ।
घृतारुविस्फोटविसर्पमाला:
कफप्रकोपं त्रिविधं किलासम् ॥
भगन्दरश्लीपदवातरक्त-
जङ्घात्वगाढ्यान्त्रवृधीर्व्वरोगान् ।

व्याधिः

सर्व्वान् प्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविषं मूलविषं निहन्ति ॥
खलोदरः सिंहबलीदरः स्यात्
सुस्निग्धसन्धिर्मधुनोपयोगात् ।
सदीवरोगादपि ये दशन्ति
सर्पादयो यान्ति विनाशमाशु ॥
जीवेच्चिरं व्याधिजराविमुक्तः
सुखे रतिस्त्रक्समलक्तकान्तिः ॥"
अयमर्थः । निम्बस्य फलपुष्पत्वक्पत्रमूलानि
सर्व्वाणि समुदितानि द्विगुणानि चूर्णितानि
भृङ्गराजस्य रसेन सप्तवाराम् भावयेत् । त्रिफलादीनि पाठान्तानि समुदितान्येक-
भागानि चूर्णितानि खदिरासननिम्बानां
निबिड़क्वाथेन भावयेत् । ततः सर्व्वमेकीकृत्य
मध्यादिबलिक्षात् । पञ्चनिम्बकाथेन ॥ * ॥
अग्निवेलापत्रपलं तावद्विरिञ्चस्य गुग्गुलो-
र्द्वयं च ।
ताप्यस्य पलत्रितयं हे लोहाच्छावलिकायाः ॥
त्रिफलाकरञ्जपल्लवखदिरगुडूचीत्रिदन्तयः ।
सुस्निग्धविड़ङ्गरजनीकुटजत्वक्निम्बयष्टि
समाकाः ॥
एते रचिता वटिकां मधुघृतमिश्रां गिलेत्-
प्राहः ।
गोमूत्रेण च कुष्ठं वृद्धत्वङ्गवातमचिरेण ॥
त्रिन्नाभि पाण्डुरोगं विषमाग्निदरप्रमेह-
गुल्मांश्च ।
नाशयति वलीपलितं योगः स्वायम्भुवो नाम्ना ॥
अग्निवेला सोमराजी । गिरिजस्य शिलाजतुनः । ताप्यस्य स्वर्णमाक्षिकस्य । आवलिका
सुक्कीति लोके । स्वायम्भुवो गुग्गुलुः ॥ * ॥
"त्रिफलं त्रिफला क्षौमजाजी कारवी वचा ।
सैन्धवातिविषे कुष्ठं पथ्यालाबावशूकजम् ॥
विड़ङ्गान्यजमोदा च सुक्ता चामरदारु च ।
यावन्त्येतानि सर्व्वाणि तावच्चाग्नस्तु गुग्गुलुः ॥
संचूर्ण्य सर्पिषा सार्द्धं गुटिकां कारयेद्भिषक् ।
प्रातर्भोजनकाले च खादेदग्निबलं यथा ।
कुष्ठवातास्रपित्तानि क्रमोन् दुश्चर्म्माणि च ।
ग्रहण्यर्शोविकारांश्च सुखमयमजय्यत्वात् ॥
यश्चौमखण्डिभक्ष्यञ्च गुल्मञ्चापि नियच्छति ।
व्याधिं कोष्ठगताप्यपि जयेद्विष्णुरिवासुरान् ॥"
एकविंशतिको गुग्गुलुः ॥ * ॥
"वातरक्ताधिकारोक्तः पुरः कैशोरकाभिधः ।
कुष्ठानां वातरक्तानां नाशयेत् परमौषधम् ॥"
इति कैशोरको गुग्गुलुः ॥ * ॥
"भल्लातकं प्रस्थयुगं क्षिप्त्वा द्रोणजले क्षिपेत् ।
प्रस्थद्वयं गुडूच्याश्च क्षुण्णं तत्राम्भसि क्षिपेत् ॥
चतुर्थांशावशेषन्तु कषायमवतारयेत् ।
वस्त्रपूते कषाये च वस्त्रमात्राणि निक्षिपेत् ॥
सरावमात्रं गोसर्पिर्गोदुग्धस्याढकं तथा ।
क्षिपेत् प्रस्थमितं दद्यात् प्रस्थार्द्धमाक्षिकं क्षिपेत्
सर्व्वाण्येकत्र भाण्डे तु पचेत् मृदग्निना मृदुः ।
सर्व्वस्मिन् घनीभूते पावकादवतारयेत् ॥

तत्र क्षेप्यानि कृष्णानि त्रुमो विल्वमितान्यता ।
काकुची चाथ दद्रुघ्नः पिचुमर्दो हरीतकी ।
धात्री रास्नाच मञ्जिष्ठा मरिचं नागरं कणा ।
यवानी सैन्धवं सुक्तं खगेला नागकेशरम् ।
पर्पटः पञ्चकं बालमुशीरं चन्दनं तथा ।
गोक्षुरस्य च बीजानि कर्कशे रक्तचन्दनम् ।
एषां पलार्द्धमानानां सर्वमेषामिह क्षिपेत् ।
पलमात्रमिदं प्रातः समशीयाज्जलेन हि ।
नाशयेदबलेशोत्थं कुष्ठानि निखिलान्यपि ।
वातरक्तानि सर्वाणि सर्वाण्यर्शांसि सेवितः ।
व्यायाममातपं वह्निमन्नं मांसं दधि स्त्रियम् ।
तैलाभ्यङ्गं तथाभ्राणं नरो भल्लातके त्यजेत् ।"

इति अल्पभल्लातकावलेहः । ● ।

"निम्बं गोपारुषा कट्वी भार्यन्ती त्रिफला वनम् ।
पर्पटाबलगुडूचन्ता वचा खदिरचन्दनम् ।
पाठा शुण्ठी घटी भार्गी वासा भूनिम्बवत्सकम् ।
श्यामेन्द्रवारुणी सूर्या विड्भिन्नत्रयवानलम् ।
हस्तिपर्योऽन्वता द्वेका पटोलरजनीद्वयम् ।
कणारग्वधसप्ताङ्गत्र्यवेणोवटाफलम् ।
मञ्जिष्ठा काञ्चनी रास्ना वत्सकानां पुनर्नवा ।
दन्ती विजयसारश्च भृङ्गराजकुरण्टकम् ।
अङ्कोटकश्च ग्राखोटं द्विपलांशं पृथक् पृथक् ।
यवक्षीरादीनि सर्वाणि जलद्रोणे पचेच्छनैः ।
अष्टमांशावशेषन्तु कषायमवतारयेत् ।
विधाय वासवा पूतं क्षारयेद्भाजने दृढे ।
भल्लातकसहस्राणि त्रिंशा क्षीरमवोऽम्भसि ।
पचेदष्टावशेषन्तु कषायमवतारयेत् ।
तच्च वह्निं संशोध्य द्वौ कषायौ विमिश्रयेत् ।
गुडस्य च तुलां दत्वा लेहवत् साधु साधयेत् ।
भल्लातकसहस्राणि तच्च बीजानि निःक्षिपेत् ।
त्रिकटुः त्रिफला मुस्तं विड्भिन्नं चक्रकं तथा ।
चन्दनं सैन्धवं कुष्ठं दीप्यकञ्च पलं पलम् ।
सौगन्ध्यार्थं क्षिपेत्तच्च चातुर्जातं पलं पृथक् ।
महाभल्लातको ह्येष महादेवेन भाषितः ।
प्राणिनां हितकामाय जयेच्छीघ्रं प्रयोजितः ।
श्वित्रमौडुम्बरं दद्रुत्वग्जिह्मं सकाकणम् ।
पुष्करीकच्च चर्म्माख्यं विस्फोटं रक्तमण्डलम् ।
कण्डूं कपालकं कुष्ठं पामानच्च विपादिकाम् ।
वातरक्तं षडर्शांसि पाण्डुरोगं व्रणक्षतीन् ।
रक्तपित्तमुदावर्त्तमेकाहन्याशं भगन्दरम् ।
सदाश्वासेन पलितमामवातं सुदुस्तरम् ।
निर्यन्त्रणस्तु कथितो विहाराहारमैथुनैः ।
कुरुते परमां कान्तिं प्रदीप्तं जठरानलम् ।
अनुपानं प्रयोक्तव्यं क्षिप्तानोयं पयोऽथवा ।
भोजने तु सदा त्याज्यमुष्णमम्लं विशेषतः ।"

गोपा श्वेत खाउ इति लोके। बत आह निघण्टः ।

"सारिवा सारदा स्फोटा गोपकन्या प्रताणिका ।"

तद्वाचको गोपीशब्दश्च बत आह । गोपी श्यामा सारिवा स्वादनलोत्पलसारिवा रत्नमरः । गोपाङ्गना गोपवल्ली लताडा काष्ठसारिवेति मदनपालः । अरुणा अतीसः । अवल्गुजः सोमराजी । अनन्ता दुरालभा । चन्दनं श्वेतम् । भार्ग्या बलाभे कण्टकारीमूलम् । श्यामा क्षुद्रा खाउ । हस्तिकर्णः वृक्षिकश्च । द्वेका वका इति । सप्ताङ्गः क्षतिवनृ । क्षुद्रवेत्रः जलवेतसः । उच्चटाफलं आरक्तगुञ्जाफलम् । कुरण्टकः कटसरैया । दीप्यकः इति यवानी । महाभल्लातकः ।

"मञ्जिष्ठा त्रिफला तिक्ता वचा दारु निशाद्वयं ।
निम्बस्येषां क्वाथः सर्वकुष्ठानि नाशयेत् ।"

इति लघुमञ्जिष्ठादिक्वाथः । ● ।

"मञ्जिष्ठा वाकुची चक्रमर्द्दश्च पिचुमर्द्दकम् ।
हरीतकी हरिद्रे च धात्री वासा गुडूचरी ।
बला नागबला यष्टीमधुकं खदिरोपि च ।
पटोलस्य लतोशीरं गुडूची रक्तचन्दनम् ।
मञ्जिष्ठादिरयं क्वाथः कुष्ठानां नाशनः परः ।
वातरक्तस्य संहर्त्ता कण्डूमण्डलखण्डनः ।"

इति मध्यममञ्जिष्ठादिक्वाथः । ● ।

"मञ्जिष्ठा कुटजाञ्चता वनवचा गुडूची हरिद्रा द्वयं
क्षुद्रारिष्टपटोलकुण्ठकटुका भार्गी विड्भङ्गा पिचुम् ।
मूर्वा दारु कलिङ्गभङ्गमगधा त्रायन्ति पाठा वरी
गायत्री त्रिफला किरातकमहानिम्बा सनारग्वधम् ।
श्यामा वत्सगुडूचचन्दनं वरुणकं दन्ती कणा वोढ़कं
वासा पर्पटसारिवा प्रतिविषानन्ता विशाला जलम् ।
मञ्जिष्ठादिरयं कषायविधिना नित्यं पुमान् यः पिबेत्
स्वग्दोषा क्षुचिरेव यान्ति विलयं कुष्ठानि चाष्टादश ।
नाशं गच्छति वातरक्तमखिलं नश्यन्ति रक्तामया
वीसर्पश्च सिरा सूत्यता नयनजा रोगाः प्रशाम्यन्ति च ।"

अरिष्टः निम्बः । कलिङ्गः इन्द्रयवः । भृङ्गं भृङ्गरा । वरी शतावरी । गायत्री खदिरः । अवल्गः विजयसारः । श्यामा प्रियङ्गुः । चन्दनमत्र रक्तं ग्राह्यम् । सारिवा खाउ । अनन्ता दुरालभा । विशाला इन्द्रवारुणी इति । जलं नेचवाला । इदमञ्जिष्ठादिक्वाथः ।

"मरिचं त्रिफला मुस्ता हरितालं मनःशिला ।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ।
विशाला करवीरश्च चीरमर्कसमुद्भवम् ।
गोमयस्य रसं कुर्यात् प्रत्येकं कर्षसम्मितम् ।
विस्वार्द्धपलं देयं तैलं प्रस्थमितं कटु ।
पचेच्चतुर्गुणे नीरे गोमूत्रे द्विगुणे तथा ।
मरिचाद्यमिदं तैलमभ्यङ्गात् कुष्ठनाशनम् ।
एतस्याभ्यङ्गतः श्वित्रं विवर्णं तत्क्षणाद्व्रजेत् ।
तैलमेतज्जयेत् कण्डूं पामां सिध्मं विचर्चिकाम् ।
पुष्करीकं तथा दद्रुं शून्यतां नित्यसेविनाम् ।"

इति लघुमरिचाद्यं तैलम् । ● ।

"मरिचं त्रिफला दन्ती क्षीरमार्कं शुक्लद्वयः ।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ।
विशाला करवीरश्च हरितालं मनःशिला ।
चित्रकं काञ्चनी मुस्ता विड्भङ्गं चक्रमर्दकः ।
शिरीषः कुटजो निम्बः सप्तपर्णोऽम्बुता खुही ।
सम्याको नक्तमालश्च खदिरो वाकुची वचा ।
ज्योतिष्मती च पलिका विषं द्विपलिकं भवेत् ।
आढ़कं कटुतैलस्य गोमूत्रञ्च चतुर्गुणम् ।
स्थापित्वा लोहपात्रे च शनैर्मृद्वग्निना पचेत् ।
मरिचाद्यमिदं तैलं महत्कुष्ठविनिर्हरणम् ।
भिषगेतेन तैलेन म्रक्षयेत् कौष्ठिकान् नरान् ।
पामाविचर्चिकादद्रुकण्डूविस्फोटकानि च ।
वलयः पलितं श्यामा नीलं व्यङ्गं तथैव च ।
अभ्यङ्गेन प्रणश्यन्ति सौकुमार्यञ्च जायते ।
प्रथमे वयसि स्त्रीणां यासां नखं प्रदीयते
तासामपि जरां प्राप्य न स्यातां स्खलितौ स्तनौ ।
वलीवर्द्दस्तुरङ्गो वा गजो वा वायुपीडितः ।
त्रिभिरभ्यङ्गने रम्यं भवेत्कामतविक्रमः ।"

ज्योतिष्मती मालकङ्गुनीति लोके । इति महामरिचाद्यं तैलम् । ● ।

"तालकस्य तु पञ्चानि यस्य सन्ति पृथक् पृथक् ।
अभ्रकस्येव तद्ग्राह्यं हरितालं चिकित्सकैः ।
पुनर्नवायाः स्वरसे तालकं तद्विमर्द्दयेत् ।
दिनमेकं ततस्तस्मिन् घनत्वं गमिते सति ।
कुर्व्वीत चक्रिकां तान्तु शोषयेत् सम्यगातपे ।
पुनर्नवासमस्ताङ्गचारैः स्थालीं गलावधि ।
पूरयेच्च ततः क्षारं दृढ़येत् पीड़नेन हि ।
क्षारस्योपरि सां दद्यात् तालकस्य तु चक्रिकाम् ।
तत आच्छादनं दत्वा मुद्रां कृत्वा विशोषयेत् ।
स्थालीं चुल्ल्यां निधायाग्निमन्दं ज्वालयेद्भिषक् ।
निरन्तरमहोरात्रं पचकं तैन सिध्यति ।
स्वाङ्गशीतं समुद्धार्य यत्नीयादसमुत्तमम् ।
तालकेश्वरनामायसुक्तो गुञ्जामितो रसः ।
गुडूच्यादिकषायेण सदानेपान् विनाशयेत् ।
अष्टादशापि कुष्ठानि वातरक्तं तथोद्भटम् ।
क्षिप्रङ्गदेशजं रोगं दुस्तरं च व्यपोहति ।
एतद्भेषजसेवी तु लवणान्नं विवर्ज्जयेत् ।
तथा कटुरसं वह्निमातपं दूरतस्त्यजेत् ।
लवणं यः परित्यक्तुं न शक्नोति कथञ्चन ।
स तु सैन्धवमश्नीयात् मधुरोपरसो हि सः ।"

इति तालकेश्वरो रसः । ● ।

"तालताप्यशिलाक्षतं टङ्कणं सिधुसंयुतम् ।
गन्धार्कौ द्विगुणौ क्षताभ्रलोहाङ्गं प्रमर्द्दयेत् ।
यद्दृढं पुटितं धोरं भूधरे सकलं त्रिदम् ।
षट्पदं द्विपलं ताम्रं लोहभस्म चतुर्यलम् ।

जम्बीराद्विदिनं पृष्टं चिंशद्दंशं विषं क्षिपेत्। अस्य मासदयं खादेन्माक्षिकौघृतसंयुतम्। मध्याग्नेर्बाकुचीबीजैः कर्षं लिह्यात्ततः परम्। तालकेश्वरनामायं सर्वकुष्ठहरो रसः।" अर्कौ मारितं ताम्रम्। इति द्वितीयतालकेश्वरो रसः। *।

"रसो बलिस्तालमयः पुरोऽपि:
ग्लिजातु खादिरतिन्दुकश्च।
वरा च तुल्यं गगनं करञ्ज-
बीजं पृथग्भागचतुष्टयश्च।
संमर्द्य सर्वं मधुना घृतेन
घृतस्य पात्रे निहितं प्रयत्नात्।
कर्षं भजेत् प्रह्वमस्य पथ्यं
ग्राम्योदनं दुग्धमधुव्रतश्च।
विधूर्यकर्णाक्षुलिनासिकोऽपि
भवेदनेन सुरतुल्यमूर्त्तिः।
दारापरित्यागं इह प्रदिष्टो
तिलौदनं तत्र निषद्यते।"

तालमयश्च मारितम्। पुरो गुग्गुलुः। अग्निचित्रकम्। विषतिन्दुकः कुचिला। वरा त्रिफला। रसादि त्रिफलानां सर्वं तुल्यम्। गगनमभ्रकम्। करञ्जबीजञ्च पृथक् चतुर्गुणं रसात्। तच्च कुष्ठे बहुमूत्रे सति तिलौदनमेव पथ्यम्। इति गलत्कुष्ठाधिकारः। इति भावप्रकाशः। *। अथ सर्वव्याधिहरकवचम्।

हरिरुवाच।

"सर्वव्याधिहरं वक्ष्ये वैष्णवं कवचं शिवम्।
येन रक्षा कृता पूर्वं श्वेतं रक्षयतः पुरा।
प्रणम्य देवमीशानमजं नित्यमनामयम्।
देवं सर्वेश्वरं विष्णुं सर्वव्याधिनमथयम्।
वक्ष्याम्यहं प्रतिवरं नमस्कृत्य जनार्दनम्।
अमोघाप्रतिमं सर्वं सर्वदुरितनिवारणम्।
विष्णुर्मामग्रतः पातु पृष्ठो रक्षतु पृष्ठतः।
हरिर्मे रक्षतु शिरो हृदयञ्च जनार्दनः।
मनो मम हृषीकेशो जिह्वां रक्षतु केशवः।
पातु नेत्रे वासुदेवः श्रोत्रे रक्षत्वधोक्षजः।
प्रद्युम्नः पातु मे घ्राणमनिरुद्धश्च चक्षुषी।
वनमाली गलस्थानं श्रीवत्सो रक्षतासुरः।
पार्श्वे रक्षतु मे चक्रं वामं दैत्यनिवारणः।
दक्षिणन्तु गदा देवी सर्वासुरनिवारिणी।
उदरं मुसलं पातु पृष्ठं मे पातु शार्ङ्गभृत्।
ऊरू रक्षतु मे ग्रावाङ्गे रक्षतु नन्दकः।
पार्ष्णी रक्षतु शङ्खश्च पद्मं मे वरदाभयौ।
सर्वकार्यार्थसिद्ध्यर्थं पातु मां गरुडः सदा।
वराहो रक्षतु जले विषमेषु च वामनः।
अटव्यां नरसिंहश्च सर्वतः पातु केशवः।
हिरण्यगर्भो भगवान् हिरण्यं मे प्रयच्छतु।
सांख्याचार्यस्तु कपिलो धातुसाम्यं करोतु मे।
श्वेतद्वीपनिवासी च श्वेतद्वीपं नयत्वजः।
सर्वान् ग्रहान् क्षदयतु मधुकैटभक्षदनः।
विष्णुः सदा विकिरतु विघ्नितं मम वियद्वहात्।
हंसो मत्स्यस्तथा कूर्मः पातु मां सर्वतो दिशम्।
त्रिविक्रमस्तु मे देवः सर्वान् पापान् निहन्तु।
नरनारायणौ देवौ वृद्धिं पाल्यतां मम।
ग्रीवो मे निर्मलं ज्ञानं करोत्वज्ञाननाशनम्।
बलरामो नाशयतु कल्मषं यत् कृतं मया।
पद्मो ददातु परमो सुखं स्वर्गं मम प्रभुः।
दत्तात्रेयः कलयतु सपुत्रपशुबान्धवम्।
सर्वानरीन्नाशयतु रामः परशुना मम।
रघोन्नस्तु दाशरथिः पातु नित्यं महाभुजः।
शून्यं मे समरे हन्याद्रामो यादवनन्दनः।
प्रलम्बकेशिचाणूरपूतनार्कसनाशनः।
ज्ञानस्य यो बालभावः स मे कामान् प्रयच्छतु।
अन्धकारं तमो घोरं पुरुषं ज्ञानपिञ्जलम्।
पश्यामि भयसन्नद्धः पाशहस्तमिवान्तकम्।
ततोऽहं पुष्करीकाक्षमच्युतं शरणं गतः।
धन्योऽहं निर्भयो नित्यं यस्य मे भगवान् हरिः।
स्मृत्वा नारायणं देवं सर्वोपद्रवनाशनम्।
वैष्णवं कवचं बद्ध्वा विचरामि महीतले।
अप्रधृष्योऽस्मि भूतानां सर्वदेवमयो ह्यहम्।
शरबाहुर्वदेवस्य विष्णोरमिततेजसः।
सिद्धिर्भवतु मे नित्यं यथामन्त्रमुदाहृतम्।
यो मां पश्यति चक्षुर्भ्यां यांश्च पश्यामि चक्षुषा।
सर्वेषां पापदृष्टीनां विष्णुर्बध्नाति चक्षुषा।
वासुदेवस्य यच्चक्रं तस्य चक्रस्य ये खराः।
ते छिन्दन्तु च पापं मे मम हिंसन्तु हिंसकान्।
राजसेषु पिशाचेषु कान्तारेष्वटवीषु च।
विवादे राजमार्गेषु द्यूतेषु कलहेषु च।
नदीसन्तरणे घाते संग्रामे प्राणसंशये।
अग्निचौरनिपाते च सर्वभयनिवारणे।
विद्युत्पविषहेतौ रोगेऽथ विग्रहुटे।
जप्यमेतत्पठेन्नित्यं शरीरे भयमागते।
अयं भगवतो मन्त्रो मन्त्राणां परमो महान्।
विख्यातं कवचं गुह्यं सर्वपापप्रणाशनम्।
क्षमायाञ्चतिनिर्माल्यकल्पान्तगूढनो महत्।
अनाद्यन्त जगद्बीज पद्मनाभ नमोऽस्तु ते।
ॐ कालाय स्वाहा। ॐ कालपुरुषाय स्वाहा।
ॐ क्षयाय स्वाहा। ॐ क्षयपुरुषाय स्वाहा।
ॐ चक्षाय स्वाहा। ॐ चक्षपुरुषाय स्वाहा।
ॐ प्रचक्षाय स्वाहा। ॐ प्रचक्षपुरुषाय स्वाहा। ॐ सर्वाय स्वाहा। ॐ सर्वपुरुषाय स्वाहा। ॐ नमो भुवनेशाय त्रिलोकधात्रे हरिटि मिरिटि स्वाहा। ॐ नमो अग्नि वायवे ये ये सत्त्वा या पाञ्चचरा देवा दैत्यदानवराक्षसभूतपिशाचकुष्माण्डापस्मारकोच्छादनज्वरान्धामकाहिकद्वितीयकतृतीयचातुर्थकमौषूत्रिकदिनज्वरराक्षिज्वरसन्धाज्वरसर्वज्वरादीनां लूताकीटकसर्पदूतनासृजङ्गमस्थावरजङ्गमविषादीनामिदं शरीरं ममाप्यपथ्यं भवतु तुभ्यं स्फुटप्रकटोत्कटविकटदंष्ट्रपूर्वतो रक्ष। ॐ हैहै हैहै दिनकर सहस्रकाल ममाग्रतो जय पश्चिमतो रक्ष। ॐ निधि निधि प्रदीप्तज्वलज्ज्वालाकारा महाकपिल उत्तरतो रक्ष। ॐ मिलि मिलि विलि विलि गारुडि गौरि गान्धारि विषमोह विषविषमांगं मोहयतु स्वाहा। दक्षिणतो रक्ष मां अमुकस्य सर्वभूतभयोपद्रवेभ्यो रक्ष रक्ष जय जय विजयते न क्षीयते विप्रश्रवोऽहं कृतवाद्यते। भयरुद्य भयबोभयोऽभयं दिशतु ममास्त्रात् सादनमच्युतः। तद्दरमखिलं विश्वन्तु लोका युगपरिवर्तसहस्रं चयास्त्रमनमिव प्रविशन्ति कलयनो।
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः।
सर्वेश्वरात्मा ग्रन्तु विष्णुर्नारायणो हरिः।"
इत्यादिमहापुराणे गारुडे सर्वव्याधिहरविष्णुकवचं नाम २०० अध्यायः।

व्याधिघातः, पुं, (व्याधेर्घातो यस्मात्।) आरग्वधवृक्षः। इत्यमरः।

व्याधितः, त्रि, (व्याधिः संजातोऽस्येति। तारकादित्वादितच्।) व्याधियुक्तः। तत्पर्य्यायः। आमयावी २ विकृतः ३ अपटुः ४ आतुरः ५ अभ्यमितः ६ अभ्यात्तः ७। इत्यमरः। रोगी ८। इति जटाधरः। (यथा, हितोपदेशे।
"हरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः।")

व्याधिहन्ता, [न्] पुं, (व्याधेर्हन्ता।) वाराहीकन्दः। इति राजनिर्घण्टः। व्याधिघातके, त्रि।

व्याधूतः, त्रि, (वि+आ+धू+क्तः।) कम्पितः। इति शब्दरत्नावली।

व्याधूतः, त्रि, (वि+आ+धू+क्तः।) कम्पितः। इति शब्दरत्नावली। (यथा, गीतगोविन्दे। १।३८।
"उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीड़त्कोकिलकाकलीकलकलैरुद्गीर्णकर्ण-
ज्वराः।")

व्यान:, पुं, (व्यानिति सर्वशरीरं व्याप्नोतीति। वि+आ+अन+अण्।) शरीरस्थपञ्चवायुन्तर्गतसर्वशरीरगवायुः। इत्यमरः। इमे प्राणादयः पञ्चवायवः शरीरे तिष्ठन्ति ते च नियतस्थानस्थाः। यदाहुः।
"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः।
उदानः कण्ठदेशे च व्यानः सर्वशरीरगः।"
इति।

एवं तद्व्यापारोऽपि यथा,—
"अन्नप्रवेशनं सूत्रात्मुत्सर्गोऽन्नविपाचनम्।
भावयादि निमेषादि तद्व्यापाराः क्रमादमी।"
इति भरतः।
श्रीधरस्वामिमते तत्कर्म्म। आयनम्। आकुञ्चनप्रसारणादि। अन्यच्च।
"व्यानो व्यानयते नित्यं सर्वव्याधिप्रकोपनः।
महारुजतनुग्लानी रागोपादानकारणः।
च चाक्षिकर्णयोर्मध्ये कण्ठा वै शुक्लयोरपि।
ग्रीवे गले स्त्रियुदेशे तिष्ठत्यत्र निरन्तरम्।
स्कन्धयुग्मधरं वक्षं गात्रचेष्टाप्रकोपनः।"
इति शारदातिलकटीका।

व्यापकः, त्रि, (वि+आप्+ण्वुल्।) विशेषेणाप्नोति यः। तद्भिन्नाभावाप्रतियोगी।

यथा,—
"साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा।
स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्शितः।"
इति भाषापरिच्छेदः।

आच्छादकः। यथा,—
"पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम्।
अयाख्यागम्यमित्येवमुत्तरं तद्विदो विदुः।"
पक्षस्य भावार्थस्य व्यापकं आच्छादकं अभियोगाप्रतिकूलमिति यावत्। इति जयपद्धारतत्त्वम्। (यथा, कुमारसम्भवे। ६। ७१।
"तिर्यग्गूर्ध्वमधश्चाप व्यापको महिमा हरेः।")

व्यापकन्यासः, पुं, शिरसः पादान्तं पादतः शिरोऽन्तं मूलमन्त्रविन्यासः। यथा।
"आदाङ्घ्रादिको न्यासः करशुद्धिस्ततः परम्।
अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च॥
तालत्रयञ्च दिग्बन्धः प्रणायामस्ततः परम्।
ध्यानं पूजा जपश्चैव सर्वत्रैवेदृशं विधिः॥"
इति तन्त्रसारः।

प्रपञ्चस्तु न्यासशब्दे द्रष्टव्यः।

व्यापत्, स्त्री, विपूर्व्वाद्पूर्व्वपद्धातोः क्विप्प्रत्ययेन निष्पन्नमेतत्। हन्तुः। आपत्। (यथा, कथासरित्सागरे। २६। १०६।
"यच्च चक्रुस्तदा व्यापदिहापि फलिता मम।")

व्यापनं, क्ली, (वि+आप+ल्युट्।) आच्छादनम्। व्याप्तिः। यथा। अत्र लक्षणसमन्वयश्च रवेरुदये भवति यदा तन्मासतत्पूर्व्वमासान्यतरयोरेकराश्यवस्थितस्य तन्मासान्तरमेव राश्यन्तरसंयोगः न त्वेकराश्यितस्य मासव्यापनमात्रम्। इति मलमासतत्त्वम्।

व्यापन्नः, त्रि, (वि+आ+पद+क्तः।) नष्टः। इति हेमचन्द्रः।

व्यापादः, पुं, (वि+आ+पद+घञ्।) दोषचिन्तनम्। इत्यमरः। (यथा, राजतरङ्गिण्याम्। ८। २१११।
"इत्युदीर्य नृपः सुप्ते सञ्जौ व्यापादसिद्धये।")

व्यापादनं क्ली, (वि+आ+पद+णिच्+ल्युट्।) मारणम्। इति हेमचन्द्रः। (यथा, मार्कण्डेये। २९। ३२।
"अतीते च दिने बालामालव्यापादनोद्यताम्।
सुरभिः प्राह गायं त्वां प्राप्यते दानवाधमः॥")
परानिष्टचिन्तनम्। इत्यमरटीकायां रामाश्रमः।

व्यापादितः त्रि, (वि+आ+पद+णिच्+क्तः।) मारितः। यथा,—
"एका वेदद्रुमः शापि दैवाद्व्यापादिता भवेत्।
पादं पादञ्च हस्ताभ्यारेयुक्ते पृथक् पृथक्॥"
इति प्रायश्चित्ततत्त्वधृतसम्वर्त्तवचनम्।

व्यापिका, स्त्री, (व्यापक+टाप् अत इत्वम्।) व्यापिनी। यथा,—
"अधर्म्मपत्नी मिथ्या सा सर्व्वभूतैश्च पूजिता।
यया विना जगत्सर्व्वं मृतकप्रायं विधिनिर्म्मितम्॥
सत्ये चादर्शनं या च क्रोधायां कलहरूपिणी।
अदृष्टविषयरूपा च द्वापरे संहृता मिया॥
कलौ महाप्रमत्ता च सर्व्वत्र व्यापिका भवेत्।
कपटेन समं भ्राता भ्रमत्येव गृहे गृहे॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः।

व्यापारः, पुं, (वि+आ+पृ+घञ्।) कर्म्म। यथा,—
"स्यात् प्राक्तवियोगजनको व्यापारो हननं स्मृतम्।
रागाद्यभावात् प्रमादाद्वा मतः परत एव वा॥"
इति प्रायश्चित्ततत्त्वधृताग्निपुराणवचनम्।
(साहाय्यम्। इति मेदिनीकोषः। यथा, कुमारे। ६। ३२।
"आर्य्याप्यवन्ध्यतां तत्र व्यापारं कर्त्तुमर्हति।
प्रायेणैवंविधे कार्य्ये गुरुपत्नीर्व्रतं मता॥")
तत्सम्बन्धे सति तत्सम्बन्धकः। इति न्यायाभ्रमः। यथा, भाषापरिच्छेदे।
"विषयेन्द्रियसंयोगो व्यापारः सोऽपि षड्विधः॥")

व्यापारी, [न्] त्रि, (व्यापारोऽस्यास्तीति। व्यापार+इनिः।) व्यापारविशिष्टः। व्यवसायी। यथा,—
"व्यालग्राहोद्विद्यापारी रसादिविक्रयी च यः।
स याति नागवेश्मेव नागैर्वेष्टित एव च॥"
इति ब्रह्मवैवर्त्तपुराणम्।

व्यापी, [न्] पुं, (व्याप्नोति सर्व्वमिति। वि+आप+णिनिः।) विष्णुः। यथा,—
"स्वप्नः स्वयं व्यापी नैकात्मा नैककर्म्मकृत्।"
इति महाभारते।
तस्य सहस्रनामस्तोत्रे। १३। १४८।६३। त्रि, व्यापकः। यथा,—
"विश्वम्भरव्यापिनी या तु सैव पूज्या सदा तिथिः।
न तत्र युग्मादरणमन्यत्र हरिवासरात्॥"
इति तिथ्यादितत्त्वधृतपराशरवचनम्।

व्याप्तः, पुं, (वि+आ+पृ+क्तः।) कर्म्मसचिवः। यथा,—
"नियोगी कर्म्मसचिव आयुक्तो व्याप्तवच्च सः॥"
इति हेमचन्द्रः।

व्यापारयुक्ते, त्रि। वि-आङ्-पूर्व्व-पृ-धातोः क्तप्रत्ययेन निष्पन्नः। (यथा, उत्तरचरिते। १।
"व्याप्तिपवित्रितभुवनस्य व्याप्तैकैकदोष्णो-
रविदितगतयामा रात्रिरेव वरंवीत्॥")

व्याप्तं, त्रि, (वि+आप्+क्तः।) सम्पूर्णम्। तत्पर्य्यायः। पूर्णम् २ आचितम् ३ ह्रस्तम् ४ पूरितम् ५ भरितम् ६ निचितम् ७। इति हेमचन्द्रः। (यथा, गीतायाम्। ११। २०।
"द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्व्वाः॥")
ख्यातम्। समाक्रान्तम्। इति मेदिनी। ख्यापितम्। यथा। प्राप्तं प्रसिद्धिते समे इत्यत्र व्याप्तमपि पाठः। इत्यमरटीकायां रायमुकुटः।

व्याप्तिः, स्त्री, (वि+आप्+क्तिन्।) व्यापनम। (यथा, भागवते। ७। ८। १७।
"सत्यं विधातुं निजभृत्यभाषितं
व्याप्तिञ्च भूतेषु खिलेषु चात्मनः॥")
रम्भः। इति मेदिनी। रम्भस्थाने लम्भनमिति हेमचन्द्रः पाठः। शिवस्याष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः। यथा,—
"अणिमा लघिमा व्याप्तिः प्राकाम्यं महिमेशिता।
वशित्वमीशावसायित्वे ऐश्वर्य्यमष्टधा स्मृतम्।"
इति शब्दमाला। ७।
व्यायमते साध्यवदन्याहृत्तित्वम्। यथा। अग्न्याभावस्थाने धूमस्यावर्त्तमानत्वम्। इयं अन्वयव्याप्तिः। अस्या ज्ञानं प्रति व्यभिचारज्ञानाभावः सहचारज्ञानञ्च कारणम्। एवं साध्याभावव्यापकीभूताभावप्रतियोगित्वम्। इयं व्यतिरेकव्याप्तिः। अस्या ज्ञानं प्रति साध्याभाव एवं हेत्वभावस्य सहचारज्ञानं व्यभिचारज्ञानाभावश्च कारणं तत्र प्रमाणम्।
"व्याप्तिः साध्यवदन्यस्मिन्नसत्त्वस्य उदाहृतः।
अथवा हेतुमद्भिन्नविरहाप्रतियोगिता।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते।
व्यभिचारस्याग्रहेऽपि सहचार्यग्रहस्तथा।
हेतुर्व्याप्तियुते तर्कः क्वचित् ग्रहणिवर्त्तकः।
द्वैविध्यन्तु भवेद्व्याप्तेरन्वयव्यतिरेकतः।
अन्वयव्याप्तिरुक्तैव व्यतिरेकादथोच्यते।
साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत्।"
इति भाषापरिच्छेदः।

व्याप्तिकर्म्मा, [न्] पुं, (व्याप्तिर्विशिष्टं कर्म्म यस्य।) व्यापनक्रियाविशिष्टः। सर्व्वत्र व्याप्नुवन्। तद्वैदिकपर्य्यायः। व्नुवति १ नुवति २ आनाशः ३ आनट् ४ आष ५ आपानः ६ अश्नुवत् ७ नशत् ८ आनशे ९ अश्नुते १०। इति दश व्याप्तिकर्म्माणः। इति वेदनिघण्टौ २ अध्याये। १८।
व्याप्यं, क्ली, (व्याप्यते इति। वि+आप्+ण्यत्।) साधनम्। यथा। व्याप्यं लिङ्गञ्च साधनम्। इति सङ्केतवर्म्मे त्रिकाण्डशेषः। कुङ्कुमम्। इत्यमरः।
व्याप्यः, त्रि, (वि+आप्+ण्यत्।) व्याप्तिविशिष्टः। व्यापनीयः। यथा,—
"प्रख्यातं ते कुलिशकठिनाग्निचिते पक्षितायेऽचिन्तेऽस्माकं तदपि रमते यादि यादीति वाणी।
अप्रामाण्यं कथयति सदा सन्दहत्नोर्विरोधी
व्याप्यज्ञानाद्व्रजकुलसुतां व्यापकस्याग्निहोत्रौ।"
इति पदाङ्कदूतः।
(यथा, भागवते। ७। ६। २२।
"ब्रह्मणात्मस्वरूपेण त्रिरूपेणात्मनेऽनघ।
व्याप्त्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः॥")

व्यामः, पुं, (विशेषेण अञ्चतेऽनेनेति। अञ्च गतौ+घञ्।) तिर्य्यक्पार्श्वे ततयोः बाहुत्वयोर्बाह्वोरन्तरम्। वेँउ इति भाषा। व्यामीयतेऽनेन व्यामः करणे घञ्। व्यामो बाहुप्रमाणे स्यात्। इत्यमरभरतौ। "व्यामव्यायामन्यग्रोधाश्चिभैकवाङ्

प्रसारितौ।" इति हेमचन्द्रः। (यथा, महाभारते। ३। १९। ३८।
"ततो भीमो महाबाहुराददे तरसा द्रुमम्। दण्डायाममथोद्धृत्य निष्पत्रमकरोत् तदा।")
आयामनं, क्ली, (वि+आ+यम+ल्युट्।) आमः। इति त्रिकाण्डशेषः।
आमिश्र, त्रि, (वि+आ+मिश्र+घञ्।) संमिलितम्। भिन्नविषयाणामेकीभावकरणम्। यथा,—
"आमिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे। तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्।"
इति श्रीभगवद्गीतायाम्। ३। २।
क्वचित् कर्म्मप्रशंसा क्वचित् ज्ञानप्रशंसा दृश्यते तेनैवं वामिश्रं सन्देहोत्पादकमिव यदाक्यं तेन मे मतिसुभयत्र दोलायितां कुर्व्वन् मोहयसीव। इति तट्टीकायां श्रीधरस्वामी॥
आयत, त्रि, (विशेषेण आयतम्।) आहृतम्। दैर्घ्यम्। (यथा, आकुन्तले। २।
"अपक्वितमपि गात्रं आयतत्वादलक्ष्यं। गिरिचर इव नागः प्रांशुसारं बिभर्त्ति।")
दृढ़म्। अतिशयः। इति मेदिनी।
आयाम, पुं, (वि+आ+यम+घञ्।) पौरुषः। (यथा, महाभारते। ४। ३८। ७।
"आयामसहमत्यर्थं हस्तिराजसमं महत्। सर्व्वायुधमहामात्रं शूरशब्दावकारकम्।")
श्रमः। (यथा, महाभारते। १। १७६। ६।
"आयामकर्षितः सोऽथ स्रंसिपृष्ठः पिपासितः। आजगाम नरश्रेष्ठ वशिष्ठस्याश्रमं प्रति।")
विषमः। दुर्गसञ्चारः। इति मेदिनी। आमः। इति हेमचन्द्रः। मल्लक्रीड़ा। कुस्ती इति पारस्य भाषा। (यथा, महाभारते।१२।२१।७।
"अन्ये साम प्रशंसन्ति आयाममपरे जनाः।")
अस्य गुणादि यथा,—
"आयामो हि सदा पथ्यो बलिनां स्निग्ध-भोजिनाम्।
स च प्रीते वसन्ते च तेषां पथ्यतमः स्मृतः॥
सर्व्वेष्वृतुषु सर्व्वैर्हि शूरैरात्महितार्थिभिः। श्रमार्द्देन तु कर्त्तव्यो आयामो हन्यतो यथाम्।
कुक्षौ ललाटे ग्रीवायां यदा घर्म्मः प्रवर्त्तते। श्रमार्द्दं तं विजानीयादायतोच्छ्वासमेव च।
लाघवं कर्म्मसामर्थ्यं स्थैर्य्यं क्लेशसहिष्णुता। दोषक्षयोऽग्निवृद्धिश्च आयामादुपजायते।
आयामं कुर्व्वतो नित्यं विरुद्धमपि भोजनम्। विदग्धमविदग्धं वा निर्द्दोषं परिपच्यते।
न स आयामसदृशमन्यत् स्थौल्यापकर्षणम्। न च आयामिनं मर्त्यं मर्द्दयन्त्यरयो बलात्।
न चैनं सहसाक्रम्य जरा समधिरोहति। आयामसुखगात्रस्य प्रह्लादसुदृशस्तथा च।
आधयो नोपसर्पन्ति वैनतेयमिवोरगाः॥
रक्तपित्तं तथा ग्लानिः कासो नासो व्यतासुरः। मुक्तवान् स्थौल्य च स्थौल्यं आयामं परिवर्जयेत्।
वातपित्तामयी कासो ह्रस्वोऽल्पौजो न संत्यजेत्।
अतिव्यायामतः कासो रक्तपित्तं प्रजायते।
श्रमः क्षमः क्षयस्तृष्णा स्वरभङ्गश्च जायते॥"
इति राजवल्लभः।
आयोगः, पुं, (वि+आ+युज+घञ्।) दृश्यविशेषरूपकाङ्गतरूपकविशेषः। यथा,—
"स्यान्नाटकं प्रकरणं भाणः प्रहसनं डिमः। आयोगः समवाकारो व्यायोगेहामृगा इति।
अभिनेयप्रकाराः स्युर्भाषाः षट् संस्कृतादिकाः॥"
इति हेमचन्द्रः।
(तल्लक्षणं यथा, साहित्यदर्पणे। ६। ५१४।
"ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः। हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः॥
एकाङ्कश्च भवेदस्मिन्निमित्तसमरोदयः। कौशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः॥
राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः। हास्यशृङ्गारशान्तेभ्य इतरेऽङ्गिनो रसाः॥")
आलः, पुं, (विशेषेण आसमन्तात् अलतीति। अल पर्य्याप्तौ+अच्।) सर्षपः। चापटः। इत्यमरः। (यथा, मनुः। ९। ४३।
"पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः। रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः॥")
दुष्टगजः। इति मेदिनी। (यथा, माघे।१२।२८।
"आलद्विपा यत्नभिरुन्मदिष्णवः कथञ्चिदारादपनेन निर्ययुः।")
चित्रकः। व्याघ्रः। इति राजनिर्घण्टः। राजा। इत्यमरटीकायां मथुरेशः॥
व्याल, त्रि, (वि+आ+अल+अच्।) ग्रहः। छूर्त्तः। इति जटाधरः॥
आलक, पुं, (आल एव। स्वार्थे कन्।) दुष्टगजः। तत्पर्य्यायः। गम्भीरवेदी २ अकुण्ठदुर्द्धरः ३ व्यालकः ४। इति त्रिकाण्डशेषः। (चापटः। यथा, महाभारते।१३।११९।८५।
"आयते व्यालकश्चापि मासं तस्मात्तु मानुषः॥")
आलकङ्कटः, पुं, आलनखः। इति राजनिर्घण्टः।
आलगन्धा, स्त्री, (आलस्येव गन्धो यस्याः।) नाकुली। इति राजनिर्घण्टः।
आलग्राहः, पुं, (व्यालं ग्रहातीति। व्याल+ग्रह+अच्।) व्यालग्राही। इत्यमरटीकायां भरतः। (यथा, मनुः। ८। २६०।
"व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः॥")
व्यालग्राहिन्, [न्] पुं, (व्यालं ग्रहातीति। ग्रह+णिनिः।) भिक्षार्थं सर्पधारी। सपुड़िया इति वादिया इति च भाषा। तत्पर्य्यायः। अहितुण्डिकः २। इत्यमरः। जाङ्गुलिः ३ जाङ्गलिः ४ आहितुण्डिकः ५ व्यालग्राहः ६ गारुड़िकः ७ विषवैद्यः ८। इति शब्दरत्नावली।
आलजिह्वा, स्त्री, (आलस्य जिह्वेव आकृतिर्यस्याः।) महाबलमूला। इति राजनिर्घण्टः। (आलजिह्वा च।)
आलदंष्ट्रः, पुं, (आलस्य दंष्ट्रेव आकृतिर्यस्य।) गोक्षुरः। इति राजनिर्घण्टः॥
आलनखः, पुं, (आलस्य नख इव आकृतिर्यस्य।) गन्धद्रव्यविशेषः। वघ्नहा इति हिन्दी भाषा। तत्पर्य्यायः। कूटस्थः २ चक्रनायकः ३ चक्री ४ चक्रनखः ५ आम्रफलः ६ आम्रनखः ७ द्वीपिनखः ८ खपुरः ९ व्यालपाणिजः १० व्यालायुधः ११ व्यालबलः १२ व्यालखड्गः १३। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। कफापत्यत्वम्। कफवातकुष्ठकण्डूव्रणनाशित्वम्। वर्ण्यत्वम्। सौगन्ध्यप्रदत्वञ्च। इति राजनिर्घण्टः॥
व्यालपत्रा, स्त्री (व्यालानि तीक्ष्णानि पत्राणि यस्याः।) एरण्डः। इति राजनिर्घण्टः॥
व्यालबल, पुं, व्यालनखः। इति राजनिर्घण्टः॥
व्यालमृग, पुं, (व्यालो हिंस्रो मृगः पशुः।) सिंहव्याघ्रः। चिता बाघ इति भाषा। इति महाभारते राजधर्म्मः॥ (यथा, महाभारते। ३। १६६। ३।
"रथनेमिस्वनश्चैव वरूथाग्रञ्च भारत!। पृथक् व्यालमृगाश्चाथ पक्षिणामिव सर्व्वशः॥")
व्यालय, पुं, (विशेषेण आलयते इति। वि+आ+लय+अच्।) रक्तैरण्डः। इति वैद्यकम्। (लयमाने, त्रि। यथा, महाभारते। ७। ८८। १०।
"व्यालयन्तस्तान् संवहान् सपत्नानिव पर्व्वते॥")
व्यालायुध, क्ली, (व्यालस्यायुधं नख इव आकृतिर्यस्य।) गन्धद्रव्यविशेषः। इत्यमरटीकायां मथुरेशः॥
व्यालायुध, पुं, (व्यालस्यायुधमिवाकृतिर्यस्य।) व्यालनखः। इति राजनिर्घण्टः॥
व्यावक्रोशी, स्त्री, (वि+अव+क्रुश+"कर्म्मव्यतिहारे णच् स्त्रियाम्।" ३। ३। ४३। इति णच्। ततः "णचः स्त्रियामञ्।" ५। ३। ९४। इति स्वार्थे अञ्। "न कर्म्मव्यतिहारे। ७। ३। ६। इति ऐच्-प्रतिषेधः। स्त्रियां ङीप्।) परस्पराक्रोशनम्। इति औणादिकसंग्रहटीकायां भरतः॥
व्यावभाषी, स्त्री, (वि+अव+भाष+णच्। स्वार्थे अञ्। ङीप्।) व्यावक्रोशी। इत्यमरटीकायां रायमुकुटः॥
व्यावर्त्तः, पुं, (वि+आ+वृत्+घञ्।) नाभिकण्टकः। इति शब्दरत्नावली। तत्र व्यावर्त्तकोऽपि पाठः॥
व्यावहारी, स्त्री, (वि+अव+हृ+णच्। स्वार्थे अञ्। ङीप्।) परस्परहरणम्। इत्यमरटीकायां भरतः॥
व्यावहासी, स्त्री, (वि+अव+हस+णच्। स्वार्थे अञ्। ङीप्।) परस्परहसनम्। इत्यमरटीकायां भरतः॥
व्याहृत, त्रि, (वि+आ+हृ+क्तः।) उक्तः। यथा। हते तु हनुमद्व्याहृतौ। इति हेमचन्द्रः। आहूतश्च। (प्रतिनिहतः। यथा, रघुः।१।२७।
"व्याहृता बत्सरेणेयं मुनेः कामदुघा क्षितिः।")

व्याहृत्तिः, स्त्री, (वि+आ+हृत्+क्तिन्।) खण्डनम्। यथा,—
"अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः।
पदे त्वर्वाचीने पतति न मनः कस्य न वचः।"
इति महिम्नस्तोत्रम्।
व्याहृत्तिः। यथा। सर्वसपक्षव्याहृत्तिरेव हेतोर्न विपक्षव्याहृत्तिरपि तस्यानुगुणत्वात्। इति चिन्तामणौ अवयवप्रकरणम्।
व्यासः, पुं, (वि+अस्+घञ्।) विस्तारः। इत्यमरः। (यथा, महाभारते। १। १। ५१।
"विस्तीर्यैतन्मह‌ज्ज्ञानमृषिः संक्षिप्य चाब्रवीत्।
इदं हि विदुषां लोके समासव्यासधारणम्।"
"समासः संक्षेपः व्यासो विस्तारः।" इति तट्टीका।) भागभेदः। इति शब्दरत्नावली। पाठकक्रमाङ्कः। यथा, नैयतकालिकतत्पतरौ भविष्यपुराणम्।
"विसृष्टमृतं ग्राम्यं सदाचरपदं तथा।
कलस्वरसमायुक्तं रसभावसमन्वितम्।
बुध्यमानः सदर्थं वै यत्यार्थं कृतलक्षो नृप।
ब्राह्मणादिषु सर्व्वेषु यत्यार्थं चार्पयेन्नृप।
य एवं वाचयेद्ब्रह्मन् स विप्रो व्यास उच्यते।"
इति तिथ्यादितत्त्वम्।
गोलस्य मध्यरेखा। यथा,—
"व्यासे भनन्दाग्निहते विभक्ते
खबाणसूर्यैः परिधिस्तु सूक्ष्मः।
द्वाविंशतिघ्ने विहृतेऽथ शैलैः
स्थूलोऽथवा स्याद्व्यवहारयोगः।"
उदाहरणम्।
"विष्कम्भमानं किल यत्र सप्त
तत्र प्रमाणं परिधेः प्रचक्षु।
द्वाविंशतिर्यत्र परिधिप्रमाणं
तद्व्यासखण्डा च सखे विचिन्त्य।"
इति लीलावती।
(व्यास्यति वेदानिति। वि+आ+अस्+अच्।) मुनिविशेषः। तस्य पर्य्यायो वेदव्यासश्चब्दे द्रष्टव्यः। (अस्य निरुक्तिर्यथा महाभारते। १। १०५। १४।
"यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः।
लोके व्यासत्वमापेदे काव्यात् कृष्णत्वमेव च।")
स च सत्यवत्यां कन्याकाले पराशरात्। श्रीकृष्णस्य पञ्चकलोद्भवः। यथा,—
"व्यासः पुराणमुक्त्वा पप्रच्छ वाल्मिकिं यदा।
मौनीभूतः स संसार त्वामेव जगदम्बिकाम्।
तदा चकार सिद्धान्तं त्वद्वरेण मुनीश्वरः।
संप्राप निर्मलं ज्ञानं भ्रमान्धध्वंसदीपकम्।
पुराणसूत्रं श्रुत्वा स व्यासः पञ्चकलोद्भवः।
त्वां विधिवे प्रदध्यौ च मूलवर्णेन पुष्करे।
तदा त्वतो वरं प्राप्य स कवीन्द्रो बभूव ह।
तदा वेदविभागञ्च पुराणञ्च चकार ह।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४ अध्यायः।
तस्य जन्मान्तरं यथा,—
"अथ भूयो जगत्सृष्टा भोः शब्देनाप्युवाद यत्।
सरस्वतीमुवचार तत्र सारस्वतोऽभवत्।
अपान्तरतमा नाम मुनी वाक्सम्भवः प्रभुः।
भूतभव्यभविष्यज्ञः सत्यवादी दृढव्रतः।
तमुवाच नतं ब्रह्मा देवानामादिरव्ययः।
वेदाख्याने श्रुतिः कार्य्या यथा मतिमतां वर।
तस्मात् कुरु यथाशास्त्रं ममेतद्वचनं मुने।
तेन भिन्नास्तदा वेदा मनोः स्वायम्भुवेऽन्तरे।
ततस्तुतोष भगवान् हरिस्तेनास्य कर्म्मणा।
तपसा च सुतप्तेन यमेन नियमेन च।
मन्वन्तरेषु पुत्रत्वमेवमेवं प्रपद्यतः।
भविष्यत्कल्पो ब्रह्मन्नप्रधृष्यश्च नित्यशः।"
इति महाभारते मोक्षधर्म्मः।
अन्यच्च।
"सुतं त्वजनयच्छक्तेरदृश्यन्ती पराशरम्।
काली पराशरात् जज्ञे कृष्णद्वैपायनं मुनिम्।
द्वैपायनादरण्यां वै शुको जज्ञे गुणान्वितः।"
इति वह्निपुराणे प्रजापतिसर्गो नामाध्यायः।
युगभेदे व्यासभेदो यथा,—
"यस्मिन्मन्वन्तरे व्यासा ये ये तांस्तान्निबोध मे।
यथा च भेदः व्यासानां व्यासेन क्रियते मुने।
अष्टाविंशतिरुक्तो वै वेदो व्यासो महर्षिभिः।
वैवस्वतेऽन्तरे त्वस्मिन् द्वापरेषु पुनः पुनः।
वेदव्यासा व्यतीता ये अष्टाविंशतिसत्तमाः।
चतुर्धा वेदः कृतो वेदो द्वापरेषु पुनः पुनः।
द्वापरे प्रथमे व्यासः स्वयं वेदः स्वयम्भुवा।
द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः।
तृतीये चोशना व्यासश्चतुर्थे तु बृहस्पतिः।
सविता पञ्चमे व्यासो मृत्युः षष्ठे स्मृतः प्रभुः।
सप्तमे च तथैवेन्द्रो वशिष्ठश्चाष्टमे स्मृतः।
सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः।
एकादशे वै त्रिवृषो भारद्वाजस्ततः परम्।
त्रयोदशे चान्तरीक्षो धर्म्मो वापि चतुर्दशे।
अत्यरुचः पञ्चदशे सोमशुष्मस्तु षोडशे।
नृतञ्जयः सप्तदशे ऋक्षवान्ह्यष्टादशे स्मृतः।
ततो व्यासो भरद्वाजो भरद्वाजात्तु गोतमः।
गोतमादुत्तमो व्यासो हर्य्यात्मा योऽभिधीयते।
अथ हर्य्यात्मजो वेदः स्मृतो वाजश्रवास्तु यः।
सोमो सुत्यायनस्तस्मादृक्षविन्दुरिति स्मृतः।
ऋक्षोभूद्भार्गवस्तस्माद्वाल्मीकिर्योऽभिधीयते।
तस्मादस्मत्पिता शक्तिर्व्यासस्तस्मादहं सुने।
जातुकर्ण्योऽभवत्तस्मात् कृष्णद्वैपायनस्ततः।
अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः।
एको वेदश्चतुर्धा तु तैः कृतो द्वापरादिषु।
भविष्ये द्वापरे चापि त्रैविद्यर्षिर्भविष्यति।
व्यतीते मम पुत्रोऽस्मिन् कृष्णद्वैपायने मुनौ।"
इति विष्णुपुराणे ३ अंशे ३ अध्यायः।
कूर्म्मपुराणे तिथ्यादि विशेषः। द्वादशे द्वापरे श्वेतवेगाः। त्रयोदशे धर्म्मः। चतुर्दशे तुरङ्गः। पञ्चदशे व्योमयः। षोडशे ऋतञ्जयः। एकविंशे राजश्रवाः। द्वाविंशे शुष्मायणः। त्रयोविंशे ऋक्षविन्दुः। चतुर्व्विंशे वाल्मीकिः। पञ्चविंशे विष्णुः। अन्यत् विष्णुपुराणवत्। (एतद्विवरणञ्च देवीभागवते १ स्कन्धे ३ अध्याये च द्रष्टव्यम्।)
व्यासक्तः, त्रि, (वि+आ+सञ्ज+क्तः।) विशेषेणासक्तः। संलग्नः। यथा,—
"व्याकोषेन्दीवराभा कनकपरिलसत्पीतवासाः सुहासा
वर्हैरत्नप्रकाण्डैर्ललयितचिकुरा चारुकर्णावतंसा।
अंसव्यासक्तवंशध्वनिसुखितजगद्वल्लवीलक्षसंख्या
मूर्त्तिर्गोपस्य विष्णोरवतु जगति नः सुन्दरा चारुहारा।"
इति छन्दोमञ्जरी।
व्यासङ्गः, पुं, विशेषेण आसङ्गः। वि-आङ्-पूर्ब्बसृजधातोर्घञ्प्रत्ययेन निष्पन्नमेतत्।
व्यासमाता, [ऋ] स्त्री, (व्यासस्य माता।) वेदव्यासजननी। इति त्रिकाण्डशेषः। तत्पर्य्यायः। सत्यवती १ वासवी २ गन्धकालिका ३ योजनगन्धा ४ दाशेयी ५ मौलंकायनजीवनः ६। इति हेमचन्द्रः। अन्यान्तरे प्राजङ्कायनजा इति च पाठः। काली ७ भगोदरी ८ विचित्रवीर्य्यसूः ९ चित्राङ्गदसूः १० योजनगन्धिका ११। इति त्रिकाण्डशेषः। गन्धकाली १२ सत्या १३ दाशनन्दिनी १४। इति शब्दरत्नावली।
व्यासिद्धः, त्रि, (वि+आ+सिध+क्तः।) निषिद्धः। इति मिताक्षरा।
व्याहृतः, त्रि, (वि+आ+हृ+क्तः।) विशेषेणाहृतः। व्यर्थः। यथा। सुप्तव्याघ्रसमप्रसार्येन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् तेषामपदेशाज्ञानविशेषाद्या व्याहृतत्वादहेतुः। इति गोतमसूत्रे प्रत्यक्षपरीक्षाप्रकरणम्। अपि च।
"अव्याहृताः सर्व्वासु यः सदा देवयोनिषु।
निर्ज्जिताखिलदैवारिः स यदाह ब्रह्मतत्।"
इति देवीमाहात्म्यम्।
व्याहारः, पुं, (वि+आ+हृ+घञ्।) वाक्यम्। इत्यमरः। (यथा, हरिवंशे। ३६। ७१।
"त्वमिरस्मिन्नवसरप्रवेशनं मन्दिरेषु मरकाय।
पशुपालव्याहारे कृपणत्वमुन्निवचनीयम्।")
व्याहृतिः, स्त्री, (वि+आ+हृ+क्तिन्।) व्याहारः। मन्त्रविशेषः। यथा,—
"ॐकारमादितः कृत्वा व्याहृतिसदनन्तरम्।
ततोऽधीयीत सावित्रीमेकाग्र्यश्रद्धयान्वितः।
पुराकल्पे समुत्पन्ना भूर्भुवःस्वःसनातनाः।
महाव्याहृतयस्तिस्रः सर्व्वाद्यभिगवर्द्धनाः।
प्रधानपुरुषः कालो ब्रह्मविष्णुमहेश्वराः।
सत्त्वं रजस्तमश्चैव क्रमाद्व्याहृतयः स्मृताः।

ओङ्कारस्तत्परं ब्रह्म सावित्री स्यात्तदक्षरम्।
एव मन्त्रो महाभाग सारात्सार उदाहृतः॥"
इति कौर्मे उपविभागे १३ अध्यायः॥
(वाक्यम्। यथा, कुमारसम्भवे। १। ६३।
"न हीश्वरव्याहृतयः कदाचित्
पुष्णन्ति लोके विपरीतमर्थम्॥")

व्युतः, त्रि, (वि+वे+क्तः।) सूतम्। इति भरतहिरूपकोषः॥

व्युतिः, स्त्री, (वि+वे+क्तिन्।) ऊतिः। तन्तुसन्ततिः। इति भरतहिरूपकोषः॥

व्युत्क्रमः, पुं, (वि+उत्+क्रम+घञ्।) क्रमविपर्य्ययः। व्यतिक्रमः। तत्पर्य्यायः। उत्क्रमः २ अक्रमः ३। इति हेमचन्द्रः॥ (यथा, साहित्यदर्पणे। १०।
"यद्येतत् कथितञ्चपल रे का त्वराहं कुमारी
हस्तग्राहं वितर हरहरा व्युत्क्रमः क्वासि
यासि॥")

व्युत्थानं, क्ली, (वि+उत्+स्था+ल्युट्।) स्वातन्त्र्यलाभः। विरोधाचरणम्। इति मेदिनी॥
(यथा, महाभारते। १४। २६। १६।
"एवं ते द्रविडाभीरा पुलिन्दाश्च नरेश्वर।
वृषलत्वं परिगता व्युत्थानात् क्षत्रधर्म्मिणः॥")
प्रतिरोधनम्। समाधिपारणम्। इति हेमचन्द्रः। वृत्तभेदः। इति ग्रन्थरत्नावली॥ विशेषेणोत्थानञ्च। (चित्तस्यावस्थाविशेषः। इति पातञ्जलदर्शनम्॥)

व्युत्पत्तिः, स्त्री, (वि+उत्+पद्+क्तिन्।) विशेषेणोत्पत्तिः। संस्कारः। इति व्युत्पन्नग्रन्थार्थदर्शनात्। यथा। ग्रन्थकालबोधनीयत्वेन ग्रन्थारम्भपदव्युत्पत्तेस्तु पदं तालव्यादि सारं दन्तास्तीति व्युत्पत्तिस्तु काल्पनिकी। इति तिथ्यादितत्त्वम्॥ अभिज्ञानम्। यथा। अवधारादिबाधकं विना विवरणादपि व्युत्पत्तेः। बाधकं विना स्वसाध्यस्य बाधकं यद्विशेषणं तदभावस्तद्विशेषणसहकारेण व्युत्पत्तेः व्युत्पत्तिसम्भवात् अभिज्ञसम्भवादिति यावत्। इति आख्यातवादस्य माधुरी टीका॥

व्युत्पन्नः, त्रि, (वि+उत्+पद्+क्तः।) संस्कृतः। इति हेमचन्द्रग्रन्थरत्नावल्यौ॥ व्युत्पत्तियुक्तः। यथा। व्याकरणव्युत्पन्नग्रन्थज्ञानाधीनं शास्त्रान्तरज्ञानं तदधीना च वैदिकक्रिया ततफलं स्वर्गादि। इति सुग्धबोधटीकायां दुर्गादासः॥

व्युत्पादकः, त्रि, (विशेषेणोत्पादयति ज्ञानम्। वि+उत्+पद्+णिच्+ण्वुल्।) व्युत्पत्तिजनकः। यथा। ग्रन्थव्युत्पादकशास्त्रारम्भे ग्रन्थैरेव मङ्गलं कर्त्तव्यम्। इति सुग्धबोधटीकायां दुर्गादासः॥

व्युदासः, पुं, (वि+उत्+अस+घञ्।) निरासः। परित्यागः। यथा। तदेवैतेनैवकारेणावकाशस्त्रियदेशे स्वकविषयो नियम्यते कर्त्तव्यो लक्षान्तरव्युदासाय। इत्यमावास्याग्राह्यतानिरूपणे तिथ्यादितत्त्वम्। (यथा च महाभारते। १२। १६। १८।
"अथैकान्तव्युदासेन शरीरे पाञ्चभौतिके।")

व्युष्टं, क्ली, (वि+वस्+क्तः।) फलम्। दिनम्। प्रभातम्। (यथा, माघे। १२। ४।
"व्युष्टं प्रयाणञ्च वियोगदेना
विदूनगारीकमभूत् समन्तदा॥")
पर्य्युषितम्। इति हेमचन्द्रः॥ (प्रभातार्थे क्वचित् पुंलिङ्गोऽपि। स तु दोषायाः पुत्रः। यथा, भागवते। ४। १३। १४।
"प्रदोषो निशिथो व्युष्ट इति दोषास्तवाक्षयः।
व्युष्टः सुतं पुष्करिण्यां सर्व्वतेजसमादधे॥")

व्युष्टः, त्रि, (वि+वस+क्तः।) उषितः। (यथा, महाभारते। ३। ६६। २८।
"सा व्युष्टा रजनीं तत्र पितुर्वेश्म विभाविनी।")
दग्धः। इति मेदिनी॥

व्युष्टिः, स्त्री, (वि+वस्+क्तिन्।) फलम्। (यथा, महाभारते। १२। २२८। ४।
"महतस्तमसो व्युष्टा पञ्चस्रोतो परावरौ॥")
सन्ततिः। इति मेदिनी॥ स्तुतिः। इति हेमचन्द्रः॥ (प्रकाशः। यथा, ऋग्वेदे। १।१७१।५।
"व्युष्टिषु श्रवसा ग्रथ्नतीनाम्॥"
"व्युष्टिषु सतीषु प्रकाशेषु सत्सु।" इति तद्भाष्ये सायणः॥)

व्यूढः, त्रि, (विशेषेण उह्यतेस्म। वि+वह+क्तः।) विन्यस्तः। संहतः। इत्यमरः। ३। १। ४४॥ (यूहरचनयाधिष्ठितः। यथा, गीतायाम्। १।२।
"दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्य्योधनस्तदा।
आचार्य्यमुपसंगम्य राजा वचनमब्रवीत्॥")
पृथुलः। इति मेदिनी॥ (यथा, रघुः। १।१३।
"व्यूढोरस्को वृषस्कन्धः प्रालम्बौ पुरुषद्विषः।
आत्मकर्म्मक्षमं देहं क्षात्रो धर्म्म इवाश्रितः॥")

व्यूढकटुः, त्रि, (व्यूढः कटुः सम्राहो येन।) सन्नद्धः। इत्यमरः॥

व्यूढिः, स्त्री, (वि+वह+क्तिन्।) विन्यासः। संहतिः। पृथुलता। इति व्यूढग्रन्थार्थदर्शनात्॥

व्यूतं, त्रि, (तम्। तन्तुसन्ततम्। विपूर्ब्बेण्धातोः क्तप्रत्ययेन निष्पन्नमेतत्॥

व्यूतिः, स्त्री, (वि+वे अव वा+क्तिन्। "क्तिनयूतिजूतीति।" ३। ३। ९७। इति निपातितः।) वस्त्रादिवयनक्रिया। तत्पर्य्यायः। वाजिः २। इत्यमरः॥ व्युतिः ३। इति तट्टीका॥ वायौ ४। इति ग्रन्थरत्नावली॥

व्यूहः, पुं, (वि+ऊह+घञ्।) सन्नद्धः। निर्म्माणम्। तर्कः। इति मेदिनी॥ देहः। (यथा, भागवते। ११। ६। १०।
"यः सात्वतैः समविभूतय आत्मवद्भि-
र्व्यूहैश्चतुर्भिरुर्जितः सवनाय गुप्तये॥")
सेना। इति त्रिकाण्डशेषः॥ (परिवारः। लिङ्गम्। यथा, भागवते। ४। २६। ७०।
"यावदुद्दिश्यमोऽर्थार्थगुणव्यूहो गुणात्मिका॥")

युद्धार्थसेनारचना। तत्पर्य्यायः। बलविन्यासः२। इत्यमरः॥ "युद्धार्थं सैन्यस्य देशविशेषे विभज्य दुर्गबलनिमित्तं स्थापनं व्यूहः। ऊह वितर्के विपूर्व्वात् घञ्। युद्धे दण्डादयो भेदा विशेषा व्यूहसंज्ञेत्यर्थात् आदिना भोगमण्डलसंहतानां ग्रहः। यथाह कामन्दकिः।
तिर्य्यग्वृत्तिश्च दण्डः स्याद्भोगोऽन्यादृत्तिरेव च।
मण्डलं सर्व्वतो वृत्तिः पृथग्वृत्तिरसंहतः॥ इति॥
एवं चतुर्व्यूहो बहवो भेदाः क्रौञ्चचक्रादयो ग्रन्थगौरवभयान्नोक्ताः।" इति भरतः॥ अपि च।
"समग्रस्य तु सैन्यस्य विन्यासः स्थानभेदतः।
स व्यूह इति विख्यातो युद्धेषु पृथिवीभुजाम्॥
व्यूहभेदास्तु चत्वारो दण्डो भोगोऽसमण्डलम्।
असंहतश्च निर्द्दिष्टा नीतिसारादिसम्मताः॥
अन्येऽपि प्रकृतिव्यूहाः क्रौञ्चचक्रादयः क्वचित्।
तिर्य्यग्वृत्तिस्तु दण्डः स्याद्भोगोऽन्यादृत्तिरेव च॥
मण्डलं सर्व्वतो वृत्तिः पृथग्वृत्तिरसंहतः।
सैन्यानां नीतिसारादौ व्यूहभेदाः समीरिताः।
क्रौञ्चचक्रादिभेदानां लक्षणं भारतादिषु॥"
इति ग्रन्थरत्नावली॥
(यथा च कामन्दकीयनीतौ। १६।२६—५०।
"सर्व्वव्यूहविधानज्ञा युद्धकर्म्मसु कर्म्मठः।
उरः कक्षे च पक्षौ च मध्यं पृष्ठं प्रतिग्रहः।
कोटी च व्यूहशास्त्रज्ञैः सप्ताङ्गो व्यूह उच्यते॥
उरश्च कक्षपक्षौ च व्यूहोऽयं सप्रतिग्रहः।
गुरोरेष च शुक्रस्य कक्षार्थो परिवर्ज्जितः॥
अभेद्याः कुञ्जरा मेध्या सज्जलक्ष्याः प्रहारिणः।
सैन्याङ्गपतयः कार्य्या दृढयुद्धप्रतिक्रियाः॥
प्रवीरपुरुषैरेतैस्त्रिभिर्युः परिवारिताः।
अमेद्यैश्च व्यूहैरन्यै रचयेद्यत्र परस्परम्॥
फल्गु सैन्यस्य यत्किञ्चिन्मध्ये व्यूहस्य तद्भवेत्।
युद्धवस्तु च यत्किञ्चित्पार्श्वस्थञ्चरणे भवेत्॥
युद्धार्थं युद्धकुशलं पक्षानीकं प्रयोजयेत्।
युद्धं हि नायकप्राणं दृश्यते तदनायकम्॥
व्यूहोऽयं दृष्टसमरैः पत्त्यश्वरथदन्तिभिः।
तथाप्रतिहतो ज्ञेयो दृश्यश्चरथपत्तिभिः॥
मध्ये देशे हयानीकं रथानीकं तु कक्षयोः।
पक्षयोश्च गजानीकं व्यूहोऽन्तर्भिदयं स्मृतः॥
रथस्थाने हयान्द्यात्पदातींश्च हयाश्रये।
रथाभावे तु मतिमान्नागानेव प्रकल्पयेत्॥
विभज्य प्रत्यिपेत्सैन्यं पत्त्यश्वरथकुञ्जरान्।
मध्ये कुर्व्वीत नागेन्द्रान् पत्त्यश्वरथवारितान्॥
धनुःकक्षौ च दण्डश्च शकटो मकरश्चलः।
इत्यादयो महाव्यूहास्तदाकारान् प्रकल्पयेत्॥
यदि स्याद्दण्डबाहुल्यं तदा चापः प्रकीर्त्तितः।
मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभिः॥
कथिताः प्रकृतिव्यूहा भेदास्तेषां प्रकीर्त्तिताः।
यः स तं व्यूह्य मतिमान् कार्य्ये स्याने प्रकल्पयेत्॥
तिर्य्यग्वृत्तिश्च दण्डः स्याद्भोगस्त्वादृत्तिरेव च।
प्रदरो दृढकोऽसह्यश्चापो वै तद्विधस्मृतः॥
प्रतिष्ठः सुप्रतिष्ठश्च श्येनो विजयसञ्ज्ञयौ।
विशालविजयः कक्षौ व्यूहाकर्षश्चमुखः॥

सुखाप्तौ वलयश्चैव दक्षभेदाः सुदुर्ज्जयः ।
अतिक्रान्तः प्रतिक्रान्तः कषाभ्यांचैकपक्षतः ॥
अतिक्रान्तश्च पक्षाभ्यां वयोऽन्यस्तु विपर्य्ययः ।
न्यूनाधपक्षो धनुःपक्षो द्विन्यूनो दक्ष ऊर्द्धगः ॥
द्विगुणात्तत्क्षतिक्रान्तपक्षोऽन्योऽस्य विपर्य्ययः ।
द्विचतुर्हस्त दक्षश्चैव श्येना लक्षणतः क्रमात् ॥
गोमूत्रिकाद्विचारी प्रकटो मकरस्तथा ।
भोगभेदाः समाख्याताश्चया परिपतत्तकः ॥
दक्षपक्षो युगोरस्कः प्रकटस्तद्विपर्य्ययः ।
मकरो व्यवकीर्णश्च श्येनः कुञ्जरराजिभिः ॥
मङ्गलवृद्धभेदौ च सर्व्वतोभद्रदुर्ज्जयौ ।
गजानीको द्वितीयस्तु प्रथमः सर्व्वतोमुखः ॥
अर्द्धचन्द्रक उद्दारो वज्रो मेदाश्चसंहतेः ।
तथा कुक्कुटपक्षी च काकपादी च गोधिका ॥
त्रिचतुःपञ्चसैन्यानां श्येना आकारभेदतः ।
इति व्यूहाः समाख्याता व्यूहभेदप्रयोक्तृभिः ॥
इति समग्रं प्रोक्ता दक्षव्यूहाश्च षष्ठधा ।
तथा व्यूहश्चैव मङ्गलस्य प्रयोक्तृभिः ॥
असंहताश्च षड्व्यूहा भोगव्यूहाश्च षष्ठधा ।
व्यूहश्रेषु प्रयोज्याः स्युर्युद्धकाल उपस्थिते ॥
यथादीनामनीकेन हत्वा श्येनं परिक्षिपेत् ।
तरसा च समाहत्य कोटिभ्यां परिवेष्टयन् ।
परकोटिसपक्षस्य पक्षाभ्यामप्रतिग्रहः ।
कोटिभ्यां जघने हन्याद्धरसा च प्रपीड़येत् ॥
एवं व्यूहप्रयत्नेन यत्नवाववनीपतिः ।
विदारयेद्व्यूहघातं वज्रेण द्विषतामलम् ॥")

व्यूहनं, क्ली, (वि+ऊह+ल्युट् ।) सैन्यसंस्थानम् । विपूर्ब्बोहधातोरनट्प्रत्ययेन निष्पन्नमिदम् । (मेलनम् । यथा, भागवते । १।२६।३६।
"चालनं व्यूहनं प्राप्निर्नैकसं दण्यशब्दयोः ।"
"व्यूहनं मेलनं ह्वादेः ।" इति तट्टीकायां स्वामी । व्योमके, त्रि । यथा, हरिवंशे । १२६ । ३६ ।
"परं गुह्येभ्यः पृथिगभंकरूपं
यशः प्रदं व्यूहनं कालरूपम् ।"
"व्यूहनं जगत्व्योमकम् ।" इति तट्टीकायां नीलकण्ठः ।)

व्यूहपार्श्वः, पुं, (व्यूहस्य पार्श्वः ।) व्यूहपक्षाङ्गः । तत्पर्य्यायः । प्रत्यासारः २ । इत्यमरः । प्रत्यासरः ३ । इति तट्टीका । व्यूहस्य पक्षाद्व्यूहान्तरम् । इति केचित् । इति भरतः । व्यूहमध्यम् । इति शब्दरत्नावली ।

वेञ्, ञ ऐ तन्तौ । इति कविकल्पद्रुमः । (भ्वा०-उभ०-सक०-अनिट् ।) ञ, वयति अवते । ऐ, वीयात् । इति दुर्गादासः ।

व्योकारः पुं, लौहकारः । इत्यमरः ।

व्योम, [न्] क्ली, (वेञ् ञे तन्तौ+"नामन् व्योमन्निति ।" उणा० ४ । १४६ । इति निपातनात् साधुः । यद्वा, "विपूर्ब्बादवतेर्व्योमप्रत्ययात् औणादिके 'सर्व्वधातुभ्यो मनिन् ।' इति मनिन्प्रत्यये 'ज्वरत्वरस्रिव्यविमवामुपधायाश्च ।' इत्यूठि गुणः । व्यवति व्याप्नोति सर्व्वं व्यन् । यदा व्यवतिर्गत्यर्थः भावे मन् व्योम् । अथवं गमनं विविधमस्मिन् विद्यते । यद्वा रक्षणार्थः विपूर्ब्बोऽवतिः प्राज्ञिनोऽवकाशप्रदानेन । उणादौ तु नामन् सौमन् व्योमन् इत्यादिना वेञ् संवरणे इत्यस्मान्मनिनि उत्वं निपात्यते । दीयते तदायुना व्योम । तथाच निरुक्तम् योनिरन्तरिक्षं महाभवथः परिवीतो वायुना इति ।" इति निघण्टुटीका । १ । ३ । ३ ।) आकाशः । इत्यमरः । (यथा, रघुः । ४।२६ ।
"रजोभिः स्यन्दनोद्भूतैर्नभश्चैव घनस्विभैः ।
सुवस्तलमिव व्योम कुर्व्वन् योधैः भूतलम् ।")
जलम् । भास्करस्यार्घनाभयः । इति मेदिनी । अभ्रकम् । इति राजनिर्घण्टः ।

व्योमकेशः, पुं, (व्योम एव केशा यस्य । विराट्मूर्त्तिलादस्य तथात्वम् ।) शिवः । इत्यमरः । (यथा, महाभारते । ७ । २०० । १२६ ।
"सूर्य्याचन्द्रमसौ लोके प्रकाशन्ते रुचच यः ।
ते केशसंज्ञिताश्चास्य व्योमकेश इति स्मृतः ।")

व्योमकेशी [न्] पुं, महादेवः । गङ्गाधारणकाले व्योमव्यापिनः केशा अस्य सन्तीति व्योमकेशशब्दात् इनिप्रत्ययेन निष्पन्नमेतत् ।

व्योमचारिपुरं, क्ली, (व्योमचारि आकाशगामि पुरम् ।) शौभपुरम् । इति भूरिप्रयोगः ।

व्योमचारी, [न्] पुं. (व्योम्नि चरतीति । चर+णिनिः ।) देवता । पक्षी । इति मेदिनी । चिरजीवी । दिनातः । इति विश्वः । (आकाशचारिणि, त्रि । यथा, कथासरित्सागरे । २२ । ५६ ।
"अस्ति पूर्व्वमहं व्योमचारी विद्याधरोऽभवम् ।")

व्योमधूमः, पुं, (व्योम्नः धूमः ।) मेघः । इति त्रिकाण्डशेषः ।

व्योमनाशिका, स्त्री, भारतीपक्षी । इति त्रिकाण्डशेषः ।

व्योममञ्जरं, क्ली, (व्योम्नः मञ्जरमिव ।) पताका । इति त्रिकाण्डशेषः ।

व्योममण्डलं, क्ली, (व्योम्नः मण्डलम् ।) पताका । इति शब्दरत्नावली । आकाशश्च ।

व्योमसद्मरः, पुं, (व्योम्नः सद्मर इव ।) निर्घातः । इति हारावली ।

व्योमयानं, क्ली, (व्योममार्गे यानम् ।) विमानम् । इत्यमरः ।

व्योमस्थली, स्त्री, भूमिः । इति भूरिप्रयोगः । (व्योम्नः स्थली ।) नभःस्थलञ्च ।

व्योमाभः, पुं, (व्योम्ना सूर्य्येण आभातीति । आ+भा+कः ।) वृहः । इति त्रिकाण्डशेषः ।

व्योमोदकं, क्ली, (व्योम्नः उदकम् ।) दिव्योदकम् । इति राजनिर्घण्टः ।

व्योषं, क्ली, (विशेषेण व्योषतीति । व्यष दाहे+घञ् ।) त्रिकटु । इत्यमरः । (यथा, सुश्रुते । १ । ४४ ।
"व्योषं त्रिजातकं मुस्ता विडङ्गामलके तथा ।")

व्रज, गतौ । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) व्रजति । इति दुर्गादासः ।

व्रज, क संस्कृतौ । गतौ । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) क, व्राजयति । विरेफौ तौ । तौ एतौ विरेफौ रेफरहितौ च स्यातां । इति दुर्गादासः ।

व्रजं, क्ली, व्रजनम् : गमनम् । व्रज गतौ इत्यस्मात् घञन्तत्वेन निष्पन्नमिदम् । इति सिद्धान्तकौमुदी ।

व्रजः, पुं, (व्रज गतौ+"गोचरसंचरेति ।" ३ । ३ । ११६ । इति घञन्तत्वेन निपातनात् साधुः ।) समूहः । इत्यमरः । (यथा, महाभारते । १ । १४६ । १२ ।
"ततः प्रतापः सुमहान् शब्दश्चैव विभावसोः ।
प्रादुरासीत् तदा तेन बुबुधे स जनव्रजः ।")
गोष्ठम् । (यथा, माघे । २ । ६४ ।
"निरन्तरीवधासारग्रसारा गा इव व्रजम् ।
उपरुन्धन्तु दृशार्द्राः पूर्वीं माहिष्मतीं दिशः ।")
पन्थाः । इति मेदिनी । अग्रवनमधुरयोश्चतुर्थ्यार्थवर्त्तिदेशः । अस्य विवरणं यथा, माघे ।
"व्रजमङ्गलभूमीनां ग्रैवनाग्रपथं वरम् ।
कुसुदाख्यं महाश्रेष्ठं सर्व्वर्त्तौ मध्यसंस्थितम् ।
तस्योपरिस्थितं लोकं सर्व्वस्यानं महाफलम् ।
लक्ष्मीलीलाविहारार्थसुखस्थानविराजितम् ।
चतुरष्टकक्रोशेन परिपूर्णविराजितम् ।
अस्य प्रदक्षिणीकुर्व्वन् धनधान्यसुखं लभेत् ।
दामार्द्धावासतो लोको विष्णुलोकमवाप्नुयात् ।
आवासान्नास्रियते चेह पुनर्जन्म न विद्यते ।
पुण्यं सप्तगुणं लब्ध्वा क्षतेऽस्मिन् व्रजमण्डले ।
लक्षेण निर्म्मितास्तौर्यैः साईद्वयसहस्रकाः ।"*
तत्रादौ वनोपवनप्रतिवनाधिवनान्यष्टपञ्चारिंशत् तानि चतुरक्रोशपरिमाणस्थितानि चतुर्भागशोऽभ्यन्तरस्थितानि क्रमश आह । पाद्मे ।
"वनानि द्वादशान्याहुर्यत्रगोचरचर्च्चिते ।
महावनं महाश्रेष्ठं १ दयं काम्यवनं शुभम् २ ।
कोकिलाख्यं ततीयञ्च ३ तृयं तालवनं तथा ४ ।
पञ्चमं कुसुदाख्यञ्च ५ षष्ठं भाण्डीरसंज्ञकम् ६ ।
वाञ्छा कृष्णवनं श्रेष्ठं सप्तमं परिकीर्त्तितम् ७ ।
अष्टमं खदिरं प्रोक्तं ८ नवमं लोहजं वनम् ६ ।
नाम्ना भद्रवनं श्रेष्ठं दशमं बहुपुण्यदम् १० ।
एकादशं समाख्यातं बहुलावनसंज्ञकम् ११ ।
नाम्ना विल्ववनं श्रेष्ठं द्वादशं कामनाप्रदम् १२ ।
इति द्वादशसंज्ञानि वनानि शुभदानि च ।"
इति द्वादशवनानि ।
अथ द्वादशोपवनान्याह वाराहे ।
"आदौ भद्रवनं नाम १ द्वितीयं लक्षरावनम् २ ।
तृतीयं विल्वजं नामश् कदम्बाख्यं चतुर्थकम् ४ ।
नाम्ना खर्जूरवनं श्रेष्ठं पञ्चमं परिकीर्त्तितम् ५ ।
सुरभीवननामानं बहुमाऽऽदवर्द्धनम् ६ ।
श्रेष्ठं प्रेमवनं नाम सप्तमं शुभदं नृणाम् ७ ।

मथुरावनमानमष्टमं परिकीर्त्तितम् ८ ।
मार्त्तेङ्गितवनं श्रेष्ठं नवमं मानवर्द्धनम् ९ ।
शेषशायिवनं श्रेष्ठं दशमं पापनाशनम् १० ।
एकादशं समाख्यातं नारदाख्यं शुभोदितम्
११ ।
द्वादशं परमानन्दवनं सर्व्वार्थदायकम् १२ ।
इति द्वादशसंज्ञानि वनान्युपवनानि च ।"
इति द्वादशोपवनानि । ● ।

अथ द्वादशप्रतिवनानि । भविष्ये ।
"आदौ रङ्गवनं श्रेष्ठं पुरसंज्ञाविराजितम् १ ।
वार्त्तावनं द्वितीयञ्च २ करहाख्यं तृतीयकम् ३ ।
चतुर्थं काम्यनामानं वनं कामप्रदं नृणाम् ४ ।
वनमञ्जननामानं पञ्चमं स्त्रीशुभप्रदम् ५ ।
नाम्ना कर्ब्बवनं श्रेष्ठं षष्ठं खप्नवरप्रदम् ६ ।
लक्ष्मणिपलकं नाम वनं सप्तममीरितम् ७ ।
नन्दप्रेक्षवलक्ष्माख्यं वनं नन्दनमप्रमम् ८ ।
वनमिन्द्रवनं नाम नवमं लक्ष्मपूजितम् ९ ।
श्रीखावनं शुभं प्रोक्तं दशमं नन्दभावितम् १० ।
चन्द्रावलीवनं श्रेष्ठमेकादशसुदाहृतम् ११ ।
नाम्ना लोहवनं श्रेष्ठं द्वादशं शुभदं नृणाम् १२ ।
इति प्रतिवनान्याहुर्मार्गे वामे च दक्षिणे ।
इति द्वादशसंज्ञास्ते देवावासफलप्रदाः ।"
इति द्वादश प्रतिवनानि । ● ।

अथ द्वादशाधिवनानि । विष्णुपुराणे ।
"मधुरा प्रथमं नाम १ राधाकुण्डं द्वितीयकम्
२ ।
नन्द्यामं तृतीयञ्च ३ गूढ्याभं चतुर्थकम् ४ ।
पञ्चमं ललितायामं ५ हृषभानुपुरञ्च षट् ६ ।
सप्तमं गोकुलं स्थान-७ मष्टमं बलदेवकम् ८ ।
गोवर्द्धनवनं श्रेष्ठं नवमं कामनाप्रदम् ९ ।
वनं जावयटं नाम दशमं परिकीर्त्तितम् १० ।
सुखदन्दावनं श्रेष्ठमेकादशं प्रकीर्त्तितम् ११ ।
खदिरवटकं ख्यातं वनं द्वादशं कीर्त्तितम् १२ ।
इति द्वादशसंज्ञानि वनान्यधिवनानि च ।
वनानामधिपाः प्रोक्ता व्रजमण्डलमध्यगाः ।
एवं नैव विलोक्यैव वनयात्रा च निष्फला ।
एवाश्च दर्शनेनैव वनयात्रा शुभप्रदा ।
आदौ लीलां यदा पश्येद्वनयात्रां ततश्चरेत् ।
सर्व्वान् कामानवाप्नोति विष्णुलोकमवाप्नुयात् ।
सर्व्वत्र विजयी भूयाद्वनयात्राप्रभावतः ।"
इति व्रजभक्तिविलासे १ अध्यायः ।

व्रजकः, पुं, तपस्वी । इति शब्दरत्नावली ।

व्रजकिशोरः, पुं (व्रजस्य किशोरः ।) श्रीकृष्णः । स तु द्वादशाधिवनान्तर्गतललितायामाधिवनाधिपो देवः । "अथ ललितायामाधिपव्रजकिशोरमन्त्रः । यथा ऋषिरोपनिषदि । ॐ श्रीं ललितायामाधिवनाधिपतये व्रजकिशोराय नमः । इत्येकविंशाक्षरो व्रजकिशोरमन्त्रः । अनेन मन्त्रेण प्राणायामः । अस्य मन्त्रस्य विभाण्डक ऋषिर्व्रजकिशोरो देवता गायत्री छन्दः मम सकलपापक्षयद्वारा युगलकृष्णदर्शनार्थे विनियोगः । शिरसि विभाण्डकऋषये नमः मुखे व्रजकिशोराय नमः हृदि गायत्रीच्छन्दसे नमः । अथ ध्यानम् ।
'ललितार्द्धयुतं कृष्णं सर्व्वैस्तु सखिभिर्युतम् ।
ध्यायेत्त्रिवेणिकूपस्थं महारासस्थलोत्सवम् ।'
इति ध्यात्वा यथाशक्ति जपं कृत्वा गुरुस्तोत्रादिना जपं समर्पयेत् । इति ललितायामाधिपव्रजकिशोरमन्त्रः ।" इति व्रजभक्तिविलासे १ अध्यायः ।

व्रजनाथः, पुं, (व्रजस्य नाथः ।) श्रीकृष्णः । इति पुराणम् ।

व्रजभूः, पुं, (व्रजे भूरुत्पत्तिर्यस्य ।) केलिकदम्बः । इति शब्दचन्द्रिका । (व्रजस्य भूर्भूमिः ।) व्रजभूमौ, स्त्री । व्रजयति, त्रि ।

व्रजमण्डलं, क्ली, (व्रजस्य मण्डलम् ।) व्रजभूमिः । यथा, माघे ।
"व्रजमण्डलभूगोलं शैवलागमयं वरम् ।
कुसुदाख्यं महाश्रेष्ठं सर्व्वेषां मध्यसंस्थितम् ।"
इति व्रजविलासे १ अध्यायः ।

व्रजमोहनः, पुं, (व्रजान् व्रजवासिनो मोहयतीति । मुह + णिच् + ल्युट् ।) श्रीकृष्णः । इति पुराणम् ।

व्रजवरः, पुं, (व्रजे वरः श्रेष्ठः ।) श्रीकृष्णः । स तु द्वादशाधिवनान्तर्गतजावयटाधिवनाधिपो देवः । "अथ जावयटाधिवनाधिपव्रजवरमन्त्रः । गौतकीये ।
'वटाइहिः समस्तानु वनं वनमाश्रितम् ।
तमेवाधिवनं ख्यातं वटसेवावरायकम् ।
तस्मिन्मध्ये वटं श्रेष्ठं कृष्णक्रीडावरप्रदम् ।
वटाइहिर्वनं ज्ञातं मध्ये चैव वटं स्थितम् ।
वटं दृष्ट्वा स्थितं तत्र वटसंज्ञं विधीयते ।
वटन्नावासुवारेश वटजिह्वानि दर्शयेत् ।'
वटस्थानजिह्वम् । ॐ ठः ॐ वटाधिवनाधिपतये व्रजवराय नमः । इत्येकोनविंशाक्षरो जावयटाधिवनाधिपव्रजवरमन्त्रः । अनेन मन्त्रेण प्राणायामः । अस्य मन्त्रस्य वलीक ऋषिर्जावयटाधिपो व्रजवरो देवता गायत्री छन्दः मम सकलसौभाग्यसम्पत्फलप्राप्त्यर्थे जपे विनियोगः । न्यासं पूर्ब्ववत् । अथ ध्यानम् ।
'नानाश्रृङ्गारभूषाढ्यं राधालक्ष्मं मनोहरम् ।
ध्यायेद्युगलमूर्त्तिञ्च वनयात्रावरप्रदम् ।'
इति ध्यात्वा यथाशक्ति जपं कृत्वा गुरुस्तोत्रादिना जपं समर्पयेत् । इति जावयटाधिवनाधिपव्रजवरमन्त्रः ।" इति व्रजभक्तिविलासे १ अध्यायः ।

व्रजवल्लभः, पुं, (व्रजानां व्रजवासिनां वल्लभः प्रियः ।) श्रीकृष्णः । इति पुराणम् ।

व्रजाङ्गना, स्त्री, (व्रजस्य अङ्गना ।) गोपी । यथा, छन्दोमञ्जर्य्याम् ।
"विलासवंशश्रवणं सुखानिलैः
प्रपूर्य्य यः पञ्चमरागमुद्गिरन् ।
व्रजाङ्गनानामपि गानगर्ब्बितां
जहार मानं स हरिः पुनातु वः ।"

व्रज्या, स्त्री, (व्रजनमिति । व्रज गतौ + "व्रजयजोर्भावे क्यप् ।" ३ । ३ । ९८ । इति क्यप् ।) पर्य्यटनम् । जिगीषोः प्रयाणम् । गमनम् । इत्यमरः । वर्गः । इति मेदिनी । (यजातीयानामेकत्र सन्निवेशः । यथा, साहित्यदर्पणे । ६ । ५६५ ।
"कोशः श्लोकसमूहस्तु स्यादेकोत्तानपेशकः ।
व्रज्याक्रमेण रचितः स एवातिमनोहरः ।")
रङ्गः । इति धरणिः ।

व्रज, गृम्भे । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-सेट् ।) व्रजति । इति दुर्गादासः ।

व्रज, तृ क अङ्गचूर्णे । इति कविकल्पद्रुमः । (अदन्त चुरा०-पर०-सक०-सेट् ।) अङ्गचूर्णः अङ्गभेदः । व्रजयति गात्रं वाद्येन भटः । इति दुर्गादासः ।

व्रजः, पुं क्ली, (व्रजयति गात्रमिति । व्रज अङ्गचूर्णे + पचाद्यच् ।) क्षतम् । तत्पर्य्यायः । ईर्म्मम् २ अरुः ३ । इत्यमरः । ईर्म्मः ४ । इति तट्टीका । (यथा, रघुः । १२ । ५५ ।
"स रावणकृतां ताभ्यां वधसाचव्यमैथिलीम् ।
आत्मनः सुमहत् कर्म्म व्रजैरावेद्य संस्थितः ।")
अथ व्रजाधिकारः ।
"व्रजो द्विधा परिज्ञेयो दोषजागन्तुभेदतः ।
दोषजो दुष्टदोषैः स्यादन्यः शस्त्रादिसम्भवः ।"
तत्र वातिकस्य लक्षणमाह ।
"स्तब्धः कठिनसंशूर्णो मन्दस्रावो महारुजः ।
तुद्यते स्फुटितप्रख्यो व्रणो मारुतसम्भवः ।"
स्तब्धः अचलः । ● । पैत्तिकमाह ।
"दाहमोहज्वरक्लेददाहदुःखवदारुणैः ।
व्रणं पित्तकृतं विद्यात् सावैर्गन्धेन पूतिकैः ।"
क्लेद आर्द्रता । दुःखं यथारूपम् । अवदारुणं व्रणे विदारणवत् पीड़ा । ● । श्लैष्मिकमाह ।
"बहुपिच्छो गुरुः स्निग्धस्तिमितो मन्दवेदनः ।
पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः ।"
बहुपिच्छः बहुपिच्छिलः । अल्पसंक्लेद इत्यादेः । ● । रौधिरं लक्षणं सान्निपातिकमाह ।
"रक्तो रक्तसुतो रक्ताद्विज्ञेयः सान्निपातिकः ।"
तदन्यः द्विदोषलिङ्गसम्बन्धः । ● । शुद्धव्रणलिङ्गमाह ।
"स्निग्धतनुभोऽतिमृदुः श्लक्ष्णः स्निग्धोऽल्पवेदनः ।
सुखवक्त्रो निरुपायः शुद्धव्रण इति स्मृतः ।"
स्निग्धतनुभः अतिमृदुश्च स्वरूपार्थः । तेन स्निग्धावयवः । सुखवक्त्रः उच्छ्रूनतारहितः । दुष्टव्रणलिङ्गमाह ।
"पूतिपूयादिदुष्टास्रक्स्रावात्तृषक्षी चिरस्थितिः ।
दुष्टव्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्य्ययः ।"
उत्तृषक्षी कोटरवान् । अतिगन्धादिः आदिशब्देन स्रावदेवनाविवर्णतादयः संगृह्यन्ते । ● ।
संरोहणस्य लिङ्गमाह ।
"कपोतवर्णश्लक्ष्मा यस्यां तालोदवर्जितः ।
स्थिरश्च स्निग्धकावन्नो रोहणीति तमादिशेत् ।"

कपोतवर्णप्रतिमाः पाण्डूषराः। स्थिराः विदीर्णतारहिताः। पिडकावन्तः संरोहणार्थाः ये मांसाङ्कुराक्तदुष्टाः। ● ।. सङ्कुलिङ्गमाह।

"रूढव्रणानमग्र्यमिमशूलमरुजं व्रणम्।
त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्दिशेत्।"

रूढव्रणानं संरूढभावमार्गम्। समतलं अनिम्नम्। ● । सुखसाध्यत्वादिकमाह।

"त्वङ्मांसजः सुखे देशे तरुणस्त्वगुपद्रवः।
धीमतोऽभिनवः काले सुखे साध्यः सुखव्रणः।"

सुखे देशे मर्मरहिते। अनुपद्रवः ज्वरश्वास्वासकासारोचकादिरहितः। धीमतः पथ्यसेविनः। सुखे काले हेमन्ते शिशिरे च।

"गुरुरन्धतरैरेभिर्हीनः सङ्क्षो व्रणः स्मृतः।
सर्वैर्विहीनो विज्ञेयस्त्वसाध्यो निरुपक्रमः।"

एभिस्त्वङ्मांसजत्वादिभिः। निरुपक्रमः अनुपक्रीतः चिरमुपेक्षित इति यावत्।

"वसामेदोऽथ मज्जानं मस्तुलुङ्गञ्च यः स्रवेत्।
आगन्तुजो व्रणः सिद्धेन सिद्धेदोषसम्भवः।"

मस्तुलुङ्गं मस्तुकाभ्यन्तरस्थैः।

"कुष्ठिनां विषदुष्टानां ग्रोथिनां मधुमेहिनाम्।
व्रणाः सङ्क्षेण सिध्यन्ति येषां चापि व्रणे व्रणः॥"

अरिष्टमाह।

"दृश्यन्ते चान्तरर्थं बहिःशीताश्च ये व्रणाः।
दृश्यन्ते बहिरर्थं भवन्त्यन्तश्च शीतलाः।
प्राङ्मांसचयश्वासकासारोचकपीडिताः।
प्रवृद्धपूयरुधिरं व्रणा ये चापि मर्मसु।
क्रियाभिः सम्यगारब्धा न सिध्यन्ति च ये व्रणाः।
चिकित्सिन्नैव तान् वैद्यः संरम्भान्नाक्रमो यशः।
मद्यागुर्व्याज्यसुमनाः पद्मचन्दनचम्पकम्।
सगन्धा दिग्गजाश्चाष्टौ सुनिर्दूता व्रणाः स्मृताः॥"

मर्मसु पायुनाभिहृदयादिषु। सुमनाः जातिः। दिग्गजाः पारिजातादिगजाः। ● । अथाङ्गव्रणस्य विज्ञानमाह।

"नानाधारासुखैः शस्त्रैर्नानास्थानविपातितैः।
भवन्ति नानाशततो व्रणांस्तान्निबोध मे॥"

नानाधारासुखानि येषां तैः शस्त्रैः अर्द्धचन्द्रखड्गभल्लकुन्तशूलशरादिभिः। नानाशततः बहुशततः। ता आशतोराद्।

"छिन्नं भिन्नं तथा विद्धं क्षतं पिच्छितमेव च।
दृष्टमाकुलया बुद्ध्या तेषां वक्ष्यामि लक्षणम्॥"

अथ छिन्नस्य लक्षणमाह।

"तिर्यक् छिन्नं ऋजुर्यापि यो व्रणस्यायतो भवेत्।
गात्रस्य पातनं तद्धि छिन्नमित्यभिधीयते॥"

यो व्रणः तिर्यक्छिन्नः खड्गादिक्षततिर्यक्छेदकृतः। ऋजुर्यापि अथवा खड्गादिक्षतो रक्तो व्रणः। आयतः दीर्घः। आयत इति तिर्यक्छिन्नस्य अयोग विशेषणम्। गात्रस्य पातनं गात्रस्यैकदेशस्य छेदेन पृथक्करणं वा छिन्नमित्यभिधीयते। ● । भिन्नमाह।

"शक्तिकुन्तेषुखड्गाग्रविज्ञेराग्रथी कृतः।
यत्किञ्चित् प्रसवेत्तद्धि भिन्नमित्यभिधीयते॥"

आग्रथः कोष्ठः॥● कोष्ठभेदस्य लक्षणमाह।

"स्थानान्मामाग्निपक्वानां मूत्रस्य रुधिरस्य च।
कुक्षुकुः कुःकुश्च कोष्ठ इत्यभिधीयते॥
तस्मिन् भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते।
मूत्रमार्गगुदास्येभ्यो रक्तं प्रागाश्च गच्छति॥
मूर्च्छाभ्रमसृषाध्मानमभक्तच्छन्द एव च।
विण्मूत्रवातसङ्गश्च स्वेदश्चाधोऽधिरक्तता॥
कोष्ठगन्धित्वमास्यस्य गात्रदौर्गन्ध्यमेव च।
हृदि शूलं पार्श्वयोश्च विज्ञेयश्चाभिधीयते॥"

तस्मिन् कोष्ठे। भिन्ने शस्त्रादिभिः। रक्तपूर्णे कोष्ठे नखादङ्गाद्विस्रावात् स्रुतेन रक्तेन पूर्णे वा ज्वरादयो जायन्ते। ● । आमाशये पक्वाशये च रक्तपूर्णे लक्षणभेदमाह।

"आमाशयस्थे रुधिरे रुधिरं छर्दयत्यपि।
आध्मानमतिमात्रञ्च शूलञ्च भृशदारुणम्॥
पक्वाशयगते रक्ते रुजा गौरवमेव च।
अधःकाये विशेषेण शीतता च भवेद्दृढम्॥"

रुजा शूलम्। गौरवं पक्वाशये। अधःकाये नाभेरधोदेशे विशेषेण गौरवमित्यन्वयः। शीतता च भवेद्दृढम्। दृढ नाभेरधोदेशे शीतता च स्यात्। सा च व्याधिस्वभावात्। ● । विद्धमाह।

"सूच्यास्यशल्याभिहतं पदं शल्याग्रयं विना।
उत्तुदितं निर्गतं वा तद्विद्धमिति निर्दिशेत्॥"

आग्रयं विना कोष्ठं विना। उत्तुदितं अनिर्गतशल्यम्। निर्गतं वा निर्गतशल्यं वा। ● । सशल्यस्य व्रणस्य लक्षणमाह।

"श्यावं सशोथं पिडकायुतञ्च
सुदुर्मुदुः स्रोतिवाहनञ्च।
स्पृष्टुरुतं दुष्टुदतुल्यमांसं
व्रणं सशल्यं सततं वदन्ति॥"

सुदुर्मुदुः स्रोतिवाहनं यदा यदा शल्यं चलति तदा तदा रुधिरं वहति। उन्नतं उत्थितसुखम्। ● । कोष्ठस्थितस्य शल्यस्य लक्षणमाह।

"लघोरतीव शिरादीनि भिन्नाङ्गं परिहृत्य वा।
कोष्ठे प्रतिष्ठितं शल्यं कुर्यादुत्क्लाशुपद्रवान्।"

लघोः सन्नपि अतिक्रम्य उत्क्लाशुपद्रवान् आटोपानाहौ व्रणसुखेनाथ पुरीषदर्शनञ्च। ● । असाध्यस्य कोष्ठस्थस्य रक्तस्य पुरीषस्य लक्षणमाह।

"कोष्ठान्तर्लोहितं पाण्डु शीतपादकराननम्।
शीतोच्छ्वासं रक्तनेत्रमानद्धञ्च विवर्जयेत्।"

आनद्धं आनाहवन्तम्। ● ।

क्षतमाह।

"नातिच्छिन्नं नातिभिन्नमुभयोर्लक्षणान्वितम्।
विषमं व्रणमङ्गे यत्तत् क्षतं परिकीर्त्तितम्।"

नातिच्छिन्नं नातिदीर्घघातम्। नातिभिन्नं नातिगम्भीरघातम्। उभयोश्छिन्नभिन्नयोः। विषमं व्रणमङ्गे यत् यद्व्रणमङ्गवैषम्यकरम्॥● पिच्छितमाह।

"प्रहारपीडनाभ्यान्तु यदङ्गं पृथुतां गतम्।
सास्रि तत् पिच्छितं विद्याद्रक्तमज्जपरिप्लुतम्।"

प्रहारो मुद्गरादिना। पीडनं कपाटादिना। पृथुतां पिच्छितताम्॥● दृष्टमाह।

"घर्षणादपि घातादा यदङ्गं विगतत्वचम्।
उत्क्लेशावान्वितं तत्तु दृष्टमित्यभिधीयते।
घर्षणात् कर्कशैश्चिकापाषाणभित्तादिभिः।"●

मांसशिरास्नायुसन्धिसमर्मसु क्षतेषु सामान्य लक्षणमाह।

"भ्रमः प्रलापः पतनं प्रमोहो
विचेष्टनं स्खलितरोधजता च।
मस्तुङ्गता मूर्च्छनमर्म्मघात-
क्षौद्रा रुजो वातजताश्च ताः स्युः॥
मांसोद्भवाभं रुधिरञ्च गच्छेत्
सर्वेन्द्रियार्थोपरमस्तथैव।
दृष्टार्द्रसंक्लेद्यथ विच्छवित्व
सामान्यतो मर्मसु लिङ्गमुक्तम्।"

पतनं भूमौ। विचेष्टनं विरुद्धं चेष्टनं हस्तपादादिप्रक्षेपणादिकम्। मूर्च्छनं इन्द्रियमोहः। प्रमोहो मनोमात्रमोहः। तीव्रा रुजो वातजताश्च ताः स्युः एकायतनकाश्च। रुधिरञ्च गच्छेत् मेहनभगगुदास्यनासेभ्यः स्रवेत्। सर्वेन्द्रियार्थोपरमः इन्द्रियाणां कार्यनाशः॥●॥ अथ मर्म्मशिरास्नायुसन्धीनां विद्धानां पृथग्लक्षणमाह।

"सुरेन्द्रगोपप्रतिमं प्रभूतं
रक्तं स्रवेत्तत्क्षयजञ्च वायुः।
करोति रोगान् विविधान् यथोक्तान्
शिरासु विद्धासथवा क्षतासु॥"

सुरेन्द्रगोपो वार्षिकोत्थितकीटविशेषः। वीरबहूटी इति लोके ख्यातम्। प्रभूतं बहु। रोगान् शिरोऽभितापान्यतात्क्षयकादीन्। विद्धासु शिरादिना। क्षतासु खड्गादिना।

"कौञ्च शरीरावयवावसादः
क्रियाच शक्तिस्तुसुला रुजाच।
चिराद्व्रणो रोहति यस्य चापि
तं स्नायुविद्धं पुरुषं वदन्ति॥"

कौञ्च विद्धस्नायुस्थ वक्तव्य। तुसुला महती।

"ग्रोथातिदृब्धिस्तुसुला रुजश्च
बलक्षयः सर्वत एव ग्रोथः।
क्षतेषु सन्धिष्वचलावलेषु
स्यात् सन्धिकर्म्मोपरमश्च लिङ्गम्।"

सर्वत एव ग्रोथः सर्वसन्धीन् व्याप्य ग्रोथः। उपरमः नाशः।

"घोरा रुजो यस्य शिरादिनेषु
सर्व्वास्ववस्थासु न चेति शान्तिम्।
भिषग्विपश्चिद्दिदितार्थतत्त्व-
स्तमस्रविद्धं पुरुषं प्रवक्ति॥"

सर्व्वास्ववस्थासु त्रयनासनादिकासु। विदितार्थतत्त्वः ज्ञानग्रन्थतत्त्वम्॥● अथ मर्म्मशिरादिविद्धलिङ्गानि पृथगभिधाय मर्म्मशिरादीनां विद्धानां पृथग्लिङ्गान्यतिदेशेनाह।

"यथास्वमेतानि विभावयेच्च
लिङ्गानि मर्म्मस्वपि ताडितेषु ।"

यथास्वं शिरादीनां विद्धानां एतानि लिङ्गानि एथगुक्तानि लिङ्गानि चकारात् भ्रमप्रलापादीनि च मर्म्मस्वपि शिरादिषु ताडितेषु विद्धेषु। विभावयेत् जानीयात् । * । सर्व्वव्रणानामुपद्रवानाह ।

"विसर्पपक्वघातश्च शिरास्नम्भोऽपतानकः।
मोहोन्मादौ व्रणे पीड़ा ज्वरस्तृष्णा हृतग्रहः ।
कासश्छर्द्दिरतीसारो हिक्का श्वासः सवेपथुः।
षोड़शोपद्रवाः प्रोक्ता व्रणानां व्रणचिन्तकैः ।"

अथाग्निदग्धस्य निदानमाह ।

"तत्राग्निर्द्विविधो ज्ञेयः स्नेहरूक्षः समाश्रितः।
स्नेहस्तत्र तु तैलादि रूक्षं लोहादि कथ्यते ।"

अग्निदग्धं चतुर्व्विधमाह ।

"अग्निदग्धं चतुर्द्धा स्यात् मृदु दुर्दग्धमेव च ।
सम्यग्दग्धं तथा तीव्रदग्धञ्च परिकीर्त्तितम् ।"

तेषां लक्षणमाह ।

"यद्विवर्णमतिप्लुष्टं तत् मृदुमभिधीयते ।
तीव्रदाहो यथावस्तो यत्र स्फोटा भवन्ति हि।
विरेजे ते प्रशाम्यन्ति तद्दुर्दग्धमुदाहृतम् ।
तालवर्णमगाभीरं दाहपीड़ासमन्वितम् ।
सुसंस्थितञ्च कथितं सम्यग्दग्धं भिषग्वरैः ।
लक्ष्मांसं यत्र दग्धं स्याद्विस्फोटो वपुषस्तथा ।
शिरास्नायुस्थिसन्धीनां तं वदन्त्यतिदग्धकम्।
अत्यर्थं वेदना दाहो ज्वरस्तृष्णामूर्च्छया सह ।
स्याद्व्रणस्तु चिरादूर्द्धे रूढ़ो याति विवर्णताम् ।"*।

अथ व्रणस्य चिकित्सा ।

"आदौ ग्रोथहरो लेपस्ततस्तु परिवेचनम् ।
विस्रावणमसङ्कोचात: स्रादुपनाहनम् ।
पाचनं भेदनं पश्चात् पीड़नं ग्रोधनं तथा ।
रोपणं वर्णकरणं व्रणस्येते क्रमाः स्मृताः ।"

क्रमाच्चिकित्साः । सुश्रुतेषु व्रणस्य वहिरूपक्रमा लिखिताः सन्ति । ते सर्व्वेऽत्र विस्तरभयान्न लिखिताः । * । तत्रादौ ग्रोथहरं लेपमाह ।

"यथा प्रज्वलिते वेश्मन्यम्भसा परिवेचनम् ।
क्षिप्रं प्रशमयत्यग्निमेवमालेपनं व्रणम् ।
बीजपूरत्वचाहिंसा देवदारु मलौषधम् ।
राज्ञाग्निमन्थो लेपोऽयं वातग्रोथविनाशनः ।*
मधुकं चन्दनं दूर्व्वा नलमूलन्तु पद्मकम् ।
उशीरं बालकं पद्मं लेपोऽयं पित्तग्रोथहा ।
न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः ।
सर्पिष्कैः प्रदेहः स्याच्छोथे पित्तसमुद्भवे ।*।
आरग्वधे रक्तजे च लेप एषोऽभिपूजितः ।
अजशृङ्ग्याजयष्ट्या च मञ्जिष्ठा सरलस्तथा ।
एकैकिकात्रगन्धा च लेपोऽयं श्लेष्मग्रोथहा ।"

अजशृङ्गी मेढ़ाशृङ्गी । एकैकिका श्यामनिशोत:

"लक्षा पुराजपिण्याकं शिग्रुत्वक् शिंकता शिवा ।
मूत्रपिष्टः सुखोष्णोऽयं प्रलेपः श्लेष्मग्रोथहा ।*।
न रात्रौ लेपनं दद्याद्दत्तं च पतितं तथा ।
न च पर्य्युषितं शुष्यमार्द्रं तत्रैव धारयेत् ।"

दत्तं दत्तमेव पुनर्न दद्यात् । पतितं दीयमानं यदन्यात् पतितम् । पर्य्युषितं लेपनद्रव्यकल्कीकृतं यत् पर्य्युषितम् ।

"तमसा पिहितो ह्युष्मा रोमकूपसुखे स्थितः ।
विना लेपेन निर्याति रात्रौ नालेपयेदतः ।
रात्रावपि प्रलेपस्तु विधातव्यो विचक्षणैः ।
अपाकिग्रोथे गम्भीरे रक्तपित्तसमुद्भवे ।"* ।

अथ परिषेचनमाह ।

"यथाम्बुभिः सिच्यमानः शान्तिमग्निर्हि गच्छति।
दोषाग्निरेवं सहसा परिषेकेण शाम्यति ।"

तद्यथा,—

"वातघ्नौषधनिक्वाथैस्तैलैर्मांसरसैर्हितैः ।
उष्णैः संसेचयेत् ग्रोथं वातिकं काफ्फिकेन तु ।
पित्तरक्ताभिघातोत्थं ग्रोथं सिञ्चेत् शीतलैः ।
क्षीराज्यमधुखेक्षुरसैः पित्तहरैः शृतैः ।
कफघ्नौषधनिःक्वाथैरुष्णैः परिषेचयेत् ।
तैलक्षारामुसृक्चैव ग्रोथं श्लेष्मसमुद्भवम् ।"*।

अथ विस्रापनमाह ।

"रूक्षतः कठिनस्यास्य कार्य्यं विस्रापनं ग्रनैः ।"

अथ ग्रोथस्य विस्रापनस्य विधिमाह । सुश्रुतः।

"अभ्यज्य स्वेदयित्वा तु वेणुनाद्या ग्रनैः ग्रनैः ।
विमर्द्दयेद्विवृद्धमन्दं तलेनाङ्गुष्ठकेन वा ।"

वेणुनाद्या स्वेदयित्वा दृष्ट्वास्वेदं ज्ञात्वा । * ।

रक्तमोक्षणमाह ।

"वेदनोपशमार्थाय तथा पाकसमाय च ।
अचिरोत्पतिते ग्रोथे ग्रोथितस्रावणञ्चरेत् ।"

चरेत् कुर्य्यात् ।

"एकतस्तु क्रियाः सर्व्वा रक्तमोक्षणमेकतः ।
रक्तं हि वेदनामूलं तच्चैवाक्ति न चापि रुक् ।
विवर्णे कठिने ग्लाने व्रणे चात्यन्तवेदने ।
सविग्रेषे विग्रेषेण जलौकोभिः प्रदेरपि ।"

ग्रोथितस्रावणञ्चरेदित्यनेनान्वयः । * ।

अथोपनाहस्वेदमाह । तस्य विधिर्भेषजसाधनप्रकरणे कथित एवास्ति ।

"रूक्षाणां दारुणानां कठिनानां तथैव च ।
ग्रोथानां स्वेदनं कार्य्यं ये चाप्येवं विचारणात्।"

ग्रोथानां सामान्यानां व्रणा: व्रणग्रोथाः तेषामपि स्वेदनं कार्य्यम् ।

"ग्रोथयोरुपनाहन्तु दद्यादामविदग्धयोः ।
प्रशाम्यत्यविदग्धस्तु विदग्धः पाकमेति च ।"

अविदग्धः आमः । विदग्धः पाकोन्मुखः । स यथा,—

"दग्धमूली बला राला वालिजन्या प्रसारिणी ।
मूलं फलञ्च वातारिसिन्दुवारपुनर्नवाः ।
ग्रोभाञ्जनः कक्षा चापि सैन्धवं विल्वमेषजम् ।
शुक्लकार्पासयोर्बीजमतसी च कुलत्थिका ।
तिला यवाश्च सिद्धार्थः कुटेरो मूलकं मिसिः ।
यथाप्रलेपैरमीभिस्तु द्रव्यैरन्यैश्च संयुतैः ।
कल्कीकृतैः सुखोष्णैश्च स्वेदयेद्विधिवच्छनैः ।
अनेन प्रशमं याति वातग्रोथो न संशयः ।"

दग्धमूलादिरूपमाह ।

"पुनर्नवा दारु शुण्ठी शिग्रुः सिद्धार्थ एव च ।
अल्पिष्टः सुखोष्णोऽयं प्रलेपः सर्व्वग्रोथहा ।"

पुनर्नवादिः । * ।

अथ पाचनमाह ।

"न प्रशाम्यति यः ग्रोथः प्रलेपादिविधानतः ।
द्रव्याणि पाचनीयानि दद्यात्तत्रोपनाहने ।"

पाचनद्रव्याण्याह ।

"गृञ्जकन्मूलशिग्रूणां फलानि तिलसर्षपाः ।
अतसीसक्तवः किण्वसुण्ठीद्रव्यञ्च पाचनम् ।"

गृञ्जफलादीनामतस्यन्ताः सक्तवः कर्त्तव्याः । किण्वं सुराबीजम् । यवगोधूमधान्यादिप्रकारः अन्यच्चोद्रव्यं व्रणस्य पाचनं भवति । * ।

अथ भेदनमाह ।

"अन्तःपूयेषु वक्रेषु तथैवोत्सङ्गवत्सु च ।
गतिमत्सु च रोगेषु भेदनं संप्रयुज्यते ।"

उत्सङ्गवत्सु कोटरवत्सु । गतिमत्सु गाढ़ीव्रणेषु । भेदनं शस्त्रमौषधकर्म्म च । * । तत्र शस्त्रेण भेदनमाह ।

"रोगे बहुलसाध्ये तु यथादेशं प्रमाणतः ।
शस्त्रं विधाय दोषस्तु स्रावयेत् कथितं यथा ।"

क्वचिच्छस्त्रनिक्षेपापवादमाह ।

"बालवृद्धासहक्षीणाभीरूणां योषितामपि ।
व्रणेषु मर्म्मजातेषु भेदनं द्रव्यलेपनम् ।"

तत्र भेदमाह ।

"चिरविल्वोऽर्कको दन्ती चित्रको हयमारकः ।
कपोतकद्रुपत्राणां मलं लेपेन दारुणम् ।"

चिरविल्वः करञ्जः । अर्कः भल्लातकः ।

"भल्लातकास्थिमलं तु रक्तचन्दनमिश्रितं ।"

हयमारकः करवीरः । दारुणं भेदनम् ।

"क्षारद्वयं तथा क्षारो दारुणः परिकीर्त्तितः ।"

क्षारद्वयं अपामार्गादि । क्षारः खर्জिका यवक्षारादिः ।

"हस्तिदन्तो जले पिष्टो विन्दुमात्रः प्रलेपतः ।
अत्यन्तकठिने ग्रोथे कथितो भेदनः परः ।"*।

अथ पीड़नमाह ।

"पूयगर्भाणनूद्धारान् व्रणान् मर्म्मगतानपि ।
यथोक्तैः पीड़नद्रव्यैः समन्तात् परिपीड़येत् ।"

पीड़नद्रव्याण्याह ।

"द्रव्याणां पिच्छिलानान्तु त्वङ्मूलानि प्रपीड़येत् ।
यवगोधूममाषाणां चूर्णानि च समासतः ।
शुष्यमाणसुपेक्षेत प्रलेपं पीड़नं प्रति ।
न चापि सुखमालिम्पेत्तथा दोषः प्रसिच्यते ।"

पीड़नं प्रति पीड़नद्रव्यलेपं प्रति । पीड़नद्रव्यलेपे शुष्यन्तमपि धारयेदित्यर्थः । तथा व्रणस्य सुखे लेपं विना प्रसिच्यते स्रवति । * ।

अथ ग्रोधनमाह ।

"व्रणस्य त्वविशुद्धस्य कार्य्यः शुद्धिकरः परः ।
पटोलनिम्बपत्रस्य सर्व्वमेव प्रशस्यते ।
वातिके दग्धमूलानां चौरिकां पैत्तिके व्रणे ।
आरग्वधादेः कफजे कषायः ग्रोधने हितः ।

व्रण:

अश्वत्थोदुम्बरप्लक्षवटैरेतत्सघृतम् ।
व्रणग्रोधोपदंशानां नाशनं चालनात् स्मृतम् ।
तैलसैन्धवयष्ट्याह्वनिम्बपत्रनिशायुतैः ।
चित्रद्विपलयुतैः कार्यः प्रक्षेपो व्रणशोधनः ॥
एकैकं सारिवास्थं सर्व्वव्रणविशोधनम् ।
निम्बपत्रतिलादन्तीचित्रकैस्तैलमाचिकम् ।
दुष्टव्रणप्रशमनो लेपः शोधनकेसरी ।"
शोधनकेसरी शोधनश्रेष्ठः ।
"लेपान्निम्बदलैः कल्कैर्व्रणशोधनरोपणः ।
भक्षणाच्छर्दिमन्दाग्निपित्तश्लेष्मशमो हरेत् ॥
व्रणान् विशोधयेत् वर्षा क्षमा स्यात् सन्धिमर्म्मणाम् ।
अभयाचित्रकादन्तीलाङ्गलीमधुसैन्धवैः ॥
निम्बपत्रघृतक्षौद्रार्द्धीमधुकसंयुता ।
वल्लिस्थितानां कल्को वा शोधयेद्रोपयेद्व्रणम् ।"॥

अथ रोपणमाह ।

"अपेतपूतिमांसानां मांसस्थानमरोहताम् ।
कल्कस्तु रोपणे देयस्तिलजो मधुसंयुतः ॥
अम्लगन्धा रुहा लोध्रः कट्फलं मधुयष्टिका ।
समङ्गा धातकीपुष्पं परमं व्रणरोपणम् ।
मधुयुक्ता व्रणपुष्टा सर्व्वव्रणरोपणी कथिता ।
सुखबीपत्रघनसूरवला मोचा कुटेरका ।
पृथगेते प्रलेपेन गम्भीरव्रणरोपणाः ।"
सुखबीपत्र कलौञ्जीपत्र । अम्ला एतदेव नाम पुस्तके धृतम् । कुटेरक वरवरी ।
"कक्कुभोदुम्बराश्वत्थजम्बुकट्फलजोधजे: ।
त्वक्पूर्वैर्चूर्णिता लेपात् प्ररोहन्ति महाव्रणाः ॥
प्रियङ्गुधातकीपुष्पयष्टीमधुजतूनि च ।
त्वक्पूर्वाणि तानि स्यू रोपणान्यवधूनयात् ॥
यवचूर्णं समधुकं सतैलं सह सर्पिषा ।
दह्यादालेपनं कोष्णं दाहमूलोपशान्तये ॥
करञ्जारिष्टनिर्गुण्डीलेपो दह्यादव्रणं क्षमोत् ।
लसुनस्याथवा लेपो हिङ्गुनिम्बतिलोऽथवा ।
निम्बपत्रवचाहिङ्गुसर्षपैर्लेपयेत्सर्षपैः ।
धूपनं स्याद्व्रणे रक्तःक्रमिकक्षूरजापहम् ॥

ये खेदपाकस्रुतिगन्धवन्तो
व्रणाश्चिरोत्था: समताञ्च शोथा: ।
प्रयान्ति ते गुग्गुलुमिश्रितेन
पीतेन शान्तिं त्रिफलाहृतेन ।
पटोलनिम्बासनसारधाभी-
पक्वान्नभिर्यं हमवर्मुखे तु ।
पिबेत् हृतं गुग्गुलुना विसर्प-
विस्फोटदुष्टव्रणशान्तिमिच्छन् ।"॥

अथ सर्व्वव्रताकरणम् ।

"मन:शिला समञ्जिष्ठा सलाक्षा रक्तशोधनम् ।
प्रलेप: सघृतक्षौद्रस्त्वच: सावर्ण्यकृत् स्मृत: ।"
अथ व्रणिनो भोजनम् ।
"जीर्णशाल्योदनं स्निग्धमश्नन्मुद्गं द्रवोत्तरम् ।
भुञ्जानो जाङ्गलैर्मांसै: शीघ्रं व्रणमपोहति ॥
लक्ष्मीयकजीवन्तीवास्तूकसुनिषण्णकै: ।
बालं मूलकवार्त्ताकुपटोलै: कारवेल्लकै: ॥

सदाक्षिमै: सामलकै: घृतभृष्टै: ससैन्धवै: ।
अन्यैरेवं गुणैर्व्यापि सुव्रादीनां रसेन च ।"
एभि: सह जीर्णशाल्योदनं भुञ्जान: शीघ्रं व्रणमपोहतीत्यन्वय: ।
"अम्लं दधि च शाकेषु मांसमानूपमोदकम् ।
क्षीरं गुरूणि चान्नानि व्रणित: परिवर्ज्जयेत् ॥
व्रणे व्यथुरायासात् स च रागेण जागरात् ।
तौ च रुक् च दिवास्वापात् तांश्च श्लेष्मा मैथुनात् ।"॥

अथाङ्गव्रणचिकित्सा ।

"कुर्य्याद्व्रणं कुर्य्यादूर्द्धमधश्च शोधनम् ।
क्रिया शीता प्रयोक्तव्या रक्तपित्तोष्मनाशिनी ।
लङ्घनञ्च बलं ज्ञात्वा भोजनं चाल्पमोचनम् ।
दुष्टे विदलिते चैव सुतरामिष्यते विधि: ॥
छिन्ने भिन्ने तथा विद्धे क्षते वाहमतिस्रवेत् ।
रक्तक्षयात्तत्र वात: करोति पवनो भृशम् ॥
स्नेहपानपरीषेकलेपाक्तौषधभेषजम् ।
कुर्व्वीत स्नेहवस्तिञ्च मारुतघ्नौषधैर्भिषक् ॥
खड्गादिच्छिन्नगात्रस्य तत्कालं पूतितो व्रण: ।
गाङ्गेरुकीमूलरसै: सद्य: स्यात् गतवेदन: ॥"
गाङ्गेरुकी नागबला गुरुसकरी इति लोके ।
"कषायमधुरा: शीता: क्रिया: सर्व्वा: प्रयोजयेत् ।
सद्यो व्रणानां सप्ताहात् पश्चात् पूर्व्वोक्तमाचरेत् ॥
आमाशयस्थे रुधिरे विदध्याद्वमनं नर: ।
तस्मिन् पक्वाशयस्थे तु यत्नीयात् स विरेचनम् ॥
बाधो वंशलगेरुकखदंष्ट्राक्षभिदा हृत: ।
छिन्नुसैन्धवसंयुक्त: कोष्णं सावयेद्रक्तं ।
वत्सकोलकुलत्थानां निस्क्वेथेन रसेन च ।
सुक्तीतान्नं यवागूं वा पिबेत् सैन्धवसंयुतम् ॥
जातीनिम्बपटोलपत्रकटुकादार्वीनिम्बाग्निसारिवा-
मञ्जिष्ठाभयतिक्ततुल्यमधुकैरेलाबीजै: समै: ।
सर्पि:सिद्धमनेन सूत्रवदना मर्म्माश्रिता: स्राविणो
गम्भीरा: सकृजो व्रणा: सगतिका: शुध्यन्ति रोहन्ति च ।
दृष्टवैद्योपदेशेन पारम्पर्य्योपदेशत: ।
जातीपत्रेण संसिद्धं लेपनं सिक्थकं वृषे: ॥"
इति जात्यादिघृतम् ।॥
"जातीनिम्बपटोलानां नक्तमालस्य पल्लवा: ।
सिक्थं समधुकं कृत्वं दे निशे कटुरोहिणी ।
मञ्जिष्ठा पद्मकं पथ्या लोध्रमुत्पलबीजसंयुतम् ।
सारिवा तुल्यकं चापि नक्तमालफलं तथा ॥"
सारिवास्थाने सनिम्ब इति च पाठ:
"एतानि समभागानि कल्कीकृत्य प्रयत्नत: ।
तिलतैलं पचेत् सम्यक् वैद्य: पाकविचक्षण: ॥
विसर्पव्रणे समुत्पन्ने स्फोटके कच्चरोगिणि ।
दद्रुकीसर्परोगेषु कीटदष्टेषु सर्व्वथा ।
सद्य: श्लेष्मप्रहारेषु दग्धविद्धेषु चैव हि ।
नखदन्तक्षते देहे दुष्टमांसापकर्षणे ।
भक्षणेन हितं तैलमिदं शोधनरोपणम् ।

तैलं जात्यादि नाम्नैतत् प्रसिद्धं भिषगाहृतम् ।"
इति जात्यादितैलम् । * ।
"चित्रकरञ्जीनरामठप्ररपुंखालाङ्गलीकसिन्दूरै: ।
सविषैस्तथा सकुष्ठै: कटुतैलं साधसंयुक्तम् ।
विपरीतमल्लतैलं दुष्टव्रणं तथा नाड़ीम् ।
बहुमेवणे रसाधामपथ्यभोक्तुश्च निर्गुंदति ।"
इति विपरीतमल्लतैलम् ।॥
"अन्ततापटोलमूलत्रिफलात्रिकटुकृमिघ्नानाम् ।
समभागानां चूर्णं सर्व्वसमो गुग्गुलोर्भाग: ।
प्रतिवासरमेकैकां खादेद्दिवाचपरिमाणाम् ।
जेतुं व्रणवाताद्यङ्गगुल्मोदरग्रोथवातरोगांश्च ।"
इति अन्ततादिगुग्गुलु: । * ।
अथाग्निदग्धस्य चिकित्सा ।
"दुष्टस्याग्निप्रपतनं कार्य्यमुक्तं तथौषधम् ।
सम्यक्छिन्नं शरीरे तु छिन्नं भवति शोभितम् ।
प्रक्षाल्य बलिनं शीतं स्कन्दयन्त्यतिशोभितम् ।
तस्मात् सुखयति शुष्कं न तु शीतं कदाचन ।"
स्कन्दयन्ति शोषयन्ति ।
"शीतासृक्षाच्च दुर्दग्धे क्रियां कुर्य्यात्ततः पुनः ।
घृतालेपप्रसेकास्तु शीतानेवास्य कारयेत् ।
सम्यग्दग्धे तुगाक्षीरीशतचन्दनगैरिकै: ।
साम्बुतै: सर्पिषा युक्तैरालेपं कारयेद्भिषक् ।
धान्यानूपौदकैर्मांसै: पिष्टैरेनं प्रलेपयेत् ।
अतिदग्धे विशीर्णानि मांसान्युद्धृत्य शीतलाम् ।
क्रियां कुर्य्यात् ततः पश्चाच्छालितण्डुलकल्कजै: ।
तिन्दुकाच्च कषायैर्व्वा घृतमिश्रै: प्रलेपयेत् ॥
बदरीलक्षकषायैर्व्वा घृतमिश्रै: प्रलेपनम् ।
यवान् दग्ध्वा मसीकृत्य तेनैव युतया तया ॥
अयं सर्व्वाग्निदग्धेषु लेपनाद्व्रणरोपक: ।
व्रणं गूढविषिक्तं वा क्षादयेदयमोदनै: ॥
मधूच्छिष्टं समधुकं लेपं सर्व्वरसं तथा ।
मञ्जिष्ठाचन्दनं चूर्णं पिष्ट्वा सर्पिषि पाचयेत् ।
सर्व्वेषामग्निदग्धानामेतल्लेपनसुत्तमम् ॥"
इति सिक्थकादिघृतम् । * ।
"सिद्धं कषायकल्काभ्यां पटोल्या कटुतैलकम् ।
व्रणदग्धरुजा स्रावदाहविस्फोटनाशनम् ॥"
इति पटोलीतैलम् ॥
"वातोल्बणमसृतं दुष्टं संशोध्य यथितं व्रणम् ।
कुर्य्यात् सदाहं कल्काढ्यं व्रणयित्नुं स सूक्ष्मत: ।
कम्पिल्लकं विडङ्गानि त्वक्षीरी दार्व्यारसेव च ।
पिष्ट्वा तैलं पचेत्तत्तु व्रणयन्त्रिहरं परम् ॥"
इति व्रणागन्तुव्रणाग्निदग्धव्रणाधिकार: ।॥
भयाधिकारस्तु भयग्रन्थे द्रष्टव्य: । नाड़ीव्रणनिदानं नाड़ीव्रणग्रन्थे द्रष्टव्यम् । * । अथ नाड़ीव्रणस्य चिकित्सा ।
"क्षुद्रकैदुग्धदार्वीभिर्वर्त्तिं कृत्वा प्रपूरयेत् ।
एष सर्व्वशरीरस्थां नाड़ीं हन्यात् प्रयोगराट् ।
आरग्वधनिशाकाकादार्वीक्षौद्रसंयुता ।
व्रणवर्त्तिर्नरे योज्या शोधनी गतिनाशिनी ।"
काला मञ्जिष्ठा ।

"जात्यर्कसव्याककरञ्जदन्ती-
सिन्धूत्थसौवर्चलयावशूकैः।
वर्त्तिः कृता हन्त्यचिरेण नाड़ीं
सुकुष्ठीरपिडा सह चित्रकेण ॥
गाढा: ग्रस्तेण वदनं दृढतं कृत्वा प्रवेशयेत्।
कुशलो वस्तिविधिना तैलं नाड्यादिसाधितम्।
एवमन्यच्च यत्तैलं घृतं वा खरसं तथा।
यत्तैलं यद्घृतं पक्वं खरसं वा तथैव च ॥"
इति वा पाठः ॥
"नाड्या अभ्यन्तरे वैद्यो लघुहस्तः प्रवेशयेत्।
कर्पूरकरञ्जतैलं सिद्धार्थकभवं भिषक्।
यत्नेत सिन्दूरकल्केन नाड़ीदुष्टव्रणापहम् ॥
गुग्गुलुत्रिफलायोषैः समांशैराज्ययोजितम्।
अक्षप्रमाणां गुटिकां खादेच्छीतामनु नरः ॥
नाड़ीदुष्टव्रणं शूलसुदावर्त्तभगन्दरम्।
गुल्मञ्च गुदजान् हन्यात् पक्षिराट् पन्नगानिव ॥"
सप्ताङ्गो गुग्गुलुः। इति नाड़ीव्रणाधिकारः ॥*॥
भगन्दरस्य निदानं चिकित्सा च भगन्दरग्रन्थे द्रष्टव्यम्। उपदंशस्य निदानादुपदंशग्रन्थे द्रष्टव्यम् ॥*॥ अथोपदंशस्य चिकित्सा।
"उपदंशेषु सर्व्वेषु क्षिप्तक्षिप्तस्य देहिनः।
मेढ्रमध्ये शिरां विध्येत् पातयेद्वा जलौकसः ॥
सद्यो निर्हृतदोषस्य रक्तस्रोधाप्रपन्नायतः।
पाको निवार्य्यो यत्नेन शिश्नच्छेदकरः स यतः ॥
वटप्ररोहार्জ্জুনजम्बुलोध्र-
पथ्याहरिद्रारचितः प्रलेपः।
यथा तथा शोथमपाकरोति
सर्व्वोपदंशेषु ततो हितोऽयम् ॥
उपदंशेषु पक्वेषु व्रणप्रक्षालनं हितम्।
त्रिफलायाः कषायेण भृङ्गराजरसेन वा ॥
नीलोत्पलं सुकुसुदं पद्मं सौगन्धिकं तथा।
एषां चूर्णं धूलनार्थे प्रलेपश्चात्र शस्यते ॥
वल्मूकदलचूर्णेन रजसा दाड़िमस्य वः।
गुग्गुलान्तद्व्रये कुर्य्याल्लेपं पूगफलेन वा ॥
दहेत् कटाहे त्रिफला तन्मसी मधुसंयुता।
प्रलेपेनोपदंशस्य व्रणः सद्यः प्ररोहयेत् ॥
पटोलनिम्बत्रिफलाकिरात-
क्वाथं पिबेद्वा खदिरासनाभ्याम्।
सगुग्गुलुं वा त्रिफलायुतं वा
सर्व्वोपदंशोपहरः प्रयोगः ॥
भूनिम्बनिम्बत्रिफलापटोल-
करञ्जधात्रीखदिरासनानाम्।
कषायकल्कैः घृतमाशु पाच्यं
सर्व्वोपदंशोपहरं प्रदिष्टम् ॥
इति भूनिम्बादिघृतम् ॥
"घृतानि यानि प्रोक्तानि कुष्ठे नाड़ीव्रणे व्रणे।
उपदंशे प्रयोज्यानि सेकाभ्यञ्जनभोजने ॥
क्षारकर्म्मैव संछिद्य शिङ्गवर्त्तिमथेषतः।
दहेच्च तान्ततस्ताभ्यां चिकित्सां व्रणवच्चरेत् ॥"
इत्युपदंशाधिकारः ॥*॥
शूकदोषाधिकारः शूकदोषग्रन्थे द्रष्टव्यः। इति भावप्रकाशः ॥*॥ अथ व्रणनाशकतैलम्।
"उड़ुम्बरं वटप्ररोहं जम्बुद्वयमधार्জ্জুनम्।
पिप्पलञ्च कदम्बञ्च पलाशशोधनिम्बकम् ॥
मधूकमाम्रसर्জ্জञ्च वदरं पद्मकेशरम्।
शिरीषबीजं कृतकमेतत् क्वाथेन साधितम्।
तैलं हन्ति व्रणान्क्षिप्राच्चिरकालभवानपि ॥"
इति गारुड़े १६८ अध्यायः ॥
व्रणकृत्, पुं, (व्रणं करोतीति। कृ+क्विप्। तुगागमश्च।) भल्लातकः। इति रत्नमाला। चतकारके, त्रि ॥
व्रणकेतुनी, स्त्री, (व्रणकेतुं हन्तीति। हन+टक्। ङीप्।) दुग्धफेनीवृक्षः। इति राजनिर्घण्टः ॥
व्रणघिट्, [ट्] पुं, (व्रणस्य घिट् शुद्धः।) व्रणशोधयष्टिका। इति शब्दचन्द्रिका। व्रणदेवके, त्रि ॥
व्रणघ्नः, पुं, (व्रणं हन्तीति। हन+डः।) एरण्डवृक्षः। इति शब्दचन्द्रिका। व्रणघातके, त्रि ॥
व्रणघ्ना, स्त्री, (व्रणं हन्तीति। हन+डः। स्त्रियां टाप्।) गुडूची। इति शब्दचन्द्रिका ॥
व्रणच्छत्, पुं, (व्रणं छरतीति। छ+क्विप्। तुक् च।) कञ्चिकारीवृक्षः। इति राजनिर्घण्टः ॥
व्रणारिः, पुं, (व्रणस्य अरिः शत्रुः।) शोधनम्। अगस्त्यवृक्षः। इति राजनिर्घण्टः ॥
व्रतं, क्ली पुं, भक्षणम्। इत्यमरादिकोषः। (क्रियते इति। डुकृञ् करणे+बाहुलकात् अतच्। सच चित्।) पुण्यजनकोपवासादि। तत्पर्य्यायः। नियमः २ पुण्यकर्म्म ३। इत्यमरः। नियामः ४ संयमः ५। इति शब्दरत्नावली। अथ व्रतविधिः। तदारम्भप्रतिष्ठयोर्व्वर्ज्यकालमाह ज्योतिषे। गुरोर्भगोरस्तवाक्ये वार्द्धके सिंहगे गुरौ इति। दृढो वाको दिनत्रयमित्यत्रम्। मठप्रतिष्ठातत्त्वादावनुसन्धेयम् ॥*॥ बुधाष्टमीव्रते विशेषो राजमार्त्तण्डोक्तो यथा,—
"द्विजेन्द्रसुतसंयुक्ता पूर्व्वा या च सिताष्टमी।
तस्यां नियमकर्त्तारौ न स्तः खण्डितसम्पदः ॥
पतङ्गे मकरे याते देवे जायति माधवे।
बुधाष्टमीं प्रकुर्व्वीत वर्द्धयित्वा तु चैत्रकीम् ॥
प्रसुप्ते च जगन्नाथे सन्ध्याकाले मघौ तथा।
बुधाष्टमीं न कुर्व्वीत कृता हन्ति पुराकृतम् ॥"
अथ व्रतानुष्ठानम्। तत्र देवलः।
"अरुणोदयात् प्रातराहारं कृत्वा चैव समाहितः।
सूर्य्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत्।
ब्रह्मचर्य्यं तथा शौचं सत्यमामिषवर्জ্জनम्।
व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः ॥"
अथ प्रातरित्यस्यासङ्कल्पेत्यत्र मान्वयः। किन्तु व्रतमिश्रनैवान्वयोऽभ्यर्हितत्वात्।
"प्रातः स्नात्वेत्यिहानुपवासव्रतादिकम्।
वापराह्णे न मध्याह्ने पित्र्यकार्य्यौ हि तौ स्मृतौ ॥"
इति वराहपुराणैकवाक्यत्वाच्च। ततश्चारुणोदयात् प्रातराहारमिति।
"मुनिभिर्विहितं प्रोक्तं विप्राणां सर्व्वदा स्थितं।
अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः ॥"
इति ज्योतिषपरिशिष्टादेकाहारं पूर्व्वदिने कृत्वा परदिने स्नात्वाचम्य सूर्य्यादिदेवेभ्यो निवेद्य। ॐ सूर्य्यः सोमो यम इत्यादिमन्त्रेण सान्निध्यं प्रार्थ्य व्रतमाचरेत्। ततः सङ्कल्पयेत्। यद्वा सूर्य्यादिदेवेभ्यो निवेद्य पूजनीयब्रह्मादि दत्त्वा व्रतमाचरेत् व्रतं कुर्य्यात्। तद्विधानञ्च शान्तिपर्व्वणि।
"यष्टीलौड़म्बरं पात्रं वारिपूर्णसुरक्षितः।
उपवासन्तु शक्रीयात् यद्वा वार्य्येव धारयेत्॥"*॥
कर्म्मादौ सूर्य्यपूजामाह ब्रह्मपुराणम्।
"यावन्न दीयते चार्घ्यं भास्कराय महात्मने।
तावन्न पूजयेद्विष्णुं शङ्करं वा महेश्वरीम् ॥"
नवग्रहपूजामाह मत्स्यपुराणम्।
"नवग्रहमखं कृत्वा ततः कर्म्म समारभेत्।
अन्यथा फलदं पुंसां न कार्य्यं जायते क्वचित् ॥"
आदित्यादिपूजामाह पद्मपुराणम्।
"आदित्यं गणनाथञ्च देवीं रुद्रं यथाक्रमम्।
नारायणं विष्णुहरं अग्निं च कुलदेवताम् ॥"
यतु।
"देवतादौ यदा मोहात् गणेशञ्च न पूजयेत्।
तदा पूजाफलं हन्ति विघ्नराजो गणाधिपः ॥"
इत्यनेन गणेशपूजनस्यादित्यसूक्तं ततः सूर्य्यपूजेतरपरम्। कुलदेवतेत्यत्र कुलाद्युपलक्षणम्।
"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे।
आरब्धे क्षुतकं न स्यादनारब्धे तु क्षुतकम्॥"
तत्र विशेषयति मत्स्यपुराणम्।
"गर्भिणी क्षुतिका नक्तं कुमारी च रजस्वला
यदाशुद्धा तदान्येन कारयेत् क्रियते सदा ॥
उपवासाशक्तौ तु नक्तं भोजनं कुर्व्वीत।
"उपवासेष्वशक्तानां नक्तं भोजनमिष्यते।"
इति वचनान्तरात् अशुद्धा चेत् पूजां कारयेत्। कायिकोपवासादिकं सदा शुद्धया अशुद्धया वा स्वयं क्रियते। अत्यन्तासामर्थ्ये पुत्रादिप्रतिनिधिद्वारा उपवासः कार्य्यः। तदभावेऽनुकल्पः। गरुड़पुराणम्।
"भार्य्या भर्त्तृव्रतं कुर्य्यात् जायायास्तु पतिस्तथा।
असामर्थ्यात् द्वयोरन्या व्रतभङ्गो न जायते ॥
पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा।
एवमभाव एवान्यं ब्राह्मणं विनियोजयेत्॥"
आरब्धव्रतस्यासमाप्तौ मरणेऽपि तत्फलप्राप्तिमाहाङ्गिराः।
"यो यदर्थं चरेद्धर्म्मं न समाप्य मृतो भवेत्।
स तत्पुण्यफलं प्रेत्य प्राप्नुयान्नात्र संशयः॥"
प्रेत्य परलोके। गारुड़पुराणम्।
"लोभान्मोहात् प्रमादाद्वा व्रतभङ्गो यदा भवेत्।
उपवासत्रयं कुर्य्यात् कुर्य्याद्वा केशमुण्डनम्॥"
मोहो भ्रमः। प्रमादोऽनवधानता। वाशब्दः समुच्चये तेन मुण्डनञ्च कार्य्यं मुण्डनाकरणे द्विगुणं प्रायश्चित्तम्। उपवासत्रयाशक्तौ चतुर्विंशतिपणा देयाः। पद्मपुराणम्।

"वपनं नैव नारीणां नानुव्रज्याजपादिकम्।
न गोष्ठे शयनं तासां न च दध्याद्दवाजिनम्॥
सर्व्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम्।
एवमेव तु नारीणां सुखसुखनमादिशेत्॥"
इति गोवधप्रकरणे विवेचितम्।
"प्रायश्चित्तमिदं ज्ञात्वा पुनरेव व्रती भवेत्।
पूर्व्वं गृहीत्वा सङ्कल्पं प्रमादान्नाचरेद्यदि।
जीवन् भवति चण्डालो मृतः श्वा चाभि-
जायते॥"
इति प्रायश्चित्तविवेकधृतवचनम्॥
देवलः।
"सर्व्वभूतभयं व्याधिः प्रमादो गुरुशासनम्।
अव्रतघ्नानि कथ्यन्ते सङ्गदेतानि शास्त्रतः॥"
भर्त्तुरनुज्ञया स्त्रीणां व्रतकरणे न दोषः। कामं भर्त्तुरनुज्ञया व्रतोपवासनियमेष्वादीनामभ्यासः स्त्रीधर्म्मे इति संवत्सरप्रदीपधृतशङ्खवचनात्। अत्र कथाश्रवणमाह देवीपुराणम्।
"तद्व्रतं तत्तपः स्नानं तत्कथाश्रवणादिकम्।
उपवासस्ततो ज्ञेयो गुणाः प्रोक्ता मनीषिभिः॥"
अथ व्रतप्रतिष्ठाविधिः।
श्रीभगवानुवाच।
"गोपथारामसेतूनां मठसंक्रमवेश्मनाम्।
नियमव्रतलक्षाणां प्रतिष्ठां शृणु सत्तम॥
ब्राह्मेण विधिना वह्निं समाधाय विचक्षणः।
घृतां पूर्णघटं कांस्यं सन्निवे स्थापयेद्बुधः॥
ब्रह्मन् सर्व्वं समासाद्य अपयेद्यवमयं चरुम्।
क्षीरेण कपिलायास्तु तद्घृतेनेति साधकः॥
प्रणवेनाभिघार्य्याथ दर्व्या संघट्टयेत् ततः।
साधयित्वावतार्य्याथ तद्घृतेनेति होमयेत्॥
व्याहृत्या चैव गायत्र्या तद्घृतमासेति होमयेत्।
विश्वतश्चक्षुरित्युक्त्वा वेदाद्यैर्होमयेत्तथा॥
ॐ भूरग्नये स्वाहा। ॐ सूर्य्याय स्वाहा। ॐ प्रजापतये स्वाहा। ॐ अन्तरीक्षाय स्वाहा। ॐ द्यौः स्वाहा। ॐ ब्रह्मणे स्वाहा। ॐ पृथिव्यै स्वाहा। ॐ महाराजाय स्वाहा। ॐ सोमं राजानमिति जुहुयात्। ॐ लोकपालेभ्यः स्वाहा। सखमन्त्रैर्जुहुयाद्दश्यहेभ्यश्च। एवं हुत्वा चरोर्भागं दद्यात् दशदिशां बलिम्। ततः पलाशसमिधा हुनेदष्टोत्तरं शतम्। आज्यन्तु जुहुयात् पञ्चादेभिर्मन्त्रैर्द्विजोत्तमः। ततः पूरयेत्तैव मन्त्रैराज्यन्तु होमयेत्॥ इरावतीति जुहुयात् तिलान् घृतपरिप्लुतान्। हुत्वा च ब्रह्मविष्णोग्रदेवानामनुयायिनम्॥ ग्रहाणामाहुतीर्हुत्वा लोकेशानामथो पुनः। पर्व्वतानां नदीनाञ्च समुद्राणां तथैव च॥ हुत्वा व्याहृतिभिर्दद्यात् श्रुचा पूर्णाहुतित्रयम्। वौषट्कृतेन मन्त्रेण वैष्णवेन सुरोत्तम॥ पक्वान्नयज्ञ संप्राप्य दद्यादाचार्य्यदक्षिणाम्। तिलपात्रं हेमयुक्तं सवस्त्रं गामलङ्कृताम्। प्रीयतां भगवान् विष्णुरित्युक्त्वोद्वहेत्तं नरः॥
आरामं कारयेद्यस्तु नन्दने स चिरं वसेत्। मठप्रदानात् खर्लोकं प्राप्नोति पुरुषः सदा॥
सेतुप्रदानादिन्द्रस्य लोकमाप्नोति मानवः।
प्रपादानाद्वरुणस्य लोकमाप्नोत्यसंशयम्॥
संक्रमाणान्तु यः कर्त्ता दुर्गतिं तरते नरः।
स्वर्गलोके च निवसेत् दृष्टकासेतुकृत्तथा॥
गोमार्गस्य तथा कर्त्ता गोलोके क्रीड़ते चिरम्।
नियमव्रतलङ्घयति विष्णुलोकं नरोत्तमः॥
लङ्घयेत् स्वर्गमाप्नोति सर्व्वपापविवर्ज्जितः।
अनेन विधिना मर्त्यः संपूर्णं फलमाप्नुयात्॥
इयं प्रतिष्ठा सामान्या सर्व्वसाधारणात्मिका।
कर्त्तव्या देशिकेनैव प्रतिष्ठा यत्र विद्यते॥
इति संक्षेपतः प्रोक्तः समुदायविधिस्तव।
सर्व्वेषामेव वर्णानां सर्व्वकामफलप्रदः॥
सर्व्वैर्मुक्तेषु कर्त्तव्या प्रतिष्ठा विधिना बुधैः।
फलार्थिभिस्तु प्रतिष्ठं यस्मान्निष्फलमुच्यते॥"
इति हयग्रीर्षे समुदायप्रतिष्ठापटलः॥
ब्राह्मेण वैदिकेन स्वयम्भोक्तविधिनेति यावत्। घृतेति उदूखलोपलक्षणम्। कांस्यं अग्निप्रणयनार्थम्। कांस्येन अग्निप्रणयनमाह यज्ञासंग्रहे।
"शुभं पात्रन्तु कांस्यं स्यात्तेनाग्निं प्रणयेद्बुधः।
तस्याभावे सरावेण नवेनाभिमुखञ्च तम्॥
सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः।
विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु॥"
एवमग्निप्रणयनानन्तरं सर्व्वत इत्यस्य पाठो युक्तः। प्रणीत इति मन्त्रलिङ्गात्। अन्यथा स्थापनानन्तरं एतद्विधानं अर्थं स्यात्॥
अत्र च पाकाङ्गत्वात् साहस्रनामानमग्निमाह यज्ञासंग्रहः।
"प्रायश्चित्ते विधुश्चैव पाकयज्ञे तु साहसः।
पूर्णाहुत्यां रुद्रो नाम शान्तिके वरदस्तथा।
आहूय चैव होतव्यं यत्र यो विहितोऽनलः॥"
प्रायश्चित्ते होमकर्म्मवैगुण्यसमाधानार्थं प्रायश्चित्तात्मकमहाव्याहृतिहोमादौ। तथा च छन्दोगपरिशिष्टम्।
"यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत्।
तत्रस्तत्र विज्ञेयाः स्त्रीपाणिग्रहणे यथा॥
अपि व्याहृतिमित्येषा प्राणापत्यापि वाहुतिः।
होतव्या चिर्विकल्पोऽयं प्रायश्चित्तविधिः
स्मृतः॥"
अत्र चिर्विकल्प इत्यभिधानात् सामगानां भवदेवभट्टोक्तग्राह्यायणहोमो नित्यमात्मिकः। अन्यासुकामे इहागच्छागच्छ इत्युच्चार्य्य यवाभावे व्रीह्यादिभिरपि होमः।
"हविष्येषु यवा मुख्यास्तदभावे व्रीहयः स्मृताः।
माषकोद्रवगौरादीन् सर्व्वाभावे विवर्ज्जयेत्॥
यथोक्तवस्तुसम्पत्तौ यज्ञं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहीणामिव शालयः॥"
इति छन्दोगपरिशिष्टात्॥
तत्र गोभिर्वेन अथ हविर्निर्व्वपति व्रीहीन् यवान् वा कांस्ये चरुस्थाल्यां वा असंस्कृते वा जुहूं निर्व्वपामीत्यनेन देवतानामोद्देशः। सकृद्-यजुषा हिरण्मीमित्यनेन निर्व्वापक्रमाभिधानात् सामगेन तन्नाद्यं कर्त्तव्यम्। अत्र च विष्णवे त्वा जुहूं निर्व्वपामीत्यनेन यजुषा चरुं इत्यभिधानात् हवनीयनिर्व्वापवदाहुतिनिष्पत्तिः कर्त्तव्या। तत्र छन्दोगपरिशिष्टम्।
"देवतासंख्यया यस्य निर्व्वापाश्च पृथक् पृथक्।
तूष्णीं हिरेव यज्ञीयाहोमाश्चापि पृथक् पृथक्॥"
अत्र देवतासंख्यया पृथक् पृथक् निर्व्वापः। अनुनिर्व्वापस्तन्त्रेणैव। होमोऽपि पृथक् पृथगेवेति। आलस्यादिपुरुषदोषेण गृहीतनस्रुतेनापि मन्त्रेण निर्व्वापादिकं समाचरन्ति याज्ञिकाः।
"घाते न्यूने तथा च्छिन्ने सान्नाय्ये मान्त्रिके
तथा।
यत्ने मन्त्राः प्रयोक्तव्या मन्त्रा यज्ञार्थसाधकाः॥"
इत्युक्तेः। मान्त्रिके मन्त्रसाध्ये अवघातादौ न्यूने तत्काले मन्त्रपाठाभावे मन्त्राः प्रयोक्तव्याः। कपिलाया अभावे अन्यधेनोरपि घृतेन सप्रणवतद्विष्णोरित्यनेनाभिघार्य्य दर्व्या दक्षिणावर्त्तेन संमिश्रयेत्। दर्व्यौ च प्रादेशप्रमाणा द्व्यङ्गुलविस्तारा ग्राह्या।
"इध्मजातीयमिध्मार्द्धप्रमाणं मेध्यदं भवेत्।
वृत्तं वार्त्तघ्नमव्रणमवदानक्रियाक्षमम्॥
एषैव दर्व्यौ यस्तत्र विशेषस्तमहं ब्रुवे।
दर्व्यौ द्व्यङ्गुलपृथ्वया तुरीयोनघ मेध्यदम्॥"
इति छन्दोगपरिशिष्टात्।
इध्मार्द्धप्रमाणं प्रादेशमात्रम्। प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्त्तितम्। इति छन्दोगपरिशिष्टोक्तेः। अथेत्यनेन स्वयम्भोक्तप्रोक्षणसमापनानन्तरं प्रकृतहोमः। अत्र बहुदेवताकचरुहोमादुपघातहोमः।
"चरौ तु बहुदेवत्ये होमः स्यादुपघातवत्।"
इति छन्दोगपरिशिष्टधृतवचनात्॥
उपघातलक्षणमाह यज्ञासंग्रहः।
"पाणिना मेध्यदेनाथ स्रुवेणैव तु यद्घृतेः।
घृयते चानुपस्तीर्य्य उपघातः स उच्यते॥
यदुपघातं जुहुयाच्चरावाज्यं समापयेत्।
मेध्यदेन तु होतव्यं नाज्यभागौ न खिद्यते॥"
अनुपस्तीर्य्य इत्यनेन स्रुचि यच्चतुरावर्त्तं पञ्चावर्त्तं वा घृतोपस्करणादिकं तदत्र नास्ति तेन मेध्यदादिना सकृत् गृहीत्वा होतव्यम्॥
प्रकृतहोमात् प्राक् वह्निपूजनमाह मार्कण्डेयपुराणम्।
"पूजयेच्च ततो वह्निं दद्याच्चाज्याहुतीः क्रमात्।"
तत इति वह्निनामकरणाध्यानानन्तरम्। होमाद्युद्देशे स्मृतिः।
"मन्त्रोच्चारपूर्व्वेण स्वाहान्तेन विचक्षणः।
स्वाहावसाने जुहुयाद्ध्यायन् वै मन्त्रदेवताम्॥"
ततस्तद्विष्णोरितिमन्त्रेण चरुणा होमयेत्। एवं व्याहृत्या प्रत्येकं भूरित्यादिना। गायत्र्या सावित्र्या। तद्विप्रासेति तद्विप्रासो विपण्यवो जागृवांस ऋत्यादिना। विश्वत इति विश्वत-

चक्षुरत विश्वतोमुख इत्यादिना। वेदाद्यैः अग्निर्मीळे इत्यादिना। इषेत्वोर्ज्जेत्वा इत्यादिना। अग्न आयाहि इत्यादिना। अग्नो देवीरित्यादिना चतुर्भिः। भूरस्यये इत्याद्यष्टभिः। ततः सोमं राजानमित्यादिना। ततो लोकपालेभ्य इत्यादिना खस्वमन्त्रैस्तत्तदेवोक्तदग्दिक्पालमन्त्रैः। तत्र सामगानां इन्द्रस्य त्रातारमित्यादिना। अथेत्य अग्निं दूतं वृणीमहे इत्यादिना। यमस्य नाके सुपर्णमित्यादिना। निर्ऋतेर्वैत्याहि निर्ऋतीनां इत्यादिना। वरुणस्य ध्रुवासी सुवरणानामित्यादिना। वायोः वात आवातु भेषजं इत्यादिना। सोमस्य सोमं राजानमित्यादिना। ईशानस्य अभित्या शूरणो नुम इत्यादिना। ब्रह्मणो ब्रह्मयज्ञानं प्रथममित्यादिना। अनन्तस्य सर्पराज्ञीध्रुवमित्यादिना। तथा च गोभिलीयकर्म्मप्रदीपे।

"त्रातारमिन्द्रमवितारमिन्द्रस्य परिकीर्त्तितः।
अग्निं दूतं वृणीमहे वह्निमन्त्रो यमस्य वै॥
नाके सुपर्णमुपयत् वेत्याहिर्निर्ऋतेस्तथा।
ध्रुवासीति वरुणस्य वात आवातु भेषजम्॥
वायोर्मन्त्रः समुद्दिष्टः सोमं राजानमित्यृचा।
सोमस्य मन्त्रः कथितस्त्रिभिरेतैरुदीच्य उच्यते॥"

ईशे ईशानस्य।

"ब्रह्मयज्ञानं प्रथमं ब्रह्मणः परिकीर्त्तितः।
सर्पराज्ञीध्रुवमिति च सर्पस्य समुदाहृतः॥"

ग्रहेभ्यः नवग्रहेभ्यः खस्वमन्त्रैः सर्व्ववेदसाधारणैः। सूर्य्यस्याक्षभिरित्यादिना। सोमस्याप्यायेत्यादिना। मङ्गलस्यामिर्बृहा इत्यादिना। बुधस्याग्ने विवस्वदित्यादिना। बृहस्पतेर्बृहस्पते परिदीयेत्यादिना। शुक्रस्य शुक्रन्नोऽन्यदृयजतन्त इत्यादिना। शनैश्चरस्य अग्नो देवीरित्यादिना। राहोः कयानश्चित्रेत्यादिना। केतोः केतुं कृण्वन्नित्यादिना। तथा च मत्स्यपुराणम्।

"आकृष्णेनेति सूर्य्याय होमः कार्य्यो विजानता।
आप्यायस्वेति सोमाय मन्त्रेण जुहुयात् पुनः॥
अग्निर्मूर्द्धा दिवो मन्त्रमिति भौमाय कीर्त्तयेत्।
अग्ने विवस्वदुषस इति सोमसुताय च।
बृहस्पते परिदीया रथेनेति गुरोर्मतः।
शुक्रन्नोऽन्यदिति च शुक्रस्यापि निगद्यते॥
अन्नेश्चरायेति पुनः अग्नो देवीति होमयेत्।
कयानश्चित्र आभुव दूती राहोरुदाहृतः।
केतुं कृण्वन्निति कुर्य्यात् केतूनामुपशान्तये॥"

एवं चरुहोमं समाप्य चरुशेषेण प्राच्यादिदिग्भ्यः पायसबलिं दद्यात्। तद्यथा। एव पायसबलिः ओं प्राच्ये दिग्ये नमः इत्यादिना। दक्षिणाये दिग्ये स्वाहा इति श्रुतिदर्शनात्। इन्द्रेश्वरपद्मतिलतत्प्रदीपाभ्यां स्वाहान्तेन बलिदानसूक्तम्। वस्तुतस्तु बलिप्रकरण एव प्राच्यूर्द्धावाचीभ्योऽहरहर्नैत्यं प्रयोग इति गोभिलसूत्रे ओलिङ्गनिर्देशात् दिशां देवतात्वं बलौ प्रतीयते। अत्र लवाचीतिपाठात् शुक्लपक्षहोमीये दक्षिणाये इत्यनाद्यन्तं ओं अवाच्ये दिग्ये नमः इति बलौ प्रयुज्यते। एभिर्मन्त्रैस्तद्दिग्भ्यः परमं पदं इत्यादियावन्मन्त्रैः। आप्यन्तिति तुशब्देन समिद्धोमे तैर्वा यावर्त्तनात् मन्त्राकाङ्क्षायां प्रायश्चित्तत्वेन तद्दिग्भ्योरित्यस्य परिग्रहः। ततस्तद्दिग्भ्योरिति मन्त्रेण स्वाहान्तेन घृताक्तपलाशसमिद्भिरष्टोत्तरशतं जुहुयात्। पूर्व्वोक्तमन्त्रैः पूर्व्वोक्तदेवताभ्यः सुवेणाज्याहुतीर्जुहुयात्। पुरुषसूक्तस्तत्तदेवोक्तः। तत्र सामगानाम्। ओं इदं विष्णुरिति। प्रेषकस्य विष्णोरिति। प्राकाश्यसूक्तेन त्रुवाभ्य इति। सहस्रशीर्षेति। त्रिपादूर्द्ध इति। पुरुष एवेदमिति। एतावानस्य इति। ततो विराडिति। कयान इत्यादि पुरुषसूक्तम्। तथा च सामिधेनी श्रुतिः। इदं विष्णुः प्रेषकस्य विष्णोः प्राकाश्यसूक्तेन त्रुवाभ्यः इति वाराहमन्त्रं पुरुषव्रते चैषा वैष्णवीनामसहितेनां प्रयुञ्जन् विष्णुः प्रीयाति इति प्राकाश्यसूक्तेन त्रुवाभ्य इति वाराहमन्त्रमित्यनेन एको मन्त्रः प्रकाशितः। पुरुष इत्यनेन पुरुषपदयुक्तपञ्चमन्त्राः। व्रते इत्यनेन कयानश्चित्र इत्येको मन्त्रः। सामगो जुहुयात्। यजुर्व्वेदी तु तत्र प्रविष्टाभिः सहस्रशीर्षेत्यादिऋग्भिः षोडशाहुतीर्जुहुयात्। इरावतीति तिलान् घृताक्तान् सङ्क्षिप्य जुहुयात्। एवं ब्रह्मानुयायिभ्यः स्वाहा विष्णुयायिभ्यः स्वाहा ईशानानुयायिभ्यः स्वाहा। एवं पूर्व्वोक्तनवग्रहमन्त्रैः पूर्व्वोक्तदिक्पालमन्त्रैश्च जुहुयात्। एवं पर्व्वतेभ्यः स्वाहा नदीभ्यः स्वाहा नदेभ्यः स्वाहा समुद्रेभ्यः स्वाहा भूः स्वाहा भुवः स्वाहा इति जुहुयात्। ततः परिभाषासिद्धं स्वग्राखोक्तमहाव्याहृतिहोमं प्रायश्चित्तहोमञ्च कृत्वा सुचा तद्दिग्भ्योरिति मन्त्रेण दौवङ्गुलेन पूर्णाहुतित्रयमुत्सृज्य जुहुयादिति विप्रेभ्योपादानात् नात्र स्वग्राखोक्तपूर्णहोमः। ततः पञ्चगव्यं चरुशेषं प्राश्य त्यक्त्वा वा हैमयुक्तं सवत्सं तिलपात्रं अलङ्कृतां गाञ्च दक्षिणामाचार्य्याय दद्यात्। आचार्य्यपदञ्च।

"उदाहरति वेदार्थान् यज्ञविद्याः श्रुतेरपि।
श्रुतिस्मृतिसमापन्नमाचार्य्यं तं विदुर्बुधाः॥"

इति छन्दोगपरिशिष्टात्।

कर्म्मोपदेष्टुराचार्य्यत्वेन आचार्य्यपदं स्वयं होमपरं ब्रह्मपरं अन्यहोमपरं ब्रह्महोमद्वयपरम्। स्वयं ब्रह्महोमकर्म्मकरणपक्षे पुस्तकधारणपरम्।

"ब्रह्मणे दक्षिणा देया यज्ञ या परिकीर्त्तिता।
कर्म्मान्तेऽशुचमानायां पूर्णपात्रादिका भवेत्॥
विदधाद्वौचमन्यच्चेद्दक्षिणार्द्धहरो भवेत्।
स्वयंचेदुभयं कुर्य्यादन्यस्मै प्रतिपादयेत्॥"

इति छन्दोगपरिशिष्टैकवाक्यतात्।

एवं ब्रह्मविधिना अग्निस्थापनादि प्रीयतां भगवान् विष्णुरित्यन्तकर्म्मसंस्कृतगोपथादिहानियमव्रतलङ्घादिकरणान्यतररूपा समुदायप्रतिष्ठा कर्त्तव्या। समुदायस्य प्रकृतगोपथादिप्रतिष्ठा समुदायप्रतिष्ठा। तथा च कपिलपञ्चरात्रम्।

"प्रतिष्ठाशब्दसंसिद्धिः प्रतिपूर्व्वाच्च तिष्ठतेः।
वह्नर्थेत्वाग्निपातानां संस्कारादौ प्रतिःस्थितिः॥"

तथा च गोपथादेरुक्तकर्म्मसंस्कृतस्य पूजनकरणम्। अप्रतिष्ठस्तु निष्फलमित्युक्तेः। एतद्व्रतकर्म्मणा प्रीयतां भगवान् विष्णुरिति समाप्नुयात्॥ ॥ अथ व्रतप्रतिष्ठाप्रयोगः। तत्र कृतनित्यक्रियः कथाञ्च व्रतं समाप्य तत्तद्देवताप्रीतिकामो यथाशक्ति दानादि दद्यात्।

"व्रते देवद्दोत्सर्गे कूपादीनां प्रतिष्ठने।
दद्यात् षोडशदानानि द्विषड्दानानि चैव वा॥"

इति दानसागरधृतवचनात्॥

ओं तत् सदद्यैतुचार्य्ये ओं अद्येत्यादि असुकगोत्रोऽसुकदेवशर्म्मा ततद्व्रतफलप्राप्तिकामः कृतैतत् असुकव्रतप्रतिष्ठामहं करिष्ये। स्त्री चेद्व्रतकारिणी तदा असुकगोत्रासुकी देवीत्यादृशं इति सङ्कल्पं कुर्य्यात्। ततो घटं संस्थाप्य पञ्च देवान् संपूज्य मौर्य्यादिषोडशमातृकाः संपूज्याः। पुरुषश्चेत्तदा नान्दीश्राद्धं कुर्य्यात्। तत उत्तराभिमुखं ब्राह्मणमुपवेश्य तत्पश्चीपे आसनमानीय प्राङ्मुखो यजमानः ओं साधु भवानास्तां इति कृताञ्जलिर्वदेत्। ओं साध्वहमासे इति प्रतिवचनम्। ओं अर्च्चयिष्यामो भवन्तं इति पुनर्वदेत् ओं अर्च्चयेति प्रतिवचनम्। ततो वस्त्रालङ्कारगन्धपुष्पादिभिरभ्यर्च्च्य दक्षिणं जानु भूत्वा ओं अद्येत्यादि असुकगोत्रमसुकदेवशर्म्माणमर्चयितं कृतैतत्सदसुकव्रतप्रतिष्ठाकर्म्मणि होमादिकर्म्मकरणाय भवन्तमहं वृणे। ओं वृतोऽस्मीति प्रतिवचनम्। ओं यथाविहितं वृतकर्म्म कुरु। ओं यथाज्ञानं करवाणि इति प्रतिवचनम्। ततो वेदीं पञ्चगव्येनाभ्युक्ष्य पूर्व्वे पञ्च घटान् घटमेकं वा संस्थाप्य प्रथमलिखितक्रमेण भूतशुद्ध्यादिन्यासादिपूजां विधाय तत्तद्देवतां क्रमेण पूजयेत्। ततो होता स्वयंप्रोक्तविधिनार्घ्यं संस्थाप्य ब्रह्मस्थापनानन्तरं चरुश्रपणं कुर्य्यात्। अत्रत सर्व्वं प्रतिष्ठाप्रद्धतौ द्रष्टव्यम्॥ अथ व्रतप्रयोगः। स्वस्तिवाचनं कृत्वा सूर्य्यः सोम इति पठित्वा सङ्कल्पं कुर्य्यात्। अद्येत्यादि असुकशर्म्मोऽसुकव्रतमहं करिष्ये। व्रतादृत्तौ आवृत्तिसंख्यासूचिकेति अद्यारभ्येति च उदङ्मुखो भूत्वा एतत् कुर्य्यात्। ओं वृषः त्रिलिं नम इति स्वस्तिकं मार्जयेत्। ओं ब्रह्मभ्युच्चयेत्। वामहस्तेन स्वस्तिकं गृहीत्वा कुशेन प्रणवपूर्व्वकं चतुर्थ्यन्तव्रतदेवतानाम लिखेत्। हस्तप्रमाणं स्वस्तिकं चतुरस्रं वितस्तिमितपूर्व्वं मध्ये वितस्त्यङ्गुलिकं हरिद्रापूर्णेन तद्बहिर्वितस्तिप्रमाणान्यन्योन्यसंलग्नानि अष्टदलानि वितस्तुलपूर्णेन पञ्चगन्धेन केशरादि कुसुम्भपूर्णेन पञ्चसन्धीविल्वादिपञ्चपूर्णेन पीठगात्राणि दग्धपुलाकेन त्रिधा घटं संस्थाप्य सामान्यार्घ्यं त्रिधा तदुदकेनात्मानं पूजोपकरण-

स्वाभ्युक्ष्य गणेशादीन् नवग्रहांश्चैव पूजयेत्। ततो व्रतदेवता: पूजयेत्। इति व्रततत्त्वम् ॥७॥ अथ व्रतलक्षणम्। दीर्घकालानुपालनीयसङ्कल्पो व्रतमिति नारायणोपाध्यायानां स्वरस:। स्वकर्मव्यतिरिक्तो नियत: सङ्कल्पो व्रतमिति श्रीदत्तहरिनाथवर्द्धमानप्रभृतय:॥ सङ्कल्पश्च भावे मयैतत् कर्त्तव्यमेव निषिद्धं न कर्म्मत्यमिति ज्ञानविशेष:। अतएव सङ्कल्प: कर्म्मभानसमित्याभिधानिका:। वस्तुतस्तु पूर्व्वोक्तवराहपुराणवचनेनैकादश्युपवासस्य व्रतत्वाभिधानात्। "एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैकेन पादलक्ष्म उदाहृत:।" इत्यादि याज्ञवल्क्योक्तेषु एकभक्तनक्तायाचितभोजनोपवासादिषु पादलक्ष्मादित्वाभिधानाच्च न सङ्कल्पो व्रतम्। किन्तु सङ्कल्पविषयतत्तत्कर्म्मैव व्रतमिति। अतएव व्रतानां सङ्कल्पसम्भवत्वमाह मनु:।

"सङ्कल्पमूल: कामो वै यज्ञा: सङ्कल्पसम्भवा:। व्रता नियमधर्म्माश्च सर्व्वे सङ्कल्पजा: स्मृता:॥"

अनेन कर्म्मणा इदमिष्टं फलं साध्यते इत्येवं विषया बुद्धि: सङ्कल्पस्तदनन्तरमिष्टसाधनतया व्यवगते तस्मिन् इच्छा जायते ततस्तदर्थं प्रयत्नं कुर्व्वीत इत्येवं यज्ञा: सङ्कल्पसम्भवा:। व्रता नियमरूपा धर्म्माश्चतुर्थाध्याये वक्ष्यमाणा:। सर्व्वे इत्यनेन अन्येऽपि श्राद्धार्था: सङ्कल्पादेव जायन्ते इति कुल्लूकभट्ट:॥ ॥ सङ्कल्पमाह वराहपुराणम्।

"प्रात: सङ्कल्पयेद्विद्वानुपवासव्रतादिकम्। नापराह्णे न मध्याह्ने पित्र्याकाली हि तौ स्मृतौ॥"

सङ्कल्पं व्रतस्यारम्भ इत्युक्तं राघवधृतो विष्णु:। "व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे। आरम्भे सूतकं न स्यादनारम्भे तु सूतकम्॥ आरम्भो वरणं यज्ञे सङ्कल्पो व्रतजापयो:। नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया। नियमस्तस्तु वा श्राद्धे आरम्भ: स्यादिति स्मृति:॥"

पाकपरिक्रियेति सामैर्द्धश्राद्धविषयम्। तत्रैव तस्याप्युद्धरणविधानेन तदग्निपाकस्यासाधारणत्वात्॥ सङ्कल्पविधानन्तु संवत्सरप्रदीपे। "प्रात:स्नात्वा तत: कृत्वा सङ्कल्पं वृध आचरेत्।" शान्तिपर्व्वणि।

"गृहीत्वाऽङ्गुलं पात्रं वारिपूर्णसुदङ्मुख:। उपवासन्तु गृह्णीयादथवा सङ्कल्पयेद्बुध:॥ देवतास्तस्य तुष्यन्ति कामितं तस्य सिध्यति। अन्यथा तु हृथा मर्त्या: क्लिश्यन्ति खलु बुद्धय:॥"

यद्वेति पक्षान्तरम्। तेन ताम्रपात्राभावे सङ्कल्पमात्रं करणीयम्॥ ॥ गृहीतव्रताकरणे दोषमाह छागलेय:।

"पूर्व्वं व्रतं गृहीत्वा यो नाचरेत् काममोहित:। लोवन् भवति चाण्डालो मृत: श्वा चैव जायते। द्वादशीव्रतमादाय व्रतभङ्गं करोति य:। द्वादशाब्दं व्रतं चीर्णं निष्फलं तस्य जायते॥" इति नारदीयवचनात् द्वादश्यां विशेषोऽपि॥

प्रायश्चित्तमाह पद्मपुराणम्।

"लोभान्मोहात् प्रमादाद्वा व्रतभङ्गो यदा भवेत्। उपवासत्रयं कुर्य्यात् कुर्य्याद्वा केशसङ्क्षपनम्। प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्॥" वाराह: वसुत्रये तेन सङ्कल्पश्च कर्त्तव्यमिति प्रायश्चित्तविवेक:। प्रमादादस्य सङ्कृतत्वे प्रतिपद्यते देवल:।

"सर्व्वभूतभयं व्याधि: प्रमादो गुरुशासनम्। अव्रतानि कथ्यन्ते सङ्कटेतानि शास्त्रत:॥" इत्येकादशीतत्त्वम्॥

पुण्यजनकव्रतानि यथा। वैशाखस्य शुक्लतृतीयायां अक्षयतृतीयाव्रतम् १ तस्य शुक्ला द्वादशी पिपीतकी २ तच्चतुर्दशी वृषिंद्धचतुर्दशी ३ तस्य कृष्णाष्टमी त्रिलोचनाष्टमी ४ तस्य कृष्णचतुर्दशी सावित्री ५ ज्येष्ठशुक्लतृतीया रम्भातृतीया ६ तस्य शुक्ला चतुर्थी उमाचतुर्थी ७ तस्य शुक्ला षष्ठी अरण्यषष्ठी ८ तच्चतुर्दशी चम्पकचतुर्दशी ९ आषाढ़ी शुक्लैकादशी शयनैकादशी १० श्रावणी कृष्णाष्टमी श्रीकृष्णजन्माष्टमी ११ भाद्रशुक्ला चतुर्थी गिरा चतुर्थी १२ तस्य शुक्ला षष्ठी चपेटा षष्ठी १३ तस्य शुक्ला सप्तमी ललिता सप्तमी तत्र कुक्कुटीव्रतम् १४ तस्य शुक्लाष्टमी दूर्व्वाष्टमी १५ राधाष्टमी च १६ तस्य शुक्ला नवमी तालनवमी १७ तस्य शुक्लैकादशी पार्श्वपरिवर्त्तनव्रतम् १८ तस्य शुक्ला द्वादशी श्रवणद्वादशी १९ तस्य शुक्ला चतुर्दशी अनन्तचतुर्दशी २० तस्य कृष्णा चतुर्थी गणेशचतुर्थी २१ आश्विनशुक्लाष्टमी महाष्टमी २२ कार्त्तिकशुक्ला नवमी दुर्गानवमी २३ तस्य शुक्लैकादशी उत्थानैकादशी २४ तस्य शुक्ला चतुर्दशी पाषाणचतुर्दशी २५ तस्मात्तीयैकादश्यादिपञ्चतिथ्यात्मकं वकपञ्चकम् २६ वृश्चिकसंक्रान्तौ सर्व्वजयाव्रतम् २७ कार्त्तिकेयव्रतञ्च २८ अयाचितस्य शुक्ला षष्ठी गुहषष्ठी २९ तस्य शुक्ला सप्तमी मित्रसप्तमी ३० तस्य शुक्ला द्वादशी अखण्ड द्वादशी ३१ माघशुक्ला चतुर्थी वरदा चतुर्थी ३२ तस्य शुक्लपक्षे श्रीपञ्चमीव्रतं षड्वर्षनिष्पाद्यम् ३३ तस्य शुक्ला षष्ठी श्रीतेजा षष्ठी ३४ तस्य शुक्ला सप्तमी आरोग्यसप्तमी ३५ तस्य शुक्लैकादशी भीमैकादशी ३६ तद्द्वादशी वराहद्वादशी ३७ तस्य कृष्णा चतुर्दशी शिवरात्रि: ३८ फाल्गुनशुक्ला द्वादशी गोविन्दद्वादशी ३९ चैत्रकृष्णा षष्ठी स्कन्दषष्ठी ४० चैत्रशुक्लाष्टमी अशोकाष्टमी ४१ तस्य शुक्ला नवमी श्रीरामनवमी ४२ तस्य शुक्ला त्रयोदशी मदनत्रयोदशी ४३। इति स्मृति:॥ ॥ अयाचितव्रतं नक्तव्रतं उमामाहेश्वरव्रतं शङ्करनारायणव्रतं देवीपुराणे कृष्णाष्टमीव्रतनामाध्याये सम्पूर्णमाहात्म्याध्याये च द्रष्टव्यम्॥ तिथ्यादिव्रतं गारुड़े ११६ अध्याये अगस्त्यार्घ्यव्रतं गारुड़े ११८ अध्याये चातुर्म्मास्यव्रतानि गारुड़े १२१ अध्याये भौमपञ्चकादिव्रतं गारुड़े १२३ अध्याये द्रष्टव्यम्॥ ॥ कार्त्तिकस्नानव्रतं कार्त्तिकव्रतं कार्त्तिकप्रदीपदानव्रतञ्च पाद्मोत्तरखण्डे १४० अध्याये द्रष्टव्यम्॥ ॥ प्रतिपत्कल्पे नक्षत्रव्रतम्। द्वितीयाकल्पे पुष्पद्वितीयाव्रतं फलद्वितीयाव्रतञ्च। तृतीयाकल्पे गौरीव्रतम्। चतुर्थीकल्पे गणेशचतुर्थी। पञ्चमीकल्पे भाद्रशुक्ला पञ्चमी नागपञ्चमी। षष्ठीकल्पे भाद्रशुक्ला षष्ठी गुहषष्ठी। सप्तमीकल्पे माघशुक्लसप्तमी रथसप्तमी। शुक्लपक्षे रविवारे सप्तम्यां रोहिणीनक्षत्रयोगे विजयासप्तमी। रविवारे संक्रान्तौ आदित्यहृदयव्रतम्। शुक्लपक्षीयसप्तम्यां पुष्यतारकनक्षत्रयोगे जया सप्तमी। माघशुक्लसप्तमी जयन्ती। भाद्रशुक्लसप्तमी अपराजिता सप्तमी। शुक्लपक्षे सप्तम्यां रविसंक्रमणे महाजया सप्तमी। मार्गशीर्षस्य शुक्ला सप्तमी नन्दा सप्तमी। शुक्लसप्तम्यां हस्तानक्षत्रयोगे भद्रासप्तमीव्रतम्। फाल्गुनस्य शुक्ला सप्तमी कामदा सप्तमी। पापनाशिनी सप्तमीव्रतम्। भानुपदव्रतम्। सर्व्वाग्निसप्तमीव्रतम्। मार्गशुक्लसप्तमीव्रतम्। भाद्रशुक्लसप्तमी नतसप्तमी। श्रावणशुक्लसप्तमी अभ्यङ्गसप्तमी। मार्गशीर्षस्य सितसप्तम्यां हस्तानक्षत्रयोगे चित्तयप्रदाव्रतम्। इति भविष्यपुराणम्॥ ॥ उत्तरायणे शुक्लपक्षे बुधवारे अष्टमी बुधाष्टमी। अमावस्याव्रतम्। वैशाखीपूर्णिमा मिष्टपूर्णिमा। मेषसंक्रान्तौ मधुसंक्रान्ति:। वृषसंक्रान्ति:। घृतसंक्रान्ति:। अन्नसंक्रान्ति:। दधिसंक्रान्तिव्रतञ्च॥ ॥ अथ व्रतविधि:। तत्र व्रतधर्म्मा:। तत्र विष्णुहारीतौ।

"दिनान्ते नखरोमादीन् प्रवाप्य स्नानमाचरेत्। भस्मगोमयमृद्हारिपञ्चगव्यादिकल्पितम्॥ मलापकर्षणं कार्य्यं बाह्यान्तरविशुद्धये। दन्तधावनपूर्व्वेद्युः पञ्चगव्येन संयुतम्। व्रतं निशासुखे याम्यं वह्निसारकदर्शने॥"

तेन प्रायश्चित्तव्रतारम्भे पूर्व्वदिने पञ्चगव्यं प्राश्य दन्तधावनं कृत्वा सायं समये व्रतसङ्कल्प: कर्त्तव्य:। वशिष्ठ:। श्मश्रुकेशनखान् वापयेदक्षिणोन्मुखिश्चावर्त्तम्। केशधारणेच्छायां दिगुणव्रतमाह हारीत:।

"राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुत:। केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत्॥ केशानां धारणार्थन्तु दिगुणं व्रतमाचरेत्। द्विगुणे तु व्रते चीर्णे दक्षिणा द्विगुणा भवेत्॥"

स्त्रिया: केशवपनं न कार्य्यमित्याह बौधायन:। कृच्छ्रे त्रिसवनसुदकोपस्पर्शनमध:शयनमेकवासता केशश्मश्रुनखरोमवापनं व्रतदेव स्त्रिया: केशवपनवर्ज्जम्। पञ्चगव्याहृतप्राशनयोर्विकल्प:।

तथा शङ्खलिखितौ ।
"बाह्यं कैशनखान् पूर्व्वं घृतं प्राश्य बहिर्निशि ।
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् ॥
प्रायश्चित्तमुपाशीनो वाग्यतस्त्रिसवनं स्नुशेत् ।
एकवासाद्रवासा वा जघन्याशी स्त्रिसेशय: ॥
ज्ञानी वीरासनी मौनी मौञ्जी दण्डकमण्डलुम् ।
भैक्षचर्य्यामिकार्य्यञ्च कृष्णार्द्धेर्जुहुयादृतम् ॥"
प्रत्येकं नियतं कालमिति व्रतसंख्या सङ्कल्पवाक्ये उल्लेखनीया इत्यर्थ: । वीरासनी भित्त्याद्यनाश्रित: । दण्डकमण्डलुं आर्षत्वात् मतुपो लोपेन तेनेतदयुक्त इत्यर्थ: । कृष्णार्द्धैर्वेति वा देवदैवतमित्यादिमन्त्रै: । मनु: ।
"महाव्याहृतिभिर्होम: कर्त्तव्य: खयमन्वहम् ।
अहिंसासत्यमक्रोधमार्ज्जवञ्च समाचरेत् ।
चिरङ्खित्वेनिशायाञ्च सवासा जलमाविशेत् ॥"
चिरङ्खित्वेनिशायाञ्च इति षट्त्रानविषयमिदम् । पिपीलिकामध्यचान्द्रायणादिव्रतन्तु कृच्छ्रवर्ज्जं फलातिशयार्थं बहुषु त्रिसवनविधानात् । तथा ।
"स्त्रीशूद्रपतितांश्चैव नाभिभाषेत कर्हिचित् ।
ज्ञानासनाभ्यां विहरेदशक्तोऽधःशयी भवेत् ॥
ब्रह्मचारी व्रती च स्यादगुरुर्वेदविन्मार्चक: ।
सावित्रीञ्च जपेन्नित्यं पवित्राणि च शक्तित: ॥
सर्व्वेषु च व्रतेष्वेवं प्रायश्चित्तार्थमादृत: ॥"
ब्रह्मचारी मैथुनवर्ज्जं व्रती क्षत्रोपानहमाल्याञ्जनगन्धादिवर्ज्जम् । शूद्रेण सावित्रीजपस्थाने नारायणादिमन्त्रजप: कार्य्य: । अन्यद्वारा वा कारयितव्य: । एवमन्यत्रापि । यथा वराहपुराणम् ।
"अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण यत्नत: ।"
जाबाल: ।
"आरम्भे सर्व्वकृच्छ्राणां समाप्तौ च विशेषत: ।
आग्नेयेन हि स्नानाद्यौ जुहुयाद्व्याहृतीः पृथक् ॥
आद्यं कुर्य्यादव्रतानि च गोहिरण्यादिदक्षिणाम् ।
यद्वै यद्यो वसन् कुर्व्वन् ब्रह्मलोके महीयते ॥
स्त्रीणां होमो न कर्त्तव्य: पञ्चमव्यान्नमेव च ।
शूद्राणां पापिनाञ्चैव संवादं न च कारयेत् ॥
संवादस्तु न कर्त्तव्यस्त्रिवर्णेन कदाचन ।
ब्राह्मणेनैव वक्तव्य उत्पन्ने प्रायसंशये ॥"
आद्यमिति क्षुद्रार्थं आद्यं दर्शितम् । स्त्रीभिर्होमो न कर्त्तव्य: पञ्चगव्यान्नञ्च स्त्रीणां कर्त्तरि वेति वक्ष्यते । प्रारब्धव्रतपीडया प्रायसंशये । अन्ये वर्णा न प्रव्रज्या ब्राह्मण एव प्रव्रज्या: । व्रतं मौनं पूर्व्वोक्तं । तत्र विशेषमाह आपस्तम्ब: । तत्र मौनसूत्रं नैविधदण्डैर्मुनिभिरन्यैराश्रमिभिर्व्रह्मसत्रैर्दैवैर्हैरण्यान् सन्यायान्मुख एव यावद्यावदर्थं भाषते न मन्त्रलोपो भवतीति विज्ञायते । मन्त्रलोपो व्रतलोप: । बालदण्डादिभिरदण्डहीनमपि व्रतं कार्य्यमित्याह शङ्खविष्णु: ।
"असंस्कृतो निरुत्साही रोगी भवति जीवक: ।
यथाशक्ति प्रकुर्व्वीत व्रतं स्त्रीषु न दुष्यते ॥"
अयुक्तावन्यदारेऽपि कार्य्यमिति उक्तञ्च ब्रह्मपुराणे ।
"रोगी दण्डस्तु योगाढ्य: कुर्व्वन्त्यन्यैर्व्रतं सदा ।
चतुर्थादुत्सरादूर्द्धमर्धं यावद्दिवं हि ।
अग्निर्व्रतं प्रकुर्व्वीरन् गुरुसन्निधावान्वया: ।
गुर्व्विणी बालवत्सा च रोगी व्रतपरायण: ॥
एते नक्तेषु भुञ्जन्ति बाला मध्याह्न एव च ।
व्रतस्य: प्राणरक्षार्थं कदाचिदुदकं पिबेत् ॥
फलमूले तथा क्षीरं यज्ञाग्निष्टं तथा हवि: ।
व्रतमध्ये तु रोगार्त्तो वैद्यप्रोक्तमथौषधम् ॥
करोति च गुरोर्वाक्यं व्रतस्यस्तत्तदादपि ।
ब्राह्मणस्याभिलषितं साधयेदविचारयन् ॥
एतान्यष्टौ व्रतस्थानामव्रतानि कुत्रचित् ।
व्रतेष्वेतेषु देवांस्तान् व्रतस्थस्तु प्रपूजयेत् ॥"
योगाढ्यो बाल: । व्रतपरायण: कुटुम्बी व्रतार्जनपालनपर: सन्नित्यर्थ: । बौधायन: ।
"अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पय: ।
हविर्ब्राह्मणकाम्या च गुरोर्व्वचनमौषधम् ॥"
हारीतयमौ ।
"बलयज्ञोपहारश्च हवींषि चरवस्तथा ।
निर्व्विघ्नङ्कर्म भोक्तव्यं व्रतमस्य न लुप्यते ॥"
बलिर्वैश्वदेवादिदेवताभ्यो दत्त: । उपहारो नैवेद्यम् । चरु: पार्व्वणस्थालीपाकादि । अत्र चैषां दत्तावशिष्टं भक्षणीयमिति । देवल: ।
"उपवासो दिनक्षेण दिवास्नानमैथुनै: ।
अन्नये जलपानेन नोपवास: प्रणश्यति ॥"
दण्डस्नातातप: ।
"गन्धालङ्कारवस्त्राणि पुष्पमाल्यानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥"
अलङ्कारवस्त्रसिन्दूरादि उपवासेन हेतुना इत्यर्थ: । तथा ।
"स्त्रीणां सम्भोजनात् स्नानात् ताभि: संकथनादपि ।
ब्रह्मचर्य्यं विपद्येत न दारसङ्गमादपि ॥"
संप्रेक्षणात् संकथनात् इति अत्र सरागत्वं संभ्रमार्थं: । इति प्रायश्चित्तविवेक: । ॥ ॥
प्रायश्चित्तात्मकव्रतानि यथा । विष्णुधर्म्मे: ।
"कृच्छ्रचान्द्रायणादीनि शुद्ध्यर्थमुदयेकारकम् ।
प्रकाशे च रहस्ये च संशयेऽशुक्लकेऽस्फुटे ॥
प्राजापत्य: सान्तपन: शिशुकृच्छ्र: पराकक: ।
अतिकृच्छ्र: पर्णकृच्छ्र: सौम्य: कृच्छ्रातिकृच्छ्रक: ॥
महासान्तपन: शुद्धेः तप्तकृच्छ्रस्तु पावन: ।
जलोपवासकृच्छ्रस्तु ब्रह्मकूर्चस्तु शोधक: ॥
एते व्रता: समस्ता वा प्रत्येकमेकशोऽपि वा ।
पातकादिषु सर्व्वेषु पापकेषु प्रयत्नत: ॥
कार्य्याश्चान्द्रायणैर्युक्ता: केवला वा विशुद्धये ।
शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा ॥
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाह्वयम् ।
उपवासस्त्रिरात्रन्तु मास: पञ्चदशर्द्धकम् ॥
बहुदर्दादग्राह्यादि कार्य्यं शुद्धिपराधिना ।
उपपातकयुक्तानामनादिष्टेषु चैव हि ॥
प्रकाशे च रहस्ये च अभिसन्धाद्यपेक्षया ।
जातिशक्तिगुणान् दृष्ट्वा सम्यग्बुद्धिकृतं तथा ।
अनुबन्धादिकं दृष्ट्वा सर्व्वं कार्य्यं यथाक्रमम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥ ॥
द्वादशवार्षिकादिव्रतं प्रायश्चित्तविवेकादौ द्रष्टव्यम् ॥

व्रतति:, स्त्री, (प्र+तन विस्तारे+क्तिच् । पृषोदरादित्वात् पस्य व: ।) विस्तार: । लता । इत्यमर: । (यथा, ऋग्वेदे । ८ । ४० । ६ ।
"अपि वृश्च पुराणवद्व्रततेरिव
शुष्यितमोजो दासस्य दम्भय ॥"
"व्रततेरिव यथा लतायां शुष्यितं निर्गतां शाखां वृश्चति ।" इति तद्भाष्ये सायण: ॥)

व्रतती, स्त्री, (व्रतति+पक्षे ङीष् ।) विस्तार: । लता । इति भरतदिरूपकोष: ॥ (यथा, रघु: । १४ । १ ।
"अथ प्रस्थे तस्मिन्नरथी जनन्यौ
क्षेत्रादिवोप्तव्रतयोर्व्रतज्ञौ ॥")

व्रतभिक्षा, स्त्री, (व्रते उपनयनकाले भिक्षा ।) उपनयनकालीनभिक्षा । तस्या विधिर्यथा । अथ भैक्षचरति । अथ शब्दस्तूष्णीमादिशोपस्थानमग्निप्रदक्षिणञ्च सूचयति ।
"प्रतिगृह्येप्सितं दण्डमुपस्थाप्य च भास्करम् ।
प्रदक्षिणं परीत्याग्निं चरेत् भैक्षं यथाविधि ॥"
इति मनुवचनात् ।
भिक्षासमूहं भैक्षं चरति आवहति इत्यर्थ: । मातरमेवाग्रे ये चान्ये सुहृदो यावत्यो वा सन्निहिता: स्यु: । याचते इत्यध्याहार्य्यम् । सुहृदे स्निग्धहृदये खसादौ । तथा च मनु: ।
"मातरं वा खसारं वा मातुर्व्वा भगिनीं निजाम् ।
भिक्षेत भिक्षां प्रथमां या चैनं नावमानयेत् ॥"
सन्निहितास्तदग्रस्था: न तु प्रतिगृहं गत्वा । भवति भिक्षां देहीति ब्राह्मणभिक्षाप्रयोग: । तथा च मनु: ।
"भवत्पूर्व्वं चरेद्भैक्षमुपनीतद्विजोत्तम: ।
भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥
आदिमध्यावसानेषु भवच्छब्दोपलक्षिता ।
ब्राह्मणस्त्रिषु भिक्षां भैक्षचर्य्या यथाक्रमम् ॥"
इति याज्ञवल्क्यवचनाच्च । इति संस्कारतत्त्वम् ॥

व्रतसंग्रह:, पुं, (व्रतस्य संग्रह: ।) दीक्षा । इति हेमचन्द्र: ॥

व्रतादेश:, पुं, (व्रतस्यादेश: ।) उपनयनम् । यथा,
"आदत्तजनगात् सद्य आचूडादेकरात्रकम् ।
चिरात्रमाव्रतादेशात् दशरात्रमत: परम् ॥"
इति मुहूर्त्ततत्त्वम् ॥

व्रती, [न्] पुं, (व्रतमस्यास्तीति । व्रत+इनि: ।) यजमान: । इत्यमर: । (ब्रह्मचारी । यथा, मनु: । २ । १८८ ।
"भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती ।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ॥")

व्रतविशिष्टे, त्रि। यथा,—
"तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्वीत पारणम्।"
इति तिथ्यादितत्त्वम्।

व्रश्च, ऊ ग्र छेदे। इति कविकल्पद्रुमः। (तुदा०-पर०-सक०-वेट्।) इत्योपधः। चयोगात् तालव्यः। तेन क्विपि ग्रच्छाविति षढि निमित्तभावे नैमित्तिकस्याप्यभाव इति न्यायात् तालव्यस्य दन्तत्वे संयोगादेः सस्य लोपे सुवृट् इति। तथा च।
"नकारजावनुस्वारपञ्चमौ झलि धातुषु।
सकारः ग्रकारः स्यात् षाढ़वर्गस्त्ववर्गजः।"
इति बोपदेवः।
अस्यार्थः। धातुषु मध्ये झलि झसे परे अनुस्वारपञ्चमौ नकारौ ज्ञेयौ तालव्यग्रकारश्च दन्त्यसकारजात; षढ़ीत्यषकारात् परस्त्ववर्गोऽपि नवर्गजातो ज्ञेय इति। जिह्वास्थाने इत्यादीनाञ्च यकारादिप्रक्षतित्वे तस्यौ इत्यादिबोध्यम्। ऊ, अव्रश्चीत् अव्राक्षीत्। ग्र, वृश्चति। इति दुर्गादासः।

व्रश्चनं, क्ली, (व्रश्च+ल्युट्।) छेदनम्। व्रश्चधातोरनट्प्रत्ययेन निष्पन्नम्। (यथा, व्रतपथब्राह्मणे। १। ६। ४। ७।
"स रातमना वृश्चनाय भवति।")

वृश्चनः, पु, (व्रश्चति छिनत्ति पतिक्षतीरिति। वृश्च+ल्युः। यद्वा, वृश्चत्यनेनेति करणे ल्युट्।) स्वर्णादिच्छेदिका। छेनी इति भाषा। तत्पर्य्यायः। पत्रपरशुः २। इत्यमरः। पत्रपर्णुः ३। इति शब्दरत्नावली। स्वर्णलोहादिभेदकः ४। इति जटाधरः। वृश्चच्छेदनजातनिर्यासः। यथा,—
"देवतार्थे ऋषिः ग्रिग्रुं लोहितान् वृश्चनांस्तथा।
अनुपाक्षतमांसानि विकृतानि कवकानि च।"
इति याज्ञवल्क्यः।
व्रश्चनात् वृश्चच्छेदनजातान् लोहितानपि। यथा, मनुः।
"लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा।"
इति मिताक्षरायामाचाराध्यायः।
(करणे ल्युटि तस्य कुठारादिवाचकता विशेष्यलिङ्गता च। यथा, कातन्त्रे ततुसु करव्याधिकरणयोश्चेत्यत्र कलापचन्द्रः। "युड्लक्षणग्रब्दः प्रायो विशेषलिङ्गग्राही यथा वृश्चनः कुठारो गोदोहनो घटो दण्डः पाषाणदारव इति।")

व्राजिः, स्त्री, (व्रजति गच्छतीति। व्रज गतौ+"वसिव्रजियजीति।" उणा० ४। १२४। इति इन्।) वायुः। व्रजधातोरौणादिकेन प्रत्ययेन निष्पन्नमेतत्।

व्रातः, पुं, समूहः। इत्यमरः। (यथा, भागवते। ४। २५। १६।
"नानारसाद्भुतव्रातैरनावाधे सुनिर्वृतैः।
आकूतं मथ्यते पात्र्यो यत्र कोकिलकूजितैः।")
व्याधादिः। इति व्राजशब्दटीकायां भरतः।
(मनुष्यः। इति निघण्टुः। २। ३।"हृन् वरणे 'तातव्रातलातसुपित्त' इत्यादिसूत्रेण भोजराजेन छन्दस्यये आड़ागमो निपात्यते। हृणन्ति स्मभिमतं देवताभ्यः तपसाराधितेभ्यः प्रियभक्ते वा यज्ञादौ। यद्वा, व्रातो धान्यादिसञ्चयः। तद्भक्तो व्राता मत्वर्थीयोऽकारः। यद्वा, व्रतमिति कर्म्मनाम अन्नं वा। अन्नमपि व्रतयेतस्मादेवेत्युक्तेः तदीयाः 'तस्येदम्' इत्यण्। 'कर्म्मणा जायते जन्तुः कर्म्मणैव प्रलुप्यते' इत्युक्तेः कर्म्मणामधिकारित्वाच्च मनुष्याणां कर्म्मसम्बन्धित्वम्। 'अथो अन्नाद् भूतानि जायन्ते जातान्यन्नेन वर्द्धन्ते' इति। अन्नात् रेतो रेतसः पुरुषः इति च श्रुतेः मनुष्याणामन्नसम्बन्धित्वम्।" इति तट्टीकायां देवराजयज्वा। अस्मिन्नर्थे प्रायशो बहुवचनप्रयोगो दृश्यते। *। क्ली, शरीरायासजौविकर्म्म। इति काशिका। ५। २। २१।)

व्रातीनः, पुं, (शरीरायासेन ये जीवन्ति तेषां कर्म्म व्रातं तेन जीवतीति। व्रात+"व्रातेन जीवति।" ५। २। २१। इति खञ्।) संघजीवी। इति हेमचन्द्रः। (यथा, भट्टिः। ४। १२।
"व्रातीनवाग्जदीप्राक्षः सुवनः परिपूजयन्।")

व्राध्यः, पुं, (व्रातो व्याजादिः स इव। "ग्राखादिभ्यो यत्।" ५। ३। १०३। इति यत्।) दृग्धसंस्काररहितः। षोड़शवर्षादूर्द्ध अक्षतव्रतबन्धो अरुणायज्ञीको वा। इति भरतः। तत्पर्य्यायः। संस्कारहीनः २। इत्यमरः। सावित्रीपतितः ३ वागुदृट् ४ पुरुषोक्तिकः ५। इति जटाधरः। तस्य प्रायश्चित्तादि यथा,—
"अथ व्राजविधिं देवि! प्रायश्चित्तञ्च यद्भवेत्।
तत् ग्रृणुष्व महेग्राणि सर्व्ववर्णे विशेषतः॥
दग्ध वर्षाणि पञ्चैव ब्राह्मणस्योपनीयते।
एकविंग्रतिवर्षाणि यावद्वर्षत्रयोदग्रम्॥
अत ऊर्द्धं पतत्येव सर्व्वधर्म्मबहिष्कृतः।
गायत्रीपतितो व्राह्मो व्राह्मस्तोमेन संस्कृतः।
अग्रक्तो चैव यज्ञस्य चरेदौद्दालिकं व्रतम्।
दौ मासौ यावकाहारो मासमेकं पयः पिबेत्।
दग्धा च पञ्चमेकन्तु सप्तरात्रं घृतेन तु।
अयाचितेन षड़्रात्रं चिरात्रं वर्त्तयेज्जलैः।
अहोरात्रं न भुञ्जीत ततः संस्कारमर्हति॥
पतिता यस्य गायत्री दग्ध वर्षाणि पञ्च च।
प्रायश्चित्तं भवेत्तस्य प्रोवाच भगवान् ग्रिवः॥
सग्रिरं वपनं कृत्वा व्रतं कुर्य्यात् समाहितः।
हविष्यं भोजयेद्विप्रं ब्राह्मणान् सप्त पञ्च वा।
एकविंग्रतिरात्रन्तु पिबेत् पञ्चतियावकम्।
ततो यावकमुद्धृत्य तस्योपनयनं स्मृतम्।
व्रतस्याचरणाग्रक्तौ कुर्य्याच्चान्द्रायणव्रतम्।
सावित्रीपतिता येषां देग्रकालादिविप्लवात्॥
चान्द्रायणं चरेदृग्धस्तु व्रतान्ते धेनुसुत्सृजेत्।
क्षीरंवापि पिबेन्मासं दद्याद्वा वत्सग्रालिनीम्।"
इति मत्स्यसूक्ते प्रायश्चित्तप्रकरणे १८ पटलः।

व्राह्मस्तोमः, पुं, यज्ञविशेषः। यथा,—
"सावित्रीपतिता व्राह्मा व्राह्मस्तोमादते क्रतोः।"
इति गारुड़े ६४ अध्याये। तथा, याज्ञवल्क्यः। १। ६८॥

व्री, ग गि इत्याम्। इति कविकल्पद्रुमः। (क्र्या०-प्या०-पर०-सक०-अनिट्।) रेफोपधः। गि, व्रिणाति। व्रीणः व्रीणि:। ग, यो व्रीणाति अयश्रियं रणसुखे। व्रीतः व्रीतिः। इति दुर्गादासः॥

व्री, य ड ग्री गतौ। इत्याम्। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) रेफोपधः॥ य ड, व्रीयते। ग्री, व्रीणः। इति दुर्गादासः॥

व्रीड़, य ञि क्विपि। लज्जे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-लज्जे-अक०-सेट्।) रेफयुक्तः। य, व्रीड्यति वाणं चापः। व्रीड्यति वधूः। ञि, व्रीड़ितोऽस्ति। इति दुर्गादासः॥

व्रीड़ः, पुं, (व्रीड़+भावे घञ्।) लज्जा। इत्यमरः॥ (यथा, कुमारे। ७। ६७।
"न नूनमारूढ़रुषा शरीर-
मनेन दग्धं कुसुमायुधस्य।
व्रीड़ादसुं देवसृदीक्ष्य मन्ये
सद्यस्तदेहः स्वयमेव कामः॥")

व्रीड़नं, क्ली, (व्रीड़+ल्युट्।) लज्जा। यथा,—
"अथ मन्दाक्षमन्दाक्षं लज्जा लज्जा च हीक्षणा।
व्रीड़ो व्रीड़ा व्रीड़नञ्च लज्जापर्य्याय ईरितः॥"
इति शब्दरत्नावली॥

व्रीड़ा, स्त्री, (व्रीड़+"गुरोश्च हलः।" ३। ३। १०३। इत्यः। टाप्।) लज्जा। इत्यमरः॥ (यथा आर्य्यासप्तशत्याम्। ३५०।
"प्रातरुपागत्य रहो वदतः सखि नास्य विद्यते व्रीड़ा।
सुखलभ्यापि योऽर्थं न लज्जते दग्धकालिकया॥")

व्रीष, कि वधे। इति कविकल्पद्रुमः। (चुरा०-पक्षे भ्वा०-सक०-सेट्।) कि, व्रीषयति व्रीषति। इति दुर्गादासः॥

व्रीहिः, पुं, (वर्द्धते वृद्धिं गच्छतीति। वृद्ध वृद्धौ+"इगुपधात् कित्।" उणा० ४। ११६। इति इन्। पृषोदरादित्वात् साधुः।) धान्यमात्रम्। आशुधान्यम्। इत्यमरः॥ अस्य सामान्यनामगणना गुणाश्च यथा,—
"धान्यं भोग्यञ्च भोगार्हमन्नादौ जीवसाधनम्।
तच्च तावद्विधा ज्ञेयं शूकशिम्बीतृणाह्वयम्॥
व्रीह्यादिकं यदि च शूकसमन्वितं स्यात्
यत् शूकधान्यमयसूक्ष्मकुटादि।
शिम्बीनिगूढ़मिति तत्प्रवदन्ति शिम्बीधान्यं हरीतकतया हरधान्यमन्यत्।
तत्र त्रिदोषशमनं लघु शूकधान्यं
तेजोबलातिशयवीर्य्यविवर्द्धिदायि।
शिम्बीभवं गुरु हिमञ्च विरुन्धदायि
वातालकन्तु शिम्बिरं हरधान्यमाहुः॥

देशे देशे शूकधान्येषु संख्या
ज्ञातुं शक्या नैव तैर्दृश्यनेत्रैः ।
अस्मादेषां येषु भोगोपभोगा-
स्तान्यस्माभिर्याक्रियन्ते कियन्ति ॥
शालयः कलमा रक्ता व्रीहिश्रेष्ठा नृपप्रियाः ।
धान्योत्तमाश्च विज्ञेयाः केदाराः सुकुमारकाः ॥
राजान्नषष्टिकसितेतररक्तसुख-
स्थलाशुगन्धतिरियादिकशालिसंज्ञाः ।
व्रीहिस्त्वेति दशधा भुवि शास्त्रविज्ञाः स्यु-
स्तेषां क्रमेण गुणनाममगं ब्रवीमि ॥
व्रीहिर्गौरो मधुरशिशिरः पित्तहारी कषायः
स्निग्धो वृष्यः कृमिकफहरस्तापरक्तापहश्च ।
पुष्टिं दत्ते श्रमशमनकृद्दीर्घदृष्टिं विधत्ते
रूक्षोत्क्लेशं जनयति मुदं वातकृन्नेक्षुकोऽन्यः ॥"
इति राजनिर्घण्टः ॥

अपि च ।
"वार्षिकाः काश्मिकाः शुक्ला व्रीहयश्चिर-
पाकिनः ।
कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि ॥
शालिमुखो जतुमुख इत्याद्या व्रीहयः स्मृताः ।
कृष्णव्रीहिः स विज्ञेयो यत्कृष्णतुषतण्डुलः ॥
पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते ।
कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते ॥
शालिमुखः कृष्णशूकः कृष्णतण्डुल उच्यते ।
लालवर्णमुखं तस्य श्रेयो जतुमुखस्तु सः ॥
व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिमाः ।
अल्पाभिष्यन्दिनो बहुवर्चस्काः षष्टिकैः समाः ॥
कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे ॥"
इति भावप्रकाशः ॥

तस्य यज्ञीयत्वं यथा,—
'यज्ञार्थं तनु भूतानां भक्ष्यमित्येव वै श्रुतिः ।
दिवौ भौमस्तथा पैचो मानुषो ब्राह्म एव च ॥
एते पञ्च महायज्ञा ब्रह्मणा निर्म्मिताः पुरा ।
ब्राह्मणानां हितार्थाय इतरेषां च तनृसुखाः ॥
इतरेषां तु वर्णानां ब्राह्मणैः कारिताः शुभाः ।
एवं कृत्वा नरो भुक्त्वास्त्वाहरिचि ! विमुच्यते ॥
अन्यथा व्रीहयोऽप्येते एकैके स्तम्पक्षिणः ।
भक्षयन्ति दारुभोक्तृणां महामांसं तु तत्
स्मृतम् ॥"
इति वाराहे व्रीहिकृतवृत्तान्ताध्यायः ॥
तेन पिष्टैष्टिर्यथा । मनुः ।

"तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ।
दत्तेन मासं प्रीयन्ते विधिवत् पितरो नृणाम् ॥"
व्रीहिः शरत्यकधान्यम् । याज्ञवल्क्यः ।
"हविष्यान्नेन वै मासं पायसेन च वत्सरम् ।
मात्स्यहारिणकौरभ्रशाकुनिच्छागपार्षतैः ॥
ऐणरौरववाराहशाग्नैर्मासैर्यथाक्रमम् ।
मासवृद्ध्याभितृप्यन्ति दत्तेनेह पितामहाः ॥"
हविष्यान्नेन शालिव्रीह्यन्नेन । इति । अमा-
वास्यास्त्रिस्रोऽष्टका माघी प्रौष्ठपद्यूर्द्ध कृष्णत्रयोद-
श्यो व्रीहियवपाकौ च ।
"एतांस्तु आद्धकालान् वै नित्यानाह प्रजा-
पतिः ।
आद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥"
इति विष्णुवचनं नवान्नागमश्राद्धस्यैव व्रीहि-
यवोभयप्राप्तिविषयकल्पेन विधायकं श्यैमाद्दि-
धान्यवृद्ध्यासाय । शालिधान्यस्य तु प्राप्तिः ।
"शरदसन्तयोः केचित् नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः ॥"
इति छन्दोगपरिशिष्टे व्रीह्यप्राप्ता नवशस्येऽष्टौ-
शालिविधानात् यज्ञतुल्यन्यायात् आद्धेऽपि तथा
कल्पनात् । इति च आद्धतत्त्वम् ॥ * ॥ नवान्न-
आद्धकालो यथा । विष्णुः । अमावस्यास्त्रिस्रो-
ऽष्टकास्त्रिस्रोऽन्वष्टका माघी प्रौष्ठपद्यूर्द्ध कृष्ण-
त्रयोदश्यो व्रीहियवपाकौ च ।
"एतांस्तु आद्धकालान् वै नित्यानाह प्रजापतिः ।
आद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥
व्रीहिपाके च कर्त्तव्यं यवपाके च पार्थिव ।
न तावद्यौ महाराज विना आद्धं कथञ्चन ॥"
इति मलमासतत्त्वम् ॥

तेन यागकरणं यथा,—
व्रीहिभिर्यजेत यवैर्यजेत इति श्रूयते ॥ तत्र
"व्रीहिप्रयोगे प्रतीतयवप्रामाण्यपरित्यागः ।
अप्रतीतयवप्रामाण्यकल्पनम् ।" इत्येकादशी-
तत्त्वम् ॥ * ॥ व्रीह्यप्राप्तौ शालिधान्येन कर्म्म-
करणं यथा,—
"यथोक्तवत्त्वसम्पत्तौ शास्त्रं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥"
इति तिथ्यादितत्त्वम् ॥

व्रीहिकः, त्रि, (व्रीहिरस्यास्तीति । व्रीहि+
"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।)
धान्यविशिष्टः । इति सिद्धान्तकौमुदी ॥

व्रीहिकाञ्चनः, पुं, (व्रीहिः काञ्चनमिव । अभि-
धानात् पुंस्त्वम् ।) मस्तरः । इति त्रिकाण्डशेषः ॥
व्रीहिपर्णी, स्त्री, (व्रीहेः पर्णमिव पर्णमस्याः ।
ङीष् ।) शालपर्णी । इति राजनिर्घण्टः ॥
व्रीहिभेदः, पुं, (व्रीहेर्भेदः ।) धान्यविशेषः ।
चिना इति ख्यातः । तत्पर्य्यायः । अनुः २ ।
इत्यमरः ॥
व्रीहिमयः, पुं, (व्रीहेः पुरोडाशः । व्रीहि+"व्रीहेः
पुरोडाशे ।" ४ । ३ । १४८ । इति मयट् ।)
व्रीहिनिर्म्मितपुरोडाशः । इति सिद्धान्तकौमुदी ॥
(व्रीह्यात्मके. त्रि । यथा, महाभारते । १३ ।
११५ । ५६ ।
"श्रूयते हि पुरा कल्पे नृणां व्रीहिमयः पशुः ।
येनायजन्त यज्वानः पुण्यलोकपरायणाः ॥")
व्रीहिराजकः, पुं, (व्रीहीनां राजा । टच् समासे ।
ततः कन् ।) कङ्कुधान्यम् । चीनकधान्यम् ।
इति मेदिनी ॥
व्रीहिश्रेष्ठः, पुं. (व्रीहिषु श्रेष्ठः) शालिधान्यम् ।
इति राजनिर्घण्टः ॥
व्रीही, [न्] त्रि, (व्रीहिरस्यास्तीति । व्रीहि+
"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ इति इनिः ।)
व्रीहियुक्तक्षेत्रादि । इति सिद्धान्तकौमुदी ॥
व्रीह्यागारं, क्ली, (व्रीहीनामगारम् ।) धान्यगृहम् ।
तत्पर्य्यायः । कुस्थलः २ । इति त्रिकाण्डशेषः ॥
व्रुड. भ्रि संवृतिसंहत्योः । मज्जे । इति कविकल्प-
द्रुमः ॥ (तुदा०-कुटा०-पर०-सक०-अकच-सेट्।)
रेफयुक्तः । भ्रि, व्रुड़ति व्रुड़ीत् व्रुड़ोड़ ।
मज्जो मज्जनम् । इति दुर्गादासः ॥
व्रूस, कि वधे । इति कविकल्पद्रुमः ॥ (चुरा०-पचे
भ्वा०-सक०-सेट् ।) रेफयुक्तो दीर्घी । कि,
व्रूसयति व्रूसति । इति दुर्गादासः ॥
व्रेहः, त्रि, (व्रीहेरवयवो विकारो वा । व्रीहि+
"विल्वादिभ्योऽण् ।" ४ । ३ । १३६ । इत्यण् ।)
व्रीहिनिर्म्मितः । इति सिद्धान्तकौमुदी ॥
व्रैहेयः, त्रि, (व्रीहीनां भवनं क्षेत्रम् । व्रीहि+
"व्रीहिशाल्योर्ढक् ।" ५ । २ । २ । इति ढक् ।)
आशुधान्योपयुक्तभूम्यादिः । इत्यमरः ॥
व्ली, ग गि गतित्वयोः । इति कविकल्पद्रुमः ॥
(क्रया०-प्या०-पर०-सक०-अनिट् ।) अन्तःस्थ-
लतौयोपधः । गि, व्लिनाति । व्लीनः व्लीनिः ।
इति दुर्गादासः ॥

व्रतविधिष्टे, त्रि। यथा,—
"तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्वीत पार-
णम्।"
इति तिथ्यादितत्त्वम्।

व्रश्च, क्र श्र छेदे। इति कविकल्पद्रुमः। (तुदा०-पर०-सक०-वेट्।) दन्त्योपधः चयोगात् तालव्यः। तेन क्विपि ग्रच्छाजेति षढि विभक्तावचि नैमित्तिकस्याप्यभाव इति न्यायात् तालव्यस्य दन्तत्वे संयोगादेः सस्य लोपे सुवृट् इति। तथा च।
"नकारजावनुस्वारयमौ झलि धातुषु।
सकारजः शकारः स्यात् षाढ्वर्गस्यवर्गजः।"
इति बोपदेवः।
अस्यार्थः। धातुषु मध्ये झलि झसे परे अनुस्वारपञ्चमौ नकारजौ श्रेयौ तालव्यशकारश्च दन्त्यसकारजात् सङ्घट्टयकारात् परस्यवर्गोऽपि नवर्गजातो ज्ञेय इति। निष्ठास्थाने इत्यादौ नाच्च यकारादिप्रत्ययनिमित्ते तस्यौ इत्यादिरोधम्। अ, अव्रश्चीत् अव्राक्षीत्। ग्र, वृश्चति। इति दुर्गादासः।

व्रश्चनं, क्ली, (व्रश्च+ल्युट्।) छेदनम्। व्रश्चधातोरनट्प्रत्ययेन निष्पन्नम्। (यथा, शतपथब्राह्मणे। १। ६। ४। ७।
"स रातमना वृत्रहणाय भवति।")

वृश्चनः, पुं, (व्रश्चति छिनत्ति पतिच्छतीति। व्रश्च+ल्युः। यद्वा, वृश्च्यतेनेनेति करणे ल्युट्।) स्वर्णादिच्छेदिका। छेनी इति भाषा। तत्पर्य्यायः। पत्रपरशुः २। इत्यमरः। पत्रपर्शुः ३। इति शब्दरत्नावली। स्वर्णलोहादिभेदकः ४। इति जटाधरः। वृश्चच्छेदनजातनिर्यासः। यथा,—
"देवतार्थे हविः शिष्टं लोहितान् व्रश्चनांस्तथा।
अनुपाक्षतमांसानि विड्जानि कवकानि च।"
इति याज्ञवल्क्यः।
व्रश्चनात् वृश्चच्छेदनजातात् लोहितानपि।
यथा, मनुः।
"लोहितान् वृश्चनिर्यासान् व्रश्चनप्रभवांस्तथा।"
इति मिताक्षरायामाचाराध्यायः।
(करणे ल्युटि तस्य कुठारादिवाचकता विशेष्यलिङ्गता च। यथा, कातन्त्रे ऋतृसु करणाधिकरणयोश्चेत्यत्र कलापचन्द्रः। "युड्लक्षणग्रन्थः प्रायो विशेषलिङ्गत्वाद्दी यथा वृश्चनः कुठारो लोहदलनो घटो टङ्कः पाषाणदारण इति।")

व्राजिः, स्त्री, (व्रजति गच्छतीति। व्रज गतौ+"वसिवपियजीति।" उणा० ४। १२४। इति इन्।) वायुः। व्रजधातोरौणादिकेन इप्रत्ययेन निष्पन्नमेतत्।

व्रातः, पुं, समूहः। इत्यमरः। (यथा, भागवते। ४। २५। १६।
"नामान्यनन्तस्य गृणन्ति नानाधि सुनिव्रतेः।
आकूतं मन्यते पाल्यो यत्र कोकिलकूजितैः।")
व्याधादिः। इति व्रात्यशब्दटीकायां भरतः।

(मनुष्यः। इति निघण्टुः। २। ३।"वृञ् वरणे 'तातव्रातलातसुपित्त' इत्यादिसूत्रेण भोजराजेन छत्रत्रये आट्टागमो निपात्यते। वृणन्ति स्वमभिमतं देवताभ्यः तपसाराधितेभ्यः प्रियमिति वा व्रातात्।)

व्रातीनः, पुं, (व्रातीरायासेन ये जीवन्ति तेषां कर्म्म व्रातं तेन जीवतीति। व्रात+"व्रातेन जीवति।" ५। २। २९। इति खञ्।) संचजीवी। इति हेमचन्द्रः। (यथा, भट्टिः। ४।१२।
"व्रातीनव्राजदीप्राप्तः सुतनः परिपूजयन्।")

व्रात्यः, पुं, (व्रातो व्राजादिः स एव। "ग्राखादिभ्यो यत्।" ५। ३। १०३। इति यत्।) दशसंस्काररहितः। षोडशवर्षादूर्द्धं अक्षतब्रह्मसावित्रीको वा। इति भरतः। तत्पर्य्यायः। संस्कारहीनः २। इत्यमरः। सावित्रीपतितः ३ वाग्दुष्टः ४ पुरश्चोल्लिकः ५। इति जटाधरः। तस्य प्रायश्चित्तादि यथा,—
"अथ व्रात्यविधिं देवि! प्रायश्चित्तञ्च यद्भवेत्।
तत् शृणुष्व मयेऽग्रानि सर्व्ववर्णे विशेषतः॥
दश वर्षाणि पञ्चैव ब्राह्मणस्योपनीयते।
एकविंशतिवर्षाणि यावद्वर्षत्रयावरेत्।
अत ऊर्द्धं पतत्येव सर्व्वधर्म्मबहिष्कृतः॥
गायत्रीपतिता व्रात्या व्रात्यस्तोमेन संस्कृतः।
अग्रक्ते चैव यज्ञस्य चरेदौद्दालिकं व्रतम्॥
द्वौ मासौ यावकाहारो मासमेकं पयः पिबेत्।
दश च पञ्चमेकन्तु सप्तरात्रं घृतेन तु।
अयाचितेन षड्रात्रं त्रिरात्रं वर्त्तयेज्जलैः।
अहोरात्रं न भुञ्जीत ततः संस्कारमर्हति॥
पतिता यस्य गायत्री दश वर्षाणि पञ्च च।
प्रायश्चित्तं भवेत्तस्य प्रोवाच भगवान् शिवः॥
यज्ञियं वपनं कृत्वा व्रतं कुर्य्यात् समाहितः।
हविष्यं भोजयेद्यज्ञं ब्राह्मणान् सप्त पञ्च वा॥
एकविंशतिरात्रन्तु पिबेत् प्रस्तियावकम्।
ततो यावकमुद्धृत्य तस्योपनयनं स्मृतम्॥
व्रतस्यान्ते गवार्थन्तु कुर्य्याच्चान्द्रायणव्रयम्।
सावित्रीपतिता येषां देशकालादिविद्विषाम्॥
चान्द्रायणं चरेदृग्यजु व्रतान्ते धेनुसुतृप्तये।
क्षीरं वापि पिबेन्मासं दद्याद्वा वत्सशालिनीम्॥"
इति मत्स्यसूक्ते प्रायश्चित्तप्रकरणे १८ पटलः॥

व्राह्मस्तोमः, पुं, यज्ञविशेषः। यथा,—
"सावित्रीपतिता व्रात्या व्राह्मस्तोमादृते क्रतोः॥"
इति गारुडे ६४ अध्याये॥ तथा, याज्ञवल्क्यः। १। ६८॥

व्री, ग गि इत्याम्। इति कविकल्पद्रुमः॥ (क्र्या०-प्या०-पर०-सक०-अनिट्।) रेफोपधः। गि, व्रिणाति। व्रीणः वीणिः। ग, यो व्रीणाति जयश्रियं रणसुखे। व्रीतः व्रीतिः। इति दुर्गादासः॥

व्री, य ड यो गतौ। इत्याम्। इति कविकल्पद्रुमः॥ (दिवा०आत्म०-सक०-अनिट्।) रेफोपधः॥ य ड, व्रीयते। यो, व्रीणः। इति दुर्गादासः॥

व्रीड्, य लि त्रिपि। लज्जे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-लज्जे-अक०-सेट्।) रेफयुक्तः। य, व्रीयति वाणं चापः। व्रीयति वधूः। लि, व्रीड़ितोऽस्ति। इति दुर्गादासः॥

व्रीड़ः, पुं, (व्रीड़+भावे घञ्।) लज्जा। इत्यमरः॥ (यथा, कुमारे। ७। ६७।
"न नूनमारूढरुषा शरीरमनेन दग्धं कुसुमायुधस्य।
व्रीड़ादसं देवसदीक्ष्य मन्ये सञ्चस्तदेहः स्वयमेव कामः॥")

व्रीड़नं, क्ली, (व्रीड़+ल्युट्।) लज्जा। यथा,—
"अथ मन्दाक्षमन्दाक्षं लज्जा लज्जा च हीक्षया।
व्रीड़ो व्रीड़ा व्रीड़नञ्च लज्जापर्य्याय ईरितः॥"
इति शब्दरत्नावली॥

व्रीड़ा, स्त्री, (व्रीड़+"शुरोच इलः।" ३। ३। १०३। इत्यः। टाप्।) लज्जा। इत्यमरः॥ (यथा आर्य्यासप्तशत्याम्। ३५७।
"प्रातरुपागत्य स्वयं वदतः सखि नास्य विद्यते व्रीड़ा।
सुखलभयापि योऽयं न लज्जते दग्धकामिकया।")

व्रीस, कि वधे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-सक०-सेट्।) कि, व्रीसयति व्रीसति। इति दुर्गादासः॥

व्रीहिः, पुं, (वर्द्धति वृद्धिं गच्छतीति। वृह वृद्धौ+"इगुपधात् किति।" उणा० ४। ११८। इति इन्। पृषोदरादित्वात् साधुः।) धान्यमात्रम्। आशुधान्यम्। इत्यमरः॥ अस्य सामान्यनामगणना गुणाश्च यथा,—
"धान्यं भोग्यञ्च भोगार्हमन्नाद्यं जीवसाधनम्।
तच्च सावत्रिधा ज्ञेयं शूकशिम्बीत्वभेदयम्॥
व्रीह्यादिकं यदि ह शूकसमन्वितं स्यात्
यत् शूकधान्यमयसूक्ष्मकुरुकादि।
शिम्बीनिगूढ़मिति तन्नवदन्ति शिम्बी-
धान्यं हवोद्भवतया हवधान्यमन्यत्।
तच्च त्रिदोषशमनं लघु शूकधान्यं
तेजोबलानिलयवीर्य्यविवृद्धिदायि।
शिम्बीभवं गुरु हिमञ्च विबन्धदायि
वातालकन्तु शिम्बिरं हवधान्यमाहुः॥

देशे देशे शूकधान्येषु संख्या
ज्ञातुं शक्या नैव तैर्दर्शितैर्वा ।
अस्मादेषां येषु भोगोपभोगा-
स्तान्यस्माभिर्याक्रियन्ते क्रियन्ते ॥

शालयः कलमा रुद्धा व्रीहयश्चेति वृत्तयः । धान्योत्तमास्तु विज्ञेया: केदाराः सुकुमारकाः ॥
राजान्नषष्टिकसितेतररक्तसुख-
श्यामासुगन्धतिरियादिकशालिसंज्ञाः ।
व्रीहिस्तथेति दशधा भुवि शाखना: स्यु-
स्तेषां क्रमेण गुणनामगणं ब्रवीमि ॥
व्रीहिर्गौरो मधुरशिशिरः पित्तहारी कषायः
स्निग्धो वृष्यः कृमिकफहरस्तापरक्तापहश्च ।
पुष्टिं दत्ते श्रमभ्रमनलदौर्ब्यदृष्टिं विधत्ते
रुच्योत्पन्नं जनयति मुदं वातकृन्मेचकोऽन्यः ॥"
इति राजनिर्घण्टः ॥

अपि च ।
"वार्षिकाः काष्ठिताः शुक्ला व्रीहयश्चिर-
पाकिनः ।
कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि ॥
शालमुखो नतुमुख इत्याद्या व्रीहयः स्मृताः ।
कृष्णव्रीहिः स विज्ञेयो यत्तण्डुलतुषतण्डुलाः ॥
पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते ।
कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते ॥
शालमुखः कृष्णशूकः कृष्णतण्डुल उच्यते ।
लालावर्णमुखं तस्य ज्ञेयो नतुमुखस्तु सः ॥
व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिमाः ।
अल्पाभिष्यन्दिनो बहुवर्चस्काः षष्टिके समाः ॥
कृष्णव्रीहिर्व्वरस्तेषां तस्मादल्पगुणाः परे ॥"
इति भावप्रकाशः ॥

तस्य यज्ञीयत्वं यथा,—
'यज्ञार्थं तनु भूतानां भस्ममित्येव वै श्रुतिः ।
दिवो भौमस्तथा पैत्रो मानुषो ब्राह्म एव च ॥
एते पञ्च महायज्ञा ब्रह्मणा निर्म्मिताः पुरा ।
ब्राह्मणानां हिताधाय इतरेषां च तनुसुखाः ॥
इतरेषां तु वर्णानां ब्राह्मणैः कारिताः शुभाः ।
एवं कृत्वा नरो मुक्तामाहरित्रि ! विशुध्यति ॥
अन्यथा व्रीहयोऽप्येते एकैके रुगपक्षिणः ।
मन्तव्या दारुभोक्तृणां महामांसं तु तत्
स्मृतम् ॥"
इति वाराहे आदिकृतदृष्टान्ताध्यायः ॥
तेन पिष्टत्वमियथा । मनुः ।
"तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ।
दत्तेन मासं प्रीयन्ते विधिवत् पितरो नृणाम् ॥"
व्रीहिः शरत्पक्वधान्यम् । याज्ञवल्क्यः ।
"हविष्यान्नेन वै मासं पायसेन च वत्सरम् ।
मात्स्यहारिणकौरभ्रशाकुनिच्छागपार्षतैः ॥
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम् ।
मासद्वयाभिवृद्ध्या तु दत्तेनेह पितामहाः ॥"
हविष्यान्नेन शालिव्रीह्यन्नेन । इति । अमावास्यास्त्रिस्रोऽष्टका माघी प्रौष्ठपद्यूर्द्धं कृष्णत्रयोदश्यौ व्रीहियवपाकौ च ।
"एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥"
इति विष्णुवचनं नवान्नागमश्राद्धस्यैव व्रीहियवोभयप्राप्तिविषयकत्वेन विधायकं शेषाद्धान्यव्युदासाय । शालिधान्यस्य तु प्राप्तिः ।
"शरदृतवोः केचित् नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाकैर्वनिनः स्मृतः ॥"
इति छन्दोगपरिशिष्टे व्रीह्यप्राप्तौ नवशस्येष्टौ शालिविधानात् यज्ञतुल्यन्यायात् श्राद्धेऽपि तथा कल्पनात् । इति च श्राद्धतत्त्वम् ॥ * ॥ नवान्नश्राद्धकालो यथा । विष्णुः । अमावास्यास्त्रिस्रोऽष्टकास्त्रिस्रोऽन्वष्टका माघी प्रौष्ठपद्यूर्द्धं कृष्णत्रयोदश्यौ व्रीहियवपाकौ च ।
"एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्व्वाणो नरकं प्रतिपद्यते ॥
व्रीहिपाके च कर्त्तव्यं यवपाके च पार्थिव ।
न तावाद्यौ महाराज विना श्राद्धं कथञ्चन ॥"
इति मलमासतत्त्वम् ॥

तेन यागकरणं यथा,—
व्रीहिभिर्यजेत यवैर्यजेत इति श्रूयते ॥ तत्र "व्रीहिप्रयोगे प्रतीतयवप्रामाण्यपरित्यागः । अप्रतीतयवाप्रामाण्यकल्पनम् ।" इत्येकादश्यीतत्त्वम् ॥ * ॥ व्रीह्यप्राप्तौ शालिधान्येन कर्म्मकरणं यथा,—
"यथोक्तवत्सम्यक्तौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥"
इति तिथ्यादितत्त्वम् ॥

व्रीहिकः, त्रि, (व्रीहिरस्यास्तीति । व्रीहि+"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) धान्यविशिष्टः । इति सिद्धान्तकौमुदी ॥

व्रीहिकाञ्चनः, पुं, (व्रीहिः काञ्चनमिव । अभिधानात् पुंस्त्वम् ।) मत्सरः । इति त्रिकाण्डशेषः ॥

व्रीहिपर्णी, स्त्री, (व्रीहेः पर्णमिव पर्णमस्याः । ङीष् ।) शालपर्णी । इति राजनिर्घण्टः ॥

व्रीहिभेदः, पुं, (व्रीहेर्भेदः ।) धान्यविशेषः । चिना इति ख्यातः । तत्पर्य्यायः । अनुः २ । इत्यमरः ॥

व्रीहिमयः, पुं, (व्रीहेः पुरोडाशः । व्रीहि+"व्रीहेः पुरोडाशे ।" ४ । ३ । १४८ । इति मयट् ।) व्रीहिनिर्म्मितपुरोडाशः । इति सिद्धान्तकौमुदी ॥ (व्रीह्यात्मके. त्रि । यथा, महाभारते । १३ । ११५ । ५६ ।
"श्रूयते हि पुरा कल्पे नृणां व्रीहिमयः पशुः ।
येनायजन्त यज्वानः पुण्यलोकपरायणाः ॥")

व्रीहिराजकः, पुं, (व्रीहीनां राजा । टच् समासे । ततः कन् ।) कङ्कुधान्यम् । चीनकधान्यम् । इति मेदिनी ॥

व्रीहिश्रेष्ठः, पुं, (व्रीहिषु श्रेष्ठः ।) शालिधान्यम् । इति राजनिर्घण्टः ॥

व्रीही, [न्] त्रि, (व्रीहिरस्यास्तीति । व्रीहि+"व्रीह्यादिभ्यश्च ।" ५ । २ । ११६ इति इनिः ।) व्रीहियुक्तक्षेत्रादि । इति सिद्धान्तकौमुदी ॥

व्रीह्यागारं, क्ली, (व्रीहीनामगारम् ।) धान्यगृहम् । तत्पर्य्यायः । कुसूलः २ । इति त्रिकाण्डशेषः ॥

व्रूङ. ग्रि संवृतिसंहत्योः । मर्च्छे । इति कविकल्पद्रुमः ॥ (तुदा०-कुटा०-पर०-सक०-अकच-सेट्।) रेफयुक्तः । ग्रि, व्रूड़ति अव्रूड़ीत् व्रुव्रोड़ । मर्च्छो मर्च्छनम् । इति दुर्गादासः ॥

व्रूस, किं वधे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-सक०-सेट् ।) रेफयुक्तो दीर्घौ । किं, व्रूसयति व्रूसति । इति दुर्गादासः ॥

व्रेहः, त्रि, (व्रीहेरवयवो विकारो वा । व्रीहि+"विल्वादिभ्योऽण् ।" ४ । ३ । १३६ । इत्यण् ।) व्रीहिनिर्म्मितः । इति सिद्धान्तकौमुदी ॥

व्रैहेयः, त्रि, (व्रीहीनां भवनं क्षेत्रम् । व्रीहि+"व्रीहिशाल्योर्ढक् ।" ५ । २ । २ । इति ढक् ।) आशुधान्योपयुक्तभूम्यादिः । इत्यमरः ॥

व्ली, ग गि गतितृप्त्योः । इति कविकल्पद्रुमः ॥ (क्रया०-प्या०-पर०-सक०-अनिट् ।) अन्तःस्थलतीयोपधः । गि, व्लिनाति । व्लीनः, व्लीनिः । इति दुर्गादासः ॥

Reprinted by
Skylark Printers (photo-Offset), Delhi-6 (Phone : 266595)

PK
925
D47
1967
v.4

Deva, (Sir) Radhakanta
Sabdakalpadrumah

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

॥ श्रीः ॥

शब्दकल्पद्रुमः

पञ्चमो भागः

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९३



शब्दकल्पद्रुमः

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः ।

पञ्चमो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : तृतीय, सं० २०२४ वि०
मूल्य : सम्पूर्ण ग्रन्थ १–५ भाग रु० १५०–००



PK
925
D47
1967
V.5

©
चौखम्बा संस्कृत सीरीज आफिस
पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी–१ (उ० प्र०)
भारतवर्ष
फोन नं० ३१४५

THE

CHOWKHAMBA SANSKRIT SERIES

WORK NO. 93

SHABDA-KALPADRUM

OR

AN ENCYCLOPÆDIC DICTIONARYIOF SANSKRIT WORDS ARRANGED IN ALPHABETICAL ORDER GIVING THE ETYMOLOGICAL ORIGIN OF THE WORDS ACCORDING TO PANINI, THEIR GENDER, VARIOUS MEANINGS AND SYNONYMS, AND ILLUSTRATING THEIR SYNTACTICAL USAGE AND CONNOTATION WITH QUOTATIONS DRAWN FROM VARIOUS AUTHORITATIVE SOURCES SUCH AS VEDAS, VEDANTA, NYAYA, OTHER DARSHANAS, PURANETIHAS, MUSIC, ART, ASTRONOMY, TANTRA, RHETORICS AND PROSODY AND MEDICINE ETC.

BY

RAJA RADHA KANTA DEVA

PART FIVE

THE

CHOWKHAMBA SANSKRIT SERIES OFFICE

POST BOX 8, VARANASI-1

Publisher : The Chowkhamba Sanskrit Series Office, Varanasi.
Printer : Vidya Vilas Press, Varanasi.
Edition : Third, 1967
Price : 1–5 Vols. Complete Rs. 150–00

© The Chowkhamba Sanskrit Series Office
Oriental and Foreign Book-Sellers and Publishers
P. O. Chowkhamba, Post Box 8,
Varanasi–1 (India)
1967
Phone : 3145



शब्दकल्पद्रुमः।

पञ्चमकाण्डम्।

शं

शं. तालव्यशकारः। स तु शवर्गीयप्रथमवर्णः। व्यञ्जनत्रिंशद्वर्णश्च। अस्योच्चारणस्थानं तालु। इति तन्त्रव्याकरणे॥ (तथा च शिक्षायाम्। १७।

"कण्ठ्या वह्याविचुयशास्तालव्या ओष्ठजावुपू॥")

अस्य स्वरूपं यथा,—

"शकारं परमेशानि! शृणु वर्णं शुचिस्मिते!।
रत्नवर्णप्रभाकारं स्वयं परमकुण्डली॥
चतुर्व्वर्गप्रदं देवि! शकारं ब्रह्मविग्रहम्।
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं प्रिये!॥
रजःसत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा।
त्रिशक्तिसहितं वर्णमात्मादितत्त्वसंयुतम्॥"

इति कामधेनुतन्त्रम्॥*॥

(वङ्गीयवर्णमालायाम्) तल्लेखनप्रकारो यथा,

"कुञ्चिता वामतो दत्तगता च गोक्षतिस्वधः।
पुनरूर्द्ध्वगता तालु वह्निचन्द्रदिवाकराः।
मात्रा भवानी विज्ञेया ध्यानमस्य प्रचक्षते॥"

इति वर्णोद्धारतन्त्रम्॥*॥

तद्वाचकानि यथा,—

"शः सव्यश्च कामरूपो कामरूपो महामतिः।
सौख्यनामा कुमारोऽस्य शोकण्ठो हृषकेतनः॥
हृषघ्नः शयनं शान्ता सुभगा विस्फुलिङ्गिनी।
मृत्युर्देवो महालक्ष्मीमहेन्द्रः कुलकौलिनी॥
बाहुर्हेमो वियद्वक्त्रं हृदनङ्गाङ्कुशः खलः।
वामोरुः पुण्डरीकात्मा कान्तिः कल्याण-
वाचकः॥"

इति योगिनीतन्त्रे ३भागे ७पटले वर्णाभिधानम्॥ (काव्यादावस्य प्रथमप्रयोगे सुखं फलम्। यथा, हृत्तरत्नाकरटीकायाम्।

"शः सुखं मस्तु खेदम्॥"

धात्वनुबन्धविशेषः। यथा, कविकल्पद्रुमः।

"————वो हृतादिः श्तुदादिकः॥"

एतेन तुदौ अश् व्याप्तौ तुदति इति स्यात्॥)

शं, क्ली, शुभम्। इति त्रिकाण्डशेषशब्दरत्नावल्यौ॥ (यथा, देवीभागवते। ३। १८। ७।

"न च इन्द्रं वने शं मे दोर्घिकायां न पर्व्वते॥")

शंसितः

शं, [म्] व्य, कल्याणम्। (यथा, राजेन्द्रकर्णपुरे। ५१।

"यः कीर्त्तौ भवतो दतो नृपगुरोर्यः शंतनुः शन्तनुः॥")

शुभम्। शास्त्रम्। इति शब्दरत्नावली॥

शः, पुं, शिवः। शस्त्रम्। इति शब्दरत्नावली॥

शंयुः, त्रि, (शंशुभमस्यास्तीति। शं+"कंशंभ्यां वभयुस्तितुतयसः।" ५। २। १३८। इति युस्।) शुभान्वितः। इति त्रिकाण्डशेषः॥ (यथा, भट्टिः। ४। १८।

"कुर्व्वाणा पश्यतः शंयून् सम्विधौ सुहसानना॥"

पुं, हविरतिपुत्रोऽग्निविशेषः। यथा, महाभारते। ३। २१८। २।

"आहुतिष्वेव यस्याग्नेर्हविषाज्यं विधीयते।
सोऽग्निर्हविरतेः पुत्रः शंयुर्नाम महाव्रतः॥")

शंवः, पुं, मुसलाग्रस्थलौहमण्डलकः। वज्रम्। इति धरणिः॥

शंवः, त्रि, (शमस्यास्तीति। शं+"कंशंभ्यामिति।" ५। २। १३८। इति वः।) शुभान्वितः। इति त्रिकाण्डशेषः॥

शंवरं, क्ली, (शं सुखं वृणोतीति। वृ+अच्।) जलम्। इत्यमरः॥

शंस, उ हिंसास्तुत्योः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्वावेट्।) तालव्यादिः। उ, शंसित्वा शस्त्वा। यः शंसति सतामिति हलायुधः॥ अनेकार्थत्वात् कथनेऽप्ययम्। यथा रघौ। शशंस वाचा पुनरुक्तयेवेति। न मे क्रिया शंसति किञ्चिदीप्सितमित्यादि च। इति दुर्गादासः॥

शंसा, स्त्री, (शंस+अः। स्त्रियां टाप्।) वाक्यम्। वाञ्छा। इति मेदिनी॥ प्रशंसा। इति शब्दरत्नावली॥

शंसितः, त्रि, (शंस+क्तः।) निश्चितः। इति हलायुधः॥ हिंसितः। स्तुतः। इति शब्दरत्नावली॥ क्तप्रत्ययेन निष्पन्नमेतत्॥ (यथा, महाभारते। १। ११८। २५।

शक

"ब्राह्मणाश्च महात्मानः सोमपाः शंसितव्रताः॥")

शंस्ता, [ऋ] पु, (शंस+"ढनृढचौ शंसिवदादिभ्यः संज्ञायां चानिटौ।" उणा०। २। ८४। इति ढन्। यद्वा, छन्दसि "असितस्खलितस्खलितेति।" ७। २। ३४। इति निपातनात् साधुः।) स्तोता। शंसिता। इति संक्षिप्तसारोणादिवृत्तिः॥ (प्रशास्ता। यथा, ऋग्वेदे। १। १६२। ५।

"होताध्वर्युरावया अग्निमिन्धो
ग्रावग्राभ उत शंस्ता सुविप्रः॥"

"शंस्ता प्रशास्ता।" इति तद्भाष्ये सायणः॥)

शंस्यः, त्रि, (शं शुभे तिष्ठतीति। शम्+स्था+"स्थः कच।" ३।२।७७। इति कः।) शुभान्वितः। शंपूर्व्वस्याधातोर्ण्यत्प्रत्ययेन निष्पन्नमिदम्॥

शंस्थाः, त्रि, (शं+स्था+"स्थः कच।" ३।२।७७। इति क्विप्।) शुभान्वितः। शम्पूर्व्वस्याधातोः क्विप्प्रत्ययेन निष्पन्नमेतत्॥

शंस्यः, त्रि, (शंस+ण्यत्। "ईडवन्दवृशंसदुहां ण्यतः।" ६।१।२१४। इत्याद्युदात्तः।) हिंस्यः। स्तुत्यः। शंस्धातोः ण्यप्रत्ययेन निष्पन्नमेतत्।

शक, ट ङ त्रासशङ्कयोः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-त्रासे अक०-शङ्कायां सक०-सेट्।) त्रासो भयम्। शङ्का संशयारोपः। ट, शङ्कते व्याघ्राज्जनेन। ङ, शङ्कते पुरुषत्वं स्थाणौ। स्थाणुर्वा पुरुषो वा इति संशयमारोपयतीत्यर्थः। इति दुर्गादासः॥

शक, न इर् ऊ शक्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक०-च-वेट्।) न, शक्नोत्यशक्यमप्याजौ विजेतुं य इति हलायुधः। इर, अशकत् अशकोत् अशाचीत्। स्वादित्वेनास्मात्रित्यं ङ इत्यन्ये। ऊ, शकिष्यति शक्ष्यति। पृथक्पाठादाद्यो न स्वादिः। द्वावेवानिमावित्यन्ये। षड्स्वरानुबन्धः केषाञ्चिदनुरोधात्। द्वावेव सकर्मकौ। तथा च।

अक्षोऽस्य मन्युर्भवता विनेतुमिति रघुः। रजः-परिणाममेदो न शक्यते प्रत्याख्यातुमिति तत्त्व-कौमुद्यां वाचस्पतिमिश्रः। शक्या मखेनापि मुदोऽमराणामिति नैषधम्। इति दुर्गादासः॥

शक, य अ शक्तौ। इति कविकल्पद्रुमः॥ (दिवा॰ उभ॰-सक॰-सेट्।) शक्तिर्दिवादिपक्षे क्षमा स्वादिपक्षे सामर्थ्यम्। य अ, शक्यति शक्यते दुःखं दीनः। इति दुर्गादासः।

शकः, पुं, (शक+अच्।) जातिभेदः। नृपभेदः। इति मेदिनी॥ स च नृपः शकादित्यः इति मालिवाहन इति च नाम्ना ख्यातः। तस्य मरणदिनावधि वत्सरगणनाङ्कः शकाब्देति नाम्ना पञ्जिकायां लिख्यते। स च म्लेच्छ-जातिविशेषः। सत्ययुगे सगरराजेनास्य मस्त-कार्द्धं मुण्डयित्वा वेदबाह्यत्वमकारि। यथा,—

"ततः शकान् सयवनान् काम्बोजान् पारदां-स्तथा।
पञ्चवांश्चापि निःशेषान् कर्त्तुं व्यवसितो नृपः॥
ते हन्यमाना वीरेण सगरेण महौजसा।
वशिष्ठं शरणं जग्मुः सूर्य्यवंशपुरोहितम्॥
वशिष्ठः शरणापन्नान् समये स्थाप्य तान्नृपिः।
सगरं वारयामास तेभ्यो दत्त्वाभयं तदा॥
सगरस्तां प्रतिज्ञान्तु निशम्य सुमहाबलः।
धर्म्मं जघान तेषाञ्च वेशान्यन्यांश्चकार ह॥
अर्द्धं शिरः शकानान्तु मुण्डयामास भूपतिः।
जवनानां शिरः सर्व्वं काम्बोजानामपि द्विज॥
पारदान्मुक्तकेशांस्तु पञ्चवान् श्मश्रुधारिणः।
निःस्वाध्यायवषट्कारान् सर्व्वानेव चकार ह॥"

इति पाद्मे स्वर्गखण्डे सगरोपाख्यानम् १५ अः॥

देशभेदः। इति विश्वः॥ (यथा, मात्स्ये। १२०।४५।

"तुषारान् बर्ब्बरान् कारान् पञ्चवान् पारदान् शकान्।
एतान् जनपदान् सङ्घ प्लावयित्वोदधिं गता॥")

शकटः, पुं, क्ली, (शक्नोति भारं वोढुमिति। शक्+"शकादिभ्योऽटन्।"उणा॰ ४।८१। इति अटन्।) यानविशेषः। गाड़ी इति भाषा॥ तत्पर्य्यायः। अनः २। इत्यमरः॥ अक्षः ३। इति शब्दरत्नावली॥ विष्णुवक्षासुरविशेषः। द्विसहस्रपलपरिमाणम्। तत्पर्य्यायः। भारः २ आचितः ३ शाकटीनः ४ शलाटः ५। इति हेमचन्द्रः॥ उन्नश्च।

"शकटः शाकिनी गावी यानमस्कन्दनं वनम्।
अनूपः पर्व्वतो राजा दुर्भिक्षे नव वृत्तयः॥"

इति भरतः॥

तिनिसवृक्षः। इति राजनिर्घण्टः॥ (व्यूह-विशेषः। यथा, मनुः। ७। १८७।

"दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा॥"

शकटाकृतित्वात् रोहिणीनक्षत्रम्। यथा, बृहत्संहितायाम्। २४। ३०।

"रोहिणीशकटमध्यसंस्थिते
चन्द्रमस्यशरणीकृता जनाः।
कापि यान्ति शिशुयाचिताशनाः
सूर्य्यतप्तपिठराम्बुपायिनः॥")

शकटङ्गा, [न्] पुं, (शकटं हन्तीति। हन्+क्विप्।) श्रीकृष्णः। इति हेमचन्द्रः॥ (एतद्वि-वरणं भागवते १० स्कन्धे ७ अध्याये तथा हरिवंशे ६१ अध्याये च द्रष्टव्यम्॥) शकट-नाशके, त्रि॥

शकटाङ्गा, स्त्री, (शकटमिति आङ्गा यस्याः।) रोहिणीनक्षत्रम्। तस्याः पञ्चतारामयशकटा-कृतित्वात्॥

शकलं, क्ली, (शक्नोतीति। शक्+"शाकशस्यो-र्निन्।" उणा॰ १।१११। इति कलः।) त्वक्। खण्डम्। (यथा, रघुः। २। ४६।

"अथान्धकारं गिरिगह्वराणां
दंष्ट्रामयूखैः शकलानि कुर्व्वन्॥")

रागवस्तु। वल्कलम्। इति मेदिनी॥ शल्कम्। आँश इतिभाषा। इतिशकलिन्शब्दरत्नात्॥

शकलः, पुं, क्ली, (शक्+कलः।) एकदेशः। (यथा, मनुः। ६। ८८।

"प्रतिगृह्य पुटेनैव पाणिना शकलेन वा॥")

खण्डम्। यथा,—

"भित्तं शकलखण्डे वा पुंस्यर्द्धोऽर्द्धे समेऽशके॥"

इत्यमरः॥

(यथा, मनुः। १। १३।

"ताभ्यां स शकलाभ्याञ्च दिवं भूमिञ्च निर्ममे॥")

शकली, [न्] पुं, (शकलमस्यास्तीति। इनिः।) मत्स्यः। इत्यमरः॥

शकान्तकः, पुं, (शकस्य म्लेच्छजातिविशेषस्य अन्तकः।) विक्रमादित्यराजः। इति केचित्॥

शकारः, पुं, राज्ञः अनूढायाः स्त्रिया भ्राता। यथा, साहित्यदर्पणे ३ परिच्छेदे॥

"मदमूर्च्छिताभिमानो दुष्कुलतंश्वर्य्यसंयुक्तः।
सोऽयमनूढाभ्राता राज्ञः श्यालः शकार
इत्युक्तः॥"

शकारिः, पुं, (शकस्य म्लेच्छजातिविशेषस्यारिः शत्रुः।) विक्रमादित्यराजः। स तु उज्जयनी-देशाधिपतिः। यथा,—

"साहसाङ्कःशकारिः स्यादिक्रमादित्य इत्यपि॥"

इति जटाधरः॥

शकुनं, क्ली, (शक्नोति शुभाशुभं विज्ञातुमनेनेति। शक्+"शकेरुनोन्तुनयः।"उणा॰ ३।४८। इति उनः।) शुभशंसिनिमित्तम्। इति मेदिनी॥ सगुन इतिहिन्दीभाषा। फललक्षणम्। इत्यजयपालः॥ * ॥ अथ शुभशकुनानि।

"कीर्त्तनात् श्रवणतो विलोकनात्
स्पर्शनात् समधिकं समोत्तरम्।
मङ्गलाय दधिचन्दनादिकं
स्यात् प्रवासभवनप्रवेशयोः॥
दध्याज्यदूर्व्वाक्षतपूर्णकुम्भाः
सिद्धान्नसिद्धार्थकचन्दनानि।
आदर्शशङ्खामिषमौनसत्या-
गोरोचनागोमयगोमधूलिः॥

गौर्व्राणवोणाफलभद्रपीठ-
पुण्यान्ननालङ्करणायुधानि।
ताम्बूलयानासनवर्द्धमान-
ध्वजातपत्रव्यजनाम्बराणि॥
अम्भोजभृङ्गारमसृङ्मणिश्च
गजाजवाह्याः कुशचामराणि।
रत्नानि चामीकररूप्यताम्र-
वङ्गेक्षुकाश्चौषधयः सुराश्च॥
वनस्पतेर्नूतनशाकमेवं
माङ्गल्यपञ्चाशदिदं प्रदिष्टम्।
शुभेषु कार्य्येष्वशुभेषु चैव
कार्य्ये गतानां शुभदाः सदैव॥
एतानि दृष्ट्वा शुभदर्शनानि
कुर्व्वन्ति दृष्टः पथि दक्षिणेन।
सङ्कल्पितार्थादशुभावहानि
त्यक्तानि वामेन शुभा भवन्ति॥
गान्धारषड्जादृषभस्तथान्ये
स्वरेषु गम्भीरमनोरमा ये।
वादित्रवेदध्वनिगीतनृत्य-
मित्यादिशस्तं किल यत्र रौद्रम्॥
आदाय रिक्तं कलसं जलार्थी
यदि व्रजेत् कोऽपि सहाध्वगेन।
पूर्णं समादाय निवर्त्ततेऽसौ
यथा कृतार्थः पथिकस्तथैव॥ * ॥
अङ्गारभस्मेन्धनरज्जुपङ्क-
पिण्याककार्पासतुषास्थिविष्ठाः।
क्षणायसावस्करकृष्णधान्य-
पाषाणकेशा भुजगौषधानि॥
तैलं गुड़ं चर्म्म वसा विभिन्नं
रिक्तञ्च भाण्डं लवणं तृणञ्च।
तक्रार्गला शृङ्गलहस्तिवाताः
कार्य्ये क्वचित् चिन्त्यदिमे न शस्ताः॥ * ॥
स्खपादयानस्खलनं नृपाणां
भङ्गः क्वचिद्यानपलायनञ्च।
द्वाराभिघाताध्वगशस्त्रघाताः
प्रस्थानविघ्नं कथयन्तु यातुः।
मार्জ্জारयुद्वारवदर्शनानि
कलिः कुटुम्बस्य परस्परञ्च।
चित्तस्य कालुष्यकरञ्च सर्व्वं
गन्तुः प्रयाणप्रतिषेधनाय॥
दृष्टे शवे रोदनशब्दहीने
महार्थसिद्धिः कथितोद्यमेषु॥
गृहप्रवेशेषु शवः शवत्वं
रुजं सदीर्घामथवा ददाति॥
गण्डूषमावर्जयतां नराणा-
मन्तर्गलं चेत् प्रविशत्यकस्मात्।
भवेत् तदाभीप्सितसौख्यलाभो
यः कौतुकी तेन निरूप्यमेतत्॥
उच्छ्रितं झटिति दन्तधावनं
संमुखं पतति यत्र वासरे।
भोजनं भवति तत्र वीचितं
व्यासभाषितमिदं हि नानृतम्॥"

इति वसन्तराजशाकुने विचारिताः शुभाशुभाः॥
अथ नराङ्गितविचारः।
"अथाभिधास्ये द्विपदेषु तावत्
प्रधानभावात् शकुनं नराणाम्।
नैमित्तिकं यत् प्रतिभाव्य सर्व्वं
फलं शुभाशोभनयोर्ब्रवीति॥
नरोऽभिरूपः सितवस्त्रमाल्यो
वाचं प्रशस्तां मधुराञ्च जल्पन्।
एवंविधा योषिदपि प्रयाणे
प्रवेशकाले च करोति सिद्धिम्॥*॥
वमद्विकेशो हतमानगर्व्वः
क्षिप्ताङ्गनग्नान्यजतेलदिग्धाः।
रजस्वला गर्भवतो रुदन्तो
मलान्वितोन्मत्तजराधवाश्च॥
दीनो द्विषत्कृष्णविमुक्तकेशाः
क्रमेलकस्थाः खरसैरिभस्थाः।
सन्यासिसांक्रन्दनपुंसकाद्या
दुःखावहाः सर्व्वसमीहितेषु॥*॥
पृथ्वीपतिर्ब्राह्मणहर्षयुक्तो
वैश्या कुमारो सुहृदः सुवेशाः।
नार्य्या नराश्चाश्वहयाधिरूढाः
शुभाय दृष्टाः शकुनोद्यमेषु॥*॥
कृष्णाम्बराः कृष्णविलेपनाढ्याः
कृष्णां स्रजं मूर्द्ध्नि विधारयन्तो।
दृष्टा सकोपा यदि कृष्णवर्णा
नारी नरैस्तद्विपदो भवन्ति॥*॥
श्वेताम्बरा श्वेतविलेपनाढ्या
मालां सितां मूर्द्ध्नि विधारयन्ती।
दृष्टा प्रहृष्टा यदि गौरवर्णा
नारी नरैः स्यात्तदभीष्टसिद्धिः॥
धृतातपत्रः सुविशुद्धवासाः
पुष्पान्वितश्चन्दनचर्चिताङ्गः।
स्निग्धावयुक्तः कृतभोजनो वा
विप्रः पठन् यच्छति सर्व्वसिद्धिम्॥
अभ्युपगच्छति यस्य हि याने
स्त्रीपुरुषोऽप्यथवा फलहस्तः।
सर्व्वसमीहितसिद्धिरवश्यं
तस्य नरस्य भवत्यचिरेण॥"
इति वसन्तराजशाकुने नराङ्गितेङ्गितसंज्ञम्॥*॥
"गच्छेति पृष्टे पुरतस्तथैव
वागोदृशी केनचिदुच्यमाना।
सर्व्वार्थसिद्ध्यातिशयेन ताभ्य-
श्चित्तस्य तुष्टिर्विजयाय पुंसाम्॥
सिद्ध्य विरावा जहि छिन्द भिन्द
चैत्यादयः शत्रुवधोद्यतानाम्।
क्व यासि मा गच्छत चैवमाद्याः
प्रयोजनारम्भनिवारणार्थाः॥
स्थैर्य्यं स्थिरार्थादृगमनं तदर्था-
द्वाक्यान्निवृत्तिर्विनिवर्त्तितार्थात्।
लाभं जयं भङ्गममङ्गलं वा
बुध्येत तत्तत्प्रतिपादनार्थात्॥
उग्रं भवेद्रोदनमग्रभागे
भयं भवेद्वङ्क्षविभागभूते।
नैर्ऋत्यकोणे रणमार्गरोधो
वायव्यकोणे रुदितं समूहे॥
मृत्युः सुतानां रुदितेन पृष्ठे
लाभो भवेत्तच्च निवर्त्तनेन।
मृत्युस्तदाग्रे रुदितेन गन्तुः
सिद्धिं विधत्ते रुदितं रिपूणाम्॥"
इति वसन्तराजशाकुने नराङ्गिते उपस्थितिप्रकरणम्॥*॥ वकचक्रवाकटङ्कटिट्टिभकारण्डवभासभारद्वाजमयूरकपिञ्जललावकगृध्रोलूककपोतगोवत्सकुक्कुटकलविङ्कभारतीचाससञ्जनकाकपिङ्गलारूपाणिशकुनानिघोटकवृषभहिषखरगोमहिष्यजाजमेषैडकोष्ट्रकुच्छुन्दरीमूषिकमार्जारवानरमृगवराहऋक्षलासनकुलहृषिकपिपोलिकाप्रभृतीनि कुक्कुरादिरूपशकुनानिच वसन्तराजशाकुने द्रष्टव्यानि।
हस्तिशशकसृगालषट्पदशरभसर्परूपाणि
शकुनानि तत्तच्छब्दे द्रष्टव्यानि॥
शकुनः, पुं, (शक+उनः।) पक्षिमात्रम्। (यथा, महाभारते। १। ७२। १०॥
"तं वने विजने गर्भे सिंहव्याघ्रसमाकुले।
दृष्ट्वा ययानं शकुना समन्तात् पर्य्यवारयन्॥")
पक्षिविशेषः। गृध्र इति ख्यातः। इति मेदिनी॥
कश्यपपत्नीताम्नायाः श्येनगृध्रादयः पुत्राः।
इति श्रीभागवतम्॥ गृध्रस्याशुभफलं यथा,—
"वामेऽपसव्ये पुरतश्च पृष्ठे
युद्धं विभेदं मरणं क्षितश्च।
गृध्रः स्थितः सन् कुरुते क्रमेण
शब्दोऽप्यसव्योऽस्य विपत्तिहेतुः॥"
इति वसन्तराजशाकुनम्॥
विप्रभेदः। इत्युणादिकोषः। तद्विवरणं भागवते उक्तम्। गौतविशेषः। तत्तु उत्सवादिषु मङ्गलार्थगेयम्। इत्यजयपालः॥ शुभशंसी।
इति शब्दरत्नावली॥
शकुनज्ञः, स्त्री, (शकुनं जानातीति। ज्ञा+कः। स्त्रियामाप्।) ज्यैष्ठी। इति चिकाण्डशेषः॥
शकुनज्ञातरि, त्रि॥ (यथा, कथासरित्सागरे। ३१। ५३।
"प्राह्निणोत्प्राङ्निषद्यापि स्वसख्या शकुनज्ञया।
स्वतन्त्रोऽभिनवारूढो युवतीनां मनोभवः॥")
शकुनिः, पुं, (शक्नोति उन्नेतुमात्मानमिति। शक+"शकेरुनोन्त्युनयः।" उणा० ३।४९ इति उनिः।) पक्षी। इत्यमरः॥ (यथा, मनुः। ५। ११।
"क्रव्यादान् शकुनीन् सर्व्वांस्तथा ग्राम-
निवासिनः।
अनिर्द्दिष्टांश्चैकशफांष्टिट्टिभञ्च विवर्जयेत्॥")
चित्रपक्षी। इति हेमचन्द्रः॥ सौबलः। स तु कौरवमातुलः। (अयं हि दुर्य्योधनमन्त्री। द्यूते पाण्डवान् जित्वा वनं प्रेरयामास। असौ हि कौरवयुद्धे सहदेवेन निहतः। एतद्विवरणं महाभारते शल्यपर्व्वणि द्रष्टव्यम्॥) ववाद्येकादशकरणान्तर्गताष्टमकरणम्। इति मेदिनी॥ तत्करणजातफलम्।
"परजनधनहर्त्ता वञ्चकः क्रूरचेष्टः
करधृतकरवालो व्याहतस्वामिपक्षः।
अतिशयपरदारासक्तचित्तः सरोषो
भवति शकुनिजन्मा मानवः शीघ्रकर्म्मा॥"
इति कोष्ठीप्रदीपः॥*॥
दुःसहपुत्रः। यथा,—
"दुःसहस्याभवत् भार्य्या निर्म्माष्टिर्नामनामतः।
जाता कलेस्तु पाप्मायां ऋतोश्चण्डालदर्शनात्॥
तयोरपत्यान्यभवन् जगद्व्यापीनि षोडश।
अष्टौ कुमाराः कन्याश्च तथाष्टावतिभीषणाः॥
दम्भाकृतिस्तथोल्लिश्च परिवर्त्तस्तथा परः।
शकुधुक् शकुनिश्चैव गण्डप्रान्तरतिस्तथा॥"
तस्य पञ्च पुत्रा यथा,—
"श्येनकाककपोतांश्च गृध्रोलूकौ च वै सुतान्।
अवाप शकुनिः पञ्च जगद्धस्तान् सुरासुरः॥
श्येन जग्राह वै मृत्युः काकं कालो ग्रहोत-
वान्।
उलूकं निर्ऋतिस्तापि जग्राहातिभयावहम्॥
गृध्रं व्याधिस्तदीशोऽथ कपोतञ्च स्वयं यमः।
एतेषामेव चैवोक्ता कृता पापोपपादने॥
तस्मात् श्येनादयो यस्य निलीयन्ते शिरस्यथ।
तेनात्मरक्षणायालं शान्तिः कार्य्या द्विजोत्तम॥
गेहे प्रसूतिरेतेषां तद्बीजनिवेशनम्।
न शस्तं वर्जयेद्गेहं कपोताक्रान्तमस्तकम्॥
श्येनः कपोतो गृध्रो वा कौशिको वा यदि
द्विजः।
प्रविष्टः कथयन्त्यन्तं वसतां तत्र वेश्मनि॥
ईदृक् परित्यजेद्गेहं शान्तिं कुर्य्याद्विजोत्तम।
स्वप्नेऽपि हि कपोतस्य दर्शनं न प्रशस्यते॥"
इति मार्कण्डेयपुराणे दुःसहवंशोत्पत्तिनामाध्यायः॥*॥ विकुक्षिपुत्रः। तथा,—
"वैवस्वतमनोरासीद्विकुक्षिर्पृथिवीपतिः।
तस्य पुत्रशतं चासीद्विकुक्षिर्ज्येष्ठ उच्यते॥
सोऽयोध्याधिपतिर्वीरस्तस्य पञ्चदश स्मृताः।
शकुनिप्रमुखाः पुत्रा रक्षिता रोमहर्षिताः॥"
इति वह्निपुराणे सगरोपाख्याननामाध्यायः॥
शकुनिप्रपा, स्त्री, (शकुनीनां पक्षिणां पानार्थं या प्रपा।) पक्षिणः पानीयशाला। तत्पर्य्यायः। श्रीग्रहः २। इति हारावली॥
शकुनी, स्त्री, श्यामापक्षी। इति राजनिर्घण्टः॥ चटकी। इति केचित्॥ (पक्षीरूपधारिणी पूतना। यथा, महाभारते। ५। १३०। ४५।
"अनेन हि हता बाल्ये पूतना शकुनी तथा।"
तथा च हरिवंशे। ६२। १—२।
"कस्यचित्त्वथ कालस्य शकुनीवेशधारिणी।
धात्री कंसस्य भोजस्य पूतनेति परिश्रुता॥
पूतना नाम शकुनी घोरा प्राणिभयङ्करी।
आजगामार्द्धरात्रे तु पक्षी क्रोधात् विधुन्वती॥")

शकुनीश्वरः, पुं, (शकुनीनां पक्षिणामीश्वरः।) गरुड़ः। इति धनञ्जयः॥

शकुन्तः, पुं, (शक्नोति उत्पतितुमिति। शक+"शकेरुनोन्तोन्युनयः।" उणा० ३।४८। इति उन्तः।) पक्षी। इत्यमरः॥ (यथा, महाभारते। १।७२।११।

"नैमां हिंस्युर्वने बालां क्रव्यादा मांसगृद्धिनः।
पर्य्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम्॥")

कीटभेदः। भामपक्षी। इति मेदिनी॥

शकुन्तला, स्त्री (शकुन्तैः पक्षिभिर्लायते पाल्यते इति। ला+घञर्थे कः। स्त्रियामाप्।) मेनकाप्सरःसु विश्वामित्रेण जनिता कन्या। सा कण्वमुनिना प्रतिपालिता। दुष्मन्तराजेन विवाहिता। अस्याः पुत्रो भरतः राजचक्रवर्त्ती। अस्या नामकारणं यथा,—

"निर्जने तु वने यस्मात् शकुन्तैः परिरक्षिता।
शकुन्तलेति नामास्याः कृतञ्चापि ततोमया॥"

इति महाभारते।१।७२।१५॥

अस्या विवरणं कालिदासकृताभिज्ञानशकुन्तलनाटके द्रष्टव्यम्। पाद्मे स्वर्गखण्डे प्रथमादिषड्ध्यायेषु महाभारते आदिपर्व्वणि ६९ अध्यायमारभ्य च ज्ञातव्यम्॥

शकुन्तलात्मजः, पुं, (शकुन्तलाया आत्मजः पुत्रः।) भरतराजः। यथा,—

"दौष्मन्तिर्भरतः सर्व्वदमः शकुन्तलात्मजः॥"

इति हेमचन्द्रः॥

शकुन्तिः, पुं, (शक्नोति उत्पतितुमिति। शक+उन्तिः।) पक्षिमात्रम्। इत्यमरः॥ (यथा, ऋग्वेदे। २।४२।३।

"अवक्रन्द दक्षिणतो गृहाणां
सुमङ्गलो भद्रवादी शकुन्ते!॥")

भामपक्षी। इत्युणादिकोषः॥

शकुलः, पुं, (शक्नोति गन्तुं वेगेनेति। शक+"मद्गुरादयश्च।" उणा० १।४२। इति उरच्। रस्य लः।) मत्स्यविशेषः। इत्यमरः॥ शउल इति भाषा॥ (यथा, महाभारते।१२। १३७।३।

"नातिगाधे जलाधारे सुहृदः शकुलास्तयः।
प्रभूतमत्स्यो कौन्तेय! बभूवुः सहचारिणः॥")

अस्य गुणाः। मधुरत्वम्। रूक्षत्वम्। ग्राहित्वम्। पित्तामजित्त्वम्। गुरुत्वञ्च। इति राजवल्लभः॥

शकुलगण्डः, पुं, (शकुलस्य गण्ड इव गण्डो यस्य। गालमत्स्यः। इति त्रिकाण्डशेषः॥

शकुलार्त्तकः, पुं, श्वेतदूर्व्वा। इत्यमरः॥

शकुलार्त्तो, स्त्री, गण्डदूर्व्वा। इति राजनिर्घण्टः।

शकुलादनी, स्त्री, (शकुलानां अदनं यस्याः। ङीप्।) चक्राङ्गी। इत्यमरः॥ कटकी इति। भाषा। कञ्चटशाकः। इति मेदिनी। कांचड़ा दाम इति भाषा॥ मांसी। किञ्चुलिका। जलपिप्पली। कटफलः। इति विश्वः। गजोपकी। इति राजनिर्घण्टः॥

शकुलार्भकः, पुं, (शकुलस्य अर्भक इव।) गड़कमत्स्यः। इत्यमरः॥ (गड़इमाछ इति भाषा॥)

शकुली, स्त्री, (शकुल+ङीष्।) मत्स्यविशेषः। मृगाल् इति भाषा। महाशकुल इति केचित्। अस्या आकारो गुणाश्च।

"शकुली रोहिताकारा भूमौ प्रायश्चरत्यसौ।
गुर्व्वी पाके च मधुरा मेदिका दोषकोपना॥"

इति राजवल्लभः॥

पुस्तकान्तरे शकली इति च पाठः॥ (नदीविशेषः। यथा, मार्कण्डेये। ५७। २३।

"सुमेरुजा शक्तिमती शकुली चित्रिदिवा क्रमुः।
स्कन्धपादप्रसूता वै तामान्या वेगवाहिनी॥")

शकृत्, क्ली, (शक्नोति सर्त्तुमिति। शक्+"शकेर्ऋतिन्।" उणा० ४।५८। इति ऋतिन्।) विष्ठा। इत्यमरः॥ यथा,(भागवते। ३।३०।१८।

"स दृष्ट्वा तस्तहृदयः शकृन्मूत्रं विमुञ्चति॥")

शकृत्करिः, पुं, स्त्री, (शकृत् करोतीति। शकृत्+कृ+"सम्भ्यशकृतोरिन्।"३।२।२४। इति इन्।) वत्सः। इत्यमरः॥ दन्त्यादिरिति विद्याविनोदः॥

शकृत्कारः, पुं, (शकृत् करोतीत्यर्थे शकृच्छब्दात् कृधातोः घञ् (अण्) प्रत्ययेन निष्पन्नः॥

शक्रद्वारं, क्ली, (शक्रतो द्वारम्।) मलद्वारम्। तत्पर्य्यायः। अपानम् २ पायुः ३ गुदम् ४ च्युतिः ५ अधोमर्म्म ६ त्रिवलीकः ७ बली ८। इति हेमचन्द्रः॥

शक्करः, पुं, वृषः। इति हेमचन्द्रः॥

शक्करिः, पुं, वृषः। इति त्रिकाण्डशेषः॥

शक्करी, स्त्री, छन्दोभेदः। नदीभेदः। मेखला। इति मेदिनी॥ सा च समवृत्तषड्विंशतिच्छन्दोऽन्तर्गतचतुर्दशच्छन्दः। यथा,—

"उक्थात्युक्था तथा मध्या प्रतिष्ठान्या
सुपूर्व्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च॥
त्रिष्टुप् च जगती चैव तथातिजगती मता।
शक्करी सातिपूर्व्वा स्यादष्ट्यत्यष्टी तथा मता॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः।
विकृतिः संकृतिश्चापि तथा चैवातिमत्कृतिः॥
इत्याख्याः समवृत्तानां छन्दसां क्रमशः कृताः॥"

तत्र चतुर्दशाक्षरपादसमच्छन्दांसि सन्ति। तेषां नामानि गणाश्च यथा।

मो गो गो नौ मः शरनवभिरसंबाधौ। १।
श्रेयं वसन्ततिलकं तभजा जगौ गः। २।
ननरमलयुगैः खरैरपराजिता। ३।
ननभनलगतिप्रहरणकलिका। ४।
मस्तौ नौ सौ गौ यदि गदिता वासन्तीयम्।५।
द्विः सप्त छिदि लोलाम्बौ भौ गो चरणे चेत्।६।
खरभिदि यदि नौ तौ च नान्दीमुखीयम्।७।

इति छन्दोमञ्जरी॥

एतेषामुदाहरणानि बाहुल्याभिया नोक्तानि॥

शक्तः, त्रि, (शक+क्तः।) शक्तिविशिष्टः। समर्थः। तत्पर्य्यायः। सहः २ क्षमः ३ प्रभुः ४ उष्णुः ५। इति हेमचन्द्रः॥ (यथा, मनुः। ९।२०७।

"भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्म्मणा।
न निर्भाज्यः स्वकादंशात् किञ्चिदित्येषजीवनम्॥")

प्रियंवदः। इति शक्तशब्दटीकायां स्वामी॥

शक्तवः, पुं, भृन्नि, भ्रष्टयवादिचूर्णम्। क्वातु इति भाषा। यथा,—

"धाना भ्रष्टयवे भृन्नि स्त्रियां पुंभृन्नि शक्तवः
केचित्तु शक्तुरस्त्रीति वन्धुरा भूम्नि स्त्रियाम्॥"

इति जटाधरः॥

अस्य विवरणं शक्तुशब्दे द्रष्टव्यम्॥

शक्तिः, स्त्री, (शक+क्तिन्।) कार्य्यजननसामर्थ्यम्। यथा,—

"या देवी सर्व्वभूतेषु शक्तिरूपेण संस्थिता।"

इति देवीमाहात्म्यस्य टीकायां नागोजीभट्टः॥

शक्यते जेतुमनया। सा प्रभावोत्साहमन्त्रभेदात्त्रिविधा। तत्र प्रभुत्वे साधकत्वात् कोषदण्डौ प्रभुशक्तिः १। विक्रमेण स्वशक्त्या विस्फुरणमुत्साहशक्तिः २। सन्ध्यादीनां सामादीनाञ्च यथावस्थानं मन्त्रशक्तिः ३॥ सामर्थ्यमात्रम्। तत्पर्य्यायः। द्रविणम् २ तरः ३ सहः ४ बलम् ५ शौर्य्यम् ६ स्थामः ७ शुष्मम् ८ पराक्रमः ९ प्राणः १०। इत्यमरः॥ शुष्म११ सहम् १२। इति शब्दरत्नावली॥ ऊर्ज्जः १३। इति जटाधरः॥ कासूः। सा तु शर्व्वलानामाख्यम्। इति नानार्थे अमरभरतौ॥ गौरी। इति मेदिनी॥ लक्ष्मीः। इति शब्दमाला॥*॥

त्रिशक्तयो यथा,—

"एषा त्रिशक्तिरुद्दिष्टा नयसिद्धान्तगामिनी।
एषा श्वेता परा सृष्टिः सात्त्विकी ब्रह्मसंस्थिता॥
एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता।
एषैव कृष्णा तमसो रौद्री देवी प्रकीर्त्तिता॥
परमात्मा यथा देवो एक एव त्रिधा स्थितः।
प्रयोजनवशाच्छक्तिरेकैव त्रिविधाभवत्॥"

इति वाराहे त्रिशक्तिमाहात्म्यनामाध्यायः॥*॥

अपि च।

"बिन्दुः शिवात्मकस्तत्र बीजं शक्त्यात्मकं स्मृतम्।
तयोर्योगे भवेन्नादस्तेभ्यो जातास्त्रिशक्तयः॥"

इति क्रियासारः॥

अन्यच्च।

"इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु वैष्णवी
त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति॥"

इति गोरक्षसंहिता॥*॥

अष्ट शक्तयो यथा,—

"इन्द्राणी वैष्णवी शान्ता ब्रह्माणी ब्रह्मवादिनी।
कौमारी नारसिंही च वाराही विकटाकृतिः॥
माहेश्वरी महामाया भैरवी भीमरूपिणी।
अष्टौ च शक्तयः सर्व्वा रथस्थाः प्रययुर्मुदा॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे बाधयुद्धनाम ११९ अध्यायः॥*॥

नव शक्तयो यथा,—
"तत्र पद्मे चाष्टदले मध्ये च भक्तिपूर्वकम्।
वैष्णवीञ्चैव ब्राह्मणीं रौद्रीं माहेश्वरीं तथा॥
नारसिंहीञ्च वाराहीमिन्द्राणीं कार्त्तिकीं तथा।
सर्वशक्तिस्वरूपाञ्च प्रधानां सर्वमङ्गलाम्॥
नवशक्तीश्च संपूज्य घटे देवांश्च पूजयेत्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६१ अध्यायः॥*॥

पञ्चाशद्विष्णुशक्तयो यथा,—
"कीर्त्तिःकान्तिस्तुष्टिपुष्टी धृतिः शान्तिः क्रिया दया।
मेधा सहर्षा श्रद्धा स्याल्लज्जा लक्ष्मीः सरस्वती॥
प्रीती रती रमा प्रोक्ताः क्रमेण स्वरशक्तयः।
जया दुर्गा प्रभा सत्या चण्डा वाणी विलासिनी॥
विरजा विजया विश्वा विनदा सुनदा स्मृतिः।
ऋद्धिः समृद्धिः शुद्धिश्च भक्तिर्मुक्तिर्मतिः क्षमा॥
रमोमा क्लेदिनी क्लिन्ना वसुदा वसुधा परा।
परा परायणा सूक्ष्मा सन्ध्या प्रज्ञा प्रभा निशा॥
अमोघा विद्युता चेति शक्तयः सर्वकामदाः।
एताः प्रियतमाहेषु निपक्षाः सस्मितानना॥
विद्युद्दामसमानाङ्ग्यः पद्मजाभयबाहवः॥"*॥

पञ्चाशद्रुद्रशक्तयो यथा,—
"गुणोदरी स्यादिरजा शाल्मली तदनन्तरम्।
लोलाची वर्त्तुलाची च दीर्घघोणा समीरिता॥
सदीर्घमुखीगोमुख्यौ दीर्घजिह्वा तथैव च।
कुण्डोदर्यैरावत्यौ च तथा विकृतमुख्यपि॥
ज्वालामुखी ततो ज्ञेया पश्चादुल्कामुखी ततः।
सुश्रीमुखी चैव विद्यामुख्येता: स्वरशक्तयः॥
महाकाली सरस्वत्यौ सर्व्वसिद्धिसमन्विते।
गौरी त्रैलोक्यविद्या स्यान्मन्त्रसिद्धिस्ततः परम्॥
आत्मशक्तिर्भूतमाता तथा लम्बोदरी स्मृता।
द्रावणी नागरी भूयः खेचरी चापि मञ्जरी॥
रूपिणी चिचिणी पश्चात् काकोदर्य्यपि पूतना।
स्याद्रुद्रकालीयोगिन्यौ गर्ज्जिनी गर्ज्जिनी तथा॥
कालरात्रिश्च कुब्जिन्या कपर्द्दिन्यपि वज्रया।
जया च सुमुखेश्वर्य्या रेवती माधवी ततः॥
वारुणी वार्षवी प्रोक्ता पश्चाच्छोविदारिणी।
ततश्च सहजा लक्ष्मीर्व्यापिनी माययान्विता॥
एता रुद्राङ्गपीठस्थाः सिन्दूरारुणविग्रहाः॥
रक्तोत्पलकपालाभ्यामलङ्कृतकराम्बुजाः॥"
इति प्रपञ्चसारः॥*॥

कुलशक्तयो यथा,—
"शक्तयः परमेशानि! विदग्धाः सर्वयोषितः।
नटी कापालिकी वेश्या मालिनी कुसुमालिनी॥
चाण्डाली च कुलाली च रजकी नापिताङ्गना।
गोपिनी योगिनी शुद्धा ब्राह्मणी राजकन्यका॥
कोचाङ्गना च देवेशि! तथैव शङ्खकारिणी।
एताः षड्विंशतिः कन्या देवानामपि दुर्लभाः॥
दैवज्ञा व्याधवामा च तथा मांसापहारिणी।
बौद्धा च जवनी देवि तथा रसपसारिणी॥
वेश्या चतुर्विधा प्रोक्ता द्विविधा कुसुमालिनी॥
धीवरी द्विविधा प्रोक्ता तथैव गणिकाङ्गना॥
कुम्भकारी द्विधा प्रोक्ता तथैव गोपिनी स्मृता।
वातवैद्याङ्गना देवि जवनी द्विविधा स्मृता॥
बौद्धकन्या विधा देवि तथा कोचाङ्गना प्रिया।
पूर्व्वोक्ताभिः सहैकत्र चतुःषष्टिश्च शक्तयः॥"
इति रेवतीतन्त्रे ३ पटलः॥*॥

अपि च।
"पञ्चाचारेण देवेशि! कुलशक्तिं प्रपूजयेत्।
नटी कापालिकी वेश्या रजकी नापिताङ्गना॥
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका।
मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः॥
विशेषवैदग्ध्ययुताः सर्व्वा एव कुलाङ्गनाः।
रूपयौवनसम्पन्ना शीलसौभाग्यशालिनी।
पूजनीया प्रयत्नेन ततः सिद्धिर्भवेद् ध्रुवम्॥"
इति गुप्तसाधनतन्त्रे १ पटलः॥*॥

तस्याः प्रशंसा यथा।
"शक्तिं विना महेशानि! सदाहं शवरूपकः।
शक्तियुक्तो यदा देवि! शिवोऽहं सर्वकामदः॥
शक्तियुक्तं जपेन्मन्त्रं न मन्त्रं केवलं जपेत्।
सावित्रीसहितो ब्रह्मा सिद्धोऽभूज्जगन्मन्दिनि॥
द्वारवत्यां कृष्णदेवः सिद्धोऽभूत् सत्यया सह।
तथा कोचवधूसङ्गान्मम सिद्धिर्वरानने॥
ईश्वरोऽहं महादेवि! केवलं शक्तियोगतः।
शक्तियोगेन देवेशि! यदि सिद्धिर्न जायते॥
तदैव परमेशानि मम वाक्यं हृषा भवेत्।
यद्दत्तं जलगण्डूषं शक्तिवक्त्रे सुरेश्वरि!॥
सिन्धुरूपं महेशानि! तज्जलं नात्र संशयः।
स्वीयेष्टदेवीभावेन भोजयेत्तान्च यत्नतः॥
शक्तिश्च कथ्यते देवि शृणुष्व सुरसुन्दरि।
त्रयोदशाब्दादूर्द्धं या पञ्चविंशतिवार्षिकी॥
अप्रसूता विशेषेण पञ्चमेऽपि भवेत् प्रिये।
सुन्दरी तु विशेषेण प्रसूता वाप्रसूतिका॥
अवश्यं पञ्चमं कुर्य्यात् शक्तिमात्रे महेश्वरि॥"
इति शक्तिकागमसर्व्वस्वम्॥*॥

तस्या उत्पत्तिमाहात्म्यादि यथा,—
नारायण उवाच।
"सह बुद्ध्या बुद्धिमन्तो न वक्तुमुचितं सुराः।
सर्व्वे शक्त्यालया विश्वे शक्तिमन्तो हि जीविनः॥
ब्रह्मादिस्तम्बपर्य्यन्तं सर्व्वं प्राकृतिकं जगत्।
सत्यं नित्यं विना मात्रं मया शक्तिः प्रकाशिता॥
आविर्भूता च सा मत्तः सृष्टौ देवी मदीच्छया।
तिरोहिता च सा शेषे सृष्टिसंहरणे मयि॥
सृष्टिकर्त्री च प्रकृतिः सर्व्वेषां जननी परा।
मम तुल्या च मन्माया तेन नारायणी स्मृता॥
सुचिरञ्च तपस्तप्तं शम्भुना ध्यायता च माम्।
तेन तस्मै मया दत्ता तपसां फलरूपिणी॥
व्रतञ्च लोकशिक्षार्थमस्या न स्वार्थमेव च।
स्वयं व्रतानां तपसां फलदात्री जगन्मयी॥
मायया मोहिताः सर्व्वे किमस्या वास्तवं व्रतम्।
साध्यमस्या व्रतफलं कल्पे कल्पे पुनः पुनः॥
सुरेश्वरा यदंशाश्च ब्रह्मविष्णुमहेश्वराः।
कलाः कलांशरूपास्ते जीविनश्च सुरादयः॥
मृदा विना कुलालश्च घटं कर्त्तुं यथाक्षमः।
विना स्वर्णं स्वर्णकारः कुण्डलं कर्त्तुमक्षमः॥
विना शक्त्या तथाहञ्च स्वसृष्टिं कर्त्तुमक्षमः।
शक्तिप्रधाना सृष्टिश्च सर्व्वदर्शनसम्मता॥
अहमात्मा च निर्लिप्तोऽदृश्यः साक्षी च देहिनाम्।
देहाः प्राकृतिकाः सर्व्वे नश्वराः पाञ्चभौतिकाः॥
अहं नित्यशरीरी च भानुविग्रहविग्रहः।
सर्व्वाधारा च प्रकृतिः सर्व्वात्माहं जगत्सु च॥
अहमात्मा मनो ब्रह्म ज्ञानरूपो महेश्वरः।
पञ्च प्राणाः स्वयं विष्णुर्बुद्धिः प्रकृतिरीश्वरी॥
शक्तयो निद्रादयश्चैताः सर्व्वाश्च प्रकृतेः कलाः।
सा च शैलेन्द्रकन्येयमिति वेदनिरूपितम्॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ७ अध्यायः॥*॥

अपि च।
"सा शक्तिः सृष्टिकाले च पञ्चधा चेश्वरेच्छया
राधा पद्मा च सावित्री दुर्गा देवी सरस्वती॥
प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः।
प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता॥
ऐश्वर्य्याधिष्ठातृदेवी सर्व्वमङ्गलकारिणी।
परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता॥
विद्याधिष्ठातृदेवी या परमेशस्य दुर्लभा।
वेदशास्त्रयोगमाता सा सावित्री प्रकीर्त्तिता॥
बुद्ध्यधिष्ठातृदेवी या सर्व्वशक्तिस्वरूपिणी।
सर्व्वज्ञानात्मिका सर्व्वा सा दुर्गा दुर्गनाशिनी॥
रागाधिष्ठातृदेवी या शास्त्रज्ञानप्रदा सदा।
कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती॥
पञ्चधादौ स्वयं देवी मूलप्रकृतिरीश्वरी॥
ततः सृष्टिक्रमेणैव बहुधा कलया च सा।
योषितः प्रकृतेरंशाः पुमांसः पुरुषस्य च॥"
इति च ब्रह्मवैवर्त्ते गणेशखण्डे ४० अध्यायः॥*॥

ब्रह्माणीशक्तयुत्पत्तिर्यथा।
"ततो ब्रह्मादयो देवा भयं जग्मुः सवासवाः।
यदि स्यान्निर्जितो देवः क्षयः सर्व्वदिवौकसाम्॥
एतस्मिन्नन्तरे शक्र! ब्रह्मा चिन्तयते क्रियाः।
स्त्रीरूपधारिणी भूत्वा सहायत्वं महेश्वरे॥
क्षिप्रं कुरु स्वकार्य्यं त्वं एवं विश्वेश्वरे रणे।
ततो द्योतितवान् शम्भुः स्वशक्तिं किरणोज्ज्वलाम्॥
ब्रह्मरूपधरां किन्तु ज्वलनाकारविग्रहाम्।
हंसस्यन्दनमारूढां स्वकीयायुधधारिणीं॥
तर्ज्जयन्तीं महौजेन दानवानां भयङ्करीं।
तस्या घोराणि कर्म्माणि दृष्ट्वा स विस्मयन् शिवः
का पुनः स्रष्टुः सृष्टेर्वा सदातिप्रतिपक्षजित्।
तस्याः शक्तिं द्वितीयाञ्च सृजामि अपराजिताम्॥"
इति देवीपुराणे रुद्रवधे ब्रह्मास्त्रोत्पत्तिः॥*॥

नन्दातीर्थे शक्तिमन्त्रविचारनिषेधो यथा।
"योऽसावनादिमध्यान्तशिवशक्तिमयः परः।
तस्यैव परमानन्दा सर्व्वकिल्बिषनाशिनी॥
तत्प्रभावेण प्राप्नोति तपोयज्ञादिकं फलम्।
मन्त्राणां देवशक्तीनां न विचारो वरानने॥"
इति देवीपुराणे नन्दाकुण्डप्रवेशः प्रथमाध्यायः॥*॥

प्रकृतिः । यथा,—
"प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा ।
एतानि तस्या नामानि पुरुषं या समाश्रिता ॥"
तस्या गुणानाह ।
"सत्त्वं रजस्तमश्चेति विज्ञेयाः प्रकृतेर्गुणाः ।"
इति भावप्रकाशः ॥ * ॥

शक्तिविषयकपुष्पाणि यथा,—
"अथ पुष्पं प्रवक्ष्यामि कर्म्मयोगे महेश्वरि ।
शृणुष्व परया भक्त्या यथोक्तं ब्रह्मणा पुरा ॥
कमले करवीरे द्वे कुसुम्भे तुलसीद्वयम् ।
जात्यशोके केतकी द्वे कुमारीचम्पकोत्पलम् ॥
कुन्दमन्दारपुन्नागपाटलानागचम्पकम् ।
आरग्वधं कर्णिकारं पावन्ती नवमल्लिका ॥
सौगन्धिकं सकोरण्टं पलाशाशोकसर्ज्जकाः ।
सिन्धुवारो ह्यपामार्गवापुलीकञ्च कामजम् ॥
व्याघ्रचेलं दमनकं मरुवकं ततः परम् ।
लवङ्गं जलकर्पूरं तगरञ्च जवा तथा ॥
शिवपुष्पं द्रोणपुष्पं कामराजं सुकेतकम् ।
अन्यानि वनपुष्पाणि जलजस्थलजानि च ।
गिरिजानि देशजानि नानापुष्पाण्यतः परम् ॥"
इति प्रपञ्चसारः ॥

शक्तिग्रहः, पुं, (शक्तिं गृह्णातीति । शक्ति + ग्रह + "शक्तिलाङ्गलाङ्कुशेति ।" ३।२।८। इत्यस्य वार्त्तिकोक्त्या अच् ।) शिवः । कार्त्तिकेयः । शक्तिं गृह्णाति यः इत्यर्थे शक्तिशब्दपूर्व्वकग्रहधातोरलप्रत्ययेन निष्पन्न इति केचित् ॥ (शक्तेर्ग्रहो ग्रहणम् ।) शब्दशक्तिज्ञानम् । यथा ।
"अस्मात् शब्दात् अयमर्थो बोद्धव्य इतीश्वरेच्छा शक्तिरिति तार्किकाः । तज्ज्ञानन्तु व्याकरणादिभ्यः । अतएव ।
'शक्तिग्रहं व्याकरणोपमान-
कोषाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्व्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः ॥
इति प्राहुः ।" इति दुर्गादासः ॥

शक्तिग्राहकः, पुं, व्याकरणोपमानादिः । शक्तिग्रहीता च । शक्तिं ग्राहयति गृह्णाति च इत्यर्थे आन्ताज्ञान्तग्रहधातोर्णक (ख्वुल्) प्रत्ययेन निष्पन्नमेतत् ॥

शक्तिधरः, पुं, (धरतीति । धृ + अच् । शक्तेर्धरः ।) कार्त्तिकेयः । इत्यमरः ॥ (यथा, हरिवंशे । ७३।८
"बलेन वपुषा चैव बाल्येन चरितेन च ।
स्यात्ते शक्तिधरस्तुल्यो न तु कश्चन मानुषः ॥") शक्तिधारके, त्रि ॥ (यथा, बृहत्संहितायाम् । ५८ । ४१ ।
"स्कन्दः कुमाररूपः शक्तिधरो वह्निकेतुश्च ॥")

शक्तिपर्णः, पुं, सप्तपर्णवृक्षः । इति जटाधरः ॥

शक्तिपाणिः, पुं, (शक्तिरस्त्रविशेषः पाणौ यस्य ।) कार्त्तिकेयः । इति हलायुधः ॥

शक्तिभृत्, पुं, (शक्तिं बिभर्त्तीति । भृ + क्विप् । तुक् च ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥ शक्त्यस्त्रधारके, त्रि ॥

शक्तिहेतिकः, त्रि, (शक्तिर्हेतिः प्रहरणास्त्रं यस्य ।) शक्त्यस्त्रधारियोद्धा । तत्पर्य्यायः । शाक्तीकः २ । इत्यमरः । लक्ष्यायुधधरः ३ । इति शब्दरत्नावली ॥

शक्तुः, पुं क्लो, (शक्क + बाहुलकात् तुन् ।) भर्जितयवादिचूर्णम् । छातु इति भाषा । यथा,—
"धाना भृष्टयवे भूम्नि स्त्रियां पुं भूम्नि शक्तवः ।
केचित्तुशक्तुरस्त्रीति वस्तुरा भूमनि स्त्रियाम् ।"
इति जटाधरः ।

अस्य गुणाः ।
"यवानां शक्तवो रूक्षा लेखना वह्निवर्द्धनाः ।
वातलाः कफरोगघ्ना वातवर्च्चोऽनुलोमनाः ॥
धानासंज्ञास्तु तेऽतीव दुर्जरा लेखनाः स्मृताः ।
गुर्व्वी पिण्डोक्तताल्पर्थं लघ्वी सैव विपर्य्ययात् ।
शक्तूनामाशु जीर्य्यन्ति मृदुत्वादवलेहिका ॥"
इति राजवल्लभः ।

अथ शक्तवः ।
"धान्यानि भ्राष्टभृष्टानि यन्त्रपिष्टानि शक्तवः ।"
तत्र यवशक्तवः ।
"यवजाः शक्तवः शीता दीपना लघवः सराः ।
कफपित्तहरा रूक्षा लेखनाश्च प्रकीर्त्तिताः ॥
ते पीता बलदा हृद्या हृद्याश्च भेदनास्तथा ।
तर्पणा मधुरा रुच्याः परिणामे बलावहाः ॥
कफपित्तश्रमच्छर्दितृड्व्रणनेत्रामयापहाः ।
प्रशस्ता घर्म्मदा हृद्या व्यायामार्त्तश्च रोरिणाम् ॥
अथ चणकयवशक्तवः ।
"निस्तुषैश्चणकैर्भृष्टैस्तूर्य्याशैश्च यवैः कृताः ।
शक्तवः शर्करासर्पिःशक्ता ग्रीष्मेऽतिपूजिताः ॥"
अथ शालिशक्तवः ।
"शक्तवः शालिसंभूता वह्निदा लघवो हिमाः ।
मधुरा ग्राहिणो रुच्याः पथ्याश्च बलशुक्रदाः ॥
न भुञ्जा न रदैश्छित्त्वा न निशायां न वा वह्नन् ।
न जलान्तरितान् न हिः शक्तूनद्यान्न केवलान् ॥
पृथक्पानं पुनर्हानं सामिषं पयसा निशि ।
दन्तच्छेदनमुष्टञ्च सप्त शक्तुषु वर्ज्जयेत् ॥"
इति भावप्रकाशः ।

जन्मतिथौ तद्भक्षणफलम् । ज्योतिषे ।
"शक्तून् खादति यस्तु तस्य रिपवो नाशं
प्रयान्ति ध्रुवं
भुङ्क्ते यस्तु निरामिषं स हि भवेत् जन्मान्तरे
पण्डितः ।"
इति तिथ्यादितत्त्वम् ।

मेषसंक्रान्त्यां तद्दानविधिर्यथा । स्मृतिः ।
"मेषादौ शक्तवो देया वारिपूर्णा च गर्गरी ।"
महार्णवे ।
"यो ददाति हि मेषादौ शक्तूनम्बुघटान्वितान् ।
पितॄनुद्दिश्य विप्रेभ्यः सर्व्वपापैः प्रमुच्यते ।
विप्रेभ्यः पादुके छत्रं पितृभ्यो विषुवे शुभम् ॥"
इति तिथ्यादितत्त्वम् ।

चातुर्मास्यव्रते प्रातःस्नानस्य घृतशक्तवो दक्षिणा यथा । नारदीयम् ।
"नित्यस्नाने हविर्दद्यान्नित्यं स्नेहे घृतशक्तवः ॥"
नित्यस्नाने प्रातःस्नाने । इति मलमासतत्त्वम् ॥

शक्तुकः पुं, विषभेदः । तस्य लक्षणस्वरूपे यथा,
"यदग्रन्थिः शक्तुकेनैव पूर्णमध्यः स शक्तुकः ॥"
इति भावप्रकाशः ।

शक्तुफला स्त्री. शमीवृक्षः । इत्यमरः ॥

शक्तुफली स्त्री, शमीवृक्षः । इति शब्दरत्नावली ॥

शक्त्यर्दः, पुं, (शक्नोरर्द्दः ।) यमद्वारा कुक्षिललाटग्रीवासूत्पन्नो घर्म्मः दीर्घनिश्वासश्च । यथा,—
"कुक्षौ ललाटे ग्रीवायां यदा घर्म्मः प्रवर्त्तते ।
शक्त्यर्दं तं विजानीयादायतोच्छ्वासमेव च ॥"
इति राजवल्लभः ।

शक्तिः पुं, वशिष्ठमुनेर्ज्येष्ठपुत्रः । इति पुराणम् ॥ (यथा, महाभारते । १ । १७७ । ६ ।
"अपश्यदजितः संख्ये मुनिं प्रतिमुखागतम् ।
शक्तिं नाम महाभागं वशिष्ठकुलवर्द्धनम् ।
ज्येष्ठं पुत्रं पुत्रशतात् वशिष्ठस्य महात्मनः ॥"
अयं हि इक्ष्वाकुवंशीयं कल्माषपादनृपतिं अशपत् । स च नृपतौ राक्षसो भूत्वा एनमभक्षयत् । एतद्वृत्तान्तस्तु महाभारते १।१७७ अध्याये द्रष्टव्यः ॥)

शक्तृः, त्रि, प्रियंवदः । इत्यमरटीकायां भरतः ॥

शक्तुः, त्रि, प्रियंवदः । इत्यमरः ॥

शक्मा, [न्]पुं, (शक्त + "अंशिशक्यिभ्यां कन्दमि ।" उणा० ४ । १४६ । इति मनिन् ।) शक्तिः । शकधातोरौणादिकमनिन्प्रत्ययेननिष्पन्नम् इति सिद्धान्तकौमुदी ॥ (इन्द्रः । इत्युज्ज्वलः । ४ । १४६ ॥ क्लो, शक्यतेऽनेनाभिमतं प्राप्तुं शक्नोतीष्टं साधयितुं वा शक्यते कर्त्तुमिति वा । शक्त + मनिन् । कर्म्म । इति निघण्टुः । २ । १ ॥ यथा, ऋग्वेदे । ८ । ३४ । ३ ।
"दुहन्ति शक्मना पयः ॥"
"शक्मना कर्म्मणा ।" इति तद्भाष्ये सायणः ॥)

शक्यः, त्रि, (शक्त + "शकिसहोश्च ।" ३।१।९९। इति यत्) समर्थनीयः । (यथा, रघुः । २।४९ ।
"शक्योऽस्य मन्युर्भवता विनेतुं
गाः कोटिशः स्पर्शयता घटोघ्नीः ॥")

शक्याश्रयः । (यदा भावे यत् स्यात् तदा क्लीवलिङ्गः स्यात् । यथा, गौतायाम् । १८।११ ।
"नहि शक्यं देहभृता त्यक्तुं कर्म्माण्यशेषतः ॥
तथाच रामायणे । २ । १३ । ५ ।
"तानि सर्वाणि संयन्तुं शक्यं राम जितेन्द्रियैः ॥"

पुं, वाच्योऽर्थः । यथा,—
"शक्योऽर्थोऽभिधया श्रेयः लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया ज्ञेयस्त्रिधः शब्दस्य वृत्तयः ॥
इत्यलङ्कारशास्त्रम् ॥

अन्यच्च ।
"शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ।"
इति भाषापरिच्छेदः ॥

अपि च । ईश्वरसङ्केतः शक्तिस्तया अर्थबोधकं पदं वाचकम् । यथा गोत्वादिविशिष्टबोधकं गवादिपदं तद्बोध्योऽर्थो गवादिर्वाच्यः स एव मुख्यार्थ इत्युच्यते ।" इति शक्तिवादः ॥

शक्यतावच्छेदकं,त्वि,(शक्यताया अवच्छेदकम्) शक्यांशे भासमानधर्म्मः। यथा। "एवञ्च तादृशधर्म्मस्य शक्यतावच्छेदकत्वं दुर्व्वारमेव।" इति शक्तिवादः॥

शक्रः, पुं,(शक्नोति दैत्यान् नाशयितुम्। शक+ "स्फायितञ्चीति।" उणा० २।१३। इति रक्।) इन्द्रः। इत्यमरः॥ (यथा, रघुः। ३। ३८।

"धनुर्भृतामग्रत एव रक्षिणां
जहार शक्रः किल गूढविग्रहः॥")

कुटजवृक्षः। अर्জ্জुनवृक्षः। इति मेदिनी॥ ज्येष्ठानक्षत्रम्। यथा,—

"शक्रो निर्ऋतिस्त्वष्टायं विष्णुर्विवस्वान् सविता तथा।
मित्रोऽथ वरुणः। अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा नाम॥"
इति ज्योतिस्तत्त्वम्॥

चतुर्दशेन्द्रा यथा,—

"विष्वक्सेनश्च विपश्चित्यः सुवित्तिः शिविरेव च।
विभुर्मनोजवश्चैव तथौजस्वी बलिस्तथा॥
अद्भुतश्च तथा शान्तिस्तथा दैवचरो वृषः।
ऋतधामा दिवः स्वामी शुचिः शक्रश्चतुर्दश॥"*
ब्राह्मदिनमासाब्देषु इन्द्राणां नाशसंख्या यथा।
"ब्राह्मे दिने वै नश्यन्ति चतुर्दश पुरन्दराः।
शतानि मासि चत्वारि विंशत्या सहितानि च।
अब्दे पञ्चसहस्राणि चत्वारिंशच्छतानि च॥"
इत्याद्ये वह्निपुराणे गणभेदनामाध्यायः॥*॥

इन्द्रत्वप्राप्तिकारणं यथा,—

इन्द्र उवाच।

"रमाकान्तभवत्प्रीत्यै कृतं क्रतुशतं पुरा।
तेन पुण्येन सम्प्राप्तं मया पौरन्दरं पदम्॥
इदानीं नूतनः कोऽपि जातो दिवि पुरन्दरः।
न तेन धर्म्मो विहितो न तेन क्रतवः कृताः।
मम सिंहासनं दिव्यं कथमाक्रान्तमच्युत॥
इत्येवं वदतस्तस्य श्रुत्वा वाक्यं रमापतिः।
उन्मीलितस्मिताच्चोऽसावुवाच मधुरं वचः॥

श्रीभगवानुवाच।

देवाद्यो मनुष्यान्ता मम सेवापरायणाः।
मद्यजनरता लोका मद्भक्तिस्तुतिपाठकाः॥
मन्मूर्त्तिषु कृतध्याना मत्कथाश्रवणादृताः।
मत्पादोदकनैवेद्यभोजिनोऽन्यद्वेषिणो ये॥
मन्नामकीर्त्तनपरा मम स्मृतिपरायणाः।
मन्मन्त्रजापका नित्यमनन्याश्रयसम्पदः॥
किं विधित्वं किमिन्द्रत्वं देवत्वमपरं किमु।
तेषामलभ्यं यत्किञ्चित् दुर्लभं नास्ति संसृतौ॥
किं दानैरल्पफलदैः किं तपोभिः किमध्वरैः।
सेव्यमानैः क्षितितले सदा मम प्रीतिमान् सदा॥

इन्द्र उवाच।

भगवन् कर्म्मणा केन स त्वत्प्रीतिपरो भवेत्।
तदद्य मह्यं बाहो प्रपन्नभयभञ्जन॥

श्रीभगवानुवाच।

अनेकधा मद्भजनं मम प्रीतिकरं परम्।
यद्भक्त्या तत् पदं लेभे तत् शृणुष्व पुरन्दर॥
जपत्यष्टादशाध्यायगीतानां श्लोकपञ्चकम्।
तया भक्त्या तु संप्राप्तं तव साम्राज्यमुत्तमम्॥"

इति पाद्मोत्तरखण्डे ९६ अध्यायः॥

(समर्थं, त्रि। यथा, ऋग्वेदे। ४। १६। ६।

"विश्वानि शक्रो नर्य्याणि विद्वान्
अपो रिरेच सखिभिर्निकामैः॥")

शक्रक्रीडाचलः, पुं, (शक्रस्य क्रीड़ाचलः क्रीड़ापर्व्वतः।) सुमेरुपर्व्वतः। इति हलायुधः॥

शक्रगोपः, पुं, इन्द्रगोपकीटः। इति जटाधरः॥ (यथा, हरिवंशे। ६६। ५।

"नववर्षावसिक्तानि शक्रगोपाकुलानि च।
नष्टदावाग्निमार्गाणि वनानि प्रचकाशिरे॥")

शक्रजः, पुं, (शक्राज्जायते इति। जन+ड।) काकः। इति त्रिकाण्डशेषः॥ इन्द्रजाते, त्रि॥

शक्रजातः, पुं, (शक्राज्जातः।) काकः। इति शब्दरत्नावली॥ इन्द्रजाते, त्रि॥

शक्रजित्, पुं, (शक्रं जितवानिति। जि+क्विप्।) रावणपुत्रः। इति त्रिकाण्डशेषः॥ (यथा, रघुः। १४। ८३।

"अपि प्रभुः सानुशयोऽधुना स्यात्
किमुत्सुकः शक्रजितोऽपि हन्ता॥")

इन्द्रजेतरि, त्रि॥

शक्रद्रुमः,(शक्रस्य पुंद्रुमः।) देवदारुवृक्षः। इति भावप्रकाशः॥

शक्रधनुः, [स्] क्ली, (शक्रस्य धनुः।) इन्द्रधनुः। इत्यमरः॥ गण्डी इति रामधनुक इति च भाषा।

"इन्द्रायुधं शक्रधनुः कौशिकायुधमित्यपि।
ऐरावतं रोहितं स्यादवक्रं यदि तद्धनुः॥
इति शब्दरत्नावली।

(यथा, महाभारते। ५। २६। ११।

"यथाकाशे शक्रधनुः प्रकाशते
न चैकवर्णं न च वेद्मि किञ्चन तत्॥")

शक्रध्वजः, पुं (शक्रस्य ध्वजः।) इन्द्रध्वजः। (यथा, आर्य्यासप्तशत्याम्। २६९।

"ते श्रेष्ठिनः क्व सम्प्रति शक्रध्वज! येः कृतस्तवोच्छ्रायः।
ईषो वा मेढिं वाधुनातनास्त्वां विधित्सन्ति॥")

तद्विवरणं यथा,—

नृपवाहन उवाच।

"भगवन् श्रोतुमिच्छामि तस्य उत्थापनं यथा।
क्रियते दिन ऋक्षे च द्रव्यमन्त्रविधिं वद॥

अगस्त्य उवाच।

ब्रह्मणा कथितं शक्र बृहस्पतिसमीपतः।
यथा तथा प्रवक्ष्यामि विधिं केतोः समुच्छ्रये॥

बृहस्पतिरुवाच।

शुभाह्ने ऋक्षे करणे मुहूर्त्ते शुभमङ्गले।
दैवज्ञः सूत्रधारश्च वनं गच्छेत् सहायवान्॥
देवीप्रतिष्ठाविधिना यात्रायां या प्रचोदिता।
गत्वा वृक्षं शुभं पुण्यं धवार्জ্জुनप्रियङ्गवम्॥
उडुम्बराजकर्णञ्च पञ्चैते शोभना द्रुः।
ध्वजार्थे वर्জयेद्वृक्षं देव उद्यानजान् द्रुमान्॥
कन्या मध्ये तु या यष्टीः करमानेन कल्पयेत्।
एकादशकरा वक्षे नव पञ्च करापरा॥
अरालतां क्रिमिचितां तथा पक्षिनिकेतनाम्।
वल्मीकपिप्पलवनजां सुशुष्ककोटरान्तराम्॥
कुलाञ्च घटसिक्ताञ्च तथा स्त्रीनामगर्हिताम्।
विद्युद्वज्रहतांश्चैव दग्धाञ्च परिवर्জयेत्॥
अलाभे चन्दनं आम्रं शालशाकमयं तथा।
कर्त्तव्यं शक्रचिह्नार्थं न चान्यं वृक्षजं क्वचित्॥
शुभभूमिभवं वाह्यं शुभतोयं शुभावहम्।
ततः संपूजयेद्वृक्षं प्राङ्मुखोदङ्मुखोऽपि वा॥
नमो वृक्षपते वृक्ष त्वामर्चयति पार्थिवः।
ध्वजार्थं तत्त्वतो नाथ अन्यथा उपगम्यताम्॥
राची देवो बलिस्तत्र युगवृक्षे तथैव च।
वासवानां महावृक्षं कृत्वा चान्यत्र गम्यताम्॥
ध्वजार्थे देवराजस्य न चान्तिस्तव अत्र च।
पूजयित्वा ततो वृक्षं बलिं भूताय दापयेत्॥
प्रभाते छेदयेद्वृक्षं शुभस्वप्नादिदर्शनैः।
शुक्लाम्बरधरश्चैव समुद्रतरणं नदी॥
वृक्षान् नस्यान् शुभान् क्षीरानारोहेत् देवतालयम्।
देवो द्विजस्तथा साधुलिङ्गब्रह्म हरेरपि॥
प्रतिमा पूजिता स्वप्ने क्षिप्रं सिद्धिफलप्रदा।
मत्स्यमांसदधिलाभं रुधिरं घृतरोदनम्॥
अगस्त्यागमनं दृष्ट्वा आशु सिद्धिफलप्रदम्।
द्रुमांस्त्रिलं धनं धान्यं शत्रुनाशं यथा शुभम्॥
फलं पुष्पं सिता दूर्व्वा स्वप्ने लब्धा जयावहाः।
शृङ्गवस्तथा दन्तिलाभा राज्यप्रदायकाः॥
गोः सवत्सा नवसुता दृष्टा पुत्रफलप्रदा।
पङ्कस्योद्धरणं कूपे व्याधिमोक्षकरं चिरात्॥
एवं स्वप्नान् शुभान् दृष्ट्वा तथा छिन्देत पादपम्।
उदङ्मुखः प्राङ्मुखो वा मधूक्त्वाक्षपर्णना॥
पूर्व्वोत्तरे च पतनं श्रस्तोऽशब्दोऽव्रणः शुभः।
अलग्नपादपे चान्ये अन्यथा तु परित्यजेत्॥
अष्टाङ्गुलं त्यजेत् मूले अग्रे तन्तु जले क्षिपेत्।
तथा तमानयेद्वृक्षं शकटेन हयैरपि॥
युवानैर्बलसम्पन्नैर्नयं तत्पुरतः परम्।
नीयमाना यदा यष्टी समा वा चतुरस्रका॥
वृक्षा वा भङ्गमाधत्ते राज्ञः पुत्रं पुरोहितम्।
आरभङ्गे बलं भिन्द्याद्धान्यनाशं क्षयं तथा॥
अर्थस्य अग्रभङ्गेन शान्तिस्तत्र तु कारयेत्।
इन्द्रर्জ्जवृक्षमन्त्रेण जातदेवसमापि वा॥
तथा नीत्वा शुभे लग्ने पुरस्तादुपवेशयेत्।
द्वारशोभां पथस्थां गृहे वृक्षे च कारयेत्॥
यदा पटहनादाद्य वेश्याशङ्खद्विजातयः।
सङ्गुलैर्वेदशब्दैश्च तान् नेया यत्र उच्छ्रयेत्॥
तत्रस्थाश्चित्रकर्म्मावनिर्म्मितैस्तान्तु वेष्टयेत्।
वस्त्रैरक्तजरोमोत्थैः शुभैः शुक्लैर्यथाक्रमम्॥
नन्दोपनन्दसंज्ञाय कुमार्य्यः प्रथमांशगाः।
देवो जयविजयाख्याः षोड़शांशव्यवस्थिताः॥

अधिके शत्रुजयिनी तथार्घ्यजा देवतेर्दण्डाः ।
ध्वजपरिमाणार्थं सपरिधिः प्रथमं पिटम् ॥
षोढ़शांशविहीनानि कुर्य्याच्छेषाणि बुद्धिमान् ।
रसनां विचित्रवर्णां प्रथमां दद्यात् स्वयम्भूः ॥
सुरक्तां चतुरस्राञ्च विश्वकर्म्मा द्वितीयतः ।
अष्टांशान्तु स्वयं शक्रो नीलरक्तां प्रदापयेत् ॥
कृष्णं यमेन दत्तञ्च वरुणेन सहस्रिकम् ।
मञ्जिष्ठाजलदाकारं वासुदेवो मसूरकम् ॥
नीलवर्णञ्च तं दद्यात्स्कन्दो बहुविचित्रितम् ।
हस्तन्तु दहनो दद्यात् सुवर्णाभं तथाष्टमम् ॥
वैदूर्य्यसदृशमिन्द्रो ग्रैवेयं दापयेद् बुधः ।
चक्राङ्काकृतिन्तु सूर्य्यो विश्वेदेवाः पद्मनिभम् ॥
ऋषयो नियमं दद्युर्नीलं नीलोत्पलाभासम् ।
गुरुणा शुक्रेण ततो विशालं मूर्द्धतो न्यस्तम् ॥
रत्नैर्विचित्राणि बहुमाल्यैः स्वानि रूपाणि ।
यद्येकेनैव दत्तन्तु केतोस्तत्तस्य भूषणम् ॥
तदेव तं विजानीयादृत्विग्भिस्तमुच्छ्रयेत् ।
प्रथमं प्रविशमाना भूमिं यष्टिर्हन्ति राष्ट्रम् ॥
बालानां तालशब्देन देशविघातं समाचष्टे ।
नृपवधकरा विशीर्णा शुभावहा सर्व्वसान्द्राच्च ॥
शम्भुसूर्य्यमशक्रसोमधनदवारुणैः ।
ब्रह्मौशक्रयमिन्द्राग्न्योर्होतव्या दधि चाज्यतः ॥
शक्रस्कन्दगुरुरुद्रभास्करादि प्रपाठयेत् ।
हुत्वा तु विधिवद्वह्निज्वालालक्षेत बुद्धिमान् ॥
सुतेजाः सुमनो दीप्तः संहतो रुचिरप्रभः ।
रक्ताशोकसमाकारो रथभेरीसनः शुभः ॥
शङ्खदुन्दुभिमेघानां नादाः शस्तास्तु पावके ।
ततः सकदलीच्छेदण्डान् पताकानि समुच्छ्रये ॥
अन्याश्च विविधाः शोभाः शक्रकेतुसमुच्छ्रये ।
प्रौष्ठपदे तु अष्टम्यां शुक्लायां शोभने ऋक्षे ॥
आश्विने वाथ शुक्लायां श्रवणेनाथ उच्छ्रयेत् ।
पौरजानलग्नहन्दैः पटभेरीनिनादितम् ॥
वितानध्वजशोभाढ्यं पताकाभिः समुज्ज्वलम् ।
विश्वोशशक्रमन्त्रेण सिंहरज्ञाक्षतेन च ॥
दृढ़माल्यकरन्यस्तं शुभतोरणमाकुलम् ।
अविलम्बितमुत्थानमभग्नपिठकं समम् ॥
न द्रुतं वा समुत्थाप्य केतुं वासवजं विभो ।
उच्छ्रितं रचयेत्प्राज्ञः काकोलूककपोतयोः ॥
न समुत्थापनं दद्यादन्येषामपि पक्षिणाम् ।
यन्त्रोद्देशेन तं कुर्य्यात् सुखं केतोर्यथाविधि ॥
तथा सुसंस्थितं पूज्यं मुखयन्त्रसुयन्त्रितम् ।
रात्रौ जागरणं कुर्य्यादिन्द्रमन्त्रानुकीर्त्तनम् ॥
पुरोहितः सदैवज्ञः शुभशान्तिरतः सदा ।
छत्रपाता नृपं हन्यात् पताका महिषीवधम् ॥
पिटके युवराजस्य सचिवमनुकम्पते ।
राष्ट्रं तोरणपातेन ध्वजे अन्नक्षयो भवेत् ॥
पतिते शक्रदण्डे तु नृपमन्यं समादिशेत् ।
कृमिजालक उत्थाने शलभात्तस्कराद्भयम् ।
सुसमे संस्थिते शान्तिर्नृपस्य नगरस्य च ॥
याचोच्छ्रितन्तु तिष्ठन्ति तावत् पौराः सदा हृष्टाः ।
केतोर्निरता यजने भुञ्जीयाद्विप्रकन्याश्च ॥

पाते तु तथैव कुर्य्यादुत्थाने यादृशी पूजा ।
रात्रौ शुभक्षत् पातनं नो दृष्टं काककपोतैः ॥
याति नृपं सहराष्ट्रं यश्चैव कारयेत् केतुम् ।
नगरे वा पुरे खेटे यद्येवं कुर्वते पौराः ॥
पुरे नगरस्य द्वारे वृषसिंहखगोत्थितम् ।
केतु समस्तघोराणां नाशनं जयदं महत् ॥
एवं पूर्वं हरिः केतुं प्राप्तवान् वृषवाहनात् ।
तथा ब्रह्मसुतेनैव ब्रह्मणः शक्रमागतः ॥
तेन सोमस्य तद्दत्तं ततो दत्ते समागतम् ।
तदाप्रभृति कुर्वन्ति नृपा अद्यापि उच्छ्रयम् ॥
एवं यः कारयेद्राजा केतुं विजयकारकम् ।
तस्य पृथ्वी बलोपेता सद्वीपा वशगा भवेत् ॥"
इत्याद्ये देवीपुराणे इन्द्रध्वजलक्षणम् २१ अध्यायः ॥

शक्रनन्दनः, पुं, (शक्रस्य नन्दनः ।) अर्জ্জुनः इति जटाधरः । (इन्द्रपुत्रमात्रमपि । शक्रं नन्दयतीति । नन्दि + ल्युः ।) इन्द्रानन्दकारके, त्रि ॥

शक्रपर्य्यायः, पुं, (शक्रस्य पर्य्यायो नाम यस्य ।) कुटजवृक्षः । इति रत्नमाला । इन्द्रवाचकश्च ॥

शक्रपादपः, पुं, (शक्रस्य पादपः ।) देवदारुवृक्षः । इत्यमरः ॥ कुटजवृक्षः । इति राजनिर्घण्टः ॥

शक्रपुष्पिका, स्त्री, (शक्रपुष्पी + स्वार्थे कन् । अत इत्वम् ।) अग्निशिखावृक्षः । इति रत्नमाला ॥

शक्रपुष्पी, स्त्री, अग्निशिखावृक्षः । इत्यमरः ॥

शक्रबीजं, क्ली, इन्द्रजवः । इति राजनिर्घण्टः ॥

शक्रभवनं, क्ली, (शक्रस्य भवनम् ।) स्वर्गः । इति त्रिकाण्डशेषः ॥

शक्रभित्, [द्] पुं, (शक्रं भिनत्तीति । भिद् + क्विप् ।) इन्द्रजित् । स च रावणपुत्रः । इति शब्दरत्नावली ॥

शक्रभूभवा, स्त्री, इन्द्रवारुणी । इति शब्दचन्द्रिका ॥

शक्रमाता, स्त्री, (शक्रस्य मातेव ।) भार्गी । इति राजनिर्घण्टः । इन्द्रजननी च ॥

शक्रमाल्यका, स्त्री, (शक्रस्य माल्यकेव ।) शक्रध्वजाङ्गयष्टिविशेषः । यथा, कालिकापुराणम् ।
"कुमार्य्यः पञ्च कर्त्तव्याः शक्रस्य नृपसत्तम ।
शालमय्यस्तु ताः सर्वास्त्वपराः शक्रमाल्यकाः ॥
केतोः पादप्रमाणेन कार्य्याः शक्रकुमारिकाः ।
माल्यकार्द्धप्रमाणा तु यन्त्रं हस्तहयं तथा ॥
एवं कृत्वा कुमारीश्च माल्यकां केतुमेव च ।
एकादश्यां सिते पक्षे यष्टीनामधिवासनम् ॥"
इति तिथ्यादितत्त्वम् ॥

शक्रमूर्द्धा, [न्] स्त्री, (शक्रस्येव मूर्द्धा यस्य ।) वल्मीकः । इति त्रिकाण्डशेषः ॥

शक्रवल्ली, स्त्री, (शक्रप्रिया वल्ली ।) इन्द्रवारुणी । इति राजनिर्घण्टः ॥

शक्रवाहनः, पुं, (शक्रं वाहयतीति । वह + णिच् + ल्युः ।) मेघः । इति शब्दचन्द्रिका ॥

शक्रशरासनं, क्ली, (शक्रस्य शरासनम् ।) इन्द्रधनुः । इति हलायुधः ॥

शक्रशाखी, [न्] पुं, (शक्रनामकः शाखी ।) कुटजवृक्षः । इति भावप्रकाशः ॥

शक्रशाला, स्त्री, प्रतिश्रयः । इति भूरिप्रयोगः ॥ पुस्तकान्तरे सत्रशाला इति पाठश्च ॥ (शक्रस्य शाला ।) इन्द्रगृहञ्च ॥

शक्रशिरः, [स्] क्लीं, (शक्रस्य शिर इव ।) वल्मीकः । इति राजनिर्घण्टः ॥ इन्द्रमस्तकञ्च ॥

शक्रसारथिः, पुं, (शक्रस्य सारथिः ।) मातलिः । इति हलायुधः ॥

शक्रसुतः, पुं, (शक्रस्य सुतः ।) वालिवानरः । इति हलायुधः ॥ इन्द्रपुत्रमात्रञ्च ॥

शक्रसुधा, स्त्री, (शक्रस्य सुधेव ।) पालङ्की । इति शब्दचन्द्रिका ॥ कुन्दुरुखोटी इति भाषा ॥

शक्रसृष्टा, स्त्री, (शक्रेण सृष्टा ।) हरीतकी । इति त्रिकाण्डशेषः ॥

शक्राख्यः, पुं, (शक्रस्य आख्या यस्य ।) पेचकः । इति त्रिकाण्डशेषः । इन्द्रनामके, त्रि, ॥

शक्राणी, स्त्री, (शक्रस्य पत्नी । ङीप् । आनुक् ।) शची । इति शब्दमाला ॥ (यथा, महाभारते । ५ । ११ । २२ ।
"बृहस्पतिरथोवाच शक्राणीं भयमोहिताम् ॥")

शक्राशनं, क्लीं, (शक्रेण अश्यते इति । अश + ल्युट् ।) भङ्गा । भाङ् इति भाषा । अस्य गुणाः ।
"शक्राशनन्तु तीक्ष्णोष्णं मोहकृत् कुष्ठनाशनम् ।
बलमेधाग्निकृत् श्लेष्मदोषहारि रसायनम् ॥"
इति राजवल्लभः ॥
अन्यत् विजयाशब्दे द्रष्टव्यम् । इन्द्रभोजनञ्च ॥

शक्राशनः, पुं, (शक्र इति नाम अश्नुते व्याप्नोतीति । अश + ल्युः ।) कुटजवृक्षः । इति शब्दचन्द्रिका ॥

शक्राङ्गः, पुं, (शक्रस्य अङ्गा यस्य ।) इन्द्रयवः । इति राजनिर्घण्टः । इन्द्रनामके, त्रि ॥

शक्तिः, पुं, (शक + बाहुलकात् क्तिन् ।) मेघः । वज्रम् । हस्ती । पर्वतः । इति संक्षिप्तसारोणादिवृत्तिः ॥

शक्रोत्थानं, क्लीं, (शक्रस्य शक्रध्वजस्य उत्थानम् ।) शक्रध्वजोत्सवः । अस्य विधिर्लिख्यते ।

श्रीभीष्म उवाच ।

"अथातः शृणु राजेन्द्र शक्रोत्थानध्वजोत्सवम् ।
यत्कृत्वा नृपतिर्याति नो कदाचित् पराभवम् ॥
रवौ हरिस्थे द्वादश्यां श्रवणे सितपक्षके ।
आराधयेन्नृपः सम्यक् सर्वविघ्नोपशान्तये ॥
राजोपरिचरो नाम वसुनामापरस्तु यः ।
नृपस्तेनायमतुलो यज्ञः प्रावर्त्तितः पुरा ॥
प्राविट्काले च नभसि द्वादश्यामसितेतरे ।
पुरोहितो बहुविधैर्वाद्यैस्तूर्य्यैः समन्वितः ॥
प्रथमं शक्रकेतवर्थे वृक्षमामन्त्र्य वर्द्धयेत् ।
सांवत्सरो वाहकिश्च कृतकौतुकमङ्गलः ॥
उद्याने देवतागारे श्मशाने मार्गमध्यतः ।
ये जातास्तरवस्तांस्तु वर्जयेद्दवासवध्वजे ॥
बहुवल्लीयुतं शुष्कं बहुकण्टकसंयुतम् ।

कुजं वृक्षादनीयुक्तं लताच्छन्नं तरुं त्यजेत् ॥
पक्षिवाससमाकीर्णं कोटरैर्बहुभिर्युतम् ।
पवनानलविध्वस्तं तरुं यत्नेन वर्जयेत् ॥
नारीमंज्ञाश्च ये वृक्षा अतिक्षुद्रा अतिक्षुराः ।
तान् सदा वर्जयेद्धीरः सर्व्वदा शक्रपूजने ॥
अर्जुनोऽप्यश्वकर्णश्च प्रियको धव एव च ।
श्रोडुम्बरश्च पञ्चैते केत्वर्थे सत्तमाः स्मृताः ॥
अन्ये च देवदार्वाद्याः शालाद्यास्तरवस्तथा ।
प्रशस्तास्तु परिग्राह्या नाप्रशस्ताः कदाचन ॥
तञ्च वृक्षं ततो रात्रौ स्पृष्ट्वा मन्त्रमिमं पठत् ॥
यानि वृक्षे तु भूतानि तेभ्यः स्वस्ति नमोऽस्तु वः।
उपहारं गृहीत्वेमं क्रियतां वासवध्वजः ॥
पार्थिवस्त्वां वरयते स्वस्ति तेऽस्तु नगोत्तम ।
ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम् ॥
ततोऽपरेऽह्नि तं छित्त्वा मूलमष्टाङ्गुलं पुनः ।
जले क्षिप्तेत्तदग्रस्य छित्त्वैवं चतुरङ्गुलम् ॥
ततो नीत्वा पुरद्वारं केतुं निर्म्माय तत्र वै ।
शुक्लाष्टम्यां भाद्रपदे केतुं वेदीं प्रवेशयेत् ॥
द्वात्रिंशद्धस्तमानन्तु अधमः केतुरुच्यते ।
द्वात्रिंशत्तु ततो ज्यायान् द्वाचत्वारिंशदेव च ॥
ततोऽधिकः समाख्यातो द्वापञ्चाशत्तथोत्तमः ।
कुमार्य्यः पञ्च कर्त्तव्याः शक्रस्य नृपसत्तम ! ॥
शालमय्यस्तु ताः सर्व्वास्त्वपराः शक्रमालकाः ।
केतोः प्रादप्रमाणेन कार्य्याः शक्रकुमारिकाः ॥
मालकार्द्धप्रमाणात्तु यन्त्रं हस्तद्वयं तथा ।
एवं कृत्वा कुमारीश्च मालकां केतुमेव च ॥
एकादश्यां सिते पक्षे यष्टिं तामधिवासयेत् ।
अधिवास्य ततो यष्टिं गन्धद्वारादिमन्त्रकैः ॥
द्वादश्यां मण्डलं कृत्वा वासवं विस्तृतात्मकम् ।
अच्युतं पूजयित्वा तु शक्रं पश्चात् प्रपूजयेत् ॥
शक्रस्य प्रतिमां कुर्य्यात् कानकीं दारवीं तथा ।
अन्यतैजसभूतां वा सर्व्वाभावे तु मृण्मयीम् ॥
तां मण्डलस्य मध्ये तु पूजयित्वा विशेषतः ।
ततः शुभे मुहूर्त्ते तु केतुमुत्थापयेन्नृपः ॥
वज्रहस्त सुरारिघ्न बहुनेत्र पुरन्दर ।
क्षेमार्थं सर्व्वलोकानां पूजेयं प्रतिगृह्यताम् ॥
एह्येहि सर्व्वामरसिद्धसंघै-
रभिष्टुतो वज्रधरामरेश ! ।
समुत्थितस्त्वं श्रवणाद्यपादे
गृहाण पूजां भगवन् नमस्ते ॥
एवमुत्तरतन्त्रोक्तैर्दहनप्लवनादिभिः ।
इति मन्त्रेण तन्त्रेण नानानैवेद्यवेदनैः ॥
श्रापूपैः पायसैः पानैर्गुड़ैर्धानाभिरेव च ।
भक्ष्यैर्भोज्यैश्च विविधैः पूजयेत् श्रीविहङ्गये ॥
घटेषु दशदिक्पालान् ग्रहांश्च परिपूजयेत् ।
माध्यादीन् सकलान्देवान् मातृः सर्व्वास्त्वनुक्रमात् ॥
ततः शुभे मुहूर्त्ते तु ज्ञानिवर्द्धकिसंयुतः ।
केतोरुत्थानभूमिन्तु यत्नवेद्याय पश्चिमे ।
विप्रैः पुरोहितैः सार्द्धं यन्त्रश्लिष्टं समालकम् ।
रज्जुभिः पञ्चभिर्बद्धं यन्त्रश्लिष्टं समालकम् ।
कुमारीभिश्च संयुक्तं दिक्पालानाञ्च पेटकैः ॥
पेटकैः स्थाने पट्टकैरिति च पाठः ।
"हृद्वङ्गिरतिकान्तैश्च नानाद्रव्यसुपूरितैः ।
यथावर्णैर्यथादेशयोजितैर्वस्त्रवेष्टितैः ॥
युक्तं तं किङ्किणीजालैर्बहुघण्टोद्यचामरैः ।
भूषितं बहुरत्नैश्च माल्यैर्बहुविधैस्तथा ॥
बहुपुष्पैः सुगन्धैश्च भूषितं रत्नमालया ।
चित्रमाल्याम्बरधरैश्चतुर्भिरपि तोरणैः ॥
उत्थापयेन्महाकेतुं राजामात्यैः शनैः शनैः ।
तमुत्थाप्य महाकेतुं पूजितं मण्डलान्तरे ॥
प्रतिमां तां नयेन्मूलं केतोः शक्रं विचिन्तयन् ।
यजेत्तं पूर्ववत्तत्र ऋचो मातलिमेव च ॥
जयन्तं तनयं तस्य वज्रमैरावतं तथा ।
ग्रहांश्चाप्यथ दिक्पालान् सर्वांश्च गणदेवताः ।
अपूपाद्यैः पूजयेत्तु बलिभिः पायसादिभिः ।
पूजितानाञ्च देवानां शक्रहोमं समाचरेत् ॥
होमान्ते तु बलिं दद्यात् वासवाय महात्मने॥
तिलं घृतं चाक्षतञ्च पुष्पं दूर्वां तथैव च ।
एतैस्तु जुहुयाद्देवान् स्वैः स्वैर्मन्त्रैर्नरोत्तमः ॥
ततो होमावसाने तु भोजयेदपि ब्राह्मणान् ।
एवं संपूजयेन्नित्यं समरावं दिने दिने ॥
ब्राह्मणैः सहितो राजा वेदवेदाङ्गपारगैः ।
सर्व्वत्र शक्रपूजासु यज्ञेषु परिकीर्त्तितः ॥
चातारमिति मन्त्रोऽयं वासवस्य प्रियः सदा ।
एवं कृत्वा दिवाभागे शक्रोत्थापनमादितः ॥
श्रवणर्क्षयुतायान्तु द्वादश्यां प्रार्थिवः स्वयम् ।
अन्यपादे भरण्यास्तु निशि शक्रं विसर्जयेत् ॥
सुप्तेषु सर्वलोकेषु यथा राजा न पश्यति ।
यस्मात्सान्मृत्युमाप्नोति राजा दृष्ट्वा विसर्जनम् ॥
शक्रस्य नृपशार्दूल तस्मान्नेक्षेत तं नृपः ।
विसर्জ্জनस्य मन्त्रोऽयं पुराविद्भिरुदीरितः ॥
सार्द्धं सुरासुरगणैः पुरन्दर शतक्रतो ।
उपहारं गृहीत्वेमं महेन्द्रध्वज गम्यताम् ॥
सूतके तु समुत्पन्ने वारे भौमस्य वा शनेः ।
भूमिकम्पादिकोत्पाते वासवं न विसर्जयेत् ॥
उत्पाते समरात्तन्तु तथोपप्लवदर्शने ।
व्यतीत्य शनिभौमौ च ह्यन्यर्क्षेऽपि विसर्जयेत् ॥
सूतके त्वथ संप्राप्ते व्यतीते सूतके पुनः ।
तस्मिंस्तस्मिन् दिने चैव सूतकान्ते विसर्जयेत्॥
तथा रक्षेन्नृपः केतुं पतन्ति शकुना यथा ।
न केतौ नृपशार्दूल यावन्नापि विसर्जनम् ॥
शनैः शनैः पातयेत्तु यथोत्थापनमादितः ।
क्षतं तथान्यथा भग्ने केतौ मृत्युमवाप्नुयात् ॥
विसृष्टं शक्रकेतुं तं सालङ्कारं तथा निशि ।
क्षिपेदनेन मन्त्रेण त्वगाधे सलिले नृपः ॥
तिष्ठ केतो महाभाग यावत् संवत्सरं जले ।
भवाय सर्वलोकानामन्तरायविनाशक ! ॥
उत्थापयेत्तूर्य्यरवैः सर्वलोकस्य वै पुरः ।
रही विसर्जयेत् केतुं विशेषोऽयं प्रपूजने ॥
एवं यः कुरुते पूजां वासवस्य महात्मनः ।
स चिरं पृथिवीं भुक्त्वा वासवं लोकमाप्नुयात् ॥
न तस्य राज्ये दुर्भिक्षं नेतयो नाप्यधर्म्मकृत् ।
स्थास्यन्ति मृत्युर्नाकाले जनानां तत्र जायते ॥
तत्तुल्यः कोऽपि नान्योऽस्ति प्रियः शक्रस्य पार्थिव ! ।
तस्य पूजा सर्वपूजा केशवाद्याश्च तत्रगाः ॥
सकलकलुषहारि व्याधिदुर्भिक्षनाशि
सकलभवनिवेशं सर्वसौभाग्यकारि ।
सुरपतिगृहगामीहार्च्चनं शक्रकेतोः
प्रतिशरदमनेकैः पूजयेत् श्रीविहङ्गैः ॥"
इति श्रीकालिकापुराणे ८८ अध्यायः ॥

शक्रोत्सवः, पुं, (शक्रस्योत्सवः ।) इन्द्रस्य उत्सवः । तत्पर्य्यायः । ध्वजोत्थानम् २ । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । ६३ । २७ । "वरदानमहायज्ञैस्तथा शक्रोत्सवेन च । संपूजिता मघवता वसुधेदीश्वरो नृपः ॥") अस्य विवरणं शक्रोत्थानशब्दे द्रष्टव्यम् ॥

शक्रः, पुं, (शक + "मूङ्शकाविभ्यः क्रः ।" उणा० ४ । १०८ । इति क्रः ।) प्रियंवदः । इति शक्रशब्दटीकायां भरतः ॥

शक्करः, पुं, हयः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शक्करी, स्त्री, (शक्नोति कर्म्माणि कर्त्तुमिति । शक + "ञ्नामदिपदीति ।" उणा० ४ । ११२ । इति वणिप् । "वनो रच ।" ४ । १ । ७ । इति ङीञ् ।) अङ्गुली । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ नदीविशेषः । मेखला । छन्दोभेदः । इति मेदिनी ॥ स तु चतुर्दशाक्षरपादवृत्तम् । तल्लक्षणं यथा । असंबाधा १ वसन्ततिलकम् २ सिंहोद्धता ३ अपराजिता ४ प्रहरणकलिका ५ वासन्ती ६ लोला ७ नान्दीमुखी ८ । इति छन्दोमञ्जरी ॥ (ऋक् । यथा, ऋग्वेदे । १० । ७१ । ११ ।

"ऋचां त्वः पोषमास्ते पुपुष्वान्
गायत्रं त्वो गायति शक्करीषु ॥"* ॥

शक्नोति चौरादिप्रदानेन तद्वन्तं प्रीणयितुं स्वर्गदानेन वा पापमपनेतुमिति । शक + वनिप् । ङीञ् च । गौः । इति निघण्टुः । २ । ११ ॥)

शक्रा, [न्] पुं, (शक्नोतीति । शक् + "ञ्नामदिपदीति ।" उणा० ४ । ११२ । इति वनिप् ।) हस्ती । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शङ्करः, पुं, शकटादिवाहकवृषभः । यथा,—

"स्कन्धवाहस्तु शङ्कस्य शृङ्गी गौरवधूर्त्तिलः ।"
इति हारावली ॥

शङ्करः, पुं, (शं कल्याणं करोतीति । शम् + कृ + "शमिधातोः संज्ञायाम् ।" ३ । २ । १४ । इति अच् ।) शिवः । इत्यमरः ॥ अस्य व्युत्पत्तिर्यथा,—

"सदा ध्यानाच्च भक्तानां पवनं यन्निरामयम् ।
भूतनाथत्वमप्यस्मात्तेनाहं शङ्करः स्मृतः ॥"
इति स्कन्दपुराणम् ॥

अस्य भस्माक्षिधारणकारणं यथा,—

"विसृज्य तान् ब्रह्मविष्णुमयान् वृषभवाहनः ।
आदाय सगणान् सर्वान् कामरूपान्तरं ययौ ॥
उग्रतारां ततो देवीं गणांश्च प्राह शङ्करः ।

उत्सारयन्तु सकलान् इमान् लोकान् गणा द्रुतम्।
उग्रतारे महादेवि त्वञ्चाप्युत्सारय द्रुतम्॥
ततो गणाः कामरूपाद्वा चाप्यपराजिता।
लोकानुत्सारयामासुः पीठं कर्त्तुं रहस्यकम्॥
उत्सार्य्यमाणे लोके तु चतुर्वर्णैर्द्विजातिभिः।
सन्ध्याचलं गतो विप्रो वशिष्ठः कुपितो मुनिः॥
सोऽप्युग्रतारया देव्या उत्सारयितुमीशया।
गणैः सह द्रुतः पाद्भ्यां शापं कुर्वन् सुदारुणम्॥
यस्मादहं द्रुतो वामि त्वयोत्सारयितुं मुनिः।
तस्मात्त्वं वाम्यभावेन पूज्या भव समन्विका॥
भस्यान्ति म्लेच्छवदयस्माद्ब्राह्मणास्ते मन्दबुद्धयः।
भवन्तु म्लेच्छास्तस्माद्वै भवत्याः कामरूपके॥
महादेवोऽपि यस्माच्चां निःसारयितुमुद्यतः।
तपोधनं मुनिं दान्तं म्लेच्छवद्देवपारगम्।
तस्मात् म्लेच्छप्रियो भूयात् शङ्करस्त्वाश्रिभस्मधृक्॥"

इति कालिकापुराणे ८३ अध्यायः॥*॥

शङ्करगीता देवीपुराणे ७ अध्याये द्रष्टव्या॥

शिवावतारविशेषः। यथा,—

"तद्भवान् लोकरक्षार्थमुत्साद्य निखिलान् खलान्।
वर्त्म स्थापयतु श्रौतं जगदेषेन सुखं व्रजेत्॥
इत्युक्तोपरतान् देवानुवाच गिरिजाप्रियः।
मनोरथं पूरयिष्ये मानुषमवलम्ब्य वः॥
दुष्टाचारविनाशाय धर्म्मसंस्थापनाय च।
भाष्यं कुर्वन् ब्रह्मसूत्रतात्पर्य्यार्थविनिर्णयम्॥
मोहयन् प्रकृतिर्हैतध्वान्तमध्याह्नभानुभिः।
चतुर्भिः सहितः शिष्यैश्चतुरैर्हरिवद्भुजैः॥
यतीन्द्रः शङ्करो नाम्ना भविष्यामि महीतले।
महत्तथा भवन्तोऽपि मानुषीं तनुमाश्रिताः॥
तं मामनुसरिष्यन्ति सर्वे त्रिदिववासिनः।
तदा मनोरथः पूर्णो भवतां स्यान्न संशयः॥"

इति माधवीयसंक्षेपशङ्करजये १ सर्गः॥*॥

(अयं हि द्वात्रिंशद्वर्षवयसि भौतिकशरीरं परित्यज्य परब्रह्मणि लीन आसीत्। यथा,तत्रैव

"एवं प्रकारैः किल कल्पपद्मैः
शिवावतारस्य शुभैश्चरित्रैः।
द्वात्रिंशदब्दोज्ज्वलकीर्त्तिराशेः
समा व्यतीयुः किल शङ्करस्य॥")

मङ्गलकारके, त्रि। यथा,—

"क्षेमङ्करोऽरिष्टतातिः स्याच्छङ्करशङ्करौ॥"

इति त्रिकाण्डशेषः॥

(यथा च महाभारते। ३। २२८। ६।

"हिरण्यगर्भ गर्द्द ते लोकानां शङ्करो भव॥")

शङ्करप्रियः,पुं,(शङ्करस्य प्रियः।) तित्तिरिपक्षी। इति केचित्॥ शिववल्लभे, त्रि। (यथा, कथासरित्सागरे। ८५। ८८।

"एतद्गणेभ्यः श्रुत्वा सा शरण्या शङ्करप्रिया।
शान्तानङ्गास्त्रयोऽप्येते जीवन्तीति समादिशत्॥")

शङ्कराचार्य्यः,पुं, (शङ्कर आचार्य्यश्च।) स्वनामख्याताचार्य्यः। स तु अद्वैतवादी वेदान्तभाष्यकर्त्ता च। यथा,—

"श्रीशङ्कराचार्य्यनरावतारं
विश्वेश्वरं विश्वगुरुं प्रणम्य।
वेदान्तशास्त्रश्रवणालसानां
बोधाय कुर्वे कमपि प्रयत्नम्॥"

इति मधुसूदनसरस्वतीकृतसिद्धान्तबिन्दुप्रथमश्लोकः॥

शङ्करावासः, पुं, (शङ्करस्य आवास इव शुक्लत्वात्।) कर्पूरभेदः। इति राजनिघण्टः॥ (शङ्करस्य महादेवस्य आवासः। कैलासश्च॥

शङ्करी, स्त्री, मञ्जिष्ठा। इति शब्दचन्द्रिका॥ शमी। इति राजनिर्घण्टः॥ शङ्करभार्य्या। यथा।

"शङ्करी शम्भुपत्नी च शिवा शतनिनादिनी।
शुभा शुभप्रदा नित्या शतसूर्य्यसमप्रभा॥"

इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम्॥

शङ्का,स्त्री, (शङ्क + अः। स्त्रियां टाप्।)त्रासः। (यथा, हितोपदेशे।

"शङ्काभिः सर्वमाक्रान्तमत्रं पानञ्च भूतले।
प्रवृत्तिः कुत्र कर्त्तव्या जीवितव्यं कथं नु वा॥")

वितर्कः। इति मेदिनी॥ (यथा, भागवते। ८। २। ६।

"यत्र मंगीतसन्नादैर्नदद्दुन्दुभमर्मरया।
अभिगर्ज्जन्ति हरयः श्लाघिनः परशङ्कया॥")

शङ्कितः, त्रि, (शङ्का जाता अस्य। शङ्का + इतच्।) भीतः। इति त्रिकाण्डशेषः॥ (यथा, "अशङ्कामपि शङ्कते नित्यं शङ्कते शङ्कितान्॥")

वितर्कितः। इति शङ्काशब्दार्थदर्शनात्॥ चोरकनामगन्धद्रव्ये, पुं। इति राजनिर्घण्टः॥

शङ्कितवर्षकः,पुं,(शङ्कितं अत्र कोऽप्यस्तिनास्तीत्यादिकं वा वर्णयति तर्कयतीति। वर्णि + ण्वुल्।) चौरः। इति त्रिकाण्डशेषः॥

शङ्कुः पुं, (शङ्कयतेऽस्मादिति। शङ्क + "खरशङ्कुपायुनोलङ्गुलिगु।" उणा० १। ३७। इति कुप्रत्ययेन निपातितः।) स्थाणुः। मुड़ा गाछ इति भाषा। मत्स्यविशेषः। शौंकोच इति भाषा। शल्यास्त्रम्। शेल इति भाषा। इत्यमरभरतौ॥ संख्याविशेषः। स तु लीलावतीमते दशलक्षकोटिः। कील। गोंज इति भाषा। (यथा, मनुः। ८। २७१।

"निःक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः।
ईशः। कलुषः। इति मेदिनी॥ पक्षिशिराजाशम्। मेढ्रः। इति हेमचन्द्रः॥ राक्षसः। इति शब्दमाला॥ नखीनामगन्धद्रव्यम्। इति जटाधरः॥ दीपसूर्य्ययोश्छायापरिमाणार्थं काष्ठादिनिर्म्मितः क्रमेण सूक्ष्माग्रहादशाङ्गुलपरिमितः कीलकः। यथा।

"अर्काङ्गुला तु सूच्यग्रा काष्ठी द्वादशमूलिका
शङ्कुसंज्ञा भवेच्चैव तच्छायां परिकल्पयेत्॥
मध्याह्नहीनैरादित्ययुक्तैश्छायाङ्गुलैर्हरेत्।
षट्पूरितदिवादण्डं लब्धं दण्डादिकं भवेत्॥
पूर्वाह्णच्छाययायातौतं परार्द्धच्छायया यथक्रम्।
शून्यैकरामबाणेभदिग्नो रुद्राः। ०। १। ३। ५। ८। १०। ११। क्रमोत्क्रमैः॥
आषाढादिषु मासेषु च्छाया माध्याह्निकी मता
अयनांशजमासान्तं व्युत्क्रमेणादितो बुधैः।
संख्योक्तान्यदिने भागहारे हृद्धौतरे तथा॥"

इति ज्योतिस्तत्त्वम्॥

तस्य नामान्तरं नरः। यथा,—

अथ करणसूत्रम्।

"शङ्कः प्रदीपतलशङ्कुतलान्तरघ्न-
च्छाया भवेद्दिनरदीपभशङ्कुघाताप्तः।"

उदाहरणम्।

"शङ्कुप्रदीपान्तरभूस्त्रिहस्ता
दीपाच्छ्रुतिः सार्द्धकरद्वया चेत्।
शङ्कोस्तथार्काङ्गुलसंमितस्य
यस्य प्रभा स्यात् कियती वदाशु॥"

न्यासः। शङ्कुः १२ भूः ३ दीपः ७ लब्धानि च्छायाङ्गुलानि १२। इति लीलावत्यां छायाव्यवहारः द्वादशाङ्गुलपरिमाणम्। यथा। विष्णुधर्म्मोत्तरीयप्रथमकाण्डम्।

"द्वादशाङ्गुलिकः शङ्कुस्तद्धयन्तु भयः स्मृतः।
तच्चतुष्कं धनुः प्रोक्तं क्रोशो धनुःसहस्रिकः॥"

इति तिथ्यादितत्त्वम्॥

(जनमेजयस्य पुत्रः। यथा, महाभारते। १। ८५। ८६।

"भवतो वपुष्टमायां द्वौ पुत्रौ जन्नातेः शतानीकः शङ्कुश्च॥" *॥ उग्रसेनस्य पुत्रविशेषः। यथा, भागवते। ८। २४। २४।

"कंसः सुनामा न्यग्रोधः कङ्कः शङ्कुः सुहूस्तथा
राष्ट्रपालोऽथ धृष्टिश्च तुष्टिमानौग्रसेनयः॥")

शङ्कुकर्णः पुं, (शङ्कू इव कर्णौ यस्य।) गर्द्दभः। इति त्रिकाण्डशेषः॥ (दानवविशेषः। यथा, हरिवंशे। ३। ८१।

"शङ्कुकर्णो विवादश्च गवेष्टो दुन्दुभिस्तथा॥"

नागविशेषः। यथा, महाभारते। १। ५७। १५।

"शङ्कुकर्णः पिठरकः कुठारमुखसेचकौ॥"

शङ्कुसदृशकर्णविशिष्टे, त्रि। यथा, भागवते। ७। ८। १५।

"आन्त्रसृजः क्षतजकेशरशङ्कुकर्णा-
विक्षादभीतदिगिभादरिभिन्नखाग्रात्॥")

शङ्कुचिः, पुं, शङ्कुमस्त्रयः। इति शब्दरत्नावली।

शङ्कुतरुः, पुं, (शङ्कुरिव तरुः।) शालवृक्षः। इति शब्दरत्नावली॥

शङ्कुरः त्रि, (शङ्कतेऽस्मादिति। शङ्क + बाहुलकात् उरच्।) त्रासदायी। इति हेमचन्द्रः॥

शङ्कुला, स्त्री, (शङ्कुपूर्वात् लातेः 'आतोऽनुपसर्गे कः। ३। २। ३। इति के शङ्कुला।"इत्युणादिवृत्तौ उज्ज्वलः। १। ३०॥ "शङ्कुपूर्वाल्लातेर्धे अर्थे कविधानमिति वा कप्रत्ययः।"इति काशिका। ६। २। २।) उत्पलपत्रिका। इति

मंक्षिप्तसारोणादिवृत्तिः ॥ पूगकर्त्तनी । इति केचित् ॥ जाँती इति भाषा ।
शङ्खवृक्षः, पुं, (शङ्खरिव वृक्षः ।) शालवृक्षः । इति रत्नमाला ॥
शङ्खोचः, पुं, शङ्खमत्स्यः । इति जटाधरः ॥
शङ्खोचिः, पुं, मत्स्यविशेषः । शाँकोच इति भाषा । यथा,—
"अथ शङ्खः शङ्खचिः स्यात् शङ्खोचिः शङ्खचीत्यपि ॥"
इति शब्दरत्नावली ॥
शङ्खः, पुं, क्ली, (शाम्यति अशुभमस्मादिति । शम + "शमेः खः ।" उणा० १ । १०४ । इति खः ।) समुद्रोद्भवजन्तुविशेषः । शाँख इति भाषा । तत्पर्य्यायः । कम्बुः २ । इत्यमरः ॥ कम्बोजः ३ अब्जः ४ जलजः ५ । इति शब्दरत्नावली ॥ अर्णोभवः ६ पावनध्वनिः ७ अन्तःकुटिलः ८ महानादः ९ श्वेतः १० पूतः ११ सुस्वरः १२ दीर्घनादः १३ बहुनादः १४ हरिप्रियः १५ । अस्य गुणाः । कटुरसत्वम् । शीतत्वम् । पुष्टिवीर्य्यबलप्रदत्वम् । गुल्मशूलकफश्वासविषदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"कम्बुशङ्खनखाद्यापि शुक्तिशम्बूककर्कटाः ।
जीवा एवंविधाश्चान्ये कोषस्थाः परिकीर्त्तिताः ॥
कोषस्था मधुराः स्निग्धाः पित्तवातहरा हिमाः ।
हृद्या बहुवर्च्चस्का हृष्याश्च बलवर्द्धनाः ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"शङ्खोदधिमली शीतौ कषायावतिलेखनौ ॥"
इति राजवल्लभः ॥*॥
अस्योत्पत्त्यादिर्यथा ।
"अथ शम्भुहरेः शूलं जघ्राह दानवं प्रति ।
घोरमध्याह्नमार्त्तण्डशतकरुचमुत्तमम् ॥
शूलञ्च भ्रमणं कृत्वा पपात दानवोपरि ।
चकार भस्मसात्तञ्च सरथञ्चावलोलया ॥
स शिवस्तेन शूलेन दानवास्थिजालकम् ।
प्रेम्णा च प्रेरयामास लवणोदे च सादरम् ॥
अस्थिभिः शङ्खचूडस्य शङ्खजातिर्बभूव ह ।
नानाप्रकाररूपा च शश्वत्पूता सुरार्च्चने ॥
प्रशस्तं शङ्खतोयञ्च देवानां प्रीतिदं परम् ।
तीर्थतोयस्वरूपञ्च पवित्रं शम्भुना विना ॥
शङ्खशब्दो भवेद्यत्र तत्र लक्ष्मीश्च सुस्थिरा ।
स स्नातः सर्व्वतीर्थेषु यः स्नातः शङ्खवारिणा ॥
शङ्के हरेरधिष्ठानं यतः शङ्खस्ततो हरिः ।
तत्रैव सततं लक्ष्मीर्हरीभूतममङ्गलम् ॥
स्त्रीणाञ्च शङ्खध्वनिभिः शूद्रानाञ्च विशेषतः ।
भीता रुष्टा याति लक्ष्मीः स्खलमन्यत् स्खलात्ततः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १८ अध्यायः ॥*॥
अथ शङ्खमाहात्म्यम् ।
ब्रह्मोवाच ।
"शृणु शङ्खस्य माहात्म्यं सर्व्वपापहरं शुभम् ॥
कपिला चौरमादाय शङ्के कृत्वा जनार्दनम् ।
यत्रायुतसहस्रस्य स्नापयित्वा लभेत् फलम् ॥
पयस्विन्या शुभं चौरं शङ्के कृत्वा तु नारद ।
यः स्नापयति देवेशं स गच्छेद्ब्रह्मणः पदम् ॥
क्षिप्त्वा गङ्गोदकं शङ्के यः स्नापयति माधवम् ।
नमो नारायणेत्युक्त्वा मुच्यते योनिसङ्कटात् ॥
शङ्खलग्नन्तु यत्तोयं भ्रमितं केशवोपरि ।
निःक्षिपेन्मूर्द्ध्नि सततं गङ्गास्नानेन तस्य किम् ॥
कृत्वा पादोदकं शङ्के वैष्णवाय प्रयच्छति ।
तिलमिश्रं तुलस्या च चान्द्रायणफलं लभेत् ॥
नदीतडागजं वारि वापीकूपस्रदोद्भवम् ।
गाङ्गेयं तद्भवेत् सर्व्वं कृतं शङ्के हरिप्रिय ॥
गृहीत्वा विष्णुपादाम्बु शङ्के कृत्वा च वैष्णवः ।
यो वहेत् शिरसा नित्यं स मुने तापसोत्तमः ॥
त्रैलोक्ये यानि तीर्थानि वासुदेवाश्रया मुने ।
शङ्खं तान्यधितिष्ठन्ति तस्मात् शङ्खं सदार्च्चयेत् ॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्व्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते ॥
पुरतो वासुदेवस्य सपुष्पफलचन्दनैः ।
शङ्खः समर्च्चितो येन तस्य लक्ष्मीर्न दुर्लभा ॥
दर्शनेनापि शङ्खस्य किमु तस्यार्च्चनेन च ।
विलयं यान्ति पापानि हिमः सूर्य्योदये यथा ॥
गर्भा देवारिनारीणां विनश्यन्ति सहस्रधा ।
तव नादेन पाताले पाञ्चजन्य नमोऽस्तु ते ॥
तीर्थोदकं हरेर्मूर्द्ध्नि भ्रामयेत् शङ्खसंस्थितम् ।
ददाति मुक्तिं देवेशः क्षीरसागरजाप्रियः ॥
यमदूताश्च कुष्माण्डपिशाचोरगराक्षसाः ।
दृष्ट्वा शङ्खोदकं मूर्द्ध्नि भीता यान्ति दिशो दश ॥
नित्ये नैमित्तिके काम्ये स्नानार्च्चनविलेपने ।
शङ्खं समर्च्चयति यः श्वेतद्वीपे वसेद्धि सः ॥"
इति पाद्मोत्तरखण्डे १२८ अध्यायः ॥*॥
अथ दक्षिणावर्त्तशङ्खमाहात्म्यम् ।
"दक्षिणावर्त्तशङ्खेन गत्वा प्राक्स्रोतसं नदीम् ।
कृत्वाभिषेकं विधिवत् ततः पापैः प्रमुच्यते ॥
दक्षिणावर्त्तशङ्खेन तिलमिश्रोदकेन तु ।
उदके नाभिमात्रे तु यः कुर्य्यादभिषेचनम् ॥
प्राक्स्रोतस्यां तु वै नद्यां नरस्तत्राश्वमेधभाक् ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥
दक्षिणावर्त्तशङ्खेन पात्रशोधं करे स्थितम् ।
उदकं यः प्रतीच्छेत शिरसा हृष्टमानसः ॥
तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति ।
न शङ्खेन पिबेत्तोयं न हन्यान्मत्स्यशूकरौ ॥"
इति वाराहे प्रबोधनीमाहात्म्याध्यायः ॥*॥
दक्षिणावर्त्तशङ्खतोयेन विष्णुपूजाफलं यथा ।
स्कान्दे ।
"दक्षिणावर्त्तशङ्खस्य तोयेन योऽर्च्चयेद्धरिम् ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥"
इत्याह्निकाचारतत्त्वम् ॥
स च शङ्खः रत्नविशेषः । तल्लक्षणादि यथा,—
"क्षीरोदकूलेऽपि सुराष्ट्रदेशे
तदन्यतोऽपि प्रभवन्ति शङ्खाः ।
अरुष्कवर्णाः शशिशुभ्रभासः
सुसूक्ष्मवक्त्रा गुरवो महान्तः ॥
ते वामदक्षिणावर्त्तभेदेन द्विविधा मताः ।
दक्षिणावर्त्तशङ्खस्तु कुर्य्यादायुर्यशो धनम् ॥
तेनैव शिरसा यस्तु शङ्खधानः प्रतीच्छति ।
वारि हित्वा स पापानि पुण्यमाप्नोति मानवः ॥
वृत्तत्वं स्निग्धताच्छत्वं शङ्खस्येति गुणत्रयम् ।
आवर्त्तभङ्गदोषो हि हैमयोगाद्विनश्यति ॥
ब्रह्मादिजातिभेदेन स पुनस्तु चतुर्व्विधः ॥"*॥
इति युक्तिकल्पतरुः ॥
श्रीकृष्णार्জ্জুनादिशङ्खनामानि यथा,—
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥"
इति श्रीभगवद्गीतायाम् १ अध्यायः ॥
अथ तु रणवाद्यविशेषः । यथा,—
"भक्तूर्य्यं गन्धतूर्य्यं रणतूर्य्यं महास्वनः ।
संग्रामपटहः शङ्खस्तथा चाभयडिण्डिमः ॥
महाहुन्दो नृपाभौरुर्भीरुः कोलाहलोऽपि च ।
युद्धवादस्य पर्य्यायास्त्वन्ये भेदाः शब्दादयः ॥"
इति शब्दरत्नावली ॥
ललाटास्थि । (यथा, सुश्रुते । १ । ५ ।
'तत्र भ्रूगण्डशङ्खललाटाक्षिपुटौष्ठदन्तवेष्टकक्षाकुक्षिवङ्क्षणेषु तिर्य्यक्छेद उक्तः ॥") कुबेरस्य निधिविशेषः । (यथा, महाभारते । २ । १० । ३६ ।
"निधिप्रवरमुख्यौ च शङ्खपद्मौ धनेश्वरौ ॥"
यथा च मार्कण्डेये । ६८ । ४२—४५ ।
"रजस्तमोमयश्चान्यः शङ्खसञ्ज्ञो हि यो निधिः ।
तेनापि नीयते विप्र तद्गुणित्वं निधीश्वरः ।
एकस्यैव भवत्येष नरं नान्यमुपैति च ।
यस्य शङ्खो निधिस्तस्य स्वरूपं क्रोष्टुके शृणु ॥
एक एवात्मना सृष्टमन्नं भुङ्क्ते तथाम्बरम् ।
कदन्नभुक् परिजनो न च शोभनवस्त्रभृक् ॥
न ददाति सुहृद्भार्य्या भ्रातृपुत्रस्वपादिषु ।
स्वपोषणपरः शङ्खी नरो भवति सर्व्वदा ॥")
नखीनामगन्धद्रव्यम् । इत्यमरमेदिनीकारौ ॥
(यथा, सुश्रुते । ६ । १७ ।
"मनःशिला चूर्णशङ्खमाक्षिकैः
ससिन्धुकासौसरसाञ्जनैः क्रियाः ॥")
कर्णसमीपास्थि । इति राजनिर्घण्टः ॥ (यथा, याज्ञवल्क्ये । ३ । ८६ ।
"कर्णौ शङ्खौ भ्रुवौ दण्डवेष्टावोष्ठौ ककुन्दरे ॥")
अष्टनागनायकान्तर्गतनागविशेषः । (यथा, मनसापूजापद्धतौ ।
"अनन्तो वासुकिः पद्मो महापद्मस्तु तक्षकः ।
कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः ॥")
हस्तिदन्तमध्यम् । इति चिकाण्डशेषः ॥ दशनिखर्व्वसंख्या । लक्षकोटिरिति यावत् । यथा,
"एकं दशगुणञ्चैव सहस्रमयुतं तथा ।
लक्षञ्च नियुतं चैव कोटिरर्व्बुदमेव च ॥
वृन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः ।

अन्त्यं मध्यं परार्द्धञ्च दग्धहत्या यथाक्रमम् ॥'
इति भरतधृतब्रह्माण्डपुराणवचनम् ॥*॥
धर्म्मशास्त्रप्रयोजकमुनिविशेषः। यथा—
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसम्वर्त्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥"
इति याज्ञवल्क्यवचनम् ॥
शङ्कं, क्ली, बलयः। इति मेदिनी ॥
शङ्कः, पुं क्ली, (शङ्क + स्वार्थे कन्।)कम्बुः।
शिरोरोगे,पुं। इति मेदिनी ॥ तस्य लक्षणादि
यथा,—
शङ्कमाह।
"पित्तरक्तानिलाः दुष्टाः शङ्कदेशे विमूर्च्छिताः।
तीव्ररुग्दाहरागं हि शीघ्रं कुर्व्वन्ति दारुणम् ॥
स शिरो विसवद्वेगान्निरुध्याशु गलं तथा।
त्रिरात्राज्जीवितं हन्ति शङ्को नाम नामतः।
त्राढाज्जीवति भैषज्यं प्रत्याख्येयस्य कारयेत् ॥"
पित्तरक्तानिलाः अत्र कफोऽपि योज्यः।
क्षतानुतापः कफपित्तरक्ते रिति सुश्रुतवचनात्।
विमूर्च्छिताः प्रदुष्टाः। चिराद्वात् चिरात्रमध्ये
मारयति। इति भावप्रकाशः॥ अस्य चिकित्सा
शिरोरोगशब्दे द्रष्टव्या ॥ (ललाटास्थि। यथा,
याज्ञवल्क्यः। ३। ८०।
"द्वौ शङ्खौ कपालानि चत्वारि शिरसस्त्रया।
ऊरुः सप्तदशास्थानि पुरुषस्यास्थिसंग्रहः॥")
शङ्खकारः, पुं, (शङ्ख करोतीति। शङ्ख + क +
अण्।)वर्णसङ्करजातिविशेषः। शाखारि इति
भाषा। स तु शूद्रागर्भे विश्वकर्म्मौरसाज्जातः।
इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः।
शाङ्खिकः२ काम्बजकः३। इति शब्दरत्नावली ॥ शाम्बविकः ४। इति जटाधरः ॥
शङ्खचरी,स्त्री, (शङ्ख, ललाटास्थि चरतीति। चर
+ टः। स्त्रियां ङीप्।) ललाटिका। इति
त्रिकाण्डशेषः ॥
शङ्खचर्च्चा, स्त्री, ललाटिका। इति शब्दरत्नावली ॥
शङ्खचूर्णं, क्ली, (शङ्खस्य चूर्णम्।) शङ्खजातचूर्णम्। शाँखेर चूण इति भाषा। अस्य गुणाः।
"शङ्खचूर्णं कटु क्षारमुष्णं क्रिमिहरं परम्॥"
इति राजवल्लभः ॥
शङ्खजः, पुं, (शङ्खाज्जायते इति। जन + डः॥)
कपोतडिम्बवद्दृहन्मुक्ता। इति केचित्॥
शङ्खजातवस्तुनि, त्रि ॥
शङ्खद्रावकः, पुं, शङ्खं द्रावयतीति। द्रु + णिच्
+ ण्वुल्।) औषधविशेषः। यथा,—
"अर्कक्षुद्दौ तथा चिञ्चा तिलारग्वधचित्रकम्।
अपामार्गभस्मसमं वस्त्रपूतं जलं हरेत् ॥
मृद्भिन्ना पचेत्तत्तु यावल्लवणतां गतम्।
लवणेन समो ग्राह्यो द्वौ क्षारौ टङ्कणं तथा ॥
समुद्रफलगोदन्ताकाशीशं सोरका तथा।

द्विगुणं पञ्चलवणं मातुलुङ्गरसेन च ॥
काचकुप्यान्तु सप्ताहं वासयेदम्लयोगतः।
शङ्खचूर्णपलं दत्त्वा वारुणीयन्त्रमुद्धरेत् ॥
सर्व्वधातून् हरेच्छीघ्रं वराटीशङ्खकादिकान्।
उदरादिसर्व्वरोगाणां सद्यो हि नाशकः परः॥"
इति शङ्खद्रावकः ॥*॥
अपि च।
"योगिनीभैरवाभ्याञ्च बलिमादौ प्रदापयेत्।
पश्चाद्यन्त्रञ्च कर्त्तव्यमेवाह परमेश्वरी ॥
रस- शङ्खद्रवो नाम शम्भुदेवेन भाषितः।
गुह्याद्गुह्यतमं गुह्यमिदानीं कथ्यते मया ॥
शङ्खचूर्णं यवक्षारं सर्জ्जिकाक्षारटङ्कणम्।
समञ्च पञ्चलवणं स्फाटिकारी नृशादरः ॥
काचकुप्यां ततः क्षिप्त्वा वारुणीयन्त्रमुद्धरेत्।
यामार्द्धं द्रावयत्येष शङ्खशुक्तिवराटकान् ॥
अर्शांसि नाशयेत् षट् च मूत्रकृच्छ्राश्मरीं तथा
उदरार्त्तविधं हन्ति गुल्मप्लीहोदराणि च ॥
अजीर्णं नाशयेच्छीघ्रं ग्रहणीञ्च विसूचिकाम्।
भुक्तशेषे च भोक्तव्यो माषमात्रो रसोत्तमः ॥
क्षणमात्राद्बलेद्वह्निं पूनर्भोजनमिच्छति।
प्रत्यहं भोजनान्ते च संसेव्योऽयं रसोत्तमः ॥
न रुजायां भयं क्वापि सत्यं सत्यं वदाम्यहम्।
न देयं यस्य कस्यापि सदा गोप्यञ्च कारयेत्।
रसः शङ्खद्रवो नाम वैद्यानामुपकारकः ॥"
शङ्खद्रावको रसः। इति भैषज्यरत्नावली ॥
शङ्खद्रावी,[न्] पुं, शङ्खं द्रावयतीति। द्रु + णिच्
+ णिनिः।) अम्लवेतसः। इति राजनिर्घण्टः॥
शङ्खधरा, स्त्री, (धरतीति। धृ + अच्। टाप्।
शङ्खस्य धरा।) हिलमोचिका। इति रत्नमाला ॥
शङ्खध्मः, पुं, (शङ्खं धमतीति। धमा + कः।)शङ्खवादकः। तत्पर्य्यायः। शाङ्खिकः२। इति जटाधरः ॥ (यथा,वाजसनेयसंहितायाम् ।३०।१८।
"क्रोशाय तूणवध्मवरम्पराय शङ्खध्मम् ॥"
शङ्खध्माः, पुं, (शङ्खं धमतीति। धमा + क्विप्।)
शङ्खवादकः। इति मुग्धबोधव्याकरणम् ॥
शङ्खनखः, पुं, क्षुद्रशङ्खः। जोङ्गड़ा इति भाषा।
इत्यमरभरतौ ॥(यथा,महाभारते ।१३।५०।२०)
"नग्नैः शङ्खनखैर्गात्रैः क्रोडैश्चिबिरिवार्पितम्॥"
नखीनामगन्धद्रव्यम्। इति शब्दरत्नावली ॥
क्षुद्रनखी। यथा,—
"महांस्त्वसौ शङ्खनखः शङ्खाख्यो गन्धसारणः।
इति रत्नमाला ॥
शङ्खनखा, स्त्री, शङ्खनखी। यथा,—
"द्विधा शङ्खनखाख्यान्या शुक्लाख्या वदरीच्छदः ॥"
इति रत्नमाला ॥
शङ्खपुष्पी, स्त्री, (शङ्खवत् पुष्पं यस्याः। ङीप्।)
क्षुद्रविशेषः। शङ्खाहुली इति डानकुनी इति
च भाषा। तत्पर्य्यायः। सुपुष्पी २ शङ्खाह्वा३
कम्भ्वलिनी४पीतपुष्पी ५ कम्बुपुष्पी ६मेध्या
७ मलविनाशिनी ८ किरिटी ९ शङ्खकुसुमा

१० भूलग्ना ११ शङ्खमालिनी १२। अस्या
गुणाः। हिमत्वम्; तिक्तत्वम्। मेधास्वरकारित्वम्। ग्रहभूतादिदोषनाशित्वम्। वशीकरणमिदिदाक्षत्वञ्च। इति राजनिर्घण्टः ॥
अपि च।
"शङ्खपुष्पी तु तीक्ष्णोष्णा मेध्या क्रिमिविषापहा ॥"
इति राजवल्लभः ॥
अन्यच्च।
"शङ्खपुष्पी तु शङ्खाह्वा मङ्गल्या कुसुमापि च।
शङ्खपुष्पी सरा मेध्या हृद्या मानसरोगनुत् ॥
रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा।
दोषापस्मारभूतासृक्कुष्ठक्रिमिविषप्रणुत् ॥"
इति भावप्रकाशः ॥
शङ्खप्रस्थः, पुं, चन्द्रस्य चिह्नम्। यथा,—
"लिङ्गं शृङ्गञ्च चिह्नञ्च शङ्खप्रस्थो विधोरथ ॥"
इति शब्दमाला ॥
शङ्खभृत्, पुं, (शङ्खं बिभर्त्तीति। भृ + क्विप्।)
विष्णुः। इति हेमचन्द्रः ॥ (यथा, महाभारते।
१३। १४८। १२०।
"शङ्खभृन्नन्दको चक्री शार्ङ्गधन्वा गदाधरः ॥")
शङ्खमुखः, पुं, शङ्खवत् मुखं यस्य।) कुम्भीरः।
इति हेमचन्द्रः ॥ (नागविशेषः। यथा, महाभारते। १। ३५। ११।
"नागः शङ्खमुखश्चैव तथा कुम्भाण्डकः परः ॥)
शङ्खमूलं, क्ली, (शङ्खवत् शुक्लं क्रमसूक्ष्मं वा मूलं
यस्य।) मूलकम्। इति राजनिर्घण्टः।
शङ्खाख्यः,पुं, (शङ्ख इति आख्या यस्य।) क्षुद्रवृक्षी। इति रत्नमाला ॥
शङ्खाह्वा,स्त्री, (शङ्ख इति आह्वा नाम यस्याः।)
शङ्खपुष्पी। इति राजनिर्घण्टः ॥
शङ्खिका, स्त्री, शङ्खवत् पुष्पमस्त्यस्याः। शङ्ख +
ठन्।) तृणविशेषः। चोरबहुली इति भाषा।
यथा। शङ्खिन्यां शङ्खिका चोरा। इति शब्दचन्द्रिका ॥
शङ्खिनी,स्त्री, (शङ्खवत् पुष्पमस्त्यस्याः। शङ्ख +
इनिः।) चोरपुष्पी। इत्यमरः। श्वेतपुन्नागः।
इति विश्वः ॥ श्वेतवृन्दा। इति मेदिनी ॥ श्वेतचुक्रा। इति शब्दरत्नावली ॥ वृद्धशक्तिभेदः।
इति त्रिकाण्डशेषः ॥ यवतिक्ता। इति राजनिर्घण्टः ॥ चतुर्विधस्त्रीमध्ये स्त्रीविशेषः।
तल्लक्षणं यथा,—
"दीर्घा सुदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता।
रेखात्रयेण च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा ॥
शशकं पद्मिनी तुष्टा चित्रिणी रमते मृगम्।
हयभं शङ्खिनी तुष्टा हस्तिनी रमते हयम् ॥
पद्मिनी पद्मगन्धा च लीनगन्धा च चित्रिणी।
शङ्खिनी चारगन्धा स्यात् मदगन्धा च
हस्तिनी ॥"
इति रसमञ्जरी ॥

शङ्खयुक्ता। यथा,—
"शङ्खिनी चापिनी वाणभुशुण्डीपरिघायुधा॥"
इति देवीमाहात्म्यम्॥
उपदेवताविशेषः। शङ्खिनीवासशब्दार्थदर्शनात्॥
शङ्खिनीफलः, पुं, (शङ्खिन्याः फलमिव फलं यस्य।) शिरीषवृक्षः। इति राजनिर्घण्टः॥
शङ्खिनीवासः, पुं. (शङ्खिन्या वास आश्रयस्थानम्।) शाखोटवृक्षः। इति शब्दचन्द्रिका॥
शङ्खी, [न्] पुं. (शङ्खोऽस्यास्तीति। शङ्ख+इनिः।) विष्णुः। समुद्रः। इति मेदिनी॥ शाङ्खिकः। शङ्खविशिष्टे, त्रि। इति शब्दरत्नावली॥ (यथा, हरिवंशे भविष्यपर्वणि। ८। १२॥
"शङ्खिनं चक्रिणं विष्णुं खड्गिनं गदिनं विभुम्॥"
शङ्खनिधिवशिष्टे च त्रि। यथा, मार्कण्डेये। ६८। ४५।
"स्वपोषणपरः शङ्खी नरो भवति सर्वदा॥")
शच, इ ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, शचते। इति दुर्गादासः॥
शच, ङ वाचि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, शचते। इति दुर्गादासः॥
शचिः, स्त्री, ('शच वाचि+"सर्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) इन्द्रपत्नी। इत्यमरटीकायां भरतः॥
शची, स्त्री, (शचि+ङ्यादिति ङीष्।) इन्द्रपत्नी। तत्पर्य्यायः। पुलोमजा २ इन्द्राणी ३। इत्यमरः॥ शचिः ४ सची ५ सचिः ६। इति भरतः॥ पूतक्रतायी ७ पौलोमी ८। इति जटाधरः॥ माहेन्द्री ९ जयवाहिनी १० ऐन्द्री ११ शतावरी १२। इति शब्दरत्नावली॥ (यथा, रघुः। ३। १३।
"उमामहेशाविव सरजन्मना यथा यथा जयन्तेन शचीपुरन्दरौ।
तथा नृपः सा च सुतेन मागधी ननन्दतुस्तत्सदृशेन तत्समौ॥")
शतमूली। स्त्रीकरणान्तरम्। तच्च विष्टिकरणमिति केचित्॥ इति मेदिनी॥ (कर्म्म। इति इति निघण्टुः। २। १॥ यथा, ऋग्वेदे। ८। ३२। १५।
"न किरस्य शचीनां नियन्ता सुनृतानाम्॥"
प्रज्ञा। इति निघण्टुः। ३। ९॥ वाक्। इति च निघण्टुः। १। ११॥)
शचीपतिः, पुं, (शच्याः पतिः।) इन्द्रः। इत्यमरः॥ (यथा, मार्कण्डेये। १५। ७०।
"यदि जानासि धर्म्मं त्वं त्वं वा शक्र शचीपते मम यावत् प्रमाणन्तु शुभं तद्वक्तुमर्हतः॥"
कर्म्मपालके, त्रि। यथा, ऋग्वेदे। ७। ६७। ५।
"शक्रं शचीपतीं शचीभिः॥"
"हे शचीपतो शचीति कर्म्मनाम कर्म्मणां पालकौ।" इति तद्भाष्ये सायणः॥)

शट, सादे। शैथिल्ये। गतौ। रुजि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-गतौ सक०-सेट्।) सादोऽवसादः। शैथिल्यभेदः। शटति लोकः अवसीदति। विशृणाति। गच्छति रुजति वा इत्यर्थः। इति दुर्गादासः॥
शट, क ङ श्लाघे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-अक०-सेट्।) क ङ, शाटयते। इति दुर्गादासः॥
शटः, त्रि, अस्त्रः। शटधातोरच् प्रत्ययेन निष्पन्नमेतत्। इति सिद्धान्तकौमुदी॥
शटा, स्त्री, (शट+अच्+टाप्।) सटा। जटा। इत्यमरटीका॥
शटिः, स्त्री, (शट+इन्।) शटी। इति शब्दरत्नावली॥
शटी, स्त्री, (शटि+वा ङीष्।) स्वनामख्यातौषधिः। वन आदा इति भाषा। कचूर इति हिन्दी भाषा। तत्पर्य्यायः। गन्धमूली २ षड्ग्रन्थिका ३ कर्व्वूरः ४ पलाशः ५। इत्यमरः॥ सटी ६ षटी ७ गन्धशटी ८ कर्व्वूरः ९ कर्च्चूरः १०। इति भरतादयः॥ सुगन्धा ११ सटिः १२ शटिः १३ गन्धमूला १४ गन्धोलिः १५ गन्धमूलकः १६। इति शब्दरत्नावली॥ गन्धसटा १७ बधूः १८ गन्धमूलम् १९। इति जटाधरः॥ जीमूतमूलम् २० कच्छोरम् २१ हिमजा २२। इति रत्नमाला॥ हैमी २३ षड्ग्रन्थिः २४ सुव्रता २५ गन्धाली २६ पलाशा २७ हिमा २८। इति ग्रन्थान्तरम्॥ षड्ग्रन्था २९ आम्रनिशा ३० सुगन्धमूला ३१ गन्धाली ३२ शटीका ३३ पलाशिका ३४ सुभद्रा ३५ लघ्वी ३६ दूर्व्वा ३७ गन्धा ३८ पृथुपलाशिका ३९ सौम्या ४० हिमोद्भवा ४१ गन्धबधूः ४२। अस्या गुणाः। तिक्तत्वम्। अम्लरसत्वम्। लघुत्वम्। उष्णत्वम्। रुचिकारित्वम्। ज्वरकफास्रकण्डुव्रणदोषरक्तामयध्वंसकारित्वम्। हृद्यत्वञ्च। इति राजनिर्घण्टः॥ अपि च। अथ गन्धपलाशौ सुगन्धद्रव्यं काश्मीरे प्रसिद्धम्।
"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका।
गन्धारिका गन्धवधूर्बधूः पृथुपलाशिका॥
भवेद्गन्धपलाशौ तु कषाया ग्राहिणौ लघुः।
तिक्ता तीक्ष्णा च कटुकानुष्णास्यमलनाशिनौ।
शोषकासव्रणश्वासशूलाध्मानग्रहापहौ॥"
इति भावप्रकाशः॥
शठकं, क्ली, घृतजलमिश्रितशालिचूर्णम्। मयदार घटा इति भाषा। यथा,—
"शालिचूर्णं घृतं तोयं मिश्रितं शठकं वदेत्॥"
इति भावप्रकाशः॥
शठ, वधक्लेशकैतवे। इति कविकल्पद्रुमः॥ भ्वा० पर०-सक०-सेट्।) क्लेशो दुःखानुभवः। कैतवं मिथ्यावञ्चनम्। शठति खलः साधुं वञ्चयतीत्यर्थः। इति दुर्गादासः॥

शठ, क आलस्ये। गत्यसंस्कृतसंस्कृते। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) क, शाठयति दृढः क्रियासु मन्दः स्यादित्यर्थः। इति दुर्गादासः।
शठ, क ङ श्लाघे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-अक०-सेट्।) क ङ, शाठयते। इति दुर्गादासः॥
शठ, त् क दुर्व्वाचि। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-सक०-सेट्।) शठयति नीचः कुत्सितं वदतीत्यर्थः। रमानाथस्तु सम्यग्भाषणे इति मत्वा शठयति सम्यग्वदतीत्यर्थ इत्याह। सम्यग्भाषणे इति जौमराः। सम्यग्भावे इत्येके। इति दुर्गादासः॥
शठं, क्ली, (शठ+अच्।) तगरम्। कुङ्कुमम्। लोहम्। इति राजनिर्घण्टः॥
शठः, पुं, मध्यस्थपुरुषः। धूर्त्तः। (यथा, मनुः। ४। १०।
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान्।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत्॥")
धुस्तूरः। इति मेदिनी॥ शठस्य लक्षणम्। यथा,—
"प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम्।
व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः॥"
इति विष्णुपुराणे। ३। १८। २१। श्रीकटीका॥
चतुर्विधपत्न्यन्तर्गतपतिविशेषः। तस्य लक्षणम्। कामिनीविषयकपटपटुः। यथा,—
"मौली दाम विधाय भालफलके व्यालिख्य पत्रावलीं
केयूरं भुजयोर्निधाय कुचयोर्विन्यस्य मुक्ताव्रजम्।
विश्रासं समुपार्ज्जयन् मृगदृशः कट्यां निवेश्याञ्चलान्
ग्रन्थिं ग्रन्थिमपाकरोति मृदुना हस्तेन वामभ्रुवः॥"
इति रसमञ्जरी॥
(वृष्णिवंशीयविशेषः। यथा, हरिवंशे। भविष्यपर्व्वणि। २। ३।
"बलभद्रं शिनेः पुत्रं हार्दिक्यं शठसारणौ॥")
शठता, स्त्री, (शठ+तल्।) शठस्य भावः। तत्पर्य्यायः। माया २ शाठ्यम् ३ कुसृतिः ४ निकृतिः ५। इति हेमचन्द्रः॥ अन्यच्च।
"अस्त्रियां कपटो व्याज उपधिर्दंभ एव च।
कूटं कल्कं छलं छद्म निघकैरवकैतवम्॥
अथ शाठ्यञ्च शठता कुसृतिर्निकृतिश्च सा।
हिंसाफले चतुष्कं स्यात् शाठ्यपर्य्याय ईरितः॥
पूर्वः कपटपर्य्यायः फले वञ्चनमात्रके।
उभयोरेकपर्य्याय इति केचित् प्रचक्षते॥"
इति शब्दरत्नावली॥
शठाम्बा, स्त्री, अम्बष्ठा। इति राजनिर्घण्टः॥
शड, इ ङ, संघरजोः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) तालव्यादिः। इ,

शण्डयते। ड, शण्डते। काण्डो वीरं रुजतीत्यर्थः। इति दुर्गादासः॥
शण, म दाने। इति कविकल्पद्रुमः॥ (स्वा॰-पर॰-मक॰-सेट्।) म, शणयति। इति दुर्गादासः॥
शण, क्ली, (शण+अच्।) क्षुपविशेषः। तत्पर्य्यायः। भङ्गा २ मातुलानी ३। इति हेमचन्द्रः॥ (यथा, महाभारते। १। १४५। ११।
"शणं तैलं घृतञ्चैव जतु दारूणि चैव हि।
तस्मिन् वेश्मनि सर्वाणि निःक्षिपेथाः समन्ततः॥")
शणः, पुं,(शण+पचाद्यच्।) स्वनामख्यातक्षुपः। तत्पर्य्यायः। माल्यपुष्पः २ वमनः ३ कटुतिक्तकः ४ निशाधनः ५ दीर्घशाखः ६ त्वक्सारः ७ दीर्घपल्लवः ८। अस्य गुणाः। अम्लत्वम्। कषायत्वम्। मलगर्भास्रपातनत्वम्। वातकारित्वम्। पित्तकफतीव्राङ्गमर्दनाग्नित्वञ्च। इति राजनिर्घण्टः॥
शणघण्टिका, स्त्री, (शणस्य घण्टेव तत्तुल्यशब्दकारिफलवत्त्वात्। इवार्थे कन्। टापि अत इत्वम्।) शणपुष्पी। इति राजनिर्घण्टः॥
शणपर्णी, स्त्री, (शणस्य पर्णमिव पर्णमस्याः। ङीप्।) अशनपर्णी। इति शब्दरत्नावली॥
शणपुष्पिका, स्त्री, (शणपुष्पी+स्वार्थे कन्। अत इत्वम्।) घण्टारवा। इत्यमरभरतौ॥ झनझनिया इति वनगोण इति च भाषा॥
शणपुष्पी, स्त्री, (शणस्य पुष्पमिव पुष्पमस्याः।) क्षुपविशेषः। शणहुली इति शणइ इति वनशणइ इति च भाषा। तत्पर्य्यायः। ह्रस्वपुष्पी २ शणिका ३ शणघण्टिका ४ पीतपुष्पी ५ स्थूलफला ६ लोमशा ७ माल्यपुष्पिका ८। अस्या गुणाः। क्षुद्रतिक्तत्वम्। वमिकारित्वम्। रसनियामकत्वञ्च। इति राजनिर्घण्टः॥
शणसूत्रं, क्ली, (शणस्य सूत्रम्।) पवित्रकम्। इत्यमरः॥ "ईं शणसूत्रजाले। शणस्य सूत्रं शणसूत्रम्। शणति ददाति सूत्रं शणः। शण अस्त्र दाने अन्। शणः तालव्यशादिर्मूर्द्धन्यणान्तः इति बहवः। सनो दन्त्यसादिर्दन्त्यनान्त इति कैचित्। तन्मते पन द अु दाने इत्यस्य रूपम्। सणो दन्त्यसादिर्मूर्द्धन्यणान्त इत्यपरे। सणकिणमणिकाकणकोणकाणा इति मूर्द्धन्यणान्ते विद्याभरणम्॥
'कार्पासमुपवीतं स्यादिप्रस्योर्द्वृतं त्रिवृत्। सनसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥'इति मनुवचनात् पवित्रकमपि तदुच्यते। आनाय इत्यादि चतुष्कं जाले इत्येके। आनाय इत्यादि श्लोकार्द्धं क्वचिद्दृश्यते तत् स्वाम्यादुपेक्षितमपि अन्यैराहृतमिति विद्वतम्।" इति तट्टीकायां भरतः॥
शणालुकः, पुं, (शणालुरेव। स्वार्थे कन्।) आरेवतवृक्षः। इति शब्दरत्नावली॥ शोणालु इति भाषा॥

शणिका, स्त्री, (शण+स्त्रियां टाप्। कन्। अत इत्वम्।) शणपुष्पी। इति राजनिर्घण्टः॥
शणीरं, क्ली, शोनमध्यस्थपुलिनम्। दर्दरोतटम्। इति मेदिनी॥
शण्डं क्ली, पद्मादिसमूहः। इति शब्दरत्नावली॥
शण्डः, पुं, नपुंसकम्। गोपतिः। इति भरतद्विरूपकोषः॥
शण्डता, स्त्री, (शण्डस्य भावः। तल्।) षण्डत्वम्। शण्डशब्दात् भावे तप्रत्ययस्यानन्तरं आप् प्रत्ययेन निष्पन्नमेतत्॥
शण्डिलः, पुं, (शडि रुजायाम्+"सलिकल्यनिमहिभडिभण्डिशण्डीति।" उणा॰ १।५५। इति इलच्।) मुनिविशेषः। इति सिद्धान्तकौमुदी॥
शण्ढः, पुं,(शाम्यति श्राम्यधर्म्मात्। शम+"शमेर्ढः" उणा॰ १।१३२। इति ढः।) अन्तर्मेढ्रिकः। अभ्यन्तरस्त्रीरक्तकोऽयम्। खोजा इति भाषा। तत्पर्य्यायः। वर्षवरः २। तल्लक्षणम् यथा,—
"ये त्वल्पसत्त्वाः प्रथमाः क्लीवाश्च स्त्रीस्वभाविनः।
जात्या न दुष्टाः कार्य्येषु ते वै वर्षवराः स्मृताः॥"
इति॥
नपुंसकम्। हिजड़े इति भाषा। इत्यमरभरतौ॥ गोपतिः। गाँड़ इति भाषा। इति मेदिनी॥ बन्ध्यपुरुषः। इति जटाधरः॥ उन्मत्तः। इति धनञ्जयः॥
शतं, क्ली, (दश दशतः परिमाणमस्येति। "पंक्तिविंशतित्रिंशद्दिति।"५। १।५९। इति तः दशानां शभावश्च निपात्यते।) दशगुणितदशसङ्ख्या। एकशत इति हिन्दीभाषा। (यथा, शान्तिशतके।
"निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपः॥")
तत्पर्य्यायः। दशतिः २। इति पुराणम्॥ तद्वाचकानि। धार्त्तराष्ट्रः १ शतभिषातारा २ पुरुषायुषः ३ रावणाङ्गुलिः ४ पद्मदलम् ५ इन्द्रयज्ञः ६ अग्नियोजनम् ७। इति कविकल्पलता॥ (बहु। इति निघण्टुः। ३। १॥ यथा, ऋग्वेदे। ८।१।५। "वज्रिवो न शताय शतामघ।" "शताय बहुनामैतत् अपरिमिताय।" इति तट्टीकायां सायनः॥)
शतकः, त्रि, (शतं परिमाणमस्य। शत+"संख्याया अतिशदन्तायाः कन्।"५।१।२२॥ इति कन्।)शतसंख्याविशिष्टः। यथा। शान्तिशतकामरुशतकादिः। शतशब्दात् कप्रत्ययेन निष्पन्नमेतत्। (यथा, माकण्डये। ४६।३०।
"सम्यासम्यांश्चकर्यैव शतकौ समुदाहृतौ॥")
स्वार्थे के शतकञ्च॥
शतकीर्त्तिः, पुं, भाव्यर्हदिशेषः। इति हेमचन्द्रः॥
शतकुन्दः, पुं, (शतं कुन्दा यस्य।) करवीरः। इति राजनिर्घण्टः॥

शतकुम्भः, पुं, पर्वतविशेषः। इति शातकुम्भशब्दटीकायां भरतः॥ (स्त्री, नदीतीर्थविशेषः। यथा, महाभारते। ३। ८४। १०।
"सुगन्धां शतकुम्भाञ्च पञ्चयज्ञाञ्च भारत।
अभिगम्य नरश्रेष्ठ स्वर्गलोके महीयते॥")
शतकोटिः, पुं,(शतं कोट्योऽग्राः शिखा यस्य।) वज्रम्। इत्यमरः॥ छन्दःसंख्या लीलावतीमते अब्जसंख्या॥
शतक्रतुः, पुं, (शतं क्रतवो यस्य।) इन्द्रः। इति धनञ्जयकोषः॥ (यथा, महाभारते।३।४२।१२।
"आह माममरश्रेष्ठः पिता तव शतक्रतुः॥"
बहुकर्म्मा। बहुप्रज्ञः। यथा, ऋग्वेदे। १।१०।१।
"ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे॥"
"हे शतक्रतो बहुकर्म्मन् बहुप्रज्ञ वा।" इति तद्भाष्ये सायणः॥)
शतखण्डं, क्ली, सुवर्णम्। यथा,—
"सोमेरुकं महाधातुः शतखण्डं मृदुत्वकम्॥"
इति शब्दचन्द्रिका॥
शतभागश्च॥
शतग्रन्थिः, स्त्री, (शतं ग्रन्थयो यस्याः।) दूर्वा। इति राजनिर्घण्टः॥
शतघ्नी, स्त्री, (शतं हन्तीति। हन+टक्। ङीप्।) शस्त्रभेदः। अस्य लक्षणम्। यथा,—
"अयःकण्टकसंछन्ना शतघ्नी महती शिला।"
इति विजयरक्षितः॥
"दुर्गञ्च परिखोपेतं चयाट्टालकसंयुतम्।
शतघ्नीयन्त्रसुस्थञ्च शतशस्त्रसमाहृतम्॥
गोपुरं सकवाटञ्च तत्र स्यात् सुमनोहरम्।
सपताकं गजारूढो येन राजा विशेत् पुरम्॥"
इति मात्स्ये राजधर्म्मे दुर्गसम्पत्तिर्नाम २८१ अध्यायः॥*॥ (यथा, रघुः। १२। ८५।
"अयःशङ्कुचितां रक्षः शतघ्नीमथ शत्रवे।
हृतां वैश्रवतस्थैव कूटशाल्मलिमक्षिपत्॥"
"अथ रक्षो रावणः अयसः शङ्कुभिः कीलैश्चितां कीर्णां शतघ्नीं लौहकण्टककीलितयष्टिविशेषाम्। शतघ्नी तु चतुस्शाला लोहकण्टकसञ्चिता। यष्टिः————॥ इति केशवः॥"
इति तट्टीकायां मल्लिनाथः॥) हस्विकाली। करञ्जकः। इति मेदिनी॥ गलरोगविशेषः। अस्य निदानलक्षणचिकित्सा रोहिणीशब्दे द्रष्टव्या॥
शतच्छदः, पुं,(शतं छदा यस्य।) काष्ठकुट्टपक्षी इति त्रिकाण्डशेषः॥ काठोकरा इति भाषा। शतदलपद्मञ्च॥
शततमः, त्रि, शतस्य पूरणः। शतशब्दात्तमट्प्रत्ययेन निष्पन्नमेतत्॥
शततारा, स्त्री, (शतं तारा यस्याम्।) शतभिषानक्षत्रम्। इति केचित्॥
शतदन्तिका,स्त्री,नागदन्ती। इति राजनिर्घण्टः॥
शतद्रुः,स्त्री,(शतधा द्रवतीति। शत+द्रु। "शतेच" उणा॰ १। ३६। इति कुः।) नदीविशेषः। शतलज् इति हिन्दी भाषा। सा हिमालया-

दुत्पन्ना विपाशायां मिलिता। (अस्या नामनिरुक्तिर्यथा, महाभारते। १। १७८। ९।
"शतधा विदुता यस्माच्छतद्रुरिति विश्रुता॥"
तत्पर्य्यायः। शितद्रुः २। इत्यमरः॥ शुतुद्रिः३ शतद्रूः ४। पुत्रशोकसन्तप्तो वशिष्ठः कण्ठे शिलां बद्धा नद्यामस्यां प्रविष्टस्ततो भीत्या इयं शतधा द्रुता इति शतद्रुः। इति तट्टीकायां भरतः॥ (एतद्वृत्तान्तस्तु महाभारते।१।१७८। अध्याये द्रष्टव्यः॥) अस्या जलगुणाः।
"शतद्रोर्विपाशायुजः सिन्धुनद्याः
सुशीतं लघु स्वादु सर्वामयघ्नम्।
जलं निर्मलं दीपनं पाचनञ्च
प्रदत्ते बलं बुद्धिमेधायुषञ्च॥"
इति राजनिर्घण्टः॥

शतधा, स्त्री, दूर्वा। इति शब्दचन्द्रिका॥

शतधा, व्य, (शत+धाच्।)शतप्रकारम्। यथा,
"आस्तीकवचनं श्रुत्वा यः सर्पो न निवर्त्तते।
शतधा भिद्यते मूर्द्धि शिरीषस्य फलं यथा॥"
इति महाभारतम्॥

शतधामा,[न्] पुं, (शतं धामानि वर्चांसि यस्य। विष्णुः। इति जटाधरः॥

शतधारं, क्ली, (शतं धाराः कोणा यस्य।) वज्रम्। इति त्रिकाण्डशेषः॥ शतधारायुक्ते, त्रि। यथा,—
"वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्।
वसोः पवित्रेण शतधारेण सुत्वा कामधुक्ष॥"
इति पशुपतिपद्धतिः॥

शतधृतिः, पुं, इन्द्रः। (यथा, महिम्नः स्तोत्रे।
"रथः क्षौणी यन्ता शतधृतिरगेन्द्रो धनुरथो॥")
ब्रह्मा। इति मेदिनी॥ (यथा,भागवते।७।४।१।
"एवं हतं शतधृतिर्हिरण्यकशिपोरथ॥")
स्वर्गः। इति विश्वः॥

शतपत्रं, क्ली,(शतं पत्राणि यस्य।) पद्मम्। इत्यमरः॥ (यथा, महाभारते। ३।१६८।२०।
"इमामसितकेशान्तां शतपत्रायतेक्षणाम्॥")

शतपत्रः, पुं, (शतं पत्राणि पक्षा यस्य।)मयूरः। सारसः। दार्वाघाटपक्षी। इति मेदिनी॥ राजकीरः। तुरी इति भाषा। इति हेमचन्द्रराजनिर्घण्टौ॥ (यथा, महाभारते। ३। १०८। ८।
"मयूरैः शतपत्रैश्च जीवञ्जीवककोकिलैः॥")

शतपत्रकः,पुं,(शतपत्र+स्वार्थे कन्।) दार्वाघाटपक्षी। इत्यमरः॥ काठ्ठोकरा इति भाषा॥

शतपत्रनिवासः, पुं, (शतपत्रे निवासो यस्य।) ब्रह्मा। इति कविकल्पलता॥ पद्मस्थे त्रि॥

शतपत्री, स्त्री, (शतं पत्राणि यस्याः। ङीप्।) पुष्पविशेषः। सेउती इति भाषा। पाटलवर्णासौ गोलाव इति वदन्ति। तत्पर्य्यायः। सुमनाः २ सुशीता ३ शिववल्लभा ४ सौम्यगन्धी ५ शतदला ६ सुहृत्ता ७ शतपत्रिका ८ अस्या गुणाः। हिमत्वम्। तिक्तत्वम्। कषायत्वम्। कुष्ठमुखस्फोटपित्तदाहनाशित्वम्। रुच्यत्वम्। सुरभित्वञ्च। इति राजनिर्घण्टः॥

शतपत्रिका,स्त्री, (शतपत्री+कन्। टाप्। अत इत्वम्।) शतपत्री। इति राजनिर्घण्टः॥

शतपथिकः,(शतपथमधीते तदेद इति वा। "शतपथेः थिकन् पथो बहुलम्।"४। २।६० इत्यस्य वार्त्तिकोक्त्या शत-शब्दोत्तरपथिन्-शब्दात् थिकन्प्रत्ययेन निष्पन्नः।)नानामतावलम्बी। नानापथगामी। इतिसिद्धान्तकौमुदी॥

शतपदचक्रं,क्ली, (शतं पदानि कोष्ठा यस्यतच्च तच्चक्रञ्चेति।) नाना नक्षत्रज्ञानार्थं चक्रम्। यथा,—
"चक्रं शतपदं वक्ष्ये ऋक्षांशाक्षरसम्भवम्।
नामादिवर्णतो ज्ञेया ऋक्षराश्यंशकास्तथा॥
तिर्य्यग्गूर्द्ध्वगता रेखा रुद्रसंख्यालिखेद्बुधः।
जायते कोष्ठकानाञ्च शतैकं१००नाम संयुतम्॥
अ-व-क-ह-डा ऐशान्यां म-ट प-रता हरिति चाग्नेय्याम्।
न-य-भ-ज-खा नैर्ऋत्यां ग-स-द-च-ला वायव्याम्॥
पञ्च पञ्च क्रमेणैव विंशवर्णान् प्रयोजयेत्।
पञ्चस्वरसमायोगी एकैकं पञ्चधा कुरु॥
अवर्णाद्यास्त्रयो ज्ञेयाः सव्यंचरयुतास्तथा।
सजातीयैक्यमाख्याय पञ्चस्वरविनिर्णयः॥
ऋदॄलृतोरप्यकारेण शेन सस्य परिग्रहः।
कुर्य्यात् कु-पु-भु दुस्थाने त्रीणि त्रीण्यक्षराणि च॥
कु-घ-ङ-छा भवेत् स्तम्भे रौद्रे त्वीशानगोचरे।
पु-प-ण-ठा भवेत् स्तम्भे हस्ते चाग्नेयसंज्ञके॥
भु-ध-फ-ढा भवेत् स्तम्भे पूर्वाषाढ़े च नैर्ऋते॥
टु-थ-भ-ञा भवेत् स्तम्भे वायव्ये भाद्र उत्तरे॥
एवं स्तम्भचतुष्कञ्च ज्ञातव्यं स्वरवेदिभिः॥
धिष्ण्यानि क्रत्तिकादीनि प्रत्येकं चतुरक्षरैः।
साभिजिन्त्यंशकास्तत्र शतैकं द्वादशाधिकम्॥
यद्दक्षांशककोष्ठस्थः क्रूरः सौम्योऽपि वा ग्रहः।
तत्स्थो वेधयेत् सम्यक् पुंसो नामादिमाक्षरम्॥
सौम्यैर्विद्ध शुभं ज्ञेयमशुभं पापखेचरैः।
मिश्रैर्मिश्रफलं तत्रनिर्वेधेन शुभाशुभम्॥
यद्दाक्षं सर्वतोभद्रे ग्रहोपग्रहवेधतः।
शुभाशुभफलं सर्वं तदिहापि विचिन्तयेत्॥"
पञ्चस्वरा अ-इ उ-ए-ओकारास्तैर्योगैर्धिष्ण्यानि नक्षत्राणि। अत्र चतुर्भिर्वर्णैरेकनक्षत्र यथा, अ इ उ ए ३। ओ व वि वु ४। वे वो क कि ५। कु घ ङ छ ६। के को ह हि ७। हु हे हो ड.८। डि डु डे डो ९। म मि मु मे १०। मो ट टि टु ११। टे टो प पि १२। पु ष ण ठ १३। षे षो र रि १४। रु रे रो त १५। ति तु ते तो १६। न नि नु ने १७। नो य यि यु १८। ये यो भ भि १९। भु ध फ ढ २०। मे भो ज जि २१। खु जे जो ख। ०। खि ख खे खो २२। ग गि गु गे २३। गो घ ङि ङु २४। शे षो द दि २५। दु थ झ ञ २६।

शतपु

दे दो च चि २७। चु चे चो ल १। लि लु ले लो २। ऋलृयुक्तः अकारयुक्तेन ज्ञेयः ऋकारेण दीर्घो ज्ञेयः। तालव्यशकारेण दन्त्यसकारो ज्ञेयः। इति शतपदचक्रम्। इति ज्योतिस्तत्त्वम्

शतपदी, स्त्री, (शतं पादा यस्याः। ङीप्।) बहुपदयुक्तकीटविशेषः। काणविछा इति कानकोटारी इति च भाषा। तत्पर्य्यायः। कर्णजलौकाः २। इत्यमरः॥ कर्णकोटी ३ भीरुः ४ शतपादिका ५ कर्णजलुका ६। इति शब्दरत्नावली॥ शतपात् ७ शतपादी८। इति जटाधरः॥ शतावरी। इति राजनिर्घण्टः॥

शतपद्मं क्ली, श्वेतकमलम्। यथा,—
"शतपद्मं महापद्मं पुण्डरीकं सिताम्बुजम्॥"
इति रत्नमाला॥

शतपर्व्वा, [न्] पुं, (शतं पर्व्वाणि यस्य।)वंशः। इत्यमरः॥ इक्षुभेदः। यथा,—
"शतपर्व्वा भवेत् किञ्चिल्लोथकारगुणान्वितः।
विशेषात् किञ्चिदुष्णश्च सक्षारः पवनापहः॥"
इति भावप्रकाशः॥

शतपर्व्वा, स्त्री, (शतं पर्व्वाणि यस्याः।) दूर्व्वा। वचा। भार्गवपक्षौ। (यथा, महाभारते। ५। ११७। १३।
"बृहस्पतिश्च तारायां शुक्रश्च शतपर्व्वया॥")
कोजागरपूर्णिमा। इति शब्दरत्नावली॥ कटुका। इति राजनिर्घण्टः॥

शतपर्व्विका, स्त्री, (शतपर्व्वा+कन्। टापि अत इत्वम्।) दूर्व्वा। वचा। इति मेदिनी॥ यवः। इति शब्दरत्नावली।

शतपर्व्वेशः, पुं, (शतपर्व्वाया ईशः।) शुक्रग्रहः। इति त्रिकाण्डशेषः॥

शतपात्, } स्त्री, (शतं पादा यस्याः। पादस्य
शतपाद्, } पात्।) कर्णजलौकाः। इति जटाधरः॥

शतपादिका, स्त्री, (शतपाद+स्वार्थे कन्+टाप्। अत इत्वम्।) काकोली। इति जटाधरः॥ कर्णजलौकाः। इति शब्दरत्नावली॥

शतपुष्पः, पुं, भारविः। स तु किरातार्जुनीयग्रन्थकर्त्ता। इति त्रिकाण्डशेषः॥

शतपुष्पा, स्त्री, (शत पुष्पाणि यस्याः।) शाकविशेषः। इति भरतः॥ शुलफा इति ख्याता। (यथा, सुश्रुतसंहितायाम्। ५१। १५।
"गन्धमांसिशतपुष्पया वहेत्॥")
तत्पर्य्यायः। सितच्छदा २ अतिच्छदा ३ मधुरा ४ मिसिः ५ अवाकपुष्पी ६ जारवी ७। इत्यमरः॥ शताची ८ शतपुष्पिका ९ मधुरिका १० शताङ्गा ११ छत्रा १२ मिसिः १३ मिसी १४। इति शब्दरत्नावली॥ माधवी १५ घोषा १६। इति जटाधरः॥ अस्या गुणाः। मधुरत्वम्। वातपित्तहरत्वम्। गुरुत्वञ्च। इति राजवल्लभः॥ ०॥ क्षुपविशेषः। मौरी इति भाषा। तत्पर्य्यायः। शताङ्गा २ मिसिः ३ घोषा ४ पोतिका ५ अतिच्छत्रा ६ अवाक्-

पुष्पी ७ माधवी ८ कारवी ९ शिफा १० संघातपत्रिका ११ क्षुद्रा १२ वज्रपुष्पा १३ सुपुष्पिका १४ शतप्रसूना १५ वहला १६ पुष्पाह्वा १७ शतपत्रिका १८ वनपुष्पा १९ भूरिपुष्पा २० सुगन्धा २१ सूक्ष्मपत्रिका २२ मधुरिका २३ अतिच्छत्रा २४। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। स्निग्धत्वम्। श्लेष्मातिसारज्वरनेत्रव्रणनाशित्वम्। वस्तिकर्म्मणि प्रशस्यत्वञ्च ॥ * ॥ तद्दलगुणाः उष्णत्वम्। मधुरत्वम्। गुल्मशूलवातनाशित्वम्। दीपनत्वम्। पथ्यत्वम्। पित्तहारित्वम्। रुचिदायकत्वञ्च। इति राजनिर्घण्टः ॥ * ॥ अपि च।

"शतान्वानिलदाहामशूलक्षुद्दृष्टिनाशिनी।"

इति द्रव्यगुणः ॥

अन्यच्च।

"शतपुष्पा कटुः स्निग्धा तिक्तोष्णा कफवातजित्
रुच्या वस्तिहिता नेत्रा वहविट्कृमिशुक्रकृत्।
मेध्याह्वी शीतला तिक्ता दाहनुत् वातला लघुः ॥"

इति भावप्रकाशः।

अन्यन्मधुरिकाशब्दे द्रष्टव्यम् ॥

शतपुष्पिका, स्त्री, (शतपुष्पा + स्वार्थे कन्। टापि अत इत्वम्। (शतपुष्पा। इति शब्दरत्नावली ॥

शतप्रसूना, स्त्री, (शतं प्रसूनानि पुष्पाणि यस्याः।) शतपुष्पा। इति राजनिर्घण्टः ॥

शतप्रासः, पुं, (शतं प्रासा इव फलानि यस्य।) करवीरवृक्षः। इत्यमरः ॥

शतभिषक्, [ज्] स्त्री, (शतं भिषज इव तारा यत्र।) शतभिषानक्षत्रम्। इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम्। ९। ३४।

"शतभिषजि शौण्डिकाना-
मजैकपे द्यूतजीविनां पीड़ा ॥"

शतभिषजि जाते, त्रि। अत्र "वत्सशालाभिजिदश्वयुक्कृतभिषजो वा।" ४। ३। ३६। इति जातार्थप्रत्ययस्य लुक् ॥)

शतभिषा, स्त्री, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतचतुर्विंशनक्षत्रम्। तत्पर्य्यायः। शतभिषक् २। इति शब्दरत्नावली ॥ अस्या आकृतिर्मण्डलाकारशततारामयी। यथा,—

"मण्डलाभशततारकाकुलै-
र्मध्यभाजि नभसः प्रचेतसि।
वाणशैलधरणीमिताः कलाः
शारदेन्दुसुखि तायुरेयुषः ॥" इं २। पं ५५।

इति कालिदासकृतरात्रिलग्नमानिरूपणम्॥ अस्या अधिष्ठातृदेवता वरुणः। यथा,—

"अश्वियमदहनकमलजगवियूलभृददितिजोव
फणिपितरः।
योन्यर्यमदिनकृत्तृपवनशक्राग्निमित्राः ॥
शक्रो निर्ऋतिस्तोयं विश्वविरिञ्ची हरिर्व्वसु
र्व्वरुणः।
अजपादोऽहिब्रघ्न पूषा चेतीश्वरा भानाम् ॥"

सा तु अधोमुखी। यथा,—

"अश्लेषवङ्क्रियमपित्राविशाखयुक्तं
पूर्व्वात्रयं शतभिषा च नवाप्युडूनि।
एतान्यधोमुखगणानि शिवानि नित्यं
विद्यार्च्चभूमिखननेषु च भूषितानि ॥"

इति ज्योतिस्तत्त्वम् ॥*॥

तत्र जातफलम्।

"शोतभोतिरतिसाहसी सदा
निष्ठुरो हि चतुरो नरो भवेत्।
वैरिणामतिशयेन दारुणो
वारुणोडुयदि यस्य सम्भवे ॥"

इति कोष्ठीप्रदीपः ॥*॥

तत्र जातस्य मित्रगुणाः। यथा।

"शतानलादित्यविशाखमैत्र-
शक्रोडुवा मित्रगुणाः प्रदिष्टाः।
शिवाजहस्ताहिभवा जघन्याः
शेषोडुवाः सत्यरुषा भवन्ति ॥"*॥

रविवारादौ शतभिषादियोगे ज्वरोत्पत्तिफलं तथा,—

"शिवशतभिषावातो याम्यसर्पस्त्रिपूर्व्वाः
शनिरविकुजवारे भूतगोष्ठीनवम्याम्।
इह हि मरणयोगे यो हि रोगोपयुक्तः
पशुपतिसमदेहः सोऽपि मृत्युं प्रयाति ॥
उत्तरे विंशतिर्ज्ञेया द्वौ मासौ श्रवणे तथा।
धनिष्ठायामर्द्धमासं वारुणेन दशाहकम् ॥"

इति ज्योतिःसारधृतकौशिकवचनम्।

शतभीरुः, स्त्री, मल्लिका। इत्यमरः ॥ शतं बहवो वियोगिनो भीरवोऽस्या इति शतभीरुः। शीतभीरुरिति च पाठः। तदा शैषिकत्वेन शीताद्हिमेतीति शीतभीरुः। इति भरतः ॥

शतमखः, पुं, (शतं मखा यज्ञा यस्य।) इन्द्रः। इति हलायुधः ॥ (यथा, कुमारे। २। ६४।

"सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ॥")

शतमन्युः, पुं, शतं मन्यवः क्रतवो यस्य।) इन्द्रः। इत्यमरः ॥ (यथा भागवते। १। ८। ६।

"याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः।
तदृयशः पावनं दिक्षु शतमन्योरिवातनोत्॥"

शतयज्ञकारिणि, त्रि। यथा, बृहत्संहितायाम्। ४३। ५४।

"त्वमन्तकः सर्व्वहरः क्रुगानुः
सहस्रशीर्षा शतमन्युरोजाः ॥"

बहुक्रोधे च त्रि। यथा ऋग्वेदे। १०।१०३।७।

"वीरः शतमन्युरिन्द्रः।"

"शतमन्युः बहुयज्ञः बहुक्रोधो वा।" इति तद्भाष्ये सायणः ॥)

शतमानः, पुं, क्ली, रूप्यपलम्। आढकः। इत्यमरभरतौ ॥ (यथा, मनुः। ८। १३७।

"धरणानि दश ज्ञेया शतमानस्तु राजतः।"

चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ॥"

शतलोकपूज्ये, त्रि। यथा, वाजसनेयसंहितायाम्। १८। ८३।

"इन्द्रस्य रूप शतमानमायु-
स्चन्द्रेण ज्योतिरमृतं दधाशः ॥"

"शतानामनेकेषां प्राणिनां मानं पूजा यस्मिन् तत् जगत्पूज्यमित्यर्थः।" इति तद्भाष्ये महीधरः ॥)

शतमार्जः, पुं, (शतं शतवारं मार्जयति शस्त्राणीपि। मृज शुद्धौ + णिच् + अच्।) अस्त्रकारकः। इति क्वचित् ॥ (क्वचित् शस्त्रमार्ज इति पाठः ॥)

शतमूला, स्त्री, (शतं मूलानि यस्याः।) दूर्व्वा। वचा। इति राजनिर्घण्टः ॥

शतमूलिका, स्त्री, (शतं मूलानि यस्याः। ततः स्वार्थे कन्।) द्रवन्ती। इति राजनिर्घण्टः ॥

शतमूली, स्त्री, (शतं मूलानि यस्याः। 'पापकर्णेति' ४।१।६४। ङीष्।) स्वनामख्यातौषधविशेषः। तत्पर्य्यायः। बहुसुता २ अभीरुः ३ इन्दीवरी ४ वरी ५ ऋष्यप्रोक्ता ६ भीरुपत्नी ७ नारायणी ८ शतावरी ९ अहेरुः १०। इत्यमरः ॥ रङ्गिणी ११ शटी १२ द्वीपिशत्रुः १३। इति जटाधरः ॥ ऋष्यगता १४। इति शब्दरत्नावली ॥ शतपदी १५ पोवरी १६ धीवरी १७ हृष्या १८ दिव्या १९ दीपिका २० दरकण्टिका २१ सूक्ष्मपत्रा २२ सुपत्रा २३ बहुमूला २४ शताह्वया २५ स्वादुरसा २६ शताह्वा २७ लघुपर्णिका २८ आत्मगुप्ता २९ जटा ३० मूला ३१ शतवीर्य्या ३२ महौषधी ३३ मधुरा ३४ शतमूला ३५ कैशिका ३६ शतपत्रिका ३७ विश्वस्था ३८ वैष्णवी ३९ पार्णी ४० वासुदेवप्रियङ्करी ४१ दुर्मना ४२ तैलवल्ली ४३। अस्या गुणाः। हृद्यत्वम्। मधुरत्वम्। हिमत्वम्। मेहकफवातपित्तनाशित्वम्। तिक्तत्वम्। श्रेष्ठत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः ॥ अपि च।

"शतावरी बहुसुता भीरुरिन्दीवरी वरी।
नारायणी शतपदी शतवीर्य्या च पोवरी ॥
महाशतावरी त्वन्या शतमूल्यूहकण्टिका।
सहस्रवीर्य्या हैतुश्च ऋष्यप्रोक्ता महोदरी ॥
शतावरी गुरुः शीता तिक्ता स्वाद्वी रसायनी।
मेधाग्निपुष्टिदा स्निग्धा नेत्रा गुल्मातिसार-
जित्।
शुक्रस्तन्यकरी वल्या वातपित्तास्रशोथजित् ॥"

इति भावप्रकाशः ॥*॥

अन्यच्च।

"शतावरी वातपित्तमेहकुष्ठहरा सरा।"

इति राजवल्लभः ॥

शतयष्टिकः, पुं, (शतं यष्टयो गुच्छा यस्य।) शतलतिकहारः। तत्पर्य्यायः। देवच्छन्दः २। इत्यमरः ॥

शतरु (द्रि) द्वीयं, त्रि, (शतं रुद्रा देवता अस्य शतरुद्र + "शतरुद्राच्छ्य घश्च।" ४।२।२८। इत्यस्य वार्त्तिकोक्त्या घः पक्षे छश्च।) हविरादिकम्। इति सिद्धान्तकौमुदी ॥ (यथा, महाभारते। ७। ७८। १३।

"गृणन्तो वेदविद्वांसो तद्ब्रह्म शतरुद्रियम् ॥"
यजुर्व्वेदोक्तमन्त्रविशेषे, क्ली। यथा, महाभारते। ७। २००। १४६।
"पठन् वै शतरुद्रीयं मृत्युंजय सतोत्थितः ॥")
शतरूपा, स्त्री, (शतं रूपाणि अस्याः।) ब्रह्मणः कन्या पत्नी च। यथा,—
"एवन्तत्त्वात्मकं कृत्वा जगद्धात्रीजनत्।
मावित्रीं लोकसिद्ध्यर्थं हृदि कृत्वा ममास्थितः ॥
ततः सजपतस्तस्य भित्त्वा देहमकल्मषम्।
स्त्रीरूपमर्द्धमकरोद्दक्षं पुरुषरूपवत् ॥
शतरूपा च सा ख्याता सावित्री च निगद्यते।
सरस्वत्यथ गायत्री ब्रह्माणीच परन्तप ॥
दृष्ट्वा तां व्यथितस्तावत् कामबाणार्दितो विभुः
उपयेमे स विख्यात्मा शतरूपामनिन्दिताम् ॥
ततः कालेन महता ततः पुत्त्रोऽभवन्मनुः।
स्वायम्भुव इति ख्यातः स विराड्डिति नः श्रुतम् ॥"
इति मात्स्ये ३ अध्यायः ॥
(विष्णुपुराणमते इयं स्वायम्भुवमनोः पत्नी। यथा, तत्रैव। १। ७। १४—१६।
"ततो ब्रह्मात्मसम्भूतं पूर्व्वं स्वायम्भुवं प्रभुः।
आत्मानमेव कृतवान् प्रजापाल्ये मनुं द्विज ॥
शतरूपां तु तां नारीं तपोनिर्धूतकल्मषाम्।
स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे विभुः ॥
तस्माच्च पुरुषात् देवी शतरूपा व्यजायत।
प्रियव्रतोत्तानपादौ प्रसूत्याकूतिसंज्ञितम् ॥")
शतलुम्बः, शतलुम्बकः,] पुं. भारविः। इति त्रिकाण्डशेषभूरिप्रयोगौ ॥
शतवीर्य्या, स्त्री, (शतं वीर्य्याणि यस्याः।) श्वेतदूर्व्वा। इत्यमरः ॥ शतावरी। कपिलद्राक्षा। इति राजनिर्घण्टः ॥
शतवेधी, [न्] पुं, (शतं विध्यतीति। विध + णिनिः।) अस्त्रवेतसः। इत्यमरः ॥
शतसहस्रं, क्ली, (शतगुणितं सहस्रम्। मध्यपदलोपिकर्म्मधारयः।) शतगुणितसहस्रम्। लक्षमिति यावत्। यथा हारीतः। मणिवासो गवादिनां प्रतियज्ञे सावित्रशतसहस्रं जपेत् पञ्च मध्यमे दशोत्तमे द्वादशशतं पयोव्रतं शतसहस्रमसत्रतियज्ञेष्विति। इति श्रुद्धितत्त्वम् ॥ (यथा च हरिवंशे। १२१। १३।
"अष्टौ शतसहस्राणि देवजाद्योत्तमा इयाः॥")
शतह्रदा, स्त्री, (शतं ह्रदा अर्चिंषि यस्याः। यद्वा, शतं ह्रादाः शब्दाः यस्याः। निपातनात् ह्रस्वः।) विद्युत्। इत्यमरः ॥ (यथा, हरिवंशे। १४६। ४८।
"समुद्रमेघः स रराज राजन्
शतह्रदास्त्रीप्रभयाभिरामः ॥")
वज्रम्। इति मेदिनी॥ दक्षकन्याविशेषः। यथा,
"दर्दी च बाहुपुत्त्राय ह्री तड़िच्च शतह्रदा।
तयोः पुत्त्राय विद्वांसश्चतस्रो विद्युतः शुभाः।"
इति वह्निपुराणे सर्गानुकीर्त्तने सतीदेहत्यागो नामाध्यायः ॥

शताक्षी, स्त्री, रात्रिः। शतपुष्पा। इति शब्दरत्नावली ॥ पार्व्वती। यथा,—
"भूयश्च शतवार्षिक्यामनाहष्ट्यामनम्भसि।
मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा ॥
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन्।
कीर्त्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥
इति मार्कण्डेयपुराणे देवीमाहात्म्ये देव्याश्चरितस्तुतिनामाध्यायः ॥
शताङ्गः, पुं, (शतं अङ्गानि अवयवा यस्य।) रथः। इत्यमरः ॥ तिनिसवृक्षः। इति राजनिर्घण्टः ॥ (दानवविशेषः। यथा, हरिवंशे। २३२। ६।
"करालो ज्वालजिह्वश्च शताङ्गः शतलोचनः॥")
शतावयवविशिष्टे, त्रि। यथा, महाभारते। १। १८८। ३२।
"शताङ्गानि च तुर्य्याणि वादकाः समवादयन् ॥")
शतानकं, क्ली, श्मशानम्। इति त्रिकाण्डशेषः॥
शतानन्दः, पुं, (शतं बहुलः आनन्दो यस्य।) मुनिभेदः। स तु जनकराजपुरोहितः। देवकीनन्दनः। इति मेदिनी ॥ ब्रह्मा। गौतममुनिः। इति हेमचन्द्रः ॥ विष्णुरथः। इति त्रिकाण्डशेषः ॥ (विष्णुः। यथा, महाभारते। १३। १४८। ७८।
"स्वयं स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ॥")
शतानीकः, पुं, (शतं अनीकानि यस्य।) हरः। मुनिभेदः। स तु व्यासशिष्यः। राजभेदः। स च चतुर्थयुगे चन्द्रवंशीयद्वितीयराजः। तस्य पिता जनमेजयः पुत्त्रः सहस्रानीकः। इति मेदिनी ॥ सुदासराजपुत्त्रः। इति श्रीभागवते ९ स्कन्धे २२ अध्यायः ॥ (नकुलपुत्त्रः। यथा, महाभारते। १। २३४। १०।
"पुत्त्रस्ते प्रतिविन्ध्यश्च सुतसोमस्तथा विभुः।
श्रुतकर्म्मार्জ্জुनिश्चैव शतानीकश्च नाकुलिः ॥
सहदेवाच्च यो जातः श्रुतसेनस्तवात्मजः।
सर्व्वे कुशलिनो वीराः कृतास्त्राश्च सुतास्तव॥")
शतारं, क्ली, (शतं आराणि अस्य।) वज्रम्। इति त्रिकाण्डशेषः ॥
शतारुः- [स] क्ली, शतारुषी, स्त्री,] कुष्ठभेदः। इति शब्दरत्नावली ॥ तस्य रूपमाह
"रक्तं श्यावं सदाहार्त्ति शतारुः स्याद्दुरुत्तरम्।"
इति भावप्रकाशः ॥
शतावरी, स्त्री, (शतं आवृणोतीति। आ + वृ + अच्। गौरादित्वात् ङीष्।) शतमूली। इत्यमरः ॥ इन्द्रभार्य्या। इति शब्दरत्नावली ॥ शची। इति मेदिनी ॥
शतावर्त्तः, पुं, विष्णुः। इति हेमचन्द्रः ॥ (यथा, महाभारते। १३। १४६। ५०।
"अनुकूलः शतावर्त्तः पद्मी पद्मनिभेक्षणः ॥"
"धर्म्मत्राणाय शतमावर्त्तमानाः प्रादुर्भावा अस्येति शतावर्त्तः। नाड़ीशतेन प्राणरूपेण वर्त्तते इति वा शतावर्त्तः।" इति तत्र शाङ्करभाष्यम् ॥ महादेवः। यथा, महाभारते। १२। २८४। ६।
"शतोदर शतावर्त्त शतजिह्व नमोऽस्तु ते ॥")
शतावर्त्ती, [न्] पुं, विष्णुः। इति त्रिकाण्डशेषः ॥
शताह्वा, स्त्री, (शतं आह्वा यस्याः।) शतपुष्पा। इति जटाधरः ॥ शतावरी ॥ इति राजनिर्घण्टः ॥
शतिकः, त्री, (शत + "शताच्च ठन् यतावशते।" ५। १। २१। इति ठन्।) शतेन क्रीतः। शतस्य विकारः। शतसम्बन्धी। इति सिद्धान्तकौमुदी ॥
शतेरः, पुं, (शद शातने + "शदेस्तु च।" उणा० १। ६१। इति एरक् तकारान्तादेशश्च।) शत्रुः। हिंसा। इत्युणादिकोषः ॥
शत्यः, त्रि, (शत + "शताच्च ठन्यतावशते।" ५। १। २१। इति यत्।) शतस्य विकारः। शतेन क्रीतः। धनपतिसंयोगः। शतमस्मै हृद्यः आयः लाभः शुल्कमुपदा वा दीयते इत्यर्थे शत्यः शतिकः। शत्यं शतिकम्। दक्षिणाचिह्नमन्दनं शतस्य निमित्तमित्यर्थः। इति सिद्धान्तकौमुदी॥
शत्रिः, पुं (शद् + "राशदिभ्यां त्रिप्।" उणा० ४। ६७। इति त्रिप्।) इन्द्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (राजर्षिविशेषः। यथा, ऋग्वेदे। ५। ४। ८।
"शत्रिमग्न उपमां केतुमर्य्यः ॥"
"शत्रिं एतन्नामकं राजर्षिम्।" इति तद्भाष्ये सायणः ॥)
शत्रुः, पुं, (शद् शातने + "रुशदिभ्यां क्रुन्।" उणा० ४। १०३। इति क्रुन्।) स्वदेशादनन्तरोऽव्यवहितैकविषयाभिनिवेशिराजः। यथा,—
"विषयानन्तरो राजा शत्रुर्भिन्नमतः परम् ॥"
इति,
शातकः। निपातकारीत्यर्थः। तत्पर्य्यायः। रिपुः २ वैरिः ३ सपत्नः ४ अरिः ५ द्विषः ६ द्वेषणः ७ दुर्हृद् ८ द्विट् ९ विपक्षः १० अहितः ११ अमित्रः १२ दस्युः १३ शात्रवः १४ अभिघाती १५ परः १६ अराातिः १७ प्रत्यर्थी १८ परिपन्थी १९। इति चामरः॥ द्वषः २० प्रतिपक्षः २१। इति जटाधरः॥ द्विषन् २२ घातकः २३ द्वेषी २४ विद्विषः २५ हिंसकः २६ विद्विट् २७ अप्रियः २८ अभिघातिः २९ अहितः ३० दौर्हृदः ३१। इति शब्दरत्नावली ॥
तस्य जयोपायो यथा,—
मत्स्य उवाच।
"सर्व्वेषामप्युपायानां दानं श्रेष्ठतमं मतम्।
स्वदत्तेनेह भवति दानेनोभयलोकजित् ॥
न सोऽस्ति राजन् दानेन वशयोगो न जायते।
दानेन वशगा देवा भवन्तीह सदा नृणाम् ॥
दानमेवोपजीवन्ति प्रजाः सर्व्वा नृपोत्तम।
प्रियो हि दानवान् लोके सर्व्वस्यैवोपजायते ॥
दानवानविरेणैव तथा राजा परान् जयेत्।

दानवानेव शक्नोति संहतान् भेदितुं परान् ॥
यद्यप्यल्पबला गावः पुरुषाः सागरोपमाः ।
न शक्नुवन्ति तथाप्यैते जायन्ते पक्षपातिनः ॥
अन्यत्रापि कृतं दानं करोत्यन्यं तथा वशे ।
उपायेभ्यः प्रशंसन्ति दानं श्रेष्ठतमं जनाः ॥
दानं श्रेयस्करं श्रेष्ठं दानं श्रेष्ठकरं परम् ।
दानवानेव लोकेषु पुत्रत्वे ध्रियते सदा ॥
न केवलं दानपरा जयन्ति
भूर्लोकमेकं पुरुषाः सुवीराः ।
जयन्ति ते राजसुरेन्द्रलोकं
सुदुर्जयं यद्विबुधाधिवासम् ॥"
इति मात्स्ये २२४ अध्यायः ॥*॥
मत्स्य उवाच ।
"न शक्या ये वशे कर्त्तुमुपायत्रितयेन तु ।
दण्डेन तान् वशान् कुर्य्यात् दण्डो हि वश-
कृतां वृषाम् ॥
सम्यक् प्रणयनं तस्य तथा कार्य्यं महीक्षिता ।
धर्म्मशास्त्रानुसारेण सुहृदायेन धीमता ॥
तस्य सम्यक्प्रणयनं तथा कार्य्यं महीक्षिता ।
वानप्रस्थांश्च धर्म्मज्ञान् निर्म्ममान् निष्परि-
ग्रहान् ।
स्वदेशे परदेशे च धर्म्मशास्त्रविसारदान् ।
समीक्ष्य प्रणयेद्दण्डं सर्व्वं दण्डे प्रतिष्ठितम् ॥
आश्रमी यदि वा वर्णी पूज्योवाथ गुरुर्महान् ।
नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्म्मे न
तिष्ठति ॥
अदण्ड्यान् दण्डयेद्राजा दण्ड्यांश्चैवाप्यदण्ड-
यन् ।
इह राज्यपरिभ्रष्टो नरकं प्रतिपद्यते ॥
तस्माद्राजा विनीतेन धर्म्मशास्त्रानुसारतः ।
दण्डप्रणयनं कार्य्यं लोकानुग्रहकाम्यया ॥
यत्र श्यामो लोहिताक्षो दण्डमरति पापहा ।
प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति ॥
बालवृद्धातुरयतिद्विजस्त्रीविश्वात्मतः ॥
सर्व्वे बलिष्ठा भवेरन् यदि दण्डं न पातयेत् ॥
देवदैत्योरगगणाः सिद्धभूतपतत्रिणः ।
उपक्रमेयुर्म्मर्य्यादां यदि दण्डं न पातयेत् ॥
एष ब्रह्माभिशापेषु सर्व्वप्रहरणेषु च ।
सर्व्वविक्रमकोपेषु व्यवसायी च तिष्ठति ॥
पूज्यन्ते दण्डिनो देवा न पूज्यन्ते त्वदण्डिनः ।
न ब्रह्माणं विधातारं न पूषार्य्यमणावपि ॥
य एते मानवाः केचित् प्रशास्तारः सर्व्वकर्म्मसु ।
रुद्रमग्निञ्च शक्रञ्च सूर्य्याचन्द्रमसौ तथा ।
विष्णुं देवगणांश्चान्यान् दण्डिनः पूजयन्ति च ॥
दण्डः शास्ति प्रजाः सर्व्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्बुधाः ॥
राजदण्डभयादेके पापाः पापं न कुर्व्वते ।
यमदण्डभयादेके परस्परभयादपि ॥
एवं हि सात्त्विके लोके सर्व्वं दण्डे प्रतिष्ठितम् ।
अन्ये तमसि मज्जेयुर्यदि दण्डं न पातयेत् ॥
तस्मात् दण्डो दमयति अदण्ड्यं दण्डयत्यपि ।
दमनाद्दण्डनाश्चैव तस्माद् दण्डं विदुर्बुधाः ॥
दण्डस्य भीतैस्त्रिदशैः समेते-
र्भागो धृतः शूलधरस्य यज्ञे ।
भवस्व पुत्रं ध्वजिनीपतिश्च
वरं शिशुनाञ्च भयात्तु दुस्त्यजम् ॥"
इति मात्स्ये १९९ अध्यायः ॥
सामभेदौ तत्तच्छब्दे द्रष्टव्यौ ॥
शत्रुघ्नः, पुं, (शत्रून् हन्तीति । हन् + मूलविभु-
जादित्वात् कः । यद्वा, अमनुष्यकर्त्तृकेऽपि
चेत्यपिशब्दात् कृतघ्न शत्रुघ्नादयः सिद्धा इति
दुर्गसिंहः ।) श्रीरामस्य भ्राता । तत्पर्य्यायः ।
शत्रुमर्दनः २ । इति शब्दरत्नावली ॥ स तु
सुमित्रया हुतोच्छिष्टभोजनादसावि । यथा—
"निष्ठां गते दक्षिणसभ्यतोये
विहिंस्रिमे कर्म्मणि राजपत्न्यः ।
प्राशूहुतोच्छिष्टसुदारवंश्या-
स्त्रिस्रः प्रसोतुं चतुरः सुपुत्रान् ॥
कौशल्ययासावि सुखेन रामः
प्राक्कैकयीतो भरतस्ततोऽभूत् ।
प्रासोष्ट शत्रुघ्नमुदारचेष्ट-
मेका सुमित्रा सह लक्ष्मणेन ॥"
इति भट्टिकाव्ये १ सर्गः ॥
(अयं हि मधुपुरनिवासिनो लवणाख्यराक्ष-
सस्य निहन्ता । एतद्विवरणं रामायणे उत्तर-
काण्डे ७३ अध्यायमारभ्य द्रष्टव्यम् ॥*॥ शत्रु-
घ्नतरि, त्रि । यथा, रामायणे । २ । १ । १ ।
"गच्छता मातुलकुलं भरतेन तदानघः ।
शत्रुघ्नो नित्यशत्रुघ्नो नीतः प्रीतिपुरस्कृतः ॥")
शत्रुघ्नजननी, स्त्री, (शत्रुघ्नस्य जननी ।) सुमित्रा
इति शब्दरत्नावली ॥
शत्रुजित्, पुं, (शत्रून् जयतीति जि + "सत्सूद्वि-
षेति ।" ३ । २ । ६१ । इति क्विप् । ततस्तुक् ।)
राजविशेषः । तस्य पुत्रः ऋतध्वजः । स एव
कुवलयाश्वः । इति मार्कण्डेयपुराणम् ॥
शत्रुञ्जयः, पुं, विमलाद्रिः । इति हेमचन्द्रः ॥
(नागविशेषः । यथा, रामायणे ।२।३२।१०।
"नागः शत्रुञ्जयो नाम मातुलोऽयं ददौ मम
तं ते निष्कसहस्रेण ददामि द्विजपुङ्गव ॥"
शत्रुं जयतीति । जि + "संज्ञायां भृतृ-
जीति ।" ३ ।२। ४६। इति खच्। ततो मुम्।)
शत्रुजितरि, त्रि ॥
शत्रुन्तपः त्रि, (शत्रुं तपति तापयति वा । तप +
संज्ञायां भृतृजीति ।" ३ । २ । ४६ । इति
खच् । ततो मुम् ।) वैरितापकृत् । इति
मुग्धबोधव्याकरणम् ॥) यथा महाभारते । ४ ।
५२ । ११ ।
"शत्रुन्तपः कोपमसृत्यमानः
समहयत् कूर्म्मनखेन पार्थम् ॥"]
शत्रुमर्दनः पुं,] शत्रुं मृद्नातीति । मृद् + ल्युः ।
शत्रुघ्नः । इति शब्दरत्नावली ॥ (शत्रुहन्तरि,
त्रि । यथा, कथासरित्सागरे । ४२ । १२५ ।
'अध्यास्ते यमदंष्ट्राख्यः स्वामी नः शत्रुमर्दनः ॥
शत्वरी स्त्री रात्रिः । इतित्रिकाण्डशेषः ॥

शद, लृ ज शौ शाते । इति कविकल्पद्रुम ॥
(भ्वा०-पर०-अक०-सक० च-अनिट् ।) ल,
अशदत् । ज,शादः शदः । शौ,शत्स्यति । शातः
पतनं पातनञ्च । शीयते पत्रं हृक्षात् वायुः ।
शदोऽपि समित्यभिधये आत्मनेपदम् । केचि-
दिमं तुदादौ पठित्वा तत्सामर्थ्यात् आत्मने-
पदानित्यत्वे शीयतौ शीयन्तीत्युदाहरन्ति
इति दुर्गादासः ॥
शद, शौ गतौ । आङ्पूर्व्वोऽयमिति कविकल्प-
द्रुमः ॥ भ्वा०-पर०-सक०-अनिट् ।) तालव्या-
दिः । आशीयते । शौ, आशात्सीत् ।
इति दुर्गादासः ॥
शदः, पुं, फलमूलादिः । शदधातोरच्प्रत्ययेन
निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥
शद्रिः, पुं, (शीयते इति । शद + अदिशदिभूशु-
भिभ्यः क्रिन् । उणा० ४ ।६५। इति क्रिन् ।)
मेघः । जिष्णुः । इति मेदिनी ॥ इन्द्रः । इत्यु-
णादिकोषः ॥
शद्रिः, स्त्री, (शद गतौ + "अदिशदीति क्रिन् ।)
विद्युत् । इति हेमचन्द्रः ॥ खण्डः । इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
शद्वः, त्रि. (शद शाते + "दाधटभिशदसदो रुः ।
३ । २ । १५८ । इति रुः ।) पतनकर्त्ता ।
गन्ता । इति शदधातो रुप्रत्ययेन निष्पन्नमेतत्
इति व्याकरणम् ॥
शनकावलिः, स्त्री, गजपिप्पली । इति शब्द-
चन्द्रिका ॥
शनपर्णी, स्त्री, (शनस्येव पर्णान्यस्याः । ङीष् ।
पृषोदरादित्वात् यस्य नः ।) कटुकी । इति
शब्दचन्द्रिका ॥
शनिः, पुं, रव्यादिनवग्रहान्तर्गतसप्तमग्रहः । तत्प-
र्य्यायः । सौरिः २ शनैश्चरः ३ । इत्यमरः ॥
नीलवासाः ४ मन्दः ५ छायात्मजः ६ । इति
त्रिकाण्डशेषः ॥ पातङ्गिः ७ ग्रहनायकः ८
छायासुतः ९ भास्करिः १० नीलाम्बरः ११
इति शब्दरत्नावली ॥ आरः १२ क्रोडः १३
वक्रः १४ क्रोलः १५ सप्तांशुः १६ पङ्गुः १७ ।
इति जटाधरः ॥ कालः १८ सूर्य्यपुत्रः १९ ।
असितः २० । इति ज्योतिस्तत्त्वम् ॥ अस्य वर्णः
कृष्णः । पश्चिमदिङ्नपुंसकान्त्यजजातितमो-
गुणकषायरसमकरकुम्भराशिनीलकान्तमणि-
सौराष्ट्रदेशानामधिपतिरयम् । कश्यपमुनि-
सन्तानः । शूद्रवर्णः । सूर्य्यमुखः । चतुरङ्गुलपरि-
माणः । कृष्णवर्णवस्त्रः । गृध्रवाहनः । सूर्य्यपुत्रः
चतुर्भुजः । भल्लबाणवरशूलधनुर्धारी । अस्या-
धिदेवता यमः । प्रत्यधिदेवता प्रजापतिः ।
इति ग्रहयागतत्त्वहृज्जातकादयः ॥ अपि च ।
"शनिर्विहङ्गोऽनिलवन्यवन्द्या
शूद्राङ्गना धातुसमः स्थिरश्च ।
क्रूरः प्रतीची तुवरोऽतिहृद्रो-
ऽकरक्षितोऽदीर्घसुनीललोहम् ॥"
इति नीलकण्ठीयजातकम् ॥ * ॥

अस्योत्पत्तिर्यथा,—
"मरीचे; कश्यपो जज्ञे तस्माज्जज्ञे विभावसुः।
तस्य भार्य्याभवत् संज्ञा पुत्री त्वष्टुः प्रजापतेः॥
नातितेजोमयं रूपं सोढुं सालं विवस्वतः।
मायामयीं ततश्छायां सवर्णां निर्ममे स्वतः॥
संज्ञोवाच ततश्छायां सवर्णे शृणु मे वचः।
अहं यास्यामि सदनं पितुस्त्वं पुनरत्र मे।
भवने वस कल्याणि निर्विशङ्कं ममाज्ञया॥
इति छायां गृहे स्थाप्य संज्ञागात् पितुरालयम्।
मन्यमानोऽथ तां संज्ञां सवर्णायां तथा रविः॥
सावर्णिं जनयामास मनुश्रेष्ठं महीपते।
शनैश्चरं द्वितीयञ्च सुतं भद्रां च तृतीयिकाम्॥"
इति ब्राह्मे स्वर्गखण्डे ११ अध्यायः॥

तस्य क्रूरदृष्टेः कारणं यथा,—
"एतस्मिन्नन्तरे तत्र द्रष्टुं शङ्करनन्दनम्।
आजगाम महायोगी सूर्य्यपुत्रः शनैश्चरः॥
अत्यन्तानम्रवदन ईषन्मीलितलोचनः।
हारिणं शूलहस्तञ्च विशालाक्षमुवाच ह॥
शनैश्चर उवाच।
शिवाज्ञया शिशुं द्रष्टुं यामि शङ्करकिङ्करः।
विष्णुप्रमुखदेवानां मुनीनामनुरोधतः॥
विशालाक्ष उवाच।
आत्मावहो न देवानां नाहं शङ्करकिङ्करः।
हारं दातुमशक्तोऽहं विना मन्मातुराज्ञया॥
ददौ वर्त्म ग्रहेशाय चक्षुःकोणाज्जया ततः।
शनिरभ्यन्तरं गत्वा ननामानम्रकन्धरः॥
रत्नसिंहासनस्थाञ्च पावतीं सस्मितां मुदा।
नतं सूर्य्यसुतं दृष्ट्वा दुर्गा संभाष्य यत्नतः।
शुभाशिषं ददौ तस्मै दृष्ट्वा तत्कुशलं शुभा॥
पार्व्वत्युवाच।
कथमानम्रवक्त्रस्त्वं श्रोतुमिच्छामि साम्प्रतम्।
कथं न पश्यसि मां साधो बालकञ्च महेश्वर॥
शनिरुवाच।
सर्वे स्वकर्म्मणः साध्वि भुञ्जते वाञ्छितं फलम्
शुभाशुभं वा यत् कर्म्म कोटिकल्पैर्न लुप्यते॥
इतिहासं चातिगोप्यं शृणु शङ्करवल्लभे।
अकथ्यं जननीसाक्षाज्जाजनककारणम्॥
आबालात् कृष्णभक्तोऽहं कृष्णध्यानैकमानसः
तपस्यासु रतः शश्वद्विषये विरतः सदा॥
पिता ददौ विवाहेन कन्यां चित्ररथस्य च।
अतितेजस्विनी शश्वत्तपस्यानुरता सती॥
एकदा सा ऋतुस्नाता सुवेशं स्वं विधाय च।
रत्नालङ्कारसंयुक्ता मुनिमानसमोहिनी॥
हरिपादं ध्यायमानं सा मां पश्येत्युवाच ह।
मत्समीपं समागत्य सस्मिताननलोचना।
शशाप मामपश्यन्तमृतुनष्टा स्वकोपतः।
बाह्यज्ञानविहीनञ्च ध्यानैकतानमानसम्॥
न दृष्टाहं त्वया येन न कृतं ऋतुरक्षणम्।
त्वया दृष्टन्तु यद्यत्तु मूढ़ सर्वं विनश्यति॥
अहञ्च विरते ध्याने तामतोषं पुरा सतीम्।
शापं मोक्तुं न शक्ता सा पश्चात्तापं चकार च॥
तेन मातर्न पश्यामि किञ्चिदवस्तु स्वचक्षुषा।
ततः प्रभृति नम्रास्यः प्राणिहिंसाभयादहम्॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ११अध्यायः॥

अस्य भोगकालो यथा,—
"रविर्मासं निशानाथः सपादद्विमहयम्।
पञ्चवर्षं भूमिपुत्रो बुधोऽष्टादश वासरान्॥
वर्षमेकं सुराचार्य्यस्त्रिंशद्विंशद्दिनं भृगुः।
शनिः सार्द्धत्रयं वर्षं स्वर्भानुः सार्द्धवत्सरम्॥"
इति ज्योतिस्तत्त्वम्॥

तस्य जपमन्त्रो यथा,—
"प्रणवं वाग्भवं मायां श्रीमुद्धृत्य शनैश्चरम्।
चतुर्थ्यन्तं मनुं प्राज्ञ रविसूनोनवाक्षरम्॥
ॐ ह्रीं श्रीं शनैश्चराय। इति रुद्रयामलम्
जपेत्। यथा,—
"सूर्य्यरराड्मन्दानामूर्द्धपाणौ जपेद्बुधः।
सोमकेत्वोरधः पार्श्वोरन्ध्रां शुडपार्णिकः॥"
इति च रुद्रयामलम्॥

तस्य होममन्त्रो यथा। ॐ अग्नो देवीरभीष्टये अग्नो भवन्तु पीतये शंयोरभिस्रवन्तुनः। यथा शनैश्चरायेति पुनः अग्नो देवीति होमयेत्।
इत्युद्धृतत्त्वधृतमत्स्यपुराणम्॥

वारविशेषः
तत्र वारवेला यथा,—
"क्षतमुनियमशरमङ्गल-
रामर्त्तुभास्करादियामार्द्धं।
प्रभवति हि वारवेला
न शुभाशुभकार्य्यकरणाय॥"

तत्र कालवेला यथा,—
"कालस्य वेला रवितः शराग्नि-
कालानलागाम्बुधयो गजेन्दू।
दिने निशायामृतुवेदनेत्र-
नगेषु रामा विधुदन्तिनी च॥"

तत्र कुलिकवेला यथा,—
"षष्ठाष्टकं दिनेशात् क्रमश इह दिने मन्दि-
चण्डेश्वरीक्तः
पूर्वे वारार्द्धयामः कुलिक इह परो मध्यमश्चेति
कालः।"

तद्दिने पूर्वदिग्गमननिषेधो यथा,—
"शुक्रादित्यदिने न वारुणदिशं न ज्ञे कुजे चोत्तरां
मन्देन्दोश्च दिने न शुक्रकुकुभ याम्यां गुरौ न
व्रजेत्॥"

तत्र प्रथमरजोयोगे दोषो यथा,—
"आदित्य विधवा नारी सोमे चैव पतिव्रता।
वेश्या मङ्गलवारे च बुधे सौभाग्यमेव च॥
हृष्टस्तुती पतिः श्रीमान् शुक्रे चापत्यमेव च।
शनौ वन्ध्यां विजानीयात् प्रथमेऽस्त्री रजस्वला
इति ज्योतिस्तत्त्वम्॥

अथ नवानां ग्रहाणां दानानि।
"सूर्य्ये धेनुञ्च ताम्रञ्च गोधूमं रक्तचन्दनम्।
चन्द्रे चन्दनशङ्खौ च वस्त्रञ्च तिलतण्डुलान्॥
कुजे वृषः प्रदातव्यो रक्तवस्त्रं गुडौदनम्।
बुधे कर्पूरमुद्गञ्च हरिद्रस्त्रं हिरण्यकम्॥
पीतवस्त्रहयं जीवे हरिद्राकनकानि च।
अश्वः शुक्रे सितो देयः शुक्लधान्यानि यानि च
शनौ च सतिला देया कृष्णा गौर्लौहसुत्तमम्।
राहौ च महिषोच्छागौ माषाश्च तिलसर्षपाः॥
अजामिषौ च दातव्यौ केतौ चान्नञ्च मिश्रितम्
स्वर्णगोविप्रपूजाभिः सर्वपा शान्तिरुत्तमा॥"
इति ज्योतिस्तत्त्वम्॥

ब्राह्मणां बलयो यथा,—
"गुड़ौदनं पायसञ्च हविष्यं क्षीरषष्टिकम्।
दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च॥
दद्यात् ग्रहक्रमाच्चैतं द्विजेभ्यो भोजनं बुधः।
शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकम्॥
ब्राह्मणां दक्षिणा यथा,—
"धेनुः ग्रहस्तथानड्वान् हेम वासो हयस्तथा।
कृष्णा गौरायसं छाग एता वै दक्षिणाः क्रमात्
इति संस्कारतत्त्वम्॥

ग्रहचक्रं, क्ली, (ग्रहचक्रम्।) नृणां शुभाशुभज्ञानार्थग्रहभोग्यनक्षत्रादिसहविंशतिनक्षत्रयुक्तनराकारचक्रम्। यथा,—
"ग्रहचक्रं नराकारं लिखित्वा सौरिभादितः
नाम ऋक्षं भवेद्यत्र फलं तत्र शुभाशुभम्॥
एकं मुखे दक्षहस्ते चत्वारि षट् पदद्वये।
हृदि पञ्च करे वामे चत्वारि मस्तके त्रयम्॥
हृयं नेत्रद्वये गुह्ये हयं तत्र न्यसेद्बुधः।
मुखे हानिर्जयो दक्षे भ्रमः पादेऽथियो हृदि।
वामे भौर्मस्तके राज्यं नेत्रे सौख्यं मृतिर्गुदे॥
तूर्य्याष्टद्वादशे ऋक्षे यदा विघ्नकरः शनिः।
तदा सौख्यं वपुःस्वन्तु हृच्छीर्षे नेत्रदक्षयोः॥
तृतीयैकादशे षष्ठे यदा सौख्यकरः शनिः।
तदा विघ्नः शरीरस्थो गुह्ये वक्त्रेऽङ्घ्रिवामयोः॥
यस्य पीड़ाकरः शौरिस्तस्य चक्रं फलन्त्विदम्
लिखित्वा कृष्णद्रव्येण तैलमध्ये क्षिपेत्ततः॥
निक्षिप्य भूमिमध्यस्थं कृष्णपुष्पैः प्रपूजयेत्।
तुष्टिं याति न सन्देहः पीड़ां त्यक्त्वा शनैश्चरः॥
इति ज्योतिस्तत्त्वम्॥

शनिप्रसूः, स्त्री, (शनेः प्रसूर्जननी।) छाया। सूर्य्यपत्नी। इति भूरिप्रयोगः॥

शनिप्रियं, क्ली, (शनेः प्रियम्।) नीलमणिः।
इति केचित्॥

शनिवारः, पुं, (शनिर्भोग्यः शनेर्वा वारः।) शनिभोग्यसावनदिनम्। तत्तु उदयादोदयकालः।
यथा,—
"सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिता॥"
दिनाधिपस्य रव्यादेर्भोग्यं दिनं वाररूपं सावनगणनोक्तम्।
"उदयादोदयाद्भानोर्भौमसावनवासराः॥"
इति तिथ्यादितत्त्वम्॥

शतभिषानक्षत्रयुक्तमधुकृष्णत्रयोदश्यां शनिवारयोगे महावारुणी स्यात्। यथा। स्कन्दपुराणे
"वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा।

शनिवारसमायुक्ता सा महावारुणी स्मृता ॥"
इति तिथ्यादितत्त्वम् ॥*॥

तत्र जातफलं यथा,—
"क्षयः सुवेशः कुलकीर्त्तिहीनो
ज्वरायुतो मध्यधनोऽङ्गहीनः।
तमोगुणः क्लेशकरो नराणां
मन्दस्य वारप्रभवोऽतिमन्दः ॥"
इति कोष्ठीप्रदीपः ॥*॥

तत्र यात्रानिषेधो यथा,—
"संत्यजेद्दिवसे यात्रां सूर्य्यारार्कीन्द्रवक्रिणाम्।
इति ज्योतिस्तत्त्वम् ॥

वारवेलादिशनिशब्दे द्रष्टव्यम् ॥

शनैः, [स्] अ, अद्भुतम्। इत्यमरः। यथा,—
"शनैर्विद्या शनैः पन्थाः शनैः पर्वतमारुहेत्।
शनैः कामश्च धर्मश्च पञ्चैतानि शनैः शनैः ॥"
इति गारुडे १०९ अध्यायः ॥

शनैश्चरः। इति मेदिनी ॥

शनैश्चरः, पुं, (शनैर्मन्दं मन्दं चरतीति। चर-गतौ+पचाद्यच्।) शनिः। इत्यमरः। अस्य स्तोत्रं यथा,—
"नीलाञ्जनचयप्रख्यं रविसूनुं महाग्रहम्।
छायाया गर्भसम्भूतं वन्दे भक्त्या शनैश्चरम् ॥
व्यासेनोक्तमिदं स्तोत्रं यः पठेत् प्रयतो नरः।
दिवा वा यदि वा रात्रौ शान्तिस्तस्य न संशयः ॥"
इति व्यासभाषितस्तोत्रम् ॥

शप्, व्य, स्त्रीकारः। शप् करोति। इति सिद्धान्तकौमुदी ॥

शप, य अ भौ } क्रोशे। इति कविकल्पद्रुमः।
शप, भौ अ } (दिवा०-भ्वा०-च उभ०-सक० अनिट्।) हौ तालव्यादौ। य अ, शप्यति शप्यते। भौ, अशप्। भौ, अशाप्सीत्। अ, शपति शपते। क्रोश उक्तिविशेषः। निर्भर्त्सनमिति चतुर्भुजः। सहस्रशोऽमी शपथानपश्यत् क्रोशो भ्वादिपक्षे गालिदानम्। शपते। जित्वेऽपि शपथाद्योर्गत्यनुकारेति नियमात् शपथे आत्मनेपदं अन्यत्र परस्मैपदम्। क्षणाय शपते गोपी। प्रजेति त्वां शशाप सा। इति रघौ। सख्यः शपामि यदि किञ्चिदपि स्मरामि। इति वाचा शरीरस्यर्गनाभावादिति पाणिनीयाः। केचित्तु शपथे नित्यमात्मनेपदं अन्यत्र विभाषया इत्याहुः। तेन प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभृते। इति माघः। इति दुर्गादासः ॥

शपः, पुं, शपथः। इति हेमचन्द्रः ॥ निर्भर्त्सनम् गालिदानम्। इति शपधात्वर्थदर्शनात् ॥

शपथः, पुं, (शप क्रोशे+"शोऽ्गपिरुशमीति। उणा० ३। १११। इति थः।) अनृतं वदन् घोरं नरकं यास्यामि इत्येवं रूप मिथ्यानिरूपणम्। सत्यावधारणम्। इति साङ्ख्यः। वाचा शरीरस्यर्गनम्। इति गोयीचन्द्रः ॥ शपथो दिव्यम्। इति रमानाथः। इति भरतः ॥ तत्पर्य्यायः। शपनम् २। इत्यमरः ॥ शपः ३। इति हेमचन्द्रः ॥ सत्यम् ४ समयः ५ शापः ६ प्रत्ययः ७ अभिषङ्गः ८। इति जटाधरः ॥*॥ चतुष्पादव्यवहारस्य क्रियापादाङ्गम्। यथा अथ शपथः।
"युक्तिव्यवसनासु शपथैरेनमर्द्दयेत्।
अर्थकालबलापेक्षमन्यस्य सुकृतादिभिः ॥"
अर्थस्य विवादास्पदस्य बलं बहुल्यभावः। कालस्य च बलं पुण्यापुण्यत्वम्। तदपेक्षं यथा स्यादित्यर्थः। दूर्वाकरत्वस्य पुत्रादिस्पर्शस्य चायं दर्शनीयत्वात्। अत्र मयैतत् कृतं न वा इति प्रतिज्ञामुच्चार्य्याग्नौ जले वा हस्तं प्रक्षिपेत्। एतन्मिथ्यात्वे मम सुकृतं नश्येदिति वा ब्रूयात्। न त्वग्निपरीक्षां जलपरीक्षां वा कुर्य्यात् इत्यभिप्रायवर्णनं युक्तम्। तस्या महाभियोगविषयकत्वेन शपथसमभिव्याहारानर्हत्वात्। सुकृतादिभिरित्यादिना दूर्वास्पर्शाभ्युपग्रहः। तथा च विष्णुः। सर्वस्वे वार्थजातेषु सूत्रं कनकं प्रकल्पयेत्। तत्र कृष्णलोने शूद्रं दूर्वाकरं शापयेत्। द्विकृष्णलोने तिलकरम्। त्रिकृष्णलोने जलकरम्। चतुःकृष्णलोने स्वर्णकरम्। पञ्चकृष्णलोने सीतोद्भूतमहीकरम् सुवर्णार्द्धोने कोषो देयः। शूद्रस्य यथासमये विहिता क्रिया तथा द्विगुणेऽर्थे राजन्यस्य त्रिगुणेऽर्थे वैश्यस्य चतुर्गुणेऽर्थे ब्राह्मणस्येति। कृष्णलः काञ्चनरत्तिका तन्मूल्यादूने कृष्णलोने एवमन्यत्र। मनुः।
"सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः।
पुत्रदारस्य वाप्येवं शिरांसि स्पर्शयेत् पृथक् ॥
ब्राह्मणेन मयैतत् कृतं न कृतं वेति प्रतिज्ञामुच्चार्य्य सत्यमिति वक्तव्यम्। तथैव क्षत्रियेण वाहनायुधं स्प्रष्टव्यम्। तथैव वैश्येन गोबीजकाञ्चनानामन्यतमं स्प्रष्टव्यम्। शूद्रेण तु पूर्वोक्तं सर्वमेव स्प्रष्टव्यम्। तेषां हृथाकृतस्पर्शानां पातकैस्तुल्यत्वात् पातकशब्दन निर्देशः। हलायुधोऽप्येवम्। दैवक्रियाविषयमाह नारदः।
"अरण्ये निर्जने रात्रावन्तर्वत्मनि साहसे।
न्यासापहरणे चैव दिव्या सम्भवति क्रिया ॥"
बृहस्पतिः।
"देवब्राह्मणपादांश्च पुत्रदारशिरांसि च।
एते तु शपथाः प्रोक्ता मनुना स्वल्पकारणे।
साहसेष्वभिशापे च दिव्यानि तु विशोधनम्॥"
अत्र शपथदिव्ययोः पृथक्त्वप्रतीतेः शपथे न दिव्यधर्म्माः। किन्तु वैधे कर्म्मणि तत्र शौचार्थं स्नानाचमनादिकार्य्यम्। दिव्यानि तु दिव्यतत्त्वे कथितानि नात्र लिखितानि। अत्राभियुक्तन शपथः कर्त्तव्य इत्युत्सर्गः उभयेच्छया अभियोक्तापि। इत्याह नारदः।
"अभियोक्ता शिरोवर्त्ती सर्वत्रैव प्रकीर्त्तितः।
इच्छयान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ॥"
इतरः शपथकर्त्तृभिन्नः। तथा कात्यायनः।
"आचतुर्हं शकादक्षो यस्य नो राजदैविकम्।
व्यसनं जायते घोरं स ज्ञेयः शपथे शुचिः ॥"
व्यसनमापत्। घोरमतिपीड़ाकरम्। तथा च कोपाधिकारे यस्य पश्येदित्यनुवृत्तौ विष्णुः।
"रोगोऽग्निर्ज्ञातिमरणं राजातङ्कमथापि वा।
तमशुद्धं विजानीयात्तथा शुद्धं विपर्य्ययात् ॥"
कात्यायनः।
"तस्यैकस्य न सर्वस्य जनस्य यदि सम्भवेत्।
रोगोऽग्निर्ज्ञातिमरणमृणं दद्यात् दमश्च सः ॥
ज्वरातिसारविस्फोटगूढ़ास्यपरिपीड़नम्।
नेत्ररुग्गलरोगश्च तथोन्मादः प्रजायते ॥
शिरोरुग्गुदभङ्गश्च दैविका व्याधयो नृणाम् ॥"
तस्यैकस्येति न तु देशव्यापकमरणादिः। मनुः।
"न हृथा शपथं कुर्य्यात् स्वल्पेऽप्यर्थे नरो बुधः।
हृथा हि शपथं कुर्वन् प्रेत्य चेह च नश्यति ॥
कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् ॥"
कामिनीष्विति रहसि कामिनीसन्तोषार्थं हृथा शपथः। एवं विवाहसिद्ध्यर्थं गोग्रासार्थं आवश्यकहोमेन्धनार्थं ब्राह्मणरक्षार्थमङ्गीकृतधनादौ। यमः।
"हृथा तु शपथं कृत्वा कीटस्य वधसंयुतम्।
अनृतेन च युज्येत वधेन च तथा नरः।
तस्मात्र शपथं कुर्य्यान्नरो मिथ्यावधेप्सितम ॥"
कीटस्येति प्राणिमात्रोपलक्षणम्। तद्वधापेक्षेन हृथाशपथकर्त्ता युज्यत इत्यर्थः। इति व्यवहारतत्त्वम् ॥

शपनं, क्ली, (शप क्रोशे+ल्युट्।) शपथः। इत्यमरः ॥ गालिः। इति त्रिकाण्डशेषः ॥

शफः, पुं (शप+क्तः।) तृणविशेषः। इति शब्दचन्द्रिका ॥ उलु इति भाषा ॥ अभिशापग्रस्त, त्रि ॥ (यथा, भागवते। १। १८। ४१।
"निशम्य शप्तमतदर्हं नरेन्द्र
स ब्राह्मणो नात्मजमभ्यनन्दत् ॥")

शफं, क्ली, गवादीनां खुरः। (यथा, याज्ञवल्क्यः। १। २०४।
"हेमशृङ्गा शफैरौप्यैः सुशीला वस्त्रसंयुता।
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥")

वृक्षमूलम्। इति मेदिनी ॥

शफरः, पुं, स्त्री, मत्स्यविशेषः। इत्यमरः पुंस्त्री इति भाषा ॥ (यथा,—
"कैवर्त्तकर्कशकरात् शफरस्युतोऽपि
जाले पुनर्निपतितः सकरो विपाकः ॥"
यथा च।
"अगाधजलसञ्चारी विकारी न च रोहितः।
गण्डूषजलमात्रेण शफरी फर्फरायते ॥"
इत्यङ्कटः ॥)

शफराधिपः, पुं, (शफराणां मत्स्यानां अधिपः।) झषीशमत्स्यः। इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः झिल्लिशः २ वारिकर्पूरः ३ गाङ्गेयः ४ जमदालः ५। इति त्रिकाण्डशेषः।

शब्द, क शब्दकृतौ । कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, शब्दयति । सोपसर्गस्वाविस्कृतौ मतः । प्रशब्दयति गभीरमत्यर्थं ग्रिथः स्फुटीकरोतीत्यर्थः । इति दुर्गादासः ॥

शब्दः, पुं, (शब्द + भावे घञ् । यद्वा, शप आक्रोशे + "शाशपिभ्यां ददनौ ।" उणा० ४।८७ । इति दन् । पकारस्य बकारः ।) श्रोत्रग्राह्यगुणपदार्थविशेषः । तत्पर्य्यायः । निनादः २ निनदः ३ ध्वनिः ४ ध्वानः ५ रवः ६ स्वनः ७ स्वानः ८ निर्घोषः ९ निर्हादः १० नादः ११ निस्वानः १२ निस्वनः १३ आरवः १४ आरावः १५ संरावः १६ विरावः १७ । इत्यमरः ॥ संरवः १८ रावः १९ इति शब्दचन्द्रिका ॥ घोषः २० । इति जटाधरः ॥ स च ध्वन्यात्मको वर्णात्मकश्च । यथा, "कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः ।
मूर्त्तः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गच्छति ॥
वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता ।
कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते ॥
उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता ।
सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ॥
तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् ।"
इति भाषा परिच्छेदः ॥

शब्दं निरूपयति ।
'शब्दो ध्वनिश्च वर्णश्च स्फोटादिभेदो ध्वनिः ।'
मूर्त्तः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गच्छति ॥"
इति ॥

नभोवृत्तिराकाशसमवेतः । दूरस्थशब्दस्याग्रहणादाह श्रोत्रोत्पन्न इति कण्ठसंयोगादिजन्या वर्णास्ते कादयो मता इति । ननु स्फोटाद्यवच्छेदेनोत्पन्नं शब्दं श्रोत्रे कथमुत्पत्तिरतः आह वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता इति । आद्यशब्दस्य बहिर्देशदिगवच्छिन्नोऽन्यः शब्दस्तेनैव शब्देन जन्यते तेन चापरस्तद्व्यापक एवं क्रमेण श्रोत्रोत्पन्नो गच्छति इति । कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते इति आद्यशब्दात् दशदिक्षु दश शब्दा उत्पद्यन्ते । ततस्तान्यै दश शब्दा उत्पद्यन्ते इति भावः । अस्मिन् कल्पे गौरवादुक्तं कस्यचिन्मते इति । ननु शब्दस्य नित्यत्वादुत्पत्तिः कथमतः आह । उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता इति । शब्दानामुत्पादविनाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः । ननु स एवायं ककार इत्यादिप्रत्यभिज्ञानाच्छब्दानां नित्यत्वम् । इत्यत्रोत्पादविनाशबुद्धिभ्रमरूपा चेत्यत आह सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते । तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् इति ॥ तत्र प्रत्यभिज्ञानस्य तत्सजातीयत्वं विषयः । ननु तद्वस्त्वभेदो विषयः उक्तप्रतीतिविरोधात् । इत्यत्र द्वयोरपि बुद्ध्योर्न भ्रमत्वमिति । ननु सजातीयत्वं सोऽयमिति प्रत्यभिज्ञायां भासते इति कुत्र दृष्टमित्यत आह तदेवेति । यदौषधं मया कृतं तदेवान्येनापि कृतमित्यादिदर्शनादिति भाव इति सिद्धान्तमुक्तावली ॥ * ॥

दशविधशब्दा यथा,—
"षड्जर्षभसगान्धारमध्यमः पञ्चमस्तथा ।
अतः परन्तु विज्ञेयो निषादो धैवतस्तथा ।
इष्टस्वानिष्टशब्दश्च संहतः प्रविभागवान् ॥
इत्याग्नेयेधिकपर्व्व ॥

शब्दविशेषाणां नामविशेषा यथा,—
"शब्दो गुणानुरागोत्थः प्रणादः प्रीतकृतं नृणाम् ।
पर्हनं गुदजे शब्दे कर्हनं कुक्षिसम्भवे ॥
क्ष्वेड़ा तु सिंहनादोऽथ क्रन्दनं सुभटध्वनिः ।
कोलाहलः कलकलस्तुमुलो व्याकुलो रवः ॥
मर्मरो वस्त्रपर्णादेर्भूषणानान्तु शिञ्जितम् ।
हेषा क्रेषा तुरङ्गाणां गजानां गर्ज्जितं हिते ॥
विष्कारो धनुषां हुम्भारम्भे गोर्जलदस्य च ।
स्तनितं गर्ज्जितं गर्ज्जः स्वनितं रसितादि च ॥
कूजितं स्याद्विहङ्गानां तिरश्चां रुतवाश्चिते ।
हकस्य रेषणं रेवा वुक्कनं भषणं शुनः ॥
पीड़ीतानान्तु कणितं मणितं रतकूजितम् ।
प्रक्काणः प्रक्वणस्तन्त्र्या मर्दलस्य तु गुन्दलः ॥
क्षोभनन्तु कौचकानां भेर्य्या नादस्तु टट्टुरः ।
तारोऽत्युच्चैर्ध्वनिर्मन्द्रो गम्भीरो मधुरः कलः ॥
काकली तु कलः सूक्ष्म एकतालो लयानुगः ।
काकुर्ध्वनिविकारः स्यात् प्रतिशब्दस्तु प्रतिध्वनिः ॥"
इति हेमचन्द्रः ॥

अथैकार्थानुलोमविलोमसमशब्दाः । नयन १ नर्त्तन २ कनक ३ कण्टक ४ महिम ५ कलङ्क ६ कालिका ७ सरस ८ सहास ९ मधुम १० सदस्य ११ नवेन १२ तावता १३ तारता १४ विभवि १५ करक १६ कम्बुक १७ काङ्क्षिका १८ नन्दन १९ दन्तद २० दभद २१ योग्ययोः २२ लगुल २३ नुततनु २४ हाववहा २५ पतदातप २६ वरभैरव २७ कलपुलक २८ वरकैरव २९ वरपौरव ३० तरुणीरुत ३१ रदसोदर ३२ नदभेदन ३३ दम्पतीपदम् ३४ लङ्काकङ्काल ३५ माधववल्लववधमा ३६ नन्दनन्दन ३७ तद्धित ३८ समास ३९ कारिका ४० पादपाः ४१ जलज ४२ नाना ४३ मम ४४ ॥*॥ अथान्यार्थकानुलोमविलोमशब्दाः । वन्दे १ देवे २ लेखे ३ रवौ ४ भानौ ५ हंसा ६ जीवा ७ यामा ८ विभु ९ वद १० रम ११ यम १२ कम्य १३ राधा १४ राधया १५ सूत्रामा १६ नन्दक १७ मालिका १८ कालिनी १९ राजते २० भारती २१ हासिका २२ गगन २३ करका २४ भार्गव २५ कटकम् २६ दीनरक्ष २७ महोरगा २८ वातापिना २९ पिनाकिना ३० सदालिका ३१ यमराज ३२ हरिदेवे ३३ सव्यायामा ३४ भोविकर्त्तन ३५ नन्दनवन ३६ नलकूवर ३७ सहसानुत ३८ रसविभवेन ३९ साहसहसिक ४० नवतमसंमद ४१ मार ४२ वत ४३ युवा ४४ सदा ४५ वह्नि ४६ मया ४७ लता ४८ नुत ४९ लव ५० विभा ५१ ॥*॥ अथ संस्कृतप्राकृतसमपुंलिङ्गशब्दाः । आहार १ हार २ विहार ३ सार ४ समर ५ सम्भोग ६ रोग ७ असुर ८ संहार ९ अमर १० वार ११ वारण १२ गण १३ टङ्कार १४ भार १५ आकर १६ लोल १७ उल्लोल १८ विलास १९ वायस २० हर २१ अहङ्कार २२ हीर २३ अङ्कुर २४ नीहार २५ उरग २६ राग २७ भाल २८ तरल २९ गोविन्द ३० कन्द ३१ उदर ३२ तरुण ३३ तरणि ३४ दास ३५ मोह ३६ सन्दोह ३७ मास ३८ खुर ३९ खर ४० तर ४१ मल ४२ सङ्कर ४३ आरम्भ ४४ हास ४५ कर ४६ करि ४७ किरि ४८ कीर ४९ कोल ५० कन्दोल ५१ धीर ५२ मल ५३ मलय ५४ करीर ५५ वामदेव ५६ असि ५७ वीर ५८ नर ५९ नरक ६० करङ्क ६१ दण्ड ६२ चण्डाल ६३ रङ्ग ६४ दर ६५ सरल ६६ कलङ्क ६७ कम्बल ६८ आकार ६९ पङ्क ७० खल ७१ बहुल ७२ कुरङ्ग ७३ देह ७४ सन्देह ७५ सङ्ग ७६ पर ७७ कुरर ७८ तरङ्ग ७९ चारु ८० सञ्चार ८१ भङ्ग ८२ अरि ८३ हरि ८४ परिणाह ८५ कण्ठ ८६ कुण्ठ ८७ अहि ८८ दाह ८९ परिसर ९० रवि ९१ हाहा ९२ मञ्जु ९३ मञ्जीर ९४ बाह ९५ अचल ९६ कुल ९७ कुमार ९८ कुम्भ ९९ कुम्भीर १०० सार १०१ विरल १०२ कदल १०३ जार १०४ कन्दर १०५ उदार १०६ पार १०७ जम्बीर १०८ कैशरि १०९ वराह ११० मुरारि १११ काल ११२ कोकोल ११३ कुन्तल ११४ चमूर ११५ विराम ११६ बाल ११७ आलोल ११८ बाहु ११९ रण १२० सङ्कर १२१ चोल १२२ भार १२३ संसार १२४ केरल १२५ समीरण १२६ टङ्क १२७ ताल १२८ आसार १२९ चामर १३० कुलीर १३१ तुरङ्ग १३२ सूर १३३ कङ्काल १३४ कन्दल १३५ कराल १३६ विकास १३७ पूर १३८ हेरम्ब १३९ कम्बु १४० विधु १४१ सिन्धु १४२ बुध १४३ अनुबन्ध १४४ कुन्द १४५ इन्द्र १४६ मन्दर १४७ समीर १४८ समूह १४९ गन्ध १५० भीम १५१ अङ्क १५२ सङ्कर १५३ किरीट १५४ तमाल १५५ गुञ्जा १५६ हिन्ताल १५७ तोमर १५८ महीरुह १५९ विम्ब १६० पुञ्ज १६१ हिण्डीर १६२ पिण्ड १६३ वर १६४ संवर १६५ कोण १६६ काण १६७ संरम्भ १६८ सोम १६९ परिरम्भ १७० विकार १७१ वाण १७२ वसन्त १७३ आसव १७४ वैसन्त १७५ वास १७६ वासव १७७ वासर १७८ कासार १७९ सार १८० सरस १८१ किरण १८२ अरुण १८३ वारण १८४ ॥*॥ अथ संस्कृतप्राकृतसमस्त्रीलिङ्गशब्दाः । ईला १ खेला २ कला ३ माला ४ रसाला ५ काहला ६ अचला ७ कीला ८ लीला ९ वला १० वाला ११ लोला १२ दोला १३ अलसा १४

मसी १५ धरणी १६ धारणी १७ गोणी १८ रोहिणी १९ रमणी २० मणी २१ वीणा २२ वाणी २३ वमा २४ वेणी २५ रीढ़ा २६ गङ्गा २७ तरङ्गिणी २८ कन्दली २९ लहरी ३० नारी ३१ रामा ३२ भेरी ३३ वसुन्धरा ३४ काली ३५ कराली ३६ चामुण्डा ३७ चण्डा ३८ रण्डा ३९ तुला ४० मही ४१ ॥*॥ अथ संस्कृतप्राकृतक्लीवलिङ्गसमशब्दाः। जल १ फल २ पल ३ मूल ४ वारि ५ कीलाल ६ कूल ७ वल ८ पलल ९ दुकूल १० लिङ्ग ११ गम्भीर १२ कूल १३ सलिल १४ कमल १५ चीर १६ तुच्छ १७ राजीव १८ नीर १९ इल २० रजत २१ कुटीर २२ दारु २३ लाल २४ पटीर २५ कारण २६ रोहण २७ चेल २८ कुहर २९ अम्बर ३० मन्दिर ३१ कुण्डल ३२ मण्डल ३३ तामरस ३४ कुण्डल ३५ अङ्गद ३६ पुर ३७ अरविन्द ३८ लोह ३९ अङ्ग ४० तड़ाग ४१ करण ४२ कुल ४३ तोरण ४४ मरण ४५ तुङ्ग ४६ अलम् ४७ आगार ४८ भासुर ४९ ॥ * ॥ अथ संस्कृतप्राकृतसमक्रियापदानि। भण १ देहि २ गच्छ ३ संहर ४ कुरु ५ चोरय ६ मारय ७ अवगच्छ ८ अवलोकय ९ अवचिन्तय १० खाद ११ ॥*॥ अथ निरोष्ठ्यपुलिङ्गशब्दाः। नीहार १ हार २ हरिण ३ अङ्ग ४ हर ५ अट्टहास ६ कैलास ७ कास ८ रद ९ नारद १० सिंह ११ शङ्ख १२ शेष १३ अहि १४ हंस १५ घनसार १६ इलि १७ इन्द्र १८ नाग १९ हिमीर २० निर्झर २१ शरदन २२ चन्द्रकान्त २३ शृङ्गार २४ सागर २५ तगाड़ २६ अलाश्य २७ भग २८ हर्य्यक्ष २९ तक्षक ३० नख ३१ क्षत ३२ दीक्षित ३३ अक्ष ३४ नाराच ३५ काच ३६ कक्ष ३७ कौचक ३८ चक्षरीक ३९ चाणक्य ४० चारण ४१ गण ४२ चक्ष ४३ काक ४४ शोक ४५ संहार ४६ सारस ४७ रस ४८ अरि ४९ रसाल ५० साल ५१ कङ्काल ५२ क्राल ५३ कलि ५४ शैल ५५ खल ५६ अनल ५७ अर्क ५८ किञ्जल्क ५९ कल्क ६० क्षार ६१ शङ्कर ६२ कीर ६३ हीर ६४ लङ्केश ६५ केश ६६ गर ६७ केशव ६८ देश ६९ लेश ७० आनन्द ७१ नन्दन ७२ धनञ्जय ७३ खञ्जरीट ७४ कीट ७५ अग्नि ७६ कण्टक ७७ कटाह ७८ कटाक्ष ७९ यक्ष ८० दक्ष ८१ अङ्क ८२ यज्ञ ८३ जनक ८४ अञ्जलि ८५ यन्त्र ८६ यत्न ८७ रत्नाकर ८८ अन्धक ८९ धराधर ९० धीर ९१ शीर ९२ नासीर ९३ नारायण ९४ कृष्ण ९५ हृषीकेश ९६ ॥ * ॥ अथ निरोष्ठ्यस्त्रीलिङ्गशब्दाः। गङ्गा १ गीता २ सती ३ सीता ४ सिद्धि ५ सन्ध्या ६ गदा ७ गया ८ आशी: ९ काशी १० निशा ११ नामा १२ कान्ति १३ शान्ति १४ दया १५ रसा १६ आर्द्रा १७ निद्रा १८ हरिद्रा १९ दृक् २० द्राक्षा २१ लाक्षा २२ धृति २३ कृति २४ छाया २५ जाया २६ कथा २७ कान्ता २८ धात्री २९ रात्रि ३० रति ३१ गति ३२ कन्धरा ३३ धारणा ३४ धारा ३५ तारा ३६ कारा ३७ जरा ३८ धरा ३९ आजि ४० राजि ४१ रजनी ४२ अर्त्ति ४३ कीर्त्ति ४४ कन्या ४५ तटी ४६ नटी ४७ नारी ४८ सारी ४९ दरी ५० दासी ५१ घटिका ५२ खटिका ५३ जटा ५४ कक्षा ५५ रक्षा ५६ शिखा ५७ संख्या ५८ कालिन्दी ५९ कलिका ६० कला ६१ काली ६२ कराली ६३ दुर्गा ६४ ॥* अथ निरोष्ठ्यक्लीवलिङ्गशब्दाः। चरण १ करण २ चक्र ३ चत्र ४ नक्षत्र ५ तक्र ६ रजत ७ शत ८ शरीर ९ चीर १० नीर ११ अक्षि १२ तीर १३ धन १४ कनक १५ निधान १६ ध्यान १७ सन्धान १८ दान १९ नलिन २० नगर २१ गात्र २२ छत्र २३ नेत्र २४ अस्थि २५ दात्र २६ आलिङ्गन २७ स्थान २८ शिर: २९ चरित्र ३० जल ३१ स्थल ३२ स्थाल ३३ कलत्र ३४ चित्र ३५ कीलाल ३६ जाल ३७ अलक ३८ नाल ३९ दैन्य ४० लिङ्ग ४१ अङ्ग ४२ लावण्य ४३ हिरण्य ४४ सैन्य ४५ अस्त्र ४६ अजिन ४७ यान ४८ अस्रक् ४९ काञ्चन ५० आनन ५१ कानन ५२ झाटक ५३ नाटक ५४ नाट्य ५५ तैल ५६ चेल ५७ रसातल ५८ अदन ५९ सदन ६० आनन ६१ निदान ६२ दधि ६३ चन्दन ६४ अक्षर ६५ लक्षण ६६ लक्ष ६७ शस्त्र ६८ शास्त्र ६९ दल ७० इल ७१ ॥ * ॥ अथ निरोष्ठक्रियापदानि। आशास्ते १ अस्ति २ चकास्ति ३ निन्दति ४ सृजति ५ आशंसति ६ क्रीड़ति ७ ध्यायति ८ अर्हति ९ याचते १० याति ११ वहति १२ आराधति १३ वसति १४ शेते १५ गच्छति १६ यच्छति १७ इच्छति १८ नयति १९ आयाति २० इन्ति २१ ईक्षते २२ अश्नाति २३ स्नाति २४ दधाति २५ याति २६ जयति २७ हसति २८ करोति २९। इति कविकल्पलतायां १ स्तवके २ कुसुमम् ॥

शब्दकारः, त्रि, (शब्दं करोतीति। क + अण्।) "न शब्दश्लोककलहगाथेति।" ३। २। २४। इति टप्रतिषेधः।) शब्दं करोति यः। यथा, "सतामरुस्करं पक्षी वैरकारं नराशनम्। हन्तुं कलहकारोऽसौ शब्दकारः पपात खम् ॥"

इति भट्टौ ५ सर्गः ॥

शब्दग्रहः, पुं, (शब्दं गृह्णात्यनेनेति। ग्रह + "ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) कर्णः। इत्यमरः ॥ शब्दस्य ग्राहश्च ॥

शब्दनः, त्रि, (शब्द कर्त्तुं शीलमस्य। शब्द + "चलनशब्दार्थादकर्मकादुच्।" ३।२।१४८। इति तच्छीले युच्।) शब्दकर्त्ता। तत्पर्य्यायः। रवणः २। इत्यमरः ॥ (शब्द + भावे ल्युट्।) शब्दमात्रं, क्ली ॥

शब्दभेदी, [न्] पुं, (शब्दमनुसृत्य भेत्तुं शीलमस्य। भिद् + णिनिः।) अर्জ্জুनः। इति त्रिकाण्डशेषः॥ पार्थः। इति केचित् ॥ वार्षविशेषः। इति रामायणम् ॥

शब्दवेधी, [न्] पुं, (शब्दमनुसृत्य वेद्धुं शीलमस्य। विध + णिनिः।) अर्জ্জुनः। इति धनञ्जयः ॥ दशरथराजः। यथा,—

"लब्धशब्देन कौशल्ये कुमारेण धनुष्मता।
कुमारः शब्दवेधीति मया पापमिदं कृतम् ॥"

इति वाल्मीकीये रामायणे ६ अध्यायः ॥

शब्दवेधी इत्यवं लब्धकीर्त्तिर्नेति यावत्। इति तट्टीका ॥

शब्दाधिष्ठानं, क्ली, (शब्दस्य अधिष्ठानं आश्रयस्थानम्।) कर्णः। इति हेमचन्द्रः ॥

शम, उ भ य इर् शमे। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक० सेट्। क्षान्तेट्।) उ, शमित्वा शान्त्वा ॥ भ य शाम्यति। इर, अशमत् अशमीत्। पुषादित्वाच्चित्यं ङ इत्यन्ये। शमः शान्तीभावः। शशाम दृष्टापि विना दवाग्निरिति रघुः। शम इति पदस्य आन्तस्थापि सम्भवे शान्तीकरणेऽप्ययमिति धातुप्रदीपः। "वरेण शमितुं लोकानलं दग्धुं हि तत्तपः ॥"

इति कुमारसम्भवम् ॥

'वचो निशम्याधिपतिर्दिवौकसाम्।'

इत्यादावनेकार्थत्वात् श्रुत्वेत्यर्थः॥ वा शमयम इत्यत्र वाशब्दस्य व्यवस्थावाचित्वादस्य औ नित्यं ह्रस्वः शमयति। इति दुर्गादासः॥

शम, ङ क ञ आलोचे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-उभ०-इतिकेचित्-सक०-सेट्।) आलोचः प्रणिधानम्। वा शम यम इत्यत्र वाशब्दस्य व्यवस्थावाचित्वात् अस्य स्वार्थे औ ह्रस्वाभावः। ङ क, शामयते कार्य्यं सुधीः। ञ शामयति शामयते।

"निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥"

अयमात्मनेपदीत्यन्ये। इति दुर्गादासः ॥

शमः, पुं, (शम्यत इति। शम + इलचेति घञ् नोदात्तोपदेशेति हृद्भावः।) शान्तिः। इत्यमरः ॥ (यथा, राजतरङ्गिण्याम्। ४। ३८१। "विरागशैलमथितात् तस्य चित्तमहोदधेः। प्रकोपकालकूटस्य पश्चात् शमसुधोदयात् ॥") मोक्षः। इति त्रिकाण्डशेषः ॥ पाणिः। इति शमशब्दटीकायां रामाश्रमः ॥ उपचारः। इति राजनिर्घण्टः ॥ अन्तरिन्द्रियनिग्रहः। इति वेदान्तसारः ॥ अन्तःकरणसंयमः। इति भगवद्गीतादशमाध्यायस्य ४ श्लोकटीकायाम् श्रीधरस्वामी ॥ (यथा, गीतायाम्। १०।४। "बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ॥") विषेषककर्म्मोपरमः। इति च तस्यैव ६ अध्यायस्य ३ श्लोकटीकायां श्रीधरस्वामी ॥ (आन्तरिन्द्रियनिग्रहः। यथा भागवते। १। ३२। ३३। "सत्यं शौचं दया मौनं बुद्धिर्ह्रीः श्रीर्यशः क्षमा। शमो दमो भगश्चेति यत् सङ्गादयाति सङ्क्षयम् ॥"

सर्वकर्म्मनिवृत्तिः। यथा, गीतायाम्। ६। ३।
"योगारूढस्य तस्यैव शमः कारणमुच्यते॥"
"शमः उपरमः सर्वकर्म्मभ्यो निवृत्तिः।" इति भाष्करभाष्यम्॥ शान्तरसस्य स्थायिभावः। यथा, साहित्यदर्पणे। ३। २३८।
"शान्तः शमः स्थायिभाव उत्तमः प्रकृतिर्मतः॥"
निवृत्तिः। यथा, राजतरङ्गिण्याम्। २। ५६।
"अभवन्निर्म्मलं व्योम देवौकस्त्वैः सह क्रमात्।
साकं भूपालशोकेन दुर्भिक्षञ्च शमं ययौ॥")
शमकः त्रि, (शमयतीति। शम+णिच्+खुल्। "नोदात्तोपदेशेति।" ७। ३। ३४। इनि न दीर्घः।) शान्तिकारकः। अन्तशमधातोर्ण्वुलन्तप्रत्ययेन निष्पन्नमेतत्॥
शमथः पुं, (शम+"इगुपधमिभ्यश्च।" इति थः। इत्युज्ज्वलदत्तः। ३। ११४।) शान्तिः। इत्यमरः॥ मन्त्री। इति मेदिनी॥
शमनं, क्ली,(शम+ल्युट्।) यज्ञार्थपशुहननम्। इत्यमरः॥ शान्तिः। इति मेदिनी॥ (यथा, पाणिनौ। ५। १। ३८। "वातस्य शमनं कोपनं वा।" इति काशिका॥) चर्म्मचम्। इति धरणिः॥ हिंसा। इति हेमचन्द्रः॥ (प्रतिसंहारः। यथा, मार्कण्डेये। ७८। १३।
"निमेषकोष्ठादिमयः कालरूपः क्षयात्मकः।
प्रसीद स्वेच्छया रूपं स्वतेजःशमनं कुरु॥"
निवारकः। यथा, तत्रैव देवीमाहात्म्ये।
"दुर्वृत्तवृत्तशमनं तव देवि! शीलम्॥")
शमनः, पुं, (शमयति पापिनां कर्म्म आलोचयतीति। कर्त्तरि ल्युः।) यमः। इत्यमरः॥ नगभेदः। इति शब्दचन्द्रिका॥ कषायः। इति राजनिर्घण्टः॥
शमनस्वसा, [ऋ] स्त्री, (शमनस्य यमस्य स्वसा।) यमुना। इत्यमरः॥
शमनी,स्त्री,(शमयति नृणां व्यापारान्। शम+ल्युः। स्त्रियां ङीप्।) रात्रिः। इति शमनीपदशब्ददर्शनात्॥ (शाम्यते अनेन इत्यर्थे करणे ल्युटि शान्तिकारके, त्रि। यथा, भागवते। ३। २४। ३९।
"मात्रे चाध्यात्मिकीं विद्यां शमनीं सर्वकर्म्मणाम्॥")
शमनीपदः, पुं, (शमस्यां सीदन्तीति। सद्+अच्।) निशाचरः। राक्षसः। इति त्रिकाण्डशेषः॥
शमलं, क्ली, (शम+"शाकशम्योर्नित्।" उणा०। १। १११। इति कलः।) विष्ठा। इत्यमरः॥ पापम्। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, भागवते। २। ७। ३।
"क्षये यथात्मशमलं गुणसङ्गप्रदम्॥")
शमान्तकः, पुं, (शमश्च शान्तेरन्तकः।) कामदेवः। इति त्रिकाण्डशेषः॥
शमिः, स्त्री, शिम्बा। इति हेमचन्द्रः॥
शमितः, त्रि, (शम+क्तः।) शान्तः। इत्यमरः॥
शमिरः, पुं, शमीवृक्षः। इति शब्दरत्नावली॥
शमिरोहः, पुं, शिवः। इति त्रिकाण्डशेषः॥
शमी स्त्री, हवविशेषः। शाँइ इति भाषा। (यथा, शाकुन्तले। ३।
"अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥")
तत्पर्य्यायः। शम्युफला २ शिवा ३। इत्यमरः॥ शम्युफली ४। इति शब्दरत्नावली॥ शान्ता ५ तुङ्गा ६ कवरिपुफला ७ केशमथनी ८ईशानी ९ लक्ष्मीः १० तपनतनया ११ इष्टा १२ शुभंकरी १३ हविर्गन्धा १४। मेध्या १५ दुरितदमनी १६ शम्युफलिका १७ समुद्रा १८ मङ्गल्या १९ सुरभिः २० पापशमनी २१ भद्रा २२ शङ्करी २३ केशहन्त्री २४ शिवाफला २५ सुपवा २६ सुखदा २७। अस्य गुणाः। रूक्षत्वम्। कषायत्वम्। रक्तपित्तातिसारनाशित्वञ्च। तत्फलगुणाः। गुरुत्वम्। स्वादुत्वम्। रूक्षत्वम्। उष्णत्वम्। केशनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"शमी शम्युफला तुङ्गा केशहन्त्री शिवाफला।
मङ्गल्या च तथा लक्ष्मीः शमीरः स्वस्थिका स्मृता॥
शमी तिक्ता कटुः शीता कषाया रेचनी लघुः।
कम्पकासश्वासकुष्ठार्शःक्रिमिजित् स्मृता"
इति भावप्रकाशः॥॥
शिम्बा। छिमड़ा इति भाषा। इत्यमरः॥
वागुजिः। इति मेदिनी॥ (कर्म्म। यथा, ऋग्वेदे। ६। २। २।
"यूजे यत्ते भिः शमे शमीभिः।"
"शमीभिः कर्म्मभिः क्रक्षचान्द्रायणादिभिः॥"
इति तद्भाष्ये सायणः॥)
शमी, [न्] त्रि,शान्तः। शमो विद्यतेऽस्य इत्यर्थे इन्प्रत्ययेन निष्पन्नमिदम्॥
शमीकः, पुं, मुनिविशेषः। यथा,—
"जलाशयमचक्षाणः प्रविवेश तमाश्रमम्।
ददर्श मुनिमासीनं शान्तं मीलितलोचनम्॥"
इति श्रीभागवते। १। १८॥
अस्यार्थः। अचक्षाणः अपश्यन्। तं प्रसिद्धमाश्रमं तस्मिन् मुनिं शमीकम्। इति श्रीधरस्वामी॥
शमीगर्भः, पुं,(शम्या गर्भः।) ब्राह्मणः। अग्निः। इति हेमचन्द्रः॥
शमीधान्यं,क्ली,(शमी यज्ञादिकर्म्म तदर्थं धान्यम्) माषादिः। इत्यमरः॥ तत्पर्य्यायगुणाः।
"शमीजाः शिम्बिजाः शिम्बातराः सूप्याश्च वैदलाः।
वैदला मधुरा रूक्षाः कषायाः कटुपाकिनः॥
वातलाः कफपित्तघ्ना बहुमूत्रमला हिमाः।
ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारकाः॥"
मुद्गमसूरयोराध्मानकारित्वमन्यैरप्यपेक्ष्यते। न तु सर्व्वथा। एतयोरपि किञ्चिदाध्मानकारित्वदर्शनात्। इति भावप्रकाशः॥
अपि च।
"शूकधान्यं शमीधान्यं समातीतं प्रशस्यते।
परतो वातलत्वञ्च प्रायेणातिनवं गुरु॥
यवगोधूममाषाश्च तिलाश्चातिनवा हिताः।
पुराणा विरसा रूक्षा न तथार्थकरा मताः॥"
इति राजवल्लभः॥
शमीपत्रा, स्त्री, (शम्याः पत्राणीव पत्राण्यि यस्याः।) सत्यानुद्वृक्षः। इति जटाधरः॥
शमीरः, पुं, (क्रक्षा शमी। "कुटीशमीशुण्डाभ्यो रः।" ५। ३। ८८। इति रः।) कक्षा शमी। इत्यमरः॥
शम्या, स्त्री, विद्युत्। इत्यमरः॥
शम्याकः, पुं, आरग्वधः। इत्यमरः॥ विषाकः। यावकः। इति हेमचन्द्रः॥ (दक्षिणापुरवासी कश्चिद्ब्राह्मणः। यथा, महाभारते। १२। १७६। २३।
"इत्येतद्दाक्षिणात्येषु ब्राह्मणेषूपवर्णितम्।
सम्याकेन पुरा सख्यं तस्मात्त्यागः परो मतः॥")
शम्पातः, पुं, आरग्वधः। इति शब्दरत्नावली॥
शम्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०सक०-सेट्।) शम्बति। इति दुर्गादासः॥
शम्बः, पुं, (शम्+"शमेर्वन्।" उणा०। ४। ८४। इति वन्। यद्वा,शमस्त्यस्येति। शं+"कंशंभ्यां बभयुस्तितुतयसः" ५। ४। १३८। इति बः।) वज्रम्। (यथा, ऋग्वेदे। १०। ४२। ७।
"उशो यः शम्बः पुरुहूत तेन।"
"शम्ब इति वज्रनाम।" इति तद्भाष्ये सायणः॥ सुषलाग्रखलोहमण्डलकम्। इति मेदिनी॥ लौहकाष्ठी। इति हेमचन्द्रः॥ अनुलोमकर्म्मचम्। इति शब्दार्थचन्द्रिकायां भरतः॥ दरिद्रः। इति संक्षिप्तसारोणादिवृत्तिः॥ भाग्यवति, त्रि। इति रामाश्रमः॥
शम्बरं, क्ली, सलिलम्। व्रतम्। वित्तम्। इति नानार्थरत्नमाला॥ चित्रम्। बौद्धव्रतविशेषः। इति विश्वहेमचन्द्रौ॥ (मेघः। यथा, ऋग्वेदे। २। २४। २। "अदर्हन्मन्युना शम्बराणि॥"
"शम्बराणि मेघनामैतत् मेघान् व्यदर्हः वर्षणार्थं विदारितवान्॥" इति तद्भाष्ये सायणः॥)
शम्बरः, पुं, मृगविशेषः। दैत्यविशेषः। इति मेदिनी॥ (यथा, ऋग्वेदे। १। ५१। ६।
"अरन्धयो तिथिग्वाय शम्बरम्।"
"शम्बरं एतन्नामानमसुरम्।" इति तद्भाष्ये सायणः॥ यथा च महाभारते। १। ६५। २३।
"शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुतः।
असिलोमा च केशी च दुर्जयश्चैव दानवः॥")
मत्स्यविशेषः। शैवविशेषः। जिनभेदः। इति विश्वः॥ युद्धम्। श्रेष्ठः। इति धरणिः॥ चित्रकहृक्षः। लोध्रः। अर्জ্জুनवृक्षः। इति राजनिर्घण्टः॥ शम्बरासुरस्य वधोपाख्यानं श्रीभागवते १०। स्कन्धे ५५ अध्याये द्रष्टव्यम्॥
शम्बरस्कन्दः, पुं, (शम्बरनामकः स्कन्दः। वाराहीस्कन्दः। इति राजनिर्घण्टः॥

शम्बरचन्दनं, क्ली, (शम्बरनामकं चन्दनम्।) चन्दनविशेषः। तत्पर्य्यायः। कैरातम् २ वङ्गजगन्धम् ३ वल्यम्। ४ गन्धकाष्ठम् ५ कैरातकम्६ शैलगन्धम्। ७। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। उष्णत्वम्। श्लेष्मानिलश्रमपित्तविस्फोटपामादिकुष्ठव्रणधातापविमोहनाशित्वञ्च इति राजनिर्घण्टः॥

शम्बरसूदनः, पुं, (शम्बरं सूदयतीति। सूद+ल्युः कामदेवः। इति हलायुधः॥

शम्बरारिः, पुं, (शम्बरस्यारिः।) कामदेवः। इत्यमरः॥

शम्बरी, स्त्री, शालुपर्णी। इति मेदिनी॥ माया इति शब्दरत्नावली॥

शम्बलः, पुं, क्ली, कूलम्। पाथेयम्। मक्षरः। इति मेदिनी॥

शम्बाक्षतं, त्रि, (शम्ब+"क्षञो द्वितीयतृतीयशम्बबीजात् क्षयौ।"५।४।५८। इति डाच्) द्विवारकृष्टक्षेत्रम्। तत्पर्य्यायः। द्विगुणाकृतम्२ द्वितीयाकृतम् ३ द्विहलम्४ द्विसीत्यम् ५। इत्यमरः॥

शम्बुः, पुं, शम्बुकः। यथा,—

"शम्बूकः शम्बुको ज्ञेयः पूर्वः कान्तस्तु सर्वदा।
ककारेण विना शेषो दृश्यते ग्रन्थविस्तरे॥"

इति हेमचन्द्रः। इत्यमरटीकायां भरतः॥

शम्बुकः, पुं, (शम्बु+स्वार्थे कन्।) शम्बुकः यथा,

"शम्बूकः शम्बुको ज्ञेयः पूर्वः कान्तस्तु सर्वदा।
ककारेण विना शेषो दृश्यते ग्रन्थविस्तरे॥"

इति हेमचन्द्रः। इत्यमरटीकायां भरतः॥

शम्बुकः, पुं, शम्बूकः। इति शब्दरत्नावली॥

शम्बूकः, पुं, स्त्री, (शम्+"उलूकादयश्चेति" उणा० ४। ४१। इति उकः वुगागमश्च निपात्यते।) जलजन्तुविशेषः। शामूक इति भाषा। तत्पर्य्यायः। जलशुक्तिः २। इत्यमरः॥ शम्बुका ३ शम्बुकः ४ शम्बुकः ५ शाम्बुकः ६ शम्बुः ७ शाम्बुकः ८। इति शब्दरत्नावली॥ जलडिम्बः ९ दुग्धरः १० पङ्कमण्डूकः ११। इति हारावली॥ पुं, गजकुम्भान्तर्भागः। धोङ्गः। गूढतापसः। (यथा, उत्तरचरिते। २।

"दत्ताभये त्वयि यमादपि दण्डधारे
सञ्जीवितः शिशुरयं मम चेयमद्धिः।
शम्बूक एष शिरसा चरणौ ननस्ते
सत्सङ्गजानि निधनान्यपि तारयन्ति॥")

इति मेदिनी॥ दैत्यविशेषः। शङ्खः। इति हेमचन्द्रः। क्षुद्रशङ्खः। इति राजनिर्घण्टः॥

शम्बूका, स्त्री, (शम्बुक+टाप्।) जलशुक्तिः। इति राजनिर्घण्टः॥

शम्भलः, पुं, ग्रामविशेषः। अधुना सम्बल-मोरदाबाद इति नाम्ना ख्यातः। तत्र षष्टितीर्थानि सन्ति कल्की चाविर्भूय सहस्रं समाः स्थास्यति यथा,—

"शम्भले वसतस्तस्य सहस्रं परिवत्सराः।
व्यतीता भ्रातृपुत्रस्वज्ञातिसम्बन्धिभिः सह॥
शम्भले ग्रामे श्रेयोऽभाषणकचत्वरैः।
पताकाध्वजचित्राद्यैर्यथेन्द्रस्यामरावती॥
यत्रास्ते षष्टितीर्थानां सम्भवः शम्भलेऽभवत्।
मृत्यौ मोक्षः क्षितौ कल्केरकल्कस्य क्षयाश्रयः॥
वनोपवनसन्तानानानाकुसुमसङ्कुलैः।
शोभितं शम्भलग्रामं मन्ये मोक्षोपमं भुवि॥
महीमाक्षास्य भगवान् निजजन्मक्षतोद्यमः।
शम्भलग्रामविप्रर्षिभावशेष परात्मकः॥
सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम्।
द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः॥
जातो दृष्ट्वतुः पुत्रं पितरौ हृष्टमानसौ।
धात्री माता मक्षाषष्ठी नाडीच्छेत्री तदाम्बिका
गङ्गोदकक्लेदमोचा सावित्री माञ्जनोद्यता।
तस्य विष्णोरनन्तस्य माल्लकादात् पयःसुधाम्॥
सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्प्रभुम्।
पूर्णकामा विप्रमुख्यानाहूयादात् गवां शतम्॥
तं बालकं नराकारं विष्णुं मत्वा मुनीश्वराः।
कल्किं म्लेच्छविनाशार्थमाविर्भूतं विदुर्बुधाः।
नामाकुर्वंस्ततस्तस्य कल्किरित्यभिविश्रुतम्॥"

इति कल्किपुराणे १ अध्यायः॥

शम्भली, स्त्री, (शम्भं कल्याणयुक्तं नायकादिकं लाति गृह्णातीति। ला+कः। गौरादित्वात् ङीष्।) कुट्टनी। इत्यमरः॥

शम्भुः, पुं, (शं मङ्गलं भवत्यस्मादिति। शम्+"मितद्वादिभ्य उपसंख्यानम्।" ३। २। १८०। इत्यस्य वार्त्तिकोक्त्या डुः।) शिवः। इत्यमरः॥ (यथा, भागवते। ४। ७। ५७।

"एतद्भगवतः शम्भोः कर्म्मदक्षाध्वरद्रुहः।
श्रुतं भागवतात् शिष्यादुद्धवाद्मे बृहस्पतेः॥"

एकादशरुद्राणामन्यतमः। यथा, विष्णुपुराणे। १। ५। १२३—१२४।

"हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः।
वृषाकपिश्च शम्भुश्च कपर्दी रैवतस्तथा॥
मृगव्याधश्च सर्वश्च कपाली च महामुने।
एकादशैते प्रथिता रुद्राख्यिभुवनेश्वराः॥")

ब्रह्मा। (यथा, महाभारते। १। ६४। ४५।

"तामुवाच महाराज भूमिं भूमिपतिः प्रभुः।
प्रभवः सर्वभूतानामीशः शम्भुः प्रजापतिः॥")

वुद्धः। इति मेदिनी॥ विष्णुः। इति हलायुधः॥ (यथा महाभारते। १२। ४३। ७।

"विचक्षुः शम्भुरेकस्त्वं विभूर्दामोदरोऽपि च॥")

सिद्धः। इति शब्दरत्नावली॥ श्वेतार्कः। इति चन्द्रिका॥ (अग्निः। यथा, महाभारते। ३। २२०। ५।

"शम्भुमग्निमथ प्राहुर्ब्राह्मणा वेदपारगाः।
आवसथ्यं द्विजाः प्राहुर्दीप्तमग्निं महाप्रभम्॥"

सुखस्य भावयितरि, त्रि। यथा, ऋग्वेदे। १। ४६। १३।

"मनुष्वच्छम्भू आगतम्॥"

"हे शम्भू सुखस्य भावयितारौ।" इति तद्भाष्ये सायणः॥)

शम्भुतनयः, पुं, (शम्भोस्तनयः।) कार्त्तिकेयः। इति शब्दरत्नावली॥ गणेशश्च॥

शम्भुनन्दनः, पुं, (शम्भोर्नन्दनः। गणेशः। इति शब्दरत्नावली॥ कार्त्तिकेयश्च॥

शम्भुप्रिया, स्त्री, (शम्भोः प्रिया।) आमलकी इति शब्दचन्द्रिका॥ दुर्गा च॥

शम्भुवल्लभं, क्ली, (शम्भोर्वल्लभम्।) श्वेतकमलम्। इति राजनिर्घण्टः॥ शिवप्रिये, त्रि॥

शम्या, स्त्री, (शम्यतेऽनयेति। शम+यत्। टाप्।) युगकीलकः। इत्यमरः॥ (यथा, ऋग्वेदे। १। ३३। १३।

"उद्व उर्म्मिं शम्याः हत्वापो योक्त्राणि मुञ्चत॥"

दक्षिणहस्तग्रहीततालविशेषः। इति सङ्गीतशास्त्रम्॥ (दण्डयष्टिः। इति मेदातिथिः॥ यथा मनुः। ८। २३७।

"शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु॥")

शम्याक्षेपः, पुं, (शम्यायाः क्षेपो यत्र।) भ्रमितचित्तयष्टिप्रासयावद्भूप्रदेशः। यथा,—

"भ्रामयित्वा बहुगुणं यष्टिः चित्ता समाप्नुयात्।
भुवः प्रदेशं यावन्तं शम्याक्षेपः स उच्यते॥"

इति मार्कण्डेयपुराणे विविंशचरितं नामाध्यायः॥ (यज्ञविशेषः। यथा, महाभारते ३। ८०। ५।

"पुण्यश्चाख्यायते दिव्यं शिवमग्निशिरोऽनघ।
सहदेवोऽयजत् यत्र शम्याक्षेपेण भारत!॥"

"बलवता क्षिप्ता शम्या लगुड़विशेषो यावद्दूरं पतेत् तावान् यज्ञमण्डपो यस्मिन् यज्ञे न शम्या क्षेपस्तेन।" इति तट्टीकायां नीलकण्ठः॥)

शयः, पुं, (शेते सर्वमस्मिन्निति प्रायो वस्तुनः करादीनत्वात्। शी+पुंसीति घः।) हस्तः। इत्यमरः॥ शय्या। सर्पः। इति मेदिनी॥ निद्रा। पणः। इति विश्वः॥

शयण्डः, त्रि, (शेते इति। शी+अण्डन्। इत्युज्ज्वलः। १। १२८।) निद्राशीलः। इत्युणादिकोषः॥ (पुं, विषयः। देशः। इत्युणादिटीका। १। १२८॥)

शयतः, पुं, निद्रालुः। इति संक्षिप्तसारोणादिवृत्तिः॥

शयथः, पुं, (शेते इति। शीङ्+शीङ्शपिरुगमिजौविप्राणिभ्योऽथः।" उणा० ३। ११३। इति अथः।) अजगरः। मृत्युः। निद्रालुः। इति हेमचन्द्रः॥ वराहः। मत्स्यः। इति संक्षिप्तसारोणादिवृत्तिः॥ (नरकम्। यथा ऋग्वेदे। ६। १७। ८।

"विश्वायुः शयथे जघान॥"

"शयथे शयननिमित्ते चरणायेत्यर्थः।" इति तद्भाष्ये सायणः॥)

शयनं, क्ली, (शी+ल्युट्।) निद्रा। शय्या। इत्यमरः॥ (यथा, महाभारते। १। १४५। १४।

"आसनानि च दिव्यानि यानानि शयनानि च
विधातव्यानि पाण्डूनां यथा तुष्येत वै पिता॥")

मैथुनम्। इति मेदिनी॥ अत्र सर्वदेवशयनकालः।

पुलस्त्य उवाच ।
"यदाषाढ़ी समायाति व्रजते चोत्तरायणम् ।
तदा स्वपिति देवेशो भोगिभोगे श्रियः पतिः॥
प्रतिसप्ते विभौ तस्मिन् देवगन्धर्व्वगुह्यकाः ।
देवानां मातरश्चापि प्रसुप्ताश्चाप्यनुक्रमात् ॥
नारद उवाच ।
कथयस्व सुरादीनां शयने विधिमुत्तमम् ।
सर्व्वेषामनुक्रमेणैव पुरस्कृत्य जनार्दनम् ॥
पुलस्त्य उवाच ।
मिथुनाभिगते सूर्य्ये शुक्लपक्षे तपोधन ।
एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् ॥
शेषाहिभोगपर्य्यङ्कं कृत्वा संपूज्य केशवम् ।
कृतोपवीतकञ्चैव मन्त्रेण संपूज्य च द्विजान् ॥
अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः ।
लब्ध्वा पीताम्बरधरं स्वस्तिनिद्रां समानयेत् ॥
त्रयोदश्यां ततः कामः स्वपते शयने शुभे ।
कदम्बानां सुगन्धानां कुसुमैः परिकल्पिते ॥
चतुर्दश्यां तनौ यत्नाः स्वपन्ति सुखशीतले ।
सुवर्णपङ्कजयुते सुखास्तीर्णोपधानके ॥
पौर्णमास्यामुमानाथः स्वपते चर्म्मसंस्तरे ।
वैयाघ्रे च जटाभारं समुद्वह्यान्यचर्म्मणा ॥
ततो दिवाकरो राशिं संप्रयाति च कर्कटम् ।
ततोऽमरार्च्चां रजनी भवते दक्षिणायनम् ॥
ब्रह्मा प्रतिपदि तथा नीलोत्पलदलेऽनघ ।
तल्पे स्वपिति देवानां दर्शयन मार्गमुत्तमम् ॥
विश्वकर्म्मा द्वितीयायां तृतीयायां गिरेः सुता ।
विनायकश्चतुर्थ्यान्तु पञ्चम्यामपि धर्म्मराट् ॥
षष्ठ्यां स्कन्दश्च स्वपिति सप्तम्यां भगवान् रविः ।
कात्यायनी तथाष्टम्यां नवम्यां कमलालया ॥
दशम्यां भुजगेन्द्राश्च स्वपन्ति वायुभोजनाः ।
एकादश्यान्तु कृष्णायां साध्या ब्रह्मन् स्वपन्ति हि ॥
एष क्रमस्ते गदितो निशायां शयने मुने ।
स्वपत्सु तेषु देवेषु प्रावृट्कालः समायथौ ॥
कङ्काः समं बलाकाभिरारोहन्ति नगोत्तमान् ।
वायसाश्चापि कुर्वन्ति नीड़ानि मुनिपुङ्गव ।
वायश्च स्वपन्त्येता ऋतौ गर्भभरालसाः ।
यस्यां तिथ्यां प्रस्वपिति विश्वकर्म्मा प्रजापतिः ।
द्वितीया सा शुभा पुण्या सुपुण्या शयनोदिता॥
तस्यां तिथावर्च्चयेत हरिं श्रीवत्साङ्कं चतुर्भुजम् ।
पर्य्यङ्कस्थं समं लक्ष्म्या गन्धपुष्पादिभिर्मुने ॥
ततो देवाय शय्यायां फलानि पचिपेत् क्रमात् ।
सुरभीणि निवेद्येत्थं विज्ञाप्यो मधुसूदनः ॥
यथा हि लक्ष्म्या न वियुज्यसे त्वं
विविक्रमानन्त जगन्निवास ।
तथास्त्वशून्यं शयनं ममैव
तस्माकमेवेह तव प्रसादात् ॥
तदा स्वशून्यं तव देव तल्पं
स्वयं हि लक्ष्म्या शयने सुरेश ।
सत्येन तेनामितवीर्य्य विष्णो
गार्हस्थ्यरागो मम चास्तु देव ॥
इत्युच्चार्य्य प्रणम्येत्थं प्रसाद्य च पुनः पुनः ।
नक्तं भुञ्जीत देवर्षे तैलचारविवर्जितम् ॥
द्वितीयेऽह्नि द्विजायाग्र्य फलं दद्याद्विचक्षणः ।
लक्ष्मीधर प्रीयतां मे इत्युच्चार्य्य निवेदयेत् ॥
अनेन तु विधानेन चातुर्मास्यव्रतं चरेत् ।
यावद्दृश्चिकराशिस्थः प्रतिभाति दिवाकरः ।
ततो विबुध्यन्ति सुराः क्रमशः क्रमशो मुने ॥
नभस्ये मासि च तथा या स्यात् कृष्णाष्टमी शुभा ।
युक्ता मृगशिरेणैव सा तु कामाष्टमी स्मृता ॥
तस्यां सर्व्वेषु लिङ्गेषु तिथौ स्वपिति शङ्करः ।
वसते सन्निधाने तु तत्र पूजार्च्चया स्मृता ॥"
इति वामने १६ अध्यायः ॥*॥
अथ हरिशयनादिव्यवस्था । भविष्यनारदीययोः ।
"मैत्राद्यपादे स्वपितीह विष्णु-
र्वैष्ण्यमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥"
मैत्रमनुराधा । वैष्णवं श्रवणा । पौष्णं रेवती ।
भविष्ये ।
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्
अन्यत्र पादयोगे तु द्वादश्यामेव कारयेत् ॥"
इत्यत्र नक्षत्रयोगप्राप्तौ फलातिशयः । एतद्विधानं वामनपुराणे ।
"एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् ।
शेषाहिभोगपर्य्यङ्कं कृत्वा संपूज्य केशवम् ॥
अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः ।
लब्ध्वा पीताम्बरधरं देवं निद्रां समानयेत् ॥"
अनुज्ञां लब्ध्वा इत्यन्वयः । एकादशीसमये दिवाशयनीयकल्पनं रात्रौ द्वादशीक्षणे निद्रेति ।
विष्णुधर्म्मोत्तरे ।
"स्वास्तीर्णशयनं कृत्वा प्रीणयेद्भोगशायिनम् ।
आषाढशुक्लद्वादश्यां विष्णुलोके महीयते ॥"
स्वास्तीर्णशयनं शोभनास्तरणयुक्तं खट्वादि ।
वराहपुराणे श्रीभगवानुवाच ।
"अन्यत्तु संप्रवक्ष्यामि कर्म्म संसारमोचनम् ।
कदम्बकुटजैर्बैव धवकोऽर्ज्जुनकैस्तथा ॥
एभिरभ्यर्चनं कुर्य्याद्विधिदृष्टेन कर्म्मणा ।
ततः संस्थापनं कृत्वा मम मन्त्रविधिः स्मृतः ।
नमो नारायणायेत्ति इमं मन्त्रमुदीरयेत् ॥
पश्यन्तु मेघानपि मेघश्यामं
क्षुपागतं सिच्यमानं महीमिमाम् ।
निद्रां भगवान् गच्छतु लोकनाथ
वर्षाक्षिमं पश्यतु मेघवृन्दम् ॥
गच्छैव पश्यैव च लोकनाथ मासा-
श्चत्वारि वैकुण्ठस्य च पश्य नाथ ।
आषाढ़शुक्लद्वादश्यां सर्वशान्तिकरं शिवम् ॥
य एतेन विधानेन भूमि ! मे कर्म्म कारयेत् ।
स पुमान् न प्रणश्येत्तु संसारेषु युगे युगे ॥"
शयने कुटजविधानात् विष्णुधर्म्मोत्तरीयनिबन्धोऽन्यत्र । धवकः कपित्थः । संस्थापन समापनम् । भूमि इति पृथिव्याः सम्बोधनम् ।
"एवमुक्तेन मन्त्रेण कृष्णं सुप्तापयेत्ततः ।
सुप्ते त्वयि जगन्नाथ जगत् सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत जगत् सर्वं चराचरम् ॥"
इति मन्त्रेण पूजयेत् ॥*॥
"प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि ।
कटदानं भवेद्विष्णोर्महापूजा प्रवर्त्तते ॥"
कटदानं पार्श्वपरिवर्त्तः । कामरूपीयनिबन्धे ।
"एवं संपूज्य विधिवद् भाद्रस्य द्वादशीदिने ।
मन्त्रेणानेन देवेशं पार्श्वेन परिवर्त्तयेत् ॥
वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव ॥
त्वयि सुप्ते जगन्नाथ जगत्सर्वं चराचरम् ॥"
ब्रह्मपुराणे ।
"एकादश्यान्तु शुक्लायां कार्त्तिके मासि केशव
प्रसुप्तं बोधयेद्रात्रौ महामङ्गलसंयुतः ॥"
रात्रौ प्रसुप्तमित्यन्वयः । बोधनन्तु दिवैव ॥
"कृत्वा वै मम कर्म्माणि द्वादश्यां मत्परो नरः
ममैव बोधनार्थाय इमं मन्त्रमुदीरयेत् ॥
महेन्द्ररुद्रैरभिनूयमानो
भवान्मुनिर्वन्दितवन्दनीयः ।
प्राप्ता तवेयं किल कौमुदाख्या
जागृध्व जागृध्व च लोकनाथ ॥
मेघा गता निर्म्मलपूर्णचन्द्रः
शरत्पुण्यानि च लोकनाथ ।
अहं ददानीति च पुष्पहेतो-
र्जागृध्व जागृध्व च लोकनाथ ॥
एवं कर्म्माणि कुर्व्वीरन् द्वादश्यां ये यशस्विनि ।
मम मन्त्रा नरश्रेष्ठास्ते यान्ति परमां गतिम् ।
अत्र मन्त्रद्वयपाठान्तरम् ।
"उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते
त्वया चोत्थीयमानेन उत्थितं भुवनत्रयम् ॥"
इति सम्प्रदायागतस्तृतीयः श्लोक इति वाचस्पतिमिश्राः ॥ शयनोत्थानमन्त्रास्तु कल्पतरुप्रभृतिग्रन्थसंवादान्निखिताः । तदेवं द्वादश्यां एकादश्यां वा रैवत्यन्तपादयोगवशाद्विधोत्थानं नक्षत्रयोगाभावे तु द्वादश्यामेव कारयेदिति गुरुचरणाः । जीमूतवाहनस्तु भविष्ये ।
"आ-भा-का-सितपक्षेषु मैत्र्यवसरेवती ।
आदिमध्यावसानेषु प्रस्थापावत्तबोधनम् ॥"
आ-भा-का-सितपक्षेषु आषाढ़-भाद्र कार्त्तिकशुक्लपक्षेषु । एषाञ्च द्वादश्यां प्राप्तौ मुख्यकल्पः । भविष्यपुराणम् ।
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्
अन्यत्र पादयोगे तु द्वादश्यामेव कारयेत् ॥"
विष्णुधर्म्मोत्तरे ।
"विष्णुर्दिवा न स्वपिति न रात्रौ प्रतिबुध्यते ।
द्वादश्यादित्यसंयोगे पादयोगो न कारणम् ॥
अप्राप्ते द्वादशीशुक्ले उत्थानशयने हरेः ।
पादयोगेन कर्त्तव्येनाहोरात्रं विचिन्तयेत् ॥"
वचनान्तरम् ।
"रैवत्यन्तो यदा रात्रौ द्वादश्या च समन्वितः ।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रैवतीम् ॥

हिनान्ते त्रिधा विभक्तदिनद्वतीयभागे दिवो-त्थानमित्यनुरोधात्। अतएव।

"रात्रौ विबोधो विनिहन्ति पौरान्
स्वापो दिवा राट्कुलं नृभर्तुः।
सन्ध्याद्वये स्वस्यफला धरित्री
भवेत्तदाधामपि रोगदुःखम्॥"

इति स्मृतिः॥ वराहपुराणे।

"द्वादश्यां सन्धिसमये नक्षत्रत्रयसम्भवे।
आ-भा-का-सितपक्षेषु शयनावर्त्तनादिकम्॥"

तदेवं शयनादौ कालचतुष्टयम्। द्वादश्यां निशादौ नक्षत्रयोगः। तदभावेऽपि निशाद्य-नादरेण तिथ्यन्तरे पादयोगः। तस्याप्यभावे-ऽपि सन्ध्यायां नक्षत्रमात्रयोगः तस्याप्यभावे द्वादश्यां सन्ध्यायामिति। विष्णुधर्म्मोत्तरे।

"किं तत्रैत्राद्यपादेन दशम्यर्द्धेन यो दिवा।
पौष्णश्रवणेषु किं तेन प्रतिपद्यथ यो निशि॥"

इति दशमीप्रतिपदोर्निषेधात् एकादश्यादि-पौर्णमास्यन्तानां तिथीनामभ्युन्नानम्॥*॥

पद्मपुराणे सर्वदेवशयनादिकमुक्तं यथा,—

"प्रतिपच्चनदस्योक्ता पवित्रारोहणे तिथिः।
त्रिया देव्या द्वितीया तु तिथीनामुत्तमा स्मृता॥
द्वतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च।
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च॥
सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी स्मृता।
मातृणां नवमी प्रोक्ता दशमी वासुकेस्तथा॥
एकादशी ऋषीणान्तु द्वादशी चक्रपाणिनः।"

चक्रपाणिन इति पशव्यवहार इत्यस्मात्।

"त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्दशी।
मम चैव मुनिश्रेष्ठ पौर्णमासी तिथिः स्मृता॥
यस्य यस्य तु देवस्य यच्चक्रं तिथिश्च या।
तस्य देवस्य तस्मिंश्च शयनावर्त्तनादिकम्॥"

अत्र हरिशयनाद्याषाढादिविधानात् तस्माच्च-तुर्थ्यादन्येषामपि तथा। ज्योतिषेऽपि।

"व्रजति यदा मिथुनं विहाय
सकं राजविवर्जितां तिथिं सूर्य्यः।
भवति तदा नियतं हिराषाढः
हरशयनादिविधिर्हितीये मासि॥"

राज्ञा चन्द्रेण विवर्जितां अमावास्याम्। पूर्व-स्मिन्पक्षे मिथुने संक्रान्ते इति शेषः। हरि-नाथोपाध्यायस्तु। यमः।

"चीराब्धौ शेषपर्य्यङ्के आषाढ्यां संविशेद्धरिः।
निद्रां त्यजति कार्त्तिक्यां तयोस्तं पूजयेत् सदा॥
ब्रह्महत्यासमं पापं क्षिप्रमेव व्यपोहति।
हिंसालभैश्च किं तस्य यज्ञैः कार्य्यं महात्मनः।
प्रस्वापे च प्रबोधे च पूजितो येन केशवः॥"

आषाढ़शुक्लैकादशीमारभ्य पौर्णमासीपर्य्यन्तं विष्णोर्निद्राख्यस्वरूपशयनसमयः। अतएव एकादश्यां शयनमभिधाय तदादिदिनपक्षके कर्म्मकथनं ब्रह्मपुराणे। वराहपुराणेऽपि तु। एकादशीकालीनमन्त्रे निद्रापद्मनाभिधानम्। यमस्मृतौ पौर्णमास्यां शयनाभिधानम्। आषाढ़ीपदस्यानुपादेयत्वेन प्रवृत्तेः। एतच्च ब्रह्मपुराणे यद्यप्येकादश्यां प्रबोधसमयः। तेन वराहपुराणे द्वादश्यां प्रबोधाभिधानम्। यम-स्मृतौ कार्त्तिक्यां प्रबोधाभिधानम् सर्वसमञ्जस-मिति। एवमेव त्रयोदशीपाध्यायाः। कल्पतरुस्तु एकादश्यामेव शयनं प्रबोधञ्च। यमस्मृतावा-षाढ़ी कार्त्तिकस्येयमिति व्युत्पत्त्या न तत्रत्य-यानुपपत्तिः। अपवादविषयके क्वचिदुत्सर्ग-प्रवृत्तेरित्याह। श्रीभगवद्वाक्यम्।

"मत्स्यशयने मदुत्साने मत्पार्श्वपरिवर्त्तने।
फलमूलजलाहारी हृदि शय्यं समार्पयेत्॥"

फलाहारपदमनशनपरम्। तेन सर्वथा अन-शनपरत्वम्। इत्येकादशीतत्त्वम्॥*॥

मर्त्यानां शयनविधिनिषेधौ यथा,—

सूत उवाच।

"उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च।
भृत्यैः परिवृतो भुक्त्वा नातित्वरोऽथ संविशेत्॥
शुचिं देशं विविक्तन्तु गोमयेन तु लेपयेत्।
प्रागुदक्प्रवणे चैव संस्वपेत सदा बुधः॥
प्राक्शिराश्च स्वपेन्नित्यं तथा वै दक्षिणाशिराः।
स्वपेदुदक्शिरा नैव तथा प्रत्यक्शिरा न च।
न चान्तर्द्धानहीने तु न तिर्य्यक् च कदाचन॥
शून्यालये श्मशाने तु एकान्ते चतुष्पथे।
महादेवगृहे चापि माल्यवेश्मनि न स्वपेत्॥
न यज्ञनागायतने स्कन्दस्यायतने तथा।
गर्भेषु च विना दीक्षां न स्वपेच्च कथञ्चन॥
धान्यगेहे च विप्राणां गुरूणाञ्च तथोपरि।
नाशुचौ पर्णकीर्णे तु नाशुचिर्नोश्रिखस्तथा॥
दिने सन्ध्यौ न नग्नश्च नोत्तरापरमस्तकः।
आकाशे पर्वते शून्ये न च चैत्यद्रुमे तथा॥
न तु दारिऽभसाकीर्णे नार्द्रपादस्त्वधावितः।
पाखाग्रे शयने नैव बहुदारक्षते न च॥
न दग्धे विद्युता चैव वह्निसृष्टे जले तथा।
न स्वपेत् सन्ध्ययोर्नित्यं न शिरस्यासने कटे॥
एवं स्वपन् नरो नित्यं सुखस्येह परत्रभाक्।
व्यत्यये च भवेद्रोगी मृतो नरकमश्नुते॥"

इति वह्निपुराणे आह्निकतत्त्वोनामाध्यायः॥*॥

अपि च। सति सूर्य्ये शय्यां च न पातनीयां सूर्य्योदयात् पूर्वमुत्तोलनीयां। तथा च स्मृतिः।

"भास्करादृष्टशय्यानि नित्याग्निसहितानि च।
सूर्य्यावलोकदीपानि सद्मानि वेश्मानि भाज-नम्॥
आसनं वसनं शय्या जायापत्यं कमण्डलुः।
आत्मनः शुचिरेतानि न परेषां कदाचन॥"

न कदाचन इत्यनुमतिं विना अन्यथातिव्याप्यनु-पपत्तेः। व्यासः।

"शुचौ देशे विविक्ते तु गोमयेनोपलेपिते।
प्रागुदक्प्रवणे चैव संविशेत्तु सदा बुधः॥
माङ्गल्यं पूर्वकुम्भञ्च शिरःस्थाने निधापयेत्।
वैदिकैर्मन्त्रदैवत्यैर्मन्त्रे रक्षां कृत्वा स्वपेत्ततः॥"

गर्गः।

"सगृहे प्राक्शिराः शेते श्मशाने दक्षिणा-शिराः।
प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः॥"

मार्कण्डेयपुराणे।

"प्राक्शिराः शयने विद्यात् धनमायुश्च दक्षिणे।
पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे॥"

तथा।

"नमस्कृत्याव्ययं विष्णुं समाधिस्थः स्वपेद्विधिः।"

मार्कण्डेयः।

"शून्यागारे श्मशाने च एकान्ते चतुष्पथे।
महादेवगृहे चापि शर्करालोष्टपांशुषु॥
धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि।
न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम्॥
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः।
नाकाशे सर्वशून्ये च न च चैत्यद्रुमे तथा॥"

न स्वपेदित्यर्थः। इत्याह्निकाचारतत्त्वम्॥*॥

अन्यच्च।

"भुक्त्वा च विधिवन्मन्त्रैर्द्विजो भुक्तावशिष्टकम्।
सक्षुत्क्षान्यवजनः स्वपेत् शुष्कपदो निशि॥
नोत्तराभिमुखः स्वप्यात् पश्चिमाभिमुखो न च।
न चाकाशे न नग्नो वा नाशुचिर्नासने क्वचित्॥
न शीर्णायान्तु खट्वायां शून्यागारे न चैव हि।
नापि वंशे च पाखाग्रे शयने वा कदाचन॥"

इति कौर्म्मे उपविभागे १८ अध्यायः॥*॥

अपि च।

"कृतपादादिशौचश्च भुक्त्वा सायं ततो गृही।
गच्छेत् शय्यां समन्त्राञ्च अथवा दारुनिर्म्मिताम्॥
शाल्मलस्य कदम्बस्य नीपमन्दारकस्य च।
किंशुकस्य वटस्याथ तथा कुशमयस्य च॥
आरोहणाद् भवेत् पापं तस्मात्तेषु न च स्वपेत्।
प्ररोहशय्यां सूत्रे वा अपर्णे परमेश्वरि!॥
न शुक्ले नाप्यविते च न दग्धे न च भूतले।
तूलिकायां तथा वस्त्रे शय्याभावे स्वपेदृग्दृढ़ी।
स्वपेच्च पट्टवस्त्रे च कम्बलेषु च॥"

इति मत्स्यसूक्ते ४४ पटलः॥*॥

अपि च।

"सूर्य्येणाभ्युदितो यस्तु त्यक्तः सूर्य्येण यः स्वयम्।
अन्यत्रातुरभावाच्च प्रायश्चित्तीयते नरः॥"

इति विष्णुपुराणे ३ अंशे ११ अध्यायः॥

यस्मिन् सुप्ते सूर्य्य उदेति स सूर्य्येणाभ्युदितः। यस्मिन् सुप्ते अस्तं याति स सूर्य्येण त्यक्तः। सूर्य्योदयास्तसमययोः स्वपन् प्रायश्चित्तीयते पातकी भवेदित्यर्थः। इति तस्य टीका च॥

किञ्च।

"श्वासानष्टौ समुत्तानस्तान् हि १६ पार्श्वे च दक्षिणे।
ततस्त्रिगुणान् ३२ वामे पश्चात् स्वप्यात् यथासुखम्॥
वामदिग्यायामनलो नामेरूर्द्धोऽस्ति जन्तू-नाम।
तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थम॥"

इति भावप्रकाशः॥

शयनीयं, क्ली, (शेतेऽस्मिन्निति। शी + अधिकरणे अनीयर्।) शय्या। इत्यमरः॥ (यथा, माघे। ११। ५।
"रतिपरिचयनम्रनेत्रतन्द्रः कथञ्चित्
गमयति शयनीये शर्वरीं किं करोतु॥"*॥)
शयनयोग्ये, त्रि॥ (यथा, रामायणे। २। ७२। ११।
"श्लक्ष्णोऽयं शयनीयस्थे पर्य्यङ्के हेमभूषितः।
न चायमिक्ष्वाकुजनः प्रहृष्टः प्रतिभाति मे॥")
शयनीयकं, क्ली, (शयनीयमेव। स्वार्थे कन्।) शय्या। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ३३। १७७।
"गत्वा कलिङ्गसेनायाः सुप्तायाः शयनीयके।
सुप्तं मदनवेगं तं स्वरूपे स्थितमैक्षत॥")
शयनैकादशी, स्त्री, (शयनाय शयनस्य वा एकादशी।) श्रीहरेः शयनसम्बन्धितिथिः। सा चाषाढशुक्लैकादशी। तद्विवरणं शयनशब्दे हरिशयनशब्दे च द्रष्टव्यम्॥
शयानकः, पुं, (शी + आनच्। ततः कन्। यद्वा, "आनकः शीङ्भियः।" इति आनक्।) सर्पः। इत्युणादिकोषः॥ लक्कलासः। इति हेमचन्द्रः॥
शयालुः, त्रि, (शयनशीलः। शी + "शीङो रुक्लुसनौ कर्त्तव्यम्। ३। २। १५८। इत्यस्य वार्त्तिकोक्त्या आलुच्। (निद्रालुः। इत्यमरः॥ (यथा, माघे। २। ८०।
"उपायमास्थितस्यापि नक्षत्रस्यार्थाः प्रमाद्यतः।
हन्ति नोपशयस्थोऽपि शयालुर्गजुर्गान्॥")
शयालुः, पुं, (शी + आलुच्। अजगरः।) कुक्करः। इति हारावली॥
शयितः, त्रि, (शी + क्तः।) निद्रालुः। इत्यमरः॥ (शयनः। यथा, कथासरित्सागरे। ५६। १८७।
"तयोः सुपितयोः स्वामि भुक्ते भोजितयोः
स्तयोः।
शये शयितयोस्तेन ज्ञानमौद्दण्डिकं मम॥")
वसन्तकुसुमे, पुं। यथा,—
"वसन्तकुसुमः शेषुः शयितो द्विजकुत्सितः॥"
इति शब्दमाला॥
शयने, क्ली॥
शयितवान्, त्रि, निद्रालुः। शीङ्धातोः क्तवतुप्रत्ययेन निष्पन्नमेतत्॥
शयुः, पुं, (शेते इति। शी + उः।) अजगरः। इत्यमरः॥ (ऋषिविशेषः। यथा, ऋग्वेदे। १। २१२। १६॥
"याभिर्नरा शयवे याभिरत्रये॥"
"हे नरा नेतारावश्विनौ पुरा पूर्वस्मिन् काले शयवे एतत्संज्ञकाय ऋषये।" इति तद्भाष्यम्॥ शयाने, त्रि। यथा, ऋग्वेदे। ४। १८। १२।
"कस्ते मातरं विधवामचक्रत्
शयुं कल्याममजिषांसचरन्ताम्॥"
"कस्तत्तोऽन्यः शयुं शयानं चरन्तं जायतं वा त्वां अजिषांसत्।" इति तद्भाष्यम्॥)
शयुः, पुं, अजगरः। इत्युणादिकोषः॥
शय्या, स्त्री, (शी शयने + "संज्ञायां समजनिषदेति।" ३। ३। ९९। इति क्यप्।) गुम्फनम्। इति मेदिनी॥ शीयते यत्र सा। तत्पर्य्यायः। शयनीयम् २ शयनम् ३। इत्यमरः॥ तल्पम् ४। इति जटाधरः॥ शयनीकम् ५। इति शब्दरत्नावली॥ तस्या गुणाः।
"सुखशय्यासनं सेव्यं निद्रापुष्टिधृतिप्रदम्।
श्रमानिलहरं श्रेष्ठं विपरीतमतोऽन्यथा॥
भूशय्यानिलपित्तघ्नी हृद्या श्लेष्मविवर्द्धिनी।
खट्वा तु वातला प्रोक्ता पट्टी रूक्षोऽतिवातलः॥"
इति राजवल्लभः॥*॥
अपि च।
"त्रिदोषशमनी खट्वा तूली वातकफापहा।
भूशय्या हृद्या श्लेष्मघ्नी काष्ठपट्टी तु वातला॥"
अन्यत् पुनराह।
"भूशय्या वातलातीव रूक्षा पित्तास्रनाशिनी।
सुशय्याशयनं श्रेष्ठं पुष्टिनिद्राधृतिप्रदम्।
श्रमानिलहरं श्रेष्ठं विपरीतमतोऽन्यथा॥"
इति भावप्रकाशः॥*॥
तल्पमनविधानं यथा,—
"श्रुतपादावधौचैव भुक्त्वा सायं ततो गृही।
गच्छेत् शय्यामसङ्कुटितामेव दारसमीपे नृप॥
नाविशालां न वै भग्नां नासमां मलिनां न च।
न च जन्तुमहीं शय्यामधिगच्छेदनास्तृताम्॥"
इति विष्णुपुराणे ३ अंशे ११ अध्यायः॥*॥
तल्पानफलं यथा। याज्ञवल्क्यः।
"गृहधान्याभयोपानच्छत्रमाख्यातुलेपनम्।
यानं श्रेष्ठं प्रियं शय्यां दत्त्वात्यन्तं सुखी भवेत्॥"
प्रियं यदृच्छया लब्धमादि। प्रतिग्रहसमर्थेन शय्या न प्रत्याख्येया। यथा याज्ञवल्क्यः।
"कुप्यः शाकं पयो मद्यं गन्धाः पुष्पं दधि क्षितिः।
मांसशय्यासनं धाना प्रत्याख्येयं न वारि च॥"
सूतोद्देशकदत्तशय्यायश्चे दोषो यथा। ब्रह्मपुराणम्।
"शय्यालङ्कारवस्त्रादि प्रतिगृह्य मृतस्य च।
नरकान् निवर्त्तन्ते धेनुं तिलमयीं तथा॥"*॥
सा च चैत्रतानाङ्गिरोदेवताका। यथा,—
"छत्रं छत्राजिनं शय्यां रथमासनमेव च।
उपानही तथा यानं तथा यत् प्राणवर्जितम्।
चैत्रतानाङ्गिरसश्चैतत् प्रतिगृह्णीत मानवः॥"
इतिशुद्धितत्त्वम्॥*॥
पुष्याभिषेके शय्यापट्टकं यथा,—
"सर्वरत्नसमाहारं पट्टं कार्य्यं हिरण्मयम्।
हस्तविस्तार उच्छ्राये दशाङ्गुल्यः सुशोभनम्॥
स्नानाख्यं सार्द्धहस्तन्तु पट्टं तत्रासनान्वितम्।
शय्याख्यं द्विगुणं दैर्घ्याद्विगुणं सपीठकम्॥"
इति देवीपुराणे त्रैलोक्याभ्युदयपादे पुष्याभिषेकनामाध्यायः॥
शरं, क्ली (शृ + अप्।) जलम्। इति मेदिनी॥
शरः, पुं, (शृणात्यनेनेति। शृ गि हिंसे + "ऋदोरप्।" ३। ३। ५७। इति अप्।) बाणः। इत्यमरः॥ (यथा, रघुः। १। ६१।
"तव मन्त्रकृतो मन्त्रैर्दूरात् प्रशमितारिभिः।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्याभिदः शराः॥")
दध्यग्रभागः। इति मेदिनी॥ दुग्धशरस्य नामान्तरम्। सन्तालिका। दधिशरस्य नामान्तरम्। दधिसारः। दधिसेहः। कट्टरञ्च। इति रत्नमालादयः॥ तृणविशेषः। कांड़ा इति हिन्दी भाषा। (यथा, महाभारते। १। १३८। १५।
"आचार्य्यः कलसाज्ञातो द्रोणः शस्त्रभृतांवरः।
गौतमस्यान्ववाये च शरस्तम्बाच्च गौतमः॥")
तत्पर्य्यायः। इषुः २ काण्डः ३ बाणः ४ मुञ्जः ५ तेजनः ६ गुन्द्रकः ७। इति रत्नमाला॥ उत्कटः ८ शायकः ९ क्षुरः १० दृक्षुप्रः ११ क्षुरिकाग्रः १२ विशिखः १३। अस्य गुणाः। मधुरत्वम्। सतिक्तत्वम्। कोष्णत्वम्। कफश्रान्तिमदापहत्वम्। बलवीर्य्यकारित्वम्। नित्यं निषेवितश्चेत् किञ्चिद्वातकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"भद्रमुञ्जः शरो बाणस्तेजनश्चक्षुवेष्टनः।
मुञ्जो मुञ्जातको बाणः स्थूलदर्भः सुमेधसः॥
मुञ्जश्चक्षुष्यो मधुरं तुवरं शिशिरं तथा।
दाहश्रमाविसर्पास्रमूत्रवस्त्रक्षिरोगजित्।
दीपनश्चयहरं हृद्यं मेखलासूपयुज्यते॥"
इति भावप्रकाशः॥
उशीरः। महापिण्डीतरुः। इति च राजनिर्घण्टः॥ हिंसा। इति गृधात्यर्थदर्शनात्॥ (ज्योतिषोक्तपञ्चमाङ्कः। यथा साहित्यदर्पणे। ४। २६४।
"वेदस्याग्निशरः शुक्रे रिपुबाणाग्निसायकाः॥")
शरजं, क्ली, (शरात् जायते यत् तत्। जन् + डः।) हैयङ्गवीनम्। इति हेमचन्द्रः॥ नवनीतम्। इति केचित्॥
शरजन्मा, [न्] पुं, (शरे शरवणे जन्म यस्य।) कार्त्तिकेयः। इत्यमरः॥ (यथा, रघुः। ३। २३।
"उमाङ्कपालौ शरजन्मनो यथा
यथा जयन्तेन शचीपुरन्दरौ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्प्रतिदृश्यचेष्टितौ॥")
शरटः, पुं, (शृ + शकादित्वात् अटन्।) कुसुम्भशाकः। इति रत्नमाला॥ कृकलासः। इत्यमरटीका॥ (यथा,—
"भद्रस्य कक्ष्यां शरटः प्रविष्टः॥"
इति हास्यार्णवे॥)
शरणं, क्ली, (शृणाति दुःखमनेनेति। शृ + ल्युट्।) गृहम्। (यथा, महाभारते। १। १०६। ४।
"ततोऽग्निकार्य्यां प्रथमं नियुक्तः सत्यवाग्ऋषिः।
दीप्यमानेषु दीपेषु शरणं प्रविवेश ह॥")
रक्षिता। इत्यमरः॥ (यथा, रघवंशे। ८१।

"त्यज संसारमसारं भज शरणं पार्व्वतीरमणम्।
विश्वसिहि श्रुतिशिखरं विश्वमिदं तव निदेशकम् ॥")
रक्षणम्। वधः। इति मेदिनी ॥ घातकः। इति शब्दरत्नावली ॥
शरणा, स्त्री, प्रमारणी। इति शब्दरत्नावली ॥
शरणागतः, त्रि, (शरणमागतः प्राप्तः।) शरणापन्नः। तत्पर्य्यायः। शरणार्पकः२ अभिपन्नः३ शरणार्थी ४। इति त्रिकाण्डशेषः ॥ तद्रक्षणारक्षणयोः गुणदोषौ यथा,—
"शस्त्रहीनञ्च भीतञ्च दीनञ्च शरणागतम्।
यो न रक्षत्यधर्म्मिष्ठः कुम्भीपाके वसेद्युगम् ॥
राजसूयशतानाञ्च रक्षिता लभते फलम्।
परमैश्वर्य्ययुक्तश्च धर्म्मेण स भवेदिह ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५५ अध्यायः ॥*॥
अपि च।
"शरणागतरक्षां यः प्राणैरपि धनैरपि।
कुरुते मानवो ज्ञानी तस्य पुण्यं निशामय ॥
सर्व्वपापविनिर्मुक्तो ब्रह्महत्यामुखैरपि।
शास्त्रेषु निष्कृतिर्दृष्टा महापातकिनामपि।
शरणागतघातस्तु न दृष्टा निष्कृतिः क्वचित् ॥"
इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः॥
शरणार्थी, [न्] त्रि, (शरणं अर्थयते इति। अर्थ+णिनिः।) शरणागतः। इति हेमचन्द्रः ॥ (यथा, महाभारते। १। १६२। १०।
"आगतस्य गृहं त्यागस्तथैव शरणार्थिनः।
याचमानस्य च वधो नृशंसो गर्हितो बुधैः॥")
शरणार्पकः, त्रि, (शरणार्थमर्पयति आत्मानमिति। अर्प+ण्वुल्।) शरणापन्नः। इति त्रिकाण्डशेषः।
शरणिः, स्त्री, पन्थाः। इत्यमरः ॥ सरत्यनयेति सरणिः नान्त्रीति अनिः इदन्तात् पक्षे ईपि सरणी च।
"सरणिः श्रोणिवर्त्मनोरिति दन्त्यादौ रभसः।" गृहू गि हिंसने इत्यस्मात् पूर्व्ववदनौ शरणिस्तालव्यादिश्च। शुभे शुभे प्रदीप्ते च शरणिः पथि चावनाविति तालव्यादावजयः। इति तट्टीकायां भरतः ॥ पृथ्वी। इत्यजयः॥ (हिंसा यथा, ऋग्वेदे। १। ३१। १६।
"इमामग्ने शरणिं मीमृषो नः।"
"हे अग्ने नोऽस्मत्सम्बन्धिनीं इमामिदानीं सम्पादितां शरणिं हिंसां व्रतलोपरूपां मीमृषः क्षमस्व *** शरणिं गृ हिंसायामित्यस्मादौणादिकः अनिः प्रत्ययः। "इति तट्टीकायां सायणः॥
शरणी, स्त्री, (शरणि+वा ङीष्।) पन्थाः। प्रसारणी। इति शब्दरत्नावली ॥ जयन्ती। इति शब्दचन्द्रिका ॥
शरण्डः, पुं, पक्षी। कामुकः। इति शब्दरत्नावली॥ धूर्त्तः। शरटः भूषणभेदः। इति मेदिनी ॥ चतुष्यात्। इति संक्षिप्तसारोणादिवृत्तिः ॥
शरण्यः, त्रि, (शृणाति भयमिति। शृ हिंसायाम्+"शॄस्वृस्निहित्रपिचमिकमिकसिभ्यो नित्।" उणा० ३।१०१। इति न्यः। यद्वा, शरणमिव। शरण+"शाखादिभ्यो यः।" ५।३।१०३। इति यः।) रक्षाकर्त्ता यथा,—
"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम् ॥"
इति श्रीभागवतम् ॥
शरण्या, स्त्री, (शरण्य+टाप्।) दुर्गा। यथा
"विप्राग्निभयघोरेषु शरण्यं स्मरणादयतः।
शरण्या तेन सा देवी पुराणे परिपठ्यते ॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ॥
शरण्युः, पुं, वारिदः। वातः। इति विश्वः ॥
भरण्युः। इति शब्दमाला ॥
शरत्, [द्] स्त्री, (शृ हिंसायाम्+("शॄदृभसोऽदिः ॥" उणा० १।१२८। इति अदिः।) वत्सरः। (यथा, रघुः। १०। १।
"पृथिवीं शासतस्तस्य पाकशासनतेजसः।
किञ्चिदूनमनुर्नेदुः शरदामयुतं यथौ ॥")
ऋतुविशेषः। स चाश्विनकार्त्तिकमासद्वयात्मकः। इत्यमरः ॥ तत्पर्य्यायः। शारदा २ कालप्रभातः ३। इति शब्दरत्नावली ॥ कालप्रभातम् ४। इति त्रिकाण्डशेषः ॥ वर्षावसानः ५ मेघान्तः ६ प्रावृड्व्ययः ७। (यथा, रघुः। ४। २४।
"सरितः कुर्व्वती गाधाः पथश्चाग्रानकर्दमान्।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् ॥")
तत्र जलगुणाः।
"वर्षासु नाभसं वारि सेवितोद्विदमेव वा।
सर्व्वं शरदि हैमन्ते तडागं सारसन्तु वा ॥*॥"
तत्र वायुर्यथा,—
"वसन्ते दक्षिणो वातो भवेत् वर्षासु पश्चिमः।
उत्तरः शरदे काले पूर्व्वो हेमन्तशैशिरे ॥"
इति राजनिर्घण्टः ॥*॥
अपि च।
"शारदञ्चानभिष्यन्दि लघु तत्परिकीर्त्तितम्।
हैमन्तिकं जलं स्निग्धं बल्यं हृद्यं हितं गुरु॥"
इति राजवल्लभः ॥*॥
वैद्यकमते भाद्राश्विनमासात्मकः। केचित्तु।
"ऋतुषट्कं समाख्यातं रवे राशिषु संक्रमात् ॥
ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृट् मिथुनकर्कटौ।
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत्।
धनुर्म्मकरौ च हेमन्तो वसन्तः कुम्भमीनकौ ॥"
अन्ये तु।
"शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्भिमः।
माघादिमासयुग्मैः स्युर्ऋतवः षट्क्रमादमी॥"
तस्य गुणाः।
"शरदुष्णा पित्तकर्त्री नृणां मध्यबलावहा।"
इति भावप्रकाशः ॥*॥
तत्र जातफलम्।
"नरः शरत्सञ्जकलब्धजन्मा
भवेत् सुकर्म्मा मनुजस्तरस्वी।
शुचिः सुशीलो गुणवान् सुमानी
धनान्वितो राजकुलप्रपन्नः ॥"
इति कोष्ठीप्रदीपः ॥*॥
तत्र वर्ज्जनीयानि यथा। चन्द्रपटुता। रविपटुता। जलशुष्कता। अगस्त्यः। हंसः। हयः सर्पः। सप्तच्छदः। पद्मम्। श्वेतमेघः। धान्यम्। शिखिपक्षमदपातः। इति कविकल्पलता ॥
शरत्कामी, [न्] पुं, (शरदि शरत्काले कामयते कुकुरीमिति। कम+णिच्+णिनिः।) कुक्कुरः। इति शब्दरत्नावली ॥
शरत्पद्मं, क्ली, (शरदः पद्मम्।) सिताम्भोजम्। इति राजनिर्घण्टः ॥
शरत्पर्व्व, [न्] क्ली, (शरदः पर्व्व।) कोजागरपूर्णिमा। यथा,—
"कोजागरः शरत्पर्व्व शारदी द्यूतपूर्णिमा।"
इति जटाधरः ॥
शरत्पुष्पं, क्ली, (शरदः पुष्पम्।) आढकम्। इति राजनिर्घण्टः ॥ शरदुद्भवकुसुमञ्च ॥
शरद्, स्त्री, (शृ+अदिः।) शरत्। इत्यमरः ॥
शरदन्तः, पुं, (शरदः तदाख्य-ऋतोरन्तो यस्मात्।) हेमन्तः। राजनिर्घण्टः ॥ इति।
शरदा, स्त्री, वत्सरः। शरद्ऋतुः। इति शब्दरत्नावली ॥
शरदिजं, त्रि, (शरदि जायते यत्। जन+डः। "प्रावृट्शरत्कालदिवां जे।" ६।३।१५। इति सप्तम्या अलुक्।) शरत्कालजातम्। यथा,
"नद्यः प्रावृषिजास्तु पैत्तसकफश्वासार्त्तिकाश्च-प्रदाः
पथ्या वातकफापहाः शरदिजा हैमन्तजा बुद्धिदाः।
सन्तापं शमयन्ति संविदधते शैशिर्य्यवासन्तजा-
स्तृष्णादाहवमिश्यमार्त्तिशमदा ग्रीष्मे यथास्वं गुणाः॥
इति राजनिर्घण्टः ॥
शरदुदाशयं, क्ली, शरत्कालीनसरोवरम् यथा,—
"शरदुदाशये साधुजातसत्-
सरसिजोदरश्रीमुषा दृशा।
सुरतनाथ तेऽशुल्कदासिका
वरद निघ्नतो नेह किं वधः ॥"
इति श्रीभागवते १०।३१।२॥
शरदुदाशये शरत्कालीनसरसि। इति श्रीधरस्वामी ॥
शरधिः, पुं, (शरा धीयन्तेऽस्मिन्निति। शर+धा+"कर्म्मण्यधिकरणे च।" ३। ३। ९३। इति किः।) तूणः। इति हेमचन्द्रः ॥ (यथा, राजेन्द्रकर्णपूरे। ३३।

"धृत्वाङ्गे कवचं निबध्य शरधिं कृत्वा पुरो माधवं
कामः कैरवबान्धवोदयधिया धुन्वन् धनुर्धावती ॥")

शरपुङ्खा, स्त्री पुं, (शरस्य पुङ्खेव आकृतिर्यस्याः) नीलोत्पलाकृतिपत्रविशेषः। शरफोका इति हिन्दीभाषा। तत्पर्य्यायः। काण्डपुङ्खा २ बाणपुङ्खा ३ इषुपुङ्खिका ४ शायकपुङ्खा ५ इषुपुङ्खा ६। तस्या गुणाः। कटुत्वम्। उष्णत्वम्। कृमिवातरुजापहत्वम्। श्वेतायाः गुणाल्पत्वञ्च। इति राजनिर्घण्टः ॥ अपि च।

"शरपुङ्खो यकृत्प्लीहगुल्मव्रणविषापहः।
तिक्तः कषायः कासास्रज्वरश्वासहरो लघुः ॥"
इति भावप्रकाशः ॥

बाणस्य पक्षे, पुं ॥ (क्लौ, यन्त्रविशेषः। यथा, सुश्रुते। १। ७। "तेषां गण्डूपदशरपुङ्खसर्पफणवडिशमुखे हे हे एषणव्यूहनचालनाहरणार्थमुद्दिश्येते ॥")

शर(ल)भः, पुं, (शृणाति हिनस्तीति। शॄ हिंसायाम् + "कृशृशलिकलिगर्दिभ्योऽभच्।" उणा० ३। १२२। इति अभच्।) मृगेन्द्रविशेषः। इत्यमरः ॥ तत्पर्य्यायः। महामृगः २ महास्कन्धी ३ महामनाः ४ अष्टपादः ५ महासिंहः ६ मनस्वी ७ पर्व्वताश्रयः ८। इति राजनिर्घण्टः ॥ अस्य लक्षणं यथा,—

"अष्टपादूर्द्धनयन ऊर्द्धपादचतुष्टयः।
तं सिंहं हन्तुमागच्छन्मुनेस्तस्य निवेशनम्॥"
इति महाभारतम्। १२।११७। १२ ॥

करभः। (यथा, ऋतुसंहारे। १। २३।

"भ्रमति गवययूथः सर्व्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात्॥")

वानरविशेषः। इति मेदिनी ॥ उष्ट्रः। इति जटाधरः ॥ (विष्णुः। यथा, महाभारते। १३। १४८। ५२।

"अतुलः शरभो भीमः समयज्ञो हविर्हरिः॥"

दनुपुत्रविशेषः। यथा, तत्रैव। १। ६५। २६।

"शरभः शलभश्चैव सूर्य्याचन्द्रमसौ तथा।
एते ख्याता दनोर्व्वंशे दानवाः परिकीर्त्तिताः॥"

नागविशेषः। यथा, तत्रैव। १। ५७। ११।

"विहङ्गः शरभो मेदः प्रमोदः संहतापनः॥")

शरभूः, पुं, (शरे शरवणे भूरुत्पत्तिर्यस्य।) कार्त्तिकेयः। इति हेमचन्द्रः ॥

शरमयं, त्रि, (शरस्य विकारोऽवयवो वा। शर + "नित्यं हृदयशरादिभ्यः।" ४। ३। १४४। इति मयट्।) शरनिर्म्मितम्। यथा,—

"शरमयवर्हिषा कुशमयवर्हिर्व्वाधयत्।" इति स्मृतिः ॥

शरमल्लः, पुं. (शरे शरवणे मल्ल इव।) पक्षिविशेषः। इति शब्दचन्द्रिका॥ गोग्रालिक इति भाषा (शरे बाणनिक्षेपादौ मल्लः।) बाणयोद्धा च ॥

शरयुः, शरयूः, } स्त्री, नदीविशेषः। इति त्रिरूपकोषः ॥ दन्त्यसादिरयं शब्दः। इति बहुसम्मतः ॥

शरलः, त्रि, (विगीतः। स्वच्छत्वदयः। वृक्षविशेषे पुं। इति सारस्वताभिधानम्॥ दन्त्यसादिरप्ययमिति बहुसम्मतः ॥

शरलकं, क्लौ, जलम्। इति शब्दचन्द्रिका ॥

शरवणोद्भवः, पुं, (शरवणे उद्भवो यस्य।) कार्त्तिकेयः। इति केचित् ॥ (यथा, महाभारते। ३। २३१। ८।

"खचारी ब्रह्मचारी च शूरः शरवणोद्भवः ॥")

शरवाणिः, पुं, शरमुखम्। पदातिः। शरजीवी। इति हेमचन्द्रः ॥

शरव्यं, क्लौ, (शरवे हिंसायै बाणग्रिक्षायै वा साधु। शरु + "तृगवादिभ्यो यत्॥" ५।१।२। इति यत्। यद्वा, शरान् व्यथति। व्ये + डः।) लक्ष्यम्। इत्यमरः ॥ (यथा, माघे। ७। २४।

"विदधाति जनतामनःशरव्य-
व्यधपटुमन्मथचापनादशङ्काम् ॥")

शराघातः, पुं, (शरस्याघातः।) बाणाघातः। तत्पर्य्यायः। प्रचलाकः २। इति जटाधरः ॥

शराटिः, स्त्री, (शरं जलं अटति प्राप्नोतीति। अट् + इन्।) शरालिपक्षी। इति शब्दरत्नावली ॥

शराड़िः, स्त्री, शरालिपक्षी। इति शब्दरत्नावली ॥

शरातिः, स्त्री, (शरं जलमततीति। अत + इन्।) शरालिपक्षी। इत्यमरटीकायां रामाश्रमः ॥

शराभ्यासः, पुं, (शराणामभ्यासः।) बाणशिक्षा। तत्पर्य्यायः। उपासनम् २। इत्यमरः ॥ विकर्षणम् ३ खरली ४ शस्त्राभ्यासः ५। इति शब्दरत्नावली ॥

शरारिः, पुं, (शरं जलं ऋच्छतीति। ऋगतौ + "अच इः।" इति इः।) शरालिपक्षी। तत्पर्य्यायः। आटिः २ आड़िः ३। इत्यमरः ॥ आड़ी ४ शराड़ी ५ आड़िका ६ शरालो ७ शरालिः ८ शराटिः ९ शरालिका १०। इति शब्दरत्नावली ॥ (यथा, ऋतुसंहारे। ४। ९।

"प्रफुल्लनीलोत्पलशोभितानि
शरारिकादम्बविघट्टितानि।
प्रसन्नतोयानि सशैवलानि
सरांसि चेतांसि हरन्ति यूनाम् ॥")

अस्य गुणाः। पवनापहत्वम्। स्निग्धत्वम्। सृष्टमलत्वम्। हृद्यत्वम्। वातरक्तहरत्वम्। हिमत्वञ्च। इति राजवल्लभः ॥ अपि च।

"हंससारसकाचाह्वचक्रीञ्चशरारिकाः।
नन्दीमुखीसकादम्बाः बलाकाद्याः प्लवाः स्मृताः ॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥"
इति भावप्रकाशः ॥

शरारुः, त्रि, (शृणातीति। शॄ + "शृवन्द्योरारुः।" ३।२।१७३। इति आरुः।) हिंसकः इत्यमरः ॥

शरारोपः, पुं, (शरस्यारोपो यस्मिन्।) धनुः। इति जटाधरः ॥

शरालिः, स्त्री, शरारिपक्षी। इति शब्दरत्नावली ॥

शरालिका, स्त्री, शरारिपक्षी। इति शब्दरत्नावली ॥

शरालो, स्त्री, शरारिपक्षी। इति शब्दरत्नावली ॥

शरावः, पुं क्लौ, (शरं जलं अवति रक्षतीति। अव रक्षणे + अण्।) मृत्पात्रविशेषः। शरा इति भाषा। तत्पर्य्यायः। वहमानकः २। इत्यमरः ॥ मात्तिकः ३ सरावः ४ शालाजिरम् ५ पार्थिवम् ६ मृत्कांस्यम् ७। इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम्। १२६।

"उदितेऽपि तुहिनगहने गगनप्रान्ते न
दीप्यते तपनः।
कठिनघृतपूरपूर्णे शरावशिरसि प्रदीप इव॥")

कुड़वद्वयपरिमाणम्। तच्च चतुःषष्टितोलकात्मकम्। सेर इति भाषा। तत्पर्य्यायः। मानिका २। इति शब्दमाला वैद्यकपरिभाषा च ॥

शरावती, स्त्री, (शरास्तृणविशेषाः सन्त्यस्यामिति। शर + मतुप्। "शराटीनाच्च।"६। ३। १२०। इति दीर्घः।) नदीविशेषः। इत्यमरः ॥ (यथा, महाभारते। ६। ८। २०।

"शरावतीं पयोष्णीञ्च वेणां भीमरथीमपि ॥"

लवस्य राजधानी। यथा, रघुः। १५। ९७।

"स निवेश्य कुशावत्यां रिपुनागादुरं कुशम्।
शरावत्यां सतां सूक्तैः जनितास्रुलवं लवम् ॥")

शरार्द्धं, क्लौ, (शरावस्य अर्द्धम्।) कुड़वपरिमाणम्। तत्तु द्वात्रिंशत्तोलकात्मकम्। आधसेर इति भाषा। इति वैद्यकपरिभाषा ॥

शराश्रयः, पुं, (शराणामाश्रयः।) तूणः। इति हेमचन्द्रः ॥

शरासनं, क्लौ, (शरा अस्यन्ते क्षिप्यन्तेऽनेनेति। अस + करणे ल्युट्।) धनुः। इत्यमरः ॥ (यथा, रघुः। ३। ५२।

"स एवमुक्त्वा मघवन्तमुन्मुखः
करिष्यमाणः सशरं शरासनम् ॥"

पुं, धृतराष्ट्रपुत्राणामन्यतमः। यथा, महाभारते। १। ११७। ४।

"चित्रोपचित्रौ चित्राक्षशरुचित्रः शरासनः ॥")

शरास्यं, क्लौ, (शरा अस्यन्तेऽनेनेति। अस् + ण्यत्।) धनुः। यथा,—

"चिच्छेद तस्य तान् बाणान् शरास्यञ्च महामुने।
युयुधातेऽतिसंरब्धौ परस्परवधैषिणौ ॥"

इति मार्कण्डेयपुराणे जैमिनिसंवादे पुराणं परिपूर्णम् ॥

शरिमा, [न्] पुं, (शृणाति यौवनमिति शॄ + "शॄभॄवृस्तृभ्य इमनिच्।" उणा० ४।१४७। इति इमनिच्।) प्रसवः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शरी, स्त्री. एरकाटगम्। इति भावप्रकाशः ॥

शरीरं, क्ली. (शॄ + "कॄशॄपृकटिपटिशीटिभ्य ईरन्।" उणा० ४।१०। इति ईरन्।) शीर्य्यते रोगादिना यत्। तत्पर्य्यायः। कलेवरम् २ गात्रम् ३ वपुः ४ संहननम् ५ वर्ष्म ६ विग्रहः ७ कायः ८ देहः ९ मूर्त्तिः १० तनुः ११ तनूः १२। इत्यमरः ॥ क्षेत्रम् १३ पुरम् १४ घनः १५ अङ्गम् १६ पिण्डम् १७। इति राजनिर्घण्टः ॥ भूतात्मा १८ स्वर्गलोकेशः १९ स्कन्धः २० पञ्जरः २१ कुलम् २२ बलम् २३ आत्मा २४। इति जटाधरः ॥ स्कन्धम् २५। इति शब्दरत्नावली ॥ इन्द्रियायतनम् २६ भूः २७ मूर्त्तिमत् २८ करणम् २९ वेरम् ३० शरीरः ३१ बन्धः ३२ पुद्गलम् ३३। इति हेमचन्द्रः ॥* ॥ शरीरधर्म्मा यथा,—

"शरीरे भक्षसाङ्गते प्रतिविश्वः स चात्मनः।
जीवस्तत्रान्तरोत्तस्थ उवाच विनयं विभुम् ॥

जीव उवाच।

मदुक्तिर्व्वा कदुक्तिर्व्वा कोपः सन्तोष एव च।
लोभो मोहश्च कामश्च क्षुत्पिपासादिकञ्च यत्
स्त्रीत्वं कार्श्यञ्च नाशश्च दृश्यादृश्यं समुद्भवम्।
सर्व्वं शरीरधर्म्मश्च न जीवस्य न चात्मनः ॥
सत्त्वं रजस्तम इति शरीरं त्रिगुणात्मकम्।
तत्र नानाप्रकारस्य प्रबोधं कथयामि ते ॥
किञ्चित् सत्त्वातिरिक्तञ्च किञ्चिदेव रजोऽधिकम्।
तमोऽतिरिक्तं किञ्चिन्न समं क्वचिदुभे ॥
सत्त्वाहया च सुखेच्छा कर्म्मेच्छा च रजोगुणात्।
तमोगुणाज्जीवहिंसा कोपोऽहङ्कार एव च ॥
कोपात् कदुक्तिर्नियतं कदुक्त्या शत्रुता भवेत्।
तया चाप्रियता सद्यः शत्रुः कः कस्य भूतले ॥
को वा प्रियोऽप्रियो वा कः किं मित्रं को रिपुर्भुवि।
इन्द्रियाणि च जीवानि सर्व्वत्र शत्रुमित्रयोः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २४ अः ॥*॥

अथ स्त्रीपुंसयोः सर्व्वाङ्गानि पादाद्यादिशिरःपर्य्यन्तानि। प्रपदम् १ अङ्घ्रिः २ गुल्फः ३ पार्ष्णिः ४ जङ्घा ५ जानु ६ ऊरुः ७ वङ्क्षणः ८ कटिः ९ त्रिकम् १० नितम्बः ११ सिक्थ् १२ वस्तिः १३ उपस्थः १४ ककुन्दरम् १५ जघनम् १६ उदरम् १७ नाभिः १८ वलिः १९ स्तनः २० चूचुकम् २१ क्रोडम् २२ रोम २३ कक्षः २४ अंसः २५ बाहुः २६ दोः २७ पार्श्वः २८ प्रगण्डः २९ कूर्परः ३० हस्तः ३१ प्रकोष्ठः ३२ मणिबन्धः ३३ अङ्गुलिः ३४ अङ्गुष्ठः ३५ करभः ३६ नखः ३७ पर्व्व ३८ चपेटकः ३९ कण्ठः ४० शिरोधिः ४१ श्मश्रु ४२ मुखम् ४३ ओष्ठः ४४ चिबुकम् ४५ हनुः ४६ कृकम् ४७ तालु ४८ रदः ४९ जिह्वा ५० नासा ५१ भ्रूः ५२ गण्डः ५३ लोचनम् ५४ अपाङ्गः ५५ तारा ५६ कर्णः ५७ भालः ५८ मस्तकम् ५९ केशः ६०। इति कविकल्पलता ॥ * ॥

परमेश्वरशरीरतो देवानामुत्पत्तिर्यथा,—

"सर्व्वे देवाः सपितरो ब्रह्माद्याश्चाखण्डमध्यगाः।
विष्णोः सकाशादुत्पन्ना इतीयं वैदिकी श्रुतिः॥
अग्निस्तस्याश्विनौ गौरी गजवक्त्रो भुजङ्गमः।
कार्त्तिकेयस्तथादित्यो मातरो दुर्गया सह ॥
दिग्यो धनपतिर्विष्णुर्धर्म्मो रुद्रः शशी तथा।
पितरश्चेति संभूताः प्राधान्येन जगत्पते ॥
हिरण्यगर्भस्य तनौ सर्व्व एव समुद्भवाः।
पृथक् पृथक् ततो गर्व्वं वहमानाः समन्ततः॥
अहं योग्यस्त्वहं याज्य इति तेषां स्वनो महान्।
श्रूयते देवसमितौ क्षुब्धसागरसन्निभः ॥
तेषां विवदमानानां वह्निरुत्थाय पार्थिव।
उवाच मां यजस्वेति ध्यायध्वं मामिति ह्युवन्॥
प्राजापत्यमिदं नूनं शरीरं महिना कृतम्।
विनाशमुपपद्येत यतो नाहं महानहम् ॥
एवमुक्त्वा शरीरन्तु त्यक्त्वा वह्निर्व्विनिर्ययौ।
निर्गतेऽपि ततस्तस्मिंस्तच्छरीरं न शीर्य्यते ॥
ततोऽग्निनौ मूर्त्तिमन्तौ प्राणापानशरीरगौ।
आवां प्रधानावित्येवमूचतुर्याज्ञवल्क्यौ ॥
एवमुक्त्वा शरीरं तौ विहाय क्वचिदास्थितौ।
तयोरपि चयं कृत्वा चीर्णं तत्पुरमास्थितः ॥
ततश्चैवाब्रवीद्वीरो प्राधान्यमपि संस्थितम्।
साप्येवमुक्त्वा क्षेत्रात्तु निश्चक्राम बहिः शुभा ॥
तया विनापि तत् क्षेत्रं वायूनं व्यवतिष्ठते।
ततो गणपतिर्व्वाक्यमाकाशाख्योऽब्रवीत्तदा ॥
न मया रहितं किञ्चिच्छरीरस्थोऽपि दूरतः।
कालान्तरेत्येवमुक्त्वा सोऽपि निष्क्रम्य देहतः ॥
पृथग्भूतस्तथा प्येतच्छरीरं नाप्यनीनशत्।
विना सांख्यञ्च तत्त्वेन तथापि न विशीर्य्यते ॥
ऋषिरेतु विहीनन्तु दृष्ट्वा क्षेत्रं व्यवस्थितम्।
शरीरधातवः सर्व्वे ते ब्रूयुर्व्वाक्यमेव हि ॥
अस्माभिर्य्यतिरिक्तस्य न शरीरस्य धारणम्।
भवतीत्येवमुक्त्वा ते जड़ाः सर्व्वं शरीरिणः ॥
तैर्व्यपेतमपि क्षेत्रं पुरुषेण प्रपालितं।
तद्दृष्ट्वा त्वब्रवीत् स्कन्दः सोऽहङ्कारः प्रकीर्त्तितः ॥
मया विना शरीरस्य सम्भूतिरपि नेष्यते।
एवमुक्त्वा शरीरान्तु सोऽप्येतः पृथक् स्थितः ॥
तेनाक्षतेन तत् क्षेत्रं विना मुक्तवदास्थितम्।
तद्दृष्ट्वा कुपितो भानुः स चादित्यः प्रकीर्त्तितः ॥
मया विना कथं क्षेत्रमिमं चक्षमपोष्यते।
एवमुक्त्वाथ यातः स तच्छरीरं न शीर्य्यते ॥
ततः कामादिरुत्थाय गणो मातृकसंज्ञितः।
न मया व्यतिरिक्तस्य शरीरस्य व्यवस्थितिः ॥
एवमुक्त्वा स यातस्तु शरीरं तत्र शीर्य्यते।
ततो मायाब्रवीत् कोपात् त्वा च दुर्गा प्रकीर्त्तिता ॥
न मयास्य विना भूतिरित्युक्त्वान्तर्दधे पुनः।
ततो दिग्यः समुत्तस्थुरुच्चुक्रुशुश्च वचो महत् ॥
नाम्नाभी रहितं कायं भवतीति न संशयः।
ततश्च आगताः काष्ठा उपयाताः क्षणात्तदा ॥
ततो धनपतिर्व्वायुर्मध्ये तत्पक्षसम्भवः।
शरीरस्थेति सोऽप्येवमुक्त्वा मूर्द्धानगोऽभवत् ॥
ततो विष्णोर्मनो ब्रूयात् नायं देहो मया विना।
चक्षमप्युक्त्वेह ज्ञातुमित्युक्त्वान्तर्दधे पुनः ॥
ततो धर्म्मोऽब्रवीत् सर्व्वमिदं पालितवाहनम्।
इदानीं मय्युपगते कथमेतद्भविष्यति ॥
एवमुक्त्वा गते धर्म्मे तच्छरीरं न शीर्य्यते।
ततोऽब्रवीन्महादेवस्तावद्यक्षो भूतनायकः ॥
मद्रक्षंस्त्वं मया हीनं शरीरं नो भवेद्यथा।
एवमुक्त्वा गतः शम्भुस्तच्छरीरं न शीर्य्यते ॥
तद्दृष्ट्वा पितरश्चोचुस्तन्मात्रा यावदृक्षभिः।
प्राणान्तरैरिरितेव शरीरं शीर्य्यते ध्रुवम् ॥
एवमुक्त्वा तु तं देहं त्यक्त्वान्तर्द्धानमागताः।
अग्निः प्राहः अपानश्च आकाशश्चैव धातवः ॥
क्षेत्रं तद्दृष्ट्वहंकारो भानुः कामादयो मया।
काष्ठा वायुर्विष्णुधर्म्मौ शम्भुश्चैवेन्द्रियार्थकाः ॥
एतैर्मुक्तन्तु तत् क्षेत्रं मुक्तावित्र सुसंस्थितम्।
सोमेन पाल्यमानन्तु पुरुषेणेन्दुरूपिणा ॥
एवं व्यवस्थिते सोमे पोढ़शात्मन्यवाचरे।
प्राग्वत्तत्र गुणोपेतं क्षेत्रमुत्थाय यद्भवेत् ॥
प्रागवस्थं शरीरन्तु दृष्ट्वा सर्व्वप्रपालितम्।
ताः क्षेत्रदेवताः सर्व्वा वैलक्ष्यं भावमाश्रिताः ॥
तमेवं तुष्टुवुः सर्व्वास्तं देवं परमेश्वरम्।"
इति वाराहे महातपोपाख्याननामाध्यायः ॥*

शरीराङ्गं यथा,—

"शरीरमापः सोमस्य विविधं चान्नमुच्यते।
प्राणो ह्यग्निस्तथादित्यस्त्रिभोक्ता एक एव तु॥"
इति गारुड़े २१५ अध्यायः ॥*॥

मानसकायिकक्लेशसाध्यव्रतं यथा,—

धरण्युवाच।

"कथमाराध्यसे देव भक्तिमद्भिर्नरैर्विभो।
स्त्रीभिर्वा सर्व्वमेतत्त्वं शंस त्वं भूतभावन ॥

वाराह उवाच।

भावसाध्यस्त्वहं देवि न वित्तैर्न जपैरहम्।
साध्यस्तथापि भूतानां कायक्लेशं वदामि ते ॥
कर्म्मणा मनसा वाचा सचित्तो यो नरो भवेत्।
तस्य व्रतानि वक्ष्येऽहं विधिवानि निबोध मे॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्कता।
एतानि मानसान्याहुर्व्रतानि तु धराधरे ॥
एकभक्तं तथा नक्तमुपवासादिकञ्च यत्।
तत् सर्व्वं कायिकं पुंसां व्रतं भवति नान्यथा॥"
इति वाराहे सत्यतपोपाख्याननामाध्यायः ॥

शरीरजः, पुं, (शरीरात् जायते इति। जन + डः।) रोगः। कामदेवः। (यथा मत्स्यपुराणे। १। १००। ५६।

"नाकामयत तं दातुं वरं दाशाय शान्तनुः ।
शरीरजेन तीव्रेण दह्यमानोऽपि भारत ॥")
पुत्रः । इति धरणिः । (यथा, महाभारते ।
१३ । २४ । ४ ।
"इति पृष्टो मया राजन् पराशरशरीरजः ।
अब्रवीन्निपुणो धर्म्मे निःसंशयमनुत्तमम् ॥")
देहजाते, त्रि । यथा,—
"शरीरजैः कर्म्मदोषैर्य्याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

शरीरसंस्कारः, पुं, (शरीरस्य संस्कारः ।) देह-संस्कारकर्म्म । शरीरस्य शोभनं मार्জनञ्च ॥

शरीरावरणं क्ली, (शरीरस्य आवरणम् ।) चर्म्म । इति राजनिर्घण्टः ॥ कायवेष्टनञ्च ॥ (वर्म्म । यथा, महाभारते । ७ । १८५ । ४२ ।
"विचित्रैर्विविधाकारैः शरीरावरणैरपि ।
विचित्रैश्च रथैर्भग्नैर्हतैश्च गजवाजिभिः ॥")

शरीरी [न्] पुं, (शरीरमस्यास्तीति । शरीर+इनिः ।) शरीरविशिष्टः । तत्पर्य्यायः ।
"भवोद्भवौ च प्राणी तु शरीरिजन्युजन्तवः ।
प्राणभृच्चेतनो जन्मी चित्तन्तु हृदयं मनः ॥"
इति जटाधरः ॥

शरीरिलक्षणं यथा,—
"गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकः ।
प्रकृतिः सविकारा च तत् सर्वं गर्भसंज्ञकम् ॥
कालेन वर्द्धितो गर्भो यद्यङ्गोपाङ्गसंयुतः ।
भवेत्तदा स मुनिभिः शरीरीति निगद्यते ॥"
अङ्गोपाङ्गसंयुतः व्यक्ताङ्गोपाङ्गः ।
"तस्य त्वङ्गान्युपाङ्गानि ज्ञात्वा सुश्रुतशास्त्रतः ।
मस्तकादभिधीयन्ते शिष्याः शृणुत यत्नतः ॥
आद्यमङ्गं शिरः प्रोक्तं तदुपाङ्गानि कुन्तलाः ।
तस्यान्तर्मस्तुलुङ्गश्च ललाटभ्रुयुगं तथा ॥
नेत्रद्वयं तयोरन्तर्वर्त्तते हे कणीनिके ।
दृष्टिद्वयं क्षणगोलौ श्वेतभागौ च वर्त्मनि ॥
पक्ष्माख्यपाङ्गौ शङ्खौ च कर्णौ तच्छष्कुलीद्वयम् ।
घ्राणद्वयं कपोलौ च नासिका च प्रकीर्त्तिता ॥
ओष्ठाधरौ च सृक्कण्यौ मुखं तालु हनुद्वयम् ।
दन्ताश्च दन्तवेष्टाश्च रसना चिबुकं गलः ॥
द्वितीयमङ्गं ग्रीवा तु यया मूर्द्धा विधार्य्यते ।
तृतीयं बाहुयुगलं तदुपाङ्गान्यथो शृणु ॥
तस्योपरि मतौ स्कन्धौ प्रगण्डौ भवतस्त्वधः ।
कफोणियुग्मं तदधः प्रकोष्ठयुगलं तथा ॥
मणिबन्धौ तले हस्तौ तयोर्व्याङ्गुलयो दश ।
नखाश्च दश ते ख्याप्या दश च्छेद्याः प्रकीर्त्तिताः ॥
चतुर्थमङ्गं वक्षस्तु तदुपाङ्गान्यथ शृणु ।
स्तनौ पुंसस्त्रियो नार्य्याः विशेष उभयोरयम् ॥
यौवनागमने नार्य्याः पीवरौ भवतः स्तनौ ।
गर्भवत्याः प्रसूतायास्तावेतौ क्षीरपूरितौ ॥
हृदयं पुण्डरीकेण सदृशं स्यादधोमुखम् ।
जाग्रतस्तद्विकसति स्वपतस्तु निमीलति ॥
आशयस्तत्तु जीवस्य चेतनास्थानमुत्तमम् ।
अतस्तस्मिंस्तमोव्याप्ते प्राणिनः प्रस्वपन्ति हि ॥"

चेतनास्थानमुत्तममिति अयमभिप्रायः ।
"चेतनानामधिष्ठानं मनो देहस्य सेन्द्रियः ।
कैशलोमनखाग्रान्तर्मलं द्रव्यगुणैर्विना ॥"
इत्युक्तवता चरकेण सकलं शरीरं चेतनास्थानमुक्तं तदपेक्षया हृदयं विशेषतश्चेतनावस्थानमिति ।
"कक्षयोर्वक्षसो: सन्धौ जत्रुणी समुदाहृते ।
कण्ठे उभे समाख्याते तयोः स्यातान्तु वंक्षणौ ॥
उदरं पञ्चमं भागं षष्ठं पार्श्वद्वयं मतम् ।
सप्तष्ठवंशं पृष्ठन्तु समस्तं सप्तमं स्मृतम् ॥*॥
उपाङ्गानि च कथ्यन्ते तानि जानीहि यत्नतः ।
शोणिताज्जायते प्लीहा वामतो हृदयादधः ॥
रक्तवाहिशिराणां स मूलं ख्यातो महर्षिभिः ।
हृदयाद्दामतोऽधश्च फुप्फुसौ रक्तफेनजः ॥
अधो दक्षिणतश्चापि हृदयादुद्गतः स्थितिः ।
तन्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम् ॥
अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति ।
जलवाहिशिरामूलं तृष्णाच्छादनकृन्मतम् ॥"
क्लोम तिलकं एतत्तु वातरक्तजम् । अत्राह च हृदवाग्भटः ।
"रक्तादनिलसंयुक्तात् कालीयकसमुद्भवः ।"
इति ।
"मेदःशोणितयोः सारादुबुक्कयोर्युगलं भवेत् ।
तौ तु पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः ॥
उक्ताः सार्द्धत्रयो व्यामाः पुंसामन्त्राणि सूरिभिः ।
अर्द्धव्यामेन हीनानि योषितोऽन्त्राणि निर्दिशेत् ।
उण्डुकश्च कटी चापि त्रिकं वस्तिश्च वंक्षणौ ।
कण्डराणां प्ररोहः स्यान्मेदसां वीर्य्यमूलयोः ॥
स एव गर्भस्याधानं कुर्य्याद्गर्भाशये स्त्रियाः ।
शङ्खनाभ्यावृतियोनिस्त्रावर्त्ता सा च कीर्त्तिता ।
तस्यास्तोये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता ।
द्वयणौ भवतः सारात् कफासृङ्मांसमेदसाम् ॥
वीर्य्यवाहिशिराधारौ तौ मतौ पौरुषाश्रयौ ।
गुदस्य मानं सर्वस्य सर्वं स्याच्चतुरङ्गुलम् ॥
तत्र स्युर्वलयस्त्रिस्रः शङ्खावर्त्तनिभास्तु ताः ।
प्रवाहिणी भवेत् पूर्वा सार्द्धाङ्गुलमिता मता ॥
उत्सर्जिनी तु तदधः सा सार्द्धाङ्गुलसम्मिता ।
तस्या अधःसंवरणी स्यादेकाङ्गुलसम्मिता ॥
अर्द्धाङ्गुलप्रमाणन्तु बुधैर्गुदमुखं मतम् ।
मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्मितः ॥
पुंसः प्रोथौ स्मृतौ यौ तु तौ नितम्बौ च योषितः ।
तयोः कुकुन्दरे स्यातां सक्थिनी त्वङ्मटमम् ।
तदुपाङ्गानि च ब्रूमो जानुनी पिण्डिकाद्वयम् ।
जङ्घे हे घुटिके पार्ष्णी तले च प्रपदे तथा ।
पादावङ्गुलयस्तत्र दश तासां नखा दश ॥"
इति भावप्रकाशः ॥
(चेतज्ञो जीवात्मा । यथा, मनुः । १ । ५३ ।
"तस्मिन् स्वपिति तु स्वस्थे कर्म्मात्मानः शरीरिणः ।
स्वकर्म्मभ्यो निवर्त्तन्ते मनश्च ग्लानिमृच्छति ॥")

शरुः, पुं, (शृ हिंसायाम् + "शृस्वृस्निहित्रप्यसीति ।" उणा० १ । ११ । इति उः ।) क्रोधः । वज्रम् । इति मेदिनी ॥ बाणः । इति हेमचन्द्रः ॥ आयुधम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (हिंसा । यथा, ऋग्वेदे । ६ । २७ । ६ ।
"हृचीवन्तः शरवे पत्यमानाः ।"
"शरवे हिंसायै ।" इति तद्भाष्ये सायणः ॥
गन्धर्वविशेषः । यथा, महाभारते । १ । १२३ । ५५ ।
"विश्वावसुर्भुमन्युश्च सुचन्द्रश्च शरस्तथा ॥"
हिंसके, त्रि । यथा, तत्रैव । ७ । ७१ । १ ।
"दिवा नक्तं शरुमस्मद्युयोतम् ॥"
"शरुं हिंसकम् ।" इति तद्भाष्ये सायणः ॥)

शरेष्टः, पुं, आम्रः । इति जटाधरः ॥

शर्करकः, पुं, (शर्करा + "वुञ्छण्कठेति ।" ४ । २ । ८० । इत्यनेन कः ।) मधुरजम्बीरः । इति राजनिर्घण्टः ॥

शर्करजा, स्त्री, (शर्कराज्जायते इति । जन + डः । स्त्रियां टाप् ।) सिताखण्डः । इति राजनिर्घण्टः ॥

शर्करा, स्त्री, खण्डविकृतिः । चिनी इति भाषा । तत्पर्य्यायः । सिता २ । इत्यमरः ॥ शुक्लोपला ३ शुक्ला ४ सितोपला ५ । इति रत्नमाला ॥ मीनाण्डी ६ खेटा ७ मत्स्यण्डिका ८ अच्छिच्छा ९ सुसिकता १० गुडोद्भवा ११ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । पित्तदाहश्रमरक्तदोषभ्रान्तिक्लमिकोपनाग्नित्वञ्च । इति साधारणशर्करागुणाः ॥ * ॥

अथ शर्कराविशेषगुणाः ।
"स्निग्धा पुण्ड्रकशर्करा हितकरी चीये क्षये-
ऽरोचके
चक्षुष्या बलवर्द्धनी सुमधुरा रुच्या च वर्ण्या-
च्छजा ।
हृद्या दृष्टिबलप्रदा श्रमहरा ग्रामेच्छुजा
शीतला
स्निग्धा कान्तिकरी रसालजनिता रक्ते च्छजा
पित्तजित् ॥"
इति पक्वे च्छशर्करागुणाः ॥*॥
"यावनाली हिमोत्पन्ना हिमाली हिमशर्करा ।
क्षुद्रशर्करिका क्षुद्रा गुड़जा जलबिन्दुजा ॥
हिमजा शर्करा गौड्या सोज्ञा तिक्षातिपिच्छिला ।
वातघ्नी सारिका रुच्या दाहपित्तासदायिनी ॥"
इति यावनालशर्करागुणाः ॥*॥
"शीतजान्या कर्करजा माधवी मधुशर्करा ।
माक्षिका शर्करा प्रोक्ता सिताखण्डश्च खण्डकः ।
सिताखण्डोऽतिमधुरश्चक्षुष्यश्छर्द्दिनाशनः ।
कुष्ठव्रणकफश्वासहिक्कापित्तासदोषनुत् ॥
यवासशर्करा त्वन्या सुधामोदकमोदकः ।
तवराजः खण्डसारः खण्डजा खण्डमोदकः ॥"
इति राजनिर्घण्टः ॥"*॥

अपि च ।
"मत्स्यण्डिकाः खण्डसिता गुणश्रेष्ठा यथोत्तरम्
विमलाः शीतलाः स्निग्धा गुर्व्व्यः स्वादुतराः सराः ॥
दृष्यास्तृषाक्षतक्षीणरक्तपित्तानिलापहाः ।
मत्स्यण्डी ग्राहिणी बल्या कषाया वातजिद्गुरुः ॥
खण्डं गुरु सरं रुच्यं वातघ्नं बलपुष्टिदम् ।
सितोपला सरा गुर्व्वी वातघ्नी न कफप्रदा ॥"
इति पथ्यापथ्यविवेकः ॥*॥

अन्यच्च ।
"शर्करा ज्वरपित्तास्रदृङ्मूर्च्छाछर्दिक्षयापहा ।
तृष्णाघ्नस्त्वपराजस्तु ज्वरदाहास्रपित्ततुत् ॥
लसिकाफाणितगुडखण्डमत्स्यण्डिकासिताः ।
निर्म्मला लघवोज्ञेयाः शीतवीर्य्या यथोत्तरम् ।
यथा यथैषां वैमल्यं भवेच्छैत्यं तथा तथा ॥"
इति राजवल्लभः ॥*॥

किञ्च ।
"खण्डन्तु सिकतारूपं सुश्वेतं शर्करा सिता ।
सिता सुमधुरा रुच्या वातपित्तास्रदाहजित् ।
मूर्च्छाछर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी ॥*॥
भवेन्मधुसिता शीता रक्तपित्तहरी लघुः ।
सितोपला सरा लघ्वी वातपित्तहरी हिमा ॥*॥
मधुजा शर्करा रुच्या कफपित्तहरी गुरुः ।
कथ्यतीभारखण्ड दाहरक्तक्षत्तुवरा हिमा ॥
यथा यथैषां नैर्म्मल्यं मधुरत्वं तथा तथा ।
श्वेतलाघवशैत्यानि रसत्वञ्च तथा तथा ॥"
इति भावप्रकाशः ॥*॥

उपला । कर्परांशः । (यथा, महाभारते । ३ । ५५ । २ ।
"ततो वायुर्म्महान् शीघ्रो नीचैः शर्करवर्षणः॥"
शर्करान्वितदेशः । रोगभेदः । शकलम् । इति मेदिनी ॥ शर्करारोगस्य निदानचिकित्सादिर्मूत्रकृच्छ्रशब्दे द्रष्टव्यः ॥(कूर्म्मचक्रस्य पुच्छदेशस्थितदेशविशेषः । यथा, मार्कण्डेये । ५८ ।३५।
"तारक्षुरा ह्यङ्गतका शर्कराः शाल्मवेश्मकाः ॥")

शर्करांचलः, पुं, (शर्करामयोऽचलः ।) दानार्थकृत्रिमशर्करामयाचलविशेषः । अस्य विवरणं पर्व्वतशब्दे द्रष्टव्यम् ॥

शर्कराधेनुः, स्त्री, (शर्कराभिर्निर्म्मिता धेनुः ।) दानार्थशर्करानिर्म्मितधेनुः । तद्विधिर्यथा,—
श्रीहोतोवाच ।
"तदत्स शर्कराधेनुं शृणु राजन् यथार्थतः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुं शर्करया राजन् कृत्वा भारचतुष्टयम् ।
उत्तमा कथ्यते सद्भिश्चतुर्थांशेन वत्सकम् ॥
तदर्द्धं मध्यमा प्रोक्ता कनिष्ठा भारकेण तु ।
तदत् वत्सं प्रकुर्व्वीत चतुर्थांशेन तत्त्वतः ॥
अथ कुर्य्यादृष्टशतैरूर्द्धं नृपतिसत्तम ।
स्वशक्त्या कारयेद्धेनुं यथात्मानं न पीड़येत् ॥
सर्व्वबीजानि संस्थाप्य चतुर्दिक्षु समन्ततः ।
सौवर्णमुखशृङ्गाणि मौक्तिकानयने तथा ॥
गुड़ेन तु मुखं कार्य्यं जिह्वा पिष्टमयी तथा ।
कम्बलं पट्टसूत्रेण कण्ठाभरणभूषितम् ॥
इक्षुपादां रौप्यखुरां नवनीतमयस्तनीम् ।
प्रशस्तपत्रश्रवणां सितचामरभूषिताम् ॥
पद्मरत्नसमायुक्तां वस्त्रैराच्छादितां तथा ।
गन्धपुष्पैरलङ्कृत्य ब्राह्मणाय कुटुम्बिने ॥
श्रोत्रियाय दरिद्राय साधुवृत्ताय धीमते ।
वेदवेदाङ्गविदुषे आहिताग्नेर्विशेषतः ॥
अदुष्टाय प्रदातव्या न तु मत्सरिणे नृप ।
अयने विषुवे पुण्ये व्यतीपाते ग्रहिचये ॥
एषु पुण्येषु कालेषु यदृच्छा वा सदार्पयेत् ।
सत्पात्रन्तु द्विजं दृष्ट्वा आगतं श्रोत्रियं गृहे ॥
तादृशाय प्रदातव्या पुच्छदेशे विगह्य च ।
पूर्व्वाभिमुखमास्थाय अथवा स उदङ्मुखः ॥
गां पूर्व्वाभिमुखीं कृत्वा वत्समुत्तरतो न्यसेत् ।
दानकाले तु ये मन्त्रास्तान् पठित्वा समर्पयेत्॥
संपूज्य विधिवद्विप्रं सुद्रिकाकर्णभूषणः ।
स्वशक्त्या दक्षिणां दत्त्वा वित्तशाठ्यविवर्जितः ॥
इक्षौ तु दक्षिणां दत्त्वा गन्धपुष्पसचन्दनाम् ।
धेनुं समर्पयेत्तस्य मुखञ्च न विलोकयेत् ॥
एकाहं शर्कराहारो ब्राह्मणस्त्रिदिनं वसेत् ।
सर्व्वपापहरा धेनुः सर्वकामप्रदायिनी ।
सर्वकामसमृद्धस्तु जायते नात्र संशयः ॥
दीयमानां प्रशंसन्ति तेऽयान्ति परमां गतिम्
य इदं शृणुयाद्भक्त्या पठते वापि मानवः ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥"
इति वाराहे शर्कराधेनुमाहात्म्यनामाध्यायः॥

शर्कराप्रभा, स्त्री, (शर्करेव प्रभा यस्याः ।)जिनानां नरकविशेषः । यथा,—
"रत्नशर्करावालुकापङ्कधूमतमःप्रभा ।
महातमःप्रभा चेत्यधोऽधो नरकभूमयः ॥"
इति हेमचन्द्रः ॥

शर्करार्बुदः, पुं, क्लो (शर्करावदर्बुदः ।)क्षुद्ररोगविशेषः । तल्लक्षणं यथा,—
"प्राप्य मांसं शिराः स्नायुं मेदः श्लेष्मा तथानिलः
ग्रन्थिं करोत्यसौ भिन्नो मधुसर्पिर्वसानिभम्॥
स्ववत्यासावमत्यर्थं तत्र वृद्धिं गतोऽनिलः ।
मांसं विशोष्य ग्रथितां शर्करां जनयत्यतः ॥
दुर्गन्धक्लिन्नमत्यर्थं नानावर्णं ततः शिराः ।
स्रवन्ति सहसा रक्तं तं विद्याच्छर्करार्बुदम्॥"
शर्करा बालुकातुल्या । तच्चिकित्सा यथा,—
"मेरोर्बुदविधानेन साधयेच्छर्करार्बुदम् ॥"
इति भावप्रकाशः ।

शर्करावान्, [त्] त्रि, (शर्करा विद्यतेऽस्मिन् । "देशेलुबिलचौ च ।"५।२।१०५। इति मतुप्।) कपरांशवद्बुलदेशः । तत्पर्य्यायः । शर्करा २ शर्करिलः ३ शार्करः ४ । इत्यमरः ॥

शर्करासप्तमी, स्त्री, (शर्करायादानविधायिका सप्तमी ।) वैशाखीशुक्ला सप्तमी । तत्र व्रतविधिर्यथा,—
ईश्वर उवाच ।
"शर्करासप्तमीं वक्ष्ये तद्दत् कल्मषनाशिनीम् ।
आयुरारोग्यमैश्वर्य्यं यया नन्तं प्रजायते ॥
माधवस्य सिते पक्षे सप्तम्यां शुक्लपक्षतः ।
प्रातः स्नात्वा तिलैः शुक्लैः शुक्लमाल्यानुलेपनैः ।
स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम् ॥
तस्मै नमः सवित्रे तु गन्धपुष्पं निवेदयेत् ।
स्थापयेदुदकुम्भञ्च शर्करापात्रसंयुतम् ॥
शुक्लवस्त्रैरलङ्कृत्य शुक्लमाल्यानुलेपनैः ।
सुवर्णाश्वसमायुक्तं मन्त्रेणानेन पूजयेत् ॥
विश्ववेदमयो यस्मात् वेदवादीति पठ्यते ।
त्वमेवामृतसर्व्वस्वमतः कान्तिं प्रयच्छ मे ॥
पद्मगर्भं ततः पीत्वा स्वपेत्तत् पार्श्वतः क्षितौ ।
सौरसूक्तं स्मरन्नास्ते पुराणश्रवणेन च ॥
अहोरात्रे गते पश्चात् अष्टम्यां कृतनैत्यिकः ।
तत् सर्व्वं वेदविदुषे ब्राह्मणाय निवेदयेत् ॥
भोजयेच्छक्तितो विप्रान् शर्कराक्षुतपायसैः ।
भुञ्जीतातैललवणं स्वयमप्यथ वाग्यतः ॥
अनेन विधिना सर्वं मासि मासि समाचरेत् ।
संवत्सरान्ते शयनं शर्कराकलसान्वितम् ॥
सर्व्वोपस्करसंयुक्तं तथैकां गां पयस्विनीम् ।
गृहञ्च शक्तितो दद्यात् समस्तोपस्करान्वितम्॥
सहस्रेणाथ निष्काणां कृत्वा दद्यात् शतेन वा ।
दशभिर्व्वाथ निष्काणां तदर्द्धेनाथ शक्तितः ॥
सुवर्णाश्वः प्रदातव्यः पूर्ववन्मन्त्रवाचनम् ।
वित्तशाठ्यं न कुर्वीत कुर्वन् दोषं समश्नुते ॥
अमृतं पिबतो वक्त्रात् सूर्य्यस्यामृतबिन्दवः ।
निपेतुर्ये तदुत्पन्नाः शालिमुद्गेक्षवः स्मृताः ॥
शर्करापरमस्तस्मादिक्षुसारोऽमृतात्मकः ।
इष्टा रवेरतः पुण्या शर्कराहव्यकव्ययोः ॥
शर्करा सप्तमी चैषा वाजपेयफलप्रदा ।
सर्वदुःखोपशमनीं पुत्रसन्ततिवर्द्धनीम् ॥
यः कुर्य्यात् परया भक्त्या स परं ब्रह्म गच्छति
कल्पमेकं वसेत् स्वर्गे ततो याति महत् पदम् ॥
इदमनघं शृणोति यः स्मरेद्वा
परिपठतीह दिवाकरस्य लोके ।
मतिमपि च ददाति सोऽपि
देवैरमरवधूजनमालया च पूज्यः ॥"
इति भाविष्ये ७२ अध्यायः ॥

शर्करिकः, त्रि, (शर्करा विद्यते अस्मिन् । "वृक्षकण्ठकजिलेति ।"४।२।८०। इति कुमुदादित्वात् ठक् ।) शर्करावान् । इति सिद्धान्तकौमुदी ॥

शर्करिलः, त्रि, (शर्करा विद्यते अस्मिन् । "देशेलुबिलचौ च ।"५ । २ । १०५ । इति इलच् । शर्करावान् । इत्यमरः ॥

शर्करी, स्त्री, कन्दोविशेषः । नदी । मेखला । इति हस्तलिखितमेदिनी ॥ लेखनी । इति धरणिः सुद्राङ्कितमेदिनीहेमचन्द्रयोः रेफशून्यतिकरारमध्यपाठः । अस्या विवरणं शर्करीशब्दे द्रष्टव्यम् ॥

शर्करोदकं, क्ली, (शर्करायुक्तमुदकम् ।) शर्करायुक्तजलम्। चिनिरपानা इति शरवत् इति च भाषा। यथा,—
"जलेन शीतलेनैव घोलिता शुभ्रशर्करा।
एलालवङ्गकर्पूरमरिचेश्च समन्विता॥
शर्करोदकनाम्नैतत् प्रसिद्धं विदुषां सुखे।
शर्करोदकमाख्यातं शुक्लं शिशिरं सरम्॥
बल्यं रुच्यं लघु स्वादु वातपित्तासनाशनम्।
मुर्च्छाच्छर्दिष्टषादाहज्वरशान्तिकरं परम्॥"
इति भावप्रकाशः॥

शर्दः, पुं, (शृधु शब्दकुत्सायाञ्च + घञ् ।)अपानोत्सर्गः। शृधधातोर्घञ्प्रत्ययेन निष्पन्नमेतत्॥ (तेजः। यथा, ऋग्वेदे। ४। १। १२।
"प्र शर्द्ध आर्त्त प्रथमं विपन्या॥"
"शर्द्धस्तेजः।" इति तद्भाष्ये सायणः॥
समूहः। यथा, तत्रैव। १। ६४। १।
"हण्णे शर्द्धाय सुमखाय वेधसे।"
"शर्द्धाय समूहाय।" इति तद्भाष्ये सायणः॥
प्रसहनशीले, त्रि। यथा, तत्रैव।१।३७।४।
"प्रवः शर्द्धाय धृष्वये त्वेषद्युम्नाय शुष्मिणे॥"
'शर्द्धाय प्रसहनशीलाय।' इति तद्भाष्ये सायणः॥

शर्दंजहः, पुं, (शर्दं जहातीति। हा + "एजेः खश्।" ३। २। २८। इत्यत्र। वातशुनीतिलशर्दंष्विति।" खश्। "अरुर्द्विषदजन्तस्येति।" ६। ३। ६७। इति मुम्।) मापः यथा। शर्दं आर्द्रत्वं जहाति इति शर्दंजहो मापः। इति मुग्धबोधव्याकरणटीकायां दुर्गादासः॥

शर्दनं, क्ली, (शर्द + ल्युट् अधोवायुः। इति मनुटीकायां कल्लूक-भट्टः॥ वातकर्म्म इति भाषा॥

शर्व्व, हिंसे। गतौ। इति कविकल्पद्रुमः॥ शर्वति। इति दुर्गादासः॥

शर्म्म,[न्] क्ली, (शृ + "सर्व्वधातुभ्यो मनिन्॥" उणा० ४। १४४। इति मनिन्।) सुखम्। इत्यमरः॥ (यथा, ऋग्वेदे। ४। ३५। ४।
"तस्मा अग्निर्भारतः शर्म्म यंसत्।"
"शर्म्म सुखम्।"इति तद्भाष्ये सायणः॥ यथाच कथासरित्सागरे। ७८। ४८।
"स्वामिभक्तस्तदेतस्य शर्म्मोपायमिमं शृणु॥")
तद्यति, त्रि॥ गृहम्। इति निघण्टुः। ३।४॥ (यथाच ऋग्वेदे। ३। १३। ४।
"स नः शर्म्माणि वीतयेऽग्निर्यच्छतु शन्तमा।"
"शर्म्माणि शर्म्मशब्दो गृहवाची क्वाचा शर्म्मेति तत्रामसु पाठात्।" इति तद्भाष्ये सायणः॥)

शर्म्मा,[न्] पुं, (शृणात्यशुभमिति। शृ + "सर्वधातुभ्यो मनिन्।" उणा० ४। १४४। इति मनिन्।) ब्राह्मणस्योपाधिविशेषः। यथा,—
"शर्म्मब्रह्मादिके कार्य्ये शर्म्मा तर्पणकर्म्मणि।
शर्म्मणोऽत्तव्यकाले च पितॄणां दत्तमत्तयम्॥"
शर्म्मेत्यनेन गोत्रसम्बन्धनामानि पितॄनां परिकल्पयन्त्येकवाक्यतया शर्म्मान्तं नाम प्रतीयते। तथा च विष्णुपुराणम्।
"ततश्च नाम कुर्व्वीत पितैव दशमेऽहनि।
देवपूर्व्वं नराख्यं हि शर्म्मवर्म्मादिसंयुतम्॥"
देवात् पूर्व्वं नराख्यं नरनाम तच्च विशिष्टं शर्म्मयुतम्। एतच्च विप्रपरम्।
"शर्म्मा देवश्च विप्रस्य वर्म्म चाता तु भूभुजः।
भूतिदत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्॥"
इति यमवचनात्॥
अत्र चकारेण देवशर्म्मणोः समुच्चयः। अत्रापि शर्म्माद्यन्तताह शातातपः॥
"शर्म्मान्तं ब्राह्मणस्य स्याद्वर्म्मान्तं क्षत्रियस्यच
धनान्तञ्चैव वैश्यस्य दासान्तं चान्त्यजन्मनः॥"
इति श्राद्धतत्त्वम्॥
(तथा च विष्णुपुराणे। २। १०। ८—९।
"ततश्च नाम कुर्व्वीत पितैव दशमेऽहनि।
देवपूर्व्वं नराख्यं हि शर्म्मवर्म्मादिसंयुतम्॥
शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्रसंश्रयम्।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः॥"
"दशमेऽहनि अतीते इति शेषः तच्चाशौचान्तोपलक्षणम्। अत्रैव कालान्तरमप्याह। यथा,—
"नामधेयं दशम्यान्तु केचिदिच्छन्ति पार्थिव।
द्वादश्यामथवा रात्रौ मासे पूर्णे तथापरे॥"
इति॥
देवपूर्वं कुलदेवतानामपूर्वकं कुलदेवतासम्बन्धं नाम कुर्य्यात् इति शङ्खोक्तेः। नराख्यं पुरुषवाचकम्। तत्र प्रान्ते शर्म्मवर्म्मादिसंयुतम्। यथा, सोमशर्म्मा इन्द्रवर्म्मा चन्द्रवर्म्मा चन्द्रगुप्तः शिवदासः इत्यादि।"इति तट्टीकायां स्वामी॥
"तत्रादौ नाम निर्णयः।
"शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्रसंश्रयम्।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः॥"
इत्यत्रेति पदस्वरसेन यद्यपि शर्म्मपदात्मकमेव नामावगम्यते तथापि तावन्मात्रं न नाम किन्तु तद्व्रामेति निर्णीयते द्व्यक्षरं चतुरक्षरं इत्यादिग्रन्थदर्शनात्। एवञ्च हरिशर्म्मा नारायणशर्म्मेत्यादि सिध्यति शर्म्मपदमात्रात्मकत्वात् तत्रान्यतरत्वरता न स्यादेव। तथाच नारायणादिपदशर्म्मपदाभ्यां निर्गतमिव नाम द्व्यक्षरादिकन्तु शर्म्मपूर्वप्रतिकृतिमात्रमेव अतएव दानादौ नामोच्चारणे चैत्रशर्म्मणे इत्येव श्रूयते। गोभिलः।
"शर्म्मब्रह्मार्घादिके कार्य्ये शर्मा तर्पणकर्म्मणि।
शर्मणोऽत्तव्यकाले स्यादेवं कुर्व्वन्न मुह्यति॥"
इदमप्युत्तरप्रतीकमात्रपरमुक्तग्रन्थेन सहैकमूलत्वात्। एतेन शर्म सुखनीयमिति कर्कदर्शनात् शर्मपदमर्थपरं तेन शुभङ्करित्यादावेव नामेत्यपास्तं गोभिलविरोधात्। कर्कस्तु पूर्वप्रतीकमात्रपरम्। तेन शुभङ्करशर्मा भौमशर्मेत्यादि सिध्यति एवच्च हव्यकव्ये चैतादृशमेव नाम तेषां प्रयोज्यम्। अपवादकाभावादिति। अत्रैव मनुः।
"मङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम्
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम्॥
शर्म्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितम्।
स्त्रीणां सुखोद्यमक्रूरं विष्यष्टार्थं मनोहरम्।
मङ्गल्यं दीर्घवर्णान्तमाशीर्व्वादाभिधानवत्॥"
शर्म्मवर्म्मप्रभृतीनि उत्तरपदानि कार्य्याणीति मनुटीकायाम्। स्त्रीनामन्तु यशोदादेवीत्यादि स्त्रीणां दान्तमित्यपि पूर्व्वप्रतीकमात्रपरम्। वैश्यस्य गुप्तान्तमिति तु पराशरः। एवञ्च दानादौ चैत्रशर्म्मणे ब्राह्मणायेत्यादि स्वरूपं वाक्यम्॥" इतिहैतनिर्णयः॥*॥)

शर्म्मरः, पुं, वस्त्रभेदः। इतिधरणिः॥

शर्म्मरा, स्त्री, दारुहरिद्रा। इति धरणिः॥

शर्य्या, स्त्री, रात्रिः। यथा,—
"त्रियामाशर्व्वरी शर्य्या क्षणदा क्षपा।"
इति भरतधृतवाचस्पतिः॥
(इषुः। यथा, ऋग्वेदे।१। १४।४।
"शर्य्यामसना मनुष्युन्।" "शर्य्या इषवः शरमय्यः। इति यास्कः॥"इति तद्भाष्ये सायणः॥
अङ्गुलिः। यथा, तत्रैव।८।११०।५।
"शर्य्याभिर्नभरमाणोगभस्त्योः।"
"शर्य्याभिरङ्गुलीभिः।" इतितद्भाष्ये सायणः॥
शर्य्यातिः पुं, वैवस्वतमनुपुत्रः। तस्य पुत्र आनर्त्तः यथा,—
"आनर्त्तो नामशर्य्यातेः सुकन्यानाम दारिका।
आनर्त्तस्याभवत् पुत्रो रोचमानः प्रतापवान्।
आनर्त्तो नाम देशोऽभूत्तत्रगरी च कुशस्थली॥"
इति मात्स्ये १२ अध्यायः॥
(अस्य विशेषविवरणं भागवते ८। १३॥
एवं ९। १। अध्याये च द्रष्टव्यम्॥)

शर्व, हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०- परं० सक०-सेट्।) शर्वति। इति दुर्गादासः॥

शर्वः पुं, (शृणाति सर्वाः प्रजाः संहरति प्रलये संहारयति वा भक्तानां पापानि। शॄ + कॄ + गॄ शॄ दॄ भ्यो वः।" उणा० १।२५५। इति वः।) शिवः। इति हेमचन्द्रः॥ (यथा, रघुवंशे। ११। ९३।
"कतिचिदपनिपातः शर्वरीः शर्वकल्पः॥")
दन्त्यसादिरव्ययम्। विष्णुः। यथा,—
"शर्वः सर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः।"
इति तस्य सहस्रनामस्तोत्रम्॥

शर्वरं, क्ली, तमः। कन्दर्पः। इति संक्षिप्तसारोणादिवृत्तिः॥

शर्वरी, स्त्री, (शृणाति चेष्टामिति। शॄ + "कॄ गॄ शॄ दृ भ्यो वरच्।" उणा० २। १२३। इति वरच्। पित्वात्ङीष्।) रात्रिः। इत्यमरः॥ (यथा, ऋग्वेदे। ५। ५२। ३।
"अतिस्कन्दन्ति शर्वरीः॥")
योषित्। इति मेदिनी॥ हरिद्रा। इति विश्वः॥ सन्ध्या। इति संक्षिप्तसारोणादिवृत्तिः॥

शर्वला, स्त्री, तोमराख्यम्। इत्यमरटीकायां रायमुकुटः॥ दन्त्यसादिरव्ययम्॥

शर्वाणी, स्त्री, (शर्वस्य भार्य्या। "इन्द्रवरुणभवेति।" ४।१।४९। इति ङीष्।) पार्व्वती।

इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे। १।५८।
"निपत्य पादयोस्ताभ्यां जयया सह बोधिता। शापान्तं प्रति शर्वाणी शनैर्वचनमब्रवीत् ॥")
दन्त्यसादिरव्ययं शब्दः ॥

शर्शरीकः, पुं, (शृ+"शृपृहृभ्यां ईरेक् चाभ्यासस्य।" उणा० ४।१८। इति ईकन् हित्वमभ्यासस्य रुक् च।) हिंस्रः। खलः। इत्युणादिकोषः ॥ अश्वः। मङ्गलाभरणम्। अग्निः। इति संक्षिप्तसारोणादिवृत्तिः ॥

शल, वेगे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) शलति। इति दुर्गादासः ॥

शल, क ङ शाघे। इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट्।) क ङ, शालयते पण्डितं धीरः। इति दुर्गादासः ॥

शल, ङ चलने। स्तुतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक०-च-सेट्।) ङ, शलते। चलनं कम्पः। स्तुतिरिह संवरणम्। इति दुर्गादासः ॥

शल, ज गतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) ज, शालः शलः। इति दुर्गादासः ॥

शलं, क्ली, (शल+"ज्वलितिकसन्तेभ्यो णः।" ३।१।१४०। इति णः।) शल्ककीलोम। सजारुकाँटा इति भाषा। तत्पर्य्यायः। शलली २ शललम् ३। इत्यमरः ॥

शलः, पुं, शललम्। भृङ्गी। क्षेत्रभेदः। ब्रह्मा। इति मेदिनीशब्दरत्नावल्यौ॥ कुन्तास्त्रम्। इति त्रिकाण्डशेषः ॥ उष्ट्रः। इति हेमचन्द्रः ॥ (वासुकिवंशीयसर्पविशेषः। यथा, महाभारते। १।५७।५।
"कोटिशो मानसः पूर्णः शलः पालो हलीमकः" शन्तनुराजपुत्रः। यथा, भागवते। ९।२२।१८।
"शलश्च शन्तनोरासीत् गङ्गायां भीष्म आत्मवान्।")
शस्त्रराजः। यथा, भागवते। १। १५। १६।
"नमुचिर्गर्त्तशलसैन्धवाद्रिकाद्यैः ॥"
कंसामात्यः। यथा, तत्रैव। १०। ३६। २१।
"ततो मुष्टिकचाणूरशलतोशलकादिकान् ॥")

शलकः, पुं, मर्कटः। इति त्रिकाण्डशेषः ॥ माकड়সা इति भाषा ॥

शलङ्गः, पुं, लोकपालः। लवणविशेषः। इत्युणादिकोषः ॥

शलभः, पुं, (शल+"क्रमृशलिकलिगर्हिभ्योऽभच्।" उणा० ३। १२२। इति अभच्।) कीटविशेषः। फड়িং इति पङ्खपाल इति च भाषा। तत्पर्य्यायः। पतङ्गः २। इत्यमरः ॥ पतङ्गः ३ पताङ्गः ४। इति शब्दरत्नावली ॥ स तु ईतिविशेषः। यथा,—
"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः। प्रत्यासन्नाश्च राजानः षडेते ईतयः स्मृताः।"
इति ज्योतिस्तत्त्वम् ॥ (असुरविशेषः। यथा, हरिवंशे। ३। ८८।
"शरभः शलभश्चैव विप्रचित्तिश्च वीर्य्यवान् ॥")

शललं, क्ली, (शल चलनसंवरणयोः+हृषादित्वात् कलः।) शलम् इत्यमरः ॥

शललो, स्त्री, (शलल+गौरादित्वान्ङीतित्वाद्ङीष्।) शलम् इत्यमरः ॥ शल्ली। इति राजनिर्घण्टः ॥

शलाका, स्त्री, (शल+"वलाकायदश्च।" उणा० ४।१४। इति आकः। स्त्रियां टाप्।) शस्त्रम्। मदनवृक्षः। शारिका। शल्लकी। छत्रादिकाष्ठी। (यथा, गुरुगीतायाम्।
"अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया। चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥")
शरः। इति मेदिनी ॥ आलेख्यकूर्चिका। इति हेमचन्द्रः ॥ अक्षि। इति शब्दचन्द्रिका ॥

शलाकापरि, व्य, शलाकाक्रीड়ায়াং পরাজয়ঃ। यथा। "अक्षशलाकासंख्या परिषा।" २।१।१०। द्यूतव्यवहारे पराजये एवायं समासः। अक्षे विपरीतं दत्तम्। अक्षपरि। एवं शलाकापरि। एकपरि। इति सिद्धान्तकौमुदी ॥ अपि च। "नन्वेकस्याक्षस्य शलाकाया वा द्यूतेऽन्यथापातनमित्यर्थे अक्षपरि शलाकापरि इत्यव्ययीभावेऽव्याप्तिस्तयोरव्ययगर्भत्वेऽपि अव्ययपूर्वत्वाभावात्।" इति शब्दशक्तिप्रकाशिका ॥

शलाकापुरुषाः, पुं, बौद्धानां त्रिषष्टिदेवपुरुषाः। तत्र द्वादश चक्रवर्त्तिनः। चतुर्विंशतिर्जिनाः। नव वासुदेवाः। नव बलदेवाः। नव प्रतिवासुदेवाश्च। यथा,—
"यः सर्वमण्डलस्येशो राजसूयञ्च योऽयजत्। चक्रवर्त्ती सार्वभौमस्ते तु द्वादश भारते ॥
आर्षभिर्भरतस्तत्र सगरस्तु सुमित्रभूः। मघवा वैजयिरथाश्वसेनभूपनन्दनः ॥
सनत्कुमारोऽथ शान्तिकुन्थ्वरोजिना अपि। शुभूमस्तु कार्त्तवीर्य्यः पद्मः पद्मोत्तरात्मजः ॥
हरिषेणो हरिसुतो जयो विजयनन्दनः। ब्रह्मसूनुर्ब्रह्मदत्तः सर्वे चेक्ष्वाकुवंशजाः ॥
प्राजापत्यस्त्रिपृष्ठोऽथ द्विपृष्ठो ब्रह्मसम्भवः। स्वयम्भू रुद्रतनयः सोमभूः पुरुषोत्तमः ॥
पैविः पुरुषसिंहोऽथ महाशौरः समुद्भवः। स्यात् पुरुषपुण्डरीको दत्तोऽग्निः सिंहनन्दनः॥
नारायणो दाशरथिः कृष्णस्तु वसुदेवभूः। वासुदेवा अमी कृष्णनव शुक्ला बलास्त्वमी ॥
अचलो विजयो भद्रः सुप्रभश्च सुदर्शनः। आनन्दो नन्दनः पद्मो रामो विष्णुर्द्विषस्त्वमी॥
अश्वग्रीवस्तारकश्च मेरको मधुरेव च। निशुम्भबलिप्रह्लादलङ्केशमगधेश्वराः।
जिनाः सह त्रिषष्टिः स्युः शलाकापुरुषा अमी॥"
इति हेमचन्द्रः ॥

शलाटः, पुं, शकटपरिमाणम्। यथा,—
"तुलापलशतं तासां विंशत्या भार आचितः। शकटः शाकटीनञ्च शलाटस्ते दशाचितः ॥"
इति हेमचन्द्रः ॥

शलाटुः, त्रि, अपक्वफलम्। इत्यमरः। २।४।१५॥ (यथा, सुश्रुते। १। ४३।
"मदनशलाटुचूर्णाभ्येवं वा वकुलरम्भकोपयुक्तानि मधुलवणयुक्तानीति ॥")

शलाटुः, पुं, मूलविशेषः। इत्युणादिकोषः॥ बिल्वः इति राजनिर्घण्टः ॥

शलाभोलिः, पुं, उष्ट्रः। इति हेमचन्द्रः ॥

शलालु, क्ली, सुगन्धिद्रव्यविशेषः। इति सिद्धान्तकौमुदी ॥

शलालुकः, त्रि, शलालुना क्रीतं वस्तु। यथा। "शलालुनोऽन्यतरस्याम्।" ४। ४। ५४। इति पक्षे ठक्। शलालुकः। शलालुकी। शालालुकः। शालालुकी। शलालु सुगन्धिद्रव्यविशेषः। इति सिद्धान्तकौमुदी ॥

शल्ली, स्त्री, (शलं शल्ककीलोम अस्त्यस्या इति। शल+अच्। ङीष्।) खण्डशल्लकः। तत्पर्य्यायः। शललली २ शल्वित्र३। अस्य मांसगुणाः। गुरुत्वम्। स्नेग्धत्वम्। शीतलत्वम्। कफपित्तनाशित्वञ्च। इति राजनिर्घण्टः ॥

शल्कं, क्ली, (शलं चलने स्तुतौ+इण्भीकापाशल्यतिमर्च्छिभ्यः कन्।' उणा० ३। ४३। इति कन्।) खण्डम्। वल्कलम्। इत्यमरः ॥ मल्लत्वक्। আঁইস इति भाषा। यथा,—
"शल्कं स्यात् वल्कले खण्डे शल्कन्तु मत्स्यवल्कले ॥"
इति भरतधृतकोषः ॥
(यथा, महाभारते। १२। ३६। २३।
अभक्ष्या ब्राह्मणैर्मत्स्याः शल्कैर्ये वै विवर्जिताः ॥")

शल्कलं, क्ली, मत्स्यवल्कलम्। द्रुमत्वक्। शलधातोः कलच्प्रत्ययेन निष्पन्नमेतत्। इति सिद्धान्तकौमुदी ॥

शल्कली, [न्] पुं, (शल्कलमस्यास्तीति। शल्कल+इनिः।) मत्स्यः। इति हेमचन्द्रः ॥

शल्की, [न्] पुं, (शल्कमस्यास्तीति। शल्क+इनिः।) मत्स्यः। इति हेमचन्द्रः ॥

शल्यदा, शल्यपर्णिका, } स्त्री, मेदा। इतिराजनिर्घण्टः

शल्य, ङ कत्थने। इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-सक०-सेट्।) ङ शल्यते। कत्थनं प्रशंसा। इति दुर्गादासः ॥

शल्यलिः, पुं, शाल्मलीवृक्षः। (यथा, वाजसनेयसंहितायाम्। २३। १३। "शाल्मलिर्वृद्धा।"
"शाल्मलिवृक्षविशेषो वृद्धत्वं स्वामवतु शल्मलिर्वनस्पतीनां वर्षिष्ठं वर्द्धते इति श्रुतेः।" इति तद्भाष्यम् ॥)

शल्मली, स्त्री, शाल्मलिवृक्षः। यथा,—
"शल्मलिः स्यात् शाल्मलिश्च शाल्मली शल्मली तथा ॥"
इति भरतहृरूपकोषः ॥

शल्यं, क्ली, (शलति चलतीति। शल+"सानसिवर्षसिपर्णसीति।" उणा० ४। १०७। इति

यः।) क्लेदः। इषुः। यथा, रघुः। ८।७५।

"शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं
तापादन्तःशल्य इवासीत् क्षितियोऽपि॥"

तोमरम्। इति मेदिनी॥ वंशकन्धिका। इति विश्वः॥ दुःसहम्। दुर्वाक्यम्। इति शब्दरत्नावली॥ पापम्। इति चिकाण्डशेषः। अस्थि। यथा। अथ शल्योद्धारविधिः।

"सुनिश्चितां मन्दिरभूमिमादौ
निखाय तोयावधि यत्नतस्ताम्।
कुर्य्यादिशल्यामथवा नृमानं
ज्ञात्वाथवा प्रस्रवशादिधिज्ञः॥
दूर्वाप्रवालाचितपुण्यपाणिः
शुचिः शुचिं दैवविदं समेत्य।
पृच्छेदिनीतो मधुरस्वरेण
शल्यस्य तत्त्वं भवने तदीशः॥

ततः प्रश्नादिमो वर्णः सन्धार्य्यो यत्नतोऽथवा। क्रमात् पुष्यापगादेव फलानां ब्राह्मणादितः॥ प्रणवो धरणी धारिणी करौ च तदनन्तरम्। न भूत्ये नम इत्येष मन्त्रो वह्निप्रियान्तकः॥" वह्निप्रिया स्वाहा।

"मन्त्रेणानेन कठिनीमभिमन्त्र्य विभाजयेत्। नवधा मदनक्षेत्रं तया पश्चादिलेखयेत्॥
व-क-च-त-ए-ङाः श-ष-सा नव चेत् प्रश्नाक्षराणि जायन्ते।
प्रागादिकोष्ठे नवके वर्णास्ते शल्यमाख्यान्ति॥
प्रश्ने वकारः पुरतो नराणि
ब्रवीति शल्यं मरकप्रदायि।
कौणीशदष्टोरगहेतुमृत्यु-
प्रदं ककारः खरशल्यमग्नौ॥
याम्यां चकारः प्लवगास्थि वेश्म
प्रभोर्विनाशं प्रकरोति शल्यम्।
रक्षोदिशि ङास्थिगदस्थितानां
महद्भयं वक्ति सुनिश्चितं तः॥
एः पार्श्वदिश्यस्थि शिशोर्ब्रवीति
मृत्युं प्रवासादृहमेव शल्यम्।
हो वायुकोणे नरकङ्कपमस्थि
दारिद्र्यमित्रक्षयकृद्दधत्ते॥"

"धनपदिशि शकारः प्राह विप्रास्थि वित्तक्षयकृदथ षकारो वक्ति ऋक्षास्थि शल्यौ। तदिह कुलविनाशं गोधनानाञ्च हानिं वितरति गृहनाथस्यापि गुप्तस्य दैवैः॥
यो मध्यभागे भसितं कपालं
कालायसं चाह कुलक्षयाय।
यद्वादपास्यान्यधनं प्रमाणं
सर्वत्र तथ्यं कथयामि शल्ये॥

इन्द्ररत्नो जलेशाने शल्यं शार्द्धकरे कटौ। वह्न्यन्तककुबेरेषु पुरुषे मध्यवातयोः॥" देवीपुराणम्।

"पुरुषाधःस्थितं शल्यं न गृहे दोषदं भवेत्। प्रासादे दोषदं शल्यं भवेद्यावज्जलान्तकम्॥ गृहारम्भेऽतिकष्टतिः स्याच्छल्ये यदि जायते। शल्यं त्वपनयेत्तत्र प्रासादे भवनेऽपि वा॥"

इति ज्योतिस्तत्त्वम्॥ * ॥

सप्त शल्यानि यथा,—

"कृष्णे न हरिसेवको व्ययधनो न क्षत्रियापंकः
कविर्न सुरजित् कविः श्रुतगुरुर्न सद्वैद्यवः।
गुणी न भगवत्परो रसिकधीर्न क्षत्राश्रयः
स न व्रजजनानुगो जगति सप्त शल्यानि च॥"

इति पाद्मोत्तरखण्डे १०० अध्यायः॥

शल्यः, पुं, (शल गतौ + यः।) मदनवृक्षः। श्वाविध्। इत्यमरः॥ (यथा, भागवते ८।२।२२।

"बृका वराहा महिषर्क्षशल्या
गोपुच्छशालावृकमर्कटाश्च॥")

नृपभेदः। स तु युधिष्ठिरमातुलः। (अयं हि दुर्य्योधनेन कापट्यात् वशीकृतः कुरुपाण्डवयुद्धे दुर्य्योधनपक्षं समाश्रयत्। यथा, महाभारते। १।२।२१६।

"मद्रराजञ्च राजानमायान्तं पाण्डवान् प्रति
उपहारैर्वञ्चयित्वा वर्म्म त्येव सुयोधनः॥
वरदं तं वरं वव्रे साहाय्यं क्रियतां मम।
शल्यस्तथेति प्रतिश्रुत्य जगामोद्दिश्य पाण्डवान्॥"

कर्णार्জ্জুনयोर्द्वैरथयुद्धे शल्यस्य कर्णतेजो भङ्गकरणे प्रतिज्ञा। यथा, तत्रैव। ५।८।३७-४५।

युधिष्ठिर उवाच।

"सुकृतं ते कृतं राजन्! प्रहृष्टेनान्तरात्मना।
दुर्य्योधनस्य यद्वीर त्वया वाचा प्रतिश्रुतम्॥
एकं त्विच्छामि भद्रन्ते क्रियमाणं महीपते।
राजन्नकर्त्तव्यमपि कर्त्तुमर्हसि मातुल॥
मम त्ववेक्षया वीर शृणु विज्ञापयामि ते।
भवानिह महाराज वासुदेवसमो युधि॥
कर्णार্জ্জুनयोः संग्रामे द्वैरथे राजसत्तम।
कर्णस्य भवता कार्य्यं सारथ्यं नात्र संशयः॥
तत्र पार्थोऽর্জ্জুनो राजन् यदि मन्त्रियमिच्छति।
तेजोवधस्य ते कार्य्यः सौतेरस्यजयावहः।
अकर्त्तव्यमपि ह्येतत् कर्त्तुमर्हसि मातुल॥

शल्य उवाच।

शृणु पाण्डव भद्रं ते यदब्रवीषि दुरात्मनः।
तेजोवधनिमित्तं मां सूतपुत्रस्य संयुगे॥
अहं तस्य भविष्यामि संग्रामे सारथिर्ध्रुवम्।
वासुदेवेन हि समं नित्यं मां स हि मन्यते॥
तस्याहं कुरुशार्দূल प्रतीपमहितं वचः।
ध्रुवं सङ्क्षयिष्यामि योद्धुकामस्य संयुगे॥
यथा च हृतदर्पश्च हृततेजाश्च पाण्डव।
भविष्यति सुखं हन्तुं सत्यमेतद्ब्रवीमि ते॥"

युधिष्ठिरस्तु एनं हतवान्। एतद्वृत्तान्तस्तु महाभारते शल्यपर्व्वणि १७अध्याये द्रष्टव्यः॥) सीमा। शलाका। इति हेमचन्द्रः॥ बिल्ववृक्षः। मत्स्यभेदः। इति रावणनिर्घण्टः॥*॥

शल्यनिःसरणौषधं यथा,—

"रुद्र लाङ्गलिकामूलं छिज्जलस्य तथैव च।
तेन व्रणमुखं लिप्तं शल्यो निःसरति व्रणात्।
चिरकालप्रविष्टोऽपि तेन मार्गेण शङ्कर॥"

इति गारुडे १८३ अध्यायः॥

शल्यः, पुं, क्लीं, शस्त्रविशेषः। शेल इति भाषा। तत्पर्य्यायः। शङ्कुः २। इत्यमरः॥ दीर्घायुधः ३ शलः ४ कुन्तः ५ विषाङ्गुरः ६। इति चिकाण्डशेषः॥

शल्यकः, पुं, (शल्य इव। शल्य + इवार्थे कन्।) मदनवृक्षः। इति शब्दरत्नावली॥ शल्यकीजन्तुः। इति राजनिर्घण्टः॥ (यथा, मनुः। ५।१८।

"श्वाविधं शल्यकं गोधां खड्गकूर्म्मशशांस्तथा।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः॥")

शल्यकण्टः, पुं, (शल्यं तद्रोम कण्डेऽपि यस्य) शल्लकी। इति शब्दचन्द्रिका॥

शल्यलोम, [न्] क्लीं, (शल्यवत् लोम।) शल्लकी इति राजनिर्घण्टः॥

शल्यारिः, पुं, (शल्यस्य अरिस्तन्नाशकत्वात्।) युधिष्ठिरराजः। इति हेमचन्द्रः॥

शल्ल, गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर सक०-सेट्।) शल्लकी। इति दुर्गादासः॥ सौत्रधातुरयम्॥

शल्लं, क्लीं, त्वक्। इति शब्दरत्नावली॥

शल्लः, पुं, भेकः। इति शब्दरत्नावली॥

शल्लकं, क्लीं, (शल्लमेव। स्वार्थे कन्।) त्वक्। इति शब्दरत्नावली॥

शल्लकः, पुं, शोणवृक्षः। इति जटाधरः॥ (शल्लकीजन्तुः। यथा, याज्ञवल्क्ये। १।१७७।

"भक्ष्याः पञ्चनखाः सेधा गोधाकच्छपशल्लकाः।
शशाश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः॥")

शल्लकी, स्त्री, पशुविशेषः। शजारु इति वङ्गभाषा। साहिल इति हिन्दीभाषा॥ तत्पर्य्यायः। श्वाविध् २ शलका ३ शल्यः ४। इति जटाधरः॥ कृकवचपादः ५ छेदारः ६। इति शब्दरत्नावली॥ शल्यकः ७ शल्यमृगः ८ वज्रशल्यः ९ विलेशयः १०। अस्या मांसगुणाः।

"शल्यमांसं गुरु स्निग्धं शीतलं कफपित्तजित्॥"

इति राजनिर्घण्टः॥

भावप्रकाशोक्तगुणाः विलेशयशब्दे द्रष्टव्याः॥ हृद्यविशेषः। (यथा, रामायणे। २।५५।८।

"क्रोशमात्रं ततो गत्वा नीलं प्रेक्ष्य च कानने।
शल्लकीवदरीमिश्रं राम वन्यं च यासुनैः।
स पन्थाश्चित्रकूटस्य गतस्य बहुशो मया॥")

तत्पर्य्यायः। गजभक्षा २ सुवहा ३ सुरभिः ४ रसा ५ मदेरहा ६ कुन्दुरुकी ७ ह्लादिनी ८। इत्यमरः॥ गजभक्षा ९ सुरभी १० मदेरुहा ११ मदारहा १२ ह्लादिनी १३ सिल्लकी १४ सल्लकी १५। इति भरतः॥ सुरभीरसा १६ शिल्लकी १७। इति टीकान्तरम्॥ सिल्लकी १८ सिल्लभूमिका १९। इति शब्दरत्नावली॥ अक्षसूत्री २० कुन्ती २१। इति जटाधरः॥

शल्लकीद्रवः, पुं, सिल्लकः। इति जटाधरः॥

शल्वः, पुं, शाल्वदेशः। इत्युणादिकोषः॥

शव, विकारे। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।)शवति चित्तं कामः। इति दुर्गादासः॥

शवं, क्ली, (शवति गच्छतीति। शव+अच्।) जलम्। इति मेदिनी॥

शवः, पुं, क्ली. (शवति दर्शनेन चित्तं विकरोतीति। शव विकारे+अच्।) मृतशरीरम्। तत्पर्य्यायः। कुणपः २। इत्यमरः॥ क्षितिवर्द्धनः ३। इति शब्दरत्नावली॥ मृतकम् ४। इति वराहपुराणम्॥* तद्दाहविधिर्यथा,—

"नष्टसंज्ञं समुद्दिश्य ज्ञात्वा मृत्युवशं गतम्। महावनस्थितिं गत्वा गन्धांश्च विविधानपि॥ घृततैलसमायुक्तं कृत्वा वै देहशोधनम्। तेजोव्यपकरं चास्य तत् सर्वं परिकल्प्य च॥ दक्षिणायां शिरः कृत्वा सलिलं निधाय च। तीर्थाद्यावाहनं कृत्वा स्नापनं तस्य कारयेत्॥ गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः।

कुरुक्षेत्रञ्च गङ्गा च यमुना च सरिद्वरा॥ कौशिकी च पयोष्णी च सर्वपापप्रणाशिनी। गण्डकी भद्रनामा च सरयूर्बाहुदा तथा॥ वनानि नव वाराहं तीर्थं पिण्डारकं तथा। पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा॥ सर्वाणि मनसा ध्यात्वा स्नानमेवन्तु कारयेत्। प्राणान्नतन्तु तं ज्ञात्वा चितां कृत्वा विधानतः॥ तस्या उपरि तं स्थाप्य दक्षिणाग्रं शिरस्तथा। देवानग्निमुखान् ध्यात्वा गृह्य हस्ते हुताशनम्॥ प्रज्वाल्य विधिवत्तत्र मन्त्रमेतदुदीरयेत्। कृत्वा सुदुष्करं कर्म्म जानता वाप्यजानता॥ मृत्युकालवशं प्राप्य नरः पञ्चत्वमागतः। धर्म्माधर्म्मसमायुक्तो लोभमोहसमावृतः॥ दह एतस्य मात्राणि देवलोकाय गच्छतु। एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम्॥ ज्वलमानं तदा वह्निं शिरःस्थाने प्रदापयेत्। चातुर्वर्णेषु संस्कारमेवं भवति पुत्रक। गात्राणि वाससी चैव प्रक्षाल्य विनिवर्त्तयेत्॥ मृतनाम ततोद्दिश्य दद्यात् पिण्डं मही तले। तदाप्रभृति चाशौचं दैवकर्म्म न कारयेत्॥"

इति वाराहे श्राद्धोत्पत्तिनामाध्यायः॥

अन्यत् दाहशब्द द्रष्टव्यम्॥*॥ तस्य स्पर्शे दोषो यथा,

वाराह उवाच।

"स्पृष्ट्वा तु मृतकं भद्रे नरं पञ्चत्वमागतम्। स्नात्वा शस्त्रं बहिः कृत्वा यः श्मशानं प्रपद्यते॥ पितरस्तस्य सुश्रोणि आत्मानञ्च पितामहाः। श्मशाने जम्बुका भूत्वा भक्षयन्तः शवांस्तथा॥ ततो हरेर्व्वचः श्रुत्वा कर्म्मकामा वसुन्धरा। उवाच मधुरं वाक्यं सर्वलोकहिताय वै॥

धरण्युवाच।

तव नाथ प्रपन्नानां क्व पापं विद्यते प्रभो। प्रायश्चित्तञ्च मे ब्रूहि येन शुध्यति किल्बिषात्॥

वाराह उवाच।

शृणु सुन्दरि! तत्त्वेन यन्मां त्वं परिपृच्छसि। कथयिष्यामि ते क्षौद्रं शोभनं पापनाशनम्॥ एकाहारं दिनान् सप्त त्रिदिनं चाप्युपोषितः। पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्यति किल्बिषात्॥ शवे सृष्टेऽपराधस्य एष ते कथितो विधिः। सर्वथा वर्জ्जनीयो वै सर्वभागवतेन तु॥ य एतेन विधानेन प्रायश्चित्तं समाचरेत्। विमुक्तः सर्वपापभ्यः अपराधो न विद्यते॥ अपिच।

वराह उवाच।

"स्पृष्ट्वा तु मृतकं देवि! योमत्त्वेवेषु तिष्ठति। शतं वर्षसहस्राणि गर्भेषु परिवर्त्तते॥ दश वर्षसहस्राणि चण्डालत्वैव जायते। अन्धः सप्तसहस्राणि मण्डूकश्च शतं समाः॥ मक्षिका त्रीणि वर्षाणि टिट्टिभैकादशं समाः। दश वै सप्त चान्यानि कृकलासो भवेत् समाः॥ हस्ती वर्षशतञ्चैव खरो द्वात्रिंशको भवेत्। मार्জ্জारो नव वर्षाणि वानरो दश पञ्च च॥ एवं स चात्मदोषेण मम कर्म्मपरायणः। प्राप्नोति सुमहद्दुःखं देवि! एव न संशयः॥ ततो हरेर्व्वचः श्रुत्वा दुःखेन परिपृच्छति। सर्वसंसारमोक्षाय प्रत्युवाच वसुन्धरा॥ किमिदं भाषसे देव मानुषाणां दुरासदम्। याकयं भीषणकञ्चैव मम कर्म्मप्रतोदकम्॥ आचाराच्च परिभ्रष्टस्तव कर्म्मपरायणः। तरन्ति येन दुर्गाणि प्रायश्चित्तं तथा वद॥ श्रुत्वा पृथ्वास्ततो वाक्यं लोकनाथो जनार्द्दनः। धर्म्मसंरक्षणार्थाय प्रत्युवाच वसुन्धराम्॥

वराह उवाच।

स्पृष्ट्वा तु मृतकं भूमे मम कर्म्मपरायणः। एकाहारं ततस्तिष्ठेत् दिनानि दश पञ्च च॥ तत एवं विधिं कृत्वा पञ्चगव्यन्तु प्राशयेत्। शुद्धभावं विशुद्धात्मा कर्म्मणा च न लिप्यते॥ एतत्ते कथितं देवि स्पृष्ट्वा मृतकमेव च। दोषञ्चैव विबुध्याथ यत्त्वया पूर्वपृच्छतम्॥ य एतेन विधानेन प्रायश्चित्तं समाचरेत्। अपराधविनिर्मुक्तो मम लोके स गच्छति॥"

इति वाराहे मृतदर्शनस्पर्शनप्रायश्चित्तनामाध्यायः॥*॥ शवानुगमनाशौचं यथा। कूर्म्मपुराणम्।

"प्रेतीभूतं द्विजं विप्रो योऽनुगच्छति कामतः। स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥ एकाहात् क्षत्रिये शुद्धिर्वैश्ये च स्यात् द्व्हेन तु। शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः॥"

एतच्च घृतप्राशनं शुद्धिहेतुत्वाश्रियमपरम्। न तु प्रायश्चित्तवद्भोजनाभावपरम्। तच्च तपस्त्वात्तथा। मनुः सहार्थः। यत्तु याज्ञवल्क्यवचनम्।

"ब्राह्मणेनानुगन्तव्यो न तु शूद्रः कथञ्चन। अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिः॥"

तत्प्रमादादनुगमने कथञ्चनेत्यभिधानात्। अम्भसि न तूदकोदके॥*॥ शूद्रस्य ब्राह्मण शवदहने दोषो यथा,—

"मृतब्राह्मणदेहांश्च दैवात् शूद्रा वहन्ति चेत्। पदप्रमाणवर्षञ्च तेषाञ्च नरके स्थितिः॥ ततस्तेषाञ्च माहात्म्यं करोति हरिरूपिणी। ददाति मुक्तिं तेभ्योऽपि क्रमेण च कृपामयी॥ जन्म पुण्यवतां गेहे कारयित्वा च भारते। स्थानं ददाति वैकुण्ठे निश्चितं जन्मभिस्त्रिभिः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४४अध्यायः॥ शवदूषितगृहजलाशयादीनां शुद्धिर्यथा,—

ब्रह्मपुराणम्।

"येषामभक्ष्यं मांसञ्च तच्छरीरैर्युतञ्च यत्। वापीकूपतडागेषु जलं सर्वञ्च दुष्यति॥"

तच्छरीरैर्मृतशरीरैः। उत्तरवचने कुणपग्रहणात्। यथा,—

"सकुणपं सकर्दमं तेभ्यस्तोयमपास्य तत्। प्रक्षिपेत् पञ्चगव्यञ्च समन्त्रं सवृषद्धिकृत्॥ अपास्य कुणपं तेभ्यो बहुतोयेभ्य एव वा। शतं षष्ट्यथवा त्रिंशत् तोयकुम्भान् समुद्धरेत्॥"

वापी ससोपाना। निःसोपानः कूपः। तड़ागः पद्माकरः। शतादिजलाल्पत्वाद्यपेक्षया अल्पस्य सर्वोद्धारणाभिधानात्। एवं मरणसमये गृहान्निःसार्य्यते अन्यथा गृहस्य दुष्टता स्यात्॥ यथा, हरिवंशे मनुः।

"शूद्रपतिताद्यान्त्या मृताश्चेहिजमन्दिरे। शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा॥ दशरात्राच्छुनि प्रेते मासाच्छूद्रे भवेच्छुचिः। द्वाभ्यान्तु पतिते गेहे अन्त्ये मासचतुष्टयात्। अत्यन्त्य वर्জ्जयेद्गेहमित्येवं मनुरब्रवीत्॥"

द्वाभ्यां मासाभ्यां मासशब्दपाठात्। अन्त्यो म्लेच्छः। अत्यन्त्यः श्वपाकः। इति वाचस्पतिमिश्राः॥ यमः।

"द्विजस्य मरणे वेश्म विशुध्यति दिनत्रयात्। दिनैकेन बहिर्भूमिरग्निप्रोक्षणलेपनैः॥"*॥

यथोक्तकालानन्तरकर्त्तव्यमाह सम्वर्त्तः।

"गृहशुद्धिं प्रवक्ष्यामि अन्तस्थशवदूषिते॥ प्रोत्सृज्य मृण्मयं पात्रं सिद्धमन्नं तथैव च। गृहादपास्य तत् सर्वं गोमयेनोपलेपयेत्। गोमयेनोपनिष्पाद्य छागेनाघ्रापयेद्बुधः॥ ब्राह्मणैर्भिन्नपूतैश्च हिरण्यकुशवारिभिः। सर्वमभ्युक्षयेद्वेश्म ततः शुध्यत्यसंशयः॥"

अत्र मन्त्राणादेशे गायत्री। देवलः।

"पञ्चधा वा चतुर्धा वा भूरमेध्या विशुध्यति। दुष्टा द्विधा त्रिधा वापि शुध्यते मलिनैकधा॥ दहनं खननं भूमेरुपलेपनवापने। पर्य्येष्यवर्षणञ्चापि शौचं पञ्चविधं स्मृतम्॥ प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः। चाण्डालैरुषितं यत्र यत्र विण्मूत्रयते शवः॥ विण्मूत्रोपहतं यच्च कुणपो यत्र दृश्यते।

एवं कश्मलभूयिष्ठा भूरभिख्याति कथ्यते ॥
क्रगिकीटपदक्षेपैर्दूषिता यत्र मेदिनी।
एषया कर्षणैः क्षिप्रा वान्तैर्वा दुष्टतां व्रजेत् ॥
नखदन्ततनूजत्वक्तुषपांशुरजोमलैः।
भस्मपङ्कतृणैर्वापि प्रच्छन्ना मलिना भवेत् ॥"
वापनं क्षुदन्तरेण पूरणम्। क्षपितं वासः।
एषा घनीभूतश्लेष्मादि। चतुर्वादौ पञ्चानां मध्ये यथासम्भवं ग्रहणम्। अङ्गिराः।
"शौचं सहस्ररोमाणां वायुग्न्यर्केन्दुरश्मिभिः।
रेतस्सृष्टं शवस्सृष्टमाविकं नैव दुष्यति ॥"
सहस्ररोमाणां कम्बलानाम्। इति शुद्धितत्त्वम्।

शवकाम्यः, पुं, (शवः काम्यो यस्य।) कुक्कुरः। इति शब्दरत्नावली ॥

शवयानं, क्ली, (शवस्य यानम्।) शववहनार्थखट्वा। मड़ार खाट इति भाषा। तत्पर्य्यायः। काष्ठमञ्चः २। इति हारावली ॥ खोटः ३ खाटी ४ खाटिका ५ शवरथः ६। इति शब्दरत्नावली ॥

शवरः, पुं, (शव + बाहुलकादरः। यद्वा, शवं राति रंश्लातीति। रा + कः।) म्लेच्छजातिविशेषः। इत्यमरः॥ मयूरपुच्छपरिधानो म्लेच्छः किरातः। पत्रपरिधानः शवरः। इति तट्टीकायां भरतः॥ पानीयम्। शिवः। इति मेदिनी ॥ शास्त्रविशेषः। हस्तः। इत्युणादिकोषः ॥

शवरथः, पुं, (शवस्य रथः।) शवयानम्। इति शब्दरत्नावली ॥

शवरलोध्रः, पुं, श्वेतलोध्रः। इति रत्नमाला ॥

शवरालयः, पुं, (शवरस्यालयः।) शवरगृहम्। तत्पर्य्यायः। पक्षणः २। इत्यमरः॥ शक्षणः३। इति शब्दरत्नावली ॥ शवरावासः ४। इति हेमचन्द्रः ॥

शवरावासः, पुं, (शवरस्यावासः।) शवरालयः। इति हेमचन्द्रः ॥

श(ब)वलः, पुं, (शप आक्रोशे + "शपेर्वश्च।" उणा० १। १०७। इति कलः वश्चान्तादेशः।) कर्बुरवर्णः। तद्वति, त्रि। इत्यमरः॥ (यथा, भागवते। ३। २३। २४।
"अङ्गञ्च मलपङ्केन संकल्पं शवलस्तनम् ॥")

शवला, स्त्री, (शवल + स्त्रियां टाप्। शवलवर्णा गौः। इत्यमरभरतौ ॥

शवली, स्त्री, (शवलयोगादन्यतो ङीष्।) शवलवर्णा गौः। इत्यमरभरतौ ॥

शवसानः, पुं, पथिकः। इति सिद्धान्तकौमुदी ॥ वैदिकपदोऽयम्। शवधातोरौणादिकसानच्प्रत्ययेन निष्पन्नमेतत् ॥

शश, प्लवने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) शशौ शशिशुशोः शशतिति किरातयमकात्। शशति भेकः प्लवेन गच्छतीत्यर्थः। ल फल भज इत्यत्र वर्ज्जनमस्यैव दन्त्यान्तोऽयमपीत्येके। इति दुर्गादासः॥

शशः, पुं, (शशति प्लवेन गच्छतीति। शश + अच्।) मृगविशेषः। इत्यमरः॥ शशात् इति खरगोश इति च भाषा॥(यथा, मनौ।३।२७०।
"शशकूर्म्मयोस्तु मांसेन मासानेकादशैव तु ॥"
अस्य मांसगुणाः। स्वादुत्वम्। कषायत्वम्। मलवद्धकारित्वम्। शीतत्वम्। लघुत्वम्। शोथातीसारपित्तरक्तनाशत्वम्। रूक्षत्वञ्च। इति राजवल्लभः। अपि च।
"शशमांसं त्रिदोषघ्नं दीपनं श्वासकासनुत् ॥"
इति राजनिर्घण्टः॥
अन्यच्च।
"शशः शूली लोमकर्णो विलेशयः प्रकीर्त्तितः।
शंशः शीतो लघुर्ग्राही रूक्षः स्वादुः सदा हितः ॥
वह्निकृत् कफपित्तघ्नो वातसाधारणः स्मृतः।
ज्वरातीसारशोषास्रश्वासमेदश्च सः ॥"
इति भावप्रकाशः॥
श्राद्धेऽस्य मांसस्य दानफलं यथा,—
"इविष्यान्नेन वै मासं पायसेन च वत्सरम्।
मात्स्यहारिणकौरभ्रशाकुनिच्छागपार्षतैः ॥
ऐणरौरववाराहशाग्रैर्मांसैर्यथाक्रमम्।
मासद्वयाभिवृध्यन्ति दत्तेनेह पितामहाः ॥"
इति श्राद्धतत्त्वम् ॥
विष्णवे एतन्मांसस्य देयत्वं यथा,—
"मार्गं मांसं तथा च्छागं शशं समनुयुज्यते।
एतानि हि प्रियाणि स्युः प्रयोज्यानि वसुन्धरे॥"
इत्येकादशीतत्त्वम् ॥
चन्द्रलाञ्छनः। इति धरणिः॥ वोलः। लोध्रः। मनुष्यविशेषः। इति मेदिनी॥ स तु चतुर्विधपुरुषान्तर्गतपुरुषविशेषः। तस्य लक्षणं यथा,—
"मृदुवचनसुशीलः कोमलाङ्गः सुकेशः।
सकलगुणनिधानः सत्यवादी शशोऽयम् ॥'
इति रतिमञ्जरी ॥

शशक, पुं, (शश + स्वार्थे कन्। शशः। यथा,
"शशकः शल्लकी गोधा खड्गी कूर्म्मश्च पञ्चमः।
भक्ष्याः पञ्चनखेष्वेते न भक्ष्यान्यज्जातयः॥"
इति स्मृतिः॥

शशधरः, पुं, (शशस्य धरः।) चन्द्रः। (यथा, साहित्यदर्पणे। १०।
"इदं वक्त्रं साह्लादरहितकलङ्कः शशधरः॥")
कर्पूरः। इत्यमरः॥

शशपृक्तकं, क्ली, नखाघातः। इति शब्दमाला ॥

शशबिन्दुः, पुं, विष्णुः। राजविशेषः। इति मेदिनी॥ (यथा, महाभारते। १। १। २२५।
"रामं दाशरथिञ्चैव शशबिन्दुं भगीरथम् ॥")
स तु चित्ररथपुत्रः। इति पुराणम् ॥

शशभृत्, पुं, (शशं बिभर्त्तीति। भृ + क्विप्।) चन्द्रः। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। ७३। २५८।
"गृहीतो राजशशभृत् वैद्यासाध्येन यक्ष्मणा॥")

शशभृद्भृत्, पुं, (शशभृतं चन्द्रं बिभर्त्तीति। भृ + क्विप्। शिवः। यथा,—
"आत्मानं योगनिद्राञ्च चिन्तयित्वा मनस्विनी।
दक्षिणे स्वशरीरस्य भागार्द्धं शशभृद्धृतः ॥"
इति कालिकापुराणे ४४ अध्यायः॥

शशलोम, [न्] क्ली, (शशस्य लोम।) शशकस्य रोम। तत्पर्य्यायः। शशोर्णम् २। इत्यमरः॥ (पुं, तन्नामकराजः। यथा, महाभारते। १५। २०। १४।
"शशलोमा स राजासीत् राजन् परमधार्मिकः ॥")

शशशिम्बिका, स्त्री, जीवन्ती। इति राजनिर्घण्टः॥

शशस्थली, स्त्री, अन्तर्वेदी। इति त्रिकाण्डशेषः॥ सा च गङ्गायमुनयोर्मध्यदेशः। अधुना दोयाव इति नाम्ना ख्यातः॥

शशाङ्कः, पुं, (शशोऽङ्कचिह्नं अङ्के क्रोड़े वा यस्य।) चन्द्रः। इति हलायुधः॥ (यथा, कथासरित्सागरे। १८। ३९५॥
"स जनेर्ष्टङ्गे तत्र शिखरे ज्वलितौषधौ।
शशाङ्क इव पूर्व्वाद्रे रुदयस्थो विदूषकः॥")
कर्पूरः। इति राजनिर्घण्टः॥

शशाण्डुलिः, स्त्री, कर्कटीभेदः। तत्पर्य्यायः। बहुफला २ तण्डुली ३ क्षेत्रसम्भवा ४ चुद्राम्बा ५ लोमशफला ६ धूम्रा ७ हस्तफला ८। अस्या गुणाः।
"शशाण्डुलिस्तिक्तकटुश्च कोमला
कटूम्लयुक्ता मधुरा कफापहा।
पाके तु साम्ला मधुरा विदाहिनी
कफे तु शुष्का रुचिकृच्च दीपनी ॥"
इति राजनिर्घण्टः॥

शशादः, पुं, (शशमत्तीति। अद + अच्।) श्येनपक्षी। इति राजनिर्घण्टः॥ (इक्ष्वाकुपुत्रः। यथा, महाभारते। ३। २२१। १।
"इक्ष्वाकौ संस्थिते राजन् शशादः पृथिवीमिमाम्।
प्राप्तः परमधर्म्मात्मा सोऽयोध्यायां नृपोऽभवत्॥"
अस्य विकुक्षिरिति नाम आसीत्। अयं हि पित्रनुज्ञातः श्राद्धार्थं मांसमानेतुं वनं गतः मृगान् व्यापादयामास। ततोऽतिश्रान्तः क्षुत्परीत एकं शशमभक्षत् अतोऽस्य शशाद इति नाम अजायत। एतद्विवरणं भागवते। ९। ६ अध्याये तथा विष्णुपुराणे ४। २ अध्याये च द्रष्टव्यम्॥)

शशादनः, पुं, (शशमत्तीति। अद + ल्यु।) श्येनपक्षी। इत्यमरः॥

शशिकला, स्त्री, पञ्चदशाक्षरपादच्छन्दोविशेषः। यथा,—
"गुरुनिधनमनु लघुरिह शशिकला।
मलयजतिलकससुदितशशिकला
व्रजयुवतिलसदलिकगगनगता।
सरसिजनयनहृदयसलिलनिधिं
व्यतनुत वितततरमसपरितरलम्॥"
इति छन्दोमञ्जरी॥

(शशिनः कला । चन्द्रकला । यथा,—
"कमलिनी मलिनी दिवसात्यये
शशिकला विकला चपदात्यये ।
इति विधिविदधे प्रमदामुखम्
भवति विभ्रतमः क्रमशो जनः ॥"
इत्युद्भटः ॥)
शशिकान्तं, क्ली, (शशी कान्तो यस्य ।) कुमुदम् । इति राजनिर्घण्टः ॥
शशिकान्तः, पुं, (शशी कान्तो यस्य ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥ यथा, (हुहत्संहितायाम् । ८० । ४ ।
"वैदूर्य्यविपुलकविमलक-
राजमणिस्फटिकशशिकान्ताः ॥")
शशिध्वजः, पुं, (शशी ध्वजे यस्य ।) भल्लाटपुरराजः । यथा,—
"ततः शशिध्वजो राजा युद्धादाद्रृत्य पुत्रकान् ।
सुशान्तायां मतिं दृष्ट्वा रमां प्रादात् स कल्कये॥
विशाखयूपभूपाय रुचिराख्यं संयुगम् ।
अन्याश्चक्रुर्नृपेष्वापि भल्लाटं पुरमाययुः ॥"
इति कल्किपुराणे २५ अध्यायः ॥
शशिप्रभं, क्ली, (शशिनः प्रभेव प्रभा यस्य ।) कुमुदम् । इति शब्दमाला ॥ मुक्ता । इति राजनिर्घण्टः ॥ चन्द्रप्रभायुक्ते, त्रि ॥ (चन्द्रप्रभासदृशे च, त्रि । यथा महाभारते । १ । ८६ । ४ ।
"तस्या वासः समुद्भूतं मारुतेन शशिप्रभम् ॥")
शशिप्रभा, स्त्री, (शशिनः प्रभा ।) ज्योत्स्ना । इति जटाधरः ॥
शशिभूषणः, पुं, (शशी भूषणं यस्य) शिवः । इति शशिशेखरशब्ददर्शनात् ॥
शशिलेखा, स्त्री, चन्द्रकला । गुडूची । हस्तभेदः । इति मेदिनी ॥ तदुक्तस्य लक्षणादि यथा,—
"स्त्री मो यौ चेत् भवेतां सप्ताष्टकैश्चन्द्रलेखा ।
विच्छेदे ते मुरारे पाण्डुप्रकाशा कृशाङ्गी
म्लानच्छायं दुकूलं न भ्राजते विभ्रती सा ।
राधाश्रोदस्य मध्ये लीला यथा चन्द्रलेखा
किम्वान्तो त्वां स्मरन्ती धत्ते ध्रुवं जीवयोगम्॥"
इति छन्दोमञ्जरी ॥
शशिवाटिका, स्त्री, पुनर्नवा । इति राजनिर्घण्टः ॥
शशिशेखरः, पुं, (शशी शेखरे यस्य ।) शिवः । इति हेमायुधः ॥ (यथा, कथासरित्सागरे । १ । २२ ।
"तस्याः स्तुतिवचो श्रुत्वा तामङ्कमधिरोप्य सः ।
किन्ते प्रियं करोमीति तमाचे शशिशेखरः ॥")
बुधभेदः । तत्पर्य्यायः । हेरम्बः २ हेरकः ३ चक्रसम्बरः४ देवः५ वज्रकपाली ६ निशुम्भी० वज्रटीकः ८ । इति त्रिकाण्डशेषः ॥
शशी, [न्] पुं, (शशोऽस्यास्तीति । शश + इनिः चन्द्रः । यथा,—
'हिमांशुचन्द्रमाश्चन्द्रः शशी चन्द्रो हिमद्युतिः॥'
भरतधृतशब्दार्थवः ॥
(यथा च हितोपदेशे ।
"शशिनस्तुखवंशोऽपि निर्धनः परिभूयते ॥")
अहंदुआविशेषः । इति हेमचन्द्रः ॥
शशीर्षं, क्ली, (शशस्य उर्षा । अभिधानात् क्लीवत्वम् ।) शशस्य लोम । इत्यमरः ॥
शश्वत्, व्य, (शश + बाहुलकादत् ।) पुनःपुनः इत्यमरः ॥ (यथा, गीतायाम् । ६ । ३१ ।
"क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं नियच्छति ॥")
शश, वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) शशति । इति दुर्गादासः ॥
शष्कुलः, पुं, क्षिप्तिः । इति शब्दचन्द्रिका ॥ डरकरमचा इति भाषा ॥
शष्कुली, स्त्री, (शष्कुल + गौरादित्वात् ङीष्) तिलतण्डुलमाषमिश्रितयवागूः । इति शब्दचन्द्रिका ॥ कर्णरन्ध्रम् । इति शब्दरत्नावली ॥ मत्स्यभेदः । सौरी । इति हिन्दी भाषा । अस्या गुणाः ।
"शष्कुली ग्राहिणी रूक्षा मधुरा तुवरा स्मृता ।"
इति भावप्रकाशः ॥
(पिष्टकविशेषः । यथा, महाभारते । १२ । २२८ । ६२ ।
"पायसं क्षसरं मांसमपूपानथ शष्कुलीः ॥")
शष्पं, क्ली, (शष + "खष्पशष्पशष्पवाष्परूपपर्पतल्पाः ।" उणा० ३ । २८ । इति पत्वं निपात्यते ।) बालतृणम् । इत्यमरः ॥ (यथा, रघुवंशे । २ । २६ ।
"गङ्गाप्रपातान्तविरूढशष्पं
गौरीगुरोर्गह्वरमाविवेश ॥")
शस, उ वधे । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) उ, शसित्वा शस्त्वा । इति दुर्गादासः ॥
शस, इ ङ आशिषि । आङ्पूर्वकोऽयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) इ, आशंसते । ङ, आशंसते । आशीरिष्टार्थशंसनम् । इच्छायामित्यन्ये । इति दुर्गादासः॥
शसनं, क्ली, (शस + ल्युट् ।) यज्ञार्थपशुहननम् । इति शसनशब्दटीकायां रामाश्रमः ॥ (शस्यते हन्यतेऽत्र इत्यधिकरणे ल्युटि इत्याख्यानम् । यथा, ऋग्वेदे । १० । ८८ । १४ ।
"मित्रक्रुवो यच्छसनेन गावः ।"
"शसने विशसनस्थाने ।"इति तद्भाष्ये सायणः
शस्कुली, स्त्री, पिष्टकविशेषः । पुली पिटा इति भाषा । (यथा, महाभारते । ७ । ६२ । ७ ।
"मोदकान् पूरिकापूपान् धानाधमक-
शस्कुलीः ॥")
अस्या गुणाः ।
"पर्पटालघवो रूक्षाः शस्कुल्यः कफपित्तलाः ॥"
काश्चिकयुक्ततिलशस्कुली त्याज्या यथा,—
"मांसैरिक्षुविकारांश्च काञ्जिकैस्तिलशस्कुलीम्
मूलकं माषसूपेन मधुना च न भक्षयेत् ॥"
इति राजवल्लभः ॥*॥
शस्त्रं हन्या तन्नक्षत्रप्रायश्चित्तं यथा । हन्या पायसपूपशस्कुलीक्षशरसंयावशिग्रुलोहितशुक्लनिर्य्यासामेध्यप्रभवाणां भक्षणे कामतस्त्रिरात्रोपवासः । अकामतस्तदर्द्धम् । अङ्गिरादीनां पादपादहानिः । इति प्रायश्चित्तविवेकः ॥
शस्, इ र लु स्वप्ने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) इ, शंस्यते । नमध्यपाठेऽपि नस्य उपधात्वाभावात् लोपाभावे इदनुबन्धो वेदेषूच्चारणभेदार्थः । सु, शंस्ति । र, वैदिकः । इति दुर्गादासः ॥
शस्त्रं, क्ली, (शस् + क्तः ।) कल्याणम् । इत्यमरः ॥ (यथा, महाभारते । १३ । १० । ४२ ।
"लक्षयित्वा पुरोधास्तु बहुशस्त्रं नराधिपम् ॥"
शरीरम् । इति त्रिकाण्डशेषः ॥
शस्तः, त्रि, कल्याणयुक्तः । स्तुतः । इत्यमरः ॥ प्रशस्तः । इति मेदिनी ॥ (यथा, भागवते । ३ । २८ । १५ ।
"क्रियायोगेन शस्तेनानातिहिंसेन नित्यशः॥"
निहतः । यथा, महाभारते । ३ । ४० । ३ ।
"शक्राभिषेके सुमहद्धनुर्ज्जलदनिस्वनम् ।
प्रगृह्य दानवाः शस्तास्त्वया कृष्णेन च प्रभो॥")
शस्तकं, क्ली, अङ्गुलित्राणम् । यथा,—
"अङ्गुलित्रं शस्तकञ्च तथा चाङ्गुष्ठरक्षकम् ॥"
इति शब्दरत्नावली ॥
शस्तकेशकः, त्रि, (शस्ताः केशा यस्य कन् । प्रशस्तकेशयुक्तः । इति शब्दरत्नावली ॥
शस्त्रं, क्ली, (शस्यते हिंस्यते अनेन । "अमिचिमिदिशसिभ्यः क्रः ।" उणा० ४ । १६३ । इति क्रः । यद्वा, "दात्रीशस्युयुजेति ।" ३ । २ । १८२ इति ष्ट्रन् ।) लोहम् । अस्त्रम् । इत्यमरः ॥ शस्त्रास्त्रैर्बहुधा मुक्तैरित्यादिदर्शनात् शस्त्रास्त्रयोः कश्चिद्भेदमाह । येन करधृतेन हन्यते तत् शस्त्रं खड्गादि । येन क्षिप्तेन हन्यते तदस्त्रं काण्डादि । इति तट्टीकायां भरतः ॥ तत्पर्य्यायः ।
"अस्त्रे शस्त्रं प्रहरणमुद्धातो हेतिरायुधः ।"
इति शब्दरत्नावली ॥
"एकैकमस्त्रं शस्त्रञ्च देवैर्मुक्तं सहस्रधा ।
चिच्छेद लीलयैवेशो जगतां मधुसूदनः ॥"
इति विष्णुपुराणे ५ अंशे ३० अध्यायः ॥
अस्त्रं मन्त्राभिमन्त्रितम् । शस्त्रं तदितरत् । इति तट्टीका ॥*॥ राज्ञां अस्त्राचार्य्यो यथा,—
"यन्त्रयुक्तो पाणियुक्तो मयुक्तो युक्तधारिते ।
अस्त्राचार्य्यो निरुद्देगः कुशलश्च विशिष्यते ॥"
तदगारनियुक्तस्य लक्षणं यथा,—
"स्थापनाजातितत्त्वज्ञः सततं प्रतिजाग्रतः ।
राज्ञः स्यादायुधागारे दक्षः कर्म्मसु चोद्यतः ॥"
इति मात्स्ये १८८ अध्यायः ॥
अस्त्रचिकित्सा यथा । "अथातोऽग्रोपहरणीयमध्यायं व्याख्यास्यामः । त्रिविधं कर्म्म । पूर्व्वकर्म्म प्रधानकर्म्म पश्चात्कर्म्मेति । तदध्यायिं प्रत्यवदेक्ष्यामः । अस्मिन् शास्त्रे शस्त्रकर्म्म-

प्राधान्यात् शस्त्रकर्मैव तावत् पूर्व्वमुपदेक्ष्याम-स्तत्सम्भारांश्च । तत्र शस्त्रकर्म्माष्टविधम् । तद्यथा । छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्य्यं विस्राव्यं सीव्यमिति ॥* ॥ अतोऽन्यतमं कर्म्म चिकिर्षता वैद्येन पूर्व्वमेवोपकल्पयितव्यानि । तद्यथा । यन्त्रशस्त्रक्षाराग्निश्लाकाशृङ्गतुम्ब-जलौकालाबूजाम्बवोष्ठपिचुप्रोतसूत्रपत्रपट्टमधु-घृतवसाप्रभृतीन्यालेपनकल्कव्यञ्-जनशीतोष्णोदककटाहादीनि परिकर्म्मिणश्च स्निग्धाः स्थिरा बलवन्तः । ततः प्रशस्तेषु तिथि-करणमुहूर्त्तनक्षत्रेषु दध्यक्षताक्षपानरत्नैरग्निं विप्रान् भिषजश्चार्चयित्वा कृतबलिमङ्गलस्वस्ति-वाचनं लघु भुक्तवन्तं प्राङ्मुखमातुरमुपवेश्य यन्त्रयित्वा प्रत्यङ्मुखो वैद्यो मर्म्मशिरास्नायु-सन्धिस्थिमनीः परिहरन्ननुलोमं शस्त्रं निद-ध्यादापूयदर्शनात् सकृदेवापहरेच्छस्त्रमाशु च। महत्स्वपि च पाकेषु द्व्यङ्गुलं त्र्यङ्गुलं वा शस्त्र-पदमुक्तम् । तत्रायतो विशालः समः सुविभक्त इति त्रयगुणाः । भवतश्चात्र ।

"आयतश्च विशालश्च सुविभक्तो निराश्रयः । प्राप्तकालकृतश्चापि व्रणः कर्म्मणि शस्यते ॥ शौर्य्यमाशु क्रिया शस्त्रतैक्ष्ण्यकस्त्रे देवेपथू । असंमोहश्च वैद्यस्य शस्त्रकर्म्मणि शस्यते ॥"

एकेन वा त्रयेणानुध्यमाणेनान्तरावुद्धावेक्ष्य अपरान् व्रणान् कुर्य्यात् । भवन्ति चात्र ।

"यतो यतो गतिं विद्यादुत्सङ्गो यत्र यत्र च । तत्र तत्र व्रणं कुर्य्यादृजवो न तिष्ठति ॥"

तत्र भ्रूगण्डशङ्खललाटाक्षिपुटोष्ठदन्तवेष्टकक्षा-कुक्षिवङ्क्षणेषु तिर्य्यक्छेद उक्तः ॥

"चन्द्रमण्डलवच्छेदान् पाणिपादेषु कारयेत् । अर्द्धचन्द्राकृतींश्चापि गुदे मेढ्रे च बुद्धिमान् ॥"

अन्यथा तु शिरास्नायुच्छेदनादतिमात्रं वेदना चिराद्व्रणसंरोहो मांसकन्दो प्रादुर्भावश्चेति । मूढ़गर्भोदरार्शोऽश्मरीभगन्दरमुखरोगेष्वभुक्त-वतः कर्म्म कुर्वीत । ततः शस्त्रमवतार्य्य शीता-भिरद्भिरातुरमाश्वस्य समन्तात् परिपीड्याङ्गु-ल्या व्रणमभिमृज्य प्रक्षाल्य कषायेण प्रोते-नोदकमादायतिलकल्कमधुसर्पिःप्रगाढ़ामौषध युक्तां वर्त्तिं प्रणिदध्यात् । ततः कल्केनाच्छाद्य नातिस्निग्धां नातिरूक्षां नातिघनां कवलिकां दत्त्वा वस्त्रपट्टेन बध्नीयादेदनारक्तोष्मैर्धूपैर्धूपयेद्व्रणान्नैव मन्दं रक्षां कुर्वीत । ततो गुग्गुल्व-गुरुसर्ज्जरसवचागौरसर्षपचूर्णैलवणनिम्बपत्रव्या-मिश्रैराज्ययुक्तैर्धूपैर्धूपयेत् । आज्यशेषेण चास्य प्राणान् समालभेत ।उदकुम्भाच्चापो गृहीत्वा प्रोक्षयन् रक्षाकर्म्म कुर्य्यात्तद्यथा: ॥* ॥

"कृत्यानां प्रतिघातार्थं तथा रक्षोभयस्य च । रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यताम् ॥ नागाः पिशाचा गन्धर्वाः पितरो यक्षराक्षसाः । अभिद्रवन्ति ये ये त्वां ब्रह्मादा घ्नन्तु तान् सदा ॥ पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः । दिक्षु वास्तुनिवासाश्च पान्तु त्वां ते नमस्कृताः ।

पान्तु त्वां मुनयो ब्राह्म्या दिव्या राजर्षयस्तथा । पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः ॥ अग्नी रक्षतु ते जिह्वां प्राणान् वायुस्तथैव च । सोमो व्यानमपानं ते पर्य्यक्षः परिरक्षतु ॥ उदानं विद्युतः पान्तु समानं स्तनयित्नवः । बलमिन्द्रो बलपतिर्मनुर्मन्युं मतिं तथा ॥ कामांस्ते पान्तु गन्धर्व्वाः सत्त्वमिन्द्रोऽभिरक्षतु । प्रज्ञां ते वरुणो राजा समुद्रो नाभिमण्डलम् ॥ चक्षुः सूर्य्यो दिशः श्रोत्रे चन्द्रमाः पातु ते मनः । नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव ॥ रेतस्त्वाप्याययत्वापो रोमाण्योषधयस्तथा । आकाशं खानि ते पातु देहं तव वसुन्धरा ॥ वैश्वानरः शिरः पातु विष्णुस्तव पराक्रमम् । पौरुषं पुरुषश्रेष्ठो ब्रह्मात्मानं भ्रुवौ भ्रुवौ ॥ एता देहे विशेषेण तव नित्या हि देवताः । एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि ॥ स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्व-न्ताम् । स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्व्वतौ ॥ स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः सहेन्द्रगाः । पितामहकृता रक्षा स्वस्त्यायुर्वर्द्धतां तव । एतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः ॥"

इति स्नाहा ॥

"तैर्व्वेदात्मकैर्मन्त्रैः कृत्वा व्याधिविनाशनैः । मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि ॥"*॥

ततः कृतरक्षमातुरमागारं प्रवेश्याचारिक-मादिशेत् । ततस्तृतीयेऽहनि विसृज्यैवं बध्नी-याद्दक्षपट्टेन । न चैनं त्वरमाणोऽपरेद्युर्मोचये-त् । द्वितीयदिवसे परिमोक्षणादिग्रथितो व्रणविरादुपसंरोहति तीव्रदजश्च भवति । अत ऊर्द्धं दोषकालबलादीनवेक्ष्य कषायालेपनबन्धा-हाराचारान् विदध्यात् । न चैनं त्वरमाणः सान्तर्दोषं रोपयेत् स क्ष्वेडेनाप्यपचारेणाभ्य-न्तरमुखक्लेदं कृत्वा भूयोऽपि विकरोति । भवन्ति चात्र ।

"तस्मादन्तर्वहिर्यत्नैव सुरुढं रोपयेद्व्रणम् । रूढेऽप्यजीर्णव्यायाममध्वयायादीन् विवर्जयेत् ॥ हर्षं क्रोधं भयञ्चापि यावदास्थैर्य्यसम्भवात् । मासान् षट् सप्त वा नृणां विधिरेष प्रशस्यते ॥ हेमन्ते शिशिरे चैव वसन्ते चापि मोक्षयेत् । वाहात् व्याहाच्छरदृग्रोमवर्षासपि च बुद्धि-मान् ॥ अतिपातेषु रोगेषु नेच्छेद्विधिमिमं भिषक् । प्रदिशागारवच्छीघ्रं तत्र कुर्य्यात् प्रतिक्रियाम् ॥

या वेदना शस्त्रनिपातजाता
तीव्रा शरीरं प्रदुनोति जन्तोः ।
घृतेन सा शान्तिमुपैति सिक्ता
कोष्णेन यष्टीमधुकान्वितेन ॥"

इति सुश्रुते ५ अध्यायः ॥

शस्त्र,पुं, (शस्यतेनेति । शस वधे + "असिचि मिदिशसिभ्यः क्तः ।"उणा० ४।१६३। इति क्तः। युद्धा, दात्रौषधयुयुजेति ।" ३ । २ । १८२ ।

इति ष्ट्रन् ।) खड्गः । यथा,—

"रिष्टिः खड्गस्तरवारिः शस्त्रो भद्रात्मजश्च सः ॥"

इति त्रिकाण्डशेषः ॥

शस्त्रक, क्ली, (शस्त्रमेव । स्वार्थे कन् ।) लोहम् । इत्यमरः ॥

शस्त्रकोशतरुः, पुं. (शस्त्रस्य खड्गस्य कोश इव तरुः।) महापिण्डीतरुः। इति राजनिर्घण्टः॥

शस्त्रजीवी, [न्] (शस्त्रेण जीवतीति । जीव + णिनिः ।) शस्त्राजीवः । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । १७ । २४ ।

"रविजेन सिते विजिते
गणमुख्याः शस्त्रजीविनः चक्रम् ॥")

शस्त्रधारणजीवकः, त्रि, (शस्त्रधारणेन जीव-तीति । जीव + ण्वुल् ।) शस्त्राजीवः । इति शब्दरत्नावली ॥

शस्त्रपाणिः, त्रि, (शस्त्रं पाणौ यस्य ।) शस्त्र-हस्तः । यथा,—

"उल्काहस्तोऽग्निदो ज्ञेयः शस्त्रपाणिश्च घातकः ।
केशाकेशिगृहीतश्च युगपत् पारदारिकः ॥"

इति व्यवहारतत्त्वम् ॥

अपि च ।

"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारापहारी च षड़ेते आततायिनः ॥"

इति प्रायश्चित्तविवेकः ॥

शस्त्रभृत्, त्रि, शस्त्रधारी । शस्त्रं बिभर्त्तीति । भृधातोः क्विप्प्रत्ययेन निष्पन्नमेतत् ॥ (यथा, रघुः । २ । ४० ।

"शस्त्रेण रक्ष्यं यदशक्यरक्षं
न तद्यशः शस्त्रभृतां क्षिणोति ॥")

शस्त्रमार्जः,पुं,(शस्त्राणि मार्ष्टीति । मृज + अण्।) शस्त्रमार्जनकर्त्ता । सिकलगर इति भाषा । तत्पर्य्यायः । असिधावकः२। इत्यमरः ॥ शस्त्र-मार्जः ३ असिधावः ४। इति शब्दरत्नावली ॥ शानाजीवः ५ भ्रमासक्तः ६ । इति हेम-चन्द्रः ॥

शस्त्रहतः, त्रि, (शस्त्रेण हतः ।) शस्त्राघातेन मृतः । तस्याशौचादि यथा । व्यासः ।

"क्षतेन म्रियते यस्तु तस्याशौचं भवेद्दिधा ।
आसमाप्तात् त्रिरात्रं स्यात् दशरात्रमतःपरम् ॥
शस्त्राघाते व्रणाद्दूर्द्धं यदि कश्चित् प्रमीयते ।
अशौचं प्राकृतं तत्र सर्व्ववर्णेषु नित्यशः ॥"

अत्र शस्त्रघातपदं क्षतेतरशस्त्रघातपरं पारि-भाषिकशस्त्रघातपरमपि । यथा, देवीपुराणे ।

"पश्चिमस्त्यक्तवर्त्मे तु दंष्ट्रिशृङ्गिनखेहताः ।
पतनानशनप्रायैर्वज्राग्निविषबन्धनैः ।
मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः ॥"

अन्यथा क्षतं विना पतनादिभिर्बिलम्बमृतानां दिनग्रहणे अनध्यवसायः स्यात् । न च शास्त्रीय-व्यवहारेऽन्तरङ्गत्वेन पारिभाषिकस्यैव युक्तत्व-मिति वाच्यं श्राद्धे पारिभाषिकापारिभाषिक-

श्रस्त्रवातप्रहणवदत्रापि तथायुक्तत्वात् पारिभाषिकत्वादेव न प्रकरणनियमः ॥*॥
"क्रोधात् प्रायं विषं वह्निं श्रस्त्रमुद्बन्धनं जलम्।
गिरिवृक्षप्रपातञ्च ये कुर्वन्ति नराधमाः ॥
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः।
पाततानां न दाहः स्यान्नाश्रौ दृष्टिर्नास्थिसञ्चयः॥
न चाम्बुपातः पिण्डो वा कार्य्यः श्राद्धादिकं क्वचित्
एतानि पतितानाञ्च यः करोति विमोहितः।
तस्यैवं दहनेनैव तस्य शुद्धिर्न चान्यथा ॥"*॥
तदिदञ्च मरीचिः।
"विषश्रस्त्रक्षयापदाहितिर्य्यग्ब्राह्मणघातिनाम्।
चतुर्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता॥"
इति शुद्धितत्त्वम् ॥

श्रस्त्रहतचतुर्दश्यी, स्त्री, (श्रस्त्रहतानां चतुर्दश्यी। युद्धादिहतानां श्राद्धादिकर्म्मणि प्रशस्ततयास्यास्तथात्वम्।) गौणाश्विनकृष्णचतुर्दश्यी। गौणकार्त्तिककृष्णचतुर्दश्यी च। यथा, लिङ्गपुराणम्।
"दीपमालां तथा कृष्णचतुर्दश्यां शिवाग्रतः।
चतुष्पथे च नद्याञ्च चत्वरेषु गृहेषु च।
एकविंशकुलोपेतो वसेच्छिवपुरे नरः॥"
अत्र श्रस्त्रहतानामुल्कादानं अन्येषान्तु दर्शे। इति संवत्सरकौमुदी ॥*॥ अन्यच्च। अथ श्रस्त्रहतचतुर्दश्यी तत्र विष्णुः। युद्धहतानां श्राद्धकर्म्मणि चतुर्दश्यी प्रशस्ता। युद्धहतानामेवेति न नियमार्थमिदम्। ब्रह्मपुराणे।
"प्रायोऽनशनशस्त्राग्निविषाद्युद्बन्धनान्तथा।
चतुर्दश्यान्तु कर्त्तव्यं तत्प्रशस्त्यमिति निश्चयः॥"
प्रायो महापथगमनम्। वायुपुराणे।
"युवानस्तु गृहे यस्य मृतास्तेषान्तु दापयेत्।
श्रस्त्रेण तु हता ये वै तेषां दद्याच्चतुर्दशीम्॥"
युवान एव पित्रादयो मृता इत्यर्थः। मरीचिः।
"विषश्रस्त्रक्षयापदाहितिर्य्यग्ब्राह्मणघातिनाम्।
चतुर्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता॥
ब्राह्मणक्षतघातोऽस्यास्तीति ब्राह्मणघाती यो च वैब्राह्मणैर्हता इति ब्रह्मपुराणवचनात्। न तु क्षतब्राह्मणघातः तस्य पतितत्वात् अन्येषामश्रस्त्रादिहतानाम्। एतच्च श्रस्त्रहतश्राद्धं विष्णुादिभिः सामान्यप्रकरणलिखनात् सकलकृष्णपक्षसाधारणं पित्रादीनामिव पार्वणविधिप्रकरणात् पार्वणविधिना कार्य्यम्।
"सपिण्डीकरणादूर्द्धं यत्र यत्र प्रदीयते।
तत्र तत्र व्ययं कुर्य्याद्दर्शयित्वा मृताहनि॥"
इति गरुडवचनाच्च ॥*॥
ननु अन्येषान्तु विगर्हिता इति श्रवणात्। कथं वैपुरुषिकपार्वणविधिः। न यस्य पुरुषाश्रय एव श्रस्त्रहतास्तस्य वैपुरुषिकविधिरुपपद्यते। एवं यस्य द्वौ श्रस्त्रहतावेको वा तेनापि द्वैपुरुषिकैकपुरुषिकं पार्वणं कर्त्तव्यम्। यथा, मनुः।
"पिता यस्य तु हतः स्यात् जीवेद्वापि पितामहः।
पितुः मनामयङ्कीर्त्त्यं कीर्त्तयेत् प्रपितामहम्॥"
तथा हारीतः।
"पितामहेऽपि जीवे वै पितर्य्येव समापयेत्॥"
नन्वेकोद्दिष्टमेव श्रूयते। यथा शङ्खः।
"सपिण्डीकरणादूर्द्धमृते क्षत्रचतुर्दशीम्।
प्रतिसंवत्सरादन्यदेकोद्दिष्टं न कारयेत्॥"
यमः
"सपिण्डीकरणादूर्द्धं यत् पिढभ्यः प्रदीयते।
एकोद्दिष्टविधानेन तत् कार्य्यं श्रस्त्रघातिने॥"
भविष्यपुराणे।
"समत्वमागतस्यापि पितुः श्रस्त्रहतस्य च।
चतुर्दश्यान्तु कर्त्तव्यमेकोद्दिष्टं न पार्वणम्॥
चतुर्दश्यान्तु यच्छ्राद्धं सपिण्डीकरणे कृते।
एकोद्दिष्टविधानेन तत्कार्य्यं श्रस्त्रघातिने॥"*॥
उच्यते। एषां वचनानामसूलकत्वात् समूलत्वेऽपि पार्वणश्रस्त्रविषयाण्येतानि विष्णुादिवचनेषु पार्वणावगतेः। भ्रात्रादीनान्तु श्रस्त्रहतानामेकोद्दिष्टविधिना कार्य्यम्।
"अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये।
तेषामपि च दातव्यं स्यादेकोद्दिष्टं न पार्वणम्॥
इत्यापस्तम्बवचनेन पार्वणनिषेधात्। तच्च न सकलकृष्णपक्षसाधारणं विष्णुादिवचनेषु श्राद्धशब्दस्य पार्वणपरत्वोक्तेः। किन्त्वाश्विनमासीयकृष्णपक्षविषयम्। ब्रह्मपुराणे प्रायोऽनशनेत्यादिना सकलकृष्णपक्षसाधारणं श्राद्धमभिधाय आश्विने। तर्पणीयाश्चतुर्दश्यां तुलसीपिण्डोदकक्रिया। इति यत् पुनरभिधानं तच्छस्त्रहतभ्रात्रादिविषयं अतएव तत्रैवामावास्यायां पितरः पूज्या नान्दीमुखा अपीति हतप्रपितामहादीनामपि श्राद्धं दर्शितम्। इदञ्च चतुर्दश्यामश्रस्त्रहतश्राद्धनिन्दा आश्विनमासीयपक्षश्राद्धादिकल्पव्यतिरिक्तसामान्यकृष्णपक्षविहितश्राद्धकाम्यश्राद्धविषया प्रकरणभेदेन श्राद्धकर्म्मभेदात् सामान्यविशेषन्यायात् इतरथा चतुर्दश्यां संक्रान्तिश्राद्धेऽश्रस्त्रहतनिन्दा स्यात्। अतएव कृष्णपक्षे दशम्यादौ वक्ष्यित्वा चतुर्दशीमिति मनुवचनेऽपि चतुर्दशीवर्জ্জनं पक्षश्राद्धादिव्यतिरिक्तश्राद्धविषयम्॥*॥ ननु श्रस्त्रादिहतानां श्राद्धनिषेधः श्रूयते। तथा छागलेयः।
"श्रस्त्रविप्लुतानाञ्च वृद्धिदंष्ट्रिसरीसृपैः।
आत्मनस्त्यागिनाञ्चैव श्राद्धमेषां न कारयेत्॥"
सत्यं बुद्धिपूर्वहतानामेव। प्रमादमृतानान्तु श्राद्धादिकमाहाङ्गिराः।
"अथ कथित् प्रमादेन म्रियतेऽम्बुदकादिभिः।
अशौचं तस्य कर्त्तव्यं कर्त्तव्या चोदकक्रिया॥"
अबुद्धिपूर्वमपि वृद्धगादिभिः क्रीड़ां कुर्वतां मृतानां न कर्त्तव्यम्। यथा, ब्रह्मपुराणम्।
"वृद्धिदंष्ट्रिनखिव्यालविषवह्निक्रियाजलैः।
आदरात् परिहर्त्तव्यः कुर्वन् क्रीड़ां मृतस्तु यः॥"
परिहर्त्तव्यः श्राद्धादौ शास्त्रानुमत्या बुद्धिपूर्वमृतानामपि कर्त्तव्यम्। यथाह हरिहारीतः।

"वृद्धः शौचमृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः।
आत्मानं घातयेद्यस्तु शस्त्रव्यालजलादिभिः॥
अस्य विरात्रमशौचं द्वितीये त्वस्थिसञ्चयः।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमिष्यते॥"
एवं क्रीड़ाव्यतिरेकेणाबुद्धिपूर्वं मृताः शास्त्रानुमत्या बुद्धिपूर्वकमृता अपि श्राद्धार्हाः कथं तुलसीपिण्डोदकत्वमिति चेत् गौणमिति ब्रूमः। बुद्धिपूर्वं पिण्डोदकक्रियालोपादिति। इति श्राद्धविवेकः॥

श्रस्त्रहन्, पुं, श्रस्त्रं हन्ते यस्य सः। इति श्रस्त्रपाणिशब्ददर्शनात्॥

श्रस्त्राजीवः, त्रि, (श्रस्त्रेण आजीवतीति। आ+जीव+घञ्।) श्रस्त्रिजीवी। तत्पर्य्यायः। काण्डपृष्ठः २ आयुधीयः ३ आयुधिकः ४। इत्यमरः॥ काण्डस्पृष्टः ५। इति तट्टीका॥ काण्डपृष्टः ६ श्रस्त्रधारणजीवकः ७। इति शब्दरत्नावली॥

श्रस्त्राभ्यासः, पुं, (श्रस्त्राणां अभ्यासः।) श्रस्त्रशिक्षा। तत्पर्य्यायः। खुरली २। इति त्रिकाण्डशेषः॥

श्रस्त्रायसं, क्ली, (श्रस्त्रार्थं यदायसम्।) लोहम्। इति राजनिर्घण्टः॥

श्रस्त्री, स्त्री, (श्रस्+ष्ट्रन्। स्त्रियां ङीप्।) क्षुरिका। इति मेदिनी॥ (यथा, माघे। ४।४४।
"श्रस्त्रीश्यामैरंशुभिराशुद्रुतमभ-
स्यायासृच्छति नौली सलिलस्य॥")

श्रस्त्री, [न्] त्रि, श्रस्त्रविशिष्टः। श्रस्त्रधारी। श्रस्त्रशब्दादिन्प्रत्ययेन निष्पन्नमेतत्॥ (यथा, कामन्दकीयनीतिसारे। ७। ३७।
"ग्रामश्रस्त्रानुगतः प्रविश्येच्च
सङ्कटेषु गहनेषु न तिष्ठेत्॥")

श्रस्थं, क्ली, बालद्रुमम्। इत्यमरटीकायां भरतः॥ प्रतिभाङ्गानिः। इति जटाधरः॥

श्रस्थं, क्ली, (श्रस+"तस्किशसिचतियतीति।" ३।१।८७। इत्यस्य वार्त्तिकोक्त्या यत्।) हृच्छादिनिष्पन्नम्। तत्पर्य्यायः। फलम् २। इत्यमरः॥ हृच्छाणां लतादीनाञ्च फलं निष्पन्नत्वमामतं आम्रादिकं श्रस्थं सस्यपदवाच्यं इत्यन्वयः। फलति निष्पद्यते फलं फलनिष्पत्तौ पचाद्यच्। सस्ति स्वपिति सस्यं सस लु र स्वप्ने क्वौ रिति यः सस्यं हिदन्त्यम्। ग्राम्यकविकथानुबन्ध इव नीरसस्यमनोहरो देश इति नलदमन्त्रीश्लेषात्।
"श्रंसनं सीसकं सस्यं श्रस्थं साक्षा च साध्वसम्॥"
इत्युणादिविवेकाच्च॥ तालव्यादिदन्त्यान्तश्च तथा हि श्रन्सु हिंसास्तुत्योरित्यस्मात् क्रत्यः सृजेति क्यपि यत् श्रस्थं तत् क्रियावाच्येऽपि फलेऽपि दृश्यते। तालव्या अपि दन्त्याय श्रस्थशूकरपांशव इत्युभयभेदः। इति तट्टीकायां भरतः॥*॥ क्षेत्रस्थधान्यादि। यथा,—
"श्रस्थं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते।

श्यामं त्रितुषमित्युक्तं स्निग्धमल्पमुदाहृतम् ॥"
इति स्मृतिः ॥
ग्राम्यशस्यानि यथा,—
"व्रीहयश्च यवाश्चैव गोधूमाश्चाणवस्तिलाः ।
प्रियङ्गवो हुदाराश्च कोरदूषाः सचीनकाः ॥"
उदाराः दीर्घशूकयः ।
"माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः ।
आढक्यश्चणकाश्चैव ग्राम्याः सप्तदश स्मृताः ॥
इत्येता ओषधीनान्तु ग्राम्याणां जातयो मुने ॥"
ग्राम्यारण्यशस्यानि यथा,—
"औषध्यो यज्ञियाश्चैव ग्राम्यारण्यास्तथैव च ।
व्रीहयश्च यवा माषा गोधूमाश्चाणवस्तिलाः ॥
प्रियङ्गुसप्तमा ज्ञेयाः षष्टमास्तु कुलत्थकाः ।
श्यामाकास्त्वथ नीवारा जर्त्तिलाः सगवेधुकाः ॥
तथा वेणुयवाः प्रोक्तास्तथा मर्कटकाः मुने ।
ग्राम्यारण्याः स्मृता ह्येता ओषध्यस्तु चतुर्दश॥"
इति विष्णुपुराणे १ अंशे ६ अध्यायः ॥*॥
नवशस्यसम्भोगनक्षत्राणि यथा,—
"अनुराधा मृगशिरो रेवती चोत्तरात्रयम् ।
हस्ता चित्रा मघा पुष्या श्रवणा च पुनर्व्वसुः ॥
रोहिणी नवशस्यादिनवद्रव्याग्रनादिषु ।
प्रशस्तं नवपीठादिसम्भोगं ग्रहविद्विदेत् ॥"*॥
नवशस्यश्राद्धादिकालो यथा,—
"शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते ।
धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः॥"
इत्यनेन शरद्वसन्तविहितनवशस्येष्टेः ।
"श्यामाकैर्व्रीहिभिर्यैर्वा यवैरन्योन्यकालतः ।
प्राग्यज्ञं युज्यतेऽवश्यं न त्वन्नाग्रयणात्ययः ॥"
इति कालान्तरदर्शनात् श्राद्धेऽपि तथा ।
नाग्रयणं नवशस्येष्टिः ।
"हविष्के शुक्लपक्षे तु नवान्नं शस्यते बुधैः ।
अपरे क्रियमाणं हि धनुषेव ह्रतं भवेत् ॥
धनुषि यत् ह्रतं श्राद्धं स्वजनेनाहृ रात्रिषु ।
पितरस्तत्र मज्जन्ति नवान्नाभिषवाक्षिप्तः ॥"
अपरे ह्रष्णपक्षे ।
"पौषे चैत्रे ह्रष्णपक्षे नवान्नं नाचरेद्बुधः ।
भवेत् तस्यान्तरे रोगो पितृणां नोपतिष्ठते ॥
यद्यपि व्रीहिपाके च यवपाके च यागिव ।
न तावद्यौ महाराज विना श्राद्धं क्वचन॥"
इति विष्णुधर्म्मोत्तरवचने श्राद्धं प्रति व्रीहियवपाकयोर्निमित्तत्वं प्रतीयते । तथापि नवोदके नवान्ने च इति ज्ञातातपवचने पूर्व्वोक्तबहुषु वचनेषु च नवान्नस्य श्रुतेर्नवान्नत्वेनैवोभयसाधारण्यं निमित्तं लाघवात् । अभिलाषवाक्ये नवागमनिमित्तमिति नियोज्यम् । न तु यवागमादि । हविष्के शुक्लपक्षे च इति तु धनुरादिपर्य्युदस्तेतरगौणकालमध्ये हविष्कस्य प्राशस्त्यमात्रार्थं न तु श्राद्धान्तरार्थमिति । इति मलमासतत्त्वम् ॥ अन्यत् नवान्नशब्दे द्रष्टव्यम् ॥
शस्यध्वंसी, [न्] पुं, (शस्यानि ध्वंसयतीति । ध्वंस + णिनिः ।) तुषहृत्तः । इति शब्दचन्द्रिका ॥ शस्यनाशके, त्रि ॥
शस्यमञ्जरी, स्त्री, (शस्यस्य मञ्जरी ।) अभिनवनिर्गतधान्यादिशीर्षकम् । शीष इति भाषा ॥ तत्पर्य्यायः । कणिशम् २ । इत्यमरः ॥ कणिशः ३ कणिषः ४ । इति तट्टीका ॥
शस्यशूकं, क्ली, (शस्यस्य शूकम् ।) शस्यस्य तीक्ष्णाग्रम् । शुङ्गा इति भाषा । तत्पर्य्यायः । किंशारुः २ । इत्यमरः ॥
शस्यसम्वरः, पुं, सालवृक्षः । इत्यमरः ॥
शस्यात्, त्रि, शस्यभक्षकः । शस्यं अत्ति इत्यर्थे अदधातोः कर्त्तरि क्विप्प्रत्ययेन निष्पन्नमेतत् । इति सुग्धबोधव्याकरणम् ॥
शस्याद्यः, पुं, क्षुद्रशमीवृक्षः । इति शब्दरत्नावली ॥
शांशपः, पुं, शिंशपाया विकारवनसः । शिंशपाशब्दादण्प्रत्यये इकारस्य आकारादेशेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥
शांशपायनः, पुं, मुनिविशेषः । इति पुराणम् ॥ (यथा, विष्णुपुराणे । ३ । ६ । १८ ।
"काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः ॥")
शाकं, क्ली, पुं, (शक्यते भोक्तुमिति । शक + घञ्) पत्रपुष्पादि । साग इति हिन्दीभाषा । तत्पर्य्यायः । हरितकम् २ शिग्रु: ३ । इत्यमरः ॥ सिग्रु: ४ । इति तट्टीका ॥ हारितकम्५ इति शब्दरत्नावली ॥ अथ शाकवर्गः । तत्र शाकनिरूपणम् ।
"पत्रं पुष्पं फलं नालं कन्दं संक्षेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यात् यथोत्तरम्॥"
अथ शाकानां गुणाः ।
"प्रायःशाकानि सर्व्वाणि विष्टम्भीनि गुरूणि च ।
रूक्षाणि बहुवर्च्चांसि सृष्टविण्मारुतानि च ॥
शाकं भिनत्ति वपुरस्रि निहन्ति नेत्रं
वर्षं विनाशयति रक्तमथापि शुक्रम् ।
प्रज्ञाक्षयञ्च कुरुते पलितञ्च नूनं
हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः ॥
शाकेषु सर्व्वे निवसन्ति रोगाः
सङ्केतगो देहविनाशनाय ।
तस्माद्बुधः शाकविवर्जनञ्च
कुर्य्यात्तथाल्पेषु स एव दोषः ॥"
इति भावप्रकाशः ॥
अपि च ।
"सर्व्वशाकमचाक्षुषमलक्ष्यमैथुनम् ।
ऋते पटोलवास्तूकशाकमाषौपुनर्नवाः ॥"
इति राजवल्लभः ॥
शाकः, पुं, क्षुपविशेषः । सेगोन् इति भाषा । तत्पर्य्यायः । शाकतरुः २ शाकाह्यः ३ खरपत्रः ४ अर्जुनोपमः ५ । इति रत्नमाला ॥ क्रकचपत्रः ६ शरपत्रः ७ अतिपत्रः ८ अहिदृष्टः ९ श्रेष्ठकाष्ठः १० स्थिरसारः ११ गृहद्रुमः १२ । अस्य गुणाः । सारकत्वम् । पित्तदाहश्रमापहत्वञ्च । अस्य वल्कलगुणाः । कफनाशित्वम् । मधुरत्वम् । रूक्षत्वम् । कषायत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ शक्तिः । इति मेदिनी ॥ गिरीषवृक्षः । इति शब्दरत्नावली ॥ नृपभेदः । इति विश्वः ॥ द्वीपविशेषः । तस्य विवरणं यथा,—
सूत उवाच ।
"शाकद्वीपस्य वक्ष्यामि यथावदिह निश्चयम् ।
कथ्यमानं निबोधध्वं शाकद्वीपं द्विजोत्तमाः ॥
जम्बुद्वीपस्य विस्ताराद्विगुणस्तस्य विस्तरः ।
विस्ताराद्विगुणश्चापि परिखाः समन्ततः ॥
तेनावृतः समुद्रोऽयं द्वीपेन क्षवणोदधिः ।
तत्र पुष्या जनपदाश्चिरञ्च स्त्रियते जगः ॥
कृतएव च दुर्भिक्षं क्षमातेजोवृतेष्विह ।
तत्रापि पर्वताः शुभ्राः सप्तैव मणिभूषिताः ॥
शाकद्वीपादिद्वीपेषु सप्त सप्त नगाश्चिषु ।
ऋज्वायताः प्रतिदिशं निविष्टा वर्षपर्वताः ॥
रत्नाकराद्विगाम्भोभावन्तो महाचिताः ।
समाचिताः प्रतिदिशं द्वीपविस्तरमानतः ॥
उभयत्रावगाढाश्च क्षवक्षीरसागरौ ।
शाकद्वीपे तु वक्ष्यामि सप्त दिव्यान् महाचलान् ॥
देवर्षिगन्धर्वयुतः प्रथमो मेरुरुच्यते ।
प्रागायतः स सौवर्ण उदयो नाम पर्वतः ॥
तत्र मेघास्तु हव्यर्थं प्रभवन्ति च यान्ति च ।
तस्यापरेण सुमहान् जलधारो महागिरिः ॥
सैव चन्द्रः समाख्यातः सर्व्वौषधिसमन्वितः ।
तस्मान्निस्यमुपादत्ते वासवः परमं जलम् ॥
नारदो नाम सैवोक्तो दुर्गशैलो महाचितः ।
तत्राचले समुत्पन्नौ पूर्वं नारदपर्व्वतौ ॥
तस्यापरेण सुमहान् श्यामो नाम महागिरिः ।
यत्र श्यामत्वमापन्नाः प्रजाः पूर्वमिमाः क्षिप्त ॥
स एव दुन्दुभिर्नाम श्यामः पर्वतसत्तमः ।
शब्दस्तस्य पुरा तस्मिन् दुन्दुभिस्ताड़ितः सुरैः ॥
वज्रज्वालान्तरमयः शाकस्तस्यान्तराश्रितः ।
तस्यापरेण रजतो महानभ्रो गिरिः स्मृतः ॥
सैव सोमक इत्युक्तो देवैर्यत्रास्तं पुरा ।
सम्भृतश्च ह्रतश्चैव मातुरर्थे गरुत्मता ॥
तस्यापरे चाम्बिकेयः सुमनास्तैव स स्मृतः ।
हिरण्याभो वराङ्गेण तस्मिन् शैले निसूदितः ॥
आम्बिकेयात् परो रम्यः सर्व्वौषधिसमन्वितः ।
विभ्राजस्तु समाख्यातः स्फाटिकः स महा गिरिः ॥
यस्माद्विभ्राजते नित्यं विभ्राजस्तेन स स्मृतः ।
सैवेह केशवेत्युक्तो यतो वायुः प्रवायति ॥
तेषां वर्षाणि वक्ष्यामि पर्वतानां द्विजोत्तमाः ।
शृणुध्वं नामतस्तानि यथावदनुपूर्व्वशः ॥
द्विनामाद्येव वर्षाणि तथैव गिरयस्तथा ।
उदयस्योदयं वर्षं जलधारेति विश्रुतम् ॥
नाम्ना सान्तभयत्राम वर्षं तत् प्रथमं स्मृतम् ।
द्वितीये जलधारस्य सुकुमारमिति स्मृतम् ॥
तदेव शैशिरं नाम वर्षं संपरिकीर्त्तितम् ॥
रैवतस्य तु कौमारं तथैव च सुखोदयम् ।
श्यामपर्वतवर्षन्तु मनोरमकमिति स्मृतम्॥
आनन्दकमिति प्रोक्तं तदेव मुनिभिः शुभम् ।

सोमकस्य शुभं वर्षं विज्ञेयं कुसुमोत्तरम् ॥
तदेव शिवमित्युक्तं वर्षं सोमकसंज्ञितम् ।
आम्बिकेयस्य मेदाकिं क्षेमकस्यैव तत् स्मृतम् ॥
सेतुपर्वतकस्यापि महाद्रुममितिस्मृतम् ।
तदेव ध्रुवमित्युक्तं वर्षं विभ्राजसंज्ञितम् ॥
द्वीपस्य परिणाहस्य ह्रस्वदीर्घत्वमेव च ।
जम्बुद्वीपेन संख्यातस्तस्य मध्ये वनस्पतिः ॥
शाको नाम महावृक्षस्तस्य प्रजा महानुगाः ।
एतेषु देवगन्धर्व्वाः सिद्धाश्च सह चारणैः ॥
विहरन्ति रमन्ते च दृश्यमानाश्च तैः सह ।
तत्र पुण्या जनपदास्तुर्वर्ण्यसमन्विताः ॥
तेषु नद्यस्तु वै सप्त प्रतिवर्षं समुद्गताः ।
त्रिनामधेयैर्वै ताः सर्वा गङ्गाः सप्तविधाः स्मृताः ॥
प्रथमा सुकुमारीति गङ्गा शिवजला शुभा ।
अनुतप्ता च नाम्नैषा नदी संपरिकीर्त्तिता ॥
सुकुमारी तपःसिद्धा द्वितीया नामतः सती ।
नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥
शिवलोका चतुर्थी स्यात् त्रिविधा च पुनः स्मृता ।
दृषद्वत्य पञ्चमी ज्ञेया तथैव च पुनः कसू ॥
धेनुका च स्मृता चैव षष्ठी संपरिकीर्त्तिता ।
सुकृता च गभस्ती च सप्तमी परिकीर्त्तिता ॥
एताः सप्त महाभागा प्रतिवर्षं शिवोदकाः ।
पावयन्ति जनं सर्वं शाकद्वीपनिवासिनम् ॥
अभिगच्छन्ति ताश्चान्या नदीर्नद्यः सरांसि च ।
बृहदकपरिस्रावा यतो वर्षति वासवः ॥
आसान्तु नामधेयानि परिमाणं तथैव च ।
न शक्यं परिसंख्यातुं पुण्यास्ताः सरिदुत्तमाः ॥
ताः पिबन्ति महाहृष्टा नदीर्जनपदास्तु ते ।
ये ते शान्ततया प्रोक्ताः प्रमोदार्थे ति वै शिवाः ॥
आनन्दाश्रुमुखार्थे व क्षेमकैश्च ध्रुवैः सह ।
वर्णाश्रमाचारयुक्ता देशास्ते सप्त विश्रुताः ॥
अरोगा बलिनश्चैव सर्व्वे मरणवर्जिताः ।
अवसर्पिणी न तेष्वस्ति त्र्यैवोत्सर्पिणी पुनः ॥
न तत्रास्ति युगावस्था चतुर्युगसमा क्वचित् ।
त्रेतायुगसमः कालस्तथा तत्र प्रवर्त्तते ॥
शाकद्वीपादिषु ज्ञेयं पञ्चस्वेतेषु सर्व्वशः ।
देशस्य तु विचारेण कालः स्वाभाविकः स्मृतः ॥
न तेषु शङ्करः कश्चिद्वर्णाश्रमसमङ्कृतः क्वचित् ।
धर्म्मस्याव्यभिचारेण एकान्तसुखिताः प्रजाः ॥
न तेषु माया लोभो वा ईर्ष्यासूया भयं तथा ।
विपर्य्ययो न तेष्वस्ति तद्वै स्वाभाविकं स्मृतम् ॥
कालो नचैव तेष्वस्ति न दण्डो न च दाण्डिकः ।
स्वधर्मेण च धर्म्मज्ञास्ते रक्षन्ति परस्परम् ॥"
इति मात्स्ये १०२ अध्यायः ॥ *॥
अपि च। एवं परस्तात् क्षीरोदात् परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन दधिमण्डोदेन परीतः। यस्मिन् हि शाको नाम महीरुहः स्वचैतन्यव्यपदेशकः। यस्य हि महासुरभिगन्धस्तद्द्वीपमनुवासयति। तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश। एतेषां वर्षमर्य्यादा गिरयो नद्यश्च सप्त सप्तैव। ईशान उरुशृङ्गो बलभद्रः शतकेशरः सहस्रस्रोता देवपालो महानस इति। अनघा आयुर्दा उभयसृष्टिरपराजिता पञ्चपदी सहस्रश्रुतिर्निजधृतिरिति। तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवन्तं वायुात्मकं प्राणायामविधूतरजस्तमसः परमसमाधिना यजन्ते। इति श्रीभागवते ५स्कन्धे २० अध्यायः ॥ * ॥ युधिष्ठिरविक्रमादित्यशालिवाहनादिशकनरपतीनामतीताब्दः। तस्य प्रमाणं दिनपञ्जिकायां द्रष्टव्यम् ॥ (शक्तिः। कर्म्म। यथा, ऋग्वेदे। ६। २४। ४।
"अचोवतस्ते पुरुशाक शाका
गवामिव श्रुतयः सञ्चरण्योः ॥"
"हे पुरुशाक बहुकर्म्मन्निन्द्र अचोवतः प्रज्ञावतस्ते त्वदीयाः शाकाः शक्तयः कर्म्माणि वा।" इति तद्भाष्ये सायणः ॥ * ॥ समर्थे, त्रि। यथा, ऋग्वेदे। ५। ३०। १०।
"सन्ता इन्द्रो अक्षजदस्य शाकै-
र्यदी सोमासः सुषुता अमन्दन् ॥"
"शाकैः शक्तैर्म्मरुद्भिः सह।" इति तद्भाष्ये सायणः ॥)
शाकचुक्रिका, स्त्री, चिञ्चा। इति राजनिर्घण्टः।
शाकटं, त्रि, (शकट+अण्।) शकटस्येदम्। शकटवोढा। इति मेदिनी ॥
शाकटः, पुं, शेषान्तकलहः। इति राजनिर्घण्टः॥ (शकटं वहतीति। शकट+"शकटादण्।" ४। ४। ८०। इत्यण्।) युगादिवोढा। तत्पर्य्यायः। युग्यः २ प्रासङ्गः ३। इत्यमरः ॥
शाकटाख्यः, पुं, (शाकट इति आख्या यस्य।) धववृक्षः। इति रत्नमाला ॥
शाकटायनः, पुं, (शकटस्यापत्यं पुमान्। शकट+"नडादिभ्यः फक्।" ४। १। ९९। इति फक्।) अष्टशाब्दिकान्तर्गतशाब्दिकविशेषः। यथा,—
"इन्द्रचन्द्रः काशकृत्स्ना पिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥"
इति कविकल्पद्रुमः ॥
(अयन्तु नाममात्रं धातुनिष्पन्नमाह। यथा, कातन्त्रे कृत्सु उणादयो भूतेऽपि इत्यत्र त्रिलोचनः।
"नाम च धातुजमाह निरुक्ते
व्याकरणे शकटस्य च तोकः।
यत्र पदार्थविशेषसमुत्थ
प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥")
शाकटिकः, त्रि, शकटगामी। शकटेन गच्छतीत्यर्थे ठक्प्रत्ययेन निष्पन्नमेतत्। इति सिद्धान्तकौमुदी ॥ (यथा, हरिवंशे। १०।४।
"रोहिण्यां कोशलमद्र-
काशिपाञ्चालशाकटिकाः ॥")
शाकटीनः, पुं, विंशतितुलापरिमाणम्। तत्पर्य्यायः। भारः २ आचितः ३ शकटः ४ शलाटः ५। इति हेमचन्द्रः ॥
शाकतरुः, पुं, (शाकाख्यस्तरुः।) शाकवृक्षः। इति शब्दमाला ॥ सागौन इति हिन्दी भाषा॥
शाकपत्रः, पुं, शिग्रुः। इति राजनिर्घण्टः ॥
शाकवालेयः, पुं, ब्रह्मयष्टिः। इति शब्दरत्नावली ॥
शाकम्भरी, स्त्री, (शाकेन बिभर्त्ति। भृ+खश् ङीष्।) दुर्गा। यथा,—
'ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि।
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥"
इति मार्कण्डेयपुराणे नारायणीस्तुतिः ॥
अपि च।
"भूयः सुरास्तिष्ययुगे निराशना-
न्निरीक्ष्य मारीचगृहे समाश्रिता।
लोकान् भरिष्यामि तनूजशाकै-
स्तदा भविष्यामि शाकम्भरीति ॥"
इति वामने ५३ अध्यायः ॥
नगरविशेषः। शाम्भरीति ख्यातः। इति केचित्॥
शाकम्भरीयं, क्ली, आजमेराख्यदेशान्तर्गतशाम्भरनगरीयजलाशयविशेषोद्भवलवणम्। शाम्भरि इति ख्यातम्। तत्पर्य्यायगुणा यथा,—
"शाकम्भरीयं कथितं गड़ाख्यं रोमकं तथा।
गड़ाख्यं लघु वातघ्नमत्युष्णं भेदि पित्तलम्।
तीक्ष्णं व्यवायि सूक्ष्मञ्चाभिष्यन्दि कटुवाकि च ॥"
इति भावप्रकाशः ॥
शाकयोग्यः, पुं, (शाकस्य योग्यः।) धान्यकम्। इति राजनिर्घण्टः ॥
शाकराजः, पुं, (शाकानां राजा निर्दोषत्वात्। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) वास्तूकम्। इति राजनिर्घण्टः ॥
शाकलः, पुं, शकलेन प्रोक्तमधीयते शाकलास्तेषां सङ्घोऽङ्गो घोषो वा।
शाकलकः, "शाकलाद्वा।" ४। ३। १२८। इति अण्। परम्परासम्बन्धोऽङ्गः। इति सिद्धान्तकौमुदी (द्वीपविशेषः। यथा, महाभारते। २। २९। ६।
"शाकलद्वीपवासाश्च सप्तद्वीपेषु ये नृपाः।
अर्জ্জुनस्य च सैन्यैस्तैर्विग्रहस्तुमुलोऽभवत् ॥")
शाकलिकः, त्रि, शकलसम्बन्धी। ("शकलकहेमाभ्यामुपसंख्यानम्।" ४। २। २। इत्यस्य वार्त्तिकोक्त्या शाकलिकः काईमिकः। आभ्यामणपीति वृत्तिकारः।) शाकलः। काईमः। इति सिद्धान्तकौमुदी ॥
शाकविल्वः, पुं, (शाके विल्व इव।) वार्त्ताकुः। इति जटाधरः ॥
शाकविल्वकः, पुं, (शाकविल्व+स्वार्थे कन्।) वार्त्ताकुः। इति त्रिकाण्डशेषः ॥

शाकवीरः, पुं, (शाकेषु वीरः।) वास्तूकशाकः। इति त्रिकाण्डशेषः॥ जीवशाकः। इति राजनिर्घण्टः॥

शाकवृक्षः, पुं, (शाकाख्यो वृक्षः।) तरुविशेषः। इति रत्नमाला॥ सेगोन इति भाषा। अस्य पर्य्यायगुणौ शाकशब्दे द्रष्टव्यौ॥

शाकशाकटं, क्ली, (शाकानां भवनं क्षेत्रम्। शाक+"भवने क्षेत्रे शाकटशाकिनौ।" इति शाकटः।) शाकक्षेत्रम्। इति हेमचन्द्रः॥

शाकशाकिनं, क्ली, (शाकानां भवनं क्षेत्रम्। शाक+शाकिनः।) शाकक्षेत्रम्। इति हेमचन्द्रः॥

शाकश्रेष्ठः, पुं, (शाकेषु श्रेष्ठः।) वास्तूकशाकम्। इति शब्दरत्नावली॥

शाकश्रेष्ठा, स्त्री, (शाकेषु श्रेष्ठा।) जीवन्ती। डोड़ीशुप्रः। वार्त्ताकुः। इति राजनिर्घण्टः॥

शाका, स्त्री, हरीतकी। इति केचित्॥

शाकाख्यं, क्ली, (शाक इति आख्या यस्य।) पत्रपुष्पादि। इत्यमरः॥

"व्यञ्जनयोग्यं पत्रपुष्पादि शाकपदवाच्यम्। आदिना फलमूलादिग्रहः। यदुक्तम्।

"मूलपत्रकरीराग्रफलकाण्डाधिरूढ़कम्।
त्वक् पुष्पं करकश्चैव शाकं दशविधं स्मृतम्॥"

तत्र मूलं मूलकादेः। पत्रं पटोलादेः। करीरं वंशाङ्कुरादि। अग्रं वेत्रादेः। फलं कुष्माण्डादेः काण्डं उत्पलादिनाड़ी। अधिरूढं तालास्थिमज्जा। अधिरूढोऽङ्कुर इति केचित्। त्वक् मातुलुङ्गादेः। पुष्पं कोविदारादेः। करक छत्रिका। शक्यते भोक्तुमनेनेति शाकम्। शक्नोति सामर्थ्यं तनूकरोति शो तनूकरणे बाहुलकात् कः शाकमित्यन्ये।" इति तट्टीकायां भरतः॥

शाकाख्यः, पुं, (शाक इति आख्या यस्य।) शाकवृक्षः। इति रत्नमाला॥ अस्य पर्य्यायगुणौ शाकशब्दे द्रष्टव्यौ॥

शाकाङ्गं, क्ली, (शाकस्य अङ्गमिव।) मरिचम्। इति राजनिर्घण्टः॥

शाकाश्वं, क्ली, (शाके अश्वो यस्य।) वृक्षाम्लम्। इति राजनिर्घण्टः॥

शाकाश्वभेदनं, क्ली, (शाकाश्वं भेदनञ्च।) चुक्रम्। इति राजनिर्घण्टः॥

शाकालावुः, स्त्री, राजालावुः। इति राजनिर्घण्टः॥

शाकाष्टका, स्त्री, (शाका अष्टौ प्रदेया यत्र।) शाकोपकरणकश्राद्धार्हाष्टमी। सा च गौणफाल्गुनकृष्णाष्टमी। तद्विवरणं मांसाष्टकाशब्दे द्रष्टव्यम्॥

शाकिनी, स्त्री, शाकोऽस्त्यस्येति। शाक+इनिः। शाकयुक्ता भूमिः। यथा,—

"शकटः शाकिनी गावो जालमस्यन्दनं वनम्।
अनूपं पर्वतो राजा दुर्भिक्षे नव वृत्तयः॥"

शकटो धान्यादिवहनहारिणोपजीव्यः।

"पत्रं पुष्पं फलं कन्दं नालं संस्वेदजं तथा।
शाकं षड्विधमुद्दिष्टं गुरु विद्यात् यथोत्तरम्॥"

इति वैद्योक्तशाकयोगात् शाकिनीगृहवाटिका शाकाद्याहरणेन। गावो दुग्धादिना। जालं मत्स्याद्याहरणेन। अस्यन्दनं स्वस्थानादत्यागः ऋणादिलाभेन। व्याधिक्यनिवृत्त्या च। वनं फलपुष्पाद्याहरणेन। अनूपं बृहदकदेशः सशृणालशालूकाद्याहरणेन। पर्वतो गैरिकमृदाद्याहरणेन। राजा भैक्षादिना। इत्याह्निकतत्त्वम्॥*॥ दुर्गाया अनुचरीविशेषः। यथा,—

"डाकिनी योगिनी चैव खेचरी शाकिनी तथा
दिक्षु पूज्या इमा देव्यः सुसिद्धाः फलदायिकाः॥"

इति कात्यायनीकल्पः॥

"ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
ततः परशिवो देवि षट्शिवाः परिकीर्त्तिताः॥
मूलाधारे तु ब्रह्माणं डाकिनीसहितं न्यसेत्।
सर्व्वत्र त्वाचरीमुक्ता वादिसान्तं सबिन्दुकम्॥
स्वाधिष्ठानाख्यचक्रे तु सविष्णुं राकिणीं तथा।
वादिलान्तं प्रविन्यस्य नाभौ तु मणिपूरके॥
डादिफान्तार्णसहितं रुद्रञ्च लाकिनीं तथा।
अनाहते कादिटान्तं ईश्वरं काकिनीं तथा॥
विशुद्धाख्ये महाचक्रे षोड़शस्वरसंयुतम्।
सदाशिवं शाकिनीन्तु विन्यसेत् पूर्ववत्ततः॥
आज्ञाचक्रे तु देवेशि ह-क्ष-वर्णसमन्वितम्।
परं शिवं ब्रह्मरूपं हाकिनीसहितं न्यसेत्॥"

इति तारान्यासभेदः। इति तन्त्रसारः॥

शाकुणः, त्रि, परोक्षापी। इति शब्दमाला॥

शाकुनः, पुं, (शकुनमधिकृत्य कृतो ग्रन्थः। शकुन+अण्।) पशुपक्ष्यादिरूपशकुनद्वारा मनुष्यशुभाशुभनिर्णायकग्रन्थः। तस्येमौ श्लोकौ।

"शुभाशुभज्ञानविनिर्णयाय
हेतुर्नृणां यः शकुनः स उक्तः।
गतिः स्वरालोकनभावचेष्टां
संकीर्त्तयामो द्विपदादिकानाम्॥
लोकोऽसुना शाकुनसंज्ञकेन
ज्ञानेन विज्ञातसमस्तकार्य्यः।
नापायकूपे पतति प्रसर्पन्
शास्त्रं हि दिव्या दृगतीन्द्रियेषु॥"

इति वसन्तराजशाकुने १ सर्गः॥

(शकुनस्यायमिति। शकुन+"तस्येदम्।"४।३।१२०।इति अण्। पक्षिसम्बन्धी। यथा, मनुः। ३। २६८।

"द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु
औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै॥")

शाकुनिकः, पुं, (शाकुनान् हन्तीति। शकुन+"पक्षिमत्स्यमृगान् हन्ति।" ४।४।३५। इति ठक्।) पक्षिहन्ता। पाखिमारा इति चिड़िमार इति च भाषा। तत्पर्य्यायः। जीवान्तकः २। इत्यमरः॥ (यथा, मनुः। ८।२६०।

"व्याधान् शाकुनिकान् गोपान् केवर्त्तान्
मूलखानकान्॥")

शाकुनेयः, पुं, (शकुनेरपत्यम्। शकुनि+"शुभ्रादिभ्यश्च।" ४।१।१२३। इति ढक्।) डुण्डुलपक्षी। इति राजनिर्घण्टः॥ शकुनीपुत्रो दैत्यासुरः। यथा भागवते। १०।८८।२८।

"शाकुनेय भवान् व्यक्तं श्रान्तः किंदूरमागतः।
क्षणं विश्राम्यतां पुंस आत्मायं सर्व्वकामधुक्॥"

शकुनसम्बन्धिनि, त्रि॥

शाकुन्तलेयः, पुं, (शकुन्तलाया अपत्यमिति। शकुन्तला+"स्त्रीभ्यो ढक्।" ४।१।१२०। इति ढक्।) भरतराजः। इति जटाधरः॥

शाकुन्तलासम्बन्धिनि, त्रि॥

शाकुनिकः, त्रि, शकुनान् हन्ति यः। शकुनशब्दात् "पक्षिमांसमृगान् हन्ति।" ४।४।३५। इति ठक्प्रत्ययेन निष्पन्नमेतत्। इति सिद्धान्तकौमुदी॥

शाक्करः, पुं, (शक्कर एव। स्वार्थे अण्।) अनड्वान्। इति हेमचन्द्रः॥

शाक्तः, त्रि, शक्तिर्देवता अस्य। (शक्ति+"तस्य देवता।" ४।२।२४। इत्यण्।) शक्त्युपासकः। अस्य प्रशंसा यथा,—

"स्वर्गे मर्त्ये च पाताले नास्ति शाक्तात् परः प्रियः।
सौराणां गाणपत्यानां वैष्णवानां तथैव च॥
तदन्ते चैव शाक्ताः स्युः क्रमशः क्रमशः प्रिये।
शृणु देवि वरारोहे नास्ति शाक्तात् परो जनः॥
शाक्तोऽपि शङ्करः साक्षात् परं ब्रह्मस्वरूपभाक्।
आराधिता येन कालो तारा त्रिभुवनेश्वरी॥
षोड़शी चैव मातङ्गी छिन्ना च वगलामुखी।
आराधिता महेशानि स शिवो नात्र संशयः॥
अतिगोप्यं महेशानि शाक्तानां परमं पदम्।
यो जानाति महीमध्ये स शिवो नात्र संशयः॥
ब्रह्माद्यर्चितपादाब्जं यो भजेत् सततं मुदा।
स याति चिरकालेन मुक्तिमन्दिरमेव हि॥
पार्व्वतीचरणद्वन्द्वभजनाकिङ्करो भवेत्।
स्वर्गभोगञ्च मोक्षञ्च शाक्तानां न भवेत् किमु॥
शाक्तानाञ्चैव निन्दांये कुर्व्वन्ति हि नराधमाः।
तेषां लोहितपानं वै कुर्व्वन्ति भैरवीगणाः॥
भैरवार्थे च भैरव्यः सदा हिंसन्ति पामरान्।
शाक्तान् हिंसन्ति गर्জन्ति निन्दन्ति बहुजल्पकाः॥
छिनत्ति तेषां देवेशि शिरांसि हरवल्लभा।
शाक्तेभ्य उत्तमो नास्ति स्वर्गे मर्त्ये रसातले॥
शाक्तस्तु शङ्करो ज्ञेयस्त्रिनेत्रश्चन्द्रशेखरः।
स्वयं गङ्गाधरो भूत्वा विहरेत् क्षितिमण्डले॥"

देवीं प्रति शिववाक्यम्।

"मदंशार्थे च ये भूतास्ते शैवा नात्र संशयः।
त्वदंशार्थे च शाक्ताश्च सत्यं वै गिरिनन्दिनि।
बहुवर्षसहस्रान्ते शैवाः शक्तिपरायणाः।
शाक्ता वै शङ्करा देवि यस्य कस्य कुलोद्भवाः॥
चाण्डाला ब्राह्मणाः शूद्राः क्षत्रिया वैश्यसम्भवाः।

एते शाक्ता जगद्धात्रि न मनुष्याः कदाचन ॥
पश्यन्ति मानुषान् लोके केवलं कर्म्मचक्षुषा ।
ब्राह्मणैः क्षत्रियैर्व्वैश्यैः शूद्रैरेव च जातिभिः ॥
वाममार्गप्रभावेण कर्त्तव्यं जपपूजनम् ।
ये शाक्ता ब्राह्मणा देवि क्षत्रिया ब्राह्मणाः स्मृताः ॥
वैश्याश्च ब्राह्मणा देवि सर्व्वे शूद्राश्च ब्राह्मणाः ।
ब्राह्मणाः शङ्कराश्चैव विनेत्राश्चन्द्रशेखराः ॥"
इति मुण्डमालातन्त्रे २।३।४।७ पटलाः ॥*॥
"शाक्ता एव द्विजाः सर्वे न शैवा न च वैष्णवाः ।
उपासन्ते यतो देवीं गायत्रीं परमाक्षरीम् ॥"
इति निर्व्वाणतन्त्रे ३ पटलः ॥
शक्त्युपासनानन्तरमन्योपासननिषेधो यथा,—
"अन्याराधनं हित्वा नान्यस्याराधनं चरेत् ।
अन्यस्य स्मरणाद्देवि योगिनीशापमालभेत् ॥"
इति गन्धर्वतन्त्रे २ पटलः ॥*॥
तस्य आभ्यन्तरस्नानं यथा,—
"शाक्तमाभ्यन्तरस्नानमुक्तं श्रीपद्ममीमते ।
स्नानप्रकारो द्विविधो बाह्याभ्यन्तरभेदतः ॥
आन्तरं स्नानमत्यन्तं रहस्यमपि सादरात् ।
कथयामि भयध्वस्यै चतुर्व्वर्गफलाप्तये ॥
सम्भित्तयमनुस्मृत्य चरणत्रयमध्यतः ।
सवस्कं सच्चिदानन्दप्रभावं भावगोचरम् ॥
विमुक्तिसाधनं पुंसां स्मरणादेव योगिनाम् ।
तेन प्लावितमात्मानं भावयेत् भयशान्तये ॥"
इति विश्वसारतन्त्रे २ पटलः ॥*॥
तस्य कुशविशेषो यथा,—
"तर्ज्जन्या रजतं धार्य्यं स्वर्णं धार्य्यमनामया ।
एष एव कुशः शाक्ते न दर्भो वनसम्भवः ॥"
इति श्यामारहस्यम् ॥
(शक्तिमान् । यथा, ऋग्वेदे । ७ । १०३ । ५ ।
"वाचं शाक्तस्येव वदति शिक्षमाणः ॥"
"शिक्षमाणः शिक्ष्यमाणः शिक्ष्यः शाक्तस्येव शक्तिमतः शिक्षकस्य वाचं यथा अनुवदति तद्वत् ।" इति तद्भाष्ये सायणः ॥)
शाक्तीकः, पुं, (शक्तिः प्रहरणमस्य । शक्ति + "शक्तियष्टीकाकक् ।" ४।४।५८ । इति ईकाक् ।) शक्तिधारकः तत्पर्य्यायः । शक्तिहैतिकः २ । इत्यमरः ॥
शाक्तः, त्रि, शक्त्युपासकः । इति शक्तिशब्दात् स्वार्थप्रत्ययेन निष्पन्नमेतत् ॥
शाक्यः, पुं, (शकोऽभिधानमस्येति । शक + "शक्तिकादिभ्यो ण्यः ।" ४।२।८२ । इति ण्यः बुद्धः । इति हलायुधः ॥
शाक्यमुनिः, पुं, शाक्यवंशावतीर्णबुद्धमुनिविशेषः इत्यमरः ॥ अस्य सप्त पर्य्याया गोतमशब्दे दृष्टव्याः । पर्य्यायान्तरं यथा । खर्जित् २ क्षेतकेतुः ३ धर्म्मकेतु ४ महामुनिः ५ पञ्चज्ञानः ६ सर्व्वदर्शी ७ महाबोधिः ८ महाबलः ९ बुद्धतमः १० तिमूर्त्तिः ११ सिद्धार्थः १२ शक्रः १३ । इति शब्दरत्नावली ॥ शाक्यवंशत्वात् शाक्यः शाक्यस्वामी मुनिश्चेति शाक्यमुनिः । तथा हि शाक्यो हस्तिविशेषः तत्र भवा विद्यमानाः शाक्याः । पितुः शापेन केचिदिक्ष्वाकुवंश्या गौतमवंशजकपिलमुनेराश्रमे शाकवृक्षे कृतवासाय शाक्या उच्यन्ते । तदुक्तम् ।
"शाकवृक्षप्रतिच्छन्नं वासं यस्मात् प्रचक्रिरे ।
तस्मादिक्ष्वाकुवंशास्ते भुवि शाक्या इतिश्रुताः ।"
इत्यमरटीकायां भरतः ॥
शाक्यसिंहः, पुं, (शाक्यः सिंह इव ।) शाक्यमुनिः । इत्यमरः ॥
शाक्री, स्त्री, दुर्गा । यथा,—
"इन्द्राणी इन्द्रजननी शाक्री शक्रपराक्रमा ।
वज्राङ्कुशकरा देवी वज्रा तेनोपगीयते ॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ॥
शक्रपत्नी च ॥
शाख, क्ष व्याप्तौ । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट् ।) क्ष, अशशाखत् । इति दुर्गादासः ।
शाखः, पुं, कृत्तिकापुत्रः । यथा,—
"अवाप चानिलात् पुत्रमग्नितुल्यगुणं पुनः ।
अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत ॥
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः ।
अपत्यं कृत्तिकानाञ्च कार्त्तिकेयस्ततः स्मृतः ॥"
इति मात्स्ये ५ अध्यायः ॥
चित्तिः । इति शब्दचन्द्रिका ॥
शाखा, स्त्री, (शाखति गगनं व्याप्नोतीति । शाख + अच् । टाप् ।) वृक्षाङ्गविशेषः । डाल इति भाषा । (यथा, दुर्गापूजापद्धतौ ।
"शाखाच्छेदोद्भवं दुःखं न च कार्य्यं त्वया प्रभो ! ॥")
तत्पर्य्यायः । लता २ । इत्यमरः ॥ लङ्गा ३ । इति जटाधरः । शिखा ४ । इति भरतधृतमेदिनी ॥ पक्षान्तरम् । बाहुः । वेदभागः । इति मेदिनी ॥ (यथा, मनौ । ३ । १४५ ।
"यज्ञे न भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् ।
शाखान्तगमथाध्वर्य्युं छन्दोगन्तु समापिकम् ॥")
यत्यभेदः । इति धरणिः ॥ अन्तिकः । इति विश्वः ॥ (प्रकारः । यथा, गीतायाम् । २।४१ ।
"बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥")
शाखाकण्टः, पुं, (शाखायां कण्टो यस्य ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥
शाखानगरं, क्ली, (शाखेव नगरम् ।) मूलनगरादन्यत् पुरम् । इत्यमरः ॥ (यथा, महाभारते । १२ । ८७ । ८ ।
"शाखानगरमर्हस्तु सहस्रपतिरुत्तमः ॥")
मूलनगरेऽसम्मितस्य जनीघस्य स्थानाय मूलनगरस्य समीपेऽङ्गे वा यदन्यत् पुरं नगरान्तरं क्रियते तत् शाखानगरं मूलनगरस्य तदस्थानी यस्य शाखेव । अभिचन्दि रमणमप्यत्र । स्यादभिचन्दि रमणं शाखानगरमित्यपि । इति विकाण्डशेषः । इति तट्टीकायां भरतः ॥ अपि च । यथा, शब्दरत्नावल्याम् ।
"आरभ्य मूलनगरादपरं नगरं हि यत् ।
तदभिचन्दि रमणं शाखानगरमित्यपि ॥"
शाखापित्तः, पुं, पाणिपादांशमूलदाहः । इति राजनिर्घण्टः ॥
शाखापुरं, क्ली, (पुरस्य शाखा अभिधानात् पूर्व्वनिपातः । शाखेव पुरमिति वा ।) शाखानगरम् । तत्पर्य्यायः । उपपुरम् २ । इति हेमचन्द्रः ॥
शाखाभा, स्त्री. (शाखायामङ्गे भवा ।) वृक्षाङ्गा । इति राजनिर्घण्टः ॥
शाखामृगः, पुं, (शाखायां मृगः ।) वानरः । इत्यमरः ॥ (यथा,—
"मुक्ताफलाय करिणं हरिणं पलाय
सिंहं निहन्ति भुजविक्रमसूचनाय ।
का नीतिरीतिरियती रघुवंशवीर !
शाखामृगे जरति यस्तव वाचमोघः ॥"
इत्यङ्गटः ॥
शाखारुढः, पुं, स्वशाखां परित्यज्य शाखान्तराध्ययनकर्त्ता । तत्पर्य्यायः । अन्यशाखकः २ । इति हेमचन्द्रः ॥
शाखारथ्या, स्त्री, षोड़शहस्तप्रस्थपथः । यथा,—
"धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः ।
त्रिकराश्चोपरथ्यास्तु द्विकराप्युपरक्षकाः ॥"
इति देवीपुराणे गोपुरद्वारलक्षणनामाध्यायः ॥
शाखालः, पुं, (शाखां लाति आश्रयतीति । ला + कः ।) वानीरवृक्षः । इति राजनिर्घण्टः ॥
शाखाशिफा, स्त्री. (शाखायाः शिफा ।) वटादीनां शाखासम्बन्धिशिफा । नाम्ना इति ख्याता । तरोर्मूलादारभ्य अधः यावत् गता लतागुडूच्यादिः । इति भरतः ॥ तत्पर्य्यायः । अवरोहः २ । इत्यमरः ॥
शाखी, [न्] पुं, (शाखास्यस्येति । शाखा + इनिः ।) वृक्षः । इत्यमरः ॥ (यथा,—
"सीताया हृदि यच्छिरीषकुसुमप्राये पफालौशके:
पौलस्त्यस्य नितान्तकुण्ठकुलिशे वज्राधिके वक्षसि ।
आपुङ्खं निममज्ज मन्मथशरस्तम्भे व जानीमहे
कः शाखी सखि ! यस्य पुष्पमभवत् पुष्पायुधस्यायुधम् ॥"
इत्युद्भटः ॥)
वेदः । तुरुष्काख्यजनः । इति मेदिनी ॥ राजभेदः । इति हेमचन्द्रः ॥
शाखोटः, पुं, वृक्षविशेषः । श्याओड़ा इति भाषा ॥ तत्पर्य्यायः । पिशाचद्रुः २ पीतफलः ३ कर्कशच्छदः ४ । इति त्रिकाण्डशेषः ॥ भूतवृक्षः ५ सकटः ६ अक्षधरः ७ । इति भूरिप्रयोगः ॥ गवाक्षी ८ भूतावासः ९ रूक्षपत्रः १० पीतः ११ वैश्रिक्लोजः १२ क्षीरनाशनः १३ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । पित्तकारित्वम् । वातहारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"शाखोटः पीतफलको भूतावासः खरच्छदः ।

शाखोटो रक्तपित्तार्शोवातश्लेष्मातिसारजित् ॥"
इति भावप्रकाश: ॥
शाख्य:, त्रि, शाखासम्बन्धी। शाखाशब्दात् ष्यञ्प्रत्ययेन निष्पन्नमेतत् ॥
शाङ्करं, क्ली, (शङ्कर+अण्।) छन्दोभेद:। इति मेदिनी ॥ अस्य रूपान्तरं शाङ्करं शार्करञ्च ॥ (शङ्करो देवतास्य इत्यर्थे अणि आर्द्रानक्षत्रम्। यथा, बृहत्संहितायाम्। ७१। ७।
"मृगे तु सूचकाङ्गयं व्यस्तत्वमेव शाङ्करे ॥")
शाङ्कर:, पुं, (शङ्करस्यायं वाहनत्वात्। शङ्कर+अण्।) वलीवर्द:। इति मेदिनी ॥ (शङ्करसम्बन्धिनि, त्रि। यथा, कथासरित्सागरे। ४६। २०१।
"तत्रैषां तद्गुहाद्वारप्राप्तानां शाङ्करा गणा: ॥")
शाङ्करि:, पुं, शङ्करस्यापत्यं पुमान्। शङ्कर+इञ्।) कार्त्तिकेय:। गणेश:। इति मेदिनी ॥
शाङ्कुची, स्त्री, शङ्खोचनमस्य:। इति शब्दरत्नावली ॥
शाङ्ख:, त्रि, शङ्खसम्बन्धि। शङ्खशब्दात् ष्णप्रत्ययेन निष्पन्नमेतत् ॥
शाङ्खिक:, पुं, (शङ्खकरणं शिल्पमस्य इति। शङ्ख+ठक्।) जातिविशेष:। शाँखारि इति भाषा। तत्पर्य्याय:। काम्बविक: २। इत्यमर: ॥ शङ्खकार: ३ काम्बजक: ४। इति शब्दरत्नावली ॥ शङ्खवादक:। तत्पर्य्याय:। शङ्खधा: २। इति जटाधर: ॥
शाङ्गुष्ठा, स्त्री, गुञ्जा। इति रत्नमाला ॥
शाट:, पुं, वस्त्रभेद:। इत्यमरभरतौ ॥ यथा,—
"दूरत: शोभते मूर्खो लम्बशाटपटावृत:।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥"
इति चाणक्यशतकम् ॥
शाटक:, पुं क्ली, (शाट+स्वार्थे कन्।) पट:। (यथा, कथासरित्सागरे। ५३। ३८।
"स राजवन्दिनामा तद्दत्त्वा शाटकमग्रहीत्॥")
नाटकभेद:। इत्यमरभरतौ ॥
शाटिका, स्त्री, शाटी। इत्यमरटीकायां भरत:॥
शाटी, पुं स्त्री, वस्त्रभेद:। शाड़ी इति भाषा। इत्यमर: ॥ अस्या निर्माल्यत्वं निर्माल्यशब्दे द्रष्टव्यम् ॥
शाण्डायनं, क्ली, प्रकृतकर्म्मवैगुण्यप्रशमनार्थहोम:। यथा। यत्तु प्रकृतकर्म्मवैगुण्यप्रशमनाय शाण्डायनहोमाभिधानं भवदेवभट्टसम्मतं तन्न प्रामाणिकं तस्मादपि महाप्रामाणिकैर्भट्टनारायणचरणैर्गोभिलभाष्ये तदप्रमाणीकृतत्वात्। छन्दोगपरिशिष्टेऽपि प्रायश्चित्तार्थं प्रकारत्रयमात्रमुक्तम्। यथा,—
"यत्र व्याहृतिभिर्होम: प्रायश्चित्तात्मको भवेत्।
चतस्रस्तत्र विज्ञेया स्त्रीपाणिग्रहणे यथा ॥
अपि वाज्ञातमित्येषा प्राजापत्यापि वाहुति:।
होतव्या त्रिर्विकल्पोऽयं प्रायश्चित्तविधि: स्मृत: ॥"
चिर्विकल्प इत्यनेन कल्पान्तरनिषेधात् गोभिलीयकर्म्मणि शाण्डायनहोमो न युक्त:। किन्तु व्यस्तसमस्तमहाव्याहृतिभिर्यतस्तभि: प्रायश्चित्तहोमो युक्त:। विशारदप्रभृतयोऽप्येवम्। शाण्डायनहोमस्य समूलत्वेऽपि शाखान्तरीयत्वम्। इति तिथ्यादितत्त्वम् ॥
शाण्डायन:, पुं, मुनिविशेष:। इति पुराणम् ॥
शाण्ड, क्ली, (शठस्य भाव:। शठ+अञ्।) शठता। (यथा। "शठे शाठ्यं समाचरेत् ॥")
तत्पर्य्याय:। कपट: २ व्याज: ३ दम्भ: ४ उपधि: ५ छद्म ६ कैतवम् ७ कुसृति: ८ निकृति: ९। इत्यमर: ॥ नव अयथार्थव्यवहारे। शठ वधे क्लेशकैतवे तालव्यादि: अल् तस्य कर्म्म शाठ्यं ष्ण:। कपटादिषट्कं छद्मनि कुसृत्यादित्रयं चित्तकौटिल्ये इत्येके। कपटादिषट्कं वञ्चनमात्रफलम्। कुसृत्यादित्रिकन्तु हिंसाफलमिति भेद:। इति सर्वानन्दो मधुश्च। नवैवैकार्था इति वहव:। इति भरत: ॥ अपि च।
"अस्त्रियां कपटो व्याज उपधिर्दंभ एव च।
कूटं कल्कं छलं छद्म मिषकैरवकैतवम् ॥
अथ शाठ्यञ्च शठता कुसृतिर्निकृतिश्च सा।
हिंसाफले चतुष्कं स्यात् शाठ्यपर्य्याय ईरित:॥
पूर्व: कपटपर्य्याय: फले वञ्चनमात्रके।
उभयोरेकपर्य्याय इति केचित् प्रचक्षते ॥"
इति शब्दरत्नावली ॥
शाड, ऋङ श्राघे। इति कविकल्पद्रुम: ॥(भ्वा० आत्म०-सक०-सेट्।) ऋ, अशशाड़त्। ङ, शाड़ते गुणिनं गुणी। अन्त:स्थटतीययुक्तादिरयमिति कस्यचिद्भ्रम:। इति दुर्गादास: ॥
शाड्वल:, पुं, शाद्वल:। इति केचित् ॥
शाण, क्ली, (शणेन निर्म्मितमिति। शण+अण्।) शणनिर्म्मितवस्त्रम्। यथा। क्षौमं शाणं वा ब्राह्मणस्य कार्पासं क्षत्रियस्य आविकं वैश्यस्य। क्षुमा अतसी तस्या इदं क्षौमं तसरादि। शाणं शणतन्तुभवं तदुभयं ब्राह्मणस्य। इति संस्कारतत्त्वम् ॥
शाण:, पुं, (शण्यते ज्ञायते गुणादिरत्रेति। शण+घञ्।) कषपट्टिका। कष्टिपातर इति भाषा। तत्पर्य्याय:। निकष: २ कष: ३। इत्यमर: ॥ शान: ४ निकस: ५ कस: ६। इति भरत: ॥ आकष: ७। इति शब्दरत्नावली ॥ मापचतुष्टयम्। चारि माषा इति भाषा ॥ तत्पर्य्याय:। निष्क: २ टङ्क: ३। इति वैद्यकपरिभाषा। यथा,—
"माषैश्चतुर्भि: शाण: स्यात् वरण: स निगद्यते।
टङ्क: स एव कथितस्तद्वयं कोल उच्यते ॥"
इति भावप्रकाश: ॥
लौहादीनां निकष:। शानपातर: इति भाषा। इति मेदिनी ॥ करपत्रम्। करात् इति भाषा। इति विश्व: ॥
शाणाजीव:, पुं, (शाणेन आजीवतीति। आ+जीव+अच्।) अस्त्रमाजक:। यथा,—
"शाणाजीव: अस्त्रमाजी भ्रमासक्तोऽसिधावक: ॥"
इति हेमचन्द्र: ॥
शाणि:, पुं, षट्टङ्क:। यथा,—
"षट्टे राजशण: शाणिश्चिमि: कक्खटपत्रक: ॥"
इति शब्दमाला ॥
शाणित:, त्रि, तीक्ष्णीकृत:। निशित:। कृतशाण: शाणशब्दादितप्रत्ययेन निष्पन्नमेतत् ॥
शाणी, स्त्री, (शणस्य विकार:। शण+अण्। टिड्ढेति ङीप्।) शणसूत्रमयी पट्टिका। यथा,—
"शाणीप्रायाणि वस्त्राणि शमीप्राया मही-रुहा:।
शूद्रप्रायास्तथा वर्णा भविष्यन्ति कलौ युगे ॥"
इति विष्णुपुराणे ६ अंशे १ अध्याय: ॥
शाणी शणसूत्रमयी पट्टिका तन्तुजानि वस्त्राणि। इति तट्टीका ॥ (यथा, महाभारते। ३। १८४। १८।
"वस्त्राणां प्रवरा शाणी धान्यानां कोरदूषक: ॥")
प्रावरणान्तरम्। ताम्बु इति भाषा। इति मेदिनी ॥ छिद्रवस्त्रम्। यथा। शाणी गोणी छिद्रवस्त्रे। इति हेमचन्द्र: ॥ हस्तकटाद्यादिसूचना। इशारा इति पारस्यभाषा। इति शब्दरत्नावली ॥
शाणीरं, क्ली, शोणनदमध्यस्थतट:। दर्दरीनदीतट:। इति विश्व: ॥
शाण्डिल्य:, पुं, विल्वहेच:। इत्यमर: ॥ (यथा, महागणपतिस्तोत्रे। ९।
"हैरम्बं प्रणमामि यस्य पुरत: शाण्डिल्यमूले स्थिरा
बिभ्रत्याम्बुरुहे समं मधुरिपुस्ते शङ्खचक्रे वहन् ॥")
वह्निभेद:। (शण्डिलस्य मुनेर्गोत्रापत्यमिति। शण्डिल+"गर्गादिभ्यो यञ्।" ४। १। १०५। इति यञ्।) मुनिविशेष:। इति मेदिनी ॥ स तु गोत्रकार: भक्तिसूत्रकारश्च। तत्सूत्रभाष्यादयश्लोको यथा,—
"प्रणम्य परमं देवं श्रीखण्डेश्वरसूरिणा।
शाण्डिल्यशतसूत्रीयं भाष्यमाभाष्यतेऽधुना ॥"
शातं, क्ली, (शो+क्त: "शाच्छोरन्यतरस्याम्।" ७। ४। ४१। इति पक्षे इत्वाभाव:।) सुखम्। तद्धति, त्रि। इत्यमर: ॥ (विनाश:। यथा, सुश्रुते। ४। १।
"पाणिघ्राणं पाणिदाहं नखशातं करोति च॥")
शात:, त्रि, (शो+क्त: दुर्बल:।) निशित:। इति मेदिनी ॥ धुस्तूर: इत्यमर: ॥
शातकुम्भं, क्ली, (शतकुम्भे पर्वते भवम्। शतकुम्भ+अण्।) काञ्चनम्। (यथा, माघे। ९। ९।

"द्रुतशातकुम्भनिभमंशुमतो
वपुरद्दमन्नवपुषः पयसि ॥")
धुस्तूरः । इत्यमरः ॥
शातकुम्भः पुं, करवीरवृक्षः । इति मेदिनी ॥
शातकौम्भं, क्ली, स्वर्णम् । इति भरतद्विरूपकोषः॥
(सुवर्णनिर्म्मिते, त्रि । यथा, रामायणे । २ ।
३ । ११ ।
"शतञ्च शातकौम्भानां कुम्भानामभिवर्षताम्॥")
शातनं, क्ली, कार्श्यम् । विनाशनम् । यथा,—
"वसन्ते सर्वशस्यानां जायते पत्रशातनम् ।
मोहमायाय तिष्ठन्ति यवाः कणिशशालिनः ॥"
इति सारमञ्जरी ॥
(छेदके, त्रि । यथा, रघुः । ३ । ४२ ।
"स पूर्वतः पर्वतपक्षशातनं
दधर्श देवं नरदेवसम्भवः ॥")
शातपत्रकः, पुं, (शातपत्रं पद्ममिव । कन् ।)
चन्द्रप्रकाशः । यथा,—
"चन्द्रिका कौमुदी ज्योत्स्ना प्रकाशो द्योत आतपः ।
शतरश्मा चन्द्रिकायाञ्च प्रकाशे शातपत्रकः ॥"
इति शब्दचन्द्रिका ॥
शातभीरुः, पुं, मदनमाली । मल्लिकाभेदः ।
यथा,—
"शातभीरुर्भद्रवल्ली भूमिमण्डोऽष्टपादिका ॥"
इति रत्नमाला ॥
शातमानं, त्रि, (शतमान + "शतमानविंशति-
केति ।" ५ । १ । २७ । इति अण् ।) शत-
मानेन क्रीतम् । इति सिद्धान्तकौमुदी ॥
शातला, स्त्री, (शातं छेदं लातीति ला + कः ।)
सातला । चर्म्मकषा इति ख्याता । इत्यमर-
टीकायां भरतः ॥
शात्रवं क्ली, (शत्रोर्भावः समूहो वा । शत्रु +
अण् ।) शत्रुभावः । शत्रुसंहतिः । इति
मेदिनी ॥ (शत्रुसम्बन्धिनि, त्रि । यथा, रघुः ।
४ । ४२ ।
"ताम्बूलीनां दलैस्तत्र रचितापानभूमयः ।
नारिकेलासवं योधाः शात्रवस्य पपुर्यशः ॥")
शात्रवः पुं, (शत्रुरेव । स्वार्थे अण् ।) शत्रुः ।
इत्यमरः ॥ (यथा, माघे । १४ । ४४ ।
"तत्र नाभवदसौ महाहवे
शात्रवादिव पराङ्मुखोऽर्थिनः ॥")
शादः, पुं, (शो तनूकरणे + "शाशपिभ्यां ददनौ।"
उणा० ४ । ८७ । इति दः ।) कर्दमः । श्यष्म ।
इत्यमरः ॥
शादहरितः, त्रि, (शादैः श्यैः हरितः ।)
शाद्वलः । इत्यमरः ॥
शाद्वलः, त्रि, शाद + "नडशादात् ड्वलच् ।" ४ ।
२ । ८८ । इति ड्वलच् ।) नवदूर्वाबहुलदेशः ।
इत्यमरः ॥ शादो नवदूर्वं विद्यतेऽत्र शाद्वलः ।
श्यव्यवाचिन एव शादशब्दाद्वलः स्यात् न तु
पद्यवाचिनोऽनभिधानात् । इति तट्टीकायां
भरतः ॥ (यथा, रामायणे । २ । ३० । १४ ।
"शाद्वलेषु यदा गिरेः वनान्ते वनगोचरः ।
कथास्तरणयुक्तेषु किं स्यात् सुखतरं ततः ॥")
शान, अ तेजे । इति कविकल्पद्रुमः ॥ (भ्वा०-
उभ०-सक०-सेट् ।) शानस्तिक्ष्णीकरणम् ।
अ, शौशांसते शौशांसते खड्गं कर्म्मकारः ।
इति दुर्गादासः ॥
शानः, पुं, शाणः । इत्यमरटीकायां भरतः ॥
शान(ण)नपादः, पुं, पारिपात्रपर्वतः । (अस्य
विवरणं हरिवंशे १३१ अध्याये द्रष्टव्यम् ॥)
चन्दनघर्षणपाषाणः । इति महाभारते हरि-
वंशः ॥ चन्दनपिढ़ि इति भाषा ॥
शानी, स्त्री, इन्द्रवारुणी । इति शब्दचन्द्रिका ॥
शान्तः, त्रि, (शम + क्तः । "वा दान्तशान्तेति ।"
७ । २ । २७ । इति निपातितः ।) उपशमं
प्रापितः । प्राप्तोपशमः । इति भरतः ॥ तत्-
पर्य्यायः । शमितः २ । इत्यमरः ॥ शान्तः ३
जितेन्द्रियः ४ । इति हेमचन्द्रः ॥ शमान्वितः ५ ।
इति मेदिनी ॥
शान्तः, पुं, अभियुक्तः । रसभेदः । इति मेदिनी॥
शान्तरसस्य लक्षणादि यथा,—
"शान्तः शमः स्थायिभाव उत्तमप्रकृतिर्मतः ।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ॥
अनित्यत्वादिनाशेषवस्तुनिःसारता तु या ।
परमार्थस्वरूपं वा तस्यालम्बनमिष्यते ॥
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ।
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ॥
रोमाञ्चाद्यानुभावास्तथा स्युर्व्यभिचारिणः ।
निर्वेदहर्षस्मरणमतिभूतदयादयः ॥"
यथा,—
"रथ्यान्तरतस्तथा धृतजरत्कन्या नवस्या-
ध्वगैः
सत्रासञ्च सकौतुकञ्च सदयं दृष्टस्य तैर्नागरैः ।
निर्व्याजोक्तचित्सुधारससुदा निद्रायमाणस्य
मे
निःशङ्कं करटः कदा करपुटी भिक्षां विलुण्ठि-
ष्यति ॥"
पुष्टिस्तु महाभारतादौ द्रष्टव्या ।
"निरहङ्काररूपत्वात् दयावीरादिरेष नो ।"
दयावीरादौ हि जीमूतवाहनादौ अन्तरा
मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्र-
वर्त्तित्वाद्यासेर्दर्शनादहङ्कारोपशमो न दृश्यते ।
शान्तस्तु सर्वप्रकारेणाहङ्कारप्रशमैकरूपत्वात्र
तत्रान्तर्भावमर्हति । अतश्च नागानन्दे शान्त-
रसप्रधानत्वमपास्तम् । मनु ।
"न यत्र दुःखं न सुखं न चिन्ता
न द्वेषरागौ न च काचिदिच्छा ।
रसः स शान्तः कथितो मुनीन्द्रैः
सर्वेषु भावेषु समप्रमाणः ॥"
इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्म-
स्वरूपापत्तिलक्षणायां प्रादुर्भावात् । तत्र
सञ्चार्य्यादीनामभावात् कथं रसत्वमित्युच्यते
युक्तवियुक्तदशायामवस्थितो यः शमः स एव
यतः रसतामेति तदस्मिन् सञ्चार्य्यादेः स्थितिश्च
न विरुद्धा । यस्मिन् सुखभावोऽप्युक्तस्तस्य
वैषयिकसुखपरत्वान्न विरोधः । उक्तं हि ।
"यच्च कामसुखं लोके यच्च दिव्यं महासुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोड़शीं कलाम् ॥
सर्व्वाकारमहङ्काररहितत्वं व्रजन्ति चेत् ।
अत्रान्तर्भावमर्हन्ति दयावीरादयस्तदा ॥"
आदिशब्दात् धर्म्मवीरदानवीरदेवताविषय-
रतिप्रभृतयः । तत्र देवताविषया रतिर्यथा,—
"कदा वाराणस्यामिह सुरधुनी रोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्"
इति साहित्य दर्पणे ३ परिच्छेदः ॥
शान्तं, [म्] क्ली वारणम् । इति मेदिनी ॥
शान्तनवः, पुं,(शान्तनोरपत्यं पुमान् । शान्तनु +
अण् ।) शान्तनुराजपुत्रः । भीष्मः । इति
त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । ३६ ।
८० ।
"तथा भीष्मः शान्तनवो गङ्गायाममितद्युतिः ।
वसुवीर्य्यात् समभवत् महावीर्य्यो महायशाः॥")
शान्तनुः, पुं, द्वापरयुगस्य चन्द्रवंशीयैकविंश-
राजः । स तु गङ्गायां भीष्मं जनयामास । तस्य
पिता प्रदिपः । यथा,—
"जयसेनस्तत्तनयो राधिकोऽतोऽयुतायुभूत् ।
ततश्चाक्रोधनस्तस्मात् देवातिथिरमुष्य च ।
ऋक्षस्तस्य दिलीपोऽभूत् प्रतीपस्तस्य चात्मजः ।
देवापिः शान्तनुस्तस्य बाह्लीक इति चात्मजाः ॥
यं यं कराभ्यां स्पृशति जीर्णं यौवनमेयति ।
शान्तिमाप्नोति चैवाशु कर्म्मणा तेन
शान्तनुः ॥
बाह्लीकात् सोमदत्तोऽभूत् भूरिर्भूरिश्रवास्ततः ।
शलश्च शान्तनोरासीत् गङ्गायां भीष्म आत्म-
वान् ॥"
इति श्रीभागवते ९ स्कन्धे २२ अध्यायः ॥
तत्पर्य्यायः । महाभीष्मः २ । इति जटाधरः ॥
प्रातीपः ३ इति त्रिकाण्डशेषः ॥ प्रतीपः ४
प्रतिपः ५ । इति शब्दरत्नावली ॥ (शन्तनु-
रिति पाठस्तु बहुभिराहृतः ॥) कर्कटी । इति
रत्नमाला ॥
शान्ता, स्त्री, दशरथराजकन्या । दशरथेन कन्यार्थं
लोमपादाय राज्ञे प्रदत्ता । सा च ऋष्यशृङ्ग-
भार्य्या । इति रामायणम् ॥ (यथा, उत्तर-
चरिते १ अङ्के ।
"कन्यां दशरथो राजा शान्तां नाम व्यजी-
जनत् ।
अपत्यकृतिकां राज्ञे लोमपादाय यां ददौ ॥")
शमीभेदः । तत्पर्य्यायः । शुभा २ भद्रा ३ अप-
राजिता ४ जया ५ विजया ६ । अस्या गुणाः
शमीवत् । इति राजनिर्घण्टः ॥
शान्तिः, स्त्री, (शम + क्तिन् ।) कामक्रोधादि-
प्रशमः । चित्तोपशमः । इति भरतः ॥ विषयेभ्य

इन्द्रियोपरमः। इति चण्डिटीकायां नागोजीभट्टः॥ तत्पर्य्यायः। शमथः २ शमः ३। इत्यमरः॥ प्रशमः ४ उपशमः ५ प्रशान्तिः ६। इति शब्दरत्नावली॥ तृष्णाक्षयः ७। इति हेमचन्द्रः॥ तल्लक्षणं यथा,—

'यत्किञ्चिदस्तु संप्राप्य स्वल्पं वा यदि वा बहु।
या तुष्टिर्जायते चित्ते शान्तिः सा गद्यते बुधैः॥"

इति पद्मपुराणे क्रियायोगसारे १५ अध्यायः॥ भद्रम्। इति हेमचन्द्रः॥ गोपीविशेषः। यथा,

राधिकोवाच।

"शान्त्या गोप्या युतस्त्वञ्च दृष्टोऽहं राशमण्डले।
वसन्तपुष्पशय्यायां माल्यवान् चन्दनोक्षितः॥
रत्नप्रदीपैर्युक्तश्च रत्ननिर्म्माणमन्दिरे।
रत्नभूषितभूषाढ्यो रत्नभूषितया सह॥
तया दत्तञ्च ताम्बूलं भुक्तवांश्च पुरा विभो।
सद्यो मच्छद्मनात्रेण तिरोधानं कृतं तया॥
शान्तिर्देहं परित्यज्य भयाद्दीना त्वयि प्रभो।
ततस्तस्याः शरीरञ्च गुणश्रेष्ठं बभूव ह॥
संविभज्य त्वया दत्तं प्रेम्णा प्रददता पुरा।
विप्रे विषयिणे किञ्चित् सत्त्वरूपाय विष्णवे॥
गृहसत्त्वस्वरूपाये महालक्ष्म्यै पुरा विभो।
त्वन्मन्त्रोपासकेभ्यश्च वैष्णवेभ्यश्च किञ्चन।
तपस्विभ्यश्च धर्म्माय धर्म्मिष्ठेभ्यश्च किञ्चन॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ९ अध्यायः॥*॥

दुर्गा यथा,—

"उत्पत्तिस्थितिनाशेषु रजादित्रिगुणा मता।
सर्व्वज्ञा सर्व्ववेत्तृत्वाच्छान्तित्वाच्छान्तिरुच्यते॥"

इति देवीपुराणे देवीनिरुक्ताध्यायः॥*॥

धर्म्मद्वारा ग्रहदोःस्वदुःस्वप्नादिसूचितैहिकानिष्टहेतुदुरितनिवृत्तिः। यथा,—

"यथा शस्त्रप्रहाराणां कवचं विनिवारकम्।
तथा दैवोपघातानां शान्तिर्भवति वारणम्॥"
बालग्रहभूतग्रहनराधिपप्रबलतरग्रतुदुःसहरोगाभिभवाद्यतदुःस्वग्रहदोःस्वादिनिमित्तकं शान्तिकर्म्मापि मलमासे कर्त्तव्यम्। शुद्धकालप्रतीक्षायामसहत्वे नानन्यगतिकत्वात्। अतएवात्मानं सततं गोपायेत इति श्रुतौ सततमित्युक्तम्। इति मलमासतत्त्वम्॥*॥ उपसर्गशान्तिगाथा यथा,—

"एषामिन्द्रो महावीर्य्यस्ते लोक्यस्येश्वरोऽभवत्।
शतं क्रतूनामाहृत्य सुशान्तिर्नाम नामतः॥
तस्योपसर्गनाशाय नामाक्षरविभूषिता।
अद्यापि मानवैर्गाथा गीयतेऽत्र महीतले॥
सशान्तिर्देवराट् शान्तः सुशान्तिं न प्रयच्छति।
सहितः शिवसत्कीर्त्यैस्तथैव वशवर्त्तिभिः॥"

इति मार्कण्डेयपुराणे उत्तममन्वन्तरसमाप्ताध्यायः॥*॥

अथाङ्गशान्तिः। तत्राङ्गतनिरूपणम्। अद्भुतसागरे आथर्व्वणाङ्गतवचनम्। प्रकृतिविरुद्धमङ्गतमापदः प्राक्प्रबोधाय देवा सृजन्तीति। तेनापज्ञानाय भूम्यादीनां पूर्वस्वभावप्रच्यवो देवकर्त्तृकोऽङ्गत इति। एवञ्च बुधोदयपर्व्वणि ग्रहादीनां गणितागणितत्वेन प्रकृतानामपि यदुत्पातत्वं तदाङ्गम्। तत्कारणञ्च गगसंहितावार्हस्पत्ययोः।

"अतिलोभादसत्याद्दा नास्तिक्याद्दाप्यधर्म्मतः।
नरापचारान्नियतमुपसर्गः प्रवर्त्तते॥
ततोऽपचारान्नियतमपवर्ज्जन्ति देवताः।
ताः सृजन्त्यङ्गतांस्तांस्तु दिव्यनाभसभूमिजान्॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः।
विचरन्ति विनाशाय रूपैः सम्बोधयन्ति च॥"

तांश्च परं न दर्शयेदित्याह विष्णुः। नोत्पातं दर्शयेदिति। तत्र वेलानक्षत्रमण्डलनिरूपणम् यथा, दीपिकायाम्।

"प्राग्द्वित्रिचतुर्भागैर्द्यूनिशोरङ्गतेषु सर्व्वेषु।
अनिलाग्निशक्रवरुणा मण्डलपतयः शुभाशुभेषु॥"

वेलामण्डलः।

"अर्य्यमणादिचतुष्कचन्द्रतुरगादित्येषु वायुर्भवेत्
देवेज्याजविशाखयाम्ययुगले पित्र्याहये चानलः।
विश्वादित्रयधाटमैत्रयुगलेष्विन्द्रो भवेन्मण्डलः
सर्पोपान्त्यशतान्त्यमूलयुगलेष्वानेय्यपामीश्वरः॥
पवनदहनौ नेष्टौ योगस्तयोरतिदोषदः।
सुरपतिवरुणौ शस्तौ योगस्तयोरतिशोभनः॥
सवरुणमरुन्मित्रः शक्रस्तथाग्निसमायुतः।
फलविरहितः सेन्द्रो वायुस्तथाग्निसुतोऽम्बुपः॥
यन्मण्डलेऽङ्गतं जातं शान्तिस्तद्देवतात्रया।
तथा शान्तिद्वयं कार्य्यं मण्डलद्वयजाङ्गते॥*॥"

विष्णुधर्म्मोत्तरे।

"ग्रहसंवेद्यतं दिव्यं शान्तरीचं निबोध मे।
उल्कापातो दिशां दाहः परिवेशस्तथैव च॥
गन्धर्वनगरञ्चैव वृष्टिश्च विकृता तथा।
एवमादीनि लोकेऽस्मिन् नाभसानि विनिर्दिशेत्॥
चरस्थिरभवं भौमं भूकम्पमपि भूमिजम्।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितम्॥
भौमं चाल्पफलं ज्ञेयं चिरेण परिपच्यते।
नाभसं मध्यफलदं मध्यकालफलप्रदम्।
दिव्यं तीव्रफलं ज्ञेयं शीघ्रकारी तथैव च॥*॥
शीतोष्णताविपर्य्यासः ऋतूनां रिपुजं भयम्।
पुष्पे फले च विकृते राज्ञो मृत्युं तथा दिशेत्॥
अकालप्रभवा नार्य्यः कालातीताः प्रजास्तथा।
विकृताः प्रसवाश्चैव युग्मप्रसवनं तथा॥
हीनाङ्गाः अधिकाङ्गाश्च जायन्ते यदि वा व्रयः।
पशवः पक्षिणश्चैव तथैव च सरीसृपाः।
विनाशं तस्य देहस्य कुलस्य च विनिर्दिशेत्॥
प्रदोषे कुक्कुटारावो हेमन्ते चापि कोकिलाः।
अर्कोदयेऽर्कोभिमुखः शारावो भयं दिशेत्॥
उलूको वसते यत्र निपतेद्वा तथा गृहे।
ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च॥
गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च।
चिल्लश्च धर्म्मचिल्लश्च भासः पारुष्ट एव च॥
गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते।
पञ्चाशत्तस्य वर्षाणि मृत्युः स्यादृग्गृहेमिनः।
पत्राणां पुत्रस्य वा मृत्युर्द्रव्यापि विनश्यति॥
ब्राह्मणाय गृहं दत्त्वा दत्त्वा तल्लूनमेव वा।
गृह्णीयादृयदि रोचेत शान्तिश्चेमां प्रयोजयेत्॥
इमां वक्ष्यमाणाम्॥*॥

"मांसास्थीनि समादाय श्मशानादृगृध्रवायसाः
श्वा शृगालोऽथवा मध्ये पुरस्य प्रविशन्ति चेत्॥
विकिरन्ति गृहादौ च श्मशानं सा महीभवेत्।
चौरेण हन्यते लोकः परचक्रसमागमः॥
संग्रामश्च महाघोरो दुर्भिक्षं मरकं तथा।
अद्भुतानि प्रसूयन्ते तत्र देशस्य विद्रवः॥
अकाले फलपुष्पाणि देशविद्रवकारणम्॥"

मत्स्यपुराणे।

"अतिदृष्टिरनावृष्टिर्दुर्भिक्षादिभयं मतम्।
अवृष्टौ तु दिनादूर्द्धं दृष्टिर्न्नेया भयाय च॥
निरभ्रे वाथ रात्रौ वा क्षेतं यस्योत्तरेण तु।
इन्द्रायुधं ततो दृष्ट्वा उल्कापातं तथैव च॥
दिग्दाहपरिवेशौ च गन्धर्व्वनगरं तथा।
परचक्रभयं विद्याद्देशोपद्रवमेव च॥"

भासो वनकुक्कुटः॥*॥ कंसनिधनसूचने हरिवंशः॥

"वक्रमङ्गारकयुक्ते चित्रायां घोरदर्शनः।
चलत्पर्व्वणि मही गिरिणां शिखराणि च॥"

बाणोत्पाते स एव।

"दक्षिणां दिशमास्थाय धूमकेतुः स्थितोऽभवत्
वक्रमङ्गारकयुक्ते कृत्तिकासु भयङ्करः॥"*॥

कृत्यचिन्तामणौ।

"त्वन्नाशोचविवेकतत्त्ववसुधा लोकाः क्षुधापीड़िताः
विप्रा वेदहतास्तथा प्रचलिता ब्रह्माग्निनी दुःखिताः।
चौचौमन्दफला नृपाश्च विकलाः संग्रामघोरा मही
प्रेताघातदुरन्तपीड़िततरा देवेज्यराज्यौर्युती॥
रक्ते शस्त्रोदयोगो मांसास्थिवशादिभिःरकः।
धान्यस्थिरण्यत्वक्फलकुसुमाद्ये वर्षिते भयं विद्यात्।
अङ्गारपांशुवर्षे विनाशमुपयाति तन्नगरम्॥
उपलं विनानलधरैर्विकृता वा यदा प्राणिनो दृष्ट्वा।
छिद्रं वाप्यतिदृष्टिं शस्यानामीतिसंजननम्॥"

बुधकौशिकसंवादे।

"वज्राः प्रपाते च फलं शरटस्य प्ररोहणे।
शीर्षे राजश्रियोऽवाप्तिर्भाले चैश्वर्य्यमेव च॥
कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनम्।
नासिकायाञ्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनम्॥
कण्ठे चैव श्रियोऽवाप्तिर्भुजयोर्विभवो भवेत्।
धनलाभो बाहुमूले करयोर्धनहृद्दिः॥
स्तनमूले च सौभाग्यं हृदि सौख्यविवर्द्धनम्।
पृष्ठे नित्यं महीलाभः पार्श्वयोर्बन्धुदर्शनम्॥
कटिदये वस्त्रलाभो गुह्ये मृत्युसमागमः।

जङ्घे चार्थक्षयो नित्यं गुदे रोगभयं भवेत् ॥
ऊर्व्योस्तु वाहनाशस्त्रिर्जानुनश्चेऽर्थसंक्षयः ।
वामदक्षिणयोः पादे भ्रमणं नियतं भवेत् ॥
वक्षाः प्ररोहणे चैव पतने शरटस्य च ।
व्यत्यासाच्च फलञ्चैव तद्देव प्रजायते ॥
वक्षाः प्ररोहणं रात्रौ शरटस्य प्रपातनम् ।
निधनार्थाय भवति व्याधिपीड़ा विपर्य्यये ॥
पतनानन्तरं चैवारोहणं यदि जायते ।
पतने फलमुत्कृष्टं रोहणेऽन्यत् फलं भवेत् ॥
आरोहणञ्चोर्द्ध्वशाखे अधोवक्त्रे च पातनम् ॥
भवेदिष्टफलं तस्य तत्काले जायते ध्रुवम् ॥*॥
स्पृष्टमात्रे तयोः सद्यः सचेलं जलमाविशेत् ।
पञ्चगव्यप्राशनञ्च कुर्य्यादर्कावलोकनम् ॥
वल्मीकरूपं सुवर्णस्य रजतस्य च वेष्टयेत् ।
पूजयेद्गन्धपुष्पाद्यैस्तदग्रे पूर्णकुम्भके ॥
पञ्चगव्यं पञ्चरत्नं पञ्चामृतं सपल्लवम् ।
पञ्चवल्कषायञ्च निक्षिप्यावाहयेत्ततः ॥
पूजयेद्गन्धपुष्पाद्यैर्लोकपालांस्तथा ग्रहान् ।
मृत्युञ्जयेन मन्त्रेण समिद्भिः खदिरैः शुभैः ।
तिलैर्व्याहृतिभिर्होममष्टोत्तरसहस्रकम् ॥"
वल्मी गृहगोधिका । मृत्युञ्जयमन्त्रस्त्र्यम्बकमन्त्रः
इति विद्याकरः ॥*॥ गर्गसंहितायामाह्यत्ययोः ।
"ये तेषु शान्तिं कुर्वन्ति न ते यान्ति परा-
भवम् ।
ये तु न प्रतिकुर्वन्ति क्रियया श्रद्धयान्विताः ।
दाम्भिकाद्या विमोहाद्या विनश्यन्त्येव तेऽचि-
रात् ॥"*॥
अत्र निमित्तनिश्चयवतोऽधिकारोऽन्यथा दोष
इत्याह मत्स्यपुराणम् ।
"भिन्नमण्डलवेलायां ये भवन्त्यद्भुताः क्वचित् ।
तत्र शान्तिरयं कार्य्यो निमित्तं सति नान्यथा ।
निर्निमित्तकृताच्छान्तिर्निमित्तमुपपादयेत् ॥"
एतच्च तत्तद्विशेषविहितशान्तिविषयम् ।
अन्यथा वेलामण्डलसन्देहे शान्तिर्न स्यात् ॥*॥
अतएवोक्तं योगियाज्ञवल्क्येन ।
"यत्र यत्र च संक्षोभमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्या समुदाहृतः ॥
गायत्र्या प्रयतः गृह्यैः सर्वपापैः प्रमुच्यते ।
शान्तिकामश्च जुहुयात् गायत्रीमयतेः
शुचिः ॥
इन्द्रुकामश्च नृपतेर्घृतेन जुहुयात् शुचिः ।
सावित्र्या शान्तिहोमांश्च कुर्य्यात् पर्वसु
नित्यशः ॥
प्रणवव्याहृतिभ्याञ्च स्वाहान्तो होमकर्म्मणि ।
प्रतिलोमा प्रयोक्तव्या फट्कारान्ताभिचारिके ॥
मार्कण्डेयपुराणम् ।
"दिग्देशजनसामान्यं नृपसामान्यमात्मनि ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभम् ।
परस्परारिष्टा च ग्रहदोषेषु जायते ॥"
तथा ।
"तस्माच्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ।
लोकवादांश्च शान्तौच ग्रहपीड़ासु कारयेत् ॥
भूदोहानुपवासांश्च श्रद्धां चैत्यादिवन्दनम् ।
कुर्य्यात् होमं तथा दानं त्यजेत् क्रोधविवर्ज्ज-
नम् ॥
अद्रोहं सर्वभूतेषु मैत्रीं कुर्वन्ति पण्डिताः ।
वर्ज्जयेदुद्यतों वाचमतिवादांस्तथैव च ॥
ग्रहपूजाञ्च कुर्व्वीत सर्वपीड़ासु मानवः ।
एवं शाम्यत्यशेषाणि घोराणि द्विजसत्तम ।
प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यनेकशः ॥"*॥
लोकवादाश्च तत्रैवोक्ता यथा,—
"आकाशाद्देवतानाञ्च देव्यादीनाञ्च सौहृदात् ।
पृथिव्यां प्रतिलोके च लोकवादा इति स्मृताः ॥"
ते च सर्वभूतडाकिन्याद्यभिभवशान्त्यर्थं लौकि-
कौषधमन्त्रादयः । विषहरीमङ्गलचण्डिका-
गीतादयः । चैत्यवृक्षादौ चैत्रपालकुलदेवता-
पूजा च ॥*॥ तथा चापस्तम्बः । स्त्रीभ्योऽवर-
वर्णेभ्यो धर्म्मशेषान् प्रतीयादित्येक इति । धर्म-
शेषान् श्रुतिस्मृतिसदाचारेष्वप्रसिद्धान् इति
नारायणोपाध्यायाः ॥ भूदोहश्च पात्रं विना
भूमौ गोस्तनं निष्पीड्य दुग्धोत्सर्गः । चैत्यः
पूज्यत्वेन ख्यातो ग्रामप्रधानवृक्षः । तथा च
वाणोक्ताते हरिवंशः ।
"अनेकशाखश्चैत्यश्च निपपात महीतले ।
अर्चितः सर्वकन्याभिर्दानवानां महात्मनाम् ॥"
उपतों प्रकल्याणीम् । अतिवादश्च पूज्यमति-
क्रम्य भाषणम् ॥*॥ मत्स्यपुराणम् ।
"काकश्चैकरवश्चावः प्रभाते दुःखदायकः ।
काको मैथुनकासक्तः श्वेतो वा यदि दृश्यते ॥
उलूको वसते यत्र निपतेद् वा तथा गृहे ।
श्वेतो गृहपतेर्मृत्युर्धनमाशस्त्रथैव च ॥"*॥
वराहसंहितायाम् ।
"क्रीड़ातुरश्चो रतिमांसलुब्धो
भीतो रुजार्त्तः पतितो विवद्धः ।
नासौ गृहस्थस्य विनाशहेतु-
र्दोषः समुत्थाप्यत आहुरार्य्याः ॥
गृहे पक्षिविकारेषु कुर्य्याच्छामरतर्पणम् ।
देवाः कपोता इति वा जप्तव्यं सप्तभिर्द्विजैः ॥
गावश्च देया विविधा द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते पापमुपैति शान्तिं
स्वर्गञ्च दिव्यैर्वपुषा निवेदितं तत् ॥"
द्विजैः पक्षिभिः । अपिना अन्यैरपि ॥*॥
भुजबलभीमे ।
"एको हयस्त्रयो गावः सप्तमा नव दक्षिणः ।
सिंहप्रसूतिकाश्चैव कथिताः स्वामिघातिकाः ॥"
सिंहप्रसूतिका गावः ॥*॥ मत्स्यपुराणे ।
"अङ्गे दक्षिणभागे तु श्रस्तं विस्फुरणं भवेत् ।
अप्रशस्तं तथा वामं पृष्ठस्य हृदयस्य च ॥
स्खाच्छनं पिटकञ्चैव ज्ञेयं विस्फुर्जितं तथा ।
विपर्य्ययेण विहितं सर्वं स्त्रीणां फलं तथा ॥"
"अनिष्टचिह्नोपगमे द्विजानां कार्य्यं सुवर्णेन च
तर्पणं स्यात् ।" ग्रहः । दुःस्वप्नानिष्टदर्शनादौ हुतं
हिरण्यञ्च दद्यादिति ॥*॥ मात्स्ये ।
"नमस्ते सर्वलोकेश नमस्ते भृगुनन्दन ।
कवे सर्व्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तु ते ॥
एवं शुक्रोदये कुर्व्वन् यात्रादिषु च भारत ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ॥
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ बृहस्पते ।
क्रूरग्रहैः पीड़ितानामस्माकाय नमो नमः ॥
संक्रान्तावपि कौन्तेय यात्रास्वभ्युदयेषु च ।
कुर्वन् बृहस्पतेः पूजां सर्वान् कामान् सम-
श्नुते ॥*॥"
वैष्णवामृते व्यासः ।
"ग्रहयज्ञैः शान्तिकैश्च किं क्लिश्यन्ति नरा
दिव ।
महाशान्तिकरः श्रीमान् तुलस्या पूजितो हरिः
उत्पादान् दारुणान् पुंसां दुर्निमित्तानानेकशः ।
तुलस्या पूजितो भक्त्या महाशान्ति करो
हरिः ॥"
अत्र ब्रह्मपुराणीयो मन्त्रः ।
"नमस्ते बहुरूपाय विष्णवे परमात्मने
स्वाहेति ॥*॥"
छन्दोगपरिशिष्टम् । अथातो रजस्वलाभिगमने
गोऽश्वभार्य्यासु गमने यमजजनने विजातीय-
जनने वा काककङ्कगृध्रबकश्येनभासचिल्लकपो-
तानां गृहप्रवेशे मानुषस्योपरिविश्रामणे एषा-
मेव क्रियमाणे गृहद्वारारोहणे अन्येषु चाद-
भुतेषु कल्पदृष्टेन विधिनाग्निमुपसमाधाय प्राय-
श्चित्ताज्याहुतीर्जुहोति अद्भुताय अग्नये स्वाहा
सोमाय विष्णवे रुद्राय वायवे सूर्य्याय मृत्यवे
विश्वेभ्यो देवेभ्यः स्वाहेति स्विष्टोपाकाद्धुतान्य-
दिति ॥*॥ कपोतं विशेषयति शौनकः ।
"रक्तपादः कपोताख्यो धरण्डीकाः शुकच्छविः
स चेच्छालां विशेच्छालासमीपञ्च व्रजेद्यदि ।
अन्येषु गृहमध्ये वा वल्मीकस्योद्गमादिषु ॥"
कल्पदृष्टेन विधिना गृह्योक्तेन प्रायश्चित्ताज्या-
हुतीः अद्भुतदोषप्रशमनार्थाः सप्ताज्याहुतीः
अद्भुतायाग्नये स्वाहा इत्यादिमन्त्रैः तत्स्विष्टो-
पाकेति कृत्वत्यया पायसचरुभिरेतेभ्यो देवेभ्यो
जुहुयात् । छन्दोगपरिशिष्टम् । पश्चात् हुत-
पायसेन ब्राह्मणान् भोजयित्वा गोवरं दत्त्वा
शान्तिर्भवतीति । गावरं गोश्रेष्ठम् । दक्षिणां
तां गां दत्त्वा दोषशान्तिर्भवतीति । तथा
चोक्तम् ।
"गौर्विशिष्टतमा लोके वेदेष्वपि निगद्यते ।
न ततोऽन्यतरं यस्मात् तस्माद्गौर्वरमुच्यते ॥"
छन्दोगपरिशिष्टम् । यस्त्वेषामन्यतममापन्नः
प्रायश्चित्तं न कुर्य्यात्तस्य गृहपतेर्मरणं सर्वस्व-
नाशो वा भवति तस्मात् प्रायश्चित्तं कर्त्तव्यं कर्मा-
पवर्गे वामदेव्यगानं शान्तिः शान्तिरिति । अप-
वर्गे समाप्तौ । वामदेव्यगानं शान्तिः कार्य्या ।
आहुतिः प्रकरणसमाप्त्यर्था । बाईहत्य ।
"शमयत्यशुभस्याशु कम्पादिकृतं निमित्त-
माशेव ।
अतिवर्षमोपवासव्रतदीक्षाजप्यहवनानि ॥*॥"

वराहः।
"ये च न दोषं जनयन्त्यु त्पातान् तान्तुल्यभाव-
ज्ञतान्।
ऋषिपुत्रज्ञते: श्लोकैर्विद्यादेभि: समासोक्तैः॥"
तथा च मत्स्यपुराणम्।
"वज्राग्निमहीकम्पसम्भ्यानिर्घातनिस्वना:।
परिवेषरजोधूमरक्षार्काक्षमयोदया:॥
दूमेभ्योऽथ रसक्षेमधुपुष्पफलोद्गमा:।
गोपक्षिमदहृद्विघ्न शिवाय मधुमाधवे॥"
तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम्।
अनग्निज्वलनं स्फोटं धूमरेणुनिराकुलम्॥
रक्तपद्माकरा सन्ध्या नभ: शुष्कार्चवोपमम्।
सरिताद्यम्बुसंशोषं दृष्ट्वा शीघ्रं भयं वदेत्॥"
यक्षायुधपरीवेषौ विद्युच्छुष्कविरोहणम्।
कम्पोद्वर्त्तनवैक्लव्यं रसनं दरणं क्षितेः॥
नद्युदपानसरसां दृष्ट्वाद्या भवनम्पया:।
पतनद्वाद्रिगेहानां वर्षासु न भयावहम्॥"
हरिवंशे वर्षावर्षनायाम्।
"क्वचित् कन्दरहासाढ्यं गिलोन्मोभरणं
क्वचित्।"
इति दर्शनात् वर्षासु गिलोन्मोद्गमो न भयावह:॥
"दिव्यस्त्रीभूतगन्धर्वविमानादद्भुतदर्शनम्।
ग्रहनक्षत्रतारायां दर्शनञ्च दिवाम्बरे॥
गीतवादित्रनिर्घोषो वनपर्वतसानुषु।
अम्लहृद्दी रसोत्पत्तिरपापा: शरदि स्मृता:॥"
शीतानिलतुषारत्वं नर्हनं मृगपक्षिणाम्।
रुचोयवादिसत्त्वानां दर्शनं वागमानुषी॥
दिशो धूमान्धकाराश्च ग्लौभा वनपर्वता:।
उच्चै: सूर्य्योदयास्तत्वं हेमन्ते शोभना मता:॥"
हिमपातानिलोत्पातविरूपाद्भुतदर्शनम्।
दृष्ट्वाम्बुनाभमाकाशं तारोल्कापातपिञ्जरम्॥
चित्रा गर्भोद्भवा: स्त्रीषु गोऽजाश्च मृगपक्षिणाम्।
पद्माङ्कुरलतानाञ्च विकारा: स्त्रिग्धिरे शुभा:॥"
ऋतुलक्षणभावज्ञा ये दृष्टा: कर्त्ता शुभावहा:।
ऋतावन्यत्र चोत्पाता दृष्ट्वाद्ये मृगदाक्षया:॥"
उन्मत्तानाञ्च या गाथा स्त्रियूनां चेष्टितञ्च यत्।
स्त्रियो यत्र प्रभाषन्ते तत्र नास्ति व्यतिक्रम:॥
पूर्वं स्मरति देवेषु पश्चाच्छ्रुति मानुषान्।
नादेशिता वाग्वदति सत्या श्लोका सरस्वती॥"
हरिवंशे:।
"ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृणाम्
त्रावयन्त्यर्थलोभेन विनेयास्तेऽपि यत्नत:॥"
विनेया दण्डनीया:। इति ज्योतिस्तत्त्वम्॥"
भीमदिव्यान्तरीक्षोत्पातशान्तिमाख्ये २०२
अध्यायावधि २१२ अध्यायपर्य्यन्तं द्रष्टव्या।
तथा देवीपुराणे महाभ्युदयपादे सर्वदेवीकी-
सर्व्वोत्पातशान्तिसमाराधाये चण्डीशब्दे च
द्रष्टव्या। तन्त्रोक्ता शान्तिः षट्कर्म्मशब्दे
द्रष्टव्या॥" अथ शान्तिकपौष्टिककर्म्मादिनम्।
तत्र वारा रविसोमबुधहरुसतिशुक्राणां तत्र
नक्षत्राणि उत्तराषाढा उत्तरफल्गुनी उत्तर-
भाद्रपत् रोहिणी चित्रा अनुराधा मृगशिर:
रेवती पुष्या अश्विनी हस्ता। तत्र चन्द्र:
शोभन:। लग्नं शोभनम्। इति ज्योतिषतत्त्वम्
शान्ति:,पुं,हुत्ताईद्विशेष:। जिनचक्रवर्त्तिविशेष:
इति हेमचन्द्र:॥ दशमन्वन्तरीशेन्द्र:। यथा,—
"धर्म्मपुत्रस्य पुत्रास्तु दशमस्य मनो: नृप।
सुक्षेत्रोत्तमौजाश्च भूमिन्त्रेक्षश्च वीर्य्यवान्॥
शतानीको निरमित्रो हविर्मानो जयद्रथ:।
भूरिद्युम्न: सुवर्चाश्च शान्तिरिन्द्र: प्रतापवान्॥
आपो मूर्त्तिर्विभांश्च सत्यजितावाध्यस्तथा।
नाभागोऽरिष्टमर्त्तव सौरभा ऋतयस्तथा॥
प्राचाख्या: शतसंख्याश्च देवतानां गणास्तथा।
वालिशवदुक्तं हरिश्च गदया घातयिष्यति॥"
इति गारुडे ८७ अध्याय:॥
शान्तिकाम:, त्रि, (शान्तिं कामयते इति।
काम+णिच्+अच्।) शान्त्यभिलाषी। यथा,
"श्रीकाम: शान्तिकामो वा ग्रहयज्ञं समा-
चरेत्।
दृष्टायु:पुष्टिकामो वा तथैवाभिचरन्नपि॥"
इति संस्कारतत्त्वम्॥
शान्तिगृहं, क्ली, (शान्तेर्गृहम्।) शान्त्यालय:।
यत्रान्ते शान्तिकुशजलेन स्नानस्य गृहम्।
तत्पर्य्याय:। आथर्व्वणम् २। इति हेमचन्द्र:॥
(यथा, हरिवंशे हिताख्याम्। ४४। ५।
"कक्षेषु निवसेत्पुष्ट्यर्थं शान्तिगृहगानाम्"
शान्त्व,क्ली, सान्त्वम्। इत्यमरटीकासारसुन्दरी।
शान्त्वति:, स्त्री ब्राह्मयष्टिका। इति शब्द-
चन्द्रिका॥ पुस्तकान्तरे शान्वतिरिति च पाठ:
शाप:, पुं,(शपनमिति। शप+घञ्।)आक्रोश:।
(यथा रघु:। ५। ५६।
"संमोचित: सत्त्ववता त्वयाहं
शापादिवाग्रार्थितदर्शनेन॥")
दिव्यम्। इति मेदिनी॥ आधस्य पर्य्याय:।
अवरुधि: २। इत्यमर:॥ अजीवनि: ३
अजननि: ४ अवग्रह: ५ निग्रह: ६। इति
भरत:॥ अभिसम्पात: ७। इति अन्यान्तरम्॥
शेषस्य पर्य्याय:। शपनम् २ शपथ: ३। इत्य-
मर:॥ मिथ्यानिरसनम् ४। इति शब्दरत्ना-
वली॥ (उपद्रव:। यथा, रामायणे।१।२६।३५
"उवास रजनीं तत्र ताड़काया वने सुखम्।
सुशापं वनं तच्च तस्मिन्नेव तदाहनि।
रमणीयं विबभ्राज यथा चैत्ररथं वनम्॥"
"सुशापं शपगतोपद्रवम्।" इति तट्टीका॥
अत्रम्। यथा, ऋग्वेदे। १०। २८। ४।
"प्रतीपं शापं नद्यो वहन्ति।"
"नद्यो गङ्गाद्या: सरित: प्रतीपं प्रतिकूलं शापं
उदकं वहन्ति।" इति तद्भाष्ये सायण:॥)
शापटिक:, पुं, मयूर:। इति केचित्॥
शापास्त्र:, पुं, (शाप एव अस्त्रं यस्य।) मुनि:।
इति त्रिकाण्डशेष:॥
शाफरिक:, पुं, (शफरान् हन्तीति। शफर+
"पञ्चिमत्स्यमृगान् हन्ति।" ४।४।३५। इति
ठक्।) मत्स्यधारक:। इति केचित्॥
शाब्द:, त्रि, (शब्दस्यायमिति। शब्द+अण्।)
शब्दसम्बन्धी। यथा। एक: शाब्दोऽपरार्थ:।
इति दायभाग:॥ (शब्दमय:। यथा, भाग-
वते। २। २। २।
"शाब्दस्य हि ब्रह्मण एष पन्था
यन्नामभिर्व्याभियते धीर धार्म्यै:॥")
सरस्वत्यां स्त्री, शाब्दी। इति केचित्॥
शाब्दबोध:, पुं, (शाब्द: शब्दसम्बन्धी बोध:।)
शब्दार्थज्ञानम्। न्यायमते पदार्थज्ञानजन्य-
ज्ञानम्। तस्य करणं पदज्ञानम्। तस्य कारणं
पदशक्तिज्ञानम्। कदाचित् शक्यज्ञानम्।
एवं आकाङ्क्षायोग्यतासत्तितात्पर्य्यज्ञानञ्च।
यथा,—
"पदज्ञानन्तु करणं द्वारं तत्र पदार्थधी:।
शाब्दबोध: फलं तत्र शक्तिधी: सहकारिणी॥"
इति भाषापरिच्छेद:॥*॥
शाब्दबोधप्रकारं दर्शयति पदज्ञानमिति।
न तु ज्ञायमानं पदं करणं पदाभावेऽपि मौनि-
श्लोकादौ शाब्दबोधात्। पदार्थधीरिति पद-
जन्यपदार्थस्मरणं व्यापार:। अन्यथा पदज्ञान-
वत: प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबो-
धापत्ते:। तत्रापि हृत्वा पदजन्यत्वं बोध्यं अन्यथा
घटादिपदात् समवायसम्बन्धेन आकाश-
स्मरणे जाते आकाशस्यापि शाब्दबोधापत्ते:।
इत्ति: शक्तिश्चयान्यतरसम्बन्ध:। अत्रैव शक्ति-
ज्ञानस्य उपयोग:। पूर्वं शक्तिग्रहाभावे
पदज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्ते:।
पदज्ञानस्य हि सम्बन्धिज्ञानविधयार्थस्मार-
कत्त्वम्।*। शक्तिश्च पदेन सह पदार्थस्य
सम्बन्ध:। अस्माच्छब्दादयमर्थो बोद्धव्य इतो-
श्वरेच्छारूपा आधुनिके नाम्नि शक्तिरस्त्येव
एकादशेऽहनि पिता नाम कुर्य्यादितीश्वरे-
च्छाया: सत्त्वात् आधुनिके तु सङ्केते न शक्ति-
रिति सम्प्रदाय:। नव्यास्तु ईश्वरेच्छा न शक्ति:
किन्त्विच्छैव तेनाधुनिकसङ्केतेऽपि शक्तिरस्तीति
वदन्ति।* शक्तिग्रहश्च व्याकरणादित:।
तथा हि।
"शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सान्निध्यत: सिद्धपदस्य वृद्धा:॥"
धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्-
भवति क्वचित्तु सति बाधके लक्ष्यतेऽपि। यथा,
वैयाकरणैराख्यातस्य कर्त्तरि शक्तिरुच्यते।
चैत्र: पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वय-
स्तत्र गौरवान्न जन्यते किन्तु क्रतौ शक्तिग्रहो
लाघवात्। क्रतिर्द्धात्वादौ प्रकारीभूय भासते।
न च कर्त्तुरनभिधानाच्चैत्रादिपदानन्तरं क्रतौवा
ख्यादिति वाच्यं कर्त्तृसंख्यानभिधानस्य तत्र
तन्त्रत्वात्। संख्याभिधानयोग्यस्य कर्म्मत्वाच्चान-
वच्छ:। प्रथमान्तपदोपस्थाप्यकर्म्मत्वादीत्यस्य
विशेषत्वतात्पर्य्याविषयत्वमर्थ: तेन चैत्र इव

गच्छतीत्यादौ न चैत्रे संख्यान्वयः। यत्र कर्म्मादौ न विशेषणत्वतात्पर्य्यं तद्वारणाय प्रथमान्तेति। यद्वा धात्वर्थातिरिक्तविशेषणत्वं प्रथमदलार्थः तेन चैत्र इव गच्छतीत्यत्र चैत्रादेर्व्वारणं स्तोकं प्रचलतीत्यादौ स्तोकादेर्वारणाय च द्वितीयदलम्। तस्य द्वितीयान्तोपस्थाप्यत्वाद्वारणम्। एवं व्यापारेऽपि न शक्तिर्गौरवात्। रथो गच्छति इत्यादौ तु स्वव्यापारे आश्रयत्वे वा लक्षणा। जानाति इत्यादौ तु आश्रयत्वे नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा। उपमानादयथा शक्तिग्रहस्तथोक्तम् ॥ * ॥ एवं कोषादपि शक्तिग्रहः सति बाधके क्वचित्स्यज्यते यथा नीलादिशब्दानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः कोषे व्युत्पादिता तथापि लाघवात् नीलादौ शक्तिः नीलादिविशिष्टे लक्षणेति ॥ * ॥ एवमाप्तवाक्यादपि। यथा, कोकिलः पिकपदवाच्यः इत्यादिशब्दात् पिकादिशक्तिग्रहः ॥*॥ एवं व्यवहारादपि। यथा, प्रयोजकवृद्धेन घटमानयेत्युक्तं तत् श्रुत्वा प्रयोज्यवृद्धेन घट आनीतस्तदवधार्य्य पार्श्वस्थो बालो घटानयनरूपं कार्य्यम्। घटमानय इति शब्दप्रयोज्यं अवधारयति ततश्च घटमपसारय गामानय इत्यादौ आवापोद्वापाभ्यां घटादिपदानां कार्य्यान्वितघटादौ शक्तिं गृह्णाति ॥*॥ एवं वाक्यशेषादपि शक्तिग्रहः। यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशिष्टे आर्य्याणां प्रयोगः काम्बोजा च म्लेच्छानाम्। तत्र हि यथान्ये ओषधयो म्लायन्ते तथैते मोदमाना इवोत्तिष्ठन्ति ॥ "वसन्ते सर्व्वशस्यानां जायते पत्रशातनम्। मोदमानाश्च तिष्ठन्ति यवाः कश्चिद्यशालिनः॥" इति वाक्यशेषात् दीर्घशूके शक्तिर्निर्णीयते काम्बोजा तु शक्तिभ्रमात् प्रयोगः। नानाशक्तिकल्पने गौरवात्। हरिपदादौ तु विनिगमकाभावान्नानाशक्तिकल्पनम् ॥*॥ एवं विवरणादपि शक्तिग्रहः। विवरणन्तु तत्समानार्थपदान्तरेण तदर्थकथनम्। यथा घटोऽस्ति इत्यस्य कलसोऽस्तीत्यनेन विवरणाद्घटपदस्य कलसे शक्तिग्रहः। एवं पचति इत्यस्य पाकं करोति इत्यनेन विवरणादाख्यातस्य यत्नार्थकत्वं कल्प्यते ॥ * ॥ एवं प्रसिद्धपदसान्निध्यादपि शक्तिग्रहः यथा। इह सहकारतरौ मधुरं पिको रौति इत्यादौ पिकपदस्य शक्तिग्रह इति। तत्र जातावेव शक्तिर्न तु व्यक्तौ व्यभीचारादानन्त्याच्च ॥ * ॥ शक्तं पदन्तु क्वचिद्यौगिकं क्वचिद्रूढं क्वचिद्योगरूढं क्वचिद्यौगिकरूढम्। यत्रावयवार्थ एव बुध्यते तद्यौगिकं यथा पाचकादिपदम्। यत्रावयवशक्तिनैरपेक्षेण समुदायशक्तिमात्रेण बुध्यते तद्रूढं यथा गोपदमश्वपादि पदम्। यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढं यथा पङ्कजादिपदम्। तथा हि पङ्कजपदमवयवशक्त्या पङ्कजनिकर्त्तृरूपमर्थं बोधयति समुदायशक्त्या च पङ्कत्वेन रूपेण पङ्कं बोधयति। यत्र अवयवार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तदयौगिकरूढं यथोद्भिदादिपदम्। तत्र हि उद्भेदनकर्त्ता तरुगुल्मादिरपि बुध्यते। इति सिद्धान्तसुक्तावली ॥

शाब्दिकः, पुं, (शब्दं करोतीति। शब्द + "शब्दवैरकलहाभ्रकण्वमेघेभ्यः करोति।" ४। ४। ३४। इति ठक्।) शब्दशास्त्रवेत्ता। वैयाकरणः। आदिशाब्दिका यथा,—

"इन्द्रचन्द्रः काशकृत्स्ना पिशली शाकटायनः।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः॥"

इति कविकल्पद्रुमः ॥

नव्यशाब्दिका यथा। क्रमदीश्वरः। सर्ववर्म्मा। पद्मनाभमिश्रः। बोपदेवः। सत्स्वर्वानन्दः। भरतमल्लिकप्रभृतयः ॥ शब्दसम्बन्धिनि, त्रि ॥

शाम, [न्] क्ली, साम। इत्यमरटीकासारसुन्दरी ॥

शामनं, क्ली,(शमनमेव। स्वार्थे अण्।)मारणम्। शान्तिः। इति केचित् ॥

शामनः, पुं, (शमन एव। प्रज्ञाद्यण्।) शमनः। इति पुराणम् ॥

शामनी, स्त्री, (शमनस्य यमस्येयमिति। शमन + अण्। ङीष्।) दक्षिणा दिक्। इति राजनिर्घण्टः ॥

शामित्रं, क्ली, यज्ञम्। पशुबन्धनम्। यज्ञपात्रम्। इति केचित् ॥ (शमितुरिदम्। शमितृ + अण्) पशुहिंसनम्। यथा, भागवते। १। १६। ८।

"इहोपश्रुत्य भगवान् मृत्युः शामित्रकर्म्मणि।
न क्वचिन्म्रियते तावद् यावदास्ते इहान्तकः॥")

शामीलं क्ली, (शम्याः विकारः। "शम्याष्टलच्।" ४। ३। १४२। इति टलच्।) भक्ष्म। इति सिद्धान्तकौमुदी ॥

शामीलो, स्त्री, सुक्। इति सिद्धान्तकौमुदी ॥

शाम्बरी, स्त्री, शम्बरदैत्यनिर्म्मितमाया। इन्द्रजालादिमाया। इत्यमरभरतौ ॥

शाम्बविकः, पुं, शाङ्किकः। इति जटाधरः।

शाम्बुकः, पुं, शम्बूकः। इति शब्दरत्नावली ॥ शामुक इति भाषा ॥

शाम्बूकः, पुं, शम्बुकः। इत्यमरटीकायां भरतः ॥

शाम्भवं, क्ली, (शम्भोरुपवेशाय इदम्। अण्।) देवदारु। इति राजनिर्घण्टः ॥

शाम्भवः, पुं, कर्पूरः। शिवभक्तौ। गुग्गुलुः। इति राजनिर्घण्टः ॥ विषभेदः। इति शब्दचन्द्रिका॥ शम्भुपुत्रः। शम्भुपूजकः। शम्भुसम्बन्धिनि, त्रि॥ (यथा, कथासरित्सागरे। १२। १६०।

"तत्र च प्रविशन्त्यग्रे बहवः शाम्भवा गणाः॥")

शाम्भवी, स्त्री, नीलदूर्वा। इति राजनिर्घण्टः ॥ दुर्गा। यथा,—

"शाम्भवी देवमाता च चिन्ता रत्नप्रिया सदा॥"

इति तन्त्रसारे दुर्गास्तोत्रम् ॥

शायकः, पुं, (शाययति शवून्। शी + णिच् + ण्वुल्। यद्वा, शेते तूणीरे इति। शी + ण्वुल्।) बाणः। इति जटाधरः ॥ (यथा, नैषधचरिते। ४। १०१।

"प्रियसखीनिवहेन सहाय सा
व्यरचयद्गिरमर्हसमस्यया।
हृदयमर्म्मणि मन्मथशायकैः
क्षततमा बहु भाषितुमक्षमा॥")

खड्गः। इत्यमरटीकायां स्वामी ॥

शार, त् क दीर्घत्वे। इति कविकल्पद्रुमः।(अदन्त चुरा०-पर०-अक०-सेट्।)अशशारत्। इति दुर्गादासः ॥

शारं, त्रि, (शृ + घञ्।) कर्बुरवर्णः। इत्यमरः ॥

शारः, पुं, (शीर्य्यतेऽनेन शृणाति वा। शृ + "शॄ वायुवर्णनिहत्तेषु।" ३। ३। २१। इत्यस्य वार्त्तिकोक्त्या घञ्।) वायुः। इत्यमरः ॥ अन्नोपकरणम्। इति मेदिनी ॥ हिंसनम्। कर्बुरवर्णः। कुष्ठे, स्त्री। इति केचित् ॥

शारङ्गः, पुं, (शीर्य्यते आतपैः। शृ + "तरत्यादिभ्यश्च।" उषा० १। ११८। इति अङ्गच्।) चातकः। (यथा,—

"अष्टौ मासान् जलधर तवापेक्षया शुष्ककण्ठः
शारङ्गोऽयं निरवधिवतव्यानिनायाति कृत्स्नात्
आस्तां तावत् सलिलकणिकालाभसम्भावनापि
वर्षारम्भप्रथमसमये दारुणो वज्रपातः॥"

इत्युद्भटः ॥)

हरिणः। (यथा, शाकुन्तले। १।

"एष राजेव दुष्यन्तः शारङ्गेणातिरंहसा॥")

हस्ती। भृङ्गः। मयूरः। कर्बुरवर्णविशिष्टे, त्रि। इत्यमरटीकायां सुकुटादयः ॥

शारङ्गी, स्त्री, (शारङ्ग + ङीष्।) वाद्ययन्त्रविशेषः। इति शब्दरत्नावली ॥

शारदं, क्ली,(शरदि भवम्। शरद् + "सन्धिवेलाऋतुनक्षत्रेभ्योऽण्"। ४। ३। १६। इति अण्।) श्वेतकमलम्। इति राजनिर्घण्टः ॥ (यथा, महाभारते। २। ६१। ३४।

"शारदोत्पलपत्राक्षी शारदोत्पलगन्धया।
शारदोत्पलसेविन्या रूपेण श्रीसमानया॥")

शस्यम्। इति मेदिनीशब्दरत्नावली ॥

शारदः पुं, (शरद् + अण्।) कासः। वकुलः। हरिणुप्तः। इति राजनिर्घण्टः ॥ वत्सरः। इति मेदिनी ॥ पीतसुप्तः। इति हेमचन्द्रः ॥ रोगः। इति सिद्धान्तकौमुदी ॥

शारदः, त्रि, (शरदि भवः। शरद् + अण्।) शरज्जातः। (यथा, मनौ। ६। ११।

"वासन्तशारदैर्मेधैर्मुन्यन्नैः स्वयमाहृतैः॥")

नूतनः। अप्रतिभः। इति मेदिनी ॥ प्राचीनः। इति विश्वः ॥

शारदा स्त्री, सरस्वती। इति त्रिकाण्डशेषः ॥ (यथा, महिम्नस्तोत्रे।

"लिखति यदि गृहीत्वा शारदा सर्वकालम्॥")

दुर्गा (यथा, भागवते। १०। २। १२ ॥

"माया नारायणीशानी शारदेत्यम्बिकेति च ॥")

अस्या व्युत्पत्तिर्यथा,—

"शरत्काले पुरा यस्मात् नवम्यां बोधिता सुरैः। शारदा सा समाख्याता पीठे लोके च नामतः॥"

इति तिथ्यादितत्त्वम् ॥

वीणाविशेषः। इति शब्दरत्नावली ॥ ब्राह्मी। सारिवा। इति राजनिर्घण्टः ॥

शारदिकं, क्ली. (शरद्+"आद्ये शरदः।" ४।३। १२। इति ठञ्।) श्राद्धम्। इति सिद्धान्तकौमुदी ॥

शारदिकः, पुं, (शरद्+"विभाषा रोगातपयोः।" ४। ३। १३। इति ठञ्।) रोगः। आतपः। इति सिद्धान्तकौमुदी ॥

शारदी, स्त्री, (शारद+ङीप्।) तोयपिप्पली। सप्तपर्णः। इति मेदिनी ॥ कोजागरपूर्णिमा। इति शब्दरत्नावली ॥ शरत्कालीने, त्रि। यथा, स्कान्दभविष्ययोः।

"शारदीचण्डिकापूजा त्रिविधा परिगीयते। सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥ सात्त्विकी जपयज्ञार्घैर्नैवेद्यैश्च निरामिषैः। माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम् ॥ पाठस्तस्य जपः प्रोक्तः पठेद्देवीमना प्रिये। राजसी बलिदानेन नैवेद्यैः सामिषैस्तथा ॥ सुरामांसाद्युपहारैर्जपयज्ञैर्विना तु या। विना मन्त्रैस्तामसी स्यात् किरातानाञ्च सम्मता ॥"

इति तिथ्यादितत्त्वम् ॥

(संवत्सरसम्बन्धिनी। यथा, ऋग्वेदे।१।१३१।४।

"यदिन्द्रशारदीरवातिरः सा सदानो अवातिरः ॥")

शारदीयमहापूजा, स्त्री, (शारदीया महापूजा।) शरत्कालीनदुर्गामहापूजा। यथा,—

"शारदीया महापूजा चतुःकर्म्ममयी शुभा। तां तिथित्रयमासाद्य कुर्य्यात् भक्त्या विधानतः ॥"

इति तिथ्यादितत्त्वम् ॥

अपि च।

"इते घोरे महावीरे सुरासुरभयङ्करे। देवीमुपासका देवाः प्रभूता राक्षसास्तथा ॥ समेताः सर्व्वदेवास्ते देवीं भक्त्या तुतोषिरे। बलिञ्च ददुर्भूतानां महिषाजामिषेण च ॥ एवं तस्मिन् दिने वत्स प्रेतभूतसमाकुलम्। जातवान् सर्व्वदेवस्य पूजाय शाम्भवीमहान् ॥ बलिदानन्तु श्विने मासि महिषारिनिवर्हिणीम्। देवीं संपूजयित्वा तु अष्टमीपर्व्वरात्रिषु ॥ ये घातयन्ति सदा भक्त्या ते भवन्ति महाबलाः। बलिञ्च ये प्रयच्छन्ति सर्व्वभूतविनाशनम् ॥ तेषान्तु तुष्यते देवी यावत् कल्पन्तु शाङ्करम्। क्रीड़ते विविधैर्भोगैर्दैवलोके सुदुर्लभे ॥ यावद्भूर्वाडुराकाशं जलं वह्निश्च शिखराः। तावच्च चण्डिकापूजा भविष्यति सदा भुवि ॥ प्रावृट्काले विशेषेण श्राद्धिने ह्यष्टमीषु च। महाशब्दो नवम्याञ्च लोके ख्यातिं गमिष्यति॥

इन्द्र उवाच।

श्राद्धिने घातिते घोरे नवमी प्रतिवत्सरम्। श्रोतुमिच्छाम्यहं तात उपवासव्रतादिकम् ॥ महाव्रतं महापुण्यं शङ्करार्थैरनुष्ठितम्। कर्त्तव्यं देवराजेन्द्र देवीभक्तिसमन्वितैः ॥ कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नन्दिकाम्। अपाशी त्वथ वैकाशी नक्ताशी वाथ वायुदः ॥ प्रातःस्नायी जितद्वन्द्वः त्रिकालं शिवपूजकः। जपहोमसमायुक्तः कन्यकां भोजयेत् सदा ॥ अष्टम्यां नवगेहानि दारुजानि शुभानि च। एवं वा चित्तभावेन कारयेत् सुरसत्तम ॥ तस्मिन् देवी प्रकर्त्तव्या हैमी वा राजती च वा मृन्मयी लवणोपेता खड्गे शूलेऽथ पूजयेत् ॥ सर्व्वोपहारसम्पन्नो वस्त्ररत्नफलादिभिः। कारयेद्रथदोलादीन् पूजाञ्च बलिदैवकीम् ॥ पुष्पाद्यैर्द्रोणविख्यातजातीपुन्नागचम्पकैः। विचित्रां कारयेत् पूजां अष्टम्यामुपवासयेत् ॥ दुर्गाग्रतो जपेच्चण्डमेकचित्तः सुभावितः। तदर्द्धयामिनीशेषे विजयार्थं नृपोत्तमैः ॥ पञ्चाब्दं लक्षणोपेतं गन्धधूपसगर्च्चितम्। विधिवत् कालि कालीति अष्टौ खड्गे न घातयेत् ॥ तस्योत्थं रुधिरं मांसं गृहीत्वा पूतनादिषु। नैर्ऋताय प्रदातव्या महाकौशिकमन्त्रितम् ॥ तस्याग्रतो नृपः स्नायाच्छक्रं ज्ञात्वा तु पिष्टजम् खड्गेन घातयित्वा तु दद्यात् स्कन्दविशाखयोः ॥ ततो देवीं स्नापयेत् प्राज्ञः क्षीरसर्पिर्जलादिभिः। कुङ्कुमागुरुकर्पूरचन्दनैश्चारुधूपकैः ॥ हैमानि पुष्परत्नानि वासांसि स्नाहतानि च। निवेद्यं सुप्रभूतन्तु देयं देव्याः सुभावितैः ॥ अश्वमेधमवाप्नोति भक्तिमान् सुरसत्तम। महानवम्यां पूजेयं सर्व्वकामप्रदायिका ॥ सर्व्वेषु सर्व्ववर्षेषु तव भक्त्या प्रकीर्त्तिता। ज्ञात्वाप्नोति यशो राज्यं पुत्रायुर्धनसम्पदः ॥"

इति देवीपुराणे २८।३० अध्यायात् सङ्कलितं न तु सङ्क्रमकम् ॥

शारिः, पुं, (शृ हिंसायाम्+इञ्।) अक्षोपकरणम्। पाशकादेर्बलम्। गुटिका। इति मेदिनी ॥ तत्पर्य्यायः। शारः २ खेलनी ३। इति हेमचन्द्रः ॥

शारिः, स्त्री, (शृ+"ऋः शकुनौ।" उणा० ४। १२७। इति इञ्।) शकुनिकाभेदः। युद्धार्थगजपर्य्याणम्। व्यवहारान्तरम्। इति मेदिनी॥ कपटः। इति धरणिः ॥

शारिका, स्त्री, (शारिरेव। स्वार्थे कन्।) पक्षिविशेषः। मयना इति भाषा। तत्पर्य्यायः। पीतपादा २ गोराटी ३ गोकिराटिका ४। इति हेमचन्द्रः ॥ सारिका ५ शारी ६ चित्रलोचना ७ शारिः ८। इति शब्दरत्नावली ॥ मदनशारिका ९ शलाका १०। इति जटाधरः ॥ वीणादिवादनम्। तत्पर्य्यायः। बोधः २। इति हेमचन्द्रः ॥

शारिफलं, क्ली, पुं, (शारीणां खेलनीनां फलम्) शारिपट्टः। शारिखेलनाधारः। छक् इति भाषा। तत्पर्य्यायः। अष्टापदम् २। इत्यमरः ॥ फलकः ३। इतिशब्दरत्नावली ॥ आकर्षः ४ शारिफलकः ५ बिन्दुतन्त्रः ६ अक्षपीठी ७। इति जटाधरः ॥

शारिफलकः, पुं, क्ली, (शारीणां फलकः।) शारिफलम्। इति जटाधरः ॥

शारिवा, स्त्री, श्यामलता। तत्पर्य्यायः। गोपी२ श्यामा ३ अनन्ता ४ उत्पलशारिवा ५। इत्यमरः ॥ पद्म श्यामलतायाम्। नागजिह्वायामिति केचित्। गोप्यादित्रयं श्यामलतायां अनन्तादित्रयं अनन्तमूले इति केचित्। गुपू रक्षणे शोणादित्वादीप् गोपा च।

'गोपीश्यामा गोपपत्नी गोपा गोपालिकापि च'

इति वाचस्पतिः।

"एकं वा शारिवामूलं सर्व्वव्रणविशोधनम्।"

इति वैद्यकम्। इति भरतः ॥

अस्या गुणः। वातपित्तरक्तहृच्छ्वासार्दितज्वरनाशित्वम्। इति राजवल्लभः ॥

शारिशृङ्खला, स्त्री, (शारीणां शृङ्खला यत्र।) पाशकविशेषः। यथा,—

"चुचुरी तिन्तिड़ी द्यूतं पञ्चमी शारिशृङ्खला। नयपीठी चाष्टकाचो नयः स्याज्जयपुष्पकः। एते पाशकभेदाः स्युर्जयकोलाहलोऽपि च ॥"

इति शब्दरत्नावली ॥

शारी, स्त्री, (शृ+इञ्। वा ङीप्।) कृषा। इति केचित्॥ (शकुनिकाभेदः। यथा, भाषासमग्रन्थाम्। ६२३।

"सा विरहदहनदूना सत्वा सत्वापि जीवति वराकी। शारीव कितव भवत्प्रतिकूलिता पातिताचेष्या॥")

शारीरं, क्ली, हृषः। (शरीरे भवः। शरीर+अण्।) शरीरजाते, त्रि। इति मेदिनी ॥*॥

शारीरदण्डो यथा,—

"दिग्दण्डं प्रथमं कुर्य्यात् वाग्दण्डं तदनन्तरम् ततीयं धनदण्डञ्च वधदण्डमतः परमिति ॥"

वधदण्डोऽपि शारीरो ब्राह्मणव्यतिरिक्तानाम्। इति मिताक्षरायां व्यवहारकाण्डम् ॥*॥

शारीरदुःखं यथा,—

"आध्यात्मिको द्वे विविधः शारीरो मानसस्तथा। शारीरो बहुभिर्भेदैर्भिद्यते शृणताञ्च सः ॥ शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः। गुल्मार्शःक्षयपुष्णासच्छर्द्यादिभिरनेकधा ॥ तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः। भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ॥ कामक्रोधभयर्षेर्ष्यालोभमोहविषादजः।

शोकासूयापमानेर्ष्यामात्सर्य्यादिभयस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ तापो भवति नैकधा ।
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥
दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम ।
सुकुमारतनुर्गर्भे जन्तुर्बहुमलाहृते ॥
उल्बसंवेष्टितो भुग्नपृष्ठग्रीवातिसंहतिः ।
अत्यम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः ॥
अतितापिभिरत्यर्थं वर्द्धमानातिवेदनः ।
प्रसारणाकुञ्चनादौ नाड्यानां प्रभुरात्मनः ॥
शक्नमूत्रमहापङ्कशायी सर्वत्र पीड़ितः ।
निश्वासः सचैतन्यः स्मरन् जन्मशतान्यथ ॥
आस्ते गर्भेऽतिदुःखेन निजकर्म्मनिबन्धनः ।
जायमानः पुरीषास्रङ्मूत्रशुक्राविलाननः ॥
प्रजापत्येन वातेन पीड्यमानास्थिबन्धनः ।
अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः ॥
क्लेशैर्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः ।
मूर्च्छामवाप्य महतीं संस्पृष्टो बाह्यवायुना ॥
विज्ञानं भ्रंशमाप्नोति जातश्च मुनिसत्तम ।
कण्टकैरिव तुन्नाङ्गः क्रकचैरिव दारितः ॥
पूतिव्रणान्निपतितो धरण्यां कृमिको यथा ।
कण्डूयनेऽपि वाग्यन्त्रः परिवर्त्तेऽप्यनीश्वरः ॥
स्नानपानादिकाहारमप्याप्नोति परेच्छया ।
अशुचिः सस्तरे सुप्तः कीटदंशादिभिस्तथा ॥
भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे ।
जन्मदुःखान्यनेकानि जन्मनोऽनन्तराणि च ॥
बालभावे यदाप्नोति आधिभौतादिकानि च ।
अज्ञानतमसाच्छन्नो मूढान्तःकरणो नरः ॥
न जानाति कुतः कोऽहं क्व वा गन्ता किमात्मकः ॥"

इति विष्णुपुराणे ६ अंशे ५ अध्यायः ॥*॥

अथातः शरीरसंख्याव्याकरणं शारीरं व्याख्यास्यामः । शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसंमूर्च्छितं गर्भ इत्युच्यते । तत्र चेतनावस्थितं वायुर्विभजति । तेज एनं पचति । आपः क्लेदयन्ति । पृथिवी संहन्ति । आकाशं विवर्द्धयति । एवं विवर्द्धितः स यदा हस्तपादशिरोग्राणकर्णनितम्बादिभिरङ्गैरुपेतस्तदा शरीरमिति संज्ञां लभते । तत्र षड़ङ्गं शाखाचतस्रो मध्यं पञ्चमं षष्ठं शिर इति ॥*॥ अतः परं प्रत्यङ्गानि कथ्यन्ते । मस्तकोदरपृष्ठनाभिललाटनासाचिबुकवस्तिग्रीवा इत्येता एकैकाः । कर्णनेत्रनासाभ्रूशङ्खांसगण्डकक्षस्तनहृषणपार्श्वस्फिक्जानुबाहुरुप्रभृतयो द्वे द्वे । विंशतिरङ्गुलयः । स्रोतांसि च वक्ष्यमाणानि । एष प्रत्यङ्गविभाग उक्तः ॥*॥ तस्य पुनः संख्यानम् । त्वचः कला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयमाशया अन्त्राणि द्वौ स्रोतांसि कण्डरा जालानि कूर्चा रज्जवः सेवन्यः संघाताः सौमन्ता अस्थीनि सन्धयः स्नायवः पेश्यो मर्म्माणि सिरा धमन्यो योगवहानि स्रोतांसि च ॥*॥ त्वचः सप्त । कलाः सप्त । आशयाः सप्त । धातवः सप्त । सप्त शिरागतानि । पञ्च पेश्यीशतानि । नव स्नायुशतानि । चीख्खिशतानि । द्वे दशोत्तरे सन्धिशते । सप्तोत्तरं मर्म्मशतम् । चतुर्विंशतिर्धमन्यः । त्रयो दोषास्त्रयो मलाः । नव स्रोतांसि इति समासः ॥*॥ विस्तारोऽत उर्द्धम् । त्वचोऽभिहिताः कला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयं हृदौ च ॥*॥ आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयो मूत्राशयः स्त्रीणां गर्भाशयोऽष्टम इति ॥*॥ सार्द्धत्रिव्यामान्यन्त्राणि पुंसां स्त्रीणामर्द्धव्यामहीनानि । श्रवणनयनवदनघ्राणगुदमेढ्राणि नव स्रोतांसि नराणां बहिर्मुखान्यन्तर्मुखानि च स्त्रीणामपराणि च त्रीणि: द्वे स्तनयोरधस्ताद्रक्तवहे च ॥*॥ षोड़श कण्डरा तासाञ्चतस्रः पादयोस्तावत्यो हस्तग्रीवापृष्ठेषु । तत्र हस्तपादगतानां कण्डराणां नखाः प्ररोहाः ग्रीवाहृदयनिबन्धिनीनां अधोभागगतानां मेढ्रं श्रोणिपृष्ठनिबन्धिनीनां अधोभागगतानां विम्बः मूर्द्धरुचोऽन्यपिण्डादीनाञ्च मांससिरास्नायुस्त्रिजालानि प्रत्येकं चत्वारि चत्वारि । तानि मणिबन्धगुल्फसंश्रितानि परस्परनिबद्धानि परस्परसंश्रिष्टानि परस्परगवाक्षितानि चेति । यैर्गवाक्षितमिदं शरीरम् ॥*॥ षट् कूर्चास्ते हस्तपादग्रीवाभेदेषु । हस्तयोर्द्वौ पादयोर्द्वौ ग्रीवाभेदयोरेकैकः । मङ्क्षणो मांसरज्ज्वयतस्तः पृष्ठवंशसुभयतः पेश्यौनिबन्धनार्थं द्वे बाह्ये आभ्यन्तरे च द्वे ॥*॥ सप्त सेवन्यः । शिरसि विभक्ताः पञ्च जिह्वासेफसोरेकैका ता: परिहर्त्तव्याः शस्त्रेण ॥*॥ चतुर्दशास्थ्नां संघाताः । तेषां त्रयो गुल्फजानुवङ्क्षणेषु । एतेनेतरसक्थिबाहू च व्याख्यातौ । त्रिकशिरसोरेकैकः ॥*॥ चतुर्दशैव सीमन्ताः । ते चास्थिसंघातवद्वर्णनीया यतस्तैर्युक्ता अस्थिसंघाताः । ये क्षुद्राः संघातास्तु खल्वष्टादशैकेषाम् ॥*॥ त्रीणि शतषष्ठान्यस्थिशतानि वैद्यवादिनो भाषन्ते । शस्त्रतन्त्रे तु त्रीण्येव शतानि । तेषां सविंशमस्थिशतं शाखासु । सप्तदशोत्तरं शतं श्रोणिपार्श्वपृष्ठोदररःसु । ग्रीवां प्रत्युर्द्धं त्रिषष्टिः । एवमस्थां त्रीणि शतानि पूर्य्यन्ते । एकैकस्यान्तु पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश । तल कूर्चगुल्फसंश्रितानि दश । पार्ष्ण्यग्रिमकम् । जङ्घायां द्वे । जानुन्येकम् । एकमूरावितिं । त्रिंशदेवमेकस्मिन् सक्थि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ । श्रोण्यां पञ्च तेषां गुदभगनितम्बेषु चत्वारि । त्रिकसंश्रितमेकम् । पार्श्वे षट्त्रिंशदेवमेकस्मिन् द्वितीयेऽप्येवम् । पृष्ठे त्रिंशत् । अष्टावुरसि । द्वे अक्षकसंज्ञे । ग्रीवायां नवकम् । कण्ठनाड्यां चत्वारि । द्वे हन्वोः । दन्ता द्वात्रिंशत् । नासायां त्रीणि । एकं तालुनि । गण्डकर्णशङ्खेष्वेकैकम् । षट् शिरसि । एतानि पञ्चविधानि भवन्ति । तद्यथा । कपालरुचकतरुणवलयनलकसंज्ञानि । तेषां जानुनितम्बांसगण्डतालुभ्रूशङ्खशिरःसु कपालानि । दशनास्तु रुचकानि ॥ ह्यक्षकर्णग्रीवास्त्रिकोपेषु तरुणानि । पार्ष्णिपादपार्श्वपृष्ठोदरोरःसु वलयानि । शेषाणि नलकसंज्ञानि ॥*॥ भवन्ति चात्र ।

"अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः ।
अस्थिसारैस्तथा देहा ध्रियन्ते देहिनां ध्रुवम् ॥
तस्मादशिरविनष्टेषु त्वक्सारांसेषु शरीरिणाम् ।
अस्थीनि न विनश्यन्ति सारास्थे तानि देहिनाम् ॥
मांसान्यत्र निबद्धानि शिराभिः स्नायुभिस्तथा ।
अस्थीन्यालम्बनं ज्ञात्वा न शीर्य्यन्ते पतन्ति वा ॥"

सन्धयस्तु द्विविधाश्चेष्टावन्तः स्थिराश्च ।

"शाखासु हन्वोः कट्याञ्च चेष्टावन्तस्तु सन्धयः ।
शेषास्तु सन्धयः सर्वे विज्ञेया हि स्थिरा बुधैः ॥"

संख्यातस्तु दशोत्तरे द्वे शते । तेषां शाखास्वष्टषष्टिरेकोनषष्टिः । कोष्ठे । ग्रीवां प्रत्युर्द्धं त्रयस्त्रीतिः । एकैकस्यां पादाङ्गुल्यां त्रयस्त्रयो द्वावङ्गुष्ठे ते चतुर्दश । जानुगुल्फवङ्क्षणेष्वेकैकः । एवं सप्तदशैकस्मिन् सक्थि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ । त्रयः कटीकपालेषु । चतुर्विंशतिः पृष्ठवंशे । तावन्त एव पार्श्वयोः । उरस्यष्टौ । तावन्त एव ग्रीवायाम् । त्रयः कण्ठे । नाड़ीषु हृदयक्लोमनिबद्धास्त्वष्टादश । दन्तपरिमाणादन्तमूलेषु । एकः काकलके नासायाञ्च । द्वौ वर्त्ममण्डलजौ नेत्रात्रयी । गण्डकर्णशङ्खेष्वेकैकः । द्वौ हनुसन्धी । द्वावुपरिष्टाद्भ्रुवोः शङ्खयोश्च । पञ्च शिरःकपालेषु । एको मूर्द्धि ॥*॥ त एते सन्धयोऽष्टविधाः । कोरोदूखलसामुद्गप्रतरतुन्नसेवनीवायसतुण्डमण्डलशङ्खावर्त्ताः । तेषामङ्गुलिमणिबन्धगुल्फजानुकूर्परेषु कोराः सन्धयः । कक्षावङ्क्षदशनेषूदूखलाः । अंसपीठगुदभगनितम्बेषु सामुद्गाः । ग्रीवापृष्ठवंशयोः प्रतराः । शिरःकटीकपालेषु तुन्नसेवनी । हन्वोरुभयतस्तु वायसतुण्डाः । कण्ठहृदयनेत्रक्लोमनाड़ीषु मण्डलाः । श्रोत्रशङ्खाटकेषु शङ्खावर्त्ताः ।

तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः ।

"अस्थ्नान्तु सन्धयो ह्येते केवलाः परिकीर्त्तिताः ।
पेश्यस्नायुशिरानान्तु सन्धिसंज्ञा न विद्यते ॥"

नवस्नायुशतानि । तासां शाखासु षट् शतानि । द्वे शते त्रिंशच्च कोष्ठे । ग्रीवां प्रत्युर्द्धं सप्ततिः । एकैकस्यान्तु पादाङ्गुल्यां षट् त्रिंशतास्त्रिंशत् । तावत्य एव तलकूर्चगुल्फेषु । तावत्य एव जंघायाम् । दश जानुनि । चत्वारिंशदूरौ । दश वङ्क्षणे । शतमध्यर्द्धमेवमेकस्मिन् सक्थि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ । षष्टिः कट्याम् । अशीतिः पृष्ठे । पार्श्वयोः षष्टिः । उरसि त्रिंशत् । षट्त्रिंशत् ग्रीवायाम् । मूर्द्धि चतुस्त्रिंशत् । एवं नवस्नायुशतानि व्याख्यातानि ॥*॥ भवन्ति चात्र ।

"स्नायुशतुर्विधा विद्यात्तास्तु सर्वा निबोध मे ।

प्रतानवत्यो दत्ताश्च पृथ्यश्च शुषिरास्तथा ॥
प्रतानवत्यः शाखासु सर्व्वसन्धिषु चाप्यथ ।
दत्तास्तु कण्डराः सर्व्वा विज्ञेयाः कुण्डलैरिह ॥
आमपक्वाशयान्तेषु वस्तौ च शुषिराः खलु ।
पार्श्वोरसि तथा पृष्ठे पृथुलाश्च शिरस्यपि ॥
नौर्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता ।
भारक्षमा भवेदेषु पृथुत्वा सुसमाहिता ॥
एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः ।
स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः ॥
न ह्यस्थीनि नवा पेश्यो न शिरा न च सन्धयः ।
व्यापादितास्त्वया हन्युर्यथा स्नायुः शरीरिणम् ॥
यः स्नायूः प्रविजानाति वाह्याभ्यन्तरा-
स्तथा ।
स गूढं शल्यमाहर्त्तुं देहाच्छक्नोति देहि-
नाम् ॥" * ॥

पञ्च पेश्योशतानि भवन्ति । तासां चत्वारि शतानि स्नायुषु । कोष्ठे षट्षष्टिः । ग्रीवां प्रत्यूर्द्धमेकसप्ततिरेकैकस्यान्तु पादाङ्गुल्यां तिस्रस्तिस्रस्ताः पञ्चदश । दश प्रपदे । पादोपरि कूर्चसन्निविष्टास्तावत्य एव । दश गुल्फतलयोः । गुल्फजान्वन्तरे विंशतिः । पञ्च जानुनि । विंशतिरूरौ । दश वङ्क्षणे । शतमेवमेकस्मिन् सक्थ्नि भवन्ति । एते नेतरसक्थिबाहू च व्याख्यातौ । तिस्रः पायौ । एका मेढ्रे । सेवन्यां चापरा । द्वे वृषणयोः । स्फिचोः पञ्च पञ्च । द्वे वस्तिशिरसि । पञ्चोदरे । नाभ्यामेका । पृष्ठोर्द्धसंनिविष्टाः पञ्च पञ्च दीर्घाः । षट् पार्श्वयोः । दश वक्षसि । अक्षकांसौ प्रति समन्तात् सप्त । द्वे हृदयामाशययोः । षट् यकृत्प्लीहोण्डुकेषु । ग्रीवायाश्चतस्रः । अष्टौ हन्वोः । एकैका काकलकगलयोः द्वे तालुनि । एका जिह्वायाम् । ओष्ठयोर्द्वे । दन्तोपायां द्वे । द्वे नेत्रयोः । गण्डयोश्चतस्रः । कर्णयोर्द्वे । चतस्रो ललाटे । एका शिरसीत्येवमेतानि पञ्च पेश्योशतानि ॥ * ॥

"सिरास्नायुसिपर्व्वाणि सन्धयश्च शरीरिणाम् ।
पेश्योभिः संहतान्यत्र बलवन्ति भवन्त्यतः ॥"

स्नायवस्तु विंशतिरधिका । दश तासां स्नायोरेकैकस्मिन् । पञ्च पञ्च यौवने तासां परिहाणिः । अपत्यपथे चतस्रस्तासां प्रसृतेऽभ्यन्तरतो द्वे मुष्कावित्ते वाह्ये च प्रसृते द्वे । गर्भच्छिद्रसंवृताश्चिस्रः । शुक्रार्त्तवप्रवेशिन्यश्चिस्र एव । पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति । तासां बदरपेलवबुसाणुपृथुदत्तक्रमेणादीर्घस्थिरमृदुसूक्ष्मकर्कशभावाः सन्धिसिरास्नायुप्रच्छादका यथादेशं स्वभावतः एव भवन्ति ॥* भवति चात्र ।

"पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता लक्षण-
सुच्चयाः ।
स्त्रीणामाहत्य तिष्ठन्ति फलमन्तर्गतं हि ताः ॥"

मर्म्मसिरा धमनीस्रोतसामन्यत्र विभागः ॥

'मर्म्मनाम्नाञ्जतियोनिः स्नावर्त्ता सा प्रकीर्त्तिता
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता ॥
यथा रोहितमत्स्यस्य मुखं भवति रूपतः ।
तत्संस्थानां तथारूपां गर्भशय्यां विदुर्बुधाः ॥
आभुग्नोऽभिमुखः शेते गर्भो गर्भाशये स्त्रियाः ।
स योनिं शिरसा याति स्वभावात् प्रसवं प्रति ॥
स्वकपर्य्यन्तस्य देहस्य योऽयमङ्गविनिश्चयः ।
शल्यज्ञानादृते नैष वर्णयेतेऽङ्गेषु केषुचित् ॥
तस्मान्निःसंशयं ज्ञानं दत्त्वा शल्यस्य वाञ्छता ।
शोधयित्वा मृतं सम्यक् द्रष्टव्योऽङ्गविनिश्चयः ॥
प्रत्यक्षतो हि यद्दृष्टं शास्त्रदृष्टञ्च यत्नवेत् ।
समासतस्तदुभयं भूयो ज्ञानविवर्द्धनम् ॥"

तस्मात् समस्तगात्रमविशोषदृतं अदीर्घव्याधिपीड़ितमवर्षशतिकं निःसृष्टान्त्रपुरीषं पुरुषमवहन्त्यामापगायां निबद्धं यन्त्ररन्ध्रं मुञ्चवल्कलकुशशरादीनामन्यतमेनावेष्टिताङ्गं अप्रकाशे देशे कोथयेत् । सम्यक्प्रकुथितञ्चोद्धृत्य ततो देहं ससरान्नादुशीरवालवेणुवल्कलकुचीनामन्यतमेन शनैः शनैरवधर्षयंस्त्वगादीन् सर्व्वानेव बाह्याभ्यन्तराङ्गप्रत्यङ्गविशेषान् यथोक्तान् लक्षयेच्चक्षुषा । श्लोकौ चात्र भवतः ।

"न शक्यञ्चक्षुषा द्रष्टुं देहे सूक्ष्मतमो विभुः ।
दृश्यते ज्ञानचक्षुर्भिस्तपश्चक्षुर्भिरेव च ॥
शरीरे चैव शास्त्रे च दृष्टार्थः स्यादिशारदः ।
दृष्टश्रुताभ्यां सन्देहमवापोह्याचरेत् क्रियाः ॥"

षष्ठोऽध्यायः ।

अथातः प्रत्येकमर्म्मनिर्देशं शारीरं व्याख्यास्यामः । सप्तोत्तरं मर्म्मशतम् । तानि मर्म्माणि पञ्चात्मकानि । तद्यथा । मांसमर्म्माणि सिरामर्म्माणि स्नायुमर्म्माणि । अस्थिमर्म्माणि । सन्धिमर्म्माणि चेति । न खलु मांससिरास्नायुस्थिसन्धिव्यतिरेकेणान्यानि मर्म्माणि भवन्ति यत्रान्नोपलभ्यन्ते । तत्रैकादश मांसमर्म्माणि । एकचत्वारिंशत् सिरामर्म्माणि । सप्तविंशतिः स्नायुमर्म्माणि । अष्टावस्थिमर्म्माणि । विंशतिः सन्धिमर्म्माणि । तदेतत् सप्तोत्तरं मर्म्मशतम् ॥*॥ तेषामेकादशैकस्मिन् सक्थ्नि भवन्ति । एतेनेतरसक्थिबाहू च व्याख्यातौ । उदरोरसोर्द्वादश । चतुर्दश पृष्ठे ग्रीवां प्रत्यूर्द्धं सप्तविंशत् । तत्र सक्थिमर्म्माणि विप्रतलहृदयकूर्चकूर्चशिरोगुल्फेन्द्रवस्तिजान्वाख्यर्व्वोलोहिताक्षाणि विटपक्षेति । एतेनेतरसक्थि व्याख्यातम् ॥*॥ उदरोरसोस्तु । गुदवस्तिनाभिहृदयस्तनमूलस्तनरोहितापलापाग्र्यपस्तम्भौ चेति । पृष्ठमर्म्माणि तु कटीकतरुणकुकुन्दर-नितम्बपार्श्वसन्धिहृत्संमकलकान्यंसौ चेति । बाहुमर्म्माणि तु विप्रतलहृदयकूर्चकूर्चशिरोमणिबन्धेन्द्रवस्तिकूर्परागुर्व्वीलोहिताक्षाणि कक्षधरे इति । एतेनेतरौ बाहुर्व्याख्यातः । अक्षकूटं मर्म्माणि चतस्रो धमन्योऽष्टौ माडलाः । द्वे कक्षाटिके । द्वे विधुरे । द्वौ फणौ । द्वावपाङ्गौ । द्वावावर्त्तौ । द्वावुत्क्षेपौ । द्वौ गङ्गाधेका स्वपनौ । पञ्च सीमन्ताः । चत्वारि शृङ्गाटकान्यधिकौऽधिपतिरिति । तत्र तलहृदयेन्द्रवस्तिगुदस्तनरोहितानि मांसमर्म्माणि । नीलधमनी-माडलाशृङ्गाटकापाङ्गस्वपनीफक्स्तनमूलापलापापस्तम्भहृदयनाभिपार्श्वसन्धिहृत्तोलोहिताक्षोर्व्वाः सिरामर्म्माणि । अधिविटपकक्षधरकूर्चकूर्चशिरोवस्तिक्षिप्रांसविधुरोत्क्षेपाः स्नायुमर्म्माणि । कटीकतरुणनितम्बांसफलकशङ्खास्थिमर्म्माणि । जानुकूपरसीमन्ताधिपतिगुल्फमणिबन्धकुकुन्दरावर्त्तशृङ्गाटिकाक्षेति सन्धिमर्म्माणि । तान्येतानि पञ्चविकल्पानि मर्म्माणि भवन्ति । तद्यथा। सद्यःप्राणहराणि । कालान्तरप्राणहराणि । विशल्यघ्नानि । वैकल्यकराणि । रुजाकराणीति । तत्र सद्यःप्राणहरास्वे कोनविंशतिः । कालान्तरप्राणहराणि त्रयस्त्रिंशत् । त्रीणि विशल्यघ्नानि । चतुश्चत्वारिंशद्वैकल्यकराणि । अष्टौ रुजाकराणीति ॥ * ॥ भवन्ति चात्र ।

"शृङ्गाटकान्यधिपतिः शङ्खौ कण्ठशिरोगुदम् ।
हृदयं वस्तिनाभी च घ्नन्ति सद्योहतानि तु ॥
वक्षोमर्म्माणि सीमन्ततलक्षिप्रेन्द्रवस्तयः ।
कटीकतरुणे सन्धी पार्श्वजौ बृहती च या ॥
नितम्बाविति चैतानि कालान्तरहराणि तु ।
उत्क्षेपौ स्वपनौ चैव विशल्यघ्नानि निर्द्दिशेत् ॥
लोहिताक्षाणि जानूर्वी कूर्चौ विटपकूर्परौ ।
कुकुन्दरे कक्षधरे विधुरे सक्थिकाटिके ॥
अंसांसफलकापाङ्गौ नीले मन्ये फणौ तथा ।
वैकल्यकरणान्याहुरावर्त्तौ द्वौ तथैव च ॥
गुल्फौ द्वौ मणिबन्धौ द्वौ द्वे द्वे कूर्चशिरांसि च
रुजाकराणि जानीयादष्टावेतानि बुद्धिमान् ।
क्षिप्राणि विद्यमात्राणि घ्नन्ति कालान्तरेण च॥"

मर्म्माणि नाम मांससिरास्नायुस्थिसन्धिसन्निपातास्थेषु स्वभावत एव विशेषेण प्राणाश्रितानि तस्मान्मर्म्मस्वभिहतास्तांस्तान् भावानापद्यन्ते । तत्र सद्यःप्राणहराण्याग्नेयान्यग्निगुणेष्वाग्नेयगुणेषु चोपयन्ति । कालान्तरप्राणहराणि सौम्याग्नेयान्यग्निगुणेष्वाग्नेयगुणेषु क्रमेण च सोमगुणेषु कालान्तरेण चोपयन्ति । विशल्यघ्नानि वायव्यानि शल्यसङ्गनिरुद्धो यावदन्तर्व्यायुस्तिष्ठति तावज्जीवत्यभृतमात्रे तु शल्ये मर्म्मस्थानाश्रितो वायुर्निष्क्रामति तस्मात् सशल्यो जीवत्यभृतशल्यो म्रियते । वैकल्यकराणि सौम्यानि सोमो हि स्थिरत्वाच्छैत्याच्च प्राणावलम्बनं करोति । रुजाकराण्यग्निवायुगुणभूयिष्ठानि विशेषतश्च तौ रुजाकरौ । पाञ्चभौतिकेषु रुजाकारणेषु केचिदाहुर्मांसादीनां पञ्चानामपि समस्तानां विशेषाणाञ्च समवायात् सद्यःप्राणहराणि । एकद्वीनामसङ्घातानां वा कालान्तरप्राणहराणि । द्विद्वीनानां विशल्यप्राणहराणि । त्रिद्वीनानां वैकल्यकराणि । एकस्मिन्नेव रुजाकराणीति । यतश्चैवमतोऽस्मिन्मर्म्मसप्तभिहतेषु शोणितागमनं भवति ॥ * ॥

"चतुर्विधा यास्तु शिरा शरीरे
प्रायेण ता मर्म्मसु सन्निविष्टाः।
स्नायुस्थिमांसानि तथैव सन्धीन्
सन्तर्प्य देहं प्रतिपालयन्ति॥
ततः क्षते मर्म्मणि ताः प्रदुष्टाः
समन्ततो वायुरभिस्तृणोति।
विवर्द्धमानस्तु स मातरिश्वा
रुजः सुतीव्राः प्रतनोति कार्य्ये॥
रुजाभिभूतस्तु पुनः शरीरं
प्रलीयते नश्यति चास्य संज्ञा।
अतो हि शल्यं विनिहन्तुमिच्छन्
मर्म्माणि यत्नेन परीक्ष्य कर्षेत्॥"

एतेन शेषं व्याख्यातम्। तत्र सद्यःप्राणहरमन्ते विद्धं कालान्तरेण मारयति। कालान्तरप्राणहरमन्ते विद्धं वैकल्यमापादयति। विशल्यघ्नमन्ते विद्धं कालान्तरेण क्लेशयति रुजाञ्च करोति। रुजाकरमतीव्रवेदनं भवति। तत्र सद्यःप्राणहराणि सप्तरात्राभ्यन्तरान्मारयन्ति। कालान्तरप्राणहराणि पक्षान्मासाद्वा। तेष्वपि तु क्षिप्राणि कदाचिदाशु मारयन्ति। विशल्यघ्नानि वैकल्यकराणि च कदाचिदत्यभिहतानि मारयन्ति॥ * ॥ अत ऊर्द्धं प्रत्येकशो मर्म्मस्थानान्यनुव्याख्यास्यामः। तत्र पादाङ्गुष्ठाङ्गुल्योर्म्मध्ये क्षिप्रं नाम मर्म्म तत्र विद्धस्याक्षेपकेण मरणम्। मध्यमाङ्गुलीमनुपूर्व्वेण मध्ये पादतलस्य तलहृदयं नाम तत्रापि रुजाभिर्मरणम्। क्षिप्रस्योपरिष्टादुभयतः कूर्च्चौ नाम यत्र पादस्य भ्रमणवेपने भवतः। गुल्फसन्धेरध उभयतः कूर्च्चशिरो नाम तत्र रुजाशोफौ। पदङ्घ्र्योः सन्धाने गुल्फौ नाम तत्र रुजस्तब्धपादता खञ्जता वा। पार्ष्णिं प्रति जङ्घामध्ये इन्द्रवस्तिर्नाम तत्र शोणितक्षये मरणम्। जङ्घोर्व्वीः सन्धाने जानु नाम तत्र खञ्जता जानुन ऊर्द्धमुभयतस्त्वङ्गुल्माणिर्नाम तत्र शोफाभिवृद्धिः स्तब्धसक्थिता च। ऊरुमध्ये ऊर्व्वी नाम तत्र शोणितक्षयात् सक्थिशोषः। ऊर्व्व्या ऊर्द्धमधोवङ्क्षणसन्धरूरुमूले लोहितार्द्धं नाम तत्र लोहितक्षयेण पक्षाघातः। वङ्क्षणवृषणयोरन्तरे विटपं नाम तत्र वाङ्क्षणमल्पशुक्रता वा भवति। एवमेतान्येकादशसक्थिमर्म्माणि व्याख्यातानि। एतेनेतरसक्थिबाहू च व्याख्यातौ। विशेषतस्तु यानि सक्थि गुल्फजानुविटपानि तानि बाह्वोः मणिबन्धकूर्परकक्षधराणि। यथा वङ्क्षणवृषणयोरन्तरे विटपमेवं वक्षःकक्ष्योर्म्मध्ये कक्षधरं तस्मिन् विद्धेत एवोपद्रवाः। विशेषतस्तु मणिबन्धे कुण्ठता। कूर्परास्थ्ये कुब्जिः। कक्षधरे कक्षाघातः। एवमेतानि चतुश्चत्वारिंशच्छाखासु मर्म्माणि व्याख्यातानि॥ * ॥ अत ऊर्द्धमुदरोरसोर्म्मर्म्मस्थानान्यनुव्याख्यास्यामः। तत्र वातवर्च्चोनिरसनं स्थूलान्त्रप्रतिबद्धं गुदं नाम मर्म्म तत्र सद्योमरणम्। अल्पमांसशोणितोऽभ्यन्तरतः कक्ष्यां मूत्राशयो वस्तिर्नाम तत्रापि सद्योमरणमश्मरीव्रणाद्वते। तत्राप्युभयतो भिन्ने न जीवत्येकतो भिन्ने मूत्रस्रावी व्रणी भवति। स तु यत्नेनोपक्रान्तो रोहति। पक्वामाशययोर्म्मध्ये सिराप्रभवा नाभिर्नाम तत्रापि सद्य एव मरणम्। स्तनयोर्म्मध्यमधिष्ठायोरस्यामाशयहारं सत्त्वरजस्तमसामधिष्ठानं हृदयं नाम तत्र सद्य एव मरणम्। स्तनयोरधस्तात् हृदङ्गुलमुभयतस्तनमूले नाम मर्म्मणी तत्र कफपूर्णकोष्ठतया कासश्वासाभ्यां म्रियते। स्तनचूचुकयोरूर्द्ध्वं द्व्यङ्गुलमुभयतः स्तनरोहिती नाम तत्र लोहितपूर्णकोष्ठतया कासश्वासाभ्याञ्च म्रियते। अंसकूटयोरधस्तात् पार्श्वोपरिभागयोरपलापी नाम तत्र रक्तेन पूयभावं गतेन मरणम्। उभयोस्तोरसो नाड्यौ वातवहे अपस्तम्भी नाम तत्र वातपूर्णकोष्ठतया कासश्वासाभ्याञ्च मरणम्। एवमेतान्युदरोरसोर्द्वादश मर्म्माणि व्याख्यातानि॥ * ॥ अत ऊर्द्धं पृष्ठमर्म्माण्यनुव्याख्यास्यामः। तत्र पृष्ठवंशमुभयतः प्रतिश्रोणी काण्डमस्थीनि कटीकतरुणे नाम मर्म्मणी तत्र श्रोणितक्षयात् पार्श्वोर्विवर्णा हीनरूपत्व म्रियते। पार्श्वजघनवद्भिर्भागे पृष्ठवंशमुभयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी तत्रस्थार्त्तानमधःकाये चेष्टोपघातत्व। श्रोणीकाण्डयोरुपर्य्याशयाच्छादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौ नाम तत्राधःकायग्रोपो दौर्ब्बल्याच्च मरणम्। अधःपार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययोस्थ्यर्य्यगूर्द्धञ्च जघनात् पार्श्वसन्धी नाम तत्र लोहितपूर्णकोष्ठतया म्रियते। स्तनमूलादुभयतः पृष्ठवंशस्य बृहती नाम तत्र श्रोणितातिप्रवृत्तिनिमित्तैरुपद्रवैर्म्रियते। पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसम्बद्धे अंसफलके नाम तत्र बाह्वोः स्रापः शोथो वा। बाहुमूर्द्धग्रीवामध्येऽंसपीठस्कन्धनिबन्धनावंसौ नाम तत्र स्तब्धबाहुता। एवमेतानि चतुर्द्दश पृष्ठमर्म्माणि व्याख्यातानि॥ * ॥ अत ऊर्द्धं जत्रुगतानि व्याख्यास्यामः। तत्र कण्ठनाडीमुभयतश्चतसो धमन्यो हे नीले हे च मन्ये व्यत्यासेन तत्र मूकता स्वरवैक्लवतमरसग्राहिता च। ग्रीवायामुभयतश्चतस्रः सिरामाष्टकास्तत्र सद्योमरणम्। शिरीषीवयोः सन्धाने कृकाटिके नाम तत्र चलमूर्द्धता। कर्षेपृष्ठतोऽधःसंश्रिते विद्युरे नाम तत्र व्याधिर्य्यम्। घ्राणमार्गमुभयतः स्रोतोमार्गप्रतिबद्धे अभ्यन्तरतः फणे नाम तत्र गन्धाज्ञानम्। भ्रूपुच्छान्तयोरधोऽक्ष्णोर्वाश्रितोऽपाङ्गौ नाम तत्राक्ष्यं दृष्ट्युपघातो वा। भ्रुवोरुपरिनिम्नयोरावर्त्तौ नाम तत्राक्ष्यं दृष्ट्युपघातश्च। भ्रुवोःपुच्छान्तयोरुपरिकर्णललाटयोर्म्मध्ये शङ्खौ नाम तत्र सद्योमरणम्। शङ्खयोरुपरि केशान्त उत्क्षेपौ नाम तत्र सद्यस्को जीवति पाकात् पतितशल्यो वानोद्धृतशल्यः। भ्रुवोर्मध्ये स्थपनी नाम तत्रोत्क्षेपवत्। पञ्च सन्धयः शिरसि विभक्ताः सीमन्ता नाम तत्रोन्मादभयचित्तनाशैर्मरणम्। घ्राणश्रोत्राक्षिजिह्वास्यतर्पणीनां सिराणां मध्ये सिरासन्निपातः शृङ्गाटकानि तानि चत्वारि मर्म्माणि तत्रापि सद्योमरणम्। मस्तकाभ्यन्तरोपरिष्टात् सिरासन्धिसन्निपातो रोमावर्त्तः अधिपतिस्तत्रापि सद्योमरणम्। एवमेतानि सप्तत्रिंशदूर्द्धं जत्रुगतानि मर्म्माणि व्याख्यातानि॥ * ॥ भवन्ति चात्र।

"ऊर्व्वः शिरांसि विटपे च सकक्षपार्श्वे
एकैकमङ्गुलमिता स्तनपूर्वमूलम्।
विद्याङ्गुलद्वयमितं मणिबन्धगुल्फं
त्रीण्येवं जानु सपरं सह कूर्पराभ्याम्॥
हृदस्थिकूर्च्चं गुदनाभि वदन्ति सूर्द्ध्नि
चत्वारि पञ्च च गले दश यानि च द्वे।
तानि स्वपाणितलकुञ्चितसंमितानि
शेषाण्यवेहि परिविस्तरतोऽङ्गुलार्द्धम्॥
एतत् प्रमाणमभिवीक्ष्य वदन्ति तज्ज्ञाः
शस्त्रेण कर्म्म करणं परिहृत्य मर्म्म।
पार्श्वाभिघातितमपीह निहन्ति मर्म्म
तस्माद्धि मर्म्मसदनं परिवर्ज्जनीयम्॥
क्षिप्रेषु पाणिचरणेषु शिरा नराणां
सङ्कोचमीयुरसृगल्पमतो निरेति।
प्राप्यामितव्यसनमुग्रमतो मनुष्याः
संक्षिप्तशाखतरुवन्निधनं न यान्ति॥
क्षिप्रेषु तत्र सतलेषु हतेषु रक्तं
गच्छत्यतीव पवनश्च रुजं करोति।
एवं विनाशमुपयान्ति हि तत्र विद्धा
दृष्ट्वा दृवायुधविघातनिकृत्तमूलाः॥
तस्मात्तयोरभिहतस्य तु पाणिपादं
क्षेत्तव्यमाशु मणिबन्धनगुल्फदेशे।
मर्म्माणि शल्यविषयाद्दमुदाहरन्ति
यस्माच्च मर्म्मसु हता न भवन्ति सद्यः॥
जीवन्ति तत्र यदि वैद्यगुणेन कैचित्
ते प्राप्नुवन्ति विकलत्वमसंशयं हि।
सञ्चिन्त्रजर्ज्जरितकोष्ठशिरःकपाला
जीवन्ति शल्यविहतैश्च शरीरदेशैः।
क्षिप्रैश्च शक्थिभुजपादकरैरशेषै-
र्येषां न मर्म्मपतिता विविधाः प्रहाराः॥
सोममारुततेजांसि रजःसत्त्वतमांसि च।
मर्म्मसु प्रायशः पुंसां भूतात्मा चावतिष्ठते॥
मर्म्मस्वभिहतास्वाशु जीवन्ति शरीरिणः।
इन्द्रियार्थेष्वसंप्राप्तिर्मतीवुद्धिर्विपर्य्ययः॥
रुजश्च विविधांस्तीव्रा भवन्त्याशुहरे हते।
हते कालान्तरघ्ने तु ध्रुवो धातुक्षयो नृणाम्॥
ततो धातुक्षयाज्जन्तुर्वेदनाभिश्च नश्यति।
हते वैकल्यजनने केवलं वैद्यनैपुणात्॥
शरीरं क्रियया युक्तं विकलत्वमवाप्नुयात्।
विशल्यघ्नेषु विद्धेषु यं पूर्व्वोक्तं यच्च कारणम्॥
रुजाकराणि मर्म्माणि क्षतानि विविधा रुजः।
कुर्वन्त्यन्ते च वैकल्यं कुवैद्यवशगो यदि॥
छेदभेदाभिघातेभ्यो दहनाहारणादपि।
उपघातं विजानीयान्मर्म्मणान्तुल्यलक्षणम्॥

मर्म्माभिघातस्य न कश्चिदस्ति
योऽल्पात्ययो वापि निरत्ययो वा।
प्रायेण मर्म्मस्वभिताड़ितास्तु
वैकल्यमृच्छन्त्यथवा म्रियन्ते ॥
मर्म्माण्यधिष्ठाय हि ये विकारा
मूर्च्छन्ति काये विविधा नराणाम्।
प्रायेण ते क्लेशतमा भवन्ति
नरस्य यत्नैरपि साध्यमानाः ॥* ॥"

सप्तमोऽध्यायः।

अथातः सिरावर्णनविभक्तिनाम शारीरं व्याख्यास्यामः। सप्त सिराशतानि भवन्ति। याभिरिदं शरीरमारामइव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यते अनुगृह्यते चाकुञ्चनप्रसारणादिभिर्व्विशेषैः। द्रुमपत्रसेवनीनामिव च तासां प्रतानास्तासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्द्ध्वमधस्तिर्य्यक् च ॥*॥ भवतश्चात्र।

"यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम्
नाभ्यां सर्व्वा निबद्धास्ता प्रतन्वन्ति समन्ततः ॥
नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्युपाश्रिता।
सिराभिराहृता नाभिश्चक्रनाभिरिवारकैः ॥"

तासां मूलसिरायत्वारिंशत्। तासां वातवाहिन्यो दश। पित्तवाहिन्यो दश। कफवाहिन्यो दश। दश रक्तवाहिन्यः। तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चसप्ततिशतं भवति। तावत्य एव पित्तवाहिन्यः। पित्तस्थाने कफवाहिन्यश्च। कफस्थाने रक्तवाहिन्यश्च। यकृत्प्लीह्नोरेवमेतानि सप्तसिराशतानि तत्र वातवाहिन्यः सिरा एकस्मिन् सक्थ्नि पञ्चविंशतिः। एतेनेतरसक्थिबाहू च व्याख्यातौ। विशेषतस्तु कोष्ठे चतुस्त्रिंशत्तासां गुदमेढ्राश्रिताः। श्रोण्यामष्टौ। द्वे द्वे पार्श्वयोः। षट् पृष्ठे। तावत्य एव चोदरे। दश वक्षसि। एकचत्वारिंशज्जत्रुण ऊर्द्ध्वम्। तासां चतुर्दश ग्रीवायाम्। कर्णयोश्चतस्रः। नव जिह्वायाम्। षट् नासिकायाम्। अष्टौ नेत्रयोः। एवमेतत् पञ्चसप्तत्यधिकशतं वातवहानां सिराणां व्याख्यातम्। एष एव विभागः श्लेष्मणामपि। विशेषतस्तु पित्तवाहिन्यो नेत्रयोर्दश। कर्णयोर्द्वे। एवं रक्तवहा कफवहाश्च। एवमेतानि सप्तशिराशतानि सविभागानि व्याख्यातानि॥*॥

भवन्ति चात्र।

"क्रियाणामप्रतीघातममोहं बुद्धिकर्म्मणाम्।
करोत्यन्यान् गुणांश्चापि स्राः सिराः पवनश्चरन्॥
यदा तु कुपितो वायुः स्राः सिराः प्रतिपद्यते।
तदास्य विविधा रोगा जायन्ते वातसम्भवाः ॥
भ्राजिष्णुतामग्निरुचिमग्निदीप्तिमरोगताम्।
संसर्पत् स्राः सिराः पित्तं कुर्य्याच्चान्यान् गुणानपि ॥
यदा प्रकुपितं पित्तं सेवते स्रवहाः सिराः।
तदास्य विविधा रोगा जायन्ते पित्तसम्भवाः ॥
स्नेहमङ्गेषु सन्धीनां स्थैर्य्यं बन्धमुदीर्णताम्।
करोत्यन्यान् गुणांश्चापि बलासः स्राः शिराश्चरन्॥
यदा तु कुपितः श्लेष्मा स्राः सिराः प्रतिपद्यते।
तदास्य विविधा रोगा जायन्ते श्लेष्मसम्भवाः॥
धातूनां पूरणं वर्णं सौम्यज्ञानमसंशयम्।
स्राः सिराः सञ्चरद्रक्तं कुर्य्याच्चान्यान् गुणानपि
यदा तु कुपितं रक्तं सेवते स्रवहाः सिराः।
तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः ॥
न हि वातं सिराः काश्चिन्न पित्तं केवलं तथा।
श्लेष्माणं वा वहन्त्येता अतः सर्व्ववहाः स्मृताः॥
प्रदुष्टानां हि दोषाणामुच्छ्रितानां प्रधावताम्।
ध्रुवमुन्मार्गगमनमतः सर्व्ववहाः स्मृताः ॥
तत्रारुणा वातवहाः पूर्य्यन्ते वायुना सिराः।
पित्ता दुष्टाश्च नीलाश्च शीता गौर्य्यः स्थिराः कफात्।
अस्रग्वहास्तु रोहिण्यः सिरा नात्युष्णशीतलाः॥
अत ऊर्द्धं प्रवक्ष्यामि न विध्येद्याः सिरा भिषक्।
वैकल्यं मरणञ्चापि व्यधात्तासां ध्रुवं भवेत् ॥
सिराशतानि चत्वारि विद्याच्छाखासु बुद्धिमान्।
षट्त्रिंशच्च शतं कोष्ठे चतुःषष्टिश्च मूर्द्धनि ॥
शाखासु षोड़श सिराः कोष्ठे द्वाविंशतिर्यथा तु।
पञ्चाशज्जानुतश्चोर्द्धमवेध्याः परिकीर्त्तिताः ॥"

तत्र सिराशतमेकैकस्मिन् सक्थ्नि भवति तासां जालधरा त्वेका तिस्रश्चाभ्यन्तराः। तत्रोर्वीसंस्थे द्वे लोहितात्तसंज्ञा चैकैतास्ववेध्याः। एतेनेतरसक्थिबाहू च व्याख्यातावेवमशस्रक्रियाः षोड़श शाखासु। द्वात्रिंशत् श्रोण्यां तासामष्टावशस्रक्रियाः। द्वे द्वे विटपयोः कटीकरुणयोश्च। अष्टावष्टावेकैकस्मिन् पार्श्वे तासामेकैकामूर्द्ध्वगां परिहरेत्। पार्श्वसन्धिगते च द्वे। चतस्रो विंशतिश्च पृष्ठवंशमुभयतस्तासामूर्द्ध्वगामिन्यौ द्वे द्वे परिहरेद्बृहतीं सिरे। तावत्य एवोदरे तासां मेढ्रोपरि रोमराजीमुभयतो द्वे द्वे परिहरेत्। चत्वारिंशद्वक्षसि तासां चतुर्दशाशस्रक्रियाः। हृदये द्वे द्वे। द्वे स्तनमूले। स्तनरोहितापलापस्त्वेषूभयतो ऽष्टौ। एवं द्वात्रिंशदशस्रक्रियाः पृष्ठोदरोरःसु भवन्ति। चतुःषष्टिशिराशतं जत्रुण ऊर्द्धं भवति तत्र षट्पञ्चाशच्छिरोधरायां तासामष्टौ चतस्रश्च मन्यासंज्ञाः परिहरेत्। द्वे कृकाटिकयोः। द्वे विधुरयोः। एवं ग्रीवायां षोड़शाव्यध्याः। हन्वोरुभयतोऽष्टावष्टौ तासान्तु सन्धिमन्यौ द्वे द्वे परिहरेत्। षट्त्रिंशज्जिह्वायां तासामधः षोड़शाशस्रक्रियाः रसवहे द्वे वाग्वहे च द्वे। द्विर्द्वादश नासायां तासामौपनासिकव्यतस्तः परिहरेत्। तासामेव च तालुन्येकां मृदावहेद्वे। अष्टाविंशदुभयोर्नेत्रयोस्तासामेकैकामपाङ्ग्योः परिहरेत्। कर्णयोर्दश तासां शब्दवाहिनीनामेकैकां परिहरेत्। नासानेत्रगतास्तु ललाटे षष्टिस्तासां केशान्तानुगतावर्त्तयोरेकैका स्थपन्यावेका परिहर्त्तव्या। शङ्खयोर्दश तासां शङ्खसन्धिगतामेकैकां परिहरेत्। द्वादश मूर्द्ध्नि तासामुत्क्षेपयोर्द्वे परिहरेत् सीमन्तेष्वेकैकामधिपतावितिं। एवमशस्त्रक्रियाः पञ्चाशज्जत्रुण ऊर्द्धमिति। भवति चात्र।

"व्याप्नुवन्त्यभितो देहं नाभितः प्रसृताः सिराः।
प्रताना पद्मिनीकन्दादिसादीनां यथा जलम्॥"

अष्टमोऽध्यायः।

अथातः सिराव्यधविधिशारीरं व्याख्यास्यामः। बालस्थविररूक्षचकितक्षीणभीरुपरिश्रान्तस्त्रीमद्याध्वकर्षितमत्तवान्तविरिक्तास्थापितानुवासितजागरितक्षीवक्षुधगर्भिणीनां कासश्वासशोषप्रच्छर्द्यज्वरार्त्तोपक्रमपञ्चाघातोपवासपिपासामूर्च्छाप्रपीड़ितानाञ्च सिरां न विध्येत्। यांश्चाव्यध्या व्यध्याश्चादृष्टा दृष्टाश्चायन्त्रिता यन्त्रिताश्चानुक्तिता इति। शोणितावसेकसाध्याश्च विकाराः प्रागभिहितास्तेषु चापक्रमेष्वन्येषु चानुक्तेषु यथाभ्यासं यथान्यायञ्च सिरां विध्येत्। प्रतिषिद्धानामपि च विषोपसर्गे आत्ययिकेषु सिराव्यधनमप्रतिषिद्धम्। तत्र स्निग्धस्विन्नमातुरं यथादोषप्रत्यनीकद्रवप्रायमन्नं भुक्तवन्तं यवागूं पीतवन्तं वा यथाकालमुपस्थाप्यासीनं स्थितं वा प्राणानवाधमानो वस्त्रपट्टचर्म्मान्तर्वल्कलतानामन्यतमेन यन्त्रयित्वा नातिगाढ़ं नातिशिथिलं शरीरप्रदेशमासाद्य यथोक्तं शस्त्रं गृहीत्वा सिरां विध्येत्॥*॥

"नैवातिशीते नात्युष्णे न प्रवाते न चाब्भिते।
सिराणां व्यधनं कार्य्यमरोगे वा कदाचन॥"

तत्र व्यध्यसिरं पुरुषं प्रत्यादित्यमुखमरत्निमात्रोच्छ्रिते उपवेश्यासने सक्थ्नोराकुञ्चितयोर्निवेश्य कुर्परसन्धिद्वयस्योपरि हस्तावन्तर्गूढाङ्गुष्ठकृतसमुष्टीमन्यतो स्थापयित्वा यन्त्रणशाटकं ग्रीवामुच्योरुपरि परिक्षिप्यान्येन पुरुषेण पश्चात् स्थितेन वामहस्तेनोत्तानेन शाटकान्तर्द्वयं ग्राहयित्वा ततो वैद्यो ब्रूयाद्दक्षिणहस्तेन सिरोत्थापनार्थं नात्यायतग्रथितं यन्त्रमावेष्टयत्यस्कक्षावणार्थं यन्त्रं पृष्ठमध्ये च पीड़येदिति कर्म्म पुरुषस्य वायुपूर्णमुखं स्थापयेदेष उत्तमाङ्गगतानामन्तर्मुखवर्ज्यानां सिराणां व्यधेन यन्त्रणविधिः। तत्र पादव्यध्यसिरस्य पादं समे स्थाने सुस्थिरं स्थापयित्वान्यं पादमीषदङ्कुचितमुच्चैः कृत्वा व्यध्यपादं जानुसन्धेरधः शाटकेनावेष्य हस्ताभ्यां प्रपीड्य गुल्फं व्यध्यप्रदेशस्योपरि चतुरङ्गुलं श्रोतादीनामन्यतमेन बद्धां पादसिरां विध्येत्। अथोपरिष्टाद्धस्तौ गूढाङ्गुष्ठकृतसमुष्टी सम्यगासने स्थापयित्वा सुखोपविष्टस्य पूर्ववद्यन्त्रं बद्धा हस्तसिरां विध्येत्। गृध्रसीविश्वाचोः सङ्कुचितजानुकुर्परः स्यात्। श्रोणीपृष्ठस्कन्धेषून्नामितपृष्ठस्यावाक्शिरस्कस्य उपविष्टस्य विस्फुर्जितपृष्ठस्य विध्येत्। उदरोरसोः प्रसारितोरस्कस्योन्नमितशिरस्कस्य

विस्फूर्जितदेहस्य बाहुभ्यामवलम्ब्यमानदेहस्य पार्श्वयोः। अवनामितमेढ्रस्य मेढ्रे। उन्नामितविदष्टजिह्वाग्रस्याधोजिह्वायाम्। अतिव्यक्ताननस्य तालुनि दन्तमूलेषु च। एवं यन्त्रोपायानन्यांश्च शिरोत्थापनहेनून् बुद्धावेक्ष्य शरीरवशेन व्याधिवशेन च विदध्यात्। मांसलेष्ववकाशेषु यवमात्रं शस्त्रं निदध्यादतोऽन्येष्वर्धयवमात्रं व्रीहिमात्रं वा व्रीहिमुखेन। अस्थनामुपरि कुठारिकया विध्येदर्धयवमात्रम् भवन्ति चात्र।

"अभ्रे वर्षासु विध्येत ग्रीष्मकाले तु शीतले। हेमन्तकाले मध्याह्ने शस्त्रकालास्त्रयः स्मृताः॥ सम्यक् शस्त्रनिपातेन धारया या सवेदसृक्। सुशस्तं तद्धा तिष्ठेच्च सुविद्यानां विनिर्दिशेत्॥ यथा कुसुम्भपुष्पेभ्यः पूर्वं स्रवति पीतिका। तथा सिरासु विद्धासु दुष्टमग्रे प्रवर्त्तते॥ मूर्च्छितस्यातिभीतस्य श्रान्तस्य क्षुपितस्य च। न वहन्ति सिरा विद्धास्तथानुत्तिष्ठतश्चिताः। क्षीणस्य बहुदोषस्य मूर्च्छया विद्रुतस्य च। भूयोऽपराह्णे विस्राव्या सापरेद्युस्तदहेऽपि वा॥ रक्तं सशेषदोषन्तु कुर्यादपि विचक्षणः। न चातिप्रसृतं कुर्याच्छेषं संशमनैर्जयेत्॥ बलिनो बहुदोषस्य वयःस्थस्य शरीरिणः। परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे॥"

तत्र पाददाहपादहर्षावबाहुकटिप्यविसर्पवातशोणितवातकण्टकविचर्चिकापाददारीप्रभृतिषु क्षिप्रमर्म्मण उपरिष्टात् द्वाङ्गुले व्रीहिमुखेन सिरां विध्येत्। श्लीपदे तच्चिकित्सिते यथा वक्ष्यते। क्रोष्टुकशिरःखञ्जपङ्गुलवातवेदनासु जङ्घायां गुल्फस्योपरि चतुरङ्गुले। अपच्यामिन्द्रवस्तेरधस्ताद्द्वाङ्गुले। जानुसन्धेरुपर्य्यधो वा चतुरङ्गुले गृध्रस्याम्। ऊरुमूलसंश्रितान्तु गलगण्डे। एतेनेतरसक्थिबाहू च व्याख्यातौ॥ विशेषतस्तु वामबाहौ कुर्परसन्धेरभ्यन्तरतो बाहुमध्ये श्रोणि कनिष्ठिकानामिकयोर्मध्ये वा एवं दक्षिणबाहौ यकृद्दाल्ये कफोदरे चैतामिव च कासश्वासयोरप्यादिशन्ति। गृध्रस्यामिव विध्याम्। श्रोणिप्रति समन्तात् द्वाङ्गुले प्रवाहिकायां शूलिन्यां परिकर्त्तिकोपदंशशूकदोषशुक्रव्यापत्सु मेढ्रमध्ये। हृषणयोः पार्श्वे मूत्रवहाम्। नाभेरधश्चतुरङ्गुले सेवन्या वामपार्श्वं दकोदरे वामपार्श्वे कक्षास्तनयोरन्तरेऽन्तर्विद्रधौ पार्श्वशूले च। बाहुशोषबाहुकयोरप्येके वदन्त्यंसयोरन्तरे। त्रिकसन्धिमध्यगतां तृतीयके अधःस्कन्धसन्धिगतामन्यतरपार्श्वसंश्रितामाशुतृर्यके। हनुसन्धिमध्यगतामपस्मारे। शङ्खकेशान्तसन्धिगतासुरोऽपाङ्गललाटेषु चोन्मादेऽपस्मारे च। जिह्वारोगेष्वधोजिह्वायां दन्तव्याधिषु च तालुनि तालव्येषु। कर्णयोरुपरि समन्तात् कर्णशूले तद्रोगेषु च। गन्धाग्रहणे नासारोगेषु च नासाग्रे तिमिरार्त्तिपाक्षप्रभृतिष्वामयेषूपनासिके। लालाव्यापाच्चैता एव शिरोरोगाधिमन्थप्रभृतिषु रोगेष्विति॥ * ॥ अत ऊर्द्धं दुष्टव्यधनं अनुव्याख्यास्यामः। तत्र दुर्विद्धातिविद्धा कुण्ठिता पिच्छिता कुट्टिता प्रसुप्ता अत्युदीर्णा अन्तेऽभिहता परिशुष्का कूणिता वेपिता अनुत्थितविद्धा शस्त्रहता तिर्य्यग्विद्धा अविद्धा अव्याधा विद्रुता धेनुका पुनः पुनर्विद्धा शिरास्नायुसन्धिसन्धिमर्म्मसु चेति विंशतिर्दुष्टव्यधाः। तत्र या सूक्ष्मशस्त्रविद्धा न व्यक्तमसृक् स्रवति रुजा शोफवती च सा दुर्विद्धा। प्रमाणातिरिक्तविद्धायामन्तः प्रविशति शोणितं शोणितातिप्रवृत्तिर्वा सातिविद्धा। कुण्ठितायामप्येवम्। कुण्ठशस्त्रप्रमथिता दृथुलीभावमापन्ना पिच्छिता। अनासादिता पुनःपुनरन्तयोश्च बहुशः शस्त्राभिहता कुट्टिता। शीतभयमूर्च्छाभिरप्रवृत्तशोणिता अप्रसृता। तीक्ष्णा महामुखशस्त्रविद्धा अत्युदीर्णा। अल्परक्तस्रावित्वेऽन्ते विद्धा अन्तेऽभिहता। क्षीणशोणितस्यानिलपूर्णा परिशुष्का। चतुर्भागावसादिता किञ्चिन्नप्रवृत्तशोणिता कूणिता। दुःस्थानबन्धनाद्देपमानायाः शोणितमग्नोष्मो भवति सा वेपिता। अनुत्थितविद्धायामप्येवम्। छिन्नातिप्रवृत्तशोणिता क्रियासङ्करी शस्त्रहता। तिर्य्यक् प्रणिहितशस्त्रा किञ्चिच्छेषा तिर्य्यग्विद्धा। बहुशः क्षता हीनशस्त्रप्रणिधानेनाविद्धा। अशस्त्रकृत्या अव्याधा अनवस्थितविद्धा विद्रुता। प्रदेशस्य बहुशोऽवघट्टनादारोग्यव्यधा सुदुर्मुदुःशोणितस्रवा धेनुका। सूक्ष्मशस्त्रव्यधनाद्दुष्टो विच्छिन्ना पुनःपुनर्विद्धा। स्नायुस्थिशिरासन्धिमर्म्मसु विद्धा वा रुजां शोफं वैकल्यं मरणं वापादयति॥ * ॥ भवन्ति चात्र।

"सिरासु शिथिलो नास्ति चला श्लेष्मा: स्रभावतः।
मस्तुवत् परिवर्त्तन्ते तस्मादयत्नेन ताडयेत्॥
अजानता गृहीते तु शस्त्रे कायनिपातिते।
भवन्ति व्यापदश्चैता बहवश्चाप्युपद्रवाः॥
स्नेहादिभिः क्रियायोगैर्न तथा लेपनैरपि।
यान्त्याशु व्याधयः शान्तिं यथा सम्यक् सिराव्यधात्॥
सिराव्यधविकित्सार्द्धं शस्त्रतन्त्रे प्रकीर्त्तितः।
यथा प्रणिहितः सम्यक् वस्तिः कायचिकित्सिते॥"

तत्र स्निग्धस्विन्नवान्तविरिक्तास्थापितानुवासित सिराविद्धैः परिहर्त्तव्यानि। क्रोधायासमैथुनदिवास्वप्नप्रवाग्व्यायामयानोत्थानामनचंक्रमणशीतवाततपविरुद्धासात्म्याजीर्ण्यान्नवललाभाग्रासमेके मन्यन्ते॥* एतेषां विस्तरमुपरिष्टाद्वक्ष्यामः। भवतश्चात्र।

"सिराविषाणतुम्बैस्तु जलौकाभिः पदस्तथा।
अवगाढं यथापूर्वं निर्हरेद्दुष्टशोणितम्॥
अवगाढे जलौका स्यात् प्रच्छन्नं पिण्डितेहितम्
सिराङ्व्यापके रक्ते शृङ्गालाबुत्वचि स्थिते॥"

नवमोऽध्यायः।

अथातो धमनीव्याकरणं शारीरं व्याख्यास्यामः। चतुर्विंशतिर्धमन्यो नाभिप्रभवा अभिहिताः। तत्र केचिदाहुः सिराधमनीस्रोतसामविभागः सिराविकारा एव धमन्यः स्रोतांसि चेति। तत्तु न सम्यक्। अन्या एव हि धमन्यः स्रोतांसि च सिराभ्यः कस्माद्ग्रहणान्यत्वान्मूलसन्नियमात् कर्म्मवैशेष्यादागमाच्च केवलन्तु परस्परसन्निकर्षात् सदृशागमकर्म्मत्वात् सौक्ष्म्याच्च विभक्तकर्म्मणामप्यविभागइव कर्म्मसु भवति। तासान्तु नाभिप्रभवाणां धमनीनामूर्द्ध्वगा दश दश चाधोगामिन्यश्चतस्रस्तिर्य्यग्गाः। ऊर्द्ध्वगाः शब्दस्पर्शरूपरसगन्धप्रस्रावोच्छ्वासजृम्भितक्षुद्धसितकथितरुदितादीन्विशेषानभिवहन्तः शरीरं धारयन्ति। तासु हृदयमभिप्रपन्नासिधा जायन्ते तासिंशत्। तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश शब्दरूपरसगन्धानष्टाभिर्गृह्णीते। द्वाभ्यां भाषते च द्वाभ्यां घोषं करोति द्वाभ्यां स्वपिति द्वाभ्यां प्रतिबुध्यते। द्वे चास्तुवाहिन्यौ। द्वे स्तन्यं स्त्रिया वहतस्तेन मंस्त्रिते ते एव शुक्रं नरस्य स्तनाभ्यामभिवहतः। तास्त्वेतासिंशत्। सविभागा व्याख्याताः। एताभिरूर्द्ध्वं नाभेरुदरपार्श्वपृष्ठोरःस्कन्धग्रीवाबाहवो धार्य्यन्ते याप्यन्ते च ॥*॥ भवति चात्र।

"ऊर्द्ध्वं गतास्तु कुर्वन्ति कर्म्माण्येतानि सर्व्वशः।
अधोगमास्तु वक्ष्यामि कर्म्म तासां यथायथम्॥"

अधोगमास्तु वातमूत्रपुरीषशुक्रार्त्तवादीन्यधो वहन्ति। तासुपित्ताशयमभिप्रतिपन्नास्तत्रस्थमेवान्नपानरसं विपक्वमोष्माहिरेचयन्तोऽभिवहन्ताः शरीरं तर्पयन्त्यापयन्ति चोर्द्ध्वगतानां तिर्य्यग्गतानां रसस्थानञ्चाभिपूरयन्ति मूत्रपुरीषस्वेदांश्च विरेचयन्त्यामपक्वाशयान्तरे च त्रिधा जायन्ते तासिंशत्। तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतः ता दश द्वे अन्नवाहिन्यावन्त्राश्रिते तोयवहे द्वे मूत्रवस्तिमभिप्रपन्ने मूत्रवहे द्वे शुक्रवहे द्वे शुक्रप्रादुर्भावाय द्वे विसर्गाय ते एव रक्तमभिवहतो नारीणामार्त्तवसंस्थम्। द्वे वर्च्चोनिरसन्यौ स्थूलान्त्रप्रतिबद्धे। अष्टावन्यास्तिर्य्यग्गानां धमनीनां स्वेदमर्पयन्ति। तास्त्वेतासिंशत् सविभागा व्याख्याताः। एताभिरधोनाभेः पक्वाशयकटीमूत्रपुरीषगुदवस्तिमेढ्रसक्थीनि धार्य्यन्ते याप्यन्ते च ॥*॥ भवति चात्र।

"अधोगमास्तु कुर्व्वन्ति कर्म्माण्येतानि सर्व्वशः
तिर्य्यग्गाः संप्रवक्ष्यामि कर्म्म तासां यथा-
यथम्॥"

तिर्य्यग्गानान्तु चतसृणां धमनीनामेकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यन्ते तास्त्वसंख्येयास्ताभिरिदं शरीरं गवाक्षितं विवद्धमाततञ्च। तासां मुखानि रोमकूपप्रतिबद्धानि यैः स्वेदमभिवहन्तिरसञ्चापि सन्तर्पयन्त्यन्तर्वहिश्च

तैरेव चाभ्यङ्गपरिषेकावगाहालेपनवीर्य्याख्यन्तः शरीरमभिपद्यन्ते त्वचि विपक्वानि। तैरेव स्वेदसुखमसुखं वा गृह्णाति। तास्त्वेताश्चतस्रो धमन्यः सर्व्वाङ्गगताः सविभागा व्याख्याताः। भवतश्चात्र।

"यथा स्वभावतः खानि मृणालेषु विसेषु च।
धमनीनां तथा खानि रसो यैरुपचीयते॥
पञ्चाभिभूतास्त्वथ पञ्चकृत्वः
पञ्चेन्द्रियं पञ्चसु भावयन्ति।
पञ्चेन्द्रियं पञ्चसु भावयित्वा
पञ्चत्वमायान्ति विनाशकाले॥"*॥

अत ऊर्द्धं स्रोतसां मूलविद्धलक्षणमुपदेक्ष्यामः। तानि तु प्राणान्नोदकरसरक्तमांसमेदोमूत्रपुरीषशुक्रार्त्तववहानि येष्वधिकार एतेषां बहूनि। एतेषां विशेषा बहवः। तत्र प्राणवहे हे तयोर्मूलं हृदयं रसवाहिन्यश्च धमन्यः। तत्र विद्धस्य क्लोमनविनमनमोहनभ्रमणवेपनानि मरणं वा भवति। अन्नवहे हे तयोर्मूलमामाशयोऽन्नवाहिन्यश्च धमन्यस्तत्र विद्धस्याध्मानं शूलान्नद्वेषौ छर्द्दिः पिपासान्यं मरणं वा। उदकवहे हे तयोर्मूलं तालुक्लोम च। तत्र विद्धस्य पिपासा सद्योमरणञ्च। रसवहे हे तयोर्मूलं हृदय रसवाहिन्यश्च धमन्यस्तत्र विद्धस्य शोषः प्राणवहविद्धवच्च मरणं तल्लिङ्गानि च। रक्तवहे हे तयोर्मूलं यकृत्प्लीहानौ रक्तवाहिन्यश्च धमन्यस्तत्र विद्धस्य श्यावाङ्गता ज्वरो दाहः पाण्डुता श्रोणितातिगमनं रक्तनेत्रता चेति। मांसवहे हे तयोर्मूलं स्नायुत्वचं रक्तवहाश्च धमन्यस्तत्र विद्धस्य स्नायुर्मांसशोषः सिराग्रन्थयो मरणम्। मेदोवहे हे तयोर्मूलं कटीवृक्कौ च तत्र विद्धस्य स्वेदागमनं स्निग्धाङ्गता तालुशोषः स्थूलशोफता पिपासा च। मूत्रवहे हे तयोर्मूलं वस्तिर्मेढ्रञ्च तत्र विद्धस्यानद्धवस्तिता मूत्रनिरोधः स्तब्धमेढ्रता च। पुरीषवहे हे तयोर्मूलं पक्वाशयो गुदञ्च तत्र विद्धस्यानाहो दुर्गन्धता ग्रथितान्नता च। शुक्रवहे हे तयोर्मूलं स्तनौ वृषणौ च तत्र विद्धस्य क्लीवता चिरात् प्रसेको रक्तशुक्रता च। आर्त्तववहे हे तयोर्मूलं गर्भाशयः आर्त्तववाहिन्यश्च धमन्यस्तत्र विद्धायां वन्ध्यात्वं मैथुनासहिष्णुत्वमार्त्तवनाशश्च। सेवनीच्छेदाद्बुजाप्रादुर्भावः। वस्तिगुदविद्धलक्षणं प्रागुक्तमिति। स्रोतोविद्धन्तु प्रत्याख्यायोपचरेदुद्धृतशल्यन्तु क्षतविधानेनोपचरेत्।

"मूलात् खादन्तरं देहे प्रसृतत्वभिवाहि यत्।
स्रोतस्तदिति विज्ञेयं सिराधमनिवर्জ্জितम्॥"

दशमोऽध्यायः।

अथातो गर्भिणीव्याकरणं शारीरं व्याख्यास्यामः। गर्भिणी प्रथमदिवसात् प्रभृति नित्यं प्रहृष्टा शुचिशुक्लवसना शान्तिमङ्गलदेवताब्राह्मणगुरुपरा च भवेन्मलिनविक्षतहीनगात्राणि न स्पृशेद्दुर्गन्धदुर्दर्शनानि परिहरेदुद्वेजनीयाश्च कथाः शुष्कं पर्य्युषितं कुथितं क्लिन्नं चान्नं नोपभुञ्जीत। बहिर्निष्क्रमणं शून्यागारचैत्यश्मशानवृक्षाश्रयान् क्रोधभयसङ्कारांश्च भारानुद्वेगांश्चादिकं परिहरेदयानि च गर्भं व्यापादयन्ति। न चाभीक्ष्णं तैलाभ्यङ्गोत्सादनादीनि निषेवेत। न चायासयेच्छरीरं पूर्व्वोक्तानि च परिहरेत्। शयनासनं मृदास्तरणं नात्युच्चमपाश्रयोपेतमसम्बाधं विदध्यात्। हृद्यं द्रवं मधुरप्रायं स्निग्धं दीपनीयसंस्कृतञ्च भोजनं भोजयेत् सामान्यमेतदा प्रसवात्॥*॥ विशेषतस्तु गर्भिणी प्रथमद्वितीयतृतीयमासेषु मधुरशीतद्रवप्रायमाहारमुपसेवेत। विशेषतस्तु तृतीये षष्टिकौदनं पयसा भोजयेच्चतुर्थे दध्ना पञ्चमे पयसा षष्ठे सर्पिषा चेत्येके। चतुर्थे पयोनवनीतसंसृष्टमाहारयेज्जाङ्गलमांससहितं हृद्यमन्नं भोजयेत्। पञ्चमे क्षीरसर्पिःसंसृष्टम्। षष्ठे खदंष्ट्रामिश्रं सर्पिषो मात्रां पाययेद्यवागूं वा। सप्तमे सर्पिः पृथक् पर्ण्यादिसिद्धमेवमाप्याय्यते गर्भः। अष्टमे वदरोदकेन बलातिबलाशतपुष्पपल्लवपयोदधिमस्तु तैललवणमदनफलमधुघृतमिश्रेणास्थापयेत्। पुराणपूरीषशुद्धयर्थमनुलोमनार्थञ्च वायोः। ततः पयोमधुरकषायसिद्धेन तैलेनानुवासयेदनुलोमे हि वायौ सुखं प्रसूयते निरुपद्रवा च भवति। अत ऊर्द्धं स्निग्धाभिर्यवागूभिर्जाङ्गलरसैश्चोपक्रमेदाप्रसवकालादेवमुपक्रान्ता स्निग्धा बलवती सुखमनुपद्रवा प्रसूयते। नवमे मासि सूतिकागारमेनां प्रवेशयेत् प्रशस्ततिथ्यादौ। तत्रारिष्टं ब्राह्मणक्षत्रियवैश्यशूद्राणां स्वेतररक्तपीतकृष्णेषु भूमिप्रदेशेषु विल्वन्यग्रोधतिन्दुकभल्लातकनिर्म्मितं सर्व्वागारं यथासंख्यं तन्मयपर्य्यङ्कमुपलिप्तभित्तिं सुविभक्तपरिच्छदं प्राग्द्वारमुदग्द्वारं दक्षिणद्वारं वाष्टहस्तायतञ्चतुर्हस्तविस्तृतं रक्षामङ्गलसम्पन्नं विधेयम्॥*॥

"जाते हि शिथिले कुक्षौ मुक्ते हृदयबन्धने।
सशूले जघने नारी स्रष्टेया सा तु प्रजायिनी॥"

तत्रोपस्थितप्रसवायाः कटीपृष्ठं प्रति समन्ताद्वेदना भवत्यभीक्ष्णं पुरीषप्रवृत्तिर्मूत्रं प्रसिच्यते योनिमुखात् श्लेष्मा च। प्रजनयिष्यमाणां क्षतमङ्गलस्वस्तिवाचनां कुमारपरिष्टतां पुत्रामफलहस्तां स्वभ्यक्तामुष्णोदकपरिषिक्तामथैनां सपृतां यवागूमाकण्ठात् पाययेत्। ततः क्षतोपधाने मृदुविस्तीर्णे शयने स्थितामाभुग्नसक्थीमुत्तानामग्रहस्तौ याश्चतस्रः स्त्रियः परिणतवयसः प्रजननकुशलाः कर्त्तितनखाः परिचरेयुरिति॥*॥ अथास्या विग्रिह्यान्तरमनुलोममनुसुखमभ्यज्यात् ब्रूयाच्चैनामेका सुभगे प्रवाहस्व ति न चाप्राप्तावौ प्रवाहस्व ति विग्रिह्यान्तरमपत्यमार्गम्। ततो विमुक्ते गर्भनाड़ीप्रबन्धे सशूलेषु श्रोणिवङ्क्षणवस्तिशिरःसु प्रवाहेथाः शनैः शनैः। ततो गर्भनिर्गमे प्रगाढं ततो गर्भे योनिमुखं प्रपन्ने गाढ़तरमाविश्यभावात्॥*॥ अकालप्रवाहणात् वधिरं मूकं व्यस्तहनुं मूर्द्धाभिघातिनं कासश्वासशोषोपद्रुतं कुब्जं विकटं वा जनयति। तत्र प्रतिलोममनुलोमयेत् गर्भसङ्गे तु योनिं धूपयेत् कृष्णसर्पनिर्म्मोकेण पिण्डीतकेन वा। बध्नीयाद्विरण्यपुष्पीमूलं हस्तपादयोर्धारयेत् सुवर्च्चलां विश्वल्यां वा॥*॥

अथ जातस्योल्वं मुखञ्च सैन्धवसर्पिषा विशोध्य घृताक्तां मूर्द्धि पिचुं दद्यात् ततो नाभिनाडीमष्टाङ्गुलमायम्य सूत्रेण बद्धा छेदयेत् तत्सूत्रैकदेशञ्च कुमारस्य ग्रीवायां सम्यग्बध्नीयात्॥*॥

अथ कुमारं शीतोष्णाभिरद्भिराप्लाव्य जातकर्म्मणि कृते मधुसर्पिरनन्तात्रास्नीरसेन सुवर्णचूर्णमङ्गुल्यानामिकया लेहयेत्ततो बलातैलेनाभ्यज्य क्षौरवृक्षकषायेण सर्वगन्धोदकेन वा रूप्यहेमप्रतप्तेन वा वारिणा स्नापयेदेनं कपित्थपत्रकषायेण वा कोष्णेन यथाकालं यथादेशं यथाविभवं च।

"धमनीनां हृदिस्थानां विस्तृतत्वादनन्तरम्।
चतूरात्रात्त्रिरात्राद्वा स्त्रीणां स्तन्यं प्रवर्त्तते॥"

तस्मात् प्रथमेऽह्नि मधुसर्पिरनन्तामिश्रं मन्त्रपूतं त्रिकालं पाययेद्वितीये लक्ष्मणासिद्धं सर्पिस्तृतीये च। ततः प्राङ्निवारितस्तन्यं मधुसर्पिः स्वपाणितलसम्मितं द्विकालं पाययेत्॥*॥

अथ सूतिकां बलातैलाभ्यक्तां वातहरौषधनिःक्वाथेनोपचरेत् सशेषदोषान्तु तदहः पिप्पलीपिप्पलीमूलहस्तिपिप्पलीचित्रकशृङ्गवेरचव्यचूर्णं गुड़ोदकेनोष्णेन पाययेत्। एवं द्विरात्रं त्रिरात्रं वा कुर्य्यादादुष्टशोणितात्। विशुद्धे ततो विदारिगन्धादिसिद्धां स्नेहयवागूं चौरयवागूं वा पाययेत् त्रिरात्रम्। ततो यवकोलकुलत्थसिद्धेन जाङ्गलरसेन शाल्योदनं भोजयेद्बलमग्निबलञ्चावेक्ष्य। अनेन विधिना अध्यर्द्धमानमुपसंस्कृता विमुक्ताहाराचारा विगतसूतिकाभिधाना स्यात्। पुनरार्त्तवदर्शनादित्येके। धन्वभूमिजातां सूतिकां घृततैलयोरन्यतरस्य मात्रां पाययेत्। पिप्पल्यादिकषायानुपाना स्नेहनित्या च स्याच्चिरात्रं पञ्चरात्रं वा बलवती। अबलां यवागूं पाययेत्त्रिरात्रं पञ्चरात्रं वा अत ऊर्द्धं स्निग्धेनान्नसंसर्गेणोपचरेत्। प्रायश्चैनां प्रभूतेनोष्णोदकेन परिषिञ्चेत्। क्रोधायासमैथुनादीन् परिहरेत्॥*॥

भवतश्चात्र।

"मिथ्याचारात् सूतिकाया यो व्याधिरुपजायते।
स कृच्छ्रसाध्योऽसाध्यो वा भवेदत्ययतर्षणात्॥
तस्मात्तां देशकालौ च व्याधिसात्म्येन कर्म्मणा।
परीक्ष्योपचरेदेवं नेयमत्ययमाप्नुयात्॥*॥"

अथापरापतन्त्यानाहाधानौ कुरुते तस्मात् कण्ठमस्याः केशवेष्टितयाङ्गुल्या प्रमृजेत्। कटुकालाबुकृतवेधनसर्षपसर्ष्पनिर्म्मोकैर्वा कटुतैलविमिश्रैर्योनिमुखं धूपयेत्। लाङ्गलीमूलकल्केन वास्याः पाणिपादतलमालिम्पेत्। मूर्द्धि वाक्षा

महाह्वच्च क्षीरमनुपेचयेत् । कुष्ठलाङ्गलीमुलकल्कं वा मद्यमूत्रयोरन्यतरेण पाययेत् । शालिमूलकल्कं वा पिप्पल्यादिं वा मद्येन सिद्धार्थककुष्ठलाङ्गलीमहाह्वच्चीरमिश्रेण सुरामण्डेन वा स्थापयेत् । एतैरेव सिद्धेन सिद्धार्थकतैलेनोत्तरवस्तिं ददात् । स्निग्धेन वालक्तनखेन हस्तेनापहरेत् । प्रजातायाश्च नार्य्या रूक्षशरीरायास्तीक्ष्णैरविशोधितं रक्तं वायुना तद्वेगेनातिसंरुद्धं नाभेरधःपार्श्वयोर्वस्तौ वा अस्थ्नि वा शिरसि वा ग्रन्थिं करोति । ततश्च नाभिवस्त्युदरपृष्ठशूलानि भवन्ति । सूचीभिरिव निस्तुद्यते भिद्यते दीर्य्यत इव च पक्वाशयः । समन्तादाध्मानमुदरे मूत्रसङ्गश्च भवतीति मरुल्लक्षणम् । तत्र वीरतर्व्वादिसिद्धं जलभूषकादिप्रतिवापं पाययेत् । यवक्षारचूर्णं वा सर्पिषा सुखोदकेन वा लवणचूर्णं वा पिप्पल्यादिकाथेन पिप्पल्यादिचूर्णं वा सुरामण्डेन वरुणादिक्वाथं वा पञ्चकोलैलाप्रतीवापं पृथक् पर्ण्यादिकाथं वा भद्रदारुमरिचसंसृष्टं पुराणगुड़ं वा त्रिकटुकचतुर्जातककुस्तुम्बुरुमिश्रं खादेदक्षं वा पिबेदरिष्टमिति ॥*॥ अथ बालं क्षौमपरिवृतं क्षौमवस्त्रास्तृतायां शय्यायां शाययेत् । पौलुवदरीनिम्बपरूषकशाखाभिश्चैनं वीजयेत् । सुदूरं चास्याहरहस्तैलपिचुमवचारयेत् । धूपयेच्चैनं रक्षोघ्नैर्धूपैः । रक्षोघ्नानि चास्य पाणिपादशिरोग्रीवास्वबद्धजेत् । तिलातसीसर्षपकणांश्चात्र प्रकिरेत् । अधिष्ठाने चाग्निं प्रज्वालयेत् । व्रणितोपासनीयश्चावेक्षेत । ततो दशमेऽहनि मातापितरौ कृतमङ्गलकौतुकौ स्वस्तिवाचनं कृत्वा नाम कुर्य्यातां यदभिप्रेतं नक्षत्रनाम वा ॥ * ॥ ततो यथावर्णान्धात्रीमुपेयान्मध्यमप्रमाणां मध्यमवयसामरोगां शीलवतीमचपलामलोलुपामक्षुद्रामस्थूलां प्रसन्नक्षीरां अलम्बोष्ठीमलम्बोर्ध्वस्तनीमव्यङ्गामव्यसनिनीं जीवद्वत्सां दोग्ध्रीं वत्सलामक्षुद्रकर्मिणीं कुले जातामतो भूयिष्ठं च गुणैरन्वितां श्यामामारोग्यबलहृद्ये बालस्य । तत्रोर्ध्वस्तनी करालं कुर्य्यात् । लम्बस्तनी नासिकामुखं छादयित्वा मरणमापादयेत् । ततः प्रशस्तायां तिथौ शिरःस्नातामहतवाससमुदङ्मुखं शिशुमुपवेश्य धात्रीं प्राङ्मुखीमुपवेश्य दक्षिणं स्तनं धौतमौषत्परिसुतमभिमन्त्र्य मन्त्रेणानेन पाययेत् ॥*॥

"चत्वारः सागरास्तुभ्यं स्तनयोः क्षीरवाहिनः।
भवन्तु सुभगे नित्यं बालस्य बलहृद्ये ॥
पयोऽमृतरसं पीत्वा कुमारस्ते शुभानने ।
दीर्घमायुरवाप्नोतु देवाः प्राश्यामृतं यथा ॥"

अतोऽन्यथा नानास्तन्योपयोगस्यासात्म्याद्व्याधिजन्म भवति । अपरिसुतेऽप्यतिस्तब्धस्तन्यपूर्णस्तनपानादुत्क्षुभितस्रोतसः शिशोः कासश्वासवमीप्रादुर्भावः । तस्मादेवं विधानं स्तन्यं न पाययेत् । क्रोधशोकावात्मस्थादिभिश्च स्त्रियाः स्तन्यनाशो भवति ॥*॥ अथास्याः क्षीरजननार्थं सौमनस्यमुत्पाद्य यवगोधूमशालिषष्टिकमांसरससुरासौवीरकपिण्याकलशुनमत्स्यकसेरुकशृङ्गाटक-विसविदारिकन्दमधुक-शतावरी-नालिकालावूकालशाकप्रभृतीनि विदध्यात् ॥ * ॥ अथास्याः स्तन्यमस्रु परीक्षेत । तच्चेच्छीतलममलं तनु शङ्खावभासमप्सु न्यस्तमेकीभावं गच्छत्यफेनिलमतन्तुमनोत्प्लवते न सीदति वा तच्छुद्धमिति विद्यात्तेन कुमारस्यारोग्यं शरीरोपचयो बलहृद्यं च भवति । न च क्षुधितशोकार्त्त-श्रान्तप्रदुष्टधातुगर्भिणीज्वरितातिक्षीणातिस्थूल-विदग्ध-भक्तविरुद्धाहार-तर्पितायाः स्तन्यं पाययेन्नाजीर्णेषु च बालं दोषौषधमलानां तीव्रवेगोत्पत्तिभयात् ॥ * ॥ भवन्ति चात्र ।

"धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दोषलैस्तथा ।
दोषा देहे प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति ॥
मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः ।
दूषयन्ति पयस्तेन शारीरा व्याधयः शिशोः ॥
भवन्ति कुशलस्तांश्च भिषक् सम्यक् विभावयेत् ।
अङ्गप्रत्यङ्गदेशे तु रुजा यत्रास्य जायते ॥
मुहुर्मुहुः स्पृशति तं स्पृश्यमाने च रोदिति ।
निमीलिताक्षो मूर्द्धस्थे शिरोरोगे न धारयेत् ॥
वस्तिस्थे मूत्रसङ्गार्त्तो रुजा दृश्यति मूर्च्छति ।
विगन्धमूत्रसङ्गेवर्च्छर्दार्ध्मानान्वकूजनैः ।
कोष्ठे दोषात् विजानीयात् सर्व्वत्रस्थांश्च रोदनैः ॥"

तेषु च यथाभिहितं मृदुच्छेदनीयमौषधं मात्रया क्षीरपस्य जीरसर्पिषा धात्र्याश्च केवलमेव विदध्यात् । क्षीराद्यादस्यात्मनि धात्र्याश्चाद्यस्य कषायादीनात्मन्येव न धात्र्याः । तत्र मासादूर्द्धं क्षीरपायाङ्गुलिपर्व्वद्वयग्रहणसम्मितामौषधमात्रां विदध्यात् कोलास्थिसम्मितां कल्कमात्रां क्षीराद्यादाय कोलसम्मितामश्नादायेति ॥ * ॥

"शेषं गदानां ये योगाः प्रवक्ष्यन्ते ऽगदङ्कराः ।
तेषु तत्कल्कसंसिद्धौ पाययेत शिशुं स्तनौ ॥
एकं द्वे त्रीणि चाहानि वातपित्तकफज्वरे ।
स्तन्यपायाहितं सर्पिरितराभ्यां यथार्थतः ॥
न च क्षणाभयादत्र पाययेत शिशुं स्तनौ ।
विरेकवस्तिव्यमनान्नाते कुर्य्याच्च नात्ययात् ॥
मस्तुलुङ्गचयादस्य वायुस्तालूस्थि नामयेत् ।
तस्य वृद्ध्यै नियुक्तस्य सर्पिर्मधुरकैः शृतम् ॥
पानाभ्यञ्जनयोर्ज्ञेयं शीताम्बुह्रदजं तथा ।
वातेनाध्मापितां नाभिं सरुजां तुण्डिकेरिताम् ।
मारुतघ्नैः प्रशमयेत् स्वेदस्वेदोपनाहनैः ।
गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियाम् ।
रसाञ्जनं विशेषेण पानालेपनयोर्हितम् ॥"

क्षीराहाराय सर्पिः पाययेत् सिद्धार्थकवचामांसी-पयस्यापामार्गशतावरीगारिवाब्राह्मीपिप्पलीहरिद्राकुष्ठसैन्धवसिद्धम् । क्षीराद्यादाय मधुकवचापिप्पलीचित्रकत्रिफलासिद्धम् । अन्नादाय हिपञ्चमूलीक्षीरतगरभद्रदारुमरिचमधुविड़ङ्गद्राक्षाहिब्राह्मीसिद्धम् । तेनारोग्यबलमेधायूंषि शिशोर्भवन्ति ॥ * ॥ बालं पुनर्गात्रसुखं गृह्णीयात् न चैनं तर्जयेत् सहसा न प्रतिबोधयेद्वित्रासभयात् । सहसा नापहरेदुत्क्षिपेद्वा वातादिविघातभयात् । नोपवेशयेत् क्रीड़ाभयाद्विस्रं चैनमनुवर्त्तेत प्रियगतैरजिघांसुः । एवमनभिहतमनास्त्वभिवर्द्धते नित्यमुदग्रसत्त्वसम्पन्नो नीरोगः सुप्रसन्नमनाश्च भवति । वातातपविद्युदभ्रापादपलता-दर्शन-दीपावलोकनशून्यागारनिम्नस्थानगृहच्छायादिभ्यो दुर्गन्धोपसर्गतश्च बालं रक्षेत् ॥ * ॥

"नाग्नौ विसृजेद्बालं नाकाशे विषमे न च ।
नोष्णमारुतवर्षेषु रजोधूमोदकेषु च ॥
क्षीरसात्मतया क्षीरमाजं गव्यमथापि वा ।
दद्याः स्तन्यपर्य्याप्तं बालानां वीक्ष्य मात्रया ॥"

वक्ष्यामश्चैनमत्र प्राग्रयेभ्यश्च हितञ्च । नित्यमवरोधरतश्च स्यात् क्षतरक्षश्च उपसर्गभयात् । प्रयत्नतश्च ग्रहोपसर्गेभ्यो रक्षेद्बालो भवन्हि ॥

अथ कुमार उद्विजते त्रस्यति रोदिति नष्टसंज्ञो भवति नखदशनैर्धात्रीमात्मानञ्च परिक्षुदति दन्तान् खादति कूजति जृम्भते भ्रुवौ विक्षिपत्यक्षि निरीक्षते फेनमुद्गमति सन्दष्टौष्ठः क्रूरो भिन्नाभवर्च्चादीनार्त्तस्वरो निशि जागर्त्ति दुर्बलो म्लानाङ्गो मत्स्यक्रुच्छन्दरोमत्कुणगन्धो यथा पुरा धात्र्याः स्तन्यमभिलषति तथानाभिलषतीति सामान्येन ग्रहोपसृष्टलक्षणमुक्तं विस्तरेणोत्तरे वक्ष्यामः ॥*॥ अक्लिमन्तञ्चैनं ज्ञात्वा यथावर्णं विद्यां ग्राहयेत् । अथास्मै पञ्चविंशतिवर्षाय द्वादशवर्षां पत्नीमावहेत् पित्र्यार्थधर्म्मार्थकामप्रजाः प्राप्नुयादिति ॥*॥

"ऊनषोड़शवर्षायामप्राप्तः पञ्चविंशतिम् ।
यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते ॥
जातो वा न चिरं जीवेत् जीवेद्वा दुर्बलेन्द्रियः ।
तस्मादत्यन्तबालायां गर्भाधानं न कारयेत् ॥"

अतिवृद्धायां दीर्घरोगिण्यामन्येन वा विकारेणोपसृष्टायां गर्भाधानं नैव कुर्वीत । पुरुषस्याप्येवंविधस्य त एव दोषाः संभवन्ति । तत्र पूर्व्वोक्तैः कारणैः पतिष्यति गर्भे गर्भाशयकटीवङ्क्षणवस्तिशूलानि रक्तदर्शनञ्च । तत्र शीतैः परिषेकावगाह-प्रदेहादिभि-रुपचरेज्जीवनीयशृतशीतक्षीरपानैश्च । गर्भस्रंसिनि मुहुर्मुहुस्तत्सन्धारणार्थं क्षीरमुत्पलादिसिद्धं पाययेत् । प्रसंसमाने सदाहपार्श्वपृष्ठशूलाऽगुदरानाहमूत्रसङ्गाः । स्थानात् स्थानञ्चोपक्रामति गर्भे कोष्ठे संरम्भस्तत्र स्निग्धाः शीता क्रियाः वेदनायां महासहाचुद्रसहामधुकखर्जदंष्ट्राकण्टकारिकासिद्धं पयः शर्करा क्षौद्रमिश्रं पाययेत् । मूत्रसङ्गे दर्भादिसिद्धम् । आनाहे हिङ्गुसौवर्चललशुनवचासिद्धम् । अत्यर्थं स्रवति रक्ते कोष्ठागारिकागारधूमोत्पिण्डसमङ्गाधातकीकुसुमनवमालिकागैरिकसर्ज्जरसरसाञ्जनचूर्णं मधुना-

वलिह्यात्। यथालाभं न्यग्रोधादित्वक् प्रवालकल्कं वा पयसा पाययेदुत्पलादिकल्कं वा कशेरुशृङ्गाटकशालूककल्कं वा घृतेन पयसोदुम्बरफलोदककन्दकाथेन वा शर्करामधुमधुरेण शालिपिष्टं न्यग्रोधादिस्वरसपरिपीतं वा वस्त्रावयवं योन्यां धारयेत्॥*॥ अथाद्दष्टशोणितवेदनायां मधुकदेवदारुपयस्यासिद्धं पयः पाययेत् तदेवाश्मन्तकशतावरीपयस्यासिद्धं विदारिगन्धादिसिद्धं वा हृद्दतीद्दयोत्पलशतावरीसारिवापयस्यामधुकसिद्धं पयस्यार्कपुष्पीसिद्धं वा पयः पाययेदिति। एवं क्षिप्रमुपक्रान्ताया उपावर्त्तन्ते रजो गर्भश्चाप्यायते। व्यवस्थिते च गर्भे गव्येनोष्ट्रखरगलाटुसिद्धेन पयसा भोजयेत्। अतीते लवणस्नेहवर्ज्यैर्भिषग्वागूभिरुद्दालकादीनां पाचनीयोपसंस्कृताभिरुपक्रमेत यावन्तो मासा गर्भस्य तावन्त्यहानि। वस्त्युदरशूलेषु पुराणगुडं दीपनीयसंयुक्तं पाययेदरिष्टं वा वातोपद्रवगद्दीतत्वात्। स्रोतसां लीयते गर्भः सोऽतिकालमवतिष्ठमानो व्यापद्यते तं मृदुना स्नेहादिक्रमेणोपचरेत्। उत्क्लेशरसमंसिद्धामनल्पस्नेहां यवागूं पाययेत्। माषतिलविल्वशलाटुसिद्धान् वा कुल्माषान् भक्षयेन्मधुमाध्वीकं चानुपिबेत् सप्तरात्रम्। कालातीतस्यायिनि गर्भे विशेषतः सधान्यमुदूखलं मुषलेनाभिहन्यात् विषमे वा यानासने सेवेत। वाताभिपन्न एव शुष्यति गर्भः। स मातुः कुक्षिं न पूरयति मन्दं स्पन्दते च तं हृंहणीयैः पयाभिर्मांसरसैश्चोपचरेत्। शुक्रशोणितं वायुनाभिप्रपन्नमवक्रान्तजीवमाधायास्योदरम्। तत् कदाचित् यदृच्छयोपशाम्यं नेगमेयापहृतमिति भाषन्ते। तमेव कदाचित् प्रलीयमानं नागोदरमित्याहुस्तत्रापि लीनवत् प्रतीकारः॥*॥ अत ऊर्द्धं मासानुमासिकं वक्ष्यामः।

"मधुकं शाकवीजञ्च पयस्या सुरदारु च।
अश्मन्तकस्थिलाः क्षीरास्तास्त्रवल्ली शतावरी॥
हृच्छादनी पयस्या च लता चोत्पलसारिवा।
अनन्ता सारिवा रास्ना पद्मा मधुकमेव च॥
हृद्दत्ती काश्मरी चापि क्षीरिशृङ्गास्त्वचो घृतम्।
वृश्चिपर्त्ती बला श्रेयसी, स्वदंष्ट्रा मधुपर्णिका॥
शृङ्गाटकं विसं द्राक्षा कशेरु मधुकं सिताः।
वक्ष्यते सप्त योगाः स्युरर्द्धश्लोकसमापनाः॥
यथासंख्यं प्रयोक्तव्या गर्भस्रावे पयोयुताः।
कपित्थहृद्दतीविल्वपटोलेक्षुनिदिग्धिकाः॥
मूलानि क्षीरसिद्धानि पाययेद्विषगष्टमे।
नवमे मधुकान्नापयस्यासारिवाः पिबेत्॥
क्षीरं शृङ्गीपयस्याभ्यां सिद्धं स्याद्दशमे हितम्।
सक्षीरा वा हिता शृङ्गी मधुकं सुरदारु च।
एवमाप्याय्यते गर्भस्तीव्रा रुक् चोपशाम्यति॥"
निहृत्तप्रसवायास्तु पुनः षड्भ्यो वर्षेभ्य ऊर्द्धं प्रसवमानायाः नार्याः कुमारोऽल्पायुर्भवति॥*॥

अथ गर्भिणीं व्याधुत्पत्तावत्यये हृद्यैर्मधुराम्लै र्नात्रोपहितेनानुलोमयेच्च संशमनीयञ्च मृदु विदध्यादन्नपानयोरन्नीयाच्च मृदुवीर्य्यं मधुरप्रायं गर्भाविरुद्धञ्च गर्भाविरुद्धाय क्रिया यथायोगं विदधीत मृदुप्रायाः॥*॥ भवन्ति चात्र।
"सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतञ्च वा।
मल्याश्चकः शङ्खपुष्पी मधु सर्पिः सकाञ्चनम्॥
अर्कपुष्पी मधु घृतं चूर्णितं कनकं वचा।
हेमचूर्णानि कैटर्य्यः श्वेता दूर्वा घृतं मधु॥
चत्वारोऽभिहिताः प्राग्या श्लोकार्द्धेषु चतुर्ष्वपि।
कुमाराणां वपुर्मेधाबलबुद्धिविवर्द्धनाः॥"
इति सुश्रुत आयुर्वेदशास्त्रे द्वितीयं शारीरस्थानं समाप्तम्॥ इङ्गरेजीभाषायां एनाटोमीत्युक्तमेतत्॥*॥ शारीरं तपो यथा,—
"देवद्विजगुरुप्राज्ञपूजनं शौचमार्জ্জवम्।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते॥"
इति भगवद्गीतायाम् १७ अध्यायः॥

शारीरकं, क्ली, (शरीरमेव शारीरं कुत्सितत्वात् तन्निवासी शारीरको जीवस्तमधिकृत्य कृतो ग्रन्थः। शारीरक + अण्।) वेदव्यासकृतवेदान्तमीमांसासूत्रम्। यथा। तथा च वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः। वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम्। अथातो ब्रह्मजिज्ञासेति। इति शङ्करभाष्यम्॥ (शरीरमेव शरीरकं तत्र भवम्। शरीरक + अण्। शरीरभवे, त्रि। यथा, भागवते। ३। ३१। १८।
"पश्यत्यसौ धियएया ननु सप्तवह्निः
शारीरके दमशरीर्य्यपरः स्वदेहे॥")

शारीरिकः, त्रि, (शरीर + ठक्।) शरीरसम्बन्धि। तत्पर्य्यायः। कालेवरिकः २ गात्रिकः ३ वापुषिकः ४ सांहनिकः ५ वार्षिकः ६ वैग्रहिकः ७ कायिकः ८ दैहिकः ९ मौर्त्तिकः १० तानविकः ११। इति अमरोक्तशरीरपर्य्यायशब्दात् ष्णिकप्रत्ययेन निष्पन्नमिदम्॥

शारुकः, त्रि, (शृणातीति। शॄ + "सर्व्वधिष्वाद्यिभ्य ऊरोलचौ।" उणा० ४। ८०। इति ऊलच् प्रत्ययेन साधुः।) व्याघ्रः। उत्तरपदे श्रेष्ठार्थवाचकः। इत्यमरः॥ राक्षसः। पशुभेदः। स तु सरभः। इति मेदिनी॥ पक्षिविशेषः। इति धरणिः॥ चिबुकः। इति राजनिर्घण्टः॥

शार्दूललक्षितं, क्ली, धृतिवृत्तौ अष्टादशाक्षरपादच्छन्दोविशेषः। यथा,—
"मः सो जः स-त-सा दिनेश ऋतुभिः शार्दूललक्षितम्।
कृत्वा कंसमृगे पराक्रमविधिं शार्दूललक्षितं
ययक्रे क्षितिभारकारिषु सुरारातिष्वतिदेवम्।
सन्तोषं परमन्तु देवनिवहे चैलोक्यशरणं
श्रेयो वः स तनोत्वपारमहिमा लक्ष्मीप्रियतमः॥"
इति छन्दोमञ्जरी २ स्तवकः॥

शार्दूलवाहनः, पुं, पञ्चविंशतिपूर्व्वजिनान्तर्गतजिनविशेषः। इति त्रिकाण्डशेषः॥

शार्दूलविक्रीड़ितं, क्ली, अतिधृतिवृत्तौ ऊनविंशतिपादच्छन्दोविशेषः। यथा,—
"सूर्य्याश्वैर्मः सं-ज-स्त-ताः सगुरवः शार्दूलविक्रीड़ितम्।
गोविन्दं प्रणमोत्तमाङ्गरसने त्वं घोषयाहर्निशं
पाणी पूजयतं मनः स्मर पदे तस्यालयं गच्छतम्।
एवञ्चेत् कुरुताखिलं मम हितं शौर्य्यादयस्तादृग्भवं
न प्रेक्षे भवतां कृते भवमहाशार्दूलविक्रीड़ितम्॥"
इति छन्दोमञ्जरी २ स्तवकः॥

शार्करः } त्रि, शर्करावहुलदेशः। शर्करा-
शार्करिकः } शब्दात् कण्प्रत्ययेन ष्णिकप्रत्ययेन च निष्पन्नः॥

शार्करीयः, त्रि, शर्करायुक्तदेशः। शर्कराशब्दात् छप्रत्ययेन निष्पन्नमिदम्॥

शार्ङ्गं, क्ली, आर्द्रकम्। इति राजनिर्घण्टः॥ (शृङ्गस्य विकारः। शृङ्ग + अण्।) विष्णुधनुः। धनुर्मात्रम्। इति मेदिनी। गे, २६॥ (यथा, रघुः। ४। ६२।
"शार्ङ्गकूजितविस्रब्धं यत्प्रतियोधे रजस्यभूत्॥")
शृङ्गसम्बन्धिनि, त्रि॥

शार्ङ्गष्टा, स्त्री, मद्दाकरञ्जः। इति राजनिर्घण्टः॥ पुस्तकान्तरे शार्ङ्गेष्टा इति च पाठः॥

शार्ङ्गी, [न्] पुं, (शार्ङ्गमस्यास्तीति। शार्ङ्ग + इनिः।) विष्णुः। इत्यमरः॥ (यथा, रघुः। १२। ७०।
"स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि।
रसातलादिवोन्मग्नं शेषं सुप्तमिव शार्ङ्गिणः॥")
धन्विमात्रम्। इति शार्ङ्गशब्दार्थदर्शनात्॥

शार्दूलः, पुं, (शृहिंसायाम् + "सर्व्वधिष्वाद्यिभ्य ऊरोलचौ।" उणा० ४। ८०। इति ऊलच् प्रत्ययेन साधुः।) व्याघ्रः। उत्तरपदे श्रेष्ठार्थवाचकः। इत्यमरः॥ राक्षसः। पशुभेदः। स तु सरभः। इति मेदिनी॥ पक्षिविशेषः। इति धरणिः॥ चित्रकः। इति राजनिर्घण्टः॥

शार्व्वरं, क्ली, अत्यतमसम्। घातुके, त्रि। इति मेदिनी॥ (शर्व्वर्य्या इदम्। शर्वरी+अण्।) शर्वरीसम्बन्धिनि, त्रि॥

शर्वरी, स्त्री, रात्रिः। इत्यमरटीकायां भरतधृतवाचस्पतिः॥

शाल, ङ क्षेपणे। इति कविकल्पद्रुमः॥(भ्वा०-आत्म०-सक०-सेट्।) क्षेपणे प्रशंसायाम्। ङ, शालते गुणिनं गुणी। क्ष, अशशालत्। इति दुर्गादासः।

शाल, पुं, (शलते प्रशंसते इति। शाल+घञ्।) मत्स्यभेदः। गजाड़ इति ख्यातः। प्राकारः। वृक्षविशेषः। तत्पर्य्यायः। सर्जः २ कार्य्यः ३ अश्वकर्णकः४ शस्यसम्भरः ५। इत्यमरः॥ शङ्कुवृक्षः ६। इति रत्नमाला॥ नदभेदः। इति शब्दरत्नावली॥ शालनृपः। स तु शालिवाहनराजः। इतिः विश्वः॥ वृक्षमात्रम्। इति राजनिर्घण्टः॥*॥ शालो झषे धीवर एव दास इत्युभयभेदात्तालव्यादिः। दन्त्यादिश्च। कैवर्त्त इव वडराजीवोत्पलसालो वसन्तकाल आजगाम। इति वासवदत्तश्लेषात्। कैवर्त्तपक्षे सालो मत्स्यविशेषः। वसन्तपक्षे सालस्य पुष्पं सालम्। इति भरतः॥

शालग्रामः, पुं, विष्णुमूर्त्तिविशेषः। स च गण्डक्यृद्भवचक्रकोटिकृतचक्रयुक्तशिला द्वारकोद्भवनाट्टशशिला च। तस्य माहात्म्यलक्षणादि यथा,—

"प्रसङ्गात् कथयिष्यामि शालग्रामशिलार्च्चनम्
निष्कामो मुक्तिमाप्नोति मूर्त्तिं ध्यायन् स्तुवन् जपन्॥
शङ्खचक्रगदापद्मं केशवाख्यो गदाधरः।
माधवौमोदकीचक्रशङ्खी नारायणो विभुः॥
म च शङ्खाक्षरपदो माधवः श्रीगदाधरः।
गदाब्जशङ्खचक्री वा गोविन्दाख्यो गदाधरः॥
पद्मशङ्खादिगदिने विष्णवे शङ्खाय वै नमः।
सशङ्खाब्जगदाचक्रमधुसूदनमूर्त्तये॥
नमो गदासिचक्राब्जयुक्तायै विक्रमाय च।
साविकौमोदकौपद्मशङ्खवामनमूर्त्तये॥
शङ्खाब्जचक्रगदिने नमः श्रीधरमूर्त्तये।
हृषीकेश साविगदाशङ्खपद्मिन्नमोऽस्तु ते॥
माब्जशङ्खगदाचक्रपद्मनाभस्वरूपिणे।
दामोदर शङ्खगदाचक्रपद्मिन्नमोऽस्तु ते॥
साविशङ्खगदाब्जाय वासुदेव नमो नमः।
शङ्खाब्जचक्रगदिने दमः सङ्कर्षणाय च॥
शङ्खचक्रगदाब्जाय धृतप्रद्युम्नमूर्त्तये।
नमोऽनिरुद्धाय गदाशङ्खाब्जवरधारिणे॥
माब्जशङ्खगदाचक्रपुरुषोत्तममूर्त्तये।
नमोऽधोक्षजरूपाय गदाशङ्खविधारिणे॥
नृसिंहमूर्त्तये पद्मगदाशङ्खविधारिणे।
पद्माविशङ्खगदिने नमोऽस्त्वच्युतमूर्त्तये॥
मशङ्खचक्राब्जगदं जनार्द्दनमिहो नमः।
उपेन्द्रं गदिनं साविपद्मशङ्ख नमोऽस्तु ते।
दचक्राब्जगदाशङ्खयुक्ताय हरिमूर्त्तये।
सगदाब्जाविशङ्खाय नमः श्रीकृष्णमूर्त्तये॥
शालग्रामशिलाहारगतलग्नद्विचक्रधृक्।
शुक्लाभाख्यश्च सोऽव्याद्दः सदैव श्रीगदाधरः॥
लग्नद्विचक्री चक्राभः पूर्वभागस्तु पुष्कलः।
सङ्कर्षणोऽथ प्रद्युम्नः सूक्ष्मचक्रस्तु पीतकः॥
स दीर्घः स शिरश्छिद्रो योऽनिरुद्धस्तु वर्त्तुलः।
नानाहारद्विरेखश्च अथ नारायणोऽसितः॥
मध्ये गदाङ्कता रेखा नाभिपद्ममहोन्नतः।
पृथुचक्रो नृसिंहो वः कपिलोऽव्याच्छिबिन्दुकः॥
अथवा पञ्चबिन्दुस्तत्पूजनं ब्रह्मचारिणः।
वराहश्चक्रिलिङ्गोऽव्याद्विषमद्वयचक्रकः॥
नीलरेखः स्थूलोऽथ कूर्म्ममूर्त्तिः स्वबिन्दुमान्।
कृष्णः सवर्त्तुलावर्त्तः पाण्डरोन्नतपृष्ठकः॥
श्रीधरः पञ्चरेखोऽव्याद्दनमालागदाङ्कितः।
वामनो वर्त्तुलो नाम वामचक्रः सुरेश्वरः॥
नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनन्तकः।
स्थूलो दामोदरो नीलो मध्ये चक्रः सुनीलकः॥
संकर्षणहारको वोऽव्यादथ ब्रह्मा सुमोहितः।
सदीर्घरेखा शुषिर एकचक्राम्बुजः पृथुः॥
प्रत्युच्छिद्रः स्थूलचक्रः कृष्णोऽबिन्दुश्च बिन्दुमत्।
हयग्रीवोऽङ्कुशाकारः पञ्चरेखः समन्ततः॥
वैकुण्ठोऽमलवद्भाति एकचक्रात्मकोऽसितः।
मत्स्यो दीर्घाम्बुजाकारो हाररेखस्तु पाण्डरः॥
वामचक्री दचरेखः श्यामो वोऽव्यात्त्रिविक्रमः
शालग्रामे हारकायां स्थिताय गदिने नमः॥
एकेन लक्षितो वोऽव्याद्दादाधारी सुदर्शनः।
लक्ष्मीनारायणौ द्वाभ्यां त्रिभिर्मूर्त्तिस्त्रिविक्रमः॥
चतुर्भिश्च चतुर्व्यूहो वासुदेवश्च पञ्चभिः।
प्रद्युम्नः षड्भिरेवाद्यात् सङ्कर्षण इतः स्तुतः॥
पुरुषोत्तमोऽष्टभिः स्याच्च नवव्यूहो नवान्वितः।
दशावतारी दशभिरनिरुद्धोऽवतादथ।
द्वादशात्मा द्वादशभिरत ऊर्द्धं त्वनन्तकः॥"

इति पाद्मे पातालखण्डे १० अध्यायः॥

अपि च।

ईश्वर उवाच।

"शालग्रामे मणौ यन्त्रे मण्डले प्रतिमासु च।
नित्यन्तु श्रीहरेः पूजा केवलेन जलेन तु॥
गण्डक्यामेकदेशे तु शालग्रामस्थलं महत्।
पाषाणान्तर्भवं यत्तत् शालग्राममिति स्थितम्॥
शालग्रामशिलास्पर्शात् कोटिजन्माघनाशनम्।
किं पुनर्जननं तत्र हरेः सान्निध्यकारणम्॥
शालग्रामैकयजनात् शतलिङ्गफलं लभेत्।
बहुभिर्जन्मभिः पुण्यैर्यदि कृष्णशिलां लभेत्॥
गोप्पदेन च चिह्नेन तेन वै त्रायते नरः।
आदौ शिलां परीक्षेत स्निग्धां श्रेष्ठाञ्च मिश्रकाम्॥
अकृष्णा मध्यमा प्रोक्ता मिश्रा मिश्रफलप्रदा।
सर्वकामप्रदा सौम्या कराला भयदुःखदा॥
स्निग्धा च श्रीकरी नित्यं रूक्षा दारिद्र्यदायिका।
क्षुद्रा क्षुद्रफला प्रोक्ता स्थूला स्थूलफलप्रदा॥
सदा काष्ठे स्थितो वह्निर्मन्थने च प्रकाशते।
यथा तथा हरिर्व्यापी शालग्रामे प्रकाशते॥
प्रत्यहं द्वादश शिलाः शालग्रामस्य योऽर्च्चयेत्।
द्वारवत्याः शिलायुक्तां स वैकुण्ठे महीयते॥
शालग्रामशिलायान्तु गह्वरं लक्ष्यते नरः।
पितरस्तस्य तिष्ठन्ति लक्षाः कल्पान्तरं दिवि॥
शालग्रामशिला यत्र यत्र द्वारवती शिला।
मृते विष्णुपुरं याति क्रोशार्द्धं योजनत्रयम्॥
जपपूजा च होमश्च सर्वं कोटिगुणं भवेत्।
मनस्कामः सदाभीष्टं क्रोशमात्रं समन्ततः॥
कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः।
शालग्रामशिलायां यो मूल्यमुत्पादयेन्नरः॥
विक्रेता चानुमन्ता च यः परीक्षानुमोदकः।
सर्वे ते नरकं यान्ति यावदाहूतसंप्लवम्।
अतस्तं वर्ज्जयेद्देवि! हरिविक्रयणक्रमम्।
शालग्रामोद्भवो देवो यो देवो द्वारकोद्भवः।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः॥
द्वारकोद्भवः शुक्लश्च बहुचक्रेण चिह्नितः।
चक्रमासीत् शिवाकारचित्स्वरूपनिरञ्जनम्॥
नमोऽस्त्वोङ्काररूपाय सदानन्दस्वरूपिणे।
शालग्रामे महाभाग भक्तस्यानुग्रहं कुरु।
त्वया युतस्य धर्म्मस्य ऋणग्रस्तस्य मे प्रभो॥"

इति तत्रैव ११ अध्यायः

अपरञ्च।

ब्राह्मण उवाच।

"गण्डकीयं नदी राजन्! सुरासुरनिसेविता।
पुण्योदकपरीवाहैर्हृतपातकसञ्चया॥
दर्शनान्मानसं पापं स्पर्शनात् कर्म्मजं दहेत्।
वाचिकं स्वीयतोयस्य पानतः पापसञ्चयम्॥
पुरा दुष्टाः प्रजा नाथः प्रजाःसर्व्वा विपाप्मनः।
स्वगण्डाद्दिपुषोऽनेकपापघ्नीं सृष्टवानिमाम्॥
एनां नदीं ये पुण्योदां स्पृशन्ति सुतरङ्गिणीम्।
ते गर्भभाजो नैव स्युरपि पापकृतो नराः॥
तस्यां भवा ये चाश्मनश्चक्रचिह्नैरलङ्कृताः।
ते साक्षाद्भगवन्तो हि स्वस्वरूपधराः पराः॥
शिलाः संपूजयेद्यस्तु नित्यं चक्रयुताः सदा।
न जातुचिज्जनन्या वै जठरं समुपाविशेत्॥
पूजयेद् यो नरो धीमान् शालग्रामशिलां वराम्।
तेनाचारवता भाव्यं दम्भमोहवियोगिना॥
परदारपरद्रव्यविमुखेन नरेण च।
पूजनीयः प्रयत्नेन शालग्रामः सचक्रकः॥
द्वारवत्या भवं चक्रं शिला वै गण्डकीभवा।
पुंसां क्षणाद्धरन्त्येव पापं जन्मशतार्জ্জितम्॥
अपि पापसहस्राणां कर्त्ता तावन्नरो भवेत्।
शालग्रामशिला आपः पीत्वा पूयेत तत्क्षणात्॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वेदपथे स्थितः।
शालग्रामं पूजयित्वा गृहस्थो मोक्षमाप्नुयात्॥
न कदाचित् स्त्रिया कार्य्यं शालग्रामस्य पूजनम्
भर्त्तृदीनाथ सुभगा सर्वलोकहितैषया॥
मोहात् स्पृशेत महिला जन्मशीलगुणान्विता।
हित्वा पुण्यसमूहन्तु सत्वरं नरकं व्रजेत्॥
स्त्रीपाणिमुक्तपुष्पाणि शालग्रामशिलोपरि।

परैरधिकपापानि वदन्ति ब्राह्मणोत्तमाः ॥
चन्दनं विषपङ्काभं कुङ्कुमं वज्रसन्निभम् ।
नैवेद्यं कालकूटाभं भवेद्भगवतः कृतम् ॥
तस्मात् सर्व्वात्मना त्याज्यः स्त्रियाः सर्ग्गः शिलोपरि ।
कुर्व्वतो याति नरकं यावदिन्द्राश्चतुर्दश ॥*॥
अपि पापसमाचारो ब्रह्महत्यायुतोऽपि वा ।
शालग्रामशिलास्तोयं पीत्वा याति परां गतिम् ॥
तुलसी चन्दनं चक्रं शङ्खो घण्टाथ चक्रकम् ।
शिला तास्वस्य पात्रन्तु विष्णोर्नाम पदामृतम् ॥
पदामृतन्तु नवभिः पापराशिप्रदाहकम् ।
वदन्ति मुनयः शान्ताः सर्वशास्त्रार्थकोविदाः ॥
सर्वतीर्थपरिस्नानात् सर्वक्रतुसमर्च्चनात् ।
पुण्यं भवति यद्राजन् बिन्दौ बिन्दौ तदद्भुतम् ॥
शालग्रामशिला यत्र पूज्यते पुरुषोत्तमैः ।
तत्र योजनमात्रन्तु तीर्थकोटीसमन्वितम् ॥*॥
शालग्रामाः समाः पूज्याः समेषु हितयं न हि ।
विषमा एव पूज्या वै विषमेषु त्रयं न हि ॥
द्वारवतीभवं चक्रं तथा वै गण्डकीभवम् ।
उभयोः सङ्गमो यत्र तत्र गङ्गा समुद्गगा ॥
रूक्षाः कुर्व्वन्ति पुरुषान् आयुः श्रीभिर्विवर्ज्जितान् ।
तस्मात् स्निग्धा मनोहारिरूपेण ददति श्रियम् ॥
आयुष्कामो नरो यस्तु धनकामोऽपि यः पुमान् ।
पूजयन् सर्वमाप्नोति पापं लौकिकमैहिकम् ॥
प्राणान्तकाले तु यस्य भवेद्वाग्यबलान्नृप ।
वाचि नाम हरेः पुण्यं शिलाकृतिस्तदन्तिके ॥
गच्छत्सु प्राणमार्गेषु यस्य विभ्रमतोऽपि वेत् ।
शालग्रामशिलामूर्त्तिस्तदा मुक्तिं न संशयः ॥
पुरा भगवता प्रोक्तमम्बरीषाय धीमते ।
ब्राह्मणो न्यासिनो भक्ताः शालग्रामशिला मम ॥
स्वरूपचिह्नयं मन्त्रमेतद्धि क्षितिमण्डले ।
पापिनां पापनिवारं कर्त्तुं धृतमुदञ्चताम् ॥
निन्दन्ति पापिनो ये वा शालग्रामशिलां सकृत् ।
कुम्भीपाके पचन्त्याशु यावदाहूतसंप्लवम् ॥
पूजां समुद्यतं कर्त्तुं यो वारयति मूढधीः ।
तस्य माता पिता बन्धुः सर्वे नरकगामिनः ॥
यो वै कथयति श्रेष्ठं शालग्रामार्च्चनं कुरु ।
स कृतार्थो नयत्याशु वैकुण्ठं सप्त पूर्व्वजैः ॥"
इति च तत्रैव २० अध्यायः ॥*॥
अन्यच्च ।
श्रीईश्वर उवाच ।
"शालग्रामशिलायान्तु त्रैलोक्यं सचराचरम् ।
सदा वसति तेनात्र विष्णुस्तिष्ठति सर्व्वदा ॥
शालग्रामशिलापूजां प्रकुरुष्व षडानन ।
मद्भक्तमिव महापुण्यां चतुर्व्वर्गफलप्रदाम् ॥
दृष्टेन मनसा येन स्थापिता पूजिता तथा ।
यज्ञकोटिसमं पुण्यं आशु तस्मै प्रयच्छति ॥
छिन्नस्तेन महापाशेन गर्भवासः सुदारुणः ।
पीतं येन सदा विष्णोः शालग्रामशिलाजलम् ॥
कामाद्वतोऽपि यो नित्यं भक्तिभावविवर्ज्जितः ।
शालग्रामशिलां पश्येत् तस्य पापक्षयो भवेत् ॥
शालग्रामशिला विप्र हत्याकोटिविनाशिनी ।
स्मृता संकीर्त्तिता ध्याता पूजिता च नमस्कृता ॥
शालग्रामशिलां दृष्ट्वा यान्ति पापानि देहिनाम् ।
सिंहं दृष्ट्वा यथा यान्ति वने मृगगणा भयात् ॥
नमस्कृत्वा तु यः कुर्य्यात् शालग्रामशिलार्च्चनम् ।
भक्त्या वा यदि वाभक्त्या स मुक्तिं समवाप्नुयात् ॥
यः सेवां कुरुते नित्यं शालग्रामशिलाग्रतः ।
वैवस्वताद्भयं तस्य न स्यान्मरणजन्मनी ॥
शालग्रामशिलाचक्रं पयोदधिघृतादिकैः ।
यः स्नापयति नूनं स कल्पकोटिं वसेद्दिवि ॥
शालग्रामे नमस्कारो भावेनापि च यैः कृतः ।
मानवाः किं करिष्यन्ति मद्भक्त्या ते महीतले ॥
मद्भक्तिरगदर्पिष्ठा मत्प्रभुं न नमन्ति ये ।
वैष्णवास्ते न विज्ञेया मद्भक्ताः पापमोहिताः ।
शालग्रामशिला यत्र तत्र पुत्र वसाम्यहम् ॥
पूजितोऽहं न तैर्मर्त्यैः स्थापितश्च न तैर्नरैः ।
न कृतं मर्त्यलोके यैः शालग्रामशिलार्च्चनम् ॥
किमर्च्चितैर्लिङ्गशतैर्विष्णुभक्तिबहिष्कृतैः ।
शालग्रामशिलाचक्रं नार्च्चितं यदि पुत्रक ॥
जन्मकोटिसहस्रेण पूजिते मयि यत् फलम् ।
तत् फलं समवाप्नोति शालग्रामशिलार्च्चनात् ॥
अनर्घ्यं मम नैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलादृष्टं सर्वं याति पवित्रताम् ॥
नैवेद्यं मे न भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् ।
भुक्त्वा केशवनैवेद्यं कोटिभक्षिफलं लभेत् ॥
सकृदभ्यर्च्चितो विष्णुः शालग्रामशिलास्थितः ।
ददाति विपुलां मुक्तिं सर्वसङ्गविवर्ज्जिताम् ॥
मल्लिङ्गकोटिभिर्दृष्टैर्यत् फलं पूजितैः स्तुतैः ।
तत्फलं समवाप्नोति शालग्रामैकपूजनात् ॥
शालग्रामशिलाचक्रं यो विद्वान् पश्यति ध्रुवम् ।
अर्च्चयेद्वैष्णवो नित्यं तस्य पुण्यं निबोध मे ॥
कोटिलिङ्गसहस्रैर्यत् पूजितैर्जाह्नवीतटे ।
काशीवासादृयुगान्यष्टौ दिनैनैकेन तद्भवेत् ॥
तस्माद्भक्त्यैव मद्भक्तैः प्रीत्यर्थं मम पुत्रक ।
कर्त्तव्यं सर्वदा मर्त्यैः शालग्रामशिलार्च्चनम् ॥
शालग्रामशिलारूपी यत्र तिष्ठति केशवः ।
तत्र देवाः सुरा यज्ञा भुवनानि चतुर्दश ॥
शालग्रामशिलाग्रे यैः सकृच्छ्राद्धं कृतं भवेत् ।
वसन्ति पितरस्तेषां विष्णुलोके न संशयः ॥
ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनम् ॥
प्रायश्चित्ते समुत्पन्ने किं दानैः किमुपोषणैः ।
चान्द्रायणैः किं हि तादृक् पीत्वा पादोदकं शुचिः ॥"
इति पाद्मे उत्तरखण्डे १२७ अध्यायः ॥*॥
कलेर्दशसहस्रवर्षानन्तरं स च भारतं त्यक्ता यास्यति । यथा,—
"शालग्रामो हरेर्मूर्त्तिर्जगन्नाथस्य भारतम् ।
कलेर्दशसहस्रान्ते ययौ त्यक्ता हरेः पदम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः ॥*॥
तस्योत्पत्तिलक्षणादि यथा,—
"शालग्रामसमुत्पत्तिं शृण्वन्तु परमाद्भुताम् ।
गण्डक्या प्राक् तपस्तप्तं भवन्तु मम देवताः ॥
सर्वाः पुत्राः सुखं दातुं जनानामिति ते सुराः ।
तस्यास्तु तपसा तुष्टा ब्रह्मविष्णुमहेश्वराः ॥
वरं दातुं समुद्युक्ता वव्रे सा स्वस्य पुत्रताम् ।
अशक्तास्तं वरं दातुं तदा शप्तास्तया क्रुधा ॥
प्रतारणं मम सुराः कृतं यस्मात् पुनः पुनः ।
कीटयोनिं प्रपद्यध्वं कृष्णास्तोयपरायणाः ॥
अविचार्य्य वयं शप्तास्त्वया यत्तपसोद्यताः ।
तेन कर्म्मविपाकेन जड़ा कृष्णा नदी भव ॥
अन्योन्यशापं श्रुत्वेत्थं महान् कोलाहलोऽभवत् ।
प्रकम्पिताः सुराः सा च ब्रह्माणन्ते व्यजिज्ञपत् ॥
ब्रह्मन् त्राहि महाशापादन्योन्यपतितात् क्रुधा ।
इति देववचः श्रुत्वा ब्रह्मा शङ्करमब्रवीत् ॥
शिवः प्रोवाच धातारमहं संहारकारकः ।
त्वं सृष्टिकर्त्ता विष्णुस्तु पालको बुद्धिमत्तरः ॥
स प्रष्टव्यो यथासङ्गमुभयोः सम्भवेदिति ।
इति माहेश्वरं श्रुत्वा वचनं विष्णुरब्रवीत् ॥
शृणु ब्रह्मन् महादेव शृणु देव गजानन ।
मद्वणौ ब्राह्मणौ शप्तौ शापतोऽत्र तु ॥
भविष्यतस्तयोर्म्मांसं भविष्यामि कलेवरम् ।
शीर्णं भविष्यति यदा तन्मेदोमज्जसम्भवाः ॥
पाषाणान्तर्गता कीटा वज्राख्या प्रभविष्यथ ।
अथैव गण्डकी पुण्या गङ्गातुल्या महानदी ॥
गण्डक्यां गिरिराजस्य दक्षिणे दशयोजनम् ।
विस्तीर्णं तन्मम क्षेत्रं पुण्यक्षेत्रं महीतले ।
चक्रतीर्थमिति ख्यातं त्रिषु लोकेषु विश्रुतम् ॥
शालग्रामगता देवा देवो द्वारावतीगतः ।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥
सर्वदेवप्रीतिकरा भुक्तिमुक्तिप्रदायिनी ।
भवन्त्वस्यान्तु पाषाणा ये तदन्तर्गता सुराः ।
प्रार्थितं स्वं विना सर्वे वज्रकीटा भवन्त्विति ।
अनेनैव तु गण्डक्याः पुत्रत्वं भवतामपि ॥
भविष्यति तदन्तश्च चिह्नं तद्देवतोद्भवम् ।
विज्ञाय येऽर्च्चयिष्यन्ति सा प्रीता तस्य देवता ॥
न यन्त्रस्य न मूर्त्तेश्च न ह्यस्यापि पूजनात् ।
सन्तोषो जायते तेषां गण्डक्यां मज्जनादृयथा ॥
इति विष्णुवचः श्रुत्वा ब्रह्मा वचनमब्रवीत् ॥*॥
कीदृक् पूज्या शिला विष्णोः किच्छिद्रा कस्य वल्लभा ।
किं फलं चाधिकारी च केन मार्गेण तद्वद ॥
इति ब्रह्मवचः श्रुत्वा विष्णुर्वचनमब्रवीत् ।
स्वीयवर्णा शिला पूज्या ब्राह्मणाद्यैः सुखामये ॥
स्निग्धा शिला मनस्सिद्धिं रूक्षा सिद्धिं करोति च ।
मेचका कीर्त्तिता धौताङ्गारवत् सा यशोहरा ॥
पाण्डू रूपार्थशमनी मलिना पापधीकरा ।
पीता पुत्रफलं दद्यादारवर्णा सुतान् हरेत् ॥
नीला संदिशते लक्ष्मीं धूमाभा हरते मतिम् ।
रोगप्रदा रक्तवर्णा सिन्दूराभा महाकलिम् ॥
दारिद्र्यकारिणी वक्रा समा सर्वार्थसाधिका ।

स्थूला निहन्ति चैवायुः सूक्ष्मा स्वल्पमतिं हरेत्
पूजाफलं लाञ्छितया निष्फलं लाञ्छनं विना।
कपिला चित्तवैकल्यं नेत्ररोगञ्च कर्बुरा ॥
भग्ना भङ्गकरी ज्ञेया बहुचक्रापमानताम्।
लक्षणान्तरहीना च देवचक्रा वियोगताम् ॥
हृहन्मुखी कलत्रघ्नी हृहच्चक्रा सुतान् हरेत्।
संलग्नचक्रा त्वसुखं बहुचक्रा महागदम् ॥
भग्नचक्रा तु दारिद्र्यं सर्वनाशं त्वधोमुखी।
कुष्ठादिकं व्यालमुखी विषमा विविधापदम् ॥
विकृतावर्त्तनाभिश्च विकारान् कुरुते बहून्।
वंशच्छेदो गृहस्थानां नारसिंह्यां प्रजायते ॥
रेखार्त्ता दुःखदात्री च यया सूक्ष्मा तथा
सुखम्।
यथा स्निग्धास्तथा लक्ष्मीस्त्रिभेदादः शृणु ॥
लक्ष्मीहरिः स विज्ञेयो यत्र पद्मं सचक्रकम्।
केवला वनमाला वा गृहस्थानामभीष्टदः ॥१॥
वासुदेवः स विज्ञेयो यहारं चक्रयुग्मकम्।
निरन्तरं समं चापि स श्वेतः पापनाशनः ॥२॥
सङ्कर्षणः स विज्ञेयः प्राक् पश्चाच्चक्रयुग्मकम्।
संलग्नपूर्वभागस्थं भद्रदः सुशोभनः ॥ ३ ॥
प्रद्युम्नः सूक्ष्मचक्रः स्याच्छिद्रं दीर्घं विचित्रितम्
सुस्थिरान्तर्वहिश्छिद्रं पीत इष्ट प्रदायकः ॥४॥
अनिरुद्धस्तु नीलाभो वर्त्तुलश्चातिशोभनः।
रेखाद्वयन्तु तद्वारि पृष्ठं पद्मेन लाञ्छितम् ॥५॥
केशवः स तु विज्ञेयस्त्वेकं वा द्वयमेव वा।
प्राग्वा पश्चाच्च चक्रं स्यात् चतुष्कोणः स भाग्य-
कृत् ॥ ६ ॥
नारायणः श्यामवर्णः नाभौ चक्रं तथोन्नतम्।
दीर्घरेखासमायुक्तं दक्षिणे शुषिरं पृथु ॥ ७ ॥
हरिरूपा शिला सा स्यादुर्ध्वस्या ऊर्द्धं मुखं
भवेत्।
हरिवदृश्यते द्वारं भुक्तिमुक्तिप्रदा तु सा ॥८॥
परमेष्ठी स विज्ञेयः पद्मचक्रान्वितस्तु यः।
विस्तीर्णाकृतिश्चक्राभः पृष्ठे च शुषिरं महत्॥९॥
विष्णुस्तु कृष्णवर्णः स्यात् स्थूलचक्रे सुशोभने।
द्वारोपरि तथा रेखा दृश्यते मध्यदेशतः ॥१०॥
नारसिंहस्तु कपिलः पृथुचक्रो हृहन्मुखः।
त्रयो वा पञ्च वा तत्र बिन्दवो गृहिणां न
सत् ॥११॥
कपिलो नरसिंहस्तु गुडलाक्षानिभो भवेत्।
स्थूलचक्रद्वयं मध्ये द्वारे रेखा सुशोभना ॥१२॥
महानृसिंहो विज्ञेयः पूर्वोक्तैर्लक्षणैर्युतः।
रेखाश्च केशराकारा मुखं दीर्घं भयानकम्॥१३
लक्ष्मीनृसिंहो विज्ञेयश्चतुश्चक्रः सबिन्दुकः।
पूर्वोक्तलक्षणैर्युक्तो वनमालाविराजितः ॥१४॥
वराहोऽसौ शक्तिलिङ्गे चक्रे च विषमे तथा।
इन्द्रनीलनिभः स्थूलस्थिरेखालाञ्छितो भवेत्१५
पृथ्वीवाराहनाम्नी सा या वराहाकृतिः शिला।
आभुग्ना चैव रेखैका गतराज्यप्रदायिका ॥१६॥
मत्स्याख्या सा शिला ज्ञेया बिन्दुत्रयविभूषिता
कांस्याङ्गारा स्वर्णनिभा दीर्घा सा भुक्ति-
मुक्तिदा ॥१७॥

कूर्म्माख्या तु शिला पिष्टे वर्त्तुला चोन्नता भवेत्
हरितं वर्णमाबन्तु कीस्तुभेन च चिह्निता ॥
शिलाकूर्म्मः स विज्ञेयः कूर्म्माकारस्तु यो भवेत्।
चक्राङ्किता तथा हत्ता पूजिता सा पदप्रदा॥१८
हयग्रीवोड्डुयाकारा रेखा चक्रा समीपगा।
बहुबिन्दुसमायुक्तं पृष्ठं नीरदनीलकम् ॥१९॥
ज्ञेयः सौम्यहयग्रीवो हयग्रीवासमा शिला।
दीर्घया लेखया युक्ता रेखा वा तादृशी
भवेत् ॥२०॥
हयशीर्षः स विज्ञेयो मुखं यस्य हयाकृति।
पद्माकृति भवेद्वापि साब्जमालं शिरस्तथा॥२१॥
वैकुण्ठस्तिलवर्णाभश्चक्रमेकं तथा ध्वजम्।
हारोपरि तथा रेखा पूज्याकारा सुशोभना॥२२
श्रीधरस्तु तथा देवश्चिह्नितो वनमालया।
कदम्बकुसुमाकाररेखापञ्चकभूषितः ॥२३॥
वामनः स तु विज्ञेयो योऽतिह्रस्वश्च वर्त्तुलः।
अतसीकुसुमप्रख्यो बिन्दुना परिशोभितः ॥२४॥
दधिवामननामा तु ऊर्द्धाधश्चक्रसंयुतः।
महाद्युतिरतिह्रस्वः सुभद्रः क्षेमदायकः ॥२५॥
सुदर्शनस्तथा देवः श्यामवर्णो महाद्युतिः।
वामपार्श्वे तथा चक्रं रेखैकैव तु दक्षिणे ॥२६॥
सहस्रार्जुननामासौ नानारेखामयी भवेत्।
चक्राकारा यन्त्रपङ्क्तिः स नष्टद्रव्यदायकः॥२७
स्थूलो दामोदरो यस्य मध्ये चक्रं प्रतिष्ठितम्।
दूर्वाभं हारसङ्कीर्णः पीतरेखा धनप्रदः ॥२८॥
राधादामोदरो ज्ञेय ऊर्द्धाधश्चक्रवद्दिलम्।
नातिदीर्घं सुरं मध्ये लम्बरेखा स भोगदः॥२९
दामोदरः स विज्ञेयो यश्चक्रद्वयलाञ्छितः।
सूक्ष्मं भवेच्च विवरं पूजितः सुखदः सदा ॥३०॥
अनन्तो बहुवर्णः स्याद्रागभोगेन चिह्नितः।
अनेकचक्रसंभिन्नः सर्वकामफलप्रदः ॥३१॥
पुरुषोत्तमनामासौ यस्य दिक्षु विदिक्षु च।
ऊर्द्धन्यासानि दृश्यन्ते पुरुषार्थफलप्रदः॥३२॥
योगेश्वरः स विज्ञेयो लिङ्गं यस्य शिरोगतम्।
ब्रह्महत्यादिपापानां नाशको योगसिद्धिदः॥३३॥
पद्मनाभस्तथा रक्तः पङ्कजच्छत्रसंयुतः।
तुलस्या पूजितो नित्यं दरिद्रस्त्वीश्वरो भवेत्३४
रश्मिज्वालो हिरण्यास्त्रयन्द्राभः स्फटिको-
पमः।
अथवा जायते नानास्वर्णरेखाभिरन्वितः ॥३५॥
गरुडः स तु विज्ञेयो मध्ये पञ्चद्वयान्विते।
सुदीर्घा दृश्यते रेखा स सर्पविषनाशकः॥३६॥
जनार्दनः स विज्ञेयः केवलानि स्फुटानि च।
यस्योदरे तु चक्राणि चत्वारि पिष्टसंभृतः॥३७
लक्ष्मीनारायणो ज्ञेयो वनमालाङ्कितोदरः।
सूक्ष्मद्वारश्चतुश्चक्रो भुक्तिमुक्तिप्रदायकः ॥३८॥
हृषीकेशः स विज्ञेयो योऽर्द्धचन्द्राकृतिर्भवत्।
तमभ्यर्च्य लभेत् स्वर्गं विषयांश्च समीहितान् ॥
३९ ॥
लक्ष्मीनारहरिर्ज्ञेयः कृष्णवर्णः सबिन्दुकः।
वामपार्श्वे समे चक्रे गृहस्थाभीष्टदायकः॥४०
त्रिविक्रमस्तु विज्ञेयः श्यामवर्णो महाद्युतिः।

वामपार्श्वे चक्रयुग्मेकरेखा तु दक्षिणे ॥४१॥
कृष्णो ज्ञेयः शिला कृष्णा सचक्रा वा विच-
क्रिका।
प्रदक्षिणावर्त्तकृतवनमालाविभूषिता ॥ ४२ ॥
चतुर्मुखः स विज्ञेयो हे चक्रे मध्यदेशतः।
चतस्रः पार्श्वगा रेखा वेदशास्त्रागमप्रदः ॥४३॥
विष्णोर्भेदा इमे प्रोक्ता अत्रैवावाहयेद्धरिम्।
विसर्ज्जयेच्च पूजान्ते प्रतिष्ठां नात्र कारयेत् ॥*॥
शालग्रामाः समाः पूज्या समेषु हितयं न हि।
असमा नैव पूज्यन्ते एकः पूज्यतमो मतः ॥
शिला द्वादश यो नित्यं भक्त्या संपूजयेन्नरः।
दिने दिने धर्म्मवृद्धिः पापनाशश्च जायते ॥
शालग्रामशिलां यस्तु भक्त्या संपूजयेन्नरः।
शतं दिनानि यस्तेन कृतः कामः स सिध्यति ॥*
शालग्रामा मत्स्वरूपाः शृणु तेषान्तु लक्षणम्।
यत्सेवनाद्भवेदिष्टमिह लोके परत्र च ॥
शिवनाभः स विज्ञेयः सलिङ्गाकारताङ्कितः।
स्वयम्भुलिङ्गाकृतिमान् मन्त्रसिद्धिविधायकः॥१
त्र्यम्बकः स तु विज्ञेयो यो बिन्दुत्रयभूषितः।
शूलाकारा तथा रेखा गतपुंस्त्वप्रदायकः ॥२॥
धूर्ज्जटिः स तु विज्ञेयो यत्र रेखा जटासमा।
तिस्रो यत्र प्रदृश्यन्ते सोऽर्चितो ज्ञानदायकः३
शम्भुस्तु पाण्डुरो ज्ञेयो बिन्दुकृष्णस्तु मस्तके।
विल्वप्रमाणस्तेजस्वी पूजितः स्त्रीवशङ्करः ॥४॥
ईश्वरः स तु विज्ञेयो रक्तो बिन्दुस्तु मस्तके।
एकचक्रो द्विचक्रो वाभ्यन्तरेऽथश्च गोपदम् ॥५॥
मृत्युञ्जयः स विज्ञेयः स्वल्पमृत्युविनाशकः।
अधश्चक्रं तदूर्द्धश्च श्वेता रेखा त्रिशूलवान्॥६॥
चन्द्रशेखरनामासावर्द्धचन्द्राकृतिस्त्रिके।
मध्ये चक्रद्वयं तस्य सेवनाद्रोगनाशनम् ॥ ७ ॥
रुद्रः स एव विज्ञेयः कपिलो मूर्द्धि रञ्जितः।
चक्रमध्ये भवेद्रेखा मारयेद्रिपुसन्ततिम् ॥८॥*॥
शालग्रामानथो वक्ष्ये शक्तिकीटसमुद्भवान्।
येषां पूजनतो देवी भवानी सुप्रसीदति ॥
श्रीविद्या सा तले चक्रमूर्द्धे छत्रं प्रदृश्यते।
वाह्ये घण्टाङ्कितो मूर्द्धा स्निग्धा श्यामाखिले-
ष्टदा ॥ १ ॥
महाकाली तु सा ज्ञेया योनिचिह्नसमन्विता॥२
द्विच्छिद्राद्या सर्वशिला त्रिकोणेनाङ्किता च या
यदायुधाकृतियोर्द्धं तां देवीं तत्र निर्दिशेत् ॥
देवीशिला सचक्रा या दक्षमार्गेण तां यजेत्।
सार्चिता वाममार्गेण लोकहृयसुखावहा ॥
या चक्ररहिता देवी शिला तां वामतोऽर्च्च-
येत्।
स्वर्गकार्य्येण विप्राणां नगभां चोभकृद्वेत्॥*॥
सौरिशिला दुर्लभैव प्रायः कलियुगे सुराः।
स्फटिकाभा भवेत् सा तु धर्म्मयुक्ता विमुक्तिदा ॥
तुलस्योर्द्धस्थिते वह्निं साभिसिक्ता प्रवर्षणम्।
कुरुते नृपतेर्मित्या कृते स्यात् कुष्टकारिका॥*
गणेशः स तु विज्ञेयः स्वल्पशुण्डाङ्कितो भवेत्।
शुण्डाकारा शिला वापि गजाननसमापि वा॥*
यस्या मध्ये महच्चक्रं सूक्ष्मचक्रञ्च यद्दिशि।

सा शिला तस्य दिक्यस्य सेव्या तद्विशि
राज्यदा ॥*॥
अर्द्धचन्द्राकृतिर्यत्र दृश्यते शकलद्वयम्।
सा तु चन्द्रशिला त्रासयुक्ता भीमशिला
मता ॥ * ॥
बाणाकारेण चिह्नेन ज्ञेया बुधशिला सुराः।
दीर्घेण चतुरस्रेण युक्ता गुरुशिला मता ॥*॥
पञ्चकोणा तु शुक्रस्य चापाकारा शनेर्मता।
सूर्पाकारा तु राहोः स्यात् केतोस्तु ध्वज-
रूपिणी ॥ * ॥
प्राप्ते कलियुगे घोरे वामाचारविमिश्रिते।
भक्ष्याभक्ष्यविचारादिरहिते म्लेच्छसङ्कुले ॥
कामक्रोधादिभिर्व्याप्ते जने स्त्रीभिर्विनिर्जिते।
क्व शिष्यः क्व गुरुर्मन्त्रः क्व जपः क्व च सिद्धयः ॥
अयुताब्दे कलेर्याते त्यजेद्विष्णुशिला महीम्।
तदर्द्धाज्ज्ञाङ्कवीतोयं तदर्द्धाद्वेतशिला ॥
जप एव कलौ श्रेयान् शालग्रामार्चनं यथा ॥"
इति मेरुतन्त्रे ५ पटलः ॥
अपि च।
तुलस्युवाच।
"हे नाथ ते दया नास्ति पाषाणसदृशस्य च।
छलेन धर्मभङ्गेन मम स्वामी त्वया हृतः ॥
पाषाणहृदयस्त्वञ्च दयाहीनो यतः प्रभो।
तस्मात् पाषाणसदृशस्त्वं भवेह हरऽधुना ॥
श्रीभगवानुवाच।
अहञ्च शैलरूपी च गण्डकीतीरसन्निधौ।
अधिष्ठानं करिष्यामि भारते तव शापतः ॥
वज्रकीटाश्च क्रमयो वज्रदंष्ट्राश्च तत्र वै।
तच्छिलाकुहरे चक्रं करिष्यन्ति मदीयकम् ॥
एकद्वारे चतुश्चक्रं वनमालाविभूषितम्।
नवीननीरदाकारं लक्ष्मीनारायणाभिधम् ॥
एकद्वारे चतुश्चक्रं नवीननीरदोपमम्।
लक्ष्मीजनार्दनं ज्ञेयं रहितं वनमालया ॥
द्वारद्वये चतुश्चक्रं गोष्पदेन समन्वितम्।
रघुनाथाभिधं ज्ञेयं वेष्टितं वनमालया ॥
अतिक्षुद्रं द्विचक्रन्तु नवीननीरदप्रभम्।
दधिवामनं विज्ञेयं गृहिणाञ्च सुखप्रदम् ॥
अतिक्षुद्रं द्विचक्रञ्च वनमालाविभूषितम्।
श्रीधरं देवि विज्ञेयं श्रीपदं गृहिणां सदा ॥
स्थूलञ्च वर्त्तुलाकारं रहितं वनमालया।
द्विचक्रं स्फुटमत्यन्तं ज्ञेयं दामोदराभिधम् ॥
मध्यमं वर्त्तुलाकारं द्विचक्रं बाणचिह्नितम्।
रणरामाभिधं ज्ञेयं शरतूणसमन्वितम् ॥
चतुश्चक्रं स्थूलञ्च नवीनजलदप्रभम्।
अनन्ताख्यञ्च विज्ञेयं चतुर्वर्गफलप्रदम् ॥
मध्यमं सप्तचक्रञ्च शरतूणसमन्वितम्।
राजराजेश्वरं ज्ञेयं राजसम्पत्करं नृणाम् ॥
चक्राकारं द्विचक्रञ्च सश्रीकं जलदप्रभम्।
सगोष्पदं मध्यमञ्च विज्ञेयं मधुसूदनम् ॥
सुदर्शनञ्चैकचक्रं गुप्तचक्रं गदाधरम्।
द्वि चक्रं हयवक्त्राभं हयग्रीव प्रकीर्त्तितम् ॥
अतीवविस्तृतास्यञ्च द्विचक्रं विकटं सति।
नरसिंहाभिधं ज्ञेयं सद्यो वैराग्यदं नृणाम् ॥
द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम्।
लक्ष्मीनृसिंहं विज्ञेयं गृहिणां सुखदं सदा ॥
द्वारदेशे द्विचक्रञ्च सश्रीकञ्च समं स्फुटम्।
वासुदेवञ्च विज्ञेयं सर्वकामफलप्रदम् ॥
प्रद्युम्नं सूक्ष्मचक्रञ्च नवीननीरदप्रभम्।
शुषिरे छिद्रबहुलं गृहिणाञ्च सुखप्रदम् ॥
द्वे चक्रे चैकलग्ने तु पृष्ठे यत्र तु पुष्कलम्।
सङ्कर्षणन्तु विज्ञेयं सुखदं गृहिणां सदा ॥
अनिरुद्धञ्च पीताभं वर्त्तुलञ्चातिशोभनम्।
सुखप्रदं गृहस्थानां प्रवदन्ति मनीषिणः ॥*॥
शालग्रामशिला यत्र तत्र सन्निहितो हरिः।
तत्रैव लक्ष्मीर्वसति सर्वतीर्थससन्विता ॥
यानि कानि च पापानि ब्रह्महत्यादिकानि च।
तानि सर्व्वाणि नश्यन्ति शालग्रामशिलार्च्चनात् ॥
छत्राकारे भवेद्राज्यं वर्त्तुले च भवेत् श्रियः।
दुःखञ्च शकटाकारे शूलाग्रे मरणं ध्रुवम् ॥
विकृतास्ये च दारिद्र्यं छिद्रिले हानिरेव च।
लग्नचक्रे भवेद्धानिर्विघ्नैर्मरणं ध्रुवम् ॥
व्रतं दानं प्रतिष्ठा च श्राद्धञ्च देवपूजनम्।
शालग्रामशिलायाश्च सन्निधानात् प्रशस्तकम् ॥
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः।
सर्वदाने च यत् पुण्यं प्रादक्षिण्याद्भुवस्तया ॥
सर्वयज्ञेषु तीर्थेषु व्रतेष्वनशनेषु च।
पाठे चतुर्णां वेदानां तपसां करणे सति।
तत् पुण्यं लभते नूनं शालग्रामशिलार्च्चनात् ॥
शालग्रामशिलातोयं नित्यं भुङ्क्ते च यो नरः।
सुरेप्सितं प्रसादञ्च जन्ममृत्युजराहरम् ॥
तस्य स्पर्शञ्च वाञ्छन्ति तीर्थानि निखिलानि च
जीवन्मुक्तो महापूतोऽन्ते याति हरेः पदम् ॥
तत्रैव हरिणा सार्द्धमसंख्यं प्राकृतं लयम्।
पश्यन्त्येव हि दास्येव नियुक्तो दास्यकर्म्मणि ॥
यानि कानि च पापानि ब्रह्महत्यादिकानि च
तं दृष्ट्वा च भिया यान्ति वैनतेयमिवोरगाः ॥
तत्पादपद्मरजसा सद्यः पूता वसुन्धरा।
पुंसां लक्षं तत्पितॄणां निस्तरेत्तस्य जन्मनि ॥
शालग्रामशिलातोयं मृत्युकाले च यो लभेत्।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥
निर्व्वाणमुक्तिं लभते कर्म्मभोगादिमुच्यते।
विष्णुपादप्रलीनश्च भविष्यति न संशयः ॥
शालग्रामशिलां धृत्वा मिथ्यावाक्यं वदेत्तु यः।
स याति कूर्म्मदंष्ट्रञ्च यावद्वै ब्रह्मणो वयः ॥
शालग्रामशिलां धृत्वा स्वीकारं यो न पालयेत्
स प्रयात्यसिपत्रञ्च लक्षमन्वन्तरावधि ॥
तुलसीपत्रविच्छेदं शालग्रामं करोति यः।
तस्य जन्मान्तरे कान्ते स्त्रीविश्लेषो भविष्यति ॥
तुलसीपत्रविच्छेदं शङ्खं यो हि करोति च।
भार्य्याहीनो भवेत् सोऽपि रोगी च सप्तजन्मसु ॥
शालग्रामञ्च तुलसीं शङ्खञ्चैकत्र एव च।
यो रक्षति महाज्ञानी स भवेत् श्रीहरिप्रियः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १९ अध्यायः ॥*॥
शूद्राणां तत्पूजनेऽनधिकारो यथा,—
"विप्रक्षत्रियवैश्यानां शालग्रामशिलार्च्चने।
अधिकारो न शूद्राणां हरेरर्च्चार्च्चने तथा ॥"
इति तत्रैव जन्मखण्डे २१ अध्यायः ॥*॥
शालग्रामे सदा विष्णोः स्थितिस्तत्पूजने विशेषञ्च
यथा,—
भूमिरुवाच।
"उक्ता याः प्रतिमाः सर्व्वाः सुवर्णादिविनि-
र्म्मिताः।
तासु तिष्ठसि सर्व्वासु शालग्रामे च सर्वदा ॥
कति पूज्या गृहादौ च अविशेषस्तु पूजने।
विशेषो वा भवेत्तत्र रहस्यं वद माधव ॥
वराह उवाच।
गृहे लिङ्गद्वय नार्च्चा शालग्रामद्वयं तथा।
द्वे चक्रे द्वारकायास्तु नार्च्चा सूर्य्यद्वयं तथा ॥
शालग्रामशिला भग्ना पूजनीया सचक्रका।
खण्डिता स्फुटिता वापि शालग्रामशिला शुभा
शिला द्वादश वै देवि शालग्रामसमुद्भवाः।
विधिवत् पूजिता येन तस्य पुण्यं वदामि ते ॥
कोटिद्वादशलिङ्गेन्तु पूजितैः स्वर्णपङ्कजैः।
यत् स्यात् द्वादशकल्पैस्तु दिनैनैकेन तद्भवेत् ॥
यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतम्।
तत्फलं नैव शक्नोऽहं वक्तुं वर्षशतैरपि ॥
शालग्रामो न स्पृष्टव्यो हीनवर्णैर्वसुन्धरे।
स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मतः ॥
मोहाद्यः संस्पृशेत् शूद्रो योषिद्वापि कदाचन।
स पतेन्नरके घोरे यावदाङ्कतसंप्लवम् ॥
यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुन्धरे।
दूरादेवास्पृशन् पूजां कारयेत् सुसमाहितः ॥
चरणामृतपानेन सर्वपापक्षयो भवेत् ॥
अभक्ष्यं शिवनिर्म्माल्यं पत्रं पुष्पं फलं जलम्।
शालग्रामशिलायोगात् पावनं भवेत् सदा ॥
दद्याद्भक्ताय यो देवि शालग्रामशिलां नरः।
सुवर्णसहितां तेन सपर्वतवनाकरा।
ससमुद्रा भवेद्दत्ता सत्याय वसुन्धरा ॥
शालग्रामशिलायास्तु मौल्यमुद्घाटयेत् क्वचित्।
विक्रेता क्रयकर्त्ता वा नरके वै पतेत् ध्रुवम् ॥
पूजाफलं न शक्नोति वक्तुं वर्षशतैरपि।
एतत्ते कथितं गुह्यं प्रतिमास्थापनं प्रति ॥
शालग्रामे विशेषञ्च लिङ्गादीनाञ्च यो भवेत्।
पूजनादौ विधिश्चापि किमन्यच्छ्रोतुमिच्छसि॥"
इत्यादि वाराहे रौप्यसौवर्णार्च्चास्थापननामा-
ध्यायः ॥ * ॥ अथ शालग्रामशिलामूर्त्तिनिरू-
पणम्।
"चतुर्विंशतिमूर्त्तिः स शालग्रामशिलास्थितः।
द्वारकादिशिलासंस्थो ध्येयः पूज्योऽपि वा हरिः॥
मनसोऽभीप्सितं प्राप्य देवो वैमानिको भवेत्।
निष्कामो मुक्तिमाप्नोति मूर्त्तीर्ध्यायन् स्तुवन्
जपन् ॥"
इत्यादि गारुड़े मूर्त्तामूर्त्तध्यानं ४४ अध्यायः॥
अपि च।
"शङ्खचक्रगदापद्मी केशवाख्यो गदाधरः।
साङ्कोमोदकीचक्रशङ्खी नारायणे विभुः ॥

सचक्रशङ्खाब्जगदो माधवः श्रीगदाधरः ।
गदाब्जशङ्खचक्री वा गोविन्दोऽर्च्यो गदाधरः ॥
पद्मशङ्खासिगदिने विष्णुरूपाय वै नमः ।
शङ्खाब्जचक्रगदिने नमः सङ्कर्षणाय च ॥
सशङ्खसगदाब्जाविधृते प्रद्युम्नमूर्त्तये ।
नमोऽनिरुद्धाय गदाशङ्खाब्जाविविधारिणे ॥
नमो गदासिशङ्खाब्जयुक्तचैविक्रमाय च ।
सासिकौमोदकीपद्मगदिने वामनमूर्त्तये ॥
चक्राब्जशङ्खगदिने नमः श्रीधरमूर्त्तये ।
हृषीकेश साविगदाशङ्खपद्मिन्नमो नमः ॥
साब्जशङ्खगदाचक्रपद्मनाभस्वरूपिणे ।
दामोदर शङ्खगदाचक्रपद्मिन्नमो नमः ॥
साविशङ्खगदाब्जाय वासुदेवाय वै नमः ।
शङ्खाब्जचक्रगदिने नमः सङ्कर्षणाय च ॥
साब्जशङ्खगदाचक्रपुरुषोत्तममूर्त्तये ।
नमोऽधोक्षजरूपाय गदाशङ्खासिपद्मिने ॥
नृसिंहमूर्त्तये पद्मगदाशङ्खाब्जधारिणे ।
पद्माब्जशङ्खगदिने नमोस्वच्युतमूर्त्तये ॥
सशङ्खचक्राब्जगदं जनार्दनमिहानमे ।
उपेन्द्रं सगदं साविं पद्मशङ्खिन्नमो नमः ।
सुचक्राब्जगदाशङ्खयुक्ताय हरिमूर्त्तये ।
मगदाब्जाविशङ्खाय नमः श्रीकृष्णमूर्त्तये ॥
शालग्रामशिलाहारगतलग्नद्विचक्रधृक् ।
शुक्लाभो वासुदेवाख्यः सोऽव्याद्दः श्रीगदाधरः॥
लग्नद्विचक्रो रक्ताभः पूर्वभागे तु पुष्कलः ।
सङ्कर्षणोऽथ प्रद्युम्नः सूक्ष्मचक्रस्तु पीतकः ॥
सदीर्घशुषिरच्छिद्रो योऽनिरुद्धस्तु वर्त्तुलः ।
नीलो हारि त्रिरेखश्च अथ नारायणोऽसितः ॥
मध्ये गदाकृतो रेखा नाभिचक्रमहोन्नतः ।
पृथुचक्रो नृसिंहोऽथ कपिलोऽव्यात् त्रिबिन्दुकः ॥
अथवा पञ्चबिन्दुस्तत्पूजनं ब्रह्मचारिणः ।
वराहः शक्तिलिङ्गोऽव्याद्दियमद्दयचक्रकः ॥
नीलश्चीरेखः स्थूलोऽथ कूर्ममूर्त्तिः स बिन्दुमान् ।
कृष्णः सवर्त्तुलावर्त्तः पातु वोन्नतशृङ्गकः ॥
श्रीधरः पञ्चरेखोऽव्याद्दनमाली गदान्वितः ।
वामनो वर्त्तुलो ह्रस्वो वामचक्रः सुरेश्वरः ॥
नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनन्तकः ।
स्थूलो दामोदरो नीलो मध्ये चक्रः सनीलकः॥
संकीर्णद्वारको वोऽव्यादथ ब्रह्मा सुलोहितः ।
सदीर्घरेखः शुषिर एकचक्राम्बुजः पृथुः ॥
पृथुच्छिद्रस्थूलचक्रः कृष्णो विष्णुश्च बिन्दुवत् ।
हयग्रीवोऽङ्कुशाकारः पञ्चरेखः सकौस्तुभः ॥
वैकुण्ठो मणिरत्नाभ एकचक्राम्बुजोऽसितः ।
मत्स्यो दीर्घोऽम्बुजाकारो द्वाररेखश्च पातु वः॥
वामचक्रो दरीरेखः श्यामो वोऽव्यात्त्रिविक्रमः।
शालग्रामे द्वारकायां स्थिताय गदिने नमः ॥
एकेन लक्षितो योऽव्याद्गदाधारी सुदर्शनः ।
एकद्वारे चतुश्चक्रं वनमालाविभूषितम् ॥
स्वर्णरेखासमायुक्त गोष्पदेन विराजितम् ।
कदम्बकुसुमाकारं लक्ष्मीनारायणं विदुः ॥
लक्ष्मीनारायणौ द्वाभ्यां त्रिभिर्मूर्त्तिस्त्रिविक्रमः ।
चतुर्भुजश्चतुर्व्यूहो वासुदेवश्च पञ्चभिः ॥
प्रद्युम्नः षड्भिरेव स्यात् सङ्कर्षण इतस्ततः ।
पुरुषोत्तमोऽष्टभिः स्याच्चवव्यूहो नवोन्नतः ॥
दशावतारो दशभिरनिरुद्धोऽवताट्य ।
द्वादशात्मा द्वादशभिरत ऊर्द्धमनन्तकः ।
विष्णोर्मूर्त्तिमयं स्तोत्रं यः पठेत् स दिवं व्रजेत् ॥"

इति गारुड़े ४५ अध्यायः ॥ * ॥

अपरञ्च ।

हरिरुवाच ।

"निर्लक्षणा शुभा स्याच्च चक्राङ्कितशिलार्च्चनात् ।
आदौ सुदर्शनो मूर्त्तिर्लक्ष्मीनारायणोऽपरः ॥
त्रिचक्रोऽसावच्युतः स्यात् चतुश्चक्रश्चतुर्भुजः ।
वासुदेवश्च प्रद्युम्नस्ततः सङ्कर्षणः स्मृतः ॥
पुरुषोत्तमो ह्यष्टमः स्याच्चवव्यूहो दशात्मकः ।
एकादशोऽनिरुद्धः स्याद्द्वादशो द्वादशात्मकः ॥
अत ऊर्द्धमनन्तः स्याच्चक्रैरेकादिकैः क्रमः ।
सुदर्शनाद्या लक्षिताश्च पूजिताः सर्वकामदाः ॥
शालग्रामशिला यत्र देवो द्वारवतीभवः ।
उभयोः सङ्गमो यत्र तत्र मुक्तिर्न संशयः ॥"

इति गारुड़े ६५ अध्यायः ॥*॥

क्षेत्रविशेषः - यथा,—

धरण्युवाच ।

"भगवन् देवदेवेश शालङ्कायनको मुनिः ।
किं चकार तपः कुर्वन् तव क्षेत्रे विमुक्तिदे ॥

वाराह उवाच ।

अथ दीर्घेण कालेन स ऋषिः संशितव्रतः ।
तप्यमानो यथान्यायं पश्यते शालमुत्तमम् ॥
विश्रामं कुरुते तत्र द्रष्टुकामोऽथ मां मुनिः ।
मायया मम मूढात्मा शक्तो द्रष्टुं न मामभूत् ॥
ततः पूर्वेण पार्श्वेन तस्य शालस्य सुन्दरि ।
वैशाखमासहादश्यां मद्दर्शनमुपागतः ॥
दृष्ट्वा मां तत्र स मुनिस्तपस्वी शंसितव्रतः ।
तुष्टाव वैदिकैः सूक्तैः प्रणम्य च पुनः पुनः ॥
ततोऽहं स्तूयमानो वै ऋषिमुख्येन सुन्दरि ।
प्राप्तोऽस्मि परमां प्रीतिं तमवोचं ततः ऋषिम्
तत्रास्मि महाभाग स्थित्वा त्वं तपसां निधे ।
पुत्रेण परमप्रीतो मत्क्षेत्रे मत्समो भव ॥
अन्यच्च गुह्यं वक्ष्यामि शालङ्कायन तच्छृणु ।
तव प्रीत्या प्रवक्ष्यामि यैनैतत् क्षेत्रमुत्तमम् ॥
शालग्राममिति ख्यातं तन्निबोध सुने शुभम् ।
योऽयं त्वयास्वया दृष्टः सोऽहमेव न संशयः ॥
एतत् कोऽपि न जानाति विना देवं महेश्वरम्
एवं तस्मै वरं दत्त्वा शालङ्कायनकाय वै ॥
पश्यतस्तस्य वसुधे तत्रैवान्तर्हितोऽभवत् ।
दत्तं दक्षिणतः कृत्वा जगाम स्वाश्रमं मुनिः ॥
मम तद्रोचते स्थानं गिरिकूटशिलोच्चये ।
शालग्राम इति ख्यातं भक्तसंसारमोक्षणम् ॥"

इति वाराहे शालग्रामक्षेत्रमाहात्म्यवर्णननामाध्यायः ॥

शालग्रामगिरिः, पुं, (शालग्रामस्य गिरिः ।) शालग्रामोत्पादकपर्व्वतः । यथा,—

वाराह उवाच ।

"कथयिष्यामि ते गुह्यं शालग्राममिति श्रुतम् ।
तस्मिन् क्षेत्रे हरो देवो मत्स्वरूपेण संयुतः ॥
शालग्रामे गिरौ तस्मिन् शिलारूपेण तिष्ठति ।
अहं तिष्ठामि तत्रैव गिरिरूपेण नित्यता ॥
तस्मिन् शिलाः समग्रास्तु मत्स्वरूपा न संशयः
पूजनीयाः प्रयत्नेन किं पुनश्चक्रलाञ्छिताः ॥
लिङ्गरूपेण तु हरस्तत्र देवालये गिरौ ।
शिवनाभाः शिलास्तत्र चक्रनाभास्तथा शिलाः॥
सोमेश्वराधिष्ठितस्तु शिवरूपो गिरिः स्मृतः ।
शालग्रामगिरिर्विष्णुरहं सोमेश्वराधिपः ॥
तयोः पर्वतयोर्यो वै शिला विष्णुशिलाभिधाः ॥
रेवया च कृतं पूर्वं तपः शिवसुतुष्टिदम् ।
मम त्वत्सदृशः पुत्रो भूयादभिहितस्तया ॥
अहं कस्यापि न सुतः किं करिष्यामि चिन्तयन् ।
रेवायास्तु वरो देयस्त्ववश्यं मृगलाञ्छन ।
निश्चित्यैवं तदा प्रोक्तं प्रसन्नेनान्तरात्मना ॥
लिङ्गरूपेण ते देवि गजाननपुरस्कृतः ।
गर्भे तव वसिष्यामि पुत्रो भूत्वा शिवप्रिये ॥
मम त्वमपरा मूर्त्तिः ख्याता जलमयी शिवा ।
शिवशक्तिविभेदेन आवामेकत्व संस्थितौ ॥
एवं दत्तवरा रेवा मत्सान्निध्यमिहागता ।
रेवाखण्डमिति ख्यातं ततः प्रभृति गोपते ॥*॥
गण्डक्यापि पुरा तप्तं वर्षाणामयुतं विधे ।
शीर्णपर्णाशनं कृत्वा वायुभक्षाप्यनन्तरम् ॥
दिव्यं वर्षशतं तेपे विष्णुं चिन्तयती तदा ।
ततः साच्याज्जगन्नाथो हरिर्भक्तजनप्रियः ॥
उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः ।
गण्डकि ! त्वां प्रसन्नोऽस्मि तपसा विस्मितेऽनघे
अनवच्छिन्नया शक्त्या वरं वरय सुव्रते ।
किं देयं तदद्यास्या प्रीतोऽस्मि वरवर्णिनि ॥
गण्डक्यपि पुरो दृष्ट्वा शङ्खचक्रगदाधरम् ।
दण्डवत् प्रणता भूत्वा ततः स्तोत्रं प्रचक्रमे ॥
अहो देव मया दृष्टो दुर्दर्शो योगिनामपि ।
त्वया सर्व्वमिदं सृष्टं जगत् स्थावरजङ्गमम् ॥
ततो हिमांशे सा देवी गण्डकी लोकतारिणी।
प्राञ्जलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत् ॥
यदि देव प्रसन्नोऽसि देयो मे वाञ्छितो वरः ।
मम गर्भगतो भूत्वा विष्णो मत्पुत्रतां व्रज ॥
ततः प्रसन्नो भगवान् चिन्तयामास गोपते ।
किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया ॥
दास्यामि याचितं येन लोकानां भवमोचणम् ।
इत्येवं कृपया देवो निश्चित्य मनसा स्वयम् ॥
गण्डकीं कथयामास शृणु देवि वचो मम ।
शालग्रामशिलारूपी तव गर्भगतः सदा ॥
तिष्ठामि तव पुत्रत्वे भक्तानुग्रहकारणात् ।
मत्सान्निध्यात्तदीनां त्वमतित्रेष्ठा भविष्यसि ॥
दर्शनात् स्पर्शनात् स्नानात् पानाच्चैवावगाहनात् ।

हरिष्यसि महापापं वाङ्मनः कायसम्भवम्॥"
इति वाराहे सौमेश्वरादिलिङ्गमहिमावमुक्ति-क्षेत्रविवेश्वादिमहिमानामाध्यायः ॥

शालङ्कटङ्कटः, पुं, सुकेशीराक्षसः। स विद्युत्-केशिभार्य्यायाशालङ्कटङ्कटायाः पुत्रः। इति वामनपुराणम् ॥

शालङ्कायनः, पुं, (शलङ्कस्यापत्यम्। "नडादिभ्यः फक्।" ४।१।९९। इति फक्।) मुनिविशेषः। मन्दी। इति मेदिनी ॥

शालङ्कायनजीवसूः, स्त्री, व्यासमाता। यथा,—
"व्यासस्याम्बा सत्यवती वासवी गन्धकालिका।
योजनगन्धा दाशेयी शालङ्कायनजीवसूः ॥"
इति हेमचन्द्रः ॥

शालङ्किः, पुं, मुनिभेदः। यथा,—
"वशिष्ठोऽरुन्धतीनाथो मैत्रावरुणिरित्यपि।
शालातुरीयः शालङ्किर्दाक्षीपुत्रस्तु पाणिनिः॥"
इति जटाधरः ॥

शालजः, पुं, (शालाज्जायते इति। अन्+डः।) शालमत्स्यः। यथा। शालः शालजगर्जकौ। इति शब्दरत्नावली ॥

शालनिर्यासः, पुं, (शालस्य निर्यासः।) सर्ज-रसः। धुना इति भाषा। तत्पर्य्यायः। शालनः २ सर्जः ३ सर्जरसः ४। इति रत्नमाला ॥ धूनकः ५ वह्निवल्लभः ६ सर्जमणिः ७। इति त्रिकाण्डशेषः ॥

शालपर्णी, स्त्री, (शालस्य पर्णवत् पर्णमस्याः। ङीष्) वृक्षविशेषः। शालपाणी इति भाषा। तत्पर्य्यायः। सुदला२ सुपत्री ३ स्थिरा ४ सौम्या५ कुमुदा ६ गुहा ७ ध्रुवा ८ विदारिगन्धा ९ अंशुमती १० सुपर्णिका ११ दीर्घमूला १२ दीर्घपत्रिका १३ वातघ्नी १४ पीतिनी १५ तन्वी १६ सुधा १७ सर्व्वानुकारिणी १८ गोफल्ली १९ सुभगा २० देवी २१ निश्चला २२ व्रीहिपर्णिका २३ सुमूला २४ सुरूपा २५ शुभपत्रिका २६ सुपर्णी २७ शालिपत्री २८ शालिदला २९। इति राजनिर्घण्टः। विदारी ३० सालपर्णी ३१। इत्यमरटीकायां भरतः ॥ अस्या गुणाः। ग्राहित्वम्। कफपित्तनाशित्वञ्च। इति राजवल्लभः ॥ तिक्तत्वम्। गुरुत्वम्। उष्णत्वम्। वातदोषविषमज्वरमेहार्शः-शोकसन्तापनाशित्वञ्च। इति राजनिर्घण्टः ॥ अपिच।
"शालपर्णी स्थिरा सौम्या त्रिपर्णी पीवरा गुहा।
विदारिगन्धा दीर्घाङ्घ्रिर्दीर्घपत्रांशुमत्यपि ॥
शालपर्णी गरश्छर्द्दिज्वरश्वासातिसारजित्।
शोषदोषत्रयहरी बृंहण्युक्ता रसायनी।
तिक्ता विषहरी स्वादुः शतकाण्डकृमिप्रणुत्॥"
इति भावप्रकाशः ॥

शालभञ्जिका, स्त्री, (शालेन भज्यते निर्म्मीयते इति भञ्ज+"कृञ् ग्रिप्सिसंश्रयोरपूर्वस्यापि।" उणा० २।३२। इति कृञ्। टापि अत इत्वम्। काष्ठादिनिर्म्मितपुत्रिका। (यथा, राजतरङ्गिण्याम्। २। ६६।
"अलोलकीर्त्तिकल्लोलदुकूलवसनोज्ज्वलाम्।
बभार यङ्कुजस्तम्भो जयश्रीशालभञ्जिकाम्॥")
वेश्या। इति जटाधरः ॥

शालभञ्जी, स्त्री, काष्ठादिनिर्म्मितपुत्रिका। इति हेमचन्द्रः ॥

शालवः, पुं, लोध्रः। इति शब्दरत्नावली ॥

शालवेष्टः, पुं, (शालस्य वेष्टो निर्य्यासः।) शाल-निर्य्यासः। इति त्रिकाण्डशेषः ॥

शालसारः, पुं, (शालस्य सारः।) द्रुमः। हिङ्गुः। इति विश्वः ॥

शाला, स्त्री, (शो+"बाहुलकात् श्यतेरपि कालन्।" इत्युज्वलदत्तोक्त्या कालन्।१।११७। गृहम्। इत्यमरः ॥ (यथा, भागवते।८।८।१६।
"धूपामोदितशालायां जुष्टायां माल्यदीपकैः।")
वृक्षस्य स्कन्धशाखा। गृहैकदेशः। इति मेदिनी ॥

शालाकी, [न्] पुं, अस्त्रवैद्यः। नापितः। शैल-धारी। इति केचित् ॥

शालाङ्की, स्त्री, पुत्तलिका। इति शब्दरत्नावली॥

शालाजिरः, पुं, क्ली, सरावः। इति हेमचन्द्रः शब्दरत्नावली च ॥

शालाक्षिः, स्त्री, शाकभेदः। इति शब्दरत्नावली

शालानी, स्त्री, विदारी। इति शब्दरत्नावली ॥

शालामृगः, पुं, (शालाया मृगः।) शृगालः। इति हारावली ॥

शालारं, क्ली, (शालां ऋच्छतीति। ऋ+अण्।) हस्तिनखः। सोपानम्। पक्षिपञ्जरः। इति मेदिनी ॥

शालाहकः, पुं, (शालायां गृहे शाखायां वा हक इव।) वानरः। कुक्कुरः। शृगालः। इत्यमरः ॥ मृगः। इति शब्दरत्नावली। विड़ालः। इति राजनिर्घण्टः ॥

शालिः, पुं, (शृणातीति। शॄ+बाहुलकात् इञ्। रस्य लत्वम्।) गन्धमार्জ্জারः। इति मेदिनी ॥ कलमादिधान्यम्। षष्टिकादिधान्यम्। इत्यमरः ॥ तत्पर्य्यायः। मधुरः२। रूक्षः ३ व्रीहि-श्रेष्ठः ४ नृपप्रियः ५ धान्योत्तमः ६ केदारः ७ सुकुमारकः८। पुस्त्रीकान्तरे मधुरस्थाने कलम इति पाठः। स तु दशविधः। यथा,—
"राजान्नषष्टिकसितेतररक्तमण्ड-
खूलाणुगन्धतिरियादिकशालिसंज्ञाः।
व्रीहिस्त्वेति दशधा भुवि शालयः स्यु-
स्तेषां क्रमेण गुणनामगणं ब्रवीमि॥"
इति राजनिर्घण्टः ॥

अस्य गुणाः।
"शालयो मधुराः शीता लघुपाका बलावहाः।
पित्तघ्नाश्चानिलकफाः स्निग्धा बल्याल्पवर्चसः॥"
इति राजवल्लभः ॥*॥

अथ शालिधान्यलक्षणम्।
'काण्डेन विना शुक्ला हैमन्ताः शालयः स्मृताः॥'

शालीनां नामानि यथा,—
"रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः।
सुगन्धकः कर्दमको महाशालिश्च दूषकः॥
पुण्याण्डकः पुण्डरीकस्तथा महिषमस्तकः।
दीर्घशूकः काञ्चनको हायनो लोध्रपुष्पकः।
इत्याद्याः शालयः सन्ति बहवो बहुदेशजाः॥"
अथ तेषां गुणाः।
"शालयो मधुराः स्निग्धा बल्या बल्याल्पवर्चसः।
कषाया लघवो रूक्षा स्वर्य्या हृद्याश्च बृंहणाः॥
अल्पानिलकफाः शीताः पित्तघ्ना मूत्रलास्तथा।
शालयो दग्धभूजाताः कषाया लघुपाकिनः॥
सृष्टमूत्रपुरीषाश्च रूक्षाः श्लेष्मापकर्षणाः।
केदारा वातपित्तघ्ना गुरवः कफशुक्रलाः॥
कषाया अल्पवर्च्चस्का मधुराश्च बलावहाः॥"
केदाराः कृष्टक्षेत्रजा उक्ताः।
"स्थलजाः स्वादवः पित्तकफघ्ना वातवर्द्धिदाः।
किञ्चित्तिक्ताः कषायाश्च विपाके कटुका अपि॥"
स्थलजा अकृष्टभूमिजाः स्वयंजाताः।
"वापिता मधुरा हृद्या बल्याः पित्तप्रणाशनाः॥
श्लेष्मलाश्चाल्पवर्च्चस्काः कषाया गुरवो हिमाः॥"
वापिताः कृष्टक्षेत्रे अकृष्टक्षेत्रे च।
"वापिकेभ्यो गुणैः किञ्चिद्धीनाः प्रोक्ता अवापिताः॥"
कृष्टक्षेत्रे अकृष्टक्षेत्रे च।
"रोपितास्तु नवा हृद्याः पुराणा लघवः स्मृताः।
रोपितारोपिता भूयः शीघ्रपाका गुणाधिकाः॥
छिन्नरूढ़ा हिमा रूक्षा बल्याः पित्तकफापहाः।
बहुविट्काः कषायाश्च लघवश्चाल्पतिक्तकाः॥"

अथ रक्तशालेर्गुणाः॥
"रक्तशालिर्वरस्तेषु बल्यो वर्ण्यः स्निदोषजित्।
चक्षुष्यो मूत्रलः स्वर्य्यः शुक्रलस्तृड्ज्वरापहः।
विषव्रणश्वासकासदाहनुद्वह्निपुष्टिदः।
तस्मादल्पान्तरगुणाः शालयो महदादयः॥"
रक्तशालिः दाउदखानी इति मगधदेशे प्रसिद्धः इति भावप्रकाशः॥ (पत्री। इत्युणादिवृत्तौ उज्ज्वलः। ४। १२७॥)

शालिका, स्त्री, (शालिरेव। स्वार्थे कन्।) विदा-दिका। इति शब्दरत्नावली ॥

शालिञ्चः, पुं, शाकविशेषः। शाञ्चा इति भाषा। तत्पर्य्यायः। शालञ्चः२ शितसारः३ पत्रकेष्टः ४ लोहसारकः ५। अस्य गुणाः। दीपनत्वम्। तिक्तत्वम्। ग्रीहार्शःकफवातनाशित्वञ्च। इति राजनिर्घण्टः ॥

शालिञ्ची, स्त्री, (शालिञ्च+स्त्रियां ङीष्।) शाकभेदः। शाञ्चे इति भाषा। अस्य प्रमाणं शोल्फशब्दे द्रष्टव्यम्॥

शालिनीकरणं, क्ली, न्यग्भावनम्। इति त्रिकाण्ड-शेषः ॥ तिरस्कार इति यावत् ॥

शालिपर्णी, स्त्री, (शालेरिव पर्णानि यस्याः। ङीष्।) माषपर्णी। इति राजनिर्घण्टः ॥

शालिपिष्टं, क्ली, (शालेः पिष्टमिव शुभ्रत्वात् ।) स्फटिकम् । इति त्रिकाण्डशेषः ॥
शालिवाहनः, पुं, राजविशेषः । स तु शकर्त्ता विक्रमादित्यशत्रुश्च ॥
शालिहोत्रः, पुं, घोटकः । इति त्रिकाण्डशेषः ॥
शाली, [न्] त्रि, (शालास्यास्तीति । इनिः ।) शालाविशिष्टः । पदान्ते युक्तवाचकः । यथा,—
"चन्दनचर्चितनीलकलेवरपीतवसनवनमाली ।
केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मित-
शाली ॥"
इति जयदेवः ॥
(श्राध्यः । यथा, भागवते । ३ । २५ । १ ।
"दायालुः शालिनीमाद्य शुक्लाभिर्व्याहृतं स्मरन् ॥")
शाली, स्त्री, क्षणजीवकः । इति राजनिर्घण्टः ॥
शालीनः, त्रि, (शालाप्रवेशनमर्हतीति । शाला + "शालीनकौपीने अधृष्टाकार्य्ययोः ।" ५ । २ । २० इति खञ्प्रत्ययेन निपातनात् सिद्धम् ।) अधृष्टः । इत्यमरः ॥ (यथा, मार्कण्डेये । ४१ । ८ ।
"अथ नित्यं गृहस्थेषु शालीनेषु चरेद्यतिः ॥")
शालासम्बन्धी च ।
शालीना, स्त्री, (शालीन + टाप् ।) मिश्रया । इति राजनिर्घण्टः ॥
शालु, क्ली, (शृणाति शीतागमे । शॄ + बाहुलकात् उण् रेफस्य लत्वञ्च । इत्युज्ज्वलः । १ । ५ ।) शालूकम् । इति शब्दरत्नावली ॥
शालुः, पुं, (शॄ + उण् रेफस्य लत्वञ्च ।) कषाय-द्रव्यम् । चौरकाख्यौषधिः । इति मेदिनी ॥ भेकः । इति हेमचन्द्रः ॥
शालुकं, क्ली, कुमुदादिमूलम् । तत्पर्य्यायः । पद्म-शूरणम् २ शालूकः ३ शालु ४ । इति शब्द-रत्नावली ॥
शालूकं, क्ली, (शल + "शलिमण्डिभ्यामूकण् ।" उणा० ४ । ४२ । इति ऊकण् ।) कुमुदादि-मूलम् । इत्यमरः ॥ जातीफलम् । इति राज-निर्घण्टः ॥
शालूकः, पुं, (शल + "शलिमण्डिभ्यामूकण् ।" उणा० ४ । ४२ । इत्यूकण् ।) कुमुदादिमूलम् । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे हिता-याम् । ४१ । ३ ।
"मिथुनेषि धान्यशारदवल्लीशालूककार्पासाः ॥")
मण्डूकः । इति राजनिर्घण्टः ॥
शालूरः, पुं, शलति भुवेन गच्छतीति । शल + "खल्लिपिल्लादिभ्यः ऊरोलचौ ।" उणा० ४ । ८० । इति ऊरः । (भेकः । इत्यमरः ॥
शालेयं, त्रि, (शालीनां क्षेत्रम् । शालि + "व्रीहि-शाल्योर्ढक् ।" ५ । २ । २ । इति ढक् ।) शाल्युद्भव-क्षेत्रम् । इत्यमरः ॥ शालासम्बन्धि शालसम्बन्धि च ॥
शालेयः, पुं, मधुरिका इत्यमरः ॥
शालेया, स्त्री, (शालेय + टाप् ।) मिश्रेया । इति राजनिर्घण्टः ॥

शालोत्तरीयः, पुं, (शालोत्तरे ग्रामे भवः । शालो-त्तर + छः ।) पाणिनिमुनिः । इति त्रिकाण्ड-शेषः ॥
शाल्मलः, पुं, शाल्मलीवृक्षः । इति शब्दरत्ना-वली ॥ (यथा, महाभारते । ३ । ६४ । १ ।
"अर्জ্জুনारिष्टसञ्छन्नं स्यन्दनैश्च सशाल्मलैः ॥")
द्वीपविशेषः । इति शब्दमाला ॥ तद्विवरणं यथा,—
"अत ऊर्द्ध्वं प्रवक्ष्यामि शाल्मलस्य निबोधत ।
शाल्मलो द्विगुणो द्वीपः क्रौञ्चद्वीपस्य विस्तरात् ॥
परिवार्य्य समुद्रन्तु दधिमण्डोदकं स्थितः ।
तत्र पुण्या जनपदाश्चित्राश्च स्त्रियते जनः ॥
कुत एव सुदुर्भिक्षं क्षमातेजोयुता हि ते ।
प्रथमः सूर्य्यसङ्काशः सुमना नाम पर्वतः ॥
पीतस्तु मध्यमस्तत्र शातकौम्भमयो गिरिः ।
नाम्ना सर्वसुखो नाम दिव्यौषधिसमन्वितः ॥
तृतीयश्चैव सौवर्णो भृङ्गपत्रनिभो गिरिः ।
स नाम्ना रोहितो नाम दिव्यो गिरिवरो महान् ॥
सुमनाः कुशलो देशः सुखोदर्कः सुखोदयः ।
रोहितस्तु तृतीयस्तु रोहिणी नाम विश्रुतः ॥
तत्र रत्नान्यनेकानि स्वयं रचति वासवः ।
प्रजापतिमुपादाय प्रसन्नो विधिवत् स्वयम् ॥
न तत्र नद्यो वर्षं वा शीतोष्णञ्चैव तद्विधम् ।
वर्णाश्रमाणां वार्त्ता वा त्रिषु द्वीपेषु विद्यते ॥
न तृष्णं न च दण्डोऽस्ति ईर्ष्यासूया भयं तथा ।
उद्विद्यान्युदकान्यत्र गिरिप्रस्रवणानि च ॥
भोजनं षड्रसं तत्र तेषां स्वयमुपस्थितम् ।
अधर्मोत्तमो न तेष्वस्ति न लोभो न परिग्रहः ॥
अरोगा बलवन्तश्च एकान्तसुखिताः प्रजाः ।
त्रिंशद्वर्षसहस्राणि मानसीं सिद्धिमाश्रिताः ॥
स्वस्वमायुःस्वरूपञ्च धर्म्मश्चार्य्यं तथैव च ।
शाल्मलाद्येषु विज्ञेयं द्वीपेषु त्रिषु सर्वशः ॥
व्याख्यातः शाल्मलाद्यानां द्वीपानान्तु विधिः शुभः ।
परिमण्डलस्तु स द्वीपश्चक्रवत् परिवेष्टितः ।
सुरोदेन समुद्रेण द्विगुणेन समन्वितः ॥"
इति मत्स्यपुराणे भुवनकोषे सप्तद्वीपनिवेशनं नाम १०० अध्यायः ॥ * ॥ अपि च ।
"प्लक्षद्वीपप्रमाणात्तु द्विगुणेन समन्ततः ।
संवेष्ट्य क्षुरसाम्भोधिं शाल्मलिः संव्यवस्थितः ॥
सप्त वर्षाणि तत्रैव तत्रैव कुलपर्वताः ।
ऋज्वायताः सुपर्वाणः सप्त नद्यश्च सुव्रताः ॥
कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः ।
द्रोणः कर्णस्तु महिषः ककुद्मान् सप्त पर्वताः ॥
योनितोया विशृष्टा च चन्द्रा शुक्ला विमोचनी
निवृत्तिश्चेति ता नद्यः स्मृताः पापहराः शिवाः ॥
न तेषु विद्यते लोभः क्रोधो वा द्विजसत्तमाः ।
न चैवास्ति युगावस्था जना जीवन्त्यनामयाः ॥
यजन्ति सततं तत्र वर्षा वायुं सनातनम् ।
तेषां तस्याथ सायुज्यं सारूप्यञ्च सलोकताम् ॥

कपिला ब्राह्मणाः प्रोक्ता राजानश्चारुणास्तथा ।
पीता वैश्यास्तथा कृष्णा द्वीपेऽस्मिन् कृषला द्विजाः ॥")
इति कौर्म्मे भुवनविन्यासे ४६ अध्यायः ॥ * ॥
मोचरसः । इति रत्नमाला ॥
शाल्मलिः, पुं स्त्री, वृक्षविशेषः । शिमुल इति भाषा ॥ (यथा मनौ । ८ । ४६ ।
"शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पाद-पान् ॥")
तत्पर्य्यायः । पिच्छिला २ पूरणी ३ मोचा ४ स्थिरायुः ५ । इत्यमरः ॥ दुरारोहा ६ शाल्म-लिनी ७ शाल्मलः ८ । इति शब्दरत्नावली ॥ तूलिनी ९ कुक्कुटी १० रक्तपुष्पा ११ कण्ट-कारी १२ मोचनी १३ । इति जटाधरः ॥ चिरजीवी १४ पिच्छिलः १५ रक्तपुष्पकः १६ तूलवृक्षः १७ मोचाख्यः १८ कण्टकद्रुमः १९ रक्तेत्पलः २० रम्यपुष्पः २१ बहुवीर्य्यः २२ यमद्रुमः २३ दीर्घद्रुमः २४ स्थूलफलः २५ दीर्घायुः २६ । इति राजनिर्घण्टः ॥ कण्ट-काढ्यः २७ । इति भावप्रकाशः ॥ अस्य गुणाः । पिच्छिलत्वम् । हृद्यत्वम् । बल्यत्वम् । मधु-रत्वम् । शीतलत्वम् । कषायत्वम् । लघुत्वम् । स्निग्धत्वम् । शुक्रश्लेष्मवर्द्धनत्वञ्च । तद्रसगुणाः । ग्राहित्वम् । कषायत्वम् । कफनाशित्वञ्च ॥ तत्पुष्पं फलञ्च तद्विधम् । इति राजनिर्घण्टः । "शाल्मली शीतला स्वादी रसे पाके रसायनी ।
श्लेष्मला स्निग्धबीजा च हृद्दृष्टी रक्तपित्तजित् ॥
शाल्मलीपुष्पशाकन्तु घृतसैन्धवसाधितम् ।
प्रदरं नाशयत्येव दुःसाध्यञ्च न संशयः ॥
रसे पाके च मधुरं कषायं शीतलं गुरु ।
कफपित्तास्रजिद्ग्राहि वातलञ्च प्रकीर्त्तितम् ॥"
इति भावप्रकाशः ॥*॥
नरकविशेषः । तत्र शाल्मलिकण्टकैः पीड्यन्ते ॥
शाल्मलिकः, पुं, (शाल्मली + "वुञ्छण्कठजिति।" ४ । २ । ८० । इति कुमुदादित्वात् ठक् ।) रोहितकवृक्षः । इति राजनिर्घण्टः ॥
शाल्मलिनी, स्त्री, शाल्मलिवृक्षः । इति शब्द-रत्नावली ॥
शाल्मलिपत्रकः, पुं, (शाल्मलिपत्रमिव पत्रं यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥
शाल्मलिस्थः, पुं, (शाल्मलौ वृक्षे तिष्ठतीति । स्था + कः ।) गरुड़ः । इति राजनिर्घण्टः ॥
शाल्मली, स्त्री, (शाल्मलि + आदिकारादिति वा ङीष् ।) शाल्मलिवृक्षः । इत्यमरः ॥ शलति दैर्घात् दूरं गच्छति शाल्मलिः । शल ञ गतौ नाञ्जीति मलिण् इदिः । इयोरित्युक्ते स्त्रीत्वे पाच्छोषादीति ईषि शल्मली च शाल्मलिर्येति केचित् तन्न शलते विभाषया इदिः । शल्मली रक्त-पुष्पा च ककुटी चिरजीविका इति कोषान्तर-मिति मुकुटः । इत्यमरटीकायां भरतः ॥
शाल्मली, [न्] पुं, (शाल्मलः आश्रयत्वेनास्त्य-स्येति इनिः ।) गरुड़ः । इति त्रिकाण्डशेषः ॥

शाल्मलीकन्दः, पुं, (शाल्मल्याः कन्दः।) शाल्मलिवृक्षमूलम्। तत्पर्य्यायः। विसुलः २ वनवासकः ३ वनवासी ४ मलघ्नः ५ मलहन्ता ६। अस्य गुणाः। मधुरत्वम्। मलसंग्रहरोधजयकारित्वम्। गुरुत्वम्। पित्तदाहार्त्तिशोफसन्तापनाशित्वञ्च। इति राजनिर्घण्टः॥

शाल्मलीफलः, पुं, (शाल्मल्याः फलमिव फलं यस्य) तेजःफलवृक्षः। इति राजनिर्घण्टः॥

शाल्मलीवेष्टः, पुं, (शाल्मल्या वेष्टः।) शाल्मलिनिर्य्यासः। गिमुल आठा इति भाषा॥ तत्पर्य्यायः। पिच्छा २। इत्यमरः॥ मोचरसः ३ शाल्मलः ४ शाल्मलीवेष्टकः ५। इति रत्नमाला॥ मोचसावः ६ मोचनिर्य्यासः ७। अस्य गुणाः।

"मोचसावो हिमो ग्राही स्निग्धो वृष्यः कषायकः।
प्रवाहिकातिसारामकफपित्तास्रदाहनुत्॥"

इति भावप्रकाशः॥

शाल्मलीवेष्टकः, पुं, (शाल्मलीवेष्ट + स्वार्थे कन्।) शाल्मलीवेष्टः। इति रत्नमाला॥

शाल्वः, पुं, देशविशेषः। यथा,—

"शाल्वास्तु कारुकुचीया मरवस्तु दशेरकाः॥"

इति हेमचन्द्रः॥

राजविशेषः। इति महाभारतम्॥ (भीष्मेण सहास्य युद्धवृत्तान्तो महाभारते आदिपर्व्वणि १०२ अध्याये तथा कृष्णेन सहास्य युद्धवृत्तान्तस्तत्रैव वनपर्व्वणि १५ अध्यायमारभ्य द्रष्टव्यः॥)

शाल्वणः, पुं, वातघ्नौषधगणविशेषः। यथा,—

"काकोल्यादिः स वातघ्नः सर्व्वाम्लद्रव्यसंयुतः।
सानूपोदकमांसस्तु सर्व्वस्नेहसमन्वितः॥
सुस्निग्धाम्लः स्पष्टलवणः शाल्वणः परिकीर्त्तितः।
तेनोपनाहं कुर्व्वीत सवदा वातरोगिणाम्॥"

इति सुश्रुते चिकित्सितस्थाने ५ अध्यायः॥

शावः, पुं, (शव्यते प्राप्यते इति। शव गतौ + घञ्।) शिशुः। इति शब्दरत्नावली॥ (यथा, रघुवंशे। ६। ३।

"शिलाविभङ्गैर्व्वृषराजशावः
तुङ्गं नगोत्सङ्गमिवारुरोह॥"

शवस्यायम्। शव + अण्।) शवसम्बन्धिनि, त्रि॥ यथा,—

"ग्रहणे शावमाशौचं विमुक्तौ सौतिकं स्मृतम्।
तयोः सम्पत्तिमात्रेण उपस्पृश्य क्रियाक्रमः॥

इति तिथ्यादितत्त्वे ब्रह्माण्डपुराणम्॥

शावकः, पुं, (शाव एव। स्वार्थे कन्।) शिशुः। इत्यमरः॥ (यथा, हितोपदेशे मित्रलाभे। ४८। १३।

"दत्ताभयखड्गमृगशावकेषु तेष्वाश्रमेष्वथवा॥")

शावरः, पुं, (शवराणामयम्। शवर + अण्।) पापम्। अपराधः। लोध्रवृक्षः। इति मेदिनी॥ शवरस्वामिकृतभाष्यविशेषः। शिवकृततन्त्रविशेषश्च। शवरसम्बन्धिनि, त्रि। यथा,—

"संपूज्य प्रेषणं कुर्य्यात् दशम्यां शावरोत्सवैः॥"

इति तिथ्यादितत्त्वम्॥

शावरभेदाक्षं, क्ली, ताम्रम्। इति हेमचन्द्रः॥

शावरी, स्त्री, शूकशिम्बी। इति मेदिनी॥

शावरोत्सवः, पुं, (शवराणामुत्सवः।) म्लेच्छकृतोत्सवः। यथा,—

"पूजयित्वा महाष्टम्यां नवम्यां बलिभिस्तथा।
विसर्জ্জयेत् दशम्यां तु श्रवणे शावरोत्सवैः॥
अन्तःपादो दिवाभागे श्रवणस्य यदा भवेत्।
तदा संप्रेषणं देव्या दशम्यां शावरोत्सवैः॥
रागिणीभिः कुमारीभिर्वेश्याभिर्नर्त्तकैस्तथा।
शङ्खतूर्य्यनिनादैश्च मृदङ्गैः पटहैस्तथा॥
ध्वजैर्वर्ज्जैर्बहुविधैर्लाजपुष्पप्रकीर्णकैः।
धूलीकर्दमविक्षेपैः क्रीड़ाकौतुकमङ्गलैः॥
भगलिङ्गविधानैश्च भगलिङ्गप्रगीतकैः।
भगलिङ्गादिशब्दैश्च क्रीड़येयुरहं जनाः॥
परैर्निक्षिप्यते यस्तु यः परं नाक्षिपत्यपि।
क्रुद्धा भगवती तस्य शापं दद्यात् सुदारुणम्॥"

इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः॥

शाश्वतं, त्रि, (शश्वद्भवम्। शश्वत् + अण्।) नित्यम्। इत्यमरः॥ (यथा, रामायणे। १। २। १५।

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥")

पारिभाषिकशाश्वतं यथा,—

"शाश्वतं देवपूजादि विप्रदानञ्च शाश्वतम्।
शाश्वतं सगुणा विद्याः सुहृन्मित्रञ्च शाश्वतम्॥"

इति गारुड़े नीतिसारे १०९ अध्यायः॥

शाश्वतः, पुं, वेदव्यासः। इति शब्दरत्नावली॥ (शिवः। यथा महाभारते। १३। १७। ३२।

"प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः॥")

शास्कुलः, त्रि, मांसाशी। इति हेमचन्द्रः॥

शास्कुलिकं, क्ली, (शस्कुल + समूहार्थे ठक्।) शस्कुलिसमूहः इत्यमरः॥

शास, उ च लु शासने। इति कविकल्पद्रुमः॥ (अदा०-पर०-सक०-सेट्। क्षावेट्।) उ, शासित्वा शिष्ट्वा। च, शासति। लु, शास्ति। शास्ति यथाश्रया राज्ञः स सन्नाड़ित्यमरः। इति दुर्गादासः॥

शास ङ उ } आशिषि। इति कविकल्पद्रुमः॥
शास ल ङ } (भ्वा०-अदा०-च०-आत्म०-सक०-सेट्।) आड्पूर्व्व इति केवलानामन्यपूर्व्वाणाञ्च प्रयोगनिरासार्थम्। किन्तु "इदं गुरुभ्यः पूर्व्वेभ्यो नमो वाकं प्रशास्महे।" इत्युत्तरचरिते प्रपूर्व्वोऽपि दृश्यते। ङ, आशासते। उ, आशासित्वा आशास्त्वा। पञ्चमस्वरानुबन्धसामर्थ्यात् क्त्वाप्रत्ययस्य न यप् समासाभावादिति गोविन्दभट्टः। किन्तु अस्य उदनुबन्धफलं कृन्दस्यैवेति धातुप्रदीपः। ल ङ, अशास्त्रे शासु ङिच्चस इत्यत्र जक्षादीयशास्त्रेव ग्रहणादस्योपधाया इकारो न स्यात्। आशीरिष्टार्थाशंसनम्। इच्छायामित्यन्ये। इति दुर्गादासः॥

शासनं, क्ली, (शास + ल्युट्।) आज्ञा। (यथा, मनौ। ८। २६२।

"कुर्व्वीत शासनं राजा सम्यक् सारापराधतः॥")

तत्पर्य्यायः। अववादः २ निर्देशः ३ निदेशः ४ शिष्टिः ५। इत्यमरः॥ शास्तिः ६। इति भरतः॥ आदेशः ७ आदेशनम् ८। इति शब्दरत्नावली॥ शास्त्रम् ९। इति जटाधरः॥ राजदत्तभूमिः। लेखा। शास्त्रम्। शास्तिः। इति मेदिनी। (दानलिखिततास्रफलकादिः। यथा, कथासरित्सागरे। १२४। ६२-६३।

"शासनं लेखयित्वा च तमेवं स समादिशत्।
ॐकारपीठमार्गेण भद्र गच्छोत्तरां दिशम्॥
तत्रामुना शासनेन ग्रामं भुङ्क्ष्व मदर्पितम्।
नाम्ना तं खण्डवटकं पृच्छन् गच्छन्नवाप्स्यसि॥"

यथाच मार्कण्डेये। ३६। ८।

"वाच्यं ते शासनं पद्मे क्षुद्राचरनिवेदितम्॥"

स्त्रियां धर्म्मोपदेशकर्त्री। यथा, ऋग्वेदे। १। ३१। ११।

"इलामकृण्वन्मनुषस्य शासनीम्॥")

शासनहरः, पुं, (हरतीति। हृ + अच्। शासनस्य हरः।) राजदूतः। आज्ञावाहकः। इति केचित्॥

शासितः, त्रि, (शास + क्तः।) कृतशासनः। यथा,

"सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः।
सुचिन्त्य चोक्तं सुविचार्य्य यत् कृतं
सुदीर्घकालेऽपि न याति विक्रियाम्॥"

इति पद्मरत्नम्॥

शासिता, [ऋ] त्रि, (शास + तृच्।) शास्ता। इति त्रिकाण्डशेषः॥ (यथा, मनौ। ७।१७।

"स राजा पुरुषो दण्डः स नेता शासिता च सः॥"

व्याख्याता। यथा, तत्रैव। २। १५०।

"ब्राह्मस्य जन्मनः कर्त्ता स्वधर्म्मस्य च
शासिता॥")

शास्ता, [ऋ] त्रि, (शास + "तृन्शृचौ शंसीति" उणा० २। ९४। इति असंज्ञायामपि तृन्। स च अनिट्।) शासनकर्त्ता। तत्पर्य्यायः। देशकः २ शासिता ३। इति त्रिकाण्डशेषः॥ यथा,—

"द्वौ धाता च विधाता च पौराणौ जगतः पतौ।
द्वौ शास्तारौ त्रिलोकेऽस्मिन् धर्म्माधर्म्मौ प्रकीर्त्तितौ॥"

इति वह्निपुराणे गणभेदनामाध्यायः॥

(यथा च भागवते। १। १२। २६।

"राजर्षीणां जनयिता शास्ता चोत्पथगामिनाम्॥")

शास्ता, [ऋ] पुं, (शास + "तृन्शृचौ शंसीच्छादिभ्यः संज्ञायां चानिटौ।" उणा० २। ९४। इति तृन्। स च अनिट्।) बुद्धः। इत्यमरः॥ उपाध्यायः। राजा। पिता। इति संक्षिप्तसारोणादिवृत्तिः॥

शास्तिः, स्त्री, (शास + बाहुलकात् तिः । इत्युज्ज्वलदत्तः । ४ । १७८ ।) शासनम् । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । १३२ । २० ।
"प्राहोशैरस्त्रमेतन्मे दुष्टशास्तिसमुद्यतम् ॥")
शास्त्रं, क्ली, (शिष्यते अनेन । शास + "सर्व्वधातुभ्यष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् ।) निदेशः । ग्रन्थः । इत्यमरः ॥ स च ग्रन्थः अष्टादशविधः । तस्य विवरणं विद्याशब्दे द्रष्टव्यम् ॥ * ॥ शास्त्रोत्पत्तिर्यथा,—
मत्स्य उवाच ।
"तपश्चचार प्रथममसराणां पितामहः ।
आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः ॥
पुराणं सर्व्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यशब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।
मीमांसान्यायविद्याश्च प्रमाणं तर्कसंयुताः ॥
वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः ।
मनसः पूर्व्वसृष्टा वै जाता ये तेन मानसाः ॥"
इति मात्स्ये २ अध्यायः ॥ * ॥
शास्त्रोक्तकर्म्म कर्त्तव्यं न तु शास्त्रविरुद्धम् । यथा,—
"श्रुतिस्मृतिसदाचारविहितं कर्म्म केवलम् ।
सेवितव्यं चतुर्व्वर्णैर्भजद्भिः केशवं सदा ॥
अन्यथा निरयं यान्ति कुमार्गागमसेवनात् ।
अतो वेदविरुद्धार्थं शास्त्रोक्तं कर्म्म संत्यजेत् ॥
स्वबुद्धिरचितैः शास्त्रैः प्रतार्य्यैह च बालिशान् ।
विघ्नन्ति श्रेयसो मार्गं लोकनाशाय केवलम् ॥
निन्दन्ति देवता वेदांस्तपो निन्दन्ति सद्विजान् ।
तेन ते निरयं यान्ति ह्यसच्छास्त्रनिषेवणात् ॥
श्रुतिस्मृतिसदाचारविहितं कर्म्म शाश्वतम् ।
स्वं स्वं धर्मं प्रयत्नेन श्रेयोऽर्थीह समाचरेत् ॥
स्वबुद्धिरचितैः शास्त्रैर्मोहयित्वा जनं नराः ।
तेन ते निरयं यान्ति युगानां सप्तविंशतिः ॥"
इति पाद्मे उत्तरखण्डे १७ अध्यायः ॥*॥
अध्यात्मशास्त्रातिरिक्तशास्त्रनिन्दा यथा,—
"पुराणं भारतं वेदधर्म्मशास्त्राणि यानि च ।
आयुषः क्षपणायैव धर्म्मतत्त्वं न चाचरेत् ॥
पुत्रदारादिसंभारः पुंसां संमूढचेतसाम् ।
विदुषां शास्त्रसंभारः तदयोगाभ्यासविघ्नकृत् ॥
इदं श्रेयमिदं श्रेयं यः सर्व्वं ज्ञातुमिच्छति ।
अपि वर्षशतेनापि शास्त्रान्तं नाधिगच्छति ॥
विज्ञायाचरतस्तावत् जीवितुञ्चापि सत्वरम् ।
विहाय शास्त्रजालानि पारलौकिकमाचरेत् ॥
पण्डितोऽपि हि मूर्खोऽसौ शास्त्रियुक्तोऽप्यशास्त्रिकः ।
यः संसाराच्च चात्मानं समुत्तारयितुं क्षमः ॥"
इति वह्निपुराणे सुनामहादशीनामाध्यायः ॥*
वेदविरुद्धशास्त्राणि यथा,—
"अन्यानि चैव शास्त्राणि लोकेऽस्मिन्मोहनानि च
वेदवादविरुद्धानि मयैव कथितानि तु ॥
वामं पाशुपतं योगं नाकुलं चैव भैरवम् ।
अशेषमेतत् कथितं वेदबाह्यं तथेतरत् ॥
वेदमूर्त्तिरहं विप्रा नान्यशास्त्रार्थवादिभिः ।
ज्ञायते मत्स्वरूपञ्च त्यक्त्वा वेदं सनातनम् ॥"
इति कौर्म्मे उपविभागे ३६ अध्यायः ॥*॥
अपि च । कूर्म्मपुराणे हिमालयं प्रति देवीवाक्यम् ।
"यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च ।
श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी ॥
करालभैरवञ्चापि यामलं वामनाश्रितम् ।
एवंविधानि चान्यानि मोहनार्थानि तानि तु ।
मया सृष्टानि चान्यानि मोहायैषां भवार्णवे ॥"
तस्मात् सद्भिः श्रुतिस्मृतिविरुद्धे वर्त्मनि न कदाचित् पदं न्यस्तव्यम् । इति मलमासतत्त्वम् ॥*
पृथिव्यां तन्त्रशास्त्रावतरणं यथा,—
शिव उवाच ।
"लम्बोदर महाभाग शृणु मे परमं वचः ।
इदं महासुसन्दर्भं मम वक्त्रादिनिर्गतम् ॥
निर्गतं पार्वतीवक्त्रात्तन्त्रं परमदुर्लभम् ।
विलिख्य बहुयत्नेन गच्छ सिद्धाश्रमं सुत ॥
यत्र तिष्ठन्ति मुनयो वेदवेदाङ्गपारगाः ।
अणिमादिगुणैर्युक्तः शीघ्रं त्वं भव मे सुत ॥
इत्युक्तः शङ्करेणासौ चाष्टबाहुरभूत्ततः ।
चतुर्भिर्हस्तैः संलिख्य शिवाय विनिवेदयेत् ॥
शिव उवाच ।
गच्छ पुत्र महाबाहो तन्त्रमादाय सत्वरम् ।
सिद्धाश्रमं वनं रम्यं यत्रेन्द्रस्य च नन्दनम् ।
प्रणम्य प्रययौ शीघ्रं तन्त्रमादाय तद्दनम् ॥"
इत्युपक्रम्य ।
"मुनिर्व्वाक्यं ततः श्रुत्वा तत्तन्त्रं मुनये ददौ ।
एवं तन्त्राणि सर्व्वाणि विलिख्य विनिवेदयेत् ॥"
इति गायत्रीतन्त्रे दशमब्राह्मणपटलः ॥*॥
शैवपाशुपतादिशास्त्रोत्पत्तिर्यथा,—
"प्रथमं हि मया प्रोक्तं शैवं पाशुपतादिकम् ।
मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततः परम् ॥
कणादेन च संप्रोक्तं शास्त्रं वैशेषिकं महत् ।
गौतमेन तथा न्यायं सांख्यन्तु कपिलेन तु ॥
धिषणेन तथाप्रोक्तं चार्वाकमतिगर्हितम् ॥
दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा ।
बौद्धशास्त्रं तथा प्रोक्तं लग्नलोलपटादिकम् ॥
आपत्यं श्रुतिवाक्यानां दर्शयन् लोकगर्हितम् ।
कर्म्मस्वरूपत्याज्यत्वमत्र वै प्रतिपद्यते ।
सर्व्वकर्म्मपरिभ्रष्टं कल्पयन्तु तदुच्यते ॥
गौतमप्रोक्तशास्त्रार्थनिरताः सर्व एव हि ।
शार्गालीं योनिमापन्नाः सन्दिग्धाः सर्वकर्म्मसु ॥"
इति गन्धर्वतन्त्रे प्रथमपटलः ।
शास्त्रकृत्, पुं, (शास्त्रं करोतीति । क्त + क्विप् ।) ऋषिः । इति त्रिकाण्डशेषः ॥ शास्त्रकर्त्तरि, त्रि ॥ (यथा, भागवते । १ । १० । २२ ।
"विधित्समानोऽनुससार शास्त्रकृत् ॥")
शास्त्रगण्डः, त्रि, प्रघटावित् । इति त्रिकाण्डशेषः ॥ द्वारावत्यां ह्यत्रगण्ड इति पाठः ॥
शास्त्रचक्षुः, [स्] क्ली, (शास्त्रेषु चक्षुरिव ।) व्याकरणम् । इति केचित् ॥
शास्त्रचारणः, त्रि, (शास्त्रं चारयति प्रचारयतीति । चर + णिच् + ल्युः ।) शास्त्रदर्शी । इति शब्दरत्नावली ॥
शास्त्रज्ञः, त्रि, (शास्त्रं जानातीति । ज्ञा + कः ।) शास्त्रवेत्ता । यथा,—
"अनियुक्तो नियुक्तो वा शास्त्रज्ञो वक्तुमर्हति ।
दैवीं वाचं स वदति यः शास्त्रमुपजीवति ॥"
इति व्यवहारतत्त्वधृतनारदवचनम् ॥
शास्त्रतत्त्वज्ञः, पुं, (शास्त्रस्य तत्त्वं जानातीति । ज्ञा + कः ।) गणकः । यथा, शब्दरत्नावल्याम् ।
"दैवज्ञो गणको ज्ञानी मौहूर्त्तो दैवलेखकः ।
वार्त्तान्तिको ज्योतिषिको मौहूर्त्तिकप्रसूचकौ ॥
संवत्सरो वर्षकोषो रेखाजीवी गणाङ्कभुक् ।
तान्त्रिको ज्ञातसिद्धान्तः शास्त्रतत्त्वज्ञ ईरितः ॥"
शास्त्रदर्शी, [न्] त्रि, (शास्त्रं द्रष्टुं शीलमस्य । णिनिः ।) शास्त्रज्ञः । तत्पर्य्यायः । अन्तर्वाणिः २ शास्त्रवित् ३ शास्त्रचारणः ४ । इति शब्दरत्नावली ॥
शास्त्रवित्, [द्] त्रि, (शास्त्रं वेत्तीति । विद् + सत्सूद्विषेति क्विप् ।) शास्त्रदर्शी । इत्यमरः ॥
शास्त्रविप्रतिषिद्धः, त्रि, (शास्त्रेण विप्रतिषिद्धः ।) शास्त्रनिषिद्धः । शास्त्रशब्दपूर्व्वकविपूर्व्वकसिधधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नो वा ॥
शास्त्रशिल्पी, [न्] पुं, (शास्त्रं शिल्पमस्यास्तीति इनिः ।) काश्मीरदेशः । तद्देशजे, पुं भूम्नि । इति त्रिकाण्डशेषः ॥
शास्त्री, [न्] त्रि, शास्त्रज्ञः । शास्त्रं वेत्तीत्यर्थे णिन्प्रत्ययेन निष्पन्नः ॥
शास्यः, त्रि, (शास् + ण्यत् ।) शासनीयः । शासितव्यः (यथा, मनौ । ८ । १८२ ।
"यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते ।
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम् ॥"
शिक्षणीयः यथा, ऋग्वेदे । १ । १८८ । ७ ।
"अभिप्रित्ते मनवे शास्यो भूः ।"
"शास्यो भूः शिक्षणीयो भव इदं कुरु इदं कुरु इति विधेयो भव ।" इति तद्भाष्ये सायणः ॥) शि, न अ निशाने । इति कविकल्पद्रुमः ॥ (स्वा० उभ० सक० अनिट् ।) निशानमिति श्यते रूपम् । शान अ तेजे इत्यस्य नित्यसनन्तत्वात् । अनेकार्थत्वात् निशानमिह तीक्ष्णीकरणम् । न अ, शिनोति शिनुते खड्गं कर्म्मकारः । इति दुर्गादासः ॥
शिंशपा, स्त्री, वृक्षविशेषः । शिंश इति भाषा । तत्पर्य्यायः । पिच्छिला २ अगुरुः ३ कपिला ४ भस्मगर्भा ५ । इत्यमरः ॥ अगुरुशिंशपा ६ । इति भरतः ॥ कृष्णसारा ७ । इति जटाधरः ॥ पिङ्गला ८ पिच्छला ९ वीरा १० । इति रत्नमाला ॥ * ॥ यथा,—
"शिंशपा गुरुसारा च पिच्छिला गुरुशिंशपा ।
सा चेत् कपिलवर्णा स्याद्भस्मगर्भा निगद्यते ॥

क्वचित्तु कपिला भस्मगर्भा चागुरुशिंशपा ।
पिच्छिला शिंशपा युग्मपत्रिकागुरु चेत्यपि ॥"
इति शब्दरत्नावली ॥
अस्या गुणाः । "शिंशपा वातनाशिनी ।"इति राजवल्लभः ॥ अपि च ।
"शिंशपा कटुका तिक्ता कषाया श्लेष्मकारिणी ।
उष्णवीर्य्या हरेन्मेदः कुष्ठचित्रवमिक्रमीन् ।
वस्तिवङ्क्षणदाहास्रवलासागर्भपातिनी ॥"
इति भावप्रकाशः ॥
(तत्काष्ठनिर्म्मितरथस्तु दृढो भवति । यथा, ऋग्वेदे । ३ । ५३ । १९ ।
"अभिव्ययस्व खदिरस्य सार-
मोजो धेहि स्यन्दने शिंशपायाम् ।"
"स्यन्दने रथस्य गमने सति शिंशपायां शिंशपाख्यदारुनिर्म्मिते रथस्य फलके ओजो धेहि॥ दार्ढ्यं कुरु ।" इति तद्भाष्ये सायणः ॥)
शिक्, [च्] स्त्री. शिक्यम्। इति शब्दरत्नावली ॥
शिकुः, त्रि, अव्यवसायी । इति त्रिकाण्डशेषः ॥
शिक्थं, क्ली, मधुजातद्रव्यविशेषः । मोम् इति भाषा । तत्पर्य्यायः । शिक्थकम् २ मधुजम् ३ विघसम् ४ मधुसम्भवम् ५ मोदनम् ६ काचम् ७ उच्छिष्टमोदनम् ८ मक्षिकामलम् ९ चौद्रेयम् १० पीतरागम् ११ स्निग्धम् १२ माक्षिकजम् १३ चौद्रजम् १४ मधुशेषम् १५ द्रावकम् १६ माक्षिकाज्ययम् १७ मधूत्थितम् १८ मधूत्थम् १९ । अस्य गुणाः । पिच्छिलत्वम् । स्वादुत्वम् । कुष्ठवातास्रनाशित्वम् । मृदुत्वम् । कटुत्वम् । स्निग्धत्वम् । लेपेन स्फुटिताङ्गविलोपनत्वञ्च । इति राजनिर्घण्टः ॥
शिक्थकं, क्ली, (शिक्थ + स्वार्थे कन् ।) शिक्थम् । इति राजनिर्घण्टः ॥
शिक्य, क्ली, (स्रंस + "स्रंसेः शि कुट् किच्च ।" उणा० ५ । १६ । इति यत् । स च कित् । कुडागमः शिरादेशश्च ।) द्रव्यरक्षार्थरज्जुमयाधारविशेषः । शिका इति भाषा । तत्पर्य्यायः । काचः २ शिक्या ३ शिक् ४ । इति शब्दरत्नावली ॥ (यथा, भागवते । १० । ८ । ३० ।
"हस्तायाङ्घ्रे रचयति विधिं पीठकोलूखलादौ-
च्छिद्रं ह्यन्तर्निहितवयुनः शिक्यभाण्डेषु तद्विद्")
शिक्या, स्त्री, (शिक्य + स्त्रियां टाप् ।) शिक्यम् । इति शब्दरत्नावली ॥
शिक्यितं, त्रि, (शिक्ये स्थापितमित्यर्थे प्रातिपदिकात् धात्वर्थे इति णिच् ततः क्तः ।) शिक्यस्थापितवस्तु । तत्पर्य्यायः । काचितः२ । इत्यमरः ॥
शिच, ङ शिचषे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) क्स्त्री । ङ, शिचते । शिचणं विद्याग्रहणम् । अशिचतास्रं पितुरेव मन्त्रविदिति रघुः । इति दुर्गादासः ॥
शिचणं, क्ली, (शिच + ल्युट् ।) विद्योपादानम् । इति शिक्षाशब्दटीकायां भरतः ॥

शिक्षा, स्त्री, (शिक्ष + "गुरोश्च हलः ।" ३ ।३ । १०३ इत्यः । ततष्टाप् ।) शिक्षणम् । श्येनाकहक्षः । इति शब्दमाला ॥ वेदाङ्गशास्त्रविशेषः । इत्यमरः ॥ यथा,—
"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः ।
छन्दोविचितिरित्येतैः षड़ङ्गो वेद उच्यते ॥"
इति ।
तत्र अकारादिवर्णानां स्थलकरणप्रयत्नबोधिका अ-कु-ए-ह-विसर्জ্জनीयाः कण्ठ्या इत्यादिका शिक्षा । इति तट्टीकायां भरतः ॥*॥*॥
अथ शिक्षाशास्त्रं लिख्यते ।
"अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं यथा ।
शास्त्रानुपूर्व्वं तद्विद्याद्यथोक्तं लोकवेदयोः ॥
प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाचं उच्चारणे विधिम् ॥
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥
अनुस्वारो विसर्गश्च × क×पौ चापि पराश्रितौ ।
दुःस्पृष्टश्चेति विज्ञेयः ऌकारः प्लुत एव च ॥
आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ।
प्रातःसवनयोगन्तं छन्दो गायत्रमाश्रितम् ॥
कण्ठे माध्यन्दिनयुतं मध्यमं चैष्टुभानुगम् ।
तारं तार्त्तीयसवनं शीर्षण्यं जागतानुगम् ॥
सोदीर्णो मूर्द्धमभिहतो वक्त्रमापद्य मारुतः ।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तं निबोधत ॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वराश्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥
उदात्ते निषादगन्धारावनुदात्ते ऋषभधैवतौ ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वा मूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च ॥
नाभीभावश्च विवृत्तिश्च अ-ए-सा रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोमणः ॥
यत्नोभावप्रसन्नास्यमुकारादिपरं पदम् ।
स्वरान्तं ताट्टगं विद्यादयदन्यद्व्यञ्जनमुच्यते ॥
इकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम् ।
शीरस्यं तं बीजानीयात् कण्ठ्यमाधुरसंयुतम् ॥
कण्ठ्यावहाविचुयशास्तालव्या औष्ठ्यावुपू ।
स्वुर्मुर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यौ वः स्मृतौ बुधैः ।
ए ऐ तु कण्ठतालव्यौ ओ औ कण्ठोष्ठजौ स्मृतौ ॥
अर्द्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत् ।

ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥
संवृतं मात्रिकं ज्ञेयं विवृतन्तु द्विमात्रिकम् ।
घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥
स्वराणामुष्मणाञ्चैव विवृतं करणं स्मृतम् ।
तेभ्योऽपि विवृतावेडौ ताभ्यामैचौ तथैव च ॥
अनुस्वारयमाणाश्च नासिकास्थानमुच्यते ।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥
अलाबुवीणानिर्घोषो दन्त्यमूल्यस्वराननु ।
अनुस्वारस्तु कर्त्तव्यो नित्यं ङ्रोः श-ष-सेषु च ॥
अनुस्वारे विवृत्यान्तु विरामे चाक्षरद्वये ।
द्विरोष्ठौ तु विगृह्णीयादयवैकारवकारयोः ॥
व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥
यथा सौराष्ट्रिका नारी तक्रं इत्यभिभाषते ।
एवं रङ्गाः प्रयोक्तव्याः खेऽग्नरौ इव खेदया ॥
रङ्गवर्णं प्रयुञ्जीरन् नो प्रसेत् पूर्वमक्षरम् ।
दीर्घस्वरं प्रयुञ्जीयात् पश्चान्नासिक्यमाचरेत् ॥
हृदये चैकमात्रः स्यादर्द्धमात्रस्तु मूर्द्धनि ।
नासिकायां तथार्द्धञ्च रङ्गस्यैवं द्विमात्रता ॥
हृदयादुत्करे तिष्ठन् कांस्येन समनुस्वरम् ।
मार्दवञ्च द्विमात्रञ्च जघर्न्वा इति निदर्शनम् ॥
मध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ तथा ।
स रङ्गं कम्पयेत् कम्पं रथीवेति निदर्शनम् ॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीड़येत् ।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षड़ेते पाठकाधमाः ॥
माधुर्य्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्य्यं लयसमर्थञ्च षड़ेते पाठका गुणाः ॥
शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम् ।
काकस्वरं शिरसि गतं तथा स्थानविवर्জ্জितम् ॥
उपांशुदुष्टं त्वरितं निरस्तं
विलम्बितं गद्गदितं प्रगीतम् ।
निष्पीड़ितं प्रस्तपदाक्षरञ्च
वदेन्न दीनं न तु सानुनास्यम् ॥
प्रातः पठेत्प्रत्यसुरःस्थितेन
स्वरेण शार्दूलरुतोपमेन ।
मध्यं दिने कण्ठगतेन चैव
चक्राङ्गसंकूजितसन्निभेन ॥
तारन्तु विद्यात् सवनं तृतीयं
शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यभृतस्वराणां
तुल्येन नादेन शिरःस्थितेन ॥
अघोऽस्पृष्टा यणस्त्वीषन्नस्पृष्टाः श-रस्तथा ।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥
यमोऽनुनासिका न ङ्रो नादिनो ह-झषः स्मृताः ।
ईषन्नादा यणो जश्च श्वासिनश्च खफादयः ॥
ईषच्छ्वासांबरो विद्यात् गोर्द्धमेतत् प्रचक्षते ।
दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवि ॥
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥
उदात्तमाख्याति ऋषोऽङ्गुलीनां
प्रदेशिनीमूलनिविष्टमूर्त्ता।
उपान्तमध्ये स्वरितं घृतञ्च
कनिष्ठिकायामनुदात्तमेव ॥
उदात्तं प्रदेशिनीं विद्यात्त्रयं मध्यतोऽङ्गुलिम्।
निहतन्तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥
अन्तोदात्तमाद्युदात्तमुदात्त-
मनुदात्तं नीचस्वरितम्।
मध्योदात्तं स्वरितं द्व्युदात्तं
त्र्युदात्तमिति नव पदगण्या ॥
अग्निः सोमः प्र वो वीर्य्यं हविषां
स्वर्बृहस्पतिरिन्द्रावृहस्पती।
अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्र इत्युदात्तं व इत्यनुदात्तं वीर्य्यं नीचस्वरितम् ॥ हविषां मध्योदात्तं स्वरितं स्वरितम्। बृहस्पतिरिति द्व्युदात्तमिन्द्रावृहस्पती इति त्र्युदात्तम्॥
अनुदात्तो हृदि ज्ञेयो मूर्द्ध्युदात्त उदाहृतः।
स्वरितः कण्ठमूले तु सर्व्वास्ये प्रचयः स्मृतः ॥
चाषस्तु वदते मात्रां द्विमात्रान्त्वेव वायसः।
शिखी रौति त्रिमात्रन्तु नकुलस्त्वर्द्धमात्रकम् ॥
कुतीर्थादागतं दग्धमपवर्णञ्च भक्षितम्।
न तस्य पाठे मोचोऽस्ति पापाद्वैरिव किल्बिषात् ॥
सुतीर्थादागतं व्यक्तं साध्यायं सुव्यवस्थितम्।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥
मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥
अनक्षरं हतायुष्यं विस्वरं व्याधिपीड़ितम्।
अक्षता यज्ञरूपेण वज्रं पतति मस्तके ॥
हस्तहीनन्तु योऽधीते स्वरवर्णविवर्जितम्।
ऋग्यजुःसामभिर्हन्यो वियोनिमधिगच्छति ॥
हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम्।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥
शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते।
वाग्भ्येभ्यः समाहृत्य दैवीं वाचमिति स्थितिः॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥
विनयनमुखविःसृतामिमां य
इह पठेत् प्रयतश्च सदा द्विजः।
स भवति धनधान्यपशुपुत्रकीर्त्तिमा-
नतुलञ्च सुखं समश्नुते दिवीति दिवीति ॥
अथ शिक्षामात्रोदात्तस्य इकारं स्वराणां यथा सौराष्ट्रिका। मीत्यचोऽसृष्टोदात्तं चाषस्तु शङ्कर एकादश ॥" इति वेदशिक्षासमाप्तिमगमत् ॥ * ॥ अपि च।

अग्निरुवाच।

"वक्ष्ये शिक्षां त्रिपृष्टिः सुवर्णा वा चतुराधिका:।
स्वरा विंशतिरेकस्य स्पर्शानां पञ्चविंशतिः ॥
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः।
अनुस्वारो विसर्गश्च ×कम्पौ चापि परान्तिगौ ॥
दुःस्पृष्टयेति विज्ञेयः लृकारः प्लुत एव च।
रङ्गस्य खे अरां इव हकारः पञ्चमैर्युतः ॥
अन्तस्थाभिः समायुक्तः औरस्यः कण्ठ्य एव सः।
आत्मा बुद्ध्या समेत्यार्थं मनो युङ्क्ते विवक्षया॥
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ॥
प्रातःसवनयोगन्तं छन्दो गायत्रमाश्रितम्।
कण्ठे माध्यन्दिनयुतं मध्यमं वैष्टभानुगम् ॥
तारं तार्त्तीयसवनं शीर्षण्यं जगतानुगम् ॥
सोदीर्णो मूर्द्ध्यभिहतो वक्त्रमापद्य मारुतः ॥
वर्णान् जनयते तेषां विभागाः पञ्चधा स्मृताः।
स्वरः कालगतः स्थानात् प्रयत्नानुप्रदानतः ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च ॥
ओ-भावश्च विवृत्तिश्च ग-घ-ङ-सा रेफ एव च।
जिह्वामूलमुपध्मा च गतिरष्टविधोऽभवत् ॥
यश्चोभावप्रमत्यानमुकारादिपरं पदम्।
स्वरान्तं तादृशं विद्यात् यदन्यद्व्यक्तमुच्यते ॥
कुतीर्थादागतं दग्धमपवर्णञ्च भक्षितम्।
एवमुच्चारणं पापमेवमुच्चारणं शुभम् ॥
सुतीर्थादागतं द्रव्यं स्वार्थं सुव्यवस्थितम्।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥
न कराली न लम्बोष्ठो नाव्यक्तो नानुनासिकः।
गद्गदाद्यैरजिह्मश्च न वर्णान् वक्तुमर्हति ॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वराश्चयः।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि॥
कण्ठ्यावह्या वि-चु-य-शास्तालव्या ओष्ठजावुपू।
स्वुर्मूर्द्धन्या ऋ-ट्टु-र-षा दन्त्या लृ-तु-ल-साः स्मृताः ॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यौ वः स्मृतौ बुधैः।
एऐ तु कण्ठ्यतालव्यौ ओ औ कण्ठ्यौष्ठजौ स्मृतौ ॥
अर्द्धमात्रा तु कण्ठ्या स्यात् एकारैकारयोर्भवेत्।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥
अचोऽस्पृष्टा यणस्त्वीषत्स्पृष्टाः शरः स्मृताः।
शेषाः स्पृष्टा हः प्रान्तो निर्द्वीधानुप्रदानतः ॥
यमोऽनुनासिकान्तो नादिनो हकारः स्मृताः।
ईषद्वादा यणो जश्च श्वासिनश्च खफादयः।
ईषच्छ्वासांश्चरो विद्याद्वीर्धामैतत् प्रचक्षते ॥"
इत्याग्नेये महापुराणे शिक्षानिरूपणं नाम ३३६ अध्यायः ॥

शिक्षाकरः, पुं, (करोतीति। कृ + अच्। शिक्षायाः करः।) व्यासः। इति शब्दमाला ॥ शिक्षाकर्त्तरि, त्रि ॥

शिक्षागुरुः, पुं, (शिक्षाया गुरुः।) विद्यादाता गुरुः। मन्त्राद्युपदेशकर्त्ता दीक्षागुरुः। यथा। इयं हि रसभावविशेषदीक्षागुरोर्विक्रमादित्यस्याभिरूपभूयिष्ठा परिषत्। इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः ॥

शिक्षितः, त्रि (शिक्ष + क्तः।) विज्ञः। इत्यमरः ॥ शिक्षायुक्तः। यथा,—

"आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥"
इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः ॥

शिक्षिताचारः, पुं, (शिक्षितानि आचाराणि येन।) शिक्षाकारी। क्षात्रः। यथा,—

"स्यादाचरमुखः कालाचरिकः शिक्षिताचरः।"
इति त्रिकाण्डशेषः ॥
(शिक्षिते, त्रि। यथा, राजतरङ्गिण्याम् ।५।८३।
"स सुय्यनामा मतिमान् प्रबुद्धः शिक्षिताचरः।
कस्याप्यासीदृगट्टपतेरर्भकाध्यापको गृहे ॥")

शिक्षकः, पुं, लेखकः। इति संक्षिप्तसारोणादिवृत्तिः ॥

शिखण्डः, पुं, मयूरपुच्छः। इत्यमरः यथा,

"शिखण्डोऽस्त्री पिच्छबर्हे शिखिपुच्छशिखण्डके।"
इति शब्दरत्नावली ॥
(यथा, महाभारते। १२। २८१। ५८।
"हतस्य रुधिरार्द्रैव शिखण्डाः पार्थ जज्ञिरे।
द्विजातिभिरभज्यास्ते दीक्षितैव तपोधनैः ॥")
चूड़ा इति मेदिनी ॥

शिखण्डकः, पुं, (शिखण्ड इव। कन्।) काकपक्षः। इत्यमरः जुल्पी इति भाषा। "हे क्षत्रियकुमाराणां शिखात्रये। उक्तञ्च।
'बालानाञ्च शिरः कार्य्यं त्रिशिखं मुण्डमेव चेति।'
शिखापञ्चके इत्यन्ये। सामान्येन चूड़ायामित्यन्ये। काकपक्षाकारत्वात् काकपक्षः। शिरसि खण्डते शिखण्डकः मनीषादिः तालव्यादिः शिखण्डे तु शिखावर्हे इति तालव्यादौ रभसः। शिखाण्डकञ्च। शिखण्डकशिखाण्डकाविति वाचस्पतिः।" इति तट्टीकायां भरतः ॥
(यथा, रघुः। ११। ५।
"तौ पितुर्नयनजेन वारिणा
किञ्चिदुक्षितशिखण्डकावुभौ।
धन्विनौ तमृषिमन्वगच्छतां
पौरदृष्टिकृतमार्गतोरणौ ॥")
मयूरपुच्छे, क्लो च। इति शब्दरत्नावली ॥

शिखण्डिकः, पुं, (शिखण्डीव कायति शब्दायते इति। कै + कः। यद्वा, शिखण्डोऽस्यास्तीति। शिखण्ड + ठन्।) कुक्कुटः। इति हेमचन्द्रः ॥

शिखण्डिका, स्त्री, शिखा। यथा,—
"चूडा केशी केशपाशी शिखा शिखण्डिका समाः॥"
इति हेमचन्द्रः॥
शिखण्डिनी, स्त्री, (शिखण्डचूडा अस्त्यस्या इति। इनि। ङीप्।) यूथिका। गुञ्जा। इति मेदिनी॥ द्रुपदराजकन्या। (यथा, महाभारते। ५।१९२।२
"कन्या शिखण्डिनी जाता पुरुषो वै निवेदितः॥")
सा यक्षस्य पुंस्त्वप्रदानेन पुरुषो भूत्वा शिखण्डीति नाम्ना ख्यातः। एतद्विवरणं महाभारते। ५। १९० अध्यायमारभ्य विशेषतो द्रष्टव्यम्॥ मयूरी। शिखण्डिन्-शब्दात् स्त्रियां ङीप्प्रत्ययेन निष्पन्ना॥ (विजिताश्वराजस्त्री। यथा, भागवते। ४। २४। ३।
"अपत्यत्रयमाधत्त शिखण्डिन्यां सुसम्मतम्॥"
शिखण्डविशिष्टा। यथा, महाभारते। ४। ३५। १।
"सा प्राद्रवत् काञ्चनमाल्यधारिणी
ज्येष्ठेन भ्रात्रा प्रहिता यशस्विनी।
सुदक्षिणा वेदिविलग्नमध्या
सा पद्मपत्राभनिभा शिखण्डिनी॥")
शिखण्डी, [न्] पुं, मयूरपुच्छः। गाङ्गेयारिः। स तु द्रुपदराजपुत्रः। (अस्य जन्मादिविवरणं महाभारते। ५। १९० अध्याये द्रष्टव्यम्॥) मयूरः। इति मेदिनी॥ (यथा, रघुः।१।३९।
"षड्जसंवादिनीः केका द्विधाभिन्नाः शिखण्डिभिः॥")
कुक्कुटः। बाणः। इति हेमचन्द्रः॥ गुञ्जा। स्वर्णयूथिका। इति राजनिर्घण्टः॥ विष्णुः। यथा। शिखण्डी नर्दयो ह्रषेति तस्य सहस्रनामस्तोत्रम्॥ (शिवः। यथा, महाभारते। १३। १७। ३१।
"जटी चर्मी शिखण्डी च सर्वाङ्गः सर्वभावनः॥"
शिखर, क्ली, शिखास्यास्तीति। "वृक्षण्कठजिति।" ४। २। ८०। अश्मादित्वात् रः ह्रस्वश्च।) पर्वताग्रम्। तत्पर्य्यायः। कूटम् २ शृङ्गम् ३। इत्यमरः॥ शैलाग्रदेशकम् ४। इति शब्दरत्नावली॥ (यथा, महाभारते। १। १८। २८।
"विदारयन् गिरिशिखराणि पत्रिभिः॥")
शिखरः, पुं क्ली, (शिखास्त्यस्येति। शिखा+रः। ह्रस्वश्च।) वृक्षाग्रम्। तत्पर्य्यायः। शिरः २। अग्रम् ३। इत्यमरः॥ शिरम् ४। इति शब्दरत्नावली॥ प्राग्रम् ५। इति राजनिर्घण्टः॥ पर्वतशृङ्गम्। पुलकः। कक्षः। पक्वदाडिमबीजाभमाणिक्यम्। सकलाग्रम्। इति मेदिनी॥ कोटिः। इति त्रिकाण्डशेषः॥
शिखरवासिनी, स्त्री, (शिखरे वसतीति। वस+णिनिः। ङीप्।) दुर्गा। इति त्रिकाण्डशेषः॥
शिखरा, स्त्री, मूर्वा। इति शब्दचन्द्रिका॥
शिखरिणी, स्त्री, रसाला। वृत्तभेदः। नारीरत्नम्। मल्लिका। रोमावली। इति मेदिनी॥ वृत्तभेदो यथा—
"रसै रुद्रैश्छिन्ना य-म-न-स भला गः शिखरिणी।
करादस्य भ्रष्टे मनु शिखरिणी दृश्यति शिखी-
र्विलीनाः स्युः सर्व्वे नियतमवधेयं तदखिलैः।
इति ब्रह्मद्रोपानुचितनिशितालापजनितं
स्मितं बिभ्रत् देवो जगदवतु गोवर्द्धनधरः॥"
इति छन्दोमञ्जर्य्याम् २ स्तवकः॥
नवमालिका। द्राक्षाविशेषः। इति राजनिर्घण्टः॥ मूर्व्वा। इति शब्दचन्द्रिका॥
शिखरी, [न्] पुं,(शिखरोऽस्यास्तीति। शिखर+इनिः।) पर्वतः। (यथा, गीतायाम्। १०। २३।
"वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्॥")
वृक्षः। अपामार्गः। इति मेदिनी॥ कोष्टुः। कोयष्टिः। इति हेमचन्द्रः। वन्दाकः। कर्कटशृङ्गी। कुन्दुरुकः। यावनालः। इति राजनिर्घण्टः॥ (कोटिविशिष्टे, त्रि। यथा, महाभारते। १। ७४। ४।
"दन्तैः शुक्लैः शिखरिभिः सिंहसंहननो महान्॥")
शिखलोहितः, पुं, वृक्षविशेषः। इति शब्दचन्द्रिका॥ कुकुरमुडा इति भाषा॥
शिखा, स्त्री, (शी+"शीङो क्रस्वश्च।" ऊणा० ५। २४। इति खः ह्रस्वो गुणाभावश्च। स्त्रियां टाप्।) अग्निज्वाला। तत्पर्य्यायः। ज्वालः २ कीलः ३ अर्चिः ४ हेतिः ५ शिखा ६। इत्यमरः॥ (यथा, माघे, १। २०।
"विदिद्युते बाडवजातवेदसः
शिखाभिरालिष्ट इवाम्बसां निधिः॥")
पिण्डितशिखाग्नेः शुभसूचकत्वं यथा, वायुपुराणे।
"अच्छिन्नान् पिण्डितशिखः सर्पिःकाञ्चनसन्निभः
स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्यसिद्धये॥"*॥
अग्नेरशुभलक्षणं यथा। ब्रह्मपुराणे।
"अल्पे रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके।
आर्द्रकाष्ठैश्च सम्पन्ने फुत्कारवति पावके॥
कृष्णार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम्।
आहुतीर्जुहुयात् यश्च तस्य नाशो भवेत् ध्रुवम्॥"
इति तिथितत्त्वम्॥*॥
शिरोमध्यस्थकेशः। तत्पर्य्यायः। चूडा २ केशपाशी ३। इत्यमरः॥ जुटिका ४ जूटिका ५। इति शब्दरत्नावली॥ केशी ६ शिखाण्डका ७ इति हेमचन्द्रः॥*॥ गायत्र्या शिखाबन्धनं यथा,—
"गायत्री तु शिखां बद्ध्वा नैर्ऋत्यां ब्रह्मरन्ध्रतः
जुटिकाञ्च ततो बद्ध्वा ततः कर्म्म समारभेत्॥"*
शूद्रस्य शिखाबन्धे मन्त्रो यथा,—
"ब्रह्मवाणीसहस्राणि शिववाणीशतानि च।
विष्णोर्नामसहस्रेण शिखाबन्धं करोम्यहम्॥"*
शिखामोचनमन्त्रो यथा,—
"गच्छन्तु सकला देवा ब्रह्मविष्णुमहेश्वराः।
तिष्ठत्वत्राचला लक्ष्मीः शिखामुक्तं करोम्यहम्॥"*॥
शिखाबन्धनानन्तरमाचमनं यथा,—
"निबद्धशिख आसीनो द्विज आचमनं चरेत्।
कृतोपवीतं सव्येऽंशे वाग्यत कायसंयतः॥"*
मुक्तशिखस्याचमने दोषो यथा,—
"शिरः प्राहृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा
अकृत्वा पादयोः शौचं आचान्तोऽप्यशुचिर्भवेत्॥"
इति आह्निकतत्त्वम्॥*॥
शाखा। वह्निचूडा। (यथा, महाभारते। १३। २८२। ५३।
"रत्नागतमथाज्ञानां शिखोल्केव वह्नेरहम्॥"
लाङ्गलिकी। अग्रमात्रम्। (यथा, भागवते। ३। १३। ४४।
"सटाशिखोद्धूतशिवाम्बुबिन्दुभिः॥")
चूडामात्रम्। प्रपदम्। इति मेदिनी॥ प्रधानम्। शिफा। वृद्धिः। इति हेमचन्द्रः॥(यथा, कथासरित्सागरे। २१। ८५।
"क्षुरद्रव्यशिखाजालं धात्रा मोहतमोपहम्॥")
स्वरज्वरः। इति शब्दरत्नावली॥
शिखाकन्दं, क्ली, (शिखायुक्तः कन्दो यस्य।) गृञ्जनम्। इति राजनिर्घण्टः॥
शिखाण्डकः, पुं, काकपक्षः। इति हेमचन्द्रः॥
शिखातरुः, पुं, (शिखायाः दीपशिखायास्तरुरिव।)दीपवृक्षः। इति त्रिकाण्डशेषः॥ पिलसुज इति भाषा॥
शिखाधरः, पुं, (शिखाया धरः।) मयूरः। इति शब्दमाला॥ मञ्जुघोषः। इति त्रिकाण्डशेषः॥
शिखाधारः, पुं, (शिखां धरतीति। धृ+अण्।) मयूरः। इति शब्दरत्नावली॥
शिखामूलं, क्ली, (शिखायुक्तं मूलं यस्य।) गृञ्जनम्। इति राजनिर्घण्टः॥
शिखालुः, पुं, मयूरशिखा। इति राजनिर्घण्टः॥
शिखावती, स्त्री, (शिखा विद्यतेऽस्याः। शिखा+मतुप्। मस्य वः। स्त्रियां ङीप्।) मूर्वा। इति शब्दचन्द्रिका॥
शिखावरः, पुं, (शिखा विद्यते अस्य। शिखा+"दन्तशिखात् संज्ञायाम्।" ५। २। १३३। इति वलच्। रस्य लत्वम्।) पनसवृक्षः। इति शब्दमाला॥
शिखावलः, पुं, (शिखा विद्यतेऽस्य। शिखा+"दन्तशिखात् संज्ञायाम्।" ५। २। १३३। इति वलच्।) मयूरः। इत्यमरः॥ (शिखावलनगरम्। शिखावला स्त्रीणा। इति काशिका॥)

शिखावला, स्त्री, (शिखा+वलच्। टाप्।) मयूरशिखा। इति राजनिर्घण्टः॥

शिखावान्, [त्] पुं, (शिखा विद्यतेऽस्य। शिखा+मतुप्। मस्य वः।) अग्निः। चित्रकवृक्षः। इत्यमरः॥ केतुग्रहः। इति शब्दरत्नावली॥ शिखायुक्ते, त्रि॥ (यथा, मनौ १।३८ श्लोके। "केतवः शिखावन्ति ज्योतींषि॥" इति मेधातिथिकुल्लूकौ॥)

शिखावृक्षः, पुं, (शिखाया वृक्ष इव।) दीपवृक्षः। इति शिखातरुशब्ददर्शनात्॥

शिखावृद्धिः, स्त्री, (शिखेव वृद्धिर्यस्याः।) कायिका वृद्धिः। पारत्रिकदेयलाभः। इति स्मृतिः॥

शिखिकण्ठं, क्ली, (शिखिनो मयूरस्य कण्ठ इव आकृतिर्यस्य।) तुत्थम्। इति रत्नमाला॥

शिखिग्रीवं, क्ली, (शिखिनः ग्रीवेव आकृतिर्यस्य) तुत्थम्। इत्यमरः॥

शिखिध्वजः, पुं, (शिखिनो वह्नेर्ध्वज इव।) धूमः। इति त्रिकाण्डशेषः॥ (शिखी मयूरो ध्वजो यस्य।) कार्त्तिकेयः। इति शब्दरत्नावली॥

शिखिनी, स्त्री, (शिखा विद्यतेऽस्याः। इनिः। स्त्रियां ङीप्।) मयूरशिखा। इति राजनिर्घण्टः॥

शिखिपुच्छं, क्ली, (शिखिनः पुच्छम्।) मयूरपिच्छम्। यथा,—

"शिखण्डोऽस्त्री पिच्छवर्हं शिखिपुच्छशिखण्डके॥"

इति शब्दरत्नावली॥

शिखिप्रियः, पुं, (शिखिनः प्रियः।) लगुवदरः। इति राजनिर्घण्टः॥

शिखिमण्डलः, पुं, वरुणवृक्षः। इति शब्दरत्नावली॥

शिखिमोदा, स्त्री, (शिखिनं मोदयतीति। मुद्+णिच्+अच्। टाप्।) अजमोदा। इति राजनिर्घण्टः॥

शिखियूपः, पु, श्रीकारी मृगः। इति राजनिर्घण्टः॥

शिखिवर्द्धकः, पुं, (शिखिनं जठराग्निं वर्द्धयतीति वृध+ण्वुल्।) कुक्कुटाण्डः। इति शब्दरत्नावली॥

शिखिवाहनः, पुं, (शिखी वाहनं यस्य।) कार्त्तिकेयः। इत्यमरः॥

शिखिव्रतं, क्ली, (शिखिनो व्रतम्।) व्रतविशेषः यथा,—

ब्रह्मोवाच।

"वक्ष्ये प्रतिपदादीनि व्रतानि व्यास शृणुताम्। प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदः। वैष्णवं पदं याति शिखिव्रतमिदं स्मृतम्॥"

इति गारुड़े १२९ अध्यायः॥

शिखी, [न्] पुं, (शिखास्यास्तीति। शिखा+"श्रोत्रादिभ्यश्च।"५।२।११६। इति इनिः।) मयूरः। (यथा, हरिवंशितायाम्। ३। २८।

"शिखिपत्रनिभः सलिलं न करोति हादशाब्दानि॥")

अग्निः। (यथा, महाभारते। ४। ५६। ८।

"खड्गी च धन्वी च विभाति पार्थः शिखी हुतः स्रुग्भिरिवाज्यसिक्तः॥")

चित्रकवृक्षः। इत्यमरः। बलीवर्दः। शरः। केतुग्रहः। द्रुमः। कुक्कुटः। इति मेदिनी॥ घोटकः। इति हेमचन्द्रः। अजलोमा। इति रत्नमाला॥ सितावरः। मेथिका। इति राजनिर्घण्टः॥ पर्व्वतः। ब्राह्मणः। दीपः। इति केचित्॥ शिखायुक्ते, त्रि। इति मेदिनी॥

शिग्रुः, पुं, (शेते स्वल्पेऽपि वायौ। शी+"जृव्रतीति।" उणा० ४।१०२। इति। रुः ह्रस्वो गुणागमश्च।) शाकम्। इत्यमरः॥ हस्तविशेषः। अञ्जिना इति भाषा। तत्पर्य्यायः। हरितशाकः २ शाकपत्रः ३ सुपत्रकः ४ उपदंशः ५ शमादंशः ६ कोमलपत्रकः ७ बहुमूलः ८ दंशमूलः ९ तीक्ष्णमूलः १०। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। तीक्ष्णत्वम्। वातकफमुखजाद्व्रणदोषहरत्वम्। दीपनत्वम्। रुच्यत्वञ्च। तस्य पत्रशाकगुणाः। रुच्यत्वम्। वातकफक्रिमिनाशित्वम्। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। पथ्यत्वम्। पाचनत्वञ्च॥ अपि च।

"शोभाञ्जनो नीलशिग्रुस्तीक्ष्णगन्धो जनप्रियः। मुखमोदः कृष्णशिग्रुर्बहुपत्रो रुचिराञ्जनः॥ शोभाञ्जनस्तीक्ष्णकटुः स्वादुष्णः पिच्छिलस्तथा जन्तुवातार्त्तिशूलघ्नश्चक्षुष्यो रोचनः परः॥"

श्वेतशिग्रुः सुतीक्ष्णः स्यान्मुखभङ्गः सिताह्वयः। समूलः श्वेतमरिचो रोचनो मधुशिग्रुकः॥ श्वेतशिग्रुः कटुस्तीक्ष्णः शोफानिलनिकृन्तनः। अक्ष्यव्यथाहरो रुच्यो दीपनो मुखजाद्यनुत्॥

रक्तको रक्तशिग्रुः स्यान्मधुरो बहुलच्छदः। सुगन्धिः केशरी सिंहो मृगारिश्च प्रकीर्त्तितः॥ रक्तशिग्रुर्महावीर्य्यो मधुरश्च रसायनः। शोफाध्मानसमीरार्त्तिपित्तघ्नो वातमारकः॥"

इति राजनिर्घण्टः॥

(वानप्रस्थाश्रमिणां तद्भक्षणनिषेधो यथा मनौ ६। १४।

"वर्জ্জयेन्मधुमांसञ्च भौमानि कवकानि च। भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च॥"

"शिग्रुकं वाह्लीकेषु प्रसिद्धं शाकम्।" इति मेधातिथिकुल्लूकौ॥)

शिग्रुजं, क्ली, (शिग्रोर्जायते। इति। जन+डः) शोभाञ्जनबीजम्। तत्पर्य्यायः। श्वेतमरिचम् २ इत्यमरः॥ शिग्रुभवे त्रि॥

शिग्रुबीजं, क्ली, (शिग्रोर्बीजम्।) शोभाञ्जनबीजम्। इति शब्दचन्द्रिका॥

शिघ, इ आघ्राणे। इति कविकल्पद्रुः॥ स्वा०) पर०-सक०-सेट्। इ, शिघ्रयते। इति दुर्गादासः॥

शिङ्गाणं, क्ली, (शिङ्ग+आधकः। पृषोदरादित्वात् कलोपः। इत्युणादिवृत्तौ उज्ज्वलदत्तः ३।८३।) काचपत्रम्। लोहमलम्। नासिकामलम्। इति मेदिनी॥ शिक्नि इति भाषा॥

शिङ्गाणकः, पुं, शिङ्गते इति। शिघ+"आधकौ लुधुशिंघिधाञ्भ्यः।" उणा० ३।८३। इति आधकः।) श्लेष्मा। इत्युणादिकोषः॥

शिङ्गाणकः, पुं, क्ली, (शिङ्ग+आधकः।) नासिकामलम्। इत्युणादिकोषः॥

शिङ्गितं, त्रि, (शिङ्ग+क्तः।) घ्रातम्। इति शब्दरत्नावली॥

शिञ्ज, इ ल कि ङ अस्फुटध्वनौ। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-अदा० च-आत्म०-अक०-सेट्।) अस्फुटध्वनिरिह भूषणकर्त्तृकएव। भूषणानान्तु शिञ्जितमित्यमरात्। इ, शिञ्जते। ल ङ, शिञ्जके। कि ङ, शिञ्जयते शिञ्जते मञ्जीरम्। तालैः शिञ्जदलयशुभगैर्नर्त्तितः कान्तयाने इत्यत्र शिञ्जदिति गणकृतानित्यत्वादिति रमानाथः। वस्तुतस्तु शिङ्के शिञ्जः पचाद्यजन्तात् ततः शिञ्ज इवाचरतीति क्वौ शवलम्। इति दुर्गादासः॥

शिञ्जा, स्त्री, (शिञ्जि अव्यक्तशब्दे+"गुरोश्च हलः।" ३।३।१०३। इत्यः। टाप्।) भूषणशब्दः। इति शब्दरत्नावली॥ धनुर्गुणः। इति हेमचन्द्रः॥

शिञ्जितं, क्ली, (शिञ्ज+क्तः।) भूषणध्वनिः। इत्यमरः॥ (यथा,—

"नखानि विधुग्रङ्क्या विरहिणी करेणाहतोत् ततः किशलयभ्रमात् स्वयमथाच्छिपद्भुतः। ततो वलयशिञ्जितं भ्रमरगुञ्जिताशङ्क्या उड्डरिति कुड्मलध्वनिधिया ततो मूर्च्छिता॥"

इत्युद्भटः॥)

शिञ्जिनी, स्त्री, (शिञ्जति आकृष्टमुक्ता शब्दायते इति। शिञ्ज+णिनिः। स्त्रियां ङीप्।) धनुर्गुणः। इत्यमरः॥ नूपुरः। इति हेमचन्द्रः॥

शिञ्जी, [न्] त्रि, भूषणशब्दविशिष्टः। शिञ्जा विद्यतेऽस्य इत्यर्थे इन्प्रत्ययेन निष्पन्नः॥

शिट, अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शेठति खलं लोकः। इति॥ दुर्गादासः॥

शिण्डाकी, स्त्री, खाद्यद्रव्यविशेषः। यथा,—

"शिण्डाकी राजिकायुक्तैः स्यान्मूलकदलद्रवैः। सपयस्करसैर्व्वापि शालिपिष्टकसंयुतैः। शिण्डाकी रोचनी गुर्व्वी पित्तघ्नी मरुती स्मृता॥"

इति राजनिर्घण्टः॥

शितं त्रि, (शो तनूकरणे+क्तः। "श्राच्छीरन्यतरस्याम्।"७। ४। ४१। इति इकारादेशः।) दुर्बलः। निशितः इति मेदिनी॥ (यथा, रघौ ६। ४२।

"धारां शितां रामपरश्वधस्य सभावयत्यत्पलपत्रसाराम्॥")

क्लग्नः। इति विश्वः॥ (पुं विश्वामित्रगोत्रीय ऋषिः। यथा, महाभारते। १३। ४। ५३।

"आर्द्रको नैकदक् चैव शिलायूपः शितः शुचिः ॥")
शितदुः, स्त्री, शतद्रुनदी। इत्यमरः ॥ शतलज् इति ख्याता ॥ चीरमोरटः। इति रत्नमाला ॥
शितशूकः, पुं, (शितं निशितं शूकं यस्य।) यवः। इत्यमरः ॥ दन्त्यादिरित्येके इति भरतः ॥ गोधूमः। इति त्रिकाण्डशेषः ॥
शितिः, त्रि, (शतिः सौत्रो धातुः + "क्रमितमिशितिस्तम्भामत इच्च।" उणा० ४।१२१। इति इन्। स च कित्। अत इकारश्च।) शुक्लः। कृष्णः। (यथा, माघे। १५। ४८।
"शितितारकानुमिततास्र-
नयनमरुचोऽक्तं क्रुधा ॥")
भूर्जवृक्षे, पुं। इति मेदिनी ॥ यथा च।
"शितिच्छिदु सिते कृष्णे भूर्जे सारेऽपि च त्रयोः।"
इति शब्दरत्नावली ॥
शितिकण्ठः, पुं, (शितिः कण्ठे यस्य।) शिवः। इत्यमरः ॥ (यथा, भागवते। ४। ३। १२।
यामां व्रजन्निः शितिकण्ठ! मक्षितं
नभो विमानैः कलहंसवाक्शुभिः ॥")
दात्यूहपक्षी। इति त्रिकाण्डशेषः ॥) यथा, महाभारते। १। ८०। ६।
"यदा तु तान् वितुदन्ते वयांसि
तथा गृध्राः शितिकण्ठाः पतङ्गाः ॥")
शितिचारः, पुं, शाकविशेषः। यथा,—
"शितिचारः सूतपुत्रो वितत्रं सुनिषण्णकम् ॥"
इति जटाधरः ॥
शितिच्छदः, पुं, (शितौ छदौ यस्य।) हंसः। इति शब्दरत्नावली ॥
शितिपक्षः, पुं, (शितौ शुक्लौ पक्षौ यस्य।) हंसः। इति शब्दरत्नावली ॥
शितिसारकः, पुं, (शितिः सारो यस्य।) तिन्दुकवृक्षः। इत्यमरः ॥
शिथिलं, त्रि, (श्रथ + "अजिरशिशिरशिथिलेति।" उणा० १। ५४। इति किरच् प्रत्ययेन साधुः।) शृथः। इति हेमचन्द्रः ॥ (यथा, भागवते। ४। २८। १५।
"शिथिलावयवो यर्हि गन्धर्वाप्सरसां पतिः ॥")
शिथिलं, क्ली, (श्रथ + किरच्।) मन्दबन्धनम्। मान्यरत्वम्। इति संक्षिप्तसारोणादिवृत्तिः ॥ संयोगविशेषः। यथा,—
"प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते।"
इति भाषापरिच्छेदः ॥
"प्रचय इति मूले शिथिलाख्य इति किञ्चिदवयवावच्छेदेनावयवान्तरसंयोगिनि महत्त्ववति अवयवे वर्त्तमानः संयोगः प्रचय इत्येके। अत्र महत्त्वपदं न देयं परमाणुसंयोगस्य प्रचयत्वेऽपि न क्षतिरित्यन्ये। भूयोऽवयवावच्छेदेनावयवान्तरसंयोगिन्यवयवे वर्त्तमानः संयोगः प्रचयः तेन परमाणुसंयोगो द्व्यणुकसंयोगो वा न प्रचय इत्यमरे।" इति सिद्धान्तमुक्तावली-टीकादिनकरौ ॥
शिनिः, पुं, क्षत्रियभेदः। इत्युणादिकोषः ॥ (यथा महाभारते। २। ४। ३०।
"अक्रूरः कृतकर्म्मा च सत्यकश्च शिनेः सुतः ॥")
शिनेर्नप्ता, [तृ] पुं, सात्यकिः। इति त्रिकाण्डशेषः ॥
शिपविष्टः, पुं, शिपिविष्टः। इत्यमरटीकायां रमानाथः ॥
शिपिः, पुं, रश्मिः। यथा,—
"शेत्यात् शयनयोगाच्च शिपिवारि प्रचक्षते।
तत्पानाद्वचणाच्चैव शिपयो रश्मयो मताः।
तेषु प्रवेशात् विश्लेषः शिपिविष्ट इहोच्यते ॥"
इति व्याख्यानम् ॥
शिपिविष्टः, पुं, खलतिः। दुष्कर्म्मा। महेश्वरः। इत्यमरः ॥ कुष्ठी। इत्यमरटीकायां रायमुकुटः॥ अस्य रूपान्तरम्। शिपविष्टः। शिपिविष्टः। इत्यमरटीका ॥ विष्णुः यथा,—
"नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥"
इति तस्य सहस्रनामस्तोत्रं रमानाथश्च ॥ (पशुप्रविष्टे, त्रि। यथा, भागवते। ४। १३। २५।
"पुरोडाशं निरवपन् शिपिविष्टाय विष्णवे ॥"
"शिपिषु पशुषु यज्ञरूपेण प्रविष्टाय। तथाच श्रुतिः यज्ञो वै विष्णुः पशवः शिपिः यज्ञ एव पशुषु प्रतितिष्ठतीति।" इति श्रीधरस्वामी ॥)
शिप्रः, पुं, सरोवरविशेषः। यथा,—
"एवं विवाह्य विधिवत् सौवर्णे मानसाचले।
अरुन्धतीं वशिष्ठस्तु मोदमाप तया सह ॥
तत्र यत् पतितं तोयं मानसाचलकन्दरे।
विवाहावभृतार्थाय शान्त्यर्थं वसुधाकृतम् ॥
ब्रह्मविष्णुमहादेवपाणिभिः समुदीरितम्।
तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात् ॥
हेमाद्रेः कन्दरे सानौ सरस्याञ्च पृथक् पृथक्।
तत्तोयं पतितं शिप्रे देवभोग्ये सरोवरे।
तेन शिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम् ॥"
इति कालिकापुराणे २३ अध्यायः ॥
शिफा, स्त्री, नदीविशेषः। यथा'—
"ततो हिमवतः प्रस्थे प्रतीच्यां तत्पुरस्य च।
शिप्र नाम सरः पूर्णं दृष्टशुद्धिप्रियादयः ॥
तद्रक्षस्थानमासाद्य ब्रह्मशक्रादयः सुराः।
उपविष्टा यथान्यायं पुरस्कृत्य महेश्वरम् ॥
तं शिप्रसङ्गकामारं मनोज्ञं सर्व्वदेहिनाम्।
शीतामलजलं सर्व्वैर्गुणैर्मानससम्मितम् ॥
दृष्ट्वा चक्रं हरस्तस्मिन् सौत्सुक्योऽभूदवेक्षणे।
शिप्रां नाम नदीं तस्मान्निःसृतां दक्षिणोदधिम्।
गच्छन्तीञ्च ददर्शासौ पावयन्तीं जगज्जनान् ॥"
इति कालिकापुराणे १८ अध्यायः ॥
(हनुः। यथा, ऋग्वेदे। ८। ६५। १०।
"उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः।"
"शिप्रे हनू।" इति तद्भाष्ये सायणः ॥)
शिफः, पुं, शिफा। इत्यमरटीकायां विद्याविनोदः॥
शिफा, स्त्री, वृक्षाणां जटाकारमूलम्। शिकड़ इति ख्यातम्। तत्पर्य्यायः। जटा। २। इत्यमरः ॥ मूलम् ३। इति जटाधरः ॥ नदी (यथा ऋग्वेदे। १। १०४। ३।
"इते ते स्यातां प्रवणे शिफायाः।"
"शिफायाः शिफा नाम नदी तस्याः।" इति तद्भाष्ये सायणः ॥) मांसिका। माता। इति मेदिनी ॥ शतपुष्पा। हरिद्रा। इति राजनिर्घण्टः ॥ पद्मकन्दः। इति मुकुटधृतस्वामी ॥ लता। इति मेधातिथिः ॥ यथा, मनौ। ८। २३०।
"शिफाविदलरज्ज्वर्थं विदध्यादृपतिर्द्रुमम् ॥)
शिफाकः, पुं, (शिफा इव। कन्।) पद्ममूलम्। इति शब्दरत्नावली ॥
शिफाकन्दः, पुं, (शिफायुक्तः कन्दो यस्य।) पद्ममूलम्। तत्पर्य्यायः। करहाटः २। इत्यमरः ॥ शिफाकः ३। इति शब्दरत्नावली ॥ पद्मकन्दः ४ कर्कटः ५। इति जटाधरः ॥ शिफा ६ कन्दः ७। इति मुकुटधृतस्वामी ॥
शिफाधरः, पुं, (शिफाया धरः।) शाखा। इति शब्दचन्द्रिका ॥
शिफारुहः, पुं, (शिफाया रोहतीति। रुह + कः।) वटवृक्षः। इति राजनिर्घण्टः ॥
शिम्बड़ी, स्त्री, क्षुपविशेषः। चाङ्गेरी इति हिन्दीभाषा। तत्पर्य्यायः। मतिदा २ वल्या ३ पङ्क्त्यहारिणी ४ द्रवत्यत्री ५ वातघ्नी ६ गुच्छपुष्पी ७। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। वातपृष्ठशूलनाशित्वम्। रसायने युक्ता चेत देहदार्ढ्यकारित्वञ्च। इति राजनिर्घण्टः ॥
शिम्बः, पुं, चक्रमर्दकः। इति शब्दचन्द्रिका ॥
शिम्बा, स्त्री, (शिम्ब + टाप्।) कलयादित्वक् सुंटी इति छिमड़ा इति च भाषा। तत्पर्य्यायः। समी २। इत्यमरः ॥ सिम्बा ३ सिम्बी ४ शिम्बी ५ शिम्बिका ६ शमी ७ सिम्बिका ८ शिम्बिः ९। इति शब्दरत्नावली। शमिः १०। इति हेमचन्द्रः ॥
शिम्बिः, स्त्री, शिम्बा। इति हेमचन्द्रः ॥ एरका इति भावप्रकाशः ॥
शिम्बिकः, पुं, कृष्णमुद्गः। यथा,—
"कृष्णे प्रवरवासन्तहरिमन्यजशिम्बिकाः ॥"
इति हेमचन्द्रः ॥
शिम्बिका, स्त्री, (शिम्बि + कन्। टाप्।) शिम्बा इति शब्दरत्नावली ॥
शिम्बिपर्णिका, स्त्री, (शिम्बिपर्णी + स्वार्थे कन्।) मुद्गपर्णी। इति रत्नमाला ॥
शिम्बिपर्णी, स्त्री, (शिम्बेः पर्णमिव पर्णमस्याः। ङीष्।) मुद्गपर्णी। इति शब्दचन्द्रिका ॥
शिम्बी, स्त्री, (शिम्बि + पचे ङीप्।) शिम्बा। इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम्। १। २११।
"भुञ्जाने कच्चरगुच्छानां शिम्बीरम्बुजलोचने ॥"
मुद्गपर्णी। कपिकच्छुः। इति राजनिर्घण्टः ॥
शिरः, पुं, पिप्पलीमूलम्। इति मेदिनी। मस्तकम्। इति जटाधरः ॥ (यथा,—

"पिण्डं दद्यात् गयाशिरे।"इति वायुपुराणम् ॥ "शिरो वाटी शिरोऽदन्तो रजोवाटी रजस्तथा।" इति कोषान्तरम् ॥) शय्या। अजगरः। इति संक्षिप्तसारोणादिवृत्तिः ॥

शिरः, [स्] क्ली, (शॄ+"अयतेः खाङ्गे शिरः किच्च।"उणा० ४।१८३। असुन्। सच कित्। धातोः शिरादेशश्च।) शिखरम्। (यथा, महाभारते। ४। २३। २।

"यथा वज्रेण वै दीर्णं पर्व्वतस्य महच्छिरः ॥") मस्तकम्। इत्यमरः ॥ (यथा, लक्ष्मीचरित्रे।

"शिरः सपुष्पं चरणौ सुपूजितौ ॥") तच्च मानमात्रेण भवति। इति सुखबोधः ॥ तद्रोगनाशकौषधम्। यथा,—

"शिरोरोगहरं लेपात् गुञ्जामूलं सकाञ्जिकम्।"

इति गारुडे १८८ अध्यायः ॥

प्रधानम्। (यथा, भागवते। ५। १४। ४५। "योगाय सांख्यशिरसे प्रकृतीश्वराय ॥") सेनाग्रम्। इति मेदिनी ॥

शिरःकपाली, [न्] पुं, (शिरःकपालोऽस्यास्तीति इनिः।) नरमस्तककपालधारी सन्न्यासी। इति केचित् ॥

शिरःफलः, पुं, (शिरस्तुल्यं फलं यस्य।) नारिकेलः। इति त्रिकाण्डशेषः ॥

शिरःशूलं, क्ली, (शिरसः शूलम्।) मस्तकवेदनारोगः। (यथा, कथासरित्सागरे। १३। १५५।

"प्रातः सोऽपि शिरःशूलव्यपदेशेन वेष्टनम्। कृत्वा प्रच्छादयामास ललाटतटमङ्कितम् ॥") तस्यौषधं यथा,—

"श्वेतापराजितामूलं पिप्पलीशुण्ठिसंयुतम्। परिपिष्टं शिरोलेपात् शिरःशूलविनाशनम् ॥"

इति गारुडे १८८ अध्यायः ॥

शिरजः, पुं, (शिराज्जायते इति। जन+डः।) केशः। इति शब्दरत्नावली ॥

शिरसिजः, पुं, (शिरसि जायते इति। जन+डः।) केशः। इति जटाधरः ॥ (यथा, माघे। ७। ६२।

"अथशिरसिजपाशपातभारा- दिव नितरां नतिमङ्गिरंसभागैः ॥")

शिरसिरुहः, पुं, (शिरसि रोहतीति। रुह+कः।) केशः। इति शब्दरत्नावली ॥

शिरस्कं, क्ली, शिरस्त्राणम्। इति हेमचन्द्रः ॥ शिरःसम्बन्धिनि, त्रि ॥

शिरस्त्रं, क्ली, (शिरस्त्रायते इति। त्रै+कः।) शिरोरक्षणसन्नाहः। टोप् इति ख्यातः। इत्यमरभरतौ ॥ (यथा राजतरङ्गिण्याम् ।५।४७। "वल्गन् मध्येऽश्ववाराणां नृत्यत्येवाश्ववाजिना वल्गाङ्गेनोद्दलल्लम्बं शिरस्त्रं वामपाणिना ॥")

शिरस्त्राणं, क्ली, (शिरस्त्रायते अनेन। त्रै+ल्युट्।) शिरोरक्षणसन्नाहः। खोपड़ा इति टोप् इति च भाषा। तत्पर्य्यायः। शीर्षण्यम् २ शीर्षकम् ३ शिरस्कम् ४। इति हेमचन्द्रः ॥ शिरस्त्रम् ५। इत्यमरः ॥ (यथा, रघौ। ४। ६४।

"अपनीतशिरस्त्राणाः श्रेयास्तं शरणं ययुः ॥")

शिरस्यः, पुं, (शिरस्+"शाखादिभ्यो यत्।" ५। ३। १०३। इति यत्।) विशदकचः। तत्पर्य्यायः। शीर्षण्यः २। इत्यमरः ॥ हे स्नातः स्नानादिना वा निर्म्मले अन्योन्यासंसृक्ते केशे। इति भरतः ॥

शिरा, स्त्री, धमनिः। इति मेदिनी ॥ शिर इति भाषा। अस्याः पर्य्यायादिकं नाड़ीशब्दे द्रष्टव्यम् ॥

शिरापत्रः, पुं, (शिरायुक्तं पत्रं यस्य।) हिन्तालवृक्षः। इति राजनिर्घण्टः ॥ कपित्थः। इति शब्दचन्द्रिका ॥

शिरालं, क्ली, (शिराः सन्ति अस्य। "प्राणिस्थादातो लजन्यतरस्याम्।" ५। २। ८६। इति लच्।) कर्म्मरङ्गम्। इति शब्दचन्द्रिका ॥ (शिरायुक्ते, त्रि। यथा, भट्टौ। २। ३०।

"आपिङ्गरूक्षोर्द्धशिरस्यवालैः शिरालजङ्घैर्गिरिकूटदन्नैः ॥")

शिरालकः, पुं, (शिराल इव। कन्।) अक्षिभङ्गवृक्षः। इति शब्दचन्द्रिका ॥ हाड़भाङ्गा इति भाषा ॥

शिराहत्तं, क्ली, सीसकम्। इति राजनिर्घण्टः ॥

शिरिः, पुं, (शृणात्यनेन+"कृगृशृपृकुटिभिदिछिदिभ्यश्च।" उणा० ४। १४२। इति इः। स च कित्।) खड्गः। शरः। हिंस्रः। इत्युणादिकोषः ॥ शलभः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शिरीषः, पुं, (शृणाति झटिति स्फायतीति। शॄ+"शॄपृभ्यां किच्च।" उणा० ४। २७। इति ईषन् सच कित्।) स्वनामख्यातवृक्षः। (यथा, कुमारे। ५। ४।

"पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥") तत्पर्य्यायः। कपीतनः २ भण्डिलः ३। इत्यमरः ॥ भण्डिरः ४ भण्डीरः ५ भण्डीलः ६। इति तट्टीका ॥ मृदुपुष्पः ७ शुकतरुः ८ विषनाशनः ९। इति रत्नमाला ॥ श्वेतपुष्पः १० भण्डिकः ११ स्वर्णपुष्पकः १२ शुकेष्टः १३ वर्हपुष्पः १४ विषहन्ता १५ सुपुष्पकः १६ उद्दानकः १७ शुक्रतरुः १८ लोमशपुष्पकः १९ कपीतकः २० कलिङ्गः २१ श्यामलः २२ शङ्खिनीफलः २३ मधुपुष्पः २४ वृत्तपुष्पः २५। पुस्तकान्तरे शिखिनीफलः २६ भण्डी २७ प्लवगः २८ शुकपुष्पः २९। अस्य गुणाः। कटुत्वम्। शीतत्वम्। विषवातपामाकुष्ठकण्डूतित्वग्दोषनाशित्वञ्च। इति राजनिर्घण्टः ॥ अपि च।

"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः। शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥

शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः। दोषशोथविसर्पघ्नः काश्यव्रणविषापहः ॥"

इति भावप्रकाशः ॥ * ॥

कण्टकशिरीषस्य पर्य्यायः।

"कटभी किणिही श्वेता महाश्वेता च रोहिणी।"

इति रत्नमाला ॥ * ॥

अस्य गुणाः।

"शिरीषो विषवीसर्पस्वेदत्वग्दोषशोथजित्।"

इति राजवल्लभः ॥

शिरीषपत्रिका, स्त्री, (शिरीषस्य पत्रमिव पत्रमस्याः। ततः स्वार्थे कन्। टापि अत इत्वम्।) श्वेतकिणिही। इति राजनिर्घण्टः ॥

शिरोगृहं, क्ली, (शिरसो गृहम्।) अट्टालिकोपरिगृहम्। तत्पर्य्यायः। चन्द्रशाला २। इति हेमचन्द्रः ॥

शिरोग्रीवं, क्ली, (शिरश्च ग्रीवा च द्वयोः समाहारः। यथा। द्वन्द्वैकत्वं अव्ययीभावश्च क्लीवे स्यात् द्वन्द्वस्य समासस्य एकत्वं समाहारद्वन्द्व इत्यर्थः। यथा, वाक्त्वचं श्रोत्रजं पाणिपटं शिरोग्रीवम्। इति क्लीवलिङ्गसंग्रहटीकायां भरतः ॥

शिरोधरा, स्त्री, (शिरसो धरा।) ग्रीवा। इति हेमचन्द्रः ॥ (यथा भागवते। ३। १७। १०।

"सङ्गीतवद्रोदनवदुन्नमय्य शिरोधराम्। व्यमुञ्चन् विविधा वाचो ग्रामसिंहास्ततस्ततः ॥" क्लीवलिङ्गेऽपि दृश्यते। यथा, तत्रैव। ३। १३। ३७।

"दीक्षानुजन्मोपसदः शिरोधरम् ॥")

शिरोधिः, स्त्री, (शिरो धीयते अनया। धा+"कर्म्मण्यधिकरणे च।"३।३।९३। इति किः।) ग्रीवा। इत्यमरः ॥

शिरोमणिः, पुं स्त्री, (शिरसो मणिः।) मस्तकधार्य्यरत्नम्। तत्पर्य्यायः। चूड़ामणिः २ शिरोरत्नम् ३। इति शब्दरत्नावली ॥ पण्डितस्य उपाधिविशेषश्च ॥ (इयोरुदाहरणम्। यथा,—

"यस्य सांसारिकी चिन्ता चिन्ता चिन्तामणेः कुतः।

तयैव हि शिरःकम्पः क्व शिरोमणिधारणम् ॥" इत्युद्भटः ॥)

शिरोमर्म्मा, [न्] पुं, (शिर एव मर्म्म जीवाधानं यस्य।) शूकरः। इति हेमचन्द्रः ॥

शिरोरत्नं, क्ली, (शिरसो रत्नम्।) शिरोमणिः। इत्यमरः ॥

शिरोरुजा, स्त्री, (शिरसि रुजतीति। रुज+कः। टाप्।) सन्निपातवृक्षः। इति त्रिकाण्डशेषः ॥ मस्तकरोगश्च ॥

शिरोरुट्, [ड्] पुं, (शिरसि रोहतीति। रुह+क्विप्।) केशः। इति शब्दरत्नावली ॥

शिरोरुहः, पुं, (शिरसि रोहतीति। रुह+कः।) केशः। इत्यमरः ॥ (यथा, भागवते। ४। २८। ४४।

"चीरवासा व्रतश्यामा वेणीभूतशिरोरुहा ॥")

शिरोरोगः, पुं, (शिरसो रोगः ।) मस्तकपीड़ा । यथा,—

अथ शिरोरोगाधिकारः । अत्र शिरोरोगस्य निदानं सङ्ख्याञ्चाह ।

"शिरोरोगास्तु जायन्ते वातपित्तकफैस्त्रिभिः । सन्निपातेन रक्तेन क्षयेण कृमिभिस्तथा ॥
सूर्य्यावर्त्तानन्तवातशङ्खकार्द्धावभेदकाः । एकादशविधस्यास्य लक्षणानि प्रचक्षते ॥"

शिरोरोगा अत्र शिरोरोगः शूलरूपा रुगभिधीयते । वातपित्तकफैस्त्रिभिः । ननु वातपित्तकफैरित्युक्ते तत्त्रित्वबोधात् । किमर्थं त्रिभिरिति पदम् । वातपित्तकफानां पृथक्कारणत्वबोधनार्थम् । तर्हि सर्व एव शिरोरोगाः सन्निपातसमुद्भवा इति कथम् । तदा वातादय उल्बणतया पृथक्कारणानि बोद्धव्यानि । क्षयेण रसादिक्षयेण ॥*॥ वातिकस्य लक्षणमाह ।

"यस्यानिमित्तं शिरसो रुजश्च
भवन्ति तीव्रा निशि चातिमात्रम् ।
बन्धोपतापैः प्रशमश्च यत्र
शिरोऽभितापः स समीरणेन ॥"

भवेदिति विशेषः । अनिमित्तं अतर्कितविप्रकृष्टनिमित्तम् । निशि चातिमात्रं रात्रौ श्लैष्मिकरोगाधिक्यात् । प्रतापः स्वेदनम् । शिरोऽभितापः शिरःपीड़ा ॥*॥ पैत्तिकमाह ।

"यस्योष्णमङ्गारचितं यथैव
भवेच्छिरो दह्यति नाशिनाशम् ।
शीतेन रात्रौ च भवेच्छमञ्च
शिरोऽभितापः स तु पित्तकोपात् ॥

दह्यतीत्यार्षत्वात् ॥*॥ श्लैष्मिकमाह ।

"शिरो भवेद्यस्य कफोपदिग्धं
गुरु प्रतिष्टब्धमथो स्निमञ्च ।
सूनाच्चिनासावदनञ्च यस्य
शिरोऽभितापः स कफप्रकोपात् ॥"

कफोपदिग्धं अन्तःकफलिप्तम् । प्रतिष्टब्धं स्तब्धशिरम् ॥*॥ सान्निपातिकमाह ।

"शिरोऽभितापे त्रितयप्रवृत्ते
सर्वाणि लिङ्गानि समुद्भवन्ति ॥"*॥

रक्तजमाह ।

"रक्तात्मिकाः पित्तसमानलिङ्गा-
स्वर्शासहत्वं शिरसो भवेच्च ॥"

पैत्तिकाद्भेदकलिङ्गमाह । शिरःस्वर्शासहत्वमिति ॥*॥ क्षयजमाह ।

"वसावलासक्षतसम्भवानां
शिरोगतानामतिसंक्षयेण ।
क्षयप्रवृत्तिः शिरसोऽभितापः
कष्टो भवेदुग्ररुजोऽतिमात्रम् ॥"

क्षतसम्भवं रुधिरम् । कष्टः कृच्छ्रसाध्यः ।

"भ्रमो भ्रमति तुद्येत शिरो विभ्रान्तनेत्रता ।
मूर्च्छा गात्रावसादश्च शिरोरोगे क्षयात्मके ॥"

कृमिजमाह ।

"निस्तुद्यते यस्य शिरोऽतिमात्रं
संभक्ष्यमाणं स्फुरतीव चान्तः ।
घ्राणाच्च गच्छेद्रुधिरं सपूयं
शिरोऽभितापः कृमिभिः सघोरः ॥"

संभक्ष्यमाणं कृमिभिरिति शेषः । घ्राणाच्चेति चकारेण कृमिनिर्गमोऽपि बोध्यते ॥*॥ सूर्य्यावर्त्तमाह ।

"सूर्य्योदयं या प्रतिमन्दमन्द-
मच्छिभ्रुवं रुक् समुपैति गाढ़म् ।
विवर्द्धते चांशुमता सहैव
सूर्य्याववृत्तौ विनिवर्त्तते च ॥
शीतेन शान्तिं लभते च किञ्चि-
दुष्णेन जन्तुः सुखमाप्नुयाद्वा ।
सर्व्वात्मकं कष्टतमं विकारं
सूर्य्यावर्त्तं तमुदाहरन्ति ॥"

सूर्य्योदयमिति लक्षीकृत्य आरभ्येति यावत् । सूर्य्यस्याववृत्तौ सूर्य्यस्याधोगतौ ॥ * ॥ अनन्तवातमाह ।

"दोषास्तु दुष्टाः स्वयमेव मन्या
संपीड्य घाटां स्वरुजां सुतीव्राम् ।
कुर्वन्ति सोऽच्छि भ्रुवि शङ्खदेशे
स्थितिं करोत्याशु विशेषतस्तु ॥
गण्डस्य पार्श्वं तु करोति कम्पं
हनुग्रहं लोचनजान् विकारान् ।
अनन्तवातं तमुदाहरन्ति
दोषत्रयोत्थं शिरसो विकारम् ॥"

एवशब्दोऽव्याप्यर्थः । अव्ययानामनेकार्थत्वात् । स्वरुजां स्वस्य रुजां व्यथादाहगौरवादिरूपां दोषाः कुर्वन्ति । अयमनन्तवातः । स अनन्तवातः अक्ष्यादिषु स्थितिं करोति । विशेषतः गण्डपार्श्वे स्थितिं करोति । पीड़या स्थितिं कृत्वा कम्पादींश्च करोति ॥ * ॥ शङ्खकमाह ।

"पित्तरक्तानिला दुष्टाः शङ्खदेशे विमूर्च्छिताः॥
तीव्ररुग्दाहरागं हि शोथं कुर्वन्ति दारुणम् ॥
स शिरोविषवद्वेगान् निरुणद्ध्याशु गलं तथा ।
त्रिरात्राज्जीवितं हन्ति शङ्खको नाम नामतः ।
त्र्यहाज्जीवति भैषज्यं प्रत्याख्येयस्य कारयेत् ॥"

पित्तरक्तानिलाः अत्र कफोऽपि योज्यः । कृतानुतापः कफपित्तरक्तैरिति सुश्रुतवचनात् । विमूर्च्छिताः प्रवृद्धाः । स शोथः । त्रिरात्रात् त्रिरात्रमध्ये मारयति ॥*॥ अर्द्धावभेदकमाह ।

"रूक्षाशनाद्यध्यशनाद्यवश्याप्राग्वातमैथुनैः ।
वेगसंधारणायास्यायामैः कुपितोऽनिलः ॥
केवलः सकफो वार्द्धं गृहीत्वा शिरसो बली ।
मन्याभ्रूशङ्खकर्णाक्षिललाटार्द्धेषु वेदनाम् ॥
शस्त्राग्निनिभां कुर्य्यात्तीव्रां सोऽर्द्धावभेदकः ।
नयनं वाथवा श्रोत्रमभिहन्ती विनाशयेत् ॥"

अवश्या अवश्यायः । आयासः अतिबलेन भारोद्वहनादिभिः । व्यायामः स्वल्पश्रमः । शस्त्राग्निनिभां शस्त्रपातेनेव वज्रपातेनेव वेदनाम् ॥*॥ अथ शिरोरोगाणां चिकित्सा ।

"वातजाते शिरोरोगे स्नेहस्वेदं विवर्द्धनम् ।
पानाहारोपनाहांश्च कुर्य्याद्धातामयापहान् ॥
कुष्ठमेरण्डमूले च नागरे तत्र पेषितम् ।
कटूष्णं शिरसः पीड़ां भाले लेपनतो हरेत् ॥
रसः श्वासकुठारोत्यस्तस्य नस्यं विशेषतः ।
शिरःशूलं हरत्येव विधेयो नात्र संशयः ॥"*॥

अथ शिरोवस्तिविधिः ।

"आशिरोव्यापि तच्चर्म्म पोड़याङ्गुलमुच्छ्रितम् ।
तेनावेष्ट्य शिरोऽधस्तान्माषकल्केन लेपयेत् ॥
निश्चलस्योपविष्टस्य तैलैः कोष्णैः प्रपूरयेत् ।
धारयेदारुजः शान्त्यै यामं यामार्द्धमेव च ॥
शिरोवस्तिर्हरत्येष शिरोरोगं मरुद्भवम् ।
हनुमन्याशिरःकर्णार्त्तिमर्द्दितं सूर्दकम्पनम् ।
विना भोजनमेवैष शिरोवस्त्या प्रयुज्यते ॥
दिनानि पञ्च वा सप्त रुजि तत्परतोऽपि वा ।
ततोऽपनीतस्नेहस्तु मोचयेद्वस्तिबन्धनम् ॥
शिरोललाटवदनग्रीवादीनि विमर्द्दयेत् ।
सुखोष्णेनाम्भसा गात्रं प्रक्षाल्याप्नोति यद्धितम्॥
आमिषं जाङ्गलं पथ्यं तत्र शाल्यादयोऽपि च ।
मुद्गान् माषान् कुलत्थांश्च खादेद्वा निशि केवलान् ॥
कटुकोष्णान् ससर्पिष्कानुष्णं क्षीरं पिबेत्तथा ।
पित्तात्मके शिरोरोगे शीतानां चन्दनाम्भसाम्॥
कुमुदोत्पलपद्मानां स्वर्गाः सेव्याश्च मारुताः ।
सर्पिषः शतधौतस्य शिरसा धारणं हितम् ॥
रसः श्वासकुठारोत्यः कर्पूरं कुङ्कुमं नवम् ।
शीतं छागीपयः सर्वं वदनेनानुवर्त्तयेत् ॥
तस्य नस्यं भिषग्दद्यात् पित्तलायां शिरोरुजि ।
किन्तु मस्तकशूलेषु सर्व्वेष्वेवं हितं मतम् ॥
गुड़नागरकल्कस्य नस्यं मस्तकशूलनुत् ॥*॥
रक्तजे पित्तवत् सर्वं भोजनालेपसेवनम् ॥
शीतोष्णयोश्च विन्यासो विशेषो रक्तमोक्षणम् ।
कफजे लङ्घनं स्वेदो रूक्षोष्णैः पावकात्मकैः॥*॥
सन्निपातभवे कार्य्या सन्निपातहरी क्रिया ।
पुराणसर्पिषः पानं विशेषेण दिशन्ति हि ॥

एरण्डमूलं तगरं शताह्वा
जीवन्तिका सैन्धवरास्निके च ।
भृङ्गं विड़ङ्गं मधुयष्टिका च
विश्वौषधं कृष्णतिलस्य तैलम् ॥
अजापयस्तैलविमिश्रितञ्च
चतुर्गुणं भृङ्गरसे विपक्वम् ।
षड़्बिन्दवो नासिकयोः प्रदेयाः
सर्व्वाणि हन्युः शिरसो विकारान् ॥
च्युतांश्च केशान् पलितांश्च दन्तान्
निर्बध्य मूलान् प्रकटीकरोति ।
सुपर्णगृध्रप्रतिमञ्च चक्षुः
कुर्वन्ति बाह्वोरधिकं बलञ्च ॥"

जीवन्तिका अत्र हरीतकी शाकविशेषश्च । इति षड़्बिन्दुतैलम् ॥ * ॥

"क्षयजे क्षयनाशाय कर्त्तव्यो ह्यंशुमो विधिः ।
पाने नस्ये च सर्पिः स्याद्धातुवर्द्धमधुरैः शृतम्॥*॥
कृमिजे व्योषमश्नीयाद्गोमूत्रेण शिरुबीजेन लावणम् ।
अजामूत्रयुतं नस्यं कर्त्तव्यं कृमिनुत् परम् ॥
सूर्य्यावर्त्ते विधातव्यं नस्यकर्म्मादिभेषजम् ।
योजयेत् सगुड़ं सर्पिर्घृतपूपांश्च भक्षयेत् ॥

लावनं क्षीरसर्पिर्भ्यां पानञ्च क्षीरसर्पिषोः।
क्षीरपिष्टैस्तिलैः स्वेदो जीवनीयैश्च शस्यते॥
भृङ्गराजरसच्छागक्षीरतुल्यार्कतापितः।
सूर्य्यावर्त्तं निहन्त्याशु नस्येनैव प्रयोगराट्॥*॥
अर्द्धावभेदके पूर्वं स्नेहस्वेदौ हि भेषजम्॥
विरेकः कायशुद्धिश्च धूपस्निग्धोष्णभोजनम्।
पिङ्गलानि तिलान् क्षौद्रान् समान् पिष्ट्वा
विलेपयेत्॥
नस्यं वाप्याचरेत्तस्मादर्द्धभेदं व्यपोहति।
पिबेत् सशर्करं क्षीरं नीरं वा नारिकेलजम्॥
सुशीतं वापि पानीयं सर्पिर्वा नस्ततस्तयोः॥"
नस्ततः नासिकया पिबेदित्यन्वयः। तयोः
सूर्य्यावर्त्तार्द्धभेदयोः॥*॥
"अनन्तवाते कर्त्तव्यः सूर्य्यावर्त्तहितो विधिः।
शिराव्यधश्च कर्त्तव्योऽनन्तवातप्रशान्तये॥
आहारश्च प्रदातव्यो वातपित्तविनाशनः।
मधुमस्तकसंयावघृतपूपैर्विशेषतः॥"
संयावः पक्वान्नविशेषः। एरकिया इति लोके।
मधुमस्तकः मधुनोपलिप्तः। घृतपूरो-
ऽपूपः।
"पथ्यात्तधात्री रजनी गुडूची
भूनिम्बनिम्बैः सगुडः कषायः।
भूशङ्खकर्णाच्छिरोऽर्द्धशूलं
निहन्ति नासानिहितः क्षणेन॥"
इति पथ्यादिक्वाथः॥*॥
"दार्व्वी हरिद्रा मञ्जिष्ठा सनिम्बीक्षीरपञ्चकम्।
एतल्लेपनं कुर्य्याच्छङ्खस्य विनाशयेत्॥
पीततोयाभिषेकश्च क्षीरे लक्षीरसेवनम्।
कल्कैश्च क्षीरवृक्षाणां शङ्खके लेपनं हितम्॥"
सर्वेषु।
"यष्टीमधुकमाषः स्यात् तूर्य्यांशन्तु विवर्द्धयेत्।
तयोश्चूर्णन्तु सूक्ष्मं स्यात्तच्चूर्णं सर्पयोन्मितम्॥
नासिकाभ्यन्तरे न्यस्तं सर्व्वां शीर्षव्यथां हरेत्।
दृष्टप्रयोगो योगोऽयमनुभाविभिराहृतः॥
आर्द्रं यच्छल्लिकाचूर्णं चूर्णितं नवमादरम।
उभयं योजितं गव्यात्तस्य नश्यति शीर्षरुक॥"
इति भावप्रकाशे शिरोरोगाधिकारः॥
शिरोऽर्त्तिः, स्त्री, (शिरसोऽर्त्तिः।) शिरःपीड़ा।
इति लोके प्रसिद्धिः॥ (यथा, कथासरित्सागरे।
१३। १५२।
"जागरव्याप्तिपानेन शिरोऽर्त्तिं व्यपदिश्य च।
प्रातः स तस्थौ वस्त्रेण वेष्टयित्वाङ्गितं शिरः॥")
शिरोवल्ली, स्त्री, (शिरसो वल्लीव।) वहिंचूड़ा।
इति शब्दचन्द्रिका॥
शिरोवृत्त, क्ली, (शिर इव वृत्तम्।) मरिचम्।
इति राजनिर्घण्टः॥
शिरोवृत्तफलः, पुं, (शिरसि वृत्तं फलं यस्य।)
रक्तापामार्गः। इति भावप्रकाशः॥
शिरोवेष्टः, पुं, (शिरो वेष्टयतीति। वेष्ट+अच्।)
उष्णीषः। इति त्रिकाण्डशेषः॥
शिरोवेष्टनं, क्ली, (शिरो वेष्टयतीति। वेष्ट+
ल्युः।) शिरःप्रावरणम्। पागड़ी इति भाषा।
तत्पर्य्यायः। उष्णीषः२ वेष्टनम् ३ वेष्टकम् ४।
इति शब्दरत्नावली॥ शिरोवेष्टः ५ चेलो-
ष्णकः ६। इति त्रिकाण्डशेषः॥
शिरोऽस्थि, क्ली, (शिरसोऽस्थि।) मस्तकास्थि।
माथार खुलि इति भाषा। तत्पर्य्यायः।
करोटिः २ शिरस्त्राणम् ३ शीर्षकम् ४। इति
राजनिर्घण्टः॥
शिल, श उञ्छे। इति कविकल्पद्रुमः॥ (तुदा०-
पर०-सक०-सेट्।) उञ्छ उद्धृतशस्यग्रहण-
ग्रं, शिलति धान्यं दीनः। शेलिता।
इति दुर्गादासः॥
शिलः, पुं, क्ली, (शिल+कः।) उञ्छः। इति
मेदिनी॥ (यथा, भागवते। ११। १७। ४१।
"अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्
तयोः॥")
जीवनोपायविशेषः। यथा,—
"ऋताभृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्।
मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम्॥"
इति मानवे ४ अध्यायः॥
"अबाधितस्थानेषु पथि वा चैत्येषु वा अप्रति-
हतावकाशेषु यत्र यत्रौषधयो विद्यन्ते तत्र
तत्राङ्गुलीभ्यां एकैकं कणं समुच्चयित्वा इति
बौधायनदर्शनात्। एकैकधान्यादिगुडकोमय-
मुञ्छः। मञ्चर्य्यात्मकानेकधान्याश्रयनं शिलः।
उञ्छश्च शिलश्च इत्येकवद्भावः। तत् सत्यसमान-
फलत्वादृतमित्युच्यते।"इति तट्टीकायां कुल्लूक-
भट्टः॥ (रघुवंशीयपारियात्रनृपपुत्रः। यथा,
रघुवंशे। १८। १७।
"तस्याभवत् सूनुरदारशीलः
शिलः शिलापट्टविशालवक्षाः॥")
शिलगर्भजः, पुं, पाषाणभेदनः। इति राज-
निर्घण्टः॥
शिला, स्त्री, पाषाणः। (यथा मनौ। २।
२०४।
"गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च॥")
द्वाराधःस्थितदारु। इत्यमरः॥ स्तम्भशीर्षम्।
मनःशिला। इति मेदिनी॥ कर्पूरः। इति
राजनिर्घण्टः॥
शिलाकर्णी, स्त्री, (शिलेव कर्णः कोणो यस्याः।
ङीप्।) शल्लकीवृक्षः। इति शब्दचन्द्रिका॥
शिलाकुट्टकः, पुं, (शिलां कुट्टयति दारयतीति।
कुट्ट+ण्वुल्।) टङ्कः। इति शब्दरत्नावली॥
शिलाजं, क्ली, (शिलाया जायते इति। जन+
डः।) शैलेयम्। इति शब्दचन्द्रिका॥ लोहम्।
इति राजनिर्घण्टः॥
शिलाजतु, क्ली, (शिलाया जतु।) पर्वतजातो-
धातुविशेषः। शिलाजित् इति हिन्दीभाषा।
तत्पर्य्यायः। गैरेयम् २ अर्घ्यम् ३ गिरिजम् ४
अश्मजम् ५। इत्यमरः॥ शिलाजम् ६ अगजम्
७ शैलम् ८ अद्रिजम् ९। इति रत्नमालाः॥
शैलेयम् १० शीतपुष्पकम् ११। इति शब्द-
चन्द्रिका॥ शिलाव्याधिः १२। इति त्रिकाण्ड-
शेषः॥ अश्मोत्थम् १३ अश्मलाक्षा १४ अश्म-
जतुकम् १५ जत्वश्मकम् १६। अस्य गुणाः।
तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। रसायनत्वम्।
मेहोन्मादाश्मरीशोफकुष्ठापस्मरनाशित्वं च।
इति राजनिर्घण्टः॥ अपि च। शर्करारसव-
रोगहरत्वम्। योगवाहित्वम्। अत्युष्णशीत-
कत्वञ्च। इति राजवल्लभः॥ अस्योत्पत्तिनाम-
लक्षणगुणाः।
"निदाघे घर्मसन्तप्ता धातुसार धराधराः।
निर्यासवत् प्रमुञ्चन्ति तच्छिलाजतु कीर्त्तितम्॥
सौवर्णं राजतं ताम्रं आयसं तच्चतुर्विधम्।
शिलाजत्वद्रिजतु च शैलनिर्यास इत्यपि॥
गैरेयमश्मजञ्चापि गिरिजं शैलधातुजम्।
शिलाङ्गं कटुतिक्तोष्णं कटुपाकं रसायनम्॥
क्षेदि योगवहं हन्ति कफमेदोऽश्मशर्कराः।
मूत्रकृच्छ्रं क्षयं श्वासं वातास्रार्शांसि
पाण्डुताम्॥
अपस्मारं तथोन्मादं श्लीपकुष्ठोदरक्रिमीन्।
सौवर्णन्तु जवापुष्पवर्णं भवति तद्रसात्॥
मधुरं कटुतिक्तन्तु शीतलं कटुपाकि च।
राजतं पाण्डुरं शीतं कटुकं स्वादुपाकि च॥
ताम्रं मयूरकण्ठाभं तत्तिक्तं लवणं भवेत्।
विपाके कटुकं शीतं सर्वश्रेष्ठमुदाहृतम्॥"
इति भावप्रकाशः॥
शिलाघ्नी स्त्री, (शिलामश्नातीति। अश्न+
ल्युः। स्त्रियां ङीप्।) कालाघ्नीवृक्षः। इति
राजनिर्घण्टः॥
शिलाटकः, पुं, (शिलामटतीति। अट+ण्वुल्।)
भटः। विल्वम्। इति मेदिनी॥
शिलात्मजं, क्ली, (शिलाया आत्मजमिव।)
लोहम्। इति राजनिर्घण्टः॥
शिलात्मिका, स्त्री, भूषा। इति शब्दचन्द्रिका॥
शिलादद्रुः, पुं, (शिलाया दद्रुरिव।) शैलेयम्।
इति राजनिर्घण्टः॥
शिलाधातुः, पुं, (शिलानां धातुः।) सितो-
पलः। इति त्रिकाण्डशेषः॥ खड़ा इति भाषा॥
गैरिकभेदः। स तु पीतवर्णः। इति राज-
निर्घण्टः॥
"सितोपलः शिलाधातुर्वर्णरेखा च मङ्गलम्।
शिलाधातुविशेषस्तु विज्ञेयो लोकशास्त्रतः॥"
इति शब्दरत्नावली॥
शिलापट्टः, पुं, (शिलाया पट्टः।) पेषणार्थ-
शिला। शिल् इति भाषा। इति केचित्॥
शिलापुत्रः, पुं, (शिलाया पुत्र इव।) पेषणयोग्य-
शिला। लोड़ा इति भाषा। तत्पर्य्यायः। घर्घ-
नाशः २ शिलापुत्रकः ३। इति शब्दरत्ना-
वली।
शिलापुष्पं, क्ली, (शिलाया पुष्पमिव।) शैले-
यम्। इति राजनिर्घण्टः॥

शिलाभवं, क्ली, (शिलाया भवः ङत्यन्तिर्यस्य ।) शैलेयम् । इति जटाधरः ॥
शिलाभेदः, पुं, (शिलां भिनत्तीति । भिद् + अच्) पाषाणभेदी वृक्षः । इति रत्नमाला ॥ प्रस्तरभेदकाख्ये, क्ली, ॥
शिलारम्भा, स्त्री, (शिलेव दृढ़ा रम्भा ।) काष्ठकदली । इति राजनिर्घण्टः ॥
शिलावल्का, स्त्री, (शिलेव कठिनो वल्कों यस्याः ।) औषधद्रव्यविशेषः । शिलावाक् इति हिन्दी भाषा । तत्पर्य्यायः । शिलजा २ शैलवल्कला ३ वल्कला ४ शैलगर्भाङ्गा ५ शिलात्वक् ६ खेता ७ । अस्या गुणाः । हिमत्वम् । स्वादुत्वम् । क्षुद्रकृमिदूषत्वरोधाश्मरीशूलज्वरपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥
शिलाव्याधिः, पुं, (शिलाया व्याधिरिव ।) शिलाजतु । इति त्रिकाण्डशेषः ॥
शिलासनं, क्ली, (शिला आसनं यस्य ।) शैलेयम् । इति शब्दरत्नावली ॥ प्रस्तरनिर्म्मितासनञ्च ॥
शिलासारं, क्ली, (शिलावत् सारो यत्र ।) लोहम् । इति हेमचन्द्रः ॥
शिलाह्वं, क्ली, (शिला इत्याह्वा यस्य ।) शिलाजतु । इति भावप्रकाशः ॥
शिलिः, पुं, भूर्जपत्रवृक्षः । इति शब्दमाला ॥
शिलिः, स्त्री, दारुधःस्थितकाष्ठम् । इति शब्दरत्नावली ॥ गोबराट् इति भाषा ॥
शिलिन्दः, पुं, मत्स्यविशेषः । यथा,—
"शिलिन्दः श्लेष्मलो बल्यो विपाके मधुरो गुरुः ।
श्रमवातकरो वृष्यो वातपित्तहरो मतः ॥"
इति राजवल्लभः ॥
शिली, स्त्री, (शिलि + ङादिकारादिति ङीष् ।) दारुधःस्थितकाष्ठम् ।) इति शब्दरत्नावली ॥ गण्डूपदी । स्नायुशोषम् । इति मेदिनी ॥
शिलीन्ध्रं, क्ली, कदलीपुष्पम् । यथा, माघे । ६ । ३२ ।
"नवकदम्बरजोरुणिताम्बरै-
रधिपुरन्ध्रिशिलीन्ध्रसुगन्धिभिः ॥")
करका । इति मेदिनी ॥ त्रिपुटा । इति विश्वः ॥
शिलीन्ध्रः, पुं, छत्रविशेषः । इति मेदिनी ॥ मत्स्यविशेषः । स तु चित्रफलकमत्स्यः । इति जटाधरः ॥
शिलीन्ध्रकं, क्ली, गोमयच्छत्रिका । यथा,—
"गोमयच्छत्रिकामाहुर्दिलीरञ्च शिलीन्ध्रकम् ।"
इति हारावली ॥
शिलीन्ध्री, स्त्री, विहगीभेदः । गण्डूपदी । मृत्तिका इति मेदिनी ॥
शिलीपदः, पुं, (शिलीव स्थूलं पदमस्मात् ।) पादरोगाख्यशेषः । गोद इति भाषा । तत्पर्य्यायः पदगण्डीरः २ श्लीपदः ३ । इति शब्दरत्नावली ॥ पादवल्मीकः ४ । इति हेमचन्द्रः ॥ श्लीपदस्य विप्रकृष्टं निदानमाह ।
"पुराणोदकभूयिष्ठाः सर्व्वर्तुषु च शीतलाः ।
ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः ॥"
विशेषत इति वचनेनान्यत्रापि श्लीपदानि भवन्ति इति बोध्यते ॥*॥ सामान्यं लक्षणमाह ।
"यः सज्वरो वंक्षणजो भृशार्त्तिः
शोथो नृणां पादगतः क्रमेण ।
तत् श्लीपदं स्यात् करकर्णनेत्र-
शिश्नोष्ठनासास्वपि केचिदाहुः ॥"
तच्चिविधम् । वातिकं पैत्तिकं श्लैष्मिकञ्चेति । तेषां लक्षणमाह ।
"वातजं क्षाणरूक्षं हि स्फुटितं तीव्रवेदनम् ।
अनिमित्तरुजञ्चास्य वङ्क्षणे ज्वर एव च ॥*॥
पित्तजं पीतसङ्काशं दाहज्वरयुतं भृशम् ॥*॥
श्लैष्मिकन्तु भवेत् स्निग्धं तथा पाण्डु गुरु स्थिरम् ॥
त्रीण्यप्येतानि जानीयात् श्लीपदानि कफोल्बणात् ।
गुरुत्वञ्च महत्त्वञ्च यस्माच्चास्ति विना कफात् ॥"
असाध्यमाह ।
"वल्मीकमिव संजातं कण्टकैरुपचीयते ।
सर्व्वात्मकं महत्त्वञ्च वर्जनीयं विशेषतः ॥
यत् श्लेष्मलाहारविहारजातै-
र्जातं तथा भूरिकफस्य पुंसः ।
सास्रावमध्युन्नतिसर्वलिङ्गं
सकण्टकं वापि विवर्जनीयम् ॥"
अस्य चिकित्सा ।
"लङ्घनालेपनस्वेदरेचनै रक्तमोक्षणैः ।
प्रायः श्लेष्महरैरुग्रैः श्लीपदं समुपाचरेत् ॥
सिद्धार्थगोभाङ्गनदेवदारु-
विश्वौषधैर्मूत्रयुतैः प्रलिम्पेत् ।
पुनर्नवा नागरसर्षपाणां
कल्केन वा काञ्जिकमिश्रितेन ॥"
श्लीपदमिति शेषः ।
"धत्तूरैरण्डनिर्गुण्डीवर्षाभूग्निसुवर्षपैः ।
प्रलेपः श्लीपदं हन्ति चिरोत्थमपि दारुणम् ॥
असाध्यमपि यात्यन्तं श्लीपदं चिरकालजम् ।
मूलेन सहचरायाः तालमिश्रेण लेपनात् ॥"
तालस्य फलरसो ग्राह्यः ।
"सप्तलास्थूलपत्राणां कल्कं तप्तेन वारिणा ।
संसृष्टं लवणोपेतं सेवितं श्लीपदं हरेत् ॥
शाखोटवल्कलक्वाथं गोमूत्रेण युतं पिबेत् ।
श्लीपदानां विनाशाय मेदोदोषनिवृत्तये ॥
रजनीं गुडसंयुक्तां गोमूत्रेण पिबेन्नरः ।
वर्षोत्थं श्लीपदं हन्ति दद्रुकुष्ठं विशेषतः ॥
वर्षाभूविफलाचूर्णं पिप्पल्या सह योजितम् ।
सक्षौद्रं श्लीपदं लिह्यादिरोत्थं श्लीपदं जयेत् ॥
गन्धर्वतैलसिद्धां हरीतकीं गोऽम्बुना पिबति ।
श्लीपदविबन्धमुक्तो भवत्यसौ सप्तरात्रेण ॥"
गन्धर्वतैलं एरण्डतैलम् । गोऽम्बुना गोमूत्रेण ।
इति भावप्रकाशः ॥
शिलीमुखः, पुं, (शिलीव मुखं यस्य ।) भ्रमरः । (यथा, रघुः । ४ । १७ ।
"कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥")
बाणः । इत्यमरः ॥ (यथा, महाभारते । ४ । ४० । ११ ।
"कस्यायं शायको दीर्घः शिलीपृष्टः शिलीमुखः ॥")
युद्धम् । जड़ीभूतः । इति शब्दरत्नावली ॥
शिलेयं, क्ली, (शिलायां भवम् । शिला + ढक् ।) शैलजम् । इति शब्दरत्नावली ॥ शिलासम्बन्धिनि, त्रि, ॥ (शिलेव + "शिलाया ढक् ।"५ । ३ । १०२ । इति ढक् । शिलासदृशे च त्रि ॥ यथा, शिलेयं दधि । इति काशिका ॥)
शिलोच्चयः, पुं, (शिलाया उच्चयो यत्र । पर्व्वतः ॥ इत्यमरः ॥ (यथा, रघुवंशे । २ । २७ ।
"न पादपोन्मूलनशक्तिरंहः
शिलोच्चये मूर्च्छति मारुतस्य ॥")
शिलोञ्छः, पुं, उञ्छशिलम् । उपात्तशस्यात् शेषात् शेषावचयनम् । उञ्छेन परिचद्वादानवदुपादानेन गृह्यते सञ्चीयते उञ्छशिलम् । उञ्छि गुञ्छे शिल गुञ्छे क्षेरित्युले क ग श्चेति इगुडलात् कः उञ्छशिलं संघातविशेषेतं विपर्य्यस्तम् ।
"शक्यं न चेदुञ्छशिलेन वृत्तिः
फलेन मूलेन च वारिणा च ।"
इति समाहारद्वन्द्वे । उञ्छं शिलञ्च ।
"उञ्छमेवञ्च यच्चान्यत् तत् परिग्रहणं त्वृतम् ।"
इति निगमाभिधाने क्लीवं पुमानुञ्छ ऋतं शिल इति वोपालिते पुंस्युञ्छः ।
"रघुकाराहृतसारे
परिणतवाक् कल्मकेदारे ।
भवभूतिकृतशिलोञ्छे
तत्तलपतितं वयं चिनुमः ॥"
इति गोवर्द्धनः । केचिदुञ्छशिलयोर्भेदमाहुः । प्रतिग्रहात् शिलं श्रेयस्ततोऽप्युञ्छः प्रशस्यते इति । तत्र शाल्यादेर्निपातितपरित्यक्तमञ्जरीणां आदानं शिलम् । शिलं धान्यमञ्जरीसंग्रह इति स्वामी च । एकैकशः कपोतवदान्यकणोद्ग्रहणमुञ्छः । तदुक्तं उञ्छो धान्यकणोच्चय इति । शिलं तालबिल्वादि दन्त्यादि च । इत्यमरटीकायां भरतः ॥ यथा, मनौ ७ । ३३ ।
"एवं वृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः ।
विस्तीर्य्यते यशो लोके तैलबिन्दुरिवाम्भसि ॥")
शिलोत्थं, क्ली, शिलाया उत्तिष्ठतीति । उत् + स्था + कः । (शैलेयम् । इति राजनिर्घण्टः ॥
शिलोद्भवं, क्ली, (शिलाया उद्भवो यस्य ।) शैलेयम् । इति राजनिर्घण्टः ॥ चन्दनविशेषः । यथा,—
"सुशीतलं चन्दनं यत् तैलपर्णिकमुच्यते ।
उभौ च तस्य पर्य्यायौ सोमयोनि शिलोद्भवम् ॥"
इति शब्दचन्द्रिका ॥
शिलोकाः, [स्]पुं, (शिला पर्व्वतः श्लोको वासस्थानं यस्य ।) गरुड़ः । इति त्रिकाण्डशेषः ॥
शिल्पं, क्ली, (शील समाधौ + "रुच्यशिल्पशल्यवाल्यरूपपर्पतल्पाः ।"उणा० । २ । २८ । इति

पः कृस्वञ ।) कलादिकं कर्म्म । इत्यमरः ॥ हुनर इति पारसीकभाषा । कारीगरी इति हिन्दीभाषा ॥ वात्स्यायनोक्तनृत्यगीतवाद्यादि-यतुषष्टिः वाङ्मक्रियाः तथा आलिङ्गनचुम्बनादिचतुषष्टिः अभ्यन्तरक्रियाः कलाः । आदिना स्वर्णकारादिकारुकर्म्मग्रहः । एतत् सर्वं शिल्पं कथ्यते । इति तट्टीकायां भरतः ॥ (यथा कथासरित्सागरे । २५ । १७५ ।
"ते तन्निरूप्य जगदुर्नेहशो देव शक्यते ।
अपरः कर्त्तुमेतद्धि दिव्यं शिल्पं न मानुषम् ॥")
स्तुवः । इति मेदिनी ॥

शिल्पकारः, पुं, (शिल्पं करोतीति । कृ + अण् ।) शिल्पी । शिल्पविद्याव्यवसायी । कारिकर इति भाषा । शिल्पं करोति इत्यर्थे षण्प्रत्ययेन निष्पन्नः ॥

शिल्पकारी, [न्] त्रि, (शिल्पं कर्त्तुं शीलमस्य । णिनिः ।) शिल्पकर्म्मकर्त्ता । तस्योत्पत्त्यादि यथा,—
"विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कंसकारः षड़ेते शिल्पिनां वराः ॥
सूत्रधारचित्रकरः स्वर्णकारस्तथैव च ।
पतितास्ते ब्रह्मशापादजात्या वर्णसङ्कराः ॥
स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम ।
बभूव सद्यः पतितो ब्रह्मशापेन कर्म्मणा ॥
सूत्रधारो द्विजातीनां शापेन पतितो भुवि ।
शीघ्रञ्च यन्त्रकाष्ठञ्च न ददौ तेन हेतुना ॥
व्यतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा ।
पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपतः ॥
कश्चिद्वणिग्विशेषञ्च संसर्गात् स्वर्णकारिणः ।
स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

शिल्पशाला, स्त्री, क्ली, (शिल्पानां शाला ।) स्वर्णकारादीनां कर्म्मगृहम् । कारखाना इति पारसीकभाषा । तत्पर्य्यायः । आवेशनम् २ । इत्यमरः ॥ शिल्पशाला ३ शिल्पशालम् ४ शिल्पिशालम् ५ । इति तट्टीका ॥

शिल्पशास्त्रं, क्ली, (शिल्पस्य शास्त्रम् ।) शिल्पकर्म्मग्रन्थः । तच्छास्त्राणि बहूनि सन्ति तन्मध्ये वास्तुशास्त्रैकं लिख्यते । यथा,—
"स्त्रीपुत्रादिकभोगसौख्यजनकं धर्म्मार्थकाम-प्रदं
जन्तूनां लयनं सुखास्पदमिदं शीतांशु धर्म्मा-पहम् ।
वापीदेवगृहादिपुण्यमखिलं गेहात् समुत्पद्यते
गेहं पूर्व्वमुशन्ति तेन विबुधाः श्रीविश्वकर्म्मा-दयः ॥

सिद्धेः सूत्रारम्भमुशन्ति हृदा
यद्योदिते मासि बलक्षपक्षे ।
शशाङ्कवीर्य्ये शुदिने निमित्ते
शुभं रवौ सौम्यगते प्रवेशम् ॥
चैत्रे शोककरं गृहादि रचितं स्यान्माधवेऽर्थ-प्रदं
ज्यैष्ठे मृत्युकरं शुचौ पशुहरं तद्दृढिदं श्रावणे ।
शून्यं भाद्रपदेऽखिने कलिकरं मृत्यूद्भयं कार्त्तिके
धान्यं मार्गसहस्रयोर्दहनभोमार्घे श्रियः फाल्गुने ॥
आदित्ये हरिकर्कनक्रघटगे पूर्व्वापरास्यं गृहं
कर्त्तव्यं तुलमेषहस्थिकहरौ याम्योत्तरास्यं तथा ।
द्वारं भिवतथा करोति कुमती रोगार्थनाश-स्तदा
कन्यामीनधनुर्गते मिथुनगे चास्मिन्न कार्य्यं गृहम् ॥
कन्यादित्रिषु पूर्वतो यमदिशि त्याज्यश्च चापा-दितो
द्वारं पश्चिमतस्त्रिके जलचरात् सौम्ये रवौ युग्मतः ।
यस्माद्दत्समुखं दिशासु भवनं द्वारादिकं हानिकृत्
सिंहं वापि हयञ्च हस्थिकघटं वाते हितं सर्वतः ॥
प्राची मेषतुलारवावुदयति स्याद्धैर्य्यदे वह्निभे
चित्राख्यातिभमध्यगा निगदिता प्राची बुधैः पञ्चधा ।
प्रासादो भवनं करोति नगरं दिङ्मूढ़मर्थक्षयं
हर्म्यं देवगृहे पुरे च नितरामायुर्धनं दिङ्मुखे ॥
तारे मार्कटिके ध्रुवस्य समतां नीते बले वैनते
दीपाग्नेय तदैक्यतश्च कथिता सूत्रेण सौम्या दिशा ।
शङ्कोर्नेत्रगुणेन २६ मण्डलवरे छाया तयो-र्मत्स्ययो-र्नाता पञ्चयुतिस्तु शङ्कुतलतो याम्योत्तरेस्तात्-क्षुटेः ॥
राज्ञोनामलिमीनसिंहभवनं पूर्व्वामुखं शोभनं
कन्याकर्कटनक्रराशिगृहिणां याम्याननं मन्दिरम् ।
राज्ञेर्धन्वितुलायुगस्य सदनं श्रस्तं प्रतीचीमुखं
पुंसां कुम्भवृषाजराशिभजतां सौम्याननं स्यादृगृहम् ॥"*॥

अथ भूपरिग्रहः ।
"श्वेता ब्राह्मणभूमिका च घृतवद्गन्धा शुभ-स्वादिनी
रक्ता शोणितगन्धिनी नृपतिभूः स्वादे कषाया च सा ।
स्वादेऽम्ला तिलतैलगन्धिरुदिता पीता च वैश्या मही
कृष्णा मत्स्यसगन्धिनी च कटुका शूद्रेति भूलक्षणम् ॥

स्वादे भवेद्या मधुरा सिताभा
चतुर्षु वर्णेषु मही प्रशस्ता ।
सैवान्विता वभ्रुभुजङ्गयोर्या
सौहार्दवत्यास्तविड़ालयोर्वा ॥ * ॥

परीक्षितायां भुवि विघ्नराजं
समर्च्चयेत् चण्डिकया समेतम् ।
क्षेत्राधिपं चाष्टदिशाधिनाथान्
सुपुष्पधूपैर्बलिभिः सुखाय ॥
खातं भूमिपरीक्षणे करमितं तत् पूरयेत्तन्-मृदा
हीने हीनफलं समे समफलं लाभो रजोवर्द्धिते ।
तत् कृत्वा जलपूर्णमाशुपदं गत्वा परीक्ष्यं पुनः
पादोनेऽर्द्ध विहीनकेऽथ निभृते मध्याधमेष्टाम्बुनि
भूमिः प्राक् प्रवणश्च शङ्करकुप्सौम्याश्रितं सौख्यदं
वह्नौ वह्निभयं यमे च मरणं चौराद्भयं रक्षसि
वायव्ये प्रवणश्च धान्यहरणं स्याच्छोकदं वारुणं
विप्रादेरनुवर्णतश्च सुखदं सृष्टिक्रमात् सौम्यतः
अग्नौ राक्षसवायुशङ्करदिशि स्थाप्याः क्रमात् कौलकाः
अश्वत्थात् खदिरात् शिरीषककुभात् डुम्बात् क्रमेण द्विजाः ।
वर्णानां कुशमुञ्जकाशशणजं सूत्रं क्रमात् सूत्रणे
निम्ना भूः स्फुटितोषरा विलवती शल्यैर्युता नाशुभा ॥"
ककुभादित्यत्र वकुलादिति च पाठः ॥*॥
"प्रश्नत्रयं वापि गृहाधिपेन
देवस्य वृक्षस्य फलस्य वापि ।
वाच्यं हि कोष्ठाक्षरसंयुतेन
सत्यं विलोक्यं भवनेषु सृष्ट्या ॥
वा का चा टा ता ए ह सा पापवर्णाः
प्राच्यादिस्थे कोष्ठके शल्यमुक्तम् ।
केशाङ्गाराः काष्ठलोहास्थिकाद्यं
तस्मात् कार्य्यं शोधनं भूमिकायाः ॥
शल्यं गवां भूपभयं हयानां
वृद्धं शुनोऽश्वोः कलहप्रणाशौ ।
खरोष्ट्रयोर्हानिमपत्यनाशं
स्त्रीणामजस्याग्निभयं तनोति ॥*॥
कन्यादौ रविवत्स्थिते फणिमुखं पूर्व्वादिसृष्टिक्रमं
ख्यातं वास्तुवपुर्दिशात्रयगतं लाङ्गूलपृष्ठं शिरः
द्वारं तस्य मुखे गृहादि भयदं कुत्रिद्वये सौख्यदं
दुःखं प्राक्खनने शिरोऽङ्घ्रिवपुषः कुक्षौ सुखं दक्षिणे ॥
प्राच्यां नागमुखं बुधैर्निगदितं भाद्राश्विने कार्त्तिके ।
मार्गात् फाल्गुनशुक्रतः क्रमतया याम्ये जले चोत्तरे ।
क्षेत्रे चाष्टविभाजिते दिनकराहाराल्लिखेत् कोष्ठगान्
शल्यङ्गारकयोश्च तत्र फणिनः शारीरकं नो खनेत् ॥*॥
शौर्ये माढपिढचयः प्रथमतः खाते द्वजा पुच्छके
पृष्ठे क्षत्रियवैश्यशूद्रजनयः कुक्षिद्वये खानने ।
शल्यं ब्राह्मणजं तु पुच्छखननात् स्यात् पुत्रधान्यादिकम् ।

पूर्वास्येऽनिलखातनं यममुखे खातं शिवे कारयेत्
शोषे पश्चिमगे च वह्निखननं सौम्ये खनेन्नैर्ऋते
दक्षिणकोणे पूर्वविभागे पूजनपूर्वं शिला समर्प्या ।
स्थाप्या शेषशिला दक्षिणतः स्तम्भाः समर्प्या विधानेन ॥"*॥

ब्रह्मगर्भ्ययो ।
"सूत्रं भित्तिशिलान्यासं स्तम्भस्यारोपणं तथा ।
पूर्वदक्षिणोर्मध्ये कुर्यादित्याह काश्यपः ॥"
नारदः ।
"नभस्यादिषु मासेषु त्रिषु त्रिषु यथाक्रमम् ।
पूर्वादिदिक्शिरोवामपार्श्वाशायां प्रदक्षिणम् ॥"
वास्तुशास्त्रेऽपुग्रहम् ।
"वास्तोः शिरसि पुच्छे च वामकुक्षौ च दृष्टतः ।
आयुष्कामः खनेन्नैव दक्षकुक्षौ खनिः शुभा ॥
भित्तेर्मूलं स्थापनीयं जलान्ते
पाषाणे वा हेमरत्नैः सगर्भम् ।
शोषे गुर्वी लेपहीनाधिका वा
सन्धिस्थेषिः पादहीनार्थहान्यैः ॥
भवनपुरसुराणां सूत्रणे पूर्वमुक्तः
कथित इह पृथिव्याः शोधनेऽपि द्वितीयः ।
तदनु मुखनिवेशे स्तम्भसंरोपणे स्या-
द्ध्रुवनवसनकाले पञ्चधा वास्तुयत्नः ॥*॥

हत्वा दुग्धसकण्टाश्च फलिनस्त्याज्या गृहाद् दूरतः
शस्ते चम्पकपाटले च कदली जाती तथा केतकी ।
यामादूर्ध्वमशेषदुःखसुरजा च्छाया न शस्ता गृहे
पार्श्वे कस्य हरेरवीशपुरतो जैनानुचण्डाः क्वचित् ॥

स दुग्धहत्वा द्रविणस्य नाशं
कुर्वन्ति ते कण्टकिनोऽरिभीतिम् ।
प्रजाविनाशं फलिनः समीपे
गृहस्य वर्ज्याः कलधौतपुष्पाः ॥
दुष्टो भूतसमाश्रितोऽपि विटपी नोच्छिद्यते शक्तितः
तद्विल्वोच्च शमीमशोकवकुली पुन्नाग-सचम्पकौ ।
द्राक्षापुष्पकमण्डपञ्च तिलकान् क्षणां वपेद्दाडिमीं
सौम्यादेः शुभदौ कपीतनवटावीदुम्बराश्वत्थकौ ॥

उत्सङ्गनाभिमुखः प्रवेशः
स्यात् पृष्ठभङ्गो भवनस्य पृष्ठात् ।
विनाशहेतुः कथितोऽपसव्यः
सृष्ट्या प्रशस्तो भवनेऽखिलेऽसौ ॥
प्रावेशः प्रतिकायको वरुणदिग्वक्त्रो भवेत् सृष्टितो
वामावर्त्त उदाहृतो यममुखेऽसौ हीनबाहुर्बुधैः ।

उत्सङ्गो नरवाहनाभिवदनः सृष्ट्या यथा निर्म्मितः
प्राग्वक्त्रोऽपि च पूर्णबाहुरुदितो गेहे चतुर्द्वा पुरे ॥*॥

हस्तः पर्वाष्टयुक्तो मुनिवररचितः पर्व चैकं त्रिमात्रं
मात्रा षष्ठ्यां यवानामुदरमिलिता निस्त्वचा-मुत्तमानाम् ।
पुण्यैश्चत्वारि पूर्वं तदनु च विभजेदङ्गुलैः पर्व-पुष्यै-
र्निघ्नयौ रक्तकाष्ठो मधुमय उदितः खादिरो वंशधात्वोः ॥
ज्येष्ठोऽष्टाभिर्यवोदरैस्तु मुनिभिर्मध्यस्तु षट् कन्यसो
माप्यं चोत्तमकेन ग्रामनगरक्रोशादिकं योजनम् ।
प्रासादप्रतिमे नृपस्य भवनं मध्येन हर्म्यादिकं
यानं षड्यवसम्भवेन शयनं क्षत्रासनास्रादिकम् ॥*॥

रुद्रो वायुर्विश्वकर्म्मा हुताशो
ब्रह्मा कालस्तोयपः सोमविष्णुः ।
पुष्पे देवा मूलतोऽग्निश्च मध्यात्
पश्चाट्टान्त्यं द्वाग्निवेदैर्विभज्यम् ॥
ईशो मारुतविश्ववह्निविधयः सूर्यश्च रुद्रो यमो
वैरूपो वसवोऽष्ट दन्तिवरुणौ षड्वक्त्र इच्छा क्रिया ।
ज्ञानं वित्तपतिर्निशाकरजयौ श्रीवासुदेवौ हली
कामो विष्णुरितिक्रमेण मरुतो हस्ते त्रयोविंशतिः ॥*॥

उच्चाटनं रोगभयञ्च दुःखं
वह्निर्भयं पीड़नकं प्रजायाः ।
मृत्युर्विनाशोऽपि धनक्षयः स्यान्-
मोहः क्रमाद्दैवतपीड़नेन ॥*॥
हस्तो यन्नात् पुष्ययोरन्तराले
त्वष्टा धार्य्यो मन्दिरादौ निवेशे ।
हस्तादूर्ध्वो यात्यकस्मात्तदासौ
कार्य्ये विघ्नं दुःखमाविष्करोति ॥
तालो द्वादशमात्रिकापरिमितस्तालद्वयं स्यात् करः
पादोनद्विकरोऽपि किष्कुरुदितस्तापत्रयतुर्भिः करैः ।
क्रोशो दण्डसहस्रयुग्ममुदितो द्वाभ्यां गव्यूतिका
ताभ्यां योजनमेव भूमिरखिला कोटीशतं योजनैः ॥

सूत्राष्टकं दृष्टिनृहस्तमौञ्जं
कार्पासजं स्यादवलम्बसंज्ञम् ।
काष्ठञ्च सृष्ट्याख्यमतोऽपि लेख्य-
मित्यष्ट सूत्राणि वदन्ति सन्तः ॥
इति वास्तुशास्त्रे राजवल्लभमण्डने मिश्रका लक्षणवर्णनं नाम १ अध्यायः ॥ * ॥
"संग्रामेऽन्धकरुद्रयोस्तु पतितः स्वेदो महेशात् क्षितौ

तस्मादद्भूतमभूच्च भीतिजननं द्यावापृथिव्यां महत् ।
तद्वैद्यै रसना विशुद्ध निहितं भूमावधोवक्त्रकं
देवानां रसनाश्च वास्तुपुरुषस्तेनैव पुज्यो बुधैः ॥
प्रासादे भवने तड़ागखनने कूपे च वापीवने
जीर्णोद्धारपुरे च यागभवने प्रारम्भनिर्वर्त्तने ।
वास्तोः पूजनकं सुखाय कथितं पूजां विना हानये
पादौ रक्षसि कं शिवेऽङ्घ्रिकरयोः सन्धौ च कोणद्वये ॥

चेत्राकृतिर्वास्तुरिहार्च्चनीय-
स्त्रेकांशतोभागसहस्रयुक्तः ।
साधारणोऽष्टोत्तपदोऽपि तेषु
चैकाधिकाशीतिपदस्तथैव ॥*॥

ग्रामे भूपतिमन्दिरे च नगरे पूज्यश्चतुःषष्टिकै-
रेकाशीतिपदैः समस्तभवने जीर्णे नवाभ्यग्रकैः ।
प्रासादेऽथ शतांशकेषु सकले पूज्यस्तथा मण्डपे
कूपे षण्णवचन्द्रभागसहिते १९६ वापीतड़ागे वने ॥
ईशो मूर्द्धि समाश्रितः श्रवणयोः पर्जन्यनामा दिति-
रापस्तस्य गले तदंशयुगले प्रोक्तो जयश्चा-दितिः ।
उक्षावर्य्यमभूधरौ स्तनयुगे स्यादापवत्सौ हृदि
पर्जन्येन्द्रादिसुराश्च दक्षिणभुजे वामे च नागादयः ॥
सावित्रः सविता च दक्षिणकरे वामे इयं रुद्रतो
मृत्युर्मैत्रगणस्तथोरुविषये स्याद्राभिपृष्ठे विधिः
मेढ्रे शक्रजयौ च जानुयुगले तौ वह्निरोगौ स्मृतौ
पूषो नन्दिगणाश्च सप्त विबुधाः कल्प्याः पदोः पैतृकाः ॥*॥

ईशस्तु पर्जन्यजयेन्द्रसूर्य्याः
सत्यो भृशाकाशक एव पूर्व्वे ।
वह्निश्च पूषा वितथाभिधानो
गृहक्षतः प्रेतपतिः क्रमेण ॥
गन्धर्वभृङ्गौ मृगपित्तसंज्ञौ
द्वारस्थसुग्रीवकपुष्पदन्ताः ।
जलाधिनाथोऽप्यसुरश्च शेषः
स पापयक्ष्मापि च रोगनागौ ॥
मुख्यश्च भल्लाटकुबेरशैला-
स्तथैव बाह्ये दितितोऽदितिश्च ।
द्वात्रिंशदेवं क्रमतोऽर्च्चनीया-
स्त्रयोदशैव त्रिदशाश्च मध्ये ॥
प्रागग्र्यमा दक्षिणतो विवस्वान्
मैत्रोऽपरे सौम्यदिशाविभागे ।
पृथ्वीधरोऽमावथ मध्यतोऽपि
ब्रह्मार्च्चनीयः सकलेषु मध्ये ॥
आपापवत्सौ शिवकोणमध्ये
सावित्रकोऽग्नौ सविता तथैव ।
कोणे महेन्द्रेन्द्रजयौ तृतीये
रुद्रोऽनिलेऽन्योऽपि च रुद्रदासः ॥

ईशानबाह्ये चरकी द्वितीये
विदारिका पूतनिका तृतीये।
पापाभिधा मारुतकोणके तु
पूज्याः सुरा उक्तविधानतस्तु ॥*॥
ब्रह्मा वेदपदस्तु तेन समका देवार्य्यमाद्यास्त्वमी
कोणेऽष्टौ द्विपदास्तथाष्टमरुतः कोणेऽर्धभागाद् बहिः।
शेषा एकपदाः सुरास्तु कथिता वेदर्तुके-६४
ऽथो नव
ब्रह्मा षट्पदिनोऽर्य्यमादिविबुधा ईशादयश्चै-
कशः ॥
ब्रह्मा कलांशो वसुतोऽर्य्यमाद्याः
कोणेऽष्ट बाह्येऽपि च सार्धभागाः।
विधाढकोणे द्विपदास्तथाष्टौ
शेषाः सुरा एकपदाः शतांशे ॥*॥
ब्रह्माजिनांश २४ उदितः शिवतोऽर्य्यमाद्याः
कोणेषु सार्धपदतोऽपि तथैव चाष्टौ।
शेषा द्विभागसमका रविभागकोऽयं
पूज्यो रथाश्वगजवाहनकेऽम्बुयन्त्रे ॥
यन्त्रे त्रयोदशपदैरपि पूजनीय-
स्तत् पञ्चविंशतिरजो दशतोऽर्य्यमाद्याः।
कोणेऽम्बयोऽमरगणा वह्निके कलांशा
भद्रेऽधिकं रविविभागपरे द्विभागाः ॥*॥
द्वात्रिंशत् कमलासनोऽर्य्यमसुखाः स्युः सूर्य-
भागा क्रमात्
कोणेऽन्त्येऽष्टसुरा द्विभागसहिता बाह्येषु
सार्धांशकाः।
अष्टौ रामपदाः पुनर्द्विपदकाः षड्भागिनोऽष्टौ
सुराः
खेवे षण्नवचन्द्रभागसहिते १८६ स्यादेवतानां
क्रमः ॥*॥
वेदांशो विधिरर्य्यमप्रभृतयस्त्रंशा नवस्वष्टके
कोणेऽन्त्येऽष्टपदार्धगाः परसुराः षड्भागहीने
पदे।
वास्तोर्नन्दयुगांश ४९ एवमधुनाष्टांशैश्चतुः-
षष्टिके
मन्त्रैः सूत्रमितान् सुधीः परिहरेद्भित्तीस्तुला-
स्तम्भकात् ॥*॥
रेखाद्वयं कोणगतं विधेय-
मंशान्तरेणैव तु कर्णसूत्रात्।
यदष्टसूत्रैः कथितं तु पद्मं
तत्पीड़नात् स्वामिधनप्रणाशः ॥
प्रोक्तं चतुर्विंशतिलाङ्गलं यत्
पादार्धगं हानिकरं प्रजायाः।
षड्भिस्तु सूत्रैर्मरणाय वज्रं
कोणे त्रिशूलञ्च रिपोर्भयाय ॥
परीक्ष्य भूमौमवसेचयेत्तां
सुपद्मगन्धेन ततो विलेख्या।
रेखा सुवर्णेन मणिप्रवालैः
पिष्टाक्षतैर्वापि पुनस्तदूर्द्धे ॥
द्वात्रिंशदंशाः पृथुले च दैर्घ्ये
कोणेषु वर्ज्या जिनसंख्यभागाः।

एतत्पदानां कथितं सहस्रं
क्षेत्रञ्च सर्वोत्तममेव वास्तोः ॥*॥
मध्ये ब्रह्मा पूजनीयः शतांशै-
श्चत्वारिंशद्भिः पदैर्बाह्यवीथौ।
प्रोक्ता देवा अर्य्यमाद्या अशीत्या
मध्ये कोणेऽष्टौ शतं चाष्टषष्ट्या ॥
कोणेऽम्बयो नन्दपदैः सुराश्च
शेषाश्च बाह्ये वसुभागिनश्च।
चौथी च बाह्ये रविभागयुक्तं
शतं पदानां कथितं मुनिन्द्रैः ॥
दुर्गप्रतिष्ठाविषये निवेशे
तथा महार्घासु च कोटिहोमे।
मेरौ च राष्ट्रेष्वपि ज्येष्ठलिङ्गे
वास्तुः सहस्रेण पदैः प्रपूज्यः ॥*॥
त्रिमेखलं शङ्करदिग्विभागे
कुण्डं प्रकुर्य्यात् करतो युगास्रम्।
होमं सुराणां शतमष्टयुक्तं
प्रत्येकमष्टाधिकविंशतिं वा ॥
मध्वाज्यदुग्धैर्दधिशर्कराभ्यां
क्षौद्रैस्तिलैर्व्रीहियवैर्नवाक्षैः।
पलाशदूर्वाङ्कुरदुग्धवृक्षै-
र्होमं तदन्ते सुरपूजनञ्च ॥
दद्याद्घृताक्तमपरे सघृतोदनञ्च
दद्याज्जयाय हरिताम्बरमेव कूर्म्मम्।
रत्नानि पिष्टकमयं कुलिशं सुरेन्द्रे
धूम्रं वितानमुदितञ्च दिवाकरस्य ॥
गोधूमयुक्तं घृतमेव सत्ये
मत्स्यान् भृशे शष्कुलिमन्तरीक्षे।
वह्नौ स्रुचं पूषणि तण्डुलाजा
दद्यादधर्म्मे चणकौदनञ्च ॥
मध्वन्नञ्च गृहक्षताय यमतो मांसौदनं दापयेत्
गन्धर्वे शतपत्रमोदनयुतं भृङ्गेऽजजिह्मं तथा।
प्रोक्ता नीलजवा मृगाय पितृतो देयाश्च सक्षी-
दकाः
पेष्टं क्षुण्णमृषिं तथैव विधिवद्दद्याच्च दौवारिके ॥
सुग्रीवाय च पूपका गणवरे क्षेत्रप्रसूनं पयः
पद्मं वारुणके सुराप्यसुरके तैलं तिलाः शेषके।
पापाख्येऽपि च पक्वमांसमुदितं रोगाय सर्वौ-
षधीः
गोक्षीरं फणिने च सुख्यविबुधे श्रीखण्डभक्षे
तथा ॥
भल्लाटाय सुवर्णकं धनपतौ मण्डाज्यदुग्धं तथा
शक्रान् पर्वतकेऽदितेस्तु लपिकां दद्यादितौ
पूरिकाम्।
सक्षीरं दधिकं क्रमेण विहितं त्वापापवक्षे तथा-
प्यर्य्यम्णेऽरुणचन्दनञ्च पयसा युक्ता तथा
शर्करा ॥
सावित्रेऽपि च लड्डुकाश्च सवितुः पूपा गुड़ा
सदृक्षता
देयं वाथ विवस्वते घृतयुतं दुग्धं तथा मोदकाः
इन्द्राख्ये कुसुमस्रगिन्द्रजयके देयं तथा चम्पकं
मैत्रे दुग्धघृतञ्च गुग्गुलुयुतो गन्धस्तथा रुद्रके ॥

तत्सिद्धमन्नन्त्वपि रुद्रदासे
सद्रत्नमालां पृथिवीधराय।
पयस्वलां गामसृतं घटञ्च
दद्यादिधौ स्वर्णमतोऽखिलेभ्यः ॥
सुरास्त्रिमांसं विहितं चरक्यै
तथैव पीतौदनको विदार्य्यै।
रक्तौदनैः पूतनिकार्द्धनीया
मत्स्यासवेनापि तथैव पापाः ॥
मांसं पक्वं पिलिपिच्छाय तज्जृम्भाये विहितं
सद्यः।
स्कन्दाय तन्मदिरायुक्तं चार्य्यम्णे दिशि
पूर्व्वादौ ॥
यः पूजयेदास्तुमनन्ययुक्ता
न तस्य दुःखं भवतीह किञ्चित्।
जीवत्यसौ वर्षशतं सुखेन
स्वर्गे नरस्तिष्ठति कल्पमेकम् ॥"
इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे
राजवल्लभे वास्तुलक्षणम् २ अध्यायः ॥*॥
"आयर्क्षव्ययतारकांशकविधुं राशिं गृहाद्यं
तथा
धान्यं सौख्ययशोऽभिवृद्धिरधिका यस्मादतः
कथ्यते।
आयास्तु ध्वजधूमसिंहशुनका गोरासभेभाः
क्रमात्
ध्वाङ्क्षखरौ वृषश्च आयभेषु विषमाः श्रेष्ठाः सुराणां
गृहे ॥
मानं देवगृहादिभूपसदने शास्त्रोक्तहस्तेन तत्
गेहे कर्म्मकरस्य नाथकरतः शास्त्रेण देयं गृहे
श्यो दण्डकराङ्गुलादिमपि ते हस्ताङ्गुलैरंशतः
क्षेत्रस्याप्यनुमानतोऽपि नगरे दण्डेन मानं पुरे
आयः कल्पयो हस्तमेयैः करैश्च
क्षेत्रे मात्रानिर्म्मिते माढकाभिः।
मध्ये पर्य्यङ्कासने मन्दिरे च
देवागारे मण्डपे भित्तिवाह्ये
क्षत्रे देवगृहे द्विजस्य भवने स्वाद्देदिकायां जले
विस्तारोच्छ्रयवस्त्रभूषणमठागारेषु शस्तो ध्वजः।
धूमो वङ्ग्रुपजीविनामपि गृहे कुण्डे च होमो-
द्भवे
सिंहद्वारनृपालयेऽस्त्रनिचये सिंहश्च सिंहा-
सने ॥
चण्डाले शुनको विशास्तु वृषभो हर्म्ये हयानां
हितो
हानिच्छे धनभोजनस्य भवनेऽयो बाह्यगेहे
खरः।
वादित्रे स्वरजीविनामपि गृहे शौद्रं गजो
योजितो
याने स्त्रीगृहवाहने च शयने शस्तो गृहे हस्ति-
नाम् ॥
ध्वाङ्क्षः गिल्पितपक्षिनां हितकरस्त्रेषां मुखं
नामवत्
ध्वाङ्क्षः काकमुखो विड़ालवदनो धूमो ध्वजो
मानुषः।

सर्वे पक्षिपदा हरेरिव गलो हस्ती नरस्येव तु
प्राच्याः सृष्टिगताः क्रमेण पतयो ह्यष्टौ च ते
सम्मुखाः ॥*॥
देयाः सिंहगजध्वजादिवृषभे सिंहध्वजौ कुञ्जरे
सिंहो वै ध्वज इष्यते न वृषभोऽन्यत्रापि देयो
बुधैः ।
सिंहो हस्तिवृषालये सृतिकरस्त्वायस्य वक्त्रं
गृहं
तस्मिन्नेव च वामदक्षिणदिशाहारे स आयः
शुभः ॥
व्यासे दैर्घ्यगुणेऽष्टभिर्विभजिते शेषो ध्वजाद्या-
यको-
ऽष्टघ्ने तद्गुणिते च धिष्ण्यभजिते स्याच्चक्रमन्या-
दिकम् ।
नघ्ने वसुभिर्व्ययोऽपि भजिते हीनस्तु लक्ष्मी-
प्रद-
स्तुल्यायश्च पिशाचको ध्वजसृते संवर्द्धितो
राक्षसः ॥
तन्मूले व्ययहर्म्यनामसहिते भक्ते त्रिभिस्त्वं
शकः
स्यादिन्द्रोपमभूपतिक्रमवशाद्देवे सुरेन्द्रो हितः ।
वेद्यामेव यमस्तु पुण्यभवने नागे तथा भैरवे
राजांशो गजवाजियाननगरे राजालये
मन्दिरे ॥*॥
यावद्गृहर्क्षं गणयेत् स्वधिष्ण्या-
न्तारादिभक्ते नवभिश्च शेषाः ।
बुधैस्तृतीया सकले विवर्ज्या
या पञ्चमी सप्तमिका न शस्ता ॥
धिष्ण्यानीह च सप्तशः क्रमतया वक्त्रेषु पूर्व्वा-
दितः
सृष्ट्या तानि भवन्ति यत्र गृहभं तत्रैव चन्द्रो
भवेत् ।
हानिं पृष्ठगतः करोति पुरतस्त्वायुःक्षयं
चन्द्रमाः
पार्श्वे दक्षिणवामके शुभकरोऽग्रे देवभूपालये ॥
प्रीतिः स्यात् समसप्तमौ च दशमौ चैकादशौ
शोभना
दारिद्र्यं युगला करोति मरणं षष्ठी कलिः
पञ्चमी ।
मेषोऽश्वित्रितये हरिस्तु पिठभाच्चापक्षये
मूलतः
शेषैः स्वर्नव राशयः परमते नन्दांशकैस्ते
पृथक् ॥
भौमोदश्विकमेषयोर्ह्यतुले शुक्रस्य राधिद्वयं
कन्या युग्मबुधस्य कर्कसदनं चन्द्रस्य सिंहो रविः
जीवो मीनधनुःपतिर्मृगघटौ मन्दस्य गेहं स्मृतं
मित्राण्यर्ककुजेन्दुदेवगुरवोऽन्ये चारयस्ते मिथः
दैवर्क्षं श्रुतिपुष्यभेऽश्विभमृगं मैत्रानिलं पौष्णभं
हस्तादित्यमथोऽनुरन्तकविधौ पूर्व्वोत्तरा
रुद्रभम् ।
रक्षोमूलविशाखिकाग्निपिठभं चित्रा धनिष्ठा-
द्वयं
ज्येष्ठाश्लेषमवीह दैत्यमनुजे मृत्युस्तु दैवे कलिः
वैरं चोत्तरफल्गुनीयुगलयोः स्वातीभरण्योर्द्वयो-
रोहिण्युत्तरषाढ़योः श्रुतिपुनर्वस्वोर्विरोधं
तथा ।
चित्राहस्तभयोश्च पुष्यफणिनोर्ज्येष्ठाविशाखा-
ख्ययोः
प्रासादे भवनासने च शयने नक्षत्रवैरं त्यजेत् ॥
विप्राः कर्कभपालिनो निगदिताः सिंहाजचापा
नृपा
विट्कन्या मकरो वृषोऽथ वृषला युग्मश्च
कुम्भस्तुला ।
वर्णेनोत्तमकामिनी च भवनं वर्ज्यं बुधैर्यत्नतः
श्रेष्ठा द्वादश नन्दरागगुणतो विप्र क्रमाद्राशयः ॥
अश्वोऽश्विनीशतभयोर्यमपूपि हस्तो
छागोऽग्निपुष्य उरगोऽपि विधाद्यसौम्ये ।
मूलार्द्रयोः शुनक श्चोतुरश्वावदित्ये
पूर्व्वा मघासु मत उन्दुररेव योनिः ॥
गौर्भद्रोत्तरफल्गुनीत उदिता स्वातौ करे माहिषी
व्याघ्रास्त्वाष्ट्रविशाखयोश्च हरिणो ज्येष्ठानु-
राधाभयोः ।
पूषाद्रश्रवणे कपिर्निगदितो वैश्वाभिजिन्नाकुलं
पूभायां वसुभे मृगेन्द्र उदितो वैरं त्यजेल्लोकतः
आयर्क्षतारा व्ययमंशकश्च
श्लोकत्र लब्धा विभजेत् क्रमेण ।
तिथ्या च वारेण तथैव लग्नैः
शेषैस्तु भान्येव भवेयुरङ्कैः ॥
दैर्घ्यं पृथुत्वेन च ताड़नीयं
तयोर्यदैक्यं पुनरुच्छ्रयेण ।
शेषेऽधिनाथो वसुभाजितेऽस्मिन्
समः प्रशस्तोऽधिपमस्तु नैव ॥*॥
वर्गाष्टकस्य पतयो गरुड़ो विड़ालः
सिंहस्तथैव शुनकोरगमूषकेशाः ।
मेढ़ाकवारुच-ट-ता: प-य-श वर्गा
यः पञ्चमः स रिपुरेव बुधैर्विवर्ज्यः ॥
अश्विन्यादिकभत्रयं फणिनिभं चक्रं त्रिनाड्यु-
द्भवं
श्लोकस्यां वरकन्ययोश्च यदि भं तन्मृत्युदं चांशतः
नाड़ीसेवकमित्रगेहपुरतस्त्वेका शुभा सव्यधा
आयादित्रिकपञ्चसप्तनवभिस्त्वङ्कैर्गृहं सौख्यदम्
गुणगणं लघुदोषमन्वितं
भवनदेवगृहादिकमिष्यते ।
जललवेन शिखी बहुतापवा-
न्न शममेति गुणैरधिको यतः ॥"
इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे
राजवल्लभे आयादिलक्षणं ३ अध्यायः ॥
"वापीकूपतड़ागदेवभवनान्यारामयागादिकं
तीर्थानामवगाहनञ्च विधिवत् कन्याप्रदाना-
दिकम् ।
सर्वं पुण्यमिदं नृपः स लभते यः कारयेत्
पर्वते
दुर्गं सर्वजनाय शर्म्मजननं विश्राममेकं परम् ॥
सिंहो वैरिपराभवं प्रकुरुते तिष्ठन् गिरौ
गह्वरे
दुर्गस्थो नृपतिः प्रभूतकटकं शत्रुं जयेत् सङ्गरे ।
कैलासे नगरं शिवेन रचितं गौर्य्यादिसंरक्षणे
दुर्गं पश्चिमसागरे च हरिणाप्येषां किमत्रो-
च्यते ॥
भूदुर्गं जलदुर्गमद्रिविषये दुर्गं भवेद्गह्वरे
तेषामुत्तममद्रिमूर्द्धि रचितं तद्दैरिणां दुर्गमम्
अम्भाद्यैष्टततोयतैललवणैः काष्ठैस्तृणाद्यैस्तथा
यन्त्रोपस्करबाणशस्त्रसुभटैः संपूरयेद्भूमिपः ॥
माहेन्द्रं चतुरस्रमायतपुरं तत् सर्वतोभद्रकं
वृत्तं सिंहविलोकनं सुपृतनायत्तं तथा वारुणम्
नन्दाख्यञ्च विमुक्तकोणमथ नन्दावर्त्तिस्वस्त्या-
कृति
प्रोक्तं तद्यववज्रयन्त्रमपि तद्दिव्यं गिरेर्मस्तके
पुण्यं चाष्टदलोपमञ्च पुरुषाकारं पुरं पौरुषं
स्नेहं कुक्षिषु भूधरस्य कथितं दण्डाभिधं दैर्घ्य-
कम् ।
शातं प्राक् सरिता परत्र कमलं याम्ये नदी
धार्म्मिकं
द्वाभ्यां चैव महाजयञ्च धनदाशायां नदी
सौम्यकम् ॥
दुर्गेकेन युतं श्रियाख्यनगरं द्वाभ्यां रिपुघ्नं पुरं
त्वष्टास्रं कथयन्ति खस्तिकमिति प्रोक्ता गुणा
विंशतिः ।
भूपानां सुखदा यशोऽर्थफलदाः कीर्त्तिप्रतापो-
द्भवा
लोकानाञ्च निवासतो विरचिताः प्राक्शम्भुनैते
गुणाः ॥"
इति पुराणां विंशतिगुणाः ॥*॥
"वह्नेर्भीतिकरं त्रिकोणनगरं षट्कोणकं क्लेशदं
वृत्तं वह्नभयञ्च शाकटपुरे रोगस्त्रिशूले कलिः
प्रोक्तं तस्करभीतये द्विशकटं कर्णाधिकेऽर्थक्षयो
दोषाः सप्त भयावहाः प्रकटिता ये विश्वकर्मो-
दिताः ॥"
इति पुराणां सप्तदोषाः ॥*॥
"वक्षेऽयो विविधं पुरं मुनिमतं मध्योत्तमं
कन्यसं
तेषां हस्तसहस्रमन्तिमपुरं मध्यं ततः सार्द्ध-
कम् ।
ज्येष्ठं युग्मसहस्रमेषु चरमं भागाष्टकेनाचितं
मध्यं द्वादशभागतः शशिकलं ज्येष्ठं विदध्यात्
सुधीः ॥
मार्गाः सप्तदशैव चादिमपुरे हीनं चतुर्भिः पुरं
प्रोक्तं कन्यसमेव मार्गनवभिर्दैर्घ्यं तथा विस्तरे
ग्रामश्चैव पुराद्धतो हि तदनु ग्रामार्द्धतो खेटकं
खेटार्द्धेन तु कूटमेव विबुधैः प्रोक्तं ततः खर्व-
टम् ॥
हस्तानाञ्च युगाष्टषोड़शसहस्रं भूपतीनां पुरं
तन्मध्ये दशधा वदन्ति मुनयो वृद्धा सहस्रे च
तत् ।

आयामे वसुपादसार्द्धवसुतो भागः प्रशस्तोऽधिक-
स्वेकैकञ्च चतुर्विधं निगदितं कार्य्यं समं कर्णयोः ॥
षट्त्रिंशतः षट् क्रमतो विहृता
दैवे पुरे चत्वरके क्रमेण ।
यदृच्छया मानमुशन्ति केचित्
प्राकारकोष्ठस्य च भित्तिकायाः ॥*॥
पूर्वापरास्याः पुरसम्मुखाश्च
देवाः शुभा नोत्तरदक्षिणास्याः ।
भद्रं पुरस्यापि पराङ्मुखास्ते
कुर्वन्ति धात्रर्कजनार्हनेत्राः ॥
ब्रह्मा विष्णुशिवेन्द्रभास्करगुहाः पूर्वापरास्याः
शुभाः
प्रोक्तौ सर्वदिशामुखौ शिवजिनौ विष्णुर्विधाता
तथा ।
चामुण्डा ग्रहमातरो धनपतिर्हैमातुरो भैरवो
देवा दक्षिणदिङ्मुखाः कपिवरो नैर्ऋत्यवक्त्रो
भवेत् ॥
मार्गाः सप्तदशाङ्गपञ्चशिखिनो युग्मं पुरात्
खर्वटं
मार्गाः षोड़श सूर्य्यविंशतिकराः कार्य्याखिधा
विस्तरे ।
प्राकारोदयविंशहस्तमभितो हाभ्यां विहीनोऽधिको
व्यासार्द्धेन तदूर्द्धतश्च कपिशीर्षाण्यष्टमात्रा-
न्तरम् ॥
प्राकारेऽपि च कोष्ठका दशकराः सूर्य्येन्द्र-
हस्तास्तथा
प्रोक्तास्तेन समैव कोणसहिता विद्याधरी
मध्यमा ।
तस्या वाथ सुवृत्तके च विविधं युद्धासनं कार-
येत्
प्राकारोदयतो विधाय परिखाविस्तार उक्तो
बुधैः ॥
विद्याधरीकोष्ठकयोश्च मध्ये
बाहुप्रमाणं शरराम हस्तम् ।
पञ्चाधिकं पञ्चकरेण हीन-
मिति त्रिधा वास्तुमतो हितञ्च ॥*॥
दुर्गोदयं नन्दकरप्रमाणं
तिथा समं समदशैव केचित् ।
एकोनविंशं पृथुलं त्रयाणां
दिक्कालसूर्य्याष्टकरा वदन्ति ॥
ताम्बूलं फलदन्तगन्धकुसुमं मुक्तादिकं यद्भवेत्
राजद्वारसुराग्रतो हि सुधिया कार्य्यं पुरे
सर्व्वतः ।
प्राग्विप्राय नृपा हि दक्षिणदिशि स्युः सौम्यतः
शूद्रकाः
कर्त्तव्याः पुरमध्यतोऽपि वणिजो वैश्या विचित्रै-
र्गृहैः ॥
ईशे रङ्गकराः कुविन्दरजका वह्नौ च तज्जो-
विनः
प्रोक्ता अन्त्यजचर्म्मकारवरटाः स्युः गौण्डिका
राक्षसे ।
पश्चस्योनिर्ऋतौ च मारुतयुते कोणे न्यसेल्-
लुब्धकान्
वापीकूपतड़ागकुण्डमखिलं तोयं तथा वारुणे
सिंहद्वारचतुष्टयञ्च खटकीद्वाराणि चाष्टौ तथा
कर्त्तव्यानि दृढ़ार्गलानि रुचिरैः कापाटकैः
सुदृढ़ैः ।
कीर्त्तिस्तम्भनृपालयामरगृहैर्ईदृैः सुधानिर्मितै-
र्हर्म्म्यैरोपवनैर्जलाशययुतैः कार्य्यं पुरं शोभ-
नम् ॥"
इति नगरप्रमाणम् ॥ * ॥
"यन्त्राः पुराणामथ रक्षणाय
संग्रामवङ्काम्बुसमोरणाख्याः ।
विनिर्म्मितास्ते जयदा नृपाणां
भवन्ति पूज्याः सुरया च मांसैः ॥
हस्ता षष्ट च भैरवो नरकरश्चान्द्रो दशाद्यो भवे-
द्रुद्रो भीमगजोऽपि भास्करकरैर्युग्मन्तु विश्वेः
शिखी ।
प्रोक्तोऽसौ यमदण्ड एव मुनिभिस्त्विथा महा-
भैरवो
ह्यष्टौ शङ्करनिर्म्मिताश्च समरे देवासुरे भैरवे ॥
यन्त्रे चाष्टकरेऽष्टहस्तफणिनीसूर्य्याङ्गुला विस्तरे
स्तम्भा मर्कटिका च पञ्चरमतः षट्त्रिंशहस्ता
क्रमात् ।
यष्टया पृष्ठविभागतोऽपि रदनैस्तुल्योऽष्टमात्रा-
ङ्गुलैः
प्रोक्ता कुण्डलवल्लवी च वहितो मध्यादशैत्य-
ङ्गुलैः ॥
यष्टया दृढ़ां मर्कटिकां विदध्या-
ल्लोहस्य कीलेन च चर्म्मणापि ।
यन्त्रं प्रकुर्य्यादृढ़काष्ठकञ्च
तन्मानया ज्योतिकया समेतम् ॥
कराङ्गुलैः पञ्चरकस्य दैर्घं
केषां मते हस्तमिते च यन्त्रे ।
याटौ कुली वङ्किजलानिलाख्या-
स्ते लक्षणज्ञैः परिकल्पनीयाः ॥"
इति यन्त्राष्टकप्रमाणानि ॥ * ॥
"नीराश्रयं पुण्यवतां विधेयं
मध्ये पुरस्यापि तथैव बाह्ये ।
वाप्यश्चतस्रोऽपि तथैव कूपा-
श्चत्वारि कुण्डानि च षट् तड़ागाः ॥*॥
कूपाः श्रीमुखवैजयौ च तदनु प्रान्तस्तथा
दुन्दुभि-
स्तस्मादेव मनोहरश्च परतः प्रोक्तस्तु चूड़ा-
मणिः ।
दिग्भद्रोजयनन्दशङ्करमतो वेदादिहस्तैर्मिता
विख्यातैः क्रमवर्द्धितैश्च कथिता वेदादयः
कूपिका ॥*॥
वापी च नन्दैकमुखा त्रिकूटा
षट्कूटिका युग्ममुखा च भद्रा ।
जया त्रिवक्त्रा नवकूटयुक्ता-
स्वर्केस्तु कूटैर्विजया मता सा ॥*॥
सरोऽर्द्धचन्द्रश्च महासरश्च
वृत्तं चतुष्कोणकमेव भद्रम् ।
भद्रैः सुभद्रैः परिघैकयुग्मं
वक्त्रैकहस्यमेव यस्मिन् ॥
ज्येष्ठं मितं दण्डसहस्रकैस्तु
मध्यं तदर्द्धेन ततः कनिष्ठम् ।
ज्येष्ठं करैः पञ्चशतानि दैर्घै-
स्तदर्द्धमध्यं तु ततः कनिष्ठम् ॥*॥
भद्राख्यकुण्डं चतुरस्रकञ्च
सुभद्रकं भद्रयुत द्वितीयम् ।
नन्दाख्यकं स्यात् प्रतिभद्रयुक्तं
मध्ये सुभद्रं परिघं चतुर्थम् ॥
कराष्टतो हस्तशतं प्रमाणं
हारैश्चतुर्भिः सहितानि कुर्य्यात् ।
मध्ये गवाक्षत्रय दिशो विभागे
कोणे चतुष्कास्वपि पट्टशालाः ॥*॥
गङ्गाद्या रवयो हरेश्च दशकं रुद्रा दशैकादिका
दुर्गा भैरवमाष्टका गणपतिर्वक्त्रेक्षिकं चण्डिका
दुर्वासा मुनिनारदस्तु सकला द्वारावती
लौलिका
लोकाः पञ्च पितामहादिविबुधाः स्युर्मध्यभित्तौ
सदा ॥
तस्योर्द्धतः श्रीधरमाड़कस्य
संदर्शनात् पूर्व्वफलञ्च काश्याः ।
स्नानाच्च गङ्गाप्लवनस्य पुण्यं
कृतं भवेच्चेद्दिविवद्दिधिर्न्नैः ॥
विधारितं जीवनमेव येन
तन्नोपदेकेन समं पृथिव्याम् ।
स षष्टिसंख्यं च सहस्रवर्षं
स्वर्लोकसौख्यान्यखिलानि भुङ्क्ते ॥
ग्रामे वाथ पुरे नरेन्द्रभवने तत्षोड़शांशं भवेत्
मध्यात् पश्चिमदिक्समाश्रितमिदं दुर्गं भवेद्भूव-
ग्रात् ।
द्वारं दक्षिणवामतश्च पुरतः कार्य्याश्चत्वय-
श्चत्वराः
सर्वं वास्तुगृहादिवासरचना भूपेच्छया कार-
येत् ॥"
इति सूत्रधारमण्डनविरचिते वास्तुशास्त्रे राज
वल्लभे प्राकारयन्त्रवापीकूपतड़ागलक्षणम् ४
अध्यायः ॥*॥
"अथो नृपाणां भवनानि वक्ष्ये
त्रैलोकपत्रावनिपालकस्य ।
शतञ्च हस्ताष्टसमन्वितञ्च
व्यासे गृहं चोत्तममेव तस्य ॥
ये द्वापरे भूमिभुजो बभूवु-
स्तेषां गृहं हस्तशतं विहीनम् ।
तच्चांशं भूमीश्वरको नृनाथ-
स्वष्टाधिकाशीतिकरं गृहं स्यात् ॥
ग्रामैकलक्षत्रयमस्ति यस्य
प्रोक्तो महामण्डलिको नरेशः ।

अशीतिहस्तं द्विकरेण हीनं
कुर्यादृगष्टहं शोभनमेव तस्य ॥
पञ्चायुतेशो नृपमण्डलीको
भवेदृगष्टहं तस्य कराष्टषष्टिः ।
सामन्तमुख्यो ह्ययुताधिपोऽसौ
तद्वेश्मसप्तेषु करप्रमाणम् ॥
तद्वेश्म पञ्चाशदपि द्विहीनं
सामन्तसंज्ञोऽयुतनाथ एव ।
तथा तृतीयोऽपि ततो द्विहीनं
त्रिंशत्करात्राष्टाधिकमेव गेहम् ॥
प्रोक्तः प्रवीणैश्चतुराश्रिकोऽसौ
ग्रामा हि यस्यैव सहस्रमेकम् ।
अष्टाधिकं विंशतिहस्तहर्म्यं
सिद्धैः समस्तानि यथोदितानि ॥
ग्रामाधिपा ये तु शताधिपाश्च
ते स्वल्पराट्टा अपि सैनिकाश्च ।
तेषां गृहा अष्टदशाधिकैश्च
करैः समाना मुनिभिर्मताश्च ॥
भूपालकार्ह्येन च मन्त्रिगेहं
यथाधिकारेण भवन्ति हीनम् ।
व्यासाद्दशांशाधिकमेव दैर्घ्यं
कुर्यादथो पञ्चमभागमिष्टम् ॥
गृहं चतुर्हस्तमितं करादि-
हस्ता हिरामान्तमिति प्रमाणम् ।
ततः परं भूपतिमन्दिराणि;
यावच्छतं चाष्टकरादियुक्तम् ॥
स्याद्भूमिरेका वसुहस्तगेहे
दशाभिहस्ता हितया पुनश्च ।
प्रासाद एवामरभूपयोश्च
हर्म्याणि लोके मुनिनोदितानि
शालाया नवधा च पञ्चकरतो मानञ्च विस्तारतः
भित्तेरेव चतुर्दशाङ्गुलमितिर्यावत् सपादं करम्।
आगारस्य तु षाड्गांशरहितोऽप्यर्द्धेन हीनोऽथवा
भित्तेर्मानमिदं त्रिधा विरचितं कर्त्तव्यं यथायोगतः ॥
दैर्घ्ये चन्द्रकलाङ्गुलोत्तमशिला मध्याङ्गुलो नान्तिमा
व्यासे दिङ्नवभूभृदुच्छ्रितिरपि त्रिंशेन विस्तारतः ।
हस्तादेस्त्रिकरोदयं नवविधं पीठं गृहे सर्वतो
विप्रादे रसभूतवेदगुणकाः स्युः पीठक मेखलाः॥
पञ्चा वाथ शताद्विसप्ततियुतैर्व्यासस्य हस्ताङ्गुलै-
द्वारस्योदयको भवेच्च भवने मध्यः कनिष्ठोत्तमैः
दैर्घ्यार्द्धेन तु विस्तरः शशिकलाभागोऽधिकः सप्ततेः
दैर्घ्यं त्र्यंशविहीनमर्द्धरहितं मध्यं कनिष्ठं क्रमात् ॥
ज्येष्ठा प्रतोली तिथिहस्तसंख्या
प्रोक्तोदये विघ्नकरा च मध्या ।
कनिष्ठिका रुद्रकरा क्रमेण
व्यासेऽष्ट सप्तैव च रागसंख्या ॥
वेश्मव्यामकलांशकैर्युगगुणैर्हस्तैस्त्रिसार्द्धैर्युते-
र्हर्म्यास्य त्रिविधोदयः चितितलादृयावच्च पट्टोङ्कम् ।
एकैकोऽपि पुनस्त्रिधा निगदितः सर्वे त एकादश
चेपाः षष्ठवतौ नखाः शशिकला अष्टादशाथस्त्रिधा ॥
त्रिस्थाने युगपर्वताष्टखस्थियुता धिष्ट्यैकविंशान्विता
मध्योऽयं त्रिकरैस्तदंशसहितैः प्रोक्तः कनिष्ठस्त्रिधा ।*।
हृच्चं दुग्धविशुष्ककण्टकयुतं नीड़ैस्तु चैत्यद्रुमं
चौरं मारुतपातितञ्च भवनं चिञ्चाविभीतं त्यजेत् ॥
शाकः शालमधूकसर्ज्जखदिरा रक्तासनाः शोभना
एकोऽसौ सरलोऽर्जुनश्च पनसः श्रीपर्णिनी शिंशपा ।
हारिद्रः पिचुमर्दचन्दनतरुः पद्माख्यकस्त्विन्दुको
नैतैऽन्यैन युता भवन्ति फलदाः शाकादयः शोभनाः ॥*॥
गेहोदयन्तु नवधा विभजेत् षड़ंशं
स्तम्भोच्छ्रायभागसमकं भरणं शिरश्च ।
कुम्भी ह्युदम्बरसमैकविभागतुल्या
पट्टश्च तत्त्रिकयुतोऽशसमान एव ॥
शालालीन्द उदाहृतो हि विबुधैर्बाणेषु युग्मांशकः
सप्तांशेषु गुणेश्च नन्दपदतो वेदांशतुल्यस्तथा ।
कापाटं गृहदक्षिणे निगदितं वामं भवेदर्गला
सृष्टा निष्क्रमणं कृतं मुनिवरैर्द्वारेषु सर्वेषु यत्॥
शालाजिनांशैमनुरेव मध्ये
चया हयान्ते हयमस्य पार्श्वे ।
द्वारोत्तमाङ्गेन समानकर्णाः
शस्ता न शस्ता भवनाभिवक्त्राः ॥*॥
दीपालयो दक्षिणदिग्विभागे
सदा विधेयोऽर्गलया समानः ।
वामे च मध्ये न शुभाय गेहे
सुरालये वामदिशोष्टसिद्धैः ॥
द्वाराग्रे खटकीमुखे च तदधो द्वाः षोड़शांशाधिकं
सर्व्वं वा शुभमिच्छता च सततं कार्य्यन्तु षट्त्रादधः ।
तच्छून्यं न शुभन्तुलातलगतं कुर्ची तथा पृष्ठगं
काष्ठं पञ्चक एव नीतरहितं यन्मूलपूर्वान्तरम्॥
द्वारोर्द्ध यद्वारमस्य प्रमाणं
संकोचं वा शोभनं नाधिकं तत् ।
क्षुद्रद्वाराण्येव यानि पृथूनि
तेषां शीर्षाण्येकसूत्राणि कुर्य्यात् ॥
सर्वं द्वारं नीचमानं शुभाय
यद्वा क्षुद्रं तत् करोत्यर्थनाशम् ।
गेहादयं यत् पूर्व्वं वास्तुस्वरूपं
तेषां भङ्गान्नैव सौख्यं कदाचित् ॥
द्वारव्यासरदांशतोऽधिकमिदं कार्य्यं गृहं दक्षिणे
तुल्यं हस्तिगृहञ्च वाजिभवनं तेनाधिकं वामतः ।
अष्टांशेऽथ नवांशके च वितथे तोये जयेन्द्रे हितं
द्वारं सौम्यगृहव्रते च कुसुमे भल्लाटके शस्यते ॥
प्राग्द्वाराष्टकमध्यतोऽपि न शुभं सूर्य्येशपर्जन्यतो
याम्यायाश्च यमाग्निपौष्णमपरे शेषासुरं पापकम् ।
सौम्यायामथ रोगनागगिरिजं त्याज्यं तथान्यच्छुभं
कैश्चिद्दारुणसौम्यकं न हि हितं प्रोक्तञ्च वातायने ॥
द्वारं विद्धमशोभनञ्च तरुणाकोणभ्रमस्तम्भकैः
कूपेनापि च मार्गदेवभवनैर्विद्धं तथा कीलकैः ।
उच्छ्रायाद्दिगुणां विहाय पृथिवीं वेधो न भित्त्यन्तरे
प्राकारान्तरराजमार्गपरतो वेधो न कोणद्वये ॥
दैर्घ्ये सार्द्धशताङ्गुलच्च दशभिर्हीनम् १४०।१३०।१२०।११० चतुर्धा विधिः
प्रोक्तं वाथ शतं त्वशीतिसहितं १८० युग्मं २०० नवत्या शतम् १९० ।
तद्वत् षोड़शभिः शतञ्च ११६ नवभिर्युक्तं तथाशीतिकम् ८९
द्वारं मत्स्यमतानुसारि दशकं योग्यं विधेयं बुधैः ॥*॥
स्वयमपि च कपाटोद्घाटनं वा पिधानं
भयदमधिकहीनं शाखयोर्वा विचाले ।
पुरुषयुवतिनाशस्तम्भशाखाविहीनं
भयदमखिलकाष्ठाग्रं यदाधःस्थितं स्यात् ॥
देवालयं वा भवनं मठञ्च
भानोः करैर्वायुभिरत्र भिन्नम् ।
तन्मूलभूमौ परिवर्जनीया
छाया गता यस्य गृहस्य कर्त्रे ॥
नैकौ लघुर्वामदिशाविभागे
मध्यं द्विषट् दारुणवर्णगेहे ।
स्तम्भासनं हीनमपि क्षयाय
यदाधिकं रोगकरं तदा स्यात् ॥
स्तम्भोऽष्टासुवृत्तभद्रसहितो रूपेण चालङ्कृतो
युक्तः पल्लवकस्तथाभरणकं यत् पद्मवेनाहृतम् ।
कुम्भो भद्रयुता कुमारसहितं शीर्षं तथा क्षिद्धराः
पत्रञ्चेति गृहे न शोभनमिदं प्रासादके शस्यते॥
स्तम्भो द्वयोर्मध्यगतो न शस्तो
शुभंकरौ पट्टयुगांशतो द्वौ ।
गृहं प्रशस्तात्चतुरस्रकास्रो
स्तम्भा न कन्देन विना प्रशस्ताः ॥
द्वानिस्तुलामध्यगता स्वनस्य
स्तम्भभद्रन्तालयभित्तिमूलम् ।

संलग्नचत्वार्य्यपि हानये स्यु:
स्तम्भासनं स्तम्भशिरश्च शीर्षम् ॥
उत्सेधाईविनिर्गतं शरयुगांशेनाधिकं शस्यते
द्वाद्यं षट्समानकं सुखकरं नाशाय निम्नोन्नतम्
तत् काकस्य च पत्तवच्च कुमुदाभं सूर्य्यकाला-
यकं
प्रालम्बच्च करालकच्च विबुधै: प्रोक्तच्च तत्
षड्विधम् ॥
भूम्यारोहसमुच्छ्रितस्तदुपरि प्रादक्षिणं शस्यते
हारं तूर्ईभवच्च भूमिरपरा ऋक्षार्कभागै:
क्रमात् ।
प्रासादे च मठे नरेन्द्रभवने शैल: शुभो नो
गृहे
तस्मिन् भित्तिषु वाह्यकास्तु शुभदा: प्राग्भूमि-
कुम्भाग्रां तथा ॥ * ॥
पृष्ठे क्षणानन्तरमेव बाह्यात्
गृहप्रवेशो न शुभङ्करोऽसौ ।
गृहस्य पृष्ठे यदि राजमार्ग-
स्तदादिभूमेर्न हि पृष्ठमीक्ष्यम् ॥
जीर्णं गृहं भित्तिमग्नं विशीर्णं
तत् पातव्यं स्वर्णनागस्य दन्तै: ।
गोगर्द्दैर्व्वा गिल्पिना निश्चयेन
पूजां कृत्वा वास्तुदोषो न तस्य ॥
हर्म्यास्यापि समन्ततो गृहपतिर्वृद्धिं यदा-
पोहते
मर्व्वांशासु विवर्द्धितच्च फलदं दुष्टं तदेकत्र च ।
प्राग्निर्व्वारपि वैरमुत्तरदिशाभागे मनस्तापकृत्
पश्चादर्थविनाशदक्षिणदिशि शत्रोर्भयं वर्द्धते ॥
वामाङ्गे धनवस्त्रदेवभवनं धातु: स्त्रियो वाजिनो
नार्य्यस्तौषधिभोजनस्य भवनं स्याद्दाटिका
वामत: ।
वह्नेर्गोजलदन्तिशस्त्रमदनं स्त्रीणां तथा दक्षिणे
स्थानं माहिषमाजमौर्णिकमिदं याम्याग्निमध्ये
शुभम् ॥
सुग्रीवे वरुणेऽसुरे गणवरे स्याद्गोटकानां गृहं
हास्ये युद्धगृहच्च नृत्यरमणं गान्धर्ब्ववेदाश्रितम्
राज्ञो माटगृहं गजेन्द्रजयके रुद्रे महिष्या
गृहं
मत्ये धर्म्मगृहं रवौ व्ययगृहं प्रोक्तं जये
श्रीगृहम् ॥
ईशप्राच्योरन्तरे गर्भभाना-
मुद्वाहां वा स्थानमेवात्र कार्य्यम् ।
धान्यागारं स्यात्तथा प्राणकोणे
भृङ्गेऽप्येवं शम्भुकोणे शिवार्च्चा ॥
प्राक् पश्चिमे मारुतवह्निकोणे
प्रोक्ता प्रवीणैरपि नृत्यशाला ।
वर्षागृहं राचिचरस्य कोणे
स्यात् पश्चिमे भोजनशालिका च ॥ * ॥
प्राक् शोभा नृपमन्दिरे च पुरत: स्थानं तथा
पुत्रकं
वामाङ्गे नृपतेस्तथायुधधरा: कृष्णातपत्राणि
च ।
छत्रं चामरतापमा: स्वगुरवस्ताम्बूलधृग्दक्षिणे
गेहाधीशयनेच्छया च शयनं सर्व्वासु भूमीषु
च ॥
विवस्वदाख्ये शयनं प्रशस्तं
वादित्रगेहं सवितुर्विवेयम् ।
पूषाश्रितं भोजनमन्दिरच्च
महानसं वह्निदिशाविभागे ॥
माहेन्द्राख्ये गोपुरं द्वित्रिभूमिं
भानो: संख्या तस्य मध्ये विधेया ।
उक्तानुक्तं मन्दिरादौ निवेश्ये
त्वष्टा कार्य्यं वाचया भूपतीनाम् ॥
दिक्शालान्तं श्लोकशालादिगेहं
ज्येष्ठा मध्या कन्यसा दक्षिणाङ्गात् ।
शाला कार्य्या लोकगेहे युगान्तात्
त्रिद्वेकाका: स्युर्भूमयस्तेषु नूनम् ॥"
इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे
राजवल्लभे राजगृहनिवेशादिलक्षणं ५ अ: ॥*॥
"अथैकशालं द्विगुणाश्रिशालं
प्रस्तारतो लक्षणमेव तेषाम् ।
यथोदितं वास्तुमते तथैव
ब्रवीमि राज्ञामथ मानवानाम् ॥
चत्वारो गुरवस्तु पूर्व्वगुरुतोऽधो ऋक्षतोऽन्ये
समा:
भूय: पश्चिमपूरितच्च गुरुभिर्य्यावल्लघुत्वं भवेत् ।
उद्दिष्टे द्विगुणाङ्कैर्लघुभवै: संख्यैकमिश्रीकृते
नष्टे स्तो विषमे समे गुरुलघू रूपे तदर्द्धोद्धृत:
स्थाने लघो: सप्तमुखादलिन्दं
प्रदक्षिणं तं क्रमतो विदध्यात् ।
प्रस्तारत: षोडशकं गृहाणां
प्रोक्तं तथाख्यां कथयामि तेषाम् ॥*॥
ध्रुवच्च धान्यं जयनन्दसंज्ञे
खराख्यकन्दच्च मनोरमाख्यम् ।
सुवक्त्रमस्मात् किल दुर्मुखाख्यं
क्रूरं विपत्तं धनदं क्षयच्च ॥
आक्रन्दकं वैपुलवैजयच्च
फलानि नाम्ना सदृशानि तेषाम् ।
इति ध्रुवादिषोडशगृहाणि ॥*॥
धान्यादितोऽष्टौ विजयान्तकं हि
त्वलिन्दयुग्मं सुखतो विदध्यात् ॥
रम्यं श्रीधरमोदिते च परतस्तद्वर्द्धमानं गृहं
कारालच्च सुनाभमेव तदनु भद्रं समृद्धं तथा
इति रम्याष्टकम् ॥*॥
मर्व्वाणि ध्रुवच्चवन्ति नियतं षड्दारुकै: सुन्दरं
प्रोक्तं तदरदच्च भद्रकुमुदेऽथो वैमुखाख्यंशिवम्
तत्सर्व्वलाभच्च विशालसंज्ञं
तथा विलक्षं त्वशुभं ध्वजच्च ।
उद्योतमेवं त्वथ भीषणच्च
सौम्याजिते स्त: कुलनन्दनच्च ॥"
इति सुंदरादिषोडशगृहाणि ॥ * ॥
"पूर्व्वालिन्दसमस्तकेषु युगलं षट्स्य शालान्तरे
हंसच्चैव सुलक्षणच्च परत: सौम्यं हयं भावुकम्
तस्मादुत्तमरोचिरे च सततं क्षेमं तथा क्षेपकम्
चोदृत्तं वृषमुत्थितच्च व्ययमानन्दं सुनन्दं
क्रमात् ॥"
इति हंसादिषोडशगृहाणि ॥ * ॥
"मध्येऽपवर्गं ध्रुवरूपकाणा-
मलङ्कृताङ्गं प्रथमच्च तत्र ।
तथाप्यलङ्कारमिति क्रमेण
ख्यातं तदन्यं रमणच्च पूर्व्वम् ॥
तत्रेश्वरं तदनु पुष्पमत: सुगर्भं
प्रोक्तं गृह कलसदृगंतमेव रिक्तम् ।
स्यादीप्सितं तदनु भद्रकवच्चिते च
दीनं गृहं विभवकामदमेव सख्या ॥"
इत्यलङ्कृतादिषोडशगृहाणि ॥ * ॥
"षड्दारु सर्व्वेष्वपवर्गकेषु
प्रभावसङ्गं त्वथ भावितच्च ।
रुक्मं तथान्यच्चिलकच्च तत्र
सत् क्रीडनं सौख्यमतो यशोदम् ॥
कुमुदमपि च कालं भासुरं भूषणच्च
वसुधरमथ गेहं धान्यनाशं तदन्यत् ।
कुपितमपि च वित्तं हृद्विदं प्रोक्तमेत-
त्तदनु कुलसमृद्धं षोडशं प्रोक्तमाद्यै: ॥"
इति प्रभवादिषोडशगृहाणि ॥*॥
"सर्व्वे मुखालिन्दसमन्वितास्य
दारुद्विषट्कं ह्यपवर्गमध्ये ।
ततश्च चूड़ामणिकं प्रभद्रं
क्षेमं तथा शेषसमुच्छ्रितच्च ॥
विशालसंज्ञं त्वथ भूतिदच्च
हृष्टं विरोधं कथितं क्रमेण ।
तत्कालपाशं हि निरामयन्तु
सुशालरौद्रे सुनिसम्मताश्च ॥
वेद्यं गृहं चैव मनोरमच्च
सुभद्रसंज्ञं कथिता च संख्या ।
इत्येकशालानि गृहाणि विद्या-
च्छतच्च चत्वार्य्यधिकं ध्रुवादि ॥
अपवरकं यत् कथितं तदामे धीमता गृहे
कार्य्यम् ।
यत् षड्दारुकमुदितं ज्ञेया सा पट्टजा श्रेणी॥"
इति चूड़ामण्यादिषोडशगृहाणि । इति चतु-
रुत्तरं शतमेकशालगृहाणि ॥*॥
"अथ द्विशालालयलक्षणानि
पदैस्त्रिभि: कोष्ठकरन्ध्रसंख्या ।
तन्मध्यकोष्ठं परिहृत्य युग्मं
शालायतस्तो हि भवन्ति दिक्षु ॥
याम्याग्निगा च करिणी धनदाभिवक्त्रा
पूर्व्वाननां च महिषी पित्र्यवारुणस्था ।
गावी यमाभिवदनापि च रोगसौम्ये
वक्त्रागी महेन्द्रशिवयोर्वरुणाभिवक्त्रा ॥
हस्तिन्या महिषी द्विशालभवनं सिद्धार्थकं
तच्छुभं
गावी माहिषसंज्ञकं सुतिकरं तदयामसूर्य्यं
भवेत् ।
दण्डं छागगवान्वितं धनहरं हस्तिन्यजाभ्यां
तथा

काचं गोकरिणीयुतं न हि शुभं शुक्ली च पर्व्वा-
परम् ॥
नामान्यतः सन्ततशान्तिदञ्च
स्याद्दर्पमानं त्वथ कुक्कुटाख्यम् ।
हस्त्यादिमी नाम चतुष्टयञ्च
हर्म्मेंद्र द्विशालं प्रथमं तथैव ॥
यत् स्वस्तिकं तद्रमदारुमध्ये-
ऽलिन्दस्तथाग्रे कथितं द्विशालम् ।
हंसाख्यकं स्यादथ वर्द्धमानं
कीर्त्तिर्विनाशं भवनं चतुर्थम् ॥
अलिन्दयुग्मं पुरतो विदध्यात्
षड्दारु मध्येऽपि च शान्तसंज्ञम् ।
तस्मादगृहे हर्षणवेपुले च
तथा चतुर्थं कथितं करालम् ॥
तस्मिन् गृहे दक्षिणतो ह्यलिन्दे
वित्तञ्च चित्तं धनकालदण्डे ।
वामे पुनर्वन्धुदपुत्रदं स्यात्
सर्व्वन्तु तस्मिन्नपि कालचक्रम् ॥
लघुञ्च पश्चात् पुरतोऽपि युग्मं
स्याद्दक्षिणैको रसदारुमध्ये ।
तच्चैपुरं सुन्दरमेव नीलं
स्यात् कौटिलञ्चैव यथा क्रमेण ॥
प्रदक्षिणैकः पुरतोऽपि युग्मं
षट्कं गृहाग्रः किल शाश्वदाख्यम् ।
ततो द्वितीयं खलु शाश्वदं स्या-
च्छीलं तथा कोटरमेव संज्ञम् ॥
सौम्यं गृहं मण्डपसंयुतञ्च
तत्तुल्यरूपं विबुधैर्विधेयम् ।
सुभद्रमस्मादपि वर्द्धमानं
क्रूरञ्च सर्व्वेष्वशुभं चतुर्थम् ॥
मुखे त्रयं दक्षिणपश्चिमैकः
षड् दारुकं श्रीधरनामधेयम् ।
प्रोक्तं गृहे कामदपुष्टिदे च
चतुर्थकं कीर्त्तिविनाशमेव ॥
वामे तथा दक्षिणपश्चिमैको
युग्मं मुखे मण्डपमग्रतश्च ।
श्रीभूषणं श्रीवमनं ततश्च
श्रीशोभकीर्त्तिचयमेव तद्वत् ॥
एकोऽपरे दक्षिणवामतश्च
यन्मध्यगं श्रीधरयुग्मपूर्व्वम् ।
सर्व्वार्थदं स्यान्मुखतस्त्रयञ्चेत्
लक्ष्मीनिवासं कुपितञ्च नाम्ना ॥
युग्मं मुखे मण्डपमेव चाग्रे
युग्मं तथा दक्षिणतोऽन्तभित्तिः ।
पृष्ठे तु उद्योतकबाहुतेजः
सुतेज एवं कलहावहं स्यात् ॥
उद्योतके पश्चिमभागतो द्वौ
कुर्य्यात् द्विशालञ्च बहिर्निवासम् ।
तत् पुष्टिदं क्रोपसमानमन्त्य-
मनुक्तषट्कं क्रमतो विधेयम् ॥
लघुत्रिकं पूर्व्वदिशाविभागे
एको भवेद्दक्षिणवामपश्चात् ।
महान्तमेतन्महितञ्च दत्तं
कुलक्षयं मण्डपसंयुतं स्यात् ॥
भ्रमहयं दिक्चितये विभागे
मुखे त्रिकं मण्डपमग्रतश्च ।
प्रतापवर्द्धन्यमिदञ्च दिव्यं
मुखाधिकं सौख्यहरं चतुर्थम् ॥
तस्यैव रूपं रसदारुयुग्मं
पुनस्त्वलिन्दोऽजगजन्ततश्च ।
स्यात् सिंहनादं त्वथ हस्तियानं
ज्ञेयं तथा कण्टकमेतदन्त्यम् ॥
शान्तादिगेहानि च षोड़शैव
द्विशालकानीह यथाक्रमेण ।
नामानि चत्वार्य्यपि रूपमेकं
हस्त्यादिभेदैः क्रमतो विधेयम् ॥"
इति सूत्रधारमण्डनविरचिते वास्तुशास्त्रे राज-
वल्लभे एकद्विशालगृहलक्षणं ६ अध्यायः ॥*॥
"द्विशालगेहानि तु षोड़शैव
वास्तूदधेः सारतरं पुनश्च ।
वक्ष्याम्यलिन्दोऽपि पणो लघुश्च ।
द्वौ तिन्दुकाख्यौ कथितावलिन्दौ ॥
सूर्य्यं द्विशालं लघुरस्य वामे
मुखे त्रिकं दक्षिणतस्तथैकः ।
मुखे तथा वासवमेव गेहं-
वामेऽपसव्ये लघुरेक एव ॥
प्रासादसंज्ञं मुखतस्त्रयञ्चेत्
प्रदक्षिणं तिन्दुकवेष्टितं स्यात् ।
अलिन्दयुक्तं विमलं द्विशालं
तद्दीर्घ्यवन्तं सह मण्डपेन ॥
अथ द्विशालेषु समस्तकेषु
मध्ये विदध्याद्रसदारु चैकम् ।
तदा भवेद्ब्रह्मसुरमग्रयुग्म-
मेको लघुर्दक्षिणदिग्विभागे ॥
एको लघुर्दक्षिणपूर्व्वगः स्यात्
तद्दन्दुभाङ्गं मुखमण्डपेन ।
द्वौ पूर्व्वतो दक्षिणतस्तथैको
युग्मं भवेन्मण्डपगं सुतेजः ॥
मुखे गुणा दक्षिणतस्तथैको
द्वौ मण्डपेऽस्मिन् हयजाभिधानम् ।
महान्तगेहं मुखजे त्रिके तु
युग्मान्वितं मण्डपमेतदेव ॥
मुखे तथा मण्डपके च युग्मं
वामेऽपसव्ये युगलं लघोश्च ।
लोकत्रयाड़म्बरमस्य नाम
षड़क्षरं शम्भुगणेशयोश्च ॥
युग्मं मुखे मण्डपगं हयं स्या-
त्तथा हयं दक्षिणवामतश्च ।
एको हि पद्माइरदाभिधानं
श्रीविश्वकर्म्मोक्तमताद्विशालम् ॥
मालीनसंज्ञं मुखगैश्चतुर्भि-
र्युग्मं भवेद्दक्षिणवामभागे ।
युग्मं तथा पश्चिमदिग्विभागे
तस्याग्रतो मण्डप एक एव ॥
प्राग्वामा लघवो विलासभवने वामे लघुर्दक्षिणे
तच्चैन्मण्डलसंयुतञ्च कमलं स्याद्दृद्विदं सौख्य-
दम् ।
वेदास्तूदरके मुखे च सततं वामेक्षणे दक्षिणे
तस्याग्रे मुखमण्डपस्य फलदानेवं गृहान्
षोड़श ॥"
इति सूर्य्यादिषोड़शगृहाणि ॥*॥
"अथ त्रिशालं त्रिदशेक्षणैकं
स्यात्तं दशावासमरूपसंज्ञम् ।
तथा चतुर्थं कुमुदाभिधानं
हस्त्यादिभेदैः क्रमतो विधेयम् ॥
छत्रं ह्यलिन्दश्च तथैव पुच्छं
हरश्च कामस्त्वथ भद्रभद्रम् ।
षट्कञ्च मध्ये खधनं कुबेरं
पद्मं तथा कामदमेतदेव ॥
अलिन्दयुग्मं त्वथ भद्रयुक्तं
मध्ये कपाटं जलजाभिधानम् ।
स्यान्मेघजं चैव गजं क्षपञ्च
षड्दारु मध्ये सकले यथातः ॥
स्याद्वैजयं मण्डपभद्रभद्रं
जयं निनादं त्वथ कीर्त्तिजञ्च ।
भद्रोनभद्राधिकसाकलाङ्गं
निर्लोभकं वासदकौशले च ॥
त्रैयकं क्रमादीश्वरवारदाख्यं
भीमञ्च कौशल्यमतः क्रमेण ।
तद्वेद वृद्धस्वजनं द्वतीयं
स्यात् कौशलं नीलमिदं चतुर्थम् ॥
मुखगुखलघुवामे दक्षिणे चैक एत-
द्वरदग्वरदमुखं दण्डकं काकपक्षम् ।
इदमिह हि निनादं मण्डपेनाधिकं स्या-
त्तदनु च गजनादं बाहुलं कीर्त्तिजाङ्गम् ॥
सृष्टादिरूपमुखमण्डपमेव सिंहं
ज्ञेये गृहे हयगजे अपि कोशसंज्ञम् ।
वामेऽधिकञ्च लघुना कथितं सुभद्रं
स्याद्भाणिभद्रमपि रत्नजकाञ्चनाख्ये ॥
युगमुखमपरैको भैरवं दक्षिणे च
भरत नरजमेतत् स्याच्चतुर्थं कुबेरम् ।
पुनरपि लघु वामे हस्तियानं वियानं
हयजक्षपजगेहं तच्चतुर्थं क्रमेण ॥
वर्णानां शुभदञ्च सागरगृहं पद्मैव क्षमामुखे
प्रोक्तं क्षीरदरत्नदाह्वयमिदं कोलाहलञ्चापरम् ।
षड् दारुहयभद्रसत्तलघवस्त्रिर्य्यक् युतं शालया
गान्धर्व्वं क्षितिभूषणञ्च कथितं सर्व्वक्षकं दर्प-
कम् ॥
धान्यं वृद्धिकरं त्रिशालसुदितं शालां विना
पावनी
प्राक्शाला रहितं शुभं निगदितं सुचैवमर्थ-
प्रदम् ।
चुल्लीसंक्रमिदं करोति मरणं क्षीनं तथा
याम्यया
पञ्चघ्नं महिषीमृते च भवनं तत्पुत्रबन्धुक्षयम्॥"
इति त्रिदशादिषोड़शगृहाणि ॥*॥

"त्रैशालानि च षोड्श प्रथमतः सोमश्च षड्-
दारुकं
तच्चैकेन पुरोऽपि शङ्करमिदं मध्ये क्रमात्
पूर्ववत् ।
रुद्रे द्वौ मुखतोऽपि दक्षिणलघुस्त्वेकाधिकं
सागरं
चत्वारो नृपशोभितश्च पुरतः प्राग्दक्षिणैको
लघुः ॥
पक्षार्धे सकलं भ्रमश्च लघुना सर्वस्र तत्
सौख्यदं
रागाख्यं भ्रमसंयुतश्च भवनं तत् सर्वशालं
भवेत् ।
प्राग्वाणङ्गुलनन्दनं क्रमतया त्वेकद्वयैकान्वितं
तस्मिन्दक्षिणसंयुते च लघुके कल्याणसंज्ञं तथा
सर्व्वाशासु लघुत्रयं शरमुखं तत् षट्युग्मं
क्रमात्
तत्तीभाग्यविवर्द्धनश्च भवनं राज्ञां सदा निर्मि-
तम् ।
आनन्दं सुखराजिदक्षिणलघुर्वामे च पृष्ठे हयं
रागाख्यं जनशोभनं गुणगणैकेनान्वितं स्फुटितः
स्याद्गोवर्द्धनमग्रतो रसयुतं युग्माग्निनेत्रैः क्रमात्
सप्ताग्रे त्रिगुणं त्रिकश्च लघवो लोकत्रिकं
सुन्दरम् ।
गेहं श्रीतिलकं च भद्रसहितं स्कन्धेन हीनं मुखे
तद्युक्तं लघुना च भद्रसहितं विष्णुप्रियं
भूपतेः ॥"
इति सोमादिषोड्शगृहाणि ॥*॥
"षड्दारुकं श्रीत्रिदशं त्रिशालं
तत् श्रीनिवासं सुखस्कन्धयुक्तम् ।
श्रीवत्सतः श्रीधरमेव हृद्या
श्रीभूषणं वेदमुखश्च गेहम् ॥
बाणैः श्रीजयमग्रतोऽपि ऋतुभिः श्रीतैलिकं
मन्दिरं
रागाग्यं रसदारुयुग्मसहितं तत् श्रीविलासं
भवेत् ।
श्रीतेजोजयमग्रतश्च मुनिभिः षड्दारु युग्मान्वितं
सोमादित्रिदशादिभूपतिगृहाः पञ्चाधिका
विंशतिः ॥"
इति त्रिदशादिनवगृहाणि ॥*॥
"भवननवकसूत्रं यच्चतुःशालमध्यात्
नयनलघुसुखं स्याद्दक्षिणैकेन चन्द्रम् ।
भवति सदनमध्ये सर्वतो दारुषट्कं
हितयमपि च तेषामन्तिमं युग्मयुक्तम् ॥
मलयमथ च गेहं वामस्कन्धाधिकं स्यात्
भवति च गुणस्कन्धं शोभनं पूर्व्वतोऽपि ।
त्रिभिरपि च सुकर्णा पृष्ठयाग्ये तथैक-
स्यादधिकमपि वामे वेश्म नागेन्द्रसंज्ञम् ॥
चक्रं चतुष्टयमुखं सकलेषु शस्तं
याम्योत्तरे हि लघुनापि जयावहं स्यात् ।
नन्द्यावर्त्तश्च मकराक्षयमेव तस्मिन्
पृष्ठापस्कन्धमपि कामदमग्रभद्रम् ॥"
इति विजयादिनवचतुःशालगृहाणि ॥*॥

"शुक्रादयो मुनिमतेऽष्टविधा च शाला-
स्तासां षड्व कथिता भवनप्रसङ्गे ।
शालालिमध्यरचितोऽपि लघुः सुखाय
यद्वा तदग्ररचिताः पृथगेव शालाः ॥"
इति सूत्रधारमण्डनविरचिते वास्तुशास्त्रे राज-
वल्लभे द्विशालत्रिशालचतुःशालगृहलक्षणवर्णनं
सप्तमोऽध्यायः ॥ * ॥
"शयनमथ नृपाणां त्वङ्गुलानां शतैकं
नवतिरपि सुतानां मन्त्रिणः षड्विहीनम् ।
बलपतिगुणहस्तं त्वङ्गुलोनं गुरोश्च
तदनु युगलहीनं ब्राह्मणादेः प्रशस्तम् ॥
व्यासोर्द्धभागे नतदैर्घ्यतश्च
कलांसमात्रोऽधिक एव शस्तः ।
त्र्यंशेन पादेन समुच्छ्रयः स्यात्
द्वित्राङ्गुलानामधिको न कार्य्यः ॥
श्रीपर्णी धनदामनोऽपि गदङ्गावित्तप्रदा तिन्दुको
हृद्दिः शिंशपयाथ शाकशयने शर्म्मापि शालैः
कृते ।
आयुः पद्मकजे च चन्दनमये शतत्रयः स्यात्
सुखं
श्रेष्ठं चैकमलं शिरीषजनितं पर्य्यङ्कयाना-
सनम् ॥"
इति शयनम् ॥ * ॥
"सिंहासनं चोत्तममङ्गुलानां
षष्ट्या दशोनञ्च परं तथैव ।
दशांशवक्षंशमतो विहीनं
व्यासे च दैर्घ्यार्द्धसमुच्छ्रयः स्यात् ॥
मुनिभिरथ शिवैर्व्वा भद्रभागत्रयं स्या-
दुदय इति विभागैर्भाजिते पीठमष्टौ ।
कनकमपि रसांश सप्तधा यासपट्टी
शिवनवमुनिरन्ध्रैर्दन्तिवाही निवेद्यौ ॥
छाद्यं स्याद्रसभागमेव तिथितो भागेन कक्षासनं
युक्तं स्तम्भयुगेन तोरणयुतं रन्ध्रैः शुभे राजि-
तम् ।
कर्त्तव्यं नृपवल्लभं मतिमता ज्ये ष्ठश्च सिंहासनं
ज्ञातव्यश्च यशोऽभिवर्द्धनमिभैः सिद्धैर्नृकक्षा-
सनम् ॥
नरैस्तु वेदो पुनरेव छाद्यं
सुखासनं तोरणसंयुतं स्यात् ।
पीठञ्च कुम्भः कलसं विटङ्क-
मुक्तङ्गसंज्ञं सह छाद्यकेन ॥
पीठे गोहरिवेदिके च सुयशश्छाद्येन सिंहासनं
हस्ती माल्यकवेदिकासनयुतं,तद्दीपचित्रं भवेत्
छत्रं ज्ये ष्ठमथोतिवेदसहितं हासप्ततिर्मध्यमं
षष्ट्या कन्यसमङ्गुलैर्नरपतेर्देवं शताढ्यं शुभम् ॥"
इति सिंहासनच्छत्रलक्षणानि ॥ * ॥
"वातायनो लुम्बिकया विहीनो
बुधैरुदीर्णक्षिपतांक एव ।
द्विलुम्बिकयोभयसंज्ञकश्च
यः स्वस्तिकोऽसौ युगलुम्बियुक्तः ॥
स्याद्बाणैः प्रियवक्त्र एव सुमुखः षड्भिः पुन-
र्येति च
छाद्यैकेन युतः सुवक्त्र उदितो द्वाभ्यां प्रियङ्गो
भवेत् ।
एकोनः परिपद्मनाभ उदितस्त्रीपञ्चिको युगै-
र्वैचित्रः शरषड्भिरेभिस्तु विविधाकारैर्युतः
पद्म च ॥
सिंहो दैर्घ्यविवर्द्धितो हि पृथुले हंसो गवाक्षो
भवेत्
कुम्भोऽसौ मतिदोऽपि भद्रसहितो गर्ग्यस्तु
वृद्धार्णवः ।
हारेणैव युगाख्यकेण गरुडः पञ्चद्वये जालकं
प्रोक्ताः पञ्चदशैव रूपमदला वेद्यादिकक्षा-
सनैः ॥"
इति पञ्चदश गवाक्षाः ॥*॥
"सभा च नन्दा परतोऽथ भद्रा
जया च पूर्णा क्रमतोऽपि दिव्या ।
पञ्ची सुरम्योद्भविकोत्पलाष्टौ
बुधैर्विधेयावनिपालगेहे ॥
चैत्रं चतुष्टयपदैरपि षोड्शांशं
मध्ये तुरीयपदमेकपदो लघुश्च ।
नन्देति भद्रसहिता च पदेन भद्रा
तद्वेदतश्च जयदा लघुना च पूर्णा ॥
दिव्या सभा केवलनन्दभागा
भद्रैश्चतुर्भिः सहिता च पञ्ची ।
रन्ध्रोद्भवा स्यादयुगतोऽपि तुर्य्यै-
स्तथोत्पलाख्या प्रतिभद्रतश्च ॥
स्तम्भैस्तोरणराजितैश्च मदला निर्यूहवैतानकै-
र्लूञ्छाद्यैर्गजसिंहराजविविधैर्नृत्यान्वितैः
शोभितम् ।
रत्नस्फाटिकरङ्गभूमिनृपतेः क्रीड़ास्पदं मण्डपं
कुर्य्याद्दक्षिणभद्रकं च रुचिरां यत्नाश्रयतो वेदि-
काम् ॥"
इति सभाष्टकम् ॥*॥
'वेदी कोणचतुष्टयेन सकले पाणिग्रहे स्वस्तिका
कल्याणं रविकोणकैश्च नृपतेः सा भद्रिका
सर्व्वदा ।
कोणैः श्रीधरिका च विंशतिमितैस्त्रिस्रोऽम-
राणां गृहे
कोणैरष्टभिरन्विता च शुभदा चण्डार्च्चने
पद्मिनी ॥
विप्रे सप्तकराश्च भूपभवने षट्पञ्च वैश्ये तथा
कुर्य्याद्धस्तचतुष्टयाच्च दयले चिद्वेदकतो हीनके
तस्योर्द्धे च नरेश्वरासनमतो माल्यं चतुस्तम्भकं
हेम्ना मौक्तिकपट्टकूलमणिभिः सौम्याननं
राजितम् ॥"
इति वेदिकाचतुष्टयम् ॥*॥
"दीपस्तम्भं त्रिकरमुदये षड्भिरूनं क्रमेण
हस्तान्तं तं विहितमपि तैः पीठकुम्भान्वितञ्च
दीपस्योर्द्धे कनककलसं शोभितं कङ्कणाद्यैः
कुर्य्याद्धातोरथ तरुमतो नागवल्ले विवर्ज्ये ॥"
इति श्रीसूत्रधारमण्डनविरचिते वास्तुशास्त्रे
राजवल्लभे शयनसिंहासनच्छत्रगवाक्षसभा-
ष्टकवेदिकाचतुष्टयदीपस्तम्भलक्षणं ८ अध्यायः

"गृहा वास्तुशास्त्रोदधौ राजयोग्या
अनन्ता हि सन्त्यत्र तेभ्यः कियन्तः ।
मयोक्ताश्च योग्या नृपाणां समृद्ध्यै
सुखोभान्वितास्ते च कल्याणदाश्च ॥
त्रिशालं गृहं दिक्त्रये द्वारयुग्मं
मुखे वीथिकाग्रे च षड् दारुमध्यम् ।
गुणालिन्दचातुर्दिशं चैकवक्त्रं
गवाक्षश्च कोणे च भद्रे विधेयम् ॥
मुखे भद्रके श्रीधरं माण्डयुक्तं
तथा भूमिका पञ्चसप्तैकभूम्याम् ।
विनाच्छादनं मण्डपं वेदवक्त्रं
रिपुघ्नं गृहं राज्यवर्धन्यमेतत् ॥
मध्ये निम्नस्वङ्गणाग्रं तथोच्चैः
शस्तं दैवं पुत्रनाशाय गेहम् ।
स्तम्भश्रेणी मध्यमानेन कार्या
न्यूनाधिक्ये नैव पूज्या न च श्रीः ॥
हीनस्तम्भे शालयोर्बाह्यपट्टे
नो वेद्यः स्यादन्यतो वेध एव ।
भूमेर्मूर्ध्नि रुद्रसंख्याप्रमाणं
तुल्या नेष्टा वर्धमानाः शुभाः स्युः ॥
मार्हत्रयेण विभजेत् करतत्त्वसंख्य-
मध्ये नवांशमुदितश्च करार्धभित्तिः ।
स्तम्भाश्च षोड्शग्रहेऽपि च भद्रकेषु
दन्तैर्मिताश्च सकलासु चतुर्मुखं स्यात् ॥
भद्रे च भूमिहयमूर्धमाण्डं
सार्धत्रिभूमं कथितञ्च गेहम् ।
प्रतापवर्धन्यमिदं नृपाणां
लक्ष्मीविलासश्च वदामि तस्मात् ॥
स्तम्भा दश दश भद्रे चैकं
षोड्शमध्ये तत्समरूपम् ।
मदनशरावनिमाण्डसमेतं
लक्ष्मीः कर्मकरोति च नित्यम् ॥
भागाः पञ्चगुणाश्च पञ्च भवनं षड्विंशता स्तम्भकैः
कुंभे चार्धपदे च नन्दपदकैर्भद्रं चतुर्द्वारकैः ।
भद्रे वैगुणभद्रकाणि सकलेऽष्टाशीतिका स्तम्भका,
माण्डं भूत्रितये च सार्धशरभूः स्याच्छ्रीनिवास गृहम् ॥
मध्ये स्तम्भगतश्च भागसमके भित्तिश्चतुर्द्वारकं
सप्तांशाद्रिशरांशरामसहितं भद्रं चतुश्चिंशता ।
षट्त्रिंशत् द्विगती च ते तु सकलः स्तम्भाः
चितौ पूर्वतो नाम्ना तत् कमलोद्भवश्च कथितं भूम्यर्धसंज्ञान्वितम् ॥
हर्म्यस्योदयकं विभज्य नवधा कुर्भी भवेद्भागतः
पादोनं भरणं शिरश्च कथितं षट्सपादौ भवेत् ।
स्तम्भः पञ्चपदोनभाग उदितः कोणाष्टकस्तत्समा
भागार्धेन जयन्तिका निगदिता सा तत्प्रकाशोपरि ॥
गृहस्योदयं दिग्विभागैर्विभाज्यं
द्विभागेन कक्षासनं वेदिका स्यात् ।
त्रिभागेन तत्कण्ठनो निम्नमेवं
गृहस्योदयार्धेन पीठं नृपाणाम् ॥
उत्तानपट्टो नृपमन्दिरेऽसौ
हस्ते च हस्ते द्वियवोन्नतः स्यात् ।
पाषाणतः सौख्यकरो नृपाणां
धनक्षयं सोऽपि करोति गेहे ॥
सुश्लिष्टके शर्करया वियुक्ते
सकर्करैस्तैः सुदृढा गृहे भूः ।
शस्ता न शस्तं भवनेषु चित्रं
कपोतगन्धाः कपिकाकरीद्रम् ॥
गृहोल्लिन्दविशेषतश्च सकला भूम्यौचरण्डान्विता
छायेनाप्यथ मत्तवारणयुतं माण्डं तथार्धोदयम् ।
मौढ्रो भद्रचतुष्किकाभिरुदितो मण्डेन युक्तस्तथा
मञ्चैस्तुल्यसपादकैस्तु सुकुलो वा शीर्षकैः शेखरः ॥
राज्ञो गृहं छन्दचतुर्यं स्यात्
तत्रैव घण्टाकलसेन युक्तम् ।
तुङ्गारसंज्ञस्वथ सिंहकर्णः
प्रासादके तेऽपि षडेव शस्ताः ॥
षड्जातिगेहं हयपर्णपट्टै-
र्वंशैः कडैर्वापि मृदा शिलाभिः ।
छदं प्रकारैः कथितञ्च षड्भि-
र्लोकप्रसिद्धा च परीक्षणीयम् ॥"
इति राजगृहादि ॥*॥
"वामे भागे दक्षिणे वा नृपाणां
वेधा कार्या वाटिका क्रीडनार्थम् ।
एकद्वित्रिहस्तसंख्या शतं स्यान्-
मध्ये धारामण्डपं तोययन्त्रैः ॥
क्षेत्रं समविभागभाजितमतो भद्रञ्च भागत्रयं
तन्मध्ये जलवापिकालिनपदैरेकांशतो वेदिका
स्तम्भैर्द्वादशभिश्च मध्यरचितः कोणेषु कूपान्वितः
कर्त्तव्यो जलयन्त्र एष विधिवत् भोगाय भूमी-
भुजाम् ॥
तस्यां चम्पककुन्दजातिसुमनोवल्लीः सुनिर्व्वालुका
जातीहेमसमानकेतकिरपि श्वेता तथा पाटला ।
नारङ्गः करमा वसन्तलतिका चारुप्रपुन्नादिकं
जम्बीरो बदरी च पूगमधुका जम्बूश्च चूतद्रुमाः ॥
मालूरः कदली च चन्दनवटावश्वत्थपथ्याग्निवा-
चिञ्चाशोककदम्बनिम्बतरवः खर्जूरिका दाडिमौ ।
कर्पूरागुरुकिंशुका हयरिपुः पुन्नागको निम्बुको
प्रोक्ता नागलता च बीजनिभृता स्यात् तिन्दुकी लाङ्गली ॥
द्राक्षेला शतपत्रिका च वकुला धत्तूरकंकोलकौ
शालस्तालतमालकौ सुनिचरौ मन्दारपारिभद्रौ ।
अन्ये भोज्यविचित्रखाद्यसुफलास्ते रोपणीया बुधैः
यद्यप्नोति न भूतले शुभतरुं स्तच्चम्पकान् वापयेत् ॥
आस्थानं प्रतिषेचनाय च घटीयन्त्रस्तुषारोद्भवै
र्दोला क्रीजनखेलनाय रुचिरे वर्षावसन्तोत्सवे ।
बालाप्रौढवधूसमध्वनितागानैर्मनोहारिभि-
र्ग्रीष्मे शारदकेऽथ शीतलजलक्रीड़ा शुभे मण्डपे ॥
इति वाटिका ॥*॥
"तुरङ्गमाणां गृहवामभागे
शाला चतुःषष्टिकरा विधेया ।
शतार्द्धतो मध्यमिका च दैर्घ्ये
कनीयसी तैर्दशभिर्विहीना ॥
व्यासे च ज्येष्ठा तिथिहस्तमाना
त्रयोदशैकादशकैः क्रमेण ।
तदाद्यभित्तिश्च करप्रमाणा
पञ्चार्धपञ्चाधिकरोदया स्यात् ॥
तेजोहानिमपीहया विदधते पूर्व्वापरास्या नृणां
ते याम्योत्तरतो मुखादि सततं कीर्त्तिर्यशो धान्यकम् ।
कर्त्तव्यो विधिवत् प्रतीह कलसस्थानं द्विहस्तोदयं
तस्यास्तोरणमुच्छ्रितञ्च मुनिभिर्हस्तैः सुशोभान्वितम् ॥
षष्टया साधुहयाङ्गुलैर्निगदितो वेदाङ्गुलेनाधिकः
श्रीवत्सस्वस्तिलाव एव च मनोहारी द्विसप्ताङ्गुलः ।
रागाद्यङ्गुलकैस्तु वाजिविजयोऽग्नीत्या तथा भैरवः
शान्ताख्यस्तु युगाष्टमात्र उदये मानं हरेः समधा ॥"
इत्यश्वशाला ॥ * ॥
"सिंहद्वारं पूर्व्वमानेन कार्य्यं
त्रिद्वेरका वा मालिका स्तम्भशीर्षे ॥
स्यातां मध्ये ताडकौ रक्षणार्थं
तुर्य्यो भागेनाधिको वापि सार्द्धौ ॥
भागे दक्षिणवामके च करिणां शाला हरेर्द्वारतः
कर्त्तव्या सुदृढोन्नता च कलसैर्घण्टादिभिर्भूषिता ।
संकीर्णा रसनो नगैर्निगदितो मन्दा मृगाश्वाष्टतः
सर्वेषूत्तमभद्रजातिरुदितो नन्दैः करैरुच्छ्रितः ॥
इति गजशाला ॥*॥
"अष्टोत्तरहस्तशतं पृथुत्वं
नृपालयं चोत्तममेव तस्मात् ।
अष्टाभिरष्टाभिरतो विहीनं
पञ्चैव भागाधिकतोऽपि दैर्घ्ये ॥
अशीतितो रागकरैश्च हीनाः
पञ्चालया भूपसुतप्रियाश्च ।

त्रिभागदैर्घ्येऽधिकतो विधेया
गृहाः क्रमेणैव यथोदितास्य ॥
प्रोक्तं चतुःषष्टिकरं पृथुत्वे
क्रमेण षड्भिश्च करैर्विहीनम् ।
षड्भागतो दैर्घ्यमतोऽधिकं स्या-
दलाधिपस्यैव च पञ्चहस्तैः ॥
षष्ट्या हस्तैर्मन्दिरगेहं पृथुत्वे
हीनं हीनं पञ्चकं वेदवेदैः ।
कुर्य्याद्धस्तैरष्टमांशोऽधिकोऽसौ
व्यासादग्रे वर्द्धितो दैर्घ्य एव ॥
सामन्तादिकभूपतेश्च भवनं विध्यब्धिहस्तैः समं
हस्तैर्वेदविहीनकैः क्रमतया भागाधिकं
दैर्घ्यतः ।
दैवज्ञस्य सभासदश्च गुरुतः पौरोधसं भैषजं
विंशत्यष्टकरं द्विहस्तरहितं दैर्घ्यं द्विधा तद्-
भवेत् ॥
वेश्याकञ्चुकिशिल्पिनामपि गृहे वेदाधिका
विंशतिर्-
मानं हस्तचतुष्टयैर्विरहितं दैर्घ्येऽधिका
व्यासतः ।
हर्म्यं द्यूतकरान्तिकस्य रचितो हस्तैः समं
विस्तरे
हीनं त्वर्द्धकरेण पञ्चकमिदं तुर्य्यांशदैर्घ्याधि-
कम् ॥
द्वाविंशता मानमिदं द्विजादे-
र्हीनं चतुर्भिः क्रमतो विधेयम् ।
दिगष्टरागाब्धिविभागतश्च
क्रमेण तद्वर्णचतुष्टयेऽपि ॥
कर्णाधिकं विस्तरतोऽधिकञ्च
शीघ्रं विनाशं समुपैति गेहम् ।
द्वारं नतं मूर्द्धि यदाग्रतश्च
तत् सन्ततेर्हानिकरं प्रदिष्टम् ॥
व्यासे सप्ततिहस्तवियुक्ते
शालामानमिदं मनुभक्ते ।
पञ्चविंशत् पुनरपि तस्मिन्
मानमुशन्ति लघोरिव वृद्धाः ॥
एकं द्वारं प्राङ्मुखं शोभनं स्यात्
चातुर्वर्ण्यं धाढ्यभूपेशजैने ।
युग्मं प्राच्यां पश्चिमे स्याच्चिकेषु
मूलं द्वारं दक्षिणे वर्ज्जनीयम् ॥"
इति वास्तुशास्त्रे राजवल्लभमण्डने वालगृहा-
दिलक्षणं नाम नवमोऽध्यायः ॥ * ॥

शिल्पिका, स्त्री, तृणविशेषः । लहानसिपी इति हिन्दीभाषा । तत्पर्य्यायः । शिल्पिनी २ शीता ३ चेत्रजा ४ मृदुच्छदा ५ । अस्या गुणाः । मूत्रगोधाश्मरीशूलज्वरपित्तापहारकत्वम् । इति राजनिर्घण्टः ॥

शिल्पिनी, स्त्री. कोलदलौषधिः । इति मेदिनी

शिल्पिशाला, स्त्री, क्ली, (शिल्पिनां शाला ।) शिल्पशाला । इत्यमरटीकायां स्वामी ॥

शिल्पी, [न्] त्रि, (शिल्पं क्रियाकौशलमस्यास्तीति इनि. ।) शिल्पकर्त्ता । (यथा, मनौ । ७ । ७५ ।
"ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥")
तत्पर्य्यायः । कारुः २ । इत्यमरः ॥ अस्य विवरणं शिल्पकारशब्दे द्रष्टव्यम् । शिल्पसम्बन्धी च ॥

शिवं, क्ली, (शी + "सर्व्वनिष्टृचेति ।" उणा० १ । १५३ । वन् प्रत्ययेन साधु ।) मङ्गलम् । इत्यमरः ॥ (यथा, रघुः । १६० ।
"उपपन्नं ननु शिवं समस्तक्लेषु यस्य मे ।
दैवीनां मानुषीनाञ्च प्रतिहर्त्ता त्वमापदाम् ॥")
सुखम् । जलम् । इत्युणादिकोषः ॥ मैथ्यम् । समुद्रलवणम् । श्वेतटङ्कणम् । इति राजनिर्घण्टः ॥ (मङ्गलवति, त्रि ॥ यथा, महाभारते । १ । २०८ । ३६ ।
"तत्र रम्ये शिवे देशे कौरवस्य निवेशनम् ॥")

शिवः, पुं, (शी + "सर्व्वनिष्टृचेति ।" उणा० १ । १५३ इति वन् प्रत्ययेन साधुः ।) ब्रह्मणः संज्ञाविशेषः । तस्य व्युत्पत्तिर्यथा । शिवं कल्याणं विद्यतेऽस्य शिवः । शृणति अशुभमिति वा । शिरतेऽवतिष्ठन्ते अणिमादयोऽष्टौ गुणा अस्मिन् इति वा शिवः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । शम्भुः २ ईशः ३ पशुपतिः ४ शूली ५ महेश्वरः ६ ईश्वरः ७ सर्व्वः ८ ईशानः ९ शङ्करः १० चन्द्रशेखरः ११ भूतेशः १२ खण्डपरशुः १३ गिरीशः १४ गिरिशः १५ मृडः १६ मृत्युञ्जयः १७ कृत्तिवासाः १८ पिनाकी १९ प्रमथाधिपः २० उग्रः २१ कपर्द्दी २२ श्रीकण्ठः २३ शितिकण्ठः २४ कपालभृत् २५ वामदेवः २६ महादेवः २७ विरूपाक्षः २८ त्रिलोचनः २९ कृत्तानुरतिः ३० सर्व्वज्ञः ३१ धूर्ज्जटिः ३२ नीललोहितः ३३ हरः ३४ स्मरहरः ३५ भर्गः ३६ त्र्यम्बकः ३७ त्रिपुरान्तकः ३८ गङ्गाधरः ३९ अन्धकरिपुः ४० क्रतुध्वंसी ४१ वृषध्वजः ४२ व्योमकेशः ४३ भवः ४४ भीमः ४५ स्थाणुः ४६ रुद्रः ४७ उमापतिः ४८ । इत्यमरः ॥ वृषपर्व्वा ४९ रेरिहाणः ५० भगाली ५१ पांशुचन्दनः ५२ दिगम्बरः ५३ अट्टहासः ५४ कालञ्जरः ५५ पुरहिट् ५६ वृषाकपिः ५७ महाकालः ५८ वराकः ५९ नन्दिवर्द्धनः ६० हीरः ६१ वीरः ६२ खरुः ६३ भूरिः ६४ कटप्रूः ६५ भैरवः ६६ ध्रुवः ६७ गिविपिष्टः ६८ गुडाकेशः ६९ देवदेवः ७० महानटः ७१ । इति जटाधरः ॥ तीव्रः ७२ खण्डपरशुः ७३ पञ्चाननः ७४ कण्ठेकालः ७५ भरुः ७६ भीरुः ७७ भीषणः ७८ कङ्कालमालीः ७९ जटाधरः ८० व्योमदेवः ८१ सिद्धदेवः ८२ धरणीश्वरः ८३ विश्वेशः ८४ जयन्तः ८५ हररूपः ८६ सन्ध्यानाटी ८७ सुप्रसादः ८८ चन्द्रापीड़ः ८९ शूलधरः ९० वृषाङ्कः ९१ वृषभध्वजः ९२ भूतनाथः ९३ गिरिविष्टः ९४ वरेश्वरः ९५ विश्वेश्वरः ९६ विश्वनाथः ९७ काशीनाथः ९८ कुलेश्वरः ९९ अस्थिमाली १०० विशालाक्षः १०१ डिण्डी १०२ प्रियतमः १०३ विषमाक्षः १०४ भद्रः १०५ ऊर्द्धरेताः १०६ यमान्तकः १०७ नन्दीश्वरः १०८ अष्टमूर्त्तिः १०९ अर्द्धाङ्गः ११० खेचरः १११ भृङ्गीशः ११२ अर्द्धनारीशः ११३ रसनायकः ११४ । इति शब्दरत्नावली ॥ उः ११५ पिनाकपाणिः ११६ फणधरधरः ११७ कैलासनिकेतनः ११८ हिमाद्रितनयापतिः ११९ । इति कविकल्पलता ॥ तस्य महस्रनामानि श्रीमहाभारते अनुशासनपर्व्वणि १७ अध्याये द्रष्टव्यानि ॥*॥ अस्य कपालिनामकारणं यथा,—

ईश्वर उवाच ।

"आसीत्तत्र वरारोहे ब्रह्मणस्तु शिरोऽपरम् ।
पञ्चमं शृणु सुश्रोणि जातं काञ्चनसुप्रभम् ॥
ज्वलन्तं परमं शौर्य्यं जातं तस्य महात्मनः ।
स एवमब्रवीद्देवि ! जन्म जानामि ते ह्यहम् ॥
अतः क्रोधपरीतेन संरक्तनयनेन च ।
वामाङ्गुष्ठनखाग्रेण छिन्नं तस्य शिरो मया ॥

ब्रह्मोवाच ।

यस्मादनपराधेन शिरश्छिन्नं त्वया मम ।
तस्माच्छापसमायुक्तः कपाली त्वं भविष्यसि॥"

इति मात्स्ये १८५ अध्यायः ॥*॥

अथ शिवमन्त्राः । तत्र एकाक्षरमन्त्रो यथा,—

"सान्तमौकारसंयुक्तं बिन्दुभूषितमस्तकम् ।
प्रासादाख्यो मनुः प्रोक्तो भजतां कामदो
मणिः ॥" हौं ॥*॥

अस्य पूजा । प्रातःकृत्यादिमातृकान्यासं प्राणायामञ्च विधाय श्रीकण्ठादिन्यासं मातृकास्थानेषु कुर्य्यात् । ततः सामान्यपूजापद्धत्यक्तपीठन्यासं कृत्वा पीठशक्तीर्न्यसेत् । ततः ऋष्यादिन्यासः । ततः कराङ्गन्यासौ । ततः ईशानाद्याः पञ्चमूर्त्तीर्न्यसेत् । शूद्रस्तु एतत्पर्य्यन्तं न्यासं कृत्वा ध्यायेत् । अन्यत्रानधिकारात् । तत ऊर्द्ध्वं प्राग्दक्षिणोत्तरपश्चिमेषु मुखेषु ईशानस्य पञ्चकलाः पञ्च ब्रह्म ऋचः पदादिकाः प्रणवाद्या नमोऽन्ता न्यसेत् । ततः पूर्व्वपश्चिमदक्षिणोत्तरेषु तत्पुरुषस्य चतस्रः कला विन्यसेत् । ततो हृदये ग्रीवायां भ्रूमध्ये नाभौ कुक्षौ पृष्ठे वक्षसि अघोरस्याष्टौ कला न्यसेत् । ततो गुह्ये अण्डकोषे ऊरुहृदये जानुहृदये जङ्घाहृदये कुक्षिहृदये कट्यां पार्श्वयोः वामदेवस्य त्रयोदशकलाः विन्यसेत् । ततः पार्श्वयोः स्तनयोर्नासिकायां मूर्द्धि बाहुयुग्मे सद्यो जातस्याष्टौ कला न्यसेत् । ततः पञ्चाङ्गुलीषु ईशानाद्याः पञ्च ऋचो न्यसेत् । एवं मूर्त्तस्य हृदयगुह्यपादेषु ता ऋचो न्यसेत् । ततोऽङ्गन्यासान्तरं कुर्य्यात् । एवं विन्यस्य ध्यायेत् ।

"मुक्तापीतपयोदमौक्तिकजयाकर्णैर्मुखैः पञ्चभि-
स्त्र्यक्षैरञ्चितमौशमिन्दुमुकुटं पूर्णेन्दुकोटि-
प्रभम् ।
शूलं टङ्कृपाशवज्रदहनान्नागेन्द्रघण्टाङ्कुशान्
पाशं भीतिहरं दधानममिताकल्पोज्ज्वलाङ्गं
भजे ॥"

एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनं कृत्वा शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं पञ्चलक्षजपः ॥१॥*॥

अथाष्टाक्षरमन्त्रो यथा,—

"षडक्षरः शक्तिरुद्रः कथितोऽष्टाक्षरो मनुः ॥"

ह्रौं ॐ नमः शिवाय ह्रौं। अस्य पूजा। प्रातःकृत्यादिशैवोक्तं पीठमन्त्रन्तं न्यासं विधाय ऋष्यादिन्यासकराङ्गन्यासान् प्राणायामञ्च कृत्वा ध्यायेत्।

"वन्धूकाभं त्रिनेत्रं शशिशकलधरं स्मेरवक्त्रं वहन्तं
हस्तैः शूलं कपालं वरदमभयदं चारुहासं
भजामि।
वामोरुस्थभगायाः करतलविलसच्चारुरक्तोत्पलाया
हस्तेनाश्लिष्टदेहं मणिमयविलसद्भूषणायाः
प्रियायाः ॥"

एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाह्य पञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजां कृत्वा धूपदानादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं चतुर्दशलक्षजपः ॥ २ ॥ * ॥ तस्याष्टाक्षरमन्त्रान्तरं यथा,—

"तारो माया वियदिन्दुमनुस्तारविभूषितम्।
पञ्चाक्षरममायुक्तो वसुवर्णो मनुर्मतः ॥"

ॐ ह्रीं ह्रीं नमःशिवाय। अस्य पूजा। प्रातःकृत्यादिशैवोक्तपीठन्यासान्तं विधाय पूर्ववदृष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"वन्दे सिन्दूरवर्णं मणिमुकुटलसच्चारुचन्द्रावतंसं
भालोद्यद्वह्निसोमं स्मितमुखकमलं दिव्यभूषाङ्गरागम्।
वामोरुन्यस्तपाणेररुणकुवलयं संदधत्याः प्रियायाः
पद्मोत्तुङ्गस्तनाग्रे निहितकरतटं वेदटङ्कोज्ज्वलाङ्गम् ॥"

एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजां कृत्वा धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणमष्टलक्षजपः ॥३॥ * ॥ अथास्य मृत्युञ्जयाख्यमन्त्रः।

"तारं स्थिरा मकर्णेन्दुर्भगुः सर्गसमन्वितः।
वाचरात्मा निगदितो मन्त्रो मृत्युञ्जयात्मकः॥"

ॐ त्र्यं सः। अस्य पूजा। प्रातःकृत्यादिशैवोक्तपीठन्यासान्तं विधाय ऋष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम्।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं
भावये ॥"

एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कृत्वा पीठमन्त्रन्तां पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षत्रयजपः ॥४॥ * ॥

अथास्यापरद्वादशाक्षरमृत्युञ्जयमन्त्रः।

"मृत्युञ्जयं समुच्चार्य्य पालय द्वितयं वदेत्।
मृत्युञ्जयं समुच्चार्य्य पुनरेव विलोमतः ॥
द्वादशाक्षरोऽयं मन्त्रः स्यात् मृत्युञ्जयाभिधोऽपरः।"

ॐ त्र्यं सः पालय पालय ॐ त्र्यं सः। अस्य ध्यानपूजादिकं सर्वं पूर्ववत् ॥ ५ ॥ * ॥ अस्य द्वाविंशत्यक्षरमन्त्रः।

"प्रणवो हृदयं पश्चात् ततो भगवते पदम्।
डेऽन्तश्च दक्षिणामूर्त्ति मह्यं मेधामुदीरयेत्।
प्रयच्छ द्वयान्तोऽयं द्वाविंशत्यक्षरो मनुः ॥"

ॐ नमो भगवते दक्षिणामूर्त्तये मह्यं मेधां प्रयच्छ स्वाहा। अस्य पूजा। प्रातःकृत्यादिशैवोक्तपीठमन्त्रन्तं विन्यस्य ऋष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"वटद्रुमं महोच्छायं पद्मरागफलोज्ज्वलम्।
गारुत्मतमयैः पत्रैर्विचित्रैरुपशोभितम् ॥
नवरत्नमहाकल्पैर्लम्बमानैरलङ्कृतम्।
विचिन्त्य वटमूलस्थं चिन्तयेल्लोकनायकम् ॥
स्फटिकरजतवर्णैर्मौक्तिकीमक्षमाला-
ममृतकलसविद्याज्ञानमुद्राः कराग्रैः।
दधतमुरगकक्षं चन्द्रचूड़ं त्रिनेत्रं
विधृतविविधभूषं दक्षिणामूर्त्तिमीड़े ॥"

एवं ध्यात्वा मानसैः सम्पूज्य अर्घ्यस्थापनादिशैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजां कृत्वा धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षजपः ॥ ६ ॥ * ॥ अथास्य मन्त्रान्तरम्।

"अग्निसम्बर्त्तकादित्यरानिन्दो षष्ठबिन्दुमत्।
चिन्तामणिरिति ख्यातं बीजं सर्व्वमनुद्विदम्॥"

र-च म र य-औ ऊँ ॥ प्रपञ्चसारे।

"अनलक-प-मरेफ-प्राणसत्यान्तवाम-
श्रुतिद्विमरुचिखण्डैर्म्मण्डितो मन्त्रराजः।"

अस्य पूजा। प्रातःकृत्यादिशैवोक्तपीठमन्त्रन्तं विन्यस्य ऋष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"नीलप्रवालरुचिरं विलसत्त्रिनेत्रं
पाशाङ्कुशोत्पलकपालकशूलहस्तम्।
अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुवद्मुकुटं प्रणमामि रूपम् ॥"

एवं ध्यात्वा मानसैः संपूज्यार्घ्यं संस्थाप्य शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षजपः। अयं अर्द्धनारीश्वरः ॥ ७ ॥ * ॥

"पार्श्वो वह्निसमारूढस्तारवानाद्यमीरितम्।
धान्तो वह्निसमारूढस्तूर्य्यस्वरसमन्वितः ॥
बिन्दुमांस्तु द्वितीयः स्यात् टान्तः सर्गी तृतीयकः।
नीलकण्ठात्मको मन्त्रो विपश्चिद्वरः परः ॥"

प्रमाणान्तरम्।

"लोहितोऽन्यासनः सत्यो बिन्दुमान् प्रथ पुनः।
द्वितीया वह्निबीजस्था दीर्घा शान्तेन्दुभूषिता॥
तृतीया लाङ्गली सर्गी मन्त्रो बीजत्रयात्मकः।
नीलकण्ठात्मको मन्त्रो विपश्चिद्वरः परः ॥"

प्रों न्रीं ठः इति मन्त्रः। अस्य पूजा। प्रातःकृत्यादिशैवोक्तपीठन्यासान्तं कृत्वा ऋष्यादिन्यासं कराङ्गन्यासौ च विधाय ध्यानं कुर्य्यात्।

"बालार्कायुततेजसं धृतजटाजूटेन्दुखण्डोज्ज्वलं
नागेन्द्रैः कृतशेखरं जपवटीं शूलं कपालं
करैः।
खट्वाङ्गं विधृतं त्रिनेत्रविलसत्पद्मानने सुन्दरं
व्याघ्रत्वक्परिधानमम्बनिलयं श्रीनीलकण्ठं
भजे ॥"

एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनादिशैवोक्तपीठपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं त्रिलक्षजपः। अयं नीलकण्ठः ॥८॥* ॥ अथाष्टाक्षरमन्त्रो यथा—

"तारो हृन्नीलकण्ठाय मन्त्रश्चाष्टाक्षरः परम्।
ॐ नमो नीलकण्ठाय। अस्य पूजादिकं सर्व्वं पूर्ववत् ॥ ९ ॥ * ॥ अस्य षडक्षरमन्त्रश्च यथा,—

"हृदयं वपरं सार्द्धेन्दुलान्तोऽनन्तान्वितो मरुत्।
षडक्षरो मनुः प्रोक्तस्तारायोऽयं षडक्षरः ॥"

नमः शिवाय। ॐ नमः शिवाय। अस्य पूजा। प्रातःकृत्यादिशैवोक्तपीठमन्त्रन्तं न्यासं विधाय ऋष्यादिन्यासं कुर्य्यात्। ततो मूर्त्तिन्यासः। ततः कराङ्गन्यासौ। ततो गोलकन्यासः। ततो व्यापकन्यासं प्राणायामञ्च कृत्वा ध्यायेत्।

"ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं
प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं
वसानं
विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं
त्रिनेत्रम् ॥"

एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कृत्वा शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजां कृत्वा धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्।

अस्य पुरश्चरणं षट्त्रिंशल्लक्षजपः ॥ १० ॥ * ॥
अथास्य वाचरमन्त्रः ।
"अघोरो वह्निशिखरो लान्तस्थो दान्त ईरितः
फड्न्तयश्चण्डमन्त्रोऽयं त्रिवर्णात्मा समीरितः ॥"
ऊर्द्ध फट् इति मन्त्रः । अस्य पूजा । प्रातः-
कृत्यादिशैवोक्तपीठन्यासान्तं विधाय ऋष्यादि-
न्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत् ।
"चण्डेश्वरं रक्ततनुं त्रिनेत्रं
रक्तांशुकाढ्यं हृदि भावयामि ।
टङ्कं त्रिशूलं स्फटिकाक्षमालां
कमण्डलुं बिभ्रतमिन्दुचूडम् ॥"
एवं ध्यात्वा मानसैः संपूज्यार्घ्यं स्थापनादिशैवो
क्तपीठपूजान्तं विधाय ठमिति बीजेन मूर्त्तिं
संकल्प्य पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदान-
पर्य्यन्तं विधायावरणपूजां कृत्वा धूपादिविसर्ज्ज-
नान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं
त्रिलक्षजपः । अयं चण्डेश्वरः ॥ ११ ॥ इति
तन्त्रसारे शिवमन्त्राः ॥*॥*॥ विष्णुशिवयोर-
भेदो यथा,—

वराह उवाच ।

"शिवो मे दक्षिणं स्थानं तिष्ठते विगतज्वरः ।
लोकानां प्रवरः श्रेष्ठः सर्व्वलोकवरो हरः ॥
तं ये विन्दन्ति ते देवि ! नूनं मामेव विन्दति ।
ये मां विन्दति देवेशि ! ते विन्दन्ति शिवं
परम् ॥
अहं यत्र शिवस्तत्र शिवो यत्र वसुन्धरे ।
अहं तत्रापि तिष्ठामि आवयोर्नान्तरं क्वचित्॥
शिवं यो वन्दते भूमे ! स हि मामेव वन्दते ।
लभते पुष्कलां सिद्धिमेवं यो वेत्ति तत्त्वतः ॥"
इति वाराहे शालग्रामचक्रमाहात्म्यवर्णननामा-
ध्यायः ॥*॥ देवीविष्णुशिवानामभेदो यथा,—
"अयं नारायणो गौरी जगन्माता सनातनः ।
विभज्य संस्थितो देवः स्वात्मनं वसुधेश्वरः ॥
न मे विदुः परं तत्त्वं देवाद्या न महर्षयः ।
एकोऽयं देवदेवात्मा भवानी विष्णुरेव च ॥
अहं हि निष्क्रियः शान्तः केवलो निष्परिग्रहः
मामेव केशवं देवमाहुर्देवीमयाम्बिकाम् ॥"
इति कौर्म्मे १४ अध्यायः ॥*॥
शिवनिन्दानिषेधो यथा,—
'परात् परतरं यान्ति नारायणपरा जनाः ।
न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरम् ॥
ध्यानं होमस्तपस्तप्तं ज्ञानं यज्ञादिको विधिः
तेषां विनश्यति क्षिप्रं ये निन्दन्ति पिनाकिनम्
यो मां समाश्रयेन्नित्यमेकान्तं भावमाश्रितः ।
विनिन्दन्देवमीशानं स याति नरकायुतम् ॥
तस्मात् सा परिहर्त्तव्या निन्दा पशुपतेर्द्विज ।
कर्म्मणा मनसा वाचा तद्भक्तेष्वपि यत्नतः ॥"
इति कौर्म्मे २५ अध्यायः ॥*॥
तस्य प्रलयकारकत्वं यथा,—
"गते परार्द्धद्वितये काले लोकप्रकालकः ।
स्वाग्निभिर्भस्मसात् कर्त्तुं करोति निखिलं
मतिम् ॥
आत्मन्यात्मानमावेश्य भूत्वा देवो महेश्वरः ।
दहेदशेषं ब्रह्माण्डं सदेवासुरमानुषम् ॥
तमावेश्य महादेवो भगवान्नीललोहितः ।
करोति लोकसंहारं भीषणं लोकमाश्रितः ॥
प्रविश्य मण्डलं घोरं कृत्वासौ बहुधा पुनः ।
निर्दहत्यखिलं लोकं सप्तमूर्त्तिस्वरूपधृक् ॥
स दग्ध्वा सकलं सत्त्वमस्त्रं ब्रह्मशिरो महत् ।
देवतानां शरीरेषु क्षिपत्यखिलदाहकः ॥
दग्धेष्वशेषदेहेषु देवी गिरिवरात्मजा ।
एषा सा साक्षिणः शम्भोस्तिष्ठते वैदिकी श्रुतिः
शिवः कपालैर्देवानां कृतस्रग्वरभूषणः ।
आदित्यचन्द्रादिगणैः पूरयन्नोममण्डलम् ॥
सहस्रनयनो देवः सहस्राक्षतिरोश्वरः ।
सहस्रहस्तचरणः सहस्रार्चिर्म्महाभुजः ॥
दंष्ट्राकरालवदनः प्रदीप्तानललोचनः ।
त्रिशूलं कृत्तिवसनो योगमैश्वरमाश्रितः ॥
पीत्वा तत् परमानन्दं प्रभूतममृतं स्वकम् ।
करोति ताण्डवं देवस्त्रालोक्य परमेश्वरः ॥
पीत्वा नृत्यामृतं देवी भर्त्तुः परममङ्गला ।
योगमास्थाय देवस्य देहमायाति शूलिनः ॥
स भुक्त्वा ताण्डवरसं स्वेच्छयैव पिनाकधृक् ।
याति स्वभावं भगवान् दग्ध्वा ब्रह्माण्डमण्डलम्
संस्थितेष्वथ देवेषु ब्रह्मविष्णुपिनाकिषु ।
गुणैरनेकैः पृथिवी विलयं याति वारिषु ॥
सवारितत्त्वं सगुणं ग्रसते ह्यग्निवाहनः ।
तेजःस्वगुणसंयुक्तं वायौ संयाति संक्षयम् ॥
आकाशे सगुणो वायुः प्रलयं याति संक्षयम् ।
भूतादौ च तथाकाशं लीयते गुणसंयुतम् ॥
इन्द्रियाणि च सर्वाणि तैजसे यान्ति संक्षयम् ।
वैकारिके देवगणा प्रलयं यान्ति सत्तमाः ॥
वैकारिकास्तेजसश्च भूतादिश्चेति सत्तमाः ।
त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत् ॥
महान्तमेभिः सहितं ब्राह्मणममितौजसम् ।
अव्यक्तं जगतो योनिः संहरेदेकमव्ययः ॥
एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः ।
वियोजयत्यथान्योन्यं प्रधानं पुरुषं परम् ॥
प्रधानपुंसोरजयोरेष संहार ईरितः ।
महेश्वरेच्छाजनितो न स्वयं विद्यते लयः ।
गुणसाम्यं तदव्यक्तं प्रकृतिः परिगीयते ।
प्रधानं जगतो योनिराद्यतत्त्वमचेतनम् ॥
कूटस्थमक्षयो ह्यात्मा केवलः पञ्चविंशकः ।
गीयते मुनिभिः साक्षी महानेकः पितामहः ॥
एवं संहारकरणी शक्तिर्माहेश्वरी ध्रुवा ।
प्रधानस्य विशेषान्तं दहेद्रुद्र इति श्रुतिः ॥
योगिनामथ सर्वेषां ज्ञानविध्वस्तचेतसाम् ।
आत्यन्तिकश्चैव लयं विदधातीह शङ्करः ॥"
इति कौर्म्मे उपविभागे ४३ अध्यायः ॥*॥
ब्रह्मविष्णुशिवानामभेदो यथा,—

श्रीभगवानुवाच ।

"न ब्रह्मा भवतो भिन्नो न शम्भुर्ब्रह्मणस्तथा ।
न चाहं युवयोर्भिन्नो भिन्नत्वम् सनातनम् ॥
प्रधानस्याप्रधानस्य भागाभागस्य रूपिणः ।
ज्योतिर्म्मयस्य भागो मेऽनेकोऽनेकोऽहमंशकः ॥
कस्त्वं कोऽहञ्च को ब्रह्मा ममैव परमात्मनः ।
अंशत्रयमिदं भिन्नं सृष्टिस्थित्यन्तकारणम् ॥
चिन्तयन् स्वात्मनात्मानं सम्भवं कुरु चात्मनि ।
एकत्वं ब्रह्मवैकुण्ठशम्भूनां हृतं कुरु ॥
शिरोग्रीवादिभेदेन यथैवैकस्य धर्म्मिणः ।
अङ्गानि मे तथैवैकस्य भागत्रयमिदं हर ॥
यज्ज्योतिरग्र्यं स्वपरप्रकाशं
कूटस्थमव्यक्तमनन्तरूपम् ।
नित्यञ्च दीर्घादिविशेषणार्थै-
र्हीनं परं तच्च वयं न भिन्नाः ॥"
इति कालिकापुराणे ११ अध्यायः ॥
अपि च ।
"ततो ब्रह्मा च शरीरं त्रिधा चक्रे महेश्वर।
प्रधानेच्छाबलाच्छम्भो त्रिगुणं त्रिगुणीकृतम्॥
तदूर्द्धभागः संजातश्चतुर्वक्त्रश्चतुर्भुजः ।
पद्मकेशरगौराङ्गकायो ब्रह्मा महेश्वर ॥
तन्मध्यभागो नीलाङ्ग एकवक्त्रश्चतुर्भुजः ।
शङ्खचक्रगदापद्मपाणिः कायः स वैष्णवः ॥
अभवत्तदधोभागः पञ्चवक्त्रश्चतुर्भुजः ।
स्फटिकाभ्रसमः कायः शुक्लः स चन्द्रशेखरः ॥
ईशस्ततो ब्रह्मकाये सृष्टिशक्तिं न्ययोजयत् ।
स्वयमेवाभवत् स्रष्टा ब्रह्मरूपेण लोकभृत् ॥
स्थितिशक्तिं निजां मायां प्रकृत्याख्यां न्ययो-
जयत् ।
महेशो वैष्णवे काये ज्ञानशक्तिं निजां तथा ॥
स्थितिकर्त्ता भवेद्विष्णुरहमेव महेश्वरः ।
सर्व्वशक्तिनियोगेन सदा तद्रूपता मम ॥
अन्तशक्तिं तथा काये शाम्भवे संन्ययोजयत् ।
अन्तकर्त्ता भवेच्छम्भुः स एव परमेश्वरः ॥
ततस्त्रिषु शरीरेषु स्वयमेव प्रकाशते ।
ज्ञानरूपं परं ज्योतिरनादिर्भगवान् प्रभुः ॥
सृष्टिस्थित्यन्तकरणादेक एव महेश्वरः ।
ब्रह्मा विष्णुः शिवश्चेति संज्ञामपि पृथक् पृथक् ॥
अतश्चैव विधाता च तथाहमपि न पृथक् ।
एवं शरीरं रूपञ्च ज्ञानमस्माकमन्तरम् ॥"
इति तत्रैव १२ अध्यायः ॥ * ॥
मार्कण्डेय उवाच ।
"ततो ब्रह्माण्डसंस्थानं दर्शयामास शम्भवे ।
बहुधे तोयराशिस्थं ब्रह्माण्डञ्च यथा पुरा ॥
तन्मध्ये पद्मगर्भाभं ब्रह्माणं जगतः पतिम् ।
ज्योतीरूपं प्रकाशार्थं सृष्टयर्थञ्च पृथग्गतम् ॥
शरीरिणं स ददृशे ब्रह्माण्डान्तर्गतं मुहुः ।
चतुर्भुजं प्रकाशन्तं ज्योतिर्भिः कमलासनम् ॥
तत्रैव च त्रिधाभूतं वपुर्ब्रह्मं ददर्श सः ।
ऊर्द्धमध्यान्तभागैस्तु ब्रह्मविष्णुशिवात्मकम् ॥
अथोर्द्धभागो वपुषो ब्रह्मत्वमगमत्तथा ।
मध्यस्तदा विष्णुभूतो ददर्शान्तस्य शम्भुताम ॥
एकमेव शरीरन्तु त्रिधाभूतं मुहुर्मुहुः ।
हरो ददर्श खे गर्भे तथा सर्वमिदं जगत् ॥
कदाचित् वैष्णवं कायं ब्राह्मे काये लयं व्रजेत्।
ब्राह्मं तथा वैष्णवे च शाम्भवं वैष्णवे तथा ॥

शाम्भवं वैष्णवे काये ब्राह्मे चाप्यथ शाम्भवम्।
गच्छन्तं लीनतां शम्भुरेकताच्च मुहुर्मुहुः ॥
ददर्श वामदेवोऽपि भिन्नश्चाप्यपृथग्गतम्।
परमात्मनि गच्छन्तं लीनतां तद्वपुष यत् ॥"

इति कालिकापुराणे १३ अध्यायः ॥*॥

अस्य शरभरूपधारणकारणं यथा,—

"इति तेषां निगदतां श्रुत्वा वाक्यं जनार्दनः।
उवाच शङ्करं देवं ब्रह्माणञ्च विशेषतः ॥
यत्कृते देवताः सर्व्वाः प्रजाश्च सकला इमाः।
प्राप्नुवन्ति महद्दुःखं शीर्य्यते सकलं जगत् ॥
वाराहं सकलं कायं त्यक्तुमिच्छामि शङ्करः।
त्वं त्याजयस्व तत् कायं यन्नात्मा शङ्कराधुना ॥
त्वन्माय्यास्य तेजोभिर्ब्रह्मन् स्मरहरं मुहुः।
आप्यायन्तु तदा देवाः शङ्करो हन्तु पोत्रिणम् ॥
वासुदेवोऽपि तान् सर्व्वान् विसृज्य त्रिदशां-
स्तदा।
वाराहं तेजसा हर्त्तुं स्वयं ध्यानपरोऽभवत् ॥
शनैः शनैर्यदा तेज आहरत्येष माधवः।
तदा देहन्तु वाराहं सत्त्वहीनं व्यजायत ॥
तेजोहीनं यदा देहं ज्ञातं सर्व्वैरथामरैः।
आससाद महादेवो यज्ञवाराहमद्भुतम् ॥
ब्रह्माद्याखिदशाः सर्व्वे महादेवमुपापतिम्।
अनुजग्मुस्तदा तेज आधातुं स्मरनाशने ॥
ततः सर्व्वैर्देवगणैः स्वं स्वं तेजो वृषध्वजे।
आदधे तेन बलवान् सोऽतीव समजायत ॥
ततः शरभरूपी स तत्क्षणाद्गिरिशोऽभवत्।
ऊर्द्धाधोभागतश्चाष्टपादयुक्तः सुभैरवः।
द्विलक्षयोजनोच्छ्रायः सार्द्धलक्षकविस्मृतः ॥"

इति कालिकापुराणे २८ अध्यायः ॥

अस्य विवाहो यथा,—

ईश्वर उवाच।

"हिताय सर्व्वजगतां सम्भोगायात्मनस्तथा।
दारान् ग्रहीतुमिच्छामि तथा सन्तानहेतवे ॥
साहाय्यं तत्र कुर्वन्तु भवन्तो मम सांप्रतम्।
मदर्थे तनयां कालीं याचन्तान्तु हिमाचलम् ॥

मार्कण्डेय उवाच।

हरं सम्बोध्य मुनयो ह्यगच्छन् गिरिराड्गृहम्।
तेन संपूजितास्ते तु प्रोचुस्ते मुनयो गिरिम् ॥
यश्चन्द्रशेखरो देवो देवदेवश्च यो मतः।
शापानुग्रहणे शक्तो य एको जगतां पतिः ॥
यः संहरति सर्व्वाणि जगन्ति प्रलयोद्भवे।
यो विभूतिप्रदो भक्ते नानारूपो मनोहरः ॥
स ते दुहितरं कालीं भार्य्यामादातुमिच्छति।
यदि पश्यति त्वद्योग्यं वरं त्वं दुहितुः समम्।
तदा प्रयच्छ तनयां कालीं शशिभृते गिरे ॥

मार्कण्डेय उवाच।

इत्युक्तस्तैर्गिरिपतिर्वरं यद्वदयस्थितम्।
दुहितुश्च प्रियं ज्ञात्वा प्राप्यं मुदमगात्तदा ॥
दास्यामि सम्भवे पुत्रीं युष्माभिः प्रार्थित-
स्वहम्।
पूर्व्वमेव तपस्तप्त्वा तयेशः पतिरीहितः ॥
धातुर्नियोजनमिदं कोऽन्यथा कर्त्तुमुत्सहेत्।
कोऽन्यः प्रार्थयितुं शक्तः सुतां मम विना
हरात् ॥
हरेणानुगृहीता या तामन्यः कः समुत्सहेत्।
हरं गृहीत्वा मनसा नान्यं सापीह वाञ्छति ॥
इत्युक्ता मेनया सार्द्धं सुतां दातुञ्च शम्भवे।
अङ्गीकृत्य विसृष्टास्ते मुनयोऽगुर्महेश्वरम् ॥
ते गत्वा मुनयः सर्व्वे मरीचिप्रमुखा द्विजाः।
शैलराजो यदाचष्ट तदूचुर्मदनारये ॥
हिमवांस्तनयां दातुं तुभ्यमुत्सहते हर।
यदिदानीं त्वया कर्त्तुं युज्यते क्रियतान्तु तत् ॥
अस्मांश्चाप्यनुजानीहि हर गन्तुं निजाश्रमम्।
सिद्धं ज्ञात्वा हरः साध्यं मुदितस्तान् विसृष्ट-
वान् ॥
यथायोग्यं समाभाष्य क्रमादेकैकशो मुनीन्॥
कालीविवाहदिवसे यूयमायात मां प्रति।
इति चापि हरेणोक्तं प्रतिश्रुत्यर्षयो ययुः ॥
अथान्योन्यप्रियतया कृत्वा कृत्वा गतागतम्।
समयं कारयामास विवाहाय हरो गिरिम् ॥
माधवे मासि पञ्चम्यां सितपक्षे गुरोर्दिने।
चन्द्रे चोत्तरफल्गुन्यां भरण्यादौ स्थिते रवौ ॥
आगता मुनयस्तत्र मरीचिप्रमुखा मुहुः।
हरेण चिन्तिताः सर्व्वे तथा ब्रह्मादयः सुराः ॥
तथा च सर्व्वे दिक्पाला मुनयो ये तपोधनाः।
शच्या सह तदा शक्रो ब्रह्माण्याद्यास्तु मातरः ॥
नारदश्च गतस्तत्र देवर्षिर्ब्रह्मणः सुतः।
एतैः परिकरैः सार्द्धं गणैराप्यायितः स्वकैः।
कन्यामिवार्हविधिना गिरिपुत्रीं हरोऽग्रहीत् ॥
विवाहे गिरिणा शम्भोः सर्पा येऽष्टौ तनौ
स्थिताः।
ते जाम्बूनदसन्नद्धा अलङ्कारास्तदाभवन् ॥
द्विभुजोऽभून्महादेवो जटाः केशत्वमागताः।
शिरःस्थितश्चन्द्रखण्डः शोचिषा ज्वलितोऽभवत्
ललाटनेत्रमभवन्तदा रत्नं महार्घ्यकम्।
विचित्रवसनं व्याघ्रकृत्तिरासीत्तदा द्विजाः ॥
विभूतिलेपोऽभूत्तस्य सुगन्धिमलयोद्भवः।
चारुरूपो हरस्तत्र बभूवाद्भुतदर्शनः ॥
ततो देवाः सगन्धर्व्वाः सिद्धा विद्याधरोरगाः।
विस्मयं परमं प्रापुर्हरं दृष्ट्वा तथाविधम्।
हिमवान् मुदितश्चाभूत् सहपुत्रश्च मेनया।
ज्ञातयश्चास्य मुमुदुर्हरं दृष्ट्वा तथाविधम् ॥
इदं ब्रह्मा तत्र जगौ हरं दृष्ट्वा मनोहरम् ॥
सर्व्वं शिवकरं यस्मात्तस्माच्छिव इति स्मृतः।
तस्मात् शिवोऽयं लोकेषु नास्मादन्योऽधिकः
शिवः ॥

महेश्वरसमायुक्तमीदृशं यः स्मरेदृदा।
सततं तस्य कल्याणं वाञ्छितञ्च भविष्यति ॥
एवं कालीं महामायां योगनिद्रां जगत्प्रसूः।
पूर्व्वं दाक्षायणी भूत्वा पश्चात् गिरिसुताभवत्
स्वयं समर्थापि सती कालीं सम्मोहितुं हरम्।
तथाप्युग्रं तपस्तेपे हिताय जगतां शिवा।
एवं सम्मोहयामास कालिका चन्द्रशेखरम् ॥
इत्येतत् कथितं सर्वं त्यक्तदेहा सती यथा।
हिमवत्तनया भूत्वा पुनः प्राप महेश्वरम् ॥"

इति कालिकापुराणे ४३ अध्यायः ॥*॥

अस्य गणा यथा,—

पुलस्त्य उवाच।

"हरोऽपि शम्बरे याते समाहूयाशु नन्दिनम्।
प्राहामन्त्रय शैलादौ ये स्थितास्तव शासने ॥
ततो महेशवचनान्नन्दी सर्व्वगणाधिपः।
उपस्पृश्य जलं धीमान् सस्मार गणनायकान् ॥
नन्दिना संस्मृताः सर्व्वे गणनाथाः सहस्रशः।
समुत्पत्य त्वरायुक्ताः प्रणताश्चिदमेश्वरम् ॥
आगतांश्च गणान्नन्दी कृताञ्जलिपुटोऽब्रवीत्।
सर्व्वाविवेदयामास शङ्कराय महात्मने ॥

नन्द्युवाच।

यानेतान् पश्यसि शम्भो त्रिनेत्रान् जटिलान्
शुचीन्।
एते रुद्रा इति ख्याताः कोट्य एकादशैव च ॥
वानरास्यान् पश्यसि यान् शार्दूलसमविक्र-
मान्।
एते वै द्वारपालास्ते मन्त्रामानो यशोधनाः ॥
पण्मुखान् पश्यसि यांश्च शक्तिपाणीन् शिखि-
ध्वजान्।
षट् च षष्टिस्तथा कोट्यः स्कन्दनाम्नः कुमार-
कान् ॥
एतावत्यस्तथा कोट्यः शाखा नाम षडाननाः।
विशाखास्तावदेवोक्ता नैगमेयाश्च शङ्कर ! ॥
सप्तकोटिगताः शम्भो अमी वै प्रथमोत्तमाः।
एकैकं प्रति देवेश तावत्यो ह्यपि मातरः ॥
भग्नारुणितदेहाश्च त्रिनेत्राः शूलपाणयः।
एते शैवा इति प्रोक्तास्तव भक्ता गणेश्वराः ॥
तथा पाशुपताश्चान्ये भक्तप्रहरणा विभो।
एते गणास्त्वसंख्याताः साहाय्यार्थं समागताः ॥
पिनाकधारिणो रौद्रा गणाः कालमुखाः परे।
तव भक्ताः समायाता जटामण्डलिनोऽद्भुताः ॥
खट्वाङ्गयोधिनो वीरा रक्तचर्म्मसमावृताः।
इमे प्राप्ता गणा योद्धुं महाव्रतिन उत्तमाः ॥
दिग्वाससो यौनिनश्च घण्टाप्रहरणास्तथा।
निरामया नाम गणाः समायाता जगद्गुरो ॥
सार्द्धत्रिनेत्राः पद्माक्षाः श्रीवत्साङ्कितवक्षसः।
समायाताः खगारूढा हयभध्वजिनोऽव्ययाः ॥
महापाशुपता नाम चक्रशूलधरास्तथा।
भैरवो विष्णुना सार्द्धमभेदेनार्चितो हि यैः ॥
इमे मृगेन्द्रवदनाः शूलबाणधनुर्धराः।
गणास्त्वद्रोमसम्भूता वीरभद्रपुरोगमाः ॥
एते चान्ये च बहवः शतशोऽथ सहस्रशः।
साहाय्यार्थं तवायाता यथाघोत्यादिशस्व तान्
ततोऽभ्येत्य गणाः सर्व्वे प्रणेमुर्वृषकेतनम् ॥"

इति वामनपुराणे ६४ अध्यायः ॥

अस्य लिङ्गपूजादि शिवलिङ्गशब्दे द्रष्टव्यम् ॥

अस्मात् कोचविहारदेशीयराजवंशोत्पत्तिर्यथा,

श्रीदेव्युवाच।

"देवेश परमेशान सर्व्वज्ञ सर्व्वपूजित।
क्व गच्छसि मुहुर्नाथ कृपया वद शङ्कर ॥

ईश्वर उवाच ।
कोचाख्याने च देशे च योनिगर्त्तसमीपतः ।
माध्वी सती वाम्बिका हि रेवती जनविश्रुता ॥
म्लेच्छदेशोद्भवा या तु योगिनी सुन्दरी मता ।
तत्कुची कठिनौ हृद्यौ योनेस्तस्याश्च पीनता ॥
भिक्षाचारप्रसङ्गेन गच्छामि च दिवानिशम् ।
तत्सन्निधौ महेशानि तया मे रमणं महत् ॥
देव्युवाच ।
कुबामोत् किं तपस्तप्तं कथं प्राप्तं महीतलम् ।
त्वया सार्द्धं रतिर्यत् स्यात् नाल्पस्य तपसः
फलम् ॥
तवापि च कृपा तस्यां लक्ष्यते महती मया ।
इदानीं किमभूत् सा हि कृपया परया वद ॥
ईश्वर उवाच ।
नगेन्द्रतनये बाले शृणु सत्याणवल्लभे ।
गावरीचरितं किञ्चित् कथयामि शुचिस्मिते ॥
रसक्रीड़ाश्चकाराहमेकाम्रकानने मुदा ।
वेदाङ्गसम्भवा माध्वी योगिनी सा सुरी मता ।
नाभूत्तस्याः सुतस्तस्मिं मत्क्रियायां नगात्मजे
मामामुमुत्कटं तप्तं हृये मे चेत्रकामदे ॥
एकाम्रगहने देवि पर्व्वते तीर्थसङ्कुले ।
तत्रैको ब्राह्मणो जातो भिक्षार्थं तामुवाच ह ॥
न दत्तमुत्तरं तस्मै भिक्षा तिष्ठतु दूरतः ।
ततः शशाप विप्रस्तां म्लेच्छतां याहि दुर्म्मदे ।
इत्युक्ता स ययौ विप्रो म्लेच्छत्वमाप योगिनी ।
अतोऽर्थिनः समर्थस्य याचितं न ददाति च ॥
स दुर्गतिमवाप्नोत्यसमर्थो विनयञ्चरेत् ।
तस्यास्तु तपसा देवि क्रीतोऽहमभवं सदा ॥*॥
अतस्तया रतिर्जाता मम कामिनि सर्व्वदा ।
तस्याः पुत्रो विनुसिंहो मदीरससमुद्भवः ॥
एकेन जितवान् कामान् सीमारान् गौड़पञ्च-
मान् ।
विनिर्जित्य नृपान् सर्व्वान् एकः श्रीमान्
महामतिः ॥
तस्यापि बहवः पुत्राः पृथिवीपरिपालकाः ।
कुबाचा धार्म्मिकाः सर्व्वे राजानो युद्धदुर्म्मदाः ॥
ततोऽपि स विनुसिंहो योगमाश्रित्य विह्वले ।
त्रिष्ठत्यव्यक्तरूपेण पट्टे आकल्पमम्बिके ॥
कामात् सा माधवी देवि महेड़े लीनतां गता
यथा जाया नन्दिमाता तथेयं योगिनी मता ॥
यथा पुत्रो भृङ्गरीटिस्तथा विनुर्म्मामात्मजः ।
विनुसिंहोऽपि कल्पान्ते परां सिद्धिमवाप्स्यति॥
तदंगजास्तु राजानः सर्व्वे कैलासवासिनः ।
भविष्यन्ति महात्मानो गणेशाः सर्व्वशालिनः ॥
रूपयौवनसम्पन्नैर्दैवकन्यागणैः सह ।
विहरन्ति सदा देवि क्रीड़न्ति भैरवा यथा ॥*॥
यदा यदा ब्रह्मशापः कामाख्यायां भवेत् पुनः
तदा तदावतीर्य्याहं विघ्नकामस्य पालकः ॥
तथा तदंगजाः सर्व्वे भवेयुः कामपालकाः ।
कल्पान्तमेवं देवेशि यावत् शापो विमुच्यते ॥
तावदेव महामाये महीर्य्यात् क्रीड़ते ध्रुवम् ।
कल्पमेवं महेशानि कलौ वर्षशतत्रयम् ॥

यावत्तु परमेशानि भुङ्क्ते शापं परात्मिके ।
कामाख्या हि महामाये तदन्ते सफला भवेत् ॥
एवं ते कथितं देवि ब्रह्मशापविमोचनम् ।
कामाख्याया महेशानि माकख्येन मया ध्रुवम्॥"
इति श्रीयोगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशति-
साहस्रे १३ पटलः ॥ मोचः । कौलग्रहः ।
वालुकम् । गुग्गुलुः । वेदः । पुण्डरीकद्रुमः ।
इति मेदिनी ॥ क्रुगधुस्तूरः । पारदः । इति
राजनिर्घण्टः ॥ देवः । इति शब्दरत्नावली ॥
लिङ्गः । इत्युणादिकोषः ॥ विष्ण्वादिसप्त-
विंशतियोगान्तर्गतविंशतितमयोगः । तत्र जात-
फलम् ।
"महेशभक्तः श्रुतिपारदृश्वा
जितेन्द्रियश्चारुतनुर्म्महात्मा ।
शिवाभिधानः खलु योगराजः
प्रसूतिकाले यदि मानवानाम् ॥"
इति कोष्ठीप्रदीपः ॥
शिवकः, पुं, कीलकः । इत्यमरः ॥ हेखोंटा इति
ख्याते । गवां गात्रकण्डूयनार्थं गोष्ठे निखात-
स्तम्भे इति भरतः । कण्डूयनार्थकाष्ठे इति
केचित् । बन्धनखट्टे इति केचित् । यत्र बद्धा
गौर्दुह्यते इति केचित् । शमति गात्रकण्डुं शिय
शो तनुकरणे नाम्नीति डिवः स्वार्थे कन् कः
शिवकस्तालव्यादिः । कीलयतेऽधःस्थिन् कील-
कील बन्धे घञ् स्वार्थे कः कीलकः । इति
भरतः ॥
शिवकरः, पुं, (शिवस्य करः ।) चतुर्विंशति-
भूताईदन्तर्गतजिनविशेषः । इति हेमचन्द्रः ॥
मङ्गलकारके, त्रि ॥
शिवकाञ्ची, स्त्री, पुरीविशेषः । यथा,—
"शिवकाञ्ची विष्णुकाञ्ची काञ्चीयुगञ्च सम्मतम्
एतास्तु पृथिवीमध्ये न गच्छन्ते कदाचन ॥
काशी शिवत्रिशूलस्था काञ्ची हरिहरात्मिका
वामदक्षिणहस्ताभ्यां धधार द्विजपुङ्गवाः ॥"
इति भूतशुद्धितन्त्रम् ॥
शिवकीर्त्तनः, पुं, (शिवं सुखकरं कीर्त्तनं यस्य ।)
भृङ्गरीटः । विष्णुः । इति मेदिनी ॥ शैवः ।
इति शब्दरत्नावली ॥
शिवगतिः, पुं, भूताईदन्तर्गतजिनविशेषः । इति हेमचन्द्रः ॥
शिवधर्म्मजः, पुं, (शिवधर्म्माज्जातः । जन् + डः ।)
मङ्गलग्रहः । अस्य प्रमाणं मङ्गलशब्दे द्रष्ट-
व्यम् ॥
शिवङ्करः, त्रि, मङ्गलकर्त्ता । तत्पर्य्यायः । क्षेम-
ङ्करः २ अरिष्टतातिः ३ शिवतातिः ४ । इति
हेमचन्द्रः ॥ (पुं, बालग्रहविशेषः । यथा, हरि-
वंशे । १६६ । ७५ ।
"संघट्टनः संकुचनः काष्ठभूतः शिवङ्करः ॥")
शिवचतुर्दशी, स्त्री, (शिवप्रिया चतुर्दशी ।)
चतुर्दशीकर्त्तव्यशिवव्रतविशेषः । यथा,—
नन्दिकेश्वर उवाच ।
"शृणुष्वावहितो ब्रह्मन् वक्ष्ये माहेश्वरं व्रतम्
त्रिषु लोकेषु विख्याता नाम्ना शिवचतुर्दशी ।

मार्गशीर्षे त्रयोदश्यां सितायामेकभक्तकम् ।
प्रार्थयेद्देवदेवेशं त्वामहं शरणं गतः ॥
चतुर्दश्यां निराहारः समभ्यर्च्च्य च शङ्करम् ।
सुवर्णवृषभं दत्त्वा भोक्ष्यामीति परेऽहनि ॥
एवं नियमकृत् स्नात्वा प्रातरुत्थाय मानवः ।
कृतस्नानजपः पश्चादुमया सह शङ्करम् ॥
पूजयेत् कमलैः शुक्लैर्गन्धधूपानुलेपनैः ।
पादौ नमः शिवायेति शिरः सर्व्वात्मने नमः ॥
ललाटं वामदेवाय नेत्राणि हरये नमः ।
मुखमिन्दुमुखायेति श्रीकण्ठायेति कन्धरम् ॥
सद्योजाताय कर्णौ तु वामदेवाय वै भुजौ ।
अघोरहृदयायेति हृदयञ्चापि पूजयेत् ॥
स्तनौ तत्पुरुषायेति तथेशायेति चोदरम् ।
पार्श्वे चानन्तधर्म्माय ज्ञानभूताय वै कटिम् ॥
ऊरू चानन्तवैराजसिंहायेति च पूजयेत् ।
अनन्तैश्वर्य्यनाथाय जानुनी चार्च्चयेद्बुधः ॥
प्रधानाय नमो जङ्घे गुल्फौ व्योमात्मने नमः ।
व्योमकेशात्मरूपाय पृष्ठमभ्यर्च्चयेश्वरः ॥
नमः पृष्ठाय नमस्तुष्टे पार्व्वतीञ्चापि पूजयेत् ।
ततस्तु वृषभं हैममुदक्कुम्भसमन्वितम् ॥
शुक्लमाल्याम्बरयुतं पञ्चरत्नपरिष्कृतम् ।
भक्ष्यैर्नानाविधैर्युक्तं ब्राह्मणाय निवेदयेत् ॥
प्रीयतां देवदेवोऽत्र सद्योजातः पिनाकधृक् ।
ततस्तु विप्रानन्नेन तर्पयेच्छक्तितः शुभान् ॥
वृषदाज्यञ्च संप्राश्य स्वपेद्भूमावुदङ्मुखः ।
पञ्चदश्यां ततः पूज्य विप्रान् भुञ्जीत वाग्यतः ॥
तद्वत् कृष्णचतुर्दश्यामेतत् सर्व्वं समाचरेत् ।
चतुर्दशीषु सर्व्वासु कुर्य्यात् पूर्व्ववदर्च्चनम् ॥
ये तु मासविशेषाः स्युस्तान्निबोध क्रमादिह ।
मार्गशीर्षादिमासेषु स्नपनेतदुदीरयेत् ॥
शङ्कराय नमस्तुभ्यं नमस्ते करवीरकम् ।
त्र्यम्बकाय नमस्तेऽस्तु महेश्वर नमः परम् ॥
नमस्तेऽस्तु महादेव स्थाणवे च ततः परम् ।
नमः पशुपते नाथ नमस्ते शम्भवे पुनः ॥
नमस्ते परमानन्द नमः सोमार्द्धधारिणे ।
नमो भीमाय इत्येवं त्वामहं शरणं गतः ॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
पञ्चगव्यं तथा विल्वं यवान् गोशृङ्गवारि च ॥
तिलांश्च स्नानान् विधिवत् प्राशनं क्रमशः
स्मृतम् ।
प्रतिमासं चतुर्दश्योरेकैकं प्राशनं स्मृतम् ॥
मन्दारैर्मालतीभिश्च तथा धुस्तूरकैरपि ।
सिन्धुवारैरशोकैश्च मल्लिकाभिश्च पाटलैः ॥
अर्कपुष्पकदम्बैश्च शतपत्रैस्तथोत्पलैः ।
एकैकेन चतुर्दश्यामर्च्चयेत् पार्व्वतीपतिम् ॥
पुनश्च कार्त्तिके मासि संप्राप्ते तर्पयेत् द्विजान् ।
अन्नैर्नानाविधैर्भक्ष्यैर्वस्त्रमाल्यविभूषणैः ॥
स्नात्वा नीलवृषोत्सर्गं मृत्युञ्जयविधिना नरः ।
उमामहेश्वरं हैमं वृषभञ्च गवा सह ॥
मुक्ताफलाष्टकयुतं सितनेत्रत्रयान्वितम् ।
सर्व्वौषधीकरयुक्तायां गव्यायामुदकुम्भयोः ॥
ताम्रपात्रोपरि पुनः शालितण्डुलसंयुतम् ।

स्याप्य विप्राय शान्ताय वेदव्रतपराय च ॥
ज्येष्ठमासविदे देयं न वक्रव्रतिने क्वचित् ।
गुणज्ञे श्रोत्रिये दद्यादाचार्ये तत्त्ववेदिनि ॥
अव्यङ्गाङ्गाय सौम्याय सदाकल्याणकारिणि ।
सपत्नीकाय संपूज्य माल्यवस्त्रविभूषणैः ॥
गुरौ सति गुरोर्देयं तदभावे द्विजातये ।
न वित्तशाठ्यं कुर्व्वीत कुर्व्वन् मोहात् पतत्यधः ।
अनेन विधिना यस्तु कुर्य्यात् शिवचतुर्दशीम् ।
सोऽश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥
ब्रह्महत्यादिकं किञ्चिदृश्यदत्रामुत्र वा कृतम् ।
पितृभिर्भ्रातृभिर्वैव तत् सर्व्वं नाशमाप्नुयात् ॥
दीर्घायुरारोग्यकुलाभिवृद्धि-
रत्राक्षयामुत्र चतुर्भुजत्वम् ।
गणाधिपत्यं दिवि कल्पकोटि-
शतं वसित्वा पदमेति शम्भोः ॥

न ह्यस्यतिरप्यनन्तमस्याः
फलमिन्द्रो न पितामहोऽपि वक्तुम् ।
न च सिद्धगणोऽप्यलं न चाहं
यदि जिह्वायुतकोटयोऽपि वक्त्रे ॥
भवत्यमरवल्लभः पठति यः स्मरेद्वा सदा
शृणोति च विमत्सरः सकलपापविध्वंसिनीम् ।
इमां शिवचतुर्दशीममरकामिनीकोटयः
स्तुवन्ति तमनिन्दितं किमु समाचरेदयं सदा ॥
या वाथ नारी कुरुते ह भक्त्या
भर्त्तारमाशृच्छ्य सुतं गुरुं वा ।
सापि प्रसादात् परमेश्वरस्य
परं पदं याति पिशाकपार्श्वैः ॥"
इति माल्ये शिवचतुर्दशीव्रतं ८०अध्यायः ॥*॥
फाल्गुनी कृष्णा चतुर्दशी। तत्र शिवव्रतं कर्त्तव्यम्। तस्य विवरणं शिवरात्रिशब्दे द्रष्टव्यम् ॥

शिवज्ञा, स्त्री, (शिवं जानातीति । ज्ञा + कः ।) शिवोपासिका । मङ्गलज्ञात्री । शिवं जानाति या इत्यर्थे डप्रत्ययः ॥
शिवज्ञानं, क्ली, (शिवस्य ज्ञानमस्मात् ।) शुभाशुभकालबोधकशास्त्रम् । यदा यात्रादिक्रिया अवश्यकर्त्तव्या ज्योतिःशास्त्रोक्तशुभक्षणप्राप्तिश्च न भवति तदा शिवज्ञानोक्तशुभसमये कर्म्म कर्त्तुमुचितं भवति। एतच्छिवज्ञानोक्तमाहेन्द्रयोगे कृतयात्रादिर्जयं अमृतयोगे कार्य्यसिद्धिं वक्त्रे कार्य्यनाशं शून्ये मृत्युं अपमानं वा प्राप्नोति । दिवारात्रौ माघ-फाल्गुन-चैत्र-वैशाख-श्रावण-भाद्रेषु एते योगा एकरूपाः आश्विन-कार्त्तिकाग्रहायण-पौषेषु एकप्रकाराः ज्येष्ठाषाढ़योश्च एकरूपा भवन्ति ॥ यथा,—

माघ फाल्गुन-चैत्र-वैशाख-श्रावण-भाद्रेषु
दिवादण्डा यथा।

रविवारे	मा	२	अ	८	शू	८	मा	२	व	१०।									
सोमवारे	अ	४	व	८	अ	६	व	६	मा	४	शू	२।							
मङ्गलवारे	व	४	शू	२	अ	६	व	४	शू	२	अ	४	शू	२	अ	४	शू	२।	
बुधवारे	अ	४	व	६	अ	४	शू	२	व	४	मा	४	अ	४	शू	२।			
गुरुवारे	मा	४	शू	२	व	६	मा	६	शू	४	व	४	शू	४।					
शुक्रवारे	अ	२	व	२	अ	६	व	६	अ	६	शू	४	अ	४।					
शनिवारे	शू	४	व	४	शू	२	अ	८	शू	४	व	४	शू	४।					

तेषु रात्रिदण्डा यथा।

रविवारे	शू	२	मा	२	अ	४	व	८	मा	८	शू	६							
सोमवारे	व	२	अ	६	व	६	अ	८	शू	८।									
मङ्गलवारे	अ	२	व	४	शू	२	अ	६	व	६	अ	४	व	४	शू	२।			
बुधवारे	शू	२	अ	६	मा	४	व	४	शू	४	अ	१०।							
गुरुवारे	व	१४	शू	४	व	४	अ	२	शू	६।									
शुक्रवारे	व	४	अ	४	शू	४	मा	२	व	६	शू	४	अ	२	मा	२	शू	२।	
शनिवारे	शू	२	व	४	अ	६	व	४	अ	४	व	२	अ	४	शू	४।			

आश्विन-कार्त्तिकाग्रहायणपौषेषु
दिवादण्डा यथा।

रविवारे	शू	२	अ	६	व	८	अ	८	शू	२	मा	२	शू	२।					
सोमवारे	अ	४	शू	४	अ	६	व	१६।											
मङ्गलवारे	अ	२	व	२	अ	१०	व	६	शू	६	व	४।							
बुधवारे	अ	२	मा	२	अ	२	व	६	अ	६	शू	२	मा	६	व	४।			
गुरुवारे	अ	४	व	४	शू	४	व	६	शू	२	अ	४	व	६।					
शुक्रवारे	अ	२	व	२	अ	६	व	६	अ	८	शू	२	अ	४।					
शनिवारे	अ	२	व	२	अ	६	व	६	अ	८	शू	२	अ	४।					

तेषु रात्रिदण्डा यथा।

रविवारे	शू	२	व	४	अ	४	व	६	अ	४	शू	२	अ	८।					
सोमवारे	व	६	अ	८	व	८	अ	२	व	६।									
मङ्गलवारे	मा	६	अ	२	शू	२	अ	६	व	४	मा	४	शू	२	अ	४।			
बुधवारे	व	२	अ	२	व	४	अ	१६	व	२	शू	४।							
गुरुवारे	शू	२	अ	८	व	६	अ	८	शू	२	अ	४।							
शुक्रवारे	व	२	अ	८	व	६	अ	८	शू	२	अ	४।							
शनिवारे	व	१४	शू	४	व	४	अ	२	शू	६।									

ज्येष्ठाषाढ़योर्दिवादण्डा यथा।

रविवारे	शू	४	भ	६	व	६	भ	६	व	४	मा	२	शू २।
सोमवारे	व	८	भ	४	शू	६	व	८	शू	४।			
मङ्गलवारे	भ	६	शू	४	भ	६	व	६	मा	२	भ	२	मा २ शू २।
बुधवारे	शू	२	व	४	भ	८	व	६	भ	८	शू	२।	
गुरुवारे	मा	२	शू	२	व	६	मा	४	शू	४	व	६	भ ६।
शुक्रवारे	शू	२	मा	२	व	६	मा	२	शू	४	भ	६	व ४ शू ४।
शनिवारे	मा	२	शू	२	व	६	मा	६	शू	४	व	४	भ ६।

तत्र राचिदण्डा यथा।

रविवारे	भ	४	शू	४	व	४	भ	६	व	८	शू	४।	
सोमवारे	व	८	भ	८	शू	४	भ	४	शू	२	मा	२	शू २।
मङ्गलवारे	भ	२	व	४	मा	४	शू	४	व	२	भ	६	शू २ व ६।
बुधवारे	भ	१०	शू	२	व	४	भ	४	शू	१०।			
गुरुवारे	शू	२	भ	६	शू	२	व	४	शू	२	भ	६	शू ४ भ ४।
शुक्रवारे	भ	६	शू	२	व	४	शू	६	भ	६	शू	२	भ ४।
शनिवारे	शू	२	भ	२	व	८	शू	२	भ	६	शू	४	भ ६।

मतान्तरे अस्य प्रमाणं यथा,—
"माहेन्द्रे विजयो नित्यं अमृते कार्य्यशोभनम्।
वक्रे कार्य्यविलम्बः स्याच्छून्ये च मरणं ध्रुवम्॥
वैशाखादित्रयावणान्तं एकभावेन संवहेत्।
अमृतादि दिवारात्रौ चतुर्मासं यथाक्रमम्॥
याममानं दिवामाने ज्ञेयं सर्व्वत्र मासके।
तत्प्रमाणेन ज्ञातव्यं दण्डमानं विचक्षणैः।
रात्रिमानप्रमाणेन ज्ञेयो दण्डप्रमाणकः॥
न वारतिथिनक्षत्रं न योगकरणं तथा।
शिवज्ञानं समासाद्य सर्व्वं सुनिर्विचारयेत्॥"
तथा।
"भाद्रादिमार्गपर्य्यन्तं अमवारे समादिशेत्।
शून्यवक्रादियोगं हि पौषादिचैवतस्तथा॥"
इति ज्योतिषे शिवज्ञानम्॥०॥

अनेकप्रकारं शिवज्ञानं शिवाज्ञा शिवालिखितं अमृतघटी च दृष्टं किन्तु परस्परमनैक्यं जातम्॥

शिवतातिः, स्त्री, कल्याणकारिणी। इति हेमचन्द्रः॥ अस्य पर्य्यायः शिवङ्करशब्दे द्रष्टव्यः॥

शिवदत्तं, क्ली, (शिवेन दत्तम्।) विष्णुचक्रम्। इति केचित्॥ शिवेन शिवाय वा दत्तं द्रव्यमात्रञ्च॥

शिवदारु, क्ली, (शिवस्य दारु।) देवदारुवृक्षः। इति राजनिर्घण्टः॥

शिवदूतिका, स्त्री, (शिवदूती+स्वार्थे कन्।) माटकाविशेषः। इति शब्दरत्नावली॥

शिवदूती, स्त्री, (शिवेन दूतयति सन्देशं प्रापयतीत्यर्थे दूत+णिच्+पचाद्यच्। यद्वा, शिवो दूतो यस्याः। गौरादेराकृतिगणत्वात् ङीष्।) दुर्गा। इति त्रिकाण्डशेषः॥ योगिनीविशेषः। यथा,
"ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा।
कौमारी वैष्णवी चैव वाराही पञ्चमी तथा॥
नारसिंही तथैवेन्द्री शिवदूती तथाष्टमी।
एताः पूज्या महाभागा योगिनीः कामदायिनीः॥"
तस्या उत्पत्तिसम्बन्धादि यथा,—
"कौषिक्या हृदयाद्देवी निःसृता ध्यानतो हरेः।
शिवदूतीति विख्याता शिवाशतसुसंवृता॥
मन्त्रमस्याः प्रवक्ष्यामि धर्म्मकामार्थदायकम्।
यत् श्रुत्वा साधको याति दुर्लभं शिवमन्दिरम्॥
येनाराध्य महादेवीं शिवदूतीं शिवात्मिकाम्।
न चिराद्भवते कामात्तरः सर्व्वजयी भवेत्॥
अन्तःसमाधिसहितो विन्दिन्दुभ्यां दशावरा।
स्वरेण पान्त्यदन्तेन संसृष्टोऽन्तेन पूर्वगः॥
स एव बिन्दुयुगलपूर्वस्त्रोपान्त्यपावकः।
षष्ठस्वरकलाशून्यैः संहितः प्रथमस्थितः॥
मन्त्रोऽयं शिवदूत्यास्तु शिवदूतीजयप्रदः।
रूपमस्याः प्रवक्ष्यामि शृणु वत्सक संमतम्॥
चतुर्भुजं महाकायं सिन्दूरसदृशद्युतिम्।
रक्तदन्तं मुण्डमालाजटाजूटार्द्धचन्द्रधृक्॥
नागकुण्डलहाराढ्यां शोभितं नखरोज्ज्वलम्।
व्याघ्रचर्म्मपरीधानं दक्षिणे शूलचक्रधृक्॥
वामे पाशं तथा चर्म्म बिभ्रद्दूर्द्धं परिक्रमात्।
स्थूलवक्त्रञ्च पीनोष्ठं तुङ्गमूर्त्तिं भयङ्करम्॥
निक्षिप्य दक्षिणं पादं सन्तिष्ठेत् कुक्षपोपरि।
वामपादं शृगालस्य पृष्ठे फेरुशतैर्वृतम्॥
ईदृशं शिवदूत्यास्तु मूर्त्तिं ध्यायेद्विभूतये।
ध्यानमात्रादथैतस्या नरः कल्याणमाप्नुयात्॥
पूजनादक्षिराद्देवी सर्व्वान् कामान् ददाति च॥
यः शिवाविरुतं श्रुत्वा शिवदूतीं शिवप्रदाम्।
प्रणमेत् साधको भक्त्या तस्य कामाः करे स्थिताः॥
यदा जघान जगतां रक्तबीजं हिताय वै।
महादेवी महामाया तदास्याः कायतः सृता॥
दूतं प्रस्थापयामास शिवं शुभाय साम्बिका।
तेन सा शिवदूतीति देवैः सर्व्वैः प्रगीयते॥
हेमश्मश्रुश्च शान्ता च वेदमाता महोदरी।
कराला कामदा देवी भगाख्या भगमालिनी॥
भगोदरी भगाहारा भगलिङ्गा भगा तथा।
एता द्वादश योगिन्यः पूजने परिकीर्त्तिताः॥
एता द्वादश योगिन्यः शिवदूत्याः सदैव हि।
विचरन्ति स्वयं देवी यत्र यत्रैव गच्छति॥"
इति कालिकापुराणे उत्तरतन्त्रे ५० अध्यायः॥ प्रमाणानन्तरं वामने ५३ अध्याये मार्कण्डेयपुराणे देवीमाहात्म्ये रक्तबीजवधाख्याने च द्रष्टव्यम्॥

शिवद्रुमः, पुं, (शिवप्रियो द्रुमः।) बिल्ववृक्षः। इति राजनिर्घण्टः॥

शिवद्विष्टा, स्त्री, (शिवेन द्विष्टा तत्पूजनानर्हत्वात्।) केतकी। इति राजनिर्घण्टः॥

शिवधातुः, पुं, (शिवस्य धातुः।) पारदम्। पारदं शिववीर्य्यं स्यादिति दर्शनात्। गोदन्तमक्षिः। इति केचित्॥

शिवनाभिः, पुं, (शिवस्य नाभिरिव।) शिवलिङ्गविशेषः। यथा,—
"उत्तमं मध्यमधमं त्रिविधं लिङ्गमीरितम्।
चतुरङ्गुलमुत्सेधे रम्यवेदिकमुत्तमम्॥
उत्तमं लिङ्गमाख्यातं मुनिभिः शास्त्रकोविदैः।
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमधमं स्मृतम्॥
शिवनाभिमयं लिङ्गं प्रतिपूज्यं महर्षिभिः।
श्रेष्ठञ्च सर्व्वलिङ्गेभ्यस्तस्मात् पूज्यं विधानतः॥"
इति वीरमित्रोदयः॥

शिवपुरी, स्त्री, (शिवस्य पुरी।) काशी। इति हेमचन्द्रः॥

शिवप्रियं, क्ली, (शिवस्य प्रियम्।) रुद्राक्षम्। इति राजनिर्घण्टः॥ शिवस्य प्रियद्रव्ये त्रि॥

शिवप्रियः, पुं, (शिवस्य प्रियः।) वकवृक्षः। इति जटाधरः॥ स्फटिकः। धुस्तूरः। इति राजनिर्घण्टः॥

शिवप्रिया, स्त्री, (शिवस्य प्रिया।) दुर्गा। इति शब्दमाला॥

शिवमल्लकः, पुं, अर्ज्जुनवृक्षः। इति राजनिर्घण्टः॥
शिवमल्लिका, स्त्री, (शिवप्रिया मल्लिका।) वसूकः। इति राजनिर्घण्टः॥
शिवमल्ली, स्त्री, (शिवप्रिया मल्ली।) वकपुष्पः। इत्यमरः॥
शिवरसः, पुं, व्राव्हात् पर्य्युषितरसः। तत्पर्य्यायः। अम्लोदकजः २। अस्य गुणाः। दीपनत्वम्। मधुरत्वम्। अम्लत्वम्। अरुग्दाहदत्वम्। लघुतर्पणत्वञ्च। इति राजनिर्घण्टः॥
शिवरात्रिः, स्त्री, (शिवप्रिया रात्रिः।) शिवचतुर्दशी। यथा, कालमाधवीये स्कान्दे नागरखण्डम्।
"माघमासस्य शेषे या प्रथमे फाल्गुनस्य च।
कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्त्तिता॥"
अत्रैकस्यास्तिथेर्म्माघीयत्वफाल्गुनीयत्वे मुख्यगौणवृत्तिभ्यां अविरुद्धे। ततस्तु माघ्यनन्तरा चतुर्दशी शिवरात्रिः तस्यामुपवासः प्रधानम्।
"न स्नानेन न वस्त्रेण न धूपेन न चार्च्चया।
तुष्यामि न तथा पुष्पैर्यथा तत्रोपवासतः॥"
इति शङ्करोक्तेः॥*॥
स्कान्दे।
"ततो रात्रौ प्रकर्त्तव्यं शिवप्रीणनतत्परैः।
प्रहरे प्रहरे स्नानं पूजाश्चैव विशेषतः॥"
अत्र वीप्सया प्रहरचतुष्टयसाध्यं व्रतं प्रतीयते नरसिंहाचार्य्यधृतेश्वरसंहितायाम्।
"शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजकः।
सर्व्वं पूजाफलं हन्ति शिवरात्रिबहिर्म्मुखः॥*॥
संवत्सरप्रदीपे।
"दुग्धेन प्रथमं स्नानं दध्ना चैव द्वितीयके।
तृतीये च तथाज्येन चतुर्थे मधुना तथा॥"
ईशानसंहितायाम्।
"माघे कृष्णचतुर्दश्यां रविवारो यदा भवेत्।
भौमो वापि भवेद्यत्र कर्त्तव्यं व्रतमुत्तमम्॥
शिवयोगस्य योगेन तद्भवेदुत्तमोत्तमम्।
शिवरात्रिव्रतं नाम सर्व्वपापप्रणाशनम्।
आचाण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम्॥"
नागरखण्डे।
"उपवासप्रभावेण बलादपि च जागरात्।
शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया।
अक्षयान् लभते लोकान् शिवसायुज्यमाप्नुयात्॥"
पाद्मे।
"वर्षे वर्षे महादेवि नरो नारी पतिव्रता।
शिवरात्रौ महादेवं कामं भक्त्या प्रपूजयेत्॥"
ईशानसंहितायाम्
"एवमेव व्रतं कुर्य्यात् प्रति संवत्सरं व्रती।
द्वादशाब्दिकमेतद्धि चतुर्विंशाब्दिकं तथा।
सर्व्वान् कामानवाप्नोति प्रेत्य चेह च मानवः॥"
हेमाद्रिधृता स्मृतिः।
"प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी॥"
प्रदोषमाह वसिष्ठः।
"प्रदोषोऽस्तमयादूर्द्धं घटिकाद्वयमिष्यते॥"
ऊर्द्धमनन्तरम्। वायुपुराणे।
"त्रयोदश्यरगते सूर्य्ये चतुर्ष्वपि नाडिषु।
भूतविद्धा तु या तत्र शिवरात्रिव्रतञ्चरेत्॥"
ईशानसंहितायाम्।
"माघे कृष्णचतुर्दश्यामादिदेवो महानिशि।
शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः॥
तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः।
अर्द्धरात्रादधस्ताद्यैर्युक्ता यत्र चतुर्दशी॥
व्याप्ता सा दृश्यते यस्यां तस्यां कुर्य्यात् व्रतं नरः॥"
अत्र।
"महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः॥"
इति देवलोक्ता महानिशा ग्राह्या॥ घटिका एकदण्डः। एवञ्च यद्दिने प्रदोषनिशीथोभयव्यापिनी चतुर्दशी तद्दिने व्रतं उभयव्याप्यनुरोधात्। कालमाधवीयेऽप्येवम्। एतेन परदिने उभयव्याप्तित्वेऽपि पूर्व्वदिनसीयरात्रिद्वितीययामप्रभृतिचतुर्दशीसत्त्वे बहुप्रहरव्याप्तित्वेन पूर्व्वदिन एव व्रतमिति निरस्तम्। यदा तु पूर्व्वेद्युर्निशीथमात्रव्याप्तिः परेद्युः प्रदोषमात्रव्याप्तिस्तदा पूर्व्वेद्युर्व्रतम्। प्रधानकालव्याप्त्यनुरोधात्।
"पूर्व्वेद्युरपरेद्युर्व्वा महानिशि चतुर्दशी।
व्याप्ता सा दृश्यते यस्यां तस्यां कुर्य्यादव्रतं नरः॥"
इतीशानसंहितावचनाच्च॥
एतद्विषय एव भविष्यपुराणम्।
"अर्द्धरात्रात् पुरस्तात्तु जयायोगो भवेद्यदि।
पूर्व्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैः॥"
विष्णुधर्म्मोत्तरे।
"जयन्ती शिवरात्रिश्च कार्य्या भद्रजयान्विते।
कृत्वोपवासं तिथ्यन्ते तदा कुर्य्याच्च पारणम्॥"
तिथ्यन्ते पारणं जयन्तीमात्रपरं अत्र चतुर्दश्यामेव तत्।
"ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै
पूजितानि भवन्तीह भूतायां पारणे कृते॥"
इति स्कान्दात्।
"दिनमानप्रमाणेन या तु रात्रौ चतुर्दशी।
शिवरात्रिस्तु सा ज्ञेया चतुर्दश्यान्तु पारणम्॥"
इति गौतमीयाच्च।
यदा तु पूर्व्वदिने न निशीथव्याप्तिः परदिने प्रदोषमात्रव्यापिनी तदा परा ग्राह्या। प्रदोषव्यापिनीति प्रागुक्तत्वात् तिथेस्त्रिसन्ध्यव्यापित्वाच्च। एतद्विषय एव लिङ्गपुराणम्
"शिवरात्रिव्रते भूतां कामविद्धां विवर्जयेत्।
एकेनैवोपवासेन ब्रह्महत्यां व्यपोहति॥"
अत्रामावास्यायामेव पारणम्।
"शिवा घोरा तथा प्रेता सावित्री च चतुर्दशी।
कुहूयुक्तैव कर्त्तव्या कुहूमेव हि पारणम्॥"
इति वचनात्॥*॥
तदयं संक्षेपः। यद्दिने प्रदोषनिशीथोभयव्यापिनी चतुर्दशी तद्दिने व्रतम्। यदा तु पूर्व्वदुर्निशीथव्यापिनी परेद्युः प्रदोषमात्रव्यापिनी तदा पूर्व्वेद्युर्व्रतम्। यदा तु न पूर्व्वेदुर्निशीथव्याप्तिः परेद्युः प्रदोषव्यापिनीतदा परदिने। पारणन्तु परदिने चतुर्दशीलाभे चतुर्दश्यां तदलाभे अमावस्यायाम्। तत्र प्रयोगः॥*॥
प्रातरुदङ्मुखः तत् सदित्युच्चार्य्य सूर्य्यः सोम इति पठित्वा जलादीन्यादाय सङ्कल्पयेत्।
"मन्त्रेणानेन गृह्णीयान्नियमं भक्तिमान्नरः।
शिवरात्रिव्रतं ह्येतत् करिष्येऽहं महाफलम्।
निर्विघ्नमस्तु मे चात्र त्वत्प्रसादाज्जगत्पते॥"
इति शिवरहस्यात् शिवरात्रि इत्यादिना नियम्य।
"चतुर्दश्यां निराहारो भूत्वा शम्भो परेऽहनि
भोक्ष्येऽहं शुक्तिमुक्त्यर्थं शरणं मे भवेश्वर॥"
इति गरुडपुराणीयं पठेत्।
रात्रौ प्रथमप्रहरे प्रतिष्ठिते लिङ्गे अप्रतिष्ठिते वा प्रतिष्ठां विधाय पूजां कुर्य्यात्। ह्रीं अस्त्राय फड़िति पादघातत्रयेण विघ्नास्त्रिःसार्य्य तेनैव तालत्रयेण करच्छोटिकया च दशदिग्बन्धनं कृत्वा भूतशुद्धिं विधाय ह्रां हृदयाय नम इत्यादिना षड़ङ्गानि न्यस्य ह्रीं इति मन्त्रेण प्राणायामं विधाय पूजयेत्। पार्थिवलिङ्गे चेत्तदा वक्ष्यमाणपूजाविधिना पूजयेत्। तत्रायं विशेषः। ह्रीं ईशानाय नम इति प्रथमप्रहरे दुग्धेन स्नापयित्वा पुनर्जलेन स्नापयित्वा।
"शिवरात्रिव्रतं देव पूजालयपरायणः।
करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर॥"
इत्यनेनार्घ्यं दत्त्वा गन्धादिभिः संपूज्य मूलमन्त्रं जपित्वा प्रणम्य गीतनृत्यादिभिस्तं प्रहरं नयेत्॥
"तत्रानं तज्जपः स्नानं तत्कथाश्रवणादिकम्।
उपवासश्चतौ ह्येते गुणाः प्रोक्ता मनीषिभिः॥"
इति देवीपुराणे सामान्यतः श्रवणात् अत्रापि तथा॥*॥ द्वितीयप्रहरे तु विशेषः। ह्रीं अघोराय नम इति दध्ना स्नानम्। अर्घ्यमन्त्रस्तु॥
"नमः शिवाय शान्ताय सर्व्वपापहराय च।
शिवरात्रौ ददाम्यर्घ्यं प्रसीद उमया सह॥"*॥
तृतीयप्रहरे तु। ह्रीं वामदेवाय नम इति घृतेन स्नानम्। अर्घ्यमन्त्रस्तु।
"दुःखदारिद्र्यशोकेन दग्धोऽहं पार्व्वतीश्वर।
शिवरात्रौ ददाम्यर्घ्यमुमाकान्त गृहाण मे॥*॥
चतुर्थप्रहरे तु। ह्रीं सद्योजाताय नम इति मधुना स्नानम्। अर्घ्यमन्त्रस्तु।
"मया कृतान्यनेकानि पापानि हर शङ्कर।
शिवरात्रौ ददाम्यर्घ्यं उमाकान्त गृहाण मे॥"
ततो नमः शिवाय इति मूलमन्त्रं जपित्वा प्रभातेऽविघ्नेन इत्यादिवक्ष्यमाणमन्त्रात् पठेत्॥
तथा च गरुडपुराणम्।
"मूलमन्त्रं ततो जप्त्वा प्रभाते तत् समापयेत्।
अविघ्नेन व्रतं देव त्वत्प्रसादात् समर्पितम्॥
क्षमस्व जगतां नाथ त्रैलोक्याधिपते हर।
यन्मयाद्य कृतं पुण्यं तद्रुद्रस्य निवेदितम्॥

त्वत्प्रसादान्मया देव व्रतमद्य समर्पितम्।
प्रसन्नो भव मे श्रीमन् मदभूतिं प्रतिपद्यताम्।
त्वदालोकनमात्रेण पवित्रोऽस्मि न संशयः॥"
परदिने ब्राह्मणान् भोजयित्वा चतुर्दशीलाभे तत्र तदलाभे अमावस्यायां पारणं कुर्य्यात्। तत्र मन्त्रः।
"संसारक्लेशदग्धस्य व्रतेनानेन शङ्कर।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव॥"*॥
तत्र पार्थिवशिवलिङ्गपूजाविधिः। तत्र शिववाक्यं स्कान्दे।
"विप्रस्य तु सदैवाहं शुचेरप्यशुचेरपि।
गृह्णन् बलिं प्रदास्यामि विप्राणामिव दर्शनात्॥
बलिं पूजाम्। तथा,
"शूद्रः कर्म्माणि यो नित्यं स्वीयानि कुरुते प्रिये।
तस्याहमर्च्चां गृह्णामि चन्द्रखण्डविभूषिते॥"
तथा,
"नमोऽन्तेन शिवेनैव स्त्रीणां पूजा विधीयते॥"
एवकारेण प्रणवनिवृत्तिः। एवं शूद्रस्यापि। तथा नृसिंहतापनीये। "सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् स मृतोऽधो गच्छति इति।" नेच्छन्ति पर्य्यन्तं पराशरभाष्येऽपि लिखितम्। गोविन्दभट्टधृतम्।
"स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्विजः।
शूद्रो नरयमाप्नोति ब्राह्मणः शूद्रतामियात्॥"
गौतमः।
"रात्रावुदङ्मुखः कुर्य्यात् दैवकार्य्यं सदैव हि।
शिवार्च्चनं सदाप्येवं शुचिः कुर्य्यादुदङ्मुखः॥"
सदा दिवाराची। अत्र हेतुमाह रुद्रयामले।
"न प्राचीमग्रतः शम्भोर्नोदीचीं शक्तिसंस्थिताम्।
न प्रतीचीं यतः पृष्ठमतो दत्तं समाश्रयेत्॥"
यजमानः शम्भोः प्राचीमवस्थितये न समाश्रयेत् शम्भोर्जगत्संहारकस्याग्रतः सांमुख्यात् पञ्चवक्त्रपक्षे प्रधानं वक्त्रं प्राच्यवस्थितम्॥
एकवक्त्रपक्षे सुतरां तथा। तद्रूपमाह भविष्यपुराणम्।
"सौम्यं मौलीन्दुभृत् वक्त्रं एकवक्त्रं चतुर्भुजम्
शिवरूपं गृहे कुर्य्यात् प्रासादे वाप्यनिन्दितम्॥
अत्राग्रे पूजानिषेधात् देवाग्रे स्वस्य चाग्रे प्राची प्रोक्ता गुरुक्रमैः। इत्यस्य न विषयः। किन्त्वभिधानादिप्रसिद्धा प्राची ग्राह्या। एतदनुसाराद्दक्षमाणपूर्व्वाद्याग्नेय्यन्तपूजा। अतएव तन्त्रान्तरम्।

"यत्रैव भानुस्तु वियत्युदेति
प्राचीति तां वेदविदो वदन्ति।
तथा पुरः पूजकपूज्ययोश्च
सदागमज्ञाः प्रवदन्ति तान्तु॥"

एवञ्च देवतान्तरपूजा पूर्व्वाह्णे प्राङ्मुखेन सायं पश्चिमाभिमुखेन रात्रावुदङ्मुखेन कार्य्या।

"प्राक्पश्चिमोदगास्यस्तु प्रातः सायं निशासु च॥"
इति वचनात्॥
इति वाचस्पतिमिश्राः। मैवं पूजा रत्नाकरोक्तभविष्यपुराणीयसमाचारसूर्य्यमन्त्रप्रस्ताव एव प्रागादिदिङ्नियमाभिधानात्। व्यवहारोऽपि अत्र न तथेति॥*॥ लिङ्गपुराणे।
"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः।
तस्मान्मृदापि कर्त्तव्यं ललाटेऽपि त्रिपुण्ड्रकम्॥
नन्दिपुराणे।
"आयुष्मान् बलवान् श्रीमान् पुत्रवान् धनवान् सुखी।
वरमिष्टं लभेल्लिङ्गं पार्थिवं यः समार्च्चयेत्।
तस्मात्तु पार्थिवं लिङ्गं ज्ञेयं सर्वार्थसाधकम्॥"
भविष्ये।
"मृन्नवनीशकृत्पिण्डं ताम्रकांस्यमयं तथा।
स्थापयित्वा लिङ्गं सकृत् पूज्य वसेत् कल्पायुतं दिवि॥
वार्च्चं वित्तप्रदं लिङ्गं स्फाटिकं सर्वकामदम्।
नर्म्मदागिरिजं श्रेष्ठमन्यदपि हि लिङ्गवत्॥"
लिङ्गवत् लिङ्गाकारम्। कालकौमुद्याम्।
"अत्यादल्पपरीमाणं न लिङ्गं कुत्रचिद्वरः।
कुर्व्वीताङ्गुष्ठतो ह्रस्वं न कदाचित् समाचरेत्॥
अत्रोऽङ्गोतिरत्निका। अङ्गुष्ठतः इङ्गुष्ठपर्व्वग्रन्थितः।
"अङ्गुष्ठाङ्गुलिमानन्तु यत्र यत्रोपदिश्यते।
तत्र तत्र इङ्गुष्ठपर्व्वग्रन्थिभिर्मिनुयात् सदा॥"
इति छन्दोगपरिशिष्टात्॥
शिवधर्म्मे।
"सहस्रमर्च्चयेल्लिङ्गं निरयं स न गच्छति।
रुद्रलोकमवाप्नोति भुक्त्वा भोगाननुत्तमान्॥"
तथा।
"वालुकानि च लिङ्गानि सहस्राणि च कारयेत्
सहस्रमर्च्चनात् सोऽपि लभते वाञ्छितं फलम्॥"
ततश्चामुकांतिथावारभ्यामुकलाभकामः सहस्रमितपार्थिवशिवलिङ्गपूजनमिति यथास्थाने वाक्ये देयम्॥*॥ ब्रह्मपुराणे।
"यावन्न दीयते चार्घ्यं भास्कराय निवेदितम्।
तावन्न पूजयेद्विष्णुं शङ्करं वा महेश्वरीम्॥"
राघवभट्टधृतम्।
"सर्व्वत्रैव प्रशस्तोऽजः शिवसूर्य्यार्च्चनं विना॥"
अजः शङ्खः। अग्निपुराणे।
"तस्मिन्नैः पूजयेन्मन्त्रैः सर्व्वदेवान् पृथक्पृथक्।
ध्यात्वा प्रणवपूर्व्वन्तु तत्तन्नाम्ना सुसमाहितः।
नमस्कारेण मन्त्रेण पुष्पाणि विन्यसेत् पृथक्॥"
देवीपुराणे।
"मृदाहरणसंघट्टप्रतिष्ठाह्वानमेव च।
स्नपनं पूजनञ्चैव विसर्ज्जनमतः परम्॥
हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्।
पशुपतिः शिवश्चैव महादेव इति क्रमात्॥"
अत्र पूर्व्वोक्तसप्तकर्म्माणि परवचनोक्तसप्तनामभिः क्रियानुरूपविभक्तिमन्नियोजयेत्

कार्य्याणि। अदृष्टार्थयोरर्थक्रमासम्भवेन पाठक्रमादेव आवाहनात् प्राक् प्रतिष्ठा आह कुशासनदानवत्॥*॥ तत्रानुष्ठानम्। हराय नम इति मृदाहरणम्। महेश्वराय नम इति संघट्टनम्। शूलपाणे इह सुप्रतिष्ठितो भव इति प्रतिष्ठा। ध्यायेन्नित्यमित्यादिना ध्यात्वा पिनाकधृक् इहागच्छ इत्याद्यावाहनम्। पशुपतये नमः इति स्नपनम्। एतत् पाद्यं नमः शिवाय नम एवमर्घ्यादिना पूजयेत्। विसर्ज्जनात् पूर्व्वं भविष्यपुराणोक्तं स्वभावसिद्धप्राच्यैशान्यादिदिक्षु वामावर्त्तेन पूजनम्। यथा। सर्वाय क्षितिमूर्त्तये नमः। भवाय जलमूर्त्तये नमः। रुद्राय अग्निमूर्त्तये नमः। उग्राय वायुमूर्त्तये नमः। भीमाय आकाशमूर्त्तये नमः। पशुपतये यजमानमूर्त्तये नमः। महादेवाय सोममूर्त्तये नमः। ईशानाय सूर्य्यमूर्त्तये नमः।
"मूर्त्तयोऽष्टौ शिवस्यैताः पूर्वादिक्रमयोगतः।
आग्नेय्यन्ताः प्रपूज्यास्ता वेद्यां लिङ्गे शिवं यजेत्॥"
ततो महादेव चमस्व इति संहारमुद्रया विसर्ज्जयेत्॥*॥ नन्दिपुराणे।
"गोभूतिलहिरण्यादिवलिपुष्पनिवेदने।
ॐ यो नमः शिवायेति मन्त्रः सर्व्वार्थसाधकः॥
सर्व्वमन्त्राधिकत्वायमोङ्काराद्याः षडक्षरः।
तन्मन्त्रजापी तत्कर्म्मरतस्तद्गतमानसः।
निष्कामः पुरुषो राजन् स रुद्रपदमश्नुते॥"
भविष्ये पञ्चाक्षरमुपक्रम्य।
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपिवा।
महापातकयुक्तो वा मन्त्रस्यास्य जपे यथा।
अधिकारी भवेत् सर्व्व इति देवोऽब्रवीच्छिवः॥"
इति तथेत्यर्थः॥ पूर्व्वोक्तयथापदानुरोधात्। तेन यथाधिकारी भवेत्तथाब्रवीदित्यर्थः। तथा,
"सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः।
पतन्तं त्रायते यस्मादतीव नरकार्णवात्॥
शिवमुद्दिश्य यद्दत्तं सर्व्वं कारणकारणम्।
तदनन्तफलं दातुर्भवतीह किमद्भुतम्॥
दत्त्वा नैवेद्यवस्त्रादि नाददीत कदाचन।
त्यक्तव्यं शिवमुद्दिश्य तदादाने न तत्फलम्॥"
आदाने ग्रहणे। शिवधर्म्मे।
"तस्मात् पुष्पैः फलैः पत्रैस्तोयैरपि च यत्फलम्
तदनन्तफलं ज्ञेयं भक्तिरेवात्र कारणम्॥"
भविष्ये।
"लिङ्गानुलेपनं कार्य्यं दिव्यगन्धैः सुमन्त्रिभिः।
वर्षकोटिशतं दिव्यं शिवलोके महीयते॥"
शिवधर्म्मे।
"तस्मात् पुष्यप्रदानेन लिङ्गेषु प्रतिमासु च।
अशीतिवर्षकोटीनां दुर्गतिं न नरो व्रजेत्॥"
स्कान्दे।
"शुष्कान्यपि च पत्राणि शीर्णस्य सदैव हि"
दातव्यानीति शेषः। भविष्ये।
"धुस्तूरकैश्च यो लिङ्गं सकृत् पूजयते नरः।
स गोसहस्रफलं प्राप्य शिवलोके महीयते॥

विल्वपत्रैरखण्डैश्च यो लिङ्गं पूजयेत् सकृत् ।
सर्व्वपापैर्विनिर्मुक्तः शिवलोके महीयते ॥"
तथा ।
"सर्व्वकामप्रदं विल्वं दारिद्र्यस्य प्रणाशनम् ।
विल्वपत्रात् परं नास्ति येन तुष्यति शङ्करः ॥"
तथा ।
"केशकीटापविद्धानि निशि पर्य्युषितानि च ।
स्वयं पतितपुष्पाणि त्यजेदुपहतानि च ॥"
तथा ।
"देवदारुममेतञ्च सर्ज्जश्रीवासकुन्दुरम् ।
श्रीफलं चाज्यमिश्रन्तु दत्त्वाप्नोति परां गतिम्"
मर्ज्जः राजरसः । श्रीवासः सरलद्रवः । कुन्दुरुः गैरेयम् ।
"एभ्यः सौगन्धिकं धूपं षट्सहस्रगुणोत्तरम् ।
अगुरुं शतसाहस्रं द्विगुणञ्चासितागुरुम् ।
गुग्गुलुं घृतसंयुक्तं साक्षात् गच्छति शङ्करः ॥"
तथा ।
"तैलेनापि हि यो दद्यात् घृताभावेन मानवः ।
तेन दीपप्रदानेन शिववद्राजते भुवि ॥"
नन्दिकेश्वरे ।
"अथ भक्त्या शिवं पूज्य नैवेद्यमुपकल्पयेत् ।
यद्दयदेवात्मनः श्रेयस्तत्तदीशाय कल्पयेत् ॥"
शालितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम् ।
शिवाय तं चरुं दद्यात् चतुर्दश्यां विशेषतः ॥"
प्रस्थमानं प्रागुक्तम् । शिवसर्व्वस्वे स्कान्दम् ।
एकमाम्रफलं पक्वं यः शम्भोर्विनिवेदयेत् ।
वर्षाणामयुतं भोगैः क्रीड़ते स शिवे पुरे ॥
एकं मोचाफलं पक्वं यः शिवाय निवेदयेत् ।
वर्षलक्षं तथाभोगैः शिवलोके महीयते ॥"
शिवपुराणे ।
"नैवेद्यं घृतसंयुक्तं मधुपर्कं निवेदयेत् ।
अग्निष्टोमस्य यज्ञस्य फलमाप्नोति मानवः ॥"
शिवसर्व्वस्वे स्कान्दम् ।
"परिपक्वं सुसंसृष्टमाज्यसिक्तं सुसंस्कृतम् ।
शिवाय मांसं दत्त्वा तु शृणु यत् फलमाप्नुयात् ॥
अश्वमेधफलदानेन यत् फलं परिकीर्त्तितम् ।
तत् फलं प्राप्नुयात्तित्यं सर्व्वं मांसनिवेदनात् ॥"
शिवधर्म्मे ।
"लिङ्गवेदी भवेद्देवी लिङ्गं साक्षात् महेश्वरः ।
तयोः संपूजनात् स्यातां देवौ देवस्य पूजितौ ॥"
देवीपुराणे ।
"सद्यं व्रजेत्ततोऽसद्यं प्रणालं नैव लङ्घयेत् ।
एकीभूतमना रुद्रे यः कुर्य्यात् त्रिः प्रदक्षिणम् ॥
क्षिप्रस्तेन भवग्रन्थिर्न तस्य पुनरुद्भवः ॥"
भविष्ये ।
"जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवेशे सर्व्वान् कामानवाप्नुयात् ॥"
लिङ्गपुराणे ।
"गन्धपुष्पनमस्कारैर्मुखवाद्यैश्च सर्व्वशः ।
यो मामर्च्चयते तत्र तदा तुष्याम्यहं सदा ॥"
महाभारते ।
"सर्व्वलक्षणहीनोऽपि युक्तो वा सर्व्वपातकैः ।
सर्व्वं तरति तत् पापं भावयन् शिवमात्मना ।
राघवभट्टधृतम् ।
"अधोमुखे वामहस्ते ऊर्द्ध्वास्यं दक्षहस्तकम् ।
चिह्नाङ्गुलीरङ्गुलीभिः संगृह्य परिवर्त्तयेत् ।
प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते ॥"
अर्पणे आत्मनीति शेषः । स्कान्दे ।
"निर्म्माल्यं यो हि मङ्क्त्वा शिरसा धारयिष्यति ।
अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः ॥
नरके पच्यते घोरे तिर्य्यग्योनौ च जायते ।
ब्रह्महापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत् ।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते ॥"
शुचिः स्नानादिनेति शेषः । एवञ्च ।
"सृष्ट्वा रुद्रस्य निर्म्माल्यं सवासा आप्लुतः शुचिः ॥"
इति कालिकापुराणीयमशुचिविषयम् ॥
अनुपनीतविषयमिति श्रीदत्तः । वङ्गचण्डेश्वरपरिशिष्टम् ।
"अयाच्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम् ॥
कालिकापुराणे ।
"यो यद्देवार्च्चनरतः स तन्नैवेद्यभक्षकः ।
केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत् ॥"
इति तिथ्यादितत्त्वम् ॥*॥
अन्यच्च ।
ब्रह्मोवाच ।
"शिवरात्रिव्रतं वक्ष्ये कथाञ्च सर्व्वकामदाम् ।
यथा च गौरी भूतेशं पृच्छति स्म परं व्रतम् ॥
श्रीमहादेव उवाच ।
माघफाल्गुनयोर्म्मध्ये या च कृष्णा चतुर्दशी ।
तस्यां जागरणाद्रुद्रः पूजितो भुक्तिमुक्तिदः ॥
कामयुक्तो हरः पूज्यो द्वादश्यामेव केशवः ।
उमोपितैः पूजितः सन्नरकात्तारयेत्तथा ॥
निषादस्वार्व्बुदे राजा पापी सुन्दरसेनकः ।
स कुक्कुरैकमंयुक्तो मृगान् हन्तुं वनं गतः ॥
मृगादिकमसंप्राप्य क्षुत्पिपासार्दितो गिरौ ।
रात्रौ तड़ागतीरे स निकुञ्जे जागदास्थितः ॥
तत्रास्ति लिङ्गं स्वं रक्तच्छरीरं चाच्चिपत्ततः ।
पर्णानि चापतन्मूर्द्ध्नि लिङ्गस्यैवं न जानतः ॥
तेन धूलिनिरोधाय चित्तं नीरञ्च लिङ्गके ।
शरः प्रमादेनैकस्तु प्रच्युतः करपल्लवात् ॥
जानुभ्यामवनीं गत्वा लिङ्गं सृष्ट्वा गृहीतवान् ।
एवं स्नानं सपूजनं जागरोऽभवत् ॥
प्रातर्गृहागतो भार्य्यादत्तान्नं भुक्तवान् स च ।
काले मृतो यमभटैः पाशैर्बद्धा तु नीयते ॥
तदा मम गणैर्युद्धे जित्वा मुक्तीकृतः स च ।
कुक्करेण सहैवाभूद्गणो मत्पार्श्वगोऽमलः ॥
एवमज्ञानतः पुण्यं ज्ञानात् पुण्यमथाक्षयम् ।
त्रयोदश्यां शिवं पूज्य कुर्य्यात्तन्नियमं व्रती ॥
प्रातर्देव चतुर्दश्यां जागरिष्याम्यहं निशि ।
पूजां दानं जपं होमं करिष्याम्यात्मशक्तितः ॥
चतुर्दश्यां निराहारो भूत्वा शम्भो परेऽहनि ।
भोक्ष्येऽहं मुक्तिमुक्त्यर्थं शरणं मे भवेश्वर ॥
पञ्चगव्यामृतैः स्नात्वा अन्तकाले गुरुं स्मितः ।
ॐ नमो नमः शिवाय गन्धाद्यैः पूजयेद्धरम् ॥
तिलतण्डुलव्रीहींश्च जुहुयात् स्वघृतं चरुम् ।
हुत्वा पूर्णाहुतिं दद्यात् शृणुयाद्गीतमत्कथाम् ॥
अर्द्धरात्रे त्रियामे च चतुर्थे च पुनर्यजेत् ।
मूलमन्त्रं तथा जप्त्वा प्रभाते च क्षमापयेत् ॥
अविघ्नेन व्रतं देव त्वत्प्रसादात् समर्पितम् ।
क्षमस्व जगतां नाथ त्रैलोक्याधिपते शिव ॥
यन्मयाद्य कृतं पुण्यं तच्छिवस्य निवेदितम् ।
त्वत्प्रसादान्मया देव व्रतमद्य समर्पितम् ॥
प्रसन्नो भव मे श्रीमन् मदगृहं प्रतिगम्यताम् ।
तदालोकनमात्रेण पवित्रोऽस्मि न संशयः ।
भोजयेद्ब्राह्मणान्निष्ठांश्च वस्त्रच्छत्रादिकं ददेत् ॥
देवादिदेव भूतेश लोकानुग्रहकारक ।
यन्मया श्रद्धया दत्तं प्रीयतां तेन मे प्रभुः ॥
इति क्षमाप्य च यतीन् कुर्य्यात् द्वादशवार्षिकम्
कीर्त्तिश्रीपुत्रराज्यादि प्राप्य शैवं पुरं व्रजेत् ॥
द्वादशस्वपि मासेषु प्रकुर्य्यादिह जागरम् ।
यतीन् द्वादश संपूज्य दीपदः स्वर्गमाप्नुयात् ॥"
इति गारुड़े शिवरात्रिव्रतकथा १२४ अध्यायः॥
शिवलिङ्ग, क्ली, (शिवस्य लिङ्गम् ।) महादेवस्य शेफः । तस्योत्पत्तिर्यथा, —
"तत्रापि गत्वा मदनो ददर्श हृषकेतनम् ।
दृष्ट्वा प्रहर्त्तुकामोऽस्य ततः स प्राद्रवद्धरः ॥
ततो दारुवनं घोरं मदनाभिस्मृतो हरः ।
विवेश ऋषयो यत्र सपत्नीका व्यवस्थिताः ॥
ते चापि ऋषयः सर्व्वे दृष्ट्वा मूर्ध्ना नताभवन् ।
ततस्ता[illegible]ह भगवान् भिक्षां मे प्रतिदीयताम्
ततस्त[illegible]ाननस्तस्थुः सर्व्व एव महर्षयः ।
तदाश्रमाणि पुण्यानि परिचक्राम नारद ! ॥
तं प्रविष्टं तदा दृष्ट्वा भार्गवात्रेययोषितः ।
प्रत्योभमगमन् सर्व्वा हीनसत्त्वाः समन्ततः ॥
ऋते त्वरुन्धतीमेनामनसूयाञ्च भाविनीम् ।
एताभ्यां भर्त्तृपूजासु कृतं वै सुस्थिरं मनः ॥
ततः संक्षुभिताः सर्व्वा यत्र यान्ति महेश्वरः ।
तत्र प्रयान्ति कामार्त्ता मदविह्वलितेन्द्रियाः ॥
त्यक्ताश्रमाणि शून्यानि स्वानि ता मुनियोषितः ।
अनुजग्मुर्यथा मत्तं करिणं इव कुञ्जरम् ॥
ततस्तु ऋषयो दृष्ट्वा भार्गवाङ्गिरसो मुने ।
क्रोधान्विताब्रुवन् सर्व्वे लिङ्गोऽस्य पततां भुवि
ततः पपात देवस्य लिङ्गं पृथ्वीं विदारयत् ।
अन्तर्द्धानं जगामाथ त्रिशूली नीललोहितः ॥
ततस्त्वपतितं लिङ्गं विभिद्य वसुधातलम् ।
रसातलं विवेशाशु ब्रह्माण्डं चोर्द्धतोऽभिनत् ॥
ततश्चाल पृथिवी गिरयः सरितो नगाः ।
पातालभुवनाः सर्व्वे जङ्गमाजङ्गमाः स्थिताः ॥
संक्षुब्धान् भुवनान् दृष्ट्वा भूर्लोकादीन् पितामहः ।
जगाम माधवं द्रष्टुं क्षीरोदं नाम सागरम् ॥
तत्र दृष्ट्वा हृषीकेशं प्रणिपत्य च भक्तितः ।
उवाच देव भुवनाः किमर्थं क्षुभिता विभो ॥

अथोवाच हरिर्ब्रह्मन् शार्ङ्गं लिङ्गं महर्षिभिः ।
पातितन्तस्य भारार्त्ता सञ्चचाल वसुन्धरा ॥
ततस्तदद्भुतमयं श्रुत्वा देवः पितामहः ।
तत्र गच्छामि देवेश एवमाह पुनः पुनः ॥
ततः पितामहो देवः केशवश्च जगत्पतिः ।
आजगाम तमुद्देशं यत्र लिङ्गं भवस्य तत् ॥
ततोऽनन्तं हरिर्लिङ्गं दृष्ट्वारुह्य खगेश्वरम् ।
पातालं प्रविवेशाथ विस्मयात्त्वरितो विभुः ॥
ब्रह्मा पद्मविमानेन ऊर्द्धमाक्रम्य सर्व्वगः ।
नैवान्तमलभद्ब्रह्मा विस्मितः पुनरागतः ॥
विष्णुर्गत्वाय पातालं समलोकपरायणः ।
चक्रपाणिर्विनिष्क्रान्तो लेभेऽन्तं न महामुने ॥
विष्णुं पितामहश्चाह हरिर्ब्रह्माणमाह च ।
नमोऽस्तु ते शूलपाणे नमोऽस्तु हयभध्वज ।
जीमूतवाहन कवे सर्व्वास्यक शङ्कर ॥
महेश्वर हरेशान सुवर्णाक्ष हृषाकपे ।
दक्षयज्ञक्षयकर काल रुद्र नमोऽस्तु ते ॥
त्वमादिरस्य जगतस्त्वं मध्यं परमेश्वरः ।
भवानन्तश्च भगवान् सर्व्वगस्त्वं नमोऽस्तु ते ॥

पुलस्त्य उवाच ।

एवं संस्तूयमानस्तु तस्मिन् दारुवने हरः ।
सुरूपो तार्विदं वाक्यमुवाच वदतां वरः ॥

हर उवाच ।

किमर्थं देवतानाथौ परिभूतक्रमन्त्विह ।
मां स्तुवाते भृशासुखं कामतापितविग्रहम् ॥

देवावूचतुः ।

तवाङ्गपातितं लिङ्गं यदेतद्भुवि शङ्कर ।
एतत् प्रगृह्यतां भूयस्ततो देव वदावहे ॥

हर उवाच ।

यद्यर्चयन्ति त्रिदशा मम लिङ्गं सुरोत्तमौ ।
तदेतत् प्रतिगृह्णीयात् नान्यथेति कथञ्चन ॥
ततः प्रोवाच भगवानेवमस्त्विति केशवः ॥
ब्रह्मा स्वयञ्च जग्राह लिङ्गं कनकपिङ्गलम् ।
ततश्चकार भगवांश्चातुर्व्वर्ण्यं हरार्च्चने ॥
शास्त्राणि चैषां मुख्यानि नानोक्तिविधि-
तानि च ।
आद्यं शैवं परिख्यातमन्यत् पाशुपतं मुने ॥
तृतीयं कालवदनं चतुर्थञ्च कपालिनम् ।
शैव आसीत् स्वयं शक्तिर्वह्निष्ठस्य प्रियः सुतः ॥
तस्य शिष्यो बभूवाथ गोपायन इति श्रुतः ।
महापाशुपतस्त्वासीद्भारद्वाजस्तपोधनः ॥
तस्य शिष्योऽप्यभूद्राजा ऋषभः सोमकेश्वरः ।
कालास्यो भगवानासीदापस्तम्बस्तपोधनः ॥
तस्य शिष्यो वको वैश्यो नाम्ना क्राथेश्वरो
मुने ।
महाव्रती च धनदस्तस्य शिष्यश्च वीर्य्यवान् ॥
कुन्दोदर इति ख्यातो जात्या शूद्रो महातपाः ।
एवं स भगवान् ब्रह्मा पूजनाय शिवस्य च ॥
कृत्वा तु चातुराश्रम्यं स्वमेव भवनं गतः ।
गते ब्रह्मणि सर्व्वोऽपि तपः संस्थाय तं तदा ॥
लिङ्गं चित्रवने सूक्ष्मं प्रतिष्ठाप्य चचार ह ॥"

इति वामनपुराणे ६ अध्यायः ॥*॥

अपिच ।

"ततः सृष्टिं चिन्तयतो ब्रह्मणो मोहितस्य च ।
बालिखिल्याः ससुत्पन्नास्तपस्तप्तुं समारभन् ॥
दिव्यं वर्षसहस्रं वै तेपुस्ते दुश्चरं तपः ।
ततः कालेन महता पार्व्वती च पतिव्रता ॥
तेषां तपः समालोक्य चाति देवी सुदुःखिता ।
प्रसाद्य देवदेवेशं शङ्करं प्राह सुव्रता ॥
क्लिश्यन्ति बालिखिल्याश्च प्रसादार्थं तव प्रभो ।
एतेभ्योऽपि प्रियं देव विधिवत् कुरु सेवया ॥
तच्छ्रुत्वा वचनं देव्याः पिनाकी परचिन्तकः ।
प्रोवाच कान्ते कालश्च वचनं प्रियया सह ॥
न वेत्सि देवि तत्त्वेन धर्म्मस्य गहना गतिः ।
नैते धर्म्मं विजानन्ति यथार्थं धर्म्मचारिणः ॥
न दास्यामि वरं तेभ्यो यस्मात्ते मूढबुद्धयः ।
एतत् श्रुत्वाब्रवीत् देवी मा मैवं शंसितव्रताः ॥
ततो रुद्र उवाचेदं देवीं देवः स्मितानन्नः ।
तिष्ठ त्वमत्र यास्यामि यत्रैते मुनिसत्तमाः ॥
इत्युक्ता तु ततो देवी शङ्करेण महात्मना ।
गच्छन्तं त्वाह सुदिता भर्त्तारं भुवनेश्वरी ॥
यत्र ते मुनयः सर्व्वे काष्ठलोष्टसमाश्रिताः ।
तान् विलोक्य ततो देवी नग्नः सर्व्वाङ्गसुन्दरः ॥
वनमालाकृतापीड़ो युवा भिक्षाकपालभृत् ।
आश्रमे पर्य्यटन् भिक्षां मुनीनां नियतात्मनाम् ॥
देहि भिक्षां ततश्चोक्ता स भ्रमन्नाश्रमं ययौ ।
तं विलोक्याश्रमगतं योषितो ब्रह्मवादिनाम् ॥
सकौतुकस्वभावेन तस्य रूपेण मोहिताः ।
प्रोचुः परस्परं कार्य्यमस्ति पश्याम भिक्षुकम् ॥
परस्परमितीवोक्ता गृह्य मूलफलं बहु ।
गृहाण भिक्षामूचुस्तां देवं मुनियोषितः ॥
तस्मै दत्त्वैव तां भिक्षां पप्रच्छुस्ताः सरातुराः ।

नार्य्य ऊचुः ।

कोऽसौ नाम व्रतविधिस्तया तापस सेव्यते ।
यत्र नग्नेन लिङ्गेन वनमालाविभूषितः ॥
भवान् वै तापसो ह्यद्य ह्यद्याः स्त्री यदि
मन्यसे ।

इत्युक्तास्तापसस्ताभिः प्रोवाच हसिताननः ॥
इदं मम व्रतं किञ्चिन्न रहस्यं प्रकाश्यते ।
शृण्वन्ति बहवो यत्र तत्र तत्र न विद्यते ॥
तस्य व्रतस्य सुभगा इति मत्वा भविष्यथ ।
एवमुक्तास्तदा तेन ता: प्रत्यूचुस्तदा मुनिम् ॥
ततोऽभ्येत्य गमिष्यामो मुने नः कौतुकं महत्
इत्युक्ता तास्तदातीव जगृहुः पाणिपल्लवैः ॥
काचिच्चकर्ष बाहुभ्यां काचित् कामपरा तथा
जानुभ्यामपरा नाथां कचेषु ललनापरा ॥
अपरा तु कटीवस्त्रे चापरा पादयोरपि ।
क्षोभं विलोक्य मुनय आश्रमेषु स्वयोषिताम् ॥
हन्यतामिति संभाष्य काष्ठपाषाणपाण्यः ।
पातयन्ति च देवस्य लिङ्गमुद्वध्य भीषणम् ॥
पातिते तु ततो लिङ्गे गतोऽन्तर्द्धानमीश्वरः ।
देव्या स भगवान् रुद्रः कैलासं नगमाश्रितः ॥
पतिते देवदेवस्य लिङ्गे नष्टे चराचरे ।
क्षोभो बभूव सुमहान्मुनीनां भावितात्मनाम् ॥
उवाचैको मुनिवरस्तत्र बुद्धिमतां वरः ।
विरिञ्चिं शरणं यामः स हि शास्यति चेष्टि-
तम् ॥
एवमुक्ता सर्व्व एव ऋषयो लज्जिता भृशम् ।
ब्रह्मणः सदनं जग्मुर्देवैः सह निषेवितम् ॥

ऋषय ऊचुः ।

अज्ञानाच्च कृतं ब्रह्मन्नस्माभिर्ज्ञानदुर्ब्बलैः ।
तस्योपशमने यत्नं कुरु सर्व्वोपकारक ॥

ब्रह्मोवाच ।

गच्छामः शरणं देवं शूलपाणिं त्रिलोचनम् ।
प्रसादाद्देवदेवस्य भविष्यथ यथा पुरा ॥
इत्युक्ता ब्रह्मणा सार्द्धं कैलासं गिरिमुत्तमम् ।
ददृशुस्ते समासीनमुमया सहितं हरम् ॥
ततः स्तोतुं समारब्धो ब्रह्मा लोकपितामहः ।
अनन्ताय नमस्तुभ्यं वरदाय पिनाकिने ॥
एवं स्तुतो महादेवो ब्रह्मणा ऋषिभिस्तथा ।
उवाच मां मा व्रजतु लिङ्गं भोः पुरतः पुनः ॥
क्रियतां महत्तः शीघ्रं येन मे प्रीतिरुत्तमा ।
भविष्यति प्रकृष्टा या लिङ्गस्यास्य न संशयः ॥
ये लिङ्गं पूजयिष्यन्ति मम भक्तिममाश्रिताः ।
न तेषां दुर्लभं किञ्चिद् भविष्यति हितं
फलम् ॥"

इति वामने ४२ अध्यायः ॥*

कुरुक्षेत्रस्थितानि लिङ्गानि यथा,—

सनत्कुमार उवाच ।

"वटस्य दक्षिणे भागे चक्रतीर्थं प्रकीर्त्तितम् ।
स्थाणोर्वटस्य पूर्व्वेण मम तीर्थं प्रकीर्त्तितम् ॥
स्थाणोर्वटस्योत्तरतस्तीर्थं गणेश्वरं मतम् ।
स्थाणोर्टवस्य पश्चिमतः स्कन्दतीर्थं प्रकीर्त्तितम्
इमानि पुण्यतीर्थानि मध्ये रुद्रवटः स्थितः
महादेवं समभ्यर्च्च्य प्राप्नोति परमं पदम् ॥
वटस्य चोत्तरे पार्श्वे तत्तत्रेण महात्मना ।
प्रतिष्ठितं महालिङ्गं सर्व्वकामप्रदायकम् ॥
वटस्य पूर्व्वदिग्भागे विघ्नकर्म्मकृतं महत् ।
लिङ्गं प्रत्यङ्मुखं दृष्ट्वा सिद्धिमाप्नोति मानवः ॥
तत्रैव लिङ्गरूपेण संस्थिता या सरस्वती ।
तां प्रणम्य प्रयत्नेन बुद्धिं मेधाञ्च विन्दति ॥
वटपार्श्वस्थितं लिङ्गं ब्रह्मणा तत् प्रतिष्ठितम् ।
दृष्ट्वा वटेश्वरं देवं प्रयाति परमं पदम् ॥
ततः स्थाणुवटं दृष्ट्वा कृत्वा चापि प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन सप्त द्वीपा वसुन्धरा ॥
स्थाणोः पश्चिमदिग्भागे नकुलीशो गणः
स्मृतः ।
तमभ्यर्च्च्य प्रयत्नेन सर्व्वपापैः प्रमुच्यते ॥
तस्य दक्षिणदिग्भागे तीर्थं रुद्राकरं स्मृतम् ।
तस्मिन् स्नातः सर्व्वतीर्थस्नातो भवति मानवः॥
तस्य चोत्तरदिग्भागे रावणेन महात्मना ।
प्रतिष्ठितं महालिङ्गं गोकर्णं नाम नामतः ॥
आषाढ़मासे या कृष्णा भविष्यति चतुर्दशी ।
तस्यां पश्यति गोकर्णं तस्य पुण्यफलं शृणु ॥
कामतोऽकामतो वापि यत् पापं तेन सञ्चि-
तम् ।

तस्माद्विमुच्यते पापात् पूजयित्वा हरं शुचिः ॥
कौमारब्रह्मचर्य्येण यत् पुण्यं प्राप्यते नरैः ।
तत् पुण्यं सकलं तेषामष्टम्यां योऽर्च्चयेच्छिवम्
यदिच्छेत् परमं रूपं सौभाग्यं धनसम्पदम् ।
कुमारेश्वरमाहात्म्यात् सिध्यते नात्र संशयः ॥
तस्य चोत्तरदिग्भागे लिङ्गपूजां विभीषणः ।
अजरत्वामरत्वं च कल्पयित्वा बभूव ह ॥
आषाढ़स्य तु मासस्य शुक्ला या चाष्टमी
भवेत् ।
तस्याम्पूज्य सोपवासस्त्वामृतत्वमवाप्नुयात् ॥
पूर्व्वैश्च पूजितं लिङ्गं तस्मिन् स्थाने द्विजोत्तम ।
पूजयित्वा प्रयत्नेन सर्व्वकाममवाप्नुयात् ॥
दूषणस्त्रिशिरार्थं च तत्र पूज्य महेश्वरम् ।
यथाभिलषितान् कामानवापतुर्मुदान्विती ॥
चैत्रे मासि मिते पक्षे यो नरस्तत्र पूजयेत् ।
तस्य तौ वरदौ देवौ प्रयच्छेतां हि वाञ्छितम्॥
स्थानोर्वटस्य पूर्व्वेण हस्तिपादेश्वरः स्थितः ।
तं दृष्ट्वा मुच्यते पापैरन्यजन्मसमुद्भवैः ॥
तस्य दक्षिणतो लिङ्गं हारीतस्य ऋषेः
स्थितम् ।
यं प्रणम्य प्रयत्नेन सिद्धिमाप्नोति मानवः ॥
तस्य दक्षिणपार्श्वे तु हारितस्य महात्मनः ।
लिङ्गं त्रैलोक्यविख्यातं सर्व्वपापहरं शिवम् ॥
कङ्कालरूपिणा चापि रुद्रेणाशु महात्मना ।
प्रतिष्ठितं महालिङ्गं सर्व्वपापविनाशनम् ॥
भुक्तिमुक्तिप्रदं प्रोक्तं सर्व्वकिल्बिषनाशनम् ।
तल्लिङ्गस्यर्शनादेव अग्निष्टोमफलं लभेत् ॥
तस्य पश्चिमदिग्भागे लिङ्गं सिद्धप्रतिष्ठितम् ।
सिद्धेश्वरं भुवि ख्यातं सर्व्वसिद्धिप्रदायकम् ॥
तद्दर्शनात् पूजनाच्च सर्व्वसिद्धिं हि विन्दति ।
तस्य दक्षिणदिग्भागे सृकण्डेन महात्मना ॥
प्रतिष्ठितं यत्तु लिङ्गं दर्शनात् सिद्धिदायकम् ।
तस्य पूर्व्वे च दिग्भागे आदित्येन महात्मना ॥
प्रतिष्ठितं लिङ्गवरं सर्व्वकिल्बिषनाशनम् ।
चित्राङ्गदस्तु गन्धर्व्वो रम्भा चाप्सरसां वरा ॥
परस्परं सानुरागौ स्थाणुदर्शनकाङ्क्षिणौ ।
दृष्ट्वा स्थाणुं पूजयित्वा सानुरागौ परस्परम् ॥
आगम्य वरदं देवं प्रतिष्ठाप्य महेश्वरम् ।
चित्राङ्गदेश्वरं दृष्ट्वा तथा रम्भेश्वरं द्विज ॥
सुभगो दर्शनीयश्च कुले जन्म समाप्नुयात् ।
तस्य दक्षिणतो लिङ्गं शक्रेणा स्थापितं पुरा ॥
तस्य प्रसादात् सम्प्राप्तं मनसा चिन्तितं फलम् ।
पराशरेण मुनिना तथैवाराध्य शङ्करम् ॥
प्राप्तं कवित्वं परमं दर्शनाच्छङ्करस्य च ।
वेदव्यासेन मुनिना चाराध्य परमेश्वरम् ॥
सर्व्वज्ञत्वं ब्रह्मज्ञानं प्राप्तं देवप्रसादतः ।
स्थाणोः पश्चिमदिग्भागे वायुना जगदायुना ॥
प्रतिष्ठितं महालिङ्गं दर्शनात् पापनाशनम् ।
तस्यापि दक्षिणे भागे लिङ्गं हैमवतेश्वरम् ॥
प्रतिष्ठितं मुखक्रता दर्शनात् सिद्धिदायकम् ।
तस्यापि पश्चिमे भागे कार्त्तवीर्य्येण स्थापितम्॥
लिङ्गं पापहरं सद्यो दर्शनात् पुण्यमाप्नुयात् ।
तस्याप्युत्तरदिग्भागे तत्पार्श्वे स्थापितं पुनः ॥
आराध्य हनुमांश्चाप सिद्धिं देवप्रसादतः ।
तस्यैव पूर्व्वदिग्भागे विष्णुना प्रभविष्णुना ॥
आराध्य वरदं देवं चक्रं लब्धं सुदर्शनम् ।
तस्यापि पूर्व्वदिग्भागे इन्द्रेण वरुणेन च ॥
प्रतिष्ठितौ लिङ्गवरौ सर्व्वकामप्रदायकौ ।
एतानि मुनिभिः साध्यैरादित्यैर्वसुभिस्तथा ॥
सेवितानि प्रयत्नेन सर्व्वपापहराणि वै ।
स्थाणुलिङ्गस्य परितः ऋषिभिस्तत्त्वदर्शिभिः ॥
प्रतिष्ठितानि लिङ्गानि येषां संख्या न विद्यते ।
तथाह्युत्तरतश्चैव यावद्दोधवती नदी ॥
सहस्रमेकं लिङ्गानां देवर्षिमतः स्थितम् ।
तस्यापि पूर्वदिग्भागे वालिखिल्यैर्महर्षिभिः॥
प्रतिष्ठिता रुद्रकोटिर्यावत् सन्निहितं सरः ।
दक्षिणेन तु देवस्य गन्धर्व्वैर्यक्षकिन्नरैः ॥
प्रतिष्ठितानि लिङ्गानि तेषां संख्या न विद्यते ।
तिस्रः कोव्यर्द्धकोटी च लिङ्गानां वायुरब्रवीत् ॥
असंख्याताः सहस्राणि ये रुद्रा स्थाणु-
माश्रिताः ।
एतज्ज्ञात्वा श्रद्दधानः स्थाणुलिङ्गं समाश्रयेत् ॥
यस्य प्रमादात् प्राप्नोति मनसा चिन्तितं फलम्
अकामो वा सकामो वा प्रतिष्ठा स्थाणु-
मन्दिरम् ॥
विभुक्तः पातकैर्घोरैः प्राप्नोति परमं पदम् ।
चैत्रमासे त्रयोदश्यां दिने पुण्यतमे शुभे ॥
प्रतिष्ठितं स्थाणुलिङ्गं ब्रह्मणा लोकधारिणा ।
ऋषिभिर्देवसंघैश्च पूजितं शाश्वतीः समाः ॥
तस्मिन् काले निराहारा मानवाः श्रद्धया-
न्विताः ।
पूजयन्ति शिवं ये वै ते यान्ति परमं पदम् ॥
स्थाणुतीर्थमिदं ज्ञात्वा ये कुर्वन्ति प्रदक्षिणम्
प्रदक्षिणीकृता तैस्तु सप्तद्वीपा वसुन्धरा ॥"

इति वामणपुराणे ४३ अध्यायः ॥*॥

एकरुद्रे लिङ्गद्वयार्चननिषेधो यथा,—
"गेहे लिङ्गद्वयं नार्च्यं शालग्रामद्वयं तथा ।
हे चक्रे द्वारकायास्तु नार्च्चे सूर्य्यद्वयं तथा॥"
तन्निर्म्माल्यभक्षणविधिनिषेधो यथा,—
"अभक्ष्यं शिवनिर्म्माल्यं पत्रं पुष्पं फलं जलम्।
शालग्रामशिलायोगात् पावनं तद्भवेत् सदा॥"
इति वाराहे रौप्यसौवर्णाचार्च्चास्थापननामा-
ध्यायः॥*॥ लिङ्गपूजां विनान्यपूजाकरणनिषेधो
यथा,—
"लिङ्गपूजां विना देवि! अन्यपूजां करोति यः
विफला तस्य पूजा स्यादन्ते नरकमाप्नुयात् ।
तस्माल्लिङ्गं महेशानि प्रथमं परिपूजयेत् ॥"*॥
तत्पूजनप्रशंसा यथा,—
"यद्गृहं लिङ्गपूजायां रहितं सततं प्रिये ।
तद्गृहं पतितं मन्ये विष्ठाभूमिसमं स्मृतम् ॥
ब्रह्मक्षत्रियविट् देवि यदि लिङ्गं न पूजयेत् ।
तत्क्षणात् परमेशानि त्रयश्चाण्डालतां व्रजेत्॥
शूद्रश्च परमेशानि सदा शूकरवत् प्रिये ।
पूजयेत् परमेशानि चत्वारो ब्राह्मणादयः ॥
शिवार्च्चनन्तु पूजासु यद्गृहे वर्ज्जितं सदा ।
विष्ठागर्त्तसमं देवि तद्गृहं विद्धि पार्व्वति ॥
शाक्तो वा वैष्णवो वापि शैवो वा परमेश्वरि ।
आदौ लिङ्गं समभ्यर्च्च्य विल्वपत्रैर्वरानने ॥
पश्चादन्यं महेशानि शिवं प्रार्च्य प्रपूजयेत् ।
शिवपूजां विना देवि ! अन्यपूजां करोति यः॥
स एव रसनाहीनः कुष्ठीरोगी जायते प्रिये ।
निर्म्माय पार्थिवं लिङ्गं रुद्रं संहाररूपिणम् ॥
आशुतोषं महादेवं शङ्करं वृषभध्वजम् ।
निर्म्माय पार्थिवं लिङ्गं विधिवत् पूजयेत्
शिवम् ॥
शिवपूजा महेशानि यद्गृहे सततं प्रिये ।
काशीपुरं महेशानि तद्गृहं वरवर्णिनि ।
शिवलिङ्गं प्रपूज्याथ सर्व्वपूजाफलं लभेद्॥"*॥
चतुर्विधलिङ्गं यथा,—
"चतुर्द्धा पार्थिवं लिङ्गं सृत्स्नाभेदेन पार्व्वति।
शुक्लं रक्तं तथा पीतं कृष्णञ्च परमेश्वरि ॥
शुक्लन्तु ब्राह्मणे श्रस्तं क्षत्रिये रक्तमिष्यते ।
हरितं वैश्यजातौ तु कृष्णं शूद्रे प्रकीर्त्तितम् ।
चन्दनञ्च महेशानि सर्व्वजातिषु श्रस्यते ॥"

इति लिङ्गार्च्चनतन्त्रे १।२।३ पटलाः ॥*॥

अस्य पञ्चवक्त्राणि यथा,—
"तत् सर्व्वं शृणु चार्व्वङ्गि पार्थिवस्य मुखं प्रिये।
विभाव्य मुखपद्मं हि शिवस्य वरवर्णिनि ॥
सद्योजातं वामदेवमघोरञ्च ततः परम्।
तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातञ्च वै शुक्लं शुद्धस्फटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
कृष्णवर्णमघोरञ्च समं भीमविवर्द्धनम् ।
रक्तं तत्पुरुषं देवं दिव्यमूर्त्तिमनोहरम् ॥
श्यामलञ्च तथेशानं सर्व्वदेवशिवात्मकम् ।
चिन्तयेत् पश्चिमे चाद्यं द्वितीयन्तु तथोत्तरे ॥
अघोरं दक्षिणे देवं पूर्व्वे तत्पुरुषं तथा ।
ईशानं मध्यतो ध्येयं चिन्तयेत् भक्तितत्परः॥"

इति तत्रैव ६ पटलः ॥*॥

अस्य पूजायां मुखवाद्यकरणावश्यकत्वं यथा,
"संपूज्य पार्थिवं लिङ्गं परं ब्रह्म स्वयं प्रिये !
ततस्तु लिङ्गकवचं पठित्वा कमलानने ॥
मुखवाद्यं समृत्पन्नं हि कृत्वा तु परमेश्वरि ।
मालकामन्त्रसहितं मुखवाद्यं सुदुर्ल्लभम् ॥
अकारादिक्षकारान्तं अनुलोमविलोमतः ।
उच्चार्य्य परमेशानि मुखवाद्यं शुचिस्मिते ॥
सबिन्दुवर्णमुच्चार्य्य पञ्चाशन्मालकां प्रिये ।
अनुलोमविलोमेन सर्व्वेण च वरानने ॥
अनेनैव विधानेन मुखवाद्यं करोति यः ।
स सिद्धः सगणः सोऽपि स शिवो नात्र संशयः॥
मृत्युञ्जयोऽहं देवेशि मुखवाद्यप्रमादतः ।
यस्मिन् काले महेशानि असुरो बलवत्तरः ॥
तस्मिन् काले महेशानि मुखवाद्यं करोम्यहम्
तत् श्रुत्वा परमेशानि असुरा राक्षसाश्च ये ॥
पलायन्ते महेशानि तत् श्रुत्वा परमेश्वरी ।
ये नरा भुवि तिष्ठन्ति मखवाद्यं विना प्रिये ॥

म सर्व्वयातना भोगो भवेत्तस्य कुम्भिरतां व्रजेत्॥"
इति च तत्रैव ८ पटलः ॥*॥
अस्य निर्म्माल्यभोजनदोषकारणं यथा,—
देव्युवाच ।
"दुर्लभं तव निर्म्माल्यं ब्रह्मादीनां कृपानिधे ।
तत्कथं परमेशान निर्म्माल्यं तव दूषितम् ॥
ईश्वर उवाच ।
मध्यस्थानस्थितं यत्तु तन्मुखं परमेश्वरि ।
श्यामलं तत्तु ईशानं सदा ऊर्द्ध्वं शुचिस्मिते ॥
कालाग्निरूपिणं तत्तु सर्व्वशक्तिमयं सदा ।
तेजोमयं महेशानि सुखमूर्द्धं वरानने ॥
क्षीरोदमथने देवि उत्थितं गरलं महत् ।
ततः करतलोकृत्य तद्दिव्यं परमेश्वरि ॥
निपीतं तद्दिव्यं सूक्ष्मं तीव्रं ब्रह्माण्डनाशनम् ।
तद्दिव्यं कण्ठदेशे तु स्थितं हि सर्व्वदा मम ॥
ततःप्रभृति देवेशि मुखं ज्वालायते सदा ।
पत्रं वा यदि वा पुष्पं फलं वा वरवर्णिनि ॥
अन्यं हि परमेशानि उपचारं मनोहरम् ।
या दद्यात् परमेशानि मम शीर्षोपरि पार्व्वति॥
अग्राह्यं तत्तु निर्म्माल्यं साक्षाद्ब्रह्ममयं यतः
एतत्तु परमेशानि निर्म्माल्यं यस्तु धारयेत् ॥
स भ्रष्टो जायते देवि निष्कृतिर्नास्ति तत्र वै ।
अग्राह्यं मम निर्म्माल्यं अतएव वरानने ॥
यद्दत्तं सम्मुखे देवि पुष्पं वा पत्रमुत्तमम् ।
तन्निर्म्माल्यं महेशानि गृह्णीयात् शिरसा सदा
प्रथमं विष्णवे दत्त्वा विष्णुमन्त्रेण पार्व्वति ।
निर्म्माल्यं मम देवेशि विष्णोर्ग्राह्यं वरानने ॥
देवासुरमनुष्याश्च गन्धर्व्वा किन्नरादयः ।
ते सर्व्वे परमेशानि वराकाः क्षुद्रबुद्धयः ।
निर्म्माल्येषु च देवेशि अधिकारी कथं भवेत् ॥"
इति च तत्रैव १३।१४ पटलौ ॥*॥
"चतुर्दश्यां महेशानि शुक्लायां वरवर्णिनि ।
कृष्णायां वा महेशानि अमावास्यां विशेषतः॥
निर्माय च चतुर्दश्यां लिङ्गं भक्त्या च पूजयेत्।
एकहस्ते महेशानि निर्माय पार्थिवं शिवम् ॥
दक्षिणे वामहस्ते वा निर्माय ये च पार्थिवम् ।
तत्फलं परमेशानि लक्षलिङ्गसमं भवेत् ॥"
इति लिङ्गार्च्चनतन्त्रम् ॥*॥
बाणलिङ्गलक्षणादिकं बाणलिङ्गशब्दे द्रष्टव्यम्॥
अथ रौद्रलिङ्गलक्षणम् । वीरमित्रोदयधृतम् ।
"नदी समुद्भवं रौद्रमन्योन्यस्य विघर्षणात् ।
नदीवेगात् समं स्निग्धं संजातं रौद्रमुच्यते ॥"
मत्स्यसूक्तेऽपि ।
"सरित्प्रवाहसंस्थानं बाणलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं रौद्रलिङ्गं सुखावहम् ॥
नदीसारनर्म्मदायां बाणलिङ्गसमाकृति ।
तदन्यदपि बोद्धव्यं लिङ्गं रौद्रं भविष्यति ॥
रौद्रलिङ्गं तथाख्यातं बाणलिङ्गसमाकृति ।
श्वेतरक्तं तथा पित्तं कृष्णं विप्रादिपूजितम् ॥
स्वभावात् कृष्णवर्णं वा सर्व्वजातिषु सिद्धिदम् ।
नर्म्मदासम्भवं रौद्रं बाणलिङ्गवदीरितम् ॥"
इति रौद्रलिङ्गलक्षणम् ॥
शिवनाभिलक्षणं तच्छब्दे द्रष्टव्यम् ॥*॥ अथ दैवलिङ्गलक्षणम् । दैवलिङ्गमधिकृत्य सिद्धान्तशेखरे ।
"करसंपुटसंस्थं शूलटङ्केन्दुभूषितम् ।
रेखाकोटरसंयुक्तं निम्नोन्नतसमन्वितम् ।
दीर्घाकारञ्च यल्लिङ्गं ब्रह्मभागादिवर्ज्जितम् ॥"
अथ गोललिङ्गलक्षणम् ।
"लिङ्गं गोलमिति प्रोक्तं गोलकं प्रोच्यतेऽधुना।
कुष्माण्डस्य फलाकारं नागरङ्गफलोपमम् ।
कार्कडिम्बफलाकारं गोललिङ्गमितीरितम् ॥"
इति गोललिङ्गलक्षणम् ॥*॥
अथार्षलिङ्गलक्षणम् । तत्रैव ।
"नानाकोलफलाकारं ब्रह्मसूत्रविवर्त्तनम् ।
मूले स्थूलञ्च यल्लिङ्गं कपित्थफलसन्निभम् ॥
नालस्य वा फलाकारं मध्ये स्थूलञ्च यद्भवेत् ।
मध्ये स्थूलं वरं लिङ्गमृषिबाणमुदीरितम् ॥"
इत्यार्षलिङ्गलक्षणम् ॥*॥
लिङ्गं हि द्विविधमकृत्रिमं कृत्रिमञ्च । अकृत्रिमं स्वयम्भूतं स्वयम्भु बाणलिङ्गादि । कृत्रिमं निर्म्मितं धातुलिङ्गादि । सिद्धान्तशेखरे ।
"तल्लिङ्गं द्विविधं ज्ञेयमचलञ्च चलं तथा ।
प्रत्येकं त्रिविधं ज्ञेयं लिङ्गं तदुभयात्मकम् ॥
प्रासादे स्थापितं लिङ्गमचलं तच्छिलादिजम्।
स्थापितं चलं गेहे स्थिरं लिङ्गमयोजितं ॥
पञ्चधा तत् स्थितं लिङ्गं स्वयम्भु दैवपालकम् ।
आर्षञ्च मानसं लिङ्गं तेषां लक्षणमुच्यते ॥
सिद्धान्तशेखरे ।
"नानाच्छिद्रसमंयुक्तं नानावर्णसमन्वितम् ।
अष्टष्टमूलं यल्लिङ्गं कर्कशं भुवि दृश्यते ॥
तत् लिङ्गन्तु स्वयम्भूतमपरं लक्षणाच्युतम् ।
स्वयम्भु लिङ्गमित्युक्तं तच्च नानाविधं मतम् ॥
शङ्खाभमस्तकं लिङ्गं वैष्णवं तदुदाहृतम् ।
पद्माभमस्तकं ब्राह्मं ज्ञेयमेभं शाक्रमुच्यते ॥
शिरोयुग्मं तथाग्नेयं त्रिपदं याम्यमीरितम् ।
खड्गाभं नैर्ऋतं लिङ्गं वारुणं कलसाकृति ॥
वायव्यं ध्वजवल्लिङ्गं कौबेरन्तु गदान्वितम् ।
ईशानस्य त्रिशूलाभं लोकपालादिनिःसृतम् ।
स्वयम्भु लिङ्गमाख्यातं सर्व्वशास्त्रविशारदैः ॥"
इति स्वयम्भुलिङ्गलक्षणम् ॥*॥
मत्स्यसूक्ते ।
"दृष्ट्वा लिङ्गं महेशस्य स्वयम्भूतस्य पार्व्वति ।
सर्व्वपापविनिर्मुक्तः परे ब्रह्मणि लीयते ॥"*॥
एतेषां पूजाफलन्तु तत्रैव ।
"विशेषाच्छैलजं मुक्त्यै भुक्तये चानुषङ्गतः ।
पार्थिवं भुक्तये शस्तं मुक्तये चानुषङ्गतः ॥
एवं वै दारुजं ज्ञेयं चिङ्गलिङ्गं तथा पुनः ।
स्थिरलक्ष्मीप्रदं ज्ञेयं हैमं राज्यप्रदञ्च तत् ।
पुत्रवृद्धिकरं ताम्रं राङ्मायुःप्रवर्द्धनम् ॥"
पद्मपुराणम् ।
"पारदञ्च महाभूत्यै सौभाग्याय च मौक्तिकम् ।
चन्द्रकान्तं मृत्युजित् स्याद्घाटकं सर्व्वकामदम्॥"
वीरमित्रोदयधृतकल्पोत्तरेऽपि ।
"सर्व्वा फलप्रदा भूमिर्मणयस्तद्वदेव हि ।
अनन्ताद्याः स्मृता ह्यष्टौ मणयो विद्युदुज्ज्वलाः॥
रात्रौ प्रकाशकाः सर्व्वे विषाद्याघातकारिणः ।
नानावर्णास्तु विज्ञेया रसैर्गन्धैश्च रूपतः ॥
वज्राद्याः स्फाटिकाद्याश्च गुडाद्यादिविनिर्म्मितम् ।
सर्व्वकामप्रदं पुंसां लिङ्गं तात्कालिकं मतम् ॥"
लक्षणसमुच्चये ।
"गान्धं सौभाग्यदं लिङ्गं पौष्पं मुक्तिप्रदायकम् ।"
तथा ।
"नानागुणोद्भवं लिङ्गं नानाकामप्रदायकम् ।
सैकतं गुणदं लिङ्गं सौभाग्याय च लावणम् ॥
उच्चाटने तु पाषाणं मौलं शत्रुक्षयावहम् ।
तात्कालिकं दरिद्रश्च कृत्वा भक्त्या समर्च्चयेत् ॥
तथा ।
"कस्तुरिकया हो भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य त्रयश्चैव शशिना च चतुःसमम् ॥
एतद्वै गन्धलिङ्गन्तु कृत्वा संपूज्य भक्तितः ।
शिवसायुज्यमाप्नोति बन्धुभिः सहितो नरः ॥
कार्य्यं पुण्यमयं लिङ्गं हयगन्धसमन्वितम् ।
नवखण्डां धरां भुक्त्वा गणेशोऽधिपतिर्भवेत् ॥
रजोभिर्निर्म्मितं लिङ्गं यः पूजयति भक्तितः ।
विद्याधरपदं प्राप्य पश्चात् शिवसमो भवेत् ॥
श्रीकामो गोशकृल्लिङ्गं कृत्वा भक्त्या प्रपूजयेत्
स्वच्छेन कापिलेनैव गोमयेन प्रकल्पयेत् ॥
कार्य्यं यष्टिकमं लिङ्गं यवगोधूमशालिजम् ।
श्रीकामः पुष्टिकामश्च पुत्रकामस्तदर्च्चयेत् ॥
सिताखण्डमयं लिङ्गं कार्य्यमारोग्यवर्द्धनम् ।
वश्ये लवणजं लिङ्गं तालत्रिकटुकान्वितम् ॥
गव्यघृतमयं लिङ्गं संपूज्य वृद्धिवर्द्धनम् ।
लवणेन च सौभाग्यं पार्थिवं सर्व्वकामदम् ॥
कामदं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतम् ।
भस्मोत्थं सर्व्वफलदं गुडोत्थं प्रीतिवर्द्धनम् ॥
गन्धोत्थं गुणदं भूरि शर्करोत्थं सुखप्रदम् ।
वंशाङ्कुरोत्थं वंशकरं गोमयं सर्व्वरोगदम् ॥
केशास्थिसम्भवं लिङ्गं सर्व्वशत्रुविनाशनम् ।
क्षोभणे मारणे पिष्टसम्भवं लिङ्गमुत्तमम् ॥
दारिद्र्यदं हुमोद्भूतं पिष्टं सारस्वतप्रदम् ।
दधिदुग्धोद्भवं लिङ्गं कीर्त्तिलक्ष्मीसुखप्रदम् ।
धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत् ॥
पुण्योत्थं दिव्यभोगायुर्मृत्यै धात्रीफलोद्भवम् ।
नवनीतोद्भवं लिङ्गं कीर्त्तिसौभाग्यवर्द्धनम् ॥
दूर्वाकाण्डसमुद्भूतमपमृत्युविनाशनम् ।
कर्पूरसम्भवं लिङ्गं चला वै भुक्तिमुक्तिदा ।
अयस्कान्तं चतुर्द्धा तु ज्ञेयं सामान्यसिद्धिषु ॥"
इति गरुडपुराणम् ॥
"सर्व्वं मणिभवं श्रेष्ठं तच्च वज्रमरिच्छिदि ।
यमलिङ्गं महाभूत्यै सौभाग्याय च मौक्तिकम्।
पुष्टिमूलं महानीलं ज्योतिस्तीरसमुद्भवम् ।
सशक्रं कुलसङ्घत्यै तैजसं सूर्य्यकान्तजम् ॥

चन्द्रापीड़ं मृत्युजितं स्फाटिकं सर्व्वकामदम्।
मूलाख्यमणिजं शत्रुक्षयार्थं मौक्तिकं तथा॥
आपत्यं हीरकं ज्ञेयं रोगघ्नमौक्तिकोद्भवम्।
शुभक्षत् पुष्कलं तीर्थे वेदुर्य्यं शत्रुदर्पहृत्।
नीलं लक्ष्मीप्रदं ज्ञेयं स्फाटिकं सर्व्वकामदम्॥"

इति सारसंग्रहः॥

"महामुक्तिप्रदं हैमं राजतं भूतिवर्द्धनम्।
आरकूटं तथा कांस्यं शृणु सामान्यमुक्तिदम्॥
त्रपुसीसायसं लिङ्गं शत्रूणां नाशने हितम्।
कीर्त्तिदं कांस्यजं लिङ्गं राजतं पुत्रवर्द्धनम्॥
पैत्तलं भुक्तिमुक्त्यर्थं मिश्रजं सर्व्वसिद्धिदम्॥"

इति कालोत्तरतन्त्रम्॥

तत्रैव शिवनारदसंवादे।

"पितॄणां मुक्तये लिङ्गं पुण्यं रजतसम्भवम्।
हैमजं सत्यलोकस्य प्राप्तये पूजयेत् पुमान्।
पूजयेत्ताम्रजं लिङ्गं पुष्टिकामो हि मानवः॥"

मत्स्यसूक्ते।

"ताम्रलिङ्गं कलौ नार्च्चेत् रैत्यस्य सीसकस्य च
रत्नचन्दनलिङ्गञ्च शङ्खकांस्यायसं तथा॥"*॥

माहकाभेदतन्त्रे १२ पटले।

"पार्थिवे शिवपूजायां सर्व्वसिद्धियुतो भवेत्।
पाषाणे शिवपूजायां द्विगुणं फलमीरितम्॥
स्वर्णलिङ्गे च पूजायां शत्रूणां नाशनं मतम्।
सर्व्वसिद्धीश्वरो रौप्ये फलं तस्माच्चतुर्गुणम्॥
ताम्रे पुष्टिं विजानीयात् कांस्ये च धनसंचयः
गङ्गायाञ्च लक्षगुण लाक्षायां रोगवान् भवेत्॥
स्फाटिके सर्व्वसिद्धिः स्यात्तथा मरकते प्रिये।
लौहलिङ्गे रिपोर्नाशं कामद भस्मलिङ्गकम्॥
वालुकायां काम्यसिद्धिर्गोमये रिपुहिंसनम्।
सव्वलिङ्गस्य माहात्म्यं धर्म्मकामार्थमोक्षदम्
संस्कारेण विना देवि पाषाणादौ न पूजयेत्॥"

तत्संस्कारस्तत्रै यथा,—

"रौप्यञ्च स्वर्णलिङ्गञ्च स्वर्णपात्रे निधाय च।
तस्मादुत्तोल्य तल्लिङ्गं दुग्धमध्ये दिनत्रयम्॥
त्र्यम्बकेण जापयित्वा कालरुद्रं प्रपूजयेत्।
षोडशेनोपचारेण वेदान्तु पार्व्वतीं यजेत्॥
तस्मादुत्तोल्य तल्लिङ्गं गङ्गातोये दिनत्रयम्।
ततो वेदोक्तविधिना संस्कारमाचरेत् सुधीः॥"

लक्षणहीनलिङ्गपूजने दोषो यथा,—

"लिङ्गं सुलक्षणं कुर्य्यात् त्यजेल्लिङ्गमलक्षणम्।
दैर्घ्यहीने भवेद्व्याधिरधिके शत्रुवर्द्धनम्॥
मानहीने विनाशः स्यादधिके च शिशुक्षयः।
विस्तारे चाधिके हीने राष्ट्रनाशो भवेत् ध्रुवम्॥
पीठहीने तु दारिद्र्यं शिरोहीने कुलक्षयः।
ब्रह्मसूत्रविहीने च राज्ञां राष्ट्रञ्च नश्यति।
तस्मात् सर्व्वप्रयत्नेन लिङ्गं कुर्य्यात् सुलक्षणम्॥"

अथ लिङ्गप्रमाणम्।

देव्युवाच।

"लिङ्गप्रमाणं देवेश कथयस्व मयि प्रभो।
पार्थिवे च शिलादौ च विशेषो यत्र यद्भवेत्॥

श्रीशिव उवाच।

मृत्तिकातोलकं ग्राह्यमथवा तोलकद्वयम्।
एतदन्यत्र कुर्व्वीत कदाचिदपि पार्व्वति!॥"

इति माहकाभेदतन्त्रे ७ पटलः॥

अपि च।

"मृत्तिकातोलकं ग्राह्यमथवा तोलकद्वयम्।
त्रिसूत्रस्य प्रमाणेन घटनं कारयेद्बुधः।
अङ्गुष्ठपर्व्वमानन्तु कृत्वा लिङ्गं प्रपूजयेत्॥"

इति षट्कर्म्मदीपिकाधृतविश्वसारतन्त्रम्॥*॥

त्रिसूत्रीकरणमुक्तं कालोत्तरे।

"लिङ्गे वेद्यां तथा पीठे समसूत्रनिपातनात्।
समत्वेन विजानीयात् त्रिसूत्रीकरणन्त्विदम्॥"

मृत्तिकाभेदेन ब्राह्मणादीनां पूजाफलस्य प्रशस्त्यमुक्तं तत्रैव।

"शुक्लं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत्।
स एव परमेशानि चिवर्गफलभाग्भवेत्॥
रक्तवियस्तु वरारोहे रक्तं निर्म्माय पार्थिवम्।
पूजयेत् सततं यस्तु त्रिवर्गफलभाग्भवेत्॥
हरितं पार्थिवं देवि निर्म्माय यस्तु पूजयेत्।
स च वैश्यो महेशानि त्रिवर्गफलभाग्भवेत्॥
कृष्णं हि पार्थिवं लिङ्गं निर्म्माय यस्तु पूजयेत्
स शूद्रः परमेशानि त्रिवर्गफलभाग्भवेत्॥
शिलादौ च महेशानि स्थूलञ्च फलदायकम्।
अङ्गुष्ठमानं देवेशि यदा हेमाद्रिमानकम्॥
क्रमेण देवदेवेशि फलं बहुविधं लभेत्।
स्थूलात् स्थूलतरं लिङ्गं रुद्राक्षं परमेश्वरि।
पूजनाङ्कारणादेवि फलं बहुविधं स्मृतम्॥"

स्थूलात् स्थूलतरमिति पार्थिवलिङ्गे तरपरम्।
मृत्तिकातोलकं ग्राह्यमित्यादिवचनात्॥*॥

शिलास्फाटिकमरकतादीनां पञ्चसूत्रीकरणमुक्तम्। यथा,—

"शिवलिङ्गस्य यन्मानं तन्मानं दक्षसव्ययोः।
योन्यथमपि यन्मान तदर्धोऽपि तथा भवेत्॥"

इति लैङ्गम्॥

"लिङ्गस्य यादृग्विस्तारः परिणाहोऽपि तादृशः
लिङ्गस्य द्विगुणा वेदी योनिस्तदर्द्धसम्मिता॥
कुर्व्वीताङ्गुष्ठतो ऊर्द्धं न कदाचिदपि क्वचित्।
रत्नादिशिवनिर्म्माणे मानमिच्छावशाद्भवेत्॥"

इति तन्त्रान्तरम्॥

लिङ्गशब्दव्युत्पत्तिर्यथा,—

"आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका।
आलयः सर्व्वदेवानां लयनाल्लिङ्गमुच्यते॥"

इति स्कन्दपुराणम्॥*॥

लिङ्गमहिमा यथा,—

शिव उवाच।

"न तथास्यर्च्चितोऽर्च्चायां पुष्पधूपनिवेदनैः।
लिङ्गेऽर्च्चिते तथात्यर्थं परं तुष्यामि पार्व्वति॥
एष देवि पुरा कल्पे जीवोऽहं सर्व्वदेवतैः॥
लिङ्गत्वाल्लिङ्गमित्युक्तं सदेवासुरकिन्नरैः॥
प्रयच्छामि दिवं देवि यो मल्लिङ्गार्च्चने रतः।
त्यक्त्वा सर्व्वाणि पापानि निर्गदो दग्धकल्मषः।
मन्मना मत्समस्कारो मामेव प्रतिपद्यते॥"

इति वीरमित्रोदयधृतस्कन्दपुराणम्॥*॥

द्रव्यविशेषेण पूजादिफलमपि तत्रैव।

"वस्त्रपूतजलेलिङ्गं स्नपित्वा मम मानवाः।
लक्षाणाश्वमेधानां फलमाप्नोति सत्तमः॥
सुगन्धिचन्दनरसैर्लिङ्गमालिप्य भक्तितः।
आलिप्यते सुरस्त्रीभिः सुगन्धैर्यत्रकर्हचिः॥"*॥

लिङ्गपूजनाकरणे दोषस्तत्पूजाफलञ्च तत्रैव शिवनारदसंवादे।

"विना लिङ्गार्च्चनंयस्य कालो गच्छति नित्यशः।
महाहानिर्भवेत्तस्य दुर्गतस्य दुरात्मनः॥
एकतः सर्व्वदानानि व्रतानि विविधानि च।
तीर्थानि नियमा यज्ञा लिङ्गाराधनमेकतः॥
न लिङ्गाराधनादन्यत् पुरा वेदे चतुर्ष्वपि।
विद्यते सर्व्वशास्त्राणामेष एव सुनिश्चितः॥
भुक्तिमुक्तिप्रदं लिङ्गं विविधापन्निवारणम्।
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात्॥
सर्व्वमन्यत् परित्यज्य क्रियाजालमशेषतः।
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत्॥"

इति स्कन्दपुराणम्॥*॥

"अश्वमेधसहस्राणि वाजपेयशतानि च।
महेशार्च्चनपुण्यस्य कलां नार्हन्ति षोड़शीम्॥"

इति मत्स्यसूक्ते १६ पटलः॥*॥

"स्वयं नारायणः प्रोक्तो यदि शम्भुं प्रपूजयेत्।
स्वर्गे मर्त्ये च पाताले ये देवाः संस्थिताः सदा।
तेषां पूजा भवेद्देवि शम्भुनाथस्य पूजनात्॥"

इति माहकाभेदतन्त्रम्॥*॥

षट्कर्म्मदीपिकायाम्।

"असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भु-
सेवनम्॥*॥

अथ पारदशिवलिङ्गमाहात्म्यम्।

"ज्योतिर्म्मयं महालिङ्गं कैलाशनगरे प्रिये।
तस्यैव षोड़शांशैकः काश्यां विश्वेश्वरः स्थितः॥
पूर्णलिङ्गं महेशानि शिवबीजं न चान्यथा।
शिलामध्ये यथा चक्रं लक्ष्मीनारायणः परम्॥
पारदस्य शतांशैको लक्ष्मीनारायणो न हि।
पकारं विष्णुरूपञ्च आकारं कालिका स्वयम्॥
रेफं शिवं दकारञ्च ब्रह्मरूपं न चान्यथा।
पारदं परमेशानि ब्रह्मविष्णुशिवात्मकम्।
यो यजेत् पारदं लिङ्गं स एव शम्भुरव्ययः॥"

इति माहकाभेदतन्त्रे ८ पटलः॥

तस्य निर्म्माणविधानं पारदशब्दे द्रष्टव्यम्॥*॥

प्रकारान्तरशिवलिङ्गोत्पत्तिर्यथा—

"ततो विवाहं निर्व्वर्त्त्य कृतकृत्या यथागताः।
गताः सर्व्वे महेशोऽपि सत्या सह तदा गृहम्।
जगाम रेमे सत्या च चिरं निर्भरमानसः॥
अथ काले कदाचित्तु सत्या सह महेश्वरः।
रेमे न शेके तं सोढ़ुं सती श्रान्ताभवत्तदा।
उवाच दीनया वाचा देवदेवं जगद्गुरुम्॥
भगवन्न हि शक्नोमि तव भारं सुदुःसहम्।
क्षमस्व मां महादेव कृपां कुरु जगत्पते॥
निशम्य वचनं तस्या भगवान् त्र्यम्बकः।
निर्भरं रमण चक्रे गाढ़ं निर्भयमानसः॥

कृत्वा संपूर्णरमणं सती च त्यक्तमैथुना ।
उत्थानाय मनश्चक्रे उभयोस्तेज उत्तमम् ।
पपात धरणीपृष्ठे तैर्व्याप्तमखिलं जगत् ॥
पाताले भूतले स्वर्गे शिवलिङ्गास्तदाभवन् ।
तेन भूता भविष्याश्च शिवलिङ्गाः सयोनयः ॥
यत्र लिङ्गं तत्र योनिर्यत्र योनिस्ततः शिवः ।
उभयोश्चैव तेजोभिः शिवलिङ्गं व्यजायत ॥"

इति नारदपञ्चरात्रे ३ रात्रम् ॥*॥

कामनाभेदे पार्थिवलिङ्गसंख्या यथा,—

"संख्या पार्थिवलिङ्गस्य यथाकामं निगद्यते ।
मुक्तिदं पार्थिवं नाम भुक्तिमुक्तिकरं परम् ॥
देशकालादिकं ज्ञात्वा कुर्य्यात् लिङ्गं फलप्रदम्
न करोति यदा ज्ञात्वा न कार्य्यं तस्य सिध्यति
विद्यार्थी शतसाहस्रं धनार्थी च तदर्द्धकम् ।
पुत्रार्थी सार्द्धसाहस्रं कन्यार्थी च शतत्रयम् ॥
विद्वान् लिङ्गायुतं कुर्य्यात् सर्व्वपापहरं परम् ।
राज्यार्थी शतसाहस्रं कान्तार्थी शतपञ्चकम् ॥
मोक्षार्थी कोटिगुणितं भूतिकामः सहस्रकम् ।
रूपार्थी त्रिसहस्रन्तु तीर्थार्थी द्विसहस्रकमम् ।
सुहृत्कामः सहस्रन्तु वस्त्रार्थं शतमष्टकम् ॥
मारणार्थं सप्तशतं मोहनार्थं शताष्टकम् ॥
उच्चाटनवशार्थं च सहस्रन्तु यथोक्ततः ।
स्तम्भने च सहस्रन्तु दारणे च तदर्द्धकम् ॥
महाराजभये पञ्चशतञ्चापदि सङ्कटे ।
सहस्रमयुतं सर्व्वकामदं परिकीर्त्तितम् ॥
एकं पापहरं प्रोक्तं द्विलिङ्गञ्चार्थसिद्धिदम् ।
त्रिलिङ्गं सर्व्वकामानां कारणं परमीरितम् ॥"

तथा ।

"लिङ्गनामयुतं कृत्वा पूजां राजभयं हरेत् ।
सहस्राणि च लिङ्गानां निगड़ान्मोचयेद्ध्रुवम् ॥
कारागृहविमुक्त्यर्थमयुतं कारयेद्बुधः ।
डाकिन्यादिभये पञ्चसहस्रं कारयेत्तथा ।
सहस्राणाञ्च पञ्चाशदपुत्रो हि प्रकारयेत् ॥"

इति वीरमित्रोदयधृतम् ॥

"अनेन च क्रमादेवि लक्षं यस्तु प्रपूजयेत् ।
सर्व्वाभीष्टफलं देवि लभते नात्र संशयः ॥"*॥

एकीकृत्य लिङ्गपूजाविधिनिषेधौ यथा,—

"एकीकृत्य महेशानि युगलं न तु पूजयेत् ।
एकीकृत्य महेशानि दश पञ्च शतानि च ॥
प्रत्येकेनाथवा देवि विल्वपत्रैः प्रपूजयेत् ।
एकैकं पूजयेल्लिङ्गं युगलं न तु पूजयेत् ।
दरिद्रो जायते देवि युगलस्य च पूजनात् ॥"

इति लिङ्गार्च्चनतत्त्वम् ॥*॥

शिवलिङ्गमृत्तिकादिनिरूपणं यथा,—

"तीर्थमृत्स्नां समाहृत्य निर्म्माय लिङ्गमद्भुतम्
तीर्थाभावे महेशानि क्षुद्रस्य मृत्तिकां प्रिये ॥
पर्व्वतप्रभवा देवि नदीनाञ्चेत्युदाहृतम् ।
एतल्लिङ्गा महेशानि नदी क्षुद्रा इति प्रिये ॥
निर्झरस्य च देवेशि नदी सम्पत्प्रदायिनी ।
सर्व्वाभावे महेशानि गोष्पदस्याच्च मृत्तिकाम् ।
अथवा परमेशानि यत्र चित्तं प्रसीदति ॥
सुपीनं सुन्दरं रम्यं शर्करारहितं सदा ।
निर्म्माय पार्थिवं लिङ्गं कुण्डलीसहितं प्रिये ॥
यो लिङ्गं परमेशानि स रुद्रः परमेश्वरः ।
कुण्डली वेष्टनी तस्य सा देवी परमेश्वरी ॥
शिवस्य पूजनात् देवि देवीदेवी च पूजिती ॥"

इति मल्लसूक्तम् ॥*॥

बाणलिङ्गनिर्म्माल्यग्रहणे प्रतिप्रसवो यथा,—

"बाणलिङ्गे न चाशौचं न च निर्म्माल्यकल्पना
सर्व्वं बाणार्पितं ग्राह्यं भक्त्या भक्तैश्च नान्यथा ॥
ग्राह्याग्राह्यविचारोऽयं बाणलिङ्गे न विद्यते ।
तदर्पितं जलं पत्रं ग्राह्यं प्रसादसंज्ञया ॥
बाणलिङ्गे स्वयम्भूते चन्द्रकान्तेन्द्रसंस्थिते ।
चान्द्रायणसमं पुण्यं शम्भोर्नैवेद्यभक्षणे ॥"

इति शिवनारदसंवादः ॥

शिवलोकः, पुं, (शिवस्य लोकः ।) कैलासः । यथा,

"बिल्वपत्रैरखण्डैश्च यो लिङ्गं पूजयेत् सकृत् ।
सर्व्वपापैर्व्विनिर्मुक्तः शिवलोके महीयते ॥"

इति तिथ्यादितत्त्वधृतभविष्यपुराणम् ॥

शिवस्य भुवनं जनय ॥

शिववल्लभा, स्त्री, (शिवस्य वल्लभा ।) शतपत्री ।

इति राजनिर्घण्टः ॥ शिवप्रिये त्रि ॥

शिववल्लिका, स्त्री, (शिवस्य वल्लिका ।) लिङ्गिनी

इति राजनिर्घण्टः ॥

शिववल्ली, स्त्री, (शिवस्य वल्ली ।) लिङ्गिनी ।

श्रीवल्ली । इति राजनिर्घण्टः ॥

शिववाहनः, पुं, (शिवस्य वाहनः ।) वृषभः ।

इति राजनिर्घण्टः ॥

शिववीजं, क्ली, (शिवस्य वीजम् ।) पारदः ।

इति राजनिर्घण्टः ॥

शिवशेखरः, पुं, (शिवः सुखकरः शिवप्रियो वा शेखरोऽग्रो यस्य ।) धत्तूरवृक्षः । इति जटाधरः ॥ धुस्तूरः । इति राजनिर्घण्टः ॥ शिवस्य मस्तकस्थ ॥

शिवसायुज्यं, क्ली, (शिवस्य सायुज्यम् ।) मोक्षविशेषः । स च शिवेन सह योगः । यथा ।

नागरखण्डे ।

"उपवासप्रभावेण बलादपि च जागरात् ।
शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया ।
अक्षयान् लभते लोकान् शिवसायुज्यमाप्नुयात् ॥"

इति तिथ्यादितत्त्वम् ॥

शिवसुन्दरी, स्त्री, (शिवस्य सुन्दरी ।) दुर्गा ।

इति तन्त्रशास्त्रम् ॥

शिवा, स्त्री, (शिव + टाप् ।) दुर्गा । मुक्तिः । यथा,—

"शिवा मुक्तिः समाख्याता योगिनां मोक्षगामिनी ।
शिवाय यां जपेद्वीं शिवा लोके ततः स्मृता ॥"

इति देवीपुराणे ४५ अध्यायः ॥

अपि च ।

"शिवा कल्याणरूपा च शिवदा च शिवप्रिया ।
प्रिये दातरि चाशब्दः शिवा तेन प्रकीर्त्तिता ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥

अपरञ्च ।

"शय कल्याणवचन इरेवोत्कृष्टवाचकः ।
समूहवाचकश्चैव वाकारो दातृवाचकः ॥
श्रेयःसंघोत्कृष्टदात्री शिवा तेन प्रकीर्त्तिता ।
शिवराशिर्मूर्त्तिमती शिवा तेन प्रकीर्त्तिता ॥
शिवो हि मोक्षवचनश्चाकारो दातृवाचकः ।
स्वयं निर्व्वाणदात्री या सा शिवा परिकीर्त्तिता"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २७ अध्यायः ॥

शमीवृक्षः । हरीतकी । शृगालः । तामलकी । इत्यमरः ॥ आमलकी । इति मेदिनी ॥ बृहत्यग्निविशेषः । स तु द्वात्रिंशदग्निमाता ।

इति त्रिकाण्डशेषः ॥ हरिद्रा । दूर्व्वा । गोरोचना । इति राजनिर्घण्टः ॥ * ॥ शृगालस्य ध्वनेः शुभाशुभं यथा,—

"शोभनं शुभफलाग्निसूचकं
कथ्यतेत्वथितयं शिवारुतम् ।
शान्तदीप्तककुभां विशेषतो
ज्ञानमत्र च सदोपयुज्यते ॥
दग्धा दिगुत्रा दिननाथयुक्ता
विवस्वदामा भवति प्रदीप्ता ।
सा धूमिता यां सविता प्रयातः
शेषा दिगन्ताः किल पञ्च शान्ताः ॥
दग्धा दिगैशी ज्वलिता दिगैन्द्री
प्रधूमिता चानलदिक्क्रमेण ।
प्रत्येकमेकं प्रहराष्टकेन
भुङ्क्ते दिशोऽष्टौ सविता क्रमेण ॥
आद्ये दिनस्य प्रहरे प्रहृत्ते
महेशदेवेशदुताशदिक्षु ।
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययबन्धनानि ॥
भद्रो द्वितीये प्रहरस्य भागे
सहस्रनेत्रानलकालदिक्षु ।
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययबन्धनानि ॥
आग्नेय तृतीये प्रहरे दिनस्य
दुताशवैवस्वतयातुदिक्षु ।
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययबन्धनानि ॥
समागतेऽङ्कः प्रहरे तुरीये
प्रेतेश्वरक्षःपतिपाशिदिक्षु ।
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययबन्धनानि ॥
आद्ये निशायाः प्रहरे प्रहृत्ते
रक्षोऽधियादःपतिवातदिक्षु ।
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययबन्धनानि ॥
ततो द्वितीयप्रहरे रजन्या-
स्तोयोऽधिनाथानिलसोमदिक्षु ॥
शिवा रटन्ती कुरुते नराणां
संत्रासकायव्ययबन्धनानि ॥
यामे द्वतीयेऽपि च यामवत्याः
समीरदोषाकरशम्भुदिक्षु ।

शिवा रटन्ती कुरुते नराणां
सवासकायव्ययबन्धनानि ॥
समागते रात्रितुरीययामे
निशाकरेशानसुरेशदिक्षु ।
शिवा रटन्ती कुरुते नराणां
संवासकायव्ययबन्धनानि ॥"

इति शिवारुते दग्धदीप्तधूमितदिक्त्रययाम-प्रकरणं प्रथमम् ॥*॥

"इतीरितं दिक्त्रययामयोगात्
फलं विरुद्धं विरुतैः शिवायाः ।
ब्रूमोऽथ दिक्पञ्चकयामयोगात्
फलानि पुंसां क्रमतः शुभानि ॥
कृतान्तरक्षोवरुणानिलेन्दु-
दिक्षूदयामे रटितैः शृगाल्याः ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुमित्रं प्रियलोकसङ्गः ॥
रक्षःप्रचेतोऽनिलसोमशम्भु-
दिक्षु द्वितीये प्रहरे रुतेन ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुमित्रं प्रियलोकसङ्गः ॥
जलेशवातेन्दुशिवामरेश-
दिक्षूदयेऽगे प्रहरे तृतीये ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुमित्रं प्रियलोकसङ्गः ॥
समीरसोमेशसुरेशवह्नि-
दिक्षु स्वरेण प्रहरे चतुर्थे ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुमित्रं प्रियलोकसङ्गः ॥
शशाङ्करुद्रेन्दुहुताशकाल-
दिक्षूदयैः पञ्चमयामभागे ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुमित्रं प्रियलोकसङ्गः ॥
ईशानशक्राग्निकृतान्तरक्षो-
दिक्षु स्वरेण प्रहरे च षष्ठे ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुमित्रं प्रियलोकसङ्गः ॥
इन्द्राग्निकालस्रपपाशपाणि-
दिक्षूदयैः सप्तमयामकाले ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुमित्रं प्रियलोकसङ्गः ॥
अत्यन्तरक्तैर्नयनैस्तपाग्निवात-
दिक्षूदयेऽष्टमे च प्रहरे रवेश्च ।
स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धि-
र्लाभः सुमित्रं प्रियलोकसङ्गः ॥"

इति श्रीवसन्तराजे शिवारुते दिग्यामप्रकरणं द्वितीयम् ॥*॥

"एकादिकानां निधनाष्टमानां
शिवारुतानामधुना यदर्थम् ।
प्राच्यादिकास्वष्टसु दिक्ष्वशेषं
यद्यत् फलं तत्तदुदीरयामः ॥
धनान्यभीष्टाप्तिमभीष्टलाभं
ध्रुवं ततोऽर्थस्य फलं शुभञ्च ।
भयं प्रलापं सकलञ्च सौख्य-
मेकादिशब्दैः कुरुते प्रशान्ते ॥
भयान्यनिष्टश्रुतिरर्थहानि-
रिष्टैर्वियोगो महती च भीतिः ।
स्यादिग्रहाप्तिर्मरणञ्च दीप्ते
त्वेकादिना चेत् कृतसप्तकेन ॥
ऐन्द्र्यां निनादे प्रथमेऽर्थलाभो
भवेद्द्वितीये निधिदर्शनञ्च ।
कन्यां तृतीये लभते चतुर्थे
अध्वागमं पञ्चमकेऽथ सिद्धिम् ॥
षष्ठे रवे कुप्यति भूमिनाथो
भीः सप्तमे स्याद्विफलोऽष्टमेषु ॥
वासोऽग्निभागे प्रथमे द्वितीये
नराधिपः कुप्यति भीस्तृतीये ॥
घातश्चतुर्थे नगरस्य शब्दे
शिवाकृते पञ्चमके च युग्मम् ।
वदन्ति तज्ज्ञाः कलहञ्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ॥
आद्ये शुभं स्यादशुभं द्वितीये
याम्ये महाव्याधिभयं तृतीये ।
स्वरे चतुर्थे स्वजनागमः स्यात्
पुत्रो भवेत् पञ्चसु फेत्कृतेषु ॥
जायेत कन्या रटिते च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमंस्तु ।
ग्रामस्य घातो दिशि राक्षसाना-
माद्ये द्वितीयेऽपि च गोकुलस्य ॥
मृत्युस्तृतीये द्विचतुष्पदानां
हानिश्चतुर्थेऽपि च पञ्चमेऽत्र ।
चौराद्भयं राजभयञ्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ॥
शब्दे शिवाया वरुणस्य भागे
आद्ये भयं हानिरथ द्वितीये ।
स्याद्राजदूतागमनं तृतीये
दाहश्चतुर्थे खलु चौरभीतिः ॥
स्यात् पञ्चमे राजभयञ्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ।
वायव्यभागे भयमेकशब्दे
भयातिरेको भवति द्वितीये ॥
वृष्टिस्तृतीये महती चतुर्थे
मेघागमो वर्षति पञ्चमे च ।
क्रोधं विधत्ते नृपतेश्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ॥
दिश्युत्तरस्यां विहिते विरावे
म्रियेत कश्चित् प्रथमे द्वितीये ।
महाभयं विप्रवधस्तृतीये
चत्वं चतुर्थे खलु हन्यते च ॥
विट् पञ्चमे षष्ठरवे च शूद्रो
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ।
राहोस्तथा दर्शनमाद्यशब्दे
केतोर्द्वितीये च तथोत्तरेण ॥
उल्काप्रपातस्त्रिषु दुर्दिनञ्च
चतुर्षु भद्रं खलु पञ्चमे च ।
सङ्गो भवेद्वैरिजनश्च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ॥
आद्ये भवेद्दर्दिनमीशदेशे
वृष्टिर्द्वितीये च रवे शिवायाः ।
वातस्तृतीये ज्वलनश्चतुर्थे
म्रियेत कश्चित् खलु पञ्चमे च ॥
लभेत पृथ्वीं निनदे च षष्ठे
भीः सप्तमे स्याद्विफलोऽष्टमस्तु ॥"

इति श्रीवसन्तराजे शिवारुते स्वराष्टकप्रकरणं तृतीयम् ॥ * ॥

"क्षेमलाभपुनरागमनानां
निश्चयं यमधिगम्य विशङ्कः ।
येन याति पथिकः परदेशं
तं शिवारुतमथ प्रथयामः ॥
यं यं देशं गन्तुमभ्युद्यतानां
पुंसां शब्दानुच्चरन्ती शृगाली ।
शान्तायां सा सिद्धये वाञ्छितानां
दीप्तायान्तु स्यादभीष्टक्षयाय ॥
प्राचीं दिशं सन्मुखभानुबिम्बं
प्रतिष्ठमानस्य नरस्य यस्य ।
शब्दं शृगाली पुरतः करोति
बन्धं वधं वा प्रकरोति तस्य ॥
प्राचीदिगीशाभिमुखस्य पुंसः
प्रस्थानकामस्य शिवा सशब्दा ।
भियेऽर्थनाशाय च दक्षिणा स्या-
द्वामा पुनर्वाञ्छितकार्यसिद्ध्यै ॥
प्रत्यक्कमाशां चलितस्य पूर्वां
शिवा विरावं पुरतस्य यस्य ।
करोति पृष्ठे प्रकरोति तस्य
सर्वं प्रकारामभिलाषसिद्धिम् ॥
प्रस्थापिनो यस्य च दक्षिणाशां
शिवा रवं मुञ्चति दक्षिणेन ।
आदित्यमुक्ता यदि नो तदानीं
ध्रुवं भवेत्तस्य महीपतित्वम् ॥
वैवस्वताशां चलितस्य यस्य
दिवाकरस्तिष्ठति दक्षिणेन ।
शिवा च वामा कुरुते विरावं
सम्पद्यते तस्य समस्तमिष्टम् ॥
पुमान् यदा याम्यककुप्प्रवासी
करोति शब्दं पुरतः शृगाली ।
आस्ते विवस्वानपि सम्मुखेत
भवेत् तदानीमचिरेण मृत्युः ॥
नरस्य याम्यां ककुभं यियासोः
शृगालभार्या यदि पृष्ठभागे ।
फेत्कारमामुञ्चति मानवस्य
मृत्युश्च पुत्रेण भवत्यवश्यम् ॥
दिशं प्रतीचीं व्रजतः शृगाली
नरस्य यस्याभिमुखी विरौति ।
शान्ता स्थिता शान्तफलप्रदात्री-
दीप्ता तु दीप्तं फलमातनोति ॥
प्राचेतसीं सञ्चलितस्य काष्ठां
शृगालिका जल्पति दक्षिणेन ।

यदा तदानीं सुवङ्ननर्थान्
करोति चार्थानपि हन्ति पुंसः ॥
दिशं प्रचेतःपरिपाल्यमानां
नरस्य यस्य व्रजतः शृगाली ।
वामा विरावं प्रकरोति शान्ता
भवन्त्यभिप्रेतफलानि तस्य ॥
यो वारुणीं याति दिशं मनुष्यः
शृखन् शिवाया रटितानि पृष्ठे ।
गतस्य तस्याशु हुताशभीति-
रसंशयं स्यात् द्रविणक्षयश्च ॥
यस्योत्तराशां चलितस्य पुंसः
प्राच्यां शिवा मुञ्चति फेत्कृतानि ।
भानुःप्रतीच्यां विहितस्थितिश्चे-
दपेक्षितं सिध्यति तत्क्षणेन ॥
मुञ्चत्युदीचीं चलितस्य पृष्ठे
शिवा विरावं पुरुषस्य यस्य ।
आस्ते च मध्ये नभसो विवस्वां-
स्तस्यार्थहानिर्मरणं प्रदिष्टम् ॥
कुबेरकाष्ठां प्रति यः प्रयाति
ज्वालामुखी चाभिमुखी विरौति ।
तस्याध्वगस्याभिमतार्थसिद्धि-
र्भवेच्च सम्यत् पुनरागमश्च ॥
तिष्ठति तीव्रकरो दिशि यस्यां
फेत् कुरुते यदि तत्र शृगाली ।
तद्व्रजतः पथिकस्य भवेतां
निश्चयतो धनजीवितनाशौ ॥
दक्षिणतः प्रथमं यदि पश्चात्
वामगता पथिकस्य शृगाली ।
फेत्कुरुते कुरुते तदवश्यं
क्षेमधनास्निग्धहागमनानि ॥
अध्यास्य शान्तां ककुभं नरस्य
वामा शृगाली यदि वा रटन्ती ॥
तदार्थलाभं वितरत्यवश्य-
मर्थक्षयं दक्षिणतो रटन्ती ॥
वामा प्रदीप्ते ककुभः प्रदेशे-
ऽलाभं तथानर्थमुपादिशन्ति ।
शिवा रटन्ती पथि दक्षिणा तु
क्षिपत्यनर्थानथ सङ्कटेषु ॥
शान्ते दिगन्ते यदि वा प्रदीप्ते
पृष्ठे प्रयाणे प्रतिषेधयित्री ।
शब्दायमाना तु शिवा पुरस्तात्
निमज्जयत्यापदगाधसिन्धौ ॥
वामेऽपसव्ये पुरतोऽथ पृष्ठे
पुंसः शिवा जल्पति यत्र तत्र ।
आयान्ति चौराः प्रथमे विरावे
द्वयोर्भवेत्तस्करदर्शनञ्च ॥
नृपादरोऽर्थागमनं तृतीये
तुर्ये क्षतिः पञ्चमकेऽर्थलाभः ।
वाणिज्यसेवादिफलाय षष्ठे
भोः सप्तमे स्यादिफलोऽष्टमस्तु ॥
हाहारवं मुञ्चति दुष्टभावा
शस्यं तु तस्यास्तुदाहरन्ति ।
अग्रेसरा दा पथि या वियासोः
सा द्विप्रकारापि मनोरथानाम् ।
नृपस्य यात्रासमये पुरस्तात्
प्रयाति चेदर्त्तं निवेदयन्ती ।
कुर्य्याच्छिवा वैरिपराभवं त-
ज्जयश्रियश्चाभिमतं विदध्यात् ॥
कार्य्यान्तरेष्वप्यनुगम्यमाना
श्रेयःप्रदा शान्तदिशि प्रदिष्टा ।
शिवा प्रदीप्ते तु दिशि प्रदेशे
समारटन्ती महते भयाय ॥
भयोद्गमे दीप्तदिशि प्रदीप्ते-
र्नादैर्नृणां हन्ति भयानि देवी ।
महान्ति सर्व्वाण्यपि शान्तनादाः
शान्तस्थिता सर्व्वभयप्रदात्री ॥
यदा च नद्युत्तरगा नराणां
शब्दं शृगाली कुरुते कदाचित् ।
तटद्वये तत् परिरक्षणीयं
महद्भयं भावि जलेचरेभ्यः ॥"

इति श्रीवसन्तराजे शिवारुते यात्राप्रकरणं चतुर्थम् ॥ * ॥

"स्थानस्थितानामपि योगभाजां
नैमित्तिकानामुपदिश्यते तु ।
शिवाविरावैरशिवं शिवञ्च
सुनिश्चितार्थं सुनिसर्गतेन ॥
करोति फे फे इति सर्व्वदिक्षु
यदा तदा स्थानविघातयुद्धे ।
शिवा विधत्ते क्षुधिता त्वसंख्यान्
रौद्रान् स्वरान् मुञ्चति चेदुपेक्षाम् ॥
निरन्तरं रौति विदिक्षु दिक्षु
समन्दकारुण्यरवातुरा चेत् ।
अपत्यमोहेन यदा शृगाली
त्यक्तस्यसृङ्मा सा कथितेह तज्ज्ञैः ॥
स्थित्वा प्रदीप्ते ककुभो विभागे
ज्वालामुखी फेत् कुरुतेऽतिरौद्रम् ।
ग्रामस्य तस्य प्रकरोति नाशं
तस्याथवा तिष्ठति यस्य मध्ये ॥
ग्रामस्य मध्यं समवाप्य यस्य
ज्वालामुखी मुञ्चति फेत्कृतानि ।
स शून्यतां गच्छति निश्चयेन
लोकस्य वा स्यादसुखं प्रभूतम् ॥
ग्रामान्तिके सप्त दिनानि यावत्
महाभयोत्पादितफेत्कृतानि ।
विरौति चेत्तत् कुरुते शृगाली
तद्दर्शिलोकस्य भयं प्रभूतम् ॥
मध्यं दिने यावदहानि पञ्च
शिवा समीपे नगरस्य तस्य
विरौति घातं विदधाति यस्य
भयञ्च वह्निप्रभवं प्रभूतम् ॥
पञ्चार्द्धरात्राणि कथञ्चिदेषा
क्रूरारवा व्याहरते शृगाली ।
यस्यान्तिके तं बहवो दृढेन
मुष्णन्ति चौरा जनसन्निवेशे ॥
स्थानस्य यस्योपगता समीपं
दिनानि पञ्चोच्चरति प्रभावे ।
स्वरेण रौद्रेण शृगालभार्य्या
स्यात्तत्र हानिर्महती नराणाम् ॥
सुरक्षितस्यापि मनुष्यलक्षै-
र्ग्रामस्य शीघ्रं ग्रहणं विधत्ते ।
त्रयं दिनानां दिवसावसाने
शिवा रटन्ति परुषस्वरेण ॥
दिक्षुरटन्ति सकलासु रौद्रं
भ्रमत्यधिक्षा परितः पुरन्ध्रेत् ।
शृगालभार्य्या खलु तद्ब्रवीति
युद्धं महत्तत्र महाभिघातम् ॥
ज्वालां विमुञ्चत्यतिरौद्रनादा
समाकुला धावति या समन्तात् ।
कौमारकं या जनयत्यकस्मात् ।
कुर्य्याच्छिवा सा युवराजपातम् ॥
रोमोद्गमं या जनयत्यकस्मात्
फे इत्यतिक्रूररवा नराणाम् ।
सूत्रं पुरीषन्तु तुरङ्गभाणां
सा सर्व्वदा स्यादशिवा शिवेह ॥
तरङ्गिणीरोधसि सौम्यरूपां-
स्त्रीन् पञ्च वा मुञ्चति या निनादान् ।
शिवां शिवां तां नृपतित्वदार्द्धीं
वन्देत देवीमभिवन्दनीयाम् ॥
श्मशानभूमौ दिनमध्यभागे
मध्ये रजन्याः स्वगृहप्रदेशे ।
या रौति तस्यै बलिमर्घ्ययुक्तं
भक्त्या प्रदद्यादयदि भद्रमिच्छेत् ॥
सर्व्वेषु कार्य्येषु समुद्यतेषु
बलिः शिवाया विनिवेदनीयः ।
गृह्णाति यस्मिन् विषयेऽभ्युपेत्य
देवी बलिं जल्पति तत्र सिद्धिम् ॥"

इति श्रीवसन्तराजे शिवारुते स्थानस्थितप्रकरणं पञ्चमम् ॥ * ॥

"कथ्यते बलिविधानमिदानीं
शाकुनागममतेन शिवायाः ।
दिव्यमन्त्रबलिबाधितदोषं
साधिताखिलसमुद्यतकार्य्यम् ॥
शून्यालयं रुद्रगृहं श्मशानं
चतुष्पथं मातृगृहं जलान्तम् ।
बन्ध्यावनिश्चत्वरमेवमाद्या
बलिप्रदानाय मताः प्रदेशाः ॥
तेषाञ्च मध्यादुचितप्रदेशे
विशोधितं मण्डलिकं विदध्यात् ।
पौराणिकश्लोकपरीक्षितायाः
संगृह्य गोर्गोमयमन्तरीक्षात् ॥
अत्यन्तजीर्णदेहाया बन्ध्यायाश्च विशेषतः ।
रोगार्त्तनवसूताया न गोर्गोमयमाहरेत् ॥
तस्मिन् विचित्रं विततं विदध्यात्
पिष्टाक्तकेनाष्टदलं सरोजम् ।
संपूजयेत्तत्र सुराधिपादीन्
क्रमेण सर्व्वानपि लोकपालान् ॥

मध्ये सुनेः पञ्चभिरभ्युपेता
शिवान्विता पिष्टमयी प्रसन्ना।
पूज्या शिवा तुष्यति भक्तियोगात्
प्रभूतपुण्याक्षतधूपदीपैः॥
साज्यगुड़ौदनमाषकुलत्थै-
र्यावकपूपलिकामिषमद्यैः।
संभृतिरत्र नरासनमात्रं
बुद्धिमता बलिकर्म्मणि कार्य्या॥
प्राप्याष्टमीं वाथ चतुर्दशीं वा
संमन्त्र्य मन्त्रेण च सप्तकृत्वः।
बलिं शिवाया निशि निश्चयेन
दद्यान्नृणो यदि भद्रमिच्छेत्॥

अत्र मन्त्रः। ॐ शिवे ज्वालामुखि बलिं गृह्णाण गृह्णाण हुं फट् स्वाहा। ॐ शिवे शिवदूति भगवति चण्डे इदमर्घ्यं बलिलीलासमुचितं गृह्णाण गृह्णाण आगच्छ आगच्छ वायुवेगेन शुभं कुरु कुरु स्वाहा। इत्यर्घ्यमन्त्रः। बलिदानाय मन्त्रान्तरम्। ॐ नमो भगवति एनं एनं बलिं गृह्ण गृह्ण गन्धपुष्पधूपदीपादिकं दह दह पच पच घोररूपिणि भो भगवति पिबत पिबत स्वाहा।

एतस्य मन्त्रद्वितयस्य मध्या-
टेकेन केनाप्यभिमन्त्रणीयः।
बलिः शिवायाः सुमहाप्रभावं
पृथक् पृथक् मन्त्रयुगं यदेतत्॥
ताम्बूलवस्त्राभरणदक्षिणाभि-
र्नैमित्तिकं शाकुनशास्त्रदक्षम्।
प्रपूजयेत्तत्र भवत्यभीष्ट-
माचार्य्यवर्य्यं परितोषिते हि॥
अग्नेर्विकावद्भिक्षतान्तरुद्र-
धिष्ट्यानि पूर्व्वांक्तितयेन सार्द्धम्।
ज्यष्ठाञ्च सन्त्यज्य विरौति यैष
श्रेयस्करी जम्बुकगेहिनी सा॥
हितैषिणी सर्व्वममीहितेषु
देवी भवानी भुवि फेरवा च।
कृताधिवासा कृपया सदैव
शिवारुतं तेन यतेत विद्वान्॥"

इति श्रीवसन्तराजशाकुने सदागमार्थशोधने समस्तसत्यकौतुके विरचितं शिवारुतं षष्ठम्॥*

अथ तान्त्रिकशिवाबलिः। तदुक्तं कुलचूड़ामणौ "विल्वमूले प्रान्तरे वा श्मशाने वाथ साधकः। मांसप्रधानं नैवेद्यं सन्ध्याकाले निवेदयेत्॥ कालि कालीति वक्तव्यं ततः सा शिवरूपिणी पशुरूपा समायाति परिवारगणैः सह॥ भुक्त्वा रौति यदेशान्यां मुखमुत्तोल्य सुस्वरम्। तदैव मङ्गलं तस्य नान्यथा कुलभूषण॥ अवश्यमत्रदानेन नियतं तोषयेच्छिवाम्। नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम्॥ तथैव कुलसेव्यानां नित्यता कुलपूजने। पशुरूपां शिवां देवीं यो नार्च्चयति निर्जने॥ शिवारावेण तस्याशु सर्व्वं नश्यति निश्चितम्। जपपूजाविधानानि यत्किञ्चित् सुकृतानि च। गृहीत्वा शापं दत्त्वा च शिवा रोदिति निर्जने॥ एकया भुज्यते यत्र शिवया देव भैरव। तत्रैव सर्व्वशक्तीनां प्रीतिः परमदुर्लभा॥ पशुशक्तिः पक्षिशक्तिर्नरशक्तिर्यथाक्रमात्। पूजनात् द्विगुणं कर्म्म मङ्गलं साधयेत्ततः॥ तेन सर्व्वप्रयत्नेन कर्त्तव्यं पूजनं महत्। राजादिभयमापन्ने देशान्तरभयादिके॥ शुभाशुभानि कर्म्माणि विचिन्त्य बलिमाहरेत्। गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि॥ शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण बलिं तव। एवमुच्चार्य्य दातव्यो बलिः कुलजनप्रियः॥ यदि नो भुज्यते वत्स तदा नैव शुभं भवेत्। शुभं यदि भवेत्तत्र भुज्यते तदशेषतः। एवं ज्ञात्वा महादेव शान्तिस्वस्ययनं चरेत्॥"

इति तन्त्रसारः॥

शिवाटं, क्ली, (शिवस्याटि कारणत्वेनास्त्यस्येति। अच्।) रुद्राक्षम्। इति राजनिर्घण्टः॥ (अस्य विवरणं रुद्राक्षशब्दे द्रष्टव्यम्॥)

शिवाटिका, स्त्री, वंशपत्री। इति भावप्रकाशः॥

शिवात्मकं, क्ली, (शिवः सुखकरः आत्मा स्वरूपो यस्य।) सैन्धवम्। इति राजनिर्घण्टः॥ शिवमये, त्रि॥

शिवानी, स्त्री, (शिवस्य भार्य्या। यद्वा, शिवं मङ्गलमानयतीति। आ+नी+ङः। गौरादित्वात् ङीष्।) दुर्गा। इति लोकप्रसिद्धिः॥ जयन्तीवृक्षः। इति शब्दचन्द्रिका॥

शिवाप्रियः, पुं, (शिवायाः प्रियः।) छागः। इति विकाण्डशेषः॥ शिवस्य शिवाया अप्रियवस्तुनि शिवाया वल्लभे च त्रि॥

शिवापोड़ः, पुं, (शिवस्यापीड़ इव।) वकवृक्षः। इति राजनिर्घण्टः॥ शिवाशिवयोः शेखरत्व॥

शिवाफला, स्त्री, (शिवाया इव फलमस्याः।) शमीवृक्षः। इति राजनिर्घण्टः॥

शिवारातिः, पुं, (शिवायाः शृगालस्यारातिः।) कुक्कुरः। इति शब्दमाला॥ शिवाशिवयोः शत्रुत्व

शिवालयः, पुं, (शिवा आलीयतेऽत्रेति। आ+ली+अच्।) श्मशानम्। इति हारावली॥ (यथा, कथासरित्सागरे। ३। ३३।

"वध्यार्थं युद्यमानौ च पुण्ये शून्ये शिवालये॥")

शिवालयः, पुं, (शिवायाः शिवस्य वा आलयः।) रक्ततुलसी। इति शब्दचन्द्रिका॥ शिवस्य गृहम्। यथा, रामार्च्चनचन्द्रिकायाम्।

"चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये। मन्त्रमात्रप्रकथनमुपदेशः स उच्यते॥"

इति तिथ्यादितत्त्वम्॥

शिवालुः, पुं, शृगालः। इति राजनिर्घण्टः॥

शिवा(ब)लिः, पुं, (शिवाभ्यो दीयमानो बलिः।) रात्रौ शिवादेयमांसप्रधाननैवेद्यम्। यथा। अथ शिवाबलिः। कुलचूड़ामणौ।

"विल्वमूले प्रान्तरे वा श्मशाने वापि साधकः मांसप्रधाननैवेद्यं सन्ध्याकाले निवेदयेत्॥ कालि कालीति वक्तव्ये ततोमा शिवरूपिणी। पशुरूपधरायाति परिवारगणैः सह॥ भुक्त्वा रौति यदेशान्यां मुखमुत्तोल्य सुस्वरम्। तदैव मङ्गलं तस्य नान्यथाकुल भूषण॥ अवश्यमत्रदानेन नियतं तोषयेच्छिवाम्। नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम्॥ तथैव कुलसेव्यानां नित्यता कुलपूजने। पशुरूपां शिवां देवीं यो नार्च्चयति निर्जने॥ शिवारावेण तस्याशु सर्व्वं नश्यति निश्चितम्। जपपूजाविधानानि यत्किञ्चित् सुकृतानि च॥ गृहीत्वा शापं दत्त्वा च शिवा रोदिति निर्जने। एकया भुज्यते यत्र शिवया देव भैरव॥ तत्रैव सर्व्वशक्तीनां प्रीतिः परमदुर्लभा। पशुशक्तिः पक्षिशक्तिर्नरशक्तिर्यथाक्रमात्॥ पूजनात् द्विगुणं कर्म्म मङ्गलं साधयेत्ततः। तेन सर्व्वप्रयत्नेन कर्त्तव्यं पूजनं महत्॥*॥ राजादिभयमापन्ने देशान्तरभयादिके। शुभाशुभानि कर्म्माणि विचिन्त्य बलिमाहरेत्॥ गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि। शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण बलिं तव॥ एवमुच्चार्य्य दातव्यो बलिः कुलजनप्रियः। यदि न भुज्यते वत्स तदा नैव शुभं भवेत्॥ शुभं यदि भवेत्तत्र भुज्यते तदशेषतः। एवं ज्ञात्वा महादेव शान्तिस्वस्ययनं चरेत्॥ नैवेद्योपरि मूलमन्त्रमष्टोत्तरशतं जप्त्वा बलिं दद्यादिति शेषः।।" इति तन्त्रसारः॥

शिवास्मृतिः, स्त्री, जयन्तीवृक्षः। इति शब्दचन्द्रिका॥

शिवाङ्गादः, पुं, (शिवस्याङ्गादो यस्मात्।) वकवृक्षः। इति राजनिर्घण्टः॥ शिवस्यानन्दश्च॥

शिवाङ्गा, स्त्री, (शिवेन आङ्गा यस्याः।) रुद्रजटा इति राजनिर्घण्टः॥ शिवनामके त्रि॥

शिविः, पुं, हिंस्रपशुः। इति त्रिकाण्डशेषः॥ भूर्ज्जवृक्षः। राजविशेषः। स च उशीनरराजपुत्रः। इति मेदिनी॥ तस्य चरित्रं यथा,—

मैत्रेय उवाच।

"शृणु राजन्! प्रवक्ष्यामि स्वमांसं शिविना यथा समांगं दत्तवान् सत्यं पुरा शैव्यो नरो युवा॥ सत्यदानरतं ज्ञात्वा शिविमिन्द्राग्नयश्चणौ। जिज्ञासार्थं समेयातां वर्त्तमाने महाध्वरे॥ वह्निर्भूत्वा कपोतस्तु इरिश्येनपुरःसरः। शरणार्थी महीपालं निनिन्ये भयविह्वलः॥ त्राहि मां पृथिवीपालेत्यवदत् श्येनजाद्भयात्। स तमाश्वासयामास कपोतं शरणागतम्॥ राजानमुपगम्याथ श्येनः प्रोवाच संसदि। वचनं शृणु मे राजन्! क्षुधार्त्तस्य कुटुम्बिनः॥ धर्म्मात्मानं त्वामाहुर्वै पृथिव्यां सर्व्वपार्थिवाः। तद्विरुद्धं कथं कर्म्म कर्त्तुमिच्छसि पार्थिव॥ सर्व्वस्य सम्यदः स्वार्थाः स्वपरार्थास्तु कस्यचित्। परार्था भवतो नित्यं सफलस्य तरोरिव॥ नोपकारपरेऽप्येवमुपकारपरो जनः। अपकारपरेऽपि त्वमुपकारपरः सदा॥ ममैव विहितो धात्रा भक्षोऽयं त्वं सुतुत्सृज।

स श्येनमाह संप्राप्तस्त्राणार्थी सन्निधा मम ॥
तस्मात्तवाहं न समर्पयिष्ये
कपोतकं श्येन यदत्र युक्तम् ।
त्वं मन्यसे तत् करवाणि सर्व्व-
मृते कपोतात् खलु सत्यमत्र ॥
तुभ्यं हि सुमहद्राज्यं प्रयच्छामि विहङ्गम ।
यथा कामयसे चान्यद्गृह्यतां कपोतकम् ॥
श्येनः प्राह किमेतत्ते प्रीतिरासीत् खगे दृढ़ा ।
कथञ्चिदस्य तुल्यानि स्वमांसानि प्रयच्छ मे ॥
राजा तमब्रवीद्दृष्टो यस्मे मांसानि याचसे ।
एतद्ददामि ते सद्यः स्वमांसं तुलया धृतम् ॥
एवमुक्ता स्वमांसानि कपोतेन समं नृपः ।
उत्कृत्य तोलयामास प्रहृष्टो मनसा ततः ॥
तुलया ध्रियमाणस्तु कपोतो व्यतिरिच्यते ।
पुनश्चोत्कृत्य मांसानि ततः प्रादात् स पार्थिवः
न विद्यते यदा मांसं कपोतेन समं क्वचित् ।
ततः प्रक्षीणमांसोऽपि साधुः सुखयते परम् ॥
यदा तेन न तुल्यं तत् स तुलामारुहत् स्वयम् ।
अन्तःपुरस्त्रीषु न राज्ये न च जीविते ॥
करुणासक्तचित्तेन तेनापेक्षा कृता क्वचित् ।
परदुःखातुरा नित्यं स्वसुखानि महन्त्यपि ॥
नापेक्षन्ते महात्मानः सर्व्वभूतहिते रताः ।
परार्थमुद्यताः सन्तः सन्तः किं किं न कुर्व्वते ॥
तादृगप्यम्बुधेर्व्वारि जलदैस्तात् प्रपीयते ।
एक एव सतां मार्गो यदङ्गीकृतपालनम् ॥
दहन्तमकरोत् क्रोडे पावकं यदपां पतिः ।
प्रात्मानं पीड़यित्वापि साधुः सुखयते परम् ॥
ह्लादयन् तापितान् दृष्ट्वा दुःखञ्च सहते स्वयम्
अथ तस्मिन् समारूढे पुष्पवर्षं पपात च ॥
देवदुन्दुभयो नेदुस्तुलामौशीनरे नृपे ।
ततस्तस्य तदा ज्ञात्वा वाक्यं चैतदभाषत ॥
शक्रः स्वरूपमास्थाय धर्म्मो राज्ञः परिस्थितिम् ।
इन्द्रोऽहमस्मि भद्रं ते कपोतो हव्यवाहनः ॥
जिज्ञासमानौ त्वां राजन्निमं यज्ञमुपागतौ ।
महाकारुणिकेनेह यत् कृतं तत् सुदुष्करम् ॥
नैव पूर्व्वे नृपाश्चक्रुर्न करिष्यन्ति चापरे ।
यत्ते मांसानि गात्रेभ्यः समुत्कृत्तानि पार्थिव ॥
एषा ते शाश्वती कीर्त्तिर्लोकाननुभविष्यति ।
दिव्यरूपधरश्चैव पालयित्वा महीं चिरम् ॥
सर्व्वान् लोकानतिक्रम्य ब्रह्मलोकं गमिष्यति ।
एव मुक्ता तमिन्द्राग्नी जग्मतुस्त्रिदशालयम् ।
राजा तु क्रतुमिष्टा तं समुदे देवतां तदा ॥"
इति वह्निपुराणे शिवेरुपाख्याननामाध्यायः ॥

शिविका, स्त्री, (शिवं करोतीति । शिव + णिच् ततो खुल् । टापि अत इत्वम् ।) यानविशेषः । झाँपान् इति ख्यातः । इतिभरतः ॥ डुली इति पाल्की इति च भाषा । तत्पर्य्यायः । याप्ययानम् २ । इत्यमरः ॥ शिवीरथः ३ । इति हारावली ॥ तद्दानविधिर्यथा—

वह्निरुवाच ।
"शृणु तावन्महीपाल महादानमनुत्तमम् ।
येन वै दत्तमात्रेण मुच्यते नरकार्णवात् ॥
मार्गशीर्षे शुभे पक्षे समुपोष्य हरेर्दिने ।
माघफाल्गुनयोर्व्वापि वैशाखस्य शरत्सु च ॥
द्वादश्यां हरिमभ्यर्च्च कलसोपरिसंस्थितम् ।
शिविकां चक्रवंशोत्थां ऋजुदारुमयीं तथा ॥
आनाय सन्निधिं विष्णोः शुभच्छत्रसमन्विताम्
संभूय च सगेष्टूकां जागरं तत्र कारयेत् ॥
विद्याभिजनसम्पन्नविदग्धं शास्त्रवित्तमम् ।
आज्ञासारं शुचिं दक्षं कलत्रापत्यभूषितम् ॥
प्रातः सभार्य्यमभ्यर्च्च वासोभिः स्वर्णभूषणैः ।
उपानच्छुरिकां खड्गां पट्टकञ्चुकवेणुकाम् ॥
आदर्शस्थगिकां पानीयपात्रं कांस्यभाजनम् ।
चत्वारो वृषभा देया धेनवः शुभलक्षणाः ॥
शिविकावाहकानान्तु तथा छत्रस्य धारके ।
वृत्तिर्देया तथानन्त्र वर्षान्नं ब्राह्मणस्य तु ॥
वर्षे वर्षे पुनर्देयं ब्राह्मणस्य तदैव तु ।
वृत्तिरेव त्वसम्पत्तौ वर्षे वर्षेऽपि वार्षिकी ॥
इहामुत्रातपत्राणं कुरु केशव मे प्रभो ।
त्वत्प्रीणनाय मे दत्त शास्त्रविद्ब्राह्मणाय वै ॥
यत् प्रभो शिविकां देव प्रीतो भव जनार्द्दन ।
दत्तवान् ज्ञानविदुषे सपत्नीकाय पुत्रिणे ॥
सुरापस्त्रेयक्लस्त्रङ्गो ब्रह्महा गुरुतल्पगः ।
शिविकादानमाहात्म्यात् मुच्यते नात्र संशयः॥
पितृपक्षान्मातृपक्षान् पत्नीपक्षांस्तथैव च ।
आत्मानं बन्धुपक्षांश्च तारयेन्नरकार्णवात् ॥
मुक्ता स विपुलान् भोगान् इहामुत्र सुखप्रदान्
सपत्नीकः सपितृको विष्णुसायुज्यमश्नुते ॥"
इति वह्निपुराणे शिविकादानाध्यायः ॥

शिविष्टः, पुं, महादेवः । इति शब्दरत्नावली॥
शिपिविष्टशब्दार्थोऽप्यत्र ॥

शिविरं क्ली, (शेरते राजबलान्यत्र । शीङ् स्वप्ने + वाहुलकात् किरच्प्रत्ययेन साधु । इत्युणादिवृत्तौ उज्ज्वलदत्तः ।१ ।५४ ।) निवेशः । इत्यमरः॥ हे आगन्तुकसैन्यवासे। कटके इत्यन्ये । नृपस्य मूलस्थाने इत्येके । इति भरतः ॥
"शिविरन्तु निवेशे च क्लीवन्तु युद्धवेश्मनि ॥"
इत्युणादिकोषः ॥ * ॥

अथ शिविरलक्षणम् ।
श्रीभगवानुवाच ।
"शिविरं परिखायुक्तमुच्चैःप्राकारवेष्टितम् ।
युक्तद्वादशद्वारञ्च सिंहद्वारपुरस्कृतम् ॥
युक्तं चित्रैर्विचित्रैश्च क्रमेणैव कपाटकैः ।
निषिद्धवृत्तरहितं प्रसिद्धैश्च पुरस्कृतम् ।
सुलक्षणं चन्द्रवेधं प्राङ्मुखञ्च तथैव च ॥"
तत्र विहितनिषिद्धकाष्ठे यथा,—
विश्वकारुरुवाच ।
"कस्य कस्य तरोः काष्ठं प्रशस्तं शिविरे प्रभो।
अमङ्गलञ्च केषां वा सर्व्वं मां वक्तुमर्हसि ॥
श्रीभगवानुवाच ।
आम्रमे नारिकेलञ्च गृहिणाञ्च धनप्रदः ।
शिविरस्य यदीशाने पूर्व्वे पुत्रप्रदस्तरुः ॥
सर्व्वत्र मङ्गलार्हश्च तरुराजो मनोहरः ।
रसालवृक्षः पूर्व्वस्मिन् नृणां सम्पत्प्रदस्तथा ॥
शुभप्रदश्च सर्व्वत्र सुरकारो निशामय ।
विल्वश्च पनसश्चैव जम्बोरो वदरी तथा ॥
प्रजाप्रदश्च पूर्व्वस्मिन् दक्षिणे धनदस्तथा ।
सम्पत्प्रदश्च सर्व्वत्र यतो हि वर्द्धते गृही ॥
जम्बुवृक्षश्च दाड़िम्बः कदल्याम्रातकस्तथा ।
बन्धुप्रदश्च पूर्व्वस्मिन् दक्षिणे मित्रदस्तथा ॥
सर्व्वत्र शुभदश्चैव धनपुत्रशुभप्रदः ।
हर्षप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा ॥
ईशाने सुखदश्चैव सर्व्वत्रैवं निशामय ।
सर्व्वत्र चम्पकः शुद्धो भुवि भद्रप्रदस्तथा ॥
अलाबुश्चापि कुष्माण्डं मायाम्बु च सुकामुक
खर्ज्जूरी कर्कटी चापि शिविरे मङ्गलप्रदाः ॥
वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदाः।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥*॥
प्रशस्तं कथितं कारो निषिद्धञ्च निशामय ।
वन्यवृक्षो निषिद्धश्च शिविरे नगरेऽपि च ॥
वटो निषिद्धः शिविरे नित्यं चौरभयं ततः ।
नगरेषु प्रसिद्धश्च दर्शनात् पुण्यदस्तथा ॥
हे कारो तिन्तिड़ीवृक्षो यत्नात्तं परिवर्জ্জय ।
शरेण धनहानिः स्यात् प्रजाहानिर्भवेत् ध्रुवम्॥
शिविरेऽतिनिषिद्धश्च नगरे किञ्चिदेव च ।
न निषिद्धः प्रषिद्धश्च नगरेषु तथा पुरे ॥
वाय्वामतिनिषिद्धश्च प्राज्ञस्तं परिवर्জ্জयेत् ।
खर्জ্জूरश्च डहुश्चैव निषिद्धः शिविरे तथा ॥
न निषिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च ।
वृक्षश्च धनकादीनां धान्यञ्च मङ्गलप्रदम् ॥
ग्रामेषु नगरे चापि शिविरे च तथैव च ।
वृक्षवृक्षश्च शुभदः सन्ततं शुभदस्तथा ॥
अशोकश्च शिरीषश्च कदम्बश्च शुभप्रदः ।
कञ्ची हरिद्रा शुभदा शुभदश्चाद्रकस्तथा ॥
हरीतकी च शुभदा ग्रामेषु नगरेषु च ॥
न वाट्यां भद्रदा नित्यं तथा चामलकी ध्रुवम्॥
गजानामस्थि शुभदमश्वानाञ्च तथैव च ।
कल्याणमुच्चैःश्रवसां वास्तौ स्थापनकारिणाम्॥
न शुभप्रदमन्येषामुच्चक्षकारणं परम् ।
वानराणां नराणाञ्च गर्दभानां गवामपि ॥
कुक्कुराणां शृगालानां मार्জ্জाराणामभद्रकम् ।
भेटकानां शूकरानां सर्व्वेषाञ्चाशुभप्रदम् ॥
ईशाने चापि पूर्व्वस्मिन् पश्चिमे च तथोत्तरे ।
शिविरस्य जलं भद्रमन्यत्राशुभमेव च ॥*॥
दीर्घे प्रस्थे समानञ्च न कुर्य्यान्मन्दिरं बुधः ।
चतुरस्रे गृहे कारो गृहिणां धननाशनम् ॥
दीर्घप्रस्थः परिमितो नेत्राङ्के नापि संस्थितम् ।
शून्येन रहितं भद्रं शून्यं शून्यप्रदं नृणाम् ॥
प्रस्थे हस्तद्वयात् पूर्व्वं दीर्घे हस्तत्रयं तथा ।
गृहिणां शुभदं हारं प्राकारस्य गृहस्य च ।
न मध्यदेशे कर्त्तव्यं किञ्चिच्छ्रेयोऽभिकैः शुभम् ॥
चतुरस्रं चन्द्रवेधं शिविरं मङ्गलप्रदम् ।
अभद्रं सूर्य्यवेधञ्च शिविरं मङ्गलाप्रदम् ।
अभद्रदं सूर्य्यवेधं प्राङ्मुखञ्च तथैव च ॥
शिविराभ्यन्तरे भद्रा स्थापिता तुलसी नृणाम् ।
धनपुत्रप्रदात्री च पुण्यदा हरिभक्तिदा ॥

प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत्।
मालती यूथिका कुन्दमाधवी केतकी तथा॥
नागेश्वरं मल्लिका च कान्चनं वकुलं शुभम्।
अपराजिता च सुभदा तेषामुद्यानमीप्सितम्॥
पूर्व्वे च दक्षिणे चैव शुभदं नात्र संशयः।
ऊर्द्धं षोड़शहस्तेभ्यो नैमं कुर्य्यादृगृहं गृही॥
ऊर्द्धं विंशति हस्तेभ्यः प्राकारं न शुभप्रदम्।
सूत्रधारं तैलकारं स्वर्णकारञ्च हीरकम्॥
वाटीमूले ग्राममध्ये न कुर्य्यात् स्थापनं बुधः।
ब्राह्मणं क्षत्रियं वैश्यं सच्छूद्रं गणकं शुभम्॥
भट्टं वैद्यं पुष्पकारं स्थापयेत् शिविरान्तिके॥*
प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम्।
परितः शिविराणाञ्च गम्भीरं दशहस्तकम्॥
भद्रे तपूर्वकञ्चैव परिखाद्वारमीप्सितम्।
शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च॥
शाल्मलीनां तिन्तिड़ीनां हिन्तालानां तथैव च।
निम्बानां सिन्धुवाराणां उड़म्बराणामभद्रकम्॥
ध्रुस्तूराणां वटानाञ्चाप्येरण्डानामवाञ्छितम्।
एतेषामतिरिक्तानां शिविरे काष्ठमीप्सितम्॥
वृक्षञ्च वज्रहतकं दूरतो वर्जयेद्बुधः।
पुत्रदारधनं हन्यादित्याह कमलोद्भवः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः

शिवीरथः, पुं, याप्ययानम्। इति हारावली॥

शिवेष्टः, पुं, (शिवस्य इष्टः।) वकवृक्षः। इति राजनिर्घण्टः॥ शिवप्रिये, त्रि॥

शिवेष्टा, स्त्री, (शिवस्य इष्टा प्रिया।) दूर्व्वा। इति राजनिर्घण्टः॥

शिशिरः, पुं, (शशति इतस्ततो गच्छतीति। शश+किरच् प्रत्ययेन साधुः।) हिमः। इति मेदिनी॥ (विष्णुः। यथा, महाभारते। १३। १४९। ११०।
"शब्दातिगः शब्दसहः शिशिरः शर्व्वरीकरः॥")

शिशिरः, पुं, क्ली, (शशति गच्छति वृक्षादिशोभा यस्मात्। शश+"अजिरशिशिरशिथिलेति।" उणा० १। ५४। इति किरच्प्रत्ययेन साधुः।) ऋतुविशेषः। इत्यमरः॥ स तु माघफाल्गुनमासद्वयात्मकः। तत्पर्य्यायः। कम्पनः २ शीतः ३ हिमकूटः ४ कोटनः ५। क्वचित् पुस्तके कोटनस्थाने कोड़व इति पाठः। इति राजनिर्घण्टः॥ तत्कालीनजलगुणा जलशब्दे द्रष्टव्याः॥*॥ तत्र जातफलम्॥

"मिष्टान्नभोगी मधुरप्रणादी
कलत्रपुत्रादियुतः क्षुधार्त्तः।
क्रोधी सुधीवारुकलेवरश्च
यस्य प्रसूतिः शिशिराभिधाने॥"

इति कोष्ठीप्रदीपः॥*॥
तस्य वर्णनीयानि। करीषधूपः कुन्दः पद्मनाद्यः शिशिरोत्कर्षश्च। इति कविकल्पलता॥*॥
अस्य गुणाः।
"शिशिरं शीतलं हृद्यं शीतं वातप्रकोपणम्।"
इति राजवल्लभः॥

अपि च।
"शिशिरः शीतलोऽतीवरूक्षो वातानिवर्द्धनः।"
इति भावप्रकाशः॥

शिशिरः, त्रि, (शश प्लुतगतौ+किरच्प्रत्ययेन साधुः।) शीतगुणयुक्तः। यथाह अमरः।
"शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जड़ः।
तुषारः शीतलः शीतो हिमः सामान्यलिङ्गकाः॥"
(यथा, रघुः। १४। ३।
"आनन्दजः शोकजमश्रु वाष्प-
स्तयोरशीतं शिशिरो विभेद॥)

शिशुः, पुं, (श्यतीति। शो+"शः कित् सन्वच्च।" उणा० १। २१। इति उः।) बालकः। तत्पर्य्यायः। पोतः २ पाकः ३ अर्भकः ४ डिम्भः ५ पृथुकः ६ शावकः ७। इत्यमरः॥ शावः ८। अर्भः ९ शिशुकः १० पोतकः ११ भिष्टकः १२ इति शब्दरत्नावली॥ गर्भः १३। इति जटाधरः॥ तस्य लक्षणादि यथा। वृद्धशातातपः।
"शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतम्।
रजस्वलादि संस्पृश्य स्नातव्यन्तु कुमारकैः॥
प्राक् चूड़ाकरणाद्बालः प्रागव्रात्प्राशनाच्छिशुः।
कुमारस्तु स विज्ञेयो यावन्मौञ्जी न बन्धनम्॥"
इति गोपालन्यायपञ्चाननकृतस्मृतिनिर्णयः॥
अपि च।
"चतुर्थाद्वत्सरादूर्द्धं यावदष्टौ समा वयः।
शिशोर्व्रतं प्रकुर्व्वन्ति गुरुसम्बन्धिबान्धवाः॥"
इति ब्रह्मपुराणवचनम्॥
"जातमात्रः शिशुस्तावत् यावदष्टौ समा वयः।
स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शकः॥
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते।
तस्मिन् काले न दोषः स्यात् स यावन्नोपनीयते॥"
इति मनुवचनम्॥*॥
तस्याध्यापनक्रमो यथा,—
"प्राङ्मुखो गुरुरासीनो वरणाभिमुखं शिशुम्
अध्यापयेच्च प्रथमं द्विजाग्रीभिः प्रपूजितम्॥"
इति मलमासतत्त्वे बृहस्पतिवचनम्॥*॥
शिशुपुत्रं त्यक्त्वा प्रव्रज्याश्रमनिषेधो यथा,—
"मातरं पितरं वृद्धं भार्य्याञ्चैव पतिव्रताम्।
शिशुञ्च तनयं हित्वा नावधूताश्रमं व्रजेत्॥"
इति महानिर्व्वाणतन्त्रम्॥
अन्यद्बालशब्दे द्रष्टव्यम्॥*॥ (कुमारः। कार्त्तिकेयः यथा, महाभारते। ३। २३१। ४।
"शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः॥")

शिशुकः, पुं, (शिशोरिव प्रतिकृतिः। शिशु+इवार्थे कन्।) जलजन्तुविशेषः। शुशुक इति भाषा। तत्पर्य्यायः। उलूपी २। इत्यमरः॥ इह उपल इति ख्याते अति चञ्चले मत्स्ये। शिशुमाराकृतिर्मत्स्यभेदः उलूपी। इति कलिङ्गादयः। शोशु इति ख्यातो मत्स्यविशेषः उलूपीत्यन्ये। भाँगाल इति ख्याते इत्येके। शिशुमार एव उच्यते इति सर्व्वस्वम्। तथा च रत्नकोषादौ 'चुलुपी शिशुमारः स्यादुलूपी शिशुकस्तथा।' ऊर्द्धं लुम्पति भास्यति उलूपी लुप लृ शपजौ छेदे उत्पूर्व्वः ग्रहादित्वाच्छिन् मनीषादित्वात् तलोपः लोर्दीर्घश्च हिङ्कस्वोकारोऽपि। 'शिशुकस्तूलुपी बालः प्रोष्ठी तु सफरी इयोः।' इति वाचस्पतिः। चुलुपीति चवर्गादिपाठ इति केचित्। शिशुरिव शिशुकः।
'शिशुकः शिशुमारेऽपि बालकोलुपिनोरपि॥'
इति रुद्रः॥"
इति भरतः॥ अपि च।
"उलूपी स्यादुलूपीव चुलुम्पी चुलुकी तथा।
शिशुकश्येति पर्य्यायः शिशुमाराकृतौ झषे।
कैश्चिदुत्पलमत्स्ये तु पर्य्यायोऽयं निगद्यते॥"
इति शब्दरत्नावली॥
"शिशुकः शिशुमारश्च सच ग्राहो वराहकः॥"
इति राजनिर्घण्टः॥*॥
शिशुमारः। (यथा, महाभारते। १२। २८। २७।
"कूर्म्मान् कर्कटकान् नक्रान् मकरान् शिशुकानपि॥")
बालकः। इति मेदिनी॥ (यथा, कथासरित्सागरे। २१। ३९।
"शिशुकद्वयसंयुक्ता ब्राह्मणी कापि दुर्गता।
द्वारि स्थिता महाराज देवदर्शनकाङ्क्षिणी॥")
वृक्षविशेषः। इति हेमचन्द्रः॥

शिशुगन्धा, स्त्री, (शिशोर्गन्धो यत्र।) मल्लिकाविशेषः। यथा—
"लक्ष्मीपतिर्लवङ्गे स्यात् नोमाली नवमालिका
शिशुगन्धा मधुमल्ली तथा करुणमल्लयः॥"
इति शब्दमाला॥

शिशुचान्द्रायणं, क्ली, (शिशुरिव चान्द्रायणम्। स्वल्पचान्द्रायणमित्यर्थः।) व्रतविशेषः। यथा,
"चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः।
चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम्॥"
इति मनुः॥

शिशुता, स्त्री, (शिशोर्भावः। शिशु+तल्।) शिशुत्वम्। शिशोरवस्था। इति जटाधरः॥

शिशुत्वं, क्ली, (शिशोर्भावः। शिशु+त्व।) शैशवम्। इत्यमरः॥ तत्पर्य्यायः बाल्यशब्दे द्रष्टव्यः॥

शिशुपालः, पुं, चेदिदेशीयराजः। स तु कृष्णेन हतः। शिशुपालवधकाव्यं माघेन कृतमा तत्पर्य्यायः। दमघोषसुतः २ चैद्यः ३ चेदिराड् ४। इति जटाधरः॥ शिशुपालकः ५। इति त्रिकाण्डशेषः॥ (यथा, भागवते। ७। १०। ३८।
"तावित्थं पुनर्जातौ शिशुपालकरूषजौ।
हरौ वैरानुबन्धेन पश्यतस्ते समीयतुः॥")

शिशुपालकः, पुं, (शिशुपाल+स्वार्थे कन्।) दमघोषसुतः। इति त्रिकाण्डशेषः॥ कैलिकदम्बवृक्षः। इति शब्दचन्द्रिका॥ (शिशुं

पालयतीति। पालि+खुल्।) बालकपालके, त्रि।

शिशुपालहा, [न्] पुं, (शिशुपालं हतवानिति। हन्+क्विप्।) श्रीकृष्णः। इति हेमचन्द्रः॥

शिशुभावः, पुं, (शिशोर्भावः।) शिशुत्वम्। तात्त्विकभावविशेषः। यथा,—

"उक्तानुक्तञ्च यत्किञ्चित् क्रियते मद्भक्तौ प्रिये।
शिशुभाव इति ख्यातः सर्व्वतन्त्रेषु गोपितः॥"

इति तन्त्रम्॥

शिशुमारः, पुं, (शिशून् मारयतीति। मृ+णिच्+अण्।) जलजन्तुभेदः। शोंष इति शुशुक् इति च ख्यातः। इत्यमरभरतौ॥ (यथा, वाजसनेयसंहितायाम्। २४। ३०।

"नीलग्रीवः क्रमिः समुद्राय शिशुमारो हिमवते हस्ती॥" *॥) अस्य पर्य्यायः शिशुकशब्दे द्रष्टव्यः। अस्य गणना गुणाश्च पादिशब्दे द्रष्टव्याः॥ तारात्मकाच्युतः। इति मेदिनी॥ तद्विवरणं यथा,—

"शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति।
सन्निवेशश्च तस्यापि शृणुष्व मुनिसत्तम॥
यदङ्गा कुरुते पापं दृष्ट्वा तन्निशि मुच्यते।
तावत्यश्चैव ताराख्याः शिशुमाराश्रिता दिवि॥
तावन्त्येव तु वर्षाणि जीवत्यभ्यधिकानि तु।
उत्तानपादस्तस्याथ विज्ञेयोऽप्युत्तरो हनुः॥
यत्तोऽधरश्च विज्ञेयो धर्म्मो मूर्द्धानमाश्रितः।
हृदि नारायणश्चास्ते अग्निनौ पूर्व्वपादयोः॥
वरुणश्चार्य्यमा चैव पश्चिमे तस्य सक्थिनी।
शिश्नं संवत्सरस्तस्य मित्रोऽपानं समाश्रितः॥
पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः।
तारका शिशुमारस्य नास्तमेति चतुष्टयम्॥
इत्येष सन्निवेशोऽयं पृथिव्यां ज्योतिषां तथा।
द्वीपानामुदधीनाञ्च पर्व्वतानाञ्च कीर्त्तितः॥
वर्षाणाञ्च नदीनाञ्च ये च तेषु वसन्ति वै।
तेषां स्वरूपमाख्यातं संक्षेपः श्रूयतां पुनः॥
पदन्तु वैष्णवः कायस्ततो विप्र वसुन्धरा।
पद्माकारा समुद्भूता पर्व्वताब्ध्यादिसंयुता॥
ज्योतींषि विष्णुर्भुवनानि विष्णु-
र्वेदाः पुराणानि विष्णुर्विदिशो दिशश्च।
नद्यः समुद्राश्च स एव सर्व्वं
यदस्ति यन्नास्ति च विप्रवर्य्य॥
ज्ञानस्वरूपो भगवान् यतोऽसा
वशेषमूर्त्तिर्न तु वस्तुभूतः।
ततो हि शैलाब्धिधरादिभेदान्
जानीहि विज्ञानविजृम्भितानि॥
यदा हि युद्धं निजरूपसञ्ज्ञं
कर्म्मक्षये ज्ञानमयात्तदोषम्।
तदा हि मद्भक्ततरोः फलानि
भवन्ति नो वस्तुषु वस्तुभेदाः॥
महीघटत्वं घटतः कपालिका
कपालिकाचूर्णरजस्ततोऽप्यतुः।
जनैः स्वकर्म्मस्थितिमात्मनिष्ठयै-
रलक्ष्यते वस्तु किमत्र वस्तु॥"

इति विष्णुपुराणे २ अंशे १२ अध्यायः॥*॥

अपि च। "केचिदेतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति। यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पः। तस्य लाङ्गूले प्रजापतिः अग्निरिन्द्रो धर्म्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः॥ तस्य दक्षिणावर्त्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे नक्षत्राणि उपकल्पयन्ति। दक्षिणायनानि तु मध्ये यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति। दृष्टे त्वजवीथी आकाशगङ्गा चोदरतः। पुनर्व्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासंख्यं श्रवणपूर्व्वाषाढे दक्षिणवामयोर्लोचनवोर्धनिष्ठामूलञ्च दक्षिणवामयोः कर्णयो र्मघादीन्युदगयनानि दक्षिणायनानि वामपार्श्वविंधिषु युञ्जीत। वह्निषु अस्थिषु। तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्वेषु प्रतिलोम्येन युञ्जीत। शतभिषा ज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत्। उत्तराहनावगस्त्यः अधराहनौ यमः मुखे चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशनास्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्व्वाङ्गेषु रोमसु सर्व्वे तारागणाः। एतदुहैव भगवतो विष्णोः सर्व्वदेवतामयं रूपमहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत नमो नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति।

ग्रहर्क्षतारामयमाधिदैविकं
पापापहं मन्त्रकृतां त्रिकालम्।
नमस्यतः स्मरतो वा त्रिकालं
नश्येत तत्कालजमाशु पापम्॥"

इति श्रीभागवते ५ स्कन्धे शिशुमारसंस्थानम् २३ अध्यायः॥

शिशुवाहकः, पुं, (शिशुं वहतीति। वह+खुल्। वनच्छागलः। इति हेमचन्द्रः॥ बालकवोढरि, त्रि॥

शिशुवाह्यकः, पुं, (शिशुर्वाह्यो यस्य। ततः कन्। वनच्छागः। इति त्रिकाण्डशेषः॥

शिश्नः, पुं, (शश्नतीति। शश+बाहुलकात् नक्प्रत्ययेन साधुः।) मेढ्रः। इत्यमरः॥ (यथा, भागवते। २। ६। ८।

"पंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः॥") अस्य पर्य्यायः लिङ्गशब्दे द्रष्टव्यः॥

शिश्विदानः, त्रि, (श्वेतितुमिच्छतीति। श्वित+सन्+"श्वितेर्दश्च।" उणा० २।८३। इति आनच्। मनो लुक् तकारस्य च दकारः। पापकर्म्मा। तत्पर्य्यायः। कृष्णकर्म्मा २। इत्यमरः॥ हे पापाचारे। अग्निरित्यतोऽमौ शिश्विदानो मनीषादिः हितालब्धः। कृष्णं पापाचारत्वात् मलिनं कर्म्मास्य कृष्णकर्म्मा। केचित्तु अकृष्णकर्म्मा इति पठन्ति। हे निष्पापे। श्विदि श्वौक्ये इत्यस्य काने शिश्विदानः। अकृष्णं निष्पापत्वात् शुक्लं कर्म्मास्य अकृष्णकर्म्मा शुक्लकर्म्मा इत्यर्थः। इति व्याचक्षते च। इति भरतः॥*॥

"शिश्विदानः कृष्णकर्म्मा शुक्लकर्मेति कस्यचित्॥"

इति जटाधरः॥

(यथा, प्रद्युम्नविजये। ७ अङ्के।

"खाङ्गिक! क्रियतां क्रियतां एष क्षुद्रः शिश्विदानः॥")

शिष, वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शेषति। इति दुर्गादासः॥

शिष, लू ध श्री विशेषे। इति कविकल्पद्रुमः॥ (रुधा०-पर०-सक०-अनिट्।) विशेष उपरञ्जनम्। लू, अशिषत्। ध, विशिनष्टि स्मरं मूर्त्त्या यः। इति हलायुधः। मूर्त्तिविशिष्टं करोति इत्यर्थः। श्री, शेष्टा। इति दुर्गादासः।

शिष, कि असर्व्वोपयोगे। इति कविकल्पद्रुमः॥ (चुरा०-पचे-भ्वा०-सक०-सेट्। असर्व्वोपयोगः परित्यागकरणम्। कि, शेषयति शेषति यशोराशिं लोकः अवशिष्टं करोति इत्यर्थः। वेरतिशायने शिष किरनुवर्त्तते। कि, विशेषयति विशेषति सम्यक्त्या भृशं विधिः। इति दुर्गादासः॥

शिष्टः, त्रि, (शास+क्तः। "शास इदङ्हलोः।" ६। ४। ३४। इति उपधाया इकारः। "शासिवसिघसीनाञ्च।" ८। ३। ६० इति सस्य षः।) शान्तः। सुबुद्धिः। धीरः। तस्य लक्षणं यथा,—

"न पानिपादचपलो न नेत्रचपलो मुनिः।
न च वाग्द्वचपल इति शिष्टस्य लक्षणम्॥"

इति महाभारते अश्वमेधपर्व्व॥

अपिच।

"धर्म्मो नाभिगतो येषु वेदाः सपरिबृंहणाः।
ते शिष्टा ब्राह्मणाः प्रोक्ता नित्यमात्मगुणान्विताः॥"

इति कौर्म उपविभागे २४ अध्यायः॥*॥

अन्यच्च।

"विशेषशब्दनिष्ठस्तु शेषः शिष्टः प्रचक्षते।
मन्वन्तरेषु ये शिष्टा इहतिष्ठन्ति धार्म्मिकाः॥
मनुः समर्षयश्चैव लोकसन्तानकारणात्।
तिष्ठन्तीह च धर्म्मार्थं तान् शिष्टान् परिचक्षते।
तैः शिष्टैः पालितधर्म्मः स्थाप्यते वै युगे युगे॥"

इति मात्स्ये १२० अध्यायः॥

(अवशिष्टः। यथा, गीतायाम्। ४। ३०।

"यज्ञशिष्टामृतभुजो यान्ति ब्रह्मसनातनम्॥")

शिष्टाचारः, पुं, (शिष्ट आचारः। शिष्टानामाचारो वा।) साधुव्यवहारः। यथा,—

"ततः स्मार्त्तः स्मृतौ धर्म्मो वर्णाश्रमविभागजः।
एवं वै द्विविधो धर्म्मः शिष्टाचारः स उच्यते॥

त्रयी वार्त्ता दण्डनीतिः प्रजा वर्णाश्रमेज्यया।
शिष्टैराचर्य्यते यस्मात् शिष्टाचारः स शाश्वतः॥
दानं सत्यं तपोऽलोभो विद्येज्या पूजनं दमः।
अष्टौ तानि चरित्राणि शिष्टाचारस्य लक्षणम्॥
शिष्टा यस्माच्चरन्त्येनं मनुः सप्तर्षयश्च ये।
मन्वन्तरेषु सर्व्वेषु शिष्टाचारस्ततः स्मृतः॥
श्रुतिस्मृतिभ्यां विहितो धर्म्मो वर्णाश्रमात्मकः।
शिष्टाचारविहस्तु धर्म्मः सं साधुसम्मतः॥"
इति मात्स्ये १२० अध्यायः॥

शिष्टिः, स्त्री, (शास + क्तिन्। "शास इदङ्हलोः।" ६।४।३४। इति उपधाया इः।) आज्ञा। शासनम्। इत्यमरः॥ (यथा, मनुः।४।१६४।
"अन्यत्र पुत्रात् शिष्याद्वा शिष्टार्थं ताडयेत्तौ॥")

शिष्यः त्रि, (शिष्यतेऽसाविति। शास + "एतिस्तुशास्वृदृजुषः क्यप्।" ३। १।१०८। इति क्यप्। "शास इदङ्हलोः।" ६।४।३४। इति इः। "शासवसीति" ८।३।६०। इति षः।) उपदेश्यः। तत्पर्य्यायः। क्षात्रः २ अन्तेवासी ३। इत्यमरः॥ अन्तेसत् ४। अन्तेषदः ५। यथा,—
"क्षात्रान्तेवासिशिष्यान्तेषद एकार्थता इमे॥"
इति जटाधरः॥

तस्य लक्षणं यथा,—
"वाङ्मनः कायवसुभिर्गुरुशुश्रूषणे रतः।
एतादृशगुणोपेतः शिष्यो भवति नारद॥
देवताचार्य्यशुश्रूषां मनोवाक्कायकर्म्मभिः।
शुद्धभावो महोत्साहो बोद्धा शिष्य इति स्मृतः॥"
इति दीक्षातत्त्वम्॥

अपिच।
"शान्तो विनीतः शुद्धात्मा श्रद्धावान् धारणक्षमः।
समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो व्रती।
एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा॥"
निषिद्धशिष्यलक्षणमाह।
"पापिने क्रूरचेष्टाय शठाय कृपणाय च।
दीनायाचारशून्याय मन्त्रद्वेषपराय च॥
निन्दकाय च मूर्खाय तीर्थद्वेषपराय च।
भक्तिहीनाय देवेशि न देया मलिनाय च॥
गुरुता शिष्यता वापि तयोर्वत्सरवासतः॥"
तथा चोक्तं मारसंग्रहे।
"मद्गुरुः स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत्।
वर्षेकेन भवेद्योग्यो विप्रो गुणसमन्वितः॥
वर्षद्वयेन राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः।
चतुर्भिर्वत्सरैः शूद्रः कथिता शिष्ययोग्यता॥"
इति तन्त्रसारः॥

अन्यच्च।
"आचारे शमयेद्यस्तु स आचार्य्य उदाहृतः।
यस्त्वाचार्य्यपराधीनस्तद्वाक्यं शास्ति हृदि।
शमने स्थिरवृत्तिश्च शिष्यः सद्भिरुदाहृतः॥
एव लक्षणसंयुक्तं शिष्यं सर्व्वगुणान्वितम्।
अध्यापयेद्विधानेन मन्त्ररत्नमनुत्तमम्॥"
इति पाद्मोत्तरखण्डे २५ अध्यायः॥

पुत्रशिष्ययोस्तुल्यत्वं यथा,—
"यथा पुत्रस्तथा शिष्यो न भेदः पुत्रशिष्ययोः।
तर्पणे पिण्डदाने च पालने परिपोषणे॥
यथाग्निदाता पुत्रश्च तथा शिष्यश्च निश्चितम्।
इतीदं काण्वशाखायामुवाच कमलोद्भवः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६१ अध्यायः॥

पुत्रशिष्याभ्यां विशेषो यथा,—
सनत्कुमार उवाच।
"पुत्र एवाग्नि देवेश यतः शिष्योऽस्माद्दं विभो।
न विशेषोऽस्ति पुत्रस्य शिष्यस्य च पितामह॥
ब्रह्मोवाच।
विशेषः शिष्यपुत्राभ्यां विद्यते धर्म्मनन्दन।
धर्म्मकर्म्ममयोगे तथापि गदतः शृणु॥
पुन्नाम्नो नरकात्त्राति पुत्रस्तेनेह गीयते।
शेषपापहरः शिष्य इतीयं वैदिकी श्रुतिः॥
सनत् कुमार उवाच।
कोऽयं पुन्नामको देव नरकात्त्राति पुत्रकः।
कस्माच्छेषं ततः पापं हरेच्छिष्यश्च तद्वद॥"
इति वामने ५७ अध्यायः॥

ब्रह्मोवाच।
"अतः परं प्रवक्ष्यामि शेषपापस्य लक्षणम्।
ऋणं देवर्षिभूतानां मनुष्याणां विशेषतः॥
पितॄणाञ्च द्विजश्रेष्ठ सर्व्ववर्णेषु चैकतः।
ॐकारादिनिहत्तिश्च पापकार्य्यकृतिश्च या॥
हत्यादिकं महापापं त्वगम्यागमनं तथा।
घृतादिविक्रयं घोरं चण्डालादिप्रतिग्रहम्॥
खद्योतगोपनं पापं परदोषप्रकाशनम्।
ईर्ष्याविद्वं वाक्यदुष्टं निष्ठुरत्वं षडम्बरम्॥
ढाक्षित्वं तालवादित्वं नाम्ना वाचाप्यधर्म्मजम्।
मारणत्वमधार्म्मिकं नरकावहमुच्यते॥
एतैः पापैश्च संयुक्तः पात्यते यदि शङ्करम्।
ज्ञानाधिकमशेषेण शेषात् पापात् जयेत्ततः॥
शारीरं वाचिकं यत्तु मानसं त्रिविधं तथा।
पितृमातृकृतं यच्च कृतं यच्चाग्रितैर्नरैः॥
ज्ञातिभिर्ब्बान्धवैर्वापि तस्मिन् जन्मनि धर्म्मज।
तत्सर्व्वं विलयं याति कर्म्मणा सुतशिष्ययोः॥
तस्मात् पुत्रश्च शिष्यश्च विधातव्यौ विपश्चिता।
श्रुतमर्थमभिध्याय शिष्यात् श्रेष्ठतरः सुतः।
शेषात्तारयते शिष्यः सर्व्वत्रैव हि पुत्रकः॥"
इति वामने ५८ अध्यायः॥

शिल्पकः, पुं, शिल्पकः। इति शब्दचन्द्रिका॥

शिल्पकः, पुं, (शिल्प एव। स्वार्थे कन्।) गन्धद्रव्यविशेषः। शिलारसः। शिल्पा इति लोकान् इति च भाषा। तत्पर्य्यायः। कर्पिनामा २ कर्पिः ३ तैलम् ४ क्षत्रिमम् ५ कर्पिसः ६ चला ७ तुरुष्कः ८ सुक्लिमुक्लः ९ पिण्डकातः १० वरः ११। इति रत्नमाला॥ पिण्डकः १२ सिक्थः १३ यावनः १४। इत्यमरः॥ अस्यानुलेपनगुणाः।
"शिल्पकः परमा मांसी देवदारु सुरा नखम्।
सर्व्वेऽमी परमा लक्ष्मी रचोघ्ना ज्वरनाशनाः॥"

रौक्ष्यघ्ना इति वा पाठः। इति राजवल्लभः॥
अन्यत् तुरुष्कशब्दे द्रष्टव्यम्॥

शी, ङ ल ञि स्वप्ने। इति कविकल्पद्रुमः॥ (अदा०-आत्म०-अक०-सेट्। ङ ल, शेते। ञि, शयितोऽस्ति। मण्डपे शयामीति गणकृतानित्यत्वात् परस्मैपदे शयोऽलुगभावे चेति रमानाथः। वस्तुतस्तु शेते शयः पश्चात् शय इवाचरतीति क्यौ साध्यम्। इति दुर्गादासः॥

शीः, स्त्री, (शी + क्विप्।) शान्तिः। शयनम्। इति शब्दरत्नावली॥

शीक, कृ ङ सेके। सर्पे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) कृ, अशिशीकत्। ङ, शीकते। इति दुर्गादासः॥

शीक, कि आमर्शे। सेके। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-सक०-सेट्।) कि, शीकयति शीकति। आमर्शः स्पर्शः। तथा च।
"चन्द्रावतीतरङ्गार्द्रा शीकयन्ति च यद्दपुः।"
इति हलायुधः॥

वायवः स्पृशन्ति इत्यर्थः। भट्टमल्लस्तु आमर्षण इति मूर्द्धन्यषमध्यं पठित्वा क्षमार्थमाह। इति दुर्गादासः॥

शीकरं, क्ली, (शीक्यतेऽनेनेति। शीक + बाहुलकात् अरः।) अरलद्रवः। इति मेदिनी॥

शीकरः, पुं, (शीक्यतेऽनेनेति। शीक + बाहुलकात् अरः। इत्युज्ज्वलदत्तः। ३।१३१।) वातादिप्रेरितजलकणः। इत्यमरः॥ (यथा, कुमारे। १।१५।
"भागीरथीनिर्झरशीकराणां
वोढ़ा मुहुः कम्पितदेवदारुः॥")
वायुः। इति मेदिनी॥

शीघ्रं, क्ली, (शिङ्क्षति व्याप्नोतीति। शिघ व्याप्तौ + रक्प्रत्ययेन साधुः।) विलम्बाभावः। तत्पर्य्यायः। त्वरितम्२ लघु३ चिप्रम् ४ अरम् ५ द्रुतम् ६ सत्वरम् ७ चपलम् ८ तूर्णम् ९ अविलम्बितम् १० आशु ११। अव्ययाः शीघ्रवाचकाः यथा। झाक् १२ झटिति १३ अञ्जसा १४ अञ्जाय १५ सपदि १६ द्राक् १७ मंक्षु १८। इत्यमरः॥ तद्वैदिकपर्य्यायः। तुर १ मक्षु २ द्रवत् ३ ओषम् ४ जोरा ५ जूर्णिः ६ शूर्त्ताः ७ शूघनाशः ८ शीभम् ९ हवु १० तूयम् ११ तूर्णि १२ अजिरम् १३ भुरण्युः १४ शु १५ आशुः १६ प्राशुः १७ तूतुजिः १८ तूतुजानः १९ तुज्यमानासः २० अच्वाः २१ साचिवित् २२ द्युगत् २३ ताजत् २४ तरणिः २५ वातरंहा २६। इति षड्विंशतिः शिघ्रनामानि इति वेदनिघण्टौ। २। १५॥ लामज्जकम्। इति राजनिर्घण्टः॥ (पुं, कुशवंशीयाग्निवर्णस्य पुत्रः। यथा, भागवते। ९। १२। ५।
"सुदर्शनोऽथाग्निवर्णः शीघ्रस्तस्य मरुः सुतः॥")
शीघ्रविशिष्टे, त्रि। इत्यमरः॥ (यथा, महाभारते। ३। ६७। ६।
"स त्वमातिष्ठ योगं तं येन शीघ्रा इयं मम।
भवेयुरक्षाश्वशोऽसि वेतनं ते शतं शताः॥")

शीघ्रगः, त्रि, (शीघ्रं गच्छतीति। गम्+डः।) द्रुतगामी। यथा,—
"इरितं रोगोऽनुतापः शस्यानामीतिमिश्च विध्वंसः।
कपिले शीघ्रगसत्वञ्चे च्छध्वंसोऽथ दुर्भिक्षम्॥"
इति तिथ्यादितत्त्वम्॥
वायौ, पुं। इत्यमरे आशुगशब्ददर्शनात्॥ (यथा, महाभारते। ३।३।२५।
"मनः सुपर्णो भूतानि: शीघ्रगः प्राणधारणः॥")
शीघ्रगामी, [न्] त्रि, आशुगमनशीलः। शीघ्रं गच्छतीत्यर्थे शीघ्रशब्दपूर्ब्बकगमधातोर्णिन्-प्रत्ययेन निष्पन्नः॥
शीघ्रचेतनः, पुं, (शीघ्रं चेततीति। चित+ल्युः।) कुक्कुरः। इति शब्दमाला॥ द्रुतचेतनायुक्ते, त्रि
शीघ्रजम्भा, [न्] पुं, (शीघ्रं जम्भ यस्य।) करञ्जविशेषः। काँटाकरञ्ज इति भाषा। यथा,—
"पूतीकः पांशुलः पोष्टा शीघ्रजम्भा कुहत्तिकृत्॥"
इति शब्दचन्द्रिका॥
शीघ्रपुष्पः, पुं, (शीघ्रं पुष्पं यस्य।) अगस्त्यवृक्षः। इति राजनिर्घण्टः॥
शीघ्रवेधी, [न्] पुं, (शीघ्रं विधतीति। विध विद्धीकरणे+णिनिः।) चित्रशरवेधकर्त्ता। तत्पर्य्यायः। लघुहस्तः २। इति हेमचन्द्रः॥
शीघ्रा, स्त्री, दन्तीवृक्षः। इति राजनिर्घण्टः॥
शीघ्रीयं, त्रि, द्रुतसम्बन्धि। शीघ्रभवम्। शीघ्रशब्दात् छीयप्रत्ययेन निष्पन्नम्॥
शीतं, क्ली, (श्यै ङ गतौ+क्तः। "द्रवमूर्त्तिस्पर्शयोः श्यः।" ६।१।२४। इति सम्प्रसारणम्। "इलः।" ६।४।२। इति दीर्घः।) हिमगुणः। इत्यमरः॥ (यथा, मनुः।११।११४।
"उष्णे वर्षति शीते वा मारुते वाति वा भृशम्।
न कुर्व्वीतात्मनस्त्राणं गोरक्षत्वा तु शक्तितः॥")
जलम्। इति शब्दमाला॥ त्वचम्। इति राजनिर्घण्टः॥ शीतं तुषारवानीरबहुवारद्रुमेषु च इति भरतधृतताजयः॥
शीतः, पुं, (श्यै+क्तः।) वेतसवृक्षः। बहुवारकवृक्षः। इत्यमरः॥ अशनपर्णी। इति शब्दरत्नावली॥ पर्पटः। निम्बः। कर्पूरः। इति राजनिर्घण्टः॥ हिम ऋतुः। अस्य विवरणं हैमन्तशब्दे द्रष्टव्यम्॥
शीतः, त्रि, (श्यै+क्तः।) शीतलः। इत्यमरः॥ (यथा, महाभारते। ३।१६८।५०।
"शीतस्तत्र सुखो वायुःसुगन्धो जीवनः शुचिः॥
सर्व्वरत्नविचित्रा च भूमिः पुण्यविभूषिता॥")
अलसः। इति मेदिनी॥ कथितः। इति शब्दचन्द्रिका॥ शीतलद्रव्यगुणाः। पित्तनाशित्वम्। बलकफवायुकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः॥
शीतकः, पुं, (शीत+स्वार्थे कन्।) शीतकालः। सुस्थितः। दीर्घसूत्री। इति मेदिनी॥ अशनपर्णी। इति शब्दरत्नावली॥ हस्तिकः। इति शब्दमाला॥ (देशविशेषः। यथा, हृहत्संहितायाम्।१४।२७।
मागधलङ्गकोङ्कलशीतकमाण्डव्यभूतपुराः॥")
शीतकरः, पुं, (शीतः शीतलः करो यस्य।) चन्द्रः। इति हिमकरशब्ददर्शनात्॥ (यथा, हृहत्संहितायाम्। ४।२८।
"भस्मनिभः परुषोऽरुणमूर्त्तिः
शीतकरः किरणैः परिहीणः॥")
शीतलपाणियुक्ते शीतकारिणि च त्रि॥
शीतकषायः, पुं, (शीतस्य कषायः।) हिमकषायः। यथा,—
"क्षुण्णं द्रव्यफलं सम्यक् षड्भिर्जलपलैः प्लुतम्।
शर्व्वरीमुषितं स स्याद्धिमशीतकषायकः॥")
इति वैद्यकम्॥
शीतकालः, पुं, (शीतस्य कालः।) हिम ऋतुः। स तु मघहायणपौषमासद्वयकालात्मकः। तत्पर्य्यायः। शीतकः २। इति मेदिनी॥ हैमन्तः ३। इत्यमरः॥ महाः ४। इति जटाधरः॥ हैमनः ५। इति शब्दरत्नावली॥ यथा,—
"कूपोदकं वटच्छाया श्यामा स्त्री दृष्टकाग्रहम्।
शीतकाले भवेदुष्णं उष्णकालेच शीतलम्॥"
इति चाणक्यम्॥
शीतकिरणः, पुं, (शीतं शीतलं किरणं यस्य।) चन्द्रः। यथा,—
"कान्ते कोऽयमुदेति शीतकिरणो जातः कुतो वारिधौ
कस्ते सुन्दरि सोदरः करमहो दत्ते त्वदीये स्तने।
धन्या त्वं युवती सती कुलवती भ्रातापि धन्यस्तव
इत्थं श्रीपरिहासकेलिकलया मुग्धो हरिः पातु वः॥"
इत्युद्भटः॥
शीतकुम्भः, पुं, करवीरः। इति रत्नमाला॥
शीतकुम्भी, स्त्री, जलजवृक्षविशेषः। शीउलीछोप् इति भाषा। यथा,—
"शीतली शीतकुम्भी च शुक्रपुष्पा जलोद्भवा।"
इति रत्नमाला॥
शीतकृच्छ्रः, पुं, व्रतविशेषः। यथा।"यदा तु शीतं चीरादि पीयते तदा शीतकृच्छ्रः।
"त्र्यहं शीतं पिबेत्तोयं त्र्यहं शीतं पयः पिबेत्।
त्र्यहं शीतं घृतं पीत्वा वायुभक्षः परत्र्यहम्॥"
इति यमस्मरणात्। इति मिताक्षरा॥
शीतक्षारः, क्ली, (शीतः क्षारो यस्य।) श्वेतटङ्कणम्। इति राजनिर्घण्टः॥
शीतगन्धः, क्ली, (शीतो गन्धो यस्य।) श्वेतचन्दनम्। इति। राजनिर्घण्टः॥
शीतगुः, पुं, (शीता गौः किरणो यस्य।) चन्द्रः। इति वोपदेवः॥ (यथा, साहित्यदर्पणे। १०।
"भुजङ्गकुण्डली व्यक्तमग्निमुग्भ्रांशुशीतगुः॥")
शीतचम्पकः, पुं, दर्पणम्। प्रदीपः इति मेदिनीशब्दरत्नावल्यौ॥
शीतपर्णी, स्त्री, (शीतं पर्ण यस्याः। ङीप्।) अर्कपुष्पिका। इति रत्नमाला॥ अर्कडुली इति भाषा॥
शीतपल्लवा, स्त्री, (शीतं पल्लवं यस्याः।) भूमिजम्बुः। इति रत्नमाला॥
शीतपाकिनी, स्त्री, (शीते पाकोऽस्या अस्तीति। इनिः।)काकोली। इति शब्दमाला॥ महासमङ्गा। इति राजनिर्घण्टः॥
शीतपाकी, स्त्री, (शीते पाको यस्याः। ङीप्।) वाय्वालकः। इति शब्दरत्नावली॥ काकोली। इति रत्नमाला॥ गुञ्जा। इति राजनिर्घण्टः॥
शीतपुष्पं, क्ली, (शीतं पुष्पं यस्य।)परिपेलम्। इति राजनिर्घण्टः॥
शीतपुष्पः, पुं, (शीतं पुष्पं यस्य।) शिरीषवृक्षः। इति राजनिर्घण्टः॥
शीतपुष्पकं, क्ली, (शीतं पुष्पमिव। कन्।)शैलेयम्। इति शब्दचन्द्रिका॥
शीतपुष्पकः, पुं, (शीतं पुष्पं यस्य। बहुव्रीहौ कन्) अर्कवृक्षः। इति राजनिर्घण्टः॥
शीतपुष्पा, स्त्री, (शीतं पुष्पं यस्याः।) अतिबला। इति राजनिर्घण्टः॥
शीतप्रभः, पुं, (शीता प्रभा यस्य।) कर्पूरः। इति राजनिर्घण्टः॥ शीतलप्रभायुक्ते, त्रि॥
शीतप्रियः, पुं, (शीतः प्रियो यस्य।) पर्पटः। इति राजनिर्घण्टः॥
शीतफलः, पुं, (शीते फलं यस्य।) उडुम्बरः। श्वेतुः। इति राजनिर्घण्टः॥
शीतबला, स्त्री, महासमङ्गा। इति राजनिर्घण्टः॥
शीतभानुः, पुं (शीतो भानुर्यस्य।) चन्द्रः। इति शब्दरत्नावली॥
शीतभीरुः, स्त्री, (शीताद्भीरुः।) मल्लिका। इत्यमरः। शीतभीते, त्रि॥
शीतमञ्जरी, स्त्री, (शीता मञ्जरी यस्याः।) शेफालौ। इति राजनिर्घण्टः॥
शीतमयूखः, पुं, (शीतो मयूखो यस्य।) चन्द्रः। कर्पूरः। इति मेदिनी॥
शीतमरीचिः, पुं, (शीता मरीचिर्यस्य।) चन्द्रः। कर्पूरः। इति शब्दरत्नावली॥
शीतमूलकं, क्ली, (शीतं मूलं यस्य। बहुव्रीहौ कन्।) उशीरम्। इति राजनिर्घण्टः॥ शीतलमूलयुक्ते, त्रि॥
शीतरश्मिः, पुं, (शीतो रश्मिर्यस्य।) चन्द्रः। यथा,
"ज्योतिः सूर्य्यचन्द्रमा. शीतरश्मिः।"
इति ज्योतिस्तत्त्वम्॥
कर्पूरञ्च॥ चन्द्रसंज्ञक इति दर्शनात्॥
शीतलं, क्ली,(शीतं लातीति। ला+कः।)पुष्पकासीसम्। शैलजम्। मलयोद्भवम्। तत्तु चन्दनम्। इति मेदिनी॥ पद्मकम्। मौक्तिकम्।

इति राजनिर्घण्टः ॥ शैत्यम् । इति शब्दरत्नावली ॥ वीरणमूलम् । इति शब्दचन्द्रिका ॥

शीतलः, पुं, अग्निपर्णी । इत्यमरः ॥ अर्हद्विशेषः । स तु चतुर्विंशतितीर्थङ्करमध्ये दशमतीर्थङ्करः । इति हेमचन्द्रः ॥ व्रतविशेषः । स तु मेषसंक्रान्त्यां कर्त्तव्यः । चन्द्रः । इति शब्दचन्द्रिका ॥ चम्पकः । कर्पूरभेदः । राजः । इति राजनिर्घण्टः ॥

शीतलः, त्रि, (शीतोऽस्यास्तीति । शीत + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) शीतगुणविशिष्टः । तत्पर्य्यायः । सुषीमः २ शिशिरः ३ जड़ः ४ तुषारः ५ शीतः ६ हिमः ७ । इत्यमरः ॥

शीतलकं, क्ली, सितोत्पलम् । इति राजनिर्घण्टः ॥

शीतलकः, पुं, मरुवकः । इति राजनिर्घण्टः ॥

शीतलच्छदः, पुं, (शीतलश्छदो यस्य ।) चम्पकः । इति राजनिर्घण्टः ॥ शीतलपत्रश्च ॥

शीतलजलं, क्ली, (शीतलं जलं यस्य ।) उत्पलम् । इति राजनिर्घण्टः ॥ हिमवारि च ॥

शीतलता, स्त्री, (शीतलस्य भावः । तल् ।) शीतलत्वम् । शीतलस्य भाव इत्यर्थे तद्भावे तात्वमिति संक्षिप्तसारसूत्रेण ताप्रत्ययनिष्पन्ना ॥

शीतलत्वं, क्ली, (शीतलस्य भावः । त्व ।) जड़ता । इति राजनिर्घण्टः ॥ शीतलता च ॥

शीतलप्रदः, पुं, (शीतलं प्रददाति । प्र + दा + कः ।) चन्दनम् । इति केचित् ॥ हिमदातरि, त्रि ॥

शीतलवातकः, पुं, (शीतलो वातो यस्य । कन् ।) अग्निपर्णी । इति शब्दरत्नावली ॥ शीतलवायुयुक्ते, त्रि ॥

शीतला, स्त्री, (शीतल + स्त्रियां टाप् ।) शीतलोष्णः । यथा,—

"शीतला शीतलो शीतकुम्भी पारण्डरपुष्पिका ।"

इति शब्दचन्द्रिका ॥

देवीविशेषः । सा च वसन्तविस्फोटकादेरधिष्ठात्री देवता । यथा,—

स्कन्द उवाच ।

"भगवन् देवदेवेश शीतलायाः स्तवं शुभम् ।
वक्तुमर्हस्यशेषेण विस्फोटकभयापहम् ॥

ईश्वर उवाच ।

नमामि शीतलां देवीं रासभस्थां दिगम्बरीम् ।
मार्ज्जनीकलसोपेतां सूर्पालङ्कृतमस्तकाम् ॥

इति स्कन्दपुराणम् ॥

अस्या विवरणं मसूरिकाशब्दे द्रष्टव्यम् ॥ कुटुम्बिनी । आरामशीतला । वालुका । इति राजनिर्घण्टः ॥

शीतलाषष्ठी, स्त्री, (शीतला षष्ठी ।) माघशुक्ला षष्ठी । यथा,—

"प्रसूत्या द्वादशे मासि पूज्यापत्यविवृद्धये ।
सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता ।
आषाढ़े कार्ह्मभी ज्ञेया श्रावणे लुण्ठनी तथा ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा ।
नाम्नाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी ॥
पौषे मात्स्यस्वरूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता ॥"

इति स्कन्दपुराणम् ॥

शीतली, स्त्री, जलजवृक्षविशेषः । शिउलीझोप् इति भाषा । तत्पर्य्यायः । शीतकुम्भी २ शुक्लपुष्पा ३ जलोद्भवा ४ कालानुसारिवा ५ । इति रत्नमाला ॥

शीतवल्कः, पुं, (शीतलो वल्को यस्य ।) उड़म्बरः । इति राजनिर्घण्टः ॥ शीतलवल्कले, त्रि ॥

शीतवीर्य्यकः, पुं, (शीतं वीर्य्यं यस्य । कन् ।) प्लक्षवृक्षः । इति राजनिर्घण्टः ॥ शीतलवीर्य्ययुक्ते, त्रि ॥

शीतशिवं, क्ली, (शीते शीतकाले शिवं मङ्गलप्रदम् ।) सैन्धवलवणम् । शैलेयनामगन्धद्रव्यम् । इत्यमरः ॥

शीतशिवः, पुं, (शीते शीतकाले शिवः शुभप्रदः । मधुरिका । इत्यमरः ॥ अक्षफलावृक्षः । इति मेदिनी ॥

शीतशिवा, स्त्री, (शीते शिवा मङ्गलप्रदा ।) मिश्रेया । इति राजनिर्घण्टः ॥ शमीवृक्षः । इति रत्नमाला ॥

शीतशूकः, पुं, शीते शूको यस्य ।) यवः । इति केचित् ॥ शीतलशूकयुक्ते, त्रि ॥

शीतसहः, पुं, (शीतं सहते इति । सह + अच् ।) पीलुवृक्षः । इति जटाधरः ॥ शीतसहनीये, त्रि ॥

शीतसहा, स्त्री, (शीतसह + टाप् ।) नीलसिन्धुवारः । वासन्ती । इति राजनिर्घण्टः ॥

शीता, स्त्री, रामपत्नी । इति शब्दरत्नावली ॥ लाङ्गलपद्धतिः । इत्यमरटीकायां भरतः ॥ यथा,—

"शीता नभःसरिदिति लाङ्गलपद्धती च
शीता दशाननरिपोः सहधर्म्मिणी च ।
शीतं घृतं हिमगुणे च तदन्विते च
शीतोऽलसे च बहुवारतरौ च दृष्टः ॥"

इति तालव्यादौ धरणिः ॥

अतिबला । कुटुम्बिनी । दूर्व्वा । शिल्पिकाख्यम् । इति राजनिर्घण्टः ॥

शीतांशुः, पुं, (शीताः अंशवो यस्य ।) कर्पूरः । इति राजनिर्घण्टः ॥ चन्द्रः । यथा,—

"शीतांशुर्मिष्टमन्नं जनयति सततं जन्मराज्ञी नराणाम् ।"

इति ज्योतिस्तत्त्वम् ॥

शीतांशुतैलं, क्ली, (शीतांशोः कर्पूरस्य तैलम् ।) कर्पूरतैलम् । इति राजनिर्घण्टः ॥

शीताङ्गी, स्त्री, (शीतं अङ्गमस्याः ङीष् ।) हंसपदीवृक्षः । इति राजनिर्घण्टः ॥ शीतलाङ्गे, त्रि ॥ (यथा, सुश्रुते । २ । ८ ।

"अविध्यति शिरो यातु शीताङ्गी निरपत्रपा ।
नीलोत्पलशिरा हन्ति सा गर्भं च चतां तथा ॥")

शीतादः, पुं, (शीतमादत्ते इति । आ + दा + कः ।) दन्तरोगविशेषः । तस्य निदानं दन्तशब्दे द्रष्टव्यम् । तटौषधं यथा,—

"शीतादे इतरक्ते तु तोयनागरसर्षपान् ।
निष्क्वाथ्य त्रिफलाक्वापि कुर्य्यादक्षूधधारणम् ॥
कासीसलोध्रकृष्णा मनःशिला सप्रियङ्गुतेजोह्वा
एतच्चूर्णं मधुयुक् शीतादे पूतिमांसहरम् ॥"
तेजोह्वा तेजवला ।
"तैलं घृतं वा वातघ्नं शीतादे संप्रशस्यते ।"

इति भावप्रकाशः ॥

शीताद्रिः, पुं, (शीतजनकोऽद्रिः । शीतप्रधानोऽद्रिरिति वा ।) हिमालयपर्व्वतः । इति केचित् ॥

शीतावला, स्त्री, महासमङ्गा । इति राजनिर्घण्टः ॥

शीतार्त्तः, त्रि, (शीतेन ऋतः पीड़ितः ।) शीतेन पीड़ितः । तत्पर्य्यायः । शीतालुः २ । इति जटाधरः ॥ (यथा, शिवरात्रिव्रतकथायाम् ।
"शीतार्त्तश्च क्षुधार्त्तश्च कम्पान्वितकलेवरः ।
जजागार तदा रात्रौ प्रुतो नीहारवारिणा ॥")

शीतालुः, त्रि, (शीतं न सहते इति । शीत + "शीतोष्णाट्प्रेभ्यस्त्रन् सहते ।" ५ । २ । १२२ । इत्यस्य वार्त्तिकोक्त्या आलुच् ।) शीतार्त्तः । इति जटाधरः ॥

शीताश्मा, [न्] पुं, (शीतः शीतलोऽश्मा ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥ शीतलप्रस्तरश्च ॥

शीतीभावः, पुं, (शीत + भू + घञ् । अभूततद्भावे चिः ।) मोक्षः । इति त्रिकाण्डशेषः ॥ शीतलत्वञ्च ॥

शीतोत्तमं, क्ली, (शीतेषु वस्तुषु मध्ये उत्तमम् ।) जलम् । इति शब्दचन्द्रिका ॥

शीत्यं, त्रि, शैत्यम् । क्लृप्तम् । इत्यमरटीकायां रमानाथः ॥ शीतयोग्यञ्च ॥

शीत्कारः, पुं, (शीदिति शब्दस्य कारः करणम् ।) वरस्त्रीणां रतिकालध्वनिः । यथा,—

"शीत्कारो रतनारीणः सुरते वरयोषिताम् ।"

इति जटाधरः ॥

(शीत्कृतिमात्रे । यथा, कथासरित्सागरे । १ । २ ।
"सन्ध्यानृत्योत्सवे तारा करैर्वीणेव विघ्नजित् ।
शीत्कारशीकरैरन्याः कल्पयन्निव पातु वः ॥")

शीत्कृतं, क्ली, (शीदिति शब्दस्य कृतं करणम् ।) शीत्कारः । इति धरणिः ॥

शीधुः, पुं, क्ली, (शेतेऽनेनेति । शी + "शीङो धुग्लग्वलज् वानलः ।" उणा० ४ । १८ । इति धुक् ।) पक्वेक्षुरसजातमद्यम् । इत्यमरभरतौ ॥

शीधुपः, त्रि, (शीधुं पातीति । पा + कः ।) शीधुपानकर्त्ता । इति शाब्दिकाः ॥

शीधुगन्धः, पुं, (शीधोर्मद्यविशेषस्य गन्धो यत्र ।) वकुलवृक्षः । इति त्रिकाण्डशेषः ॥ मद्यगन्धश्च ॥

शीनं, त्रि, (श्यैङ् गतौ + क्तः । "द्रवमूर्त्तिस्पर्शयोः श्यः ।" ६ । १ । २४ । इति सम्प्रसारणम् । "श्योऽस्पर्शे ।" ८ । २ । ४७ । इति जः ।) घनीभूतद्रवादि । इति मुग्धबोधव्याकरणम् ॥

शीर्णः, पुं, (श्रै+क्तः ।)मूर्खः । अजगरः । इति मेदिनी ॥

शीर्फालिका,स्त्री, शेफालिका । इत्यमरटीकायां भरतः ॥

शीर्भ, ऋ ङ कत्थने । इति कविकल्पद्रुमः ॥(भ्वा० आत्म०-सक०-सेट् ।) ऋ, अशिशीर्भत् । ङ, शीर्भते । कत्थनं प्रशंसा । इति दुर्गादासः ॥

शीर्भवः, पुं, शीवरः । इति शब्दरत्नावली ॥

शीर्भ्यः, पुं, शीर्भ्यते प्रशंस्यते इति । शीर्भ+क्यत् ।) शिवः । हरः इति केचित् ॥ (त्रि, आत्मन्नाधिभवः । जलप्रवाहभवः । स्निग्धप्रभवः । यथा, वाजसनेयसंहितायाम् । १६ । ३१ ।

"शीर्भ्याय च नमः शर्म्याय ।"

"शीर्भ्य कत्थने शीर्भते कत्थते इति । शीर्भ आत्मश्राघी पदाद्यर्च् । तत्र भवः शीर्भ्यः । शीर्भो जलप्रवाहो वा शीर्भः स्निग्धो वा तत्र भवाय नमः ।" इति तट्टीकायां महीधरः ॥)

शीर्षः, पुं, (शेते इति । शी+"स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् ।) अजगरसर्पः । इति शब्दरत्नावली ॥

शीर्षी, [न्] पुं, हरिदर्भः । इति राजनिर्घण्टः ॥ हरिद्भर्भ इति वा पाठः ॥

शीर्ष, क्ली, (शॄ+क्तः ।) स्त्रीणियकम् । इति भावप्रकाशः ॥

शीर्ण, त्रि, (शॄ+क्तः ।) क्षयः । विशीर्णः । इति मेदिनी ॥ (यथा, आर्य्यासप्तशत्याम् । ५९७ ।

"शीर्णप्रासादोपरि जिगीषुरिव कलरवः क्वणति ॥")

शीर्णमाला,स्त्री,पृश्निपर्णी। इति शब्दचन्द्रिका॥ विशीर्णमाल्यञ्च ॥

शीर्णपत्रः, पुं, (शीर्णं पत्रमस्य ।) कर्णिकारवृक्षः । इति शब्दचन्द्रिका ॥ पट्टिकालोध्रः । निम्बः । इति राजनिर्घण्टः ॥ विशीर्णपत्रे, क्ली ॥

शीर्णपर्णः, पुं, (शीर्णं पर्णमस्य ।) निम्बवृक्षः । इति राजनिर्घण्टः ॥ विशीर्णपत्रे, क्ली ॥

शीर्णपादः, पुं, (शीर्णौ पादौ यस्य । विभाषापादेवास्य तथात्वम् ।)यमः । इति त्रिकाण्डशेषः ॥ क्षयचरणश्च ॥

शीर्णपुष्पिका, स्त्री, (शीर्णं पुष्पं यस्याः । शीर्णपुष्पी । ततः स्वार्थे कन् ।) अवाक्पुष्पी । इति शब्दचन्द्रिका ॥

शीर्णहस्तं, क्ली, (शीर्णं हस्तं यस्य ।) हस्तहोलम् । इति शब्दचन्द्रिका ॥ तरमुज् इति भाषा । तत्पर्य्यायः । सुखवासः २ । इति रत्नमाला ॥ सुखाशः ३ । इति केचित् ॥ अस्य गुणाः । कफभेदाग्निरुचिशुक्रकारित्वम् । क्षारत्वम् । मधुरत्वम् । आनाहश्लीहनाशित्वम् । लघुपाकित्वञ्च । इति राजवल्लभः ॥

शीर्णाङ्घ्रिः, पुं, (शीर्णौ अङ्घ्री यस्य । विभाषापादेवास्य तथात्वम् ।) यमः । इति हेमचन्द्रः । क्षयपादे, त्रि ॥

शीर्व्विः, त्रि, (शृणातीति । शॄ+"जॄशॄस्तृजाग्भ्यः क्विन् ।" उणा० ४ । ५४ । इति क्विन् ।) अपकारकः । हिंसकः । इति सिद्धान्तकौमुदी ॥

शीर्ष, क्ली, मस्तकम् । इत्यमरः ॥ (यथा, हरिवंशे । १७८ । ६ ।

"शीर्षाणां वै सहस्रन्तु विहितं शार्ङ्गधन्वना । सहस्रञ्चैव कायानां वहन् सङ्कर्षणस्तदा ॥")

क्षणागुरुः । इति राजनिर्घण्टः ॥

शीर्षकं, क्ली, (शीर्षे कं सुखमस्मात् ।) शिरोरक्षणसन्नाहः । टोप् इति भाषा । तत्पर्य्यायः । शीर्षत्रम् शिरस्त्रम् ३ । इत्यमरः ॥ शिरोऽस्थि । इति राजनिर्घण्टः ॥ जयपराजयपत्रम् । यथा, याज्ञवल्क्यः ।

"तुलाग्न्यापो विषं कोषो दिव्यानीह विशुद्धये । महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥"

विशुद्धये सन्दिग्धार्थस्य सन्देहनिवृत्तये ॥ महाभियोगेषु महापातकादिगुरुतराभियोगेषु । शीर्षकस्थे शीर्षकं प्रधानं शिरो व्यवहारस्य चतुष्पादः जयपराजयलक्षणः । तेन दण्डो लक्ष्यते तत्र तिष्ठतीति शीर्षकस्थः तत्प्रयुक्तदण्डभागीत्यर्थः । इति दिव्यतत्त्वम् ॥

शीर्षकः, पुं, (शीर्षमिव । इवार्थे कन् ।) राहुग्रहः । इति शब्दरत्नावली ॥ मस्तके, क्ली ॥

शीर्षघाती, [न्] त्रि, (शीर्षं हन्तीति । हन+"कुमारशीर्षयोर्णिनिः ।" ३ । २ । ५१ । इति णिनिः ।) मस्तकच्छेदकः । शीर्षशब्दपूर्व्वकहनधातोः कर्म्मण्यां कुमारशीर्षाभ्यां हन इति मंत्रिसमारसूत्रेण णिनप्रत्ययेन निष्पन्नः ॥

शीर्षच्छेदिकः, त्रि, (शीर्षच्छेदमर्हतीति । शीर्षच्छेद+ठक् ।) वधार्हः । यथा,—

"स शीर्षच्छेदिकः शीर्षच्छेद्यो यो वधमर्हति ॥"

इति हेमचन्द्रः ॥

शीर्षच्छेद्यः, त्रि, (शीर्षच्छेदं नित्यमर्हतीति । "शीर्षच्छेदात् यच्च ।" ५।१।६५ । इति यत् ।) मस्तकच्छेदनोपयुक्तः । वध्यः । इत्यमरः ॥ (यथा, उत्तरचरिते २ अङ्के ।

"शम्बको नाम दुष्कृतः पृथिव्यां तप्यते तपः । शीर्षच्छेद्यः स ते राम तं हत्वा जीवय द्विजम् ॥")

शीर्षण्यं, क्ली, (शिरसि हितम् । शिरस्+"शरीरावयवात् यत् ।"५।१।६। इति यत् । "शे च तन्निते ।"६ । १ । ६१ । इति शिरसः शीर्षन्नादेशः ।) शीर्षकम् । शिरस्त्रम् । इत्यमरः ॥ त्रीणि शिरोरक्षणसन्नाहे टोप् इति ख्याते । शीर्षे कं सुखमस्मात् शीर्षकम् । शीर्षमारोहति शीर्षण्यं ढके कादिति यः । शिरस्त्रायते शिरस्त्रं डः । इति भरतः ॥

शीर्षण्यः, पुं, (शिरसि भवः । शिरस+"शरीरावयवाच्च ।" ४ । ३ । ५५ । इति यत् । "वा, वेणुषु ।" ६ । १ । ६१ । इत्यस्य वार्त्तिकोक्त्या शीर्षन्नादेशः ।) विशदकवः । तत्पर्य्यायः । शिरस्यः २ । इत्यमरः ॥ हे स्नातः स्नानादिना वा निर्म्मले अन्योन्यासंपृक्ते वेणे । शीर्षे भवं शीर्षण्यं ढके कादिति यः । पाददन्तेत्यादिना शीर्षस्य शीर्षणादेशः । इति भरतः ॥ (शिरसि निबद्धे, त्रि । यथा, ऋग्वेदे । १ । १६२ । ८ ।

"शीर्षण्या रसना रज्ञरस्य ।"

"शीर्षण्या शिरसि बद्धा रसना मेखला इव ।" इति तद्भाष्ये सायणः ॥* श्रेष्ठे च त्रि । यथा, भागवते । ५ । ४ । १५ ।

"यदृयच्छीर्षण्याचरितं तत्तदनुवर्त्तते लोकः ॥"

शीर्षण्यः श्रेष्ठस्तेनाचरितम् ।"इति तट्टीका ॥)

शीर्षरत्नं,क्लो, (शीर्षे मस्तकं रत्नतीति । रत्न+अण् ।) शिरस्त्राणम् । यथा,—

"शिरस्त्रं शीर्षरत्नञ्च शीर्षण्यं शीर्षकञ्च तत् ।"

इति हारावली । ७३ ॥

शीर्षोदयः, पुं, (शीर्षे शीर्षदेशे उदयो यस्य ।) मिथुन-सिंह-कन्या-तुला--वृश्चिक-कुम्भ--मीनलग्नरूपः । यथा,—

"अजगोपतियुग्मञ्च कर्किधन्विमृगारुहा । निशासंज्ञाः स्मृताश्चैते शेषाद्यान्ये दिनात्मकाः ॥

निशासंज्ञा विमिथुनाः स्मृताः पृष्ठोदयास्तथा॥ शेषाः शीर्षोदया ज्ञेते मीनद्योभयसंज्ञकः ॥"

इति ज्योतिस्तत्त्वम् ॥

शील, ञि समाधौ । इति कविकल्पद्रुमः ॥(भ्वा० पर०-सक०-सेट् ।) ञि. शीलितोऽस्ति । समाधिः सेवानुभावनं प्रवृत्तिर्व्वा । यः शीलति सदा धर्म्ममिति हलायुधः । इति दुर्गादासः ॥

शील, त् क अभ्यासे । अतिशायने । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) अतिशायनं अतिशयकरणम् । नालब्यादि । अशिशीलत् । उपधारणे इत्यन्ये । शीलय नीलनिचोलमिति जयदेवः । इति दुर्गादासः ॥

शील, क्ली, (शीलयतीति । शीलत क अतिशायन+अच् । यद्वा शीङ् स्वप्ने+"शीङो धुक् लक् वलञ्च वालनः ।" उणा० ४ । ३८ । इति लक् । अर्द्धर्चादित्वात् पुंलिङ्गमपि) स्वभावः । सदृत्तम् । इत्यमरमेदिन्यौ ॥ (यथा, रामायणे । २ । ३८ । २४ ।

"साध्वीनान्तु स्थितानान्तु शीले सत्यं श्रुते स्थिते स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते ॥")

ब्रह्मखतादित्रयोदशविधधर्म्ममूलम् रागद्वेषवर्जनम् । यथा,—

"वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव ॥"

इति मानवे २ अध्यायः ॥*॥

शीलं ब्रह्मखतादिरूपम् । तदाह हारीतः । ब्रह्मखता देवपितृभक्तता सौम्यता अपरोपतापिता अनसूयता मृदुता अपारुष्य मैत्रता प्रियवादित्वं कृतज्ञता शरण्यता कारुण्यं प्रशान्तिश्चेति त्रयोदशविधं शीलम् । गोविन्दराजस्तु । शीलं रागद्वेषपरित्याग इत्याह । इति तट्टीकायां कुल्लूकभट्टः ॥

शीलः, पुं. (शील अतिशयने + अच् ।) अजगरसर्पः । इति शब्दरत्नावली ॥ चरित्रम् । इत्यमरटीकायां नयनानन्दः ॥

शीलनं, क्ली, (शील + ल्युट् ।) अभ्यासनम् । (यथा, महाभारते । १२ । ३२१ । ४३ ।

"पुरा हृका भयङ्करा मनुष्यटेङ्गोचराः ।
अभिद्रवन्ति सर्व्वतो यतस्व पुण्यशीलने ॥")

अतिशायनम् । उपधारणम् । सेवानुभावनम् । प्रवर्त्तनम् । इति शीलधातोरनट्प्रत्ययेन निष्पन्नम् ॥ पाठनिश्चयः । यथा,—

"भविनी गुणनी शीलनं स्मृतम् ।"

इति ब्रह्मवर्गे चिकाण्डशेषः ॥

शीलवान्, [त्] त्रि, (शीलमस्यास्तीति । शील + मतुप् । मस्य वः ।) शीलविशिष्टः । सत्स्वभावः । यथा,—

"पथ्याशिनां शीलवतां नराणां
सद्वृत्तभाजां विजितेन्द्रियाणाम् ।
एवंविधानामिदमायुरत्र
चिन्त्यं सदा वृत्तमुनिप्रवादः ॥"

इति मलमासतत्त्वम् ॥

सद्वृत्तः । इति शीलशब्दार्थदर्शनात् ॥

शीला, स्त्री, (शीलमस्या अस्तीति । शील + अच् । टाप् ।) कौण्डिन्यमुनिपत्नी । यथा,—

"मध्याह्ने भोज्यवेलायां समुत्तीर्य्य सरित्तटे ।
ददर्श शीला सा स्त्रीणां समूहं रत्नवाससाम् ॥"

इति तिथ्यादितत्त्वम् ॥

शीलितं, क्ली, (शील + क्तः ।) चीर्णम् । इति त्रिकाण्डशेषः ॥ अभ्यस्ते, त्रि ॥

शीवलं, क्ली, (शी + बाहुलकात् वलः गुणाभावश्च ।) शैलेयम् । शैवालम् । इति मेदिनी ॥

शीवा, [न्] पुं, (शेते इति । शी + "शीङ्क्रुशिरुहीति ।" उणा० ४ । ११३ । इति क्वनिप् ।) अजगरसर्पः । इति सिद्धान्तकौमुदी ॥

शुक, सर्पे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) शोकति । सर्पो गमनम् । इति दुर्गादासः ॥

शुक्, [च्] स्त्री, (शुच् शोके + क्विप् ।) शोकः । इत्यमरः ॥ (यथा, रघुः । १२ । ७५ ।

"कामं जीवति मे नाथः इति सा विजहौ शुचम् ।
प्राप्तत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता ॥")

शुकं, क्ली, (शोभते इति । शुभ दीप्तौ + "शुकवल्कोल्काः ।" उणा० ३ । ४२ । इति कप्रत्ययेन निपातनात् साधु ।) अन्यिपर्णम् । इत्यमरः ॥ वस्त्रम् । वस्त्राञ्चलम् । शिरस्त्राणम् । इति हेमचन्द्रः ॥ शोणकवृक्षः । इति विश्वः ॥

शुक, पुं, (शुभ दीप्तौ + कप्रत्ययेन साधुः । उणा० ३ । ४२ ।) पक्षिविशेषः । शुया इति वङ्गभाषा । शुगा इति हिन्दी भाषा । तत्पर्य्यायः । कीरः २ । इत्यमरः ॥ वक्रतुण्डः ३ । मेधावी ४ दाडिमप्रियः ५ रक्ततुण्डः ६ वक्रचञ्चुः ७ चिमिः ८ चिमिकः ९ । इति शब्दरत्नावली ॥ शुकः १० प्रियदर्शनः ११ । इति जटाधरः ॥ मन्त्रुपाठकः १२ । (यथा, आर्य्यासप्तशत्याम् । ३९१ ।

"प्रकटयति रागमधिकं लपनमिदं वक्रिमाणमावहति ।
प्रीणयति च प्रतिपदं दूति शुकस्येव दयितस्य ॥"

अस्य मांसगुणाः । परमवृष्यत्वम् । विषुवे गुरुत्वम् । शीतलत्वम् । कासश्वासक्षयहरत्वम् । संग्राहित्वम् । लघुत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥*॥ तस्य शुभसूचकत्वं यथा,

"वामः पठन् राजशुकः प्रयाणे
शुभं भवेद्दक्षिणतः प्रवेशे ।
वनेचराः काष्ठशुकाः प्रयातुः
स्युः सिद्धिदाः संमुखमापतन्तः ॥"

इति वसन्तराजशाकुने ८ वर्गः ॥*॥

व्यासपुत्रः । स च परीक्षिताय श्रीमद्भागवतं श्रावयामास । तस्योत्पत्त्यादिर्यथा । हरिवंशे वायवीये च ।

"पराशरकुलोत्पन्नः शुको नाम महायशाः ।
व्यासादरण्यां सम्भूतो विधूमोऽग्निरिव ज्वलन् ।
स तस्यां पिप्पलकन्यायां पीवर्य्यां जनयिष्यति ।
कृष्णं गौरं प्रभुं शम्भुं तथा भूरिश्रुतं जयम् ॥
कन्यां कौर्त्तिमतीं वर्हीं योगिनीं योगमातरम् ।
ब्रह्मदत्तस्य जननीं गृहीणीमनुहस्य च ॥"

इति विष्णुपुराणे ४ अंशे १९ अध्यायटीकायां श्रीधरस्वामी ॥ वह्निपुराणे प्रजापतिसर्गनामाध्यायेऽस्यैवम् ॥*॥ अपि च ।

"द्वैपायनाच्छुको जज्ञे भगवानेष शङ्करः ।
अंशेनैवावतीर्य्यार्य्यां संप्राप परमं पदम् ॥
शुकस्याप्यभवन् पुत्राः पञ्चात्यन्ततपस्विनः ।
भूरिश्रवाः प्रभुः शम्भुः कृष्णो गौरश्च पञ्चमः ।
कन्या कौर्त्तिमती चैव योगमाता घृतव्रता ॥"

इति कौर्म्मे १७ अध्यायः ॥*॥

(अन्यान्यविधोत्पत्तिविवरणं यथा, देवीभागवते । १ । १४ । १—२३ ।

श्रीसूत उवाच ।

"दृष्ट्वा तामसितापाङ्गीं व्यासश्चिन्तापरोऽभवत् ।
किं करोमि न मे योग्या देवकन्येयमग्रतः ॥
एवं चिन्तयमानन्तु दृष्ट्वा व्यासं तदाप्सराः ।
भयभीता हि सञ्जाता शापं मां विसृजेदयम् ॥
सा कृत्वाथ शुकीरूपं निर्गता भयविह्वला ।
कृष्णस्तु विस्मयं प्राप्तो विहङ्गीं तां विलोकयन् ॥
कामस्तु देहे व्यासस्य दर्शनादेव सङ्गतः ।
मनोऽतिविक्षिप्तं जातं सर्व्वगात्रेषु विक्षिप्तः ॥
स तु धैर्य्येण महता निगृह्णन् मानसं मुनिः ।
न शशाक नियन्तुञ्च स व्यासः प्रहृतं मनः ॥
बहुशो गृह्यमाणञ्च घृताच्या मोहितं मनः ।
भावित्वान्नैव विधृतं व्यासस्यामिततेजसः ॥
मन्थनं कुर्व्वतस्तस्य मुनेरग्निचिकीर्षया ।
अरण्यामेव सहसा तस्य शुक्रमथापतत् ॥
सोऽविचिन्त्य तथा पातं ममन्थारणिमेव च ।
तस्माच्छुकः समुद्भूतो व्यासाकृतिमनोहरः ॥
विस्मयं जनयन् बालः संजातस्तदरण्यजः ।
यथाध्वरे समिद्धोऽग्निर्भाति हव्येन दीप्तिमान् ॥
व्यासस्तु सुतमालोक्य विस्मयं परमङ्गतः ।
किमेतदिति सञ्चिन्त्य वरदानाच्छिवस्य वै ॥
तेजोरूपी शुको जातोऽप्यरणीगर्भसम्भवः ।
द्वितीयोऽग्निरिवात्यर्थं दीप्यमानः स्वतेजसा ॥
विलोकयामास तदा व्यासस्तु मुदितं सुतम् ।
दिव्येन तेजसा युक्तं गार्हपत्यमिवापरम् ॥
गङ्गाम्भः क्षेपयामास समागत्य गिरेस्तदा ।
पुष्पवृष्टिस्तु खाज्जाता शिशोरुपरि तापसाः ! ॥
जातकर्म्मादिकं चक्रे व्यासस्तस्य महात्मनः ।
देवदुन्दुभयो नेदुर्ननृतुश्चाप्सरोगणाः ॥
जगुर्गन्धर्व्वपतयो मुदितास्ते दिवौकसः ।
विश्वावसुर्नारदश्च तुम्बुरुः शुकसम्भवे ॥
तुष्टुवुर्मुदिताः सर्व्वे देवा विद्याधरास्तथा ।
दृष्ट्वा व्याससुतं दिव्यमरणीगर्भसम्भवम् ॥
अन्तरीक्षात् पपातोर्व्यां दक्षः कृष्णाजिनं शुभम् ।
कमण्डलुस्तथा दिव्यः शुकस्यार्थे द्विजोत्तमाः ॥
सद्यः स ववृधे बालो जातमात्रोऽतिदीप्तिमान् ।
तस्योपनयनं चक्रे व्यासो विद्याविधानवित् ॥
उत्पन्नमात्रं तं वेदाः सरहस्याः ससंग्रहाः ।
उपतस्थुर्महात्मानं यथास्य पितरन्तथा ॥
यतो दृष्टं शुकीरूपं घृताच्या सम्भवे तदा ।
शुकेति नाम पुत्रस्य चकार मुनिसत्तमः ! ॥
बृहस्पतिमुपाध्यायं कृत्वा व्याससुतस्तदा ।
व्रतानि ब्रह्मचर्य्यस्य चकार विधिपूर्व्वकम् ॥
सोऽधीत्य निखिलान् वेदान् सरहस्यान् ससंग्रहान् ।
धर्म्मशास्त्राणि सर्व्वाणि कृत्वा गुरुकुले शुकः ॥
गुरवे दक्षिणां दत्त्वा समाहृत्तो मुनिस्तदा ।
आजगाम पितुः पार्श्वं कृष्णद्वैपायनस्य च ॥"

अस्य दारपरिग्रहादिवृत्तान्तस्तु तत्रैव विशेषतो द्रष्टव्यः ॥*॥) स च श्रीकृष्णस्य क्रीड़ार्थं वृन्दावने उपनन्दस्य कन्या अभूत् । इति पाद्मे पातालखण्डम् ॥*॥ रावणमन्त्री । शिरीषवृक्षः । इति मेदिनी ॥ वृक्षविशेषः । इति रत्नमाला ॥ शेयाकाँटा इति भाषा ॥

शुकच्छदं, क्ली, (शुकवत् छदो यस्य ।) अन्यिपर्णम् । इति जटाधरः ॥

शुकजिह्वा, स्त्री, (शुकस्य जिह्वेव फलं यस्याः ।) वृक्षविशेषः । शुयाठेँटो इति भाषा ॥ यथा,

"शुकाख्या शुकनामा च शुकजिह्वा शुकानना"

इति रत्नमाला ॥

शुकतरुः, पुं, (शुकवत् तरुः । शुकवर्णपर्णविशिष्टत्वादस्य तथात्वम् । शुकप्रियस्तरुर्वा ।) शिरीषवृक्षः । इति रत्नमाला ॥

शुकद्रुमः, पुं, (शुकवत् द्रुमः । तद्वर्णपर्णविशिष्टत्वात् तथात्वम् । यद्वा, शुकप्रियो द्रुमः ।) शिरीषवृक्षः । इति शब्दमाला ॥

शुकनामा, स्त्री, (शुकस्य नाम नाम यस्याः ।) शुकजिह्वा । इति रत्नमाला ॥ शुकसंज्ञके, त्रि ॥

शुकनाशनः, पुं, (शुकं नाशयतीति। नश+णिच्+ल्युः।) दद्रुघ्नः। इति राजनिर्घण्टः॥ शुकनाशके, त्रि॥

शुकनासः, पुं, (शुकस्य नासेव फलं यस्य।) श्योणाकवृक्षः। इत्यमरः॥ शुकवन्नासायुक्ते, त्रि॥

शुकपिण्डिः, स्त्री, शूकशिम्बी। इति शब्दरत्नावली॥

शुकपुच्छः, पुं, (शुकस्य पुच्छ इव।) गन्धकः। इति हेमचन्द्रः॥ शुकस्य लाङ्गुलच्च॥

शुकपुच्छकं, क्ली, (शुकस्य पुच्छ इव। कन्।) स्त्रौणेयम्। इति राजनिर्घण्टः॥ शुकवत्पुच्छयुक्ते, त्रि॥

शुकपुष्पं, क्ली, (शुकप्रियं पुष्पमस्य।) स्त्रौणेयम् इति भावप्रकाशः॥

शुकपुष्पः, पुं, (शुकप्रियं पुष्पमस्य।) शिरीषवृक्षः। इति राजनिर्घण्टः॥

शुकप्रियः, पुं, (शुकस्य प्रियः।) शिरीषवृक्षः। इति भावप्रकाशः॥ शुकवल्लभे, त्रि॥

शुकप्रिया, स्त्री, (शुकस्य प्रिया।) जम्बूः। इति राजनिर्घण्टः॥

शुकफलः, पुं (शुक इव फलमस्य। तद्वर्णफलवत्त्वात् तथात्वम्।) अर्कवृक्षः। इति राजनिर्घण्टः॥

शुकबर्हं, क्ली, (शुकस्य बर्हमिव।) गन्धद्रव्यविशेषः। इति शब्दरत्नावली॥ गाँठियाला इति भाषा॥

शुकम्, व्य, शीघ्रम्। इति केचित्॥

शुकवल्लभः, पुं (शुकस्य वल्लभः प्रियः।) दाड़िमः। इति राजनिर्घण्टः। शुकप्रिये, त्रि॥

शुकवाहः, पुं, (शुको वाहो वाहनं यस्य।) कामदेवः। इति केचित्॥ शुकपक्षिवाहके, त्रि॥

शुकशिम्बा, स्त्री, कपिकच्छुः। इति शब्दरत्नावली॥

शुकशिम्बिः, स्त्री, कपिकच्छुः। इति शब्दरत्नावली॥

शुकाख्या, स्त्री, (शुकस्य आख्या आख्या यस्याः।) वृक्षविशेषः। शुयाठोंटी इति भाषा। तत्पर्य्यायः। शुकनामा २ शुकशिम्बा ३ शुकानना ४। इति रत्नमाला॥

शुकादनः, पुं, (शुकेन अद्यतेऽसौ इति। अद्+कर्म्मणि खुट्।) दाड़िमः। इति शब्दचन्द्रिका॥ शुकखादनीयद्रव्यमात्रे, त्रि॥

शुकानना, स्त्री, (शुकस्याननमिव फलं यस्याः।) शुकाख्यावृक्षः। इति रत्नमाला॥ शुकतुण्डमुखे, त्रि॥

शुकी, स्त्री, (शुक+ङीष्।) कश्यपपत्नी। यथा,

"शुकी श्येनी च भासा च सुग्रीवा शुचिरप्यधिका॥"

अत्र शुचिभासिका इत्यपि पाठः।

"शुकी शुकाननयदुलूकी प्रत्युलूकका॥"

इति गारुड़े ६ अध्यायः॥

शुकपक्षिणी च॥

शुक्तिः, स्त्री, (शुच्+क्तिन्।) जलजन्तुविशेषः। झिनुक् इति भाषा। तत्पर्य्यायः। मुक्तास्फोटः २। इत्यमरः॥ शुक्तिका ३। इति जटाधरः॥ मुक्तिप्रसूः ४ महाशुक्तिः ५ तौतिकः ६ मौक्तिकप्रसवा ७ मौक्तिकशुक्तिः ८ मुक्तामाता ९। अस्या गुणाः। कटुत्वम्। स्निग्धत्वम्। श्वासहृद्ग्रहनाशित्वम्। शूलप्रशमनत्वम्। कृमित्वम्। मधुरत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ कपालखण्डम्। ग्रहः। ग्रहनखः। नखौ। अक्षावर्त्तः। अर्शोरोगः। इति मेदिनी॥ चक्षूरोगविशेषः। इति हेमचन्द्रः॥ तद्विवरणं यथा,—

"प्रस्तारिशुक्लार्जतजोऽधिमांस-
साग्वर्त्मसंज्ञाः खलु पञ्च रोगाः।
स्याच्छुक्तिका सार्ज्जुनपिष्टकाख्या
जालं शिरायां पिड़िकाश्च तासाम्॥
रोगा बलासग्रथितेन सार्द्ध-
मेकादशोक्ताः खलु शुक्तभागे॥"

शुक्तिमाह।

"श्यावाः स्युः पिच्छितनिभाश्च बिन्दवोऽयं

शुक्तोदरं, क्ली, (शुक्तस्योदरमिव।) तालीशपत्रम्। इति राजनिर्घण्टः॥ कौरजठरञ्च॥

शुक्तं, क्ली, (शुच क्लेदे+क्तः।) मांसम्। इति शब्दचन्द्रिका॥ काञ्जिकम्। इति हारावली॥ द्रवद्रव्यविशेषः। यथा,—

"कन्दमूलफलादीनि सक्षेहलवणानि च।
यत्तद्द्रव्येऽभिषूयन्ते तच्छुक्तमभिधीयते॥"

अस्य गुणाः।

"शुक्तं तीक्ष्णोष्णलवणं पित्तकृत् कटुकं लघु।
रूक्षं कृम्युदरानाहशोथार्शोविषकुष्ठनुत्॥"

इति राजनिर्घण्टः॥ *॥

शुक्तं यन्मधुरं कालवशादम्लतां गतम्। इति प्रायश्चित्तविवेकः॥ तस्य भक्षणनिषेधो यथा। यमः।

"अपूपाश्च करम्भाश्च धाना वटकशष्कुलयः।
शाकं मांसमपूपञ्च सूपं क्षीरमेव च॥
यवागूं पायसञ्चैव यच्चान्यत् क्षीरसम्भवम्।
सर्व्वं पर्य्युषितं भक्ष्यं शुक्तञ्च परिवर्ज्जयेत्॥"

तत्प्रतिप्रसवो यथा। मनुः।

"दधिभक्ष्यञ्च शुक्तेषु सर्व्वञ्च दधिसम्भवम्॥"

इति तिथ्यादितत्त्वम्॥

(यथा च मनुः। २। १७७।

"वर्ज्जयेन्मधुमांसञ्च गन्धं माल्यं रसान् स्त्रियः।
शुक्तानि यानि सर्व्वाणि प्राणिनाञ्चैव हिंसनम्॥"

"यानि स्वभावतो मधुरादिरसानि कालवशेन उदकवासादिना चाम्लवन्ति तानि शुक्तानि।"

इति तट्टीकायां कुल्लूकभट्टः॥)

शुक्तं, त्रि, (शुच्+क्तः।) निष्ठुरम्। इति मेदिनी॥ पूतम्। अम्लम्। इति विश्वः॥ श्लिष्टम्। निर्ज्जनम्। इति शब्दरत्नावली॥

शुक्ता, स्त्री, (शुक्त+स्त्रियां टाप्।) चुक्रिका। इति शब्दरत्नावली॥

शुक्तिः, स्त्री, (शुच्+क्तिन्।) जलजन्तुविशेषः। झिनुक् इति भाषा। तत्पर्य्यायः। मुक्तास्फोटः २। इत्यमरः॥ शुक्तिका ३। इति जटाधरः॥ मुक्तिप्रसूः ४ महाशुक्तिः ५ तौतिकः ६ मौक्तिकप्रसवा ७ मौक्तिकशुक्तिः ८ मुक्तामाता ९। अस्या गुणाः। कटुत्वम्। स्निग्धत्वम्। श्वासहृद्ग्रहनाशित्वम्। शूलप्रशमनत्वम्। कृमित्वम्। मधुरत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ कपालखण्डम्। ग्रहः। ग्रहनखः। नखौ। अक्षावर्त्तः। अर्शोरोगः। इति मेदिनी॥ चक्षूरोगविशेषः। इति हेमचन्द्रः॥ तद्विवरणं यथा,—

"प्रस्तारिशुक्लार्जतजोऽधिमांस-
साग्वर्त्मसंज्ञाः खलु पञ्च रोगाः।
स्याच्छुक्तिका सार्ज्जुनपिष्टकाख्या
जालं शिरायां पिड़िकाश्च तासाम्॥
रोगा बलासग्रथितेन सार्द्ध-
मेकादशोक्ताः खलु शुक्तभागे॥"

शुक्तिमाह।

"श्यावाः स्युः पिच्छितनिभाश्च बिन्दवोऽयं

शुक्रं क्ली, (शुच क्लेदे+"ऋज्रेन्द्राग्रवज्रेति।" उणा० २। २८। इति रन्प्रत्ययेन साधु।) मज्जजातधातुः। तत्पर्य्यायः। पुंस्त्वम् २ रेतः ३ बीजम् ४ वीर्य्यम् ५ पौरुषम् ६ तेजः ७ इन्द्रियम् ८ भवविकारः ९ मञ्जारसः १० रोहणम् ११ बलम् १२। इति राजनिर्घण्टः॥ तस्योत्पत्तिर्यथा,—

"रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते।
मेदसोऽस्थि ततो मज्जा मज्जात् शुक्रस्य सम्भवः॥"

तस्य स्वरूपं यथा,—

"शुक्रं शोचं सितं स्निग्धं बलपुष्टिकरं स्मृतम्।
गर्भबीजं वपुःसारो जीवस्याश्रय उत्तमः॥"

जीवस्याश्रय उत्तम इति। यत आह।

"जीवो वसति सर्व्वस्मिन् देहे तत्र विशेषतः।
वीर्य्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणात्॥" *॥

गर्भसंजननशुक्रस्य लक्षणं यथा,—

"स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च।
शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभञ्च तत्॥"

तस्य स्खलनमाह।

"यथा पयसि सर्पिस्तु गूढ़त्वेनौ रसो यथा।
एवं हि सकले काये शुक्रं तिष्ठति देहिनाम् ॥"
अत्र सर्पिर्दृष्टान्तो बहुशुक्रेऽल्पमथनेन सर्पिः-शुक्रयोर्लाभात्। इक्षुरसदृष्टान्तस्तु स्वल्पशुक्रे पुंसि अतिपीड़नेनेक्षुरसशुक्रयोर्लाभात् ॥*॥
तस्य चरणमार्गा यथा,—
"हृदङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः।
मूत्रस्रोतःपथे शुक्रं पुरुषस्य प्रवर्त्तते ॥" * ॥
अथ शुक्रस्य चरणकारणमाह।
"कृत्स्नदेहस्थितं शुक्रं प्रसन्नमनसस्तथा।
स्त्रीषु व्याययुतस्यापि हर्षात्तत् संप्रवर्त्तते ॥"
स्त्रीषु व्याययुतः सुरतरूपं व्यायामं कुर्व्वतः।
अन्यच्च।
"शुक्रं कामेन कामिन्या दर्शनात् स्पर्शनादपि।
शब्दसंश्रवणात् ध्यानात् संभोगाच्च प्रवर्त्तते ॥"
इति भावप्रकाशः ॥ * ॥
शुक्रक्षयकरद्रव्याणि यथा। सार्षपतैलम् १ राजमाषः २ तिलः ३ पटोलवास्तूककाकमाचीपुनर्नवागाकभिन्नसर्ज्जिकाकम ४ तावदम्लद्रव्यम् ५ कारवेल्लकफलम् ६ कर्कोटकफलम् ७ बादामम् ८ लिकुचम् ९ शुष्कमरिचम् १० गुड़त्वक्११ पिप्पलीशुण्ठीभिन्नकटुत्रयः१२। इति राजवल्लभात् संगृहीतम् ॥ * ॥ अपि च।
"बीजक्षयकरं नित्यं भक्ष्यं भोज्यञ्च पानकम्।
वर्जयेत् क्षारशाकाद्यानत्यम्बु बहुतिक्तकम् ॥
कांस्यराजतरङ्गस्थं तोयं पानेऽप्यवर्द्धनम्।
मूत्रान्ते मूत्रवद्बीजक्षयकारि विवर्ज्जयेत् ॥"
शुक्रवृद्धिकरजलं यथा,—
"ताम्रायःस्वर्णसीसानां पात्रस्थं फलचर्म्मणोः।
शुक्रवृद्धिकरं तोयं तत्तु पेयं प्रयत्नतः ॥"
इति कालिकापुराणे ८८ अध्यायः ॥ * ॥
शुक्रवर्द्धकद्रव्याणि यथा। पानीयम् १ विशेषतः हैमन्तिकजलम्२ तालाम्बुश्चन्दनादिद्रव्यानुलेपनम् ४ रक्तशालिधान्यम् ५ हैमन्तिकयष्टिकधान्यम् ६ गोधूमः ७ माषः८ सामान्यशुष्कनारीचपत्रशाकम् ९ सामान्यक्लिन्नशुष्कनारीचपत्रशाकजलम् १० कलम्बीशाकम् ११ काकमाचीशाकम् १२ गोक्षुरशाकम् १३ मुक्तातकः १४ वार्त्ताकुः १५ विदारी १६ हस्त्यालुकम् १७ मध्यालुकम् १८ पक्वाम्रम् १९ दुग्धाम्रम् २० नागरङ्गम् २१ बहुवारफलम्२२ पक्वकपित्थफलम् २३ कपित्थफलास्थि २४ पक्वतालम् २५ पक्वकदलम् २६ चम्पककदलम्२७ द्राक्षा २८ खर्জ্জूरम् २९ धात्री ३० कुष्माण्डमज्जा ३१ तावन्मत्स्याः ३२ हृदयमत्स्यः ३३ समुद्रमत्स्यः ३४ रोहितमत्स्यः ३५ भाकूटमत्स्यः ३६ पाठीनमत्स्यः ३७ मेगलिमत्स्यः३८ चित्रफलमत्स्यः ३९ वाउसमत्स्यः ४० मद्गुरमत्स्यः ४१ वर्म्मिमत्स्यः ४२ फलीमत्स्यः ४३ चिङ्गटमत्स्यः४४ पर्व्वतमत्स्यः४५ एलङ्गमत्स्यः ४६शकलीमत्स्यः४७चम्पकनन्दमत्स्यः४८प्रोष्ठीमत्स्यः ४९ दग्धमत्स्यः ५० सामान्यमांसम् ५१ प्रसहामांसम् ५२ भृग्ययामांसम् ५३ अनूपमांसम् ५४ जलजमांसम्५५जलेचरमांसम् ५६ छागमांसम् ५७ वाराहमांसम् ५८ कूर्म्ममांसम् ५९ तित्तिरि- ६० कुलिङ्ग- ६१ चटकानां मांसम्६२ हंसमांसम् ६३ हंसबीजम्६४ शुकपक्षिमांसम् ६५ मयूर-६६ मरारि-६७ मद्गु-६८ कादम्ब-६९ बलाका-७० बकमांसम् ७१ जीर्णमद्यम् ७२ समस्तक्षीरम् ७३ गोदुग्धम् ७४ हस्तिनीदुग्धम् ७५ तावत्क्षीरमन्तालिका ७६ माहिषदधि७७ दधिसरः ७८ दधिमस्तु ७९ नवनीतम् ८० तावदृष्टतम् ८१ तावदिक्षुः ८२ विशेषतः पौण्ड्रेक्षुः ८३ दन्तनिर्ण्णोड़ितेक्षुरसः८४ यन्त्रनिर्ण्णोड़ितेक्षुरसः८५ अग्निपक्वेक्षुरसः ८६ इक्षुफाणितम् ८७ इक्षुगुड़ः ८८ इक्षुखण्डम् ८९ मधुरो ९० शुष्कपिप्पली ९१ शुण्ठी ९२ आर्द्रकम् ९३ लशुनम् ९४ पलाण्डुः ९५ सैन्धवम् ९६ अम्लम्९७ सतैललवणान्वितदग्धमत्स्यः९८ तैललवणयुक्तपलालवेष्टितकर्दमलेपिताङ्गारदग्धलवणवेशवारपुरस्कृतसार्द्रककटुतैलसन्तालितमत्स्यः ९९ शाकमक्षाख्यव्यञ्जनम् १०० मांसरसः १०१ परिशुष्काख्यमांसम् १०२ घृतपूरः १०३ मण्डमस्तकम् १०४ दुग्धफेनकः १०५ भूग्यश्या१०६ एरण्डमूलम् १०७ गोचुरः १०८ सामान्यवला१०९ विशेषतः पीतवला ११० अश्वगन्धा १११ प्रसारणी ११२ माषपर्णी ११३ रुदन्ती वृक्षः ११४ राजवृक्षफलम् ११५ शिलाजतुः ११६। इति राजवल्लभात् संगृहीतम् ॥*॥
नेत्ररोगविशेषः। इति मेदिनी ॥ अस्य विवरणं शुक्लशब्दे द्रष्टव्यम् ॥
शुक्रः, पुं. (शुच + रन्।) ग्रहविशेषः। तत्पर्य्यायः दैत्यगुरुः २ काव्यः ३ उशनाः ४ भार्गवः ५ कविः ६। इत्यमरः ॥ सितः ७ आस्फुजित् ८ शतपर्व्वेशः ९ भृगुसुतः १० भृगुः ११ षोड़शार्च्चिः १२ मघाभूः१३ श्वेतः १४ श्वेतरथः१५ इति शब्दरत्नावली ॥ षोड़शांशः १६। इति जटाधरः ॥ * ॥ तस्य शुक्रेति नामकारणं यथा,—
"निकुम्भादिषु दैत्येषु भूय एवोत्थितेष्वथ।
युद्धायाभ्यागतेष्वेव नन्दी शङ्करमब्रवीत् ॥
महादेव वचोऽसह्यं शृणु त्वं परमाद्भुतम्।
अविचिन्त्यममत्यञ्च सतानां जीवनं पुनः ॥
ये हताः प्रमथैर्दैत्या यथाशक्त्या रणाजिरे।
ते सर्व्वे जीविता भूयो भार्गवेणाथ विद्यया ॥
तदिदं वै महादेव महत् कर्म्म कृतं रणे।
संजातमफलं देव शुक्रविद्याबलाश्रयात् ॥
इत्येवमुक्ते वचने नन्दिना कुलनन्दिना।
प्रत्युवाच प्रभुः प्रीत्या स्वार्थसाधनमुत्तमम्।
गच्छ शुक्रं गणपते ममान्तिकमुपानय ॥
अहं तं संयतिष्यामि यथायोगं समेष्यति ॥
इत्येवमुक्ते रुद्रेण नन्दी गणपतिस्ततः ॥
तमनन्तमुपायम्य नन्दी संपूज्य वेगवान् ॥
रथाङ्गमेवमानिन्ये सिंहः क्षुद्रमृगं यथा।
तमादाय कराभ्यामाजगाम विनायकः ॥
निपात्य रक्षिणः सर्व्वानथ शुक्रं न्यवेदयत्।
तमानीतं कविं गर्ब्भे प्राच्यिपद्दने प्रभुः ॥
स गर्भुना कविश्रेष्ठो ग्रस्तो जठरमास्थितः।
तुष्टाव भगवन्तं तं वाग्मी वाग्भिरथादरात् ॥

शुक्र उवाच।

नमोऽस्तु ते शङ्कर सर्व्व शर्व्व
सहस्रनेत्राङ्घ्रिशिरो नमस्ते।
दृष्टैव सर्व्वं भुवनं तवोदरे
श्रान्तो भवन्तं शरणं प्रपन्नः ॥
इत्येवमुक्ते वचने महात्मा
शर्भुर्व्वचः प्राह ततो विहस्य।
निर्गच्छ पुत्रोऽसि ममाधुना त्वं
शिश्नेन भो भार्गवंशचन्द्रः ॥
नाम्ना तु शुक्रेति चराचरास्त्वां
स्तोष्यन्ति नैवात्र विचारणास्ति।
इत्येवमुक्त्वा भगवान् मुमोच
शिश्नेन शुक्रः स च निर्जगाम ॥
विनिर्गतो भार्गववंशचन्द्रः
शुक्रत्वमापद्य महानुभावः ॥"
इति वामने ६६ अध्यायः ॥*॥
अयं श्यामवर्णाग्निकोणस्त्रीब्राह्मणजातियजुर्व्वेदरजोगुणाम्लरसहरागिरीरकरत्नभोजकटदेशानामधिपतिः। भृगुमुनिसन्तानः। नवाङ्गलशरीरः। पद्मस्थः। सूर्य्यमुखः। श्वेतवर्णः। चतुर्भुजः। सदाजपमालावरकमण्डलुदण्डधारी। शुक्लवस्त्रः। इन्द्रादिदेवताकः। अपोप्रत्यधिदेवताकः। शुभग्रहः। अपराह्णकाले प्रबलः। जलचारी। कफप्रकृतिः। रूप्यद्रव्यधान्यादिस्वामी। मध्यवयः। रतीश्वरः। जलभूमिचारी। स्निग्धरुचिः। द्विपदमनुष्याणां स्वामी च। इति बृहज्जातकमहयागतत्त्वादयः ॥ * ॥ तस्य भोग्यं दिनं शुक्रवारः। तत्र जातफलम्।
"प्रसन्नचित्तो मतिमान् गुणज्ञः
सुकेशवेशः सितवस्त्रमाल्यः।
बन्धुप्रियो भार्गववारजातः
शीघ्रप्रसादः कुशलो नरः स्यात् ॥"
तस्य चैवजातफलम्।
"शुक्रालये काव्यकलाविदग्धो
दातातिथेयः श्रुतशास्त्रदक्षः।
कलिप्रियो वातकफान्वितः स्या-
न्मेधान्वितो हास्यपटुर्मदाढ्यः ॥"
तस्य द्रेक्काणजातफलम्।
"द्रेक्काणे भृगुनन्दनस्य सुतनुः पात्रं धरित्रीपतेः
सर्व्वज्ञः खलनानुरागकुशलो दाता सतां वल्लभः
संपूर्णस्य वराङ्गनाजनधनैः स्फीतः क्षपालुः शुचिः
शान्तः सत्वरतोऽभियुक्तहृदयो धर्म्मानुरक्तो नरः ॥"

तस्य नवांशजातफलम्।
"नारीरक्तो ललितनयनो मञ्जुकेशः कृशाङ्गः
कम्बुग्रीवो भवति कनकश्यामवर्णः सुकेशः।
क्रूरः स्तेनः कविरतिधनो दानशीलो गुणज्ञो
ज्ञानस्मारो विमलयशसा मानवो भार्गवांशे॥"
तस्य द्वादशांशजातफलम्।
"शूरो बहुधनो भोगी नृत्यगीतप्रियः सदा।
अचिरात्ता क्षमी भोक्ता द्वादशांशे मृगोनरः॥"
तस्य त्रिंशांशजातफलम्।
"बहुगुणपरिपूर्णः सुन्दरस्वारुदृष्टि-
र्युवतिजनविनोदी लब्धमौख्यार्थभोगः।
द्विजसुरगुरुभक्तो दानशीलः कृपालु-
रसुरपतिगुरोः स्यान्मानवस्त्रिंशकांशे॥"
इति कोष्ठीप्रदीपः॥
विष्कुम्भादि-सप्तविंशति-योगान्तर्गत-चतुर्विंश-योगः। तत्र जातफलम्।
"ह्यो विवादे विजयी सभायां
महत्यमाल्याम्बररत्नयुक्तः।
जितेन्द्रियः स्यात्सुजनो महीजाः
शुक्राभिधाने जननं हि यस्य॥"
इति कोष्ठीप्रदीपः॥ * ॥
अग्निः। चित्रकवृक्षः। ज्येष्ठमासः। इत्यमरः।
शुक्रकरः, पुं, (करोतीति। कृ+पचाद्यच्। शुक्रस्य करः।) मज्जा। इति हेमचन्द्रः॥ वीर्य्यकारके, त्रि॥
शुक्रभुक्, [ज्] पुं, (शुक्रं भुङ्क्ते इति। भुज+क्विप्।) मयूरः। इति शब्दचन्द्रिका॥ रेतोभोजके, त्रि॥
शुक्रभूः, पुं, (शुक्रात् भूरुत्पत्तिर्यस्य।) मज्जा। इति शब्दचन्द्रिका॥ वीर्य्यजातमात्रे, त्रि॥
शुक्रला, स्त्री, (शुक्रं लाति ददातीति। दा+कः। उषटा। इति चक्रपाणिशब्दटीकायां भरतः॥ वीर्य्यदातरि, त्रि॥
शुक्रवारः, पुं, (शुक्रस्य वारः।) शुक्रग्रहभोग्यदिनम्। यथा। तौर्य्यतत्र प्रतिप्रसवमाह। स्मृतिः।
"अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च।
उपाकर्म्मणि चोत्सर्गे युगादौ मृतवासरे।
सूर्य्यशुक्रादिवारेऽपि न दोषस्तिलतर्पणे॥"
इति प्रायश्चित्ततत्त्वम्॥
शुक्रशिष्यः, पुं, (शुक्रस्य शिष्यः।) असुरः। इत्यमरः॥
शुक्राङ्गः, पुं, मयूरः। इति जटाधरः॥
शुक्रियः, त्रि, (शुक्रसम्बन्धी। शुक्रशब्दात् इयप्रत्ययः नित्यञ्च॥ (शुक्रो देवता अस्येति। शुक्र+"शुक्रात्। घन्।" ४। २। २६। इति घन्। शुक्रदेवताकोऽविरादिः। इति सिद्धान्तकौमुदी यथा, याज्ञवल्क्ये। ३। ३०८।
"शुक्रियारण्यकजपा गायत्र्याश्च विशेषतः॥")
शुक्लं, क्ली, (शुच शौचे+"ऋज्रेन्द्रेति।" उणा० २। २८। इति रन् प्रत्ययेण साधु।) रजतम्। इति मेदिनी॥ नवनीतम्। इति चन्द्रचन्द्रिका। अभिरोगविशेषः। इति जटाधरः॥ स तु चक्षुःशुक्लभागजरोगः। तल्लिङ्गं यथा,—
"प्रस्तारिशुक्लक्षतजाधिमांस-
साम्वर्म्मसंज्ञाः खलु पञ्च रोगाः॥"
तत्र शुक्लमाह।
"सुस्निग्धं मृदुशुक्लाभं शुक्लं तद्दर्शते चिरात्॥"
अस्य चिकित्सा।
"भुक्त्वा पाणितलं दृष्ट्वा चक्षुषोर्यदि दीयते।
अचिरेणैव तद्दारि तिमिराणि व्यपोहति॥
स्नानं क्षणतिलैर्व्वापि चक्षुष्यमनिलापहम्।
आमलैः सततं स्नानं परदृष्टिबलापहम्॥
शुण्ठीनिम्बदलैः पिण्डीसुखोष्णाम्बुस्नैन्धवा।
धार्य्या नेत्रेऽनिलघ्ने अगोधकरण्डव्यथाहरी।
त्रिफला पिण्डिका नेत्रे वातपित्तकफापहा॥"
अन्यदौषधं शुक्लिशुक्लशब्दयाद्रष्टव्यम्। काञ्जिकादि। यथा.—
"कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु।
कार्त्तिके वर्जयेत्कांस्यं कार्त्तिके शुक्लसन्धितम्॥"
इति श्रीगोपालभट्टविलिखिते भगवद्भक्तिविलासे १६ विलासः॥ शुक्लं काञ्जिकादिपर्य्युषिताम्लद्रव्यं मन्थितञ्च वर्जयेत्। इति श्रीजीवगोस्वामिकृततट्टीका दिग्दर्शनी॥
शुक्लः, पुं, (शुच+रन्। रस्य लः।) वर्णविशेषः सादा इति भाषा। तत्पर्य्यायः। शुभ्रः २ शुचिः३ श्वेतः ४ विशदः ५ श्वेतः ६ पाण्डरः ७ अवदातः ८ सितः ९ गौरः १० वलक्षः ११ धवलः १२ अर्জ্জुनः १३। इत्यमरः॥ श्वेता १४ श्वेता १५ श्वेनी १६ विषदः १७ मिता १८ अवलक्षः १९। इति तट्टीका॥ शितिः २० पाण्डुः २१। इति शब्दरत्नावली॥ रामः २२ खगः २३। इति जटाधरः॥ शुक्रयोगः। इति मेदिनी॥ श्वेतेरण्डः। इति राजनिर्घण्टः॥ शुक्लपक्षः। यथा षट्त्रिंशन्मतम्।
"तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि।
चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः॥"
इति तिथ्यादितत्त्वम्॥
शुक्लगुणयुक्ते, त्रि॥ * ॥ शुक्लवस्तूनि यथा—
"सुधांशूक्षैःश्रवाः शम्भुकीर्त्तिज्योत्स्नाशरज्जनाः।
प्रासादमोघतगरमन्दारद्रुहिमाद्रयः॥
सूर्य्येन्दुकान्तकर्पूरकरभा रजतं हली।
निर्मोकभस्महिण्डीरचन्दनं करका हिमम्॥
हारोर्णनाभतन्त्वस्थि स्वर्गङ्गेभरदाभ्रकम्।
शेषाहिः शर्करा दुग्धं दधि गङ्गा सुधा जलम्॥
मृणालसिकताहंसबककैरवचामरम्।
रत्नागर्भं पुण्डरीककेतकीशङ्खनिर्झराः॥
लाघ्रसिंहध्वजच्छत्रचूर्णशुक्तिकपर्दकाः।
मुक्ताकुसुमनक्षत्रदन्तपुष्पाग्नयोगुणाः॥
केलासकाशशर्कापासहासवामवकुञ्जराः।
नारदः पारदः कुन्दस्फटिकास्फटिकादयः॥"
इति श्वेतानि॥ * ॥
शुक्लकृष्णवाचकानि वस्तूनि यथा,—
"सितकृष्णौ विधुहरी शितिताराभ्रकनागराजघनसाराः।
रामपयोराज्यर्জ্জुनसिंहीजानन्तचन्द्रहासाद्याः॥"
विधुयन्द्रो विष्णुश्च। हरिः कृष्णः सिंहश्च। शितौ धवलमेघकौ। तारा नक्षत्रं भस्म। कनीनिका च। अभ्रकं निरिजं मेघश्च नागराजः शेषो गजश्च। घनसारः कर्पूरं मेघश्चेत्यपि। रामो बलभद्रो दाशरथिश्च। पयोराशिर्दुग्धसमूहः समुद्रश्च। अर्জ্জुनः शुभ्रः पार्थश्च। सिंहीजः सिंही राहुश्च। अनन्तो बलभद्रः कृष्णश्च। चन्द्रहासः चन्द्रहास्यं खड्गश्च।
"शुक्लकरतारकेशमटाकाशव्योमकेशतालाहाः।
नीलांशुकाधिकेशारिष्टमदासिचयकलकण्ठाः॥
शुक्लकरः कम्बुकान्तिः कृष्णश्च। तारकेशचन्द्रः उज्ज्वलबालश्च। सदाकाशः सर्व्वदाकाशः सदागगनञ्च। व्योमकेशः शिवो नभोवाली च। तालाङ्को बलभद्रस्तालकलङ्की च। नीलांशुको बलभद्रः कृष्णकान्तिश्च। अधिकेशो अधिकशिवो अधिकबालश्च। अरिष्टस्तक्रं काकश्च सदासिचयः सिचयो वस्त्रं असिचयः खड्गसमूहश्च। कलकण्ठो हंसः पिकश्च।
"कलकण्ठः पिके पारावते हंसे कलध्वनौ॥
हरिजिष्णुघनाब्धिभ्यो गजाः मिश्रमुगारितः।
अद्भ्यो वाहोऽन्यानि कृष्णाद्यमुना कृष्णतो द्विषः॥"
शुक्लश्यामाभिधायका भवन्तीति सम्बन्धः हरिगज ऐरावतः। एवं जिष्णुगजः। अब्धिगजः। घनगजः। पक्षे हरिर्विष्णुर्गजो हस्ती। एवं सर्व्वत्र। गजा इति बहुवचननिर्देशात् गजपर्य्यायो गृह्यते। मुरारिमिश्रमुर्गङ्गा कृष्णसमुद्रौ च। अम्बुवाहः उच्चैःश्रवाः मेघश्च। कृष्णाङ्गं नाभीपुण्डरीकं नीलाब्जञ्च। यमुनारिर्बलभद्रो यमुनाद्वेषी च।
"कृष्णार्थाग्यात्तटिनीवाचकशब्दात् परो वरो योज्यः।
नीरदघनोपलसितसदाहिमकर-सिन्धुवेणिपृथुलाजाभाः॥"
सितश्यामवाचका इति पूर्व्ववत्। कृष्णार्थाग्यात्तटिनीवाचकशब्दाहरो यथा। कृष्णनदीवरकान्तिः गङ्गाश्रेष्ठकान्तिः। पक्षे कृष्णनदीवरस्य समुद्रस्येव कान्तिः। नीरदो निश्चितो दन्तो मेघश्च। घनोपलसितः घनोपलः करका तद्वत् सितः घनो मेघः तद्वदुपलसितः कान्तः। सदाहिमकरः चन्द्रः सर्पमकरौ च। सिन्धुवेणिर्नदीप्रवाहः समुद्रकेशविन्यासौ च। पृथुलाजाभः महती भ्रष्टधान्यस्येवाभा यस्य कृष्णस्येव च। तथा च।
"धवलकलभवच्छायमन्धकारातिदीधितिः।
सदाधिकेशवच्छायो नेकपीयूषसच्छविः॥

वपुर्महोदधिच्छायं बिभ्रत् सेन्यवकान्तिमान्।
स्फाटिकी च लसल्लक्ष्मीः पट्टांशुककटिं वहन्॥
धौताम्बरश्रियं धत्ते स्फटिकान्तश्रियान्वितः।
अर्जुनद्युतिविद्योतीत्येवमादि ममुन्नयेत्॥*"॥
रक्तश्वेतवाचकानि वस्तूनि यथा,—
"रक्तश्वेतौ हरिशुचिपुष्करशतपत्रसूर्य्य-
कान्ताक्षाः।
नवहंसमहापद्मार्ककुमोदराः कमलकोकाले॥"
हरियन्द्रसूर्य्ययोः। शुचिः श्वेतवैश्वानरयोः।
पुष्करं जलपद्मयोः। शतपत्रं हंसपद्मयोः।
सूर्य्यकान्तः स्फटिके सूर्य्यकान्ते च। अक्षः
शङ्खाम्बुजयोः। नवहंसः नवहंसे प्रत्यग्रसूर्य्ये च।
महापद्मः श्वेतनागे पद्मे च। अर्कः स्फटिक-
सूर्य्ययोः। कमलं जलाम्बुजयोः। कोकालं
जलरक्तयोः।
"सुहृद्रत्नादिभिर्भानो रत्नेनाग्ने रदांशुकैः।
जलेभ्यो जन्मशोभाभिः सरोजकुमुदादिभिः॥"
भानोः परस्मात् सुहृद्रत्नादिभिः सितरक्तौ
यथा। रविमित्रं चन्द्रः रवितुल्यश्च। भानुरत्नं
सूर्य्यकान्तो रविपद्मरागौ च। अग्निरत्नं सूर्य्य-
कान्तो अग्निपद्मरागौ च। रदांशुकं दन्तवस्त्रे
अधरश्च जलशोभा जलजा चासौ शोभा
चेति पक्षे पद्मकान्तिः। एवं सरोजादिशोभा
सरोजस्यर्द्धिशोभा पक्षे सरोजादिरिन्द्रः। कुमु-
दादिशोभा कुमुदस्यर्द्धिशोभा। पक्षे कुमुदादि-
रादित्यः॥*॥ पीतश्वेतवाचकानि वस्तूनि
यथा,—
"पीतश्वेतौ गौरद्विजराजकपर्दशम्भुहरि-
तार्क्ष्याः।
हैमस्तोमाष्टापदमहारजतचन्द्रकलधौताः॥"
गौरः श्वेतपीतयोः। द्विजराजो गुरुचन्द्रयोः।
कपर्दः शम्भुजटाजूटवराटयोः। शम्भुर्ब्रह्म-
विलोचनयोः। हरिः पिङ्गलसिंहयोः। तार्क्ष्यो
गरुड़ः पक्षे उच्चैःश्रवाः। हैमस्तोमः हेम्नोऽयं
हैमः। पक्षे हिमस्यायम्। अष्टापदं सुवर्ण-
सरभयोः। महारजतं सुवर्णरूप्ययोः। चन्द्रः
स्वर्णशशाङ्कयोः। कलधौतं हेमरूप्ययोः।
"सुशोभितारकूटश्रीः स्वर्णस्तोमसमद्युतिः।
दहनोपलसत्कान्तिर्गाङ्गेयच्छविपेशलः॥"
तारकूटो रूप्यसमूहः। पक्षे आरकूटो रीतिः।
सुशोभनमर्णः कनकञ्च॥*॥ अथ श्लोकोत्तीर्णानि। गोपतितार्क्ष्यकान्तिः रविगरुड़च्छविः।
पक्षे गोपतिरिन्द्रस्तस्य तार्क्ष्यसुरङ्गः। वाम-
देवगिरिर्मनोऽग्रमेरुः कैलासश्च। इति कवि-
कल्पलतायाम् २ श्वेते उद्दिष्टवर्णनं १ कुसुमम्॥

शुक्लकः, पुं, (शुक्ल+स्वार्थे कन्।) शुक्लपक्षः।
यथा,—
"पञ्चत्याद्यास्तु तिथयः क्रमात् पञ्चदश
स्मृताः।
दर्शान्ताः कृष्णपक्षे ताः पूर्णिमान्ताश्च शुक्लके॥"
इति तिथ्यादितत्त्वम्॥

श्वेतवर्णश्च॥

शुक्लकण्ठकः, पुं, (शुक्लः कण्ठो यस्य। कन्।)
दात्यूहपक्षी। इति शब्दमाला॥ श्वेतगलयुक्ते
त्रि,॥
शुक्लकन्दः, पुं, (शुक्लः कन्दो यस्य।)महिषकन्दः।
इति राजनिर्घण्टः॥ श्वेतमूलश्च॥
शुक्लकन्दा, स्त्री, (शुक्लः कन्दो यस्याः।) अति-
विषा॥ इति राजनिर्घण्टः॥
शुक्लकर्म्मा, [न्] त्रि, (शुक्लं पूतं कर्म्म यस्य।)
शुक्लकर्म्मा। सुकर्म्मशीलः। इति जटाधरः॥
शुक्लकुष्ठं, क्ली, (शुक्लं कुष्ठम्।) श्वेतवर्णकुष्ठ-
रोगः॥ तस्यौषधं यथा,—
"सोमराजस्य बीजानि नवनीतयुतानि च।
मधुना खादितानि स्युः शुक्लकुष्ठहराणि वै॥"
इति गारुड़े १८५ अध्यायः॥
शुक्लक्षीरा, स्त्री, (शुक्लं क्षीरं यस्याः।)कालोली।
इति राजनिर्घण्टः॥ श्वेतदुग्धयुक्ते, त्रि॥
शुक्लत्वं, क्ली, (शुक्लस्य भावः। शुक्ल+त्व।)
शुक्लस्य भाव इत्यर्थे त्वप्रत्ययेन निष्पन्नम्॥
शुक्लदुग्धः, पुं, (शुक्लं दुग्धं निर्य्यासो यस्य।)
शृङ्गाटकः। इति शब्दचन्द्रिका॥ श्वेतदुग्ध-
युक्ते, त्रि॥
शुक्लधातुः, पुं, (शुक्लः शुक्लवर्णो धातुः।)कठिनी।
इति हेमचन्द्रः॥ श्वेतवर्णधातुद्रव्यञ्च॥
शुक्लपक्षः, पुं, (शुक्लः पक्षः।) सितपक्षः। चन्द्र-
सम्बन्धि-हृद्यानुकूल-पञ्चदशकलाक्रिया-प्रचयः।
तत्पर्य्यायः।
"सितत्वापूर्य्यमाणः स्यात् शुक्लश्च विशदः शुचि
शुक्लपक्षः कृष्णपक्षो बहुलो वदि च स्मृतः॥"
इति राजनिर्घण्टः॥
स तु शुक्लप्रतिपदादिपौर्णमास्यन्तपञ्चदश-
तिथ्यात्मकः। यथा,—
"तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि।
चन्द्रहृद्दिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः॥"
इति तिथ्यादितत्वम्॥*॥
कर्म्मविशेषे तच्चोदयगामितिथेर्ग्राह्यत्वं यथा,—
"शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः॥"
इति विष्णुधर्म्मोत्तरम्॥
संस्कारकर्म्मणः शुक्लपक्षकर्त्तव्यता यथा।
आश्वलायनः। उदगयने आपूर्य्यमाणे पक्षे
कल्याणे नक्षत्रे चौड़कर्म्मोपनयनगोदान-
विवाहाः। विवाहः सार्व्वकालिक इत्येके॥*॥
विद्यारम्भस्य शुक्लपक्षकर्त्तव्यता यथा। मदन-
पारिजाते।
"रवेर्गुरोर्शुगौर्लग्ने तत्खेऽर्केऽपीन्दुदर्शिते।
गुर्व्वर्केन्दूड्डुशुद्धौ च विद्यारम्भः प्रशस्यते॥"*॥
पुष्करिण्यारम्भस्य शुक्लपक्षकर्त्तव्यता यथा।
मत्स्यपुराणे।
"प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे॥"
इत्यादि॥
देवप्रतिष्ठायाः शुक्लपक्षकर्त्तव्यता यथा। व्यव-
हारसमुच्चये।
"प्रतिष्ठा सर्व्वदेवानां केशवस्य विशेषतः।
उत्तरायण आपन्ने शुक्लपक्षे शुभे दिने॥"
गृहारम्भगृहप्रवेशयोः शुक्लपक्षकर्त्तव्यता यथा।
मत्स्यपुराणे।
"शुक्लपक्षे भवेत् सौख्यं कृष्णे तस्करतो भयम्॥"
इति ज्योतिस्तत्त्वम्॥
नवान्नग्राहस्य शुक्लपक्षकर्त्तव्यता यथा।
आश्विनाधिकारे।
"शुक्लपक्षे नवं धान्यं पर्व्व ज्ञात्वा सुशोभनम्।
गच्छेत् चैत्री विधानेन गीतवाद्यपुरःसरम्।
तेन देवान् पितॄंश्चैव तर्पयेदर्च्चयेत्तथा॥"
अपि च।
"हस्थिके शुक्लपक्षे तु नवान्नं श्रस्यते बुधैः॥"
इति तिथ्यादितत्त्वम्॥
शुक्लपुष्पः, पुं, (शुक्लं पुष्पमस्य।) कुन्दवृक्षः।
कुन्दपुष्पवृक्षः। मरुवकः। इति रत्नमाला॥
श्वेतकुसुमयुक्ते, त्रि॥
शुक्लपुष्पा, स्त्री, (शुक्लं पुष्पमस्याः।) नागदन्ती।
श्वेतकुम्भी। इति रत्नमाला॥
शुक्लपुष्पी, स्त्री, (शुक्लं पुष्पमस्याः। ङीष्।)
नागदन्ती। इति राजनिर्घण्टः॥
शुक्लपृष्ठकः, पुं, (शुक्लं पृष्ठं यस्य। कन्।) सिन्धुक-
वृक्षः। इति शब्दचन्द्रिका॥ श्वेतवर्णपृष्ठयुक्ते,
त्रि॥
शुक्लबलः, पुं, जिनविशेषः। यथा,—
"वासुदेवा अमी कृष्णा नव शुक्ला बलास्त्वमी।
अचलो विजलो भद्रः सुप्रभश्च सुदर्शनः।
आनन्दो नन्दनः पद्मो रामो रिष्णुश्चिमस्त्व मी॥"
इति हेमचन्द्रः॥
शुक्लमण्डलं, क्ली, (शुक्लं मण्डलम्।) चक्षुःश्वेत-
क्षेत्रम्। इति केचित्॥ श्वेतवर्णगोलवस्तु च॥
शुक्लरोहितः, पुं, (शुक्लः श्वेतवर्णो रोहितः।)
श्वेतरोहितवृक्षः। इति राजनिर्घण्टः॥ शुभ्र-
रोहितमत्स्यश्च॥
शुक्लला, स्त्री, (शुक्लं लातीति। ला+कः।)
उच्चटा। इति रत्नमाला॥ श्वेतदातरि,
त्रि॥
शुक्लवर्गः, पुं, (शुक्लानां वर्गः समूहः।) श्वेतवर्ण-
सजातीयद्रव्यम्। तथा। शङ्खशुक्तिकपर्दादि।
इति राजनिर्घण्टः॥
शुक्लवायसः, पुं, (शुक्लो वायस इव।) बकः।
इति त्रिकाण्डशेषः॥ श्वेतकाकश्च॥
शुक्लशालः, पुं, (शुक्लः शाल इव।) गिरिनिम्बः।
इति राजनिर्घण्टः॥ श्वेतशालवृक्षश्च॥
शुक्ला, स्त्री, (शुक्लो वर्णोऽस्त्यस्या इति। अच्।
टाप्।) सरस्वती। इति त्रिकाण्डशेषः॥
शर्करा। इति शब्दचन्द्रिका॥ काकोली।
विदारी। सुरा। इति राजनिर्घण्टः॥ श्वेत-
वर्णा च॥
शुक्लाङ्गी, स्त्री, (शुक्लं अङ्गं यस्याः। ङीष्।)
श्वेतकालिका। इति राजनिर्घण्टः॥ श्वेतावयव-
युक्ते, त्रि॥

शुक्लापाङ्गः, पुं, (शुक्लो अपाङ्गो यस्य ।)मयूरः। इति हेमचन्द्रः ॥ श्वेतवर्णनेत्रान्ते, त्रि ॥ (यथा, मेघदूते ।२३ ।
"शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्")
शुक्लाम्लं, क्ली, (शुक्लं अम्लम् ।)अम्लशाकः। इति राजनिर्घण्टः ॥
शुक्लार्म्म, [न्] क्ली, नेत्ररोगभेदः । यथा, । अथ शुक्लभागजा रोगाः । तेषां नामानि संख्यामाह ।
"प्रस्तारिशुक्लार्जुनजाधिमांस-
स्नायुर्म्मसंज्ञाः खलु पञ्च रोगाः ।
स्याच्छुक्तिका सार्ज्जुनपिष्टकाख्या
जालं शिराणां पिडिकाश्च तासाम् ॥
रोगा बलासग्रथितेन सार्द्ध-
मेकादशोक्ताः खलु शुक्लभागे ॥"
तेषु प्रस्तार्य्यर्म्मणो लक्षणमाह ।
"प्रस्तार्य्यर्म्म तनुस्तीर्णं श्यावरक्तनिभं सितम् ।"
तनुः पुत्तली । स्तीर्णं विस्तीर्णम् । श्यावरक्तमित्यत्र विकल्पो बोद्धव्यः ॥*॥ शुक्लार्म्माह ।
"सुश्वेतं मृदु शुक्लार्म्म शुक्लं तद्वर्द्धते चिरात् ॥"
रक्तार्म्माह ।
"पद्माभं मृदुरक्तार्म्म यन्मांसं चीयते सिते ।"
पद्माभं पद्मेन रक्तमित्यर्थः । चीयते उपचीयते ॥ अधिमांसार्म्माह ।
"पृथु मृदधिमांसार्म्म बहुलञ्च यकृन्निभम् ।"
पृथु विस्तीर्णम् । बहुलं पुष्टम् । यकृन्निभं ईषत् कृष्णलोहितम् ॥ * ॥ स्नायुर्म्माह ।
"स्थिरं प्रसारि मांसाद्यं शुक्लं स्नायुर्म्म पञ्चमम् ।"
स्थिरं कठिनम् । शुक्लं स्नावरहितम् ॥ * ॥ शुक्तिमाह ।
"श्यावाः स्युः पिञ्जितनिभाश्च बिन्दवो यं
शुक्लाभाः सितनिचिताः स शुक्तिसंज्ञः ।"
श्यावा इत्यादिवर्णत्रये विकल्पो बोद्धव्यः ॥*॥ अर्ज्जुनमाह ।
"एको यः शस्यरुधिरप्रभस्तु बिन्दुः
शुक्लस्थो भवति तमर्ज्जुनं वदन्ति ॥"
पिष्टकमाह ।
"श्लेष्मारुतकोपेन शुक्ले मांसं समुन्नतम् ।
पिष्टवत् पिष्टकं विद्धि मलाक्तादग्रसन्निभम् ॥"
पिष्टवत् श्वेतम् ॥ * ॥ शिराजालमाह ।
"जालाभः कठिनः शिरोऽरुणः शिराणां सन्तानो भवति शिरादिजालसंज्ञः ॥"
शिरादिजालसंज्ञः शिराजालसंज्ञः ॥ * ॥
शिरापिड़िकामाह ।
"शुक्लस्थाः सितपिडिकाः शिराहता या-
स्ता विद्यादसितसमोपमाः शिराजाः ।"
बलासग्रथितमाह ।
"कांस्याभोऽमृदुरथ वारिबिन्दुकल्पो
विच्छेद्यो नयनसिते बलाससंज्ञः ।"
कांस्याभः श्वेत इत्यर्थः । अमृदुः कठिनः । वारिबिन्दुकल्पः एतेन मनागुन्नतत्वं बोध्यते । बलाससंज्ञः बलासग्रथितसंज्ञः । क्वचिदेकदेशेनापि समुदायावगमात् । यथा भीमो भीमसेन इति । अतएव सुश्रुते । नाममंग्रहे बलासग्रथितपदं निर्दिष्टम् । इति भावप्रकाशः ॥
शुक्लिमा, [न्] पुं, (शुक्लस्य भावः । शुक्ल+"वर्णदृढादिभ्यः ष्यञ् च ।"५।१।१२३। इमनिच् ।) शुक्लता । शुक्लशब्दादिमन्प्रत्ययेन निष्पन्नः ॥
शुक्लोपला, स्त्री, (शुक्ल उपल इव आकृतिर्यस्याः।) शर्करा । इति रत्नमाला ॥ श्वेतप्रस्तरे, पुं ॥
शुचिः, पुं, (शुचत्यनेनेति । शुच+"भ्रुवि कुचि-शुचिभ्यः क्विः।" उणा० ३।१५५। इति क्विः ।) वायुः । तेजः । चित्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥
शुङ्गः, पुं, वटवृक्षः । आम्रातकवृक्षः । इति मेदिनी ॥ शुकः । शूँया इति भाषा । इति शुकशब्दार्थे मेदिन्युणादिकोषौ ॥
शुङ्गा, स्त्री, (शुङ्गोऽस्त्यस्या इति । अच् । टाप् ।) पर्कटीवृक्षः । इति मेदिनी ॥ नवपल्लवकोशी । इति हेमचन्द्रः ॥ धान्यादिशूकञ्च शुँया यस्य प्रसिद्धिः ॥ (यथा, सुश्रुते ।४।२६।
"अश्वत्थफलमूलत्वक्शुङ्गासिद्धं पयो नरः ।
पीत्वा सशर्करा चौद्रं कुलिङ्ग इव हृष्यति ॥")
शुङ्गाकर्म्म, [न्] क्ली, पुंसवनसंस्कारविशेषः। यथा
"अग्निस्तु मारुतो नाम गर्भाधाने विधीयते ।
पुंसवने चन्द्रनामा शुङ्गाकर्म्मणि शोभनः ॥"
इति तिथ्यादितत्त्वम् ॥
तत्कर्म्मानुष्ठानं यथा । शोभननामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य वटवृक्षस्य पूर्व्वोत्तरशाखायां फलयुगलशालिनीं कृमिभिरनुपहतां वटशुङ्गां यवानां माषाणां वा त्रिभिस्त्रिभिर्मुड़कैः सप्तवारान् सप्तभिर्मन्त्रैः क्षौणीयात्। सप्तीनां मन्त्राणामृष्यादयः साधारणाः । प्रजापतिर्ऋषिः सोमवरुणवसुरुद्रादित्यमरुद्विश्वे देवा देवता न्यग्रोधशुङ्गापरिक्रयणे विनियोगः । ॐ यद्यसि सौमी सोमाय त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण एकं परिक्रयणम् ॥ यद्यसि वारुणी वरुणाय त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण द्वितीयं परिक्रयणम्॥ यद्यसि वसुभ्यो वसुभ्यस्त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण तृतीयं परिक्रयणम् ॥ यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण चतुर्थं परिक्रयणम् ॥ यद्यसि आदित्येभ्यः आदित्येभ्यस्त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण पञ्चमं परिक्रयणम्॥ यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण षष्ठं परिक्रयणम्॥ यद्यसि विश्वेभ्यो देवेभ्यो विश्वेभ्यो देवेभ्यस्त्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण सप्तमं परिक्रयणम् ॥ ततः क्रीतां वटशुङ्गां अनेन मन्त्रेण हृच्चादानयेत् । प्रजापतिर्ऋषिरोसध्यो देवता न्यग्रोधशुङ्गाच्छेदने विनियोगः । ओषधयः सुमनसो भूत्वा अस्या वीर्य्यं समाधत्त इयं कर्म्म करिष्यति । ततस्तां वटशुङ्गां लक्षणवेष्टितामन्तरीक्षेणानीय अन्तरीक्षे स्थापयेत्। ततः कृतशोभननाम्नो अग्नेरुत्तरतः प्रज्वालितग्निलायां ब्रह्मचारी कुमारी भगवती वा श्रुतस्वाध्यायशीलो वा ब्राह्मणः आचारतो नीहारजलेनानाहृतलोष्टेन पुनः पुनः पेषयेत्। ततोऽग्नेः पश्चिमतः उत्तराग्रेषु कुशेषु पश्चिमाभिमुखीं बधूं पूर्व्वदिगानतमस्तकां कृत्वा पृष्ठदेशे स्थितः पतिर्दक्षिणपाणेरङ्गुष्ठानामिकाभ्यां वस्त्रबद्धां पेषितवटशुङ्गां गृहीत्वा गर्भवत्या दक्षिणनासाविवरे शुङ्गारसं निक्षिपति अनेन मन्त्रेण । प्रजापतिर्ऋषिरनुष्टुपछन्दोऽग्नीन्द्रबृहस्पतयो देवता न्यग्रोधशुङ्गारसस्य दाने विनियोगः ।
पुमानग्निः पुमानिन्द्रः पुमान् देवो बृहस्पतिः।
पुमांसं पुत्रं विन्दस्व तं पुमाननुजायताम् ॥
ततो महाव्याहृतिहोमं कृत्वा प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीच्यं शाण्डायनहोमादिवामदेव्यगानान्तं कर्म्म समाप्य कर्म्मकारयितब्राह्मणाय दक्षिणां दद्यात् । इति भवदेवः ॥
शुङ्गी, [न्] पुं, (शुङ्गा अस्त्यस्येति । शुङ्गा+इनिः ।) ब्रह्मवृक्षः । वटवृक्षः । इति जटाधरः ॥ शुङ्गाविशिष्टे, त्रि ॥
शुचः, शोके । इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट् ।) तालव्यादिः । शोचति । शोकः पुत्रादेरदर्शनादृदुःखानुभवः । किं शोचतेहाभ्यूदये वतास्मानिति भट्टिः । प्रियतमा मां शोचते शोचते । इति महानाटकम् । गणकृतानित्यत्वादात्मनेपदम् । इति दुर्गादासः ॥
शुच,इर्, य ञ ई शौचे । विशरणे । क्लेदे । इति कविकल्पद्रुमः ॥ (दिवा०-उभ० क्लेदे शौचे च अक०-अन्यत्र सक०-सेट् । निष्ठायां अनिट् ।) शौचं शुद्धिः । विशरणं विभेदः । क्लेदः आर्द्रभावः । इर् अशुचत् अशोचीत् । य ञ, शुच्यते लोकः स्नानात् । शुच्यति गात्रं बाधः। शुच्यति वस्त्रमम्भसा । ई, शुक्लः । शुचि र पूतीभावे इति प्राचः । रमानाथस्तु एतदनुरोधादेतानर्थान् व्याख्याति । इति दुर्गादासः ॥
शुचा, स्त्री, (शुच शोके+क्विप् । पचे टाप् ।) शोकः । इति शब्दरत्नावली ॥
शुचिः, पुं, (शुच्यति अनेनेति । शुच+"इगुपधात् कित्।" उणा० ४।११८। इति इन् । स च कित् ।) अग्निः । (यथा, भागवते । ४।२४।४
"पावकः पवमानश्च शुचिरित्यग्नयः पुरा ।
वसिष्ठशापादुत्पन्ना पुनर्योगगतिं गताः ॥")
चित्रकवृक्षः । आषाढ़मासः । शुक्लवर्णः । शृङ्गाररसः । इत्यमरः ॥ शौभः । शुक्रमन्त्री । ज्येष्ठमासः । इति मेदिनी ॥ सौराग्निः । यथा
"पावकः पवमानश्च शुचिरग्निश्च ते त्रयः ।
निर्म्मथ्यः पवमानः स्यात् वैद्युतः पावकः स्मृतः॥

यश्चासौ तपते सूर्य्यः शुचिरग्निस्त्वसौ स्मृतः ।
तेषान्तु सन्ततावन्ये चत्वारिंशत्तु पञ्च च ॥
पावकः पवमानश्च शुचिस्तेषां पिता च यः ।
एते चैकोनपञ्चाशद्वह्नयः परिकीर्त्तिताः ॥"
इति कौर्म्मे १२ अध्यायः ॥

सूर्य्यः । यथा,—
"तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥"
इति शाम्बपुराणम् ॥
चन्द्रः । शुक्रः । ब्राह्मणः । इति केचित् ॥ (अन्धकस्य पुत्रविशेषः । यथा, भागवते । ९ । २४ । १८ ।
"कुकुरो भजमानश्च शुचिः कम्बलबर्हिषः ॥"
कार्त्तिकेयः । इति महाभारतम् । ३।२३१।४॥)

शुचिः, स्त्री, (शुच + इन् ।) कश्यपपत्नीगास्ताम्नायाः सुता । यथा,—
"षट् सुताश्च महासत्त्वास्ताम्नायाः परिकीर्त्तिताः ।
शुकी श्येनी च भासा च सुग्रीवी शुचिगृध्रिका ॥"
इति गारुडे ६ अध्यायः ॥

शुचिः, त्रि, (शुच + इन् ।) शुक्लगुणविशिष्टः । इत्यमरः ॥ शुद्धः । (यथा, महाभारते । १ । १२८ । ४८ ।
"क्रीड़ावसाने ते सर्व्वे शुचिवस्त्राः स्वलङ्कृताः ॥")
अनुपहतः । इति मेदिनी ॥ * ॥ परस्वर्णस्पर्शे हस्तचालनात् शुचिर्यथा,—
"देवात् परस्त्रियं दृष्ट्वा विरमेद् यो हरिं स्मरन् ।
स्पृष्ट्वा परसुवर्णञ्च हस्तप्रक्षालनात् शुचिः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३५ अध्यायः ॥
(निरपराधी । यथा, महाभारते । ११।१४८।१४।
"अहो धिक् धृतराष्ट्रस्य बुद्धिर्नास्ति समञ्जसी
यः शुचीन् पाण्डुदायादान् दाहयामास शत्रुवत् ॥"
शुद्धान्तःकरणः । यथा, मनुः । ७ । ३८ ।
"वेदांश्च नित्यं सेवेत विप्रान् वेदविदो शुचीन्
वेदसेवी हि सततं ऋचोभिरपि पूज्यते ॥")

शुचिता, स्त्री, (शुचेर्भावः । शुचि + तल् ।) शुचित्वम् । यथा,—
"शैत्यं नाम गुणस्तवैव सहजः स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवन्ति शुचयः सर्व्वेण यस्यापरे ।
किन्वान्यत् कथयामि ते स्तुतिपदं त्वं जीवितं जीवनं
त्वय्येवौषधयेन यास्यसि पयः कस्त्वां निषेद्धुं क्षमः ॥"
इति लक्ष्मणसेनः ॥

शुचिद्रुमः, पुं, (शुचिः पवित्रो द्रुमः ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥ शुद्धवृक्षश्च ॥

शुचिप्रणी, पुं, (शुचिं प्रणयतीति । प्र + नी + क्विप् ।) आचमनम् । यथा,—
"आचामः स्यादाचमनमुपस्पर्शः शुचिप्रणीः ।"
इति शब्दरत्नावली ॥

शुचिमल्लिका, स्त्री, (शुचिर्मल्लिका ।) नवमालिका । इति राजनिर्घण्टः ॥

शुचिरोचिः, [स्] पुं, (शुचिः शुक्लं रोचिः किरणो यस्य ।) चन्द्रः । इति केचित् ॥ शुक्लकिरणे, त्रि ॥

शुच्य, ई अभिषवे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सक० च-सेट् । निष्ठायामनिट् ।) तालव्यादिः । पञ्चमस्वरी । तालव्यवर्गाद्योपधः । ई, शुक्तः । यद्वा, यान्तोऽयमित्यके । अभिषवः स्नानं मन्थनं पीड़नं सन्धानञ्च । इति दुर्गादासः ॥

शुटीरता, स्त्री, वीर्य्यम् । इति त्रिकाण्डशेषः ॥

शुटीर्य्यं, क्ली, वीर्य्यम् । इति शब्दरत्नावली ॥

शुट, क्षोटने । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-अक०-सेट् ।)क्षोटनमिह गत्याघातः । शोटति पयः सेतुना । इति दुर्गादासः ॥

शुठ, इ क्षोटने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) क्षोटनमिह गत्याघातः । इ, शुण्ठति । इति दुर्गादासः ॥

शुठ, इ कि शोषणे । इति कविकल्पद्रुमः । (चुरा०पक्षे भ्वा०-अक०-सेट् ।) इ, शुण्ठयति । कि, शुण्ठयति शुण्ठति पक्षमातपात् । रमानाथस्तु भ्वादिपक्षे शुष्कीभावे । चुरादिपक्षे शुष्कीकरणेऽयमिति मत्वा स्वादौ शुण्ठति पक्षं चुरादौ शुण्ठयति काष्ठमातप इत्युदाहृतवान् । वस्तुतस्तु उभयत्र शुष्कीभावः अन्यथा भौवादिकस्यैव प्रेरणवाचित्वाच्चुरादिपाठोऽनर्थकः स्यात् । इति दुर्गादासः ॥

शुठ, क आलस्ये । इति कविकल्पद्रुमः ॥ चुरा०पर०-अक०-सेट् ।) क, शोठयति हृदः क्रियासु मन्दः स्यादित्यर्थः । इति दुर्गादासः ॥

शुण्ठिः, स्त्री, शुठि शोषणे + क्विन् ।) शुण्ठी । इत्यमरटीकायां भरतः ॥(यथा, आर्य्यासप्तशत्याम् ।२७१
"तस्मिन् गतार्द्रभावे वीतरसे शुण्ठिशकल इव पुरुषे ।
अपि भूतिभाजि मलिने नागरशब्दो विड़म्बाय ॥")

शुण्ठी,स्त्री, (शुण्ठि + वा ङीप् ।) शुष्कार्द्रकम् । शुंट इति भाषा ॥ तत्पर्य्यायः । महौषधम् २ विश्वम् ३ नागरम् ४ विश्वभेषजम् ५ । इत्यमरः ॥ शुण्ठिः ६ विश्वा ७ महौषधी ८ । इति तट्टीका ॥ इन्द्रभेषजम् ९ भेषजम् १० । इति शब्दरत्नावली ॥ विश्वौषधम् ११ कटुयन्त्रिः १२ कटुभद्रम् १३ कटूष्णम् १४ सौषण्यम् १५ शृङ्गवेरम् १६ कफारि १७ चान्द्रकम् १८ शोषणम् १९ नागराह्वम् २० । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । स्निग्धत्वम् । कफशोकानिलशूलबन्धोदराधानश्वासश्लीपदनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च ।
"शुण्ठी रुच्यामवातघ्नी प्राचनी कटुका लघुः ।
स्निग्धोष्णा मधुरा पाके कफवातविबन्धनुत् ॥
हृद्या स्वर्य्या च निःश्वासशूलकासहृदामयान् ।
हन्ति श्लीपदशोथार्श-आनाहोदरमारुतान् ॥
आग्नेयगुणभूष्टिं तोयांशं परिशोषयेत् ।
संगृह्णन्ति मलं तत्तु ग्राहि शुण्ठ्यादयो यथा ॥
विबन्धभेदिनी या तु सा कथं ग्राहिणी भवेत् ।
शक्तिर्विबन्धभेदे स्यादृतो न मलपातने ॥"
इति भावप्रकाशः ॥

अन्यच्च ।
"शुण्ठी तु कफवातघ्नी सक्षेहा लघुदीपनी ।
विपाके मधुरा हृद्या रूक्षोष्णा कटुरोचनी ॥"
इति राजवल्लभः ॥

शुण्ठ्यं, क्ली, शुण्ठी । इति शब्दचन्द्रिका ॥

शुण्डः, पुं, (शुन गतौ + अमन्तात् डः ।) मदनिर्झरः । इति हेमचन्द्रः ॥ करिकरश्च ॥(यथा, महाभारते । ७ । ३५ । ३५ ।
"घण्टाशुण्डान् विषाणाग्रान् क्षुरमास्यपदानुगान् ।
शरैर्निशितधाराग्रैः शात्रवाणामशातयत् ॥")

शुण्डकः, पुं, शौण्डिकः । इति शब्दरत्नावली । युद्धवेणुः । इति शब्दमाला ॥

शुण्डरोहः, पुं, (शुण्डवत् रोहतीति । रुह + अच् ।) भूतृणम् । इति राजनिर्घण्टः ॥ पुस्तकान्तरे शृङ्गरोह इति पाठः ॥

शुण्डा,स्त्री, (शुन् + ड । टाप् ।) मद्यपानगृहम् । अभ्रहस्तिनी । वेश्या । सुरा । हस्तिहस्तः । इति मेदिनी ॥ शुंड् इति भाषा ॥ नलिनी ॥ इति विश्वः ॥ कुट्टनी । इति शब्दमाला ॥

शुण्डापानं, क्ली, (शुण्डाया आपानम् ।) मद्यपानगृहम् । तत्पर्य्यायः । मदस्थानम् । इत्यमरः ॥ मदस्थलम् । इति शब्दरत्नावली ॥

शुण्डारः, पुं, (शुण्डां राती ति । रा + कः ।) शौण्डिकः । इति शब्दरत्नावली ॥ (रूक्षा शुण्डा । "कुटीशमीशुण्डाभ्यो रः ।" ५ । ३ । ८८ । इति रः । स्वल्पशुण्डा । इति सिद्धान्तकौमुदी ॥)

शुण्डालः, पं,(शुण्डेन शलतीति । शल पर्य्याप्तौ + अच् ।) हस्ती । इति धनञ्जयः ॥

शुण्डिका, स्त्री, अलिजिह्वा । इति केचित् ॥ शुण्डाशब्दार्थाप्येषा ॥

शुण्डिमूषिका, स्त्री, (शुण्डिनी शुण्डविशिष्टा मूषिका ।) कुच्छुन्दरी । इति राजनिर्घण्टः ॥

शुण्डी,[न्] पुं,(शुण्डा अस्त्यस्येति । शुण्डा + इनिः ।) शौण्डिकः । इति शब्दरत्नावली ॥ हस्ती च ॥

शुण्डी, स्त्री, हस्तिशुण्डीवृक्षः । इति राजनिर्घण्टः ॥

शुतुद्रिः,स्त्री,शतद्रुनदी । इत्यमरटीकायां भरतः ॥

शुतुद्रुः, स्त्री, शतद्रुनदी । इति भरतधृतकोषः ॥

शुद्ध, क्ली, (शुध + क्तः ।) सैन्धवम् । मरिचम् । इति राजनिर्घण्टः ॥ मरिचपर्य्याये सर्षं यद्विखितं तदशुद्धम् ॥

शुद्धः, त्रि, (शुध + क्तः।) केवलम्। (यथा, मनुः। ८। २७८।
"तं ङागमेदकं हन्यादप्सु शुद्धवधेन वा।
तद्धापि प्रतिसंकुर्य्यात् दाप्यस्तूत्तमसाहसम्॥")
निर्दोषः। (यथा, हरिवंशितायाम्। ४८। ४।
"सर्व्वे च शुद्धकाञ्चनविनिर्म्मिताः श्रेयसो
हर्द्धेन॥")
पवित्रः। इति मेदिनी॥ (उज्ज्वलः। यथा, रघुः। १। ४६।
"काय्यभिख्या तयोरासीत् व्रजतोः शुद्ध-
वेश्ययोः॥")
शुक्लः। इति धरणिः॥ रागान्तरामिश्रितरागः। इति संगीतशास्त्रम्॥ * ॥ शरीराशुद्धताकारणं यथा,—
नारद उवाच।
"मानवानां द्विजादीनां शरीरस्यापवित्रता।
भवेत् केन प्रकारेण कथ्यतां तत् सदाशिव॥
सर्व्ववेदपुराणादिशास्त्रज्ञानां द्विजन्मनाम्।
जितेन्द्रियस्मृतिविदां तनोः कथय पूतताम्॥
सदाशिव उवाच।
यथा देहापवित्रत्वं विप्रादीनां यतो भवेत्।
देवर्षे शृण तत् सर्व्वं नराणामानुपूर्व्विकम्॥
जातके मृतकेऽस्राते जलौकोभिः क्षते तथा।
अपवित्रो द्विजादीनां देहः सन्ध्यादिकर्म्मसु॥
अपूतत्वनुरत्सर्गे नरो मूत्रपुरीषयोः।
अस्पृश्यस्पर्शने नैव ब्रह्मयज्ञजपादिषु॥
रक्तपाते नखस्पृङ्नदन्तखड्गादिभिः क्षते।
विप्रादेरशुचिः कायः शस्त्रास्थैः कण्टकादिभिः॥
भुक्ता हस्ताननोच्छिष्टेऽपवित्रः क्षतमैथुने।
शयने ब्राह्मणादीनां शरीरं क्षुरकर्म्मणि॥
ज्वरादिभिश्चतुःषष्टिरोगैर्युक्तद्विजन्मनाम्।
वपुरप्रयतं पूजादानहोमजपादिषु॥
धूमोद्गारे वमौ श्राद्धपतिताद्यादिभोजनैः।
तथा च रेतःस्खलने मर्त्यदेहापवित्रता॥
अपवित्रं द्विजादीनां वपुः स्याद्राहुदर्शने।
गर्हितदानग्रहणे पतिते पातकादिभिः॥
अशौचान्तेन शुद्धिः स्यात् जातके मृतकेऽपि च।
सर्व्ववर्णाश्रमादीनां तनोः सन्ध्यादिकर्म्मसु॥"
इति पाद्मे उत्तरखण्डे १९ अध्यायः॥
शुद्धजङ्घः, पुं, (शुद्धा जङ्घा यस्य।) गर्दभः। इति त्रिकाण्डशेषः॥ पवित्रजङ्घायुक्ते, त्रि॥
शुद्धदत्, त्रि, शुद्धा दन्ता यस्य सः। ("अयान्तशुद्धशुभद्रुषवराड्भ्यः।" ५। ४। १४५। इति दन्तस्य दत्रादेशः।) शुद्धदन्तयुक्तः। यथा—
"गते तस्मिन् जलशुचिः शुद्धदद्रावणः शिखी।
जंजपूकोऽचमालावान् धारयोन्मदलावुनः॥"
इति भट्टौ। ५। ६१॥
शुद्धमतिः, पुं, (शुद्धा मतिर्यस्य।) चतुर्विंशतिबुद्धार्हदन्तर्गतजिनविशेषः। इति हेमचन्द्रः॥ (शुद्धा मतिः।) पवित्रबुद्धौ, स्त्री। तद्वति, त्रि॥ (यथा, हितोपदेशे। १। ८०।
"उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति
पापम्।
तं जनमसत्यसन्धं भगवति वसुधे कथं वहसि॥"
शुद्धमांसं, क्ली, (शुद्धं मांसं यस्य।) मांसव्यञ्जनविशेषः। यथा,—
"पाकपात्रे घृतं दद्यात्तैलं वा तदभावतः।
तत्र छिन्नहरिद्राञ्च भर्জ্জयेत्तदनन्तरम्॥
छागादेरस्थिरहितं मांसं तत् खण्डखण्डितम्
धौतनिर्गालितं तस्मिन् घृते तद्भर्জ্জयेच्छनैः॥
सिद्धयोग्यं जलं दत्त्वा लवणञ्च पचेत् ततः।
सिद्धे जलेन संपिष्य वेसवारं परिक्षिपेत्॥
द्रव्याणि वेसवारस्य नागवल्ली दलानि हि।
तण्डुलाश्च लवङ्गानि मरिचानि समासतः।
अनेन विधिना सिद्धं शुद्धमांसमिति स्मृतम्॥
शुद्धमांसं परं हृद्यं वल्यं रुच्यञ्च बृंहणम्।
त्रिदोषशमनं श्रेष्ठं दोषघ्नं धातुवर्द्धनम्॥"
इति भावप्रकाशः॥
शुद्धवल्लिका, स्त्री, (शुद्धा वल्लिका लता।) गुडूची इति शब्दचन्द्रिका॥ पवित्रलता च॥
शुद्धान्तः, पुं, शुद्धः अन्तो यस्य। शुद्धा रक्षकाः अन्ते यस्य इति वा।) अन्तःपुरम्। (यथा, कुमारे। ६। ५२।
"विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्म्मभिः॥")
नृपस्यासर्व्वगोचरकक्षान्तरम्। इत्यमरमेदिन्यौ राजयोषित्। इत्यजयः॥ (यथा, नैषधे। ३। ८३।
"शुद्धान्तसंभोगनितान्ततुष्टे
न नैषधे कार्य्यमिदं निगाद्यम्।
अपां हि तृप्ताय न वारिधारा
स्वादुः सुगन्धिः खदते तुषारा॥")
अशौचान्तः। इति धरणिः।
शुद्धान्तपालकः, पुं, (शुद्धान्तं पालयतीति। पालि + ण्वुल्।) अन्तःपुररक्षकः। तत्पर्य्यायः। गृहदौवारिकः २ कक्षारक्षकः ३ राजिहिण्डकः ४। इति शब्दमाला॥ तस्य लक्षणं यथा,—
"वृद्धः कुलीनतः सूक्ष्मः पिङ्गपैतामहः शुचिः।
राज्ञामन्तपुराध्यक्षो विनीतश्च तथेष्यते॥"
इति मात्स्ये १८८ अध्यायः॥
शुद्धान्ता, स्त्री, (शुद्धान्तः आश्रयत्वेनास्त्यस्या इति अच्। टाप्।) राज्ञी। यथा,—
"शुद्धान्तश्च विशुद्धान्ते शुद्धान्ता राजयोषितः॥"
इति धरणिः॥
शुद्धापङ्क्तिः, स्त्री, (शुद्धा अपङ्क्तिः।) अलङ्कारविशेषः। यथा,—
"शुद्धापङ्क्तिरन्यस्यारोपार्थो धर्म्मनिह्नवः।
नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम्॥"
इति चन्द्रालोकः॥
शुद्धिः, स्त्री, (शुध + क्तिन्।) दुर्गा। यथा,—
"स्मरणाच्चिन्तनाद्वापि शोध्यते स हि पातकात्
तेन शुद्धिः समाख्याता देवी रुद्रतनौ स्थिता॥"
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५॥
मार्জ্জना। इति जटाधरः॥ वैदिककर्म्मार्हत्वप्रयोजकसंस्कारविशेषः। यथा। शुद्धाशुद्धोः संस्काररूपत्वेन एकपुरुषस्यैकदोभयस्थितिर्घटते अशुद्धेर्भावरूपत्वे शुद्धेरभावरूपत्वे नैतत् विरोधात्। अतएव शुद्धः।
"ततः श्राद्धमशुद्धौ तु कुर्य्यादेकादशे तथा।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः॥"
अशुद्धौ चतुर्थ्यादौ। कथमशुद्धौ श्राद्धं कालाशौचस्याधिकारिविशेषत्वादत आह-कर्त्तुस्तात्कालिकीति। श्राद्धविधानाद्येषात्तस्मात्रनिष्ठा शुद्धिः कथ्यते। स पुनरशुद्ध एव कर्म्मान्तर एव। इति श्राद्धविवेकः॥ एवं शुद्धेर्भावरूपत्वे अशौचस्य तदभावरूपत्वे विरोधः। तथात्वे अशौचसङ्करोऽपि न स्यात्। एकस्मिन् शुद्धभावरूपे अशौचे सत्यपरस्य तद्रूपस्य तदानीं तत्पुरुषीयशुद्धिरूपप्रतियोग्यन्तराभावादनुत्पत्तेः। तस्मात् शुद्धाशुद्धोर्भावरूपत्वम्। इति शुद्धितत्त्वम्॥* अथाशौचशुद्धिः।
"अघट्टदिमदाशौचमूर्द्धचेत्तेन शुध्यति।
अथ चेत् पञ्चमीं रात्रिमतीत्य परतो भवेत्।
अघट्टदिमदाशौचं तदा पूर्व्वेण शुध्यति॥"
अघट्टदिमत्तन्तु। सपिण्डजननाशौचापेक्षया स्वपुत्रजननाशौचस्य सपिण्डमरणाशौचापेक्षया पितृमातृभर्तृमरणाशौचस्य।*।
"जाते पुत्रे पितुः स्नानं सदैवन्तु विधीयते।
माता शुध्येदशाहेन स्नानान्तु स्वर्गतं पितुः॥"
शुध्येत् स्वर्गमाते उत्तरवाक्ये तथा दर्शनात्।*। जननाशौचमध्ये तु यद्यपरं जननं स्यात् तदा पूर्व्वाशौचव्यपगमे शुद्धिः रात्रिशेषे दिनद्वयेन प्रभाते दिनत्रयेण मरणाशौचमध्ये ज्ञातिमरणेऽप्येवमिति॥*॥
"यस्य यस्य तु वर्णस्य यदुक्तं स्यात् पञ्चिमं
त्वहः।
स तत्र वस्त्रशुद्धिञ्च गृहशुद्धिं करोत्यपि॥
समाप्य दशमं पिण्डं यथाशास्त्रमुदाहृतम्।
ग्रामाद्बहिस्ततो गत्वा प्रेतस्पृष्टे च वाससी॥
अन्यानामाच्यितानाञ्च त्यक्त्वा स्नानं करोत्यपि।
श्मश्रुलोमनखानाञ्च यत्नाच्चाप्यं तथाऽत्यपि॥
गौरसर्षपकल्केन तिलतैलेन संयुतः।
शिरः स्नानं ततः स्नात्वा तोयेनाचम्य वाग्यतः॥
वासोयुगं नवं शुभ्रमव्रणं शुद्धमेव च।
गृहीत्वा गां सुवर्णञ्च मङ्गलानि शुभानि च॥
स्पृष्ट्वा संकीर्त्तयित्वा तु पश्चात् शुद्धो भवेन्नरः॥"
गृहशुद्धिः प्राक्तनपाकभाण्डपरित्याग उपलेपादिना। त्याज्यं त्यागार्हम्।
"अघाऽःसु निहतेषु सुस्नाताः क्षतमङ्गलाः।
आशुच्याद्यप्रमुच्यैत ब्राह्मणान् स्वस्तिवाच्य च
स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि।
न तु पूर्व्वेण शुद्धिः स्यात् स्वकालेनैव शुध्यति
समानं लघु चाशौचं पूर्व्वेणैव विशुध्यति।
यदि स्यात् मृतके सूतिर्मृतके च सूतिर्भवेत्॥
शेषेणैव भवेच्छुद्धिरतः शेषे दिनाक्षकम्।

मरणोत्पत्तियोगे तु मरणाच्छुद्धिरिष्यते ॥*॥
अर्व्वाक् पञ्चमासतः स्त्रीणां यदि स्यात् गर्भ-
संस्रवः ।
तदा मासमभेस्नासां दिवसैः शुद्धिरिष्यते ॥
गर्भस्रुत्वा यथामासमृचिरे तूनमे त्रयः ।
राजन्ये तु चतूरात्रं वैश्ये पञ्चाहमेव च ॥
अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्त्तिता ।
राचिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति
रजस्यपरते माध्वी स्नानेन स्त्री रजस्वला ।
श्रद्धा भर्तुर्व्रतैर्यज्ञैः श्रुत्या देवर्षिनृणां ।
देवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति ॥*॥
दत्ता नारी पितुर्गेहे सूयते म्रियतेऽथवा ।
स्वमशौचं चरेत् सम्यक् पृथक्स्थानव्यवस्थिता ॥
तद्बन्धुवर्गस्त्वेकेन शुध्येत्तु जनकस्त्रिभिः ।
यस्तैः सहाशनं कुर्य्यात् शयनादीनि चैव हि ।
बान्धवो वा परो वापि स दशाहेन शुध्यति ॥
स्त्रीणामसंस्कृतानान्तु त्र्यहात् शुध्यन्ति
बान्धवाः ।
यथोक्तेनैव कल्पेन शुध्यन्ति हि सनाभयः ॥*॥
यस्यामाभ्यन्तरे शूद्रे मृते बाले व्रजेद्विदः ।
अनतीते दिवर्षे वै मृते शुध्येत्तु पञ्चभिः ॥
बालस्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति ।
सद्य एव विशुद्धिः स्यान्नाशौचं नैव सूतकम् ॥
नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता ।
निहतचूडकानान्तु त्रिरात्राच्छुद्धिरिष्यते ॥*॥
दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति
गोत्रजाः ॥
शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥
दशमेऽहनि शूद्रस्य कार्य्यं संसर्गनं बुधैः ।
मासेनैव विशुद्धिः स्यात् सूतके मृतकेऽपि वा ॥
संस्थिते पत्नियौ रात्रिं दौहित्रे भगिनीसुते ।
संस्थिते तु चिरात्रं स्यादिति धर्म्मो व्यवस्थितः ॥
पित्रोरुपरमे स्त्रीणामूढानान्तु कथं भवेत् ।
त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान् शिवः ॥
यदा भोजनकाले तु अशुचिर्भवति द्विजः ।
भूमौ निःक्षिप्य तदग्रासं स्नात्वा चैव विशु-
ध्यति ॥*॥
चिकित्सकौ यत् कुरुते तदन्येन न शक्यते ।
तस्मात् चिकित्सकस्यर्थे शुद्धो भवति नित्यशः ॥
गर्भिणी सूतिका नक्तं कुमारी च रजस्वला ।
यदाशुद्धा तदान्येन कारयेत् क्रियते सदा ॥*॥
प्रेतीभूतं द्विजं विप्रो योऽनुगच्छति कामतः ।
स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ।
एकाहात् क्षत्रिये शुद्धिर्वैश्ये च स्याद्दशेन तु ।
शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः ॥*॥
नारं स्पृष्ट्वाग्नि मन्त्रेण स्नात्वा विप्रो विशुध्यति ।
आचम्यैव तु निस्नेहं गामालभ्यार्कमीक्ष्य वा ॥
अमपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥
यस्यव्रतमिति तैषान्तु स दशाहेन शुध्यति ।
अनदन्नव्रतश्चैव न चेत्तस्मिन् गृहे वसेत् ॥*॥
अस्थिसञ्चयनादर्व्वाक् यदि विप्रोऽन्यु पातयेत् ।
मृते शूद्रे गृहं गत्वा त्रिरात्रेण विशुध्यति ॥
अस्थिसञ्चयनादूर्द्धं यावन्मासं द्विजातयः ।
दिवसेनैव शुद्धिः स्यादासप्तं स्नानेन च ॥*॥
स्वजातिर्दिवसेनैव त्र्यहात् क्षत्रियवैश्ययोः ।
स्वर्गे विनानुगमने शूद्रो नक्तेन शुध्यति ॥*॥
अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
दशरात्रेण शुध्यन्ति भूमिष्ठञ्च नवोदकम् ॥*॥
उदक्या सूतिका वापि अन्यत्रं संस्पृशेद्यदि ।
त्रिरात्रेणैव शुद्धिः स्यादिति ज्ञातातपोऽब्रवीत् ॥*
नवप्रजातजलं गावो महिष्यश्छागयोनयः ।
शुध्यन्ति दिवसैरेव दशभिर्नात्र संशयः ॥
काले नवोदकं शुद्धं न पातव्यन्तु तत्प्रदम् ॥"*॥
अथ द्रव्यशुद्धिः । ब्राह्मे ।
"सुवर्णरूप्यशङ्खाश्मशृङ्गरत्नमयानि च ।
कांसायस्ताम्ररैत्यानि त्रपुसीसमयानि च ॥
निर्लेपानि विशुध्यन्ति केवलेन जलेन तु ।
शूद्रोच्छिष्टानि शुध्यन्ति त्रिधाचारान्न-
धारिभिः ॥
सूतिकाश्ववविण्मूत्ररजस्वलाहतानि च ।
प्रक्षेप्तव्यानि तानग्नौ यज्ञ यावत् सहेदपि ॥"
रैत्यं पित्तलम् । त्रपु रङ्गम् । यत्तप्तार्द्रं यावत् ।
कालमग्निं सहेत तत् पात्रं प्रक्षालनान्तरं ।
तावत्तापनीयमित्यर्थः ॥*॥ बृहस्पतिः ।
"अभसा हेमरत्नाद्यः कांस्यं शुध्येत भस्मना ।
अम्लैः क्षाम्रञ्च रैत्यञ्च पुनःपाकेन मृन्मयम् ॥"
राजधर्म्मे ।
"पञ्जलोच्छिष्टकांस्यं यत् गवाघ्रातमथापि वा ।
गण्डूषोच्छिष्टमग्निं च विशुध्येदग्निसंस्तु तत् ॥"
दशभिर्दिनैरिति शेषः । तथा च ।
"कांस्ये न धावयेत् पादौ यत्र स्यादपि भोजन-
मिति ।"
यत्र पात्रान्तरे भोजनं तत्र श्रुतस्यैव तस्य
साहचर्य्यात् कांस्यवच्छुद्धिः ॥ * ॥ बौधायनः ।
"भिन्नकांस्ये तु योऽश्नीयात् नद्यां स्नात्वा
जपेद्विजः ।
गायत्र्याष्टसहस्रन्तु एकभक्तस्ततः शुचिः ॥"
देवलः । ताम्ररजतसुवर्णस्फटिकानां भिन्न-
मभिन्नम् । इति भिन्नत्वेऽपि न दोष इत्यर्थः ॥*॥
विष्णुः । क्षारैरम्लैः सुराभिर्मद्यैर्वा यदुपहतं
तदल्पलोपहतं सर्व्वं लौहभाण्डमग्नौ प्रतप्तं
शुध्येत । मणिमयशङ्खमयमञ्जमयञ्च सप्तरात्रं
मट्टीखननेन मृद्दन्तास्थिमयञ्च तक्षणेन दारु
मयं शृङ्गमयं चाद्भिरिति । लौहपदं सुवर्णाद्य-
ष्टकपरम् ॥ * ॥ मनुः ।
"चौक्षे देवाः पवित्राणि ब्राह्मणानामकल्पयन्
अहष्टमक्षिनिर्णिक्तं यच्च वाचा प्रशस्यते ॥"
अदृष्टमुपघातगन्धादिभिरज्ञातम् । अज्ञातञ्च
सदा शुचि इति याज्ञवल्क्यवाक्यात् ।
वाचेति उपघातशङ्कायां पवित्रं भवतीति ।
ब्राह्मपैत्यहाचा प्रशस्यते इति शूलपाणिमहा-
महोपाध्यायकुलूकभट्टौ ॥ * ॥ ज्ञातातपः ।
"गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः ।
अमेमांसानि शौचानि स्त्रीषु बालातुरेषु च ॥"
मनुः ।
"मक्षिका विप्रुषश्छाया गौरश्वः सूर्य्यरश्मयः ।
रजो भूर्व्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत् ॥"
बौधायनः ।
"अदुष्टाः सन्ततधारा वातोद्भूताश्च रेणवः ।
आकराः शुचयः सर्व्वे वर्जयित्वा सुराकरम् ॥"
शङ्खलिखितौ । आकरद्रव्याणि प्रोक्षितानि
शुचीनि ॥*॥ यमः ।
"आममांसं घृतं चौद्रं स्वेच्छाय फलसम्भवः ।
स्वेच्छाभाण्डस्थिता दुष्टा निष्क्रान्ताः शुचयः
स्मृताः ॥"
विष्णुधर्म्मोत्तरे ।
"मुखवर्जञ्च गौः शुद्धा मार्ज्जारश्चक्रमे शुचिः ।
पुष्पाणाञ्च फलानाञ्च प्रोक्षणात् शुद्धिरिष्यते ॥"
अत्रिः ।
"मक्षिका सन्ततधारा भूमिस्तोयं हुताशनः ।
मार्ज्जारश्चापि दर्व्वी च मारुतश्च सदा
शुचिः ॥"
बौधायनः । अनेकोद्वाहे दारुशिले भूमिममे
दृष्टकाश्च सङ्कीर्णीभूताः इति । सङ्कीर्णीभूताः
परस्परसम्बद्धाः ॥*॥ विष्णुः । प्रोक्षणेन पुस्तकं
इति ॥*॥ ज्ञातातपः ।
"तापनं घृततैलानां प्लावनं गोरसस्य च ।
तक्राम्लमुद्धृतं शुध्येत् कठिनन्तु पयो दधि ।
अविलीनं तथा सर्पिर्विलीनं अपवेन तु ॥"
अविलीनं कठिनम् ॥*॥ मनुः ।
"द्रव्याणाञ्चैव सर्व्वेषां शुद्धिरुत्प्लवनं स्मृतम् ।
प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्षणम् ॥"
इदमुच्छिष्टाद्यल्पदोषे । उत्प्लवनं यस्मान्तर-
निर्व्वापणेन कौटाद्यपनयनम् ॥*॥ ज्ञातातपः ।
"क्लीवाभिशप्तपतितैः सूतिकोदक्यनास्तिकैः ।
दृष्टं वा स्यात् यदन्नन्तु तस्य निष्कृतिरुच्यते ॥
अभ्युक्ष्य किञ्चिदुद्धृत्य भुञ्जीताप्यविशङ्कितः ॥*॥
देवलः ।
"चाण्डालेन शुना वापि दृष्टं क्षवियवच्चियम् ।
विड़ालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत् ॥"
अन्यत्र हिरण्योदकस्पर्शादिति ॥ * ॥ मनुः ।
"अद्भिस्तु प्रोक्षणं शौचं वस्त्राणां धान्यवाससाम् ।
प्रक्षालनेन स्वल्पानामद्भिः शौचं विधीयते ॥"
शुद्धिरित्यनुवृत्तौ विष्णुः । गुड़ानामिक्षुविका-
राणां प्रभूतानां वाग्निदानेन सत्वत्रयणाना-
मिति ॥*॥ अङ्गिराः ।
"यथा यतस्ततो ह्यापः शुद्धिं यान्ति नदीं गताः
शूद्रादिप्रस्रवैश्चन्नं प्रविष्टन्तु सदा शुचि ॥"
प्रविष्टं स्नात्वापादकप्रतिषादादिनेति शेषः ॥
"सकृत्पक्वं सकृद्भृष्टं तैलस्तोयमथास्य तत् ।
प्रक्षिपेत् पञ्चगव्यञ्च समन्तं सर्व्वशुद्धिदम् ॥
अथास्य कृष्णं तैलो नवनीतोद्भव घृतं वा ।

शतं वष्ट्यथवा त्रिंशत् तोयकुम्भान् समुद्धरेत् ॥
पञ्चगव्यं ततस्तेषु प्रक्षिपेन्मन्त्रपूर्व्वकम् ॥"
शतादि अल्पत्वाद्यपेक्षया अत्यल्पस्य सर्व्वोद्धारणाभिधानात् ॥*॥ बृहन्मनुः ।
"श्वशूद्रपतितास्पृश्या मृताशैर्द्विजमन्दिरे ।
शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा ॥
दशरात्राच्छुनि प्रेते मासात् शूद्रे भवेच्छुचिः ।
द्वाभ्यान्तु पतिते गेहे अन्ये मासचतुष्टयात् ।
अत्यन्ते वर्जयेद्गेहमित्येवं मनुरब्रवीत् ॥"
यमः ।
"द्विजस्य मरणे वेश्म विशुध्यति दिनत्रयात् ।
दिनैकेन वहिर्भुमिरग्निचेपणलेपनैः ॥"*॥
यथोक्तकालानन्तरं कर्त्तव्यमाह सम्वर्त्तः ।
"शुद्धशुद्धिं प्रवक्ष्यामि अन्तःस्थ्यवदूषिते ।
प्रोक्षणञ्च मृण्मयं पात्रं सिद्धमन्नं तथैव च ॥
शुद्धादपास्य तत् सर्व्वं गोमयेनानुलेपयेत् ।
गोमयेनानुलिप्याथ क्षालनेनाप्नुयादृषुधः ॥
ब्राह्मणैर्मन्त्रपूतैश्च हिरण्यकुशवारिभिः ।
सर्व्वमभ्युक्षयेद्देश्म ततः शुध्यत्यसंशयः ॥"
मन्त्रानादेशे गायत्री ॥*॥ देवलः ।
"पञ्चधा वा चतुर्धा वा भूरमेध्या विशुध्यति ।
दुष्टा द्विधा त्रिधा वापि शुध्यते सलिलैकधा ॥
दहनं खननं भूमेरुपलेपनवापने ।
पर्जन्यवर्षणञ्चापि शौचं पञ्चविधं स्मृतम् ॥
प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः ।
चाण्डालैरुषितं यत्र यत्र विन्यस्यते शवः ॥
विण्मूत्रोपहतं यच्च कृमयो यत्र दृश्यते ।
एवं कश्मलभूयिष्ठा भूरमेध्यातिकथ्यते ॥
कृमिकीटपदक्षेपैर्दूषिता यत्र मेदिनी ।
त्रपया कर्षणैः क्षिप्ता वान्तैर्व्वा दुष्टतां व्रजेत् ॥
नखदन्ततनूजत्वक्तुषपांशुरजोमलैः ।
भस्मपङ्कतृणैर्व्वापि प्रच्छन्ना मलिना भवेत् ॥"
वापनं मृदन्तरेण पूरणम् । क्षया घनीभूतस्नेहादि । इति शुद्धितत्त्वम् ॥*॥ अपिच ।

याज्ञवल्क्य उवाच ।

"द्रव्यशुद्धिं प्रवक्ष्यामि तान्निबोधत सत्तमाः ।
सौवर्णराजतानां भाजनानां शाकवस्त्रादिचर्म्मणाम् ॥
पाषाणां चमसानाञ्च वारिणा शुद्धिरिष्यते ।
उष्णाभिः स्रुक्स्रुवयोर्धान्यादेः प्रोक्षणेन च ॥
तक्षणात् दारुशृङ्गादेर्यज्ञपात्रस्य मार्जनात् ।
सोष्णैरुदकगोमूत्रैः शुध्यत्याविककैशिकम् ॥
मैक्षं योषिन्मुखं पुण्यं पुनः पाकान्महीमयम् ।
गोघ्राते च तथा केशमक्षिकाकीटदूषिते ।
भस्मनोपादिशुद्धिः स्यादिष्टदिर्मार्जनादिना ॥
त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः ।
भस्माद्रिलोष्टकांस्यानामग्नातञ्च सदा शुचि ॥
अमेध्यान्नस्य मृत्तोयैर्गन्धलेपापकर्षणात् ।
शुचि गोदसिदं तोयं प्रकृतिस्थं महीगतम् ॥
तथा मांसं श्वचाण्डालक्रव्यादादिनिपातितम् ।
रश्मिरग्नी रजश्छाया गौरश्वो वसुधानिलः ॥
अश्वाजविप्रुषो मेध्यास्तथा चामलबिन्दवः ।
स्नात्वा पीत्वा क्षुते सुप्ते भुक्ता रथ्योपसर्पणे ॥
आचान्तः पुनराचामेत् वासो व्युत्परिधायच ।
क्षुते निष्ठीविते स्वापे परिधानेऽशुपातने ॥
पञ्चस्वेतेषु नाचामेत् दक्षिणं श्रवणं स्पृशेत् ।
तिष्ठन्त्यम्भ्यादयो देवा विप्रकर्णे तु दक्षिणे ॥"

इति गारुडे ८७ अध्यायः ॥

अन्यच्च ।
"मणिवस्त्रप्रवालानां तदश्मशाकफलस्य च ।
शैलदारुमयानाञ्च तृणगुल्मौषधस्य च ॥
शाकधान्याजिनानाञ्च संहतानाञ्च वाससाम् ।
वल्कलानामशेषाणामम्बुना शुद्धिरिष्यते ॥
सक्षौद्राणामथोष्णेन तिलकल्केन शोधनम् ।
कार्पासिकानां वस्त्राणां शुद्धिः स्यात् सह भस्मना ॥
नागदन्ताक्षिशृङ्गाणां तक्षणाच्छुद्धिरिष्यते ।
पुनःपाकेन भाण्डानां मृण्मयानाञ्च शुद्धता ॥
शुद्धं भक्ष्यं कारुहस्तः पक्वं योषिन्मुखं तथा ।
रथ्यागतमविज्ञातं दासवर्गेण यत् कृतम् ॥
वाक्यस्थं चिरानीतमनेकान्तरितं क्षतु ।
चेष्टितं बालवृद्धानां बालस्य तु मुखं शुचि ॥
म्लेच्छानामपि गोशालास्तनन्धयसुताः स्त्रियः ।
वाग्मिप्लुषो द्विजेन्द्राणां पाठे वागम्बुबिन्दवः ॥
भूमिर्विशुध्यते खातदाहगोक्रमसेचनैः ।
लेपादुल्लेखनात् सेकात् वेश्मसम्मार्জ্জনाज्जलात् ।
केशकीटावपन्नेऽन्ने गोघ्राते मक्षिकान्विते ।
गृहारिभस्माचाराणि प्रक्षेप्तव्यानि शुद्धये ॥
उडुम्बराणाञ्चाम्लेन चारेण त्रपुसीसयोः ।
कांस्यानां भस्मना शुद्धिस्तोयाच्छुद्धिर्द्रवस्य च ॥
अमेध्याक्तस्य मृत्तोयैर्गन्धापहरणेन च ।
अन्येषामपि तद्द्रव्यैः शुद्धिर्गन्धावहारतः ॥
मातुः प्रसवने वत्साः शकुनिः फलपातने ।
गर्भे भारहारित्वे श्वा मृगग्रहणे शुचिः ॥
रथ्याकर्दमतोयानि नावः पथि स्थलानि च ।
मारुतेनैव शुध्यन्ति पक्षेष्टरचितानि च ॥
मृतं द्रौणाढकस्यान्तमेध्याभिप्लुतं भवेत् ।
अयमुद्धृत्य उत्पाद्यं शेषस्य प्रोक्षणं स्मृतम् ॥
लघ्वासं विरात्रं वा दूषितान्नस्य भोजने ।
अश्नाते स्नातपूर्व्वे च नैव शुद्धिर्व्विधीयते ॥
उदक्याज्ञाननग्नांश्च सूतिकान्त्यावशायिनः ।
स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिणः ॥
सक्लेदमस्थि संस्पृश्य सवासाः स्नानमाचरेत् ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य च॥"

इति वामनपुराणे १४ अध्यायः ॥

अन्यत् मार्कण्डेयपुराणे सदाचाराध्याये द्रष्टव्यम् ॥ जलशुद्धिर्यथा,—
"गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्म्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु॥"
भूतशुद्धिस्तु तच्छब्दे द्रष्टव्या ॥*॥ आसनशुद्धिर्यथा ।"एते गन्धपुष्पे आधारशक्तिकमलासनाय नमः । आसनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्म्मो देवता आसनपरिग्रहे विनियोगः ।
पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता
त्वञ्च धारय मां नित्यं पवित्रं कुरु चासनम्॥"
मण्डपशुद्धिर्यथा,—
"पञ्चगव्येन मूलेन मण्डपं परिशोधयेत् ॥"
गौतमीये ।
"पञ्चगव्येन तद्गेहं मण्डलञ्च विशोधयेत् ॥"
पञ्चगव्यप्रमाणन्तु तत्रैव ।
"पलमात्रं दुग्धभागं गोमूत्रं तावदिष्यते ।
घृतञ्च पलमात्रं स्यात् गोमयं तोलकद्वयम् ॥
दधि प्रसृतिमात्रं स्यात् पञ्चगव्यमिदं स्मृतम् ।
अथवा पञ्चगव्यानां समानो भाग इष्यते ॥
मूलमन्त्रेण संमन्त्र्य तेनैव परिशोधयेत् ।
तेन सर्व्वविशुद्धिः स्यात् सर्व्वपापनिकृन्तनम्॥"

इति तन्त्रसारः ॥*॥

अन्यशुद्धिर्गोचरशब्दे द्रष्टव्या ॥

शुद्धोदनसुतः, पुं, (शुद्धोदनस्य सुतः ।) बुद्धभेदः । इति हेमचन्द्रः ॥

शुध, ल्य औशौचे । इतिकविकल्पद्रुमः ।(दिवा० पर०-अक०-अनिट् ।)ल्, अशुधत् । य, शुध्यति लोकः स्नानात् । औ, शौद्धा । रजसा शुध्यते नारीत्यत्र शुध्यतीति क्विपि शुधं करोतीति औ कर्म्मणि यकि रूपम् । इति दुर्गादासः ॥

शुन, ग गत्याम् । इति कविकल्पद्रुमः ॥(तुदा०-पर०-सक०-सेट् ।) ग, शुनति । शौनसा । इति दुर्गादासः ॥

शुनः, पुं, (शुनति सदा इतस्ततो गच्छतीति । शुन + कः ।) कुक्कुरः । यथा,—
"कुक्कुरस्तु शुनिः श्वानः कपिलो मण्डलः शुनः ॥"

इत्यमरटीकायां भरतधृतवाचस्पतिः ॥
(शुनति क्षिप्रं गच्छतीति । कः । वायुः । इति निघण्टुटीकायां देवराजयज्वा ॥ ५ । ३ । ३४ ।
क्लीं, सुखम् । इति ऋग्वेदभाष्ये सायणः । ४ । ५७ । ८ ॥)

शुनःशेफः, पुं, मुनिविशेषः । स तु ऋचीकमुनिपुत्रः । अम्बरीषेण यज्ञार्थं क्रीतः विश्वामित्रेण रक्षितश्च । इति रामायणे वाल्मीकीये बालकाण्डे ६१ सर्गः ॥ (वरुणशापात् जलोदरयोगपीड़ितो हरिश्चन्द्रः अजीगर्त्तपुत्रं शुनःशेफं पशुं विधाय वरुणतुष्ट्यर्थं यज्ञमारब्धवान् । करुणार्द्रचित्तो विश्वामित्रस्तु तमतीवव्याकुलमवलोक्य मोचयामास । ततः प्रभृति शुनःशेफोऽयं विश्वामित्रस्य पुत्र इति प्रसिद्धोऽभूत् । एतद्वृत्तान्तस्तु देवीभागवते ७ स्कन्धे १६ अध्यायमारभ्य द्रष्टव्यः ॥ कुक्कुरशब्दे, क्लीं ॥

शुनकः, पुं, (शुनति इतस्ततो गच्छतीति । शुन गतौ + "कुन् शिल्पिसज्ञयोरपूर्व्वस्यापि।" उणा० २ । ३२ । इति कुन् । कुक्कुरः । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १३ । १२७ । १६ ।
"भिन्नभाण्डञ्च खट्वाञ्च कुक्कुटं शुनकं तथा ।
अप्रशस्तानि सर्व्वाणि यस्य हव्यो गृहेरहः ॥"
ऋषिविशेषः । यथा, महाभारते । २।४। १० ।

"अमितो देवलः सत्यः शर्पमाली महाशिराः।
अर्कावसुः सुमित्रश्च मैत्रेयः शुनको बलिः॥")
शुनकचञ्चुका, स्त्री, (शुनकस्य चञ्चुरिव। इवार्थे कन्।) क्षुद्रचञ्चुतुपः। इति राजनिर्घण्टः॥
शुनकचिल्ली, स्त्री, (शुनकप्रिया चिल्ली।) शाकविशेषः। तत्पर्य्यायः। क्षवचिल्ली२ क्षानचिल्लिका ३। अस्या गुणाः। कटुत्वम्। तीक्ष्णत्वम्। कण्डूवणनाशित्वञ्च। इति राजनिर्घण्टः।
शुनाशीरः, पुं, (शुनाशीरौ वायुसूर्य्यौ अस्य स्त इति। अर्श-आदित्वादच्।) इन्द्रः। इति भरतद्विरूपकोषः॥
शुनासीरः, पुं, (शुनासीरौ वायुसूर्य्यौ अस्य स्त इति। शुना सीर+अर्शआद्यच्।) इन्द्रः। यथा,—
"शुनाशीरौ हितालव्यः शुनासीरौ दिदन्त्यकः
तालव्यादिर्दन्त्यमध्यः शुनासीरश्च दृश्यते॥"
इत्यमरटीकायां भरतः॥
(यथा, तैत्तिरीयसंहितायाम्। १।८।७।१।
"इन्द्राय शुनासीराय पुरोडाशमिति॥" * ॥
वायुसूर्य्यौ। इति निघण्टुः।५।३॥"शु-शब्दार्थविशिष्टात् शुन गतौ इत्यस्मात् इगुपधलक्षणः कः। क्षिप्रं गच्छत्यन्तरिक्षमिति शुनो वायुः यद्वा, शु-शब्दोपपदान्नयतेर्गतिकर्मणः अन्येऽपि दृश्यते इति डः। भाष्ये तु शु एतदर्थतो निर्वचनं प्रायेण। सर्त्तेः 'डिण्डीरवानीरगभीर गम्भीर-कुम्भीर-शीरकाश्मीरजम्बीरकीरतौरादयः' इति ईरन्-प्रत्ययष्टिलोपश्च निपात्यते। सदा सरणात् सीर आदित्यः। शुनश्च सीरश्च देवताद्वन्द्वे च इत्यङ्।" इति तट्टीकायां देवराजयज्वा ॥*॥ इन्द्रवायू। यथा, ऋग्वेदे। ४। ५७। ८।
"शुनासीरा शुनमस्मासु धत्तम् ॥")
"हे शुनासीरा इन्द्रवायूादित्यौ वा।" इति। तद्भाष्ये सायणः)
शुनिः, पुं, (शुनति क्षिप्रं गच्छतीति। शुन गतौ +"इगुपधात् कित्।" उणा० ४।११८। इति इन्। स च कित्।) कुक्कुरः। इति हैमचन्द्रः।
शुनी, स्त्री, (श्वन्+गौरादित्वात् ङीष्।)कुक्कुरी। इत्यमरः॥ (यथा, भागवते। ८। १८।११।
"अहो निरीक्ष्यतामस्या दास्याः कर्म्म
ह्यसाम्प्रतम्।
अस्मद्दार्थं हुतवती शुनीव हविरध्वरे॥")
कुक्कुरी। इति राजनिर्घण्टः॥
शुनीरः पुं, कुक्कुरीसमूहः। इति त्रिकाण्डशेषः
शुन्ध, क शुद्धौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्। क, शुन्धयति। अयमात्मनेपदीत्येके। इति दुर्गादासः॥
शुन्ध, अ शुद्धौ। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सक०-च-सेट्।) शुद्धिरिह शुद्धीभावः शुद्धीकरणञ्च। अ, शुन्धति शुन्धते जलेन लोकः। यो गां शुन्धति सत्येनेति इन्द्रायुधः। गां वाचम्। इति दुर्गादासः॥
शुन्ध्युः, पुं, (शुन्ध शुद्धौ+"यजिमनिशुन्धिदसिजनिभ्यो युच्।" उणा० ३। २०। इति युच्।) अग्निः। इत्युणादिकोषः॥ (आदित्यः। पक्षिविशेषः। यथा, ऋग्वेदे। १। १२४। ४।
"उपो अदर्शि शुन्ध्युवो न वक्षः॥"
"शुन्ध्युरादित्यः सर्व्वेषां शोधकत्वात् ***यद्वा-शुन्ध्युरिति जलधरः श्वेतवर्णः पक्षिविशेषः।"
इति तद्भाष्ये सायणः॥)
शुन्भ, श दीप्तिहिंसनयोः। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-हिंसने सक०-सेट्।) श, शुम्भति शुम्भति। शुशोभ शुशुम्भ। इति दुर्गादासः॥
शुन्यं, क्ली, शूनीसमूहः। इति त्रिकाण्डशेषः॥ रिक्ते, त्रि। इति जटाधरः॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे।
"शुन्यं वासगृहं विलोक्य शयनादुत्याय किञ्चित् शनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्॥"
शुने हितम्। श्वन्+"उगवादिभ्यो यत्।" ५।१।२। इति यत्। "शुनः सम्प्रसारणं वा च दीर्घत्वम्।" इत्यनया सम्प्रसारणम्॥)
शुभ, प श दीप्तिहिंसनयोः। इति कविकल्पद्रुमः। (तुदा०-पर०-अक०-हिंसने सक०-सेट्। प श, शुम्भति शुशोभ। प्राच्यस्तु क्षादौ च शुभ शुन्भ भासनहिंसनयोरिति पठन्ति। इति दुर्गादासः॥
शुभ, लृ ङ दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) लृ, अशुभत्। ङ, शोभते। न शोभति सभामध्ये इति गणक्लृतानित्यत्वादिति रमानाथः। वस्तुतस्तु शोभते शोभः पचाद्यजन्। ततः शोभ इवाचरतीति क्विप् साध्यम्। इति दुर्गादासः॥
शुभं, क्ली, (शोभते इति। शुभ दीप्तौ+कः।) मङ्गलम्। इत्यमरः॥ (यथा, कथासरित्सागरे। १२४। ११२।
"अहो सूर्खोऽयमशुभं शुभमित्यभिनन्दति॥"
पद्मकाष्ठम्। इति राजनिर्घण्टः॥ (उदकम्। इति निघण्टुः। १। १२॥ शुभपर्य्याये शुभमित्यव्ययमप्यस्ति। इति काशिका। ५।२। १४०॥)
शुभः, पुं, (शोभते इति। शुभ+कः।) विष्णुभादिसप्तविंशतियोगान्तर्गतत्रयोविंशयोगः। तच्च जातफलम्। यथा, कोष्ठीप्रदीपे।
"शुभप्रसूतः शुभलक्षणाढ्यो
शुभोदयेष्टो विदुषां समाजे।
करोति नित्यं शुभकर्म्म धीमान्
शोभाधिकः शोभनवेशधारी॥"
शुभः, त्रि, (शुभमस्यास्तीति। अर्शआद्यच्।) क्षेमशाली। (यथा, मनुः। ८। २८७।
"पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु॥")
खड्गधारिपुरम्। इति मेदिनी। भे, ८॥
शुभंयुः, त्रि, (शुभमस्यास्तीति। शुभम्+"अर्शशुभमोर्युस्।" ५। २। १४०। इति युस्।) मङ्गलान्वितः। इत्यमरः॥ (यथा, रघुः।८।६।
"अधिकं शुशुभे शुभंयुना
द्वितयेन द्वयमेव सङ्गतम्॥")
शुभगन्धकं, क्ली, (शुभो गन्धो यस्य।) गोलम्। इति राजनिर्घण्टः॥ मङ्गलगन्धयुक्ते, त्रि॥
शुभग्रहः, पुं, (शुभः ग्रहः।) सौम्यग्रहः। स तु गुरुः शुक्रः पापायुतबुधः अर्द्धाधिकचन्द्रश्च। यथा,—
"अर्द्धो नेन्दुः कुजो राहुः शनिस्सैर्युत इन्दुजः।
रविः पापा भवन्त्येते शुभायान्ये प्रकीर्त्तिताः॥"
इति सारसंग्रहः॥
तद्धारे शुभकर्म्मकरणं यथा,—
"शुभग्रहार्कवारे च मृदुक्षिप्रध्रुवेषु च।
शुभराशिविलग्ने च शुभं शान्तिकपौष्टिकम्॥"
इति संस्कारतत्त्वम्॥
शुभङ्करः, त्रि, (शुभं करोतीति। शुभ+क्त+खच्।) मङ्गलकारकः। यथा, भूरिप्रयोगे।
"क्षेमङ्करः क्षेमकरो भद्रङ्करशुभङ्करौ॥"
खनामख्याताङ्गशाखकारके, पुं॥
शुभङ्करी, स्त्री, (शुभं करोति या। क्त+खच् ङीष्।) पार्व्वती। इति शब्दरत्नावली॥
शुभदः, पुं, (शुभं ददातीति। दा+कः।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥ शुभदातरि, त्रि॥ (यथा, हरिवंशे। ८। २२।
"अपरस्यां खात्याद्यं
ज्येष्ठाद्यं चापि मण्डलं शुभदम्॥")
शुभदन्ती, स्त्री, (शुभौ दन्तौ यस्याः। ङीष्।) पुष्यदन्तभयोषित्। सुदती। इति मेदिनी॥
शुभपत्रिका, स्त्री, (शुभानि पत्राणि यस्याः। स्वार्थे कन्। टापि अत इत्वम्।) शालपर्णी। इति राजनिर्घण्टः॥ मङ्गलपत्रिका च॥
शुभवासनः, पुं, (शुभं शोभनं यथा तथा वासयति सुखमिति। शुभ+वस+णिच्+ल्युः।) सुखवासकरगन्धः। यथा,—
"सुखवासकरो गन्ध आमोदो सुखवासनः।
सुखवासन इत्येके शुभवासन इत्यपि॥"
इति शब्दरत्नावली॥
शुभसूचनी, स्त्री, (शुभं सूचयतीति। सूच्+णिच्+ल्युः। स्त्रियां ङीष्।) देवीविशेषः। सुवचनीति ख्याता। सा च स्त्रिया पूज्या। तस्याः ध्यानं यथा,—
"रक्ता पद्मचतुर्म्मुखी त्रिनयनी चामीकराङ्गप्रभा
पीनोत्तुङ्गकुचादुकूलवसना हंसाधिरूढ़ा परा
ब्रह्मानन्दमयी कमण्डलुकराभीतिहस्ता शिवा
ध्येया सा शुभसूचनी त्रिजगतामभ्यापदुद्धारिणी॥"
इत्याचारमार्त्तण्डः॥
शुभस्थली, स्त्री, (शुभा स्थली।) यज्ञभूमिः। इति केचित्॥ मङ्गलभूमिश्च॥

शुभा, स्त्री, शोभा। कान्तिः। इच्छा। इति मेदिनी॥ वंशरोचना। गोरोचना। शमी। प्रियङ्गुः। श्वेतदूर्व्वा। इति राजनिर्घण्टः॥ देवसभा। इति शब्दरत्नावली॥ उमासखीविशेषः। इति शब्दमाला॥ मङ्गलजनिका च॥

शुभाङ्गी, स्त्री, (शुभानि अङ्गानि यस्याः। ङीष्।) कुबेरपत्नी। कामदेवपत्नी। इति केचित्॥ (कुरुराजपत्नी। यथा, महाभारते।१।८५।३८ "कुरुः खलु दशार्हीमुपयेमे शुभाङ्गीं नाम तस्यामस्य जज्ञे विदूरथः॥") मङ्गलावयवयुक्ते, त्रि॥

शुभाचारा, स्त्री, (शुभः आचारो यस्याः।) उमासखी। इति शब्दमाला॥ शोभनाचारवति, त्रि॥

शुभाञ्जनः, पुं, शोभाञ्जनवृक्षः। इति शब्दरत्नावली॥

शुभान्वितः, त्रि, (शुभेन अन्वितः।) मङ्गलयुक्तः। तत्पर्य्यायः। शुभंयुः २। इत्यमरः॥

शुभ्रं, क्ली, (शोभते इति। शुभ दीप्तौ + "स्फायि तञ्चिवञ्चीति।" उणा० २।१३। इति रक्।) अभ्रकम्। इति मेदिनी॥ गड्डलवणम्। रौप्यम्। कांसीसम्। इति राजनिर्घण्टः॥

शुभ्रः, पुं, (भ दीप्तौ + रक्।) शुक्लवर्णः। इत्यमरः॥ चन्दनम्। इति शब्दचन्द्रिका॥

शुभ्रः, त्रि, (शुभ + रक्।) उद्दीप्तः। शुक्लगुणयुक्तः। इत्यमरः॥ (यथा, रघुः। २। ६८।

"पपौ वसिष्ठेन कृताभ्यनुज्ञः
शुभ्रं यशो मूर्त्तमिवातितृष्णः॥")

शुभ्रदन्ती, स्त्री, (शुभ्रौ दन्तौ यस्याः। शुभ्रदन्ती। सा तु पुष्पदन्तनामदिग्गजकरिणी। इत्यमरटीकायाम्।

शुभ्ररश्मिः, पुं, (शुभ्रा रश्मयो यस्य।) चन्द्रः। इति केचित्॥ श्वेतकिरणश्च॥

शुभ्रांशुः, पुं, (शुभ्रा अंशवो यस्य।) चन्द्रः। इत्यमरः॥ कर्पूरः। इति राजनिर्घण्टः॥

शुभ्रालुः, पुं, (शुभ्रः शुक्लः आलुः।) मल्लिकन्दः। इति राजनिर्घण्टः॥ श्वेतालुश्च॥

शुभ्रिः, पुं, (शोभते इति। शुभ + "अदिशदिभूशुभिभ्यः क्रिन्।" ४।६५। इति क्रिन्।) ब्रह्मा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

शुम्भः, पुं, दानवविशेषः। स तु गवेष्ठीपुत्रः प्रह्लादपौत्रः अम्भिकया हतश्च। यथा,—

"विरोचनस्तु प्राह्लादिः पञ्च तस्यात्मजाः स्मृताः।
गवेष्ठी कालनेमिश्च जम्भो वास्कल एव च॥
शम्भुः श्रेष्ठोऽनुजस्तेषां पुत्रानेषामतः शृणु।
शुम्भश्चैव निशुम्भश्च विघ्नकृत्सेनो महौजसः।
गवेष्ठिनः सुता ज्ञेते जम्भस्य सुतदुन्दुभिः॥"

इत्यादौ वह्निपुराणे कश्यपीयप्रजासर्गाध्यायः॥ अन्यच्च।

पुलस्त्य उवाच।

"कश्यपस्य दनुर्नाम भार्य्यासीत् द्विजसत्तम।
तस्यास्तु द्वौ सुतावास्तां सदृशाचारशीलिकौ॥
ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः॥"

इति वामनपुराणे ५२ अध्यायः॥

अपरञ्च।

ऋषिरुवाच।

"निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितम्।
हन्यमानं बलञ्चैव शुम्भः क्रुद्धोऽब्रवीद्वचः॥
बलावलेपदुष्टे त्वं मा दुर्गे गर्व्वमावह।"

इत्यादि॥

"स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः।
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया॥
तमायान्तं ततो देवी सर्व्वदैत्यजनेश्वरम्।
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि।
स गतासुः पपातोर्व्व्यां देवीशूलाग्रविक्षतः॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्ये शुम्भवधः १० अध्यायः॥

शुम्भघातिनी, स्त्री. (शुम्भं हन्तीति। हन + णिनिः। ङीप्।) दुर्गा। इति शब्दरत्नावली॥

शुम्भपुरं, क्ली. (शुम्भस्य परम्।) शुम्भदैत्यस्य पुरी तत्पर्य्यायः। एकचक्रम् २ हरिगृहम् ३। इति भूरिप्रयोगः॥ अधुना शुम्भलपुर इति ख्यातम्॥

शुम्भपुरी, स्त्री, (शुम्भस्य पुरी।) शुम्भपुरम्। इति त्रिकाण्डशेषः॥

शुम्भमर्द्दिनी, स्त्री, (शुम्भं मृद्नातीति। मृद् + णिनिः।) दुर्गा। इति हेमचन्द्रः॥

शुल्क, क भाषे। सर्ज्जने। वर्ज्जने। इति कविकल्पद्रुमः॥ (चरा०-पर०-सक०-सेट्।) क, शुल्कयति। शुल्क श्लोक इत्येतयोरैतावर्थौ कैश्चित् मन्यते। भाषः कथनम्। इति दुर्गादासः॥

शुल्कः, पुं, क्ली, (शुल्क + घञ्।) घट्टादिदेयम्। महसुल इति भाषा। इत्यमरः॥ घट्टः पण्यात् तत्र यादृशा द्रव्यक्रयविक्रयस्थानादौ च यद्देयं दीयते स शुल्को जगात् इति घटौ इति राज इति च ख्यातः। शलति प्रतिबध्नोऽनेनेति शुल्कः। शल ज गतौ तालव्यादिः नाञ्चीति कः निपातनादत उत्वम्। घट्टश्चासौ घट्टयतेऽत्र इति घञि घट्टः। घट्टो वर्त्मेति माधवी। घट्टो राजग्राह्यग्रहणस्थानादिरिति मुकुटः। घट्टो घाट इति ख्याते इति रमानाथः। इति तट्टीकायां भरतः॥ (यथा, मनुः। ८। ३०७।

"योऽरुन्धन् बलिमादत्ते करं शुल्कञ्च पार्थिवः।
प्रतिभागञ्च दण्डञ्च स सद्यो नरकं व्रजेत्॥")

वरार्दयग्रहणम् इति मेदिनी॥ (यथा, मनुः। ३। ५१।

"न कन्यायाः पिता विद्वान् गृह्णीयात् शुल्कमण्वपि।
गृह्णन् शुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयी॥")

पक्षः। यथा, महाभारते। १। १८१। ४।

"हत्वा तो धनुरायम्य शुल्कावास्तां महाबलः।
भ्राता भीमेन सहितस्त्रयो गिरिरिवाचलः॥")

शुल्वं, क्ली, रज्जुः। ताम्रम्। इत्यमरटीकायाम्॥

शुल्व, क माने। सर्गे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक-सेट्।) पञ्चमस्वरयुक्तस्तालव्यादिरन्तःस्थतृतीयोपधः। सर्गः सृष्टिः। क, शुल्वयति वेधाः पृथिवीं परिमाति सृजति वा इत्यर्थः। इति दुर्गादासः॥

शुल्वं, क्ली, (शुल्वयत्यनेनेति। शुल्व माने + घञ्। यद्वा, शुच शोके + "उल्वादयश्च।" उणा० ४। ८५। इति वन्प्रत्ययेन निपातनात् साधु) ताम्रम्। रज्जुः। इत्यमरः॥ (यथा, भागवते। २। ७। ३०।

"गृह्णीत यदयदुपबन्धममुष्य माता
शुल्वं सुतस्य न तु तत्तदमुष्य माति॥")

ताम्रपात्रपक्वान्नभोजनदोषो यथा,—

"ताम्रे पक्वा चक्षुर्हानिर्मणौ भवति वै क्षयम्।"

इति मत्स्यसूक्ते ४२ पटलः॥

यज्ञकर्म्म। आचारः। जलसन्निधिः। इति मेदिनी॥

शुल्वारिः, पुं, (शुल्वस्य अरिः।) गन्धकः। इति हेमचन्द्रः॥

शुश्रमा, स्त्री, शुक्रपत्नी। इति केचित्॥

शुश्रुवान्, [स्] त्रि, श्रुतवान्। श्रुधातोः क्वसुप्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥ (यथा, भट्टिः। १। २०।

"स शुश्रुवान् तद्वचनं सुमोह
राजा सहिष्णुः सुतविप्रयोगम्॥")

श्वश्रूः, स्त्री, माता। यथा। "शिश्वोः श्वश्रूषणात् श्वश्रूः।" इति महाभारते। १२। २६५।३२॥

शुश्रूषणं, क्ली, (शु + सन् + ल्युट्।) सेवा यथा, "शुश्रूषणोपासनञ्च सेवोपास्तिरुपासना।"

इति शब्दरत्नावली॥

(यथा, भागवते। १०। ७८। १९।

"तं यापयं जह्यि दासार्ह तल्पः शुश्रूषणं परम्॥")

शुश्रूषा, स्त्री, (शु + सन् "अ प्रत्ययात्।" ३।३। १०२। इति अः।) उपासनम्। (यथा, मनुः। २। ११२।

"धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा
तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे॥")

कथनम्। श्रोतुमिच्छा। इति मेदिनी॥ (यथा, कामन्दकीये। ४। २२।

"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणन्तथा।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः॥")

शुष, य शौ स्व शोषे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-अनिट्।) शोषः स्नेहरहितीभावः। य, शुष्यति धान्यमातपेन। शौ, शोष्टा स्व। श, अशुषत्। इति दुर्गादासः॥

शुषः, पुं,) शुष + कः।) शोषणम्। गर्त्तः। इत्यजयपालः॥

शुषिः, स्त्री, (शुष + इन्। स च कित्।) शोषः। विलम्। इति मेदिनी॥

शुषिरं, क्ली, (शुष शोषणे + "इषिमदिमुदितौ॥" उणा० १। ५२। इति किरच्। यद्वा, शुषि-

स्छिद्रमस्यास्तीति। शुषि+"ऊषशुषिमुष्कमधो रः।" ५।२।१०७। इति रः।) विवरम्। वंश्यादिवाद्यम्। सरन्ध्रे, त्रि। इत्यमरः॥ (आकाशः। इत्युज्ज्वलदत्तः। १। ५२॥)

शुषिरः, पुं, (शुषिर्विलमस्यास्तीति। शुषि+रः॥) मूषिकः। इति मेदिनी॥ अग्निः। इति विश्वः

शुषिरा, स्त्री, (शुषिर+टाप्।) नदी। इति धरणिः॥ नलीनामगन्धद्रव्यम्। इत्यमरः॥

शुषिलः, पुं, (शुष+"गुषादिभ्यः कित्।" उणा० १। ५७। इति इलच्। स च कित्।) वायुः। इत्युणादिकोषः॥

शुष्कः, त्रि, (शुष शोषे+क्तः। यद्वा, "स्रुहम्भ्रुशुविमुषिभ्यः कक्।" उणा० ३।४१। इति कक्।) निस्नेहः। शुक्ना इति भाषा। यथा,—

"शुष्कं पर्य्युषितं वापि नीतं वा दूरदेशतः।
कुक्कुरस्य मुखादभ्रष्टं तदन्नं पापनं महत्॥"
इति स्कान्दे उत्कलखण्डम्॥

(निष्प्रयोजनम्। यथा, मनुः। ४। १३८।
"शुष्कवैरं विवादञ्च न कुर्य्यात् केनचित् सह॥"

शुष्कपत्रं क्ली, (शुष्कं पत्रम्।) स्नेहरहितदलम्। आतपादिशोषितपट्टपाकम्। नालिता इति शुक्ता इति च भाषा। तस्य गुणाः।

"शुष्कपत्रं पयोमिश्रं पित्तघ्नं श्लेष्मज्वरापहम्॥)
तत् शुष्कपत्रं जलदोषनाशनं
विशेषतः पित्तकफज्वरापहम्।
जलञ्च तस्यापि च पित्तहारकं
सुरोचनं व्यञ्जनयोगकारकम्॥"
इति राजवल्लभः॥

शुष्कमत्स्यः, पुं, शुष्को मत्स्यः।) आतपादिना निस्नेहीकृतमीनः। शुकटी माछ इति भाषा॥ तस्य गुणा मत्स्यशब्दे द्रष्टव्याः॥

शुष्कमांसं, क्ली, (शुष्कं मांसम्।) आतपादिना निस्नेहीकृतमांसम्। तत्पर्य्यायः। उत्तप्तम् २ वल्लूरम् ३। इत्यमरः॥ वल्लूरा ४ शुष्कनी ५। इति तट्टीका॥ अस्य गुणाः।

"हृद्यानां दीपनं मांसं बालानां तलदं लघु।
त्रिदोषजदुर्व्यालजुष्टं शुष्कं शूलकरं गुरु॥"
इति भावप्रकाशः॥

शुष्करेवती, स्त्री, माढकाविशेषः। यथा,—

"अस्थिभ्यश्च तथा कालो सृष्टा पूर्व्वं महात्मना
तथा तद्रुधिरं पीतमन्धकानां महात्मनाम्।
या चास्मिन् कथिता लोके नामतः शुष्करेवती॥"
इति मत्स्यपुराणे १५४ अध्यायः॥

शुष्कलः, त्रि, आमिषम्। इत्युणादिकोषः॥ आमिषाशी॥ इत्यमरटीकायां भरतः॥

शुष्कलो, स्त्री, शुष्कमांसम्। मांसमात्रम्। यथा,

"शुष्कली शुष्कमांसे स्यान्मांसमात्रेऽपि दृश्यते।"
इति शौष्कलशब्दटीकायां भरतः॥

शुष्कवृक्षः, पुं, (शुष्को वृक्षः वृक्ष।) धववृक्षः। इति राजनिर्घण्टः॥

शुष्कव्रणः, पुं, (शुष्को व्रणः।) किणः। इति त्रिकाण्डशेषः॥

शुष्काङ्गः, पुं, (शुष्कं अङ्गं यस्य।) धववृक्षः। इति वैद्यकम्॥ स्नेहशून्यावयवे, त्रि॥

शुष्काङ्गी, स्त्री, (शुष्काणीव अङ्गानि यस्याः।) गोधिका। इति शब्दचन्द्रिका॥

शुष्कार्द्रं, क्ली, (शुष्कं आर्द्रम्।) शुण्ठी। इति शब्दचन्द्रिका॥

शुष्णः, पुं,(शुष्यत्यनेनेति। शुष+"वृषिशुषिरिभ्यः कित्।" उणा० ३।१२। इति नः। स च कित्।) सूर्य्यः। इत्यादिकोषः॥ अग्निः। इति संक्षिप्तसारोणादिवृत्तिः॥ (बले, क्ली। इति निघण्टुः। २। ९॥)

शुष्मं, क्ली, शुष्यत्यनेनेति। शुष शोषे+"अविसिविसिशुषिभ्यः कित्।" उणा० १। १४३। इति मन्। स च कित्।) तेजः। इति मेदिनी॥ पराक्रमः। इति हेमचन्द्रः॥

शुष्मः, पुं, (शुष्यत्यनेनेति। शुष+मन्।) सूर्य्यः। इति मेदिनी॥ अग्निः। इति त्रिकाण्डशेषः॥ वायुः। पक्षी। इति संक्षिप्तसारोणादिवृत्तिः॥ अर्चिः। यथा। शुष्मोऽर्चिषि हुताशने। इति शब्दभेदः। इत्यमरटीकायां भरतः॥

शुष्मन्, [न्] क्ली,(शुष+मनिन्। संज्ञापूर्व्वकत्वान्न गुणः।) तेजः। इति जटाधरः॥ सौष्ठवम्। इति हेमचन्द्रः॥

शुष्मा, [न्] पुं, (शुष्यत्यनेनेति। शुष शोषे+मनिन्।) अग्निः। चित्रकवृक्षः। इत्यमरः॥ अदन्तोऽपि शुष्मेति सर्व्वत्रम्। इति भरतः॥

शूकः, पुं, क्ली, (शो तनूकरणे+"उलूकादयश्च" इति ऊकप्रत्ययेन साधुः।) सस्यतीक्ष्णाग्रम्। शूँया इति भाषा। तत्पर्य्यायः। किंशारुः २। इत्यमरः॥ शूका ३ कोशी ४। इति हेमचन्द्रः॥ दया। इति मेदिनी॥ सविषाल्पडुण्डभादिजलमलोद्भवजन्तुः। शूकप्रधानलिङ्गदृद्धिकरयोगः। तद्विवरणं यथा। अथ शूकदोषाधिकारः। तत्र शूकदोषस्य निदानमाह।

"अक्रमाच्छ्लेष्मसो दृद्धिं योऽभिवाञ्छति मूढधीः
व्याधयस्तस्य जायन्ते दश चाष्टौ च शूकजाः॥"
अक्रमात् अनुचितदृद्धिक्रमात्। अनुचिता च दृद्धिः भूरिविकारजनकस्य शूकस्य योगेन। शूकजाः। शूको जलशूकः सविषो जलजन्तुविशेषः। स तु जलमलोद्भवः। अल्पडुण्डुभ इत्यादिकः। तथा शूकप्रधानो लिङ्गदृद्धिकरो वाक्ष्यायनाद्युक्तो योगः शूक उच्यते। यथा,

"भल्लातकास्थिजलशूकमधाजपत्र-
मन्तर्विदह्य मतिमान् सह सैन्धवेन।
एतद्विरूढदृढतीक्ष्णतोयपिष्ट-
मालेपितं महिषविड्विमलीकृतेऽङ्गे॥
स्थूलं महद्धरतरङ्गमलिङ्गतुल्यं
शेफः करोत्यभिमतं न हि संशयोऽस्ति।"
इत्यादि। यत्तु जलशूकरहितमश्वगन्धादितैलं तदुचितमेव लिङ्गवर्द्धनम्।

"अश्वगन्धा वरी कुष्ठं मांसी सिंहीफलान्वितम्
चतुर्गुणेन दुग्धेन तिलतैलं विपाचयेत्।
तत्तैलं मेढ्रवृषणबीजकर्षणपाणिपियर्द्धनम्॥"
ते च शूकदोषा दश चाष्टौ च भवन्ति॥*॥
तेष्वादौ सर्षपिकामाह।
"गौरसर्षपसंस्थाना शूकदुर्भगहेतुका।
पिड़िका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका तु सा॥"
शूकदुर्भगहेतुका शूकनिमित्ता दुष्टयोनिनिमित्ता च॥*॥ अष्ठीलिकामाह।
"कठिना विषमेभुंग्नैर्व्यायुनाष्ठीलिका भवेत्।"
अष्ठीला लाङ्गलस्य भागविशेषः। निघाड इति लोके। तद्वत् कठिना ग्रन्थिरूपा अष्ठीलिका। विषमैर्भुग्नैरिति वक्ष्यमाणशूकविशेषणम्। विषमैः खदोषैः। भुग्नैः वक्रैः॥*॥ ग्रथितमाह।
"शूकैर्यत् पूरितं ग्रथ्नत् ग्रथितं नाम तत् कफात्
यल्लिङ्गं सदा शूकैः पूरितं तद्ग्रथितत्वाद्ग्रथितम्॥*॥ कुम्भिकामाह॥
"कुम्भिका रक्तपित्तोत्था जम्बुकास्थिनिभा सिता॥"
कुम्भिका कुम्भतुल्यफलत्वात्॥*॥ अलजीमाह
"अलजी स्यात्तथा याद्दक् प्रमेहपिड़िकालजी।
सा च रक्ता सिता स्फोटदारुणा कथिता च सा॥"
एषा रक्तपित्तनिमित्ता ज्ञेया॥*॥ पुदितामाह।
"पुदितं पीड़ितं यत्तु संरब्धं वातकोपतः।
पाणिभ्यां भृशसंभूढे संमूढ़पिड़िका भवेत्॥"
शूकदोषे जाते पाणिभ्यां भृशसंमूढे पिच्छिते लिङ्गे अत्रापि वातकोपत इत्यनुवर्त्तते॥*॥
अवमन्थमाह।
"दीर्घा वाऽथ पिड़िका दीर्य्यते मध्यमस्तु याम्
सोऽवमन्थः कफाश्रुग्भ्यां वेदना सोमहर्षकृत्॥"
दीर्घा दीर्घाङ्कुराः॥*॥ पुष्करिकामाह।
"पिड़िका पिड़िकाव्याप्ता पित्तशोणितसम्भवा।
पद्मकर्णिकसंस्थाना ज्ञेया पुष्करिकेति सा॥"
पिड़िकाव्याप्ता क्षुद्रपिड़िकाव्याप्ता। अतएव पद्मकर्णिकसंस्थाना॥*॥ स्पर्शहानिमाह।
"स्पर्शहानिञ्च जनयेच्छोणितं शूकदूषितम्।"
अत्र स्पर्शासहत्वमेव लक्षणम्॥*॥ उत्तमामाह।
"मुद्गमाषोपमा रक्ता रक्तपित्तोद्भवा च सा।
एषोत्तमाख्या पिड़िका शूके जीर्णसमुद्भवा"*॥
शतयोनकमाह।
"च्छिद्रैरनुमुखैर्लिङ्गं चिरं यस्य समन्ततः।
वातशोणितजो व्याधिर्विज्ञेयः शतयोनकः॥"
शतयोनकं चालनी तत्तुल्यत्वाच्छतयोनकः॥*॥
त्वक्पाकमाह।
"वातपित्तकृते ज्ञेयस्त्वक्पाको ज्वरदाहकृत्।"
एतस्य लिङ्गं त्वक्पाकलक्षणम्॥*॥ शोणितार्व्वुदमाह।
"क्षणैः स्फोटैः सरक्ताभिः पिड़काभिः प्रपीड़ितम्।

लिङ्गं वासरुजयोर्या ज्ञेयं तत् शोणितार्व्बुदम्॥" वासरुजः स्फोटकाधिस्थाने वेदना ॥*॥ मांसार्व्बुदमाह।
"मांसदुष्ट्या विजानीयादर्व्बुदं मांससम्भवम्।" मांसपाकमाह।
"शीर्य्यन्ते यस्य मांसानि यस्य सर्व्वाश्च वेदनाः विद्यात्तं मांसपाकन्तु नर्व्वदोषक्रतं भिषक्॥" शीर्य्यन्ते गलन्ति। सर्व्ववेदनाः वातपित्तकफजाः विद्रधिमाह।
"विद्रधिं सन्निपातेन यथोक्तमभिनिर्दिशेत्। उक्तं सान्निपातिकविद्रधितुल्यं कथयेत्॥ *॥ तिलकालकमाह।
"क्लथानि चित्राण्यथवा शूकाणि सविषाणि तु पतितानि पचन्त्याशु मेढ्रं निरवशेषतः॥ कालानि भूत्वा मांसानि शीर्य्यन्ते यस्य देहिनः। सन्निपातसमुत्थांश्च विद्यात्तां तिलकालकान्॥" चित्राणि नानावर्णानि। शूकानि शूकव्रणानि। मक्षाः क्षोभयन्तीतिवत्। सविषाणि सविषशूकाख्यजन्तुविशेषक्रतानि। शीर्य्यन्ते गलन्ति क्षणात्तिलतुल्यत्वात् तिलकालकाः ॥*॥ असाध्यमाह।
"तच्च मांसार्व्बुदं यच्च मांसपाकश्च यः स्मृतः। विद्रधिश्च न सिध्यन्ति ये च स्युस्तिलकालकाः॥" अथ शूकदोषस्य चिकित्सा।
"शूकदोषेषु सर्व्वेषु विधिज्ञो कारयेत् क्रियाम्। अलोकाभिर्हरेद्रक्तं रेचयेल्लघु भोजयेत्॥ गुग्गुलुं पाचयेच्चापि त्रिफलाक्वाथसंयुताम्। क्षौरेण लेपयेत्काञ्च शीतानेव हि कारयेत्॥ दार्व्वीसुरसयष्ट्याह्वैर्गृहधूमनिशायुतैः। सम्यक्तैलमभ्यङ्गान्मेढ्ररोगं विनाशयेत्॥"
सुरसं तुलसी। दार्व्वीतैलम्।
"रसाञ्जनं साध्ययमेकमेव
प्रलेपमात्रेण नयेत् प्रशान्तिम्।
सपूतिपूयव्रणशोथकण्डू-
शूलान्वितं सर्व्वमनङ्गरोगम्॥"
साध्ययमित्यनङ्गरोगस्य विशेषणम्। अनङ्गरोगस्य नामापि दूरीकरोति। इति शूकदोषाधिकारः। इति भावप्रकाशः॥

शूकवः, पुं, (शूकेन कायतीति। कै+कः।) प्रावटः। रसः। इति मेदिनी॥

शूककोटः पुं, (शूकविशिष्टः कोटः।) शूकयुक्तकोटविशेषः। शूयापोका इति भाषा। तत्पर्य्यायः। इचिकः २। इत्यमरः॥ शूककोटकः ३ इति शब्दरत्नावली॥

शूककोटकः पुं, (शूककोट+स्वार्थे कन्।) शूककोटः। इति शब्दरत्नावली॥

शूकधान्यं, क्ली, (शूकप्रधानं धान्यम्।) धान्यविशेषः शूकशस्यमात्रम्। स तु धान्ययवादिः। यथा,—
"व्रीह्यादिकं यदिह शूकसमन्वितं स्यात् तत् शूकधान्यमथ सूक्ष्मकुठकादि।
शिम्बीनिगूढमिति तत् प्रवदन्ति शिम्बी-धान्यं क्षणोऽवमथो क्षणधान्यमन्यत्॥"
अस्य गुणाः।
"तत्र त्रिदोषशमनं लघु शूकधान्यं तेजोबलातिशयवीर्य्यविवृद्धिदायि।
देशे देशे शूकधान्येषु संख्या
ज्ञातुं शक्या नैव तैर्दैवतैर्व्वा॥"
इति राजनिर्घण्टः॥
अपि च।
"शूकधान्यं शमीधान्यं समातीतं प्रशस्यते। परतो वातलत्वञ्च प्रायेणाभिनवं गुरु॥"
इति राजवल्लभः॥
अन्यच्च।
"यवस्तुसितशूकः स्यात् निःशूकोऽसितयवः स्मृतः। तोक्मस्तदत् स हरितस्तदः स्वल्पश्च कीर्त्तितः॥ यवः कषायो मधुरः शीतलो लेखनो मृदुः। व्रणेषु तिलवत् पथ्यो रूक्षो मेधाग्निवर्द्धनः॥ कटुपाकोऽनभिष्यन्दी सर्य्यो बलहरो गुरुः। बहुवातमलो वर्णस्थैर्य्यकारी च पिच्छिलः। कण्ठत्वगामयश्लेष्मपित्तमेदव्रणाश्रनः॥ पीनसश्वासकासोरुस्तम्भलोहितदृष्टिप्रणुत्। अक्षादतियवो न्यूनस्तोक्मो न्यूनतरस्ततः॥"
इति भावप्रकाशः॥

शूकपिण्डिः, स्त्री, (शूकैः पिण्डते इति। पिण्ड संहतौ+इन्।) शूकशिम्बिः। इति शब्दमाला शब्दरत्नावली॥

शूकपिण्डी, स्त्री, (शूकपिण्डि+वा ङीष्।) शूकशिम्बिः। इति शब्दमालाशब्दरत्नावल्यौ॥

शूकरः, पुं, (शूकं तद्रोम रातीति। रा+कः।) पशुविशेषः। शुअोर इति भाषा। तत्पर्य्यायः। वराहः २ स्तब्धरोमा ३ रोमशः ४ किरिः ५ चक्रदंष्ट्रः ६ किटिः ७ दंष्ट्री ८ क्रोडः ९ दन्तायुधः १० बली ११ पृथुस्कन्धः १२ पोत्री १३ घोणी १४ भेदनः १५ कोलः १६ पोत्रायुधः १७ शूरः १८ वज्रपत्थः १९ रदायुधः २०। वन्यस्य तस्य मांसगुणाः। गुरुत्वम्। वातहारित्वम्। हृद्यत्वम्। बलस्वेदकरत्वञ्च॥ ग्राम्यस्य तस्य मांसगुणाः। वन्यवराहमांसादगुरुत्वम्। मेदोबलवीर्य्यवृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"तुलापगण्डवाराहचमरीवारणादयः। एते कूलेचराः प्रोक्ता यतः कूले चरन्त्यमी॥ कूलेचरा मरुत्पित्तहरा हृद्यबलापहाः। मधुराः शीतलाः स्निग्धा मूत्रलाः श्लेष्मवर्द्धनाः॥"
इति भावप्रकाशः॥

शूकरकन्दः, पुं, (शूकरप्रियः कन्दः।) वाराहीकन्दः। इति राजनिर्घण्टः॥

शूकरदंष्ट्रः, पुं, क्षुद्ररोगविशेषः। तल्लक्षणमाह।
"सदाहो रक्तपर्य्यन्तस्त्वक्पाकी तीव्रवेदनः। कण्डूमान् ज्वरकारी च स स्याच्छूकरदंष्ट्रकः॥" स गुदभ्रंशः॥*॥ तच्चिकित्सा यथा,—
"भृङ्गराजकमूलस्य रजन्या सहितस्य च। चूर्णन्तु सहसा लेपाद्धारादहिजनाशनम्॥ राजीवमूलकल्कन्तु पीतो गव्येन सर्पिषा प्रातः शमयति शूकरदंष्ट्रं दंष्ट्रीदूतज्वरं घोरम्॥ स्वजनीमार्कवमूलं पिष्टं शीतेन वारिणा। तल्लेपाद्धन्ति वीसर्पं वाराहदशनाह्वयम्॥"
इति भावप्रकाशः॥

शूकरपादिका, स्त्री, (शूकरस्य पादा इव मूलान्यस्याः। कन्। टाप्। अत इत्वम्।) कोलशिम्बी। इति राजनिर्घण्टः॥

शूकराक्रान्ता, स्त्री, (शूकरेणाक्रम्यते स्मेति। आ+क्रम+क्तः।) वराहक्रान्ता। इति शब्दचन्द्रिका॥

शूकरी, स्त्री, (शूकर+ङीष्।) वराहक्रान्ता। इति शब्दरत्नावली॥ शूकरपत्नी च॥

शूकरेष्टः, पुं, (शूकरायामिष्टः।) कमेरुः। इति राजनिर्घण्टः॥ शूकरप्रियद्रव्ये, त्रि॥

शूकलः, पुं, (शूकवत् क्लेशं लाति ददातीति। ला+कः।) दुर्व्विनीताश्वः। इति हेमचन्द्रः॥

शूकवती, स्त्री, (शूकाः सन्त्यस्याः। शूक+मतुप्।) कपिकच्छुः। इति शब्दचन्द्रिका॥ शूकयुक्ते त्रि॥

शूकशिम्बा, स्त्री, (शूकविशिष्टा शिम्बा यस्याः।) कपिकच्छुः। इति शब्दचन्द्रिका॥

शूकशिम्बिः, स्त्री, (शूकविशिष्टा शिम्बिर्यस्याः।) कपिकच्छुः। इत्यमरः॥

शूकशिम्बिका, स्त्री, (शूकयुक्ता शिम्बिका यस्याः।) कपिकच्छुः। इत्यमरटीका॥

शूकशिम्बी, स्त्री, (शूकयुक्ता शिम्बी यस्याः।) कपिकच्छुः। इत्यमरटीका॥

शूका, स्त्री, (शूकाः सन्त्यस्याः इति अर्शआदित्वादच्।) कपिकच्छुः। इति शब्दचन्द्रिका॥

शूकापूटः, पुं, क्षणमणिः। इति हारावली॥ काफुरदाना इति काइरोवा इति च पारस्यभाषा॥

शूक्ष्मं, त्रि, अल्पम्। इत्युणादिकोषः॥ अश्लक्ष्णम्। सरु इति मिही इति च भाषा। यथा,—
"बहुतन्तुसमायुक्तं षट्सूत्रादिनिर्म्मितम्। वासो देवि सुशूक्ष्मञ्च गृहाण परमेश्वरि॥"
इति कालिकापुराणम्॥

शूक्ष्मः, पुं, क्षतकः। अध्यात्मा। इत्युणादिकोषः॥

शूतिपर्णः, पुं, भारग्वधः। इति शब्दरत्नावली॥

शूद्रः, पुं, (शोचतीति। शुच शोके+"शुचेर्दश्च" उणा० २।१८। इति रक् दश्चान्तादेशो धातोर्दीर्घश्च।) चतुर्व्वर्णान्तर्गतचतुर्थवर्णः। तत्पर्य्यायः। अवरवर्णः २ क्षयजः ३ जघन्यजः ४। इत्यमरः॥ दासः ५ पादजः ६ अन्त्यजन्मा ७ जघन्यः ८ द्विजसेवकः ९। इति शब्दरत्नावली॥

पद्मः १०। इति जटाधरः॥ अन्त्यवर्णः ११ पद्मः १२। इति हेमचन्द्रः॥ चतुर्थः १३ द्विजदासः १४ उपासकः १५। इति राजनिर्घण्टः॥ प्लक्षद्वीपे तस्य संज्ञा मत्याङ्गः। शाल्मलद्वीपे कुलुन्धरः। कुशद्वीपे कुलकः। क्रौञ्चद्वीपे सेवकः। शाकद्वीपे भृतव्रतः। पुष्करद्वीपे सर्व्वे एकवर्णाः। अस्योत्पत्तिर्ब्रह्मणः पादात्। अस्य शास्त्रनिरूपितो धर्म्मः जीविका च ब्राह्मणक्षत्रियवैश्यशुश्रूषा। अस्यैकाश्रमो गार्हस्थ्यः। इति श्रीभागवतम्॥ * ॥ अथ शूद्रधर्म्मादि।

"विप्राणामर्चनं नित्यं शूद्रधर्म्मो विधीयते।
तद्द्वेषी तद्धनग्राही शूद्रचाण्डालतां व्रजेत्॥
गृध्रः कोटिसहस्राणि शतजन्मानि शूकरः।
श्वापदः शतजन्मानि शूद्रो विप्रधनापहः॥
यः शूद्रो ब्राह्मणीगामी मातृगामी स पातकी।
कुम्भीपाके पच्यते स यावद्वै ब्रह्मणः शतम्॥
कुम्भीपाके तप्ततैले भुक्तः सर्पैरहर्निशम्।
शब्दञ्च विकृताकारं कुरुते यमताड़नात्॥
तदा चाण्डालयोनिः स्यात् सप्तजन्मसु पातकी
सप्तजन्मसु सर्पश्च जलौका सप्तजन्मसु॥
जन्मकोटिसहस्रञ्च विष्ठायां जायते कृमिः।
योनिकृमिः पुंश्चलीनां स भवेत् सप्तजन्मसु॥
गवां वृषकृमिः स्याच्च पातकी सप्तजन्मसु।
योनौ योनौ भ्रमत्येवं न पुनर्जायते नरः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः॥

अपि च।

"द्विजानां पादशुश्रूषा शूद्रैः कार्य्या सदा त्विह
पादप्रक्षालनं गन्धैर्भोज्यमुच्छिष्टमात्रकम्॥
ते तु चक्रुस्तदा चैव तेभ्यो भयः पितामहः।
शुश्रूषार्थं मया यूयं तुरीये तु पदे कृताः॥
द्विजानां क्षत्रवर्गाणां वैश्यानाञ्च भवद्विधाः।
विभ्यः शुश्रूषणा कार्य्या इत्यवादीद्विधस्तदा॥"

इति पाद्मे सृष्टिखण्डे १६ अध्यायः॥

किञ्च।

"शुश्रूषैव द्विजातीनां शूद्राणां धर्म्मसाधनम्।
कारुकर्म्म तथाजीवः पाकयज्ञोऽपि धर्म्मतः॥

इति गारुड़े ४८ अध्यायः॥

शूद्रराज्ये वासनिषेधो यथा,—

"धार्म्मिकैर्नावृते ग्रामे न व्याधिबहुले नृशम्।
न शूद्रराज्ये निवसेत् न पाषण्डजनैर्वृते॥"

शूद्राय मतिदाननिषेधो यथा,—

"न शूद्रस्य मतिं दद्यात् क्षुरं पायसं दधि।
नोच्छिष्टं वा मधु घृतं न च कृष्णाजिनं हविः।
न चैवास्मै व्रतं ब्रूयात् न च धर्म्मान् वदेद्बुधः॥

इति कौर्म्मे उपविभागे १५ अध्यायः॥ * ॥

शूद्राणां वेदाधिकारनिषेधो यथा,—

"त्रयो वर्णा महाभाग यज्ञसामान्यभागिनः।
शूद्रा वेदपविलेभ्यो ब्राह्मणैस्तु बहिष्कृताः॥"

इति वाराहे संसारचक्रनामाध्यायः॥*॥

कली ते धन्याः यथा,

"कलिः साध्विति यत् प्रोक्तं शूद्रः साध्विति योषितः।
यदाह भगवान् साधुर्धन्यार्येति पुनः पुनः॥"

इति विष्णुपुराणे ६। २। १२॥

तस्य मद्यपानादौ दोषो यथा,—

"तथा मद्यस्य पानेन ब्राह्मणीगमनेन च।
वेदाक्षरविचारेण शूद्रचाण्डालतां व्रजेत्॥"

इति शूद्रकमलाकरधृतपराशरवचनम्॥

ब्राह्मणस्य तदन्नभोजननिषेधो यथा,—

"शूद्रान्नं ब्राह्मणोऽश्नन् वै मासं मासार्द्धमेव वा।
तदृयोनावभिजायेत सत्यमेतद्विदुर्बुधाः॥
अथोदरस्थशूद्रान्नो मृतः श्वानोऽपि जायते।
द्वादश दश चाष्टौ च गृध्रशूकरपुष्करः॥
उदरस्थितशूद्रान्नो ह्यधीयानोऽपि नित्यशः।
जुह्वन् वापि जपन् वापि गतिमूर्द्धं न विन्दति॥
अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्।
वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम्॥
तस्मात् शूद्रं न भिक्षेत यज्ञार्थं सद्विजातयः।
श्मशानमिव सच्छूद्रस्तस्मात्तं परिवर्ज्जयेत्॥
कृमीनामथवा भिक्षां कुर्य्याच्चातिविकर्षितः।
सच्छूद्राणां गृहे कुर्व्वन् तत्पापेन न लिप्यते॥
विष्णुदान्वयसंजातो निहतो मद्यमांसतः।
द्विजभक्तो वणिग्वृत्तिः शूद्रः स परिकीर्त्तितः॥"

इति बृहत्पराशरसंहितायाम् ४ अध्यायः॥*॥

अपि च। हारीतः।

"शूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः।
स वै खरत्वमुष्ट्रत्वं शूद्रत्वाधिगच्छति॥"

शूद्रान्नं शूद्रस्वामिकान्नं तद्दत्तमपि भोजनकालेतदृग्दृष्टावस्थितं यत्तदपि शूद्रान्नम्। तदाहाङ्गिराः।

"शूद्रवेश्मनि विप्रेण चीरं वा यदि वा दधि।
निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्॥"

अपिशब्दात् साक्षात्तद्दत्तघृततण्डुलादि। न तु तद्दत्तकपर्दकादिना क्रीतमपि। स्वगृहागते पुनरङ्गिराः।

"यथा यतस्ततो ह्यापः भूमिं यान्ति नदीं गताः।
शूद्रादिप्रगृहैश्वर्यं प्रविष्टन्तु सदा शुचि॥"

प्रविष्टं ज्ञात्वापादकप्रतिग्रहादिनेति शेषः। अतएव पराशरः।

"तावच्चरति शूद्रान्नं यावन्न स्पृशति द्विजः।
द्विजातिकरसंस्पृष्टं सर्व्वं तद्विरुध्यते॥"

स्पृशति प्रतिगृह्णातीति कल्पतरुः॥ तच्च संप्रोक्ष्य ग्राह्यमाह विष्णुपुराणम्।

'संप्रोक्षयित्वा गृह्णीयाच्छूद्रान्नं गृहमागतम्॥"

तच्च पात्रान्तरे ग्राह्यमाहाङ्गिराः।

"स्वपात्रे यत्तु विन्यस्तं शूद्रो यच्छति नित्यशः।
पात्रान्तरगतं ग्राह्यं दुग्धं स्वगृहमागतम्॥"

एतेन स्वगृहमागतस्यैव शूद्रत्वं तद्गृहगतस्य शूद्रान्नदोषभागित्वं प्रतीयते। ततश्च तादृशमपि सुमूर्षुणा सर्व्वथा शूद्रान्नं न भोक्तव्यम्। इति शुद्धितत्त्वम्॥ * ॥ कली शूद्रविशेषान्नभोजननिषेधो यथा,—

"शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम्।
भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः॥
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः।
निवर्त्तितानि कर्म्माणि व्यवस्थापूर्व्वकं बुधैः॥"

इति तिथ्यादितत्त्वम्॥

अपरञ्च।

व्यास उवाच।

"नाद्यात् शूद्रस्य विप्रोऽन्नं मोहाद्वा यदि वान्यतः।
स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि॥
षण्मासान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम्।
जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते॥
ब्राह्मणक्षत्रियविशां शूद्रस्य च सुनीश्वराः।
यस्यान्नेनोदरस्थेन मृतस्तद्योनिमाप्नुयात्॥"

कलीतरत्र शूद्रविशेषान्नभोजनविधिर्यथा,—

"आर्त्तिजः कुलमित्रञ्च गोपालो दासनापितौ।
एते शूद्रेषु भोज्यान्ना यस्चात्मानं निवेदयेत्॥
कुशीलवः कुम्भकारः क्षेत्रकर्म्मक एव च।
एते शूद्रेषु भोज्यान्ना दत्त्वा स्वल्पं पयं बुधैः॥
पायसं स्निग्धपक्वञ्च यावत्सञ्चैव शक्तयः।
पिण्याकञ्चैव तैलञ्च शूद्रादग्राह्यं द्विजातिभिः॥

इति कौर्म्मे उपविभागे १६ अध्यायः॥

अपि च।

"कन्दुपक्वानि तैलेन पायसं दधिशक्तवः।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि॥"*॥

अन्यच्च।

"शूद्रास्तु ये दानपरा भवन्ति
व्रतान्विता विप्रपरायणास्तु।
अन्नं हि तेषां सततं सुभोज्यं
भवेद्द्विजैर्दृष्टमिदं पुरातनैः॥
तस्माद्दानं प्रकर्त्तव्यं व्रतस्थेन प्रयत्नतः।
सर्व्वपापविनाशाय महत्सुखविवृद्धये॥"

इति वह्निपुराणे हव्यदानाध्यायः॥ * ॥

वैदिकेतरमन्त्रपाठे शूद्रादेरप्यधिकारः। वेदमन्त्रवर्জ्जं शूद्रस्येति छन्दोगाह्निकाचारचिन्तामणिधृतस्मृतौ वेदेति विशेषणात्। एवञ्च पुराणमधिकृत्य।

"अध्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं विना।
श्रोतव्यमिह शूद्रेण नाध्येतव्यं कदाचन॥"

इति भविष्यपुराणवचनं पुराणमन्त्रेतरपरम्॥ पञ्चयज्ञस्नानश्राद्धेषु पौराणिकमन्त्रोऽपि निषिद्धः शूद्रमधिकृत्य।

"नमस्कारेण मन्त्रेण पञ्चयज्ञान् ह्यापयेत्॥"

इति याज्ञवल्क्येन॥

"ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते।
तूष्णीमेव हि शूद्रस्य सनमस्कारकं मतम्॥"

इति योगियाज्ञवल्क्येन॥

श्राद्धमधिकृत्य।

"अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्জ्जितः।
समन्त्रस्तु शूद्रस्य विप्रो मन्त्रेण गृह्णते॥"

इति वराहपुराणेन च॥

नमस्कारेणेति तूष्णीमिति मन्त्रवर्ज्जितमिति चाभिधानादेतत्परं वैदिकपरञ्च शूद्राधिकारि गोतमवचनम्। अनुमतोऽस्य नमस्कारो मन्त्र इति। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् स मृतोऽधो गच्छतीति। इति तिथ्यादितत्त्वम् ॥*॥* प्रसङ्गादत्र कायस्थोत्पत्तिर्लिख्यते। पाद्मे सृष्टिखण्डे।

"सृष्ट्यादौ सदसत्कर्म्मज्ञप्तये प्राणिनां विधिः।
क्षणं ध्याने स्थितस्याथ सर्व्वकायाद्विनिर्गतः ॥
दिव्यरूपः पुमान् हस्ते मसीपात्रञ्च लेखनीम्।
चित्रगुप्त इति ख्यातो धर्म्मराजसमीपतः ॥
प्राणिनां सदसत्कर्म्मलेखाय स निरूपितः।
ब्रह्मणातीन्द्रियज्ञानी देह्यान्योर्यज्ञभुक् स वै।
भोजनाच्च सदा तस्मादाहुतिर्दीयते द्विजैः ॥
ब्रह्मकायोद्भवो यस्मात् कायस्थो जातिरुच्यते।
नानागोत्राश्च तद्वंश्याः कायस्था भुवि सन्ति वै ॥"*॥

प्रकारान्तरम् यथा. स्कान्दे रेणुकामाहात्म्ये।

"एवं हत्वार्জ্জुनं रामः सन्धाय निशितान् शरान्।
एक एव ययौ हन्तुं सर्व्वानेवातुरान् नृपान् ॥
केचिद्रहनमाश्रित्य केचित् पातालमाविशन्।
सगर्भा चन्द्रसेनस्य भार्य्या दालभ्याश्रमं ययौ ॥
ततो रामः समायातो दालभ्याश्रममनुत्तमम्।
पूजितो मुनिना सद्योऽन्वर्थ्यपाद्यासनादिभिः ॥
ददौ मध्याह्नसमये तस्मै भोजनमादरात्।
रामस्तु भावयामास हृदिस्थं स्वमनोरथम्।
याचयामास रामाच्च कामं दालभ्यो महामुनिः ॥
ततो द्वौ परमप्रीतौ भोजनं चक्रतुर्मुदा।
भोजनानन्तरं दालभ्यः पप्रच्छ भार्गवं प्रति।
यत्त्वया प्रार्थितं देव तत्त्वं शंसितुमर्हसि ॥

राम उवाच।

तवाग्रमे महाभाग सगर्भा स्त्री समागता।
चन्द्रसेनस्य राजर्षेः क्षत्रियस्य महात्मनः ॥
तस्मै त्वं प्रार्थितं देहि हिंसेयं तां महामुने।

ततो दालभ्यः प्रत्युवाच ददामि तव वाञ्छितम्

दालभ्य उवाच।

स्त्रियं गर्भमिमं बालं तस्मै त्वं दातुमर्हसि।
ततो रामोऽब्रवीद्दालभ्यं यदर्थमहमागतः ॥
क्षत्रियान्तकरश्चाहं तत्त्वं याचितवानसि।
प्रार्थितश्च त्वया विप्र कायस्थो गर्भ उत्तमः ॥
तस्मात् कायस्थ इत्याख्या भविष्यन्ति शिशोः शुभाः ॥

एवं रामो महाबाहुर्हित्वान्तर्गर्भमुत्तमम् ॥
निर्জগামाश्रमात्तस्मात् क्षत्रियान्तकरः प्रभुः।
कायस्थ एष उत्पन्नः क्षत्रियां क्षत्रियात्ततः ॥
रामाज्ञया स दालभ्येन क्षत्रधर्म्माद्दिक्षितः।
कायस्थधर्म्मोऽभ्ये दत्तश्चित्रगुप्तस्य यः स्मृतः ॥
तद्गोत्रजाश्च कायस्था दालभ्यगोत्रास्ततोऽभवन्।
दालभ्योपदेशतस्ते वै धर्म्मिष्ठाः सत्यवादिनः ॥
सदाचारपरा नित्यं रता हरिहरार्च्चने।
देवविप्रपितृणाञ्च अतिथीनाञ्च पूजकाः ॥"*॥

प्रकारान्तरम्।

"माहिष्यवनितासूनुर्वैदेहात् यः प्रसूयते।
स कायस्थ इति प्रोक्तस्तस्य धर्म्मो विधीयते ॥
क्षत्राद्वैश्यायां माहिष्यो वैश्याद्विप्राजो वैदेहः।
लिपीनां देशजातानां लेखनं स समाचरेत् ॥
गणकत्वं विचित्रञ्च बीजपाटी प्रभेदतः।
अधमः शूद्रजातिभ्यः पञ्चसंस्कारवानसौ ॥
चातुर्वर्णस्य सेवां हि लिपिलेखनसाधनाम्।
व्यवसायः शिल्पकर्म्म तज्जीवनमुदाहृतम् ॥
शिखां यज्ञोपवीतञ्च वस्त्रमारक्तमश्मसा।
स्वर्गं देवतानाञ्च कायस्थाद्यो विवर्জ্জयेत् ॥"

इति कमलाकरभट्टकृतशूद्रधर्म्मतत्त्वम् ॥

शूद्रकृत्यं, क्ली, (शूद्रस्य कृत्यम्।) शूद्रकर्त्तव्यकर्म्म यथा,—

"प्रणम्य सच्चिदानन्दं शूद्राणां न्यायवर्त्तिनाम्।
आह्निकं कृत्यमोस्तत्त्वं वक्ति श्रीरघुनन्दनः ॥"

तत्र मत्स्यपुराणम्।

"एवं शूद्रोऽपि सामान्यं हृदिस्थाद्यञ्च सर्व्वदा।
नमस्कारेण मन्त्रेण कुर्य्यादामन्त्रवद्बुधः ॥
दानः प्रधानः शूद्रः स्यादित्याह भगवान् प्रभुः।
दानेन सर्व्वं कामाप्तिरस्य संजायते यतः ॥"

ततो दानमेवापेक्षितं न तु भोजनमपि। सामान्यं सर्व्वजनकर्त्तव्यत्वेन प्रतिमासकृष्णपक्षादिविहितं आद्यं आभ्युदयिकश्राद्धञ्च एवं द्विजातिवत् शूद्रोऽपि कुर्य्यादित्यन्वयः। नमस्कारेण मन्त्रेण नतुस्वयं पठितमन्त्रेण आमन्त्रवदित्यनेनजलसेकसिद्धान्तव्याहृत्तिः। स्विन्नमन्नमुदाहृतम्। इति वशिष्ठेन स्विन्नस्यैवान्नत्वाभिधानात्। कन्दुपक्वस्येभृष्टत्वं नतु स्विन्नत्वम्। हारीतेन स्वेदनभर्জ্জनयोः पृथक्त्वमुक्तम्। यथा। आदीपनतापनस्वेदनभर्জ্জनपचनादिभिः पञ्चमीति अस्यार्थः। आदीपनं काष्ठानाम् तापनं तोयादेः। स्वेदनं धान्यादेः। भर्জ্জनं यवादेः। पचनं तण्डुलादेः। इति पञ्चमी। सूना इति कल्पतरुः। अतएव स्विन्नधान्येन व्यवक्रियते।

"कन्दुपक्वानि तैलेन पायसं दधि शष्कुलिः।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि ॥"

इति कुर्म्मपुराणवचनेन शूद्रकर्त्तृककन्दुपक्वादेर्ब्राह्मणस्य भक्ष्यत्वेन श्राद्धे देयत्वं युक्तम्। कन्दुपक्वं जलोपसेकं विना केवलपात्रेण यदवह्निना पक्वम्। पायसं पाकेन काठिन्यविकारापन्नं दुग्धम्। परमान्नपरत्वे पुंलिङ्गनिर्द्देशापत्तेः ॥ तथा चामरः। परमान्नन्तु पायस इति।

"दिने चयोदशे प्राप्ते पाकेन भोजयेद्द्विजान्।
अयं विधिः प्रयोक्तव्यः शूद्राणां मन्त्रवर्জ্জितः ॥"

इति आदित्यपुराणवचनमपि कन्दुपक्वपरम्। एवन्तु एतद्वचनं सच्छूद्रपरं मैथिलोक्तं ज्ञेयम्। एवं आममांसस्यापि श्राद्धे देयत्वं सामगश्राद्धतत्त्वे उनुसन्धेयम्। तत्र द्रव्यदेवताप्रकाशार्थं ब्राह्मणेन मन्त्राः। पाठ्याः।

"अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्জ্জितः।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते ॥"

इति वराहपुराणात् ॥

अयं आद्देतिकर्त्तव्यताको विधिः शूद्रकर्त्तृकमन्त्रपाठरहितः। शूद्रस्य मन्त्रपाठानधिकारसिद्धौ यदमन्त्रस्येति पुनर्वचनं तत् स्त्रिया ग्रहणार्थं परिभाषार्थञ्च। ततश्च तत्कर्म्मसम्बन्धिमन्त्रेण विप्रस्तदीयकर्म्मकारयितव्राह्मणो गृह्यते तेन ब्राह्मणेन तत्र मन्त्रः पठनीय इति तात्पर्य्यम्। तत्र यजुर्व्वेदिको मन्त्रः। तथा च स्मृतिः।

"आर्षक्रमेण सर्व्वत्र शूद्रो वाजसनेयिनः।
तस्माच्छूद्रः स्वयं कर्म्म यजुर्व्वेदेन कारयेत्॥"

आर्षक्रमेण मुन्युक्तक्रमेण यजुर्व्वेदिसम्बन्धिगृह्यादिना।

"चतुर्णामपि वर्णानां यानि प्रोक्तानि वेधसा।
धर्म्मशास्त्राणि राजेन्द्र शृणु तानि नृपोत्तम ॥
विशेषतस्तु शूद्राणां पावनानि मनीषिभिः।
अष्टादश पुराणानि चरितं राघवस्य च ॥
रामस्य कुरुशार्দুল धर्म्मकामार्थसिद्धये।
तथोक्तं भारतं वीर पाराशर्য্যेण धीमता।
वेदार्थं सकलं योज्यं धर्म्मशास्त्राणि च प्रभो॥"

इति भविष्यपुराणवचनात्तेषां पौराणिकादिविधिर्योज्यो योजयित्वा। अत्र च आद्धे वेदमन्त्रवर्জ্জं शूद्रस्येतिवचने वेदेत्युपादानात् आद्धे पुराणमन्त्रः शूद्रेण पठनीय इति मैथिलोक्तम् तत्र वराहपुराणे शूद्राणां मन्त्रवर्জ্জित इत्यनेन मन्त्रमात्रनिषेधात् मत्स्यपुराणेन नमस्कारेण मन्त्रेण इत्युपादानाच्च। पौराणिकस्यापि आद्धे निषेधः प्रतीयते। एवं स्नानेऽपि।

"ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते।
तूष्णीमेव हि शूद्रस्य सनमस्कारकं मतम् ॥"

इत्यनेन नमस्कारविधानात् पञ्चयज्ञेऽपि।

"शूद्रस्य द्विजशुश्रूषा तया जीवनवान् भवेत्।
शिल्पैर्वा विविधैर्जीवेत् द्विजातिहितमाचरन् ॥
भार्য্यारतिः शुचिर्भृत्यभर्त्ता श्राद्धक्रियारतः।
नमस्कारेण मन्त्रेण पञ्चयज्ञान् न हापयेत् ॥"

इति नमस्कारमात्रविधानात् श्राद्धादिषु पौराणिकमन्त्रनिषेधः ततश्च स्नानश्राद्धपञ्चयज्ञेषु तत्र शूद्रस्य पौराणिकमन्त्रपाठः प्रतीयते। अत्र।

"षष्ठे ऽब्दप्राशनं मासि यद्वेष्टं मङ्गलं कुले ॥"

इति मनुवचनात्। चूड़া कार्য্या यथाकुलं इति याज्ञवल्क्यवचनाच्च संस्कारमात्रे कुलधर्म्मानुरोधेन कालान्तरस्य नामविशेषोच्चारणस्याभिधानाच्च शूद्रादीनां नामकरणे वसुघोषादिकपद्धतियुक्तनामकरणस्यैव प्रतीतेर्व्वैदिकधर्म्मेणि शूद्राणां पद्धतियुक्तनामाभिधानं क्रियते इति॥

शूद्रस्याचमने दैवतीर्थेन ओष्ठौ जलं सकृत् पिबेत् न पिबेत्। तथा च याज्ञवल्क्यः।

"कण्ठतालुगाङ्गिस्तु यथासंख्यं द्विजातयः।
शूद्रः सकृत् स्त्री च शूद्रश्च सकृत् स्पृष्टाभिरन्ततः॥"

अन्ततो हृदयादिसमीपेन ओष्ठेन उत्तरोत्तर-

मपकर्षात्। अतएव सृष्टाभिरित्युक्तं न तु भक्षिताभिरिति।
"स्त्री शूद्रः शुध्यते नित्यं क्षालनाच्च करोष्टयोः॥"
इति ब्रह्मपुराणवचनञ्च। याज्ञवल्क्यः।
"प्राग्वा ब्राह्म्येण तीर्थेन द्विजो नित्यमुपस्पृशेत्।"
अत्र द्विजस्यैव आचमने ब्राह्म्यतीर्थोपादानात् स्त्रीशूद्रयोर्न तेनाचमनम्। एवमेव मिताक्षरायां व्यक्तमुक्तं मरीचिना।
"स्त्रियास्तैर्दक्षिणं तीर्थं शूद्रजातेस्तथैव च।
सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः॥" इति।
एतदनन्तरं इन्द्रियाटिप्पणन्तु ब्राह्मणवदेव।
प्रमाणान्तरन्तु वाजसनेयिसामगब्राह्मणाद्धिकतत्त्वयोरनुसन्धेयम्। इतिवन्द्याघटीयश्रीहरिहरभट्टाचार्य्यात्मज-श्रीरघुनन्दनभट्टाचार्य्यविरचितं शूद्राह्निकाचारतत्त्वं समाप्तम्॥

शूद्रधर्म्मः, पुं, (शूद्रस्य धर्म्मः।) शूद्रस्य शास्त्रविहिताचारः। तस्य विवरणं शूद्रकृत्यशब्दे द्रष्टव्यम्॥

शूद्रप्रियः, पुं, (शूद्राणां प्रियः।) पलाण्डुः। इति राजनिर्घण्टः॥ शूद्रस्य प्रियद्रव्ये, त्रि॥

शूद्रप्रेष्यः, पुं, (शूद्रस्य प्रेष्यः।) शूद्रस्य परिचारकब्राह्मणादिः। इति कैचित्॥

शूद्रशासनं, क्ली. (शूद्रस्य शासनम्।) शूद्रस्याधिकारो लेख्यपत्रादिर्वा। यथा,—
"स्यादभिषन्दिरमणं शास्त्रानगरमित्यपि।
शासनं धर्म्मकीलः स्यान्मकुतिः शूद्रशासनम्॥"
इति पुरवर्गे त्रिकाण्डशेषः॥

शूद्रा, स्त्री. (शूद्रस्य जातिः। शूद्र+"शूद्रा चामहत्पूर्व्वा जातिः।" इति टाप्।) शूद्रजातिस्त्री। इत्यमरः॥ (यथा, मनुः।३।१३
शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते॥")

शूद्रान्न, क्ली,(शूद्रस्य अन्नम्।) शूद्रस्वामिकान्नम्। यथा,—
"शूद्रान्ने तु भुक्तेन उदरस्थेन यो मृतः।
स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चाधिगच्छति॥"
शूद्रान्नं शूद्रस्वामिकान्नम्। इति शुद्धितत्त्वम्॥ अन्यत् शूद्रशब्दे द्रष्टव्यम्॥

शूद्राभार्य्यः,पुं, शूद्रा भार्य्या यस्य सः। शूद्रास्वामी इति व्याकरणम्॥

शूद्रार्त्ता, स्त्री, (शूद्रेण आर्त्ता।) प्रियङ्गुवृक्षः। इति शब्दचन्द्रिका॥

शूद्रावेदी, [न्]पुं, (शूद्रां विन्दतीति। विद्+णिनिः।) शूद्रविवाहकर्त्ता। यथा,—
"शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च।
यौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः॥"
इति दायभागः॥

शूद्री, स्त्री, (शूद्रस्य स्त्री। "पुंयोगादाख्यायाम्।" ४।१।४८। इति ङीप्।) शूद्रस्य भार्य्या। इत्यमरः॥ (यथा, याज्ञवल्क्ये। १।९१।
"विप्रात् मूर्द्धाभिषिक्तो हि क्षत्रियायां विशः स्त्रियाम्।
अम्बष्ठः शूद्रया निषादो जातः पारशवोऽपि वा॥")

शून, त्रि,(टु श्वि गतिवृद्ध्योः+क्तः।) "ओदितश्च।" ८।२।४५। इति निष्ठानस्य नः। "वचिस्वपियजादीनां किति।६।१।१५। इति संप्रसारणम्।) इलः।६।४।२। इति दीर्घः। "श्वीदितो निष्ठायाम्।"७।२।१४। इति इडागमश्च न।) वर्द्धितः। इति व्याकरणम्॥ (यथा, सुश्रुते। ५।२।
"दुर्व्वर्णं हरितं शूने जायते चास्य लोचने॥"
शून्ये, त्रि। यथा ऋग्वेदे। ७।१।११।
मा शूने अग्ने निषदाम नृणाम्॥"
"हे अग्ने! शूने शून्ये पुत्रादिरहिते गृहे मा निषदाम न निवसाम।" इति तद्भाष्ये सायणः)

शूनवान्, [त्] त्रि, (टु श्वि गतिवृद्ध्योः+क्तवतु।)वर्द्धितः। इति व्याकरणम्॥

शूना, स्त्री, (म्रियन्ति मृत्युं गच्छन्ति कीटादयो यत्र। श्वि+क्तः। टाप्।) प्राणिवधस्थानम्। इति हलायुधः॥ पञ्चविधा शूना यथा,—
"पञ्च शूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते याश्च वाहयन्॥"
पञ्चशूनापापनाशो यथा, मनुः।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥
पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।
स गृहेऽपि वसन्नित्यं शूनादोषैर्न लिप्यते॥"
इति प्रायश्चित्ततत्त्वम्॥
अधोजिह्विका। इति हारावली॥

शूनावान्, [न्] पुं, (शूना+मतुप्। मस्य वः।) शूना विद्यते यस्य सः। कसाइ इति भाषा। इति कैचित्॥

शून्य, क्ली, आकाशम्। इति शब्दचन्द्रिका॥ (यथा, भागवते। ६।१३।२०।
"स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप।
नीतस्तेनैव शून्याय नीहार इव भानुना॥")
बिन्दुः इति हेमचन्द्रः॥

शून्यः, त्रि, अतिशयेन ऊनः। अभावविशिष्टः। असम्पूर्णः। खालि इति पारस्यभाषा। तत्पर्य्यायः। वशिकः २ तुच्छः ३ रिक्तकः ४। इत्यमरः॥ शून्यम् ५। इति तट्टीकायां भरतः॥
"अविद्यजीवनं शून्यं दिक् शून्या चेदबान्धवा।
पुत्रहीनं गृहं शून्यं सर्व्वशून्या दरिद्रता॥"
इति चाणक्यम्॥
(शून्यार्थे प्राणिहिंसार्थे हितः रहस्यस्थानत्वात् शूना+यत्। यद्वा, शूने हितम्। खञ्+"शुनः सम्प्रसारणं वा च दीर्घत्वम्।५।१।२। इत्यस्य वार्त्तिकोक्त्या यत् सम्प्रसारणं दीर्घत्वञ्च।) निर्ज्जनः। इति मेदिनी॥ (यथा, भट्टिः।१८।२८
"केन संविद्रते नान्यस्त्वतो बान्धववत्सलः।
विरौमि शून्यं प्रोर्णौमि कथं मन्युसमुद्भवम्॥")

शून्यमध्यः, पुं, (शून्यं मध्यं यस्य।) नलः।) इति राजनिर्घण्टः॥ शून्यगर्भवस्तुनि, त्रि॥

शून्यवादी, [न्] पुं, (शून्यं वदतीति। वद्+णिनिः।) सौगतः। इति जटाधरः॥ नास्तिकश्च॥

शून्या, स्त्री, नली। इति विश्वमेदिन्यौ॥ महाकण्टकिनी। इति शब्दचन्द्रिका॥ फणीमनसा इति ख्याता। वन्ध्या। इति राजनिर्घण्टः॥

शून्यालयः, पुं,(शून्य आलयः।) निर्ज्जनगृहम्। अत्र शयननिषेधो यथा। "मार्कण्डेयः।
'शून्यालये श्मशाने च एकवस्त्रे चतुष्पथे।
महादेवगृहे चापि शर्करालोष्टपांशुषु॥
धान्यगोविप्रदेवानां गुरुवाक्ष्च तथोपरि।
न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम्॥
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः।
नाकाशे सर्व्वशून्ये च न च चैत्यद्रुमे तथा॥'
न स्वपेदित्यर्थः।" इत्याह्निकतत्त्वम्॥

शूपकारः, पुं, (शूपं करोतीति। कृ+अण्।) शूद्राणां पाचकः। यथा,—
"शूद्रपाकोपजीवी यः शूपकार इति स्मृतः।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥ अन्यत् दन्यसकारादौ द्रष्टव्यम्॥

शूर, ङ य ई स्तम्भे। हिंसे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-स्तम्भे अक०-हिंसे सक०-सेट्। निष्ठायामनिट्।) ङ य, शूर्य्यते। ई, शूर्णः। स्तम्भो जड़ीभावः। इति दुर्गादासः॥

शूर, त् क ङ विक्रमे। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-आत्म०-अक०-सेट्।) ङ, अशूरत्। विक्रमः उद्यमः। इति दुर्गादासः॥

शूरः,पुं, (शूरयति विक्रामतीति। शूर+अच्। यद्वा, शवति वीर्य्यं प्राप्नोतीति। शू+"शूसिचिमिजां दीर्घश्च।" उणा० २।२५। इति क्रन् दीर्घश्च।) वीरः। इत्यमरः॥ (यथा, महाभारते। १।१०८।४।
"शूराश्च कृतविद्याश्च सन्तश्च सुखिनोऽभवन्॥")
यादवः। स तु श्रीकृष्णस्य पितामहः। इति मेदिनी॥ (यथा, भागवते। ८।२४।२६।
"शूरो विदूरथादासीत् भजमानस्तु तत्सुतः॥")
सूर्य्यः। इति त्रिकाण्डशेषः॥ सिंहः। शूकरः। चित्रकः। साल्लः। लकुचः। मसूरः। इति राजनिर्घण्टः॥

शूरणः, पुं, (शूर्य्यते इति। शूर हिंसे+क्युः।) मूलविशेषः। ओल इति भाषा। तत्पर्य्यायः। अर्शोघ्नः २ कन्दः ३। इत्यमरः॥ सूरणः ४। इति तट्टीका॥ ओलः ५। इति जटाधरः॥ ओल्लः ६। इति मेदिनी॥ कण्डूलः ७ कन्दोट सुकन्दी ८ खूलकन्दकः १० दुर्नामारिः ११ सुवृत्तः १२ वातारिः १३ कन्दशूरणः १४ तीव्रकण्डः १५ कन्दार्शः १६ कन्दवर्द्धनः १७ बहुकन्दः १८ दृढकन्दः १९ शरकन्दः २०। अस्य गुणाः। कटुत्वम्। दृढत्वम्। दीपनत्वम्। पाचनत्वम्। कृमिकफानिलश्वासकासवमनार्शः

शूलगुल्मनाशित्वम्। अस्रदोषकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"शूरणो दीपनो रूक्षः कषायः कण्डुकृत् कटुः।
विष्टम्भी विषदो रुच्यः कफार्शःक्लमनो लघुः॥
विशेषादर्शसे पथ्यः प्लीहगुल्मविनाशनः।
सर्व्वेषां कन्दशाकानां शूरणः श्रेष्ठ उच्यते॥
दद्रूणां रक्तपित्तानां कुष्ठानां न हितो हि सः।
सन्धानयोगसंप्राप्तः शूरणो गुणकृत्तमः॥"
इति भावप्रकाशः॥

अन्यच्च।
"शूरणो दीपनो रूक्षः कफघ्नो विशदो लघुः।
विशेषादर्शसां पथ्यो ग्राम्यकन्दस्तु दोषलः॥"
इति राजवल्लभः॥

म्लेनाकन्दकः। इति शब्दमाला॥

शूरणोद्भुजः, पुं, हरिद्राङ्गपक्षी। इति शब्दचन्द्रिका॥

शूरदेवः, पुं, चतुर्व्विंशतिभाव्यर्हदन्तर्गताईद्विशेषः। इति हेमचन्द्रः॥

शूरसेनः, पुं, (शूराः सेना यस्य।) राजविशेषः। देशविशेषः। यथा,—
"शूरसेनो यदुपतिर्मथुरामावसन् पुरीम्।
माथुरान् शूरसेनांश्च विषयान् बुभुजे पुरा॥"
इति श्रीभागवते १० स्कन्धे १ अध्यायः॥

शूर्प, क मानने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) षष्ठस्वरः। क, शूर्पयति धान्यं गृह्णाति। इति दुर्गादासः॥

शूर्पः, पुं क्लो.(शूर्पयति धान्यादीनिति। शूर्प+अच्। यद्वा शृ हिंसायाम्+"वृञ्भ्यां निच्च।" उणा० ३। २६। इति पः। चकारात् म च कित्।) तण्डुलादिस्फोटनार्थं वंशादिनिर्म्मितपात्रविशेषः। कुला इति भाषा। तत्पर्य्यायः। प्रस्फोटनम् २। इत्यमरः॥ सूपः ३ कुल्यः ४ प्रस्फोटनी ५। इति शब्दरत्नावली॥ (यथा,
"विसृज्य सूर्पवत् दोषान् गुणान् गृह्णन्ति साधवः॥")
द्रोणद्वयपरिमाणम्। इति शब्दमाला॥

शूर्पकः, पुं,(शूर्प इव प्रतिकृतिरस्य। "इवे प्रतिकृतौ।" इति कन्।) असुरविशेषः। स च कामदेवस्य शत्रुः। इति हेमचन्द्रः॥

शूर्पकर्णः, पुं, (सूर्पाविव कर्णौ यस्य।) हस्ती। इति त्रिकाण्डशेषः॥ कुल्यतुल्यश्रुतियुक्ते, त्रि (यथा, कथासरित्सागरे। ५५। १६५।
"घटोदरः शूर्पकर्णो गवाध्यक्षो मदोत्कटः॥")

शूर्पकारातिः, पुं, (शूर्पकस्यैतन्नामासुरः अरातिर्यस्य।) कामदेवः। इति हलायुधः॥

शूर्पकारिः, पुं, (शूर्पकः अरिर्यस्य।) कामदेवः। इति हलायुधः॥

शूर्पणखा, स्त्री. (शूर्पा इव नखा यस्याः। "पूर्व्वपदात् संज्ञायामगः।" ८। ४। ३। इति णत्वम्। "नखमुखात् संज्ञायाम्।" ४।१।५८। इति न ङीप्।) राक्षसभगिनी। इति शब्दमालाशब्दरत्नावल्यौ॥ (यथा, रघुः। १२। १८।
"रूपं गुणश्चानाम्नः सदृशं प्रत्यपद्यत॥")

शूर्पणखी, स्त्री, (शूर्पाकाराणि नखानि यस्याः। कैवल्यौगिकत्वे ङीप्।) रावणभगिनी। इति शब्दमालाशब्दरत्नावल्यौ॥

शूर्पपर्णी, स्त्री, (शूर्पा इव पर्णानि यस्याः। ङीष्।) शिम्बीविशेषः। इति शब्दचन्द्रिका॥

शूर्पवातः, पुं, (शूर्पस्य वातः।) शूर्पस्य वायुः। कुलार वातास इति भाषा। तत्पर्य्यायः। फुल्लफालः २। इति त्रिकाण्डशेषः॥

शूर्पश्रुतिः, पुं, (शूर्पौ इव श्रुती यस्य।) हस्ती। इति शब्दावली॥

शूर्पी, स्त्री, (शूर्प+गौरादित्वात् ङीष्) क्षुद्रशूर्पः। इत्युणादिकोषः॥ शूर्पणखा। इति शब्दमाला॥

शूर्म्मिः, पुं, लौहप्रतिमा। इत्यमरटीकायां रायमुकुटः॥

शूर्म्मिः, स्त्री, लौहप्रतिमा। इति भरतहिरूपकोषः॥

शूर्म्मिका, स्त्री. लौहप्रतिमा। इति शब्दशूर्म्मी, रत्नावली॥

शूल, रुजायाम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) दीर्णौ। शूलति लोक रोगः। इति दुर्गादासः॥

शूलः, पुं,क्लो.(शूलति लोकानिति। शूल रोगे+अच्।) रोगविशेषः। अस्त्रविशेषः। वर्शा इति भाला इति च भाषा। इत्यमरः॥ मृत्युः। केतनः। विष्कम्भादिसप्तविंशतियोगान्तर्गतनवमयोगः। इति मेदिनी॥ तद्योगजातफलम्। यथा,—
"भीतो दरिद्रो दहिताप्रियश्च
शूलोद्भवः शूल इव स्वबन्धोः।
विद्यामयाभ्यां रहितोऽथ शूली
करोति लोके न हितं कदाचित्॥"
इति कोष्ठीप्रदीपः॥
सुतीक्ष्णः। अयःकीलः। इति धरणिः॥ (यथा, महाभारते। १। १०७। १२।
"ततस्ते शूल मारोप्य तं मुनिं रक्षिणस्तदा।
प्रतिजग्मुर्महीपालं धनान्यादाय तान्यथ॥")
व्यथा। इति केचित्॥ विक्षे तत्त्वम्। यथा,—
"अष्टशूला जनपदाः शिवशूलाश्चतुष्पथाः।
प्रमदाः केशशूलिन्यो भविष्यन्ति कलौ युगे॥"
इति महाभारते आदिपर्व्व॥*॥

अथ शूलाधिकारः। तत्र शूलस्य सन्निकृष्टं निदानमाह।
"दोषैः पृथक् समस्तैश्च दुष्टैः शूलोऽष्टधा भवेत्
सर्व्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः॥"
प्रभुः कर्त्ता॥*॥ वातिकस्य विप्रकृष्टनिदानसंप्राप्तिलक्षणमाह।
"व्यायामपानादतिमैथुनाच्च
प्रजागराच्छीतजलादिपानात्।
कषायतिक्तातिविरूढजान्न-
विरूक्षवल्लूरकशुष्कशाकैः।
विट्क्षुक्रमूत्रानिलसन्निरोधात्
शोकोपवासादतिदुःखभावात्॥
वायुः प्रदुष्टो जनयेद्धि शूलं
कृतग्रहपार्श्वत्रिकवस्तिदेशे।
जीर्णे प्रदोषे च घनागमे च
शीते च कोपं समुपैति गाढम्॥
मुहुर्मुहुर्योपशमप्रकोपै-
र्व्विण्मूत्रसंस्तम्भनतोदभेदैः।
सस्वेदनाभ्यञ्जनमर्दनार्त्तैः
स्निग्धोष्णभोज्यैश्च समं प्रयाति॥"
व्यायामो मल्लयुद्धादिः। पानं सुरागरयादि। मैथुनं स्त्रीसेवा। प्रजागरं रात्रौ। पथामतियोगात्। कलायस्त्रिपुटः। आढकी तुवरी। कोरदूषकः कोद्रवः। अत्यर्थरूक्षद्रव्यमेवा। अध्यशनं भुक्तस्योपरि भोजनम्। अभिघातो लोष्टादिभिः। कषायतिक्तरससेवा। विरूढजान्नं विरूढमङ्कुरितमन्नकलायशाकादि तज्जमन्नं भक्ष्यम्। वल्लूरं शुष्कमांसम्। तस्य शूलस्य देशमाह। हृदयादिषु॥*॥ तस्य हृच्छूलस्य पृथगपि लक्षणं पठति।
"कफपित्तावरुद्धस्तु मारुतो रसवर्द्धितः।
हृदिस्थः कुरुते शूलमच्छ्वासस्यावरोधकम्।
स हृच्छूल इति ख्यातो रसमारुतकोपजः॥"
पार्श्वशूलस्यापि लक्षणमाह।
कफं निगृह्य पवनः शूचीभिरिव निस्तुदन्।
पार्श्वस्थः पार्श्वयोः शूलं कुर्य्यादाध्मानसंयुतम्।
तेनोच्छ्वसिति वक्त्रेण नरोऽस्रञ्च न काङ्क्षति।
निद्राञ्च नाप्नुयादेष पार्श्वशूलः प्रकीर्त्तितः॥"
वस्तिशूलस्यापि लक्षणमाह।
"संरोधात् कुपितो वायुरस्थि संश्रित्य तिष्ठति।
वस्तिवङ्क्षणनाडीषु ततः शूलन्तु जायते॥"
विण्मूत्रवातसंरोधी वस्तिशूलः स उच्यते॥"
प्रकृतमनुसरति। जीर्णे भुक्ते।। प्रदोषे रात्रेरागमे रात्रिभवशीतेन वातप्रकोपात्। घनागमे वर्षासु मेघोदये च॥*॥ तथैव पैत्तिकमाह।
"क्षारातिनीक्ष्णोष्णविदाहितैल-
निष्पावपिण्याककुलत्थयूषैः।
कटूम्लसौवीरसुराविकारैः
क्रोधानलायासरविप्रतापैः॥
याम्यातियोगादग्नेर्विदग्धैः
पित्तं प्रकुप्याश्च करोति शूलम्।
तृण्मोहदाहार्त्तिकरं हि नाभ्यां
सस्वेदमूर्च्छाभ्रमशोषयुक्तम्॥
मध्यं दिने कुप्यति चार्द्धरात्रे
निदाघकाले जलदात्यये च।
शीतैरतिशीतैः समुपैति शान्तिं
सुखादुशीतैरपि भोजनैश्च॥"

निष्पावो राजमाषः। सौवीरं सन्धानभेदः। सुराविकारैः। परिपक्वान्नसन्धानसमुत्पन्ना सुरा मता। तस्या विकारैः। रविप्रतापः आतपः। ग्राम्यातियोगो मैथुनाधिक्यम्। विदाहीत्युक्तापि अन्नैर्विदग्धैरिति बोधयति। अविदाह्यन्नोऽपि पित्तवशाद्विदाहित्वं भवति। जलदात्यये शरदि। शीते शीतकाले। शीतैर्व्वातादिभिः॥*॥ श्लैष्मिकमाह।

"आनूपवारिजकिलाटपयोविकारै-
र्म्मांसेक्षुपिष्टगुरातिलशस्कुलीभिः।
अन्यैर्व्वलासजनकैरपि हेतुभिश्च
श्लेष्मा प्रकोपमुपगम्य करोति शूलम्॥
हृल्लासकासशदनारुचिमंप्रसेकै-
रामाशये स्तिमितकोष्ठशिरोगुरुत्वैः।
भुक्तैः सदैव हि रुजं कुरुतेऽतिमात्रं
सूर्य्योदयेऽथ शिशिरे कुसुमागमे च॥"

आनूपं मद्यजलदेशजं मध्यम्। वारिजं शालूकादि। किलाटः।

"पक्वं दध्ना समं क्षीरं विज्ञेया दधिकूर्चिका।
तक्रेण तक्रकूर्चो स्यात्तयोः पिण्डः किलाटकः॥"

पयोविकारः पायसादिः। पिष्टं मांषादि। अन्यैः गुर्व्वादिभिः स्तिमितमार्द्रचर्म्मावगुण्ठितमिव यत् कोष्ठं शिरश्च तयोर्गुरुत्वैः सह। सूर्य्योदय इति त्रिधाविभक्तादिवसप्रथमभागस्योपलक्षणम्। शिशिरे तत्र कफस्यातिसञ्चयात्। कुसुमागमे वसन्ते॥*॥ इन्द्रजमाह।

"द्विदोषलक्षणैरेतैर्विद्याच्छूलं द्विदोषजम्॥"

त्रिदोषजमाह।

"सर्व्वेषु देशेषु समस्तलिङ्गं
विद्यात्त्रिषक् सर्व्वभवं हि शूलम्।
सुकष्टमेनं विषवज्जतुल्यं
विवर्ज्जनीयञ्च वदन्ति तज्ज्ञाः॥"

सर्व्वेषु देशेषु हृत्पृष्ठपार्श्वत्रिकवस्तिनाभ्यामाशयेषु। सर्व्वभवं त्रिदोषजं शूलं विन्द्यात्। सुकष्टमाध्यं विषवज्जतुल्यं मारणात्मकत्वात्॥*॥ आमजमाह।

"आटोपहृल्लासवमीगुरुत्वं
स्तेमित्यमानाङ्गकफप्रसेकैः।
कफस्य लिङ्गेन समानलिङ्ग-
मामोद्भवं शूलमुदाहरन्ति॥

कफस्य कफशूलस्य। आमोद्भवं आमादुद्भवो यस्य तं शूलम्। अत्रामाच्छूले जाते पश्चाद्दोषसम्बन्धः। अतएव शूलस्याष्टत्वमुक्तम्। न च प्रथममामाशये भवति पश्चात् सम्बन्धिदोषैर्व्वास्तनाभिहृत्पार्श्वकुक्षिषु भवति यथा दोषसम्बन्धः॥*॥ आमशूलस्य दोषविशेषेण देशविशेषमाह।

"वातात्मकं वस्तिगतं वदन्ति
पित्तात्मकं चापि वदन्ति नाभ्याम्।
हृत्पार्श्वकुक्षौ कफसन्निविष्टं
सर्व्वेषु देशेषु च सन्निपातात्॥"

हृत्पार्श्वकुक्षौ हृत्पार्श्वाभ्यां सहिते कुक्षी। कफसन्निविष्टं कफेनाविष्टम्॥*॥ तन्त्रान्तरोक्तमामशूलमाह।

"अतिमात्रं यदा भुक्तं पावके मृदुतां गते।
स्थिरीकृतन्तु तत् कोष्ठे वायुनाहत्य तिष्ठति॥
यदान्नं न गतं पाकं तच्छूलं कुरुते भृशम्।
मूर्च्छाध्मानविदाहांश्च हृत्क्लेशं सविलम्बिकम्॥
कम्पवातमतीसारं प्रमोहं जनयेदपि।
अविपाकोद्भवं शूलमेतमाहुर्म्मनीषिणः॥"

अविपाकोद्भवं आमोद्भवमित्यर्थः॥*॥ शूलस्योपद्रवानाह।

"वेदनातिक्षुधा मूर्च्छा आनाहो गौरवं ज्वरः।
भ्रमोऽरुचिः क्लमत्वञ्च बलहानिस्तथैव च।
उपद्रवा दशैवैते यस्य शूलस्य नास्ति सः॥"

शूलस्यैव भेदं परिणाममाह।

"स्वैर्निदानैः प्रकुपितो वायुः सन्निहितो यदा
कफपित्ते समाहत्य शूलकारी भवेद्बली॥
भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम्॥"

स्वैर्निदानैरित्यादिना निदानपूर्विका संप्राप्तिरुक्ता। भुक्ते जीर्य्यतीत्यादिना लक्षणमुक्तम्। समाहत्य व्याप्य॥*॥ अथान्नद्रवनामानं शूलविशेषमाह।

"जीर्णे जीर्य्यत्यजीर्णे वा यच्छूलमुपजायते।
पथ्यापथ्यप्रयोगेण भोजनाभोजनेन वा।
न शमं याति नियमात् सोऽन्नद्रव उदाहृतः॥"

नेदं शूलमाध्यं चिकित्साभिधानात्॥*॥ अथ शूलस्य चिकित्सा।

"वमनं लङ्घनं स्वेदं पाचनं फलवर्त्तयः।
क्षारचूर्णानि गुटिकाः शस्यन्ते शूलशान्तये॥
विज्ञाय वातशूलन्तु स्नेहस्वेदैरुपाचरेत्।
शूलशस्याकुलस्य स्यात् स्वेद एव सुखावहः॥
मृत्तिकां सजलां पाकाद्घनीभूतां पटे क्षिपेत्।
कृत्वा तत्पोटलीं शूली तया स्वेदं विधापयेत्॥

इति मृत्तिकास्वेदः॥

"कार्पासास्थिकुलत्थिकातिलयवैरेरण्डमूलातसी-
वर्षाभूषणबीजकाश्मिकयुतैरेकीकृतैर्व्वा पृथक्
स्वेदः स्यादथ कूर्परोदरशिरःस्फिग्जानुपादाङ्गुली-
गुल्फस्कन्धकटीरुजो विजयते निःशेषवाता-
र्त्तिहा॥"

इति कार्पासास्थ्यादिस्वेदः॥

"तिलैश्च गुटिकां कृत्वा भ्रामयेज्जठरोपरि।
शूलं सुदुस्तरं तेन शान्तिं गच्छति सत्वरम्॥
नाभिलेपाज्जयेच्छूलं मदनं काञ्जिकान्वितम्॥
मदनं मयनफलम्॥*॥

"विश्वभेरण्डमूलन्तु क्वाथं कृत्वा घृतं पिबेत्।
हिङ्गुसौवर्च्चलोपेतं सद्यः शूलनिवारणम्॥*॥
गुडशालियवाः क्षीरं सर्पिःपानं विरेचनम्।
जाङ्गलानि च मांसानि भेषजं पित्तशूलिनाम्॥"

मक्षीरजततास्त्राणां भाजनानि गुरूणि च।
नीवेनपरिपूर्णानि शूलस्योपरि धारयेत्॥*॥

विरेचनं पित्तहरं प्रशस्तं
रसाश्च शस्ताः शशलावकानाम्॥*॥
सगुडां घृतसंयुक्तां भक्षयेद्वा हरीतकीम्।
प्रलिह्याच्छूलशान्त्यर्थं धात्रीचूर्णं समाक्षिकम्॥
शाल्यन्नं जाङ्गलं मांसमरिष्टं कटुकं रसम्॥
मधूनि जीर्णगोधूमं कफशूले प्रयोजयेत्॥"

अरिष्टं भेषजकाथसिद्धं मद्यम्॥*॥

"लवणत्रयसंयुक्तं पञ्चकोलं सरामठम्।
सुखोष्णेनाम्बुना पीतं कफशूलं प्रशाम्यति॥*
आमशूले क्रिया कार्य्या कफशूलप्रणाशिनी।
सैन्धवामलवं सर्व्वं मद्यमग्निविवर्द्धनम्॥*॥
तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम्।
प्रयोज्यं मधुसर्पिर्भ्यां सर्व्वशूलनिवारणम्॥"

तीक्ष्णा राजिका॥*॥

"दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः।
अम्लपिष्टैः सुखोष्णैश्च लिम्पेच्छूलयुतोदरम्॥
मूलं वेल्लं तथैरण्डं चित्रकं विश्वभेषजम्।
हिङ्गु सैन्धवसंयुक्तं सद्यः शूलनिवारणम्॥"

वातरोगान्तर्गताध्मानचिकित्सायां लिखितो नाराचनामा रसोऽन्यच्च विरेचनं शूले हितम्॥

"कुष्माण्डतनुं कृत्वा तु क्षिप्त्वा घर्म्मे विशोषयेत्
स्थाल्यां निक्षिप्य तत् सर्व्वं पिधानेन विधाय्य
च॥
चुल्ल्यां निवेश्य वह्निञ्च ज्वालयेत् कुशलो जनः।
यथा तत्र भवेद्भस्म किन्त्वङ्गारो दृढो भवेत्॥
तदा निर्व्वापयेच्छीतं चूर्णितं चूर्णयेत्तु तम्।
माषद्वयमितं तावच्चटीचूर्णञ्च मिश्रितम्॥
जलेन भक्षयेन्नित्यं महाशूलाकुलो नरः।
असाध्यमपि यच्छूलं तदप्येतेन शाम्यति॥"

इति कुष्माण्डक्षारः॥*॥

अथ परिणामशूलस्य चिकित्सा।

"लङ्घनं प्रथमं कुर्य्यादमनं सविरेचनम्।
पक्तिशूलोपशान्त्यर्थं तत्र वान्तेर्विधिर्यथा॥
पीत्वा तु क्षीरमाकण्ठमदनक्वाथसंयुतम्।
कान्तारकस्य पौण्ड्रस्य कोशकारस्य वा रसम्
कषायं वाथ निष्वस्य कटुतुम्बीरसं वचाम्।
यथाविधि वमेद्धीमान् पक्तिशूलार्दितो जनः॥
विहृता च तथा दन्त्यास्तेलैरण्डजेन वा।
दत्तं विरेचनं सद्यः पक्तिशूलं निवारयेत्॥
विड्ङ्गं तण्डुलं व्योषं त्रिवृद्दन्तिसचित्रकम्।
सर्व्वाण्येतानि संगृह्य सूक्ष्मचूर्णानि कारयेत्॥
गुडेन मोदकान् कृत्वा खादेदुष्णेन वारिणा।
जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम्॥"

इति विड्ङ्गादि मोदकः॥*॥

"नागरतिलगुडकल्कं पयसा संपिब्य यः पुमान्
लिह्यात्।
उग्रं परिणतिशूलं नश्येत्तस्य त्रिरात्रेण।
पीतं शम्बूकजं भस्म जलेनोष्णेन तत्क्षणात्।
पक्तिजं नाशयत्येव शूलं विष्णुरिवासुरान्॥
लोहपथ्याकणाशुण्ठीचूर्णं समधुसर्पिषा।
विलिहन् विनिहन्त्येव शूलं हि परिणामजम्॥"

इति पथ्यादिलोहम्॥*॥

"नारिकेलं सतोयञ्च लवणेन सुपूरितम्।
मृदाववेष्टितं शुष्कं पक्वं गोमयवह्निना॥
पिप्पल्या भक्षितं हन्ति शूलं हि परिणा-
मजम्।
शातिकं पैत्तिकञ्चापि श्लेष्मिकं सान्निपातिकम्॥"
इति नारिकेलाचारः॥*॥

अथाम्लद्रवस्य चिकित्सा।

"अम्लद्रावाख्ये शूले तु न तावत् स्वास्थ्यमश्नुते
यावत् कटुकपीतान्नमलं न च्छर्दयेद्द्रवम्॥
जातमात्रे जरत्पित्ते शूलमाशु विनाशयेत्।
पित्तार्त्तं वमनं कृत्वा कफार्त्तञ्च विरेचनम्॥
अम्लद्रवे च तत् कार्य्यं जरत्पित्ते यदीरितम्।
जरत्पित्तेऽपि तत् पथ्यं प्रोक्तमम्लद्रवे तु यत्॥
आमपक्वाशये गुह्ये गच्छेदम्लद्रवः शमम्।
मायेण्डरीं सलवणां सुस्निग्धां तैलपाचिताम्॥
लाङ्गलीं सर्षपैर्युक्तां खादेदम्लद्रवनिपीड़ितः।
धात्रीफलभवं चूर्णमयश्चूर्णसमन्वितम्।
यष्टीचूर्णेन वा युक्तं लिह्यात् क्षौद्रेण तद्रदे।
श्यामकृतण्डुलैः सिद्धं सिद्धं कोद्रवतण्डुलैः॥
प्रियङ्गुतण्डुलैः सिद्धं पायसं ससितं हितम्॥"
प्रियङ्गुः कङ्गुविशेषः।
"गौड़िकं शौरसं कन्दं कुष्माण्डमपि भक्षयेत्।
कलायमयशूकान् वा शूकान् वा लाजसंयुतान्॥"
गौड़िकं गुड़ेन संस्कृतं पक्वान्नम्॥*॥
"कुलत्थशूकानथवा दध्नाद्याद्धिकं तथा॥
चणकानाथवा शूकान् कोद्रवस्यौदनं तथा॥"
दधिकं दध्ना संस्कृतं भक्तम्। महेरि इति लोके॥*॥
"गोधूममण्डकं तत्र सर्षपैर्युतम्॥
ससितं शीतदुग्धेन मृदितं क्वथितं हितम्॥
अम्लद्रवो दुर्विकित्स्यो दुर्विज्ञेयो महागदः।
तस्मात्तस्य प्रशमने परं यत्नं समाचरेत्॥
अम्लद्रवे जरत्पित्ते वह्निर्मन्दो भवेदयतः।
तस्मादन्नपानानि मात्राहीनानि कारयेत्॥
कलायमयगोधूमाः श्यामाकाः कोरदूषकाः।
राजमाषाश्च माषाश्च कुलत्थाः कङ्गुयालयः॥
दधिलुप्तरसं क्षीरं सर्पिर्गव्यं समाहितम्।
वास्तूकं कारवल्लीं च कर्कोटिकफलानि च॥
वर्हिणो हरिणा मत्स्या रोहिताद्याः कपिञ्जलाः।
एतन्निदानमेषां शस्ता मता मुनिचिकित्सके॥"
दधिलुप्तरसं दध्ना लुप्तः क्षतो रसो यस्य तत्।
क्षीरं दधियुक्तं क्षीरमित्यर्थः॥*॥
"गुड़ामलकपथ्यानां चूर्णं प्रत्येकशः पलम्।
पिप्पलं क्षौद्रकिट्टस्य तत् सर्व्वं मधुसर्पिषा॥
समालोड्य समग्रीयादक्षमात्रं प्रमाणतः।
आदिमध्यावसानेषु भोजनस्य निहन्ति तत्॥
अम्लद्रवं जरत्पित्तमम्लपित्तं सुदारुणम्।
परिणामसमुत्थञ्च शूलं संवत्सरोत्थितम्॥"
इति गुड़मण्डूरम्॥*॥
"श्यामां मैरेयं मद्यं लवणं कटुकं रसम्।
वेगरोधं शुचं क्रोधं विदलं शूलवान् त्यजेत्॥"
इति शूलामपरिणामशूलाम्लद्रवजरत्पित्ताधिकारः। इति भावप्रकाशः॥*॥ अपि च।
"अर्कपत्रं गृहीत्वा तु मन्दाग्नौ तापयेच्छनैः।
निष्पीड्य पूरयेत् कर्णौ कर्णशूलं विनश्यति॥*॥
साज्यनस्यं घृतं क्षौद्रं लवणं ताम्रभाजने।
दृष्टं पयःसमायुक्तं चक्षुःशूलहरं परम्॥"
साज्यनस्य इत्यत्र ताम्बूलस्य इति वा पाठः॥
"चूर्णमामलकस्यैव पीतं शूलहरं परम्॥"
इति गारुड़े १८३।१८५।१८४ अध्यायाः॥
किञ्च।
"सामुद्रं सैन्धवं क्षारो राजिका लवणं विड़म्।
कटु लोहरजः किट्टं चिह्नत् शूरणकं समम्॥
दधिगोमूत्रपयसा मन्दपावकपाचितम्।
एतच्चाग्निबलं चूर्णं पिबेदुष्णेन वारिणा॥
जीर्णे जीर्णे च भुञ्जीत माषादिघृतभोजनम्।
नाभिशूलं मूत्रशूलं गुल्मप्लीहभवञ्च यत्॥
सर्वं शूलहरं चूर्णं जठरानलदीपनम्।
परिणामसमुत्थस्य शूलस्य च हितं परम्॥"
इति गारुड़े १८८ अध्यायः॥
तस्य उपपापजत्वं यथा,—
"जलोदरयकृत्प्लीहशूलगोगन्नपानि च।
श्वासाजीर्णज्वरच्छर्द्यर्भ्रमोहगलग्रहाः।
रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः॥"
इति शातातपीयकर्म्मविपाकः॥
शूलकः, पुं, (शूल इव दुर्व्विनीतत्वात्। कन्।) दुर्वृत्तघोटकः। इति हलायुधः॥ अत्र शूकल इत्यपि पाठो दृश्यते। यथा,—
"विनीतस्तु साधुवाही दुर्विनीतस्तु शूलकः।"
इति हेमचन्द्रः॥
शूलग्रन्थिः, स्त्री, मालादूर्व्वा। इति राजनिर्घण्टः॥
शूलघातनं, क्ली, (शूलं तद्रोगं घातयतीति। हन+णिच्+ल्युः।) मज्जूरम्। इति शब्दचन्द्रिका॥
शूलघ्नः, पुं, (शूलं हन्तीति। हन+टक्। तुम्बुरुवृक्षः। इति रत्नमाला॥ शूलघातके, त्रि॥ (यथा, सुश्रुते। १। ४५।
"सर्षपैर्मधुरः सरो योनिशोधाग्निशिरसां शूलघ्नः इति॥")
शूलच्छिद्, [द्] पुं, (शूलस्य छिद् यत्नुः।) शिवः। इति रत्नमाला॥
शूलधन्वा, [न्] पुं, (शूलो धनुर्यस्य।) शिवः। इति शब्दरत्नावली॥
शूलधरः, पुं, (शूलस्य धरः।) शिवः। इति शब्दरत्नावली॥
शूलधरा, स्त्री, (शूलस्य धरा।) दुर्गा। इति शब्दरत्नावली॥
शूलधारिणी, स्त्री, (शूलं धरति या। धृ+णिनिः।) दुर्गा। यथा,—
"सती साध्वी भवप्रीता भवानी भवमोचनी।
आर्य्या दुर्गा जया चाद्या त्रिनेत्रा शूलधारिणी॥"
इति तन्त्रसारधृततच्छतनामस्तोत्रम्॥
शूलधृक्, [ज्] स्त्री, (शूलं धर्त्तुमीति। धृज्+क्विप्।) दुर्गा। इति त्रिकाण्डशेषः॥ महादेवे, पुं॥ (शूलधृत्-इत्येव क्वचित् पाठः॥)
शूलनाशनं, क्ली, (शूलं नाशयतीति। नश+णिच्+ल्युः।) सौवर्च्चलवणम्। इति हेमचन्द्रः॥
शूलपत्री, स्त्री, (शूलवत् पत्रमस्याः। ङीष्।) शूलीलताम्। इति राजनिर्घण्टः॥
शूलशत्रुः, पुं, (शूलस्य शत्रुः। एरण्डवृक्षः। इति शब्दचन्द्रिका॥
शूलहन्त्री, स्त्री, (शूलं हन्तीति। हन+ट्रच्। ङीप्।) यवानी। इति राजनिर्घण्टः॥
शूलहृत्, पुं, (शूलं हरतीति। हृ+क्विप्।) हिङ्गुः। इति त्रिकाण्डशेषः॥
शूला, स्त्री, दुष्टवधार्थकीलकः। वेश्या। इति विश्वः॥
शूलाकृतं, त्रि, (शूलेन कृतम्। "शूलात् पाके।" ५। ४। ६५। इति ष्ठाच्।) लौहादिशलाकया विद्धं पक्वमांसम्। कावाब् इति पारस्यभाषा। तत्पर्य्यायः। भटित्रम् २ शूल्यम् ३। इत्यमरः॥ वासितारम् ४। इति जटाधरः॥ शूलिकम् ५ इति शब्दचन्द्रिका॥ अस्य गुणाः शूल्यशब्दे द्रष्टव्याः॥
शूलिकं, क्ली, (शूलः निमित्तत्वेनास्त्यस्येति। शूल+ठन्।) शूलाकृतम्। इति शब्दचन्द्रिका॥
शूलिकः, पुं, शशकः। इति हेमचन्द्रः॥ (शूलः अस्यास्तीति। ठन्।) शूलयुक्ते, त्रि॥
शूलिनः, पुं, भाण्डीरवृक्षः। इति शब्दमाला॥
शूलिनी, स्त्री, (शूलं अस्या अस्तीति। शूल+इनि। ङीप्।) दुर्गा। यथा,—
"खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा॥
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा॥"
इति देवीमाहात्म्यम्॥
शूली, [न्] पुं, शूलमस्यास्तीति। शूल+इनिः। शिवः इत्यमरः॥ (यथा, महाभारते। ३। ८४। ८४।
"ततो गच्छेत् गच्छेत् स्थानं देवस्य शूलिनः॥"
शर्वः। इति भावप्रकाशः॥ शूलाख्यधारके शूलरोगयुक्ते च त्रि। यथा,—
"वर्जयेद्दधिदलं शूली कुष्ठी मांसं त्वचौ स्त्रियम्।"
इति वैद्यकम्॥
तस्य कारणं प्रायश्चित्तञ्च यथा,—
"शूली परोपतापेन जायते तत्प्रमार्ज्जकः।
सोऽन्नदानं प्रकुर्व्वीत तथा रुद्रं जपेच्छतम्॥"
इति शातातपीयकर्म्मविपाकः॥
शूली, स्त्री, तृणभेदः। तत्पर्य्यायः। शूलपर्णी २ शशाखा ३ क्षुद्रमूलिका ४ जलाश्रया ५ मधुलता ६ पिच्छिला ७ महिषीप्रिया ८। अस्या गुणाः। पिच्छिलत्वम्। कोष्णत्वम्। गुरुत्वम्। गौल्यत्वम्। बलप्रदत्वम्। पित्तदाहहरत्वम्। रुच्यत्वम्। दुग्धवृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥

शूलोत्खा, स्त्री, सोमराजी । इति शब्दचन्द्रिका॥
शूल्यं, त्रि (शूलेन संस्कृतम् । शूल + "शूलोत्खात् यत् ।" ४ । २ । १७ । इति यत्) शूलाक्षतम् । इत्यमरः ॥ कावाव् इति पारस्यभाषा । तत्-पाकप्रकारो यथा,—
"कालखण्डादिमांसानि ग्रथितानि शलाकया। घृतं सलवणं दत्त्वा निर्धूमे दहने पचेत् । तत्तु शूल्यमिति प्रोक्तं पाककर्मविचक्षणैः ॥"
अस्य गुणाः ।
"शूल्यं बल्यं सुधातुल्यं रुच्यं वह्निकरं लघु । कफवातहरं हृद्यं किञ्चित् पित्तहरं हि तत् ॥"
इति भावप्रकाशः ॥
अस्य पर्य्यायः शूलाक्षतशब्दे द्रष्टव्यः ॥
शूल्यपाकः, पुं, (शूल्येन पाको यस्य ।) शूलविधा-क्षारपक्वमांसादि । इति पाकराजेश्वरः ॥ कावाव इति पारस्यभाषा ॥
शूय, प्रसवे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) शूयति । इति दुर्गादासः ॥
शृकालः, पुं, शृगालः । इति शब्दचन्द्रिका ॥
शृगालः, पुं, (सृजति मायामिति । सृज + कालन् पृषोदरादित्वात् साधुः ।) पशुविशेषः । शेयाल् इति भाषा । तत्पर्य्यायः । शिवा २ भूरिमायः ३ गोमायुः ४ मृगधूर्त्तकः ५ वृकः ६ क्रोष्टुः ७ फेरुः ८ फेरवः ९ जम्बुकः १० । इत्यमरः ॥ शृगालः ११ जम्बुकः १२ सूत्रमत्तः १३ कुरवः १४ घोरवासनः १५ वनश्वा १६ फेरुः १७ शम्बूर्त्तः १८ । इति शब्दरत्नावली ॥ शालावृकः १९ गोमी २० कटस्वादकः २१ । इति जटाधरः ॥ शिवालुः २२ फेरुण्डः २३ व्याघ्रनायकः २४ । इति राजनिर्घण्टः ॥ दैत्यभेदः । इति मेदिनी॥ वासुदेवः । निष्ठुरः । खलः । इति भारस्वता-भिधानम् ॥ भीरुः । इत्यनेकार्थकोषः ॥*॥
शृगालशब्दादीनां शुभाशुभसूचकत्वं यथा,—
"अनर्थहेतुर्गतिशब्दहीनः सदा शृगालः खलु दृष्टमात्रः । अस्था हि वामा गतिरस्य अस्थो वामो निनादो निशि यो वहूनाम् ॥ हुवा हुवेति प्रथमं ततस्तु टटेति दीर्घः सुतरां रवो यः । व्याजम्बुकानां स नतः प्रशस्त-स्तदन्यरूपः कथितः प्रदीप्तः ॥ शृगालशब्दो भवने निशाया-मुच्चाटनार्थं दिशि पश्चिमायाम् । प्राच्यां भयायोत्तरतः शिवाय भवत्यवाच्यां भयनाशनाय ॥"
इति वसन्तराजशाकुनम् ॥
शृगालकण्टकः, पुं, (शृगालरोधकः कण्टको यस्य ।) क्षुपविशेषः । इति शब्दचन्द्रिका ॥ शेयालकाटा इति भाषा ॥
शृगालकोलिः, पुं, (शृगालप्रियः कोलिर्यस्य ।) क्षुद्रकोलिवृक्षः । शेयाकुल् इति भाषा । तत्-पर्य्यायः । कर्कन्धुः २ । इति रत्नमाला ॥ अपिच "अथ घोण्टा ३ गोपघोण्टा ४ वदरं ५ वादि-रञ्च ६ तत् । वदरीसदृशे सूक्ष्मफले हृद्ये चतुष्टयम् ॥"
इति शब्दरत्नावली ॥
शृगालघण्टी, स्त्री, कोकिलाक्षः । इति राज-निर्घण्टः ॥
शृगालजम्बुः, स्त्री, (शृगालस्य जम्बुरिव ।) गोडुम्बः । घोण्टाफलम् । इति मेदिनी ॥
शृगालविद्धा, स्त्री, (शृगालैर्विद्धा ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥
शृगालिका, स्त्री, शृगालपत्नी । त्रासात् पलाय-नम् । इति मेदिनी ॥ भूमिकुष्माण्डः इति । जटाधरः ॥ क्षुद्रशृगालः । खेँकशेयाली । इति भाषा । तत्पर्य्यायः । लोमालिका २ दीर्घ-जिह्वा ३ किणिः ४ उल्कामुखी ५ । इति त्रिकाण्डशेषः ॥
शृगाली, स्त्री, विद्रवः । पलायनमिति यावत् । इति त्रिकाण्डशेषः । कोकिलाक्षः । विदारी । इति राजनिर्घण्टः ॥ शृगालिका च ॥
शृङ्खलः, त्रि, पुंसां कण्ठाभरणम् । गोट् इति भाषा॥ हस्त्यादीनां लौहमयपादबन्धोपकरणम् आँदु इति दाँडुका इति च भाषा । तत्पर्य्यायः । उन्दुकः २ निगडः ३ । इत्यमरः ॥ शृङ्खला ४। इति तट्टीकायां भरतः ॥ (यथा, रघुः । ५ । ७२ ।
"अग्र्यां जहात्युभयपक्षविनीतनिद्राः स्तब्धेरमा मुखरशृङ्खलकर्षिणस्ते ॥")
लौहरज्जुः । शिकल वेड़ि इत्यादि भाषा ॥ बन्धनम् । इति हेमचन्द्रः ॥
शृङ्खलकः, पुं, (शृङ्खलं बन्धनमस्य । "शृङ्खलमस्य बन्धनं करभे ।" ५ । २ । ७८ । इति कन् ।) उष्ट्रः । इति राजनिर्घण्टः ॥ (यथा, माघे । १२ । ७ ।
तीव्रोत्थिताक्षावदसद्यरंहसो विशृङ्खलं शृङ्खलकाः प्रतस्थिरे ॥")
पलायननिषेधाय पादेषु दारुमयपाशग्रथित-करभः । इत्यमरभरतौ ॥ (स्वार्थे कन् ।) शृङ्-खल च ॥
शृङ्खला, स्त्री, निगडः । पुंस्कटीवस्त्रबन्धः । इति मेदिनी ॥ अन्यत् शृङ्खलशब्दे द्रष्टव्यम् ।
शृङ्खलितः, त्रि, (शृङ्खलो जातोऽस्येति । इतच् ।) शृङ्खलायुक्तः । निगडितः । इति धनञ्जयः ॥
शृङ्खली, स्त्री, कोकिलाक्षः । इति राजनिर्घण्टः॥
शृङ्गं, क्ली, (शॄ हिंसे + "शृणातेर्ङ्गस्वञ्च ।" उणा० १ । १२५ । इति गन् । धातोर्ङ्गस्वं किञ्च नुट् च प्रत्ययस्य ।) पर्व्वतोपरिभागः । तत्प-र्य्यायः । कूटम् २ कूटः ३ शिखरम् ४ । इत्य-मरः ॥ दम्भः ५ प्रागभारः ६ । इति जटाधरः ॥ शैलाग्रम् ७ । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । १३ । २६ ।
एतद्विरेमाध्वगतः पुरस्ता-दाविर्भवत्यम्बरलेखि शृङ्गम् ॥")
सानुः । इति नानार्थे अमरः ॥ प्रभुत्वम् । चिह्नम् । क्रीड़ाजलयन्त्रम् । (यथा रघुः १६ । ७० ।
"वर्णोदकैः काञ्चनशृङ्गमुक्तै-स्तमायताक्ष्यः प्रणयादसिञ्चन् ॥")
विषाणम् । (यथा, रघुः । १६ । १२ ।
"वन्यैरिदानीं महिषैस्तदग्रैः शृङ्गाहतं क्रोशति दीर्घिकाणाम् ॥")
उत्कर्षः । इति मेदिनी ॥ (यथा रघुः । ८ । ६२ ।
"शृङ्गं न दृप्तविनयाधिरूढतः परैषा-मत्युच्छ्रितं न मम ये न तु दीर्घमायुः ॥")
ऊर्द्धम् । (यथा. कुमारे । ७ । ४० ।
"विमानशृङ्गाण्यवगाहमानः प्रयेमे देवावसरं सुरेभ्यः ॥")
तीक्ष्णम् । पङ्कजम् । इति शब्दरत्नावली ॥ (कोटिः । यथा, कुमारे । २ । ६४ ।
"अथ सललितयोर्विद् भ्रूलताचारुशृङ्गं रतिवलयपदाङ्के चापमासज्य कण्ठे ॥")
स्तनम् । यथा, भागवते । ५ । २ । ११ ।
"किं सम्भृतं रुचिरयोर्द्विज शृङ्गयोस्ते मध्ये क्षणो वहसि तत्र दृशिः स्थिता मे ॥"
"स्तनावालक्ष्याह । शृङ्गयोः स्तनयोः किं सम्भृतं किं पूर्णमस्ति मनोहरं किञ्चिदस्ति पश्य तावत् जानामि ।" इति तट्टीकायां स्वामी ॥*॥)
महिषादिशृङ्गनिर्म्मितवाद्यविशेषः । सिङ्गा इति भाषा । यथा,—
"क्वचिद्दिनाद्याय मनो दधद्व्रजात् प्रातः समुत्थाय वयस्यवत्सपान् । प्रबोधयन् शृङ्गरवेण चारुणा विनिर्गतो वत्सपुरःसरो हरिः ॥"
इति श्रीभागवते १० स्कन्धे १२ अध्यायः ॥
कामोद्रेकः । यथा, साहित्यदर्पणे । ३ । २१० ।
"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः । उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ॥"*॥
गोशृङ्गभङ्गप्रायश्चित्तं यथा । भवदेवभट्टधृतं यमवचनम् ।
"अस्थिभङ्गं गवां कृत्वा लाङ्गूलच्छेदनं तथा । पाटने कर्णशृङ्गाणां मासार्द्धन्तु यवान् पिबेत् ॥"
अङ्गिराः ।
"शृङ्गभङ्गेऽस्थिभङ्गे च चर्म्मनिर्म्लोचनेऽपि वा । दशरात्रं चरेद्व्रतं सुस्था सा यदि गौर्भवेत् ॥"
भवदेवभट्टहरिनाथोपाध्यायधृतं संवर्त्तवचनम् ।
"शृङ्गभङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव च । यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते॥"
अत्र षण्मासोत्तरमरणे तद्दोषशमनाय प्राय-श्चित्तं नास्ति तदभ्यन्तरमरणे वधप्रायश्चित्तं भवति । एवञ्च शृङ्गभङ्गादिनिमित्तकपापे पृथक् प्रायश्चित्तं न कर्त्तव्यम् । वधप्रायश्चित्तेनैव गुरुणा प्रसङ्गात्तदपगमसिद्धेः । षण्मासोत्तरन्तु शृङ्गभङ्गादिनिमित्तकपूर्व्वोक्तमासार्द्धयावकपानं प्राजापत्यं वा कर्त्तव्यम् । इति प्रायश्चित्ततत्त्वम्॥
शृङ्गः, पुं, (शृ + गन् । उणा० १ । १२५ ।) कूर्म-गोधैकदृक्षः । इति मेदिनी ॥ मुनिभेदः । इति शब्दरत्नावली ॥

शृङ्गकः, पुं, (शृङ्ग इव। कन्।) नीवकवृक्षः। इति जटाधरः॥
शृङ्गकन्दः, पुं, (शृङ्गवत् कन्दो यस्य।) शृङ्गाटकः। इति राजनिर्घण्टः॥
शृङ्गजं, क्ली, (शृङ्गात् जायते इति। जन+डः।) अगुरुः। इति रत्नमाला॥ अरे, पुं। यथा।
शृङ्गाच्छरो जायते। इति संक्षिप्तसारकारकपादः॥ शृङ्गजाते, त्रि॥
शृङ्गबेरं, क्ली, (शृङ्गस्येव बेरं शरीरं यस्य।) आर्द्रकम्। इत्यमरः॥ गण्ठी। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ३८।
"पिप्पलीमरीचशृङ्गबेराणि त्रिकटुकम्॥")
शुद्धचण्डालपुरम्। यथा,—
"मारुते गच्छ शीघ्रं त्वमयोध्यां भरतं प्रति।
जानीहि कुशलो कश्चित् जनो नृपतिमन्दिरे॥
शृङ्गबेरपुरं गत्वा ब्रूहि मित्रं गुहं मम।
नानाकौलक्षणोपेतमागतं मां निवेदय॥"
इत्यध्यात्मरामायणे लङ्काकाण्डे १४ अध्यायः॥
शृङ्गबेरकं, क्ली, (शृङ्गबेरमेव। स्वार्थे कन्।) आर्द्रकम्। इति हेमचन्द्रः॥
शृङ्गबेराम्लकः, पुं, (शृङ्गबेराभं मूलं यस्य। कन्।) एरका इति भावप्रकाशः॥
शृङ्गमूलः, पुं, (शृङ्गवत् मूलं यस्य।) शृङ्गाटकः। इति राजनिर्घण्टः॥
शृङ्गमोही, [न्] पुं, (शृङ्गाय मन्मथोद्भेदाय मोहयतीति। मुह+णिच्+णिनिः।) चम्पकः। इति राजनिर्घण्टः॥
शृङ्गला, स्त्री, (शृङ्गवत् लातीति। ला+कः।) अजशृङ्गी। इति शब्दचन्द्रिका॥
शृङ्गवान्, [त्] पुं, (शृङ्गाणि सन्ति अस्येति। शृङ्ग+मतुप्। मस्य वः।) कुरुवर्षीयसीमापर्व्वतः। स तु दीर्घं ८०००० अशीतिसहस्रयोजनानि। प्रस्थे २००० द्विसहस्रयोजनानि। विस्तारे तयैव। यथा,—
"हिमवद्धेमकूटश्च निषधश्चास्य दक्षिणे।
नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्व्वताः॥
लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्तथा परे।
सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते॥"
इति विष्णुपुराणे २ अंशे २ अध्यायः॥
लक्षप्रमाणौ द्वौ प्राक्पश्चिमतो दैर्घ्येण निषधनीलौ। यद्यपि जम्बुद्वीपमण्डलाकारस्य लक्षयोजनप्रमाणत्वान्मध्यरेखायामेव मुख्यं लक्षप्रमाणत्वम्। निषधनीलौ तु तन्मध्यरेखातो दक्षिणतश्चोत्तरतश्च सप्तदशयोजनसहस्रान्तरितत्वादीषन्न्यूनौ। तथापि स्थूलदृष्ट्या लक्षप्रमाणावित्युक्तम्। अपरे तु हेमकूटादयो दशहीना दशदशन्यूनाः हेमकूटश्वेतौ नवतियोजनसहस्रप्रमाणौ। हिमवच्छृङ्गिणावशीतियोजनप्रमाणौ। मदुक्तं वाराहे।
'द्वीपस्य मण्डलीभावात् क्रमसङ्कोचः प्रकीर्त्तितः॥"
इति तट्टीकायां श्रीधरस्वामी॥
भागवतमते दैर्घ्यं १०००० दशसहस्रयोजनानि प्रस्थे २००० द्विसहस्रयोजनानि। यथा। उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्ये एव कल्पन्ति। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्॥ इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥
शृङ्गाटं, क्ली, (शृङ्गमुत्कर्षं अटतीति। अट्+अच्।) चतुष्पथम्। इति हेमचन्द्रः धरणिश्च॥
शृङ्गाटः, पुं, (शृङ्गवत् कण्टकं अटतीति। अट्+अच्।) जलकण्टकः। इति भूरिप्रयोगत्रिकाण्डशेषौ॥ स्वादुकण्टकः। इति शब्दरत्नावली॥ कामाख्याटेग्रस्थपर्व्वतः। यथा,—
"दीपवत्या: पूर्व्वतस्तु शृङ्गाटो नाम पर्व्वतः।
तत्र भर्गस्य देवस्य लिङ्गमेकं प्रतिष्ठितम्॥
सरित्तु सिद्धा विस्रोता दक्षिणोदधिगामिनी।
शृङ्गाटकस्य सततं स्रवन्ती प्राविपादतः।
दक्षिणं सागरं याति भर्गस्य प्रियकारिणी॥
सलिले यो नरः स्नाति तिस्रोतायां नरोत्तमः।
शृङ्गाटकं समारुह्य पूजयेल्लिङ्गशङ्करम्॥
स दीप्तकायः शुद्धात्मा प्राप्य कामानिहातुलान्।
अन्ते भर्गगृहं याति ततो मोक्षमवाप्नुयात्॥"
इति कालिकापुराणे ८२ अध्यायः॥
शृङ्गाटकं, क्ली, (शृङ्गाटमेव। स्वार्थे कन्।) चतुष्पथम्। इत्यमरः॥ (यथा, रामायणे। २। ७१। ४५।
"तां शून्यशृङ्गाटकवेश्मरथ्यां
रजोरुणद्वारकपाटयन्त्राम्॥")
जलज-लताफलविशेषः। पानिफल इति शिङ्घाड़ा इति च भाषा। तत्पर्य्यायः। जलसूचिः २ संघाटिका ३ वारिकण्टकः ४। इति जटाधरः॥ शृङ्गाटः ५ वारिकुलकः ६। इति त्रिकाण्डशेषः॥ क्षीरशुक्लः ७ जलकण्टकः ८ इति शब्दमाला॥ शृङ्गाटकः ९ शृङ्गरुहः १० जलवल्ली ११ जलाशयः १२ शृङ्गकन्दः १३ शृङ्गमूलः १४ विषाणी १५। अस्य गुणाः। श्लेष्मपित्तहरत्वम्। लघुत्वम्। सरत्वम्। हृद्यत्वम्। विशेषात् त्रिदोषवातभ्रमशोफनाशित्वम्। रुचिप्रदत्वम्। मेहनदार्ढ्यहेतुत्वञ्च इति राजनिर्घण्टः॥ अपि च। गुरुत्वम्। विष्टम्भित्वम्। शीतलत्वञ्च। इति राजवल्लभः॥ स्वाद्यविशेषः। समूसा इति हिन्दी भाषा॥ यथा, भावप्रकाशे।
"शुद्धमांसं तनूकृत्य कर्त्तितं स्वेदितं जले।
लवङ्गं हिङ्गुसहितं लवणार्द्रकसंयुतम्॥
एलाजीरकधान्याकनिम्बूरससमन्वितम्॥
घृते सगन्धे तद्भृष्टं पूरणं प्रोच्यते बुधैः॥
शृङ्गाटकं समितया क्षतं पूरणपूरितम्।
पुनः सर्पिषि संभृष्टं मांसं शृङ्गाटकं वदेत्॥
मांसं शृङ्गाटकं रुच्यं हृद्यं बलकृत् गुरु।
वातपित्तहरं दृष्यं कफघ्नं वीर्य्यवर्द्धनम्॥"
शृङ्गाटकः, पुं, (शृङ्गाट एव। स्वार्थे कन्।) जलकण्टकः। इति राजवल्लभः॥
शृङ्गारं, क्ली, (शृङ्गं प्राधान्यं ऋच्छतीति। ऋ+अण्।) लवङ्गम्। सिन्दूरम्। चूर्णम्। इति मेदिनी॥ आर्द्रकम्। इति शब्दचन्द्रिका॥ कालागुरुः। इति राजनिर्घण्टः॥
शृङ्गारः, पुं, (शृङ्गं कामोद्रेकमृच्छतीति। ऋ गतौ+"कर्म्मण्यण्।" ३।२।१ इत्यण्। यद्वा, शृ हिंसायाम्+"शृङ्गारशृङ्गारौ।" उणा० ३। १३६। इति आरन्प्रत्ययेन साधुः।) सुरतः। नाट्यरसः। गजभूषणम्। इति मेदिनी॥ * ॥ नाट्यरसस्य लक्षणं यथा,—
"पुंसः स्त्रियां स्त्रियाः पुंसि संयोगं प्रति या स्पृहा।
स शृङ्गार इति ख्यातो रतिक्रीड़ादिकारणम्॥"
इत्यमरटीकायां भरतः॥
अपि च।
"शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते॥
परोढ़ां वर्जयित्वान्त्र वेश्यास्वाननुरागिणीम्।
आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः॥
चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः॥
त्यक्तोग्रमरणालस्यजुगुप्साद्यभिचारिणः।
स्थायी भावो रतिः श्यामवर्णोऽयं विष्णुदैवतः॥"
स च द्विधा। विप्रलम्भः संभोगश्च। इति साहित्यदर्पणम्॥ अन्यत् मैथुनशब्दे द्रष्टव्यम्॥ * ॥ शृङ्गारादिभङ्गे नरको यथा,—
"शृङ्गाराहारनिद्राणां यश्च भङ्गं करोति च।
स व्रजेत् कालसूत्रञ्च स्वामिनश्च विशेषतः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४२ अध्यायः॥
शृङ्गारकं, क्ली, (शृङ्गारमेव। स्वार्थे कन्।) सिन्दूरम्। इति राजनिर्घण्टः॥ शृङ्गविशिष्टे, त्रि। शृङ्गशब्दात् "शृङ्गह्रस्वाभ्यामारकन् वक्तव्यः।" ५। २।१२२। इत्यस्य वार्त्तिकोक्त्या आरकन्प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥ स्वार्थे के शृङ्गारश्च तत्र पुं॥
शृङ्गारभूषणं, क्ली, (शृङ्गारस्य भूषणम्।) सिन्दूरम्। इति हेमचन्द्रः॥
शृङ्गारयोनिः, पुं, (शृङ्गारे योनिरुत्पत्तिर्यस्य।) कामदेवः। इति हलायुधहेमचन्द्रौ॥
शृङ्गारी, [न्] पुं, (शृङ्गारोऽस्यास्तीति। इनिः।) पूगः। गजः। सशृङ्गारः। सुवेशः। इति मेदिनी॥ माणिक्यम्। इति राजनिर्घण्टः॥
शृङ्गिः, स्त्री, मत्स्यविशेषः। शिङ्गीमाछ इति भाषा। यथा,—
"मद्गुरस्यप्रिया शृङ्गी शृङ्गिरित्यपि कुत्रचित्
स्यादप्रिया मद्गुरसीति च नामद्वयम् क्वचित्।'
इति शब्दरत्नावली॥

शृङ्गिकं, क्ली. विषभेदः। इति हेमचन्द्रः॥ शृङ्गिका, स्त्री. प्रतिविषा इति शब्दरत्नावली॥ शृङ्गिणः, पुं, (शृङ्गेऽस्तः अस्येति। शृङ्ग+"ज्योत्स्नातमिस्रेति।"५।२।११४। इति इनच्।) मेघः। इति हेमचन्द्रः॥ शृङ्गिणी, स्त्री. (शृङ्गेऽस्तः अस्या इति। शृङ्ग+इनिः। ङीष्।) गौः। इत्यमरः॥ श्लेष्मघ्नी-हृस्वः। मल्लिकाहृस्वः। ज्योतिष्मतीहृस्वः। इति मेदिनी॥ शृङ्गी, [न्]पुं, (शृङ्ग+इनिः।) हस्ती। हृस्वः। पर्व्वतः।(यथा, रघुः। १२। ८०।

"रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः॥"

ऋषिविशेषः। स तु शमीकपुत्रः। अभिमन्यूजः परिक्षित् अनेनाभिशप्तः।) शृङ्गियुक्ते, त्रि। इति मेदिनी॥ यथा, रामायणे।२। २५। २०।

"महिषाः शृङ्गिणोरौद्रा नते हृन्तु पुत्रक॥")

शृङ्गी, स्त्री (शृङ्गि+वा ङीष्।) मल्लविशेषः। शिङ्गी इति जियल इति च भाषा। तत्पर्य्यायः। मद्गुरप्रिया २। इत्यमरः मधुरा ३। इति कलिङ्गः॥ मद्गुरसी ४ अप्रिया ५ शृङ्गिः ६। इति केचिदिति भरतः॥ अस्या गुणाः। स्वादुरत्वम्। स्निग्धत्वम्। हृंहनत्वम्। कफकोपनत्वम्। शोथपाण्डुरुत्पित्तनाशित्वञ्च। इति राजवल्लभः॥ अतिविषा। ऋषभौषधम्। इत्यमरः॥ कर्कटशृङ्गी। वृक्षः। वटः। विषम्। इति राजनिर्घण्टः॥ अलङ्कारसुवर्णम्। यथा। स्त्री शृङ्गी मण्डनसुवर्णे। इति भरतधृतरत्नकोषः॥

शृङ्गीकनकं, क्ली (शृङ्गी मण्डनसुवर्णम्। तदेव कनकम्।) अलङ्कारसुवर्णम्। इत्यमरः॥ अलङ्कारस्य कुण्डलादेर्यत् सुवर्णं तत् शृङ्गीकनकमुच्यते शृङ्गी अलङ्कारः तदर्थं कनकं-शृङ्गीकनकं अलङ्कारसुवर्णस्य शृङ्गीति च नाम। स्त्री शृङ्गी मण्डनसुवर्णे इति रत्नकोषः॥ शृङ्गी क्रुश्नात्वा च शृङ्गति कर्षादीन् शृङ्गिः अगि गमि व्रजे नाम्नीति इः निपातनात् जिः पाच्छोषादीति ईपि शृङ्गी। इति भरतः॥

शृचिः, स्त्री, पङ्गुः। इत्यमरः॥ "शृणाति मर्म्मस्थानं शृणिः। शृ सृ गि हिंसने कृगृश्यान्ताद्धास्यादेर्निरिति स्यादित्वात् क्नेर्निः निपातनादिह ह्रस्वः। नाम्नीति ङीर्व्वा।

"शृणिरङ्कुशवाचो च काशश्च तृणवाचकः।"

इति शब्दभेदात् तालव्यादिः। सरति मर्म्मस्थानं गच्छति सृचिर्हन्त्यादिरित्यन्ये। स्त्रियामित्यत्र द्वयोरिति पाठः। इतिभेदिनी॥ आवत्तमन्नमवमत्य शृणिं शितामयमिति माघः। स्त्रियामिति प्रायिकत्वादुक्तमिति सुकुटः।" इति भरतः॥

शृतं, त्रि, (श्रा पाके+क्तः।) "शृतं पाके।" ६। १। २७। इति शृभावः।) पक्वक्षीराज्यप्रयांसि। इत्यमरः॥ शृतमन्नं विवर्ज्जयेदिति-त्यागम्। इति भरतः॥ कथितम्। इति शब्द-चन्द्रिका रत्नमाला च॥*॥ अथ क्वाथविधिः।

"पानीयं षोड़शगुणं क्षुण्ण द्रव्यतले क्षिपेत्। मृत्पात्रे क्वाथयेत् ग्राह्यमष्टमांशावशेषितम्॥ कर्षादौ तु पलं यावत् दद्यात् षोड़शिकं जलम्। तज्जलं पाययेद्धीमान् कोष्णं मृदग्निसाधितम्। मृतः काथः कषायश्च निर्य्यूहः स निगद्यते॥"

क्वाथपानमात्रामाह।

"मात्रोत्तमा पलेन स्यात्त्रिभिरत्रैस्तु मध्यमा। जघन्या च पलार्द्धेन क्षेपक्वाथौषधेन च॥"

तत्रान्तरे।

"क्वाथद्रव्यतले वारि द्विरष्टगुणमिष्यते। चतुर्भागावशिष्टन्तु पेयं पलचतुष्टयम्॥ दीप्तानलं महाकायं पाययेत् हृच्छलिं जलम्। अन्ये त्वर्द्धं परित्यज्य प्रसृतन्तु चिकित्सकाः॥ क्वाथत्यागमनिच्छन्तस्त्वष्टभागावशेषितम्। पारम्पर्य्योपदेशेन वृद्धवैद्याः पलद्वयम्॥" अष्टभागावशेषितस्य चतुर्भागावशिष्टापेक्षया गुरुत्वाद्दीप्तानलं महाकायं पलद्वयं पाययेन्मध्यमाग्निमल्पकायं पलमात्रं पाययेत्। मात्रोत्तमा पलेन स्यादित्यादिवचनात्। "क्वाथे क्षिपेत् मितमंशेषतुर्थाष्टमषोड़शैः। वातपित्तकफातङ्के विपरीतं मधु स्मृतम्॥ जीरकं गुग्गुलुं चारं लवणञ्च शिलाजतु। क्षिप्त्वा त्रिकटुकञ्चैव क्वाथे शीतोन्मितं क्षिपेत्॥ क्षीरं घृतं गुड़ं तैलं मूत्रं चान्यत् द्रवं तथा। कल्कं चूर्णादिकं क्वाथे निक्षिपेत् कर्षसम्मितम्॥ तत्रोपविश्य विश्रान्तः प्रसन्नवदनेक्षणः। औषधं क्षैम रजतं स्फाटिकाजनपरिस्थितम्॥ पिबेत् प्रसन्नहृदयः पीत्वा पात्रमधोमुखम्। विधायाचम्य सलिलं ताम्बूलाद्युपयोजयेत्॥"

इति भावप्रकाशः॥

अन्यच्च।

"द्रव्यादापोत्थितात्तोये वह्निना परितापितात्। निःसृतो यो रसः पूतः स घृतः समुदाहृतः॥"

इति वैद्यकम्॥

शृध, व लड ङ पर्दे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्। लावेट्।)व, शर्त्-स्यति शिशृत्सति। ल, अशृधत्। ङ, शर्धते। उ, शर्द्धित्वा शृद्धा। पर्दोऽपानोत्सर्गः। शृधु प्रहसने इति चुरादिपरस्मैपदीधातुरन्यैर्न मन्यते। प्रहसनं विद्रवः। इति गोविन्दभटः। शर्धयति हृदं कुत्सितशब्दैर्बालः। इति रमानाथः। इति दुर्गादासः॥

शृध, उ अ क्लेदने (इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्। लावेट्।) ङ, शर्द्धित्वा शृद्धा। अ शर्धति शर्धते। क्लेदनमार्द्रभावः। इति दुर्गादासः॥

शृधुः, पुं, (शृध+बाहुलकात् कुः।) वृद्धिः। गुदम्। इति विश्वः॥

शृधूः, पुं, (शृध+"शृतिशृध्योः कूः।"उणा० १। ८३। इति कूः।)कुत्सितः। अपानम्। इति संक्षिप्तसारोणादिवृत्तिः॥

शृ, गि हिंसने। इति कविकल्पद्रुमः॥ क्रया०-पर०-सक०-सेट्।) गि, शृणाति। शीर्णः शीर्णिः। इति दुर्गादासः॥

शेखरं, क्ली, लवङ्गम्। इति राजनिर्घण्टः॥ शिग्रु-मूलम्। इति शब्दचन्द्रिका॥

शेखरः, पुं, (शिखि गतौ+बाहुलकात् अरप्रत्ययेन साधुः।) शिखावस्थितमाल्यम्। इत्यमरः॥ यथा,—

"शिखाविन्यस्तमालायामापीड़ः शेखरोऽपि च॥"

इति शब्दरत्नावली॥

(यथा, माघे। ११। ४६।

"नवकरनिकरेण स्पष्टबन्धूकसून-स्तवकरचितमेते शेखरं बिभ्रतीव॥"

शिरोभूषणमात्रम्। यथा, कुमारे। ७। ३२।

"बभूव भस्मैव सिताङ्गरागः कपालमेवामलशेखरश्रीः॥")

गीतस्य ध्रुवविशेषः। तल्लक्षणं यथा,—

"द्वादशाक्षरपादः स्यात् स चाल्पशुभकृत् प्रभोः।
हंसके च रसे वीरे गीयते शेखरो ध्रुवः॥"

इति सङ्गीतदामोदरः॥

लघुशेखरो यथा,—

"लघुर्गुरुर्भवेद्यत्र स भवेल्लघुशेखरः॥"

इति तत्रैव॥

(शृङ्गम्। यथा, कथासरित्सागरे।२८।१८८।

"ततोऽस्तगिरिशेखरं व्रजति वासरेशे शनैः सखीं पुनरुपागमप्रणयिणीं समापृच्छ्य ताम्। क्षणं जनितविस्मया गगनमार्गमुत्पत्य सा जगाम वसतिं निजां प्रसवमेव सोमप्रभा॥")

शेखरी, स्त्री, वन्दा। इति शब्दरत्नावली॥

शेपः, पुं, (शी+बाहुलकात् पः।) शेफः। इति शब्दरत्नावली॥ (यथा, वाजसनेयसंहितायाम्॥ १८। ८८।

"वस्तिर्न शेपो हरसा तरस्वी॥")

शेपालः, पुं, (शी+वालन्। बाहुलकात् वकारस्य पकारः। इत्युणादिवृत्तौ उज्ज्वलदत्तः।४।३८) शैवालः। इति शब्दरत्नावली॥

शेफः, पुं, शिश्नः। इति शब्दरत्नावली॥ (यथा, महाभारते। १०। ७। ३८।

"विकटाः कालललम्बोष्ठा हृष्टश्मश्रुफाण्ड-पिण्डकाः॥")

शेफः, [स] क्ली, (शेते रेतःपातानन्तरमिति। शी+"हृङ्शीङ्भ्यां स्वरूपाङ्गयोः पुट् च।" उणा० ४। २००। इति असुन्। अत्र केचित् फ चेति पठन्ति इत्यतः फः।) शिश्नः। इत्यमरः॥ शुक्रपाते सति शेते पतति इति शेफः। शौङ्धातोर्नाम्नीति फस्प्रत्ययः। शेफसशेपसौ शेफशेपौ शैवर्क्षेति यच्च रूपाणि भवन्तीत्याचार्य्याः। इति भरतः॥ (यथा, बृहत्संहितायाम्। ६८। ८।

"ऋक्षशुक्लशेफसो लगुडिरालशिराश्च धनवन्तः॥")

शेफालिः, स्त्री, (शेरते इति शेफाः शयनशालिन-स्तादृग्या अलयो भङ्गा यत्र।) शेफालिका। इति शब्दरत्नावली॥

शेफालिका, स्त्री, (शेफालि + स्वार्थे कन्।) पुष्प-वृक्षविशेषः। शिउली इति भाषा॥ (यथा,—

"शेफालिकां विदलितामवलोक्य तन्वी
प्राणान् कथञ्चिदपि धारयितुं प्रभुः सा।
आकर्ण्य सम्प्रति रुतं चरणायुधानां
किंवा व्यवस्यति न वेद्मि तपस्विनी सा॥"
इत्यूढटः॥)

तत्पर्य्यायः। सुवहा २ निर्गुण्डी ३ नीलिका ४। इत्यमरः॥ चत्वारि शेफालिकामात्रे। शिय-लीति ख्यातनीलपुष्पायां शेफालिकामिति केचित्। शेफालिकादिदयं शेफालिकामात्रे निर्गुण्डादिदयं नीलपुष्पशेफालिकायामिति केचित्। इति तट्टीकायां भरतः॥ शेफाली ५ मलिका ६ रजनीहासा ७ निशिपुष्पिका ८। सा शुक्ला चेत् श्वेतसुरसा ९ भूतवेशी १०। इति शब्दरत्नावली॥ शुक्लाङ्गी ११ श्वेत-मञ्जरी १२ विजया १३ वातारिः १४ भूत-केशी १५। अस्या गुणाः। कटुत्वम्। तिक्त-त्वम्। उष्णत्वम्। रूक्षत्वम्। वातकफाङ्ग-सन्धिवातगुदवातादिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

शेफाली, स्त्री, (शेफालि + ऋदिकारादिति वा ङीप्।) शेफालिका। इति शब्दरत्नावली॥ नीलसिन्धुवारः। इति भावप्रकाशः॥

शेमुषी, स्त्री, (शेते इति शेः मोहः। शी + विच् तं मुष्णातीति। मुष स्तेये + मूलविभुजादित्वात् कः। गौरादित्वात् ङीष्। इत्यमरटीका।) बुद्धिः। इत्यमरः। १। ५। १॥ (यथा, राज-तरङ्गिण्याम्। ३। २०६।

"खिन्नस्य हि विपर्य्येति तत्त्वग्रस्यापि शेमुषी॥"

शेल क्ट चालगत्योः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) अशिशेलत्। इति दुर्गादासः॥

शेलुः, पुं, (शेलतीति। शेल गतौ + डः।) बहु-वारकवृक्षः। इत्यमरः॥ (यथा, सुश्रुते। ४। ३८।

"विदार्य्यैरावतौशेलुशाल्मलीधवलाङ्कुराः॥"

तत्फलमपि। यथा, मनुः। ५। ६।

"शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्जयेत्॥")

शेवः, पुं, (शेते रेतःपातानन्तरमिति। शी + "इण् शीङ्भ्यां वन्।" उणा० १। १५२। इति वन्। मेढ्रः। अहिः। उक्ते, त्रि। इत्युणादिकोषः॥ (क्ली, सुखम्। इति निघण्टुः। ३। ६॥ त्रि, सुखकरम्। यथा, ऋग्वेदे। १। ५८। ६।

"मित्रं न शेवं दिव्याय जन्मने॥"

"मित्रं न शेवं यथा सखा सुखकरो भवति तद्वत् सुखकरमित्यर्थः।" इति तद्भाष्ये सायणः॥)

शेवधिः, पुं, (शेवं सुखं धीयतेऽस्मिन्निति। धा + कः।) निधिः। इत्यमरः॥ (यथा, मनुः। २। ११४।

"विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम्।
असूयकाय मां मादास्तथास्यां वीर्य्यवत्तमा॥"

शेवलं, क्ली, शैवालम्। इति शब्दरत्नावली॥ (मनुष्यनाम। इति पाणिनिः। ५। ३। ८४॥)

शेवलिनी, स्त्री, (शेवलं शैवालमस्या अस्तीति। इनिः।) नदी। इति राजनिर्घण्टः॥

शेवालं क्ली, (शेते जले इति। शी + "शीङो धुक्लक्वलञ् वालनः।" उणा० ४। ३८। इति वालन्।) शैवालम्। इति शब्दरत्नावली॥ (यथा. राजेन्द्रकर्णपुरे। २५।

"शङ्के पङ्के पतति यतते बालशेवालमूले
कूले लोलः किमपि कुरुते कर्म्म वैकुण्ठकूर्म्मः॥"

शेवाली, स्त्री, आकाशमांसी। इति राजनिर्घण्टः॥

शेषं, क्ली, (शिष्यते यदिति। शिष + घञ्।) प्रसादः। इति मेदिनी। षे, २८॥

शेषः, पुं, (शेषति सङ्कर्षतीति। शिष हिंसायाम् + अच्।) सङ्कर्षणः। स तु बलदेवः। (यथा, माघे। २। ६८।

"निशम्य ताः शेषगवीं रभिधातुमधोक्षजः।
शिथाय हृष्टतां पत्युः प्रस्तावमादिशत् दृशा॥"

शिष वधे + भावे घञ्।) वधः। अनन्तः। स च सर्पराजः। इति मेदिनी॥ (यथा, कुमारे। २। ३।

व्यादिश्यते भूधरतामवेक्ष्य
क्षणेन देहोद्वहनाय शेषः॥")

तस्य ध्यानं यथा,—

"फणासहस्रसंयुक्तं चतुर्बाहुं किरीटिनम्।
नवाम्बुपल्लवाकारं पिङ्गलश्मश्रुलोचनम्॥
पीताम्बरधरं देवं शङ्खचक्रगदाधरम्।
कराग्रे दक्षिणे पद्मं गदां तस्याप्यधःकरे।
दधानं सर्व्वलोकेशं सर्व्वाभरणभूषितम्।
क्षीराब्धिमध्ये श्रीमन्तमनन्तं पूजयेत्ततः॥"
इति भविष्यपुराणम्॥

गजः। नागः। स्त्रीलक्षेतरवस्तु। इत्यजयपालः॥ भगवतो द्वितीया मूर्त्तिः। यथा,—

"एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवामला।
वासुदेवाभिधाना सा शुद्धातीता सुनिष्कला॥
द्वितीया कालसंज्ञान्या तामसी शेषसंज्ञिता।
निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः॥"
इति कौर्म्मे ४८ अध्यायः॥

शेषशयनप्रकारो यथा,—

"अनन्तस्तत्र गत्वा तु यत्र क्षीरोदसागरः।
तत्र स्वर्यं श्रिया युक्तं सुषुप्सन्तं जनार्द्दनम्॥
तस्योपधानमकरोदनन्तो दक्षिणां फणाम्।
उत्तरां पादयोश्चक्रे उपधानं महाबलः।
तालहस्तं तदा चक्रे स शेषः पश्चिमां फणाम्॥
स्वयन्तु बीजयामास शेषरूपी जनार्द्दनम्॥
शङ्खं चक्रं नन्दकासिमिषुधी हे महाबलः।
ऐशानयाथ फणया स दधे गरुडं तदा॥
गवां पद्मञ्च शार्ङ्गञ्च तथैव विविधायुधम्।
यानि चान्यानि तस्यासन्नेया फणया दधौ॥
एवं ज्ञात्वा स्वकं काय शयनीयं तदा हरेः।
भूतभव्यजगन्नाथं परापरपतिं हरिम्॥
दधार शिरसानन्तः स्वयमेव स्वकां तनुम्।
एवं ब्रह्मदिनस्यैव प्रमाणेन निशां हरिः।
सन्ध्यान्ते समधिप्राप्य शेते नारायणोऽव्ययः॥"
इति कालिकापुराणे २७ अध्यायः॥

शेषः, पुं, क्ली, (शिष्यते इति। शिष + घञ्।) उपयुक्तेतरवस्तु। इति मेदिनी॥ शेषोऽवशिष्ट-मवशिष्टता च शेषः शेषश्चेत्यादि। अनन्ते तु शेषः पुंलिङ्ग एव शिष्टप्रयोगात्। उक्तादन्यः शेषः यथा। शङ्खपद्मौ निधिवाचकौ पुंलिङ्गौ जलजे तूभयलिङ्गौ इति सर्व्वानन्दः। इत्यमर-टीकायां भरतः॥०॥ ऋणादिशेषरक्षानिषेधो यथा,—

"ऋणशेषञ्चाग्निशेषं शत्रुशेषं तथैव च।
पुनः पुनः प्रवर्द्धन्ते तस्मात् शेषं न कारयेत्॥"
इति गारुड़े ११६ अध्यायः॥

(अवशिष्टे, त्रि। यथा, रघुः। ४। ६४।

"अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः॥"

तथाच रामायणे। २। २६। ३२।

"वन्दितव्यस्त्वया नित्यं या शेषा मम मातरः"

शेषत्वं, क्ली, (शेषस्य भावः। शेष + त्व।) उप-कारित्वम् पारार्थ्यम्। परोद्देश्यप्रवृत्तिकत्वम्। यथा,—

"शेषत्वमुपकारित्वं द्रव्यादावाह बादरिः।
पारार्थ्यं शेषता तच्च सर्व्वेष्वस्तीति जैमिनिः॥"
इत्यधिकरणमालायां माधवाचार्य्यः॥

शेषस्य भावः। इति व्याकरणम्॥

शेषरात्रिः, स्त्री, (शेषा अवशिष्टा रात्रिः।) रात्रिशेषः। तत्पर्य्यायः। उषन्द्रः २ अपरात्रः ३। इति शब्दरत्नावली॥

शेषा, स्त्री, (शिष्यतेऽसौ। शिष् + घञ्। टाप्।) स्वनिर्म्माल्यार्पणम्। इति मेदिनी। (यथा, कुमारे। ३। २२।

"तथेति शेषामिव भर्त्तुराज्ञा-
मादाय मूर्ध्ना मदनः प्रतस्थे॥")

शैक्षः, पुं, (शिक्षामधीते इति। शिक्षा + अण्।) प्राथमकल्पिकः। इत्यमरः॥ इे प्रथमारब्ध-वेदाध्ययने। शिक्षणं शिक्षा। सेमन्तात् सरो-रिति अः। शिक्षा प्रथमोपदेशः तत्साह-चर्य्यात् ग्रन्थोऽपि शिक्षा तामधीयते शैक्षाः। दृघे कादिति षः प्रथमं शिक्षणीयं कल्पं शास्त्रं अधीयते प्राथमकल्पिकाः। इति भरतः॥ (शिक्षा शीलमस्येति। "ऋदादिभ्यो यः।" ४। ६२। इति यः। शिक्षाशीले, त्रि॥)

शैक्षिकः, त्रि, शिक्षाशास्त्रवेत्ता। शिक्षां वेत्ति अधीते वा इत्यर्थे ष्ठिकप्रत्ययेन निष्पन्नः॥

शैखरिकः, पुं, (शिखरे प्रायेण भवतीति। शिखर + ठञ्।) अपामार्गः। इत्यमरः॥

शैखरेयः, पु, (शिखरे भवः। शिखर + ढञ्।) अपामार्गः। इति भरतधृतरत्नकोषः॥

शैत्यं, क्ली, (शीतस्य भावः। शीत + "वर्णदृढ़ा-दिभ्यः ष्यञ् च।" ५। १। १२३। इति ष्यञ्।)

शीतलत्वम्। यथा,—
"शैत्यं नाम गुणस्तवैव सहजः स्वाभाविकी स्वच्छता
किं ब्रुमः शुचितां भवन्ति शुचयः सर्वेण यस्या परे।
किं वान्यत् कथयामि ते स्तुतिपदं त्वं जीवितं जीवनं
त्वच्चेत्रीचपथेन गच्छसि पयः कस्त्वां निषेद्धुं क्षमः॥"
इति लक्ष्मणसेनः॥
शैथिल्यं, क्ली, (शिथिल+भावे ष्यञ्।) शिथिलत्वम्। शिथिलस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥ (यथा, मार्कण्डेये। १०८। २२।
"भवन्तु केशाः पलिताः वलयः सन्तु मे शुभे।
शैथिल्यमेतु मे कायः कृतकृत्योऽस्मि मानिनि॥")
शैनेयः, पुं, (शिनेर्गोत्रापत्यमिति। शिनि+"इतश्चानिञः।"४।१।१२३। इति ढक्।) सात्यकिः। स तु श्रीकृष्णसारथिः। इति त्रिकाण्डशेषः॥ (यथा, भागवते। १। ८। ७।
"आमन्त्र्य पाण्डुपुत्रांश्च शैनेयोद्धवसंयुतः।
द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः॥")
शैरीयकः, पुं, नीलझिण्टी॥ इति रत्नमाला॥
शैरेयकोऽपि पाठः। दन्त्यसादिश्च॥
शैलं, क्ली, (शिलाया भवम्। शिला+अण्।) शैलेयम्। तार्क्ष्यशैलम्। इति मेदिनी॥ शिलाजतु। इति राजनिर्घण्टः॥
शैलः, पुं, (शिला सन्त्यस्येति। शिला+ज्योत्स्नादित्वादण्।) पर्व्वतः। इत्यमरः॥ (यथा, रघुः। ४। ७१।
"ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः।
वर्द्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः॥"
शिलासम्बन्धिनि, त्रि। यथा, भागवते। ११। २७। १२।
"शैली दारुमयी लौही लेप्या लेख्या च सैकती
मनोमयी दारुमयी प्रतिमाष्टविधा स्मृता॥")
शैलकं, क्ली, (शैलमेव। स्वार्थे कन्।) शैलजम्। इति शब्दरत्नावली॥ (यथा, बृहत्संहितायाम्। ७७। १०।
"हरीतकीशङ्खघनद्रवाम्बुभि-
र्मुड्रोत्पलैः शैलकसुस्तकान्वितैः।
नवान्तपादादिविवर्द्धितैः क्रमात्
भवन्ति धूपा बहवो मनोहराः॥")
शैलगन्धं, क्ली, (शैलस्य गन्धो यत्र।) शावरचन्दनम्। इति राजनिर्घण्टः॥
शैलगर्भाह्वा, स्त्री, शिलावल्ली। इति राजनिर्घण्टः॥
शैलजं, क्ली, (शैले पर्व्वते जायते इति। जन+डः।) सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। शीतशिवम् २ शैलेयम् ३ शिलासनम् ४ शिलेयम् ५ शीतलम् ६ शैलम् ७ कालानुसार्य्यम् ८ शैलकम् ९ हृदम् १० कालानुसारि ११ अम्बुपुष्पम् १२ शैलस्थम् १३ शिलापुष्पम् १४ गन्धम् १५ इतिच

रत्नमाला॥ अस्य गुणाः शैलेयशब्दे द्रष्टव्याः॥
पर्व्वतजाते, त्रि,॥
शैलजा, स्त्री, (शैले जायतेऽसौ इति। जन+डः। टाप्।) सिंहली। गजपिप्पली। इति राजनिर्घण्टः॥ दुर्गा। हिमशैलजत्वात्। यथा,
"तत् श्रुत्वा भगवद्वाक्यं विस्मिता हिमशैलजा।"
इति शिवरात्रिव्रतकथा॥
शैलधन्वा [न्] (पुं, (शैलवत् दृढं धनुरस्य। धनुषो धन्वन्नादेशः।) महादेवः। इति त्रिकाण्डशेषः॥
शैलधरः, पुं, (शैलस्य गोवर्द्धनस्य धरः।) श्रीकृष्णः इति धनञ्जयः॥
शैलनिर्य्यासः, क्ली, (शैलस्य निर्य्यास इव रसो यत्र।) शैलेयम्। इति केचित्॥
शैलपत्रः, पुं, (शैलवत् सुगन्धि पत्रमस्य।) विल्ववृक्षः। इति राजनिर्घण्टः॥
शैलबीजः, पुं, (शैलवत् कठिनं बीजमस्य।) भल्लातकवृक्षः। इति राजनिर्घण्टः॥
शैलभित्तिः, स्त्री, (शैलानां भित्तिर्भेदो यस्याः।) टङ्कः। इति जटाधरः॥
शैलराजः, पुं, (शैलानां राजा। "राजाहः सखिभ्यष्टच्।"५।४।९१। इति टच्।) हिमालयपर्व्वतः। (यथा, कुमारे। ७। ६८।
"मूर्द्धानमालि क्षितिधारणेश्च-
मुच्चैस्तरं वक्ष्यति शैलराजः॥")
शैलराजसुता, स्त्री, (शैलराजस्य सुता।) दुर्गा यथा,—
"अरूपा परभावत्वाद्बहुरूपा क्रियात्मिका।
जाता शैलेन्द्रगेहे मा शैलराजसुता ततः॥"
इति देवीपुराणे ४५ अध्यायः॥
(गङ्गा। यथा, महाभारते। ३। १०९। ४
"प्रयाचञ्च महाबाहो शैलराजसुतां नदीम्।
पतमानां सरित्श्रेष्ठां धारयिष्ये त्रिपिष्टपात्॥")
शैलवल्कला, पुं, (शैलं शिला वल्कलं यस्याः॥) शिलावल्कला। इति राजनिर्घण्टः॥
शैलशिविरं, क्ली, (शैलानां शिविरमिव समुद्रगर्भे बहुपर्व्वतावस्थानत्वात्तथात्वम्।) समुद्रः। इति त्रिकाण्डशेषः॥
शैलसुता, स्त्री, (शैलस्य सुता।) पार्व्वती। यथा,—
"मातः शैलसुतासपत्नि वसुधाशृङ्गारहारावलि
स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं प्रार्थये॥"
इति वाल्मिकीयगङ्गाष्टकम्॥
ज्योतिष्मती। इति राजनिर्घण्टः॥
शैलाख्यं, क्ली, (शैलमिति आख्या यस्य।) इति रत्नमाला॥
शैलाग्रं, क्ली, (शैलस्य अग्रम्।) शिखरम्। इति त्रिकाण्डशेषः॥
शैलाजं, क्ली, (शैलादाजायते इति। आ+जन+डः।) शैलेयम्। इति राजनिर्घण्टः॥
शैलाटः, पुं, (शैले भटतीति। भट+अच्।) देवलः। सिंहः। शुक्लकाचः। किरातः। इति मेदिनी॥
शैलादिः, पुं, नदी। यथा,—
"निमित्तानीदृशान् दृष्ट्वा भूतभव्यभवो विभुः।
शैलादिं प्राह वचनं सस्मितं गणिशेश्वरः॥
हर उवाच।
नन्दिन् जयोऽस्य भावी नो न कथञ्चित् पराजयः।
निमित्तानीह दृश्यन्ते शुभदानि गणेश्वर॥
तच्छम्भुवचनं श्रुत्वा शैलादिः प्राह शङ्करम्।
कः सन्देहो महादेव यत् त्वं जयसि शात्रवान्॥")
इति वामने ६५ अध्यायः॥
शैलाली, [न्]पुं, (शिलालिना प्रोक्तं नटसूत्रमधीते इति। शिलालि+"पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः।"४। ३। ११० इति णिनिः।) नटः। इत्यमरः॥
शैलिकः, पुं, सर्व्वलिङ्गी। इति जटाधरः॥
शैली, स्त्री, (शीलयेयमिति। शील+अच्। ङीष्।) सङ्केतः। यथा,—
"प्रश्नैः परिभाषा शैली सङ्केतसमयकाराः।"
इति त्रिकाण्डशेषः॥
आचार्य्याणामियं शैली यत् सामान्येनाभिधाय विशेषेण विवृणोति। इति शुद्धबोधटीकायां दुर्गादासः॥ (शिलाप्रतिमा। यथा, रामायणे। १। ६४। १२।
"यन्मां लोभयसे रम्भे कामक्रोधजयैषिणम्।
दशवर्षसहस्राणि शैली स्थास्यसि दुर्भगे॥")
शैलूषः, पुं, शिलूषस्यापत्यमिति। शिलूष+अण् नटः। (यथा, माघे। १। ६८।
"अथोपपत्तिं छलनापरोऽपरा-
मवाप्य शैलूष इवैष भूमिकाम्॥")
विल्ववृक्षः। इत्यमरः॥ धूर्त्तः। तालधारकः। इति शब्दरत्नावली॥
शैलूषिकः, पुं, नटवृत्त्यन्वेषी। यथा,—
"वृत्त्यन्वेषी नटानान्तु स तु शैलूषिकः स्मृतः॥"
इति ब्रह्मपुराणोक्तम्॥
इति प्रायश्चित्तविवेकः॥
शैलूषिकी, स्त्री, शैलूषिकजातिस्त्री। तद्गमनप्रायश्चित्तं यथा। संवर्त्तः।
नटीं शैलूषिकीं चैव रजकीं वेणुजीविनीम्।
कामतस्तु यदा गच्छेच्चरेच्चान्द्रायणद्वयम्॥"
ततश्चाज्ञानतश्चान्द्रायणम्। चान्द्रायणे षेण्वष्टकम्। इति प्रायश्चित्ततत्त्वम्॥
शैलेन्द्रः, पुं, (शैलानामिन्द्रः।) हिमालयः। यथा,—
"दृष्ट्वास्ते ततो देवीमीषद्धासां व्यवस्थिताम्।
सिंहस्कन्धपरिश्लेन्द्रशृङ्गे महति काञ्चने॥"
इति देवीमाहात्म्यम्॥
शैलेन्द्रस्थः, पुं, (शैलेन्द्रे तिष्ठतीति। स्था+कः।) भूर्जवृक्षः। इति राजनिर्घण्टः॥

शैलेयं, क्ली. (शिलायां भवम्। शिला+ढक्।) शैलजाख्यगन्धद्रव्यम्। शैलेयक इति रन्दूच इति छरिला इति च ख्यातम्। तत्पर्य्यायो यथा,— "शैलेयं शैलजं हृद्यं शिलापुष्पं शिलोद्भवम्। स्थविरं पलितं जीर्णं तथा कालानुसार्य्यकम्॥ शिलोत्थञ्च शिलाद्रुः शैलाजं गिरिपुष्पकम्। शिलाप्रसूनं सुभगं शैलकं षोडशाह्वयम्॥" अस्य गुणाः। "शैलेयं शिशिरं तिक्तं सुगन्धि कफपित्तजित्। दाहहृत्क्षयवमिश्वासव्रणदोषविनाशनम्॥" इति राजनिर्घण्टः॥ अपि च। "शैलेयन्तु शिलापुष्पं हृद्यं कालानुसार्य्यकम्। शैलेयं शीतलं हृद्यं कफपित्तहरं लघु। कण्डूकुष्ठाश्मरीदाहविषहृद्गुदरक्तहृत्॥" इति भावप्रकाशः॥०॥ तालपर्णी। सैन्धवम्। इति मेदिनी॥ शैलेयं, त्रि, (शैले भवम्। शैल+ढक्।) शैलसम्भवम्। इति हेमचन्द्रः॥ शिलातुल्यम्। इति शब्दरत्नावली॥ (शिलेव। शिला+"शिलाया ढः।" ५।३।१०२। इति योगविभागेन ढञ्॥) शैलेयः, पुं, (शैले भवः। शैल+ढक्।) सिंहः। भ्रमरः। इति शब्दरत्नावली॥ शैलेयी, स्त्री, (शैले भवा। शैल+ढक्। ङीष्।) पार्व्वती। इति विकाण्डशेषः॥ शैलोद्भवा, स्त्री, (शैलात् उद्भवो यस्याः।) शुद्धपाषाणभेदी। इति राजनिर्घण्टः॥ शैल्यं, त्रि, (शिला+ष्यञ्।) शिलासम्बन्धि। शिलाया इदं इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥ शैवं, क्ली, शैवालः। इति शब्दचन्द्रिका॥ (शिवमधिकृत्य कृतो ग्रन्थः। शिव+अण्।) शिवपुराणम्। यथा— "अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते। ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा॥" इति मत्स्यमासतत्त्वे विष्णुपुराणम्॥ (शिवस्येदमिति। शिव+अण्।) शिवसम्बन्धिनि, त्रि (यथा। कथासरित्सागरे। ४०।८८। "प्रापदायतनं शैवं नद्यास्तस्यास्तटस्थितम्॥") शैवः, पुं, (शिव+अण्।) वसुकः। धुस्तूरः। इति राजनिर्घण्टः॥ आचारविशेषः। यथा— "अष्टाङ्गयोगसंयुक्तो यजेद्देवीं विधानतः। यावज्जानं समाधिश्च तावत् शैवः प्रचक्षते॥" इत्याचारभेदतन्त्रम्॥०॥ शिवोपासकः। तत्पर्य्यायः। औडुम्बरोतसिकः २ इति विकाण्डशेषः। एतद्भेदा यथा— "ततश्चकार भगवान् चातुर्व्वर्ण्यं हरार्च्चने। शास्त्राणि चैषां मुख्यानि नानोक्तिविदितानि च। आद्यं शैवं परिख्यातमन्यत् पाशुपतं मुने!। तृतीयं कालवदनं चतुर्थञ्च कपालिनम्॥ शैव आसीत् स्वयं शक्तिर्व्वशिष्टस्य प्रियः सुतः। तस्य शिष्यो बभूवाथ गोपायन इति श्रुतः॥ महापाशुपतस्त्वासीद्दारुहाजस्तपोधनः। तस्य शिष्योऽभवद्राजा ऋषभः सोमकेश्वरः॥ कालास्यो भगवानासीदापस्तम्बस्तपोधनः। तस्य शिष्यो वको वेश्यो नाम्ना क्रोधेश्वरो मुनिः॥ महाव्रतो च धनदस्तस्य शिष्यश्च वीर्य्यवान्। कुलोदर इति ख्यातो जात्या शूद्रो महातपाः॥ एवं स भगवान् ब्रह्मा पूजनाय शिवस्य च। कृत्वा तु चातुराश्रम्यं स्वमेव भवनं गतः॥" इति वामने ६ अध्यायः॥*॥ तस्य स्वरूपं यथा। आयान्तं शैवमालोक्याह। "श्रीमानसावेति जटालमौलि- र्व्याघ्रत्वगालम्बितमध्यभागः। विभूतिसंभूषितभास्वदङ्गो रुद्राक्षमालाकलितोर्द्धदेहः॥" इति विद्वन्मोदतरङ्गिण्यां २ तरङ्गः॥ शैवलं, क्ली, (शेते इति। शी+"शीङो धुग्वक्लञ् वालनः।" उणा०४। ३८। इति वलच्।) पद्मकाष्ठम्। शैवाले, पुं, इति मेदिनी॥ (यथा कुमारे। ५। ८। "न षट्पदश्रेणिभिरेव पङ्कजं सशैवलाभ्यामपि प्रकाशते॥" विन्ध्यसमीपदक्षिणभागवर्त्तिगिरिविशेषः। यथा, रामायणे। ७। ८८। १३। "शैवलस्योत्तरे पार्श्वे ददर्श सुमहत् सरः॥") शैवलिनी, स्त्री, (शैवलमस्या अस्तीति। इनिः।) नदी। इत्यमरः॥ शैवालं, क्ली, (शी+बाहुलकात् वालच्।) जलजद्रव्यविशेषः। शेयाला इति भाषा। (यथा, महाभारते। ४। ६०। १७। "प्रावर्त्तयद्दीं घोरां शोणितोदां तरङ्गिणीम्। केशशैवालसंवाधां युगान्ते कालनिर्म्मिताम्॥") तत्पर्य्यायः। जलनीली २ शैवलः ३। इत्यमरः॥ शेपालम् ४ शेवलम् ५ शीवलम् ६ शेपालः ७ जलनीलिका ८। इति वाचस्पतिः॥ जलनीलः ९। इति मुकुटादयः। इति भरतः॥ सैवालम् १० शेवालम् ११ वारिचामरः १२ शैवलम् १३ सलिलकुन्तलम् १४ हटपर्णी १५ पद्मतालम् १६। इति शब्दरत्नावली॥ धरकः १७ जलकेशः १८ कावारम् १९। इति हारावली॥ जलजम् २०। अस्य गुणाः। शीतलत्वम्। स्निग्धत्वम्। सन्तापप्रशमनाग्नित्वञ्च। इति राजनिर्घण्टः॥ शैव्यः, पुं, श्रीक्षाणस्य घोटकविशेषः। यथा,— "तुरगाः शैव्यसुग्रीवमेघपुष्पबलाहकाः।" इति विकाण्डशेषः॥ (यथा च महाभारते। १। २२१। ३। "रथेन काञ्चनाङ्गेन कल्पितेन यथाविधि। शैव्यसुग्रीवयुक्तेन किङ्किणीजालमालिना॥") पाण्डवसेनापतिविशेषः। यथा— "धृष्टकेतुश्चेकितानः काशीराजश्च वीर्य्यवान्। पुरुजित् कुन्तिभोजश्च शैव्यश्च नरपुङ्गवः॥" इति श्रीभगवद्गीतायाम्। १। ५।

(स्त्री, प्रतीपस्य राज्ञः पत्नी। इति महाभारतम्। १। ८५। ४४॥ सगरस्य राज्ञः पत्नी। सा तु असमञ्जसो जननी। यथा, महाभारते। ३। १०७। ३९। "असमञ्जा इति ख्यातः सगरस्य सुतोऽभवत्। यं शैव्या जनयामास पौराणां स हि दारकान्। गलेषु क्रोशतो गृह्य नद्यां चिक्षेप दुर्म्मतिः॥" शिवसम्बन्धिनि, त्रि॥ शैशवं, क्ली, शिशोर्भावः। (शिशु+"दृगन्ताच्च लघुपूर्व्वात्।" ५। १। १३१। इति अण्।) बाल्यम्। इत्यमरः॥ यथा, "शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्। वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥" इति रघुवंशे १ सर्गः॥ शैशिरः, पुं, (शिशिरे ऋतौ भवः। शिशिर+अण्। श्यामचटकः। इति राजनिर्घण्टः॥ शिशिरसम्बन्धि, त्रि, यथा। स्मृतिः। तपस्तप्स्यो शैशिराहतुः। इति तिथ्यादितत्त्वम्॥ शैशोपाध्यायिका, स्त्री, (शिशोपाध्यायानांभावः कर्म्म वा। शिशोपाध्याय+"हृन्मनोज्ञादिभ्यश्च।" ५। १। १३३। इति वुञ्।) शिशाध्यापना। इति सिद्धान्तकौमुदी॥ शो, य निशाने। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-अनिट्।) निशानमिह ताक्ष्णीकरणम्। य, श्यति श्यितुं शूरः। इति दुर्गादासः॥ शोकः, पुं, शुच+घञ्।) चित्तविकलता। इष्टवियोगानुचिन्तनम्। इति नागोजीभट्टः॥ बन्धादिवियोगजनिता मनःपीड़ा। इति भावप्रकाशः॥ तत्पर्य्यायः। मन्युः २ शुक् ३। इत्यमरः॥ शुचा ४ निग्रमः ५। इत्यमरः॥ शोचनम् ६ खेदः ७। इति हेमचन्द्रः। तन्निवारणहेतुर्यथा,— "भरतं पतितं दीनं शोचन्तं सुभृशं तदा। शोचमानं वशिष्ठस्तु वारयामास हेतुभिः॥ शोचमानस्तु सस्नेहा बान्धवाः सुहृदस्तथा। पातयन्ति गतं स्वर्गादश्रुपातेन राघव॥ भूरिद्युम्नो गतः स्वर्गं पुण्येन पतितः पुनः। शोचितो बन्धुवर्गेण मृतस्त्वं परित्यज॥" इति वह्निपुराणम्॥ अपि च। अथ शोकापनोदनम्। याज्ञवल्क्यः॥ "कृतोदकान् समुत्तीर्णान् मृदुगाढलसंस्थिताम्। स्नातानपनुदेयुस्तानितिहासैः पुरातनैः॥ मानुषे कदलीस्तम्भे निःसारे सारमार्गणम्। यः करोति स संमूढो जलबुद्बुदसन्निभे॥ पञ्चधा संभृतः कायो यदि पञ्चत्वमागतः। कर्म्मभिः स्वैरशेषैस्तत्र का परिवेदना॥ गन्धर्वो वसुमती चाग्निमुदधिर्दैवतानि च। फेनप्रख्यः कथं नाम मर्त्यलोको न यास्यति॥ शैशवे वान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः। अतो न रोदितव्यं हि क्रियाकार्य्या विधानतः॥" इति शुद्धितत्त्वम्॥

अन्वश्च ।

श्रीभगवानुवाच ।

"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥
अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥
देही नित्यमवध्योऽयं देहे सर्व्वस्य भारत ।
तस्मात् सर्व्वाणि भूतानि न त्वं शोचितुमर्हसि॥"

इति श्रीभगवद्गीतायाम् २ अध्यायः ॥

शोकनाशः, पुं, (शोकस्य नाशो यस्मात् ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

शोकहारी, स्त्री, (शोकं हरतीति । हृ + अण् । ङीष् ।) वनवर्व्वरिका । इति राजनिर्घण्टः ॥

शोकारिः, पुं, (शोकस्य अरिः ।) कदम्बवृक्षः । इति शब्दचन्द्रिका ॥

शोचनं, क्लो, (शुच् + ल्युट् ।) शोकः । इति हेमचन्द्रः ॥ (शोचतीति । शुच शोके + "जुचङ्क्रम्यदन्द्रम्यसृगृधीति ।" ३ ।२।१५० । इति युच् । शोकशीले, त्रि ॥)

शोचना, स्त्री, शोकोत्पादना । शोचि शिडन्नात् ङनप्रत्ययान्तादात्प्रत्ययनिष्पन्ना । इति संक्षिप्तसारव्याकरणम् ॥

शोचिः, [स्]क्लो,(शुच्यत्यनेनेति। शुच + "अर्चिशुचिहुसृपीति ।"उणा० २।१०८। इति इसिः ।) प्रभा । इत्यमरः ॥ (यथा, भागवते ।३।१५।२६।

"तद्दिव्यगुर्व्वधिकृतं भुवनैकवन्द्यं
दिव्यं विचित्रविबुधाग्र्यविमानशोचिः ॥")

शोचिष्केशः,पुं,(शोचींषि केशा इव यस्य । नियतं समासेऽनुत्तरपदस्थस्येति षत्वम् ।) अग्निः । चित्रकवृक्षः । इत्यमरः ॥ (क्वचित् वाच्यलिङ्गोऽपि । तथा, ऋग्वेदे । १ । ४५ । ६ ।

"शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ।"

"शोचिष्केशं दीप्तिरूपकेशोपेतम् ।" इति तद्भाष्ये सायणः ॥)

शोचुकः त्रि, अवरः । क्षुद्रः । इति शब्दमाला ॥

शोटीर्य्यं, क्लो, वीर्य्यम् । इति शब्दरत्नावली ॥

शोठः, त्रि, मूर्खः । अलसः । इति मेदिनी ॥ धूर्त्तः । नीचः । पापरतः । इति शब्दरत्नावली ॥

शोण, ऋ गतौ । वर्णे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-वर्णे अक०-सेट् ।)वर्णे रक्तीभावः । शोणति सूर्य्यः सन्ध्यायाम् । इति दुर्गादासः ॥

शोणं, क्लो,(शोणतीति । शोण वर्णे + पचाद्यच् ।) सिन्दूरम् । रुधिरम् । इति राजनिर्घण्टः ॥

शोणः, पुं, (शोण वर्णे + अच् ।) रक्तोत्पलतुल्यवर्णः । तत्पर्य्यायः । लोहनदच्छविः २ । इत्यमरः ॥ रक्तोत्पलाभः ३ । इति शब्दरत्नावली ॥ रक्तोत्पलाभः ४ । इति जटाधरः ॥ (यथा, भागवते । १ । ११ । २ ।

"स उच्चकाशे धवलोदरोदरो-
ऽप्यरुक्रमस्याधरशोणशोणिमा ॥")

नदविशेषः । तत्पर्य्यायः । हिरण्यवाहः । इत्यमरः ॥ हिरण्यवाहः ३ । इति भरतः ॥ स तु अमरकण्टकदेशात् पाटलिपुत्रे गङ्गायां मिलितः । तज्जलगुणाः । रुचिदत्वम् । सन्तापशोषापहत्वम् । पथ्यत्वम् । वह्निकरत्वम् । बलशोणाङ्गहृद्विप्रदत्वञ्च । इति राजनिर्घण्टः॥ अग्निः । श्योनाकः । लोहिताक्षः । कोकनदच्छाये, त्रि । इति मेदिनी ॥ समुद्रविशेषः । इति धरणिः ॥ रक्तेक्षुः । श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥ (रक्तवर्णे, त्रि । यथा, कुमारे । १ । ७ ।

"व्यस्ताक्षरा धातुरसेन यत्र
भूर्ज्जत्वचः कुञ्जरबिन्दुशोणाः ॥")

शोणकः, पुं,(शोण एव । स्वार्थे कन् ।)शोणवृक्षः । इत्यमरः ॥

शोणझिण्टिका, स्त्री, (शोणा रक्तवर्णा झिण्टिका ।) रक्तसैरेयः । इति राजनिर्घण्टः॥

शोणझिण्टी, स्त्री, (शोणा रक्तवर्णा, झिण्टी ।) कुरुवकः । कण्टकिनी । इति राजनिर्घण्टः ॥

शोणपत्रः, पुं, (शोणवत् रक्तानि पत्राणि यस्य ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

शोणपद्मकं, क्लो, (शोणं रक्तवर्णं पद्मकम् ।)रक्तकमलम् । इति राजनिर्घण्टः ॥

शोणपुष्पकः, पुं, (शोणं पुष्पं यस्य । कन् ।) कोविदारः । इति राजनिर्घण्टः ॥

शोणपुष्पी,स्त्री, (शोणवत् पुष्पमस्याः । ङीष् ।) सिन्दूरपुष्पी । इति राजनिर्घण्टः ॥

शोणरत्नं, क्लो, (शोणं रक्तवर्णं रत्नम् ।) पद्मरागमणिः । इत्यमरः ॥

शोणा, स्त्री, (शोणो रक्तवर्णोऽस्त्यस्या इति । अच् । टाप् ।) शोणवर्णयुक्ता । इति जटाधरः ॥

शोणाकः, पुं, वृक्षविशेषः । शोणा इति ख्यातः । तत्पर्य्यायः । श्योनाकः२ शुकनासः ३ ऋक्षः४ दीर्घवृन्तः ५ कुटजटः ६ अरलुः ७ स्वर्णवल्कलः ८ ध्वान्तशाखवः९ । इति शब्दमाला ॥ मण्डूकपर्णः १०पचोर्णः ११नटः १२कटङ्कुः१३ टुण्टुकः १४ शोणकः १५ अरलः १६। इत्यमरः ॥ श्योनाकः १७ अरटुः १८। इति तट्टीका ॥

शोणितं, क्लो, (शोण वर्णे + क्तः ।) शोण + जातार्थे इतच् वा ।) रक्तम् । इत्यमरः ॥ (यथा, मनुः । ११ । २०८ ।

"शोणितं यावतः पांशून् संगृह्णाति महीतले ।
तावन्त्यब्दसहस्राणि तत्कर्त्ता नरके वसेत् ॥")

तस्योत्पत्तिर्गर्भस्थस्य पञ्चमे मासि भवति । इति सुखबोधः ॥ कुङ्कुमम् । इति राजनिर्घण्टः ॥

शोणितचन्दनं, क्लो, (शोणितवत् चन्दनम् ।) रक्तचन्दनम् । इति राजनिर्घण्टः ॥

शोणितपुरं, क्लो, (शोणिताख्यं पुरम् ।) बाणपुरम् । इति त्रिकाण्डशेषः ॥

शोणिताह्वयं, क्लो, (शोणितं आह्वयो यस्य ।) कुङ्कुमम् । इति रत्नमाला ॥

शोणितोत्पल, क्लो, (शोणितवत् रक्तमुत्पलम् ।) रक्तोत्पलम् । इति केचित् ॥

शोणी, स्त्री, (शोण + "शोणात् प्राचाम् ।" ४ । १ । ४३ । इति ङीष् ।) रक्तोत्पलतुल्यवर्णा स्त्री । इति व्याकरणं जटाधरश्च ॥ (बङ्गभा० इति काशिका ॥)

शोणोपलः, पुं, (शोणो रक्तवर्णः उपलः ।) माणिक्यम् । इति राजनिर्घण्टः ॥

शोथः, पुं, (शवतीति । शु गतौ + बाहुलकात् थन् । इत्युणादिवृत्तौ उज्ज्वलः । २ । ४ ।) रोगविशेषः । तत्पर्य्यायः । शोफः २ क्षयथुः३ । इत्यमरः ॥ शोथकः ४ । इति शब्दरत्नावली ॥

अथ शोथाधिकारः । तत्र शोथस्य विप्रकृष्टं निदानमाह ।

"गुदगामयाभक्तक्लमादलानां
क्षारान्नतीक्ष्णगुरूपसेवा ।
दध्यामसूच्छाकविरोधिपिष्ट-
गरोपसृष्टान्नविषेवणञ्च ॥
अर्शांस्यचेष्टा वपुषो ह्यशुद्धि-
र्मर्म्मोपघातो विषमा प्रसूतिः ।
मिथ्योपचारः प्रतिकर्म्मणाञ्च
निजस्य हेतुः क्षयथोः प्रदिष्टा ॥"

गुदविभ्रंशविरेकादि । आमयाः पाण्डुरोगादयः । अभक्तं अभोजनम् । आमः अपक्वो भुक्तस्य रसः । पिष्टगरोपसृष्टान्नं पिष्टौ योगरः संयोगजं विषं तेन उपसृष्टमन्नम् । वपुषो ह्यशुद्धिः शोधनार्हस्य वपुषोऽशोधनम् । मर्म्मोपघातः दोषजात एव ज्ञेयः । आगन्तुजशोथहेतुरेव । विषमा प्रसूतिः आमगर्भपतनादिना । प्रतिकर्म्मणां वमनादीनां पञ्चकर्म्मणाम् । मिथ्योपचारः असम्यक्करणम् । क्षयथोः शोथस्य । निजस्य आत्मीयस्य । सन्निकृष्टस्य हेतोर्वातादेः । हेतुः रूक्षोष्णमधुरादि ॥* सन्निकृष्टनिदानमाह ।

"दोषैः पृथक् द्वयैः सर्व्वैरभिघातादिषादपि ।
सर्व्वो हेतुविशेषैस्तु रूपभेदो नवात्मकः ॥"*॥

संप्राप्तिपूर्व्वकं सामान्यं लक्षणमाह ।

"रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् बहिःशिराः
नीत्वा रुद्धगतिस्तैर्हि कुर्य्यात् त्वक्मांसमश्नयम्
उत्सेधं संहतं शोथं तमाहुर्निचयादतः ॥
सगौरवं स्यादनवस्थितत्वं
सोत्सेधमुष्माथ शिरातताम्रत्वम् ।
सलोमहर्षञ्च विवर्णता च
सामान्यलिङ्गं क्षयथोः प्रदिष्टम् ॥"

उत्सेधः उन्नतत्वं किं विशिष्टमुत्सेधं यतः पूर्व्वोक्तानिचयात् रक्तपित्तकफवातानां समुदायात् । संहत घनम् । तमुत्सेधं शोथमाहुरित्यन्वयः ॥ * ॥ तस्य शोथस्य किं स्यादित्या-

काङ्क्षयाह। अनवस्थितत्वं स्यादनियता स्थितिः स्यादित्यर्थः। चिकित्साव्यतिरेकेणापि निवृत्तेः। तज्ज्ञानवस्थितत्वं गौरवं स्यात्। गौरवमप्यनवस्थितं स्यात्। अथ च मोक्षेधं स्यात्। उन्नतत्वमप्यनवस्थितं स्यादित्यर्थः ॥*॥ वातिकं शोथमाह।

"चरस्तनुस्त्वक्परुषोऽरुणोऽमितः
प्रसुप्तिहर्षान्तियुतो निमित्ततः।
प्रशाम्यति प्रोन्नतमेति पीड़ितो
दिवा बली स्यात् क्षयथुः समीरणात्॥"

चरः सञ्चारी। प्रसुप्तिः सुप्तता। हर्षोऽत्र झिनिझिनी रोमाञ्चो वा। अर्त्तिः पीड़ा। एतदयुतः। दिवाबलीविकृतिविषमसमवायारब्धत्वात्। अतएवोक्तं चरकेण।

"स्नेहोष्मस्वेदनाद्यैर्यः प्रशाम्येत् स च वातिकः।
यश्चाप्यरुणवर्णः स्यात् शोथो नक्तं प्रशाम्यति॥" * ॥

पैत्तिकमाह।

"मृदुः मनाग्योऽमितपीतरागवान्
भ्रमज्वरस्वेदतृषामदान्वितः।
य उच्यते सर्षरुगचिरागकृत्
स पित्तशोथो भृशदाहपाकवान्॥"

उच्यते सन्तप्यते। भृशदाहपाकवान् भृशदाहो यः पाकस्तद्युक्तः॥ * ॥ श्लैष्मिकमाह।

"गुरुः स्थिरः पाण्डररोचकान्वितः
प्रसेकनिद्रा वमिवह्निमान्द्यकृत्।
स जन्मजन्मप्रभवो निपीड़ितो
न चोन्नमेद्राचिवलीकफात्मकः॥"*॥

द्वन्द्वजमाह।

"निदानाकृतिसंसर्गात् ज्ञेयः शोथो द्विदोषजः॥

सान्निपातिकमाह।

"सर्वाकृतिः सन्निपाताच्छोथो व्यामिश्रलक्षणः
व्यामिश्रलक्षण इत्यत्र सर्व्वाकृतिरिति उक्तघातजादिशोथसकललक्षणनियमार्थम्॥ * ॥

अभिघातजमाह।

"अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः।
हिमानिलोदध्यनिलैर्भक्षातकपिकच्छुजैः॥
रसैः शूकैश्च संसर्गात् क्षयथुः स्यादिसर्पवान्।
शूनोष्मा लोहिताभासः प्रायशः पित्तलक्षणः॥"

छेदः खड्गादिना भेदः पाषाणादिना क्षतं शरादिना नाड़ीव्रणादि च। आदिशब्देन नखदन्तप्रहारादि गृह्यते। भक्षातजैः रसैः। कपिकच्छुजैः शूकैः। विसर्पवान् प्रसरणशीलः। पित्तलक्षणः पैत्तिकशोथलक्षणयुक्तः॥*॥ विषजमाह।

"विषजः सविषप्राणिपरिसर्पणमूतणात्।
दंष्ट्रादन्तनखावातादविषप्राणिनामपि॥
विस्फूर्जथुक्लोपहतमलवद्रक्तसंकटात्।
विषद्रव्यानिलस्पर्शात् शरीरागावचूर्णनात्॥
मृदुश्लोऽवलम्बी च शीघ्रो बहुकलाकरः।"

परिसर्पणं शरीरोपरि सञ्चरणम्। दंष्ट्रादिगुणी कृता दन्तावली। चौं ह इति लोके। दन्ता अग्रे भगाः। अविषप्राणिनामपौत्पत्तेन दंष्ट्रा दन्तनखानां स्वभावादेव सविषत्वमुक्तम्। किन्तु सर्पादिविषं मारकं भवति। अविषप्राणिनां दंष्ट्रादिविषं शोथव्यथादिकरं भवतीति विशेषः। विण्मूत्रे त्यादिविड़ाद्युपहतं मलिनञ्च यद्रक्तम् तथा सङ्करः संमार्जनीनिःक्षिप्तो धूल्यादिः तेषां सम्पर्कात्। गरयोगावचूर्णनात् गरः संयोगजं विषं तस्य योगो यस्य तेन वस्तुनावधूननात्। अवलम्बी लम्बमानः। अयमप्यागन्तुजस्तथापि सामान्यागन्तुजशोथचिकित्सातोऽस्य विशिष्टचिकित्साभिधानात् पृथक् पठितः॥ * ॥

यत्र स्थिता दोषा यच्च शोथं कुर्व्वन्ति तदाह।

"दोषाः क्षयथुमूर्द्धं हि कुर्वन्त्रामाशये स्थिताः।
पित्ताशयस्था मध्ये तु वर्त्मस्थानगतास्त्वधः॥
कृत्स्नं देहमनुप्राप्ताः कुर्य्युः सर्व्वसरं तथा।"

ऊर्द्धं उरःप्रभृत्यूर्द्धम्। मध्ये पक्वाशयमध्ये। अधः पक्वाशयादधः॥*॥ उपद्रवानाह।

"श्वासं पिपासा कर्हिचं दौर्बल्यं ज्वर एव च।
यस्य चात्रे रुचिर्नास्ति शोथिनं तं विवर्जयेत्॥"

कष्टसाध्यत्वादिकमाह।

"यो मध्यदेशे क्षयथुः स कष्टः सर्व्वगश्च यः।
अर्द्धाङ्गेऽरिष्टभूतश्च यश्चोर्द्धं परिसर्पति॥"

मध्यदेशे उरःपक्वाशयमध्ये। सर्व्वगः सकलशरीरभवः। सर्व्वज इति पाठे सान्निपातिकः। अर्द्धाङ्गे अर्द्धनारीश्वराकारे। यश्चोर्द्धं परिसर्पतीति पुरुषविषयम्। तथा च।

"ऊर्द्धगामी नरं पक्वाशयधोगामी मुखात् स्त्रियम्।
उभयं वस्तिसंजातः शोथो हन्ति न संशयः॥"

ऊर्द्धगामी मुखगामी। तथा च तन्त्रान्तरे।

"पादप्रवृत्तः क्षयथुर्नृणां यः प्राप्नुयान्मुखम्॥"
इति॥ स न सिध्यतीति शेषः। अधोगामी पादगामी। तथा च तन्त्रान्तरे।

"स्त्रीणां वक्त्रात् पदं याति वस्तिजश्च न सिध्यति।" इति॥

उभयं नरं नारीञ्च। अपरञ्च।

"अनन्योपद्रवकृतः शोथः पादसमुत्थितः।
पुरुषं हन्ति वा नारीं मुखजो वस्तिजो द्वयम्॥"

अयमर्थः। पादसमुत्थितः पादाभ्यासुत्थितो मुखगामीति यावत् शोथः पुरुषं हन्ति स किं विशिष्टः अनन्योपद्रवकृतः। शोफादन्ये व्याधयो ज्वरातीसारग्रहण्यर्शःप्रभृतयः तेषामुपद्रवैः कृतः। तदुपद्रवेण जात इत्यर्थः। न अन्योपद्रवकृतः। अनन्योपद्रवकृतः। अर्थात् स्वहेतुभिरेव जातः। शोथव्याधिरेव तु पुनर्मुखजः मुखाज्जातः पदगामीति यावत् नारीं हन्ति। सोऽप्यनन्योपद्रवकृत एव। वस्तिजः द्वयं पुरुषं नारीञ्च हन्ति सोऽप्यनन्योपद्रवकृत एव॥*॥ अथ शोथस्य चिकित्सा।

"गुण्ठीपुनर्नवैरण्डपञ्चमूलीशृतं जलम्।
वातिके क्षयथौ शस्तं पानाहारपरिग्रहैः॥*॥
पटोलत्रिफलारिष्टदार्व्वीक्वाथः सगुग्गुलुः।
हन्ति पित्तकृतं शोथं दहनञ्चानुषङ्गिणम्॥*॥
स्रुक्क्षीरभाविताः कृष्णा पथ्या मूत्रेण वा युताः
योजिताः शमयन्त्याशु शोथं श्लेष्मसमुत्थितम्॥
मिश्रे मिश्रक्रियां कुर्य्यात् सर्व्वजे सर्व्वमेव हि।
विल्वपत्ररसं पूतं शोथघ्नं त्रिभवे पिबेत्॥*॥
शोथे त्वागन्तुजे कुर्य्यात् सेकलेपादिशीतलम्।
भल्लातकस्य हरेच्छोथं सतिला कृष्णमृत्तिका।
महिष्या नवनीतञ्च लेपाद्दग्धतिलान्वितम्॥"

अत्र दुग्धं महिष्या एव। यत आह।

"महिषीक्षीरसंपिष्टैर्नवनीतसमन्वितैः।
तिलैर्लिप्तः समं याति शोथो भल्लातकोत्थितः॥
यष्टिदुग्धतिलैर्लेपो नवनीतेन संयुतः।
शोथमारुस्करं हन्ति चूर्णैः शालदलस्य च॥"

विषजशोथचिकित्सा तु विषचिकित्सायांद्रष्टव्या अथ सामान्यचिकित्सा।

"पथ्या निशा भार्ग्यमृताग्निदार्व्वी-
पुनर्नवा दारु महौषधञ्च।
क्वाथं प्रपीयोदरपाणिपाद-
सुखागतं हन्त्यचिरेण शोथम्॥"

इति पथ्यादिक्वाथः॥*॥

फलत्रिकोद्भवं क्वाथं गोमूत्रेणैव साधयेत्।
वातश्लेष्मभवं शोथं हन्यादुष्टव्रणसम्भवम्॥*॥
हयीवदेवदुमनागरैश्च
दन्ती त्रिवृद्वृषणचूर्णकैर्व्वा।
दुग्धं सुसिद्धं विधिना निपीतं
गीतं परं शोथहरं भिषग्भिः॥"

हयीवः वर्षाभूः॥*॥

"केशस्तथार्कवर्षाभूर्निम्बक्वाथेन शोथहृत्।
गोमूत्रेणापि कुर्व्वीत सुखोष्णं नावसेचनम्॥*॥
पुनर्नवा दारु गुण्ठी शिग्रुः सिद्धार्थकस्तथा।
अम्लपिष्टः सुखोष्णोऽयं प्रलेपः सर्व्वशोथहृत्॥
गुड़ार्द्रकं वा गुड़नागरं वा
गुड़ाभयां वा गुड़पिप्पलीं वा
कर्षाभिवृद्ध्या त्रिपलप्रमाणं
खादेन्नरः पञ्चमथापि मासम्॥
शोथप्रतिश्यायगलास्यरोगान्
सश्वासकासारुचिपीनसादीन्।
जीर्णज्वरार्शोग्रहणीविकारान्
हन्यात् तथान्यान् कफवातरोगान्॥*॥
विश्वं गुड़ेन तुल्यं हयीवरसानुपानमध्यस्तम्।
विनिहन्ति सर्व्वशोथं घनहृन्दंचण्डवायुरिव॥*॥
कथानागरजं चूर्णं सगुड़ं शोथनाशनम्।
आमाजीर्णप्रशमनं शूलघ्नं वस्तिशोधनम्॥*॥
गुड़ात् पलत्रयं ग्राह्यं शृङ्गवेरं पलत्रयम्।
शृङ्गवेरसमा कृष्णा लोहवित्तिलयोः पलम्॥
चूर्णमेतत् समुद्दिष्टं सर्व्वक्षयथुनाशनम्॥"

इति गुड़ादिवटिका॥

"मानकक्वाथकल्काभ्यां घृतप्रस्थं विपाचयेत्।
पक्वं हन्याज्जं शोथं त्रिदोषञ्च व्यपोहति॥"

इति मानकघृतम्॥

"शुष्कमूलवर्षाभूदारुराम्नामहौषधैः।
पक्वमभ्यञ्जनात्तैलं समूलं क्षयथुं हरेत्॥"

गुडूच्यमूलकतैलम्। इति शोथाधिकारः। इति भावप्रकाशः॥

शोथकः, पुं, (शोथ एव। स्वार्थे कन्।) शोथः। इति शब्दरत्नावली॥

शोथघ्नी, स्त्री,(शोथं हन्तीति। हन्+"अमनड्यकर्त्तरि च।"३।२।५३। इति टक्।) पुनर्नवा। इत्यमरः। शालपर्णी। इति राजनिर्घण्टः॥ शोथनाशके, त्रि॥

शोथजित्, पुं,(शोथं जयतीति। जि+क्विप्।) भल्लातकः। इति त्रिकाण्डशेषः॥

शोथजिह्मः, पुं, (शोथे जिह्मः कुटिल इव। तन्नाशकत्वात्।) पुनर्नवा। इति त्रिकाण्डशेषः॥

शोथहृत, पुं, (शोथं हरति नाशयतीति। हृ+क्विप्।) भल्लातकः। इति रत्नमाला॥ शोफहारके, त्रि॥

शोधनं, क्ली,(शोधयतीति। शुध+णिच्+ल्युः) कड्डछम्। इति राजनिर्घण्टः॥ (शुध+भावे ल्युट्।) शौचम्। इति शुधधात्वर्थदर्शनात्॥ (प्रायश्चित्तम्। यथा, मनुः। ११। १६१।

"अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता। अन्नानभुक्तन्तूत्तार्य्यं शोधं वाप्याशु शोधनैः॥") विष्ठा। इति शब्दचन्द्रिका॥ कांसीसम्। इति राजनिर्घण्टः॥ विहितविहितमासादिविचारणम्। यथा,—

"सूर्य्यग्रहणकालेन समानो नास्ति कश्चन। तत्र यदत्तं कृतं सर्व्वमनन्तफलदं भवेत्। न मासतिथिवारादिशोधनं सूर्य्यपर्व्वणि॥"

इति मलमासतत्त्वम्॥ *॥

धातुनिर्दोषीकरणम्। यथा,—

"पत्तूरोक्तपत्राणि हेम्नो वङ्गे प्रतापयेत्। निषिञ्चेत्तप्ततप्तानि तैलचक्रे च काञ्जिके॥ गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा। एवं हेम्नः परित्याज्य धातूनां शोधनं भवेत्॥"*॥

व्रणादिपरिष्कारणम्। यथा,—

"व्रणस्य त्वग्विशुद्धस्य क्वाथः शुद्धिकरः परः। पटोलनिम्बपत्रस्य सर्व्वैव प्रयुज्यते॥ वातिके दशमूलानां चीरिणां पैत्तिके व्रणे। आरग्वधादेः कफजे कषायः शोधनं हितम्॥"

अपि च।

"अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा। अथवा क्वाथनेनैव सिद्धमुष्णोदकं वदेत्। श्लेष्मामवातमेदोघ्नं वस्तिशोधनदीपनम्॥"

इति च भावप्रकाशः॥ *॥

लिखितपत्रादेः प्रमाणीकरणम्। यथा। लेख्यशोधनमाह कात्यायनः।

"स्वहस्तलेख्यसन्देहे जीवतो वा मृतस्य च। तत् स्वहस्तकृतैरन्यैः पत्रैस्तल्लेख्यनिर्णयः॥"*

विरुद्धलिखितस्य शुद्धीकरणम्। यथा। तच्छोधनमाह बृहस्पतिः।

"न्यूनाधिकं पूर्व्वपक्षं तावदादौ विशोधयेत्। न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥" कात्यायनः।

"शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम्। उत्तरेणावरुद्धस्य निहृत्तं शोधनं भवेत्॥"

इति व्यवहारतत्त्वम्॥* ॥

अङ्गस्य हरणम्। यथा,—

"भाज्याहरः शुध्यति यद्गुणः स्या-दन्त्यात् फलं तत् खलु भागहारे। समेन केनाप्यपवर्त्तनं हार-भाज्यौ भजेद्वा सति सम्भवे तु॥

इति लीलावती॥

अन्यत् शुद्धिशब्दे द्रष्टव्यम्॥

शोधनः, पुं, (शोधयतीति। शुध+णिच्+ल्युः।) निम्बूकः। इति राजनिर्घण्टः॥

शोधनः, त्रि, (शोधयतीति। शुध+णिच्+ल्युः।) शुद्धिकारकः। यथा,—

"महाशान्तपनः शुद्धेः तप्तकृच्छ्रस्तु पावनः। जलोपवासकृच्छ्रस्तु ब्रह्मकूर्च्चस्तु शोधनः॥"

इति प्रायश्चित्ततत्त्वधृतविष्णुमित्रवचनम्॥

यथा च।

"तैलसैन्धवयुक्ताङ्गनिम्बपत्रनिशायुगैः। त्रिदृद्दधनयुतैः पिष्टैः प्रलेपो व्रणशोधनः॥

इति भावप्रकाशः॥

शोधनी, स्त्री, (शोधतेऽनयेति। शुध शौचे+णिच्+करणे ल्युट्। ङीप्।) संमार्জ্জनी। इत्यमरः॥ ताम्रवल्ली। नौली। इति राजनिर्घण्टः॥

शोधनीबीजं,क्ली,(शोधन्या बीजमिव बीजं यस्य।) जयपालः। इति राजनिर्घण्टः॥

शोधनीयः, त्रि, शोधितव्यः। शोध्यः। शुधधातोरनीयप्रत्ययेन निष्पन्नः॥ (यथा, कथासरित्सागरे। ५३। १४१।

"भुक्तं मया तदन्नं यत्शोधनीयं मयापि तत्॥"

शोधितं,त्रि,(शोध्यते स्मेति। शुध+णिच्+क्तः। मक्षिकाद्यपनयनेनकृतशोधनव्यञ्जनादि। तत्पर्य्यायः। संमृष्टम् २। इत्यमरभरतौ॥ अपि च।

"व्यञ्जने केशकीटादिशुद्धे संमृष्टशोधिते॥"

इति शब्दरत्नावली॥

अपनीतमलम्। तत्पर्य्यायः। निर्णिक्तम् २ मृष्टम् ३ निःशोध्यम् ४ अनवस्करम् ५। इत्यमरभरतौ॥

शोफः,पुं,(शुच गतौ। बाहुलकात् फः।) शोथः। इत्यमरः॥ (यथा, सुश्रुते। १। १४।

"तदुद्दुष्टं शोणितमनिर्हियमाणः कण्डूशोफरागदाहपाकवेदना जनयेत्॥")

शोफघ्नी, स्त्री, (शोफं हन्तीति। हन+टक्। ङीप्।) शालपर्णी। रक्तपुनर्नवा। इति राजनिर्घण्टः॥

शोफनाशनः, पुं, (शोफं नाशयतीति। नश+णिच्+ल्युः।) नीलवृक्षः। इति राजनिर्घण्टः॥ शोथनाशके, त्रि॥

शोफहृत्,पुं,(शोफं हरतीति। हृ+क्विप्।)भल्लातकः। इति भावप्रकाशः॥ शोथहारके, त्रि॥

शोभनं, क्ली, (शोभते इति। शुभ+ल्युः।) पद्मम्। इति शब्दचन्द्रिका॥ (शुभ+भावे ल्युट्। शुभम्। यथा, भागवते। ५। १८।२१।

"अहो बतैषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः॥")

शोभनः, पुं, (शुभ+ल्युः।) ग्रहः। इति धरणिः॥ विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चमयोगः। इति मेदिनी॥ तत्र जातफलम्।

"स्याच्छोभनः शोभनयोगजन्मा टच्चो विपक्षप्रतिलब्धवित्तः। सदुत्तरश्मश्रुवपुः सुधीरः संमानयुक्तो मनुजः प्रवीणः॥"

इति कोष्ठीप्रदीपः॥

शोभनः, त्रि, (शोभते इति। शुभ+ल्युः।) सुन्दरः। इति मेदिनी॥ अस्य पर्य्यायो मनोज्ञशब्दे द्रष्टव्यः॥

शोभनकः, पुं, (शोभते इति। शुभ+ल्युः। ततः कन्।) शोभाञ्जनवृक्षः। इति शब्दचन्द्रिका॥ शोभनशब्दकारके, त्रि॥

शोभना, स्त्री, (शोभन+टाप्।) हरिद्रा। गोरोचना। इति राजनिर्घण्टः॥

शोभा, स्त्री, शोभन्तेऽनया। (शुभ+करणे घञ्। टाप्।) दीप्तिः। तत्पर्य्यायः। कान्तिः२ द्युतिः३ छविः४। इत्यमरः॥ द्युतौ ५ छवौ६ इति तट्टीका॥ अभिख्या ७। इति जटाधरः॥ शुभा ८ भाः ९ श्रीः १० भासा ११ भा १२ इति शब्दरत्नावली॥ सुषमा १३ काया १४ विभा १५ दृक्प्रिया१६ भानम् १७ भातिः१८ कमा १९ रमा २०। इति राजनिर्घण्टः॥ तस्या लक्षणम्।

"सा शोभा रूपभोगाद्यैर्यत् स्यादङ्गविभूषणम्। शोभैवकान्तिराख्याता मन्मथाप्यायनोज्ज्वला॥"

इत्युज्ज्वलनीलमणिः॥ *॥

गोपीविशेषः। यथा,—

"दृष्ट्वैव शोभया गोप्या युक्तश्चन्दनकानने। सद्यो मच्छब्दमात्रेण तिरोधानं कृतं त्वया॥ शोभा देहं परित्यज्य जगाम चन्द्रमण्डलम्। ततस्तस्याः शरीरञ्च स्निग्धं तेजो बभूव ह॥ संविभज्य त्वया दत्तं हृदयेन विदूयता। रत्नाय किञ्चित् स्वर्णाय किञ्चिन्मणिवराय च॥ किञ्चित् स्त्रीणां सुखाद्येभ्यः किञ्चिदन्नाय किञ्चन। किञ्चित् किशलयेभ्यश्च पुष्पेभ्यश्चापि किञ्चन॥ किञ्चिच्चन्दनपङ्केभ्यस्तोयेभ्यश्चापि किञ्चन। किञ्चित् फलेभ्यः शस्येभ्यः सुपक्वेभ्यश्च किञ्चन। किञ्चिद्भूतनवस्वेभ्यो दुग्धेभ्यश्चापि किञ्चन॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः॥*॥

हरिद्रा। गोरोचना। इति राजनिर्घण्टः॥

शोभाञ्जनः, पुं, (शोभं रुचिरं अञ्जनं यस्मात्।) वृक्षविशेषः। शजिना इतिभाषा। तत्पर्य्यायः। शिग्रुः २ तीक्ष्णगन्धकः३ अक्षीवः४ मोचकः५। इत्यमरः॥ तीक्ष्णगन्धः ६ सुतीक्ष्णः ७ घन-

पक्षदः ८ श्वेतमरिचः ९। इति जटाधरः ॥ तीक्ष्णः १० गन्धः ११ गन्धकः १२ काचीवकः १३ काचीवः १४ शुभाञ्जनः १५ स्त्रीचित्तहारी १६ द्रविणनाशनः १७। इति शब्दरत्नावली ॥ कृष्णगन्धा १८ मूलकपर्णी १९। इति रत्नमाला ॥ नीलशिग्रुः २० जनप्रियः २१ सुखमोदः २२ कृष्णशिग्रुः २३ चक्षुष्यः २४ रुचिराञ्जनः २५। अस्य गुणाः। तीक्ष्णत्वम्। कटुत्वम्। स्वादुत्वम्। उष्णत्वम्। पिच्छिलत्वम्। जन्तुवातार्त्ति-शूलनाशित्वम्। चक्षुर्हितत्वम्। रोचनत्वञ्च। इति राजनिर्घण्टः ॥ अपि च।

"शोभाञ्जनः कटुस्तिक्तः शोथविद्रधिगुल्मनुत्"

इति राजवल्लभः ॥

अन्यच्च। अथ शोभाञ्जनः श्यामः श्वेतः रक्तश्च।

"शोभाञ्जनशिग्रुस्तीक्ष्णगन्धकाचीवमोचकः।
तद्बीजं श्वेतमरिचं मधुशिग्रुः सलोहितः॥
शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः।
दीपनो रोचनो रूक्षः सरस्तिक्तो विदाहकृत्॥
संग्राह्यशुक्रलो हृद्यः पित्तरक्तप्रकोपणः।
चक्षुष्यः कफवातघ्नो विद्रधिक्षयगुल्मनुत्॥
मेदोपदोषविषप्लीहगुल्मगण्डव्रणान् हरेत्।
श्वेतः प्रोक्तगुणो ह्येष विशेषाद्दाहकृद्भवेत्॥
प्लीहानं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तकृत्।
मधुशिग्रुः प्रोक्तगुणो विशेषादीपनः सरः।
शिग्रुवल्कलपत्राणां स्वरसः परमार्त्तिहृत्॥"

अस्य पुष्पगुणाः।

"शिग्रोः पुष्पन्तु कटुकं तीक्ष्णोष्णं वायुशोथनुत्।
कृमिहृत् कफवातघ्नं विद्रधिप्लीहगुल्मजित्॥"

अस्य फलगुणाः।

"शोभाञ्जनफलं स्वादु कषायं कफपित्तनुत्।
शूलकृच्छ्रक्षयश्वासगुल्महृत् दीपनं परम्॥"

इति भावप्रकाशः॥

अथ रक्तशोभाञ्जनपर्य्यायः।

"सरक्षो स्वादुगन्धा च मधुलग्नः शुभाञ्जनः॥"

इति रत्नमाला॥

अन्यच्च।

"रक्तशोभाञ्जने तुल्यो मधुशिग्रुर्मधुद्रवी।"

इति शब्दरत्नावली॥

अस्य पुष्पगुणाः।

"मधुशिग्रोस्त्वभिहितं रक्तपित्तप्रसादनम्॥"

इति भावप्रकाशः॥

अन्यत् रक्तशिग्रुशब्दे द्रष्टव्यम्॥

शोभी, स्त्री, वनहरिद्रा। इति राजनिर्घण्टः।

शोष, पुं, (शुष्+भावे घञ्।) शोषणम्। इति मेदिनी॥ (शुष्यत्यनेनेति। शुष्+करणे घञ्।) ब्रह्मरोगः। इत्यमरः॥ तद्रोगस्यौषधं यथा,—

"वचा त्रिकटुकञ्चैव क्रव्यं देवदारु च।
मञ्जिष्ठा निम्बपत्रं श्वेता शिरीषो रजनीद्वयम्
प्रियङ्गुनिम्बचिकटु गोमूत्रेणावघर्षितम्।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा॥
अपस्मारविषोन्मादशोथालक्ष्मीज्वरापहम्।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम्॥"

इति गारुडे १९८ अध्यायः॥

शोषण, क्ली, (शुष्+ल्युट्।) रसाकर्षणम्। शोषण इति भाषा। तत्पर्य्यायः। रसादनम् २। इति हेमचन्द्रः॥ स्नेहरहितीकरणम्। यथा,—

"शोषणेन शरीरस्य तपसाध्ययनेन च।
पापकृन्मुच्यते पापाद्दानेन च दमेन च॥"

इति प्रायश्चित्ततत्त्वम्॥

शुण्ठी। इति राजनिर्घण्टः॥

शोषणः, पुं, (शोषयतीति। शुष+णिच्+ल्युः।) कामदेवस्य बाणविशेषः। यथा,—

"उन्मादनः शोषणश्च तापनः स्तम्भनस्तथा।"

इति जटाधरः॥

श्येनाकृतिश्चः। इति भावप्रकाशः॥ (शोषणकारके, त्रि॥)

शोषसम्भव, क्ली, (शोषाय रसाकर्षणाय सम्भवो यस्य।) पिप्पलीमूलम्। इति राजनिर्घण्टः॥

शोषापहा, स्त्री, (शोषं अपहन्तीति। हन+डः टाप्।) क्षीतनकम्। इति राजनिर्घण्टः॥ शोषनाशके, त्रि॥

शोषितः, त्रि, (शुष+णिच्+क्तः।) कृतशोषणः। यथा,—

"घातापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु॥"

इति मलमासतत्त्वम्॥

शौकं, क्ली, (शुकानां समूहः। शुक+"खण्डिकादिभ्यश्च।" ४। २। ४५। इत्यञ्।) शुकगणः। इत्यमरः॥ स्त्रीणां करणम्। इति मेदिनी॥

शौकरं, शौकरवं, क्ली, (शूकरस्येदमिति। शूकर+अण्।) तीर्थविशेषः। यथा,—

वराह उवाच।

"शृणु मे परमं गुह्यं यत्त्वया परिपृच्छितम्।
मम चेतं परञ्चैव गुह्यं भागवतप्रियम्॥
परं लोकामुखं स्थानं तथा कुलाम्बकं परम्।
परं शौकरवं स्थानं सर्वसंसारमोचनम्॥
यत्र संस्था च मे देवि क्षुद्वतासि रसातलात्।
यत्र भागीरथी गङ्गा मम शौकरवे स्थिता॥

धरण्युवाच।

केषु लोकेषु यान्तीश शौकरे ये मृताः प्रभो!।
किं वा पुण्यं भवेत्तत्र स्नातस्य पिबतस्तथा॥
कति तीर्था विशालाक्ष। शौकरवे तव।
धर्म्मसंस्थापनार्थाय तन्मिथो! वक्तुमर्हसि॥

वराह उवाच।

शृणु तत्त्वेन मे देवि! यत्त्वं मां परिपृच्छसि।
कां गतिं ते प्रपद्यन्त नरा शौकरवे मृताः॥
तेषां स्नानस्य वै पुण्यं गतस्यैव मृतस्य वा।
तव यानि च तीर्थानि मम संस्थानसंस्थिता॥
शृणु पुण्यं महाभागे मम चेतेषु सुन्दरि।
प्राप्नुवन्ति महाभागे गत्वा शौकरवं प्रति॥
दश पूर्व्वापरांश्चापि अपरान् सप्त पञ्च च।
स्वर्गं गच्छन्ति ते तत्र ये मृतास्तेषु जन्तवः॥
गमनादेव सुश्रोणि! मुखस्य मम दर्शनात्।
सप्तजन्मान्तरे भद्रे जायते विपुले कुले॥
धनधान्यसमृद्धेषु रूपवान् गुणवान् शुचिः।
मद्भक्तश्चैव जायेते मम कर्म्मपरायणः॥
एवं वै मानुषो भूत्वा अपराधविवर्जितः।
गमनं तस्य चेतस्य मरणं तत्र कारणम्॥
ये मृतास्तत्र सुश्रोणि चेतसे शौकरवे मम।
शङ्खचक्रगदापद्मचतुर्हस्तायतुर्भुजाः।
त्यक्त्वा कलेवरं तूर्णं मम लोकाय गच्छति॥"

इति वाराहे शौकरतीर्थमाहात्म्ये आदित्यवरप्रदानगरुडजम्बुकोपाख्याननामाध्यायः॥

शौक्तिकेयं, क्ली, (शुक्तिकायां भवमिति। शुक्तिका+ढक्।) मुक्ता। इति राजनिर्घण्टः॥

शौक्तेयं, क्ली, (शुक्तौ भवमिति। शुक्ति+ढक्।) मुक्ता। इति राजनिर्घण्टः॥ शुक्तिसम्बन्धिनि, त्रि॥

शौक्लं, क्ली, (शुक्लस्य भावः। शुक्ल+"वर्णदृढादिभ्यः ष्ञ्यञ् च।" ५। १। १२३। इति ष्ञ्य।) शुक्लता यथा—

"पलितं जरसा शौक्लं केशादौ विसमा जरा॥"

इत्यमरः॥

(यथा, बृहत्संहितायाम्। ४। ३।

"त्यजतोऽर्कतलं शशिनः
पश्चादवलम्बते यथा शौक्लम्॥")

शौचं, क्ली, (शुचेर्भावः। शुचि+"इगन्ताच्च लघुपूर्व्वात्।" ५। १। १३१। इत्यण्।) शुचिता। शुचित्वम्। शुद्धिः। तस्य लक्षणादि यथा,—

"अभक्ष्यपरिहारस्तु संसर्गाद्याप्यनिन्दितैः।
स्वधर्म्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितम्॥"

इत्येकादशीतत्त्वे बृहस्पतिवचनम्॥

अन्यच्च।

"सर्व्वेषामेव शौचानामर्थशौचं विशिष्यते।
योऽर्थार्थेरशुचिः शौचान्न मृदा वारिणा शुचिः॥
सत्यशौचं मनःशौचं शौचमिन्द्रियनिग्रहः।
सर्व्वभूतदयाशौचं जलशौचन्तु पञ्चमम्॥
यस्य सत्यञ्च शौचञ्च तस्य स्वर्गो न दुर्लभः॥"

इति गारुडे ११० अध्यायः॥

अपिच।

"यावता शुद्धिं मन्येत तावच्छौचं समाचरेत्।
प्रमाणं शौचसंख्याया न शिष्टैरुपदिश्यते॥
शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा।
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिरथान्तरम्॥"

इति गारुडे २१५ अध्यायः॥

पादादिशौचगुणा यथा,—

"मेध्यं पवित्रमायुष्यमलक्ष्मीकलिनाशनम्।
पादयोर्मलसर्गाणां शौचाधानमभीक्ष्णशः॥"

इति राजवल्लभः॥

अपि च ।
"उद्धताभ्योमृत्तिकाभ्यामित्यं नारद यत्नतः ।
कृत्वोत्सर्गं ततः कुर्य्यात् शौचं मूत्रपुरीषयोः ॥"
इति पाद्मोत्तरखण्डे १०९ अध्यायः ॥
प्रसङ्गादशौचञ्चात्र लिख्यते ।
व्यास उवाच ।
"दशाहं प्राङ्निरशौचं सपिण्डेषु विधीयते ।
मृतेषु चाथ जातेषु ब्राह्मणानां द्विजोत्तमाः ॥
नित्यानि चैव कर्म्माणि काम्यानि च विशेषतः ।
न कुर्य्याद्धितं किञ्चित् स्वाध्यायं मनसापि च
शुचौनिधनांस्वन्यान् शालाग्नौ हावयेद्द्विजान्
शुष्काग्नेन फलैर्व्वापि वैतानानुदयात्ततः ॥*॥
न स्पृशेयुरिमान्यन्ये न च तेभ्यः समाहरेत् ।
चतुर्थे पञ्चमे वाह्नि संस्पर्शः कथितो बुधैः ॥
सूतके तु सपिण्डानां संस्पर्शो न प्रदुष्यति ।
सूतकं सूतिकाञ्चैव वर्ज्जयित्वा नृणां पुनः ॥
दशाहं निर्गुणे प्रोक्तमशौचं चातिनिर्गुणे ।
एकद्वित्रिगुणैर्युक्तं चतुस्त्र्येकदिनैः शुचिः ॥
दशाहात्तु परं सम्यगधीयीत जुहोति च ।
चतुर्थे तस्य संस्पर्शं मनुः प्राह प्रजापतिः ॥*॥
क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्म्मरणान्तमशौचकम् ॥*॥
त्रिरात्रं दशरात्रं वा ब्राह्मणानान्तु शावकम् ।
प्राक् संस्कारात् त्रिरात्रं स्यादस्यादूर्द्धं दशाहकम् ॥
ऊनद्विवार्षिके प्रेते मातापित्रोस्तदिष्यते ।
त्रिरात्रेण शुचिस्त्वन्यो यदि ह्यत्यन्तनिर्गुणः ॥
आदन्तजातमरणे पित्रोरेकाहमिष्यते ।
जातदन्ते त्रिरात्रं स्यादूर्द्ध्वं स्यात्तानन्तु निर्गुणौ ॥
आदन्तजननात् सद्य आचूड़ादेकरात्रकम् ।
त्रिरात्रमौपनयनात् सपिण्डानामुदाहृतम् ॥
जातमात्रस्य बालस्य यदि स्यान्मरणं पितुः ।
सद्यःशौचं सपिण्डानां कर्त्तव्यं सोदरस्य च ॥
ऊर्द्धं दशाहादेकाहं सोदरो यदि निर्गुणः ।
अथोर्द्धं दन्तजननात् सपिण्डानामशौचकम् ॥
एकाहं निर्गुणानान्तु चूड़ादूर्द्धं त्रिरात्रकम् ।
अदन्तजातमरणं सम्भवेद्यदि सत्तमाः ॥
एकरात्रं सपिण्डानां यदि तेऽत्यन्तनिर्गुणाः ।
व्रतादेशात् सपिण्डानामर्व्वाक् स्नानं विधीयते ।
सर्व्वेषामेव गुणिनामूर्द्धन्तु विषमं पुनः ॥*॥
अर्व्वाक् षण्मासतः स्त्रीणां यदि स्याद्गर्भसंस्रवः ।
तदा माससमैस्तासामशौचं दिवसैः स्मृतम् ॥
अतऊर्द्धन्तु पतने स्त्रीणां स्यादहरात्रकम् ।
सद्यःशौचं सपिण्डानां गर्भस्रावाच्च वा ततः ॥
गर्भच्युतावहोरात्रं सपिण्डेऽत्यन्तनिर्गुणे ।
यथेष्टाचरणे ज्ञातौ त्रिरात्रमिति निश्चयः ॥*॥
यदि स्यात् सूतके सूतिर्म्मरणे वा मृतिर्भवेत् ।
शेषेणैव भवेच्छुद्धिरहःशेषे त्रिरात्रकम् ।
मरणोत्पत्तियोगे तु मरणाच्छुद्धिरिष्यते ॥
अथवाहिमदाशौचमूर्द्धस्नेन शुध्यति ।
अथ चेत् पञ्चमीं रात्रिमतीत्य परतो भवेत् ।
अथवाहिमदाशौचं तदा पूर्व्वेण शुध्यति ॥*॥
देशान्तरगतं श्रुत्वा सूतकं शावमेव तु ।
तावदप्रयतो मर्त्यो यावच्छेषः समाप्यते ॥*॥
अतीते सूतके प्रोक्तं सपिण्डानां त्रिरात्रकम् ।
तथैव मरणे स्नानमूर्द्धं संवत्सराद्यदि ॥
वेदार्थविदधीयानो योऽग्निमान् वृत्तिकर्षितः ।
सद्यःशौचं भवेत्तस्य सर्व्वावस्थासु सर्व्वदा ॥
स्त्रीणामसंस्कृतानान्तु प्रदानात् परतः सदा ।
सपिण्डानां त्रिरात्रं स्यात् संस्काराङ्कर्त्तुरेव च ॥
अतस्तदुक्तकन्यानामशौचं मरणे स्मृतम् ।
ऊनद्विवर्षाम्मरणे सद्यःशौचमुदाहृतम् ॥
आदन्तात् सोदरे सद्य आचौड़ादेकरात्रकम् ।
आप्रदानात् त्रिरात्रं स्याद्दशरात्रमतः परम् ॥
मातामहानां मरणे त्रिरात्रं स्यादशौचकम् ।
एकोदकानां मरणे सूतके चैतदेव हि ।
पत्नीषु योनिसम्बन्धे बान्धवेषु तथैव च ॥
एकरात्रं समुद्दिष्टं गुरौ सब्रह्मचारिणाम् ।
प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितिः ॥
गृहे मृतासु दत्तासु कन्यकासु त्रिरहं पितुः ।
परपूर्व्वासु भार्य्यासु पुत्रेषु क्षतकेषु च ॥
त्रिरात्रं स्यात्तथाचार्य्ये स्वभार्य्यास्वन्यगासु च ॥
आचार्य्यपुत्रे पत्न्यान्च अहोरात्रमुदाहृतम् ॥
एकाहं स्यादुपाध्याये स्वग्रामे श्रोत्रियेऽपि च ।
त्रिरात्रमसपिण्डेषु स्वगृहे संस्थितेषु च ॥
एकाहं वा श्वश्र्यां स्यादेकरात्रञ्च श्वशुरके ।
त्रिरात्रं श्वश्रूमरणे श्वशुरे चैतदेव हि ॥
सद्यःशौचः समुद्दिष्टं सगोत्रे संस्थिते सति ॥*॥
शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥*॥
क्षत्रविट्शूद्रदायादा ये स्युर्विप्रस्य बान्धवाः ।
तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते ॥
राजन्यवैश्यावप्येवं हीनवर्णासु योनिषु ।
स्वमेव शौचं कुर्य्यातां विशुद्ध्यर्थं न संशयः ॥
सर्व्वेतूत्तमवर्णानां शौचं कुर्य्युरतन्द्रिताः ।
उहर्णविधिदृष्टेन स्वन्तु शौचं स्वयोनिषु ॥
षड्रात्रं वा त्रिरात्रं स्यादेकरात्रं क्रमेण तु ।
वैश्यक्षत्रियविप्राणां शूद्रेष्वाशौचमेव तु ॥
अर्द्धमासोऽथ षड्रात्रं त्रिरात्रं द्विजपुङ्गवाः ।
शूद्रक्षत्रियविप्राणां वैश्येष्वाशौचमिष्यते ॥
षड्रात्रं द्वादशाहञ्च विप्राणां वैश्यशूद्रयोः ।
अशौचं क्षत्रिये प्रोक्तं क्रमेण द्विजपुङ्गव ॥
शूद्रविट्क्षत्रियाणान्तु ब्राह्मणे संस्थिते सति ।
दशरात्रेण शुद्धिः स्यादित्याह कमलोद्भवः ॥*॥
असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
अग्निमान्न च सन्दीप्य दशरात्रेण शुध्यति ॥
यद्यन्नमत्ति तेषान्तु त्रिरात्रेण ततः शुचिः ।
अनदन्नन्नमक्षैव न च तस्मिन् गृहे वसन् ॥
सोदरेष्वेतदेव स्यान्मातुरामेषु बन्धुषु ।
दशाहेन शवस्पर्शं सपिण्डश्चैव शुध्यति ॥
षड्रात्रेणाथवा सर्व्वे त्रिरात्रेणाथवा पुनः ।
अनाथस्त्वेव निर्हृत्य ब्राह्मणं धनवर्ज्जितम् ॥
स्नात्वा संप्राश्य तु घृतं शुध्यन्ति ब्राह्मणादयः ।
अवरस्त्वेहरं वर्णमवरं वा वरो यदि ॥
अशौचे संस्पृशेत् स्नेहात्तदाशौचेन शुध्यति ॥*॥
प्रेतीभूतं द्विजं विप्रो योऽनुगच्छति कामतः ।
स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥
एकाहात् क्षत्रिये शुद्धिर्वैश्यानां स्यात् द्व्यहेन तु ।
शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः ॥*॥
अनस्थिसञ्चिते शूद्रे रौति चेद्ब्राह्मणः स्वकः ।
त्रिरात्रं स्यादथाशौचमेकाहं त्वन्यथा स्मृतम् ॥
अस्थिसञ्चयनादर्व्वागेकाहं वैश्यशूद्रयोः ।
अन्यथा चैव सज्योतिर्ब्राह्मणे स्नानमेव तु ॥
अनस्थिसञ्चिते विप्रे ब्राह्मणो रौति चेत्तदा ।
स्नानेनैतद्भवेच्छुद्धिः सचेलेन न संशयः ॥*॥
यस्तैः सहाशनं कुर्य्याच्छयनादीनि चैव हि ।
बान्धवो वा परो वापि स दशाहेन शुध्यति ॥*॥
यस्तेषामन्नमश्नाति सकृदेवापि कामतः ।
तदाशौचे निवृत्तेऽसौ स्नानं कृत्वा विशुध्यति ॥
यावत्तदन्नमश्नाति दुर्भिक्षोपहतो नरः ।
तावन्त्यहान्यशौचं स्यात् प्रायश्चित्तं ततश्चरेत् ॥
दाहाद्यशौचं कर्त्तव्यं द्विजानामग्निहोत्रिणाम् ।
सपिण्डानान्तु मरणे मरणादितरेषु च ॥*॥
सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु जन्मनाम्नोरवेदने ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
लेपभाजश्चतुर्थाद्याः सापिण्ड्यं सप्तपौरुषम् ॥
अनूढानां तथा स्त्रीणां सापिण्ड्यं सप्तपौरुषम्
जायानां भर्तृसापिण्ड्यं प्राह देवः पितामहः ॥
ये चैकजाता बहवो भिन्नयोनय एव च ।
भिन्नवर्णास्तु सापिण्ड्यं भवेत्तेषां त्रिपौरुषम् ॥*
कारवः शिल्पिनो वैद्या दासी दासस्तथैव च ।
दातारो नियमी चैव ब्रह्मविद्ब्रह्मचारिणौ ॥
सत्रिणो व्रतिनस्त्वेते सद्यःशौचा उदाहृताः ।
राजा चैवाभिषिक्तश्च विप्राः सत्रिण एव च ॥
यज्ञे विवाहकाले च देवयागे तथैव च ।
सद्यःशौचं समाख्यातं दुर्भिक्षे वाप्युपद्रवे ॥
डिम्बाहवहतानाञ्च विद्युता पार्थिवैर्हिंजैः ।
सद्यःशौचं समाख्यातमज्ञातिमरणे तथा ॥
अग्नौ महाप्रपतने वीराध्वन्यप्यनाशके ।
ब्राह्मणार्थे च संन्यस्ते सद्यःशौचं विधीयते ॥*॥
नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम्
नाशौचं कीर्त्यते सद्भिः पतिते च तथा मृते ॥
पतितानां न दाहः स्याद्भान्त्येष्टिर्नास्तिसञ्चयः ॥
न चानुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित् ॥
व्यापादयेदथात्मानं स्वयं योऽग्निं विषादिभिः ।
विच्छिंतस्य नाशौचं नाग्निर्नाप्युदकादिकम् ॥*
अथ कश्चित् प्रमादेन म्रियतेऽग्निविषादिभिः ।
तस्याशौचं विधातव्यं कार्य्यञ्चैवोदकादिकम् ।*।
जाते कुमारे तदहः कामं कुर्य्यात् प्रतिग्रहम् ।
हिरण्यधान्यगोवासस्तिलाज्यगुड़सर्षपान् ॥
फलानि पुष्पं शाकञ्च लवणं काष्ठमेव च ।
तोयं दधि घृतं क्षीरमौषधं तैलमेव च ।

अशौचिनां गृहाद्यान्नं शुष्कान्नमेवनित्यशः ॥"
इति कौर्म्मे उपविभागे २२ अध्यायः ॥
अन्यत् पाद्मोत्तरखण्डे १०८ अध्याये द्रष्टव्यम् ॥
शौचाचारः, पुं, (शौचः आचारः ।) शुद्धिकर्म्म । यथा,—
"शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः ॥"
इत्याह्निकाचारतत्त्वे ब्रह्मपुराणम् ॥
अन्यच्च ।
"उपनीय गुरुः शिष्यं महाव्याहृतिपूर्व्वकम् ।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥"
इति याज्ञवल्क्यः ॥
शौचिकः, पुं, (शौचं गृहादेः शुचिता कार्य्यत्वेनास्त्यस्येति । शौच + ठन् ।) वर्णसङ्करविशेषः । यथा,—
"कैवर्त्तस्य च कन्यायां शौण्डिकादेव शौचिकः ॥"
इति पराशरपद्धतिः ॥
शौचेयः, पुं, (शौचेन वस्त्रादिशुचित्वेन व्यवहरतीति । शौच + ढक् ।) रजकः । इति शब्दरत्नावली ॥
शौट, ऋ गर्व्वे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) चतुर्दशस्वरी । ऋ, अशुशौटत् । शौटति वीरः । इति दुर्गादासः ॥
शौटीरः, पुं, (शौटतीति । शौट गर्व्वे + "कृगृपृ कटिपटिशौटिभ्यः ईरन् ।" उणा० ४ । ३० । इति ईरन् ।) त्यागी । वीरः । इत्युणादिकोषः ॥ गर्व्वान्वितः, त्रि । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, महाभारते । १२ । ८३ । ४३ ।
"सन्तुष्टः सम्मतः सत्यः शौटीरो हेयपापकः ।
मन्त्रवित् कालवित् शूरः समन्त्रं श्रोतुमर्हति ॥")
शौटीर्य्यं, क्ली, (शौटीरस्य भावः कर्म्म वा । शौटीर + "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ।" ५ । १ । १२४ । इति ष्यञ् ।) वीर्य्यम् । इति शब्दरत्नावली ॥ गर्व्वः । शौटीरशब्दात् भावे ष्यञ्प्रत्ययेन निष्पन्नम् ॥
शौड ऋ गर्व्वे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) चतुर्दशस्वरी । ऋ, अशुशौड़त् । इति दुर्गादासः ॥
शौण्डः, त्रि, (शुण्डायां नद्यां रतः । शुण्डा + अण् ।) मत्तः । इत्यमरः ॥ (यथा, महाभारते । ३ । २३३ । ११ ।
"चण्डालः शौण्डश्च महाशनश्च
चौरश्च दुष्टश्च पलाश वर्ज्याः ॥")
शौण्डिकः, पुं, (शुण्डापक्षमस्य । शुण्डा + "तदस्य पक्षम् ।" ४ । ४ । ५१ । इति ठक् ।) जातिविशेषः । गुड़ी इति भाषा । तत्पर्य्यायः । मद्यव्यवहारकः २ इत्यमरः ॥ शुण्डारः ३ शौण्डी ४ शुण्डकः ५ । इति शब्दरत्नावली ॥ ध्वजः ६ पानः ७ पयः ८ । इति जटाधरः ॥ कल्यपालः ९ सुराजीवी १० । वारिवासः ११ पानवणिक् १२ ध्वजी १३ । आसुतीवलः १४ । इति हेमचन्द्रः ॥ तस्योत्पत्तिर्यथा,—
ततो गान्धिककन्यायां कैवर्त्तादेव शौण्डिकः ।
कैवर्त्तस्य च कन्यायां शौण्डिकादेव शौचिकः ॥"
इति पराशरपद्धतिः ॥
(अस्य गृहे भोजननिषेधो यथा, मनुः । ४ । २१६ ।
"व्रतवतां शौण्डिकानाञ्च चेलनिर्नेजकस्य च ।
रङ्गावतारकस्य च यस्य चोपपतिर्गृहे ॥"
एषां गेहे न भोक्तव्यं इत्यर्थः ॥*॥ शुण्डिकादागते, त्रि, । अत्र "शुण्डिकादिभ्योऽञ् ।" ४ । २ । ७६ । इत्यञ् ॥)
शौण्डी, [न्]पुं, (शुण्डा सुरा एव शौण्डं मद्यम् । स्वार्थे अण् । तत् पण्यत्वेनास्त्यस्येति । शौण्ड + इन् ।) शौण्डिकः । इति शब्दरत्नावली ॥
शौण्डी, स्त्री, (शुण्डायां मद्यपानगेहे भवा । मत्तानां रुचिप्रदत्वात् । शुण्डा + अण् । ङीप् ।) पिप्पली । चव्यम् । इति विश्वः ॥
शौण्डीरः, त्रि, (शौटतीति । शौट + ईरन् । पृषोदरादित्वात् साधुः ।) अहङ्कारी । यथा,—
"शौण्डीरो गर्व्वितस्तब्धो मानी चाहङ्कृदुद्धतः ।
उद्दामौद्धत उद्धरोऽक्लिष्टो नीचश्च पिशुनोऽधमः ॥"
इति धनञ्जयकोषः ॥
शौद्धोदनिः, पुं, (शुद्धोदनस्यापत्यं पुमानिति । शुद्धोदन + "अत इञ् ।" ४ । १ । ८५ । इति इञ् ।) शाक्यवंशावतीर्णबुद्धमुनिविशेषः । इत्यमरः ॥ "शुद्धमोदनस्य इति मनीषादिः । शुद्धोदनो नाम राजा । तथाहि ।
"शुद्धोदनो यतो भुङ्क्ते न्याय्यवत् शुद्धमोदनम् ।"
इत्योषाभिधानम् ॥
शुद्धोदनस्यापत्यं शौद्धोदनिः । बाह्वाद्यत इञ् ।" इति भरतः ॥
शौद्रः, पुं, (शूद्रायां भवः । शूद्रा + अण् ।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः । स तु ब्राह्मणक्षत्रियवैश्याद्यतमात् शूद्रायां जातः । यथा,—
"औरसः क्षेत्रजो दत्तो गूढोत्पन्नश्च कृत्रिमः ।
क्रीतापविद्धकानीनशौद्रपौनर्भवा अपि ॥
स्वयं दत्तः सहोढोऽपि द्वादशैते समो ॥"
इति जटाधरः ॥
(यथा, मनुः । ९ । १६० ।
"कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयं दत्तश्च शौद्रश्च षड्दायादबान्धवाः ॥"*॥
शूद्रस्येदमिति । अण् ।) शूद्रसम्बन्धिनी, त्रि, ॥ (यथा, महाभारते । १२ । ६२ । ४ ।
"क्षात्राणि वैश्यानि च सेवमानः
शौद्राणि कर्म्माणि च ब्राह्मणः सन् ।
अस्मिंल्लोके निन्दितो मन्दचेताः
परे च लोके निरयं प्रयाति ॥")
शौधिका, स्त्री, रक्तकङ्कः । इति हेमचन्द्रः ॥
शौनकः, पुं, (शुनकस्यापत्यमिति । शुनक + "अत इञ्" । ४ । १ । १०४ । इति अञ् । मुनिविशेषः । यथा,—
"ऋषिरौकारशादूर्द्धं न दद्यात् प्रतिमाधिकम् ।
एकोद्दिष्टविधानेन दद्यादित्याह शौनकः ॥"
इति तिथ्यादितत्त्वम् ॥
शौनिकः, (शुना प्राणिवधस्थानं प्रयोजनमस्य । शुना + ठक् ।) मांसविक्रयकर्त्ता । यथा,—
'वैतंसिकः कौटिकश्च मांसिकः शौनिकः समाः ।'
इति जटाधरः हेमचन्द्रश्च ॥
मृगया । इति शब्दमाला ॥
शौभं, क्ली. (शोभायै हितम् । शोभा + अण् ।) हरिश्चन्द्रपुरम् । इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः । व्योमचारिपुरम् २ । इति भूरिप्रयोगः (पुरमेतत् शाल्वस्य नृपतेरासीत् । कृष्णेनेदं विनाशितम् । एतद्वृत्तान्तस्तु भागवते १० स्कन्धे ७७ अध्याये द्रष्टव्यः ॥)
शौभः, पुं, (शुभाय हितः । शुभ + अण् ।) देवता इति त्रिकाण्डशेषः ॥ गुवाकः । इति शब्दमाला ॥
शौभनेयः, त्रि, शोभनसम्बन्धी । शोभनशब्दात् ण्येयप्रत्ययेन निष्पन्नः ॥
शौभाञ्जनः, पुं, (शोभाञ्जन एव । स्वार्थे अण् ।) शोभाञ्जनवृक्षः । इति भरतद्विरूपकोषः ॥
शौभिकः, पुं, (शौभं व्योमचारिपुरं उपलक्षणेन तद्दाक्षर्य्यकरं वस्तु साधनत्वेनास्त्यस्येति । शौभ + ठन् ।) इन्द्रजालिकः । इति शब्दमाला ॥
शौभ्रेयः, त्रि, (शुभ्रा + "शुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् ।) शुभ्राया अपत्यम् । इति मुग्धबोधव्याकरणम् ॥ शुभ्रसम्बन्धिनि च ॥
शौरिः, पुं, (शूरस्यापत्यमिति । शूर + इञ् ।) विष्णुः । (यथा, आनन्दलहर्य्याम् २ ।
"तनीयांसं पांशुं तव चरणपङ्केरुहभवं
विरिञ्चिः सञ्चिन्वन् विरचयति लोकानविकलम् ।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः संक्षुभ्यैनं भजति भसितोद्धूननविधिम् ॥")
शनैश्चरग्रहः । इत्यमरभरतौ ॥ (शूरवंशीयभाजे । वसुदेवः । यथा, भागवते । ३ । २ । २६ ।
"क्वचित् कुरूणां परमः सुहृद्वो
भामः स आस्ते सखमङ्गशौरिः ॥"
वसुदेवः । तथा, महाभारते । ५ । ७ । २५ ।
"ततोऽभ्ययाद्बलवती रौहिणेयं महाबलम् ।
सर्व्वागमने हेतुं स तस्मै संन्यवेदयत् ।
प्रत्युवाच ततः शौरिर्धार्त्तराष्ट्रमिदं वचः ॥"
कृष्णः । यथा, भागवते । १ । १० । ३३ ।
"अथ दूरगतान् शौरिः कौरवान् विरहातुरान् ।
संनिवर्त्त्य दृढं स्निग्धान् प्रायात् स्वनगरीं प्रियैः ॥")
शौर्पः, शौर्पिकः, } त्रि, (शूर्पं + "शूर्पादन्यतरस्याम् ।" ५ । १ । २६ । इति अञ् पक्षे ठञ् ।) शूर्पपरिमितम् । शूर्पशब्दात् स्वार्थे ष्ठिकप्रत्ययेन च निष्पन्नौ ॥
शौर्य्यं, क्ली, (शूरस्य भावः कर्म्म वा । शूर × अञ् ।) शक्तिः । (यथा, रामायणे । ६ । १५ । ३ ।

"सत्त्वेन वीर्य्येण पराक्रमेण
धैर्य्येण शौर्य्येण च तेजसा च ॥")
भारभटी । इति मेदिनी ॥
शौल्कं, त्रि, शुल्कसम्बन्धि । शुल्कशब्दात् ष्यञ्प्रत्ययेन निष्पन्नम् ॥
शौल्किकः, पुं, (शुल्के अधिकृतः । शुल्क + ठञ् ।) शुल्काध्यक्षः । इति हेमचन्द्रः ॥ (यथा, याज्ञवल्क्ये । २ । १७६ ।
"शौल्किकैः स्थानपालैर्वा नष्टापन्नतमाहृतम्
अर्व्वाक् संवत्सरात् स्वामी हरेत परतो नृपः ॥")
शौल्किकेयः, पुं, विषभेदः । इत्यमरः ॥ शुल्किको देशभेदस्तत्र भवः शौल्किकेयः । क्षेयः । तालव्यादिः । इति भरतः ॥
शौल्फं, क्ली, शाकविशेषः । शुल्फा इति भाषा । भूतचतुर्दश्यां चतुर्दशशाकमध्ये तद्ग्रहणीयम् । यथा, निर्णयामृते ।
"शौलं केमुकवास्तूकं सर्षपं कालशं निम्बं
जयां
शालीक्षीं हिलमोचिकाञ्च पटुकं शौल्फं
गुडुचीन्तथा ।
भण्टाकीं सुनिसञ्चकं शिवदिने खादन्ति ये
मानवाः
प्रेतत्वं न च यान्ति कार्त्तिकदिने कृष्णे च भूते
तिथौ ॥"
इति तिथ्यादितत्त्वम् ॥
अस्य पर्य्यायगुणाः शतपुष्पाशब्दे द्रष्टव्याः ॥
शौल्विकः, पुं, कंसकारः । काँसारि इति भाषा । तत्पर्य्यायः । ताम्रकुट्टकः २ । इत्यमरः ॥ कामन्दकी ३ कांस्यकारः ४ । इति जटाधरः ॥ ताम्रिकः ५ ताम्रकारकः ६ । इति शब्दरत्नावली ॥
शौवं क्ली, (श्वन् + "शुनः सम्प्रसारणञ्च ।" ६ । ४ । १४४ । इत्यस्य वार्त्तिकोक्त्या अण् साधु ।) शुनः समूहः । शुनो वृन्दम् । श्वोभवम् इति संक्षिप्तसारव्याकरणम् ॥
शौवनं, क्ली, (श्वन् + अण् ।) शुनो भावः । शुनोऽपत्यम् । इति संक्षिप्तसारव्याकरणम् ॥ (शुनः समूहः । श्वन् + "खण्डिकादिभ्यश्च ।" ४ । २ । ४५ । इत्यञ् । कुक्कुरसमूहः । इति व्याकरणम् ॥ शुनो मांसम् । इति काशिका । ६ । ४ । १३३ ॥)
शौवस्तिकं, त्रि, (श्वो भवम् । श्वस् + "श्वसस्तुट् च ।" ४ । ३ । १५ । इति ठञ् तुडागमश्च ।) भाविदिनस्थायिवस्तु । यथा,—
आत्मम्भरित्वं पिशितैर्नराणां
फलेग्रहीन् हंसि वनस्पतीनाम् ।
शौवस्तिकत्वं विभवा न येषां
व्रजन्ति तेषां दयसे न कस्मात् ॥"
इति भट्टौ २ सर्गः ॥
"येषां विभवाः सम्पदः शौवस्तिकत्वं भाविदिनस्थितत्वं न व्रजन्ति तेषां कस्मान्न दयसे । श्वोभवः शौवस्तिकः श्वसो भवार्थे कण्विधानात् काणि मनौषादित्वात् त्यागमः हारश्चरेतिवत्
क्षिप्ते विरिति विः स्वतौ भावे इति त्वम् ।" इति तट्टीकायाम् ॥
शौवापदं, त्रि, (श्वापदस्येदमिति । श्वापद + अण् । "पादान्तस्यान्यतरस्याम् ।" ७ । ३ । ८ । इति पक्षे ऐच् ।) श्वापदसम्बन्धि । श्वापदशब्दात् ष्यञ्प्रत्ययेन निष्पन्नम् । इति सुग्धबोधव्याकरणम् ॥ (यथा, अनर्घराघवे । १ । २५ ।
"कचित् कान्तारभाजां भवति परिभवः
कोऽपि शौवापदो वा
प्रत्यूहेन क्रतूनां न खलु मखभुजो भुञ्जते
वा हवींषि ॥")
शौष्कलः, पुं, (शुष्कलं पक्वमश्नेति । अण् ।) शुष्कमांसस्य पचकः । इति मेदिनी ॥
शौष्कलः, त्रि, (शुष्कलीमश्नीति । शुष्कली + अण् ।) आमिषाशी । इत्यमरः ॥ मत्स्यमांसभोजनशीलः । आमिषं अश्नाति आमिषाशी यदादित्वात् णिन् । शुष्कली शुष्कमांसे स्यान्मांसमात्रेऽपि दृश्यते । तामत्ति शौष्कलः शुष्कः । तालव्यादिर्मूर्द्धन्यमध्यः । शुष्कं मांसं लाति इति शुष्कलः प्रज्ञादित्वात् अण् शौष्कलः । इति विद्याविनोदः । शाष्कल इति पाठः । इति स्वामी । इति भरतः ॥
शुत) इर् चरणे । इति कविकल्पद्रुमः ॥
शुत) (भ्वा० पर० अक० सेट् ।) द्यौ तालव्यवर्गाद्ययुक्ततालव्यादौ । शेषोऽन्तः स्वादियुक्तश्च । नकारजावनुस्वारपञ्चमावित्यादिनियमेऽप्यनयोस्तालव्यादित्वं तद्वचनस्य व्यभिचारसूचनार्थं तेन चुलुम्प लोपे इत्यादीनामोष्ठ्यवर्गशेषोपधत्वं सङ्गच्छते । तेन क्विपि संयोगान्तलोपे चुलुम् इत्यादि सिद्धम् । किन्तु द्यौ दन्त्यादौ इति धातुप्रदीपक्रमदीश्वरौ । तेन घृतं द्योतति इति घृतद्यौत् तमाचष्टे इति औ औमर्थे इति डित्याट्टिलोपे घृतद्यवति पुनः क्विपि ओर्लोपे घृतस्क इति स्खिते संयोगादेः सस्य लोपे घृतक् इति केचित् ॥ इर, अद्युतत् अद्योतीत् । अद्युतत् अद्योतीत् । चर इति आसेचनं चरणञ्च । रक्तमाद्योतति क्षुर इति । इदं कवचमद्योतीदिति । निद्योतन्ते श्रुतनुकवरी बिन्दवो यावदेते । इति मालत्यां नवमङ्कतानित्यत्वम् । इति दुर्गादासः ॥
द्योतः, पुं, (द्योतनमिति । द्यु + घञ् ।) प्रावारः । इत्यमरः ॥
श्म, [न्] क्ली, सुखम् । इति श्मशुशब्दटीकायां भरतः ॥ (शरीरम् । इति निरुक्तिः । ३ । ५ ॥ शवः । इति पुराणम् । अस्य प्रमाणं श्मशानशब्दे द्रष्टव्यम् ॥)
श्मशानं, क्ली, (श्मनां शवानां शानं शयनं यत्र । यद्वा, शवानां शयनमिति । "हृषोदरादीनि यथोपदिष्टानि ।" ६ । ३ । १०९ । इति शवशब्दस्य श्मादेशः शयनशब्दस्यापि शानशब्द आदेशः ।) शवदाहस्थानम् । तत्पर्य्यायः । पितृवनम् २ । इत्यमरः ॥ श्मतानकम् ३ रुद्रा क्रीडः ४ दाहसरः ५ इति त्रिकाण्डशेषः ॥ अन्तशय्या ६ पितृकाननम् ७ । इति जटाधरः ॥*॥ तस्य व्युत्पत्तिर्यथा,—
"श्मशब्देन शवः प्रोक्तः शानं शयनमुच्यते ।
निर्व्वचन्ति श्मशानार्थं मुने शब्दार्थकोविदाः ॥
महाभूतान्यपि च भूतानि प्रलये समुपस्थिते ।
शेरतेऽत्र शवा भूत्वा श्मशानन्तु ततो भवेत् ॥"
महाश्मशानं यथा,—
"वाराणसीति विख्याता रुद्रावास इति द्विजाः ।
महाश्मशानमित्येवं प्रोक्तमानन्दकाननम् ॥"
इति श्रीस्कान्दे काशीखण्डे ३० अध्यायः ॥*॥
"उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥"
इति चाणक्यम् । १७ ॥*॥
श्मशाने गत्वा विष्णुस्पर्शे दोषो यथा,—
वराह उवाच ।
"श्मशानं यो नरो गत्वा अस्नात्वैव तु मां-
स्पृशेत् ।
मम दोषापराधस्य शृणु तत्त्वेन यत् फलम् ।
जम्बुको जायते भूमे वर्षाणां नव पञ्च च ।
गृध्रस्तु सप्तवर्षाणि जायते खचरेश्वरः ॥
चरन्ती मानुषं मांसं उभौ तौ गृध्रजम्बुकौ ।
पिशाची जायते तत्र वर्षाणि नव पञ्च च ॥
ततस्तु कुणपोच्छिष्टं त्रिंशद्वर्षाणि खादति ।
ततो नारायणाच्छ्रुत्वा धरणी वाक्यमब्रवीत् ॥
एतन्मे परमं गुह्यं लोकनाथ जनार्द्दन ।
परं कौतूहलं देव निखिलं वक्तुमर्हसि ॥
श्मशानं पुण्डरीकाक्ष ईश्वरेण प्रशंसितम् ।
तत्र किं विगुणं देव पवित्रे शिवभाषिते ॥
स तत्र रमते नित्यं भगवांस्तु महाद्युतिः ।
कपालं गृह्य देवोऽत्र दीप्तिमन्तं महौजसम् ॥
प्रशंसितञ्च रुद्रेण भवता किं विनिन्दितम् ।
श्मशाणं पद्मपत्राक्ष रुद्रस्य च निशि प्रियम् ॥
वराह उवाच ।
शृणु तत्त्वेन मे देवि इदमाख्यानमुत्तमम् ।
अद्यापि ते न जानन्ति अनघे शंसितव्रताः ॥
कृत्वा सुदुष्करं कर्म्म सर्व्वभूतपतिर्हरः ।
हत्वा च बालहत्यानि त्रिपुरे रूपिणीः स्त्रियः ॥
तेन पापेन सञ्जातो न शक्नोति विचेष्टितुम् ।
तत ईशो मया चोक्तो वाक्यमेव सुखावहम् ॥
किमिदं तिष्ठसे रुद्र कश्मलेन समाहतः ।
तव चैव प्रियार्थाय येनाहमिदमागतः ॥
ततो मम वचः श्रुत्वा लब्धसंज्ञो महेश्वरः ।
उवाच मधुरं वाक्यं पापसन्तप्तलोचनः ॥
तव विष्णो प्रसादेन मया तत्त्रिपुरं हतम् ।
निहता दानवास्तत्र गर्भिण्यश्च निपातिताः ॥
बालहत्या हतास्तत्र विष्फुरन्तो दिशो दश ।
तस्य पापस्य दोषेण न शक्नोमि विचेष्टितुम् ॥
प्रनष्टयोगमायश्च नष्टैश्वर्य्यश्च माधव ।
किं मया विप्रकर्त्तव्यमेनोऽवश्येन माधव ॥
विष्णो तत्त्वेन मे ब्रूहि शोधनं पापनाशनम् ।
येन वै कृतमात्रेण शीघ्रं सुध्येत किल्बिषात् ॥

एवं चिन्तात्मनस्तत्र मया रुद्रस्य भाषितम्।
कपालमालां संगृह्य समलं गच्छ शङ्कर ॥
ममैवं वचनं श्रुत्वा भगवान् परमेश्वरः।
उवाच मां पुनर्व्यक्तं मां बोधय जगत्पते ॥
कीदृशः समलो विष्णो यत्र गच्छामहे वयम् ॥
ततस्तस्य वचः श्रुत्वा शङ्करस्य यशस्विनि।
तत्पापशोधनार्थाय मयावासं प्रभाषितम् ॥
श्मशानं समलो रुद्र पूतिको व्रणगन्धिकः।
स्वयं तिष्ठति वै तत्र मनुजा विगतस्पृहाः ॥
तत्र गृह्य कपालानि रम तत्रैव शङ्कर।
तत्र वर्षसहस्राणि दिव्यान्येव दृढव्रतः ॥
ततो भक्षय मांसानि पापक्षयचिकीर्षुकः।
हिंस्यमानानि भोज्यानि ये च भोज्यास्तव प्रियाः ॥
एवं सर्व्वैर्गणैः सार्द्धं रम तत्र सुनिश्चितः।
पूर्णे वर्षसहस्रे तु स्थित्वा त्वं समले पुनः ॥
एष्यसि स्वाश्रमं पुण्यं गौतमस्य महामुनेः।
तत्र श्राद्धयसि चात्मानं आश्रमे विधिसंस्थिते ॥
प्रसादात् गौतमस्याथ भविता गतकिल्बिषः।
एवं तस्य वरं दत्त्वा तत्रैवान्तरधीयत ॥
रुद्रोऽपि भ्रमते तत्र श्मशाने पापसंहते।
एवं न रोचते भूमे श्मशानं मे कदाचन ॥
यत्र रुद्रकृतं पापं स्थितं किल भयावहम्।
एतत्ते कथितं भद्रे श्मशानं मे जुगुप्सितम् ॥
विद्वापि कृतसंस्कारो मम कर्म्मपरायणः।
प्रायश्चित्तं प्रवक्ष्यामि येन शुध्यति किल्बिषात्
कृत्वा चतुर्थभक्तन्तु दिनानि दश पञ्च च।
आकाशशयनं कुर्य्यात् एकभक्तः कुशास्तरे ॥
प्रभाते पञ्चगव्यन्तु पातव्यं कर्म्मशोधनम्।
प्रमुक्तः सर्व्वपापेभ्यो मम लोकाय गच्छति ॥"
इति वाराहे श्मशानप्रवेशापराधप्रायश्चित्त-
नामाध्यायः ॥

श्मशानकाली, स्त्री, (श्मशानस्य काली।) कालिकाविशेषः। अथ श्मशानकाली। तदुक्तं कालीतन्त्रे।
"बाणीं मोयां ततो लक्ष्मीं कामबीजमतः परम्
कालिके संपुटत्वेन चतुष्कं बीजमालिखेत् ॥
एकादशार्णा देवेशि चतुर्वर्गप्रदायिनी ॥"*॥
अस्या यन्त्रम्।
"पद्ममष्टदलं वृत्तं तद्बाह्ये धरणीतलम्।
चतुर्द्वारसमायुक्तं मध्ये मूलं समालिखेत् ॥
दलेष्वष्टसु विलिखेत् कवर्गाद्यष्टवर्गकम्।
धरण्यां विलिखेदाद्यं चतुष्कञ्च चतुष्कके।
पूर्व्वादि उत्तरान्तञ्च मध्ये देवीं प्रपूजयेत् ॥"*॥
अस्याः पूजाक्रमः। प्रातःकृत्यादिप्राणायामान्तं कर्म्म कृत्वा ऋष्यादिन्यासं कुर्य्यात् यथा। शिरसि भृगुऋषये नमः। हृदि श्मशानकाकिकायै देवतायै नमः। गुह्ये वाग्बीजाय नमः। पादयोर्मायाशक्तये नमः। सर्व्वाङ्गे कामबीजकीलकाय नमः। ततः कराङ्गन्यासौ। ऐं अङ्गुष्ठाभ्यां नमः। क्रीं तर्ज्जनीभ्यां स्वाहा। क्रीं मध्यमाभ्यां वषट्। क्रौं अनामिकाभ्यां हुं। कालिके कनिष्ठाभ्यां वौषट्। क्रौमादिवाग्भवान्तं करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु ॥*॥ ततो ध्यानम्।
"अञ्जनाद्रिनिभां देवीं श्मशानालयवासिनीम्
रक्तनेत्रां मुक्तकेशीं शुष्कमांसातिभैरवाम् ॥
पिङ्गाक्षीं वामहस्तेन मद्यपूर्णं समांसकम्।
सद्यःकृत्तशिरो दक्षहस्तेन दधतीं शिवाम्।
स्मितवक्त्रां सदा चाममांसचर्व्वणतत्पराम्।
नानालङ्कारभूषाङ्गीं नग्नां मत्तां सदासवैः ॥
एवं ध्यात्वा जपेद्देवीं श्मशाने तु विशेषतः।
गृहे वापि गृहस्थोऽपि मद्यमांसैः सुभोजनैः।
नग्नो भूत्वा महापूजां कुर्य्याद्रात्रौ विशेषतः॥"*॥
पूजनन्तु ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कुर्य्यात्। पुनर्ध्यात्वा यथोपचारैः संपूज्य पत्रेषु ब्राह्मादिकं पूजयेत्। तद्बहिरसिताङ्गादिकं पूजयेत्। अस्याः पुरश्चरणं एकादशलक्षजपः। तथा च।
"वर्णलक्षं जपेन्मन्त्रं तद्दशांसेन होमयेत्।"
मन्त्रान्तरम्। तत्रैव।
"कामबीजं समालिख्य कालिकायै समालिखेत्
नमोऽन्तेन च देवेशि सप्तार्णो मनुरुत्तमः।
सर्व्वाङ्गे कालिका देवी अन्यत् सर्व्वन्तु पूर्ववत्॥"
इति तन्त्रसारः ॥

श्मशानवासी, [न्] पुं, (श्मशाने वसतीति। वस+णिनिः।) शिवः। यथा,—
"क्षेत्रपः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट्।
श्मशानवासी मांसाशी खर्पराशी मखान्तकृत्॥"
इति वटुकभैरवस्तोत्रम् ॥*॥

श्मशाने वासकर्त्तरि, त्रि, । यथा। शवसम्बन्धि वस्त्रादिकं श्मशानवासिचण्डालादिभ्यो दद्यात्
इति शुद्धितत्त्वम् ॥

श्मशानवेश्मा, [न्] पुं, (श्मशानं वेश्म यस्य।) महादेवः। इति हेमचन्द्रः ॥

श्मशानवासिनी, स्त्री, (श्मशाने वसति या। वस+णिनिः। ङीप्।) काली। यथा,—
"श्मशानवासिनी सौम्या शिवानी शिववल्लभा।"
इति कालिकाशतनामस्तोत्रम् ॥

श्मशानालयवासिनी, स्त्री,(श्मशानालये श्मशानगृहे वसतीति। वस+णिनिः। ङीप्।)काली। यथा,—
"घोररावां महारौद्रीं श्मशानालयवासिनीम्।"
इति तन्त्रसारे दक्षिणकालिका ध्यानम् ॥

श्मश्रु, क्ली, (श्म मुखं श्रयति आश्रयतीति। श्म+श्रि+"श्मनि श्रयतेर्डुन्।" उणा० ५। २८। डुन्।)पुंमुखे वर्द्धितलोम। इत्यमरः ॥ दाड़ी इति भाषा॥ पुंमुखे पुरुषाणे तेषां दृढौ सत्यां तन्नोम श्मश्रु उच्यते। श्मन्निति मुखनामेति स्मृतिः श्मनि मुखे श्रूयते उपलभ्यते श्मश्रु नाम्नोति डुः श्मश्रु क्लीवमुदन्तम्। श्म मुखं श्रयति श्मनः श्रयतेर्डुन्निति डुनि श्मश्रु नान्तमित्यन्ये। इति भरतः ॥*॥ तस्य अभाशुभलक्षणं यथा,—
"निम्नं वक्त्रमपुत्राणां कृपणानाञ्च ऊर्ध्वकम्।
संपूर्णं भोगिनां कान्तं श्मश्रु स्निग्धं शुभं मृदु ॥
संहतं चास्फुटितायं रक्तश्मश्रुश्च चौरकः।
रक्ताल्पपरुषश्मश्रुकर्णाः स्युः पापसंश्रवः ॥"
इति गारुड़े ६६ अध्यायः ॥*॥
क्रोधार्त्तस्यावर्त्तनं यथा,—
मार्कण्डेय उवाच।
"इति प्रतिश्राव्य तदा नरिष्यन्तसुतो दमः।
कोपामर्षविवृत्ताक्षः श्मश्रुमावर्त्तय पाणिना ॥
हा हतोऽस्मीति पितरं ध्यात्वा दैवं विनिन्द्य च।
प्रोवाच मन्त्रिणः सर्व्वानानिनाय पुरोहितम् ॥"
इति मार्कण्डेयपुराणे शेषाध्यायः ॥*॥
अस्य धारणफलं यथा। दानधर्म्मे।
"केशश्मश्रु धारयतामग्र्या भवति सन्ततिः ॥"*
तस्य चौरक्रमो यथा। वराहपुराणम्।
"श्मश्रुकर्म्म कारयित्वा नखच्छेदमनन्तरम्।"
गोभिलः।
"केशश्मश्रुलोमनखानि वापयीत शिखावर्जम।"
इति शुद्धितत्त्वम् ॥

श्मश्रुमुखी, स्त्री, (श्मश्रु मुखे यस्याः। ङीप्।) श्मश्रुयुक्ता नारी। तस्यार्थायः। पालिः २ पाली ३। इति शब्दरत्नावली ॥ पोटा ४। इति जटाधरः ॥

श्मील, निमिषणे। इतिकविकल्पद्रुमः ॥(भ्वा०पर० अक०-सेट्।) ओष्ठवर्गशेषयुक्तः। श्मीलति चक्षुः पक्ष्मभिराहतं स्यादित्यर्थः। इति दुर्गादासः ॥

श्यानः, त्रि, गतः। श्यैधातोः क्तप्रत्ययेन निष्पन्नः ॥

श्यामं, क्ली, (श्यैङ् गतौ+"इषियुधीन्धीति।" उणा० १। १४४। इति मक्।) मरिचम। सिन्धुलवणम्। इति मेदिनी ॥

श्यामः, त्रि, (श्यायते मनो यस्मात्। श्यै+मक्।) कृष्णगुणविशिष्टः। (यथा, मनुः। ७। २५।
"यत्र श्यामो लोहिताक्षो दण्डञ्चरति पापहा।
प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति॥")
हरिद्गुणविशिष्टः। इत्यमरः ॥

श्यामः, पुं, (श्यै+मक्।)प्रयागस्थ वटः। (यथा रघुः। १३। ५३।
"त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः।
राशिर्मणीनामिव गारुड़ानां
सपल्लवरागः फलितो विभाति ॥")
मेघः। दृढदारकः। कोकिलः। कृष्णवर्णः। हरिद्वर्णः। इति मेदिनी ॥ धुस्तूरः। पीलुवृक्षः। श्यामाकः। इति राजनिर्घण्टः ॥ दमनकवृक्षः। गन्धद्रव्यम्। इति विश्वः ॥*॥
श्यामवस्तूनि यथा,—
कृष्णानि केशवः सौरिर्वीरं चन्द्राङ्गरात्मजः।
विन्ध्याञ्जनाद्रिदूर्व्वाहिधनभैरवराक्षसाः ॥
शिवकृष्णधनर्द्दैपायनरामधनञ्जयाः।
अनिर्द्दशपदजा काली कलिकोलयमासुराः ॥
केशवाञ्जनकस्तूरीराजपट्टविदूरजम्।

विषकोषकुङ्कुशस्त्रागुरुपापतमोनिशाः ॥
मसीपङ्कमदाम्भोधियमुनाधूमकोकिलाः ।
गोलाङ्गुलास्यगुञ्जास्ये कण्ठः खञ्जनकेकिनोः ॥
श्यवलं तालतापिञ्छतिलेन्दीवरवज्रयः ।
रसविद्भृङ्गशृङ्गारी कटाक्षोऽलिः कणीनिका ॥
नीली जम्बूफलं मुस्ता वाकक्षत्याकुकीर्त्तयः ।
भिन्नच्छाया गजाङ्गारखलान्तःकरणादयः ॥"
इति कविकल्पलतायां २श्लेषस्तवके ४कुसुमम् ॥

श्यामकं, क्ली, (श्याम + संज्ञायां कन् ।) रोहिषतृणम् । इति राजनिर्घण्टः ॥ (कृष्णवर्णे, त्रि । यथा, हरिवंशे । ६१ । ८ ।
"श्यामकपुष्पचिताङ्गो
भस्मारुणसन्निभो विड्वराहश्च ॥")

श्यामकः, पुं, (श्यामं तद्वर्णं अकतीति । अक गतौ + अण् । शकन्ध्वादित्वात् साधुः ।) श्यामाकः । इति हेमचन्द्रः ॥ (शूरस्य पुत्रविशेषः । स तु वसुदेवस्य भ्राता । इति भागवतम् । ८।२४।२९ ॥)

श्यामकण्ठ, पुं, (श्यामः कण्ठो यस्य ।) मयूरः । इति हलायुधः ॥ शिवः । पक्षिविशेषः । इति नीलकण्ठशब्ददर्शनात् ॥

श्यामकन्दा, स्त्री, (श्यामः कन्दो यस्याः ।) अतिविषा । इति राजनिर्घण्टः ॥

श्यामकाण्डा, स्त्री, (श्यामः काण्डो यस्याः ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

श्यामग्रन्थिः, स्त्री, (श्यामो ग्रन्थिर्यस्य ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

श्यामपत्रः, पुं, (श्यामानि पत्राणि यस्य) तमालवृक्षः । इति शब्दचन्द्रिका ॥

श्यामलः, पुं, (श्यामवर्णः अस्त्यस्येति । श्याम + "सिध्मादिभ्यश्च ।" ५।२।९७। इति लच् ।) कृष्णवर्णः । पिप्पलः । इतिमेदिनी ॥ कृष्णगुणवति, त्रि । इत्यमरः ॥ (यथा मुकुन्दमालायाम् । २।
"जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥")

श्यामलचूड़ा, स्त्री, (श्यामला चूड़ा यस्याः ।) गुञ्जा । इति राजनिर्घण्टः ॥

श्यामलता, स्त्री, (श्यामा लता ।) स्वनामख्यातलता । तत्पर्य्यायः । यथा, शब्दरत्नावल्याम् ।
"गोपी गोपा गोपवल्ली सारिवोत्पलसारिवा ।
अनन्ता शारिवा श्यामा ह्यष्टौ श्यामलताह्वये ॥"
अपि च ।
"कालपेयी महाश्यामा सुभद्रोत्पलसारिवा ।
दीर्घमूला च पालिन्दी मसूरविदला च सा ॥"
इति रत्नमाला ॥
राजनिर्घण्टोक्तपर्य्यायगुणौ सारिवाशब्दे द्रष्टव्यौ

श्यामला, स्त्री, पार्व्वती । श्यामं श्रीकृष्णं लाति ददातीति व्युत्पत्तिसिद्धा । इति केचित् ॥ अश्वगन्धा । कटभी । जम्बूः । कस्तूरी । इति राजनिर्घण्टः ॥

श्यामलिका, स्त्री, नीली । इति राजनिर्घण्टः ॥

श्यामलेक्षुः, पुं, (श्यामलः कृष्णवर्णः इक्षुः ।) कृष्णेक्षुः । इति राजनिर्घण्टः ॥

श्यामसुन्दरः, पुं, (श्यामः सुन्दरश्च ।) श्रीकृष्णः । यथा,—
"यावन्ति च शरीराणि भोगार्हाणि महामुने ।
प्राकृतानि च सर्व्वाणि श्रीकृष्णविग्रहं विना ॥
ध्यायन्ते योगिनस्तच्च शुद्धं ज्योतिःस्वरूपिणम् ।
हस्तपादादिरहितं निर्गुणं प्रकृतेः परम् ॥
वेदवास्तं न मन्यन्ते तत्त्वज्ञा सूक्ष्मदर्शिनः ।
कुतो बभूव तज्ज्योतिरहो तेजस्विनं विना ।
ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४१ अध्यायः ॥*॥
अन्यच्च ।
श्यामसुन्दर ते दास्यः करवाम तवोदितम् ।
देहि वासांसि धर्म्मज्ञ नो चेद्राज्ञे ब्रुवामहे ॥"
इति श्रीभागवते दशमस्कन्धे २२ अध्यायः ॥*॥
अपि च ।
"ददर्श श्रीहरिं ब्रह्मा शङ्करश्च सुरैः सह ।
वसन्तं तन्मध्यदेशे यथेन्द्रं तारकावृतम् ॥
अमूल्यरत्ननिर्म्माणसर्व्वभूषणभूषितम् ।
किरीटिनं कुण्डलिनं वनमालाविभूषितम् ॥
शङ्खचक्रगदापद्मधारिणञ्च चतुर्भुजम् ।
नवीननीरदश्यामसुन्दरं सुमनोहरम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः ॥

श्यामा, स्त्री, (श्यामो वर्णोऽस्त्यस्या इति । अच् । टाप् ।) शारिवौषधी । अप्रसूताङ्गना । प्रियङ्गुः । वागुजिः । यमुना । रात्रिः । कृष्णवितृतिका । नीलिका । इति मेदिनी ॥ गुग्गुलुः । सोमलता । गुन्द्रा । कृष्णा । अम्बिका । इति विश्वः ॥ गुडूची । कस्तूरी । वटपत्री । वन्दा । नीलपुनर्नवा । पिप्पली । हरिद्रा । नीलदूर्व्वा । तुलसी । पद्मबीजम् । गौः । स्त्री । छाया । कृष्णसारिवा । शिंशपा । इति राजनिर्घण्टः ॥ (नारीविशेषः । यथा, भट्टिः । ५ । १८ ।
"योपिद्दारिका तस्य दयिता हंसनादिनी ।
दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ॥"
तल्लक्षणं यथा, तट्टीकायाम् ।
"शीते सुखोष्णसर्व्वाङ्गी ग्रीष्मे च सुखशीतला ।
तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कथ्यते ॥")
पक्षिविशेषः । श्यामा इति भाषा । तत्पर्य्यायः । वराही २ शकुनी ३ कुमारी ४ दुर्गा ५ देवी ६ चटका ७ कृष्णा ८ पोतकी ९ पाण्डविका १० वामा ११ कालिका १२ गितिसिञ्चिनी १३ । इति राजनिर्घण्टः ॥*॥ श्यामाया उत्पत्तिर्यथा,
"ततः सा कालिका देवी योगनिद्रा जगन्मयी ।
पूर्व्वत्वक्सततीरूपा जन्मार्थं मेनकां ययौ ॥
समयस्यानुरूपेण मेनका जठरे शिवा ।
सम्भूय च समुत्पन्ना सा लक्ष्मीरिव सागरात् ॥
वसन्तसमये देवी नवम्यां मृगयोगतः ।
अर्द्धरात्रौ समुत्पन्ना गङ्गेव शशिमण्डनात् ॥
ततस्तस्यान्तु जातायां प्रसन्नाद्याभवन् दिशः ।
सानुकूलो ववौ वायुर्गम्भीरो गन्धिलः शुभः ॥
बभूव पुष्पवृष्टिश्च तोयवृष्टिः परा तथा ।
जज्वलुर्याग्नयः शान्ता जगर्জ্জুश्च घना घनम् ॥
तस्यान्तु जायमानायां सर्व्वं स्वास्थ्यमपद्यत ।
तान्तु दृष्ट्वा यथाजातां नीलोत्पलदलानुगाम् ॥
श्यामां सा मेनका देवी मुदमापाति हर्षिता ।
देवाश्च हर्षमतुलं प्रापुस्तत्र मुहुर्मुहुः ॥
तुष्टुवुस्तामप्सरोभ्यो गन्धर्व्वाश्चासुरोगणाः ।
तान्तु नीलोत्पलदलश्यामां हिमवतः सुताम् ॥
कालीति नाम्ना हिमवानाजुहाव कृते दिने ।
बान्धवास्तु स्वसन्तानां नाम्ना तां पार्व्वतीति च ।
कालीति च तथा नाम्ना कीर्त्तिता गिरिनन्दिनी ॥"
इति कालिकापुराणे ४० अध्यायः ॥*॥
अथ श्यामामन्त्राः । क्रीं क्रीं क्रीं ह्रूं ह्रूं फ्रौं फ्रौं दक्षिणे कालिके क्रीं क्रीं क्रीं ह्रूं ह्रूं फ्रौं फ्रौं स्वाहा । यथा, कालीतन्त्रे ।
"कामत्रयं वह्निसंस्थं रतिबिन्दुसमन्वितम् ।
कूर्चयुग्मं तथा लज्जायुगलं तदनन्तरम् ॥
दक्षिणे कालिके चेति पूर्व्वबीजानि चोच्चरेत् ।
अन्ते वह्निवधूं दद्यात् विद्या राज्ञी प्रकीर्त्तिता ॥"
मन्त्रार्थमाह यामले ।
"ककाराज्जलरूपत्वात् केवलं मोक्षदायिनी ।
ज्वलनार्णसमायोगात् सर्व्वतेजोमयी शुभा ।
मायात्रयेण देवेशि सृष्टिस्थित्यन्तकारिणी ॥
बिन्दूनां निष्फलत्वाच्च कैवल्यफलदायिनी ।
बीजत्रया शाम्भवी सा केवलं ज्ञानचिल्कला ॥
शब्दबीजद्वयेनैव शब्दराशिप्रबोधिनी ।
लज्जाबीजद्वयेनैव सृष्टिस्थित्यन्तकारिणी ॥
सम्बोधनपदेनैव सदा सन्निधिकारिणी ।
स्वाहया जगतां माता सर्व्वपापप्रणाशिनी ॥"
अस्याः पूजाप्रयोगः । प्रातःकृत्यादिकं कृत्वा मन्त्राचमनं कुर्य्यात् । यथा,—
"कालिकाभिः स्त्रिभिः पीत्वा काल्यादिभिरुपस्पृशेत् ।
द्वाभ्यामोष्ठौ हिरण्मृज्य चक्रेण चालयेत् करम् ॥
मुखघ्राणेक्षणश्रोत्रनाभ्युरस्कं भुजौ क्रमात् ।
आचम्यैवं भवेत् कालौ वत्सरात्तां प्रपश्यति ॥"
कं शिरः । तदुयथा । क्रीमिति त्रिराचामेत् । ॐ काल्यै नमः कपालिन्यै नमः इति ओष्ठौ हिरण्मृजेत् । ॐ कुल्लायै नमः इति करं चालयेत् । ॐ कुरुकुल्लायै नमः इति मुखे । ॐ विरोधिन्यै नमः इति दक्षिणनासायाम् । ॐ विप्रचित्तायै नमः इति वामनासायाम् । ॐ उग्रायै नमः ॐ उग्रप्रभायै नमः इति नेत्रयोः । ॐ दीप्तायै नमः ॐ नीलायै नमः इति श्रोत्रयोः । ॐ घनायै नमः इति नाभौ । ॐ बलाकायै नमः इति वक्षसि । ॐ मात्रायै नमः इति शिरसि । ॐ मुद्रायै नमः ॐ मितायै नमः इत्यंसयोः । इति मन्त्राचमनम् ।*। ततो भूतशुद्ध्यन्तं विधाय मायाबीजेन यथाविधि

प्राणायामत्रयं कुर्य्यात् ॥*॥ ऋष्यादिन्यासः। यथा। अस्य मन्त्रस्य भैरव ऋषिरुष्णिक् छन्दो दक्षिणकालिका देवता क्रीं बीजं ह्रूं शक्तिः क्रीं कीलकं पुरुषार्थचतुष्टयसिद्ध्यर्थे विनियोगः। तथा च कालीक्रमे।

"कीलकं चाद्यबीजं स्यात् चतुर्व्वर्गफलप्रदम्।"

शिरसि वैरवाय ऋषये नमः। मुखे उष्णिक्छन्दसे नमः। हृदि दक्षिणकालिकायै देवतायै नमः। गुह्ये क्रीं बीजाय नमः। पादयोः ह्रूं शक्तये नमः। सर्व्वाङ्गे क्रीं कीलकाय नमः॥ ततः कराङ्गन्यासौ। तदुक्तं कालीतन्त्रे।

"अङ्गन्यामकरन्यासौ यथावदभिधीयते।
भैरवोऽस्य ऋषिः प्रोक्तः उष्णिक् छन्द उदाहृतम्।
देवता कालिका प्रोक्ता लज्जाबीजन्तु बीजकम्॥
कीलकं चाद्यबीजं स्याच्चतुर्व्वर्गफलप्रदम्॥
शक्तिश्च कूर्चबीजं स्यादनिरुद्धा सरस्वती।
कवित्वार्थे नियोगः स्यादित्यादि तेन मायया॥"

षड़ङ्गन्यासः।

"षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत्।"

वीरतन्त्रेऽपि।

"दीर्घषट्कयुताद्येन प्रणवाद्येन कल्पयेत्।"

इति वा। तद्यथा। ॐ क्रां अङ्गुष्ठाभ्यां नमः। ॐ क्रीं तर्ज्जनीभ्यां स्वाहा। ॐ क्रूं मध्यमाभ्यां वषट्। ॐ क्रैं अनामिकाभ्यां हुं। ॐ क्रौं कनिष्ठाभ्यां वौषट्। ॐ क्रः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। ॐ क्रां हृदयाय नमः इत्यादि। एवं ॐ क्रां अङ्गुष्ठाभ्यां नमः इत्यादि वा॥*॥ ततो वर्णन्यासः। अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं नमः इति हृदये। एं ऐं ओं औं अं अः कं खं गं घं नमः इति दक्षिणबाहौ। ङं चं छं जं झं ञं टं ठं डं ढं नमः। इति वामबाहौ। णं तं थं दं धं नं पं फं बं भं नमः इति दक्षिणपादे। मं यं रं लं वं शं षं सं हं ळं क्षं नमः इति वामपादे। विरूपाक्षमते सबिन्दुरयं न्यासः। यथा वीरतन्त्रे। अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं वै हृदये न्यसेदित्यादि। पुनर्निर्बिन्दुर्यथा। अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ वै हृदयं खड्गेदित्यादि। किन्तु सबिन्दून् वा न्यसेदेतान् निर्बिन्दून् वाथ वर्णकान् इत्याचार्य्यपरिग्रहितभैरवीयवाक्यात् उभयमेव युक्तम्॥*॥ अथ षोढान्यासः। तदुक्तं वीरतन्त्रे।

"केवलां माढकां कृत्वा माढकां तारसंपुटाम्।
माढकापुटितं तारं न्यसेत् साधकसत्तमः॥
श्रीबीजपुटितां तान्तु माढकापुटितन्तु तत्।
कामेन पुटितां देवीं तत्पुटं काममेव च॥
शक्त्या च पुटितां देवीं शक्तिञ्च तत्पुटां न्यसेत्।
क्रीं इन्द्रञ्च पुनर्न्यस्त्वा ऋ-ॠ-ऌ-ॡ-ञ पूर्ववत्
"मूलेन पुटितां देवीं तत्पुटं मन्त्रमेव च॥
अनुलोमविलोमेन न्यस्त्वा मन्त्रं यथाविधि।
मूलेनाष्टशतं कुर्य्याद्व्यापकं तदनन्तरम्॥"

यथा ॐ अं ॐ एवं माढकापुटितंतारम्। एवं श्रीबीजपुटितां ताम्। तत्पुटितं श्रीबीजम्। एवं कामेन पुटितां माढकाम्। माढकापुटितं कामम्। एवं शक्त्या पुटितां माढकां माढकापुटितां शक्तिं न्यसेत्। तथा क्रीं इन्द्रञ्च ऋ-ॠ-ऌ-ॡ-ञ पूर्ववत्। तत्पुटितां माढकां न्यसेत् माढकापुटितञ्च तत्। मन्त्रपुटितां माढकां तत्पुटितं मनुम्। पुनरनुलोमविलोमेन केवलं माढकास्थाने न्यस्य मूलेनाष्टशतेन व्यापकं कुर्य्यात् अयं न्यासस्तारायाऽपि कार्य्यः।

"इति गुप्तेन दुर्गाया अङ्गषोढाः प्रकीर्त्तिताः।
तारायाः कालिकायाश्च उन्मुखाश्च तथापरे॥
एतस्मिन् न्यासवर्य्ये च सर्व्वं पापं प्रणश्यति॥"

ततस्तत्त्वन्यासः। यथामूलं त्रिखण्डं विधाय प्रथमखण्डान्ते ॐ आत्मतत्त्वाय स्वाहेति पादादिनाभिपर्य्यन्तम्। द्वितीयखण्डान्ते ॐ विद्यातत्त्वाय स्वाहा इति नाभ्यादिहृदयान्तम्। तृतीयखण्डान्ते ॐ शिवतत्त्वाय स्वाहा इति हृदयादिशिरःपर्य्यन्तं न्यसेत्। तदुक्तं स्वतन्त्रे।

"मूलविद्यात्रिखण्डान्ते प्रणवाद्यैर्यथाविधि।
आत्मविद्या शिवैस्तत्त्वैस्तत्त्वन्यासं समाचरेत्॥"

अथ बीजन्यासः। तदुक्तं कुमारीकल्पे।

"ब्रह्मरन्ध्रे भ्रुवोर्मध्ये ललाटे नाभिदेशके।
गुह्ये वक्त्रे च सर्व्वाङ्गे सप्तबीजं क्रमान्न्यसेत्॥"

यथा आद्यबीजं ब्रह्मरन्ध्रे द्वितीयबीजं भ्रूमध्ये तृतीयबीजं ललाटे चतुर्थबीजं नाभौ पञ्चमबीजं गुह्ये षष्ठबीजं वक्त्रे सप्तमबीजं सर्व्वाङ्गे। एतत्त्रयं काम्यम्॥*॥ ततो मूलेन सप्तधा व्यापकन्यासं कृत्वा यथाविधि मुद्रां प्रदर्श्य ध्यायेत्। यथा कालीतन्त्रे।

"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम्।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम्
सद्यश्छिन्नशिरःखड्गवामाधोर्द्धकराम्बुजाम्।
अभयं वरदञ्चैव दक्षिणोर्द्धाधःपाणिकाम्॥
महामेघप्रभां श्यामां तथा चैव दिगम्बरीम्।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्च्चिताम्॥
कर्णावतंसतानीतशवयुग्मभयानकाम्।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम्॥
शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम्।
सृक्कद्वयगलद्रक्तधारावि स्फुरिताननाम्॥
घोररावां महारौद्रीं श्मशानालयवासिनीम्।
बालार्कमण्डलाकारलोचनत्रितयान्विताम्॥
दन्तुरां दक्षिणव्यापिमुक्तालम्बिकचोच्चयाम्।
शवरूपमहादेवहृदयोपरिसंस्थिताम्॥
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम्।
महाकालेन च समं विपरीतरतातुराम्॥
सुखप्रसन्नवदनां स्मेराननसरोरुहाम्।
एवं सञ्चिन्तयेत् कालीं सर्व्वकामार्थसिद्धिदाम्॥" *॥

शवयुग्मेति घोरबाणावतंसेति प्रेतकर्णावतंसेति च। शकुन्तपक्षसंयुक्तबाणकर्णविभूषितार्मिति विगतासृक्शिरोराभ्यां कृतकर्णावतंसिनीमिति च दर्शनादुभयमेव पाठः॥*॥ ध्यानान्तरं स्वतन्त्रे

"अञ्जनाद्रिनिभां देवीं करालवदनां शिवाम्।
मुण्डमालावलीकीर्णां मुक्तकेशीं स्मिताननाम्॥
महाकालहृदम्भोजस्थितां पीनपयोधराम्।
विपरीतरतासक्तां घोरदंष्ट्रां शिवैः सह॥
नागयज्ञोपवीताढ्यां चन्द्रार्द्धकृतशेखराम्।
सर्व्वालङ्कारयुक्ताञ्च मुण्डमालाविभूषिताम्॥
शतहस्तसहस्रं तु बहुकाञ्चीं दिगंशुकाम्।
शिवाकोटिसहस्रैस्तु योगिनीभिर्विराजिताम्॥
रक्तपूर्णमुखाम्भोजां मद्यपानप्रमत्तिकाम्।
वक्त्रार्कशतनेत्राञ्च रक्तविस्फुरिताननाम्॥
विगतासृक्शिरोराभ्यां कृतकर्णावतंसिनीम्।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्च्चिताम्॥
श्मशानवह्निमध्यस्थां ब्रह्मकेशववन्दिताम्।
सद्यःकृत्तशिरःखड्गवराभीतिकराम्बुजाम्॥"

ध्यानान्तरं रहस्ये। यथा,—

"शवारूढां महाभीमां घोरदंष्ट्रां हसन्मुखीम्।
चतुर्भुजां खड्गमुण्डवराभयकरां पराम्॥
मुण्डमालाधरां देवीं ललज्जिह्वां दिगम्बरीम्।
एवं सञ्चिन्तयेत् कालीं श्मशानालयवासिनीम्॥"

एवं ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनं कुर्य्यात् यथा। स्वधामे भूमौ ह्रूंकारगर्भं त्रिकोणं विलिख्य अर्घ्यपात्रं संस्थाप्य मूलेन शुद्धजलादिना। शङ्खादिपात्रमापूर्य्य गन्धादिकं दत्त्वा ॐ गङ्गे चेत्यादिना तीर्थमावाह्य मं वह्निमण्डलाय दशकलात्मने नमः इत्याधारम्। भं सूर्य्यमण्डलाय द्वादशकलात्मने नमः इति शङ्खम्। उं सोममण्डलाय षोड़शकलात्मने नमः इति जलं सम्पूज्य। ॐ क्रां हृदयाय नमः। ॐ क्रीं शिरसे स्वाहा। ॐ क्रूं शिखायै वषट्। ॐ क्रैं कवचाय हुं इत्यग्नीशासुरवायुषु। अग्रे ॐ क्रौं नेत्रत्रयाय वौषट्। चतुर्दिक्षु ॐ क्रः अस्त्राय फट्। इत्यभ्यर्च्च तदुपरि मत्स्यमुद्रयाच्छाद्य मूलं दशधा जप्त्वा धेनुमुद्रया अमृतीकृत्य अस्त्रेण संरक्ष्य भूतिनीयोनिमुद्रे प्रदर्श्य तज्जलं किञ्चित् प्रोक्षणीपात्रे निःक्षिप्य मूलेन तेनोदकेनात्मानं पूजोपकरणञ्चाभ्युक्ष्य पीठपूजामारभेत्॥*॥ अस्याः पूजायन्त्रम्। आदौ बिन्दुं स्ववीजं भुवनेशीञ्च विलिख्य ततस्त्रिकोणं तद्बाह्ये त्रिकोणचतुष्टयं वृत्तमष्टदलं पद्मं पुनर्वृत्तं चतुर्द्वारात्मकं भूगृहं लिखेत्। तदुक्तं कालीतन्त्रे।

"आदौ त्रिकोणमालिख्य त्रिकोणं तन्निधिलिखेत्
ततो वै विलिखेन्मन्त्री त्रिकोणचयमुत्तमम्॥
ततो वृत्तं समालिख्य लिखेदष्टदलं ततः।
वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककम्॥"

कुमारीकल्पे।

"मध्ये तु बैन्दवं चक्रं बीजमायाविभूषितम्॥"

इति॥*॥

अत्र विशेषाधारो मुण्डमालायाम्।

"ताम्रपात्रे कपाले वा श्मशानकाष्ठनिर्म्मिते।
अनिर्भोगदिने वापि शरीरे मृतसम्भवे॥
स्वर्णे रौप्येऽथ लौहे वा चक्रं कार्य्यं विधानतः॥"

यन्त्रान्तरमाह तन्त्रे ।
"शक्त्यग्निभ्याञ्च षट्कोणं शक्तिभिश्च नवात्मकम्
पद्मं वसुदले भूमिपुरचतुर्द्वारसंयुतेति ॥*॥
पीठपूजां ततः कुर्य्यादाधारशक्तिपूर्व्वकम् ।
प्रकृतिं कमठञ्चैव शेषं पृथ्वीं तथैव च ॥
सुधाम्बुधिं मणिद्वीपं चिन्तामणिगृहं तथा ।
श्मशानं पारिजातञ्च तन्मूले रत्नवेदिकाम् ॥
तस्योपरि मणेः पीठं न्यसेत् साधकसत्तमः ।
चतुर्दिक्षु मुनीन् देवान् शिवाञ्च शवमुण्ड-
कान् ॥"
धर्म्माद्यधर्म्मादींश्चेत्यादि क्रीं ज्ञानात्मने नमः
इत्यन्तं संपूज्य केशरेषु पूर्व्वादिक्रमेण पूजयेत्।
"इच्छा ज्ञाना क्रिया चैव कामिनी काम-
दायिनी ॥
रती रतिप्रिया नन्दा मध्ये चैव मनोन्मनी ॥"
सर्व्वत्र प्रणवादिनमोऽन्तेन पूजयेत् । तदुपरि
ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः ॥*॥
ततः पुनर्ध्यात्वा पुष्पाञ्जलावानीय मूलमन्त्र-
कल्पितमूर्त्तावावाहयेत् ।
"ॐदेवेशि भक्तिसुलभे परिवारसमन्विते ।
यावत्त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव ॥"
ततो मूलमुच्चार्य्य अमुकीदेवि इहावह इह
तिष्ठ इह सन्निधेहि इह सन्निरुध्यस्व इह सन्नि-
हिता भव । ततः क्रमित्यवगुण्ठ्य अङ्गमन्त्रैः
सकलीकृत्य धेनुमुद्रया अमृतीकृत्य परमी-
करणमुद्रया परमीकृत्य भूतिन्याकर्षिणीयोनि-
मुद्राः प्रदर्श्य प्राणप्रतिष्ठां विधाय मूलेन पाद्या-
दिभिः पूजयेत् । ततो मूलमुच्चार्य्य एतत् पाद्य
मुकदेवतायै नमः । एवमर्घ्यं स्वधा । आच-
मनीयं स्वधा । स्नानीयं निवेदयामि । पुनरा-
चमनीयं स्वधा । एष गन्धो नमः । एतानि
पुष्पाणि वौषट् । ततो मूलेन पञ्च पुष्पाञ्जलीन्
दत्त्वा धूपदीपौ दद्यात् । वनस्पतीत्यादि पठन्
मूलमुच्चार्य्य एष धूपो नमः । दीपमन्त्रस्तु ।
"सुप्रकाशो महादीपः सर्व्वतस्तिमिरापहः ।
सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥"
मूलमुच्चार्य्य एष दीपो नमः । ततः ॐ जय-
ध्वनिमन्त्रमातः स्वाहा इति घण्टां संपूज्य वाम
हस्तेन तां वादयन् नीचैर्धूपं दत्त्वा दृष्टिपर्य्यन्तं
दीपं दद्यात् । ततो मूलेन पुष्पाञ्जलित्रयं दत्त्वा
यथोपपन्नं नैवेद्यं दत्त्वा आवरणपूजां कुर्य्यात् ॥
श्रीअमुकीदेवि आवरणं ते पूजयामि इत्याज्ञां
गृहीत्वा केशरेष्वग्न्यादिकोणेषु ॐ क्रां हृदया-
यनमः । ॐक्रीं शिरसे स्वाहा । ॐ ह्रूं
शिखायै वषट् । ॐक्रैं कवचाय हूं । ॐक्रौं
नेत्रत्रयाय वौषट् । चतुर्दिक्षु ॐ क्रः अस्त्राय
फट् । बहिःपट्कोणे ॐ कालै नमः । सर्व्वत्र
प्रणवादिनमोऽन्तेन कपालिन्यै कुल्लायै कुरु-
कुल्लायै विरोधिन्यै विप्रचित्तायै उग्रायै उग्र-
प्रभायै दीप्तायै इत्यन्तस्त्रासे । ॐनीलायै नमः
एवं धनायै बलाकायै इति द्वितीयत्रासे । एवं
मात्रायै मुद्रायै मितायै इति तृतीयत्रासे ।
"सर्व्वाः श्यामा असिकरा मुण्डमालाविभूषिताः
तर्ज्जनीं वामहस्तेन धारयन्त्यः शुचिस्मिताः ॥
दिगम्बर्य्यो हसन्मुख्यः स्वस्ववाहनभूषिताः ॥"
एवं ध्यात्वार्च्चयेत् ॥*॥ ततोऽष्टपत्रेषु पूर्व्वादि-
क्रमेण ॐ ब्राह्म्यै नमः । एवं नारायण्यै माहे-
श्वर्य्यै चामुण्डायै कौमार्य्यै अपराजितायै वाराह्य
नारसिंह्यै एता गन्धादिभिः पूजयेत् । पत्राग्रे
असिताङ्गादिभैरवान् पूजयेत् । ततो मूलेन
पुष्पाञ्जलित्रयं दत्त्वा पाद्यादिना महाकालं
पूजयेत् ॥*॥ तस्य ध्यानम् ।
"महाकालं यजेद्द्व्या दक्षिणे धूम्रवर्णकम् ।
बिभ्रतं दण्डखट्वाङ्गौ दंष्ट्राभीममुखं शिखम् ॥
व्याघ्रचर्म्मावृतकटिं तुन्दिलं रत्नवाससम् ।
त्रिनेत्रं मुक्तकेशञ्च मुण्डमालाविभूषितम् ॥
जटाभारलसच्चन्द्रखड्गमुग्रं ज्वलद्विभम् ॥"
तथा च कुमारीकल्पे ।
"देव्यास्तु दक्षिणे भागे महाकालं प्रपूजयेत् ।"
ह्रूं क्षौं यां रां लां वां भां क्रीं महाकाल-
भैरव सर्व्वविघ्नान्नाशय नाशय ह्रीं श्रीं फट्
स्वाहा इत्यनेन पाद्यादिभिराराध्य त्रिस्तर्पयित्वा
मूलेन देवीं पञ्चोपचारैः पूजयेत् । तथा च
कालीतन्त्रे ।
"महाकालं यजेद्यत्नात् पश्चाद्देवीं प्रपूजयेत् ।"
कालीकल्पे ।
"कवचं क्षौं समुत्कृत्य यां रां लां वां भां च
क्रोन्ततः ।
महाकालभैरवेति सर्व्वविघ्नान्नाशयेति च ॥
नाशयेति पुनः प्रोच्य मायां लक्ष्मीं समुद्धरेत् ।
फट् स्वाहया समायुक्तो मन्त्रः सर्व्वार्थसाधकः ॥"
ततो देवीं ध्यात्वा यथाशक्ति जप्त्वा गुह्ये त्यादिना
वामहस्ते जपं समर्प्य आत्मसमर्पणं कुर्य्यात् ।
ततः स्तुत्वा प्रदक्षिणीकृत्य अष्टाङ्गप्रणामं कृत्वा
श्रीजगन्मङ्गलं नाम कवचं पठेत् ॥*॥ तत
आवरणदेवता देव्यङ्गे विलोप्य संहारमुद्रया
अमुकीदेवी क्षमस्वेति विसृज्य तत्तेजःपुञ्जेण
समं स्वहृदयारोपयेत् ।
"उत्तरे शिखरे देवि भूम्यां पर्व्वतवासिनि ।
ब्रह्मयोनिसमुत्पन्ने गच्छ देवि ममान्तरम् ॥"
इति मन्त्रेण ॥*॥
ततस्तन्नैवेद्यं किञ्चिदुच्छिष्टचाण्डालिन्यै नमः
इत्यैशान्यां दिशि दत्त्वा शेषमिष्टेभ्यो दत्त्वा
किञ्चित् स्वीकृत्य पादोदकं पीत्वा निर्म्माल्यं
शिरसि विधृत्य यथेच्छं विहरेत् ॥*॥ ततो
यन्त्रलेपं वामहस्ते कृत्वा सव्यहस्तकनिष्ठया
मायाबीजं विलिख्य तथा तिलकं कुर्य्यात् ।
तथा च ।
"वामे कृत्वा यन्त्रलेपं मायां सव्यकनिष्ठया ।
विलिख्य तिलकं कुर्य्यात् मन्त्रेणानेन साधकः ॥
ॐ यं यं स्पृशामि पादेन यो मां पश्यति
चक्षुषा ।
स एव दासतां यातु राजानो दुष्टदस्यवः ॥"
जपकाले तु कर्पूरयुक्ता जिह्वा कार्य्या ।
"कर्पूराढ्या सदा जिह्वा कर्त्तव्या जपकर्म्मणि ।"
इति विश्वसारवाक्यात् इयं काम्यजप इति
तत्त्वम् । ततो मूलेनाष्टोत्तरशताभिमन्त्रितं पुष्पं
चन्दनञ्च धृत्वा त्रैलोक्यं वशमानयेत् ।
"सर्व्वसिद्धियुतो भूत्वा भैरवो वत्सराद्भवेत् ।"
अस्य पुरश्चरणं लक्षहयजपः । तथा च कालो-
तन्त्रे ।
"लक्षमेकं जपेन्मन्त्रं हविष्याशी दिवा शुचिः ।
रात्रौ ताम्बूलपूरास्यः शय्यायां लक्षमानतः ॥"
व्यवस्थामाह स्वतन्त्रे ।
"दिवा लक्षं शुचिर्भूत्वा हविष्याशी जपेश्वरः ॥"
ततस्तु तद्दशांशेन होमयेत् हविषा प्रिये ॥"
मन्त्रान्तरस्य कालान्तरमाह नीलसारस्वते ।
"लक्षमेकं जपेन्मन्त्रं हविष्याशी दिवा शुचिः ।
अशुचिश्च तथा रात्रौ लक्षमेकं तथैव च ॥"
"दशांशं होमयेन्मन्त्रौ तर्पयेदभिषेचयेत् ।"इति
सान्नदायिकाः । वस्तुतस्तु कुमारीकल्पे ।
"लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः ।
रात्रौ ताम्बूलपूरास्यः शय्यायां लक्षमानतः ॥
रात्रिजपे तु कालो मुण्डमालायाम् ।
"गते तु प्रथमे यामे द्वितीयप्रहरावधि ।
निशायास्तु प्रजप्तव्यं रात्रिशेषे जपेन्न तु ॥
एवं लक्षत्रयं जप्त्वा तद्दशांशेन मन्त्रवित् ।
अयुतं होमयेद्देवि दिवारात्रिविभेदतः ॥"
तेन दिवा लक्षं जप्त्वा तद्दशांशं होमं कुर्य्यात् ।
रात्रौ लक्षं जप्त्वा तद्दशांशं होमं कुर्य्यादिति
रहस्यार्थः ।
"द्विजातीनाञ्च सर्व्वेषां दिवा विधिरिहोच्यते ।
शूद्राणाञ्च तथा प्रोक्तं रात्राविष्टं महाफलम् ॥"
अन्यत्र च ।
"दिवैव प्रजपेन्मन्त्रं न तु रात्रौ कदाचन ॥"*॥

अथ मन्त्रभेदाः ।

क्रीं । १ । क्रीं क्रीं क्रीं । ३ । अनयोः पूजा-
प्रयोगः सर्व्वं पूर्व्ववत् । ध्यानं सिद्धेश्वरतन्त्रे ।
"शवारूढां महाभीमां घोरदंष्ट्रां वरप्रदाम् ॥
हास्ययुक्तां त्रिनेत्राञ्च कपालकर्त्तृकाकराम् ॥
मुक्तकेशीं ललज्जिह्वां पिबन्तीं रुधिरं मुहुः ।
चतुर्बाहुयुतां देवीं वराभयकरां स्मरेत् ॥"
अनयोः पुरश्चरणं लक्षजपः ॥*॥ ॐ क्रीं क्रीं
ह्रूं ह्रूं क्रीं क्रीं क्रीं दक्षिणे कालिके क्रीं क्रीं
क्रीं ह्रूं ह्रूं क्रीं क्रीं । २१ । अस्याः पूजादिकं
दक्षिणावत् कार्य्यम् । पुरश्चरणं लक्षजपः ॥*॥
ॐ क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रीं क्रीं दक्षिणे
कालिके क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रीं
स्वाहा । २१ ॥*॥ क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रीं
क्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रीं
क्रीं स्वाहा । २२ ॥*॥ ह्रीं क्रीं ह्रूं ह्रूं क्रीं
क्रीं क्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं ह्रूं ह्रूं
क्रीं क्रां २० । ध्यानपूजादिकं दक्षिणावत् ॥*॥
क्रीं क्रीं फूं ।३॥*॥ ॐक्रीं क्रीं मे स्वाहा ।६
अस्याः पूजाप्रयोगः । अस्य भैरव ऋषिर्विराट्
छन्दः सिद्धकाली देवरूपा भुवनेश्वरी देवता

निजबीजं बीजं लब्वाबीजं शक्तिः। वर्ण-न्यासादि दक्षिणवत्। ध्यानन्तु।
"खड्गाङ्किन्दुखण्डस्रवदमृतरसाप्लाविताङ्गी विनेत्रा।
सव्ये पाणौ कपालोत्पलदलभृजमथो सुक्तकेशी पिबन्ती।
दिग्वस्त्रावद्धकाञ्चीमणिमयमुकुटाद्यैर्युता दीप्त-जिह्वा
पायान्नीलोत्पलाभा रविशशिविमलत्कुण्डला-लीढ़पादा॥"
एवं ध्यात्वा दक्षिणावत् सर्व्वं कार्य्यम्। पुश्चरण-न्तु एकविंशतिसहस्रजपः॥*॥ क्रीं क्रीं क्रीं ३॥*॥ क्रीं क्रीं क्रीं स्वाहा। ५॥*॥ क्रीं क्रीं क्रीं क्रीं फट स्वाहा। ६॥*॥ क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं स्वाहा। ८॥*॥ ऐं नमः। क्रीं ऐं नमः। क्रीं कालिकायै स्वाहा। १४॥*॥ एतस्याः पूजाप्रयोगः। अस्य दक्षिणा मूर्त्तिऋषिः पंक्तिच्छन्दः कालिका देवता। ध्यानन्तु
"चतुर्भुजा कृष्णवर्णा मुण्डमालाविभूषिता।
खड्गञ्च दक्षिणे पाणौ बिभ्रतीन्दीवरद्वयम्॥
कर्त्तृञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रती।
द्यां लिखन्तीं जटामेकां बिभ्रती शिरसाद्वयो॥
मुण्डमालाधरा शीर्षे ग्रीवायामथ चापराम्।
वक्षसा नागहारञ्च बिभ्रती रत्नलोचना॥
कृष्णवस्त्रधरा कट्यां व्याघ्राजिनसमन्विता।
वामपादं शवहृदि संस्थाप्य दक्षिणं पदम्॥
विन्यास्य सिंहपृष्ठे तु लेलिहाना शवं स्वयम्।
साट्टहासा महाघोररावयुक्ता सुभीषणा॥"
ध्यानमेवं अन्यत् सर्व्वं दक्षिणावत्। पुरश्चरणं लक्षद्वयजपः। अन्यासां मन्त्रवर्णसंख्यलक्ष-जपः॥*॥ क्रीं क्रीं क्रीं दक्षिणे कालिके स्वाहा॥११॥ क्रीं ह्रूं क्रीं दक्षिणे कालिके फट्। १०॥*॥ क्रीं क्रीं ह्रूं ह्रूं क्रों क्रीं दक्षिणे कालिके क्रीं क्रीं ह्रूं ह्रूं क्रों क्रीं स्वाहा।२० एतासां दक्षिणा मूर्त्तिऋषिः पंक्तिच्छन्दो दक्षिण कालिका देवता।अन्यत् सर्व्वं दक्षिणावत्॥*॥ क्रीं स्वाहा ३। भैरवोऽस्य ऋषिः॥*॥ क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रों स्वाहा। ८॥*॥ क्रीं ह्रूं क्रीं स्वाहा।५। अस्य पञ्चवक्त्र ऋषिः॥*॥ क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रीं स्वाहा।८॥* क्रीं दक्षिणे कालिके स्वाहा। ९॥*॥ क्रीं॥ ह्रूं क्रीं क्रीं ह्रूं क्रीं स्वाहा। ८॥*॥ क्रीं क्रीं क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रीं क्रीं क्रीं क्रीं ह्रूं ह्रूं स्वाहा। १६॥*॥ नमः ऐं क्रीं क्रीं कालिकायै स्वाहा। ११॥*॥ नमः ओं आं क्रीं क्रीं फट् स्वाहा कालि कालि ह्रूं। १४॥*॥ एतासां ऋष्यादिकं पूजादिकञ्च दक्षिणावत्। पुरश्चरणं लक्षजपः॥*॥ अथ गुह्यकालिकामन्त्राः। क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रीं गुह्ये कालिके क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रीं स्वाहा। २१॥*॥ क्रीं ह्रूं क्रीं गुह्ये कालिके क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रीं स्वाहा। १६॥*॥ क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रीं गुह्ये कालिके स्वाहा। १४॥*॥ क्रीं ह्रूं क्रों क्रीं गुह्ये कालिके ह्रूं ह्रूं क्रीं क्रीं स्वाहा। १४॥*॥ क्रीं ह्रूं क्रों दक्षिणे कालिके ह्रूं ह्रूं क्रीं क्रों स्वाहा। १५॥*॥ ह्रूं क्रों गुह्ये कालिके क्रीं क्रीं ह्रूं ह्रूं क्रों क्रीं स्वाहा १५॥*॥ क्रीं गुह्ये कालिके क्रीं स्वाहा। ९॥*॥ क्रीं दक्षिणे कालिके क्रीं स्वाहा। १०॥*॥ एतासां सर्व्वं पूर्ववत्। बलिमन्त्रस्तु। एह्येहि जगन्मातर्ज्जगतां जननि गृह्ण गृह्ण मम बलिं सिद्धिं देहि देहि शत्रूंश्च कुरु कुरु क्रूं क्रूं क्रीं क्रों फट् फट् ॐकालि काये नमः फट् स्वाहा॥*॥ यद्वा गुह्यकाल्या अयं मन्त्रः। एह्येहि गुह्यकालि मम बलिं गृह्ण गृह्ण मम शत्रून् नाशय नाशय खादय खादय स्फुर स्फुर छिन्धि छिन्धि सिद्धिं देहि देहि क्रूं फट् स्वाहा॥*॥ अथ भद्रकाल्यादिमन्त्राः। क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रों भद्रकाल्यै क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रं क्रं स्वाहा।२०। *॥ क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रीं श्मशानकालि क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रों स्वाहा।२१॥*॥ क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रों क्रीं महाकालि क्रीं क्रीं क्रीं ह्रूं ह्रूं क्रीं क्रों स्वाहा।२०॥*॥ एतासां पूजादिकं दक्षिणावत्। ध्यानन्तु।
"महामेघप्रभां देवीं कृष्णवस्त्रपिधायिनीम्।
ललज्जिह्वां घोरदंष्ट्रां कोटराक्षीं हसन्मुखीम्॥
नागहारलतोपेतां चन्द्रार्द्धकृतशेखराम्।
द्यां लिखन्तीं जटामेकां लेलिहानां शवं स्वयम्॥
नागयज्ञोपवीताङ्गीं नागशय्यानिषेदुषीम्।
पद्माश्रयमुण्डसंयुक्तवनमालां महोदरीम्॥
सहस्रफणसंयुक्तमनन्तं शिरसोपरि।
चतुर्दिक्षु नागफणावेष्टितां गुह्यकालिकाम्॥
तक्षकसर्पराजेन वामकङ्कणभूषिताम्।
अनन्तनागराजेन कृतदक्षिणकङ्कणाम्॥
नागेन रसनाहारकल्पितां रत्ननूपुराम्।
वामे शिवस्वरूपन्तं कल्पितं वत्सरूपकम्॥
द्विभुजां चिन्तयेद्देवीं नागयज्ञोपवीतिनीम्।
नरदेहसमावद्धकुण्डलश्रुतिमण्डिताम्॥
प्रसन्नवदनां सौम्यां नवरत्नविभूषिताम्।
नारदाद्यैर्मुनिगणैः सेवितां शिवमोहिनीम्।
साट्टहासां महाभीमां साधकाभीष्टदायिनीम्॥"
गुह्यकाली इत्युपलक्षणम्॥*॥भद्रकालीमन्त्रान्तरम्।
"प्रासादबीजमुद्धृत्य कालीति पदमुद्धरेत्।
महाकालीपदं चोक्त्वा किलियुग्मं ततः परम्॥
अस्त्रमग्निप्रियान्तोऽयं भद्रकाल्या महामनुः॥"
ॐ कालि महाकालि किलि किलि फट् स्वाहा॥*॥ ध्यानं यथा,—
"श्वत्क्षामा कोटराक्षी मसिमलिनमुखी
मुक्तकेशी रुदन्ती
नादं वक्त्रा वदन्ती जगदखिलमिदं ग्रासमेकं
करोमि।
हस्ताभ्यां धारयन्ती ज्वलदनलशिखासन्निभं
पाशयुग्मं
दन्तैर्जम्बूफलाभैः परिहरतु भयं पातु मां
भद्रकाली॥"
अस्याः पुरश्चरणादिकं दक्षिणकालीतन्त्रवत्। इति केचित्॥ वस्तुतस्तु पुरश्चरणमष्टोत्तर-सहस्रजपः। इति कृष्णानन्दकृततन्त्रसारः॥*॥ श्मशानकालीमन्त्रादिकं तच्छब्दे द्रष्टव्यम्॥*॥ अथ दीपन्विताश्यामापूजा। यामले।
"कार्त्तिके मासि कृष्णायां पञ्चदश्यां महानिशि पूजयेत् योऽतियत्नेन काली विद्या प्रसीदति॥ मृण्मयीं प्रतिमां कृत्वा महाकालीं प्रपूजयेत्॥" व्योमकेशसंहितायाम्।
"तुलार्के यस्त्वमावास्यां निशार्द्धे घोरदक्षिणाम पूजयेद्विधिवद्भक्त्या सर्व्वसिद्धीश्वरो भवेत्॥" इति एवञ्च अर्द्धरात्रं पूजाया मुख्यकालः। स च कालो यद्युभयदिने तदा पूर्व्वदिने पूजा। यथा तत्रैव।
"तत्रोभयदिने शस्तकाले भूतयुता यदि।
उमा माहेश्वरी सा च तिथिः सिद्धिप्रदा सताम्॥
बलिदानं बलितिथावात्मनाशकरं परम्।
ततस्तत्र न कर्त्तव्यं बलिदानविसर्জ্জने॥
मन्त्रसिद्धिकरं तत्र परेऽह्नि जपसाधनम्।
रात्रौ पूजा प्रकर्त्तव्या रात्रावेव विसर्জ্জनम्।
प्रकाशे सिद्धिहानिः स्याद्दीपने सिद्धिरुत्तमा॥"
तथा कालीकल्पे।
"तुलार्के बहुले पक्षे पञ्चदश्यां महेश्वरीम्।
यथोपचारैः संपूज्य महानिशि नृपो भवेत्।
शनिभौमदिने चेत् स्यात्तत्तः शतगुणं फलम्॥
तत्रोभयदिने भूतयुक्तकुड्यां महानिशि॥
दृमां यात्रां कारयित्वा चक्रवर्त्ती भवेन्नृपः॥"
इति॥
महेश्वरीं दक्षिणकालीं तत्प्रकरणोक्तत्वात्॥*। कार्त्तिकामावास्यायां कालीपूजाहेतुमाह विश्व-सारे।
"कार्त्तिके कृष्णपक्षे तु पञ्चदश्यां महानिशि।
आविर्भूता महाकाली योगिनीकोटिभिः सह॥
अतोऽत्र पूजनीया सा तस्मिन्नहनि मानवैः।
बलिपूजादिकं सर्व्वं निशायां क्रियते तु यत्।
तत्तदक्षयतां याति काली विद्या प्रसीदति॥"
महानिशि अर्द्धरात्रे। तथा च उत्तरकामाख्या-तन्त्रे।
"शरत्काले च देवेशि दीपयात्रादिनेऽपि च।
अमावास्यां समासाद्य मध्यरात्रौ विचक्षणः॥
मृण्मयीं पुत्तलीं कृत्वा दीपादिभिरलङ्कृताम्।
बलिं नानाविधं दद्यात् वाद्यभाण्डसमन्वितम्।
नृत्यगीतं कौतुकञ्च यावत् सूर्य्योदयं भवेत्।
प्रातःकाले शुद्धतोये स्थापयेदरिनाशिनीम्॥"
इति॥
एतेनास्या दीपयात्राप्यर्द्धरात्रे बोध्या। आवि-

भूतेत्यनेनार्द्धरात्रे जन्मश्रवणात् तत्रैव पूजा मुख्येति। तथा बृहद्धर्म्मपुराणे।
"रात्रौ निशीथव्यापायाममावास्यामिहैव तु।
पृथ्वीतलं समायाता काली दिग्वसनाम्बिका॥
अतस्तामत्र वै भक्त्या देवदेवीं द्विजातयः।
पूजयेदात्मनो भक्त्या पशुपुष्पार्घ्यसम्पदा॥" इति
तथा गुप्तसाधनतन्त्रे।
"निशा तु परमेशानि सूर्य्ये चास्तमुपागते।
प्रहरे च गते रात्रौ घटिके द्वे परे च ये॥
महानिशा समाख्याता ततश्चातिमहानिशा।
अर्द्धरात्रे गते देवि पशुभावो न पूजयेत्॥"
अर्द्धरात्रे गते अर्द्धरात्रात् परम्। तथा।
"दशदण्डे तु या पूजा तत् सर्व्वमक्षयं भवेत्।
षष्ठक्रोशे महेशानि तत् सर्व्वममृतोपमम्॥
सप्तमक्रोशके देवि सर्व्वं क्षीरोपमं भवेत्।
अष्टमक्रोशके देवि! द्रव्यतुल्यं न संशयः॥
अतः परं महेशानि विषतुल्यं न संशयः।
एतत् सर्व्वं महेशानि पशुभावे मयोदितम्॥"
अर्द्धरात्रस्य गौणत्वश्रवणात् पशूनां यत्र पूर्व्वदिने अर्द्धरात्रव्यापिन्यमावास्या न तु तत्पूर्व्वं प्राप्तिः परदिने च रात्रेः पञ्चममुहूर्त्तव्यापिनी तदा परेद्युः पूजेति चेन्न गुप्तसाधनतन्त्रोक्तत्वाच्च नक्तं नित्यपूजादिपरम्। कार्त्तिकामावास्यायामर्द्धरात्रे जन्मनिमित्तकपूजाया विशेषेणाभिधानात्। पशुभिरपि एवंभूतस्थले पूर्व्वदिनेऽर्द्धरात्र एव पूजा कार्य्या। यथा श्रीकृष्णपूजायाः सामान्यतो निशायामकर्त्तव्यत्वेऽपि जन्माष्टम्यामर्द्धरात्रकर्त्तव्यता मुख्यतमेति परन्तु यत्र पूर्व्वदिने अर्द्धरात्रात् परममावास्या परदिने अर्द्धरात्रात् पूर्वमेव तत्र पशुभाविनः परदिने वीरदिव्ययोश्च पूर्व्वदिने पूजा कार्य्या इति प्रमाणं गोप्यगोपनलीलागमीयषष्ठपटले। एवं यत्र पूर्व्वदिने अर्द्धरात्रव्यापिन्यमावास्या परदिने तथा भूतापि कुजवारादियुक्ता तत्रापि पूर्व्वदिने पूजा गुणफलकुजवारादिकमपेक्ष्य चतुर्दश्योयोगस्य मुख्यत्वात्। तथोक्तं व्योमकेशतन्त्रे
"कुजवारे लक्षगुणं पूर्व्वविद्धा ततोऽधिकेति।"
कुजवार इति शनिवारोपलक्षणम्।
"शनिभौमदिने चेत् स्यात्ततः शतगुणं फलम्।
इति श्रवणात्॥
कार्त्तिकामावास्यायां कालीपूजाया नित्यतामाह मायातन्त्रे।
"वर्षे वर्षे च कर्त्तव्यं कालिकायाः महोत्सवम्।
कार्त्तिके तु विशेषेण अमावास्यां निशार्द्धके॥"
इति॥
देव्यागमे च।
"प्रतिसंवत्सरं कुर्य्यात् कालिकायाः महोत्सवम्
कार्त्तिके तु विशेषेण अमावास्यां निशार्द्धके।
तत्र संपूजयेद्देवीं भोगमोक्षप्रदायिनीम्॥"
इति।
एवञ्चात्र कार्त्तिकपदं गौणचान्द्रकार्त्तिकपरं जन्मतिथिकृत्यत्वात्। न तु नानावचने तुलार्के श्रवणात् सौरकार्त्तिकपरम्। तथा सति यस्मिन् वर्षे तुलार्के रात्रौ नामावास्याप्राप्तिस्तद्वर्षे कृत्यलोपः स्यात्। एवं यत्र वर्षे तुलार्के दर्शहयं तत्रानध्यवसायापत्तेः। स्पष्टमुक्तं विद्योत्पत्तितन्त्रे
"कार्त्तिकस्याप्यमावास्या गौणचान्द्रप्रमाणतः।
निशीथव्यापिनी या तु तस्यां पूजां समाचरेत्॥"
निशीथमर्द्धरात्रम्। एव यत्र पूर्वदिने निशीथव्यापिन्यमावास्या कन्यार्के परदिने च तुलार्केऽर्द्धरात्रात् परं मुहूर्त्तादिव्यापिनी तत्रापि पूर्वदिने निशीथस्य मुख्यकालत्वानुरोधात् भूततिथियोगानुरोधाच्च तुलार्कस्य दिनभेदनियामकत्वेन श्रुतत्वात्। परन्तु तुलार्कपदं नानावचने यद्यस्ति तत्प्रायिकाभिप्रायेण गुणफलाभिप्रायेण वा बोध्यम्। अतएव तिथितत्त्वधृतमादिपुराणम्।
"ऋक्षराशिविशेषेण यत् कर्म्म विहितं नरैः।
दैवं वाप्ययवा पैत्रं तदन्यत्रापि दृश्यते॥"
इति।
अगस्त्यसंहितायाम्।
"मेषं पूषणि संप्राप्ते लग्ने कर्कटकाह्वये।
आविरासीत् सकलया कौशल्यायां परःपुमान्॥"
इति॥
अत्र मेषार्के जन्मश्रवणं मीनार्केऽपि कदाचित् उपवासः। यत्तु तन्त्रीयमिति कृत्वा पठन्ति।
"तुलार्के त्वर्द्धरात्रे या दीपयात्रा तिथिर्भवेत्।
तत्र संपूजयेत् कालीं सर्वकामार्थसिद्धये॥
निशार्द्धं सा तिथिर्नास्ति तदधःकालसंयुता।
तत्रापि पूजयेत् कालीं तुलार्के नैव लङ्घयेत्॥"
इति तदमूलम्। समूलकत्वेऽपि तुलार्के इत्यत्र तुशब्दः कन्यार्कव्यावृत्तः। तेन तुलार्के कन्यार्के वा इत्यर्थः। तुलार्कमात्रपरत्वे प्रतिसंवत्सर इत्यस्य बाधापत्तेरुक्तत्वात्। तुलार्कं नैव लङ्घयेदित्यस्य तुलार्कविहितपूजां न त्यजेत् इत्यर्थः। तुलार्कविहितपूजायागौणकार्त्तिकत्वेनकर्त्तव्यतायां विधेस्तात्पर्य्यशेषत्वात्। यद्वा सर्वत्र तुलार्कघटितवचनेषु तुलार्कस्यामावास्यायामुपलक्षणतयान्वयः। न तु विशेषणतया। न वा पूजायामपि तदन्वयः। तेन तुलार्कोपलक्षितामावास्यायां निशीथे कालीं पूजयेत् इतिविधिस्तेनगौणचान्द्रकार्त्तिकामावास्यालाभः। तस्यामेव तुलार्कसम्बन्धनियमात्। अन्यथा तुलास्थरव्यारब्धत्वाभावेन कदाचित् तत्परप्रतिपदादिदर्शान्तस्य मुख्यकार्त्तिकत्वानुपपत्तिः। मुख्यकार्त्तिकामावास्यायाः कदाचित्तिथिके सत्त्वात् न तु तुलार्के नियमः। तथा च तुलार्कनियतामावास्यायां निशीथे कालीं पूजयेदिति पर्य्यवसितम्। तुलार्कं नैव लङ्घयेदित्यत्र तुलार्कपदञ्च तुलार्कोपलक्षितामावास्यापूजापरम्। संकल्पवाक्ये तु कार्त्तिके मासीत्युक्तेः न तु राश्युक्तेरपि गौणचान्द्रेण विधानात्। केचित्तु उपलक्षणतया अमावास्यायां अन्वयतात्पर्य्येण तुलाराशिस्थे भास्करे इत्युक्तेश्च इति भास्कर पदोत्तरसप्तम्या उपलक्षणतया तत्कालसम्बन्धबोधनसामर्थ्यात् इति वदन्ति॥*॥ तन्त्रान्तरे।
"तुलाराशिं गते भानौ दीपयात्रानिशासु च।
पूजयेत् कालिकां देवीं धर्म्मकामार्थसिद्धये॥"
तन्त्रे।
"अर्द्धरात्रात् पुरस्तात्तु यावद्वै घटिकाद्वयम्।
सा महारात्रिरुद्दिष्टा यत्तमक्षयं भवेत॥
महानिशाञ्च विज्ञेया अर्द्धरात्रात् परं शिवे।
नाड़ीचतुष्टयं श्रेष्ठं तत्र पूजा महाफला॥"
विद्योत्पत्तितन्त्रे।
"दीपोत्सवचतुर्दश्याममायां योग एव च।
कालरात्रिर्महेशानि काली तारा प्रियङ्करी॥"
ज्ञानार्णवे।
"महारात्रावमावास्यां दक्षिणायाः प्रपूजनम्।
कार्त्तिके मासि सुश्रोणि कालीप्रीतिकरं परम्॥
तत्रापि च निशीथे तन्माहात्म्यसिद्धिप्रदं नृणाम्।
निशीथात् परतो देवि यत्तु नाड़ीचतुष्टयम्॥
सा महारात्रिरुत्कृष्टा तत्र पूजा महाफला।
तारतम्येन देवेशि पूजायाः फलकल्पनम्॥"
कुलार्णवेऽपि।
"भूतयुक्ता महेशानि महारात्रौ तु या कुहूः।
सा कालरात्रिरुद्दिष्टा कालीतारा प्रियङ्करी॥
तत्र पूजा तयोः कार्य्या नानापशुविहिंसनम्।
बलिदानं बलितायावात्मनाशकरं शिवे!॥"
कुलचूड़ामणौ।
"तिथिभ्यः शतगुणं पर्व्व दर्शः कोटिगुणोत्तरः।
फलोपचारबहुलैर्ज्येष्ठे सूर्य्येन्दुसङ्गमे।
पूजयित्वा महाकालीं नरो निर्व्वाणमृच्छति॥
चतुर्वर्गप्रदं दर्शं कार्त्तिके कालिकार्च्चनम्।
अनन्तफलदं तत्र पर्व्वयुक्ते च पर्व्वणि॥
निशार्द्धे पूजयेद्देवीं मुण्डस्रजं मुण्डमालिनीम्।
पश्चाज्जिह्वोरवे घोरे सर्व्वप्राणिभयङ्करे॥"
कालीकुलसद्भावे।
"दीपोत्सर्गचतुर्दश्या संमिश्रा या भवेत् कुहूः।
तस्यां या तामसी रात्रिः सोच्यते काल-
रात्रिका॥
तस्यां पूजा प्रकर्त्तव्या कालीतारा प्रियङ्करी॥
तुलामकरमेषेषु कन्यायां मिथुने तथा।
भूतविद्धाप्यमावास्या पूज्या भवति यत्नतः॥"
इति जीमूतवाहनकृतधर्म्मरत्ने कालविवेकधृत हारीतवचनम्॥*॥ शिवरात्रिप्रकरणे देवलोक्तमहानिशा यथा:,—
"महानिशे द्वे घटिके रात्रेर्मध्यमयामयोः॥"
इति गङ्गामाहात्म्यप्रकरणे गृहस्थरत्नाकरधृता तु।
"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्।
तत्र स्नानं न कुर्व्वीत नित्यनैमित्तिकादृते॥"
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।
"षण्मुहूर्त्ते व्यतीते तु रात्रावेव महानिशा।"
कृत्यतत्त्वार्णवे बौधायनः।
"महानिशा तु विज्ञेया मध्यं मध्यमयामयोः॥"

देव्यागमे ।
"अमावास्यामर्द्धरात्रे दक्षिणां पूजयेत्पराम् ।
कुलरात्रे च यः कुर्य्यात् स गच्छेच्छिवमन्दिरम् ॥
तुलायां भौमवारे च अमावास्या यदा भवेत् ।
तिथिः सापि महापुण्या शिवेन परिकीर्त्तिता ॥
वर्षेवर्षेतुभिर्यत्नात् पुण्यं विधिवत् पूज्य चण्डिकाम्
तत्फलं लभते वीर अमावास्यां निशार्द्धके ॥"
कालीकुलतन्त्रे ।
"निशार्द्धे पूजयेद्देवीं श्मशानालयवासिनीम् ॥"
इति ॥

मालिनीतन्त्रे ।
"एतत्सन्ध्यात्रयेणैव अर्द्धरात्रो तु वन्दना ।
महारात्रावपि तथा कार्य्या देशिकसत्तमैः ॥"*
स्नापकालो यथा,—
श्रीदेव्युवाच ।
"देवदेव महादेव संसारार्णवतारक ।
देवतायाः स्नापकालं कथयस्व दयानिधे ॥
श्रीशिव उवाच ।
चतुर्दण्डात् परं देवि रात्रेः प्रथमयामकः ।
स्नापकालस्तु कथितः पूजानर्थफलप्रदा ।
पूजा होमस्तोत्रनती जाग्रत्काले प्रशस्यते ॥"
इति कालीकुलामृततन्त्रे ॥*॥
"यदुद्रमथने देवि देवासुरगणाः पुरा ।
नाराध्य त्वां प्रमथ्योयुरतस्त्वं विषरूपिणी ॥
आविर्भूता महाकाली ब्रह्माण्डनाशनाशिनी ।
तद्दृष्ट्वा देवा दैत्याश्च भीता मां शरणं गताः ॥
तेषामपि भयं दृष्ट्वा भीतोऽहं विषमक्षिणी ।
गत्वा ध्यानपरो भूत्वा विषं पातुं समारभे ॥
पूर्व्वोक्ता या महाविद्या आविर्भूता च मे हृदि ।
तुलां कृष्णां निशार्द्धं च देवदानवनिद्रिते ॥
मनुष्यपशुपक्ष्यादौ निद्रिते चान्यजन्तुषु ।
तस्मिन् काले मया पूज्या इन्द्रेणाप्यसुरेण तु ॥
देव्युवाच ।
कुत्र काले त्वया पूज्या इन्द्रेणाप्यसुरेण च ॥
महादेव उवाच ।
अर्द्धरात्रात्मुर्त्ते च मया चेन्द्रेण पूजिता ।
ततो मुहूर्त्ते संपूज्या वीरेणाप्यसुरेण च ॥
अत आद्यः पाशवः स्यात् वैरः शेषः प्रकीर्त्तितः ।
स्वायम्भुवेन मनुना मर्त्तां तेन प्रपूजिता ॥"
इति गोप्यगोपनलीलागमे ६ पटलः ॥*॥
कालीकुलसर्व्वस्वे ।
"निशार्द्धं सा तिथिर्नास्ति तदूर्द्धं भूतसंयुता ।
तत्रापि पूजयेद्देवीं भूतयुक्तां न लङ्घयेदिति ॥"
अथ रक्षाकालीपूजाप्रमाणम् । उत्तरकामाख्यातन्त्रे ।
"मारीभये समायाते दुर्भिक्षभयपीड़िते ।
पूजयेत् परया भक्त्या कालीं कालविनाशिनीम् ॥
रक्षणात् सर्व्वभूतानां रक्षाकालीति सा स्मृता ॥"
ज्ञानार्णवे ।
"सर्व्वं विघ्नोपशान्त्यर्थं रक्षाकालीं प्रपूजयेत् ।
शनिमङ्गलवारे च प्रदोषे पूजयेत् शिवाम् ॥
चतुर्दश्यामामायां वा नवम्यामष्टमीतिथौ ।
पूजनात् वरदा काली यथेप्सितफलप्रदा ॥"
कालीकुलसर्व्वस्वे ।
"निशामुखे महेशानी कालीं रक्षार्थमादरात्
पूजनीया नृभिः सर्व्वैरुपचारसमन्वितैः ।
वित्तशाठ्यं न कर्त्तव्यं यथाविभवविस्तरैः ॥"
निरुत्तरतन्त्रे ।
"बलिदानन्तु विधिवत् मधुभिः पायसेन च ।
पूपैर्म्मोदकसंघैश्च पृथुकैः श्रीफलैरपि ॥
नानाफलैः शाकमूलैः पञ्चतत्त्वैर्म्महेश्वरीम् ।
पूजयेद्विघ्नशान्त्यर्थं कालीं रक्षाविधायिनीम् ॥
प्रदोषसमये पूजा कर्त्तव्या भूतिमिच्छता ।
रात्रौ विसर्জ্জनं कार्य्यं क्रीड़ाकौतुकमङ्गलैः ॥
भैरवतन्त्रे ।
"अथ वक्ष्ये महेशानि घोरे मारीभये तथा ।
औत्पातिके च दुर्भिक्षे युद्धे राष्ट्रभयागते ।
पूजां कुर्य्यात् महाकाल्या रक्षार्थं पञ्चपर्व्वसु ॥
प्रदोषकाले संपूज्य निशायान्तु विसर्জ্জयेत् ।
मुहूर्त्तहितयं कालः प्रदोषोऽस्तमयात्ततः ॥",
तन्त्रान्तरे ।
"निशामुखे महाकालीं महामारीभये शिवाम्
कालीं त्रैलोक्यरक्षार्थं पूजयेत् रक्षणात्मिकाम् ॥"* ॥
अथ फलहारीपूजाप्रमाणम् ।
"मधुमासे सिताष्टम्यां वैशाखद्वितयेऽहनि ।
पौर्णमास्यां तथा ज्यैष्ठे अमायाञ्च महेश्वरि ॥"
इत्यादि ।
"आषाढ्यां कार्त्तिके चैव नवम्यां शुक्लपक्षके ।"
इति कात्यायनीतन्त्रे ७८ पटलः ॥
"ज्यैष्ठे मासि तथामायां सफलं कालिकार्च्चनम् ।"
इत्युत्तरकामाख्यातन्त्रे ११ पटलः ॥
"ज्यैष्ठे मासि अमायां वै मध्यरात्रे महेश्वरि ।
पूजयेत् कालिकां देवीं नानाद्रव्योपहारकैः ॥
तत्रैव सितपक्षे तु पञ्चदश्यां निशार्द्धके ।
पूजयेच्च फलैर्लक्षैः शक्तितो वापि कालिकाम्॥"
इति मायातन्त्रे २७ पटलः ॥
अथ रटन्तीपूजाप्रमाणम् ।
"माघे माघ्यसिते पक्षे रटन्त्याख्या चतुर्दशी ।
तस्यां निशार्द्धसमये पूजयेन्मुण्डमालिनीम् ॥"
इति मायातन्त्रे १७ पटलः ॥
"मकरस्थे रवौ कृष्णचतुर्दश्यां निशार्द्धके ।
पूजयेद्दक्षिणां कालीं धर्म्मकामार्थसिद्धये ॥"
इत्युत्तरकामाख्यातन्त्रे ८ पटलः ॥

श्यामाकः, पुं, (श्यामं श्यामवर्णमकतीति । अक गतौ + अण् ।) तृणधान्यभेदः । शामा इति भाषा । तत्पर्य्यायः । श्यामकः २ श्यामः ३ त्रिबीजः ४ अविप्रियः ५ सुकुमारः ६ राजधान्यम् ७ तृणबीजोत्तमः ८ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । कषायत्वम् । लघुत्वम् । शीतलत्वम् । वातकारित्वम् । कफपित्तव्रणदोषनाशित्वम् । सुग्राहित्वञ्च । इति राजनिर्घण्टः ॥
अपि च ।
"श्यामाकः शोषणो रूक्षो वातलः कफपित्तकृत् ॥"
इति भावप्रकाशः ॥

श्यामाङ्गः, पुं, (श्यामानि अङ्गानि यस्य । बहुव्रीहेः । इतिविकाष्ठगेयः ॥ कृष्णकलेवरे, त्रि यथा,—
"श्यामाङ्गीं शशिशेखरां निजकरैर्दानञ्च रक्तोत्पलं
रक्ताढ्यं चषकं परं भयहरं संबिभ्रतीं शाश्वतीम् ।
मुक्ताहारलसत्पयोधरनतां नेत्रत्रयोल्लासिनीं
वन्देऽहं सुरपूजितां हरवधूं रत्नारविन्दस्थिताम् ॥"
इति तन्त्रसारे भुवनेश्वरीध्यानम् ॥

श्यामाम्बी, स्त्री, (श्यामा चासौ अम्बी चेति कर्म्मधारयः ।) नीलाम्बी । इति राजनिर्घण्टः ॥

श्यालः, पुं, (श्यायते नर्म्मार्थं प्राप्यतेऽसौ इति । श्यै + बाहुलकात् कालन् ।) पत्नीभ्राता । इत्यमरः ॥ शाला इति भाषा ॥ (यथा, गीतायाम् । १ । ३४ ।
"मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ।
एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ॥")
तत्पर्य्यायः । वाकीरः २ श्यालिकः ३ । इति शब्दरत्नावली ॥ श्वशुर्य्यः ४ आत्मवीरः । इति जटाधरः ॥ तन्मरणे एकराचाशौचं यथा ।
आचार्य्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वश्रूसहाध्यायिशिष्येष्वेकरात्रेणेति । इति शुद्धितत्त्वम् ॥ दन्त्यसादिश्च । (भगिनीपतिः । यथा, ब्रह्मवैवर्त्ते । १ । १० । १५१ ।
"भग्नी पुत्रो भागिनेयो भ्रातृपुत्रश्च भ्रातृजः
श्यालस्तु भगिनीकान्तो भगिनीपतिरेव ॥")

श्यालकः, पुं, श्याल एव । स्वार्थे कन् ।) श्यालः । इति रत्नावली ॥ (यथा, ब्रह्मवैवर्त्ते । १ । १० । १४८ ।
"पत्नीभ्राता श्यालकश्च पत्नीभग्नी च श्यालिका ॥")

श्यालिका, स्त्री, पत्न्या भगिनी । शाली इति भाषा । तत्पर्य्यायः । (श्यालो२केलिकुञ्चिका ३ इति शब्दरत्नावली ॥ (यथा, ब्रह्मवैवर्त्ते ।१। १० । १४८ ।
"पत्नीभ्राता श्यालकश्च पत्नीभग्नी च श्यालिका ॥")

श्यावः, पुं, (श्यै + बाहुलकात् वः ।) कपिशः । इत्यमरः ॥ स तु कृष्णपीतमिश्रवर्णः । इति भरतः ॥ तद्युक्ते, त्रि ॥ (यथा हृदृत्संहितायाम् । ४ । २८ ।

"श्यावतनुः स्फुटितः स्फुरणो वा
क्षुत्समरामयचौरभयाय ॥")

श्यावदन्, [त्] त्रि, (श्यावा दन्ता यस्य। "विभाषा श्यावारोकाभ्याम्।" ५।४। १४४। इति दन्तादेशः।) कृष्णपीतमिश्रितवर्णदन्तयुक्तः। इति सिद्धान्तकौमुदी ॥

श्यावदन्तः, श्यावदन्तकः, } त्रि, (श्यावा दन्ता यस्य। "विभाषा श्यावारोकाभ्याम्।" ५। ४। १४४। इति विभाषया दन्तादेशो न। स्वार्थे कन् च।) स्वाभाविककृष्णवर्णदशनयुक्तः। प्रधानदन्तहयमध्यस्थक्षुद्रदन्तविशिष्टः। प्रधानदन्तोपरिदन्तान्तरयुक्तः। यथा विष्णुः। अथ नरकानुभूतदुःखानां तिर्यक्त्वमुक्तोर्णानां मानुष्ये लक्षणानि भवन्ति। कुष्ठातिपातकी। ब्रह्महा यक्ष्मी। सुरापः श्यावदन्तकः। सुवर्णहारी कुनखी। गुरुतल्पगो दुश्चर्म्मा इत्यादि। श्यावदन्तकः स्वभावकृष्णदन्तः। प्रधानदन्तहयमध्यवर्त्तिक्षुद्रदन्तः। प्रधानदन्तोपरि दन्तान्तरमिति केचित्॥ कुनखी सङ्कुचितनखः। दुश्चर्म्मा स्वभावतः अनाहतमेढ्रः। अतएव महारोगिणो यावज्जीवमशौचमाह कूर्म्मपुराणम्।

"क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम्॥"

क्रियाहीनस्य नित्यनैमित्तिकक्रियाननुष्ठायिनः। मूर्खस्य गायत्रीरहितस्य। सार्थगायत्रीरहितस्येति रुद्रधरः॥ महारोगिणः पापरोगाष्टकान्यतमरोगवतः। ते च उन्मादश्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दर उदरोऽर्शसौ इत्यष्टौ पापरोगा नारदोक्ताः। यथेष्टाचरणस्य द्यूतवेश्याद्यासक्तस्य। एवञ्च भविष्यपुराणोक्तं यतिचान्द्रायणप्रायश्चित्तं अकृतप्रायश्चित्तानां कुष्ठादीनां दाहे बोद्धव्यम्। अन्यथा प्रायश्चित्तोपदेशो विफलः स्यात्। यथा विष्णुः। कुनखी श्यावदन्तश्चादशरात्रं कृच्छ्रं चरित्वोद्वरेयातां तदन्तनखौ इति। अत्र द्वादशरात्रं पराकरूपं तत्र पञ्चधेनवः। न तु प्राजापत्यम्। तद्दाहकर्त्तुर्यतिचान्द्रायणेन विषमशिष्टत्वात्। अत्र बहूनामेकधर्म्माणामिति वचनात् आकाङ्क्षितत्वात् कुष्ठादीनामपि प्रायश्चित्तम्। अतएव प्रायश्चित्तविवेकेऽप्युक्तं एवं दुश्चर्म्मादिष्वप्यूह्यमिति। महापातकादतिपातकस्य गुरुत्वात् तच्छेषेऽपि प्रायश्चित्तं द्विगुणम्। इति शुद्धितत्त्वम्॥

श्वेतः, पुं, (श्वेङ् गतौ + "इगुपधाभ्यामितन्।" उणा० ३। ८३। इति इतन्।) शुक्लवर्णः। तद्वति, त्रि। इत्यमरः॥

श्वेतकोलकः, पुं, (श्वेतः कोलः क्रोडदेशो यस्य। कन्।) मत्स्यविशेषः। पुँटी इति भाषा। यथा। सफरः श्वेतकोलकः। इति हारावली॥

श्वेनः, पुं, (श्वे ङ् गतौ + श्यास्त्राङ्भ्यो नक्। उणा० २। ४६। इति इनक्।) पाण्डुरवर्णः। इति मेदिनी॥ पक्षिविशेषः। सञ्चालः इति वाज् इति च भाषा। तत्पर्य्यायः। श्यादनः २ पत्री ३। इत्यमरः॥ कपोतारिः ४ पतङ्गेरुः ५। इति शब्दरत्नावली। घातिपक्षी ६ ग्राहकः ७ मारकः ८। इति जटाधरः॥ श्यादः ९ क्रव्यादः १० क्रूरः ११ वेगी १२ खगान्तकः १३ करगः १४ नीलपिच्छः १५ लम्बकर्णः १६ रणप्रियः १७ रणपक्षी १८ पिच्छयाणः १९ स्थूलनीलः २० भयङ्करः २१। इति राजनिर्घण्टः॥ श्यघातकः २२। इति भावप्रकाशः॥ अस्य मांसगुणाः प्रसङ्गशब्दे द्रष्टव्याः॥*॥ तस्य शुभाशुभसूचकत्वं यथा,—

"प्रदक्षिणीकृत्य नरं व्रजन्तो
यात्रासु वामेन गताः प्रवेशे।
श्येनाः प्रशस्ताः प्रकृतस्वरास्ते
शान्ताः प्रदीप्ता विततस्वरास्ते॥
श्येनो नृणां दक्षिणवामपृष्ठ-
भागेषु भाग्यैः स्थितिमादधाति।
तिष्ठन् पुरस्तान्मृतये करोति
युद्धे जयं कुत्वरथध्वजस्थः॥"

इति वसन्तराजशाकुने अष्टमवर्गः॥

श्येनघण्टा, स्त्री, दन्तीवृक्षः। इति राजनिर्घण्टः॥

श्येनचित्, पुं, (श्येनेन चयति अन्यपक्षिणं इति। चि + क्विप्।।) श्येनपक्षिरचकः। इतिकेचित् (श्येन इव चीयते इति। कर्म्मण्यण्न्याख्यायाम्।" ३। २। ९२। इति क्विप्। अस्यर्थ दृष्टकाचयः। इति काश्चिका॥)

श्येनी, स्त्री, श्वेतवर्णा। इति जटाधरः॥ श्येनपत्नी च॥ (सा तु कश्यपात् दक्षकन्यायां ताम्रायां समुत्पन्ना। यथा, मार्कण्डेये। १०४। ८।

"ताम्रा च सुषुवे श्येनीप्रमुखाः कन्यका द्विज।
यासां प्रसूताः खगमाः श्येनभासशुकादयः॥")

श्वे, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक०-अनिट्।) तालव्यादिरन्तस्थोपधः। ङ, श्वायते। इति दुर्गादासः॥

श्वेन्मयातः, स्त्री, (श्वेनपातोऽस्यां वर्त्तते इति। "घञः सास्यां क्रियेति ञः।" ४। २। ५८। इति ञः। "श्येनतिलस्य पाते ङे।" ६। ३। ७१। इति सुमागमः।) सृगया। इत्यमरः। (यथा, नैषधे। १८। १२।

"नभस्तिमइसां ध्वान्तध्वङ्क्षप्रमापणपक्षिणामिह विहरणैः श्येनम्यातां रवेरवधारयन्॥")

श्योनाक(वा)नाकः, पुं, (श्वायते इति। श्वे ङ गतौ + पिचाकादयेति निपातनात् साधुः।) वृक्षविशेषः। शोनागाछ इति भाषा। तत्पर्य्यायः। मण्डूकपर्णः २ पत्रोर्णः ३ नटः ४ कटुङ्गः ५ टुण्टुकः ६ शुकनासः ७ ऋक्षः ८ दीर्घहन्तः ९ कुटन्नटः १० शोणकः ११ अरलुः १२। इत्यमरः॥ स्योना १३। इति भरतः॥ शोणः १४ अवटुः १५ दीर्घहन्दकः १६। इति शब्दरत्नावली॥ पृथुशिम्बिः १७ शुक्लकः १८। इति जटाधरः॥ कटभरः १९ मयूरजङ्घः २० अरलुकः २१ प्रियजीवः २२। तद्भेदा यथा,—

"शोनाकः पृथुशिम्बोऽन्यो भण्डको दीर्घहन्तकः
टेन्द्रकः पीतहन्वश्च भूतसारो मुनिद्रुमः॥
निःसारः फलहन्ताकः पूतिपत्रो वसन्तकः।
मण्डूकवर्णः पीताङ्गो जम्बुकः पीतपादकः॥
वातारिः पीतकः शोणः कुलटश्च विरोचनः।
भ्रमरेष्टो वह्निजङ्घो नेत्रनेत्रमिताभिधः॥"

पुस्तकान्तरे टेन्द्रकस्थाने टुण्टकः फलहन्ताकस्थाने फलगुहन्ताकः पीतपादकस्थाने पीतपादपः कुलटस्थाने कुनटः वह्निजङ्घस्थाने वह्निजङ्घ इति च पाठः॥ तयोर्गुणाः।

"शोनाकयुगलं तिक्तं शीतलञ्च त्रिदोषजित्।
पित्तश्लेष्मातिसारघ्नं सन्निपातज्वरापहम्॥"

इति राजनिर्घण्टः॥*॥

अपिच।

"शोनाकः शोषणश्च स्यात्कटुङ्कटुष्टुकाः।
मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः॥
दीर्घहन्तोऽरलुश्चापि पृथुशिम्बः कटभरः।
शोनाको दीपनः पाके कटुकस्तुवरो हिमः॥
ग्राही तिक्तोऽनिलश्लेष्मपित्तकाशमनाशनः।
कटुकस्य फलं बालं रूक्षं वातकफापहम्॥
हृद्यं कषायं मधुरं रोचनं लघु दीपनम्।
गुल्मार्शः कृमिहृत् प्रोक्तं गुरु वातप्रकोपणम्"॥

इति भावप्रकाशः॥

श्वक, इ ङ सर्पे इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक०-सेट्।) रेफयुक्तोऽयं। इ, श्वक्षते ङ, श्वक्षते। सर्पो गतिः। इति दुर्गादासः॥

श्वग, इ त्वरे। इति कविकल्पद्रुमः॥ (भ्वा० पर०-सक०-भृतौ अक०-सेट्।) रेफान्ततालव्यादिः। अयं भृतगताविति भट्टमल्लः। इ, श्वङ्गयते। इति दुर्गादासः॥

श्वथ, कन्दाने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, श्वाथयति। स्वमते अस्यवाङि क्सविकल्पनेऽप्यङमस्वरानुबन्धाभावोऽन्येषामनुरोधात्। इति दुर्गादासः॥

श्वथ, म दाने। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक०-सेट्। तालव्यादी रेफयुक्तः। म, श्वथयति। इति दुर्गादासः॥

श्वत्, व्य, श्वद्धा। इति सुग्धबोधटीकायां दुर्गादासः॥ (सत्यम्। इति निघण्टुः। ३।१०॥)

श्वथ, इ ङ शैथिल्ये। इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-अक०-सक०-च सेट्।) शैथिल्यमिह शिथिलीभावस्तत्करणञ्च।। इ, श्वथ्यते। ङ, श्वथ्यते वस्त्रं शिथिलं स्यादित्यर्थः। श्वथ्यते वस्त्रं लोकः शिथिलं करोति इत्यर्थः। इति दुर्गादासः॥

श्वथ, क यत्ने। प्रतिहर्षेऽपि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-यत्ने अक०-प्रतिहर्षे सक०-सेट्। क, श्वाथयति पठितुं शिष्यः। श्वाथयति शिष्यं लोकः पुनःपुनर्हर्षयति इत्यर्थः। इति दुर्गादासः॥

श्रथ किं वधे। मोक्षे। वधे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-सक०-सेट्।) किं, श्राथयति श्रथयति। श्राध्यं श्राथयति स्फुटार्थ-मधुरं गद्यञ्च पद्यं सदा भावालङ्कृतिपेशलं श्रथयति स्फटाक्षरं नाटकम्। श्रथ्नाति ग्रथितावदातचरितः शास्त्रं विचित्रञ्च य इति हलायुधोक्तं श्रथयतीति श्रथ त् क दीर्घश्चे इत्यदन्तस्य रूपम्। अनेकार्थत्वात् बध्नातीत्यर्थः। इति दुर्गादासः

श्रथ, त् क दीर्घश्चे। इति कविकल्पद्रुमः॥ (श्रदन्त चुरा०-पर०-सक०-सेट्।) श्रथयति। इति दुर्गादासः॥

श्रथ, म वधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, श्रथयति। इति दुर्गादासः॥

श्रथनं, क्ली, (श्रथ+ल्युट्।) वधः। यत्नः। पुनः-पुनर्हर्षणम्। बन्धनम्। मोक्षणम्। शिथिलीकरणम्। इति श्रथधातोरनट्प्रत्ययेन निष्पन्नम्॥

श्रद्दधानः, त्रि, (श्रद्दत्ते इति। श्रत्+धा+शानच्।) श्रद्धायुक्तः। यथा,—
"तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया।
पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया॥"
इति श्रीभागवते १ स्कन्धे २ अध्यायः॥

श्रद्धा, स्त्री, (श्रद्दानमिति। श्रत्+धा+"षिद्भिदादिभ्योऽङ्।" ३।३।१०४। इत्यङ्। टाप्।) संप्रत्ययः। सृद्धा। इत्यमरः॥ (यथा, रामायणे। २। ३८। २।
"विच्छेद जीवितं श्रद्धां धर्म्मे यशसि चात्मनः॥"
श्रादरः। शृद्धिः। इति शब्दरत्नावली॥ शास्त्रार्थे दृढ़प्रत्ययः। यथा,—
"प्रत्ययो धर्म्मकार्य्येषु यथा श्रद्धेत्युदाहृता।
नास्ति ह्यश्रद्दधानस्य धर्म्मकृत्ये प्रयोजनम्॥"
इति स्मृतिः॥
(यथा, रघुः। २। १६।
"वसौ च सा तेन सतां मतेन।
श्रद्धेव साक्षात् विधिनोपपन्ना॥")
चेतसः प्रसादः। इति पातञ्जलभाष्ये वेदव्यासः॥ सा त्रिविधा। यथा,—
श्रीभगवानुवाच।
"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥
सत्त्वानुरूपा सर्व्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥"
इति श्रीभगवद्गीतायां १७ अध्यायः॥*॥
तस्याः प्रशंसा यथा,—
ब्रह्मोवाच।
"श्रद्धापूर्व्वा इमे धर्म्माः श्रद्धा मध्यान्त-संस्थिताः।
श्रद्धा नित्या प्रतिष्ठाश्च धर्म्माः श्रद्धैव कीर्त्तिताः॥
श्रुतिमात्ररसाः सूक्ष्माः प्रधानपुरुषेश्वराः।
श्रद्धामात्रेण गृह्यन्ते न क्रतुभिर्न चक्षुषा॥
कायक्लेशैर्न बहुभिस्तथार्थस्य राशिभिः।
धर्म्मः संप्राप्यते सूक्ष्मः श्रद्धाहीनैः सुरैरपि॥
श्रद्धा धर्म्मः परः सूक्ष्मः श्रद्धा ज्ञानं हुतं तपः।
श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धा सर्व्वमिदं जगत्॥
सर्व्वस्वं जीवितं वापि दद्यादश्रद्दया यदि।
नाप्नुयात्तत्फलं किञ्चित् श्रद्धादानं ततो भवेत्॥
एवं श्रद्धान्वयाः सर्व्वे सर्व्वधर्म्माः प्रकीर्त्तिताः।
कैश्चित् श्रद्धया गम्यो ध्येयः पूज्यश्च सर्व्वदा॥"
इति वह्निपुराणे धेनुदानमाहात्म्याध्यायः॥
देवलः।
"अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनम्।
दानमित्यभिनिर्दिष्टं व्याख्यानन्तस्य वक्ष्यते॥"
उदिते शास्त्रकथिते। श्रद्धा देवलोक्ता यथा,
"सत्क्रतिश्चानसूया च सदा श्रद्धेति
कीर्त्तिता॥"
अतएव भगवद्गीतासु।
"अश्रद्दया हुतं दत्तं तपस्तप्तं कृतञ्च यत्।
असदित्युच्यते पार्थ न च तत् प्रेत्य नेह च॥"
हरिवंशे बलिं प्रति भगवद्वाक्यम्।
अयोत्थियं श्राद्धमधीतमव्रतं
त्वदग्निहोत्रं यज्ञमनृत्विजा हुतम्।
अश्रद्दया दत्तमसंस्कृतं हवि-
र्भागाः पड़ेते तव दैत्यपुङ्गव॥"
इति शुद्धितत्त्वम्॥
याज्ञवल्क्यः।
"श्रद्धाविधिसमायुक्तं कर्म्म यत् क्रियते नृभिः।
सुविशुद्धेन भावेन तदानन्त्याय कल्पते॥"
योगियाज्ञवल्क्यः।
"विधिहीनं भवेद्दृष्टं कृतमश्रद्दया च तत्।
तदस्त्यसुरास्तस्य मूढ़स्य दुष्कृतात्मनः॥"
इति प्रायश्चित्ततत्त्वम्॥

श्रद्दालुः, स्त्री, (श्रद्दधातीति। श्रत्+धा+स्फुरि स्फुलितिदयिनिद्रेति"। ३। २। १५८। इति आलुच्।) दोहदवती। श्रद्धायुक्ते, त्रि। इत्यमरः॥ (यथा, भागवते। ३। ८। १०।
"सोऽहं तवैतत् कथयामि वत्स
श्रद्दालवे नित्यमनुव्रताय॥")

श्रद्धावान्,[त्]त्रि, (श्रद्धा विद्यतेऽस्येति। श्रद्धा+मतुप्। मस्य वः।) श्रद्धायुक्तः। यथा,—
"श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥"
इति भगवद्गीतायां ४ अध्यायः॥

श्रन्थ, कि दर्भे। वधे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-सक०-सेट्।) कि, श्रन्थयति श्रन्थति। दर्भो ग्रन्थनम्। इति दुर्गादासः॥

श्रन्थ, ग मोचे। प्रतिहृपि। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-सेट्।) ग, श्रन्थाति वस्त्रं लोकः मोचयतीत्यर्थः। श्रन्थाति शिशुं लोकः पुनः पुनर्हर्षयति इत्यर्थः। श्रन्थ। इति दुर्गादासः॥

श्रन्थः पुं, (श्रन्थाति मोचयति मत्कान् संसारादिति। श्रन्थ+श्रच्।) विष्णुः। इति त्रिकाण्डशेषः॥ (श्रन्थ+भावे घञ्।) श्रन्थधात्वर्थोऽप्यत्र॥

श्रन्थनं, क्ली, (श्रन्थ+भावे ल्युट्।) ग्रन्थनम्। यथा,—
"सन्दर्भो रसना गुम्फः श्रन्थनं ग्रन्थनं समाः।"
इति हेमचन्द्रः॥

श्रन्थितः, त्रि, ग्रन्थितः। बद्धः। क्षतवधः। मुक्तः। हर्षितः। इति श्रन्थधातोः क्तप्रत्ययेन निष्पन्नः॥

श्रपितं, त्रि, (श्रप+क्तः।) घृतदुग्धजलभिश्रपक्वद्रव्यम्। यथा,—
"निष्पक्वं क्वथिते पक्वन्त्वाज्यं क्षीरं पयः स्मृतम्।
श्रन्यत्तु श्रपितं प्राणं समुदक्लोढ़ृते समे॥"
इति जटाधरः॥

श्रपिता, स्त्री, (श्रप+क्तः। टाप्।) काम्पिल्लम्। इति केचित्॥

श्रभ उ भ य ञि इर् तपःखेदयोः। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्। ञावेट्।) उ, श्रमित्वा श्रान्त्वा। भ य, श्राम्यति लोकः तपः करोति खिद्यति वेत्यर्थः। ञि, श्रान्तोऽस्ति। इर् श्रश्रमत् श्रश्रात्। श्रश्रात् पृषादित्वान्नित्यं ङ इत्यन्ये। धूर्य्यान् विश्रामयेति स इति रघौ श्राम त् क मन्त्र इत्यदन्तस्य रूपम्। इति दुर्गादासः॥

श्रमः, पुं, (श्रम+घञ्। नोदात्तोपदेशस्येति वृद्ध्यभावः।) तपः। खेदः। इति श्रमधात्वर्थदर्शनात्॥ श्रान्तिः। तत्पर्य्यायः। क्लमः २। क्लेशः ३ परिश्रमः ४ प्रयासः ५ श्रायासः ६ व्यायामः ७। इति हेमचन्द्रः॥ क्लमयः ८। इत्यमरः॥ (यथा, भागवते। ५। १८। १४।
"यद्यैहिकामुष्मिककामलम्पटः
सुतेषु दारेषु धनेषु चिन्तयन्।
शक्नोति विद्वान् कुकलेवरात्ययात्
यस्तस्य यत्नः श्रम एव केवलम्॥")
शस्त्राभ्यासः। तत्पर्य्यायः। खरली २ योग्यः३ अभ्यासः ४। इति च हेमचन्द्रः॥

श्रमणः, पुं, (श्राम्यति तपस्यतीति। श्रम+ल्यु।) यतिविशेषः। इति मेदिनी॥ (स तु बौद्धसन्न्यासी।) तत्पर्य्यायः।
"मुक्तिर्मोक्षोऽपवर्गश्च मुमुक्षुः श्रमणो यतिः।
वाचंयमो व्रती साधुरनगार ऋषिर्मुनिः॥
निर्ग्रन्थो भिक्षुरस्य स्यं तपोयोगश्रमादयः।"
इति हेमचन्द्रः॥
(यथा, रामायणे। १। १४। १२।
"तापसा भुञ्जते चापि श्रमणाश्चैव भुञ्जते॥")
नित्यजीविनि त्रि,। इति मेदिनी॥

श्रमणा, स्त्री, सुदर्शना। मांसी। मुण्डीरी। शबरीभेदः इति मेदिनी॥

श्रमी [न्]त्रि, श्रमविशिष्टः। श्रमशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्नः। (यद्वा, श्राम्यतीति।

श्रम तपः खेदयोः + "श्रमित्यृदाभ्यो घिनुण्।" ३।२।१४१। इति घिनुण्॥)
श्रयः, पुं, (श्रि + "एरच्।" ३।३।५६। इति अच्।) आश्रयः। श्रिधातोरल्प्रत्ययेन निष्पन्नः
श्रयणं, क्ली, (श्रि + ल्युट्।) आश्रयः। तत्पर्य्यायः आयः २। इत्यमरः॥ (यथा, भागवते। ८। ८। २८।
"तत्रामृतं सुरगणाः फलमञ्जसापु-
र्यत्पादपङ्कजरजःश्रयणान्न दत्याः॥")
श्रवः, पुं, (श्रूयतेऽनेनेति। श्रु + "ऋदोरप्।" ३।३।५७। इत्यप्।) कर्णः। (यथा, कथासरित्सागरे। १०३। १५८।
"तुमुलप्रोल्लसच्छब्दपिहितान्यरवश्रवः।
चचाल स बलाभोधिस्तयोगम्भीरभीषणः॥"
श्रु + भावे अप्।) श्रवणम्। इत्यमरटीकायां भरतः॥ (यथा, रघुः। ११। ७१।
"मन्मर्म एव दण्डघट्टनात्
रोषितोऽस्मि तव विक्रमश्रवात्॥"
श्रूयते इति। कर्म्मणि अप्। शब्दः। यथा, वाजसनेयसंहितायाम्। १६। ३४।
"नमो वन्यत्य च कक्षाय च नमः श्रवाय च प्रतिश्रवाय च॥")
श्रवः, [स्] क्ली, (श्रूयतेऽनेनेति। श्रु + "सर्व्वधातुभ्योऽसुन्॥" इत्यसुन्।) कर्णः। इत्यमरः॥ (अन्नम्। इति निघण्टुः। २।७॥ यथा, ऋग्वेदे। ३। १८। ५।
"अधिश्रवांसि धेहि नस्तनूषु॥"
धनम्। इति निघण्टुः। २। १०॥ यशः। यथा, भागवते। ४। १७। ६।
"श्रवः सुश्रवसः पुण्यं सर्व्वदेहकथाश्रयम्॥"
शब्दः। यथा, तत्रैव। ५। ११। ८।
"गन्धाक्षति स्वर्गरसश्रवांसि
विसर्गवत्यर्त्तभिजल्पशिल्पाः॥")
श्रवणं, क्ली, (श्रूयतेऽनेनेति। श्रु + करणे ल्युट्।) कर्णः। इत्यमरः॥ न स्त्रियां श्रवणः कर्णः। इति हेममालो। इति तट्टीकायां भरतः॥ यस्मात्साध्यन्तरे श्रवणयोश्छिद्रं भवति। इति सुखबोधः॥ श्रुतिः। सा तु कर्णेन्द्रियज्ञानम्। इति मेदिनी॥ शोना इति भाषा॥ (यथा, मनुः। ८। ७४।
"समत्वदर्शनात् साध्यं श्रवणाच्चैव सिध्यति॥"
तत्तु नीतिशास्त्रोक्तधीगुणानामन्यतमम्। यथा, कामन्दकीये। ४। २२।
"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा।
ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः॥")
षड्विधलिङ्गैरशेषवेदान्तानामहितीयं वस्तुनि तात्पर्य्यावधारणम्। लिङ्गानि तु उपक्रमोपसंहाराभ्यासापूर्व्वता फलार्थवादोपपत्त्याख्यानि। इति वेदान्तसारः॥
श्रवणः, पुं, क्ली, श्रवणानक्षत्रम्। इति मेदिनी॥ (यथा च स्मृतिः।
"अमावास्यां श्रवणं यदि स्यादिति॥")

श्रवणद्वादशी, स्त्री, (श्रवणयुक्ता द्वादशी।) श्रवणानक्षत्रयुक्तभाद्रशुक्लद्वादशी। यथा,—
पितामह उवाच।
"श्रवणद्वादशीं वक्ष्ये भुक्तिमुक्तिप्रदायिनीम्।
एकादशी द्वादशी च श्रवणेन च संयुता॥
विजया सा तिथिः प्रोक्ता हरिपूजादि चात्र यम्।
एकभक्तेन नक्तेन तथैवायाचितेन च॥
उपवासेन भक्ष्येण नैवाद्यादग्निको भवेत्।
कांस्यं माषं तथा क्षौद्रं लोभं वितथभाषणम्॥
व्यायामञ्च व्यवायञ्च दिवास्वप्नमथाञ्जनम्।
श्लिष्टापिष्टं मसूरञ्च द्वादश्यां वर्জ्जयेन्नरः॥
मासि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता।
महती द्वादशी ज्ञेया उपवासे महाफला॥
सङ्गमे सरितः स्नानं बुधयुक्ता महाफला।
कुम्भे सरस्ये सजले यजेत् स्वर्णन्तु वामनम्॥
सितवस्त्रयुगच्छन्नं क्षत्रोपानद्युगान्वितम्।
ॐ नमो वासुदेवाय शिरः संपूजयेत्ततः॥
श्रीधराय मुखं तद्वत् कण्ठं क्षणाय वै नमः।
नमः श्रीपतये वक्षो भुजौ सर्व्वास्त्रधारिणे॥
व्यापकाय नमः कक्षौ केशवायोदरं बुधः।
त्रैलोक्यपतये मेढ्रं जङ्घां सर्व्वपते नमः॥
सर्व्वात्मने नमः पादौ नैवेद्यं घृतपायसम्।
कुम्भांश्च मोदकान् दद्यात् जागरं कारयेन्निशि॥
स्नात्वा प्रीतोऽर्च्चयित्वा तु क्षतपुष्पाञ्जलिर्वदेत्।
नमो नमस्ते गोविन्द बुध श्रवणसंज्ञक॥
अघौघसंक्षयं कृत्वा सर्व्वसौख्यप्रदो भव।
प्रीयतां देव देवेशो विप्रेभ्यः कलसान् ददेत्।
नद्यास्तीरेऽथवा कुर्य्यात् सर्व्वान् कामानवाप्नुयात्॥"
इति गारुड़े १४१ अध्यायः॥
अन्यत् द्वादशीशब्दे द्रष्टव्यम्॥
श्रवणशौण्डिका, स्त्री, श्रावणीहट्टः। इति राजनिर्घण्टः॥
श्रवणा, स्त्री, पुं, नक्षत्रविशेषः। इति मेदिनी॥ सा तु अश्विन्याद्यन्तर्गतद्वाविंशनक्षत्रम्। तस्याः स्वरूपं शराकारतारात्रयात्मकम्। तस्याधिदेवो हरिः। यथा,—
"तारकात्रयमिते शराकृतौ
केशवे गगनमध्यवर्त्तिनि।
मन्त्रवारणगतेऽजलग्नतो
निर्यगुर्गजमहीप्रलिम्पिकाः॥" दं १।पं १८।
इति कालिदासकृतताजिकनिरूपणम्॥*॥
तत्र जातफलम्।
"शास्त्रानुरक्तो बहुपुत्रमित्रः
सत्पुत्रभक्तिर्व्विजितारिवर्गः।
चेज्जन्मकाले श्रवणा हि यस्य
प्रेमा पुराणश्रवणे प्रवीणः॥
इति कोष्ठीप्रदीपः॥*॥
तत्र व्यवहारभार्थदलकाष्ठादिच्छेदनसंग्रहदन्तिकाष्ठादिक्रमगमननिषेधा यथा,—
"छेदनं संग्रहञ्चैव काष्ठादीनां न कारयेत्।
श्रवणादौ बुधः षट्के न गच्छेद्दक्षिणां दिशम्॥
अग्निपीड़ा भयं शोको राजपीड़ा धनक्षयः।
संग्रहे दलकाष्ठानां क्रते वस्त्रादिपञ्चके॥"
इति ज्योतिस्तत्त्वम्॥
श्रवणा, स्त्री, मुण्डरिकाहट्टः। इति रत्नमाला॥
श्रवाय्यः, पुं, (श्रु श्रवणे + "श्रुदक्षिस्पृहिगृहिभ्य आय्यः।" उणा० ३।८६। इति आय्यः।) बलियोग्यपशुः। यज्ञियपशुः। इति सिद्धान्तकौमुदी॥ (श्रवणीये, त्रि। यथा, ऋग्वेदे। १। २७। ८।
"वाजो अस्ति श्रवाय्यः॥"
"श्रवाय्यः श्रवणीयो वाजोऽस्ति बलविशेषोऽस्ति।" इति तद्भाष्यम्॥)
श्रविष्ठा, स्त्री, (श्रवणमिति श्रवः। सोऽस्या अस्तीति। मतुप्। अतिशयेन श्रववती। अतिशयने तमबिष्ठनौ इति इष्ठन्। विन्मतुपोर्लुगिति मतुपो लुक्।) धनिष्ठानक्षत्रम्। इत्यमरः॥ (यथा, वामनपुराणे ७७ अध्याये।
"अविष्ठायां तथा पृष्ठं शालिभक्तञ्च दोहदे।
पुष्ये सुखं पूजयेत दोहदे घृतपायसम्॥")
श्रविष्ठाजः, पुं, (श्रविष्ठायां जायते इति। जन् + डः।) बुधग्रहः। इति त्रिकाण्डशेषः॥ तत्र जाते, त्रि॥
श्रव्यः, त्रि, श्रोतव्यः। श्रवणार्हवाक्यादिः। श्रुधातोर्यत्प्रत्ययेन निष्पन्नः॥ (यथा, राधातन्त्रे। ८। ३।
"यत्श्रुत्वा परमेशानि श्रव्यमन्यन्न रोचते॥")
श्रा, ल खे दे। इति कविकल्पद्रुमः॥ अदा० पर० अक० अनिट्।) रेफयुक्तस्तालव्यादिः। ल, श्राति। इति दुर्गादासः॥
श्रा, ल म पाके। इतिकविकल्पद्रुमः॥ (अदा० पर० सेक० अनिट्।) रेफयुक्तस्तालव्यादिः। ल, श्राति। म, श्रपयति। इति दुर्गादासः॥
श्राणं, त्रि, (श्रा + क्तः।) पक्वम्। इति मेदिनी॥ घृतदुग्धजलभिन्नपक्वद्रव्यम्। इति जटाधरः॥
श्राणा, स्त्री, (श्रायते स्मेति। श्रा + क्तः) यवागूः। इत्यमरः॥
श्राद्धं, क्ली, (श्रद्धा प्रयोजनमस्य। श्रद्धा + "चूड़ादिभ्य उपसंख्यानम्।" ५।१।११०। इत्यस्य वार्त्तिकोक्त्या अण्।) शास्त्रोक्तविधानेन पित्रुद्देशकश्रद्धयात्रादिदानम्। तस्य लक्षणम्। यथा,—
"संस्कृतव्यञ्जनाढ्यञ्च पयोदधिघृतान्वितम्।
श्रद्धया दीयते यस्मात् श्राद्धं तेन निगद्यते॥"
इति पुलस्त्यवचनात् श्रद्धया अन्नादेर्दानं श्राद्धं इति वैदिकप्रयोगाधीनयौगिकम्। इति श्राद्धतत्त्वम्॥ अपि च। सम्बोधनपदोपनीतान् पित्रादीन् चतुर्थ्यन्तपदेनोद्दिश्य हविस्त्यागः श्राद्धम्। तत्तु द्वादशविधं यथा। विश्वामित्रः।
"नित्यं नैमित्तिकं काम्यं त्रिविधं श्राद्धं सपिण्डनम्
पार्व्वणञ्चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम्॥
कर्म्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम्।
यात्रार्थैकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम्॥"

एतद्विष्णुपुराणे विहितम्। यथा, भविष्ये।
"अहन्यहनि यच्छ्राद्धं तन्नित्यमभिधीयते।
वैश्वदेवविहीनं तदग्नावुदकेन तु॥
एकोद्दिष्टन्तु यच्छ्राद्धं तन्नैमित्तकमुच्यते।
तदप्यदैवं कर्त्तव्यमयुग्मानाशयेद्द्विजान्॥
काम्याय तु हितं काम्यमभिप्रेतार्थसिद्धये।
पार्व्वणेन विधानेन तदप्युक्तं खगाधिप॥
हव्यौ यत् क्रियते श्राद्धं हविष्याद्धं तदुच्यते।
सर्व्वं प्रदक्षिणं कार्य्यं पूर्व्वाह्णे तूपवीतिना॥
गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम्।
अर्घ्यार्थं पिण्डपात्रेषु प्रेतपात्रं प्रसेचयेत्॥
ये समाना इति द्वाभ्यामेतज्ज्ञेयं सपिण्डनम्।
नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रिया अपि॥
अमावास्यां यत् क्रियते तत् पार्व्वणमुदाहृतम्
क्रियते वा पर्व्वणि यत् तत् पार्व्वणमिति स्थितिः
गोष्ठ्यां यत् क्रियते श्राद्धं गोष्ठ्याश्राद्धं तदुच्यते
बहूनां विदुषां सम्यक्सुखार्थं पिण्डदस्य ये॥
क्रियते शुद्धये यत्तु ब्राह्मणानान्तु भोजनम।
शुद्ध्यर्थमिति तत् प्रोक्तं वैनतेय मनीषिभिः॥
निषेककाले सोमे च सीमन्तोन्नयने तथा।
ज्ञेयं पुंसवने चैव श्राद्धं कर्म्माङ्गमेव च॥
देवानुद्दिश्य यच्छ्राद्धं तद्दैविकमिहोच्यते।
हविष्येण विशिष्टेन सप्तम्यादिषु यत्नतः॥
गच्छन् देशान्तरं यत्तु, श्राद्धं कुर्य्याच्च सर्पिषा
यावार्थमिति तत् प्रोक्तं प्रवेशे च न संशयः॥
शरीरोपचये श्राद्धमर्थोपचय एव च।
पुष्ट्यर्थमेतद्विज्ञेयमौपचायिकमुच्यते॥"॥
तस्य पञ्चविधत्वं यथा। हविष्यतिः।
"नित्यं नैमित्तिकं काम्यं हविष्याद्धं तथैव च
पार्व्वणञ्चेति मनुना श्राद्धं पञ्चविधं स्मृतम्॥"
कूर्म्मपुराणे।
"अहन्यहनि नित्यं स्यात् काम्यं नैमित्तिकंपुनः
एकोद्दिष्टन्तु विज्ञेयं हविश्राद्धञ्च पार्वणम्॥
एतत् पञ्चविधं श्राद्धं मनुना परिकीर्त्तितम्॥"
मत्स्यपुराणे वैविध्यमुक्तं यथा,—
"नित्यं नैमित्तिकं काम्यं त्रिविधं श्राद्धमुच्यते॥"
तस्य द्वैविध्यम्। विष्णुना नित्यकाम्यरूपतया द्वैविध्यं वक्ष्यते। तत्र नित्यपदमावश्यकरूपतया पार्व्वणैकोद्दिष्टयोरपि परिग्रहार्थम्। काम्यपदमनावश्यकत्वार्थम्। इति श्राद्धविवेकः॥
आदावात्रेयमुनिपुत्त्रेण निमिना तत्पुत्रस्य श्राद्धं कृतम्। यथा,—

धरण्युवाच।

"को गुणः पिण्डयज्ञस्य कथमेव प्रपूज्यते।
केन चोत्पादितं श्राद्धं कस्मिन्नर्थे किमात्मकम्
एतदिच्छाम्यहं श्रोतुं विस्तरेण ववेस मे॥

वाराह उवाच।

मनोस्तु वंशसम्भूत आत्रेय इति विश्रुतः।
आत्रेयस्यात्मजो विप्रो निमिनामा तपोधनः॥
निमिपुत्रस्तु धर्म्मात्मा त्रिषु लोकेषु विश्रुतः।
वर्षाणाञ्च सहस्राणि तपस्तप्त्वा वसुन्धरे॥
मृत्युकालमनुप्राप्तस्ततः पञ्चत्वमागतः।
नष्टञ्च तं सुतं दृष्ट्वा निमिः शोकं उपाविशत्।
पुत्रशोकाभिसंयुक्तो दिवा रात्रौ च चिन्तयन्॥
निमिः कृत्वा ततः शोकं विधिना तत्र माधवि
तमेव गतसङ्कल्पस्त्रिरात्रे प्रत्यपद्यत॥
तस्य प्रतिविशुद्धस्य माघमासे तु द्वादशीम्।
मनः संसृज्य विषयं बुद्धिर्विस्तारगामिनी॥
स निमिश्चिन्तयामास श्राद्धकल्पं समाहितः।
यानि तस्यैव भोज्यानि मूलानि च फलानि च॥
यानि कानि च भक्ष्याणि नवञ्च रससम्भवम्।
यानि तस्यैव चेष्टानि सर्व्वमेतदुदाहरत्॥
आमन्त्र्य ब्राह्मणं पूर्व्वं शुचिर्भूत्वा समाहितः॥
दक्षिणावर्त्ततः सर्व्वं ऋषिः स्वयमकुर्व्वत।
सप्त कृत्वा ततस्तत्र युगपत् समुपाविशत्॥
दत्त्वा तु मांसशाकानि मूलानि च फलानि च
पूजयित्वा तु विप्रान् स सप्तकृत्वस्तु सुन्दरि॥
कृत्वा तु दक्षिणाग्रांश्च कुशांश्च प्रयतः शुचिः।
प्रददौ श्रीमते पिण्डं नामगोत्रमुदाहरन्॥
एतस्मिन्नन्तरे देवि नारदो द्विजसत्तमः।
जगाम तापसारण्यं ऋष्याश्रमविभूषितम्॥
तं दृष्ट्वा पूजयामास स्वागतेनाथ माधवि।
भीतो गद्गदया वाचा निश्चसंश सुहुर्मुहुः॥
सव्रीड़ो भाषते विप्रः कारण्येन समन्वितः।
कृतः सोऽयं पुत्त्रार्थे मया संकल्प्य यत् कृतम्॥
तर्पयित्वा द्विजान् सप्त श्रद्धान्वेन फलेन च।
पश्चाद्दिसर्ज्जितं पिण्डं दर्भानास्तीर्य्य भूतले॥
उदकानयनञ्चैव त्वपसव्येन पातितम्।
शोकसंप्लवभावेन एतत् कर्म्म मया कृतम्॥
न च श्रुतं मया पूर्वं न दैवैर्ऋषिभिः कृतम्।
भयं तीव्रं प्रपद्यामि मुनिश्रापात् सुदारुणात्

नारद उवाच।

न मेतव्यं द्विजश्रेष्ठ पितरं शरणं व्रज।
अधर्म्मं न च पश्यामि धर्म्मेणैवाच संशयः॥
नारदेनैवमुक्तस्तु निमिर्ध्यानमुपाविशत्।
कर्म्मणा मनसा वाचा पितरं शरणं गतः॥
ततोऽतिचिन्तयामास वंशकर्त्तारमात्मनः।
ध्यायमानस्ततोऽप्याशु आजगाम तपोधनः॥
पुत्रशोकेन सन्तप्तं पुत्रं दृष्ट्वा तपोधनः।
पुत्रमाश्वासयामास वाग्भिरिष्टाभिरव्ययैः॥
निमे सङ्क्लिष्टशरीरान् पितृयज्ञस्तपोधन।
पितृयज्ञेति निर्दिष्टो धर्म्मोऽयं ब्रह्मणा स्वयम्॥
ततो श्रुतितरो धर्म्मः क्रतुरेकः प्रतिष्ठितः।
कृतः स्वयम्भुवा पूर्वं श्राद्धं यो विधिरुत्तमः॥"

इति वाराहे श्राद्धोत्पत्तिनामाध्यायः॥

अपि च।

"अपसव्येन दातव्यं मासि मासि तिलोदकम्।
प्रणम्य शिरसा देवीर्निर्व्वापस्य च धारिणीः।
वसावो काश्यपी चेति अजया चेति नामतः॥
एवं दत्तेन प्रीयन्ते पितरश्च न संशयः।
परमात्मा शरीरस्थो देवतानां मया कृतः॥
वयञ्चात्र वरारोहे देवगान्धर्वादिनिर्मिताः।
पितृदेवा भविष्यन्ति भोक्तारः पितृपिण्डकान्।
देवतासुरगन्धर्व्वा यक्षराक्षसपन्नगाः।
पिण्डं श्राद्धस्य पश्यन्ति वायुभूता न संशयः॥
पितृयज्ञं विशालाक्षि ये कुर्व्वन्ति विदो जनाः।
आयुः कीर्त्तिर्बलं तेजो धनं पुत्रपशुस्त्रियः॥
ददन्ति पितरस्तस्य आरोग्यं नात्र संशयः।
आत्मकर्म्मवशाल्लोकान् प्राप्नुवन्तीह शोभनान्।
तिर्य्यक्त्वं च विमुच्यन्ते प्रेतभावाच्च मानवाः।
नरके पच्यमानानां त्राता भवति मानवः॥
पूजकः पितृदेवानां सर्व्वकालं गृहाश्रमे।
द्विजातींस्तर्पयित्वा तु पूर्णेन विधिना नरः॥
अक्षयं तस्य मन्यन्ते पितरः श्राद्धतर्पिताः।
नरा ये पितृभक्तास्ते प्राप्नुवन्ति परां गतिम्॥
पक्वान्नं तत्र वै कार्य्यं सुविसृष्टञ्च शुद्धितः।
हस्ते तु तत्र मध्याह्ने श्राद्धारम्भन्तु कारयेत्॥
स्वागतञ्च तथा कृत्वा पाद्यार्थं मण्डलं शुचिः।
पाद्यं दत्त्वा तु विप्राय गृहस्याभ्यन्तरं नयेत्॥
आसनं कल्पयित्वा तु आवाह्य तदनन्तरम्।
अर्घ्यं दद्याद्विधानेन गन्धमाल्यैः प्रपूज्य च॥
धूपं दीपं तथा वस्त्रं तिलोदकमथापि वा।
पात्रञ्च भोजनस्यार्थे विप्राग्रे धारयेत्तथा॥
भस्मना मण्डलं कार्य्यं पंक्तिदोषनिवारकम्।
अग्निकार्य्यं ततः कृत्वा अन्नञ्च परिवेषयेत्॥
तत्र कार्य्यस्तु सङ्कल्पः पितॄनुद्दिश्य सुन्दरि।
यथासुखेन भोक्तव्यमिति ब्रूयाद्विजं प्रति॥
रक्षोघ्नमन्त्रपाठांश्च आचमेत विचक्षणः।
हर्षान्तु ब्राह्मणान् ज्ञात्वा दद्याद्वै विकिरं ततः॥
उत्तरापोशनं दत्त्वा पिण्डप्रश्नन्तु कारयेत्।
दक्षिणाभिमुखो भूत्वा दर्भानास्तीर्य्य भूतले॥
पिण्डदानं प्रकुर्व्वीत पित्रादित्रितये तथा।
पिण्डानां पूजनं कार्य्यं तन्तुहस्तेन यथाविधि॥
ब्राह्मणस्य च हस्ते तु दद्यादक्षय्यमात्मवान्।
पिण्डान्नक्षयस्तु वसुधे यावत्तिष्ठन्ति भूतले॥
आप्यायमानाः पितरस्तावत्तिष्ठन्ति वै गृहे।
उपसृश्य शुचिर्भूत्वा दद्यात् शान्त्युदकानि च॥
प्रणम्य शिरसा भूमौ निर्वापस्य च धारिणीः।
वसावो काश्यपी चेति अक्षय्या चेति नामतः॥
अक्षयेत् प्रथमं पिण्डं पत्न्यै देयञ्च मध्यमम्।
तृतीयमुदके दद्यात् श्राद्धे एवं विधिः स्मृतः॥
पितृदेवं विसृज्याथ भक्त्या तु प्रणमेत्तु तान्।
एवं दत्तेन तुष्यन्ति पितृदेवा न संशयः॥
दीर्घायुषं प्रयच्छन्ति पुत्रपौत्रधनानि च।
तेनोत्तमेषु विप्रेषु दद्यात् श्राद्धं विधानतः॥
अन्यथा तत्तु वै श्राद्धं निष्फलं नास्ति संशयः।
मन्त्रहीनं क्रियाहीनं यत् श्राद्धं कुरुते द्विजः।
सप्तजन्मासुरेन्द्रस्य फलं भवति भागतः॥"

इति वाराहे पितृयज्ञनिर्णयनामाध्यायः॥

तस्याधिकारिक्रमो यथा,—

"पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा श्राद्धसन्ततिः।
सपिण्डसन्ततिर्वापि क्रियार्हो नृप जायते॥
तेषामभावे सर्व्वेषां समानोदकसन्ततिः।
मातृपक्षस्य पिण्डेन सम्बन्धा ये जलेन वा॥

कुलद्वयेऽपि चोत्पन्ने स्त्रीभिः कार्य्या क्रिया नृप।
संघातान्तर्गतैर्व्वापि कार्य्याः प्रेतस्य याः
क्रियाः॥
उत्पन्नबन्धुरिक्थाद्या कारयेदवनीपतिः।
पूर्व्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः
क्रियाः॥
त्रिप्रकाराः क्रियास्त्वेतास्तासां भेदं शृणुष्व मे।
आदाहवार्य्यायुधादिस्पर्शान्तास्तु याः क्रियाः॥
ताः पूर्व्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः।
प्रेते पिण्डत्वमापन्ने सपिण्डीकरणादनु॥
क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता नृपोत्तराः।

पिण्डाद्यसपिण्डेषु समानसलिलेस्तथा॥
संघातान्तर्गतैर्व्वैव राज्ञा वा धनहारिणा।
पूर्व्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः।
दौहित्रैर्व्वा नरश्रेष्ठ कार्य्यास्तत्तनयैस्तथा।
मृताहनि च कर्त्तव्याः स्त्रीणामप्युत्तराः क्रियाः॥
प्रतिसंवत्सरं राजन्नेकोद्दिष्टं विधानतः॥"

इति विष्णुपुराणे ३ अंशे १३ अध्यायः॥*॥

याज्ञवल्क्य उवाच।

"अथ श्राद्धविधिं वक्ष्ये सर्व्वपापप्रणाशनम्।
अमावास्याष्टकाद्यद्रिः कृष्णपक्षोऽयनद्वयम्॥
ग्रस्तं ब्राह्मणसम्पत्तिर्विषुवत् सूर्य्यसंक्रमः।
व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्य्ययोः॥
श्राद्धं प्रतिरुचिर्य्यैव श्राद्धकालाः प्रकीर्त्तिताः॥*॥
अग्नौ यः सर्व्ववेदेषु श्रोत्रियो वेदविद्युवा।
वेदार्थविच्छ्रोत्रसामाश्रिमधुस्त्रिसुपर्णिकः॥
स्वकीयऋत्विग् जामाद्ययाज्यश्वशुरमातुलाः।
त्रिणाचिकेतदौहित्रत्रिशिखसम्बन्धिबान्धवाः॥
कर्म्मनिष्ठास्तपोनिष्ठाः पाङ्क्त्याग्निब्रह्मचारिणः।
पितृमातृपरायैव ब्राह्मणाः श्राद्धदेवताः॥*॥
रोगी हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा॥
अवकीर्ण्यादयो ये च ये चाचारविवर्जिताः।
अवेक्षणाश्च ये सर्व्वे न श्राद्धार्हाः कदाचन॥*॥
निमन्त्रयेच्च पूर्व्वेद्युर्दैवे कर्म्मण्यसंयतैः।
आचान्तयैव पूर्व्वाह्णे श्वासने सुपवेशयेत्॥
युग्मान्दैवे तथा पित्र्ये सुप्रदेशे स्वशक्तितः।
द्वौ दैवे प्रागुदक्पित्र्ये त्रीन्वेकं चोभयोः पृथक्॥
मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम्।
हस्तप्रक्षालनं दत्त्वा विष्टरार्थं कुशानपि॥
आवाह्य तदनुज्ञातो विश्वेदेवास इत्यृचा।
यवैरन्यवकीर्य्याथ भाजने सपवित्रके॥
शन्नो देव्या पदः क्षिप्ता यवोऽसीति यवांस्तथा।
या इति मन्त्रेण हस्तेष्वेव विनिक्षिपेत्॥
गन्धोदके तथा धूपमाल्यदानप्रदीपकम्।
अपसव्यं ततः कृत्वा पितृणामप्रदक्षिणम्॥
द्विगुणांस्तु कुशान् दत्त्वा उपनस्त्वेत्यृचा
पितॄन्।
आवाह्य तदनुज्ञातो जपेदायान्तु नस्पितः॥
यवार्थस्तु तिलैः कार्य्यः कुर्य्यादर्घ्यादि पूर्ववत्।
दत्त्वा तु संस्रवांस्तेषां पात्रे कृत्वा विधानतः॥
पित्रभ्यः स्थानमसीति स्रुवं पात्रं करोत्यधः।
अग्नौ करिष्येत्यादाय पृच्छत्यन्नं हुतभुजम्॥
कुरुष्वेति तयोक्तोऽग्नौ कृत्वासौ पिण्डपयतः।
हुतशेषं प्रदद्याच्च भाजनेषु समाहितः॥
यथालाभोपपन्नेषु रौप्येषु च विशेषतः।
दत्त्वार्घं भूर्भुवौ ते पात्रमिति पात्राभिमन्त्रणम्॥
कृत्वेदं विष्णुरित्यन्ने निजाङ्कुष्ठं निवेशयेत्।
सव्याङ्गुलिकां गायत्रीं मधुवातेत्यृचं तथा॥
जप्त्वा यथासुखं वाचं भुक्तवीरंस्तोऽपि वाग्यतः।
अन्नमिष्टं हविष्यञ्च दद्यादक्रोधनोऽत्वरः॥
आद्यन्तयोश्च पवित्राणि जप्त्वा पूर्व्वं जपन्तथा।
अन्नमादाय तृप्ताः स्थ शेषश्चैवानुमन्त्र्य च॥
तदन्नं प्रकिरेद्भूमौ दद्याच्चापः सकृत् सकृत्।
सर्व्वं मन्त्रमुपादाय सतिलं दक्षिणामुखः॥
उच्छिष्टसन्निधौ पिण्डान् प्रदद्यात् पित्रयन्नवत्।
मातामहानामप्येवं दद्याच्चाचमनं ततः॥
स्वस्ति प्रीयन्तामिति चाहैवं विश्वेदेवान् जलं
ददत्।
स्वस्तिवाच्य ततो दद्यादक्षय्योदकमेव च॥
दत्त्वा तु दक्षिणां शक्त्या स्वधाकारमुदीरयेत्।
वाच्यतामित्यनुज्ञातः पित्रभ्यः स्वधोच्यताम्॥
विप्रैरस्तु स्वधेत्युक्तो भूमौ सिञ्चेत्ततो जलम्।
दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च॥
श्रद्धा च नो मा व्यगमत् बहु देयञ्च नोऽस्त्विति
इत्युक्त्वापि प्रियं वाचं प्रणिपत्य विसर्ज्जयेत्॥
वाजे वाजे इति प्रीत्या पित्रपूर्व्वं विसर्जनम्।
यस्मिन्ते सक्तवः पूर्व्वं मर्घ्यपात्रे निपातिताः॥
पित्रपात्रं तदुत्तानं कृत्वा विप्रान् विसर्ज्जयेत्।
प्रदक्षिणमनुव्रज्य भुञ्जीत पित्रसेवितम्॥
ब्रह्मचारी भवेत्तान्तु रजनीं भार्य्यया सह।
एवं प्रदक्षिणं कृत्वा वृद्धौ नान्दिमुखानपि॥
यजेत यवकर्कन्धुमिश्राः पिण्डा यवैः त्रिताः।
एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम्।
आवाहनाग्नौ करणरहितं अपसव्यवत्।
उपतिष्ठतामित्यत्रस्थाने विप्रान् विसर्ज्जयेत्॥
अभिरम्यतां ब्रूयात् ब्रूयुस्तेऽभिरताः स्म इ।
गन्धोदकतिलैर्मिश्रं कुर्य्यात् पात्रचतुष्टयम्॥
अर्घ्यार्थं पित्रपात्रेषु प्रेतपात्रं प्रसेचयेत्।
ये समाना इति द्वाभ्यां शेषं पूर्व्ववदाचरेत्॥
एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि।
ऊर्ध्वं सपिण्डीकरणं यस्य संवत्सराद्भवेत्॥
तस्याप्यत्रं सोदकुम्भं दद्यात् संवत्सरं द्विज।
पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा॥
हविष्यान्नेन वै मासं पायसेन तु वत्सरम्।
मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः॥
ऐणरौरववाराहशाशैर्मासैर्यथाक्रमम्।
मासद्वयापि तृप्यन्ति दत्तैरिह पितामहाः॥
दद्याद्वर्षा त्रयोदश्यां मघासु च न संशयः।
प्रतिपत्प्रभृतिष्वेवं कन्यादीन् श्राद्धदो भवेत्॥
शस्त्रेण निहतानान्तु चतुर्दश्यां प्रदीयते॥*॥
स्वर्गं प्रपत्यमोजश्च शौर्य्यं चेत्रं बलं तथा॥
पुत्रश्रेष्ठान् सौभाग्यानपत्यं सुख्यतां शुभम्।
प्रवृत्तचक्रतां पुत्रान् बाधिर्य्यप्रमृतींस्तथा॥
अरोगित्वं यशो वीतशोकतां परमां गतिम्।
धनं विद्यां भिषक्सिद्धिं कुप्यं गोऽजाविकं तथा॥
अश्वानायुष्य विधिवदयः श्राद्धं संप्रयच्छति।
कृत्तिकादिभरण्यन्तं सकामानाप्नुयादिमान्॥
वस्वाद्याः प्रीणयन्त्येव नवं श्राद्धं कृतं द्विजाः।
आयुष्पुत्रां धनं विद्यां स्वर्गं मोक्षं सुखानि च॥
प्रयच्छन्ति तथा राज्यं प्रीतो नित्यं पितामहः॥"

इति गारुडे ८८ अध्यायः॥*॥

अपिच।

"व्याख्यास्यामह वक्ष्ये मुक्तिमुक्तिप्रदं नृणाम्।
पूर्व्वं निमन्त्रयेद्विप्रान् निशि स्नुर्ब्रह्मचारिणः॥
प्रदक्षिणोपवीतेन देवान् वामोपवीतिना।
पितॄन्निमन्त्रयेत् पादौ क्षालयेद्दक्षमन्ततः॥
ॐस्वागतं भवद्भिरिति प्रश्नः। ॐसुस्वागतमिति तैरुक्ते ॐविश्वेभ्यो देवेभ्य एतत् पाद्यावनेजनं स्वाहा पितृभ्यः स्वधा इति देवब्राह्मणपादयोर्देवतीर्थेनाभ्युक्षणजलकुसुमदानम्। ततो दक्षिणामुखस्य वामोपवीतेन अमुकगोत्रेभ्य अस्मत्पितृपितामहप्रपितामहेभ्यो यथानामशर्म्मभ्यः सपत्नीकेभ्य एतत् पाद्यावनेजनं स्वधा इति पित्रादिब्राह्मणपादयोः पितृतीर्थेन अभ्युक्षणतिलकुसुमजलदानम्। एव मातामहादिषु। एतद् आचमनीयं स्वाहा स्वधेति ब्राह्मणहस्ते। एष वो अर्घ्यः इति ब्राह्मणहस्तेऽर्घ्यदानम्। एतद्वः पुष्पं इति ब्राह्मणहस्ते पुष्पदानम्। ॐ सिद्धमिदमासनं इदमासनमित्यभिधाय ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं सप्तव्याहृतिभिः पूर्व्वमुखदेवब्राह्मणोपवेशनम्। उत्तराभिमुखाः पितरः ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच। नमः स्वधायै स्वाहायै नित्यमेव नमो नमः इति विर्ज्जपेत्। ॐ अद्यास्मिन्देशे अमुकमासे अमुकराशिगते सवितरि अमुकस्यां तिथौ अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानां यथानामशर्म्मणां विश्वेदेवपूर्व्वकं श्राद्धमहं करिष्ये ॐ विश्वेभ्यो देवेभ्य इदमासनं स्वाहा। ॐ विश्वान् देवानावाहयिष्ये ॐ आवाहय इत्युक्ते ॐ विश्वेदेवास आगत शृणुतामं हवं एदं बर्हिर्निषीदत। ॐ विश्वदेवाः शृणुतेमं हवं ये मे अन्तरीक्षे य उपद्यविष्ट येऽग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम्। ॐ ओषधयः समवदन्त सोमेन सह राज्ञा यस्मै ब्राह्मणस्वं राजन् पारयामसि।
ॐआगच्छन्तु महाभागा विश्वे देवा महाबलाः।
ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते॥
ॐ अपहतासुररक्षांसि वेदिसदः। इति त्रिभिर्यवविकिरणम्। ॐ पवित्रमहं करिष्यं ॐ कुरुष्वेति तेनोक्ते साग्रकुशपवित्रद्वयं प्रादेशप्रमाणं कृत्वा ॐ पवित्रे स्थो वैष्णव्यौ अनेनं कुशान्तरेण छित्त्वा ॐ विष्णुर्मनसा पूते स्थः

दत्त्वाभ्य च कुशान्तरेण विहतं कृत्वा पात्रे पवित्रमिवेशनम्। शन्नो देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः। इति पात्रे जलदानम्। ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीर्दति यवदानम्।

ॐगन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्व्वभूतानां त्वामिहोपह्वये श्रियम्॥

इति गन्धदानम्॥

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्या इति पुष्यदानम्। ॐ या दिव्या आपः पयसा सम्बभूवुर्य्या अन्तरीक्षा उतपार्थ वोर्य्या हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः संश्योनाः सुहवा भवन्तु ॐ ध्रुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एषोऽर्घ्यो नमः। इति हस्तेऽर्घ्यं दत्त्वा अनेनैव पात्रेण मंत्रवपवित्रग्रहणं प्रथमपात्रेण मंत्रवं पवित्रञ्च गृहीत्वा ब्राह्मणदक्षिणपार्श्वे कुशोपरि उर्द्धमुखपात्रे स्थापनं तदुपरि कुशदानम्। ततः ॐ ध्रुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतानि गन्धपुष्पधूपदीपवासोयुगमोत्तरीययज्ञोपवीतानि नमः। गन्धादिदानमच्छिद्रमस्तु संकल्पसिद्धिरस्तु। ब्राह्मणवाचनम्। ततः पितृपितामहप्रपितामहमातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां श्राद्धमहं करिष्ये। अनुज्ञापनम्। ॐ कुरुष्वेति ब्राह्मणैरुक्ते। ॐ देवताभ्यः पितृभ्य महायोगिभ्य एव च। इति विर्जपेत्। तत ॐ अमुकसगोत्राणां अस्मत्पितृपितामहप्रपितामहानां यथानामशर्म्मणां सपत्नीकानां श्राद्धं युष्माभिरहं करिष्ये। ॐ कुरुध्व श्राद्धकरणानुज्ञानम्। ॐ अमुकसगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यो यथानामशर्म्मभ्यः सपत्नीकेभ्य इदमासनं स्वधा। ब्राह्मणवामपार्श्वे आसनम्। ॐ पितृनावाहयिष्ये ॐ आवाहयेत्युक्ते ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि। उशन्नुशत आवह पितॄन् हविषे अत्तवे। ॐ आयान्तु नः पितरः सोम्यासो अग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान्। इत्यावाहनम्। ॐ अपहता असुरा रक्षांसि वेदिसदः। विस्रिलविकिरणम्। ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्म्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् प्रीणाहि नः स्वाहा। तिलदानम्। गन्धपुष्पं हस्ताभ्यां दत्त्वा पितृपात्रमुत्थाप्य या दिव्येति पठित्वा अमुकगोत्र अस्मत्पितः अमुकशर्म्मन् सपत्नीक एष ते अर्घ्यः स्वधा। एवं पितामहादौ। सर्पवित्रं पात्रं गृहीत्वा ब्राह्मणवामपार्श्वे दक्षिणाग्रकुशोपरि ॐ पितृभ्यः स्थानमसीति अधोमुखपात्रस्थापनम्। ॐ शुन्धन्तां लोकाः पितृषदनाः पितृषदनमसि। अधोमुखपात्रस्थेनम्। ततः अमुकसगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यः सपत्नीकेभ्यः एतानि गन्धपुष्पधूपदीपवासोयुगमोत्तरीययज्ञोपवीतानि स्वधा। पितृतीर्थेन गन्धादिदानम्। गन्धादिदानमच्छिद्रमस्तु सङ्कल्पसिद्धिरस्तु। ब्राह्मणवाचनम्। एवं मातामहादीनामनुज्ञापनादि कर्म्म। ॐ या दिव्येति भूमिसम्मार्জ্জनम्। ततो घृताक्तमन्नं गृहीत्वा दक्षिणोपवीतं पितृब्राह्मणम्। ॐ अग्नौ करणमहं करिष्ये ॐकुरुष्वेति तेनोक्ते ॐ अग्नये कव्यवाहनाय स्वाहा ॐ सोमाय पितृमते स्वाहा। आहुतिद्वयं देवब्राह्मणहस्ते दत्त्वा अवशिष्टार्द्धं पिण्डार्थं स्थापयित्वा अपरमर्द्धं पित्रादिपात्रे मातामहादिपात्रे च निःक्षिपेत्। पात्रे अन्नादि निधाय कुशं दत्त्व अधोमुखाभ्यां पाणिभ्यां पात्रं गृहीत्वा। ॐ पृथिवी ते पात्रं द्यौः पिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा। पात्राभिमन्त्रणम्। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुले विष्णो हव्य रक्षस्व। इत्यन्नोपर्य्यधोमुखहिजाङ्गुष्ठनिवेशनम्। ॐअपहतेति विर्य्यवविकरणम्।

ॐनिहन्मि सर्व्वं यदमेध्यवद्भवेत्
हताश्च सर्व्वेऽसुरदानवा मया।
रक्षांसि यक्षाः सपिशाचसंघा
हता मया यातुधानाश्च सर्व्वे॥

इति सिद्धार्थविकिरणम्॥

ततः ॐ ध्रुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतदन्नं सघृतं सपानीयं सव्यञ्जनं स्वाहा इति वारिकुशाद्यैरन्नसङ्कल्पनम्। ॐ श्राद्धमिदमच्छिद्रमस्तु सङ्कल्पसिद्धिरस्तु। ततो वामोपवीतेन सव्यञ्जनं सघृतमन्नं पित्रादिपात्रे निधाय तदुपरि भूमिसंलग्नकुशं दत्त्वा ॐ पृथिवी ते पात्रं अभिमन्त्रणम्। उत्तानाभ्यां पाणिभ्यां पात्रं गृहीत्वा ॐइदं विष्णुरित्यन्नोपरि उत्तानाङ्गुष्ठं निवेशयेत् ॐअपहता इति तिलविकिरणम्। भूमिपातितवामजानुः। अमुकगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्य अमुकामुकशर्म्मभ्यः सपत्नीकेभ्य एतदन्नं सघृतं सपानीयं सव्यञ्जनं प्रतिपिण्डवर्জ্জितं स्वधा। अन्नसङ्कल्पः। ॐ ऊर्জ্জं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्त तर्पयत मे पितॄन्। दक्षिणामुखवारित्यागः। ॐ अन्नमिदमच्छिद्रमस्तु सङ्कल्पसिद्धिरस्तु। ततः सव्याहृतिकया गायत्र्या विमर्জ্জयित्वा मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः। मधुनक्तमुतोषसो मधुमत् पार्थिवं रजः मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमानस्तु सूर्য্যो माध्वीर्गावो भवन्तु नः॥ मधु मधु मधु इति जपः। यथा सुखं वाग्यता जुषध्वमिति ब्रूयात्। भुक्तवत्सु सप्तव्याधादिकं पितृस्तोत्रं जपेत्।

ॐसप्तव्याधा दशार्णेषु मृगाः कालाञ्जरे गिरौ।
चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः।
प्रस्थिता दूरमध्वानं यूयं तेभ्योऽवसीदत॥

ततस्तृप्तेषु। दक्षिणामुखो वामोपवीती उच्छिष्टायतः।

ॐ अग्निदग्धाश्च ये जीवाः येऽप्यदग्धाः कुले मम।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥

इति भूमौ कुशोपरि सघृतमन्नं जलप्लुतं विकिरेत्। ततो देवब्राह्मणक्रमेण जलगण्डूषं दत्त्वा पूर्ववत् पुनः सव्याहृतिकां सावित्रीं मधुवातेत्यृचं मधु मधितिं च जप्त्वा ॐ रुचितं भवद्भिरिति देवब्राह्मणप्रश्नः। सुरुचितमिति तेनोक्ते ॐ शेषमन्नमप्यस्तीति प्रश्नः। इष्टैः सह भुङ्क्ष्वेति तेनोक्ते पित्रादिब्राह्मणे वामोपवीतेन ॐ तृप्तास्थ इति प्रश्नः। ॐ तृप्तास्म इत्युक्ते शेषमन्नमिति प्रश्नः। ॐ इष्टैः सह भुङ्क्ष्वेति तेनोक्ते मातामहादिब्राह्मणे तथैव प्रश्नः। ततः पित्रादिब्राह्मणे पिण्डानहं पातयिष्ये पातयेत्युक्ते। तदुच्छिष्टायतोऽभ्युक्षणं मण्डलञ्च चतुष्कोणं तिलविकिरणं ॐअमुकगोत्र अस्मत्पितः अमुकशर्म्मन् सपत्नीक एतत्ते पिण्डासनं स्वधा इत्यं रेखामध्ये पितामहाय प्रपितामहाय च। सव्याहृतिकां गायत्रीं मधुवातेति चिर्জ্জपन् अन्नं माज्यं पिण्डं कृत्वा कुशोपरि अमुकगोत्रास्मत्पितः अमुकशर्म्मन् सपत्नीक एष ते पिण्डः ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा। एवं पितामहप्रपितामहमातामहप्रमातामहवृद्धप्रमातामहेभ्यः। पिण्डशेषविकिरणं पिण्डान्तिके। ॐ लेपभुजः प्रीयन्तां इति स्तरणकुशेषु हस्तमार्জ্जनम्। प्रक्षालितेन पिण्डपात्रोदकेन अमुकगोत्र अस्मत्पितः अमुकशर्म्मन् सपत्नीक एतत्ते जलमवनेनिक्ष्व ॐ ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति पितृपिण्डसेचनम्। पिण्डपात्रमधोमुखं कृत्वा वहाञ्जलिं ॐ अत्र पितरो मादयध्वं यथाभागमावृषायिध्वमिति जपः। अपः स्पृष्ट्वा वामेन पराहृत्य उदङ्मुखस्य प्राणायामः संयम्य।

ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः।
वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमः सदा॥
हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च।
माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः॥

ॐषड्भ्य ऋतुभ्यो नमः पितृभ्यो नमः। इति जपः। वामेनैव पराहृत्य दक्षिणामुखः अमी मदन्त पितरो यथाभागमावृषायिषत। इति जपः। वासः शिथिलीकृत्याञ्जलिं कृत्वा ॐ नमो वः पितरः पितरो नमो वः। इति जपः। गृहान्नः पितरो दत्त। इति गृहवीक्षणम्। ॐ सदो वः पितरो देषः। इति पिण्डवीक्षणम्। ॐ एतद्वः पितरो वासः इत्युक्त्वार्घ्य अमुकगोत्र इत्यादिना एतत्ते वासः ॐ ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा। दशभवस्त्रदानम्। वामेन पाणिना उदकपात्रं गृहीत्वा। ॐ ऊर्জ्जं वहन्तीरमृतं घृतं पय

कीलालं इत्यादिना पिण्डोपरि वारिधारा-त्यागः। पूर्वस्थापितपात्रशेषोदकैः प्रत्येकं पिण्ड-सेचनम्। पिण्डवाह्मेन गन्धादिदानम्। पिण्डो-परि कुशं हस्तञ्च दत्त्वा ॐ अघत्रमी मदन्त-स्तवप्रिया अधूषत अस्तोषत स्वभानवो विप्रा न विष्टया मतीयो यात्विन्द्र ते हरीति जपः। इत्थं मातामहादेर्ब्राह्मणानामाचमनं सुसुप्रो-क्षितमस्तिति भूम्यभ्युक्षणं कृत्वा।

अपां मध्ये स्थिता देवा सर्व्वमेषु प्रतिष्ठितम्। ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु नः॥

शिवा आपः सन्त्विति हस्ते ब्राह्मणस्य जल-दानम्।

लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे। लक्ष्मीर्वस्ते सदा गोष्ठे सौमनस्यं सदास्तु मे॥

सौमनस्यमस्तु पुष्पदानम्।

ॐ अघतच्चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिश्च मे। यद्यत् श्रेयस्करं लोके तत्तदस्तु सदा मम॥

ॐ अघतच्चारिष्टञ्चास्तु यवतण्डुलदानम्। अमुक-गोत्राणामस्मत्-पिट-पितामह-प्रपितामहानां सपत्नीकानां दत्तमिदमन्नपानादिकमक्षय्यमस्तु इति पित्रादिब्राह्मणहस्ते सतिलजलदानम्। यजमानस्य प्रश्ने अस्तिति ब्राह्मणो वदेत्। एवं मातामहादीनामाचम्यम्। आशिषः।

ॐ अघोराः पितरः सन्तु गोत्रं नो वर्द्धताम्। दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च। श्रद्धा च नो मा व्यगमद्बहु देयञ्च नोऽस्त्विति॥ अन्नञ्च नो बहु भवेदतिथींश्च लभेमहि। याचितारश्च नः सन्तु मा च याचिष्म कञ्चन॥

एता एवाशिषः सन्तु सौमनस्यमस्तु सुसुखं चास्तु इत्युक्ते पिण्डपात्रे अर्घ्यसम्बन्धान् कुशान् पवित्राणि चास्तीर्य्य पित्रादिब्राह्मणं स्पृष्ट्वा स्वधां वाचयिष्ये ॐ वाचयतां ॐ पितृपितामह-प्रपितामह-मातामह-प्रमातामह-वृद्धप्रमाता-महेभ्यो यथानामगर्म्मभ्यः सपत्नीकेभ्यः स्वधो-च्यतां अस्तु स्वधा इत्युक्ते ऊर्ज्जं वहन्तीरमृतं घृतं इति पिण्डानामुपरि वारिधारां दद्यात्। तत ॐ विश्वेदेवा अस्मिन् यज्ञे प्रीयन्तां देव-ब्राह्मणहस्ते यवोदकदानं ॐ प्रीयन्तामिति तेनोक्त ॐ देवताभ्य इति विर्ज्जयेत्। अधो-मुखपिण्डपात्राणि चालयित्वा आचम्यदक्षिणो पवीती पूर्व्वाभिमुखः ॐ अमुकसगोत्राय अमुकशर्म्मणे ब्राह्मणाय सपत्नीकाय श्राद्ध-प्रतिष्ठार्थं दक्षिणामिदं रजतं तुभ्यमहं ददे इति दक्षिणां दद्यात् एवं मातामहादौ ततो देवब्राह्मणाय दक्षिणादानम्। ततः पिट-ब्राह्मणे। पिण्डपात्रमुत्तानं कृत्वा ॐ पिण्डाः सम्पन्नाः ॐ सुसम्पन्ना इति पिण्डे क्षीरधारां दत्त्वा पिण्डचालनम्।

ॐ वाजे वाजे वतवाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥

इति पित्रादिविसर्ज्जनम्॥

ॐ आ मा वाजस्य प्रसवो जगम्या-देमे द्यावा पृथिवी विश्वरूपे। आ मा गन्तां पितरा मातरा युव-मा मा सोमोऽमृतत्वाय गम्यात्॥

इति देवविसर्ज्जनम्॥

ॐ अभिरम्यतामित्युक्ते अभिरताः स्म इति ब्राह्मणैरनुज्ञातस्य निवर्त्तनम्। गवादिषु पिण्ड-प्रतिपादनमिति।

एष श्राद्धविधिः प्रोक्तः पठतां पापनाशनः। अनेन विधिना श्राद्धं कृतं वै यत्र कुत्रचित्॥ अक्षयं स्यात् पितॄणाञ्च स्वर्गप्राप्तिर्ध्रुवा तथा। इत्युक्तं पार्व्वणश्राद्धं पितॄणां ब्रह्मलोकदम्॥"

इत्याद्ये गारुड़े पार्व्वणश्राद्धम् २२२ अध्यायः॥

ब्रह्मोवाच।

"नित्यश्राद्धं प्रवक्ष्यामि पूर्व्ववत्तद्विशेषयेत्॥ ॐ अमुकसगोत्राणामस्मत्पितृपितामहप्रपि-तामहानाममुकशर्म्मणां सपत्नीकानां श्राद्धं सिद्धान्नेन युष्मभ्यमहं करिष्ये।

आसनादिकमत्र स्याद्विश्वे देवविवर्ज्जितम्। वृद्धिश्राद्धं प्रवक्ष्यामि पूर्व्ववत्तद्विशेषकम्॥

जातपुत्रमुखदर्शनादौ वृद्धिश्राद्धं पूर्व्वाभिमुखेषु दक्षिणोपवीतिषु मधुयववदरमिश्राः पिण्डा देव तीर्थेन नमस्कारान्तेन दक्षिणोपचारेणकर्त्तव्यम्। दक्षिणजानु गृहीत्वा ॐ अद्यामुकगोत्रा अमुकवृद्धी अमुक-गोत्राणामस्मत्पितृपितामहप्रपितामह-मातामह-प्रमातामह-वृद्धप्रमातामहानां अमुकशर्म्मणां सपत्नीकानां नान्दीमुखानां श्राद्धेकर्त्तव्ये वसुसत्यसंज्ञकानां विश्वेषां देवानां श्राद्धं सिद्धान्नेन युष्मासु मया कर्त्तव्यम्। इति देवब्राह्मणामन्त्रणं ॐ करिष्यसीति तेनोक्ते इत्यमेव मातृपितामहीप्रपितामहीनां देवब्राह्म णामन्त्रणम्। तत ॐ अमुकगोत्राया मत्-प्रपितामह्या अमुकदेव्या नान्दीमुख्याः श्राद्धं सिद्धान्नेन युष्मासु मया कर्त्तव्यमिति प्रपिता-महीब्राह्मणामन्त्रणम्। करिष्यसीति तेनोक्ते इत्यमेव पितामहब्राह्मणामन्त्रणं मातृब्राह्मणा मन्त्रणञ्च॥ तत ॐ अद्यामुकवृद्धी अमुक-गोत्राणामस्मत्-प्रपितामह-पितामह-पितॄणां नान्दीमुखानां श्राद्धं सिद्धान्नेन युष्मासु मया कर्त्तव्यमिति ब्राह्मणामन्त्रणं ॐ करिष्यसीति तेनोक्ते इत्यमेव वृद्धप्रमातामहादिब्राह्मणा-मन्त्रणम्। देवपितृसर्व्वदेवब्राह्मणश्राद्धकरणानु-ज्ञापनम्। आसने ॐ विश्वे देवास आगत शृणु-ताम् इमं हव एद बर्हिर्निषीदत ॐ विश्व-देवाः शृणुतेमं हव ये मेऽन्तरीक्षे य उपद्यविष्ट ये अग्निजिह्वा उतवा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम्। ॐ आगच्छन्तु महाभागा विश्वे देवा इति विश्वे देवावाहनम्। गन्धादि-दानञ्च। अच्छिद्रावधारणवचनम्। ततः प्रपि-तामहीप्रभृतीनामनुज्ञापनं आसनं गन्धादि-दानं अच्छिद्रावधारणम्। इत्थं प्रपितामहा-दीनां अनुज्ञापनम्। आसनं आवाहनं गन्धादिदानम्। एवं वृद्धप्रमातामहादीनां अनुज्ञापनादिकरणम्। ॐ वसुसत्यसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतदन्नं सक्तवः सपानीयं सव्य-ञ्जनं सवदरं सदधि प्रतिपिण्डवर्ज्जितं नमः। इति अन्नसङ्कल्पनम्। ॐ अमुकगोत्रे मत्-प्रपितामहि अमुकीदेवि नान्दिमुखि एतदन्न सवदरं सदधि नमः। इत्थं पितामहीमाह-ब्राह्मणे। ततः प्रपितामहादिब्राह्मणपात्रे ॐ अमुकगोत्रेभ्यो मत्प्रपितामहपितामहपितृभ्य एतदन्नं सवदरं सदधि सव्यञ्जनं सपानीयं नमः। एवं वृद्धप्रमातामहादिभ्यः॥*॥

एकोद्दिष्टं पुरावक्ष्ये तद्विशेषं वदे शृणु॥ प्रथमं निमन्त्रणं पादप्रक्षालनं आसनम्। अघ अमुकगोत्रस्य मत्पितुरमुकदेवशर्म्मणः प्रति-सांवत्सरिकमेकोद्दिष्टं श्राद्धं सिद्धान्नेन युष्मासु अहं करिष्ये। श्राद्धकरणानुज्ञापनम्। आसनं अर्घ्यः। गन्धादिदानं पितृस्थापनम्। अन्न-सङ्कल्पनं जप्यं निवीती उत्तराभिमुखीभूया-तिथिश्राद्धं कुर्य्यात्। ततस्तूष्णिं ज्ञात्वा दक्षि-णाभिमुखो वामोपवीती उच्छिष्टसमीपे ये अग्निदग्धा इति अन्नविकिरणम्। ॐ अमुक-गोत्र पितुरमुकदेवशर्म्मन् एतत्ते जलमवने-निक्ष्व ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति रेखोपरि दक्षिणामुखवारिधारा-दानम्।" इति गारुड़े २२३अध्यायः॥*॥

ब्रह्मोवाच।

"सपिण्डीकरणं वक्ष्ये पूर्णेऽब्दे तत्तच्चाहनि। कृत्वा कुतपकाले तु प्रेतादेः पितृलोकदम्॥ सपिण्डीकरणं कुर्य्यात् अपराह्णे तु पूर्व्ववत्॥

पितामहादिब्राह्मणनिमन्त्रणम्। ॐ पुरोरवो माद्रवःसंज्ञकेभ्यो देवेभ्य एतदासनं नमः। वामपार्श्वे चासनदानम्। ततः पितामह-प्रपितामहवृद्धप्रपितामहानां सपत्नीकानां श्राद्धमहं करिष्ये। इत्यनुज्ञाग्रहणम्। पात्र-त्रयकरणं पात्रोपरि कुशं दत्त्वा पात्रान्तरेण पिधाय अच्छिद्रावधारणान्तं परिसमाप्य तयैव पितुरपि सपत्नीकस्य प्रेतान्तनाम्ना श्राद्धकर-णानुज्ञापनम्। देवपात्राच्छिद्रावधारणम्। तं परिसमाप्य पितामहप्रपितामहवृद्धप्रपितामह-पितृक्रमेण पात्राणां मनाक् वाचनं उद्घाटनं कृत्वा ये समानाः समनसः पितरो यमराज्ये। तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्॥ ये समानाः समनसो जीवा जीवेषु मामकाः। तेषां श्रीर्मयी कल्पतां अस्मिन् लोके शतं समाः॥

एतन्मन्त्रद्वयेन पितृपात्रोदकं पितामहप्रपि-तामहवृद्धप्रपितामहपात्रे दत्त्वा वृद्धप्रपितामह-पात्रं परित्यज्य पितामहप्रपितामहयोरुदकं पवित्रञ्च पितृपात्रे निक्षिपेत्। ततः पित-

ब्राह्मणहस्ते पवित्रदानम्। पात्रपुष्पेण शिरसः करपादार्घ्यनं हस्तेऽन्यजलदानं हस्ताभ्यां पात्रमुत्थाप्य ॐ या दिव्येति च पठित्वा अमुकगोत्र मत्पितरमुक प्रेत एष ते अर्घ्यो ये चात त्वामनु यांत्र त्वमनु तस्मै ते स्वधा इति पितृब्राह्मणहस्ते स्तोकमर्घ्योदकं पितृतीर्थेन दत्त्वा पितामहब्राह्मणहस्ते पवित्रदानं पात्रपुष्पेण शिरःकरपादार्घ्यनं हस्तेऽन्यजलदानम्। हस्ताभ्यां पात्रमुत्थाप्य या दिव्येति पठित्वा अमुकगोत्र मत्पितामह अमुकदेवशर्म्मन् सपत्नीक एष ते अर्घ्यः स्वधा। पितृपात्रेणैव पितामहब्राह्मणहस्ते स्तोकमर्घ्योदकं दत्त्वा शेषमुदकं पिण्डसेचनार्थं पात्रान्तरे निधाय तेनैव पात्रेण पितामहब्राह्मणानां हस्तस्थं उदकं पवित्रञ्च गृहीत्वा पितृब्राह्मणवामपार्श्वे दक्षिणाग्रकुशोपरि पितृभ्यः स्थानमसीति अधोमुखपात्रस्थापनम्। पितामहानां गन्धादिदानं अग्नौकरणम्। देवानां अवशिष्टान्नं पितामहादिपात्रे क्षिपेत्। पितामहादिपात्राभिमन्त्रणादिवाचनपर्य्यन्तं क्रमेण समाप्य पितृब्राह्मणपात्राभिमन्त्रणं अङ्गुष्ठनिवेशनं तिलविकिरणम्। सिद्धान्नविकिरणं कृत्वा अमुकगोत्र मत्पितरमुक प्रेत एतत्ते अन्नं सघृतं मयानीयं मध्यन्नं प्रतिपिण्डवर्जितं ये चात्र त्वामनु यांत्र त्वमनु तस्मै ते स्वधा। ततो देवप्रभृति आशीर्वादं दद्यात्। अतिथौ प्राप्ते अतिथिश्राद्धं कुर्य्यात् अस्मिन्नवसरे। ततो विकिरणम्। पितामहादौ प्रश्नं कृत्वा पितृब्राह्मण ॐ स्वदितं भवद्भिरिति प्रश्नः अमुकगोत्र मत्पितामह अमुकशर्म्मन् सपत्नीक एष ते पिण्डो ये चात्र त्वामनु यांत्र त्वमनु तस्मै ते स्वधा। एवमन्ययोः। पिण्डदानमच्छिद्रमस्तु। सङ्कल्पसिद्धिरस्तु इति वाचनं कृत्वा ततः पितृप्रेतपिण्डपातनं ॐ संकल्पसिद्धिरस्त्विति वाचनम्। तंसमाप्य पिण्डं त्रिधा कृत्वा ये समानाः समनसः इति मन्त्रद्वयं पठित्वा पितामहप्रपितामहवृद्धप्रपितामहपिण्डेषु क्षिपेत्। पिण्डेषु गन्धादिकं पिण्डचालनम्। अतिथिब्राह्मणे स्वदितमित्यादि प्रश्नः। ब्राह्मणानामाचमन भुक्तक्रमेण ताम्बूलदानं मुखप्रोक्षितमस्तु शिवा आपः सन्तु इत्यन्तं प्रपितामहादिक्रमेण ब्राह्मणानां हस्ते जलदानम्। गोत्रस्याक्षय्यमस्तु पितृब्राह्मणहस्ते ॐ उपतिष्ठतामिति सतिलजलदानं नामगोत्रेण उपतिष्ठतामिति तेनोक्ते अघोराः पितरः सन्तु सन्त्विति उक्ते स्वधां वाचयिष्ये इति पितामहादिब्राह्मणानुज्ञापनम् ॐ वाच्यतामित्युक्ते पितामहादिभ्यः स्वधोच्यतां अस्तु स्वधा इत्युक्ते पितृब्राह्मणे पितृभ्यः स्वधोच्यतां इति अस्तु स्वधा इत्युक्ते ॐ ऊर्ज्जं वहन्तीरमृतं इति दक्षिणाभिमुखधारिधारात्यागः। ॐ विश्वे देवा अस्मिन् यज्ञे प्रीयन्तामिति देवब्राह्मणहस्ते यवोदकदानम्। ॐ देवताभ्य इति विसर्ज्जनः। पिण्डान् पात्रे तोलयित्वा आचम्य पितामहादिभ्यो दक्षिणां दत्त्वा ततः पितृब्राह्मणाय ततो अतिथिब्राह्मणाय च। आशिषो मे दीयन्तामित्याशीःप्रार्थनं आशिषः प्रतिगृह्यन्तां इत्युक्ते दातारो नोऽभिवर्द्धन्तामिति पात्रमुत्तानं कृत्वा वाजे वाजे इति विसर्ज्जनम्। अभिरम्यतामिति पितृब्राह्मणविसर्जनम्।

सपिण्डीकरणश्राद्धं व्यासप्रोक्तं मया तव।
श्राद्धं विष्णुः श्राद्धकर्त्ता फलं श्राद्धादिकं हरिः॥"

इति गारुड़े २२४ अध्यायः ॥*॥

तिथ्यादिविशेषे श्राद्धकरणफलं यथा,—

व्यास उवाच।

"अथ श्राद्धमावास्यां प्राप्य कार्य्यं द्विजोत्तमैः।
पिण्डान्नाहार्य्यकं भक्तभुक्तिमुक्तिफलप्रदम्॥
पिण्डान्नाहार्य्यकं श्राद्धं चौणे राजनि शस्यते।
अपराह्णे द्विजातीनां प्रशस्ते नाभिषेण तु॥
प्रतिपत्प्रभृति ह्येतास्तिथयः कृष्णपक्षके।
चतुर्द्दशीं वर्জ्जयित्वा प्रशस्ता ह्युत्तरोत्तराः॥
अमावास्याष्टकास्तिस्रः पौषमाघादिषु त्रिषु।
तिस्रश्चान्वष्टकाः पुण्या माघस्य दशमी तथा॥
त्रयोदशी मघायुक्ता वर्षासु तु विशेषतः।
शस्यपाकश्राद्धकाला नित्यं प्रोक्ता दिने दिने॥
नैमित्तिकं हि कर्त्तव्यं ग्रहणे चन्द्रसूर्य्ययोः।
बान्धवानाञ्च मरणे नारकी स्यादथान्यथा॥
काम्यानि चैव श्राद्धानि शस्यन्ति ग्रहणादिषु।
अयने विषुवे चैव व्यतीपातेऽप्यनन्तकम्॥
संक्रान्त्यामक्षयं श्राद्धं तथा जन्मदिनेष्वपि।
नक्षत्रेषु च सर्व्वेषु तथा कामि विशेषतः॥
स्वर्गन्तु लभते कृत्वा कृत्तिकासु द्विजोत्तमः।
अपत्यमथ रोहिण्यां सौम्ये तु ब्रह्मवर्च्चसम्॥
मृद्राद्धां कर्म्मणां सिद्धिमार्द्रायां शस्यमेव च।
पुनर्व्वसौ तथा भूमिं श्रियं पुष्ये तथैव च॥
सर्व्वान् कामान् तथा सर्पे पैत्रे सौभाग्यमेव च।
अर्य्यम्णे तु धनं विद्यात् फाल्गुन्यां पापनाशनम्॥
प्राप्तिश्रेष्ठं तथा हस्ते चित्रायां सुबहून् सुतान्।
वाणिज्यसिद्धिं स्वातौ च विशाखायां सुवर्णकम्॥
मैत्रे वह्निं मित्रभे राज्यं शक्रे तथैव च।
मूले ऋषिं लभेद्याने सिद्धिमाप्ये तथैव च॥
सर्व्वान् कामान् वैश्वदेवे श्रैष्ठन्तु श्रवणे पुनः।
श्रविष्ठायां तथा कामान् वारुणेच परं बलम्॥
अजैकपादके कुर्य्यादहिब्रध्ने गृहं शुभम्।
रेवत्यां बहवो रोगा अश्विन्यां तुरगांस्तथा॥
याम्ये चाजीवनं तस्मात् यदि श्राद्धं प्रयच्छति।
आदित्यवारे चारोग्यं चान्द्रे सौभाग्यमेव च॥
कौजे सर्व्वत्र विजयं सर्व्वान् कामान् बुधस्य च।
विद्यामभीष्टं जीवे तु धनं वै भार्गवे पुनः।
शनैश्चरे लभेदायुः प्रतिपत्सु शुभान् सुतान्।
कन्यकां वै द्वितीयायां तृतीयायां भवेत्तथा॥
पशून् सुद्वांश्चतुर्थ्यान्तु पञ्चम्यां शोभनान् सुतान्।
षष्ठ्यां द्युतिं क्षत्रियापि सप्तम्यां लभते नरः॥
अष्टम्यामपि वाणिज्यं लभते श्राद्धदः सदा।
स्यात्रवम्यामेकशुरं दशम्यां हिशुरं बहु॥
एकादश्यान्तथा रूप्यं ब्रह्मवर्च्चसिनः सुतान्
द्वादश्यां जातरूपन्तु रजतं रौप्यमेव च॥
त्रातिश्रेष्ठं त्रयोदश्यां चतुर्द्दश्यान्तु कुप्रजाः
पञ्चदश्यां सर्व्वकाममाप्नोति श्राद्धदः सदा॥
तस्माच्छ्राद्धं न कर्त्तव्यं चतुर्द्दश्यां द्विजातिभिः।
शस्त्रेण च हतानां वै तत्र श्राद्धं प्रकल्पयेत्॥
द्रव्यब्राह्मणसम्पत्तौ न कालनियमः कृतः।
तस्माद्योगापवर्गार्थं श्राद्धं कुर्य्यात् द्विजातिभिः॥
कर्म्मारम्भेषु सर्व्वेषु कुर्य्यादाभ्युदयं पुनः।
पुत्रजन्मादिषु श्राद्धं पार्व्वणं पर्व्वणि स्मृतम्॥
अहन्यहनि नित्यं स्यात् काम्यं नैमित्तिकं तथा
एकोद्दिष्टन्तु विज्ञेयं वृद्धिश्राद्धञ्च पार्व्वणम्॥
एतत् पञ्चविधं श्राद्धं मनुना परिकीर्त्तितम्।
यात्रायां षष्ठमाख्यातं तत् प्रयत्नेन पालयेत्॥
शुद्धये सप्तमं श्राद्धं ब्रह्मणा परिकीर्त्तितम्।
दैविकं चाष्टमं श्राद्धं यत् कृत्वा मुच्यते भयात्॥
मध्यारात्रोर्न कर्त्तव्यं रात्रौरन्यत्र दर्शनात्।
देशानाञ्च विशेषेण भवेत् पुण्यमनुत्तमम्॥
गयायामक्षयं श्राद्धं प्रयागेऽमरकण्टके।
गायन्ति पितरो गाथां कीर्त्तयन्ति मनीषिणः॥
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्।
यजेत् वाश्वमेधेन नीलं वा वृषमुत्सृजेत्॥
एष्टव्या बहवः पुत्राः शीलवन्तो गुणान्विताः।
तेषान्तु समवेतानां यद्येकोऽपि गयां व्रजेत्॥
गयां प्राप्यानुषङ्गेण यः श्राद्धं सम्यगाचरेत्।
तारिताः पितरस्तेन स याति परमां गतिम्॥
वराहपर्व्वते चैव गङ्गायाञ्च विशेषतः।
वाराणस्यां विशेषेण यत्र देवः स्वयं हरः॥
गङ्गाद्वारे प्रभासे च विन्ध्यके नीलपर्व्वते।
कुरुक्षेत्रे च कुब्जाम्रे भृङ्गतुङ्गे महालये॥
केदारे फल्गुतीर्थे च नैमिषारण्य एव च।
सरस्वत्यां विशेषेण पुष्करे च विशेषतः॥
नर्म्मदायां कुशावर्त्ते श्रीशैले भद्रकर्णके।
वेत्रवत्यां विपाशायां गोदावर्य्यां विशेषतः॥
एवमादिष्वन्येषु तीर्थेषु पुलिनेषु च।
नदीनाञ्चैव तीरेषु तुष्यन्ति पितरः सदा॥*॥
व्रीहिभिर्य्व यवैर्माषैरद्भिर्म्मूलफलेन च।
श्यामकैर्व तथा श्याकैर्नीवारैश्च प्रियङ्गुभिः॥
गोधूमैश्च तिलैर्म्मुद्गैर्मासं प्रीणयते पितॄन्।
आम्रानाम्रातकानिक्षून् सहोकांश्च सदाडिमान्।
विदारीञ्च भरुखांश्च श्राद्धकाले प्रदापयेत्।
लाजमाषयुतान्दद्यात् शक्तून् शर्करया सह
दद्याच्छ्राद्धं प्रयत्नेन शृङ्गाटककशेरुकान्।
द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु।
औरभ्रेण अथ चतुरः शाकुनेन तु पञ्च च॥
षण्मासान् छागमांसेन पार्षतेनाथ सप्त वै।
अष्टावेवस्य मांसेन रौरवेण नवैव तु॥
दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः।

गव्यकूष्माण्डयोस्तु मांसेन मासानेकादशैव तु ॥
संवत्सरन्तु गव्येन पयसा पायसेन वा ।
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥
कालशाकं महाशल्कं खड्गिनोऽप्यामिषं मधु ।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्व्वशः ॥
क्रीत्वा लब्ध्वा स्वयंवाथ मृतानाहृत्य वै द्विजः ।
दद्यात् श्राद्धं प्रयत्नेन यदस्याक्षयमुच्यते ॥*॥
पिप्पलिं शिग्रुकञ्चैव तथा चैव मसूरकम् ॥
कुष्माण्डालाबुवार्त्ताकान् भूस्तृणं सूरसं तथा ।
कुसुम्भं पिण्डमूलं वै तण्डुलीयकमेव च ॥
राजमाषांस्तथा क्षौद्रं माक्षिकञ्च विवर्जयेत् ।
कोद्रवान् कोविदारांश्च पालङ्कीं मरिचं तथा ।
वर्जयेत् सर्व्वयत्नेन श्राद्धस्थाने द्विजोत्तमः ॥"

इति कौर्म्मे उपविभागे १९ अध्यायः ॥

व्यास उवाच ।

"स्नात्वा यथोक्तं संतर्प्य पितॄन् चन्द्रक्षये द्विजः ।
पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यात् सौम्यमनाः शुचिः ॥
पूर्व्वमेव परीक्षेत ब्राह्मणं वेदपारगम् ।
तीर्थं तदन्यकार्य्याणां प्रदाने वातिथिः स्मृतः ॥
ये मोमपा विरजसो धर्म्मज्ञाः शान्तचेतसः ।
व्रतिनो नियमस्थाश्च ऋतुकालाभिगामिनः ॥
पञ्चाग्निरग्र्यधीयानो यजुर्व्वेदविदेव च ।
सुबह्वृक् च त्रिषवणस्त्रिमधुर्व्वाथ यो भवेत् ॥
त्रिणाचिकेतस्त्रिसुपर्णोऽथ ज्येष्ठसाम एव च ।
अथर्व्वशिरसोऽध्येता रुद्राध्यायी विशेषतः ॥
अग्निहोत्रपरो विद्वान् न्यायविच्च षडङ्गवित् ।
मन्त्रब्राह्मणविच्चैव यश्च स्याद्धर्म्मपाठकः ।
ऋषिव्रतो ऋषिकल्पस्तथा द्वादशवार्षिकः ॥
ब्रह्मदेयार्थसन्तानो गर्भगुह्यः सहस्रदः ।
चान्द्रायणव्रतचरः सत्यवादी पुराणवित् ।
गुरुदेवाग्निपूजासु प्रसक्तो ज्ञानतत्परः ॥
विमुक्तः सर्व्वतो धीरो ब्रह्मभूतो द्विजोत्तमः ।
महादेवार्च्चनरतो वैष्णवः पंक्तिपावनः ॥
अहिंसानिरतो नित्यमप्रतिग्राहकस्तथा ।
शुचिर्दानरता विप्रा ज्ञेयाः पंक्तिपावनाः ॥
मातापित्रोर्हिते युक्तः प्रातःस्नायी च वा द्विजः ।
अध्यात्मविन्निर्हान्तो विज्ञेयः पंक्तिपावनः ॥
ज्ञाननिष्ठो महायोगी वेदान्तार्थविचिन्तकः ।
अद्रोहकृत् श्राद्धनिरतो ब्राह्मणः पंक्तिपावनः ॥
वेदविद्याव्रतस्नातो ब्रह्मचर्य्यापरः सदा ।
आथर्व्वणो सुमुखश्च ब्राह्मणः पंक्तिपावनः ॥
असमानप्रवरको ह्यसगोत्रस्तथैव च ।
असम्बन्धी च विज्ञेयाः ब्राह्मणाः पंक्तिपावनाः ॥
भोजयेद्योगिनं पूर्व्वं तत्त्वज्ञानरतिं यतिम् ।
अलाभे नैष्ठिकं दान्तमुपकुर्व्वाणकं तथा ॥
तदलाभे गृहस्थं वा मुमुक्षुं सङ्गवर्ज्जितम् ।
तदप्यलाभे साधकं वा गृहस्थमपि भोजयेत् ॥
प्रकृतेर्गुणतत्त्वज्ञो यस्याश्राति यतिर्हविः ।
फलं वेदविदां तस्य सहस्रादतिरिच्यते ॥
तस्मात् यत्नेन योगीन्द्रमीश्वरज्ञानतत्परम् ।
भोजयेच्छ्राद्धकार्य्येषु त्वलाभे क्षितरान् द्विजान् ॥
एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः ।
अतः कल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः ॥*॥
मातामहं मातुलञ्च स्वसीयं श्वशुरं गुरुम् ।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् ॥ * ॥
न श्राद्धे भोजयेन्नित्यं धनैः कार्य्योऽस्य संग्रहः ।
पैत्र्याची दक्षिणा सा हि नैवामुत्र फलप्रदा ॥
कामं श्राद्धेऽर्चयेन्नित्यं नाभिरूपमपि त्वरिम् ।
हविषा हि हविर्भुक्तं भवति प्रेत्य निष्फलम् ॥
ब्राह्मणस्वजनधीयानस्तृणाग्निरिव शाम्यति ।
तस्मै हव्यं न दातव्यं न च भस्मनि हूयते ॥
यथोषरे बीजमुप्त्वा न वप्ता लभते फलम् ।
तथानृचे हविर्दत्त्वा न दाता लभते फलम् ॥
यावतो ग्रसते पिण्डान् हव्यकव्येष्वमन्त्रवित् ।
तावतो ग्रसते प्रेत्य दीप्तान् शूलदृशोगुडान् ॥
अपि विद्याकुलैर्युक्ता हीनवृत्ता नराधमाः ।
यत्रैते भुञ्जते हव्यं तद्गवेदासुरं द्विजाः ॥
यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम् ।
एष ब्रह्मद्विषो नार्हः श्राद्धादिषु कदाचन ॥
शूद्रप्रेष्यो भृतो राज्ञा हयलग्रामयाजकः ।
वधबन्धोपजीवी च षड्ढते ब्रह्मबन्धवः ॥
दत्तात्मयोगो हरार्थं पतिताग्न्युद्वहावुत् ।
वेदविक्रयिणो ह्येते श्राद्धादिषु विगर्हिताः ॥
स्मृतिविक्रयिणो ये तु परपूर्व्वासमुद्भवाः ।
अधमान् ये याजयन्ति पतितास्ते प्रकीर्त्तिताः ॥
असंस्कृताध्यापका ये भृत्यर्थेऽध्यापयन्ति ये ।
अधीयते तथा वेदान् पतितास्ते प्रकीर्त्तिताः ॥
वृक्षत्यावकनिर्य्यासाः पशुरात्मविदो जनाः ।
कापालिकाः पाशुपताः पाषण्डा ये च तद्विधाः ॥
यस्यान्नमिह दुर्बोद्धे दुरात्मानस्तु तामसाः ।
न तस्य तद्भवेच्छ्राद्धं प्रेत्य चेह फलप्रदम् ॥
अनाश्रमी यो द्विजः स्यादाश्रमी वा निरर्थकः ।
मिथ्याश्रमी च ये विप्रा विज्ञेयाः पंक्तिदूषकाः ॥
दुष्कर्म्मा कुनखी कुष्ठी श्वित्री च श्यावदन्तकः ।
विद्यमाननखश्चैव क्लीवोऽथ नास्तिकः ॥
मद्यपो हयलीसक्तो वीरहा दिधिषूपतिः ।
अगारदाही कुण्डाशी सोमविक्रयिणो द्विजाः ॥
परिवेत्ता तथा हिंसाः परिवित्तिर्निराकृतिः ।
पौनर्भवः कुशीदी च तथा नक्षत्रदर्शकः ॥
गीतवादित्रनिरतो व्याधितः काण एव च ।
हीनाङ्गश्चातिरिक्ताङ्गो श्रवकीर्णी तथैव च ॥
कन्यादूषी कुण्डगोलौ श्वभिश्वस्तोऽथ देवलः ।
मित्रध्रुक् पिशुनश्चैव नित्यं भार्य्यानुवर्त्तकः ॥
मातापित्रोर्गुरोस्त्यागी दारत्यागी तथैव च ।
सोत्रभिद्भ्रष्टशौचश्च काण्डपृष्ठस्तथैव च ॥
अनपत्यः कूटसाक्षी याचको रङ्गजीवनः ।
समुद्रयायी कितवस्तथा समयभेदकः ॥
वेदनिन्दापरश्चैव परदाररतास्तथा ।
द्विजनिन्दारतश्चैव वर्ज्याः श्राद्धादिकर्म्मसु ॥
कृतघ्नः पिशुनः क्रूरो नास्तिको वेदनिन्दकः ।
मित्रध्रुक् कुण्डकर्त्ता च विज्ञेयाः पंक्तिदूषकाः ॥
सर्वे पुनरभोज्यान्नास्तादागार्हा हि कर्म्मसु ।
ब्राह्मभावाभिरस्याय वर्ज्जनीयाः प्रयत्नतः ॥
शूद्रान्नरसपुष्टाङ्गः मन्त्रोपासनवर्ज्जितः ।
महायज्ञविहीनश्च ब्राह्मणः पंक्तिदूषकः ॥
अधीतनाशनश्चैव ज्ञानहोमविवर्ज्जितः ।
तामसो राजसश्चैव ब्राह्मणः पंक्तिदूषकः ॥
बहुनात्र किमुक्तेन विहितान् ये न कुर्वते ।
निन्दितानाचरन्त्येव वर्ज्जनीयाः प्रयत्नतः ॥"

इति कौर्म्मे उपविभागे २० अध्यायः ॥ * ॥

"गोमयेनोदकैर्भूमिं शोधयित्वा समाहितः ।
सन्निपात्र द्विजान् सर्व्वान् साधुभिः सन्निमन्त्रयेत् ॥
श्वो भविष्यति मे श्राद्धं पूर्व्वेद्युरभिपूज्य च ।
असम्भवे परेद्युर्व्वा यथोक्तलक्षणैर्गुणैः ॥
तस्य ते पितरः श्रुत्वा श्राद्धकालमुपस्थितम् ।
अन्योन्यमनसा ध्यात्वा सम्पतन्ति मनोजवाः ॥
ब्राह्मणैस्ते सहाश्नन्ति पितरो ह्यन्तरौचसः ।
वायुभूताश्च तिष्ठन्ति भुक्ता यान्ति परां गतिम् ॥
आमन्त्रिताश्च ते विप्राः श्राद्धकालं उपस्थिते ।
वसेयुर्नियताः सर्वे ब्रह्मचर्य्यपरायणाः ॥
अक्रोधनोऽत्वरोऽमत्तः सत्यवादी समाहितः ।
भारं मैथुनमध्वानं श्राद्धकृद्वर्जयेत्क्षपम् ॥
आमन्त्रितो ब्राह्मणो यः अन्यं वै कुरुते क्षपम् ।
स याति रौरवं घोरं शूकरत्वं प्रयाति च ॥
आमन्त्रयित्वा यो मोहादपरं मन्त्रयेत् द्विजम् ।
स तस्मादधिकः पापी विष्ठाकीटोऽभिजायते ॥
श्राद्धे निमन्त्रितो विप्रो मैथुनं योऽधिगच्छति ।
ब्रह्महत्यामवाप्नोति तिर्य्यग्योनौ स गच्छति ॥
श्राद्धं कृत्वा तु भुक्त्वा च योऽध्वानं प्रतिपद्यते ।
भवन्ति पितरस्तस्य तस्मासं पांशुभोजनाः ॥
निमन्त्रितस्तु यः श्राद्धे प्रकुर्य्यात् कलहं द्विजः ।
भवन्ति तस्य तस्मासं पितरो मलभोजनाः ॥
तस्मान्निमन्त्रितः श्राद्धे नियतात्मा भवेत् द्विजः ।
अक्रोधनः शौचपरः कर्त्ता चैव जितेन्द्रियः ॥
क्षीभूते दक्षिणां गत्वा दिशं दर्भान् समाहितः ।
समूलानाहरेदपि दक्षिणाग्रान् सुनिर्म्मलान् ॥
दक्षिणाग्रवनं स्निग्धं विविक्तं शुभलक्षणम् ।
शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत् ॥
नदीतीरेषु तीर्थेषु स्वभूमौ चैव सानुषु ।
विविक्तेषु च तुष्यन्ति दत्ते च पितरः सदा ॥
पारक्ये भूमिभागे तु पितॄणां नैव निर्वपेत् ।
स्वामिभिस्तद्धि दत्तेऽपि मोहात् यत् क्रियते नरैः ॥
अटव्यः पर्व्वताः पुण्यास्तीर्थान्यायतनानि च ।
सर्व्वास्वस्वामिकान्याहुर्न हि तेषु परिग्रहः ॥
तिलानवकिरेत्तत्र सर्वतो वन्यवेदजान् ।
असुरोपहतं सर्व्वं तिलैः शुध्यत्यसंशयम् ॥
ततोऽन्नं बहुसंस्कारं नैलक्ष्यञ्जनमद्भुतम् ।
घोषपेयसमृद्धञ्च यथाशक्त्या प्रकल्पयेत् ॥
ततो निहत्ते मध्याह्ने न्युप्तलोमनखान् द्विजान् ।
अभिगम्य यथामार्गं प्रयच्छेदुत्तमासनम् ॥
तैलमभ्यञ्जनं स्नानं स्नानीयञ्च पृथग्विधम् ।
पादैरौदुम्बरैः कुर्य्यात् वैष्णवैवत्यपूर्वकम् ॥
ततः स्नात्वा विहत्तेभ्यः प्रत्युत्थाय कृताञ्जलिः ।

पात्रमाचमनीयञ्च संप्रयच्छेदयथाक्रमम् ॥"
पुस्तकान्तरे विश्वेभ्यः स्थाने निमित्तेभ्य इति निमित्तेभ्य इति च पाठः ॥
"ये चात्र विश्वदेवानां द्विजाः पूर्व्वं निमन्त्रिताः।
प्राङ्मुखान्यासनान्येषां द्विदर्भोपचितानि च ॥
दक्षिणामुखयुक्तानि पितृणामासनानि च।
दक्षिणायैकदर्भेषु प्रोक्षितानि तिलोदकैः ॥
तेषूपवेशयेदेतानासनं संस्पृशन् द्विजः।
आसध्वमिति संजल्पवासीरंस्ते पृथक् पृथक् ॥
द्वौ दैवे प्राङ्मुखौ पित्र्ये त्रयोदङ्मुखास्तथा।
एकैकं वा भवेत्तत्र देवमातामहेष्वपि ॥
सत्क्रियां देशकालौ च शौचं ब्राह्मणसम्पदम्।
पञ्चैतान् विस्तरो हन्ति तस्मात्तेहेत विस्तरम् ॥
अपि वा योजयेदेकं ब्राह्मणं वेदपारगम्।
श्रुतशीलादिसम्पन्नमसत्तमविवर्जितम् ॥
उद्धृत्य पात्रे चान्नं तत् सर्वस्मात् प्राक्कृतात् पुनः।
देवतायतने तस्मै निवेद्यान्नं प्रवर्त्तयेत् ॥
प्राग्वेदग्नौ तदन्नन्तु दद्याद्वा ब्रह्मचारिणे।
तस्मादेकमपि श्रेष्ठं विद्वांसं भोजयेत् द्विजम् ॥
भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थितः।
उपविष्टेषु यः श्राद्धे कामं तमपि भोजयेत् ॥
अतिथिर्यस्य नाश्नाति न तत् श्राद्धं प्रशस्यते।
तस्मात् प्रयत्नात् श्राद्धेषु पूज्या ह्यतिथयो द्विजैः ॥
आतिथ्यरहितश्राद्धे भुञ्जते ये द्विजातयः।
काकयोनिं व्रजन्त्येते दाता चैव न संशयः ॥
हीनाङ्गः पतितः कुष्ठी व्रणी पूतिसनास्तिकौ।
कुकुटा शूकराः श्वानौ वर्ज्याः श्राद्धेषु दूरतः ॥
वीभत्सममृचिं नग्नं मत्तं धूर्त्तं रजस्वलाम्।
नीलकाषायवसनं पाषण्डांश्च विवर्जयेत् ॥
यत्तत्र क्रियते कर्म्म पैतृकं ब्राह्मणान् प्रति।
तत् सर्वमेव कर्त्तव्यं वैश्वदेवकपूर्व्वकम् ॥
यथोपदिष्टान् सर्व्वांस्तानलं कुर्य्याद्विभूषणैः।
संगृह्यामभिः शिरोवेष्टिधूपवासोऽनुलेपनैः ॥
ततस्त्वावाहयेद्देवान् ब्राह्मणानामनुज्ञया।
उदङ्मुखो यथान्यायं विश्वेदेवास इत्यृचा ॥
हे पवित्रे गृहीत्वा च भाजने चालिते पुनः।
अग्नौ देव्या जलं क्षिप्त्वा यवोऽसीति यवांस्तथा
या दिव्या इति मन्त्रेण हस्ते त्वर्घ्यं निवेदयेत्।
प्रदद्याद्गन्धमाल्यानि धूपादीनि च शक्तितः ॥
अपसव्यं ततः कृत्वा पितृणां दक्षिणामुखः।
आवाहनं ततः कुर्य्यात् उशन्तस्त्वेत्यृचा बुधः ॥
आवाह्य तदनुज्ञातो जपेदायान्तु नस्ततः।
अग्नौ देव्योदकं पात्रे तिलोऽसीतितिलां स्त्रुवा
क्षिप्त्वा चार्घ्यं यथापूर्वं दत्त्वा हस्तेषु वै पुनः।
संस्रवांश्च ततः सर्व्वान् पात्रे कुर्य्यात् समाहितः ॥
"पित्र्येभ्यः स्थानमेतेन न्युब्जं पात्रं निधाय तु।
अग्नौ करिष्येत्यादाय पृच्छत्यन्नं हुतभुजम् ॥
कुरुष्वेति ह्यनुज्ञातो जुहुयादुपवीतवत्।
यज्ञोपवीतिना होमः कर्त्तव्यः कुशपाणिना।
प्राचीनावीतिना पित्र्यं वैश्वदेवन्तु होमयेत्।
दक्षिणं पातयेज्जानुं देवान् परिचरन् सदा ॥
पितॄणां परिचर्य्यासु पातयेदितरं तथा।
सोमाय वै पितृमते स्वधा नम इति ब्रुवन् ॥
अग्नये कव्यवाहनाय स्वधेति जुहुयात्ततः।
अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् ॥
महादेवान्तिके वाथ गोष्ठे वा सुसमाहितः।
ततस्तेरभ्यनुज्ञातो गत्वा वै दक्षिणां दिशम् ॥
गोमयेनोपलिप्योर्व्वीं स्थानं कृत्वा तु सैकतम्।
मण्डलं चतुरस्रं वा दक्षिणावनतं शुभम्।
त्रिरुल्लिखेत्तस्य मध्यं दर्भेणैकेन चैव हि ॥
ततः संस्तीर्य्य तत्स्थानं दर्भान् वै दक्षिणाग्रकान्।
त्रीन् पिण्डान् निर्व्वपेत्तत्र हविःशेषान् समाहितः ॥
न्युप्य पिण्डांस्तु तत्रस्तं निर्मृज्यान्नेपभागिनाम्।
तेषु दर्भेष्वथाचम्य त्रिरायम्य शनैः सून ॥
षड्पृतून्नमस्कुर्य्यात् पितॄनेव च मन्त्रवत्।
उदकं निनयेच्छेषं शनैः पिण्डान्तिके पुनः ॥
अवजिघ्रेषु तान् पिण्डान् यथाभ्युक्षान् समाहितः।
अथ पिण्डावशिष्टान्नं विधिना भोजयेद्द्विजान् ॥
मांसान् पुपांश्च विविधान् दद्यात् क्षीरपायसम्।
सूपशाकफलानीक्षून् पयो दधि घृतं मधु ॥
अन्नञ्चैव यथाकामं विविधं भक्ष्यपेयकम्।
यदुद्दिष्टं द्विजेन्द्राणां तत्तत्सर्व्वं निवेदयेत् ॥
धान्यांस्तिलांश्च विविधान् शर्करा विविधास्तथा
उष्णमन्नं द्विजातिभ्यो दातव्यं श्रेय इच्छता ॥
अन्यच्च फलमूलेभ्यः पानकेभ्यस्तथैव च।
नाप्नुणि पातयेज्जातु न कुप्येन्नानृतं वदेत् ॥
न पादेन स्पृशेदन्नं न चैतदवधूनयेत्।
क्रोधेन चैव यद्दत्तं यद्दत्तं त्वरया पुनः ॥
यातुधाना विलुम्पन्ति जल्पता चोपपादितम्।
खिन्नगात्रो न तिष्ठेत सन्निधौ च द्विजन्मनाम्
न चात्र श्येनकाकादीन् पक्षिणः प्रतिषेधयेत्।
न दद्यादन्न हस्तेन प्रत्यक्चलवणं तथा ॥
न चायसेन पात्रेण न चैवाश्रद्धया पुनः।
काञ्चनेन तु पात्रेण राजतोडुम्बरेण च ॥
दत्तमक्षयतां याति खाङ्गेन च विशेषतः।
पात्रे तु मृण्मये यो वै श्राद्धे भोजयते पितॄन् ॥
स याति नरकं घोरं भोक्ता चैव पुरोधसा।
न पंक्त्या विषमं दद्यात् न याचेन्न च दापयेत्
याचिता दापिता दाता नरकान् यान्ति दारुणान्।
भुञ्जीत वाग्यताः स्वृष्टा न ब्रूयुः प्राकृतान् गुणान् ॥
तावद्धि पितरोऽश्नन्ति यावन्नोक्ता हविर्गुणाः।
नाग्रासनोपविष्टस्तु भुञ्जीत प्रथमं द्विजः ॥
वह्निना पश्यतां सोऽन्नः पंक्त्या हरति किल्बिषम्।
न किञ्चिदर्ज्जयेच्छ्राद्धे नियुक्तस्तु द्विजोत्तमः ॥
न मांसं प्रतिषेधेत नवान्नस्त्रामपोक्षयेत्।
यो नाश्नाति द्विजो मांसं नियुक्तः पितृकर्म्मणि
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम् ॥
स्वाध्यायं श्रावयेदेषां धर्म्मशास्त्राणि चैव हि।
इतिहासपुराणानि श्राद्धकल्पांश्च शोभनान् ॥
ततोऽन्नमुत्सृजेद्भूम्यां विकिरन् भुवि।
सृष्ट्वा खादितमित्येवं क्षमानाचमयेत्ततः ॥
आचान्तानननुज्ञानोयादभितो रम्यतामिति।
स्वधास्त्विति च तं ब्रूयुर्ब्राह्मणास्तदनन्तरम् ॥
ततो भुक्तवतां तेषामन्नशेषं निवेदयेत्।
यथा ब्रूयुस्तथा कुर्य्यादनुज्ञातो द्विजोत्तमैः ॥
पित्र्यं खादितमित्येवं वाच्यं गोष्ठेषु सुस्थितम्।
सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि ॥
विसृज्य ब्राह्मणांस्तान् वै पिण्डपूर्व्वन्तु वाग्यतः।
दक्षिणां दिशमाकाङ्क्षन् याचेतेमान् वरान् पितॄन् ॥
दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च।
श्रद्धा च नो मा व्यगमद्बहु देयञ्च नोऽस्त्विति ॥
पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा
मध्यमन्तु ततः पिण्डमद्यात् पत्नी सुतार्थिनी
प्रक्षाल्य हस्तावाचम्य ज्ञातीन् शेषेण भोजयेत्
ज्ञातिष्वपि च भुक्तेषु स्वान् भृत्यान् भोजयेत्ततः।
पश्चात् स्वयञ्च पत्नीभिः शेषमन्नं समाहरेत्।
नोद्वासयेत्तदुच्छिष्टं यावन्नास्तं गतो रविः ॥
ब्रह्मचारी भवेत्तान्तु दम्पती रजनीन्तु ताम्।
दत्त्वा श्राद्धं तथा भुक्त्वा सेवते यस्तु मैथुनम् ॥
महारौरवमासाद्य कीटयोनिं व्रजेत् पुनः।
शुचिरक्रोधनः शान्तः सत्यवादी समाहितः ॥
स्वाध्यायञ्च तथाध्वानं कर्त्ता भोक्ता च वर्जयेत्॥
श्राद्धं कृत्वा परश्राद्धे भुञ्जते ये द्विजातयः।
महापातकिभिस्तुल्या यान्ति ते नरकान् बहून्
एष वोऽभिहितः सम्यक् श्राद्धकल्पः सनातनः।
अनेन वर्त्तयेन्नित्यमुदासीनोऽथ तत्त्ववित् ॥
अनग्निरध्वगो वापि तथैव व्यसनान्वितः।
आमश्राद्धं द्विजः कुर्य्यात् हृषलस्तु सदैवहि ॥
आमश्राद्धं यदा कुर्य्यात् विधिघ्नः श्रद्धयान्वितः
तेनान्नीकरणं कुर्य्यात् पिण्डांस्तेनैव निर्वपेत् ॥
योऽनेन विधिना श्राद्धं कुर्य्यात् संयतमानसः।
व्यपेतकल्मषो नित्यं यतीनां वर्त्तते पदम् ॥
तस्मात् सर्व्वप्रयत्नेन श्राद्धं कुर्य्यात् द्विजोत्तमः
आराधितो भवेदीशस्तेन सम्यक् सनातनः।
अपि मूलफलैर्व्वापि प्रकुर्व्वन्विधिनो द्विजः ॥
तिलोदकैस्तर्पयेद्धा पितॄन् स्नात्वा समाहितः।
न जीवत्पितृको दद्याद्दानमात्मं वा विधीयते।
येषां वापि पिता दद्यात्तेषाञ्चैके प्रचक्षते।
पितापितामहश्चैव तथैव प्रपितामहः ॥
यो यस्य म्रियते यस्मै देयं तस्मात्तु तेन तु।
भोजयेदापि जीवन्तं यथाकामन्तु भक्तितः ॥
न जीवन्तमतिक्रम्य ददाति श्रूयते श्रुतिः।
इहामुष्यायणिको दद्याद्दीजिश्चैत्रिकर्यो समम्॥
ऋक्थादर्द्धं समादद्यात् नियोगोत्पादितो द्विजः
अनियुक्तात् सुतो यस्तु शुक्लतो जायते द्विजैः ॥
प्रदद्याद्दीजिने पिण्डं क्षेत्रिणे तु ततोऽन्यथा।

द्वौ पिण्डौ निर्व्वपेत्ताभ्यां चेत्रिणे बोजिने तथा॥
कौर्त्तयेदथ चैकस्मिन् बोजिनं चेत्रिणं ततः।
मृताहनि तु कर्त्तव्यमेकोद्दिष्टं विधानतः॥
अशौचे स्ते परिचीणे काम्यं वै कामतस्ततः।
पूर्व्वाह्णे चैव कर्त्तव्यं श्राद्धमभ्युदयार्थिना॥
दैववत् सर्व्वमेव स्यात्र वै कार्य्या तिलक्रिया।
दर्भाश्च ऋजवः कार्य्या युग्मान् वै भोजयेत् द्विजान्॥
नान्दीमुखास्ते पितरः प्रीयन्तामिति वाचयेत्।
माटृश्राद्धन्तु पूर्वं स्यात् पितृणां स्यादनन्तरम्॥
ततो मातामहानाञ्च त्रयो श्राद्धत्रयं स्मृतम्।
देवपूर्व्वन्तु दत्ताहे न कुर्य्यादप्रदक्षिणम्॥
प्राङ्मुखो निर्व्वपेत् पिण्डानुपवीती समाहितः।
पूर्व्वं वै मातरः पूज्या भक्त्या चैव गणेश्वरः॥
स्थण्डिलेषु पवित्रेषु प्रतिमासु द्विजातिषु।
पुष्पैर्धूपैश्च नैवेद्यैर्गन्धार्घैर्भूषणैरपि॥
पूजयित्वा माटृगणान् कुर्य्यात् श्राद्धत्रयं बुधः।
भक्षत्वा माटृयागन्तु यः श्राद्धं परिवेशयेत्।
तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः॥"

इति कौर्म्मे उपविभागे २१ अध्यायः॥

मात्स्ये १६।१७।१८। अध्यायेषु चान्यत् द्रष्टव्यम्॥* श्राद्धे कदलीपत्रं निषिद्धं भोजनपात्रतया। इति हेमाद्रिव्याख्या श्राद्धखण्डे॥
न जातीकुसुमानि दद्यात् न कदलीपत्रम्।
इति क्रतुवचनम्॥* श्राद्धोत्तरनिषिद्धानि यथा,—
"यात्रा युद्धं नदीपारं मिथ्यालापो हिभोजनम्।
द्यूतक्रीड़ा दिवानिद्रा श्राद्धे सप्त विवर्ज्जयेत्॥"

इति कर्म्मलोचनम्॥

स्मृतिः।
द्यूतञ्च कलहञ्चैव सायंसन्ध्यां दिवाश्रयम्।
श्राद्धकर्त्ता च भोक्ता च पुनर्भुक्तञ्च वर्जयेत्॥"
अपि च। विष्णुपुराणम्।
"वर्ज्यानि कुर्व्वता श्राद्धं कोपोऽध्वगमनं त्वरा।
भोक्तुरप्यत्र राजेन्द्र वयमेतन्न शंसते॥"
राजमार्त्तण्डे।
"पुनर्भोजनमध्वानं द्युताध्ययनमैथुनम्।
दानं प्रतिग्रहं सन्ध्यां श्राद्धं कृत्वाष्ट वर्जयेत्॥"
नव्यवर्द्धमानधृता स्मृतिः।
"पुनर्भोजनमध्वानं भाराध्ययनमैथुनम्।
दानं सन्ध्यां पुनः स्नानं श्राद्धं कृत्वाष्ट वर्जयेत्॥"

इति श्राद्धतत्त्वम्॥

अथ वैष्णवश्राद्धविधिः।
"प्राप्ते श्राद्धदिनेऽपि प्रागन्नं भागवतेऽर्पयेत्।
तच्छेषेणैव कुर्व्वीत श्राद्धं भागवतो नरः॥"
यज्ञ स्मृतौ।
"गृहाग्निग्निग्रुदेशानां यतीनां ब्रह्मचारिणाम्।
पिण्डपाकेन दातव्यो यावत् पिण्डान्न निर्व्वपेत्॥"

इति॥

"ईदृक् सामान्यवचनं विशेषवचनव्रजैः।
श्रुतिस्मृतिपुराणादिवर्त्तिभिर्व्वाध्यते ध्रुवम्॥"
तथा च पाद्मे।
"विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम्।
पितृभ्यश्चापि तद्देयं तदानन्त्याय कल्पते॥"
मोक्षधर्म्मे नारदीक्तौ।
"सात्वतं विधिमास्थाय प्राक् सूर्य्यमुखनिःसृतम्।
पूजयामास देवेशं तच्छेषेण पितामहान्॥"
ब्रह्माण्डपुराणे।
"यः श्राद्धकाले हरिभुक्तशेषं
ददाति भक्त्या पितृदेवतानाम्।
तेनैव पिण्डांस्तुलसीविमिश्रा-
नाकल्पकोटिं पितरः सुतृप्ताः॥"
स्कान्दे श्रीशिवोक्तौ।
"देवान् पितॄन् समुद्दिश्य यद्विष्णोर्विनिवेदितम्।
तानुद्दिश्य ततः कुर्य्यात् प्रदानं तस्य चैव हि॥
प्रयान्ति तृप्तिमतुलां सोदकेन तु तेन वै।
मुकुन्दगात्रलग्नेन ब्राह्मणानां विलेपनम्॥
चन्दनेन तु पिण्डानां कर्त्तव्यं पिण्डतृप्तये।
देवानाञ्च पितॄणाञ्च जायते तृप्तिरक्षया॥
एवं कृते महीपाल मा भवेत् संशयः क्वचित्॥"
तत्रैव श्रीपुरोषोत्तमखण्डे।
"अन्नाद्यं श्राद्धकाले तु पतितादैर्निरीक्षितम्।
तुलसीदलमिश्रेण सलिलेनाभिषिञ्चयेत्॥
तदन्नं शुद्धतामेति विष्णोर्नैवेद्यमिश्रितम्।
विष्णोर्नैवेद्यशेषन्तु तस्माद्देयं द्विजन्मना।
पिण्डे चैव विशेषेण पितॄणां तृप्तिमिच्छता॥"
तत्रैव श्रीब्रह्मनारदसंवादे।
"पितॄनुद्दिश्य यैः पूजा केशवस्य कृता नरैः।
त्यक्त्वा ते नारकीं पीड़ां मुक्तिं यान्ति महामुने॥
धन्यास्ते मानवा लोके कलिकाले विशेषतः।
ये कुर्व्वन्ति हरेर्नित्यं पित्रर्थं पूजनं मुने॥
किं दत्तैर्ब्बहुभिः पिण्डैर्गयाश्राद्धादिभिर्मुने॥
यैरर्च्चितो हरिर्भक्त्या पित्रर्थञ्च दिने दिने॥
यमुद्दिश्य हरेः पूजा क्रियते मुनिपुङ्गव॥
उद्धृत्य नरकावासात्तं नयेत् परमं पदम्॥
यो ददाति हरेः स्नानं पितॄनुद्दिश्य नारद।
कर्त्तव्यं हि पितॄणां यत्तत् कृतं तेन भो द्विज॥"*
श्रुतौ च। एक एव नारायण आसीत् न ब्रह्मा नेमे द्यावापृथिवी सर्व्वे देवाः सर्व्वे पितरः सर्व्वे मनुष्याः विष्णुना अग्रितमग्रति विष्णुना घ्रातं जिघ्रन्ति विष्णुना पीतं पिबन्ति तस्माद्विद्वांसो विष्णूपहृतं भक्षयेयुरिति। अतएवोक्तं श्रीभगवता विष्णुधर्म्मे।
"प्राणेभ्यो जुहुयादन्नं मन्त्रिवेदितमुत्तमम्।
तृप्यन्ति सर्व्वदा प्राणा मन्त्रिवेदितभक्षणात्॥
तस्मात् सर्व्वप्रयत्नेन प्रदेयं मन्त्रिवेदितम्।
ममापि हृदयस्थस्य पितॄणाञ्च विशेषतः॥"
किञ्च तत्रैवान्यत्र।
"भक्ष्यं भोज्यञ्च यत्किञ्चिदनिवेद्याग्रभोक्तरि।
न देयं पितृदेवेभ्यः प्रायश्चित्ती यतो भवेत्॥
सर्गादौ कथितो देवैरग्रभुक् भगवान् हरिः।
यज्ञभागभुजो देवा ततस्तेन प्रकल्पिताः॥"

इति श्रीहरिभक्तिविलासे ८ विलासः॥*॥

अथोपवासदिने श्राद्धनिषेधः। पाद्मे पुष्करखण्डम्।
"एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत्।
तद्दिने तु परित्यज्य द्वादश्यां श्राद्धमाचरेत्॥"
तत्रैवोत्तरखण्डे।
"एकादश्यान्तु प्राप्तायां मातापित्रोर्म्मृतेऽहनि
द्वादश्यां तत् प्रदातव्यं नोपवासदिने क्वचित्॥
गर्हितान्नं न चाश्नन्ति पितरश्च दिवौकसः॥"
स्कान्दे।
"एकादशी यदा नित्या श्राद्धं नैमित्तिकं भवेत्
उपवासं तदा कुर्य्यात् द्वादश्यां श्राद्धमाचरेत्॥"
ब्रह्मवैवर्त्ते।
"ये कुर्व्वन्ति महीपाल श्राद्धं त्वेकादशीदिने।
व्रतस्थे नरकं यान्ति दाता भोक्ता परेतकः॥"

इति श्रीहरिभक्तिविलासे १२ विलासः॥

श्राद्धं, त्रि, (श्रद्धा अस्त्यस्येति। श्रद्धा + "प्रज्ञा श्रद्धार्च्चाहस्तिभ्यो णः।" ५।२।२०१। इति णः।) श्रद्धासमन्वितम्। इति हेमचन्द्रः॥

श्राद्धकर्त्ता, [ऋ] त्रि, (करोतीति। कृ + तृच्। श्राद्धस्य कर्त्ता।) श्राद्धकारकः। यथा,—
"श्राद्धकर्त्ता च भोक्ता च पुनर्भुक्तञ्च वर्ज्जयेत्॥"

इति श्राद्धतत्त्वम्॥

श्राद्धदेवः, पुं, (श्राद्धस्य देवः।) यमः। इत्यमरः॥ (यथा, मार्कण्डेये। ८। १५६।
"श्राद्धदेवेन कथितं विश्वामित्रस्य चेष्टितम्॥")
स तु विवस्वतः संज्ञायां पत्न्यां जातः॥ मनुभेदः। इति पुराणम्॥ (यथा, मार्कण्डेये। १०६। ४।
"मनुर्वैवस्वतो ज्येष्ठः श्राद्धदेवः प्रजापतिः।
ततो यमो यमौ चैव यमलौ संबभूवतुः॥")

श्राद्धशाकं, क्लो, (श्राद्धे देयं शाकम्।) कालशाकम्। इति भावप्रकाशः॥

श्राद्धिकः, त्रि, (श्राद्धमनेन भुक्तमिति। श्राद्ध + "श्राद्धमनेन भुक्तमिनिठनौ।" ५। २। ८५। इति ठन्।) श्राद्धभोक्ता। इति सिद्धान्तकौमुदी॥ श्राद्धसम्बन्धिद्रव्यादि। यथा, याज्ञवल्क्यः।
"सन्ध्यागर्ज्जितनिर्घाते भूकम्पोल्कानिपातने।
समाप्य वेदं द्युनिशमारण्यकमधीत्य च॥
पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके।
ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च॥"

इति तिथ्यादितत्त्वम्॥

श्राद्धी, [न्] त्रि, श्राद्धभोक्ता। श्राद्ध + "श्राद्धमनेन भुक्तमिनिठनौ।" ५। २। ८५। इति सूत्रेण इनिः। इति सिद्धान्तकौमुदी॥

श्रान्तः, पुं, (श्रम + क्तः।) श्रान्तः। जितेन्द्रियः। इति हेमचन्द्रः॥ श्रमयुक्ते, त्रि। श्रम तपःखेदयोः इत्यस्मात् क्तप्रत्ययेन निष्पन्नः। यथा,—
"सखि मत्प्रार्थनार्थन्तु साधयन्तौ निरन्तरम्।
अतिश्रान्तासि सद्भावस्नेहयोरियमौचिती॥"

इति काव्यचन्द्रिका॥

श्रान्तसंवाहनं, क्ली, (श्रान्तस्य संवाहनम्।) श्रमान्वितस्य आसनादिप्रदानद्वारा श्रमोपशमनम्। इति केचित्॥

श्राम, तृ क मन्ते। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-सक०-सेट्।) अश्रयामत्। मन्त्रोऽभिमुखीकरणम्। गुप्तोक्तिरित्येके। इति दुर्गादासः॥

श्रामः, पुं, (श्रामयतीति। श्राम+अच्।) मासः। मखपः। कालः। इति मेदिनी॥

श्रामणेरः, पुं, जिनभिक्षुशिष्यः। तत्पर्य्यायः। चेलुकः२ प्रव्रजितः३ महापासकः४ गोमी५। इति त्रिकाण्डशेषः॥

श्रायः, पुं, (श्रि श्रये+"श्रिणीभुवोऽनुपसर्गे।" ३।३। २४। इति घञ्।) श्रयणम्। आश्रयः। इत्यमरः॥ (यथा, भट्टिः। ७। ३६।

"यात यूयं यमश्रायं दिशं नायेन दक्षिणाम्॥")

श्रौसम्बन्धिनि, त्रि। यथा। श्रीर्देवता अस्य श्रायं हविः। इति श्रीशब्दादण्प्रत्ययेन निष्पन्नमिति सिद्धान्तकौमुदी॥

श्रायसः, त्रि, (श्रेयस्+अण्। "देविकाशिंशपेति।" ७। ३। १। इति आदेरचः आत्।) श्रेयसि भवः। इति सिद्धान्तकौमुदी॥

श्रावः, पुं, श्रवणम्। श्रुधातोर्घञ्प्रत्ययेन निष्पन्नः। इक्ष्वाकुवंशीयनृपतिविशेषः। यथा, महाभारते। ३। २०१। ३।

"आर्द्रान्तु युवनाश्वस्तु श्रावस्तस्यात्मजोऽभवत्॥")

श्रावकः, पुं, (शृणोतीति। श्रु+ण्वुल्।) शाक्यमुनिशिष्यविशेषः। काकः। इति त्रिकाण्डशेषः॥ (श्रावयतीति। श्रु+णिच्+ण्वुल्। दूरध्वनिः। यथा, माघे। ११। १।

"प्रथिजगदुरकाकुश्रावकस्निग्धकण्ठाः परिणतिमिति रात्रेर्मागधा मागधाय॥")

श्रोतरि, त्रि। (यथा, पुराणम्।

"ऋग्वेदश्रावकं पैलं जग्राह विधिवद्द्विजम्। यजुर्वेदप्रवक्तारं वैशम्पायनमेव च॥")

श्रावणः, पुं, (श्रवणेनाचरति न तु कार्य्येषेति। श्रवण+अण्। पाषण्डः। इति मेदिनी॥ (श्रवणेन रक्षते इति। श्रवण+"शेषे।" ४। २। ८२। इत्यण्। शब्दः। इति कात्यिका॥) वैशाखादि-द्वादशमासान्तर्गत-चतुर्थ-मासः। श्रवणानक्षत्रयुक्ता पौर्णमासी श्रावणी सा यत्र मासि सः। (श्रवणा+अण्।) तत्पर्य्यायः। नभाः२ श्रावणिकः३। इत्यमरः॥ नभः४। इति शब्दरत्नावली। स च द्विविधः सौरचान्द्रश्च। कर्कटस्थरविको मासः सौरश्रावणः। कर्कटस्थरविप्रारभ्यशुक्लप्रतिपदादिदर्शान्तो मासश्चान्द्रश्रावणः। चान्द्रोऽपि द्विविधो मुख्यो गौणश्च। तत्र मुख्यचान्द्रश्रावणीयशुक्लप्रतिपदादिपौर्णमास्यन्तो मासो गौणचान्द्रः श्रावणः। मुख्यलक्षणं प्रागेवोक्तम्। इति मलमासतत्त्वम्॥ * ॥ तत्र जातफलम्।

"लोकप्रमिद्धो धनवान् वदान्यः सुहृत्कलत्रात्मजदासयुक्तः। आज्ञाकरो यस्य जनस्य सर्व्वे स श्रावणाख्ये सुतरां प्रसूतः॥"

अथ श्रावणकृत्यम्। तत्र देवीपुराणम्।

"सुप्ते जनार्द्दने कृष्णे पञ्चम्यां भवनाङ्गने। पूजयेन्नागमा देवीं सुहोविटपसंस्थिताम्॥" सुहो सिजहृदः।

"देवीं संपूज्य नत्वा च न सर्पभयमाप्नुयात्। पञ्चम्यां पूजयेन्नागाननन्ताद्यान् महोरगान्। क्षीरं सर्पिश्च नैवेद्यं देयं सर्पविषापहम्॥"

गारुडे।

"अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च। तथा कर्कोटकं नागं धृतराष्ट्रञ्च शङ्खकम्॥ कालीयं तक्षकञ्चापि पिङ्गलं मणिभद्रकम्। यजेत्तानसिताभ्राणान् दद्यान्नो दिवं व्रजेत्॥"

पुराणान्तरेऽपि।

अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः। कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः॥"

पाद्मे।

शेषः पद्मो महापद्मः कुलीरः शङ्खपालकः। वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः। ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ॥"

रत्नाकरे।

"पिचुमर्दस्य पत्राणि स्थापयेद्भवनोदरे। स्वयञ्चापि तदश्नीयात् ब्राह्मणानपि भोजयेत्॥" पिचुमर्दस्य निम्बस्य॥ * ॥ तत्र प्रयोगः। हरिशयनानन्तरं शौक्लचान्द्रेण श्रावणकृष्णनवम्यां कृतस्नानादिरुदङ्मुखः। अथ श्रावणे मासि कृष्णे पक्षे पञ्चम्यां तिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा सर्पभयाभावकामो मनसादेवीपूजामहं करिष्ये। इति सङ्कल्प्य क्षीरेक्षुवे पूजयेत्। तदभावे घटे जले वा व्यासादिकं ज्ञात्वा देवीमम्बेति ध्यात्वा मनसादेवि इहागच्छ इहावाह्य एतत् पाद्यं ॐ मनसादेव्यै नमः। इत्यनेन यथाशक्ति गन्धपुष्पधूपदीपनैवेद्यानि दद्यात्। ततोऽनन्तादीन् नागान् पूजयेत् तत्र क्षीरसर्पिर्नैवेद्यं प्रधानम्। अनन्तादिकं पाद्यादिभिः संपूज्य।

ॐ योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम्। पुष्यवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः॥"

इत्यनेन त्रिः पूजयेत्। एवं प्रणवादिनमोऽन्तेन स्वस्वनाम्ना पूजयेत्। ॐ वासुकये नमः। ॐ शङ्खाय नमः। ॐ कम्बलाय नमः। ॐ कर्कोटकाय नमः। ॐ शङ्खकाय नमः। ॐ कालीयाय नमः। ॐ तक्षकाय नमः। ॐ पिङ्गलाय नमः। ॐ महापद्माय नमः। ॐ कुलिकाय नमः। ॐ मणिभद्राय नमः। ॐ धनञ्जयाय नमः। ॐ शेषाय नमः। ॐ ऐरावताय नमः। अथवा गन्धपुष्पाभ्यां पूजयेत्। निम्बपत्राणि मृष्टे स्थापयेत् ब्राह्मणेभ्यो दद्यात् स्वयं भक्षयेच्च। उभयदिने पूर्व्वाह्णे मुहूर्त्तान्यूनपञ्चमीलाभे पूर्व्वदिने पूजा युग्मात्। श्रावण्यां पौर्णमास्यां श्राद्धमावश्यकम्। इति कृत्यतत्त्वम्॥ श्रवणानक्षत्रसम्बन्धिनि, त्रि॥

श्रावणा, स्त्री, दध्यासीकहृदः। इति मेदिनी।

श्रावणिकः, पुं, (श्रवणा पौर्णमास्यस्मिन्नस्तीति। श्रवणा+"विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः।" ४।२।२६। इति ठक्।) श्रावणमासः। इत्यमरः॥

श्रावणी, स्त्री, (श्रवणेन नक्षत्रेण युक्ता पौर्णमासी। श्रवण+"नक्षत्रेण युक्तः कालः।" ४। २।३। इत्यण्। ङीप्।) श्रावणमासीयपूर्णिमा। यथा,

"पौर्णमासी तथा माघी श्रावणी च नरोत्तम। एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः॥

इति श्राद्धतत्त्वम्॥

क्षुपविशेषः। सुखी इति बोलकुड़िया इति च हिन्दीभाषा। तत्पर्य्यायः। मुष्कितिका२ भिक्षुः३ श्रवणशौर्षिका४ श्रवणा५ प्रव्रजिता६ परिव्राजी७ तपोधना८। अस्या गुणाः। कषायत्वम्। कटुत्वम्। उष्णत्वम्। कफवातामातिसारकासविषच्छर्दिनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"मुष्कौ भिक्षुरपि प्रोक्तः श्रावणी च तपोधना। श्रवणाङ्गा मुष्कितिका तथा श्रवणशौर्षिका॥ महाश्रावणिकाख्या तु सा स्मृता भूकदम्बिका। कदम्बपुष्पिका च स्यादन्यथा तु तपस्विनी। मुष्कितिका कटुः पाके वीर्य्योष्णा मधुरा लघुः। मेध्या गुरुश्च पित्तास्रकृमियोन्यर्त्तिपाण्डुनुत्॥ श्रीपदारुचपस्मारगण्डीहमेदोगुदार्त्तिहृत्। महामुष्कौ च तत्तुल्यौ गुणैरुक्तौ महर्षिभिः॥"

इति भावप्रकाशः॥

अन्यत् मुष्कितिकाशब्दे द्रष्टव्यम्॥

श्रावन्ती, स्त्री, धर्म्मपत्तनाख्यदेशः। इति त्रिकाण्डशेषः॥

श्राविष्ठीयः, त्रि, (श्रविष्ठासु जातः। +श्रविष्ठा+"श्रविष्ठाफल्गुन्यनुराधेति।" ४।३।३४। इतिछण्।) श्रवणानक्षत्रजातः। इति सिद्धान्तकौमुदी॥

श्रि, ञ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) श्र, श्रयति श्रयते। इति दुर्गादासः॥

श्रितः, त्रि, (श्रि+क्तः। "सुयजः किति।" ७।२।११ इति इड़ागमो न।) सेवितः। आश्रितः। इति सिद्धान्तकौमुदी॥ (यथा रघुः। ११।६१।

"भास्करस्य दिशमध्युवास यां तां श्रिताः प्रतिभयं ववाशिरे॥"

पक्वः। यथा, रामायणे। २। ५६। २८।

"लक्ष्मणः पुरुषव्याघ्रमथ राघवमब्रवीत्। अयं सर्व्वैः समस्ताङ्गः श्रितः कृष्णमृगो मया। देवता देवसङ्काश यज्ञस्य कुशलो ह्यसि॥")

श्रितवान्, [त्] त्रि, (श्रि+क्तवतु। "सुयजः किति। ७। २। ११। इति इड़ागमो न) सेवाकारकः। इति सिद्धान्तकौमुदी॥

श्रियंमन्या. स्त्री, आत्मानं श्रियं मन्यते या । इति मुग्धबोधव्याकरणम् ॥ (यथा, भट्टिः । ५।७१ । "मिथ्यैव श्रीः श्रियंमन्या औमन्मथो मृषा-हरिः ॥")

श्रिष, उ दाहे । इति कविकल्पद्रुमः ॥(भ्वा०पर० सक०-सेट् ।) क्त्वेट् ।) उ, श्रेषित्वा श्रिष्टा । इति दुर्गादासः ॥

श्री. अ ग पाके । इति कविकल्पद्रुमः ॥ [क्रया०-उभ०-सक०-सेट् ।) अ ग श्रीणाति श्रीणीते । इति दुर्गादासः ॥

श्रीः,स्त्री,(श्रयतीति। श्रि + "क्विप्वचिप्रच्छीति" उणा०२ । ५७ । इति क्विप् दीर्घश्च ।) लक्ष्मीः (यथा, विष्णुपुराणे । १ । ८ । १३ ।

"श्रियश्च देवदेवस्य पत्नी नारायणस्य च या॥" लवङ्गम् । इत्यमरः ॥ वेशरचना । शोभा । (यथा, रामायणे । २ । ८४ । १० ।

एवमादिभिराकीर्णः श्रियं पुष्यत्ययं गिरिः ॥") सरस्वती । सरलवृक्षः । त्रिवर्गः । सम्पत्तिः । (यथा,—

"न दातुं नोपभोक्तुं वा शक्नोति कृपणः श्रियम् ॥")

विधा । उपकरणम् । विभूतिः । मतिः । इति मेदिनी ॥ अधिकारः । प्रभा । कीर्त्तिः । इति धरणिः ॥ वृद्धिः । सिद्धिः । इति शब्दरत्नावली ॥ हस्तार्हन्मुनाता । इति हेमचन्द्रः ॥ कमलम् । बिल्ववृक्षः । वृद्धिनामौषधम् । इति राजनिर्घण्टः ॥ * ॥ देवादिनाम्नः पूर्व्वं श्रीशब्दप्रयोगः कर्त्तव्यः । यथा,—

"देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम् । सिद्धं सिद्धाधिकारांश्च श्रीपूर्व्वं समुदीरयेत् ॥"

इति राघवभट्टधृतप्रयोगसारदर्शनात् स्वर्ग-गामित्वादिना सिद्धोऽधिकारो येषां नराणां इत्यनेन जीवतां श्रीशब्दादित्वं नास्ति । न तु मृतानां तथेति शिष्टाचारः । इति संस्कार-तत्त्वम् ॥* ॥ पत्रपृष्ठे श्रीशब्ददानप्रमाणं पत्र-शब्दे द्रष्टव्यम् ॥ (एकाक्षरच्छन्दोविशेषः । यथा. छन्दोमञ्जर्य्याम् । "ग् श्रीः ।" उदा-हरणम् । "श्रीस्ता । मास्ताम् ॥")

श्रीः, पुं, (श्रि + क्विप् दीर्घश्च ।)रागविशेषः । स तु हनुमन्मते षड्रागान्तर्गतपञ्चमरागः । पृथिव्या नाभितो निर्गतः । अस्य जातिः सम्पूर्णा । तस्य स्वरावलिः । ष ऋ ग म प ध नि अस्य ग्रहं षड्जस्वरः । हेमन्तर्त्तौ अप-राह्णे गानसमयः । रागमालायां अस्याकारः । सुन्दरपुरुषः । शुक्लवस्त्रपरीधानः । मतान्तरे रक्तवस्त्रपरीधानः । स्फाटिकपद्मरागमणि-मालागलः । पद्मपुष्पहस्तः । विचित्रसिंहा-सनारूढः । अस्य संमुखे गायन्ति गायकाः ॥ हनुमन्मते अस्य भार्य्याः पञ्च । यथा । प्रथमा मालश्रीः । तस्याः सम्पूर्णजातिः । अस्याः स्वरावलिः । ष ऋ ग म प ध नि । अस्या ग्रहं षड्जस्वरः । हिमर्त्तौ द्वितीयप्रहरदिवसे गान-समयः । रागमालायां तस्याः स्वरूपम् । रक्त-वर्णा स्त्री । कोमलाङ्गी । पीतवस्त्रपरीधाना । कौतुकाद्भ्रमन्ती सती नायकाद्भिन्ना सखी-गणेन सह हास्ययुक्तास्तरुतलोपविष्टा ॥ १ ॥ द्वितीया मारवा अथवा मालवा । अस्याः षाड़वजातिः । अस्याः स्वरावलिः । ष ऋ ग म ध नि । अस्या ग्रहं षड्जस्वरः । हिमर्त्तौ शेषवेलायां गानसमयः । रागमालायां तस्याः स्वरूपं यथा । सर्षवस्त्रपरीधाना । पुष्पमाल्य-धरा । नायकमेलनार्थमेकाकिनीसङ्केतस्थानोप-विष्टा ॥२॥ तृतीया धनाश्रीः । अस्याः षाड़व-जातिः । अस्याः स्वरावलिः । ष ऋ ध नि ऋ ग । ग्रहं षड्जस्वरः । हिमर्त्तौ द्वितीयप्रहर-दिवसे शेषवेलायां वा गानसमयः । राग-मालायां तस्याः स्वरूपम् । वियोगिनी नारी । रक्तवस्त्रपरीधाना । वियोगजसन्तापेन दुःखि-तातिक्लान्ता । एकाकिनी रोरुद्यमाना बकुल-तरुतलोपविष्टा ॥ ३ ॥ चतुर्थी वसन्तरागिणी । अस्याः सम्पूर्णा जातिः । अस्याः स्वरावलिः । ष ऋ ग म प ध नि । अस्या ग्रहं षड्जस्वरः । हिमर्त्तौ मध्याह्ने वसन्तर्त्तौ दिवा मात्रे च गान-समयः । रागमालायां तस्याः स्वरूपम् । सुन्दरपुरुषाकृतिः । कस्यचिन्मते श्यामवर्णा । रक्तवसना । मयूरपुच्छशिखा । आम्रमुकुल-हस्ता । यौवनमदनमदमत्ता । पुष्पमाल्यगल-देशा । पुष्पोद्याने सह नर्त्तकीसुस्वरगायनीभिः सुखेन रागरङ्गयुता । वामहस्तधृततताम्बूल-वीटिका । स्त्रीगणसहितहास्यकौतुककीड़ा-नृत्यगीतवाद्यासक्ता । रागमालान्तरे उक्तगुण-युक्ता श्रीकृष्णमूर्त्तिसदृशमूर्त्तिर्लिखिता ॥४॥ पञ्चमी आशावरी । अस्या ओड़वजातिः । अस्याः स्वरावलिः । ध नि ग म प । अस्याः ग्रहं धैवतस्वरः । हिमर्त्तौ द्वितीयप्रहरदिवसे गानसमयः । रागमालायां अस्याः स्वरूपम् । श्यामवर्णा स्त्री । कोमलाङ्गी । श्वेतशाटीपरि-धाना । कर्पूरानुलेपना । हस्तपदयोर्बृहत्सर्प-वेष्टिता केशैर्बद्धचूड़ा । जलमध्यस्थपर्वतगुहा-यामुपविष्टा । रागमालान्तरे उक्तगुणयुक्ता हस्तपत्रवड्कटिदेशा नग्ना लिखिता ॥५ ॥* ॥ अस्य पुत्त्रा अष्टौ । यथा । सिन्धुः १ मालवः २ गौड़ः अथवा गोण्डः ३ अस्य स्थाने केचित् कल्याणः इति केचिच्च हामीर इति पठन्ति । गुणसागरः ४ कुम्भः ५ गम्भीरः ६ शङ्करः अथवा आगड़ः ७ विहागरः ८ ॥ * ॥ कल्लि-नाथमते श्रीरागः प्रथमरागः अस्य भार्य्या षट् । यथा । गौरी १ गौलाहली २ धवली ३ रुद्राणी ४ मालकौश अर्थात् कौशिकी ५देव-गान्धारी ६ । तन्मते पुत्त्रा अष्टौ हनुमन्मत-तुल्याः । किन्तु गौड़शङ्करविहागरस्थाने कल्याण आगड़ा विगड़ा लिखिताः ॥ * ॥ सोमेश्वरमतेऽपि प्रथमरागोऽयम् । अस्य रागिणः षट् । यथा । मालवी अथवा मरवा १ त्रिवेणी अथवा तिरवनी २ गौरी ३ केदारा ४ मधुमाधवी५ पाहाड़िका अथवा पाहाड़ी६ । अस्य पुत्त्राः पूर्व्वोक्तमतद्वयतुल्याः । तन्मते अस्य रागस्य रागिणीसहितस्य शिशिरर्त्तौ गानसमयः ॥ * ॥ भरतमते पञ्चमरागोऽयम् । अस्य रागिणः पञ्च । यथा । सिन्धुवी १ । काफी २ ठुमरी ३ पूर्व्वदेशे विस्तार इति ख्याता । विचित्रा ४ शिरहटी अथवा सोरहठी ५ तन्मते अस्याष्ट पुत्त्राः यथा । श्रीरामः १ कोलाहलः २ सामन्तः ३ शङ्करणः ४ राजे-श्वरः ५ खटरागः ६ वड़हंसः ७ देशकारः ८ । तेषां भार्य्या यथा । विद्या १ धात्री २ क्षुभा ३ सुहनी ४ शरदा ५ रेमा ६ शशिरेखा ७ सर-स्वती ८ । इति नानासङ्गीतग्रन्थतः संगृहीतम् ॥

श्रीकण्ठः, पुं, (श्रीः शोभा कण्ठे यस्य ।) शिवः । इत्यमरः ॥ कुरुजाङ्गलदेशः । स तु हस्तिना-पुरस्य उत्तरपश्चिमे वर्त्तते । इति हेमचन्द्रः ॥ (पक्षिविशेषः । यथा, हरिवंशे । ८६ । ३८ ।

"स्त्रीसंज्ञा भासभषककपिश्रीकर्णछिक्करा: । शिखिश्रीकण्ठपिण्डीकरुरुरुशेनश्च दक्षिणा: ॥")

श्रीकण्ठपदलाञ्छनः, पुं, (श्रीकण्ठ इतिपदं लाञ्छनं यस्य ।) भवभूतिः । स तु मालती-माधवादिनाटककर्त्ता । इति शब्दमाला ॥ (यथा, उत्तरचरिते प्रस्तावनायाम् ।

"अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठ-पदलाञ्छनो भवभूतिर्नाम ॥")

श्रीकण्ठसखः,पुं,(श्रीकण्ठस्य महादेवस्य सखा । समासे टच् ।) कुबेरः । इति हलायुधः ॥

श्रीकन्दा, स्त्री, (श्रीः शोभा तद्युक्तः कन्दो यस्याः ।) बन्ध्याकर्कोटकी । इति राज-निर्घण्टः ॥

श्रीकरं, क्ली, रक्तोत्पलम् । इति त्रिकाण्डशेषः ॥

श्रीकरः, पुं, विष्णुः । इति त्रिकाण्डशेषः ॥ स्मृति-ग्रन्थकारविशेषः । यथा । श्रीकराचार्य्यादि-ग्रन्थादरपराहतविवेकानाम् । इति दायभागा-द्यश्लोकटीकायां श्रीकृष्णतर्कालङ्कारः ॥(श्रियः शोभायाः करः) । श्रीकारके, त्रि ॥

श्रीकरणं, क्ली, (श्रीः क्रियतेऽनेनेति । कृ + करणे ल्युट् ।)लेखनी । इति शब्दरत्नावली ॥

श्रीकान्तः, पुं, (श्रियाः कान्तः ।) विष्णुः । इति शब्दरत्नावली ॥

श्रीकारी, [न्] पुं,(श्रियं शोभां करोतीति । कृ + णिनिः ।) मृगविशेषः । तत्पर्य्यायः । शिखि-यूपः २ कुरङ्गः ३ महायवः ४ यवनः ५ वेगि-हरिणः ६ जङ्गालः ७ जाङ्गिकाह्वयः ८ । अस्य मांसगुणाः । लघुत्वम् । हृद्यत्वम् । बलप्रदत्वञ्च इति राजनिर्घण्टः ॥

श्रीखण्डः, पुं, क्ली, (श्रियः शोभायाः खण्ड इव यत्र ।) चन्दनम् । इति त्रिकाण्डशेषः ॥ (यथा, गीतगोविन्दे । ८ । १० ।

"तदयुक्तं विपरीतकारिणि तव श्रीखण्डचर्चा विषं
शीतांशुस्तपनो हिमं हुतवहः क्रीड़ासुदो यातनाः ॥")

श्रीगर्भः, पुं, (श्रीर्गर्भेऽस्य ।) विष्णुः । इति त्रिकाण्डशेषः ॥ खड्गः । यथा,—

"असिर्विषग्वनः खड्गस्तोक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्म्मपाल नमोऽस्तु ते ॥"
इति तिथ्यादितत्त्वम् ॥

श्रीगृहः, पुं, (श्रियः गृहो यत्र ।) पण्यशालः । पानीयशाला । तत्पर्य्यायः । शकुनिप्रपा २ । इति हारावली ॥

श्रीघनं, क्ली, (श्रिया घनम् ।) दधि । इति जटाधरः ॥

श्रीघनः, पुं, (श्रिया वृद्धया घनः ।) वृद्धः । इत्यमरः ॥

श्रीचक्रं, क्ली, (श्रियाश्चक्रम् ।) त्रिपुरसुन्दर्य्याः पूजायन्त्रविशेषः । यथा,—

"श्रीचक्रस्योद्धृतिं वक्ष्ये तव पूजाप्रसिद्धये ।
बिन्दुगर्भं त्रिकोणन्तु कृत्वा चाष्टारमुद्धरेत् ॥
दशारद्वयमन्वस्राष्टारषोड़शकोणकम् ।
त्रिरेखात्मकभूगेहवेष्टितं यन्त्रमालिखेत् ॥"
इति मन्त्रमहोदधौ ११ तरङ्गः ॥

अपिच । अथ श्रीचक्रम् । यथा बिन्दुमत् त्रास्रमष्टकोणं एतत्त्रयं संहारचक्रम् । द्विदशारं चतुर्दशारं स्थितिचक्रमेतत्त्रयम् । अष्टपत्रं षोड़शदलं वृत्तत्रयम् । भूसदनत्रयं चतुर्द्वारसमायुक्तमेतत् सृष्ट्यात्मकम् । तदुक्तं यामले ।

"बिन्दुत्रिकोणवसुकोणदशारयुग्म-
मन्वस्रनागदलसङ्गतषोड़शारम् ।
वृत्तत्रयञ्च धरणीसदनत्रयञ्च
श्रीचक्रराजमुदितं परदेवतायाः ॥"

चक्रराजं सिन्दूरकुङ्कुमादिना लिखितं सुवर्णरजतपद्मरत्नस्फटिकताम्रायुत्कीर्णं कुर्य्यात् । तथा भूतभैरवतन्त्रे ।

"लङ्घयेत् सुसमां रेखां नालिख्य सुसमं सुखम् ।
योऽत्र यन्त्रे प्रवर्त्तेत तस्य सर्व्वं हराम्यहम् ॥
यस्या यत्र स्थितिर्देवि तत्र तां नार्च्चयेद्यदि ।
तस्यांसरुधिरेणैव पारणा तस्य जायते ॥
पशोरालोकनं न स्यात्तथा कुरुत यत्नतः ।
यदि दैवात् पशोरग्रे लिखितं दृश्यते क्वचित् ।
ममाङ्गच्छतिरेवात्र क्रियते पापबुद्धिना ॥"

तथा भूतभैरवे ।

"योऽस्मिन् यन्त्रमहेशानि केशराणि प्रकल्पयेत्
योगिनीसहितास्तस्य हिंसां कुर्व्वन्ति भैरवाः ॥"

इति वचनान्नात्र केशराणि ।

"न रात्रावर्च्चयेत् यन्त्रं साधकस्तु कदाचन ।
प्रमादादर्च्चिते यन्त्रे शापो भवति तत्क्षणात् ॥
तत्रापराजितापुष्पे करवीरे जवासु च ।
तत्र देवी वसेन्नित्यं तदृयन्त्रे पूजनं मम ॥"

तथा सच्चन्दभैरवे ।

"कुर्य्याच्च स्फटिके यन्त्रं हस्तमात्रं सुसुन्दरम् ।
रत्नादिषु च निर्म्माणे मानमिच्छावशाच्चरेत् ॥
एकतोलं द्वितोलं वा त्रितोलं वेदतोलकम् ।
इतोऽधिकं नरः कृत्वा प्रायश्चित्तीभवेत् ध्रुवम् ॥
रक्तेन रजसापूर्य्य श्रीचक्रं भुवि पूजयेत् ।
नश्यन्ति सर्व्वविघ्नानि प्राप्यते च यथेप्सितम् ॥
दशभागं सुवर्णस्य ताम्रस्य द्वादशं तथा ।
षड्दशं रजतस्याथ चैतत्त्रोक्तत्रयं भवेत् ॥
चक्रेऽस्मिन् पूजयेद्यो हि स सौभाग्यमवाप्नुयात्
अणिमाद्यष्टसिद्धीनामधिपो जायतेऽचिरात् ॥
विद्रुमे रचिते यन्त्रे पद्मरागेऽथवा प्रिये ।
इन्द्रनीलेऽथ वैदूर्य्ये स्फाटिके मरकतेऽपि वा ।
धनं पुत्रं तथा दारान् यशांसि लभते ध्रुवम् ।
ताम्रन्तु कान्तिदं प्रोक्तं सुवर्णं शत्रुनाशनम् ॥
राजतं क्षेमदञ्चैव स्फाटिकं सर्व्वसिद्धिदम् ॥"
एतदृयन्त्रमात्रे न्यूनम् ॥*॥ अथ श्रीचक्रनाशे प्रायश्चित्तम् ।

"दग्धं च स्फुटितं यन्त्रं हृतं चौरेण वा प्रिये ।
उपवासं प्रकुर्व्वीत दिनमेकमतन्द्रितः ॥
लक्षमात्रं जपेद्विद्यां होमतर्पणपूर्व्वकम् ।
सङ्ख्यया च गुरुं तोष्य ब्राह्मणानपि भोजयेत् ॥"

लक्षं जप्त्वा दशांशहोमः तद्दशांशञ्च तर्पणम् । लक्षमयुतमित्येके ।

"कदाचिच्छुभचिह्नं वा स्फुटितादि विदूषणम्
भग्नं करोति यो मर्त्यो मृत्युस्तस्य द्रुतं भवेत्
तस्माच्च तीर्थराजे वा गङ्गादिसरितां वरे ॥
समुद्रे वा चिपेद्देवि चान्यथा दुःखमाप्नुयात् ॥"

इदन्तु यन्त्रमात्रविषयम् ॥*॥ अथ श्रीचक्रपादोदकमाहात्म्यम् ।

"गङ्गापुष्करनर्म्मदासु यमुनागोदावरीसोमतीगङ्गाहारगयाप्रयागवदरीवाराणसीसिन्धुषु ।
रेवासेतुसरस्वतीप्रभृतिषु ब्रह्माण्डभाण्डोदरे
तीर्थस्नानसहस्रकोटिफलदं श्रीचक्रपादोदकम्"

अथ दर्शनफलम् ।

"सम्यक् शतक्रतून् कृत्वा यत् फलं समवाप्नुयात्
तत् फलं लभते भक्त्या कृत्वा श्रीचक्रदर्शनम् ॥
षोड़शं वा महादानं कृत्वा यल्लभते फलम् ।
तत् फलं समवाप्नोति कृत्वा श्रीचक्रदर्शनम् ॥
सार्हत्रिकोटितीर्थेषु स्नात्वा यत् फलमश्नुते ।
तत् फलं लभते भक्त्या कृत्वा श्रीचक्रदर्शनम् ॥
इति तन्त्रसारः ॥

श्रीजः, पुं, (श्रियः जायते इति । जन् + डः ।) कामदेवः । श्रिया जातत्वात् । शाम्बः । इति केचित् ॥

श्रीतालः, पुं, (श्रीयुक्तस्तालः ।) तालवृत्तसहस्रवृत्तविशेषः । तत्पर्य्यायः । मृदुतालः २ लक्ष्मीतालः ३ मृदुच्छदः ४ विशालपत्रः ५ लेखार्हः ६ मसीलेख्यदलः ७ शिरालपत्रकः ८ याम्योद्भूतः । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । ईषत् कषायत्वम् । पित्तनाशित्वम् । कफकारित्वम् । ईषद्वातप्रकोपणत्वञ्च । इति राजनिर्घण्टः ॥

श्रीदः, पुं, (श्रियं ददातीति । दा + कः ।) कुबेरः । इत्यमरः ॥ श्रीभादातरि, त्रि, ॥

श्रीधरः, पुं, (धरतीति । धृ + अच् । श्रिया धरः ।) विष्णुः । (यथा, मुकुन्दमालायाम् ।८।

"मा भैर्मन्दमनो विचिन्त्य बहुधा यामीयिरं यातना
नामी नः प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥"

भूताईदभेदः । इति हेमचन्द्रः ॥ शालग्रामचक्रे, क्ली, । यथा,—

"अतिक्षुद्रं द्विचक्रन्तु वनमालाविभूषितम् ।
श्रीधरं देवि विज्ञेयं श्रीप्रदं गृहिणां सदा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १८ अध्यायः ॥

श्रीनन्दनः, पुं, (श्रियाः नन्दनः ।) कामदेवः । इति हेमचन्द्रः ॥ लक्ष्मीपुत्रश्च ॥

श्रीनिकेतनः, पुं, (श्रियं निकेतयति वासयतीति । नि + कित + णिच् + ल्युः ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, भागवते । ८।१८।१३ ।

"भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥"

श्रियः आश्रयस्थाने, त्रि । यथा, भागवते । ३ । ३ । २० ।

"स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया ।
चरित्रेणानवद्येन श्रीनिकेतेन चात्मना ॥")

श्रीनिवासः, पुं, (श्रियो निवास आश्रयस्थानम् । विष्णुः । इति त्रिकाण्डशेषः ॥

श्रीपं, त्रि, (श्री + पा + कः ।) श्रियं पाति यत् । इति मुग्धबोधव्याकरणम् ॥

श्रीपञ्चमी, स्त्री, (श्रियः सरस्वत्याः पञ्चमी ।) माघशुक्लपञ्चमी । यथा,—

"चतुर्थी वरदा शुक्ला तत्र गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥
सरस्वतीपूजानध्यायत्राह गौड़ाचारः । अत्र श्रीपञ्चम्यामारभ्य प्रतिमासं षड्ब्दसमाप्यं श्रीपञ्चमीव्रतं कुर्व्वन्ति पठन्ति च । इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम् ॥

श्रीपतिः, पुं, (श्रियः पतिः ।) विष्णुः । इत्यमरः ॥ (यथा, मुकुन्दमालायाम् । १६ ।

"सेव्यः श्रीपतिरेव सर्व्वजगतामेकान्ततः साचिवः
प्रह्लादश्च विभीषणश्च करिराट् पाञ्चाल्य-
इत्या ध्रुवः ॥")

पृथिवीनाथः । इति मेदिनी ॥

श्रीपथः, पुं, (श्रियः पन्थाः । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अः ।) राजपथः । इति हेमचन्द्रः ॥

श्रीपर्णं, क्ली, (श्रीविशिष्टानि पर्णानि यस्य ।) पद्मम् । अग्निमन्थवृक्षः । इति मेदिनी ॥

श्रीपर्णिका, स्त्री, (श्रीपर्णी एव । स्वार्थे कन् ।) कट्फलवृक्षः । इत्यमरः ॥

श्रीपर्णी, स्त्री, (श्रीयुक्तानि पर्णानि यस्याः । ङीष्) गम्भारीवृक्षः । इत्यमरः । कटफलवृक्षः । इति मेदिनी ॥ शाल्मलीवृक्षः । हठवृक्षः । इति हेमचन्द्रः । अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥

श्रीपिष्टः, पुं, (श्रियः सरलद्रुमस्य पिष्टः ।) सरलवृक्षरसः । इत्यमरटीकायां रामाश्रमः ॥

श्रीपुत्रः, पुं, अश्वः । इति त्रिकाण्डशेषः ॥ (श्रियः पुत्रः ।) कामदेवश्च ॥

श्रीपुष्पं, क्ली, (श्रीयुक्तं पुष्पमस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥ पद्मकाष्ठम् । इति रत्नमाला ॥

श्रीफलः, पुं, (श्रीयुक्तं फलमस्य ।) विल्ववृक्षः । इत्यमरः । राजादनी । इति राजनिर्घण्टः ॥

श्रीफला, स्त्री, (श्रीविशिष्टं फलमस्याः ।) नीली । क्षुद्रकारवेल्लौ । इति राजनिर्घण्टः ॥

श्रीफलिका, स्त्री, (श्रीफला + स्वार्थे कन् । टापि अत इत्वम् ।) क्षुद्रकारवेल्लौ । महानीलवृक्षः । इति राजनिर्घण्टः ॥

श्रीफली, स्त्री, (श्रीयुक्तं फलमस्याः । ङीष् ।) आमलकौ । नीली । इति मेदिनी ॥

श्रीभद्रा, स्त्री, भद्रमुस्तकः । इति शब्दरत्नावली ॥

श्रीभागवतं, क्ली, (श्रीमत् भागवतमिति मध्यपदलोपिसमासः ।) अष्टादशमहापुराणान्तर्गताष्टादशसहस्रश्लोकयुक्तपुराणविशेषः । (तच्च मतभेदेन विष्णुभागवतदेवीभागवतभेदात् । द्विविधम् ।) यथा,—

"अष्टादशं भागवतं सारमाकृष्य सर्व्वतः ।
कृतवान् भगवान् व्यासः शुकश्चाध्यापत् सुतम् ॥
स्कन्धैर्द्वादशभिर्युक्तं ब्रह्मविद्यासमन्वितम् ।
वेदवेदान्तसारं तत् पुराणानाञ्च सत्तम ॥
यत्र संकीर्त्तितः कृष्णो भगवान् वै पदे पदे ।
श्रीभागवतमित्येव ये स्मरन्ति नराः क्वचित् ।
मुच्यन्ते सर्व्वपापेभ्यो यथा नाम्ना गदाभृतः ॥
महीभृतां यथा मेरुर्देवानां केशवो यथा ।
सुरभिः कामधेनूनामप्सरस्सु यथोर्व्वशी ॥
क्राणानां पार्व्वतीनाथो राज्ञां दाशरथिर्यथा ।
समीनाञ्चैव गन्धर्व्वा नदीनां जाह्नवी यथा ।
पुराणानां तथा राजन् श्रीभागवतमुत्तमम् ॥

अम्बरीष उवाच ।

पुराणं तं भागवतं पठ मे पुरतो हरेः ।
चरितं दैत्यराजस्य प्रह्लादस्य च मत्पतेः ॥

गौतम उवाच ।

अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणु ।
पठस्व स्वमुखेनापि यदीच्छति भवक्षयम् ॥
स्कन्धे स्कन्धऽश्वमेधस्य फलमाप्नोति मानवः ।
प्रत्यध्यायं राजसूयफलेन परिजुष्यते ॥
प्रतिश्लोकं वाजपेयफलं तस्योपजायते ।
पदे पदे महाराज तीर्थस्नानफलं लभेत् ॥
एतद्भागवतं देवि पुराणं मुक्तिसाधकम् ।
तत्रापि दशमस्कन्धः सर्व्वभक्तमनोहरः ।
तत्रापि रासलीलाख्या पञ्चाध्यायी महाफला ॥

श्रीपार्व्वत्युवाच ।

सर्व्वञ्च हरिलीलाख्यं श्रीमद्भागवतं यदि ।
स्कन्धस्य दशमस्यायं महिमा केन हेतुना ॥
रासलीलेति तत्रापि कथ्यते सर्व्वतोऽधिका ।
तत्र मे कारणं श्रोतुमुत्कण्ठा वर्द्धते भृशम् ॥

श्रीसदाशिव उवाच ।

स्वयं भगवतो जन्म तस्य लीला च वर्ण्यते ।
श्रुतीनाञ्च स्तुतिर्यत्र सर्व्ववेदार्थसम्मिता ॥
स्वयं भगवतो लीला सर्वशक्तिश्च दर्शिता ।
दशमस्कन्धमाहात्म्यं एतद्धेतुं कारणं मतम् ॥
तत्रापि रासलीलाया यन्माहात्म्यमुदीरितम् ।
तत्रापि कारणं वच्मि शृणु पर्व्वतनन्दिनि ॥
यः स्वयं भगवान् कृष्णः पूर्णैश्वर्य्य इतीर्य्यते ।
स सर्व्वशक्तिसम्पूर्णः सर्वलीलाप्रकाशकः ॥
तस्यैव शक्तयो गोप्यः प्रोक्ताः सर्व्वोत्तमा यतः ।
शक्तीनाञ्च शक्तिमतो लीला यत्रैवतः स्थिता ।
सा लीला सर्वतः श्रेष्ठा कीर्त्तिता परमर्षिभिः ॥"

इति पाद्मे पातालखण्डे ७१ अध्यायः ॥
(तथाच शिवपुराणे ।
"भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते ।
तत्तु भागवतं प्रोक्तं नतु देवीपुराणकम् ॥"
अस्य विशेषविवृतिस्तु पुराणशब्द-भागवतशब्दयोर्द्रष्टव्यम् ॥)

श्रीभ्राता, पुं, (श्रियः भ्राता समुद्रजातत्वात् ।) अश्वः । इति राजनिर्घण्टः ॥ चन्द्रः । समुद्रोत्पन्नत्वात् ॥

श्रीमतिः, स्त्री, राधा । यथा,—

"श्रीराधा श्रीमतिः श्रेष्ठा श्रेष्ठरूपा श्रुतिप्रिया ॥"

इति नारदपञ्चरात्रे तस्याः सहस्रनामस्तोत्रम् ॥

श्रीमती, स्त्री, (श्रीर्विद्यतेऽस्या इति । मतुप । ङीप्) श्रीयुक्ता । योषिन्मात्रः पूर्व्वं एतच्छब्दो योज्यः । इति शिष्टाचारः ॥

श्रीमस्तकः, पुं, (श्रीयुक्तं मस्तकमस्य ।) रसोनः । इति त्रिकाण्डशेषः ॥ (स्त्रियो मस्तकः ।) लक्ष्मीशिरश्च ॥

श्रीमान्, [त्] पुं, (श्रीर्विद्यतेऽस्येति । मतुप् ।) तिलकवृक्षः । इत्यमरः ॥ अश्वत्थवृक्षः । इति राजनिर्घण्टः ॥ विष्णुः । इति शब्दरत्नावली ॥ शिवः । इति त्रिकाण्डशेषः ॥ कुबेरः । इति शब्दमाला ॥

श्रीमान्, [त्] त्रि, (श्री + मतुप् ।) मनोज्ञः । (यथा, माघे । १ । १ ।

श्रियः प्रतिः श्रीमति शासितुं जगत्
जगन्निवासो वसुदेवसद्मनि ।
वसन् ददर्शावतरन्तमम्बरात्
हिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥")

धनी । इति मेदिनी ॥ तत्पर्य्यायः । लक्ष्मीवान् २ लक्ष्मणः ३ श्रीलः ४ । इत्यमरः ॥ (यथा,—

"श्रीमन्नाथ भवद्यशोविटपिनः खे तारकाः कोरका-
स्तेषामेकतमः पुरा विकसितो यः पूर्णिमाचन्द्रमाः ।
तेनेदं शरदिन्दुसुन्दरसुधास्यन्देर्जगत् मण्डितं
शेषेष्वेषु विकस्वरेषु भविता कीदृक् न जानीमहे ॥"

इति कालिदासः ॥)

श्रीमालपत्रा, स्त्री, धूम्रपत्रा । इति राजनिर्घण्टः ॥

श्रीमुखः, पुं, कालचक्रस्य सप्तमवत्सरः । इति केचित् ॥ पत्रपृष्ठ श्रीशब्दलिखनम् । इति लोकप्रसिद्धिः ॥ शोभायुक्तानने, क्ली ॥

श्रीमूर्त्तिः, स्त्री, (श्रीयुक्ता मूर्त्तिः ।) देवविग्रहः । विष्णुप्रतिमा । यथा । अथ श्रीमूर्त्तयः । एकादशस्कन्धे ।

"शैली दारुमयी लौही लेप्या लेख्या च सैकता
मनोमयी मणिमयी प्रतिमाष्टविधा मता ॥
चलाचलेति द्विविधा प्रतिष्ठा जीवमन्दिरम् ।
उद्वासावाहने न स्तः स्थिरायामुद्वार्चने ॥
अस्थिरायां विकल्पः स्यात् स्थण्डिले तु भवेदयम् ।
स्नपनं त्वविलेप्यायामन्यत्र परिमार्ज्जनम् ॥
गोपालमन्त्रोद्दिष्टत्वात् तच्छ्रीमूर्त्तिरपेक्षिता ।
तथापि वैष्णवप्रोक्तै लेख्याः श्रीमूर्त्तयोऽखिलाः ॥"

अथ श्रीमूर्त्तिलक्षणानि । हयशीर्षपञ्चरात्रे । भगवच्छ्रीहयशीर्षब्रह्मसंवादे ।

"आदिमूर्त्तिर्वासुदेवः सङ्कर्षणमथासृजत् ।
चतुर्मूर्त्तिः परं प्रोक्त एकैको भिद्यते त्रिधा ॥
केशवादिप्रभेदेन मूर्त्तिद्वादशकं स्मृतम् ।
पङ्कजं दक्षिणे दद्यात् पाञ्चजन्यं तथोपरि ॥
वामोपरि गदा यस्य चक्रं चाधोव्यवस्थितम् ।
आदिमूर्त्तेस्तु भेदोऽयं केशवेति प्रकीर्त्त्यते ॥ १ ॥
अधरोत्तरभावेन कृतमेतत्तु यत्र वै ।
नारायणाख्या सा मूर्त्तिः स्थापिता भुक्तिमुक्तिदा ॥ २ ॥
सव्याधः पङ्कजं यस्य पाञ्चजन्यं तथोपरि ।
दक्षिणोर्द्धे गदा यस्य चक्रं चाधोव्यवस्थितम् ॥
आदिमूर्त्तेस्तु भेदोऽयं माधवेति प्रकीर्त्त्यते ॥ ३ ॥
दक्षिणाधःस्थितं चक्रं गदा यस्योपरिस्थिता ।
वामोर्द्धसंस्थितं पद्मं शङ्खं चाधोव्यवस्थितम् ।
सङ्कर्षणस्य भेदोऽयं गोविन्देति प्रकीर्त्त्यते ॥ ४ ॥
दक्षिणोपरि पद्मं तु गदा चाधोव्यवस्थिता ।
सङ्कर्षणस्य भेदोऽयं विष्णुरित्यभिशब्द्यते ॥ ५ ॥
दक्षिणोपरि शङ्खश्च चक्रं चाधः प्रदृश्यते ।
वामोपरि तथा पद्मं गदा चाधः प्रदृश्यते ।
मधुसूदननामायं भेदः सङ्कर्षणस्य च ॥ ६ ॥

त्रिविक्रममूर्त्तिमाह ।

दक्षिणोर्द्धे गदा यस्य पङ्कजं चाप्यधः स्थितम् ।
वामोर्द्धे संस्थितं चक्रमधः शङ्खं प्रदृश्यते ।
ब्रह्माण्डगं वामपादं दक्षिणं शेषपृष्ठगम् ॥ ७ ॥

श्रीवामनमूर्त्तिमाह ।

वलिबन्धनसंयुक्त वामनं चाप्यधःस्थितम् ।
वामोर्द्धे कौमोदी यस्य पुण्डरीकमधःस्थितम् ॥

दक्षिणोर्द्धे सहस्रारं पाञ्चजन्यमधःस्थितम् ।
सप्ततालप्रमाणेन वामनं कारयेत् सदा ॥८॥
ऊर्द्धे दक्षिणतश्चक्रमधः पद्मं व्यवस्थितम् ।
वामोर्द्धे कौमोदी यस्य पाञ्चजन्यमधःस्थितम्॥
पद्मा पद्मकरा वामे पार्श्वे तस्य व्यवस्थिता ।
स्थितो वाप्युपविष्टो वा सानुरामविलासवान् ॥
प्रद्युम्नस्य हि भेदोऽयं श्रीधरेति प्रकीर्त्यते॥८॥
दक्षिणोर्द्धे महाचक्रं कौमोदी तदधःस्थिता ॥
वामोर्द्धे नलिनं यस्य अधः शङ्खं विराजते ।
हृषीकेशेति विज्ञेयः स्थापितः सर्व्वकामदः॥ १०
दक्षिणोर्द्धे पुण्डरीकं पाञ्चजन्यमधस्तथा ।
वामोर्द्धे संस्थितं चक्रं कौमोदी तदधःस्थिता॥
पद्मनाभेति सा मूर्त्तिःस्थापिता मोक्षदायिनी११
दक्षिणोर्द्धे पाञ्चजन्यमधस्तात्तु कुशेशयम् ॥
सव्योर्द्धे कौमोदी देवी हेतिराजमधःस्थितम् ।
अनिरुद्धस्य भेदोऽयं दामोदर इति स्थितः॥१२।
एतेषान्तु स्त्रियौ कार्य्ये पद्मवीणाधरे शुभे ।
इति क्रमेण मार्गादिमासाधिपाः केशवादयो
द्वादश ॥ * ॥ अथ सिद्धार्थसंहितायां चतु-
र्विंशतिमूर्त्तयः ।
"वासुदेवो गदाशङ्खचक्रपद्मधरो मतः । १ ।
पद्मं शङ्खं तथा चक्रं गदां वहति केशवः ॥२॥
शङ्खं पद्मं गदां चक्रं धत्ते नारायणः सदा।३।
गदां चक्रं तथा शङ्खं पद्मं वहति माधवः ॥४॥
चक्रं पद्मं तथा शङ्खं गदाञ्च पुरुषोत्तमः ।५।
पद्मं कौमदकीं शङ्खं चक्रं धत्तेऽप्यधोजः॥६॥
सङ्कर्षणो गदाशङ्खपद्मचक्रधरः स्मृतः । ७ ।
चक्रं गदां पद्मशङ्खौ गोविन्दो धरते भुजे ॥८॥
गदां पद्मं तथा शङ्खं चक्रं विष्णुर्विभर्त्ति यः।८।
चक्रं शङ्खं तथा पद्मं गदाञ्च मधुसूदनः ॥१०॥
गदां सरोजं चक्रञ्च शङ्खं धत्तेऽच्युतः सदा।११।
शङ्खं कौमोदकीं चक्रमुपेन्द्रः पद्ममुद्वहेत् ॥१२॥
शङ्खचक्रगदापद्मधरः प्रद्युम्न उच्यते । १३ ।
पद्मं कौमोदकीं चक्रं शङ्खं धत्ते त्रिविक्रमः॥१४॥
शङ्खं चक्रं गदां पद्मं वामनो वहते सदा ।१५।
पद्मं चक्रं गदां शङ्खं श्रीधरो वहते भुजे ॥१६॥
चक्रं पद्मं गदां शङ्खं नरसिंहो बिभर्त्ति यः।१७।
पद्मं सुदर्शनं शङ्खं गदां धत्ते जनार्द्दनः ॥१८॥
अनिरुद्धश्चक्रगदाशङ्खपद्मलसद्भुजः । १८ ।
हृषीकेशो गदां चक्रं पद्मं शङ्खञ्च धारयेत् ॥२०॥
पद्मनाभो वहेत् शङ्खं पद्मं चक्रं गदां तथा।२१।
पद्मं चक्रं गदाशङ्खं धत्ते दामोदरः सदा॥२२॥
शङ्खं चक्रं सरोजञ्च गदां वहति यो हरिः।२३।
शङ्खं कौमोदकीं पद्मं चक्रं कृष्णो विभर्त्ति
यः ॥२४॥
एताश्च मूर्त्तयो ज्ञेया दक्षिणाधःकरक्रमात् ॥"
मत्स्यपुराणे च ।
"एतदु-शतः प्रोक्तं प्रतिमालक्षणं तथा ।
विस्तरेण न शक्नोति वक्तुमप्यतिरपि द्विजाः ॥"
इति ।
सेवानिष्ठा हरेः श्रीमद्वैष्णवाः पाञ्चरात्रिकाः ।
प्राकट्यादखिलाङ्गानां श्रीमूर्त्तिं बहु मन्यते ॥
सेव्या निजनिजैरेव मन्त्रैः स्वस्वेष्ट मूर्त्तयः ।
शालग्रामात्मके रूपे नियमो नैष विद्यते ॥
द्विभुजा जलदश्यामा त्रिभङ्गी मधुराकृतिः ॥
सेव्या ध्यानानुरूपैव श्रीमूर्त्तिः कृष्णदैवते ॥
अन्याश्च विविधाः श्रीमद्वतारादिमूर्त्तयः ।
प्रादुर्भावविधावत्र लेख्यास्तत्तद्दिशेयतः ॥
नित्यकर्म्मप्रसङ्गेऽत्र मूर्त्तिजन्मप्रतिष्ठयोः ।
विधिर्वं लेखितुं योग्यः न तु लेखिष्यतेऽयतः॥"
इति श्रीहरिभक्तिविलासे १८१ विलासः ॥
श्रीयुक्तः त्रि, (श्रिया युक्तः ।) लक्ष्मीविशिष्टः ।
श्रीमान् । जीवत्पुरुषनाम्नः पूर्वं दातव्योऽयम्॥
श्रीयुतः त्रि, (श्रिया युतः ।) लक्ष्मीविशिष्टः ।
श्रीमान् । जीवत्पुरुषनाम्नः पूर्वं दातव्योऽयम् ॥
श्रीरसः पुं. (श्रियः रसो निर्य्यासः ।) श्रीवेष्टः ।
इति राजनिर्घण्टः ॥
श्रीरङ्गपत्तन, क्ली, देशविशेषः । सारंपटन् इति
भाषा । इति मादराजाख्यदेशे प्रसिद्धम् ॥
श्रीरागः, पुं, षड्रागाणां मध्ये तृतीयरागः ।इति
हलायुधः । अस्य रागिण्यो यथा,—
"गान्धारी देवगान्धारी मालवश्रीश्च सारवी ।
रामकीर्य्यपि रागिण्यः श्रीरागस्य प्रिया
इमाः ॥"
इति सङ्गीतदामोदरः ॥
विस्तारस्तु श्रीशब्दे द्रष्टव्यः ॥
श्रीरामः पुं (श्रीयुतो रामः ।) रामचन्द्रः । इति
शब्दरत्नावली ॥
श्रीरामनवमी, स्त्री, (श्रीरामस्य नवमी तज्जन्म
दिनत्वात् ।) चैत्रशुक्लनवमी । सा च श्रीरामस्य
जन्मतिथिः । । तद्व्रतकथा यथा,—
"पुरैकदा सुखासीनं ब्रह्माणं जगतां पतिम् ।
उवाच सहसागत्य सनकः संजितेन्द्रियः ॥
सनक उवाच ।
राज्ञा दशरथेनैव राज्ञ्या कौशल्ययापि वा ।
कस्मात् कर्म्मवशाल्लब्धः पुत्रोऽसौ जगतीपतिः।
दूर्व्वादलश्यामरामो विस्तार्य्य कथयस्व मे ॥
ब्रह्मोवाच ।
साधु पृष्टं त्वया वत्स जगतां हितकारकम् ।
पुरा राजा दशरथः कौशल्या च समाहितौ ॥
जजाप मन्त्रं दुर्गायाः शिवस्य च विशेषतः ।
तयोर्जपेन तुष्टः सन् शिवः प्रत्यक्षतां गतः ॥
दशरथ उवाच ।
अद्य मे सफलं जन्म अद्य मे सफलं तपः ।
अद्य मे सफलं चक्षुर्यत्त्वमवलोकितः ॥
श्रीशिव उवाच ।
किन्ते कार्य्यं महाराज कथयस्व ददामि तत् ॥
दशरथ उवाच ।
देवदेवाप्यपुत्रोऽहमिति दुःखेन दुःखितः ।
चिरं विचार्य्य मनसा शिवाराधनतत्परः ॥
इति श्रुत्वा महादेवस्तमुवाच दयापरः ।
कुरु राजन् वंशयज्ञं ततस्ते जगतीपतिः ॥
श्रीरामनामा पुत्रोऽसौ कौशल्यायां भविष्यति।
इत्युक्त्वा तं महादेवस्तयोरन्तर्हितोऽभवत् ॥०॥
इति रुद्रमुखात् श्रुत्वा राजा दशरथः सुखी।
ततयज्ञे वंशयज्ञं स देव्या सह तत्परः ॥
ततः काले महाराज्ञी गर्भं धत्ते मनोहरम्
चैत्रे मासि सिते पक्षे नवम्यां शोभने दिने।
अतिपुण्यसुसंलग्ने जातो रामः स्वयं हरिः।
पुनर्व्वस्वृक्षसंयुक्ता सा तिथिः सर्व्वकामदा ।
श्रीरामनवमी प्रोक्ता कोटिसूर्य्यग्रहाधिका ॥
अस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः।
यत्किञ्चित् क्रियते कर्म्म तदक्षयकरं स्मृतम् ॥
उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम् ।
तस्मिन् दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः।
तस्मिन् दिने महापुण्ये राममुद्दिश्य भक्तितः
जपेदेकान्त आसीनो यावत् स्याद्दशमीदिनम्॥
तेनैव स्यात् पुरश्चर्य्या दशम्यां भोजयेद्विजान्।
भक्ष्यभोज्यैर्बहुविधैर्भक्त्या दद्याच्च दक्षिणाम्।
कृतकृत्यो भवेत्तेन सद्यो रामः प्रमोदति ॥
यस्तु रामनवम्यान्तु भुङ्क्ते मर्त्यो विमूढधीः।
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः ॥
कुर्य्याद्रामनवम्यां य उपोषणमतन्द्रितः ।
न शेते मातृजठरे स्वयं रामो भवेत्तु सः ॥
श्रीरामनवमी नाम पुण्यात् पुण्यतमव्रतम्।
इति श्रुत्वा सुसंतुष्टः सनकः पुनरब्रवीत् ।
विधिना केन कर्त्तव्यं वद मे कमलोद्भव ॥*॥
ब्रह्मोवाच ।
व्रतपूर्व्वदिने स्नात्वा सङ्कल्प्य निरामिषम ।
त्यक्त्वा च योषिच्छयनं शयीत स्थण्डिले कुशे॥
ब्राह्मे मुहूर्त्ते चोत्थाय कृत्वा प्रातःक्रियां ततः ।
प्रातः स्नात्वा शुचिर्भूत्वा सङ्कल्पं विधिनाचरेत्
प्रतिमायां घटे वापि पटे वा यन्त्रतोऽपि वा ।
शालग्रामशिलायान्तु तुलसीदलकल्पिता ॥
पूजा श्रीरामचन्द्रस्य कोटिकोटिगुणाधिका ।
कौशल्या पूजनीयादौ राजा चैव ततः परम् ॥
षड्ङ्गं पूजयेत्तत्र लक्ष्मणादीन् विशेषतः ।
पूजयेत् परया भक्त्या परिवारं ततः परम् ॥
ततो ग्रहांश्च दिक्पालांस्तदस्त्राणि च पूजयेत् ।
उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्व्वसुदिने मेषं गते भूपचि :
निर्द्दग्धुं निखिलाः पशाशसमिधो मध्यादयो-
ध्यारणे
राविर्भूतमभूदपूर्व्वविभवं यत्किञ्चिदेकं महः ॥
ततो वाद्यादिकं कृत्वा दद्यादर्घ्यं विशेषतः ।
मूलमन्त्रेण दद्यार्घं भक्त्या पुष्पाञ्जलित्रयम् ॥
एवमष्टसु यामेषु अष्टधा च जपेद्व्रती ।
इतिहासकथां श्रुत्वा गीतनृत्यैर्निशां नयेत् ॥
ततः परदिने प्रातः स्नानं कृत्वा विधानतः ।
रामं दूर्व्वादलश्यामं भक्त्या भक्त्या प्रपूजयेत्।
दक्षिणां विधिवद्दत्त्वा ततोऽच्छिद्रावधारयेत्।
भोजयित्वा ततो विप्रान् स्वयं पारणमाचरेत्।
य इदं शृणुयान्नित्यं पुण्यार्द्दे च विशेषतः ।
बहुपुत्रो धनाढ्यश्च अन्ते ब्रह्मात्मतां व्रजेत् ॥
सङ्गामे वैरिणो हत्वा सर्व्वत्र विजयी भवेत्
राजद्वारे महाघोरे संग्रामे शत्रुसङ्कटे ॥

दूर्वादलश्यामरामस्तस्य रक्षाकरो भवेत् ॥
भक्त्या यः शृणुयाद्वोगी उल्लापः स भवेत् सदा
वन्ध्या पुत्रवती सा च पतिचित्तानुवर्त्तिनी ।
सपत्नीदर्पदलनी सा भवेन्नात्र संशयः ॥
दरिद्रो लभते वित्तं भीतो भवति निर्भयः ।
यज्ञदानतपांस्यस्य तीर्थस्नानादिकाः क्रियाः ॥
न रामनवमी-नाम-व्रतस्यैककला-समाः ।
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ॥
शिष्याय भक्तियुक्ताय शुचयेऽपि प्रदापयेत् ।
शठाय परतन्त्राय विकत्थनरताय च ॥
भ्रमादपि न वक्तव्यं यदीच्छेदात्मनो हितम् ।
मयैतत् कथितं वत्स तव स्नेहाद्व्रतोत्तमम् ॥
य इदं कुरुते भक्त्या श्रीरामनवमीव्रतम् ।
सर्व्वपापप्रमुक्तस्य अन्ते ब्रह्मत्वमाप्नुयात् ॥"
इति श्रीरामभक्तितरङ्गिण्यां ब्रह्मसनकसंवादे
श्रीरामनवमीव्रतकथा समाप्ता ॥

श्रीलः, त्रि, (श्रीर्विद्यतेऽस्येति । श्री + सिध्वादित्वात् लच् ।) लक्ष्मीवान् । इत्यमरः ॥ शोभायुक्तश्च ॥

श्रीलता, स्त्री, (श्रीविशिष्टा लता ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥

श्रीवत्सः, पुं, (श्रीयुक्तं वत्सं वक्षो यस्य ।) विष्णुः । विष्णुचिह्नविशेषः । स तु वक्षस्थशुक्लवर्णदक्षिणावर्त्तलोमावली । (यथा, रघुः । १०।१०।
"प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ।
कौस्तुभाख्यमपांसारं बिभ्राणं हृदतोरसा ॥")
अर्हतां ध्वजः । इति हेमचन्द्रः ॥ सुरङ्गामेदः । इति त्रिकाण्डशेषः ॥

श्रीवत्सकी, [न्] पुं, श्रीवत्सकः श्रीवत्सवत् चिह्नमस्त्यस्येति । श्रीवत्सक + इनिः ।) हृद्रक्षावस्तुहयः । इति हेमचन्द्रः ॥

श्रीवत्सभृत्, पुं, (श्रीवत्सं बिभर्त्तीति । भृ + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

श्रीवत्सलाञ्छनः, पुं, विष्णुः । इत्यमरः ।१।१।२२॥
"श्रीवत्सो लाञ्छनं चिह्नं यस्य श्रीवत्सलाञ्छनः ।
वक्षस्थनन्यमहापुरुषलक्षणं श्वेतरोमावर्त्तविशेषः श्रीवत्स इति सर्व्वस्वे । श्रीवत्सो हृत्सङ्गतमणिविशेषः कौस्तुभवदिति क्षीरदासः ।"
इत्यमरटीकायां भरतः ॥

श्रीवत्साङ्कः, पुं. (श्रीवत्सः अङ्कश्चिह्नं यस्य ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । ४३ । ३ ।
"लक्ष्मवराः चीरोदं मत्वा ते तुष्टुवुः सुराः सेन्द्राः ।
श्रीवत्साङ्क कौस्तुभमणिकिरणोद्भासितोरस्कम् ॥")

श्रीवराहः, पुं, (श्रिया युक्तो वराहः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

श्रीवल्ली, स्त्री, (श्रीयुता वल्ली ।) कण्टकहृक्षभेदः । तत्पर्य्यायः । श्रियवल्ली २ कण्टवल्ली ३ श्रीवल्ली ४ भद्रा ५ कटुफला ६ दुरारोहा ७ । अस्या गुणाः । कटुत्वम् । अम्लत्वम् । वातश्लेष्मकफापहत्वञ्च । तत्फलं तैललेपन्नमत्यन्तं रुचिकृत् परम् । इति राजनिर्घण्टः ॥

श्रीवाटी, स्त्री, नागवल्लीभेदः । इति राजनिर्घण्टः ॥

श्रीवारकः, पुं, (स्त्रियं वारयति कामयते इति । हृ + घिच् + खुल् ।) सितावरशाकः । इति राजनिर्घण्टः ॥

श्रीवासः, पुं, (स्त्रियं सरलहृक्षं वासयतीति । वस + घिच् + अच् ।) सरलहृक्षरसः । टारपिन् इति भाषा । तत्पर्य्यायः । पायसः २ हृक्षधूपः ३ श्रीवेष्टः ४ सरलद्रवः ५ । इत्यमरः ॥ तैलपर्णी ६ श्रीपिष्टः ७ । इति जटाधरः ॥ श्रीवेशः ८ । इति शब्दरत्नावली ॥ अस्य गुणाः ।
"श्रीवासः सरलं पूतिः कुन्दुरुग्रन्थिपर्णकम् ।
सिल्हकः परमा मांसी देवदारु सुरा नखम् ।
सर्व्वेऽमी परमा लक्ष्मी रक्षोघ्ना ज्वरनाशनाः ॥"
इति राजवल्लभः ॥

अन्यत् श्रीवेष्टशब्दे द्रष्टव्यम् ॥ (श्रियो लक्ष्म्या वासः आश्रयस्थानम् ।) पद्मम् । (यथा, राजेन्द्रकर्णपूरे । ४२ ।
"श्रीवासो यत्र सां पदं सुमनसामप्यास्पदं सम्पदां
यत्रागच्छति गोचरं नयनयोः काश्मीरमौनध्वजः ॥")
विष्णुः । इति मेदिनी ॥ शिवः । इति शब्दरत्नावली ॥

श्रीवासः, [स्] पुं, श्रियं सरलहृक्षं वासयतीति । वस + णिच् + असुन् ।) सरलद्रवः । इत्यमरटीका ॥

श्रीविद्या, स्त्री, (श्रिया विद्या ।) महाविद्याविशेषः । सा तु त्रिपुरसुन्दरी । तस्याः षट्त्रिंशद्भेदाः तन्त्रबाहुल्यभिया न लिखिताः । अथ श्रीविद्या । तत्र भेदः । प्राणार्थवे ।
"भुमिचन्द्रः शिवो माया अग्निः लक्ष्माधवादनौ ।
अर्द्धचन्द्रश्च बिन्दुश्च नवार्णो मेरुरुच्यते ॥
महात्रिपुरसुन्दर्य्या मन्त्रा मेरुसमुद्भवाः ।
सकला भुवनेशानी कामेशी बीजमुदृष्टतम् ।
अनेन सकला विद्याः कथयामि वरानने ॥
अस्यन्तस्तृतीयवर्णोऽयं कलमध्ये सुलोचने ।
वाग्भवं पञ्चवर्णाढ्यं कामराजमथोच्यते ॥
मादनं शिवचन्द्राढ्यं शिवान्तं मीननोचने ।
कामराजमिदं मद्रे षड्वर्णं सर्व्वमोहनम् ॥
अग्निबीजं वरारोहे चन्द्रार्द्धं सर्व्वमोहनम् ।
एतामुपास्य देवेशि कामः सर्व्वाङ्गसुन्दरः ।
कामराजो भवेद्देवि विद्येयं ब्रह्मरूपिणी ॥"
अस्यार्थः । अग्निरेकारः तूर्य्य ईकारः तेन ककार एकार ईकारलकारमहामाया वाग्भवकूटम् । शिवो हकारः चन्द्रः सकारः तेन हकारसकारलकारमहामाया इति कामराजकूटम् । चन्द्रः सकारः तेन सकारककारलकारमहामाया इति अग्निकूटम् । तेन त्रिभिः कूटैः कामराजविद्येयम ॥* अस्याः ध्यानं यथा,—

"बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम्
पाशाङ्कुशधरांशायं धारयन्तीं शिवां श्रये ॥"
एवं ध्यात्वा मानसपूजादिकं कुर्य्यात् । इति तन्त्रसारः ॥

श्रीहृक्षः, पुं, (श्रीप्रदः श्रीप्रियो वा हृक्षः । शाकपार्थिवादित्वात् समासः ।) अश्वत्थहृक्षः । इति हेमचन्द्रः ॥ बिल्वहृक्षः । यथा,—
"इषे मास्यसिते पक्षे नवम्यामार्द्रयोगतः ।
श्रीहृक्षे बोधयामि त्वां यावत् पूजां करोम्यहम् ॥"
इति तिथ्यादितत्त्वधृतश्रीदुर्गाबोधनमन्त्रः ॥
(विष्णोर्वक्षः स्थलस्थश्रीवर्त्तविशेषः । यथा, विष्णुपादादिकेशान्तवर्णनस्तोत्रे । २८ ।
"वक्षः श्रीहृक्ष-कान्तं मधुकरनिकरश्यामलं शार्ङ्गपाणेः
संसाराध्वश्रमार्त्तेरुपवनमिव यत् सेवितं तत् प्रपद्ये ॥"
अश्वस्य हृदावर्त्तः । इति माधवटीकायां मल्लिनाथः । ५ । ५६ ॥)

श्रीहृक्षकः, पुं, (श्रीहृक्ष एव । स्वार्थे कन् ।) अश्वस्य हृदावर्त्तः । इति त्रिकाण्डशेषः ॥ (अस्य प्रमाणं माघे । ५ । ५६ । इत्यस्य टीकायां द्रष्टव्यम् ॥*)

श्रीवेष्टः, पुं, (श्रियः सरलहृक्षस्य वेष्टः निर्य्यासः) सरलहृक्षस्य निर्य्यासः । तत्पर्य्यायः ।
"श्रीवेष्टो हृक्षधूपश्च चित्तागन्धो रसायकः ।
श्रीवासः श्रीरसो वेष्टो लक्ष्मीवेष्टस्तु वेष्टकः ॥
वेष्टसारो रसावेष्टः शीरग्रीर्षः सुधूपकः ।
धूपाङ्गस्त्रिलपर्णश्च सरलाङ्गोऽपि षोडश ॥"
तद्गुणाः ।
"श्रीवेष्टः कटुतिक्तश्च कषायः शेऽपित्तजित् ।
योनिदोषरुजाजीर्णव्रणघ्नाश्मानदोषनुत् ॥"
इति राजनिर्घण्टः ॥*॥

अपि च ।
"श्रीवासः सरलः स्रावः श्रीवेष्टो हृक्षधूपकः ।
श्रीवासो मधुरस्निग्धः स्निग्धोष्णसुवरः सरः ॥
पित्तलावातमूर्द्धास्थिररोगकफापहः ।
रक्षोऽश्रीस्त्वक्ददीर्गन्ध्यपूकाकण्डूव्रणप्रणुत् ॥"
इति भावप्रकाशः ॥

श्रीशः, पुं, (श्रिया ईशः ।) विष्णुः । (यथा, मुग्धबोधे ।
"श्रीशोऽधिश्रेतेऽहिमधिष्ठितोऽब्धि-
मध्यास्य घोषं मथुरामनूद्य ।
यो द्वारकामध्युषितो विकुण्ठ-
मुपावसद्यावसतात् स हरिः ॥")
श्रीरामः । इति शब्दरत्नावली ॥

श्रीसंज्ञं, क्ली, (श्रियः संज्ञा संज्ञा यस्य ।) लवङ्गम् इत्यमरः ॥

श्रीसहोदरः, पुं, (श्रियाः सहोदरः समुद्रजातत्वात् ।) चन्द्रः । इति केचित् ॥

श्रीहस्तिनी, स्त्री, (श्रीयुक्ता हस्तिनीव ।) हृक्षविशेषः । हातिशुंड़ा इति भाषा । तत्पर्य्यायः

पूरुषण्डी २। इत्यमरः॥ नामदन्ती ३। इति जटाधरः॥

श्रु, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) श्रवति। रेफरहितोऽप्ययमिति केचित्। श्रवति। इति दुर्गादासः॥

श्रु, न गतौ। शृणौ। इति कविकल्पद्रुमः॥ (स्वा०-पर०-सक०-अनिट्। न, शृणोति। रक्षांसीति पुरापि संशृणुमहे। इति मुरारौ व्यतीहारादात्मनेपदम्। संशृणुष्व मयाख्यातम्। इति गणश्रुतानित्यत्वात्। आख्यातशब्दस्य क्रियाविशेषवतयाकर्मकत्वे समो गम्यृच्छीत्यादिना म वा। इति दुर्गादासः॥

श्रुग्वारुः, पुं, विकङ्कतवृक्षः। इति रत्नमाला॥

श्रुचिका, स्त्री, सर्ज्जिकाक्षारः। इति रत्नमाला॥

श्रुतं, क्ली, (श्रूयते स्म यदिति। श्रु + क्तः।) शास्त्रम्। इत्यमरः॥ (यथा, रघुः। २। २१।

"श्रुतस्य यायादयमन्तमर्भक-
स्तथा परेषां युधि चेति पार्थिवः।
अवेक्ष्य धातोर्गमनार्थमर्थवित्
चकार नाम्ना रघुमात्मसम्भवम्॥")

श्रवणगोचरः। इति शब्दरत्नावली॥ (यथा, माण्डूक्योपनिषदि। ३। २। ३।

"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन॥"

पुं, कालिन्दीगर्भजातः कृष्णस्य पुत्रविशेषः। यथा, भागवते। १०। ६१। १४।

"श्रुतः कविर्बभ्रुरथो वीरः सुबाहुर्भद्र एकलः।
शान्तिदर्शः पूर्णमासः कालिन्द्याः सोमकोऽवरः॥")

श्रुतः, त्रि, (श्रु + क्तः।) अवधृतः। इत्यमरः॥ आकर्णितः। इति मेदिनी॥ (यथा, रघुः। १। ७८।

"स शापो न त्वया राजन् न च सारथिना श्रुतः॥")

श्रुतकीर्त्तिः, स्त्री, (श्रुता कीर्त्तिर्यस्याः।) जनकभ्रातृकुशध्वजराजकन्या। सा शत्रुघ्नपत्नी। यथा,

"शत्रुघ्नोऽपि धर्म्मात्मा अब्रवीन्मिथिलेश्वरः।
श्रुतकीर्त्तिमहाबाहो पाणिं गृह्णीष्व पाणिना॥"

इति वाल्मीकीये रामायणे बालकाण्डे ७३ सर्गः॥ अपि च।

"एवं भवतु भद्रं ते कुशध्वजसुते इमे।
पत्नीर्भजेतां सहिते शत्रुघ्नभरतावुभौ॥"

इति तत्रैव ७२ सर्गः॥

देवपौ, पुं। (द्रौपदीगर्भजाते अर्জ্জুনस्य पुत्रे च पुं। यथा, महाभारते। १। ६३। १२०।

"अर्জ্জুनात् श्रुतकीर्त्तिञ्च शतानीकञ्च नाकुलिः॥")

कीर्त्तियुक्ते, त्रि। इति केचित्॥

श्रुतदेवी, स्त्री, (श्रुतस्य शास्त्रस्य देवी।) सरस्वती। इति हेमचन्द्रः॥

श्रुतबोधः, पुं, (श्रुतस्य बोधो यस्मात्। श्रुतमात्रं बोधयतीति वा। बुध + घिच् + अच्।) कालिदासकृतच्छन्दोग्रन्थविशेषः। यथा,—

छन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते।
तदहं कथयिष्यामि श्रुतबोधमविस्तरम्॥"

इति तदुपन्यस्यादयश्लोकः॥

श्रुतर्षिः, पुं, (श्रुतप्रधान ऋषिः।) ऋषिविशेषः। स तु सुश्रुतादिः। इति विकाण्डशेषः। यथा,—

"संहिता ऋग्यजुःसाम्नां सहितास्तैः श्रुतर्षिभिः।
सामान्याद्वैकृतादेव दृश्यन्ते द्वापरे त्विह॥"

इति मात्स्ये १२० अध्यायः॥

श्रुतश्रवोऽनुजः, पुं, (श्रुतश्रवसोऽनुजः।) शनैश्चरग्रहः। इति हारावली॥

श्रुतश्रोणी, स्त्री, द्वयन्ती। इति भावप्रकाशः॥

श्रुतादानं, क्ली, (श्रुतस्यादानम्।) ब्रह्मवादः। इति हारावली॥

श्रुताध्ययनसम्पन्नः, त्रि, (श्रुतस्य शास्त्रस्य अध्ययने सम्पन्नः युक्तः।) धर्म्मशास्त्रज्ञः। यथा, याज्ञवल्क्यः।

श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः।
राज्ञा सभासदः कार्य्याः शत्रौ मित्रे च ये समाः॥"

इति व्यवहारतत्त्वम्॥

श्रुतान्वितः, त्रि, (श्रुतेन श्रुतशास्त्रेण अन्वितः।) शास्त्रज्ञः। यथा,—

"अभून्नृपो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः।
गुरुर्व्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत् स्वयम्॥"

इति भट्टिः। १। १॥

श्रुतार्थः, पुं, (श्रुतोऽर्थः।) शाब्दबोधविषयीभूतार्थः। श्रवणमात्रबोध्योऽर्थः। यथा,—

"श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्।
प्राप्तस्य बाधादित्येवं परिसङ्ख्या त्रिदोषिका॥"

इति प्रायश्चित्ततत्त्वम्॥

(त्रि, श्रुतोऽर्थो येन सः। यथा, हरिवंशे। ११५। २७।

"श्रुतार्थो देव गुह्यस्य भवान् यत्र वयं स्थिताः॥")

श्रुतायुः, पुं, सूर्य्यवंशीयराजविशेषः। स तु कुशस्य चतुर्थपुरुषः। यथा,—

"नाभागस्याम्बरीषोऽभूत् सिन्धुद्वीपस्ततोऽभवत्
ततः श्रुतायुः पुत्रोऽभूत ऋतुपर्णस्ततोऽभवत्॥"

इति मात्स्ये १३ अध्यायः॥

श्रुतिः, स्त्री, (श्रूयतेऽनयेति। श्रु + "श्रुयजिस्तुभ्यः करणे।" ३। ३। ८४। इत्यस्य वार्त्तिकोक्त्या करणे।" क्तिन्।) वेदः। (यथा, मनुः। २। १०।

"श्रुतिस्तु वेदो विज्ञेयो धर्म्मशास्त्रन्तु वै स्मृतिः॥")

कर्णः। इत्यमरः॥ (यथा, भागवते। ८। ४। १८।

"करौ हरेर्मन्दिरमार्জ্জनादिषु
श्रुतिं चकाराच्युतसत्कथोदये॥")

गर्भस्थस्य पञ्चमासैः श्रुतिर्भवति। इति सुश्रुतः॥ श्रुतीन्द्रियग्राह्यः शब्दः शब्दत्वादिः। यथा,—

"घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः॥"

इति भाषापरिच्छेदः॥

कर्णस्य शुभाशुभलक्षणमाह।

"रक्ताल्पपरुषश्मश्रुकर्णाः स्युः पापमृत्यवः।
निर्म्मांसेषिपिटैर्भोगाः क्षपणा दीर्घकर्णकाः॥
शङ्कुकर्णाय राजानो रोमकर्णाः शतायुषः।
बृहत्कर्णाय राजानो धनिनः परिकीर्त्तिताः॥"

इति गारुड़े ६६ अध्यायः॥

(श्रु + भावे क्तिन्।) श्रोत्रकर्म्म। (यथा, भागवते। ८। ५। १६।

"यन्नामश्रुतिमात्रेण पुमान् भवति निर्म्मलः
तस्य तीर्थपदः किंवा दासानामवशिष्यते॥")

वार्त्ता। इति मेदिनी॥ (यथा, रघुः। १। २७।

"व्याहृता यत्परैस्तेभ्यः श्रुतौ तस्करता स्थिता॥")

श्रवणनक्षत्रम्। इति शब्दरत्नावली॥ षड्जाद्यास्त्रिका। इति हेमचन्द्रः॥ श्रोरत् इति भाषा। (यथा, शिशुपालवधे। १। १०।

"रथक्षिराघट्टनया नभस्वतः
पृथक्विभिन्नश्रुतिमण्डलैः स्वरैः॥")

सा च द्वाविंशतिप्रकारा यथा,—

"नान्दी चालनिका रमा च सुमुखी चित्रा विचित्रा घना
मातङ्गी सरसामृता मधुकरी मैत्री शिवा माधवी।
बाला शार्ङ्गरवी कला कलरवा माला विशाला जया
मात्रेति श्रुतयः पुराणकविभिर्द्वाविंशतिः, कीर्त्तिताः॥

नान्दी-विशाला-सुमुखी-विचित्रासम्भवः सदा।
षड्जो मतो मुनीन्द्रेण भरतेन शिवेन च॥
चित्रा घना चालनिका निवेशात्
संजायतेऽसौ ऋषभस्तथैव।
स्वरोऽपि माला सरसानिवेशात्
गान्धारनामा प्रथितः पृथिव्याम्॥
मातङ्गी माधवी मैत्री शिवाजातस्तु पञ्चमः।
कला कलरवा बाला शार्ङ्गरव्यास्तु पञ्चमः॥
जायामृतारसानान्तु संयोगाद्धैवतस्वरः।
मात्रा मधुकरी योगात् निषादः संप्रजायते॥
श्रुतिस्थाने स्वरान् वक्तुं नालं ब्रह्मापि तत्त्वतः।
जले च श्रुतरां मार्गो मीनानां नोपलक्ष्यते॥
गगने पक्षिणां यद्वत् तद्वत् स्वरगता श्रुतिः।
श्रुतिर्नादवशा प्रोक्ता तथाख्या च कला मता।
यथा तैलगतं सर्पिर्यथा काष्ठगतोऽनलः।
ज्ञायतेऽल्पोपदेशेन यथा स्वरगता श्रुतिः॥
वीणादेस्तु श्रुतिज्ञानं स्वरज्ञानन्तु वंशजम्।
अश्विनौ वसवो रुद्राः सद्यैषाङ्गेन शुश्रुवुः॥
प्रश्नसंसुहरेर्नादमतो द्वाविंशतिः श्रुतिः॥"

इति सङ्गीतदामोदरः।

अन्यच्च ।
"तोत्राकुमुदतोमन्दाक्रन्दोवत्सस्तु षड्जगाः ।
दयावती रञ्जनी च रतिका ऋषभे स्थिताः ॥
रौद्री क्रोधा च गान्धारे वज्रिकाय प्रसारिणी ।
प्रीतिश्च मार्ज्जनीत्येताः श्रुतयो मध्यमाश्रिताः ॥
क्षितौ रक्ता च सन्दीपन्यालापिन्यपि पञ्चमे ।
मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः ।
उग्रा च क्षोभिणीति द्वे निषादे वसतः श्रुती ॥"
इति सङ्गीतरत्नाकरः ॥

श्रुतिकटः, पुं, (श्रुतिं कटतीति । कट् + अच् ।) प्राश्नकोष्ठः । अहिः । पापशोधनम् । इति मेदिनी ॥

श्रुतिकटुः, पुं, (श्रुतौ कटुः ।) कठोरशब्दः । अलङ्कारस्य दोषविशेषः । यथा,—
"श्रुतिकटुश्रुतमंस्कृतिरक्रमोक्त्यनुचिताकविजुष्टविमन्थिकाः ।" उदाहरणम् ।
"वाचा मधुरया तन्वि स्मितापाङ्गतरङ्गया ।
मनाग्वदनमुत्तोल्य कार्त्तार्थ्यं कुरु मादृशम् ॥"
इति काव्यचन्द्रिका ॥

श्रुतिकथितः, त्रि, (श्रुतौ कथितः ।) श्रुत्युक्तः । वेदोक्तः । इति लोकप्रसिद्धिः ॥

श्रुतिजीविका, स्त्री, (श्रुतिरेव जीविका यस्याः ।) धर्म्मशास्त्रम् । यथा,—
"स्मृतिर्धर्म्मसंहिता च संहिता श्रुतिजीविका ।"
इति शब्दरत्नावली ॥
वेदजीवनोपायश्च ॥

श्रुतितत्परः, त्रि, (श्रुतौ तत्परः ।) सकर्णः । इति जटाधरः ॥ वेदाभ्यासरतश्च ॥

श्रुतिधरः, त्रि, (श्रुत्या श्रवणमात्रेण धरतीति । धृ + अच् । श्रुतिमात्रधारकः । श्रवणमात्रेणाभ्यासकर्त्ता । (यथा, गीतगोविन्दे । १ । ४ ।
"स्मर्त्तो कोऽपि न विश्रुतः श्रुतिधरो धोरो कविः क्ष्मापतिः ॥")
तदौषधं यथा,—
हरिरुवाच ।
"हस्तिकर्णस्य वै मूलं गृहीत्वा चूर्णयेद्दर ।
सर्वरोगविनिर्मुक्तं चूर्णं पलशतं शिव ॥
सक्षीरं भक्षितं कुर्य्यात् सप्ताहेन वृषध्वज ।
नरं श्रुतिधरं शूरं मृगेन्द्रगतिविक्रमम् ॥
पद्मगौरप्रतीकाशं युक्तं दशशतायुषा ।
षोड़शाब्दाकृतिं विप्र सततं दुग्धभोजितम् ॥
मधुसर्पिःसमायुक्तं जन्ममायुष्करं भवेत् ।
तल्लब्धं मधुना सार्द्धं दशवर्षसहस्रिणम् ।
कुर्य्याच्चरं श्रुतिधरं प्रमदाजनवल्लभम् ॥"
इति गारुड़े १८१ अध्यायः ॥

श्रुतिवर्ज्जितः, त्रि, (श्रुत्या वर्जितः ।) वधिरः । इति जटाधरः ॥ वेदरहितश्च ॥

श्रुतिवेधः, पुं, (श्रुतेः कर्णस्य वेधो यत्र ।) कर्णवेधः । तस्य विहितकालो यथा दीपिकायाम् ।
"नो जन्मेन्दुमभाससूर्य्यरविजक्ष्माजाहसुताश्रुतिं
यस्तोऽर्कं लघुयुग्मविष्णुभृदुभे स्वात्युत्तरादित्यभे
सौम्येस्वायत्रिकोणकण्टकगते: पापेक्षिलाभारिगे-
रोजोऽब्दे श्रुतिवेध इत्यसितभे लग्ने तु काले शुभे ॥"
इति ज्योतिस्तत्त्वम् ॥

अन्यच्च । तत्र तिथयः रिक्ताभिन्नाः प्रशस्ताः । वाराः बृहस्पतिबुधशुक्राणां प्रशस्ताः । नक्षत्राणि अश्विनी रेवती हस्ता चित्रा पुनर्व्वसुधनिष्ठा मृगशिरः पुष्यः श्रवणानुराधा उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत्स्वातौ । लग्नानि वृषतुलाधनुर्म्मीनसंज्ञकानि । अयुग्मवर्षे । जन्ममासचैत्रपौषाग्रहायणभिन्नमासाः प्रशस्ताः । शुक्लपक्षे चन्द्रतारादिशुद्धौ हरिशयनभिन्नकाले कालशुद्धौ श्रुतिवेधः कार्य्यः । इति ज्योतिषम् ॥

श्रुतिस्फोटा, स्त्री, (श्रुतिं स्फोटयतीति । स्फुट् + अच् । टाप् ।) कर्णस्फोटा लता । इति राजनिर्घण्टः ॥

श्रुवः, पुं, (श्रु + कः ।) यागः । इति जटाधरः ॥ स्रुवे, क्ली । इति केचित् ॥

श्रुवा, स्त्री, मूर्व्वा । इति राजनिर्घण्टः ॥

श्रुवाहृच्चः, पुं, विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

श्रेढ़ी, स्त्री, अङ्कविशेषः । भिन्नं भिन्नं यल्लिखित्वा द्रव्यादिकमेकीक्रियते तद्गणनायाः श्रेढ्या मिश्र प्रायत्वात्तद्गणनानन्तरमारब्धः श्रेढ़ीव्यवहारः । इति मुनीश्वरगणककृतलीलावतीटीका ॥ अस्याद्यसूत्रं यथा । अथ श्रेढ़ीव्यवहारे करणसूत्रम् ।
"सैकपदघ्नपदार्द्धमथैका-
द्यङ्कयुतिः किल संकलिताख्या ।
सा द्वियुतेन पदेन विनिघ्नी
स्यात् त्रिहृता किल संकलितैक्यम् ॥"
उदाहरणम् ।
"एकादीनां नवान्तानां पृथक् संकलितानि मे
तेषां संकलितैक्यञ्च प्रचक्ष्व गणक द्रुतम् ॥"
न्यासः । १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ ।
लब्धान्येतेषां संकलितानि । १ । ३ । ६ । १० । १५ । २१ । २८ । ३६ । ४५ । अथ तेषां संकलितैक्यानि । १ । ४ । १० । २० । ३५ । ५६ । ८४ । १२० । १६५ । तस्य शेषसूत्रं यथा । करणसूत्र सार्द्धमार्य्या ।
"पादोत्तरमिते गच्छे गुणवर्गफलद्वये द्विगुणे ।
समवृत्तानां संख्या तद्वर्गो वर्गवर्गश्च । खखपदोनौ स्यातां अर्द्धसमानाश्च विषमाणाम् ॥"
उदाहरणम् ।
"समानामर्द्धतुल्यानां विषमाणां पृथक् पृथक् ।
वृत्तानां वद मे संख्यामनुष्टुप्छन्दसां द्रुतम् ॥"
न्यासः उत्तरो द्विगुणः गच्छः ८ लब्धा समवृत्तानां संख्या २५६ । तथार्द्धसमानाश्च ६५२८० विषमाणाश्च ४२८४८०१७६० । इति लीलावती ॥

श्रेणिः, पुं, स्त्री, (श्रयति श्रीयते वा । श्रि + "वर्हिश्रिस्रुयुदिभ्यः ।" उणा० ४ । ५१ । इति णिः ।) निश्छिद्रपंक्तिः । तत्पर्य्यायः । पंक्तिः २ श्रेणी ३ विस्रोली ४ वीथी ५ आलिः ६ पालिः ७ आवलिः ८ आली ९ पाली १० आवली ११ वीथिः १२ वीथिका १३ राजी १४ राजिः १५ रेखा १६ लेखा १७ । इति शब्दरत्नावली ॥ (यथा, कुमारे । ५ । ८ ।
"न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते ॥"):
समानश्लिष्टिसंहतिः । इति मेदिनी ॥ कोम्पानि इति इङ्गरेजीयभाषा ॥ सेकपात्रम् । इति विश्वः ॥

श्रेणिकः, पुं, मगधदेशीयराजविशेषः । इति हेमचन्द्रः ॥

श्रेणी, स्त्री, (श्रेणि + कृदिकारादिति ङीष् ।) श्रेणिः । इति शब्दरत्नावली ॥ (यथा, रघुः । १ । ४१ ।
"श्रेणीबन्धाद् वितन्वद्भिरस्तभां तोरणस्रजम् ।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननैः ॥"
श्रेयः, [स]क्ली, (इदमनयोरतिशयेन प्रशस्यम् । प्रशस्य + ईयसुन् । "प्रशस्यस्य श्रः ।" ५ । ३ । ६० । इति श्रः ।) धर्म्मम् । मुक्तिः । इत्यमरः ॥ (चतुर्व्वर्ग एव श्रेयः । यथा, मनुः । २ । २२४ ।
"धर्म्मार्थावुच्यते श्रेयः कामार्थौ धर्म्म एव च ।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः ॥"
"धर्म्मार्थकामात्मकः परमपुरुषार्थरूपस्त्रिवर्ग एव पुरुषार्थतया श्रेय इति विनिश्चयः । एवञ्च बुभुक्षून् प्रत्युपदेशो न मुमुक्षून् । मुमुक्षूणान्तु मोक्ष एव श्रेयः इति षष्ठे वक्ष्यते ।" इति तट्टीकायां कुल्लूकः ॥) शुभम् । इति मेदिनी ॥ (यथा, रघुः । १ । ७८ ।
"प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥")
श्रेयसी, स्त्री, (इदमनयोरतिशयेन प्रशस्या । प्रशस्य + ईयसुन् । प्रशस्यस्य श्रः । उगित्त्वात् ङीप् ।) हरीतकी । पाठा । करिपिप्पली । इत्यमरः ॥ रात्रा । इति विश्वः ॥ शुभयुक्ता च ॥

श्रेयांसः, पुं, वृत्ताद्दिशेषः । इति हेमचन्द्रः ॥

श्रेयान्, [स] त्रि, (अयमनयोरतिशयेन प्रशस्यः । प्रशस्य + ईयसुन् । "प्रशस्यस्य श्रः ।" ५ । ३ । ६० । इति श्रः ।) श्रेष्ठः । इत्यमरः ॥ (यथा, मनुः । १० । ११२ ।
"प्रतिग्रहाच्छ्लः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते ॥"
शुभयुक्तश्च ॥

श्रेष्ठं, क्ली, (अयमेषामतिशयेन प्रशस्यः । प्रशस्य + इष्ठन् । प्रशस्यस्य श्रः ५ । ३ । ६० । इति श्रः ।) गोदुग्धम् । इति त्रिकाण्डशेषः ॥

श्रेष्ठः, पुं, (प्रशस्य + इष्ठन् ।) कुबेरः । नृपः । द्विजः । इति शब्दरत्नावली ॥ विष्णुः । इति तस्य सहस्रनामस्तोत्रम् ॥ (महादेवः । यथा, महाभारते तस्य सहस्रनामस्तोत्रे । १३ । १७ । ४० ।
"विश्वरूपः स्वयं श्रेष्ठो बलवीरो बलो गणः ॥")
श्रेष्ठः, त्रि, (प्रशस्य + इष्ठन् ।) प्रशस्तः । वरः । (यथा, रामायणे । २ । १ । २० ।

"इष्वस्त्रे च पितुः श्रेष्ठो बभूव भरताग्रजः ॥") तत्पर्य्यायः। श्रेयान् २ पुष्कलः ३ सत्तमः ४ अतिशोभनः ५। इत्यमरः॥ सुख्यः ६ वरेण्यः७ प्रमुखः ८ अग्रः ९ अग्रहरः १० उत्तमः ११ अग्रहः १२ अनुत्तमः १३ अग्रीयः १४ प्रवेकः१५ अग्र्यः १६ अग्रियः १७। इति शब्दरत्नावली॥ अनवरः १८ अग्रिमः १९ प्राग्रः २० प्राग्रहरः२१ अग्रर्ह्यः २२। इति जटाधरः॥ वृद्धः। ज्येष्ठः। इति शब्दरत्नावली॥

श्रेष्ठकाष्ठः, पुं. (श्रेष्ठं काष्ठमस्य।) शाकवृक्षः। इति राजनिर्घण्टः॥

श्रेष्ठा, स्त्री.(इयमासामतिशयेन प्रशस्या। इष्ठन्। टाप्।) स्थलपद्मिनी। इति राजनिर्घण्टः॥ मेदा। इति केचित्॥ उत्तमा नारी च॥

श्रेष्ठाम्लं, क्ली. (श्रेष्ठं अम्लम्।) वृक्षाम्लम्। इति राजनिर्घण्टः॥

श्रेष्ठाश्रमः, पुं, (श्रेष्ठ आश्रमः।) गृहस्थाश्रमः। आश्रमत्रयाणां पालकत्वात्॥

श्रेष्ठी, [न्] पुं.(श्रेष्ठं धनादिकमस्त्यस्येति। इनिः।) कुलोत्तमशिल्पी। यथा,—

"कुलीकस्तु कुलीश्रेष्ठी कुलश्रेष्ठिनि शिल्पिनाम्॥"

इति जटाधरः॥

(यथा, बृहत्संहितायाम्। २८। १०।

"श्रेष्ठी सुवर्णपुष्पैः पद्मैर्विप्राः पुरोहिताः कुमुदैः॥")

श्रै खेदे। इति कविकल्पद्रुमः॥ (स्वा०-पर०-अक०-अनिट्।) श्रायति रौद्राक्षोकः। इति दुर्गादासः॥

श्रै म पचने। इति कल्पद्रुमः॥ स्वा०-पर०-सक०-अनिट्।) म, श्रपयति। इति दुर्गादासः॥

श्रोण, ऋ संघाते। इति कविकल्पद्रुमः॥(भ्वा०-पर०-सक०-सेट्।)ऋ अशुश्रोणत्। संघातो राशीकरणम्। इति दुर्गादासः॥

श्रोणः, पुं, (श्रोणतीति। श्रोण संघाते+अच्। यद्वा शृणोतीति। शु श्रवणे बाहुलकात् नः। इत्यणादिटीकायां उज्ज्वलदत्तः।३।६।) पङ्गुः। इत्यमरः॥

श्रोणा, स्त्री, (श्रोणसंघाते+अच्।) श्रवणानक्षत्रम्। (यथा, भागवते। ८। १८। ५।

"श्रोणायां श्रवणदाद्यां मुहूर्त्तेऽभिजिति प्रभुः सर्व्वे नक्षत्रताराद्यास्कृत्वाऽग्रदक्षिणम्॥")

काञ्चिकम्। पङ्के, त्रि। इति केचित्॥

श्रोणिः, स्त्रीः, (श्रोण संघाते+इन्। यद्वा, शु-श्रवणे+"वहिश्रिश्रुयुद्रुस्रुभ्य इति।" उणा० ४। ५१। इति निः।) कटिः। इत्यमरः॥(यथा, बृहत्संहितायाम्। ५६। ७।

"कुक्षतोरट्टमौत्तंसाः सङ्गमश्रोणिमण्डलाः। पुलिनाभ्युन्नतोरस्या हंसहासाय निम्नगाः॥")

सा तु गर्भस्थस्य मासद्वयेन भवति। इति सुश्रुतः॥ पन्याः। इति शब्दरत्नावली॥

श्रोणिफलं,क्ली.(श्रोणिः फलं फलकमिव।)कटिः इति राजनिर्घण्टः॥

श्रोणिफलकं, क्ली. (श्रोणिफल+स्वार्थे कन्।) कटिपार्श्वः। तत्पर्य्यायः। कटः २। इत्यमरः॥ फलकं चर्म्म तदाकारत्वात् श्रोणिः फलकमिव श्रोणिफलकम्। कट्यते आव्रियते कटः कटे वर्षावरणयोः अल्। कटिः। इति केचित्। इति भरतः।

श्रोणिबिम्बं, क्ली, कटिसूत्रम्। इति धनञ्जयः॥

श्रोणिसूत्रं, क्ली, (श्रोणिस्थितं सूत्रम्।) खञ्जबन्धनसूत्रम्। परतला इति हिन्दीभाषा॥ कटिबन्धनसूत्रम्। इति केचित्॥ घुनघुनी इति भाषा॥

श्रोणी,स्त्री.(श्रोणि+वा ङीष्।)कटिः। पन्याः। इति भरतविरूपकोषः॥

श्रोतः,[स्] क्ली.(श्रु+असुन्। तुट् च।) कर्णः। नदीवेगः। इति जटाधरः॥ इन्द्रियम्। यथा,

"दृषोकमक्षं करणं श्रोतः खं विषयेन्द्रियम्॥"

इति हेमचन्द्रः॥

श्रोतव्यं, त्रि, (श्रु+तव्य।) श्रवणीयम्। यथा,

"अध्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं विना। श्रोतव्यमिह गृद्रेण नाध्येतव्यं कदाचन॥"

इति तिथ्यादितत्त्वम्॥

श्रोता, [क्तृ] त्रि, (शृणोतीति। श्रु+ढच्।) श्रवणकर्त्ता। यथा,—

"अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः॥"

इति हितोपदेशः॥

पुराणश्रोतृत्वे प्रमाणमाह।

"पठेदर्थं बुध्यमानः श्रावयेद्वै नरोत्तमे। श्रोता तु प्राङ्मुखो भूत्वा शृणुयात् भक्तितत्परः॥"

इति पाद्मे पातालखण्डे ७१ अध्यायः॥

श्रोत्रं, क्ली, (श्रूयतेऽनेनेति। श्रु+"हृयामाश्रुभसिभ्यस्त्रन्।" उणा० ५। १६७। इति त्रन्।) कर्णम्। इत्यमरः॥ (यथा, रघुः। ७। १६।

"इत्युद्गताः पौरवधूमुखेभ्यः शृण्वन् कथाः श्रोत्रसुखाः कुमारः॥")

श्रोत्रियता। इति त्रिकाण्डशेषः॥

श्रोत्रियः,पुं,(छन्दोऽधीते इति।छन्दस्+श्रोत्रियश्छन्दोऽधीते।"५। २। ८४। इति घन्प्रत्ययेन साधुः।) वेदाध्येतब्राह्मणः। तत्पर्य्यायः। छान्दसः २। इत्यमरः॥ श्रूयते धर्म्माधर्म्मावनेन इति श्रोत्रो वेदः तमधिते वेत्ति वा श्रोत्रियः छधे कादिति इयः। छन्दोऽधीते इत्यर्थे इये छन्दःशब्दस्य श्रोत्रादेशः। इति परे। छन्दो वेत्ति अधीते वा छान्दसः। इति पूर्वेऽप्याः। इति भरतः॥*॥ तस्य लक्षणं यथा,—

"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते विद्याभ्यासी भवेद्विप्रः श्रोत्रियस्त्रिभिरेव हि॥"

इति पाद्मे उत्तरखण्डे ११६ अध्यायः॥

मानवे मार्कण्डेयपुराणे चाप्येवम्॥*॥अपिच।

"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित्॥"

इति दानकमलाकरः॥

श्रोत्रियता, स्त्री, (श्रोत्रियस्य भावः। श्रोत्रिय+तल्।) श्रोत्रियधर्म्मः। तत्पर्य्यायः। श्रोत्रम् २। इति त्रिकाण्डशेषः॥

श्रौतं, क्ली,(श्रुतौ भवम्। श्रुति+अण्।) गार्हपत्याहवनीयदक्षिणाग्नयः। यथा,—

"त्रयो ये गार्हपत्याहवनीयदक्षिणाग्नयः। इदमग्नित्रिकं श्रौतं वेतानिहोत्रमित्यपि॥"

इति जटाधरः॥

श्रौतः, त्रि, (श्रुतौ भवः। श्रुति+अण्।) श्रुतिविहितधर्म्मादिः। यथा,—

"धर्म्मश्चविहितो धर्म्मः श्रौतः स्मार्त्तो द्विधा द्विजः दानाग्निहोत्रसम्बन्धमित्या श्रौतस्य लक्षणम्॥ स्मार्त्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः। पूर्वेभ्यो वेदयित्वेह श्रौतं समर्षयोऽब्रुवन्॥ ऋचो यजूंषि सामानि ब्रह्मणोऽङ्गानि सा श्रुतिः मन्वन्तरस्थातीतस्य स्मृत्वा तन्मनुरब्रवीत्॥ ततः स्मार्त्तः स्मृतो धर्म्मो वर्णाश्रमविभागजः। एवं वै द्विविधो धर्म्मः शिष्टाचारः स उच्यते॥ इज्यावेदात्मकः श्रौतः स्मार्त्तो वर्णाश्रमात्मकः॥

इति मात्स्ये १२० अध्यायः॥

अपि च। अधिकरणमालाकृन्माधवाचार्य्यधृतपराशरभाष्ये शातातपः।

"श्रौतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत् अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्वतः॥"

इति तिथ्यादितत्त्वम्॥

श्रौत्रं, क्ली, श्रोत्रमेव। प्रज्ञादित्वादण्।) कर्णः। (श्रोत्रियस्य भावः कर्म्म वा। "हायनान्तयुवादिभ्योऽण्।"५। १। १३०। इत्यण्। "श्रोत्रियस्य यलोपश्च वाच्यः।" इति यलोपः।) श्रोत्रियकर्म्म। तत्पर्य्यायः। श्रौत्रियता २। इति शब्दरत्नावली॥ (श्रोत्रस्य भावः कर्म्म वा। अण्।) श्रोत्रकर्म्म च॥(श्रोत्राणां समूहः "भिक्षादिभ्योऽण्।" ४।२।३८। इति अण्॥)

श्रौषट्,व्य. देवहविर्दानम्। इत्यमरः। देवहविर्दानं इत्यनेनायं मन्त्रः सूचितः। इति भरतमतम्॥

श्राङ्क,क्ली, श्रिय आङ्का आङ्का यस्य।) पद्मम्। इति केचित्॥

श्लक, ङ ङ सर्पे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) अन्तःस्थद्वितीयवर्णादिः। ङ, श्लङ्क्ते। ङ, श्लङ्के। सर्पो गतिः इति दुर्गादासः॥

श्लक्ष्ण, त्रि. (श्लिष आलिङ्गने+"श्लिषेरच्चोपधायाः।"उणा० ३। १८। इति क्ष्णः अकारस्योपधायाः।) अल्पम्। इत्यमरः॥ मनोहरम्; इत्यणादिकोषः॥ (यथा, मनुः। २। १५८।

"अहिंसयैव भूतानां कार्य्यं श्रेयोऽनुशासनम् वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्ममिच्छता॥")

श्लक्ष्णकं, क्ली. पूगफलम्। इति राजनिर्घण्टः॥ (त्रि, श्लक्ष्णमेव। स्वार्थे कन्।) मनोहरञ्च॥

श्लक्ष्णत्वक्, [च्] पुं, (श्लक्ष्णा मनोहरा त्वक् यस्य।) अश्मन्तकवृक्षः। इति राजनिर्घण्टः॥ सुन्दरवल्कलश्च॥

श्लग, इ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) अन्तःस्थदन्त्यवर्णयुक्ततालादिः। इ, श्लगति। इति दुर्गादासः॥

श्लथ, त् क दौर्ब्बल्ये। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-अक०-सेट्।) अन्तस्थः-लतीययुक्तादिः। क, श्लथयति। इति दुर्गादासः॥

श्लथ, त्रि, (श्लथयतीति। श्लथ+अच्।) शिथिलः। यथा। "शिथिलः प्रस्रथः श्लथः।" इति जटाधरः॥ (यथा, माघे। ७। ६२।)

"श्लथशिरमिजपातभारा-
दिव नितरां नतिमद्भिरंसभागैः॥")

दुर्ब्बलः। इति श्लथधात्वर्थदर्शनात्॥

श्लाघ, ऋ व्याप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) अन्तःस्थदन्त्यवर्णयुक्तः। ऋ, अश्लाघत्। इति दुर्गादासः॥

श्लाघ, ऋ ङ कत्थने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) अन्तःस्थदन्त्यवर्णयुक्तः तालव्यादिः। कत्थनं प्रशंसा। ऋ, अश्लाघत्। ङ, श्लाघते गुणिनं गुणी। इति दुर्गादासः॥

श्लाघा, स्त्री, (श्लाघ कत्थने+अः। टाप्।) प्रशंसा। (यथा, रघुः। १। २२।

"आनौ मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्ययः।
गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव॥")

परिचर्य्या। अभिलाषः। इति मेदिनी॥

श्लाघ्य, त्रि, (श्लाघ+ण्यत्।) श्लाघनीयः। प्रशंस्यः। यथा,—

"गौरवितास्त्वाचार्य्यमिश्राः श्लाघ्यास्तत्रभवन्मुखाः॥"

इति त्रिकाण्डशेषः॥

(यथा, रघुः। ११। ८६।

"आहितो जयविपर्य्ययोऽपि मे
श्लाघ्य एव परमेष्ठिना त्वया॥")

श्लिकु, क्ली, (श्लिष्यति अङ्गादीनीति। श्लिष+"श्लिषेः कित्।" उणा० १। ३३। इति कुः। कयाच्चादेशः।) ज्योतिःशास्त्रम्। इत्यादिकोषः॥

श्लिकुः, पुं, (श्लिष आलिङ्गने+कुः।) भृत्यः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ विष्टिः। इत्यादिकोषः॥

श्लिष, उ दाहे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। ज्ञापेट्।) अन्तःस्थदन्त्ययुक्तः। उ, श्लेषित्वा श्लिष्ट्वा। इति दुर्गादासः॥

श्लिष, श्री य श्लि श्लि श्लेषे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-अनिट्।) अन्तःस्थदन्त्ययुक्तादिः। श्री श्लेष्टा। य, श्लिष्यति। श्लि, अश्लिषत्। आलिङ्गने तु अश्लिक्षत्। श्लि श्लिष्टोऽस्ति। श्लेष आलिङ्गनम्। तच्च बाह्याभ्यामेव रूढम्। श्लिष्यति कामपीति जयदेवः। प्राप्तावव्ययम्। श्लिष्यति हृदं लता। इति दुर्गादासः॥

श्लिष, क श्लेषे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) अन्तःस्थदन्त्ययुक्तः। क, श्लेषयति। इति दुर्गादासः॥

श्लिषा, स्त्री, आलिङ्गनम्। त्रिकाण्डशेषः॥

श्लिष्टः, त्रि, (श्लिष+क्तः।) श्लेषयुक्तशब्दादिः। भिन्नार्थकैकरूपान्वितवाक्यम्। तस्य लक्षणं यथा,—

"श्लिष्टमिष्टमविस्पष्टमेकरूपान्वितं वचः।"

इति भरतौकण्ठाभरणम्॥

श्लीपदं, क्ली. (श्रीयुक्तं हृदिमत् पदमत्रेति। पृषोदरादित्वात् साधु।) स्फीतपादादि। गोद इति भाषा। तत्पर्य्यायः। पादवल्मीकम् २। इति हेमचन्द्रः॥ (यथा, आर्य्यासप्तशत्याम्। ४८५।

"यत्रोपकारकं यत्र भूषणं यत् प्रकोपमातनुते।
गुरुणापि तेन कार्य्यं पदेन किं श्लीपदेनेव॥")

अथ श्लीपदाधिकारः। तत्र श्लीपदस्य विप्रकृष्टं निदानमाह।

"पुराणोदकभूयिष्ठाः सर्व्वर्त्तुषु च शीतलाः।
ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः॥"

विशेषत इति वचनेनान्यत्रापि श्लीपदं भवति इति बोध्यते॥* सामान्यं लक्षणमाह॥

"यः सन्वरो वंक्षणजो भृशार्त्तिः
शोथो नृणां पादगतः क्रमेण।
तत् श्लीपदं स्यात् करभेवकर्ण-
मित्याह नाम्नासपि केचिदाहुः॥"

तत् त्रिविधम्। वातिकं पैत्तिकं श्लैष्मिकञ्चेति। तेषां लक्षणमाह।

"वातजं रूक्षपरुषं हि स्फुटितं तीव्रवेदनम्।
अनिमित्तरुजं चास्य बहुशो ज्वर एव च॥
पित्तजं पीतमङ्गाग्रं दाहज्वरयुतं भृशम्।
श्लैष्मिकन्तु भवेत् स्निग्धं तथा पाण्डु गुरु स्थिरम्॥
क्षीरुप्येतानि जानीयात् श्लीपदानि कफोल्बणात्।

गुरुत्वञ्च महत्त्वञ्च यस्माच्चास्ति विना कफात्॥"

असाध्यमाह।

"वल्मीकमिव संजातं कण्टकैरुपचीयते।
सर्व्वात्मकं महत्त्वन्तु वर्ज्जनीयं विशेषतः॥
यत् श्लेष्मलाहारविहारजातै-
र्जातं तथा भूरिकफस्य पुंसः।
साध्यावमप्यत्र तु सर्व्वलिङ्गं
सकच्छुकं वापि विवर्ज्जनीयम्॥"*

श्लीपदस्य चिकित्सा।

"लङ्घनालेपनस्वेदरेचनै रक्तमोक्षणैः।
प्रायः श्लेष्महरैश्चान्नैः श्लीपदं समुपाचरेत्॥१॥
सिद्धार्थगोमाक्षनदेवदारु-
विश्वौषधैर्मूत्रयुतैः प्रलिम्पेत्।
पुनर्नवागारसर्षपाद्यां
वल्केन वा काम्बिकमिश्रितेन॥
श्लीपदमिति शेषः॥ २॥

"धत्तूरैरण्डनिर्गुण्डीवर्षाभूधिग्यमर्षपैः।
प्रलेपः श्लीपदं हन्ति चिरोत्थमपि दारुणम्॥३॥
असाध्यमपि यात्यन्तं श्लीपदं चिरकालजम्।
मूलेन सहचराया स्तालमिश्रेण लेपनात्॥
तालस्य फलरसो ग्राह्यः॥ ४॥
मसलास्थूलपत्राणां कल्कं तप्तेन वारिणा।
संमृष्टं लवणोपेतं लेपितं श्लीपदं हरेत्॥५॥
शाखोटवल्कलक्काथं गोमूत्रेण युतं पिबेत्।
श्लीपदानां विनाशाय मेदोदोषनिहन्तृणी॥६॥
रजनीं गुडसंयुक्तां गोमूत्रेण पिबेन्नरः।
वर्षोत्थं श्लीपदं हन्ति दद्रुकुष्ठं विशेषतः॥७॥
वर्षाभूविफलाचूर्णं पिप्पल्या सह योजितम्।
सक्षौद्रं श्लीपदं लिह्यात् चिरोत्थं श्लीपदं जयेत्॥
गन्धर्व्वतैलसिद्धां हरीतकीं गोऽम्बुना पिबति।
श्लीपदविबन्धमुक्तो भवत्यसौ समराघेण॥"

गन्धर्व्वतैलं एरण्डतैलम्। गोऽम्बुना गोमूत्रेण॥८

इति श्लीपदाधिकारः। इति भावप्रकाशः॥*॥

तस्य कर्म्मविपाको यथा। गोतमोऽपि क्वचिद् विशेषमाह। अनृतवागुल्बणो मुहुर्मुहुः संलग्नवाक् जलोदरो दारत्यागी कूटसाक्षी श्लीपदी॥

इति मिताक्षरायां प्रायश्चित्ताध्यायः॥ कूटसाक्ष्यस्य सुरापानसमत्वं नानुपातकत्वात् तत्कर्म्म जन्यश्लीपदरोगयुक्तेन पराक्रान्तं कर्त्तव्यम्। इति मन्वादिमतम्॥

श्लीपदप्रभवः, पुं, (श्लीपदवत् प्रभवतीति। प्र+भू+अच्।) आम्रवृक्षः। इति शब्दमाला॥

श्लीपदापहः, पुं, (श्लीपदं अपहन्तीति। ह्न+डः।) पुत्रजीववृक्षः। इति त्रिकाण्डशेषः॥

श्लीलः, त्रि, (श्रीर्विद्यतेऽस्येति। श्री+लच्। रस्य लः।) लक्ष्मीवान्। इति श्रीलशब्दटीकायां स्वामी॥

श्लेषः, पुं, (श्लिष+घञ्।) संयोगः। तत्पर्य्यायः॥ सन्धिः २। इत्यमरः॥ दाहः। आलिङ्गनम्। इति श्लिषधात्वर्थदर्शनात्॥*॥ (यथा आर्य्यासप्तशत्याम्। ३८८।

"पुलकितकठोरपीवरकुचकलशश्लेषवेदना-
भिन्नः।
ग्रन्थीरुपवीतफणी वाञ्छति मानग्रहं
देव्याः॥" ७॥

श्लिष्यतीति। श्लिष+"ग्लाहाघाश्लिसंसिभ्य इति।" उ। ३। १। १४१। इति थः।) शब्दालङ्कारविशेषः। तस्य लक्षणादि यथा,—

"वाच्यभेदेन भिन्ना यदुयुगपदुच्चारणस्यृशः।
श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा॥"

अर्थभेदेन शब्दभेद इति दर्शने काव्यमार्गे स्वरो न गच्छते इति च न ये वाक्यभेदेन भिन्ना अपि शब्दा यदुयुगपदुच्चारणेन श्लिष्यन्ति भिन्नस्वरूपमपह्नुवते स श्लेषः॥* स च वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदादष्टधा। क्रमेणोदाहरणम्।

"प्रलङ्कारः शङ्काकरनरकपालं परिजनो
विशीर्णाङ्गो भङ्गी वसु च तव एको बहुवयाः।
अवश्येयं स्थाणोरपि भवति सर्व्वामरगुरो-
र्विधौ वक्रे मूर्द्धि स्थितवति वयं के पुनरमी॥
दृषत्कार्त्तस्वरपात्रं भूषितनिःश्रेयपरिजनं देव।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम्
भक्तिप्रह्वविलोकनप्रणयिणी नीलोत्पलस्रग्विनी
ध्यानालम्बनतां समाधिनिरतैर्नीते हिताप्राप्तये।
नावस्थैकमहानिधी रमिकतां लक्ष्मोट्टयो-
स्मत्वती
युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्व्वा
हरेः॥"

एष एव वचनश्लेषोऽपि।

"महदे सुर सन्धम्मे तमवसमासं गमागमा
हरणे।
हर बहु शरणं तं चित्तमोहमवसर उमे
सहमा॥

अयं सर्व्वासि शास्त्रासि हृदि श्लेषु च वक्ष्यति
सामर्थ्यलब्धमित्राणां मित्राणाञ्च नृपात्मजः॥
रजनिरमणमौलेः पादपद्मावलोक-
व्यसमयपरामा पूर्व्वसम्यत्सहस्रम्।
प्रथमनिवहमध्ये जातु चित्तप्रसादा-
दहमुचितरुचिः स्यान्नन्दिता सा तथा मे॥
सर्व्वस्वं हर सर्व्वस्य त्वं भवच्छेदनत्परः।
नयोपकारसाम्मुख्यमायासि तनुवर्त्तनम्॥"

'भेदाभावात् प्रकृत्यादेर्भेदोऽपि नवमो भवेत्॥'

नवमोऽपौत्पत्तिपरिभिन्नक्रमः। उदाहरणम्।

"योऽसक्रत् परगोत्राणां पुच्छच्छेदक्षणक्षमः।
शतकोटिदृतां बिभ्रद्विबुधेन्द्रः स राजते॥"

अत्र प्रकरणादिनियमाभावात् द्व्यर्थौ वाच्यौ ननु स्वरितादिगुणभेदात् भिन्नप्रयत्नोच्चार्य्याणां तदभेदादभिन्नप्रयत्नोच्चार्य्याणाञ्च शब्दानां वक्ष्येऽनियमेनालङ्कारान्तरप्रतिभोत्पत्तिहेतुः। शब्दश्लेषोऽर्थश्लेषयेति द्विविधोऽप्ययमर्थालङ्कारमध्ये गणितोऽन्यैरिति कथमयं शब्दालङ्कारः। उच्यते। इह दोषगुणालङ्काराणां शब्दार्थगतत्वेन यो विभागः सोऽन्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते। तथा हि कष्टत्वादिगाढ़त्वाद्यनुप्रासादयो व्यर्थत्वादिप्रौढ़त्वाद्युपमादयः सद्भावतदभावानुविधायित्वादेव शब्दार्थगतत्वेन व्यवह्यन्ते। तथाहि।

"स्वयञ्च पञ्चबाताम्रभास्वत्करविराजिता।"

इत्यभङ्गश्लेषः॥ प्रभातसन्ध्ये वा स्वापफलसुखे हितप्रदेति सभङ्गशब्दश्लेषेति द्वावपि शब्दैकसमाश्रयाविति ह्योरपि शब्दश्लेषत्वमुपपन्नम् न त्वाद्यस्यार्थश्लेषत्वम्। अर्थश्लेषस्तु स विषयः यत्र शब्दपरिवर्त्तनेऽपि न श्लेषत्वक्षतिः।

यथा,—

"स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्
अहो खलस्तृणो दृत्तिस्तुलाकोटेः खलस्य च॥"

न चायमुपमाप्रतिभोत्पत्तिहेतुः श्लेषः। अपि त श्लेषप्रतिभोत्पत्तिहेतुरुपमा। तथा हि।

यथा कमलमिव मुखं मनोज्ञमेतत् कचतितरामित्यादौ गुणसाम्ये क्रियासाम्ये उभयसाम्ये वा उपमा तथा सकलकलं पुरमेतल्लातं संप्रति च सितांशुबिम्बमिवेत्यादौ शब्दमात्रसाम्येऽपि युक्तैव तथा ह्युक्तं रुद्रटेन। स्फुटं अर्थालङ्कारावेतौ उपमासमुच्चयौ किन्तु। श्लिष्टत्वं शब्दमात्रं सामान्यमिहापि सम्भवत इति। न च कमलमिव मुखमित्यादि साधारणधर्म्मप्रयोगशून्य उपमाविषय इति वक्तुं युक्तं पूर्णोपमाया निर्विषयत्वापत्तेः। देवत्वमेव पातालमाशानां त्वं निबन्धनम्। त्वन्नामरमरुद्भूमिरेको लोकत्रयात्मकः। इत्यादिश्लेषस्य चोपमाद्यलङ्कारविविक्तोऽस्ति विषयः। इति ह्योर्योगे सहर एव उपपत्तिपर्य्यालोचने तु उपमाया एवायं युक्तो विषयः अन्यथा विषयापहार एव पूर्णोपमायाः स्यात्। न च अविन्दुसुन्दरी नित्यं गतज्ञावरुद्धबिन्दुकेत्यादौ विरोधप्रतिभोत्पत्तिहेतुः श्लेषः। अपि तु श्लेषप्रतिभोत्पत्तिहेतुर्विरोधः। न ह्यत्रार्थद्वयप्रतिपादकः शब्दः श्लेषः द्वितीयार्थस्य प्रतिभातमात्रस्य प्ररोहाभावात्। न च विरोधाभास इव विरोधः। श्लेषाभास इव श्लेषस्तस्मादेवमादिषु वाक्येषु श्लेषप्रतिभोत्पत्तिहेतुरलङ्कारान्तरमेव साधीयः। तथा च सहंगमुक्तामणिर्नान्यः कविरिव खल्वसौ देव महान् भवान्

"अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः।
अहो दैवगतिश्चित्रा न तथापि समागमः॥
आदाय चापमचलं ज्वलां हीनं गुणं विषम-
दृष्टिः।
यश्चित्रमच्छशरो लक्षमभाङ्गीन्नमस्तस्मै॥"

इत्यादावेकदेशविवर्त्तिरूपश्लेषव्यतिरेकसमासोक्तिविरोधत्वमुचितं न तु श्लेषत्वं शब्दश्लेष इति चोच्यते। अर्थालङ्कारमध्ये च लक्षत इति कोऽयं नयः किन्तु वैचित्र्यमलङ्कारः इतियत्रैव कविप्रतिभासंरम्भगोचरस्तत्रैव विचित्रतेति सैवालङ्कारभूमिः। अर्थसुखमपेक्षित्वमेतेषां शब्दानामिति चेत् अनुप्रासादीनामपि तथैवेति तेऽप्यर्थालङ्काराः किं नोच्यन्ते रसादिव्यञ्जकस्वरूपवाच्यविशेषञ्चापेक्षित्वेत्यनुप्रासादीनामलङ्कारताशब्दगुणदोषाणामप्यर्थापेक्षयैव गुणदोषता। अर्थगुणदोषालङ्काराणां शब्दापेक्षयैव व्यवस्थितिरिति तेऽपि शब्दगतत्वेनोच्यन्ताम्। विधौ वक्रे मूर्द्धि स्थितवतीत्यादौ च वर्णादिश्लेषे एकप्रयत्नोच्चार्य्यत्वेऽर्थश्लेषत्व शब्दभेदेऽपि प्रसज्यतामित्येवमादि स्वयं विचार्य्यम्। इति काव्यप्रकाशे शब्दालङ्कारनिर्णयो नाम ९ उल्लासः॥

श्लेष्मक:, पुं, (श्लेष्मा एव। स्वार्थे कन्।) कफः। इति शब्दचन्द्रिका॥

श्लेष्मघ्ना, स्त्री, (श्लेष्माणं हन्तीति। हन+टक्। टित्वात् ङीष्।) ज्योतिष्मती। इति जटाधरः॥ मल्लिका। इति मेदिनी॥ विकटुः। इति शब्दरत्नावली॥

श्लेष्मणः, त्रि, (श्लेष्मा अस्तास्येति श्लेष्मन्+"लोमादिपामादिपिच्छादिभ्यः शनेलचः।"५।२।१००। इति नः।) कफी। इत्यमरः॥

श्लेष्मणा, स्त्री, (श्लेष्मन्+यामादित्वात् नः। टाप्।) वृक्षविशेषः। यथा,—

"गुरुस्कन्धस्तर्पणो च श्लेष्मणा च वृषापि च।"

इति शब्दमाला॥

श्लेष्मलः, त्रि, (श्लेष्मास्तास्येति। श्लेष्मन्+"सिध्मादिभ्यश्च।"५।२।८७। इति लच्।) श्लेष्मयुक्तः। इत्यमरः॥

श्लेष्मलः, पुं, (श्लेष्मन्+लच।) वृक्षविशेषः। बहुयार इति ख्यातः। इति शब्दचन्द्रिका॥

श्लेष्महः, पुं, (श्लेष्माणं हन्तीति। हन+डः।) कट्फलवृक्षः। इति शब्दचन्द्रिका। कफनाशके, त्रि॥

श्लेष्मा, [न्] पुं, श्लिष+"सर्व्वधातुभ्यो मनिन्।" उणा० ४।१४४। इति मनिन्।) कफः। इत्यमरः॥ तस्य प्रकोपहेतुर्यथा,—

"गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्य-
द्रवदधिदिननिद्रापूपसर्पिःप्रपूरैः।
तुहिनपतनकाले श्लेष्मणः संप्रकोपः
प्रभवति दिवसादौ भुक्तमात्रे वसन्ते॥" *॥

तस्य लक्षणं यथा,—

"स्त्रैमित्यं मधुरास्यता स्निग्धिरता शीतक्रमः
प्रसेको मल-
प्राचुर्य्यं स्थिरता रसस्य लवणः कण्डूरतिस्वस्थता
आलस्यं चिरकारिता कठिनता श्वेतारुचिः
स्निग्धता
तन्द्रा वृत्तुरुपदेहकासगुरुता एताः कफोक्ता
गुणः॥"*॥

अस्य प्रशमताकारकं यथा,—

"गुरुशीतमृदुस्निग्धं मधुरस्थिरपिच्छिलाः।
श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः॥
रूक्षचारकपायतिक्तकटुकव्यायामनिष्ठीवन-
स्त्रीसेवाध्वनियुद्धजागररतिक्रीड़ापदाघातनम्
धूमात्युष्णशिरोविरेकवमनस्वेदोपनाहादिक
पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं
जयेत्॥"*॥

स च पञ्चविधो यथा,—

"अवलम्बक इत्येकः क्लेदकः श्लेष्मकोऽपरः।
बोधकस्तर्पकश्चेति श्लेष्मा पञ्चविधः स्मृतः॥"*

एतेषां लक्षणानि यथा,—

"कफधात्वाश्रयो श्लेष्मा यत् करोत्यवलम्बनम्।
ततोऽवलम्बकाख्यातिं श्लेष्मा प्राप्नोत्युरःस्थितः॥
आमाशयाश्रितः सोऽन्नक्लेदनात् क्लेदकः
स्मृतः॥२॥
श्लेष्मकः श्लेषणात् सन्धेः स च सन्ध्यां व्यवस्थितः॥३॥

रसनावस्थितस्त्वेष बोधको रसबोधनात् ।४।
शिरसि प्रस्थितश्चासौ तर्पको नेत्रतर्पणात् ॥"५॥
अस्य स्थानानि ।
"उरःकण्ठशिरःक्लोमपर्व्वाख्यामाशयो रसः ।
मेदो घ्राणञ्च जिह्वा च कफस्थानमुरः परम् ॥"
तत्प्रकृतिकलक्षणम् । यथा,—
"गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः ।
स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः ॥*॥
स्नेहो बन्धः स्थिरत्वञ्च गौरवं वृष्यता बलम् ।"
क्षमा धृतिरलोभश्च कफकर्म्माविकारजम् ॥"
इति सुखबोधः ॥*॥
श्लेष्मकरद्रव्याणि यथा,—
"भोजनानन्तरं स्नानं जलपानं विना तृषा ।
तिलतैलं स्निग्धतैलं स्निग्धमामलकोद्भवम् ॥
पर्य्युषितान्नं तक्रञ्च पक्वरम्भाफलं दधि ।
माषाम्बुशर्करातोयं सस्निग्धस्थलसेवनम् ॥
नारिकेलोदकं रूक्षस्नानं पर्य्युषितं जलम् ।
तरमुज्जापक्वफलं सुपक्वकर्कटीफलम् ॥
खातस्नानञ्च वर्षासु मूलकं श्लेष्मकारणम् ।
तज्जलं ब्रह्मरन्ध्रे च महदैर्य्यविनाशनम् ॥"*॥
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥
अपिच । एरण्डतैलम् १ अनूपदेशवारि २ वार्षिकपानीयम् ३ पाल्वलजलम् ४ सामान्यशालिधान्यम्५ माषः ६ अतसी ७ नूतनधान्यम्८ मधुरनारीचशाकम् ९ कञ्चटशाकम् १० कलम्बीशाकम् ११ उत्पादिकाशाकम् १२ मध्यमकुष्माण्डफलम् १३ अलाबुफलम् १४ गोधूमान्तफलम् १५ चेलानम् १६ दीर्घपटोलिका १७ अलाबुनाड़िका १८ पिण्डालुकम्१९ करीषपलालचितिविणुभ्यो जातं कृत्रिकाशाकम् २० विशेषतः पलालजातसंस्वेदजशाकम् २१ मधुकुकुटिका २२ बहुवारफलम् २३ बालास्त्रिकाफलम् २४ चीरुकम् २५ पक्वकण्टाफलम् २६ कण्टाफलास्थि २७ पक्वकदलम् २८ तावन्मत्स्यः २९ पाण्डरमत्स्यः ३० क्वथितमत्स्यः ३१ लवणभावितमत्स्यः ३२ भाकुटमत्स्यः ३३ पाठीनमत्स्यः ३४ शिलिन्दमत्स्यः ३५ मेकलिमत्स्यः ३६ गरमत्स्यः ३७ कर्णफलमत्स्यः ३८ इल्लिशमत्स्यः ३९ शृङ्गीमत्स्यः ४० चिङ्गटमत्स्यः ४१ वाचमत्स्यः ४२ चिङ्गटीमत्स्यः ४३ गवाचीमत्स्यः अर्थात्पाँकालमत्स्यः ४४ कुलिङ्गपक्षिमांसम् ४५ तावत्क्षीरम् ४६ आमदुग्धम् ४७ आविकदधि ४८ माहिषदधि ४९ स्वादुदधि ५० अम्लदधि ५१ तावद्घृतम् ५२ माहिषघृतम् ५३ तावदिक्षुः ५४ विशेषतो भीरुनामकेक्षुः ५५ कान्तारीक्षुः ५६ इक्षुः फाणितम् ५७ इक्षुखण्डः ५८ नवान्नम् ५९ चिपिटः ६० घृतपूरः ६१ पायसः ६२ शष्कुलो ६३ सरसगुवाकफलम् ६४ मधुररसः ६५ अतिगयान्नभोजनम् ६६ लवणरसः ६७ शीतवीर्य्यद्रव्यम् ६८ कुन्दकुसुमपुष्पम् ६९ यूथिकापुष्पम् ७० बन्धूकपुष्पम् ७१ तावज्जन्तुरसः ७२ तावज्जन्तुमज्जा ७३ । इति द्रव्यगुणात् संगृहीतम् ॥
श्लेष्मनाशकद्रव्याणि यथा,—
"वह्निस्त्वेदं मृष्टभङ्गं पक्वतैलं विशोषकम् ।
भ्रमणं शुष्कभक्ष्यञ्च शुष्कपक्वहरीतकी ॥
पिण्डारकमपक्वञ्च रम्भाफलमपक्वकम् ।
वेशवारसिन्धुवारमनाहारमपानकम् ॥
सघृतं रोचनाचूर्णं सघृतं शुष्कशर्करम् ।
मरीचं पिप्पली शुष्कमार्द्रकं जीरकं मधु ।
द्रव्याण्येतानि गन्धर्व्वि ! सदाश्लेष्महराणि च॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥*॥
अपि च । सार्षपतैलम् १ तैलाभ्यङ्गः २ उद्वर्त्तनम् ३ शैग्रिरजलम् ४ वाप्यजलम् ५ कूपजलम् ६ नैर्झरजलम् ७ नादेयजलम् ८ सामान्योष्णोदकम् ९ विशेषतः पादशेषोष्णोदकम्१० पेषितवचासुस्तकसंयुक्तजलस्नानम्११ अगुरु १२ कुङ्कुमम् १३ पत्रकम १४ कक्कोलम् १५ शटी १६ दग्धभूमिजातशालिधान्यम् १७ अतिरोध्यधान्यम् १८ यवः १९ श्यामाकधान्यम् २० कोद्रवधान्यम् २१ कङ्गुधान्यम् २२ हस्तिश्यामाकधान्यम् २३ चीनकधान्यम् २४ मुद्गः २५ मुकुष्टम् २६ राजमाषः २७ मसूरः २८ चणकः २९ कुलत्थः ३० तुवरी ३१ नानाशिम्बा ३२ जलसंयोगिसामान्यशुष्कनारीचपत्रशाकम् ३३ हिलमोचीशाकम् ३४ शालञ्चीशाकम् ३५ शीघ्रसुन्दरशाकम् ३६ पूननवाशाकम् ३७ कलायशाकम् ३८ ब्रह्मीशाकम्३९ चाङ्गेरीशाकम् ४० वृक्काशाकम्४१ पालङ्कीशाकम् ४२ चणकपत्रशाकम् ४३ कौसुम्भशाकम् ४४ शीघ्रणीशाकम् ४५ महाराष्ट्रीशाकम् ४६ कदलीमोचकम् ४७ क्षुद्रवार्त्ताकुफलम् ४८ अङ्गारपक्ववार्त्ताकुः ४९ पाण्डुरङ्गफलम् ५० कारवेल्लफलम् ५१ कर्कोटकफलम् ५२ पटोलनाड़ी ५३ कुष्माण्डनाडिका ५४ वेत्राग्रम् ५५ शूरणः ५६ केचुकमूलम् ५७ घृततैलाभ्यां सिद्धं मूलम् ५८ मूलकपुष्पम्५९ खण्डकर्णः ६० मूलकफलम्६१ वाराहीकन्दमूलम्६२ आम्रपेषी ६३ अम्लरमदाड़िमम् ६४ मातुलुङ्गत्वक्६५ लिम्याकम्६६ जम्बीरम् ६७ कर्कन्धुः ६८ शुष्कसमस्तकोलफलम् ६९ अक्षीरम् ७० जवनालम् ७१ लवलीफलम् ७२ जाम्बवम् ७३ पक्वास्त्रिकाफलम् ७४ पक्वतिन्दुकम् ७५ अम्लवेतसम् ७६ महार्द्रम् ७७ करुणम् ७८ कोचाम्रफलम्७९ तालास्थिमज्जा ८० बालविल्वम् ८१ विल्वपेषिका८२ धात्रीफ८३ विभीतकम्८४ विभीतमज्जा ८५ धात्रीमज्जा ८६ नन्द्यावर्त्तमत्स्यः८७ कवयीमत्स्यः ८८ एलङ्गमत्स्यः ८९ दण्डिकमत्स्याः ९० चिकणटमत्स्याः ९१ प्रोष्ठीमत्स्यः९२ मत्स्याण्डम्९३ कूर्म्माण्डम् ९४ खगाण्डम ९५ एणमांसम्९६ खड्गिमांसम् ९७ कूर्म्मपादः९८ कपिञ्जलमांसम् ९९ वर्त्तिकापक्षिमांसम् १०० प्रसन्नामद्यम् १०१ अरिष्टमद्यम् १०२ अर्घ्यमद्यं १०३ पुराणमद्यं १०४ नूतनमद्यं १०५ मेषोक्षीरम् १०६ उष्ट्रीक्षीरम् १०७ गवीक्षीरम् १०८ छागदधि १०९ हास्तिनदधि११० दधिमस्तुः १११ दधिसरः ११२ मथिततक्रम ११३ आविकघृतम्११४ औष्ट्रकघृतम् ११५ पक्वेक्षुरसः ११६ इक्षुः ११७ जीरकम् ११८ वास्यिका ११९ शुष्कधान्याकम्१२० कासुन्दीवटिका १२१ हरिद्रा १२२ यमानी १२३ शुष्कपिप्पली १२४ आर्द्रपिप्पली १२५ शुण्ठी १२६ आर्द्रकम१२७ सर्षपः १२८ सिद्धार्थः १२९ पलाण्डुः १३० गुड़त्वक् १३१ पत्रम्१३२ यवक्षारः १३३ सर्জ্জिकाक्षारः १३४ टङ्कणक्षारः १३५ मण्डः १३६ भृष्टतण्डुलः १३७ लाजाः १३८ लाजमण्डः १३९ अपक्वयवशत्तुः १४० वाट्यमण्डः स तु भृष्टयवमण्डः १४१ मुद्गयूषः १४२ रागयूषः स च दाडिमद्राक्षायुक्तमुद्गयूषः १४३ मसूरयूषः १४४ कुलत्थयूषः १४५ खड़्यूषः १४६ काम्बलिकयूषः स तु लवणघृतादितिलमाषमिश्रितपक्वदधि १४७ पलालवेष्टित-कर्दम-लेपिताङ्गार-दग्धलवणवेश वारपुरस्कृतसार्द्रकटुतैलसन्तोलितमत्स्याः १४८ प्रदिग्धम् १४९ शालिपिष्टकम् १५० ताम्बूलम् १५१ चूर्णम्१५२ खदिरः १५३ एला १५४ जातीफलम् १५५ कर्पूरम् १५६ कटुरसः १५७ तिक्तरसः १५८ कषायरसः १५९ उष्णस्वभावद्रव्यम् १६० मालतीपुष्पम् १६१ मल्लिकापुष्पम् १६२ पद्मपुष्पम् १६३ वकुलपुष्पम्१६४ पुन्नागपुष्पम् १६५ कङ्कारपुष्पम् १६६ उत्पलपुष्पम्१६७ पाटलपुष्पम्१६८ चम्पकपुष्पम् १६९ रात्रिजागरणम् १७० बिल्वमूलम् १७१ पाटला १७२ शालपर्णी १७३ पृश्निपर्णी १७४ एरण्डमूलम् १७५ कण्टकारिका १७६ विशाला १७७ लोध्रः १७८ भृङ्गराजः १७९ केशराजः १८० द्रोणपुष्पी १८१ भिण्डी १८२ वचा १८३ शक्राशनम् १८४ हरिद्रा १८५ दार्व्वी १८६ अवल्गुजः १८७ एड़गजः १८८ रेणुका१८९ भूर्जः १९० आसनः १९१ निम्बपत्रम् १९२ भूनिम्बः १९३ कुटजः १९४ यासः १९५ दुरालभा १९६ कटुकी १९७ त्रायन्ती १९८ शृङ्गी १९९ कट्फलम् २०० कुष्ठम् २०१ पारिभद्रः २०२ वासकः २०३ मधुयुक्तगुड़ूची २०४ पिप्पलीमूलम् २०५ चविका २०६ गजपिप्पली २०७ अकः २०८ धुस्तूरः २०९ सामान्यगुलगुलुः २१० नूतनपुरातनगुग्गुलुः २११ अरुणा विद्रुता २१२ सिता विद्रुता २१३ सिन्धुवारः २१४ मनोज्ञा २१५ सौराष्ट्री २१६ ताम्रम् २१७ कांस्यम् २१८ ॥ इति द्रव्यगुणात् संगृहीतम् ॥

श्लेष्मातः, पुं. श्लेष्माणमततीति। अत + अच् ।) श्लेष्मातकवृक्षः । इति शब्दरत्नावली ॥

श्लेष्मातकः, पुं. (श्लेष्मात एव। स्वार्थे कन् ।) बहुबारकवृक्षः । इत्यमरः ॥ (यथा मनुः ६।१४ ।

"वर्जयेत् मधुमांसञ्च भैमानि कवकानि च।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च॥")

श्लेष्मान्तकः, पुं, (श्लेष्मणा श्लेष्मसेवनजनितकफेन अन्तयति नाशयतीति। अन्त+णिच+ण्वुल्।) इक्षविशेषः। बड़हार इति बङ्गभाषा। लसोड़ इति हिन्दी भाषा। तत्पर्य्यायः। बहुवारः २ पिच्छिलः ३ द्विजकुत्मितः ४ श्लेतुः ५ श्लीतफलः ६ श्लीतः ७ गाकटः ८ कर्क्कुदारकः ९ भूतद्रुमः १० गन्धपुष्पः ११। अस्य गुणाः। कटुत्वम्। हिमत्वम् मधुरत्वम्। कषायत्वम्। स्वादुत्वम्। पाचनत्वम् क्रिमिगुल्महरत्वम्। पामासदोषमलरोधवहव्रणार्त्तिविस्फोटशान्तिकरत्वम्। कफकारकत्वञ्च। इति राजनिर्घण्टः॥ अस्यामफलगुणाः। विष्टम्भित्वम्। रूक्षत्वम्। पित्तकफास्रनाशित्वञ्च। तत्कक्फलगुणाः। मधुरत्वम्। स्निग्धत्वम्। श्लेष्मत्वम्। श्लीतलत्वम्। गुरुत्वञ्च। इति भावप्रकाशः॥

श्लैष्मिकं, त्रि, (श्लेष्मणः शमनं कोपनं वा। श्लेष्मन्+"वातपित्तश्लेष्मभ्यः शमनकोपनयोः।" ५।१।३८। इत्यस्य वार्त्तिकोक्त्या ठञ्। कफशमनम्। कफकोपनम्। इति व्याकरणम्॥) श्लेष्मोद्भवम्। श्लेष्मसम्बन्धीयम्। इति श्लेष्मशब्दात् ष्ठिकप्रत्ययेन निष्पन्नम्॥ (यथा, सुश्रुते। १।३।

"चिकित्साप्रविभागीये वाताभिष्यन्दवराणः।
पैत्तिकस्य श्लैष्मिकस्य रौधिरस्य तथैव च॥")

श्लोक, ऋ ङ संघाते। वर्ज्जने। सर्ज्जने। इति कविकल्पद्रुमः॥(स्वा०-आत्म०-अक०-सक०-च-सेट्।) संघात इह छन्दोविशिष्टवाक्यरचनम्। ऋ, अशुश्लोकत्। ङ, श्लोकते कविः। इति दुर्गादासः॥

श्लोकः, पुं, (श्लोक्यते इति। श्लोकसंघाते+घञ्।) पद्यम्। यशः। इत्यमरः॥ * ॥ (वाक्। इति निघण्टुः। १।११॥ "शुश्रवणे 'इष् भीकापाशल्यतिमचिभ्यः कन्' इति कन्प्रत्ययो बाहुलकाद्भवति गुणः कविलकादित्वाल्लत्वम्। श्रूयते इति श्लोकः। यद्वा श्लोक संघाते 'पुंसि संज्ञायां घः।' श्लोक्यते पद्यते रूपेण संछन्द्यते कविभिः श्लोकः।" इति तट्टीका॥) श्लोकनामकारणम्। यथा,—

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥
तस्येत्थं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः।
शोकार्त्तस्यास्य शकुनेः किमिदं व्याहृतं मया॥
चिन्तयन् स महाप्राज्ञश्चकार मतिमान् मतिम्।
शिष्यञ्चैवाब्रवीद्वाक्यमिदं स मुनिपुङ्गवः॥
पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा॥"
इति रामायणे वाल्मीकीये बालकाण्डे २सर्गः॥

श्लोष, ऋ सङ्घाते। इति कविकल्पद्रुमः॥ (स्वा०-पर०-सक०-सेट्।) ऋ, अशुश्लोषत्। संश्लेषो राशीकरणम्। इति दुर्गादासः॥

श्वः, [म्] व्य, अनागताहः। इत्यमरः॥ कालि इति भाषा॥ (यथा, रामायणे।२।६४।३६।

"श्वो मया सह गन्तासि जनन्या च समेधितः॥")

श्वःश्रेयस, क्लो, (श्वः आगामिकाले श्रेयो यत्र। "श्वसो वसीयःश्रेयसः।" ५।४।८०। इति अच्।) कल्याणम्। इत्यमरः॥ (यथा, भट्टिः।४।३८।

"श्वःश्रेयसमवाप्तासि श्वश्रूभ्यां प्रत्यभाणि सा॥")

परमात्मा। धर्म्मः। इति मेदिनी॥ कल्याणयुक्ते, त्रि॥

श्वक, इ ङ गतौ। इति कविकल्पद्रुमः॥ (स्वा०-आत्म०-सक०-सेट्।) वकारयुक्तादयः। इ, श्वङ्क्ते। ङ श्वङ्कते। सर्पो गतिः। इति दुर्गादासः॥

श्वगणः, पुं, (शुनां गणः।) कुक्कुरसमूहः। यथा।

द्वारि देयबलेरिमौ स्यातां क्षित्तक्षिते परे।
श्वापदन्यङ्कवो वा। न तु श्वगणप्रभृतीनाम्।
इति मुग्धबोधव्याकरणटीकायां दुर्गादासः॥
(यथा, हरिवंशे भविष्यपर्व्वणि। ८।१४।

"श्वगणा नात्र दृश्यन्ते पिशाचा मांसभोजनाः॥")

श्वच, ङ } गत्याम्। इति कविकल्पद्रुमः॥
श्वच, इ ङ } (स्वा०-आत्म०-सक०-सेट्।) द्वौ वकारयुक्तादी। पुनःपाठादाद्यो नेदनुबन्धः। ङितौ तु द्वौ। एक एवेत्याठबलाद्वाध्य इति नियमात्। ङ, श्वचते। इ, श्वञ्चते। ङ, श्वञ्चते। इति दुर्गादासः॥

श्वठ, क } गतौ। संस्कृते। संस्कृते। इति
श्वठ, इ क } कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) द्वौ वकारयुक्तौ पुनःपाठादाद्यो नेदनुबन्धः। त्रयः अर्थाः। क, श्वाठयति। इ क श्वठयति जनः। गच्छति किमपि संस्करोति वा इत्यर्थः। संस्कारगत्योरिति केचित्। इति दुर्गादासः॥

श्वठ, त् क दुर्व्याचि। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-सक०-सेट्।) वकारयुक्तः। श्वठयति नीचः। कुत्सितं वदतीत्यर्थः। रमानाथस्तु सम्यग्भाषणे इति मत्वा श्वठयति सम्यग्वदतीत्यर्थ इत्याह। सम्यग्भाग इत्यर्थके इति दुर्गादासः॥

श्वदंष्ट्कः, पुं, (शुनो दंष्ट्रेव कण्टकोऽस्य।) गोक्षुरः। इति राजनिर्घण्टः॥

श्वदंष्ट्रा, स्त्री, (शुनो दंष्ट्रेव कण्टकाहतत्वात्।) गोक्षुरकः। इत्यमरः॥ (यथा, सुश्रुते।१।४६।

"पिप्पल्यादीनां श्वदंष्ट्रावसुकासवः कुम्भाण्डादीनां दार्व्वीकरमवः॥")

श्वधूर्त्तः, पुं, (शुनि धूर्त्तस्तद्वत्त्वात्।) शृगालः। इति शब्दरत्नावली॥

श्वनिशं, क्लो, } (शुना निशा। "सुरासेनाश्वनिशा, स्त्री, } च्छायाशालानिशा स्त्रियाञ्च।" इति लिङ्गानुशासनसूत्रेण विभाषया क्लीवत्वम्।) शुनां निशा। इत्यमरभरतौ॥ मत्त-कुक्कुरनिशा। यथा,—

"यस्यां मत्ता निशि श्वानः श्वनिशं श्वनिशा च सा॥"
इति जटाधरः॥

श्वपक्, [च]पुं, (श्वानं पचतीति। पच+क्विप्।) चण्डालः। यथा। निषादः। श्वपचः श्वपक्। इति भरतधृतयोपालितः॥ (यथा, मनुः।३।१८२

"शुनाञ्च पतितानाञ्च श्वपचं पापरोगिणाम्।
वायसानां कृमीणाञ्च शनकैर्निर्व्वपेद् भुवि॥")

श्वपचः, पुं, (श्वानं पचतीति। पच+अच्।) चण्डालः। इत्यमरः॥ तस्य सङ्गा अन्यावसायी। तस्य धर्म्मो यथा,—

"चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः।
अपपात्राश्च कर्त्तव्या धनं येषां श्वगर्हितम्॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायः समलङ्कारः परिव्रज्या च नित्यशः॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन्।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह॥
अन्नं येषां पराधीनं देयं स्याद्भिन्नभाजने।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च॥
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः।
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च॥"
चाण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः॥"
तस्यान्नभक्षणे प्रायश्चित्तं यथा,—
"अन्त्यावसायिनामन्नमश्नीयादयस्तु कामतः।
स तु चान्द्रायणं कुर्य्यात् तप्तकृच्छ्रमथापि वा॥"
इति प्रायश्चित्ततत्त्वधृताङ्गिरोवचनम्॥

श्वपाकः, पुं, (शुनां पाकः कार्य्यत्वेन यस्य।) चण्डालः। इत्यमरः॥ तस्योत्पत्तिर्यथा,—

"चत्तृजातस्तयोर्यायां श्वपाक इति कीर्त्तितः॥"
इति मानवे १० अध्यायः॥*॥

रजस्वलायास्तस्य स्पर्शने प्रायश्चित्तं यथा,—

"चाण्डालेन श्वपाकेन संस्पृष्टा चेत् रजस्वला।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत्॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति।
तां निशान्तु व्यतिक्रम्य स्नानात्शुद्धां वदेत्॥"
इति वचनान्तरदर्शनात् एतत् कामतः। अज्ञाने बहुस्मृतिः।

"पतितास्त्यश्वपाकैस्तु संस्पृष्टा स्त्री रजस्वला।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्॥
प्रथमेऽह्नि त्रिरात्रन्तु द्वितीये द्वादशाचरेत्।
अहोरात्रं ततोऽप्येकं चतुर्थे नक्तमाचरेत्॥"
चतुर्थेऽह्नीति शुद्धिस्नानात् पूर्व्वम्। इतिप्रायश्चित्ततत्त्वम्॥

श्वफलः, पुं,(श्वप्रियं फलमस्य।) बीजपूरः। इति रत्नमाला॥

श्वफल्कः, पुं, हरिणपुत्रः। स च अक्रूरपिता। यथा। अनमित्रस्यान्वयेऽन्त्या हरिणाः। तस्मात् श्वफल्कः। तत्पिता। कथितएव। श्वफल्कस्यान्यः

कनीयान् चित्रको नाम भ्राता। श्वफल्काद-क्रूरो गान्दिन्यामभवत्। इति विष्णुपुराणे ४ अंशे १४ अध्यायः॥

श्वभीरुः, पुं, (शुनः कुक्कुरात् भीरुर्भयशीलः।) शृगालः। इति शब्दमाला॥

श्वभ्र, क विले। गतौ। तङ्के। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-तङ्के अक०-सेट्।) विलं रन्ध्रकरणम्। क, श्वभ्रयति भाण्डं बालकः। तङ् इति तकि दीर्घश्चेत्यस्य रूपम्। श्वभ्रयति दोनः दुःखेन जीवतीत्यर्थः। तङ्स्थाने तन्त्र इत्यपपाठः। इति दुर्गादासः॥

श्वभ्र, क्ली, (श्वभ्रते यदिति। श्वभ्र विले + कर्म्मणि घञ्।) छिद्रम्। इत्यमरः॥ (यथा, मार्कण्डेये। ४३। २८।

"पततो यस्य वै गर्त्ते स्वप्ने द्वारं विधीयते।
न चोत्तिष्ठति यः श्वभ्रात् तदन्तं तस्य जीवितम्॥")

श्वयथुः, पुं, (टु ओ ष्वि गतिवृद्धयोः + "टितोऽथुच्।" ३। ३। ८८। अथुच्।) शोथः। इत्यमरः॥ (यथा, बृहत्संहितायाम्। ३२। १०।

"श्वयथुश्वासोन्मादज्वरकासभया वणिक्-पीड़ा॥")

श्वयोचौ, स्त्री, (श्वयतीति। ष्वि गतिवृद्धयोः + "श्वयतेर्युच्।" उणा० ४। ७१। इति ईचिः। वा ङीष्।) पीड़ा। इति सिद्धान्तकौमुदी॥

श्वल, वेगे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्। वकारयुक्तादिः। श्वलति। वेगः शीघ्रगतिः। इति दुर्गादासः॥

श्वल्क, क भाषे। इति कविकल्पद्रुमः। (चुरा०-पर०-सक०-सेट्।) वकारयुक्तस्तालव्यादिरन्तः-स्थद्वितीयोपधः। क, श्वल्कयति। भाषः कथनम्। इति दुर्गादासः॥

श्वल्ल, वेगे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) वकारयुक्तादिः लट्यन्तः। श्वल्लति। वेगः शीघ्रगतिः। इति दुर्गादासः॥

श्वदृत्तिः, स्त्री, (शुनः कुक्कुरस्येव पराधीना वृत्तिः। सेवा। इत्यमरः॥ चाकरी इति भाषा। शुन इव वृत्तिः परपिण्डोपजीवनात्। इति भरतः॥ अपि च।

"सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते।
सेवा श्वदृत्तिराख्याता तस्मात्तां परिवर्जयेत्॥"

इति मानवे ४ अध्याये ६ श्लोकः॥

"सेवा तु दीनदृष्टिसन्दर्शनस्वामितर्ज्जननीचक्रियादिधर्म्मयोगात् शुन इव वृत्तिरतः श्वदृत्ति-रुक्ता तस्मात्तां प्रकृतो ब्राह्मणस्त्यजेत्।" इति कुल्लूकभट्टः॥

श्वव्याघ्रः, पुं, (शुनो व्याघ्रः।) हिंसपशुः। यथा,

"शार्दूलः पुष्करोकस्य द्वीपी चाथ सगादनः।
श्वव्याघ्रश्च तरक्षुश्च व्याड़श्च श्वापदः समौ॥"

इति जटाधरः॥

श्वशुरः, पुं, (शु आशु अश्नुते व्याप्नोति इति। अश + "आशेरुरच्।" उणा० १। ४५। इति उरच्। "शुशब्दोऽत्राशुशब्दाभिधायी। आशु व्याप्नुयः श्वशुर इति धातुपारायणम्।" इति तट्टीकायां उज्ज्वलदत्तः॥) पतिपत्न्योः पिता। इत्यमरः॥ (यथा,—

"असारे खलु संसारे सारः श्वशुरमन्दिरम्।
हिमालये हरः शेते हरिः शेते महोदधौ॥"

इत्युद्भटः॥)

पूज्यः। इति मेदिनी॥

श्वश्रूः, पुं, (श्वश्रूश्च श्वशुरश्च तौ। "श्वश्रूः श्वश्रूा।" १। २। ७१। इति पाक्षिक एक-शेषः।) श्वश्रूश्वशुरौ। द्विवचनान्तोऽयम्। इत्यमरः॥ श्वशुर शाशुड़ी इति भाषा॥

श्वशुर्य्यः, पुं, (श्वशुरस्यापत्यमिति। श्वशुर + "राजश्वशुरात् यत्।" ४। १। १३७। इति यत्।) देवरः। श्यालः। इत्यमरः॥ (यथा, कथासरित्सागरे। १८। ५७।

दृष्टो वैदेहदेशे च राज्यं गोपालकाय सः।
सत्कारहेतोर्नृपतिः श्वशुर्य्यायानुगच्छति॥")

श्वश्रूः, स्त्री, (श्वशुरस्य स्त्री। श्वशुर + "श्वशुर-स्योकारलोपश्च।" ४। १। ६८। इत्यस्य वार्त्ति-कोक्त्या ऊङ् उकारलोपश्च।) पतिपत्न्योः प्रसूः। इत्यमरः॥ शाशुड़ी इति भाषा॥ * ॥ तस्याः सुखाभिः सहाविश्वासकारणं यथा,—

धर्म्मव्याध उवाच।

"मया ते दुहिता दत्ता पुत्रार्थे वरवर्णिनी।
सा च त्वद्भार्य्यया प्रोक्ता दुहिता जन्तुघातिनः॥
अतोऽर्थमागतोऽहं ते गृहं प्रति समीचितुम्।
आचारं देवपूजाञ्च अतिथीनाञ्च तर्पणम्॥
एतेषामेकमप्यत्र कुर्व्वन्नपि न दृश्यते।
तदृगृहं गन्तुमिच्छामि पितॄणां श्राद्धकाम्यया॥
स्वगृहे नैव भुञ्जामि पितॄणां कार्य्यमित्युत।
अहं व्याधो जीवघाती न तु तल्लोकहिंसकः॥
मत्सुता जीवघातस्य यदूढा त्वत्सुतेन च।
तच्छ्वश्वश्वा संप्राप्तं प्रायश्चित्तं तपोधन॥
एवमुक्ता स चोत्थाय गत्वा नारीं तदा घरे।
मा सुषाभिः समं स्वस्रा विश्वासो भवतु क्वचित्
मा च सुषा कदाचित् स्यात् या स्वश्रूं जीवतोमिषेत्।
एवमुक्ता गतो व्याधः स्वगृहं प्रति भामिनि॥"

इति वाराहे आदिकृतद्वन्द्वान्तनामाध्यायः॥

श्वश्रूश्वशुरौ, पुं, (श्वश्रूश्च श्वशुरश्च तौ।) श्वश्रू-श्वशुरयोः समाहारः। तत्पर्य्यायः। श्वशुरौ २। इत्यमरः॥

श्वस, घ लु प्राणने। इति कविकल्पद्रुमः॥ (अदा० पर०-अक०-सेट्।) "वकारयुक्तादिः। घ लु, श्वसिति लोकः जीवतीत्यर्थः। आश्वसेयुर्निशाचरान्। इति भट्टौ। न विश्वसेत् पूर्व्वं विरोधितश्चेति। पञ्चतन्त्रे।

'न विश्वसेदविश्वस्तं विश्वस्ते नातिविश्वसेत्।'

इत्यादौ च गत्वक्तमनित्यमिति न्यायात् अपः स्थितौ साध्यम्। अथवा छादेराकृतिगणत्वात् तत्र द्रष्टव्यम्। वस्तुतस्तु "पचादित्वादनि श्वस इत्याचरतीति क्वौ माध्यम।" इति दुर्गादासः॥

श्वस, लु र श्वस्ने। इति कविकल्पद्रुमः॥ (अदा०-पर०-अक०-सेट्।) लु, श्वस्ति। र, वैदिकः। इति दुर्गादासः॥

श्वसनं, क्ली, (श्वस + ल्युट्।) श्वसितम्। निश्वासः। इति मेदिनी॥ (यथा, किरातें। १०। ३४।

"श्वसनचलितपद्मवाधरोष्ठे
नवनिहितेर्क्षमिवावधूनयन्ती॥" * ॥

स्पर्शनम्। इति श्रीधरस्वामी॥ यथा, भागवते २। २। २८।

"घ्राणेन गन्धं रसनेन वै रसं
रूपञ्च दृष्ट्या श्वसनं त्वचैव॥")

श्वसनः, पुं, श्वसितीति। श्वस + ल्युः।) वायुः। (यथा, बृहत्संहितायाम्। ३४। २।

"इन्द्रयमवरुणनिर्ऋति-
श्वसनेशपितामहाग्निशताः॥")

मदनवृक्षः। इत्यमरः॥

श्वसनाशनः, पुं, (श्वसनो वायुरशनं भक्ष्यं यस्य। सर्पः। इति हारावली॥ (यथा, राजतर-ङ्गिण्याम्। १। २२५।

"जगाद तं द्विजत्राणं निश्वस्य श्वसनाशनः॥")

श्वसनेश्वरः, पुं, (श्वसन ईश्वरो यस्य।) अर्জ্জुन-वृक्षः। इति शब्दचन्द्रिका॥

श्वसनोत्सुकः, पुं, (श्वसनाय उत्सुकः। सर्पः। इति शब्दरत्नावली॥

श्वसितं, क्ली, (श्वस + क्तः।) श्वासः। यथा,

"श्वासस्तु श्वसितं सोऽन्तर्मुखे उच्छ्वास आहरः
प्राणो बहिर्मुखस्तु स्यात्निःश्वासः पान एतनः॥

इति हेमचन्द्रः॥

श्वसुनः, पुं, (श्वस + बाहुलकात् उनन्।) चतुष्प-दजन्तुः। इति शब्दचन्द्रिका॥ कुकुरशोका इति भाषा॥

श्वस्तनं, त्रि, (श्वो भवम्। श्वस् + "एषमोऽह्नः श्वसोऽन्यतरस्याम्।" ४। २। १०५। इति त्यब्-भावे ष्युञ्युलौ तुट् च।) भविष्यदस्तु। इति शब्दमाला॥ (यथा, भागवते। ११। ८। १२।

"सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षुकः।
मक्षिका इव संगृह्णन् सह तेन विनश्यति॥")

भविष्यत्काले, क्ली। इति राजनिर्घण्टः॥

श्वस्त्य त्रि, (श्वो भवमिति। श्वस् + "एषमोऽह्नः श्वसोऽन्यतरस्याम्।" ४। २। १०५। इति त्यब्।) श्वोभववस्तु। इति शब्दमाला॥

श्वा, [न्] पुं, (श्वयति गच्छतीति। श्वि गतौ + "श्वन् उक्षन् पूषन्निति।" उणा० १। १५८ इति कनिन्प्रत्ययेन साधु।) कुक्कुरः। तत्-पर्य्यायः।

"कुक्कुरः श्वा च भषकः शुनको गृधदंशकः।
कौलेयको रन्तिदेवः सारमेयो रतन्नयः॥
"कुक्कुरो दीर्घसुरतः श्वानो ग्रामस्थगोऽपि च।
वक्रपुच्छः शयालुः स्यात् शरलक्ष्यरतश्रपः॥
औषधादियोगितः श्वा स्यादलर्कोऽपालर्कवः।

मृगयाकुशलः श्वा तु विश्वकद्रुः पुमानयम् ॥"
इति शब्दरत्नावली ॥

श्वागणिकः, त्रि, श्वगणेन चरति यः। "श्वगणात् ठञ् च।"४।४।११। इति ठञ्। श्वगणेन चरति। श्वागणिकः श्वागणिकौ श्वगणिकः श्वगणिकौ। इति सिद्धान्तकौमुदी ॥

श्वादन्तः, पुं, (शुनो दन्त इव दन्तो यस्य। "शुनो दन्तदंष्ट्रेति।"६। ४। १३७। इत्यस्य वार्त्तिकोक्त्या दीर्घः।)कुक्कुरदशनः। इति सिद्धान्तकौमुदी ॥

श्वानः, पुं, (श्वा एव। श्वन्+स्वार्थे अण्।) कुक्कुरः। इति शब्दरत्नावली ॥ (शुनां समूहः खण्डिकादित्वात् अञ्। कुक्कुरसमूहे, क्ली ॥)

श्वानचिल्लिका, स्त्री, (श्वानप्रिया चिल्लिका।) शुनकचिल्ली। इति राजनिर्घण्टः ॥

श्वानी, स्त्री, (श्वान+स्त्रियां ङीष्।) कुक्कुरी। इति शब्दरत्नावली ॥

श्वापदः, पुं, (शुन इव पदं यस्य। "शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु।" ६।४।१३७। इत्यस्य वार्त्तिकोक्त्या दीर्घः।) हिंस्रपशुः। इति हेमचन्द्रः ॥ (यथा, विष्णुपुराणे।१।५।५१।
"श्वापदो हिंस्रको हस्ती वानरः पक्षिपञ्चमः।
औदकाः पशवः षष्ठाः सप्तमास्तु सरीसृपाः॥")
व्याघ्रः। इति शब्दरत्नावली ॥

श्वावित्, [ध्] पुं, (श्वानं विध्यतीति। व्यध+क्विप्। "नहिवृतीति।"६। ३। ११६। इति दीर्घः।) गृध्रः। इत्यमरः ॥ सजारु इति भाषा ॥ (यथा, मनुः। ५। १८।
"श्वाविधं शल्यकं गोधां खड्गकूर्म्मशशांस्तथा।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतो दतः॥")

श्वाविद्, (ध्)पुं,(श्वानं विध्यतीति। व्यध+क्विप्। "नहिवृतीति।"६। ३।११६। इति दीर्घः।) गृध्रः। इत्यमरः ॥ सजारु इति भाषा ॥

श्वाशः, पुं,(श्वा कुक्कुरः अश्व इव वाहनं यस्य।) भरवः। कुक्कुरवाहनत्वात्। इति केचित् ॥

श्वासः, पुं,(श्वसित्यनेनेति। श्वस+करणे घञ्। यद्वा, श्वसितीति। श्वस+"श्वसादयश्चेति।" ३। १। १४१। इति षः।) श्वसितम्। वायुः। इति हेमचन्द्रः ॥ तत्पर्य्यायः। प्राणः २। इति राजनिर्घण्टः ॥ (यथा, साहित्यदर्पणे।१।१४७।
"श्वासान् मुञ्चति भूतले विलुठति त्वन्मार्गमालोकते
दीर्घं रोदिति विक्षिपत्यत इतः शामां भुजावल्लरीम् ॥")
रोगविशेषः। स तु बलवान् महापातकजः। यथा,—
"उन्मादश्च त्वचां दोषो राजयक्ष्मा श्मरी तथा।
श्वासश्च मधुमेही द्वावुदरी पापसंज्ञकाः॥
इति नारदीयम्॥"
इति शुद्धितत्त्वम्। स च क्षीणबलउपपातकजः यथा,—
"जलोदरयकृत्प्लीहशूलरोगव्रणानि च।
श्वासाजीर्णज्वरच्छर्द्दिभ्रममोहगलग्रहाः।
रक्तार्ब्बुदविसर्पाद्या उपपापोद्भवा गदाः॥"
इति मलमासतत्त्वम् ॥ * ॥

अथ श्वासाधिकारः। तत्र निदानमाह।
"यैरेव कारणैर्हिक्का देहिनां संप्रवर्त्तते।
तैरेव बहुभिः श्वासो व्याधिर्घोरः प्रजायते॥"
श्वासस्य भेदानाह।
"महोर्द्ध्वच्छिन्नतमक्षुद्रभेदैस्तु पञ्चधा।
भिद्यते स महाव्याधिः श्वास एको विशेषतः॥"
पूर्व्वरूपमाह।
"प्राग्रूपं तस्य हृत्पीड़ा शूलमाध्मानमेव च।
आनाहो वक्त्रवैरस्यं शङ्खनिस्तोद एव च॥"*॥
संप्राप्तिमाह।
"यदा स्रोतांसि संरुध्य मारुतः कफपूर्त्तकः।
विश्वग्व्रजति संरुद्धस्तदा श्वासं करोति सः॥"
स्रोतांसि प्राणोदकान्नवहानि। कफपूर्व्वकः कफः पूर्व्वः प्रधानं यस्य सः। विश्वग्व्रजति सर्व्वतो विमार्गान् याति। संरुद्धः कफेन रुद्धमार्गः॥*॥
महाश्वासस्य लक्षणमाह।
"उद्धूयमानवातो यः शब्दवत् दुःखितो नरः।
ऊर्द्ध्वं श्वसिति सन्नद्धो मत्तर्षभ इवानिशम्॥
प्रनष्टज्ञानविज्ञानस्तथा विभ्रान्तलोचनः।
विह्वलाक्षाननो बद्धमूत्रवर्च्चा विशीर्णवाक्॥
दीनः प्रश्वसितं चास्य दूरात् विज्ञायते भृशम्।
महाश्वासोपसृष्टस्तु शीघ्रमेव विपद्यते॥"
उद्धूयमानवातः ऊर्द्धं नीयमानो वातो यस्य सः शब्दवत् शब्दं यथा स्यात् कीदृक् स शब्दस्तद्बोधयितुमाह। मत्तर्षभ इव ऊर्द्ध्वं श्वसितीत्यन्वयः। सन्नद्धः आनद्धः आनाहयुक्त इति यावत्। ज्ञानं ग्राह्यम्। विज्ञानं तदर्थविनिश्चयः। विशीर्णवाक् स्खलितवचनः। दीनः ग्लानः। मारकत्वार्थं महाश्वासः॥ * ॥ ऊर्द्ध्वश्वासमाह।
"ऊर्द्ध्वं श्वसिति योऽत्यर्थं न च प्रत्याहरत्यधः।
श्लेष्माहतमुखस्रोतः क्रूरगन्धवहार्दितः।
ऊर्द्ध्वदृष्टिर्विपश्यंस्तु विभ्रान्ताक्ष इतस्ततः।
प्रमुह्यन् वेदनार्त्तश्च शुष्कास्यो रतिपीड़ितः॥
ऊर्द्ध्वश्वासे प्रकुपिते ह्यधःश्वासो निरुध्यते।
मुह्यतस्ताम्यतोर्द्धं श्वासस्तस्यैव हन्त्यसून्॥"
सर्व्वेषु श्वासेषूर्द्धं श्वसते। अत्र अत्यर्थमिति विशेषः। न च प्रत्याहरत्यधः न श्वासमधः करोति। श्लेष्माहतेत्यादि। श्लेष्मणा आहतं यन्मुखं स्रोतांसि च तैः क्रूरो यो गन्धवहस्तेनार्दितः। विपश्यन् इतस्ततो विकृतं यथा स्यादेवं पश्यन्। अधःश्वासो निरुध्यते श्वासो नाधः प्रवर्त्तत इत्यर्थः॥ * ॥ ऊर्द्ध्वश्वासस्यारिष्टस्य लक्षणमाह। मुह्यतो मोहं प्राप्नुवतः ताम्यतो ग्लानिं प्राप्नुवतश्च ऊर्द्ध्वश्वासः असून् प्राणान् हन्ति। तस्यैवेति न तु मोहग्लानिरहितस्य॥ * ॥ छिन्नश्वासमाह।
"यस्तु श्वसिति विच्छिन्नं सर्वप्राणेन पीड़ितः।
न चाश्वसिति दुःखार्त्तो मर्म्मच्छेदरुजार्दितः॥
आनाहस्वेदमूर्च्छार्त्तो दह्यमानेन वस्तिना।
विप्लुताक्षः परिक्षीणः श्वसन् रक्तैकलोचनः॥
विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः।
छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून्॥"
विच्छिन्नं सविच्छेदम्। सर्व्वप्राणेन यावद्बलेन। मर्म्मच्छेदरुजार्दितः हृदयशिरश्छेदवेदनयेव पीड़ितः। दह्यमानेन वस्तिना उपलक्षितः। विप्लुताक्षः अश्रुपूर्णनेत्रः। विचेता उद्विग्नचित्तः। छिन्नश्वासेन विच्छिन्नः सः। यस्तु श्वसिति विच्छिन्नमित्यादिलक्षणयुक्तो यः स नरश्छिन्नश्वासेन विच्छिन्नः पीड़ितो बोद्धव्य इत्यर्थः। मारकत्वाय विच्छिन्नश्वासः॥ * ॥
तमकश्वासमाह।
"प्रतिलोमं यथा वायुः स्रोतांसि प्रतिपद्यते।
ग्रीवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य्य च॥
करोति पीनसन्तेन कण्ठे घुर्घुरकं तथा।
अतीव तीव्रवेगञ्च श्वासं प्राणप्रपीड़कम्॥
प्रताम्यति स वेगेन त्रस्यते संनिरुध्यते।
प्रमोहं कासमानश्च स गच्छति मुहुर्म्मुहुः॥
श्लेष्मणा मुच्यमानेन भृशं भवति दुःखितः।
तस्यैव च विमोक्षान्ते मुहूर्त्तं लभते सुखम्॥
तथास्योर्द्धं सते कण्ठः क्लेदाच्छ्लोकति भाषितुम्।
न चापि निद्रां लभते शयानः श्वासपीड़ितः॥
पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः।
आसीनो लभते सौख्यमुष्णञ्चैवाभिनन्दति॥
उक्लिष्टाक्षो ललाटेन क्लिद्यता भृशमार्त्तिमान्
विशुष्कास्यो मुहुः श्वासो मुहुश्चैवावधम्यते॥
मेघाम्बुग्रीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते।
स याप्यस्तमकः श्वासः साध्यो वा स्यान्नवोत्थितः॥"
संगृह्य व्यथया समुदीर्य्य वर्द्धयित्वा। पीनसं नासास्रावम्। तेन श्लेष्मणा घुर्घुरकं घुर्घुरशब्दम्। प्राणप्रपीड़कं प्राणाधिष्ठानहृदयप्रपीड़कम्। प्रताम्यति तमसि प्रविशतीव। वेगेन श्वासवेगेन। संनिरुध्यते निश्चेष्टो भवतीति चक्रः। संनिरुध्यते श्वास इति जेज्जटः। श्लेष्मणा श्लेष्मुच्यमानेन। सुखं सुखमिव। उद्वंसते व्यथितो भवति। शयानः शय्यानिहिताङ्गः अवगृह्णाति पीड़यति। उष्णञ्चैवाभिनन्दति इत्यनेन तमको वातकफारब्ध इति बोद्धव्यम्। उक्लिष्टाक्षः शूनाक्षः। ललाटेन स्विद्यता उपलक्षितः। अवधम्यते गजारूढ़स्येव सर्व्वगात्रं चाक्ष्यते॥ * ॥ तमकस्यैव पित्तानुबन्धजनितज्वरादियोगेन प्रतमकसंज्ञामाह।
"ज्वरमूर्च्छापरीतस्य विद्यात् प्रतमकं तु तत्।
उदावर्त्तरजोऽजीर्णक्लिन्नकायनिरोधतः॥
तमसा वर्द्धतेऽत्यर्थं श्लेष्मणाशु प्रशाम्यति।
मज्जतस्तमसो चास्य विद्यात् प्रतमकं तु तत्॥"
क्षुद्रश्वासमाह।
"रूक्षायासोद्भवः कोष्ठे क्षुद्रो वात उदीरयन्।
क्षुद्रश्वासेन सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः॥
क्षिणस्य न च गात्राणि न च दुःखी यथेतरे।

न च भोजनपानानां निरुणद्धुचितां गतिम् ॥
नेन्द्रियाणां व्यथाञ्चापि काञ्चिदुत्पादयेद्भुजम् ।
स साध्य उक्तो बलिनः सर्व्वे वा व्यक्तलक्षणाः ॥"
क्षुद्रः अल्पनिदानलिङ्गः । उटीरयन् ऊर्द्ध-
गच्छन् । दुःखः दुःखप्रदः । सर्व्वे महाश्वासा-
दयोऽपि ॥*॥ श्वासानां साध्यत्वादिकमाह ।
"क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते ।
त्रयः श्वासा न सिध्यन्ति तमको दुर्बलस्य च ॥
कामं प्राणहरा रोगा बहवो न ज्वरादयः ।
तथा यथा श्वासहिक्के हरतो जीवमाशु ते ॥"
अथ श्वासस्य चिकित्सा ।
"श्वासहिक्कातुरं प्रायः स्निग्धैः स्वेदैरुपाचरेत् ।
युक्तैर्लवणतैलाभ्यां तैरस्थ ग्रथितः कफः ॥
श्वासो विलयमायाति मारुतश्चोपशाम्यति ।
स्निग्धं ज्ञात्वा ततश्चैनं भोजयेच्च रसौदनम् ॥
स्वरसं शृङ्गवेरस्य माक्षिकेण समन्वितम् ।
पाययेत् श्वासकासघ्नं प्रतिश्यायकफापहम् ॥"
शृङ्गवेरमार्द्रकम् ।
"प्रस्थं विभीतकानां अस्थि विना साधयेदजा-
मूत्रे ।
अयमवलेहो लीढो मधुसहितः श्वासकासघ्नः ॥
दशमूली शटी रास्ना पिप्पली विश्वभैष्कारी ॥
शृङ्गतामलकीभार्गीगुडूचीनागराग्निभिः ॥
यवागूं विधिना सिद्धां कषायं वा पिबेन्नरः ।
श्वासहृद्ग्रहपार्श्वार्त्तिहिक्काकासप्रशान्तये ॥"
तामलकी भूम्यामलकी ।
"दशमूलस्य वा क्वाथः पौष्करेणावचूर्णितः ।
श्वासकासप्रशमनः पार्श्वशूलविनाशनः ॥
रम्भाकुन्दशिरीषाणां कुसुमं पिप्पलीयुतम् ।
पिष्ट्वा तण्डुलतोयेन पीत्वा श्वासमपोहति ॥
शृङ्गीमहौषधकणाघनपुष्कराणां
चूर्णं शटीमरिचयोश्च सिताविमिश्रम् ।
क्वाथेन पीतमसृता हृषपञ्चमूल्या
श्वासं त्वरेण विनिहन्ति हि घोररूपम् ॥
पञ्चमूली तु सामान्यात् पित्ते योज्या कनीयसी
महती मारुते देया सैव देया कफेऽधिके ॥
कुष्माण्डकशिफाचूर्णं पीतं कोष्णेन वारिणा ।
शीघ्रं शमयति श्वासं कासञ्चापि सुदारुणम् ॥
हरिद्रां मरिचं द्राक्षां कणां रास्नां शटीं
गुडम् ।
कटुतैलं लिहन् हन्यात् श्वासान् प्राणहरानपि॥
शतं संगृह्य भार्य्यास्तु दशमूल्यास्तथापरम् ।
शतं हरीतकीनाञ्च पचेत्तोये चतुर्गुणे ॥
पादावशेषे तस्मिंस्तु रसे वस्त्रनिपीडिते ।
आलोड्य च तुलां पूतां गुडस्य त्वभयां ततः ॥
पुनः पचेत्तु मृद्वग्नौ यावल्लेहत्वमेति तत् ।
शीते च मधुनस्तत्र षट् फलानि विनिक्षिपेत् ॥
त्रिकटु त्रिसुगन्धञ्च पलमात्रं पृथक् पृथक् ।
यवक्षारं कर्षयुगं संचूर्ण्य प्रक्षिपेत्ततः ॥
भक्षयेदभयामेकां लेहस्यार्द्धं पलं तथा ।
श्वासं सुदारुणं हन्ति कासं पञ्चविधं तथा ॥
अर्शांस्यरोचकं गुल्मं शूलहृद्रोगं क्षयं तथा ।
स्वरवर्णप्रदो श्लेष जठराग्नेश्च दीपनः ।
नाम्ना भार्गीगुडाख्यातो भिषग्भिः सकलैर्मतः॥"
इति भार्गीगुडः ॥
"रसो गन्धो विषञ्चापि टङ्कणञ्च मनः शिला ।
एतानि कर्षमात्राणि मरिचं चाष्टकर्षकम् ॥
कटुत्रयं कर्षयुगं पृथगत्र विनिःक्षिपेत् ।
रसः श्वासकुठारोऽयं सर्व्वश्वासनिवारणः ॥"
श्वासकुठारो रसः । इतिश्वासाधिकारः । इति
भावप्रकाशः ॥*॥ अन्यच्च ।
"विभीतकस्य वै चूर्णं समधु श्वासनाशनम् ।
पिप्पलीत्रिफलाचूर्णं मधुसैन्धवसंयुगम् ।
सर्व्वरोगज्वरश्वासशोषपीनसहृद्भवेत् ॥"
इति गारुडे १८६ अध्यायः ॥*॥
तस्य पुराणोक्तनिदानं यथा,—
धन्वन्तरिरुवाच ।
"अथातः श्वासरोगस्य निदानं प्रवदाम्यहम् ।
कासहृद्या भवेच्छ्वासः पूर्व्वो वा दोषकोपनैः ॥
आमातिसारवमथुविषपाण्डुज्वरैरपि ।
रजोधूमानिलैर्मर्म्मघातादपि हिमाम्बुना ॥
क्षुद्रकस्तमकश्छिन्नो महानूर्द्ध्व पञ्चमः ।
कफोपरुद्धगमनः पवनो विश्वमाश्रितः ॥
प्राणोदकान्नवाहीनि दुष्टस्रोतांसि दूषयन् ।
उरःस्थः कुरुते श्वासमामाशयसमुद्भवम् ॥*॥
प्राग्रूपं तस्य हृत्पार्श्वशूलं प्राणविलोमता ।
आनाहः शङ्खभेदश्च तत्रापासीत भोजनैः ॥
प्रेरितः प्रेरयन् क्षुद्रं स्वयं सममलं मरुत् ।
प्रतिलोमं शिरा गच्छेत् उदीर्य्य पवनः कफम्॥
परिगृह्य शिरोग्रीवमूरःपार्श्वे च पीड़यन् ।
कासं घुर्घुरकं मोहमरुचिं पीनसं भृशम् ॥
करोति तीव्रवेगश्च श्वासं प्राणोपतापनम् ।
प्रभ्राम्येत्तस्य वेगेन निष्ठुतान्ते क्षणं सुखी ॥
कृच्छ्राच्छयानः श्वसिति निषण्णः स्वास्थ्य-
मिच्छति ।
उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमार्त्तिमान्॥
विशुष्कास्यो मुहुः श्वासः कांक्षत्यूर्णं सवेपथुम् ।
मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते ॥
स याप्यस्तमकः साध्यो नरस्य बलिनो भवेत् ।
ज्वरमूर्च्छायुतः शीतैः शाम्येत् प्रतमकस्तु सः ॥
कासश्वसितविच्छिन्नमर्म्मच्छेदरुजार्दितः ।
सस्वेदमूर्च्छः सानाहो वस्तिदाहनिरोधवान् ॥
अधोदृष्टिः प्लुताक्षस्तु मुह्यन्नुन्नकलोचनः ।
शुष्कास्यः प्रलपन् दीनो नष्टच्छायो विचेतनः ॥
महतामहता दीनो नादेन श्वसिति क्षयन् ।
उद्यमानः संरम्भो मत्तर्षभ इवानिशम् ॥
प्रनष्टज्ञानविज्ञानो विभ्रान्तनयनाननः ।
अत्त समाक्षिपन्वहमूत्रवर्चा विशीर्णवाक् ॥
शुष्यत्कण्ठो मुहुर्भ्रुहुः कर्णशङ्खशिरोऽभिरुक् ।
यो दीर्घमुच्छ्वसित्यूर्द्धं न च प्रत्याहरत्यधः ॥
श्लेष्माहतमुखस्रोताः क्रुद्धगन्धवहार्दितः ।
ऊर्द्धदृग्वोच्चतं भ्रान्तमक्षिणी परितः क्षिपन् ॥
मर्म्मसु क्षिप्यमाणेषु परिदेवी निरुद्धवाक् ।
एते सिद्ध्येयुरव्यक्ता व्यक्ताः प्राणहरा ध्रुवम् ॥"
इति गारुडे श्वासरोगनिदानं १५४ अध्यायः॥
अथ श्वासरोगस्य कर्म्मविपाकः ।
"श्वासरोगो महानुग्रो देहिदेहावघातकः ।
कर्म्मणा येन भवति तन्मे निगदतः शृणु ।
महोर्द्ध्वच्छिन्नतमकक्षुद्राभेदोऽस्य पञ्चधा ॥
श्वासः संजायते नृणां पृथक् कर्म्मानुसारतः ॥
यस्तु यन्नं समासाद्य पशुश्वासं निरुध्य च
हन्ति खादन्ति वा तञ्च महाश्वासेन गृह्यते ॥१॥
पौराणिककथामध्ये यस्तु वाचान्यथा भवेत् ।
स ऊर्द्ध्वश्वासमासाद्य दुर्नीत्यहरहर्निशम् ॥२॥
निषिद्धदानग्रहणात् छिन्नश्वासेन गृह्यते ।३।
मर्त्यः शास्त्रार्थनिर्णीतवाक्यं यो दूषयत्यपि ॥
पीड्यते तमकश्वासैः क्षुद्रैः पाकस्य विघ्नतः ।४।५
परत्र कर्म्मतो देहि नरकेषु विपच्यते ॥
नरकान्ते पुनर्य्याम्ययोनिं शूकरवायसीम् ।
पृथक्कर्म्मवशाद्योनिं गत्वा संप्राप्य तप्यते ॥
मानुषत्वमनुप्राप्य पूर्व्वोक्तैर्नोपगृह्यते ।
श्रुत्वा तूष्णन्तु कदनं श्वासरोगसमुद्भवम् ।
प्रणम्य भरतः श्रीमान् भृगुं वाचमुवाचह ॥
राजोवाच ।
श्वासकर्म्मक्षयं येन दानेन नियमेन च ।
कृतेन मुक्तो भवति तन्मे वद प्रसादतः ॥
भृगुरुवाच ।
हाटकीं कारयेन्मूर्त्तिं भक्त्या वरुणवातयोः ।
ताम्रपात्रोपरि स्थाप्य तत्पात्रं कलसोपरि ।
राजतं कारयेत् पाशं ध्वजञ्चैव पलद्वयम् ।
वामदक्षिणतो मूर्त्तिं सपार्श्वां गन्धदीपकैः ॥
वायोर्ध्वजसमायुक्तां गन्धमाल्यपरिष्कृताम् ।
वरुणस्यापसव्ये तु कुर्य्याद्यागः प्रपूजनम् ॥
न च श्वासं विनाकासस्तच्छ्वासः कासतोऽपि वा
तस्मात् पूज्यावियौ सम्यक् वायुर्वरुण एव च ॥
वारुणं कारयेद्धोमं वरुणर्क्षे ति मन्त्रतः ।
घृतक्षौद्रतिलयवैः सहस्रं वा सहस्रितः ॥
वायोस्तिलयवैः कार्य्यं मनोवातेति मन्त्रतः ।
सादरं ब्राह्मणं पूज्य वस्त्रमाल्याद्यतादिभिः ॥
कर्म्मोपशमवाक्येन ब्राह्मणाय निवेदयेत् ।
सदक्षिणाञ्च तन्मूर्त्तिं दत्त्वा गाथां पठेन्नरः ।
ॐ नमः पाशभृते तुभ्यं ध्वजातिपतये नमः ।
जलाधिपतये तुभ्यं वायो सर्व्वजनप्रिय ॥
शुचये दीयते दानं ध्वजपाशो तु राजतौ ।
श्वासकासौ हरेयातां प्रीतौ सर्व्वजनप्रियौ ॥
पूर्व्वजन्मविपाकोत्थौ श्वासकासौ च दारुणम् ।
सहिरण्यं प्रयच्छामि मुक्तोऽहं त्वत्प्रसादतः ॥
सादरं माधवं नत्वा दिग्देवान् भास्करं शिवम् ।
वस्त्रान्तरं कृतं विप्रं पुनर्भानुमुदीरयेत् ॥
अतः परं प्रकुर्व्वीत यदा सोऽद्भुतदुर्व्वहौ ।
श्वासकासौ ज्वरव्याधौ दानं तस्योपशान्तये ॥
पशुघातोद्भवे श्वासे कुर्य्यादग्नेस्तु तर्पणम् ।
ॐ अग्ने सूर्द्वेति मन्त्रेण छागं दद्यात् सुदक्षिणम् ।
कथाविघ्नोद्भवे रोगे कुर्य्यात् सारस्वतं नृप ।
दधिपात्रं सरजतं सरस्वत्यै निवेदयेत् ॥
निषिद्धदानग्रहणे गादानन्तु समाचरेत् ।

इच्छाहारेण सन्तर्प्य द्विजस्यापि प्रजापतिम् ॥
होमेनानेन दानेन मुक्तो भवति कर्म्मतः ।
मादरं माधवं नत्वा सन्तर्प्य द्विजपुङ्गवान् ॥
स्नात्वा कलसतोयेन मुक्तो भवति मानुषः ॥"
इति भृगुभरतोक्तश्वासकासकर्म्मविपाकः ॥
अपि च ।
"पिशुनो नरकस्थान्ते जायते श्वासकासवान् ।
हुतं तेन प्रदातव्यं सहस्रपलसम्मितम् ॥"
इति शातातपीयकर्म्मविपाकः ॥

श्वासकासः, पुं, (श्वासयुक्तः कासः ।) श्वासयुक्तकासरोगः । श्वासजनककासः । यथा,—
"कासहृद्या भवेच्छ्वासः पूर्व्वो वा दोषकोपनैः ।"
इति गारुड़े १५४ अध्यायः ॥
अन्यत् श्वासशब्दे द्रष्टव्यम् ॥

श्वासकुठारः, पुं, (श्वासस्य कुठार इव तन्नाशकत्वात् ।) श्वासरोगस्य औषधविशेषः । यथा,—
"रसो गन्धो विषञ्चापि टङ्गणञ्च मनःशिला ।
एतानि कर्षमात्राणि मरिचञ्चाष्टकर्षकम् ॥
कटुत्रयं कर्षयुग्मं पृथगत्र विनिःक्षिपेत् ।
रसः श्वासकुठारोऽयं सर्व्वश्वासनिवारणः ॥"
इति भावप्रकाशः ॥

श्वासप्रश्वासधारणं, क्ली, (श्वासप्रश्वासयोर्धारणं यत्र ।) प्राणायामः । इति हेमचन्द्रः ॥

श्वासहैतिः, स्त्री, (श्वासस्य हैतिरिव ।) निद्रा । इति हेमचन्द्रः ॥

श्वासारिः, पुं, (श्वासस्य अरिः ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥

श्वासी, [न्] पुं, (श्वासयतीति । श्वस + णिच् + णिनिः ।) वायुः । इति शब्दरत्नावली ॥ (श्वासोऽस्यास्तीति । इनिः ।) श्वासयुक्ते, त्रि ॥ (यथा, सुश्रुते । १ । २८ ।
"वामाचारा रुदन्तश्च श्वासिनो विकृतेक्षणाः ।
याम्यां दिशं प्राप्नुवन्ति विषमैकपदं स्थिताः ।
वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः ॥
श्वासरोगयुक्ते च त्रि । यथा, तत्रैव । ६ । ५१ ।
"स्नेहवस्तिं विना केचिदूर्द्ध्वाधश्च शोधनम् ।
मृदुप्राणवतां श्रेष्ठं श्वासिनामादिशन्ति हि ॥"

श्वि, टु ऐ ओ इर् गतिवृद्धयोः । इति कविकल्पद्रुमः ॥ भ्वा०-पर०-सक०-सेट् ।) तालव्यादिः । टुः, श्वयथुः । ऐ, शूयात् । ओ, शूनः । इर्, अश्वत् अश्वयीत् । इति दुर्गादासः ॥

श्वित, ल्ल आ ङ शौक्ल्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) वकारयुक्तः । ल्ल. अश्वितत् । आ, श्वितितं श्वित्तम् । ङ, श्वतते प्रासादः । इति दुर्गादासः ॥

श्वित्रं, क्ली, (श्वेतते इति । श्वित शौक्ल्ये + "स्फायितञ्चिवञ्चीति ।" उणा० २ । १३ । इति रक् ।) श्वेतकुष्ठम् । तत्पर्य्यायः । कुष्ठम् २ । इत्यमरः ॥ श्वेतम् ३ श्वेत्यम् । इति तट्टीका ॥ (यथा, भागवते । ७ । १ । १८ ।
"अपतोरसजह्यिणं यदब्रह्म परमव्ययम् ।
श्वित्रं न जातं जिह्वायां नाम्नं विविशतुस्तमः ॥")
अथ त्वग्दृष्टिसाम्यात् कुष्ठभेदत्वञ्चास्यैव श्वित्रमाह ।
"कुष्ठै कसम्भवं श्वित्रं किलासञ्चारुणं भवेत् ।
निर्द्दिष्टमपरिस्रावि विधातूद्भवसंश्रयम् ॥"
कुष्ठै कसम्भवं कुष्ठेन सह एकस्तुल्यः सम्भवो निदानं यस्य तत् । श्वित्रस्य भेदानाह । किलासं चारुणं भवेत् । श्वित्रमेव रक्तमांसाश्रयात् किलासमरुणं भवेत् इत्यन्वयः । ननु कुष्ठस्य श्वित्रस्य को भेदः इत्यत आह । निर्दिष्टमपरिस्रावीति । श्वित्रमपरिस्रावि भवति कुष्ठन्तु स्रावि अथच विधातूद्भवसंश्रयमिति त्रयो धातवो वातपित्तकफास्तेभ्यः पृथग्भूतेभ्य उद्भवो यस्य तत् । अथ च त्रयो धातवो रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत् । कुष्ठं सान्निपातिकं सर्व्वधातुगतञ्च भवति इति भेदः ॥ दोषभेदेन लक्षणभेदमाह ।
"वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत् ।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥
सकण्डूकं क्रमात् रक्तं मांसमेदः सु चादिशेत् ।
वर्णनैवेदमुभयं कष्टं तच्चोत्तरोत्तरम् ॥"
अरुणमौषच्छोहितम् । कमलपत्रवत् इत्यनेन मध्ये श्वेतमन्ते लोहितं बोधयति ।
"घनं पुष्टं क्रमाद्रक्तं मांसमेदःसु चादिशेत् ।"
तथा च चरकः ।
"अरुणं रक्तगे वाते ताम्रं पित्ते पलङ्कते ।
श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कुष्ठं परं परम् ॥"
इति ॥
उभयं द्विविधमपि श्वित्रं वर्णेन दृष्टगेव । अरुणं ताम्रं श्वेतञ्च दोषभेदात् । द्विविधं दोषजं व्रणजञ्च । तथा च भोजः ।
"श्वित्रञ्च द्विविधं विद्याद्दोषजं व्रणजं तथेति ॥"
श्वित्रं साध्यमसाध्यमाह ।
"अगुक्लरोमावहुलमसंसृष्टं मिथो नवम् ।
अनन्विदग्धजं साध्यं श्वित्रं वर्ज्जमतोऽन्यथा ॥"
अवहुलं तनु । अन्यच्च ।
"गुह्यपायितलौष्ठेषु जातमप्यचिरन्तनम् ।
वर्ज्जनीयं विशेषेण किलासं सिद्धिमिच्छता ॥"
गुह्य मेहनं भगञ्च । तलमत्र पादतलम् । सुश्रुतेनाल्पे जातमिति सामान्यतो निर्द्दिष्टत्वात् ॥७॥ अथ श्वित्रस्य चिकित्सा ।
"विभीतकत्वङ् मलपूजटानां
क्वाथेन कृत्वा गुडसंयुतेन ।
अवल्गुजं बीजमपाकरोति
श्वित्रानि कृच्छ्राण्यपि पुण्डरीकम् ॥"
मलपूः कटुवरी । अवल्गुजः वाकुची ॥ १ ॥
"कुड़वावल्गुजबीजं हरितालं तच्चतुर्थांशम् ।
मनःशिला तालकार्द्धा गुञ्जाफलमग्निमूलञ्च ॥
सूत्रेण गवां पिष्टं सवर्णताकारकं श्वित्रस्य ।"२।
"श्वित्रकुष्ठं व्रजत्यस्तं पञ्चार्द्धेनाधिकेन वा ।
गिरिकर्ण्याः सितायाश्च मूलेन परिलेपितम् ॥"
गिरिकर्णी नीलापराजिता । धन्वन्तरीति लोके ॥ ३ ॥
"क्वाथः सवाकुचीचूर्णं धात्रीखदिरसारयोः ।
शङ्खेन्दुकुन्दधवलं श्वित्रं संसेवितो हन्ति ॥४॥
मथितेन पिबेच्चूर्णं काकोदुम्बरवल्गुजम् ।
तैलाक्तं घर्म्मसेवी स्यात्क्राथी श्वित्रङ्गवेत् ॥"
मथितं निर्जलं विलोड़ितं दधि । तक्रं चतुर्थांशजलयुक्तं वस्त्रपूतं दधि ॥५॥
"खदिरस्य पलान्यष्टौ सोमराज्याः पलद्वयम् ।
त्रिफला पिचुमर्दञ्च दारुदार्व्यश्च पर्पटः ॥
पृथक् फलान् समृत्य सिंहिकायाः पलद्वयम् ।
जलाढ़कद्वये साध्यं यावत् पादावशेषितम् ॥
क्वाथ्यमानञ्च मृद्वग्नौ घृतप्रस्थं विपाचयेत् ।
चतुःपलं सोमराज्याः खदिरस्य पलं तथा ॥
पटोलमूलत्रिफलात्रायमाणा दुरालभा ।
कषायं कटुकञ्चापि कार्षिकान् सूक्ष्मपेषितान् ।
पलद्वयं कौविकस्य गुड़स्यात्र प्रदापयेत् ।
सिद्धं सर्पिरिदं श्वित्रं हन्यादग्निरिवानलम् ॥
अष्टादशानां कुष्ठानां परमं वै तथौषधम् ।
सोमराजीघृतं नाम निर्म्मितं ब्रह्मणा पुरा ॥
लोकानामुपकाराय श्वित्रकुष्ठादिरोगिणाम् ॥"
इति सोमराजीघृतम् ॥६॥
"महौषधं महामेदां निम्बपत्राणि सर्षपाः ।
मनःशिला च सिन्दूरं पद्मवारिण्यवल्गुजम् ॥
हरिद्रे हरितालञ्च त्रिफला पीतगन्धकान् ।
एतानि समभागानि विषार्द्धांशानि योजयेत् ॥
सर्पिषश्च पलान्यष्टौ देवदारुरसं शुभम् ।
द्विगुणं त्रिगुणं क्षीरं गोमूत्रञ्च चतुर्गुणम् ॥
ताम्रपात्रे तु संस्थाप्य शनैर्मृद्वग्निना पचेत् ।
चतुर्भागावशेषन्तु सकल्कमवतारयेत् ॥
अग्नौ क्षिपन्तु निःशब्दं जलमुक्तं विचक्षणः ।
अभ्यङ्गपानयोगाक्तदाग्न सर्व्वान् गदान् जयेत् ॥
अष्टादशानां कुष्ठानां दद्रूणां श्वित्रिणां तथा ।
दुष्टनाड़ीषु मर्त्यानां स्राविणां कौटिनां तथा ॥
असृक्स्रावपरीता ये ये च त्यक्ताभिषक्क्रियाः ।
सर्व्वग्रहविमुक्तानां शीर्णाङ्गानां विशेषतः ॥
सर्व्वधातुगते कुष्ठे पतितभ्रूशिरोरुहम् ।
घर्घराव्यक्तघोषाणां तथा सर्व्वाङ्गवातिनाम् ॥
पानेऽभ्यङ्गे तथा नस्ये वस्तिकर्म्मणि नित्यशः ।
सप्तरात्रप्रयोगेण सर्व्वकुष्ठानि नाशयेत् ॥
द्विसप्ताहप्रयोगेण पूर्णचन्द्रनिभाननः ।
जातकैशनखश्मश्रुभाति षोड़शवर्षवत् ॥
अनङ्गसहितं साक्षात् सर्व्वामर्त्यविनाशनः ।
एतद्घृतं महाश्रेष्ठं भार्गवेणावतारितम् ॥
मनुष्याणां हितार्थाय सर्व्वव्याधिहरं परम् ।
महामार्त्तण्डकमिदं घृतं सर्व्वामरार्चितम् ॥७॥
इति भावप्रकाशः ॥
अपि च ।
"धात्रीखदिरयोः क्वाथं पीत्वा च जम्बुसंवृतम् ।
शङ्खेन्दुधवलश्वित्रं हन्ति तूर्णं न संशयः ॥"
इति गारुड़े १०५ अध्यायः ॥

श्वित्रघ्नी, स्त्री, (श्वित्रं हन्तीति । हन + टक् । ङीष् ।) पीतपर्णी । इति शब्दचन्द्रिका ॥ विकुटी इति भाषा ॥

श्वित्री, [न्] त्रि, (श्वित्रमस्यस्येति। श्वित्र + इनि:।) श्वित्ररोगयुक्तः। यथा,—
"श्वित्री वस्त्रं श्वा रसन्तु चौरी लवणहारकः॥"
इति याज्ञवल्क्यः। ३। २१५॥
श्विद, द् ङ श्वीक्ये। इति कविकल्पद्रुमः॥(भ्वा०-आत्म०-अक०-सेट्।) वकारयुक्तः। इ.श्विन्यते। ङ, श्विन्दते पुण्डरीकम्। इति दुर्गादासः॥
श्वेतं, क्ली, (श्वेतते इति। श्वित + अच्।) रूप्यम्। इत्यमरः॥
श्वेतः,पुं,(श्वेतते इति। श्वित श्वीक्ये + पचाद्यच्।) शुक्लवर्णः। द्वीपविशेषः (यथा, महाभारते। १२। ३३५। ८।
"क्षीरोदधेर्योत्तरतो हि द्वीपः
श्वेतः स नाम्ना प्रथितो विशालः॥")
पर्व्वतभेदः। इति मेदिनी॥ (स तु जम्बुद्वीपपर्व्वतानामन्यतमः। यथा, मार्कण्डेये।५४।८।
"हिमवान् हेमकूटश्च ऋषभो मेरुरेव च।
नीलः श्वेतस्तथा शृङ्गी सप्तास्मिन् वर्षपर्व्वताः॥"
श्वेतपर्व्वतस्य परिमाणादि यथा। "उत्तरोत्तरे णैलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां मर्य्यादागिरयः प्रागायताः उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशगिधिकांशेन दैर्घ्य एव क्रमन्ति। एवं दक्षिणेनेलावृतं निषधा हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्।"इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥ * ॥
कपर्दकः। इति हेमचन्द्रः॥ शुक्लयष्टः।
श्वेताभ्रः। इति शब्दरत्नावली॥ शङ्खः। इति राजनिर्घण्टः॥ जीवकः। इति जटाधरः॥
शिवावतारविशेषः। यथा,—
"वेदव्यासावताराणि द्वापरे कथितानि तु।
महादेवावताराणि कलौ शृणुत सुव्रताः॥
आदौ कलियुगे श्वेतो देवदेवो महाद्युतिः।
नाम्ना हिताय विप्राणामभूद्वै वस्वतेऽन्तरे॥
हिमवच्छिखरे रम्ये शुभगे पर्वतोत्तमे।
तस्य शिष्याः शिखायुक्ता बभूवुरमितप्रभाः॥
श्वेतः श्वेतशिखश्चैव श्वेताश्वः श्वेतलोहितः।
चत्वारस्ते महात्मानो ब्राह्मणा वेदपारगाः॥
सुभावो दमनश्चाथ सुहोत्रः कङ्कणस्तथा।
लोकाक्षिश्च योगीन्द्रो जैगीषव्यस्तु सप्तमे॥
अष्टमे दधिवाहः स्यान्नवमे ऋषभप्रभुः।
मृगुस्तु दशमे प्रोक्तस्तस्मादुग्रः परः स्मृतः॥
द्वादशेऽत्रिः समाख्यातो बालो चाथ त्रयोदशे।
चतुर्दशे गौतमस्तु वेदशीर्षा ततः परम्॥
योकण्ठश्चाभवत्तस्मात् गुहावासः शिखण्डश्च।
जटामाल्यट्टहासश्च दारुको लाङ्गली क्रमात्॥
श्वेतस्तथापरः शूली तिण्डी मुण्डी च वै क्रमात्।
सहिष्णुः सोमशर्म्मा च नकुलीशोऽन्तिमे प्रभुः॥
वक्षस्तेऽन्तरे शम्भोरवतारास्त्रिशूलिनः।
अष्टाविंशतिराख्याता ह्यन्ते कलियुगे प्रभोः॥"
इति कौर्म्मे ५० अध्यायः॥ * ॥
राजविशेषः। यथा,—
ब्रह्मोवाच।
"श्वेताभिजनसम्पन्नः सत्यवागनसूयकः।
त्वयाधीतं हुतं दत्तं गुरवः परितोषिताः॥
न ते दत्तं द्विजेभ्योऽन्नं कदाचिद्हि बुभुक्षितैः।
तस्मात्तोत्रेह संजाता क्षुधा ते नृपसत्तम॥
अन्नदानाद्धते पुंसां न स्यात्तृप्तिर्महीतले।
स्वर्गे वापि तथा नात्र अन्नदानं ततोऽधिकम्॥"
इति वह्निपुराणे अन्नदाननामाध्यायः॥
(नागविशेषः। यथा, भागवते। ५।२४। ३१।
"ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति॥")
श्वेतः,त्रि, (श्वेतो वर्णोऽस्यास्तीति। श्वेत + अर्श आद्यच्।) शुक्लवर्णयुक्तः। इत्यमरः॥ * ॥ (यथा, रघुः। १। ८३।
"ललाटोदयमाभुग्न पल्लवस्निग्धपाटला।
बिभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम्॥")
श्वेतवस्तूनि यथा। अथ श्वेतानि।
"सुधांशूक्षःश्वःशम्भुकीर्त्तिज्योत्स्नाशरद्घनाः।
प्रासादसौधतरमन्दारदुग्धिमाद्र्यः॥
सूर्य्येन्दुकान्तकर्पूरकरभारजतं हली।
हिर्म्मोकभस्म हिण्डीरचन्दनं करका हिमम्॥
हारोर्णनाभतन्वस्थि स्वर्गङ्गेभरदाभ्रकम्।
शेषाहिः शर्करा दुग्धं दधि गङ्गा सुधाजलम्॥
मृणालसिकता हंसवककैरववामरम्।
रत्नागर्भपुण्डरीककेतकीशङ्खनिर्झराः॥
लोध्रसिंहध्वजच्छत्रचूर्णसूक्तिकपर्दकाः।
मुक्ताकुसुमनक्षत्रदन्तपुष्पोशनोगुणाः॥
कलामकासकार्पासहासवासवकुञ्जराः।
नारदः पारदः कुन्दखटिका स्फाटिकादयः॥"
इति कविकल्पलतायां द्वितीये श्वेतपल्लवके वर्णो नाम द्वितीयं कुसुमम्॥
श्वेतकं, क्ली, (श्वेतमेव। स्वार्थे कन्।) रूप्यम्। इति राजनिघण्टः॥
श्वेतकः,पुं, (श्वेत एव। स्वार्थे कन्।) वराटकः। इति भूरिप्रयोगः॥ (श्वेतशब्दार्थोऽप्यत्र॥
श्वेतगुणविशिष्टे, त्रि। यथा, बृहत्संहितायाम्। ८१। १८।
"कृष्णश्वेतकपोतकताम्राणामीषदपि च
विषमाणाम्॥")
श्वेतकण्टकारी, स्त्री, (श्वेता कण्टकारी।) शुक्लकण्टकारिका। श्वेत रेङ्गनी इति हिन्दीभाषा। तत्पर्य्यायः। सितकण्टकारिका २। श्वेता ३ क्षेत्रदूती ४ लक्ष्मणा ५ सितसिंही ६ सितक्षुद्रा ७ क्षुद्रवार्त्ताकिनी ८ सिता ९ सिक्ता १० कटुवार्त्ताकिनी ११ क्षेत्रजा १२ कपटेश्वरी १३ निःशूकफला १४ वामा १५ सितकण्टा १६ महौषधी १७ गर्हभी १८ चन्द्रिका १९ चान्द्री २० चन्द्रपुष्पा २१ प्रियङ्करी २२ नाकुली २३ दुर्लभा २४ राक्षा २५। अस्या गुणाः। रूक्षत्वम्। कटुत्वम्। उष्णत्वम्। कफवातनाशित्वम्। चक्षुष्यत्वम्। दीपनत्वम्। रसनियामकत्वञ्च। इति राजनिर्घण्टः॥*॥
अन्यच्च।
"श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षेत्रदूतिका।
गर्हभा चन्द्रभा चान्द्री चन्द्रपुष्पा प्रियङ्करी॥
कण्टकारी सरा तिक्ता कटुका दीपनी लघुः।
रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान्॥
निहन्ति पीनसं पार्श्वपीडाक्रमिहृदामयान्।
तयोः फलं कटुरसं पाके च कटुकं भवेत्॥
शुक्रस्य रेचनं भेदि तिक्ता पित्ताग्निकृल्लघुः।
हन्यात् कफमरुत्कण्डूकासमेदःक्रमिव्रणान्॥
तद्वत् प्रोक्ता सिता क्षुद्रा विशेषाद्गर्भकारिणी॥"
इति भावप्रकाशः॥
श्वेतकन्दा, स्त्री, (श्वेता कन्दा।) अतिविषा। इति राजनिर्घण्टः॥
श्वेतकिणिही, स्त्री, (श्वेता किणिही।) क्षुद्रविशेषः। तत्पर्य्यायः। सितामिकटभी २ गिरिकर्णिका ३ गिरीषपत्री ४ कालिन्दी ५ शतपत्रा ६ विषघ्निका ७ महाश्वेता ८ महाशीर्ष्णी ९ महादिकटभी १०। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। गुल्मविषाध्मानशूलदोषनाशित्वम्। वातकफजीर्णरोगशमनत्वञ्च। श्वेता च तत्र गुणयुक्ता। इति राजनिर्घण्टः॥ पुस्तकान्तरे सितामिकटभीस्थाने सितालिकटभी। महादिकटभीस्थाने महालिकटभीति च पाठः॥
श्वेतकुञ्जरः, पुं, (श्वेतः कुञ्जरः।) ऐरावतहस्ती। इति शब्दरत्नावली॥ शुक्लगजश्च॥
श्वेतकुशः, पुं, (श्वेतः कुशः।) तृणविशेषः। तत्पर्य्यायः। सितदर्भः २ क्रकुशः ३ पूतः ४ यज्ञीयपवकः५ वज्रः६ ब्रह्मपवित्रः ७ तोक्ष्णः८ यज्ञभूषणः ९ सूचीमुखः १० पुण्यतृणः ११ बर्हिः १२ पूततृणः १३। अस्य मूलगुणाः। हिमत्वम्। रुचत्वम्। मधुरत्वम्। पित्तरक्तज्वरतृषाश्वासकामलादोषनाशित्वञ्च। इति राजनिर्घण्टः॥
श्वेतकेतुः, पुं, (श्वेतः केतुर्यस्य।) बुधः। इति त्रिकाण्डशेषः॥ केतुग्रहविशेषः। यथा,—
"केतवो ह्यत्र दृश्यन्ते वारुणास्य एव ते।
ऊर्म्मिकेतुः श्वेतकेतुर्धूमकेतुस्तृतीयकः॥
श्वेतकेतुर्यदा दृश्येत् श्वेताख्यि कुरुते महीम्।
तदा मानुषमांसानि भक्षयन्तीह मानुषाः॥
क्षुद्भयार्त्तं जगत् कृत्स्नं चक्रवदभ्रमते तदा॥"
अपि च।
"श्वेतः शस्त्राकुलं कुर्य्यात्लोहितस्त्वग्निजं भयम्
क्षुद्भयं पीतकः कुर्य्यात् कृष्णो रोगमयोल्वणम्॥"
अन्यच्च।
"अवन्ती पुष्करारण्यं यावद्यन्त्यत्तथापरान्।
देशान् क्वचित् क्वचिद्रोगदुर्भिक्षैः परिपीड़ितान्

श्वेताश्वस्तु जटाकारो श्यामो व्योमविभागः।
निवर्त्ततेऽपसव्येन विभागोकुरुते प्रजाः॥"
इति समयामृतम्॥
(मुनिविशेषः। यथा, महाभारते। १।५।३।७।
"उद्दालकः प्रमतकः श्वेतकेतुश्च पिङ्गलः॥"
स तु उद्दालकमुनेः पुत्रः। पुरा किल नार्य्यः प्रायशः पूर्वपतिं परित्यज्य पत्यन्तरं जगृहुः। अनेन तु तद्दोषमपाकृत्य समाजमर्य्यादा स्थापिता। यथा, महाभारते।१।१२२।८—२०
"बभूवोद्दालको नाम महर्षिरिति नः श्रुतम्।
श्वेतकेतुरितिख्यातः पुत्रस्तस्याभवन्मुनिः॥
मर्य्यादेयं कृता तेन धर्म्या वै श्वेतकेतुना।
कोपात्कमलपत्राक्षि! यदर्थं तं निबोध मे॥
श्वेतकेतोः किल पुरा समक्षं मातरं पितुः।
जग्राहं ब्राह्मणः पाणौ गच्छाव इति चाब्रवीत्॥
ऋषिपुत्रस्ततः कोपं चकारामर्षचोदितः।
मातरं तां तथा दृष्ट्वा नीयमानां बलादिव॥
क्रूरं तन्तु पिता दृष्ट्वा श्वेतकेतुमुवाच ह।
मा तात कोप कार्षीस्त्वमेष धर्म्मः सनातनः॥
अनावृता हि सर्व्वेषां वर्णानामङ्गना भुवि।
यथा गावः स्थितास्तात स्वे स्वे वर्णे तथा प्रजाः॥
ऋषिपुत्रोऽथ तं धर्मं श्वेतकेतुर्न चक्षमे।
चकार चैव मर्य्यादामिमां स्त्रीपुंसयोर्भुवि॥
मानुषेषु महाभागे न त्वेवान्येषु जन्तुषु।
तदाप्रभृति मर्य्यादा स्थितेयमिति नः श्रुतम्॥
व्युच्चरन्त्याः पतिं नार्य्या अद्यप्रभृति पातकम्।
भ्रूणहत्यासमं घोरं भविष्यत्यसुखावहम्॥
भार्य्यां तथा व्युच्चरतः कौमारब्रह्मचारिणीम्।
पतिव्रतामेतदेव भविता पातकं भुवि॥
पत्या नियुक्ता या चैव पत्नौ पुत्रार्थमेव च।
न करिष्यति तस्याश्च भविष्यति तदेव हि॥
इति तेन पुरा भीरु मर्य्यादा स्थापिता बलात्
उद्दालकस्य पुत्रेण धर्म्मज्ञा वै श्वेतकेतुना॥")
श्वेतकेशः, पुं, (श्वेताः केशा यस्मात्।) रक्तशिग्रुः। इति जटाधरः॥ (श्वेतः केशः।) शुक्लकचश्च॥
श्वेतकोलः, पुं, (श्वेतः कोलः क्रोडदेशो यस्य।) शफरमत्स्यः। इति त्रिकाण्डशेषः॥
श्वेतखदिरः, पुं, (श्वेतः खदिरः।) शुक्लखदिरः। तत्पर्य्यायः। कदरः२ श्वेतसारः३ कामुकः ४। कुब्जकण्टकः ५ सोमसारः ६ सोमवल्कः ७ सोमवल्कः ८ पथिद्रुमः ९। अस्य गुणाः। तिक्तत्वम्। कषायत्वम्। कटुत्वम्। उष्णत्वम्। कण्डूतिभूतकुष्ठकफवातव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥ पुस्तकान्तरे कामुकस्थाने कामुकः कुब्जकण्टकस्थाने कुष्ठकण्टकः इति च पाठः॥ * ॥ अन्यच्च।
"खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः।
कदरो विगटोऽत्रघ्नो मुखरोगकफास्रजित्॥"
इति भावप्रकाशः॥

श्वेतगजः, पुं, (श्वेतः शुक्लो गजः।) इन्द्रहस्ती। इति हेमचन्द्रः॥ शुक्लवर्णहस्ती च॥
श्वेतगरुत्, पुं, (श्वेतः गरुत् पक्षो यस्य।)हंसः। इत्यमरः। २। ५। २३॥
श्वेतगुञ्जा, स्त्री, (श्वेता गुञ्जा।) शुक्लगुञ्जा। सादा कुँच इति भाषा। तत्पर्य्यायः। श्वेतकाम्बोजी २ भृष्टिका३ काकादनी ४ काकपीलुः ५ चक्रशल्या ६ चूड़ाला ७। अस्या गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। तस्या बीजं वान्तिकरम्। तस्याः शिफा शूलविषनाशिनी। तस्याः पत्रं वश्ये शस्तम्। इति राजनिर्घण्टः॥
अपि च।
"श्वेता रक्तोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता।
रक्ता सा काकचिञ्ची स्यात् काकनन्ती च रक्तिका॥
काकादनी काकपीलुः सा स्मृताङ्गारवल्लरी।
गुञ्जाद्वयन्तु केश्यं स्यात् वातपित्तज्वरापहम्॥
मुखशोषभ्रमश्वासतृष्णामदविनाशनम्।
नेत्रामयहरं तृष्यं बल्यं कण्डूव्रणं हरेत्।
कृमीन्द्लुप्तकुष्ठानि रक्ता च धवलापि च॥"
इति भावप्रकाशः॥
अन्यच्च।
"गुञ्जा शिखण्डिका ताम्रा रक्तिका काकशान्तिका।
श्वेतान्या चक्रिका चूड़ा दुमाषा काकपीलुका॥
गुञ्जा केश्या बलकरा रुच्या पित्तकफापहा।
नेत्रामयहरा तृष्या हन्ति कण्डूयहव्रणान्।
कृमीन्द्लुप्तकुष्ठानि तद्वच्छ्वित्रापि शस्यते॥"
इति मदनपालनिर्घण्टः॥
श्वेतचन्दनं, क्ली,(श्वेतं चन्दनम्।)शुक्लचन्दनम्। इति राजनिर्घण्टः॥ अस्य पर्य्यायगुणौ चन्दनशब्दे द्रष्टव्यौ॥
श्वेतचिञ्ची, स्त्री, (श्वेता चिञ्ची।) शाकभेदः। तत्पर्य्यायः। वास्तुकी २ सुपक्ष्या ३ श्वेतचिल्लिका ४ सितचिञ्ची ५ उपचिल्ली ६ ज्वरघ्नी ७ क्षुद्रवास्तुकी ८। अस्या गुणाः।
"श्वेतचिञ्ची सुमधुरा क्षारा च शिशिरा च सा।
त्रिदोषशमनी पथ्या ज्वरदोषविनाशिनी॥"
इति राजनिर्घण्टः॥
श्वेतच्छदः, पुं,(श्वेतः च्छदो यस्य।) हंसः। इति हलायुधः॥ गन्धपत्रः। इति शब्दचन्द्रिका॥ बाबुइ तुलसी इति भाषा॥
श्वेतजीरकः, पुं, (श्वेतो जीरकः।) गौरजीरकः। इति राजनिर्घण्टः॥
श्वेतटङ्कं,क्ली,(श्वेतं टङ्कम्।) श्वेतटङ्कम्। इति राजनिघण्टः॥
श्वेतटङ्कं,क्ली,(श्वेतं टङ्कम्।) क्षारविशेषः। सादा सोहागा इति भाषा। तत्पर्य्यायः। श्वेतटङ्कम् २ लोहि ३ सिन्धुकरम् ४ सिन्धु५ मालतीतीरसम्भवम् ६ शिवम् ७ द्रावकरम् ८ शीतक्षारम् ९ टङ्कणम् १०। अस्य गुणाः। स्निग्धत्वम्। कटुत्वम्। उष्णत्वम्। कफवातामक्षयश्वासविश्वकासमलनाशित्वञ्च। इति राजनिर्घण्टः॥
श्वेतदूर्व्वा, स्त्री, (श्वेता दूर्व्वा।) शुक्लदूर्व्वा। तत्पर्य्यायः। गोलमी २ सिताख्या ३ चण्डा ४ भद्रा ५ भार्गवी ६ दुर्ग्गरा ७ गौरी ८ विघ्नेशानकान्ता ९ अनन्ता १० श्वेता ११ दिव्या१२ श्वेतकाण्डा १३ प्रचण्डा १४ सहस्रवीर्य्या १५ सहस्रकाण्डा १६ सहस्रपर्व्वा१७ सुरवल्लभा१८ शुभा १९ सुपर्व्वा २० सितच्छदा २१ श्वेच्छा२२ कच्छान्तरुहा२३। अस्या गुणाः। अतिशिशिरत्वम्। मधुरत्वम्। वान्तिपित्तामातिसारकासदाहक्षयानाशित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥
श्वेतद्विपः, पु, (श्वेतः शुक्लो द्विपः।) इन्द्रहस्ती। इति त्रिकाण्डशेषः॥ शुक्लगजश्च॥
श्वेतद्वीपः,पुं,क्ली, (श्वेतो द्वीपः।) चन्द्रद्वीपः। स च वैकुण्ठाख्यविष्णुधाम। यथा,—
"श्वेतद्वीपं गतवति त्वयि द्रष्टुं तदीश्वरम्।
तत्र ह्ययमभूत् प्रश्नस्त्वं मां यमनुपृच्छसि॥"
इति श्रीभागवते १०स्कन्धे ८७ अध्यायः॥
अपि च।
"एकदा ब्रह्मणो लोकादायान्तं नारदं मुनिम्।
पर्य्यटन् रावणो लोकान् दृष्ट्वा तत्वान्नवीदचः॥
भगवन्! ब्रूहि मे युद्धं कुत्र सन्ति महाबलाः।
योद्धुमिच्छामि बलिभिस्त्वं जानासि जगत्त्रयम्॥
मुनिर्ध्यात्वा तु सुचिरं श्वेतद्वीपनिवासिनः।
महाबला महाकायास्तत्र यूयं महामते॥
विष्णुपूजारता ये वै विष्णुना निहताश्च ये।
त एव तत्र संजाता अजेयाश्च सुरासुरैः॥
श्रुत्वा तद्रावणो वेगान्मन्त्रिभिः पुष्पकेण तान्।
योद्धुकामः समागत्य श्वेतद्वीपसमीपतः॥
तत्प्रभाहततेजस्कं पुष्पकं नाचलत्ततः।
त्यक्त्वा विमानं प्रययौ मन्त्रिणश्च दशाननः॥
प्रविशन्नेव तद्द्वीपं धृतो हस्तेन योषिता।
पृष्टश्च त्वं कुतः कोऽसि प्रेषितः केन वा वद॥
इत्युक्तो लीलया स्त्रीभिर्हसन्तीभिः पुनः पुनः॥
कक्षाङ्गस्तादिनिर्म्मुक्तास्तासां स्त्रीणां दशाननः॥
आश्चर्य्यमतुलं लब्ध्वा चिन्तयामास दुर्म्मतिः।
विष्णुना निहतो यामि वैकुण्ठमिति निश्चितः॥
मयि विष्णुर्यया कुप्येत्तथा कार्य्यं करोम्यहम्॥
इति निश्चित्य वैदेहीं जहार विपिनेऽसुरः।
ज्ञात्वैव परमात्मानं स जहारावनीसुताम्॥"
इति श्रीब्रह्माण्डपुराणे श्रीमदध्यात्मरामायणे उत्तरकाण्डे ४ अध्यायः॥ अन्यच्च।
"श्वेतां गङ्गां नरः स्नात्वा यः पश्येत् श्वेतमाधवम्।
मुक्तात्तं माधवञ्चैव श्वेतद्वीपं स गच्छति॥"
इति तीर्थचिन्तामणिः॥
श्वेतधातुः पुं, (श्वेतो धातुः।) खटिका। इति राजनिर्घण्टः॥ शुक्लवर्णधातुद्रव्यञ्च॥

श्वेतधामा, [न्] पुं, (श्वेतं धाम किरणं यस्य।) चन्द्रः। कर्पूरः। समुद्रफेनः। इति मेदिनी॥
श्वेतनीलः, पुं, (श्वेतो नीलश्च। वर्णो वर्णेनेति समासः।) मेघः। इति शब्दरत्नावली॥ शुक्लनीलवर्णश्च॥
श्वेतपत्रः, पुं, (श्वेतं पत्रं पक्षो यस्य।) हंसः। इति श्वेतपत्ररथशब्दार्थदर्शनात्। शुक्लपर्णे, क्ली॥
श्वेतपत्ररथः, पुं, श्वेतपत्रो हंसो रथो वाहनं यस्य। ब्रह्मा। इति शब्दमाला॥
श्वेतपद्मं, क्ली, (श्वेतं शुक्लं पद्मम्।) सिताम्भोजम्। तत्पर्य्यायः। सिताब्जम्२ पुण्डरीकम् ३ श्वेतवारिजम् ४ हरिनेत्रम् ५ शरत्पद्मम् ६ शारदम् ७ शुभ्रुवल्लभम् ८। अस्य गुणाः। हिमत्वम्। तिक्तत्वम्। मधुरत्वम्। पित्तदाहास्रभ्रमदोषविषपिपासानाशित्वञ्च। इति राजनिर्घण्टः॥
श्वेतपर्णा, स्त्री, (श्वेतानि पर्णानि यस्याः।) वारिपर्णी। इति रत्नमाला॥ पानाइति भाषा॥ (भद्राश्ववर्षस्थ पर्वतविशेषे, पुं। यथा, मार्कण्डेये। ५८। ४।
"पूर्वेण यत् स्थितं वर्षं भद्राश्वं तन्निबोध मे। श्वेतपर्णश्च नीलश्च शैवालश्चाचलोत्तमः।
कीरश्च: पञ्चशैलाग्रः पञ्चैते तु कुलाचलाः॥")
श्वेतपर्णासः, पुं, (श्वेताः पर्णासः।) श्वेततुलसी। यथा,—
"अर्जकः श्वेतपर्णासो गन्धपत्रः कुठेरकः॥"
इति रत्नमाला॥
श्वेतपाटला, स्त्री, (श्वेता पाटला।) शुक्लपाटलावृक्षः। इति जटाधरः॥
श्वेतपिङ्गः, पुं, (देहेन श्वेतः जटया पिङ्गश्च। वर्णो वर्णेनेति समासः।) सिंहः। इति हेमचन्द्रः॥
श्वेतापङ्गलः, पुं, (श्वेतः पिङ्गलश्च।) सिंहः। इति त्रिकाण्डशेषः॥ शुक्लकपिलवर्णयुक्ते, त्रि॥ (महादेवः। यथा, महाभारते। १३। १७। १३६।
"महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः॥")
श्वेतपिङ्गलकः, पुं, (श्वेतापङ्गल+स्वार्थे कन्।) सिंहः। इति शब्दमाला॥
श्वेतपिण्डोतकः, पुं, (श्वेतः शुक्लः पिण्डोतकः।) महापिण्डोतरुः। इति राजनिघण्टः॥
श्वेतपुष्पः, पु, (श्वेतानि पुष्पाणि यस्य।) सिन्धुवारवृक्षः। इति जटाधरः राजनिघण्टश्च॥ (श्वेतं पुष्पम्।) शुक्लकुसुमे, क्ली। (यथा, सुश्रुते। १। ११।
"श्वेतपुष्प-रक्तपुष्प-सहस्रं लुडयात्॥")
श्वेतपुष्पकः, पुं, (श्वेतानि पुष्पाणि यस्य। कप्।) करवीरवृक्षः। इति राजनिघण्टः॥ शुक्लपुष्पयुक्ते, त्रि॥
श्वेतपुष्पा, स्त्री, (श्वेतं पुष्पं यस्याः।) घोषातकी। श्वेतघोषा इति भाषा। इति रत्नमाला। नागदन्ती। मृगेर्व्वारुः। इति राजनिर्घण्टः॥
श्वेतपुष्पिका, स्त्री, (श्वेतं पुष्पं यस्याः। ततः स्वार्थे कन्। टापि अत इत्वम्।) पुत्रदात्री। महाश्रवणपुष्पिका। इति राजनिर्घण्टः॥
श्वेतप्रसूनकः, पुं, (श्वेतानि प्रसूनानि यस्य। कप्।) वृक्षविशेषः। यथा,—
"तिक्तः शाकतरुः सेतुवृक्षः श्वेतप्रसूनकः।"
इति शब्दमाला॥
शुक्लपुष्ययुक्ते, त्रि॥
श्वेतबृहतौ, स्त्री, (श्वेता बृहती।) शुक्लक्षुद्रवार्त्ताकी। तत्पर्य्यायः। श्वेता २ श्वेतमहीटिका३ श्वेतसिंही४ श्वेतफला५ श्वेतवार्त्ताकिनी ६। अस्या गुणाः।
"विज्ञेया श्वेतबृहती वातश्लेष्मविनाशिनी। रुच्या व्यञ्जनयोगेन नानानेत्रामयापहा॥"
इति राजनिर्घण्टः॥
श्वेतभण्डा, स्त्री, (श्वेता भण्डा।) श्वेतापराजिता। इति रत्नमाला॥
श्वेतमन्दारकः, पुं, (श्वेतो मन्दारकः।) वृक्षविशेषः। श्वेत आक इति हिन्दी भाषा॥ तत्पर्य्यायः। पृथ्वीकुरुवकः २ दीर्घायुष्यः ३ सितालर्कः ४ दीर्घालर्कः ५ सिताह्वयः ६। इति राजनिर्घण्टः॥
श्वेतमरिचं, क्ली, (श्वेतं मरिचमिव।) शोभाञ्जनबीजम्। इत्यमरः॥ शुक्लमरिचञ्च॥
श्वेतमालः, पुं, (श्वेता शुक्लवर्णा माला यस्य।) मेघः। धूमः। इति विश्वः॥ मेदिनीशब्दरत्नावल्योः क्षतमाल इति पाठः॥
श्वेतरक्तः, पुं, (श्वेतो रक्तश्च।) पाटलवर्णः। इत्यमरः॥ गोलावी रङ् इति भाषा॥
श्वेतरञ्जनं, क्ली, (श्वेतं सिताभ्रं रञ्जयतीति। रञ्ज+ल्युः।) सीसकम्। इति केचित्॥
श्वेतरथः, पुं, (श्वेतो रथो यस्य।) शुक्लग्रहः। इति शब्दरत्नावली॥ शुक्लवर्णस्यन्दनश्च॥
श्वेतराजी, स्त्री, (श्वेतेन वर्णेन राजते इति। राज+अच्। गौरादित्वात् ङीष्।) चचेण्डा। इति राजनिर्घण्टः॥
श्वेतरोचिः, [स्] पुं, (श्वेतं रोचिर्यस्य।) चन्द्रः। इति हलायुधः।
श्वेतरोहितः, पुं, (पुष्पेण श्वेतः फलेन लोहितः सन् यः।) वृक्षविशेषः। श्वेत रोहिड़ इति हिन्दी भाषा। तत्पर्य्यायः। सितपुष्पः २ सिताह्वयः ३ सिताङ्गः ४ शुक्लरोहितः ५ लक्ष्मीवान् ६ जनवल्लभः ७। अस्य गुणाः। कटुत्वम्। स्निग्धत्वम्। कषायत्वम्। सुशीतलत्वम्। कृमिदोषव्रणप्लीहरक्तनेत्रामयनाशित्वञ्च। इति राजनिर्घण्टः॥
श्वेतलोध्रः, पुं, (श्वेतो लोध्रः।) पट्टीकालोध्रः। इति राजनिर्घण्टः॥
श्वेतवचा, स्त्री, (श्वेता वचा।) अतिविषा। शुक्लवचा। सादा वच् इति भाषा। तत्पर्य्यायः। मेध्या २ षड्ग्रन्था ३ दीर्घपत्रिका ४ तीक्ष्णगन्धा ५ हैमवती ६ मङ्गल्या ७। अस्या गुणाः। अतिगुणाढ्यत्वम्। मतिमेधायुःसमृद्धित्वम्। कफनाशित्वञ्च। इति राजनिर्घण्टः॥ अन्यच्च।
"पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा। हैमवत्युदिता तद्वच्छूलं हन्ति विशेषतः॥"
तद्वत् वचावत्। इति भावप्रकाशः॥
श्वेतवल्कलः, पुं, (श्वेतं वल्कलं यस्य।) उडुम्बरवृक्षः। इति जटाधरः॥ शुक्लत्वक् च॥
श्वेतवाजी, [न्] पुं, (श्वेतो वाजी घोटको यस्य।) चन्द्रः। इति हेमचन्द्रः॥ अर्জ্জुनः इति जटाधरः॥ शुक्लघोटकश्च॥
श्वेतवासाः, [स्] पुं, श्वेतं वासो यस्य।) शुक्लवस्त्रधारिसन्न्यासी। इति हलायुधः॥ परिहितशुक्लवसने, त्रि॥
श्वेतवाः, [ह्] पुं, (श्वेतेन वाहनेन उह्यते इति वह+खिः।) इन्द्रः। इति मुग्धबोधव्याकरणम्॥
श्वेतवाहः, पुं, (श्वेतः शुक्लो वाहो घोटको यस्य।) अर्জ্জुनः। इन्द्रः। इति केचित्॥
श्वेतवाहनः, पुं, (श्वेतं वाहनं यस्य।) चन्द्रः। अर्জ্জुनः। इति मेदिनी॥ (यथा, महाभारते। ४। ४२। १५।
"श्वेताः काञ्चनसन्नाहा रथे युज्यन्ति मे हयाः। संयामे युध्यमानस्य तेनाहं श्वेतवाहनः॥")
मकरः। इति शब्दरत्नावली॥ (राजाधिदेवस्य पुत्रः। स तु विदूरथस्य पौत्रः। यथा, हरिवंशे। ३८। २।
"राजाधिदेवः शूरस्य विदूरथसुतोऽभवत्। राजाधिदेवपुत्रास्तु जज्ञिरे वीर्य्यवत्तराः। दत्ताति दत्तो बलिनो यानश्च श्वेतवाहनः॥")
श्वेतवाही, [न्] पुं, (श्वेतवाहः श्वेतघोटकोऽस्यास्तीति। इनिः।) अर्জ্জुनः। इति शब्दरत्नावली॥
श्वेतवृक्षा, स्त्री, (श्वेता वृक्षा।) वनतिक्ता। यथा,—
"श्वेतवृक्षा कपोतस्तु वनतिक्ता विमर्षिणी। शङ्खिनी चाकचिक्या च गिरिजा धूसरच्छदा॥"
इति रत्नमाला॥
श्वेतवृक्षः, पुं, (श्वेतो वृक्षः।) वरुणवृक्षः। इति राजनिर्घण्टः॥ शुक्लतरुश्च॥
श्वेतशरपुङ्खा, स्त्री, (श्वेता शरपुङ्खा।) तृणविशेषः। श्वेत शरफोंका इति हिन्दी भाषा। तत्पर्य्यायः। सितशायका २ सितपुङ्खा ३ श्वेतपुङ्खा ४ शुभ्रपुङ्खा५। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। कृमिवातरुजापहत्वम्। गुणाढ्यत्वञ्च इति राजनिर्घण्टः॥
श्वेतशिग्रुः, पुं, (श्वेतः शुक्लः शिग्रुः।) शुक्लशोभाञ्जनः। सादा शजिना इति भाषा। तत्पर्य्यायः। सुतीक्ष्णः २ मुखभङ्गः ३ सिताह्वयः ४ सुमूलः ५ श्वेतमरिचः ६ रोचनः ७ मधुशिग्रुकः ८। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। शोफानिलाङ्गव्यथामुखजाड्यनाशित्वम्। रुच्यत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥

"शिग्रुवल्कलपत्राणां सुरसः परमार्त्तिहृत्।
चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम्।
अष्ठ्यं कफवातघ्नं तन्नस्येन शिरोऽर्त्तिनुत्॥"
इति भावप्रकाशः॥

श्वेतशिंशपा, स्त्री, (श्वेता शिंशपा।) शुक्लशिंशपावृक्षः। तत्पर्य्यायः। श्वेतपत्रा २ श्वेतचिञ्चिका ३। अस्या गुणाः। तिक्तत्वम्। शिशिरत्वम्। पित्तदाहनाशित्वञ्च। इति राजनिर्घण्टः॥

श्वेतशुङ्गः, पुं, (श्वेता शुङ्गा यस्य।) यवः। इति जटाधरः॥ शुक्लशुङ्गायुक्ते, त्रि॥

श्वेतशूरणः, पुं, (श्वेतः शूरणः।) वनशूरणः। इति राजनिर्घण्टः॥

श्वेतसर्षपः, पुं, वरुणवृक्षः। इति जटाधरः॥ (श्वेतः सर्षपः।) शुक्लवर्णसर्षपे॥

श्वेतसारः, पुं, (श्वेतः सारो यस्य।) खदिरः। इति जटाधरः॥

श्वेतसुरसा, स्त्री, (श्वेता सुरसा।) शुक्लशेफालिका। इत्यमरः॥

श्वेतसन्दा, स्त्री, अपराजिता। इति राजनिर्घण्टः॥

श्वेतहयः, पुं, (श्वेतो हयः।) इन्द्रश्वः। इति त्रिकाण्डशेषः॥ (श्वेतो हयो यस्य।) अर्জ্জुनः। इति हेमचन्द्रः॥ (यथा, महाभारते।७।२७।३।
"ततः श्वेतहयः कृष्णमब्रवीदजितञ्जयः।
एष मां भ्रातृभिः सार्द्धं सुगर्म्माङ्गयतेऽच्युत॥")
इन्द्रः। शुक्लवर्णघोटकश्च॥

श्वेतहस्ती, [न्] पुं, (श्वेतो हस्ती।) ऐरावतः। इति भूरिप्रयोगः॥ शुक्लगजश्च॥

श्वेता, स्त्री, वराटिका। काष्ठपाटला। शङ्खिनी। इति मेदिनी॥ अतिविषा। इति रत्नमाला॥ अपराजिता। श्वेतवृहती। श्वेतकण्टकारी। पाषाणभेदी। शिलावल्कला। श्वेतदूर्व्वा। वंशरोचना। स्फटी। शर्करा। वृक्षभेदः। केना इति कन्ने इति च हिन्दी भाषा। तत्पर्य्यायः। कुरिकापत्री २ पर्व्वमूला ३ अविप्रिया ४। अस्या गुणाः। अतिमधुरत्वम्। शीतलत्वम्। स्तन्यदाढत्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥

श्वेताविवृत्, स्त्री, शुक्लविवृता। सादा तेउड़ी इति भाषा। तत्पर्य्यायः। चिभण्डी २ विवृता ३ विपुटा ४ सर्व्वानुभूती ५ सरला ६ निशोत्तरा ७ रेचनी ८। अस्या गुणाः। रेचनत्वम्। स्वादुत्वम्। उष्णत्वम्। समीरपित्तज्वरश्लेष्मपित्तशोथोदरनाशित्वम्। रुचित्वञ्च। इति भावप्रकाशः।

श्वेताश्मिः, स्त्री, क्षुपविशेषः। तत्पर्य्यायः। अश्मिका २ पिष्टोड़ी ३ पिण्डिका ४। अस्या गुणाः। मधुरत्वम्। वृष्यत्वम्। पित्तनाशित्वम्। बलदात्रीत्वञ्च। इति राजनिर्घण्टः॥

श्वेतार्कः, पुं (श्वेतः शुक्लवर्णः अर्कः।) शुक्लार्कवृक्षः। सादा आकन्द इति भाषा। तत्पर्य्यायः। तपनः २ श्वेतः ३ प्रतापः ४ सितार्कः ५ शर्करापुष्पः ६ वृत्तमञ्जिका ७। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। मलशोधनकारकत्वम्। मूत्रकृच्छ्राश्मशोफार्शिव्रणदोषविनाशनत्वञ्च। इति राजनिर्घण्टः॥

श्वेतावरः, पुं, (श्वेतं शुक्लवर्णमावृणोतीति। आ वृ+अच्।) सितावरशाकः। इति राजनिर्घण्टः॥

श्वेताह्वा, स्त्री, (श्वेता आह्वा यस्याः।) सितपाटला। इति राजनिर्घण्टः॥

श्वेतेक्षुः, पुं, (श्वेत इक्षुः।) शुक्लवर्णेक्षुः। सादा आक् इति भाषा। तत्पर्य्यायः। सितेक्षुः २ कोष्ठेक्षुः ३ वंशपत्रकः ४ सुवेशः ५ पाण्डुरेक्षुः ६। अस्य गुणाः। कठिनत्वम्। रूक्षत्वम्। गुरुत्वम्। कफमूत्रकारित्वम्। दीपनत्वम्। पित्तदाहनाशित्वम्। विपाके कोष्णत्वञ्च। इति राजनिर्घण्टः॥

श्वेतोदरः, पुं, (श्वेतं उदरं यस्य।) कुबेरः। इति त्रिकाण्डशेषः॥ (दर्व्वीकरसर्पाणामन्यतमः। यथा, सुश्रुते कल्पस्थाने ४ अध्याये।
"श्वेतोदरो महाशिरा अलगर्दो आशीविष इति॥") शुक्लवर्णजठरश्च॥

श्वेत्र, क्लौ, श्वित्रम्। इत्यमरटीका।

श्वेतोही, स्त्री, (श्वेतवाह+ङीष्।) इन्द्राणी। इति मुग्धबोधव्याकरणम्॥

श्वोवसीयस, क्लौ, (वसुशब्दः प्रशस्तवाची तत ईयसुनि वसीयः। श्वः शब्द उत्तरपदार्थप्रशंसामाशीर्विषयतामाह। मयूरव्यंसकादित्वात् समासः।"श्वसो वसीयःश्रेयसः।"५।४।८०
इति अच्।) कल्याणम्। यथा,—
"श्वःश्रेयसं शुभशिवे कल्याणं श्वोवसीयसं
श्रेयः।
क्षेमं भावुकभविककुशलमङ्गलभद्रमद्रशस्तानि॥"
इति हेमचन्द्रः॥

तद्धति, त्रि॥

ष

ष, मूर्द्धन्यषकारः। स तु एकपञ्चाशद्वर्णान्तर्गतसप्तचत्वारिंशद्वर्णः। चतुस्त्रिंशद्वाञ्जनान्तर्गतैकविंशत्तमव्यञ्जनञ्च। अस्योच्चारणस्थानं मूर्द्धा। इति व्याकरणम्॥ (यथा, शिक्षायाम्।१०।
स्युर्मूर्द्धन्या ऋटुरसा दन्त्या लृतुलसाः
स्मृताः॥")
तत्पर्य्यायः।
"षः श्वेतो १ वासुदेवश्च २
पीता ३ प्राज्ञा ४ विनायकः ५।
परमेष्ठी ६ वामबाहुः ७
श्रेष्ठो ८ गर्भविमोचनः ९॥
लम्बोदरो १० यमौजेशः ११
कामधुक् १२ कामधूमकः १३।
सुखी १४ उमा १५ वृषो १६ लज्जा १७
मरुद्वश्यः १८ प्रियः १९ शिवः २०॥
सूर्य्यात्मा २१ जठरः २२ कोपी २३
मत्ता २४ वक्षो २५ विदारिणी २६।
कलकण्ठो २७ मध्यभिन्ना २८
युद्धात्मा २९ मलघ्नः ३० शिरः ३१॥"
इति तन्त्रम्॥*॥

अपि च।
"षकारः श्वेत आख्यातो मूर्द्धन्यो वृषसंज्ञकः।
पित्तं शक्तिश्च माया च महायोनिः स्वबिन्दुमत्॥"
इति मन्त्राभिधानम्॥

अस्य स्वरूपं यथा,—
"षकारं शृणु चार्व्वङ्गि! अष्टकोणमयं सदा।
रक्तचन्द्रप्रतीकाशं स्वयं परमकुण्डली॥
चतुर्वर्गमयं वर्णं सुधानिर्म्मितविग्रहम्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा॥
रजःसत्त्वतमोयुक्तं त्रिशक्तिसहितं सदा।
त्रिबिन्दुसहितं वर्णं आत्मादितत्त्वसंयुतम्॥
सर्व्वदेवमयं वर्णं हृदि भावय पार्व्वति॥"
इति कामधेनुतन्त्रम्॥

अस्य लिखनप्रकारो यथा,—
"चतुष्कोणात्मिका रेखा वामदक्षिणतः क्रमात्
वक्षीन्द्रविष्णवस्तासु तिष्ठन्ति क्रमतः सदा॥
ऊर्द्धमात्रा शक्तिरूपा महालक्ष्मीसमा स्मृता।
मात्रा मध्यगता या तु वाग्देवी सा परा
स्मृता॥"

अस्य ध्यानं यथा,—
"चतुर्भुजां चकोराक्षीं चारुचन्दनचर्चिताम्।
शुक्लवर्णां त्रिनयनां वरदाञ्च शुचिस्मिताम्॥
रत्नालङ्कारभूषाढ्यां श्वेतमाल्योपशोभिताम्।
देववृन्दैरभिवन्द्यां सेवितां मोक्षकाङ्क्षिभिः॥
एवं ध्यात्वा षकारन्तु तन्मन्त्रं दशधा जपेत्॥
इति च वर्णोद्धारतन्त्रम्॥

(धात्वनुबन्धविशेषः। यथा, कविकल्पद्रुमे।
"शिः कुटादिः षः क्षदङ्वान् चो जचादी र
वैदिकः॥"
"आख्यातिकस्याङोऽप्रास्यर्थं क्षदिति विशेषणम्। स्वमते तूभयत्र ङ एव। डु ओ ष पच पाके। भौषिचिन्तीति पचा।" इति तट्टीका॥)

षः, पुं, कचः। इति मेदिनी॥ मानवः। सर्व्वः। श्रेष्ठः। गर्भविमोचनः। इति कश्चिदेकाक्षरकोषः॥

षः, त्रि, विघ्नः। श्रेष्ठः। इति मेदिनी॥

षग, म ए सङ्गतौ। इति कविकल्पद्रुमः॥(भ्वा०-पर०-सक०-सेट्।) म, सिषगयिषति। ए, असगोत्। इति दुर्गादासः॥

षघ, न हिंसे। इति कविकल्पद्रुमः॥ (स्वा०-पर०-सक०-सेट्।) न, सघ्नोति। असोषघत्। इति दुर्गादासः॥

षच, सम्बन्धे। इति कविकल्पद्रुमः॥ (भ्वा०-पर० सक० सेट्।) सचति। इति दुर्गादासः॥

षच, ङ सेचने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, सचते जलं मेघः। इति दुर्गादासः॥

षट्, अंशके। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) अंशके अवयवे। सटति षटः अवयवी स्यादित्यर्थः। इति दुर्गादासः॥

षट्, [ष] त्रि, संख्याविशेषः। छय इति भाषा। तद्वाचकानि यथा,। वाचकोषः १ त्रिशिरोनेत्रम् २ तर्कः ३ अङ्गम् ४ दर्शनम् ५ चक्रतन्त्री ६ कार्त्तिकेयमुखम् ७ गुणः ८ रसः ९ ऋतुः १० ज्वरबाहुः ११ रूपम् १२। इति कविकल्पलता॥

षट्कर्म्म, [न्] क्ली, (षट्प्रकारं कर्म्म।) षट्प्रकारशान्त्यादिकर्म्म। यथा, शारदायाम्।

"अथाभिधास्ये तन्त्रेऽस्मिन् सम्यक् षट्कर्म्मलक्षणम्।
सर्व्वतन्त्रानुसारेण प्रयोगः फलसिद्धिदः॥
शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटने ततः।
मारणान्तानि शंसन्ति षट्कर्म्माणि मनीषिणः॥
रोगकृत्या ग्रहादीनां निराशः शान्तिरीरिता।
वश्यं जनानां सर्व्वेषां विधेयत्वमुदीरितम्॥
प्रवृत्तिरोधः सर्व्वेषां स्तम्भनं तदुदाहृतम्।
स्निग्धानां क्लेशजननं मिथोविद्वेषणं मतम्॥
उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितम्।
प्राणिनां प्राणहरणं मारणं तदुदाहृतम्॥
स्वदेवतादिकालादीन् ज्ञात्वा कर्म्माणि साधयेत्
रतिर्वाणी रमा ज्येष्ठा दुर्गा काली यथाक्रमम्।
षट्कर्म्मदेवताः प्रोक्ताः कर्म्मादौ ताः प्रपूजयेत्॥
ईशचन्द्रेन्द्रनिर्ऋतिवायुवह्नीनान्दिशो मताः।
सूर्य्योदयं समारभ्य घटिकादशकं क्रमात्॥
ऋतवः सुर्व्वसन्ताद्याः अहोरात्रं दिने दिने।
वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशैशिराः॥"

यद्वा,—

"अर्द्धरात्रं शरत्कालो हेमन्तश्च प्रभातकः।
पूर्व्वाह्णश्च वसन्तः स्यात् मध्याह्नो ग्रीष्म एव च॥
प्राह्णड्रूपोऽपराह्णः स्यात् प्रदोषः शिशिरः स्मृतः॥"

अथवा,—

"ऊषोयोगे च हेमन्तः प्रभाते शिशिरागमः।
प्रह्णरार्द्धे वसन्तः स्यात् ग्रीष्मो मध्यन्दिनागमे।
तृतीयामे च वर्षाख्यः शरदस्तं गते रवौ॥"*॥

अथ कालनियमः।

"हेमन्तः शान्तिके प्रोक्तो वसन्तस्ते वश्यकर्म्मणि।
शिशिरं स्तम्भने प्रोक्तो विद्वेषे ग्रीष्म एव च।
प्राह्णड्चाटने ज्ञेया शरत्सारस्वतकर्म्मणि॥"*॥

अथ तिथिनियमः।

"पञ्चमी च द्वितीया च तृतीया सप्तमी तथा।
बुधेज्यवारसंयुक्ता विज्ञेया हेवकर्म्मणि॥
कृष्णा चतुर्द्दशी तद्वदष्टमी मन्दवारकाः।
उच्चाटने तिथिः शस्ता प्रदोषे च विशेषतः॥
चतुर्द्दश्यष्टमी कृष्णा अमावास्या तथैव च।
मन्दभौमदिनोपेता शस्ता मारणकर्म्मणि॥
बुधचन्द्रदिनोपेता पञ्चमी दशमी तथा।
पौर्णमासी तु विज्ञेया तिथिः स्तम्भनकर्म्मणि॥
शुभग्रहोदये कुर्य्यात् शुभानि च शुभोदये।
रौद्रकर्म्माणि रिक्तार्के मृत्युयोगे च मारणम्॥*
जपेत् पूर्व्वमुखो वश्ये दक्षिणस्याभिचारके।
पश्चिमे स्तम्भनं विद्यात् उत्तरे शान्तिकं भवेत्॥
आकर्षणमथाग्नेये नैर्ऋते मारणं तथा।
उच्चाटनन्तु वायव्ये ऐशान्यां मोचदायकम्॥*॥
अथाभिचारे कार्य्या च दक्षिणाप्लवना मही।
वसनं लोहितं प्रोक्तं उष्णीषं लोहितं स्मृतम्॥
भूषणं लौहद्रव्येण वामेन पूजनादिकम्।
नरस्रायुविशेषेण मारणे रज्जुरीरिता
मृतस्य युवशून्यस्य दन्तस्य गर्हभस्य वा।
कृत्वाक्षमालां जप्तव्यं शत्रूणां वधमिच्छता॥
भग्नेभदन्तमणिभिर्जपेदाकर्षकर्म्मणि।
साध्यकेशसूत्रप्रोतसुरक्तदग्धदनोद्भवैः।
अक्षमालां समालोक्य विद्वेषोच्चाटने जपेत्॥*
पद्माक्षं स्वस्तिकं भूयो विकटं कुक्कुटं पुनः।
वज्रं भद्रकमित्याहुरासनानि मनीषिणः॥
पद्मासनन्तु संयोज्य जानूर्वोरन्तरे करौ।
निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनम्॥
अन्यानि वक्तव्यानि॥*॥

"षण्मुद्राः क्रमतो ज्ञेयाः पद्मपाशगदाह्वयाः।
मुषलाशनिखड्गाख्याः शान्तिकादिषु कर्म्मसु॥
जलं शान्तिविधौ शस्तं वश्ये वह्निरुदीरितः।
स्तम्भने पृथिवी शस्ता विद्वेषे व्योम कौर्त्तितम्॥
उच्चाटने स्मृतो वायुर्भूयोऽग्निर्म्मारणे स्मृतः।
तत्तद्भूतोदये सम्यक् तत्तत्मण्डलसंयुतम्।
तत्तत् कर्म्म विधातव्यं मन्त्रिणा निश्चितात्मना॥*
शीतांशुसलिलचौर्णोव्योमवायुहविर्भुजाम्।
वर्णः स्युर्मन्त्रबीजानि षट्कर्म्मसु यथाक्रमम्॥
अन्यत्तच्च विदर्भेच संपुटो रोधनं तथा।
योगः पल्लव इत्येते विन्यासाः षट्सु कर्म्मसु॥
मन्त्रार्णान्तरितान् कुर्य्यात् साध्यवर्णान् यथाविधि।
यत्नेन तद्विजानीयात् प्रशस्तं शान्तिकर्म्मणि॥
मन्त्रार्णत्रयमध्यस्तं साध्यनामाक्षरं लिखेत्॥
विदर्भ एष विज्ञेयो मन्त्रिभिर्व्वश्यकर्म्मणि॥
आदावन्ते च मन्त्रः स्यान्मन्त्रौ संपुटः स्मृतः।
एष स्यात् स्तम्भने प्रस्त इत्युक्तो मन्त्रवेदिभिः॥
नाम्न आद्यन्तमध्येषु मन्त्रः स्याद्रोधनं मतम्।
विद्वेषणविधानेषु प्रशस्तमिदमीरितम्॥
मन्त्रस्यान्ते भवेन्नाम योगः प्रोच्चाटने मतः।
अन्ते नाम्नो भवेन्मन्त्रः पल्लवो मारणे मतः॥
सितरक्तपीतमिश्रकृष्णधूम्राः प्रकीर्त्तिताः।
वर्णतो मन्त्रसंप्रोक्ता देवताः षट्सु कर्म्मसु॥*॥
मन्त्राणां लिखनद्रव्यं चन्दनं रोचनं निशा।
गृहधूमसिताङ्गारी मारणेऽष्ट विषाणि च॥
श्येनाग्निलोलपित्तानि धुस्तूरकरसस्तथा।
गृहधूमस्त्रिकटुकं विप्राष्टकमितीरितम्॥
देवताकालमुद्रादीन् सम्यक् ज्ञात्वा विचक्षणः।
षट्कर्म्माणि प्रयुञ्जीत यथोक्तफलसिद्धये॥*॥
उच्चाटने वषट् प्रोक्तं हूं फड़न्तश्च मारणे।
स्तम्भने च नमः प्रोक्तं स्वाहा शान्तिकपौष्टिके॥
होमतर्पणयोः स्वाहा न्यासपूजनयोर्नमः।
मन्त्रान्ते योजयेन्मन्त्री जपकाले यथास्थिति॥"

अस्यार्थः एतानि तत्तत्कर्म्माणि जपकाले मन्त्रान्ते योजयित्वा मन्त्रं जपेत्। होमादिषु नायं नियमः। होम इति क्वचित् तत्र।

"अग्निकार्य्ये जपेत् स्वाहा नमः सर्व्वत्र चार्च्चने
शान्तिपुष्टिवश्यद्वेषाकर्षोच्चाटनमारणे॥
स्वाहा-स्वधा-वषट्-हूंश्च वौषट् फट् योजयेत् क्रमात्।
वश्याकर्षणसन्तापज्वरे स्वाहा प्रकीर्त्तिता॥
क्रोधोपशमने शान्तौ प्रीतौ योज्यं नमो बुधैः।
वौषट् सम्मोहनोद्दीपपुष्टिमृत्युच्चयेषु च॥
हूंकारं प्रीतिनाशे च मारणे च्छेदने तथा।
उच्चाटने च विद्वेषे वषट् फट्कृतौ वषट्।
मन्त्रोद्दीपनकार्य्येषु लाभालाभे वषट् स्मृतः॥"

इति विशेषवचनान्होमे नायं विधिः॥*॥

शान्तिकादौ मन्त्रलिखनपत्रादिनियमस्तत्र एव

"शान्तिके राजतं ताम्रं भूर्জपत्रञ्च वश्यके।
सर्व्वकार्य्येषु सौवर्णं क्रूरे स्यात् प्रेतकर्पटम्॥
त्रिगन्धं शान्तिके प्रोक्तं पञ्चगन्धन्तु वश्यके।
सर्व्वकार्य्येऽष्टगन्धः स्यात् क्रूरे चाष्टविषाणि च
शान्तिके लेखनी दूर्व्वा वश्यादौ शिखिपुच्छिका॥
हेला सर्व्वाणि कार्य्याणि क्रूरे स्यात् काकपुच्छिका॥
गृहेषु शान्तिकर्म्म स्यात् वश्यञ्च चण्डिकागृहे
देवालये च सर्व्वाणि क्षत्रागारे क्रूरकर्म्म च॥"*॥

अथ भूतानामुदयः।

"दण्डाकारा गतिर्भूमेः पुटयोरुभयोरपि।
तोयस्य पावकस्योर्द्धं गतिस्तिर्य्यक् नभस्वतः॥
गतिर्व्योम्नो भवेन्मध्ये भूतानामुदयः स्मृतः।
धरणेरुदये कुर्य्यात् स्तम्भनं वश्यमात्मवित्॥
शान्तिकं पौष्टिकं कर्म्म तोयस्य समये वसोः।
मारणादीनि मरुतो विपत्तोच्चाटनादिके।
स्वेदादिनाशने शस्तमुदये च विहायसः॥"*॥

अथ भूतानां मण्डलानि।

"वृत्तं दिक्सप्तषड्बिन्दुलाञ्छितं मातरिश्वनः
त्रिकोणं स्वस्तिकोपेतं वह्नेर्द्वेन्दुसंयुतम्॥
अम्भोजसप्तसो भूमेश्चतुरस्रं सवज्रकम्।
तत्तद्भूतसमाभानि मण्डलानि विदुर्बुधाः॥
वर्णैः स्वे रञ्जितान्याहुः स्वस्वनामाहतान्यपि।
स्वयं वियत् मरुत् कृष्णो रक्तोऽग्निर्विषदं पयः॥"

पीठाभूतादिप्रयोगानन्तरं कुलार्णवे।

"एकलक्षं जपेन्मन्त्रं ध्यानन्यासससन्वितम्।
प्रयोगदोषशान्त्यर्थमात्मरक्षार्थकारणम्।
न चेत् फलञ्च नाप्नोति देवताशापमाप्नुयात्॥"

यत्तु।

"न शस्तं मारणं कर्म्म कुर्य्याच्चेदपुतं जपेत्।"

तत् प्रायश्चित्तपरम्। इति तन्त्रसारः॥ * ॥
योगाङ्गषट्प्रकारक्रिया। तद्यथा,—
"धौतिर्वस्तिस्तथा नेतिर्नौलिकी त्राटकस्तथा।
कपालभातिरेतानि षट्कर्म्माणि समाचरेत्॥
अन्तर्धौतिर्हन्तधौतिर्हृद्धौतिर्मलशोधनम्।
धौत्यश्चतुर्विधाः प्रोक्ता घटं कुर्व्वन्ति निर्म्मलम्॥
वातसारं वारिसारं वह्निसारं बहिष्कृतम्।
घटस्य निर्म्मलार्थाय अन्तर्धौतिश्चतुर्विधा॥"*॥
प्रयोगः।
"काकचञ्चुवदास्येन पिबेद्वायुं शनैः शनैः।
चालयेदुदरं पश्चादधर्म्मना रेचयेत् शनैः॥
वातसारं परं गोप्यं देहनिर्म्मलकारकम्।
सर्व्वरोगचयकरं देहानलविवर्द्धकम्॥१॥
आकण्ठं पूरयेदारि वक्त्रेण च पिबेत् शनैः।
चालयेदुदरेणैव चोदराद्रेचयेदधः॥
वारिसारं परं धौतं देहनिर्म्मलकारकम्।
साधयेदयः प्रयत्नेन देवदेहं प्रपद्यते॥२॥
नाभिग्रन्थिं मेरुपृष्ठं शतवारञ्च कारयेत्।
उदरामयजां त्यक्त्वा जठराग्निं विवर्द्धयेत्।
वह्निसारमिदं धौतं योगिनां योगसिद्धिदम्॥३॥
काकीमुद्रां साधयित्वा पूरयेदुदरं मरुत्।
धारयेद्दंयामन्तु चालयेदधवर्त्मना॥
इदं धौतं परं गोप्यं न प्रकाश्यं कदाचन।
नाभिमग्नजले स्थित्वा शक्तिनाड़ीं विसर्জ্জयेत्॥
कराभ्यां चालयेन्नाड़ीं यावन्मलविसर्জ্জनम्।
तावत् प्रक्षाल्य नाड़ीञ्च उदरे वेशयेत् पुनः॥
इदं प्रक्षालनं गोप्यं देवानामपि दुर्लभम्।
केवलं धौतिमात्रेण देवदेहो भवेत् ध्रुवम्॥
यामार्द्धधारणात् शक्तिं यावन्न साधयेन्नरः।
बहिष्कृतमहद्धौतिस्तावन्नैव न जायते॥ ४॥
दन्तमूलं जिह्वामूलं रन्ध्रे च कर्णयुग्मयोः।
कपालरन्ध्रं पञ्चैते दन्तधौतिर्विधीयते॥*॥
प्रयोगः।
"खादिरेण रसेनाथ मृत्तिकाभिश्च शुद्धिभिः।
मार्জ্জयेद्दन्तमूलञ्च यावत् किल्बिषमाहरेत्॥
दन्तमूलं परं धौतिर्योगिनां योगसाधने।
नित्यं कुर्य्यात् प्रभाते च दन्तरन्ध्राय योगवित्॥
दन्तमूलं धारणादिकार्य्येषु योगिनां यतः॥१॥
अथातः संप्रवक्ष्यामि जिह्वाशोधनकारणम्॥
जरामरणरोगादि नाशयेत् दौर्घलम्बिका।
तर्জ্জनी मध्यमानामा अङ्गुलित्रययोगतः॥
वेशयेद्वदनमध्ये तु मार्জ্জयेन्नम्बिकामलम्।
शनैः शनैर्मार्জ্জयित्वा कफदोषं निवारयेत्॥
मार्জ্জयेन्नवनीतेन दोहयेच्च पुनः पुनः।
तदग्रं लोहयन्त्रेण घर्षयित्वा पुनः पुनः॥
नित्यं कुर्य्यात् प्रयत्नेन रवेरुदयकौशुके।
एवं कृते तु नित्ये च लम्बिका दीर्घतां गता॥२
तर्জ্জन्यङ्गुल्यकाग्रेण मार्জ্জयेत् कर्णरन्ध्रयोः।
नित्यमभ्यासयोगेन नादान्तरप्रकाशनम्॥३॥४॥
हस्ताङ्गुष्ठेन दक्षेण मार्জ্জयेन्नालरन्ध्रकम्।
एवमभ्यासयोगेन कफदोषं निवारयेत्॥
नाड़ीनिर्म्मलतां याति दिव्यदृष्टिः प्रजायते।
निद्रान्ते भोजनान्ते च दिवान्ते च दिने दिने॥५
हृद्धौतिं त्रिविधां कुर्य्यात् दण्डवज्जलवाससा।
रम्भादण्डं हरिद्दण्डं वेत्रदण्डन्तथैव च॥
हृन्मध्ये चालयित्वा तु पुनः प्रत्याहरेत् शनैः।
कफपित्तं तथा क्लेदं रेचयेदूर्द्ध्वर्त्मना।
दण्डधौतिविधानेन हृद्रोगं नाशयेत् ध्रुवम्॥"
हरिद्दण्डं वटझुरि॥ १॥
"भोजनान्ते पिबेद्वारि आकण्ठं पूर्णितं सुधीः।
ऊर्द्धदृष्टिं क्षणं कृत्वा तज्जलं वमयेत् पुनः।
नित्यमभ्यासयोगोऽयं कफपित्तं निवारयेत्॥२
चतुरङ्गुलविस्तारं सूक्ष्मवस्त्रं शनैर्ग्रसेत्।
पुनः प्रत्याहरेदेतत् प्रोच्यते धौतकर्म्मकम्॥
गुल्मज्वरप्लीहकुष्ठं कफपित्तं विनश्यति।
आरोग्यं बलपुष्टिञ्च भवेत्तस्य दिने दिने॥ ३॥
अपानक्रूरता तावन्मलं यावन्न शोधयेत्।
तस्मात् सर्व्वप्रयत्नेन मलशोधनमाचरेत्॥
प्रीतमूलस्य दण्डेन मध्यमाङ्गुलिनापि वा।
यत्नेन चालयेद्गुह्यं वारिणा च पुनः पुनः॥
वारयेत् कोष्ठकाठिन्यमामाजीर्णं निवारयेत्।
कारणं कान्तिपुष्टेश्च दीपनं वह्निमण्डलम्॥*॥
जलवस्तिः शुष्कवस्तिर्वस्त्री च द्विविधो स्मृतौ।
जलवस्तिं जले कुर्य्यात् शुष्कवस्तिं क्षितौ सदा॥
नाभिमग्नजले पायुं न्यस्तनालोत्कटासनम्।
आकुञ्चनं प्रकाशञ्च जलवस्तिं समाचरेत्॥
प्रमेहञ्च गुदावर्त्तं क्रूरवायुं निवारयेत्।
भवेत् स्वच्छन्ददेहस्य कामदेवसमो भवेत्॥"
न्यस्तनालोत्कटासनं जलहृदये दत्त्वा
शारङ्गवदुदरं कुर्य्यादित्यर्थः।१।
"वस्तिं पश्चिमतानेन चालयित्वा शनैः शनैः।
अश्विनीमुद्रया पायुं आकुञ्चयेत् प्रकाशयेत्॥
एवमभ्यासयोगेन कोष्ठदोषो न विद्यते।
विवर्द्धयेत् जाठराग्निं आमवातं विनाशयेत्॥२
वितस्तिमानं सूक्ष्मसूत्रं नाशानाले प्रवेशयेत्।
मुखान्निर्गमयेत् पश्चात् प्रोच्यते नेतिकर्म्मकम्॥
साधनान्नेतिकर्म्मापि खेचरीसिद्धिमाप्नुयात्।
कफदोषा विनश्यन्ति दिव्यदृष्टिश्च जायते॥*॥
भ्रमन्दवेगे तुन्दञ्च भ्रामयेदुभपार्श्वयोः।
सर्व्वरोगान्निहन्तीह देहानलविवर्द्धनम्॥"
इति नौलिकी॥*॥
"निमेषोन्मेषकं त्यक्त्वा सूक्ष्मलक्ष्यं निरीक्षयेत्।
यावदश्रु निपतति त्राटकं प्रोच्यते बुधैः॥
एवमभ्यासयोगेन याम्भवी जायते ध्रुवम्।
न जायते नेत्ररोगो दिव्यदृष्टिप्रदायकम्॥*॥
सीत्कृत्य पीत्वा वक्त्रेण नासानालैर्विरेचयेत्।
व्युत्क्रमेण व्युत्क्रमेण सीत्कृमेण विशेषतः॥
भालभातिं त्रिधा कुर्य्यात् कफदोषं निवारयेत्॥
इड़या पूरयेद्वायुं रेचयेत् पिङ्गलया पुनः।
पिङ्गलया पूरयित्वा पुनश्चन्द्रेण रेचयेत्॥
पूरकं रेचकं कृत्वा वेगेन न तु धारयेत्।
एवमभ्यासयोगेन कफदोषं निवारयेत्॥*॥
नासाभ्यां जलमाकृष्य वक्त्रेण रेचयेत् पुनः।
पायं पायं प्रकुर्व्वीत श्लेष्मदोषं निवारयेत्॥
न जायते वार्द्धक्यञ्च ज्वरो नैव प्रजायते॥"
इति घेरण्डसंहितायां षट्कर्म्मशोधनं प्रथमोऽध्यायः॥

षट्कर्म्मन्,[न्] पुं, (षट् कर्म्माणि यजनादीनि यस्य। यागादिभिर्युतो ब्राह्मणः। इत्यमरः॥ तथा च।
"इज्याध्ययनदानानि याजनाध्यापने तथा।
प्रतिग्रहश्च तैर्युक्तः षट्कर्म्मा विप्र उच्यते॥"
षट् कर्म्माण्यस्य इति बहुव्रीहिः। इति भरतः॥

षट्कूटा, स्त्री, भैरवीविशेषः। यथा,—
अथ षट्कूटा भैरवी।
"डाकिनी राकिनी बीजे लाकिनी काकिनी-युगम्।
साकिनी हाकिनी बीजे आद्यात्य सुरसुन्दरि॥
आद्यमैकारसंयुक्तमन्यदीकारमण्डितम्।
शक्रस्वरान्वितं देवि तार्त्तीयं बीजमालिखेत्।
बिन्दुनादकलाक्रान्तं त्रितयं शैलसम्भवे॥"
द्वितीयबीजं सविसर्गं इत्यपि केचित्। तन्त्रान्तरे।
"ऊरौ क्ष्मामादनं जीवं शिवमत्र त्रिधा लिखेत्
अर्केण मायाशक्राभ्यां क्रमात्तं मण्डितं कुरु॥
बिन्दुनादान्वितं चाद्यद्वयमन्त्यं विसर्गवत्।
ध्यानमस्याः प्रवक्ष्यामि सर्व्वभूतनिकृन्तनम्॥
बालसूर्य्यप्रभां देवीं जवाकुसुमसन्निभाम्।
मुण्डमालावलीरम्यां बालसूर्य्यसमांशुकाम्॥
सुवर्णकलसाकारपीनोन्नतपयोधराम्।
पाशाङ्कुशौ पुस्तकञ्च तथा च जपमालिकाम्॥"
दधतीमिति शेषः।
"शिराष्टत्तरा षड़ङ्गानि विधाय परमेश्वरि।
यन्त्रमस्या वरारोहे त्रिकोणं तत्पुटं लिखेत्॥
बहिरष्टदलं पद्मं रविपत्रं ततो लिखेत्।
चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत्॥
षड़ङ्गावरणं देवि! पूजयेत् पूर्व्ववच्छिवे।
रत्यादि त्रितयं देवि त्रिकोणे परिपूजयेत्॥
डाकिन्याद्याय षट्कोणे वसुपत्रे ततः परम्।
ब्राह्म्यादि युगलं पश्चादरविपत्रे ततः परम्॥
बालायाः पीठशक्तीस्तु वामाद्याः पूजयेत् क्रमात्।
चतुरस्रे लोकपालान् सायुधान् परमेश्वरि।
अनेनैव विधानेन नित्याख्यां भैरवीं यजेत्॥"
इति तन्त्रसारः॥

षट्कोणं, क्ली, षण्णां षष्ठत्वेन पूरणं षट्कम्। तच्च रिपुस्थानम्। यथा,—
"पातालं त्रिकुकं चैव सुहृदभ्रचतुर्थकम्।
त्रित्रिकोणञ्च नवमं दुश्चिक्यं स्यात् तृतीयकम्॥
धौस्थानं पञ्चमं श्रेयं याम्त्रिं सप्तमं स्मृतम्।
द्युनं द्युनं तथास्त्राख्यं षट्कोणं रिपुमन्दिरम्॥"
इति ज्योतिस्तत्त्वम्॥*॥
(षट् कोणा यस्य।) वज्रम्। इति राजनिर्घण्टः॥ षड़ङ्गमन्त्रोक्तो यन्त्रभेदः। यथा,
गणेशयन्त्रम्।

"वीजं षट्कोणमध्यं स्फुरदनलपुरे तारगं दिक्षु लक्ष्मीः
माया कन्दर्पभूमिस्तदनु रसपुटेष्वालिखेद्वीज-षट्कम्।"
इति तन्त्रसारः॥

षट्चक्रं, क्ली, (षण्णां चक्राणां समाहारः।) शरीरस्थषडाधारषट्प्रकारचक्रम्। यथा,—
"सप्तपद्मानि तत्रैव सन्ति लोका इव प्रभो।
गुदे पृथ्वीसमं चक्रं हरिद्वर्णं चतुर्दलम्॥
लिङ्गे तु षड्दलं चक्रं स्वाधिष्ठानमिति स्मृतम्।
त्रिलोकवह्निनिलयं तप्तचामीकरप्रभम्॥
नाभौ दशदलं चक्रं कुण्डलिन्या समन्वितम्।
नीलाम्बुननिभं ब्रह्मस्थानं पूर्व्वकमन्दिरम्॥
मणिपूराभिधं स्वच्छं जलस्थानं प्रकीर्त्तितम्।
उद्यदादित्यसंकाशं हृदि चक्रमनाहतम्॥
कुङ्कुमाख्यं द्वादशारं वेणवं वायुमन्दिरम्।
कण्ठे विशुद्धशरणं षोड्शारं पुरोदयम्॥
शाम्भवीवरचक्राख्यं चन्द्रबिन्दुविभूषितम्।
षष्ठमाज्ञालयं चक्रं द्विदलं श्वेतमुत्तमम्॥
राधाचक्रमिति ख्यातं मनःस्थानं प्रकीर्त्तितम्।
सहस्रदलमेकार्णं परमात्मप्रकाशकम्॥
नित्यज्ञानमयं सत्यं सहस्रादित्यसन्निभम्।
षट् चक्राणीह भेद्यानि नैतच्छेद्यं कथञ्चन॥"
इति पाद्मे स्वर्गखण्डे २७ अध्यायः॥*॥

अन्यच्च।
"तत्त्वस्वरूपमेकं तत् षट्चक्रं प्रतिलक्षयेत्।
षट्चक्रेऽपि महामायां चर्णं ध्यात्वा प्रयत्नतः॥
लम्बयेन्मूलमन्त्रेण आदिषोड्शचक्रकम्।
आदिषोड्शचक्रस्थां साधकानन्दकारिणीम्॥
चिन्तयन् साधको देवीं जपकर्म्म समारभेत्।
भ्रुवोरुपरि नाड़ीनां त्रयाणां प्रान्त उच्यते।
तत्प्रान्तं त्रिपथस्थानं षट्कोणं चतुरङ्गुलम्॥
रक्तवर्णन्तु योगज्ञैराज्ञाचक्रमितीरितम्॥
कण्ठे त्रयाणां नाड़ीनां वेष्टनं विद्यते नृणाम्।
सुषुम्नेड़ापिङ्गलानां षट्कोणं तत् षड़ङ्गुलम्॥
तत् षट्चक्रमिति प्रोक्तं शुक्लं कण्ठस्य मध्यगम्।
त्रयाणामथ नाड़ीनां हृदये चैकता भवेत्॥
तत्स्थानं षोड्शारं स्यात् समाङ्गुलप्रमाणतः।
तत् पीतसुक्तं योगज्ञैरादिषोड्शचक्रकम्॥
ध्यानानामथ मन्त्राणां चिन्तनस्य जपस्य च।
यस्मादाद्यञ्च हृदयं तस्मादादीति गद्यते॥"
इति कालिकापुराणे ५४ अध्यायः॥*॥

अपरञ्च।
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम्॥
तदूर्द्धे कामबीजन्तु क-ल-ग्लान्तीन्दुनादकम्।
तदूर्द्धे तु शिखाकारा कुण्डली ब्रह्मविग्रहा॥
तद्बाह्ये हेमवर्णाभं व-स-वर्णचतुर्दलम्।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत्॥
तदूर्द्धेऽग्निसमप्रख्य षड्दलं शोणकप्रभम्।
कादिलान्तषड्वर्णेन युक्ताधिष्ठानसञ्ज्ञकम्॥
मूलाधारषट्कानां मूलाधारं ततो विदुः।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः॥
तदूर्द्धे नाभिदेशे तु मणिपूरं महत्प्रभम्।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः।
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते॥
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्।
शिवेनाधिष्ठितं पद्मं विश्वलोकैककारणम्॥
तदूर्द्धेऽनाहतं पद्ममुद्यदादित्यसन्निभम्।
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम्॥
तन्मध्ये वाणलिङ्गन्तु सूर्य्ययुतसमप्रभम्।
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते॥
तेनाहताख्यं पद्मं तत् मुनिभिः परिकीर्त्तितं।
आनन्दसदनं तस्तु पुरुषाधिष्ठितं परम्॥
तदूर्द्धेन्तु विशुद्धाख्यं दलषोड्शपङ्कजम्।
स्वरैः षोड्शकैर्युक्तं धूम्रवर्णं महत्प्रभम्॥
विशुद्धिं तनुते यस्मात् जीवस्य हंसलोकनात्।
विशुद्धं पद्ममाख्यातं आकाशाख्यं महत् परम्॥
आज्ञाचक्रं तदूर्द्धे तु आत्मनाधिष्ठितं परम्।
आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम्॥
कैलासाख्यं तदूर्द्धे तु बोधनीन्तु तदूर्द्धतः।
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत॥
सहस्राराम्बुजं बिन्दुस्थानं तदूर्द्धमीरितम्।
इत्येतत् कथितं सर्वं योगमार्गमनुत्तमम्॥"
इति तन्त्रसारः॥

षट्चरणः, पुं, (षट् चरणा यस्य।) भ्रमरः। इति हलायुधः॥ (यथा, आर्य्यासप्तशत्याम्। ५८७।
"षट्चरणकोटजुष्टं परागगुणपूर्णमायुधं त्यक्त्वा।
त्वां मुष्टिमेयमध्यामधुना शक्तिं स्मरो वहति॥")
यूका। इति राजनिर्घण्टः॥ षट्पादश्च॥

षद्ऽ, क निकेतने। हिंसे। दाने। बले। इति कविकल्पद्रुमः॥ (चुरा०-परo०वासे बले च भ्वक०-हिंसे दाने च सक०-सेट्।) मूर्द्धन्यादिरिदयान्तः। क, षड्यति लोकः। निवसति हन्ति बली स्यात् ददाति वा इत्यर्थः। इति दुर्गादासः॥

षट्तिलो,[न्]त्रि, (उद्वर्त्तनादिभेदेन षट्प्रकारास्तिलाः सन्त्यस्येति। षट्तिल+इनिः।)जन्मतिथ्यादौ तिलकरणकषट्कर्म्मकारी। यथा,—
"तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः।
तिलभुक् तिलवापी च षट्तिलो नावसीदति॥"
इति तिथ्यादितत्त्वम्॥

षट्त्रिंशत्, स्त्री, (षड्धिका त्रिंशत्। मध्यपदलोपि समासः।) संख्याविशेषः। छत्रिश इति भाषा। यथा, आह्निकचिन्तामणौ।
"आसनाभ्यञ्जने तद्वदुद्वर्त्तनविरूक्षणे।
सम्मार्জ্জनं सर्पिरादिस्नपनावाहने तथा॥
पाद्यार्घ्याचमनीयञ्च स्नानीयमधुपर्कयोः।
पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके॥
अलङ्कारो गन्धपुष्पधूपदीपौ तथैव च।
ताम्बूलादिकनैवेद्यं पुष्पमाल्यं तथैव च॥
अनुलेपश्च शय्या च चामरव्यजनं तथा।
आदर्शदर्शनञ्चैव नमस्कारोऽथ नर्त्तनम्॥
गीतवाद्ये च दानानि स्तुतिर्होमप्रदक्षिणम्।
दन्तकाष्ठप्रदानञ्च ततो देवविसर्জ্জनम्॥
उपचारा इमे ज्ञेयाः षट्त्रिंशत् सुरपूजने॥"
इत्येकादशीतत्त्वम्॥

षट्त्रिंशन्मतं, क्ली, (षट्त्रिंशतसत्संख्यकधर्म्मशास्त्रकारिणां मुनीनां मतम्।) षड़धिकत्रिंशत्सङ्ख्यकधर्म्मशास्त्रप्रयोजकमुनीनामभिप्रायः। यथा। तथा च षट्त्रिंशन्मतम्। इति तिथिस्वरूपकथने तिथ्यादितत्त्वम्। तेषां नामानि यथा,—
"मनुर्विष्णुर्यमो दक्षः अङ्गिरोऽत्रिर्बृहस्पतिः।
आपस्तम्बयोगिना च कात्यायनपराशरौ॥
वशिष्ठव्याससंवर्त्ता हारीतगोतमावपि।
प्रचेताः शङ्खलिखितौ याज्ञवल्क्यश्च काश्यपः॥
शातातपो लोमशश्च जमदग्निः प्रजापतिः।
विश्वामित्रपैठीनसी बौधायनपितामहौ॥
छागलेयश्च जाबालो मरीचिर्व्यासनो भृगुः।
ऋष्यशृङ्गो नारदश्च षट्त्रिंशत् स्मृतिकारकाः॥
एतेषान्तु मतं यत्तु षट्त्रिंशन्मतमुच्यते॥"
इति शङ्खलिखितौ॥

षट्पदः पुं, (षट् पदानि यस्य।) भ्रमरः। इत्यमरः॥ (यथा, रघुः। ६। ६८।
"न हि प्रफुल्लं सहकारमेत्य
हृद्यान्तरं काङ्क्षति षट्पदालौ॥")
तच्छकुनानि यथा,—
"ये षट्पदाद्याः शकुनानि तेषामाद्यर्थरूपाणि निरूपयामः।
अयेत वामो यदि मक्षु गुञ्जन्
पश्येत वा वामदिशं प्रसर्पन्।
आस्वादयेद्वा कुसुमं प्रशस्तं
भृङ्गस्तदा स्यात् सुमहान् प्रमोदः।
अन्यापरे सन्ति च षट्पदा ये
यात्रासु ते वामगताः प्रशस्ताः॥"
इति वसन्तराजशाकुने षट्पदादयः १५ वर्गः॥*
यूका। इति राजनिर्घण्टः॥ षट्चरणे, त्रि॥ (षट्पदविशिष्टे च त्रि। यथा, महाभारते। १४। ५। १६।
"पुरञ्च ते सुगुप्तं स्यात् दृढ़प्राकारतोरणम्।
अट्टाट्टालकसंबाधं षट्पदं सर्व्वतोदिशम्॥")

षट्पदप्रियः,पुं, (षट्पदानां भ्रमराणां प्रियः।) नागकेशरवृक्षः। इति शब्दमाला॥

षट्पदातिथिः, पुं, (षट्पदः अतिथिरिव यत्र। आम्रवृक्षः। इति त्रिकाण्डशेषः॥

षट्पदानन्दवर्द्धनः, पुं,(षट्पदानामानन्दं वर्द्धयतीति। हृध+ल्युः।) किंकिरातवृक्षः। इति राजनिर्घण्टः॥

षट्पदी, स्त्री, (षट्पदानि यस्याः। ङीप्।) यूका। इति हेमचन्द्रः॥ भ्रमरपत्नी च॥

षट्प्रज्ञः, पुं, (षट्सु रसेषु प्रज्ञा यस्य।) कामुकः। यथा,—
"पिङ्गो व्यलीकः षट्प्रज्ञः कामकेलिर्विदूषकः
पीठकेलिः पीठमर्दो भविष्यद्विदुरो विटः॥"
इति विकाण्डशेषः॥
(षट्सु धर्म्मादिषु प्रज्ञा यस्य।) धर्म्मादिशास्त्रविज्ञः। यथा,—
"धर्म्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि।
षट्सु प्रज्ञास्ति यस्योच्चैः स षट्प्रज्ञ इति स्मृतः॥"
इति च त्रिकाण्डशेषः॥
षडक्षीणः, पुं (षट्सु रसेषु अक्षीणः।) मत्स्यः। इति केचित्॥
षड़ङ्गं, क्ली, (षण्णां अङ्गानां समाहारः। शरीरस्य षड़वयवम्। यथा,—
"जङ्घे बाहू शिरो मध्यं षड़ङ्गमिदमुच्यते॥"
इति शब्दचन्द्रिका॥
वेदाङ्गषट्शास्त्राणि। यथा,—
"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा।
छन्दसेति षड़ङ्गानि वेदानां वैदिका विदुः॥"
इति शब्दरत्नावली॥*॥
अपि च। अङ्गान्याह शिक्षापद्यम्।
"छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ कथ्यते।
ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते॥
शिक्षाघ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥"
इति तिथ्यादितत्त्वम्॥*॥
आद्यश्चादीयदानाङ्गपीठादिकम्। इति लोकप्रसिद्धम्॥*॥ षट्प्रकारगव्यविशेषः। यथा,—
"गोमूत्रं गोमयं क्षीरं सर्पिर्दधि च रोचना।
षड़ङ्गमेतन्माङ्गल्यं पवित्रं सर्व्वदा गवाम्॥
इति स्मृतिः॥ ०॥
हृदयादिषड़वयवम्। तत्प्रमाणं न्यासशब्दे द्रष्टव्यम्॥
षड़ङ्गः, पुं, (षट् अङ्गानि यस्य।) क्षुद्रगोक्षुरकः। इति राजनिर्घण्टः॥ (वेदः। यथा,—
"शिक्षाकल्पो व्याकरणं निरुक्तं छन्दसाचयः।
ज्योतिषामयनञ्चैव षड़ङ्गो वेद उच्यते॥")
षड़ङ्गजित्, पुं, (षड़ङ्गं जितवानिति। जि + क्विप्।) विष्णुः। इति शब्दमाला॥ षड़ङ्गजेतरि, त्रि॥
षड़भिज्ञः, पुं, (षट्सु धर्म्मार्थकाममोक्षलोकतत्त्वार्थेषु अभिज्ञा यस्य। बुद्धः॥ इत्यमरः॥
षड़शीतिः, स्त्री, रविसंक्रान्तिविशेषः। सा तु मिथुनकन्याधनुर्म्मीनराशिषु भवति। यथा, भविष्यमाला-ज्योतिषेषु।
"मृगकर्कटसंक्रान्ती हे तूदग्दक्षिणायने।
विषुवती तुलामेषे गोलमध्ये तथापरा॥
धनुर्म्मिथुनकन्यासु मीने च षड़शीतयः।
हयहस्थिककुम्भेषु सिंहे विष्णुपदी स्मृता॥"
इति तिथ्यादितत्त्वम्॥
अस्याः पुण्यकालः संक्रान्तिशब्दे द्रष्टव्यः॥*॥
षड़धिकाशीतिसंख्या। इत्यङ्कगणितम्॥ क्रेयाग्री इति भाषा॥

षड़शीतिचक्रं, क्ली, (षड़शीतेश्चक्रम्।) मिथुनकन्याधनुर्म्मीनराशिस्थरवेः शुभाशुभफलज्ञानार्थं नक्षत्राङ्कनराकारचक्रम्। यथा,—
"मुखे चैकं करे वेदाः पादयुग्मे हयं हयम्।
क्रोड़े बाणस्तथा वेदाः करे सप्तैतरेऽपि च॥
हयं हयं तथा नेत्रे मस्तके त्रितयं तथा।
हयश्चैव तथा गुह्ये षड़शीत्यां स्थिते स्थिते॥
मुखे दुःखं करे लाभः पादयोर्भ्रमणं हृदि।
कान्ता स्यादञ्जनं वामे हस्ते स्यात् स्त्रीयभे नृणाम्॥
सम्मानं नेत्रयोश्चैव अपमानञ्च मस्तके।
गुह्ये चैव भवेन्मृत्युः षड़शीतिफलश्रुतिः॥"
इति ज्योतिस्तत्त्वम्॥
षड़ष्टकं, क्ली, योगविशेषः। स तु वरकन्ययोः स्वस्वराश्यपेक्षया परस्परषष्ठाष्टमराशिसम्बन्धः। स च मित्रारिभेदेन द्विविधः। तत्र मित्रषड़ष्टकं यथा। श्रीपतिरत्नमालायाम्।
"मकरसमेतं मिथुनं कन्याकलसौ मृगेन्द्रमीनौ च।
वृषभतुले अलिमेषौ कर्कटधनुषौ च मित्रविधौ॥"
षड़ष्टकाविति शेषः॥*॥ अरिषड़ष्टकमाह।
"मकरः करिकुलरिपुना
कन्या मेषेण सह भवस्तुलया।
कर्किघटौ वृषधनुषौ
वृश्चिकमिथुने चारिविधौ॥
यदि कन्याष्टमे भर्त्ता भर्तुः षष्ठे च कन्यका।
षड़ष्टकं विजानीयात् वर्জ্জितं त्रिद्रशैरपि॥"*
षड़ष्टकादौ तारानियममाह। भीमपराक्रमः।
'सोद्वाह शुभयोर्द्वयोरपि तयोरेकाधिपत्येऽपिवा
तारा षट् च सुमित्रमित्रजननक्षेमार्थसम्पद्यदि
षट्काष्टे नव पञ्चके व्ययधने योगे च युंयोषितोः
प्रीत्यायुःसुखहृद्विपुष्टिजनकः कार्य्यो विवाहस्तदा॥"
गर्गः।
"मरणं तारविरोधे ग्रहरिपुभावे चिरेण रोगादि नरनार्य्योः षट्काष्टे वैरं भवेदाशु॥"
व्यासः।
"मैत्रादियोगेऽपि षड़ष्टकादौ
तारा विपत्प्रत्यरिनैधनाख्याः।
वर्জ্या विवाहे पुरुषोद्भुतो हि
प्रीतिः परा जन्मसु तारकासु॥"
इति ज्योतिस्तत्त्वम्॥*॥
मतान्तरं यथा,—
"सिंहेन मकरः श्रेष्ठो कन्यया मेष उत्तमः।
तुलया सह मीनस्तु कुम्भेन सह कर्कटः॥
धनुषा वृषभः श्रेष्ठो मिथुनेन च वृश्चिकः।
एतत् षड़ष्टकं प्रोक्तं भवत्यैव न संशयः॥"
इति गारुड़े ६१ अध्यायः॥
षड़ानना, पुं, (कृत्तिकादीनां षण्णां स्तनपानार्थं षट् आननानि यस्य।) कार्त्तिकेयः। इत्यमरः॥ (यथा, महाभारते। ३। २३१। २०।

"स्तोष्यामि देवैर्ऋषिभिश्च जुष्टं
भक्त्या गुहं नामभिरप्रमेयम्।
षड़ाननं शक्तिधरं सुवीरं
निबोध चेतानि कुरुप्रवीर!॥")
तस्य कार्त्तिकेयनामकारणं यथा,—
"अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत।
तस्य साखो विशाखश्च नैगमेयश्च पृष्ठजः॥
अपत्यं कृत्तिकानाञ्च कार्त्तिकेयस्ततः स्मृतः॥"
इति मात्स्ये ५ अध्यायः॥
(षट्सु वदनेषु, क्ली। यथा. रघुः।१४। २२।
"सर्व्वासु मातृष्वपि वत्सलत्वात्
स निर्विशेषप्रतिपत्तिरासीत्।
षड़ाननापीतपयोधरासु
नेता चमूनामिव कृत्तिकासु॥")
षड़ाम्नायः, पुं, (षट् आम्नायाः।) शिवस्य षड़्वक्त्रविनिर्गतषट्प्रकारतन्त्रशास्त्रम्। यथा,—
श्रीशिव उवाच।
"अथेदानीं प्रवक्ष्यामि आम्नायकथनं पृथक्।
पूर्व्वाम्नायो यदा मन्त्रस्तदा प्राचीदिशि स्थितः॥
सद्योगिवोऽहं भगवानाचारः परिकीर्त्तितः।
एवं वै दक्षिणाम्नायो दक्षिणस्यां दिशि स्थितः॥
एवं हि पश्चिमाम्नायः पश्चिमायां दिशि स्थितः
एवमेवोत्तराम्नाय उत्तरस्यां दिशि स्थितः॥
मुखमूर्द्धकृतं देवि! यत् प्रोक्तं तव सन्निधौ।
ऊर्द्धाम्नायश्च कथितो देवानामपि दुर्ल्लभः॥
यदा चाधोमुखं देवि यत् प्रोक्तं गिरिजे प्रिये।
अथ आम्नाय इत्युक्तः सत्यं सत्यं सुमध्यमे।
षड़ाम्नायाश्च कथिताश्चोत्पत्तिक्रममनामतः॥*॥
यस्मिन् यस्मिंश्च ये देवाः कथिताश्च वरानने।
तान्देवांश्च प्रवक्ष्यामि साधकानां हिताय वै॥
श्रीविद्याभेदसहिता तारा च त्रिपुरा तथा।
भुवनेशी चान्नपूर्णा पूर्व्वाम्नाये प्रकीर्त्तिताः॥
बगलामुखी च वह्निनी त्वरिता धनदा तथा।
वह्निनी बालभैरवोत्यर्थः।
महिषघ्नी महालक्ष्मीर्दक्षिणाम्नायकीर्त्तिताः॥
महासरस्वती विद्या तथा वाग्वादिनी परा।
प्रत्यङ्गिरा भवानी च पश्चिमाम्नायकीर्त्तिताः॥
कालिका भेदसहिता तारामेदैश्च संयुता।
मातङ्गी भैरवी च्छिन्ना तथा धूमावती परा।
उत्तराम्नायकथिताः कली श्रीघ्रफलप्रदाः॥
समस्तभेदसहिताः कालिकायाः प्रकीर्त्तिताः।
द्वात्रिंशत्यक्षरी तासां दक्षिणाम्नायकीर्त्तिता॥
एकजटा षड़ाम्नाये महामोक्षप्रदायिनी।
तत्परा परमा विद्या न विद्यान्तरगोपिता॥
परप्रसादमन्त्रश्च ऊर्द्धाम्नाये प्रकीर्त्तितः।
वागीश्वरादयो देवा अथ आम्नायकीर्त्तिताः॥
ऊर्द्धाम्नायो अधश्चैव केवलं मोक्षदो भवेत्।
धर्म्मार्थकाममोक्षार्थं आम्नायाश्चे प्रकीर्त्तिताः॥
यथोक्तविधिना भद्रे कृत्वा फलमवाप्नुयात्॥*॥
पूर्व्वाम्नायादिसर्व्वासां विधानं शृणु सुन्दरि।
कृत्वा येनाशु लभते फलं यदुत्तमोत्तमम्॥
षट्कर्म्मफलदा नृणां षड़ाम्नायाः प्रकीर्त्तिताः।

उत्तराम्नायो देवेशि तेषामाश्च फलप्रदः ॥"
इति समयाचारतन्त्रे २ पटलः ॥*॥
तत्र आम्नायभेदेनाचारभेद उक्तः। यथा,—
"पूर्वाम्नायोदितं कर्म्म पाशवं कथितं प्रिये।
यदुक्तं दक्षिणाम्नाये तदेव पाशवं स्मृतम् ॥
पश्चिमाम्नायजं कर्म्म पशुवीरसमाश्रितम्।
उत्तराम्नायजं कर्म्म दिव्यवीराश्रितं प्रिये ॥
दिव्योऽपि वीरभावेन साधयेत् पिटकानने।
वीरामनं विना दिव्यः पूजयेत् पिटकानने।
ऊर्द्धाम्नायोदितं कर्म्म दिव्यभावाश्रितं प्रिये ॥"
इति निरुत्तरतन्त्रे १ पटलः ॥
षड्यणं, क्ली, (षण्णामूषणानां समाहारः।) मिश्रितषट्कटुद्रव्यम्। यथा—
"पिप्पली मरिचं शुण्ठी त्रयमेतद्विमिश्रितम्।
त्रिकटु त्रुषणं व्योषं कट्त्रिकमथोच्यते।
ग्रन्थिकानलवेत्रेषु चतुः पञ्च षड्ूषणम् ॥"
इति शब्दचन्द्रिका ॥
अपि च।
"पञ्चकोलं समरिचं षड्ूषणमुदाहृतम्।
पञ्चकोलगुणं तत्तु रूक्षमुष्णं विषापहम् ॥"
इति भावप्रकाशः ॥
षड्गया, स्त्री, षड्विधगया। यथा,—
"गयागजो गयादित्यो गायत्री च गदाधरः।
गया गयासुरश्चैव षड्गया मुक्तिदायिका ॥"
इति वायुपुराणे गयापद्धतिः ॥
षड्गवं, त्रि, (षट् गावो यत्र। समासे अच्।) गोपटकयुक्तहलादि। यथा,—
"अष्टागवं धर्म्मफलं षड्गवं जीविकार्थिनाम्।
चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम् ॥"
इत्याह्निकाचारतत्त्वम् ॥*॥
प्रत्ययविशेषः। (यथा। "प्रकृत्यर्थस्य षट्त्वे षड्गवच्।" ५। २। १२८। इत्यस्य वार्त्तिकोक्त्या भवति ॥) यथा,—
"पशुभ्यो गोयुगं युग्मे परं षट्त्वे तु षड्गवम् ॥"
इति हेमचन्द्रः ॥
(यथा च महाभारते। ८। ३८। ६।
"अन्यं तस्मै वरं दद्यां सौवर्णं हस्तिषड्गवम्॥")
षण्णां गवां समाहारः। इति द्विगुसमासनिष्पन्नम्। तत्र, क्ली ॥
षड्ग्रन्था, (षट् ग्रन्था यस्याः सा।) वचा। इति भावप्रकाशः ॥ ब्रह्मवचा। गटी। महाकरञ्जः। इति राजनिर्घण्टः ॥
षड्ग्रन्थि, क्ली, (षट् ग्रन्थयो यस्य) पिप्पलीमूलम्। इति वैद्यकम् ॥ षट्पर्व्वणि, पुं, भूम्नि ॥
षड्ग्रन्थिका, स्त्री, (षड्ग्रन्था एव। स्वार्थे कन्। टापि अत इत्वम्।) गटी। इत्यमरः ॥
षड्ग्रन्थी, स्त्री, (षट् ग्रन्था यस्याः। ङीष्।) वचा। इति शब्दरत्नावली ॥
षड्जः, पुं, (षड्भ्यः स्वनेभ्यः जायते इति। जन+डः।) तन्त्रीकण्ठोत्थितस्वरविशेषः। इत्यमरः ॥ अस्य व्युत्पत्तिर्यथा—
"नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संस्पृशन्।
षड्भ्यः संजायते यस्मात् तस्मात् षड्ज इति स्मृतः ॥"
स च मयूरस्वरतुल्यस्वरः। यथा,—
"षड्जं रौति मयूरो हि गावो नर्दन्ति चर्षभम्।
अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमम्॥"
इति भरतः ॥
(अस्मिन् चतसः श्रुतयो वसन्ति। यथा, सङ्गीतदर्पणे। ५३।
'तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्जगाः॥')
तानसेनमते सप्तस्वराणां मध्ये प्रथमस्वरोऽयम्। स्वरज् इति लोके ख्यातः। अस्योच्चारणस्थानं कण्ठः। अयं विप्रवर्णः। अस्यार्द्धिकं नाम। अर्थात् एकस्वरमिलितः। सर्व्वस्वरापेक्षया क्षुद्रस्वरोऽयम्। अस्य ताल एकः। अस्याष्टौ भेदा भवन्ति। इति सङ्गीतशास्त्रम् ॥
षड्दुर्ग, क्ली, (षट् प्रकारं दुर्गम्।) षट्प्रकारकोष्ठम्। तदयथा। धन्वदुर्गम् १ महीदुर्गम् २ गिरिदुर्गम् ३ मनुष्यदुर्गम् ४ नृदुर्गम् ५ वनदुर्गञ्च ६। इति महाभारते राजधर्म्मः।
षड्धा, व्य, (षष्+धाच्।) षट्प्रकारम्। इति व्याकरणम् ॥
षड्बिन्दुः, पुं, विष्णुः। इति त्रिकाण्डशेषः। कीटभेदः। इति मेदिनी। शिरोरोगस्य पञ्चतैलविशेषः। यथा,—
"एरण्डमूलं तगरं शताह्वा
जीवन्तिका सैन्धवराम्लिके च।
भृङ्गं विडङ्गं मधुयष्टिका च
विश्वौषधं कृष्णतिलस्य तैलम्॥
अजापयस्तैलविमिश्रितञ्च
चतुर्गुणे भृङ्गरसे विपक्वम्।
षड्बिन्दवो नासिकयोः प्रदेयाः
सर्व्वान्निहन्युः शिरसो विकारान्॥
घृतांश्च केशान् पलितांश्च दन्तान्
निर्बध्य मूलान् सुदृढीकरोति
सुपक्वगृध्रप्रतिमञ्च चक्षुः
कुर्व्वन्ति बाह्वोरधिकं बलञ्च॥"
जीवन्तिकात्र हरीतकीशाकविशेषः। इति भावप्रकाशः ॥
षड्भुजः, त्रि, (षट् भुजा यस्य।) षड्हस्तयुक्तः। यथा,—
"भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः।
भग्नप्रहरणो रौद्रः कालान्तकयमोपमः॥"
इति ब्रह्मवैवर्त्तपुराणे माहेश्वरखण्डरूपम् ॥
(यथा च महानिर्व्वाणतन्त्रे। ४। १७।
"चतुर्भुजा त्वं द्विभुजा षड्भुजाष्टभुजा तथा।
त्वमेव विश्वरक्षार्थं नानाशस्त्रार्थधारिणी॥")
चैतन्यदेवे, पुं, । स तु पुरुषोत्तमक्षेत्रे षड्भुजो भूत्वा श्रीजगन्नाथदेवशरीरे लीनोऽभूत्। इति लोकप्रसिद्धिः ॥
षड्भुजा, स्त्री, (षट् भुजा इव रेखा यस्याम्।) फललताविशेषः। खरबुजा इति भाषा। (अस्यार्थे क्लीवलिङ्गेऽपि दृश्यते॥) तत्पर्य्यायः। मधुफला २ षड्रेखा ३ वृत्तकर्कटी ४ तिक्ता ५ तिक्तफला ६ मधुपाका ७ हस्तेर्व्वारुः ८ षण्मुखा ८। अस्याः फलगुणाः।
"तिक्तं वाप्ये तदनु मधुरं किञ्चिदम्लञ्च पाके
निष्पक्वञ्चेत् तदमृतसमं तर्पणं पुष्टिदायि।
दृष्यं दाहश्रमविषमनं मूत्रगुदं विधत्ते
पित्तोन्मादापहरकफदं षड्भुजं वीर्य्यकारि॥"
इति राजनिर्घण्टः ॥*॥
षड्भुजिका। यथा। पूर्व्वदले षड्भुजां पीतवर्णां रक्तवस्त्रालङ्कारभूषितां प्रसन्नवदनां षड्भुजां दक्षिणे वज्रशूलपरशुधरां वामे शक्तिखड्गधरां देवीमिति ॥*॥ रुद्रचण्डा। यथा। दक्षिणदले रुद्रचण्डां कृष्णवर्णां दिव्याभरणभूषितां प्रसन्नवदनां षड्भुजां दक्षिणे वज्रशूलपरशुधरां वामे पाशाङ्कुशकेशधरां देवीमिति ॥*॥ चण्डवती। यथा। वायुदले चण्डवतीं धूम्रवर्णां प्रसन्नवदनां सर्व्वालङ्कारभूषितां षड्भुजां दक्षिणे अङ्कुशपाशखड्गधरां वामे दण्डशूलडमरुधरां देवीमिति ॥
इति हरिभक्तिविलासधृतविष्णुरहस्यादिपुराणोक्तदुर्गापूजापद्धतिः ॥
षड्रसः, पुं, (षट्प्रकारो रसः।) मधुरादिषट्प्रकाररसः। यथा,—
"मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा।
सन्तीति रसनीयत्वादाद्ये षड्मी रसाः॥"
एषां नामलक्षणे।
"मधुरं गोधूमित्यादुरिक्षादौ स च लक्ष्यते।
लवणस्तु पटुः प्रोक्तः सैन्धवादौ स दृश्यते॥
तिक्तस्तु पित्तमर्द्दादौ व्यक्तमास्वाद्यते रसः।
कषायस्तुवरस्तूक्तः स च पूगीफलादिषु।
कटुस्तु चारसंज्ञः स्याद्भल्लातादौ स चेष्यते॥"
इति राजनिर्घण्टः ॥
एषां गुणास्तत्तच्छब्दे द्रष्टव्याः ॥
षड्रात्रं, क्ली, (षण्णां रात्रीणां समाहारः।) षड्रः। यथा,—
"सद्यःशौचं भवेद्विद्वन् तथा चोक्तं चतुर्व्विधम्।
गर्भस्रावे च वेदोक्तं पूर्व्वकाले त्वचेतसः॥
ब्राह्मणानामहोरात्रं क्षत्रियाणां दिनत्रयम्।
षड्रात्रञ्चैव वैश्यानां शूद्राणां द्वादशाह्निकम्॥"
इति वामने १४ अध्यायः ॥
षड्रेखा, स्त्री, (षट्रेखा यत्र।) षड्भुजा। इति राजनिर्घण्टः ॥ षड्राजी च ॥
षड्लवणं, क्ली, (षट्गुणितं लवणम्।) मृल्लोपेतं पञ्चलवणम्। इति राजनिर्घण्टः ॥
षड्वक्त्रः, पुं, (षट् वक्त्राणि यस्य।) कार्त्तिकेयः। यथा,—
"यतस्ततो विशाखोऽसौ स्यातो लोकेषु चक्रमुखः।
स्कन्दो विशाखः षड्वक्त्रः कार्त्तिकेयश्च विश्रुतः॥"
इति मत्स्यपुराणे १३४ अध्यायः ॥

षड्विध, त्रि, (षट् विधाः प्रकारा यत्र ।) षट् प्रकारम् । यथा,—
"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥"
इति सुग्धबोधटीकायां दुर्गादासः ॥
अपि च ।
"तत्र चितिर्गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः॥"
इति भावापरिच्छेदः ॥

षण्ढः, पुं, (षणु दाने + "अमन्ताट् डः।" उणा० १।११३। इति डः। बहुलवचनात् सत्वाभावः।) वृषभः। षाँड़ इति भाषा। तत्पर्य्यायः। गोपतिः २ वृष्टरः ३। इत्यमरः ॥ षण्टः ४ अण्डः ५ अण्टः ६। इति शब्दरत्नावली ॥ क्लीवम्। इति जटाधरामरटीके ॥ समूहः। इति हलायुधः ॥ (यथा, हरिवंशे। ३३। ३२।
"नता स्त्रियस्मूर्द्धानो बभूवुस्ते महोरगाः।
सायाह्ने कदलीषण्डे कम्पितास्तस्य वायुना॥")

षण्ढः, पुं, क्लीं, (षणु दाने + डः।) भृजादिकदम्बम्। पद्मकुमुदादिसमूहः। इत्यमरः। (यथा, माघे। ११। १५।
"कलरवमुपगीते षट्पदौघेन धृत्तः
कुमुदकमलषण्डे तुल्यरूपामवस्थाम् ॥"
चिह्नम्। यथा, भागवते। ४। १८। २३।
"यानि रूपाणि जगृहे इन्द्रो दयितहीर्मया।
तानि पापस्य षण्डानि स्त्रियं षण्डमिहोच्यते॥")

षण्डाङ्गी, स्त्री, तैलमानम्। छटाक् इति भाषा। सरसी। (षण्डेन वृषभवत् कामुकपुरुषेण अलति पर्य्याप्नोतीति। अल + अच्। गौरादित्वात् ङीष्।) कामुकस्त्री। इति मेदिनी ॥ मुद्राङ्कितमेदिन्यां दन्त्यसकारादौ लिखिता ॥

षण्ढः, पुं, (श्राम्यति स्त्रिग्राभावात्। श्रम + "श्रमेर्ढः।" उणा० १। १०१। इति ढप्रत्ययेन साधुः।) नपुंसकः। इति राजनिर्घण्टः हेमचन्द्रश्च ॥ स च चतुर्द्दशविधः विंशतिविधश्च। यथा नारदः।
"परीक्ष्यः पुरुषः पुंस्त्वे निजैरेवाङ्गलक्षणैः।
चतुर्द्दशविधः प्राज्ञैः षण्ढो दृष्टो मनीषिभिः॥
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात्।
निसर्गषण्ढो वृद्धश्च पक्षषण्ढस्तथैव च ॥
प्रतिशापादगुरो रोगात् देवक्रोधात्तथैव च।
ईर्ष्याषण्ढश्च सेव्यश्च वातरेता मुखेभगः॥
आक्षिप्तमोघबीजौ च शालिनोऽन्यापतिस्तथा॥"
१४ ॥

कामतन्त्रे तु।
"निसर्गषण्ढो वृद्धश्च पक्षषण्ढश्च कीलकः।
शापादिषण्ढस्तव्यश्च ईर्षकः सेव्यकस्तथा ॥
आक्षिप्तमोघबीजौ च शालीनोऽन्यापतिस्तथा।
मुखेभगो वातरेताः कुम्भीकः षण्ढनष्टकौ ॥
आसेव्यश्च सुगन्धौ च षण्ढः क्लीवानि विंशतिः॥"
२० ॥

तेषां लक्षणानि यथा,—
"ध्वजादिरहितोत्पत्तौ निसर्गषण्ढ उच्यते ।१।
गलितागडो भवेद्वृद्धः २ पक्षान्तरितशक्तिमान् ॥
पक्षषण्ढः३ कीलकस्तु यः क्लैब्यादात्मनः स्त्रियम्
परेण सह संयोज्य पश्चात्तामेव सेवते ॥ ४ ॥
शापादिषण्ढो गुर्व्वादिशापादेवाप्रहर्षणः ।५।
सदा स्तम्भितरेतास्तु रतिस्तव्यः ६ स ईर्षकः ॥
दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते । ७ ।
बहुस्त्रीसेवनाज्जातविरसः सेव्यकः स्मृतः ॥८॥
प्रत्यक्प्रवृत्तवीर्य्यो यो विसर्गसमये भवेत् ।
आक्षिप्तबीजः स ज्ञेयो ९ मोघबीजस्तु स स्मृतः ॥
वृष्टस्त्रीसन्निधानादेर्यो भवेत् पतिध्वजः ।१०।
अत्र शालीनलक्षणं पतितम् ॥ ११ ॥
परस्यामेव यस्यास्ति पुंस्त्वं सोऽन्यापतिर्मतः१२
वक्त्र एव तु यः कुर्य्यान्मैथुनं स सुखेभगः ॥१३॥
वातरेता विसर्गे यो वातं लिङ्गेन मुञ्चति ।१४
कुम्भीकः स तु यो नार्य्याः पायावेव प्रवर्त्तते ॥ १५ ॥
अविकारिध्वजः षण्ढो १६ नष्टो रोगादशुक्रकः। १७।
शुक्रप्राप्यध्वजोच्छ्रायौ आसेव्यः१८ सुगन्धिकः॥
यो योनिसेफसोर्गन्धमाघ्राय लभते बलम् ।१०
षण्टः स्त्रीतुल्यवाक्चेष्टः स्त्रीधर्म्मा छिन्नलिङ्गकः ॥"२०॥

इति वाचस्पतिकृतस्मृतिरत्नावल्यामुद्वाहरहस्यविकाशः ॥ तदर्शनलक्षणयोः प्रायश्चित्तं यथा,—
"नालपेक्षनविद्विष्टान् वीरहीनां तथा स्त्रियम्
देवतापितृसच्छास्त्रयज्ञसन्यादिनिन्दकैः ॥
कृत्वा तु स्वर्णनाशार्थं गृहेतार्कावलोकनात् ।
अवलोक्य तयोदक्त्वामन्यजं पतितं गवम् ॥
विधर्म्मिसूतिकाषण्टविक्लान्तावसायिनः ।
शूतनिर्य्यातकांश्चैव परदाररताश्च ये ॥
एतदेव हि कर्त्तव्यं प्राज्ञैः शोधनमात्मनः ।
अभोज्यसूतिकाषण्टमार्ज्जाराखुश्वकुक्कुटान् ॥
पतितापविद्धचाण्डालशूतहारांश्च धर्म्मवित् ।
संस्पृश्य शुध्यते स्नानादुदक्याग्रामशूकरौ ॥"
इति मार्कण्डेये सदाचाराध्यायः ॥

षण्ढाड़ीचक्रं, क्ली, (षड्विधं नाड़ीचक्रम् ।) नराणां जन्मादिषण्ढचक्रघटितचक्रविशेषः । यथा,—
"जन्माद्यं कर्म्म ततोऽपि दशमं सांहातिकं षोड़शम् ।
समुदायमष्टादशमं विनाशसंज्ञं त्रयोविंशम् ॥
आद्यात्तु पञ्चविंशं मानसमेवं नरः षड्वः स्यात ॥"*॥

तेषां फलम् ।
"इष्टदेहार्थहानिः स्याज्जन्मर्क्षे उपतापिते ।
कर्म्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे ॥
मूर्त्तिद्रविणबन्धूनां हानिः सांहातिके तथा ॥
सन्तसे सामुदविके मित्रभृत्यार्थसङ्क्षय

वैनाशिके विनाशः स्याद्देहद्रविणसम्पदाम् ॥"
इति ज्योतिस्तत्त्वम् ॥

षण्मास्यः, त्रि. (षण्मासे भवः। षण्मास + "षण्मासात् ण्यच्।" ५।१।८३। इति यत्।) षाण्मास्यः। इति सिद्धान्तकौमुदी ॥

षण्मुखः, पुं, (षट् मुखानि यस्य।) कार्त्तिकेयः। इति हलायुधः ॥ (यथा, महाभारते। ३।२३१। १६।
"त्वं क्रीड़से षण्मुख कुक्कुटेन
यष्टेश्च नानाविधकामरूपी ॥")

षट् संख्यकवदने, क्लौ। तद्यति, त्रि ॥

षण्मुखा, स्त्री, (षट् मुखानीव रेखा यस्याम्।) षड्भुजा। इति राजनिर्घण्टः ॥

षत्वं, क्ली, (षस्य भावः। ष + त्व।) मूर्द्धन्यषकारस्य भावः। यथा। एत्वषत्वे। इति सुग्धबोधव्याकरणम् ॥

षद, ल्ल ज श्रौ ग विषादे। शरणे। गतौ। इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-विषादे अक०-अनिट्।) लृ, असदत्। ज, सादः सदः। श्रौ असात्सीत्। ग, सीदती सीदन्ती। विषाद आकुलीभावः। सीदति राधा रासगृहे। शरणं हिंसा। इति दुर्गादासः।

षद, क गतौ। आङ्पूर्व्वोऽयम्। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) मूर्द्धन्यादि। क, आसादयति। इति दुर्गादासः ॥

षन, सम्भक्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सम्भक्तिः सेवनम्। सनति गुरुं लोकः। इति दुर्गादासः।

षन, द ज उ दाने। इति कविकल्पद्रुमः॥(तना०-उभ०-सक०-सेट्। ज्ञावेट्।) द ज, सनोति सनुते। उ सनित्वा सत्वा। इति दुर्गादासः ॥

षम्च, गतौ। इति कविकल्पद्रुमः॥ (स्वा०-पर०-सक०-सेट्।) सञ्चति। इति दुर्गादासः ॥

षन्ज, श्रौ ञि सङ्गे। इति कविकल्पद्रुमः॥(भ्वा०-पर०-अक०-अनिट्।) श्रौ, असाङ्क्षीत्। ञि, सङ्क्तोऽस्ति। सजति वपुषि वासः। इति दुर्गादासः ॥

षप, सम्बे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) सपति। असीषपत्। सम्बः सम्बन्धः। इति दुर्गादासः ॥

षम, वैक्लव्ये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) वैक्लव्यं विह्वलीभावः।
"समन्ति यद्वियोगेन सीमन्तिन्यः सुरातुराः।"
इति दुर्गादासः ॥

षम, त् क वैक्लव्ये। इति कविकल्पद्रुमः ॥(अदन्त चुरा०-पर०-अक०-सेट्।) सिषमयिषति। इति दुर्गादासः ॥

षम्ब, सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सम्बति। इति दुर्गादासः ॥

षर्ज्ज, अर्ज्जने। इति कविकल्पद्रुमः॥ (स्वा०-पर०-सक०-सेट्।) सिषर्ज्जयिषति। सर्ज्जति धनं लोकः। इति दुर्गादासः ॥

षर्व्व,सर्पणे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) सर्व्वति। इति दुर्गादासः ॥
षर्व्वपी, स्त्री, पक्षिविशेषः। यथा,—
"इडापुत्रिका खञ्जनिका षर्व्वपी खञ्जनाक्षती।"
इति शब्दरत्नावली ॥
षल, गतौ। इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट्।) सलति। सिषालयिषति। इति दुर्गादासः ॥
षष्टिः,स्त्री,(षड् दशतः परिमाणमस्य। "षड्क्तिंशतित्रिंशदिति।"५। १। ५८। इति निपातनात् साधुः।) संख्याविशेषः। साठ इति भाषा। इति ज्योतिषम् ॥ (यथा, मनुः।३। १७७।
"वीक्ष्यान्यो नवतेः काणः षष्टेः क्लीबो गतस्य तु।
पापरोगी महस्रस्य दातुर्नाश्नुते फलम् ॥")
षष्टिकः,पुं,(षष्टिरात्रेण पच्यन्ते इति।"षष्टिकाः षष्टिरात्रेण पच्यन्ते।"५।१। ८०। इति कन्-प्रत्ययेन निपातितः।) धान्यविशेषः। षष्टिरात्रेण पच्यते साठिया इति स्वामिसुभूती। इत्यमरभरतौ ॥ तत्पर्य्यायः। षष्टिशलिः २ षष्टिजः ३ स्निग्धतण्डुलः ४ षष्टिवासरजः ५। अस्य गुणाः।
"गौरो नीलः षष्टिकोऽयं द्विधा स्या-
दाद्यो रूक्षः शीतलो दोषहारी।
बल्यः पथ्यो दीपनो वीर्य्यवृद्धिं
दत्ते तस्मात् किञ्चिदूनो द्वितीयः ॥"
इति राजनिर्घण्टः ॥
षष्टिसंख्याक्रीते, त्रि ॥
षष्टिका,स्त्री, (षष्टिक+स्त्रियां टाप्।)षष्टिकधान्यम्। यथा,—
"हैमन्तिकं सितासित्रं धान्यं मुद्गास्तिला यवाः
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका।
षष्टिका कालशाकञ्च मूलकं केसुकेतरत् ॥"
इति तिथ्यादितत्त्वे हविष्यान्नप्रकरणीयस्मृतिवचनम् ॥ किञ्च। शरदि षष्टिकाभिः पार्वणं नित्यमिति वाचस्पतिमिश्राः ॥
षष्टिकं,त्रि,(षष्टिकानां भवनं क्षेत्रम्। षष्टिक+"यवयवकषष्टिकात् यत्" ५। २। ३। इति यत्।) षष्टिकधान्योपयुक्तक्षेत्रादि। इत्यमरः। २। ९। ७ ॥
षष्टितमः, त्रि, (षष्टि+"षष्टादेरसंख्याटेः।" ५। २। ५८। इति तमट्।) षष्टेः पूरणः। इति मुग्धबोधव्याकरणम् ॥
षष्टिधा, व्य, षष्टिप्रकारम्। षष्टिशब्दात् धाच्-प्रत्ययेन निष्पन्नम् ॥
षष्टिमत्तः,पुं, (षष्टया वर्षैर्मत्तः।) हस्ती। षष्टिवर्षपर्य्यन्तं वयःपूर्व्वार्द्धं स्थित्वा षष्टिमत्तः। इति सारस्वताभिधानं शब्दमाला च ॥
षष्टिलता,स्त्री, भ्रमरमारी। इति राजनिर्घण्टः॥
षष्टिसंवत्सराः, पुं, (षष्टिगुणिताः संवत्सराः।) प्रभवादिषष्टिसंख्यकवर्षम्। यथा,—

अथ षष्टिसंवत्सरगणना।
"शाकेन्द्रकालः पृथगाकृतिघ्नः २२
शशाङ्कनन्दाश्वियुगैः ४२९१ समेतः।
शरादिवस्विन्दु १८७५ हृतः सलब्धः
षष्ट्यावशिष्टाः प्रभवादयोऽब्दाः ॥
वर्षवर्ज्जन्तु यच्छेषं सूर्य्यैः संपूर्य्य खोर्ग्निभिः६०।
हृतव्युत्क्रमतः खाग्निहृतेऽग्रे मासकादयः॥"
अस्यार्थः। शाकेन्द्रकालः शकराजाब्दकालः पृथक् स्थितः तत्रैव आकृतिघ्नः २२ द्वाविंशत्या पूरितः शशाङ्कनन्दाश्वियुगैरेकनवत्यधिकशतत्रयाधिकचतुःसहस्रैः समेतोऽङ्कः। शरादिवस्विन्दुहृतः पञ्चसप्तत्यधिकाष्टादशशतैर्यावल्लब्धं हर्त्तुं शक्नोति तावता हृतः कर्त्तव्यः। सलब्धः पूर्व्वशकाब्दः शरैत्यादिना लब्धसंख्यया युतः कार्य्यः षष्ट्यावशेषे पश्चादेषोऽङ्कः पूर्ववत् षष्ट्या हृते लब्धस्यावशिष्टे प्रभवादयः। एकावशेषे प्रभवः द्व्याद्यवशिष्टे विभवादिः। वर्षवर्ज्जन्तु यच्छेषं वर्षात्तिरिक्तं शरादिवस्विन्दुहृतावशिष्टं तत् सूर्य्यैर्द्वादशभिः संपूर्य्य खोर्ग्निभिः षष्ट्या हृते व्युत्क्रमत इत्यनेन षष्टिहृतावशिष्टाः अङ्का दण्डाः षष्टिहृतलब्धांशके खाग्निहृते त्रिंशता हृते अवशिष्टा अंशका लब्धा मासाः स्युरिति ॥*॥ प्रभवादिषष्टिवर्षाण्युपक्रम्य।
"आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता।
तृतीया रुद्रदैवत्या श्रेष्ठा मध्याधमा भवेत् ॥"
भविष्यपुराणे।
भैरव उवाच।
"षष्ट्यब्दं कथयाम्यत्र क्रूराः सौम्याश्च ये प्रिये।
संवत्सरफलं सुख्यं प्रभवादौ वरानने ॥
बहुतोयास्तथा मेघाः सर्वशस्या च मेदिनी।
बहुक्षीरास्तथा गावो व्याधिरोगविवर्ज्जिताः।
प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्त्तिताः ॥१
सुभिक्षं क्षेममारोग्यं सर्वे व्याधिविवर्ज्जिताः।
प्रशान्ता मानवाः सर्वे बहुशस्या वसुन्धरा।
हृष्टास्तुष्टा जनाः सर्वे विभवे च वरानने ॥२॥
रोगा बहुविधाश्चैव मनुष्या वाजिकुञ्जराः।
सर्व एव प्रणश्यन्ति शुक्ले वर्षे वरानने ॥३॥
उन्मत्तश्च जगत् सर्वं धनधान्यसमाकुलम्।
नित्योत्सवः प्रजाहृष्टः प्रमोदे जायते प्रिये ॥४
नीरोगाश्च निरावाधा मानवा विगतद्विषः।
बहुक्षीरास्तथा गावः प्राजापत्ये वरानने ॥५॥
निरातङ्कं जगत् सर्व्वं धनयौवनगर्व्वितम्।
अङ्गिरसि प्रजा सर्वा नित्योत्साहा वरानने।
॥ ६ ॥
सुभिक्षं क्षेममारोग्यं वर्षाकालं सुशोभनम्।
शस्यवृद्धिं विजानीयात् श्रीमुखे सुरवन्दिते ॥७
बहुक्षीरास्तथा गावो धान्यञ्च बलवत्तरम्।
जायन्ते सर्व्वशस्यानि भावे वर्षे वरानने ॥८॥
महार्घं जायते सर्वं घृततैलरसादिकम्।
प्रजानाञ्च भवेद्वृद्धिर्यूनि संवत्सरे शुभे ॥ ९ ॥
निष्पत्तिः सर्वशस्यानां मध्या धातरि कीर्त्तिता
इक्षुक्षीरगुड़ादीनां प्रबलत्वं वरानने ॥१०॥
सुभिक्षं क्षेममारोग्यं कार्पासस्य महार्घता।
लवणं मधु गव्यञ्च ईश्वरे दुर्लभं प्रिये ॥११॥
सुभिक्षं क्षेममारोग्यं प्रशान्ताः पार्थिवाः
प्रिये।
तस्करोपहतं वित्तं बहुधान्ये वरानने ॥१२॥
राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैश्चोपपीड़नम्।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने॥१३॥
जायन्ते सर्वशस्यानि मेदिनी निरुपद्रवा।
लवणं मधु गव्यञ्च महार्घं विक्रमे प्रिये ॥१४॥
कोद्रवाः शालिमुद्गाश्च शङ्कुमाषास्तथैव च।
महार्घं जायते सर्वं हृषे च सुरवन्दिते ॥१५॥
चणका मुद्गमाषाश्च अन्यच्च विदलं प्रिये ॥
महार्घं जायते सर्व्वं चित्रभानौ वरानने ॥१६॥
सुभिक्षं क्षेममारोग्यं विश्वश्च निरुपद्रवम्।
व्यवहारो भवेत् श्रेयान् स्वर्भानौ देवपूजिते॥१७
अतिहृष्टिश्च जायेत धान्यस्याथ प्रपीड़नम्।
शस्यं भवति सामान्यं दारुणे देववन्दिते ॥१८॥
बहुशस्यानि जायन्ते सर्व्वदेशे सुलोचने।
सौराष्ट्रे नाटदेशे च पार्थिवे नात्र संशयः ॥१९॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम्।
अनावृष्टिः समाख्याता व्यये संवत्सरे प्रिये॥२०॥
उद्यतो वर्षणे मेघो जलं नैवोपयच्छति।
महार्घं सर्व्वजिन्नर्घं सर्व्वमेव वरानने ॥२१॥
कोद्रवाः शालिमुद्गाश्च कङ्गुमाषास्तथैव च।
सुलभं जायते सुख्यं जगद्वै सर्व्वधारिणि ॥२२॥
अनग्निप्रबला लोका धान्योपधिप्रपीड़नम्।
जायते मानुषे कष्टं विरोधिनि न संशयः॥२३॥
सर्व्वाः प्रजाः प्रपीड़न्ते व्याधिः शोकश्च जायते
शिरोवक्षोऽक्षिरोगाश्च पापादि विकृते
जनाः ॥२४॥
उपद्रुतं जगत् सर्व्वं तस्करैर्मूषिकैः खगैः।
पीड़िताश्च प्रजाः सर्व्वाः देशभङ्गः खरे प्रिये॥२५
सुभिक्षं क्षेममारोग्यं शस्यं भवति शोभनम्।
बहुक्षीरास्तथा गावो नन्दनं नन्दने प्रिये ॥२६॥
अल्पतोयास्तथा मेघा वर्षन्ति खण्डमण्डले।
नश्यन्ति सर्व्वशस्यानि विजये नात्र संशयः॥२७॥
क्षत्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः।
पीड़ितास्ते वरारोहे जये सर्व्वे न संशयः॥२८॥
सरोगश्च तथा देवि दाहज्वरसमन्वितम्।
अभिभूतं जगत् सर्वं मन्मथे सुरवन्दिते ॥२९॥
तृषधान्यक्षयो देवि सर्व्वशस्यमहार्घता।
व्यवहाराश्च नश्यन्ति दुर्म्मुखे दुर्म्मुखाः प्रजाः॥३०
पीड़ान्ते सर्व्वशस्यानि देशे देशे शुचिस्मिते।
हेमलम्बे प्रजाः सर्व्वाः क्षीयन्ते नात्र संशयः॥३१
तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत्।
अर्थो भवति सामान्यो विलम्बे तु भयं महत्॥३२
विषमस्थं जगत् सर्व्वं विरोधे भवसंप्लवम्।
विकारी सर्व्वतोऽपायो मम वाक्यन्तु नान्यथा॥३३
क्वचिदर्घति पर्জन्यो देशे संक्लिन्नमण्डलः।
दुर्भिक्षं सर्व्वरीवर्षे व्यवहारो विपर्य्ययः ॥३४॥

दुर्भिक्षं जायते सर्व्वा मेदिनी दुःखति प्रिये ।
म्रवे म्रवन्ति तोयानि मानवा दुःखिता भुवि॥३५
सुवर्णरूप्यधान्यानि जगत् सर्व्वं सुशोभनम् ।
ब्राह्मणा वणिजस्तुष्टाः सुभिक्षे शुभकृत् प्रिये॥३६
सुभिक्षं क्षेममारोग्यं दृष्ट्वा गोब्राह्मणाः प्रिये ।
सुस्थिताः शोभने वर्षे प्रजाः सर्व्वाः सुलोचने॥३७
विषमस्थं जगत् सर्व्वं व्याकुलं समुदाहृतम् ।
जनानां जायते भद्रे क्रोधे क्रोधः परस्परम्॥३८
सर्व्वत्र जायते क्षेमं सर्व्वशस्यमहार्घता ।
विख्यातो वरारोहे कार्यास्तस्य महार्घता॥३९॥
पार्थिवैर्न्नृपसैन्यैश्च समस्तैः खण्डमण्डले ।
प्रपीड्यन्ते जनाः सर्व्वे भयभीताः पराभवे॥४०॥
दृषधान्यानि पीड्यन्ते ग्रीष्मे वर्षति वासवः ।
म्रवङ्गः पीड़िताः सर्व्वाः प्रजाश्च सुरवन्दिते॥४१॥
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम् ।
सौम्यदृष्टिर्भवेद्राजा कालिके च शुभं वदेत्॥४२
सुभिक्षं क्षेममारोग्यं सुखञ्च निरुपद्रवम् ।
सौम्यदृष्टिभवेद्राजा सौम्ये सौख्यं प्रकीर्त्तितम्॥४३
तोयपूर्णो भवेन्मेघो वर्षते च दिने दिने ।
निरुपद्रवाय राजानः सर्व्वसाधारणे प्रिये॥४४
वासवो वर्षते देवि देशे चाखण्डमण्डले ।
म्रहिछत्रे कान्यकुब्जे विरोधि क्षुधिनाशकृत्॥४५
म्रभिभूतं जगत् सर्व्वं क्लेशैर्बहुविधैः प्रिये ।
मारुतैः फलदाश्चैव परिवारिणि शोभने॥४६॥
निष्पत्तिः सर्व्वशस्यानां सुभिक्षं भवति प्रिये ।
प्रमाथिनि जलोद्गारी जलदो मोदते प्रजा॥४७॥
निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यामहार्घता ।
हृतं तैलसमं याति म्रानन्दे नन्दति प्रजा॥४८॥
कोद्रवाः शालिमुद्गाश्च पीड्यन्ते वरवर्णिनि ।
सर्व्वौषधानि धान्यानि राक्षसे निष्ठुराः
प्रजाः॥४९॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम् ।
अनले च समाख्यातं नात्र कार्य्या विचारणा॥५०
देशभङ्गः सुदुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चारुपद्माक्षि दुर्भिक्षं नर्म्मदातटे॥५१॥
गोमहिष्यो विनश्यन्ति ये चान्ये नटनर्त्तकाः ।
वासवो वर्षते देवि शस्यञ्च नहि जायते॥
तिलसर्षपमाषादिकार्पासानां महार्घता ।
गोमहिष्यः सुवर्णानि कांस्यताम्राण्यशेषतः॥
तत्सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः ।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्दिनम् ।
पार्थिवा मोषकादीनाः कालयुक्ते प्रपीड़िताः॥५२
तोयपूर्णाः स्रुता मेघा बहुशस्या च मेदिनी ।
निष्ठुराः पार्थिवा देवि सिद्धार्थे च वरानने॥५३
अल्पतोया घनार्घैव कीटकाः प्रबलाः स्मृताः ।
विरुद्धाः पार्थिवा देवि रौद्रे संवत्सरे प्रिये॥५४
दुर्भिक्षं मध्यसं प्रोक्तं व्यवहारो न वर्त्तते ।
भवेद्वै मध्यमा दृष्टिर्दुर्भृतौ समुपस्थिते॥५५॥
दुर्भिक्षं जायते लोकाः सर्व्वे दुर्विषवर्ज्जिताः ।
प्राचिनां जायतेऽवर्षो दुन्दुभौ वरवर्णिनि॥५६॥
महिषीगोहिरण्यादितान्रकांस्याश्यशेषतः ।
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः॥
रक्ते संवत्सरे देवि क्रूरबुद्धिर्नराधिपः ।
मानवाः क्रूरचेष्टाश्च संग्रामे रुधिरं भवेत्॥५७॥
दुर्भिक्षं मरणं घोरं धान्यौषधिप्रपीड़नम् ।
पापरोगो भवेद्देवि रक्ताख्येऽमरवन्दिनि॥५८॥
रोगो मरणदुर्भिक्षं विरोधो बहुसङ्कुलम् ।
क्रोधे तु विषमं सर्व्वं समाख्यातं सुरप्रिये॥५९
मेदिनी लभते देवि सर्व्वभूतं चराचरम् ।
देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजा॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये॥
कौसुदीनर्म्मदाद्याश्च यमुनानर्म्मदातटम् ।
विन्ध्यायां सैन्धवाश्चापि विनश्यन्ति न संशयः॥
सिंहलं मध्यदेशञ्च कालक्षरं तथैव च ।
क्षये क्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि॥"६०

इति ज्योतिस्तत्त्वम्॥

षष्टिहायनः, पुं, (षष्टिर्हायना म्रायुःकालो यस्य।) गजः। धान्यविशेषः। इति मेदिनी राजनिर्घण्टश्च॥ षष्टिसंख्यकवत्सरः। तत्संख्यवयोयुते, त्रि, ॥ (यथा, महाभारते ।१।१५४।४४।
"वभञ्जतुस्तदा दृक्षाँल्लतावाकर्षतुस्तदा ।
मत्ताविव च संरब्धौ वारुणौ षष्टिहायनौ॥")

षष्ठः, त्रि, (षष्+तस्य पूरणे डट्। ५।२।४८। डट्। षट्कतिकतिपयचतुरां थुक्। ५।२।५१। इति थुक्।) षष्ठमां पूरणः। इति मेदिनी॥ (यथा, रघुः। १७। ७८।
"पञ्चमं लोकपालानामूचुः साधर्म्मयोगतः।
भूतानां महतां प्रथममष्टमं कुलभूभृताम्॥")

षष्ठकः, त्रि, षष्ठः। षष्ठशब्दात् स्वार्थे कन्प्रत्ययेन निष्पन्नः॥ (षष्ठो भागः। "मानपशुबन्धयोः कनुलुकौ च।" ५।३।५१। इति कन्। "षष्ठको भागो मानञ्चेद्भवति।" इति काशिका॥)

षष्ठालुकालकं, क्ली, द्वित्राहानन्तरभुक्तम्। यथा
"द्वयन्तरे त्रयन्तरे भुक्तमाहुः षष्ठालुकालकम्।"
इति चिकाण्डशेषः॥

षष्ठिका, स्त्री, (षष्ठी+स्वार्थे कन्।) यथा। चासुरुक्त्यत्र षष्ठिकेत्यूह्यम्। इति दुर्गोत्सवीयबलिदानप्रकरणे तिथ्यादितत्त्वम्॥

षष्ठी, स्त्री, (षष्+क्तीप्।) कात्यायनी। इति मेदिनी॥ षोड़शमाढकान्तर्गतमाढकाविशेषः। सा प्रकृतेः षष्ठीकला स्कन्दभार्य्या च। तस्याः स्वरूपादिर्यथा,—
"प्रधानांशस्वरूपा या देवसेना च नारद!।
माढकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता॥
त्रिगुणां प्रतिविश्वेषु प्रतिपालनकारिणी।
तपस्विनो विष्णुभक्ता कार्त्तिकेयस्य कामिनी॥
षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्त्तिता।
पुत्रपौत्रप्रदात्री च धात्री त्रिजगतां सती॥
सुन्दरी युवती रम्या सन्ततं मर्त्तुरन्तिके।
स्थाने त्रिगुणां परमा तत्त्वरूपा च योगिनी॥
पूजा द्वादशमासेषु यस्या त्रिलोकेषु सन्ततम्।
पूजा च सूतिकागारे परा षष्ठदिने त्रिशो॥
एकविंशतिमे चैव पूजा कल्याणहेतुकी।
शङ्खवन्नियमिता चैषा नित्या काम्याहुतिः परा॥
माढरूपा दयारूपा शङ्खवृक्षस्वरूपिणी।
जले स्थले वान्तरीक्षे शिशूनां खड्गगोचरे॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः॥*॥

अपि च।

श्रीनारायण उवाच।

"षष्ठांशा प्रकृतेर्या च सा तु षष्ठी प्रकीर्त्तिता।
तस्याः पूजाविधौ ब्रह्मन् इतिहासमिमं शृणु॥
राजा प्रियव्रतश्चासीत् स्वायम्भुवमनोः सुतः।
योगीन्द्रो न वहेद्वार्त्तां तपस्यासु रतः सदा॥
ब्रह्मज्ञया च यत्नेन कृतदारो बभूव सः।
सुचिरं कृतदारश्च न लेभे तनयं ततः॥
पुत्रेष्टियज्ञं तच्चापि कारयामास कश्यपः।
मालिन्यै तस्य कान्तायै मुनिर्यज्ञचरुं ददौ॥
भुक्ता चरुञ्च तस्याश्च सद्यो गर्भी बभूव ह।
दधार तञ्च सा देवी दैवं द्वादशवत्सरम्॥
ततः सुषाव सा ब्रह्मन् कुमारं कनकप्रभम्।
सर्व्वावयवसम्पन्नं मृतमुत्तानलोचनम्॥
श्मशानञ्च ययौ राजा गृहीत्वा बालकं मुने।
एतस्मिन्नन्तरे तत्र विमानञ्च ददर्श ह॥
ददर्श तत्र देवीञ्च कमनीयां मनोहराम्।
दृष्ट्वा तां पुरतो राजा तुष्टाव परमादरम्॥
पप्रच्छ राजा तां दृष्ट्वा शरत्सूर्य्यसमप्रभाम्।
तेजसा ज्वलितां कान्तां भ्रान्तां स्कन्दस्य नारद॥

प्रियव्रत उवाच।

का त्वं सुशोभने कस्य कान्ते कान्तासि सुव्रते।
कस्य कन्या वरारोहा धन्या मान्या च योषितां॥

देवसेनोवाच।

ब्रह्मणो मानसी कन्या देवसेनाहमीश्वरी।
दृष्ट्वा मां मनसा धाता ददौ स्कन्दाय भूमिप॥
मालकासु च विख्याता स्कन्दभार्य्या च सुव्रता।
विश्वे षष्ठीति विख्याता षष्ठांशा प्रकृतेर्यतः॥
इत्येवमुक्त्वा सा देवी गृहीत्वा बालकं मुने।
महाज्ञानेन तपसा जीवयामास लीलया॥
गृहीत्वा बालकं देवी गगनं गन्तुमुद्यता।
पुनस्तुष्टाव तां राजा शुष्ककण्ठौष्ठतालुकः॥
नृपस्तोत्रेण च सा देवी परितुष्टा बभूव ह।
उवाच तं नृपं ब्रह्मन्! वेदोक्तं कर्म्मनिर्म्मितम्॥

देवसेनोवाच।

त्रिषु लोकेषु राजा त्वं स्वायम्भुवमनोः सुतः।
मम पूजाञ्च सर्व्वत्र कारयित्वा स्वयं कुरु॥
तदा दास्यामि पुत्रन्ते कुलपद्मनभोरमम्।
इत्येवमुक्त्वा सा देवी तस्मै तद्बालकं ददौ॥
राजा चकार स्वीकारं तत्पूजार्थञ्च सुव्रतः।
जगाम देवी स्वर्गञ्च दत्त्वा तस्मै शुभं वरम्॥
आजगाम महाराजः स्वगृहं हृष्टमानसः।
देवीं तां पूजयामास ब्राह्मणेभ्यो धनं ददौ॥
राजा च प्रतिमासेषु शुक्लषष्ठ्यां महोत्सवम्।
षष्ठ्या देव्याश्च यत्नेन कारयामास सन्ततः॥
बालानां सूतिकागारे षष्ठ्यादे यत्नपूर्व्वकम्।
तत्पूजां कारयामास चैकविंशतिवासरे॥

बालानां शुभकार्य्ये च शुभान्नप्राशने तथा ।
सर्व्वत्र वर्द्धयामास स्वयमेव चकार ह ॥
ध्यानं पूजाविधानञ्च स्तोत्रं मन्त्रो निशामय ।
यत् श्रुतं धर्म्मवक्त्रेण कौथुमोक्तञ्च सुव्रत ॥
शालग्रामे घटे वाथ वटमूलेऽथवा मुने ।
भित्तौ पुत्तलिकां कृत्वा पूजयेद्वा विचक्षणः ॥
षष्ठांशां प्रकृतेः शुद्धां सुप्रतिष्ठाञ्च सुप्रभाम् ।
सुपुत्रदाञ्च शुभदां दयारूपां जगत्प्रसूम् ॥
श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम् ।
पवित्ररूपां परमां देवसेनामहं भजे ॥
इति ध्यात्वा स्वशिरसि पुष्पं दत्त्वा विचक्षणः
पुनर्ध्यात्वा च मूलेन पूजयेत् सुव्रतां सतीम् ॥
दद्याद्वार्घ्यमनौपम्य गन्धधूपप्रदीपकैः ।
नैवेद्यैर्विविधैश्चापि फलेन शोभनेन च ॥
मूलेनैँ ह्रीँ षष्ठीदेव्यै स्वाहेति विधिपूर्व्वकम्
अष्टाक्षरं महामन्त्रं यथाशक्ति जपेन्नरः ॥
ततः स्तुत्वा च प्रणमेद्भक्तियुक्तः समाहितः ।
स्तोत्रञ्च सामवेदोक्तं वरपुत्रफलप्रदम् ॥
अष्टाक्षरं महामन्त्रं लक्षधा यो जपेन्मुने ।
स पुत्रं लभते नूनमित्याह कमलोद्भवः ॥*॥
स्तोत्रं शृणु मुनिश्रेष्ठ सर्व्वकामशुभावहम् ।
आह्नाप्रदञ्च सर्व्वेषां गूढं वेदेषु नारद ॥

प्रियव्रत उवाच ।

नमो देव्यै महादेव्यै सिद्ध्यै शान्त्यै नमो नमः ।
शुभायै देवसेनायै षष्ठ्यै देव्यै नमो नमः ॥
वरदायै पुत्रदायै धनदायै नमो नमः ।
सुखदायै मोक्षदायै षष्ठीदेव्यै नमो नमः ॥
शक्तिषष्ठांशरूपायै सिद्धायै च नमो नमः ।
मायायै सिद्धयोगिन्यै षष्ठीदेव्यै नमो नमः ॥
सारायै सारदायै च परायै सर्व्वकारिण्यै ।
बालाधिष्ठातृदेव्यै च षष्ठीदेव्यै नमो नमः ॥
कल्याणदायै कल्याण्यै फलदायै च कर्म्मणाम् ।
प्रत्यक्षायै च भक्तानां षष्ठीदेव्यै नमो नमः ॥
पूज्यायै स्कन्दकान्तायै सर्व्वेषां सर्व्वकर्म्मसु ।
देवरक्षणकारिण्यै षष्ठीदेव्यै नमो नमः ॥
शुद्धसत्त्वस्वरूपायै वन्दितायै नृणां सदा ।
हिंसाक्रोधवर्ज्जितायै षष्ठीदेव्यै नमो नमः ॥
धनं देहि प्रियां देहि पुत्रं देहि सुरेश्वरि ।
धर्म्मं देहि यशो देहि षष्ठीदेव्यै नमो नमः ॥
देहि भूमिं प्रजां देहि विद्यां देहि सुपूजिते ।
कल्याणञ्च जयं देहि षष्ठीदेव्यै नमो नमः ॥
इति देवीञ्च संस्तुत्य लेभे पुत्रं प्रियव्रतः ।
यशस्विनञ्च राजेन्द्रं षष्ठीदेवीप्रसादतः ॥
षष्ठीस्तोत्रमिदं ब्रह्मन् यः शृणोति च वत्सरम् ।
अपुत्रो लभते पुत्रं वरं सुचिरजीविनम् ॥
वर्षमेकञ्च या भक्त्या संस्तुत्येदं शृणोति च ।
सर्व्वपापविनिर्म्मुक्ता महाबन्ध्या प्रसूयते ॥
वीरं पुत्रञ्च गुणिनं विद्यावन्तं यशस्विनम् ।
शुचिं चिरायुषन्तमेव षष्ठीदेवीप्रसादतः ॥
काकबन्ध्या च या नारी मृतापत्या च या भवेत्
वर्षं श्रुत्वा लभेत् पुत्रं षष्ठीदेवीप्रसादतः ॥
रोगयुक्ते च बाले च पिता माता शृणोति चेत्
मासञ्च मुच्यते बालः षष्ठीदेवीप्रसादतः ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४० अध्यायः ॥*॥
चन्द्रस्य षष्ठकलाक्रियारूपतिथिविशेषः । स तु शुक्लकृष्णपक्षभेदेन द्विविधः । तत्र चन्द्रस्य वृद्ध्यनुकूलषष्ठकलाक्रियारूपः शुक्लपक्षीयः। तस्य ह्रासानुकूलषष्ठकलाक्रियारूपः कृष्णपक्षीयः।*।
वैशाखादिषु तस्या विशेषनामानि यथा,—
"प्रसूता द्वादशे मासि सम्पूज्यापत्यवृद्धये ।
सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्येष्ठे चारण्यसंज्ञिता ।
आषाढ़े कार्त्तिकी श्रेया श्रावणे सुखदा तथा ॥
भाद्रे चपेटा विख्याता दुर्गाख्याश्वयुजे तथा ।
नाम्नाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी
पौषे मास्यन्नरूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता॥"

इति स्कन्दपुराणम् ॥

तत्कृत्यादि यथा,—
अथ षष्ठी सा सप्तमीयुता ग्राह्या युग्मात् ।
राजमार्त्तण्डे ।
"ज्येष्ठे मासि सिते पक्षे षष्ठी चारण्यसंज्ञिता
व्यजनैककरास्तस्यामटन्ति विपिने स्त्रियः ॥
तां विन्ध्यवासिनीं स्कन्दषष्ठीमाराधयन्ति च ।
कन्दमूलफलाहारा लभन्ते सन्ततिं शुभाम् ॥"
कन्दं सूरणादि । मूलं तदितरत् । भविष्ये ।
"श्रेयं मार्गशिरे मासि षष्ठी भरतसत्तम ।
पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया॥"
देवीपुराणे चैत्रमधिकृत्य ।
"षष्ठ्यां स्कन्दस्य कर्त्तव्या पूजा सर्व्वोपचारिका
इहैव सुखसौभाग्यमन्ते विष्णुपुरं व्रजेत् ॥"
इयमेव स्कन्दषष्ठी पञ्चमीयुतैवोपोष्या ।
"कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी ।
एताः पूर्व्वयुताः कार्य्यास्तिथ्यन्ते पारणं भवेत्॥"

इति ब्रह्मवैवर्त्तवचनात् ॥

विष्णुधर्म्मोत्तरे ।
"अष्टमीञ्च तथा षष्ठीं नवमीञ्च चतुर्दशीम् ।
शिरोऽभ्यङ्गं न कुर्व्वीत पर्व्वसन्धौ तथैव च ॥"

इति तिथ्यादितत्त्वम् ॥ * ॥

सा च कार्त्तिकेयाभिषेकतिथिः । यथा,—
"स्वयं स्कन्दो महादेवः सर्व्वपापप्रणाशनः ।
तस्य षष्ठीं तिथिं प्रादादभिषेके पितामहः ॥
अस्यां फलाशनो यस्तु यजेन्नियतमानसः ।
अपुत्रोऽपि लभेत् पुत्रान् अधनोऽपि लभेत् धनम्
य यमिच्छेत मनसा तं तं लभति मानवः ॥
यश्चैतत् पठति स्तोत्रं कार्त्तिकेयस्य मानवः ।
तस्य गेहे कुमाराणां चेमारोग्यं भवेदध्रुवम्॥"

इति वाराहे स्कन्दोत्पत्तिनामाध्यायः ॥ * ॥

तत्र जातफलम् ।
"विद्वान् वरिष्ठयतुरः सुकीर्त्तिः
प्रलम्बबाहुर्व्रणकीर्णगात्रः ।
सत्यप्रतिष्ठो धनपुत्रयुक्तः
षष्ठीप्रसूतो मनुजश्चिरायुः ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

तत्र यात्राकरणदोषो यथा,—
"पञ्चम्यामौषितार्थः स्यात् षष्ठ्यां व्याधियुतो भवेत् ।
सप्तम्यामर्थलाभः स्यादष्टम्यामस्त्रपीड़नम् ।
षष्ठ्यष्टमीद्वादशीषु न गच्छेच्चिरदिनसृग्नि ॥"

इति ज्योतिस्तत्त्वम् ॥

षस, लु र स्वप्ने । इति कविकल्पद्रुमः ॥(अदा० पर०-अक०-सेट् ।) मूर्च्छनादिः । लु, सस्ति । र, वैदिकः । स्वापः शयनम् । इति दुर्गादासः ॥
षस्ज, सर्गे । इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट् ।) दन्त्यसोपधः । क्विपि संयोगादिलोपे सक् । सज्जति । वचोऽपि परुषाक्षरं न च पदेषु संसज्जते । इति शाकुन्तले गद्यकृतानित्यत्वात् । इति दुर्गादासः ॥
षस्त, इ लु र स्वप्ने । इति कविकल्पद्रुमः ॥(अदा० पर०-अक०-सेट् ।)मूर्च्छनादिः दन्त्यसोपधः । इ, संस्तते । नमध्यपाठेऽपि नस्योपधत्वाभावादेव लोपाभावे इदनुबन्धो वेदेषूच्चारणभेदार्थः । लु, संस्ति । र, वैदिकः । इति दुर्गादासः ॥
षह, ज ङ शक्तौ । इति कविकल्पद्रुमः ॥(भ्वा०-आत्म०-सक०-सेट् ।) इहापि शक्तिः क्षमा । ज, साहः सहः । ङ, अन्यायं सहते नासौ । इति हलायुधः । इति दुर्गादासः ॥
षह, य कि शक्तौ । इति कविकल्पद्रुमः ॥ (दिवा० चुरा०-भ्वा०-च-पर०-सक०-सेट् ।) शक्तिरिह दैवादिकस्य शकधातो रूपंतेन क्षमा इत्यर्थः । य, सह्यति दुःखं लोकः सहत इत्यर्थः । कि, साह्यति । स एवायं नागः सहति कलभेभ्यः परिभवम् । इति दुर्गादासः ॥
षहसानुः, पुं, क्षमावान् । यज्ञः । मयूरः । इति संक्षिप्तसारोणादिवृत्तिः ॥
षाट्, व्य, सम्बोधनम् । इति कैचित् ॥
षाड़वः, पुं, गानम् । रसः । इति मेदिनी ॥ रागस्य जातिविशेषः । स च षट्स्वरमिलितरागरागिणी । यथा,—
"औड़वः पञ्चभिः प्रोक्तः स्वरैः षड़्भिस्तु षाड़वः
सम्पूर्णः सप्तभिर्ज्ञेय एवं रागस्त्रिधा मतः ॥"

इति सङ्गीतदर्पणम् ॥

षाड्गुण्यं, क्ली, (षड्गुणा एव । "गुणवचनब्राह्मणादीनां स्वार्थे ।" ५ । १ । १२४ । इत्यस्य वार्त्तिकोक्त्या ष्यञ् ।) राज्ञां राज्यरक्षणे उपायाः षट् । यथा । सन्धानासनं सन्धिं कृत्वा अवस्थानम् १ । यात्रासन्धानं युद्धार्थयानम् २ । विग्रहासनं वैरं कृत्वावस्थानम् ३ । यायां संपरिरक्षासनं शत्रोर्भयप्रदर्शनार्थं यानं प्रदर्श स्वस्थाने अवस्थानम् ४ । द्वैधीभावः उभयत्र सन्धीकरणम् ५ । अन्येषां सश्रयः दुर्गादेर्गत्वा राजस्य वा आश्रयः ६ । इति महाभारते राजधर्म्मः ॥ (यथा. माघे । २ । ८१ ।
"षाड्गुण्यसुपयुञ्जीत शत्रुष्वेषं रसायनम् ।
भवत्यसेवमङ्गानि स्वास्थ्यानि बलवन्ति च ॥")

षाण्मातुरः, पुं, (षण्णां मातृणामपत्यमिति। "मातृतृत्संख्यासंभद्रपूर्व्वाच्च।" ४।१।११५। इति अण्। उकारस्यान्तादेशः।) कार्त्तिकेयः। इत्यमरः॥

षात्वणत्विकः, त्रि, षत्वणत्वविधायकशास्त्रव्याख्यानम्। तत्र भवः। यथा। षत्वणत्वयोर्विधायकं शास्त्रं षात्वणत्वं तस्य व्याख्यानान्तत्र भवो वा षात्वणत्विकः। इति सिद्धान्तकौमुदी॥

षाध, ओ न य सिद्धौ। इति कविकल्पद्रुमः॥ (स्वा०-दिवा०च-पर०-अक०-अनिट्।) ओ, शिष्यात्सति। न, साध्नोति। य, साध्यति। सिद्धिर्निष्पत्तिः। इति दुर्गादासः॥

षान्त्व,क सामयोगे। इतिकविकल्पद्रुमः॥(चुरा० पर०-सक०-सेट्।) क, सान्त्वयति शोकार्त्तं दयालुः। सिषान्त्वयिषति। इति दुर्गादासः॥

षाष्टः, त्रि, षष्ठः। षष्ठशब्दात् स्वार्थे षा (अण्) प्रत्ययेन निष्पन्नः॥ (पुं. षष्ठो भागः। "षष्टाष्टमाभ्यां ञ च।" ५।३।५०। इति ञः। इति सिद्धान्तकौमुदी॥)

षि, ग ञ न बन्धे। इति कविकल्पद्रुमः॥(क्रया०-स्वा०च-उभ०-सक०-अनिट्।) मूर्द्धन्यादिः। ग ञ, सिनाति सिनीते। न, सिनोति सिनुते। इति दुर्गादासः॥

षिच, प श ञ ओ चरणे। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-अनिट्।) प श ञ, सिञ्चति सिञ्चते। ओ, सेक्ता। सिषिचुरवनिमम्बुवाहाः। इति भारविः। इति दुर्गादासः॥

षिट, अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मूर्द्धन्यादिः। सेठति खलं लोकः। इति दुर्गादासः॥

षिङ्गः, पुं, (षिट् अनादरे+बाहुलकात् अतोऽपि गन् सत्वाभावश्च। इत्यणादिटीकायां उज्ज्वलः। १।१२३।) कामुकः। लोचा इति भाषा। तत्पर्य्यायः। विदग्धः २ नागरः ३ भविलः ४ क्षिदुरः५ विटः ६ व्यलीकः ७ षट्प्रश्नः ८ कामकेलिः ९ विदूषकः १०। इति भूरिप्रयोगः॥ पीठकेलिः ११ पीठमर्दः १२। इति त्रिकाण्डशेषः॥ पक्षविकः १३। इति हेमचन्द्रः॥ (यथा, माघे। ५। ३४।
"पत्यानमाशु विजहीहि पुरः स्तनौ ते
पश्यन् प्रतिद्विरदकुम्भविशङ्कितेन।
स्तम्बेरमः परिणिनं सुरसावुपैति
षिड्गैरगत्यत ससम्भ्रममेव कांचित्॥")

षिध,गत्याम्। इति कविकल्पद्रुमः॥(भ्वा०-पर०-सक०-सेट्।) सेधति। निष्ठायां सिधितः। इति दुर्गादासः॥

षिध,उ-गत्याम्। इति कविकल्पद्रुमः॥ (स्वा०-पर०-सक०-सेट्। क्त्वा वेट्।) सेधति। उ, सेधित्वा सिद्ध्वा। क्त्वावेट्त्वान्नेम् डीश्चीति इमो निषेधे सिद्धः। इति दुर्गादासः॥

षिध, उ य श्रौ सिद्धौ। इति दुर्गादासः॥ (दिवा०-पर०-अक०-अनिट्। क्त्वावेट्।) उ, सेधित्वा सिद्ध्वा। य, सिध्यति। श्रौ, असैत्सीत्। अस्मात् पुषादित्वाच्चिलं ङ इत्यन्ये। सिद्धिर्निष्पत्तिः। सिध्यति घटो निष्पन्नः स्यात् इत्यर्थः। इति दुर्गादासः॥

षिध, ञ शिवे। शास्त्रे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-शिवे अक०-अनुशासने सक०-वेट्।) मूर्द्धन्यादिः। ञ, असेधीत् असैत्सीत्। शिवं मङ्गलम्। तदाकर्म्मकः। सिद्धो वर्णसमाम्नाय इति कातन्त्रस्थादिसूत्रम्। शास्त्रमनुशासनम्। सेधति शिष्यं गुरुः। इति दुर्गादासः॥

षिनभ, उ हिंसने। दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-दीप्तौ अक०-सेट्। क्त्वावेट् उ, सिम्भित्वा सिम्भ्वा। इति दुर्गादासः॥

षिल, ग उञ्छे। इति कविकल्पद्रुमः॥ (तुदा० पर०-सक०-सेट्।) उञ्छ उद्धृतशस्यशेषापहरणम्। ग, सिलति धान्यं दीनः। सेलिता। इति दुर्गादासः॥

षिव, य उ तन्तुततौ। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्। क्त्वावेट्।) तन्ततिस्तन्तुभिर्ग्रथनम्। य, सीव्यति वस्त्रं सौचिकः। उ, सेवित्वा स्यूत्वा। इति दुर्गादासः॥

षु, गतौ। ऐश्वर्य्यप्रसवयोश्च। इति कविकल्पद्रुमः (भ्वा०-पर०-सक०-अनिट्।) सवति। इति दुर्गादासः॥

षु, ञ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-उभ० सक०-अनिट्।) ञ, सुषाव सुषुवे। इति दुर्गादासः॥

षु,न ञ सन्धाक्लेदपीड़नयोः। इति कविकल्पद्रुमः॥ (स्वा०-उभ०-सक०-अक०च-अनिट्।) मूर्द्धन्यादिः। न ञ, सुनोति सुनुते। सन्धा सन्धानम्। क्लेद इह स्नानं मङ्गलस्नानं वा। तथाच षु ञ अभिषवे। इति प्राञ्चः। अभिषवः पीडनं मन्थनं चेति विलोचनादयः। स्नानञ्चेति दुर्गः। सन्धानं मङ्गलस्नानं वेति धातुप्रदीपः। इति दुर्गादासः॥

षु, ल ऐश्वर्य्यप्रसवयोः। इति कविकल्पद्रुमः॥ (अदा०-पर०-अक०-सक० च-सेट्।) ल, सौति। इति दुर्गादासः॥

षुः, पुं, गर्भविमोचनम्। इत्येकाक्षरकोषः॥

षुट्, क तौच्छ्ये। अनादरे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) पञ्चमस्वरी टवर्गान्तः। क, सुट्टयति। दन्त्यादिरयमिति भौमः। तौच्छ्यमल्पीभावः। इति दुर्गादासः॥

षुनभ, दीपनहिंसयोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-दीपने अक०-हिंसायां सक०-सेट्) मूर्द्धन्यादिः। पञ्चमस्वरी। सुम्भति सुषुम्भ। इति दुर्गादासः॥

षुर, ग भेश्वर्ययोः। इति कविकल्पद्रुमः॥(तुदा०-पर०-अक०-सेट।) मूर्द्धन्यादिः। ग, सुरति सोरिता सुषोर। भा दीप्तिः। ऐश्वर्य्यमैश्वर्य्यम्। इति दुर्गादासः॥

षुह, ल य ढ अपि। शक्तौ। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) शक्तिः क्षमा। लृ, असुहत्। य, सुह्यति दुःखं मुनिः सहत इत्यर्थः। सुषोह। इति दुर्गादासः॥

षू, ङ ल सूतौ। इति कविकल्पद्रुमः॥ (अदा० आत्म०-सक०-अनिट्।) मूर्द्धन्यादिः। ङल, सुते। इति दुर्गादासः॥

षूय ङ श्रौ सूतौ। इति कविकल्पद्रुमः॥(दिवा० आत्म०-सक० अनिट्।) य ङ, सूयते। श्रौ, सूनः। सूतिर्गर्भविमोचनम्। सूते पुत्रं नारी। अन्यत्रापि धर्म्मार्थं प्रसूयते। इति दुर्गादासः॥

षू, श छेदे। इति कविकल्पद्रुमः॥ (तुदा०-पर० सक०-अनिट्।) मूर्द्धन्यादिः। श, सुवति। इति दुर्गादासः॥

षूः, स्त्री, गर्भविमोचनम्। इति कविदेकाक्षरकोषः॥

षूद, क्षरणे। इति प्राञ्चः। (भ्वा०-पर०-सक० सेट्।) क्षरणमवदारणं हिंसोपलक्षणमिति रमानाथेन व्याख्यातम्। इति दुर्गादासः॥

षूद, क आस्रुतिहृत्योः। निरासे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) आस्रुतिरङ्गीकारः। क, सूदयति धनं विप्राय दातुं दाता। रमानाथस्तु आसवंश इति दन्त्यसकारं पठित्वा सूदयति मदिरा भाण्डात् क्षरति इत्यर्थ इत्याह। इति दुर्गादासः।

षूद, ङ निरासे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) षष्ठस्वरी। ङ, सूदते। निरासो निःक्षेपः। इति दुर्गादासः॥

षूर, ङ य ई स्तम्भे। हिंसे इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-स्तम्भे अक०-हिंसे सक०-सेट्। निष्ठायां अनिट्।) ङ य, सूर्य्यते। ई, सूर्णः। कैश्चिदयं न मन्यते। स्तम्भो जड़ीभावः। इति दुर्गादासः॥

षूर्च्छ, नादरे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफयुक्तः। षष्ठस्वरी। सूर्च्छति दुष्टं लोकः। इति दुर्गादासः॥

षूर्ष्ण, ईर्षे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) सूर्ष्णति सुषूर्ष्ण। षड्यान्तोऽयमित्येके। इति दुर्गादासः॥

षूष, प्रसवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) षष्ठस्वरी मूर्द्धन्यादिः। सूषति। इति दुर्गादासः॥

षेक, ऋ ङ सर्पणे। इति कविकल्पद्रुमः॥(भ्वा०-आत्म०-सक०-सेट्।) मूर्द्धन्यादिः। अस्य षोपदेश्यविधौ वर्ज्जनेऽपीह पाठः कस्यचिदनुरोधात्। ऋ, असिषेकत्। ङ, सेकते। इति दुर्गादासः॥

षेल, ऋ चालगत्योः। इति कविकल्पद्रुमः॥(भ्वा० पर०-सक०-सेट्।) मूर्द्धन्यादिः। ऋ, असिषेलत्। इति दुर्गादासः॥

षेव, ऋ ञ ङ सेवने। इतिकविकल्पद्रुमः ॥(भ्वा० उभ०-आत्म०-च-सक-सेट् ।) ऋ, असि-षेवत्। ञ, सेवति सेवते। ङ, सेवते। सेवनमाराधनमुपभोग आश्रयणञ्च। विष्णुं सेवते सुखं सेवते तीर्थं सेवते साधुः। अन्ये त्वस्मात् परस्मै पदममन्यमानाः नीचं समृद्धमपि सेवति नीच एव। स्वाधीने विभवेऽप्यहो नरपतिं सेवन्ति किं मानिन इत्यादौ गणकृतानित्यत्वमाहुः। इति दुर्गादासः ॥

षै, क्षये। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट्।) मूर्द्धन्यादिः। सायति। इति दुर्गादासः ॥

षो, य नाशे। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-अनिट्।) मूर्द्धन्यादिः। नाश इह नष्टीकरणम्। य, स्यति यमो जन्तून्। इति दुर्गादासः ॥

षोड़न्, [त्]पुं (षट् दन्ता अस्य। "पृषोदरादीनि यथोपदिष्टम्।" ६। ३। १०९। इति षष उत्वं दलदशधासूत्तरपदादेष्टुत्वञ्च।) षड्दन्तयुक्तहस्तः। इति हेमचन्द्रः ॥

षोड़श,[न्]त्रि, (षट् च दश च। "पृषोदरादीनि यथोपदिष्टम्।" ६। ३। १०९। इति साधुः।) संख्याविशेषः। षड़धिका दश। षोल इति भाषा। तद्बाचको इन्दुकलामात्रकाशब्दौ। इति कविकल्पलता ॥ नित्यबहुवचनान्तोऽयम् ॥ (यथा, मनुः। ११। २४९।
"सध्याहुतिप्रणवकाः प्राणायामास्तु षोड़श।
अपि भ्रूणहनं मासात् पुनन्त्यहरहःकृताः॥")

षोड़शः, त्रि, षोड़शानां पूरणः। षोड़शन्शब्दात् डट्प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी। (यथा, भागवते। २। ९। ६।
"स्वर्गेषु यत् षोड़शमेकविंशं
निष्कञ्चनानां नृप यद्वनं विदुः॥")

षोड़शकलाः, स्त्री, (षोड़शसंख्यान्विताः कलाः।) चन्द्रमण्डलस्य षड़धिकदशभागाः। तासां नामानि यथा। तत्रचन्द्रस्य अमृतादिषोड़शकलाः पूर्ब्बवत् प्राणप्रतिष्ठां कृत्वा पूजयेत्। अं अमृतायै नमः १। आं मानदायै २। इं पूषायै ३। ईं तुष्ट्यै ४। उं पुष्ट्यै ५। ऊं रत्यै ६। ऋं धृत्यै ७। ॠं शशिन्यै ८। ऌं चन्द्रिकायै ९। ॡं कान्त्यै। १० एं ज्योत्स्नायै ११। ऐं श्रियै १२। ओं प्रीत्यै १३। औं अङ्गदायै १४। अं पूर्णायै २५। अः पूर्णामृतायै १६। नमः सर्व्वत्र। अन्यत्रैतत् प्रत्येकमावाह्य मन्त्रादिभिः पूजयेत्। इति तन्त्रसारः ॥

षोड़शदानं, क्ली, (षोड़शप्रकारं दानम्।) श्राद्धादौ षोड़शप्रकारदेयद्रव्यम्। तत्क्रममाहुः साम्प्रदायिकाः।
"भूम्यासनं जलं वस्त्रं प्रदीपोऽन्नं ततः परम्।
ताम्बूलच्छत्रगन्धाश्च माल्यं फलमतः परम्॥
शय्या च पादुका गावः काञ्चनं रजतं तथा।
दानमेतत् षोड़शकं प्रेतमुद्दिश्य दीयते॥"

तत् षोड़शषोड़शकैरेको दानसागरो भवति॥ तत्र भूमेः पूजायां दानवाक्ये च प्रियदत्तेति विशेषणम्। भूमेर्देवता विष्णुः षष्टिवर्षसहस्रावच्छिन्नस्वर्गवासः फलम्। प्रतिग्रहे तद्भूमेः प्रदक्षिणीकरणम्। तद्भूमेरसन्निधाने तामुद्दिश्य प्रदक्षिणम्॥ १॥ आसनस्य उत्तानाङ्गिरसो देवता राज्यस्थानोत्तमस्वर्गप्राप्तिः फलम्। तत्र विशेषानुपदेशात् करमध्यात्माग्नेयेन तीर्थेन प्रतिग्रहः। एवमन्यत्रापि आग्नेयं करतलम्॥ २॥ जलस्य वरुणो देवता ऋद्धिप्राप्तिः फलम्॥ ३॥ वस्त्रस्य बृहस्पतिर्देवता चन्द्रसालोक्यप्राप्तिः फलम्। प्रतिग्रहे दशान्तग्रहणपरिधाने॥ ४॥ दीपस्य अग्निर्देवता उत्तमचक्षुःप्राप्तिः फलम्॥ ५॥ अन्नस्य प्रजापतिर्देवता अक्षयसुखप्राप्तिः फलम्। प्रतिग्रहे मुष्टिग्रहणम्॥ ६॥ ताम्बूलस्य वनस्पतिर्देवता मेधावित्वसुभगत्वप्राज्ञत्वदर्शनीयत्वप्राप्तिः फलम्॥ ७॥ छत्रस्य उत्तानाङ्गिरसो देवता सर्व्वव्याधिविनिर्मुक्तत्वश्रीमत्त्वबहुपुत्रत्वप्राप्तिः फलम्। प्रतिग्रहे दण्डधारणम्॥ ८॥ गन्धस्य गन्धर्व्वो देवता ब्रह्मपदप्रयाणं फलम्॥ ९॥ माल्यस्य वनस्पतिर्देवता अत्यन्तसुखित्वभवनं फलम्॥ १०॥ फलस्य वनस्पतिर्देवता मुदा युक्तत्वं फलम्॥ ११॥ शय्यायाः उत्तानाङ्गिरसो देवता अत्यन्तसुखित्वभवनं फलम्। प्रतिग्रहे आरोहणम्॥ १२॥ पादुकायुगलस्य उत्तानाङ्गिरसो देवता सर्व्वलोकसुखगमनं फलम्। प्रतिग्रहे आरोहणम्॥ १३॥ धेनोः रुद्रो देवता सूर्य्यलोकप्राप्तिः फलम्। तत्र धेनुं प्राङ्मुखीमात्मसमीपमानीय।
"ॐ या लक्ष्मीः सर्व्वभूतानां या च देवेष्ववस्थिता।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु॥
ॐ देवस्य या च रुद्राणी शङ्करस्य च या प्रिया।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु॥
ॐ विष्णोर्वक्षसि या लक्ष्मीर्या लक्ष्मीर्धनदस्य च।
या लक्ष्मीः सर्व्वभूतानां सा धेनुर्वरदास्तु मे॥
ॐ चतुर्मुखस्य या लक्ष्मीः स्वाहा चैव विभावसोः।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये॥
ॐ स्वधा त्वं पितृसंघानां स्वाहा यज्ञभुजां यतः।
सर्व्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे॥
सर्व्वदेवमयीं देवीं सर्व्ववेदमयीन्तथा।
सर्व्वलोकनिमित्ताय सर्व्वलोकमपि स्थिराम्।
प्रयच्छामि महाभागामव्ययाय सुखाय च॥"
इत्युच्चार्य्य उत्सृजेत्। प्रतिग्रहे पुच्छधारणम्॥ १४॥ हिरण्यस्याग्निर्देवता दीर्घायुःप्राप्तिः फलम्॥ १५॥ रजतस्य चन्द्रमा देवता उत्तमरूपप्राप्तिः फलम्॥ १६॥ इति शब्दतत्त्वम् ॥*॥ गयापद्धत्युक्तषोड़शदानं यथा,
"स्वर्णं रौप्यं तथा ताम्रं कांस्यं गावो गजा हयाः।
गृहं भूमिर्द्विषो वस्त्रं शय्या चैत्रमुपानही॥
दास्यन्नं पितृयज्ञेषु दानं षोड़शकं मतम्॥"
इति वायुपुराणे गयामाहात्म्यम् ॥

षोड़शभुजा, स्त्री, (षोड़श भुजा यस्याः।) षोड़शहस्तयुक्ता दुर्गा। यथा,—
"यदा तु षोड़शभुजां महामायां प्रपूजयेत्।
दुर्गातन्त्रेण मन्त्रेण विशेषं तत्र वै शृणु॥
कन्यायां कृष्णपक्षस्य एकादश्यामुपोषितः।
द्वादश्यामेकभक्तन्तु नक्तं कुर्य्यात् परेऽहनि॥
चतुर्दश्यां महामायां बोधयित्वा विधानतः।
गीतवादित्रनिर्घोषैर्नानानैवेद्यवेदनैः॥
अयाचितं बुधः कुर्य्यात् उपवासं परेऽहनि।
एवमेव व्रतं कुर्य्यात् यावद्वै नवमी भवेत्॥
ज्येष्ठायान्तु समभ्यर्च्च्य मूलेन प्रतिपूजयेत्।
उत्तरेणार्च्चनं कृत्वा श्रवणान्ते विसर्জ्जयेत्॥"
इति कालिकापुराणे ५९ अध्यायः ॥

षोड़शमातृकाः, स्त्री, (षोड़शसंख्यकाः मातृकाः।) षोड़शसंख्यकदेवीविशेषः। यथा। गौर्य्यादिषोड़शमातृकाभ्यो नमः। इति दुर्गोत्सवपद्धतिः॥ तासां नामानि यथा, आद्यतत्त्वे।
"गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह।
आदौ विनायकः पूज्यः अन्ते च कुलदेवता॥"

षोड़शर्त्विक्क्रतुः, पुं, (षोड़श ऋत्विजो यत्र। तादृशः क्रतुः।) षोड़शपुरोहितसाध्ययागविशेषः। स तु ज्योतिष्टोमयागः। द्वादशाहसाध्यसत्रयागश्च। यथा। ज्योतिष्टोमे द्वादशशतगोदक्षिणाविभागः षोड़शर्त्विजां तद्विकृतीभूते सत्रात्मके द्वादशाहसाध्ये ग्रतेनार्द्धिनो दीक्षयन्तीत्यादिदर्शनेन निर्णीयते। तत्र विभागं मनुरप्याह।
"सर्व्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे।
तृतीयिनस्तृतीयांशास्तुर्य्यांशैकपादिनः॥"
दक्षिणा गोशतविभागाय श्रौतकात्यायनोऽपि।
अथ द्वादश द्वादश आद्येभ्यः षट् षट् द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्त्रिस्त्रिस्त्रिस इतरेभ्यः।
इत्यत्र षोड़शर्त्विजां चतुरश्चतुरः कृत्वा चत्वारो वर्गाः। इति मलमासतत्त्वम् ॥*॥ एषां ऋत्विजां नामानि यथा ब्रह्मा १ ब्राह्मणाच्छंसी २ आग्निध्रः ३ पोता ४। एते साम्वेदीयाः। होता५ मैत्रावरुणः६ अच्छावाक् ७ ग्रावस्तोता ८। एते ऋग्वेदिनः। अध्वर्य्युः ९ प्रतिप्रस्थाता १० नेष्टा ११ उन्नेता १२। एते यजुषाः। उद्गाता१३ प्रस्तोता१४ प्रतिहर्त्ता १५ सुब्रह्मण्यः१६। एते सामगाः। इति महाभारते मोक्षधर्म्मे १०५ अध्याये नीलकण्ठटीका

षोड़शाङ्गः, पुं, (षोड़श अङ्गवो यस्य।) शुक्रः। इति शब्दमाला ॥ षोड़शार्कीरथयुक्ते, त्रि

षोड़शाङ्गः, पुं,(षोड़श द्रव्याणि अङ्गानि यस्य ।) षोड़शप्रकारसुगन्धिद्रव्यमिश्रितधूपः । यथा,— "गुग्गुलुं सरलं दारु पत्रं मलयसम्भवम् । क्रौञ्चैरमगुरुं कुष्ठं गुड़ं सर्ज्जरसं घनम् ॥ हरीतकीं नखीं लाक्षां जटामांसीञ्च शैलजम् । षोड़शाङ्गं विदुर्धूपं देवे पैत्रे च कर्म्मणि ॥" इति तन्त्रसारः ॥

षोड़शावयवयुक्ते, त्रि ॥

षोड़शाङ्घ्रिः, पुं,(षोड़श अङ्घ्रयो यस्य ।) कर्कटः । इति हेमचन्द्रः ॥ षोड़शचरणयुक्ते, त्रि ॥

षोड़शारं, क्ली, (षोड़श अराणि इव दलानि यस्य ।) षोड़शदलपद्मम् । यथा, तन्त्रे ।

"आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वे पत्रे षोड़शारे द्विदशदशदले द्वादशार्द्धे चतुष्के ।
वासान्ते वादिलान्ते ड-फ-क-ठ-सहिते कण्ठदेशे स्वरार्णा
ह्यन्तौ कोदण्डमध्ये सकलदलगतं वर्णरूपं नमामि ॥"

जलाशयोत्सर्गीयवेदिकोपरिकर्त्तव्यचक्रम्। यथा, मत्स्यपुराणे ।

"रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन तत्त्ववित्।
षोड़शारं भवेच्चक्रं पद्मगर्भं चतुर्म्मुखम् ॥
चतुरस्रन्तु परितो वृत्तं मध्ये गुणोत्तरम् ।
वेदाधोपरि तत् कृत्वा ग्रहाणोकपतींस्तथा ।
विन्यसेन्मन्त्रतः सर्व्वान् प्रतिदिक्षु विचक्षणः॥"
इति जलाशयोत्सर्गतत्त्वम् ॥

षोड़शार्चिः, [स्] पुं, (षोड़श अर्च्चींषि यस्य ।) शुक्रग्रहः । इति भूरिप्रयोगः ॥ षोड़शशिखायुक्ते, त्रि ॥

षोड़शावर्त्तः, पुं, (षोड़श आवर्त्ता यस्य ।)शङ्खः। इति हेमचन्द्रः ॥ षोड़शावर्त्तनयुक्ते, त्रि ।

षोड़शिकाख्यं, क्ली, पलपरिमाणम्। इति वैद्यकपरिभाषा ॥

षोड़शी, [न्] पुं, यज्ञपात्रविशेषः । यथा अतिरात्रे षोड़शिनं गृह्णाति नातिरात्रे षोड़शिनं गृह्णातीति। षोड़शी सोमकपात्रविशेषः। इति मलमासतत्त्वम् ॥

षोड़शी, स्त्री, द्वादशमहाविद्यान्तर्गतविद्याविशेषः । यथा,—

"काली तारा महाविद्या षोड़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः॥"

तत्र पारिभाषिकीं षोड़शीमाह ज्ञानार्णवे ।

"चन्द्रान्तं वाक्यवान्तञ्च शक्रादिसहितं पृथक्।
वामाक्षिबिन्दुनादाढ्यं विश्वमाद्यकलात्मकम्॥
विद्यादौ योजयेद्देवि साक्षात् जाग्रत्स्वरूपिणी।
त्रिकूटाः सकला भेदाः पञ्चकूटा भवन्ति हि।
वैष्णवी वसुकूटा स्यात् षट्कूटा शाम्भरी भवेत् ॥"

अस्यार्थः चन्द्रान्तं हकारः । वाक्यवान्तं शकारः । शक्रादौ रेफः । वामाक्षि ईकारः । विद्यादौ पूर्व्वोक्तहादशविद्यादौ ।

"वेदादिमण्डिता देवि शिवशक्तिमयी सदा।
तदा भेदास्तु सकलाः षट्कूटा परमेश्वरि ।
वैष्णवी नवकूटा स्यात् सप्तकूटा च शाम्भरी ॥"

अस्यार्थः शिवशक्तिमयी पूर्व्वोक्ता बीजद्वयवती । वेदादिः प्रणवः । मण्डिता आदौ भूषिता ॥* अथ महाषोड़शी ।

"आद्यबीजद्वयं भद्रे विपरीतक्रमेण हि ।
विलिख्य परमेशानि ततोऽन्यानि समुद्धरेत् ॥
अन्तर्म्मुखी वरारोहे कुमारी त्रिपुरेश्वरी ।
एभिस्तु पञ्चसंख्याकैर्बीजैः संपुटितां यजेत् ॥
षट्कूटां परमेशानि विद्येयं षोड़शाक्षरी ।
त्रिकूटाः सफला भद्रे षोड़शार्णा भवन्ति हि ।
वैष्णव्येकोनविंशार्णा शैवी सप्तदशाक्षरी ॥"

अस्यार्थः । आद्यबीजद्वयं मायारमात्मकम् । विपरीतक्रमः आदौ रमा पश्चान्माया । अन्तर्मध्ये स्थितं कामबीजं मुखे आदौ यस्याः कुमार्य्याः । एभिः पञ्चसंख्याकैर्बीजैः षट्कूटां सप्तकूटां नवकूटां वा संपुटितां संपुटवत् कृतां तेनानुलोमविलोमतः, संपुटितामित्यर्थः । योगिनीतन्त्रे ।

"श्रीबीजमायाम्मरयोनिशक्ति-
स्तारञ्च माया कमलाथ विद्या ।
शक्त्यादिबीजैश्च विलोमतोक्ता
श्रीषोड़शीयञ्च शिवप्रदिष्टा ॥"

तथा च रुद्रयामले ।

"श्रीर्म्माया मदनो वाणी परा तारं शिवप्रिया ।
हरिप्रिया त्रिकूटा सा परा वाणी मनोभवः ।
मातालक्ष्मीर्म्महाविद्या श्रीबीजं षोड़शी परा ॥"

अथ बीजावली षोड़शी । रुद्रयामले ।

"श्रीबीजमाद्ये संलिख्य तथैव च कुमारिकाम् ।
श्रीबीजमाद्ये कामञ्च वाग्भाया कमला तथा ॥
परां कामञ्च वाग्बीजं माया श्रीबीजमेव च ।
बीजावली षोड़शीयं सर्व्वतन्त्रेषु गोपिता॥
राज्यं देयं शिरो देयं न देया षोड़शाक्षरी ॥"*॥

तन्त्रान्तरे ।

"आद्या कुण्डलिनी शक्तिः शक्तिराद्या ततः परा
निवेशयेत्तयोर्म्मध्ये देवि गोविन्दवल्लभाम् ॥
ततस्तु मन्मथं बीजं श्रीबीजं तदनन्तरम् ।
हृल्लेखा रमयोर्वक्त्रे वेदवक्त्रं विनिःक्षिपेत् ॥
ततो लोपां न्यसेद्देवि त्रिकूटामथवा पराम् ।
आद्यानि पञ्चबीजानि पश्चादिन्यस्य सुन्दरि ।
षोड़शीयं सुगोप्या हि स्वेच्छादेवि प्रकाशिता ॥
अस्या माहात्म्यमतुलं जिह्वाकोटिशतैरपि ।
वक्तुं न शक्यते देवि किं पुनः पञ्चभिर्मुखैः ॥
अपि प्रियतमं देयं सुतदारधनादिकम् ।
राज्यं देयं शिरो देयं न देया षोड़शाक्षरी ॥"

तन्त्रान्तरे ।

"सिन्दूररञ्जसा वापि कुङ्कुमेन विशेषिते ।
लिखित्वा दर्शयेद्भूमौ न च कस्मै प्रकाशयेत् ॥
ततः स्वात्मविशुद्ध्यर्थं लक्षमेकं जपेद्गुरुः ॥"*॥

बीजषोड़शीमाह । सिद्धयामले ।

कामो माया रमा बाला त्रिकूटा स्त्री भगाङ्कुशौ ।
काली कामकला कूर्च्चं सर्व्वादौ प्रणवः प्रिये ॥
श्रीमहाषोड़शीयञ्च या ख्याता भुवनत्रये ।
ज्ञानेन मृत्युहा विद्या सर्व्वाम्नायैर्नमस्कृता ॥
सप्तलक्षमहाविद्यास्तन्त्रादौ कथिताः प्रिये ।
सारात्सारतरा भूता या या विद्याः सुगोपिताः॥
बहुना किमिहोक्तेन तासां सारा तु षोड़शी ।
प्रकाशिता महादेवो या दृष्टा ते पुनः पुनः॥"*

शक्तकामराजन्तु श्रीक्रमे ।

"मायाबीजं तथा भिण्ठी कामं शक्रं वियत् क्रमात् ।
जातवेदो मृगाङ्केन चाञ्छितं परमेश्वरी ॥
एतद्वाग्भवकूटञ्च पूर्व्ववत् कामराजकम् ।
तथैव शक्तिबीजन्तु सुन्दर्य्येषा प्रकीर्त्तिता ॥"

अत्रापि पूर्व्ववद्बीजसंयोगः । माया ईकारः । भिण्ठी एकारः । पुनः शक्तमाह ।

"एतद्वगं ततो माया ब्रह्मा शक्रो हरोऽग्निना
वामनेत्रेण संयुक्तो नादबिन्दुविभूषितः ।
एतद्वाग्भवमुद्दिष्टं पूर्व्ववत् कामराजकम् ॥"

भग एकारः । अत्रापि पूर्व्ववद्बीजसंयोगः। अत्र विशेषः ।

"ब्रह्मबीजं यदा दद्यात् त्रिकूटेषु वरानने ।
प्रथमा सुन्दरी देवी द्वितीया ब्रह्मसुन्दरी ॥
शक्तिकूटे महेशानि अनन्तसुन्दरी मता ।
एषा तु सुन्दरी विद्या मतभेदेन दर्शिता ॥
त्रिकूटान्ते हंसबीजं बिन्दुसर्गविभूषितम् ।
एषा श्रीप्राणसंयुक्ता दारिद्र्यदुःखमोचिनी ॥"
इति तन्त्रसारः ॥ * ॥

ऊनविंशतिपिण्डदानक्रिया । यथा,—

प्रेतशिलोक्तरीत्या द्वादशपिण्डान् षोड़शीपिण्डांश्च दद्यात्। इति तीर्थयात्राप्रयोगतत्त्वम्। तद्विधानं यथा,—

"अमावस्यान्तु कन्यार्के तीर्थप्राप्तौ तथा नृप ।
कृत्वा श्राद्धं विधानेन दद्यात् षोड़शपिण्डकम्॥"

वायुपुराणीयस्तत्प्रयोगो यथा । ऊनविंशतिदाक्ष्यमाणपिण्डस्थानानि यथादक्षिणं भागचतुष्टयेन कृतानि तत्र दक्षिणाग्रान् कुशान् आस्तीर्य्य ।

"अस्मत्कुले मृता ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः॥
मातामहकुले ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः॥
बन्धुवर्गकुले ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः॥"
इत्येतैस्तिलोदकैरावाह्य ।

"आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ॥"

इत्येताभ्यां तिलोदकाञ्जलीन् दद्यात्। ततो मूलादितः पिण्डतोयेन पिण्डान् दद्यात्। तत्र क्रम
"अस्मत्कुले मृता ये च गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१॥
मातामहकुले ये च गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥२॥
बन्धुवर्गकुले ये च गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥३॥
अजातदन्ता ये केचित् ये च गर्भे प्रपीड़िताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥४॥
अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथा परे।
विद्युच्चोरहता ये च तेभ्यः पिण्डं ददाम्यहम्॥५
दावदाहे मृता ये च सिंहव्याघ्रहताश्च ये।
दंष्ट्रिभिः शृङ्गिभिर्वापि तेभ्यः पिण्डं ददाम्यहम् ॥६॥
उदन्धनमृता ये च विषशस्त्रहताश्च ये।
आत्मापघातिनो ये च तेभ्यः पिण्डं ददाम्यहम्॥७
अरण्ये वर्त्मनि वने क्षुधया तृषया हताः।
भूतप्रतपिशाचाश्च तेभ्यः पिण्डं ददाम्यहम् ॥
वने जले ॥ ८ ॥
रौरवे चान्धतामिस्रे कालसूत्रे च ये स्थिताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥९॥
अनेकयातनासंस्था प्रेतलोके च ये गताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१०॥
अनेकयातनासंस्था ये नीता यमकिङ्करैः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥११॥
नरकेषु समस्तेषु यातनासु च ये स्थिताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१२॥
पशुयोनिगता ये च पक्षिकीटसरीसृपाः।
अथवा वृक्षयोनिस्थास्तेभ्यः पिण्डं ददाम्यहम् ॥ १३ ॥
जात्यन्तरसहस्रेषु भ्रमन्तः स्वेन कर्म्मणा।
मानुष्यं दुर्लभं येषां तेभ्यः पिण्डं ददाम्यहम् ॥१४
दिव्यन्तरीक्षभूमिष्ठाः पितरो बान्धवादयः।
मृता असंस्कृता ये च तेभ्यः पिण्डं ददाम्यहम् ॥ १५ ॥
ये केचित् प्रेतरूपेण वर्त्तन्ते पितरो मम।
ते सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा ॥१६
येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः।
तेषां पिण्डो मया दत्तः अक्षय्यमुपतिष्ठताम्॥१७
पितृवंशे मृता ये च मातृवंशे च ये मृताः।
गुरुश्वशुरबन्धूनां ये चान्य बान्धवा मृताः॥
ये मे कुले लुप्तपिण्डाः पुत्तदारविवर्जिताः।
क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा॥
विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम।
तेषां पिण्डो मया दत्तः अक्षय्यमुपतिष्ठताम्॥१८
आब्रह्मणो ये पितृवंशजाता
मातुस्तथा तंशभवा मदीयाः।
कुलद्वये य मम दासभूता
भृत्यास्तथैवाश्रितसेवकाश्च॥
मित्राणि सख्यः पशवश्च दृष्टा
दृष्टा अदृष्टाश्च कृतोपकाराः।
जन्मान्तरे ये मम दासभूता
स्तेभ्यः स्वधा पिण्डमहं ददानि ॥१९॥
अष्टोनविंशतिपिण्डे षोड़शपिण्डत्वं पारिभाषिकं पक्षाम्बवत्। इति तिथ्यादितत्त्वम् ॥*॥ एतेषां मन्त्राणां स्त्रीलिङ्गोक्तेन स्त्रीषोड़शीत्वं भवति॥*

अथ माढषोड़शी।

"गर्भादवगमे चैव विषमे भूमिवर्त्मनि।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
मासि मासि कृतं कष्टं वेदना प्रसवेषु च।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
ग्रैथिल्ये प्रसवे चैव मातुरत्यन्तदुष्करम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम् ॥
पङ्गां जनयते मातुर्दुःखञ्चैव सुदुस्तरम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
पङ्गामित्यत्र दङ्गामिति च पाठः ॥ ४ ॥
अग्निना शोषते देहं क्षिराज्ञानशनेषु च।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
पिबेच्च कटुद्रव्याणि क्लेशानि विविधानि च।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
दुर्लभं भक्षद्रव्यस्य त्यागे विन्दति यत् फलम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
रात्रौ मूत्रपुरीषाभ्यां भिद्यते माढकर्पटम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
पुत्रं व्याधिसमायुक्तं माढदुःखमहर्निशम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
यदा पुत्रो न लभते तदा मातुश्च शोचनम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
क्षुधया विह्वले पुत्रे ददाति निर्भरं स्तनम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
दिवा रात्रौ यदा मातुः शोचश्च पुनः पुनः।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
पूर्णे तु दशमे मासि मातुरत्यन्तदुष्करम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
गात्रभङ्गो भवेन्मातुस्तृप्तिं नैव प्रयच्छति।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
अल्पाहारवती माता यावत् पुत्रीऽस्ति बालकः
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥
यमद्वारे महाघोरे पथि मातुश्च शोचनम्।
तस्या निष्क्रमणार्थाय माढपिण्डं ददाम्यहम्॥

इति गयायां प्रसिद्धिः॥

षोड़शोपचारः, पुं, (षोड़शप्रकार उपचारः।) षोड़शप्रकारपूजाद्रव्यम्। यथा,—
"आसनं स्वागतं पाद्यमर्घमाचमनीयकम्।
मधुपर्काचमनस्नानवसनाभरणानि च॥
सुगन्धिसुमनोधूपदीपनैवेद्यवन्दनम्।
प्रयोजयेदर्चनायां उपचारांस्तु षोड़श॥"

इति तन्त्रसारः॥

षोढ़ा,व्य,(षष्+धाच्। पृषोदरादित्वात् साधु। षट्प्रकारम्। यथा,—
"सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा।
निर्व्वाहकैककार्य्यत्वे षोढ़ा सङ्गतिरिष्यते॥"

दक्षानुमतौ जागदीशी टीका॥

संख्याया धाच्प्रकारे। इति सूत्रेण षष्शब्दात् धाच्प्रत्ययेन निपातनान्निष्पन्नम्। इति मुग्धबोधव्याकरणम्॥

षोढ़ान्यासः,पुं. (षोढ़ा षड्धा न्यासः।)विधिना शरीरे मन्त्रविन्यासः। यथा। अथ षोढ़ान्यासः। तदुक्तं वीरतन्त्रे।
"केवलां माढकां कृत्वा माढकां तारसंपुटाम्।
मातृकापुटितं तारं न्यसेत् साधकसत्तमः॥१॥
श्रीबीजपुटितां तान्तु मातृकापुटितन्तु तत्॥२
कामेन पुटितां देवीं तत्पुटं काममेव च॥३॥
यक्षया च पुटितां देवीं यक्षिञ्च तत्पुटां न्यसेत्
क्रीं इन्द्रञ्च पुनर्न्यस्वा ऋ-ॠ-ऌ-ॡ च पूर्ववत्॥५
मूलेन पुटितां देवीं तत्पुटं मन्त्रमेव च॥६॥
अनुलोमविलोमेन न्यस्वा मन्त्रं यथाविधि।
मूलेनाष्टशतं कुर्य्यात् व्यापकं तदनन्तरम्॥"

यथा, प्रणवपुटितां माढकाम्। एवं मातृकापुटितं तारम्। एवं श्रीबीजपुटितां ताम्। तत्पुटितं श्रीबीजम्। एवं कामेन पुटितां मातृकाम्। माढकापुटितं कामम्। एवं यक्षया पुटितां मातृकाम्। मातृकापुटितां यक्षिं न्यसेत्। तथा क्रीं इन्द्रञ्च ऋ-ॠ-ऌ-ॡ च पूर्ववत्। तत्पुटितां माढकां न्यसेत्। मातृकापुटितञ्च तत्। मन्त्रपुटितां माढकाम्। तत्पुटितं मन्त्रम्। पुनरनुलोमविलोमेन केवलं मातृकास्थाने न्यस्य मूलेनाष्टशतेन व्यापकं कुर्य्यात्। अयं न्यासस्तारायां अपि कार्य्यः।
"इति गुप्तेन दुर्गाया अङ्गषोढ़ा प्रकीर्त्तिता।
तारायाः कालिकायाश्च उन्मुख्याश्च तथा-परे।
एतस्मिन् न्यासवर्य्ये च सर्व्वं पापं प्रणश्यति॥"

इति तन्त्रसारः॥

ष्टक,म प्रतीघाते। इति कविकल्पद्रुमः॥ (भ्वा॰ पर॰-सक॰-सेट्।) म, ष्टिष्टकयिषति। इति दुर्गादासः॥

ष्टग,म प संहतौ। इति कविकल्पद्रुमः॥ (भ्वा॰-पर॰-सक॰-सेट्।) म, तिष्टगयिषति। दन्त्यवर्गद्वितीयोपध इति केचित्। इति दुर्गादासः॥

ष्टन, मि शब्दे। इति कविकल्पद्रुमः॥ (भ्वा॰-पर॰-अक॰-सेट्।) मि, स्तानयति स्तानयति अतिष्टनत्। इति दुर्गादासः॥

ष्टभ,इ ङ स्तम्भे। इति कविकल्पद्रुमः॥ (भ्वा॰-आत्म॰-अक॰-सक॰ च-सेट्।)इ, स्तम्भते। ङ, स्तम्भते। तिष्टम्भयिषति। इकारस्य पुनरुक्तिः पूर्वत्र तत्सम्बन्धनिषेधायैव ङितस्तु सर्वे। एव एवेत् पाठबलात् वाच्य इति वत्। स्तम्भो जड़ीभावः जड़ीकरणञ्च। स्तम्भी स्तम्भाजड़ीभावौ इत्यमरोक्तेः। द्योतेनावस्तब्धः जड़ीकृत इत्यर्थः। इति क्रमदीश्वरोक्तेश्च। स्तम्भ इह क्रियानिरोधः। इति भीमः। दोषस्तिष्ठिरिति भोविन्दभट्टः। स्तम्भो दर्पीकरणञ्च। स्तम्भते कवाटेन द्वारं लोकः। इति दुर्गादासः॥

ष्टम,वैक्लव्ये। इति कविकल्पद्रुमः ॥(भ्वा०-पर०-अक०-सेट्।) वैक्लव्यं विह्वलीभावः। ष्टमति। ष्टमितम्। इति दुर्गादासः ॥

ष्टम,ल् क वैक्लव्ये। इति कविकल्पद्रुमः ॥(अदन्त चुरा०-पर०-अक०-सेट्।) मूर्द्धन्यादिः। षोपदेशपाठो भ्वाद्यादौति दन्त्यत्वे कृतसकारादित्वात् यत्वार्थः। तिष्टमयिषति। एवं सर्वत्र। इति दुर्गादासः ॥

ष्टिघ, न ङ आस्कदि। इति कविकल्पद्रुमः ॥ (स्वा०-आत्म०-सक०-सेट्।) आस्कत् आस्कन्दनम्। अभियोग इति भट्टमल्लः। न ङ, स्तिघ्नुते नदीं पान्थः। तिष्टिघे। इति दुर्गादासः ॥

ष्टिप,ऋ ङ ऋति। इति कविकल्पद्रुमः ॥(स्वा०-आत्म०-अक०-सेट्।) ऋ, अतिष्टेपत्। ङ, स्तेपते तिष्टेपे। ऋति क्षरणे। इति दुर्गादासः॥

ष्टिम, य क्लेदे। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट्।) य,स्तिम्यति तिष्टेम। क्लेदः आर्द्रभावः। इति दुर्गादासः ॥

ष्टीम, य क्लेदे। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट्।) य,ष्टीम्यति तिष्टीम। क्लेद आर्द्रभावः। इति दुर्गादासः ॥

ष्टु, अ ल स्तुतौ। इति कविकल्पद्रुमः ॥ अदा०-उभ०-सक०-अनिट्।) मूर्द्धन्यादिः। अ ल, स्तौति स्तवीति स्तुते। इति दुर्गादासः ॥

ष्टुच, ङ प्रसादे। इति कविकल्पद्रुमः ॥ (स्वा०-आत्म०-सक०-सेट्।) मूर्द्धन्यादिस्तमध्यः। प्रसादः प्रसन्नीभावः। ङ, स्तोचते जनं तोष्टुच्यते। पस्याधो मूर्द्धन्य इति केचित्। स्तोचते सोस्तुचते। इति दुर्गादासः ॥

ष्टुभ, उ ङ स्तम्भे। इति कविकल्पद्रुमः ॥(भ्वा०-आत्म०-अक०-सक० च-सेट्। क्रावेट्।) उ, स्तोभित्वा। स्तुब्धा। ङ, स्तोभते तुष्टोभयिषति। स्तम्भो जड़ीभावः तत्करणञ्च। स्तम्भो स्थूणाजड़ीभावावित्यमरोक्तेः। शीतेनावस्तब्धो जड़ीकृत इत्यर्थः। इति क्रमदीश्वरोक्तेश्च। "शास्त्रेण स्तोभते भूयो लघुप्रकृतिको नरः।" इति हलायुधः। स्तोभते हृदं शीतो वायुः। इति चतुर्भुजः। स्तम्भ इह क्रियानिरोधः। इति भीमः। दोषहृदिरिति गोविन्दभट्टः। इति दुर्गादासः।

ष्टूप,क उच्छाये। इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट्।) षष्ठस्वरी। उच्छायो राशीकरणम्। क, स्तूपयति धान्यं कृषकः। तुष्टूपयिषति। इति दुर्गादासः ॥

ष्टूप, य इर् उच्छाये। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट्।) षष्ठस्वरी। य, स्तूप्यति। इर्,अस्तूपत् अस्तूपीत्। पुषादित्वाच्चिलं ङ इत्यन्ये। अतष्टूपत्। इति दुर्गादासः ॥

ष्टृच,गमने। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।)षष्ठस्वरयुक्तः तमध्यः। स्तृच्चति तरीष्टृच्यते। इति दुर्गादासः ॥

ष्टृह, ऊ श वधे। इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-वेट्।) मूर्द्धन्यादिः तमध्यः। ऊ, अस्तर्हीत्। अस्तृहत्। श, स्तृहती स्तृहन्ती। तिष्टर्हयिषति। इति दुर्गादासः ॥

ष्टृह, ऊ श वधे। इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-वेट्।) मूर्द्धन्यादिः तमध्यः। अष्टमस्वरी। ऊ,अस्तृहीत् अस्तृहत्। श स्तृहती स्तृहन्ती। तिष्टृहयिषति। इति दुर्गादासः ॥

ष्टेप, ऋ ङ ष्टुग्रति। इतिकविकल्पद्रुमः ॥(भ्वा०-आत्म०-अक०-सेट्।) ऋ, अतिष्टेपत्। ङ, स्तेपते तिष्टेपे। ष्टुग्रति क्षरणे। इति दुर्गादासः ॥

ष्ठ्यूमः, पुं, चन्द्रः। दीप्तिः। इति केचित् ॥

ष्ठ्यै, संहतौ। ध्वनौ। इतिकविकल्पद्रुमः ॥(भ्वा०-पर०-अक०-अनिट्।) अन्तःस्थाद्ययुक्तदन्त्यवर्गाद्यमध्यः पयोगात् टः। तेन तष्ठ्यौ। तष्ठ्यायति। ताष्ठ्यायते। संहतिः समूहः। ष्ठ्यायति लोकः एकत्र समूहायते शब्दायते वा इत्यर्थः ॥ दन्त्यविधौ ष्ठ्यै वक्रछिवां वर्ज्जनान्न दन्त्यः। इति दुर्गादासः ॥

ष्ठग, म ए संहतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।)मूर्द्धन्यादिस्तमध्यः पयोगात् ठः। म, तिष्ठगयिषति। ए, अस्यगीत्। दन्त्यवर्गप्रथममध्यः इति केचित्। तिष्ठगयिषति अतिष्ठगत्। इति दुर्गादासः ॥

ष्ठल, ज स्थितौ। इति कविकल्पद्रुमः ॥ (स्वा०-पर०-अक०-सेट्।)ज, स्खालः स्खलः। स्खलति लोकस्तिष्ठतीत्यर्थः। इति दुर्गादासः ॥

ष्ठा, ञि स्थाने। इति कविकल्पद्रुमः ॥ (स्वा०-पर०-अक०-अनिट्।) ञि, स्थितोऽस्ति। स्थानं गतिनिवृत्तिः। तिष्ठति साधुर्धर्मे। पृष्ठतस्तिष्ठमान इति वीरचरिते प्रकाशार्थे आत्मनेपदविधानात् ग्लानः। अथवा ताच्छील्ये शतुः ग्लानः। इति दुर्गादासः ॥

ष्ठिव, उ निरासे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्। क्रावेट्।) उ, ष्ठेविला ष्ठूत्वा। अस्य नेम् डौश्वो इत्यादिना इमो निषेधे निष्ठायां ष्ठूत इति भेदः। निरास इह फुत्कार इति भट्टमल्लः। मुखेन श्लेष्मादेर्वमनमिति केचित्। इति दुर्गादासः ॥

ष्ठिव, य निरासे। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट्।) य, ष्ठीव्यति। इति दुर्गादासः ॥

ष्ठीव, निरासे। इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट्।) ष्ठीवति। यं क्ष्विनं मत्वा ष्ठिवुक्लमाचमोऽपीति दीर्घत्वं विदधामः स एवायं ष्ठीविष्यति इत्यादिसाधनाय दीर्घो पठ्यते। तेन क्ष्विनो ग्रहणेनाक्ष्विन् ग्रहीते भ्वाद्यादि ष्णः स्न इत्यादिना मूर्द्धन्यस्य दन्त्यसो न स्यात् एवं ष्ठिवक्राद्योः खेरित्यादिना खेष्कारस्य तकारे तिष्ठीव टिष्ठीवइत्यपि स्यात्। यत्तु सत्यप्यक्ष्विन्नटि ष्ठीवनमिति निपातनं तदस्य सर्वसम्मतत्वाभावात्। निरास इह फुत्कार इति भट्टमल्लः। मुखेन श्लेष्मादेर्वमनमिति केचित्। ष्ठीवत्यत्र लोकः। ष्ठीवामि शुष्केक्षुलताश्चिकल्पम्। इति दुर्गादासः ॥

ष्णस,य लृ उ मि निवासे। इति कविकल्पद्रुमः। (दिवा०-पर०-अक० सेट्। क्रावेट्।) मूर्द्धन्यादिर्दन्त्यनकारयुक्तः। य, स्नस्यति। लृ, अस्नसत्। उ, स्नसिता स्नस्वा। मि,स्नसयति स्नासयति। इति दुर्गादासः ॥

ष्णा, ल शोधने। इति कविकल्पद्रुमः ॥(अदा० पर०-अक०-अनिट्।) मूर्द्धन्यादिरयम्। दन्त्यादिरयमिति कश्चित्। ल, स्नाति गङ्गायां धीरः। अनुपसर्गस्य औ ज्वलह्वलेत्यादिना क्ङिति वा स्नपयति स्नापयति। सोपसर्गस्य तु प्रस्नापयति। इति दुर्गादासः ॥

ष्णिह, ऊ य लृ ञि प्रीतौ। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-वेट्।) ऊ, स्नेहिष्यति स्नेष्यति। य, स्निह्यति बन्धुः। लृ, अस्निहत्। ञि, स्निग्धः स्नीढोऽस्ति। इति दुर्गादासः ॥

ष्णिह,क स्नेहने। इति कविकल्पद्रुमः ॥ (चुरा० पर-अक०-सेट्।) स्नेहनं स्निग्धीभावः। क, स्नेहयति वर्त्तिका तैलेन। इति दुर्गादासः ॥

ष्णु, अ ल स्तुतौ। इति कविकल्पद्रुमः ॥ (अदा० उभ०-सक०-अनिट्।) अ ल,स्नौति स्नवीति स्नुते। इति दुर्गादासः ॥

ष्णुच, ङ सेचने। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्। स्नोचते सुष्णुचे। इति दुर्गादासः ॥

ष्णुम, य भचे। इति कविकल्पद्रुमः ॥ (दिवा० पर०-सक०-सेट्।) दन्त्यनकारयुक्तः। य, स्नुम्यति सुष्णोम। इति दुर्गादासः ॥

ष्णुह, य ऊ लृ उद्गारे। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-वेट्।) दन्त्यनकारयुक्तः। उद्गारो वान्तिः। य, स्नुह्यत्यत्र लोकः। ऊ, स्नोहिष्यति स्नोष्यति। लृ, अस्नुहत्। इति दुर्गादासः ॥

ष्णौ,वेष्टे। इति कविकल्पद्रुमः (भ्वा०-पर०-सक० अनिट्।)प्रकृत्या दन्त्यवर्गशेषोपधः। स्नायति हृदं लता। अनुपसर्गस्य औ ज्वलह्वलेत्यादिना क्ङिति वा। स्नपयति स्नापयति। सोपसर्गस्य तु प्रस्नापयति। इति दुर्गादासः ॥

ष्मि, ङ स्मिते। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-अनिट्। स्मितमीषद्धास्यम्। ङ, स्मयते बधूः। विस्मापयते। इति दुर्गादासः ॥

ष्वक्क, ङ सर्पणे। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक-सेट्।) वकारयुक्तादिः कोपधः। ङ, ष्वक्कते विष्वक्किपते ष्वाष्वक्कते। दन्त्यविधावस्य वर्ज्जनान्न दन्त्यः। चन्द्रोदयस्तु इमं पञ्चमस्वरिणं मत्वा पुक्कते पुषुक्किपते पोपुक्कते इत्याह ॥ इति दुर्गादासः ॥

स्वद, क स्वादे । छेदे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) स्वादो रसोपादानम् । क, स्वादयति चौरं लोकः । इति दुर्गादासः ॥

स्वद, ङ प्रीतिलिह्योः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) प्रीतिः प्रीतीकरणम् । लिट् रसोपादानम् । ङ, अपां हि तृप्तये न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा । इति श्रीहर्षः । इति दुर्गादासः ॥

स्वम्ज, श्वी ञि ङ आलिङ्गे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अनिट् ।) वकारयुक्तादिः । आलिङ्ग आलिङ्गनम् । श्वी, स्वङ्क्ता । ञि, स्वञ्जोऽस्ति । ङ, स्वजते युवतीं युवा । परिष्वजति याज्ञालो मध्यमं पाण्डुनन्दनमिति गणकृतानित्यत्वात् । इति दुर्गादासः ॥

स्वप, श्वी घ लु ञि शये । इति कविकल्पद्रुमः ॥ (अदा०-पर-अक०-अनिट् ।) वकारयुक्तमूर्द्धन्यादिः । श्वी, अस्वाप्सीत् । घ लु, स्वपिति । ञि, सुप्तोऽस्ति । शयः शयनम् । इति दुर्गादासः ॥

स्वर्त्त, क गत्याम् । तड्डे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-तड्डे अक०-सेट् ।) वकारयुक्तमूर्द्धन्यादिः । तड्डो दुःखेन जीवनम् । क, स्वर्त्तयति जनो गच्छति दुःखेन जीवति वेत्यर्थः । अभिस्वर्त्तत् । इति दुर्गादासः ॥

स्विद, लृ श्वी य आ ञि स्विदि । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-अनिट् ।) लृ, अस्विदत् । श्वी, स्वेत्ता । य, स्विद्यति । आ, स्वेदितं स्विन्नं तेन । ञि, स्विन्नोऽस्ति । स्विदीति मोहस्वेदयोश्चेष्विति वोपदेवः । गात्रप्रक्षरणे इति प्राचः । न च स्विद्यति तस्माङ्गमिति हलायुधः ॥ इति दुर्गादासः ॥

स्विद, ञि आ ङ लृ मोहस्वेदयोश्चेषु । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-अक०-सेट् ।) ञि, स्विन्नोऽस्ति ॥ आ, स्वेदितं स्विन्नं तेन । ङ, स्वेदते तिलः तैलं मुञ्चति इत्यर्थः । लृ, अस्विदत् स्नेहः स्निग्धीभावः । इति दुर्गादासः ॥

स

स, दन्त्यसकारः । स तु व्यञ्जनद्वात्रिंशवर्णः । अस्योच्चारणस्थानं दन्तः । इति व्याकरणम् ॥ (तथाच शिक्षायाम् । १७ ।

"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥") तत्स्वरूपं यथा,

"सकारं शृणु चार्व्वङ्गि शक्तिबीजं परात्परम् ।
कोटिविद्युल्लताकारं कुण्डलीत्रयसंयुतम् ॥
पञ्चदेवमयं देवि पञ्चप्राणात्मकं सदा ।
रजःसत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा ॥"

इति कामधेनुतन्त्रम् ॥ * ॥

अस्य लेखनप्रकारो यथा,—

"कुञ्चिता वामतो दक्षगता च गोक्षतिस्पृशः ।
पुनरूर्द्ध्वगता तासु वह्निचन्द्रदिवाकराः ।
मात्रा भवानी विज्ञेया ध्यानमस्य प्रचक्षते ॥"

अस्य ध्यानादि ।

"शुक्लाम्बरां शुक्लवर्णां द्विभुजां रत्नलोचनाम् ।
श्वेतचन्दनलिप्ताङ्गीं मुक्ताहारोपशोभिताम् ॥
गन्धर्व्वगीयमानाञ्च सदानन्दमयीं पराम् ।
अष्टसिद्धिप्रदां नित्यां भक्तानन्दविवर्द्धिनीम् ॥
एवं ध्यात्वा सकारन्तु तन्मन्त्रं दशधा जपेत् ॥
त्रिशक्तिसहितं वर्णं आत्मादितत्त्वसंयुतम् ।
प्रणम्य सततं देवि इदि भावय सुन्दरि ॥"

इति वर्णोद्धारतन्त्रम् ॥*॥

तत्पर्य्यायः

"सो हंसः सुयशा विष्णुर्भृंखोशयचन्द्रसंज्ञकः ।
जगद्बीजं शक्तिनामा सोऽहं वैश्ववती भृगुः ॥
प्रकृतिरीश्वरः शुद्धः प्रभा श्वेता कुलोज्ज्वलः ।
दक्षपादोऽसृतं ब्राह्मी परमात्मा परोऽक्षरः ॥
सुरूपा च गुणेशो गौः कलकण्ठो द्रुकोदरी ।
प्राणाद्याश्च पुरादेवी लक्ष्मीः सोमो हिरण्यपूः ।
दुर्गोत्तारिणि सम्मोहाज्जीवो मूर्त्तिर्मनोहरः ॥"

इति तन्त्रम् ॥

सं, [म्] व्य, शोभनार्थः । समार्थः । सङ्गतार्थः । प्रकृष्टार्थः । इति मेदिनी ॥ उपसर्गविशेषः । अस्यार्थाः यथा । सम् प्रकर्षाग्रे धनैरन्तर्य्यौचित्याभिमुख्येषु । इति मुग्धबोधटीकायां दुर्गादासः ॥

सः, पुं, ईश्वरः । सर्पः । इति शब्दरत्नावली ॥ पक्षी । इत्येचाकरकोषः ॥ विष्णुः । यथा । सः स्याद्विष्णौ हरे सर्पे । इति भरतैकार्थसंग्रहः ॥ पूर्व्वोक्तपरामर्शकः । से इति भाषा । तच्छब्दस्य प्रथमैकवचननिष्पन्नः । यथा भट्टिः । १ । २ ।

"सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट
पितॄनपारीत् सममंस्त बन्धून् ॥"

समासपूर्वपदत्वे सहार्थः । यथा । समाढकः । क्वचित् समानार्थश्च । यथा । सरूपः । इति व्याकरणम् ॥

संग्राही, [न्] पुं, संगृह्णातीति । सं + ग्रह + णिनिः ।) कुटजवृक्षः । इति राजनिर्घण्टः ॥ धारके, त्रि ॥ (यथा, सुश्रुते । १ । ४५ ।

"दीपनं लघु संग्राहि श्वासकाश्मरिपित्तनुत्॥"

संग्रहकारके च । यथा, कामन्दकीयनीतिसारे । ४ : १० ।

"प्रख्यातवंशमक्रूरं लोकसंग्राहिणं शुचिम् ।
कुर्व्वीतात्महिताकाङ्क्षी परिवारं महीपतिः ॥"

संज्ञं, क्ली, पीतकाष्ठम् । यथा,—

"जायकं झावुकं संज्ञं प्रचेलं प्राविरः पुमान् ।
कालीयकञ्च कालानुसार्य्यञ्चाथ समर्थकम् ॥"

जायकादिसमपीतकाष्ठे । इति शब्दचन्द्रिका॥

संज्ञः, त्रि, (सम्यक्प्रकारेण जानाति यः । सं + ज्ञा + कः ।) लब्धजानुकः । यथा,—

"प्रज्ञः प्रगतजानुः स्यात् प्रज्ञोऽत्रैव च दृश्यते ।
संज्ञः संहतजानुश्च भवेत् संज्ञोऽपि तत्र हि ॥"

इति साहसाङ्कः । इत्यमरटीकायां भरतः ॥

संज्ञपनं, क्ली, (सं + ज्ञा + णिच् + ल्युट् ।) मारणम् । इत्यमरः ॥ (यथा, भागवते । ४।५।२२।

"इष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे ।
यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥")

विज्ञापनञ्च ॥

संज्ञप्तिः, स्त्री, (सं + ज्ञा + णिच् + क्तिन् ।)मारणम् । इति हेमचन्द्रः ॥ विज्ञापनञ्च ॥

संज्ञा, स्त्री, (सं + ज्ञा + भावे अङ् ।) चेतना । (यथा, कुमारे । ६ । ४४ ।

"रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्य्ययः ॥")

बुद्धिः ।(ज्ञानम् । यथा, भागवते । ६। ७। १७।

"गुरोर्नाधिगतः संज्ञां परीक्षन् भगवान् स्वराट् ।
ध्यायन् धिया सुरेर्युक्तः शर्म्म नालभतात्मनः ॥"

तथा च गीतायाम् । १ ।७ ।

"नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते॥"

नाम । आख्या । (यथा, मनुः । ८। १२१ ।

"शोकसंव्यवहारार्थं या संज्ञाः प्रथिता भुवि ।
ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः ॥")

हस्ताद्यैरर्थसूचना । हस्तभ्रूलोचनादिभिः प्रयोजनस्य ज्ञापना । इत्यमरभरतौ ॥ (यथा कुमारे । ३ । ४१ ।

"सुखार्पितैकाङ्गुलिसंज्ञयैव
मा चापलायेति गणान् व्यनैषीत् ॥")

गायत्री । सूर्य्यपत्नी । इति मेदिनी ॥ (यथा, मार्कण्डेये । ७७ । १ ।

"मार्त्तण्डस्य रवेर्भार्य्या तनया विश्वकर्म्मणः ।
संज्ञा नाम महाभाग तस्यां भानुरजीजनत् ॥"

अस्या विशेषविवरणन्तु तत्रैवाध्याये द्रष्टव्यम् ॥)

संज्ञासुतः, पुं, (संज्ञायाः सुतः ।) शनिः । इति केचित् ॥

संज्ञुः, त्रि, (संहते संलग्ने जानुनी यस्य । प्रसंभ्यां जानुनोर्ज्ञुः । ५ । ४ । १२८ । इति ज्ञुः ।) सहतजानुकः । इत्यमरः ॥

संज्वरः, पुं, (संज्वरयतीति । सं + ज्वर + णिच् + अच् ।) अग्निजतापः इत्यमरः ॥ (यथा, कथासरित्सागरे । ५५ । ६३ ।

"कदलीपत्रपवनैर्वीज्यमानां सखीजनैः ।
पाण्डुश्यामामभिव्यक्तसंज्वरलक्षणाम् ॥")

संयः, पुं, कङ्कालः । इति शब्दचन्द्रिका ॥

संयत्, पुं, क्ली, (संयम्यतेऽवेति । सं + यम् + क्विप् । "गमादीनाम् ।" ६ । ४ । ४० । इत्यस्य वार्त्तिकोक्त्या मलोपः । तुक् ।) युद्धम् । इत्यमरभरतौ ॥ (यथा, रघुः । ७ । ३८ ।

"उत्थापितः संयति रेणुरश्वैः
सान्द्रीकृतः स्यन्दनवश्यचक्रैः ॥")

संयतः, त्रि, (सं + यम् + क्तः ।) बद्धः । इत्यमरः ॥ (यथा, रामायणे । १ । १० । २५ ।

"मायामिव परिभ्रष्टां हरिणीमिव संयताम्॥"

कृतसंयमः । यथा ब्रह्मपुराणम् ।

"यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे ।

कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्ब्राह्मिनस्त्रो गणेशम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

संयत्वरः, पुं, वाग्यतः। जन्तुसमूहः। इति संक्षिप्तसारोणादिवृत्तिः ॥

संयद्वरः, पुं, (संयच्छतीति। सं + यम + क्विप् + क्वरच्छत्वरेति। उणा० ३। १। इति क्वरच्प्रत्ययेन साधु।) नृपः। इत्युणादिकोषः ॥

संयन्ता, [न्तृ] त्रि संयमनकर्त्ता। नियन्ता। संपूर्व्वयमधातोस्तृन्प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते। ४। ६२। ४८।
"तं विसंज्ञमथोवाह संयन्ता रथवाजिनाम्।
उपदेशमनुस्मृत्य रक्तमाणो महारथम् ॥")

संयमः, पुं. (सं + यम + "यमः समुपनिविषु च।" ३।३। ६३। इति अप्।) व्रताद्यङ्गपूर्व्वदिनकर्त्तव्याचारः। तत्पर्य्यायः। वियामः २ वियमः ३ यामः ४ यमः ५ संयामः ६। इत्यमरः ॥ संयमनम् ७ नियमः ८ इति धरणिः ॥ तद्विधानं यथा। अथ दशमीनियमाः। सूरिसन्तोषे।
"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम्।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"
अत्रोपवसन्निति तद्दिने भोजनासम्भवात् सामीप्यात् पूर्व्वापरदिनयोर्ग्रहणम्। स्मृतिः।
"शाकं माषं मसूरञ्च पुनर्भोजनमैथुने।
द्यूतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत् ॥
कांस्यं मांसं सुरां चौद्रं लोभं वितथभाषणम्।
व्यायामञ्च व्यवायञ्च दिवास्वप्नं तथाञ्जनम् ॥
तिलपिष्टं मसूरञ्च दशम्यां वर्জ্জयेत् पुमान्।
दशम्यामेकभक्तञ्च कुर्व्वीत नियतेन्द्रियः ॥
आचम्य दन्तकाष्ठञ्च खादेत तदनन्तरम्।
पूर्व्वं हरिदिनाह्लोकाः सेवध्वं चैकभोजनम् ॥
अवनीपृष्ठशयनाः स्त्रियाः सङ्गविवर्জ্জिताः।
सेवध्वं देवदेवेशं पुराणं पुरुषोत्तमम्।
सकृद्भोजनसंयुक्ता द्वादश्याञ्च भविष्यथ ॥"
इत्येकादशीतत्त्वम् ॥*॥

श्राद्धपूर्व्वं दिनकर्त्तव्यनियमो यथा। देवलः।
"श्वः कर्त्तास्मीति निश्चित्य दाता विप्रान्निमन्त्रयेत्।
निरामिषं सकृत् भुक्त्वा सर्व्वमुत्सृजने गृहे।
असम्भवे परेद्युर्व्वा ब्राह्मणांस्तान्निमन्त्रयेत् ॥"
वराहपुराणम्।
"वस्त्रशौचादि कर्त्तव्यं श्वः कर्त्तास्मीति जानता।
स्नानोपलेपनञ्चैव कृत्वा विप्रान्निमन्त्रयेत्।
दन्तकाष्ठञ्च विसृजेत् ब्रह्मचारी शुचिर्भवेत् ॥"
विसृजेत् श्राद्धीयब्राह्मणेभ्यो दद्यात्। मार्कण्डेयपुराणम्।
"निमन्त्रयेच्च पूर्व्वेद्युः पूर्व्वोक्तान् द्विजसत्तमान्।
अशक्तौ तद्दिने वापि हित्वा योषित्प्रसङ्गिनम्॥"
यमः।
"प्राग्वेत् प्रदोषान्ते भुक्तान्नं शयितान् द्विजान्।
सर्व्वाशाविनिर्मुक्तः कामक्रोधविवर्জ্জितैः ॥
भवितव्यं भवद्भिश्च क्षोभूते श्राद्धकर्म्मणि।
दक्षिणं जानु चालभ्य त्वं मयात्र निमन्त्रितः।
एवं निमन्त्र्य नियमान् श्रावयेत् पञ्चकान्बुधः॥"
तत्रियममाह।
"अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः।
भवितव्यं भवद्भिश्च मया च श्राद्धकर्म्मणि ॥"
इति श्राद्धतत्त्वम् ॥*॥

तीर्थयात्रापूर्व्वदिनकर्त्तव्यनियममाह। ब्रह्मपुराणम्।
"यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे।
कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्ब्राह्मिनस्त्रो गणेशम् ॥
देवान् पितॄन् ब्राह्मणांश्चैव साधून्
धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात्।
प्रत्यागतश्चापि पुनस्तथैव
देवान् पितॄन् ब्राह्मणान् पूजयेच्च ॥"
एवं प्रकुर्व्वतस्तस्य तीर्थादृयदुद्भवं फलं तत् स्यान्नात्र सन्देह एव। सुसंयतः पूर्व्वदिने कृतैकभक्ताद्यनियमस्तदुत्तरदिने कृतोपवास इत्यादि। उपवासदिने मुण्डनमपि।
"प्रयागे तीर्थयात्रायां पितृमातृवियोगतः।
कक्षानां वपनं कार्य्यं तथा न विकचो भवेत् ॥"
इति विष्णुपुराणात्। इति प्रायश्चित्ततत्त्वम् ॥
प्रायश्चित्तपूर्व्वाहकृत्यं यथा। शङ्खलिखितौ।
"वाप्य केशनखान् पूर्व्वं घृतं प्राश्य वहिर्निशि
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(बन्धनम्। यथा, साहित्यदर्पणे। ३। १५५।
"कापि कुन्तलसंयानसंयमव्यपदेशतः।
बाहुमूलं स्तनीनाभिपङ्कजं दर्शयेत् स्फुटम् ॥")
संकोचः। यथा, मार्कण्डेये। ७७। ४।
"मयि दृष्टे सदा यस्मात् कुरुषे नेत्रसंयमम्।
तस्माज्जनिष्यते मूढे प्रजासंयमनं यमम् ॥")

संयमकः, त्रि, (संयच्छतीति। सं + यम + ण्वुल्।) नियन्ता। यथा,—
"स एव धाता सर्व्वस्य तन्नियोगकरा वयम्।
यमसंयमने त्वन्तः सोऽस्मत्संयमको हरिः ॥"
इति वह्निपुराणे नारसिंहप्रादुर्भावाध्यायः ॥
संयमी च ॥

संयमनं, क्लो, (सं + यम + ल्युट्।) बन्धनम्। (यथा, साहित्यदर्पणे। ६। ३१८।
"यथावा वेण्यां द्रौपदीकेशसंयमनहेतुर्भीमसेनक्रोधापचितो युधिष्ठिरोत्साहः ॥") व्रतम्। इति मेदिनी ॥ चतुःशालम्। इति सङ्क्षिप्तशब्दटीकायां भरतः ॥ (यमगृहम्। यथा, महाभारते। ३। १६३। ८।
"एतत् संयमनं पुण्यमतीवाद्भुतदर्शनम्।
प्रेतराजस्य भवनमृद्धया परमया युतम् ॥"
शासनम्। दमनम्। यथा, भागवते। १०। १६। ६।
"तं चण्डवेगविषवीर्य्यमवेक्ष्य तेन।
दुष्टां नदीञ्च खलसंयमनावतारः ॥"*॥

संयच्छतीति। सं + यम + क्यु:। नियन्तरि, त्रि। यथा, मार्कण्डेये। ७७। ४।
"तस्माज्जनिष्यते मूढे प्रजासंयमनं यम् ॥")

संयमनी, स्त्री, (संयम्यतेऽस्यामिति। सं + यम् + अधिकरणे ल्युट्।) यमपुरी। इति मेदिनी ॥ (यथा, भागवते। १०। ४५। ४२।
"ततः संयमनीं नाम यमस्य दयितां पुरीम्।
गत्वा जनार्दनः शङ्खं प्रदध्मौ सहलायुधः ॥")

संयमितः, त्रि, जातसंयमः। संयमशब्दात् इतोऽस्य जाते इत्यनेन इतप्रत्ययेन निष्पन्नः ॥

संयमी, [न्] पुं, (संयमोऽस्यास्तीति। संयम + इनिः।) मुनिः। इति धरणिः ॥ निगृहीतेन्द्रिये, त्रि। यथा,—
"या निशा सर्व्वभूतानां तस्यां जागर्त्ति संयमी
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥"
इति श्रीभगवद्गीतायाम् २ अध्यायः ॥

संयाचा, स्त्री, द्वीपान्तरगमनम्। संपूर्व्वो यातिर्द्वीपान्तरगमनवृत्तिस्ततस्त्रासुसिति त्रः स्त्रियामाप् संयात्रा। द्वीपान्तरगमनं सम्यग्याचा संयात्रा वा। इति सांयात्रिकशब्दटीकायां भरतः ॥

संयानं, क्लो, सम्यग्गमनम्। संपूर्व्वयाधातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते। ३। १८। ५।
"स त्वं सात्वतमुख्याद्य लब्धसंज्ञो यदृच्छया।
पश्य मे हयसंयाने शिक्षां केशवनन्दन! ॥"
प्रेतनिर्हारः। यथा, रामायणे। १। ७६। २।
"अलं शोकेन भद्रं ते राजपुत्र महायशः।
प्राप्तकालं नरपतेः कुरु संयानमुत्तमम् ॥")

संयामः, पुं, (सं + यम + "यमः समुपनिविषु च।" ३। ३। ६३। इति घञ्।) संयमः। इत्यमरः ॥

संयावः, पुं, (सं + यु + "समि युद्रुदुवः।" ३। ३। २१। इति घञ्।) घृतक्षीरादिपक्वगोधूमः। यथा,—
"संयावस्तु घृतक्षीरगुड़गोधूमपाकजः।"
इति शब्दचन्द्रिका ॥
पिष्टकविशेषः। पेराकी इति भाषा। यथा,—
"पक्वैश्च: साज्यसमिता निर्म्मिता घृतभर्জ্জिताः
कुट्टिताश्चालिताः शुद्धाः शर्करामिश्रिमर्दिताः॥
तच्चूर्णे प्रक्षिपेदेलां लवङ्गमरिचानि च।
नालिकेलं सकर्पूरं दाडिमीजान्यनेकशः ॥
घृतात्तसमितापुष्टरोटिका रचिता ततः।
तस्यां तत्पुरणात्तस्य कुर्य्यान्मुद्गां दृढां सुधीः॥
सर्पिषि प्रचुरे तान्तु सुपक्वेन्द्रियुणो जनः।
प्रकारश्चैः प्रकारोऽयं संयाव इति कीर्त्तितः।
मण्डकोऽपि समो ज्ञेयः संयावोऽपि गुणैर्জ্জनैः॥"
इति भावप्रकाशः ॥

संयुक् [ज्] त्रि, (सं + युज् + क्विप्।) गुणवान्। यथा,—
"सम्बन्धी गुणवान् संयुक् मित्रयुड्मित्रवत्सलः।"
इति त्रिकाण्डशेषः।

(यथा, महाभारते । २ । ३६ । २२ ।
"आचार्य्यदयितश्चैव संयुजश्च युधिष्ठिर ।
ज्ञातकंश्च प्रियं प्राहुः बहुधार्हान् नृपं तथा ॥")
संयुक्तश्च ॥

संयुक्तः, त्रि, (सं + युज् + क्तः ।) संयोगाश्रयः । यथा, तिथ्यादितत्त्वे ।
"कुर्य्यादलाभे संयुक्तां नालाभेऽपि प्रवेशिनीम्॥"

संयुगः, पुं, ("युजिर योगे + घञ् । उक्त्यादिषु युगशब्दस्य पाठात् निपातनादगुणत्वम् । 'विशेषोऽसौ निपातनमिष्यते कालविशेषे रथाध्वकरणे च ।' इति हृत्तिः । सङ्गता रथयुगा यस्मिन् वा ।" इति निरुक्तटीकायां देवराजयज्वा । २ । १७ । २९ ।) युद्धम् । इत्यमरः । २ । ८ । १०५ ॥ (यथा, महाभारते । २ । १७ । १५ ।
"अनयस्यानुपायस्य संयुगे परमः क्षयः ।
सशयो जायते साम्यात् जयश्च न भवेत् द्वयोः॥"
संयोगश्च ॥

संयुतः त्रि. संयुक्तः । यथा,—
"चतुर्थीसंयुता कार्य्या पञ्चमी परया न तु ।
दैवे कर्म्मणि पित्र्ये च शुक्लपक्षे तथासिते ॥"
इति तिथ्यादितत्त्वम् ॥

संयोगः, पुं, (सं + युज् + घञ् ।) मेलनम् । न्यायमते गुणपदार्थः । स च सम्बन्धविशेषः । अप्राप्तवस्तुद्वयस्य प्राप्तिः । स च त्रिविधो यथा ।
एककर्म्मजन्यः । यथा पर्व्वते पक्षिसंयोगः ॥१॥
उभयकर्म्मजन्यः । यथा मेषद्वयसंयोगः ॥ २ ॥
संयोगजन्यसंयोगः । यथा कपालतरुसंयोगजन्यतरुकुक्षिसंयोगः ॥ ३ ॥ कर्म्मजन्यसंयोगोऽपि द्विविधः । अभिघातः । तस्मात् शब्दो जायते ॥ १ ॥ नोदनः । तस्मात् शब्दो न जायते ॥ २ ॥ अत्र प्रमाणम् ।
"अप्राप्तस्यैव या प्राप्तिः सैव संयोग इष्यते ।
कीर्त्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्म्मजः ॥
तयोरन्यः कर्म्मजन्यो भवेत् संयोगजोऽपरः ।
आद्यिमः श्येनशैलादिसंयोगः परिकीर्त्तितः ॥
मेषयोः सन्निपातो यः स द्वितीय उदाहृतः ।
कपालतरुसंयोगात् संयोगस्तरुकुक्षयोः ॥
द्वितीयः स्यात् कर्म्मजोऽपि द्विधैव परिकीर्त्तितः
अभिघातो नोदनश्च शब्दहेतुरिहादिमः ।
शब्दाहेतुर्द्वितीयः स्यादिहभागोऽपि त्रिधा भवेत् ॥"
इति भाषापरिच्छेदः ॥७॥

उदयात् पूर्व्वं दशम्याः शेषः । यथा,—
"उदयात् प्राक् दशम्यास्तु शेषः संयोग इष्यते ।
उपरिष्टात् प्रवेशस्तु तस्मात् तां परिवर्জ্জयेत् ॥"
इति तिथ्यादितत्त्वम् ॥

सम्बन्धमात्रम् । इति संयोगपृथक्त्वन्यायार्थदर्शनात् ॥

संयोगपृथक्त्वं क्लीं, (संयोगेन फलसम्बन्धभेदेन पृथक्त्वं, नानाविधत्वं यत्र ।) न्यायविशेषः । यथा । एकस्य कर्म्मणो नित्यत्वकाम्यत्वाभ्यां द्वैरूप्याङ्गीकारे नित्यानित्यसंयोगविरोधः । नैवं संयोगपृथक्त्वन्यायात् । स च न्यायश्चतुर्थाध्याये उक्तः । यथा । खादिरे यूपं बध्नाति खादिरं वीर्य्यकामस्य यूपं कुर्व्वीत इति श्रूयते । अत्र संशयः । किं काष्ठस्यैव खादिरता नित्येऽपि स्यादुत नेति । तत्र फलार्थत्वेनानित्यतया नित्यप्रयोगाङ्गता न युक्ता । यत्तु नित्येऽपि खादिरत्वश्रवणं तत् काम्यस्यैव पशुनश्यनाय यूपाश्रयज्ञापनार्थं अतो न नित्ये खादिरता इति प्राप्ते राद्धान्ताय चतुर्थाध्यायसूत्रम् । एकस्य तूभयत्वे संयोगपृथक्त्वमिति । अत्र संयोगः सम्बन्धमात्रं पृथक्त्वं भेदः । एकस्य खादिरस्य क्रत्वर्थत्वपुरुषार्थत्वरूपोभयात्मकत्वे वाक्यद्वयेन चक्रतुश्रेयत्वफलश्रेयत्वलक्षसंयोगभेदावगमान्न नित्यानित्यसंयोगविरोधः । न चाश्रयज्ञानार्थं नित्यवाक्यं सन्निधानादेवाश्रयलाभात् । अत उभयार्था खादिरतेति । एवं दध्ना जुहोति दध्नेन्द्रियकामस्य इत्यादावुभयार्थतैव । दधित्वस्य द्रव्याश्रयत्वात् । इति प्रायश्चित्ततत्त्वम् ॥

संयोगविरुद्धं, क्लीं, (संयोगेन विरुद्धम् ।) परस्परसंयोगेन रोगजनकखाद्यद्रव्यम् । यथा,—
"श्राकाम्लपलपिण्याककुलत्थलवणामिषैः ।
करीरदधिमाषैश्च प्रायः क्षीरं विरुध्यते ॥
प्रागुक्तारी तु हारीतो हरिद्रालवणं मृतः ।
तरीस्नेहैर्जलैर्भृष्टं विषं मायूरमामिषम् ॥
वराहवसया भृष्टा बलाका तु हरत्यसून् ।
संयुक्ता सैव वारुण्या कुल्माषैश्च विरुध्यते ॥
अर्कं कुसुम्भशाकेन मत्स्यतैलैः कणां त्यजेत् ।
मांसं रिक्तविकारांश्च काञ्जिकैस्तिलशस्कुलीम्॥
कपोतः सार्षपे भृष्टो घृतं कांस्ये दधाहृतम् ।
विषं घृतसमं क्षौद्रं मधुना गगनाम्बु च ॥
मूलकं माषसूपेन मधुना च न भक्षयेत् ।
एकत्र सर्व्वं मांसानि विरुध्यन्ते परस्परम् ॥
राजन्यवीर्यपदकोदरयोः
विस्फोटिकोन्मादभगन्दराणाम् ।
मूर्च्छामदाध्मानगलग्रहाणां
पाण्डामयश्यामविषस्य चैव ॥
किलासकुष्ठग्रहणीगदानां
श्रोथातिसारज्वरपीनसानाम् ।
सन्तानदोषस्य तथैव मूलो-
द्विरुद्धमन्नं प्रवदन्ति हेतुम् ॥
विरुद्धाहारजान् रोगान् विनिहन्ति विरेचनम्।
वमनं शमनं वापि पूर्व्वं वा हितसेवनम् ॥"
इति संयोगविरुद्धम् । इति राजवल्लः ॥

संयोगितः, त्रि, जातसंयोगः । संयोगशब्दादितप्रत्ययेन निष्पन्नः । इति संयोजितशब्दटीकायां भरतः ॥

संयोगी, [न्]त्रि, (संयोगोऽस्यास्तीति । संयोग + इनिः ।) संयोगविशिष्टः । यथा,—
"अयं हस्तः कपिसंयोगी न मूले।" इति सिद्धान्तलक्षणागदीधृतौ ॥

संयोजनं, क्लीं, (सं + युज् + ल्युट् ।) मैथुनम् । इति हारावली ॥ संयोगश्च ॥

संयोजितः, त्रि, (सं + युज + णिच् + क्तः ।) पदार्थः पदार्थान्तरेण संयुक्तीकृतः । तत्पर्य्यायः उपाहितः २ । इत्यमरः ॥ संयोगितः ३ । इति भरतः ॥ (यथा, भागवते । ५ । २३ । ३ ।
"यथामेधीस्तन्न आक्रमथपशवः संयोजिताः ।
त्रिभिः सवनैर्यथाख्यानं मरुद्भानि चरन्ति ॥")

संरम्भः, पुं, (सं + रभ + घञ् । नुम् ।) क्रोधः । इति शब्दरत्नावली ॥ (यथा, मनुः । ४ । १६६ ।
"ताडयित्वा तृणेनापि संरम्भात् मतिपूर्व्वकम्।
एकविंशतिमाजातीः पापयोनिषु जायते ॥")
आटोपः । इति त्रिकाण्डशेषः ॥ (सम्भ्रमः ॥ यथा, भागवते । ८ । ६ । २४ ।
"न संरम्भेण सिध्यन्ति सर्व्वार्थाः सान्त्वया यथा ॥")
वेगः । यथा, तत्रैव । ८ । ११ । ४५ ।
"संयम्य मन्युसंरम्भं मानयन्तो मुनेर्व्वचः ।
उपगीयमानानुचरैर्ययुः सर्व्वे त्रिविष्टपम् ॥")
उत्साहः । यथा,—
"कार्य्यारम्भेषु संरम्भः स्थेय उत्साह इष्यते ।"
इति साहित्यदर्पणे ३ परिच्छेदः ॥

संरावः, पुं, (सं + रु ल ध्वनौ + "उपसर्गे रुवः।" ३।३।२२। इति घञ् ।) शब्दः । इत्यमरः ॥ (यथा, राजतरङ्गिण्याम् । ३ । ३४२ ।
"ततस्तस्य सरित्पार्श्वे मुक्तसंरावमग्रतः ।
ऊर्द्ध्वबाहुर्महद्भूतं प्रादुरासीत् महीजसः ॥")

संरावी, [न्]त्रि, प्रशस्तशब्दविशिष्टः । संरावशब्दादत्यर्थे इनिप्रत्ययेन निष्पन्नः ॥

संरूढः, त्रि, (सं + रुह + क्तः ।)प्रौढः । अद्भुतः । इति मेदिनी ॥ (यथा, महाभारते ॥ १२ । २२८ । २ ।
"तन्नो मनसि संरूढं करिष्यामस्तथा च तत्॥")

संरोधः पुं. (सं + रुध + घञ् ।) रोधनम् । (यथा, भागवते । १० । ७३ । २ ।
"क्षुत्क्षामाः शुष्कवदनाः संरोधपरिकर्शिताः
दृष्ट्वास्ते घनश्यामं पीतकौशेयवाससम् ॥")
चेपः । इति मेदिनी ॥

संलग्नः त्रि,संयुक्तः । संपूर्व्वलगधातोः क्तप्रत्ययेन निष्पन्नः ॥ यथा,कथासरित्सागरे ।१२३।११९।
"स चाम्बिवेलया नीत्वा विधिगत्येव रोधसि ।
चिरस्याहोपसंलग्नो महामत्स्योऽवसन्नवान्॥"

संलयः, पुं, (सं + ली + अच् ।) निद्रा । इति हेमचन्द्रः ॥ प्रलयश्च ॥

संलापः, पुं, (सं + लप + घञ् ।) परस्परभाषणम् । इत्यमरः ॥ अन्योन्यं प्रीतिभाषणं संलापः । उक्तिप्रत्युक्तिभावेन विरोधरहितमन्योन्यभाषणं संलापः । इति परेऽपि । रहसि भाषणं संलापः । इति कौमुदी । मिथोऽन्योन्यं रहस्यपि । इति वक्ष्यति । समन्तालपनं संलापः प्रियादिकथा घञ् । यस्त्वालापः स तु केनापि क्रियते । इदन्तु परस्परभाषणमेवेति भेदः । इति भरतः ॥ "उक्तिप्रत्युक्तिमद्वाक्यं संलाप इति कीर्त्यते ।" इत्युज्ज्वलनीलमणिः ॥

संवत्, व्य, वत्सरः। इत्यमरः॥ अधुना विक्रमादित्यराजवत्सरः संवत् इति ख्यातः॥ (स्त्री भूमिविशेषः। यथा, वाजसनेयसंहितायाम्। ११। १२।

"धरिष्ठामनु संवतम्।"

"वन सम्भक्तौ संवन्यते सम्यगभज्यते फलरसार्थं सेव्यते इति संवत् संपूर्वस्य वनतेः क्विप्येतद्रूपम्। फलोत्पत्तियोग्या भूमिः संवत्। सा च पाषाणाद्यभावेनातिप्रशस्तत्वादतिरिष्ठेत्युच्यते।"इति तद्भाष्यम्॥*॥ संग्रामः। इति निघण्टुः।२।१७॥)

संवत्सरः,पुं, (संवसन्ति ऋतवो यत्र। सं+वस निवासे+"संपूर्वात् क्वित्।"उणा० ३। ७२। इति तसरन्।) वत्सरः। इत्यमरः॥ "संवसन्ति ऋतवो अत्र संवत्सरः। वस औ निवासे नाञ्नोति सरः सस्य तः। संवदति भावान् इति वदो रूपं वा।" इति भरतः॥ पञ्चविधवत्सरान्तर्गतप्रथमवत्सरः। यथा—

"प्रकाब्दात् पञ्चभिः शेषात् समाब्दादिषु वत्सराः।
संपरीदानुपूर्व्वाश्च तथोदापूर्वका मताः॥"

संवत्सरादिफलं विष्णुधर्म्मोत्तरे।

"संवत्सरे तथा दानं तिलस्य च महाफलम्।
परिपूर्वे तथा दानं यवानाञ्च द्विजोत्तमाः॥
इदापूर्व्वेऽब्दवस्त्राणां धान्यानाञ्चानुपूर्व्वके।
उदासंवत्सरे दानं रजतस्य महाफलम्॥
ज्योतिर्विदस्त्विज्यमध्यात् प्रभवादेश सम्भवम्।
ऊचुस्त्रहत् समाब्दादिवर्षाणामपि सम्भवम्॥"

इति मलमासतत्त्वम्॥

संवदनं, क्ली,(सं+वद्+ल्युट्।) आलोचनम्। वशीकरणम्। इति मेदिनी॥ (यथा, महाभारते। ३। २३२। ५७।

"एतज्ज्ञानामाहं कर्त्तुं भर्त्तुः संवदनं महत्।
असत्स्त्रीणां समाचारं नाहं कुर्य्यान्न कामये॥")

संवादः। इति हेमचन्द्रः॥

संवदना, स्त्री, संवदनम्। वशक्रिया। यथा। मन्त्रिमन्त्रौषधैर्वशीकरणं संवदनम्। संपूर्व्वो वदिर्वशीकरणे भावेऽनट्। संवदना चेति केचित्। करणेऽनटि वशक्रियासाधने मणिमन्त्रादावपि। जयश्चियः संवदनं यतस्तदिति रघुः। संचलनमिति पाठान्तरम् इत्यमरटीकायां भरतः॥

संवनं, क्ली, (सं+वन+ल्युट्।) संवदनम्। इत्यमरटीकायां रामाश्रमः॥ (यथा,कथासरित्सागरे। ३४। १६८।

"हृदयानुप्रवेशो हि प्रभोः संवनं महत्॥")

संवरं, क्ली, (सं+वृ+"ग्रहवृदृनिश्चिगमश्च।" २। ३। ५८। इति अप्।) जलम्। बौद्धव्रतविशेषः। इति केचित्॥ रभसे मकारमध्यपाठः। तत्र सम्बधातोररप्रत्ययेन निष्पन्नम्॥

संवरः, पुं, दैत्यविशेषः। मत्स्यविशेषः। हरिणविशेषः। इति केचित्॥ रभसकोषे सम्बर इति पाठः॥ (क्वचित् शम्बर इति च दृश्यते॥)

संवर्त्तः, पुं, (सं+वृत्+घञ्।) प्रलयः। इत्यमरः॥ (यथा, भागवते। ८। १५। २६।

"दहन्निव दिशो दिग्भिः संवर्त्ताग्निरिवोत्थितः॥")

मुनिविशेषः। (यथा, मार्कण्डेये। १३०। ११।

"ऋत्विक् तस्य तु संवर्त्तो बभूवाङ्गिरसः सुतः।
भ्राता बृहस्पतेर्विप्र महात्मा तपसां निधिः॥"

अयं हि धर्म्मशास्त्रप्रयोजकानामन्यतमः॥) कर्षफलवृक्षः। इति मेदिनी॥ मेघः। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १२०। ८०।

"शुश्रुवे सुमहान् शब्दः सवर्त्तनिनदो यथा॥")

मेघनायकविशेषः। तस्य विवरणं यथा,—

"त्रियुते शाकवर्षे तु चतुर्भिः शेषिते क्रमात्।
आवर्त्ते विधि संवर्त्तं पुष्करं द्रोणमम्बुदम्॥
आवर्त्तो निर्जलो मेघः संवर्त्तश्च वह्निदकः।
पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः॥"

इति ज्योतिस्तत्त्वम्॥

संपूर्व्वकान्तःस्थवकारादिवृतधातोः घञ्प्रत्ययेन निष्पन्नत्वादनुस्वारमध्यः। मकारमध्योऽप्ययम्॥

संवर्त्तकः, पुं, (संवर्त्तयतीति सं+वृत्+णिच् ण्वुल्।) बलदेवः। इति शब्दरत्नावली॥ बलदेवस्य लाङ्गलम्। बड़वानलः। इति हेमचन्द्रः॥ (यथा भागवते। १२। ४। ८।

"ततः संवर्त्तको वह्निः सङ्कर्षणमुखोत्थितः।
दहत्यनिलवेगोत्थः शून्यान् भूविवरानथ॥")

संवर्त्तकी, [न्] पुं, (संवर्त्तकोऽस्यास्तीति। इनिः।) बलदेवः। इति विकाण्डशेषः॥

संवर्त्तिः, स्त्री, (समाक्प्रकारेण वर्त्तते इति। सं+वृत्+"वृषिपिरुहीति।" उणा० ४। ११८। इति इन्।) संवर्त्तिका। इत्यमरटीकायां भरतः॥

संवर्त्तिका, स्त्री, पद्मस्य केशरसमीपस्थदलम्। इत्यमरः॥ पद्मादीनां जटिकाकारि नवदले इत्यन्ये। समाक् वर्त्तते वर्द्धते इति संवर्त्तिकाणकः। संवर्त्तयति वेष्टयतीति वा नाञ्नोति इप्रत्यये संवर्त्तिरपि। संवर्त्तिनवपत्रिकेति वोपालितः। पाच्छोणादीति ईपि संवर्त्ती च अतः स्वार्थे के संवर्त्तिका। सामान्यनूतनपत्रेऽपि संवर्त्तिकेति हेमचन्द्रः॥ दलमात्रे च संवर्त्तिकेति मधुः। कुर्व्वाणा समकोचयद्दशगतान्यम्भोजसंवर्त्तिकेति मुरारिः। इति भरतः॥

संवर्द्धकः, त्रि, (संवर्द्धयतीति। सं+वृध्+णिच्+ण्वुल्।)संवर्द्धनकारी। इति हेमचन्द्रः॥

संवर्द्धनं, क्ली, (सं+वृध्+ल्युट्।) समाग्वृद्धिः। सन्दीपनम्। संपूर्वबृधधातोरनट्प्रत्ययेन निष्पन्नम्॥)यथा,महाभारते।१।६३।१०१।

"पुरुषः स विभुः कर्त्ता सर्वभूतपितामहः।
धर्म्मसंवर्द्धनार्थाय प्रयत्नं तत्र कारयेत्॥"

क्रीड़नम्। यथा, रामायणे। १११। १०।

"नित्यञ्च प्रियवादेन तथा संवर्द्धनेन च॥"

"संवर्द्धनं क्रीड़नम्।" इति तट्टीका॥)

संवर्द्धितः, त्रि, (सं+वृध्+णिच्+क्तः।) समाग्वृद्धिविशिष्टः। यथा,—

"अथ प्रभावोपनतैः कुमारं
कल्पद्रुमोत्थैरवकौर्य्य पुष्पैः।
उवाच वाग्मी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः॥"

इति रघौ ५ सर्गः॥

संवलितः, त्रि, (सं+वल+क्तः।) मिश्रितः। एकत्रीकृतः। यथा। प्रकृतग्रन्थस्वरसंवलितस्यैव पाठस्य धर्त्तुमुचितत्वाद्रासावधारणं युक्तम्। इति पद्यताजागदीशी टीका॥

अन्यच्च।

"प्रतीयमानः प्रत्येकं प्रथमं हेतुरुच्यते।
ततः संवलितः सर्व्वो विभवादिः सचेतसाम्॥"

इति साहित्यदर्पणे ३ परिच्छेदः॥

संवसथः,पुं, (संवसत्यत्रेति। सं+वस+"उपसर्गे वसेः।" उणा० ३। ११४। इति अथः।) ग्रामः। इत्यमरः॥

संवहः, पुं, (संवहतीति। सं+वह+अच्। समवायुन्तर्गतप्रशस्तवायुः। स तु उद्वहवायोरुपरिष्टात्। इति सिद्धान्तशिरोमणिः॥ (यथा, महाभारते। १२। ३२८। ४२।

"चतुर्थः संवहो नाम वायुः स गिरिमर्द्दनः।
येन वेगवता रुग्णा रुक्षेणारुजता नगाः॥
वायुना सहिता मेघास्ते भवन्ति बलाहकाः।
दारुणोत्पातसंसारो नभसः स्तनयित्नुमान्॥")

संवाटिका, स्त्री, शृङ्गाटकः। इति जटाधरः॥

संवादः,पुं, (सं+वद्+घञ्।) सन्देशवाक्यम्। समाचार इति यावत्। तत्पर्य्यायः। वाचिकम्२ सन्देशः ३। इति जटाधरः॥ सन्देशवाक् ४। इत्यमरः॥ वाचिकं तद्भवेद्यत्र दूतत्वेनाभिधीयते। इति शब्दरत्नावली॥ (मिथःसम्भाषणम्। यथा, गीतायाम्। १८। ७०।

"अध्येष्यते च य इमं धर्म्मं संवादमावयोः।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥")

संवासः, पुं,(संवसन्त्यत्रेति। सं+वस्+घञ्।) गृहम्। इति शब्दरत्नावली॥ (यथा, हरिवंशे। ८५। १३।

"भयदो जनसंवासात्
यदि भाण्डान्यपनयेत् काकः॥")

पुरवासिनां विहारार्थं पुरमध्ये बहिर्व्वा अनाहतस्थानम्। तत्पर्य्यायः। मन्त्रिवेशः २ सन्निकर्षणम् ३। इति जटाधरः॥ (यथा, रामायणे। २। ४८। ४।

"मृगयन् वाचो मनुष्याणां ग्रामसंवासवासिनाम्।
राजानं धिक् दशरथं कामस्य वशमास्थितम्॥"

एकत्रावस्थानम्। यथा, मनुः। ८। २७३।

"ज्ञात्वया सह संवासे चाण्डाल्या तावदेव तु॥"

संवाहः, पुं, (संवाहतीति। सं+वह+णिच्+अच्।) अङ्गविमर्द्दकः। इति जटाधरः॥

(सप्राकारमुद्यानम्। इति नीलकण्ठः॥ यथा. महाभारते। ३। १६०। ३७।
"हारतोरणनिर्व्यूहध्वजसंबाधशोभिना॥"
सं+वह+घञ्। विमर्दनम्। यथा, मार्कण्डेये। १६। १५।
"तं तथा व्याधितं भार्या पतिं देवमिवार्च्चयत्।
पादाभ्यङ्गाङ्गसंवाहस्नानाच्छादनभोजनैः॥")
संवाहकः, त्रि, (संवाहयतीति। सं+वह+णिच्+ण्वुल्।) अङ्गमर्दकारकः। तत्पर्य्यायः। अङ्गमर्दकः। इति त्रिकाण्डशेषः॥ अङ्गमर्दः ३। इति हेमचन्द्रः॥ (यथा, कामन्दकीयनीतिसारे। १२। ४५।
"प्रसाधका भोजकाश्च गात्रसंवाहका अपि।
जलताम्बूलकुसुमगन्धभूषणदायकाः।
कर्त्तव्याश्च सदा क्षेते ये चान्येऽभ्यासवर्त्तिनः॥")
संवाहनं, क्ली, (सं+वह+णिच्+ल्युट्।) अङ्गमर्दनम्। (यथा, मार्कण्डेये। १०। ७४।
"तैलाभ्यङ्गो बान्धवानामङ्गसंवाहनञ्च यत्।
तेन चाप्याय्यते जन्तुर्यावन्ति सबान्धवः॥")
भारादिवहनम्। इति मेदिनी॥
संवित्तिः, स्त्री, (सं+विद्+क्तिन्।) प्रतिपत्तिः जनस्याविवादः। इति मेदिनी॥ चेतना। बुद्धिः। इति शब्दरत्नावली हेमचन्द्रश्च॥ (यथा, किराते। १६। ३२।
"छायां विनिर्द्धूय तमोमयीन्तां
तत्त्वस्य संवित्तिरिताप विद्याम॥"
अनुभवः। यथा तत्रैव। ११। ३४॥
"स्वस्थया सुखसंवित्तिः स्मरणीयाधुनातनी।
इति स्वप्नोपमान् मत्वा कामान् मागास्तदङ्गताम्॥")
संवित्, } स्त्री, (सं+विद्+क्विप्।) अङ्गी-
संविद्, } कारः। ज्ञानम्। (यथा, श्रीधरस्वामी।
"वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि।
यस्यास्ते हृदये संवित् तं नृसिंहमहं भजे॥"
मन्त्रभेदः। क्रियाकारः। युद्धम्। इत्यमरः॥ आचारः। (यथा, माघे। १२। ३५।
"ओजस्विवर्णोज्ज्वलहेमगात्रिणः
प्रमादिनोऽनुज्झितगोत्रसंविदः।
श्लोकानुपेन्द्रस्य पुरः स्म भूयसो
गुणान् समुद्दिश्य पठन्ति वन्दिनः॥")
सङ्केतः। (यथा, रघुः। ७। ३१।
"स राजलोकः कृतपूर्व्वसंवित्
आरभ्यसिद्धौ समयोपलभ्यम्।
आदास्यमानः प्रमदामिवं तत्
आहृत्य पत्यानमजस्य तस्थौ॥")
नाम। तोषणम्। इति मेदिनी॥ समाधिः। इति शब्दरत्नावली॥
संविदितः, त्रि, (सं+विद्+क्तः।) अङ्गीकृतः। इत्यमरः॥
संविषा, स्त्री, (सं सम्यक् विषो यत्र।) अतिविषा। इति शब्दचन्द्रिका॥

संवीक्षणं, क्ली, (सं+वि+ईक्ष+ल्युट्।) अन्वेषणम्। अपहृतवस्तुनस्तात्पर्य्येणान्वेषणम्। इत्यमरः॥ सम्यक्तात्पर्य्येण विविधप्रकारेरीक्षणं संवीक्षणं अनट्। इति भरतः॥
संवीतं, त्रि, (सं+व्ये+क्तः।) वृतम्। आवृतम्। इत्यमरः॥ (यथा, मनुः। ४। ४८।
"तिरस्कृत्योच्चरेत् काष्ठलोष्टपत्रतृणादिना।
नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः॥")
संवृतः, पुं, आवृतः। संपूर्व्ववृञ्धातोः क्तप्रत्ययेन निष्पन्नः॥
संवृत्तः, पुं, (सं+वृत्+क्तः।) वरुणः। इति शब्दमाला॥
संवृत्तिः, स्त्री, (सं+वृत्+क्तिन्।) सम्यक्प्रकारेण वर्त्तनम्। (यथा, कथासरित्सागरे। ५६। ४१४।
"इसता हृदि भीमभूभुजा
कृतसंवृत्तुपचारसत्क्रियः।
ऋतुपार्णनृपोऽपि तं नलं
प्रतिपूज्याथ जगाम कोशलान्॥")
आवरणम्। इति संपूर्व्वकवृतधातोः क्तिप्रत्ययेन निष्पन्ना॥ (देवीविशेषः। यथा, महाभारते। २। ११। ३८।
"संवृत्तिराशा नियतिः सृष्टिर्देवी रतिस्तथा।
एताश्चान्याश्च वै देव्य उपतस्थुः प्रजापतिम्॥")
संवेगः, पुं, (सं+विज+घञ्।) भयादिजनितत्वरा। इत्यमरः॥ (यथा, महाभारते। २। ७२। १४।
"अथ सभ्याः सभामध्ये समुच्छ्रितकरास्तदा।
ऊचुरुद्विग्नमनसः संवेगात् सर्व्व एव हि॥")
समाकवेगश्च॥ (यथा, राजतरङ्गिण्याम्। ४। ३६०।
"अभग्नशमसंवेगलब्धसिद्धिर्नराधिपः।
श्रीपर्वतादावद्यापि भव्यानामेति दृक्पथम्॥")
संवेदः, पुं, (सं+विद्+घञ्।) अनुभवः। तत्पर्य्यायः। वेदना२। इत्यमरः॥ इदे अनुभवे। विद ल मतौ घञ् संवेदः। ओपिथत्योति अने वेदना। न नित्युक्तेः क्लौ वेदनम्। तत्र विशेषेणापि सामान्यं बाध्यते न क्वचित् क्तौति अनट्। इति भरतः॥ (यथा, हरिवंशे। २०३। २३।
"संवेदजननी धात्री चेति मात्रा प्रचोदिता।
अनुतां तनुतां चैव जन्तूनां कर्म्मभोगिनाम्॥"
संवेशः, पुं, (सं+विश+घञ्।) निद्रा। इत्यमरः॥ (यथा, रघुः। ८३।
"अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम्।
सूनुः सूनृतवाक् सूतः विसस्रर्जोदितश्रियम्॥"
स्त्रीरतञ्च। इति मेदिनी॥ पीठः। इति हेमचन्द्रः॥ (उपभोगस्थानम्। इति स्वामी॥ यथा, भागवते। ३। २३। २०।
"विहारस्थानविश्रामसंवेशप्राङ्गणाजिरैः।
यथोपजोषं रचितैर्विस्मापनमिवात्मनः॥")

संवेशनं, क्ली, (सं+विश+ल्युट्।) रतिक्रिया। इति हेमचन्द्रः॥ (उपवेशनम्। यथा, भागवते। ५। ८। १०।
"शीतोष्णवातवर्षेषु ह्यध्वनाहृताङ्गः पीनः संहननाङ्गः स्थण्डिलमंवेशनामर्हनामञ्जनरजसा महामणिरिव *** विचचार॥")
संव्यानं, क्ली, (संवीयतेऽनेनेति+सं+व्य+ल्युट्।) उत्तरीयवस्त्रम्। इत्यमरः॥ (यथा, किराते। ४। २८।
"विपाण्डु संव्यानमिवानिलोद्धतं
निरुन्धतीः सप्तपलाशजं रजः॥")
वस्त्रम्। इति मेदिनी॥
संशप्तकः, पुं, समयात् संग्रामादनिवर्त्ती। इत्यमरः॥ समयात् कुलाचारात् शपथाद्वा संग्रामादनिवर्त्तिनोऽपराङ्मुखा अपलायमानायोद्धारस्ते संशप्तकाः। शपेर्भावे क्तेशप्तं सम्यक् सत्यं शप्तं येषां ते संशप्तकाः। इति भरतः॥ नारायणीसेनाविशेषः। इति महाभारतम्॥ (यथा, महाभारते। १। १। १८७।
"तदा शौण्डं चाप्सदीयान् महारथान्
व्यवस्थितानर्জ্জুनस्यान्तकाय।
संशप्तकान् निहतानर्জ্জুनेन
तदा नाशंसे विजयाय सञ्जय॥"
एतद्वधवृत्तान्तादिकं महाभारते द्रोणपर्व्वणि १७ अध्यायमारभ्य द्रष्टव्यम्॥)
संशयः, पुं, (सं+शी+अच्।) सन्देहः। इत्यमरः॥ तस्य लक्षणं यथा,—
"न सन्नयो भवेद्यत्र धीरेकत्वाभावभावयोः।
साधारणादिधर्म्मस्य ज्ञानं संशयकारणम्॥"
इति भाषापरिच्छेदः॥
"संशयं लक्षयति संशय इति। एकधर्म्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः। साधारणेति उभयसाधारणो यो धर्म्मस्तज्ज्ञानं संशयमाधनम्। यथा ऊर्द्धस्तरत्वं स्थाणुत्वसाधारणं ज्ञात्वा अयं स्थाणुर्न वेति सन्दिग्धे। एवमसाधारणज्ञानं संशयकारणम्। यथा शब्दत्वं नित्यानित्यत्वाभ्यां शब्दे गृहीत्वा शब्दो नित्यो न वेति सन्दिग्धे। विप्रतिपत्तिस्तु शब्दोऽनित्यो न वेति शब्दात्मिका न संशयकारणं शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वाभाव्यात्। किन्त्वत्र शब्देन कोटिद्वयज्ञानम् जन्यते संशयस्तु मानस एवेति। एवं ज्ञानेऽप्रामाण्यसंशयादिप्रयोजकसंशय इत्यादिकं बोध्यम्। किन्तु संशये धर्म्मिज्ञानं धर्म्मीन्द्रियसन्निकर्षो वा कारणमिति।" इति तर्कौका। सङ्क्षिप्तसारावली॥
संशयानः, त्रि, संशययुक्तः। संपूर्व्वशीङ्धातोः ज्ञानप्रत्ययेन निष्पन्नः॥
संशयापन्नमानसः, त्रि, (स संशयापन्नं मानसं यस्य यत्रेति वा।) संशयविषयः। संशययुक्तः।

तत्पर्य्यायः। सांशयिकः२। इत्यमरः॥ हे संशय विषये स्थाणवादौ। संशयमापन्नः सांशयिकः ष्ठिकः। संशयमापन्नं मानसं यस्य स तथा। संशयमापन्नं मानसं यस्य स तथेति षष्ठ्यन्तपदार्थत्वे संशयितरि पुष्पादावर्थे तच्छब्दस्यप्रवृत्तिः स्यात्। इति भरतः॥

संशयालुः, त्रि, संशयिता। इति हेमचन्द्रः॥

संशयिता, [तृ] त्रि, [सं + शी + तृच्।) संशयकर्त्ता। इति हेमचन्द्रः॥

संशरणं, क्ली, (सं + शृ + ल्युट्।) रणारम्भः। इति शब्दमाला॥ (संरक्षणम्। यथा, कामन्दकीये। ६। ४।

"लोकानुग्रहमन्विच्छन् शरीरमनुपालयेत्। राज्ञः संशरणं धाम शरीरं धर्म्मसाधनम्॥")

संशितं, त्रि, (सं + शो + क्तः।) सम्यक्सम्पादितम्। व्रतविषयकयत्नवान्। यथा संशितं व्रतम्। सम्यक् सम्पादितमित्यर्थः। संशितो ब्राह्मणः। व्रतविषयकयत्नवानित्यर्थः। इति सिद्धान्तकौमुदी॥

संशुद्धिः, स्त्री, (सं + शुध + क्तिन्।) सम्यक् शोधनम्। शरीरमार्জ্জনम्। यथा,—

सम्मार्জ্জनञ्च संशुद्धिः संशोधनविशोधने॥"

इति रत्नमाला॥

संशुष्कं, त्रि, शातपादिना संशोषितवस्तु। संपूर्व्वशुषधातोः क्तप्रत्ययेन निष्पन्नम्॥

संशोधनं, क्ली, (सं + शुध + ल्युट्।) संशुद्धिः। इति रत्नमाला॥

संशोधितं, त्रि (सं + शुध + क्तः।) शुद्धीकृतवस्तु। यथा,—

"ये लेपाः कुष्ठानां युज्यन्ते निर्गताम्बुदोषाणाम्
संशोधितशयानां सद्यः सिद्धिर्भवेत्तेषाम्॥"

इति मधुमती॥

संश्चत्, क्ली, (संचिनोति मायामिति। सं + चि + "सर्व्वधातुभ्यः इत्।" उणा० २। ८५। इति अतिप्रत्ययेन निपातनात् साधुः) कुहकः। इत्युणादिकोषः॥

संश्यानः, त्रि, (सं + श्यै + क्तः।) शीतेन सङ्कुचितः। इति मुग्धबोधव्याकरणम्॥

संश्रयः, पुं, (सं + श्रि + अच्।) आश्रयः। यथा,

स्तुता सुरैः पूर्व्वमभीष्टसंश्रया-
तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः॥"

इति मार्कण्डेयपुराणे देवीमोहात्मो५ अध्यायः॥ (आश्रयस्थानम्। यथा, रामायणे।२।४१।६।

"अद्यो निवेशनो राजा जीवलोकस्य संश्रयम्। धर्म्मं सत्यव्रतं रामं वनवासे प्रवत्स्यति॥")

संश्रवः, पुं, (सं + श्रु + अप्।) अङ्गीकारः। इत्यमरः॥ (समाक् श्रवणम्। यथा, महाभारते। १५। ३। ६।

"अथ भीमः सुहृन्मध्ये बाहुशब्दं तदाकरोत्। स श्रवे धृतराष्ट्रस्य गाम्भार्य्याश्चाप्यमर्षणः॥")

संश्रितः, त्रि, (सं + श्रि + क्तः।) आश्रितः। यथा,

"न प्राचीमप्रतः शम्भोर्नोदीचीं शक्तिमाश्रिताम्।
न प्रतीचीं यतः पृष्ठमतो दक्षं समाश्रयेत्॥"

इति तिथ्यादितत्त्वम्॥

संश्रुतः, त्रि, (सं + श्रु + क्तः।) अङ्गीकृतः। इत्यमरः॥ (यथा, रामायणे। ३। १०। ३६।

"मया चैतद्वचः श्रुत्वा कार्त्स्न्येन परिपालनम्। ऋषीणां दण्डकारण्ये संश्रुतं जनकात्मजे॥")

संश्लिष्टः, त्रि, आश्लिष्टः। मिलितः। स पूर्व्वश्लिषधातोः क्तप्रत्ययेन निष्पन्नः॥

संश्लेषः, पुं, (सं + श्लिष + घञ्।) आलिङ्गनम्। इत्यमरः॥ (यथा, महाभारते।१२।१३३।१७।

"संश्लेषञ्च परस्त्रीभिर्दूरतस्तानि वर्জयेत्॥")

मेलनम्॥ (यथा मार्कण्डेये। ३७। १५।

"अनन्तरेण संश्लेषमभ्येत्य तदनन्तरम्।
तेषामन्यतमैर्भृत्यैः समाक्रम्यानयद्गृहम्॥")

संश्वत्, क्ली, (सं + श्वि + अतिप्रत्ययेन निपातनात् सिद्धम्। "संपूर्व्वात् श्वयतेः संश्वदिति सुभूतिचन्द्रः।" इत्युणादिटीकायां उज्ज्वलदत्तः। २। ८५।) माया यथा,—

"संश्वत्तु कुहके क्लेयं संश्वत् तत्रैव ते समे।"

इत्युणादिकोषः॥

संसक्तः, त्रि, (सं + सञ्ज + क्तः।) सलग्नः। अव्यवहितः। इत्यमरः॥

संसक्तिः, स्त्री, संसक्तता। संपूर्व्वसञ्जधातोर्भावे क्तिन्प्रत्ययेन निष्पन्ना॥

संसत्, } स्त्री, (संसीदन्त्यस्यामिति। सं +
संसद् } सद् + क्विप्।) सभा। इत्यमरः॥ (यथा, रघुः। १६। २४।

"तदङ्गजं संसदि राजवृत्तं
प्रातर्द्विजेभ्यो नृपतिः शशंस॥")

संसरणं, क्ली, (सं + सृ गतौ + ल्युट्।) प्राणिजन्म। असंबाधसैन्यगमनम्। षण्टापथः। इत्यमरः॥ रणारम्भः। मेदिनी॥ गमनम्। इति शब्दरत्नावली॥ (संसारः। यथा, भागवते। १०। ४०। २८।

"पुंसो भवेदयर्हि संसरणापवर्गः
सत्यञ्जनाभ सदुपासनया मतिः स्यात्॥")

संसर्गः, पुं, (सं + सृज् + घञ्।) सम्बन्धः। स च समवायादिः। इति न्यायशास्त्रम्॥*॥ पापिष्ठान्त्यजादिभिः सर्गप्रायश्चित्तम्। यथा,—

"स्तेयादिना पतिता इत्युपक्रम्य उक्तम्। अज्ञानतो वत्सरेण पतितत्वम्।

"संवत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनादयौनादेकग्रयामनाशनात्॥"

इति हारीतवचनात्।

ज्ञानतो वत्सरात्तेनेति। तदसंसृष्टस्तदोषाभाव एव। [क्वचित्।"

"ब्राह्मणोऽपि पृथग्भूत्वा तत् पापं नाप्नुयात्

इति देवलवचनात्॥*॥

"यस्तस्य भुङ्क्ते पक्वान्नं क्वचित्तस्य निर्दिशेत्

गुप्तावभोजिनः पादमित्याह भगवान् मनुः॥
तस्याविज्ञातचण्डालसहितैकवेश्मस्थसङ्करीकरूपमूलपाककर्त्तुः द्वितीयसंसर्गिणः। तथा चापस्तम्बः।

"अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि।
स वै ज्ञात्वा तु कालेन कुर्य्यात्तस्य विशोधनम्॥
चान्द्रायणं पराको वा द्विजातीनां विशोधनम्।
प्राजापत्यस्तु शूद्राणां तथा संसर्गदूषणे॥
यैस्तत्र भुक्तं पक्वान्नं कृच्छ्रं तेषां विनिर्दिशेत्।
तेषामपि च यैर्भुक्तं तेषामर्द्धं विधीयते।
तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयते॥"

अत्र तृतीयसंसर्गिण एव प्रायश्चित्तदर्शनात् चतुर्थसंसर्गे दोषो नास्ति। प्रायश्चित्तविवेकोऽप्येवम्।" इति प्रायश्चित्ततत्त्वम्॥*॥ अथ संसर्गनिरूपणम्। तत्र महापातकिसंसर्गस्य पापहेतुत्वमाह मनुः।

"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥"

प्रायश्चित्तमपि दर्शितम्।

"एषां पापकृतामुक्ता चतुर्णामपि निष्कृतिः।
पतितैः संप्रयुक्तानामिमाः शृणुत निष्कृतीः॥
यो येन पतितेनैषां संसर्गं याति मानवः।
स तस्यैव व्रतं कुर्य्यात् तत्संसर्गविशुद्धये॥
प्रायश्चित्तीयतां प्राप्य दैवात् पापकृतेन वा।
न संसर्गं व्रजेत् सद्भिः प्रायश्चित्तेऽकृते द्विजः॥"

पापिष्ठसंसर्गी पातकी भवति इति कल्पान्तरश्रुतिः॥ विष्णुः। अथ येन पापात्मना सह संसृजेत् स तस्यैव प्रायश्चित्तं कुर्य्यात्। गौतमोऽप्याह।

ब्रह्महसुरापगुरुतल्पगपितृमातृयोनिसम्बन्धिस्तेनाभक्ष्यभक्षणनास्तिकनिन्दकनिन्दितकर्म्मात्मागिपतितात्याग्यपतितत्यागिनः पतिताः पातकसंप्रयोगाच्च तैश्चाब्दं समाचरन्। निपिष्टपतितसंसर्गात् पतनीति श्रुतिः कल्पा॥

के ते संसर्गप्रकारा इत्याह हारीतः।

"एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणम्।
याजनाध्यापनं योनिस्तथा च सहभोजनम्।
नवधा सङ्करः प्रोक्तो न कर्त्तव्योऽधमैः सह॥"

कात्यायनोऽपि।

"आलापात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात्।
सहशय्यासनाध्यायात् पापं संक्रमते नृणाम्॥"

यमः।

"दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति।
यो यस्यान्नमिहाश्नाति स तस्याश्नाति किल्बिषम्॥"

देवलः।

"पतितेन सहोषित्वा ज्ञानात् संवत्सरं नरः।
मित्रित्वस्तेन सोऽब्दान्ते स्वयञ्च पतितो भवेत्॥
याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम्।
कृत्वा सद्यः पतन्त्येते पतितेन न संशयः॥"

व्यासः।

"ब्रह्महा मद्यपः स्तेनो गुरुतल्पग एव च।

महापातकिनस्त्वेते यश्च तैः सह संवसेत् ॥
संवत्सरन्तु पतितैः संसर्गं कुरुते तु यः ।
यानशय्यासनैर्नित्यं जानन् स पतितो भवेत् ॥"
ननु द्वितीयतृतीयसंगिनि प्रमाणं नास्ति अतएव तद्भगातातपः ।
"अशुचिं संस्पृशेद्यस्तु एक एव स दुष्यति ।
तत्स्पृष्टान्यो न दुष्येत सर्व्वं द्रव्येष्वयं विधिः ॥"
तथा ।
"संहतानान्तु पात्राणां यथैकमुपहन्यते ।
तस्य तत् शोधनं प्रोक्तं न तु तत्स्पृष्टिनामपि॥"
उच्यते । यश्च येन पापात्मनेति यो येन संपिबेदिति संसर्गी येन संसर्गमिति विष्णुव्यासजाबालवचनैः सामान्येन पापिष्ठसंसर्गी पापी भवति इति प्रतिपादनात् संसर्गपापिष्ठस्यापि संसर्गी पापयुक्तो भवतीति एभिरेव प्रतिपादितम् ॥* पतितोत्पन्नानां ग्रहिमिच्छतां पतितानां प्रायश्चित्तस्य तृतीयो भागस्तत्प्रायश्चित्तं ग्रेयम् । स्त्री च पतितोत्पन्ना तृतीयभागस्य तृतीयभागं कुर्य्यात् । इति प्रायश्चित्तविवेकः ॥

संसर्गाभावः, पुं, (संसर्गेण सम्बन्धेन अवच्छिन्नोऽभावः ।) सम्बन्धरहितत्वम् । न्यायमते अभावपदार्थविशेषः । स तु भेदभिन्नाभावः । स च त्रिविधः । प्रागभावः १ ध्वंसः २ अन्यताभावः ३ । यथा,—
"अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥"
इति भाषापरिच्छेदः ॥*॥
भेदत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । विनाश्यभावत्वं प्रागभावत्वम् १ जन्याभावत्वं ध्वंसत्वम् २ नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम् ३ । इति सिद्धान्तमुक्तावली ॥

संसर्गि, [न्] (संसर्गोऽस्यास्तीति । इनिः । यद्वा, सं + सृज + "संसृजानुरुधेति ।"३ । २ । १४२ । इति घिणुन् ।) संसर्गविशिष्टः । यथा । विभागानन्तरं मैत्र्यात् पितृभ्रातृपितृव्यभ्रातृपुत्राणां यथायथं एकत्रावस्थानं संसर्गः । तद्युक्तः संसर्गी । एवम्भूतस्य संसर्गिणो मृतस्य धनं तज्जातस्यापत्यस्य तदपत्याभावे संसर्गी स्वयं गृह्णीयात् । इति दायतत्त्वम् ॥

संसर्पः, पुं, सम्यक्प्रकारेण गमनम् । सर्पादिगमनवद्गमनम् । संपूर्व्वसृपधातोर्घञ् प्रत्ययेन निष्पन्नः ॥

संसर्पी, [न्] त्रि, संसर्पशब्दादिन्प्रत्ययेन संपूर्व्वकसृपधातोर्णिन्प्रत्ययेन वा निष्पन्नः ॥ संसर्पविशिष्टः । सम्यग्गमनशीलः ॥ (यथा, रघुः । ७ । २६ ।
"कपोलसंसर्पिशिखः स तस्याः
मुहुर्त्तकर्णोत्पलतां प्रपेदे ॥")

संसारः, पुं, (संसरत्यस्मादिति । सं + सृ गतौ + घञ् ।) मिथ्याज्ञानजन्यवासना । इति नैयायिकाः ॥ यथा । संसारश्च मिथ्याधीप्रभवा वासना । इति प्रामाण्यवादगादाधरी टीप्पनी॥ स्वाष्टौपनिषदशरीरपरिग्रहः । इति कलापटीकायां गोपीनाथः ॥ संसरणम् । इति शब्दरत्नावली ॥ तत्पर्य्यायः । दुःखलोकः २ भवः ३ कष्टकारकः ४ । इति त्रिकाण्डशेषः ॥ अपिच।
"अस्माद्विजायते विश्वमत्रैव प्रविलीयते ।
अमायी मायया बद्धः करोति विविधास्तनूः ॥
न चाप्ययं संसरति न च संसारयेत् प्रभुः ।
नायं पृथ्वी न सलिलं न तेजः पवनो न तत् ॥
न प्राणो न मनो व्यक्तं न शब्दः स्पर्श एव च ।
न रूपरसगन्धाश्च नाहं कर्त्ता न वागपि ॥
न पाणिपादौ नो पायुर्न चोपस्थो द्विजोत्तमाः।
न कर्त्ता न च भोक्ता वा न च प्रकृतिपूरुषौ ॥
न माया नैव च प्राणश्चैतन्यं परमार्थतः ।
अहं कर्त्ता सुखी दुःखी कृशः स्थूलेति या मतिः
सा चाहङ्कारकर्त्तृत्वादात्मन्यारोप्यते जनैः ।
वदन्ति वेदविद्वांसः माच्छिन्नं प्रकृतेः परम् ॥
भोक्तारमक्षरं शुद्धं सर्व्वत्र समवस्थितम् ।
तस्मादज्ञानमूलोऽयं संसारः सर्व्वदेहिनाम् ॥"
इति कौर्म्मे ईश्वरगीतासु २ अध्यायः ॥
किञ्च ।
"पितृमातृसुहृद्भ्रातृकलत्रादिकृतेन च ।
दृष्टोऽसकृत्तथा दैन्यमश्रुपूर्णाननो गतः ॥
एवं संसारचक्रेऽस्मिन् भ्रमता तात सङ्कटे ।
ज्ञानमेतन्मया प्राप्तं मोक्षसंप्राप्तिकारकम् ॥"
इति मार्कण्डेयपुराणे पितापुत्रसंवादनामाध्यायः ॥

संसारगुरुः, पुं, (संसारस्य गुरुः ।) कामदेवः । इति त्रिकाण्डशेषः ॥ जगद्गुरुश्च ॥

संसारमार्गः, पुं, (संसारस्य मार्गः ।) योनिः । इति त्रिकाण्डशेषः ॥

संसारमोचनं, त्रि, (संसारस्य मोचनं यस्मात् ।) भवतारकम् । यथा,—
"एवमेतन्महाशास्त्रं देवि । संसारमोचनम् ।
मम भक्तव्यवस्थायै प्रयुक्तं परमं मया ॥"
इति वाराहे सुतस्वामिमाहात्म्यनामाध्यायः॥*

(संसारस्य मोचनम् ।) भवमोचने, क्लौ । तदुपाया यथा,—
बलिरुवाच ।
"संसारार्णवमग्नानां नराणामन्यचेतसाम् ।
तरणे यो भवेत् पोतस्तन्मे व्याख्यातुमर्हसि ॥
प्रह्लाद उवाच ।
ये शङ्खचक्राङ्कधरं तु शार्ङ्गिणं
खगेन्द्रकेतुं वरदं श्रियः पतिम् ।
समाश्रयन्ते भवभीतिनाशनं
संसारगर्त्ते न पतन्ति ते पुनः ॥
वैकुण्ठं खगपरशुं भवबन्धसमुच्छिदम् ।
प्रणिपत्य महात्मानं संसारे न पुनर्भवेत् ॥
ध्यायेत् दामोदरं यस्तु भक्तिनम्रोऽर्च्चयेत वा ।
न स संसारगर्त्तेऽस्मिन् मज्जते दानवेश्वर ।॥

संसृष्टः

ये मानवा विगतरागपरावरज्ञा
नारायणं सुरगुरुं सततं स्मरन्ति ।
ते धौतपाण्डरपटा इव राजहंसाः
संसारसागरजलस्य तरन्ति पारम् ॥"
इति वामने ९० अध्यायः ॥

संसारी, [न्] पुं, (संसारोऽस्त्यस्येति । इनिः ।) संसारविशिष्टप्राणी । इति हलायुधः ॥ शरीरी। यथा । संसारिणामिति संसारित्वं शरीरित्वम् । शरीरित्वञ्च भोगावच्छेदकत्वं न तु चेष्टावत्त्वम् । अतईश्वरपरिग्रहीतरामकृष्णादिशरीरव्युदासः मिथ्याज्ञानजन्यवासनाया अदृष्टस्य वा न संसारपदेन विवक्षासम्भवः । इति बौडाधिकारस्य गादाधरी टिप्पनी ॥

संसिद्धिः, स्त्री, (स + सिध + क्तिन् ।) प्रकृतिः । स्वभावः । इत्यमरः ॥ सम्यक्सिद्धिः । मदीया । इति मेदिनी ॥ परमा सिद्धिः । मोक्षः । यथा,
"मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥"
इति श्रीभगवद्गीतायां ८ अध्यायै १५ श्लोकः ॥
(फलम् । इति स्वामी ॥ यथा, भागवते । १ । २ । १३ ।
"अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ।
स्वनुष्ठितस्य धर्म्मस्य संसिद्धिर्हरितोषणम् ॥")

संसृतिः, स्त्री, (सं + सृ + क्तिन् ।) संसारः ॥ इति शब्दरत्नावली ॥ (यथा, भागवते । १ । १ । १४ ।
"आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ।
ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम् ॥")
प्रवाहः । इति त्रिकाण्डशेषः ॥

संसृष्टः, त्रि, (सं + सृज + क्तः ।) संसर्गः । वमनादिना संशुद्धः । इति मेदिनीकरहेमचन्द्रौ ॥ विभागानन्तरं मैत्र्यात् पितृभ्रातृपितृव्यभ्रातृपुत्राणां यथायथं एकत्रावस्थानं संसर्गस्तद्युक्तः । अथ संसृष्टधनविभागः । एकपितृजातयोरपि सोदरविमातृजयोर्मृतदेयषट्पुरुषपिण्डदातृत्वेन सोदरस्यैव धनाधिकारो न तु पित्रादित्रयमात्रपिण्डदातुर्विमातृजस्य । क्वचित्तु संसृष्टत्वेन विमातृजस्याप्यसंसृष्टसोदरेण सह तुल्याधिकारिता सोदरस्य संसृष्टत्वेन एव ग्रहीयात्र संसृष्यपि विमातृज इति। तथा च याज्ञवल्क्यः ।
"संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ।
दद्याच्चापहरेदंशं जातस्य च मृतस्य च ॥
अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत् ।
असंसृष्यपि चादद्यात् संसृष्टी नान्यमातृजः ॥"
संसृष्टिनमाह बृहस्पतिः ।
"विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र
संस्थितः ।
पित्र्येणाथवा प्रीत्या स तु संसृष्ट उच्यते ॥"
तेन विभागानन्तरं मैत्र्यात् पितृभ्रातृपितृव्यभ्रातृपुत्राणां यथायथं एकत्रावस्थानं संसर्गः तद्युक्तः संसर्गी । एवम्भूतस्य संसर्गिणो मृतस्य

धनं तज्जातस्यापत्यस्य तदपत्याभावे संसर्गी स्वयं गृह्णीयात्। एवं सोदरस्य तु सोदरः ॥*॥ ततश्च संसृष्टिनस्तु संसृष्टीत्येतद्वचनं तुल्यरूपसम्बन्धिसंसर्गकृतविशेषप्रतिपत्त्यर्थं तेन सोदराणां सापत्नानां भ्रातृपुत्राणां पितृव्याणां तुल्यानां सद्भावे संसर्गी गृह्णीयात् याज्ञवल्क्यादविशेषश्रुतेः। पूर्ववचने सर्व्वेषामेव प्रकृतत्वात् सर्व्वेषु चाक्षेपासम्भवात्। अतो न भ्रातृमात्रविषयमिदं वचनमिति जीमूतवाहनः ॥ सोदरे त्वसंसृष्टिनि संसृष्टिन्यसोदरे च सति कतरस्तावत् गृह्णीयात्। एवंसोदरासोदरयोः संसृष्टयोः सद्भावे कतर इत्यत्र प्रथमतः आह अन्योदर्य्यस्त्विति। अन्योदर्य्यः पुनः संसृष्टी मन् गृह्णीयात् नान्योदर्य्यमात्रः किन्तु असंसृष्टापि पूर्ववचनस्थसोदरपदानुषङ्गात् प्राप्तः सोदरश्च गृह्णीयात्। तेन एकत्र विषये पूर्ववचनोक्तसंसृष्टत्वसोदरत्वयोरेकतरस्तुल्यत्वादुभयोर्विभज्य ग्रहणम्। तदुभयसत्त्वे च असोदर्य्यस्यासंसृष्टिनोऽनुरूपत्वात् नेति। द्वितीये आह संसृष्टी नान्यमात्रजः इति। सोदरे संसृष्टिनि सति अन्यमात्रजः संसृष्यपि न गृह्णीयात्। अर्थात्तत्र संसृष्टी सोदर एव गृह्णीयात्। संसृष्टत्वाविशेषेऽपि सोदरत्वेन तस्य बलवत्त्वात्। दायभागकारास्तु अन्योदर्य्यस्तु संसृष्टी सन् सत्यपि सोदरेऽसंसृष्टिनि धनं हरेत् नान्योदर्य्यः संसृष्टापि गृह्णीयादिति पूर्व्वार्द्धस्यार्थः। तत्र किं सोदरस्यदानीं न गृह्णीयादेवेत्यपेक्षायामुत्तरार्द्धोक्तं असंसृष्टापि चादद्यात् सोदर इत्यनुषज्यते न संसृष्टीऽन्यमात्रजः केवलः। किन्तु उभाभ्यामेव विभज्य ग्रहीतव्यमित्याहुः। मिताक्षरादयोऽप्येवम्। याज्ञवल्क्यदीपकलिकायां शूलपाणिमहामहोपाध्यायस्तु। अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्। असंसृष्यपि सोदर एव गृह्णीयात् न तु संसृष्टः सापत्नो भ्राता। संसृष्ट इति गर्भसंसृष्टः सोदर इति केचित्। नान्योदर्य्यो धनं हरेत् इति पाठे अन्योदर्य्यः सन् धनं न गृह्णीयात् इति व्याख्या असंसृष्टसोदरस्याधिकारार्थमिदं वचनमतो न पुनरुक्तिरित्याहुः। रत्नाकरप्रभृतयस्तु कल्पतरौ नान्योदर्य्यो धनं हरेदिति पाठो दृश्यते स मूलभूतयाज्ञवल्क्यमिताक्षरापारिजातहलायुधग्रन्थेषु नान्योदर्य्यो धनं हरेदिति पाठदर्शनात् तदनुसारव्याख्यादर्शनाच्च लिपिकरप्रमाद इत्याहुः। इति दायतत्त्वम् ॥

संसृष्टत्व, क्ली, (संसृष्ट+त्व।) संसृष्टस्य भावः। यथा। तेन एकत्र विषये पूर्ववचनोक्तसंसृष्टत्वसोदरत्वयोरेकतरस्तुल्यत्वादुभयोर्विभज्य ग्रहणम्। इति दायतत्त्वम् ॥

संसृष्टी, [न्] पुं, संसृष्टं संसृष्टत्वमस्यास्तीति। इनिः।) संसृष्टत्वविशिष्टः। यथा, याज्ञवल्क्यः ॥

"संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः।
दद्याच्चापहरेदंशं जातस्य च मृतस्य च ॥
अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्।
असंसृष्टापि चादद्यात् संसृष्टी नान्यमातृजः॥"

इति दायतत्त्वम् ॥

संस्कारः, पुं, (सं+कृ+घञ्।) प्रतियत्नः। अनुभवः। मानसकर्म्म इति मेदिनी ॥ न्यायमते गुणविशेषः। स च त्रिविधः। वेगाख्यसंस्कारः १ अयं मूर्त्तपदार्थस्थायी। क्वचिद्गुरुत्वजन्यः क्वचित्कर्म्मजन्यश्च। स्थितिस्थापकसंस्कारः २ अयं पृथिवीगुणः केषाञ्चिन्मते पृथिव्यादिचतुःपदार्थगुणः। अयं अतीन्द्रियः स्पर्शनकारणञ्च। भावनाख्यसंस्कारः ३ अयं आत्मनः अतीन्द्रियगुणः। उपेक्षानात्मकनिश्चयजन्यः। अयं स्मरणप्रत्यभिज्ञयोः कारणञ्च ॥*॥ अस्य प्रमाणम्।

"संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने।
मूर्त्तमात्रे तु वेगः स्यात् कर्म्मजो वेगजः क्वचित्॥
स्थितिस्थापकसंस्कारः क्षितौ कैश्चित्तुर्ध्वपि।
अतीन्द्रियः स विज्ञेयः क्वचित् स्पर्शेऽपि कारणम् ॥
भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ॥
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ॥"

इति भाषापरिच्छेदः ॥*॥

शुद्धिः अदृष्टविशेषजनककर्म्म। यथा। यद्यग्निस्थापनान्तरं कर्म्मकाले दृष्टादिशङ्कया संस्कृतामग्निरन्यत्रानीयते तदा पुनर्भूसंस्कारः कर्त्तव्यः। संमुह्य उपलिप्य उल्लिख्य उद्धृत्य अभ्युक्षेत् एष संस्कारोऽनुगतोऽग्नौ भूयः। इति गृह्यान्तरात्। इति संस्कारतत्त्वम् ॥*॥

दशविधसंस्कारा यथा। विवाहः १ गर्भाधानम् २ पुंसवनम् ३ सीमन्तोन्नयनम् ४ जातकर्म्म ५ नामकरणम् ६ अन्नप्राशनम् ७ चूड़ाकरणम् ८ उपनयनम् ९ समावर्त्तनम्१०। यथा हारीतः। गर्भाधानवदुपेतो ब्रह्मगर्भं सन्दधाति पुंसवनात् पुंसोकरोति फलस्थापनात् मातापित्रज पाषानमपोहति रेतोरक्तगर्भोपघातः पञ्चगुणो जातकर्म्मणा प्रथममपोहति नामकरणेन द्वितीयं प्राशनेन तृतीयं चूड़ाकरणेन चतुर्थं स्नापनेन पञ्चमं एतैरष्टाभिः संस्कारैर्गर्भोपघातात् पूतो भवतीति। स्नानमत्र समावर्त्तनरूपमिति कल्पतरुः। इति संस्कारतत्त्वम् ॥*॥ याज्ञवल्क्यः।

"गर्भाधानसृतौ पुंसः सवनं स्पन्दनात् पुरा।
षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च ॥
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः।
षष्ठेऽन्नप्राशनं मासि चूड़ा कार्य्या यथाकुलम्॥
एवमेनः शमं याति बीजगर्भसमुद्भवम् ॥"

इति मलमासतत्त्वम् ॥*॥

संस्कृतानामधिकारमाह याज्ञवल्क्यः।

"असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्व्वसंस्कृतैः
भगिन्यश्च निजादंशाद्दत्त्वांशन्तु तुरीयकम् ॥"

असंस्कृता भ्रातरो भगिन्यश्च पूर्वसंस्कृतैरुपनीतैः। अन्यथा मन्त्रपाठानधिकारापत्तेरित्युद्वाहतत्त्वम् ॥ एषां विवरणं तत्तच्छब्दे द्रष्टव्यम्। गरुड़पुराणोक्तसंस्कारास्तत्रैव ८३। ८४। ८५ अध्यायेषु द्रष्टव्याः ॥ * ॥

अथ जीर्णदेवगृहादिसंस्कारफलम्।

"अथ चेज्जीर्णसंस्कारविधिः पुण्यो महामुने!
देवतादिषु कर्त्तव्यो महाभोगफलेप्सुभिः ॥
मूलादष्टगुणं पुण्यं जीर्णसंस्करतो भवेत्।
तस्मादनाथजीर्णेषु कार्य्यं संस्करणं सुने!॥
स्वकीयं परकीयं वा यथाविभवविस्तरैः ॥
स्वतो वा परतो वाद्य यस्तु संस्कुरुते सुरान्।
स यावच्चन्द्रसूर्य्यौ गौस्तावत्कालं सुखी-
भवेत् ॥
लोकेषु तेषु देवानां विरजस्केषु दृष्टधीः।
यथा गोमेधयज्ञेषु पशुरोमसमाः समाः ॥
वसते दिवि दृष्टात्मा जीर्णसंस्कारकारकः।
अनाथा वा सनाथा वा पूजनीयाः सदा सुराः ॥

इति देवीपुराणे पूजाविधिनामाध्यायः ॥

संस्कारजः, त्रि, संस्कारेण जातः। संस्कारशब्दपूर्वकजनधातोर्डप्रत्ययेन निष्पन्नः ॥

संस्कारवर्জ্জितः, पुं, (संस्कारेण जातः।)उपनयनसंस्कारहीनः। तत्पर्य्यायः। व्रात्यः २। इति हेमचन्द्रः ॥ दशसंस्कारहीने, त्रि ॥

संस्कारहीनः, पुं, (संस्कारहीनः।) व्रात्यः। इत्यमरः ॥ संस्कारहीनत्वकालमाह। यमः।

"पतिता यस्य सावित्री दशवर्षाणि पञ्च च।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः।
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः ॥"

तथा मार्कण्डेयः।

"विप्रस्य षोड़शाद्वर्षात् राज्ञो द्वाविंशतेः परम।
वैश्यस्याष्टाधिकादब्दात् सावित्रीपतनं भवेत्॥"

विष्णुधर्म्मोत्तरे।

"षोड़शाब्दा हि विप्रस्य राजन्यस्य द्विविंशतिः।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता ॥
सावित्री नातिरिर्च्यंत अत ऊर्द्धं निवर्त्तते ॥"

इति मलमासतत्त्वम् ॥

संस्कृतं, क्ली, (सं+कृ+क्तः।) लक्षणोपेतम्। इति मेदिनी ॥ पाणिन्यादिकृतव्याकरणसूत्रेण उपेत उपगतो लक्षणोपेतः साधुशब्दः। इत्यमरटीकायां भरतः ॥ स तु दैववाणी। यथा,

"गोर्व्वाणवाणीवदनं मुकुन्द-
संकीर्त्तनश्लेत्युभयं हि लोके।
सुदुर्लभं तच्च न मुग्धबोधा-
त्र लभ्यतेऽतः पठनीयमेतत् ॥"

इति मुग्धबोधव्याकरणप्रशंसाश्लोकः ॥

संस्कृतः, त्रि,(स+कृ+क्तः।) कृत्रिमः। इत्यमरः ॥ करणेन निर्वृत्तः कृत्रिमो घटादिः। इति भरतः ॥ पक्वः। स्वतो गुणान्तराधानम्।

इत्यमरटीकायां स्वामी ॥ ग्रस्तः । भूषितः । इति मेदिनी ॥ शोधितः । इति जटाधरः ॥ (यथा, देवीभागवते । १ । २ । ११ ।
"पुराणमुत्तमं पुण्यं श्रीमद्भागवताभिधम् ।
अष्टादशसहस्राणि श्लोकास्तत्र तु संस्कृताः॥")
संस्क्रिया, स्त्री, (सं+कृ+"कृञः श्यच ।" ३ । ३ । १०० । इति यः ।) श्यदाहादिक्रिया । इति त्रिकाण्डशेषः ॥ संस्कारश्च ॥
संस्तरः, पुं, (संस्तीर्य्यते इति । सं+स्तृ+अप् ।) शय्या । यज्ञः । इति हेमचन्द्रः ॥ पल्लवादिरचितशय्या । इति शब्दरत्नावली ॥ (यथा, रघुः । ८ । ५७ ।
"नवपल्लवसंस्तरेऽपि ते
मृदु दूयेत यदङ्गमर्पितम् ।
तदिदं विषहिष्यते कथं
वद वामोरु चिताधिरोहणम् ॥")
संस्तवः, पुं, (सं+स्तु+अप् ।) परिचयः । इत्यमरः ॥ (यथा, किराते । ४ । २५ ।
"विहाय वाञ्छामुदिते मदात्यया-
दरक्तकण्ठस्य रुते शिखण्डिनः ।
श्रुतिः श्रयत्युन्मदहंसनिःस्वनं
गुणाः प्रियत्वेऽधिकृता न संस्तवः ॥")
सम्यक्स्तुतिश्च ॥ (यथा, भागवते ।११।१३।१४।
"इति मे छिन्नसन्देहा मुनयः सनकादयः ।
सभाजयित्वा परया भक्त्या गृणत संस्तवैः ॥")
संस्तवानः, त्रि, (संस्तवीतीति । सं+स्तु+"सम्यानच् स्तुवः ।" उणा० ३ । ८८ । इति आनच् ।) सङ्गता । इत्यादिकोषः ॥ वाग्मी । उद्गाता । हर्षः । इति संक्षिप्तसारोणादिवृत्तिः॥
संस्तावः, पुं, (समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगा इति । सम्+स्तु+"यज्ञे समि स्तुवः ।" ३ । ३ । ३१ । इति घञ् ।) क्रतुषु द्विजन्मनां स्तुतिभूमिः । इत्यमरः ॥ यज्ञेषु स्तुतिकारिणां ब्राह्मणानां अवस्थानभूमिः संस्ताव उच्यते । क्रतुषु यज्ञविषयेषु द्विजानां या स्तुतिभूमिः स्थानं स संस्ताव इत्यन्वयः । समेत्य-स्तूयते छन्दोगरत्र इति संस्तावः घञ् । इति भरतः ॥
संस्तुतः, त्रि, (सं+स्तु+क्तः ।) सम्यक्प्रकारेण स्तुतिप्राप्तः । सम्यक्स्तवविषयीभूतः । यथा,—
"भूयश्च शतवार्षिक्यामनाहृष्टामनञ्जसि ।
मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा॥"
इति देवीमाहात्म्यम् ॥
संस्थायः, पुं, (सं+स्थै+घञ् । आतो युक् ।) सघातः । सन्निवेशः । इत्यमरः ॥ संस्थानम् । विस्तृतिः । इति मेदिनी ॥ गृहम् । इति हेमचन्द्रः ॥
संस्थः, पुं, (संतिष्ठते स्वपरराष्ट्रेषु इति । सं+स्था+कः ।) चरः । इति मेदिनी ॥ निजराष्ट्रकः इति हेमचन्द्रः ॥ (यथा, कामन्दकीये । १२ । ३६ ।
"सस्याः स्युश्चारसस्थित्यै दत्तदायाः शुभाशयाः ॥")

संस्थः, त्रि, (संतिष्ठते इति । सं+स्था+कः ।) अवस्थितः । इति मेदिनी ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ८ । ६६ ।
"यदा मे मरणं भूयात् तदा मा भूत् स्मृतिभ्रमः ।
दिने दिने च यच्चित्तं त्वयि संस्थं भवत्विति ॥")
मृतः । इति शब्दरत्नावली ॥
संस्था, स्त्री, (संतिष्ठतेऽनयेति । सं+स्था+अङ् ।) न्याय्यपथस्थितिः । इत्यमरः ॥ सन्तिष्ठतेऽनया सम्यगवस्थानं वा संस्था । इति भरतः ॥ अस्याः पर्य्यायो मर्य्यादाशब्दे द्रष्टव्यः॥ (यथा, उपदेशशतके । ८० ।
"अपि शक्रः परिहर्त्तुं ययातिशापं हरिर्हते कंसे ।
राजासनं न भेजे पुरातनीं पालयेत् संस्थाम्॥"
प्रतिज्ञा । यथा, रघुः । ११ । ३८ ।
"तस्य वीक्ष्य ललितं वपुः शिशोः
पार्थिवः प्रथितवंशजन्मनः ।
स्वं विचिन्त्य च धनुर्दुरानमं
पीड़ितो दुहितृशुल्कसंस्थया ॥")
स्थितिः साहश्यम् । नाशः । इति मेदिनी ॥ व्यवस्था । (यथा, मनुः । १ । २१ ।
"सर्व्वेषान्तु स नामानि कर्म्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥")
व्यक्तिः । क्रतुभेदः । (यथा, भागवते । १० । २३ । ८ ।
"दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः ।
अन्यत्र दीक्षितस्यापि नान्नमश्नन् हि दुष्यति॥"
समाप्तिः । इति हेमचन्द्रः ॥ प्रलयश्चतुष्टयम् । यथा,—
"नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ।
संस्थेति कविभिः प्रोक्तश्चतुर्धास्य प्रभावतः ॥"
इति पुराणम् ॥
संस्थानं, क्ली, (सं+स्था+ल्युट् ।) सन्निवेशः । (यथा, मनुः । ८ । ३७१ ।
"भर्त्तारं लङ्घयेत् या तु स्त्रीज्ञातिगुणदर्पिता ।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते॥")
चतुष्पथः । इत्यमरः ॥ आकृतिः । मृत्युः । इति मेदिनी ॥ चिह्नम् । इत्यजयपालः॥ सम्यक्स्थितिश्च ॥ (व्यवस्था । यथा, भागवते । ३ । ९ । २७ ।
"लोकसंस्थानविज्ञान आत्मानं परिखिद्यतः ।
तामाहागाधया वाचा कश्मलं शमयन्निव ॥")
संस्थापनं, क्ली, (स+स्था+णिच्+ल्युट् ।) सम्यक्स्थितिप्रापणम् । स्थिरीकरणम् । यथा,
"परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय संभवामि युगे युगे ॥"
इति भगवद्गीतायाम् ३ अध्यायः ॥
"साधुरक्षणेन दुष्टवधेन च धर्म्मं स्थिरीकर्त्तुम् ।"
इति तट्टीकायां श्रीधरस्वामी ॥

संस्थितः, त्रि, (स+स्था+क्तः ।) मृतः । इत्यमरः ॥ (यथा, मनुः । ८ । १९० ।
"संस्थितस्यापत्यस्य सगोत्रात् पुत्रमाहरेत् ।
यत्र यत्कथजातं स्यात् तत्तस्मिन् प्रतिपादयेत् ॥")
सम्यक्स्थितिविशिष्टश्च ॥ (यथा,कौर्म्मे ।१।२१।
"इदन्तु पञ्चदशमं पुराणं कौर्म्ममुत्तमम् ।
चतुर्द्धासंस्थितं पुण्यं संहितानां प्रभेदतः ॥"
संस्थितिः, स्त्री, (सं+स्था+क्तिन् ।) संस्थानम् । (यथा, मनुः । ६ । ८० ।
"यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्॥"
मृत्युः । गृहम् । इति केचित् ॥
संस्पर्शः, पुं, (सं+स्पृश+घञ् ।) सम्यक्स्पर्शः । स तु त्वगिन्द्रियग्राह्यगुणविशेषः । यथा, छागलेयः ।
"आलापात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात् ।
सहशय्यासनाध्यायात् पापं संक्रमते नृणाम् ॥"
इति प्रायश्चित्तविवेकः ॥
संस्पर्शा, स्त्री, (संस्पृश्यतेऽसौ इति । सं+स्पृश+कर्म्मणि घञ् । टाप् ।) जनीनामगम्यद्रव्यम् । इत्यमरः ॥
संस्फालः, पुं, (सम्यक् स्फालः स्फुरणं यस्य ।) मेषः । इति त्रिकाण्डशेषः ॥
संस्फुटः, त्रि, (संस्फुटतीति । सं+स्फुट+इगुपधेति कः ।)विकसितः । इति शब्दरत्नावली॥
संस्फेटः, पुं, (सं+स्फिट अनादरे+अधिकरणे घञ् ।) युद्धम् । इत्यमरटीकायां भरतः ॥
संस्फोटः, पुं,(संस्फोटयतीति । सं+स्फुट् भेदने+घञ् ।) युद्धम् । इत्यमरः ॥
संस्मरणं, क्ली, (सं+स्मृ+ल्युट् ।) संस्मृतिः । संस्कारजन्यज्ञानम् । यथा, योगियाज्ञवल्क्यः ।
"ध्यायेन्नारायणं नित्यं स्नानादिषु च कर्म्मसु ।
तद्विष्णोरिति मन्त्रेण स्नायादप्सु पुनः पुनः ॥
गायत्री वैष्णवी ह्येषा विष्णोः संस्मरणाय वै"
इति तिथ्यादितत्त्वम् ॥
संस्मृतिः, स्त्री, संस्मरणम् । संपूर्वस्मृधातोः क्तिन्प्रत्ययेन निष्पन्ना ॥ (यथा, कथासरित्सागरे । ५५ । २०६ ।
"तच्छ्रुत्वा संस्मृतिं लब्ध्वा स राजा प्रत्युवाच तम् ॥")
संहतः, त्रि, (सं+हन+क्तः ।) दृढ़सान्द्रः । इत्यमरः ॥ मिलितः । दृढ़ः । इति मेदिनीकरहेमचन्द्रौ ॥ सम्यक्प्रकारेण हतश्च ॥
संहतजानुः, त्रि, (संहते जानुनी यस्य ।) सन्नजानुकः । यथा,—
"प्रभुः प्रगतजानुः स्यात् प्रभोऽधश्च च दृश्यते ।
संभुः संहतजानुश्च भवेत् संभोऽपि तत्र हि ।
जर्हृभुरूर्द्धजानुः स्यादूर्द्धभोऽप्यूर्द्धजानुकः ॥"
इति भरतधृतसाहसाङ्कः ॥

संहतजानुकः, त्रि, (संहतजानुरेव। स्वार्थे कन्।) लग्नजानुकः। तत्पर्य्यायः। संभृः २। इत्यमरः॥ संहतजानुः ३ संभ्रः ४। इति तट्टीकायां भरतः॥

संहतलः, पुं, (संहतं परस्परयोर्मेलनं लातीति। ला + कः।) मिलितपाणिद्वयम्। इत्यमरः॥ द्वौ वामदक्षिणौ प्रतलौ संहतौ मिलितौ संहतल उच्यते। प्रतलद्वयं मिलितं संहतलः। स्यादित्यर्थः। संहतं लाति संहतलः। डनजनादिति डः। निर्विसर्गपाठे द्वौ वामदक्षिणौ पाणी संहतौ मिलितौ स्यातां तदा संहतलप्रतलावुच्येते। अस्मिन्नर्थे प्रतलोऽयं चपेटे संहतले च वर्त्तमानत्वात् नानार्थः। इति भरतः॥

संहतिः, स्त्री, (सं + हत + क्तिन्।) समूहः। इत्यमरः॥ (यथा, हितोपदेशे।
"अल्पानामपि वस्तूनां संहतिः कार्य्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥")

संहननं, क्ली, संहन्यते इति। सं + हन + ल्युट्।) शरीरम्। इत्यमरः॥ (यथा, भागवते। ५। २। २१।
"आग्नीध्रसुतास्ते मातरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामसि यावद्विभागं जम्बूद्वीपवर्षाणि बुभुजुः।"
सम्यग्घातनञ्च॥ (कठिनं, त्रि। यथा, भागवते। ५। ८। १०।
"शीतोष्णवातवर्षेषु दृष इवानाधृताङ्गः पीनसंहननाङ्गः * * * विचचार॥" "संहन्यन्ते निविड़ीभवन्ति अङ्गानि यस्य। कठिनावयव इत्यर्थः॥" इति तट्टीकायां स्वामी॥)

संहराख्यः, पुं, (संहर इति आख्या यस्य।) पावकनामाग्निः। इति मत्स्यपुराणम्॥

संहर्षः, पुं, (सं + हृष + घञ्।) प्रमोदः। हर्षः। (यथा, महाभारते। ३। २१८। २४।
"संहर्षाद्दारयन् क्रोधं धन्वी सज्वी रथस्थितः।
समरे नाशयेत् शत्रूनमोघो नाम पावकः॥"
वायुः। इति विश्वमेदिन्यौ॥ (लोमहर्षः। यथा, सुश्रुते। ६। ६।
"दाहसंहर्षतास्वेदशोकनिस्तोदगौरवैः॥")

संहवनं, क्ली, सम्यक्प्रकारेणाहुतिः। संपूर्व्वहुधातोर्भावेऽनट् (ल्युट्) प्रत्ययेन निष्पन्नम्॥

संहारः, पुं, (संहियतेऽनेनेति। सं + हृ + "अध्यायन्यायेति।" ३। ३। १२२। इति घञन्तः साधुः।) नरकविशेषः। इत्यमरः॥ प्रलयः। इति हेमचन्द्रः॥ (यथा, मनुः। १। ८०।
"मन्वन्तराण्यसंख्यानि सर्गः संहार एव च।
क्रीड़न्निवैतत् कुरुते परमेष्ठी पुनः पुनः॥")
संक्षेपः। इति जटाधरः॥ संहरणञ्च॥ (यथा, रघुः। ५। ५७।
"संमोहनं नाम सखे! ममास्त्रं
प्रयोगसंहारविभक्तमन्त्रम्॥")

संहारमुद्रा, स्त्री, (संहारस्य मुद्रा।) विसर्ज्जनमुद्रा। यथा, राघवभट्टधृतम्।
"अधोमुखे वामहस्ते ऊर्द्ध्वास्यं दक्षहस्तकम्।
चिसाङ्गुलीरङ्गुलीभिः संगृह्य परिवर्त्तयेत्।
प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते॥"
अर्पणे आत्मनीति शेषः। इति तिथ्यादितत्त्वम्॥

भैरवविशेषः। यथा,—
"असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्त एव च।
कपाली भीषणश्चैव संहाराश्चाष्ट भैरवाः॥"
इति तन्त्रम्॥

संहितः, त्रि, मिलितः। संपूर्व्वधाधातोः क्तप्रत्ययेन निष्पन्नः॥

संहितपुष्पिका, स्त्री, (संहितानि मिलितानि पुष्पाणि यस्याः। कापि अत इत्वम्।) मल्लिका। इति राजनिर्घण्टः॥

संहिता, स्त्री, सम्यक् (धीयते स्मेति। धा + कर्म्मणि क्तः। यद्वा, सम्यक् हितं प्रतिपाद्यं यस्याः।) मन्वादिप्रणीतधर्म्मशास्त्रम्। तत्पर्य्यायः। स्मृतिः २ धर्म्मसंहिता ३ स्मृतिजीविका ४। इति शब्दरत्नावली। संहिताविशेषा यथा,—
"एवं पुराणसंख्यानं चतुर्लक्षमुदाहृतम्।
अष्टादशपुराणानामेवमेव विदुर्बुधाः।
एवञ्चोपपुराणानामष्टादश प्रकीर्त्तिताः॥
इतिहासो भारतञ्च वाल्मीकं काव्यमेव च।
पञ्चकं पञ्चरात्राणां कृष्णमाहात्म्यमुत्तमम्॥
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम्।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम्।
पञ्चभ्यः संहितानाञ्च कृष्णभक्तिसमन्विताः
ब्रह्मणश्च शिवस्यापि प्रह्लादस्य तथैव च।
गौतमस्य कुमारस्य संहिताः परिकीर्त्तिताः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अध्यायः॥
अपि च।
"इदन्तु पञ्चदशमं पुराणं कौर्म्ममुत्तमम्॥
चतुर्धा संस्थितं पुण्यं संहितानां प्रभेदतः॥
ब्राह्मी भागवती शैवी वैष्णवी च प्रकीर्त्तिता।
चतस्रः संहिताः पुण्या धर्म्मकामार्थमोक्षदाः॥
इदन्तु संहिता ब्राह्मी चतुर्व्वेदैः समन्विता।
भवन्ति षट्सहस्राणि श्लोकानामत्र संख्यया॥"
इति कौर्म्मे १ अध्यायः॥

तत्र स्कन्दपुराणोक्तषट्संहिता यथा,—
"स्कान्दमद्याभिधास्यामि पुराणं श्रुतिसम्मितम्।
षड्विधं संहिताभेदैः पञ्चाशत्खण्डमण्डितम्॥
आद्या सनत्कुमारोक्ता द्वितीया सूतसंहिता।
तृतीया शाङ्करी विप्राश्चतुर्थी वैष्णवी मता॥
तत्परा संहिता ब्राह्मी सौराख्या संहिता मता।
अन्यतः पञ्चपञ्चाशत्सहस्रैरुपलक्षिता॥
आद्या तु संहिता विप्रा द्वितीया षट्सहस्रिका।
तृतीया यत्र तत्रिंशत् सहस्रैरुपलक्षिता।
तुरीया संहिता पञ्चसहस्रैरुपलक्षिता।
ततोऽन्या त्रिसहस्रैश्च ग्रन्थैरेव विनिर्म्मिता।
अन्या सहस्रतः सृष्टा ग्रन्थतः पञ्चितोत्तमाः॥"
इति स्कन्दपुराणे सूतसंहितायां शिवमाहात्म्यखण्डे १ अध्यायः॥

संहतिः, स्त्री, (सं + हन् + क्तिन्।) बहुभिः कृताघातम्। इत्यमरः॥

संहृतः, त्रि, (सं + हृ + क्तः।) कृतसंहारः। यथा,
"अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता।
तत् संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव॥"
इति मार्कण्डेयपुराणीयदेवीमाहात्म्यम्॥

संहृतिः, स्त्री, (सं + हृ + क्तिन्।) संहारः। यथा,—
"विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

संचयः, पुं, (सं + चि + अच्।) नाशः। यथा,—
"रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते।
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम्॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
प्रलयः। इति शब्दरत्नावली॥

संक्षिप्तः, त्रि, (सं + क्षिप् + क्तः।) कृतसंक्षेपः। संक्षेपविशिष्टः। यथा,—
"समाङ्गत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः।
सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्॥"
इत्यमरः॥
संक्षिप्तैः अल्पैरेव वाक्यैरर्थप्रतिपादकतयाभिहितैः। इति तट्टीकायां भरतः॥

संक्षेपः, पुं, (सं + क्षिप् + घञ्।) स्तोकेन भूयसोऽभिधानम्। इत्यमरटीकायां भरतः॥ चुम्बक इति स्वल्प इति च ख्यातः॥

संक्षुब्धः, त्रि, (सं + क्षुभ + क्तः।) सञ्चलनविशिष्टः। इति क्षुभधात्वर्थदर्शनात्। आकुलः। यथा,—
"दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः।
सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

संक्षेपणं, क्ली, (सं + क्षिप् + ल्युट्।) विस्तीर्णानां संक्षेपः। प्रपञ्चकरणवैपरीत्यम्। इति भरतः॥ तत्पर्य्यायः। समसनम्२। इत्यमरः॥ संहारः ३ समाहारः ४ संग्रहः ५ समासः६। इति जटाधरः॥

संक्षोभः, पुं, (सं + क्षुभ + घञ्।) चाञ्चल्यम्। सञ्चलनम्। यथा। "संक्षोभमक्षरयुषामपि चित्ततन्वोः।" इति श्रीभागवतम्॥

सकः, पुं, } पूर्व्वोक्तपरामर्शकः। से इति भाषा।
सका, स्त्री } तच्छब्दस्य टेः पूर्व्वं अकि परत्र टाप्प्रत्यये च कृते प्रथमैकवचननिष्पन्नं पदद्वयम्॥ (यथा, ऋग्वेदे। १। १८१। ११।
"इयत्तिका शकुन्तिका सका जघास ते विषम्॥")

सकटः, पुं, (कटेन अशुचिना शवादिना सह वर्त्तमानः।) शाकोटवृक्षः। इति भूरिप्रयोगः॥

सकटान्नं, क्ली, (कटशब्देनाशौचं लक्ष्यते तत्सहचरितमन्नं सकटान्नम्। इति मिताक्षरा।) अशुद्धान्नम्। इति केचित्॥ (यथा, याज्ञवल्क्यः। ३। १५।
"आचार्य्यपितृपाध्यायाश्चिङ्गिन्यापि व्रती व्रतौ।
सकटान्नं न चाश्नीयात् न च तैः सह संवसेत्॥"

सकण्टकः, पु, (कण्टकेन सह वर्त्तमानः।) शेवालः। इति शब्दचन्द्रिका॥ करञ्जविशेषः। इति रत्नमाला॥ नाटाकरञ्ज इति भाषा॥ कण्टकयुक्ते, त्रि। यथा,—
"शोतलोच्चसमायुक्तसकण्टकदलान्वित।
हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः॥"
इति तिथ्यादितत्त्वम्॥
(लोमाञ्चिते च त्रि। यथा, कथासरित्सागरे। २५। २२०।
"स तं साहसिकस्यर्गभोतैरिव सकण्टकैः।
अङ्गैः प्रणतमालिङ्ग्य मुमुदे भूपतिश्चिरम्॥")
सकरः, त्रि. हस्तयुक्तः। राजस्वविशिष्टः। शुण्डयुक्तः। किरणविशिष्टः। करेण सह वर्त्तते योऽसौ। इति बहुव्रीहिसमासनिष्पन्नः॥
सकरुणः, त्रि, (करुणया सह वर्त्तमानः।) करुणायुक्तः। सदयः। यथा,—
"भवानि त्व दासे मयि वितर दृष्टिं सकरुणा-
मिति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः।
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं
मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम्॥"
इत्यानन्दलहरी॥
सकर्णः, त्रि, (कर्णाभ्यां सह वर्त्तमानः।) श्रवणशीलः। तत्पर्य्यायः। श्रुतितत्परः २। इति जटाधरः॥ कर्णयुक्तश्च॥
सकर्मकः, पुं, (कर्म्मणा सह वर्त्तमानः। कप्।) कर्म्मयुक्तधातुः। कर्म्मान्वयिक्रियार्थकः। यथा। क्वचित् सकर्म्मकाद्भावेऽपि क्रियाव्याप्तिरस्ति। यथा। त्वां दिशं गन्तव्यम्। इतिमुग्धबोधटीकायां दुर्गादासः॥ (कर्म्मयुक्ते, त्रि। यथा, भागवते। ५। २०। ३२।
"तद्वर्षपुरुषा भवन्तं ब्रह्मरूपिणं सकर्म्मकेण कर्म्मणाराधयन्ति॥" "सकर्म्मकेण ब्रह्मलोकादिसाधनेन।" इति तट्टीका॥)
सकलं, त्रि, (कलया सह वर्त्तमानम्।) समुदायः। तत्पर्य्यायः। समम् २ सर्व्वम् ३ विश्वम् ४ अशेषम् ५ कृत्स्नम् ६ समस्तम् ७ निखिलम् ८ अखिलम् ९ निःशेषम् १० समग्रम् ११ पूर्णम् १२ अखण्डम् १३ अमूलकम् १४। इत्यमरः॥ अनन्तम् १५। इति शब्दरत्नावली॥ (यथा, भागवते। ४। २८। ४।
"दाभिः प्रविश्य सुभृशं प्रार्दयन् सकलां पुरीम्॥"
कला प्रकृतिस्तया सह वर्त्तते इति। सगुणम्। यथा महाभारते। १३। १६। ८।
"निष्कलं सकलं ब्रह्म निर्गुणं गुणगोचरम्॥")
सकामः, त्रि, (कामेन सह वर्त्तमान इति।) कामनाविशिष्टः। यथा,—
"अकामो वा सकामो वा यश्च ज्ञापि बहिर्जले
इह चामुत्र दुःखानि माघस्नायी न पश्यति॥"
इति तिथ्यादितत्त्वम्॥
सकाशः, पुं, (काशः प्रकाशस्तेन सह वर्त्तते इति।) समीपः। यथा,—
"देवि देवेश्वरः शम्भस्त्वे लोके परमेश्वरः।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
काशयुक्ते, त्रि॥
सकुरुण्डः, पुं, (साकुरुण्डवृक्षः। इति राजनिर्घण्टः॥
सकुलः, पुं, (कुलेन सह वर्त्तते इति।) शकुलमत्स्यः। इति शब्दरत्नावली॥
सकुल्यः, त्रि, (समाने कुले भवः। यत्।) सगोत्रः। यथा,—
"जारो लङ्गः सगोत्रास्तु स्वजनज्ञातिबान्धवाः।
सकुल्यबन्धुदायादस्वसमानोदका अपि॥"
इति जटाधरः॥ *॥
स्वावध्यूर्द्धतनाष्टमावधिदशमपुरुषपर्य्यन्तपुरुषत्रयम्। तेषां दशमपुरुषपर्य्यन्तसन्ततिः। स्वावध्यधस्तनाष्टमावधिदशमपुरुषपर्य्यन्तसन्ततिश्च। तेषामशौचं यथा, हरिवंशे भविष्यति।
"दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके।
त्रिरात्रेण सकुल्यास्तु ज्ञात्वा शुध्यन्ति गोत्रजाः॥"
इति शुद्धितत्त्वम्॥ *॥
दायाधिकारिसकुल्यास्तु पञ्चमपुरुषावधयः। यथा। बौधायनः। प्रपितामहः पितामहः पिता स्वयं सोदर्य्यभ्रातरः सवर्णायाः पुत्रः पौत्रः प्रपौत्रो वा एतानविभक्तदायादान् सपिण्डान् आचक्षते। विभक्तदायादान् सकुल्यान् आचक्षते सप्तमेषु तन्नामी ह्यर्थो भवतीति। इति दायतत्त्वं शुद्धितत्त्वञ्च॥*॥ तस्य कन्यादानाधिकारित्वं यथा। विष्णुः। पिता पितामहो भ्राता सकुल्यो मातामही माता चेति कन्याप्रदः पूर्व्वनाशे प्रकृतिस्थः परः परः। नारदश्च।
'पिता दद्यात् स्वयं कन्यां भ्राता वानुमतः पितुः।
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा॥
माता त्वभावे सर्व्वेषां प्रकृतौ यदि वर्त्तते।
तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः॥'
इत्युद्वाहतत्त्वम्॥
सकुली, स्त्री, मत्स्यविशेषः। अस्या गुणादिस्तालव्यशकारादिशकुलशब्दे द्रष्टव्यः॥
सकृत्, व्य, (एक+"एकस्य सकच।" ५।४।१९। इति सुच् सकृदादेशश्च। संयोगस्येति सुचो लोपः।) एकवारम्। (यथा,—
"सकृदंशो निपतति सकृत् कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सकृत् सकृत्॥"
इति महाभारतम्॥)
सह। इत्यमरः॥ विधा। इति तट्टीका॥ (अस्मिन्नर्थे तालव्यशकारस्य प्रयोगः प्रायशो दृश्यते॥)
सकृत्प्रजः, पुं, (सकृत् प्रजा यस्य।) काकः। इत्यमरः॥ जातैकमात्रापत्ये, त्रि॥
सकृत्फला, स्त्री, (सकृत् फलानि यस्याः।) कदली। इति राजनिर्घण्टः॥
सकृद्गर्भः, पुं, (सकृत् गर्भो यस्य।) केसरः। इति राजनिर्घण्टः॥ एकमाचगर्भिण्यां, स्त्री॥
सकृद्वीरः, पुं, (सकृत् वीर इव।) एकवीरवृक्षः। इति राजनिर्घण्टः॥
सक्तः, त्रि, (सन्ज+क्तः।) अविरतः। इति हेमचन्द्रः॥ आसक्तः॥ (यथा, रामायणे। ६। ४। ११८।
"अन्योन्यं राहताः सक्ता मखनुर्भीमनिःस्वनाः
ऊर्म्मयः सिन्धुराजस्य महाभीमा इवाहवे॥")
सक्तिः, स्त्री, सङ्गः। सन्जधातोः क्तिप्रत्ययेन निष्पन्ना॥ (यथा, किराते। ५। ४६।
"सक्तिं जवादपनयत्यनिले लतानां
वैरोचनेर्हिगुणिता महसा मयूखैः।
रोधोभुवां मुहुरमुत्र हिरण्मयीनां
भासस्तडिल्लसितानि विडम्बयन्ति॥")
सक्तुः, पुं, (सच्यते सिच्यते इति। सच सेचने+"सितनिगमिमसिसचीति।" उणा० १।७०। इति तुन्।) भृष्टयवादिचूर्णम्। छातु इति भाषा। यथा,—
"भृष्टा यवाः पुनर्धाना भानाचूर्णन्तु सक्तवः॥"
इति हेमचन्द्रः॥
अस्य गुणादिः तालव्यादिशक्तुशब्दे द्रष्टव्यः॥ (यथा, कथासरित्सागरे। ४। १२२।
"एकः शरावः सक्तूनामेकः प्रत्यहमश्नतः।
शकटालस्य तत्रान्तः सपुत्रस्य व्यधीयत॥"
अर्द्धर्चादित्वात् क्लीवलिङ्गेऽपि दृश्यते॥ प्रायशोऽयं शब्दः बहुवचने प्रयुज्यते॥)
सक्तुकः, पुं, (सक्तुरिव। कन्।) विषभेदः। इति हेमचन्द्रः॥ स्वार्थे के सक्तुश्च॥
सक्तुफला, स्त्री, (सक्तव इव फलानि यस्याः। अजादित्वात् टाप्।) शमीवृक्षः। इत्यमरः॥
सक्तुफली, स्त्री, (सक्तव इव फलानि यस्याः। ङीष्।) शमीवृक्षः। इति शब्दरत्नावली॥
सकाथि, [न्] क्लीं, (सज्यते इति। सन्ज सङ्गे+"असिसञ्जिभ्यां कथिन्।" उणा० ३। १५४। कथिन्।) जलम्। इत्यमरः॥ (यथा, मार्कण्डेये। १८। ४९।
"नृणां पदे स्थिता लक्ष्मीर्निलयं संप्रयच्छति।
सकाथोच संस्थिता वस्त्रं तथा नानाविधं वसु॥")
शकटावयवविशेषः। इत्युणादिकोषः॥
सक्षमः, त्रि, क्षमताविशिष्टः। क्षमाविशिष्टः। क्षमेण क्षमया वा सह वर्त्तमानः। इति बहुव्रीहिनिष्पन्नः॥
सक्षारः, त्रि, क्षारयुक्तः। क्षारेण सह वर्त्तमानः। इति बहुव्रीहिसमासनिष्पन्नः॥ (यथा, सुश्रुते। १। ४५।
"वातश्लेष्महरं वाप्यं सक्षारं कटुपित्तलम्॥")
सखा, [ख] पुं, (समानः ख्यायते इति। समान+ख्या+"समाने ख्यः सचोदात्तः।" उणा० ४। १३६। इति डख्। टिलोपयलोपौ समानस्य सभावश्च।) सौहार्दयुक्तः। समानः ख्यायते जनैः नाम्नीति डिः मनीषादित्वात्

ख्यातेर्यलोपः समानस्य सभावश्च सख्युद्भावमिति सेर्डा। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। आक्रन्दः २ मित्रम् ३ सुहृत् ४। इति जटाधरः॥ वयस्यः ५ सवयाः ६ स्निग्धः ७ सहचरः ८। इति हेमचन्द्रः॥ (यथा माघे। २। ३६।

"सखा गरीयान् गरुड़श्च क्षत्रियस्तौ हि कार्य्यतः। स्यातामभित्रौ मित्रे च सहजप्राकृतावपि॥")

सहायः। इति मेदिनी॥ तत्पत्नीगमने दोषो यथा,—

"गुरुतल्पव्रतं कुर्य्यात् रेतः सिक्त्वा स्वयोनिषु। सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च॥

इति प्रायश्चित्ततत्त्वम्॥

सखिता, स्त्री, (सख्युर्भावः। सखि + तल्।) सख्यम्। यथा,—

"मीमांसे बहुसेवितासि सुहृदस्तर्काः समस्ताः स्म मे वेदान्ताः परमात्मबोधगुरवो यूयं मयोपासिताः। जाता व्याकरणाति बालसखिता युष्माभिरभ्यर्थये प्राप्तोऽयं समयो मनूक्तविहितो साहाय्यमालम्ब्यताम्॥"

इति मनुटीकायां कुल्लूकभट्टः॥

सखित्वं, क्ली, (सख्युर्भावः। सखि + त्व।) सख्यम्। (यथा, महाभारते। १। १३७। १५।

"कृतं सर्व्वेण मेऽन्येन सखित्वन्तु त्वया वृणे। द्वन्द्वयुद्धञ्च पार्थेन कर्त्तुमिच्छाम्यहं प्रभो!॥")

सखी, स्त्री, ("सख्यश्चस्त्रीति भाषायाम्।" ४। १। ६२। इति ङीष्।) सहचरी। तत्पर्य्यायः। आलिः २ वयस्या ३। इत्यमरः। सम्प्रोची ४। इति हेमचन्द्रः॥ (यथा, रघुः। ३।

"अथेप्सितं भर्त्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखम्। निदानमिक्ष्वाकुकुलस्य सन्ततेः सुदक्षिणा दौर्हृदलक्षणं दधौ॥")

सख्यं, क्ली, (सख्युर्भावः कर्म्म वा। सखि + यत्।) मित्रता। तत्पर्य्यायः। सौहृदम् २ सौहार्दम् ३ साप्तपदीनम् ४ मैत्रम् ५ जन्यम् ६ सङ्गतम् ७। इति हेमचन्द्रः॥ (यथा, रघुः। १३। ५७।

"वधनिर्भृतशापस्य कबन्धस्योपदेशतः। सुमूर्च्छे मख्यं रामस्य समानव्यसने हरौ॥")

सग, म ए संहतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, सिसगयिषति। ए, असगीत्। इति दुर्गादासः॥

सगन्धः, पुं, (गन्धेन सह वर्त्तमान इति।) भ्रातिः। इति त्रिकाण्डशेषः॥ गन्धयुक्ते, त्रि॥ (यथा, बृहत्संहितायाम्। ४३। ३६।

"हिरदमदमहीसरोजलाजैः दृष्टमधुना च हुताग्नये सगन्धे॥")

सगरः, पुं, (गरेण सह वर्त्तमानः।) अहिफेनः। इति हेमचन्द्रः॥ सूर्य्यवंश्यराजविशेषः। स तु अयोध्याधिपतिर्बाहुराजपुत्रः तस्योत्पत्त्यादि यथा,—

सूर्य्यवंशे महाराजो बाहुर्नाम महानभूत्। तस्य राज्यं हृतं सर्व्वं हैहयैस्तालजङ्घकैः॥ काम्बोजाः पह्लवाश्चैव पारदा यवनाः शकाः। एते पक्षगणा ब्रह्मन् हैहयार्थे पराक्रमन्॥ हृतराज्यः स वै विप्र तदा बाहुर्व्वनं ययौ। पत्नौ तु यादवी तस्य गुर्ब्बिण्यासीत् पतिव्रता॥ तत्सपत्नी पूर्व्वमेव तस्या गर्भजिघांसया। भोजनेन सह प्रादात् गरं धर्म्मानवेक्षया॥ यादव्यास्तु तपोयोगात् गर्भो नैव ममार ह। न ममार च सा राज्ञी दैवानामनुकम्पया॥ पतिं सानुययौ साध्वी सिषेवे तं वने सदा। स राजा विपिने तस्मिन् प्राणांस्तत्याज योगवान्॥ सा तु भर्त्तुश्चितिं कृत्वा वने तामध्यरोहत। और्व्वस्तां भार्गवस्तात कारुण्यात् समवारयत्॥ तस्याश्रमे च सा गर्भं सुषुवे ज्वलनप्रभम्। व्यजायत महाबाहुर्गरेणैव सह द्विज॥ सगरो नाम तेनाभूत् बालकोऽतिमनोहरः। और्व्वस्तु जातकर्म्मादि तस्य कृत्वा महात्मनः॥ अध्याप्य वेदानखिलान् शस्त्राणि प्रत्यपादयत्। आग्नेयन्तु महाघोरममरैरपि दुःसहम्॥ स तेनास्त्रबलेनाजौ बलेन च समन्वितः। हैहयांस्तालजङ्घांश्च जघ्ने रुद्रः पशूनिव॥ जनयामास लोकेऽस्मिन् कीर्त्तिं कीर्त्तिमतांवरः। ततः शकान् सयवनान् काम्बोजान् पारदांस्तथा। पह्लवांश्चापि निःशेषान् कर्त्तुं व्यवसितो नृपः॥ ते हन्यमाना वीरेण सगरेण महौजसा। वशिष्ठं शरणं जग्मुः सूर्य्यवंशपुरोहितम्॥ वशिष्ठः शरणापन्नान् समये स्थाप्य तान्नृपैः। सगरं वारयामास तेभ्यो दत्त्वाभयं तदा॥ सगरस्तां प्रतिज्ञान्तु निशम्य सुमहाबलः। धर्म्मं जघान तेषाञ्च वेशानन्यांश्चकार ह॥ अर्द्धं शिरः शकानान्तु मुण्डयामास भूपतिः। यवनानां शिरः सर्व्वं काम्बोजानामपि द्विज॥ पारदान् मुक्तकेशांस्तु पह्लवान् श्मश्रुधारिणः। निःस्वाध्यायवषट्कारान् सर्व्वानेव चकारह॥ कोलिसर्पा माहिषका दार्व्वाश्चोलाः सकेरलाः। खसास्तुषाराश्चैनाश्च मद्राः किष्किन्धकास्तथा। कोन्तलाश्च तथा वन्याः शाल्वाः कोङ्कणकास्तथा। सर्व्वे ते क्षत्रियास्तात धर्म्मास्तेषां निराकृताः॥ पुरोहितस्य वाक्येन कृता विकृतवेशिनः। वशं कृत्य सराजन्यान् स्वराज्यमन्वशासत॥"

इति पार्ब्ब स्वर्गखण्डे १५ अध्यायः॥ * ॥

अपि च।

"रोहिताश्च वृको जातो वृकाद्बाहुरजायत॥ सगरस्तस्य पुत्रोऽभूत् राजा परमधार्मिकः॥ द्वे भार्य्ये सगरस्यापि प्रभा भानुमती तथा। ताभ्यामाराधितः पूर्व्वं और्व्वोऽग्निः पुत्रकाम्यया। और्व्वस्तुष्टस्तयोः प्रादात् यथेष्टं वरमुत्तमम्।

एका षष्टिसहस्राणि सुतमेकं तथा परा॥ गरुड़ात् वंशकर्त्तारं प्रभा गरुड़सन्निभम्। एकं भानुमतीपुत्रमगरुड़सदृशं सुतम्॥ ततः षष्टिसहस्राणि सुषुवे यादवी प्रभा। खनन्तः पृथिवीं दग्धा विष्णुना वेदमार्गेण॥ असमञ्जसस्तु तनयः अंशुमान् नाम विश्रुतः। तस्य पुत्रो दिलीपस्तु दिलीपात्तु भगीरथः॥ येन भागीरथी गङ्गा तपः कृत्वावतारिता। भगीरथस्य तनयो नाभाग इति विश्रुतः॥"

इति मात्स्ये १२ अध्यायः॥

सगर्भः, पुं, (समानो गर्भो यस्य। समानस्य सः।) सहोदरः। इति शब्दरत्नावली॥ त्रि, अभ्यन्तरितसूक्ष्मपत्रादियुक्तः। यथा—

"दर्भान् सगर्भानादाय नव सप्त च पञ्च वा। साग्रान् समूलानच्छिन्नान् द्विजो दक्षिणपाणिना। अन्वारब्धेन सत्येन तर्पयेत् षड्विनायकान्॥"

इति काशीखण्डे सदाचारो नाम ३५ अध्यायः॥ (गर्भविशिष्टे च त्रि। यथा कथासरित्सागरे। २०। ८४।

"अनलोऽपि सगर्भोभूत् तेन वीर्य्येण धूर्जटेः॥"

सगर्भा, स्त्री, (गर्भेण सह वर्त्तमाना।) गर्भवती। यथा—

"केचिद्गहनमाश्रित्य केचित् पातालमाविशन्। सगर्भा चन्द्रसेनस्य भार्य्या दाल्भ्याश्रमं ययौ॥"

इति पाद्मे सृष्टिखण्डे १ अध्यायः॥

सहोदरा। इति सगर्भशब्ददर्शनात्॥

सगर्भ्यः, पुं, (समाने गर्भे भवः। "सगर्भसयूथसनुतात् यन्।" ४। ४। ११४। इति यन्।) सहोदरः। इत्यमरः॥ (यथा, वाजसनेयसंहितायाम्। ४। २०।

"अनु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भोऽनु सखा सयूथ्यः॥")

सगोत्रं, क्ली, (समानं गोत्रमिति। समानस्य सः।) कुलम्। यथा,—

"कुलं गौत्रं सगोत्रञ्च तुल्यगोत्रे निगद्यते।"

इति शब्दरत्नावली॥

सगोत्रः, पुं, (समानं गोत्रमस्य। "ज्योतिर्जनपदरात्रीति।" ६। ३। ८५। इति समानस्य सः।) ज्ञातिः। यथा,—

"सगोत्रबान्धवज्ञातिबन्धुस्वजनाः समाः॥"

इत्यमरः॥

(यथा, मनुः। ९। १९०।

"संस्थितस्यानपत्यस्य सगोत्रात् पुत्रमाहरेत्॥")

सन्धिः, स्त्री, सहभोजनम्। इत्यमरः॥ समाना सह वा जन्धिः सन्धिः। अदः क्तिः जन्धोऽदो इति जन्धे जन्धिः निपातनात् सन्धिरादेशः। सन्धिरपि छन्दसीति परे। इत्यमरटीकायां भरतः॥

सघ, न हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) न, सघ्नोति। असीसघत्। इति दुर्गादासः॥

सङ्कटः, त्रि, (सम्+"संप्रोदश्च कटच्।"५।२।२९। इति कटच्।) संवाधः। इत्यमरः॥ ह्रे अल्पावकाशे वर्त्मादौ। सम्यक् कटति आवृणोति सङ्कटं अल्। सम्यगन्योन्यं बाधन्तोऽत्र संवाधः घञ्। वाचस्पतिस्तु च। संवाधं ह्रस्वमपि तद्भुव वर्त्म इति माघः। इति भरतः॥ दुःखे, क्ली। यथा,—

"सर्व्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा।
स्मरन्ममैतच्चरितं नरो मुच्येत सङ्कटात्॥"

सङ्कटं दुःखमुत्तरार्द्धमुत्तरान्वयि। इति देवीमाहात्म्यस्य टीकायां नागोजीभट्टः॥

सङ्कटा, स्त्री, (सम्यक् कटति आवृणोति या। सम्+कट्+अच्। टाप्।) देवीविशेषः। सा च वाराणस्यां प्रसिद्धा। योगिनीविशेषः। यथा,

"मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा।
उल्का सिद्धिः सङ्कटा च योगिन्योऽष्टौ प्रकीर्त्तिताः॥"

इति ज्योतिषम्॥

सङ्कटाचः, पुं, (संकटं अञ्चतीति। अञ्च व्याप्तौ+अण्।) धववृक्षः। इति विश्वः॥

सङ्कथनं, क्ली, (सम्यक् कथनम्।) सम्यग्भाषणम्। यथा,—

"उपवासफलं नश्येत् दिवास्वप्नाच्चमैथुनात्।
स्त्रीणां सम्प्रेक्षणात् स्पर्शात्ताभिः सङ्कथनादपि॥"

इत्येकादशीतत्त्वम्॥

सङ्कथा, स्त्री, (सम्यक् कथा।) परस्परभाषणम्। यथा,—

"उल्लापः काकुवागन्योन्योक्तिः संलापसङ्कथे।"

इति हेमचन्द्रः॥

(यथा, भागवते। १०। ८२। १७।

"पृथा भ्रातॄन् स्वसॄर्वीक्ष्य तत्पुत्रान् पितरावपि।
भ्रातृपत्नीर्मुकुन्दञ्च जहौ संकथया शुचः॥")

सम्यक्कथनञ्च॥

सङ्करः, पुं, (सङ्कीर्य्यते इति। सं+कॄ विक्षेपे+अप्।) सम्मार्জ্জन्या क्षिप्तधूल्यादिः। तत्पर्य्यायः। अवकरः २। इत्यमरः॥ सङ्कारः ३। इति शब्दरत्नावली॥ अग्निचटत्कारः। इति मेदिनीहारावल्यौ॥ मिश्रितत्वम्। यथा,—

"भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः।"

इत्यमरः॥

परस्परात्यन्ताभावसमानाधिकरणयोरैकाधिकरण्यम्। यथा। मूर्त्तत्वं मनसि वर्त्तते भूतत्वं नास्ति आकाशे भूतत्वं वर्त्तते मूर्त्तत्वं नास्ति। पृथिव्यां भूतत्वं वर्त्तते मूर्त्तत्वञ्चास्तीति जातिसाङ्कर्य्यम्। तथा चोक्तम्।

"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः॥"

इति सिद्धान्तमुक्तावली॥*॥

वर्णशङ्करजातिः। यथा,—

याज्ञवल्क्य उवाच।

"वक्ष्ये सङ्करजात्यादि गृहस्थादिविधिं परम्।
विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम्॥
जातोऽम्बष्ठस्तु शूद्रायां निषादः पार्शवोऽपि वा।
माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात्॥
वैश्यां शूद्राच्च राजन्यां माहिष्योग्रौ सुतौ स्मृतौ।
शूद्रायां करणो वैश्यात् विद्वान् एष विधिः स्मृतः॥
ब्राह्मण्यां क्षत्रियात् सूतो वैश्याद्वैदेहकस्तथा।
शूद्राज्जातस्तु चाण्डालः सर्व्वधर्म्मबहिष्कृतः॥
क्षत्रिया मागधं वैश्यात् शूद्रात् क्षत्तारमेव च।
शूद्रादायोगवं वैश्या जनयामास वै सुतम्॥
माहिष्येण करण्यान्तु रथकारः प्रजायते।
असंसुताश्च विज्ञेया: प्रातिलोमानुलोमजाः॥
जात्युत्कर्षाहिजो ज्ञेयः सप्तमे पञ्चमेऽपि वा।
व्यत्यये कर्म्मणां साम्ये पूर्व्ववच्चोत्तरावरम्॥"

इति गारुड़े ८६ अध्यायः॥

सङ्करी, स्त्री, (सं+कॄ+अप्। गौरादित्वात् ङीष्।) नवदूषितकन्या। इति मेदिनी॥

सङ्करीकरणं, क्ली, (असङ्करः सङ्करः क्रियतेऽनेनेति। सङ्कर+कृ+ल्युट्। अभूततद्भावे च्विः।) नवविधपापान्तर्गतपापविशेषः। यथा, विष्णुः।

अथ पुरुषस्य कामक्रोधलोभाख्यं रिपुत्रयं भवति। परिग्रहप्रसङ्गेन विशेषाद्गृहाश्रमिणः। तेनायमाक्रान्तोऽतिपातकमहापातकानुपातकोपपातकेषु वर्त्तते। जातिभ्रंशकरेषु सङ्करकरणेष्वप्रात्रीकरणेषु मलावहेषु प्रकीर्णकेषु। तद्यथा,—

"खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा।
सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च॥"

तस्य प्रायश्चित्तं यथा,—

"सङ्करापाचक्रत्यासु मासं गोधनमैन्दवम्।
मलिनीकरणीयेषु तप्तः स्याद्यावकव्रतः॥"

तथा विष्णुः।

"ग्राम्यारण्याणां पशूनां हिंसा सङ्कीर्णीकरणम्।
सङ्करीकरणं कृत्वा मासमश्नाति यावकम्।
कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तन्तु कारयेत्॥"

इति प्रायश्चित्तविवेकः॥

सङ्कर्षणं, क्ली, आकर्षणम्। सम्यक्प्रकारेण कर्षणम्। सं+पूर्व्वः कृषधातोरनट्प्रत्ययेन निष्पन्नम्॥ (यथा, भागवते। १०। २। १३।

"गर्भसंकर्षणात् तं वै प्राहुः सङ्कर्षणं भुवि॥"

एकीकरणम्। इति स्वामी॥ यथा, भागवते। ५। २५। १।

"तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तरे आस्ते या वै कला भगवतस्तामसी समाख्याता अनन्त इति सात्वतीया दृष्टदृश्ययोः सङ्कर्षणं अहमित्यभिमानलक्षणं यं सङ्कर्षण इत्याचक्षते॥")

सङ्कर्षणः, पुं, (सम्यक् कर्षतीति। सं+कृष्+ल्युः।) बलदेवः। इत्यमरः॥ (अस्य नामनिरुक्तिर्यथा, हरिवंशे। ५८। ६।

"कर्षणेनास्य गर्भस्य स्वगर्भाच्चावितस्य वै।
सङ्कर्षणो नाम शुभे तव पुत्रो भविष्यति॥"

तथा च भागवते। १०। २। १३।

"गर्भसंकर्षणात् तं वै प्राहुः सङ्कर्षणं भुवि॥")

सङ्कलः, पुं, सङ्कलनम्। योगः। सं पूर्वकलधातोर्भावे अल्प्रत्ययेन निष्पन्नः॥

सङ्कलनं, क्ली, (सं+कल+ल्युट्।) एकत्रीकरणम्। योजनम्। इति लीलावती॥ ठिक देओया इति भाषा॥

सङ्कलितः, त्रि, (सं+कल+क्तः।) लेखादिना संहृतः। तत्पर्य्यायः। संगूढः २। इत्यमरभरतौ॥ योजिताङ्कम्। ठिक देओया आँक इति भाषा। यथा। अथ सङ्कलितव्यवकलितयोः करणसूत्रम्। इति लीलावती॥ पुञ्जीकृतधान्यादि। इति केचित्॥

सङ्कल्पः, पुं, (सं+कृप+भावे घञ्। गुणे कृते रस्य लः।) कर्म्मणो मानसम्। इत्यमरः॥

"सङ्कल्प उक्तो हारीतेन। यथा। मनसा सङ्कल्पयति वाचा अभिलपति कर्म्मणा चोपपादयति इति। भविष्यपुराणवचनेन च।

'सङ्कल्पेन विना राजन् यत्किञ्चित् कुरुते नरः।
फलञ्चाल्पाल्पकं तस्य धर्म्मस्यार्द्धक्षयो भवेत्॥'

इति। ब्रह्मपुराणेनापि।

'आशास्य च शुभं कार्य्यमुद्दिश्य च मनोगतम्'।

इत्यगस्त्यपूजने उक्तम्। मनोगतं शुभं फलं आशास्य मनसा सङ्कल्प्य उद्दिश्य वाचा अभिलप्य कार्य्यं कर्म्मणा उपपाद्यम्। भविष्ये।

'शुक्तिशङ्खाश्महस्तेभ्य कांस्यरूप्यादिभिस्तथा।
सङ्कल्पो नैव कर्त्तव्यो मृण्मयेन कदाचन॥
गृहीत्वौडुम्बरं पात्रं वारिपूर्णं गुणान्वितम्।
दर्भत्रयं साग्रमूलं फलपुष्पतिलान्वितम्॥
जलाशयारामकूपे सङ्कल्पे पूर्वदिङ्मुखः।
साधारणे चोत्तरास्य ऐशान्यां निक्षिपेज्जलम्॥'

अत्र केवलहस्तनिषेधस्तु पात्रान्तरसद्भावविषयः। शङ्खादिसाहचर्य्यात् एकहस्तपरो वा।

'गृहीत्वौडुम्बरं पात्रं वारिपूर्णमुदङ्मुखः।
उपवासन्तु गृह्णीयाद् यद्वा वार्य्येव धारयेत्॥'

इति वराहपुराणदर्शनात्।" इति तिथ्यादितत्त्वम्॥*॥ सङ्कल्पस्य भावे मयेतत् कर्त्तव्यमेव निषेधे तु मयैतन्न कर्त्तव्यमिति ज्ञानविशेषः। व्रतादीनां सङ्कल्पसम्भवत्वं यथा,—

"सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः।
व्रता नियमधर्म्माश्च सर्वे सङ्कल्पजाः स्मृताः॥"

इत्येकादशीतत्त्वम्॥

तद्दानवचना यथा,—

"ओंपदं पूर्वमुच्चार्य्य ततो विष्णुपदं वदेत्।
ॐ तत् सदित्युच्चार्य्य नाम गोत्रं ततो वदेत्॥
तत इष्टप्रीतिकामो मूलबीजं समुच्चरेत्।
ततोऽस्याश्च वरारोहे गङ्गास्नानमहं ततः॥
करिष्ये इति सङ्कल्प्य शिरःस्नानं समाचरेत्।
त्रिः स्नात्वा चञ्चलापाङ्गि! इति—वाक्य सुरार्च्चिते!॥

अथेत्याद्यस्य चार्वङ्गि ! रहस्यं प्रवदामि ते ॥"
इति कामधेनुतन्त्रे ३२ पटलः ॥*॥
अपि च । अथ सङ्कल्पविधानम् ।
"यमङ्कयितमर्त्यो यत्नाधिकमथापि वा ।
न मन्त्रफलभाग्भूयात्तस्मात्क्रियममाचरेत् ॥
ताम्रपात्रं सदूर्वञ्च सतिलं जलपूरितम् ।
सकुशञ्च फलैर्देवि ! गृहीत्वाचम्य कल्पतः ॥
अभ्यर्च्य च शिरःपद्मे श्रीगुरुं करुणामयम् ।
यत्रेशवदनो वापि देवेन्द्रवदनोऽपि वा ॥
मासं पक्षं तिथिञ्चैव देवपर्व्वादिकन्तथा ।
आद्यन्तकालञ्च तथा गोत्रं नाम च कामिनाम्
क्रियाङ्गयं करिष्येऽन्तमेवं सम्यक्समुज्जेत् पयः ॥"
इति योगिनीतन्त्रे प्रथमखण्डीयः २ पटलः ॥*॥
अन्यच्च । शिवपूजायां मानससङ्कल्पो यथा, —
"ततस्तु परमेशानि ! कृत्वा सङ्कल्पमानसम् ।
यथापूर्व्वं महादेवि ! ब्रह्माण्डस्थितिमानसः ॥
तथा भवतु मर्व्वाङ्गं इति सङ्कल्प मानसः ।
न गोत्रं मम देवेशि ! न नाम परमेश्वरि ॥
न माता परमेशानि न पिता मम कामिनि ।
तस्मिन् काले महेशानि मम सर्वं न हि प्रिये ॥
न वारं न तिथिं देवि तस्मिन् काले शुचिस्मिते
न काष्ठां न कलां देवि तस्मिन् काले वरानने
न दिवा परमेशानि न रात्रिं परमेश्वरि ।
अतएव महेशानि सङ्कल्पं मानसं स्मृतम् ॥
मानसं यदि आयाति तदा स्नानेन किं प्रिये ।
सङ्कल्पं मानसं देवि चतुर्व्वर्गप्रदायकम् ॥
स्नानं हि परमेशानि सङ्कल्पं व्यर्थमुच्यते ॥
सङ्कल्पेन विना देवि यत्किञ्चित् क्रतवान्सुधीः
तदुक्तं परमेशानि तत् सर्व्वं मानसं परम् ॥
यदुक्तं परमेशानि मुनिना क्षुद्रबुद्धिना ।
तत् सर्व्वं परमेशानि व्यर्थं भवति पार्व्वति ।
इति सङ्कल्पमाचर्य्य जीवन्मासं समाचरेत् ॥"
इति लिङ्गार्च्चनतन्त्रे ५ पटलः ॥
सङ्कल्पजन्मा, [न्] पुं, (सङ्कल्पात् जन्म यस्य ।) कामदेवः । इति हलायुधः ॥ (यथा, कथासरित्सागरे । ४८ । २३८ ।
"दग्धोऽपि कामः सङ्कल्पजन्मा शर्व्वेण निर्म्मितः ॥")
सङ्कल्पभवः, पुं, (सङ्कल्पात् भव उत्पत्तिर्यस्य ।) कामदेवः । इति त्रिकाण्डशेषः ॥ (अभिलाषस्वरूपमात्रे, त्रि । यथा, महाभारते । १३ । ४१ । ८ ।
"त्वदर्थमागतं विद्धि देवेन्द्रं मां शुचिस्मिते ।
क्लिश्यमानमनङ्गेन त्वत्सङ्कल्पभवेन ह ॥")
सङ्कल्पयोनिः, पुं, (सङ्कल्पात् योनिर्यस्य ।) कामदेवः । इति हेमचन्द्रः ॥
सङ्कसुकः, त्रि, (सम्यक् कसति इतस्ततो गच्छतीति । सस + कस गतौ + "समि कसेरुकन् ।" उणा० २ । २८ । इति उकन् ।) अस्थिरः । इत्यमरः ॥ दुर्ब्बलः । इत्युणादिकोषः ॥ मन्दः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ संकीर्णः । अपवादशीलः । इति संक्षिप्तसारोणादिवृत्तिः ॥

सङ्कीर्त्तन

(यथा, महाभारते । १२ । १८३ । १३ ।
"लोष्टमर्दी तृणच्छेदी नखखादी तु यो नरः ।
निष्पेषिष्टः सङ्कुसको नेहायुर्विन्दते महत्॥")
सङ्कारः, पुं, (सं कीर्य्यते इति । सं + कृ + विक्षेपे + घञ् ।) सम्मार्জ্জन्या विक्षिप्तादिः । इति शब्दरत्नावली ॥ अग्निचटत्कारः । इति मेदिनी ॥
सङ्कारी, स्त्री, नवदूषितकन्या । इति मेदिनी ॥
सङ्काशः, त्रि, (सम्यक् काशते प्रकाशते इति । काश + पचाद्यच् ।) सदृशः । (यथा, महाभारते । १ । १२१ । ३ ।
"आजगाम ततो देवो धर्म्मो मन्त्रबलात् ततः ।
विमाने सूर्य्यसङ्काशे कुन्ती यत्र जपस्थिता ॥")
अन्तिकः । इति विश्वः ॥
सङ्किलः, पुं, दग्धोल्का । इति त्रिकाण्डशेषः ॥
सङ्कीर्ण, त्रि, (सं + कृ + क्तः ।) जनादिभिर्निरवकाशः । इति भरतः ॥ नानाजातिसंमिलितम् । इति भानुदीक्षितः ॥ तत्पर्य्यायः । सङ्कुलम् २ आकीर्णम् ३ । इत्यमरः ॥ निचितम् ४ । इति नानार्थे अमरः ॥ व्याप्तम् ५ समाकीर्णम् ६ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १३४ । २८ ।
"द्रोणः सङ्कीर्णयुद्धे च शिक्षयामास वीर्य्यवान्॥")
सङ्कटः । इत्यजयः । परस्परविजातीयः । यथा,
"विशेषनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ।"
इत्यमरश्लोकटीकायां भरतः ॥
अशुद्धः । इति नानार्थे अमरः ॥
सङ्कीर्णः, पुं, (सं + कृ + क्तः ।) अम्बष्ठकरणादिचाण्डालपर्य्यन्तमिश्रजातिः । इत्यमरः ॥ मिश्रितरागः । इति संगीतशास्त्रम् ॥
सङ्कीर्त्तनं, क्ली, स्त्री, (सं + कीर्त्त + ल्युट्।) सम्यक्प्रकारेण देवतानामोच्चारणम् । गुणादिकथनम् । यथा, —
"कृष्णवर्णं त्विषा कृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ।
यज्ञैः सङ्कीर्त्तनप्रायैर्यजन्ति हि सुमेधसः ॥"
इति श्रीभागवते ११ स्कन्धे ५ अध्यायः ॥
"रूक्षतां व्यावर्त्तयति । त्विषा कान्त्या कृष्णं इन्द्रनीलमणिवदुज्ज्वलम् । यद्वा त्विषा कृष्णं कृष्णावतारं अनेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति । अङ्गानि हृदयादीनि । उपाङ्गानि कौस्तुभादीनि । अस्त्राणि सुदर्शनादीनि । पार्षदाः सुनन्दादयः । तत्सहितं यज्ञैरर्चनैः । सङ्कीर्त्तनं नामोच्चारणं स्तुतिश्च तत्प्रधानैः । सुमेधसो विवेकिनः ।" इति तट्टीकायां श्रीधरस्वामी ॥*॥ तस्माद्गानं यथा, —
"सङ्कीर्त्तनध्वनिं श्रुत्वा ये च नृत्यन्ति मानवाः ।
तेषां पादरजःस्पर्शात् सद्यः पूता वसुन्धरा ॥"
इति हरिभक्तिविलासीयपुराणम् ॥
अपि च ।
"नामसङ्कीर्त्तनं यत्र कृष्णस्य परमात्मनः ।
स्नानं तत्तु पवित्रं स्यान्मृतानां तत्तु मुक्तिदम्॥"
इति पद्मपुराणम् ॥ *॥

सङ्कुलं

प्रथमसङ्कीर्त्तनारम्भप्रमाणं यथा । पुष्करतीर्थे नारदं प्रति ब्रह्मवाक्यम् ।
"श्रीकृष्णरसमङ्कीर्तं वीणाध्वनिसमन्वितम् ।
कुरु वत्साधुनैवेह सृजन्तु सुनयः सुराः ॥
गोपीनां वल्लभरवं परं राममहोत्सवम् ।
ताभिः सार्द्धं जलक्रीड़ां हरिसङ्कीर्त्तनं कुरु ॥
कृष्णसङ्कीर्त्तनं तूर्णं पुनाति श्रुतिमात्रतः ।
श्रोतारञ्च प्रवक्तारं पुरुषैः सप्तभिः सह ॥
यत्रैव प्रभवेद्वत्स ! तन्नामगुणकीर्त्तनम् ।
तत्र सर्व्वाणि तीर्थानि पुण्यानि मङ्गलानि च ॥
तत्कीर्त्तनध्वनिं श्रुत्वा सर्व्वाणि पातकानि च ॥
दूरादेव पलायन्ते वैनतेयमिवोरगाः ॥
तदिनं सफलं धन्यं यशस्यं सर्व्वमङ्गलम्।
श्रीकृष्णकीर्त्तनं यत्र तत्र वै नायुषोऽन्यथः ॥
कृष्णसंकीर्त्तनस्थाने ये च नृत्यन्ति वैष्णवाः ।
तेषां पादरजःस्पर्शात् सद्यः पूता वसुन्धरा ॥
उत्कीर्त्तन भवेद्यत्र कृष्णस्य परमात्मनः ।
स्थानं तत्र भवेत्तीर्थं मृतानां तत्र मुक्तिदम् ॥
नात्र पापानि तिष्ठन्ति पुण्यानि सुस्थिराणि च ।
तपस्विनाञ्च व्रतिनां व्रतानां तपसां फलम् ॥
वर्त्तन्ते पापिनां देहे पापानि त्रिविधानि च ।
महापापोपपापातिपापान्येव स्मृतानि च ॥
कृष्णसंकीर्त्तनाद्यानात्सम्भवन्यङ्गसादृशः ।
मुच्यन्ते पातकैस्तेच पापिनस्त्रिविधा जनाः॥"
इति नारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे महोत्सवारम्भो नाम १० अध्यायः ॥
सङ्कीर्त्तितः, त्रि, (सं + कीर्त्त + क्तः ।) सम्यगुच्चरितः । संस्तुतः । यथा, —
"अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् ।
संकीर्त्तितमघं पुंसो दहेदेधो यथानलः ॥"
इति श्रीभागवते ६ स्कन्धे २ अध्यायः ॥
सङ्कुचितं, क्ली, (सं + कुच् + क्तः ।) संकोचयुक्तम् । अप्रफुल्लम् । तत्पर्य्यायः । निद्राणम् २ मीलितम् ३ सुप्तम् ४ । इति हेमचन्द्रः ॥ सुप्तम् ५ मिलितम् ६ नतम् ७ निकुञ्चितम् ८ । सनिद्रम् ९ अलसम् १० । इति राजनिर्घण्टः ॥ (यथा, आर्य्यासप्तशत्याम् । ६५४ ।
"सङ्कुचिताङ्गीं द्विगुणांशुकां मनोभावविस्फुरदनाम् ।
दयितां भजामि सुधामिव तुहिन इव प्रसादेन ॥")
सङ्कुलं, क्ली, (सङ्कुलतीति । सं + कुल संस्याने + इगुपधेति कः ।) युद्धम् । इत्यजयः ॥ (यथा, हरिवंशे । ८१ । ८५ ।
"ततो बलेन महता गजानीकेन चाप्यथ ।
उभयोरन्तरं ताभ्यां सङ्कुलं समपद्यत ॥")
परस्परपराहतवाक्यम् । तत्पर्य्यायः । क्लिष्टम् २ । इत्यमरः ॥ "हे पूर्व्वापरविरुद्धे वाक्ये । यथा — 'यावज्जीवमहं मौनी ब्रह्मचारी पिता मम ।
माता च मम वन्ध्या स्यात् अरामोऽनुपमो भवान् ॥'

कुलजबन्धुसंहत्योः संपूर्व्वः इसुङत्वात् कः। क्लिश्यते: क्तः क्लिष्टम्। परस्परं पराहतं विरुद्धं परस्परपराहतम्। तत्र सरस्वतीकण्ठाभरणे तु क्लिष्टलक्षणं यथा,—

'दूरे यस्यार्थसंवित्तिः क्लिष्टं नेष्टं हि तत् सताम्।'

यथा,—

'विजितात्मभवद्विगुरुपादहतो जनः।
हिमापहामिवधरैर्व्याप्तं व्योमाभिनन्दति॥'

अस्यार्थः। विना गरुडेन जितं इन्द्रस्यात्मभतोऽर्जुनस्तस्य ईषो कर्णः तस्य गुरुः पिता सूर्य्यः तस्य पादे रश्मिभिर्हतो जनो लोकः व्योम आकाशमभिनन्दति। काष्टयं हिमापहोऽस्मिन्स्यामित्रं जलं तद्धारयन्ति ये तैर्मेघैर्व्याप्तम्।" इति तट्टीकायां भरतः॥ (सङ्कीर्णता। यथा, महाभारते। ३। १४२। ३८।

"एतस्मिन् सङ्कुले तात वर्त्तमाने भयङ्करे।
अतिभारात् वसुमती योजनानां शतं गता॥")

सङ्कुलं,त्रि, (सं+कुल संस्त्याने+कः।) जनादिभिर्निरवकाशम्। तत्पर्य्यायः। सङ्कीर्णम् २। आकीर्णम् ३। इत्यमरः॥ कलिलम् ४ गहनम् ५। इति केचित्॥ सङ्कीर्य्यते स्म जनादिभिर्निरन्तरं व्याप्यते स्म सङ्कीर्ण क्त्र विच्चेपे क्तः। संकुलति संङ्कुलं कुल ज बन्धुसंहत्योः संपूर्व्वेजुङत्वात् कः। संकुलं दन्त्यादि। अकिधातोरुले शङ्कुलं तालव्यादीति स्वामी। आकीर्णं सङ्कीर्णवत्। इति भरतः॥ (यथा, महाभारते। १। ११३। २६।

"ततः सेनामुपादाय पाण्डुर्नानाविधध्वजाम्।
प्रभूतहस्त्यश्वयुतां पदातिरथसङ्कुलाम्॥")

सङ्केतः, पुं, सङ्कित्यते उच्यतेऽत्र। (सं+कित+घञ्।) स्वाभिप्रायव्यञ्जकचेष्टाविशेषः। तत्पर्य्यायः। प्रज्ञप्तिः २ परिभाषा३ शैलो४ समयः ५ आकारः ६। इति त्रिकाण्डशेषः॥ उदाहरणं यथा,—

"सङ्केतप्रियशङ्या निजपतिं प्रायोचदध्वश्रमम्।"

इति रसमञ्जरी॥

(यथा च साहित्यदर्पणे।

"सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥")

ज्ञायमते यथा। सङ्केतो लक्षणा चार्थे पदवृत्तिः। तया पदप्रतिपाद्योऽर्थं एव पदार्थं इत्यभिधीयते। इदं पदमिमर्थं बोधयत्विति भगवच्छब्दादयमर्थो बोद्धव्य इति वेच्छा सङ्केतरूपा वृत्तिः। तत्राधुनिकसङ्केतः परिभाषा। तया अर्थबोधकं पदं पारिभाषिकम्। यथा शास्त्रकारादिसङ्केतितनदीहृद्यादिपदम्। ईश्वरसङ्केतः शक्तिः। तया अर्थबोधकं पदं वाचकम्। यथा गोत्वादिविशिष्टबोधकगवादिपदम्। तद्बोध्योऽर्थो गवादिर्वाच्यः स एव मुख्यार्थ इत्युच्यते। इति शक्तिवादे गादाधरी टीका॥

सङ्केतनिकेतनं,क्ली,(सङ्केतस्य निकेतनम्।)प्रियमेलनार्थावधारितस्थलम्। यथा,—

"सङ्केतनिकेतने प्रियमनवलोक्य समाकुलहृदया विप्रलब्धा।

'सङ्केतकेलिगृहमित्य निरीक्ष्य शून्य-
मेणीदृशो निभृतनिःश्वसिताधरायाः।
अर्द्धाक्षरं वचनमर्द्धविकाशि नेत्रं
ताम्बूलमर्द्धकवलोक्तमेव तस्थौ॥'

सङ्केतस्थलं प्रति भर्त्तुरनागमनकारणं चिन्तयति या सोत्कण्ठिता॥" इति रसमञ्जरी॥

सङ्कोचं, क्ली, सङ्कुचतीति। स+कुच्+अच्।) कुङ्कुमम्। इत्यमरः॥

सङ्कोचः, पुं, (संकुचतीति। सं+कुच्+अच्।) मत्स्यभेदः। (सं+कुच्भावे घञ्।) बन्धः। इति मेदिनी॥ (यथा, कथासरित्सागरे। ८०। ६५।

"निनाय च निशामिन्दुविषमामञ्जिनीव ताम्
बहुमोहालिपटले हृदि सङ्कोचमेत्य सा॥")

बहुविषयक-वाक्यार्थादेरल्पविषय-स्थापनम्। यथा, सामान्यशब्दार्थस्य विशेषनिष्ठत्वं सङ्कोचः इति शाब्दविवेकः॥ रोधः। जड़ीभाव इत्यर्थः। यथा,—

"यस्मिन् प्रमुदिते राज्ञि तमः सङ्कोचति क्षितौ॥"

इति कविकल्पद्रुमटीकायां दुर्गादासः॥

सङ्कोचनी,स्त्री,(सङ्कुचतीति। सं+कुच्+ल्युः। ङीष्।) लज्जालुलता। इति रत्नमाला॥

सङ्कोचपिण्डनं, क्ली, (सङ्कोचेन पिण्डनम्।) कुङ्कुमम्। इति भावप्रकाशः॥

सङ्क्रन्दनः,पुं, (सङ्क्रन्दयति असुरानिति। सं+क्रन्द+णिच्+ल्युः।) इन्द्रः। इत्यमरः॥ (भौत्यस्य मनोः पुत्रविशेषः। यथा, मार्कण्डेये। १००। ३२।

"स्त्रीमाणौ च प्रतीरश्च विष्णुः सङ्क्रन्दनस्तथा।
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः॥")

सं+क्रन्द+भावे ल्युट्।)रोदने, क्ली। (यथा, महाभारते। ११। २३। ४।

"दिष्ट्या नैनं महाराज दारुणं भरतक्षयम्।
कुरु संक्रन्दनं घोरं युगान्तमनुपश्यसि॥")

सङ्क्रन्दयति शत्रूनिति। शत्रुतापके, त्रि। यथा, महाभारते। ४। ५। २६।

"तस्य मौर्व्वीमपाकर्षत् शूरः सङ्क्रन्दनो युधि।
कुले नास्ति समो रूपे यस्येति नकुलः स्मृतः॥")

सङ्क्रमः, पुं, क्ली, दुर्गसञ्चरः। सांको इति भाषा। इत्यमरः॥ संक्रामति अनेन संक्रम्यते असौ वा संक्रमः। घञ्। दुर्गं सेत्वादि सञ्चरत्यनेन दुर्गसञ्चरः करणे अल्। सञ्चरो निर्गमोऽम्बुपथः। इति रत्नकोषः। इति भरतः॥ (यथा, मनुः। ८। २८५।

"संक्रमध्वजयष्टीनां प्रतिमानाञ्च भेदकः।
प्रतिकुर्य्याच्च तत्सद्यं पञ्च दद्यात् शतानि च॥")

सङ्क्रमः, पुं, (सं+क्रम+घञ्।) क्रमणम्। सम्यग्राशिसञ्चारवस्तु। इति धरणिः॥ (यथा, भागवते। ४। १२। ४८।

"दिनक्षये व्यतीपाते सङ्क्रमेऽर्कदिनेऽपि वा॥")

रविसंक्रमकालो यथा,—

"त्रुटेः सहस्रभागो यः स कालो रविसङ्क्रमः॥"

इति तिथ्यादितत्त्वम्॥

सङ्क्रमणं, क्ली, (सं+क्रम+ल्युट्।) गमनम्। सूर्य्यस्य राश्यन्तरप्रवेशः। यथा। कालकौमुद्यां जाबालिः।

"पूर्णे चेदर्द्धरात्रे तु रविसङ्क्रमणं भवेत्।
प्राहुर्दिनद्वयं पुण्यं त्यक्त्वा मकरकर्कटौ॥"

देवीपुराणे।

"रविसङ्क्रमणे पुण्ये न स्नानायात् यस्तुमानवः।
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते॥"

इति तिथ्यादितत्त्वम्॥

(प्रापणम्। यथा, हरिवंशे। ३२। १६।

"अत्रैवोदाहरन्तीमं भरद्वाजस्य धीमतः।
धर्म्मसङ्क्रमणञ्चापि महद्भिर्भरताय वै॥")

सङ्क्रान्तः, त्रि, (संक्रान्तिरस्यास्तीति। अच्।) संक्रान्तिविशिष्टः। यथा,—

"असङ्क्रान्तमासोऽधिमासः स्फुटः स्यात्
द्विसंक्रान्तमासः क्षयाख्यः कदाचित्।"

इति मलमासतत्त्वम्॥

(सं+क्रम्+क्तः।) प्राप्तः। गतः। क्रमागतधनादि। यथा। स्त्रीसङ्क्रान्तधनस्य स्त्रीधनत्वाभावात् अधिकारविशेषस्यात्र वचनादप्राप्याकाङ्क्षया कल्पने साटश्यात् स्त्रीसङ्क्रान्तधनमात्रस्य पूर्व्वस्वामिदायादरूपोऽधिकारी कल्पनीय एतदर्थं पत्नीपदस्य स्त्रीलक्षकत्वमिति भावः। इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः॥

संक्रान्तिः, स्त्री, (सं+क्रम+क्तिन्।) राश्यन्तरसंयोगानुकूलव्यापारः। यथा,—

"नाड़ीनक्षत्रदिवसे रविभौमशनैश्चराः।
सङ्क्रान्तिं यस्य कुर्व्वन्ति तस्य क्लेशोऽभिजायते॥"

इति तिथ्यादितत्त्वम्॥

रविसंक्रान्तिर्यथा। भविष्यमाल्यज्योतिषेषु।

"मृगकर्कटसंक्रान्ती ह्ययनौ तूदगदक्षिणायने।
विषुवती तुलामेषे गोलमध्ये तथापरौ॥"

मृगो मकरः। गोलो राशिचक्रम्।

"धनुर्म्मिथुनकन्यासु मीने च षड़शीतयः।
हयहस्त्रिकसिंहेषु कुम्भे विष्णुपदी स्मृता॥"

देवीपुराणम्।

"यावद्दिग्भकला भुक्तास्तत् पुण्यं चोत्तरायणे।
निरंशे भास्करे दृष्टे दिनान्तं दक्षिणायने॥
अर्द्धरात्रे त्वसंपूर्णे दिवा पुण्यमनागतम्।
अर्द्धरात्रे व्यतीते तु विज्ञेयं चापरेऽहनि॥
संपूर्णे चार्द्धरात्रे च उदयेऽस्तमयेऽपि वा।
मानार्द्धं भास्करे पुण्यमपूर्णे गर्ग्यरोदसे॥
सम्पूर्णे तूभयोर्ग्रेयमतिरिक्ते परेऽहनि।

षड़शीतिमुखेऽतीते दृष्टे च विषुवद्दये ॥
भविष्यत्ययने पुण्यमतीते चोत्तरायणे ।
आदौ पुण्यं विजानीयात् यद्यभिन्ना तिथि-
र्भवेत् ॥"

विंशकला विंशतितमो कला संक्रान्तिलक्षणादूर्द्धं यावद्भवति तावत् पुण्यम्। निरंशेऽंशगून्ये संक्रान्तिकाले हि भास्करोऽरहितो भवति तस्मिन् दृष्टे दिवेति यावत्। दिनञ्च दिनकरकरसंस्कृतास्त्रिंशद्घटिका इति ज्योतिर्विदः। तदर्द्धं तत्समाप्तिं यावत् तावत् पुण्यम्। तथा च हृद्दग्गिष्ठः। विंशत्कर्कटके नाड्यो मकरे विंशतिः स्मृताः। नाड़ी दण्डः।

"उत्पलादिपलं षष्ट्या विपलास्तु पलं नयेत्।
पलात्षष्ट्या नयेन्नाड़ीं तत्षष्ट्या तु रवेर्दिनम्॥"
इति सिद्धान्तसन्दर्भात्॥

ततश्च देवीपुराणबृहद्दग्गिष्ठयोरेकवाक्यतया कलान्याद्योः पर्य्यायता ॥*॥ रात्रिसंक्रमणं त्वाह अर्द्धरात्रे त्विति। असम्पूर्णे कलान्यूनार्द्धरात्रे।

"कलान्यूनार्द्धरात्रे तु यदि संक्रमणं भवेत्।
तदहः पुण्यमिच्छन्ति गार्गगालवगोतमाः॥"

इति क्षत्यचिन्तामणिधृतगर्गवचनात्। कालकौमुद्याञ्च गालवेत्यत्र हारीत इति पाठः। ततश्च कलान्यूनार्द्धरात्राभ्यन्तरे द्वादशस्वेव संक्रान्तिषु अनागतं नागतं संक्रमणेन यत्र दिवा तत्रैव पुण्यं पुण्यजनकम्। तत्तु पूर्व्वदिनं तदैव संक्रान्तेरनागतत्वसम्भवात्। तेन संक्रमणकालादर्व्वागेव दिवापरार्द्धे स्नानादिकं कर्त्तव्यमित्यर्थः। अर्द्धरात्रे व्यतीते कालाधिकार्द्धरात्रे व्यतीते। सम्पूर्णे अर्द्धरात्रे रात्रिमध्यकालयोः। कलान्यूनार्द्धरात्रे त्विति वचनानन्तरं भुजबलभीमे।

"अर्द्धरात्रे कलाधिक्ये यदा संक्रमते रविः।
तदोत्तरदिनं ग्राह्यं स्नानदानजपादिषु॥
अर्द्धरात्रे तु संपूर्णे यदा संक्रमते रविः।
प्राहुर्द्विनद्वयं पुण्यं त्यक्त्वा मकरकर्कटौ॥"

इति वचनाभ्यां तथा प्रतीतेः। कालविवेके कालकौमुद्याञ्च ज्ञातातपजाबालौ।

"पूर्णे चेदर्द्धरात्रे तु रविसंक्रमणं भवेत्।
प्राहुर्द्विनद्वयं पुण्यं त्यक्त्वा मकरकर्कटौ॥"

एतयोर्व्यवस्थां आह कालमाधवीये भविष्योत्तरीयम्।

मिथुनात् कर्किसंक्रान्तिर्यदि स्यादंशमालिनः।
प्रदोषे वा निशीथे वा कुर्य्यादह्नि पूर्व्वतः॥
कार्म्मुकन्तु परित्यज्य झषं संक्रमते रविः।
प्रभाते वार्द्धरात्रे वा स्नानं कुर्य्यात् परेऽहनि॥"

ततश्च रात्रिमध्यदण्डद्वयात्मकार्द्धरात्रसंक्रान्तावुदयेऽस्तमयेऽपि वा इत्यनेन उदयोपक्रममस्तमयान्तञ्च मानार्द्धं पुण्यम्। एवञ्चोभयदिने पुण्यकाले पूर्व्वदिनाकरण एव परदिने।

"यः कार्य्यमद्य कर्त्तव्यं पूर्व्वाह्णे चापराह्णिकम्।
न हि प्रतीक्षते मृत्युः कृतमस्य न वा कृतम्॥"

इति लिङ्गपुराणात् मोक्षधर्म्माच्च॥

तत्रापि दक्षिणायने पूर्व्वदिनार्द्धमात्रमिति विशेषः। उत्तरायणे परदिनार्द्धमात्रमिति विशेषः। मानार्द्धमिति भास्करे भास्करोपलक्षिते काले दिवेति यावत् तस्मिन् संक्रमणेऽपि मानार्द्धं पुण्यम्। एतच्च विषुवषड़शीतिविषयम्! अयनकालयोः पूर्व्वमुक्तत्वात् विष्णुपद्याश्चोभयतः षोड़शकलानां पञ्चदशनाड़िकानां वा पुण्यत्वस्य ज्ञातातपादिवचनेन वक्ष्यमाणत्वात्। तेन दिवासंक्रमण एवायनादित्वेन पुण्यकाले विशेषः। रात्रिसंक्रमणे तु अर्द्धरात्रीयमकरकर्कटसंक्रमणव्यतिरिक्ते सर्व्वेषां तुल्यतेति। अपूर्णे अर्द्धरात्रे कलान्यूनार्द्धरात्रे इत्यत्रापि मानार्द्धमित्यनुषज्यते। दिवापुण्यमिति यत् प्रागुक्तं अत्र तदेव मानार्द्धत्वेन विशेषितमित्यपुनरुक्तिः। एवमुदयास्तमये यन्मानार्द्धं पुण्यं तत् किमेकदिने दिनयोर्व्वेति तत्राह संपूर्णे तूभयोरिति उभयोः पूर्व्वापरदिनयोर्म्मानार्द्धं पुण्यं तेन पूर्व्वदिनस्यास्तमयपर्य्यन्तं परदिनस्य उदयमारभ्य मानार्द्धं पुण्यमित्यर्थः। अतिरेके अर्द्धरात्रात् परतः संक्रमणे परेऽहनि मानार्द्धं पुण्यमित्यनुषज्यते। मानार्द्धन्तु प्रहरद्वयम्।

"अर्द्धरात्रादधस्तस्मिन् मध्याह्नस्योपरिक्रिया।
ऊर्द्धं संक्रमणे भानोरुदयात् प्रहरद्वयम्।
पूर्णार्द्धरात्रसंक्रान्तौ ह्यहनी तु पुण्यदे॥"

इति संवत्सरप्रदीपगङ्गावाक्यावलीधृतवह्निपुराणधर्म्मवचनैकवाक्यत्वात्!

"अर्द्धरात्रादधर्त्वेव दिनार्द्धस्योपरि क्रिया।
ऊर्द्धं संक्रमणे भानोरुदयात् प्रहरद्वयम्॥"

इति भोजराजकृत्यचिन्तामणिधृतैकवाक्यत्वाच्च अधः पूर्व्वं ऊर्द्धं परत। क्रिया स्नानादिका। एवञ्च गर्गवचनस्थतदहरिति यामद्वयपरम्। अन्यथा मूलभूतमुख्यरत्नाप्तेः। एवञ्च षड़शीतिमुखेऽतीते इत्यादि दिवासंक्रमणविषयम्। तेन दिवा षड़शीतिसंक्रमणे भूते भविष्यन्मानार्द्धं पुण्यं एव विषुवद्दयेऽपि। दिवोत्तरायणेऽपि भविष्यद्दिनातिदण्डानां पुण्यत्वम्। अत्रोत्तरायणस्य पृथगभिधानात् अयन इति पदं दक्षिणायनपरं गोवलीवर्द्दन्यायात्। तेन दिवा दक्षिणायने भविष्यति भूतत्रिंशद्दण्डानां पुण्यत्वम्। एवञ्च षड़शीत्यादिव्यवहारयमलभमानम्।

"अर्व्वाक् षोड़श विष्णया नाड्यः पश्चाच्च षोड़श।
कालः पुण्योऽर्कसंक्रान्तेर्व्विदद्भिः परिकीर्त्तितः॥"

इति ज्ञातातपोयम्।

"अतीतानागतो भोगो नाड्यः पञ्चदश स्मृताः॥"

इति देवीपुराणीयञ्च वचनं दिवा विष्णुपदीविषयम्। अतएव जाबालिबृहद्दग्गिष्ठौ।

"पुण्यायां विष्णुपद्याञ्च प्राक् पश्चादपि षोड़श।"

अर्द्धरात्रे विशेषमाह आदावित्यादि। अर्द्धरात्रसंक्रान्तावादौ पूर्व्वदिन एव मानार्द्धं पुण्यम्। यद्यभिन्ना संक्रान्तिकाले पूर्व्वदिने च एकैव तिथिर्भवेत् तेन मध्यरात्रे संक्रमणे यदुभयदिनमानार्द्धं पुण्यमुक्तं तन्निरस्तितिथिविषयम्। अतीते पुनरर्द्धरात्रे पूर्व्वेषाङ्का तिथ्यभेदेऽपि परदिनस्यैव पूर्व्वार्द्धं पुण्यमिति तात्पर्य्यार्थः॥ एवञ्च रात्रिसंक्रान्तौ दिन एव पुण्यत्वाभिधानात्।

"राहुदर्शनसंक्रान्तिविवाहात्ययहादिषु।
स्नानदानादिकं कुर्य्युर्निशि काम्यव्रतेषु च॥"

इति देवलेन दिनसंक्रमणस्य रात्रिप्रविष्टपुण्यकालांशे संक्रान्तिनिमित्तेन स्नानदानादि विधीयते इति॥ * ॥ यत्तु।

"मन्दा मन्दाकिनी ध्वाङ्क्षी घोरा चैव महोदरी
राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप
मन्दा ध्रुवेषु विज्ञेया खदो मन्दाकिनी तथा।
क्षिप्रे ध्वाङ्क्षी विजानीयादुग्रे घोरा प्रकीर्त्तिता
चरे महोदरी ज्ञेया क्रूरैर्ज्ञेया च राक्षसी।
मिश्रिता चैव विज्ञेया मिश्रितर्क्षेषु संक्रमे॥"

इत्येतैर्द्वादशस्वेव संक्रान्तिषु ध्रुवादिनक्षत्रयोगान्मन्दादिरूपतया सप्तधाभिन्नासु।

"त्रि चतुः पञ्च सप्ताष्ट नव द्वादश एव च।
क्रमेण घटिका ज्ञेतास्तत्पुण्यं पारमार्थिकम्॥"

इति देवीपुराणे एव त्रिचतुरादिघटिकानां पुण्यत्वमुक्तं तद्दिवारात्र्योस्तत्तत्कालोपदेशात् अवकाशमलभमानं सन्ध्याद्वयसंक्रान्तिविषयमिति समयप्रकाशः॥*॥ ध्रुवादिगणस्तु दीपिकायाम्

"उग्रः पूर्व्वमघान्तकाः ध्रुवगणस्त्रीणुत्तराणि स्वभू-
र्व्वातादित्यहरित्रयं चरगणः पुष्याश्विहस्ता लघुः।
चित्रामित्रमृगान्त्यभं मृदुगणस्त्वौष्ण्योऽहि-
रुद्रेन्द्रयुक् मिश्रोऽग्निः सविशाखभः शुभफलाः सर्व्वे स्वकृत्य गणाः॥"

अन्तको भरणी। स्वभू रोहिणी। वातादित्यहरित्रयं स्वातौ पुनर्वसुः श्रवणा धनिष्ठा शतभिषा। मित्रमृगान्त्यभं अनुराधामृगशिरा-रेवत्यः। अहिरुद्रेन्द्रयुक् अश्लेषा आर्द्रा ज्येष्ठा मूला। अग्निः कृत्तिका। कल्पतरुस्तु। क्रमेण यथासंख्यन एता घटिकास्तत्पुण्यं तस्य सक्रमणस्य पुण्यहेतुत्वात् पुण्यं पारमार्थिकं मुख्यम्।

"त्रुटेः सहस्रभागो यः स कालो रविसंक्रमः।"

इत्युक्तसूक्ष्मसंक्रमकालीनानुष्ठानजन्यपुण्यसमपुण्यहेतव इत्याह। त्रुटिस्तु।

"लघुक्षरचतुर्भागस्त्रुटिरित्यभिधीयते।
त्रुटियं लवः प्रोक्ता निमेषस्तु लवद्वयम्॥"

इति स्मृत्युक्ता॥

एतदेव मतं युक्तम्। अतएव देवलेन।

"या याः संग्रहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः।"

इत्यत्रम्। एवञ्चैता घटिकाः पुण्यतमाः मानार्द्धादिकन्तु पुण्यमात्रमिति तच्चाग्रन्थे इत्यादि न सन्ध्यासंक्रान्ति विषयकमिति। सन्ध्यासंक्रान्ति-विषयत्वे पारमार्थिकमित्यनुपपत्तेः। पुण्यमित्यनेनैव सिद्धेः। पारमार्थिकमित्यत्र कल्पतरव्याख्यानावलोकनात् रविसंक्रम इति पाठकल्पनं कल्पनमेव। समयप्रकाशेऽपि तथा पठितत्वात्। जीमूतवाहनोऽपि कालविवेके।

"अर्कि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितम्। रात्रौ संक्रमणे भानोर्हिनार्द्धं स्नानदानयोः॥"

इति बृहद्गिरिदेवचनपर्य्यालोचनया दिवासंक्रान्तौ दिनमात्र पुण्य पुण्यतरास्तु विशेषविहिता नाद्याः इत्याह। अतएव तद्धृतजाबालिबृहस्पतिप्रातातपवचनमपि सङ्गच्छते। यथा,—

"वर्त्तमाने तुलामेषे नाद्यास्तूभयतो दश॥"

कालमाधवीयेऽपि। अर्कीत्यभिधाय प्राग्यस्तारतम्यमुक्तम्। एवञ्च दिवासंक्रान्तौ कृत्स्नं दिनं पुण्यं षड़शीतिमुखेऽतीते इति वचनं पुण्यतरपरम् ॥*॥ ननु देवीपुराणे दिवारात्रयोः संक्रमणे विशिष्यकालाभिधानात् सन्ध्यासंक्रान्तेः कः काल इति चेत्।

"त्रिंशन्मुहूर्त्तं कथितमहोरात्रन्तु यत्नया।"

इति विष्णुपुराणेन सन्ध्ययोः पृथगनुपादानात् दिवारात्रिसम्बन्धित्वान्मुहूर्त्तार्द्धेन तयोरन्तर्भावः तथा च दक्षः।

"अहोरात्रस्य यः सन्धिः सूर्य्यनक्षत्रवर्জ्जितः। सा तु सन्ध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः॥"

योगियाज्ञवल्क्यः।

"क्रान्तिहृद्धौ च सततं दिनरात्र्योर्यथाक्रमम्। सन्ध्या मुहूर्त्तमाख्याता क्रान्तेः हृद्धौ समा स्मृता॥"

वराहः।

"अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्॥"

तेजःपरिहानिरुषा भानोरर्द्धोदयं यावत्॥"

अतएव केनापि मुनिना नानादेशीयैस्य ग्रहकारैश्च सन्ध्यासंक्रान्तित्वेन विशेषो नाभिहितः॥*॥*॥ तदयं संक्षेपः। दिनसंक्रमणे कृत्स्नं दिनं पुण्यम्। षड़शीतिमुखेऽतीते इत्याद्युक्तं पुण्यतरं। मन्दा मन्दाकिनीत्यादिरूपेण त्रिचतुरादिघटिकाः पुण्यतमाः। दिनहृत्तोत्तरायणादिविहितविंशतिदण्डादीनां रात्रिप्रविष्टभागस्यापि पुण्यत्वम्। रात्रिसंक्रमणे तु कलान्यूनप्रथमार्द्धरात्रगते तद्दिवसीयशेषयामद्वयं पुण्यम्। कलाद्वयात्मकमध्यरात्रगते तद्दिवसीयतिथिरभेदे तद्दिवसीयशेषयामद्वयं पुण्यम्। भेदे तु तद्दिवसीयशेषयामद्वयं परदिवसीयाद्ययामद्वयञ्च पुण्यम्। उभयदिने पुण्यकालेऽपि पूर्व्वदिनाकरण एव परदिने तद्विहितं कार्य्यम्। तिथिभेदाभेदयोर्दक्षिणायने तद्दिवसीयशेषयामद्वयं उत्तरायणे तु परदिवसीयाद्ययामद्वयं पुण्यमिति। मध्यरात्रीयकलोत्तरशेषार्द्धरात्रसंक्रमणमात्रे तु परदिनाद्ययामद्वयं पुण्यमिति। सन्ध्यासंक्रमणे तु दिनदण्डेदिनस्य रात्रिदण्डे रात्रेर्व्यवस्थेति ॥*॥*॥ ब्रह्मपुराणे।

"शुक्लपक्षस्य सप्तम्यां यदा संक्रमते रविः। महाजया तदा प्रोक्ता सप्तमी भास्करप्रिया॥ स्नानं दानं तपो होमः पितृदेवाभिपूजनम्। सर्व्वं कोटीगुणं प्रोक्तं तपनेन महौजसा॥"

अथ।

"मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वशः।" इत्यनेन प्राप्ततिथुद्देशे तद्विशेषत्वेन महाजया इत्युल्लेख्यम्। मन्त्रविधेरेतदेव प्रयोजनं यत्तया निर्देश इत्युक्तत्वात्। एवञ्च संक्रान्तिविशेषस्य निमित्तत्वेन प्राप्तौ विषुवाद्युल्लेखोऽपि ॥*॥ स्कान्दे।

"एकान्ततो मया प्रोक्ताः कालाः संक्रान्तिसंज्ञकाः। नैतेषु विद्यतेऽनिष्टं यतश्चायसंज्ञिताः॥ अक्षयत्वापि यद्दत्तं कुपात्रेभ्योऽपि मानवैः। अकालेऽपि हि तत् सर्व्वं सत्यमक्षयतां व्रजेत्॥"

मात्स्ये।

"अयने कोटिगुणितं लक्षं विष्णुपदेषु च। षड़शीतिसहस्रन्तु षड़शीत्यामुदाहृतम्॥ शतमिन्दुक्षये पुण्यं सहस्रन्तु दिनक्षये। विषुवे शतमाहस्रमा-मा-वैष्वनन्तकम्॥"

आ-का-मा-वैषु आषाढ़ीकार्त्तिकीमाघीवैशाखीपूर्णिमासु। देवीपुराणे।

"रविसंक्रमणे पुण्ये न स्नायादृयस्तु मानवः। सप्तजन्मसु रोगी निर्द्धनश्चोपजायते॥"*॥

दीपिकायाम्।

"नाड़ीनक्षत्रदिवसे रविभौमशनैश्चराः। संक्रान्तिं यस्य कुर्व्वन्ति तस्य क्लेशोऽभिजायते॥ गोमूत्रसर्षपैः स्नानं सर्व्वौषधिजलेन च। विधृतं काञ्चनं दद्याद्वाड़ीदोषोपशान्तये॥ नाड़ीनक्षत्राणि चाद्यदशघाड़्याष्टादशघट्यो-र्विंशतिपञ्चविंशतयः। रत्नमालायाम्।

"तारावलादिन्दुरथेन्दुवीर्य्या-द्दिवाकरः संक्रममाच उक्तः। ग्रहाश्च सर्व्वे सवितुर्बलेन महीसुताद्याः क्रमशः प्रशस्ताः॥"*॥

संवत्सरप्रदीपे।

"धुस्तूरबीजसलिलैः स्नायात् संक्रान्तिशान्तये तथा सर्व्वौषधीभिश्च विष्णुमन्त्राञ्च संजपेत्॥ यदाऽर्कि मेषसंक्रान्तिस्तुलासंक्रमणं निशि। तदा प्रजा विवर्द्धन्ते धनधान्यसमृद्धिभिः॥ कुजाकशनिवारेण महासंक्रमणं यदा। तदा भवेत् प्रजानाशो दुर्भिक्षादिभयं महत्॥"

षट्त्रिंशन्मतनिगमौ।

"संक्रान्त्यां पञ्चदश्याञ्च द्वादश्यां श्राद्धवासरे। वस्त्रं न पीड़येत्तत्र न च चारेण योजयेत्॥ संक्रान्त्याञ्च त्रयोदश्यां पञ्चान्ते नवमीदिने। सप्तम्यां रविवारे च स्नानमामलकैस्त्यजेत्॥"

प्रातातपः।

"रविवारेऽर्कसंक्रान्त्यां षष्ठ्यां वै सप्तमीतिथौ। आरोग्यकामस्तु नरो निम्बपत्रं न भक्षयेत्॥"*

कृत्यचिन्तामणौ गुणिसर्व्वस्वे च।

"चैत्रे मासि च सम्पूज्यो घण्टाकर्णो घटात्मकः। आरोग्याय सुखीमूलं सक्रान्त्यां तत्र कारयेत्॥"

पूजामन्त्रः।

"घण्टाकर्ण महावीर सर्व्वव्याधिविनाशन। विस्फोटकभये प्राप्ते रक्ष रक्ष महाबल!॥"

शिवपुराणे।

"घण्टाकर्णो गणः श्रीमान् शिवस्यातीववल्लभः॥"*॥

कृत्यचिन्तामणौ।

"मसूरं निम्बपत्रञ्च योऽक्ति मेषगते रवौ। अपि रोषान्वितस्तस्य तक्षकः किं करिष्यति॥"

संवत्सरप्रदीपे तूत्तरार्द्धे।

"मेषस्थे च विधौ तस्य नास्त्यङ्गे विषजं भयम्॥"

स्मृतिः।

"मेषादौ शक्तवो देया वारिपूर्णा च गर्गरी॥"

वारिदानमन्त्रः।

"एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः। अस्य प्रदानात् सफला मम सन्तु मनोरथाः॥ वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने। ददात्यभुक्ता राजेन्द्र स याति परमां गतिम्॥"

पूर्णं जलेनेति शेषः। महार्णवे।

"यो ददाति हि मेषादौ शक्तूनम्बुघटान्वितान् पितॄनुद्दिश्य विप्रेभ्यः सर्व्वपापैः प्रमुच्यते॥ विप्रेभ्यः पादुके दत्ते पिठभ्यो विषुवे शुभम्।"

पिठभ्यः पितॄनुद्दिश्य इत्यर्थः। अत्र विषुवस्य पुण्यविशेषजनकत्वेन विवक्षितत्वात् मेषादाविति विषुवसंक्रान्तिपुण्यकालपरम्। अन्यथा कालद्वयकल्पनापत्तेः॥*॥ कर्म्मोपदेशिन्यां व्यासः।

"संक्रान्त्यां पञ्चयोरन्ते द्वादश्यां श्राद्धवासरे। सायंसन्ध्यां न कुर्व्वीत कृते च पिठदो भवेत्॥"

देवीपुराणे।

"अतीतानागतो भोगो नाद्याः पञ्चदश स्मृताः। सान्निध्यन्तु भवेत्तत्र ग्रहाणां संक्रमे रवेः॥ पुण्यपापविभागेन फलं देवी प्रयच्छति।"

भोगः पुण्यपापजननयोग्यकालः। पुण्यपापविवेचने विश्वामित्रः।

"यमार्य्याः क्रियमाणं हि शंसन्त्यागमवेदिभिः। स धर्म्मो य विगर्हन्ति तमधर्म्मं प्रचक्षते॥"

आगमवेदिभिः क्रियमाणमिति सम्बन्धः। तान्त्रिकास्तु।

"विहितक्रियया साध्यो धर्म्मः पुंसो गुणो मतः। प्रतिषिद्धक्रियासाध्यः स गुणोऽधर्म्म उच्यते॥"

अत्रैकस्मिन्नेव काले पुण्यपापफलदानदर्शनात् संक्रमणपुण्यकाल एव स्नानादिवस्तैलादित्यागः एवमेव गुरुचरणाः। एकादशीप्रकरणोक्तसंक्रान्त्युपवासस्य व्रतत्वेन भावरूपत्वात् भाव-

घटितत्वादोभयथापि तत्र पूज्ये विधेर्वृत्तिरित्यनेन पुण्यकालयुक्ताहोरात्रकर्त्तव्यता अष्टम्युपवासवत्। एकादश्यौतत्त्वे एतद्दृढधा विस्मृष्टम्। एवञ्च रात्रिप्रागर्द्धसंक्रान्तौ दिवाग्रेपार्द्धमात्रस्य तत्पुण्यकालत्वाद्द्वात्रिंशद्घटिकं सायं सन्ध्योपासनं कार्य्यमेव।*। ब्रह्मपुराणे।

"नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः।
चन्द्रार्कयोर्ग्रहक्षयोर्व्यतीपातेषु पर्व्वसु॥
अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम्।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयञ्च तत्॥"
अहोरात्रोषितः पूर्व्वदिने कृतोपवासः। एतत्परमेव।

"अर्द्धरात्रे व्यतीते तु संक्रान्तिर्यदहर्भवेत्।
पूर्व्वे व्रतादिकं कुर्य्यात् परेद्युः स्नानदानयोः॥"
इति भीमपराक्रमीयम्॥

स्नानदानयोरित्यत्र सप्तमीनिर्द्देशात् परदिवसीयस्नानदानादिनिमित्तकं पूर्व्वदिने उपवाससंयमरूपः व्रतादिकं कुर्य्यादित्यर्थः। इति तिथ्यादितत्त्वम्॥*॥ अथ रविसंक्रान्तिगणनम्

"नवाष्टशक्रहीनेन शकाब्दाङ्केन पूरिताः।
भूर्व्वाणचन्द्रविकाग्नौ कुरामौ वेदयुग्मके॥
१।१५।३१।३१।२४॥
अङ्का अनुपलादेस्तु षष्टया लब्धाङ्कमिश्रिताः।
दण्डात् खाग्नौ हयेषू च ३०।५७। पलादित्यादि
ततः पुनः॥
सप्तावशिष्टा वाराः स्युस्ततो दण्डादिकाः परे।
मेषसंक्रमणे भानोः सिद्धान्तस्फुटसम्मताः॥
भुजौ षड़िषू रामाग्नौ २।५६।३३। कालो
जातिर्गजावनी।६।२२।१८
रामचन्द्रोऽग्नियुग्मश्च १।१।२३।तर्कोऽङ्क दृङ्नवाग्नयौ॥६।२८।५८॥
द्वावङ्कदृग्वेदबाणा २।२८।५४। अग्निर्वाणगरौ
सुराः।४।५५।३३।
वसुनागवेदौ शून्येन्दू ६।४८।१०। एकं शैलभुवौ
शराः॥१।१७।५॥
द्वौ षड़ग्नौ तथा काला २।२६।६। अब्धीरामाः
शरावनौ।४।३।१५।
पक्षाग्नीषू तथा रुद्रा ५।५३।११। मेषसंक्रमवारतः।
अङ्केर्योज्या हृपादेस्तु वाराद्याः संक्रमे रवेः॥"
इति ज्योतिस्तत्त्वम्॥

सङ्क्रान्तिचक्रं, क्लो, (संक्रान्त्यायचक्रम्।)नराणां शुभाशुभ-ज्ञानायनक्षत्राङ्कितनराकारचक्रम्। यथा,—

"मूर्द्धि सप्त मुखे त्रीणि हृदये पञ्च विन्यसेत्।
त्रितयं हस्तपादेषु महाविषुवभक्रमात्॥
मस्तके भूपतेः सौख्यं वदने पटुता खमे।
हृदये च धनाढ्यत्वमर्थप्राप्तिर्दक्षिणे करे॥
वामकरे महद्दुःखं सुखं पादे च दक्षिणे।
भ्रमणं वामपादे च कथितं विषुवत्फलम्॥"
इति महाविषुवचक्रम्॥*॥

"षड्मूर्द्धि वदने पञ्च चत्वारि हृदये तथा।
त्रितयं करपादेषु पयोविषुवभक्रमात्॥
मानं मूर्द्धि मुखे चैवं हृदये सुखसम्भवः।
दोः पदोर्दक्षयोर्भोगस्त्रासश्च वामयोः खमे॥"
इति जलविषुवचक्रफलम्॥*॥

"शीर्षे पञ्च मुखे त्रीणि हस्तयोश्च द्वयं द्वयम्।
हृदि पञ्च शशी नाभौ गुदे च पादयो रसाः।
उत्तरायणभाजश्चेयं स्वनक्षत्रस्थितेः फलम्॥
शीर्षेऽर्थलाभो वदने सुखानि
दक्षे करेऽङ्घ्रौ हृदये च सौख्यम्।
नाभौ भयं वामकरेऽर्थनाशो
गुह्ये भयं वामपदे प्रवासः॥"
इत्युत्तरायणचक्रफलम्॥*॥

"शीर्षे त्रीणि मुखे त्रीणि हृदये पञ्च हस्तयोः।
अष्टौ पादद्वयेऽप्यष्टौ दक्षिणायनभक्रमात्॥
शीर्षे मानं मुखे विद्या हृदये वित्तसञ्चयः।
प्रवासः स्यात् करे वामे भिक्षालाभश्च दक्षिणे।
निष्फलं वामपादे च किञ्चिल्लाभश्च दक्षिणे॥"
इति दक्षिणायनचक्रफलम्॥*॥

"ऋक्षे संक्रमणं यत्र विष्णुपद्यां मुखे च तत्।
चत्वारि दक्षिणे बाहौ त्रीणि त्रीणि पदद्वये॥
चत्वारि वामबाहौ च हृदये पञ्च निर्द्दिशेत्।
अक्षोर्द्वयं द्वयं योज्यं मूर्द्धि द्वौ चैककं
गुदे॥
रोगो भोगस्तथा यानं बन्धनं लाभ एव च।
ऐश्वर्य्यं राजपूजा च अपमृत्युरिति क्रमात्॥"
इति विष्णुपदीचक्रफलम्॥*॥

"मुखे चैकं करे वेदाः पादयुग्मे द्वयं द्वयम्।
क्रोड़े बाणस्तथा वेदाः करे सव्येतरेऽपि च॥
द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा।
द्वयञ्चैव तथा गुह्ये षड़शीत्यां खमे स्थिते॥
सुखे दुःखं करे लाभः पादयोर्भ्रमणं हृदि।
कान्ता स्याद्भवनं वामे हस्ते स्यात् स्वीयमे
नृणाम्॥
सम्मानं नेत्रयोश्चैव अपमानञ्च मस्तके।
गुह्ये चैव भवेन्मृत्युः षड़शीतिफलश्रुतिः॥"
इति षड़शीतिचक्रफलम्॥*॥
इति ज्योतिस्तत्त्वम्॥

सङ्क्रामः, पुं, (सं+क्रम+घञ्।) दुर्गसञ्चरः। इति हेमचन्द्रः॥

सङ्क्लेदः, पुं, (सं+क्लिद्+घञ्।) आर्द्रीभावः। (यथा, हरिवंशे। ५३।
"अनया सह जाह्नव्या मोदमानो ममाग्रया।
इमं सलिलसंक्लेदं विस्मरिष्यसि सागर!॥")

सङ्ख, क्लो, (सम्यक् ख्यायतेऽनेति। सं+ख्या+बाहुलकात् कः।) युद्धम्। इत्यमरः॥ (यथा, गीतायाम्। १।४६।
"एवमुक्त्वार्জ্জুनः संख्ये रथोपस्थ उपाविशत्॥"

सङ्ख्येय, त्रि॥

सङ्ख्यता, स्त्री, सङ्ख्यत्वम्। सङ्ख्यशब्दात् भावे तप्रत्ययेन निष्पन्नम्॥

सङ्ख्या, स्त्री, (संख्यायतेऽनयेति। सं+ख्या+षङ्।टाप्।) बुद्धिः। इति राजनिर्घण्टः॥ विचारणा। इत्यमरः॥ (यथा, महाभारते २।५७।७।
"यो वेत्ति संख्यां निकृतौ विधिज्ञ-
मेष्टासखिज्ञः कितवोऽक्षजासु।
महामतिर्यश्च जानाति द्यूतं
स वै सर्व्वं सकृतं प्रक्रियासु॥")

एकत्वादिः। इति मेदिनी॥ (सङ्ख्येये, त्रि। यथा,—

"विषमो विक्रयः सङ्ख्या सङ्ख्येये ह्यादय विषु
विंशत्याद्या सदैकत्वे सर्व्वा सङ्ख्येयसङ्ख्ययोः॥
सङ्ख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः।
षड़्शतेः शतसहस्रादि क्रमादृशगुणोत्तरम्॥"
इति चामरः॥

"दश दशश्रुतिपर्य्यन्तं अष्टादश यावत् एकादिकाः संख्याशब्दाः संख्येये द्रव्ये वर्त्तन्ते। त्रिषु लिङ्गेषु तेन संख्यासंख्येययोः सामानाधिकरण्येन वृत्तिः। यथा एका शाटी एकः पटः एकं कुण्डम्। हि शब्दो अवधारणे संख्येय एव न तु संख्यायामित्यर्थः। तेन घटा दश इति साधुर्न घटानां दशेति। किन्तु द्येकयोर्द्विवचनैकवचने इति सूत्रे द्येकयोरिति निर्द्देशात् संख्यामात्रेऽपि सम्भव इति भाव्यम्। घटानां पञ्च इत्यपि स्यादिति सुभूतिः। वार्त्ताकुरेषा गुणसमयुक्ता इति वैद्यकम्। आङ्शब्देन दशशब्दस्याव्ययीभावः। दशशब्दस्य त्रिलिङ्गत्वात् नपुंसकत्वपक्षे क्लीवादेति पक्षे अः तेन आदशं आदशेति पाठः। विंशः। अष्टादशपरा विंशत्याद्याः सर्व्वा एव सङ्ख्याः संख्यायां संख्येये च नित्यमेकवचनान्ता भवन्ति यथा विंशतिर्भावः गवां विंशतिः। संख्या। इह संख्या संख्यान्तरं अन्यथा पूर्व्वेण विरोधः स्यात् संख्या अर्थः अभिधेयो यस्य स संख्यार्थः तच्च संख्यार्थे विंशत्यादौ संख्यायां संख्येये च सामानाधिकरण्यात् द्विवचनबहुवचने भवतः यथा द्वे विंशती गावः गवां वा तिस्रो विंशतयो गावः गवां वा एवं द्वे शते दश शतानीत्यादि। अयमभिप्रायः सदा विंशत्यादीनामनाहत्तिरेकैव विंशतिरेकमेव शतमित्येवं स्यात् तदा पूर्व्वेण एकवचनान्ततैव यथोक्तं विंशतिर्गावः गवां विंशतिरिति। यदा विंशत्यादेराहत्तिर्विंशतिद्वयं शतद्वयमित्येवं स्यात् तदा अनेन द्विवचनबहुवचनान्तता स्यात् यथोक्तं द्वे विंशती तिस्रो विंशतयः। अतएव परे परिभाषन्ते। विंशत्यादेरनाहत्तौ बहुत्वेऽप्येकवचनं इति एकशेषात् द्वे विंशती तिस्रो विंशतयः इत्यन्येऽपि। स्वमतेऽपि त्रयादयः संख्याशब्दाव्यान्ता इत्युक्तेः टेर्लोप इति सूत्रे विंशतेस्तेस्त्वाडाविति ङित्त्वमनेनैव एकवचनान्तताज्ञापकात् ज्ञेयानि इत्यनेन चाहत्तौ द्वित्वबहुत्वसम्भवाच्चायमर्थोऽवगम्यः। ताश्च संख्यासु विंशताद्या नवत्यन्ताः स्त्रीलिङ्गाः भिन्नलिङ्गेनापि सामानाधिकरण्ये स्त्रिय एव

यथा विंशत्या पुरुषैः विंशतिः कुलानीति विंशतिः श्रुतिरष्टाविंशतियावत् एवं त्रिंशत् श्रुतिरष्टात्रिंशदयावत् एवं चत्वारिंशदादौ। षड्विंशदंशसङ्ख्या तामारभ्य परार्द्धान्तं दशगुणोत्तरं दशगुणाधिकं क्रमात् शतसहस्रादि भवति। क्रमादितिपदोपादानादयमर्थः एकं दशगुणितं षड्विंशदुच्यते। दशषड्विंशतयः शतम् दशशतानि सहस्रम्। एवं दशगुणितं सहस्रमयुतम्। एवं लक्षनियुतादि ज्ञेयम्। तथा च। ब्रह्माण्डपुराणम्।

'एकं दश शतञ्चैव सहस्रमयुतं तथा।
लक्षञ्च नियुतञ्चैव कोटिरर्बुदमेव च॥
वृन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः।
अन्त्यं मध्यं परार्द्धञ्च दशवृद्ध्या यथाक्रमम्॥'

शतं तालव्यशकारम्। सहस्रं हिदन्त्यसकारम्।" इति भरतः॥*॥ न्यायमते अस्या गणनव्यवहारे कारणत्वम्। एकत्वं नित्यवस्तुनि नित्यम्। अन्यत्र अनित्यम्। द्वित्वादिपरार्द्धपर्य्यन्तं अपेक्षाबुद्ध्या जायते। एवं अपेक्षाबुद्धिनाशे तेषां नाशः। पर्य्याप्तिसम्बन्धेन अनेकाश्रये तिष्ठन्ति। यथा,—

"गणनव्यवहारे तु हेतुः संख्या विधीयते।
नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते॥
द्वित्वादयः परार्द्धान्ता अपेक्षा बुद्धिजा मताः।
अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः॥
अपेक्षाबुद्धिनाशाच्च तेषां नाशो निरूपितः।
अनेकैकत्वबुद्ध्या सापेक्षा बुद्धिरुच्यते॥"

इति भाषापरिच्छेदः॥*॥

अपि च।

श्रीमैत्रेय उवाच।

"परार्द्धसंख्यां भगवन्! ममाचक्ष यया तु सः।
द्विगुणीकृतया ज्ञेयः प्राकृतः प्रतिसञ्चरः॥

श्रीपराशर उवाच।

स्थानात् स्थानं दशगुणमेकस्मादुद्गुणते द्विज।
ततोऽष्टादशमे भागे परार्द्धमभिधीयते॥
परार्द्धद्वितयं यत्तु प्राकृतः प्रलयो द्विजः।
तदाव्यक्तेऽखिलं व्यक्तं सहेतौ लयमेति वै॥"

इति विष्णुपुराणे ६ अंशे ३ अध्यायः॥

सङ्ख्यातं, त्रि, (सं+ख्या+क्तः।) कृतसङ्ख्यम्। तत्पर्य्यायः। गणितम् २। इत्यमरः॥ (यथा, भागवते। ६। १४। ३।

"रजोभिः समसंख्याताः पार्थिवैरिह जन्तवः।
तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः॥")

सङ्ख्यानं, क्ली, (सं+ख्या+ल्युट्।) सङ्ख्या। संपूर्व्वख्याधातोरनङ्प्रत्ययेन निष्पन्नम्॥(यथा, मनुः। ८। ४००।

"मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययम्॥"

प्रकाशः यथा, भागवते ५। १७। १७।

"ॐ नमो भगवते महापुरुषाय सर्व्वगुणसंख्यानायानन्तायाव्यक्ताय नम इति॥"

"सर्व्वेषां गुणानां संख्यानं प्रकाशो यस्मात्।" इति तत्र श्रीधरस्वामी॥)

सङ्ख्यावान्, पुं, (संख्या बुद्धिरस्यस्येति। मतुप्। मस्य वः।) पण्डितः। इत्यमरः॥ (यथा, काशीखण्डे। ८२। ८।

"रणाङ्गणे कृतान्ताभः सङ्ख्यावांश्च सदोजिरे॥")

सङ्ख्यायुक्ते, त्रि। इति मेदिनी॥

सङ्ख्येयं, त्रि, (संख्यातुं योग्यमिति। सं+ख्या+यत्।) सङ्ख्यायोग्यम्। तत्पर्य्यायः। गण्येयम् २ गणनीयम् ३। इति जटाधरः॥ गण्यम् ४। इति हेमचन्द्रः॥ (यथा, साहित्यदर्पणे। ४। २५५।

"एकोऽपि भेदोऽनन्तत्वात् सङ्ख्येयस्यास्य नैव यत्॥")

सङ्गः, पुं, (सञ्जसङ्गे+घञ्।) मेलनम्। तत्पर्य्यायः। मेलकः २ सङ्गमः ३। इत्यमरः॥ (यथा, देवीभागवते। १। २०।६७।

"अम्बिका च यदा स्नाता नारी ऋतुमती तदा
सङ्गं प्राप्य सुनेः पुत्रमसूतान्धं महाबलम्॥")

रागः। यथा। "रागसङ्गौ तु गृध्नुता।" इति त्रिकाण्डशेषः॥ (यथा, कुमारे। १। २७।

"अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा॥"*॥)

सङ्गदोषो यथा,—

"स मे समाधिर्ज्जलवासमित्र-
मत्स्यस्य सङ्गात् सहसैव नष्टः।
परिग्रहः सङ्गकृतो ममायं
परिग्रहोत्थाय महाविवित्साः॥"

इति विष्णुपुराणे ४ अंशे २ अध्यायः॥

अन्यच्च।

"अहोऽस्य दारसंयोगः कथं तमूर्द्ध्वरेतसः।
दृष्ट्वा तयोश्च शृङ्गारं मुनिः कामी बभूव ह।
जितेन्द्रियोऽसतां सङ्गात् दोषः सांसर्गिको भवेत्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २३ अध्यायः॥

अपि च।

"असतां सङ्गदोषेण को न याति पराभवम्।
त्रिदशैर्वन्दितो वह्निर्भक्षना सहितो यथा॥"

इति चाणक्यम्॥

किञ्च।

"यत्र यत्र स्थितो जीवस्तमोयोगेन लज्जते।
उपहासाय किं न स्यादसत्सङ्गो मनीषिणाम्॥"

इति ज्योतिस्तत्त्वम्॥

सङ्गणिका, स्त्री, अप्रतिरूपकथा। इति त्रिकाण्डशेषः॥

सङ्गतं, क्ली, (सं+गम्+क्तः।) सौहार्द्दम्। इति हेमचन्द्रः॥ यथा, कुमारे। ५। ३८।

"यतः सतां सन्नतगात्रि! सङ्गतं
मनीषिभिः साप्तपदीनमुच्यते॥")

युक्तियुक्तवाक्यम्। इति भरतः॥ तत्पर्य्यायः। हृदयङ्गमम् २॥ इत्यमरः। १।६।१८॥ (मौर्य्यवंशीयनृपतिविशेषे, पुं। यथा, भागवते। १२। १। १३।।

"सुयशा भविता तस्य सङ्गतः सुयशः सुतः॥")

सङ्गतिः, स्त्री, (सं+गम+क्तिन्।) सङ्गमः। ज्ञानम्। इति मेदिनी॥ न्यायमते। आनन्तर्य्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोऽर्थः। सा च षोढा। प्रसङ्गः १। सङ्गतित्वे सति उपोद्घातादिभिन्नः। यथा सामान्यलक्षणायां प्रसङ्गसङ्गतिः। उपोद्घोतः २। निर्द्दिष्टोपपादकत्वम्। यथा परामर्शप्रवर्त्तकज्ञाने च उपोद्घातसङ्गतिः। हेतुता ३। यथा। प्रत्यक्षप्रमाणे हेतुतासङ्गतिः। अवसरः ४। अनन्तरवक्तव्यत्वम्। यथा। उपमाने अवसरसङ्गतिः। निर्व्वाहकम्५। कारणतानिर्व्वाहकं कार्य्यत्वम् यथा। अनुमाने कार्य्यतासङ्गतिः। एककार्य्यत्वम् ६। एककार्य्यकारित्वम्। यथा हेत्वाभासे एककार्य्यकारित्वसङ्गतिः। इति अनुमितिपत्रे जगदीशतर्कालङ्कारः॥ (मेलनम्। यथा, मोहमुद्गरे। ६।

"चपमिह सज्जनसङ्गतिरेका
भवति भवार्णवतरणे नौका॥"

युक्तिः। यथा,—

"त्वमद्य भव नो राजा राजपुत्र महायशः।
सङ्गत्या नापराध्नोति राज्यमेतदनायकम्॥"

इति रामायणे। २। ७८। ३॥)

सङ्गमः, पुं, क्ली, (सं+गम+"अवहट्टनिवि-गमश्च।" ३। ३। ५८। इति अप्।) सङ्गः। इत्यमरः॥ (यथा, साहित्यदर्पणे।

"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः।
सङ्गमे सैव तथैका त्रिभुवनमपि तन्मयं विरहे॥")

नद्यादिमेलकः। इति पुंनपुंसकलिङ्गसंग्रहटीकायां भरतः॥ स्त्रीपुंसोर्मिथुनीभावः। स त्रिविधः। प्रथमः १। मध्यमः २। उत्तमः ३। यथा,—

"त्रिविधं तत्समाख्यातं प्रथमं मध्यमोत्तमम्।
अदेशकालभाषाभिर्निर्ज्जने च परस्त्रियाः।
कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतम्॥१
प्रेरणं गन्धमाल्यानां धूपभूषणवाससाम्।
प्रलोभनञ्चान्नपानैर्मध्यमं साहसं स्मृतम्॥२॥
सहासनं विविक्तेषु परस्परसमाश्रयः।
केशाकेशिग्रहश्चैव सम्यक्संग्रहणं स्मृतम्॥"३॥

इति मिताक्षराधृतव्यासवचनम्॥

सङ्गरं, क्ली, (संगीर्य्यते इति। सं+गॄ+अप्।) श्रमौषधफलम्। इति मेदिनी॥

सङ्गरः, पुं (संगृणन्ति शब्दायन्ते वीरा यत्र। सं+गॄशब्दे+अप्।) युद्धम्। (यथा, कथासरित्सागरे। ३१। ८३।

"सङ्कटे हि परीक्ष्यन्ते प्राज्ञाः शूराश्च सङ्गरे॥")

आपत्। अङ्गीकारः। (यथा, रघुः। ५।२६।

"तथेति तस्या वितथं प्रतीतः
प्रत्यग्रहीत् सङ्गरमग्रजन्मा॥")

संवित्। इत्यमरः॥ क्रियाकारः। विघ्नम्। इति मेदिनी॥

सङ्गवः, पुं, (सङ्गताः गावो दोहनार्थं यत्र। पृषोदरादित्वात् साधुः।) प्रातःकालात् परं मुहूर्त्तत्रयम्। यथा,—
"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम्।
सायाह्नस्त्रिमुहूर्त्तः स्याच्छ्राद्धं तत्र न कारयेत्॥"
इति तिथ्यादितत्त्वम्॥
(यथा, ऋग्वेदे। ६। ७६। ३।
"उतायातं सङ्गवे प्रातरह्नो
मध्यन्दिन उदिता सूर्य्यस्य॥"
"अह्नोऽष्टधा त्रेधा पञ्चदशधेति समाना विभागाः सन्ति इह पञ्चधा विभाग आत्तः उतापिचायातं आगच्छतं कदा सङ्गवे सङ्गवकाले। सङ्गच्छन्ते गावो दोहनभूमिं यस्मिन् काले स सङ्गवः। रात्र्यपरकाले हि गावो वने हिमकणानि भक्षयित्वा पुनर्दोहाय सङ्गवे प्रतिनिवर्त्तन्ते॥"
इति तद्भाष्ये सायणः॥)
सङ्गी, [न्] त्रि, (सङ्गोऽस्यास्तीति। इनिः।) सङ्गविशिष्टः। यथा,—
"आमृत्युतो नैव मनोरथाना-
मन्तोऽस्ति विज्ञातमिदं मयाद्य।
मनोरथासक्तिपरस्य चित्तं
न जायते वै परमार्थसङ्गि॥"
इति विष्णुपुराणे ४ अंशे २ अध्यायः॥
सङ्गीतं, क्ली, (सं+गे+क्तः।) प्रेक्षणार्थनृत्यगीतवाद्यम्। यथा, हेमचन्द्रः।
"गीतवाद्यनृत्यत्रयं नाट्यं तौर्य्यत्रिकञ्च तत्।
सङ्गीतं प्रेक्षणार्थेऽस्मिन् शास्त्रोक्ते नाट्यधर्म्मिका॥"
नृत्यगीतवाद्यस्य शास्त्रम्। तत्तु सोमेश्वरभरतहनूमत्कल्लिनाथमतभेदात् चतुर्व्विधम्। अधुना हनूमन्मतं प्रचलितम्। तस्य अध्यायाः सप्त। स्वराध्यायः १ रागाध्यायः २ तालाध्यायः ३ नृत्याध्यायः ४ भावाध्यायः ५ लोकाध्यायः ६ रसाध्यायश्च ७। इति सङ्गीतशास्त्रम्॥ * ॥
सङ्गीतावसाने ताम्बूलदानप्रमाणं यथा,—
"तां वासुदेवोऽप्यनुरक्तचित्तः
संनृत्य गीताभिनयैरुदारैः।
नरेन्द्रसूनो परितोषितेन
ताम्बूलयोगेन वराप्सरोभिः॥
तदागताभिर्नृवराहृतास्तु
कृष्णेच्छया मानमयास्तथैव।
फलानि गन्धोत्तमवन्ति वीरा-
स्त्रालिक्यगान्धर्व्वमयाहृतश्च॥
कृष्णेच्छया च त्रिदिवान्नृदेव
अनुग्रहार्थं भुवि मानुषाणाम्।
स्थितश्च रम्यं हरितेजसैव
प्रयोजयामास स रौक्मिणेयः।
त्रालिक्यगान्धर्व्वमुदारबुद्धि-
स्तेनैव ताम्बूलमथ प्रयुक्तम्॥"
इति हरिवंशे भानुमतीहरणे जलक्रीड़ायाम् १४८ अध्यायः॥

सङ्गीतिः, स्त्री,(सं+गै+"स्वागापापचो भावे" ३। ३। ९५। इति क्तिन्।) आलापः। इति हलायुधः॥ सङ्गीतञ्च॥
सङ्गृहीतं, त्रि, (सं+गृ+क्तः।) अङ्गीकृतम्। इत्यमरः॥
सङ्गुसः, पुं, (सं+गु+क्तः।) बुदभेदः। इति हेमचन्द्रः॥ सङ्गोपनाख्ये, त्रि॥
सङ्गूढः, त्रि, (सं+गुह+क्तः।) लेखादिना संवृतः। इति भरतः॥ रेखादिना पुच्छाकृतधान्यादिः। इति नीलकण्ठः॥ तत्पर्य्यायः। सङ्गलितः २ इत्यमरः॥
सङ्गोपनं, क्ली, (सं+गुप+ल्युट्।) सम्यक्प्रकारेण गोपनम्। संपूर्व्वगुपधातोरनट्प्रत्ययेन निष्पन्नम्॥
सङ्ग्रहः, पुं, (सं+ग्रह+अप्।) समाकृतिः। इत्यमरः॥ (यथा, रघुः। १७। ६०।
"कोशेनाव्ययणीयत्वमिति तस्यार्थसंग्रहः।
अम्बुगर्भो हि जीमूतस्तातकैरभिनन्द्यते॥")
"संक्षेपेण गृह्यन्ते नानाख्यानेषु विप्रकीर्णा अर्था बुध्यन्तेऽनेन संग्रहः। संपूर्व्वात् ग्रह आदानेऽल्।
'विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः।
निबन्धो यः समासेन संग्रहं तं विदुर्बुधाः।'
इति॥
इतस्तत आहृत्य एकत्र निबन्धनं संग्रहः। इति कल्पतरुप्रभृतयः।" इत्यमरटीकायां भरतः॥
नानाग्रन्थस्था अर्थाः संगृह्यन्ते एकस्थानस्थाः क्रियन्ते इति संग्रहो ग्रन्थविशेषः। इति श्राद्धविवेकटीकायां श्रीकृष्णतर्कालङ्कारः॥*॥
(यथा, हरिवंशे। ८८। ७।
"चतुष्पादं धनुर्व्वेदं शास्त्रग्रामं ससङ्ग्रहम्।
अचिरेणैव कालेन गुरुस्तावभ्यशिक्षयत्॥")
बृहत्। उत्तुङ्गः। ग्रहणम्। (यथा, रघुः।१।६६।
"नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः॥")
संक्षेपः। इति मेदिनी॥ मुष्टिः। इति विश्वः॥ स्वीकारः। महोदयोगः। इति नानार्थरत्नमाला॥
सङ्ग्रहणी, स्त्री, (संश्रिता ग्रहणी।) ग्रहणीरोगः। तस्य निदानादि ग्रहणीशब्दे द्रष्टव्यम्। अथ सामान्यग्रहणीरोगस्य चिकित्सामाह।
"ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत्।
लङ्घनैर्दीपनीयैश्च मन्दातीसारभेषजैः॥
दोषं सामं निरामञ्च विद्यादतिसारवत्।
प्रतिसारोक्तविधिना तस्यामञ्च विपाचयेत्॥
पेयादि पटु लघ्वन्नं पञ्चकोलादिभिर्युतम्।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक्॥
कपित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता।
यवागूः पाचयत्यामं सकृत् संवर्त्तयत्यपि॥"
संवर्त्तयति घनीकरोति॥* ॥ औषधान्याह।
"जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः।
कर्पूरं चन्दनन्तिक्तत्वक्क्षीरतगरामलैः॥
तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः।
गुण्ठीविड़ङ्गमरिचैः समभागैर्विचूर्णितैः॥
यावन्त्येतानि सर्व्वाणि दद्याड़ङ्गाञ्च तावतीम्।
सर्व्वचूर्णसमानांशा प्रदेया शुभ्रशर्करा॥
कर्षमात्रमिदं खादेन्मधुनाप्लावितं जनः।
नाशयेद्ग्रहणीं कासं क्षयं श्वासमरोचकम्॥"
इति जातीफलादिचूर्णम्॥*॥
"चित्रकं पिप्पलीमूलं चारौ लवणपञ्चकम्।
व्योषं हिङ्गुजमोदाञ्च चव्यं चैकत्र चूर्णयेत्॥
वटिका मातुलुङ्गस्य रसैर्व्वा दाड़िमस्य वा।
कृता विपाचयत्यामं प्रदीपयति चानलम्॥"
चारौ खर्ज्जिकायवचारौ। लवणपञ्चकमिति। सैन्धवं रुचकञ्चैव विड़ं सामुद्रिकं गड़मिति। व्योषं गुण्ठीपिप्पलीमरिचानि। अजमोदाव यवानिका। मातुलुङ्गं बीजपूरकम्। चित्रकादिवटिका॥*॥
"श्रीफलग्लादुकल्को नागरचूर्णेन मिश्रितः सगुड़ः।
ग्रहणीमदमत्युग्रं तक्रभुजा शीलितो जयति॥"
श्रीफलग्लादुः विल्वस्यामं फलम्। गुड़स्याव भागद्वयम्। विल्वकल्कः॥*॥
"चतुष्पलं सुधाकाण्डं त्रिफलं लवणत्रयम्।
वार्त्ताकोः कुड़वञ्चाकमूलादिश्चेत्तथानलात्॥
दग्धद्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम्।
भुक्ताभुक्तं पचत्याशु नाशयेद्ग्रहणीगदम्।
कासं श्वासं तथार्शांसि विसूचीञ्च हृदामयम्॥"
इति वार्त्ताकुगुटिका॥*॥
"मुस्तकातिविषाविल्वकौटजं सूक्ष्मचूर्णितम्।
मधुना च समालोढ़ं ग्रहणीं सर्व्वजान्यजेत्॥"
कौटजं इन्द्रयवः। मुस्तादिचूर्णम्॥*॥
"श्वेतो वा यदि वा रक्तः सुपक्को ग्रहणीगदः।
गुड़ेनाधिकसर्ज्जेन भक्षितेनाशु नश्यति॥"
सर्ज्जः राल इति लोके। सर्ज्जरसचूर्णम्॥ * ॥
"विल्वाब्दग्रक्रयवबालकमोचसिद्धमाजं पयः पिबति यो दिवसत्रयेण।
सोऽतिप्रवृद्धचिरजं ग्रहणीविकारं सामं सशोणितमसाध्यमपि क्षिणोति॥"
मोचो मोचरसः। क्षिणोति हन्ति।
"प्रस्थत्रये त्वामलकीरसस्य
गुड़स्य दत्त्वार्द्धतुलां गुड़स्य।
चूर्णीकृतैर्गुन्यितजीरचव्य-
व्योषेभकृष्णाहपुषाजमोदैः॥
विड़ङ्गसिन्धुत्रिफलायवानी
पाठाग्निधान्यैश्च पलप्रमाणैः।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत्॥
तं भक्षयेदक्षफलप्रमाण
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम्।
अनेन सर्व्वा ग्रहणीविकाराः
सश्वासकासस्वरभेदगोथाः॥
शाम्यन्ति चायं चिरमन्तराग्ने-
रेतस्य पुंस्त्वस्य च हृद्धितुः।

स्त्रीणान्तु बन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रसिद्धः ॥
तैले मनाक् त्रिवृत् शुष्टा त्रिसुगन्धिपलं पलम्।
सिद्धं निधेयमत्रैव गुड़े कल्याणपूर्व्वके ॥"
इति कल्याणकगुड़ः ॥*॥

"पिप्पली पिप्पलीमूलं चव्यकं गजपिप्पली।
धान्यकञ्च विड़ङ्गानि यवानी मरिचानि च ॥
त्रिफला चाजमोदा च नलिनी जीरकस्तथा।
सैन्धवं रौमकं चापि सामुद्रं रुचकं विड़म् ॥
आराग्वधस्य त्वक् पत्रं सूक्ष्मैला चोपकुञ्चिका।
गुण्डो गक्रयवाश्चैव प्रत्येकं कर्षसम्मिता ॥
गृहीकायाः पलान्यत्र चत्वारि कथितानि हि।
त्रिवृतायाः पलान्यष्टौ गुड़स्यार्द्धतुला तथा ॥
तिलतैलपलान्यष्टौ चामलक्या रसस्य तु।
प्रस्थत्रयमिदं सर्व्वं मृनैर्म्मृदग्निना पचेत् ॥
उड़म्बरं चामलकं बादरं वा यथाफलम्।
तावन्मात्रमिदं खादेदक्षमेहा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैकविंशतिम्।
उरोघातं प्रतिश्यायं दीर्ब्बल्यं वह्निसंक्षयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं स्मरम्।
पित्तपाठान्वयाहन्ति रक्तपित्तञ्च चिद्ग्रहम् ॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः।
तेभ्यो हितश्च बन्ध्यायै महाकल्याणको गुड़ः ॥"
इति महाकल्याणकगुड़ः ॥*॥

'कुष्माण्डानां सुपक्वानां क्षिप्तानां लिकुचत्वचाम्
सर्पिःप्रस्थे पलशतं ताम्रपात्रे शनैः पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली।
धान्यकानि विड़ङ्गानि नागरं मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम्।
एकैकस्य पलं चैकं त्रिवृतोऽष्टपलानि च ॥
तैलस्य च पलान्यष्टौ गुड़ात् पञ्चाशदेव तु।
आमलक्या रसस्यात्र प्रस्थत्रयमुदीरितम् ॥
तावत् प्राक्तं प्रकुर्व्वीत मृदुना वह्निना भिषक्।
यावत् दर्व्वीप्रलेपः स्यात् तदैनमवतारयेत् ॥
औड़ुम्बरं चामलकं बादरं वा यथाफलम्।
तावन्मात्रमिदं खादेदक्षमेहा यथानलम् ॥
अनेनैव विधानेन प्रयुक्तश्च दिने दिने।
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान्॥
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिकाः।
कामलां पाण्डुरोगञ्च प्रमेहांश्चैकविंशतिम् ॥
वातगोचितवोसर्पदद्रुपचश्लीमकान्।
वातपित्तकफान् सर्व्वान् दुष्टान् व्रणान् समाचरेत्
व्याधिक्षीणा वयःक्षीणा स्त्रीषु क्षीणाश्च ये नराः।
तेभ्यो हितो गुड़ोऽयं स्यात् बन्ध्यानामपि पुत्रदः।
हृष्यो बल्यो बृंहणश्च वयसः स्थापनः परः ॥"
इति कुष्माण्डकल्याणगुड़ः ॥*॥

अतोसाराधिकारलिखितं विल्वं तैलञ्चात्र हितम्। इति ग्रहणीरोगाधिकारः। इति भावप्रकाशः।

सङ्ग्राम, ड अ त् क युद्धे। इति कविकल्पद्रुमः॥ (भ्वदन्त चुरा०-आत्म०-उभ०-च-अक०-सेट्।) असंग्रासत्। ड, संग्रामयते। ड, संग्रामयति संग्रामयते। इतैवोभयपदसिद्धौ ङित्करणं अफलवत्कर्त्तरि आत्मनेपदार्थम्। एवं सर्व्वत्र। किन्तु अयमात्मनेपदीति प्राहुः कदाचित् परस्मैपदार्थो अकारः। इति दुर्गादासः॥

सङ्ग्रामः, पुं, (सङ्ग्राम+णिच्+भावे घञ्।) युद्धम्। इत्यमरः॥ (यथा, मनुः। ७। ८७।
"न निवर्त्तेत संग्रामात् क्षात्रं धर्म्ममनुस्मरन्॥")

सङ्ग्रामपटहः, पुं, (सङ्ग्रामस्य पटहः।) रणवाद्यम्। यथा, त्रिकाण्डशेषे।
"रणतूर्य्यन्तु संग्रामपटहोऽभयडिण्डिमः।"

सङ्ग्राहः, पुं, (संग्रहणमिति। सं+ग्रह+"समि मुष्टौ।" ३। ३। ३६। इति घञ्।) फलकस्य मुष्टिः। फलकग्रहणस्थानमिति यावत्। मुष्टिबन्धनक्रिया। तत्पर्य्यायः। मुष्टिबन्धः २। द्वे मुष्टिबन्धनक्रियायाम्। मुष्टेर्बन्धोऽङ्गुलिविन्यासो मुष्टिबन्धः। मुष्टिना बन्धो दृढ़ग्रहणं संग्राह इत्यपरे। मुष्टामेव संग्रह इत्यन्ये। मुष्टिः स्त्रियाञ्च संग्रह इति वोपालितः। संपूर्व्वग्रहेर्घञ् संग्राहः। इत्यमरभरतौ॥ (यथा, महाभारते। ५। १५४। २०।
"सुसंग्राहाः सुसम्पन्नाः हेमभाण्डपरिच्छदाः।"
"पदातिनो नरास्तत्र बभूवुर्हेममालिनः॥")

सङ्ग्राही, [न्] पुं, (संगृह्णाति मलमिति। सं+ग्रह+णिनिः।) कुटजवृक्षः। इति राजनिर्घण्टः॥ (मलसन्धारके, त्रि। यथा, सुश्रुते। १। ४५।
"दीपनं लघु संग्राहि श्वासकाशास्रपित्तनुत्॥")

संग्राहके, त्रि। यथा, कामन्दकीये। ४। १०।
"प्रख्यातवंशमक्रूरं लोकसंग्राहिणं शुचिम्।
कुर्व्वीतात्महिताकाङ्क्षी परिवारं महीपतिः॥")

सङ्घः, पुं, (सं+हन+"संघोद्घौ गणप्रशंसयोः।" ३। ३। ८६। इति अप् ढिलोपो घत्वञ्च निपात्यते।) समूहः। इत्यमरः॥ सजातीयानां विजातीयानाञ्च जन्तूनां द्वन्द्वे सङ्घशार्थौ स्याताम्। यथा भिक्षुसङ्घः बणिक्सार्थः। संहन्यते परिच्छिद्यतेऽनेनेति सङ्घः। संपूर्व्वात् हनधातोर्नान्नोति डः निपातनात् हस्य घः। इति भरतः॥ (यथा, महाभारते। १। १२०। १।
"तथापि तपसि श्रेष्ठे वर्त्तमानः सवीर्य्यवान्।
सिद्धचारणसङ्घानां बभूव प्रियदर्शनः॥")

सङ्घचारी, [न्] पुं, (सङ्घेन चरतीति। चर+णिनिः।) मत्स्यः। इति हेमचन्द्रः॥ बहुभिः सहगामिनि, त्रि॥ (यथा महाभारते। ९। ११। १९।
"ततस्तदयुद्धमत्युग्रमभवत् सङ्घचारिणाम्॥")

सङ्घजीवी, [न्] पुं, (सङ्घेन जीवतीति। जीव+णिनिः।) व्रातीनः। इति हेमचन्द्रः॥

सङ्घट्टः, पुं, (सं+घट्ट+घञ्।) अन्योन्यविमर्द्दनम्। यथा,—
"नैवान्यत्र मदान्धसिन्धुरघटासङ्घट्टघण्टारणत्-
कारव्यस्तसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः।"
इति वाल्मीकिकृतगङ्गाष्टकस्तोत्रम्॥

गठनम्। यथा,—
"मृदाहरणसङ्घट्टप्रतिष्ठादानमेव च।
स्नपनं पूजनञ्चैव विसर्জ্জनमतः परम्॥"
इति तिथ्यादितत्त्वम्॥

चक्रविशेषश्च॥

सङ्घट्टचक्रं, क्ली, (संघट्ट एव चक्रम्।) युद्धविचारार्थनक्षत्राङ्कितचक्रविशेषः। यथा,—
"अश्विन्यादि लिखेच्चक्रं सप्तविंशतितारकैः।
त्रिकोणं नवभिर्व्वेधः कर्त्तव्यस्तिर्य्यगाकृतिः॥
अश्विनीरेवतीवेधो अश्विनीज्येष्ठयोस्तथा।
मघापुष्णोः सर्पपित्र्योरश्लेषामूलयोस्तथा॥
ज्येष्ठामूलकयोर्व्वेधो भवेत् सङ्घट्टचक्रके।
एवं सङ्घट्टचक्रे च कार्य्या ऋक्षगता ग्रहाः॥
भूपनामर्क्षसङ्घट्टे युद्धं भवति नान्यथा।
निर्व्वेधे सौम्यवेधे च युद्धं नास्तिं रणेऽयोः॥
क्रूरवेधे भवेद्युद्धं तत्काले घोरदारुणम्।
युद्धाकाङ्क्षी भवेद्राजा यस्य भं क्रूरवेधितम्॥
युद्धद्वेषी भवेत् सौम्यैर्भं च वेधविवर्জ্জिते।
सौम्यक्रूरविभागेन मित्रामित्रक्रमेण च।
वक्रातिचारगत्या च युद्धमत्रास्ति नास्ति च॥"
इति स्वरोदये सङ्घट्टकालानलचक्रम्॥

सङ्घट्टनं, क्ली, स्त्री, (सं+घट्ट+ल्युट्। स्त्रियां युच्।) मेलनम्। गठनम्। घटना। इति केचित्॥ (यथा, साहित्यदर्पणे। ९। ६२४।
"पदसंघट्टना रीतिरङ्गसंस्थाविशेषवत्।
उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्व्विधा॥")

सङ्घट्टा, स्त्री, (संघट्टते इति। सं+घट्ट+अच्+टाप्।) लता। इति शब्दचन्द्रिका।

सङ्घतलः, पुं, (सङ्घे संहते तले यस्य।) मिलितप्रतलहस्तयम्। इत्यमरः॥ योड़ हात इति भाषा॥

सङ्घपुष्पी, स्त्री, (सङ्घानि पुष्पाणि यस्याः।) धातकी। इति राजनिर्घण्टः॥

सङ्घर्षः, पुं, (सं+घृष+घञ्।) सङ्घर्षणम्। (यथा, महाभारते। १। १८। २३।
"तेषां सङ्घर्षजस्याग्निरर्चिर्भिः प्रज्वलन् मुहुः।
विद्युद्भिरिव नीलाभ्रमाहृणोत् मन्दरं गिरिम्॥")

स्पर्द्धा। (यथा, महाभारते। १। ७६। ५।
"सुराणामसुराणाञ्च समजायत वै मिथः।
ऐश्वर्य्यं प्रति संघर्षस्तेलोक्ये सचराचरे॥")

संस्पर्शः। इति शब्दरत्नावली॥

सङ्घाटिका, स्त्री, (संघाटयतीति। सं+घट+णिच्+ण्वुल्। टापि अत इत्वम्।) युग्मम्। कुट्टनी। जलकण्टकम्। इति मेदिनी॥ घ्राणम्। इति विश्वः॥

सङ्घातः, पुं, (सं+हन+घञ्।) समूहः। (यथा, कुमारे। ५। ५५।
"न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि॥")

नरकभेदः। इत्यमरः॥ हननम्। इति मेदिनी। (निविड़संयोगः। यथा, कुमारे। २। ११।
"द्रवः सङ्घातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु॥")

कफः। इति राजनिर्घण्टः॥ नाटके गतिविशेषः। इति केचित्॥

सङ्गतपत्रिका, स्त्री, (सङ्गतयुक्तानि पत्राणि यस्याः। कापि अत इत्वम्।) शतपुष्पा। इति राजनिर्घण्टः॥

सङ्घर्षितं, त्रि, सम्यग्घोषणाश्रयः॥ संपूर्व्वसङ्घट्टं, ∫ घुषधातोः क्तप्रत्यये कृते वा घृषामङ्घत्वरसंघुषास्वन इत्यनेन विकल्पेन इमा निष्पन्नम्। इति मुग्धबोधव्याकरणम्॥ (यथा, महानिर्व्वाणतन्त्रे। १। ४।

"मत्तकोकिलसन्दोहसंघुष्टविपिनान्तरे॥")

सचिः, स्त्री, (सच समवाये+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) शची। इत्यमरटीकायां रामाश्रमः॥

सचिक्लिक्कः, त्रि, क्लिन्नचक्षुः। इति शब्दरत्नावली॥

सचिवः, पुं, (सच समवाये+इन्। तथा मन् बातीति। वा+कः।) मन्त्री। सहायः। इत्यमरः॥ (यथा, देवीभागवते। २।८।४२।

"इत्युक्त्वा सचिवान् राजा कल्पयित्वा सुरक्षकान्।
कारयित्वाथ प्रासादं सप्तभूमिकमुत्तमम्।
आरुरोहोत्तरासूनुः सचिवैः सह तत्क्षणम्॥")

क्षणाधत्तूरकः। इति राजनिर्घण्टः॥

सचिवामयः, पुं, (सचिवानामामयः।) विसर्पः। इति राजनिर्घण्टः॥

सची, स्त्री, (सचि+ऋदिकारादिति ङीप्।) शची। इन्द्राणी। शचते व्यक्तं व्यक्ति शची शच ङ वाति तालव्यादिः। नाञ्चीति इः। याञ्छोणादीति पचे ईपि शची। कौशिकी च शची कोशातकीति वर्णदेशमालायां तालव्यशेषु पठ्यते। सची दन्त्यादिश्च तत्र सचते आप्याययति इन्द्रमिति ष च ङ सेचने पूर्व्ववत इः ईप् च। इत्यमरटीकायां भरतः॥ सचिः शचीति भरतहिरूपकोषश्च॥

सचीनन्दनः, पुं, (सच्या नन्दनः।) शचीसुतः। न च जयन्तः। चैतन्यदेवः। यथा,—

"शाके मुनिस्योमयुगेन्दुगण्ये
पुण्ये तिथौ फाल्गुनपौर्णमास्याम्॥
त्रैलोक्यभाग्योदयपुञ्जकीर्त्ति-
दवः सचीनन्दन आविरासीत्॥"

इति चैतन्यचन्द्रोदयनाटकम्॥

सचेष्टः, पुं, आम्रः। इति शब्दमाला॥ चेष्टया सह वर्त्तमाने, त्रि॥

सचारा, स्त्री, हरिद्रा। इति शब्दचन्द्रिका॥

सच्चित्, क्लीं, ब्रह्म। इति मुग्धबोधव्याकरणम्॥

सच्चिदानन्दः, पुं, (संश्चासौ चिच्चासौ आनन्दश्चेति त्रिपदे कर्म्मधारयः।) नित्यज्ञानसुखस्वरूपं ब्रह्म। यथा,—

"अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न शोकभाक्।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान्॥"

इत्याद्यिङ्गतत्त्वम्॥

साकारदैवविशेषणे, त्रि। यथा,—

"मुकुन्दं सच्चिदानन्दं प्रणिपत्य प्रणीयते।"

इत्यादि मुग्धबोधव्याकरणम्॥

सजम्बालः, त्रि, (जम्बालेन पङ्केन सह वर्त्तमानः।) पङ्किलः। इत्यमरः॥

सजातिः, पुं, (समाना जातिरस्य। समानस्य सः।) समानजातिस्त्रीपुंसोः पुत्रः। यथा,—

"सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः।
अनिन्द्येषु विवाहेषु पुत्राः सन्तानवर्द्धनाः॥"

इति मिताक्षरायां आचाराध्यायः॥

समानजातौ, त्रि॥

सजातीयः, त्रि, (जातौ भवः जातीयः। समानो जातीयः। समानस्य सः।) समानधर्म्माक्रान्तः। यथा,—

"सजातीयैः कुलं यूथं तिरश्चां पुं नपुंसकम्।"

इत्यमरः॥

सज्जूः, [ष्] व्य, सहार्थः। इति शब्दरत्नावली भरतश्च॥ (यथा, भागवते। ६। १८। ६७।

"सज्जूरिन्द्रेण पञ्चाशत् देवास्ते मरुतोऽभवन्॥")

सज्जूः, [ष्] जुष सेवे+क्विप्। जुषा सह वर्त्तते इति। सहस्य सः। "ससजुषो रुः।" ८। २। ६६। इति रुः। वोरिति दीर्घः।) प्रीतियुक्ता। सेवायुक्ता। इति मुग्धबोधव्याकरणम्॥ "जुषी प्रीतिसेवनयोः। जोषणं जुट् सह जुषा वर्त्तते या सा सजूः।" इति तट्टीकायां दुर्गादासः॥ तापसः। इति संक्षिप्तसारव्याकरणम्॥

सज्जः, त्रि, (सज्जतीति। सज्ज+अच्।) सन्नद्धः। इत्यमरः॥ सम्भृतः। इति विश्वमेदिन्यौ॥ निभृतः। इति शब्दरत्नावली॥ सज्जायुक्तश्च॥ (यथा, महाभारते। १। २। २३२।

"तं तस्य वचनं श्रुत्वा मन्त्रयित्वा तु यद्धितम्।
सांग्रामिकं ततः सर्व्वं सज्जश्चक्रुः परन्तपाः॥")

सज्जनं, क्लीं, (सज्ज+णिच्+ल्युट्।) रक्षणार्थं सैन्यस्थानम्। चौकीति ख्यातम्। तत्पर्य्यायः। उपरक्षणम् २। इत्यमरः॥ घट्टः। इति मेदिनी॥ सज्जा च॥

सज्जनः, पुं, (सन् चासौ जनश्चेति।) सत्कुलोद्भवः। तत्पर्य्यायः। महाकुलः २ कुलीनः ३ आर्य्यः ४ सभ्यः ५ साधुः ६। इत्यमरः॥ कुलजः ७ सभ्यः ८ साधुजः ९। इति शब्दरत्नावली॥ मेदिनीकारमते वाच्यलिङ्गोऽयम्। तल्लक्षणं यथा,—

दान्त उवाच।

"निजाचारग्राहिणो ये कुर्व्वन्तो वेदसम्मतम्।
पापाभिलाषरहिताः सज्जनास्ते प्रकीर्त्तिताः॥"

इति पाद्मे क्रियायोगसारे १६ अध्यायः॥

तत्सङ्गप्रशंसा यथा,—

"नलिनीदलगतजलवत्तरलं
तद्वज्जीवनमतिशयचपलम्।
क्षणमिह सज्जनसङ्गतिरेका
भवति भवार्णवतरणे नौका॥"

इति श्रीशङ्कराचार्य्यकृतमोहमुद्गरः॥

सज्जना, स्त्री, (सज्ज+णिच्+न्यामश्यन्येति युच्। टाप्।) नायकस्यारोहणार्थं गजसज्जीकरणम्। तत्पर्य्यायः। कल्पना २। इत्यमरः॥ (यथा, आर्य्यासप्तशत्याम्। ३१६।

"निजपदगतिगुणरञ्जितजगतां करिणाञ्च सत्कवीनाञ्च।
वहतामपि महिमानं शोभायै सज्जना एव॥")

सज्जा, स्त्री, वेशः। साज इति भाषा सन्नाहः। साँजओया इति भाषा। षस्जधातोर्भावे आत् प्रत्ययनिष्पन्ना। इति व्याकरणम्॥

सज्जितः, त्रि, भूषितः। कृतसज्जः। वर्म्मितः। सन्नद्धः। षस्जधातोः क्तप्रत्ययेन निष्पन्नः॥

सञ्चः, पुं, (संचिनोति वर्णानिति। सं+चि+डः।) पुस्तकलेखनार्थपत्रचयः। साँच इति भाषा। यथा,—

"श्रीतालीपत्रजे सञ्चे समे पत्रसुसञ्चिते।
विचित्रकं विपार्श्वं च चर्म्मणा संपुटीकृते॥
रक्तेन अथ कृष्णेन सूत्रेणावर्द्वितेन च।
दृढसूत्रसुबन्धेन एवंविधकृतेन च॥
यस्तु द्वादशसाहस्रीं संहितामुपलेखयेत्।
ददाति चाभियुक्ताय स याति परमां गतिम्॥"

इति देवीपुराणे विद्यादानमाहात्म्यफलनामाध्यायः॥

सञ्चत्, पुं, ("संश्चत्पृषद्वृहत्।" उणा० २। ८५। इत्यत्र "सञ्चत्" इति पाठेन अतिप्रत्ययान्तो निपात्यते।) प्रतारकः। इति सिद्धान्तकौमुदी॥

सञ्चयः, पुं, (सञ्चीयते इति। सम्+चि+"एरच्" ३। ३। ५६। इत्यच्।) समूहः। इत्यमरः॥ यथा, कथासरित्सागरे। १८। १२८।

"तस्मै स सेवमानस्तं राजानं स तदाश्रितः।
भुञ्जानश्च सहान्यैस्तैर्ब्राह्मणैर्ग्रासमञ्चयम्॥")

संग्रहः। यथा,

"शक्तेनापि हि शूद्रेण न कार्य्यो धनसञ्चयः।
शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते॥"

इत्याह्निकाचारतत्त्वम्।

सञ्चयनं, क्लीं, (सं+चि+ल्युट्।) सञ्चयः। यथा, संवर्त्तः।

"चतुर्थेऽहनि कर्त्तव्यमस्थिसञ्चयनं द्विजैः।
ततः सञ्चयनादूर्द्धमङ्गस्पर्शो विधीयते॥"

इति शुद्धितत्त्वम्।

सञ्चयी, [न्] त्रि, सञ्चयविशिष्टः। संग्रहकर्त्ता। सञ्चयशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्नः। यथा, सञ्चयी नावसीदति। इति महाभारतम्॥

सञ्चरः, पुं, (सञ्चरन्त्येऽनेनेति। सम्+चर+"गोचरसंचरेति।" ३। ३।११९। इति घः।) सेतुः। इति त्रिकाण्डशेषः॥ सञ्चरो निर्गमोऽध्वपथः। इति भरतधृतरत्नमाला॥ (मार्गः। इति सिद्धान्तकौमुदी॥ यथा, कुमारे। ६।४३।

"यथौषधिप्रकाशेन नक्तं दर्शितसञ्चराः।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः॥")

देहः। इति हेमचन्द्रः॥

सञ्चलनं, क्ली, कर्म्मनम्। संपूर्व्वचलधातोरनट्-(ल्युट्) प्रत्ययेन निष्पन्नम्॥ (यथा,मार्कण्डेये। ८। १८।
"केचिद्गिरिनिपातेन केचिदोधिवारिणा।
केचित् महीसञ्चलनात् प्रययुः प्राणिनः क्षयम्॥"
सञ्चानः, पुं, श्येनपक्षी। इति केचित्॥ शिक्रे इति भाषा॥
सञ्चाय्यः, पुं, (संचीयतेऽस्मिन् सोम इति। सं+चि+"क्रतौ कुण्डपाय्यसञ्चाय्यौ।"३।१।१३०। इति ण्यदायादेशौ निपात्येते।) यज्ञविशेषः। इति मुग्धबोधव्याकरणम्॥
सञ्चारः, पुं, (सं+चर+घञ्।) दुर्गसञ्चरः। इत्यमरटीका॥ गमनम्। यथा। सञ्चारो रति-मन्दिरावधि इत्यादि काव्यप्रकाशः॥ (यथा, रघुः। २। १५।
"सञ्चारपूतानि दिगन्तराणि
कृत्वा दिनान्ते निलयाय गन्तुं।
प्रचक्रमे पल्लवरागताम्रा
प्रभा पतङ्गस्य मुनेश्च धेनुः॥")
ग्रहादेः राश्यन्तरसंक्रमणञ्च॥ (यथा, याज्ञवल्क्ये। ३। १७२।
"तारा नक्षत्रसञ्चारैर्ज्ञागरैः स्वप्नजैरपि॥"*॥
सञ्चरत्यस्मिन्निति। अधिकरणे घञ्। देशः। इति रामायणटीका॥ यथा, रामायणे। २। ११९। १८।
"तावूचुस्ते वनचरास्तापसा धर्म्मचारिणः।
वनस्य तस्य संस्कारं राक्षसैः समभिप्लुतम्॥")
सञ्चारजीवी, [न्] त्रि, (सञ्चारेण जीवतीति। जीव+णिनिः।) शरणापन्नः। इति त्रिकाण्डशेषः॥
सञ्चारिका, स्त्री, (सञ्चारयति नायकयोर्व्वार्त्तामिति। सं+चर+णिच्+ण्वुल्।) दूती। इत्यमरः॥ युगलम्। कुट्टनी। प्राणम्। इति मेदिनी॥
सञ्चारी, [न्] पुं, (सञ्चरतीति। सं+चर+णिनिः।) धूपः। इति त्रिकाण्डशेषः॥ वायुः॥ इति शब्दचन्द्रिका॥ भावविशेषः। यथा,—
"स्थायिसात्त्विकसञ्चारिप्रभेदैः स्याद्रतिः पुनः।"
इति हेमचन्द्रः॥
अन्यच्च।
"सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रस्थायी च भाव इत्यभिधीयते॥"
अपि च।
"नानाभिनयसम्बन्धान् भावयन्ति रसान् यतः।
तस्माद्भावा अमी प्रोक्ताः स्थायिसञ्चारि-सात्त्विकाः॥"
वात्सल्यरससञ्चारिणो यथा,—
"सञ्चारिणोऽनिष्टशङ्काहर्षगर्व्वादयो मताः॥"
वीररससञ्चारिणस्तु। "धृतिमतिगर्व्वस्मृतितर्क-रोमाद्याः।" इति साहित्यदर्पणे ३ परिच्छेदः॥ (गतिशीले, त्रि। यथा, गीतगोविन्दे। ६। ११।
"अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति॥")
सञ्चारिणी, स्त्री, (सञ्चरतीति। सं+चर+णिनिः। ङीप्।) हंसपदी। इति राजनिर्घण्टः॥ (गतिशीला। यथा, कुमारे। ३। ५४।
"पर्य्याप्तपुष्पस्तवकावनम्रा
सञ्चारिणी पल्लविनी लतेव॥")
सञ्चाली, स्त्री, गुच्छा। यथा,—
"सञ्चाली प्रोच्यते गुच्छा सा तिस्रो रूपकं भवेत्॥"
इति युक्तिकल्पतरुः॥
सञ्चिका, स्त्री, (सम्यक् चिनोमस्यामिति।) सूचीकर्त्री। इति शब्दरत्नावली॥
सञ्चेयं, त्रि, सञ्चयनीयम्। सञ्चेतव्यम्। संपूर्व्वकचिञ्धातोः कर्म्मणि यप्रत्ययेन निष्पन्नम्॥
सञ्जः, पुं, (सम्यक् जायते इति। सं+जन+डः। सम्यक् जयतीति। जि+अन्येष्वपीति वा डः।) ब्रह्मा। शिवः। इति मेदिनी॥
सञ्जवनं, क्ली, (सञ्जवन्ति संश्लिष्यन्त्यत्रेति।सं+जु गतौ+अधिकरणे ल्युट्।) अन्योन्याभिमुखगृहचतुष्टयम्। तत्पर्य्यायः। चतुःशालम् २। इत्यमरः॥ संयमनम् ३ चतुःशाला ४। इति भरतः॥ सञ्जीवनम् ५ शाला ६ निलयः ७ चतुःशालकम् ८। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १५५। ५६।
"तस्मिन् सुविहिताः सर्व्वे रुक्मदण्डाः पताकिनः
सदने वासुदेवस्य मार्गसञ्जवनध्वजाः॥")
सञ्जा, स्त्री, छागी। इति त्रिकाण्डशेषः॥
सञ्जीवनं,क्ली,(सञ्जीव्यतेऽस्मिन्निति। सं+जीव+अधिकरणे ल्युट्।) सञ्जवनम्। इति शब्दरत्नावली॥ (सं+जीव+भावे ल्युट्।) सञ्जीवकप्रकारेण प्राणधारणञ्च॥ (यथा, सुकुन्दमालायाम्। ३०।
"व्यामोहोद्दलनौषधं सुनिगमोद्वृत्तिप्रहर्त्तृौषधं
दैत्यानर्थकरौषधं त्रिजगतां सञ्जीवनैकौषधम्।
भक्तार्त्तिप्रशमौषधं भवभयध्वंसि दिव्यौषधं
श्रेयः प्राप्तिकरौषधं पिब मनः श्रीकृष्णनामौषधम्॥"
नरकविशेषः। यथा, मनुः। ४। ८८।
"नरकं कालसूत्रञ्च महानरकमेव च।
सञ्जीवनं महावीचिं तपनं सम्प्रतापनम्॥"
स्त्री, विद्याविशेषः। यथा महाभारते। १। ७६। ३१।
"ततः सञ्जीवनीं विद्यां प्रयुज्य कचमाह्वयत्॥")
सञ्ज्ञं, क्ली, संज्ञम्। इति शब्दचन्द्रिका॥
सञ्ज्ञः, त्रि, संज्ञः। इत्यमरटीकायां भरतः॥
सञ्ज्ञपनं, क्ली, (सं+ज्ञा+णिच्+ल्युट्।) संज्ञपनम्। इत्यमरः॥
सञ्ज्ञप्तिः, स्त्री, (सं+ज्ञा+णिच्+क्तिन्।) संज्ञप्तिः। इति हेमचन्द्रः॥
सञ्ज्ञा, स्त्री, (सं+ज्ञा+अङ्।) संज्ञा। इति मेदिनी॥
सञ्जुः, त्रि, (संहते जानुनी यस्य। "प्रसंभ्यां जानुनोर्ज्ञुः।" ५। ४। १२९। इति ज्ञुः।) संज्ञुः। इत्यमरः॥
सञ्ज्वरः, पुं, (सम्यक् ज्वरः।) संज्वरः। इत्यमरः॥
सटं, क्ली, (सटतीति। सट अवयवे+अच्।) जटा। यथा,—
"जटा जटिर्जटी जूटी जुटकन्तु सटं सटा।
कौटीरं जूटकं इस्तं शिखायां व्रतिनामपि॥"
इति शब्दरत्नावली॥
सटा, स्त्री, (सट अवयवे+अच्।) जटा। केशरः। इति मेदिनी॥ (यथा, रघुः। ९। ६०।
"तं वाहनादवनतोत्तरकायमीषत्
विध्वस्तमुद्धृतसटाः प्रतिहन्तुमीयुः॥")
शिखा। इति शब्दरत्नावली॥ (यथा, भागवते। ४। ५। २।
"क्रुद्धः सुदष्टौष्ठपुटः स भूर्ज्जटि-र्जटां तडित्वद्विसटोग्ररोचिषम्॥")
सटाङ्गः, पुं, (सटा अङ्गेषिङ्गं यस्य।) सिंहः। इति शब्दरत्नावली॥
सटिः, स्त्री, (सटतीति। सट अवयवे+इन्।) शिटी। इति शब्दरत्नावली॥
सटिका, स्त्री, गन्धपत्रा। सटी। इति राजनिर्घण्टः॥
सटी, स्त्री, (सटि+वा ङीष्।) गन्धद्रव्यविशेषः॥ वन आदा इति अल्पइरिद्रा इति च भाषा। आवेहलदी इति कोङ्कणे प्रसिद्धा। तत्पर्य्यायः। शिटी २ गन्धशटी ३ सुगन्धा ४ सटिः ५ शटिः ६ गन्धमूला ७ गन्धमूली ८ पलाशः ९ कर्व्वुरः १० षड्ग्रन्थिका ११ कर्व्वूरः १२ गन्धोलिः १३ गन्धमूलकः १४। इति शब्दरत्नावली॥ शठी १५ षड्ग्रन्था १६ अम्बनिशा १७ बधूः १८ गन्धारी १९ सटिका २० पलाशिका २१ समुद्रा २२ ढण्ढी २३ दूर्व्वा २४ गन्धा २५ पृथुपलाशिका २६ सौम्या २७ हिमोद्भवा २८ गन्धबधूः २९। अस्या गुणाः। सुतिक्तत्वम्। अम्लरसत्वम्। लघुत्वम्। उष्णत्वम्। रुचिप्रदत्वम्। ज्वरकफास्रकण्डूव्रणदोष-वह्नामयनाशित्वम्। हृद्यत्वञ्च। इति राजनिर्घण्टः॥
सट्टा, स्त्री, पक्षिभेदः। वाद्यम्। इति संक्षिप्तसारोणादिवृत्तिः॥
सठ, क श्राठार्थे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) इत्स्वादिः। क, साठयति सठार्थं गत्वसंस्कृतसंस्कृतेषु। इति दुर्गादासः॥
सठी, स्त्री, शठी। इति राजनिर्घण्टः॥
सण्डसूत्रं, क्ली, (सण्डस्य सूत्रम्।) शणसूत्रम्। इत्यमरटीकायां रायमुकुटः॥
सण्डः, पुं, षण्डः। इत्यमरटीका॥

सङ्गिग्रः, पुं, सन्दंशः। सांड़ाशि इति भाषा। यथा,—
"पायसं कृसराच्छागं देवान्नानि च यानि वै।
भुक्तानि येरसंस्कृत्य तेषामन्नानि पार्थिवाम्॥
निपातितानां भूपृष्ठे उड्डतानि निरीक्षताम्।
सङ्गिग्रैरपकृष्यन्ते नखैर्म्मांसान्यतः॥"
इति मार्कण्डेयपुराणे १४ अध्यायः॥
सङ्गोनं, क्ली, खगगतिक्रिया। इत्यमरः॥ खगानां पक्षिणां गतौ खानान्तरसञ्चारे एताः क्रियाः व्यापाराः। कास्ता इत्याह प्रथमडीनं उड्डयनाय क्रमवत्यः। ऊर्द्धं डीनं उड्डीनं वियद्गमनम्। संगतं डीनं सङ्डीनं द्रुमादौ पतनमिति। पृथक् पृथक् पक्षिगतिक्रियासु प्रडीनं सङ्गतगमनमित्यर्थे। घो डो ङ य गतौ डोङ च नभोगतौ भावे क्तः सुखाद्योदिति नत्वम्। इति भरतः॥
सततं, क्ली, (सन्तन्यते स्रोति। सं+तन+क्तः। समो वा ह्रिततततयोरिति पक्षे मलोपः।) निरन्तरक्रिया। तद्धति, त्रि। इत्यमरः॥ तत्पर्य्यायः अनवरतशब्दे नित्यशब्दे च द्रष्टव्यः। अपि च।
"सततं त्वनवरतानारतायान्तसन्ततम्।
प्रसक्तासक्तनित्याजस्रानवद्याविरतानिशम्॥"
इति जटाधरः॥
(यथा, मनुः। ४। २२।
"एतानेक महायज्ञान् यज्ञशास्त्रविदो जनाः।
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति॥")
सतत्त्वं, क्ली, स्वभावः। इति हेमचन्द्रः। ६।१३॥
सतर्कः, त्रि, तर्केण सह वर्त्तमानः। सावधानः। इति लोकप्रसिद्धः॥
सतानन्दः, पुं, गौतममुनिपुत्रः। स च जनकराजपुरोहितः। इति शब्दरत्नावली॥
सतिः, स्त्री, (सनु दाने+क्तिच्। "सनः क्तिचि लोपश्चास्यान्यतरस्याम्।" ६। ४। ४५। इति नलोपः।) दानम्। अवसानम्। इति सातिशब्दटीकायां भरतः।
सती, स्त्री, (अस्तीति। अस्+शतृ। उगित्वात् ङीप्।) दुर्गा। साध्वी। इति मेदिनी। (यथा, कुमारे। १। २१।
"सती सतो योगविसृष्टदेहा
तां जन्मने शैलवधूं प्रदेपे॥")
सौराष्ट्रमृत्तिका। इति हेमचन्द्रः॥ दानम्। अवसानम्। इति नानार्थसातिशब्दटीकायां भरतः॥*॥ स्थानविशेषे सत्यष्टोत्तरशतनामानि यथा,—
देव्युवाच।
"सर्व्वगा सर्व्वभूतेषु द्रष्टव्या सर्व्वतो भुवि।
सप्तलोकेषु यत्किञ्चिद्रहितं न मया विना॥
तथापि येषु स्थानेषु द्रष्टव्याः सिद्धिमीप्सुभिः।
स्मर्त्तव्या भूतिकामैर्व्वा ता वक्ष्यामि प्रयत्नतः॥
वाराणस्यां विशालाक्षी नैमिषे लिङ्गधारिणी।
प्रयागे ललिता देवी कामुका गन्धमादने॥
मानसे कुमुदा नाम विश्वकाया तथेश्वरी।
गोमन्ते गोमती नाम मन्दरे कामचारिणी॥
मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे।
कान्यकुब्जे तथा गौरी रम्भा मलयपर्व्वते॥
एकाम्रके कीर्त्तिमती विश्वा विश्वेश्वरे विदुः।
पुष्करे पुरुहूतेति केदारे मार्गदायिनी॥
नन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका।
स्थानेश्वरे भवानी तु विल्वके विल्वपत्रिका॥
श्रीशैले माधवी नाम भद्रा भद्रेश्वरे तथा।
जया वराहशैले तु कमला कमलालये॥
रुद्रकोट्यान्तु रुद्राणी काली कालञ्जरे तथा।
महालिङ्गे तु कपिला साकोटे कमलेश्वरी॥"
अत्र कपिलाम्बरा इति च पाठः।
"शालग्रामे महादेवी शिवलिङ्गे जनप्रिया।
मायापूर्य्यां कुमारी तु सन्ताने ललिता तथा॥
उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला।
गयायां मङ्गला नाम विमला पुरुषोत्तमे॥
विपाशायामघोराक्षी पाटला पुरुहूतके।
नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥
विपुले विपुला नाम कल्याणी मलयाचले।
कोटवी कोटितीर्थेषु सुगन्धा माधवे वने॥
गोदाश्रमे त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया।
शिवकुण्डे शिवानन्दा नन्दिनी देविकातटे॥
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने।
देवकी मथुरायान्तु पाताले परमेश्वरी॥
चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी।
सह्यद्रौ करवीरा तु हरिश्चन्द्रे तु चन्द्रिका॥
रमणा रामतीर्थे तु यमुनायां मृगावती।
करवीरे महालक्ष्मीरुमादेवी विनायके॥
अरोगा वैद्यनाथे तु महाकाले महेश्वरी।
अभयेत्युक्ततीर्थे तु अमृता विन्ध्यकन्दरे॥"
उष्णतीर्थेत्यत्र अक्षततीर्थेति च पाठः।
"माण्डव्ये माण्डवी नाम स्वाहा माहेश्वरे पुरे।
कुलाण्डे प्रचण्डा तु चण्डिकामरकण्टके॥
सोमेश्वरे वरारोहा प्रभावे पुष्करावती।
देवमाता सरस्वत्यां पारा पारातटे मता॥
महालये महाभागा पयोष्णां पिङ्गलेश्वरी।
सिंहिका क्षतशैचे तु कार्त्तिकेये तु शङ्करी॥
उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे।
महासिद्धवने लक्ष्मीरनङ्गा भरताश्रमे॥
जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते।
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले॥
भीमादेवी हिमाद्रौ च तुष्टिर्वस्त्रेश्वरे तथा।
कपालमोचने शुद्धिरार्य्या कायावरोहणे॥
शङ्खोद्धारे धनिर्नाम ध्रुतिः पिण्डारके तथा।
कालञ्जरे तु चन्द्रभागायामच्छोदे शिवचारिणी।
वेणायामस्मृता नाम वदर्य्यां वर्द्धसी तथा।
ओषधी चोत्तरकुरौ कुशद्वीपे कुशोदका।
मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी॥*॥
अक्षत्थे वन्दनीया तु निधिर्वैश्रवणालये।
गायत्री वेदवदने पार्व्वती शिवसन्निधौ॥
देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती।
सूर्य्यबिम्बे प्रभा नाम मातृणां वैष्णवी तथा॥
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा।
चित्ते ब्रह्मकला नाम शक्तिः सर्व्वशरीरिणाम्॥
एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमम्।
अष्टोत्तरञ्च तीर्थानां शतमेतदुदाहृतम्।
यः पठेच्छृणुयाद्वापि सर्व्वपापैः प्रमुच्यते॥
एषु तीर्थेषु यः कृत्वा स्नानं पश्यति मानवः।
सर्व्वपापविनिर्म्मुक्तः कल्पं शिवपुरे वसेत्॥
यस्तु मत्परमः कालं करोत्येतेषु मानवः।
स भित्त्वा ब्रह्मसदनं पदमभ्येति शाङ्करम्॥
नामाष्टशतकं यस्तु श्रावयेच्छिवसन्निधौ।
शतौघायामथाष्टम्यां बहुपुत्रो भवेन्नरः॥
गोदाने श्राद्धकाले वा अहन्यहनि वा पुनः।
देवार्च्चनविधौ विद्वान् पठन् ब्रह्माधिगच्छति॥
एवं वदन्ती सा तत्र ददाहात्मानमात्मना।
स्वायम्भुवेऽपि काले च दक्षप्राचेतसोऽभवत्॥
पार्व्वती चाभवद्देवी शिवदेहार्द्धधारिणी।
मेनागर्भसमुत्पन्ना मुक्तिमुक्तिफलप्रदा॥
अरुन्धती जपन्त्येतत्तदासा योगमुत्तमम्।
पुरुरवाश्च राजर्षिर्लोकेषु जयतामगात्॥
ययातिः पुत्रलाभन्तु धनलाभन्तु भार्गवः।
तथान्ये देवदैत्याश्च ब्राह्मणाः क्षत्रियास्तथा।
वैश्याः शूद्राश्च बहवः सिद्धिमीयुर्यथेप्सिताम्॥
यत्रैतल्लिखितं तिष्ठेत् पूज्यते देवसन्निधौ।
न तत्र शोकदौर्गत्यं कदाचिदपि जायते॥"
इति मत्स्यपुराणे १३ अध्यायः॥*॥
सावित्री। यथा,—
यम उवाच।
"सावित्रीवरदानेन त्वं सावित्रीकला सती।
प्राप्ता पुरा भूभृता च तपसा तत्समा शुभे॥
यथा श्रीः श्रीपतेः क्रोडे भवानीव भवोरसि।
सौभाग्या सुप्रिया त्वञ्च भव सत्यवति प्रिये॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः॥*॥
विद्यमाना। (यथा,—
"तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्व्वती
प्रियेषु सौभाग्यफला हि चारुता॥"
इति कुमारसम्भवे। ५। १॥)
सतीनः, पुं, वंशः। इति शब्दमाला॥ सतीलकः। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। १।४६।
"हरिणः सतीनाश्च विशेषा बहुवर्चसः॥"*॥
क्ली, जलम्। इति निघण्टुः। १। १२॥)
सतीनकः, पुं, (सतीन एव। स्वार्थे कन्।) सतीलकः। इत्यमरटीका॥
सतीर्थ्यः, पुं, (समानस्तीर्थो गुरुर्यस्य। समानस्य सः।) परस्परैकगुरुशिष्यः। इति शब्दरत्नावली॥
सतीर्थ्यः, पुं, (समाने तीर्थे वासीति। "समानतीर्थे वासी।" ४।४।१०७। इति यत्। "तीर्थे ये॥" ६। ३। ८७। इति समानस्य सः।) परस्परैकगुरुशिष्यः। इत्यमरः॥ एकोऽभिन्नो

गुरुर्येषां तेऽन्योन्यं सतीर्थ्याः। समाने तीर्थे गुरौ वसन्ति सतीर्थ्याः। ढ्वेकादिति यः। ज्योतिर्जनपदेत्यादिना सः। तीर्थमृषियुष्टजले गुरौ इति वच्यते। इति भरतः॥ अपि च।
"स्यात् सतीर्थः सतीर्थ्योऽपि तथैकगुरुरित्यपि।"
इति शब्दरत्नावली॥

सतीलः, पुं, वंशः। इति हारावली॥ वायुः। इत्यमरटीकायां रायमुकुटः॥("तीलेन तीलवत् कृष्णवर्णचिह्नेन सह वर्त्तते इति। निपातनादिकारस्य दीर्घः।"इति भरतः॥)कलायः। यथा,
"कलायखिपुटः प्रोक्तः सतीलो वर्त्तुलो मतः।"
इति भरतधृतव्याडिः॥

सतीलकः, पुं, (सतील एव। स्वार्थे कन्।) कलायः। यथा,—
"कलायस्तु सतीलकः हरेणुखण्डिकौ चास्त्रिन्"
इत्यमरः॥
"चत्वारि कलाये। मटर इति ख्याते। कलायशब्दो विशेषे सामान्ये च अतएव मापकलाय इत्यादिप्रयोगः। कड्यते भुज्यते कलायः। कड भक्षणे नाक्नोति आयः मनीषादित्वात् डस्य लः। तिलेन तिलवत् कृष्णवर्णचिह्नेन सह वर्त्तते सतीलः निपातनादिकारस्य दीर्घः स्वार्थे के सतीलकः दन्त्यादिः। क्रियते भक्षणार्थं हरति मनो वा हरेणुः नाक्नोति एणुः। खण्ड्यते विदार्य्यते खण्डिकः पूर्ब्वेण इकः।
"कलायखिपुटः प्रोक्तः सतीलो वर्त्तुलो मतः।
हरेणुः कण्टका श्लेया————
इति तु व्याडिः।" इति भरतः॥

सतीला, स्त्री, कलायविशेषः। तेओड़ा इति भाषा। यथा। सतीला निष्किका तिण्डीति शब्दचन्द्रिका॥

सतृषं, क्ली, (तृषेण सह वर्त्तमानम्।) तृषयुक्तशस्यम्। धान्यम्। यथा,—
"अस्यं चेद्व्रगतं प्राहुः सतृषं धान्यमुच्यते।
आमं वितृषमित्युक्तं खिन्नमन्त्रमुदाहृतम्॥"
इति श्राद्धतत्त्वम्॥

सतृट्, [ष्] त्रि, (तृषा सह वर्त्तमानः।) तृष्णायुक्तः। तत्पर्य्यायः। तृषितः२ तर्षितः३। इति त्रिकाण्डशेषः॥

सतैरः, पुं, तुषः। इति संक्षिप्तसारोणादिवृत्तिः।

सत्, क्ली, (अस्तीति। अस+शतृ) ब्रह्म। यथा। भगवद्गीतायाम्।
"ओम् तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥"
ओम् तत् सदिति त्रिविधो ब्रह्मणो जगदीश्वरस्य निर्देशोऽभिधानं ब्रह्मविद्भिर्यिन्तितम्। तत्र तावदोमितिब्रह्मेत्यादि श्रुतिप्रसिद्धेरोमिति ब्रह्मणो नाम। पातञ्जलिरप्याह अस्येव वाचकः प्रणवः। अस्य ब्रह्मणः। ओमकारो भगवान् विष्णुरित्यादि तु वाच्यवाचकयोरभेदेन। तथा च। जगत्कारणत्वेन प्रसिद्धत्वादविदुषां परोक्षत्वाच्च तच्छब्दोऽपि ब्रह्मणो नाम। एवं परमार्थसत्त्वसाधुत्वप्रशस्त्यादिभिः सच्छब्दोऽपि अतस्तेन त्रिविधनिर्देशेन। यद्वा यस्यायं त्रिविधो निर्देशस्तेन परमात्मना ब्राह्मणादयो निर्म्मिताः॥ वैदिके कर्म्मणि तेषां प्रथमतो निर्देशो यथा,—
"तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥"
यस्मादेवं ब्रह्मणो निर्देशस्तस्मादोमित्युदाहृत्य उच्चार्य्य ऋता वेदवादिनां यज्ञाद्याः शास्त्रोक्ताः क्रियाः सततमङ्गत्वेऽपि प्रवर्त्तन्ते प्रकर्षेण वर्त्तन्ते सगुणा भवन्तीति भगवान् शङ्कराचार्य्यचरणाः॥
"तदित्यनभिसन्धाय यज्ञदानतपःक्रियाः।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥"
तदिति ब्रह्मणोऽभिधानमुदाहृत्य इत्यनुषङ्गः। अनभिसन्धाय कर्म्मणः फलमिति शेषः। तस्मात् फलाभिसन्धानं विना मुमुक्षुणा कर्म्म कर्त्तव्यमित्यपि बोध्यम्।
"सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते।
प्रशस्ते कर्म्मणि तथा सच्छब्दः पार्थ युज्यते॥"
यतो विद्यमानजन्मनि उत्कृष्टचरिते च सदित्येतत् प्रयुज्यते। अतो यज्ञादौ कर्म्मणि प्रथमतः सच्छब्दः प्रयुज्यते। इत्येकादशीतत्त्वम्॥*॥
सत्, त्रि, (अस्तीति। अस+शतृ।) सत्यम्। साधुः। (यथा, सुग्धबोधे।
"रामंनमति सानन्दं धर्म्मानभिनिविश्य स सन्।")
विद्यमानम्। (यथा, हितोपदेशे।
"दुर्ज्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयङ्करः॥")
प्रशस्तम्। अभ्यर्हितम्। इत्यमरः॥ धीरः। इति मेदिनी॥

सत्कदम्बः, पुं, (सन् कदम्बः।) केलिकदम्बः। यथा,—
"केलिहृच्चः सत्कदम्बो व्रजभूः शिशुपालकः।"
इति शब्दचन्द्रिका॥

सत्कर्त्ता, [र्त्तृ] पुं, (सतां कर्त्ता।) विष्णुः। यथा। सत्कर्त्ता सत्कृतः साधुरिति तस्य सहस्रनामस्तोत्रम्॥

सत्कर्म्म, [न्] क्ली, (सत् प्रशस्तं कर्म्म। वेदविहितक्रिया। यथा। विष्णुपुराणे।
"सत्कर्म्मयोग्यो न जनो नैवापः शौचकारणम्
यस्मिन्नुदिते तस्मै नमो देवाय भास्वते॥"
इति प्रायश्चित्ततत्त्वम्॥

सत्काञ्चनारः, पुं, (सन् काञ्चनारः।) रक्तकाञ्चनः। यथा,—
"कोविदारे चमरिकः कुद्दालो युगपत्रकः।
सत्काञ्चनारः कामालुर्हयवाहनशङ्करः॥"
इति शब्दचन्द्रिका॥

सत्काण्डः, पुं, चिह्नः। इति शब्दचन्द्रिका॥

सत्कारः, पुं, (सत्करणमिति। सत्+कृ+घञ्।) पूजा। यथा। एवम्भूताः सभासदः सभायां यथा सीदन्ति उपविशन्ति तथा दानमानसत्कारैः राज्ञा कर्त्तव्या। इति व्यवहारतत्त्वम्॥ (यथा, कुमारे। ६। ५२।
"विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्म्मभिः॥"
उत्सवविशेषः। यथा, मनुः। २। ५९।
"तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च॥"
"सत्कारेषु कौमुद्यादिषु उत्सवेषु उपनयनादिषु।" इति तट्टीकायां कुल्लूकः॥*॥)
शवदाहादिक्रिया। इति लोकप्रसिद्धिः॥

सत्कुलीनः, पुं, (सत्कुले जातः। सत्कुल+खः। सन् प्रशस्तः कुलेन इति वा।) सत्कुलोद्भवः। यथा,—
"सत्कुलीनाय शान्ताय ऋजवे दम्भवर्জ্জिते।
दद्यात् स्त्रोत्रमिदं पुण्यं सर्व्वकामफलप्रदम्॥"
इति विश्वसारतन्त्रे वटुकभैरवस्तोत्रम्॥

सत्कृतः, त्रि, (सत्+कृ+क्तः।) पूजितः। कृतसत्कारः। यथा,—
"तस्थौ कञ्चित् स कालञ्च मुनिना तेन सत्कृतः।"
इति देवीमाहात्म्यम्॥
(महादेवे, पुं। इति महाभारतम्। १३। १७। ११३॥)

सत्कृतिः, स्त्री, (सत्+कृ+क्तिन्।) सत्कारः। सत्क्रियाशब्दार्थदर्शनात्॥ (यथा, भागवते। २०। १५। ४३।
"तत्सत्कृतिं समधिगम्य विवेश गोष्ठं
सव्रीड़हासविनयं यदपाङ्गमोक्षम्॥"
पुं, विष्णुः। इति महाभारतम्।१३।१४९।८८॥)

सत्क्रिया, स्त्री, (सती क्रिया।) शवदाहादिक्रिया। तत्पर्य्यायः। संस्क्रिया२। इति त्रिकाण्डशेषः॥ संस्कारः ३। इति शब्दरत्नावली॥ यथा, महाभारते। १। ४४। ५।
"ततो नृपे तच्चकृतेजसा हते
प्रयुज्य सर्व्वाः परलोकसत्क्रियाः।
शुचिर्द्विजो राजपुरोहितस्तदा
तथैव ते तस्य नृपस्य मन्त्रिणः॥"
परिष्कारः। यथा, रघुः। ११। ३।
"यावदादित्यति पार्थिवस्तयो-
र्निर्गमाय पुरमार्गसत्क्रियाम्।
तावदाश्च विदधे मरुत्सखैः
सा सपुष्पजलवर्षिभिर्घनैः॥")
सम्मानम्। यथा, मनुः।
"घटेऽपवर्জ্জिते स्नातिमध्यस्थो यवसं गवाम्।
प्रदद्यात् प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया॥"
इति प्रायश्चित्ततत्त्वम्॥

सत्तमः, त्रि, (अयमेषामतिशयेन सन्। सत्+तमप्।) अतिशोभनः। इत्यमरः॥ पूज्यतमः। साधीयान्। उत्तमः। इति मेदिनी॥ (यथा, देवीभागवते। ११। १६। ३।
"तद्भेदानपि वक्ष्यामि शृणु देवर्षिसत्तम!॥")

सत्ता, स्त्री, जातिविशेषः। इति भाषापरिच्छेदः॥ (सतो भावः। सत्+तल्।) विद्यमानता।

यथा। यद्यपि पापस्य कार्य्यानन्वितत्वेन तत्सत्तायामप्रामाण्यं प्रतिभाति। इति प्रायश्चित्ततत्त्वम्॥ साधुता। सतो भाव इत्यर्थे सच्छब्दात् तप्रत्ययेन निष्पन्ना॥

सत्त्रं, क्ली, (सतः साधून् त्रायते इति। त्रै+कः। यद्वा, सीदन्ति सज्जना यत्र। सद गतौ+"गुधृवीपचिवचीति।" उणा० ४।१६६। इति त्रः।) यज्ञः। (यथा, मनुः। ८। ३०१।

"अभयस्य हि यो दाता संपूज्यः सततं नृपः।
सत्त्रं हि वर्द्धते तस्य सदैवाभयदक्षिणम्॥")

सदादानम्। आच्छादनम्। अरण्यम्। (यथा, किराते। १३। ८।

"अयमेव मृगव्यसत्त्रकामः
प्रहरिष्यन् मयि मायया समस्त्रे।
पृथुभिर्भ्रुजिनीरवैरकार्षीत्
चकितोद्भ्रान्तमृगाणि काननानि॥")

कैतवम् इति मेदिनी॥ (यथा, महाभारते। ४। ३६। ३८।

"सत्त्रेण नूनं छन्नं हि चरन्तं पार्थमर्জ্জुनम्।
उत्तरः सारथिं कृत्वा निर्य्यातो नगरात् बहिः॥")

धनम्। गृहम्। दानम् सरोवरम्। इत्यनेकार्थकोषः॥ यागविशेषः। यथा,—

"नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः।
सत्त्रं स्वर्गाय लोकाय सहस्रसममासत॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम्।
आसीना दीर्घसत्त्रेण कथायां सक्षणा हरेः॥"

इति श्रीभागवते १ स्कन्धे १ अध्यायः॥ *॥

द्वादशाहसाध्यसत्त्रं यथा। ज्योतिष्टोमे द्वादशगोशतदक्षिणाविभागः षोड़शर्त्विजां तद्विकृतीभूते सत्त्रात्मके द्वादशाहसाध्ये शतेनाधिनो दोक्षयन्तीत्यादिदर्शनेन निर्णीयते। तच्च सावनमानेन कर्त्तव्यम्। यथा,—

"सत्त्राण्युपास्यान्यथ सावनेन
लौकिक्य यत् स्याद्यवहारमर्म्म।"

इति मलमासतत्त्वम्॥*॥

सदक्षिणं सततान्नदानम्। तन्निन्दकस्यनर्थनादिनिषेधो यथा,—

"नाग्निपेक्षनविधिष्टान् वीरहीनां तथा स्त्रियम्।
देवतापितृसच्छास्त्रयज्ञसत्त्रादिनिन्दकैः।
कृत्वा तु स्पर्शनालापं शुद्धेतार्कावलोकनात्॥"

इति मार्कण्डेयपुराणे सदाचाराध्यायः॥

सत्त्रं सदक्षिणं सततान्नदानम्। इति तट्टीका॥

सत्त्रं, [न्], व्य, सह। इत्यमरः॥

सत्त्रशाला, स्त्री, (सत्त्रस्य शाला।) अन्नादिदानगृहम्। तत्पर्य्यायः। प्रतिश्रयः २। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। २१। ७४।

"ततः सा सत्त्रशालान्तः प्रविवेश वणिक्सुता।
अन्वगात् राजपुत्रोऽपि स तां गुप्तमवेक्षितुम्॥"

सत्रा, व्य, सह। इत्यमरः॥

सत्राजित्, पुं, राजविशेषः। स तु शैक्षणस्य क्षत्रशरः। परे भल्लाटनगरे शत्रिध्वजराजो बभूव। इति कल्किपुराणे २७ अध्यायः॥

सत्रिः, पुं, मेघः। इन्द्रः। जयशीले, त्रि। इत्युणादिकोषः॥

सत्रिजातकं, क्ली,(सत् साधु त्रिजातकं तुल्यत्वगेलापत्रादिकं यत्र।) व्यञ्जनविशेषः। यथा,—

"मांसं बहुघृते भृष्टं सिक्ता चोष्णाम्बुना मुहुः।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते।
तदेव घृततक्राढ्यं प्रदिग्धं सत्रिजातकम्॥"

इति शब्दचन्द्रिका॥

सत्री, [न्] पुं, (सत्त्रमस्त्यस्येति। इनिः।) गृहपतिः। इत्यमरः॥ ई गृहस्थे। सत्त्रं सदा दानं विद्यतेऽस्य सत्री इन्। सदेत्तं सत्त्रं हितकारम्। सत्त्रमाच्छादने यज्ञे सदा दाने च केतवे। इति विश्वः। गृहस्य पतिर्गृहपतिः। इति भरतः॥ नित्यप्रवृत्तान्नदानः। यथा विष्णुः।

नाग्नौचं राज्ञां राजकर्म्मणि न व्रतिनां व्रते न सत्रिणां सत्रे न कारुणां स्वकर्मणि न राजाज्ञाकारिणां तदिच्छया न देवप्रतिष्ठाविवाहयोः पूर्व्वसंवृतयोः। इति। सत्रिणां नित्यप्रवृत्तान्नदानानां सत्रेऽन्नदाने। इति शुद्धितत्त्वम्॥ (यज्ञान्विते, त्रि। यथा,महाभारते।१४।७।३।

"सत्यमेतद्वचनाद्य स मां जानाति सत्रिणम्।
कथयस्व तदेतन्मे क्व नु सम्प्रति नारद॥")

सत्त्वं, क्ली, (सतो भावः। सत्+त्व।) प्रकृतेर्गुणविशेषः। अत्र सत्त्वं प्रकाशकत्वानं सुखहेतुः। सतो भावः सत्त्वम्। त्वतौ भावे इति त्वं निपातनात्तलोप इति केचित्। सत्त्वं हितकारमिति वदवः। इत्यमरभरतौ॥ * ॥ (यथा, मनुः। १२। २४।

"सत्त्वं रजस्तमश्चैव त्रीन् विद्यादात्मनो गुणान्।
यैर्व्याप्येमान् स्थितो भावान् महान् सर्व्वान-शेषतः॥")

महाभारतमते सुखजनकगुणः। तस्य धर्म्माः। प्रसादः १ हर्षः २ प्रीतिः ३ असन्देहः ४ धृतिः५ स्मृतिः ६। इति मोक्षधर्म्मः॥ द्रव्यम्। अम्बु। (यथा, रामायणे। २। ६०। १।

"ततो भूतोपसृष्टेव वेपमाना पुनः पुनः।
धरण्यां गतसत्त्वेव कौशल्या सुतमब्रवीत्॥")

व्यवसायः। इत्यमरः॥ पिशाचादिः। (यथा, रामायणे। २। ३३। १०।

"अद्य नूनं दशरथः सत्त्वमाविश्य भाषते।
न हि राजा प्रियं पुत्रं विवासयितुमर्हति॥")

बलम्। (यथा, रघुः। ४। ७२।

"अग्रंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसम्भ्रमम्।
गुहाशयानां सिंहानां परिवृत्त्यावलोकितम्॥")

स्वभावः। (यथा, किराते। १२। ३८।

"सत्त्वविदितमनुजभुजयो-
र्बलमस्य पश्यत मृधेऽधिकुप्यतः॥")

आत्मा। चित्तम्। इति मेदिनी॥ रसः। आयुः। इति धरणिः॥ कुबेरः। इति हेमचन्द्रः॥ धनम्। आत्मता। इति शब्दरत्नावली॥

सत्त्वः, पुं, क्ली, (सत्त्वमस्त्यस्येति। अर्शआदित्वादच्।) जन्तुः। इत्यमरः॥ (यथा, रघुः। २। ८।

"रक्षापदेशान्मुनिहोमधेनोः
वन्यान् विनेष्यन्निव दुष्टसत्त्वान्॥")

सत्त्वता, स्त्री, सत्त्वस्य भावः। सत्त्वशब्दात् भावे तप्रत्ययानन्तरं आप्प्रत्ययेन निष्पन्ना॥

सत्त्वसन्तवः, त्रि, (सत्त्वं सम्पन्नः।) सत्त्वप्रायः। इति लोकप्रसिद्धिः॥

सत्त्वस्थः, त्रि, (सत्त्वे तिष्ठतीति। स्था+कः।) सत्त्वहत्तिशाली। सत्त्वप्रधानः। यथा,—

"ऊर्द्धं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः॥"

इति भगवद्गीतायाम्। १४। १८।

सत्पत्रं,क्ली, (सत्पत्रं यस्य।) पद्मस्य नवदलम्। इति शब्दचन्द्रिका॥

सत्पथः, पुं, (सन् पन्थाः। टच्।) प्रशस्तपथः। तत्पर्य्यायः। अतिपन्थाः २ सुपन्थाः ३ अर्द्धिताध्वा ४। इत्यमरः॥ सुपथः ५। इति शब्दरत्नावली॥ (यथा, भागवते। ४। १२। ५०।

"ज्ञानमज्ञाततत्त्वाय यो दद्यात् सत्पथेऽमृतम्
कृपालोर्दीननाथस्य देवास्तस्यानु गृह्णते॥")

सत्पशुः, पुं, (सन् पशुः।) यज्ञीयपशुः। इति केचित्॥ शोभनपशुश्च॥

सत्पुत्रः, पुं, (सन् पुत्रः।) उत्तमसन्तानः। वेदादिविहितपित्रादिकार्य्यकर्त्ता। यथा—

"पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः।
सुखसन्दर्शनेनापि तदुत्पत्तौ यतेत सः॥"

इति हृदयस्थपुन्नरकनिस्ताराय ऋणमस्मिन् समन्वयति अमृतत्वञ्च विन्दति। इति पिता पुत्रस्य जातस्य पश्येच्च जीवतो मुखम्। इति वशिष्ठोक्तार्षापनयनाय च यत् पश्येदिति नियमविधानं तदुक्तपुत्रकार्य्यपुत्रपरम्। सत्पुत्रस्तु सुखदर्शनं विनापि नरकनिस्तारकः। तथा च विष्णुपुराणम्।

"सत्पुत्रेण तु जातेन वेत्तोऽपि त्रिदिवं ययौ।
पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना॥"

ब्रह्मपुराणेऽपि।

"समुत्पन्नेन भो विप्राः सत्पुत्रेण महात्मना।
त्रातः स पुरुषव्याघ्रः पुन्नाम्नो नरकात्तदा॥"

इति शुद्धितत्त्वम्॥

सत्पुरुषः, पुं, (सन् पुरुषः।) पूज्यमानपुरुषः। इति संक्षिप्तसारसमासपादः। (यथा, रामायणे। २। ४८। ८।

"एकः सत्पुरुषो लोके लक्ष्मणः सह सीतया।
योऽनुगच्छति काकुत्स्थं रामं परिचरन् वने॥")

सत्प्रतिग्रहः, पुं, सद्भ्यः साधुभ्यः प्रतिग्रहो दानग्रहणम्। साधुजनदत्तद्रव्यग्रहणम्। यथा,—

"सप्तवित्तागमा धर्म्म्या दायो लाभः क्रयो जयः

प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ॥"
इति मानवे १० अध्यायः ॥
सत्प्रतिपक्षः, पुं,(सन् प्रतिपक्षः।) तुल्यबलिः।
प्रतियोगी। न्यायमते। साध्याभावव्याप्यवत्
पक्षः। यथा। ह्रदो वह्निमान् धूमादित्यादौ
वह्न्यभाववाप्यवद्ह्रदादिः। इति सत्प्रतिपक्ष-
शब्दः। तल्लक्षणं यथा। साध्यविरोधिप्रसाधन-
समर्थसमानबलोपस्थित्या प्रतिरुद्धकार्य्यत्वं
तत्त्वं बलञ्च व्याप्तिपक्षधर्म्मतो विरोधिबोधका-
भ्यामनवतीयधिकरूपसम्पत्तिमत्तया प्राय-
मानेन प्रतिरुद्धकार्य्यत्वं वा तल्लक्षम्। इति
गङ्गेशोपाध्यायकृतचिन्तामणिः॥
सत्फलः, पुं, (सत् फलं यस्य।) दाड़िमवृक्षः।
इति शब्दचन्द्रिका॥ शोभनफलवति च॥
सत्यं, क्ली,(सते हितम्। सत्+यत्।)कृतयुगम्।
अपदः। यथार्थम्। (यथा, रघुः। १२। ७५।
"कामं जीवति मे नाथ इति सा विजयी
शुचम्।
प्राप्तवा सत्यमसत्यान्तं जीवितान्नौति
सत्यिता॥")
तथ्यम्, त्रि। इति मेदिनी॥ (यथा, याज्ञ-
वल्क्ये। ३। १४८।
"महाभूतानि सत्यानि यथात्मापि तथैव हि॥")
सिद्धान्तः। इति शब्दरत्नावली॥*॥ यथार्थस्य
पर्य्यायः। तथ्यम् २ ऋतम् ३ सम्यक् ४। इत्य-
मरः॥ अवितथम् ५ भूतम् ६। इति जटा-
धरः॥ तल्लक्षणम्। यथा,—
"यत्रार्थकथनं यत्र सर्व्वलोकसुखप्रदम्।
तत् सत्यमिति विज्ञेयमसत्यं तद्विपर्य्ययम्॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः॥*॥
तदाकारा यथा,—
"सत्यञ्च समता चैव दमश्चैव न संशयः।
अमात्सर्य्यं क्षमा चैव ह्रीस्तितिक्षानसूयता॥
त्यागो ध्यानमथार्य्यत्वं धृतिश्च सततं दया।
अहिंसा चैव राजेन्द्र सत्याकारास्त्रयोदश॥"
इति महाभारते राजधर्म्मः॥*॥
तस्यापालने दोषो यथा,—
"कृत्वा प्रपथरूपञ्च सत्यं हन्ति न पालयेत्।
स कृतघ्नः कालसूत्रे वसेद्दैवचतुर्युगम्॥
सप्तजन्मसु काकश्च सप्तजन्मसु पैंचकः।
ततः शूद्रो महाव्याधो जन्मसप्त ततः शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४८ अध्यायः॥*॥
अपि च।
"सत्येन लोकं जयति सत्यन्तु परमं तपः।
यथाभूतप्रसादन्तु सत्यमाहुर्म्मनीषिणः॥"
इति कौर्म्मे उपविभागे १४ अध्यायः॥*॥
तस्य प्रशंसा यथा,—
"सत्यमायास्यति हरिः सत्यं निष्कपटं वद।
वद तत् स्वभयं त्यक्त्वा सत्यं ब्रूहि सभासदि॥
वरं कूपशतादापी वरं वापीशतात् क्रतुः।
वरं क्रतुशतात् पुत्रः सत्यं पुत्रशतात् किल॥
नहि सत्यात् परो धर्म्मो नानृतात् पातकं परम्।
नहि मातुः परो बन्धुर्न गुरुर्मन्त्रदात् परः॥"
इति ब्रह्मवैवर्त्ते जन्मखण्डे ८५ अध्यायः॥*॥
अपि च।
"तस्मात् सत्यं परं ब्रह्म सत्यमेव परं तपः।
सत्यमेव परो यज्ञः सत्यमेव परं श्रुतम्॥
सत्यं वेदेषु जागर्त्ति सत्यञ्च परमं पदम्।
कीर्त्तिर्यशश्च पुण्यञ्च पितृदेवर्षिपूजनम्॥
आयुर्विद्या विद्या च सर्व्वं सत्ये प्रतिष्ठितम्।
सत्यं यज्ञस्तथा वेदा मन्त्रा देवाः सरस्वती॥
व्रतचर्य्या तथा सत्यं ओङ्कारः सत्यमेव च।
सत्येन वायुर्वाति सत्येन तपते रविः॥
सत्येनाग्निर्दहेत्सत्यं स्वर्गं सत्ये न गच्छति।
परेच सर्व्वदेवानां सर्व्वतीर्थावगाहनम्।
सत्यस्य वचनाल्लोके सर्व्वमाप्नोत्यसंशयम्॥
अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते॥
सत्येन देवाः प्रीयन्ते पितरः क्रतवस्तथा।
मनुष्याः सिद्धगन्धर्व्वाः सत्यात् सिद्धिमितो
गताः॥
अगाधे विपुले गुह्ये सत्यतीर्थे शुचिह्रदे।
स्नातव्यं मनसा युक्तैः स्नानं तत् परमं स्मृतम्॥
आत्मार्थे वा परार्थे वा पुत्रार्थे वापि मानवाः।
अनृतं ये न भाषन्ते ते नराः स्वर्गगामिनः॥
तस्मात् सत्यव्रतं पुण्यं तदनन्तफलं भवेत्॥"
इति वह्निपुराणे दानावख्यानिर्णयनामाध्यायः॥
अपि च।
"तडागशतदानेन यत् पुण्यं लभते नरः।
ततोऽधिकञ्च लभते वापीदानेन निश्चितम्॥
दशवापीप्रदानेन यत् फलं लभते नरः।
ततोऽधिकञ्च लभते पुण्यं कन्याप्रदानतः॥
दशकन्याप्रदानेन यत् फलं लभते नरः।
ततोऽधिकञ्च लभते यज्ञं कृत्वा नराधिपः॥
शतयज्ञेन लभते यत् पुण्यं पुत्रजन्मनः।
ततोऽधिकञ्च लभते पुत्रास्यदर्शनेन च॥
दर्शने शतपुत्राणां यत् पुण्यं लभते नरः।
तत् पुण्यं लभते नूनं पुण्यवान् सत्यपालनात्॥
नहि सत्यात् परो धर्म्मो नानृतात् पातकं नरः।
नहि गङ्गासमं तीर्थं न देवः केशवात् परः॥"
इति ब्रह्मवैवर्त्तपुराणम्॥*॥
अन्यच्च।
"सत्यमूलं जगत् सर्व्वं सर्व्वं सत्ये प्रतिष्ठितम्।
सिद्धं लभन्ते सत्येन ऋषयो वेदपारगाः॥
सत्येन दीयते कन्या सत्यं जल्पन्ति ब्राह्मणाः।
सत्यं वदन्ति राजानः सत्येन वसुधा धृता॥
सत्येन गम्यते स्वर्गं मोक्षं सत्येन प्राप्यते।
सूर्य्यस्तपति सत्येन सोमः सत्येन राजते॥
यमः सत्येन हरति सत्येनेन्द्रो विराजते।
वरुणश्च कुबेरश्च तौ च सत्ये प्रतिष्ठितौ॥
तत् सत्यं मम नश्येत यदहं नागमे पुनः॥"
इति वाराहे मथुरामाहात्म्ये अन्यतीर्थ-
प्रभाववर्णननामाध्यायः॥*॥ अन्यच्च।
"सत्यं सन्तोष आस्तिक्यं तथा चेन्द्रियनिग्रहः।
देवताभ्यर्चनं पूजा ब्राह्मणानां विशेषतः॥
सत्यं भूतहितं वाक्यमस्तेयं स्नानमप्यरम्।
नियमाः पञ्च सत्याद्या बाह्यमाभ्यन्तरं द्विधा॥"
इति गारुड़े ४८ अध्यायः॥*॥
अपि च।
"यैरर्य्या धर्म्मैश्च ते सत्या यैरधर्म्मैश्च गतश्रियः।
सत्यशौचं मनःशौचं शौचमिन्द्रियनिग्रहः॥
सर्व्वभूतदया शौचं जलशौचञ्च पञ्चमम्।
यत्र सत्यञ्च शौचञ्च तत्र स्वर्गो न दुर्ल्लभः॥
सत्यं हि वचनं यस्य सोऽश्वमेधाधिगच्छते॥"
इति गारुड़े १११ अध्यायः॥*॥
अपि च।
"न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्म्मम्।
नासौ धर्म्मो यत्र नो सत्यमस्ति
नो तत् सत्यं यच्छलेनानुविद्धम्॥
ब्राह्मणोऽपि मनुष्याणामादित्यश्च तेजसाम्।
गिरीणामपि सर्व्वेषां व्रतानां सत्यमुत्तमम्॥"
इति गारुड़े ११५ अध्यायः॥
ब्रह्म। यथा। यः सर्व्वज्ञः सर्व्ववित् यस्य ज्ञान-
मयं तपः सर्व्वस्य वशी सर्व्वस्येशानः यः
पृथिव्यां तिष्ठन् पृथिव्या अन्तरः सोऽकामयत
बहुस्यां स ईक्षत तत्तेजोऽसृजत सत्यं ज्ञान-
मनन्तं ब्रह्म इत्याद्याः। इति श्रीभागवतदशम-
स्कन्धीय ८७ अध्यायीयक्रतीयश्लोकटीकायां
श्रीधरस्वामी॥*॥ अपि च।
"अहमात्मा परं ब्रह्म सत्यं ज्ञानमनन्तजम्।
विज्ञानमानन्दो ब्रह्म सत्तत्त्वमसि केवलम्॥
नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम्।
योऽसावादित्यपुरुषः सोऽसावहमचक्षतः।
इति ध्यायन् विमुच्येत ब्रह्मणो भवबन्धनात्॥"
इति गारुड़े ४८ अध्यायः॥
तद्वैदिकपर्य्यायः। वट १ ऋत २ सत्या ३
अद्वा ४ इत्या ५ ऋतम् ६। इति षट् सत्य-
नामानि। इति वेदनिघण्टौ। ३। १०॥
सत्यं, [म्] व्य, प्रश्नः। स्वीकारः। इति-
रत्नावली॥
सत्यः, पुं,(सते हितः। सत्+यत्।) श्रीरामः।
यथा,—
"कौशल्यानन्दनः श्रीमान् सत्यो दशमुखान्तकः॥"
इति शब्दरत्नावली॥
विष्णुः। यथा,—
"औत्तमेऽप्यन्तरे विष्णुः सत्यैः सह सुरोत्तमैः।
सत्यायामभवत् सत्यः सत्यरूपो जनार्द्दनः॥"
इति कौर्म्मे ४८ अध्यायः॥*॥
अन्यच्च।
"सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितञ्च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः॥"
इति श्रीभागवते १० स्कन्धे १ अध्यायः॥*॥

"प्रतिश्रुतं सत्यं ऋतमिति ऋष्टाः प्रथमं सत्यत्वेन स्तुवन्ति सत्यव्रतमिति। सत्यं व्रतं सङ्ख्यो यस्य। सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिन् तम्। त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः पूर्वं प्रलयानन्तरं स्थितिसमये च सत्यं व्यभिचारेण वर्त्तमानम्। तत एवाहुः। सत्यस्य योनिमिति। सच्छब्देन पृथिव्यप्तेजांसि। त्यशब्देन वायुाकाशौ। एवं सच्च त्यच्च सत्यं भूतपञ्चकम्। तं सत्यमित्याचक्षते इति श्रुतेः। तस्य योनिं कारणं अनेन सृष्टेः पूर्वं वर्त्तमानातोक्ता। तथा सत्ये तस्मिन्नेव निहितं अन्तर्यामितया स्थितं अनेन स्थितिसमये च सत्यत्वमुक्तम्। तथा सत्यस्य सत्यं तस्यैव सत्यस्य सत्यं पारमार्थिकं नाशेऽपि अवशिष्यमाणं रूपं अनेन प्रलयेऽप्यवधित्वेन सत्यत्वं दर्शितं एवं त्रिसत्यत्वमुपपादितम्। तथा ऋतसत्यनेत्रम्। ऋतञ्च सूनृता वाणी सत्यञ्च समदर्शनम्। तथा भगवता व्याख्यास्यमानत्वात् सत्यञ्च समदर्शनमिति ऋतञ्च सूनृता वाणी ऋषिभिः परिकीर्त्तिता॥ इति तयोर्नेत्रं नयनसाधनं नेतारं प्रवर्त्तकमिति यावत्। एवं सर्व्वप्रकारेण सत्यात्मकं तां वयं शरणं प्रपन्ना इत्यर्थः।" इति श्रीधरस्वामी॥*॥ अथसत्यङ्कचः। इति राजनिर्घण्टः॥ नान्दीमुखश्राद्धदेवः। यथा,

"इष्टिश्राद्धे क्रतुर्दक्षः सत्यो नान्दीमुखे वसुः।
नैमित्तिके कालकामौ काम्येच धुरिलोचनौ॥"

इति श्राद्धतत्त्वम्॥*॥

(मुनिविशेषः। यथा, महाभारते।२।४। १०।

"असितो देवलः सत्यः सर्पमाली महागिराः॥"

देवगणविशेषः। यथा, मार्कण्डेये।७१।१—२

"मन्वन्तरे तृतीयेऽस्मिन् उत्तमस्य प्रजापतेः।
देवानिन्द्रानृषीन् भूपान् निबोध गदतो मम॥
स्वधामानस्तथा देवा यथानामानुकारिणः।
सत्याख्यश्च द्वितीयोऽन्यस्त्रिदशानां तथा गणः॥")

तपोलोकादूर्द्धलोकः। इति विश्वः॥ अस्य विवरणं सत्यलोकशब्दे द्रष्टव्यम्॥

सत्यकं, क्ली, सत्यङ्कारः। इति केचित्॥(सत्यमेव। स्वार्थे कन्।) सत्यम्। तदयुक्ते त्रि॥ (ऋष्टिवंशीयविशेषे, पुं,। यथा, भागवते।८।२४।१३।

"अनमित्रसुतो योऽन्यः शिनिस्तस्य च सत्यकः॥"

सत्यङ्कारः, पुं, (सत्यस्य कार इति। क्व+घञ्। "कारे सत्यागदस्य।" ६।३।७०। इति सुम्।) अवश्यं मयैतत् क्रेतव्यमिति सत्याकरणम्। तत्पर्य्यायः। सत्यापनम् २ सत्याकृतिः ३। इत्यमरः॥ सत्यापना ४। इति वोपालितः॥ (यथा, राजतरङ्गिण्याम्।६।७१।

"लेभिरे निधनन्तस्मात्सत्यङ्कारात् पदातयः॥"

सत्यङ्कारकृतः, त्रि, (सत्यङ्कारेण कृतः।) अवश्यं मयैतत् क्रेतव्यमिति सत्यं कृत्वा यद्देयम्। वायना इति भाषा। इति मिताक्षरा॥ (यथा, याज्ञवल्क्यः। २। ६१।

"सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिपादयेत्॥")

सत्यतपाः, [स्] पुं, (सत्यं तपो यस्य।) मुनिविशेषः। स तु पुरा व्याध आसीत् ततस्तपः कृत्वा दुर्व्वाससो वरेण वेदादिसर्व्वशास्त्रज्ञो भूत्वा एतन्नामा बभूव। यथा,—

"तमस्यिशेषं व्याधन्तु क्षुधादुर्व्वसतां गतम्।
उवाच वेदाः साङ्गास्ते सरहस्यपदक्रमाः।
ब्रह्मविद्यापुराणानि प्रत्यक्षाणि भवन्तु ते॥
एवं प्रादाद्वरं तस्य दुर्व्वासा नाम चाकरोत्।
भवान् सत्यतपा नाम ऋषिराड्यो भविष्यति॥"

इति वाराहे सत्यतपउपख्याननामाध्यायः॥

सत्यधृतिः, पुं, (सत्या धृतिः।) ऋषिविशेषः। यथा,—

"सरहस्यस्तु दायादमवाप्य संप्रसूयते।
शतानन्दं ऋषिश्रेष्ठं तस्यापि सुमहातपाः।
तस्य सत्यधृतिर्नाम मुनिर्वेदस्य पारगः॥"

इति मात्स्ये ४८ अध्यायः॥

(सत्यशीले, त्रि। यथा, रामायणे।२।८२।६।

"रामस्तथा सत्यधृतिः सतां धर्म्ममनुस्मरन्।
नाजहात् पितुरादेशं शशी ज्योत्स्नामिवोदितः॥")

सत्यनारायणः, पुं, (सत्यो नारायणः।) देवताविशेषः। सत्यपीर इति भाषा। तस्य व्रतकथा यथा,—

"एकदा मुनयः सर्व्वे सर्व्वलोकहिते रताः।
सुरम्ये नैमिषारण्ये गोष्ठीञ्चक्रुर्मुनीश्वराः॥
तत्रान्तरे महातेजा व्यासशिष्यो महायशाः।
सूतः शिष्यगणैर्युक्तः समायातो हरिं स्मरन्॥
तमायान्तं समालोक्य सूतं शास्त्रार्थपारगम्।
नेमुः सर्व्वे समुत्थाय शौनकाद्यास्तपोधनाः॥
सोऽपि तान् सहसा भक्त्या मुनीन् परमवैष्णवान्
ननाम दण्डवद्भूमौ सर्व्वधर्म्मविदांवरः॥
वरासने महाबुद्धिस्तैर्दत्ते मुनिपुङ्गवैः।
उवास स सभामध्ये सर्व्वैः शिष्यगणैर्वृतः॥
तत्रोपविष्टं तं सूतं शौनको मुनिसत्तमः।
बद्धाञ्जलिरिमां वाचमुवाच विनयान्वितः॥

शौनक उवाच।

महर्षे सूत सर्व्वज्ञ कलिकाले समागते।
केनोपायेन भगवन् हरिभक्तिर्भवेन्नृणाम्॥
कलौ सर्व्वे भविष्यन्ति पापकर्म्मपरायणाः।
वेदविद्याविहिनाश्च तेषां श्रेयः कथं भवेत्॥
कलावल्पगताप्राणा लोकाः स्वल्पायुषस्तथा।
निधनाय भविष्यन्ति नानापीड़ाप्रपीड़िताः॥
प्रयाससाध्यं सुव्रतं शास्त्रेषु श्रूयते द्विज।
तस्मात् केऽपि करिष्यन्ति कलौ न सुव्रतं जनाः॥
सुव्रतेषु विनष्टेषु प्रवृत्ते पापकर्म्मणि।
सर्व्वेशाः प्रलयं सर्व्वे गमिष्यन्ति दुराशयाः॥
स्वल्पश्रमैरल्पवित्तैरल्पकालैश्च सत्तम।
यथा भवेन्महापुण्यं तथा कथय सूत नः॥
यस्योपदेशतः पुण्यं पापं वा कुरुते जनः।
स तद्भागी भवेन्नित्यं इति शास्त्रेषु निश्चितम्॥
पुण्योपदेशी सदयः कैतवैश्च विवर्ज्जितः।
पापायतनविरोधी च चतुरः केशवोपमः॥

ज्ञानं संप्राप्य संसारे यः परेभ्यो न यच्छति।
ज्ञानरूपी हरिस्तस्मै प्रसन्न इव नेक्षते॥
ज्ञानरत्नेन रत्नैश्च परसन्तोषकारकः।
स श्रेयः सुव्रतिर्नूनं नररूपधरो हरिः॥
व्रतेन तपसा किंवा प्राप्यते वाञ्छितं फलम्।
सर्व्वं तत् श्रोतुमिच्छामि कथयस्व महामते॥
त्वमेव मुनिशार्दूल वेदवेदाङ्गपारगः।
त्वदृते नहि वक्तान्यो यतस्त्वं व्यासशिष्यतः॥

सूत उवाच।

धन्योऽसि त्वं मुनिश्रेष्ठ त्वमेव वैष्णवाग्रणीः।
यतः समस्तलोकानां हितं वाञ्छसि सर्व्वदा।
शृणु शौनक वक्ष्यामि यत् त्वया श्रोतुमिच्छते॥
नारदेनैवमुक्तः सन् भगवान् कमलापतिः।
सुरर्षये यथैवाह तत् शृणुष्व समाहितः॥*॥
एकदा नारदो योगी परानुग्रहकाङ्क्षया।
पर्य्यटन् विविधान् लोकान् मर्त्यलोकमुपागतम्॥
तत्र दृष्ट्वा जनाः सर्व्वे नानादुःखसमन्विताः।
नानायोनिसमुत्पन्नाः क्लिश्यन्ते पापकर्म्मभिः॥
केनोपायेन चैतेषां दुःखनाशो भवेद्ध्रुवम्।
इति सञ्चिन्त्य मनसा विष्णुलोकं गतस्तदा॥
तत्र नारायणं देवं शुक्लवर्णं चतुर्भुजम्।
शङ्खचक्रधरं देवं वनमालाविभूषितम्॥
दृष्ट्वा तं देवदेवेशं स्तोतुं समुपचक्रमे।

नारद उवाच।

नमस्ते वाङ्मनोऽतीतरूपायानन्तशक्तये।
आदिमध्यान्तहीनाय निर्गुणाय गुणात्मने॥
सर्व्वेषामादिभूताय भक्तानामार्त्तिनाशिने।
श्रुत्वा स्तोत्रं ततो विष्णुर्नारदं प्रत्यभाषत॥

श्रीभगवानुवाच।

किमर्थमागतोऽसि त्वं किन्ते मनसि वर्त्तते।
कथयस्व महाभाग तत् सर्व्वं कथयामि ते॥

नारद उवाच।

मर्त्यलोके जनाः सर्व्वे नानाशोकसमन्विताः।
नानायोनिसमुत्पन्नाः पच्यन्ते पापकर्म्मणा॥
तत् कथं शमयेन्नाथ लघूपायेन तद्वद।
श्रोतुमिच्छामि तत् सर्व्वं कृपास्ति यदि ते मयि॥

श्रीभगवानुवाच।

साधु पृष्टं त्वया वत्स! लोकानुग्रहकाम्यया।
यत् कृत्वा मुच्यते मोहात् तत् शृणुष्व वदामि ते॥
व्रतमस्ति महापुण्यं स्वर्गे च भुवि दुर्लभम्।
तव स्नेहान्मया विप्र प्रकाशीक्रियतेऽधुना॥*॥
सत्यनारायणस्यैतद्व्रतं सम्यग्विधानतः।
कृत्वा सद्यः सुखं भुक्त्वा परत्र मोक्षमाप्नुयात्॥
तत् श्रुत्वा भगवद्वाक्यं नारदः पुनरब्रवीत्॥
किं फलं किं विधानञ्च कृतं केनेति वा व्रतम्।
तत् सर्व्वं विस्तरादब्रूहि कदा कार्य्यं हि तद्व्रतम्॥

श्रीभगवानुवाच।

दुःखशोकादिशमनं धनधान्यविवर्द्धनम्।
सौभाग्यसन्ततिकरं सर्व्वत्र विजयप्रदम्॥
यस्मिन् कस्मिन् दिने मर्त्यो भक्तिश्रद्धासमन्वितः।
सत्यनारायणं देवं यजेच्चैव निशामुखे॥

बान्धवैर्ब्राह्मणैश्चैव सहितो धर्मतत्परः।
नैवेद्यं भक्तितो दद्यात् सपादं भक्ष्यमुत्तमम् ॥
रम्भाफलं घृतं चीरं गोधूमस्य च चूर्णकम्।
अभावे शालिचूर्णं वा शर्करां वा गुड़ं तथा ॥
सपादसर्व्वभक्ष्याणि एकीकृत्य निवेदयेत्।
विप्राय दक्षिणां दद्यात् कथां श्रुत्वा जनैः सह ॥
ततश्च बन्धुभिः सार्द्धं विप्रेभ्यः प्रतिपादयन्।
प्रसादं भक्षयेत् भक्त्या नृत्यगीतादिकं चरेत् ॥
ततः स्तुत्वा गृहं गच्छेत् सत्यनारायणं स्मरन्।
एवं कृते मनुष्याणां वाञ्छासिद्धिर्भवेद्ध्रुवम् ॥
विशेषतः कलियुगे नान्योपायोऽस्ति भूतले।
कथामस्य प्रवक्ष्यामि कृतकृत्यो भवेत् द्विजः ॥*॥
कश्चित् काशीपुरे ग्रामे आसीद्विप्रश्च निर्धनः।
क्षुधार्त्तश्चाकुलो भूत्वा सततं भ्रमते महीम् ॥
दुःखितं ब्राह्मणं दृष्ट्वा भगवान् ब्राह्मणप्रियः।
वृद्धब्राह्मणरूपः सन् पप्रच्छ द्विजमादरात् ॥
किमर्थं भ्रमसे विप्र! महीं कृत्स्नाञ्च दुःखितः।
तत् सर्व्वं श्रोतुमिच्छामि कथ्यतां यदि रोचते ॥

विप्र उवाच।

ब्राह्मणोऽतिदरिद्रोऽहं भिक्षार्थं भ्रमते महीम्
उपायं यदि जानासि कृपया कथय प्रभो ॥

वृद्ध उवाच।

सत्यनारायणो देवो वाञ्छितार्थफलप्रदः।
तस्य त्वं द्विजशार्दूल कुरुष्व व्रतमुत्तमम् ॥
यत् कृत्वा सर्व्वदुःखेभ्यो मुक्तो भवति मानवः॥
विधानञ्च व्रतस्यास्य विप्रायाभाष्य यत्नतः।
सत्यनारायणो वृद्धस्तत्रैवान्तरधीयत ॥
ततः प्रातः करिष्यामि व्रतं मनसि चिन्तितम्
इति सञ्चिन्त्य विप्रोऽसौ रात्रौ निद्रां न चाल-
भत ॥
ततः प्रातः समुत्थाय सत्यनारायणव्रतम्।
करिष्येऽहञ्च सङ्कल्प्य भिक्षार्थमगमद्द्विजः ॥
तस्मिन्नेव दिने विप्रः प्रचुरं प्राप्तवान् धनम्।
तेनैव बन्धुभिः सार्द्धं सत्यस्य व्रतमाचरत् ॥
सर्व्वदुःखविनिर्म्मुक्तः सर्वसम्पत्समन्वितः।
बभूव स द्विजश्रेष्ठो व्रतस्यास्य प्रभावतः।
ततः प्रभृतिकालञ्च मासि मासि व्रतं कृतम् ॥

सूत उवाच।

एवं नारायणस्येदं व्रतं कृत्वा द्विजोत्तमः।
सर्वपापविनिर्मुक्तो दुर्ल्लभं मोक्षमाप्नुयात् ॥
व्रतञ्च तदृयथा विप्रः पृथिव्यां सञ्चरिष्यति।
तदैतत् सर्वदुःखं हि नराणाञ्च विनश्यति ॥
एवं नारायणेनोक्तं नारदाय महात्मने।
मयापि कथितं विप्र किमन्यत् कथयामि ते ॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायण-
विप्रसंवादो नाम १ अध्यायः ॥ * ॥

शौनक उवाच।

"तस्माद्विप्र व्रतं केन पृथिव्यां चरितं मुने।
तत् सर्वं श्रोतुमिच्छामि यद्यस्माकं प्रजायते ॥

सूत उवाच।

शृणुध्वं मुनयः सर्वे तस्माद्येन कृतं भुवि।
एकदा स द्विजवरो यथाविभवविस्तरैः ॥
बन्धुभिः स्वजनैः सार्द्धं व्रतं कर्त्तुं समुद्यतः।
एतस्मिन्नेव काले तु काष्ठकेतुः समागतः।
बहिः काष्ठञ्च संस्थाप्य विप्रस्य मन्दिरं ययौ ॥
क्षुधया पीड़ितात्मा स विप्रं दृष्ट्वा तथाविधम्।
प्रणिपत्य द्विजश्रेष्ठं किमिदं क्रियते त्वया।
कृते किं फलमाप्नोति विस्तराद्वद मे प्रभो ॥

विप्र उवाच।

सत्यनारायणस्येदं व्रतं सर्व्वेप्सितप्रदम्।
दुःखशोकादिशमनं सर्वत्र विजयप्रदम् ॥
धनादिसन्ततिकरं सर्वेषामीप्सितप्रदम्।
यस्य प्रसादान्मे सर्वं धनधान्यादिकं महत् ॥
ततस्तु स व्रतं ज्ञात्वा काष्ठकर्त्तातिहर्षितः।
पपौ जलं प्रसादञ्च भुक्त्वा तन्नगरं ययौ ॥
सत्यनारायणं देवं चिन्तयन् स्थिरमानसः।
काष्ठं विक्रीय नगरे प्राप्यते चाद्य यद्धनम्।
तेनैव सत्यदेवस्य व्रतमद्य करोम्यहम् ॥
इति सञ्चिन्त्य मनसा काष्ठं कृत्वा तु मस्तके।
जगाम नगरे रम्ये धनिनां यत्र सम्स्थितिः।
तद्दिने काष्ठमूल्यञ्च द्विगुणं प्राप्तवानसौ ॥
ततः प्रसन्नहृदयः सुपक्वकदलीफलम्।
शर्कराञ्च घृतं दुग्धं गोधूमस्य च चूर्णकम् ॥
प्रत्येकन्तु सपादञ्च गृहीत्वा गृहमाययौ।
ततो बन्धून् समाहूय चकार विधिना व्रतम् ॥
तद्व्रतस्य प्रसादेन धनपुत्रान्वितोऽभवत्।
इह लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ ॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायण-
कथायां विप्रकाष्ठकेतुसंवादो नाम २ अध्यायः॥

सूत उवाच।

"पुनरन्यत् प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः।
आसीदुल्कामुखो नाम नृपतिर्ब्बलिनां वरः ॥
जितेन्द्रियः सत्यवादी ययौ देवालयं प्रति।
दिने दिने धनं दत्त्वा द्विजान् सन्तोषयेत् सुधीः
भार्य्या तस्य प्रमुग्धा च सरोजवदना सती।
सञ्चिताश्वा शरदिन्दु सकटाक्षं च बिभ्रती ॥
काञ्चीञ्च बिभ्रती श्यामा मालतीमाल्यभूषिता
भद्रशीला व्रतं सत्यं सिन्धुतीरेऽकरोन्मुने ॥
एतस्मिन्नन्तरे तत्र साधुः कोऽपि समागतः।
वाणिज्यार्थं बहुधनै रत्नाद्यैः परिपूरितः ॥
नावं संस्थाप्य तत्तीरे जगाम तत्तटं प्रति।
दृष्ट्वा तत्र व्रतं सम्यक् पप्रच्छ विनयान्वितः ॥

साधुरुवाच।

किमिदं कुरुषे राजन् भक्तियुक्तेन चेतसा।
प्रकाशं कुरु तत् सर्वं श्रोतुमिच्छामि सम्प्रति॥

राजोवाच।

पूजनं क्रियते साधो विष्णोरतुलतेजसः।
व्रतञ्च स्वजनैः सार्द्धं पुत्रादिप्राप्तये मया ॥
प्रत्युवाच ततो नत्वा राजानं मधुरं वचः।
सत्यं कथय मे राजन् व्रतमेतत् करोम्यहम् ॥
ममापि सन्ततिर्नास्ति सत्यमेतत् सुतव्रतम्।
ततो निवृत्त्य वाणिज्यात् सानन्दं गृहमागतः ॥
भार्य्यायै कथितं सर्व्वं व्रतञ्च सन्ततिप्रदम्।
तदा व्रतं करिष्यामि यदा मे सन्ततिर्भवेत् ॥
यत्किञ्चिद्दिवसे तस्यं भार्य्या लीलावती सती।
गर्भयुक्तानन्दचित्ताभवद्धर्म्मपरायणा ॥
पूर्णे गर्भे ततो जाता बालिका चातिनिर्म्मला।
दिने दिने वर्द्धमाना शुक्लपक्षे यथा शशी ॥
ततो वणिक् सुतायाश्च जातकर्म्मादिकञ्चरन्।
नाम्ना कलावतीं चेति तन्नामकरणं कृतम् ॥
ततो लीलावती प्राह स्वामिनं मधुरं वचः।
न करोषि किमर्थं वा पुरा यच्च प्रतिश्रुतम् ॥
विवाहसमयेऽप्यस्याः करिष्यामि व्रतं प्रिये।
इति भार्य्यां समाश्वास्य जगाम नगरं प्रति ॥
ततः कलावती कन्या वर्द्धिता पितृवेश्मनि।
दृष्ट्वा कन्यां ततः साधुर्नगरे बन्धुभिः सह।
मन्त्रयित्वा दृतं दूतं प्रेरयित्वा स धर्म्मवित्।
विवाहार्थञ्च कन्यायाः वरं श्रेष्ठं विचारयन् ॥
तेनाज्ञप्तश्च दूतोऽसौ काञ्चनं नगरं ययौ।
तस्मादेकं वणिक्पुत्रं समादायागतो हि सः ॥
दृष्ट्वा तं सुन्दरं बालं वणिक्पुत्रं गुणान्वितम्।
ज्ञातिभिर्बन्धुभिः सार्द्धं परितुष्टेन चेतसा ॥
दत्तवान् साधुराश्वय कन्यां विधिविधानतः।
ततो भाग्यवशात्तेन विस्मृतं व्रतमुत्तमम् ॥
विवाहसमयेऽप्यस्यास्तेन रुष्टोऽभवद्विभुः ॥
ततः कालेन कियता निजधर्म्मविशारदः।
वाणिज्यार्थं गतः शीघ्रं जामात्रा सहितो
वणिक् ॥
रत्नसारपुरे रम्ये गत्वा सिन्धुसमीपतः।
वाणिज्यं कुरुते साधुर्जामात्रा श्रीमता सह ॥
पुरीं निर्म्माय नगरे चन्द्रकेतोर्नृपस्य च।
एतस्मिन्नेव काले तु सत्यनारायणः प्रभुः ॥
भ्रष्टप्रतिज्ञमालोक्य शापं तस्मै प्रदत्तवान्।
अद्यप्रभृति कालस्य महादुःखं भविष्यति ॥
तस्मिन्नेव दिने राज्ञो धनमादाय तस्करः।
तेनैव वर्त्मना यातः पृष्ठदेशं विलोकयन् ॥
तत्पश्चादावकान् दूतान् दृष्ट्वा भीतेन चेतसा।
धनं संस्थाप्य तत्रैव गतः शीघ्रमलक्षितः ॥
ततो दूताः समायाता यत्रास्ते सज्जनो वणिक्॥
दृष्ट्वा नृपधनं तत्र बद्ध्वा दूता वणिक्सुतौ ॥
हययुक्ता धावमाना ऊचुर्नृपसमीपतः।
तस्करौ द्वौ समानीतौ विलोक्याज्ञापय प्रभो ॥
ते नृपाज्ञां समादाय दृढं बद्ध्वा तु तावुभौ।
क्षिप्तौ द्वौ महादुर्गे कारागारेऽविचारयन् ॥

सूत उवाच।

मायया सत्यदेवस्य न श्रुतञ्च तयोर्वचः।
ततस्तयोर्धनं यच्च गृहीतं चन्द्रकेतुना ॥
तच्छापाच्च तयोर्गेहे भार्य्या च दुःखिताभवत्।
चौरेणापहृतं सर्व्वं गृहे यच्च स्थितं धनम् ॥
आधिव्याधिसमायुक्ता क्षुत्पिपासातिपीड़िता।
अन्नचिन्तापरा भूत्वा भ्रमते च गृहे गृहे।
ततः कलावती कन्या बभ्राम प्रतिवासरे ॥
एकस्मिन् दिवसे रात्रौ क्षुधार्त्ता द्विजमन्दिरम्।
गत्वापश्यद्व्रतं तत्र सत्यनारायणस्य सा ॥
उपविश्य कथां श्रुत्वा वरं प्रार्थयती सुदा।
प्रसादभक्षणं कृत्वा ययौ रात्रौ गृहं प्रति ॥

ततो लीलावती कन्या भर्तुः सस्मार तां शुभाम्।
पूर्वं। रात्रौ स्थिता कुत्र किन्ते मनसि वर्त्तते॥
द्विजालये व्रतं मातर्दृष्टं वाञ्छितसिद्धिदम्॥
तत् श्रुता कन्यकावाक्यं व्रतं कर्तुं समुद्यता।
ससुता सा वणिग्भार्य्या सत्यनारायणस्य च॥
व्रतं चक्रे च वै साध्वी बन्धुभिः स्वजनैः सह।
भर्तृजामातरौ क्षिप्रमागच्छेतां ममान्तिकम्॥
इति देवं वरं वाञ्छे सत्यदेवं पुनः पुनः।
अपराधन्तु भर्तुर्मे जामातुः क्षन्तुमर्हसि॥
व्रतेन तस्यास्तुष्टोऽसौ सत्यनारायणः प्रभुः।
दर्शयामास स्वप्नं हि चन्द्रकेतुं नृपोत्तमम्॥
बन्दिनौ मोचय प्रातर्वणिजौ नृपसत्तम!।
देयं धनञ्च तत् सर्व्वं विधिना द्विगुणीकृतम्॥
नो चेत् त्वां नाशयिष्यामि सराज्यधनपुत्रकम्।
एवमाभाष्य राजानं ध्यानगम्योऽभवत् प्रभुः॥
ततः प्रभातसमये राजा च स्वजनैः सह।
उपविश्य सभामध्ये प्राह दूतजनं प्रति॥
बद्धौ महाजनौ शीघ्रं मोचयध्वं वणिक्सुतौ।
इति राज्ञो वचः श्रुत्वा मोचयित्वा महाजनौ॥
समानीय नृपस्याग्रे प्रोचुश्च विनयान्विताः।
आनीतौ द्वौ वणिक्पुत्रौ सुतौ निगडबन्धनात्॥
ततो महाजनौ नत्वा चन्द्रकेतुं नृपोत्तमम्।
स्मृत्वा च पूर्व्ववृत्तान्तं विस्मयान्नम्रविग्रहौ॥
राजा वणिक्सुतौ वीक्ष्य प्रोवाच सादरं वचः।
दैवात् प्राप्तं महत् कष्टमिदानीं नास्ति ते भयम्॥
इदानीमेव मुक्तस्त्वं श्वशुरभ्यादिकञ्चर॥
ततो नृपवरः श्रीमान् स्वर्णरत्नविभूषणैः।
अलङ्कृत्य वणिक्पुत्रौ वचसाप्रीणयद्गुरुम्।
पुरानीतञ्च यद्द्रव्यं द्विगुणीकृत्य दत्तवान्॥
प्रोवाच तौ ततो राजा गच्छ साधो निजाश्रमम्।
राजानं प्रणिपत्याह गन्तव्यं त्वत्प्रसादतः॥
यात्रां कृत्वा ततः साधुर्मङ्गलाचारपूर्व्विकाम्।
ब्राह्मणेभ्यो धनं दत्त्वा सहर्षो नगरं ययौ॥
कियद्दूरे गते साधौ सत्यनारायणः प्रभुः।
जिज्ञासां कृतवान् साधो किमस्ति तरणौ तव॥
ततो महाजनो मत्तो हेलया च प्रहस्य च।
कथं पृच्छसि भो दण्डिन्! मुद्रां किं लब्धुमिच्छसि॥
लतापत्रादिकञ्चैव वर्त्तते तरणौ मम।
निष्ठुरञ्च वचः श्रुत्वा सत्यं भवतु ते वचः॥
एवमुक्त्वा गतः शीघ्रं दण्डी तस्य समीपतः।
कियद्दूरे ततो गत्वा स्थितः सिन्धुसमीपतः॥
गते दण्डिनि साधुश्च कृतनित्यक्रियस्तदा।
उत्थितस्तरणौ दृष्ट्वा विस्मयं परमं ययौ॥
लतापत्रादिकं दृष्ट्वा मूर्च्छितो न्यपतद्भुवि।
लब्धसंज्ञो वणिक्पुत्रस्ततश्चिन्तापरोऽभवत्॥
श्वशुरं दुहितुः कान्तो वचनञ्चेदमब्रवीत्॥

जामातोवाच।

किमर्थं क्रियते शोक आपादेतच्च दण्डिनः।
शक्यते तेन सर्व्वं हि कर्तुं हर्त्तुं न संशयः॥
ततस्तच्छ्वशुरश्चापि वाञ्छितार्थो भविष्यति।
जामातुश्च वचः श्रुत्वा तत्सकाशं गतस्तदा॥
दृष्ट्वा च दण्डिनं भक्त्या नत्वा प्रोवाच सादरम्।
क्षमस्व चापराधं मे यदुक्तं तव सन्निधौ॥
मया दुरात्मना देव मुग्धोऽहं तव मायया।
यदुक्तं तद्वचो नाथ दुष्टं मे क्षन्तुमर्हसि॥
यतः परकृताः सर्वे क्षमासारा हि साधवः।
पुनः पुनस्ततो नत्वा रुरोद शोकविह्वलः॥
तमुवाच ततो दण्डी विलपन्तं विलोक्य च।
मा रोदीः शृणु मे वाक्यं मम पूजापराङ्मुखः॥
मामवज्ञाय दुर्बुद्धे! लब्धं दुःखं मुहुर्मुहुः।
तत् श्रुत्वा भगवद्वाक्यं स्तुतिं कर्तुं समुद्यतः॥

साधुरुवाच।

त्वन्मायामोहिताः सर्व्वे ब्रह्माद्यास्त्रिदिवौकसः।
न जानन्ति गुणं रूपं तवावर्य्यमिदं प्रभो॥
मूढोऽहं त्वां कथं जाने मोहितस्तव मायया।
प्रसीद पूजयिष्यामि यथाविभवविस्तरैः॥
पुत्रं वित्तञ्च मच्चित्तं पाहि मां शरणागतम्॥
श्रुत्वा भक्तियुतं वाक्यं परितुष्टो जनार्दनः।
वरञ्च वाञ्छितं दत्त्वा तत्रैवान्तरधीयत॥
ततोऽसौ नावमारुह्य दृष्ट्वा रत्नादिपूरिताम्।
कृपया सत्यदेवस्य यत् फलं वाञ्छितं मम॥
इत्युक्त्वा स्वजनैः सार्द्धं पूजां कृत्वा यथाविधि।
हर्षेण महता साधुः प्रयाणं चाकरोत् द्विजः॥
नावं संयोज्य वेगेन स्वदेशमगमत्तदा॥
ततो जामातरं प्राह पश्य वक्त्र पुरीं मम।
दूतञ्च प्रेरयामास निजवित्तस्य रक्षकम्॥
ततोऽसौ नगरं गत्वा साधुभार्य्यां विलोक्य च।
उवाच वाञ्छितं वाक्यं नत्वा बद्धाञ्जलिस्तदा॥
निकटे नगरस्यैव जामाता सहितो वणिक्।
आगतौ बन्धुवर्गैश्च धनैर्बहुविधैस्तथा॥
श्रुत्वा दूतमुखाद्वाक्यं महाहर्षयुता सती।
सत्यपूजां ततः कृत्वा प्रोवाच तनुजां प्रति।
व्रजामि शीघ्रमागच्छ साधुसन्दर्शनाय च॥
इति मातृवचः श्रुत्वा व्रतं कृत्वा समाप्य च।
प्रसादं संपरित्यज्य गता सा च पतिं प्रति॥
तेन रुष्टः सत्यदेवो भर्त्तारं तरणौ तथा।
संस्थाप्य च धनैः सार्द्धं जले तस्मिन् समर्पयत्॥
ततः कलावतीकन्या लीलाख्यं वणिजं पतिम्।
शोकेन महता तत्र रुदन्ती चापतद्भुवि॥
दृष्ट्वा तथाविधां कन्यां न दृष्ट्वा तत्पतिं तरीम्।
भीतेन महता साधुः किमाश्चर्य्यमिदं महत्॥
विचिन्त्यमानास्ते सर्व्वे बभूवुस्तरिवाहकाः।
ततो लीलावती साध्वी दृष्ट्वा तद्विह्वला सती।
विललापातिदुःखेन भर्त्तारञ्चेदमब्रवीत्॥
इदानीं नौकया सार्द्धमदृश्योऽभूदलक्षितम्।
न जाने केन दैवेन हेलया वापहारितम्॥
सत्यदेवस्य माहात्म्यं किं ज्ञातुं नहि शक्यते।
इत्युक्त्वा विललापाथ तत्रस्था स्वजनैः सह॥
ततो लीलावती कन्यां क्रोडे कृत्वा रुरोद च।
ततः कलावती कन्या नष्टे स्वामिनि दुःखिता॥
गृहीत्वा पादुकां तस्य अनुगन्तुं मनो दधे।
कन्यायाश्चरितं दृष्ट्वा सभार्य्यः सुजनो वणिक्॥
अतिशोकेन सन्तप्तश्चिन्तयामास धर्म्मवित्॥
हृतो हि सत्यदेवेन जामाता सत्यमायया।
सत्यपूजां करिष्यामि यथाविभवविस्तरैः॥
इति सर्व्वान् समाश्वास्य कथितञ्च मनोरथम्।
नत्वा च दण्डवद्भूमौ सत्यदेवं पुनः पुनः॥
ततस्तुष्टः सत्यदेवो गगनादब्रवीद्वचः।
जगाद वचनञ्चेदं नैवेद्यमवमन्य च॥
आगता स्वामिनं दृष्ट्वा नौकाश्चाभवत् प्रभुः॥
गृहं गत्वा प्रसादञ्च भुक्त्वा चायाति सा पुनः।
तदाभर्तृमुखं साधो भविष्यति न संशयः॥
ततश्च प्राहदं वाक्यं श्रुत्वा गगनमण्डलात्।
क्षिप्रं तदा गृहं गत्वा प्रसादं प्रतिभुज्य च॥
अपश्यत् पुनरागत्य पतिं नावं जनैः सह।
ततः कलावती तुष्टा जगाद पितरं प्रति॥
एहि तातं गृहं यावि विलम्बं कुरुषे कथम्।
तत् श्रुत्वा कन्यकावाक्यं सन्तुष्टोऽभूद्वणिक्सुतः।
पूजनं सत्यदेवस्य कृत्वा विधिविधानतः।
धनैर्बन्धुगणैः सार्द्धं जगाम निजमन्दिरम्॥
पौर्णमास्याञ्च संक्रान्त्यां पूजां कृत्वा यथाविधि।
इह लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे श्रीसत्यनारायणकथायां वणिक्साधुमोचवर्णनो नाम ३ अध्यायः॥*॥

सूत उवाच।

"अथ चान्यत् प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः।
आसीदंगध्वजो राजा प्रजापालनतत्परः॥
प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः।
एकदा स वनं गत्वा हत्वा च विविधान् मृगान्॥
आगत्य वटमूले च दृष्ट्वा सत्यस्य पूजनम्।
गोपाः कुर्व्वन्ति सन्तुष्टा भक्तियुक्ताः सबान्धवाः॥
राजा दृष्ट्वा तु दर्पेण नागतो न ननाम सः।
ततो गोपगणाः सर्व्वे प्रसादं नृपसन्निधौ॥
संस्थाप्य पुनरागत्य भुक्त्वा सर्व्वे यथेप्सितम्।
ततः प्रसादं संत्यज्य राजा दुःखमवाप सः॥
तस्य पुत्रशतं नष्टं धनधान्यादिकञ्च यत्।
सत्यदेवेन तत् सर्व्वं नाशितं मम निश्चितम्॥
अतस्तत्रैव गच्छामि यत्र देवस्य पूजनम्।
मनसेति विनिश्चित्य ययौ गोपालसन्निधिम्॥
ततोऽसौ सत्यदेवस्य पूजां गोपगणैः सह।
भक्तिश्रद्धान्वितो भूत्वा चकार विधिवन्नृपः॥
सत्यदेवप्रसादेन धनपुत्रान्वितोऽभवत्।
इह लोके सुखं भुक्त्वा चान्ते विष्णुपुरं ययौ॥
य इदं कुरुते सत्यव्रतं परमदुर्लभम्।
शृणोति च कथां पुण्यां भक्तिसंयुक्तिफलप्रदाम्॥
धनधान्यादिकं तस्य भवेत् सत्यप्रसादतः।
दरिद्रो लभते वित्तं बद्धो मुच्येत बन्धनात्॥
भीतो भयात् प्रमुच्येत सत्यमेतन्न संशयः।
ईप्सितञ्च फलं भुक्त्वा चान्ते सत्यपुरं व्रजेत्॥
इति वः कथितं विप्राः सत्यनारायणव्रतम्।
यत् कृत्वा सर्व्वदुःखेभ्यो मुक्तो भवति मानवः॥
विशेषतः कलियुगे सत्यपूजाकथाफलम्।
सत्यनारायणं केचित् सत्यदेवं तथापरे॥

नानारूपधरो भूत्वा सर्व्वेषामीप्सितप्रदः।
भविष्यति कलौ सत्यव्रतरूपी सनातनः॥
य इदं पठते नित्यं शृणोति मुनिसत्तमाः।
तस्य नश्यन्ति पापानि सत्यदेवप्रसादतः॥"
इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायण-कथानाम ४ अध्यायः॥*॥ इति श्रीसत्यनारायणव्रतकथा समाप्ता॥ क्वचित् पुस्तके अध्याय-नाम नास्ति। क्वचित् भविष्यपुराणे इति ज्ञात्वा एतत्कथा लिखिता॥*॥ अथ सत्यनारायण-पूजाप्रकृतिः। आदौ स्वस्तिवाचनपूर्व्वं सङ्कल्पं कुर्य्यात्। अद्येत्यादि अमुकतिथौ रात्रौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुककामः गणेशादिदेवतापूजापूर्व्वकश्रीसत्यनारायणपूजा-नक्षत्राश्रवणमहं करिष्ये। ततः सूक्तं पठेत्। तत आसनशुद्ध्यादिकं कृत्वा गणेशादिदेवता-नवग्रहदिक्पालान् पूजयेत्। लक्ष्मीसरस्वत्या-दिपुरुषनादिपुरुषश्रीरामलक्ष्मणपूजां कृत्वा यवतिलैः सत्यनारायणमावाहयेत्। प्रणवव्याहृतीः समुच्चार्य्य भगवन् सत्यनारायण इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ मम पूजां गृहाण इत्यादिना आवाह्य पुष्पं गृहीत्वा ध्यायेत्।
"ध्यायेत् सत्यं गुणातीतं गुणत्रयसमन्वितम्।
लोकनाथं त्रिलोकेशं पीताम्बरधरं हरिम्॥
इन्दीवरदलश्यामं शङ्खचक्रगदाधरम्।
नारायणं चतुर्ब्बाहुं श्रीवत्सपदभूषितम्।
गोविन्दं गोकुलानन्दं जगतः पितरं गुरुम्॥"
इति ध्यात्वा एतत् पाद्यं सत्यनारायणाय नमः। अर्घ्यमन्त्रस्तु।
"व्यक्ताव्यक्तस्वरूपाय हृषीकपतये नमः।
मया निवेदितो भक्त्या अर्घ्योऽयं प्रतिगृह्यताम्॥"
एषोऽर्घ्यः श्रीसत्यनारायाय नमः। पुष्पाञ्जलिं गृहीत्वा।
"नमस्ते विश्वरूपाय शङ्खचक्रधराय च।
पद्मनाभाय देवाय हृषीकपतये नमः।
नमोऽनन्तस्वरूपाय त्रिगुणात्मविभासिने॥"
नैवेद्यं गृहीत्वा।
"त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पितम्।
गृहाण सुमुखो भूत्वा प्रसीद पुरुषोत्तम॥"
ततः अञ्जलिं बद्ध्वा पठेत्।
"अच्युतं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम्।
हृषीकेशं जगन्नाथं वागीशं वरदायकम्॥
गुणत्रयं गुणातीतं गोविन्दं गरुड़ध्वजम्।
जनार्द्दनं जनानन्दं जानकीवल्लभं जयम्॥
प्रणमामि सदा सत्यनारायणमतः परम्।
दुर्गमे विषमे घोरे शत्रुभिः परिपीड़िते॥
विविधापत्सु दुष्टेषु तथान्येष्वपि यज्जयम्।
नामान्येतानि सङ्कीर्त्त्य ईप्सितं फलमाप्नुयात्॥
सत्यनारायणं देवं वन्देऽहं कामदं शुभम्।
लीलया च ततं विश्वं येन तस्मै नमो नमः॥"
ततो दक्षिणान्दद्यात्। अच्छिद्रावधारणं कुर्य्यात्। इति सत्यनारायणपूजापद्धतिः॥

सत्यपुरं, क्ली, (सत्यं पुरम्।) विष्णुलोकः। यथा,
"ईप्सितञ्च फलं भुक्त्वा चान्ते सत्यपुरं वसेत्।
इति वः कथितं विप्राः सत्यनारायणव्रतम्॥"
इति स्कन्दपुराणीयसत्यनारायणव्रतकथा॥
सत्यफलः, पुं, (सत्यं फलं यस्य।) विल्वतरुः। इति राजनिर्घण्टः॥
सत्यभामा, स्त्री, कृष्णपत्नीभेदः। इति शब्दरत्नावली॥ सा च श्रीकृष्णस्याष्टमहिष्यन्तर्गत-महिषीविशेषः। यथा,—
अष्टौ महिष्यस्तस्यासन् सर्व्वा रुक्मिण्याद्या महागुणः।
रुक्मिणी सत्यभामा च कालिन्दी च सुचिस्मिता॥
मित्रविन्दा जाम्बवती नाग्नजिती सुलक्षणा।
सुशीला नाम तन्वङ्गी महिष्यश्चाष्टमाः स्मृताः॥"
इति पाद्मे उत्तरखण्डे ६९ अध्यायः॥
सत्यभारतः, पुं, (सत्यं भारतं यस्य।) वेदव्यासः। इति त्रिकाण्डशेषः॥
सत्ययुगं, क्ली, (सत्यं युगम्।) चतुर्युगानां प्रथम-युगम्। यथा,—
"कृतं सत्ययुगं त्रेताम्नायी द्वापरयज्ञियौ।
कलिर्भर्भरकः कर्म्मयुगं पापन्तु पातकम्॥"
इति त्रिकाण्डशेषः॥*॥
तस्य कृतनामकारणं यथा,—
"तदुपाधिकृतः कालो ब्रह्मणो जन्ममृत्युरकृतः।
शतसंवत्सरे ब्रह्मा लयं प्राप्नोति हि त्वयि॥
लयान्ते तन्नाभिमध्यादुत्थितः सृजति प्रभुः।
ततः कृतयुगान्तेऽहं कालं सदर्म्मपालकम्॥
कृतकृत्यः प्रजा यत्र तत्रात्मा मां कृतं विदुः॥"
इति कल्किपुराणे १९ अध्यायः॥*॥
तद्धर्म्मा यथा,—
"धर्म्मश्चतुष्पादभवत् कृते पूर्णं जगत्त्रयम्।
देवा यथोक्तफलदास्तन्ति भुवि सर्व्वतः॥
सर्व्वश्रेष्ठा वसुमती हृष्टपुष्टजनाकुला।
ग्राम्यचैर्य्यादृतैर्हीना आधिव्याधिविवर्ज्जिता॥
विप्रा वेदविदः सुमङ्गलयुता नार्य्यस्तु चर्य्याव्रतैः
पूजाहोमपराः पतिव्रतधरा यागोद्यताः क्षत्रियाः।
वैश्या वस्तुषु धर्म्मतो विनिमयैः श्रीविष्णुपूजा-परा
शूद्रास्तु द्विजसेवनादरिकथालापाः सपर्य्या-पराः॥"
इति कल्किपुराणे २८ अध्यायः॥*॥
तद्युगमानं यथा,
"चत्वारि त्रीणि द्वे चैकं कृत्वादिषु यथाक्रमम्
संख्यातानि सहस्राणि द्विगुणानि शतानि च॥"
इति श्रीभागवते १२स्कन्धे ४ अध्याये २श्लोक-टीकायां श्रीधरस्वामी॥ तस्योत्पत्त्यादिर्यथा। वैशाखशुक्लपक्षे तृतीयायां रविवारे सत्य-युगोत्पत्तिः। तत्रावतारचतुष्टयं मत्स्यकूर्म्म-वराहनृसिंहाः। पूर्णं पुण्यम्। पापं नास्ति। कृतचेतं तीर्थम्। मनुष्याणां ब्राह्मणः। मनुष्या-गताः प्राणाः। इच्छामृतुः। एकविंशति-हस्तपरिमिती मानवदेहः। लक्षवर्षं परमायुः। सुवर्णनिर्म्मितभोजनपात्रम्। सत्ययुगाब्दाः १७२८०००। सत्ययुगस्य राजा बलिः वेणः मान्धाता पुरूरवा धुन्धुमारिकः कार्त्तवीर्य्यः एते षट् चक्रवर्त्तिनः॥ सत्ययुगस्य लक्षणम्।
"सत्यधर्म्मरतो नित्यं तीर्थानाञ्च सदाश्रयम्।
नन्दन्ति देवताः सर्व्वाः सत्ये सत्यपरा नराः॥"
तत्र तारकब्रह्मनाम यथा,—
"नारायणपरा वेदा नारायणपराः क्रतवः।
नारायणपरा मुक्तिर्नारायणपरा गतिः॥"
इति मुद्राङ्कितपञ्जिकातः संगृहीतम्॥
सत्ययुगाद्या, स्त्री, (सत्ययुगस्य आद्या तिथिरित्यर्थः।) कृतयुगारम्भतिथिः। सा तु वैशाखशुक्लतृतीया। तद्विवरणं युगाद्याशब्दे द्रष्टव्यम्॥
सत्ययौवनः, पुं, (सत्यमेव यौवनमिव यस्य।) विद्याधरः। इति जटाधरः॥
सत्यरतः, पुं, (सत्ये रतः।) सत्यव्रतराजपुत्रः। यथा,—
"त्रिधन्वनः सुतो जातस्त्र्यारुण इति स्मृतः।
तस्य सत्यव्रतो नाम तस्मात् सत्यरतः स्मृतः॥
तस्य पुत्रो हरिश्चन्द्रो हरिश्चन्द्राच्च रोहितः।"
इति मार्क्कण्डेये १२ अध्यायः॥
सत्यलोकः, पुं, (सत्यो लोकः।) समलोकान्तर्गत-लोकविशेषः। यथा,—
"षड्गुणेन तपोलोकात् सत्यलोको विराजते।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः॥"
इति विष्णुपुराणे २ अंशे ७ अध्यायः॥
जनलोकापेक्षयैव षड्गुणेन द्वादशकोट्यु-च्छ्रायेण तपोलोकानन्तरं सत्यलोकः। न तु तपो-लोकात् षड्गुणेनेति मन्तव्यम्। तथा सत्यष्ट-चत्वारिंशत्कोट्युच्छ्रायत्वेन ब्रह्माण्डे तस्यावकाशाभावात्। सूर्य्याण्डगोलयोरन्तःकोट्यः खलु पञ्चविंशतिरिति श्रुतेः। सत्यलोक एव कथा-भेदेन ब्रह्मधिष्ण्यात् परं वैकुण्ठलोकादि ज्ञेयम्। एवञ्च भूतलादूर्द्धं पञ्चदशलक्षोत्तरास्त्रयोविंश-तिः कोट्यो भवन्ति। सत्यलोकादूर्द्धञ्च पञ्च-दशलक्षोनकोटिद्वयादण्डकटाह इति ज्ञेयम्। अपुनर्मारकाः पुनर्म्मृत्युशून्याः। इति तट्टीका॥
सत्यवचाः, [स्] पुं, (सत्यं वचो यस्य।) ऋषिः। इत्यमरः॥ सत्यवादिनि, त्रि॥
सत्यवती, स्त्री, (सत्यमस्त्यस्येति। सत्य + मतुप्। मस्य वः। ङीप्।) व्यासमाता। तत्पर्य्यायः। कालौ २ योजनगन्धा ३ गन्धकाली ४ झषोदरी ५ व्यासमाता ६ सत्या ७ चिचाङ्गदप्रसूः८ विचित्रवीर्य्यसूः ९ कक्षा १० दाशेयी ११ दाश-नन्दिनी १२। इति शब्दरत्नावली॥ (यथा, भागवते १। ३। २१।
"ततः समदशे जातः सत्यवत्यां पराशरात्।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः॥")

नारदपत्नी। (यथा, महाभारते।५।११७।१५।
"दमयन्त्यां नलश्चैव सत्यवत्यान्च नारदः॥")
ऋचीकमुनिपत्नी। इति मेदिनी॥ (यथा, हरिवंशे। २७। १८।
"गाधेः कन्या महाभागा नाम्ना सत्यवती शुभा।
तां गाधिः काव्यपुत्राय ऋचीकाय ददौ प्रभुः॥"
सत्यविशिष्टे, त्रि॥ यथा, भागवते।४।२१।४६।
"पुत्रेन जयते लोकानिति सत्यवती श्रुतिः।
ब्रह्मदण्डहतः पापो यद्गोऽत्यतरत्तमः॥")
ऋचीकपत्न्याः प्रमाणान्तरं यथा,—
"ब्रह्मपुत्रो भृगुर्नाम ऋचीकस्तत्सुतोऽभवत्।
स भार्य्यार्थी चरन् भूमौ कान्यकुब्जं गतः पुरा॥
ददर्श चारुणगतं जह्नोर्वंशसमुद्भवम्।
कुशिकस्य सुतं गाधिं तपस्यं नृपसत्तमम्॥
अरण्यस्थस्य तस्याथ पुत्रकामस्य भूभृतः।
सभार्य्यस्य सुता जज्ञे देवकन्यासमा गुणैः॥
ऋचीको भृगुपुत्रस्तां भार्य्यार्थं समयाचत।
गाधिं नृपतिशार्दूलं स चोवाच नृपो मुनिम्॥
एकतः श्यामकर्णानामश्वानां चन्द्रवर्चसाम्।
सहस्रमेकं यो दद्यात्तस्मै पुत्री प्रतीयते॥
ऋचीक उवाच।
दास्याम्यश्वसहस्रन्तु तव राजंस्तथाविधम्।
कञ्चित्कालं प्रतीक्षस्व यावत्तदहमानये॥
गङ्गाजलादुत्थितन्तु दत्तं सम्यक् प्रचेतसा।
आदायाश्वसहस्रं स मुनिर्गाधिमथाभ्ययात्॥
तानश्वान् गाधिरादाय पुत्रीं सत्यवतीं स्वकाम्
ऋचीकाय ददौ लक्ष्मीं केशवायेव सागरः॥
ऋचीको गाधितनयां लब्ध्वा भार्य्यामनिन्दिताम्
मुदितः स तया रेमे यथाकामं स्वमाश्रमे॥
श्वशुरं सुतं श्रुत्वा द्रष्टुं पुत्रं स्वकं भृगुः।
अथाजगाम मतिमान् स्नुषां दृष्ट्वा ननन्द च॥
दम्पती तं समासीनं भृगुं देवगणार्चितम्।
पूजयित्वा समासीनं तस्थतुस्तौ कृताञ्जली॥
ततो भृगुः स्नुषां स्नेहात् सुप्रीत इदमब्रवीत्।
वरं वृणीष्व दास्यामि वाञ्छितं वरवर्णिनि।
अदेयं दुष्करं वापि यत्र ते वर्त्तते स्पृहा॥
ततः सत्यवती पुत्रं तप आम्नायपारगम्।
मातुश्च वीरमतुलं पुत्रं वरमयाचत॥
स चैवमस्त्वित्युक्त्वैव भूत्वा ध्यानपरस्तदा।
विज्ञमावत्य मनसा यत्नात् स्वासं ससर्ज्ज स॥
तस्य निःश्वासवातान्तु निःसृतं वै चरुद्वयम्।
तस्यै तत् हितयं दत्त्वा भृगुस्तामिदमब्रवीत्॥
चरुद्वयं गृहाण त्वं स्नुषे सत्यवति स्वयम्।
स्नात्वा ऋतौ ऋतौ माता तदा त्वञ्च करिष्यथः॥
आलिङ्गाश्वत्थवृक्षं ते माता पुंसवनाय वै।
चरुमारुक्षकं चमं सा भोक्ष्यति सुतस्ततः॥
त्वञ्चोडुम्बरवृक्षन्तु समालिङ्ग्य सितं चरुम्।
भक्षयेस्तेन पुत्रस्ते भविष्यति सनातनः॥
एवमुक्त्वा भृगुर्यातो यथेष्टं सापि संमुदम्।
अवाप मात्रा सहिता भर्त्रा पित्रा च भाविनी॥
अथ स्नानदिनेऽश्वत्थमालिङ्गारुक्षकं चरुम्।
भ्रक्षात् सत्यवतौ तस्या माता फलं सितं चरुम्॥ * ॥
परिवर्त्तन्तु तं ज्ञात्वा दिव्यज्ञानी भृगुर्मुनिः।
अथागत्य स्नुषां तान्तु वचनञ्चेदमब्रवीत्॥
विपर्य्ययस्त्वया भद्रे वृक्षालिङ्गनकर्म्मणि।
तया चरुप्राशने च तत्रेदन्ते भविष्यति॥
ब्राह्मणः क्षत्रियाचारस्त्वत पुत्रो भविष्यति।
क्षत्रियो ब्राह्मणाचारो मातुस्ते भविता सुतः॥
इत्युक्ता भृगुणा साध्वी तदा सत्यवती भृगुम्।
पुनः प्रसादयामास पौत्रो मेऽस्त्विति तादृशः।
एवमस्त्विति प्रोक्ता स तत्रैवान्तर्हधे भृगुः॥
अथ काले सुतं दीप्तं जमदग्निञ्च गाधिजा।
सुषुवे जननी तस्या विश्वामित्रं तपोधनम्॥
जमदग्निस्ततो वेदान् चतुरः प्राप मा चिरम्।
प्रादुरासदनुर्व्वेदः स्वयं तस्मिन् महात्मनि॥
विश्वामित्रोऽपि सकलान् वेदानपि तथाचिरात्
धनुर्व्वेदं तथा कृत्स्नं विप्रस्वाभूत्तपोधनः॥
जाज्वल्यमानस्तेजस्वी जमदग्निर्महातपाः।
वेदैस्तपोभिः स मुनीनत्यक्रामच्च सूर्य्यवत्॥"
इति श्रीकालिकापुराणे जामदग्न्योपाख्याने ८४ अध्यायः॥
सत्यवतीसुतः, पुं, (सत्यवत्याः सुतः।) व्यासः।
इति शब्दरत्नावली॥ (यथा, महाभारते।
१। १५७। १२।
"एवं स तान् समाश्वास्य व्यासः सत्यवतीसुतः।
एकचक्रामभिगतः कुन्तीमाश्वासयत् प्रभुः॥"
जमदग्निः। इति पुराणम्॥)
सत्यवाक्, [च्] पुं, (सत्या वाक् यस्य।) ऋषिः।
इति शब्दरत्नावली॥ (कश्यपपत्न्या सुनेः पुत्रविशेषः। यथा, महाभारते। १। ६५। ४३।
"सत्यवागर्कपर्णश्च प्रयुतश्चापि विश्रुतः॥")
काकः। इति त्रिकाण्डशेषः॥ (सावर्णमनुपुत्रविशेषः। यथा, मार्कण्डेये। ८०। ११।
"विरजाश्चार्व्ववीरश्च निर्म्मोहः सत्यवाक् कृतिः।
विष्वाद्याश्चैव तनयाः सावर्णस्य मनोर्नृपाः॥")
सत्यवादिनि, त्रि॥ (यथा, रामायणे। २।
२८। ११।
"कालयायं समुत्पन्नः सत्यवाग् भवतु द्विजः॥"
सत्यवादी, [न्] त्रि, (सत्यं वदतीति। वद+णिनिः।) यथार्थवक्ता। तत्पर्य्यायः। सत्योद्यः
२। इति शब्दमाला॥ (यथा, महानिर्व्वाणतन्त्रे। ३। ८८।
"अस्मिन् धर्म्मे महेशि! स्यात् सत्यवादी जितेन्द्रियः।
परोपकारनिरतो निर्व्विकारः सदाशयः॥")
सत्यवान्, [त्] पुं, (सत्यमस्त्यस्येति। सत्य+मतुप्। मस्य वः।)राजविशेषः। स तु सावित्रीपतिः। इति मेदिनी॥ (अस्य नामनिरुक्तिर्यथा, महाभारते। ३। २८३। १२।
"सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते।
ततोऽस्य ब्राह्मणाश्चक्रुर्नामैतत् सत्यवानिति॥"
अस्य विशेषवृत्तान्तस्तु तत्रैव २८२ अध्यायमारभ्य द्रष्टव्यः॥ * ॥ चाक्षुषमनुपुत्रविशेषः। यथा, भागवते। ४। १३। १६।
"स चक्षुः सुतमाकूत्यां पत्न्यां मनुमवाप ह।
मनोरसूत महिषी विरजान्नड्वला सुतान्।
पुरुं कुत्सम्रुतं द्युम्नं सत्यवन्तं ऋतं व्रतम्॥"
सत्यवति, त्रि॥ (यथा, महाभारते। १३।
७५। ३४।
"सत्यवन्तः स्वर्गलोके मोदन्ते भरतर्षभ॥")
सत्यवृत्तः, त्रि, (सत्यं वृत्तं यस्य।) सत्यवादी।
इति केचित्॥ (सच्चरित्रे क्ली। यथा, महाभारते। १३। ७३। ११।
"यावज्जीवं सत्यवृत्ते रतश्च
दाने रतो यः शमी चापराधे॥")
सत्यव्रतः, पुं, (सत्यमेव व्रतं यस्य।) त्रेतायुगे सूर्य्यवंशीयपञ्चविंशराजः। यथा,—
"त्रिधन्वनः सुतो जातस्त्र्यारुण इति स्मृतः।
तस्य सत्यव्रतो नाम तस्मात् सत्यरतः स्मृतः॥"
इति मात्स्ये १२ अध्यायः॥
स च त्रिशङ्कुराजः। यथा,—
"त्रिधन्वनस्त्र्यारुणस्त्र्यारुणात् सत्यव्रतः। योऽसौ त्रिशङ्कुसंज्ञामवाप चाण्डालतामुपगतश्च द्वादशवार्षिक्यामनावृष्ट्यां विश्वामित्रस्य कलत्रापत्यपोषणार्थं चाण्डालपरिग्रहपरिहरणार्थञ्च जाह्नवीतीरे न्यग्रोधे मृगमांसमनुदिनं बबन्ध। परितुष्टेन च विश्वामित्रेण सशरीरः स्वर्गे आरोपितः। त्रिशङ्कोर्हरिश्चन्द्रः।" इतिविष्णुपुराणे ४ अंशे २ अध्यायः॥ (धृतराष्ट्रस्य पुत्रविशेषः। यथा, महाभारते।१।६३।११७।
"जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत॥"
महादेवः। इति महाभारतम्।१३।१७।१५०॥
सत्यरूपव्रते, क्ली। यथा, रामायणे।२।२६।३७।
"सा त्वं वसेह कल्याणि राज्ञः समनुवर्त्तिनी।
भरतस्य रता धर्म्मे सत्यव्रतपरायणा॥"
सत्यव्रतविशिष्टे, त्रि। यथा, हरिवंशे।३१।५८।
"एतेऽहि वंशजाः सर्व्वे राजानः कौर्त्तिता मया।
सत्यव्रता महात्मानः प्रजावन्तो महारथाः॥")
सत्यसङ्काशः, त्रि, (सत्यस्य सङ्काशः सदृशः।) सत्यसन्निभः। इति केचित्॥
सत्यसङ्गरः, पुं, (सत्यः सङ्गरः प्रतिज्ञा युद्धं वा यस्य।) कुबेरः। इति त्रिकाण्डशेषः॥ अन्यायरहितयुद्धञ्च॥ (ऋषिविशेषः। इति महाभारतम्। २। ७। १५॥)
सत्यसन्धः, पुं, (सत्या सन्धा अभिसन्धिर्यस्य।) रामानुजभरतः, । जनमेजयः। इति शब्दरत्नावली॥ (विष्णुः। इति महाभारतम्। १३। १४९। ६७॥ धृतराष्ट्रपुत्रः। इति च महाभारतम्। १। ११७। ८॥) सत्यप्रतिज्ञे, त्रि॥ यथा,—
"राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्त्तिं

वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥"
इति महानाटके १ अङ्कः ।

सत्यसन्धा, स्त्री, (सत्ये सन्धाभिसन्धिर्यस्याः ।) द्रौपदी। इति शब्दरत्नावली ॥

सत्या, स्त्री, (सत्यमस्त्यस्या इति । सत्य + अच् । टाप् ।) सीता । सा च रामपत्नी । सत्यवती । सा तु व्यासमाता । इति शब्दरत्नावली ॥ दुर्गा । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥(सत्यभामा । सा च कृष्णपत्नी । यथा, भागवते । १ । १४ । ३७ ।

"यत्पादशुश्रूषणमुख्यकर्म्मणा
सत्यादयो द्यष्ट-सहस्रयोषितः ।
निर्जित्य संख्ये त्रिदशांस्तदाश्रिषो
हरन्ति वज्रायुधवल्लभोचिताः ॥"

तथा च महाभारते । ३ । २३४ । २ ।

"आरुरुक्षू रथं सत्यामाङ्क्यामास केशवः ॥"

संयुपत्नी । यथा, महाभारते । ३ । २१८ । ४ ।

"संयोरग्रतिमा भार्य्या सत्या सत्याय धर्म्मजा ।
अग्निस्तस्य सुतो दीप्तस्तिस्रः कन्याश्च सुव्रताः॥")

सत्याकृतिः, स्त्री, (सत्यस्य आकृतिः करणम् । "सत्यादशपथे ।"५ । ४ । ६६ । इति डाच् ।) अवश्यं मयैतत् क्रेतव्यमिति सत्यकरणम्। तत्पर्य्यायः । सत्यङ्कारः२ सत्यापनम् ३ । इत्यमरः ॥

सत्याग्निः, पुं, (सस्यत्य अग्निः ।) अगस्त्यमुनिः । इति शब्दरत्नावली ॥

सत्यानृतं, क्ली, वाणिज्यम् । इत्यमरः किञ्चित् सत्यं किञ्चदसत्यं सत्यसहितमनृतं वा यत्र । इति भरतः ॥ (यथा, मनुः । ४ । ६ ।

"सत्यानृतञ्च वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेत् ॥"

सत्यश्चानृतञ्चेति द्वन्द्वे कृते द्विवचनप्रयोगः स्यात् । यथा, वाजसनेयसंहितायाम्।१८।७७। "दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः ॥")

सत्यापनं, क्ली, (सत्यस्य करणम् । सत्य + सत्यापपाशेति । ३ । १ । २५ । इति णिच् आपुक्च ततो ल्युट् ।) सत्याकृतिः । इत्यमरः ॥

सत्यापना, स्त्री, (सत्यस्य करणम् । सत्य + सत्यापपाशेति । ३ । १ । २५ । इति णिच् आपुक् च ततो युच् ।) सत्याकृतिः । इत्यमरटीकायां क्षीरस्वामिनः ॥

सत्यावादः, त्रि, (सत्यस्य वदनम् । वद् + क्यप् ।) सत्यवादी इति शब्दमाला ॥

सत्र, त् ङ क सम्बन्धे । सन्नती । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा-आत्म-सक-सेट् ।) दन्त्यवर्गाद्यमध्यः । सन्ततिर्निर्व्वाहक्रियेति भट्टमल्लः । ङ सत्रयते । सत्रापयते प्रतिज्ञां साधुः। सन्ततिर्विस्तारणमिति गोविन्दभट्टः । इति दुर्गादासः ॥

सत्रं, क्ली, (सत्रयते संतन्यते इति । सत्र + घञ् ।) यज्ञविशेषः । यथा,—

"नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।
सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम् ।
आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥"
इति श्रीभागवते १ स्कन्धे १अध्यायः ॥

सत्राजित्, पुं, (सत्रेण आजयति लोकानिति। ता + जि + क्विप् ।) राजविशेषः । स च श्रीकृष्णश्वशुरः । सत्यभामापिता । परे यज्ञिध्वजराजश्च बभूव । इति कल्किपुराणे २७ अध्यायः ॥ (त्रि, सन्ततयजशीलः । यथा, ऋग्वेदे । २ । २१ । १ ।

"सत्राजिते नृजित उर्व्वराजिते ।"

"सत्राजिते सत्रा सन्ततं जयशीलाय ।" इति तद्भाष्ये सायणः ॥)

सत्रिजातकं, क्ली,(त्रिजातकेन सह वर्त्तमानम् ।) मांसव्यञ्जनविशेषः । यथा,—

"मांसं बहुघृते भृष्टं सिक्तं चोष्णाम्बुना मुहुः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ।
तदेव घृततक्राढ्यं प्रदिग्धं सत्रिजातकम् ॥"
इति शब्दचन्द्रिका ॥

सत्वरं, क्ली, सह त्वरया वर्त्तते इति । शीघ्रम् । इत्यमरः ॥ (यथा, रामायणे । २ । ३८ । १४ ।

"राजा सत्वरमाहूय व्याहृतं चित्तसम्भवे ।
उवाच देशकालज्ञो निश्चितं सर्व्वतः शुचिः ॥")

तद्धति, त्रि, । इति भरतः ॥ (यथा, मनुः । ९ । ८४ ।

"त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥")

सत्सारः, पुं, (सन् सारो यस्य ।) वृक्षविशेषः । चित्रकरः । कविः । इति केचित् ॥ उत्तमसारयुक्ते त्रि ॥

सधूत्कारं, क्ली, अव्ययम् । इति हेमचन्द्रः ॥ धूत्कारेण सह वर्त्तमानञ्च ॥

सदंशकः, पुं, (दंशकेन सह वर्त्तमानः ।) कर्कटः । इति राजनिर्घण्टः ॥ दंशयुक्ते, त्रि ॥

सदंशवदनः, पुं, (सदंशं दंशाकारसहितं वदनं यस्य ।) कङ्कपक्षी । इति राजनिर्घण्टः ॥

सदञ्जनं, क्ली, (सत् अञ्जनम् ।) कुसुमाञ्जनम् । यथा,—

"रौतिपुष्पं पुष्पकेतुं पौष्पकं कुसुमाञ्जनम् ।
सदञ्जनञ्च चाक्षुष्यं माक्षिकं धातुमाक्षिकम् ॥"
इति शब्दचन्द्रिका ॥

सदन, क्ली, (सीदन्त्यत्रेति । सद् + अधिकरणे ल्युट् । गृहम् । इत्यमरः ॥ (यथा, रामायणे । २ । ६४ । ३६ ।

तिष्ठ मा मागमः पुत्रः यमस्य सदनं प्रति ।
स्त्री मया सह गन्तासि जनन्या च समेधितः ॥")

जलम् । इति मेदिनी ॥

सदः,[स्] स्त्री, क्ली,(सीदन्त्यस्मिन्निति । सद् + "सर्व्वधातुभ्योऽसुन्।" उणा० ४ । १८८ । इति असुन् ।)सभा । इत्यमरः ॥(यथा, हितोपदेशे ॥

विपदि धैर्य्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥")

सदस्यः, पुं, (सदसि साधुः । सदस् + यत् ।) विधिदर्शी । इत्यमरः ॥ न्यूनातिरिक्तानां विपर्य्यासञ्च परिहर्त्तुं विधिं वेदोक्तयज्ञक्रियाकलापं द्रष्टुं शीलं येषां ते सदस्याः । सदसि साधवः कारका इतिविकारसंज्ञेत्यादिना यः । इति भरतः ॥ तस्य नामान्तरं प्रस्तोता । यथा,—

"एकः कर्म्मनियुक्तः स्यात् द्वितीयस्तन्मधारकः।
तृतीयः प्रस्तकं ब्रूयात्ततः कर्म्म समाचरेत् ॥"

कर्म्मनियुक्तः आचार्य्यः स च ब्रह्मासके होमकर्म्मणि ब्रह्मा । स्वयं होमाकरणे होतापि । स्वयं प्रधानकर्म्माकरणे प्रतिनिधिरपि । तन्मधारकः पुस्तकधारकः । प्रस्तोता सदस्यः । इति संस्कारतत्त्वम् ॥* ॥ सभ्यः । यथा । सभ्याः सदस्याः पार्षद्याः सभास्तारः सभासदः । सामाजिका इत्यादि हेमचन्द्रः ॥

सदा, व्य सर्व्वकालः । सर्व्वदा । इत्यमरः॥ यथा, "परोपकारनियतः सदा भव महाजन ।"
इतिविष्णुपुराणम् ॥

सदागतिः,पुं,(सदा सर्व्वदा गतिर्यस्य ।)वायुः । इत्यमरः ॥ (यथा, महाभारते । १ । ७२ । १ ।

"एवमुक्तस्तया शक्रः सन्दिदेश सदागतिम् ।
प्रातिष्ठत तदा काले मेनका वायुना सह ॥")

सूर्य्यः । निर्व्वाणम् । सदीश्वरः । इति मेदिनी ॥ (सर्व्वदा गमनशीले, त्रि । यथा, महाभारते। ३ । १३३ । २५ ।

"चतुर्विंशतिपर्व्वाणं त्वां वक्षामि द्वादशप्रधिं ।
तन्त्रिषष्टिशतारं वै चक्रं पातु सदागतिं ॥")

सदाचारः, पुं, (सतां साधूनामाचारः ।) साधूनामाचरणम् । तल्लक्षणादि यथा,—

"सरस्वतीदृशद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥
तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां सदाचारः स उच्यते ॥"
इति मनुः ॥*॥

अन्यच्च ।

और्व्व उवाच ।

"सदाचारेषु राजेन्द्र विशेषान् शृणु संप्रति ।
यानवश्यं नृपः कुर्य्यात्तान्मत्तः सकलान् शृणु ॥
साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत्तु सदाचारः स उच्यते ॥
आगमेषु पुराणेषु संहितासु यथोदितान् ।
समुद्दिष्टसदाचारांस्तान् गृह्णीयादृगृह्यवत्॥
ऋषीन् यजेदेदपाठैर्देवान् होमैस्तु पूजयेत् ।
श्राद्धैः पितॄन् यजेदन्नैर्भूतानि बलिभिस्तथा ॥
मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम् ।
सर्व्वं गृह्यवत् कुर्य्यात् निषेकाद्यं विधिं तथा॥
षट्कर्म्मसु नियुञ्जीत राजा विप्रान् समन्ततः ।
तथैव क्षत्रियादीनि स्वे स्वे कर्म्मणि योजयेत्।

यः स्वधर्मं परित्यज्य परधर्मं समाचरेत् ।
तं ग्रतेन नृपो दण्ड्यः पुनस्तस्मिन्नियोजयेत् ॥
सांवत्सरेषु कृत्येषु विशेषैतान् समाचरेत् ।
अवश्यं पार्थिवो राजन् विशेषांस्तु शृणुष्व मे ॥
अरण्याधि मङ्गाष्टम्यां दुर्गायाः परिपूजनम् ।
नीराजनं दशम्यान्तु कुर्याद्वै बलहृदये ॥
पौषे मासि ग्रतौयायां कुर्यात् पुष्याभिषेचनम्
पूजयित्वा श्रियं देवीं श्रीपञ्चम्यां नृपश्चरेत् ॥
श्रीयज्ञं धनधान्यस्य हृदये नृपसत्तमः ।
ज्येष्ठे दशहरायान्तु विष्णोरिष्टं समाचरेत् ॥
रवौ हरिस्थे द्वादश्यां शक्रपूजां समाचरेत् ।
विशेषैतांस्तु नृपतिः कुर्यात् सर्वं बहुव्ययैः ।
एभिः कृतैर्बलं राज्यं कोषश्चापि विवर्द्धते ॥
अकृतैश्चैषु यज्ञेषु दुर्भिक्षं मरकं तथा ।
जायते च नृपस्तस्मादेषु यत्नं समाचरेत् ॥
अरण्याले मङ्गाष्टम्यां दुर्गायाः पूजने विधिः ।
पुरा प्रोक्तस्तु विधिना तेन कार्य्यन्तु पूजनम् ॥"

इति कालिकापुराणे ८६ अध्याय ॥*॥

अपि च ।

"सदाचारे विशेषोऽयं कथितस्तव पार्थिव ! ।
निशेषेषु विशेषांस्तु शृणु येन श्रियेयते ॥
असंपूज्य तथा विष्णुं शिवामग्निं पुरन्दरम् ।
अदत्त्वा च तथा दानं न भुञ्जीयान्नृपः क्वचित् ॥
हावयेदग्निहोत्रन्तु नित्यमेव पुरोहितैः ।
अहुत्वा चाग्निहोत्रन्तु भुञ्जवरकमाप्नुयात् ॥
नारक्षिते गृहे राजा रत्नर्द्धिपरिवर्जिते ।
स्वपेत्तथा स्त्रिया सार्द्धं न कदाचन संविशेत् ॥
भुञ्जाबं श्रीफलं नाद्यात्तथा धात्रीफलं नृपः ।
बुद्धिक्षयकरा एता मांस आसवसत्तिकाः ॥
निम्बाटरूपहत्ताश्च बुद्धिहृद्धिकरा न ताः ।
बुद्धिहृद्धिरात्रित्यं त्यजेद्राजा च भोजने ॥
भोजयेदन्वहं बुद्धिहृद्धिहेतुं नृपोत्तमः ।
न पर्य्यायविहीनन्तु प्रारोहेदासनं नृपः ॥
न यानं न गजानश्वमारोहेद्वीक्ष्य ब्राह्मणम् ।
नैकन्तु विचरेद्राजा कदाचिदपि निर्जने ॥
मदहेतुं न भुञ्जीयात् कदाचिदपि भोजने ॥
कदापि नोपसेवेत चाष्टम्यां मांसमैथुने ॥
अमावास्यां गयाश्राद्धं तिलैस्तर्पणमेव च ।
न जीवत्पितृको भूपः कुर्यात् कृत्वाधमाप्नुयात् ।
न चैत्रजादींस्तनयान् राजा राज्येऽभिषेचयेत् ।
पितृषां श्राद्धयेन्नित्यमौरसे तनये सति ॥
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च पोष्यश्च षड्मे पुत्रणांगुलाः ॥
अभावे पूर्व्वपूर्व्वेषां परान् समभिषेचयेत् ।
पौनर्भवं स्वयं दत्तं दासं राज्ये न योजयेत् ॥
दत्ताद्याद्यापि तनया निजगोत्रेण संस्कृताः ।
आयान्ति पुत्रतां सम्यगन्यबीजसमुद्भवाः ॥
पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते ।
आचूड़ान्तं न पुत्रः सः पुत्रतां याति चान्यतः ॥
चूड़ाद्या यदि संस्कारा निजगोत्रेण वैकृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥
जर्झन्तु पञ्चमाद्वर्षादुत्साद्याथ सुता नृप ।
गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत् ॥
पौनर्भवन्तु तनयं जातमात्रं समानयेत् ।
कृत्वा पौनर्भवं स्तोमं जातमात्रस्य तस्य वै ॥
सर्व्वांस्तु कुर्य्यात् संस्कारान्जातकर्म्मादिकान्नरः ।
कृते पुनर्भवस्तोमे सुतः पौनर्भवस्तथा ॥
एकोद्दिष्टं पितुः कुर्य्यान्न श्राद्धं पार्व्वणादिकम् ।
क्रीताद्या वनिता मूल्यैः सा दासीति निगद्यते ॥
तस्यां यो जायते पुत्रो दासः पुत्रस्तु स स्मृतः ।
न राज्ञो राज्यभाक् स्यादिपुलानपि श्राद्धकृत् ।
अधमः सर्व्वपुत्रेभ्यस्तस्मात् परिवर्जयेत् ॥
पुराणधर्म्मशास्त्राणि संहिताश्च मुनीरिताम् ।
नाध्यापयेन्नृपः शूद्रैर्व्विहितान्यत् यदृच्छया ॥
यस्य राज्ये सदा शूद्राः पुराणं संहितां तथा ।
पठन्ति स्वाग्रहीनाग्नी राजा राष्ट्रेण सान्वयः ।
मोहाद्वा कामतः शूद्रः पुराणं संहितां स्मृतिम् ।
पठत्वरकमाप्नोति पिठभिः सह पापकृत् ॥
शूद्रोक्तया विहितं यच्च यच्च मन्त्रं उदाहृतः ।
तदयं विप्रवदानाद्यान्नं शूद्रैः सदैव हि ॥
न योजयेन्नृपः शूद्रं व्यवहारस्य दर्शने ।
नियोज्य तत्र तं भूप ! तामिस्रे तेन पच्यते ।
हीनायुश्च भवेल्लोको राजा चापि सहान्वयः ॥
कार्यं व्यङ्गमन्धपुत्रं वानभिज्ञमजितेन्द्रियम् ।
न क्लृप्तं व्याधितं वापि नृपः कुर्यात्पुरोहितम् ॥
क्षपयश्च धनं राजा न गृह्णीयात् कदाचन ।
न द्विजानां तथा दद्याद्दानानि विपुलान्यपि ॥
नारोहेत् कामुकीमत्तं गजं राजा कदाचन ।
आरुह्य कामुकं तन्तु परत्रेह विषीदति ॥
अनायुष्यं न कुर्य्यात्तु कर्म्म भूपः कदाचन ।
सततं आयुषो हृद्धै यतेत सकलैर्बलैः ॥
न क्रूरवारे नाष्टम्यां न षष्ठ्यां नृपसत्तमः ।
अक्षनाभ्यक्षने कुर्यात्ताम्बूलस्यापि भोजनम् ॥
अतिसूक्ष्मं तथा पृथ्वं ग्रहणं चन्द्रसूर्य्ययोः ।
नालोकयेत् स्वयं राजा रत्नं सूर्य्यं तथैव च ॥
उत्पातं जायते यत्तु दिव्यं भौमञ्च नाभसम् ।
नेक्षेत यत्नाद्यपतिदृष्ट्वा नाद्यात् व्रतं पुनः ॥
सर्व्वदा मङ्गलं रत्नं धारयेत् सह दूर्व्वया ।
अवस्त्राच्छादितं गात्रं न विप्रेभ्यः प्रदर्शयेत् ॥
न तोये स्वं मुखं पश्येन्नाद्यान्मांसानि पर्व्वसु ।
नारोहेत खरं चोष्ट्रं न वामोमपि गुर्व्विणीम् ॥
एवं नयसुतो राजा चतुरङ्गं विवर्द्धयन् ।
आत्मानं सततं रक्षन् सदा वीर्य्यं विवर्द्धयेत् ॥
बीजक्षयकरं नित्यं भक्ष्यं भोज्यञ्च पानकम् ।
वर्ज्जयेत् शारदाकाद्यानत्यम्लं बहुतिक्तकम् ॥
कांस्यराजतरङ्गस्थं तोयं पानेऽप्यवर्द्धनम् ।
मूत्रहृद्धिकरं बीजक्षयकारि विवर्ज्जयेत् ॥
ताम्रायःस्वर्णसीसानां पात्रस्थं फलधर्म्मणी ।
शक्रहृद्धिकरं तोयं तदुपासीत यत्नतः ॥
सर्व्वमूलेषु कृत्येषु सदाचारेष्वनुष्ठितः ।
भुक्त्वेह विविधान् भोगानैन्द्रं स्थानं व्रजेत् परं ॥

श्रीमार्कण्डेय उवाच ।

एवमीर्व्वस्तु सगरं शशास मुनिपुङ्गवः ।
शास्त्राणि चैव सर्व्वाणि सदाचारान् सगुह्यकान् ।
बभ्रुः कथयामास सगराय महात्मने ॥
तच्छ्रुत्वा यत् पुरोर्व्वेन कथितं सगराय न ।
राजनीतिः सतां नीतिर्यच्चान्यच्छास्त्रसम्भवम् ॥
संहितासु पुराणेषु यज्ञागमचये स्थितम् ।
सर्व्वं शुश्राव सगरो मुखादौर्व्वस्य धीमतः ॥
तेषान्तु कथितं किञ्चिदुद्धृत्य द्विजसत्तमाः ।
विष्णुधर्म्मोत्तरे पूर्वं मया रहसि भारते ॥
राजनीतिं सदाचारं वेदवेदाङ्गसङ्गतम् ।
रहस्यं सततं विष्णोर्नीचध्वं द्विजसत्तमाः ॥
यच्चानुदितमन्यत्र गदितं वा ससंशयम् ।
संशयच्छेदनं तेषु युष्मभ्यं कथितं त्विदम् ॥
अनुक्तं संशयच्छेदि पुराणं कालिकाह्वयम् ।
योऽभ्यसेत् सततं विप्रः स वेदानां फलं लभेत् ॥"

इति श्रीकालिकापुराणे ८६ अध्याये राजनीति-सदाचारादिकं समाप्तम् ॥ * ॥ अन्यच्च ।

ऋषय ऊचुः ।

"सदाचारो निगदितस्तव योऽस्माभिरादरात् ।
लक्षणं तस्य वक्ष्यामस्तच्छृणुष्व निशाचर ॥
गृहस्थेन सदा कार्य्यमाचारपरिपालनम् ।
न ह्याचारविहीनस्य भद्रमत्र परत्र च ॥
यन्नदानतपांसीह पुरुषस्य न भूतये ।
भवन्ति यः समुल्लङ्घ्य सदाचारं प्रवर्त्तते ॥
दुराचारो हि पुरुषो नेह नामुत्र नन्दति ।
कार्य्यो यत्नः सदाचारे आचारो हन्त्यलक्षणम् ॥
तस्य स्वरूपं वक्ष्यामः सदाचारस्य राक्षस ।
शृणुष्वैकमनास्त्वञ्च यदि श्रेयो हि वाञ्छसि ॥
धर्म्मोऽस्य मूलं धनमस्य शाखा
पुष्पञ्च कामः फलमस्य मोक्षः ।
असौ सदाचारतरुः सुकेशिन्
संसेवितो येन स पुण्यभोक्ता ॥
ब्राह्मे मुहूर्त्ते प्रथमे विबुध्ये
दनुस्मरेद्देववरं मधूर्वीन् ।
प्राभातिकं मङ्गलमेव वाक्यं
यदुक्तवान् देवपतिस्त्रिनेत्रः ॥

सुकेशी उवाच ।

किं तदुक्तं सुप्रभातं शङ्करेण महात्मना ।
प्रभाते यत् पठन् मर्त्यो मुच्यते पापबन्धनात् ।

ऋषय ऊचुः ।

श्रूयतां राक्षसश्रेष्ठ सुप्रभातं हरोदितम् ।
श्रुत्वा स्मृत्वा पठित्वा च सर्व्वपापैः प्रमुच्यते ॥
ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुः शुक्रः सह भानुजेन
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
भृगुर्वशिष्ठः क्रतुरङ्गिराश्च
मनुः पुलस्त्यः पुलहः सगौतमः ।
रैभ्यो मरीचिश्यवनो रिभुश्च
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥

सनत्कुमारः सनकः सनन्दनः
सनातनोऽप्यासुरिपिङ्गलौ च।
सप्तस्वराः सप्त रसातलाश्च
कुर्वन्तु सर्वे मम सुप्रभातम्॥
पृथ्वी सुगन्धा सरसास्तथापः
सस्पर्शवायुर्ज्वलितश्च तेजः।
नभः सशब्दं महता सहैव
कुर्वन्तु सर्वे मम सुप्रभातम्॥
सप्तार्णवाः सप्त कुलाचलाश्च
सप्तर्षयो द्वीपवराश्च सप्त।
भूरादि कृत्वा भुवनानि सप्त
कुर्वन्तु सर्वे मम सुप्रभातम्॥
इत्थं प्रभाते परमं पवित्रं
यः संस्मरेद्वा शृणुयाच्च भक्त्या।
दुःस्वप्ननाशो ननु सुप्रभाते
भवेच्च सत्यं भगवत्प्रसादात्॥
ततः समुत्थाय विचिन्तयेच्च
धर्मं तथार्थं च विहाय शय्याम्।
उत्थाय पद्माद्वरिरित्युदीर्य
गच्छेत्ततोत्सर्गविधिं हि कर्तुम्॥
न देवगोब्राह्मणवह्निमार्गे
न राजमार्गे न चतुष्पथे च।
कुर्यादयोत्सर्गमपीह गोष्ठे
प्रच्छाद्य शीर्षं मुखनासिकाश्च॥
ततश्च शौचार्थमुपाहरेन्मृदं
गुदे त्रयं पाणितले च सप्त।
तथोभयोः पञ्च चतुस्तथैकां
लिङ्गे तथैकां मृदमाहरेच्च॥
नान्तर्जलाद्राद्यसमूषिकस्थला-
न्न चावशिष्टा सदनादिभग्ना।
वल्मीकमृच्चैव हि शौचनाय
ग्राह्या सदाचारविदा नरेण।
उदङ्मुखः प्राप्य पदौ भुविस्थः
समाचमेदद्भिरफेनिलाभिः।
आचम्य च त्रिः परिमृज्य च द्वि-
रतः स्पृशेदात्मशिरः करेण॥
सन्ध्यां स निर्वर्त्य ततः क्रमेण
केशांश्च संशोध्य च दन्तधावनम्।
कृत्वा तथा दर्पणदर्शनञ्च
कृत्वा शिरःस्नानमथाङ्गिकञ्च॥
संपूज्य तोयेन पितॄन् सदेवान्
होमञ्च कृत्वालभनं शुभानाम्।
कृत्वा बहिर्निर्गमणं प्रशस्तं
दूर्वां दधि सर्पिरथोदकुम्भम्॥
धेनुं सवत्सां वृषभं सुवेषं
मृन्मयं स्वस्तिकमक्षतानि।
लाजा मधु ब्राह्मणकन्यकाश्च
श्वेतानि पुष्पाण्यथ शोभनानि॥
हुताशनं चन्दनमर्कबिम्ब-
मश्वत्थवृक्षञ्च समालभेत।
ततस्तु कुर्याद्विजजातिधर्म्म
देशानुविष्टं कुलधर्म्ममग्र्यम्॥

स्वगोत्रधर्म्मं न हि सन्त्यजेत
तेनापि सिद्धिं समुपाचरेत।
नासत्प्रलापं न च सत्यहीनं
न निष्ठुरं नागमशास्त्रहीनम्॥
वाक्यं वदेत् साधुजनेन येन
निन्द्यो भवेन्नैव च धर्म्मभेदी।
सङ्गं न चासत्सु जनेषु कुर्य्यात्
सन्ध्यासु भक्ष्यं सुरतं दिवा च।
सर्व्वासु योनीषु परावलासु
रजस्वलास्वेव जलेषु धीरः॥
हयाटनं हयादानं हया च पशुमारणम्।
न कर्त्तव्यं गृहस्थेन हया दारपरिग्रहम्॥
हयाटनान्नित्यहानिर्हयादानाद्धनक्षयः।
हयापशुघ्नः प्राप्नोति घातनान्नरकं महत्॥
सन्तत्या हानिरश्वाघ्या वर्णसङ्करतो भयम्।
भेतव्यञ्च भवेल्लोके हयादारपरिग्रहात्॥
परस्वे परदारे च न कार्य्या बुद्धिरुत्तमैः
परस्वं नरकायैव परदाराश्च मृत्यवे॥
नेच्चेत् परस्त्रियं नग्नां न सभाषेच्च तस्करान्।
उदक्त्या दर्शनं स्पर्शं सम्भाषाञ्च विवर्जयेत्॥
नैकासने तथा स्वेयं सुन्दर्य्या परजायया।
तथैव स्वात्र मातुश्च तथैव दुहितुस्त्वपि॥
न भार्य्या वीक्ष्यते नग्ना पुरुषेण कदाचन।
न च स्नायीत वै नग्नो न शयीत कदाचन॥
दिग्वाससोऽपि न तथा परिभ्रमणमिष्यते।
भिन्नासनं भाजनादौन् दूरतः परिवर्जयेत्॥
नन्दासु नाभ्यङ्गमुपाचरेत
क्षौरञ्च रिक्तासु जयासु माषम्।
पूर्णासु योषित् परिवर्जनीया
भद्रासु सर्व्वाणि समालभेत॥
नाभ्यङ्गमर्के न च भूमिपुत्रे
क्षौरञ्च शुक्रे रविजे च मांसम्।
बुधेषु योषिन्न समाचरेत
शेषेषु सर्व्वाणि सदैव कुर्य्यात्॥
चित्रासु हस्ते श्रवणेषु तैलं।
क्षौरं विशाखास्वभिजित्सु वर्ज्यम्।
मूले मृगे भाद्रपदासु मांसं
यौषिन्मघाकृत्तिकयोत्तरासु॥
सदैव वर्ज्यं शयने शुदक्शिर-
स्तथा प्रतीच्यां रजनीचरेश।
भुञ्जीत नैवेह च दक्षिणामुखो
न च प्रतीचीमभिभोजनीयम्॥
देवालयं चैत्यतरुं चतुष्पथं
विद्याधिकञ्चापि गुरुं प्रदक्षिणम्।
कुर्य्यान्न वामं गमने च धीमान्
द्विजान् मृगान् गाश्च निशाचरेश॥
माल्यानुलेपं वसनानि यत्नतो
नान्यैर्धृतान्येव हि धारयेत।
स्नायाच्छिरःस्नानतया च नित्यं
निष्कारणं चैव विना निशासु॥
ग्रहोपरागे स्वजनाभिघाते
मुक्त्वा च जन्मर्क्षगते शशाङ्के।

नाक्षिप्तं क्वायमुपस्पृशेच्च
स्नातो न केशान् विधुनीत चापि॥
गात्राणि चैवाम्बरपाणिना च
स्नातोऽवमृज्याद्रजनीचरेश।
वसेच्च देशेषु सुराजकेषु
सुसंहितस्वीयजनेषु नित्यम्॥
अक्रोधना न्यायपरा अमत्सराः
क्षमौबला द्यौषधिजातयश्च।
न तेषु देशेषु वसेच्च बुद्धिमान्
यस्मिन्नृपो दण्डरुचिस्वशक्तः।
जनोऽपि नित्योत्सवबद्धवैरः
सदा जिगीषुश्च निशाचरेन्द्र॥

ऋषय ऊचुः।

यत्र भोज्यं महाबाहो सदा धर्म्मस्थितैर्नरैः।
यद्भोज्यञ्च समुद्दिष्टं कथयिष्यामहे वयम्।
त्यज्यमन्नं पर्य्युषितं स्नेहाक्तं चिरसंभृतम्।
पक्वेष्टा व्रीहयः शुद्धा विकाराः पायसा-
स्तथा॥
शशकः शल्लको गोधा तथा खड्गी च कच्छपः।
तद्वद्विदलकादीनि भोज्यानि मनुरब्रवीत्॥
मणिवस्त्रप्रवालानां तद्वन्मुक्ताफलस्य च।
शैलदारुमयानाञ्च तृणगुल्मौषधस्य च॥
शाकधान्याजिनानाञ्च संहतानाञ्च वाससाम्।
वल्कलानामशेषाणामम्बुना शुद्धिरिष्यते॥
सक्षौद्राणामथोर्णेन तिलकल्केन चाविकम्।
कार्पासिकानां वस्त्राणां शुद्धिः स्यात् सह
भस्मना॥
नागदन्ताक्षिशृङ्गाणां तक्षणाच्छुद्धिरिष्यते।
पुनःपाकेन भाण्डानां मृन्मयानाञ्च शुद्धता॥
शुद्धं भैक्ष्यं कारुहस्तः पण्यं योषिन्मुखं तथा।
रथागतमविज्ञातं दासवर्गेण यत् कृतम्॥
वाक्यपूतं चिरानीतमनेकान्तरितं स्वयु।
चेष्टितं बालवृद्धानां बालस्य तु मुखं शुचि॥
म्लेच्छानामपि गोग्राला स्तनन्धयसुता स्त्रियः।
वाग्विप्रुषो द्विजेन्द्राणां पाठे वाग्बुबिन्दवः॥
भूमिर्विशुध्यते खातदाहगोक्रमसेचनैः।
लेपादुल्लेखनात् सेकात् वेश्मसम्मार्ज्जनाच्चलात्॥
केशकौटावपन्नेऽग्नौ गोघ्राते मक्षिकान्विते।
मृद्दारिभस्मचाराणि प्रक्षेप्यानि शुद्धये॥
उडुम्बराणाञ्चाम्लेन चारेण त्रपुसीसयोः।
कांस्यानां भस्मना शुद्धिस्तोयाच्छुद्धिर्द्रवस्य च॥
अमेध्यान्नस्य मृत्तोयैर्गन्धापहरणेन च।
अन्येषामपि तद्द्रव्ये शुद्धिर्गन्धावहारतः॥
मातुः प्रसवने वत्सः शकुनिः फलपातने।
गर्हभो भारहारित्वे श्वा मृगग्रहणे शुचिः॥
रथाकर्षमतोयानि गावः पथि तृणानि च।
मारुतेनैव शुध्यन्ति पक्वेष्टकाचितानि च॥
घृतं द्रोणाढकस्थाममेध्याभिप्लुतं भवेत्।
अपसृत्य सन्त्यज्यं शेषस्य प्रोक्षणं स्मृतम्॥
उपवासं त्रिरात्रं वा दूषितान्नस्य भोजने।
अश्नाते स्नातपूर्व्वं च नैव शुद्धिर्विधीयते॥
उदक्याञ्च तु नग्नाञ्च सूतिकान्तावशायिनः

स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिणः ॥
सङ्घेहमस्थि संस्पृश्य सवासाः स्नानमाचरेत् ।
आलभ्यैव तु निष्ठेवं नामालभ्यार्कमीक्ष्य च ॥
न लङ्घयेत् नरं लक्ष्णवर्त्मानं दुर्ब्बलं तथा ।
गृहादुच्छिष्टविण्मूत्रपादाङ्गासि विवेदृष्टिः ॥
पङ्क्तिपिण्डाननुहृत्य न स्नायात् परवारिणि ।
स्नायीत देवखातेषु सरोह्रदसरित्सु च ॥
नोद्यानादौ विकालेषु प्राग्नस्थिष्टेत् कदाचन ।
नालपेज्जनविद्विष्टं दीक्षितानां तथा स्त्रियाम् ॥
देवतापितृसच्छास्त्रयज्ञसन्त्रादिनिन्दकैः ।
कृत्वा तु सार्द्धनालापं शुध्यतेऽर्कावलोकनात् ॥
अभोज्याः सूतिकाषण्ढमार्ज्जाराखुश्वकुक्कुटाः
पतितापविद्धनग्नाश्च चाण्डालाधमाश्च ये ॥

शुकेशो उवाच ।

भवद्भिः कीर्त्तिता भोज्या य एते सूतिकादयः ।
अमीषां श्रोतुमिच्छामि तत्त्वतो लक्षणानि च ॥

ऋषय ऊचुः ।

ब्राह्मणो ब्राह्मणत्वं च यावच्छेषत्वमागतौ ।
ताभ्यां सूतिकेत्युक्तौ तयोरन्नं विगर्हितम् ॥
न क्षुद्रोत्युचिते काले न स्नाति च ददाति च ।
पितृदेवार्चनादीनः स षण्ढः परिगीयते ॥
दम्भार्थं जपते यश्च तप्यते यजते तथा ।
न परत्रार्थमुद्युक्तो मार्ज्जारः परिकीर्त्तितः ॥
विभवे सति नैवात्ति न ददाति जुहोति च ।
तमाखुरार्थं तस्यान्नं भुक्त्वा क्षुच्छेव शुध्यति ॥
सभागतानां यः सभ्यः पक्षपातं समाश्रयेत् ।
तामाहुः कुक्कुटं देवास्तस्यान्नं विगर्हितम् ॥
स्वधर्म्मं यः ससुत्सृज्य परधर्म्मं समाचरेत् ।
अनापदि स विद्वद्भिः पतितः परिकीर्त्यते ॥
वेदत्यागी पितृत्यागी गुरुवह्न्यृत्विगक्रियः ।
गोब्राह्मणस्त्रीवधकृदपविद्धः स उच्यते ॥
येषां कुले न वेदोऽस्ति न शास्त्रं नैव च व्रतम् ।
ते नग्नाः कीर्त्तिताः सद्भिस्तेषामन्नं विगर्हितम् ॥
आशार्त्तानामदाता च दातुश्च प्रतिषेधकः ।
शरणागतं यस्त्यजति स चाण्डालाधमो नरः ॥
यो बान्धवैः परित्यक्तः साधुभिर्ब्राह्मणैरपि ।
कृष्णाग्नौ यश्च अश्नाति भुक्त्वा चान्द्रायणं चरेत् ॥
यो नित्यकर्म्मणो हानिं कुर्य्यान्नैमित्तिकस्य च ।
भुक्त्वान्नं तस्य गृध्येत त्रिरात्रोपोषितो नरः ॥
नित्यस्य कर्म्मणो हानिः केवलं मृतजन्मसु ।
न तु नैमित्तिकोच्छेदः कर्त्तव्यो हि कथञ्चन ॥
जाते पुत्रे पितुः स्नानं सचेलस्य विधीयते ।
मृते च सर्व्वबन्धूनामित्याह भगवान् भृगुः ॥
प्रेताय सलिलं देयं बहिर्ग्रामा तु गोव्रजैः ।
प्रथमेऽह्नि चतुर्थे वा सप्तमे वास्थिसञ्चयम् ॥
अहं सञ्चयनात्तेषामङ्गस्पर्शो विधीयते ।
सोदकैस्तु क्रिया कार्य्या अशुद्धैस्तु सपिण्डकैः ॥
विपोद्वन्धनशस्त्राम्बुवह्निपातमृतेषु च ।
तथा गृहीतसन्यासे देशान्तरमृते तथा ॥
सद्यःशौचं भवेदिद्वन् तत्राप्युक्तं चतुर्व्विधम् ।
गर्भस्रावे तदेवोक्तं पूर्णकाले न वै चरेत् ॥
ब्राह्मणानामहोरात्रं क्षत्रियाणां दिनत्रयम् ।
वड्वानां चैव वैश्यस्य शूद्राणां द्वादशाह्निकम् ॥
दशद्वादशमासार्द्धं माससंख्यादिनैश्च तैः ।
स्नात्वा कर्म्मक्रियाः कुर्य्युः सर्व्ववर्णा यथाक्रमम् ॥
प्रेतमुद्दिश्य कर्त्तव्यमेकोद्दिष्टं विधानतः ।
सपिण्डीकरणं कार्य्यं प्रेतस्य वत्सरान्तरे ॥
ततः पितृत्वमापन्ने दर्शपौर्णादिभिः शुभैः ।
प्रीणनन्तस्य कर्त्तव्यं यथाश्रुतिनिदर्शनम् ॥
पितुरर्थं समुद्दिश्य भूमिकोपादिकञ्च यत् ।
कुर्य्यादृणेनास्य सुप्रीता पितरो यान्ति राक्षस ॥
यदृयदिष्टतमं किञ्चित् यच्चास्य दयितं गृहे ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥
अध्येतव्या त्रयी नित्यं भाव्यञ्च विदुषा सदा ।
धर्म्मतो धनमाहार्य्यं यष्टव्यञ्चापि शक्तितः ॥
आचारं कुर्व्वतो नात्मा जुगुप्सामेति राक्षस ।
तत् कर्त्तव्यमशङ्कं न यत्र गोप्यं महाजने ॥
एवमाचरतो लोके पुरुषस्य गृहे सतः ।
धर्म्मार्थकामसंप्राप्तिः परत्रेह च शोभना ॥
एष तूद्देशतः प्रोक्तो गृहस्थाश्रम उत्तमः ॥*॥
वानप्रस्थाश्रमं धर्म्मं ते वक्ष्यामोऽवधार्य्यताम् ।
अपत्यसन्ततिं दृष्ट्वा प्राज्ञो देहस्य चायतिम् ।
वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणम् ॥
तत्रारण्योपभोगेन तपोभिश्चात्मकर्षणम् ।
भूमौ शय्या ब्रह्मचर्य्यं पितृदेवातिथिक्रिया ।
होमस्त्रिसवनस्नानं जटावल्कलधारणम् ।
वन्यस्नेहनिषेवित्वं वानप्रस्थविधिस्त्वयम् ॥*॥
सर्व्वसङ्गपरित्यागो ब्रह्मचर्य्यममानिता ।
जितेन्द्रियत्वमावासे नैकस्मिन् वसते चिरम् ॥
अनारम्भस्तथाहारे भिक्षा विप्रे ह्यनिन्दिते ।
आत्मज्ञानं विवेकश्च तथात्मावबोधनम् ॥
चतुर्थे चाश्रमे धर्म्मा ह्यस्माभिस्ते प्रकीर्त्तिताः ॥
वक्ष्यधर्म्मांश्च चान्यानि निबोधय निशाचर ॥
गार्हस्थ्यं ब्रह्मचर्य्यञ्च वानप्रस्थं त्रयाश्रमाः ।
क्षत्रियस्यापि गदिता य आचारो द्विजस्य हि ॥
वैखानसत्वं गार्हस्थ्यमाश्रमद्वितयं विशः ।
गार्हस्थ्यमुत्तमं त्वेकं शूद्रस्य शृणुदाचर ॥
स्वानि वर्णाश्रमोक्तानि धर्म्माणीह न हापयेत् ।
यो हापयति तस्यासौ परिकुप्यति भास्करः ॥
कुपितः कुलनाशाय देहरोगविवर्द्धनैः ।
वर्षासु पतते तस्य नरस्य शृणुदाचर ॥
तस्मात् स्वधर्म्मं न हि संत्यजेत
न हापयेच्चापि तथात्मवंशम् ।
यः संत्यजेच्चापि निजं हि धर्मं
तस्मै प्रकुप्येत दिवाकरश्च ॥

पुलस्त्य उवाच ।

इत्येवमुक्तो मुनिभिः शुकेशो
प्रणम्य तान् ब्रह्मऋषीन्महर्षीन् ।
जगाम चोत्पत्य पुरं स्वकीयं
सुदुर्मुखुर्धर्म्ममवेक्षमाणः ॥"

इति श्रीवामनपुराणे १४ अध्यायः ॥*॥

अन्यत् पाद्मे स्वर्गखण्डे २८ । ३० । ३१ अध्याये विष्णुपुराणे ३ अंशे ११ अध्याये मार्कण्डेयपुराणे सदाचारनामाध्याये आलोकनीयम् ।

(सन् साधुराचारो यस्य । सदाचारशीले, त्रि । यथा, कथासरित्सागरे । २ । ७ ।
"कात्यायनो जगादेनमुपविष्टः क्षणान्तरे ।
सदाचारो भवानेवं कथमेतां गतिं गतः ॥")
सदाचारवान्, [स्]त्रि, सदाचारविशिष्टः । सदाचारौ । सदाचारशब्दादस्त्यर्थे वतुप्रत्ययनिष्पन्नः ॥ (यथा, मनुः । ४ । १५८ ।
"सर्व्वलक्षणहीनोऽपि यः सदाचारवान् नरः ।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥")
सदातनः, पुं, (सदा भवः । सदा + सायंचिरमिति । ४ । ३ । २३ । इति व्युट्युलौ तुट् च ।) विष्णुः । इति त्रिकाण्डशेषः ॥ नित्ये, त्रि । इत्यमरः ॥ (यथा, भट्टिः । ५ । ६५ ।
"सायन्तनीं तिथिप्रख्यः पङ्कजानां दिवातनीम् ।
कान्तिं कान्त्या सदातन्या क्षपयन्ती शुचि-
स्मिता ॥")
सदातोया, स्त्री, (सदा तोयं यत्र ।) एकापर्णी । इति शब्दचन्द्रिका ॥ करतोया । इति सदानीराशब्ददर्शनात् ॥
सदादानः, पुं, (सदा दानं मदजलं यस्य ।) ऐरावतः । गणेशः । मत्तहस्ती । इति मेदिनी ॥ नित्यदाने, क्ली ॥
सदानन्दः, पुं, (सदा आनन्दो यस्य ।) शिवः । यथा,—
"सदाशिवः सदाकर्त्ता सदाहर्त्ता सदागतिः ।
सदानन्दः सदावर्त्ता सदासङ्गविवर्जितः ॥"
इति श्रीशिवरहस्ये पार्व्वतीश्वरसंवादे शिवसहस्रनामस्तोत्रम् ॥ शततारोद्भवयुक्ते, त्रि । यथा,
"ममानन्दे सदानन्दः सदानन्दो भविष्यति ।
ममानन्दे निरानन्दो निरानन्दो भविष्यति ॥"
इति पुराणे भगवतीवाक्यम् ॥
सदानर्त्तः, पुं, (सदा नृत्यतीति । नृत् + अच् ।) खञ्जनपक्षी । इति शब्दचन्द्रिका ॥ सर्व्वदानृत्यकारके, त्रि ॥
सदानीरवहा, स्त्री, (वहतीति । वह + अच् । सदा सर्व्वदा नीरस्य वहा ।) करतोया नदी । इति शब्दरत्नावली ॥
सदानीरा, स्त्री, (सदा नीरं यस्याः ।) करतोया नदी । इत्यमरः ॥ गौरीविवाहसमये शङ्करकरगलितसम्प्रदानतोयप्रभवत्वात् करस्य तोयं विद्यते अत्रेति करतोया अर्शं आदित्वादः । श्रावणे एतद्दर्शे सर्व्वा नद्यो रजस्वला इयन्तु न रजस्वला । अतएव सदा सर्व्वदा नीरमस्या इति सदानीरा । तथा च स्मृतिः ।
"अषाढी कर्कटे देवी याहं गङ्गा रजस्वला ।
सर्व्वा रजस्वहा नद्यः करतोयाम्बुवाहिनी ॥"
इति भरतः ॥
(यथा, महाभारते । २ । २० । २७ ।
"गण्डकीञ्च सदानीरां शर्करावर्त्तमेव च ।
एकपर्व्वतके नद्यः क्रमेणैत्यात्रजन्तु ते ॥"
निरन्तरजलपूर्णे अम्बुजलपूर्णे च त्रि । यथा, आर्य्यासप्तशत्याम् । २२४ ।

"चिरपथिकद्राघिमम्लिदलकलत्राग्रे-
बलावलिग्रथिता ।
करतोयेव मृगाक्षी दृष्टिरिदानीं सदानीरा ॥")
सदापुष्पः, पुं,(सदा पुष्पं यस्य ।) नारिकेलवृक्षः । इति शब्दमाला ॥ सर्व्वदाकुसुमयुक्ते, त्रि ॥ (यथा, महाभारते । १४ । ३५ । २०-२२ ।
"अव्यक्तबीजप्रभवो बुद्धिस्कन्धमयो महान् ।
महाहङ्कारविटप इन्द्रियाङ्कशकोटरः ॥
महाभूतविशेषश्च विशेषप्रतिशाखवान् ।
सदापर्णः सदापुष्पः सदाशुभफलोदयः ॥
आजीवः सर्व्वभूतानां ब्रह्मबीजः सनातनः ।
एतज्ज्ञात्वा च तत्त्वानि ज्ञानेन परमासिना ॥
छित्त्वा चामरतां प्राप्य जहाति मृत्युजन्मनी॥")
सदापुष्पी, स्त्री, (सदा पुष्पं यस्याः । ङीष् ।) रक्तार्कवृक्षः । इति रत्नमाला ॥
सदाप्रसूनः, पुं,(सदा प्रसूनं यस्य ।) रोहितकः । अर्कः । कुन्दः । इति राजनिर्घण्टः ॥
सदाफलः, पुं, (सदा फलमस्य ।) स्कन्धफलः । नारिकेलः । उडुम्बरः । इति मेदिनी ॥ बिल्वः । इति जटाधरः ॥
सदाफला,स्त्री, (सदा फलं यस्याः ।) त्रिसन्धिपुष्पम् । इति राजनिर्घण्टः ॥ वार्त्ताकुविशेषः । सला वेगुन इति कुली वेगुन इति दंकी वेगुन इति च भाषा । अस्या गुणाः ।
"सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी ।
कण्डुकच्छूहरी चैव वार्त्ताकौगुणवत्तरा ॥"
इति राजवल्लभः ॥
सदाभद्रा, स्त्री, (सदा भद्रमस्याः ।) गम्भारीवृक्षः । इति रत्नमाला ॥
सदायोगी,[न्]पुं,(सदा सर्व्वस्मिन् काले योगी। विष्णुः । इति त्रिकाण्डशेषः ॥ हरिशयने मधुमांसवर्জ্জनफलभागी । यथा,—
"सदामुनिः सदायोगी मधुमांसस्य वर्জनात् ।
निराधीर्नीरुगोजस्वी विष्णुभक्तश्च जायते ॥"
इति तिथ्यादितत्त्वम् ॥
सदृक्, [श्] त्रि, (समान इव दृश्यतेऽसौ । समान + दृश् + "समानान्ययोश्चेति वक्तव्यम्।" ३ ।२ ।६० । इत्यस्य वार्त्तिकोक्त्या क्विन् । "दृक्दृशवतुषु ।" ६ । ३ । ८८ । इति समानस्य सः ।) तुल्यम् । इत्यमरः ॥ (यथा, कथासरित्सागरे । ३९ । ८८ ।
"न त्वया सदृशन्योऽस्ति त्रैलोक्येऽपि धनुर्धरः"
सदृक्षः, त्रि, (समान इव दृश्यते इति । समान + दृश + क्सः । समानस्य सादेशः ।) सदृशः । इत्यमरः ॥ (यथा, भागवते । ३ । १ । २९ ।
"कपिवरः सौम्य सुतः सदृक्ष
आस्तेऽग्रणी रथिनां साधु साम्यः ॥")
सदृशः, त्रि, (समान इव दृश्यतेऽसौ । समान + दृश + कञ् । "दृक्दृशवतुषु ।" ६ । ३ । ८८ । इति समानस्य सः ।) समः । इत्यमरः ॥ (यथा, रघुः । १ । १५ ।
"आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥")
उचितः । इति मेदिनी ॥
सदृशसन्दनं,क्ली, निष्यन्दः । इति त्रिकाण्डशेषः॥
सदेशः, त्रि, (देशेन सह वर्त्तमानः ।) निकटः । इत्यमरः ॥ देशान्वितः । यथा,—
"सदेशसवेशौ निकटे देशवेशान्वितौ क्रमात् ।"
इति धरणिः ॥
सद्भूतः, त्रि, (सन् भूतः ।) सत्यम् । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । १४८ । ४४ ।
"तद्भवद्भिर्गुणा वाच्याः प्रद्युम्नस्य महात्मनः ।
सद्भूताः कुलरूपस्य शौलस्य वयसस्तथा ॥")
सद्म, [न्] क्ली, (सीदन्त्यत्रेति सद + मनिन् ।) गृहम् । इत्यमरः ॥ (यथा, रघुः । ३ । १८ ।
"न केवलं सद्मनि मागधीपतेः
पथि व्यजृम्भन्त दिवौकसामपि ॥"*।
"विशीर्य्यते शिलादिषु पातात् विशीर्य्यन्तेऽनेन कुड्यादय इति वा । गच्छन्ति वागच्छन्ति निम्नं गम्यते वा प्राणिभिः । अवसादयति पिपासायुक्तं वा । सदल्ल विशरणगत्यवसादनेषु + मनिन् ।" इति निघण्टुटीका । १ । १२।६६।) जलम् । इति मेदिनी ॥ (साद्यन्ते अवसाद्यन्ते प्राणिनो यत्रेति । संग्रामः । इति निघण्टुः । २ । १७ ॥)
सद्यः, [स्] व्य, (समानेऽहनि इति । "सद्यः परुत्परार्य्यैषम इति ।" ५ । ३ । २२ । इति द्यप्रत्ययः समानस्य सभावश्च निपात्यते ।) तत्क्षणम् । तत्पर्य्यायः। सपदि २। इत्यमरः ॥ ई तत्क्षणे तत्काले । समानेऽह्नि सद्यः कुतः क्त कुह इत्यादिना निपातः । सद्यः पतति मांसेन इति सपदि सुकुलिताद्यौम् । इयं दन्त्यादि । इति भरतः ॥
सद्यःकृतं, क्ली,(सद्यस्तत्क्षणात् कृतम् ।)नाम । इति त्रिकाण्डशेषः ॥ तत्क्षणकृते, त्रि ॥
सद्यःप्राणकरः, त्रि, (सद्यस्तत्क्षणात् प्राणस्य बलस्य करः।) तत्क्षणात् बलकारकद्रव्यादिः। यथा, चाणक्ये ।
"सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतमुष्णोदकञ्चैव सद्यःप्राणकराणि षट् ॥"
सद्यःप्राणहरः, त्रि, (सद्यः प्राणस्य बलस्य हरः। तत्क्षणात् बलापहारकद्रव्यादि । यथा,—
"शुष्कं मांसं स्त्रियो दृष्ट्वा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥
इति चाणक्यम् ॥
सद्यःशुद्धिः, स्त्री,(सद्यस्तत्क्षणात् शुद्धिः।)सद्यःशौचम् । यथा,—
"देशान्तरमृते बाले सद्यःशुद्धिर्यतौ मृते ॥"
इति गारुड़े १०७ अध्यायः ॥
सद्यःशोथा, स्त्री, (सद्यःशोथो यस्याः । कापिकच्छूः । इति शब्दचन्द्रिका ॥
सद्यःशौचं, क्ली, (सद्य एव शौचं शुद्धिः ।) तत्क्षणाच्छुद्धिः । यथा,—
"शिल्पिनः कारवो वैद्या दासीदासाश्च भृत्यकाः ।
आगन्तवः श्रोत्रियो राजा सद्यःशौचाः प्रकीर्त्तिताः ॥"
इति गारुड़े १०७ अध्यायः ॥*॥
अन्यच्च ।
"कारवः शिल्पिनो वैद्या दासीदासास्तथैव च ।
दातारो नियमी चैव ब्रह्मविद् ब्रह्मचारिणी ॥
सत्रिणो व्रतिनस्तावत् सद्यःशौचा उदाहृताः ।
राजा चैवाभिषिक्तश्च प्रातः सत्रिण एव च ॥
यज्ञे विवाहकाले च देवयागे तथैव च ।
सद्यःशौचं समाख्यातं दुर्भिक्षे वाप्युपद्रवे ॥
डिम्बाहवहतानाञ्च विद्युता पार्थिवैर्हि जैः ।
सद्यःशौचं समाख्यातं सजातिमरणे तथा ॥
अग्नौ मरुप्रपतने वीराध्वस्याप्यनाशके ।
ब्राह्मणार्थे च संन्यस्ते सद्यःशौचं विधीयते ॥"
इति कौर्म्मे उपविभागे २२ अध्यायः ॥*॥
अपरञ्च । अथ सद्यःशौचम् । तत्र विष्णुः नाशौचं राज्ञां राजकर्म्मणि न व्रतिनां व्रते न सत्रिणां सत्रे न कारूणां स्वकर्म्मणि न राजाज्ञाकारिणां तदिच्छया न देवप्रतिष्ठाविवाहयोः पूर्व्वसंहतयोः इति। सत्रिणां नित्यप्रवृत्तान्नदानानां सत्रे अन्नदाने । कारवः सूपकाराद्याः । आदिपुराणे ।
"सूपकारेण यत् कर्म्म क्रियतेयं नरेश्विह ।
तदन्यो नैव शक्नोति तस्माच्छूद्रः स सूपजित् ॥"
कूर्म्मपुराणे ।
"कारवः शिल्पिनो वैद्या दासा दास्यस्तथैव च ।
दातारो नियमी चैव ब्रह्मविद् ब्रह्मचारिणी ।
सत्रिणो व्रतिनस्तावत् सद्यःशौचा उदाहृताः॥"
आदिपुराणे ।
"शिल्पिनश्चित्रकाराद्याः कर्म्म यत् साधयन्त्युत ।
तत् कर्म्म नान्यो जानाति तस्मात् शुद्धः स्वकर्म्मणि ॥
दासा दास्यश्च यत् कर्म्म कुर्व्वन्त्यपि च लीलया ।
तदन्यो न क्षमः कर्त्तुं तेन ते शुचयः स्मृताः ॥"
चित्रकाराद्यरूपाः शिल्पिनः । आद्यशब्दाच्चेलनिर्णेजकाद्याः । ज्ञातातपः ।
"मूल्यकर्म्मकराः शूद्रा दासा दास्यस्तथैव च ।
स्नाने शरीरसंस्कारे गृहकर्म्मण्यदूषिताः ॥"
स्मृतिः ।
"सद्यःसूश्चो गर्भदासो भक्तिदासस्तथाहृताच्चुचिः ॥"
वैद्या अपि चिकित्सायामेव । तथा च स्मृतिः ।
"चिकित्सको यत् कुरुते तदन्येन न शक्यते ।
तस्मात् चिकित्सकः स्वर्गे शुद्धो भवतिनित्यशः ॥'
दातार आवश्यकप्रत्यहं गोभूमिहिरण्यादिदाने प्रवृत्ताः । तेषां तदान एव । प्रत्यहं दानञ्च । दातव्यं प्रत्यहं पात्रे इति याज्ञवल्क्यात् । कादाचित्कदानकारिणान्तु दाने प्रक्रान्ते अशौचं नास्ति तावत् यावत्तत् कर्म्म कुर्व्वन्ति इति । हारलताप्येवम् । पूर्व्वसङ्कल्पितद्रव्यदानेऽपि नाशौचम् । यथा च मिताक्षरायाम् ।

"पूर्व्वं सङ्कल्पितं द्रव्यं दीयमानं न दुष्यति ॥"
इति ॥

आदिपुराणे ।
"निमन्त्रिते श्राद्धहोमादौ ब्राह्मणादिषु भोजने।
गृहीतनियमस्यापि न स्यादन्यस्य कस्यचित्॥
निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्म्मणि ।
निमन्त्रणादि विप्रस्य स्वाध्यायादिरतस्य च ।
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ॥"
प्राजापत्यादिसत्रेषु समाप्तेषु होमयागजपेषु समाप्तेषु सम्पूर्णार्थमवश्यं मया ब्राह्मणा भोजयितव्या इति गृहीतनियमो यस्तस्याशौचेऽन्यकुलजातानामपि भुञ्जानानां दोषाभावः। कस्यचिद्दाढभोक्तोरित्यर्थः। एवं प्रारब्धश्राद्धेऽपि क्वचिदित्यनेन दाढभोक्तोरशौचाभावः। तथा च विष्णुः।
"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥"
इति ॥

पराशरः।
"दीक्षितेष्वभिषिक्तेषु व्रततीर्थपरेषु च।
तपोदानप्रसक्तेषु नाशौचं मृतसूतके ॥"
यजमानां सोमयागाङ्गदीक्षणीयेष्टौ कृतायां दीक्षितत्वं भवति तेन दीक्षणीयेष्टुत्तरकालं यजमानस्य यत् कर्म्म तत्राशौचं नास्ति।
अभिषिक्तेषु चक्रियनृपतिषु। तीर्थं गङ्गादि। गुरुरिति क्वचित्॥ कालमाधवीये कूर्म्मपुराणम्।
"काम्योपवासे प्रक्रान्ते अन्तरा मृतसूतके।
तत्र काम्यव्रतं कुर्य्यात् दानार्च्चनविवर्ज्जितम्॥"
तत्र दानार्च्चनं स्वयं वर्ज्जयेत् अन्यद्वारा तु कारयेत्। तथा च मत्स्यपुराणम्।
"गर्भिणी सूतिका नक्तं कुमारी च रजस्वला।
यदाश्नन्ति तदान्ये न कारयेत् क्रियते सदा ॥"
उपवासाचरणे गर्भादिपीड़ासम्भावनायां नक्तं भोजनं कुर्य्यात्।
"उपवासेष्वशक्तस्य तदेव फलमिच्छतः।
अनभ्यासेन रोगाणां किमिष्टं व्रतसूचताम्॥"
इति नारदप्रश्नानन्तरम्।
"उपवासेष्वशक्तानां नक्तं भोजनमिष्यते।"
इति मत्स्यपुराण एवेश्वरप्रतिवचनात्। स्वयमशक्तो गृहद्वारा पूजादिकं कारयेत्। कायिकमुपवासादि सदा शक्त्यशक्तिकाले स्वयं क्रियते। स्मृतिपरिभाषायामप्येवम्। विष्णुः।
"बहुकालिकसङ्कल्पो गृहीतश्च पुरा यदि।
सूतके मृतके चैव व्रतं तत्रैव दुष्यति ॥"
एतत्काम्यव्रतपरम्। नित्यानाम्त्वारब्धानामनारब्धानामविशेषेण कर्त्तव्यता। नाशौचमित्यनुवृत्तौ ब्रह्मपुराणम्।
"नैष्ठिकस्यार्थवान्यस्य भिक्षार्थं प्रस्थितस्य च॥"
नैष्ठिकस्य ब्रह्मचारिविशेषस्य। अन्यस्य चतुर्थाश्रमिणः। अशौचिभिक्षाग्रहणे दोषाभावः।
इति द्वारलताप्रभृतयः॥ कौर्म्मे।
"सद्यःशौचं समाख्यातं दुर्भिक्षे चाप्युपप्लवे।
विस्फोटहतानाञ्च विद्युता पार्थिवैर्हतैः।
सद्यःशौचं समाख्यातं श्वापदादिमरणे तथा॥"
उपप्लवे राजविप्लवे। औपसर्गिकात्यन्तमरकपीड़ने च सद्यःशौचमुक्तम्। तथा च पराशरः।
"उपसर्गमृते चैव सद्यःशौचं विधीयते।"
अतएव।
"आपदापि च कष्टायां सद्यःशौचं विधीयते।"
इति याज्ञवल्क्यवचने अनिरुद्धभट्टशूलपाणिप्रभृतिभिरौपसर्गिकात्यन्तमरकपीड़ायां सद्यःशौचं विधीयते इत्युक्तम्। उपसर्गश्च त्रिविधोत्पातः। तथा च गर्गसंहितायाम्—
"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः।
नरापचारान्नियतमुपसर्गः प्रवर्त्तते॥
अतोऽपचारान्नियतमपवर्ज्जन्ति देवताः।
ताः सृजन्त्यद्भुतांस्तावद्दिव्यनाभसभूमिजान्॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः।
विचरन्ति विनाशाय रूपैः सम्भावयन्ति च॥"
यद्यप्युपसर्गः स्मृतो रोगभेदोपप्लवयोरपीति विश्वकोषादुपसर्गस्योभयवाचकत्वं तथाप्यत्र सुनिप्रयुक्तत्वेनान्तरङ्गत्वात् त्रिविधोत्पातात्मकोपसर्गो गृह्यते न तु रोगविशेषात्मक इति। एतेनोपसृजन्तीति व्युत्पत्त्या देहाभ्यन्तर एव यावद्वर्त्तते तावत्कालमरण एव सद्यःशौचं बहिर्भावे व्रणपरम्परया मरणे सति स्वजात्युक्ताशौचमेवेति व्राहमिति दर्शनस्मृतिसारप्रदीपा इति वाचस्पतिमिश्रोक्तं हेयम्। द्विजैर्ब्राह्मणैः। श्वापादीत्यादिशब्देनाभिचारमृतस्य ग्रहणम्। ब्रह्मकूर्म्मपुराणाभ्यां यदब्राह्मणहतस्याशौचाभाव उक्तः स बुद्धिपूर्व्वकहनने बोद्धव्यः। प्रमादहते त्वशौचाद्यस्यैव अन्यथा मरीचिवचनं निर्व्विषयं स्यात्। यथा,—
"विषशस्त्राग्न्यपदाहितैर्यैर्ब्राह्मणघातिनाम्
चतुर्ण्णां क्रिया कार्य्या अन्ये यान्तु विगर्हिताः
विषादिसाहचर्य्यात् ब्राह्मणहतघातोऽस्यास्तीति प्रतीयते। यद्वात्र ये च वै ब्राह्मणैर्हता इति ब्रह्मपुराणीयं साधकत्वेनोपन्यस्तं श्राद्धविवेके तच्चिन्त्यम्।
"महापातकिनो ये च पतितास्ते उदाहृताः।"
इत्युत्तरार्द्धेन पातित्यमभिधाय तेषां श्राद्धनिषेधात्। जाबालः।
"दुर्भिक्षे राष्ट्रसम्पाते शस्त्रगोब्रह्मघातिते।
पतितेऽनशनप्रेते विदेशस्थे शिशौ न च॥"
नाशौचमित्यर्थः। इति शुद्धितत्त्वम्॥
सद्यस्कः, त्रि, (सद्यः कायतीति। कै+कः।) नूतनम्। इति हेमचन्द्रः॥ (यथा, सुश्रुते। १। ४५।
"नवनीतं पुनः सद्यस्कं लघु सुकुमारं मधुरमिति॥")
सद्योजातः, पुं, (सद्यस्त्वणात् जातः।) शिवः। इति शब्दचन्द्रिका॥ शिवः। यथा,—
"भक्तेर्नानाविधैर्युक्तं ब्राह्मणाय निवेदयेत्।
प्रीयतां देवदेवोऽत्र सद्योजातः पिनाकधृक्॥"
इति मात्स्ये शिवचतुर्दशीव्रते ७८ अध्यायः॥
सद्योजाताय नमः। इति शिवरात्रिव्रते शिवज्ञानमन्त्रः। इति तिथ्यादितत्त्वञ्च॥ तत्त्वणोत्पन्ने त्रि॥
सद्योभावी, [न्] पुं, (सद्यो भवतीति। भू+णिनिः।) तर्कः। सद्योजातवक्त्रः। इति शब्दचन्द्रिका॥
सदुः,, त्रि, (सीदति गच्छतीति। सद गतौ+"दाधेट्सिद्यदसदो रुः।" ३। २। १५९। इति रुः।) गमनकर्त्ता। इति सिद्धान्तकौमुदी॥
सदृसथः, पुं, ग्रामः। सच्छब्दपूर्व्वकवसधातोरथच् प्रत्ययेन निष्पन्नः। इति केचित्॥ किन्तुसंपूर्व्ववसधातोरथप्रत्यये संवसथ इति सिद्धान्तकौमुद्यां निष्पादितम्॥
सदृत्तं, क्ली, (सत् वृत्तम्।) साधुस्वभावः। सच्चरित्रम्। इति जटाधरः॥ (यथा, कथासरित्सागरे। ५१। २२७।
"सच नरवाहनदत्तः सदृत्तमनोरमासुदारगुणाम्
प्राप्यालङ्कारवतीं वाणीमिव सुकविरास्त
तद्रसिकः॥")
तद्युक्ते त्रि। यथा,—
"नासमञ्जसशीलैस्तु सहासीत कदाचन।
सदृत्तसन्निकर्षो हि चलाद्भमपि ग्रसते॥"
इति तिथ्यादितत्त्वम्॥
सदृत्तिभाक्, [ज्] त्रि, (सदृत्तिं भजतीति भज+क्विप्।) सदृत्तिविशिष्टः। यथा, सारावल्याम्।
"पथ्याशिनां शीलवतां नराणां
सदृत्तिभाजां विजितेन्द्रियाणाम्।
एवंविधानामिदमायुरत्र
चिन्त्यं सदा हृत्सुनिप्रवादः॥"
इति मलमासतत्त्वम्॥
सधर्म्मचारिणी, स्त्री, (सहधर्म्मं चरतीति।चर+णिनिः। "वोपसर्ज्जनस्य। ६। ३। ८२। इति सहस्य सः।) भार्य्या। यथा,—
"सधर्म्मचारिणी पत्नी जाया च गृहिणी गृहा॥"
इति हलायुधः॥
(यथा, महाभारते। १३। १५०। ४८।
"एतन्मे संशयं सर्वं वक्तुमर्हसि वै प्रभो।
सधर्म्मचारिणी चाहं भक्ता चेति हृषीकेश॥"
सधर्म्मा, [न्] त्रि, (समानो धर्म्मो यस्य। "धर्म्मादनिच् केवलात्।" ५। ४। १२४। इति अनिच्।) सदृशः। यथा,—
"तुल्यः समानः सदृशः सरूपः सदृशः समः।
साधारणसधर्म्माणौ सवर्णः सविभः सदृक्॥"
इति हेमचन्द्रः॥
समानधर्म्मयुक्तश्च॥ (यथा, मनुः। १०। ४१।
"सजातिजानन्तरजाः षट्सुता द्विजधर्म्मिणः।
शूद्राणान्तु सधर्म्माणः सर्व्वेऽपध्वंसजाः
स्मृताः॥")

सधर्म्मिणी, स्त्री, (सह धर्म्मोऽस्या अस्तीति। "धर्म्मशीलवर्णान्ताच्च।" ५। २। ११२। इति इनिः। "वोपसर्জनस्य।" ६। ३। ८२। इति सहस्य सः।) भार्य्या। यथा,—

"सुवासिनो बधूटी स्याच्चिरस्थाय सधर्म्मिणी।
पत्नी सहचरी पाणिगृहिती गृहिणी गृहा॥"

इति हेमचन्द्रः॥

सधर्म्मी, [न्] त्रि, (सह धर्म्मोऽस्यास्तीति। "धर्म्मशीलवर्णान्ताच्च।" ५। २। ११२। इति इनिः। "वोपसर्জनस्य।" ६। ३। ८२। इति सहस्य सः।) समानधर्म्माचारी। यथा,—

"पशूनां समशोर्ण्यानां समाजोऽथ सधर्म्मिणाम्॥"

इत्यमरः॥

सधवा, स्त्री, (धवेन भर्त्रा सह वर्त्तमाना।) जीवत्पतिका। तत्पर्य्यायः। सभर्त्तृका २ पतिवती ३ सनाथा ४। इति जटाधरः॥ अस्या धर्म्मा यथा,—

"भर्त्तुः शुश्रूषणं स्त्रीणां परो धर्म्मो ह्यमायया।
तदबन्धूनाञ्च कल्याण्यः प्रजानाञ्चानुपोषणम्॥
दुःशीलो दुर्भगो वृद्धो जड़ो रोग्यधनोऽपि वा।
पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी॥"

इति श्रीभागवते १० स्कन्धे २९ अध्यायः॥

सधिः, पुं, अग्निः। इति त्रिकाण्डशेषः॥

सधिः, [स्] पुं, (सहते इति। सह + सहेर्धश्च।" उणा० २। ११४। इति इसिन् धश्चान्तादेशः।) वृषभः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

सध्रीची, स्त्री, (सह अञ्चति या सा। अञ्च + ऋत्विगादिना क्विन्। सहस्य सध्रिः। अञ्चतेर्योपसंख्यानं इति ङीप्। अच इत्यकारलोपः। चावितिं दीर्घः।) सखी। इति हेमचन्द्रः॥ (यथा, भट्टिः। ६। ७।

"सीतां सौमित्रिणा त्यक्तां सध्रीचीं वक्तुमेकिकाम्
विज्ञायामंस्त काकुत्स्थः क्वचिद्वेमं सुदुर्लभम्॥")

सध्र्यङ्, [च्] त्रि, (सह अञ्चतीति। अञ्च गतौ + ऋत्विगादिना क्विन्। सहस्य सध्रिः।) सहचरः इत्यमरः॥ (यथा, भागवते। २। ७। ४७।

"सध्र्यङ् नियम्य यतयो यमकर्त्तहेतिं।
जह्रुः खराड़िव निपानखनित्रमिन्द्रः॥"

सम्यक्। यथा, तत्रैव। ४। २७। १।

"इत्थं पुरञ्जनं सन्त्यवद्यमानीय विभ्रमैः।
पुरञ्जनी महाराज रेमे रमयती पतिम्॥")

सन्, पुं, व्याकरणीयप्रत्ययविशेषः। तत्सूत्रादि यथा। सन्निच्छायाम्। धोः परः सन् स्यादिच्छायाम्। भोक्तुमिच्छति जिघत्सति। इति मुग्धबोधव्याकरणे सनन्तपादः॥*॥ प्रथमैकवचनान्तपुंलिङ्गसच्छब्दरूपोऽप्येवम्। तदुदाहरणम्। यथा,—

"रामं नमति सानन्दं धर्म्मानभिनिविश्य सन्॥"

इति तत्रैव कारकपादः॥

सनः, पुं, स्त्री, हस्तिकर्णास्फालः। यथा। कर्णास्फाले सनः सनी। इति शब्दरत्नावली॥

सनः, पुं, घण्टापाटलिद्रुमः। इति शब्दचन्द्रिका॥ (सनत्कुमारः। सनकः। सनन्दनः। सनातनः। दाने, क्लौ। अखण्डिते, त्रि॥ यथा, भागवते। २। ७। ५।

"तप्तं तपो विविधलोकसिसृक्षया म
आदौ सनात् स्वतपनः स चतुःसनोऽभूत्॥"

"स हरिः चतुसनोऽभूत्। सनत्कुमारः सनकः सनन्दनः सनातन इति चत्वारः सनशब्दान्ताभि यस्य सः। कथम्भूतात् स्वतपसः सनात् अखण्डितात् यद्वा स्वतपसः सनात् दानात् समर्पणादित्यर्थः सनु दाने।" इति तट्टीकायां श्रीधरस्वामी॥)

सनकः, पुं, विष्णुपारिषभेदः। इति शब्दरत्नावली॥ स तु ब्रह्मणश्चतुष्पुत्रान्तर्गतपुत्रविशेषः। यथा,—

"दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बहुमन्यत।
भगवद्ध्यानपूतेन मनसान्वांस्ततोऽसृजत्॥
सनकञ्च सनन्दञ्च सनातनमथात्मभूः।
सनत्कुमारञ्च मुनीन् निष्क्रियानूर्द्धरेतसः॥
तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः
तत्र नैच्छन्मोक्षधर्म्माणो वासुदेवपरायणाः॥"

इति श्रीभागवते ३ स्कन्धे १२ अध्यायः॥

तस्य वासस्थानं जनलोकः। इति काशीखण्डम्॥

सनत्, पुं, ब्रह्मा। इति त्रिकाण्डशेषशब्दरत्नावली॥

सनत् अ सर्व्वदा। इत्यमरटीकायां रामाश्रमः॥

सनत्कुमारः, पुं, (सनतो ब्रह्मणः कुमारः।) ब्रह्मणः पुत्रः। तत्पर्य्यायः। वैधात्रः २। इत्यमरः॥ वैधातकिः ३। इति भरतः॥ धातृपुत्रः ४ वेधायः ५। इति शब्दरत्नावली॥ तन्नामव्युत्पत्तिर्यथा। सनत् ब्रह्मा तस्य कुमारः सनत्कुमारः। सन्नित्यकुमारस्तेन सनत्कुमारो वापीति स्वामिमतम्। इति भरतः॥ तन्नामकारणम्। यथा,—

"यथोत्पन्नस्तथैवाहं कुमार इति विद्धि माम्।
तस्मात् सनत्कुमारेति नामैतन्मे प्रतिष्ठितम्॥"

इति महाभारते हरिवंशः॥*॥

स च धर्म्मस्यौरसेन अहिंसायां जातः पश्चात् ब्रह्मणो दत्तपुत्रः। अयं साध्यगणः। यथा,—

श्रीनारद उवाच।

"कोऽयं सनत्कुमारेति यस्योक्तं ब्रह्मणा स्वयम्।
तवापि तेन गदितं वद मामनुपूर्व्वतः॥

पुलस्त्य उवाच।

धर्म्मस्य भार्य्याहिंसाख्या तस्यां पुत्रचतुष्टयम्।
सम्भ्रान्तं मुनिशार्दूल योगशास्त्रविचारकम्॥
ज्येष्ठः सनत्कुमारोऽभूत् द्वितीयश्च सनातनः॥
तृतीयः सनको नाम चतुर्थश्च सनन्दनः॥
सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम्।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम्॥
ज्ञानयोगं न ते दध्युर्ज्यायांसोऽपिकनीयसाम्।
ज्ञानमाद्यं महायोगं कपिलादिर्न चावदत्॥
सनत्कुमारस्वाभ्येत्य ब्रह्माणं कमलोद्भवम्।
अपृच्छद्योगविज्ञानं तमुवाच प्रजापतिः॥
कथयिष्यामि ते सांख्यं यदि पुत्रेति मे वचः।
शृणोषि कुरुषे तच्च ज्ञानं सांख्यं श्रुतो भव॥
पितामहवचः श्रुत्वा साध्यः प्राह तपोधन।
सत्यं हि तव पुत्रोऽहं देव योगं वदस्व माम्॥
तमुवाच महायोगी त्वन्मातापितरौ यदि।
दास्येते च ततः सूनुर्दायादो मेऽसि पुत्रकः॥
सनत्कुमारः प्रोवाच दायादपरिकल्पना।
यैषां हि भवता प्रोक्ता तान् मे व्याख्यातुमर्हसि॥
तदुक्तं साध्यमुख्येन वाक्यं श्रुत्वा पितामहः॥
प्राह प्रहस्य भगवान् शृणु वत्सेति नारद!॥"

इति वामने ५७। ५८ अध्यायौ॥

स च पञ्चहायनवयस्कः चूड़ादिसंस्कारवेदसन्ध्याविहीनश्च। यथा,—

"तच्छ्रुत्वा वचनं राजा रत्नभूषणभूषिताम्।
गृहीत्वा कन्यकां रम्यां नारदाय ददौ मुदा॥
गृहीत्वा च सभार्य्यं तं पुत्रं धाता मुदान्वितः।
प्रययौ ब्रह्मलोकञ्च देवैरृषिभिः सह॥
तत्राजगाम नम्रश्च प्रज्वलन् ब्रह्मतेजसा।
सनत्कुमारो भगवान् साक्षाच्च बालको यथा॥
सृष्टेः पूर्व्वञ्च वयसा यथैवं पञ्चहायनः।
अचूड़ोऽनुपवीतश्च वेदसन्ध्याविहीनकः॥
कृष्णेति मन्त्रं जपति यस्य नारायणो गुरुः।
अनन्तकालकल्पञ्च भ्राढभिश्च त्रिभिः सह॥
वैष्णवानामग्रणीश्च ज्ञानिनाञ्च गुरोर्गुरुः।
आराद्दृष्ट्वा नारदस्तं भ्रातरञ्च सतां वरम्॥
सहसा शिरसा भूमौ दण्डवत् प्रणनाम तम्।
उवाच नारदं बालः प्रहस्य परमार्थकम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२८ अध्यायः॥

जिनमते द्वादशसार्व्वभौमान्तर्गतसार्व्वभौमभेदः इति हेमचन्द्रः॥

सनन्दः, पुं, ब्रह्मणः पुत्रचतुष्टयान्तर्गतपुत्रविशेषः स तु जनलोकवासी। इति काशीखण्डम्॥ ॥ स एव दिव्यमनुष्यः। अस्य तर्पणं निवीतिना प्रत्यङ्मुखेन प्राजापत्यतीर्थेन सागमेन कर्त्तव्यम् तदितरेण उदङ्मुखेन कर्त्तव्यम्। यथा दक्षः।

"प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान्।
उदङ्मनुष्यांस्तूष्णीत पितॄन् दक्षिणतस्तथा॥
अग्रैस्तु तर्पयेद्देवान् मनुष्यान् कुशमध्यतः।
पितॄंस्तु कुशमूलाग्रं विधिः कौशो यथाक्रमम्॥
कृतोपवीती देवेभ्यो निवीती च भवेत्ततः।
मनुष्यांस्तर्पयेद्वत्स तथा ऋषिपुत्रानृषींस्तथा॥
सनकश्च सनन्दश्च तृतीयश्च सनातनः।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा।
सर्व्वे ते ऋषिमायान्तु मद्दत्तेनाम्बुना सदा॥"

अनेनाञ्जलिद्वयम् यथा,—

"एकैकमञ्जलिं देवा हौ हौ तु सनकादयः।
अर्हन्ति पितरस्त्रींस्त्रीन् स्त्रियस्त्वेकैकमञ्जलिम्॥"

परिशिष्टप्रकाशधृत सामवेदीयषट्त्रिंशद्ब्राह्मणम्। मनुष्याणामेषा दिक् या प्रतीचीति। तथा च ज्योतिष्टोमे श्रूयते। प्राचीं

देवा अभजन्त दक्षिणां पितरः प्रतीचीं मनुष्याः उदीचोमसुराः अपरेषामुदीचीं मनुष्याः। विष्णुपुराणे ॥
"प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेत् पृथक्।"
इत्याह्निकाचारतत्त्वम् ॥

सनपर्णी, स्त्री, (सनस्य पर्णमिव पर्णमस्याः। पाकजर्णेति ङीष्।) असनपर्णी। इति शब्दरत्नावली ॥

सनसूत्रं, क्ली, (सनस्य सूत्रम्।) पवित्रकम्। इ अणसूत्रजाले। अणस्य सूत्रं अणसूत्रं अणति ददाति सूत्रं अणः। अण अन्न दाने अन् अणस्तालव्यादिर्मूर्द्धन्यणान्तः। इति बहवः। सनो दन्त्यसादिर्दन्त्यनान्तः। इति केचित्। तन्मते पन दु अ दाने इत्यस्य रूपम्। अणो दन्त्यसादिर्मूर्द्धन्यणान्त इत्यपरे। सण कित्र मणि काकच कोण काणा इति मूर्द्धन्यणान्ते विद्याभरणः।
"कार्पासमुपवीतं स्यात् विप्रस्योर्द्धवृतं त्रिवृत्।
सनसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥"
इति मनुवचनात् पवित्रकमपि तदुच्यते। इत्यमरटीकायां भरतः ॥

सना, व्य, नित्यम्। इत्यमरः ॥ (यथा, ऋग्वेदे। ३। ५४। ८।
"सना पुराणमध्ये म्यारात् ॥")

सनात्, व्य, नित्यम्। इत्यमरटीकायां रामाश्रमः॥ (चिरात्। यथा, ऋग्वेदे। ४।२०। ६।
"सनादेव सहसे जात उग्रः ॥"
"सनादेव चिरादेव जात उत्पन्नः ॥"इति तद्भाष्ये सायणः ॥) विष्णुः। इति तस्य सहस्रनामस्तोत्रम् ॥

सनातनः, पुं, (सना भवः। "सायञ्चिरंप्राह्णे प्रगे इति।" ४। ३। २३। इति ट्युट्युलौ तुट् च।) विष्णुः। शिवः। ब्रह्मा। पितृणामतिथिः। इति हेमचन्द्रः ॥ दिव्यमनुष्यः। अस्य प्रमाणं सनन्दशब्दे द्रष्टव्यम्। स च ब्रह्मणः पुत्रः। यथा,—
"सनत्कुमारो धर्म्मश्च सनकश्च सनातनः।
सनन्दश्चापि सूर्य्यश्च यैरन्ये वा ब्रह्मणः सुताः ॥
विचक्षणा न यद्गन्तुं के वान्ये जडबुद्धयः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३१ अध्यायः ॥
स तु जनलोकवासी। इति काशीखण्डम् ॥ वह्निपुराणमते तु तपोलोकस्थ इति भेदः। वैष्णवराजः। इति मत्स्यपुराणम् ॥

सनातनः, त्रि, (सनाभवः। सायञ्चिरमिति ट्युट्युलौ तुट् च।) नित्यम्। इत्यमरः ॥ सुनिश्चलः। इति विश्वः ॥ (यथा, मनुः। ७। ८८।
"एषोऽनुपस्कृतः प्रोक्तो योधधर्म्मः सनातनः।
अस्माद्धर्म्माद्य चवेत क्षत्रियो घ्नन् रणे रिपून् ॥")

सनातनतमः, पुं, (अयमेषामतिशयेन सनातनः। तमप्।) विष्णुः। इति महाभारते तस्य सहस्रनामस्तोत्रे। १३। १४८। १०८ ॥

सनातनी, स्त्री, (सनातन + टित्वात् ङीप्।) दुर्गा। लक्ष्मीः। सरस्वती। इति शब्दरत्नावली ॥ तस्या व्युत्पत्तिर्यथा,—
"सर्व्वकाले सना प्रोक्ता विद्यमाने तनीति च।
सर्व्वत्र सर्व्वकालेषु विद्यमाना सनातनी ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥
अपि च।
"निर्गुणस्य च नित्यस्य वाचकश्च सनातनः।
सदा नित्या निर्गुणा या कीर्त्तिता सा सनातनी ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २०अध्यायः॥
अन्यच्च।
"स्थितिं करोति भूतानां सैव काले सनातनी।"
इति देवीमाहात्म्यम् ॥

सनाथा, स्त्री, (नाथेन सह वर्त्तमाना।) जीवद्भर्त्तृका। इति जटाधरः ॥ (प्रभुविशिष्टे, त्रि। यथा, भागवते। १।११। ८।
"अहो सनाथा भवता स्म यद्वयं
त्रैपिष्टपानामपि दूरदर्शनम्।
प्रेमस्मितस्निग्धनिरीक्षणाननं
पश्येम रूपं तव सर्व्वसौभगम् ॥")

सनाभिः, पुं, (समानो नाभिर्गोत्रमस्य। "ज्योतिर्जनपदेति।" ६। ३। ८५। इति समानस्य सः।) सपिण्डः। ज्ञातिः। इत्यमरमेदिनीकरौ॥ (यथा, मनुः। ५। ७२।
"यथोक्तैनैव कल्पेन शुध्यन्ति तु सनाभयः ॥")

सनाभिः, त्रि, (समानो नाभिर्यस्येति। समानस्य सः।) तुल्यः। इति मेदिनी ॥ स्त्रियुक्तः। इति शब्दरत्नावली ॥

सनामकः, पुं, (सोभाञ्जनः। इति शब्दचन्द्रिका ॥ (समानं नाम यस्य।) समाननामयुक्ते, त्रि ॥ (यथा, हरिवंशे। ३१। १४।
"स तासु जनयामास पुत्रिकासु सनामकान्।
दश पुत्रान् महात्मासौ तपस्युग्रे रतान् सदा॥")

सनिः, पुं, (सन + "खनिकथञ्जीति।" उणा० ४। १३८। इति इः।) पूजा। दानम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, ऋग्वेदे। १। १००। १३।
"तं सचन्ते सनयस्तं धनानि ॥"
"सनयो धनस्य दानानि सचन्ते सेवन्ते।" इति तद्भाष्ये सायणः ॥)

सनिः, पुं, स्त्री, (सन + "खनिकथञ्जीति।" उणा० ४। १३८। इति इः।) अर्थ्येषणा। इत्यमरः॥ गुर्व्वादेः सत्कारपूर्व्वकं क्वचिदर्थे नियोजनम्। तच्च हे गुरो अस्माकं कर्म्म कुर्व्वित्यादिरूपम्। सायते दीयते पुण्यादिकमत्र सनिः पन दु अ दाने नाम्नीति इः पाच्छोणादीति ईपि सनी च। अन्वेषणादिवदर्थ्येषणा। इति भरतः ॥ दिक्। इति शब्दमाला ॥

सनितः, त्रि, प्रतिपन्नः। इति हेमचन्द्रः॥

सनिष्ठीवं, क्ली, (निष्ठीवेन सह वर्त्तमानम्।) सनिष्ठेवम्। इत्यमरटीकायां भरतः ॥

सनिष्ठेवं, क्ली, अम्बुकृतम्। इत्यमरः ॥ निष्ठेवो मुखवारिबिन्दुः तेन सह वर्त्तते इति सनिष्ठेवं निपूर्व्वष्ठिवेर्घञ् गुणः सनिष्ठीवमिति क्वचित् पाठो लिपिकरप्रमादादिति मुकुटः। इत्यमरटीकायां भरतः ॥

सनी, स्त्री, (सन + इः। वा ङीप्।) सनिः। इत्यमरटीकायां भरतः ॥ हस्तिकर्णास्फालः। इति शब्दरत्नावली ॥

सनीडः, त्रि, (नीड़ेन वासस्थानेन सह वर्त्तमानः।) निकटः। इत्यमरः ॥ (यथा, भट्टिः। ५। ३१।
"सम्पत्य तत्सनीड़ेऽसौ तं वृत्तान्तमशिश्रवत्॥")
नीड़शब्दश्च ॥

सन्तः, पुं, संहतलः। इति शब्दचन्द्रिका ॥ सच्छब्दस्य प्रथमाबहुवचनान्तरूपञ्च ॥ (यथा, रघुः। १। १०।
तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हैमः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥")

सन्तं, क्ली, (सम् + तन + क्तः। समो वा हितततयोः इति पक्षे मलोपाभावः।) सततम्। तहति, त्रि। इत्यमरः ॥

सन्ततास्थासः, पुं, (सन्ततं यथा तथा अभ्यासः।) निरन्तराभ्यासः। यथा। स्वाध्यायः सन्ततास्थासः। इति भूरिप्रयोगः ॥

सन्ततिः, स्त्री, (सम् + तन + क्तिन्।) गोत्रम्। इत्यमरः ॥ (यथा, रघुः। १। ६८।
"सन्ततिः शुद्धवंश्यार्हि परत्रेह च शर्म्मणे ॥")
पंक्तिः। (यथा, कथासरित्सागरे। ११। ५१।
"तत् श्रुत्वा नेत्रयुगलात् सरागादश्रुसन्ततिम्।
हृदयादीरतान्यापि समं कन्या मुमोच सा ॥")
विस्तारः। (यथा, भागवते। १। ४। १८।
"व्यदधात् यज्ञसन्तत्यै वेदमेकं चतुर्व्विधम् ॥")
परम्पराभवः। पुत्रः। कन्या। इति विश्वः ॥ (यथा, स्मृतिः।
"सन्तत्या पितृऋणन्तु शोधयित्वा परिव्रजेत्॥")

सन्तप्तः, त्रि, (सम् + तप + क्तः।) अध्वगमनादिना श्रान्तः। तत्पर्य्यायः। सन्तापितः २ धूपितः ३ धूपायितः ४ दूनः ५। इत्यमरः ॥ तप्तः ६। इति शब्दरत्नावली ॥ अग्निजतापयुक्तः। यथा,—
"आदित्यदादीप्तकृशानुकल्पं
सिंहासनं तस्य सपादपीठम्।
सन्तप्तचामीकरवल्गुवज्रं
विभागविन्यस्तमहार्घरत्नम् ॥"
इति भट्टिकाव्ये ३ सर्गः ॥

सन्तमसं, क्ली, (समन्तात् तमः। "अवसमन्धेभ्यस्तमसः।" ५। ४। ७८। इति अच्। विश्वक्तमः। व्यापकान्धकारः। इत्यमरः ॥ (यथा, माघे। ८। २२।
"अवधार्य्य कार्य्यगुरुतामभव-
न्न भयाय सान्द्रतमसन्तमसम् ॥")

मोहः। यथा,—

"ममापि किं नो दयसे दयाधन
त्वदङ्घ्रिमग्नं यदि वेत्थ मे मनः।
निमज्जयन् सन्तमसे पराशयं
विधिस्तु वाच्यः क्व तवागसः कथा॥"
इति नैषधे ९ सर्गः॥

सन्तर्पणं, क्ली, (सन्तर्पयति इन्द्रियाणीति। सं+तृप्+णिच्+ल्युः।) द्राक्षादाडिमखर्ज्जुरी-कदलीशर्करालाजाचूर्णमध्याज्य-संमिलितम्। इति राजनिर्घण्टः॥ तृप्तिकारके, त्रि। यथा,
"पुष्पो महान्नसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः।
जज्वाल लोकस्थितये स राजा
यथाध्वरे वह्निरभिप्रणीतः॥"
इति भट्टिकाव्ये १ सर्गः॥

सन्तानः, पुं, (सन्तनोति विस्तारयति पत्रपुष्पादीनिति। सम्+तन विस्तारे+"तनोतेरुपसंख्यानम्।" ३।१।१४०। इत्यस्य वार्त्तिकोक्त्या घञ्।) कल्पवृक्षः। (संतन्यते इति। तन+घञ्।) वंशः। इत्यमरः॥ विस्तारः। (यथा, महाभारते। १।१०३।१०।
"तयोरुत्पादयापत्यं सन्तानाय कुलस्य नः।
मत्नियोगात् महाबाहो धर्म्मं कर्त्तुमिहार्हसि॥") अपत्यम्। इति मेदिनी॥ (यथा, मनुः।९।५९।
"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ् नियुक्तया
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये॥")
तद्दिकपर्य्यायः। तुक् १ तोकम् २ तनयः ३ तोक ४ तक ५ शेषः ६ अप्रः ७ गयः ८ जाः ९ अपत्यम् १० यदुः ११ सूनुः १२ नपात् १३ प्रजा १४ बीजम् १५। इति पञ्चदशापत्यनामानि। इति वैद्यनिघण्टौ। २।२॥ (अस्त्रविशेषे, क्ली। यथा, महाभारते।५।८६।४०।
"सन्तानं नर्त्तकं घोरमास्यमोदकमष्टमम्।
एतैर्विद्धाः सर्व्व एव मरणं यान्ति मानवाः॥")
सन्तानिका, स्त्री, (सन्तानो विस्तारोऽस्त्यस्या इति। सन्तान+ठन्।) क्षीरसरः। मर्कटजालकः। कुरिकाफलम्। फेनः। इति हारावली॥ आद्यस्य गुणाः।
"सन्तानिकागुरुः शीता हृद्या पित्तास्रवातजित्"
इति राजनिर्घण्टः॥
मिष्टान्नविशेषः। सरभाजा इति भाषा। तत्करणप्रकारो यथा। दुग्धं शरावचतुष्टयं शर्करार्द्धशरावपरिमितांष्टतं शरावपादैकञ्च गृहीत्वा तद्दुग्धे आयत्तेनेन घनीभूते उष्णे स्थिते मन्थानदण्डेन मथनेन बहुतरफेनो भविष्यति। तत्फेनं संहितदुग्धस्य तप्ताङ्गुरपरिरक्षणात् सरो जायते। तं सरमस्त्रेण चतुष्कोणाकृतिं निर्म्माय घृतेन भृष्ट्वा एकतारवद्गवक्कारसेमग्नं कुर्य्यात् किन्तु तत्राधिकत्वणं न रचेत्। इति पाकराजेश्वरः॥ (जालकरञ्जः। यथा, सुश्रुते।१।१।८
"अत ऊर्द्धं व्रणबन्धनद्रव्याण्युपदेक्ष्यामः। तद्यथा क्षौमकार्पास*** विदलरज्जुतूलफलपत्रानिकालोहानीति॥")

सन्तापः, पुं, (सं+तप+घञ्।) अग्निजतापः। तत्पर्य्यायः। संज्वरः २। इत्यमरः॥ तापः३ प्रोषः ४ उष्णा ५। इति राजनिर्घण्टः॥ सम्यक् तापनञ्च॥ (यथा, कथासरित्सागरे। १५। ७५।
"जन्मना ज्वरसन्तापपीड़ा गाढ़मवाप सः॥"
दुःखम्। यथा, भागवते। ६। १४। ४१।
"दासीनां कोऽनुसन्तापः स्वामिनः परिचर्य्यया।
अमोघं लभमानानां दास्या दासीव दुर्भगाः॥")
सन्तापनः, पुं, (सन्तापयतीति। सं+तप+णिच्+ल्युः।) कामदेवस्य पञ्चबाणान्तर्गतबाणविशेषः। इति त्रिकाण्डशेषः॥ सम्यक्तापकारके, त्रि॥ (यथा, भागवते। ७।१०।२६।
"दिष्ट्या ते निहतः पापो लोकसन्तापनोऽसुरः॥")
सन्तापितः, त्रि, (सं+तप+णिच्+क्तः। अध्वादिना श्रान्तः। इत्यमर-भरतौ॥ अस्य पर्य्यायः सन्तप्तशब्दे द्रष्टव्यः॥
सन्तिः, स्त्री, (सनु दाने+क्तिच्। "सनः क्तिचि लोपश्चेत्यन्तरस्याम्।" ६।४।४५। इति नलोपाभावः।) दानम्। अवसानम्। इत्यमरे सातिशब्दटीकायां नीलकण्ठः॥ सतिश्च सातिश्च सतिसातौ। सनोतेरग्निषि तिगन्तस्य एतौ निपात्यौ। पक्षे सनुतात् इति वाक्ये तिक्किकृते हवत्वतेरिति इमनिषेधे वनतनेत्यत्र तिक्किवर्জ্জनात् नलोपाभावे सन्तिः। इति मुग्धबोधटीकायां दुर्गादासः॥ सन्तिशब्दो निर्विसर्गश्चेत् अस ल भावे इत्यस्मात् अन्तिप्रत्ययेन निष्पन्नः। यथा,—
"सन्ति रम्या जनपदा बह्वन्नाः परितः कुरून्।"
इति महाभारते विराटपर्व्व॥
सन्तुष्टः, त्रि, (सं+तुष+क्तः।) सन्तोषयुक्तः। यथा,—
"गच्छध्वममराः सर्व्वे गृहीत्वार्घां स्वमालयम्
सन्तुष्टा वरमस्माकं दत्त्वेदानीं सुपूजिताः॥"
इति छन्दोगद्यतोत्सर्गतत्त्वम्॥
सन्तोषः, पुं, (सं+तुष+घञ्।) सन्तुष्टिः। तत्पर्य्यायः। धृतिः २ स्वास्थ्यम् ३। इति हेमचन्द्रः॥ (यथा, हितोपदेशे।
"सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम्॥")
सन्दंशः, पुं, (सन्दशतीति। सं+दंश+अच्।) कङ्कमुखः। इति हेमचन्द्रः॥ सांड़ासी इति भाषा॥ (यथा, मार्कण्डेये। २४। ६१।
"निपातितानां भूपृष्ठे उद्धृत्याद्रि निरोचताम्
सन्दंशैः पश्य कृत्यन्ते नरैर्याम्यैर्मुखात्ततः॥")
वैद्यशास्त्रोक्तयन्त्रविशेषः। यथा, सुश्रुते।१।७।
"तत्र मनःशरीराबाधकराणि शल्यानि तेषामाहरणोपायो यन्त्राणि। तानि षट्प्रकाराणि। तद्यथा। स्वस्तिकयन्त्राणि। सन्दंशयन्त्राणि। *** ये सन्दंशयन्ते *** सनिग्रहोऽनिग्रह

सन्दंशी षोड़शाङ्गुली भवतस्त्वग्मांसशिरास्नायुगतशल्योद्धरणार्थमुपदिश्येते॥")
सन्दंशिका, स्त्री, (सन्दंशतीवेति। सं+दंश+ण्वुल्। टापि अत इत्वम्।) सुचुटी। सांड़ासी इति चिम्टा इति च भाषा। लौहयन्त्रविशेषः॥ कातारि इति भाषा। इति मेदिनी॥
सन्दर्भः, पुं, (सं+दृभ ग्रन्थने+घञ्।) रचना। इति हलायुधः॥ (यथा, आर्य्यासप्तशत्याम्। ७००।
"कविसमरसिंहनादः स्वरानुवादः सुधैकसंवादः।
विदुदिनोदकन्दः सन्दर्भोऽयं मया सृष्टः॥")
प्रबन्धः। इति त्रिकाण्डशेषः॥ ग्रन्थनम्। यथा,—
"सन्दर्भो रसना गुम्फः ग्रन्थनं ग्रन्थनं समाः।"
इति हेमचन्द्रः॥
तस्य लक्षणं यथा,—
"गूढ़ार्थस्य प्रकाशश्च सारोक्तिः श्लेष्टता तथा।
नानार्थवक्त्वं वैदग्ध्यं सन्दर्भः कथ्यते बुधैः॥"
इति रूपसनातनगोस्वामिकृतश्रीभागवतीयषट्सन्दर्भस्य प्रथमसन्दर्भकारिका॥
सन्दर्शनं, क्ली, (सं+दृश+ल्युट्।) सम्यक्प्रकारेण दर्शनम्। यथा,—
"सन्दर्शनार्थमम्बाया नदीपुलिनसंस्थितः।
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥ (सं+दृश+णिच्+ल्युट्। कारितदर्शनम्। यथा, महाभारते। १।२।१८०।
"अस्त्रसन्दर्शदारभ्य धर्म्मराजस्य सन्निधौ॥")
सन्दानं, क्ली, (सं+दा+ल्युट्।) दाम। इत्यमरः॥ सम्यग्दानञ्च॥
सन्दानः, पुं, गजस्याष्ठीवतोरधोभागः। इति त्रिकाण्डशेषः॥
सन्दानिका, स्त्री, खरिखदिरः। इति राजनिर्घण्टः॥
सन्दानितः, त्रि, (सन्दानं जातमस्येति। सन्दान+इतच्।) बद्धः। इत्यमरः॥
सन्दानिनी, स्त्री, गोगृहम्। इति हेमचन्द्रः॥ गोयालि इति भाषा॥
सन्दावः, पुं, (सं+दु+"समि युडुदुवः।" ३।३।२१। इति घञ्।) पलायनम्। इत्यमरः॥
सन्दाहः, पुं, (सं+दह+घञ्।) मुखतालुशोषदाहः। इति राजनिर्घण्टः॥
सन्दिग्धः, त्रि, (सं+दिह+क्तः।) सन्देहयुक्तः। यथा,—
"न तावत् सन्दिग्धसाध्यधर्म्मत्वं पक्षत्वमिति पक्षतामूलम्॥"
सन्दिग्धमतिः, त्रि, सन्देहविषयीभूतबुद्धियुक्तः। सन्दिग्धा मतिर्यस्य इति बहुव्रीहिसमासनिष्पन्नः॥
सन्दिग्धार्थः, पुं, (सन्दिग्धोऽर्थः।) सन्देहविषयीभूतार्थः। (सन्दिग्धोऽर्थो यस्य।) तद्विशिष्टे, त्रि॥

सन्दितः, त्रि, (सं + दो अवखण्डने + क्तः ।) बद्धः । इत्यमरः ॥

सन्दिष्टं, क्ली, (सं + दिश + क्तः ।) वार्त्ता । इति शब्दरत्नावली ॥ कथिते, त्रि ॥

सन्दिष्टार्थः, पुं, (सन्दिष्टोऽर्थो यस्य ।) सन्देशहरः । इति केचित् ॥

सन्दिह्यान, त्रि, (सं + दिह + शानच् ।) सन्दिग्धः । यथा, जटाधरः ।

"सन्दिह्यानः सांशयिकः संशयापन्नमानसः ॥"

सन्दी, स्त्री, खट्टा । यथा । निषण्णा खट्टिका सन्दी । इति त्रिकाण्डशेषः ॥

सन्दीप्यः, पुं, मयूरशिखाहत्तः । इति शब्दचन्द्रिका ॥

सन्देशः, पुं, (सं + दिश + घञ् ।) संवादः । इति शब्दरत्नावली ॥ (यथा, मेघदूते । ७ ।

"सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणाम् ॥")

स्वनामख्यातमिष्टान्नविशेषश्च ॥

सन्देशवाक्, [च्] स्त्री, (सन्देश एव वाक् ।) संवादः । तत्पर्य्यायः । वाचिकम् २ । इत्यमरः ॥

सन्देशहरः, पुं, (हरतीति । हृ + अच् । सन्देशस्य हरः ।) दूतः इत्यमरः ॥ (यथा, रघुः । ३ । ६६ ।

"तवैव सन्देशहरात् विशांपतिः ।
शृणोति लोकेश । तथा विधीयताम् ॥")

सन्देशहारकः, पुं, (सन्देशं संवादं हरतीति । हृ + ण्वुल् ।) दूतः । इति हेमचन्द्रः ॥

सन्देहः, पुं, (सं + दिह + घञ् ।) एकधर्म्मिकविरुद्धभावाभावप्रकारकं ज्ञानम् । इति सिद्धान्तमुक्तावली ॥ तत्पर्य्यायः । विचिकित्सा २ संशयः ३ द्वापरः ४ । इत्यमरः ॥ (यथा, महाभारते । ३ । ५७ । ११ ।

"तान् समीक्ष्य ततः सर्व्वान् निर्विशेषाकृतीन् स्थितान् ।
सन्देहादथ वैदर्भी नाभ्यजानान्नलं नृपम् ॥")

सन्दोहः, पुं, (सं + दुह + घञ् ।) समूहः । इत्यमरः ॥ (यथा, आर्य्यासप्तशत्याम् । ५८९ ।

"स्तननूतननखलेखालम्बो तव घर्म्मबिन्दुसन्दोहः ।
आभाति पद्मसूत्रे प्रविशन्निव मौक्तिकप्रसरः ॥")

सन्द्रावः, पुं, (सं + द्रु + "समि युद्रुदुवः ।" ३ । ३ । २३ । इति घञ् ।) पलायनम् । इत्यमरः ॥

सन्धा, स्त्री, (सं + धा + अङ् ।) स्थितिः । प्रतिज्ञा । इति मेदिनी ॥ (यथा, रघुः । १४ । ५२ ।

"गङ्गां निषादाधृतनौविशेषस्ततार सन्धामिव सत्यसन्धः ॥")

सन्धानम् । इति शब्दरत्नावली ॥ सन्ध्या । यथा । सन्धा द्विजमेवो पिङ्गप्रसूः । इति भरतधृतवाचस्पतिः ॥

सन्धानं क्ली, (सन्धीयते यदिति । सं + धा + ल्युट् ।) मद्यसज्जीकरणम् । इति भरतानन्दः ॥ तत्पर्य्यायः । अभिषवः २ । इत्यमरः ॥ सन्धानी ३ सन्धिका ४ । इति शब्दरत्नावली ॥ सन्धीयते सन्धानं वंशाङ्कुरफलादीन् बहुकालं सन्धाय, यत् क्रियते । इति भरतः ॥ सङ्घट्टनम् । इति मेदिनी ॥ (यथा, कुमारे । ५ । २७ ।

"सुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसम्पदां
सरोजसन्धानमिवाकरोदपाम् ॥")

काञ्जिकम् । इति हलायुधः ॥ मदिरा । अवदंशः । सौराष्ट्रम् । इति राजनिर्घण्टः ॥ धनुषि बाणयोजनम् । यथा,

"तदाशु कृतसन्धानं प्रतिसंहर सायकम् ।
आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि ॥"

इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः ॥ अन्वेषणम् । इति लोकप्रसिद्धम् ॥ (सन्धिः । यथा महाभारते । ५ । १० । ३३ ।

"एवं कृते तु सन्धाने हृतः प्रमुदितोऽभवत् ।
यत्तः समभवच्चापि शक्रो हर्षसमन्वितः ॥")

सन्दधातीति । सं + धा + ल्युः । धारके, त्रि । यथा, सुश्रुते । १ । ४५ ।

"मधु तु मधुरं कषायानुरसं * * हृद्यं सन्धानं शोधनं रोपणमिति ॥")

सन्धानिका, स्त्री, (सन्धानमस्त्यस्या इति सन्धान + ठन् ।) खाद्यद्रव्यविशेषः । आचार इति भाषा । तत्करणप्रकारको यथा । अपक्वाम्रफलानि विंशतिः राजिका शरावषोड़शैकभागमिता मरिचं तोलकद्वयं लवणं षट्तोलकं मेथिकादितोलकं जीरकं तोलकद्वयं हरिद्रातोलकैकं नागरमुस्तकमेकतोलकं लशुनजीरकं तोलकैकं घृततोला आम्रेभ्यः सकलद्रव्यं चूर्णयित्वा एकत्रीकुर्य्यात् आम्रान्तं दीर्घं छिद्रखण्डं चतुष्खण्डं वा कृत्वा अष्टौ दूरीकृत्य तदभ्यन्तरे पूर्व्वोक्तचूर्णं पूरयित्वा शलाकया विद्धाखण्डाम्रवत् कुर्य्यात् । ततस्तैले निमज्जयेत् । इति पाकराजेश्वरः ॥

सन्धानितः, त्रि, सन्धानविशिष्टः । सङ्घट्टितः । सन्धानशब्दादितप्रत्ययेन निष्पन्नः ॥

सन्धानिनी, स्त्री, गोग्रहम् । इति केचित् ॥

सन्धानी, स्त्री, (सन्धीयते यस्यामिति । सं + धा + ल्युट् । ङीप् ।) कुप्यशाला । इति हेमचन्द्रः ॥ सन्धानम् । इति शब्दरत्नावली ॥

सन्धिः, पुं, (सन्धानमिति । सं + धा + किः ।) राजादीनां षड्गुणान्तर्गतगुणविशेषः । स तु स्वर्णादिदानेन बन्धुभिः प्रीत्युत्पादनात् मित्रीकरणम् । मेल इति ऐक्य इति च भाषा । तद्विवरणं यथा,—

"धनवद्भो भवेत् सन्धिः स्वयं हीनस्तमाचरेत् ।
मर्य्यादोल्लङ्घनं नास्ति यदि शत्रोरिति स्थितिः ॥
मर्य्यादोल्लङ्घनं यत्र शत्रौ संशयितं भवेत् ।
न तं संशयितं कुर्य्यादित्यूचुर्हृहस्पतिः ॥
बलवद्विग्रहीतः सन् नृपोऽनन्यप्रतिक्रियः ।
आपन्नः सन्धिभावेन विदध्यात् कालयापनाम् ॥
ये च दैवेनोपहता राष्ट्रं येषाञ्च दुर्गतम् ।
बहवो रिपवो येषां तेषां सन्धिर्विधीयते ॥
दुर्म्मन्त्रो भिन्नमन्त्रश्च नीचधर्म्मरतश्च यः ।
एतैः सन्धिं न कुर्व्वीत विश्वासात् पूर्वपीड़ितैः ।
सन्धिं हि तादृशैः कुर्व्वन् प्राणैरपि हि हीयते ॥'

इति भोजराजकृतयुक्तिकल्पतरुः ॥ * ॥

षोड़शविधसन्धिर्यथा,—

"बलीयसाभियुक्तस्तु नृपो नान्यप्रतिक्रियः ।
आपन्नः सन्धिमन्विच्छेत् कुर्व्वीत कालयापनम् ॥
कपाल १ उपहारश्च २ सन्तानः ३ सङ्गतः ४ स्वयं ।
उपन्यासः ५ प्रतीकारः ६ संयोगः ७ पुरुषान्तरः ८ ॥
अदृष्टनर ९ आदिष्ट १० आत्मादिष्ट ११ उपग्रहः १२ ।
परिक्रय-१३ स्वयोच्छिन्न-१४ स्वयं च परभूषणः १५ ॥
स्कन्धोपनेयः १६ सन्धिय षोड़शैते प्रकीर्त्तिताः ।
इति षोड़शकं प्राहुः सन्धिं सन्धिविचक्षणाः ॥"

तेषां लक्षणानि । यथा,—

"कपालसन्धिर्विज्ञेयः केवलं समसन्धितः ।१।
सम्प्रदानाङ्गवति य उपहारः स उच्यते ॥२॥
सन्तानसन्धिर्विज्ञेयो दारिकादानपूर्व्वकः ।३
सङ्गिस्तु सङ्गतः सन्धिर्म्मैत्रीपूर्व्वं उदाहृतः ॥
यानदायुःप्रमाणस्तु समानार्थप्रयोजनम् ।
सम्पत्तौ वा विपत्तौ वा कारणैर्यो न भिद्यते ॥
सङ्गतः सन्धिरेवायं प्रहृष्टत्वात् स्वयंवत् ।
तयान्यैः सन्धिकुशलैः काञ्चनः स उदाहृतः ॥४॥
द्रव्यात्मा कार्य्यसिद्धिस्तु समुद्दिश्य क्रियेत यः ।
स उपन्यासकुशलैरुपन्यास उदाहृतः ॥ ५ ॥
मयास्योपकृतं पूर्व्वं ममाप्येष करिष्यति ।
इति यः क्रियते सन्धिः प्रतीकारः स उच्यते ॥"

अन्यच्च ।

"उपकारं करोम्यस्य ममाप्येष करिष्यति ।
अयञ्चापि प्रतीकारो रामसुग्रीवयोरिव ॥६॥
एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छति ।
समं हि तत्प्रमाणेन स च संयोग उच्यते ॥७॥
आवयोर्य्योधमुख्यस्तु मदर्थः साध्यतामिति ।
यस्मिन् पणस्तु क्रियते स सन्धिः पुरुषान्तरः ॥८
त्वयैकेन मदीयोऽर्थः संप्रसाध्यस्त्वसाविति ।
यत्र यत्नः पणं कुर्य्यात् सोऽदृष्टपुरुषः स्मृतः ॥९॥
यत्र भूम्येकदेशेन पणेन रिपुवर्ज्जितः ।
सन्धीयते सन्धिविद्भिः स चादिष्ट उदाहृतः ॥१०॥
स्वसैन्येन तु सन्धानमात्मादिष्ट उदाहृतः ।११।
क्रियते प्राणरक्षार्थं सर्व्वदानादुपग्रहः ॥१२॥
कोषांशेनार्द्धकोषेण सर्व्वकोषेण वा पुनः ।
शिष्टस्य प्रतिरक्षार्थं परिक्रय उदाहृतः ॥१३॥
भुवां सारवतीनान्तु दानादुच्छिन्न उच्यते ।१४।
भूम्युत्थफलदानेन सर्व्वेण परभूषणः ॥ १५ ॥
प्रतिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते ।

स्कन्धोपनेयं तं प्राहुः सन्धिं सन्धिविचक्षणाः ॥१६॥
परस्परोपकारस्तु मैत्रीसम्बन्धकस्तथा।
उपहारश्च विघ्नेयास्त्वारश्चैव सन्धयः ॥"
इति विष्णुशर्म्मकृतहितोपदेशे सन्धिर्नाम चतुर्थकथासंग्रहः ॥ संयोगः। तत्पर्य्यायः। श्लेषः २। इत्यमरभरतौ ॥ (यथा, मनुः। ८। २४८।
"तड़ागान्युदपानानि वाप्यः प्रस्रवणानि च।
सीमासन्धिषु कार्य्याणि देवतायतनानि च ॥")
सुरङ्गा। भगम्। सङ्घट्टनम्। रूपकाणां सुखाद्यङ्गम्। सावकाशः। इति मेदिनी ॥ भेदः। इति विश्वः ॥ (साधनम्। यथा, रघुः। १८। १६।
"तस्य सावरणद्वारसन्धयः
काम्यवस्तुषु नरेषु सङ्गिनः।
वल्लभाभिरुपसृत्य चक्रिरे
साभिमुक्तविषयाः समागमाः ॥")
व्याकरणमते वर्णद्वयस्य मेलनम्। (यथा, कथासरित्सागरे। ६। ११३—११७।
"अथैका तस्य महिषी राज्ञः स्तनभरालसा।
गिरीषसुकुमाराङ्गी क्रीड़न्ती क्रममभ्यगात् ॥
सा जलैरभिषिञ्चन्तं राजानमसहा सती।
अब्रवीन्मोदकैर्देव परिताड़य मामिति ॥
तच्छ्रुत्वा मोदकान् राजा हुतमानाययन् बहून्
ततो विहस्य सा राज्ञी पुनरेवमभाषत ॥
राजन्नवसरः कोऽत्र मोदकानां जलान्तरे।
उदकैः सिञ्च मा त्वं मामित्युक्तं हि मया तव ॥
सन्धिमात्रं न जानासि माशब्दोदकशब्दयोः।
न च प्रकरणं वेत्सि मूर्खस्त्वं कथमीदृशः ॥")
तस्य लक्षणादि यथा। अर्द्धमात्रोच्चारणकालेनाव्यवहितयोर्व्वर्णयोर्द्वुततरोच्चारणं सन्धिः। अत एव श्लोकार्द्धयोर्मन्त्रार्द्धयोर्व्वा न सन्धिः। तत्र अर्द्धमात्रोच्चारणकालव्यवधानस्योचितत्वादिति प्राञ्चः। स्वमते तु सन्ध्यध्यायसूत्रविहितकार्य्यं सन्धिरिति सन्धिलक्षणम्। तेन पिपक्षादिशब्दानां संयोगान्तलुपि लुपि न सन्ध्याद्यविधौ इति निषेधेऽपि सन्धिग्रहणात् सन्धिलुप्येव न सन्धिरिति नियमात् झषभसोरित्यनेन चपजपौ पिपक् पिपग् इति। भिन्नपदे तु सन्धिर्व्विभाषयेति बोध्यम्। तथा च।
"सन्धिरेकपदे नित्यो नित्यो धातूपसर्गयोः।
सूत्रेषु च भवेन्नित्यः सैवान्यत्र विभाषया ॥"
इति प्राञ्चः।
एकपदे इति स्वभावादेकपदे समासेऽपि। यथादानं भवेत् नद्यौ इत्यादि। समासे मुरारिः कृष्णोकेशः त्र्यम्बकः गवीशः इत्यादि। धातूपसर्गयोस्तु अधीते उपेत्य इत्यादि। अन्यत्र अत्र अभ्रः अत्राभ्रः इह इन्दुः इहेन्दुः इत्यादि। धातूपसर्गयोः समासस्य नित्यत्वादेकपदग्रहणेनैवेष्टसिद्धौ तयोः पुनरुपादानं अनित्यसमासे कदाचिदेकपदेऽपि सन्धिर्विभाषते इति ज्ञापनार्थम्। तेन उच्चारितरुचिरऋचां चाननानां चतुर्णां इत्यादि सिद्धिः। इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥*॥ सर्व्वाङ्कुरसन्धिर्म्मासत्रयेण भवति। गात्रसन्धिः सप्तमासैर्भवति। इति सुखबोधः ॥ युगसन्धिर्युगशब्दे देहसन्धिर्म्मर्म्मशब्दे च द्रष्टव्यः ॥
सन्धिका, स्त्री, (सन्धा एव। स्वार्थे कन्।) मद्यसन्धानम्। इति शब्दरत्नावली ॥
सन्धिचौरः, पुं, (सन्धिकृत् सुरङ्गाकारी चौरः। सन्धिना चौर इति वा।) चौरविशेषः। सिंधाल चोर इति भाषा। यथा। सन्धिचौरस्तु हारकः। इति शब्दमाला ॥
सन्धिज, क्ली, (सन्धेर्जायते यदिति। जन+डः।) आसवादि। यथा, काशीखण्डे।
"कार्त्तिके वर्জ্জयेत्तैलं कार्त्तिके वर्জ্জयेन्मधु।
कार्त्तिके वर्জ্জयेत् कांस्यं कार्त्तिके मासि सन्धिजम् ॥"
सन्धिजमासवादि। इति तिथ्यादितत्त्वम् ॥ (सन्धिसमुत्पन्ने, त्रि। यथा, सुश्रुते। ६। २।
"पक्वः शोफः सन्धिजः संस्ववेदयः
सान्द्रं पूयं पूति पूयास्रसः सः ॥")
सन्धिजीवकः, त्रि, (सन्धिना अभिसन्धिना जीवतीति। जीव+खुल्।) कुसृत्या विभवान्वेषी। तत्पर्य्यायः। पार्श्वकः २। इति त्रिकाण्डशेषः।
सन्धितः, त्रि, (सन्धा जातास्येति। सन्धा+इतच्।) सन्धियुक्तः। मिलितः। यथा,—
"अस्मदरादिव्यवपुः सन्धितः सन्धिमानसौ।
आर्य्यत्वादार्य्यराजाख्यः ख्यातो भुवि भविष्यति ॥"
इति राजतरङ्गिण्याम् २ तरङ्गः ॥
आसवादि। यथा,—
"कार्त्तिके वर्জ্জयेत् कांस्यं कार्त्तिके शुक्लसन्धितम्।"
इति श्रीहरिभक्तिविलासे १६ विलासः ॥
शुक्लं काञ्जिकादिपर्য্যुषितद्रव्यं सन्धितञ्च वर्জ্জयेत्। इति तट्टीका ॥
सन्धिनी, स्त्री, (सन्धास्त्यस्या इति। इनिः। ङीप्।) वृषभेणाक्रान्ता गौः। इत्यमरः ॥ या ऋतुमतौ वृषभेण आक्रान्ता निष्पादितमैथुना सा सन्धिनी। गर्भेण सन्धानं सन्धा सा विद्यते अस्याः सन्धिनी इन्। इति भरतः ॥ अकालदुग्धा गौः। इति मेदिनी शब्दरत्नावली च ॥ (यथा, याज्ञवल्क्यः। १। १७०।
"सन्धिन्यनिर्द्दशावत्सागोपयः परिवर्জ্জयेत् ॥")
सन्धिपूजा, स्त्री, (सन्धौ अष्टमीनवमीसन्धिक्षणे पूजा।) शारदीयमहापूजान्तर्गततृतीया पूजा। यथा कालिकापुराणवचनान्तरम्।
"अष्टमीनवमीसन्धौ तृतीया खलु कथ्यते।
तत्र पूज्या त्वहं पुत्त्र योगिनीगणसंयुता ॥"
ज्योतिषे।
"अष्टम्यां सन्धियोगे सकलपरिजनैः पूजयेत् सत्त्वभावैः।"
सप्तमीपूजावत्महाष्टम्यादिकल्पमपि षष्टिदण्डात्मिकायामेव न तु परदिवसीयखण्डतिथौ किन्तु पूर्व्वोक्तसन्ध्यनुरोधान्निशादाविव खण्डतिथावपि सन्धिपूजा। एवञ्च पूर्णाष्टम्यां महाष्टमीपूजा तत्परदिने अष्टमीनवम्योः सन्धिपूजा तत्परदिने महानवमीपूजा प्रागुक्तनन्दिकेश्वरपुराणाद्युक्तोदयगामितिथ्यनुरोधात्। तत्परदिने दशम्यां विसर्জनं पूजानुरोधेनाधिकदिनलाभात्। अन्यत् दुर्गाशब्दे द्रष्टव्यम् ॥
सन्धिबन्धः, पुं, (सन्धिं बध्नातीति। बन्ध+अच्।) भूमिचम्पकः। इति शब्दचन्द्रिका ॥
सन्धिबन्धनं, क्ली, (सन्धेर्बन्धनं यस्मात्।) शिरा। इति केचित् ॥
सन्धिमतिः, पुं, काश्मीरदेशीयजयेन्द्रराजमन्त्री। स च परे राजा बभूव। यथा,—
"सुतो महीमहेन्द्रस्य जयेन्द्रस्तस्य भूपतेः।
क्ष्मामाजानुभुजो राजा बुभोजाष्ट प्रथुप्रथः ॥
तस्याभूदङ्गतोदन्तभवभक्तिविभूषितः।
राज्ञः सन्धिमतिर्नाम मन्त्री मतिमतांवरः ॥
अस्मदरादिव्यवपुः सन्धितः सन्धिमानसौ।
आर्य्यत्वादार्य्यराजाख्यः ख्यातो भुवि भविष्यति ॥"
इति राजतरङ्गिण्याम् २ तरङ्गः ॥
सन्धिरन्ध्रका, स्त्री, (सन्धिरन्ध्रेण कायतीति। कै+कः। टाप्।) सुरङ्गा। इति केचित् ॥
सन्धिला, स्त्री, (सन्धिं लातीति। ला+कः।) सुरङ्गा। नदी। मदिरा। इति मेदिनी ॥
सन्धिवेला, स्त्री, (सन्धिरूपा वेला।) कालविशेषः। स तु अहोरात्रादिमेलनकालरूपः। यथा। व्यासः।
"उपास्ते सन्धिवेलायां निशाया दिवसस्य च।
तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः ॥"
इत्याह्निकतत्त्वम् ॥
सन्धिहारकः, पुं, (सन्धिना हरतीति। हृ+खुल्।) सन्धिचौरः। यथा,—
"वन्दिचौरो माचलः स्यात् कुम्भिलः सन्धिहारकः।"
इति हारावली ॥
सन्ध्या, स्त्री, (सं सम्यक् ध्यायत्यस्यामिति सं+ध्यै चिन्तने+"आतश्चोपसर्गे। इत्यङ्। यद्वा, सन्दधातीति। सं+धा+"अन्नादयश्च।" उणा० ४। ११२। इति यक्प्रत्ययेन निपातितः।) कालविशेषः। स तु दिवारात्रिसम्बन्धिदण्डद्वयरूपः। तत्पर्य्यायः। पिठप्रसूः २। इत्यमरः ॥ सन्धा ३ द्विजमैत्री ४। इति भरतधृतवाचस्पतिः। सायम् ५ दिनान्तम् ६ निशादि ७ दिवसात्ययम् ८। इति राजनिर्घण्टः ॥ सायाह्नः ९ विकालः १० ब्रह्मभूतिः ११ सायः १२। इति शब्दरत्नावली ॥ सा च कालस्य भार्य्या। यथा,—
"कालस्य तिस्रो भार्य्याश्च सन्ध्यारात्रिदिनानि च
याभिर्विना विधात्रा च संख्यां कर्त्तुं न शक्यते ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः ॥*॥
रात्रेराद्यन्तदण्डचतुष्टयात्मककालः। यथा,—

"त्रियामां रजनीं प्राहुरृषयस्तत्त्वदर्शिनः।
नाड़ीनां तदुभे सन्ध्ये दिवमध्यन्तसंश्रिते॥"
इति प्रायश्चित्ततत्त्वम्॥

तत्सार्थक्यं यथा,—
"समुद्रे हिमवत्यार्द्रे नद्यामस्याञ्च दुर्गते।
रात्रावहनि सन्ध्यायां कस्य गुप्तः परिग्रहः॥"
इति तिथ्यादितत्त्वम्॥*॥

त्रिसन्ध्याकालीनोपासना। तत्कालोपास्या देवता। यथा। अथ सन्ध्योपासनम्। तत्र छन्दोगपरिशिष्टम्।
"अतः ऊर्द्धं प्रवक्ष्यामि सन्ध्योपासनिकं विधिम्
अनर्हः कर्म्मणां विप्रः सन्ध्याहीनो यतः स्मृतः॥"
अतः प्रातःस्नानानन्तरम्। तथा,—
"एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्
यस्य नास्यादरस्तत्र न स ब्राह्मण उच्यते॥"
ग्रातातपः।
"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववादिना।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च॥
अनागतान्तु यः पूर्व्वां सादित्याञ्चैव पश्चिमाम्।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः॥"
राजभृतो राजसेवकः। ग्रामादेर्भृतो भरणीयः। ग्रामलक्षणमाह मार्कण्डेयपुराणम्।
तथा शूद्रजनप्रायाः सुमनुष्यबलाः।
चित्रोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका॥"
अत्र सन्ध्यात्रयस्य नित्यत्वाभिधानात्।
"सर्व्वकालमुपस्थानं सन्ध्यायाः पार्थिवेष्यते।
अन्यत्र सूतकाशौचविभ्रमातुरभीतितः॥"
इति विष्णुपुराणीये सन्ध्याया इत्येकवचनान्तपाठो धर्म्मकीर्त्तनो युक्तः। एवमेव नव्यवर्द्धमानः। सर्व्वकालं प्रातर्म्मध्याह्नसायंरूपकालत्रये। अन्यथा तदुपादानं व्यर्थस्यात्। विभ्रमश्चित्तविक्षेपः। तेन चलादावपि सन्ध्यामाचरन्ति। अतएव याज्ञवल्क्यः।
"सर्व्वावस्थोऽपि यो विप्रः सन्ध्योपासनतत्परः।
ब्राह्मण्याच्च न हीयेत अन्यजन्मगतोऽपि सन्॥"
सर्व्वावस्थोऽपि नित्यं सैवकादिकर्म्मरतोऽपि।
यथोचितशौचेऽप्यशक्तोऽपि इति रत्नाकरः॥
अन्यादवस्थापनोऽपीति युक्तम्॥*॥ सन्ध्यात्रयसाधारणलक्षणमाह योगियाज्ञवल्क्यः।
"यस्याश्चैव वेदानां ब्रह्मादीनां समागमः।
सन्धिः सर्व्वसुराणाञ्च तेन सन्ध्या प्रकीर्त्तिता॥"
सन्ध्याद्वयकालस्तु अहोरात्रसन्धिमुहूर्त्तात्मकः। तथा च दक्षः।
"अहोरात्रस्य यः सन्धिः सूर्य्यनक्षत्रवर्ज्जितः।
सा च सन्ध्या समाख्याता मुनिभिस्तत्त्ववादिभिः॥"
सूर्य्यनक्षत्रवर्ज्जितः। अर्द्धास्तमितार्द्धोदितसूर्य्यमण्डलप्रकृष्टतेजोनक्षत्रवर्ज्जितः। तथा च वराहः।
"अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्।
तेजःपरिहानिरुषा भागीरर्द्धोदयं यावत्॥"
अथ प्रायश्चित्तता उक्ता। परिमाणमाह दक्षः।
"रात्र्यन्तकाले नाड्यौ द्वे सन्ध्यादिः काल उच्यते।
दर्शनादर्कविरेखायास्तदन्तो मुनिभिः स्मृतः॥"
नाड़ीदण्डः। योगी याज्ञवल्क्यः।
"क्रान्तवृत्ती च सततं दिनरात्रीर्यथाक्रमम्।
सन्धा मुहूर्त्तमाख्याता क्रान्तौ वृत्ती समा स्मृता॥"
अत्रोपासनाया अपि सन्ध्यात्वमाह व्यासः।
"उपास्ते सन्धिवेलायां निशायां दिवस्य च।
तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः॥"
उपास्ते यद्दक्ष्यमाणप्राणायामादिक्रियेति यावत्॥*॥ तत्काले उपास्या अपि देवता सन्ध्या। तथा च याज्ञवल्क्यः।
"सन्धौ सन्ध्यामुपासीत नास्तगे नोदिते रवौ॥"
उपासनोपक्रममाह संवर्त्तः।
"प्रातःसन्ध्यां सनक्षत्रामुपासीत यथाविधि।
सादित्यां पश्चिमां सन्ध्यां अर्द्धास्तमितभास्कराम्॥"
सनक्षत्रामित्यनेन तदयुक्तकाले उपक्रम्य प्रातः सन्ध्यामुपासीत। एवमेवार्द्धास्तमितभास्करारभ्यां पश्चिमां सादित्यामित्यनेन तदयुक्तकाले उपक्रम्य उपासीतेत्यर्थः॥*॥ मध्याह्नसन्ध्याया अष्टममुहूर्त्ते कालमाह स्मृतिः॥
"पूर्व्वापरे तथा सन्ध्ये सनक्षत्रे प्रकीर्त्तिते।
समसूर्य्येऽपि मध्याह्ने मुहूर्त्तमष्टमोपरि॥"
सांख्यायनगृह्यम्। अरण्ये समित्पाणिः सन्ध्यामुपास्ते नित्यं वाग्यत उत्तरापराभिमुखोऽन्वष्टमदिगमानक्षत्रदर्शनात्। अतिक्रान्तायां मध्याह्नतो सावित्रीं स्वस्त्ययनादि जप्त्वा एवं प्रातः प्राङ्मुखस्तिष्ठन् आमण्डलदर्शनादिति। उत्तरापराभिमुखो वायुकोणाभिमुखः। कोणं विहणोति अन्वष्टमदिगमिति। उभयदिगष्टमभागमिति यावत्। व्यासः।
"गायत्री नाम पूर्व्वाह्णे सावित्री मध्यमे दिने
सरस्वती च सायाह्ने सैव सन्ध्या त्रिधा स्मृता॥
प्रतिग्रहान्न दोषाच्च पातकादुपपातकात्।
गायत्री प्रोच्यते तस्मात् गायन्तं त्रायते यतः॥
सवित्प्रद्योतनात् सैव सावित्री परिकीर्त्तिता।
जगतः प्रसवित्रीत्वात् वाग्रूपत्वात् सरस्वती॥"
तैत्तिरीयब्राह्मणम्। उद्यन्तमस्तं यान्तं आदित्यमभिध्यायन् कुर्व्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुते। असावादित्यो ब्रह्मा इति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेदेत्यर्थः। वक्ष्यमाणप्रकारेण प्राणायामादिकं कुर्व्वन् यथोक्तनामरूपोपेतं सन्ध्याशब्दस्य वाच्यमादित्यं ब्रह्मेति ध्यायन् ऐहिकमामुष्मिकञ्च सकलभद्रमश्नुते। य एवमुक्तध्यानेन शुद्धान्तःकरणो ब्रह्मसाक्षात्कुरुते स पूर्व्वमपि ब्रह्मैव सन् प्रज्ञावान् चिरजीवित्वं प्राप्तो यथोक्तज्ञानेनाज्ञानोपशमे ब्रह्मैव प्राप्नोति। इति परागरभाष्ये माधवाचार्य्यः॥
अतएव व्यासः।
"न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह।
सोऽहमस्मीत्युपासीत विधिना येन केनचित्॥"*॥
गायत्रीस्थभर्गपदप्रतिपाद्य ईश्वरः। अहं जीवरूपोऽस्मि भवामि इति। अजहत्स्वार्थलक्षणया जीवेश्वरयोरहंकारप्रतिफलितत्वोपाधिरहितेन चिद्रूपेणैक्यम्। घटाकाशमठाकाशयोरुपाधिरित्यवगमात्। ऐक्यमिव भावयन् उपासीत। याज्ञवल्क्योऽपि।
"या सन्ध्या सा तु गायत्री द्विधा भूत्वा प्रतिष्ठिता।
सन्ध्या उपासिता येन विष्णुस्तेन उपासितः॥"*
उपासनायाः फलमाह स एव।
"गवां सर्पिः शरीरस्थं न करोत्यङ्गपोषणम्।
निःसृतं कर्म्मसंयुक्तं पुनस्तासां तदौषधम्॥
एवं स हि शरीरस्थः सर्पिर्वत् परमेश्वरः।
विना चोपासनादेव न करोति हितं नृषु॥
प्रणवव्याहृतिभ्याञ्च गायत्र्या त्रितयेन च।
उपास्यं परमं ब्रह्म आत्मा यत्र प्रतिष्ठितः॥"
त्रितयेन प्रणवादित्रितयेन ब्रह्मप्रतिपादकेनोच्चारितेन तदर्थावगमेन उपास्यं प्रसादनीयम्। तदाह स एव।
"वाच्यः स ईश्वरः प्रोक्तो वाचकः प्रणवः स्मृतः
वाचकेऽपि च विज्ञाते वाच्य एव प्रसीदति॥
भूर्भुवःस्वस्तथा पूर्व्वं स्वयमेव स्वयम्भुवा।
व्याहृता ज्ञानदेहेन तस्मात् व्याहृतयः स्मृताः॥"
ज्ञानदेहेन तत्त्वज्ञानस्य चिद्रूपेश्वरस्य देहेन शरीररूपेण व्याहृता उक्ताः। तेन तद्वाच्योऽपीश्वरः। कूर्म्मपुराणम्।
"प्रधानं पुरुषः कालो ब्रह्मविष्णुमहेश्वराः।
सत्त्वं रजस्तमस्तिस्रः क्रमाद्व्याहृतयः स्मृताः॥"
एतद्रूपेणापि भावनीयाः। इत्याह्निकाचारतत्त्वम्॥*॥ अपि च।
"दिनान्तसन्ध्यां सूर्य्येण पूर्व्वामृक्षैर्युतां बुधः।
उपतिष्ठेत् यथान्यायं सम्यगाचम्य पार्थिव॥
सर्व्वकालमुपस्थानं सन्ध्यायाः पार्थिवेष्यते।
अन्यत्र सूतकाशौचविभ्रमातुरभीतितः॥
सूर्य्येणाभ्युदितो यस्तु त्यक्तः सूर्य्येण यः स्वपन्
अन्यत्रातुरभावाच्च प्रायश्चित्तीयते नरः॥
तस्मादनुदिते सूर्य्ये समुत्थाय महीपते।
उपतिष्ठेन्नरः सन्ध्यां ससूर्य्याञ्च दिनान्तजाम्॥
उपतिष्ठन्ति वै सन्ध्यां ये न पूर्व्वां न पश्चिमाम्
व्रजन्ति ते दुरात्मानस्तामिस्रं नरकं नृप॥"
इति विष्णुपुराणे ३ अंशे ११ अध्यायः॥*॥
दीक्षितविशेषस्य सन्ध्याविशेषा यथा,—
भूमिरुवाच।
"देवदेव कथं सन्ध्यां दीक्षितः कुरुते वद।
केन मन्त्रेण वा भक्तस्त्वत्र कर्म्मपरायणः॥

वराह उवाच ।
शृणु माधवि तत्त्वेन सन्ध्यामन्त्रमनुत्तमम् ।
यथा वदन्ति वै सूर्य्यं सन्ध्यां पूर्व्वं चिरां तथा ॥
जलाञ्जलिं गृहीत्वा च मम भक्त्या व्यवस्थितः ।
मुहूर्त्तं ध्यानमास्थाय इमं मन्त्रमुदाहरेत् ॥
मन्त्रः । भवोद्भवमादिं व्यक्तमहयमादित्यं सर्व्वे देवा ब्रह्मरुद्रेन्द्राश्च ऋषयो यथामीत् ध्यानयोगस्थिता ते सन्ध्या संध्या वासुदेव नमन्ति वयं देवमादि व्यक्तरूपं कृत्वा चात्मनि देवसंख्या तथापि संसारार्थं कर्म्म तत्कारणमेव सन्ध्या संध्या वासुदेव नमो नमः ।
अनेनैव तु मन्त्रेण सन्ध्यां कुर्य्यात्तु दीक्षितः ॥"
इति वाराहे चतुर्व्वर्णदीक्षानामाध्यायः ॥*॥
सन्ध्याप्रशंसा यथा,—
मुनयः ऊचुः ।
"कथं मुने दिवं याति ब्राह्मणो दग्धकिल्बिषः ।
अनग्निको हि मे ब्रूहि यदुक्तं वह्निना पुरा ॥
सूत उवाच ।
सायं प्रातश्च यः सन्ध्यामुपास्तेऽस्खलन्मानसः ।
जपन् हि पावनीं देवीं गायत्रीं वेदमातरम् ॥
तपसा भावितो देव्या ब्राह्मणः पूतकिल्बिषः ।
न सीदेत् प्रतिगृह्णानो अपि पृथ्वीं ससागराम् ॥
ये चान्ये दारुणाः केचित् ग्रहाः सूर्य्यादयो दिवि ।
ते चास्य सौम्यतां यान्ति शिवाः शिवतरास्तथा ॥
यत्र तत्र गतं चैनं दारुणाः पिशिताशनाः ।
घोररूपा महाकायाः प्रभवन्ति न राक्षसाः ॥"
इति वह्निपुराणे आश्वमेधिकनामाध्यायः ॥*॥
अपि च ।
"नित्यं नित्यं त्रिसन्ध्यास्तु करिष्यसि दिने दिने ।
मध्याह्ने चापि सायाह्ने प्रातरेव शुचिः सदा ॥
सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु ।
यदन्या कुरुते कर्म्म न तस्य फलभाग्भवेत् ॥
नोपतिष्ठति यः पूर्व्वां नोपास्ते यस्तु पश्चिमाम् ।
स शूद्रवद्बहिः कार्य्यः सर्व्वस्मात् द्विजकर्म्मणः ॥
यावज्जीवनपर्य्यन्तं यस्त्रिसन्ध्यं करोति च ।
स च सूर्य्यसमो विप्रस्तेजसा तपसा सदा ॥
तत्पादपद्मरजसा सद्यःपूता वसुन्धरा ।
जीवन्मुक्तः स तेजस्वी सन्ध्यापूतो हि यो द्विजः ॥
तीर्थानि च पवित्राणि तस्य संस्पर्शमात्रतः ।
ततः पापानि यान्त्येव वैनतेयादिवोरगाः ॥
न गृह्णन्ति सुरास्तेषां पितरः पिण्डतर्पणम् ।
स्वेच्छया च द्विजातिश्च त्रिसन्ध्यरहितस्य च ॥
विष्णुमन्त्रविहीनश्च त्रिसन्ध्यरहितो द्विजः ।
एकादशीविहीनश्च विषहीनो यथोरगः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः ॥
अन्यत् कौर्म्मे १७ अध्याये गारुडे २१५।२२० अध्याययोर्द्रष्टव्यम् ॥*॥जननमरणाशौचे तन्निषेधो यथा,—
"सन्ध्यां पञ्चमहायज्ञं नैत्यिकं स्मृतिकर्म्म च ।
तस्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया ॥"
इति शुद्धितत्त्वम् ॥*॥
सायंसन्ध्यानिषेधकालो यथा । कर्म्मोपदेशिन्यां व्यासः ।
"संक्रान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे ।
सायंसन्ध्यां न कुर्व्वीत कृते च पितृहा भवेत् ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
तत्काले शयनादिनिषेधो यथा,—
"स्नानमध्ययनं स्नानमुहूर्त्तं भोजनं गतिः ।
उभयोः सन्ध्ययोर्नित्यं मध्याह्नं चैव वर्ज्जयेत् ॥"
इति कौर्म्मे १५ अध्यायः ॥
नदीविशेषः । युगसन्धिः । इति मेदिनी ॥
चिन्ता । संशयः । सीमा । सन्धानम् । कुसुमविशेषः । इति हेमचन्द्रः ॥
सन्ध्यांशः, पुं, (सन्ध्याया अंशः ।) युगसन्धिः । यथा,—
"चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥"
इति मानवे । १ । ६९-७० ॥
चत्वार्य्याहुरिति । चत्वारि वर्षसहस्राणि कृतयुगं कालं मन्वादयो वदन्ति तस्य तावद्वर्षशतानि सन्ध्या सन्ध्यांशश्च भवति युगस्य पूर्व्वा सन्ध्या उत्तरश्च सन्ध्यांशः । तदुक्तं विष्णुपुराणे ।
"तत्प्रमाणैः शतैः सन्ध्या पूर्व्वा तत्राभिधीयते ।
सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरो हि यः ॥
सन्ध्यासन्ध्यांशयोरन्तर्यः कालो मुनिसत्तम ।
युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञकः ॥"
वर्षसंख्या चेयं दिव्यमानेन तस्यैवानन्तरप्रकृतत्वात् ।
"दिव्यैर्व्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम् ।
चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे ॥"
इति विष्णुपुराणवचनाच्च ।
इतरेष्विति अन्येषु त्रेताद्वापरकलियुगेषु सन्ध्यासन्ध्यांशसहितेषु एकहान्या सहस्राणि शतानि च भवन्ति । तेनेदं सम्पद्यते । त्रीणि वर्षसहस्राणि त्रेतायुगं तस्य त्रीणि वर्षशतानि सन्ध्या सन्ध्यांशश्च । एवं द्वे वर्षसहस्रे द्वापरः तस्य द्वे वर्षशते सन्ध्या सन्ध्यांशश्च । एवं वर्षसहस्रं कलिः । तस्यैकवर्षशतं सन्ध्या सन्ध्यांशश्च । इति कुल्लूकभट्टः ॥
सन्ध्याचलः, पुं, (सन्ध्याया अचलः ।) पर्व्वतविशेषः यथा,—
"आराधनोपदेशाय कापोतस्य वचः स्मरन् ।
जग्मतुर्दक्षिणां काष्ठां यत्र सन्ध्याचलः स्थितः ॥
कान्ता नाम नदी तत्र वशिष्ठेनावतारिता ।
तस्यास्तीरे महाशैले स्निग्धच्छाया लता तदा ।
सन्ध्यां वशिष्ठः कृतवान् तत्र यस्माद्दिवेः सुतः ।
अतः सन्ध्याचलं नाम तस्य गायन्ति देवताः ॥"
इति कालिकापुराणे ५० अध्यायः ॥ * ॥
अपि च ।
"लोभकाख्यान्महाशैलादैशान्यां पर्व्वतोत्तमः ।
तुङ्गः सन्ध्याचलो नाम वशिष्ठो यत्र शुश्रुवान् ॥
निमेर्नाम्ना तु राजर्षेः शापाद्ब्रह्मसुतः पुरा ।
वशिष्ठो ह्यशरीरोऽभूत्तच्छापाच्च निमिस्तथा ॥
ततो ब्रह्मोपदेशेन निर्जने कामरूपके ।
सन्ध्याचले तपस्तेपे तस्य विष्णुरभूत्तदा ॥
प्रत्यक्षस्तस्य देवस्य वरदानान्महामुनिः ।
अमृतान्यवतार्य्यर्थे कुण्डं कृत्वा गिरिस्थले ॥
तत्र स्नात्वा च पीत्वा च शरीरं प्राप पूरितम् ।
तस्मादमृतकुण्डात्तु सन्ध्या नाम नदीवरा ।
निःसृता तत्र चाप्लुत्य चिरायुरगदो भवेत् ॥"
इति च कालिकापुराणे ८१ अध्यायः ॥
सन्ध्यानाटी, [न्] पुं, (सन्ध्यायां नटतीति । नट + इनिः ।) शिवः । इति शब्दरत्नावली-चिकाण्डशेषौ ॥
सन्ध्यापुष्पी, स्त्री, (सन्ध्यायां पुष्पं यस्याः । ङीष् ।) जातौ । इति राजनिर्घण्टः ॥
सन्ध्याबलः, पुं, (सन्ध्यायां बलं यस्य ।) राक्षसः । इति त्रिकाण्डशेषः ॥
सन्ध्याबलिः, पुं, शिवालयस्थितमृत्काष्ठादिर्मितहृषः । यथा,—
"ये शिवायतनोत्सृष्टास्ते सन्ध्याबलयो हृषाः ।"
इति हारावली ॥
सन्ध्याभ्रं क्ली, (सन्ध्याया अभ्रमिव तद्वर्णत्वात्) सुवर्णगैरिकम् । इति राजनिर्घण्टः ॥ (सन्ध्याकालीनमेघः । यथा, रघुः । १२ । २८ ।
"सन्ध्याभ्रकपिशस्तस्य विरोधी नाम राक्षसः ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥")
सन्ध्यारागं, क्ली, (सन्ध्याया राग इव रागो यस्य ।) सिन्दूरम् । इति राजनिर्घण्टः ॥ (यथा, आर्य्यासप्तशत्याम् । ३८२ ।
"प्राचीरान्तरितयं प्रियस्य वदनेऽधर सम-
र्पयति ।
प्राग्गिरिपिहिता रात्रिः सन्ध्यारागं दिनस्येव ॥")
सन्ध्यारामः, (सन्ध्यायां रामो रमणं यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥
सन्नः, पुं, (सद + क्तः ।) पियालवृक्षः । इत्यमरटीकायां भरतः ॥ अवसन्ने, त्रि ॥ (यथा, रामायणे । ६ । ११३ । ८७ ।
"कश्मलाभिहितो सन्नो बभौ सा रावणोरसि ॥")
सन्नकः, पुं, (सीदति स्मेति । सद + क्तः । ततः स्वार्थे कन् ।) खर्व्वः । इति सन्नकदुश्शब्दटीकायां भरतः ॥
सन्नकदुः, पुं, पियालवृक्षः । इत्यमरः ॥ सन्नकः खर्व्वो दुः स्कन्धोऽस्येति सन्नकदुरिति स्वामी । सन्नको दुर्यस्येति वा नामनी इति सोमनन्दी । इति भरतः ॥
सन्नतिः, स्त्री, (सं + नम + क्तिन् ।) प्रणतिः । (यथा, भागवते । १० । ७० । २४ ।
"ये च दिग्विजये तस्य सन्नतिं न ययुर्नृपाः ।
प्रसह्य कृत्वास्ते नासन्नयुते द्वे गिरिव्रजे ॥")
ध्वनिः । इति मेदिनी ॥ नम्रता यथा हरिवंशे ।

"यत्र श्रीः श्रीः स्थिता तत्र यत्र श्रीस्तत्र सन्नतिः
सन्नतिर्ह्रीस्तथा श्रीश्च नित्यं क्षमे महात्मनि ॥"
इति तिथ्यादितत्त्वम् ॥
(तथा च रामायणे । ५ । ६४ । २० ।
"तव चेदं सुसदृशं वाक्यं नान्यस्य कस्यचित् ।
सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम् ॥")
सन्नद्धः, त्रि, (सं+नह+क्तः) वर्म्मितः । कृतसन्नाहः । (यथा, भागवते । ७ । १०।६६ ।
सन्नद्धो रथमास्थाय शरं धनुरुपाददे ॥")
व्यूढः । व्यूहविन्यासयुक्तः । इति मेदिनी ॥
आततायी । वधोद्यतः । इत्यमरटीकायां रायमुकुटः ॥ मन्त्रादिसंयुतः । इति शब्दरत्नावली ॥
(आरूढः । यथा, अभिज्ञानशकुन्तले १ अङ्के ।
"कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥"
सञ्जातः । इति मल्लिनाथः ॥ यथा. रघुः ।३।७।
"पुराणपत्रापगमादनन्तरं
लतेव सन्नद्धमनोज्ञपल्लवा ॥")
सन्नयः, पुं, (सं+नी+अच्।) समूहः । यथा, महाभारते । १ । १८० । ६ ।
"अस्मिन् राजसमावाये देवानामिव सन्नये ।
किमयं सदृशं कञ्चित् नृपतिं नैव दृष्टवान् ॥"
पृष्ठरक्षायिबलः । इत्यमरमेदिनीकरौ ॥
सन्नाहः, पुं, (संनह्यतेऽसौ इति । सं+नह+घञ् ।) अङ्गत्राणम् । साँजोया इति भाषा । तत्पर्य्यायः । वर्म्म २ कङ्कटः ३ जगरः ४ कवचम् ५ दंशः ६ तनुत्रम् ७ मायो ८ उरच्छदः ९ । इति हेमचन्द्रः ॥ (यथा, महाभारते । ४ । ३० । १७ ।
"पृथक् काञ्चनसन्नाहान्रथेष्वज्ञानयोजयन् ॥"
उद्योगः । इति रामानुजः ॥ यथा, रामायणे । ६ । ७५ । ४० ।
"ततो रामशरान् दृष्ट्वा विमानेषु गृहेषु च ।
सन्नाहो राक्षसेन्द्राणां तुमुलः समपद्यत ॥")
सन्नाह्यः, पुं, (संनह्यते इति । सं+नह+ण्यत् ।) युद्धयोग्यगजः । यथा,—
"राजवाह्यस्तूपवाह्यः सन्नाह्यः समरोचितः ।"
इति हेमचन्द्रः ॥
सन्निकर्षः, पुं, (सं+नि+कृष+घञ् ।) सान्निध्यम् । तत्पर्य्यायः । पार्श्वम् २ समीपम् ३ सविधम् ४ समीपाभ्यासम् ५ सवेशः ६ अन्तिकः७ सदेशम् ८ अभ्यशम् ९ सनीडम् १० सन्निधानम् ११ उपान्तम् १२ निकटम् १३ उपकण्ठम् १४ सन्निकृष्टम् १५ समर्य्यादम् १६ अभ्यर्णम् १७ आसन्नः १८ सन्निधिः १९ । इति हेमचन्द्रः (यथा, कुमारे । ३ । ७४ ।
"स्त्रीसन्निकर्षं परिहर्त्तुमिच्छन्
अन्तर्दधे भूतपतिः सभूतः ॥")
न्यायमते विषयेन्द्रियसम्बन्धः । स च ज्ञानस्य कारणम् । स तु द्विविधः । लौकिकसन्निकर्षः अलौकिकसन्निकर्षश्च । लौकिकसन्निकर्षश्च षड्विधः । इन्द्रियसंयोगः १ इन्द्रियसंयुक्तसमवायः २ इन्द्रियसंयुक्तसमवेतसमवायः ३ श्रोत्रादिसमवायः ४ श्रोत्रादिसमवेतसमवायः ५ तदादिविशेषणता ६ ॥ अलौकिकसन्निकर्षस्तु त्रिविधः । सामान्यलक्षणा १ ज्ञानलक्षणा २ योगजः ३ ।
यथा,—
"महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ।
विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ।
द्रव्येषु समवेतानां तथा तत्समवायतः ॥
तत्रापि समवेतानां शब्दस्य समवायतः ।
तद्वृत्तीनां समेतसमवायेन तद्ग्रहः ॥
विशेषणतया तद्वदभावानां ग्रहो भवेत् ।
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ॥
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ।
अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः ॥
सामान्यलक्षणा ज्ञानलक्षणा योगजस्तथा ।
आसत्तिरत्र यायान्तु सामान्यज्ञानमिष्यते ॥
तदिन्द्रियजतद्धर्म्मबोधसामग्र्यपेक्षते ।
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ॥
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ।
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः ॥"
इति भाषापरिच्छेदः ॥
सन्निकर्षणं, क्ली, (सं+नि+कृष+ल्युट् ।) सन्निधानम् । तत्पर्य्यायः । सन्निधिः२ । इति सङ्कीर्णवर्गे अमरः ॥ सन्निधम् ३ । इति भरतः ॥ (सम्बन्धः । यथा, भागवते । ११ । २८ । १२ ।
"यावद्देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम् ।
संसारः फलवांस्तावदपार्थोऽप्यविवेकिनः ॥")
सन्निकृष्टः, त्रि, (सं+नि+कृष+क्तः ।) सन्निकर्षविशिष्टः । निकटः । इति विशेष्यनिघ्नवर्गे अमरः ॥ अस्य पर्य्यायः समीपशब्दे द्रष्टव्यः ॥
सन्निधं, क्ली, (सं+नि+धा+कः ।) सन्निधानम् । इति भरतधृतवोपालितः ॥
सन्निधानं, क्ली, (सं+नि+धा+ल्युट् ।) निकटम् । इति हेमचन्द्रः ॥ (यथा, रामायणे । २ । २१ । ५३ ।
"श्रेयो मुहूर्त्तं तव सन्निधानं
ममैव क्षन्नादपि जीवलोकात् ॥"*॥
सम्यङ्निधीयतेऽस्मिन्निति ।) आश्रयः । यथा,
"आरम्भः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां सन्निधानं कपटशतमयं चेतनमप्रत्ययानाम् ।
दुस्त्याज्यं यन्मनुष्यैः सुरनरवधमैः सर्व्वमायाकरण्डं
स्त्रीरूपं केन लोके विषममृतमयं धर्म्मनाशाय सृष्टम् ॥"
इति शान्तिशतकम् ॥
(अवस्थानम् । यथा, मार्कण्डेये । ८७ । ३५ ।
"यस्मिन् गेहे च लिखितमेतत् तिष्ठति नित्यदा
सन्निधानं कृते श्राद्धे तत्रास्माकं भविष्यति ॥")
सन्निधिः, स्त्री, (सं+नि+धा+किः ।) सन्निकर्षः । इत्यमरः ॥ (यथा, मनुः । २ । १८४ ।
"हीनान्नवस्त्रवेशः स्यात् सर्व्वदा गुरुसन्निधौ॥"
इन्द्रियगोचरः । इति मेदिनी ॥ (अवस्थानम् । यथा, जलशुद्धिप्रकरणे ।
"गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्म्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥
सन्निपतितः, त्रि, एकत्रीकृतः । मिश्रितः । संनिपूर्व्वकपतधातोः क्तप्रत्ययेन निष्पन्नः ॥
सन्निपातः, पुं, (सम्यक् निपातो पतनं यत्र ।) तालभेदः । यथा,—
"एक एव गुरुर्यत्र सन्निपातः स उच्यते ।"
इति सङ्गीतदामोदरः ॥
(सम्यक् निपातो यस्मात् ।) विकारोत्पादकमिलितदोषत्रयम् । अस्य त्रयोदश नामलक्षणानि यथा,—
"शीघ्रगस्तान्त्रिकश्चैवमसाध्यश्चित्तविभ्रमः ।
कष्टसाध्यः कण्ठकुब्जः कर्णिको जिह्मगस्तथा ॥
कष्टात् कष्टतमो ज्ञेयो रुग्दाहो हृल्लि
मानवम् ।
अन्तको भग्ननेत्रश्च रक्तष्ठीवी निपातकः ॥
शीताङ्गश्च प्रलापश्च अभिन्यासोऽतिसारकः ।
ज्ञातव्याः सर्व्वदा वैद्यैः सन्निपातास्त्रयोदश ॥
माण्डव्यौ ।
"शीघ्रगस्तान्त्रिकश्चित्तविभ्रमः कण्ठकुब्जकः ।
कर्णिको जिह्मकश्चैव जयाहृद्यान्तकस्तथा ॥
भग्ननेत्रो विलापश्च प्रलापः शीतलाङ्गकः ।
अभिन्यासश्चेति विद्यात् सन्निपातास्त्रयोदश॥*
सदास्यं श्लेष्मणा पूर्णं शूलं कासोऽतिवेदना ।
शीघ्रश्च लक्षणान्येवं शीघ्रगे सान्निपातिके ॥१॥
अतितन्द्रा ज्वरः श्वासकासस्तापोऽतिसारकः ।
स्थूलकण्ठः सिता श्यामा जिह्वा कण्ठे च
कूजति ॥
श्रुतिरल्पा चेति विद्यात् तान्त्रिके सान्नि-
पातिके ॥२॥
मदो मोहो भ्रमस्तापो हास्यगीतप्रलापनम् ।
नित्यं वैकल्पिता पीड़ा विकटाक्षनिरीक्षणम् ।
लक्षणैः सन्निपातोऽयं ज्ञातव्यश्चित्तविभ्रमः ॥३
कण्ठग्रहो ज्वरो मूर्च्छा दाहः कम्पविलापनम्
मोहस्तापः शिरोऽर्त्तिश्च वातार्त्तः प्रलयं गतः ॥
कण्ठकुब्जं सन्निपातं कष्टसाध्यं विनिर्दिशेत्॥४
ज्वरः कर्णान्तशोथश्च श्वासः कम्पः प्रलापनः ॥
स्वेदः कण्ठग्रहस्तापस्तृष्मोहो भयमेव च ।
कर्णिके सन्निपाते च लक्षणानि भवन्तिह ।५॥
सङ्कटा कठिना जिह्वा कासः श्वासोऽति-
विह्वलः ।
मूको बधिरता तापो बलहानिश्च लक्षणम् ॥
जिह्मगः सन्निपातोऽयं कष्टात् कष्टतरः परः॥६॥
मोहस्तापः प्रलापश्च व्यथा कण्ठे भ्रमः श्रमः ॥
वेदना च तृषा जाड्यं श्वासश्च लक्षणैरिमैः ।
कष्टात् कष्टतरो ज्ञेयः कुब्जाहः सान्निपातिकः॥
दाहो मोहः शिरःकम्पो हिक्का श्वासाङ्ग-
मर्द्दनम् ।
सन्तापश्चान्तको ज्ञेयः सन्निपातोऽतिमारकः॥८

ध्वसनं लोचने भुग्ने स्मृतिः स्खला ज्वरोऽधिकः।
मोहः प्रलापनं कम्पो भ्रमो निद्रा च लक्षणैः॥
ज्ञातव्यो भुग्ननेत्रोऽयं सन्निपातः क्षयंकरः॥९॥
रक्तनिष्ठीवनं मूर्च्छा ज्वरो मोहस्तृषा भ्रमः।
वान्तिर्हिक्कातिसारश्च संज्ञानाशो हृदि व्यथा॥
मण्डल श्यावरक्तञ्च देहेषु लक्षणैरिमैः।
ज्ञातव्यः सन्निपातोऽयं रक्तष्ठीवी निपातकः॥१०॥
प्रलापतापकर्णार्त्तिः प्रज्ञानाशोऽतितापवान्।
श्वेयः प्रलापकक्लिष्टः सन्निपातोऽतिमारकः॥११॥
शरीरं हिमवत् शीतमतिसारश्च कम्पनम्।
कर्णनादो हस्ततापो हिक्का श्वासः क्रमोत्तरम्।
सर्व्वाङ्गशीतलो हन्ति शीताङ्गः सन्निपातकः॥
१२॥
त्रिदोषञ्च मुखं शुष्कं निद्रावैकल्यकष्टवाक्।
निर्यत्नमतिश्वासो मन्दाग्निर्बलहीनता॥
मृत्युतुल्यमभिन्यासं सन्निपातञ्च लक्षयेत्॥१३॥
इति चक्रपाणिदत्तः॥*॥

यं दृष्ट्वा यस्य सम्भवः स तस्य सन्निपातः। सन्निपातविधिरनिमित्तं तद्विघाताय। इति कलापव्याकरणे ४ वृत्तौ २ प्रकरणम्॥ समूहः। यथा,—
"धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥"
इति मेघदूतम्॥
सम्यक्प्रकारेण पतनं मरणञ्च॥

सन्निपातज्वरः,पुं,(सम्यक् निपातो नाशो यस्मात् तादृशो ज्वरः।) त्रिदोषजज्वरः। स तु अष्टप्रकारज्वरान्तर्गतज्वरविशेषः। अष्टत्वं विवृणोति। वातिकः पैत्तिकः श्लैष्मिकश्चेति त्रयः। द्वन्द्वजाश्च त्रयः। वातपैत्तिकः वातश्लैष्मिकः पित्तश्लैष्मिकश्चेति। संघातनः सन्निपातिक एकः। "द्व्युल्वणैकोल्वणैः षट् स्युर्हीनमध्यादिकैश्च षट् समैश्चैको विकारास्ते सन्निपातास्त्रयोदश॥"
इति चरकेण त्रयोदश सन्निपाता उक्ताः॥ ते यथा। वातोल्वणः १ पित्तोल्वणः २ कफोल्वणः ३। वातपित्तोल्वणः ४ वातश्लेष्मोल्वणः५ पित्तश्लेष्मोल्वणः ६ एवं षट्। अधिकवातो मध्यपित्तो हीनकफः१ अधिकवातो मध्यकफो हीनपित्तः २ अधिकपित्तो मध्यवातो हीनकफः ३ अधिकपित्तो मध्यकफो हीनवातः४ अधिककफो मध्यवातो हीनपित्तः ५ अधिककफो मध्यपित्तो हीनवातश्चेति ६षट्। द्व्युल्वण एकः १। एवं त्रयोदश। अत्र तु त्रिदोषजत्वेन साम्यात् सान्निपातिक एक एव गणितः। आगन्तुजोऽपि एक एव। अत्र आगन्तुजशब्देन अभिघातादयो हेतव उच्यन्ते। कुत्रचिद्व्यधयः कार्य्यकारणयोरभेदोपचारात्। इति ज्वराधिकारे भावप्रकाशः॥*॥ अथ सन्निपातज्वराधिकारमाह। तत्र सन्निपातज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्ब्बिकां सम्प्राप्तिमाह।
"त्रिदोषजनकैर्व्वातपित्तश्लेष्मागरेहगाः।
बहिर्निरस्य कोष्ठाग्निं रसगा ज्वरकारिणः॥"
पूर्व्वरूपमाह।
"प्राग्रूपाणि त्रिदोषाणां स्युस्त्रिदोषज्वरे नृणाम्।"
सन्निपातज्वरस्य सामान्यानि लक्षणान्याह।
"चक्षे दाहः क्षणे शीतमस्थि सन्धिशिरोरुजा।
सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने॥
सस्वनौ सस्रवौ कर्णौ कण्ठः शूकैरिवावृतः।
तन्द्रा मोहः प्रलापश्च कासश्वासोरुचिर्भ्रमः॥
परिदग्धा खरस्पर्शा जिह्वा सस्ताङ्गता परा।
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च॥
शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा।
स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः॥
क्लमत्वं नातिगात्राणां प्रततं कण्ठकूजनम्।
कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम्॥
मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च।
चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः॥"
लोचने सास्रावे साश्रुणी। कलुषेऽस्वच्छे। निर्भुग्ने निर्गते कूटिले च। कण्ठः शूकैरिव धान्याग्रैरिवावृतः। जिह्वा परिदग्धा परिदग्धेव ज्ञायते। अथवा परिदग्धेव क्षुण्णा दृश्यते। सस्ताङ्गता शिथिलगात्रता। परा अतिशयिता। ष्ठीवनमित्यादि कफसंयुक्तस्य रक्तस्य पित्तस्य च ष्ठीवनम्। शिरसो लोठनमितस्ततः शिरश्चालनम्। क्लमत्वं नातिगात्राणां गात्राणामतिशयितं कार्य्यं न व्याधिप्रभवात्। प्रततं निरन्तम्। कोठः वरटीदष्टसंस्थानः कोठ इत्यभिधीयते। श्यावः कपिशो वर्णः। मूकत्वमवचनत्वमल्पवचनत्वं वा। स्रोतसां कर्णनासादीनाम्॥*॥ ननु वातादयः परस्परविरुद्धगुणास्तेषां सम्भूयैककार्य्यारम्भकत्वं नोपपद्यते परस्परोपघातात् दहनसलिलयोरिव तत् कथं वातपित्तकफा मिलित्वा विकारोत्पादकाः। अत्र समाधानमुक्तं दृढबलेन।
"विरुद्धैरपि न त्वेते गुणैर्न्नन्ति परस्परम्।
दोषाः सहजसात्म्यत्वादिषं घोरमहीनिव॥"
गदाधरस्तु हेत्वन्तरमुक्तवान्।
"दैवाद्दोषस्वभावाद्वा दोषाणां सान्निपातिके।
विरुद्धैश्च गुणैः कश्चिन्नोपघातः परस्परम्॥"इति
ननु भिन्नचयप्रकोपकालानां वातपित्तकफानां युगपदुत्थानाभावात् कथं सम्भूय सन्निपातज्वरारम्भकत्वमुपपद्यते। उच्यते। त्रिदोषजनकनिदानबलेन युगपदेषां प्रकोपादिति सिद्धान्तः॥*॥ अथ सामान्यसन्निपातज्वरस्य त्रयोदश विशेषानाह।
"एकोल्वणस्त्रयश्चैते स्युर्द्व्युल्वणश्च तथेति षट्।
त्र्युल्वणश्च भवेदेको विज्ञेयः स तु सप्तमः॥
प्रहृष्टमध्यहीनैस्तु वातपित्तकफैश्च षट्।
सन्निपातज्वरस्यैवं स्युर्व्विशेषास्त्रयोदश॥"
तत्र प्रहृष्टवातो मध्यपित्तो हीनकफः १ मध्यवातः प्रहृष्टपित्तो हीनकफः २ हीनवातः प्रहृष्टपित्तो मध्यकफः३ प्रहृष्टवातो हीनपित्तो मध्यकफः ४ मध्यवातो हीनपित्तः प्रहृष्टकफः५ हीनवातो मध्यपित्तः प्रहृष्टकफश्चेति षट् ६। तेषां नामानि क्रमादाह।
"विस्फारकथाग्रकारी कम्पनो बभ्रुसंज्ञकः।
शीघ्रकारी तथा भग्नुः सप्तमः कूटपाकलः॥
सम्मोहकः पाकलश्च याम्यः क्रकच इत्यपि।
तद्वत् कर्कटकः प्रोक्तस्ततो वैदारिकाभिधः॥"
तन्त्रान्तरे विस्फारक इत्यत्र विस्फुरक इति पाठः। बभ्रुस्थाने विभुरिति पाठः। कुत्रापि विद इत्यपि पाठः। भग्नुरित्यत्र फल्गुरिति पाठः। याम्य इत्यत्र संग्राम इति पाठः। कर्कटक इत्यत्र कर्कोटक इति पाठः॥*॥ तत्र वातोल्वणस्य लक्षणमाह।
"श्वासः कासो भ्रमो मूर्च्छा प्रलापो मोहवेपथुः।
पार्श्वस्य वेदना जृम्भा कषायत्वं मुखस्य च॥
वातोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्।
एष विस्फारको नाम्ना सन्निपातः सुदारुणः॥"१
अथ पित्तोल्वणस्य लक्षणमाह।
अतिसारो भ्रमो मूर्च्छा मुखपाकस्तथैव च।
गात्रे च बिन्दवो रक्ता दाहोऽतीव प्रजायते।
पित्तोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्।
भिषग्भिः सन्निपातोऽयमाशुकारी प्रकीर्त्तितः॥"२॥*॥
अथ कफोल्वणस्य लक्षणमाह।
"जड़ता गद्गदा वाणी रात्रौ निद्रा भवत्यपि।
प्रस्तब्धे नयने चैव मुखमाधुर्य्यमेव च॥
कफोल्वणस्य लिङ्गानि सन्निपातस्य लक्षयेत्।
मुनिभिः सन्निपातोऽयमुक्तः कम्पनसंज्ञकः॥"३॥
अथ वातपित्तोल्वणस्य लक्षणमाह।
"वातपित्ताधिको यस्य सन्निपातः प्रकुप्यति।
तस्य ज्वरो मदस्तृष्णा मुखशोषप्रमीलकाः।
आध्मानारुचितन्द्राश्च कासश्वासभ्रमश्रमाः।
मुनिभिर्बभ्रुनामायं सन्निपात उदाहृतः॥"४॥*
अथ वातश्लेष्मोल्वणस्य लक्षणमाह।
"वातश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति।
तस्य शीतज्वरो मूर्च्छा क्षुत्तृष्णा पार्श्वनिग्रहः॥
शूलमस्थिभ्यमानस्य हिक्का श्वासश्च जायते।
असाध्यः सन्निपातोऽयं शीघ्रकारीति कथ्यते।
न हि जीवत्यहोरात्रमनेनाविष्टविग्रहः॥"५॥
अथ पित्तश्लेष्मोल्वणस्य लक्षणमाह।
"पित्तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति।
अन्तर्दाहो बहिः शीतं तस्य तृष्णा प्रवर्द्धते॥
तुद्यते दक्षिणं पार्श्वमुरःशीर्षगलग्रहाः।
छर्दति श्लेष्मपित्तञ्च कृच्छ्रात् कण्ठस्य दूयते॥
विड्भेदः श्वासहिक्काश्च वर्द्धन्ते सप्तमीलकाः।
ऋषिभिर्भग्नुनामायं सन्निपात उदाहृतः॥"६॥
अथ वातपित्तश्लेष्मोल्वणस्य लक्षणमाह।
"सर्व्वदोषोल्वणे यस्य सन्निपातः प्रकुप्यति।

त्रयाणामपि दोषाणां तस्य रूपाणि लक्षयेत् ॥
व्याधिभ्यो दारुणश्चैव वज्राग्निसन्निभः ।
केवलोच्छ्वासपरमस्तब्धाङ्गस्तब्धलोचनः ॥
त्रिरात्रोपरमे तस्य जन्तोर्हरति जीवितम् ।
तदवस्थन्तु तं दृष्ट्वा मूढो व्याहरते जनः ॥
धर्षितो रात्रमन्यूनमवेलायां चरन्ति ये ।
अम्बया ब्रुवते कैश्चित् यक्षिण्या ब्रह्मराक्षसैः ॥
पिशाचैर्गुह्यकैश्चैव तथान्यैर्भीस्तकैर्हतम् ।
कुलदेवार्चनाहीनं धर्षितं कुलदेवतैः ॥
नक्षत्रपीडामपरे गरकर्मेति चापरे ।
सन्निपातमिमं प्राहुर्भिषजः कूटपाकलम् ॥"७॥

अथ प्रवृद्धमध्यहीनवातादिजनितसन्निपातज्वराणां लक्षणान्याह ।

"प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
प्रलापायाससंमोहकम्पमूर्च्छारतिभ्रमाः ।
एकपक्षाभिघातश्च तत्राप्येतद्विशेषतः ।
एष सम्मोहको नाम्ना सन्निपातः सुदारुणः ॥"
रोगास्त एवोक्ता उक्ता एव ते रोगाः व्याधयः । पृथुनिद्रानाम्रविट्कादयो वातजाः । दाहतृष्णोष्णता स्वेदादयः पित्तजाः । गौरवाग्निमान्द्योल्लासिका मुखप्रसेकादयः कफजाः । तत्रापि प्रलापादयः पक्षाघातान्ता विशेषाद्भवन्ति ॥ * ॥ ननु वातः प्रवृद्धः सन् ज्वरं करिष्यति पित्तन्तु मध्यं सममिति यावत् तत् कथं ज्वरं करिष्यति । यत आह ।

"धातवस्त्रिमला दोषा नाशयन्त्यसमास्तनुम् ।
समाः सुखाय विषमा बलायोपचयाय च ॥"
इति ।

उच्यते । अत्र पित्तं मध्यमपि अप्रकृतमेव यतोऽप्रकृतयोर्वातश्लेष्मणोरपेक्षया मध्यं तेन मध्यं मध्यकुपितमित्यर्थः ॥*॥ ननु कफः क्षीणः स कथं ज्वरं करिष्यति क्षीणस्नेहत्वात् । उच्यते । दोषाः क्षीणा अपि व्याधीन् कुर्वन्त्येव । यत आह ।

"वातक्षयेऽल्पचेष्टत्वं मन्दवाक्त्वं विसंज्ञता ।
पित्तक्षयेऽधिकश्चैव वह्निर्मन्दः प्रभाक्षयः ॥
गिरिताः सन्धयो मूर्च्छा रौक्ष्यं दाहो कफक्षयः ॥"
इत्याद्यङ्गा सिद्धान्तश्चापरत्रापि ॥ ८ ॥ * ॥

"मध्यप्रवृद्धहीनैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
मोहप्रलापमूर्च्छाः स्युर्मन्यास्तम्भः शिरोग्रहः ॥
कासश्च श्वासो भ्रमस्तन्द्रा संज्ञानाशो हृदिग्रहः ॥
खेभ्यो रक्तं विसृजति तन्द्रा स्यात् स्तब्धनेत्रता ।
तत्राप्येते विशेषाः स्युर्मृत्युरर्वाक् त्रिवासरात्
भिषग्भिः सन्निपातोऽयं कथितः पाकलाभिधः ॥ ९ ॥

हीनप्रवृद्धमध्यैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
हृदयं दह्यते चास्य यकृत्प्लीहान्त्रफुप्फुसाः ।
पच्यन्ते त्यर्थमूर्द्धाधः पूयशोणितनिर्गमः ॥
शीर्णदन्तस्य मृत्युश्च तत्राप्येतद्विशेषतः ।
भिषग्भिः सन्निपातोऽयं याम्यनामा प्रकीर्त्तितः ॥ १० ॥*॥

अथ प्रवृद्धवातमध्यपित्तहीनकस्य सन्निपातस्य लक्षणमाह ।

"प्रवृद्धमध्यहीनैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
प्रलापायाससंमोहकम्पमूर्च्छारतिभ्रमाः ।
मन्यास्तम्भेन मृत्युश्च तत्राप्येतद्विशेषतः ।
उक्तः क्रकचनामायं सन्निपातो भिषग्वरैः ॥११ ॥*॥

मन्यहीनप्रवृद्धैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त्वेवोक्ता यथादोषबलाश्रयाः ॥
अन्तर्दाहो विशेषोऽत्र न च वक्तुं स शक्यते ।
रक्तमालक्तकेनेव लक्ष्यते मुखमण्डलम् ॥
यत्र नाकर्षितः श्लेष्मा हृदयान्न प्रमुच्यते ।
दुष्टेवाहतं पार्श्वं तुद्यन्ते खन्यते हृदि ॥
प्रमीलकश्चासहिक्का वर्द्धते तु दिनं दिनम् ।
जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवाहतः ॥
विसर्गं नाभिजानाति कूजेच्चापि कपोतवत् ।
अतीवश्लेष्मणा पूर्णः शुष्कवक्त्रोष्ठतालुकः ॥
तन्द्रानिद्रातियोगार्त्तो हतवाग्विहतद्युतिः ।
न चातिलभते ग्लानिं विपरीतानि चेच्छति ॥
आयम्यते च बहुशो रक्तं छर्दयति चाल्पशः ।
एष कर्कटको नाम्ना सन्निपातः सुदारुणः ॥१२ ॥*॥

हीनमध्यप्रवृद्धैस्तु वातपित्तकफैश्च यः ।
तेन रोगास्त एवोक्ता यथादोषबलाश्रयाः ॥
अल्पं शूलं कटीतोदो मध्ये दाहो रुजा भ्रमः ।
भृशं क्लमः शिरो वक्त्रमन्या हृदयवाग्रुजः ॥
प्रमीलकः श्वासहिक्काकाशजाड्यविसंज्ञताः ।
प्रथमोत्पन्नमेतन्तु साधयन्ति कदाचन ॥
एतस्मिन् सन्निवृत्ते तु कर्णमूले सुदारुणा ।
पिडका जायते जन्तोर्यया क्लृच्छ्रेण जीवति॥
स वैदारिकसंज्ञोऽयं सन्निपातः सुदारुणः ।
त्रिरात्रोपरमे तस्य व्यर्थमौषधकल्पनम् ॥"१३॥

अथ तन्मान्तरे । वातोल्वणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां शीताङ्गादीनि त्रयोदश नामान्तराणि लक्षणान्तराणि चाह ।

"शीताङ्गस्त्रिमलोद्भवज्वरगणे तन्द्री प्रलापी ततो
रक्तष्ठीवयिता च तत्र गणितः सम्भुग्ननेत्रस्तथा
साभिन्यासकजिह्वकश्च कथितः प्राक्सन्धिगोऽन्यान्तको
रुग्दाहः सहचित्तविभ्रम इह ह्रीकर्णकण्ठग्रहौ ॥"

तन्द्री तन्द्रिकः । प्रलापी प्रलापकः । रक्तष्ठीवयिता रक्तष्ठीवी । सम्भुग्ननेत्रो भुग्ननेत्रः । अभिन्यासकः अभिन्यासः । कर्णकण्ठग्रहो कर्णग्रहः कर्णकः । कण्ठग्रहः कण्ठकुब्जकः ॥*॥

अथ तेषां प्रत्येकलक्षणानि ।

"हिमशिशिरशरीरः सन्निपातज्वरी यः
श्वसनकसनहिक्कामोहकम्पप्रलापैः ।
क्लमबहुकफतान्तर्हार्दवम्यङ्गपीड़ा-
स्वरविकृतिभिरार्त्तः शीतगात्रः स उक्तः ॥१॥
तन्द्रातीव ततस्तृषातिसरणं श्वासोऽधिकः
कासरुक्
सन्तप्तातितनुर्गले क्षयथुना मार्दश्च कण्डूः कफः ।
सुश्यामा रसना क्लमः श्रवणयोर्मौख्यञ्च दाहस्तथा
यत्र स्यात् स हि तन्द्रिको निगदितो दोषत्रयोत्थो ज्वरः ॥२॥
यत्र ज्वरे निखिलदोषनितान्तदोषजाते प्रलापबहुला महसोत्थिताय ।
कम्पश्चथापतनदाहविसंज्ञता: स्युर्वान्ता प्रलापक इति प्रथितः पृथिव्याम् ॥३॥
निष्ठीवो रुधिरस्य रक्तमटुरं क्षणं तनौ मण्डलं
लौहित्यं नयने क्षयारुचिवमिश्वासातिसारभ्रमाः ।
आध्मानञ्च विमज्जता च तपनं हिक्काङ्गपीड़ा भृशं
रक्तष्ठीविनि सन्निपातजनिते लिङ्गं ज्वरे
जायते ॥४॥
भृशं नयनरक्तताश्वसनकासतन्द्राभ्रमाः
प्रलापमदवेपथुश्रवणहानिमोहास्तथा ।
अदो निखिलदोषजे भवति यत्र लिङ्गं ज्वरे
पुरातनचिकित्सकैः स इह भुग्ननेत्रो
मतः ॥५॥
दोषास्त्रीव्रतरा भवन्ति बलिनः सर्व्वेऽपि यत्र
ज्वरे
मोहोऽतीव विचेष्टता विकलता श्वासो भृशं
मूकता ।
दाहश्चिक्कणमाननञ्च दहनो मन्दो बलस्य
क्षयः
सोऽभिन्यास इति प्रकीर्त्तित इह प्राज्ञैर-
भिषग्भिः पुरा ॥६॥
त्रिदोषजनिते ज्वरे भवति यत्र जिह्वा भृशं
हृता कठिनकृष्णकैस्तदनु मूकता मूढ़ता ।
श्रुतिच्युतिवलक्षतो श्वसनकाससन्तापयः
पुरातनभिषग्वरास्तमिह जिह्वकं चक्षते ॥७॥
व्यथातिशयिता भवेच्छ्रथयुता सन्धिषु
प्रभूतकफता मुखे विगतनिद्रता कासरुक् ।
समस्तमिति कीर्त्तितं भवति लक्ष्म यत्र ज्वरे
त्रिदोषजनिते बुधैः स हि निगद्यते सन्धिगः॥८॥
यस्मिन् लक्षणमेतदस्ति सकलैर्दोषैरुदीते ज्वरेऽजस्रं मूर्द्धविधूननं सकसनं सर्व्वाङ्गपीड़ाधिका ।
हिक्काश्वाससदाहमोहसहिता दैहेऽतिसन्तप्तता
वैकल्यञ्च हृषावचांसि मुनिभिः सङ्कीर्त्तितः
सोऽन्तकः ॥८॥
दाहोऽधिको भवति यत्र तृषा च तीव्रा
श्वासप्रलापविरुचिभ्रममोहपीड़ाः ।
मन्या हनुव्यथनकण्ठरुजा श्रमाय
रुग्दाहमंश्च उदितस्त्रिभवो ज्वरोऽयम् ॥९॥
गायति नृत्यति हसति प्रलपति विक्षतं निरीक्षते सुश्लेत् ।
दाहव्यथाभयार्त्तो दोषत्रयचित्तविभ्रमो ज्वरवान् ॥११॥

निःश्लेष्मदोषजनितज्वरश्लेष्मजन्मा
स्यात् कर्णमूलविषये व्यथयुर्व्यथा च ।
कण्ठश्च वधिरताश्वसनप्रलाप-
प्रस्वेदमोहदहनानि च कर्णकाख्ये ॥ १२ ॥
कण्ठः यूकगतावरुद्धवदति श्वासःप्रलापोऽरुचि-
र्दाहो देहरुजा ह्यपि च हनुस्तम्भः शिरो-
ऽर्त्तिस्तथा ।"
मोहो वेपथुना सहेति सकलं लिङ्गं त्रिदोषज्वरे
यत्र स्यात् स हि कण्ठकुब्ज उदितः प्राज्ञै-
श्चिकित्सावुधैः ॥ १३ ॥ * ॥
सन्धिगस्तेषु साध्यः स्यात्तन्द्रिकयित्तविभ्रमः ।
कर्णको जिह्मकः कण्ठकुब्जः पञ्चापि कष्टकाः ॥
रुग्दाहस्वल्पतिकष्टेन संसाध्यस्तेषु भाषितः ।
रक्तष्ठीवी भुग्ननेत्रः शीतगात्रः प्रलापकः ।
अभिन्यासोऽन्तकश्चैते षड्साध्याः प्रकी-
र्त्तिताः ॥"*॥
अथ तन्त्रान्तरे । वातोल्वणादीनां सन्निपात-
ज्वरविशेषाणां त्रयोदशानां कुम्भीपाकादीनि
त्रयोदश नामान्तराणि लक्षणान्तराणि चाह ।
"कुम्भीपाकः प्रोर्णुनावः प्रलापी
शान्तर्दाहो दण्डपातोऽन्तकश्च ।
एणीदाहश्चाथ हारिद्रसंज्ञो
भेदा एते सन्निपातज्वरस्य ॥
अजघोषभूतहासौ यन्त्रापीड़श्च संन्यासः ।
संशोषी च विंशेषास्त्रैवोक्तास्त्रयोदश च ॥"
अथैषां लक्षणानि ।
"घोनाविवरभ्रूरुद्गोणासितनीललोहितं
सार्त्तिः ।
विलुठन् मस्तकमभितः कुम्भीपाकेन पीड़ितं
विद्यात् ॥
उत्क्षिप्य यः स्वमङ्गं क्षिपत्यधस्ताच्चिरान्त-
मुच्छ्वसिति ।
तं प्रोर्णुनावलुप्तं विचित्रकष्टं विजानीयात् ॥
स्वेदभ्रमाङ्गपीड़ा कम्पो दवथुर्वमी व्यथा कण्ठे
गात्रञ्च गुर्व्वतीदं प्रलापिलुप्तस्य जायते
लिङ्गम् ॥
शान्तर्दाहः शैत्यं बहिश्च यस्या विशेषतः श्वासः
अङ्गमिव दग्धकल्पं सोऽन्तर्दाहार्दितः कथितः ॥
नक्तं दिवा न निद्रामुपैति गृह्णाति मूढधी-
र्नभसः ।
उत्थाय दण्डपाते भ्रमातुरः सर्वतो भ्रमति ॥"
नभसो गृह्णाति आकाशात् किञ्चिदगृहीतं
करौ प्रसारयति इत्यर्थः ।
"संपूर्य्यते शरीरं ग्रन्थिभिरभितस्त्वचीदरं मरुता
श्वासातुरस्य सततं विचेतनस्यान्तकार्त्तस्य ॥
परिधावतीव गात्रे रुक्पात्रे भुजगपतम-
हरिणगणः ।
वेपथुमतः सदाहस्यैणीदाहज्वरार्त्तस्य ॥"
रुक्पात्रे पीड़ाभाजने । गात्रस्य विशेषणमेतत्
"यस्यातिपीतमङ्गनयने सुतरामलं ततोऽप्य-
धिकम् ।
दाहोऽतिशीतता बहिरस्य स हारिद्रको ज्ञेयः॥
छगलकशरीरगन्धः स्कन्धरुजावान्विरुद्गल-
रन्ध्रः ।
अजघोषसन्निपातादातान्त्राच्च पुमान् भवति ॥
शब्दादीनधिगच्छति न स्वान्विषयान् यदी-
न्द्रियग्रामः ।
हसति प्रलपति पद्यं स गेयो भूतहासार्त्तः ॥
येन मुहुर्ज्वरवेगादुन्नेषेवावपोह्यते गात्रम् ।
रक्तं पीतञ्च वमेत् यन्त्रापीड़ः स विज्ञेयः ॥
अतिसरति वमति कूजति गात्राण्यभितश्चिरं
नरः क्षिपति ।
स न्याससन्निपाते प्रलपति भुग्नाक्षिमण्डलो
भवति ॥
मेचकवपुरतिमेचकलोचनयुगलोऽबलो मलोत्-
सर्गात् ।
संशोषिणि सितपिड़कामण्डलयुक्तो ज्वरैर्भवति
नारायण एव भिषग्भेषजमेतेषु जाङ्गलीनीरम् ।
नैरुज्यहेतुरेको नित्यं मृत्युञ्जयोऽर्थ्यः ॥"*॥
अथासाध्यसन्निपातज्वरस्य लक्षणमाह ।
"सन्निपातज्वरश्चान्ते कर्णमूले सुदारुणः ।
शोथः संजायते तेन कश्चिदेव प्रमुच्यते ॥"
सुदारुणः मारकत्वात् यतस्तेन शोथेन कश्चि-
देव प्रमुच्यते । कोऽपि जीवितं त्यजति इत्यर्थः ।
"सन्निपातज्वरान् कष्टानसाध्यानपरे जगुः ।
दोषे विबद्धे नष्टेऽग्नौ सर्व्वसम्पूर्णलक्षणः ।
सन्निपातज्वरोऽसाध्यः कष्टसाध्यस्ततोऽन्यथा॥"
दोषे पित्तकफे । विबद्धे अपक्वे सर्व्वसम्पूर्ण-
लक्षणः सर्व्वाणि दाहशीतादीनि सम्पूर्णानि
अन्यूनानि प्रौढ़ानीति यावत् लक्षणानि यस्य
सः । ततोऽन्यथा दोषे पक्वे अग्नौ दीप्ते स्वल्प-
लक्षणकः कष्टसाध्य इत्यर्थः ॥ * ॥ * ॥
अथ सामान्यसन्निपातज्वरस्य चिकित्सा ।
"सन्निपातार्णवे मग्नं योऽभ्युद्धरति मानवम् ।
कस्तेन न कृतो धर्म्मः काश्च पूजां न सोऽर्हति ॥
मृत्युना सह योद्धव्यं सन्निपातं चिकित्सता ।
यश्च तत्र भवेज्जेता स जेतामयसङ्कुले ॥
श्लेष्मनिग्रहमेवादौ कुर्य्याद्व्याधौ त्रिदोषजे ।
निरस्ते श्लेष्मणि ह्यस्य स्रोतःसूद्घाटितेषु च ।
लाघवं जायते सद्यस्तृष्णा चैवोपशाम्यति ॥"*॥
भेड़ोऽप्याह ।
"सन्निपातज्वरे पूर्व्वं कुर्य्यादामकफापहम् ।
पश्चात् श्लेष्मणि संशोधे शमयेत् पित्तमारुतौ॥"
इति ॥ * ॥
ननु तन्त्रान्तरे प्रथमं पित्तस्य प्रतिक्रिया प्रोक्ता
यथा,—
"शमयेत् पित्तमेवादौ ज्वरेषु समवायिषु ।
दुर्निवारतरं तद्धि ज्वरार्त्तेषु विशेषतः ॥"इति
अन्यत्रापि ।
"समवाये त्रिदोषाणां पूर्वं पित्तमुपाचरेत् ।
ज्वरे चैवातिसारे च सर्व्वत्रान्यत्र मारुतः ॥"
इति ॥
तथान्यत्र प्रथमं वायोः प्रतिक्रिया प्रोक्ता ।
यथा,
"वातस्यानुजयेत् पित्तं पित्तस्यानुजयेत् कफम्।"
इति ॥ * ॥
तत्र व्यवस्थामाह तन्त्रान्तरे ।
"ज्वरे त्रिदोषजे सामे शमयेत् प्रथमं कफम् ।
जीर्य्यत्यामे जयेत् पित्तं निरामे त्वनिलं जयेत्॥
इति । प्रथममिति स्थानत्रयेऽपि सम्बध्यते ।
अन्ये त्विति समादधते ।
"त्रयाणां वा जयेत् पूर्व्वं तं यः स्याद्बलवत्तरः ।"
इति ।
तथा च ।
"संसर्गे यो गरीयान् स्यादुपक्रम्यः स वै भवेत्
श्लेष्मदोषाविरोधेन सन्निपाते तथैव च ॥"इति ॥
संसर्गे दोषद्वयसंसर्गे । गरीयान् बलवत्तरः ।
"अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात् ॥
क्रियां साधारणीं तत्र विदधीत चिकित्सकः ॥
लङ्घनं बालुकास्वेदो नस्यं निष्ठीवनं तथा ।
अवलेहोऽञ्जनञ्चैव प्राक् प्रयोज्यं त्रिदोषजे ॥"
ज्वर इति शेषः ॥ * ॥ ननु ।
"क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत्
पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो हितः ॥"
इति वचनेन क्रियासङ्करस्य निषिद्धत्वात् कथ-
मत्र नस्यनिष्ठीवनावलेहाञ्जनानि युगपद्विधी-
यन्ते इत्याशङ्क्यायामाह ।
"क्रियाभिस्तुल्यरूपाभिः क्रियासाङ्कर्य्यमिष्यते ।
भिन्नरूपतयैतासु नहि कुर्व्वन्ति दूषणम् ॥"*॥
तत्र लङ्घनस्य अवधिमाह ।
"त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा ।
लङ्घनं सन्निपातेषु कुर्य्याद्दारोग्यदर्शनात् ॥"
लङ्घने त्रिरात्रादिविकल्प उल्बणवातादिपेक्षया
दोषाणां शीघ्रमध्यमन्दशक्तिकत्वात् व्याधिस्व-
भावाच्च । आरोग्यदर्शनात् इति यावदरोगता-
दर्शनं स्यात्तावद्धा लङ्घनं कुर्य्यात् । एतेन
त्रिरात्राद्यवधेरनियतत्वं सूचितम् । अतएव
सुश्रुतः प्राह ।
"सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा ।
पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा ॥"
घोरतर इति घोरः स्वभावादेव तदा घोरतरो
भूत्वेति ॥ *॥ हननप्रशमनयोः कारणमाह ।
"पित्तकफानिलहृद्या दशदिवसहादशाह-
समाहात् ।
हन्ति विमुञ्चत्यथवा त्रिदोषजो धातुमलपा-
कात् ॥"
त्रिदोषजो ज्वर इति शेषः । धातुमलपाकात्
धातुपाकाद्धन्ति मलपाकाद्विमुञ्चतीत्यर्थः ।
धातुमलपाके प्राक्तनकर्म्मैव हेतुः । तत्र यदि
जीवनसंवर्द्धकं कर्म्मास्ति तदा मलपाकोऽन्यथा
धातुपाकः । स च रसादिशुक्रान्तधातूनां पाको
बोद्धव्यः ॥*॥ तत्र धातुपाकस्य लक्षणमाह ।
"निद्रानाशो हृदि स्रंशो विष्टम्भो गौरवा-
रुची ।
अरतिर्बलहानिश्च धातूनां पाकलक्षणम् ॥"
विष्टम्भ उदरस्य । गौरवं गात्राणाम् । अन्यच्च ।

"संबाध्यमानो हृदि नाभिदेशे
गात्रेषु वा पाकरुजायुतेषु ।
पीड़ाज्वरार्त्तोऽङ्गुलिभिश्च गच्छेत्
स धातुपाकी कथितो भिषग्भिः ॥"

अपरञ्च ।

"नाभेरूर्द्धं हृदोऽधस्तात् पीड्यते व्यथया यदि ।
धातोः पाकं विजानीयादन्यथा तु मलस्य च॥"

मलपाकलक्षणमाह ।

"दोषप्रकृतिवैकृत्यं लघुता ज्वरदेहयोः ।
इन्द्रियाणाञ्च वैमल्यं मलानां पाकलक्षणम् ॥"

दोषप्रकृतिवैकृत्यं दोषा वातादयस्तेषां प्रकृतिवैषम्यहेतुगौरवादिकरणं तस्य वैकृत्यं वैपरीत्यम् । वैमल्यं मलराहित्यम् । मलानां दोषाणाम् । अन्यच्च ।

"गच्छद्दोषेन्द्रियपक्वस्य पटुता वक्ष्यते यत्र क्रमात्
तृष्णादिप्रशमो ज्वरस्य मृदुता तं दोषपाकं
वदेत् ।
हृन्नाभ्योरतिवेदनातिसरणं तीव्रो ज्वरस्तृष्मद
श्लामाधिक्यमरोचको रतिरिति स्याद्धातु-
पाकाकृतिः ॥"*॥

आमस्याधिक्येन सप्तमदिवसाद्यवध्यतिक्रमे परमावधिमाह । हारीतः ।

"सप्तमी द्विगुणा यावन्नवम्येकादशी तथा ।
एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च ॥"

नवम्येकादशी चागमनदिवसं संविहाय बोद्धव्या तेनागमनदिवसं नीत्वा दशमी द्वादशी च अत्र रात्रिरित्यध्याह्रियते ।

"सन्निपातज्वरी पूर्वं सम्यग्लङ्घनमाचरेत् ।
घृतं शीतं पिबेदग्रः समये भेषजं भवेत् ॥
सन्निपातेन तप्यन्तं पार्श्वरुक् तालुशोषितम् ।
यः पाययेज्जलं शीतं स मृत्युनरविग्रहः ॥"

शीतं अक्वथितम् । घृतं तु शीतं विहितमेव इति लङ्घनम् ॥*॥ अथ वालुकास्वेदः ।

"वातश्लेष्मकृते स्वेदात् कारयेद्वालुकानिर्म्मितात्
स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजान्
खर्परभृष्टपटस्थितकाञ्जिकसंसिक्तवालुकास्वेदः
शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन्॥
श्लोतसामार्द्रवं कृत्वा नीत्वा पावकमाशयम् ।
हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति ॥"

इति वालुकास्वेदः ॥ * ॥

अथ नस्यम् ।

"नैम्बवं श्वेतमरिचं सर्षपाः कुष्ठमेव च ।
वस्तमूत्रेण संपिष्टं नस्यं तन्द्रानिवारणम् ॥"

श्वेतमरिचं गिरियबीजम् । नैम्बवादिनस्यम् ॥

"मधूकसारसिन्धूत्थचोषणकणाः समाः ।
श्लक्ष्णं पिष्ट्वाम्बसा नस्यं दद्यात् संज्ञाप्रबोधनम् ॥"

इति मधूकसारादिनस्यम् ॥

"मातुलुङ्गार्द्रकरसं कोष्णं लवणान्वितम् ।
अन्यद्वा सिद्धविहितं नस्यं तीक्ष्णं प्रयोजयेत् ॥
तेन प्रभिद्यते श्लेष्मा प्रभिन्नश्च प्रमिद्यते ।
शिरोहृदयकण्ठास्यपार्श्वरुक् चोपशाम्यति ॥
मोहामयेन मुग्धं बोधयितुं यादृशः शक्तः ।
कल्पतरुनामधेयो रसो न तादृक् परं
किञ्चित् ॥"

इति नस्यम् ॥*॥

अथ निष्ठीवनम् ।

"जिह्वातालुगलक्लोम मरुत्पित्तेन चोच्छ्रितः ।
तदा न चारयेच्छ्लेष्मं जिह्वायाः खरतां तथा ॥
स्फुटनञ्च तदा जिह्वां लेपयेन्मधुपिष्टया ।
द्राक्षया साज्यपातेन जिह्वा स्यात् सरसा
मृदुः ॥

आर्द्रकस्य रसोपेतं सैन्धवं कटुकत्रयम् ।
आकण्ठाद्वारयेदास्ये निष्ठीवेच्च पुनः पुनः ॥
तेनास्य हृदयक्लोममन्यापार्श्वशिरोगलात् ।
नीलोऽप्याक्लथते श्लेष्मा लाघवं चास्य जायते ॥
पर्व्वभेदो ज्वरो मूर्च्छा निद्राश्लासगलामयाः ।
मुखाच्छिगौरवं लाद्यमुत्क्लेशश्चोपशाम्यति ॥
सकृत् द्विस्त्रियतः कुर्याद्दृष्ट्वा दोषबलाबलम् ।
एतद्धि परमं प्राहुर्भेषजं सन्निपातिनाम् ॥"

इति कवलग्रहः ॥ * ॥

अथावलेहः ।

"कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी
श्लक्ष्णचूर्णीकृतं चैतत् मधुना सह लेहयेत् ॥
एषावलेहिका हन्ति सन्निपातं सुदारुणम् ।
हिक्कां श्वासञ्च कासञ्च कण्ठरोगञ्च नाशयेत् ।
एतद्योज्यं कफोद्रेके चूर्णमार्द्रकजे रसैः ॥"

तन्त्रान्तरे च उक्तम् ।

"अष्टाङ्गं मधुना लिह्यादार्द्रकस्य रसेन वा ।
संमोहं दारुणं हन्यात्तन्द्राकाससमन्वितम् ॥"

इति ।

"सर्वेषु सन्निपातेषु न क्षौद्रमवचारयेत् ।
शीतोपचारि क्षौद्रं स्याच्छीतश्चात्र विरुध्यते ॥
अयमभिप्रायः । सन्निपातज्वरेषु स्नेहनिश्चयार्थं सर्व्वदा स्नेहो हित उक्तः । अत्राग्निसम्बन्धाद्देहस्योष्णता तिष्ठेद्व । उष्णेन मधुना विरोधः । उक्तञ्च सुश्रुतेन ।

"उष्णे विरुध्यते सर्वं विषान्वयतया मधु ।
उष्णार्त्तमुष्णं रुणद्ध तन्निहन्ति यथा विषम् ॥"

इति ॥

शीतोपचारि क्षौद्रमिति । शीतेनोपचारोऽस्यास्तीति शीतोपचारि । शीतश्चात्र सन्निपाते विरुध्यते । अयमवलेहः प्रायेणोर्द्ध्वजत्रुजरोगहरत्वात् सायमुपयुज्यते । यत उक्तं चरकेण ।

"ऊर्द्ध्वजत्रुगदघ्नो या सा सायमवलेहिका ।
अधोरोगहरी या सा भोजनात् प्राक् प्रयुज्यते ॥"

पौष्करं पुष्करमूलं तदलाभे कुष्ठं देयम् । शृङ्गी ककटशृङ्गी । व्योषं शुण्ठीपिप्पलीमरिचानि । यासो यवासः । केचिद्यासस्थाने यवानीं प्रक्षिपन्ति । कारवी मगरेला इति लोके । अष्टाङ्गावलेहिका ॥ * ॥

"स्विन्नमामलकं पिष्ट्वा द्राक्षया सह मेलयेत् ।
विश्वभेषजसंयुक्त मधुना सह लेहयेत् ।
तेनाश्च शाम्यति श्वासः कासो मूर्च्छारुचि-
स्तथा ॥"

इत्यवलेहः ॥ * ॥

अथाञ्जनम् ।

"शिरीषबीजगोमूत्रकृष्णामरिचसैन्धवैः ।
अञ्जनं स्यात् प्रबोधाय सरसोनगिलावचैः ॥"

इति शिरीषबीजाद्यञ्जनम् ॥ * ॥

"अयोरजः खे तल्लोध्रमञ्जनं मरिचं तथा ।
गोपित्तेन समायुक्तं तन्द्रानाशनमुत्तमम् ॥"

गोपित्तं गोरोचना । लौहचूर्णाद्यञ्जनम् ॥*॥

"अञ्जनं सम्यगारब्धं मधुसिन्धुगिलोषणैः ।
प्रमोहद्रोहि भवति भाषितं भिषजां वरैः ॥"

गिला मनःशिला । उषणं मरिचम् । इत्यञ्जनम् ॥ * ॥ अथ क्वाथः ।

"सूतं विषञ्च मरिचं तुल्यकं नवसादरम् ।
चूर्णितं खरसेनैव धूर्त्तपत्ररसोनयोः ॥
सन्निपातकृते मोहे मूर्द्ध्नि लिम्पेत् पदोपरि ।
अक्षिण्यास्यनसेनैव लेपं कुर्यात् पदोपरि ॥"

पदं पौष्क इति लोके ।

"विल्वश्योनाकगम्भारीपाटलागणिकारिकाः ।
पाचनं वातकफहृत् पञ्चमूलमिदं महत् ॥
शालपर्णी पृश्निपर्णी हृस्वती कण्टकारिका ।
गोक्षुरो वातपित्तघ्नं कनीयः पञ्चमूलकम् ॥
उभयं दशमूलं तत् पिप्पलीचूर्णसंयुतम् ।
सन्निपातज्वरं हन्ति हृत्कण्ठग्रहनाशनम् ॥
तन्द्रावातकफातङ्कश्वासपार्श्वार्त्तिकासनुत् ।
सङ्घान्ति यानि मूलानि काष्ठगर्भाणि यानि
च ।
तेषान्तु वल्कलं ग्राह्यं ह्रस्वमूलानि कृत्स्नशः॥"

अत्र विल्वादीनां पञ्चानां मूलस्य वल्कलं ग्राह्यम् । दशमूलक्वाथः ॥ * ॥

"दशमूलीकषायस्तु स पौष्करकणान्वितः ।
सन्निपातज्वरे देयः श्वासकाससमन्विते ॥"

इति द्वादशाङ्गक्वाथः ॥ * ॥

"चिरज्वरे वातकफोल्वणे वा
त्रिदोषजे वा दशमूलमिश्रः ।
किराततिक्तादिगणः प्रयोज्यः
शुद्धयर्थिने वा त्रिहता विमिश्रः ॥"

किराततिक्तादिर्यथा,—

किराततिक्तकी मुस्तं गुडूची विश्वभेषजम् ।
किरातादिगणो ह्येष चातुर्भद्रकमित्यपि ॥'

इति चतुर्दशाङ्गक्वाथः ॥ * ॥

"दशमूली शठी शृङ्गी पौष्करं सदुरालभम् ।
भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी ॥ ॥
अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः ।
कासहृद्ग्रहपार्श्वार्त्ति श्वासहिक्कावमीहरः ॥"

इत्यष्टादशाङ्गक्वाथः ॥ * ॥

"भूनिम्बदारुदशमूलमहौषधाब्द-
तिक्तेन्द्रबीजधनिकैभकणाकषायः ।
तन्द्राप्रलापकसनारुचिदाहमोह-
श्वासत्रिदोषजनितज्वरनाशनः स्यात् ॥"

इति द्वितीयोऽष्टादशाङ्गक्वाथः ॥

एतस्यैव गुण उक्तो वङ्गसेनेन ।
"अष्टादशाङ्गमित्येष मृत्युकाल्पं ज्वरं जयेत् ॥"
इति ॥*॥

अथ सन्निपातज्वरे रसाः ।
"विषं त्रिकटुकं गन्धं टङ्कणं मृतशुल्बकम् ।
धुस्तूरस्य च बीजानि हिङ्गुलं नवमं क्षितम् ॥
एतानि समभागानि दिनैकं विजयाद्रवैः ।
मर्दयेच्चणकाकारा कर्त्तव्या वटिकाथ सा ॥
भक्षणीया तु पातव्यो रविमूलकषायकः ।
मृतसंजीवनी नाम्ना सन्निपातज्वरान्तकृत् ॥"
इति मृतसञ्जीवनी वटिका ॥*॥

सन्निपातज्वरे रसप्रदीपे ।
"गुडमूतसमं गन्धं सूतांशं मृततास्रकम् ।
त्रिभिस्त्रिगैर्गवां क्षीरैर्मर्दयेदातपे खरे ॥
मर्दयेदिनमेकन्तु निर्गुण्डीशिग्रुजद्रवैः ।
विधाय गोलं तं गोलमन्धमूषागतं पचेत् ॥
त्रियामान् वालुकायन्त्रे ततः खञ्जे विचूर्णयेत् ।
अष्टमांशं विषं तत्र क्षिपेत्तेनापि मर्दयेत् ॥
त्रिनेत्राख्यो रसो ह्येष क्षयो गुल्माहयोन्मितः ।
पञ्चकोलकषायेण छागीदुग्धेन वा सह ॥
रसेनानेन भुक्तेन सन्निपातज्वरो महान् ।
संक्षयं व्रजति क्षिप्रं कर्त्तव्यो नात्र संशयः ॥"
इति त्रिनेत्रो रसः ॥*॥

सन्निपातज्वरे रसप्रदीपे ।
"भस्म षोड्शनिष्कं स्यादारख्योपलसम्भवम् ।
मरिचं निष्कमात्रञ्च विषं निष्कं विचूर्णयेत् ॥
रसो भस्मेश्वरो नाम्ना सन्निपातज्वरान्तकृत् ।
एकगुञ्जामितो भक्ष्य आर्द्रकस्य द्रवेण हि ॥"
इति भस्मेश्वरो रसः ॥ * ॥

सन्निपातज्वरे रसेन्द्रचिन्तामणौ ।
"द्वौ कर्षौ सूतकाद्भ्राभ्रौ गन्धकाद्दौ तथैव च ।
यत्नतस्तुभयं मर्द्यं दिनं हंसपदीरसैः ॥
कल्कस्य वटिकां कृत्वा निःक्षेपेत् काचभाजने ।
कर्षैकमभृतं तत्र क्षिप्त्वा वक्त्रं निरोधयेत् ॥
कुपिकायाः परौ भागौ वालुकाभिश्च पूरयेत् ।
सार्द्धं यावद्दहोरात्रं तावत्तत्र पचेद्रसम् ॥
दीपमात्रोऽनलो देयः साङ्गशीतं समुद्धरेत् ।
तोलार्द्धमभृतं तत्र क्षिपेत्तावत्तथौषणम् ॥
भक्षितो रक्तिकामात्रो रसस्त्वग्निकुमारकः ।
सन्निपातज्वरं हन्याद्दातं मन्दाग्नितामपि ॥
शूलं संग्रहणीं गुल्मं क्षयं पाण्डुगदं तथा ।
श्वासकासादिकान् सर्व्वान् गदानेष विनाशयेत् ॥"
इति अग्निकुमारो रसः ॥*॥

सन्निपातज्वरादिषु रसेन्द्रचिन्तामणौ ।
"गन्धेशटङ्कमरिचं विषं धत्तूरजैर्द्रवैः ।
दिनसंमर्दितं शुष्कं पञ्चवक्त्रो रसो भवेत् ॥
आर्द्रकस्य द्रवेणैष दातव्यो रक्तिकामतः ।
सन्निपातज्वरं घोरं नाशयेन्नात्र संशयः ॥"
इशः पारदः । टङ्कः टङ्कणः । पञ्चवक्त्रो रसः ॥*॥
सन्निपातज्वरे रसेन्द्रचिन्तामणौ । अथ शीतज्वरे रसाः ।

"सूतकं गन्धकञ्चैव हरितालं मनःशिलाम् ।
एकनिष्कं द्विनिष्कञ्च चतुर्निष्कं तथैव च ॥
पञ्चनिष्करसैः कारवेल्लाः कल्कं प्रकल्पयेत् ।
ताम्रपात्राणि तुल्यानि तेन कल्केन लेपयेत् ॥
सरावसंपुटे तानि कृत्वा तेषामुपर्य्यपि ।
दद्यात्तां पिष्टिकां पश्चात् पुटपाकेन पाचयेत् ॥
ततः संचूर्णयेदेव रसः क्षौद्रेण भक्षितः ।
यश्चैकमात्रया हन्ति घोरं शीतज्वरं ध्रुवम् ॥"
पाराटङ्कः १ गन्धकटङ्कः २ हरितालटङ्कः ४
मनःशिलाटङ्कः ५ ताम्रपत्रटङ्कः १२ । इति
शीतज्वरारिरसः ॥*॥ रसप्रदीपे ।
"पारदं गन्धकं तुल्यं दरदञ्च विषं समम् ।
विषादष्टगुणं योज्यं मरिचं विश्वभेषजम् ॥
अजगन्धा तु विजया कासमर्दकठिल्लकः ।
चतुर्णाञ्च रसैरेतच्चूर्णं यत्नेन मर्दयेत् ॥
तुलस्यास्तु दलैः सार्द्धं भक्षितो रक्तिकामितः ।
हन्ति शीतज्वरं घोरं नात्रायं शीतकेशरी ॥"
इति शीतकेशरीरसः ॥*॥
रसप्रदीपे ।
"तालकं शुक्तिकाचूर्णं तुल्यं तत्रोभयोपरि ।
नवमांशञ्च तुल्यं स्यात् मर्दयेत् कन्यकाद्रवैः ॥
तत्तु संशुष्कमुपलेर्वन्यैर्गजपुटे पचेत् ।
शीतं तच्चूर्णयेदर्द्धं गुञ्जामातं घृतायुतम् ॥
प्रभाते भक्षयेत्तेन याति शीतज्वरक्षयम् ।
वान्तिर्भवति कस्यापि कस्यापि न भवत्यपि ॥"
इति शीतभञ्जी ॥*॥

"रसकं पारदं तुल्यं तालकं गन्धटङ्कणम् ।
सर्व्वमेतत् समं चूर्णं कारवेल्लीरसैर्दिनम् ॥
मर्दयेत्तेन शुद्धस्य रसकादिसमस्य तु ।
ताम्रस्य भाजनस्यान्तर्लिप्त्वा दर्द्धाङ्गुलोन्मितम् ॥
तत् पचेदालुकायत्ने यवा यावत् स्फुटन्ति हि ।
शीतलं तद्धि गृह्णीयात्ताम्रपात्रोदराङ्घिकम् ॥
शीतभञ्जो रसो मात्रामितो मरिचसंयुतः ।
भक्षितः पर्षखण्डेन नाशयेद्विषमज्वरान् ॥"
इति शीतभञ्जो रसः ॥*॥
शीतज्वरादिविषमज्वरेषु रसेन्द्रचिन्तामणौ ।
"तालको दरदोद्भूतपारदो गन्धकः शिला ।
क्रमाद्भागैर्हरितं कारवेल्लाम्बुमर्दितम् ॥
अनेनास्य प्रमाणेन ताम्रपात्रौ प्रलेपयेत् ।
अधोमुखौ दृढे भाण्डे तान्निरुध्याथ पूरयेत् ॥
चुल्लीं वालुकया पक्वमग्निं प्रज्वालयेद्दृढम् ।
शीतं संचूर्ण्य माषोऽस्य नागवल्लीदले स्थितः ॥
भक्षितो मरिचैः सार्द्धं समस्तान् विषमज्वरान्
शीतदाहादिकान् हन्ति पथ्यं शाल्योदनं
पयः ॥"
इति शीतभञ्जीरसः ॥*॥

रसरत्नप्रदीपे ।
"रसं गन्धं विषञ्चैव समं शुद्धञ्च टङ्कणम् ।
मर्दयेत् खल्वमध्ये तु यावत् कज्जलसन्निभम् ॥
नकुलस्य मुखे क्षिप्त्वा दृढं संवेष्टयेद्दृढम् ।
स्थापयेत् मृण्मये पात्रे अधोऽर्द्धलवणं न्यसेत् ॥
मुखे भाण्डं संनिरुध्य चतुर्यामं दृढाग्निना ।

माङ्गशीतं समुद्धृत्य कृत्वा खल्वेषु कज्जलीम् ।
गुञ्जाद्वयप्रमाणेन नस्यकर्म्मणि योजयेत् ।
वामभागे ज्वरं हन्ति तत्क्षणात् कौतुकं महत् ।
योजयेद्दक्षिणे भागे आरोग्यं नियतं भवेत् ॥"
इत्यर्द्धनारीनाटेश्वरो रसः ॥*॥

शीतज्वरादिविषमज्वरेषु रसरत्नप्रदीपे ।
"कट्फलं त्रिफलादारुचन्दनं सपरूषकम् ।
कटुकापञ्चकोशीरं विपचेत् कर्षकं जले ॥
त्रिदोषदाहदुःखार्त्तं पानमात्रेण पूजितम् ।
दीर्घकालज्वरार्त्तानामेतत् स्यादमृतोपमम् ॥"
कर्षं कट्फलादिगणौषधानां समुदितानां जले
प्रस्थमिते विपचेत् अर्द्धशेषम् । कट्फलादिपाठं
दृष्टायां दाहे च ।
"सन्निपाते तु दाहार्त्तं यः सिञ्चेच्छीतवारिणा
आतुरः स कथं जीवेद्भिषग्वा स कथं भवेत् ॥"
एष सन्निपातिनो दाहे शीताम्बुसेकनिषेधो रुग्-
दाहान्यत्र तत्र व्याप्याशयगाहनस्योक्तत्वात्॥*॥
अथान्नमाह ।
"दुःस्पर्शगोचुरशुद्धासिद्धमाहारमर्पयेत् ।
दोषशान्तिबलाग्न्यर्थं त्रिदोषज्वरिणे भिषक् ॥"
दुःस्पर्शो यवागूः । आहारमुचितमन्नम् ॥
"लाजशक्तून् समश्नीयात् सैन्धवेन समन्वितान्
ते चेज्जीर्य्यन्त्यविघ्नेन ज्वरी जीवेत्तदा ध्रुवम्॥"
इति केचित् ॥

रक्तपित्ते हितत्वेन तृष्णादाहज्वरेषु च ।
लाजानां शक्तवः शीता न च तेऽत्र हिता
मताः ॥
पाचनो दीपनः सोष्णो लाजमण्डो यतः स्मृतः ।
दशमूलादिसंसिद्धः सन्निपातज्वरे हितः ॥
सन्निपातज्वरी यस्तु कथ्यते प्रलपन्नपि ।
किञ्चिदेव न जानाति चिकित्सा तस्य कथ्यते ॥
अभ्यञ्जयेत् पुराणेन सर्पिषा पूर्व्वमेव तम् ।
बलाराजागुडूच्यार्ककैलेय परिषेचयेत् ॥
वर्त्तको वर्त्तका लावो वार्त्ताकस्तित्तिरिः शशः ।
कुलिङ्गश्च रसैरेषां तर्पयेत यथानलम् ॥"
वर्त्तकः बटेर इति लोके । वर्त्तका बटई इति
लोके । वार्त्ताको वातचटक इति निर्घण्टः ॥
वगैरा इति लोके । कुलिङ्गो गरगरैया इति
लोके ।
"सन्निपाते क्षुधार्त्तं यो भोजयेत् पिशितौदनम्
स कथं भिषगाख्यान्तु लभते मनुजाधमः॥"*॥
अथ वातोल्बणसन्निपातज्वरस्य चिकित्सा ।
"पञ्चमूलीकषायन्तु दद्याद् वातोत्तरे ज्वरे ।
भृशोष्णं वा सुखोष्णं वा दृष्ट्वा दोषबलाबलम्॥"
पञ्चमूली मदतो प्रथमं प्रामाण्यस्यागे वचना-
भावात् ॥*॥ अथ पित्तोल्बणसन्निपातज्वरस्य
चिकित्सा ।
"परूषकाणि त्रिफला देवदारु च कट्फलम् ।
चन्दनं पद्मकं चैव तथा कटुकरोहिणी ॥
पृश्निपर्णी मृतं त्वेभिर्हृतं शीतलं जलम् ।
पित्तोत्तरे तृषामेतत् सन्निपाते चिकित्सितम् ॥"
इति पर्षकादिक्वाथः ॥*॥

"किराततिक्तकं मुस्तं गुडूची विश्वभेषजम्।
पाठोदीच्यं मृणालञ्च घृतं पित्ताधिके पिबेत्॥"
इति किरातादिसप्तकम्॥*॥
अथ कफोल्वणसन्निपातज्वरस्य चिकित्सा।
"हृद्दत्वो पौष्करं भार्गी यटी शृङ्गी दुरालभा।
वत्सकस्य तु बीजानि पटोलं कटुरोहिणी॥
हृद्दत्वादिर्गणः श्रस्तः सन्निपाते कफोत्तरे।
श्वासादिषु च सर्व्वेषु हितः सोपद्रवेष्वपि॥"
इति वृहत्यादिक्वाथः॥*॥
अथ वातपित्तोल्वणसन्निपातज्वरस्य चिकित्सा
"वातपित्तहरं द्रव्यं कनीयः पञ्चमूलकम्।
तत्क्वाथो मधुना हन्ति वातपित्तोत्तरं ज्वरम्॥"
इति लघुपञ्चमूलम्॥*॥
अथ वातश्लेष्मोल्वणसन्निपातज्वरचिकित्सा।
किराततिक्तकं मुस्तं गुडूची विश्वभेषजम्।
चातुर्भद्रकमित्याहुर्व्वातश्लेष्मोल्वणे ज्वरे॥"
इति चातुर्भद्रकक्वाथः॥*॥
अथ पित्तश्लेष्मोल्वणसन्निपातज्वरचिकित्सा।
"पर्पटः कट्फलं कुष्ठमुशीरं चन्दनं जलम्।
नागरं मुस्तकं शृङ्गी पिप्पल्येषां घृतं हितम्।
दद्यादाश्वग्निमान्ध्येषु पित्तश्लेष्मोल्वणे ज्वरे॥"
इति पर्पटादिक्वाथः॥*॥
अथ वातपित्तश्लेष्मोल्वणसन्निपातज्वरचिकित्सा
"नागरं धान्यकं भार्गी पञ्चकं रक्तचन्दनम्।
पटोलं पिचुमर्दञ्च त्रिफला मधुकं वला॥
शर्करा कटुका मुस्ता गजाह्वा व्याधिघातकः।
किराततिक्तमसृता दशमूली निदिग्धिका॥
योगराजो निहन्त्येव सन्निपातत्रिकोल्वणम्।
सन्निपातसमुत्थानं मृत्युमप्यागतं जयेत्॥"
गजाह्वा गजपिप्पली। व्याधिघातकः भारग्वधः।
निदिग्धिका ईषद्गुण्यार्थं पृथक् पठिता। इति
योगराजक्वाथः॥*॥ अथ प्रवृद्धमध्यक्षीनवातादिजनितसन्निपातज्वराणां यथां तन्त्रेण
चिकित्सामाह।
"प्रवृद्धं कर्षयेद्दोषं क्षीणं संवर्द्धयेद्विषक्।
चिकित्सेयं विधातव्या दोषयोर्व्वृद्धिहानयोः॥"
अस्यायमर्थः। प्रवृद्धं दोषं कर्षयेत् तत्क्षैण्यहेतुभिरौषधान्नविहारैः क्षपीकृत्य समीकुर्य्यात्
क्षीणं दोषं संवर्द्धयेत्। तद्वृद्धिहेतुभिरौषधान्नविहारैर्वर्द्धयित्वा समीकुर्य्यादित्यर्थः।
"प्रवृद्धे समिते दोषे मध्यमः स्वयमेव हि।
शान्तिं याति समं नीते त्वनुबन्धेऽनुबन्धवत्॥"
अस्यायमर्थः। वर्षासु वायुरनुबन्धः सेव्यः।
प्रधानमिति यावत्। पित्तश्लेष्माणावनुबन्धौ
वायोरनुचरौ शरदि पित्तमनुबन्ध्यं कफोऽनुबन्धः। वसन्ते कफोऽनुबन्धो वातपित्ते अनुबन्धौ
तत्र यथानुबन्धेन प्रशमं नीतोऽनुबन्धः स्वयमेव
शान्तिं याति। तथा प्रवृद्धे दोषे शमिते क्षपयित्वा समीकृते मध्यमो दोषो हि निश्चयेन
स्वयमेव शान्तिं याति प्रकृतो भवतीत्यर्थः॥*॥
अथ शीतादीनां सन्निपातज्वराणां त्रयोदशानां विशिष्टा चिकित्सा। तत्र शीताङ्गस्य
चिकित्सामाह।
"भास्वन्मूलं जीरकं व्योषभार्गी-
व्याघ्रीशुण्ठीपुष्करं गोजलेन।
सिद्धं सद्यः शीतगात्रादिमोहे-
श्वासश्लेष्मोद्रेककासान्निहन्ति॥"
भास्वन्मूलं अर्कमूलम्।
"कर्कोटिकाकन्दरजः कुलत्थ-
क्षत्रावचाकट्फलक्षत्रजीरैः।
किराततिक्तानलकट्वलावु-
पथ्याभिरुद्वर्त्तनमत्र शस्तम्॥"
कर्कोटिकाकन्दरजः खरसामूलरजः।
"रसविषमरिचमरेवग्रियफलभस्मै कभूचतुर्वसुभिः।
भागैर्म्मितमुद्गूनमिदममितस्वेदशैत्यहरम्॥"*
अथ तन्द्रिकस्य चिकित्सा।
"क्षुद्रास्मृतानागरपौष्कराणि
मृतानि पीतानि शिवायुतानि।
शुण्ठीकणागस्थिरसोषणानि
नस्येन तन्द्राविजयौषधानि॥
मरिचकपञ्चपचा वचा रुक्
क्षमिहरनागरशर्व्वरीगवाक्षः।
हृगलकजलकल्किता नितान्तं
नसि निहिता ननु तन्द्रिकं जयन्ति॥"
कपः बालकः। पञ्चपचा दारुहरिद्रा। रुक्
कुष्ठम्। क्षमिहरो विड्डङ्गः। शर्व्वरी हरिद्रा।
गवाक्षी इन्द्रवारुणी। नसि नासिकायाम्।
"तुरङ्गलालास्रवणोत्तमेन्द्रः
मनःशिलामागधिकामधूनि।
नियोजितान्यक्षिणि निक्षितं द्राक्
तन्द्रां सनिद्रां विनिवारयन्ति॥".
स्रवणोत्तमं सैन्धवम्। इन्द्रः कर्पूरः। निद्रा
अतिनिद्रा॥*॥ अथ प्रलापकस्य चिकित्सा।
"सतगरवरतिक्तो रेवताभोदतिक्ता-
नलदतुरगगन्धाभारतीहारङ्गराः।
मलयजदशमूलीशङ्खपुष्पीसुपक्वाः
प्रलपनमपहन्युः पानतो नातिदूरात्॥"
वरतिक्तोऽत्र पर्पटो न तु महानिम्बस्तन्नान्तरानुरोधात्। नलदं लामज्जकम्। तदलाभादुशीरं ग्राह्यम् भारती ब्राह्मी। वरश्री
इति लोके। हारङ्गरा द्राक्षा।
"साम्बुनैरञ्जनैर्नस्यैस्तीक्ष्णै स्तिमितसेवनैः।
सर्व्वतो विकृतं चित्तमस्य प्रकृतिमानयेत्॥"*॥
अथ रक्तष्ठीविनचिकित्सा।
"रोहिषधन्वयवासकवासा-
पर्पटगन्धलताकटुकाभिः।
शर्करया समभेद कषायः
शतजष्ठीविन उदित उपायः॥"
रोहिषं सुगन्धलक्षविशेषः। रोहित इति
लोके। गन्धलता प्रियङ्गुः।
पद्मकचन्दनपर्पटमुस्ता-
जातिवरारुणचन्दनवारि।
क्लीतकनिम्बयुतं परिपक्वं
वारि भवेदिह शोणितहारि॥"
क्लीतकं यष्टीमधुकम्। इह रक्तष्ठीविनि।
"मधुकमधूकपरुषकषाय-
चन्दनपद्मवदारुसनाथः।
शीपर्णीफलशीतकषायः
तर्पयति इह स्यादजयाय॥"
पद्मकं पत्रकम्। पाथः वालः। सनाथः सप्रधानः। शीपर्णी गम्भारी॥*॥ अथ भग्ननेत्रस्य चिकित्सा।
"तुरङ्गगन्धालवणोपगन्धा-
मधूकसारोपणमागधीभिः।
वस्त्राम्बुशुण्ठीलसुनान्वितासि-
र्नस्यं त्वसभुग्नदृशं करोति॥"*॥
अथाभिन्यासस्य चिकित्सा।
"शृङ्गीभार्य्या भयाजाजीकणाभूनिम्बपर्पटैः।
देवदारुवचाकुष्ठयासकट्फलनागरैः॥
मुस्ताधान्याकृतिक्तेन्द्रयवपाठाहरेणुभिः।
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकैः॥
विशालारग्वधारिष्टशटीवाकुचिकाफलैः।
विड्डङ्गरजनीदार्व्वीयवानीद्वयसंयुतैः॥
समांशैर्व्विहितः क्वाथो हिङ्ग्वार्द्रकरसान्वितः।
अभिन्यासज्वरं घोरं हन्ति तन्द्राञ्च तत्क्षणात्
प्रमोहं कर्णशूलञ्च सन्निपातांस्त्रयोदश।
हिक्कां श्वासञ्च कासञ्च तथा सर्व्वानुपद्रवान्॥"
इति शृङ्ग्यादिक्वाथः॥*॥
अथ जिह्वकस्य चिकित्सा।
"किराततिक्ताकुलकृत्कलिङ्ग-
कर्चूरकृष्णाकटुतैलयुक्तः।
अक्षद्रवः संगमयेद्रसज्ञा
दोषांस्ततो दाशरथिर्यथाग्निम्॥"
आकुलकृत् अकरकरहा इति लोके। कलिङ्गं
कुलिञ्जन इति लोके। अक्षद्रवः बीजपुराद्रसः। इति किरातादिकवलः॥*॥
"शालूरपर्णी मालूरमूलामयमधूद्भता।
गम्भूकपुष्पी सहिता सेव्या वाचां विशुद्धये॥"
शालूरपर्णी ब्राह्मी। मालूरमूलं विल्वमूलम्॥
आमयः कुष्ठम्। गम्भूकपुष्पी शङ्खपुष्पी। शालूरपर्ण्यादिरवलेहः॥*॥
"क्षुद्रा नागरपुष्करामृतलता ब्राह्मी वचा-
सुव्रता।
भार्गी वासकया सतोयसुरसा क्वाथो जयेज्जिह्वकम्।
विश्वावर्ष्माविभावरीयुगवरावत्सादनीवारिद-
व्याघ्रीनिम्बपटोलपुष्करजटारुग्दारुभिर्व्वा
कृतः॥"
पुष्करं पुष्करमूलम्। तथा चामरसिंहः।
"मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे।"
सुव्रता गन्धपलाशी काश्मीरे प्रसिद्धा। सुरसा
तुलसी। विश्वादिर्योगान्तरम्। वर्ष्म पर्पटः॥
विभावरीयुगं हरिद्रा दारुहरिद्रा च। वरा
त्रिफला। वत्सादनी गुडूची। व्याघ्री कण्ट-

कारिका। रुक् कुष्ठम् ॥*॥ अथ सन्निगस्य चिकित्सा।
"शटीसुरतरुत्तमाः खविरदारुरास्नाः समाः
सनागरसुधान्विताः शिव शतावरीसंयुताः।
मृदुज्वलनपाचिताः सह पुरेण सन्निग्रह-
व्यथापहतये हृषा गिरिरसेवनं मा कृथाः ॥"
उत्तमा त्रिफला। खविरदारु विधारा इति लोके। सुधा गुडूची। पुरो गुग्गुलुः।
"वचाकवचकच्छुरासहचरामृताभङ्गुरा-
सुराङ्घ्रिघननागरातरुणदारुरास्नापुराः।
हृषातरुणभीरुभिः सह भवन्ति सन्निग्रह-
व्यथोरुजड़िमक्लमभ्रमणपक्षघातद्रुहः ॥"
कवचः पर्पटकः। कच्छुरा यवासः। भङ्गुरा अतिविषा। सुराङ्घ्रिः देवदारु। अतरुणदारु हरिद्रारु। पुरो गुग्गुलुः। हृषा हरिद्रन्ती एरण्डवत् पत्रविटपा तदलाभे दन्ती च ग्राह्या समानगुणत्वात्। तरुण एरण्डः। भीरुः शतावरी।
"सुरदारु शटी सुधालता
सुवहा ग्रन्थियुता मृता जले।
सपुरा ग्रसयन्ति सेविताः
सततं सन्निगतं सदागतिम् ॥"
सुवहा रास्ना।
"मुस्तं रक्तप्रणदावाषदारु-
च्छिन्नारास्नाभीरुकर्कूरतिक्ता।
वासा विश्वा पञ्चमूलीयुगाख्या
हन्यान्मन्यास्तम्भसन्निग्रहार्त्तीः ॥"
प्रणदा हरितकी। वाणः नीलपुष्पसहचरः। तिक्ता कटुका ॥*॥ अथान्तके विधिः।
"दृष्टापहाय व्रतमुष्णवारि
ज्वरारिपूयादिगदापहारि।
ज्वरच्छिदं जीवितदञ्च नित्यं
मृत्युञ्जयं चेतसि चिन्तयस्व ॥"
इह अन्तके व्रतं लङ्घनादिनियमम्।
"कर्पूरप्रकरावदातवपुषं सद्योगमुद्रान्वितं
शङ्खेन्दुजनेषु भावुकजुषं भालस्थचन्द्रक्षुषम्।
संपूर्णामृतकुम्भसम्भृतकरं शुभ्राब्जमालाधरं
पिङ्गोत्तुङ्गजटाकलापरुचिरं चन्द्रार्द्धमौलिं स्तुहि ॥
भिषग्भिरिति निर्णीतं सन्निपातेऽन्तकाभिधे।
भेषजं जाह्नवीनीरं वैद्यो गोविन्द एव हि॥"*
अथ रुग्दाहस्य चिकित्सा।
"उशीरचन्दनोदीच्यद्राक्षामलकपर्पटैः।
शृतं शीतं जलं दद्याद्दाहलड्ज्वरशान्तये ॥"
॰ इति षड़ङ्गपानम् ॥*॥
"सग्रितो निशि पर्य्युषितः प्रातर्धान्याक-
तण्डुल क्वाथः।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पित्तम् ॥"
धान्याकतण्डुलाः कण्डितधान्यकानि। इति धान्याकक्वाथः ॥*॥
"पथ्यां सैलघृतक्षौद्रैर्लिहन् दाहज्वरापहाम्।
कासासृक्पित्तवीसर्प श्वासान् हन्ति वमीमपि॥"
तैलघृतक्षौद्रैरित्यत्र न समुच्चयः स्नेहेन केवलेन मधुनापि लिह्यात्। इति पथ्यावलेहः ॥*॥
"प्रशमयति दाहमचिरात् दधियुक्कर्क्कम्भु-
पल्लवैर्लेपः।
लेपो हिमकरमलयजनिम्बदलैस्तक्रपिष्टैर्वा॥"
हिमकरः कर्पूरः। तथा च धनसारचन्द्रसंज्ञ इत्यमरः॥
"उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ।
शीताम्बुधारा बहला पतन्ती
निहन्ति दाहं त्वरितं ज्वरञ्च ॥
शीताम्बसा तु शतशश्च विलोड़ितेन
गव्येन चन्दनयुतेन घृतेन दिग्धा।
दाहज्वरी सकमलोत्पलमाल्यधारी
क्षिप्रं विशेत् सलिलकोष्ठमनल्पकालम् ॥
काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम्।
अथ शीतक्रसंस्निग्धशीतलीकृतवाससा ॥"*॥
अथात्रमाह।
"दाहावमर्दितं चामं निरन्नं व्रणयान्वितम्।
शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥"
लाजतर्पणं लाजशक्तभिरुपतर्पणम्।
"वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः।
नार्य्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः ॥
मुक्तावली चन्दनशीतलानां
सुगन्धपुष्पाम्बरभूषितानाम्।
स्तनस्थिनीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम् ॥
प्रह्लादं चास्य विज्ञाय ताः क्षीरपनयेत् पुनः।
हितञ्च भोजयेदन्नं येनाप्नोति सुखं महत्॥"
प्रह्लादकं कामशतं हर्षम् ॥*॥ अथ चित्तभ्रमस्य चिकित्सा।
"कणोषणोग्रालवणोत्तमानि
करञ्जबीजं चणदामलानि।
पथ्याचसिद्धार्थकहिङ्गुगुग्गो-
युतानि वस्ताम्बुविमिश्रितानि ॥
पिष्ट्वा गुटीयं नयने विधेया
प्रचेतनेति ग्रथितान्विताख्या।
चित्तभ्रमापस्मृतिभूतदोष-
शिरोऽक्षिरोगभ्रमनाशहेतुः ॥"
वस्ताम्बु छागमूत्रम्।
"कुम्भोद्भवतरोरभ्रोगुड़विश्वाकणान्वितम्।
निहितं नसि नूनं स्यात् चित्तभ्रमविनाशनम्॥"
कुम्भोद्भवतरोरभ्रः अगस्तिहृत्पत्रकल्करसः।
"मुरामूर्ज्जमेधाद्वामधूकमलयोद्भवैः।
मरुत्तरुमधूच्छिष्टैः पुरपाणिजपांशुभिः ॥
लोहलामज्जकैलाभिर्धूपयित्तभ्रमापहः।
यद्दोषहरः शीतः सौभाग्यकर उत्तमः॥"
मुरा एकाङ्गी। मूर्ज्जो बाला। मरुत्तरुः देवदारुः। पुरः गुग्गुलुः। पाणिजः नखः। पांशुः पर्पटकः। लोहं अगुरुः। लामज्जकं उशीरवत् पीतच्छविलक्षणविशेषः। तदलाभे उशीरं ग्राह्यम्।
"मृद्वीकामरदारुमत्स्यशकलामुस्तामलकोऽमृता
पथ्यारेवतरामसेनकरजोराजीफलैः संयुताः।
हन्युश्चित्तरुजोऽथ दर्द्रु रदला द्राक्षा पटोली पयः
पथ्या पर्पटराजहृत्तकटुकाशम्बूकपुष्पः शृताः॥"
मृद्वीका द्राक्षा। मत्स्यशकला कटुका। आरेवतः आरग्वधः। रामसेनकः किरातितिक्तकः। रजः पर्पटकः। राजीफलः पटोलः। अथ योगान्तरमाह। दर्द्रुलदला मण्डूकपर्णी। सा च त्रयार्था ब्राह्मी मञ्जिष्ठा शोणक्षा। तथाप्यत्र ब्राह्मी ग्राह्या। यत उक्तं गुणग्रन्थे। ब्राह्मी मतिप्रदा मेध्या ज्वरघ्नी रसायनीति ब्राह्मी वरभी इति लोके। पयः बालकं राजहृत्तु आरग्वधः। शम्बूकपुष्पी शङ्खपुष्पी ॥*॥
अथ कर्णकस्य चिकित्सा।
"प्रलेपः समस्तं नयत्यल्पमेकः
समुद्भिन्नगोथञ्च रक्तावसेकः।
विपक्वञ्च शस्त्रक्रिया पूयजित् सा
व्रणत्वं गतञ्च द्रुतं तच्चिकित्सा ॥"
अयमर्थः। अल्पं तं कर्णकं एकः प्रलेपः अस्तं नाशं नयति। तच्चिकित्सा व्रणचिकित्सा।
"निशाविशालामयमाणिमन्थ-
दार्वीद्रुदीमूलकृतः प्रलेपः।
प्रभाकरक्षीरयुतप्रभावाद्-
व्यस्तः समस्तोऽप्यथ कर्णकघ्नः ॥"
कुलत्थः कटफलं शुण्ठी कारवी च समांशकैः।
सुश्लोष्णं लेपनं कार्य्यं कर्णमूले मुहुर्मुहुः ॥
गैरिकं कठिनीशुण्ठीकट्फलैः सवचैः समैः।
उष्णैः काञ्जिकसंपिष्टैः प्रलेपः कर्णमूलनुत् ॥
शिग्रुराजिकयोः पिष्ट्वा कर्णमूलं प्रलेपयेत्।
कर्णमूलभवः शोथस्तेन लेपेन शाम्यति ॥
अग्निशिरजलपरिमृदितं मरिचकणाजोर-
सिन्धुजं त्वरितम्।
नस्यविधिसेवितं ननु कर्णकरुक् नाशमुपैति
गदितम्॥
भार्गीजयापौष्करकण्टकारी-
कटुत्रिकोशाधनकुण्डलीभिः।
कुलीरशृङ्गीकटुकारसाभिः
कृतः कषायः किल कर्णकघ्नः ॥"
भार्गी बभनेटी इति लोके। तदलाभे कण्टकारीमूलं ग्राह्यम्। जया गणियार इति लोके। पौष्करं पुष्करमूलम्। उशा वचा। कुण्डली गुडूची। कुलीरशृङ्गी कर्कटशृङ्गी। रसा रास्ना।
"दशमूलमत्स्यशकलाचपला-
त्रिफलामहौषधिकिरातयुतम्।
मरिचं परिक्षपितमाशु बला-
दपहन्ति कर्णरुजः सकलाः ॥"
चपला पिप्पली ॥*॥ अथ कण्ठकुब्जस्य चिकित्सा।
"फलत्रिकत्रपुषमुस्तकहि-
कलिङ्गसिंहाननगर्ज्जरोभिः।

काथः कृतः क्वन्ति कण्ठकुजं
कण्ठीरवः कुञ्जरमाशु यद्वत् ॥"
मिंडाननो वासकः। गर्ब्बरी हरिद्रा।
"किरातकटुकाक्षणाकुटजकण्टकारीशटी-
कलिङ्गकिलिमाभयाकटुककट्फलाम्भोधरैः।
विषामलकपुष्करानलकुलीरशृङ्गौहपै-
र्मंहौषधसखैरयं जयति कण्ठकुजं गणः॥"
शटी कचूरः। कलिङ्गः विभीतकः। किलिमं देवदारुः। कटुकं मरिचम्। विषा अतिविषा। पुष्करं पुष्करमूलम्। हयः वासकः। हयादिभिः किंविशिष्टैः महौषधसखैः महौषधस्य सखिभिः। तेन एतैः सहितेन महौषधेन इत्यर्थः॥ * ॥ अथोल्बणवातादिप्रबृद्धमध्यचौणवातादिहेतुकानां कुम्भीपाकादिसन्निपातज्वराणां त्रयोदशानां चिकित्साभिधीयते सा च तुल्यहेतुकानां विस्फूरकादीनां त्रयोदशानामिव विधातव्या। इति सन्निपातज्वराधिकारः। इति भावप्रकाशः॥
सन्निपातनुत्, पुं, (सन्निपातं नुदतीति। नुद+क्विप्।) नेपालनिम्बः। इति राजनिर्घण्टः॥
सन्निबद्धः, त्रि, सम्यग्बन्धनयुक्तः। संनिपूर्ब्बबन्धधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः॥
सन्निबन्धनं, क्ली, सम्यङ्निश्चितबन्धनम्। सम्यग्विबन्धनम्। संनिपूर्ब्बं कबन्धधातोरनट्प्रत्ययेन निष्पन्नम्॥
सन्निभः, त्रि, (सम्यक् निभातीति। सं+नि+भा+कः।) सदृशः। इति जटाधरः॥ (यथा, भागवते। ३। १३। २२।
"भगवान् यज्ञपुरुषो जगर्ज्जागेन्द्रसन्निभः॥")
सन्निरुद्धगुदः, पुं, (संनिरुद्धं गुदं यस्मात्।) गुह्यद्वारोद्भवरोगविशेषः। इति भावप्रकाशः॥ (यथा, सुश्रुते। ४। २०। ४२।
"संनिरुद्धगुदं रोगं वल्मीकं वह्निरोहिणीम्।
प्रत्याख्याय यथायोगं चिकित्सितमथाचरेत्॥"
तन्निदानादि क्षुद्ररोगशब्दे द्रष्टव्यम्॥
सन्निविष्टः, त्रि, (सं+नि+विश्+क्तः।) उपविष्टः। यथा,—
"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः॥"
इत्यादित्यहृदयम्॥
निकटः। इति केचित्॥
सन्निवृत्तिः, स्त्री, (सं+नि+वृ+क्तिन्।) सम्यङ्निवर्त्तनम्। (यथा, रघुः। १०। २७।
"गतिस्त्वं वीतरागाणामभूयः सन्निवृत्तये॥")
सन्निवेशः, पुं, (संनिविशन्ते अत्रेति। सं+नि+विश+घञ्।) पत्तनादिषु दिगादिपरिच्छिन्नप्रदेशः। पूर्ब्बदिगाद्यवच्छिन्नगृहम्। इति कलिङ्गः॥ पुराद्देर्हिर्विहरणभूमिः। इति स्वाम्यादयः॥ तत्पर्य्यायः। निकर्षणम् २। इत्यमरभरतौ॥ किञ्च।
"नगरादिबहिः स्थैरविहारचारुभूमिषु।
तत्र द्वयं निगदितं सन्निवेशो निकर्षणम्॥"
इति शब्दरत्नावली॥
(यथा, रघुः। १४। ७६।
अगूनयतीरां मुनिसन्निवेशै-
स्तमोऽपहन्त्रीं तमसां वगाह्य॥"
संस्थानम्। यथा, कुमारे। ३। ४५।
"उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये॥")
सन्निहितं, त्रि, (सं+नि+धा+क्तः।) निकटस्थितम्। यथा। ब्रह्मपुराणे।
"षड्रात्रादौ क्षणपक्षे तु भूमौ सन्निहिता भवेत्
यावत् पुष्यममावास्यां दिनानि दश पञ्च च॥"
इति प्रायश्चित्ततत्त्वम्॥
(अग्निविशेषे, पुं। यथा, महाभारते। ३। २२०। १८।
"प्राणानाश्रित्य यो देहं प्रवर्त्तयति देहिनाम्।
तस्य सन्निहितो नाम शब्दरूपस्य साधनः॥")
सन्यस्तः, त्रि, (सं+नि+अस्+क्तः।) सम्यङ्न्यासीकृतः। समर्पितः। यथा,—
"योगसन्यस्तकर्म्माणं ज्ञानसञ्छिन्नसंशयम्।
आत्मवन्तं न कर्म्माणि निबध्नन्ति धनञ्जय॥"
इति भगवद्गीतायाम् ४ अध्यायः॥
सन्यासः, पुं, (सं+नि+अस्+घञ्।) जटामांसी। इति शब्दचन्द्रिका" काम्यकर्म्मणां न्यासः। इथा,—
"काम्यानां कर्म्मणां न्यासं सन्यासं कवयो विदुः
सर्व्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः॥
अपि च।
"सन्यासः कर्म्मणां न्यासः कृतानामकृतैः सह
कुशलाकुशलाभ्यान्तु प्रहाणं न्यास उच्यते॥"
इति मात्स्ये १२० अध्यायः॥*॥
चतुर्थाश्रमः। तदाश्रमधर्म्मो यथा,—
"सर्व्वसङ्गपरित्यागी ब्रह्मचर्य्यसमन्वितः।
जितेन्द्रियत्वमावासे चैकस्मिन् वसतिश्चिरम्॥
अनारम्भस्त्वयाहारे भिक्षा विप्रे चानिन्दिते।
आत्मज्ञानविवेकश्च तथा ह्यात्मावबोधनम्॥
चतुर्थे चाश्रमे धर्म्मो ह्यस्माभिस्ते प्रकीर्त्तितः॥"
इति वामने १४ अध्यायः॥*॥
तदाश्रमकालादि यथा,—
"एवं वनाश्रमे स्थित्वा तृतीयं भागमायुषः।
चतुर्थमायुषो भागं सन्यासेन नयेत् क्रमात्॥
अग्नीनात्मनि संस्थाप्य द्विजः प्रव्रजितो भवेत्।
योगाभ्यासरतः शान्तो ब्रह्मविद्यापरायणः॥
यदा मनसि सम्पन्नं वैतृष्ण्यं सर्व्ववस्तुषु।
तदा सन्यासमिच्छेत्तु पतितः स्यादिपर्य्यये॥
प्राजापत्यान्विरूप्येष्टिमाग्नेयीमथवा पुनः।
दान्तः पक्वकषायोऽसौ ब्रह्मात्ममुपाश्नुते॥"
इति कौर्म्मे उपविभागे २७ अध्यायः॥*॥
कलौ क्षत्रियवैश्ययोः सन्यासनिषेधो यथा,—
"अश्वमेधं गवालम्भं सन्यासं पलपैतृकम्।
देवरेण सुतोत्पत्तिं कलौ पञ्च विवर्ज्जयेत्॥"
इति कलौ सन्यासनिषेधकं क्षत्रियवैश्यविषयकम् इति मलमासतत्त्वम्॥ सन्यासप्रतिषेधश्च कलौ क्षत्रविशोर्भवेत्। इति मलमासतत्त्वप्रतिज्ञायां श्रीरघुनन्दनभट्टाचार्य्यः॥ * ॥
चैत्रमासि सन्यासकरणप्रमाणं यथा,—
"चैत्रे शिवोत्सवं कुर्य्यात् नृत्यगीतमहोत्सवैः।
जायात् त्रिसन्ध्यं रात्रौ च हविष्याशी जितेन्द्रियः।
शिवस्वरूपतां याति शिवप्रीतिकरः परः॥
चक्रियादिषु यो मर्त्यो देहं संपीड्य भक्तितः।
अश्वमेधफलं तस्य जायते च पदे पदे॥
सर्व्वकर्म्मपरित्यागी शिवोत्सवपरायणः।
भक्त्या जागरणं कुर्य्याद्रात्रौ नृत्यकुतूहलैः॥
नानाविधैर्म्महावाद्यैर्नृत्यैश्च विविधैरपि।
नानाविधैश्चरित्रैस्तैः प्रीयते शङ्करप्रभुः॥
किमलभ्यं भगवति प्रसन्ने नीललोहिते।
तस्मात् सर्व्वप्रयत्नेन तोषणीयो महेश्वरः॥
शङ्खवाद्यं शङ्खतोयं वर्ज्जयेत शिवसन्निधौ।
ग्रामाद्बहिरिमं शम्भोरुत्सवं कारयेन्मुदा।
उपोष्य हुत्वा संक्रान्त्यां व्रतमेतत् समापयेत्॥"
इति बृहद्धर्म्मपुराणे उत्तरखण्डे ८ अध्यायः॥
सन्यासी, [न्]पुं, (संन्यासोऽस्यास्तीति। इनिः।) सन्यासाश्रमविशिष्टः। चतुर्थाश्रमी। तत्पर्य्यायः। पाराशरी २ मस्करी ३ परिव्राट् ४ कर्म्मन्दी५ श्रमणः ६ भिक्षुः ७। इति जटाधरः॥ तस्य लक्षणादि यथा। सर्व्वं गृहादिकं त्यक्त्वा मुण्डितमुण्डो गैरिककौपीनाच्छादनं दण्डं कमण्डलुञ्च बिभ्रत् भिक्षावृत्तिर्निर्ज्जने तीर्थे वा स्थित्वा केवलमीश्वराराधनं करोति यः स सन्यासी। च तु सतुर्व्विधः। कुटीचरः १ बह्वदकः २ हंसः ३ परमहंसः ४। तस्य धर्म्मा यथा,—
"सदले वा कदले वा लोष्टे वा काञ्चने तथा
समबुद्धिर्यस्य भवत् स सन्यासीति कीर्त्तितः॥
दण्डं कमण्डलुं रक्तवस्त्रमात्रञ्च धारयेत्।
नित्यं प्रवासी नैकत्र स सन्यासीति कीर्त्तितः॥
सदाचारद्विजात्रञ्च भुङ्क्ते लोभादिवर्ज्जितः।
किन्तु किञ्चिन्न याचेत स सन्यासीति कीर्त्तितः
न व्यापारी नाश्रमी च सर्व्वकर्म्मविवर्ज्जितः।
ध्यायेन्नारायणं भवत् स सन्यासीति कीर्त्तितः
भवभ्रमोनो ब्रह्मचारी सम्भाषालापवर्ज्जितः।
सर्व्वं ब्रह्ममयं पश्येत् स सन्यासीति कीर्त्तितः॥
सर्व्वत्र समबुद्धिश्च हिंसामायाविवर्ज्जितः।
क्रोधाहङ्काररहितः स सन्यासीति कीर्त्तितः॥
अयाचितोपस्थितञ्च मिष्टामिष्टञ्च भुक्तवान्।
न याचेत भक्षणार्थी स सन्यासीति कीर्त्तितः॥
न च पश्येत् मुखं स्त्रीणां न तिष्ठेत्तत्समीपतः।
दारवीमपि योषाञ्च न स्पृशेद् यः स भिक्षुकः।
अयं सन्यासिनां धर्म्मः इत्याह कमलोद्भवः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३३ अध्यायः॥*॥
अपि च।
"सर्व्वन्यासी हरौ भूप धर्म्मः सन्यासिनां ध्रुवम्

रक्तैकवासा दण्डी च बिभर्त्ति मृत्कमण्डलुम् ॥
सर्व्वत्र समदर्शी च स्मरेन्नारायणं सदा ।
करोति भ्रमणं नित्यं गेहे गेहे न तिष्ठति ॥
विद्यामन्त्रञ्च कस्मैचित् न ददाति च दैवतम् ।
करोति नाग्रमं भिक्षुः करोति नान्यवासनाम् ॥
करोति नान्यसङ्गञ्च निर्म्मोहः सङ्गवर्ज्जितः ।
न स्वादु भुङ्क्ते दैवाच्च स्त्रीमुखं न हि पश्यति ॥
न वाञ्छितं भक्ष्यवस्तु याचते गृहिणं व्रती ।
इति सन्यासिनां धर्म्ममित्याह कमलोद्भवः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः ॥

अन्यच्च ।

"तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सन्यासोऽह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥
योगाभ्यासरतो नित्यमारुरुक्षुर्जितेन्द्रियः ।
ज्ञानाय वर्त्तते भिक्षुः प्रोच्यते पारमेष्ठिकः ॥
यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः ।
सम्यक् च दमसम्पन्नः स योगी भिक्षुरुच्यते ॥
भैक्ष्यं श्रुतञ्च मौनित्वं तपो ध्यानं विशेषतः ।
सम्यक् च ज्ञानवैराग्यं धर्म्मोऽयं भिक्षुके मतः ॥
ज्ञानसन्यासिनः केचित् वेदसन्यासिनोऽपरे ।
कर्म्मसन्यासिनः केचित् त्रिविधः पारमेष्ठिकः ॥
योगी च त्रिविधो ज्ञेयो भौतिको मोक्ष एव च ।
तृतीयोऽन्त्याश्रमी प्रोक्तो योगमूर्त्तिसमाश्रितः ॥
प्रथमा भावना पूर्व्वे मोक्षे त्वपरभावना ।
तृतीये चान्तिमा प्रोक्ता भावना पारमेश्वरी ॥
यतीनां यतचित्तानां न्यासिनामूर्द्ध्वरेतसाम् ।
आनन्दं ब्रह्म तत्स्थानं यस्मान्नावर्त्तते मुनिः ॥
योगिनाममृतं स्थानं व्योमाख्यं परमाक्षरम् ।
आनन्दमेश्वरं यस्मान्मुक्तो नावर्त्तते नरः ॥"

इति गारुडे ४८ अध्यायः ॥*॥

अपरञ्च ।

"ज्ञानसन्यासिनः केचिद्वेदसन्यासिनोऽपरे ।
कर्म्मसन्यासिनस्त्वन्ये त्रिविधाः परिकीर्त्तिताः ॥
यः सर्व्वसङ्गनिर्म्मुक्तो निर्द्वन्द्वश्चापि निर्भयः ।
प्रोच्यते ज्ञानसन्न्यासी स्वात्मन्येव व्यवस्थितः ॥
वेदमेवाभ्यसेन्नित्यं निराशीर्निष्परिग्रहः ।
प्रोच्यते वेदसन्न्यासी मुमुक्षुर्व्विजितेन्द्रियः ॥
यस्त्वग्नीनात्मसात् कृत्वा ब्रह्मार्पणपरो द्विजः ।
श्रेयः स कर्म्मसन्न्यासी महायज्ञपरायणः ॥
त्रयाणामपि चैतेषां ज्ञानी त्वभ्यधिको मतः ।
न तस्य विद्यते कर्म्म न लिङ्गाद्या विपश्चितः ॥
निर्म्ममो निर्भयः शान्तो निर्द्वन्द्वः पर्णभोजनः ।
जीर्णकौपीनवासाः स्यान्नग्नो वा ध्यानतत्परः ॥
ब्रह्मचारी मिताहारो ग्रामान्नाद्यं समाहरेत् ।
अध्यात्मरतिरासीत निरपेक्षो निरामिषः ।
आत्मनैव सहायेन स्वर्गार्थं विचरेदिह ॥"

स्वर्गार्थमित्यत्र सुखार्थमिति च पाठः ।

"नाभिनन्देत मरणं नाभिनन्देत जीवितम् ॥
कालमेव प्रतीक्षेत निर्देशं भृतको यथा ।
नाधीतव्यं न वक्तव्यं न श्रोतव्यं कदाचन ॥
एवं ज्ञानपरो योगी ब्रह्मभूयाय कल्पते ।
एकवासोऽथवा विद्वान् कौपीनाच्छादनोऽथवा ॥
मुण्डः शिखी वाथ भवेत् त्रिदण्डी निष्परिग्रहः ।
कषायवासाः सततं ध्यानयोगपरायणः ॥
ग्रामान्ते वृक्षमूले वा वासं देवालयेऽपि वा ।
समः शत्रौ तथा मित्रे तथा मानापमानयोः ॥
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेत् क्वचित् ।
यस्तु मोहेन चान्नमादेकान्नादो भवेद्यदि ॥
न तस्य निष्कृतिः काचिदग्निशास्त्रेषु कथ्यते ।
रागद्वेषविमुक्तान्नसममोष्टाश्मकाञ्चनः ॥
प्राणिहिंसानिवृत्तश्च मौनी स्यात् सर्व्वनिस्पृहः ।
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत् ॥
नैकत्र निवसेद्ग्रामे वर्षाभ्योऽन्यत्र भिक्षुकः ।
स्नानशौचरतो नित्यं कमण्डलुकरः शुचिः ॥
ब्रह्मयज्ञरतो नित्यं वनवासरतो भवेत् ।
मोक्षशास्त्रेषु निरतो ब्रह्मसूत्री जितेन्द्रियः ॥
दम्भाहङ्कारनिर्म्मुक्तो निन्दापैशुन्यवर्ज्जितः ।
आत्मज्ञानगुणोपेतो यतिर्म्मोक्षमवाप्नुयात् ॥*॥
अभ्यसेत् सततं वेदं प्रणवाख्यं सनातनम् ।
स्नात्वाचम्य विधानेन शुचिर्देवालयादिषु ॥
यज्ञोपवीती शान्तात्मा कुशपाणिः समाहितः ।
धौतकाषायवसनो भस्मच्छन्नतनूरुहः ॥
अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ।
आध्यात्मिकञ्च सततं वेदान्ताभिमतञ्च यत् ॥
पुत्रेषु वाथ निवसन् ब्रह्मचारी यतिर्मुनिः ।
वेदमेवाभ्यसेन्नित्यं स याति परमां गतिम् ॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं तपः परम् ।
क्षमा दया च सन्तोषो व्रतान्यस्य विशेषतः ॥
वेदान्तज्ञाननिष्ठो वा पञ्चयज्ञान् समाहितः ।
कुर्य्यादहरहः स्नात्वा भैक्षान्नेनैव तेन हि ॥
होममन्त्रान् जपेन्नित्यं काले काले समाहितः ।
स्वाध्यायं चान्वहं कुर्य्यात् सावित्रीं सन्ध्ययोर्ज्जपेत् ॥
ध्यायेत सततं देवमेकान्ते परमेश्वरम् ।
एकान्नं वर्ज्जयेन्नित्यं कामं क्रोधं परिग्रहम् ।
एकवासा द्विवासा वा शिखी यज्ञोपवीतवान् ।
कमण्डलुकरो विद्वांस्त्रिदण्डी याति तत्पदम् ॥"

इति कौर्म्मे उपविभागे २७ अध्यायः ॥*॥

व्यास उवाच ।

"एतत्त्वाश्रमनिष्ठानां यतीनां नियतात्मनाम् ।
भैक्षेण वर्त्तनं प्रोक्तं फलमूलैरथापि वा ॥
एककालं चरेद्भैक्षं न प्रसज्येत विस्तरे ।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
समागारं चरेद्भैक्षमलाभे ह्यं पुनश्चरेत् ।
प्रक्षाल्य पात्रे भुञ्जीयादद्भिः प्रक्षालयेत्तु तत् ॥
अथवान्यदुपादाय पात्रं भुञ्जीत नित्यशः ।
भुक्त्वा च सन्त्यजेत् पात्रं याचामात्रमलोलुपः ॥
विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ॥
गोदोहमात्रं तिष्ठेत कालं भिक्षुरधोमुखः ।
भिक्षेत्युक्त्वा सकृन्मूर्ध्नीमन्त्रीयाद्वाग्यतः शुचिः ॥
प्रक्षाल्य पाणिपादौ च समाचम्य यथाविधि ।
आदित्ये दर्शयित्वान्नं भुञ्जीत प्राङ्मुखोऽत्वरः ॥
हुत्वा प्राणाहुतीः पञ्च ग्रासानष्टौ समाहितः ।
आचम्य देवं ब्रह्माणं ध्यायेत परमेश्वरम् ॥
अलाबुं दारुपात्रञ्च मृण्मयं वैणवं तथा ।
चत्वारि यतिपात्राणि मनुराह प्रजापतिः ॥
प्रदोषे पररात्रे च मध्यरात्रे तथैव च ।
सन्ध्यास्वङ्गि विशेषेण चिन्तयेन्नित्यमीश्वरम् ॥
कृत्वा हृत्पद्मनिलये विश्वाख्यं विश्वसम्भवम् ।
आत्मानं सर्व्वभूतानां परस्तात्तमसः स्थितम् ॥
सर्व्वाधारमव्यक्तमानन्दं ज्योतिरव्ययम् ।
प्रधानपुरुषातीतमाकाशं दहनं परम् ॥
तदन्तः सर्व्वभावानामीश्वरं ब्रह्मरूपिणम् ।
ध्यायेदनादिमहैतमानन्दादिगुणालयम् ॥
महान्तं परमं ब्रह्म पुरुषं सत्यमव्ययम् ।
सितेतरारुणाकारं महेशं विश्वरूपिणम् ॥
ओङ्कारान्तेऽथवात्मानं संस्थाप्य परमात्मनि ।
आकाशे देवमीशानं ध्यायीताकाशमव्ययम् ॥
कारणं सर्व्वभूतानामानन्देकसमाश्रयम् ।
पुराणं पुरुषं शम्भुं ध्यायन्मुच्येत बन्धनात् ॥
यद्वा गुहायां प्रकृतौ जगत्सम्मोहनालये ।
विचिन्त्य परमं व्योम सर्व्वभूतैककारणम् ॥
जीवनं सर्व्वभूतानां यत्र लोकः प्रलीयते ।
आनन्दं ब्रह्मणः सूक्ष्मं यत् पश्यन्ति सुमुक्षवः ॥
तन्मध्ये निहितं ब्रह्म केवलं ज्ञानलक्षणम् ।
अनन्तं सत्यमीशानं विचिन्त्यासीत संयतः ॥
गुह्याद्गुह्यतमं ज्ञानं यतीनामेतदीश्वरम् ।
योऽनुतिष्ठेत सततं सोऽमृते योगमीश्वरम् ॥
तस्मात् ध्यानरतो नित्यमात्मविद्यापरायणः ।
ज्ञानं समभ्यसेद्ब्राह्म्यं मुच्येत भवबन्धनात् ॥
यद्वा पृथक्त्वमात्मानं सर्व्वस्मादेव केवलम् ।
आनन्दमक्षरं ज्ञानं ध्यायेत च पुनः परम् ॥
यस्माद्भयन्ति भूतानि यद्गत्वा नेह जायते ।
स तस्मादीश्वरो देवः परस्तादृषोऽधितिष्ठति ॥
यदन्तरे तद्गगनं शाश्वतं शिवमव्ययम् ।
यमाहुस्तत्परो यस्तु स देवः स्यान्महेश्वरः ॥
व्रतानि यानि भिक्षूणां तथैवोपव्रतानि च ।
एकैकातिक्रमे तेषां प्रायश्चित्तं विधीयते ॥
उपेत्य च स्त्रियं कामात् प्रायश्चित्तं समाहितः ।
प्राणायामसमायुक्तं कुर्य्यात् सान्तपनं शुचिः ॥
ततश्चरेत नियमान् कृतज्ञान् संयतमानसः ।
पुनराश्रममागत्य चरेद्भिक्षुरतन्द्रितः ॥
न कर्म्मयुक्तमनृतं हिनस्तीति मनीषिणः ।
तथापि न च कर्त्तव्यः प्रसङ्गो ह्येष दारुणः ॥
एकरात्रोपवासश्च प्राणायामशतं तथा ।
उक्तानृतं प्रकर्त्तव्यं यतिना धर्म्मलिप्सुना ॥
परमापद्गतेनापि न कार्य्यं स्तेयमन्ततः ।
स्तेयादभ्यधिकः कश्चित् नास्त्यधर्म्म इति स्मृतिः ॥
हिंसा चेषा परा दृष्टा या चात्मज्ञानबाधिका ।
यदेतद्विषं नाम प्राणास्ते तु बहिश्चराः ॥
न तस्य हरते प्राणान् यो यस्य हरते धनम् ॥
एवं ज्ञात्वा स दुष्टात्मा भिन्नवृत्तो व्रतच्युतः ॥

भूयो निर्व्वेदमापन्नैरेवान्द्रायणं व्रतम् ॥
विधिना शास्त्रदृष्टेन संवत्सरमिति स्मृतिः ।
भूयो निर्व्वेदमापन्नैरित्युत्तरन्द्रितः ॥
अकस्मादपि हिंसान्तु यदि भिक्षुः समाचरेत् ।
कुर्य्यात् कृच्छ्रातिकृच्छ्रन्तु चान्द्रायणमथापि वा
स्कन्देदिन्द्रियदौर्ब्बल्यात् स्त्रियं दृष्ट्वा यतिर्यदि
तेन धारयितव्या वै प्राणायामास्तु षोड़श ॥
दिवा स्वप्ने त्रिरात्रं स्यात् प्राणायामशतं तथा
पक्वान्ने मधुमांसे च नवश्राद्धे तथैव च ॥
प्रत्यक्षलवणे चोक्तं प्राजापत्यं विशोधनम् ।
ध्याननिष्ठस्य सततं नश्यते सर्व्वपातकम् ॥
तस्मान्महेश्वरं ध्यात्वा तस्य ध्यानरतो भवेत् ।
यदब्रह्म परमं ज्योतिः प्रतिष्ठाक्षयमक्षयम् ।
योऽन्तरात्मा परं ब्रह्म स विज्ञेयो महेश्वरः ॥
एष देवो महादेवः केवलं परमेश्वरः ।
तदेवाक्षयमद्वैतं तदादित्यान्तरं परम् ॥
यस्मात् महीयते देवः स्वधात्मि ज्ञानसंज्ञिते ।
आत्मयोगाह्वये तत्त्वे महादेवस्ततः स्मृतः ॥
नान्यं देवं महादेवाद्यतिरिक्तं प्रपश्यति ।
तमेवात्मानमन्वेति यः स याति परं पदम् ॥
मन्यन्ते ये स्वमात्मानं विभिन्नं परमेश्वरात् ।
न ते पश्यन्ति तं देवं हृषा तेषां परिश्रमः ॥
एकमेव परं ब्रह्म विज्ञेयं तत्त्वमव्ययम् ।
स देवस्तु महादेवो नैतद्विज्ञाय बध्यते ॥
तस्मादयत्नेन नियतं यतिः संयतमानसः ।
ज्ञानयोगरतः शान्तो महादेवपरायणः ॥
एष वः कथितो विप्रा यतीनामाश्रमः शुभः ।
पितामहेन प्रभुणा मुनीनां पूर्व्वमीरितः ॥
न पुत्रशिष्ययोगिभ्यो दद्यादिदमनुत्तमम् ।
ज्ञानं स्वयम्भुवा प्रोक्तं यतिधर्म्माश्रमं शिवम् ॥
इति यतिनियमानामेतदुक्तं विधानं
पशुपतिपरितोषे यज्ञवेदैकहेतुः ।
न भवति पुनरेवासुद्भवो वा विनाशः
प्रणिहितमनसा ये नित्यमेवाचरन्ति ॥"
इति कौर्म्मे उपविभागे यतिधर्म्मो नाम २८ अध्यायः ॥*॥ युगभेदे सन्न्यासिनां नामानि उपाधयश्च यथा। आदौ वेदान्ताचार्य्यो ब्रह्मा। द्वितीयाचार्य्यो विष्णुः। तृतीयाचार्य्यो रुद्रः। चतुर्थाचार्य्यो वशिष्ठः। पञ्चमाचार्य्यः शक्तिः। षष्ठाचार्य्यः पराशरः। सप्तमाचार्य्यो व्यासः। अष्टमाचार्य्यः शुकः। नवमाचार्य्यो गौड़ः। दशमाचार्य्यो गोविन्दः। एकादशः श्रीशङ्कराचार्य्यः। सत्ययुगमध्ये आचार्य्यत्रयं ब्रह्मविष्णुरुद्राः। त्रेतायुगे आचार्य्यत्रयं वशिष्ठशक्तिपराशराः। द्वापरे आचार्य्यद्वयं व्यासशुकौ। कलियुगे आचार्य्यत्रयं गौड़गोविन्दशङ्कराचार्य्याः। शङ्कराचार्य्यस्य चत्वारः शिष्याः स्वरूपाचार्य्यः पद्माचार्य्यः त्रोटकाचार्य्यः पृथ्वीधराचार्य्यः इति ॥*॥ अथ दश नामानि। स्वरूपाचार्य्यस्य शिष्यः तीर्थ आश्रमश्च। पद्माचार्य्यस्य शिष्यद्वयं वनः अरण्यश्च। त्रोटकाचार्य्यस्य शिष्यत्रयं गिरिपर्व्वतसागरा इति। पृथ्वीधराचार्य्यस्य शिष्यत्रयम्। सरस्वती भारती पुरी चेति। इति श्रीशङ्कराचार्य्यविरचितं सप्तमसूत्रम् ॥*॥ अपि च।
"तीर्थाश्रमवनारण्यगिरिपर्व्वतसागराः।
सरस्वती भारती च पुरीति दश कीर्त्तिताः ॥"
तेषां लक्षणानि यथा,—
"त्रिवेणीसङ्गमे तीर्थे तत्त्वमस्यादिलक्षणे ।
ज्ञायात्तत्त्वार्थभावेन तीर्थनामा स उच्यते ॥१॥
आश्रमग्रहणे प्रौढ़ आशापाशविवर्জ্জितः ।
यातायातविनिर्मुक्त एतदाश्रमलक्षणम् ॥२॥
सुरम्ये निर्झरे देशे वने वासं करोति यः ।
आशापाशविनिर्मुक्तो वननामा स उच्यते ॥३॥
अरण्ये संस्थितो नित्यमानन्दनन्दने वने ।
त्यक्त्वा सर्व्वमिदं विश्वमानन्दलक्षणं किल॥४॥
वासो गिरिवरे नित्यं गीताभ्यासे हि तत्परः।
गम्भीराचलबुद्धित्व गिरिनामा स उच्यते ॥५॥
वसेत् पर्व्वतमूलेषु प्रौढ़ो-यो ध्यानधारणात् ।
सारात् सारं विजानाति पर्व्वतः परिकीर्त्तितः ॥६॥
वसेत् सागरगम्भीरो वनरत्नपरिग्रहः ।
मर्य्यादाञ्च न लङ्घेत सागरः परिकीर्त्तितः ॥७॥
स्वरज्ञानवशो नित्यं स्वरवादी कवीश्वरः ।
संसारसागरे सारामिज्ञो यो हि सरस्वती ॥८॥
विद्याभारेण सम्पूर्णः सर्व्वभारं प्रमित्यजेत् ।
दुःखभारं न जानाति भारती परिकीर्त्तितः ॥९॥
ज्ञानतत्त्वेन संपूर्णः पूर्णतत्त्वपदे स्थितः ।
पदब्रह्मरतो नित्यं पुरीनामा स उच्यते ॥"१०॥
इति हृदयच्छङ्करविजये विद्यारण्यस्वामिधृतम् ॥

श्रीसदाशिव उवाच ।

"अवधूताश्रमो देवि कलौ सन्यास उच्यते ।
विधिना येन कर्त्तव्यं तत् सर्व्वं शृणु साम्प्रतम्॥
ब्रह्मज्ञाने समुत्पन्ने विरते स्वर्गकर्म्मणि ।
अध्यात्मविद्यानिपुणः सन्न्यासाश्रममाचरेत् ॥
विहाय हृदौ पितरौ शिशुं भार्य्यां पतिव्रताम् ।
त्यक्त्वासमर्थान् बन्धूंश्च प्रव्रजन्नारकी भवेत् ॥
सम्पाद्य गृहकर्म्माणि परितोष्यागमानपि ।
निर्म्ममो निलयाद्गच्छेन्निष्कामो विजितेन्द्रियः॥
आहूय स्वजनान् बन्धून ग्रामस्थान् प्रतिवासिनः ।
प्रीत्यानुमतिमन्विच्छेदगृहाज्जिगमिषुर्नरः ॥
तेषामनुज्ञामादाय प्रणम्य परदेवताम् ।
ग्रामं प्रदक्षिणीकृत्य निरपेक्षो गृहादियात् ॥
मुक्तः संसारपाशैर्य्यः परमानन्दहृद्धितः ।
कुलावधूतं ब्रह्मज्ञं गत्वा संप्रार्थवेदिदम् ॥
गृहाश्रमे परं ब्रह्मन् ममैतद्विगतं वयः ।
प्रमादं कुरु मे नाथ सन्न्यासग्रहणं प्रति ॥
निवृत्तगृहकर्म्माणं विचार्य्य विधिवद्गुरुः ।
शान्तं विवेकिनं वीक्ष्य द्वितीयाश्रममादिशेत्॥
ततः शिष्यः कृतस्नानो यतात्मा विहिताह्निकः।
ऋणत्रयविमुक्त्यर्थं देवर्षीन् यार्चयेत् पितॄन् ॥
देवा ब्रह्मा च विष्णुश्च रुद्रश्च सगणैः सह ।
ऋषयः सनकाद्याश्चात्रेया देवर्षयस्तथा ॥
अत्र ये पितरः पूज्या वक्ष्यामि शृणु तानपि ।
पिता पितामहश्चैव प्रपितामह एव च ॥
माता पितामही देवि तथैव प्रपितामही ।
मातामहादयोऽप्येवं मातामह्यादयोऽपि च ॥
प्राच्यामृषीन् यजेद्देवान् दक्षिणस्यां पितॄन् यजेत् ।
मातामहान् प्रतीच्यान्तु पूजयेच्चासकर्म्मणि ॥
पूर्व्वादिक्रमतो दद्यादासनानां त्रयं त्रयम् ।
देवादीन् क्रमतस्तत्रावाह्य पूजां समाचरेत् ॥
समर्च्य विधिवत्तेभ्यः पिण्डान् दद्यात् पृथक् पृथक् ।
पिण्डप्रदानविधिना दत्त्वा पिण्डं यथाक्रमम् ॥
कृताञ्जलीपुटो भूत्वा प्रार्थयेत् पिण्डदेवताः ।
तृप्यध्वं पितरो देवा देवर्षिमाहकागणाः ॥
गुणातीतपदे यूयमृणीकृतचिरात् ॥
मानृण्यमर्थयित्वा तु प्रणम्य च पुनः पुनः ।
ऋणत्रयविनिर्म्मुक्तमात्मश्राद्धं प्रकल्पयेत् ॥
पिता ह्यात्मैव सर्व्वेषां तत्पिता प्रपितामहः ।
आत्मन्यात्मार्पणार्थाय कुर्य्यादात्मक्रियां सुधीः॥
उत्तराभिमुखो भूत्वा पूर्व्ववत् कल्पितासने ।
आवाह्यात्मपितॄन् देवि दद्यात् पिण्डं समर्च्चयन् ॥
प्रागग्रान् दक्षिणाग्रांश्च पश्चिमाग्रान् यथाक्रमात् ।
पिण्डार्थमास्तरेद्दर्भानुदगग्रान् सकर्म्मणि ॥
समाप्य श्राद्धकर्म्माणि गुरुदर्शितवर्त्मना ।
मुमुक्षुश्चित्तशुद्ध्यर्थमिमं मन्त्रं शतं जपेत् ॥
क्लीं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मा मृतात्
उपासनानुसारेण विद्यामण्डलपूर्व्वकम् ।
संस्थाप्य कलसं तत्र गुरुः पूजां समारभेत् ॥
ततस्तु परमब्रह्म ध्यात्वा शाम्भववर्त्मना ।
विधाय पूजां ब्रह्मज्ञो ब्रह्मस्थापनमाचरेत् ॥
प्रागुक्तसंस्कृते वह्नौ सङ्क्षोभ्याहुतिं गुरुः ।
दत्त्वा शिष्यं समाहूय साकल्यं हावयेत्तु तम् ।
आदौ व्याहृतिभिर्हुत्वा प्राणहोमं प्रकल्पयेत् ।
प्राणोदानः समानश्चोदानव्यानौ च वायवः ॥
तत्र होमं ततः कुर्य्याद्धामेध्यत्वमुक्तये ।
पृथिवी सलिलं वह्निर्वायुराकाशमेव च ॥
गन्धो रसश्च रूपञ्च स्पर्शः शब्दो यथाक्रमात् ।
ततो वाक्पाणिपादश्च पायूपस्थौ ततः परम् ॥
श्रोत्रं त्वक् नयनं जिह्वाघ्राणबुद्धीन्द्रियाणि च
एतानि मे पदान्ते च गृध्यन्ति पदमुच्चरेत् ॥
क्लीं ज्योतिरहं विरजा विपाप्मा भूयासं स्विष्ट कृत्यपि ।
चतुर्विंशतितत्त्वानि कर्म्माणि वैदिकानि च ।
हुत्वाग्नौ निष्क्रियो देहं मृतवच्चिन्तयेत्ततः ॥
विभाव्य मृतवत् कायं रहितं सर्व्वकर्म्मणां ।
स्मरन् तत् परमं ब्रह्म यज्ञसूत्रं समुत्सृजेत् ॥
ऐं क्लीं हुं इति मन्त्रेण स्कन्धादुद्धार्य्य तत्त्ववित्
यज्ञसूत्रं करे धृत्वा पठित्वा व्याहृतित्रयम् ।
वह्निजायां समुच्चार्य्य घृताक्तमनले क्षिपेत् ॥
हुत्वैवमुपवीतञ्च कामबीजं समुच्चरन् ।

हित्वा शिखां करे कृत्वा हुतमध्ये नियोजयेत्॥
ब्रह्मपुत्रि शिखे त्वं हि वाणीरूपा सनातनी।
दीयते पावके स्थानं गच्छ देवि नमोऽस्तु ते॥
कामं मायां कूर्चमन्त्रं वह्निजायासुदीरयेत्।
शिखामाश्रित्य पितरो देवो देवर्षयस्तथा।
सर्व्वाख्याश्रमकर्म्माणि निवसन्ति शिखोपरि॥
ततः सन्तर्प्य ताः सर्व्वाः देवर्षिपितृदेवताः।
शिखासूत्रपरित्यागात् देही ब्रह्ममयो भवत्॥
यज्ञसूत्रशिखात्यागात् सन्न्यासः स्याद्विजन्मनाम्
गूद्राणामितरेषाञ्च शिखां हुत्वैव संस्क्रिया॥
ततो मुक्तशिखासूत्रः प्रणमेद्दण्डवद्गुरुम्।
गुरुरुत्थाप्य तं शिष्यं दक्षकर्णे वदेदिमम्॥
तत्त्वमसि महाप्राज्ञ हंसः सोऽहं विभावय।
निर्म्ममो निरहङ्कारः स्वभावेन सुखं चर॥
ततो घटञ्च वह्निञ्च विसृज्य ब्रह्मतत्त्ववित्।
आत्मस्वरूपं तं मत्वा प्रणमेच्छिरसा गुरुम्॥
नमस्तुभ्यं नमो मह्यं तुभ्यं मह्यं नमो नमः।
त्वमेव त्वदहमेव विश्वरूपं नमोऽस्तु ते॥
ब्रह्ममन्त्रोपासकानां तत्त्वज्ञानां जितात्मनाम्।
स्वमन्त्रेण शिखाच्छेदात् सन्न्यासग्रहणं भवेत्॥
ब्रह्मज्ञानविशुद्धानां किं यज्ञैः श्राद्धपूजनैः।
स्वेच्छाचारपराणान्तु प्रत्यवायो न विद्यते॥
ततो निर्द्वन्द्वरूपोऽसौ निष्कामः स्थिरमानसः।
निर्म्ममो विहरेत् शिष्यः साक्षाद्ब्रह्ममयो भुवि॥
मुक्तो विधिनिषेधाभ्यां निर्योगक्षेम आत्मवित्।
सुखदुःखसमो धीरो जितात्मा विगतस्पृहः॥
स्थिरात्मा प्राप्तदुःखोऽपि सुखे प्राप्तेऽपि निष्पृहः
सदानन्दः शुचिः शान्तो निरपेक्षो निराकुलः॥
नोद्वेजकः स्याज्जीवानां सदा प्राणिहिते रतः।
विगतामर्षभीदाम्भो निःसङ्कल्पो निरुद्यमः॥
शोकहर्षविमुक्तः स्याच्छत्रौ मित्रे समो भवेत्।
शीतवातातपसहः समो मानापमानयोः॥
समः शुभाशुभे तुष्टो यदृच्छालाभवस्तुना।
निस्त्रैगुण्यो निर्व्विकल्पो निर्लोभः स्यात्त्वसञ्चयी
यथासत्त्वमुपाश्रित्य स्वपा विश्वं प्रतिष्ठते।
आत्माश्रितस्तथा देही जानन्नेवं सुखी भवेत्॥
इन्द्रियाण्येव कुर्व्वन्ति स्वं स्वं कर्म्म पृथक् पृथक्
आत्मा साक्षी विनिर्लिप्तो ज्ञात्वैवं मोक्षभाग्-
भवेत्॥
धातुप्रतिग्रहं निन्दामृतं क्रीड़नं स्त्रिया।
रैतस्त्यागमसूयाञ्च सन्न्यासी परिवर्ज्जयेत्॥
सर्व्वत्र समदृष्टिः स्यात् कीटे दैवे तथा नरे।
सर्व्वं ब्रह्मेति जानीयात् परिव्राट् सर्व्वकर्म्मसु।
विप्रान्नं श्वपचान्नं वा यस्मात्तस्मात् समागतम्
देशं कालं तथा चान्नमशीयादविचारयन्।
अध्यात्मशास्त्राध्ययनैः सदा तत्त्वविचारणैः॥
अवधूतो नयेत् कालं स्वेच्छाचारपरायणः।
सन्न्यासिनां मृतं कार्यं दाहयेन्न कदाचन॥
संपूज्य गन्धपुष्पाद्यैर्निखनेदाप्सु मज्जयेत्।
अप्राप्तयोगमर्त्यानां सदा कामाभिलाषिणाम्॥
प्रभावाज्जायते देवि प्रवृत्तिः कर्म्मसकुले।
अत्रापि ते सानुरक्ता ध्यानार्चाजपसाधने॥
ज्ञेयस्तदेव जानन्तस्तत्रैव दृढ़निश्चयाः।
अतः कर्म्मविधानानि प्रोक्तानि चित्तशुद्धये॥
नामरूपं बहुविधं तदर्थं कल्पितं मया।
ब्रह्मज्ञानं विना देवि कर्म्मसंन्यसनं विना॥
कुर्व्वन् कल्पशतं कर्म्म न भवेन्मुक्तिभाजनः।
कुलावधूतस्तत्त्वज्ञो जीवन्मुक्तो नराकृतिः॥
साक्षात्नारायणं मत्वा गृहस्थस्तं प्रपूजयेत्।
यतेर्दर्शनमात्रेण विमुक्तः सर्व्वपातकात्।
तीर्थव्रततपोदानसर्व्वयज्ञफलं लभेत्॥"
इत्यवधूताश्रमः। इति महानिर्व्वाणतन्त्रे अष्टमोल्लासः॥

सप, संबन्धे। (भ्वा०-पर०-सक०-सेट्।)असीसपत्। इति दुर्गादासः॥ कविकल्पद्रुमे मूर्द्धन्यादिरयम्॥

सपत्राकरणं, क्ली, (सपत्र + ञ + ल्युट्। "सपत्रनिष्पत्रादतिव्यथने।"५।४।६१। इति डाच्।) अत्यन्तपीड़नम्। इति हलायुधः॥

सपत्राकृतः, पुं, (सपत्र + ञ + तः। डाच्।) क्षतमृगादिः। अत्यन्तपीड़िते, त्रि। इति केचित्॥

सपत्राकृतिः, स्त्री, (सपत्र + ञ + क्तिन्। डाच्।) अत्यन्तपीड़नम्। तत्पर्य्यायः। निष्पत्राकृतिः २। इति हेमचन्द्रः॥

सपत्नः, पुं, (सह पतति एकार्थे इति। पत + नः। सहस्य सः।) शत्रुः। इत्यमरः॥ (यथा, महाभारते। १।१४५।५।
"संरक्ष तात मन्त्रञ्च सपत्नांश्च ममोद्धर।
निपुणेनाभ्युपायेन यद्ब्रवीमि तथा कुरु॥")

सपत्नारिः, पुं, (सपत्नस्य शत्रोरिरिव दुर्गप्रभवात्।)वंशविशेषः। वेसुड़ वाँश इति भाषा। यथा,—
"ब्रह्मयष्टिः सपत्नारिर्वंशसन्ततिराशुपः।"
इति शब्दचन्द्रिका॥

सपत्नी, स्त्री, (समानः एकः पतिर्यस्याः। "नित्यं सपत्न्यादिषु।" ४।१।३५। इति ङीप्। पत्युर्नकारादेशः समानस्य सभावोऽपि निपात्यते।) समानपतिका। सतीन इति भाषा॥ (यथा, आर्य्यासप्तशत्याम्। ४६१।
"या नीयते सपत्नीभा प्रविश्य या वर्ज्जिता
भुजङ्गेन।
यमुनाया इव तस्याः सखि मलिनं जीवनं मन्ये॥
यथा च। दौहित्राभावे सपत्नीपुत्रः। तस्य पुत्रत्वस्मरणात्। यथा मनुः।
"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत्।
सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्म्मनुः॥"
एकपत्नीनामिति एकः पतिर्यासामिति।
अत्र सपत्नीपुत्रस्य पुत्रत्वातिदेशात् तत्सत्त्वेऽपि स्त्रीणां सपिण्डनं मैथिलैरुक्तम्। तत्र।
"पुत्रत्वं तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोऽपि ये॥"
इति लघुहारीतवचने एवकारेणातिदिष्टपुत्रनिषेधात्। इति शुद्धितत्त्वम्॥

सपदि, व्य, (संपद्यते इति। पद गतौ + इन्। पृषोदरादित्वात् मलोपः।) द्रुतम्। तत्पर्य्यायः। इत्यमरः॥ (यथा, कुमारे। ३। ७६।
"सपदि सकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्पामद्रिरादाय दोर्भ्याम्।
सुरगज इव विभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीत् वेगदीर्घीकृताङ्गः॥")

सपर्य्या, स्त्री, (सपर पूजायाम् + "कण्ड्वादिभ्यो यक्।"३।१।२७। इति यक्। "अ प्रत्ययात्।" ३।३।१०२। इति अः। ततष्टाप्।) पूजा। इत्यमरः॥ (यथा, माघे। १।१४।
"तमर्घ्यमर्घ्यादिकयादिपूरुषः
सपर्य्यया साधु स पर्य्यपूपुजत्॥")

सपादः, त्रि, पादेन सह वर्त्तमानः। स तु चरणयुक्तयतुर्थभागसहितश्च। यथा,—
"सपादपलमानेन वेला व्रजति निश्चितम्।"
इति सत्क्रियामुक्तावली॥

सपादपीठं, त्रि, (सपादं पादसहितं पीठं यत्र।) पादपीठयुक्तसिंहासनादि। यथा,—
"आदित्यदादीप्तकृशानुकल्पं
सिंहासनं तस्य सपादपीठम्।
सन्तप्तचामीकरवल्गुवज्रं
विभागविन्यस्तमहार्घरत्नम्॥"
इति मट्टी ३ सर्गः॥

सपिण्डः, पुं, (समानः पिण्डो मूलपुरुषो निवापो वा यस्य। समानस्य सः।) सप्तपुरुषान्तर्गतज्ञातिः। तत्पर्य्यायः। सनाभिः २। इत्यमरः॥ स च शशीवविवाहदायभेदात् त्रिविधः। तत्राशौचसपिण्डस्य लक्षणं यथा। सप्तपुरुषान्तर्गतत्वे सति गोत्रैक्ये सति दाहत्वभोक्तृत्वान्यतरसम्बन्धेन पिण्डलेपान्यतरत्वत्वम्। दत्तकन्यानान्तु भर्त्तृसापिण्ड्येन सापिण्ड्यम्। अदत्तानां पित्रवधित्रिपुरुषसापिण्ड्यम्। विवाहसपिण्डास्तु। पिण्डपिण्डबन्धपेक्षया सप्तमपुरुषावधयः मातामहमातृबन्धपेक्षया पञ्चमपुरुषावधयश्च। यथा,—
"पञ्चमात् सप्तमादूर्द्धं मातृतः पितृतः क्रमात्।
सपिण्डता निवर्त्तेत सर्व्ववर्णेष्वयं विधिः॥"
इत्युद्वाहतत्त्वधृतनारदवचनम्॥
दायसपिण्डास्तु। त्रिपुरुषावधयः। ते च पितृपितामहप्रपितामहाः तेषां पुत्रपौत्रप्रपौत्रदौहित्राः। मातामहप्रमातामहवृद्धप्रमातामहाः। तत्पुत्रपौत्रप्रपौत्राश्च। इति दायभागः॥ * ॥ अथ सपिण्डादिविचारः। मत्स्यपुराणम्।
"लेपभाजश्चतुर्थ्याद्याः पिण्डाद्याः पिण्डभागिनः
पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषम॥"
नन्वेवं भ्रात्रादिभिः सह पिण्डतर्पणभोक्तृत्वा सम्भवात् कथं सपिण्डत्वमिति चेदुच्यते। तथापि पिण्डलेपयोः सम्बन्धोऽस्ति। तथा च बौधायनः। प्रपितामहः पितामहः पिता स्वयं सोदर्य्यभ्रातरः। सवर्णायाः पुत्रः पौत्रः प्रपौत्रो

वा एतानविभक्तदायादान् सपिण्डानाचष्टते विभक्तदायादान् सकुल्यानाचष्टते सत्स्वङ्गेषु तद्भागो ह्यर्यो भवति इति। अस्यार्थः। पित्रादिपिण्डत्रयेषु सपिण्डनेन भोक्तृत्वात्। पुत्रादिभिस्त्रिभिस्तत्पिण्डदानात्। यच्च जीवन् यस्य पिण्डदाता स मृतः सन् सपिण्डनेन तत्पिण्डभोक्ता एवं सति मध्यस्थितः पुरुषः पूर्व्वेषां जीवन् पिण्डदाता मृतः सन् तत्पिण्डभोक्तापरेषां जीवतां पिण्डसम्प्रदानभूत आसीत् मृतैश्च तैः सह दौहित्रादिदेयपिण्डभोक्ता। अतो येषामयं पिण्डदाता ये चास्य पिण्डभोक्तारस्तेऽविभक्तं पिण्डरूपं दायं अश्नुत इति अविभक्तदायादाः सपिण्डा इति। इदञ्च सपिण्डत्वं सकुल्यत्वञ्च दायग्रहणार्थम्। अर्थाचार्थस्तु पिण्डलेपभुजामपि। लेपभाजश्चतुर्थ्याद्याः पित्राद्याः पिण्डभागिनः॥ इति प्रागुक्तमत्स्यपुराणात् वक्ष्यमाणकूर्म्मपुराणग्रन्थलिखितवचनाच्च पिण्डे यथा परस्परं भोक्तृत्वं तथा लेपे तुल्यन्यायात्। हारलतायां कूर्म्मपुराणम्।

"सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते।
समानोदकभावस्तु जन्मनाम्नोरवेदने॥
पिता पितामहश्चैव तथैव प्रपितामहः।
लेपभाजश्चतुर्थ्याद्याः सापिण्ड्यं सप्तपौरुषम्॥"

लेपभागिभ्यस्तूर्द्धं यावज्जन्मनाम्नोरवेदनं यावदमुकनाम्नोऽस्मात् पूर्व्वं पुरुषादयं जातः इति विशेषः। अयमस्मत्कुले जात इति सामान्यतो वा स्मर्य्यते तावत् समानोदकत्वमिति हारलता॥ अत्र परवचनेनैव सापिण्ड्यसिद्धौ पूर्व्ववचनपूर्व्वार्द्धं जीवत्पितृकत्वादिना अधिकपुरुषेषु पिण्डलेपसम्बन्धेऽपि सपिण्डतानिवृत्तिज्ञापनाय। सर्व्वदेशीयाचारोऽपि तथा। यथा श्राद्धविवेकेऽपि पार्व्वणश्राद्धानन्तरं तित्यश्राद्धे विकल्पः उक्तः। मार्कण्डेयपुराणम्।

"नित्यक्रियां पितॄणान्तु केचिदिच्छन्ति सत्तमाः।
न पितॄणां तथैवान्ये श्रेयं पूर्व्ववदाचरेत्॥"

अत्र पूर्व्वार्द्धात् पितॄणां प्राप्तौ न पितृनामित्यत्र पुनः पितॄणां ग्रहणं सनकादीनामूर्द्ध्वगाभ्यनुज्ञानाय इति फलान्तरमुक्तम्। हरिवंशेऽपि अन्यार्थं पुनर्व्वचनमिति लिखितम्। अथ यः खलु पिण्डान् दत्त्वा मृतः परतश्चाप्राप्तपिण्डभावः स कथं सपिण्डः एकपिण्डदातृत्वभोक्तृत्वलक्षणसम्बन्धाभावादिति चेत् तदयोग्यतयेति ब्रूमः। योग्यताप्रयोजकञ्च सामान्यशास्त्रविषयत्वम्। ततश्च अत्यन्तिहृद्गप्रपितामहावधिकाधस्तनानां पञ्चानां पुंसां प्रत्येकापेक्षया समानामेकगोत्राणां स्वावधिपरतनानां समानाञ्च सापिण्ड्यं पिण्डलेपयोर्दातृत्वभोक्तृत्वसम्बन्धादिति। स्त्रीणान्तु भर्त्तृसापिण्ड्येन सापिण्ड्यम्। पत्नानां भर्त्तृसापिण्ड्यमिति वचनात्। नन्वेवं कन्यायाः कथं सपिण्डतेति चेत् आदिपुराणवचनात् त्रैपुरुषं सापिण्ड्यम्। यथा,—

"सपिण्डता तु कन्यानां सवर्णानां त्रिपौरुषी।"

अत्र कन्यानामनूढानाम्। अप्रत्तानां त्रिपौरुषमिति वशिष्ठवचनात्। तेन आत्मपञ्चमे हृद्यप्रपितामहे सापिण्ड्यं निवर्त्तत इति पतिपादितम्। अतएव कन्यायाः प्रपितामहभ्रात्रा तत्सन्ततिभिश्च सह सापिण्ड्याभावात् कन्यामरणजननयोस्तेषां सपिण्डाशौचं नास्ति किन्तु समानोदकनिमित्तमेवाशौचमिति। एवं तेषामपि जननमरणयोः कन्यानामिति मूलपाधिमहामहोपाध्यायाः॥ यत्तु कूर्म्मपुराणम्।

"अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं सप्तपौरुषम्।
प्रत्तानां भर्त्तृ सापिण्ड्यं प्राह देवः पितामहः॥"

इति रत्नाकरधृतं तदिवाहे पिण्डपत्तविषयम्। यथा, विष्णुपुराणम्।

"सप्तमीं पिण्डपत्ताञ्च मातृपत्ताञ्च पञ्चमीम्।
उद्वहेत द्विजो भार्य्यां न्यायेन विधिना नृप॥"

सप्तमीं पञ्चमीं हित्वा इति शेषः। भर्त्तृसापिण्ड्यमित्यत्र सप्तपौरुषमित्यनुषज्यते। तेन भर्त्तृसमानसापिण्ड्यमित्यर्थः। शङ्खलिखितौ।

"सपिण्डता तु सर्व्वेषां गोत्रतः सप्तपौरुषी।
पिण्डस्वोदकदानञ्च शौचाशौचं तदानुगम्॥"

गोत्रतः गोत्रैक्येन मातामहकुले कदाचित् षट्पुरुषपर्य्यन्तं पिण्डसम्बन्धेऽपि न सपिण्डता तान् सप्तपुरुषान् आ समन्तात्कारेण पिण्डादिकमनुगच्छतीति तदानुगम्। एतेन सपिण्डता एकशरीरावयवान्वयेन भवति। तथा, हि। पितुः शरीरावयवान्वयेन पित्रा सह एव पितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात्। एवं मातृशरीरावयवान्वयेन मात्रादिभिरपि। एवं पत्न्या सह पत्न्या एकशरीरारम्भकतया सापिण्ड्यम्। तथा च गर्भोपनिषदि। एतत् षाट्कौशिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतः त्वङ्मांसरुधिराणि मातृतश्चेति। तत्र तत्तावयवान्वयप्रतिपादनात् निर्व्वाप्य पिण्डान्वये तु सापिण्ड्ये भ्रातृपित्रादिसापिण्ड्यं न स्यात्। अतिप्रसङ्गस्तु सप्तान्यतमत्वेन प्रयोगोपाधिना निरसनीयः। यद्येवं मातामहादीनामपि मरणे सपिण्डत्वेन दशाहाशौचं प्राप्नोति स्त्रीदेतत् यदि मातामहानां मरणे त्रिरात्रं स्यादशौचकं इत्यादिविशेषवचनं न स्यात्। यत्र तु विशेषवचनं नास्ति तत्र दशाहमिति मिताक्षरारत्नाकरादिमतमास्तम्। लेपभाज इत्यादिवाचनिकेऽर्थे सापिण्ड्ये एकशरीरावयवान्वयरूपसकपोलरचितार्थानुवकाशात्। निर्व्वाप्यपिण्डसम्बन्धेनभ्रात्रादीनां सापिण्ड्यस्य मत्स्यपुराणबौधायनाभ्यां पूर्व्वमुक्तत्वात्। कामधेनुहारलताकल्पतरुपारिजातकारादिभिस्त्वर्थैव व्याख्यातत्वाच्च। रेतःशोणितपरिणामरूपत्वादपत्यशरीरस्य भवतु वा तथा। पत्न्या सह पत्न्या एकशरीरारम्भकतायाः प्रत्यक्षत्वात् कथं सापिण्ड्यं प्रमातामहादीनां विशेषवचनाभावात् सपिण्डत्वेन दशाहाद्यशौचप्रसङ्गात् मातामहादौ सापिण्ड्यस्य लोकविरुद्धत्वाच्च। भवतु वा तथा शरीरद्वारा सापिण्ड्यं तथापि वचनात् यथा सप्तान्तर्गतत्वं तथ्यं तथा गोत्रतः सप्तपौरुषीति वचनात् गोत्रैक्यमपि प्रागुक्तवचनात्। कन्यास्त्रियोरुद्वं सापिण्ड्यं ऊढायाश्च भर्त्तृसापिण्ड्येन सापिण्ड्यमिति चेत् तदेतन्मतेऽपि व्यवस्थायां न क्षतिरिति। अतएव सुमन्तुवचनाभिहितं यद्यमपुरुषपर्य्यन्तमशौचंतत्सप्तमपुरुषाभ्यन्तरा-शौचाभ्यूनं त्रिरात्रम्। यथा ब्राह्मणानामेकपिण्डस्वधानामादशमात् धर्म्मविच्छित्तिर्भवति आसप्तमात् ऋक्थविच्छित्तिर्भवति आसप्तमात्तीयात् स्वधाविच्छित्तिर्भवति अन्यथा पिण्डाशौचक्रियायुच्छेदात् ब्रह्मतुल्यो भवतीति। अस्यार्थः। एका समाना पिण्डस्वधा येषां ते तथा। यथा एकोद्दिष्टस्य पिण्डे तु अनुग्रब्दो न युज्यते इत्यत्रानुग्रब्देनानुग्रब्दयुक्तो मन्त्रो लक्ष्यते अनुयुक्तमन्त्रस्तु ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति तथापिण्डस्वधाग्रब्देन पिण्डसम्बन्धिस्वधाग्रब्दयुक्तमन्त्रकरणकदेयजलं लक्षितम्। तथा च। ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिश्रुतं स्वधास्तर्पयत मे पितॄन् इत्यनेन पिण्डान् सिञ्चेदित्युक्तम्। ततश्च एकपिण्डस्वधानां समानोदकानामित्यर्थः। अतएव मनुः।

"जन्मन्येकोदकानान्तु त्रिरात्रात् शुद्धिरिष्यते।"

विष्णुपुराणम्।

"मातृपक्षस्य पिण्डेन सम्बद्धा ये जलेन वा।"

मातृपक्षस्य मातामहपक्षस्य पिण्डेन सम्बद्धाः सपिण्डाः जलेन सम्बद्धाः समानोदका इति श्राद्धविवेकेऽपि व्याख्यातम्।

"असम्बन्धा भवेद्यातु पिण्डे नैवोदकेन वा॥"

इति विवाहेऽप्युक्तम्। अत्र पुत्रिकायाः पार्व्वणे पिण्डोदकयोः सम्बन्धात्कन्यामात्रेऽपि तदयोग्यतायाः सत्त्वात् कन्या पिण्डोदकसम्बन्धोच्यते। एतदनुसारादपि तस्याः सपिण्डता बोद्धव्या तस्मादेकपिण्डस्वधानामित्यनेन समानोदकभावः समाख्यातः। न तु दशमपुरुषपर्य्यन्तं पित्रादिजीवनादिना पिण्डसम्बन्धेऽपि सापिण्ड्यं विहितं प्रागुक्तयुक्तेः स्वधेत्यस्य तदनुपयुक्तत्वेन वैयर्थ्यापत्तेः। अपुत्रधनाधिकारस्तु सन्निहिततराभावे सप्तमपुरुषपर्य्यन्तम्। मृतपितृकस्य स्वधोपलक्षितश्राद्धाधिकारः पुरुषत्रयपर्य्यन्तमिति। अत्र स्वधाग्रब्दो मन्त्रपरः पिण्डभक्तपरोऽपि। तथा च गुणविष्णुधृता श्रुतिः। स्वधा वै पितृणामन्नमिति। दशमपुरुषानन्तरं समानोदकत्वेऽपि न त्रिरात्रं किन्तु पक्षिण्यादि। तथा हि। उदकक्रियामधिकृत्य पारस्करः। सर्व्वे ज्ञातयो भावयन्ति। आसप्तमादृषभाद्वा समानग्रामवासिन यावत् सम्बन्धमनुस्मरेयुर्व्वा इति। भावयन्ति निष्पादयन्ति। अत्र यावत् सम्बन्धमनुस्मरेयुरेककुलजाता वयमिति स्मरणं

भवतीत्यननैव सर्व्वेषामुदकदाने प्राप्ते यदासप्तमाद्दयमादवेत्युक्तं तत् सन्निकर्षतारतम्येनाशौचभेदेऽप्युदकक्रियासमानार्थमिति। अशौचभेदस्तु सप्तमपुरुषपर्य्यन्तं सपिण्डत्वाद्दयाह:। ततश्च दशमपुरुषपर्य्यन्तं त्र्याह:। तथा च विष्णुवृद्धशातपौ।

"दशाहेन सपिण्डास्तु शुध्यन्ति ऋतसूतके।
त्रिरात्रेण सकुल्यास्तु ज्ञात्वा शुध्यन्ति गोत्रजाः॥"

ततश्चतुर्दशपुरुषपर्य्यन्तं पक्षिणी। ततश्च जन्मनामस्मृतिपर्य्यन्तमेकाह:। तथा च मिताक्षराविवादचिन्तामण्योर्बृहस्पति:।

"सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते।
समानोदकभावस्तु निवर्त्तेताचतुर्दशात्॥
जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते॥"

अत्र समानोदकत्वे द्विविधे। पूर्व्वत्र गौतम: पक्षिण्यामसपिण्डे इति। परत्र हारीत:।

"मातामहे चिरात्रं स्यादेकाहस्त्वसपिण्डके॥"

अत्रैव गोत्रजानामह: स्मृतमिति जाबालवचनम्। तत: परं सर्व्वथा समानोदकतानिवृत्ते: स्नानमात्रमिति। ज्ञात्वा शुध्यन्ति गोत्रजा इति बृहस्पत्युक्तत्वादिति। इति शुद्धितत्त्वम्॥

सपिण्डीकरणं, क्ली, (सपिण्ड + च्वि + ल्युट्। अभूततद्भावे च्वि:।) पूर्णसंवत्सरक्रियमाणपार्व्वणैकोद्दिष्टैतिकर्त्तव्यताकश्राद्धम्। यत्र प्रेतपिण्डस्य पित्रादिपिण्डेन सह मिश्रीकरणम्। यथा,—

"सपिण्डीकरणं प्रोक्तं पूर्णे संवत्सरे पुनः।
कुर्य्याच्चत्वारि पात्राणि प्रेतादीनां द्विजोत्तमाः॥
प्रेतार्थं पित्रपात्रेषु पात्रमासेचयेत्तत:।
ये समाना इति द्वाभ्यां पिण्डानप्येवमेव हि॥
सपिण्डीकरणश्राद्धं देवपूर्व्वं विधीयते।
पितृनावाहयेदत्र पृथक् पिण्डञ्च निर्व्वपेत्॥
ये सपिण्डीकृता: प्रेता न तेषां स्यात् पृथक् क्रिया।
यस्तु कुर्य्यात् पृथक् पिण्डं पित्रादेः सोऽपि जायते॥"

इति कूर्म्मपुराणे उपविभागे २२ अध्याय:॥*॥

अन्यच्च।

"तत: संवत्सरे पूर्णे सपिण्डीकरणं भवेत्।
सपिण्डीकरणादूर्द्धं प्रेत: पार्व्वणभुग्यत:॥
द्विपूर्त्तेषु योग्यश्च गृह्यस्य भवेत्तत:।
सपिण्डीकरणं श्राद्धं देवपूर्व्वं निजोजयेत्॥
पितृनेवाह्ययेत्तत्र पृथक् प्रेतं विनिर्व्वपेत्।
गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम्।
अर्घ्यार्थं पित्रपात्रेषु प्रेतपात्रं प्रसेचयेत्॥
तद्वत् सङ्कल्प्य चतुर: पिण्डान् पिण्डप्रदस्तदा
ये समाना इति द्वाभ्यामाद्यन्तु विभजेत्त्रिधा॥
चतुर्थस्य पुन: कार्य्यं न कदाचित् यतो भवेत्।
तत: पित्रत्वमापन्न: स चतुर्थस्तदा पुमान्॥
अग्निष्वात्तादिमध्यन्तु प्राप्नोत्यमृतमुत्तमम्।
सपिण्डीकरणादूर्द्धं तस्मै तस्मान्न दीयते॥"

इति मात्स्ये १८ अध्याय:॥

अपरञ्च। अथ सपिण्डीकरणम्। तत्र गोभिल:।

पूर्णे संवत्सरे षण्मासे त्रिपक्षे यदह्नि वा हृद्दि. रापद्येत तदहरुत्थाप्युदकपात्राणि सतिलगन्धपुष्पोदकानि पूरयित्वा त्रीणि पितृणामेकं प्रेतस्य प्रेतपात्रं पित्रपात्रेष्वासिञ्चति। ये समाना: समनस: पितरो यमराज्ये तेषां लोक: स्वधा नमो यज्ञो देवेषु कल्पताम्।

"ये समाना: समनसो जीवा जीवेषु मामका:।
तेषां श्रीर्मयि कल्पतामस्मिन् लोके शतं समा:॥"

इति॥

एतेनैव पिण्डो व्याख्यात इति। पूर्णे संवत्सरे इति मुख्यकल्प:। तदशक्तौ नवमो मास:। संवत्सरान्ते विसर्জ্জनं नवममास्यमित्येके। इति पैठीनसिवचनात्। तदशक्तौ षष्ठो मास:। तत्राप्यशक्तौ त्रिपक्ष: तत्राप्यशक्तौ अशौचापगमे प्रथममासस्य द्वादशभिर्दिनैर्द्वादशमासिकानि श्राद्धानि निर्व्वर्त्त्य त्रयोदशाह: सपिण्डीकरणकाल:। शूद्रस्य द्वादशाहो न तु त्रयोदशाह एव मासिकार्थवत् द्वादशाहश्राद्धं कृत्वा त्रयोदशेऽह्नि वा तत् कुर्य्यान्मन्त्रवर्জ्जं हि शूद्राणां द्वादशेऽह्नीति विष्णुवचनात्। मासिकार्थवदिति मासिकार्थो मासि मासि क्रियमाणश्राद्धप्रयोजनं प्रेताप्यायनादितदुक्तं द्वादशाहक्रियमाणश्राद्धमित्यर्थ:॥*॥ यत्र लेकादशमासाभ्यन्तरेऽधिमासपात: तत्र त्रयोदशस्य दिनेषु त्रयोदश मासिकानि कृत्वा चतुर्दशेऽह्नि सपिण्डनं कार्य्यमिति। संवत्सराभ्यन्तरे यद्यधिमासो भवति तदा मासिकार्थं दिनमेकं वर्द्धयेत्। इति विष्णुवाक्यात्। शूद्रस्य त्रयोदशदिनेषु त्रयोदशमासिकानि त्रयोदशेऽह्नि सपिण्डनं दृष्टपरिकल्पनान्यायात्। एवञ्च श्राद्धहृद्दिमात्रं न दिनहृद्दिरिति मिश्रोक्तं हेयम्। तदुक्तविष्णुसूत्रे दिनमेकं वर्द्धयेदिति श्रुते:। श्राद्धाधिक्यमाह सत्यव्रत:।

"संवत्सरस्य मध्ये तु यदि स्यादधिमासक:।
तदा त्रयोदशे श्राद्धं कार्य्यन्तदधिकं भवेत्॥"

तत्राप्यशक्तौ प्रथममासस्यैकाह एव द्वादशमासिकसहितसपिण्डीकरणकाल:।

"मुख्यं श्राद्धं मासि मासि अपर्य्याप्तादृतुं प्रति।
द्वादशाहेन वा कुर्य्यादेकाहे द्वादशाय वा॥"

इति मरीचिवचनात्। अपर्य्याप्तौ अशक्तौ ऋतुमासदृश्यम्। अत्र कल्पे षष्ठमासिकदिने पञ्चममासिकं कृत्वा प्रथमषाण्मासिकं कृत्वा षष्ठमासिकं कार्य्यं तदाद्युत्कर्षन्यायात्। न तु तत्पूर्व्वं षाण्मासिकं द्युत्क्रमापत्तेर्न च पञ्चममासिकमपि पूर्व्वदिने मृततिथ्यभावात्। एवमेव वाचस्पतिमिश्रै:॥*॥ अपकर्षनिमित्तमाह व्याघ्र:।

"आनन्त्यात् कुलधर्म्माणां पुंसाञ्चैवायुष: क्षयात्।
अस्थितेश्च शरीरस्य द्वादशाह: प्रशस्यते॥"

एतच्च द्वादशाहपदं श्रावणशौचान्तदशतीयदिनमात्रपरमिति प्राचीनमैथिला: अजहत्स्वार्थलक्षणया स्वजात्युक्तावशौचान्तदशतीयदिनमात्रोपलक्षकं इति श्राद्धप्रदीपश्राद्धचिन्तामणी। तदयमप्यशुद्धम्। द्वादशाहेन वा कुर्य्यात् इति मरीचिवचनद्वादशाहशब्दं कृत्वा त्रयोदशेऽह्नि वा कुर्य्यात् इति विष्णुवचनाभ्यामेकवाक्यतया द्वादशाहमित्यस्य द्वादशदिनपरत्वात्। कुलधर्म्माणामिति कुलधर्म्मज्योतिरागमादिसिद्धानन्तरभाविनाशपरचक्रभयोत्पत्तेश्च देशयमनादिभिर्निमित्तै: अशौचापगमे द्वादशदिनानि षोड़शश्राद्धापकर्षकाल इति मूलपाण्डुपाध्यायव्याख्यानात्। मरीचिनैव एकाहे द्वादशाहवेति सामान्यत एव एकाहविधानाच्च। अतएव एकाहापेक्षया प्राशस्त्याभिधानमपि सङ्गच्छते अतएव प्रथममासस्य एकाह एव द्वादशमासिकसहितसपिण्डीकरणकाल: इति श्राद्धविवेक:। अत्र यानि एकाहकर्त्तव्यतया द्वादशमासिकश्राद्धान्युक्तानि तानि शूद्रेणापि आद्यमासिकदिन एव कार्य्याणि। न त्वाद्यमासिकं कृत्वा तत्परदिने एकादशमासिकानीति ध्येयम् एवञ्च तेषामपकर्षे तन्मध्यतदन्तकालकर्त्तव्यतया वाक्षापिकद्वयसपिण्डीकरणापकर्ष: सिध्यतीति सुधीभिर्विभाव्यम्॥*॥ यदह्नि वा हृद्दिरिति हृद्दिराद्यमानं पुंसवनादि। आपद्येत आसन्ना भवति तद्दिने सपिण्डीकरणम्। तथा हि प्रागावर्त्तनादद्य: कालं विद्यात्। इति गोभिलसूत्रेण पुंसवनादिरूपहृद्दर्य्यामहृद्याभ्यन्तरे विधानात् सपिण्डीकरणस्य चापराह्णे विधानात्तयो: कालयोरबाधाय हृद्दिपूर्व्वदिने अपकर्ष:॥*॥ ननु सपिण्डीकरणस्यापराह्णिकत्वे किं प्रमाणमिति चेत् अपराह्णे तु पैठीनसिमत्युत्सर्गवचनम्।

किञ्च "यद्यप्यदन्तक: पूषा पैष्टमत्ति सदा चरुम्।
अग्नीन्द्रेश्वरसामान्यात्तण्डुलोऽत्र विधीयते।"

इति छन्दोगपरिशिष्टवचनं यथा ब्रह्मनामनुरोधात्तण्डुलचरुर्नैवानुरोधात् पैष्टचरु:। विरुद्धधर्म्मसमवाये भूयसां स्यात् सधर्म्मकत्वम्। इति जैमिनिसूत्रात्। तद्वदत्रापि बहुदेवताकपार्व्वणानुरोधादेकोद्दिष्टकालबाध इति। एवञ्च संवत्सरं अधिकृत्य।

"सपिण्डीकरणं तस्मिन् काले राजेन्द्र तत् शृणु
एकोद्दिष्टविधानेन कार्य्यं तदपि पार्थिव॥"

इति विष्णुपुराणीयमेकोद्दिष्टांशे तदितिकर्त्तव्यतापरं न तु तत्कालपरम्। तथा च परिशिष्टप्रकाशधृतम्।

"श्राद्धद्वयमुपक्रम्य कुर्व्वीत सहपिण्डताम्।
तयो: पार्व्वणवत् पूर्व्वमेकोद्दिष्टमथापरम्॥"

इति॥*॥

एवञ्च शुद्धितत्त्वलिखित-स्यमन्तकोपाख्यानवत् हृद्दिं निश्चित्य कृतं सपिण्डीकरणं तदानीं विघ्नेन हृद्यभावेऽपि हृद्यारब्धकालान्तरं पूर्व्व-

संवत्सरं वा प्राप्य पिढत्वप्रापकं इति न सपिण्डनान्तरम्। अत्र श्वः कर्त्तास्मीति निश्चित्य दाता विप्रादिमन्त्रयेत्। इतिवन्निश्चित्येति उत्कटकोटिकसम्भावनोपलक्षणम्। भविष्यन्निमित्तस्य कर्म्मणः प्रत्यूहार्हत्वात्। एवञ्च वृद्धिश्राद्धं यदर्थं कृतं तत्कर्म्म चेत् विघ्नात्तद्दिने न क्रियते तदा दिनान्तरे तत्कर्म्मणि क्रियमाने तदङ्गत्वात् पुनर्वृद्धिश्राद्धं कर्त्तव्यमेव।

"प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः।
तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत् क्रिया॥"

इति छन्दोगपरिशिष्टेन साङ्गकरणाभिधानात् वृद्धिमाद्रिधृतम्।

पूर्णे संवत्सरे श्राद्धं षोड़शं परिकीर्त्तितम्।
तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते॥"

अत्र पूर्णसंवत्सरक्रियमाणश्राद्धादयथोभयनिर्व्वाहः। तथापकृष्टसपिण्डनादप्युभयनिर्व्वाहात्र पूर्णसंवत्सरे आब्दिकान्तरं कार्य्यम्। एवञ्च पञ्चदशश्राद्धे कृतेऽप्युन्नेयम्॥*॥ उदकपात्राणि इति अर्घ्यार्थमुदकयुक्तपात्राणि। अत्र त्रीणि पितृणामेकं प्रेतस्येति पाठक्रमदर्शनात् सर्व्वत्र छन्दोगानां यजुर्वेदिनाञ्च गृह्यानुरोधात् सपिण्डीकरणे प्रेतकर्म्मकरणं पिढकर्म्मपूर्व्वकम्। तयोः पार्वणवत् पूर्व्वमेकोद्दिष्टमथापरम्। इति पूर्वलिखितवचने शाब्दक्रमदर्शनात्। देवकृत्यपिढकृत्ययोर्म्मध्ये प्रेतकृत्येन व्यवधानस्यायुक्तत्वाच्च। एतेन अथ सपिण्डीकरणं संवत्सरमेकं पिण्डमुद्दिश्य संवत्सरान्ते चत्वार्य्युदकपात्राणि प्रयुनक्ति तत्रैकं प्रेतस्य त्रीणि इतरेभ्यः। इत्याश्वलायनदर्शनात् सर्व्वशाखिनां सपिण्डीकरणे प्रेतादित्वं मैथिलोक्तं निरस्तम्। एतद्वचनस्य तच्छाखिमात्रपरत्वात्। किन्त्वर्घ्यदानमात्रे पाठक्रमाच्छाब्दक्रमस्य बलवत्त्वात् ब्रह्मपुराणे प्रेतार्घ्यदानान्तरं ततः पितामहादिभ्यः इति शब्दक्रमस्यावाधायार्घ्यपात्रेषु गन्धपुष्पदानपर्य्यन्तं पिढपूर्व्वकता उत्सर्गे तु प्रेतपूर्व्वकतेति। तथा ब्रह्मपुराणम्।

"चतुर्थ्यार्घ्यपात्रेभ्य एकं वामेन पाणिना।
गृहीत्वा दक्षिणेनैव पाणिना च तिलोदकम्॥
सम्मार्ज्जयित्वा पृथिवीं ये समाना इति स्मरन्।
प्रेतविप्रस्य हस्ते तु चतुर्भागं जलं क्षिपेत्॥
ततः पितामहादिभ्यस्तन्मन्त्रेण पृथक् पृथक्।
ये समाना इति द्वाभ्यां तज्जलन्तु समर्पयेत्॥
अर्घ्यं तेनैव विधिना प्रेतपात्राच्च पूर्व्ववत्।
तेभ्यश्चार्घ्यं निवेद्यैव पश्चाच्च स्वयमाचमेत्॥"

एकं प्रेतपात्रं वामेन अनन्तरं दक्षिणेन गृहीत्वा इति सम्बन्धः। ये समाना इति मन्त्रद्वयं पठन् प्रेतपात्रस्थं उत्सृष्टजलं कुशरेखात्रयेण चतुर्धा विभज्य भागमेकं प्रेतब्राह्मणहस्ते क्षिपेत् दद्यात्। उत्सृष्टजलपिण्डयोर्व्विभागे मन्त्रस्य करणत्वं व्यक्तमाह शातातपः।

"निरूप्य चतुरः पिण्डान् पिण्डदः प्रतिनामतः।
ये समाना इति द्वाभ्यामाद्यन्तु विभजेत् त्रिधा।
एष एव विधिः पूर्व्वमर्घ्यपात्रचतुष्टये॥"

ततस्तदनन्तरं तन्मन्त्रैः पितामहादिभेदेन त्रिरावृत्त्या दिव्या इति मन्त्रैश्चकारात् पितामहाद्युत्सर्गवाक्यैरर्घ्यमुत्सृज्य ये समाना इति द्वाभ्यां मन्त्राभ्यामर्घ्यं पुष्पोदकं तज्जलं प्रेतपात्रस्थजलं तेनैव विधिना प्रत्येकेन पूर्व्ववत् चतुर्भागरूपं प्रेतपात्रात् समर्पयेत्। तेभ्यः पितामहादिभ्यस्त्रिभ्यस्त्रिगोत्रपुष्पतिलोदकरूपमर्घ्यं निवेद्य तत्तद्ब्राह्मणहस्ते प्रक्षिप्य पश्चादाचमेदित्यर्थः। तेन प्रेतब्राह्मणहस्ते उत्सृज्य दत्तस्यैवार्घ्यजलस्य तदवशिष्टजलस्य भागत्रयं पितामहाद्युत्सृष्टार्घ्यजलेषु मिश्रीकर्त्तव्यमिति प्रतीयते। अतएव दत्तस्यैव प्रेतपिण्डस्य मिश्रीभाव इति श्राद्धविवेकः॥*॥

यच्च न चात्र देवं भोजयेत् प्रागेव दैवे अर्घ्यं मन्त्रायच्च दत्त्वा गन्धमाल्यैः पात्रमर्घ्यियित्वा हुतशेषं पिढभ्यः पात्रेषु दद्यात् इत्याश्वलायनवचने पिढपात्रे दैवं न मिश्रयेदिति कल्पतरुव्याख्यानुरोधेन मैथिलोक्तं सर्व्वशाखिनान्तथाचरणम्। तन्न युक्तम्। आश्वलायनेन काण्डानुशयस्योक्तत्वात् बह्वृचानामेव तथा युक्तत्वात्। न सामगयजुर्व्वेदिनोः। तयोः पदार्थानुशयस्योक्तत्वात्। अत्र सामयजुर्व्वेदिनोः श्राद्धसूत्रे समन्वये मन्त्रदर्शनात्तत्रैव मन्त्रान्वयः पिढदयितादावुक्तः। वस्तुतस्तु पौराणिकत्वात् देवताभ्य इत्यस्य पाठवत् साधारणस्मृतिकारशातातपोक्तत्वाच्च विभागेऽपि मन्त्रान्वयो युक्तः अतएव मैथिलैरपि तथा लिखितमिति॥*॥

एवञ्च पार्व्वणे प्रागुक्तवचनेन शेषद्रव्येण पिण्डदानविधानात् तद्विकृतावपि सपिण्डीकरणे तन्नियमात् यद्यपि शेषाभावे पिण्डनिवृत्तिरायाति तथापि।

"यथोक्तवस्त्वसंप्राप्तौ ग्राह्यं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहीणामिव शालयः॥"

इति छन्दोगपरिशिष्टवचनात् मुख्याभावे प्रतिनिधिः शास्त्रार्थ इति न्यायाच्च मध्वाद्यभावे गुड़ादिग्रहणवत् द्रव्यान्तरेणापि पिण्डदानम् शेषद्रव्यनियमस्तु तत्सत्त्वे द्रव्यान्तरत्यागाय। अन्यथा तदङ्गाभावे कर्म्मवैगुण्यं स्यात्। सहपिण्डक्रियायां इति मनूक्तेः प्रेतपिण्डस्य सहमिश्रीकरणं यत्रेति सपिण्डीकरणसमाख्यासिद्ध्यर्थं सुतरां तत्र तथाचरणम्। प्रतिपत्तिरूपकर्म्माङ्ग एव प्रतिनिधाभावे तन्निवृत्तिः। पशुयागे लोहितं निरस्यति सक्तन्निरस्यति इत्यादावुक्ता। अतएव यज्ञवास्तुरूपप्रतिपत्तियागेऽपि यज्ञो यत्र वसति इति यज्ञवास्तुसमाख्यानुरोधेनास्तृतकुशविनाशेऽपि कुशान्तरप्रतिनिधिभट्टनारायणैः गोभिलभाष्ये उक्तः। प्राक् स्विष्टिकृत आवापः इति गोभिलसूत्रस्य व्याख्यानेऽपि आ उच्यते इत्यावापः प्रधानहोमः स तु स्विष्टिकृद्होमात् प्राक् न पश्चादित्यर्थः। एवञ्च मुख्यहोमे लक्षते यदि चरुर्नष्टो दुष्टो वा भवति तदान्यः पाच्यः मुख्ये कृते चेन्नाशदुष्टौ स्यातां तदाज्येनैव स्विष्टिकृद्धोम इति शरला। एतेन शेषनाशे पिण्डनिवृत्तिरिति वाचस्पतिमिश्रोक्तं हेयम्॥*॥ एतेन पिण्ड इति। एतेनार्घ्यदानविधानेन। पिण्डः पिण्डमिश्रणप्रकारो व्याख्यातः। तथा च ब्रह्मपुराणम्।

"अथ तेनैव विधिना दर्भमूलेऽवनेजनम्।
पितुर्हस्ते तु पिण्डन्तु दद्याद्भक्त्या तु पूर्व्ववत्॥
दत्त्वापिण्डान् पिढभ्यस्तु पश्चात् प्रेताय पार्श्वतः
तन्तु पिण्डं त्रिधा कृत्वा आनुपूर्व्व्या च सन्ततम्॥
निदध्यात्त्रिषु पिण्डेषु एवं संसर्ज्जने विधिः॥"

पिढभ्यः पिढपितामहादिभ्यः पिण्डान् दत्त्वा पश्चात् प्रेताय पार्श्वतः पूर्व्वदेशे पिण्डं दद्यादित्यर्थः। तं प्रेताय दत्तपिण्डम्। आनुपूर्व्व्या पितामहादिक्रमेण। संसर्ज्जने प्रेतपिण्डमिश्रणे। भविष्यपुराणम्।

"गन्धोदकतिलैर्युक्तं कुर्य्यात् पात्रचतुष्टयम्।
अर्घ्यार्थं पिढपात्रेषु प्रेतपात्रं प्रसेचयेत्॥"

ये समाना इति द्वाभ्यामेतज्ज्ञेयं सपिण्डनम्।
नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रिया अपि॥"

नित्येनावश्यकेन ततश्च पार्व्वणांशे पार्व्वणेन एकोद्दिष्टांशे एकोद्दिष्टेन शेषं अङ्गजातं तुल्यम्। एकोद्दिष्टमिति एकोद्दिष्टं तद्धर्म्माद्याहित्वात् सपिण्डीकरणस्येत्यभयपरम्। एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि। इति याज्ञवल्क्यवचनैकवाक्यत्वात्। तेन श्राद्धेषु मध्ये एतच्छ्राद्धद्वयं स्त्रियाः कर्त्तव्यं न त्वाभ्युदयिकश्राद्धादि। अत्र वा कर्त्तरि कृत्ये इति कर्त्तरि षष्ठीति कर्त्तृत्वनियमः। वृद्धिश्राद्धादौ स्त्रीणां भोजनदर्शनान्न भोक्तृत्वनियमः॥*॥

पितरि पूर्व्वमृते तद्वर्षाभ्यन्तरे पितामहे प्रपितामहे च मृते यथा कर्त्तव्यं तथाह छन्दोगपरिशिष्टे कात्यायनः।

'पितुः सपिण्डतां कृत्वा कुर्य्यान्मासानुमासिकम्
असंस्कृतौ न संस्कार्य्यौ पूर्व्वौ पौत्रप्रपौत्रकैः।
पितरं तत्र संस्कुर्य्यादिति कात्यायनोऽब्रवीत्॥
पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वा।
पितामहेन पितरं संस्कुर्य्यादिति निश्चयः॥"

पितुः सपिण्डतां कृत्वा प्रेतीभूतयोरपि पितामहप्रपितामहयोः सतोः प्रतिमासविहितं पार्व्वणं पिढद्वयपितामहातिद्वयप्रपितामहानां कर्त्तव्यं न तु तयोः सपिण्डीकरणपेक्षा कार्य्या॥*॥ ननु सपिण्डनेनासंस्कृताभ्यां पितामहप्रपितामहाभ्यां सह पितुः कथं सपिण्डनाख्यसंस्कारस्तस्मात् तदर्थं तयोः सपिण्डीकरणमपकर्षणीयं पितुरेव वा सपिण्डनमुत्कर्षणीयमित्यत आह असंस्कृताविति। उत्कर्षापकर्षौ न कार्य्यावित्यनेन वचनेनोक्तम्। कथमसंस्कृतेन सह संस्कार इत्यत्र आह पापिष्ठमपीति। पापिष्ठमकृतसपिण्डीकरणं शुद्धेन कृतसपिण्डीकरणेन पितामहेन पापकृता वा

अकृतसपिण्डीकरणेनापि श्राद्धं कुर्य्यादिति शास्त्रनिश्चयः। अतो वचनबलाददोषः इति तात्पर्य्यम्। अत्र तु प्रेतीभूतपितामहेन पितुः सपिण्डने पितामहस्यैकोद्दिष्टमेव।

"असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत्॥"

इति प्रागुक्तजाबालवचनात्। एवमन्यत्रापि बोध्यम्। इदमप्रपितामहस्य प्रेतत्वे तेन सह न कार्य्यमिति तात्पर्य्यम्॥*॥ अत्र मातुः सपिण्डने श्वशुरार्थश्वशुरयोः पिण्डौ कुशैराच्छाद्यौ। तथा च गार्ग्यः।

"पतिनैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
सा गता हि सतैकत्वं कुशैरन्तरयन् पितॄन्॥
श्वशुरस्याग्रतो यस्माच्छिरःप्रच्छादनक्रिया।
पुत्रैर्दर्भेण सा कार्य्या मातुरभ्युदयार्थिभिः॥"

अन्तरयन्तीत्यर्थे अन्तरयन्निति लिङन्तव्युत्पत्त्येन पुंस्त्वमिति हलायुधः। परवचनं गोभिलगृह्यसूत्रभाष्यकृतापि लिखितम्। अतएव प्रव्रजिते पतिते वा पितरि मृते न पितामहादिभिर्मातुः सपिण्डीकरणं किन्तु पितामहादिभिरेव।

"स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः।
एकत्वं सा गता यस्माच्चरमन्त्राहुतिव्रतैः।
तस्मिन् सति सुताः कुर्य्युः पितामह्या सहैव तु॥"

इत्यत्र तस्मिन् सतीति श्राद्धानर्हभर्त्तृरुपलक्षणम्। अतएव।

"तस्याश्चैव तु जीवन्त्यां तस्याः श्वश्रूरिति निश्चयः।"

इति लघुहारीतेन श्वश्रूजीवने तस्या श्वश्रूत्युक्तं न तु श्वशुरेणेति क्वचिदप्युक्तम्॥*॥ एवं पितामह्यादिभिर्मातुः सपिण्डीकरणेऽपि सामगेन ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति मन्त्रो न पाठ्यः मन्त्रलिङ्गविरोधात्। अतएव आभ्युदयिके माटपत्ने श्रीदत्तादिभिर्मन्त्रान्तरं लिखितं न तु ये चात्र त्वामिति। वस्तुतस्तु आभ्युदयिके छन्दोगानां माटपत्न एव नास्तीति वक्ष्यते। एवञ्च।

"अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्।
ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत्॥"

एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि। इति याज्ञवल्क्येन पार्व्वणैकोद्दिष्टविकृतीभूतपुंसपिण्डनातिदेशात् तद्विकृतीभूतस्त्रीसपिण्डनेऽपि ये समाना इति मन्त्रद्वयस्य पार्व्वणोक्तस्य ये चात्र त्वामिति मन्त्रस्य च लिङ्गार्थासमवेतत्वेऽपि प्रकृत्यर्थस्य समवेतार्थत्वात् पाठः।

"ततश्च मातामहानामप्येवं श्राद्धं कुर्य्याद्विचक्षणः।
मन्त्रोहीनं यथान्यायं शेषाणां मन्त्रवर्ज्जितम्॥"

इत्यनेन यच्छेषाणां मन्त्रवर्ज्जनमित्युक्तं तत् गृह्यन्तां पितरः गृह्यन्तां पितामहाः इत्यादि प्रकृत्यनुद्दिश्योग्यमन्त्रवर्ज्जनपरमिति प्रागुक्तम्। मार्कण्डेयपुराणम्।

"सर्व्वाभावे स्त्रियः कुर्य्युः स्वभर्त्तृणाममन्त्रकम्
तदभावे च नृपतिः कारयेत स्वकुटुम्बवत्॥
स्त्रीणामप्येवमेवैतदेकोद्दिष्टमुदाहृतम्।
मृताहनि यथान्यायं नृणां यदिह दीपितम्॥"

स्त्रियोऽत्र असवर्णोढ़ा अपरिणीता वेति श्राद्धविवेकः। सवर्णोढ़ायाः पुत्रपौत्रप्रपौत्राभाव एव विधानात्। तथा गङ्गः।

"पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया।
तदभावे तु पत्नी स्यात्तदभावे सहोदरः॥"

स्त्रीणामिति तु सम्प्रदानपरम्। स्त्रीकर्त्तृकत्वस्य पूर्व्वार्द्धे एवोक्तत्वात्। एकमेवामन्त्रकमित्यर्थः। इति श्राद्धविवेकः॥ अत्र स्त्रिय इत्यस्यासवर्णोढ़ा अपरिणीतापरत्वव्याख्यानात् स्त्रीणां मन्त्रनिषेधोऽपि तत्सम्प्रदानकश्राद्धपर्य्यवगम्यते। न तु स्त्रीसम्प्रदानकमात्रे। कल्पतरौ तु स्त्रीणामप्येवमिति यादृशेन सम्बन्धेन पितृव्यत्वादिना पुरुषाणामेकादशाहादिश्राद्धं तादृशेन सम्बन्धेनैव स्त्रीणामेतत् कर्त्तव्यमिति। एतद्व्याख्याने स्त्रीसम्प्रदानकश्राद्धे सुतरां मन्त्राः पाठ्याः। याज्ञवल्क्येनापि समन्त्रकमेकोद्दिष्टं सपिण्डीकरणञ्चोक्तं एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपीत्यनेन स्त्रिया अपि तथैवोक्तम्।

"मातुः सपिण्डीकरणं पितामह्या सहोदितम्।
यथोक्तेनैव कल्पेन पुत्रिकायाश्च चेत् सुतः॥"

इति छन्दोगपरिशिष्टेनापि यथोक्तेनैव कल्पेन इत्यनेन मन्त्रादिकसर्व्वमतिदिष्टं व्यवहारोऽपि तथेति। अमन्त्रकं स्त्रीकर्त्तृकमन्त्रपाठरहितम्। अमन्त्रा हि स्त्रियो मताः। इति बौधायनेन सामान्यतोऽभिधानात्। न तु ब्राह्मणकर्त्तृकमन्त्रपाठरहितम्। तथा च वराहपुराणम्।

"अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्ज्जितः।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण यद्भवेत्॥"

अत्रामन्त्रस्येति विशेषणस्य यावदमन्त्रश्राद्धार्थत्वेन परिभाषारूपत्वात्र प्रेतश्राद्धमात्रविषयः न वा शूद्रकर्त्तृकश्राद्धमात्रविषयः। किन्तु स्त्रीकर्त्तृकश्राद्धमप्यस्य विषयः। व्यक्तं ब्राह्मे।

"स्त्रीभिश्चावरवर्णैश्च श्राद्धं विप्रानुशासनात्।
मन्त्रवद्विधिपूर्व्वन्तु वह्निपाकविवर्ज्जितम्॥"

विप्रानुशासनात् विप्रपाठनात्। मन्त्रवन्मन्त्रयुक्तम्। वह्निपाकविवर्ज्जितमित्यसवर्णस्त्रीकर्त्तृकश्राद्धपरम्। पतिकर्त्तृकश्राद्धेऽपि पत्न्याः पाकाधिकारदर्शनात्। तथा च छन्दोगपरिशिष्टम्।

शाकञ्च फाल्गुनाष्टम्यां स्वयं पत्न्यथवा पचेत्।

पत्नीत्वञ्च सवर्णोढ़ायाः। ज्येष्ठा पत्नीति वचनात्। ज्येष्ठामाह मनुः।

"यदि स्याच्च परार्थैव विन्देरन् योषितो द्विजाः।
तासां वर्षक्रमेणैव ज्येष्ठ्यं पूजा च वेश्म च॥"

कुबेरोपाध्यायधृतम्।

"असंस्कृतप्रमीतानां पिता न श्राद्धमाचरेत्।
यदि स्वेन कुर्व्वीत सपिण्डीकरणं विना॥"

असंस्कृतप्रमीतानाम् अनुपनीतमृतानाम्। लघुहारीतः।

"पुत्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोऽपि ये॥"

आदिशब्दग्राह्यानाह स एव।

"भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा।
सहपिण्डक्रियां कृत्वा कुर्य्यादभ्युदयं ततः॥"

भ्राता वा इति वा शब्दात् भ्रात्रपेक्षया प्रधानत्वेन पूर्व्वाधिकारिणां दौहित्रान्तानां समुच्चयः अतएव सपिण्डत्वेनैव भ्रातृतत्पुत्रयोरधिकारसिद्धौ पृथगुपादानं प्राधान्यज्ञापनार्थम्॥*॥

"महागुरौ प्रेतीभूते दहिकर्म्म न युज्यते॥"

इति शूलपाणिलिखितवचनेन।

"प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्।
नापि देवं न वा पैत्र्यं यावत् पूर्णो न वत्सरः॥"

इति देवीपुराणवचनेन च प्रेतीभूतमातापितृकस्य पितुः प्रेतीभूतमातापितृकस्य संस्कार्य्यस्य प्रेतीभूतमातापितृकायाः अनूढ़ायाः कन्यायाश्च वैदिककर्म्मकर्त्तृत्वकर्म्मत्वानर्हत्वेन तत्परीहाराय यदहर्व्वा दहिरापद्येत इत्यनेन पूर्व्वदिने सपिण्डनं कृत्वा पित्रादिः परदिने अभ्युदयं नामकरणादिकं कुर्य्यात्। ऊढ़ायास्तु पतिरेको गुरुः स्त्रीणाम्। इति वचनोक्तैकपदेन पत्युरेव महागुरुत्वाभिधानात् तत्प्रेतत्वमात्रे तस्याः कर्म्मानधिकारः। एवञ्च पितृमात्रोर्म्महागुरुत्वव्याहत्तेस्तयोर्म्मरणे ऊढ़ाया न कर्म्मानधिकारः अत्राभ्युदयसपिण्डनयोरानन्तर्य्यमात्र श्लाघ्यत्वार्थः न त्वेककर्त्तृत्वमपि। अन्यथा सपिण्डनाधिकारिण्याः पत्न्याः सत्त्वे अभ्युदयाधिकारिणो भ्रातुः सपिण्डनाधिकारापत्तेः। यथा,=

"नानिष्टः तु पितॄन् श्राद्धैः कर्म्म वैदिकमारभेत्॥"

इति शातातपवचने पितृकर्त्तृकदहिश्राद्धानन्तरमेव पुत्रेण विवाहः क्रियते। न तु पुत्रेण श्राद्धान्तरं क्रियते॥*॥ अत्र पुरुषस्य पुनस्त्वन्ये इत्यनेन पुत्रवत् शिष्यान्तस्य सपिण्डने सामान्यतोऽधिकारप्रतिपादनात् अभ्युदयं विनापि पुरुषस्य सपिण्डनं प्रतीयते।

"सह पिण्डक्रियां कृत्वा कुर्य्यादभ्युदयं ततः।"

इति तु सपिण्डीकरणात् पूर्व्वमभ्युदयाभावार्थं न त्वभ्युदयसत्त्व एव सपिण्डीकरणार्थमिति॥*॥ यत्तु।

"यानि पञ्चदशाद्यानि अपुत्रस्येतराण्यपि।
एकस्यैव तु दातव्यमपुत्रायाश्च योषितः॥"

इति छन्दोगपरिशिष्टीयं सपिण्डीकरणेतरपञ्चदशश्राद्धविधायकं तच्छिष्यपर्य्यन्ताभावे पुरुषस्य बोध्यम्। इतराणि एकोद्दिष्टविधानेनैव यानि प्राप्तानि प्रत्याब्दिकश्राद्धानि तान्येव दातव्यं दातव्यानि इत्यर्थः। अपुत्रायाश्चेति चकारोऽनुक्तसमुच्चायकः पतिरहितायां इति समुच्चिनोति।

"अपुत्रायां मृतायान्तु पतिः कुर्य्यात् सपिण्डताम्।

इति पैठीनसिवचनैकवाक्यत्वात्। अत्र छन्दोगपरिशिष्टे अपुत्रायाः पञ्चदशश्राद्धविधानात्। "सपिण्डीकरणं तासां पुत्राभावे न विद्यते।" इति मार्कण्डेयपुराणाच्च बालकपुत्रसत्त्वे सपिण्डीकरणं अन्येनापि कर्त्तव्यमिति प्रतीयते। एवं पतिः कुर्य्यादित्यत्रापि पतिसत्त्वमात्रं विवक्षितम्। तेन ऊढ़या दुहित्रा सपिण्डनं कार्य्यम्। अत्र।

"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत्। सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः॥"

इति मनुवचने सपत्नीपुत्रस्य पुत्रत्वातिदेशात् तत्सत्त्वेऽपि स्त्रीणां सपिण्डनं मैथिलैरुक्तम्। तच्च। प्रागुक्तलघुहारीतवचने पुत्रेणैवेत्यवधारणातिदिष्टपुत्रनिषेधात्। अतएव तदुत्तरार्द्धे भ्रातृपुत्रोपादानं सङ्गच्छते। अन्यथा भ्रातृपुत्रसत्त्वे।

"यद्येकजाता बहवो भ्रातरश्च सहोदराः। एकस्मिन्नपि सुते जाते सर्व्वे ते पुत्रिणो मताः॥"

इति हविष्यतिवचनेन पुत्रत्वातिदेशात् भ्रातृपुत्रस्य पिण्डश्राद्धाधिकारे प्राप्ते भ्रातृपुत्रोपादानं व्यर्थं स्यात्। पुत्रातिदेशफलन्तु तत्सत्त्वे पुत्रान्तराकरणं पुत्रामनरकवारणञ्च॥*॥ लघुहारीतः।

"सपिण्डीकरणान्तानि यानि श्राद्धानि षोड़श। पृथङ्नैव सुताः कुर्य्युः पृथग्द्रव्या अपि क्वचित्॥ प्रेतसंस्कारकर्म्माणि यानि श्राद्धानि षोड़श। यथाकालन्तु कार्य्याणि नान्यथा सुच्यते ततः॥"

पृथग्द्रव्या अपि विभक्तधना अपि पृथक् न कुर्य्युः सुतरामपृथग्धनाः पृथक् न कुर्य्युः किन्त्वपृथक् कुर्य्युः। अत्र विशेषयति मरीचिः।

"मृते पितरि पुत्रेण क्रिया कार्य्या विधानतः। बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः॥ सर्व्वेषान्तु मतं ज्ञात्वा ज्येष्ठेनैव तु यत् कृतम्। द्रव्येण चाविभक्तेन सर्व्वैरेव कृतं भवेत्॥"

पुत्रेणेत्यविशेषात् सर्व्वेषामधिकारे प्राप्ते ज्येष्ठस्य साक्षात् कर्त्तव्यतामाह बहव इति। ज्येष्ठेनापि सर्व्वेषां भ्रातॄणां मत्कारणेनैव करणं भवतु इति मतं ज्ञानं ज्ञात्वाविभक्तत्वेन द्रव्यसंश्लेषेण च कृतं कर्म्म सर्व्वैरेव कृतमेव भवेत्। तदानीं द्रव्यासंश्लेषे च तस्मात् द्रव्यं प्राप्तव्यमिति ज्ञात्वा कर्त्तव्यम्। यदि तेन तत्र परिरुध्यते तदा स ऋणी भवति प्रत्यवायी च भवति। न तु तेन श्राद्धान्तरं कर्त्तव्यमिति श्राद्धविवेकोक्तं युक्तम्। पृथङ्नैव सुताः कुर्य्युरित्यनेन पृथक्करणस्य पर्य्युदस्तत्वेनानधिकारात्। यथाकालमिति अर्थाच्चान्तद्वितीयदिनश्राद्धमासमृततिथ्येकाब्द्यूनषण्मासाद्वितयसंवत्सरेषु। न च विधानसामर्थ्यादेव तत्तत्कालप्राप्तेरनर्थकमिदमिति वाच्यम् तत्तत्कालानां श्राद्धश्राद्धापेक्षया प्राधान्यबोधनार्थत्वात्॥ *॥ अत्र।

"आनन्त्यात् क्षुधधर्म्माणां पुंसाञ्चैवायुषः क्षयात्।
अस्थितेश्च शरीरस्य श्राद्धमाहुः प्रशस्यते॥"

इति व्याघ्रवचनोक्तप्रशस्यत इत्यनेन कुलाचारज्योतिःशास्त्रादिज्ञानभ्रष्टितिमरणराष्ट्रोपप्लवादिस्थे ऋक्षदेशादिगमनानुसारादेव सपिण्डीकरणापकर्षे श्राद्धश्राद्धापेक्षया प्रागुक्तनवममासादिगौणकालपरिग्रहः। अथवा यथाकालमित्यादेर्यद्दर्शा हविरापद्यते इत्यनेनावश्यकनामकरणादिहविरर्थमेवापकर्षो न त्वनावश्यक इष्टापूर्त्ताद्यर्थापकर्षः कार्य्य इति तात्पर्य्यम्। अतएव लघुहारीतेन। तथैव काम्यं यत् कर्म्म वत्सरात् प्रथमाहुते इत्यनेन काम्यस्यापकर्षनिमित्तता नास्तीत्युक्तम्। यदि त्वावश्यकहविर्निमित्तेनापकर्षः कृतस्तदा इष्टापूर्त्तादिकाम्यं वत्सराभ्यन्तरेऽपि कर्त्तव्यमिति। श्राद्धविवेकोऽप्येवम्। यद्यपि गोभिलसूत्रादौ सपिण्डीकरणस्यैवापकर्षः प्रागुक्तस्थापि सपिण्डीकरणापकर्षे तत्पूर्व्वकर्त्तव्यश्राद्धानामपि तदादितदन्तन्यायादपकर्षः।

"सपिण्डीकरणान्तात्तु ज्ञेया प्रेतक्रिया बुधैः।"

इति शातातपवचने प्रेतक्रियायाः सपिण्डीकरणान्तत्वं प्रतीयते॥*॥ अत्र हविर्निमित्तं विना सपिण्डनापकर्षे कृते पूर्णसंवत्सरकालं प्राप्य प्रेतत्वपरिहारमाह विष्णुधर्म्मोत्तरम्।

"कृते सपिण्डीकरणे नरः सवत्सरात् परम्। प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते॥"

हविर्निमित्तकसपिण्डीकरणापकर्षे कृते तत्क्षणादेव प्रेतत्वपरीहारः। तदर्थ एवापकर्षात् एवञ्चान्यनिमित्तकापकर्षेऽहविष्कालंप्राप्यप्रेतत्वपरीहारः। तत्कालस्य पूर्णसंवत्सरकालतुल्यत्वात्।

"अर्व्वाक् संवत्सराद्दत्ते पूर्णे संवत्सरेऽपि वा ये सपिण्डीकृताः प्रेता न तेषान्तु पृथक्क्रिया॥"

इति शातातपवचनात्। इति श्राद्धतत्त्वम्॥

सपोतकः, पुं, राजकीयघातकी। इति राजनिर्घण्टः॥

सपोतिः, स्त्री, (पा पाने + क्तिन्। "सुमाख्यागेति।"६। ४। ६६। इति ईत्वम्। सह एकत्र पोतिः पानम्। सहस्य सः।) आत्मीयजनसहमिलितैककालपानम्। तत्पर्य्यायः। तुल्यपानम् २। इत्यमरः॥ सहपोतिः ३। इति शब्दरत्नावली॥ (यथा, वाजसनेयसंहितायाम्। १८। ८।

"सन्धिस्ते सपोतिरव ऋक्षिर ते * * * यज्ञेन कल्पन्ताम्॥")

सपोतिका, स्त्री, हस्तिघोषा। इति राजनिर्घण्टः॥

सप्त, [न्] त्रि, (सप् समवाये + कनिन्। तुट् च इत्युज्ज्वलः। १। १५६।) संख्याविशेषः। सात इति भाषा। बहुवचनान्तोऽयम्। तद्वाचकानि यथा। पातालम् १ भुवनम् २ मुनिः ३ द्वीपः४ सूर्य्याश्वः ५ वारः ६ समुद्रः७ स्वरः ८ राज्याङ्गम् ९ धातुः१० वह्निशिखा११ पर्व्वतः१२। इति कविकल्पलता॥ सप्तसंख्याविशिष्टः। यथा,

"सप्त सप्त विलिखेत् प्ररेखिका-
स्तिर्य्यगूर्द्धमथ लक्षणादिकम्।
लेखयेदभिजिता समन्वितं
चैकरेखगणगेन विध्यते॥"

इति ज्योतिस्तत्त्वे दीपिका॥

अपि च।

"क्रमात् स्वराणां सप्तानामारोहश्चावरोहणम्।
मूर्च्छनेत्युच्यते ग्रामत्रये ताः सप्त सप्त च॥"

इति संगीतदर्पणम्॥

सप्तकः, त्रि, (सप्तन् + कन्।) सप्तानां पूरकः। यथा,—

"घोटके सप्तके मेषतुले युग्मद्वये तथा।
सिंहघटौ सदा वर्ष्यौ मृतिं तत्राब्रवीच्छिवः॥"

इति ज्योतिस्तत्त्वम्॥

सप्तसंख्यावशिष्टः। यथा,—

"यत्र जागर्ति दरिद्रा च चक्रास्त्र शास्तिरेव च।
दीधिर्वेवी च विज्ञेयो यत्रादिः सप्तको गणः॥"

इति मुग्धबोधटीकायां दुर्गादासः॥

सप्तसंख्या। सप्त एव सप्तकः स्वार्थे कप्रत्ययः॥

सप्तकी, स्त्री, (सप्तभिः स्वरैरिव कायति शब्दायते इति। कै + कः। गौरादित्वात् ङीष्।) काञ्ची। इत्यमरः॥

सप्तगोदावर, क्ली, सप्तानां गोदावरीणां समाहारः। इति मुग्धबोधव्याकरणम्॥ (यथा, महाभारते। १। ८५। ४४।

"सप्तगोदावरे स्नात्वा नियतो नियताशनः।
महत् पुण्यमवाप्नोति देवलोकञ्च गच्छति॥")

सप्तच्छदः, पुं, (सप्त सप्तच्छदा यस्य।) वृक्षविशेषः। छातिम इति भाषा॥ (यथा, रघुः। ५। ४८।

"सप्तच्छदक्षीरकटुप्रवाह-
सम्मीलमाघ्राय मदं तदीयम्।
विलङ्घिताधोरणतीव्रयत्नाः
सेनागजेन्द्रा विमुखा बभूवुः॥")

तत्पर्य्यायः। गुच्छपुष्पः २ युग्मपर्णः ३ मधिच्छदः ४ वृक्षवक्त्रः ५ बहुपर्णः ६ शारदिकपत्रकः ७ मदगन्धः ८ गन्धिपर्णः ९। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। त्रिदोषघ्नत्वम्। दीपनत्वम्। मदगन्धित्वम्। व्रणरक्तामयकृमिनाशित्वञ्च। इति राजनिर्घण्टः॥ अन्यत् सप्तपर्णशब्दे द्रष्टव्यम्॥

सप्तजिह्वः, पुं, सप्तजिह्वा ः काल्यादयो ः आहुतिर्यसनार्था यस्य।) अग्निः। इति त्रिकाण्डशेषः॥ (यथा, हरिवंशे। ७४। १६।

"सुव्रतव्रतयज्ञेन गतासून्
अवगूह्य प्रविशन्ति संप्तजिह्वम्॥")

तस्य सप्तजिह्वानां नामानि यथा,—

"काली कराली च मनोजवा च
सुलोहिता चैव सुधूम्रवर्णा।
उग्रा प्रदीप्ता च स्फुलिङ्गिनी
सप्तैव कौलाः कथिताय जिह्वाः॥"

टीकासर्व्वस्वे तु उग्राप्रदीप्तयोः स्थाने स्फुलिङ्गिनी विश्वरुचीत्याख्येति नामद्वयम्। इत्यमर-

टीकासारसुन्दरी ॥ कर्म्मविशेषे तासां नामान्तराणि यथा। हिरण्या १ कनका २ रक्ता ३ कृष्णा ४ सुप्रभा ५ बहुरूपा ६ अतिरक्ता ७ एताः सात्त्विको यागकर्म्मणि। काम्यकर्म्मणि तु पद्मरागा १ सुवर्णा २ भद्रलोहिता ३ लोहिता ४ श्वेता ५ धूम्रिनी ६ करालिका ७ एता राज्यस्थः। क्रूरकर्म्मणि तु। विश्वमूर्त्तिः १ स्फुलिङ्गिनी २ धूम्रवर्णा ३ मनोजवा ४ लोहिता ५ कराला ६ कालो ७ एतास्तामस्थः ॥*॥ एतासामधिष्ठातृदेवता यथा,—

"अमर्त्यपितृगन्धर्वयक्षनागपिशाचकाः।
राक्षसः सप्तजिह्वानामीरिता अधिदेवताः ॥"

एतासां वर्णदिङ्नियमो यथा। गवेधविम्बिम्बाम्।

"हिरण्या तप्तहेमाभा शूलपाणेर्दिशि स्थिता।
वैदूर्य्यवर्णा कनका प्राच्यां दिशि समाश्रिता ॥
तरुणादित्यसङ्काशा रक्ता जिह्वाग्निसंस्थिता।
कृष्णा नीलाभ्रसङ्काशा नैर्ऋत्यां दिशि संस्थिता
सुप्रभा पद्मरागाभा वारुण्यां दिशि संस्थिता।
अतिरक्ता जवाभासा वायव्यां दिशि संस्थिता।
बहुरूपा यथा ख्याता दक्षिणोत्तरसंस्थिता ॥"

इति तन्त्रसारः ॥

सप्तज्वालः, पुं, (सप्त ज्वाला यस्य।) अग्निः। इति हेमचन्द्रः ॥

सप्ततन्तुः, पुं, (सप्तभिर्भूरादिभिर्महाव्याहृतिभिरग्निजिह्वाभिर्वा तन्यते इति। तन विस्तारे + "सितनिगमीति।" उणा० १।७०। इति तुन्। सप्त तन्तवः संख्या यस्येति वा।) यज्ञः। इत्यमरः ॥ (यथा, माघे। १४। ६।

"सप्ततन्तुमधिगन्तुमिच्छतः
कुर्व्वतो नुपदमनुज्ञया मम।
मूलतामुपगते खलु त्वयि
प्रापि धर्म्ममयतन्तुचेतया ॥")

सप्ततिः स्त्री, (सप्त दशतः परिमाणमस्य। "पञ्चिविंशतित्रिंशदिति।" ५।१।५९। इति निपातनात् साधुः।) सङ्ख्याविशेषः। सत्तोर इति भाषा। यथा,—

"नवतिर्योजनानाञ्च सहस्राणाञ्च सप्ततिः।
यावद्घटिकमात्रेण तावच्चलति भास्करः ॥"

इत्यादित्यहृदयम् ॥

सप्ततितमः, त्रि, (सप्तति "तस्य पूरणे डट्।" ५।२।४८। इति डट्। "षट्त्रादेस्तिसंख्यादेः।" ५। २। ५८। इति डटस्तमडागमः।) सप्ततेः पूरणः। सप्ततिशब्दात् पूरणार्थे मयट्प्रत्ययनिष्पन्नः। इति मुग्धबोधव्याकरणम् ॥

सप्तदश, [न्] त्रि, (सप्ताधिका दश। सङ्ख्याविशेषः। सतरो इति भाषा। तत्संख्याविशिष्टः। यथा। एष वै सप्तदश प्रजापतिर्यज्ञो यज्ञे अन्वायत्तः। इति मलमासतत्त्वम् ॥ बहुवचनान्तोऽयम् ॥

सप्तदशः, त्रि, (सप्तदशन् + "तस्य पूरणे डट्।" ५।२।४८। इति डट्।) सप्तदशानां पूरणः। यथा,

"ततः सप्तदशे जातः सत्यवत्यां पराशरात्।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥"

इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥

सप्तदीधितिः, पुं, सप्त दीधितयो यस्य।) अग्निः। इति त्रिकाण्डशेषः ॥

सप्तद्वीपपतिः, पुं, (सप्तानां द्वीपानां पतिः।) सप्तद्वीपानामधिपतिः। यथा,—

"न मूल्यमादाद्धेम्नात् सभार्य्यश्चहिंसयुतः।
सप्तद्वीपपतिर्जातः सूर्य्यायुतसमप्रभः ॥"

इति तिथ्यादितत्त्वधृतमत्स्यपुराणम् ॥

सप्तद्वीपा, स्त्री, (सप्त द्वीपा यस्याम्।) पृथिवी। यथा,

"मनोः स्वायम्भुवस्यासन् दशपुत्रास्तु तत्समाः
येरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना।
सप्तसमुद्रा ह्यवतो प्रतिवर्षं निवेशिता ॥"

इति मार्कण्डेयपुराणम् ॥

तेषां नामादि द्वीपशब्दे द्रष्टव्यम् ॥

सप्तधा, व्य, (सप्तन् + धाच्।) सप्तप्रकारम्। यथा,

"सप्तवारानुपोष्यैव सप्तधा संयतेन्द्रियः।
सप्तजन्मकृतात् पापात् मुच्यते नात्र संशयः ॥"

इति तिथ्यादितत्त्वम् ॥

सप्तधातवः, पुं, (सप्तगुणिता धातवः।) शरीरस्थसप्तसंख्यकधातवः। तद्यथा,—

"रसासृमांसमेदोऽस्थिमज्जानः शुक्रसंयुताः।
शरीरस्थैर्यदा सम्यक् विज्ञेयाः सप्तधातवः ॥"

इति राजनिर्घण्टः ॥

सप्तनाड़ीचक्रं, क्लो, (सप्तनाड़ीनां चक्रम्।) दृष्टिज्ञानार्थं ग्रहनक्षत्रादिचिह्नितसप्तनाड़िकसर्पाकारचक्रम्। यथा। अथ सप्तनाड़ीचक्रम्।

"अथातः संप्रवक्ष्यामि यच्चक्रं सप्तनाड़िकम्।
येन विज्ञानमात्रेण दृष्टिं जानन्ति साधकाः ॥
कृत्तिकादीनि ऋक्षाणि साभिजिद्वै क्रमेण च।
सप्तनाड़ीष्वधस्तत्र कर्त्तव्याः पञ्चगाकृतिः ॥
ताराचतुष्कवेधेन नाड़िकैका प्रजायते।
तासां नामान्यहं वक्ष्ये तथा चैव फलानि च ॥
कृत्तिका च ३ विशाखा च १६ मेषाख्या १७ भरणी २ तथा।
अर्द्धार्द्धा शनिनाड़ी स्याच्चण्डनाड्यभिधा मता॥
रोहिणी ४ स्वाती १५ ज्येष्ठा १८ अभि१ द्वितीया नाड़िका मता।
आदित्यप्रभवा नाड़ी वायुनाड़ी तथैव च ॥
सौम्यम् ५ चित्रा १४ तथा मूलम् १८ पौष्णञ्च २७ चतुर्थकम्।
द्वितीयाङ्गारका नाड़ी दहनाख्या च सम्मता ॥
रौद्रम् ६ हस्तम् १३ तथा पूर्व्वाषाढ़ा २० भाद्रपदोत्तरा २६।
चतुर्थी जीवना नाड़ी सौम्यनाड़ी प्रकीर्त्तिता
पुनर्व्वसू ७ स्वातिफल्गुन्यु- १२ त्तराषाढ़-२१ तारकाः।
पूर्व्वभाद्रा च २५ शुक्राख्या पञ्चमी नीरनाड़िकाः।
पुष्यश्चम् ८ फल्गुनी पूर्व्वा ११ अभिजित् • शततारकाः २४।
षष्ठी नाड़ी च विज्ञेया बुधाख्या जलनाड़िका ॥
अश्लेषार्द्रम् ९ मघा १० विष्णु २२ धनिष्ठाभं२३ तथैव च।
अमृताख्याहि सा चान्द्री सप्तमी चन्द्रनाड़िका
मध्यनाड़ीस्थिता सौम्या नाड़ी तस्याग्रपृष्ठतः।
सौम्ययाम्यगतं ज्ञेयं नाड़िकानां चिकं विकम्॥
क्रूरा याम्यगता ज्ञेया सौम्या सौम्यदिग्स्थिता
मध्यनाड़ी च मध्यमा ग्रहरूपफलप्रदाः ॥
एकनाड़ीगता ह्याद्या ग्रहाः क्रूराः शुभा यदि
ततो नाड़ीफलं वाच्यं शुभं वा यदि वाशुभम् ॥
ग्रहाः कुर्य्युर्ग्रहाघातं गतायस्थाख्यनाड़िकाम्।
वायुनाड़ीगता वायुं दहनाद्याभिदाहकाः ॥
सौम्यनाड़ीगता मध्या नीरस्था मेघवाहकाः।
जलार्या दृष्टिदश्चन्द्रश्चन्द्रनाड़ीगतास्तथा ॥
एकोऽपि तत् फलं दत्ते स्वनाड़ीसंस्थितो ग्रहः
भूयुतः सर्व्वं नाड़ीषु दत्ते नाड़ीसमं फलम् ॥
प्रावृट्काले तु संप्राप्ते रौद्रर्क्षत्वगते रवौ।
नाड़ीवेधसमायोगे जलयोगं वदाम्यहम् ॥
यत्र नाड़ीस्थितश्चन्द्रस्तत्र स्युः खेचरा यदि।
क्रूराः सौम्या विमिश्राश्च तद्दिने दृष्टिरुत्तमा ॥
एकर्क्षत्वसमायोगो जायते यदि खेचरैः।
तत्काले च महादृष्टिर्यावदस्यांशके शशी ॥
केवलैः सौम्यैः पापैर्व्वा ग्रहैर्व्विद्धो यदा शशी।
तदा तु तुच्छपानीयं दुर्दिनञ्च भवेदध्रुवम् ॥
यस्य ग्रहस्य नाड़ीस्थश्चन्द्रमास्तद्ग्रहेण च।
दृष्टो युक्तः करोत्यम्भो यदि क्षीणो न जायते ॥
स्त्रियौ सितासितौ चैव पौरिसौम्यौ नपुंसकौ।
पुरुषाः पुरुषैर्व्वायुः क्लीवौ तु बुधकारुणौ ॥
स्त्रीपुरुषसमायोगे दृष्टिस्तु प्रबला भवेत्॥
पीयूषनाड़ीगश्चन्द्रस्तत्र खेटाः शुभाशुभाः ॥
द्वियुतःपञ्च पानीयं दिनान्येकविंशकम्।
एवं जलाख्यनाड़ीस्थे चन्द्रमिश्रग्रहान्विते ॥
दिनार्द्धं दिवसं पञ्च दिनानि जायते जलम्।
नीरनाड़ीस्थिते चन्द्रे अन्यस्थैः पूर्व्ववद्ग्रहैः ॥
यामं दिनार्द्धकं त्रीणि दिनानि जायते जलम्।
अमृतादि त्रिनाड़ीषु यदि स्युः सर्व्वखेचराः॥
तत्र दृष्टिः क्रमाज्ज्ञेया धृत्यर्कारसवासरान्।
सौम्यनाड़ीगताः सर्व्वे दृष्टिदास्ते दिनत्रयम् ॥
शेषानाह्यां महाराज दुष्टदृष्टिप्रदा ग्रहाः।
निर्ज्जला जलदा नाड़ी भवेदयोगे शुभाधिकः ॥
क्रूराधिकसमायोगे जलदाप्यपि निर्ज्जला।
याम्यनाड़ीगताः क्रूरा अनावृष्टिप्रसूचकाः ॥
शुभयुक्ता जलाढ्यस्याद्यातिदृष्टिः शुभा ग्रहाः।
एकनाड़ीसमायुक्तौ चन्द्रमोधरणीसुतौ ॥
यदि तत्र भवेच्छीघ्रदा वारिमयी मही।
बुधशुक्रौ यदैकत्र गुरुणा च समन्वितौ ॥
चन्द्रयोगे तदा काले जायते दृष्टिरुत्तमा।
जलयोगगतौ स्यातां यदा चन्द्रसितौ ग्रहौ ॥
क्रूरदृष्टौ युतौ वापि तदा मेघोऽल्पदृष्टिदः।
उदयास्तगते मार्गे वक्रयुक्ते च संक्रमौ ॥
जलनाड़ीगतास्ते तु महादृष्टिप्रदा ग्रहाः ॥"

इति स्वरोदये सप्तनाड़ीचक्रम्॥

तच्चक्ररूपं यथा।



सप्तनामा, स्त्री, (सप्त नामानि यस्याः। "डाबुभाभ्यामन्यतरस्याम्।"४।१।१३। इति ङाप्।) आदित्यभक्ता। इति राजनिर्घण्टः॥

सप्तपत्रः, पुं, (सप्त सप्त पत्राणि यस्य।) सुरद्रुः। इति राजनिर्घण्टः॥

सप्तपदी, स्त्री, सप्तानां पदानां समाहारः। ("द्विगोः।"४।१।२१। इति ङीप्।) इति व्याकरणम्॥ विवाहाङ्गसप्तपदीगमनं यथा। ततो जामाता प्रागुदीचीं गत्वा वधूं सप्तभिर्मन्त्रैः सप्तमण्डलिकासु सप्तपदानि नयेत्। वधूश्च दक्षिणपादं नीत्वा पश्चादामपादं मण्डलिकां नयेत् जामाता च वधूं ब्रूयात्। वामेन पादेन दक्षिणं पादमाक्रमयेति। सप्तानां मन्त्राणामृषयादयः साधारणाः। प्रजापतिर्ऋषिरेकपाद्विराट् छन्दो विष्णुर्देवता पादाक्रामणे विनियोगः। ॐ एकमिषे विष्णुस्त्वा नयतु। द्वे ऊर्जे विष्णुस्त्वा नयतु। त्रीणि व्रताय विष्णुस्त्वा नयतु। चत्वारि मायोभवाय विष्णुस्त्वा नयतु। पञ्चपशुभ्यो विष्णुस्त्वा नयतु। षड्रायस्पोषाय विष्णुस्त्वा नयतु। सप्तसप्तभ्यो होत्राभ्यो विष्णुस्त्वा नयतु॥ ततः सप्तमं पदं गतां वधूं पतिराश्वास्ते। प्रजापतिर्ऋषिर्ममकीपंक्तिश्छन्दः कन्या देवता पादाक्रामणानन्तरमाश्वासने विनियोगः। सखा सप्तपदीभव सख्यन्ते गमेयं सख्यन्ते मा योषा सख्यन्ते मायोष्ठाः। इति सप्तपदीगमनम्। इति भवदेवभट्टः॥

सप्तपर्ण, क्लो, (सप्तानां द्राक्षादीनां पर्णमिव यत्र।) मिष्टान्नविशेषः। यथा,—

"द्राक्षादाड़िमखर्जूरमृजिताम्रं सशर्करम्।
लाजचूर्णं समध्वाज्यं सप्तपर्णमुदाहृतम्॥"

इति शब्दचन्द्रिका॥

सप्तपर्णः, पुं, (सप्त सप्त पर्णानि यस्य।) वृक्षविशेषः। छातिम् इति भाषा॥ (यथा, रघुः। ४।२३।

"प्रसवैः सप्तपर्णानां मदगन्धिभिराहृताः।
अलयैव तत्यागाः सप्तधैव प्रसुस्रुवुः॥")

तत्पर्य्यायः। विशालत्वक् २ शारदी ३ विषमच्छदः ४। इत्यमरः॥ शारदः ५ देववृक्षः ६ दानगन्धिः ७ गिरीरुहा ८ अहनाम्नः ९ श्रुतिपर्णः १० गृहाम्नी ११ अहनाम्नः १२। इति शब्दरत्नावली॥ गुल्मपुष्पः १३ अक्षिपर्णः १४ सुपर्णकः १५। इति जटाधरः॥ वृक्षत्वक् १६ इति रत्नमाला॥ अस्य गुणाः।

"सप्तपर्णो व्रणश्लेष्मवातकुष्ठाऽरुजन्तुजित्।
दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः स्मृतः॥"

अन्यत् सप्तच्छदशब्दे द्रष्टव्यम्॥

सप्तपर्णी, स्त्री, (सप्त सप्त पर्णान्यस्याः। ङीप्।) लज्जालुलता। इति रत्नमालाराजनिर्घण्टौ॥

सप्तपातालं, क्लो, (सप्तानां पातालानां समाहारः।) सप्तसंख्यकाधोभुवनम्। यथा,—

"आदित्यरश्मितो देवो वृद्धरूपी जनार्दनः।
निःसृत्य प्रथमं यातः पातालतलमन्ततः॥
सप्तपातालसंख्यांस्तु नागगन्धर्वराक्षसान्।
देवान्दृप्तांश्च शेषांश्च जघान वरशूलधृक्॥"

इति कालिकापुराणे २४ अध्यायः॥

तत्रामानि यथाह भरतः।

"अतलं वितलञ्चैव नितलञ्च गभस्तिमत्।
महाख्यं सुतलञ्चाग्र्यं पातालं सप्तमं विदुः॥"

सप्तपुत्रसूः, स्त्री (सप्त पुत्रान् सूते इति। सू+क्विप्।) सप्तपुत्रप्रसूता। तत्पर्य्यायः। सुतवस्करा २। इति त्रिकाण्डशेषः॥

सप्तभद्रः, पुं, (सप्तसु स्थानेषु भद्रमस्य।) शिरीवृक्षः। इति शब्दचन्द्रिका॥

सप्तमः, त्रि, (सप्तन्+"तस्य पूरणे डट्।" ५।२।४८। इति डट्। "नान्तादसंख्यादेर्मट्।" ५।२।४९। इति डटो मडागमः।) सप्तानां पूरणः। सातङ इत्यादि भाषा। यथा,—

"लेपभाजयतुर्थाद्याः पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषम्॥"

इति शुद्धितत्त्वम्॥

सप्तमी, स्त्री, (सप्तन्+टित्त्वात् ङीप्।) तिथिविशेषः। चन्द्रस्य सप्तमकलाक्रिया। तत्र शुक्लपक्षे अमृतपूर्णावच्छिन्नसप्तमकलाक्रिया। कृष्णपक्षे तु अमृतह्रासानुकूलसप्तमकलाक्रियेति विशेषः। पञ्जिकायां तस्या अङ्कः शुक्लपक्षे ७ कृष्णपक्षे २२॥ * ॥ तत्र जातफलम्।

"कन्याप्रजो वैरीकुलेभसिंहो
विशालनेत्रः प्रथितप्रभावः।
देवद्विजार्चारसिको महात्मा
स्यात् सप्तमीजः पितृवित्तहर्त्ता॥"

इति कोष्ठीप्रदीपः॥*॥

अथ सप्तमी। सा च षष्ठीयुता ग्राह्या युग्मात्। पैठीनसिवचनात्। यथा,—

"पञ्चमी सप्तमी चैव दशमी च त्रयोदशी।
प्रतिपन्नवमी चैव कर्त्तव्या सांमुखी तिथिः॥"

सांमुख्यमुक्तं स्कान्दे।

"सांमुख्यं नाम सायाह्नव्यापिनी दृश्यते यदा।"

अतएव परदिने त्रिसन्ध्यकालाव्याप्तित्वे षष्ठीयुतसप्तम्यामुपवासमाह भविष्यपुराणम्।

"षष्ठीसमेता कर्त्तव्या सप्तमी नाष्टमीयुता।
पतङ्गोपासनायैव षष्ठ्यामाहुरुपोषणम्॥"

यथा उपोषणे तथा कर्म्मान्तरे। तथा।

"षष्ठ्या युता सप्तमी च कर्त्तव्या सर्वदा तिथिः।
षष्ठी च सप्तमी यत्र तत्र सन्निहितो हरिः॥"

इति स्कन्दपुराणात्॥ तथा।

"शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो यदा भवेत्।
सप्तमी विजया नाम तत्र दत्तं महाफलम्॥"

भविष्ये।

"शालितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम्।
सूर्य्याय चरुकं दत्त्वा सप्तम्यान्तु विशेषतः॥
यावन्तस्तण्डुलास्तस्मिन्नैवेद्ये परिसंख्यया।
तावद्वर्षसहस्राणि सूर्य्यलोके महीयते॥"

गोपथब्राह्मणम्।

"द्वात्रिंशत्पलिकं प्रस्थमुक्तं स्वयमथर्व्वणा॥"

ज्योतिषे।

"पलन्तु लौकिकैर्मानैः साष्टरत्तिहिमाषकम्।
तोलकत्रितयं प्रोक्तं ज्योतिर्ज्ञैः स्मृतिसम्मतम्॥"

तेन चतूरत्तिकाधिकमाषपञ्चकाधिकषड्धिकप्रततोलकमिताः प्रस्थतण्डुलाः। इति। एवञ्चैतत्प्रस्थाधिकयोः फलतारतम्यं बोध्यम्। एवं देवतान्तरेऽपि तत्तल्लोकमहितत्वफलेन कल्पयितुं युक्तम्। अतएव शिवेऽप्येवं वक्ष्यते॥*॥

वराहपुराणे।

"अथापरं महाराज व्रतमारोग्यसंज्ञितम्।
कथयामि परं पुण्यं सर्व्वपापप्रणाशनम्॥
तस्यैव माघमासस्य सप्तम्यां समुपोषितः।
पूजयेद्भास्करं देवं विष्णुरूपं सनातनम्॥
आदित्य भास्कर रवे भानो सूर्य्य दिवाकर।
प्रभाकरेति संपूज्यो देवः सर्व्वेश्वरो रविः॥
षष्ठ्याञ्चैकभक्ताहारः सप्तम्यां समुपोषितः।
अष्टम्याञ्चैव भुञ्जीत एष एव विधिः स्मृतः॥
अनेन वत्सरं पूर्णं विधिना योऽर्च्चयेद्रविम्।

तस्यारोग्यं धनं धान्यमिह जन्मनि जायते ॥
परत्र च शुभं स्थानं यत्कृत्वा न निवर्त्तते ।"
सप्तम्यां समुपोषित इति आदिकर्म्मणि क्तः ।
तेन सप्तम्यां समुपवस्तुमारब्धवानित्यर्थः । ततश्च
प्रातः सप्तम्यामेवोपवाससङ्कल्पः । रविश्च विष्णु-
रूपतया पूजाकाले ध्येयः । अभिलाषे तु
तत्तिथावित्युक्त्वा आरभ्येति ऐहिकारोग्यधन-
धान्यपारलौकिकशुभस्थानलाभकामः संवत्सरं
यावदारोग्यव्रतमिति विशेषः । ततः प्रभृति-
सप्तम्यामुपवासं कुर्व्वन् ।
"आदित्य भास्कर रवे भानो सूर्य्य दिवाकर ।
प्रभाकर नमस्तुभ्यं अस्माद्रोगादिमोचय ॥"
इति मन्त्रेण पूजयेत् । अत्र षष्ठ्यादिषु तत्तत्-
कर्म्मविधानात् षष्ठीसमेतेत्यस्य न विषयः ।
कालिकापुराणे भक्तं प्रति सूर्य्यवाक्यम् ।
"अदृष्ट्वा मां न भुञ्जीत विष्णुं च नैव दर्शयेत्॥"
तथा ।
"मदर्चाष्टतनिर्म्माल्यं शरीरे न तु धारयेत् ॥"
अर्च्चा प्रतिमा ॥ * ॥ अथ विधानसप्तमी ।
कृत्यचिन्तामणौ ।
"अर्काग्रं शुचि गोमयं सुमरिचं तोयं फलञ्चाम्बुजं
मूलं नक्तमुपोषणञ्च विधिवत् कृत्वैकभक्तं नरः॥
क्षीरं वायुशनं घृताशनमिति प्रोक्तान्यमूनि
क्रमात्
कृत्वा द्वादश सप्तमीर्दिनकृतः प्राप्नोत्यभीष्टं
फलम् ॥"
अत्र चार्काग्रादीतरभोजननिवृत्तिरवसीयते ।
तपस्त्वात् । तथा च मत्स्यपुराणम् ।
"तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्यतः ।
दुर्भगत्वं हृषा लोको वहते सति साधने ॥"
तपसः क्लेशरूपत्वं तत्रैवोक्तम् ।
"उमेऽतिचपला पुत्रि न क्षमं तावकं वपुः ।
सोढुं क्लेशस्वभावस्य तपसः सौम्यदर्शने ॥"
व्यक्तमुक्तं यथा,—
"अर्कपत्राङ्कुरमात्रमन्तरीक्षगृहीतकम् ।
कपिलाविड्यवमात्रं मञ्जुलं मरिचं जलम् ॥
कदलीफलमध्यन्तु कणामात्रमपक्वकम् ।
कुशमूलं यवमात्रं स्वच्छायादिगुणे क्षणे ॥
भक्ष्यं मितोदनं नक्तं शुद्धोपवसनं तथा ।
एकभक्तं मयूराण्डप्रमाणं भोजनं मतम् ॥
अर्द्धप्रसृतिमात्रन्तु कपिलादुग्धभक्षणम् ।
स्नात्वा सम्पूज्य मार्त्तण्डं प्राङ्मुखो वायुमा-
श्रयेत् ॥
हृतं स्वल्पं घीषमासे माघादब्दं समाचरेत् ।
ब्राह्मणान् भोजयेद्भक्त्या गुड़क्षीरनिरामिषैः ॥
विप्राय दक्षिणां देया विभवस्यानुरूपतः ।
अष्टम्यां पारणं कुर्य्यात् कटूष्णरहितेन च ॥
मुद्गमाषतिलादीनि घृतञ्चैव विवर्ज्जयेत् ।
एकसिद्धं भक्षयेन्नक्तमर्कतन्त्रानुसारतः ॥"*॥
एतद्व्रतस्य माघादिमासविशेषविहितकर्म्मत्वेन
मलमासेतरकर्त्तव्यत्वं आह वशिष्ठलिङ्गपुरा-
णम् ।

"प्रारब्धे तु व्रते प्राप्ते मध्यमासे त्वधिमासके ।
पूर्व्वमानेन तं त्यक्त्वा कार्य्यं द्वादशमासिकम्॥"
पूर्व्वमानेन मलिम्लुचशून्याब्दमानेन । तं मल-
मासम् । द्वादशमासिकं द्वादशमासेष्वेव कार्य्यं
न मलमास इत्यर्थः । यत्तु ।
"मासे मलिम्लुचेऽप्येवं यजेद्वै वीं सशङ्कराम् ।
किन्तु नोद्यापनं कार्य्यमित्याह भगवान्
शिवः ॥"
इति विष्णुरहस्यवचनम् ॥
तन्मासविशेषानङ्गितमासमात्रकर्त्तव्यामावास्या-
दिव्रतकर्त्तव्यतापरम् । उद्यापनं प्रतिष्ठा ।
एवमारभ्योऽपि निषिद्धः । गार्ग्यः ।
"अस्तं गते गुरौ शुक्रे बाले वृद्धे मलिम्लुचे ।
उपायनमुपारम्भं व्रतानां नैव कारयेत् ॥"
उपायनं प्रतिष्ठा । उपारम्भमारम्भः । एतच्च
कालाशुद्धिमात्रपरं तत्तन्मात्रविधिकल्पने गौर-
वात् ॥*॥ भविष्ये ।
"भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या ।
स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम्
पूजयेच्च तदा तस्या दुष्प्रापं नैव विद्यते ॥"
इदं कुक्कुटीव्रतत्वेन ख्यातम् ॥*॥ भविष्ये ।
"सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घ्यदानाभ्यामायुरारोग्यसम्पदः॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
कोटिभास्करा कोटिसप्तमीतुल्या । सूर्य्यग्रहण-
फलं स्नानजं सञ्जिहिते बुद्धिरन्तरङ्गेति न्यायात्
तेन बहुशतसूर्य्यग्रयणकालीनगङ्गास्नानजन्य-
फलसमफलप्राप्तिः फलमत्र ध्येयम् । अत्र बहु-
शतसूर्य्यग्रहाणां प्रत्येकाधिकरणतासंसर्गेणान्व-
यात् कालानां स्नानानां तत्फलानामपि बहु-
शतत्वं लभ्यते अतो नाप्रसिद्धिः । पूर्णसप्तम्यां
पूर्व्वपरयोर्व्यत्यस्तोदयकाले सप्तमी पूर्व्वदिने
तत्काले स्नानम् ।
"चतस्रो घटिका प्रातरुदयेऽर्कस्य उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः ॥
त्रियामां रजनीं प्राहुस्त्र्यहश्चाद्यन्तचतुष्टयम् ।
नाड़ीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते ॥"
इति कालललाधवीयधृतब्रह्मवैवर्त्तेन पूर्व्वस्य
तत्कालस्य पूर्व्वतिथिसम्बन्धिदिनकर्त्तव्यकर्म्माङ्ग-
त्वेन इतरस्य चेतराङ्गत्वेनाभिधानात् अतएव
दक्षेण तत्कालमारभ्याह्निककृत्यमभिहितम् ।
अत्रारुणोदयकाले मुहूर्त्तान्यूनतिथिलाभ एव
स्नानम् ।
"व्रतोपवासस्नानादौ घटिकैका यदा भवेत् ।
उदये सा तिथिर्ग्राह्या शेषादावस्तगामिनी॥"
इति विष्णुधर्म्मोत्तरात् ।
अत्र घटिका मुहूर्त्तं शास्त्रयोग्यकालानुरोधात्
इति वक्ष्यते । ब्रह्मवैवर्त्तवचने घटिका दण्ड-
रूपा परवचने नाड़ीनामाद्यन्तचतुष्टयमित्येक-
वाक्यत्वात् ॥ * ॥ ये तु सूर्य्योदयात् प्रागपि
प्रातःस्नानविधानात् तत्रैव माघसप्तम्याख्य-
गुणफलविधिर्लाघवादित्याहुस्तच्चिन्त्यम् । प्रक-
रणान्यत्वे प्रयोजनान्यत्वं इति जैमिनिसूत्रेण
प्रकरणभेदे गुणविध्यसिद्धेः । अतएव कल्पतरु-
रत्नाकरयोः ।
"य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोप-
मान् ।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्-
गुनौ ॥"
इति विष्णुस्मृतौ नित्यस्नानप्रकरणात् प्रकरणा-
न्तरास्नानात् प्रकरणान्तराधिकरणन्यायेन
काम्यस्नानान्तरमिदमित्युक्तं न तु गुणफल-
विधिः । किन्तु काम्यकरणे प्रसङ्गान्नित्यसिद्धि-
रिति । अत्र माघमासनिमित्तकमाघसप्तमी-
निमित्तककाम्यस्नानयोः प्रातर्व्विधानात् नैमि-
त्तिकत्वेन प्रायश्चित्तवत् सकृदनुष्ठानम् ।
"प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः ।
तदङ्गस्याक्रियायान्तु नावृत्तिर्न च तत्क्रिया ॥"
इति कात्यायनवचनात् ॥
"न स्नानमाचरेद्युक्ता नातुरो न महानिशि ।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये ॥"
इति मनुवचनेनैकदाजस्रस्नाननिषेधाच्च ।
"धर्म्मेविघ्नाचरेत् स्नानमाङ्गिकञ्च पुनःपुनः ।"
इति मनुवचनाच्च ।
अतएव नान्दीमुखप्रकरणशेषे प्रधानानामपि
काम्यानां तत्तद्देशकालविहितानां तत्रैव
सिद्धिरिति श्राद्धचिन्तामणिः । निष्कामविष्णु-
प्रीतिकामयोः सुतरां सकृदनुष्ठानं गुणतार-
तम्यात् फलतारतम्यं इति न्यायेन फलं
बोध्यम् । तत्तु इक्षुक्षीरगुड़ादिमाधुर्य्यभेदव-
द्विहितभक्ष्यभेदेन ज्ञेयम् ।
"पञ्चान्तरेऽपि कन्यास्थे रवौ श्राद्धं प्रशस्यते ।
कन्यागते पक्षमे तु विशेषेणैव कारयेत् ॥"
इति हेमाद्रिधृतादित्यपुराणोक्तवत् । एतद्-
वचनप्रागर्द्धं कार्त्तिकमलमासाब्दविषयम् ।
"देशकालाश्रमश्चैव द्रव्यदाढर्यगुणाः ।
सम्यग्ज्ञास्यसि दानस्य फलातिशयहेतवः ॥"
इति ब्रह्मपुराणोक्तवच्च ।
तीर्थभेदे त्वेकदापि नानास्नानम् ।
"विषुवद्दिवसे प्राप्ते पञ्चतीर्थे विधानतः ।"
इति ब्रह्मपुराणादिवचनात् तीर्थभेदे तन्त्रप्रस-
क्तयोरसम्भवाच्च । अतएव गङ्गावाक्यावली-
श्राद्धचिन्तामेष्योः । यत्तु प्रयागे ब्राह्मस्नान-
क्रोडीकृतेऽपि माघसप्तमीस्नानादावसाधारणं
सङ्कल्पेन पुनस्तत्रैव प्रातःस्नानाचरणं तद-
युक्तम् । तदा सकृत्स्नानस्यैव विहितत्वात्
अन्यथा तत्रापि फलकामनायां तदानन्त्यापत्ते-
रित्युक्तम् ।*। स्नाने परिपाटीमाह कृत्य-
कल्पलतायां विष्णुः । सप्तवदरपत्राणि सप्तार्क-
पत्राणि च शिरसि निधाय ।
"यदद्य सप्तजन्मोत्थं पापं मया सप्तसु जन्मसु ।


तस्मै रोकञ्च शोकञ्च माकरी हन्तु सप्तमी ॥"
इत्यत्राद्यर्थे ञायादिति शेषः। रोकं छिद्रम्।
तिथिकृत्यस्य पौर्णमास्यन्तमासाङ्कत्वान्माकरीति पदं मकरार्कारब्धचान्द्रमासीयतिथिपरम्
"तिथिकृत्ये च कृष्णादिं व्रते शुक्लादिमेव च।
विवाहादौ च सौरादिं मासं कृत्ये विनिर्दिशेत् ॥"
इति ब्रह्मपुराणात् ॥
मन्वन्तरादित्वेन तथा युक्तत्वाच्च। यथा,मत्स्यपुराणे।
"यस्मान्मन्वन्तरादौ तु रथमापुर्दिवाकराः।
माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥"
अतएव नारसिंहे रथाख्यायामित्युक्तम्। यथा,
"महानवम्यां द्वादश्यां भरण्यामपि चैव हि।
तथाचयतृतीयायां गिथ्यावाध्यापयेद्बुधः।
माघमासे तु सप्तम्यां रथाख्यायान्तु वर्जयेत्॥"
द्वादश्यां श्रयनोत्थानद्वादश्याम्। भरण्यां शक्रध्वजपातभरण्याम्। इति कल्पतरुः। अत्र महानवम्यादिसाहचर्य्यादृगौणचान्द्रत्वं प्रतीयते। अतएव चतुर्दशमन्वन्तरादिगणने क्वापि न राज्युल्लेखः। यथा, भविष्यमाल्ययोः।
"अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा।
आषाढ़स्यापि दशमी तथा माघस्य सप्तमी ॥
श्रावणस्याष्टमी कृष्णा तथाषाढ़स्य पूर्णिमा।
कार्त्तिकी फाल्गुनी चैत्री ज्येष्ठी पञ्चदशी सिता।
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः ॥"
अत्रामावास्याष्टमीव्यतिरिक्ताः शुक्लाः। पुनः पुनस्तथापदोपादानात् उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनाच्च। अत्र कामधेनौ तृतीया चैव माघस्येति। कल्पतरौ तु तृतीया चैत्रमासस्येति लिखितम्। अत्र पाठद्वैधे श्रीपतिरत्नमालायाम्। अश्वयुजि शुक्लनवमी द्वादशूर्ज्जे मधौ तृतीया चेति पाठाच्चैत्रतृतीयैव याह्या। श्रीदत्तोऽप्येवम्। माघसप्तम्याश्चान्द्रत्वं सौरागमेऽपि।
"मकरस्थे रवौ माघे सवटरेर्दूर्व्वाक्षतसचन्दनैः।
षष्टाङ्गविधिना चार्घ्यं दद्यादादित्यतुष्टये ॥
माघेऽथ फाल्गुने वापि भवेद्वै माघसप्तमी।
माकरीति च यत् प्रोक्तं तत् प्रायोङ्गत्वदर्शनात् ॥"
षष्टाङ्गविधिना।
"योऽष्टाङ्गमर्घ्यं मापूर्य्य भानोर्मूर्द्धि निवेदयेत्।
ताम्रपात्रार्घ्यदानेन पुण्यं दशगुणं स्मृतम् ॥"
इति विष्णुपुराणोक्तेन। आदित्यपुराणे।
"ऋक्षराशिविशेषेण यत् कर्म्म विहितं नरैः।
दैवं वाप्यथवा पैत्रं तदन्यत्रापि दृश्यते ॥"
अर्घमन्त्रस्तु।
"जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके।
सप्तव्याहृतिके देवि नमस्ते रविमण्डले ॥"
प्रणाममन्त्रस्तु।
"सप्तसप्तीवह प्रीत सप्तलोकप्रदीपन।
सप्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे ॥"
सप्तिरश्वः। इति तिथ्यादितत्त्वम् ॥*॥ सप्तमीव्रतविशेषा यथा,—

ब्रह्मोवाच।

"भगवन् भवसंसारसागरोत्तारकारकम्।
किञ्चिदव्रतं समाचक्ष्व स्वर्गारोग्यसुखप्रदम् ॥
श्रीभगवान् उवाच।
शौरधर्म्मं प्रवक्ष्यामि नाम्ना कल्याणसप्तमीम्।
विशोकसप्तमीं तद्वत् फलदां पापनाशिनीम् ॥
शर्करासप्तमीं पुण्यां तथा कमलसप्तमीम्।
मन्दारसप्तमीं पुण्यां तथैव शुभसप्तमीम् ॥
सर्व्वाः सर्व्वफलाः प्रोक्ताः सर्व्वदेवर्षिपूजिताः।
विधानमासां वक्ष्यामि यथावदनुपूर्व्वशः ॥
यदा तु शुक्लसप्तम्यामादित्यस्य दिनं भवेत्।
सा तु कल्याणिनी नाम विजया तु निगद्यते ॥"
आसां इतिकर्त्तव्यताकालौ च मत्स्यपुराणे ६९ अध्यायावधि ७५ अध्यायपर्य्यन्तं द्रष्टव्यौ॥*॥
सा सूर्य्यमूर्त्तिप्रकाशिका तिथिः। यथा,—
"एवमुक्तस्तदा देवैः सौम्यां मूर्त्तिमथाकरोत्।
प्रकाशत्वं जगामाशु देवतानां महाप्रभः ॥
एतत् सर्व्वं सुराणान्तु दहनं शमितं पुरा।
सप्तम्यां खलु सूर्य्येण मूर्त्तिश्च कृतवान् भुवि ॥"
इति वाराहे सूर्य्योत्पत्तिनामाध्यायः ॥
सप्तरक्तं, क्ली, (सप्तानां रक्तानां तद्वर्णानां समाहारः।) शरीरस्य रक्तवर्णसप्तावयवाः। ते च हस्तपादतलनेत्रान्तरतालुकाधरजिह्वानखाः। यथा, सामुद्रके।
"पाणिपादतली रक्तौ नेत्रान्तरनखानि च।
तालुकाधरजिह्वाश्च सप्तरक्तं प्रशस्यते ॥"
सप्तर्षयः,पुं,भूम्नि, (सप्तऋषयः।) सप्तसंख्यकर्षयः तेषां नामानि यथा। मरीचिः १ अत्रिः २ अङ्गिराः ३पुलस्त्यः ४पुलहः५क्रतुः६वशिष्ठः७। इत्यमरः ॥ अपि च।
"सप्तर्षिमण्डलं तस्मादृश्यते सर्व्वतोपरि।
तत्र सप्तर्षयः सन्ति विनियुक्ताः प्रजासृजा ॥
मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः।
वशिष्ठश्च महाभाग ब्रह्मणो मानसाः सुताः ॥
सप्तब्राह्मश्च इत्येते उच्यन्ते ब्रह्मवादिभिः।
संभूतिरनसूया च क्षमा प्रीतिश्च सन्नतिः ॥
अरुन्धतिस्तथा लज्जा तत्पत्न्यो लोकमातरः।
एतासां तपसा चैतदार्य्यते भुवनत्रयम् ॥
मन्यावयमुपासीना गायत्रीजपतत्पराः।
तस्मिन्लोके वसन्त्येते ब्राह्मणाः ब्रह्मवादिनः॥"
इति पाद्मे स्वर्गखण्डे ११ अध्यायः ॥
(प्रतिमन्वन्तरे सप्तर्षयो भिन्ना एवासन्। तदुत्तान्तास्तु ऋषिशब्दे द्रष्टव्याः॥)
सप्तला,स्त्री, (सप्त लातीति। ला+कः।)नवमालिका। इत्यमरः ॥ चर्म्मकषा। गुञ्जा। पाटला। इति मेदिनी ॥

सप्तशती, स्त्री, सप्तानां शतानां समाहारः। इति व्याकरणम् ॥ ("द्विगोः।" ४।१।२१। इति ङीप्।) सप्तशतिका। सप्तशतश्लोकात्मकदेवीमाहात्म्यम्। चण्डीति ख्यातम्। यथा,—
अर्गलं कीलकञ्चादौ पठित्वा कवचं ततः।
जपेत् सप्तशतीं चण्डीं क्रम एव शिवोदितः ॥"
इत्यर्गलस्तोत्रम् ॥
तथा च नागोजीभट्टः।
"तत्राद्ये चरिताध्याये श्लोका अशीतिरुत्तमाः
अथ मध्ये चरित्रे तु पञ्चाष्टकसुसंख्यकाः ॥
त्रयोऽध्यायाश्चतुःसप्तचतुर्व्वेदखवेदकाः।
अथोत्तरचरित्रे तु षट्षड़ग्निश्लोकभाक्।
अन्वीसोमाध्यायवती गौता सप्तशती स्मृता॥"
सप्तश्लाकः, पुं, (सप्त श्लाकाः सदृत्तरेखा यत्र।) विवाहस्य शुभाशुभदिनज्ञानार्थं तिथ्यृक्षसप्तरेखाविशिष्टचक्रविशेषः। यथा,—
"कृत्तिकादिचतुःसप्तरेखाराशौ परिभ्रमन्।
ग्रहर्क्षं दैकरेखास्थो वेधः सप्तश्लाकजः ॥
सप्त सप्त विलिखेत् प्ररेखिका-
स्तिथ्यृक्षं मध्य कृत्तिकादिकम्।
लेखयेदभिजिता समन्वितं
चैकरेखगखगेन विध्यते ॥
वैश्यस्य चतुर्थेऽंशे श्रवणादौ लिप्तिकाचतुष्के च अभिजित् तस्मे खचरे विद्धे या रोहिणीविद्धा॥"
लिप्तिका दण्डः।
"यस्याः शशी सप्तश्लाकभिन्नः
पापैरपापैरथवा विवाहे।
रक्तांशुकेनैव तु रोदमाना
श्मशानभूमिं प्रमदा प्रयाति ॥"
इति सप्तश्लाकवेधः। इति ज्योतिस्तत्त्वम् ॥

तच्चक्ररूपं यथा।



सप्तशिरा, स्त्री, (सप्त शिरा यस्याः।) नागस्त्री। इति राजनिर्घण्टः ॥
सप्तसप्तिः, पुं, (सप्त सप्तयो घोटका यस्य।) सूर्य्यः। इति हेमचन्द्रः ॥ (यथा, रघुः।१३।४१।
"इविर्भुजामेधवतां चतुर्णां,
मध्ये ललाटन्तपसप्तसप्तिः।
असौ तपस्त्यत्परस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः॥")

सप्तसागरः, पुं, (सप्त सागरा इव कुण्डानि यत्र ।) महादानविशेषः । यथा,—
मत्स्य उवाच ।
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
सप्तसागरकं नाम सर्व्वपापविनाशनम् ॥
पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनं बुधः ॥
ऋत्विक्स्रक्परसंभार भूषणाच्छादकादिकम् ।
कारयेत् सप्त कुण्डानि कनकानि विचक्षणः ॥
प्रादेशमात्राणि तथारत्निमात्राणि वा पुनः ।
कुर्य्यात् सप्तपलादूर्द्धमासहस्राच्च शक्तितः ॥
संस्काराण्यानि च सर्व्वाणि कृष्णाजिनतिलोपरि ।
प्रथमं पूरयेत् कुण्डं लवणेन विचक्षणः ॥
द्वितीयं पयसा तद्वत् तृतीयं सर्पिषा पुनः ।
चतुर्थन्तु गुड़ेनैव दध्ना पञ्चममेव च ॥
षष्ठं शर्करया तद्वत् सप्तमं तीर्थवारिणा ।
स्थापयेन्नववस्त्रन्तु ब्रह्माणं काञ्चनं शुभम् ॥
केशवं क्षीरमध्ये तु घृतमध्ये महेश्वरम् ।
भास्करं गुड़मध्ये तु दधिमध्ये सुराधिपम् ॥
शर्करायां न्यसेत् लक्ष्मीं जलमध्ये तु पार्व्वतीम् ।
सर्व्वेषु सर्व्वरत्नानि धान्यानि च समन्ततः ॥
तुलापुरुषवत् शेषमत्रापि परिकल्पयेत् ।
ततो वारुणहोमान्ते स्नापितो वेदपुङ्गवैः ।
त्रिः प्रदक्षिणमात्रत्य मन्त्रानिमानुदीरयेत् ॥
नमो वः सर्व्वसिन्धूनां आधारेभ्यः सनातनाः ।
जन्तूनां प्राणदेभ्यश्च समुद्रेभ्यो नमो नमः ॥
क्षीरोदकाज्यदधिमाधवलावणेषु-
सारामृतेन भुवनत्रयजीवसंघान् ।
आनन्दयन्ति वसुभिश्च यतो भवन्त-
स्तस्माच्चमाप्यघविघातमलं विदध्वम् ॥
यस्मात् समस्तभुवनेषु भवन्त एव
तीर्थामरासुरसुवन्द्यमखिप्रतानम् ।
पापक्षयादरविलोपनभूषणाय
लोकस्य बिभ्रति तदस्तु ममापि लक्ष्मीः ॥
इति ददाति रसाम्बरसंयुतान्
शुचिरविक्षयवानिह सागरान् ।
अमलकाञ्चननवरत्नमयानसौ
पदमुपैति हरेरमरावृतः ॥
सकलपापविघातविराजितं
पितृपितामहपुत्रकलत्रकम् ।
नरकलोकसमाकुलमप्यलं
झटिति नेतुमसौ शिवमन्दिरम् ॥"
इति मत्स्यपुराणे महादानानुकीर्त्तने सप्तसागरप्रदानिको नाम २६१ अध्यायः ॥

सप्तसूः, स्त्री, (सप्त सूते इति । सू + क्विप् ।) सप्तपुत्रप्रसूता । तत्पर्य्यायः । सुतवस्करा २ । इति शब्दरत्नावली ॥

सप्तांशपुङ्गवः, पुं, (सप्तभिरंशुभिः पुङ्गव इव श्रेष्ठत्वात् ।) अग्निः । इति जटाधरः ॥

सप्तार्चिः, [स्] पुं, (सप्त अर्चींषि यस्य ।) अग्निः । (यथा, रघुः । १० । २१ ।
"सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम् ।
सप्तार्चिर्मुखमाचक्षुः सप्तलोकैकसंश्रयम् ॥")
चित्रकहृक्षः । इत्यमरः ॥ अग्निग्रहः । इति हेमचन्द्रः ॥ क्रूरचक्षुषि, त्रि । इति मेदिनी ॥ अग्नेः सप्तानामर्चिषां नामानि सप्तजिह्वशब्दे द्रष्टव्यानि ॥

सप्ताश्वः, पुं, (सप्त अश्वा यस्य ।) सूर्य्यः । अर्कवृक्षः । इत्यमरः ॥ (क्वचित् वाच्यलिङ्गेऽपि दृश्यते । यथा, ऋग्वेदे । ५ । ४५ । ९ ।
"आ सूर्य्यो यातु सप्ताश्वः चेतं यदस्योर्विया-
दीर्घयाजे ॥"
"सूर्य्यः सर्व्वस्य प्रेरको देवः सप्ताश्वः सप्तस्वभावाश्वोपेतः सप्तसंख्याकाश्वो वा आयातु अस्मदभिमुखमागच्छतु ॥" इति तद्भाष्ये सायणः ॥)

सप्ताश्ववाहनः, पुं, (सप्त अश्वा वाहनान्यस्य ।) सूर्य्यः । यथा,—
"लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥"
इति शाम्बपुराणे सूर्य्यस्तोत्रम् ॥

सप्तिः, पुं, ("षप समवाये । 'सपिनसिवसि-पदिभ्यस्तिप्' इति औणादिकतिप्प्रत्ययः । सपति सङ्गच्छते सहसामेवेति । गतिकर्म्मणो वा सप्तिः । समेतेः स्वर्गार्थात् इति माधवः । क्वापि गतौ । अस्माद्धा तिप्रत्यये गुणे च रेफलोपो बाहुलकात् सर्पति सप्तिः ।" इति निघण्टुटीकायां देवराजयज्वा । १ । १४ । ५ ।) अश्वः । इत्यमरः ॥ (यथा, ऋग्वेदे । ८ । ४ । १४ ।
"अर्व्वाञ्चं त्वा सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप ॥")

सफरः, पुं, मत्स्यविशेषः । पुटी इति भाषा ॥ शयाना स्फुरति पार्श्वेन गच्छतीति शफरी मनीषादिः नदादित्वादीप् । श्रोणिशफरीशय्याशकटशिलाशरचक्षतपथ इत्युणभेदात् तालव्यादिः । दन्त्यादिरपीति केचित् । शफरश्च । इत्यमरटीकायां भरतः ॥

सफरी, स्त्री, (सफर + ङीष् ।) मत्स्यविशेषः । इति भरतः ॥ पुंटी इति भाषा ॥ तत्पर्य्यायः । शफरी २ प्रोष्ठी ३ । इत्यमरः ॥ शफरः ४ श्वेतकोलः ५ । इति त्रिकाण्डशेषः ॥ (यथा,—
"अगाधजलसञ्चारी रोहितोऽपि स्थिरायते ।
गण्डूषजलमात्रेण सफरी फरफरायते ॥"
इत्युद्भटः ॥)

सफलं, त्रि, (फलेन सह वर्त्तमानम् ।) फलविशिष्टम् । तत्पर्य्यायः । अमोघम् २ । इति जटाधरः ॥ (यथा, मार्कण्डेये । ६१ । ३७ ।
"सफलं मे भवेज्जन्म यदि मां नावमन्यसे ॥"
सप्तशतम् । यथा, कथासरित्सागरे । २५ । १२ ।
"अपश्यदाश्रमपदं सफलस्निग्धपादपम् ॥")

सबलः, त्रि, (बलेन सह वर्त्तमानः ।) सैन्ययुक्तः । सामर्थ्यवान् । यथा,—
"सबले च गृहे प्राप्ते दिनमात्रं प्रचक्षते ।
मध्ये बले तथा मासं वर्षं विद्यात्तथाबले ॥"
इति पक्षस्वराः ॥

सबलिः, पुं, विकालः । इति हेमचन्द्रः ॥

सबाधः, त्रि, पीड़ायुक्तः । निषेधयुक्तः । बाधया बाधेन च सह वर्त्तमानो यः इति बहुव्रीहिसमासनिष्पन्नः ॥

सब्रह्मचारी, [न्] पुं, (ब्रह्म वेदस्तदध्ययनार्थं यद्व्रतं तदपि ब्रह्म तच्चरतीति ब्रह्मचारी समानो ब्रह्मचारी । यद्वा, समाने ब्रह्मणि चरतीति । णिनिः । "चरेष्टे ब्रह्मचारिणि ।" ६ । १ । ८६ । इति समानस्य सः ।) परस्परैकब्रह्मव्रताचारः । इत्यमरः ॥ एकस्मादुगुरोर्ब्रह्मणे वेदाय अर्थात् वेदाध्ययनाय व्रतं अभिब्रह्मचर्य्याख्यं आचरन्ति ये तेऽन्योन्यं सब्रह्मचारिण उच्यन्ते । उपचारात् ब्रह्माध्ययनार्थं व्रतमपि ब्रह्म । समानं ब्रह्म चरन्तीति ग्रहादित्वाणिनि ज्योतिर्जनपदेत्यादिना समानस्य सभावे सब्रह्मचारिणः । एकब्रह्मव्रताचारा इत्यत्र एकस्मादब्रह्मणे ब्रह्माध्येतुं व्रतमाचरन्तीति तुमर्थे चतुर्थ्या विग्रहतीति परे । सब्रह्मचारी भिन्नगुरुश्चेत् इति हारलतेति नयनानन्दः । इति भरतः ॥

सभर्त्तृका, स्त्री, (भर्त्रा सह वर्त्तमाना । सहस्य सः ।) विद्यमानपतिका । तत्पर्य्यायः । पतिवती २ । इत्यमरः ॥ सधवा ३ सनाथा ४ । इति जटाधरः ॥

सभा, स्त्री, (सह भान्ति शोभन्ते यत्रेति । भा दीप्तौ + भिदादित्वात् अधिकरणे अङ् । सहस्य सः ।) सह भान्ति अत्र । मजलिस् इति पारसीक भाषा । पञ्चायित इति हिन्दीभाषा । मिटिं इति इङ्गरेजी भाषा । तत्पर्य्यायः । समज्या २ परिषत् ३ गोष्ठी ४ समितिः ५ संसत् ६ आस्थानी ७ आस्थानम् ८ सदः ९ समाजः १० । इत्यमरः ॥ पर्षत् १२ इति जटाधरः ॥ तल्लक्षणादि यथा । मनुः ।
"यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः ।
राज्ञः प्रतिक्षतो विद्वान् ब्राह्मणस्तां सभां
विदुः ॥"*॥
विद्वत्संहतावपि सभापर्य्यायपरिषच्छब्दमाह स एव ।
"त्रैविद्यो हैतुकस्तर्की निरुक्तो धर्म्मपाठकः ।
त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा ॥"
त्रैविद्यः त्रिवेदपारगः । हैतुकः सदुक्तिव्यवहारी । अतएवामरसिंहः । सभा सदसि सभ्ये च । अत्र भा दीप्तिः प्रकाशो ज्ञानमिति यावत् । तया सह साक्षात्परम्परया वा वर्त्तते इति सभा ॥*॥ कात्यायनः ।
"कुलशीलवयोवृत्तविद्यवद्भिरधिष्ठितम् ।
वदिग्भिः स्यात् कतिपयैः कुलद्वैरधिष्ठितम् ॥"
सद इति शेषः । इति व्यवहारतत्त्वम् ॥*॥
सामाजिकः । द्यूतम् । गृहम् । इति मेदिनी ॥

समूहः। इति हेमचन्द्रः ॥*॥ सभायां एकाकिगमननिषेधो यथा,—
"नैकश्चरेत् सभां विप्रः समवायञ्च वर्ज्जयेत् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
सभाज, त् क सेवने। प्रीतौ। दर्शने। इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-परo-सकo-सेट्।)ससभाजत्। इति दुर्गादासः ॥
सभाजनं, क्लो, (सभाज त् क सेवने प्रीतौ+ल्युट्।) गमनागमनादिसमये सुहृदादेः आलिङ्गनारोग्यप्रश्नस्वागतादिनानन्दोत्पादनम्। तत्पर्य्यायः। आनन्दनम् २ आप्रच्छनम् ३। इत्यमरः ॥ टु नदि संवृधि सभाज त् क सेवनप्रीतिदर्शने प्रच्छौ ग ह्रीषे अनट्। नन्दतिः प्रच्छतिवाङ्पूर्व्वालिङ्गनादाविति क्षुभूतिः। गमनसमये सुहृदमालिङ्ग्य गमनानुज्ञाग्रहणम्। आगतस्य वा स्वागतारोग्यादिप्रच्छा आनन्दनमिति रमानाथः। इति भरतः॥ (यथा, रघुः। १३। ४३।
"सभाजने मे भुजमूर्द्धबाहुः
सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥"
सभाजयतीति। सभाज त् क प्रीतौ+ल्युः। प्रीतिदायके, त्रि। यथा, महाभारते।४।१३।१०
प्रभूतनागाश्वरथं सभाजनं
सम्रद्धियुक्तं बहुपानभोजनम्।
मनोहरं काञ्चनचित्रभूषणं
गृहं महत् शोभयतामियं मम ॥")
सभापतिः, पुं, (सभायाः पतिः।) समाजाधिपतिः। (यथा, भागवते। ६। १७। ७।
"जटाधरस्तीव्रतपा ब्रह्मवादी सभापतिः।
अग्नीनित्य स्त्रियश्चास्ते गतक्लीः प्राकृतो यथा॥")
द्यूतगृहस्वामी। इति केचित् ॥
सभासत् } पुं, (सभा+सद्+क्विप्।) सभायां
सभासद् } सीदति उपविशति यः। तत्पर्य्यायः। सभास्तारः २ सभ्यः ३ सामाजिकः ४। इत्यमरः ॥ परिषदलः ५ पर्षदलः ६ परिषदः ७ पार्षदः ८ परिसभ्यः ९। इति शब्दरत्नावली ॥ तल्लक्षणादि यथा। कात्यायनः।
"सभ्ये नावश्यवक्तव्यं धर्म्मार्थसहितं वचः।
शृणोति यदि नो राजा स्यात्तु सभ्यस्तदानृतः॥"
सभ्यः सभायां साधुः। तथाविधानाह याज्ञवल्क्यः।
"श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः।
राज्ञा सभासदः कार्य्याः शत्रौ मित्रे च ये समाः॥"
श्रुताध्ययनसम्पन्नाः धर्म्मशास्त्रज्ञाः। कुलीनाः सङ्करादि-दोषशून्यमातापित्रवंशपरम्पराकाः। एवम्भूताः सभासदः सभायां यथा सीदन्ति तथा दानमानसत्कारे राज्ञा कर्त्तव्याः। इति व्यवहारतत्त्वम् ॥*॥ अन्यच्च।
"समः शत्रौ च मित्रे च धर्म्मशास्त्रविशारदः।
विप्रमुख्यः कुलीनश्च धर्म्माधिकरणे भवेत् ॥
कार्य्यास्तथाविधास्तत्र द्विजमुख्याः सभासदः ॥"
इति मत्स्यपुराणे १८९ अध्यायः ॥
हरीतस्मृतिस्तु सप्त पञ्च त्रयो वा सभासदो भवन्तीत्याह।
"लोकवेदव्रधर्म्मज्ञाः सप्त पञ्च त्रयोऽपि वा।
यत्रोपाविष्टा विप्राः स्युः सा यज्ञसदृशी सभा॥"
किञ्च।
"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्म्मतः॥"
तत्र ब्राह्मणा अनियुक्ताः सभासदस्तु नियुक्ता इति भेदः। तत्र नियुक्तानां यथावस्थितार्थकथनेऽपि यदि राजान्यथा करोति तदासौ निवारणीयोऽन्यथा दोषः। उक्तञ्च कात्यायनेन।
"अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः।
तेऽपि तद्भागिनस्तस्माद्रोधनीयः स तैर्नृपः॥"
इति मिताक्षरा ॥
सभास्तारः, पुं, (सभां स्तृणातीति। स्तृञ्+आच्छादने+"कर्म्मण्यण्" ३।२।१। इत्यण्।) सभासद्। इत्यमरः ॥ (यथा, महाभारते।२।४८।२।
"के च तत्र सभास्तारा राजानो ब्रह्मवित्तम!॥"
सभिकः, पुं (सभा द्यूतसभा आश्रयत्वेनास्त्यस्येति सभा+व्रीह्यादित्वात् ठन्।) द्यूतकारकः। इत्यमरः ॥ ई सहियार इति ख्याते। सभा द्यूतमस्याश्रयत्वेनास्ति सभिकः विकारसंवेतिष्णिकः। सभा द्यूतं सभा गृहमिति रुद्रः। द्यूतं कारयति द्यूतकारकः षण्णन्तात् स्वार्थे कः। इति भरतः ॥ तत्पर्य्यायः।
"दुरोदरश्च निर्ग्रन्थद्यूतकारकलग्नकाः।
सभिकः प्रतिभूश्चेति————॥"
इति जटाधरः ॥
(यथा, याज्ञवल्क्ये। २। २०२।
"ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम्।
गृह्णीयात् धूर्त्तकितवादितराद्यकं शतम्॥")
सभौकः, पुं, द्यूतकारकः। इति शब्दरत्नावली ॥
सभोचितः, पुं, (सभायासुचितः।) पण्डितः। इति धनञ्जयः ॥ सभायोग्ये, त्रि ॥
सभ्यः, पुं, (सभायां साधुः। सभा+"सभायाः यः।" ४।४। १०५। इति यः।) साधुः। सभासद्। इत्यमरः ॥ (यथा, मनुः। ८। १०।
"सोऽस्य कार्य्याणि संपश्येत् सभ्यैरेव त्रिभिर्हृतः॥"
अस्मिन्नर्थे वाचस्पतिरपि दृश्यते। यथा, रघुः। १। ५५।
"तस्मै सभ्याः सभार्य्याय गोप्त्रे गुप्तेन्द्रियाः श्रुतार्थाय ईयुर्मुनयो नयचक्षुषे॥")
सभिकः। इति जटाधरः ॥
सभ्यः, त्रि, (सभा+यः।) प्रत्ययितः। इति जटाधरः ॥ सभासम्बन्धी च ॥
सम्, व्य, समार्थः। प्रकृष्टार्थः। सङ्गतः। शोभनः। इति शब्दरत्नावली ॥ समुच्चयः। इति हेमचन्द्रः ॥ चतुर्थोपसर्गः। इति व्याकरणम् ॥ अस्यार्थविशेषाः संशब्दे द्रष्टव्याः ॥
समः, त्रि, (समतीति। सम वैलक्ष्ये+पचाद्यच्।) सर्व्वम्। (अस्मिन्नर्थे सर्व्वनामसंज्ञा भवति। यथा, मुग्धबोधे।
"नमः समस्मात् पूर्व्वस्मा अन्तरस्मा अमेधसाम् ॥")
समानम्। इत्यमरः ॥ (अस्मिन्नर्थे सर्व्वनामसंज्ञा न भवति। यथा, मुग्धबोधे।
"समायेषु परायेषां मुक्तयेऽर्थान्तराय च ॥")
साधुः। इति मेदिनी ॥
समः, पुं, (सम वैलक्ष्ये+पचाद्यच्।) राशिविशेषाणां संज्ञाविशेषः। ते तु राशयः कृषकर्कटकन्याहयिकमकरमीनाः। यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
मानस्य प्रकारविशेषः। स तु यदा गीतवाद्ययोस्तालः गायकस्य हस्तपादादिचालनञ्च एकदा समभावेन पतति तदा भवति। इति सङ्गीतशास्त्रम् ॥ * ॥ वर्गमूलानयनार्थं अङ्कोपरिदत्त ऋजुरेखाविशेषः। यथा,—
"त्यक्त्वान्त्यादिषमात् लब्धं द्विगुणयेन्मूलं समे तद्धृते।
त्यक्त्वा लब्धलवं तदाद्यविषमाल्लब्धं द्विनिघ्नं न्यसेत्॥"
इत्यादि लीलावती ॥
समकन्या, स्त्री, (समा विवाहतुल्या कन्या।) विवाहोपयुक्ता। इति धनञ्जयः ॥ सदृशकुमारी च ॥
समकोलः, पुं, (समः कोलो यस्य।) सर्पः। इति त्रिकाण्डशेषः ॥
समक्रः, त्रि, गमनकर्त्ता। संपूर्व्वात् क्रचधातोः क्त्रप्रत्ययेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥
समक्षं, त्रि, अक्ष्णोः समीपम्। संपूर्व्वाच्चिशब्दात् अप्रत्ययेन निष्पन्नम्। इति मुग्धबोधव्याकरणम् ॥ (यथा, कुमारे। ५। १।
"तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्व्वती
प्रियेषु सौभाग्यफला हि चारुता॥")
समगस्थकः, पुं, (समास्तुल्या गन्धा गन्धद्रव्याणि यत्र। कप्।) क्षत्रियमधुपः। यथा,—
"हृकधूपे भल्लकरो गिरिः स्यात् समगस्थकः।"
इति शब्दचन्द्रिका ॥
समगन्धिकं, क्लो, (समस्तुल्यो गन्धोऽस्त्वस्येति। ठन्।) उशीरम्। इति राजनिर्घण्टः ॥ तुल्यगन्धयुक्ते, त्रि ॥
समग्रः, त्रि, (समं समकालमेव गृह्णातीति। ग्रह+डः।) सकलम् (यथा, रामायणे। २। ५२। ८४।
"चतुर्दश हि वर्षाणि समग्राण्युष्य कानने।

भ्रात्रा सह मया चैव पुनः प्रत्यागमिष्यति ॥") पूर्णम्। इत्यमरः॥ (यथा, महाभारते। १। १५४। १३।
"अवेक्षमाणस्तस्याथ हिड्डिम्बो मानुषं वपुः। सगदामपूरितशिखं समग्रेन्दुनिभाननम् ॥")
समङ्गा, स्त्री, मञ्जिष्ठा। इत्यमरः। लज्जालुलता। वराहक्रान्ता। इति रत्नमाला॥ बाला। इति राजनिर्घण्टः॥
समचित्तं, क्ली, (समं तुल्यं चित्तम्।) एकविषयकान्तःकरणवृत्तिः। यथा,—
"मनो बुद्धिश्च चित्तञ्च ते क्षपीशाः शरीरिणाम् एकचित्तं मनः कृत्वा स्नानेन पृथुलोचने ॥
समचित्तं प्रपद्यन्ते न ते लिम्पन्ति मानवाः। सर्व्वभक्ष्याणि भक्षन्तः पेयापेयं तथैव च।
समं चित्तं मयि यदि तदा तस्य न च क्रिया॥" इति वाराहे गुह्यकर्म्ममाहात्म्यवर्णनं नामाध्यायः॥ (समं सर्व्वेषु पदार्थेषु तुल्यरूपं चित्तं यस्येति विग्रहे सर्व्वत्र तुल्यदर्शके, त्रि। यथा, भागवते। ७। १३। ९।
"न यतेराश्रमः प्रायो धर्म्महेतुर्महात्मनः। शान्तस्य समचित्तस्य विभृयादुत वा त्यजेत् ॥")
समज्, क्ली, (समजन्ति पशवो यत्र। सम्+अज गतौ+अप्।) वनम्। इति मेदिनी॥
समजः, पुं, (सं+अज गतौ+"समुदोरजः पशुषु।" ३।३।६९। इति अप्।) पशुसमूहः। इत्यमरः॥ मूर्खसंहतिः। इति शब्दरत्नावली॥
समज्ञा, स्त्री, (समैः सर्व्वैर्ज्ञायते इति। ज्ञा+घञर्थे कः।) कीर्त्तिः। इत्यमरः॥ समाज्ञा समज्या समाख्या इति च पाठः। इति भरतः॥
समज्या, स्त्री, (समजन्ति सङ्गच्छन्तेऽस्यामिति। सम्+अज+"संज्ञायां समजनिषदनिपतमनविदषुयुजिशीङ्भ्यः।" ३। ३। ९९। इति क्यप्।) सभा। इत्यमरः॥ कीर्त्तिः। इति तट्टीकायां रायमुकुटः॥
समञ्जसं, क्ली, (सम्यक् अञ्ज औचित्यं यत्र। अच्।) उचितम्। इत्यमरः॥
समञ्जसः, त्रि, (सम्यक् अञ्ज औचित्यं यत्र। अच्।) समीचीनः। इति त्रिकाण्डशेषः॥ (यथा, भागवते। ६। ९। ३५।
"अहोस्विदात्माराम उपशमशीलः समञ्जसदर्शन उदास्त इतिह वाव न विदाम॥") अभ्यस्तः। इत्यजयपालः॥
समण्डः, पुं, गण्डीरः। इति शब्दरत्नावली हारावली च॥
समता, स्त्री. समत्वम्। समस्य भावः इत्यर्थे समशब्दात् तप्रत्ययेन निष्पन्ना॥ (यथा, रघुः। ९। ६।
समतया वसुदृष्टिविसर्ज्जनैः नियमनादमताच्च नराधिपः॥")
समतिरिक्तं, क्ली, सम्यगधिकम्। सम्यक्प्रकारेणातिरिक्तं इति तत्पुरुषसमासनिष्पन्नम्॥
समत्रयं, क्ली, (समं त्रयं यत्र।) समभागहरीतकीनागरगुड़म्। इति राजनिर्घण्टः॥

समदर्शी, [न्] त्रि, (समं पश्यतीति। दृश+णिनिः।) सर्व्वभूतेषु तुल्यदर्शनशीलः। यथा,—
"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥"
इति श्रीभगवद्गीता॥
समदृष्टिः, स्त्री, (समा दृष्टिः।) सर्व्वत्र तुल्यदर्शनम्। यथा,—
"दुःखे सुखे च विप्रेन्द्र या दृष्टिर्व्वर्त्तते सदा। तथा-शत्रौ च मित्रे च समदृष्टिश्च सा स्मृता।"
इति पाद्मे क्रियायोगसारे १६ अध्यायः॥ (समा दृष्टिर्यस्य।) समदर्शिनि, त्रि॥
समधिकः, त्रि, (सम्यक् अधिकः।) अधिकः। तत्पर्य्यायः। अतिरिक्तः २। इत्यमरः॥ (यथा, रघुः। १८। ५३।
"प्रतिकृतिरचनाभ्यो दूतिसन्दर्शिताभ्यः समधिकतररूपाः शुद्धसन्तानकामैः। अधिविविदुरमात्यैराहृतास्तस्य यूनः प्रथमपरिगृहीतो श्रीभुवो राजकन्याः॥")
समन्तः, पुं, सीमा। सम्यक्प्रकारेण अन्तः इति तत्पुरुषसमासनिष्पन्नः॥
समन्ततः, [स] व्य, चतुर्दिगभिव्याप्तः। तत्पर्य्यायः। परितः २ सर्व्वतः ३ विष्वक् ४। इत्यमरः॥ समन्तात् ५। इति शब्दरत्नावली॥ यथा, रामायणे। २। ५७। ३४।
"स्त्रियश्च सर्व्वा रुरुदुः समन्ततः पुरं तदासीत् पुनरेव सङ्कुलम्॥")
समन्तदुग्धा, स्त्री, (समन्तात् दुग्धं चौरमस्याः।) क्षुद्रोहिणी। इत्यमरः॥
समन्तपञ्चकं, क्ली, (समन्तात् पञ्चकं रुद्रपञ्चकं यत्र।) कुरुक्षेत्रम्। तच्च कुरुपाण्डवयोर्युद्धस्थानम्। तत्र पुरा परशुरामः क्षत्रियरुधिरेण पञ्चह्रदान् चकार। यथा,—
"त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः। समन्तपञ्चके पञ्च कृतवान् रुधिरह्रदान्॥
स तेषु तर्पयामास पितॄन् भृगुकुलोद्वहः। साक्षात् ददर्श पितरं स च रामं न्यवारयत्॥"
इति पाद्मे भूमिखण्डे १२४ अध्यायः॥*॥
अन्यच्च।
"त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः। समन्तपञ्चके चक्रे शोणितोदान् ह्रदान् नव॥"
इति श्रीभागवते ९स्कन्धे १६अध्यायः॥*॥
तस्य माहात्म्यं सीमा च यथा,—
"पृथिव्यां नैमिषं तीर्थमन्तरीक्षे च पुष्करम्। त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते॥"
इत्यारभ्य,—
"तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च मचक्रुकस्य च। एतत् कुरुक्षेत्रसमन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते॥"
इति महाभारतीयवनपर्व्वणि ८२ अध्यायः॥
समन्तभद्रः, पुं, (समन्तात् भद्रमस्य।) बुधः। इत्यमरः॥

समन्तभुक्, [ज्] पुं, (समन्तात् भुङ्क्ते इति भुज्+क्विप्।) अग्निः। इति त्रिकाण्डशेषः॥
समन्तात् व्य, समन्ततः। इति शब्दरत्नावली॥ (यथा, ऋतुसंहारे। १। २२।
"दिनकरपरितापात् क्षीणतोयाः समन्तात् विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः॥")
समन्युः, पुं, (मन्युना क्रतुना क्रोधेन वा सह वर्त्तमानः।) शिवः। इति केचित्॥ क्रोधयुक्तश्च॥ (यथा, महाभारते। ३। २६८। ४।
"बुद्धिं समाच्छाद्य च मे समन्युः रुद्रोऽयते प्राणपतिः शरीरे॥")
समन्वितः, त्रि, (सम्+अनु+इण्+क्तः।) संयुक्तः। यथा, तिथ्यादितत्त्वे।
"विस्पष्टमद्भुतं शान्तं सुष्टाक्षरपदं तथा। कलस्वरसमायुक्तं रसभावसमन्वितम्॥"
समपदं, क्ली, (समे पदे यत्र।) धन्विनां पादयोस्तुल्यरूपतया धारणम्। इत्यमरटीकायां भरतः॥
समपदः, पुं, (समे पदे चरणे यत्र।) रतिबन्धविशेषः। यथा,—
"योषित्पादौ हृदि स्थाप्य कराभ्यां पीड़येत् स्तनौ। यथेष्टं ताड़येद्योनिं बन्धः समपदः स्मृतः॥"
इति रतिमञ्जरी स्मरदीपिका च॥
समपादं, क्ली, (समौ पादौ यत्र।) धन्विनां पादयोस्तुल्यरूपतया धारणम्। इति हेमचन्द्रः॥
समभिव्याहारः, पुं, (सम्+अभि+वि+आ+हृ+घञ्।) सहितः। घटमानय इत्यत्र भवति चाव्यवहितपूर्व्ववर्त्तितालचक्षसमभिव्याहारसम्बन्धेन घटपदनिष्ठस्यानुस्वारपदस्य व्यतिरेकप्रयुक्तो घटवत् कर्म्मत्वमिति भेदान्वयबुद्धभावे इति तादृशान्वयबोधे घटपदस्यानुस्वारपदवत्त्वमाकाङ्क्षा एवं विनिगमनाविरहाद्व्यवहितोत्तरवर्त्तितारूपसमभिव्याहारसम्बन्धेन अनुस्वारपदनिष्ठस्य घटपदस्य व्यतिरेकप्रयुक्तोऽपि घटवत् कर्म्मत्वमिति भेदान्वयबुद्धभावइत्यनुस्वारपदस्य घटपदवत्त्वमपि तादृशान्वयबोधे आकाङ्क्षा। इति आकाङ्क्षाग्रन्थे मथुरानाथः॥
समभिव्याहृतः, पुं, (सम्+अभि+वि+आ+हृ+क्तः।) सहोच्चरितः सहितः। यथा निमित्तानां उत्पत्तिविधिसमभिव्याहृतनियतानाम्। इति तिथ्यादितत्त्वम्॥
समभिहारः, पुं, (सम्+अभि+हृ+घञ्।) पौनःपुन्यम्। भृशार्थः। इति मेदिनी॥
समभूमिः, स्त्री, (समा भूमिः।) समानस्थानम्। तत्पर्य्यायः। आजिः २। इति जटाधरः॥ (यथा, रामायणे २। ५६। ११।
"समभूमितले रम्ये द्रुमैर्बहुभिरावृते। पुष्पैरं स्यामहे तात चित्रकूटस्य काननै॥")
समम्, व्य, सहितम्। यथा। साकं तु साकं सत्रं समं सह। इत्यमरः॥ (यथा, मनुः। २। ११९।

"विद्ययैव समं कामं मर्त्तव्यं ब्रह्मवादिना।
आपद्यपि हि घोरायां नत्वेनामरिणे वपेत्॥"
समयः, पुं, (सम्यगेतीति। सम्+इण् गतौ+पचाद्यच्।) कालः। (यथा, उत्तरचरिते १अङ्के।
"समयः समवर्त्तत दर्शय यत्र मां
ममनन्दयन् समुखि! गीतमार्पितः।
अयमाग्रहीतकमनीयकङ्कण-
स्तव मूर्त्तिमानिव महोत्सवः करः॥")
शपथः। आचारः। (यथा, महाभारते। १३। ८०। ५०।
"ऋषीणां समये नित्यं ये चरन्ति युधिष्ठिर!।
निखिताः सर्व्वधर्म्मज्ञास्तान् देवान् ब्राह्मणान् विदुः॥")
सिद्धान्तः। संवित्। इत्यमरः॥ क्रियाकारः। निर्देशः। भाषा। (यथा, महाभारते। ५। ३३। ११६।
"देशाचारान् समयान् जातिधर्म्मान्
बभूषते यः सः परावरज्ञः॥")
सङ्केतः। इति मेदिनी॥ (व्यवहारः। यथा, मनुः। १०। ५३।
"न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन्॥")
सम्यक्। नियमः। (यथा, भागवते।३।२२।१८।
"अतो भजिष्ये समयेन साध्वीं
यावत्तेजो विभृयादात्मनो मे॥")
अवसरः। इति हेमचन्द्रः॥*॥ कालप्रशंसा। यथा,—
परशुराम उवाच।
"राजेन्द्रोत्तिष्ठ समरं कुरु साहसपूर्व्वकम्।
कालभेदे जयो नृणां कालभेदे पराजयः॥
काले सिंहः शृगालश्च शृगालः सिंहमेव च।
काले व्याघ्रं नरो हन्ति गजेन्द्रं हरिणस्तथा॥
महिषं मक्षिका काले गरुडश्च यथोरगः।
किङ्करः स्तौति राजेन्द्रं काले राजा च किङ्करम्॥
इन्द्राय मनवः काले काले राजा भरिष्यति।
तिरोहिता च प्रकृतिः काले श्रीकृष्णविग्रहे॥
मरिष्यन्ति सुराः सर्व्वे त्रिलोकस्थाश्चराचराः।
सर्व्वे काले लयं यान्ति कालो हि दुरतिक्रमः॥
कालस्य कालः श्रीकृष्णः स्रष्टुः स्रष्टा यथेच्छया।
संहर्त्ता चैव संहर्त्तुः पातुः पाता परात्परः॥
महास्थूलात् स्थूलतमः सूक्ष्मात् सूक्ष्मतमः स्वयम्।
परमः परमः कालः कालश्च कालभेदकः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४० अध्यायः॥*॥
अपि च।
"कालः करोति संसर्गं बन्धूनां बन्धुभिः सम्।
कालः करोति विच्छेदं विरोधं प्रीतिमेव च॥
कालः सृष्टिञ्च कुरुते कालश्च परिपालनम्।
कालः करोति सानन्दं कालः संहरते प्रजाः॥
सुखं दुःखं भयं शोकं जरां मृत्युञ्च जन्म च।
सर्व्वं कर्म्मानुरोधेन काल एव करोति च।
सर्व्वं कालकृतं तात विस्मयं न व्रज व्रज॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८० अध्यायः॥

अथ कालनिरूपणम्।
"आनन्दनन्दनस्यैव परिपूर्णतमस्य च।
शृणु कालगतिं वत्स मदीयज्ञानगोचराम्॥
नराणाञ्च पितॄणाञ्च सुराणाञ्चापि ब्रह्मणः।
नागानां राक्षसादीनां तत्परेषाञ्च पुत्रक॥
कथयामि निगूढार्थं सावधानं निशामय।
सर्व्वस्माच्च परः स्थूलः सर्व्वाधारो महान्
विराट्॥
यस्य लोमसु विश्वानि चासंख्यानि च तानि च
सर्व्वस्माच्च परं सूक्ष्मं परमाणुं निशामय॥
कालारभ्यात्मकं सर्व्वस्यानूहं परमीप्सितम्।
परमः सद्भिरेषाणामनेकोऽयुतशस्तथा॥
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यथा।
परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते त्रयः॥
त्रसरेणुत्रिकेणापि त्रुटिरुक्ता मनीषिभिः।
वेधस्त्रुटिशतेनैव त्रिवेधेन लवस्तथा॥
त्रिलवेन निमेषश्च त्रिनिमेषेण च क्षणः।
काष्ठा पञ्चक्षणेनैव लघुश्च दशकाष्ठया॥
लघुपञ्चदशे दण्डस्तत्प्रमाणं निशामय।
द्वादशार्द्धपलोन्मा च चतुर्भिश्चतुरङ्गुलैः॥
स्वर्णमाषैः कृतच्छिद्रं यावत् प्रच्छजलप्लुतम्।
दण्डद्वये च मुहूर्त्तः षष्टिदण्डात्मिका तिथिः॥
तदष्टभागः प्रहरः प्रमाणञ्च निरूपणम्।
चतुर्भिः प्रहरै रात्रिश्चतुर्भिर्दिनमेव च॥
तिथिपञ्चदशेनैव पक्षमानं प्रकीर्त्तितम्।
पक्षद्वयेन मासः स्यात् शुक्लकृष्णाभिधेन च॥
ऋतुर्म्मासद्वयेनैव तत्षट्केनैव वत्सरः।
वसन्तग्रीष्मवर्षाश्च शरद्धेमन्तशीतकम्॥
वर्षाः पञ्चविधा ज्ञेयाः कालविज्ञानिरूपिताः।
संवत्सरः प्रवत्सरश्च इडावत्सर एव च॥
अनुवत्सरो वत्सरोऽयमिति कालविदो विदुः।
अब्दो दिषट्कमासैश्च तन्नाम शृणु चोद्धव॥*॥
वैशाखो ज्यैष्ठ आषाढः श्रावणो भाद्र एव च।
आश्विनः कार्त्तिको मार्गः पौषो माघस्तु फाल्गुनः॥
चैत्रस्तु चरमो ज्ञेयो वर्षज्ञेयो निरूपितः।
वसन्तश्चैवशाखो मासौ युग्मेन कीर्त्तितः॥
ज्यैष्ठाषाढद्वयेनैव ग्रीष्मस्तु परिकीर्त्तितः।
वर्षा श्रावणभाद्रेण चाश्विने कार्त्तिके शरत्॥
मार्गे पौषे च हैमन्तः शिशिरो माघफाल्गुने।
अब्दस्तु चायने द्वे चैवोत्तरे दक्षिणायने॥
माघादिषट्कं नियतं उत्तरायणमीप्सितम्।
श्रावणादिमासषट्कं दक्षिणायनमेव च॥
माघादाषाढपर्य्यन्तं दिनवृद्धिं क्रमेण वै।
नक्तं हृद्धं श्रावणाच्च पौषपर्य्यन्तमेव च॥*॥
प्रतिपदः पूर्णिमान्तः शुक्लः पक्षः प्रकीर्त्तितः।
पूर्णिमायाः प्रतिपदः अमावास्यान्त एव च॥
कृष्णपक्षस्तु विज्ञेयो वेदविद्भिर्निरूपितः।
द्वितीया च तृतीया च चतुर्थी पञ्चमी तथा॥
षष्ठी च सप्तमी चैव अष्टमी नवमी तथा।
दशम्येकादशी चापि द्वादशी च त्रयोदशी।
चतुर्दशी कृष्णपर्य्यावद्दिनन्तु गणनं स्मृतम्॥*॥

अश्विनी भरणी चापि कृत्तिका रोहिणी तथा।
मृगशिरास्तथार्द्रा च नक्षत्रे द्वे पुनर्व्वसुः॥
पुष्याश्लेषा मघा चैव पूर्व्वा चोत्तरफल्गुनी।
हस्ता चित्रा तथा स्वाती विशाखा चानुराधिका॥
ज्येष्ठा मूला तथा ज्ञेया पूर्व्वाषाढोत्तरा तथा
श्रवणाभिजिच्चैव धनिष्ठा च प्रकीर्त्तिता॥
ततः शतभिषा ज्ञेया पूर्व्वभाद्रपदस्तथा।
तथोत्तरस्तु विज्ञेयो रेवती चरमा स्मृता।
अष्टाविंशच्च नक्षत्रं कालस्य अश्विनीभव।
क्रमेण ताभिः सार्द्धञ्च चन्द्रस्तिष्ठति नित्यशः॥
सप्तविंशतिनक्षत्रं कालचक्रं श्रुतौ श्रुतम्।
अभिजिच्छ्रवणाच्छाया तेनाष्टाविंशतिः स्मृता
एकदा च मधौ चन्द्रो रोहिण्या रामया सह।
रेमे दिवानिशं दृष्ट्वा श्रवणा च चुकोप सा॥
छायां दत्त्वा च चन्द्राय ययौ तातान्तिकं भिया।
ततः पितरमानीय सा चक्रे विभागकम्॥
बभूव तेन नक्षत्रमभिजिन्नामकं पुरा।
एतत् श्रुत्वा क्षणमुखाच्छतशृङ्गे च पर्व्वते।
नक्षत्रं कथितं वत्स तिथ्यां भ्रमति नित्यशः॥*॥
योगञ्च करणञ्चैव मदुक्तेन निशामय।
विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा
अतिगण्डः सुकर्म्मा च धृतिः शूलस्तथैव च।
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा॥
वज्रशक्तिर्ग्रहपतीपातो वरीयान् परिघः शिवः।
सिद्धः साध्यः शुभः शुक्लो ब्रह्मेन्द्रो वैधृतिस्तथा
कौर्त्तिस्तु योगगणः करणं शृणुतामिति।
ववश्च बालवश्चैव कौलवस्तैतिलस्तथा॥
गरश्च वणिजश्चापि विष्टिश्च शकुनिस्तथा।
चतुष्पाच्चापि नागश्च किंस्तुघ्न इति कीर्त्तनम्॥
नराणाञ्चापि मासेन पितॄणाञ्च दिवानिशम्।
शुक्ले तेषां दिनञ्चापि कृष्णे नक्तं प्रकीर्त्तितम्॥
वत्सरेण नराणान्तु सुराणाञ्च दिवानिशम्।
दिनन्तेषामुत्तरेण नक्तञ्च दक्षिणायणे॥
मन्वन्तरन्तु दिव्यानां युगानामेकसप्ततिः।
मनोरायुःपरिमितं शक्रस्यायुः प्रकीर्त्तितम्॥
पञ्चविंशत्सहस्रञ्च तथा पञ्चशतं परम्।
तत्र सूर्य्यगतिर्नास्ति शक्रपातानुसारतः॥
युगानां षष्टिमधिकं नराणाञ्च प्रकीर्त्तितम्।
कालेनैतेन शक्रस्य पतनञ्च मनोस्तथा॥*॥
चतुर्दशेन्द्रावच्छेदकालेन ब्रह्मणो दिनम्।
एतेनैव च तद्युक्तमुक्तं धातुर्दिवानिशम्॥
एवन्तेषां निपतनं बोद्धव्यं तद्दिवानिशम्।
तत्र सूर्य्यगतिर्नास्ति शक्रपातानुसारतः॥
दिवानिशञ्च जानन्ति ब्रह्मलोकनिवासिनः।
दण्डद्वयं लवपलं शक्रपातेन तत्समम्॥
एवं त्रिंशद्दिनैरेव धातुर्म्मासः प्रकीर्त्तितः।
अब्दो द्वादशभिर्म्मासैरेवन्तस्य शतायुषः॥
ब्रह्मणः पतनेनैव निमेषः श्रीहरेरपि॥*॥
धातुः पातानुसारेण वैकुण्ठेन दिवानिशम्।
तत्र सूर्य्यगतिर्नास्ति चैवं गोलोकतः स्मृतम्॥

वक्तुरुच्छ्वसितः सर्व्वं तेन जानन्त्यहर्निशम् ॥
चन्द्रस्यापि ग्रहाणाञ्च गतिर्नास्तीति तत्त्व वै ।
चक्रं नैव भ्रमत्येव राशीनामिच्छया हरेः ॥
दिनञ्च तेजसा दीप्तं ब्रह्मणस्य परमात्मनः ।
नक्तं तेजोविहीनञ्च हरौ च मन्दिरं गते ॥
एवं कालगतिस्तत्र विष्णुलोकेऽस्ति सन्ततम् ।
कालस्वरूपो भगवान् परमात्मा निराकृतिः ॥
चन्द्रसूर्य्यगतिर्नास्ति पातालेषु च सप्तसु ।
तद्वासिनश्च जानन्ति सङ्केतेन दिवानिशम् ॥
दिने च मूर्द्धि नागानां मणिर्ज्वलति नित्यशः
सन्ध्यायां दीप्तितोनञ्च रात्रिञ्च तमसावृता ॥
कालं तन्मणिप्रभावेण जानन्ति तन्निवासिनः ।
यथा भुवि तथा तत्र परिमाणं प्रकीर्त्तितम् ॥*॥
कृतं त्रेता द्वापरञ्च कलिर्येति चतुर्युगम् ।
दिव्यैर्द्वादशसाहस्रैर्व्वत्सरैरपि सम्मितम् ॥
अष्टौ शतान्यप्यधिकं सहस्राणां चतुष्टयम् ।
दिव्यैर्वर्षैः कृतयुगं कालविद्भिर्निरूपितम् ॥
अष्टाविंशसहस्राण्यप्यधिकं परिमाणकम् ।
लक्षाणाञ्च समदशं नृणाञ्च परिकीर्त्तितम् ॥
अधिकं षट्शतान्येव सहस्राणां त्रयं तथा ।
दिव्यैर्वर्षैश्च त्रेतेति वत्स कालविदो विदुः ॥
षण्णवतिसहस्राणि लक्षैर्द्वादशभिः सह ।
नृणां वर्षैश्च सेतेति कालविद्भिः प्रकीर्त्तितः ॥
चतुष्टयं शतानाञ्चाप्यधिकं द्विसहस्रकम् ।
वर्षं दिव्यं द्वापरञ्च कालज्ञैः परिकीर्त्तितम् ॥
चतुःषष्टिसहस्राणि लक्षैरष्टभिरेव च ।
नृणां वर्षैर्द्वापरञ्च कालज्ञैः परिकीर्त्तितम् ॥
अधिकं द्विशतञ्चैव दिव्यं वर्षसहस्रकम् ।
एवं मितं कलियुगं वत्स प्राज्ञैः प्रकीर्त्तितम् ॥
द्वात्रिंशच्च सहस्रञ्च चतुर्लक्षं नृमाणकम् ।
वर्षञ्चेति कलियुगं चकार कालकोविदः ॥
लक्षैस्त्रिचत्वारिंशद्भिः सह विंशत्सहस्रकैः ।
नृमाणवर्षैः कालज्ञैर्व्यक्तमेव चतुर्युगम् ॥
इति ते कथितं वत्स कालसंख्यानिरूपणम् ।
यथाश्रुतं यथाज्ञानं गच्छ वत्स हरेः पुरम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे राधोद्धवसंवादे कालनिरूपणम् ८६ अध्यायः ॥*॥ अपि च।

मार्कण्डेय उवाच ।

"निमेषो नाम कालाङ्गो नेत्रोन्मेषविलक्षितः ।
तैरष्टादशभिः काष्ठा काष्ठानां त्रिंशता कला ॥
कलाभिस्त्रावतीभिस्तु क्षणाख्यः परिकीर्त्तितः ।
क्षणैर्द्वादशभिः प्रोक्तो मुहूर्त्तस्तैस्तु त्रिंशता ॥
मानुषः स्यादहोरात्रः पञ्चस्ते दश पञ्च च ।
पक्षाभ्यां मानुषो मासः पितॄणां तदहर्निशम् ॥
मासैर्द्वादशभिर्वर्षो देवानां तदहर्निशम् ।
कृष्णपक्षः पितॄणान्तु कर्म्मार्थं दिवसो मतः ॥
स्वप्नार्थं शुक्लपक्षस्तु रजनी परिकीर्त्तिता ।
देवानान्तु दिनं प्रोक्तं षण्मासा उत्तरायणम् ॥
रात्रिः स्वप्नाय देवानां षण्मासा दक्षिणायनम् ।
द्वाभ्यां द्वाभ्यान्तु मासाभ्यामर्कजाभ्यामृतुः स्मृतः ॥
ऋतुभिरयनं प्रोक्तं त्रिभिस्तन्मानुषं मतम् ।
ऋतुभिर्वत्सरः षड्भिस्तांश्च शृणु पृथक् पृथक् ॥*॥
चैत्रादियुगलैः संज्ञा तेषां षड्भिर्द्विजोत्तमाः ।
वसन्तश्चैत्रवैशाखौ ग्रीष्मो ज्येष्ठः शुचिस्तथा ॥
प्रावृट् नभोनभस्यौ तु शरत् स्यादिश्वकार्त्तिकौ ।
सहः पौषौ च हेमन्तः शिशिरो माघफाल्गुनौ ॥
षड्भिः ऋतवः प्रोक्ताः यज्ञादौ विहिताः पृथक् ।
नृणां मानेन दशभिर्लक्षैः सप्तभिरुत्तरैः ॥
साष्टाविंशतिसाहस्रैर्मानं कृतयुगस्य च ।
सन्ध्या चतुःशतानीह वर्षाणामन्तरालतः ॥
सन्ध्यांशस्तावता प्रोक्तस्तदन्तर्गत ईप्सितः ।
त्रेता द्वादशभिर्लक्षैर्मानुषैर्वत्सरैर्भवेत् ॥
षण्णवत्या सहस्रैश्च सन्ध्या च स्यात् शतत्रयम् ।
शतत्रयन्तु सन्ध्यांशस्तदन्तः परिकीर्त्तितः ॥
चतुःषष्टिसहस्राणि लक्षाण्यष्टौ प्रमाणतः ।
भवेद्युगं द्वापराख्यं तेषु सन्ध्या शतद्वयम् ॥
शतद्वयन्तु सन्ध्यांशस्तदन्तर्गत ईष्यते ।
द्वात्रिंशत्तु सहस्राणि चतुर्लक्षाणि वै कलेः ।
संवत्सरैर्भवेन्मानं सन्ध्यं कं प्रोच्यते शतम् ॥
वत्सराणामेकशतं सन्ध्यांशश्च तदन्तरे ।
एवं कृतञ्च त्रेता च द्वापरञ्च तथा कलिः ॥
मानुषेण प्रमाणेन भवेद्युगचतुष्टयम् ।
त्रिचत्वारिंशता लक्षैर्मानं चतुर्युगं भवेत् ॥
सहस्रैरपि विंशत्या सन्ध्यासन्ध्यांशसंयुतम् ।
दैवं दिनं वत्सरेण मानुषेण सरात्रकम् ॥
एवं क्रमं गणित्वा तु मानुषीयैश्चतुर्युगम् ।
दैवं द्वादशसाहस्रं वत्सराणां प्रकीर्त्तितम् ॥
दैवैर्द्वादशसाहस्रैर्व्वत्सरैर्दैविकं युगम् ।
तद्दशतुर्युगं नृणां सन्ध्यासन्ध्यांशसंयुतम् ॥
देवानान्तु कृतं त्रेता द्वापरादिव्यवस्थया ।
न युगव्यवहारोऽस्ति न च धर्म्मादिभिन्नता ॥
किन्तु चातुर्युगं नारं भवेद्वै वयुगं सदा ।
दैवैरेव च सप्तत्या युगैर्म्मन्वन्तरं भवेत् ॥
दैवे युगसहस्रे द्वे ब्राह्मणः स्याद्दहर्म्मुखम् ।
चतुर्युगसहस्रे द्वे नृणां मानेन तद्भवेत् ॥
एकस्मिन् ब्राह्मदिवसे मनवः खुचतुर्दश ।
एवं ब्राह्मेण मानेन दिवसैस्तु त्रिभिः शतैः ॥
सषष्टिभिर्व्वत्सरः स्याद्ब्राह्मो वर्षो नृणां यथा
ब्राह्मैः पञ्चशतैः वर्षैः परार्द्धः परिकीर्त्तितः ॥
तदीश्वरस्य दिवसं तावती रात्रिरिष्यते ।
शतेन ब्रह्मणो वर्षैः कालः स्यात् द्विपरार्द्धकः ॥
परार्द्धद्वितयेऽतीते ब्रह्मणः प्रलयो भवेत् ।
प्रलीने ब्रह्मणि परे जगतां प्राकृतो लयः ॥
समस्तजगदाधारमव्ययं यत् परात्परम् ।
तस्य ब्रह्मस्वरूपस्य दिवारात्रञ्च तद्भवेत् ।
तत्परं नाम तस्यार्द्धं परार्द्धमभिधीयते ॥"

इति श्रीकालिकापुराणे २४ अध्यायः ॥*॥

किञ्च ।

"अक्षिपक्षपरिक्षेपो निमेषः परिकीर्त्तितः ।
द्वौ निमेषौ त्रुटिर्नाम द्वे त्रुटी तु लवः स्मृतः ॥
द्विलवः क्षण इत्युक्तः काष्ठा प्रोक्ता दश क्षणाः ।
दश काष्ठाः किला नाम तत्संख्या स्याच्च घाटिका ॥
घटिके द्वे मुहूर्त्तः स्यात्तैस्त्रिंशत्या दिवानिशम् ।
चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्षते ॥
सूर्य्योदयादिविज्ञेयो मुहूर्त्तानां क्रमः सदा ।
पश्चिमादर्द्धरात्रादिहोरात्राणां विदुषे क्रमः ॥"

इति वह्निपुराणे गणभेदनामाध्यायः ॥*॥

अपरं नृसिंहपुराणे २ अध्याये कौर्म्मे ६ अध्याये च द्रष्टव्यम् ॥

समयकारः, पुं, (समयस्य कारः करणम् ।) सङ्केतः यथा,—

"प्रज्ञप्तिः परिभाषा स्यात् सङ्केतसमयकारौ ।"

इति त्रिकाण्डशेषः ॥

समया, स्त्री, (समयनमिति । सम् + इण गतौ + "आः सर्व्वधातुभ्यः ।" उणा० ४ । १७४ । इति आप्रत्ययः ।) निकटः । इत्यस्य पर्य्यायः । निकषा २ हिरक् ३ । इत्यमरः ॥ (यथा, शिशुपालवधे । ६ । ७३ ।

"कुटजानि वीक्ष्य गिरिभिः गिरीन्द्रं
समयावनौ घनमदभ्रमराणि ।
गगनञ्च गोतनिनदस्य गिरोचैः
समया वनौघनभ्रमराणि ॥")

मध्यः । इति चामरः । ३ । ३ । २५१ ॥

"समया निकटे मध्ये मध्ये च निकषान्तिके ।"

द्विरूपकोषे विशेषे च———॥"

इति शब्दः ॥

द्विरुक्तस्तु सामीप्ये । इत्यमरमाला ॥ कालविज्ञापनम् । इति शब्दरत्नावली ॥

समरः, पुं, क्लीं, (समन्यक् अरणं प्रापणमिति सं + ऋगतौ + अप् । यद्वा, समन्यक् ऋच्छत्यत्रेति । "मन्दरकन्दरगोकरेति ।" बाहुलकात् अरप्रत्ययेन साधुः । इत्युज्ज्वलः । ३ । १३१ ।) युद्धम् । इत्यमरः ॥ (यथा, रघुः । १२ । ८२ ।

"इतराण्यपि रक्षांसि पेतुर्नानरकोटिषु ।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥")

समरभः, पुं, (समरवत् भातीति । भा + कः ।) रतिबन्धविशेषः । तस्य लक्षणं यथा,—

"स्वजङ्घाहृदयसंयुक्तं कृत्वा योषित्पदद्वयम् ।
स्तनौ धृत्वा रमेत् कामी बन्धः समरभः स्मृतः ॥

इति रतिमञ्जरी ॥

समरूप्यः, त्रि, (समादागत इति । सम + "हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ।" ४ । ३ । ८२ । इति रूप्यः ।) समस्य साधोर्भूतपूर्व्वो गवादिः । समशब्दात् रूप्यप्रत्ययेन निष्पन्नः ॥

समर्थः, त्रि, (समर्थयते इति । सं + अर्थ + घञ् यद्वा ।) शक्तिमान् । (यथा, तिथितत्त्वे ।

"ये समर्था जगत्यस्मिन् सृष्टिस्थित्यन्तकारिणः ।
तेऽपि कालेन लीयन्ते कालो हि बलवत्तरः ॥")

सम्बन्धार्थः । हितः । इत्यमरः ॥ (यथा, महाभारते । १३ । ५ । २६ ।

"नार्हसे मां सहस्राक्ष दुःखं त्याजयितुं चिरात् ।
समर्थमुपजीव्येमं त्यजेयं कथमद्य वै ॥")

समर्थता, स्त्री, (समर्थस्य भावः । समर्थ + तल ।) सामर्थ्यम् । शक्तिः । समर्थत्वम् । समर्थशब्दात् तप्रत्ययेन निष्पन्नः ॥

समर्थनं, क्ली, (सम् + अर्थ + ल्युट् ।) इदमुचितमिदमनुचितमिति निश्चयः । तत्पर्य्यायः । संप्रधारणा २ । इत्यमरः । समर्थना ३ । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । २५ । ७३ ।

"शक्तिदेवस्य पार्श्वस्थो विष्णुदत्तः समर्थनम् ।
विनोदपूर्व्वकं कुर्व्वन् कथां कथितवानिमाम् ॥")

सामर्थ्यञ्च ॥ (यथा, महाभारते । १ । १२० । १० ।

"स तु ज्ञानगरीयस्त्वात् तपसश्च समर्थनात् ।
अवतस्थे महाप्राज्ञो धैर्य्येण परमेण ह ॥")

समर्थना, स्त्री, (सम् + अर्थ + युच् । टाप् ।) अध्यवसायः । यथा । सिन्धुमपि शोषयाचि । इति सुग्धबोधव्याकरणम् ॥ समर्थनम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । ४ । ४ । २४ ।

"समर्थनासु सर्व्वासु हितञ्च प्रियमेव च ।
संवर्णयेत्तदेवाग्र्यं प्रियादपि हितं वदेत् ॥")

समर्द्दकः, त्रि, (सम्यक् ऋध्नोतीति । सम + ऋधु वृद्धौ + ण्वुल् ।) वरदः । इष्टफलदाता देवतादिः । इत्यमरः ॥

समर्पणं, क्ली, संपूर्व्वस्य ऋधातोर्ज्जौ (णिचि) क्तेपनि क्तेऽनट् (ल्युट्) प्रत्ययनिष्पन्नम् । सम्यक्प्रकारेणार्पणम् । सौंपोन इति भाषा । यथा, "प्राणायामं ततः कृत्वा प्रजपेत् साधकाग्र्यः ।
देव्या हस्ते जपफलसमर्पणमथाचरेत् ॥"

इति तोड़लतन्त्रे ३ पटलः ॥

समर्य्यादः, पुं, (मर्य्यादया सह वर्त्तमानः ।) समीपः । मर्य्यादासहिते, त्रि । इति मेदिनी ॥

समर्ह्यं, क्ली, (महेन सह वर्त्तमानम् ।) विष्ठा । इति शब्दरत्नावली ॥ आविले, त्रि । इति जटाधरः ॥ (कलङ्कविशिष्टे च त्रि । यथा, कथासरित्सागरे । १०३ । ६२ ॥

"समस्तो व्योम्नि दृष्टोऽद्य चन्द्रोऽनेनेतिकौतुकात् ।
अव्योम्नि दर्शितं धात्रा चन्द्रमन्यमिवामलम् ॥")

समवकारः, पुं, (समवकीर्य्यन्ते बहवोऽर्था यस्मिन्निति । सम + अव + कृ + घञ् ।) नाटकभेदः । यथा,—

"स्यान्नाटकं प्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगः समवकारो वीथ्यङ्के हामृगा इति ।
अभिनेयप्रकाराः स्युर्भाषाः षट् संस्कृतादिकाः ॥"

इति हेमचन्द्रः ॥

(तल्लक्षणादिकं यथा,—

अथ समवकारः ।

"हृत्तं समवकारे तु ख्यातं देवासुराश्रयम् ।
सन्धयो निर्व्विमर्षास्तु त्रयोऽङ्कास्तत्र वादिमे ॥
सन्धी द्वावन्त्ययोस्तद्वदेक एको भवेत् पुनः ।
नायका द्वादशोदात्ताः प्रख्याता देवदानवाः ॥
फलं पृथक् पृथक् तेषां वीरमुख्योऽखिलो रसः ।
हृत्तयो मन्दकौशिक्यो नात्र बिन्दुप्रवेशकौ ॥
वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश ।
गायत्र्युष्णिङ्मुखान्यत्र छन्दांसि विविधानि च ।
त्रिशृङ्गारस्त्रिकपटः कार्य्यस्तार्य्य त्रिविद्रवः ।
वस्तु द्वादशनाड़ीभिर्निष्पाद्यं प्रथमाङ्कगम् ॥
द्वितीयेऽङ्के च तिसृभिर्द्वाभ्यामङ्के तृतीयके ॥
नाड़िका घटिकाद्वयमुच्यते । बिन्दुप्रवेशकौ च नाटकोक्तावपि नेह विधातव्यौ । तत्र ।
धर्म्मार्थकामैस्त्रिविधः शृङ्गारः कपटः पुनः ।
स्वाभाविकः कृत्रिमश्च दैवजो विद्रवः पुनः ॥
अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः ॥
तत्र शास्त्राविरोधेन कृतो धर्म्मशृङ्गारः । अर्थलाभार्थकल्पितः अर्थशृङ्गारः । प्रहसनशृङ्गारः कामशृङ्गारः । तत्र कामशृङ्गारः प्रथमाङ्क एव । अन्ययोस्तु न नियम इत्याहुः । चेतनाचेतना गजादयः । समवकीर्य्यन्ते बहवोऽर्था अस्मिन्निति समवकारः । यथा, समुद्रमथनम् ।" इति साहित्यदर्पणे । ६ । ५१५-५१६ ॥)

समवतारः, पुं, (तीर्थम् । समवपूर्व्वकतृधातोर्घञ् प्रत्ययेन निष्पन्नः ॥ (यथा, किराते । ५ । ७ ।

दधतमाकरिभिः करिभिः चतैः
समवतारसमैरसमैस्तटैः ॥")

समवर्त्ती, [न्] पुं, (सम्यं वर्त्तते इति । सम् + वृत + णिनिः ।) यमः इत्यमरः ॥ (यथा, महाभारते । १२ । २०७ । ३५ ।

"शासितारञ्च पापानां पितॄणां समवर्त्तिनम् ।
असृजत् सर्व्वभूतात्मा निधिपञ्च धनेश्वरम् ॥")

तुल्यवर्त्तनशीले, त्रि ॥

समवायः, पुं, (समवाय्यते इति । सम् + अव + अय + घञ् ।) समूहः । इत्यमरः ॥ (यथा, मनुः । ४ । १०८ ।

"अनध्यायो बध्यमाने समवाये जनस्य च ॥")

सम्बन्धविशेषः । यथा,—

"घटादीनां कपालादौ द्रव्येषु गुणकर्म्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः ॥"

इति भाषापरिच्छेदः ॥

अवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः । इति सिद्धान्तमुक्तावली ॥

समवेतः, त्रि, (सम् + अव + इण् + क्तः ।) मिलितः । यथा,—

"धर्म्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्व्वत सञ्जय ॥"

इति भगवद्गीतायाम् १ अध्यायः ॥

समवायसम्बन्धेन वृत्तिः । यथा,—

"यत् समवेतं कार्य्यं भवति
ग्रेयन्तु समवायिजनकं तत् ।"

इति भाषापरिच्छेदः ॥

समयुक्तवान्, त्रि, सम्यक्प्रकारेण व्याप्तिविशिष्टः । संपूर्व्वाङ्गधातोः क्तवतुप्रत्ययेन निष्पन्नः ॥

समष्टिः, स्त्री, (सं + अङ्ग व्याप्तौ + क्तिन् ।) समस्तः । मिलितः । यथा,—

"समष्टिरीशः सर्व्वेषां स्वात्मतादात्म्यवेदनात् ॥
तदभावात्तदन्ये तु ज्ञायन्ते व्यष्टिसंज्ञया ॥"

इति पञ्चदशी ॥

समष्ठिलः, पुं, (समं तिष्ठतीति । स्था + बाहुलकात् डलच् ।) शुपविशेषः । कोकुयाँ इति हिन्दी भाषा । तत्पर्य्यायः । भण्डीरः २ नद्यास्रः ३ आम्रगन्धकः ४ कोकाग्रः ५ कण्टकिफलः ६ उपदंशः ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । रुच्यत्वम् । मुखविशोधनत्वम् । कफवातप्रशमनत्वम् । दाहकारित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥

समष्ठिला, स्त्री, (समष्ठिल + स्त्रियां टाप् ।) गण्डीरः । इत्यमरः ॥ हे शमा इति ख्याते शमठ इति ख्याते । अनूपदेशजे शाके इति केचित् । गुण्ठिया इति ख्याते शाके इति सर्व्वानन्दः । गण्डीनि ग्रन्थियुक्तानि अङ्गानि ईरयति गण्डीरः षण् । गण्डं रोगविशेषं ईरयति गण्डीरः शूरषकन्दादिरित्यन्ये । सम्यग्लिखति समष्ठिला डः मनीषादित्वात् सस्य षत्वम् । इति भरतः ॥

समष्ठीला, स्त्री, समष्ठिला । यथा,—

"समष्ठीऽपि च गण्डीरः समष्ठीला समष्ठिला ॥"

इति शब्दरत्नावली ॥

समसनं, क्ली, (सम् + अस् + ल्युट् । संक्षेपणम् । इत्यमरः ॥ (समासः । इति केचित् ॥)

समसृप्तिः, पुं, (समेषां सर्व्वेषां सृप्तिर्यत्र ।) कल्पान्तः । महाप्रलयः । इति हेमचन्द्रः । २ । ७५ ॥ (स्त्री, समा सृप्तिरिति । तुल्यशयनञ्च ॥

समस्तं, त्रि, (सम् + अस् + क्तः ।) सम्पूर्णम् । तत्पर्य्यायः । समम् २ सर्व्वम् ३ विश्वम् ४ अशेषम् ५ कृत्स्नम् ६ निखिलम् ७ अखिलम् ८ निःशेषम् ९ समग्रम् १० सकलम् ११ पूर्णम् १२ अखण्डम् १३ अनूनकम् १४ । इत्यमरः ॥ अनन्तम् १५ । इति शब्दरत्नावली ॥ अन्यूनम् १६ अनूनम् १७ । इति जटाधरः ॥ (यथा, विष्णुपुराणे । १ । ४ । ३३ ।

"सूक्ष्मान्यशेषाणि घटाकलापो
ग्राह्यं समस्तानि ह्वीवीषि देव ॥")

समस्थः, त्रि, (समे तिष्ठतीति । स्था + कः ।) समानः । समभावेन स्थितः । समशब्दपूर्व्वकस्थाधातोर्डप्रत्ययेन निष्पन्नः ॥ (यथा, हृहत्संहितायाम् । ५० । २० ।

"परतो न विशेषफलं
विषमसमस्थास्तु पापशुभफलदाः ॥")

समस्थली, स्त्री, (समा स्थली ।) गङ्गायमुनयोर्म्मध्यदेशः । तत्पर्य्यायः । अन्तर्व्वेदिः २ । इति हेमचन्द्रः ॥

समस्या, स्त्री, समसनं उक्त्या संक्षेपणम् । सम् + अस् + क्यप् । संज्ञापूर्व्वकत्वात् हृस्वाभावः ।) समस्यते संक्षिप्यतेऽनया समस्या अस्यु इर् छेपे औत्रजयजेत्यादिना क्यप् भिन्नाभि-

प्रायस्य श्लोकादेस्तदीयत्वेन प्रत्यभिज्ञायमानानां भागानां स्वकृतेन परकृतेन वा भागान्तरेण समसनं संघटनं समस्येति माधवी ॥ श्लोकस्य पादेनैकेन द्वाभ्यां त्रिभिर्वा पूरणम् । यथा,—
"सुमूर्षोः किं तवाद्यापि चित्रकाननगारुरः ।
स्मर नारायणं येन त्रेतायां रावणो हतः ॥"
इत्यादिश्लोकादौ पादे पूरणरूपेणावयमित्येके ।
इति रायमुकुटः । तत्पर्य्यायः । समासार्था २ । इत्यमरः ॥ समस्यार्था ३ समासार्था ४ । इति भरतः ॥

समस्यार्था, स्त्री, (समस्या अर्थो यस्याः ।) समस्या । इत्यमरटीकायां भरतः ॥

समह्वा, स्त्री, यज्ञः । इति शब्दरत्नावली ॥

समा,स्त्री,(सम वैकल्ये + पचाद्यच् । ततष्टाप् ।) वत्सरः । इत्यमरः ॥ समति विकलयति भावान् समा सम ष्टम वैकल्ये पचाद्यादित्वादन् आप् । समा नित्यबहुवचनान्ताः स्त्रियामिति वामनादयः । समां समां विजायते इत्येकत्वेऽपि दृश्यते इति स्वामी । अतएव समा इति बहुवचनेन क्वचित् पाठः । समेति क्वचिदेकवचनेन । इति तट्टीकायां भरतः ॥ (यथा, रामायणे ।१।२।१५।
"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥"

समांशहारी,[न्] त्रि, (समांशं हरतीति । हृ + णिनिः ।) समभागार्हः । यथा. दायतत्त्वे ।
"समांशहारिणी माता पुत्राणां स्यात् मृते पतौ ॥"

समांशिकः, त्रि, (समांशोऽस्यस्येति । ठन् ।) समभागार्हः यथा,—।
"यदि कुर्य्यात् समानांशान् पत्नीः कार्य्याः समांशिकाः ।
न दत्तं स्त्रीधनं यासां दत्ते त्वर्द्धं प्रकीर्त्तितम् ॥"
इति दायतत्त्वम् ॥

समांशी,[न्] त्रि, (समांशोऽस्यस्येति । इनिः ।) तुल्यभागविशिष्टः । समानभागी । यथा,—
"ज्येष्ठं वा श्रेष्ठभागेन सर्व्वे वा सुः समांशिनः॥
इति दायतत्त्वम् ॥

समांसमीना,स्त्री, (समां समां विजायते इति । "समां समां विजायते ।"५।२।१२। इति खः ।) प्रतिवर्षप्रसूतगवी । इत्यमरः ॥

समाकर्षी, [न्] पुं, (समाकर्षतीति चित्तमिति । सम् + आ + कृष् + णिनिः ।) अतिदूरगामिगन्धः । तत्पर्य्यायः । निर्हारी २ । इत्यमरः ॥ दूरगाजनकगन्धयुक्ते भक्ष्यादिद्रव्ये इयमेतदिति साङ्केतिकः ॥ तत्र, त्रि ॥

समाख्या,स्त्री,(समाख्यायतेऽनयेति । सम् + आ + ख्या + अङ् ।) कीर्त्तिः । इति शब्दरत्नावली ॥ संज्ञा । यथा,—
"सपिण्डीकरणसमाख्यासिद्ध्यर्थं सुतरां तत्र तथाचरणम् ॥" इति तिथ्यादितत्त्वम् ॥

समागतः, त्रि, (सम् + आ + गम क्तः ।)सम्यगागमनविशिष्टः । आगमनाश्रयः । यथा,—
"कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ।
योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ॥"
इति भगवद्गीतायाम् । १ । २२ ॥

समागतिः, स्त्री, समागमनम् । समाङ्पूर्व्वगमधातोः क्तिप्रत्ययनिष्पन्नम् ॥

समागमः,पुं,(सं + आ + गम + घञ् ।)सम्यगागमनम् । सम्प्राप्तिः । यथा,—
"रतिशक्तिः स्त्रियः कान्ता भोज्यं भोजनशक्तिता ।
दानशक्तिः सविभवा रूपमारोग्यसम्पदः ।
आद्यपुण्यमिदं प्रोक्तं फलं ब्रह्मसमागमः ॥"
इति आदितत्त्वधृतमत्स्यपुराणवचनम् ॥

समाघातः, पुं, (समाहन्यतेऽत्रेति । सं + आ + हन + घञ् ।) युद्धम् । इत्यमरः ॥ (यथा, साहित्यदर्पणे । ६ । ४२१ ।
"सम्फेटस्तु समाघातः क्रुद्धसत्वरयोर्द्वयोः ॥")
वधः । इति मेदिनी ॥

समाचारः, पुं, (सम् + आ + चर + घञ् ।) सम्यगाचरणम् । यथा,—
"पुंस्त्रीणां समाचारं श्रोतुमिच्छामि तत्त्वतः ।"
इति मात्स्ये ६६ अध्यायः ॥

संवादः । इति लोकप्रसिद्धः ॥

समाजः, पुं,(संवीयतेऽत्रेति । सं + अज + घञ् । "अजेर्व्यञपोः ।" ३।४ । ५६। इति वीभावो न । "अजिव्रज्योश्च ।" ७ । २ । ६० । इति कुत्वनिषेधः ।) पशुभिस्त्रातानां संघः । इत्यमरः ॥ सभा । इति हेमचन्द्रः ॥ (यथा, भागवते । १० । ४४ । ८ ।
"धर्म्मव्यतिक्रमोऽस्माकं समाजस्य ध्रुवं भवेत् ।
यत्राधर्म्मः समुत्तिष्ठेत्त्र क्षेयं तत्र कर्हिचित् ॥")
हस्ती । इति अनेकार्थकोषः ॥

समाज्ञा,स्त्री, (समाज्ञायते इति । सम् + आ + ज्ञा + "आतश्चोपसर्गे ।" इत्यङ् । टाप् ।) समज्ञा । इत्यमरटीकायां भरतः ॥

समादानं, क्ली, सम् + आ + दा + ल्युट् ।)समीचीनग्रहणम् । सम्यग्ग्रहणम् । (यथा, महाभारते । १३ । ८४ । ३५ ।
"सर्व्वपापसमादानं नृशंसे,चानृते च यत् ।
तत्तस्यास्तु सदा पापं यस्त्रे हरति पुष्करम् ॥")
सौगताह्निकम् । बौद्धानां नित्यकर्म्म । इति मेदिनी ॥

समाधाः, पुं, निष्पत्तिः । विरोधभञ्जनम् । इति लोकप्रसिद्धम् । समाधानम् । समाङ्पूर्व्वधाधातोर्विच्प्रत्ययेन निष्पन्नः ॥

समाधानं, क्ली, (सम् + आ + धा + ल्युट् ।) ब्रह्मणि मनःस्थिरीकरणम् । चित्तैकाग्र्यम् । तत्पर्य्यायः । अवधानम्२ प्रणिधानम् ३ समाधिः ४ । इति हेमचन्द्रः ॥ निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम् । इति वेदान्तसारः ॥ इदानीं समाधानं लक्षयति । निगृहीतस्येति । शब्दादिविषयेभ्यो निगृहीतस्यान्तःकरणस्य श्रवणादौ तदनुगुणेषु तदुपकारकेषु अमानित्वादिसाधनविषयेषु समाधिनैरन्तर्य्येण तच्चिन्तनं समाधानमित्यर्थः । इति तट्टीकासुबोधिनी ॥ (यथा, भागवते । ३ । २८ । ६ ।
"स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणा ।
वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः ॥")
पूर्व्वपक्षस्योत्तरम् । इति लोकप्रसिद्धम् ॥(नाटकाङ्गविशेषः । यथा, साहित्यदर्पणे ।६।३३८।
"उपक्षेपः परिकरः परिन्यासो विलोभनम् ।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ।
उद्भेदः करणं भेद एतान्यङ्गानि वै मुखे ॥"
तल्लक्षणादिकं यथा, तत्रैव । ६ । ३४५ ।
"बीजस्यागमनं यत्तु तत् समाधानमुच्यते ।
यथा, वेणीसंहारे ।
नेपथ्ये भो भो विराटद्रुपदप्रभृतयः ! श्रूयताम् ।
'यत् सत्यव्रतभङ्गभारुमनसा यत्नेन मन्दीकृतं
यद्विस्रम्भनिमोपहितं शमवता शान्तिं कुलस्येच्छता ।
तद्द्यूतारणिसम्भृतं नृपसुताकेशाम्बराकर्षणैः
क्रोधज्योतिरिदं महत् कुरुवने पौधिष्ठिरं जृम्भते ॥'
अत्र 'सुखा भवन्ति मयि जीवतीति' आदिबीजस्य प्रधाननायकाभिमतत्वेन सम्यगाहितत्वात् समाधानम् ॥"*॥)

समाधिः,पुं,(समाधीयतेऽस्मिन् मनो जनैरिति । सम् + आ + धा + "उपसर्गे धोः किः ।" इति किः ।) समर्थनम् । नीवाकः । नियमः । इत्यमरः ॥ (यथा, कुमारे । ५ । ६ ।
"अयाचतारण्यनिवासमात्मनः
फलोदयान्ताय तपःसमाधये ॥")
समर्थनं अग्रक्ये अध्यवसायः दुर्घटस्य घटनत्वं वा । नीवाको वचनाभावः । इति स्वामी ॥ धान्यादिषु मूल्योत्कर्षपूर्व्वको जनादरः । इति सुभूतिः ॥ नियमः अङ्गीकारः । एते समाधयः । समाधीयतेऽस्मिन् मनो जनैरिति किः । इति भरतः ॥ ध्यानम् । काव्यगुणविशेषः । इति मेदिनी ॥ (अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ७४० ।
"समाधिः सुकरे कार्य्ये दैवाद्यत्वन्तरागमात्॥"
यथा,—
"मानमस्या निराकर्त्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्टेदमुदीर्णं घनगर्জितम् ॥"
समाधीयतेऽनेनेति करणे किः । कारणसामग्री । (यथा, रघुः । १ । २८ ।
"तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथाहि सर्व्वे तस्यासन् परार्थैकफला गुणाः ॥")
इन्द्रियनिरोधनम् । इति शब्दरत्नावली ॥*॥
समाधिलक्षणं यथा, गारुडे ४४ अध्याये ।
"नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम् ।
तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम् ।
अहं ब्रह्मेत्यवस्थानं समाधिरिति गीयते ॥"

अपि च तत्रैव २४० अध्याये ।
"द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः ।
तुष्टे तु संयतो मुक्तः समाधिः सोऽभिधीयते ॥
ध्येयमेव हि सर्वत्र ध्याता तन्मयतां गतः ।
पश्यति द्वैतरहितं समाधिः सोऽभिधीयते ॥"
अन्यच्च विष्णुपुराणे । ६ । ७ । ९० ।
तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसाध्याननिष्पाद्यं समाधिः सोऽभिधीयते॥"
अपरञ्च ।
"इमं गुणसमाहारमनात्मत्वेन पश्यतः ।
अन्तः प्रीतिर्यतः यस्य समाधिरिति कथ्यते ॥"
इति योगशास्त्रे उपशमप्रकरणम् ॥
योगाङ्गविशेषः । यथा । समाधिस्तु द्विविधः । सविकल्पको निर्विकल्पकश्चेति । तत्र सविकल्पको नाम ग्राह्यज्ञानादिविकल्पलयानपेक्षया द्वितीयवस्तुनि तदाकाराकारितायाचित्तवृत्तेरवस्थानम् । तदा मृण्मयगजादिभाण्डेऽपि मृद्भावस्य हेतभाण्डेऽप्येतं वस्तु भासते । तदुक्तमभियुक्तैः
"दृशि स्वरूपं गगनोपमं परं
सकृद्विभातं त्वजमेकमव्ययम् ।
अलेपकं सर्वगतं यदद्वयं
तदेव चाहं सततं विमुक्तम् ॥
दृशिस्तु शुद्धोऽहमविक्रियात्मको
न मेऽस्ति बद्धो न च मे विमोक्षः ॥"
इत्यादि ॥*॥
निर्विकल्पकस्तु । ग्राह्यज्ञानादिभेदलयापेक्षया द्वितीयवस्तुनि तदाकाराकारितायां बुद्धिवृत्तेरतितरामेकीभावेनावस्थानम् । तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवावभासते । ततश्चास्य सुषुप्तेश्चाभेदमङ्गः । न भवति उभयत्र हृत्यभाणे समानेऽपि तत्सद्भावासद्भावभानेनानयोर्भेदोपपत्तेः ॥ अस्याङ्गानि । 'यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः । तत्र अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहाः यमाः ।१। शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः २ करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीनि आसनानि । ३। रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः । ४। इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः । ५ । अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा । ६ । तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्य अन्तरिन्द्रियवृत्तिप्रवाहो ध्यानम् । ७ समाधिस्तु उक्तः सविकल्पक एव । ८ । एवमस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणत्वारो विघ्नाः सम्भवन्ति । लयस्तावत् अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा ।१। अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः ।२। लयविक्षेपाभावेऽपि चित्तवृत्तौ रागादिवासनया सत्त्वोद्भावात् अखण्डवस्त्वनवलम्बनं कषायः । ३ । अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पानन्दास्वादनं रसास्वादः । समाधारम्भसमये सविकल्पानन्दास्वादनं वा । ४ । अनेन विघ्नचतुष्टयेन रहितं चित्तं निर्व्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्व्वकल्पकः समाधिरित्युच्यते ॥*॥ तदुक्तम् ।
"लये सम्बोधयेत् चित्तं विक्षिप्तं शमयेत् पुनः ।
सकषायं विजानीयात् शमप्राप्तं न चालयेत् ॥
नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत् ॥"
इत्यादि । यथा दीपो निवातस्थो नेङ्गते इत्यादि च । इति श्रीसदानन्दयोगीन्द्रविरचितवेदान्तसारः ॥ (स्वनामख्यातवैद्यविशेषः । अयं हि महामायामाराध्य परं ज्ञानमलभत् । अस्य विशेषवृत्तान्तस्तु देवीभागवतादौ द्रष्टव्यः ॥)
समाधिस्थः, त्रि, (समाधौ तिष्ठतीति । स्था + कः । समाधियुक्तः । यथा,—
"मनः संकल्परहितमिन्द्रियार्थानचिन्तयन् ।
यस्य ब्रह्मणि संलीनं समाधिस्थः स कीर्त्तितः॥
ध्यायतः परमात्मानमात्मस्थं यस्य योगिनः ।
मनस्तन्मयतां याति समाधिस्थः स कीर्त्तितः ॥"
इति गारुड़े गीतासारे २४० अध्यायः ॥
समानं, त्रि,(समानीति सम्यक्प्रकारेण प्राणितीति । सम् + आ + अन + खुः । यद्वा,समानं मानमस्य । समानस्य छन्दसीति सः ।)सत् । समम् । यथा, रघुः । २ । ७४ ।
"भुजे भुजङ्गेन्द्रसमानसारे
भूयः स भूमेर्धुरमाससञ्ज ॥")
एकम् । इति मेदिनी ॥ (यथा, मनुः ।४।४०।
"नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने ।
समानशयने चैव न शयीत तया सह ॥"*॥
मानेन सह वर्त्तमानमिति विग्रहे गर्ब्भसहितञ्च । यथा, भागवते । १ । १६ । ३६ ।
"स्वैर्य्यं समानमहरत् मधुमानिनीनां
रोमोत्सवो मम यदङ्घिविटङ्कितायाः ॥")
समानः, पुं,(समन्तादनित्यनेनेति । सम् + अन + घञ् ।) शरीरस्थवायुविशेषः । स तु नाभिसंस्थितः । इत्यमरभरतौ ॥ (यथा,—
"हृदि प्राणो गुदेऽपानः समानो नाभि-
संस्थितः ॥")
वर्णभेदः । इति हेमचन्द्रः ॥ स तु एकस्वानोच्चार्य्यवर्णः । यथा । साम्यत्वे कस्यानत्वम् । इति मुग्धबोधव्याकरणम् ॥
समानकालीनः, त्रि, (समानकाले भवः । समान काल + खः ।) तुल्यकालोत्पत्तिकः । यथा । गोषु दुह्यमानासु आगतः दुग्धास्वागत इत्यादौ समानकालीनत्वं भाषते । तेन गोविषयकवर्त्तमानदोहनकालीनगमनानुकूलक्रियतिमान् । एवं गोविषयकातीतदोहनसमानकालीनातीतगमनानुकूलक्रियतिमानिति बोधः । इति सारमञ्जरी ॥
समानोदकः, पुं, (समानं एकं तर्पणकाले देयमुदकं यस्य ।) एकोदकः । स तु ज्ञातिविशेषः । तर्पणे समानं एकमुदकमस्य । यथा,
"जारो नष्टः सगोत्रस्तु स्वजनश्चातिबान्धवाः ।
सकुल्यबन्धुदायादससमानोदका अपि ॥"
इति जटाधरः ॥
स तु चतुर्दशपुरुषपर्य्यन्तः जन्मनामस्मृतिपर्य्यन्तश्च । तत्र आद्यस्यैकादशपुरुषावधिचतुर्दशपुरुषपर्य्यन्तस्यागौचं पञ्चिणी द्वितीयस्यैकाहः । यथा । उदकक्रियामधिकृत्य पारस्करः । सर्व्वे ज्ञातयो भावयन्ति । आसप्तमादशमाद्वा समानपामवासेन यावत् सम्बन्धमनुस्मरेयुर्वा इति भावयन्ति निष्पादयन्ति अत्र यावत् सम्बन्धमनुस्मरेयुरेककुलजाता वयमिति स्मरणं भवतीत्यनेनैव सर्व्वेषामुदकदानं प्राप्ते यदासप्तमादशमादुक्तं तत्सन्निकर्षतारतम्येनाशौचभेदेऽप्युदककर्म्म समानार्थमिति । अशौचभेदस्तु सप्तमपुरुषपर्य्यन्तं सपिण्डत्वादाहः । ततश्च दशमपुरुषपर्य्यन्तं त्रयहः । तथा च विष्णुहरीतौ ।
"दशाहेन सपिण्डास्तु शुध्यन्ति मृतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति
गोत्रजाः ॥"
ततश्चतुर्दशपुरुषपर्य्यन्तं पञ्चिणी ततश्च जन्मनामस्मृतिपर्य्यन्तमेकाहः । तथा च मिताक्षरायामविवादचिन्तामणौ बृहन्मनुः ।
"सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु निवर्त्तेताचतुर्दशात् ॥
जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यते ॥"
अत्र समानोदकत्वे द्विविधे पूर्व्वत्र गौतमः पञ्चिणीमेसपिण्डं । परत्र हारीतः । मातामहे त्रिरात्रं स्यादेकाहस्वसपिण्डके इति । अत्रैव गोत्रजानामहः स्मृतमिति जाबालवचनम् ततः परं सर्व्वथा समानोदकतानिवृत्तेः स्नानमात्रमिति स्नात्वा शुध्यन्ति गोत्रजा इति हरिहरत्युक्तत्वादिति । इतिशुद्धितत्त्वम् ॥
उमानोदर्य्यः, पुं, (समाने उदरे शयितः । "समानोदरे शयित ओ चोदात्तः ।" ४। ४ । १०८ । इति यत् । "विभाषोदरे ।" ६।३ । ८८ । इति पक्षे सादेशो न ।) सहोदरः । इत्यमरः । (यथा, भट्टिः । ७ । ८६ ।
"समानोदर्यमस्माकं जटायुश्च स्तुयादरात् ॥")
समापः, पुं,(समा आपो यस्मिन् । ऋक्पूरित्यः।
"समाप ईत्ते प्रतिषेधो वक्तव्यः ।" ६।३।८७ । इत्यस्य वार्त्तिकोक्त्या ईत्वप्रतिषेधः।) देवयजनम् । इति मुग्धबोधव्याकरणम् ॥
समापकः, त्रि, समापयतीति यः संपूर्व्वापधातोर्ण्वुलप्रत्ययेन निष्पन्नः । यथा,—
"आख्यातास्तिबादयस्तेषाञ्च प्रधानत्वं वाक्यसमापकत्वात् ।" इति दुर्गादासः ॥
समापनं,क्लो,(सम + आप् + ल्युट्।) परिच्छेदः । समाप्तिः । (यथा, मनुः । ५ । ८८ ।
"आदिष्टो नोदकं कुर्य्यादाव्रतस्य समापनात् ।
समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुध्यति ॥")

वधः । इति मेदिनी ॥ समाधानम् । इति विश्वः ॥ लब्धम् । इति धरणिः ॥

समापन्नः, त्रि, (सम् + आ + पद् + क्तः ।) समाप्तः । प्राप्तः । क्लिष्टः । वधः । इति विश्वः ॥

समापिका, स्त्री, (समापयतीति । सम् + आप् + ण्वुल् । टापि अत इत्वम् ।) वाक्यसमापक-क्रिया । तत्र तिङादयो भवन्ति । यथा । देवदत्तो गच्छति । क्वचित् क्त्वान्तादिपदेनापि वाक्यसमाप्तिः । यथा । स्नात्वा दृष्टः शिवो जनैः । क्वचित् तव्यादयन्तक्रियाया अपि वाक्य-समापकत्वम् । यथा । मया कां दिशं गन्तव्यम् । कार्दन्तिकी क्रिया असमापिका । तत्र शत्रादयो भवन्ति । यथा । गच्छन् भुङ्क्ते । भुञ्जा व्रजति । इति व्याकरणटीका ॥

समापितं, त्रि, (सम् + आप् + णिच् + क्तः ।) कृतसमापनम् । यथा,—

"आरब्धं मलमासात् प्राक् यत् कर्म्म न समापितम् ।
आगते मलमासेऽपि तत् समाप्यं न संशयः ॥"
इति मलमासतत्त्वम् ॥

समाप्तः, त्रि, (सम् + आप् + क्तः ।) समापन-प्राप्तः । समाप्तिविशिष्टः । यथा,—

"समाप्ते यदि जानीयान्मयैतदन्यथाकृतम् ।
यतस्तदन्यथाभूतं तत एव समापयेत् ॥"
इति तिथ्यादितत्त्वम् ॥

समाप्तालः, पुं, (समाप्ताय अलतीति । अल + अच् ।) पतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

समाप्तिः, स्त्री, (सम् + आप् + क्तिन् ।) अव-सानम् । (यथा, कुमारे । ३ । २७ ।

"सद्यः प्रवालोद्गमचारुपत्रे
नीते समाप्तिं नवचूतबाणे ।
निवेशयामास मधुद्विरेफान्
नामाक्षराणीव मनोभवस्य ॥")

समर्थनम् । इति मेदिनी ॥ परिग्राप्तिः । इति शब्दरत्नावली ॥

समाप्तार्था, स्त्री, (समाप्ता अर्था यस्याः ।) समस्या । इति समासार्थशब्दटीकायां भरतः ॥

समाप्यं, त्रि, (सम् + आप् + ण्यत् ।) समा-पनीयम् । समापितव्यम् । अस्य प्रमाणं समा-पितशब्दे द्रष्टव्यम् ॥

समायोगः, पुं, (सम् + आ + युज + घञ् ।) संयोगः । (यथा, मनुः । ९ । ३३ ।

"क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान् ।
क्षेत्रबीजसमायोगात् सम्भवः सर्व्वदेहिनाम् ॥")

समवायः । प्रयोजनम् । इति मेदिनी ॥

समालम्बी [न्] पुं, (समालम्बते इति । सम् + आ + लम्ब + णिनिः ।) भूदण्डम् । इति राज-निर्घण्टः ॥

समालभः, पुं (सम् + आ + लभ + घञ् । "उप-सर्गात् खलघञोः ।" ७ । १ । ६७ । इति नुम् ।) कुङ्कुमादिविलेपनम् । इत्यमरः ॥ (यथा, महा-भारते । १३ । १३१ । ९ ।

"गोरोचनासमालम्भो वचाहस्तश्च यो भवेत् ।
घृताक्षतञ्च यो दद्यात् मस्तके तत्परायणः ।
ये च मांसं न खादन्ति तान् शक्तुम हिंसितुम् ॥"

मारणम् । यथा, महाभारते । १२ । ३४ । २८ ।

"हया पशुसमालम्भं नैव कुर्य्युश्च कारयेत् ॥")

समालम्भनं, क्ली, (सम् + आ + लभ + ल्युट् ।) कुङ्कुमादिविलेपनम् । तत्पर्य्यायः । विच्छित्तिः २ कषायः ३ । इति त्रिकाण्डशेषः ॥ समालम्भः ४ विलेपनम् ५ । इत्यमरः ॥ (यथा, रामायणे । ४ । २६ । २८ ।

"समालम्भनमादाय गोरोचनमनःशिलाम् ।
आजग्मुस्तत्र मुदिता वराः कन्याश्च षोडश ॥")

सम्यङ्मारणम् । सम्यक्स्पर्शनम् । यथा । अत ऊर्द्धमसमालम्भनमादशरात्रादिति गोभिल-सूत्रम् ॥

समाली, स्त्री, कुसुमाकरः । इति त्रिकाण्डशेषः ॥

समावर्त्तनं, क्ली, सम् + आ + वृत् + ल्युट् ।) वेदाध्ययनान्तरं गार्हस्थ्याधिकारप्रयोजकं कर्म्म । यथा । "अथ समावर्त्तनम् । ज्योतिषे । 'भौमभानुजयोर्व्वारे नक्षत्रे च व्रतोदिते ।
ताराचन्द्रविशुद्धौ च समावर्त्तनमिष्यते ॥'
गोभिलः । अथाप्लवनम् । अथ व्रतानन्तर-माप्लवनं स्नानं कुर्य्यादिति शेषः । उत्तरतः पुरस्तादाचार्य्यकुलस्य परिव्रतं भवति । आचार्य्यगृहादुत्तरस्यां पूर्व्वस्यां वा स्नानार्थ-माहृतं स्नानं कुर्य्यात् । अत्र प्रागग्रेषु दर्भेषु उदगाचार्य्य उपविशति तत्राहृते उदक् उदङ्मुखः प्राङ् ब्रह्मचार्य्युदगग्रेषु दर्भेषु । प्राङ् प्राङ्मुख उपविशतीत्यन्वयः । सर्व्वौषधि-विर्फाण्डाभिरङ्गिरस्वतीभिः शीतोष्णाभिरा-चार्य्योऽभिषिञ्चेत् । सर्व्वौषधयश्च ।

"व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः ।
यवाश्चौषधयः सप्त विपदो घ्नन्ति धारिताः ॥"

इति छन्दोगपरिशिष्टोक्ताभिः सह या आपो विर्फाण्डा विपक्वा उष्णीकृतास्ताः सर्व्वौ-षधिविर्फाण्डास्ताभिरङ्गिरस्वतीभि-श्चन्दनादि-गन्ध द्रव्ययुक्ताभिः शीतोष्णाभिः शीतोदकमिश्रि-ताभिरिति भट्टभाष्यम् ॥ स्वयमिव तु मन्त्रवर्णो भवति । इवशब्द एवार्थे । स्वयमेव ब्रह्मचारी आत्मानमभिषिञ्चेत् । आचार्य्यकर्त्तृकाभिषेकस्तु परमतो यतो मन्त्रवर्णा भवन्ति । मन्त्रवर्णः अभिषेकमन्त्रलिङ्गं तच्च तेनाहं मामभिषिञ्चामि इति तेन मामभिषिञ्चतमिति च । तदिधि-माह । येऽप्स्वन्तरग्नयः प्रविष्टा इत्यपामञ्जलि-मवसिञ्चति । येऽप्स्वन्तरग्नय इति मन्त्रेण-कासामपामञ्जलिं ब्रह्मचारी अवसिञ्चति । क्व भूमौ कुतः अवसिञ्चति वचनात् । तन्मन्त्रा-भिहितान् सृजामीति यदपामिति मन्त्रेणाभि-हितान् सृजामि इति मन्त्रलिङ्गद्वयाच्च सर्व्वा-धारत्वेन प्राप्तायां भूमौ त्यजति । यदयं घोरं यदयं क्रूरं यदपामशान्तमिति च । अपाम-ञ्जलिमवसिञ्चतीति वर्त्तते चकारात् । यो रोचन-स्त्वमिह गृह्णामीत्यात्मानमभिषिञ्चति । ब्रह्म-तानामपामञ्जलिना यो रोचन इति मन्त्रेण ब्रह्मचारी आत्मानमभिषिञ्चति । ओम् यशसे तेजसे इति च । आत्मानमभिषिञ्चतीति वर्त्तते । येन स्त्रियमक्षत्रवतमिति च । आत्मानमभिषिञ्च-तीति वर्त्तते । तूष्णीं चतुर्थम् । आत्मानमभिषिञ्च-तीति वर्त्तते । अभिषेकः शिरसि कर्त्तव्यः शिरः प्रधानमङ्गानामिति वचनात् । उपोत्थाया-दित्यमुपतिष्ठेत उद्यन् भ्राजभृष्टिभिरित्येतत्-प्रभृतिमन्त्रेण । आचार्य्यसमीपादुत्थाय उद्य-न्नित्येतत्प्रभृतिमन्त्रेण मा हिंसीरित्यन्तमन्त्रेणा-दित्यमुपतिष्ठेत उपाञ्जन्त्रेण चेत्यात्मनेपदम् । मेखलामवमुञ्चते उदुत्तमं वरुणमिति । अव-मुञ्चते अधस्तादवतारयति अवशब्दो अधस्ता-दर्थे । ब्राह्मणान् भोजयित्वा स्वयं भुक्त्वा क्षौर-श्मश्रुरोमनखानि वापयतीति शिखावर्ज्जम् । ब्राह्मणान् भोजयित्वा स्वयं भुक्त्वा नापितेन मुण्डयीत । अत्र शिखावर्ज्जमिति वचनात् प्राक् सशिखं वपनमिति दर्शयति । उक्तञ्च । सशिखं वपनं कार्य्यमात्मानात् ब्रह्मचारिणा इति । स्नात्वा अलङ्कृत्याहते वाससी परिधाय सजमावहीत श्रीरसि मयि रमस्वेति । अलङ्कृत्य कुण्डलादिनात्मान योजयित्वा आहते ।

"ईषद्धौतं नवं शुभ्रं सदृशं यत्र धारितम् ।
आहतं तद्विजानीयात् सर्व्वकर्म्मसु पावनम् ॥"
इति वशिष्ठोक्तलक्षणे ।

ईषत् सूक्ष्मम् । न धारितं न परिधानादि कृतम् । स्रजं ग्रथितपुष्पं आवध्नीत शिरसीति शेषः । श्रीरसीति मन्त्रेण । नेत्री स्थो नयतं मामित्युपा-नही । आवध्नीतेत्यनुवर्त्तते । उपानही चर्म्म-पादुके योग्यत्वात् पादयोः । गन्धर्व्वोऽसीति मन्त्रेण वैणवं दण्डं गृह्णाति । वैणवं वंशप्रभवं गन्धर्व्वोऽसीति मन्त्रेण । आचार्य्यं सपरिषत्क-मभ्येत्याचार्य्यपरिषदमौक्षते । यक्षमिव चक्षुषः प्रियो यो भूयासमिति । सपरिषत्कं शिष्यादि-सभासहितं अभ्येत्याभिमुखेन गत्वा आचार्य्यं परिषदक्षेक्षते यक्षमिति मन्त्रेण । उपोपविश्य मुख्यान् प्राणान् संस्पृशन् ओष्ठापिधाना नक्षु-लीति उपाचार्य्यसमीपे मुख्यान् प्राणान् मुख-प्रभवान् वायून् संस्पृशन् स्नातकः । ओष्ठापि-धानमिति मन्त्रं जपेत् । अत्रैनमाचार्य्योऽर्च-येत् । अत्रावसरे एनं स्नातकं विवाहोत्तरा-र्हणविधिनार्च्चयेत् । तदग्रन्थौ गन्धपुष्पाभ्याम् । गोयुक्तं रथमुपक्रम्य पञ्चसौ कूवरवाक्नूराभि-मृशेत् । वनस्पतिविडूढ्वो हि भूया इति । पञ्चसौ चक्रे । कूवरं रथिकस्थानम् । वाक्नूरं रथरेखेत्यर्थः । वनस्पतौति मन्त्रेणाभिमृशेत् मृशेत् । आस्था ते जयतु जेत्रानीत्यातिष्ठति । रथमारुह्य आस्था ते जयतु जेत्रानीति वन-

स्ते इत्यादिमन्त्रस्य चतुर्थपादेनातिष्ठति । उप-
विशति प्राग्वा उदग्वाभिप्रयाय प्रदक्षिण-
माहृत्या उपयाति । तेन रथेन प्राङ्मुखो वा
प्रयाय प्रकर्षेण गत्वा उपयाति आचार्य-
समीपमागच्छति उपयातायार्घ्यमिति कोह-
नीयाः । उपयातायाचार्यसमीपमागतायार्घ्यं
देयमिति कोहनीया आचार्या आहुः । रथा-
भावेऽपि मन्त्रपाठाचारः । चरकरथे तण्डुला-
दाववघातादिवत् । अस्य कर्म्मणः समावर्त्तन-
संज्ञापि ।
गुरुणानुमतः स्नात्वा समावर्त्तो यथाविधि ।
उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम्॥"
इति मनुस्मृतेः ॥
स्पष्टं शौनककारिकायाम् । कुर्व्वीत स्वयमेवैतत्
समावर्त्तनसंज्ञकम् ।" इति संस्कारतत्त्वम् ॥
समावायः, पुं, समूहः । इत्यमरटीकायां भरतः ।
(यथा, भागवते । २ । ८ । १३ ।
"यस्मिन् कर्म्मसमावायो यथा येनोपगृह्यते ।
गुणानां गुणिनां चैव परिणाममभीप्सताम् ॥")
समाहृतः, त्रि, (सम् + आ + हृ + क्तः ।) सम्यक्
प्रकारेण आहृतः । यथा,—
"जय त्वं कालि सर्वेशे सर्वभूतसमाहृते ।
रक्ष मां निजभूतेभ्यो बलिं भुङ्क्ष्व नमोऽस्तुते॥"
इति दुर्गार्च्चाप्रयोगतत्त्वम् ॥
समाहृत्तः, पुं, (सम् + आ + हृत् + क्तः ।) वेदा-
ध्ययननिहृत्तः । तत्पर्य्यायः । स्नात्वानुज्ञः २ ।
इत्यमरः ॥ साङ्गवेदाध्ययनानन्तरं त्वमिदानीं
गृहस्थो भव इति गार्हस्थ्याय प्राप्तानुमतिः
समाहृत्त उच्यते । समावर्त्तते अध्ययनान्निवर्त्तते
इति समाङ्पूर्व्वात्हृतेः कर्त्तरि क्ते समाहृत्तः ।
इति भरतः ॥
"अतः परं समाहृत्तः कुर्य्याद्दारपरिग्रहम् ।"
इति उद्वाहतत्त्वञ्च ॥*॥
तस्य सर्व्वाशौचे मुण्डनं यथा अशौचाधिकारे
आपस्तम्बः । अनुभाविनाञ्च परिवापनमिति ।
अनुभाविनां स्वाशौचमनुभवतां समाहृत्तानां
सर्व्वाशौचे मुण्डनम् । यत् पुनरापस्तम्बः । न
समाहृत्ता वपेयुरन्यत्र वीहारादित्येके । वीहा-
रात् दर्शपौर्णमासाङ्गयागविशेषादन्यत्र समा-
हृत्ता गृहस्था न वपेयुः । इत्येकेषां मतम् । तत्
काम्यपरम् । इति शुद्धितत्त्वम् ॥
समाहृत्तकः, पुं, (समाहृत्त एव । स्वार्थे कन् ।)
समाहृत्तः । इति शब्दरत्नावली ॥
समावेशः, पुं, (सम् + आ + विश + घञ् ।)
एकत्र सहावस्थानम् । यथा । अर्थसाधनत्वं
बलवदनिष्टाननुबन्धीष्टसाधनत्वम् । अनर्थसाध-
नत्वं बलवदनिष्टसाधनत्वम् । न चानयोरेकत्र
समावेशः । इति तिथ्यादितत्त्वे वैधहिंसा-
विचारः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि ।
१ । ६ ।
"परस्परसमावेशात् जगतः पालने स्थितौ ।
तयोस्तत्र यथाहृत्तं कैलाशे पर्व्वतोत्तमे ॥")
समावेशितः, त्रि, सहावस्थितः । प्रविष्टः । समा-
वेशग्राप्तः । समावेश-शब्दादितप्रत्ययेन निष्पन्नः॥
समाश्रयः, पुं, (सम् + आ + श्रि + अच् ।) सम्य-
गाश्रयः । (यथा, रघुः । ८ । १२ ।
"तमरण्यसमाश्रयोन्मुखं
शिरसा वेष्टनशोभिना सुतः ।
पितरं प्रणिपत्य पादयो-
रपरित्यागमयाचतात्मनः ॥"
सम्यगाधारः । सहायः । समाङ्पूर्वकश्रिधातो-
रल्प्रत्ययेन निष्पन्नः ॥
समाश्रितः, त्रि, (सम् + आ + श्रि + क्तः ।) सम्यक्
प्रकारेणाश्रितः । यथा,—
"रवेः कवेः किं समरस्य सारः
क्षयेर्भयं किं किमदन्ति भृङ्गाः ।
सदा भयञ्चाप्यभयञ्च केषां
भागीरथीतीरसमाश्रितानाम् ॥"
इत्यन्तर्लापिका ॥
समासः, पुं, (सम् + अस् + घञ् ।) संक्षेपः ।
(यथा, मनुः । ७ । २०२ ।
"सर्व्वेषान्तु विदित्वैषां समासेन चिकीर्षितम्
ज्ञापयेत् तत्र तद्दंशं कुर्य्याच्च समयक्रियाम् ॥")
समर्थनम् । इति मेदिनी ॥ समाहारः । इति
हलायुधः ॥ एकपदम् । इति हेमचन्द्रः ॥ सम
सनं पदयोः पदानां वा एकपदीकरणं समासः ।
इति संक्षिप्तसारव्याकरणम् ॥ स च षड्विधः ।
द्वन्द्वः १ बहुव्रीहिः २ कर्म्मधारयः ३ तत्पुरुषः
४ द्विगुः ५ अव्ययीभावः ६ । तेषां लक्षणं
यथा । भिन्नान्येकार्थद्यादिसंख्याद्यादीनां च-
ह-य-प-ग-वाः । इति मुग्धबोधव्याकरणम् ॥*॥
अपि च ।
"नाम्नां समासो युक्तार्थस्तत्स्था लोप्या विभ-
क्तयः ॥"
इति वैयाकरणाः ॥ तस्य सामान्यलक्षणं यथा ।
अभिधानाश्रितलोपाभाववदन्य-मध्यवर्त्तिविभ-
क्तिशून्यनाम-समुदायत्वं समासत्वम् । तत्र कर्म्म-
धारयद्विगु-तत्पुरुष-बहुव्रीहि-द्वन्द्वाव्ययीभावाः
षट्सामासा भवन्ति । तत्र कर्म्मधारयत्वं समाह-
नियतलक्षणाशून्यासंज्ञाशब्दसंख्यावाचक-पूर्वपद-
कान्यमध्यवर्त्तिविभक्तिशून्यतुल्याधिकरणपदस-
मुदायत्वम् । यथा नीलोत्पलमित्यादि ॥१॥
तत्र द्विगुत्वम् । समासाधीनलक्षणाशून्यमध्य-
पदवर्त्तिविभक्ति-शून्यासंज्ञाशब्दसंख्यावाचक-पूर्व-
पदक-तुल्याधिकरणनामसमुदायत्वम् । स च
तद्धितार्थे विषयीभूते तद्धितार्थेऽभिधेये उत्तर-
पदे वा समाहारे वाभिधेये भवति । उत्तर-
पदं पारिभाषिकंयत्पदघटितसमासान्तर्वर्त्ति
द्विगुशब्दं तत् पदम् । तेन च पञ्चगवो
धनानीत्येवासमस्तप्रयोगो न तु पञ्चगवानि
धनानि इति । तद्धितार्थे विषयीभूते यथा पञ्च
गर्गरूप्यः पञ्चब्राह्मण्यः पञ्चनापितिः ऐना-
विकमित्यादि । तद्धितार्थेऽभिधेये यथा पञ्च
कपालः ओदनः । समासस्य संस्कृतोऽर्थः संस्कारे
प्रयोज्यतासम्बन्धेन पञ्चकपालशब्दान्वयो व्युत्पत्ति-
वैचित्र्यात् तथा च पञ्चकपालप्रयोज्यसंस्कारा-
श्रयाभिन्न ओदनः । तद्धितार्थस्य समासेनाभि-
धानात् न तद्धितप्रत्ययाः समाहारेऽभिधेये यथा
पञ्चगवं चतुष्पथं द्विपात्रं त्रिभुवनं चतुर्युगमित्यादयः । उत्तरपदे यथा । पञ्चगवधनः इत्यादि॥२॥
तत्पुरुषत्वन्तु । समासाधीनलाक्षणिकविशेष-
णपदकमध्यवर्त्तिविभक्ति-शून्यनामसमुदायत्वम्
यथा । राजपुरुषः । कष्टाश्रितः । पुरुषोत्तमः ।
इत्यादि ॥ ३ ॥
समासप्रयुक्तलक्षणानियतोत्तरपदकसमासत्वं
बहुव्रीहित्वम् । समासाधीनलाक्षणिकविशेष्य-
वाचकपदकमध्यवर्त्तिविभक्तिशून्यनामसमुदा-
यत्वं वा सम्बन्धिलाक्षणिकत्वव्याप्योत्तरपदक-
त्वं वा बहुव्रीहित्वम् । बहुव्रीहिश्च द्विविधः ।
समानाधिकरणो व्यधिकरणश्च । यथा चित्रगुः।
गृहधान्यकर्षकः । आरूढवानरा हृक्षः ।
इत्यादि ॥ ४ ॥
स्वघटकीभूतप्रत्येकपदार्थान्वितार्थकसोत्तरविभ-
क्तिकमध्यवर्त्तिविभक्तिशून्यनामसमुदायत्वं द्वन्द्व-
त्वम् । यथा धवखदिरपलाशांश्छिन्धि । इति ।
द्विविधो द्वन्द्वः । इतरेतरयोगः समाहारश्च । यत्र
समाहारस्यावयवार्थः प्रधानं तत्रेतरेतरयोगः
द्विवचनेऽपि तत्रैव । यथा । देवदत्तयज्ञदत्तौ ।
धवखदिरपलाशाः । इति यत्र संहतिप्राधान्यं
तत्र समाहारस्तत्र कवचं नपुंसकलिङ्गता च ।
यथा वाग्दृष्टयं हस्त्यश्वम् । इत्यादि ॥ ५ ॥
समासप्रयुक्तलक्षणाशून्यावयवपूर्वपदकमध्य-
वर्त्तिविभक्तिशून्य-तत्पुरुषान्यनाम-समुदायत्वं
अव्ययीभावत्वम् । यथा । उपकुम्भं अघटं निर्म्म-
क्षिकं अधिस्त्रि इत्यादि ॥ ६ ॥ इति समास-
वादः॥*॥ अन्यच्च । यौगिकेषु समासं लक्षयति।
"याट्शस्य महावाक्यस्यान्तस्त्वादिनिजार्थके ।
याट्शार्थस्य धीहेतुः स समासस्तदर्थकः ॥"
याट्शमहावाक्योत्तरः त्वतलादिः स्वार्थस्य याट्-
शार्थावच्छिन्नविषयतायालिबोधे हेतुस्तादृशं
तदाख्यं तथाविधार्थे समासः । विभज्यते ।
"स चायं षड्विधः कर्म्मधारयादिप्रभेदतः ।
यथोपपदसञ्ज्ञोऽन्यस्तेनासौ सप्तधा मतः ॥
पूर्वमध्यान्त्यसर्व्वान्यपदप्राधान्यतः पुनः ।
प्राच्यैः पञ्चविधः प्रोक्तः समासोवा भटादिभिः॥"
तेषु कर्म्मधारयं लक्षयति ।
"क्रमिकं यन्नामयुगमेकार्थेऽन्यार्थबोधकम् ।
तादात्म्येन भवेदेष समासः कर्म्मधारयः ॥"
क्रमिकं यन्नामद्वयंतयोरेकस्य नाम्नोऽर्थेधर्म्मिणि
तादात्म्येनापरनाम्नोऽर्थस्य अन्वयबोधं प्रति
समर्थे तादृशनामद्वयं कर्म्मधारयः । यथा-
नीलोत्पलम् ॥ १ ॥ द्विगुं लक्षयति ।
"संख्याशब्दयुतं नाम तदलक्ष्यार्थबोधकम् ।
अभेदेन च यत् स्वार्थे स द्विगुस्त्रिविधो मतः॥
संख्यावच्छिन्नशक्त-यत्-पदोत्तरत्वविशिष्टयन्नाम
स्वार्थधर्म्मिकं तादात्म्येन तदलक्ष्यार्थस्यान्वय-

बोधं प्रति समर्थं तन्नामोत्तरतापन्नं तन्नामैव तदलक्ष्यार्थाभिन्नस्यार्थे द्विगुरुच्यते। तच्च तद्धितार्थद्विगुं लक्षयति।
"तद्धितार्थान्वितस्वार्थस्तद्धितार्थद्विगुर्मतः।
तद्धितार्थे लाक्षणिकस्त्वन्यनाम त्वसर्व्वगः॥
यो द्विगुः स उत्तरतद्धितार्थान्वितस्वार्थकः॥"
उत्तरपदद्विगुं लक्षयति।
"स्वान्तर्निविष्टशब्दाभ्यां शब्दान्तरसमासगः।
यो द्विगुः शाब्दिकैरुक्तः स उत्तरपदद्विगुः॥"
यो द्विगुः स्वघटकनामभ्यां सह साकाङ्क्षनामान्तरेण समासस्यान्तर्गतः स उत्तरपदद्विगुः। यथा पञ्चगवधनः। समाहारद्विगुं लक्षयति।
"स्वार्थान्वितसमाहारलक्षकः स्वान्यशब्दकः।
उक्ताभ्यामितरः किंवा समाहारद्विगुर्द्विगुः॥"
स्वोपस्थाप्यार्थस्य समाहारलक्षको यदीयान्यशब्दः स द्विगुः समाहारद्विगुः। यथा पञ्चपुलीत्यादि॥ २॥ तत्पुरुषं लक्षयति।
"यदीयेन सुबर्थेन युतयद्बोधनक्षमः।
यः समासस्तस्य तत्र स तत्पुरुष उच्यते॥"
यदर्थगतेन सुबर्थेन विशिष्टस्य यदर्थस्यान्वयबोधं प्रति यः समासः स्वरूपयोग्यः स तदर्थस्य तदर्थे तत्पुरुषः। न तु यन्नामोत्तरं यन्नाम यदर्थगतसुबर्थावच्छिन्नस्य यत् स्वार्थस्य बोधकं तदुत्तरतन्नामैव तदर्थयोस्तत्पुरुषः। पूर्व्वकायोर्द्वयिप्यलौत्यादावव्याप्तेः। विभजते।
"द्वितीयादिसुबर्थस्य भेदादेव च षड्विधः।
क्रियान्वयी द्वितीयादेरर्थः प्रायोऽत्र योजितः॥"३॥
अव्ययीभावं लक्षयति।
"उत्तरार्थान्वितस्वार्थाव्ययपूर्व्वस्तु यो भवेत्।
समासः सोऽव्ययीभावः स्त्रीपुंलिङ्गविवर्जितः॥"
यः समासः सोऽत्तरपदोपस्थाप्येन यदर्थेनान्वितस्य यदर्थस्य बोधकाव्ययपूर्व्वभागकः स तद्विशिष्टस्य तदर्थस्य बोधने अव्ययीभावः। यथा निर्मक्षिकं उपकुम्भमित्यादि।
"अमादेशं विना श्रूयमाणषष्ठो न बोधिका।
स्वार्थे यदर्थस्य यदा सोऽव्ययीभाव इष्यते॥"
अमादेशं विना श्रूयमाणषष्ठी स्वार्थे यत् समासार्थस्यान्वयबोधं प्रत्यसमर्था स एव वाव्ययीभावः श्रूयमाणैव षष्ठी स्वार्थे समासान्तरार्थस्यान्वयबोधनेऽसमर्था न तु लुप्तापि॥ ४॥
बहुव्रीहिं लक्षयति।
"बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन बोधकः।
निरूढया लक्षणया स्वांशज्ञापकशब्दवान्॥"
स्वांशस्य निरूढलक्षणया ज्ञापकेन शब्देन घटितः स्वगर्भस्य यादृशार्थस्य समन्वितत्वप्रकारेणान्वयबोधं प्रति समर्थः समासः स्वगर्भतादृशार्थसम्बन्धिबोधने बहुव्रीहिः।
"प्रत्येकं प्रथमान्तं सत् सुबन्तैरितरैः सह।
यदा भेदसुबन्तेन साकाङ्क्षं नाम विग्रहः॥"
अस्य बहुव्रीहेर्घटकमेकं नाम प्रथमान्तं सत् सुबन्तैरितरनामभिः सह भेदार्थकसुबन्तयच्छब्देन साकाङ्क्षं विग्रहः कथ्यते। बहुव्रीहिं विभजते।
"तदतदृगुणसंविज्ञानो ह्यौ भेदौ तदादिमः।
विग्रहस्य विशेष्यो यस्तद्विशेष्यकबोधकृत्॥"
तच्च विग्रहवाक्यस्य विशेष्यविधया प्रत्याय्यो योऽर्थस्तद्विशेष्यकबोधकृत् बहुव्रीहिस्तयोरादिमः तदृगुणसंविज्ञानः। तस्य स्वार्थगुणीभूतस्य सम्यग्विशेष्यविधया विज्ञानंयस्मिन्निति व्युत्पत्त्या स्वार्थान्वयः संज्ञात्वात् तद्विज्ञानादृगुणसंविज्ञानवरम इत्यर्थादवगम्यते। प्राचां मतेन तदृगुणसंविज्ञानश्चबहुव्रीहिमन्यथा निर्व्वक्ति।
"यः स्वार्थघटकार्थस्य स्वार्थान्वयिनि बोधने।
अनुकूलो बहुव्रीहिः स तयोरथवादिमः॥"
यो बहुव्रीहिः स्वार्थस्यान्वयिनि स्वार्थघटकस्याप्यर्थस्यान्वयबोधने समर्थः स तयोस्तादृगुणातदृगुणयोरादिमः। लम्बकर्णमानय डित्थौवं पश्य इत्यादि। पुनर्विभजते।
"स्वान्तर्निविष्टद्वित्रादिनामभिर्विग्रहात् पुनः।
बहुव्रीहिर्बहुविधो द्विपदत्रिपदादिकः॥"
द्वित्रिचतुरादिभिरेव स्वघटकनामभिर्विग्रहवशात् द्विपदत्रिपदचतुष्पदादिको बहुव्रीहिर्ब्बोध्यः॥ ५॥ द्वन्द्वं लक्षयति।
"यदृयदर्थकयन्नामव्यूहो यदृयत्प्रकारके।
बोधे समर्थः स द्वन्द्वः समासस्तावदर्थकः॥"
यदृयदर्थोपस्थापकस्य क्रमिकयादृग्नामसमूहस्य नियतस्तदर्थप्रकारकान्वयबोधं प्रति तत्तेन समर्थस्तादृगनामनिवह एव तावदर्थको द्वन्द्वसमासः। द्वन्द्वं विभजते।
"द्वौ भेदावस्य शास्त्रोक्तौ समाहारेतरेतरौ।
एकान्यवचनाकाङ्क्षा ह्यनोपादानतस्तयौ॥"
अस्य द्वन्द्वस्य द्वौ भेदौ समाहार इतरेतरश्च शास्त्रसिद्धौ। तत्रैकवचनान्यसुबाकाङ्क्षाविहीनः समाहारः। तथाविधसुबाकाङ्क्षश्चेतरेतरः। यथा। पाणिपादं दन्तौष्ठं धवखदिरौ। इत्यादि॥ ६॥ उपपदसमासं लक्षयति।
"यदुत्तरपदं नामानुत्तरं यदबोधकम्।
धातुकृज्जसुपपदसमासः स तदन्तकः॥"
धातुकृद्भ्यां निष्पन्नं यस्योत्तरपदं शब्दानुत्तरं स यादृशार्थस्य बोधं प्रत्यसमर्थं तादृशार्थं तादृशार्थकान्वयपदकः समास उपपदसंज्ञकः। कुम्भकारः क्षीरपायीत्यादि। विभजते।
"कारकैकोपपदकः षड्विधोऽयमिति भ्रमः।
कर्म्मकर्त्रादिभेदात् बहुविधस्त्वसौ॥"७॥

इति शब्दशक्तिप्रकाशिका॥

समासक्तः, त्रि, (सम्+आ+सञ्ज+क्तः।) संयुक्तः। यथा, कर्पूराख्यस्तोत्रे।
"त्रिपञ्चारे पीठे शवशिवहृदि क्षीरदनां
महाकालेनोच्चैर्मदनरसलावण्यनिरताम्।
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो
जनो यो ध्यायेत्त्वामयि जननि स स्यात् स्मरहरः॥"

समासङ्गनं, क्लो, (सं+आ+सञ्ज+ल्युट्।) समासङ्गः। मेलनम्। संयोगः। समाङ्पूर्व्वकसञ्जधातोरनट्प्रत्ययेन निष्पन्नम्॥
समासन्न, त्रि, निकटस्थम्। समाङ्पूर्व्वसदधातोः क्तप्रत्ययेन निष्पन्नम्॥ (यथा, रघुः।१०।३५।
"अथ वेलासमासन्नशैलरन्ध्रानुनादिना।
स्वरेणोवाच भगवान् परिभूतार्णवध्वनिः॥")
समासवान्, [त्] पुं, (समासः संक्षेपोऽस्त्यस्येति। समास+मतुप्। मस्य वः।) तुन्नवायः। इति शब्दचन्द्रिका॥ समासविशिष्टे, त्रि॥
समासादितः, त्रि, (सम्+आ+सद्+णिच्+क्तः।) आहृतः। प्राप्तः। समाङ्पूर्व्वआन्तसदधातोः क्तप्रत्ययेन निष्पन्नः॥
समासाद्य, त्रि, (सम्+आ+सद्+ल्यप्।) प्राप्यम्। इत्यमरः॥ अनुस्वारशून्यश्चेत् प्राप्यानन्तरबोधकक्रिया॥ (यथा, महाभारते। ५। १६। १६।
"अपां फेनं समासाद्य विष्णुतेजोऽभिरक्षितम्
त्वया हतो हतः पूर्व्वं देवराज! जगत्पते!॥")
समासार्था, स्त्री, (समासेन संक्षेपेण अर्थो यस्याः।) समस्या। श्लोकस्य पादैर्नैकेन द्वाभ्यां त्रिभिर्व्वा पूरणम्। इत्यमरभरतौ॥
समाहरणं, क्लो, (सं+आ+हृ+ल्युट्। समाहारः। समाङ्पूर्व्वकहृञ्धातोरनट्प्रत्ययेन निष्पन्नम्॥
समाहारः, पुं, (सं+आ+हृ+घञ्।) समुच्चयः। इत्यमरः॥ बहूनां भिन्नानां बाह्यव्यापारेण बुद्ध्या वा पञ्चमूली त्रिभुवनवत् राशीकरणम्। इति भरतः॥ संक्षेपः। यथा,
"समासस्तु समाहारः संक्षेपः संग्रहोऽपि च।"
इति हैमचन्द्रः॥
समाहारद्वन्द्वसमाहारद्विगुसमासयोर्व्विवरणं समासशब्दे द्रष्टव्यम्॥
समाहितः, त्रि, (सम्+आ+धा+क्तः।) समाधिस्थः। यथा, देवीभागवते। १। १७। ६६।
"स्नात्वा प्रातःक्रियां कृत्वा पुनरास्ते समाहितः॥")
उक्तसिद्धान्तः। आहितः। निर्व्विवादीकृतः। प्रतिज्ञातः। इति मेदिनी॥ निष्पन्नः। इति धरणिः॥ शुचौ, पुं। इति शब्दरत्नावली॥
समाहृतः, त्रि, सम्यक्प्रकारेण आहरणीकृतः। संगृहीतः। एकत्रीकृतः। संक्षेपेण प्रतिपादितः। समाङ्पूर्व्वकहृधातोः क्तप्रत्ययेन निष्पन्नः॥
समाहृतिः, स्त्री, (सम्+आ+हृ+क्तिन्।) संग्रहः। इत्यमरः॥ एककर्त्तृकाणामनेककर्त्तृकाणां वा एकाभिप्रायाणां वाक्यानां समाहरणं समाहृतिः। समाक्रियते संक्षेपेण प्रतिपद्यते अनया समाहृतिः। संपूर्व्वात् आङ्पूर्व्वात् हृ ञ हरणे इत्यस्मात् क्तिः। इति भरतः॥
समाह्वयः, पुं, (समाह्वयतेऽत्रेति। सम्+आ+ह्वे+पुंसीति घः। बाहुलकात् नात्वम्।)

द्यूतम्। आह्वानम्। इति शब्दरत्नावली॥ पणपक्षिद्यूतम्। सङ्गरम्। इति मेदिनी॥*॥ तस्य निषिद्धत्वं यथा,—
द्यूतं समाह्वयञ्चैव राजा राष्ट्रान्निवारयेत्।
राज्यान्तकरणावेतौ हि दोषौ पृथिवीक्षिताम्॥
प्रकाशमेतत् तस्कर्य्यं यद्देवनसमाह्वयौ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत्॥
अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः॥
द्यूतं समाह्वयञ्चैव यः कूर्य्यात् कारयेत वा।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विज-
लिङ्गिनः॥"
इति मानवे। ९। २२१—२२४॥

समाह्वा, स्त्री, (सम्यक् आह्वा यस्याः।) गोजिह्वाहृक्षः। इति शब्दचन्द्रिका॥ समाख्या च॥

समिकं, क्ली, शैवलम्। इति शब्दरत्नावली॥ वँड्‌सा इति भाषा॥

समित्, स्त्री, (समीयतेऽत्रेति। सम्+इण्+क्विप्।) युद्धम्। इत्यमरः॥ (यथा, महाभारते। ५। २२। २३।
"पाण्ड्यश्च राजा ममितौजसल्यो
युधि प्रवीरैर्बहुभिः ममेतः॥")

समित्, [ध्] स्त्री, (समीध्यतेऽनयेति। इन्ध+क्विप्) अग्निमन्दीपनार्थदहणकाष्ठादिः। तत्पर्य्यायः। इन्धनम् २ एधम् ३ इध्मम् ४ एधः ५। इत्यमरः॥ समिन्धनम् ६। एतस्मिन् सूत्रे किलिञ्जम्। इति शब्दरत्नावली॥*॥ होमीयसमिल्लक्षणं मत्स्यपुराणे।
"प्रादेशमात्राः सशिखाः सवल्काश्च पलाशिनीः।
समिधः कल्पयेत् प्राज्ञः सर्व्वकर्म्मसु सर्व्वदा॥"
लक्षणान्तरं यथा, छन्दोगपरिशिष्टम्।
"नाङ्गुष्ठादधिका न्यूना समित् स्यूलतया क्वचित्।
नं निर्म्मुक्तत्वचा चैव न सकीटा न पाटिता॥
प्रादेशात् नाधिका नोना न तथा स्याद्विशाखिका।
न सपत्रा न निर्वीर्य्या होमेषु च विजानता॥"
इति संस्कारतत्त्वम्॥*॥
तस्य निषिद्धलक्षणं यथा,—
"विशीर्णा विदला क्लिष्टा वक्रा स्थूला द्विधाकृताः।
कृमिदष्टाश्च दीर्घाश्च समिधो नैव कारयेत्॥"
अत्र दोषो यथा,—
"विशीर्णायुःक्षयं कुर्य्याद्विदला पुत्रनाशिनी।
क्लिष्टा नाशयते पत्नीं वक्रा बन्धुविनाशिनी॥
कृमिदष्टा रोगकरी विद्वेषकरणी द्विधा।
पशून् मारयते दीर्घा स्थूला चार्थविनाशिनी॥"
इति तत्त्वम्॥**॥
नवग्रहाणां समिधो यथा,—
"अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः।
उडुम्बरः शमी दूर्व्वाः कुशाश्च समिधः क्रमात्॥"
इति संस्कारतत्त्वे याज्ञवल्क्यवचनम्॥

समिता, स्त्री, (सम्यक्प्रकारेण इता प्राप्ता।) गोधूमचूर्णम्। इति हेमचन्द्रः॥ मयदा इति भाषा॥ तस्या लक्षणं यथा,—
"गोधूमा धवला धौताः कुट्टिताः शोधितास्ततः।
प्रक्षिप्ताः सा विनिष्पिष्टाश्चालिताः समिता स्मृता॥"
इति राजनिर्घण्टः॥

समितिः, स्त्री, (संयन्त्यस्यामिति। सं+इण्+क्तिन्।) सभा। यथा, महाभारते।१।२।२२४।
"प्रभाते राजसमितौ सञ्जयो यत्र वा विभोः।
ऐक्यात्मा वासुदेवस्य प्रोक्तवानर्জ্জুनस्य च॥")
युद्धम्। (यथा, भागवते। २। ७। ३४।
"ये वा मृधे समितिशालिन आत्तचापाः
काम्बोजमत्स्यकुरुसृञ्जयकैकयाद्याः॥")
सङ्गरः। इत्यमरमेदिनीकरौ॥ साम्यम्। इति हेमचन्द्रः॥ (सन्निपातः। इति श्रीधरस्वामी॥ यथा, भागवते। ११। २५। ८।
"प्रवृत्तिलक्षणे निष्ठः पुमान् यर्हि गृहाश्रमे।
स्वधर्म्मे चानुतिष्ठेत गुणानां समितिर्हि सा॥")

समिथः, पुं, (समेतौति। सम्+इण्+"समीणः।" उणा० २। ११। इति थक्।) अग्निः। इत्यणादिकोषः॥ युद्धम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (यथा, ऋग्वेदे। ४। २०।८।
"शिचानरः समिथेषु प्रहावान्
वस्रो राशिमभिनेतासि भूरिम्॥"
अस्मिन्नर्थे क्वचित् क्लीवेऽपि दृश्यते। यथा, तत्रैव। १। ५५। ५।
"स इन्महानि समिथानि मज्मना
कृणोति युध्म ओजसा जनेभ्यः॥")
आहुतिः। इति संक्षिप्तसारोणादिवृत्तिः॥

समिद्,[ध्] स्त्री,(समिध्यतेऽनयेति। सं+इन्ध+क्विप्।) समित्। इत्यमरः॥ (यथा, मनुः। २। १७६।
"नित्यः स्नात्वा शुचिः कुर्य्यात् देवर्षिपितृ-
तर्पणम्।
देवताभ्यर्चनञ्चैव समिदाधानमेव च॥")

समिद्धः, पुं, (सं+इन्ध+क्तः।) प्रदीप्तः। यथा, कात्यायनः।
"योऽनर्चिषि हुतेत्यग्नौ व्यङ्गारिणि च मानवः
मन्दाग्निरामयावी च दरिद्रश्च स जायते।
तस्मात् समिद्धे होतव्यं नासमिद्धे कदाचन॥"
इति संस्कारतत्त्वम्॥

समिधः, पुं, (समिध्यते इति। सं+इन्ध+कः) अग्निः। इति त्रिकाण्डशेषः॥ (यथा, रामायणे। २। २४। ६।
अयन्तु मामात्मभवस्त्वदर्शनमारुतः।
विलापदुःखसमिधो रुदिताश्रुहुताहुतिः॥")

समिन्धनं, क्ली, (समिध्यतेऽनेनेति। सं+इन्ध+ल्युट्।) समित्। इति शब्दरत्नावली॥ (यथा भट्टिः। २। २८।
"तपोमरुद्भिर्भवतां शरारणिः
संधुक्षतां नोऽरिषमिन्धनेषु॥")

समिरः, पुं, वायुः। इति हेमचन्द्रः। ४।१७२॥

समीकं, क्ली, (सम्+अलीकादयश्चेति ईकः।) युद्धम्। इत्यमरः॥ (यथा. ऋग्वेदे।४।२४।३।
"तमिन्नरो विह्वयन्ते समीके
रिरिक्वांसस्तन्वः कृण्वतत्राम्॥")

समीक्षितं, त्रि, एकीकृतम्। समानीकृतम्। क्षञ्धातौ परे समग्रब्दात् क्विप्प्रत्ययेन निष्पन्नम्॥

समीक्षं, क्ली, (सम्यगीक्ष्यतेऽनेनेति। सम्+ईक्ष+घञ्।) माङ्गल्यशास्त्रम्। इति त्रिकाण्डशेषः॥ सम्यगदर्शनञ्च॥

समीक्षणं, क्ली, सम्यक्प्रकारेण दर्शनम्। प्रेक्षणम्। संपूर्व्वेक्षधातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम्॥(प्रकाशके त्रि। यथा, भागवते।८।२४।५०।
"त्वमर्कदृक्सर्व्वदृशां समीक्षणो
हतो गुरुर्न स्वगतिं बुभुत्सताम्॥")

समीक्षा, स्त्री, (सम्+ईक्ष+गुरोश्चेत्यः। टाप्।) तत्त्वम्। बुद्धिः। निभालनम्। इति मेदिनी॥ मीमांसाशास्त्रम्। यत्नः। इति शब्दरत्नावली॥ (आत्मविद्या। इति स्वामी॥ यथा, भागवते। ११। २८। ३४।
"एवं समीक्षा निपुणा सती मे
हन्यात् तमिन्द्रं पुरुषस्य बुद्धेः॥"
सम्यग्दर्शनम्। यथा, भागवते। ३। ४। १०।
"आशृण्वतो मामनुरागहास-
समीक्षया विप्लवयन्वाचा॥")

समीचः, पुं, (संयन्ति नद्यो यस्मिन्। सं+इण्+"समीणः।" उणा० ४। ८२। इति चट्। दीर्घश्च।) समुद्रः। इत्युणादिकोषः॥

समीचकः, पुं, मैथुनम्। इति केचित्॥

समीची, स्त्री, (संयातीति। सं+इण्+चट्। ङीप्।) दृग्नी। इत्युणादिकोषः॥ वन्दना। इति त्रिकाण्डशेषः॥

समीचीनं,क्ली, (सम्यगेव। सम्यक्+"विभाषाञ्चेरदिक् स्त्रियाम्।" ५। ४। ८। इति खः।) यथार्थम्। तत्पर्य्यायः। सत्यम् २ सम्यक् ३ ऋतम् ४ तथ्यम् ५ यथातथम् ६ यथास्थितम् ७ सद्भूतम् ८। इति हेमचन्द्रः॥ तद्वति, त्रि॥ (यथा, भागवते। २। ४। ५।
"समीचीनं वचो ब्रह्मन् सर्व्वज्ञस्य तवानघ।
तमो विधूयते मह्यं हरेः कथयतः कथाम्॥")

समीदः, पुं, गोधूमचूर्णम्। इति केचित्॥

समीनः,त्रि,(समामर्थीद्भूतो भूतो भावी वा। समा+"समायाः खः।" ५। १। ८५। इति खः।) वत्सरसम्बन्धी। समाशब्दात् खीनप्रत्ययेन निष्पन्नः॥

समीनिका, स्त्री, प्रतिवर्षप्रसूता गौः। इति शब्दचन्द्रिका॥

समीपः, त्रि, (सङ्गता आपो यत्र। "ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। इति अप्रः। "इगन्तरूपसर्गेभ्योऽप ईत्।" ६। ३। ९७। इति ईत्।) निकटः। इत्यमरः॥ (क्लीवेऽपि दृश्यते। यथा, मनुः। २। १०४।

"अथां समीपे नियतो नैत्यिकं विधिमास्थितः।
सावित्रीमप्यधीयीत गत्वारण्यं समाहितः॥")
समीपता, स्त्री, नैकट्यम्। समीपत्वम्। सामीप्यम्।
समीपशब्दात् तल्प्रत्ययेन निष्पन्नम्॥
समीयः, त्रि, (सम + "गहादिभ्यश्च।" ४। २।
१३८। इति छः।) समसम्बन्धी। तुल्यकारणकः। समशब्दात् णीयप्रत्ययेन निष्पन्नः॥
समीरः, पुं, (सम्यगीर्त्ते गच्छतीति। सं + ईर
गतौ + कः।)वायुः। इत्यमरः। १। १। ६५॥
(यथा, माघे। ४। ५४।
"समीरशिशिरः शिरःसु वसतां
सतां जवनिका निकामसुखिनाम्॥")
शमीवृक्षः। इति राजनिर्घण्टः॥
समीरणः, पुं, (समीरयतीति। सम् + ईर + ल्युः।)
वायुः। (यथा, कुमारे। १। ८।
"यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन।
उद्गास्यतामिच्छति किन्नराणां
तानप्रदायित्वमिवोपगन्तुम्॥")
मरुवकः। इत्यमरः। २। ४। ७। ८॥ पथिकः। इति
मेदिनी॥ (क्ली, सं + ईर + ल्युट्। प्रेरणम्।
यथा, महाभारते। ८। ८४। २३।
"शराभिघाताच्च रुषा च राजन्
श्रम्या च भासाश्वसमीरणाच्च॥"*॥
प्रेरके, त्रि। यथा, हरिवंशे। १०२। २२।
"सोऽपिबत् पाण्डुराभ्राभस्तत्कालंज्ञातिभिर्वृतः
वनान्तरगतो रामः पानं मदसमीरणम्॥")
समुखः, त्रि, (मुखेन सह वर्त्तमानः।) वाग्मी।
वावदूकः। इति हेमचन्द्रः॥
समुचितः, त्रि, सम्यगुचितः। उपयुक्तः। यथा,—
"वदामस्ते किंवा जननि वयमुच्चैर्जड़धियो
न धाता नापीशो हरिरपि न तं वेत्ति परमम्
तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते
तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः॥"
इति तन्त्रसारधृतश्यामास्तोत्रम्॥
समुच्चयः, पुं, (सं + उत् + चि + अच्।) समाहारः। इत्यमरः। ३। २। १६॥ यथा,—
"राशौ द्वयोर्बहूनाञ्च समाहारः समुच्चयः॥"
इति शब्दरत्नावली॥
(यथा, कुमारे। १। ४८।
"सर्व्वोपमाद्रव्यसमुच्चयेन
यथाप्रदेशं विनिवेशितेन।
सा निर्म्मिता विश्वसृजा प्रयत्ना-
देकस्थसौन्दर्य्यदिदृक्षयेव॥")
समुच्छेदः, पुं, विनाशः। संपूर्व्वात्पूर्व्वच्छिदधातोर्घञ्प्रत्ययेन निष्पन्नः॥ (यथा, किरातीये। ११। ४८
"वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम्।
निर्व्वाणमपि मन्येऽहमन्तरायं जयश्रियः॥")
समुच्छ्रयः, पुं, (स + उत् + श्रि + अच्।) विरोधः।
उत्सेधः। इति मेदिनी॥ (यथा, रघुः। ८। २०।
"कनधूपसमुच्छ्रयशोभिनो
वितमसा तमसासरयूतटाः॥")

समुच्छ्रायः, पुं, समुच्छ्रयः। समुत्पूर्व्वश्रिधातोर्घञ्प्रत्ययेन निष्पन्नः॥
समुच्छ्रितः, त्रि, उच्चः। समुत्पूर्व्वश्रिधातोः क्तप्रत्ययेन निष्पन्नः॥
समुज्झितः, त्रि, (सम् + उज्झ उत्सर्गे + क्तः।)
त्यक्तः। इत्यमरः। ३। १। १०७॥
समुत्क्रमः, पुं, ऊर्द्ध्वगमनम्। समुत्पूर्व्वक्रमधातोरल्प्रत्ययेन निष्पन्नः॥
समुत्क्रोशः, पुं, (समुत्क्रोशतीति। सं + उत् +
क्रुश + अच्।) कुररपक्षी। इति शब्दरत्नावली॥ (भावे घञ्।) उच्चैःशब्दश्च॥
समुत्थः, त्रि, (समुत्तिष्ठतीति। सं + उत् +
स्था + कः।) समुद्भवः। समुत्थितः। समुत्पूर्व्वस्थाधाद्बोर्डप्रत्ययेन निष्पन्नः॥ (यथा, मनुः। ७। ४५।
"दश कामसमुत्थानि तथाष्टौ क्रोधजानि च।
व्यसनानि दुरन्तानि प्रयत्नेन विवर्ज्जयेत्॥")
समुत्थानं, क्ली, (सम् + उत् + स्था + ल्युट्।)
समुदयोगः। (यथा, महाभारते। ३। ३२। ७।
"सर्व्वे हि स्वं समुत्थानमुपजीवन्ति जन्तवः।
अपि धाता विधाता च यथायमुदके वकः॥")
व्याधीनां निर्णयः। इति मेदिनी॥ (यथा, मनुः। ८। २८७।
"अङ्गावपीड़नायाञ्च व्रणशोणितयोस्तथा।
समुत्थानव्ययं दाप्यः सर्व्वदण्डमथापि वा॥")
ऊर्द्ध्वगमनम्। सम्यक्प्रकारेण उत्थानम्। उत्तोलनम्। यथा,—
"इन्द्रध्वजसमुत्थानं प्रमादान्न कृतं यदि।
तदा द्वादशमे वर्षे कर्त्तव्यं नान्तरा पुनः॥"
इति तिथ्यादितत्त्वम्॥
समुत्थितः, पुं, (सम् + उत् + स्था + क्तः।)सम्यगुत्थितः। यथा,—
"समुत्थितस्त्वं श्रवणाद्यपादे
गृहाण पूजां भगवन्नमस्ते॥"
इति तिथ्यादितत्त्वे शक्रोत्थानपूजामन्त्रः॥
समुत्पन्नः, त्रि, (सम् + उत् + पद + क्तः।)समुद्भूतः। यथा,—
"पुस्तकस्था च या विद्या परहस्तगतं धनम्।
कार्य्यकाले समुत्पन्ने न सा विद्या न तद्धनम्॥"
इति चाणक्यम्॥
समुत्पिञ्जः, त्रि, (सम् + उत् + पिंजि हिंसायाम्
+ अच्।) अत्यन्तव्याकुलः। यथा,—
"उत्पिञ्जलसमुत्पिञ्जपिञ्जला भृशमाकुले॥"
इति हेमचन्द्रः॥
समुत्पिञ्जः, पुं, (सम् + उत् + पिञ्ज + पचाद्यच्।
भृशमाकुलसैन्यम्। इत्यमरः। २। ८। ८८॥
समुत्सुकः, त्रि, (सम्यगुत्सुकः।)सम्यगुत्कण्ठितः।
इति हेमचन्द्रे उत्सुकशब्दार्थदर्शनात्॥ सम्यगिष्टार्थोद्युक्तः। इत्यमरे उत्सुकशब्दार्थदर्शनात्॥ (यथा, रघुः। १। ३३।
"तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।
विलम्बितफलैः कालं स निनाय मनोरथैः॥")

समुदञ्चं, त्रि, (समुदञ्चते ऋति। सम् + उत् +
अञ्चु + क्विप्।) उद्गतम्। कूपादेरुद्धृतजलादि। इत्यमरः। ३। १। ८०॥
समुद्भूतः, त्रि, (सम् + उत् + भू + क्तः।)समुत्पन्नः। यथा, देवीभागवते ४।
"सान्त्रवीत्तान् सुरान् सुभ्रूर्भवद्भिस्सृयतेऽत्र का
शरीरकोषतश्चास्याः समुद्भूतान्नवोच्छ्रया॥"
समुदयं, क्ली, (सम् + उत् + इण् + अच्।)
लभ्यम्। यथा,—
"सामर्थ्यं तनु कल्पते समुदये वित्तं कुटुम्बं ततो
विक्रान्तिं सहजं द्वितीयभवने योधश्च सञ्चिन्तयेत्।"
इत्यादि ज्योतिस्तत्त्वम्॥
षष्ठाष्टीचक्रान्तर्गतचतुर्थनाड़ी। सा तु जन्मनक्षत्रावधिकाष्टादशनक्षत्ररूपा। तत्पर्य्यायः।
सामुदायिकम् २। यथा, ज्योतिस्तत्त्वे।
"जन्मर्क्षं कर्म्म ततो दशमं सांघातिकं
षोड़शभम्।
समुदयमष्टादशभे विनाशसंज्ञं त्रयोविंशम्॥
सन्तप्ते सामुदायिके मित्रभूत्यर्थसंक्षयः॥"
समुदयः, पुं, (सम् + उत् + इण् + अच्।)समूहः।
इत्यमरः। २। ५। ४०॥ (यथा, कथासरित्सागरे। १०। १८६।
"तमुपाजग्मतुस्तौ च सेनासमुदयान्वितौ।
तं विज्ञायैव संबन्धं मुदा दुहितृवत्सलौ॥"
युग्मम्।(यथा, महाभारते। ६। ११३। ४४।
"द्रोणः पाञ्चालपुत्रेण समागम्य महारथे।
महासमुदयं चक्रे शरैः सन्नतपर्व्वभिः॥")
समुद्गमः। इति मेदिनी॥ दिवसः। इति शब्दचन्द्रिका॥
समुदागमः, पुं, (सम् + उत् + आ + गम + घञ्।
समन्ताज्ज्ञानम्। इति त्रिकाण्डशेषः॥
समुदाचारः, पुं, (सम् + उत् + आ + चर +
घञ्।) आर्य्यः। इति त्रिकाण्डशेषः॥
समुदायः, पुं, (सम् + उत् + अय + घञ्।)
समूहः। युग्मम्। इत्यमरः। २। ५। ४०॥
२। ८। १०६॥ पृष्ठस्थायिबलम्। इत्यजयः॥
समुच्चयः। इति मेदिनी॥
समुदितः, त्रि, सम्यक्प्रकारेण कथितः। संपूर्व्वदधातोः क्तप्रत्ययेन निष्पन्नः। उदयं प्राप्तः।
समुद्भूतः। संपूर्व्वात्पूर्व्वेण्धातोः क्तप्रत्ययेन निष्पन्नः॥
समुद्गः, पुं, (समुद्गच्छतीति। सम् + उत् + गम् +
अन्येष्वपीति डः।) सम्पुटकः। इति हेमचन्द्रः॥ (यथा, रामायणे। २। ८१। ७५।
"गुडकांयन्दनकक्तांश्च समुद्गेष्ववतिष्ठतः॥")
मुद्गेन सह वर्त्तमानः।) मुद्गसहितश्च॥
समुद्गकः, पुं, (समुद्ग एव। स्वार्थे कन्।)सम्पुटकः।
इत्यमरः। २। ६। १३८॥ सौंपुड़ा इति ख्याते।
समुद्गच्छतीति इनजनाद्गमादेरिति डे समुद्गः
ततः स्वार्थे कः। सम्पुटति द्रव्यैः संश्लिष्टो भवति
सम्पुटकः पुट श्लिष्टे इत्वुड्त्वात् कः ततः

स्वार्थे कः। इति भरतः॥ (यथा, कथासरित्सागरे। ३८। ४७।
"भिक्षुः प्रपञ्चबुद्धाख्यः समुद्रकमुपानयत्॥") चन्द्रोविशेषश्च॥

समुद्गमः, पुं, ऊर्द्ध्वगतिः। उत्पत्तिः। सपूर्व्वात्पूर्व्वगमधातोः भल् प्रत्ययेन निष्पन्नः॥(यथा, कथासरित्सागरे। १११। ९८।
"शुद्धतामग्निहोत्राणि धूमराजिसमुद्गमैः।
प्रदर्शयदिवारोढुमार्गं दिवि तपस्विनाम्॥")

समुद्गीतं, त्रि, उच्चैर्गीतम्। समुत्पूर्व्वगैधातोरुक्तप्रत्ययेन निष्पन्नम्॥

समुद्गीर्णः, त्रि, वमितः। उत्तोलितः। कथितः। समुत्पूर्व्वगृधातोः क्तप्रत्ययेन निष्पन्नः॥

समुद्यतः, त्रि, (सम्+उत्+इण+क्तः।) अविनीतः। इत्यमरः। ३।१।२॥ समुद्गीर्णः। इति हेमचन्द्रः॥

समुद्वरणं, क्लो, (सम्+उत्+वृ+ल्युट्।) वान्तान्नम्। उद्वयः। इत्यमरः॥ वान्तार्थं उद्वौर्थाद्वः उद्वयः कूपादेर्जलाद्युत्तोलनं वृक्षाद्युन्मूलनं वा अनयोः समुद्वरणम्। समुद्वियते उत्तोल्यते यत् समुद्वरणं कर्म्मण्यनट्। भुक्तोज्झितोन्मूलितयोः स्यादुद्वरणमुद्वयौ। इति रभसः। इति भरतः॥ (यथा, महाभारते। १२। ३२७। १८।
"सोऽभ्यधावत्तदाख्यं समुद्वरणनिश्चितः।
जग्राह तां तदा शक्तिं न चैनां स व्यकम्पयत्॥"

समुद्वृतं, त्रि, (सम्+उत्+वृ+क्तः।) समुत्कीर्णम्। अपनीतम्। इति मेदिनी॥ सम्यक्प्रकारेण उद्धृतम्। उत्थापितम्। यथा,—
"जलौघमग्ना सचराचरा धरा
विषाणकोट्याखिलविश्वमूर्त्तिना।
समुद्धृता येन वराहरूपिणा
स मे स्वयम्भुर्भगवान् प्रसीदतु॥"
इति पाण्डवगीता॥

समुद्रः, पुं, जलसमूहस्थानम्। तस्य व्युत्पत्तिर्यथा।"चन्द्रोदयात् आपः सम्यगुन्दन्ति क्लिद्यन्ति अत्र। चन्द्रोदयात् समुन्दयन्ति वा समुद्रः। उन्दी क्लेदे. नाञ्जोति रक् इसुङ्नलोप इति नलोपः।
'अपां चैव समूहेन स समुद्र इति स्मृतः।'
इति वायुपुराणम्॥
मुद्रा मर्य्यादा तया सह वर्त्तते इति वा समुद्रः सम्यगुद्गतो रोऽग्निरत्र इति। मुदं राति ददातीति डे। मुद्राणि रत्नादीनि तैः सह वर्त्तते इति वा।" इति भरतः॥ तत्पर्य्यायः। अब्धिः२ अकूपारः ३ पारावारः ४ सरित्पतिः ५ उदन्वान् ६ उदधिः ७ सिन्धुः ८ सरस्वान् ९ सागरः १० अर्णवः ११ रत्नाकरः १२ जलनिधिः१३ यादःपतिः१४ अपांपतिः १५। इत्यमरः।१।७।१॥ महाकच्छः१६ नदीकान्तः१७ तरीयः १८ द्वीपवान् १९ जलेन्द्रः२० मन्थिरः २१ क्षोणीप्राचीरम् २२ मकरालयः २३। इति जटाधरः॥ सरितामपतिः २४ जलधिः २५ नीरनिधिः २६ नीरधिः २७ अम्बुधिः २८ पाथोनिधिः २९ पाथोधिः ३० यादसाम्पतिः ३१ नदीनः ३२ इन्द्रजनकः ३३ तिमिकोषः३४ वारांनिधिः ३५ वारिनिधिः ३६ वार्द्धिः ३७ वारिधिः ३८ तोयनिधिः ३९ कीलालधिः ४० धरणीपूरः ४१ क्षौराब्धिः ४२ धरणिप्लवः ४३ वाहः ४४ कवङ्कलः ४५ पेरुः ४६ मितद्रुः४७ वाहिनीपतिः ४८ गङ्गाधरः ४९ दारदः ५० तिमिः ५१ प्राणभास्वान् ५२ ऊर्म्मिमाली ५३ महाशयः ५४ अम्भोनिधिः ५५ अम्भोधिः ५६ तरिषः ५७ कूलङ्कषः ५८ तारिषः ५९। इति शब्दरत्नावली॥ वारिराशिः ६० शैलशिविरम् ६१ पराकुवः ६२ तरन्तः ६३ महौप्राचीरम् ६४। इति त्रिकाण्डशेषः॥ पयोधिः ६५ सरिन्नाथः ६६ अम्भोराशिः ६७ धुनीनाथः ६८ नित्यः ६९ कन्धिः ७० अपांनाथः ७१। अस्य जलगुणाः। विस्तृत्वम्। लवणरत्नामयप्रदत्वम्। उष्णत्वम्। वैवर्णदोषजनकत्वम्। विशेषाद्दाहार्त्तिपित्तकारित्वञ्च। इतिराजनिर्घण्टः॥ अपि च।
"सामुद्रमुदकं क्षारं सर्व्वदोषप्रकोपणम्॥"
इति राजवल्लभः॥
मुद्रायुक्ते, त्रि॥*॥ स च समुद्रो ब्रह्मणो मेढ्रोत्पन्नः। यथा,—
"हृदि कामो भ्रुवोः क्रोधो लोभश्चाधरदच्छदात्।
आस्याद्वाक् सिन्धवो मेढ्रान्निर्ऋतिः पायोरघाश्रयः॥"
इति श्रीभागवते। ३। १२। १३॥
कल्पभेदे श्रीकृष्णोरसेन विरजागर्भजातः। यथा,
"श्रीकृष्णो विरजां दृष्ट्वा सरिद्रूपां प्रियां सतीम्
उवास रहसि विरजातीरे नीरमनोहरे॥
जलादुत्थाय चागच्छन्निधाय तनु नूतनम्।
आजगाम हरेरग्रं साक्षाद्राधेव सुन्दरी॥
तां च रूपवतीं दृष्ट्वा प्रेम्णोद्रेकां जगत्पतिः।
चकारालिङ्गनं तूर्णं चुचुम्ब च मुहुर्मुहुः॥
नानाप्रकारशृङ्गारं विपरीतादिकं प्रभुः।
रहसि प्रेयसीं प्राप्य चकार च पुनः पुनः॥
विरजा सा रजोयुक्ता दृष्ट्वा वैचित्यमोषकम्।
सद्यो बभूव तत्रैव धन्या गर्भवती सती।
तस्थौ तत्र सुखासीना सार्द्धं पुत्रैश्च सप्तभिः॥
एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्जने।
विजहार पुनः साध्वी शृङ्गारासक्तमानसा॥
एतस्मिन्नन्तरे तत्र मातुः क्रोडं जगाम ह।
कनिष्ठपुत्रस्तस्याश्च भ्रातृभिः पीड़ितो भिया॥
भीतं स्वतनयं दृष्ट्वा तत्याज तां कृपानिधिः।
क्रोडे चकार बालं सा कृष्णो राधागृहं ययौ।
प्रबोध्य बालं सा साध्वी न ददर्शान्तिके प्रियम्॥
विललाप भृशं तत्र शृङ्गाराढ्यसमानसा॥
शशाप स्वसुतं कोपात् लवणोदो भविष्यति।
कदापि ते जलं केन न खादिष्यन्ति जीविनः॥
शशाप सर्व्वान् बालांश्च यान्तु मूढा महीतलम्।
गच्छध्वञ्च महीं मूढा जम्बुद्वीपं मनोहरम्॥
स्थितिर्नैकत्र युष्माकं भविष्यति पृथक् पृथक्।
द्वीपे द्वीपे स्थितिं कृत्वा तिष्ठन्तु सुखिनः सुताः।
द्वीपस्थाभिर्नदीभिश्च सह क्रीड़न्तु निर्जने॥
कनिष्ठो माधवशापाच्च लवणोदो बभूव ह।
कनिष्ठः कथयामास माधवशापञ्च बालकान्॥
आजग्मुर्दुःखिताः सर्व्वे माधवस्थानञ्च बालकाः।
श्रुत्वा विवरणं सर्व्वे प्रजग्मुर्धरणीतलम्॥
प्रणम्य मातुश्चरणं भक्तिनम्रात्मकन्धराः।
सप्तद्वीपे समुद्राय सप्त तस्युर्विभागशः॥
कनिष्ठाद्दधपर्य्यन्तं द्विगुणं द्विगुणं मुने!।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः॥
एतेषाञ्च जलं पृथ्व्यां शस्यार्थञ्च भविष्यति।
व्याप्ताः समुद्राः सप्तैव सप्तद्वीपा वसुन्धराम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३ अध्यायः॥
तस्य क्वासद्दहिंकारणं यथा,—
"अपां चैव समुद्रेकात् समुद्र इति संज्ञितः।
उदयतीन्दौ पूर्व्वे तु समुद्रः पूर्य्यते सदा॥
प्रक्षीयमाणे बहुले क्षीयतेऽस्तमितेन वै।
आपूर्य्यमाणो ह्युदधिरात्मनैवाभिपूर्य्यते॥
ततो वै क्षीयमाणस्य स्वात्मन्येव क्षयाः क्षयः।
उद्दीप्यन्तेऽग्निसंयोगात् उल्कास्रापो यथा स्वयम्॥
तथा स्रतः समुद्रोऽपि वर्द्धते शशिनोदये।
अन्यूनानतिरिक्तास्तु वर्द्धन्त्यापो ह्रसन्ति च॥
उदयास्तमयेष्विन्दोः पक्षयोः शुक्लकृष्णयोः।
क्षयो वृद्धिश्च उदधेः सोमवृद्धिक्षयौ यथा॥
दशोत्तराणि पञ्चाद्रिकुलानां शतानि च।
अपां वृद्धिः क्षयो दृष्टः समुद्राणान्तु पर्व्वसु॥"
इति मात्स्ये १०० अध्यायः॥
अन्यत् विष्णुपुराणे २।४ अध्याये द्रष्टव्यम्॥*॥
समुद्रे वर्णनीयानि यथा,—
"अब्धौ द्वीपाद्रिरत्नोर्म्मिपोतयादोजलप्लवाः।
विष्णुकुम्भागमचन्द्राद्रिहरीर्व्वाङ्गपूरणम्॥"
इति कविकल्पलतायाम् १स्तवके ३ कुसुमम्॥*॥
कलौ द्विजानां समुद्रयात्रादिनिषेधो यथा, उद्धृतत्त्वधृतबृहन्नारदीयवचनम्।
"समुद्रयात्रास्वीकारः कमण्डलुविधारणम्।
द्विजानामसवर्णासु कन्यासूपयमस्तथा॥
देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्व्वधः।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा॥
दत्तायाश्चैव कन्यायाः पुनर्दानं वरस्य च।
दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ॥
महाप्रस्थानगमनं गोमेधश्च तथा मखम्।
इमान् धर्म्मान् कलियुगे वर्জ্জयानाहुर्मनीषिणः॥"
(केषाञ्चिन्मते कलावपि समुद्रयात्रास्वीकारे न दोषः॥) क्षीरोदसमुद्रस्य मन्थनवृत्तान्तो यथा, भागवते। ८। ७। १—१०।
"कृतस्थानविभागास्ते एवं कश्यपनन्दनाः।
ममन्थुः परमं यत्ता अमृतार्थं पयोनिधिम्॥
मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत्।

ध्रीयमाणोऽपि बलिभिर्गौरवात् पाण्डुनन्दन ॥
ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः ।
आसन् सुपौरुषे नष्टे दैवेनातिबलीयसा ॥
विलोक्य विघ्नं शविधिं तदेश्वरो
दुरन्तवीर्योऽवितथाभिसन्धिः ।
कृत्वा वपुः काच्छपमद्भुतं महत्
पर्य्यग्र तोयं गिरिमुज्जहार ॥
तमुत्थितं वीक्ष्य कुलाचलं पुनः
समुद्यता निर्म्मथितुं सुरासुराः ।
दधार पृष्ठेन स लक्षयोजन-
प्रस्तारिणा द्वीप इवापरो महान् ॥
सुरासुरेन्द्रैर्भुजवीर्य्यवेपितं
परिभ्रमन्तं गिरिमङ्ग पृष्ठतः ।
बिभ्रत्तदावर्त्तनमादिकच्छपो
मेनेऽङ्गकण्डूयनमप्रमेयः ॥"
तथा तत्रैव । ८ । ७ । १८—१९ ।
"निर्म्मथ्यमानादुदधेरभूद्विषं
महोल्बणं हालाहलाह्वमग्रतः ।
संभ्रान्तमीनोन्मकराहिकच्छपात्
तिमिद्विपग्राहतिमिङ्गिलाकुलात् ॥
तदुग्रवेगं दिशि दिश्युपर्य्यधो
विसर्पदुत्सर्पदसह्यमप्रति ।
भीताः प्रजा दुद्रुवुरङ्ग सेश्वरा
अरक्षमाणाः शरणं सदाशिवम् ॥"
तथाच तत्रैव । ८ । ७ । ३६—४३ ।
"तद्दौःस्थ्यं व्यसनं तासां कृपया भृशपीडितः ।
सर्व्वदेवमयो देव इदमाह सतीं प्रियाम् ॥
अहो बत भवान्येतत् प्रजानां पश्य वैशसम् ।
क्षीरोदमथनोद्भूतात् कालकूटादुपस्थितम् ॥
आसां प्राणपरीप्सूनां विधेयमभयं हि मे ।
एतावान् हि प्रभोरर्थो यदार्तपरिपालनम् ॥
प्रायेण प्राणिनः पान्ति साधवः क्षणभङ्गुरैः ।
बहुवैरेषु भूतेषु मोहितेष्वात्ममायया ॥
पुंसः कृपयतो भद्रे सर्व्वात्मा प्रीयते हरिः ।
प्रीते हरौ भगवति प्रीयेऽहं सचराचरः ॥
तस्मादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे ।
एवमामन्त्र्य भगवान् भवानीं विश्वभावनः ॥
तद्विषं जग्धुमारेभे प्रभावज्ञान्वमोदत ।
ततः करतलीकृत्य व्यापि हालाहलं विषम् ॥
अभक्षयन्महादेवः कृपया भूतभावनः ।
तस्यापि दर्शयामास स्वयोर्य्यं जलकल्पः ॥
यच्चकार गले नीलं तच्च साधोर्विभूषणम् ॥"
तथा तत्रैव । ८ । ८ । १—९ ।
"पीते गरे कृपार्द्रेण प्रीतास्तेऽमरदानवाः ।
ममन्थुस्तरसा सिन्धुं हविर्द्धानी ततोऽभवत् ॥
तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः ।
यज्ञस्य देवयानस्य मेध्याय हविषे नृप ॥
ततः उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डरः ।
तस्मिन् बलिः स्पृहां चक्रे नेन्द्र ईश्वरचिक्षया ॥
ततो ऐरावतो नाम वारणेन्द्रो विनिर्गतः ।
दन्तैश्चतुर्भिः श्वेताद्रेर्हरन् हिमवतो महीम् ॥
ऐरावणादयश्चष्टौ दिग्गजा अभवंस्ततः ।
अभ्रमुप्रभृतयोऽष्टौ च करिण्यस्त्वभवन्नृप ॥
कौस्तुभाख्यमभूद्रत्नं पद्मरागं महोदधेः ।
तस्मिन् मणौ स्पृहां चक्रे वक्षोऽलङ्करणे हरिः ॥
ततोऽभवत् पारिजातः सुरलोकविभूषणम् ।
पुरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ॥
ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः ।
रमणैः सर्गिणां वल्गुगतिलीलावलोकनैः ॥
ततश्चाविरभूत् साक्षात् श्रीरमा भगवत्परा ।
रञ्जयन्ती दिशः कान्त्या विद्युत्सौदामनी यथा ॥
तस्यां चक्रुः स्पृहां सर्व्वे ससुरासुरमानवाः ।
रूपौदार्य्यवयोवर्णमहिमाक्षिप्तचेतसः ॥"
तथा तत्रैव । ८ । ८ । २५ ।
"तस्याः श्रियस्त्रिजगतो जनको जनन्या
वक्षोनिवासमकरोत् परमं विभूतेः ।
श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन
यत्र स्थितेधयत साधिपतींस्त्रिलोकान् ॥"
तत्रैव । ८ । ८ । ३०—३६ ।
"अथासीद्वारुणी देवी कन्या कमललोचना ।
असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥
अथोदधेर्मथ्यमानात् काश्यपैरमृतार्थिभिः ।
उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ॥
दीर्घपीवरदोर्दण्डः कम्बुग्रीवोऽरुणेक्षणः ।
श्यामलस्तरुणः सर्व्वो सर्व्वाभरणभूषितः ॥
पीतवासा महोरस्कः सुसृष्टमणिकुण्डलः ।
स्निग्धकुञ्चितकेशान्तसुभगः सिंहविक्रमः ॥
अमृतापूर्णकलसं बिभ्रद्वलयभूषितः ।
स वै भगवतः साक्षादविष्णोरंशसम्भवः ॥
धन्वन्तरिरिति ख्यात आयुर्व्वेददृगीज्यभाक् ।
तमालोक्यासुराः सर्व्वे कलसं चामृताभृतम् ॥
लिप्सन्तः सर्व्ववस्तूनि कलसं तरसाहरन् ।
नीयमानेऽसुरैस्तस्मिन् कलसेऽमृतभाजने ।
विषण्णमानसा देवा हरिं शरणमाययुः ॥"
तत्रैव । ८ । ८ । ४१ ।
"एतस्मिन्नन्तरे विष्णुः सर्व्वोपायविदीश्वरः ।
योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ॥"
तत्रैव । ८ । ९ । १२ ।
"ततो गृहीत्वामृतभाजनं हरि-
र्व्वभाष ईषत्स्मितशोभया गिरा ।
यद्यभ्युपेतः क च साध्वसाधु वा
कृतं मया वो विभजे सुधामिमाम् ॥"
तत्रैव । ८ । ९ । २० ।
"कल्पयित्वा पृथक्पङ्क्तीरुभयेषां जगत्पतिः ।
तांस्तोषयन्मायाभिः स्वेषु स्वेषु च पङ्क्तिषु ॥
दैत्यान् गृहीतकलसो वञ्चयन्नुपसङ्करैः ।
दूरस्थान् पाययामास जरामृत्युहरां सुधाम् ॥"
तत्रैव । ८ । ९ । २४ ।
"देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्दैवसंसदि ।
प्रविष्टः सोममपिबच्चन्द्रार्काभ्यां च सूचितः ॥
चक्रेण क्षुरधारेण जहार पिबतः शिरः ।
हरिस्तस्य कबन्धस्तु सुधया प्लावितोऽपतत् ॥
शिरस्त्वमरतां नीतमजो ग्रहमचीकॢपत् ।
यस्तु पर्व्वणि चन्द्रार्कावभिधावति वैरधीः ॥
पीतप्रायेऽमृते देवैर्भगवान् लोकभावनः ।
पश्यतामसुरेन्द्राणां स्वरूपं जगृहे हरिः ॥"
पाद्मे उत्तरखण्डे ६९ अध्यायेऽप्येवम् ॥(अन्तरिक्षम् । इति निघण्टुः । १ । ३ । अस्य व्युत्पत्तिर्यथा तट्टीकायाम् । "समुद्वन्ति सङ्गता ऊर्द्धं द्रवन्ति गच्छन्त्यस्मादापो रश्मिभिराकृष्यमाणा आदित्यमण्डलम् । समुत्-पूर्व्वात् द्रवते र्गत्यर्थात् अन्येष्वपि दृश्यते इति अपादाने ड-प्रत्यये टि-लोपे च रूपम् । यद्वा, संहताः अभिद्रवन्त्येनमापो भौमरसलक्षणा वायुना प्रेर्य्यमाणाः आदित्यमण्डलाद्वा वर्षाकाले, रश्मिभिः प्रवर्त्तमानाः । अत्र उदित्येष उपसर्गोऽभीत्यर्थे वर्त्तते । कर्म्मणि ड-प्रत्यय इति विशेषः । सम्मोदन्तोऽस्मिन् भूतानि अन्तरिक्षचारीणीति वा । सम्पूर्व्वात् मुद हर्षे इत्यस्मात् स्फायितञ्चिवञ्चि इत्यादिना अधिकरणे रक्-प्रत्यये समो म-लोपे च रूपम् । यद्वा, सम् इत्येकीभावे उदकात् उच्छब्दः री मत्वर्थीयः । एकीभूतमुदकमस्मिन् विद्यते वर्षास्विति उदकशब्दस्योदभावश्छान्दसः । यद्वा सम्पूर्व्वात् उन्दी क्लेदने इत्यस्मात् स्फायितञ्चिवञ्चि इत्यादिना कर्त्तरि रक्-प्रत्यये कित्त्वान्नलोपे च समुद्रः ॥", इति देवराजकृतनिर्व्वचनम् ॥)
समुद्रकफः, पुं, (समुद्रस्य कफ इव ।) समुद्रफेनः । इति त्रिकाण्डशेषः ॥
समुद्रकान्ता, स्त्री, (समुद्रस्य कान्ता ।) नदी । इति हलायुधः ॥ पृक्का । इति राजनिर्घण्टः ॥
समुद्रगा, स्त्री, (समुद्रं गच्छतीति । गम + डः ।) नदी । इति हेमचन्द्रः ॥ गङ्गा । यथा,—
"यच्चद्वयं श्रावणादि सर्व्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्व्वीत वर्ज्जयित्वा समुद्रगाम् ॥"
इति प्रायश्चित्ततत्त्वे छन्दोगपरिशिष्टवचनम् ॥
यथा च महाभारते । ३ । १०९ । १० ।
"सा बभूव विसर्पन्ती त्रिधा राजन् समुद्रगा ।
फेनपुञ्जाकुलजला हंसानामिव पङ्क्तयः ॥")
समुद्रगामिनि, त्रि ॥
समुद्रगृहं, क्ली, (समुद्र इव जलयुक्तं गृहम् ।) जलयन्त्रगृहम् । इति त्रिकाण्डशेषः ॥
समुद्रचुलुकः, पुं, (समुद्रचुलुक इव अनायासेन पेयत्वात् यस्य ।) अगस्त्यमुनिः । इति त्रिकाण्डशेषः ॥
समुद्रदयिता, स्त्री, (समुद्रस्य दयिता ।) नदी । इति हेमचन्द्रः ॥
समुद्रनवनीतं, क्ली, (समुद्रस्य क्षीरोदस्य नवनीतमिव ।) अमृतम् । चन्द्रः । इति मेदिनी ॥
समुद्रफलं, क्ली, (समुद्रस्य फलमिव ।) अब्धिफलम् । औषधविशेषः । यथा,—
"समुद्रनाम प्रथमं पश्चात् फलमुदाहरेत् ।
समुद्रफलमित्यादि नाम वाच्यं भिषग्वरैः ॥
फलं समुद्रस्य कटूष्णकारि
वातापहं भूतनिरोधकारि ।

निर्दोषदाहानलदीपहारि
कफामयभ्रान्तिविरोधकारि ॥"
इति राजनिर्घण्टः ॥

समुद्रफेनः, पुं, (समुद्रस्य फेनः ।) स्वनामख्यातद्रव्यम् । तत्पर्य्यायः । फेनः २ अब्धिकफः ३ सर्णवजमलः ४ । इति रत्नमाला ॥ हिण्डीरः५। इत्यमरः ।२।८।१०५॥ समुद्रकफः ६ जलहासः ७ फेनकः ८ । इति त्रिकाण्डशेषः ॥ समुद्रफेनम् ८ फेनम् १० वार्द्धिफेनम् ११ पयोधिजम् १२ सुफेनम् १३ अब्धिहिण्डीरम् १४ सामुद्रम्१५। अस्य गुणाः । शिशिरत्वम् । कषायत्वम् । नेत्ररोगकफकण्ठामयारुचिकर्णरोगनाशित्वञ्च इति राजनिर्घण्टः ॥ अपि च ।

"समुद्रफेनयक्षुष्यो लेखनः शीतलश्च सः ।
कषायो विषपित्तघ्नः कर्णरुक्कफहृल्लघुः ॥"
इति भावप्रकाशः ॥

समुद्रमेखला, स्त्री, (समुद्रः मेखलेव यस्याः ।) पृथिवी । इति त्रिकाण्डशेषः ॥

समुद्रयात्रा, स्त्री (समुद्रे यात्रा गमनम् ।) समुद्रगमनम् । (यथा, हरिवंशे । १४५ । ४ ।

"हारवत्यां निवसतो विष्णोरतुलतेजसः ।
समुद्रयात्रा सम्प्राप्ता तीर्थे पिण्डारके नृप ॥")

कलियुगे तन्निषेधो यथा --

"समुद्रयात्वास्वीकारः कमण्डलुविधारणम् ।"
इत्युपक्रम्य ।

"इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः ॥"
इत्युद्धृतत्वे उक्तवान् ॥

समुद्रयानं, क्ली, (समुद्रस्य यानम् ।) पोतम् । जाहाज इति भाषा । यथा—

"पुनस्तत्रैव गमने वणिग्भावे मतिर्गता ।
समुद्रयाने रत्नानि महामौल्यानि साधुभिः ।
रत्नपारीक्षकैः सार्द्धमानयिष्ये बहूनि च ॥
एवं निश्चित्य मनसा महासार्थपुरःसरः ।
समुद्रयायिभिर्लोकैः संविदं सूच्य निर्गतः ॥"
इत्युपक्रम्य ।

"युक्तेन सह संप्राप्तो महान्तं लवणार्णवम् ।
पोतारूढास्ततः सर्व्वे पोतवाहैरुपोषिताः ॥"
इति वाराहे गोकर्णमाहात्म्यनामाध्यायः ॥
(समुद्रगमनम् । यथा, मनुः । ८ । १५७ ।

"समुद्रयानकुशलाः देशकालार्थदर्शिनः ।
स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति॥"

समुद्रयायी, [न्] त्रि, (समुद्रं गच्छतीति ।गम + णिनिः ।) समुद्रगामी । यथा, वाराहे ।

"समुद्रयायिभिर्लोकैः संविदं सूच्य निर्गतः ॥"
(अस्य निन्दा यथा, मनौ । ३ ।१५८ ।

"आगारदाही गरदः कुण्डाशी सोमविक्रयी ।
समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥
* * *
एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान् ।
द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् ॥")

समुद्ररमणा, स्त्री, (समुद्रो रमण इव यस्याः ।) पृथ्वी । इति हलायुधः ॥ (क्वचित् समुद्ररसना इति पाठो दृश्यते ॥)

समुद्रलवणं, क्ली. (समुद्रजातं लवणम् ।) समुद्रजलजाललवणम् । करकच् लवण इति भाषा । तत्पर्य्यायः । सामुद्रकम् २ सामुद्रम् ३ शिवम् ४ वशिरम् ५ सारोत्तम् ६ अब्धीवम् ७ लवणाब्धिजम् ८। अस्य गुणाः। लघुत्वम् । हृद्यत्वम् । पलितासपित्तदत्वम् । विदाहित्वम् । कफवातघ्नत्वम् । दीपनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च, भावप्रकाशे ।

"सामुद्रं यत्तु लवणमत्यौष्णं वशिरञ्च तत् ।
सामुद्रं मधुरं पाके सतिक्तं मधुरं गुरु ॥
नात्युष्णं दीपनं भेदि अत्यारमविदाहि च ।
श्लेष्मलं वातनुत्तिक्तमरुच्यं नातिशीतलम् ॥"

समुद्रवह्निः, पुं, (समुद्रस्य वह्निः ।) बाड़वानलः। इति हलायुधः ॥

समुद्रविजयः, पुं, हस्तार्हस्तिता । इति हेमचन्द्रः॥

समुद्रसुभगा, स्त्री, (समुद्रस्य सुभगा ।) गङ्गा । इति राजनिर्घण्टः ॥

समुद्रा, स्त्री, सटी । (सम्यगुद्गतो रोऽग्निर्यस्याः ।) शमी । इति राजनिर्घण्टः ॥

समुद्रान्तं, क्ली, (समुद्रस्य अन्त उत्पत्तिस्थानत्वेनास्त्यस्येति । अच् ।) जातीफलम् । इति शब्दचन्द्रिका ॥ (समुद्रस्य अन्तम् ।) समुद्रतीरम् ॥ (समुद्रः अन्तो यस्येति । समुद्रान्तविशिष्टे, त्रि । यथा, भागवते ।१०।४७।३३।

"एतदन्तः समाम्नायो योगः सांख्यं मनीषिणाम् ।
त्यागस्तपो दमः सत्यं समुद्रान्ता इवापगाः॥")

समुद्रान्ता, स्त्री, (समुद्रस्य, अन्तः उत्पत्तिस्थानत्वेनास्त्यस्या इति । अच् । टाप् ।) दुरालभा । इत्यमरः ।२।४।८२॥ कार्पासी । पृक्का । इति मेदिनी ॥ यवासः । इति राजनिर्घण्टः ॥

समुद्राम्बरा, स्त्री, (समुद्रः अम्बरमिव यस्याः ।) पृथिवी । इति त्रिकाण्डशेषः ॥

समुद्रारुः, पुं, (समुद्रं ऋच्छतीति । ऋ + उण् ।) कुम्भीरः । सेतुबन्धः । तिमिङ्गिलमत्स्यः । इति मेदिनी ॥

समुद्रियः, त्रि, (समुद्रे भव इति । समुद्र + "समुद्राभ्रादघः ।" ४ । ४ । ११८। इति घः ।) समुद्रभवः । समुद्रसम्बन्धी । (यथा, वाजसनेयसंहितायाम् । ११ । ४६ ।

"हृषाग्निं हृषणं भरन्तपां गर्भं समुद्रियम् ॥")

समुद्रीयः, त्रि, समुद्रसम्बन्धी । समुद्रशब्दात् छीय प्रत्ययेन निष्पन्नः ॥

समुन्दनं, क्ली, (सम् + उन्द + ल्युट् ।) आर्द्रीभावः । तत्पर्य्यायः । क्लेदः २ क्लेमः ३। इत्यमरः ।३।२।२८॥

समुन्नं, त्रि, (सम + उन्द + क्तः ।) आर्द्रम् । इत्यमरः । ३ । १ । १०५ ॥

समुन्नतः, त्रि, (सम् + उत् + नम + क्तः ।) समुन्नद्धः । स्तम्भभेदः । इति धरणिः ॥

समुन्नतिः, स्त्री, (सम् + उत् + नम + क्तिन् ।) उच्छ्रायः। उत्सेधः । इति जटाधरः ॥ (यथा, कुमारे । ६ । ६६ ।

"उपपन्नमिदं सर्व्वमतः परमपि त्वयि ।
मनसः शिखराग्राच्च सृष्टयो ते समुन्नतिः ॥")

समुन्नद्धः, त्रि, (सम् + उत् + नह + क्तः ।) पण्डितम्मन्यः । गर्व्वितः । इत्यमरः ।३।३।१०३॥ प्रभुः । इत्यजयः ॥ समुद्भूतः । इति मेदिनी ॥ उद्धतः । इति हेमचन्द्रः ॥

समुपजोषं, [म्] अ, (सम् + उप + जुष + अम् ।) आनन्दः । इत्यमरटीकायां रामाश्रमः । ३ । ४ । १० ॥ तालव्यप्रकारादि च ॥

समुपेयिवान्, [स] त्रि, गमनकर्त्ता । गमनविशिष्टः । समुपपूर्व्वधातोः क्वसुप्रत्ययेन निष्पन्नः॥

समुल्लसत्, त्रि, सम्यगुल्लासयुक्तम् । समुपपूर्व्वलसधातोः शतृप्रत्ययेन निष्पन्नम् ॥

समुल्लिखन्, [त्] त्रि, (सम् + उत् + लिख + शतृ ।) पादादिना भूमिखननकर्त्ता । यथा,—

तुषारसंघातशिला: क्षुराग्रैः
समुल्लिखन् दर्पफलः ककुद्मान् ।
दृष्टः कथञ्चिद्गवयैर्विवर्म्मे-
रसोढ़सिंहध्वनिरुत्ननाद ॥"
इति कुमारसम्भवे । १ । ५६ ॥

समूढ़ः, त्रि, (सम् + वह + क्तः ।) पुञ्जितः । (यथा, माघे । १ । ४ ।

"नवानधोऽधो हृदतः पयोधरान्
समूढ़कर्पूरपरागपाण्डुरम् ॥")

भुग्नः । सद्योजातः । अनुपद्रुतः । । इति मेदिनी ॥ दमितः । विवाहितः । इति धरणिः॥ शोधितः । इति जटाधरः ॥ मूढ़ेन सहितञ्च ॥

समूरः, पुं, मृगभेदः । इति हेमचन्द्रः ॥

समूरुः, पुं, मृगविशेषः । इत्यमरः । २ । ५ ।८॥

समूलं, त्रि, मूलेन सह वर्त्तमानम् । मूलसहितम् । यथा,—

"अधर्म्मेणैधते राजंस्ततो भद्राणि पश्यति ।
ततः सपत्नान् जयति समूलन्तु विनश्यति ॥"
इति महाभारते शान्तिपर्व्वणि राजधर्म्मे युधिष्ठिरं प्रति भीष्मवाक्यम् ॥

समूहः, पुं, (समूहनं इति । सम् + ऊह + घञ् ।) अनेकः । तत्पर्य्यायः । निवहः २ व्यूहः ३ सन्दोहः ४ विसरः ५ व्रजः ६ स्तोमः ७ ओघः ८ निकरः ९ व्रातः १० वारः ११ संघातः १२ सञ्चयः १३ समुदायः १४ समुदयः १५ समवायः १६ चयः १७ गणः १८ संहतिः १९ वृन्दम् २० निकुरम्बम् २१ कदम्बकम् २२ । इत्यमरः ॥ २।५।३९-४० ॥ पूगः २३ सञ्चयः २४ स्कन्धः २५ निचयः २६ जालम् २७ अयम् २८ पटलम् २९ काण्डम् ३० मण्डलम् ३१ चक्रम् ३२ । इति जटाधरः ॥ विस्तरः ३३ उत्कारः ३४ समुच्चयः ३५ आकरः ३६ प्रकरः ३७ संघः ३८ प्रचयः ३९ जातम् ४० । इति

शब्दरत्नावली ॥ (यथा, मनुः । ८ । २२१ ।
"एवं दण्डविधिं कुर्य्याद्धार्म्मिकः पृथिवीपतिः ।
यामजातिसमूहेषु समयव्यभिचारिणाम् ॥")
समूहनः, स्त्री, (समूह्यतेऽनयेति । सम् + ऊह + ल्युट् । स्त्रियां ङीप् ।) सम्मार्জ্জनी । इति हेमचन्द्रः ॥
समूह्यः, पुं, (समूह्यते इति । सम् + ऊह + ण्यत् ।) यज्ञाग्निः । तत्पर्य्यायः । परिचाय्यः २ उपचाय्यः ३ । इत्यमरः ।२।७।२० ॥ सम्यगूहयोग्ये, त्रि । निर्विसर्गश्चेदानन्तर्य्यार्थः । यथा,—
"प्रागुदक्प्रवनं देशं समं वा परिसमूह्य ॥"
इति गोभिलसूत्रम् ॥
समृद्धः, त्रि, (सम् + ऋधु वृद्धौ + क्तः ।) समृद्धियुक्तः । तत्पर्य्यायः । अधिकर्द्धिः २ । इत्यमरः । ३।१।११ ॥ अधिसम्पत्तिशाली ३ । इति शब्दरत्नावली ॥ (यथा, रामायणे । २।१४ । २७ ॥
"सङ्कृष्टमनुजोपेतां समृद्धविपणापणाम् ॥"
नागविशेषे, पुं । इति महाभारतम् । १ । ५७ । १७ ॥
समृद्धिः, स्त्री, (सम् + ऋधु + क्तिन् ।) सम्यग्वृद्धिः । अतिशयसम्पत्तिः । तत्पर्य्यायः । एधा २ । इत्यमरः । ३ । २ । १० ॥ विधा ३ । इति जटाधरः ॥ (यथा, रघुः । १३ ।
"चरणयोर्नखरागसमृद्धिभि-
र्मुकुटरत्नमरीचिभिरस्पृशन् ॥")
समेतः, त्रि, (सम् + आ + इण् + क्तः ।) सम्यक् प्राप्तः । संयुक्तः यथा,—
"नामसमेतं कृतसङ्केतं वादयते मृदु वेणुम् ।
बहु मनुते ननुते ननुसङ्गतपवनचलितमपि
रेणुम् ॥"
इति श्रीजयदेवः॥
समेधितः, त्रि, सम्यग्वर्द्धितः । संपूर्ब्बेधधातोः क्तप्रत्ययेन निष्पन्नः ॥
समोदकं, क्ली, (समं उदकं यत्र ।) मथितार्द्धाम्बुदधि । अर्द्धजलयुक्तघोलम् इति हेमचन्द्रः ॥ तत्पर्य्यायः । उदश्वित् २ । इत्यमरः । २ । ७ । १३९ ।
सम्पः, पुं, पतनम् । इति भूरिप्रयोगः ॥
सम्पत्तिः, स्त्री, (सं + पद् + क्तिन् ।) विभवोत्कर्षः । तत्पर्य्यायः । श्रीः २ लक्ष्मीः ३ सम्पद् ४ इत्यमरः ।२।८।८२॥ ऋद्धिः ५ । इति जटाधरः॥ भूतिः ६ । इति मेदिनी ॥ (यथा, कथासरित्सागरे । २४ । १६१ ।
"तदैव च ददौ तस्मै सुतां क्लेशविवर्द्धिताम् ।
निजां शिवाय सम्पत्तिमिव मूढत्वहारिताम्॥")
सम्पत्, [द्] स्त्री, (सं + पद् + क्विप् ।) सम्पत्तिः । इत्यमरः । २।८।८१ ॥ (यथा, रघुः । १ । ३४ ।
"त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
मानुबन्धाः कथं न स्युः सम्पदो मे निरापदः॥")
गुणोत्कर्षः । (यथा, किराते । ५ । २४ ।
"गुणसम्पदा समधिगम्य परं
महिमानमत्र महिते जगताम् ।

नयशालिनि श्रिय इवाधिपतौ
विरमन्ति न ज्वलितुमौषधयः ॥")
हारभेदः । इति मेदिनी ॥
सम्पदं, क्ली, (समाक् पदं यत्र ।) समं पदयुगम् । इति शब्दमाला ॥
सम्पदः, पुं, (सं + पद + क्वरच् । इति पुरुषोत्तमदेवः । इत्यणादिटीकायामुज्ज्वलदत्तः ।) राजा इति सिद्धान्तकौमुदी ॥
सम्पन्नः, त्रि, (सं + पद + क्तः ।) साधितः । (यथा, पञ्चदशी । ८ । ८१ ।
लौकिकं वचनं मार्थं सम्पन्नं त्वत्प्रसादतः ॥")
सम्पत्तियुक्तः । इति मेदिनी ॥
सम्परायः, पुं, (समाक् परे काले ईयते इति । इण् + घञ् ।) आपत् । युद्धम् । उत्तरकालः । इत्यमरः । ३ । ३ । १५० ॥
सम्परायकं, क्ली, युद्धम् । इत्यमरटीकायां भरतः । २ । ८ । १०४ ॥
सम्परायिकं, क्ली, युद्धम् । इत्यमरटीकायां स्वामी । २ । ८ । १०४ ॥
सम्पर्कः, पुं, (सम् + पृच् + घञ् ।) मेलकः । रतिः । इति मेदिनी ॥ संसर्गः । यथा,—
"सम्पर्काद्दृश्यते विप्रो जनने मरणेऽपि वा ।
सम्पर्कविनिवर्त्तानां न प्रेतं नैव सूतकम् ॥"
इति शुद्धितत्त्वम् ॥
सम्पर्की, [न्] त्रि, (सं + पृची सम्पर्के + "संपृचेति । ३।२।१४२। इति घिनुण् ।) सम्पर्कविशिष्टः । सम्पर्कशब्दादिन्प्रत्ययेन निष्पन्नः । इति केचित् ॥
सम्पर्क्यः, त्रि, सम्पर्कयुक्तः । सम्बन्धीयः । सम्पर्कशब्दात् ण्यप्रत्ययेन निष्पन्नः ॥
सम्पा, स्त्री, (संपततीति । सं + पत + डः । टाप्) विद्युत् । यथाह कश्चित् ।
"रागान्धा तमसो विसारिविरहज्वालातिदृष्टैः स्मरा-
विष्टा भूतगणात् पथोऽतिविषमाद्भ्रष्टा बधूः सत्पथात् ।
पङ्कादेन मदेन पङ्किलतनुः सम्पाति सम्पाततः
सम्पाभानुभुजङ्गसद्य विजहौ यान्तो भुजङ्गा-
ङ्गयम् ॥"
सम्पाकः, पुं, (समाक् पाको यस्य ।) आरम्बधृक्षः । इत्यमरः । २।४।२३ ॥ (यथा, सुश्रुते उत्तरतन्त्रे ६१ अध्याये ।
"सम्पाकश्रेयसीसप्तपर्णपामार्गपीलुभिः ॥")
समाक्पाकश्च ॥
सम्पाकः, त्रि, (समाक् पाको यस्य ।) तर्कुकः । धृष्टः । इति मेदिनी ॥ अल्पः । लम्पटः । इति धरणिः ॥
सम्पाटः, पुं, तर्कुः । इति शब्दमाला ॥
सम्पातः, पुं, (सम् + पत + घञ् ।) पतनम् । इति भूरिप्रयोगः ॥ (यथा, गीतायाम् । १ । २० ।
"प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ।

हृषीकेशं तदा वाक्यमिदमाह महीपते ! ॥")
पक्षिणां गतिविशेषः । इति जटाधरः ॥
सम्पातिः, पुं, अरुणपुत्रः । स च जटायुषोऽग्रजो भ्राता । यथा, रामायणे । ४ । ५६ । २ ।
"सम्पातिर्नाम नाम्ना तु चिरजीवी विहङ्गमः ।
भ्राता जटायुषः श्रीमान् विख्यातबलपौरुषः॥"
(यथा च तत्रैव गरुड़वाक्ये । ३ । १४ । ३२ ।
"द्वौ पुत्रौ विनतायास्तु गरुड़ोऽरुण एव च ।
तस्माज्जातोऽहमरुणात् सम्पातिश्च ममाग्रजः॥"
यथा च महाभारते । १ । ६६ । ७० ।
"अरुणस्य भार्य्या श्येनी तु वीर्य्यवन्तौ महा-
बलौ ।
सम्पातिं जनयामास वीर्य्यवन्तं जटायुषम् ॥"
तथा तत्रैव । ३ । २७८ । १ ।
"सखा दशरथस्यासीत् जटायुररुणात्मजः ।
गृध्रराजो महावीरः सम्पातिर्यस्य सोदरः ॥"
अस्य पक्षदहन-विवरणम् । यथा, रामायणे ४ । ८ । ४—७ ।
"पुरा हव्यवधे वृत्ते स चाहश्च जयैषिणौ ।
आदित्यमुपयातौ खे ज्वलन्तं रश्मिमालिनम् ॥
आवृत्याकाशमार्गेण जवेन खगतौ भृशम् ।
मध्यं प्राप्ते तु सूर्य्ये तु जटायुरवसीदति ॥
तमहं भ्रातरं दृष्ट्वा सूर्य्यरश्मिभिरर्दितम् ।
पक्षाभ्यां छादयामास स्नेहात् परमविक्लवम् ॥
निर्दग्धपक्षः पतितो विन्ध्येऽहं वानरर्षभाः ।
अहमस्मिन् वसन् भ्रातुः प्रवृत्तिं नोपलक्षये ।
जटायुषस्त्वेवमुक्तो भ्रात्रा सम्पातिना तदा ॥")
सम्पातिकः, पुं, (सम्पातिरेव । स्वार्थे कन् ।) गरुड़ज्येष्ठपुत्रः । इति शब्दमाला (अरुणस्य ज्येष्ठपुत्रः । इति पुराणम् ॥)
सम्पादकः, पुं, (सम्पादयतीति । सं + पद् + णिच् + ण्वुल् ।) निष्पादकः सम्पन्नकर्त्ता ॥
सम्पादनं, क्ली, निष्पादनम् । संपूर्ब्बकञान्तपदधातोरनट्-(ल्युट्) प्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे । १५ । १४८ ।
"संभाव्य सिद्धुदयमात्मचिकीर्षितस्य
सम्पादनाय सुतरां जगदुः प्रयत्नम् ॥")
सम्पादितः, त्रि, निष्पादितः । संपूर्ब्बञान्तपदधातोः क्तप्रत्ययेन निष्पन्नः ॥
सम्पीड़नं, क्ली समाक्प्रकारेण व्यथनम् । संपूर्ब्बपीड़धातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम् ॥
सम्पीतिः, स्त्री, समाक्पानम् । संपूर्ब्बपाधातोः क्तिन्प्रत्ययेन निष्पन्नम् ॥
सम्पुटः, पुं, (सं + पुट् + कः ।) कुरुवकः । इत्यजयः ॥ पेटा । इति हेमचन्द्रः ॥ एकजातीयोभयमध्यवर्त्ती । यथा, तन्त्रसारः ।
"सकामः संपुटो जप्यो निष्कामः संपुटं विना॥"
तथा च तत्रैव ।
"केवलां मालकां कृत्वा मालकां तारसंपुटाम् ।
मालकापुटितं तारं न्यसेत् साधकसत्तमः ॥"
रतिबन्धविशेषः । तल्लक्षणं यथा,—
"संप्रसार्य्योभयोः पादौ शय्यागतकपोलकः ।

भगलिङ्गस्य संयोगात् रमते संपुटो हि सः ॥'
इति रतिमञ्जरी ॥

सम्पुटकः, पुं, (सम्पुटति इति। सं+पुट+क्वुन्।) आधारविशेषः। सँपुड़ा इति ख्यातः। इति भरतः॥ तत्पर्य्यायः समुद्गकः २। इत्यमरः। २। ६। १३८॥ समुद्गः २ सम्पुटः ४। इति हेमचन्द्रः॥

सम्पूर्ण, त्रि, (सं+पृ+क्तः।) समग्रम्। परिपूर्णम्। साङ्गम्। यथा,—
"गृहीतेऽस्मिन् व्रते देव! यत्पूर्णं त्वं स्मिये।
तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन॥"
इति तिथ्यादितत्त्वम्॥

सम्पूर्णः, पुं, (सं+पृ+क्तः।) रागस्य जातिविशेषः। स तु सप्तस्वरमिश्रितरागिणः। यथा,
"औडवः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाड़वः।
सम्पूर्णः सप्तभिः प्रोक्तो रागजातिस्त्रिधा मता॥"
इति सङ्गीतरत्नाकरः॥

अपि च। सम्पूर्णस्वराः सा ऋ ग म प ध नि।
सम्पूर्णरागाः सप्तभिः स्वरैर्यथा। नाटवसन्तादयः। इति सङ्गीतदामोदरः॥

सम्पूर्णा, स्त्री, (सम्पूर्ण+टाप्।) एकादशीविशेषः। सा तु पूर्व्वारुणोदयव्यापिनी मता षष्टिदण्डात्मिका। यथा,—
"आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता।
सैकादशी हि संपूर्णा विद्वान्या परिकीर्त्तिता॥"
इति तिथ्यादितत्त्वम्॥

सम्पृक्तः, त्रि, (सं+पृच्+क्तः।) मिश्रितः। तत्पर्य्यायः। करम्बः २ कबरः ३ मिश्रः ४ खचितः ५ इति हेमचन्द्रः॥

सम्प्रति, अ, (सम् च प्रति च द्वयोः समाहारः।) अस्मिन् काले। तत्पर्य्यायः। एतर्हि २ इदानीं ३ अधुना ४ साम्प्रतम् ५। इत्यमरः। ३।४।२३॥
(यथा, भागवते। ७। १। १७।
"सम्प्रत्यमर्षी गोविन्दे दन्तवक्त्रे दुर्म्मतिः॥")

सम्प्रति, पुं, अतीतकल्पीयाईशेदः। इति हेमचन्द्रः॥

सम्प्रतिपत्तिः, स्त्री, (सं+प्रति+पद्+क्तिन्।) उत्तरविशेषः। यथा,—
"मिथ्यासम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा।
प्राङ्न्यायोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः॥
श्रुत्वाभियोगं प्रत्यर्थी यदि तं प्रतिपद्यते।
सा तु सम्प्रतिपत्तिः स्याच्छास्त्रविद्भिरुदाहृता॥"
अभियुज्यते अभियोगः। प्रतिपद्यते अङ्गीकरोति। तं साध्वर्थम्। इति व्यवहारतत्त्वम्॥
(मीमनस्यम्। यथा, माघे। १८। ३८।
"न तस्थौ भर्तृतः प्राप्तमानसम्प्रतिपत्तिषु।
रणैकमनसं भयं मानसं प्रति पत्तिषु॥")

सम्प्रतिरोधकं, त्रि, (सम्यक् प्रकारेण प्रतिरुणद्धीति। सं+प्रति+रुध+ण्वुल्।) प्रतिबन्धकम्। सम्प्रतिपूर्व्वरुधधातोर्ण्वुलन्तत्वेन निष्पन्नम्॥

सम्प्रतीतिः, स्त्री, सम्यक्ख्यातिः। सम्यग्ज्ञानम्। प्रम्पूर्व्वलीनधातोः क्तिन्प्रत्ययेन निष्पन्नम्॥

सम्प्रदाता, [तृ] त्रि, (सं+प्र+दा+तृच्।) सम्प्रदानकर्त्ता। यथा, शुद्धितत्त्वे कात्यायनवचनम्।
"त्रयाणामुदकं कार्य्यं त्रिषु पिण्डः प्रवर्त्तते।
चतुर्थे सम्प्रदातैषां पञ्चमो नोपपद्यते॥"

सम्प्रदानं, क्ली, (सं+प्र+दा+ल्युट्।) सम्यक्प्रकारेण दानम्। षट्कारकान्तर्गतकारकविशेषः। स च दित्सासूयाक्रोधेर्ष्यारुचिद्रोहस्पृहाङ्गुत्साध्वसूहिंसपाधीक्षाप्रतिश्रुत्प्रत्नुत्यर्थ्यानां विषयः। तच्च चतुर्थी विभक्तिः स्यात्। मुख्यसम्प्रदानन्तु प्रकृष्टं दानं यो लभते सः। तथा चोक्तम्।
"सम्प्रदानं तदेव स्यात् पूजानुग्रहकाम्यया।
दीयमानेन संयोगात् स्वामित्वं लभते यदि॥"
इति मुग्धबोधव्याकरणटीकायां दुर्गादासः॥
अपि च।
"गत्यादिभिन्ने धातर्थे चतुर्थ्या विग्रहस्य या।
यः स्वार्थो बोधनीयस्तत् संप्रदानत्वमीरितम्॥"
गत्यादिभिन्ने यद्धातूपस्थाप्य याद्दशार्थे विग्रहस्य चतुर्थ्या यः स्वार्थो बोधयितुं शक्यते स तद्धातूपस्थाप्य तादृशक्रियायां संप्रदानत्वमुच्यते। ब्राह्मणाय दानं धनस्य इत्यादौ ददातेः स्वत्वजनकस्त्यागोऽर्थः तन्निविष्टे च स्वत्वे ब्राह्मणादेः प्रतियोगित्वं निरूपितत्वं वा चतुर्थ्या बोध्यते इति तदेव तत्र संप्रदानत्वं ब्राह्मणादिप्रतियोगिकं यद्दानवृत्तिस्वत्वं तज्जनकस्त्याग इत्येवं तत्र प्रत्ययात् धात्वर्थतावच्छेदकीभूतस्वत्वाख्यफलवत्तया धनादेर्दानकर्म्मत्वात्। न चैवं पशुकामनया यागकरणदशायां चैत्रः स्वात्मने पशुं ददातीत्यपि प्रयोगापत्तिः ताद्दशयागस्य चैत्रोयं यत् पशुनिष्ठं स्वत्वं तज्जनकत्यागत्वादिति वाच्यं स्वत्वध्वंसजनकक्रियापर्य्यवसन्नस्य त्यागस्यैकदेशे स्वत्वध्वंसेऽपि हितीयाद्यर्थस्यान्वयेन पशुफलकयागे पशुनिष्ठस्य स्वत्वध्वंसस्य जनकत्वविरहादेतद्वाक्यस्याप्रमाणत्वात्। ग्रामाय गतः इत्यादौ विग्रहस्य चतुर्थ्या धात्वर्थे बोध्यमपि कर्म्मत्वं न गत्यादिभिन्ने। वृक्षाय सेचकः इत्यादौ गत्यादिभिन्ने चतुर्थ्या बोधनीयोऽपि संवर्द्धयितुमित्यादितुमर्थो न विग्रहस्ययेति न तत्र प्रसङ्गः। संप्रदानशब्दस्तु स्वाश्रयगोचरत्यागजन्यस्वत्वस्य प्रतियोगिन्येव शक्त इति स्वत्वप्रतियोगित्वं संप्रदानमित्यादिको न प्रयोगः। न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः।
"सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च॥"
इत्यादि मन्वादिवचनैस्तस्य स्वत्वहेतुत्वाप्रतिपादनादिति वाच्यम्। ब्राह्मणाय त्यक्तायां गवि गौरियं ब्राह्मणस्य न तु ममेत्यादि सार्व्वजनीनप्रतितिरेव तत्र प्रमाणत्वात् प्रदानं स्वाम्यकारणमिति वचनाच्च अतएव विदेयस्यं पात्रमुद्दिश्य त्यक्तधने स्वीकारमन्तरेणैव पात्रस्य मरणस्थले पितृदायत्वेन तद्धनं पुत्रादिभिर्विभज्य गृह्यते अन्यथा तैरेव उदासीनैरपि तद्धनस्यारण्यकुशादेरिवोपादाने यथेष्टनियोगे च प्रत्यवायो न स्यात् तस्मिंश्चैवं दानादेव स्वत्वसिद्धेर्दत्तवस्तुनि स्वीकारो व्यर्थ इति चेन्न लब्धा चाष्टगुणं फलमित्यादि स्मृतेः प्रतिगृहीतद्रव्यदानस्य फलविशेषं प्रति हेतुत्वेन तादृशफलसम्पत्त्यर्थमेव प्रतिग्रहस्योपयोगात् याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्जयेदित्यादिस्मृत्या प्रागुक्तस्मृत्या च प्रतिग्रहस्यापि स्वत्वहेतुत्वबोधनाच्च। स्वत्वजनकव्यापारस्यैवार्জ্জनपदार्थत्वात्। दामाय भक्ष्यं ददाति भृतकाय वेतनं ददातीत्यादावपि स्वत्वजनकत्यागं प्रतिपादयन् ददातिर्मुख्य एव पुण्यजनकन्तु न तादृशदानमवैधत्वात्। यत्तु स्वीकारजन्यस्य स्वत्वस्य जनकस्यागो दानं मनसा पात्रमुद्दिश्य धनत्यागन्तु न दानं किन्तूत्सर्गमात्रं प्रतिग्रहजन्यस्वत्वं प्रति हेतुभूतवैधत्यागस्यैव तथात्वात् उपेक्षा तु स्वत्वध्वंसमात्रजनकस्यागो न तु तत्र स्वत्वजनकस्यान्तर्भाव इति मैथिलैरुक्तं तन्न युक्तं लाघवेन स्वत्वजनकत्यागस्यैव ददात्यर्थत्वात्। तिलान्मह्यं प्रतियच्छति तुरगमस्मै विक्रीणीते इत्यादौ द्रव्यान्तरग्रहणपूर्व्वकं दानमेव प्रतिदानम्। मूल्यग्रहणपूर्व्वकं दानमेव विक्रय इति तत्रापि मुख्यमेव संप्रदानत्वं चतुर्थ्या बोध्यते। तिलादिकञ्च न मूल्यं पणपुराणादिरेव शास्त्रे तथात्वोपदेशात्। अदृष्टार्थं दत्तस्यैव च स्वीकारः प्रतिग्रह इति परेण प्रतिदत्तस्य विक्रीतस्य वा तिलतुरगादेः स्वीकारो न दोषावहः। मैत्राय रोचते मोदक इत्यत्र चतुर्थ्या धात्वर्थान्वितं आधेयत्वं धातुना च भक्ष्यत्वप्रकारकेच्छोपस्थाप्यते तिङा तु प्रकारान्तर इत्यादाविव विषयत्वलक्षणं कर्त्तृत्वं तथा च मैत्रनिष्ठायाः भक्ष्यत्वप्रकारकेच्छायाः विषयतावान् मोदकः इत्याकारकस्तत्र बोधः। गुरवे गां धारयति इत्यत्र धृङा गृहावस्थितिः हितीयया तदन्वितं कर्त्तृत्वं चतुर्थ्या च तन्निविष्टगृहान्वितं सम्बन्धित्वमुपस्थाप्यते तेन गोकर्त्तृकाया गुरुसम्बन्धिगृहावस्थितेरनुकूलव्यापारवान् इत्याकारकस्तत्र बोधः। धातूत्तरगिचा व्यापारबोधनादिति कालापाः। पाणिनीयास्तु धारेरुत्तमर्णे इति सूत्रानुसारेण चैत्राय शतं धारयते इत्यादाविव गुरवे गां धारयति इत्यादावपि ऋणग्रहणं धारणं दत्तत्वञ्च चतुर्थ्यर्थः तथा च गुरुदत्तां गां ऋणत्वेन गृह्णाति इत्याकारस्तत्र वाक्यार्थः पश्चात् शोध्यत्वेनाङ्गीकृत्य गृहीतञ्च द्रव्यमृणमित्याहुः। पुत्राय राध्यति पुत्रायेचत इत्यादौ दैवनिरूपणं धात्वर्थः तन्निविष्टे च दैवे सुखार्थस्य सम्बन्धस्यान्वयस्तेन पुत्रस्य दैवं निरूपयति इत्येवं तत्र बोधः। गुरवे गां

प्रतिशृणोति आशृणोदि इत्यादौ देयत्वे नाभ्युपगमः शृणोतेरर्थस्तत्र गोर्विशिष्यत्वेन तदेकदेशे च दाने गुरोरुद्दिश्यत्वे नान्वयस्तेन गुरूद्देश्यकदानकर्म्मत्वेन गामभ्युपगच्छतीत्येवं तत्र बोधः। होत्रे प्रतिशृणातीत्यादौ हर्षानुकूलव्यापारलक्षणं प्रोत्साहनं शृणातेरर्थस्तदेकदेशे च हर्षे होत्रादेरन्वयः तेन होत्रनिष्ठहर्षानुकूलव्यापारवान् इत्याकारकस्तत्र बोधः। चैत्राय कुप्यतीत्यादौ धात्वर्थ उत्कटद्वेषस्तच्च विषयित्वलक्षणं संप्रदानत्वं चतुर्थ्या बोध्यते तेन चैत्रविषयकोत्कटद्वेषवान् इत्याकारकस्तत्र बोधः। पुत्रे कोपो न युज्यते इत्यत्र क्रुदन्तस्य कोपपदस्यार्थे पुत्र इत्यस्यान्वयो न तु धात्वर्थे। पटाय यतते इत्यादावपि धात्वर्थकृतौ सुपा पटस्य विषयित्वं बोध्यते तत्र उद्देश्यत्वमेव चतुर्थ्यर्थः कथमन्यथा पटेच्छया तन्तुनिर्म्माणदशायां पटाय यतते इत्यादिकः प्रयोग इत्यपि वदन्ति। मित्राय द्रुह्यति इत्यत्र द्विष्टाचरणं द्रोहस्तेन मित्रस्य द्विष्टमाचरतीत्यर्थः। शिष्याय ईर्ष्यति इत्यत्र अनिष्टानुपेक्षणमीर्षा तथा च शिष्यानिष्टं नोपेक्षत इत्यर्थः। पुत्रायासूयति इत्यत्रासूया गुणद्वेषेण पुत्रस्य गुणं द्वेष्टि इत्याकारकस्तत्र बोधः। मित्रं द्रुह्यति शिष्यमीर्ष्यति पुत्रमसूयतीत्यपि प्रयोगात् द्रुहादिकर्म्मणः संप्रदानत्वं वैकल्पिकमित्युच्यते। कोपपूर्व्वकस्य द्रोहादेर्द्रुहादिधातुवाच्यत्वे तत्कर्म्मणः संप्रदानत्वं द्रोहादिमात्रस्य तथात्वे तु कर्म्मत्वमेवेति पुनः कौमाराः। सोपसर्गयोस्तु क्रुधद्रुहोः कर्म्मणः कर्म्मतैव न तु संप्रदानता अतएव शिष्यस्याभिक्रोधा मित्रस्याभिद्रोढेत्यादौ क्रुदयोगे कर्म्मणि षष्ठ्येव प्रमाणम्।"
इति शब्दशक्तिप्रकाशिका ॥

सम्प्रदायः, पुं, (सं+प्र+दा+घञ्। "आतो युक् चिण्कृतोः।" ७। ३। ३३। इति युक्।) गुरुपरम्परागतसदुपदेशः। शिष्टपरम्परावतीर्णोपदेशः। इति भरतः ॥ तत्पर्य्यायः। आम्नायः २। इत्यमरः। ३। २। ७॥ (यथा, माघे। १४। ७८।

"सम्प्रदायविगमादुपेयुषी-
रेष नागमविनाशिविग्रहः।
स्मर्त्तुमप्रतिहतस्मृतिः श्रुती-
र्इत्त इत्यभवदत्रिगोत्रजः॥")

गुरुपरम्परागतसदुपदिष्टशक्तिसमूहः। यथा,
"सम्प्रदायानुरोधेन पौर्व्वापर्य्यानुसारतः।
श्रीभागवतभावार्थदीपिकेयं प्रतन्यते॥"
इति श्रीधरस्वामी ॥
तद्भेदा यथा, श्रीपद्मपुराणे।
"श्रीमन्नारायणो ब्रह्मा नारदो व्यास एव च।
श्रीलक्ष्मीः पद्मनाभो हरिर्माधवस्तथा॥
मध्वो जयतीर्थश्च ज्ञानसिन्धुर्महानिधिः।
विद्यानिधिश्च राजेन्द्रो जयधर्म्ममुनिस्तथा॥
पुरुषोत्तमो ब्रह्मण्यो व्यासतीर्थमुनिस्तथा।
श्रीमल्लक्ष्मीपतिः श्रीमाधवेन्द्रपुरिस्तथा॥
संप्रदायविहीना ये मन्त्रास्ते निष्फला मताः।
अतः कलौ भविष्यन्ति चत्वारः संप्रदायिनः।
श्रीमाध्विरुद्रसनका वैष्णवाः क्षितिपावनाः॥"
तन्त्रोक्तवैष्णवसम्प्रदाया यथा,—
श्रीशिव उवाच।
"वैखानः सामवेदादौ श्रीराधावल्लभो तथा।
गोकुलेशो महेशानि! तथा वृन्दावनो भवेत्॥
पाञ्चरात्रः पञ्चमः स्यात् षष्ठः श्रीवीरवैष्णवः।
रामानन्दो हविष्याशी निम्बार्कश्च महेश्वरि॥
ततो भागवतो देवि दश भेदाः प्रकीर्त्तिताः।
शिखी मुण्डी जटी चैव द्विशिखण्डी क्रमेण च॥
एकदण्डी महेशानि वीरश्चवस्तथैव च।
सप्त पाशुपताः प्रोक्ता दशधा वैष्णवा मताः॥
तेषां वासनं देवि! शृणु यत्नेन शाम्भवि।
वैखैष्टि सर्व्वं संव्याप्य यस्तिष्ठति स वैष्णवः॥
वैखानसादिदत्ताद्यैर्भूषितः स्मार्त्तवैष्णवः।
श्रीराधावल्लभं देवि शृणु यत्नेन शाम्भवि॥
वैष्णवाचारनिरतो विष्णुतन्त्रैकपारगः।
अनन्यचेताः शान्तात्मा विष्णुचिन्तापरायणः॥
श्रीराधावल्लभो देवि गोकुलेशं शृणु प्रिये।
नानाभूषणसम्पन्नो नानासुगन्धिभूषितः॥
गवां कुलं प्रीणयिता केलिलक्षणस्वरूपधृक्।
शरीरमर्थं प्राणांश्च तन्निवेदनकारकम्॥
अन्तःशक्तिपरो देवि बहिर्वैष्णवरूपधृक्।
गन्धर्व्वाचारनिरतो लताचेष्टनतत्परः॥
संप्रदायो गोकुलेशः सर्व्वसिद्धिकरो भुवि।
वृन्दावनाख्यं देवेशि शृणु यत्नेन साम्प्रतम्॥
विगताशः प्रसन्नात्मा विष्णुभक्तिपरायणः।
कामिनीसङ्गचपलो वनक्रीड़ाविनोदधृक्॥
सौगन्धभूषिततनुः स्त्रोध्यानैकपरायणः।
विष्णुमारूप्यतन्त्रज्ञः प्रोक्तो वृन्दावनो शिवे॥
पाञ्चरात्रो महेशानि तथैव वीरवैष्णवः।
पूर्व्वमेव महेशानि कीर्त्तितः परमेश्वरि॥
रा शक्तिरिति विख्याता म शिवः परिकीर्त्तितः।
तदानन्दो शान्तचित्तो प्रसन्नात्मा विचारधृक्॥
सत्यत्र समरूपश्च रामानन्दो प्रकीर्त्तितः।
हविष्याशं महेशानि यथावदवधारय।
पापसंहरणाशक्तो विष्णुभक्तो जितेन्द्रियः॥
यमादिनियमैर्युक्तो भक्ताचारपरायणः।
स्वोपयोगफलाग्राही परकार्य्यपरायणः॥
हविष्याशी महेशानि शिवशक्तिस्वरूपधृक्।
निम्बार्काख्यं संप्रदायं शृणु यत्नेन सांप्रतम्॥
नित्यार्च्चनक्रमासक्तः स्वतन्त्रैकपरायणः।
बाह्यपूजादिनिरतो नान्यभक्तः प्रसन्नधीः॥
आर्य्यपत्न्वान्वितः स्वच्छः स्वच्छन्दाचारतत्परः।
स्वतन्त्रः स्मार्त्तविद्वेषी निम्बार्को भगवान् हरिः॥
अथ भागवतं देवि कथ्यते शृणु सांप्रतम्॥
विष्णुभक्तैकनिपुणो विजितात्मा प्रसन्नधीः।
स्मार्त्तगर्व्वान्वितो देवि तदन्याचारतत्परः॥
आर्य्यपत्न्वान्वितो देवि तथा स्वरूपवेशधृक्।
शैवद्वेषी तस्य सङ्गात् पुनः स्नानपरायणः।
केवलं विष्णुतत्त्वज्ञः प्रोक्तो भागवतः शिवे॥"
इति शक्तिसङ्गमतन्त्रे १ खण्डे ८ पटलः॥

सम्प्रधारणा, स्त्री, (सम्+प्र+धृ+णिच्+युच्। टाप्।) उचितानुचितनिश्चयः। तत्पर्य्यायः। समर्थनम् २। इत्यमरः। २। ८। २५॥

सम्प्रपदं, क्ली. (सं+प्र+पद गतौ+कः।) भ्रमणम्। पर्य्यटनम्। इति केचित्॥ (यथा, याज्ञवल्क्ये। ३। ५१।
"स्वप्याद् भूमौ शुचौ रात्रौ दिवासंप्रपदेन येत्
स्थानासनविहारैर्वा योगाभ्यासेन वा तथा॥")

सम्प्रयोगः, पुं, (सं+प्र+युज+घञ्।) निधुवनम्। रतम्। अन्वितिः। सम्बन्धः। (यथा, रघुः। ५। ५४।
"उष्णत्वमग्न्यातपसंप्रयोगात्
शैत्यं हि यत् सा प्रकृतिर्जलस्य॥")
कार्म्मणम्। वशीकरणादिकर्म्म। इति मेदिनीकरहेमचन्द्रौ॥ अर्थिते, त्रि। इत्यजयः॥

सम्प्रयोगी, [न्] पुं, (संप्रयोगोऽस्यास्तीति। इनिः।) कलाकेलिः। कामुकः। संप्रयोजकः। इति मेदिनी॥

सम्प्रसारणं, क्ली, (सं+प्र+सृ+णिच्+ल्युट्।) व्याकरणस्य संज्ञाविशेषः। यथा। इग्यणः संप्रसारणम्। यणस्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात्। इति सिद्धान्तकौमुदी॥

सम्प्रहारः, पुं, (सम्यक् प्रकारेण प्रहृत्यतेऽनेनेति सं+प्र+हृ+घञ्।) युद्धम्। इत्यमरः। २। ८। १०५॥ (यथा, रघुः। ७। ५२।
"अस्त्री गदाव्यायतसंप्रहारौ
भग्नायुधौ बाहुविमर्दनिष्ठौ॥")
गमनम्। इति मेदिनी॥ हननम्। इति धरणिः॥

सम्प्राप्तः, त्रि, (सं+प्र+आप्+क्तः।) सम्यक्प्रकारेण प्राप्तः। यथा। स्कन्दपुराणम्।
"संग्रामे मकरादित्ये पुण्ये पुण्यप्रदे सदा।
कर्त्तव्यो नियमः कश्चिद्व्रततपो नरोत्तमैः॥"
इति तिथ्यादितत्त्वम्॥

सम्प्राप्तिः, स्त्री, (सं+प्र+आप्+क्तिन्।) सम्यक्प्रापणम्। यथा,—
"आत्मनेपदसंप्राप्तौ परस्मै कुत्रचिद्वदेत्॥"
इति संक्षिप्तसारव्याकरणम्॥

सम्प्रैषः, पुं, (सं+प्र+इष+घञ्।) नियोगः। विधिः। इति हेमचन्द्रः॥

सम्फालः, पुं, (सम्यक् फालो गमनं यस्य।) मेषः। इति हेमचन्द्रः॥

सम्फुल्लः, त्रि, (सं+फल+क्तः। "उत्फुल्लसंफुल्लयोरिति वक्तव्यम्।" ८। २। ५५। इत्यस्य वार्त्तिकोक्त्या निपातितः।) विकसितः। प्रफुल्लः। इत्यमरः। २। ४। ७॥

सम्ब, सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर० सक०-सेट्।) दन्त्यादिः। ओष्ठ्यवर्गशेषोपधः। सम्बति। सिसम्बयिषति। इति दुर्गादासः॥

सम्ब,क,सम्बन्ध । इति कविकल्पद्रुमः ॥(चुरा०-पर०-सक०-सेट् ।) ओष्ठ्यवर्गशेषोपधः । क, सम्बयति धनं लोकः संबध्नातीत्यर्थः । तालव्यादिरयमिति धातुप्रदीपः । मूर्द्धन्यादिरित्यप्येके । इति दुर्गादासः ।

सम्बं, क्ली, (सम्बति सर्पतीति । सम्ब + अच् ।) जलम् । इति जटाधरः ॥ वारद्वयकर्षणम् । इति सम्बाक्षतशब्ददर्शनात् ॥

सम्बद्ध, त्रि, (सं + बन्ध + क्तः ।) सम्बन्धयुक्तः । यथा सुमन्तुः । मातृपितृसम्बद्धा आसप्तमादविवाह्याः कन्या भवन्ति । इत्युद्धाहतत्त्वम् । (यथा च भागवते । २ । ८ । १ ।

"यात्ममायामृते राजन् परस्यानुभवात्मनः ।
न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसा ॥")

बन्धनविशिष्टः । (यथा, रामायणे ।५।५६।२७।

"दन्तौष्ठपुटसंबद्धं वक्त्रं सापि तदाकरोत् ॥")

सम्बन्धः, पुं, (सम्बध्यते इति । सं + बन्ध + घञ् ।) सन्धिः । न्यायः । इत्यजयः ॥(सख्यम् इति मल्लिनाथः ॥ यथा, रघुः । २ । ५८ ।

"सम्बन्धमाभाषणपूर्व्वमाहु-
र्वृत्तः स नौ सङ्गतयोर्व्वनान्ते ॥")

भङ्गः । यथा । एकपदार्थे अपरपदार्थसंसर्गः संसर्गमर्य्यादया भासते स च प्रतियोग्यनुयोग्याधाराधेयविषयविषयिभावादिः । इतिप्रथमव्युत्पत्तिवादीयगादाधरी॥ सम्यक्कः । स च त्रिविधः । विद्याजः१ योनिजः२ प्रीतिजः ३ । तद्विवरणं यथा,—

"सम्बन्धो येषु येषां यः सर्व्वजातिषु सर्व्वतः ।
तं त्वां ब्रवीमि वेदोक्तं ब्रह्मणा कथितं पुरा ॥
पिता तातस्तु जनको जन्मदातरि वर्त्तते ।
अम्बा माता च जननी गर्भधात्र्यां प्रसूरिति ॥
प्रितामहः पितृपिता तत्पिता प्रपितामहः ।
अत ऊर्द्धं ज्ञातयश्च सगोत्राः परिकीर्त्तिताः ॥
मातामहः पिता मातुः प्रमातामह एव च ।
मातामहस्य जनकस्तत्पिता वृद्धपूर्व्वकः ॥
पितामही पितुर्म्माता तत्श्वश्रूः प्रपितामही ।
मातामही मातृमाता मातृतुल्या च पूजिता ॥
प्रमातामहीति विख्याता प्रमातामहकामिनी
वृद्धप्रमातामही ज्ञेया तत्पितुः कामिनी तथा
पितृभ्राता पितृव्यः स्यान्मातृभ्राता तु मातुलः
पितुः स्वसा पितुर्भग्नी मातुर्भग्नी च मासुरी ॥
सूनुश्च तनयः पुत्रो दायादश्चात्मजस्तथा ।
धनभाक् वीर्य्यजश्चैव पुंसि जन्ये च वर्त्तते ॥
जन्यायां दुहिता कन्या चात्मजा परिकीर्त्तिता
पुत्रपत्नी वधूर्ज्ञेया जामाता दुहितुः पतिः ॥
पतिः प्रियश्च भर्त्ता च स्वामी कान्ते च वर्त्तते ।
पत्नीभ्राता श्यालश्च पत्नीभग्नी च श्यालिका
देवरः स्वामिनो भ्राता ननन्दा स्वामिनः स्वसा
श्वशुरः स्वामिनस्तातः स्वश्रूश्च स्वामिनः प्रसूः ॥
भार्य्या जाया प्रिया कान्ता स्त्री च पत्न्याञ्च वर्त्तते ।
पत्नीमातास्तथा श्वश्रूस्तत्पिता श्वशुरः स्मृतः ॥
सगर्भः सोदरो भ्राता सगर्भा भगिनी स्मृता ।
भग्नीपुत्रो भागिनेयो भ्रातृपुत्रश्च भ्रातृजः ॥
श्यालस्तु भगिनीकान्तो भगिनीपतिरेव च ।
श्यालीपतिस्तु भ्राता च श्वशुरैकत्वहेतुना ।
श्वशुरस्तु पिता ज्ञेयो जन्मदातुः समो मुने ॥
अन्नदाता भयत्राता पत्नीतातस्तथैव च ।
विद्यादाता जन्मदाता पञ्चैते पितरो नृणाम् ॥
अन्नदात्र्यश्च या पत्नी भगिनी गुरुकामिनी ।
माता च तत्सपत्नी च कन्या पुत्रप्रिया तथा ॥
मातुर्म्माता पितुर्म्माता श्वश्रूः पित्रोः स्वसा सुता ।
पितृव्याणी मातुलानी मातरश्च चतुर्दश ॥
पौत्रस्तु पुत्रपुत्रे च प्रपौत्रस्तत्सुतोऽपि च ।
तत्पुत्राद्याश्च ये वंशाः कुलजाताश्च कीर्त्तिताः॥
कन्यापुत्रश्च दौहित्रस्तत्पुत्राद्याश्च बान्धवाः ।
भागिनेयसुताद्याश्च पुरुषा बान्धवाः स्मृताः ॥
भ्रातृपुत्राश्च पुत्राद्यास्ते पुनर्ज्ञातयः स्मृताः ॥
गुरुपुत्रस्तथा भ्राता पोष्यः परमबान्धवः ।
गुरुकन्या च भगिनी पोष्या मातृसमा मुने ॥
पुत्रस्य च गुरुर्भ्राता पोष्यः सस्निग्धबान्धवः ।
पुत्रस्य श्वशुरभ्राता बन्धुर्वैवाहिकः स्मृतः ॥
कन्यायाश्च श्वशुरे तत्सम्बन्धः परिकीर्त्तितः ।
गुरुश्च कन्यकायाश्च पुरुषा बान्धवा स्मृताः ॥"

पुरुषा बान्धवा स्मृता इत्यत्र भ्राता सुस्निग्धबान्धवा इत्यपि क्वचित् पाठः ।

"गुरुः श्वशुरभ्रातॄणां गुरुतुल्यश्च पूजितः ।
बन्धुता येन सार्द्धञ्च तन्मित्रं परिकीर्त्तितम् ।
मित्रं सुखप्रदं ज्ञेयं दुःखदो रिपुरुच्यते ।
बान्धवो दुःखदो दैवात् निःसम्बन्धो सुखप्रदः ॥
सम्बन्धस्त्रिविधः पुंसां विप्रेन्द्र ! जगतीतले ।
विद्याजो योनिजश्चैव प्रीतिजश्च प्रकीर्त्तितः ॥
मित्रन्तु प्रीतिजं ज्ञेयं स सम्बन्धः सुदुर्ल्लभः ।
मित्रमाता मित्रभार्य्या मातृतुल्या न संशयः ॥
मित्रभ्राता मित्रपिता भ्रातृपितृसमो नृणाम्
चतुर्थं नाम सम्बन्धमित्याह कमलोद्भवः ॥
जारश्चोपरतिर्बन्धुर्दृष्टासंभोगकर्त्तरि ।
उपपन्नाञ्च नवङ्गी च प्रेयसी चित्तहारिणी ॥
स्वामितुल्यश्च जारश्च नवङ्गी गृहिणीसमा ।
सम्बन्धो देशभेदे च सर्व्वदेशे विगर्हितः ॥
अवैदिको निन्दितस्तु विश्वामित्रेण निर्म्मितः ।
दुस्त्याज्यस्तु महद्भिश्च देशभेदे च सञ्चरेत् ॥
अकीर्त्तिजनकः पुंसां योषितश्च विशेषतः ।
तेजीयसां न दोषाय विद्यमानो युगे युगे ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे सम्बन्धजातिनिर्णयो नाम १० अध्यायः ॥* कूर्म्मपुराणे ।

"एकोदकानां मरणे सूतकं चैतदेव हि ।
पत्नीनां योनिसम्बन्धे बान्धवेषु तथैव च ॥"

योनिसम्बन्धे मातृस्वसृीयभागीनेयेषु ॥ अपि च

"असम्बन्धिनो द्विजान् दहित्वा वहित्वा सद्यः शौचं सम्बन्धे तु त्रिरात्रम् । इति शुद्धितत्त्वम् ॥

शब्दव्याकरणयोर्व्युत्पाद्यव्युत्पादकभावः सम्बन्धः यत्पादौ तस्य वक्तव्यता यथा,—

"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते ।
यत्पादौ तेन कर्त्तव्यः सम्बन्धः सप्रयोजनः ॥"

सप्रयोजन इत्यत्र क्वचित् पुस्तके साभिधेयेक इति पाठः । इति मुग्धबोधटीकायां दुर्गादासः॥

सम्बन्धः, त्रि, (सम्बन्धनं इति । सं + बन्ध + घञ् । ज्ञातः । हितः । इत्यजयः ॥

सम्बन्धी, [न्] त्रि, सम्बन्धोऽस्यास्तीति । इनिः।) सम्बन्धविशिष्टः । तत्पर्य्यायः । गुणवान्२ संयुक् ३ । इति त्रिकाण्डशेषः ॥ (यथा, मनुः ।८।६४।

"नार्थसम्बन्धिनो नाप्ता न सहाया न वैरिणः ।
न दृष्टदोषाः कर्त्तव्या न व्याध्यार्त्ता न दूषिताः॥"

पुं, मातृपत्नीयः । श्वशुरादिः । जामाता । श्यालकादिः । यथा, मनुः । २ । १३२ ।

"विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः ॥"

"ज्ञातयः पितृपक्षाः पितृव्यादयः । सम्बन्धिनो मातृपक्षाः श्वशुरादयश्च तेषां ज्येष्ठानां या स्त्रियः ।" इति कुल्लूकभट्टः ॥ * ॥ तथाच मनुः । ४ । १७८ ।

"बालवृद्धातुरैर्वैद्यैर्ज्ञातिसम्बन्धिबान्धवैः ॥"

"ज्ञातयः पितृपक्षाः । सम्बन्धिनो जामातृश्यालकादयः ।" इति तट्टीकायां कुल्लूकः ॥*॥ वैवाहिकः । यथा, उत्तरचरिते । ४ अङ्के ।

"स सम्बन्धो श्राघ्यः प्रियसुहृदसौ तच्च हृदयं
स चानन्दः साक्षादपिच निखिलं जीवितपदम्॥"

मित्रम् । इति मल्लिनाथः ॥ यथा, रघुः ।२।५८।

तद्गृहनाथानुगं नार्हसि त्वं
सम्बन्धिनो मे प्रणयं विहन्तुम् ॥")

सम्बाक्षतं, त्रि, (सम्बं क्षतम् । डाच् ।) वारद्वयकृष्टक्षेत्रम् । इत्यमरः । २ । ९ । ९ ॥ तालव्यादि च ॥

सम्बाधः, पुं, (सम्यक् बाधा यत्र ।) सङ्कटः । (यथा, माघः । ८ । २ ।

"संसक्तैर्विपुलतया मिथो नितम्बैः
सम्बाधं वृहदपि तद्बभूव वर्त्म ॥")

भगम् । इति मेदिनी ॥ भयम् । (यथा, महाभारते । ४ । ३८ । ७ ।

"व्यायामसहमत्यर्थं दृढराजसमं महत् ।
सर्व्वायुधमहामात्रं शत्रुसम्बाधकारकम् ॥")

नरकवर्त्म । इति शब्दरत्नावली ॥

सम्बाधनं, क्ली, (सम्यक् बाधनं यत्र ।) मदनस्य द्वारम् । शूलाग्रम् । द्वारपालः । इति मेदिनी ॥

सम्बुद्धः, पुं, (सं + बुध + क्तः ।) बुद्धावतारः । इति त्रिकाण्डशेषः ॥ सम्यग्बोधाश्रये, त्रि ॥

सम्बुद्धिः, स्त्री, (सं + बुध + क्तिन् ।) सम्बोधनम् । यथा । स्यर्थसम्बुद्ध्यर्थे प्रौ । इति मुग्धबोधव्याकरणम् ॥

सम्बोधः, पुं, (सं + बुधः + घञ् ।) बोधनम् । (यथा, महाभारते । ३ । २१२ । ८५ ।

"ज्ञानं तत्त्वार्थसम्बोधः शमश्चित्तप्रशान्तता ।
दयासर्व्वसुखैषित्वमार्ज्जवं समचित्तता ॥")

क्षेपः । इति मेदिनी ॥ नागः । इत्यजयपालः ॥

सम्बोधन, क्ली. (सं+बुध+ल्युट्।) अन्यत्र व्यासक्तस्य कार्य्यान्तरे नियोजनार्थमाभिमुख्यविधानम्। यथा हे विष्णो। इति व्याकरणम्॥ हे वृक्ष हे लते हे फल इत्यादावचेतने तूपचारः। इति दुर्गादासः॥ तत्पर्य्यायः। आमन्त्रणम् २। इति हेमचन्द्रः॥ सम्बुद्धिः ३। इति मुग्धबोधः॥ (यथा, साहित्यदर्पणे ६।५१३।
"सम्बोधनोक्तिप्रत्यक्षौ कुर्य्यादाकाङ्क्षभाषितैः॥"

सम्भली, स्त्री, कुट्टनी। इत्यमरः। २। ६।१८॥
"हे परपुरुषेण सह परनारीं योजयन्त्यां कुट्टनी इति ख्यातायाम्। कुट्टयति छिनत्ति स्त्रीपुरुषवैमत्यं कुट्टनी नन्द्यादिः। शं कल्याणं भलते निरूपयति शम्भली भल ड निरूपणे पचाद्यच् नदादित्वादीप् शम्भली तालव्यादिः सम्यक् भलते सम्भली दन्त्यादिरित्यन्ये।"इति भरतः॥

सम्भवः, पुं, (सं+भू+अप्।) हेतुः। उत्पत्तिः। (यथा, आर्य्यासप्तशत्याम्। ४५८।
"महता प्रियेण निर्म्मितमप्रियमपि सुभग!
सम्पद्यते यदि।
सुतसम्भवेन यौवनविनाशनं न खलु खेदाय॥")
मेलकः। आधेयस्य आधारानतिरिक्तत्वम्। इति मेदिनी॥ मङ्गलम्। अपायः। इत्यजयः॥ वर्त्तमानकल्पीयार्हदेवः। इति हेमचन्द्रः॥

सम्भव्यः, पुं, (सं+भू+यत्।) कपित्थः। इति शब्दचन्द्रिका॥ सम्भवनीये, त्रि॥

सम्भारः, पुं, (सं+भृ+घञ्।) सम्भृतिः। समूहः। इति मेदिनी॥ सर्व्वपूर्णत्वम्। इति त्रिकाण्डशेषः॥ (यज्ञादिकार्य्योपकरणद्रव्यम्। यथा, देवीभागवते। १। १८। २३।
"कृत्वा तस्य मखं पूर्णं करिष्यामि तवापि वै।
तावत् कुरुष्व राजेन्द्र सम्भारन्तु शनैः शनैः॥"
तथा तत्रैव। २। ६। ४।
"विवाहार्थञ्च सम्भारं रचयामासतुर्व्वने॥"
संग्रहः। इति मल्लिनाथः॥ यथा, कुमारे। २। ३६।
"पर्य्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः।
उद्यानपालसामान्यमृतवस्तमुपासते॥")

सम्भावनं, क्ली, (सम्भावयत्यनेनेति। सं+भू+णिच्+ल्युट्।) अलङ्कारविशेषः। यथा,—
"सम्भावनं यदीदं स्यादित्यूहोऽन्यस्य सिद्धये।
यदि शेषो भवेदत्रा कथिताः स्युर्गुणास्तव॥"
इति चन्द्रालोकः॥

सम्भावनं क्रियासु योग्यताध्यवसायः। इति मुग्धबोधव्याकरणम्॥ (सम्भावके, त्रि। यथा, भागवते। ४। १७। २६।
"पुमान् योषिदुत क्लीव आत्मसम्भावनोऽधमः।
भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः॥")

सम्भावना, स्त्री, (सं+भू+णिच्+युच्। टाप्।) उत्कटकोटिकसंशयः। संपूर्व्वकात् भू क शङ्कि-चिन्तयोरित्यस्मात्। औपियन्यौत्यादिसूत्रेणानप्रत्ययनिष्पन्ना। यथा, "एवं कोऽयं ते श्रौत्कट्यरूपं सम्भावनात्वमपि विषयताविशेषः। इति ध्येयम्।"इति सप्रतिपक्षचिन्तामणिदीधितिगादाधरी॥ धूमदर्शनानन्तरं वह्न्यादिव्यवहारस्तु सम्भावनामात्रादितिकुसुमाञ्जलिटीकायां हरिदासः। पौराणिकास्तु सम्भवनामकं प्रमाणान्तरं मन्यन्ते तत्प्रमाणजन्या प्रमितिः सम्भावना इति वदन्ति। तन्मतन्तु न चतुष्टयमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् इति सूत्रेणोपन्यस्य शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्ति-सम्भवाभावानामनर्थान्तरभावाच्चाप्रतिषेध इति सूत्रेण भगवदक्षपादपादैर्निराकृतम्। निश्चित्येति उत्कटकोटिकसम्भावनोपलक्षणं इति तिथ्यादितत्त्वे स्मार्त्तभट्टाचार्य्यलिखनन्तु सम्भावनाशब्दस्य संशयमात्रपरतया सङ्गमनीयम्। इति नानाग्रन्थेभ्यः संगृहीतम्॥

सम्भावितः, त्रि, (सं+भू+णिच्+क्तः।) सम्भावनाविशिष्टः। सम्भवनयोग्यः। बहुमतः। यथा, भगवद्गीतायाम्। २। ३४।
"अकीर्त्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्।
सम्भावितस्य चाकीर्त्तिर्म्मरणादतिरिच्यते॥"
"सम्भावितस्य बहुमतस्य।" इति तट्टीकायां श्रीधरस्वामी॥

सम्भाषणं, क्ली, (सं+भाष+ल्युट्।) कथनम्। आलापनम्। यथा,—
"कृते सम्भाषणादेव त्रेतायां स्पर्शनेन तु।
द्वापरे त्वर्थमादाय कलौ पतति कर्म्मणा॥"
इत्युद्वाहतत्त्वम्॥

सम्भाषा, स्त्री, (सं+भाष+अङ्। टाप्।) सम्भाषणम्॥

सम्भिन्नः, त्रि, (सं+भिद्+क्तः।) सम्यग्भेदविशिष्टः। यथा,—
"सम्भिन्नकांस्यवद्घोषो निरेति वदनादयम्।
कास इत्युच्यते लोके तालव्यान्तो न कीर्त्तितः॥"
इति प्राचीनकारिका॥

सम्भुः, त्रि, (सं+भू+"विप्रसंभ्यो डुसंज्ञायाम्" ३। २। १८०। इति डुः।) सम्भवति यः। इति मुग्धबोधव्याकरणम्॥

सम्भूतः, त्रि, (सं+भू+क्तः।) उत्पन्नः। यथा, मार्कण्डेयपुराणे। ८४। ३४।
"इत्येतत् कथितं भूप सम्भूता सा यथा पुरा।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी॥"

सम्भूतविजयः, पुं, (सम्भूतो विजयो यस्य।) श्रुतकेवलिमन्त्रकवीढविशेषः। इति हेमचन्द्रः॥

सम्भूयसमुत्थानं, क्ली, (सम्भूय मिलित्वा समुत्थानं कर्म्मकरणं यत्र।) मिलित्वैकमत्या वणिजां कर्म्मकरणम्। तच्च विवादपदविशेषः। यथा, सम्भूयसमुत्थानं नाम विवादपदमिदानीमभिधीयते।
"समवायेन वणिजां लाभार्थं कर्म्म कुर्व्वताम्।
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ॥
सर्व्वे वयमिदं कर्म्म मिलिताः कुर्म्म इत्येवंरूपा सम्भूतिपत्तिः समवायस्तेन ये वणिङ्नटनर्त्तकप्रभृतयो लाभलिप्सवो भूत्वा प्रातिस्विकं कर्म्म कुर्व्वते तेषां लाभालाभावुपचयौ यथाद्रव्यं येन यावद्धनं पण्यग्रहणार्थं दत्तं तदनुसारेणावसेयौ। यद्वा। प्रधानगुणभावपर्य्यालोचनयास्य भागद्वयमस्त्येको भाग इत्येवंरूपया संविदा समयेन यथा संप्रतिपत्तौ तथा वेदितव्या। किञ्च।
"प्रतिषिद्धमनादिष्टं प्रमादात् यच्च नाशितम्।
स तद्व्याद्विप्लवाच्च रक्षितादृदशमांशभाक्॥"
तेषां सम्भूय प्रचरतां मध्ये पण्यमिदमित्यं न व्यवहर्त्तव्यमिति प्रतिषिद्धमाचरता यन्नाशितं अनादिष्टमननुज्ञातं वा कुर्व्वतेन तथा प्रमादात् प्रज्ञाहीनतया वा येन यन्नाशितं स तत् पण्यं वणिग्भ्यो दद्यात्। यः पुनस्तेषां मध्ये चौरराजादिजनितात् व्यसनात् पण्यं पालयति स तस्माद्रक्षितात् पण्यात् दशममंशं लभते।
"अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत्।
व्यामिश्रं राजयोग्यञ्च विक्रीतं राजगामि तत्॥"
इह यतः पण्यमेयन्मूल्यं इत्यर्घस्य प्रक्षेपणात् राजनिरूपणाद्वेतोरसौ मूल्यादिंशतितमसंशं शुल्कार्थं गृह्णीयात्। यत् पुनर्व्याश्रिमन्यच्च न विक्रेयमितिराज्ञा प्रतिषिद्धम्। यच्च राजयोग्यं माणिक्यादिप्रतिषिद्धमपिनद्राज्ञे अनिवेद्य लाभलोभेन विक्रीतन्तद्दाजगामिमूल्यदानेनिरपेक्षं तत् सर्व्वं पण्यं राजापहरेदित्यर्थः।
"मिथ्या वदन् परीमाणं शुल्कस्थानादपाक्रमत्।
दाप्यस्तत्रैवशुल्कं च सव्याजक्रयविक्रयौ॥"
यः पुनर्वणिक्शुल्कवञ्चनार्थं परीमाणं निह्नुते शुल्कग्रहणस्थानादपक्रमति यश्चास्येदमस्य वेत्येवंविदादास्यदीभूतं पण्यंक्रीणाति विक्रीणीते वा ते सर्व्वे पण्याष्टगुणं दण्डनीयाः। अपि च।
"तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणानदश।
ब्राह्मणप्रातिवेश्यानामनदेवानिमन्त्रणे॥"
शुल्कं हि द्विविधं स्थलजं जलजञ्च। तत्र स्थलजमर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेदित्युक्तम्। जलजन्तु मानवैरभिहितम्।
"पणं यानं नरे दाप्यं पुरुषोऽर्द्धपणन्तरे।
पादं पशुश्च योषिच्च पादार्द्धं रिक्तकः पुमान्॥
भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारतः
रिक्तभाण्डानि यत्किञ्चित् पुमांसञ्चापरिच्छदाः॥"
शुल्कहर्य्योरयमपरो विशेषः।
"न भिन्नकार्षापणमस्ति शुल्कं
न शिल्पवृत्तौ न शिशौ न दूते।
न भेद्यलब्धे न हृतावशेषे
न श्रोत्रिये प्रव्रजिते न यज्ञे॥" इति।
तीर्य्यतेऽनेनेति तरो नावादिस्तज्जन्यशुल्केऽधिकृतस्तरिकः स यदा स्थलोद्भवं शुल्कं गृह्णाति तदा दशपणान् दण्डनीयः। वैशो वैश्यं प्रतिवेश्य इतिस्ववेश्माभिमुखं स्ववेश्मपार्श्वस्थं चोच्यते तत्र भवाः प्रतिवेश्याः। ब्राह्मणाश्च ते प्रातिवेश्याश्च ब्राह्मणप्रातिवेश्यास्तेषां श्रुतवृत्तसम्प-

ब्राह्मणां श्राद्धादिषु विभवे सत्यनिमन्त्रणे एतदेव दृश्यप्रात्मकं दण्डनं वेदितव्यम् ॥ * ॥ देशान्तरमृतबणिग्धरिक्थ प्रत्याह।

"देशान्तरगते प्रेते दृश्यं दायादबान्धवाः।
ज्ञातयो वा हरेयुस्तदागतास्तैर्विना नृपः॥"

यदा सम्भूयकारिणां मध्ये यः कश्चिद्देशान्तरं गतो मृतस्तदा तदीयमंशं दायादः पुत्राद्यपत्यवर्गः बान्धवाः मातृपक्षीयाः मातुलाद्याः ज्ञातयोऽपत्यवर्गव्यतिरिक्ताः सपिण्डा वा आगताः सम्भूयव्यवहारिणो ये देशान्तरादागतास्ते वा गृह्णीयुस्तैर्विना दायाद्यभावे राजा गृह्णीयात्। वाशब्देन च दायादीनां वैकल्पिकं अधिकारं दर्शयति। यौज्ञवल्क्यनियमस्तु पत्नी दुहितर इत्यादि प्रतिपादित एवात्रापि विज्ञेयः। शिष्यब्रह्मचारिब्राह्मणनिषेधवणिक्प्राप्तिय वचनप्रयोजनम्। वणिजामपि मध्ये यः पिण्डदानर्णदानादिसमर्थः स गृह्णीयात्। सामर्थ्याविशेषे पुनः सर्व्वे वणिजः संसृष्टिनो विभज्य गृह्णीयुस्तेषामभावे दशवर्षं दायाद्यागमनं प्रतीक्ष्यानागतेषु स्वयमेव राजा गृह्णीयात् तदिदं नारदेन स्पष्टमुक्तम्।

"एकस्य चेत् स्यात् मरणं दायादोऽस्यतदाप्नुयात्
अन्यो वासति दायादे शक्लवेत् सर्व एव ते॥
तदभावे तु गुप्तं तत् कारयेद्दशवत्सरात्।
अस्वामिकमदायादं दशवर्षस्थितं ततः॥
राजा तदात्मसात् कुर्य्यात् एवं धर्म्मो न हीयते॥"

किञ्च।

"जिह्मं त्वजेयुर्निर्लाभमशक्नोऽन्येन कारयेत्।"

जिह्मो वञ्चकः तं निर्लाभं निर्गतलाभं लाभमाच्छिद्य त्वजेयुः बहिष्कुर्य्युः। यश्च सम्भूयकारिणां मध्ये भाण्डप्रत्यवेक्षणादिकं कर्त्तुमसमर्थोऽसावन्येन स्वं कर्म्म भाण्डभारवाहनं तदायव्ययपरीक्षादिकं कारयेत्। इति मिताक्षरा॥

सम्भृतः, त्रि, (सं+भृ+क्त।)सम्यक्पुष्टः।सम्यग्भृतः। सम्यक्प्रकारेण भृतः।

सम्भृतिः, स्त्री. (सं+भृ+क्तिन्।) सम्यक्पोषणम्। सम्यग्भरणम्। सम्यग्धारणम्। (सम्भारः। यथा कथासरित्सागरे। १०३। १७१।

"अन्ये युगणकः सूनोर्लग्नाई निर्मिते नृपः।
नक्षारःमरदनोऽत्र तद्विवाहाय सम्भृतिम्॥")

सम्मद, पुं, (सं+भिद्+घञ्।) सिम्धुनद्योः सङ्गमः। इत्यमरः। १। १०। ३५॥ (यथा, मनुः। ८। ३२६।

"परस्वं योऽभिवदेत् तीव्रैरश्वं वनेऽपि वा।
तद्दानं वापि सम्भेदे स संग्रहणमाप्नुयात्॥")

स्खलनम्। (यथा, सुश्रुते। २। ५।

"क्रोध्वं गतित्रयोद्धानां सम्भेदः क्षतसंभवम्॥"

मेलनम्। इति मेदिनी॥

सम्भोग, पुं, (सं+भुज्+घञ्।) भोगः। (यथा, मनुः। ८। २००।

"सम्भोगो दृश्यते यत्र न दृश्येतागमः क्वचित्।
आगमः कारणं तत्र न सम्भोग इति स्थितिः॥"

सुरतम्। (यथा, महाभारते। ४। १३। २८।

"रत्नुत्पादसमारम्भाः साक्षात्कारकरा मम।
आत्मप्रदानसम्भोगात् मामुद्धर्त्तुं त्वमर्हसि॥")

जिनशासनम्। इति मेदिनी॥ हर्षः। इति शब्दरत्नावली॥ केलिनागरः। इति जटाधरः॥ शृङ्गारभेदः। इति त्रिकाण्डशेषः॥ तस्य लक्षणं यथा, साहित्यदर्पणे ३ परिच्छेदे।

"दर्शनस्पर्शनादीनि निषेवेते विलासिनी।
यत्रानुरक्तावन्योन्यं सम्भोगः समुदाहृतः॥"

सम्भोगी,[न्] पुं, (सम्भोगोऽस्यास्तीति। इनिः।) केलिनागरः। इति भूरिप्रयोगः॥ सम्भोगविशिष्टे, त्रि॥

सम्भ्रमः, पुं, (सं+भ्रम+घञ्।) भयादिजनितत्वरा। (यथा, रघुः। ११। २५।

"वीक्ष्य वेदिमथ रक्तबिन्दुभि-
र्बन्धुजीवपृषतैः प्रदूषिताम्।
सम्भ्रमोऽभवदपोढकर्म्मणां
ऋत्विजां श्रुतविकङ्कतस्रुचाम्॥")

तत्पर्य्यायः। संवेगः २। इत्यमरः। १। ७।३४। आवेगः ३। इति तट्टीका॥ प्रवेगः ४ त्वरा ५ त्वरिः ६। इति वाचस्पतिः॥ भयम्। (यथा, रामायणे। ४। २। १४।

"सम्भ्रमस्त्याज्यतामेष सर्व्वैर्वालिसुते महान्॥")

आदरः। इति मेदिनी॥ महाभ्रमः। सूत्रम्। इत्यजयपालः॥

सम्मतिः, स्त्री, (सं+मन+क्तिन्।) अभिलाषः। अनुज्ञा। इति मेदिनी॥ (यथा, किराते। १०। ३६।

कथमिव तव सम्मतिर्भवित्री
समसृतुभिर्मुनिनावधीरितस्य॥")

आत्मज्ञानम्। इत्यजयपालः॥

सम्मदः, पुं, (सम्+मद्+"प्रमदसंमदौ हर्षे।" ३। ३। ६८। इति अप्।) हर्षः। (यथा, साहित्यदर्पणे। ३। १६७।

"मदसम्मदपीड़ाद्यैर्वैस्वर्य्यं गद्गदं विदुः॥")

मत्स्यविशेषः। यथा, विष्णुपुराणे। ४। २। १८।

"बह्वृचश्च सौभरिर्नाम महर्षिरन्तर्ज्जले द्वादशाब्दं कालमुवास। तत्र चान्तर्ज्जले मत्स्यः सम्मदो नामातिबहुप्रजोऽतिप्रमाणो मीनाधिपतिरासीत्॥" तद्वति, त्रि। इत्यमरः। १। ४। २४॥

सम्मर्दः, पुं, (संमृद्यतेऽत्रेति। सं+मृद्+घञ्।) युद्धम्। इति कैचित्॥ (यथा, महाभारते। ५। १६८। १०।

"जवे प्रहारे संमर्दे सर्व्व एवातिमानुषाः।
सर्व्वेर्ज्जिता महीपाला दिग्जयेभरतर्षभ॥"॥

परस्परविमर्दः। यथा, रघुः। १५। १०१।

"यन्नौप्रतरकल्पोऽभूत् संमर्दस्तत्र मज्जताम्।
अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे॥")

सम्मादः, पुं, (सं+मद्+घञ्।) सम्यक्प्रकारेण मत्तता॥

सम्मानः, पुं, (सम्+मन+घञ्।) समादरः। यथा, तिथ्यादितत्त्वे।

"जन्मर्क्षयुक्तां यदि जन्ममासे
यस्य ध्रुवं जन्मतिथिर्भवेच्च।
भवन्ति तद्वत्सरमेव यावत्-
तैरुच्यसम्मानसुखानि तस्य॥"

सम्मानितः, त्रि, (सम्मानोऽस्य जातः। सम्मान+इतच्।) समादृतः। गौरवितः। यथा, मार्कण्डेयपुराणे। ८२। ७०।

"अन्यैरपि सुरैर्देवो भूषणैरायुधैस्तथा।
सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः॥"

सम्मार्ज्जकः, पुं, (सम्मार्ज्जयतीति। सं+मृज+ण्वुल्।) सम्मार्ज्जनी। इति शब्दरत्नावली॥ सम्यङ्मार्ज्जनकर्त्तरि, त्रि॥

सम्मार्ज्जनं, क्ली, (सं+मृज+ल्युट्।) संशोधनम्। यथा, रत्नमालायाम्।

"सम्मार्ज्जनञ्च संशुद्धिः संशोधनविशोधने॥"

सम्मार्ज्जनी, स्त्री, (संमृज्यतेऽनयेति। सं+मृज+ल्युट्। ङीप्।) धूल्यादिमार्ज्जनसाधनी। कॉ स्ता इति झाँटा इति च भाषा। तत्पर्य्यायः। शोधनी २। इत्यमरः। २। २। १८। जरुहनी ३ समूहनी ४। इति शब्दरत्नावली॥ बहुकरी ५ वर्द्धनी ६। इति हेमचन्द्रः॥

सम्मितः, त्रि, (सं+मा+क्तः।) समानपरिमाणः। सदृशः। इति जटाधरः॥

सम्मिश्रः, त्रि, (सम्यक् प्रकारेण मिश्रयतीति। मिश्र मिश्रणे+अच्।) संयुक्तः। मिश्रितः। यथा, तिथ्यादितत्त्वे।

"सम्मिश्रा या चतुर्दश्या अमावस्या भवेत् क्वचित्।
खर्व्वितां तां विदुः केचिदुपेष्वमिति चापरे॥"

सम्मुखः, त्रि, (सम्यक् मुखं यस्य।) अभिमुखागतः। तत्पर्य्यायः। भग्नपृष्ठः२। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। २७। १३८।

"तस्यां विक्रमसिंहाख्यो बभूवान्वर्थयाख्यया।
राजा वैरिमृगा यस्य नैवासन् सम्मुखाः क्वचित्॥"

अभिमुखे, क्ली। सुमुख इति भाषा॥ यथा, कथासरित्सागरे। ४। ७०।

"नाशकत् सम्मुखे स्थातुं कटो ह्यविनयक्रमः।"

तथा च साहित्यदर्पणे। ३। १५४।

"दृष्टा दर्शयति व्रीड़ां सम्मुखं नैव पश्यति॥"

सर्व्वं सुखमिति निपातनात् अन्तलोपे सम्मुखमिति सिद्धम्।" इति शब्दार्थचिन्तामणिः॥ समस्तमुखे च क्ली। इति काशिका। ५। २। १६॥)

सम्मुखी, [न्] पुं, (सम्मुखमस्यास्तीति। इनिः।) दर्पणम्। इति कैचित्॥

सम्मुखीनः, त्रि (सर्व्वस्य मुखस्य दर्शनः। सम्मुख+"यथामुखसम्मुखस्य दर्शनः खः।" ५। २। ६। इति खः।) अभिमुखः। इति हेमचन्द्रः। ३। ७३। (यथा, रघुः। १५। १७।

"अपशूलं तमासाद्य लवणं लक्ष्मणानुजः।
रुरोध सम्मुखीनो हि जयो रन्ध्रप्रहारिणाम्॥")

सम्मूढः, त्रि, (सं+मुह+क्तः।) सम्यङ्मोहयुक्तः। मुग्धः। यथा, शुद्धितत्त्वे।
"मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम्।
यः करोति स सम्मूढो जलबुद्बुदसन्निभे॥"
सम्मूर्च्छजः, पुं, (सम्यक्प्रकारेण मूर्च्छति व्याप्नोतीति। मूर्च्छ व्याप्तौ+अच्। तथाविधः सन् जायते इति जन+डः।) तृणादिः। इति हेमचन्द्रः॥
सम्मूर्च्छनं, क्ली, (सं+मूर्च्छ व्याप्तौ मोहे च+ल्युट्।) सर्व्वतो व्याप्तिः। तत्पर्य्यायः। अभिव्याप्तिः २। इत्यमरः।३। २। ६॥ उच्छ्रायः। मोहः। इति मेदिनी॥
सम्मूर्च्छनोद्भवः, पुं, (संमूर्च्छनादुद्भवतीति। उत्+भू+अच्।) मत्स्यादिः। इति हेमचन्द्रः॥
सम्मृष्टः, त्रि, (सं+मृज+क्तः।) संशोधितः। इत्यमरः। २। ९। ४६॥ हे मक्षिकाद्यपनयनेन शोधिते व्यञ्जनादौ। इति भरतः॥
सम्मोदः, पुः, (सं+मुद्+घञ्।) प्रीतिः। हर्षः। इति शब्दरत्नावली॥
सम्यक्, व्य, समुदयः। इति केचित्॥ यथा,—
"सम्यक् संसाधनं कर्म्म कर्त्तव्यमधिकारिणा।
निष्कामेण सदा पार्थ काम्यं कामान्वितेन च॥"
इति प्रायश्चित्ततत्त्वम्॥
सम्यक्, [च्] त्रि, (सं+अञ्च+ऋत्विगादिना क्विन्। "समः समि।" ६। ३। ९३। इति सम्यादेशः।) सत्यवचनम्। अर्थेन सह समञ्चति सङ्गच्छते। इत्यमरभरतौ॥ मनोज्ञः। सङ्गतः। इति मेदिनी॥(यथा, ऋग्वेदे।२।३।६।
"तन्तुं ततं संवयन्ती समीची
यज्ञस्य पेशः सुदुघे पयस्वती॥")
सम्राट्, [ज्] पुं, (सम्यक् राजते इति। सं+राज+क्विप्। "मो राजि समः क्वौ।" ८। २। २५। इति समो मकारस्य मादेशश्चेन नानुस्वारः।) येन राजसूयेन इष्टम्। यो मण्डलस्येश्वरः। आज्ञया राज्ञः शास्ति यः। इत्यमरः॥ राजसूयसाध्यचक्रवर्त्तिसाध्यो यागविशेषः। तेन येन इष्टं यागः कृतः। यो मण्डलस्य द्वादशराजमण्डलस्य ईश्वरः। यश्च राज्ञो नृपान् आज्ञया शास्ति भृत्यवद्व्यापारेषु नियोजयति स सम्राड्उच्यते। केचित्तु समुच्चयेन त्रीण्येतान्याहुः। राजसूययाजी यः स सम्राट् चतुरब्धिसीमावच्छिन्नाया भूमेर्य ईश्वरः सोऽपि। यश्च कियत्परिमाणाया भूमेः पतीनाज्ञया शास्ति सोऽपि। इह परत्र च सम्यक् राजते इति क्विप् सम्राट् दान्ते म इत्यत्र सम्राड्वर्জ্জनान्नानुस्वारः। इति भरतः॥(यथा, रघुः। २। ५।
"आस्वादयद्भिः कवलैस्तृणानां
कण्डूयनैर्दंशनिवारणैश्च।
अव्याहतैः स्वैरगतैः स तस्याः
सम्राट् समाराधनतत्परोऽभूत्॥")

सयोनिः, पुं, (योनिभिः सह वर्त्तमानः।) इन्द्रः। इति केचित्॥ योन्या सह वर्त्तमाने समानोत्पत्तिस्थानके च, त्रि॥ (यथा ऋग्वेदे।३।१।६।
"सना अत्र युवतयः सयोनी-
रेकं गर्भं दधिरे सप्तवाणीः॥"
"समानमन्तरिक्षं योनिस्थानं यासां ताः।" इति तद्भाष्ये सायणः॥)
सरं, क्ली, (सरतीति। सृ+अच्।) सरोवरः। इति शब्दरत्नावली॥ जलम्॥ इति जटाधरः॥
सरः, पुं, (सृ गतौ+पचाद्यच्।) दध्यग्रम्। तत्पर्य्यायः।
"सरश्च दध्युत्तरगं दधिस्नेहस्तु कट्टरम्।"
इति रत्नमाला॥
गतिः। इति मेदिनी॥ बाणः। लवणः। इति हेमचन्द्रः॥ निर्झरे, पुं, क्ली। इति भरतद्विरूपकोषः॥
सरः, त्रि, (सृ+अच्।) सारकः। भेदकः। यथा, राजवल्लभः।
"पिप्पली मधुरा हृद्या कटुका दीपनी सरा॥"
गमनकर्त्तरि, त्रि॥
सरः, [स्] क्ली, (सरतीति। सृ+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्।) सरोवरः। इत्यमरः। १। १०। २६॥ (यथा, महाभारते। १। १५६। २४।
"तथैव वनदुर्गेषु पुष्पितद्रुमसानुषु।
सरःसु रमणीयेषु पद्मोत्पलयुतेषु च॥")
अस्य विवरणं तड़ागपद्माकरशब्दयोर्द्रष्टव्यम्॥ अस्य जलगुणाः। यथा, राजवल्लभः।
"सारसं लघु तृष्णाघ्नं बल्यं स्वादु कषायवत्॥"
नीरम्। यथा। सरो नीरे तड़ागे च। इति रुद्रः। इत्यमरटीकायां भरतः॥
सरःकाकः, पुं, (सरसः काकः।) हंसः। इति शब्दरत्नावली॥
सरःकाकी, स्त्री, (सरसः काकी।) हंसी। इति शब्दरत्नावली॥
सरकं, क्ली, (सरमेव। स्वार्थे कन्।) सरोवरः। इति शब्दरत्नावली॥ आकाशम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
सरकः, पुं, क्ली, (सरतीति। सृ+वुन्।) शोधुपात्रम्। शोधुपानम्। इक्षुशोधु। अच्छिन्नाध्वगपङ्क्तिः। इति मेदिनी॥ मद्यपरिवेशनम्। इत्यमरटीकायां भरतः॥ (यथा, कथासरित्सागरे। ५४। १९९।
"प्रासादायां निशि प्रच्छ निजं परिजनञ्च सः।
किमद्य रात्रिपर्य्यायसमस्ति नः सरकं न वा॥")
सरकः, त्रि, (सुष्ठु सरतीति। सृ+"प्रसृस्रुभ्यः समभिहारे वुन्।" ३।१। २४९। इति वुन्।) गतिशीलः। इति शब्दरत्नावली॥
सरघा, स्त्री, (सर मधुविशेष हन्तीति। हन+डः। निपातनात् साधुः।) मधुमक्षिका। इत्यमरः। २। ५। २६॥ (यथा, रघुः। ४। ६३।
"भल्लापवर्জ্জितैस्तेषां शिरोभिः श्मश्रुलैर्महीम्।
तस्तार सरघाध्यासैः सक्षौद्रपटलैरिव॥")
सरङ्गः, पुं, (सरतीति। सृ+अङ्गच्।) चतुष्पात्। पक्षी। इति संक्षिप्तसारोणादिवृत्तिः॥
सरजं, क्ली, (सरात् जायते इति। जन+डः।) नवनीतम्। हैयङ्गवीनम्। इति हारावली॥ (मलिनम्। यथा, भागवते। ३। २३। २३।
"सा तद्भर्त्तुः समादाय वचः कुवलयेक्षणा।
सरजं बिभ्रती वासो वेणीभूतान् स्वमूर्द्धजान्॥")
सरजाः, [स्] स्त्री, (रजसा सह वर्त्तमाना।) ऋतुमती स्त्री। तत्पर्य्यायः। मलिष्ठा २। इति त्रिकाण्डशेषः॥ (पङ्कजे, क्ली। इति काशिका। ५। ४।७७॥)
सरट्, पुं, सरतीति। सृ गतौ+"सर्त्तेरटिः।" उणा० १। १३३। इति अटिः।) वायुः। मेघः। इत्युणादिकोषः॥ मधुमक्षिका। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ कृकलासः। इत्यमरटीका॥
सरटः, पुं, (सरतीति। सृ गतौ+शकादित्वाट्टन्। कृकलासः। इत्यमरः।२। ५। १२॥ गिरगिट् इति काँकलास इति च भाषा॥ तत्पतनादिफलं यथा,—
"वल्गाः प्रपाते च फलं सरटस्य प्ररोहणे।
शौर्य्यं राजश्रियोऽवाप्तिर्भाले चैश्वर्य्यमेव च॥
कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनम्।
नासिकायाञ्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनम्॥
कण्ठे चैव श्रियोऽवाप्तिर्भुजयोर्विभवो भवेत्।
धनलाभो बाहुमूले करयोर्धनसञ्चयः॥
स्तनमूले च सौभाग्यं हृदि सौख्यविवर्द्धनम्।
पृष्ठे नित्यं महीलाभः पार्श्वयोर्बन्धुदर्शनम्॥
कटिद्वये वस्त्रलाभो गुह्ये मृत्युसमागमः।
जङ्घे चार्थक्षयो नित्यं गुदे रोगभयं भवेत्॥
ऊर्व्वोश्च वाहनावाप्तिर्जानुजङ्घेऽर्थसञ्चयः।
वामदक्षिणयोः पादोर्भ्रमणं नियतं भवेत्॥
वल्गाः प्ररोहणे चैव पतने सरटस्य च।
व्यत्यासाच्च फलं चैव तद्दैवं प्रजायते॥
वल्गाः प्ररोहणं रात्रौ सरटस्य प्रपातनम्।
निधनार्थाय भवति व्याधिपीड़ाविपर्य्ययौ॥
पतनानन्तरं चैवारोहणं यदि जायते।
पतने फलमुत्कृष्टं रोहणेऽन्यत् फलं भवेत्॥
आरोहणञ्चार्द्धवक्त्रे अधोवक्त्रे च पातनम्।
भवेदिष्टफलं तस्य तत्फलं जायते ध्रुवम्॥
स्पृष्टमात्रेण यः सद्यः सचेलं जलमाविशेत्।
पञ्चगव्यप्राशनञ्च कुर्य्यादर्कावलोकनम्॥
वल्लीरूपं सुवर्णस्य रक्तवस्त्रेण वेष्टयेत्।
पूजयेत् गन्धपुष्पाद्यैस्तदग्रे पूर्णकुम्भके॥
पञ्चगव्यं पञ्चरत्नं पञ्चामृतं सपल्लवम्।
पञ्चदर्भकषायञ्च निःक्षिप्यावाहयेत्ततः॥
पूजयेद्गन्धपुष्पाद्यैर्लोकपालांस्तथा क्रमात्।
मृत्युञ्जयेन मन्त्रेण समिद्भिः खादिरैः शुभैः॥
तिलैर्व्याहृतिभिर्हुत्वाष्टोत्तरसहस्रकम्॥"
वल्ली गृहगोधिका। मृत्युञ्जयमन्त्रस्यार्थकमस्तः

इति विद्याकरः इति ज्योतिस्तत्त्वम्॥ (वातः। इत्यादिटीकायामुज्ज्वलदत्तः। ४। १०५॥)
सरटिः, पुं, (सरतीति + सृ + अटिन्।) वायुः। मेघः। इत्यादिकोषः॥
सरटुः, पुं, (सृ + अटुः।) शकलासः। इत्यादिकोषः॥
सरणं, क्ली, (सरतीति। सृ गतौ + "सृघक्रम्यदन्दम्यसृगृधीति।" ३।२। १५०। इति युच्।) लोहमलम्। इति हेमचन्द्रः॥ (सृ + ल्युट्।) गमनम्॥ (यथा, महाभारते। १। २३१। ५।
"अजातपक्षाश्च सुता न शक्ताः सरणे मम॥")
सरणा, स्त्री, (सरतीति + सृ + युच्।) प्रसारणी। इत्यमरः। २। ४। १५२॥ गन्धभादालि इति भाषा॥ त्रिवृता। इति शब्दमाला॥ तेउड़ी इति भाषा॥ गमनकर्त्तरि, त्रि॥
सरणिः, स्त्री, (सरत्यनयेति। सृ गतौ + "अर्त्तिसृधृधमीति।" उणा० २।१०३। इति अनिः।) पङ्क्तिः। पन्थाः। इति मेदिनी॥ (यथा, राजतरङ्गिण्याम्। ३। ४०१।
"सरसां सरणिं त्यक्त्वा जीवितस्पृहया समम्।
गुहां तेन ततः सान्द्रतमोभीमां व्यगाहत॥")
प्रसारणी। इत्यमरटीकायां भरतः॥
सरणी, स्त्री, (सरणि + वा ङीष्।) पङ्क्तिः। पन्थाः। इति मेदिनी॥ प्रसारणी। इत्यमरटीकायां भरतः। २। ४। १५॥
सरण्डः, पुं, (सरतीति। सृ + "अण्डन् शकृद्भसृजः।" उणा० १। १२८। इति अण्डन्।) भूर्त्तः। सरटः। भूषणभेदः। इति मेदिनी॥ कासुकः। पक्षी। इति शब्दरत्नावली॥
सरण्यं, त्रि, (सरण + यञ्। गम्यम्। गन्तव्यम्। सरणशब्दात् स्वार्थप्रत्ययेन निष्पन्नम्॥
सरण्युः, पुं, (सरतीति। सृ गतौ + "सृयुवचिभ्योऽन्युलागजक्षुचः।" उणा० ३। ८१। इति अन्युच्। मेघः। वायुः। जलम्। इति शब्दरत्नावली॥ वसन्तः। अग्निः। इत्युणादिकोषः॥
सरत्, क्ली, (सृ + शतृ।) सूत्रम्। इति शब्दमाला॥ (गन्तरि, त्रि, ॥)
सरत्रिः, पुं स्त्री, रत्रिः। इति केचित्॥
सरद्वान्, [त्] पुं, गौतमसुनिः। गौतमसुनिपुत्रः। इति पुराणम्॥ तालव्यशादिषु॥
सरपत्रिका, स्त्री, (सरपत्रं जलस्थपत्रमस्त्यस्या इति। ठन्। टापि अत इत्वम्।) पद्मम्। पद्मपत्रम्। इति शब्दरत्नावली॥
सरमा, स्त्री, (रमया शोभया सह वर्त्तमाना।) राक्षसीभेदः। सा च विभीषणपत्नी। (इयं लङ्कावाससमये सीतायाः प्रणयिनी आसीत्। एतद्वृत्तान्तस्तु रामायणे लङ्काकाण्डे। ३२। ३४। अध्याययोर्द्रष्टव्यः॥) कुक्कुरी। देवशुनी। इति मेदिनी॥ (यथा, महाभारते। १। ३। ११।
"जनमेजय एवमुक्तो देवशुन्या सरमया भृशं सन्त्रस्तो विषण्णवदासीत्।") काश्यपपत्नीविशेषः। तदपत्यानि भ्रमरादयः। यथा,—
"गोलाङ्गूलशकोरश्च चैत्यापत्यं तथैव च।
अपत्यं सरमायाश्च गणौ वै भ्रमरादयः॥"
इति वह्निपुराणे काश्यपीयनामाध्यायः॥
सरयुः, पुं, (सरतीति। सृगतौ + "सर्त्तेरयुः।" उणा ३। २२। इति अयुः।) वायुः। इति त्रिकाण्डशेषः॥
सरयुः, सरयूः } स्त्री, (सरतीति। सृ गतौ + "सर्त्तेरयुः।" उणा० ३।२२। इति अयुः। "सर्त्तेरयूः।" इति केचित्।) नदीविशेषः। इत्युणादिकोषः। अस्या जलगुणाः।
"सरयूसलिलं स्वादु बलपुष्टिप्रदायकम्।"
इति राजनिर्घण्टः॥
तस्या उत्पत्तिर्यथा,—
"एवं विवाद्य विधिवत् सौवर्णे मानसाचले।
अवन्तीं वशिष्ठस्तु मोदमाप तया सह॥
तत्र यत् पतितं तोयं मानसाचलकन्दरे।
तत्तोयं सप्तधा भूत्वा मानसाचलकन्दरात्॥
हेमाद्रेः कन्दरे सानौ सरस्याश्च पृथक् पृथक्।
यत्तोयं सङ्गतं कुर्य्याद्वंशं वंशविधौ।
तेनाभूत् सरयूर्नाम्ना नदी पुण्यतमा शुभा॥"
इति कालिकापुराणे २३ अध्यायः॥"
सरलः, पुं, (सरतीति। सृ + "तृषादिभ्यश्चित्।" उणा० १।१०८। इति कलच्। बाहुलकात् गुणः। इत्युज्ज्वलदत्तः।) वृक्षविशेषः। (यथा, कुमारे। १। ९।
"कपोलकण्डूः करिभिर्विनेतुं
विघट्टितानां सरलद्रुमाणाम्।
यत्र स्रुतक्षीरतया प्रसूतः
सानूनि गन्धः सुरभीकरोति॥")
तत्पर्य्यायः। पीतद्रुः २ पूतिकाष्ठम् ३। इत्यमरः। २।४।६०॥ धूपवृक्षकः ४। इति शब्दरत्नावली॥ पीतदारुः५ भद्रदारुः६ मनोज्ञः७। इति रत्नमाला॥ पीतः ८ स्निग्धदारुसंज्ञः ९। स्निग्धः १० मरिचपत्रकः ११ पीतवृक्षः १२ सुरभिदारुः १३। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातत्वग्दोषशोफकण्डूतिव्रणनाशित्वम्। कोष्ठशुद्धिदाढत्वम्। इति राजनिर्घण्टः॥ अन्यच्च भावप्रकाशे।
"सरलः पीतवृक्षः स्यात् तथा सुरभिदारुकः।
सरलो मधुकस्निग्धः कटुपाकरसो लघुः॥
स्निग्धोष्णः कर्णकण्ठाक्षिरोगरुचीकरः स्मृतः।
कफानिलक्षयश्वासकासमेदोविनाशनः॥"
वह्निः। अग्निः। इति धरणिः॥
सरलः, त्रि, (सृ + कलच्। बाहुलकात् गुणः।) उदारः। अवक्रः। इति मेदिनी॥ (यथा, कथासरित्सागरे। ४।
"आदिश्यानाययामास गणकान् सरलाशयः॥")
सरलद्रवः, पुं, (सरलस्य द्रवः।) सरलनिर्यासः। टारपीन इति भाषा। तत्पर्य्यायः। पायसः २ श्रीवासः ३ शुकधूपः ४ श्रीवेष्टः ५। इत्यमरः। २।४।१२९॥ तैलपर्णी ६ श्रीपिष्टः ७। इति जटाधरः॥ श्रीवेष्टः ८ वासः ९ यवासः १० घृताह्वयः ११ दध्याह्वयः १२ क्षीराह्वयः १३ अवक्रः १४ क्षीरशोः १५ वायसः १६ इति शब्दरत्नावली॥ अस्य गुणाः श्रीवेष्टशब्दे द्रष्टव्याः॥
सरला, स्त्री, (सरल + टाप्।) त्रिपुटा। इत्यमरः। २।४।१०८॥ नदीभेदः। इति भूरिप्रयोगः॥
सरलाङ्गः, पुं, (सरलः पीतद्रुरङ्गमस्य।) श्रीवेष्टः। इति राजनिर्घण्टः॥
सरव्यं, क्ली, (सरं रागं व्यथतीति। व्यध + डः।) लक्ष्यम्। इत्यमरटीका॥ तालव्यशादिषु॥
सरसं, क्ली, (रसेन जलेन सह वर्त्तमानम्।) सरोवरः। इति शब्दरत्नावली॥ रसयुक्ते, त्रि यथा,—
"कविता कोमलवनिता यायाता सुखदायिका बलादानीयमाना सा सरसा विरसा भवेत्॥"
इत्युद्भटः॥
सरसम्पुतं, क्ली, त्रिकण्टकवृक्षः। तेकाँटासिज् इति भाषा॥ यथा, शब्दचन्द्रिकायाम्।
"त्रिकण्टः पत्रगुप्तश्च पेषणः सरसम्पुतम्॥"
सरसा, स्त्री, (रसेन सह वर्त्तमाना।) श्वेतत्रिवृता। इत्यमरटीकायां रायमुकुटः॥
सरसिजं, क्ली, (सरसि जायते इति। जन + डः। सप्तम्या अलुक्।) पद्मम्। इतिराजनिर्घण्टः॥ (यथा, शाकुन्तले १ अङ्के।
"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥"
सरोवरजाते, त्रि। यथा, सुश्रुते। १। ४६।
"अधस्तादुपरो ज्ञेया मत्स्याः सरसिजाः स्मृताः।"
सरसी, स्त्री, (सृ + असुन्। गौरादित्वात् ङीष्।) सरोवरः। इत्यमरः। १। १०। २८॥ (यथा, रघुः। १। ४३।
"सरसीष्वरविन्दानां वीचिविक्षोभशीतलम्।
आमोदमुपजिघ्रन्ती स्वनिश्वासानुकारिणम्॥")
सरसीकः, पुं, (सरस्यां कायति शब्दायते इति। कै + कः।) सारसपक्षी। इति शब्दरत्नावली॥
सरसीरुहं, क्ली, (सरस्यां रोहतीति। रुह + कः।) पद्मम्। इत्यमरः। १। १०। ४०॥ (यथा, गीतगोविन्दे। ८। २।
"तामनुसर सरसीरुहलोचन या तव रतिविषादम्॥")
सरस्वती, स्त्री, (सरो नीरं तद्वत् रसो वाक्यस्या इति सरस् + मतुप्। मस्य वः। ततो मत्वर्थ इति भत्वान्न पदकार्य्यम्।) नदी। (यथा, महाभारते। १। २१४। ३।
"ते तया तत्र सा वीरैः पतिभिः सह पञ्चभिः।
बभूव परमप्रीता नागैरिव सरस्वती॥")
वाणी। यथा, रघुः। १५। ४६।
"उच्चचार पुरस्तस्य गुह्यरूपा सरस्वती॥"
क्षीरम्। गौः। नदीभेदः। मनुपत्नी। इति

मेदिनो ॥ ज्योतिष्मती। ब्राह्मी। इति राजनिर्घण्टः ॥ सोमलता। इति शब्दचन्द्रिका ॥ बुद्धशक्तिविशेषः। इति त्रिकाण्डशेषः ॥ दुर्गा। यथा, देवीपुराणे ४५ अध्याये।

"स्वराः स्वरणशीलत्वात् गेयाख्याः सप्त कीर्त्तिताः।
अतिप्रापणदाने वा तेन देवी सरस्वती ॥"

वाग्देवता। तत्पर्य्यायः। ब्राह्मी २ भारती ३ भाषा ४ गीः ५ वाक् ६ वाणी ७। इत्यमरः ॥ इरा ८ सारदा ९ गिरा १० गिरांदेवी ११ गौर्ईवी १२ ईश्वरी १३ वाचा १४ वचसामीशा १५ वाग्देवी १६ वर्णमातृका १७। इति शब्दरत्नावली ॥ गीः १८ श्रीः १९। इति जटाधरः ॥ वाक्येश्वरी २० अन्त्यसन्ध्येश्वरी २१ सायंसन्ध्यादेवता २२। इति कविकल्पलता ॥* तस्या उत्पत्त्यादि यथा, ब्रह्मवैवर्त्ते ब्रह्मखण्डे ३। ५२—६१।

सौतिरुवाच।

"आविर्ब्बभूव कन्यैका धर्म्मस्य वामपार्श्वतः।
मूर्त्तिर्मूर्त्तिमती साक्षात् द्वितीया कमलालया॥
आविर्ब्बभूव तत्पश्चान्मुखतः परमात्मनः।
एका देवी शुक्लवर्णा वीणापुस्तकधारिणी ॥
कोटिपूर्णेन्दुशोभाढ्या शरत्पङ्कजलोचना।
वह्निशुद्धांशुकाधाना रत्नाभरणभूषिता ॥
सस्मिता सुदती वामा सुन्दरीणाञ्च सुन्दरी।
श्रेष्ठा श्रुतीनां शास्त्राणां विदुषां जननी परा॥
वागधिष्ठातृदेवी सा कवीनामिष्टदेवता।
शुद्धसत्त्वस्वरूपा च शान्तरूपा सरस्वती ॥
गोविन्दपुरतः स्थित्वा जगौ प्रथमतः सुखम्।
तन्नामगुणकीर्त्तिञ्च वीणया सा ननर्त्त च ॥
कृतानि यानि कर्म्माणि कल्पे कल्पे युगे युगे।
तानि सर्व्वाणि हरिणा तुष्टाव संपुटाञ्जलिः ॥

सरस्वत्युवाच।

रासमण्डलमध्यस्थं रासोल्लाससमुत्सुकम्।
रत्नसिंहासनस्थञ्च रत्नभूषणभूषितम् ॥
रासेश्वरं रासकरं वरं रासेश्वरीश्वरम्।
रासाधिष्ठातृदेवञ्च वन्दे रासविनोदिनम्॥
रासायासपरिश्रान्तं रासे राजविहारिणम्।
रासोत्सुकानां गोपीनां कान्तं श्रान्तं मनोहरम् ॥
प्रणम्य तं यामीत्युक्त्वा प्रहृष्टवदना सती।
उवास सा सकामा च रत्नसिंहासने वरे ॥
इति वाणीकृतं स्तोत्रं प्रातरुत्थाय यः पठेत्।
बुद्धिमान् सोऽपि विद्यावान् लक्ष्मीवान् पुत्रवान् सदा ॥"

अपिच तत्रैव गणेशखण्डे। ४०। ६१—६७।

"सा च शक्तिः सृष्टिकाले पञ्चधा चेश्वरेच्छया
राधा पद्मा च सावित्री दुर्गा देवी सरस्वती ॥
प्राणाधिष्ठातृदेवी या देवी कृष्णस्य परमात्मनः।
प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता ॥
ऐश्वर्य्याधिष्ठातृदेवी सर्व्वमङ्गलकारिणी।
परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता ॥
विद्याधिष्ठातृदेवी या देवी परमेशस्य दुर्लभा।
वेदशास्त्रयोगमाता सा सावित्री प्रकीर्त्तिता ॥
बुद्ध्यधिष्ठातृदेवी या देवी सर्व्वशक्तिस्वरूपिणी।
सर्व्वज्ञानात्मिका सर्व्वा सा दुर्गा दुर्गनाशिनी ॥
वाग्धिष्ठातृदेवी या देवी शास्त्रज्ञानप्रदा सदा।
कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती ॥
पञ्चधादौ स्वयं देवी मूलप्रकृतिरीश्वरी।
ततः सृष्टिक्रमेणैव बहुधा कलया च सा ॥"*॥

तस्याः पूजादिर्यथा,—

श्रीनारायण उवाच।

"आदौ सरस्वतीपूजा श्रीकृष्णेन विनिर्म्मिता।
यत्प्रसादान्मुनिश्रेष्ठ मूर्खो भवति पण्डितः ॥
आविर्भूता यदा देवी वक्त्रतः कृष्णयोषितः।
इयेष कृष्णं कामेन कामुकी कामरूपिणी ॥
स च विज्ञाय तद्भावं सर्व्वज्ञः सर्व्वमातरम्।
तामुवाच हितं सत्यं परिणामसुखावहम् ॥

श्रीकृष्ण उवाच।

भज नारायणं साध्वी मदंशं तं चतुर्भुजम्।
युवानं सुन्दरं सर्व्वगुणयुक्तञ्च मत्समम् ॥
कामज्ञं कामिनीनाञ्च तासाञ्च कामपूरकम्।
कोटिकन्दर्पलावण्यलीलान्यक्कृतमीश्वरम् ॥
कान्ते कान्तञ्च मां कृत्वा यदि स्थातुमिहेच्छसि
त्वत्तो बलवती राधा न ते भद्रं भविष्यति ॥
यो यस्मात् बलवान् वापि ततोऽन्यं रक्षितुं क्षमः।
कथं परान् साधयति यदि स्वयमनीश्वरः॥
सर्व्वेशः सर्वशास्त्रज्ञं राधां बाधितुमक्षमः।
तेजसा तत्समा सा च रूपेण च गुणेन च॥
प्राणाधिष्ठातृदेवी सा प्राणांस्त्यक्तुञ्च कः क्षमः।
प्राणतोऽपि प्रियः कुत्र केषां वास्ति च कश्चन ॥
त्वं भद्रे गच्छ वैकुण्ठं तव भद्रं भविष्यति।
पतिं तमीश्वरं कृत्वा मोदस्व सुचिरं सुखम् ॥
लोभमोहकामकोपमानहिंसाविवर्जिता।
तेजसा तत्समा लक्ष्मी रूपेण च गुणेन च ॥
तया सार्द्धं तव प्रीत्या गच्छत्कालं प्रयास्यति।
गौरवं महदाप्स्यं करिष्यति पतिर्द्वयोः ॥
प्रतिविश्वेषु ते पूजां महतीं ते प्रदास्यितः।
माघस्य शुक्लपञ्चम्यां विद्यारम्भे च सुन्दरि ॥
मानवा मनवो देवा मुनीन्द्राश्च समुद्यवः।
सन्तश्च योगिनः सिद्धा नागगन्धर्व्वराक्षसाः ॥
महत्त्वेन करिष्यन्ति कल्पे कल्पे त्वयावधि।
भक्तियुक्ताश्च दत्त्वा चैवोपचाराणि षोडश।
काण्वशाखोक्तविधिना ध्यानेन स्तवनेन च ॥
जितेन्द्रियाः संयताश्च घटे च पुस्तकेऽपि च।
कृत्वा सुवर्णगुटिकां गन्धचन्दनचर्चिताम् ॥
कवचं ते ग्रहीष्यन्ति कण्ठे वा दक्षिणे भुजे।
पठिष्यन्ति च विद्वांसः पूजाकाले च पूजिते ॥
इत्युक्त्वा पूजयामास तां देवीं सर्वपूजितः।
ततस्तत्पूजनञ्चक्रुर्ब्रह्मविष्णुमहेश्वराः ॥
अनन्तश्चापि धर्म्मश्च मुनीन्द्राः सनकादयः।
सर्व्वे देवाश्च मनवो नृपाश्च मानवादयः।
बभूव पूजिता नित्या सर्व्वलोकैः सरस्वती ॥

नारद उवाच।

पूजाविधानं स्तवनं ध्यानं कवचमीप्सितम्।
पूजोपयुक्तनैवेद्यं पुष्पञ्च चन्दनादिकम् ॥
वद वेदविदां श्रेष्ठ श्रोतुं कौतूहलं मम।
वर्त्तते साम्प्रतं शश्वत् किमिदं श्रुतिसुन्दरम् ॥

श्रीनारायण उवाच।

शृणु नारद वक्ष्यामि काण्वशाखोक्तपद्धतिम्।
जगन्मातुः सरस्वत्याः पूजां विधिसमन्विताम् ॥
माघस्य शुक्लपञ्चम्यां विद्यारम्भदिनेऽपि च।
पूर्व्वेऽह्नि संयमं कृत्वा तत्राह्नि संयतः शुचिः ॥
स्नात्वा नित्यक्रियां कृत्वा घटं संस्थाप्य भक्तितः
संपूज्य देवषट्कञ्च नैवेद्यादिभिरेव च ॥
गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम्।
संपूज्य संयतो गेही ततोऽभीष्टं प्रपूजयेत् ॥
ध्यानेन वक्ष्यमाणेन ध्यात्वावाह्य घटे बुधः।
ध्यात्वा पुनः षोडशोपचारेण पूजयेद्व्रती ॥
पूजोपयुक्तं नैवेद्यं यदुक्तं दे निरूपितम्।
वक्ष्यामि साम्प्रतं किञ्चित् यथाधीतं यथागमम् ॥
नवनीतं दधि क्षीरं लाजञ्च तिलसङ्कुकम्।
इक्षुमिक्षुरसं शुक्लवर्णपक्वगुडं मधु ॥
खण्डितं शर्करा शुक्लधान्यस्याचतमक्षतम्।
अखिन्नशुक्लधान्यस्य पृथुकं शुक्लमोदकम् ॥
घृतसैन्धवसंस्कारैर्हविष्यान्नञ्च व्यञ्जनैः।
यवगोधूमचूर्णानां पिष्टकं घृतसंस्कृतम् ॥
पिष्टकं खण्डितकाम्रापि पक्वरम्भाफलस्य च।
परमान्नञ्च सघृतं पिष्टान्नञ्च सुधोपमम् ॥
नारिकेलं तदुदकं केशरं मूलमार्द्रकम्।
पक्वरम्भाफलं चारु श्रीफलं बदरं फलम् ॥
कालदेशोद्भवं पक्वफलं शुक्लं सुसंस्कृतम् ॥
सुगन्धि शुक्लपुष्पञ्च सुगन्धि शुक्लचन्दनम्।
नवीनशुक्लवस्त्रञ्च शङ्खञ्च सुन्दरं सुनेः।
माल्यञ्च शुक्लपुष्पाणि शुक्लहारञ्च भूषणम् ॥
यदुक्तञ्च श्रुतौ ध्यानं प्रशस्तं श्रुतिसुन्दरम् ॥
तन्निबोध महाभाग भयभञ्जनकारणम् ॥
सरस्वतीं शुक्लवर्णां स्मितां सुमनोहराम्।
कोटीचन्द्रप्रभामुष्टपुष्टश्रीयुक्तविग्रहाम् ॥
वह्निशुद्धांशुकाधानां स्मितां सुमनोहराम् ॥
रत्नसारेन्द्रनिर्म्माणवरभूषणभूषिताम्।
सुपूजितां सुरगणैर्ब्रह्मविष्णुशिवादिभिः ॥
वन्दे भक्त्या च वन्द्यां तां मुनीन्द्रमनुमानवैः।
एवं ध्यात्वा च मूलेन सर्व्वं दत्त्वा विचक्षणः॥
संस्तूय कवचं धृत्वा प्रथमेहण्डवह्नुवि।
येषां येषामिष्टदेवी तेषां नित्या क्रिया मुने ॥
विद्यारम्भे च वर्षान्ते सर्व्वेषां पञ्चमीदिने।
सर्व्वोपयुक्तो मूलस्य वैदिकाष्टाक्षरः परम् ॥
येषां येनोपदेशो वा तेषां समूल एव च।
सरस्वतीचतुर्थ्यन्तो वह्निजायान्त एव च ॥
लक्ष्मीर्मायादिकश्चैव मन्त्रोऽयं कल्पपादपः।
पुरा नारायणश्चैनं वाल्मीकाय कृपानिधिः ॥
ददौ जाह्नवीतीरे पुष्करक्षेत्रे च भारते।
भृगुर्ददौ च शुक्राय पुष्करे सूर्य्यपर्व्वणि ॥

चन्द्रपर्व्वणि मारीचो ददौ वाक्पतये मुदा ।
भृगवे च ददौ तुष्टो ब्रह्मा वदरिकाश्रमे ॥
आस्तीकाय जरत्कारुर्ददौ क्षीरोदसन्निधौ ।
विभाण्डको ददौ मेरौ ऋष्यशृङ्गाय धीमते ॥
शिवः कणादमुनये गौतमाय ददौ मुदा ।
सूर्य्याय याज्ञवल्क्याय तथाकात्यायनाय च ॥
शेषः पाणिनये चैव भरद्वाजाय धीमते ।
ददौ शाकटायनाय सुतले बलिसंसदि ॥
चतुर्लक्षजपेनैव मन्त्रः सिद्धो भवेन्नृणाम् ।
यदि स्यात् सिद्धमन्त्रोऽपि बृहस्पतिसमो भवेत् ।
कवचं शृणु विप्रेन्द्र यद्दत्तं विधिना पुरा ।
विश्वजेष्ठं विश्वजयं भृगवे गन्धमादने ॥

भृगुरुवाच ।

ब्रह्मन् ब्रह्मविदां श्रेष्ठ ब्रह्मज्ञानविशारद ।
सर्व्वज्ञ सर्व्वजनक सर्व्वेश सर्व्वपूजित ॥
सरस्वत्याश्च कवचं ब्रूहि विश्वजयं प्रभो ।
श्रुतयाममन्त्राणां समूहसंयुतं परम् ॥

ब्रह्मोवाच ।

शृणु वत्स प्रवक्ष्यामि कवचं सर्व्वकामदम् ।
श्रुतिसारं श्रुतिसुखं श्रुत्युक्तं श्रुतिपूजितम् ॥
उक्तं कृष्णेन गोकुले मह्यं वृन्दावने वने ।
रासेश्वरेण विभुना रासे च राससण्डले ॥
अतीवगोपनीयञ्च कल्पवृक्षपरं वरम् ।
श्रुताद्भुतमन्त्राणां समूहैश्च समन्वितम् ॥
यद्धृत्वा पठनाद्ब्रह्मन् बुद्धिमांश्च बृहस्पतिः ।
यद्धृत्वा भगवान् शुक्रः सर्व्वदैत्येषु पूजितः ॥
पठनाद्धारणाद्वाग्मी कवीन्द्रो वाल्मिको मुनिः ।
सायम्भुवो मनुश्चैव यद्धृत्वा सर्व्वपूजितः ॥
कणादो गौतमः कण्वः पाणिनिः शाकटायनः ।
ग्रन्थञ्चकार यद्धृत्वा दक्षः कात्यायनः स्वयम् ॥
धृत्वा वेदविभागञ्च पुराण्यखिलानि च ।
चकार लीलामात्रेण कृष्णद्वैपायनः स्वयम् ॥
शातातपश्च संवर्त्तो वशिष्ठश्च पराशरः ।
यद्धृत्वा पठनाद्ग्रन्थं याज्ञवल्क्यश्चकार सः ॥
ऋष्यशृङ्गो भरद्वाजश्चास्तीको देवलस्तथा ।
जैगीषव्यो याज्ञलिश्च यद्धृत्वा सर्व्वपूजितः ॥
कवचस्यास्य विप्रेन्द्र ऋषिरेव प्रजापतिः ।
स्वयं छन्दश्च बृहती देवी रासेश्वरः प्रभुः ॥
सर्व्वतत्त्वपरिज्ञानसर्व्वार्थसाधनेषु च ।
कवितासु च सर्व्वासु विनियोगः प्रकीर्त्तितः ॥
श्रीं ह्रीं सरस्वत्यै स्वाहा शिरो मेऽपातु सर्व्वतः ।
श्रीं वाग्देवतायै स्वाहा भालं मे सर्व्वदावतु ॥
ॐ सरस्वत्यै स्वाहेति श्रोत्रं पातु निरन्तरम् ।
ॐ श्रीं ह्रीं भारत्यै स्वाहा नेत्रयुग्मं सदावतु ।
ॐ ह्रीं वाग्वादिन्यै स्वाहा नासां मे सर्व्वतो-
ऽवतु ॥
ह्रीं विद्याधिष्ठातृदेव्यै स्वाहा चोष्ठं सदावतु ॥
ॐ श्रीं ह्रीं ब्राह्म्यै स्वाहेति दन्तपङ्क्तिं सदावतु ।
ऐमित्येकाक्षरो मन्त्रो मम कण्ठं सदावतु ।
ॐ श्रीं ह्रीं पातु मे ग्रीवां स्कन्धं मे श्रीं सदा-
वतु ।
ॐ वागधिष्ठातृदेव्यै स्वाहा सर्व्वं सदावतु ॥
ॐ सर्व्वकण्ठवासिन्यै स्वाहा प्राच्यां सदावतु ।
ॐ सर्व्वजिह्वावासिन्यै स्वाहाग्निदिशि रक्षतु ॥
ॐ ऐं ह्रीं श्रीं क्लीं सरस्वत्यै बुधजनन्यै स्वाहा
सततं मन्त्रराजोऽयं दक्षिणे मां सदावतु ॥
ऐं ह्रीं श्रीं त्र्याक्षरो मन्त्रो नैर्ऋत्यां सर्व्वदावतु ॥
ॐ ऐं कविजिह्वापवासिन्यै स्वाहा मां वारुणे-
ऽवतु ॥
सदम्बिकायै स्वाहा च वायव्ये मां सदावतु ।
ॐ गद्यपद्यवासिन्यै स्वाहा मामुत्तरेऽवतु ॥
ऐं सर्व्वशास्त्रवासिन्यै स्वाहैशान्ये सदावतु ।
ॐ ह्रीं सर्व्वपूजितायै स्वाहा चोर्द्धं सदावतु ॥
ऐं ह्रीं पुस्तकवासिन्यै स्वाहाधो मां सदावतु
ॐ ग्रन्थबीजस्वरूपायै स्वाहा मां सर्व्वतोऽवतु ॥
इति ते कथितं विप्र सर्व्वमन्त्रौघविग्रहम् ।
इदं विश्वजयं नाम कवचं ब्रह्मरूपिणम् ॥
पुरा श्रुतं धर्म्मवक्त्रात् पर्व्वते गन्धमादने ।
तव स्नेहान्मयाख्यातं प्रवक्तव्यं न कस्यचित् ॥
गुरुमभ्यर्च्च्य विधिवत् वस्त्रालङ्कारचन्दनैः ।
प्रणम्य दण्डवद्भूमौ कवचं धारयेत् सुधीः ॥
पञ्चलक्षजपेनैव सिद्धन्तु कवचं भवेत् ।
यदि स्यात् सिद्धकवचो बृहस्पतिसमो भवेत् ॥
महावाग्मी कवीन्द्रश्च त्रैलोक्यविजयी भवेत् ।
शक्नोति सर्व्वं जेतुञ्च कवचस्य प्रसादतः ॥
इदञ्च काण्वशाखोक्तं कवचं कथितं मुने ।
स्तोत्रं पूजाविधानञ्च ध्यानञ्च वन्दनं तथा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे सरस्वतीकवचम् ।
४ । ५८—९१ ॥ * ॥

श्रीनारायण उवाच ।

"वाग्देवतायाः स्तवनं श्रूयतां सर्व्वकामदम् ।
महामुनिर्याज्ञवल्क्यो येन तुष्टाव तां पुरा ॥
गुरुशापाच्च स मुनिर्हतविद्यो बभूव ह ।
तदा जगाम दुःखार्त्तो रविस्थानञ्च पुण्यदम् ॥
स प्राप तपसा सूर्य्यं लोलार्के दृष्टिगोचरे ।
तुष्टाव सूर्य्यं शोकेन रुरोद च मुहुर्मुहुः ॥
सूर्य्यस्तं पाठयामास वेदवेदाङ्गमीश्वरः ।
उवाच स्तुहि वाग्देवीं भक्त्या च स्मृतिहेतवे ।
तमित्युक्त्वा दीननाथोऽप्यन्तर्द्धानं चकार सः ।
मुनिः स्नात्वा च तुष्टाव भक्तिनम्रात्मकन्धरः ॥

याज्ञवल्क्य उवाच ।

कृपां कुरु जगन्मातर्नमामेव हतत्विषम् ।
गुरुशापात् नष्टस्मृतिं विद्याहीनञ्च दुःखितम् ॥
ज्ञानं देहि स्मृतिं देहि विद्यां विद्याधिदेवते ।
प्रतिष्ठां कवितां देहि शक्तिं ग्रन्थप्रबोधिकाम् ॥
ग्रन्थकर्त्तृत्वशक्तिञ्च सच्छिष्यं सुप्रतिष्ठितम् ।
प्रतिभां सत्सभायाञ्च विचारक्षमतां शुभाम् ॥
लुप्तं सर्व्वं दैवदोषात् दूरीभूतं पुनः पुनः ।
यथाङ्कुरं भस्मनि च करोति देवता पुनः ॥
ब्रह्मस्वरूपा परमा ज्योतीरूपा सनातनी ।
सर्व्वविद्याधिदेवी या तस्यै वाण्यै नमो नमः ॥
यया विना जगत् सर्व्वं शश्वज्जीवन्मृतं परम् ।
ज्ञानाधिदेवी या तस्यै सरस्वत्यै नमो नमः ॥
यया विना जगत् सर्व्वं मूकमुन्मत्तवत् सदा ।
वागधिष्ठातृदेवी या तस्यै नित्यं नमो नमः ॥
हिमचन्दनकुन्देन्दुकुमुदाम्भोजसन्निभा ।
वर्णाधिदेवी या तस्यै चाक्षरायै नमो नमः ॥
विसर्गबिन्दुमात्रासु यदधिष्ठानमेव च ।
तदधिष्ठातृदेवी या तस्यै बाण्यै नमो नमः ॥
यया विनाऽत्र संख्यावान् संख्यां कर्त्तुं न शक्यते
कालसंख्यास्वरूपा या तस्यै देव्यै नमो नमः ॥
व्याख्यास्वरूपा या देवी व्याख्याधिष्ठातृ-
देवता ।
भ्रमसिद्धान्तरूपा या तस्यै देव्यै नमो नमः ॥
स्मृतिशक्तिर्ज्ञानशक्तिर्बुद्धिशक्तिस्वरूपिणी ।
प्रतिभाकल्पनाशक्तिर्या च तस्यै नमो नमः ॥
सनत्कुमारो ब्रह्माणं ज्ञानं पप्रच्छ यत्र वै ।
बभूव जड़वत् सोऽपि सिद्धान्तं कर्त्तुमक्षमः ॥
तदाजगाम भगवानाकाशी श्रीकृष्ण ईश्वरः ।
उवाच सततं स्तौहि वाणीमिति प्रजापतिं ॥
स च तुष्टाव तां ब्रह्मा चाज्ञया परमात्मनः ।
चकार त्वत्प्रसादेन तदा सिद्धान्तमुत्तमम् ॥
यदाप्यनन्तं पप्रच्छ ज्ञानमेकं वसुन्धरा ।
बभूव मूकवत् सोऽपि सिद्धान्तं कर्त्तुमक्षमः ॥
तदा तां स च तुष्टाव संत्रस्तः कश्यपाज्ञया ।
ततश्चकार सिद्धान्तं निर्म्मलं भ्रमभञ्जनम् ॥
व्यासः पुराणसूत्रञ्च पप्रच्छ वाल्मिकं यदा ।
मौनीभूतः स सस्मार त्वामेव जगदम्बिकाम् ॥
तदा चकार सिद्धान्तं त्वद्वरेण मुनीश्वरः ।
संप्राप निर्म्मलं ज्ञानं भ्रमान्धध्वंसदीपकम् ॥
पुराणसूत्रं श्रुत्वा स व्यासः कृष्णकलोद्भवः ।
त्वां सिषेवे च दध्यौ च शतवर्षञ्च पुष्करे ॥
तदा त्वत्तो वरं प्राप्य स कवीन्द्रो बभूव ह ।
तदा वेदविभागञ्च पुराणञ्च चकार सः ॥
तदा महेन्द्रः पप्रच्छ तत्त्वज्ञानं शिवाशिवम् ।
क्षणं त्वामेव संचिन्त्य तस्मै ज्ञानं ददौ विभुः ॥
प्रपच्छ शब्दशास्त्रञ्च महेन्द्राय बृहस्पतिम् ।
दिव्यवर्षसहस्रञ्च स त्वां दध्यौ च पुष्करे ॥
तदा त्वत्तो वरं प्राप्य दिव्यं वर्षसहस्रकम् ।
उवाच शब्दशास्त्रञ्च तदर्थञ्च सुरेश्वरम् ॥
अध्यापिताश्च ये शिष्या यैरधीतं मुनीश्वरैः ।
ते च त्वां परिसंचिन्त्य प्रवर्त्तन्ते सुरेश्वरि ॥
त्वं संस्तुता पूजिता च मुनीन्द्रमनुमानवैः ।
दैत्येन्द्रैश्च सुरैश्चापि ब्रह्मविष्णुशिवादिभिः ॥
जड़ीभूतः सहस्रास्यः पञ्चवक्त्रश्चतुर्म्मुखः ।
यां स्तोतुं किमहं स्तौमि त्वामेकास्येन मानवः ॥
इत्युक्त्वा याज्ञवल्क्यश्च भक्तिनम्रात्मकन्धरः ।
प्रणनाम निराहारो रुरोद च मुहुर्मुहुः ॥
तदा ज्योतिःस्वरूपा सा तेनादृष्टाप्युवाच तम् ।
सुकवीन्द्रो भवेत्युक्त्वा वैकुण्ठञ्च जगाम ह ॥
याज्ञवल्क्यकृतं वाणीस्तोत्रं यः संयतः पठेत् ।
सुकवीन्द्रो महावाग्मी बृहस्पतिसमो भवेत् ॥
महामूर्खश्च दुर्मेधा वर्षमेकं यदा जपेत् ।
स पण्डितश्च मेधावी सुकविश्च भवेद्ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे सरस्वत्युपा-
ख्यानम् । ५ । १—२५ ॥ * ॥

अपि च। "संवत्सरप्रदीपे।
'पञ्चम्यां भूजयेल्लक्ष्मीं पुष्पधूपान्नवारिभिः।
मस्याधारं लेखनीञ्च पूजयेन्न लिखेत्ततः॥
माघे मासि सिते पक्षे पञ्चमी या श्रियः प्रिया
तस्याः पूर्व्वाह्ण एवेह कार्य्यः सारस्वतोत्सवः॥'
सारस्वत इत्युपादानात् श्रियः सरस्वत्याः।
तथा च व्याडिः।
'लक्ष्मीसरस्वतीधीवित्तवर्गसम्पद्विभूतिशोभासु।
उपकरणवेशरचनाविधासु च श्रीरिति प्रथिता॥'
तथा चोक्तं गां दद्यादित्यादौ नानार्थशब्दस्यापि
प्रसिद्धार्थत्वेन व्यवहारः विपरीतार्थग्राहक-
वाक्यशेषसत्त्वे तु अप्रसिद्धार्थत्वेन च व्यवक्रियते
सर्व्वदा नानार्थानां व्यवहारस्तु श्लेषकाव्यादा-
विति।
'तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्धै पातु वाग्देवता नः॥'
इति शारदोक्तं ध्यायेत्॥
पाद्यादिभिः पूजयित्वा।
'भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च स्वाहा॥'
इति ब्रह्मपुराणीयेन त्रिः पूजयेत्॥
मत्स्यसूक्ते।
'वन्धुजीवञ्च द्रोणञ्च सरस्वत्यै न दापयेत्॥'
सरस्वतीं संपूज्य।
'यथा न देवी भगवान् ब्रह्मा लोकपितामहः।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा॥
वेदाः शास्त्राणि सर्व्वाणि नृत्यगीतादिकञ्च यत्
न विद्योनं त्वया देवि तथा मे सन्तु सिद्धयः॥
लक्ष्मीर्म्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः
एताभिः पाहि तनुभिरष्टाभिर्म्मां सरस्वति॥'
इति मत्स्यपुराणीयैः प्रार्थयेत्॥"
इति तिथ्यादितत्त्वम्॥*॥ अथ सरस्वती-
मन्त्रादि।
"अद्रिर्व्वरुणसंरुद्धो दवाग्न्यादिनिदर्शनम्।
सरस्वत्या दशार्णोऽयं वागैश्वर्य्यफलप्रदः॥"
मन्त्रो यथा। वद वद वाग्वादिनि वह्निज-
लमेति दशाक्षरः। तथा निबन्धे।
'भुवनेश्वरीसंपुटोऽयं महासारस्वतप्रदः॥'*॥
अस्य यन्त्रम्।
"व्योमेन्दौ रसनार्णकर्णिकमचां इन्दोः स्फुरत्-
केशरं
पत्रान्तर्गतपञ्चवर्गयमला वर्णादिवर्गं क्रमात्।
आसास्वश्रियु लान्तलाङ्गलियुजा चौणी-
पुरेणावृतं
यन्त्रं कल्पितमत्र पूजयतु तां वर्णात्मिकां
देवताम्॥"
गौतमीये।
"कर्णिकायां प्रेतबीजं विधिना विलिखेत् गुरुः
ततः षोड़शकेशरेषु विलिखेत् षोड़श स्वरान्॥
तथाष्टदलमध्ये च वर्गाष्टकं यथाविधि।
कादिमान्ताः पञ्च पञ्च वर्गाः स्युर्माष्टकोदिताः॥
यादिवान्ताः शादिहान्ता ल-क्षमौशे प्रवि-
न्यसेत्।
चतुरस्रं चतुर्द्वारं दिक्षु वं ठं विदिक्षु च॥"*॥
अस्य पूजाप्रयोगः। प्रातःकृत्यादिपीठन्यासान्तं
कर्म्म विधाय केशरेषु मध्ये च पीठशक्तीर्न्यसेत्
यथा, 'ॐ मेधायै नमः। ॐ प्रज्ञायै नमः।
ॐ प्रभायै नमः। ॐ विद्यायै नमः। ॐ धियै
नमः। ॐ धृत्यै नमः। ॐ स्मृत्यै नमः। ॐ
बुद्ध्यै नमः। ॐ विद्येश्वर्य्यै नमः।' मध्ये तदु-
परि ॐ पद्मासनाय नमः।' प्रणवादिनमोऽ-
न्तेन पूजयेत्। तथा च सारदातिलके।
"आधाशक्तिमारभ्य पीठशक्त्यन्तमर्चयेत्।
मेधाप्रज्ञाप्रभाविद्याधीधृतिस्मृतिबुद्धयः॥
विद्येश्वरी च सम्प्रोक्ता ताराद्या नव शक्तयः।
वर्णाब्जेनासनं दद्यात् मूर्त्तिं मूलेन कल्पयेत्॥"
तत ऋष्यादिन्यासः। तद्यथा। शिरसि ॐ
कङ्कऋषये नमः। मायापुटितयेत् ॐ हृदय-
तये ऋषये नमः। मुखे विराट्छन्दसे नमः।
हृदि वागीश्वर्य्यै देवतायै नमः॥*॥ अत्र
मन्त्रन्यासः। शिरसि वं नमः। श्रवणयोर्द्वं नमः
वं नमः। चक्षुषोर्दं नमः दां नमः। नासि-
कयोर्वां नमः दिं नमः। वदने निं नमः।
लिङ्गे स्वां नमः। गुह्ये हां नमः॥*॥
ततो मातृकायाः करान्यासौ कृत्वा ध्यायेत्।
तथाच निबन्धे।
"शिरःश्रवणदृङ्नासावदनास्युगुदेष्विमान्।
न्यस्य वर्णान् षड़ङ्गानि मातृकोक्तानि कल्प-
येत्॥"
ततो ध्यानम्।
"तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्धै पातु वाग्देवता नः॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्
ततः पूर्व्वोक्तक्रमेण पूजयेत्। किन्त्वङ्गमन्त्रे
विशेषः। अस्य पुरश्चरणमष्टलक्षजपः। तथा च
"हविष्याशी जपेन्मन्त्रं यमुलक्षमनन्यधीः।
दशांशं जुहुयादन्ते तिलैराज्यपरिप्लुतैः॥
तारो मायाधरो बिन्दुः शक्तिस्तारः सरस्वती।
ङेऽन्तो नमोऽन्तको मन्त्रः प्रोक्त एकादशा-
क्षरः॥"*॥
अस्याः पूजाप्रयोगः। प्रातःकृत्यादिपूर्व्वोक्त-
पीठमन्त्रान्तं विन्यस्य पूर्व्वोक्तं ऋष्यादिन्यास
कुर्य्यात्। ततो मन्त्रन्यासः। ॐ नमो ब्रह्म-
रन्ध्रे। क्रों नमो भ्रूमध्ये। ऐं नमः क्रों नम-
श्चक्षुषोः। ॐ नमः स नमः कर्णयोः। रं नमः
खं नमो नासिकयोः। त्यैं नमो मुखे। नं नमो
लिङ्गे। मं नमो गुह्ये। ततः करान्यासौ।
ऐं अङ्गुष्ठाभ्यां नमः। ऐं तर्ज्जनीभ्यां स्वाहा।
इत्यादि। एवं हृदयादिषु। तथा च निबन्धे।
"मन्त्रवर्णान् न्यसेन्मन्त्री वाग्भवेनाङ्गकल्पनाम्।"
इत्यादि॥*॥
ततो ध्यानम्।
"वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्द-
प्रभा-
चन्द्रार्द्धाङ्कितमस्तकां निजकरैः संबिभ्रतीं-
मादरात्।

वीणामक्षगुणं सुधाव्यकलसं विद्याञ्च तुङ्गस्तनौ
दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे॥"
एवं ध्यात्वा मानसैः संपूज्य यन्त्रस्थापनं कुर्य्यात्
ततः पीठपूजां विधाय केशरेषु मध्ये च पूर्व्वोक्त
पीठशक्तीः पीठमनुञ्च यजेत्। ततः पुनर्ध्यात्वा-
आवाहनादि पञ्चपुष्पाञ्जलिदानपर्य्यन्तं कर्म्म
समाप्य आवरणपूजां कुर्य्यात्। देव्या दक्षिणे
ॐ संस्कृतायै वाङ्मय्यै नमः। वामे ॐ प्राकृ-
ताय वाङ्मय्य नमः। ततः केशरेषु अग्नि-
कोणे ऐं हृदयाय नमः। नैर्ऋते ऐं शिरसे
स्वाहा। वायव्ये ऐं शिखायै वषट्। ईशाने
ऐं कवचाय हुं। मध्ये ऐं नेत्रत्रयाय वौषट्।
दिक्षु ऐं अस्त्राय फट्। ततः पूर्व्वादिपत्रेषु ॐ
प्रज्ञायै नमः एवं मेधायै श्रुत्यै यन्त्रै स्मृत्यै
वागीश्वर्य्यै मत्यै स्वस्त्यै। ततः पत्राग्रेषु
ब्राह्म्याद्याः पूजयेत्। तथा च निबन्धे।
"देव्या दक्षिणतः पूज्या संस्कृता वाङ्मयी शुभा
प्राकृता वाङ्मयी पूज्या वामतः सर्व्वदा शुभा॥
इष्ट्वा पूर्व्ववदङ्गानि प्रज्ञाद्याः पूजयेत् पुनः।
प्रज्ञा मेधा श्रुतिः शक्तिः स्मृतिर्व्वागीश्वरी
मतिः।
स्वस्त्यै इति समाख्याता ब्राह्म्याद्यास्तदनन्त-
रम्॥"
तदहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो
धूपादिविसर्জ্জनान्तं कर्म्म समापयेत्। अस्य
पुरश्चरणं द्वादशलक्षजपः। तथा च।
"जपेत् द्वादशलक्षाणि तन्मांसं सिताम्बुजैः।
नागचम्पकपुष्पैर्व्वा जुहुयात् साधकोत्तमः॥"*॥
मन्त्रान्तरम् शारदायाम्।
"वाचस्पतेऽस्मते भूयः भूयासुरिति कीर्त्तयेत्।
वागाद्यो मनुराख्यातो रुद्रसंख्याक्षरोऽपरः॥"
अस्य पूजादिकं पूर्व्ववत्। कराङ्गन्यासन्तु ऐं
अङ्गुष्ठाभ्यां नमः। वाचस्पते तर्জ্জनीभ्यां
स्वाहा। अस्मते मध्यमाभ्यां वषट्। भूय
अनामिकाभ्यां हुं। भूः कनिष्ठाभ्यां फट्।
एवं हृदयादिषु। तथा च निबन्धे।
"कुर्य्यादङ्गानि विधिवत् वागाद्यैः पञ्चभिः पदैः॥
ध्यानन्तु।
"आसीना कमले करैर्जपवटीं पद्मद्वयं पुस्तकं
बिभ्राणा तरुणेन्दुवद्रसुकुटा मुक्तेन्दुकुन्दप्रभा।
भालोन्मीलितलोचना कुचभराक्रान्ताभव-
द्भूतये
भूयाद्वागधिदेवता मुनिगणैरासेव्यमाना-
न्मिशम्॥"
एवं ध्यात्वा पूर्व्ववत् पूजादिकं कुर्य्यात्। अस्य
पुरश्चरणमेकादशलक्षजपः। तथा च।
"रुद्रलक्षं जपेन्मन्त्रं दशांशं जुहुयादृतैः॥"*॥
मन्त्रान्तरं शारदायाम्।
"तोयस्थं शयनं विष्णोः सकेवलचतुर्मुखम्।
अर्द्धेन्दुयुतो वह्निर्बिन्दुमत्याम्बुमान् भृगुः।
उक्तानि त्रीणि बीजानि सन्ति सारस्वता-
र्थिनाम्॥
तोयं वकारः विष्णोः शयनमाकारः केवलेन
आकाररहितेन ककारेण सहितः तेन वागिति
सिद्धं वाग्भवमित्यर्थः। केचित्तु लक्षितलक्षणा
भयादेवं वदन्ति आकारयुक्तो वकारः के
मस्तके वलते केवलोऽनुस्वारः तदयुक्तेन क का-
रेण सह वर्त्तते तेन क्लामिति। तत्र। निरूढ-
लक्षणायाः। शक्तितुल्यत्वात्। वाक् वाग्भवं
इति पर्य्यायः। वस्तुतस्तु ऐं क्लीं सौः।
द्वादशस्वरसमुद्धृत्य बिन्दुनादविभूषितम्।
बिन्दुनादसमायुक्तं वह्निबीजं समुद्धरेत्॥
षष्ठस्वरसमायुक्तं द्वितीयं बीजमुद्धरेत्।
चन्द्रबीजं समुद्धृत्य वरुणं योजयेत्ततः।
त्रयोदशस्वरारूढं बिन्दुनादविभूषितम्॥"
इति विश्वसारवचनात् वाग्भवबीजमेव। अस्य
पूजादिकं पूर्व्ववत्। कराङ्गन्यासस्तु द्विरुक्तै-
स्त्रिभिर्बीजैर्विधेयः। तथा च निबन्धे।
"अङ्गानि कल्पयेन्मन्त्री द्विरुक्तैर्जातिसंयुतैः॥"
ध्यानन्तु।
"मुक्ताहारावदातां शिरसि शशिकलालङ्कृतां
बाहुभिः खे-
र्व्याख्यां वर्णाक्षमालां मणिमयकलसं पुस्तक-
श्रोदहन्तीम्।
आपीनोत्तुङ्गवक्षोरुहभरविलसन्मध्यदेशा-
मधीशां
वाचामीड़े चिराय त्रिभुवनमितां पुष्करीके
निषण्णाम्॥"
एवं ध्यात्वा पूर्व्ववत् पूजादिकं कुर्य्यात्। अस्य
पुरश्चरणं त्रिलक्षजपः। तथा च
"त्रिलक्षं प्रजपेन्मन्त्रं जुहुयात्तदशांशतः।
पायसैराज्यसंसिक्तैः संस्कृते हव्यवाहने॥"*॥
अथ पारिजातसरस्वतीमन्त्राः। मन्त्रदेवप्रका-
शिकायम्। स च प्रणवक्लेखा संपुटित-
हकारसकारौकारबिन्दुयुक्तः सरस्वती ङेऽन्ता
नतिश्च। अस्य पूजा। प्रातःस्नात्वादिपीठमन्त्रान्तं
विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। शिरसि कण्व-
ऋषये नमः। मुखे दृष्टुप्छन्दसे नमः। हृदि
पारिजातसरस्त्यै देवतायै नमः। ततो माद-
कोक्तकराङ्गन्यासौ कुर्य्यात्। मूर्द्धि भ्रूमध्यनेत्र-
कर्णनासापुटद्वयजिह्वालिङ्गपायुषु एकादशा-
क्षरन्यासः। ततो हृसां अङ्गुष्ठाभ्यां नम इत्यादि
नाकराङ्गन्यासौ कुर्य्यात्। अन्यत् सर्व्वं पूर्व्व
वत्। दक्षिणामूर्त्तिसंहितायान्तु।
"सम्यग्व्याहृतयो भैरव्या वाग्भवं बीजमालिखेत्।
तारेण परया देवि संपुटीकृत्य मन्त्रवित्।
सरस्त्यै ङेदन्तोऽयं रुद्रार्णो मनुरीरितः॥"
तथाच प्रपञ्चसारे।
"आद्यन्तप्रणवशक्तिमध्यसंस्था
वाक् भूयो भवति च सरस्वती ङेऽन्ता।
नत्यन्तो मनुरयमीशसंख्यवर्णः
संप्रोक्तो भजमानः पारिजातः॥
दक्षिणामूर्त्तिर्ऋषिः प्रोक्तो गायत्री च्छन्द
ईरितम्।
पारिजातेश्वरी वाणी देवता परिकीर्त्तिता॥
द्वितीयश्च द्वितीयश्च बीजशक्ती च तारकम्।
कीलकं परमेशानि महासारस्वतप्रदम्॥
षड्दीर्घस्वरसंभिन्नबीजेनाङ्गानि विन्यसेत्॥"
ततो ध्यानम्।
"हंसारूढा हरहसितहारेन्दुकुन्दावदाता
वाणी मन्दस्मिततरमुखी मौलिबद्धेन्दुरेखा।
विद्यावीणामृतमयघटाक्षस्रजा दोस्सहस्ता
शुभ्रालक्ष्या भवदभिमतप्राप्तये भारती स्यात्॥"
अस्य पूजादिकं पूर्व्वोक्तैकादशाक्षरीवत्। पुर-
श्चरणन्तु द्वादशलक्षजपः। सितपद्मैर्नागचम्पकैर्वा
जुहुयाद्द्वादशसहस्रमिति। इति तन्त्रसारः॥*॥
नदीविशेषस्य पर्य्यायः। शुक्लसमुद्भवा २ वाक्-
प्रदा ३ ब्रह्मसुता ४ भारती ५ वेदगर्भणी ६
पयोष्णिजाता ७ वाणी ८ विशाला ९ कुटिला
१०। तज्जलगुणाः। स्वादुत्वम्। पूतत्वम्। सर्व्व-
रुजापहत्वम्। रुच्यत्वम्। दीपनत्वम्। पथ्यत्वम्।
देहकान्तिकरत्वम्। लघुत्वञ्च। इति राज-
निर्घण्टः॥*॥ सा तु देशभेदे सप्तनाम्नी यथा।
पुष्करे पितामहयज्ञे आहूता सुप्रभा १ नैमि-
षारण्येसत्रयाजिभिर्ऋषिभिराहूता काञ्चनाक्षी
२ गयदेशे गयराजयज्ञे आहूता विशाला ३
उत्तरकोशलायां औद्दालकमुनियज्ञे समा-
हूता मनोरमा४ ऋषभद्वीपे कुरुक्षेत्रे कुरुराज-
यज्ञे समाहूता ओघवती ५ गङ्गाद्वारे दक्ष-
प्रजापतियज्ञे समाहूता सुरेणुः ६ हिमालय-
पर्व्वते ब्रह्मणः पुनर्यज्ञे समाहूता विमलोदा७।
तत्र सप्तसरस्वत्यः समागताः। अतएव तत्
तीर्थं सप्तसारस्वतनाम्ना ख्यातम्। इति मह-
भारते शल्यपर्व्व॥*॥
तस्या उत्पत्तिर्ब्रह्मपत्नीत्वकारणञ्च यथा,—
नारायण उवाच।
"सरस्वती सा वैकुण्ठे स्वयं नारायणान्तिके।
गङ्गाशापेन कलया कलद्वाङ्गारते सरित्॥
पुण्यदा पुण्यजननी पुण्यतीर्थस्वरूपिणी।
पुण्यवद्भिर्निषेव्या च स्थितिः पुण्यवतां मुने॥
तपस्विनां तपोरूपा तपस्याबीजरूपिणी।
कृतपापैकदाहाय ज्वलदग्निस्वरूपिणी॥
स्नाने सरस्वतीतोये मग्नं यैर्मानवैर्भुवि।
तेषां स्थितिश्च वै कुण्ठे सुचिरं हरिसंसदि॥
भारते कृतपापी च स्नात्वा तत्रावलीलया।
मुच्यते सर्व्वपापेभ्यो विष्णुलोके वसेच्चिरम्।
चातुर्म्मास्यां पार्व्वमास्यामयनायां दिनत्रये।
व्यतीपाते च ग्रहणेऽन्यस्मिन् पुण्यदिनेऽपि च॥
स्नानेन श्रद्धया यः स्नाति हेलया श्रद्धयापि वा।
सारूप्यं लभते नूनं वैकुण्ठे स हरेरपि॥
सरस्वतीमनुं तत्र मासमेकञ्च यो जपेत्।
महामूर्खः कवीन्द्रश्च स भवेन्नात्र संशयः॥
नित्यं सरस्वतीतोये यः स्नाति मुण्डयेन्नरः।
न गर्भवासं कुरुते पुनरेव स मानवः॥
इत्येवं कथितं किञ्चित् भारतीगुणकौर्त्तनम्।
सुखदं पुण्यदं सारं किं भूयः श्रोतुमिच्छसि॥*॥

नारद उवाच ।
कथं सरस्वती देवी गङ्गाशापेन भारते ।
कलया कलहेनैव बभूव पुण्यदा सरित् ॥
नारायण उवाच ।
शृणु नारद वक्ष्यामि कथामेतां पुरातनीम् ।
यस्याः श्रवणमात्रेण सर्व्वपापैः प्रमुच्यते ॥
लक्ष्मीः सरस्वती गङ्गा तिस्रो भार्य्या हरेरपि ।
प्रेम्णा समास्तास्तिष्ठन्ति सन्ततं हरिसन्निधौ॥
चकार सेकदा गङ्गा विष्णोर्मुखनिरीक्षणम् ॥
सस्मिता च सकामा च सकटाक्षं पुनः पुनः ।
विभुर्ज्जहास तद्दृष्ट्वा निरीक्ष्य च चयं मुदा ।
क्षमां चकार तद्दृष्ट्वा लक्ष्मीर्नैव सरस्वती ॥
बोधयामास तां पद्मा सत्स्वरूपा च सस्मिता ।
क्रोधाविष्टा च सा वाणी न च शान्ता बभूव ह॥
उवाच गङ्गां भर्त्तारं रक्ताक्षा रक्तलोचना ।
कम्पिता कोपवेगेन शश्वत्प्रस्फुरिताधरा ॥
सरस्त्युवाच ।
सर्व्वत्र समता बुद्धिः सङ्गर्त्तुः कामिनीं प्रति ।
धर्म्मिष्ठस्य वरिष्ठस्य विपरीता खलस्य च ॥
ज्ञातं सौभाग्यमधिकं गङ्गायां ते गदाधर ।
कमलायाश्च तत्सुखं न च किञ्चिन्मयि प्रभो ॥
मङ्गलायाः पद्मया सार्द्धं प्रीतिस्यास्ति सुसम्मता ।
क्षमां चकार तेनेदं विपरीतं हरिप्रिया ॥
किं जीवनेन मेऽत्रैव दुर्भगायाश्च साम्प्रतम् ।
निष्फलं जीवनं तस्या या पत्युः प्रेमवञ्चिता ॥
त्वां सर्व्वेशं सत्स्वरूपं ये वदन्ति मनीषिणः ।
ते च मूर्खा न वेदज्ञा न जानन्ति मतिं तव ॥
सरस्वतीवचः श्रुत्वा दृष्ट्वा तां कोपसंयुताम् ।
मनसा स समालोच्य प्रजगाम बहिःसभाम् ॥
गते नारायणे गङ्गासुवाच निर्भयं रुषा ।
वागधिष्ठातृदेवी सा वाक्यं श्रवणदुष्करम् ॥
हे निर्लज्जे हे सकामे स्वामिगर्व्वं करोषि किम्
अधिकं स्वामिसौभाग्यं विज्ञापयितुमिच्छसि ॥
मानचूर्णं करिष्यामि तवाद्य हरिसन्निधौ ।
किं करिष्यति ते कान्तो ममैव कान्तवल्लभे ॥
इत्येवमुक्ता गङ्गायाः केशं गृह्णातुमुद्यता ।
वारयामास तां पद्मा मध्यदेशे स्थिता सती ॥
शशाप वाणी तां पद्मां महाकोपवती सती ।
दृष्टरूपा सरिद्रूपा भविष्यसि न संशयः ॥
अत्युग्रताश्च तां दृष्ट्वा कोपप्रस्फुरिताधरा ।
उवाच गङ्गा तां देवीं पद्माञ्च रक्तलोचना ॥
गङ्गोवाच ।
त्वमुत्सृज महीञ्चाशु पद्मे किं मे करिष्यति ।
वाग्दुष्टा वागधिष्ठात्री देवीयं कलहप्रिया ॥
इत्येवमुक्ता सा देवी वाक्यं शापं ददाविति ।
सरित्स्वरूपा भवतु सा या त्वाञ्च शशाप ह ॥
अधोमर्त्यं सा प्रयातु सन्ति यत्रैव पापिनः ।
कलौ तेषाञ्च पापांशं लभिष्यसि न संशयः ॥
इत्येवं वचनं श्रुत्वा तां शशाप सरस्वती ।
त्वमेव यास्यसि महीं पापिपापं लभिष्यसि ॥
एतस्मिन्नन्तरे तत्र भगवानाजगाम ह ।
चतुर्भुजश्चतुर्भिश्च पार्षदैश्च चतुर्भुजैः ॥
सरस्वतीं करे धृत्वा वाक्षयामास वक्षसि ।
बोधयामास सर्व्वज्ञः सर्व्वज्ञानं पुरातनम् ॥
श्रीनारायण उवाच ।
लक्ष्मि त्वं कलया गच्छ धर्म्मध्वजगृहं शुभे ।
अयोनिसम्भवा योनौ तस्य कन्या भविष्यसि ॥
तत्रैव दैवदोषेण दृष्टत्वञ्च लभिष्यसि ।
मदंशस्यासुरस्यैव शङ्खचूडस्य कामिनी ॥
भूत्वा पश्चाच्च मत्पत्नी भविष्यसि न संशयः ।
त्रैलोक्यपावनी नाम्ना तुलसीति च भारते ॥
कलया च सरिद्भूत्वा शीघ्रं गच्छ वरानने ।
भारते भारतीशापान्नाम्ना पद्मावती भव ॥
गङ्गे यास्यसि पश्चात्त्वमंशेन विश्वपावनी ।
भारतं भारतीशापात् पापदाहाय पापिनाम् ॥
भगीरथस्य तपसा तेन नीता सुदुष्करात् ।
नाम्ना भागीरथी पूता भविष्यसि महीतले ॥
मदंशस्य समुद्रस्य जाया भव ममाज्ञया ।
मत्कलांशस्य तस्यैव शान्तनोश्च सुरेश्वरि ॥*॥
गङ्गाशापेन कलया भारतं गच्छ भारति ।
कलहस्य फलं भुङ्क्ष्व संपत्नीभ्यां सहाच्युते ॥
स्वयञ्च ब्रह्मसदनं ब्रह्मणः कामिनी भव ।
गङ्गा यातु शिवस्थानमत्र पद्मैव तिष्ठतु ॥
शान्ता च क्रोधरहिता मङ्गला सत्स्वरूपिणी ।
महासाध्वी महाभागा सुशीला धर्म्मचारिणी ॥
यदंशकलया सर्व्वा धर्म्मिष्ठाश्च पतिव्रताः ।
शान्तरूपाः सुशीलाश्च प्रतिविश्वेषु योषितः ॥
तिस्रो भार्य्यास्त्रिशालाश्च त्रयो भृत्याश्च
बान्धवाः ।
ध्रुवं वेदविदश्चाद्य न क्षेते मङ्गलप्रदाः ॥
गच्छ गङ्गे शिवस्थानं ब्रह्मस्थानं सरस्वती ।
अत्र तिष्ठतु मद्गेहे सुशीला कमलालया ॥
इत्युक्त्वा जगतां नाथो विरराम च नारद ।
अत्युच्चै रुरुदुर्देव्यः समालिङ्ग्य परस्परम् ॥
ताश्च सर्व्वाः समालोच्य क्रमेणोचुः सदीश्वरम् ।
कम्पिताः साश्रुनेत्राश्च शोकेन च भयेन च ॥
सरस्त्युवाच ।
विदायं देहि मे नाथ दुष्टाया जन्मशोधनम् ।
सत्स्वामिना परित्यक्ता कुतो जीवन्ति काः
स्त्रियः ॥
देहत्यागं करिष्यामि योगेन भारते ध्रुवम् ।
मृत्युञ्छित्वा निपतनं प्राप्तुमर्हति निश्चितम् ॥
गङ्गोवाच ।
अहं केनापराधेन त्यक्ता नाथ जगत्पते ।
देहत्यागं करिष्यामि निर्दोषाया वधं लभ ॥
निर्दोषां कामिनीं त्यागं करोति यो जनो भवे
स याति नरकं कल्पं किं ते सर्व्वेश्वरस्य वा ॥
महालक्ष्मीरुवाच ।
नाथ सत्स्वरूपस्त्वं कोपः कथमहो तव ।
प्रसादं कुरु भार्य्ये द्वे सदीशस्य क्षमा वरम् ॥
भारतं भारतीशापात् यास्यामि कलया विभो
कतिकालं क्षितिस्तत्र कदा द्रक्ष्यामि ते पदम्॥
दास्यन्ति पापिनः पापं मह्यं ज्ञानावगाहनात्
केन तेन विमुक्ताहमागमिष्यामि त्वत्पदम् ।
कलया तुलसीरूपा धर्म्मध्वजसुता सती ।
भूत्वा कदा लभिष्यामि त्वत्पादाम्बुजमच्युत ॥
वृक्षरूपा भविष्यामि त्वदधिष्ठातृदेवता ।
मामुद्धरिष्यसि कदा तन्मे ब्रूहि कृपानिधे ॥
गङ्गा सरस्वतीशापात् यदि यास्यति भारतम् ।
सा केन मुक्ता पापाच्च कदा त्वां वा लभि-
ष्यति ॥
गङ्गाशापेन सा वाणी यदि यास्यति भारतम्।
कदा शापादिनिर्मुक्ता लभिष्यति पदं तव ॥
तां वाणीं ब्रह्मसदनं गङ्गां वा शिवमन्दिरम् ।
गन्तुं वदसि हे नाथ तत् क्षमस्व च ते वचः ॥
इत्युक्त्वा कमला कान्तपदं धृत्वा ननाम च ।
स्वकेशैर्वेष्टनं कृत्वा रुरोद च पुनः पुनः ॥
उवाच पद्मनाभस्तां पद्मां कृत्वा स्ववक्षसि ।
ईषद्धास्यप्रसन्नास्यो भक्तानुग्रहकातरः ॥
श्रीनारायण उवाच ।
त्वदाख्यमाचरिष्यामि स्ववाक्यञ्च सुरेश्वरि ।
शमताञ्च करिष्यामि शृणु तत्क्रममेव च ॥
भारती यातु कलया सरिद्रूपा च भारतम् ।
अर्द्धांशा ब्रह्मसदनं स्वयं तिष्ठतु मद्गृहे ॥
भगीरथेन नीता सा गङ्गा यास्यति भारतम् ।
पूतं कर्त्तुं त्रिभुवनं स्वयं तिष्ठतु मद्गृहे ॥
तत्रैव चन्द्रमौलेश्च मौलिं प्राप्स्यति दुर्लभम् ।
ततः स्वभावतः पूताप्यतिपूता भविष्यति ॥
कलांशांशेन त्वं गच्छ भारतं कमले भव ।
पद्मावती सरिद्रूपा तुलसी वृक्षरूपिणी ॥
कलेः पञ्चसहस्रे च गते वर्षे च मोक्षणम् ।
युष्माकं सरिताश्चैव मद्गृहश्चागमिष्यति ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।४।१—८८॥

सरस्वान्, [त्] पुं, (सरो नीरमस्यास्तीति मतुप्। तस्य मत्वर्थे इति भत्वाच्च पदकार्य्यम्।) समुद्रः। इत्यमरः। १।१०।१॥ नदः। रसिके, त्रि। इति मेदिनी ॥

सरा, स्त्री, (सरति गच्छतीति। सृ+अच्। टाप्।) निर्झरः। इति भरतद्विरूपकोषः॥ प्रसारिणी। इति राजनिर्घण्टः॥

सरावः, पुं, (सरात् सरणात् अवतीति। अव रक्षणे+घञ्। सरावः। इति भरतद्विरूपकोषः॥

सरिः, पुं, स्त्री, (सरतीति। सृ+इन्।) निर्झरः। इति हेमचन्द्रः॥

सरिका, स्त्री, द्विरुपधौ। इति शब्दचन्द्रिका॥ गमनकर्त्री च॥

सरित्, स्त्री, (सरतीति। सृ गतौ+"इसुसुरुधि-युधिभ्यः इति।" उणा० १।८८। इति इति:।) नदी। इत्यमरः। १।१०। २८॥ (यथा, देवीभागवते ७।
"सरितो मार्गवाहिन्यस्तथासंख्या पतिते॥")
सूत्रम्। इति शब्दमाला॥ दुर्गा। यथा,—
"क्रिया कारणरूपत्वात् सरणाच्च सरिन्मता।
सङ्गमान्नमनान्नद्गा लोके देवी विभाव्यते॥"
इति देवीपुराणे ४५ अध्यायः॥

सरित्पतिः, पुं, (सरितां पतिः।) समुद्रः। इत्यमरः।१।१०।११॥ (यथा, भागवते।५।१७।७॥ "एवं मान्यवच्छिखरान्निष्पतन्तो तत उपरतवेगा केतुमालमभि वंक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशन्ति॥")

सरित्वान्, [त्] पुं सरितः सन्त्यस्येति। सरित्+मतुप्। मस्य वः।) समुद्रः। इति केचित्॥

सरित्सुतः, पुं, (सरितो गङ्गायाः सुतः।) भीष्मः। गङ्गापुत्रत्वात्॥

सरितांनाथः, पुं, (सरितां नदीनां नाथः। अलुक्समासः।) समुद्रः। यथा,—
"त्वं देव सरितांनाथ! त्वं देवि सरितां वरे।
उभयोः सङ्गमे स्नात्वा मुच्यामि दुरितानि वै॥"
इति प्रायश्चित्ततत्त्वे गङ्गासागरस्नानमन्त्रः॥

सरिताम्पतिः, पुं, (सरितां पतिः। अलुक्समासः।) समुद्रः। इति शब्दरत्नावली॥ यथा, कुमारे। २। ३७।
"तस्योपायनयोग्यानि रत्नानि सरिताम्पतिः।
कथमप्यभसामन्तः प्रानिष्यत्तैः प्रतीक्षते॥")

सरिद्वरा, स्त्री, (सरित्सु वरा श्रेष्ठा।) गङ्गा। इति हेमचन्द्रः॥ (यथा, महाभारते।१।८६।८८।
"महाभिषस्तु तं दृष्ट्वा नदीर्धैर्य्यात्सुतं नृपम्।
तमेव मनसा ध्यायन्त्युपावर्त्तत्सरिद्वरा॥"
नदीश्रेष्ठे, त्रि। यथा,महाभारते।१।७८।८९।
"सा तमग्निसमं विप्रमनुचिन्त्य सरिद्वरा।
गतधा विद्युता यस्माच्छतद्रुरिति विश्रुता॥")

सरिन्नाथः, पुं, (सरितां नाथः।) समुद्रः। इति राजनिर्घण्टः॥

सरिमा [न्]पुं, (सरतीति।सृ+"सृ-भ्रु-धृ-स्तृ-गृभ्य इमनिच्।" उणा० ४।१४७। ततः इमनिच्।) गमनम्। वायुः। इत्युणादिकोषः॥

सरिलं, क्लो, (सलिलम्। रलयोरैक्यात् लस्य रः।) सलिलम्। इत्यमरटीकायां भरतः॥

सरिषपः, पुं, (सृ गतौ+अपः युगागमश्च। ततः पृषोदरादित्वात् साधुः। इत्युणादिटीकायां उज्ज्वलदत्तः। ३।१४१।) सर्षपः। इति त्रिकाण्डशेषः॥

सरी, स्त्री, (सरि+ऋदिकारादिति वा ङीप्।) निर्झरः। इति भरतहिरूपकोषः॥

सरीसृपः, पुं, (कुटिलं सर्पतीति। सृप्+यङ्लुक्+पचाद्यच्।) सर्पः। इत्यमरः।१।८।७। (यथा, महाभारते। ३।२।३।
"वनञ्च दोषबहुलं बहुव्यालसरीसृपम्।
परिक्लेशञ्च वो मन्ये ध्रुवं तत्र भविष्यति॥"*॥
जङ्गमे, त्रि। इति स्वामी॥ यथा, भागवते। ५।१८।२७।
"पातुं न शेकुर्दृष्टयत्युदः।
सरीसृपं स्थाणु यदत्र दृश्यते॥")

सरुः, पु, (सृ+उन्।) तृणम्। खड्गमुष्टिः। इत्यमरटीकासारसुन्दरी॥

सरुः, त्रि, (सृ+उन्।) सूक्ष्मः। इति भूरिप्रयोगः॥

सरूपः, त्रि, (समानं रूपं यस्य। "ज्योतिर्जनपदेति।" ६।३।८५। इति समानस्य सः।) सदृशः। समानरूपः। इति जटाधरः॥ (यथा, सुश्रुतोपनिषदि। २।१।१।
"यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः
सहस्रशः प्रभवन्ते सरूपाः।
तथाक्षराद्विविधाः सोम्य भावाः
प्रजायन्ते तत्र चैवापि यन्ति॥")

सरूपता, स्त्री, (सरूपस्य भावः। तल्। टाप्।) समरूपत्वम्। तुल्यता। सरूपशब्दात् तपत्यर्थेनाप्या निष्पन्ना॥

सरोजं, क्लो, (सरसि जायते इति। जन+डः।) पद्मम्। इति हेमचन्द्रः॥ (यथा, कुमारे। ५।२७।
"मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपल्लवोभिना।
तुषारहृष्टिक्षतपद्मसम्पदां
सरोजसन्धानमिवाकरोदपाम्॥")

सरोवरजाते, त्रि॥

सरोजन्म, [न्] क्लो,(सरसः जन्म उत्पत्तिर्यस्य।) पद्मम्। इति हेमचन्द्रः॥

सरोजिनी, स्त्री, (सरोजानि सन्त्यस्यामिति। सरोज+"पुष्करादिभ्यो देशे।" ५।२।१३५। इति इनिः। ङीप्।) कमलाकरः। पद्मम्। इति मेदिनी॥ पद्मसमूहः। इति रत्नमाला॥ (यथा, साहित्यदर्पणे। १०।७०३।
"निसर्गसौरभोद्भ्रान्तभृङ्गसङ्गीतशालिनी।
उदिते वासराधीशे स्मेराजनि सरोजिनी॥")

सरोजी,[न्] पुं,(सरोजं उत्पत्तिस्थानत्वेनास्त्यस्येति। इनिः।) ब्रह्मा। इति शब्दरत्नावली-विकाण्डशेषौ॥

सरोत्सवः, पुं, (सरे सरोवरे उत्सवो यस्य।) सारसपक्षी। इति शब्दरत्नावली॥

सरोधः, त्रि. रुधः। रोधेन सह वर्त्तमानः। इति बहुव्रीहिसमासनिष्पन्नः॥

सरोरुट्, [ह्] क्लो, (सरसि रोहतीति। रुह+क्विप्।) पद्मम्। इति हेमचन्द्रः॥

सरोरुहं, क्लो, (सरसि रोहतीति। रुह+कः।) पद्मम्। इति रत्नमाला॥ (यथा, भागवते। १।१५।२८।
"एवं चिन्तयतो जिष्णोः कृष्णपादसरोरुहम्।
सौहार्देनातिगाढेन शान्तासीद्विमला मतिः॥")

सरोरुहासनः, पुं, (सरोरुहमासनं यस्य।) ब्रह्मा। इति हेमचन्द्रः॥

सरोवरः, पुं, (सरःसु वरः श्रेष्ठः पद्माकरत्वात्।) जलाशयविशेषः। (यथा, भागवते।८।२४।२१।
"तत आदाय सा राज्ञा चिप्ता राजन् सरोवरे।
तदाहृत्यात्मना सोऽयं महामीनोऽन्ववर्द्धत॥"
तत्पर्य्यायः। पद्माकरः २ कासारः ३ तडागः४ तडाकः ५ तटाकः ६ सरसः ७ सरसी ८ सरः ९ सरम् १० सरकम् ११। इति शब्दरत्नावली॥ तल्लक्षणादि पुष्करिणीशब्दे द्रष्टव्यम्। तस्य जलगुणाः सरःशब्दे द्रष्टव्याः॥

सर्कः, पुं, वायुः। मनः। प्रजापतिः। इति संक्षिप्तसारोणादिवृत्तिः॥

सर्गः, पुं, (सृज्+घञ्।) स्वभावः। निर्माणम्। (यथा, महाभारते। १३।१६२।३५।
"राजमार्गे गवां मध्ये धान्यमध्ये चधर्म्मिणः।
नोपसेवन्ति राजेन्द्र सर्गं सूत्रपुरोषयोः॥")
निश्चयः। (यथा, रघुः। ३।५१।
"गृहाण शस्त्रं यदि सर्ग एष ते
न खल्वनिर्जित्य रघुं कृती भवान्॥")
अध्यायः। (यथा, साहित्यदर्पणे। ६।५५८।
"नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह॥")
सृष्टिः। इत्यमरः।३।३।२२॥ (यथा, मनुः।१।२८।
"हिंसाहिंसे मृदुक्रूरे धर्म्माधर्म्मावृतानृते।
यद्यस्य सोऽदधात् सर्गे तत्तस्य स्वयमाविशत्॥"
संसारः। यथा, गीतायाम्। ५।१८।
"इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः॥"
मोहः। उत्साहः। इति मेदिनी॥ अनुमतिः। इति हेमचन्द्रः॥*॥ सर्गविवरणं यथा,—
"अव्याकृतगुणक्षोभात् महतस्त्रिवृतोऽहमः।
भूतसूक्ष्मेन्द्रियार्थानां सम्भवः सर्ग उच्यते॥"
इति श्रीभागवतम्॥

नवधासर्गो यथा,—
"सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः।
कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः॥
आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः।
द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः॥
भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्।
चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः॥
वकारिको देवसगः पञ्चमो यन्मयं मनः।
षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः॥
षड्डिमे प्राकृताः सर्गा वैकृतानपि मे शृणु।
रजोभाजो भगवतो लीलेयं हरिमेधसः॥
सप्तमो मुख्यसर्गस्तु षड्विधस्तस्तुधाश्च यः।
वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमाः।
उत्स्रोतस्तमःप्राया अन्तःस्पर्शा विशेषिणः।
तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः॥
अविदो भूरितमसो ब्राह्मणा हृद्यवेदिनः।
गौरजो महिषः कृष्णः शूकरो गवयो रुरुः॥
द्विशफाः पशवश्चेमे अविरुष्ट्र्य सत्तम।
खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा॥
एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून्।
श्वा शृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ॥
सिंहः कपिर्गजः कूर्म्मो गोधा च मकरादयः।
कङ्कगृध्रबकश्येनभासभल्लकबर्हिणः॥
हंससारसचक्राह्वकाकोलूकादयः खगाः।
पञ्चाक्स्रोतस्तु नवमः चत्वारिंशविधो नृणाम्॥
रजोऽधिकाः कर्म्मपरा दुःखे च सुखमानिनः।
वैकृतास्त्वय एवैते देवसर्गश्च सत्तम॥

वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः।
देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः॥
गन्धर्व्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः।
भूतप्रेतपिशाचाश्च विद्याधाः किन्नरादयः॥
दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः।
अतः परं प्रवक्ष्यामि वंशं मन्वन्तराणि च॥
एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूईरिः।
सृजत्यमोघसंकल्प आत्मैवात्मानमात्मना॥"
इति च श्रीभागवते। ३। १०। १४-२६॥
(विष्णुः। इति महाभारतम्। १३।१४१।३०॥
शिवः। इति च तत्रैव। १३। १७। १४८॥)

सर्गबन्धः, पुं, (सर्गैरध्यायैर्बन्धो यस्य।) महाकाव्यम्। इति भूरिप्रयोगः॥ तल्लक्षणं यथा,—
"सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्॥
तद्रसैकथोद्भूतमितरद्रसं तदाश्रयम्।
चतुर्व्वर्गफलायत्तं चतुरोदात्तनायकम्॥
नगरार्णवशैलर्त्तुचन्द्रार्कोदयवर्णनैः।
उद्यानसलिलक्रीड़ामधुपानरतोत्सवैः॥
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि॥
अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम्।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः॥
सर्व्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जनम्।
काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति॥"
इति दण्डी॥

सर्ज्ज, अर्ज्जने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सिसर्ज्जयिषति। सर्ज्जति धनं लोकः। इति दुर्गादासः॥

सर्ज्जः, पुं, सृजति निर्य्यासादीनिति। सृज+अच्।) शालवृक्षः। इत्यमरः। ३। ४। ४४॥ सर्ज्जरसः। इति भरतः॥ पीतशालः। इति शब्दरत्नावली॥ (यथा, ऋतुसंहारे। २। १७।
"कदम्बसर्ज्जार्জ্জুननीपकेतकी-
र्विकम्पयंस्तत्कुसुमाधिवासितः।
सशीकराम्भोधरसङ्गशीतलः,
समीरणः कं न करोति सोत्सुकम्॥")

सर्ज्जकः, पुं, (सर्ज्ज एव। स्वार्थे कन्।) पीतशालः। इत्यमरः। २। ४। ४४॥ (यथा, भावप्रकाशे। १। १।
"सर्जकोऽजककर्णः स्यात् शालो मरिचपत्रकः॥")
शालः। इति जटाधरः॥

सर्ज्जगन्धा, स्त्री, (सर्ज्जस्येव गन्धो यस्याः।) राला। इति रत्नमाला॥

सर्ज्जनं, क्ली, (सृज+ल्युट्।) सेन्यपक्षाङ्गम्। इति शब्दरत्नावली॥ विसर्ज्जनम्। सृष्टिः। इति सृजधात्वर्थदर्शनात्॥ (यथा, सर्व्वदर्शनसंग्रहे अक्षपाददर्शने।
"तस्मादीश्वरस्य जगत्सर्ज्जनं न युज्यते॥")

सर्ज्जनिर्य्यासकः, पुं, (सर्ज्जस्य निर्य्यासः। स्वार्थे कन्।) रालः। इति राजनिर्घण्टः॥

सर्ज्जमणिः, पुं, (सर्ज्जस्य मणिरिव।) धूनकः। इति त्रिकाण्डशेषः॥

सर्ज्जरसः, पुं, (सर्ज्जस्य रसः।) शालवृक्षनिर्य्यासः। धूना इति भाषा। (यथा, महाभारते। १। १४५। ६।
"शणसर्ज्जरसादीनि यानि द्रव्याणि कानिचित्
आस्ये यान्युत सन्तीह तानि तत्र प्रदापय॥")
तत्पर्य्यायः। यक्षधूपः २ अरालः ३ सर्व्वरसः४ बहुरूपः ५। इत्यमरः। २।६।१२७॥ रालः ६ वह्निवल्लभः७। इति भरतधृतरभसः॥ शालजः ८ शालनिर्य्यासः९ सर्ज्जः १० धूनकः११ शालसारः १२। इति रत्नमाला॥ विरूपः १३। इति शब्दरत्नावली॥ शालवेष्टः १४ अग्निवल्लभः १५ सर्ज्जमणिः १६। इति हेमचन्द्रः॥ राजनिर्घण्टोक्तपर्य्यायगुणौ रालशब्दे द्रष्टव्यौ॥

सर्ज्जिः, स्त्री, (सर्ज्ज अर्ज्जने+इन्।) सर्ज्जिकाक्षारः। इति रत्नमाला॥

सर्ज्जिका, स्त्री, (सर्ज्जिरेव। स्वार्थे कन्। टाप्।) सर्ज्जिकाक्षारः। इति जटाधरः॥ (नदीविशेषः। इति भरतः॥)

सर्ज्जिकाक्षारः, पु, (सर्ज्जिका एव क्षारः।) यद्वा, सर्ज्जिकाया नद्याः क्षारः। इति भरतः॥ साचिक्षार इति साजिमाटि इति च भाषा॥ तत्पर्य्यायः। कापोतः २ सुखवर्च्चकः ३ सौवर्च्चलम् ४ रुचकम् ५। इत्यमरः। २।८।१०९॥ सृजिकाक्षारः ६ सर्ज्जिका ७ क्षारः ८। इति तट्टीका। खर्ज्जिका ९ खर्ज्जिका १०। इति शब्दरत्नावली॥ सुरवर्च्चकः ११। इति जटाधरः॥ सर्ज्जिक्षारः१२ सर्ज्जिकः १३ सर्ज्जी१४ सुखोर्ज्जिकः १५ सुवर्च्चिकः १६ सुवर्च्ची १७ सुखवर्च्चाः १८। अस्य गुणाः। पटुत्वम्। कटुत्वम्। उष्णत्वम्। कफवातोदरार्त्तिनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"पाक्यक्षारो यवक्षारो यावशूको यवाग्रजः।
सर्ज्जिकोऽपि स्मृतः क्षारः कापोतः सुखवर्च्चकः॥
कथितः सर्ज्जिकाभेदो विशेषश्चैः सुवर्च्चिका।
यवक्षारो लघुः स्निग्धः सुसूक्ष्मो वह्निदीपनः॥
निहन्ति शूलं वातामश्लेष्मश्वासगलामयान्।
पाण्डुरोगग्रहणीगुल्मानाहप्लीहदामयान्॥
सर्ज्जिक्ष्यगुणा तस्माद्विशेषादुगुल्मशूलहृत्।
सुवर्च्चिका सर्ज्जिकावद्ज्ञेया गुणतो जनैः॥"
इति भावप्रकाशः॥

सर्ज्जिक्षारः, पुं, (सर्ज्जिरेव क्षारः।) सर्ज्जिकाक्षारः। इति राजनिर्घण्टः॥

सर्ज्जी, स्त्री, (सर्ज्जि+वा ङीष्।) सर्ज्जिकाक्षारः। इति राजनिर्घण्टः।

सर्ज्जुः, पुं, (सर्ज्जति उपार्ज्जयतीति। सर्ज्ज अर्ज्जने+अच्।) वणिक्। इति मेदिन्यादिकोषौ॥

सर्ज्जूः, स्त्री, (सर्ज्जतीति। सर्ज्ज+"क्वचिच्चमितनिधनीति।" उणा० १। ८२। इति ऊः।) विद्युत्। इति मेदिनी॥ अभिसारः। इति शब्दरत्नावली॥

सर्ज्यः, पुं, (सर्ज्जस्येदमिति। यत्।) सर्जरसः। इति रत्नमाला॥ अर्जनीये, त्रि॥

सर्पः, पुं, (सृप्यते इति। सृप+घञ्।) नागकेशरः। इति रत्नमाला॥ (सृप+भावे घञ्।) गमनम्। इति सृपधात्वर्थदर्शनात्। (सर्पति इतस्ततो गच्छतीति। सृप+अच्।) श्मश्रुधारी म्लेच्छजातिविशेषः। पुरा अयं क्षत्रिय आसीत्। सगरराजेन अस्य वेदयागादौ अनधिकारित्वं कृत्वा वेशान्यत्वं धर्म्मनाशञ्च चकार यथा, महाभारते हरिवंशे २४ अध्याये।
"सगरः स्वां प्रतिज्ञान्तु गुरोर्व्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानां तथैव च॥
पारदैः पह्लवाश्चैव क्षत्रियाश्च तथापरे।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलिसर्पा माहिषिका दार्व्वाश्चोलाः सकेरलाः॥
सर्व्वे ते क्षत्रियास्तात धर्म्मस्तेषां निराकृतः।
वशिष्ठवचनाद्राजन् सगरेण महात्मना॥"
द्विजजन्तुविशेषः। साप इति भाषा। तत्पर्य्यायः। दृदाकुः २ भुजगः ३ भुजङ्गः ४ अहिः ५ भुजङ्गमः ६ आशीविषः ७ विषधरः ८ चक्री ९ व्यालः १० सरीसृपः ११ कुण्डली १२ गूढ़पात्१३ चक्षुःश्रवाः १४ काकोदरः१५ फनी १६ दर्व्वीकरः १७ दीर्घपृष्ठः १८ दन्दशूकः १९ विलेशयः २० उरगः २१ पन्नगः २२ भोगी २३ जिह्मगः २४ प्लवनाशनः २५। इत्यमरः। १। ८। ३॥ विलशयः २६ कुम्भीनसः २७ द्विरसनः २८ भेकभुक् २९ श्वसनोत्सुकः ३० फणाधरः ३१ फणधरः ३२ फणावान् ३३ फणवान् ३४ फणाकरः ३५ फणकरः ३६ समकोलः ३७ व्याडः ३८ दंष्ट्री ३९ विषास्यः ४० गोकर्णः ४१ उरङ्गमः ४२ गूढ़पादः ४३ विलवासी ४४ दर्विभृत् ४५ हरिः ४६। इति शब्दरत्नावली॥ प्रचलाकी ४७ द्विजिह्वः ४८ जलकण्डः ४९ कञ्चुकी ५० चिकुरः ५१ भुजः५२। इति जटाधरः॥ अस्योत्पत्तिर्व्युत्पत्तौ यथा,
"अप्रियेणास्य तान् दृष्ट्वा केशाः शीर्य्यन्त वेधसः।
क्षीणाः स्वशिरसो भूयः समरोहन् ततः शिरः।
सर्पणात्तेऽभवन् सर्पा क्षीणत्वादहयः स्मृताः॥"
इति वह्निपुराणे सर्गकथननामाध्यायः॥*॥

सर्पाणामुत्सवतिथिर्यथा,—
सुमन्तुरुवाच।
"पञ्चमी दयिता राजन् नागानां नन्दिवर्द्धिनी।
पञ्चम्यां किल नागानां भवत्युत्सव महान्॥
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः।
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ॥
एते प्रयच्छन्त्यभयं प्राणिनां प्राणजीविनाम्।
पञ्चम्यां स्नापयन्तीह नागान् क्षीरेण ये नराः॥
तेषां कुले प्रयच्छन्ति अभयं प्राणदक्षिणम्।
श्रमा नागा यदा मात्रा दह्यमाना दिवानिशम्।

निर्व्वासयन्ति स्वपनैर्गवां क्षीरेण मिश्रितैः ।
ये स्रापयन्ति वै नागान् भक्त्या ब्रह्मसमन्विताः॥
शतानीक उवाच ।
मात्रा शप्ताः कथं नागाः कारणं संवदस्व वै ।
कथं वानन्दकरणं कस्य वा संप्रसादजम् ॥
सुमन्तुरुवाच ।
उच्चैःश्रवा अश्वरत्नं क्षेतो जातोऽमृतोद्भवः ।
तं दृष्ट्वा चाब्रवीत् कद्रुर्नागानां जननी स्वसा ॥
अश्वरत्नमिदं क्षेतं संपश्येऽमृतसंभवम् ।
कृष्णांश्च पश्यसे बालान् स वै क्षेतः सुता हयैः॥
विनतोवाच ।
सर्व्वक्षेतो हयवरो नास्य कृष्णो न लोहितः ।
कथं त्वं पश्यसे कृष्णं विनतोवाच तां स्वसा ॥
कद्रुरुवाच ।
पश्येऽहमेकनयना कृष्णबालसमन्वितम् ।
द्विनेत्रा त्वन्तु विनते न पश्यसि पणं कुरु ॥
विनतोवाच ।
अहं दासी भविष्यामि ते कृष्णे क्षेये प्रदर्शिते ।
न चेद्दर्शयतो कद्रुर्मम दासी भविष्यसि ॥
एवं तेऽविनयं कृत्वा गते क्रोधसमन्विते ।
विनतास्वसा च शयने कद्रुर्जिह्ममचिन्तयत् ॥
आहूय पुत्रान् प्रोवाच बाला भूत्वा हयाननैः ।
तिष्ठध्वं विपणे जेष्ये विनतां जयगर्द्धिनीम् ॥
प्रोचुस्तां जिह्मबुद्धिन्ते नागा मातां विगर्ह्य तु
अधर्म्ममेतन्मातोऽतो न करिष्याम ते वचः ॥
तान् शशाप रुषा कद्रुः पावको वः प्रधक्ष्यति ।
गते बहुतिथे काले पाण्डवो जनमेजयः ॥
सर्पसत्रं स कर्त्ता वै भुवि अन्यैः सुदुष्करम् ।
तस्मिन् सत्रे स तिग्मांशुः पावको वः प्रधक्ष्यति॥
एवं शप्ता रुषा कद्रुः प्रोक्तवान्नैव किञ्चन ।
माता शप्तास्तथा नागाः कर्त्तव्यं नान्यथायत ॥
वासुकिं दुःखितं ज्ञात्वा ब्रह्मा प्रोवाच सान्त्वयन्
मा शुचो वासुकेऽत्यर्थं शृणु महच्चनं परम् ॥
पराशरकुले जातो जरत्कारुरिति द्विजः ।
भविष्यति महातेजास्तस्मिन् काले तपोनिधिः
भगिनीञ्च जरत्कारुं तस्य त्वं प्रति दास्यति ।
भविता तस्य पुत्रोऽसौ आस्तीक इति विश्रुतः॥
स तत् सत्रं प्रहर्त्तं वै नागानां भयदं महत् ।
निषेधयिष्यति स मुनिर्व्वाग्भिरग्राभिस्तोषयिष्यति॥
तदिमां भगिनीं राजन् तस्य त्वं प्रतिदास्यति ।
जरत्कन्यां जरत्कारुः प्रदद्यादविचारयन् ॥
यदासौ प्रार्थतेऽरण्ये यत्किञ्चिद्विवदिष्यति ।
तत् कर्त्तव्यमशङ्केन यदीच्छेः श्रेयमात्मनः ॥
पितामहवचः श्रुत्वा वासुकिः प्रणिपत्य च ।
तथाकरोद्यथा चोक्तं यत्नञ्च परमास्थितः ॥
तच्छ्रुत्वा पन्नगाः सर्व्वे प्रहर्षात्फुल्ललोचनाः ।
पुनर्जातमिवात्मानं मेनिरे भुजगोत्तमाः ॥
तच्च मन्त्रं महाबाहो तव पित्रा प्रवर्त्तितम् ।
ऋत्विग्भिः सहितेनेह सर्व्वलोकेषु दुष्करम् ॥
प्रोक्तञ्च विष्णुना पूर्व्वं धर्म्मपुत्रस्य धीमतः ।
अवश्यं तस्य भविता नागानां भयकारकम् ॥
तस्मात् कालान्तराद्राजन् साग्रे वर्षशते गते ।
तत् सत्रं भविता घोरं नागानां क्षयकारकम् ॥
यास्यन्त्यधर्म्ममरितां दन्दशूका विषोल्बणाः ।
कोटिसंख्या महाराज निपतिष्यन्त्यहर्निशम् ॥
आप्लवे तु निमग्नानां घोरे रौद्राग्निसागरे ।
आस्तीकस्तत्र भविता तेषां नौर्वड्डिसागरे ॥
स्तुत्वा स चाग्निं राजानमृत्विजस्तदनन्तरम् ।
निवर्त्तयिष्यति तदा यागं नागानां मोहनं परम्॥
पञ्चम्यां तच्च भविता ब्रह्मा प्रोवाच लोहितान्॥
तस्मादियं महाबाहो पञ्चमी दयिता सदा ।
नागानामानन्दकरी दत्ता वै ब्रह्मणा पुरा ॥
कृत्वा तु भोजनं पूर्व्वं ब्राह्मणानान्तु कामतः ।
विसृज्य नागाः प्रीयन्तां ये केचित् पृथिवीतले॥
ये च हेलिमरीचिस्था येऽन्तरीक्षे दिवि स्थिताः।
ये नदीषु महानागा ये सरस्वतिगामिनः ।
ये च वापीतडागेषु तेषु सर्व्वेषु वै नमः ॥
नागान् विप्रांश्च संपूज्य विसृज्य च यथार्थतः ।
ततः पश्चात्तु भुञ्जीयात् सह भ्रात्रेनराधिपः ॥
प्रथमं मधुरमश्नीयात् द्वितीयं भुज्य कामतः ।
एवं नियमयुक्तस्य यत् फलं तन्निबोध मे ॥
श्रुतो नागपुरं याति पूज्यमानोऽप्सरोगणैः ।
विमानवरमारूढो रमते कालमीप्सितम् ॥
इह चागत्य राजासौ अयुतानां वरो भवेत् ।
सर्व्वरत्नसमृद्धः स्यात् वाहनाढ्यश्च जायते ॥
पञ्चजन्मन्यसौ राजा द्वापरे द्वापरे भवेत् ।
आधिव्याधिविनिर्म्मुक्तः पत्नीपुत्रसहायवान् ।
तस्मात् पूज्याश्चमाणाश्च घृतपायसगुग्गुलैः॥*॥
शतानीक उवाच ।
दशन्ति यं नरं विप्र नागाः क्रोधसमन्विताः ।
भवेत् किं तस्य दष्टस्य विस्तरात् प्रब्रवीहि मे ॥
सुमन्तुरुवाच ।
दंष्ट्रा शुक्ला च कृष्णा च रक्ता पीता च दक्षिणा
समासेन तु वक्ष्यामि यथा वै वर्णतः स्मृताः ॥
शुक्ला तु ब्राह्मणी ज्ञेया रक्ता तु क्षत्रिया स्मृता
वैश्या तु पीतिका ज्ञेया कृष्णा शूद्रा तु कथ्यते॥*
अतः परं प्रवक्ष्यामि दंष्ट्राणां विषलक्षणम् ।
दंष्ट्राणान्तु विषं नास्ति नित्यमेव भुजङ्गमे ॥
दक्षिणं नेत्रमासाद्य विषं सर्पस्य तिष्ठति ।
संक्रुद्धस्यैव सर्पस्य विषं गच्छति मस्तके ॥
मस्तकादनलीं याति ततो नाड़ीषु तिष्ठति ।
नाड़ीभ्यां गच्छते दंष्ट्रे विषं तत्र प्रवर्त्तते ॥
तत् सर्व्वं कथयिष्यामि यथावदनुपूर्व्वशः ।
अष्टभिः कारणैः सर्पो दशते नात्र संशयः ॥*॥
आक्रान्तो दशते पूर्व्वं द्वितीयं पूर्व्ववैरिणम् ।
तृतीयं दशते भीतश्चतुर्थं मददर्पितः ॥
पञ्चमन्तु क्षुधाविष्टः षष्ठञ्चैव विषोल्बणः ।
सप्तमं पुत्ररक्षार्थं अष्टमं कालचोदितम् ॥
यस्तु सर्पो दशित्वा तु उदरं परिवर्त्तयेत् ।
बलभुग्नाकृतिर्दंष्ट्रा आक्रान्तं तं विनिर्द्दिशेत् ॥
यस्य सर्पेण दष्टस्य गम्भीरं दृश्यते व्रणम् ।
वैरदष्टं विजानीयात् कश्यपस्य वचो यथा ॥
एकदंष्ट्रा पदे यस्य अव्यक्तं न च कूपितम् ।
भीतदष्टं विजानीयात् ययौवाच प्रजापतिः ॥
यस्य सर्पेण दष्टस्य रेखा दन्तस्य जायते ।
मददष्टं विजानीयात् कश्यपस्य वचो यथा ॥
द्वे च दंष्ट्रे पदे यस्य दृश्येते च महाक्षतम् ।
क्षुधाविष्टं विजानीयात् यथोवाच प्रजापतिः ॥
द्वे दंष्ट्रे यस्य दृश्येते क्वचिद्बुधिरसंकुले ।
विषोल्बणं विजानीयाद्दशन्तं नात्र संशयः ।
अपत्यरक्षणार्थाय जानीयाद्ब्राह्म संशयः ॥
यत्तु काकपदाकारं चिह्नैर्हन्तैर्विच्छिद्रितम् ।
महानाग इति प्रोक्तः कालदष्टं विनिर्द्दिशेत्॥*॥
त्रिविधं दष्टजातेस्तु लक्षणं समुदाहृतम् ।
दृष्टं दृष्ट्वा तु पीतञ्च दष्टोद्गतं तथैव च ॥
यस्तु सर्पो दशित्वा तु पिबते तु विचक्षणः ।
दष्टा तु पीतं विज्ञेयं कश्यपस्य वचो यथा ॥
विषभागी तु सर्पस्य त्रिभागस्तत्र संक्रमेत् ।
उदरं दर्शयेद्दंश्यस्तु उद्गतं तं विनिर्द्दिशेत् ॥
कर्द्दितं विषवेगेन निर्व्विषः पन्नगो भवेत् ।
असाध्यापि विचेष्टयतुर्द्दंष्ट्राभिपीड़ितः ॥
ग्रीवाभङ्गो भवेत् किञ्चित् संदष्टो विषयोगतः।
आर्द्रश्लेष्मामघाभरणीकृत्तिकासु विशेषतः ॥
विशाखा त्रिषु पूर्व्वासु मूलास्वातिशतात्मके ।
सर्पदष्टा न जीवन्ति विषं पीतञ्च यैस्तथा ॥
शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च ।
न जीवन्ति नरा दष्टा नक्षत्रे तिथिसंयुते ।
हतो दंशस्ततः शुद्ध्यन्तरः परिकीर्त्तितः ॥"
इति भविष्यपुराणे शतसाहस्र्यां संहितायां
पञ्चमीकल्पे ॥*॥
कश्यप उवाच ।
"ततः परं प्रवक्ष्यामि कालदष्टस्य लक्षणम् ।
शृणु गौतम तत्त्वेन यादृशो भवते नरः ॥
जिह्वाभङ्गो हृदि शूलं चक्षुर्भ्यां च न पश्यति ।
दंशश्च दग्धसङ्काशं पक्वजम्बूफलोपमम् ॥
वैवर्ण्यं चैव दन्तानां श्यामो भवति वर्णतः ।
सर्व्वेष्वङ्गेषु शैथिल्यं पुरीषस्य च भेदनम् ॥
भस्मस्कन्धकटीग्रीव ऊर्द्धदृष्टिरधोमुखः ।
दह्यते वेपते चैव स्वपते च सुदुर्म्मुहुः ॥
शस्त्रेण छिद्यमानस्य रुधिरं न प्रवर्त्तते ।
दण्डेन ताड्यमानस्य दण्डराजी न जायते ॥
दंशे काकपदे सुनीलमसक्तञ्जम्बूफलाभं घनं
उच्छूनं रुधिराक्तसेकबहुलं कृष्णाग्निरोधी
भवेत् ।
जिह्वास्रासगलग्रहश्च सुमहान् या दुस्तचा
दृश्यते
संस्थानं प्रवदन्ति शास्त्रनिपुणास्तत् कालदष्टं
विदुः ॥
दंशे यस्याथ शोथः प्रवलितवलितं मण्डलं वा
सुनीलं
प्रस्वेदो गात्रभेदः स्रवति च रुधिरं सानुनासश्च
जल्पेत् ।
दन्तोष्ठाभ्यां वियोगो भ्रमति च हृदयं सन्धि-
रोधश्च तीव्रो
दिव्यानामेष दंशस्त्रविपुलमयो विद्धि तं
कालदष्टम् ।

दन्तेर्दन्तान् स्पृशति बहुशो दृष्टिरायासखिन्ना
स्थलो दंशः स्रवति रुधिरं केवलं चक्षुरेकम् ।
प्रत्यादिष्टः स्खलिति सततं सानुनासश्च भावेत्
यद्यद्ब्रूते सकलगदितं कालदष्टं तमाहुः ॥
वेपते वेदना तीव्रा रक्तनेत्रश्च जायते ।
ग्रीवाभङ्गश्च लालाभिः कालदष्टं विनिर्दिशेत्॥
दर्पणे सलिले वापि आत्मच्छायां न पश्यति ।
मन्दरश्मिं तथा दीपं तेजोहीनं दिवाकरम् ॥
वेपते वेदनात्तस्तु रक्तनेत्रश्च जायते ।
स याति निधनं जन्तुः कालदष्टं विनिर्दिशेत् ॥
अष्टम्याञ्च नवम्याञ्च कृष्णपक्षे चतुर्दशीम् ।
नागपञ्चमीदष्टानां जीवितस्य च संशयः ।
आर्द्राश्लेषामघाभरणीकृत्तिकासु विशेषतः ।
विशाखा त्रिषु पूर्व्वासु मूलास्वातियुतात्मके ॥
सर्पदष्टा न जीवन्ति विषं पीतञ्च यैस्तथा ।
शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च ।
न जीवन्ति नरा दष्टा नक्षत्रे तिथिसंयुते ॥
अष्टोत्तरं मर्म्मशतं प्राणिनां समुदाहृतम् ।
तेषां मध्ये तु मर्म्माणि दश ह्येवापि कीर्त्तिते॥
शङ्के नेत्रे भ्रुवोर्म्मध्ये वस्तिभ्यां हृषणान्तरे ।
कक्षे स्कन्धे हृदि मध्ये तालुके चिबुके गुदे ॥
एषु द्वादशमर्म्मेषु दष्टः शस्त्रेण वा हतः ।
न जीवन्ति नरा लोके कालदष्टं विनिर्दिशेत्॥*
अ-क-च-ट-त-प-म-य-शान् वदन्ति प्रोक्ष्या न
जीवन्ति क्षुत्तस्य गतम् ।
ब्रूयात् यदि स्खलति गिरा तस्य संप्राप्तकालः ।
भवति च यदि दूत उत्तमस्याधमो वा
यदि भवति च दूत उत्तमो वाधमस्य ॥
यादौ दष्टस्य नाम यदि वदति क्वचिद्वर्ण
तस्याथ पश्चात्
वर्णान्तं वर्णभेदो यदि भवति समः प्राप्तकालस्य
दूतः ॥
दूतो वा दण्डहस्तो भवति च युगलं पाश-
हस्तस्तथा वा
रक्तं वस्त्रञ्च कृष्णं अथ शिरसि गतं एक-
वस्त्रश्च दूतः ।
तैलाभ्यक्तश्च तद्वत् यदि त्वरितगतिर्मुक्तकेशश्च
याति
यः कुर्य्यात् घोरशब्दं करचरणयुगैः प्राप्त-
कालस्य दूतः ॥*॥
नागोदयं प्रवक्ष्यामि ईशानेन तु भाषितम् ।
ब्रह्मणा तु पुरा सृष्टा ग्रहा नागास्त्वनेकशः ॥
अनन्तं भास्करं विद्यात् सोमं विद्यात्तु वासुकिम्
तक्षकं भूमिपुत्रन्तु कर्कोटञ्च बुधं विदुः ॥
पद्मं बृहस्पतिं विद्यान्महापद्मञ्च भार्गवम् ।
कुलिकः शङ्खपालश्च द्वावेतौ तु शनैश्चरः ॥
पूर्व्वपादः शङ्खपालो द्वितीयः कुलिकोऽस्य च ।
नैर्ऋतभागे यमौ दिष्टौ दिनरात्रौ तथैव च ॥
शुक्लसोमौ च मध्याह्ने उदये तु क्षमासुतम् ।
प्रायः प्रागष्टमे भागे दिवासन्धाविहोच्यते ॥
ग्रहाश्च भुञ्जते राजन् पथि मृत्युं व्रजत्यधः ।
अधो गत्वा भवेत् सर्पो निर्व्विषो नात्र संशयः॥

शतानीक उवाच ।
नागदष्टः पिता यस्य भ्राता वा दुहितापि वा
माता पुत्रोऽथवा भार्य्या किं कर्त्तव्यं वदस्व वै॥
मोक्षाय तस्य विप्रेन्द्र दानं व्रतमुपोषितम् ।
ब्रूहि मे द्विजशार्दूल येन तद्धे करोम्यहम् ॥
सुमन्तुरुवाच ।
उपोष्या पञ्चमी राजन् नागानां पुष्टिवर्द्धनी ।
शुभैकमेकं राजेन्द्र विधानं शृणु भारत ! ॥
मासि भाद्रपदे या तु शुक्लपक्षे महीपते ।
सा तु पुण्या महाप्रोक्ता ब्राह्मापि च महीपते ॥
ज्ञेया द्वादश संवर्त्ते पञ्चम्यां भरतर्षभ ।
चतुर्थ्यामेकभक्तन्तु तस्यां नक्तं प्रकीर्त्तितम् ॥
भूरिचन्द्रमयं नागमथवा कलधौतकम् ।
कृत्वा दारुमयं वापि अथवा मृन्मयं नृप ॥
पञ्चम्यामर्च्चयेद्भक्त्या नागं पञ्चफणं नृप ।
करवीरैः शतपत्रैर्जातिपुष्पैश्च सुव्रत ॥
तथा गन्धप्रधूपैश्च पूज्यं पन्नगमुत्तमम् ।
ब्राह्मणं भोजयेत् पश्चात् घृतपायसमोदकैः ॥
अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च ।
तथा कर्कोटकं नागं नागं धार्त्तराष्ट्रकं नृप ॥
धृतराष्ट्रं शङ्खपालं कालियं तक्षकं तथा ।
पिङ्गलञ्च तथा नागं मासि मासि च कीर्त्तितम्
संवर्त्तान्ते पारणं स्यान्महाब्राह्मणभोजनम् ।
इतिहासविदे नागं गैरिकेण कृतं नृप ॥
तथाऽऽचार्य्यो प्रदातव्या वाचकस्य महीपते ।
एष पारणके वापि विधिः प्रोक्तो बुधैर्नृप ॥
तव पित्रा कृतत्वेव पितुर्मोक्षाय भारत ।
शुभाख्यिकेयं वैधी च पञ्चमी भरतर्षभ ॥
सुवर्णभारनिष्पन्नं नागं दत्त्वा तथा च गाम् ।
व्यासस्य कुरुशार्दूल पितुरानृण्यमाप्नुयात् ॥
तव पित्रा कृतत्वेवं पञ्चम्योपासनं नृप ।
उत्सृज्य नागतां वीर तव पूर्व्वं पितामहः ॥
पुर्य्यैतरसदो गत्वा तथा पुण्यसदो नृप ।
सुनासीरसदो गत्वा तथा भद्रसदो गतः ॥
भूपसद्मतो गत्वा कश्यपस्य सदो गतः ।
अन्येऽपि ये करिष्यन्ति इदं व्रतमनुत्तमम् ।
दष्टकात् मोक्षते तेषां शुभं स्थानमवाप्स्यति ॥
यश्चेदं शृणुयान्नित्यं नरः श्रद्धासमन्वितः ।
कुले तस्य न नागेभ्यो भयं भवति कुत्रचित् ॥"
इति भविष्यपुराणे पञ्चमीकल्पे ॥ * ॥
शतानीक उवाच ।
"सर्पाणां कति रूपाणि के वर्णाः किञ्च लक्षणम्
का जातिस्तु भवेत्तेषां केषु योनिः कुलेषु वा ॥
सुमन्तुरुवाच ।
अत्र ते वर्त्मि संवादं कश्यपस्य महात्मनः ।
यथासीद्गोतमेनेह शृणु पूर्व्वं हिमाचले ॥
हुताग्निहोत्रमासीनं कश्यपन्तु हिमाचले ।
प्रणम्य शिरसा भक्त्या गौतमो वाक्यमब्रवीत् ॥
सर्पाणां कति रूपाणि किञ्चिह्नं किञ्च लक्षणम्
जातिं कुलं तथा वर्णान् ब्रूहि सर्व्वं प्रजापते ।
कथं वा जायते सर्पः कथं मुञ्चेद्विषं प्रभो ।
विषवेगाः कति प्रोक्ताः कत्येव विषनाड़िकाः ॥
दंष्ट्राः कतिविधाः प्रोक्ताः किं प्रमाणं विषागमे
कदा तु रुष्यते गर्भं कथं वेह प्रसूयते ॥
कीदृशी स्त्री पुमांश्चैव कीदृशश्च नपुंसकम् ।
किं नाम दशनं चैव एतत् कथय सुव्रत ।
तस्य तद्वचनं श्रुत्वा कश्यपः प्रत्यभाषत ।
शृणु गौतम तत्त्वेन सर्पाणामिह लक्षणम् ॥*॥
माघाषाढे तथा ज्येष्ठे प्रमाद्यन्ति भुजङ्गमाः ।
ततो नागो नागिनी च मैथुनं संप्रपद्यते ॥
चतुरो वार्षिकान् मासान् नागो गर्भमधारयत्
ततः कार्त्तिकमासे तु अण्डकानि प्रसूयते ॥
अण्डकानान्तु विज्ञेयं हे शते हे च विंशती ।
तान्येव भक्षयेत् सा तु भागैकं क्षुधया त्यजेत् ॥
सुवर्णार्कवर्णनिभात् पुमान् संजायतेऽण्डकात्
तानेव खादते सर्पी अहोरात्राणि विंशतिम् ॥
चन्द्रार्कसुवर्णाभात् दीर्घराजीवसन्निभात् ।
तस्मादुत्पाद्यते स्त्री वै अण्डाद्ब्राह्मण-
सत्तम ॥
शिरीषपुष्पवर्णाभादण्डकात् स्यान्नपुंसकम् ।
ततो भिनत्ति चाण्डानि वर्षासेन तु गौतम ॥
ततस्ते प्रीतिसंबन्धात् स्नेहं बध्नन्ति बालकाः ।
ततोऽसौ समरात्रेण कृष्णो भवति यत्नतः ॥*॥
आयुःप्रमाणं सर्पाणां शतं विंशोत्तरं स्मृतम् ।
मृत्युस्थानविधो ज्ञेयः शृणुष्वात्र यथाक्रमम् ॥
मयूरात् मानुषाद्वापि चकोराद्गोसुरात्तथा ।
विड़ालान्नकुलाच्चैव वराहाद्धयिकात्तथा ॥
एतेषां यदि मुच्येत जीवेद्विंशोत्तरं शतम् ।
सप्ताहे तु ततः पूर्णे दंष्ट्राणान्तु विरोहणम् ॥
विषस्यागमनं तत्र विज्ञेयञ्च पुनः पुनः ।
एवं ज्ञात्वा तु तत्त्वेन विषकर्म्म समारभेत् ॥
एकविंशतिरात्रेण विषं दंष्ट्रासु जायते ।
नागीपार्श्वसमावर्त्ती बालसर्पस्तु उच्यते ॥
पञ्चविंशतिरात्रस्तु सद्यः प्राणहरो भवेत् ।
षण्मासाज्जातमात्रस्तु कञ्चुकं वै मुञ्चति ॥
पादानाञ्चापि विज्ञेया हे शते हे च विंशती ।
गोलोमसदृशाः पादाः प्रविशन्ति क्रमन्ति च ॥
सन्धीनां चास्य विज्ञेयं हे शते विंशती तथा ।
पांशुलत्वापि विज्ञेया हे शते विंशतिस्तथा ॥
अकालजाता ये सर्पा निर्व्विषास्ते प्रकीर्त्तिताः ।
पञ्चसप्ततिवर्षाणि आयुस्तेषां प्रकीर्त्तितम् ॥
रक्तपीतशुक्लदन्ता आनीला मन्दवेगिनः ।
एते चाल्पायुषो ज्ञेया अल्पाहाराश्च भीरवः ॥
एकश्चास्य भवेद्रक्तं हे जिह्वे च प्रकीर्त्तिते ।
प्रथमा ब्रह्मदैवत्या द्वितीया विष्णुदैवता ॥
तृतीया रुद्रदैवत्या चतुर्थी यमदैवता ।
हीना प्रमाणतः सा तु वामनेत्रं समाश्रिता ॥
नाड्यां मन्त्राः प्रयोक्तव्या नौषधं नैव भेषजम् ।
वैद्यः पराङ्मुखो याति मृत्युस्तस्या विलेखनात्॥
चिकित्सा न बुधैः कार्य्या तदन्तं तस्य जीवितम्
मकरीं मासिकीं विद्यात् करालीञ्च हिमा-
सिकीम् ।
कालरात्री भवेत् त्रीणि चतुरो यमदूतिका ॥
मकरीशल्यकं विद्यात् करालीं काकपादिका ।

टकाराकृतिः कालरात्री याम्या कूपाकृतिः स्मृता ॥
मकरी वातुला श्वेता करालो पैत्तिकी स्मृता।
कफात्मिका कालरात्री यमदूती सान्निपातिकी
शुक्ला तु मकरी श्वेता करालो रक्तसन्निभा।
कालरात्री भवेत् पीता कृष्णा च यमदूतिका॥"
इति भविष्यपुराणे पञ्चमीकल्पे ॥ * ॥

कश्यप उवाच।

"सविषा दंष्ट्रयोर्मध्ये यमदूती तु चेद्भवेत्।
न चिकित्सा बुधैः कार्या तं गतायुं विनिर्दिशेत् ॥
प्रहराई दिवारात्रौ एकैकं भुञ्जते अहिः।
एकस्य च समानस्य द्वितीयं षोड्शं तथा ॥
नागोदये ययुर्दष्टो हतो विद्धो विदारितः।
कालदष्टं विजानीयात् कश्यपस्य वचो यथा ॥
यस्मात्रे पतते बिन्दुर्व्वालाग्रसलिलोद्धृतम्।
तस्मात्रं स्रवते दंष्ट्राविषं सर्पस्य दारुणम् ॥
ज्वालाग्रते तु संपूर्णे देहे संक्रमते विषम्।
यावत् संक्रामयेद्वायुं कुत्रितं वा प्रसारयेत् ॥
अनेन क्षणमात्रेण विषं गच्छति मस्तके।
वेधते विषवेगस्तु शतशोऽथ सहस्रशः ॥
वर्द्धते रक्तमासाद्य ततो वाते शिखी यथा।
तैलबिन्दुर्ज्वलं प्राप्य यथा वेगेन वर्द्धते ॥
शिखण्डी वायवं प्राप्य मारुतेन समीरितः।
ततस्तालागतं प्राप्य त्वचास्थानं विचेष्टितम् ॥
त्वचासु द्विगुणं विद्याच्छोनितेषु चतुर्गुणम्।
पित्ते तु त्रिगुणं याति श्लेष्मे वे षोड्शं भवेत् ॥
वायो त्रिंशद्गुणश्चैव मज्जे षष्टिगुणं तथा।
प्राणे चैकार्णवीभूते सर्व्वस्रोतान्निरोधयेत् ॥
स्रोतेन रुध्यमानेन याति साध्यमसाध्यताम्।
ततोऽसौ म्रियते जन्तुर्निश्वासोच्छ्वासवर्ज्जितः ॥
निष्क्रान्ते तु ततो जीवे भूते पञ्चत्वमागते।
तानि भूतानि गच्छन्ति यस्य यस्य यथालयम् ॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च।
इत्येषामेव संघातः शरीरमभिधीयते ॥
पृथिवी पृथिवीं याति आपस्त्रोयेषु लीयते।
तेजो गच्छति चादित्यं मारुतो मारुतं व्रजेत्॥
आकाशश्चैव आकाशे सह तेनैव गच्छति।
स्वस्थानं ते प्रपद्यन्ते परस्परवियोजिताः ॥
न जीवेदागतः कश्चिदिह जन्मनि सुव्रत।
विषार्थं न उपेक्षेत त्वरितं तु चिकित्सयेत् ॥*॥
एकमस्ति विषं लोके द्वितीयश्चोपपद्यते।
यथा चन्द्रविषश्चैव स्थावरन्तु तथैव च ॥
प्रथमे विषवेगे तु रोमहर्षः प्रजायते।
द्वितीये विषवेगे तु स्वेदो गात्रेषु जायते ॥
तृतीये विषवेगे तु कम्पो गात्रेषु जायते।
चतुर्थे विषवेगे तु श्रोत्रान्तरनिरोधकृत् ॥
पञ्चमे विषवेगे तु हिक्का गात्रेषु जायते।
षष्ठे तु विषवेगे तु श्रोत्रभङ्गस्तु जायते ॥
सप्तमे विषवेगे तु प्राणेभ्यो विप्रमुच्यते।
सप्तधातुवहा श्रोतं वैनतेयेन भाषिताः ॥*॥
त्वचस्थाने विषे प्राप्ते तस्य रूपाणि मे शृणु।
अङ्गानि तिमिरायन्ते यतन्ते च मुहुर्मुहुः ॥
एतानि यस्य चिह्नानि तस्य त्वचगतं विषम्।
तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् ॥
अर्कमूलमपामार्गप्रियङ्गु तगरं तथा ॥
एतदालोड्य दातव्यं ततः सम्पद्यते सुखम् ॥
ततस्तस्मिन् कृते विप्रा न निवर्त्तेत चेद्विषम्।
त्वचस्थानं ततो भित्त्वा रक्तस्थानं प्रधावति ॥*॥
विषे च रक्तसंप्राप्ते तस्य रूपाणि मे शृणु।
दह्यते मुह्यते चैव शीतलं बहु मन्यते ॥
एतानि यस्य रूपाणि तस्य रक्तं विषं गतम्।
तत्रागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् ॥
उशीरं चन्दनं कुष्ठमुत्पलं तगरं तथा।
महाकालस्य मूलानि सिन्धुवारमृगस्य च ॥
हिङ्गु च मरिचश्चैव पूर्व्ववेगे तु दापयेत्।
हुहुती हस्तिकाली च इन्द्रवारुणिमूलकम् ॥
सर्पगन्धा घृतं चैव द्वितीये परिकीर्त्तितम्।
सिन्दुवारं तथा हिङ्गु तृतीये कारयेद्बुधः ॥
नस्यं पानञ्च कुर्व्वीत अञ्जनं लेपनं तथा।
एतैर्नवोपचारेण ततः सम्पद्यते सुखम् ॥ * ॥
रक्तस्थानं ततो गत्वा पित्तस्थानं प्रधावति।
पित्तस्थानगते विप्र विषे रूपाणि मे शृणु ॥
उत्तिष्ठते निपतते दह्यते मुह्यते तथा।
गात्रतः पीतता स्याद्वै दिशः पश्यति पीतिकाः॥
धवलाय भवेन्मूर्च्छा न चात्मानं विजानते।
विषक्रियां तस्य कुर्य्यात् यथा सम्पद्यते सुखम् ॥
पिप्पलं मधुकं चैव मधुखण्डघृतं तथा।
मधुसारमलाबुञ्च जातिशर्करवालुकाम् ॥
इन्द्रवारुणिमूलञ्च गवां मूत्रेण पेषयेत्।
नस्यं तस्य प्रयुञ्जीत पानमालेपमार्ज्जनम् ॥
एतैर्नवोपचारेण ततः सम्पद्यते सुखम्।
पित्तस्थानमतिक्रम्य श्लेष्मस्थानञ्च गच्छति ॥*॥
श्लेष्मस्थाने ततः प्राप्ते तस्य रूपाणि मे शृणु।
गात्राणि तस्य स्तभ्यन्ते निश्वासश्च न जायते ॥
लाला च स्रवते तस्य कण्ठे घुरघुरायते।
एतानि यस्य रूपाणि तस्य श्लेष्मगतं विषम् ॥
तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम्।
त्रिकटुकञ्च कोशातकी लोध्रमधुसारकम् ॥
एतेषां समभागानि गवां मूत्रेण पेषयेत्।
नस्यं पानञ्च कुर्व्वीत अञ्जनं लेपनं तथा ॥
एतैर्नवोपचारेण ततः सम्पद्यते सुखम्।
श्लेष्मस्थानमतिक्रम्य चायुस्थानञ्च गच्छति ॥*॥
तत्र रूपाणि वक्ष्यामि वायुस्थानगते विषे।
आध्मायते च जठरं यत्नवांश्च न पश्यति ॥
ईदृशं कुरुते रूपं दृष्टिभङ्गश्च जायते।
एतानि यस्य रूपाणि तस्य वायुगतं विषम् ॥
तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम्।
गोधमूलं पियालञ्च रास्ना च गजपिप्पली ॥
भार्गी वचा पिप्पलिदेवरास-
मधूकसारं सह सिन्दुवारम्।
हिङ्गुञ्च पिष्ट्वा गुटिकाश्च कुर्य्या-
दृद्याश्च तस्याञ्जनलेपनादीन् ॥
एषोऽगदः सर्व्वविषाणि हन्यात्
स्वयम्भुवा देववरेण सृष्टः ॥
अञ्जनञ्चैव नस्यञ्च क्षिप्रं दद्याद्विषान्विते।
वायुस्थानं ततो मुक्त्वा मज्जस्थानं प्रधावति॥*॥
विषे मज्जगते विप्र तस्य रूपाणि मे शृणु।
दृष्टिश्च क्षीयते तस्य भृशमङ्गानि मुह्यति ॥
एतानि यस्य रूपाणि तस्य मज्जगतं विषम्।
तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् ॥
घृतं मधु शर्करा च उशीरं चन्दनं तथा।
एतदालोड्य दातव्यं पानं तस्य च सुव्रत ॥
ततः प्रणश्यते दुःखं ततः सम्पद्यते सुखम्।
अथ तस्मिन् कृते योगे विषं तस्य निवर्त्तते ॥*॥
मज्जस्थानं ततो गत्वा मर्म्मस्थानं प्रधावति।
विषे तु मर्म्मसंप्राप्ते शृणु रूपं यथा भवेत् ॥
निर्येष्टः पतते भूमौ कर्णाभ्यां बधिरो भवेत्।
करिणा सिच्यमानस्य रोमहर्षो न जायते ॥
दण्डेन हन्यमानस्य दण्डराजी न जायते।
शस्त्रेण क्रियमाणस्य रुधिरं न प्रवर्त्तते ॥
केशेषु लुञ्चमानेषु नैव क्लेशप्रवेदने।
यस्य कर्णौ च पार्श्वौ च हनू पादौ च सन्धयः॥
शिथिलानि भवन्तीह स गतासुरिति श्रुतिः।
एतानि यस्य रूपाणि विपरीतानि गौतम ॥
मृतन्तु तं विजानीयात् कश्यपस्य वचो यथा।
वैद्यास्तस्य न पश्यन्ति ये पश्यन्ति कुशिक्षिताः॥
विचक्षणास्तु पश्यन्ति मन्त्रौषधिसमन्विताः।
तस्यागदं प्रवक्ष्यामि स्वयं रुद्रेण भाषितम् ॥
मयूरपित्तं मार्ज्जारपित्तं नकुलपित्तकम्।
मत्स्यमाहिषपित्तञ्च धानालीमूलमेव च ॥
कुङ्कुमं भार्ङ्गवं कुष्ठं काश्मरी च त्वचं तथा।
उत्पलस्य च किञ्जल्कं पद्मस्य कुमुदस्य च ॥
एतानि समभागानि गोमूत्रेण तु श्रोपयेत्।
एषोऽगदो यस्य हस्ते दष्टेन म्रियते न वै।
कालाहिनापि दष्टोऽपि क्षिप्रं भवति निर्व्विषः॥
क्षिप्रमेव प्रदातव्यं मृतसञ्जीवनौषधम्।
अञ्जनञ्चैव नस्यञ्च क्षिप्रं दद्यात् विचक्षणः ॥"
इति भविष्यपुराणे ब्रह्मपर्व्वणि पञ्चमीधातुगतविषक्रिया ॥*॥

गौतम उवाच।

"कीदृशं एतदाख्याहि सर्व्वं दष्टस्य लक्षणम् ॥

कश्यप उवाच।

अतः परं प्रवक्ष्यामि नागानां रूपलक्षणम्।
सर्पदष्टस्य च तथा समासाद्विजपुङ्गव ! ॥
अथ सर्पेण दष्टस्य ऊर्द्ध्वा दृष्टिः प्रजायते।
सर्प्या दष्टस्य च तथा अधोदृष्टिः प्रजायते ॥
नपुंसकेन दष्टस्य अङ्गमर्दः प्रजायते।
दृष्या दष्टस्य वा साम्या दृष्टिर्हि जवरोत्तम ॥
कुमारेणापि दष्टस्य दक्षिणा एव जायते।
गुर्व्विण्या वाथ दष्टस्य तथा स्वेदश्च जायते।
रोमाञ्चः सूतिकायाश्च वेपथुश्चापि जायते।
पन्नगो प्रभवेद्रात्रौ दिवा सर्पो विषाधिकः ॥
नपुंसकन्तु सन्ध्यायां कश्यपेन तु भाषितम्।
अन्धकारे तु दष्टानामुदके गहने वने ॥

सुप्तस्य वै प्रमत्तस्य पदे सर्पो न दृश्यते।
दृष्टरूपाश्च जानन् वै कथं वैद्यश्चिकित्सति ॥
चतुर्विधा रङ्गः प्रोक्ताः पन्नगास्तु महात्मना।
दर्वीकरा मण्डलिनो राजिला व्यन्तरास्तथा ॥
दर्वीकरा वातविषा मण्डलाः पैत्तिकाः स्मृताः।
श्लेष्मला राजिला ज्ञेया व्यन्तराः सान्निपातिकाः
रक्तं परीक्ष्येद्दाढं सर्पाणान्तु पृथक् पृथक्।
कृष्णं दर्वीकराणान्तु जायते वातसुखणम् ॥
रक्तं घनञ्च बहुशः शोणितं मण्डलीकृते।
पिच्छिलं राजिले ख्यं तद्वदन्तरके तथा॥*॥
ज्ञेयाः सर्पास्तु चत्वारः पञ्चमो नोपलभ्यते।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव चतुर्थकः ॥
ब्राह्मणे मधुरं दद्यात् तिक्तं दद्यात्तथोत्तरे।
वैश्ये कषफलं ददात् शूद्रे विफलमेव वा ॥
ब्राह्मणेन तु दष्टस्य दाहो गात्रेषु जायते।
मूर्च्छा च प्रबला स्याद्वै न ज्ञानमभिजायते ॥
श्यामवर्णं सुखञ्च स्याच्छनस्तम्भश्च जायते।
तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् ॥
अश्वगन्धामपामार्गं सिन्दुवारं सुरालयम्।
एतत् सर्पिःसमायुक्तं पानं नस्यञ्च दापयेत्।
एतेनैवोपचारेण सुखी भवति मानवः ॥*॥
क्षत्रियेण तु दष्टस्य कम्पो गात्रेषु जायते।
मूर्च्छा मोहस्तथा स्याद्वै न ज्ञानमभिजायते॥
जायते वेदना तस्य ऊर्द्ध्वञ्चैव निरीक्षते।
तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् ॥
अर्कमूलमपामार्गं प्रियङ्गुमथ वारुणीम्।
एतत् सर्पिःसमायुक्तं पानं तस्य प्रदापयेत्।
एतेनैवोपचारेण सुखी भवति मानवः ॥*॥
वैश्येनापि हि दष्टस्य शृणु रूपाणि यानि तु।
श्लेष्मप्रकोपो लाला च नवोद्दहति वेदना ॥
मूर्च्छा च प्रबला यस्य आत्मानं नाभिनन्दति।
तस्य कुर्य्यात् प्रतीकारं येन सम्पद्यते सुखम् ॥
अश्वगन्धां सगोमूत्रां गृहधूमं सयुग्गुलुम्।
शिरीषार्कपलाशञ्च श्वेतां च गिरिकर्णिकाम् ॥
गोमूत्रेण समायुक्तं पानं नस्यञ्च दापयेत्।
एष वैश्येन दष्टानामगदः परिकीर्त्तितः ॥*॥
शूद्रेणापि हि दष्टस्य शृणु तत्त्वेन गौतम।
कुप्यते वेपते चैव ज्वरः शीतञ्च जायते ॥
अङ्गानि चुलुचुलायन्ते शूद्रदष्टस्य लक्षणम्।
तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् ॥
पद्मञ्च लोध्रकञ्चैव चौद्रं पद्मस्य केशरम्।
मधु मधुकसारञ्च श्वेता च गिरिकर्णिका ॥
एतानि समभागानि पेषयेत् शीतवारिणा।
पानं लेपाञ्जनं नस्यं सुखी भवति मानवः ॥*॥
पूर्व्वाह्णे चरते विप्रो मध्याह्ने क्षत्रियश्चरेत्।
अपराह्णे चरेद्वैश्यः शूद्रः सन्ध्याचरो भवेत् ॥
आहारश्च पुण्याणि ब्राह्मणानां विदुर्बुधाः।
मूषिकाः क्षत्रियाणाञ्च आहारो द्विजसत्तम ॥
वैश्या मण्डूकभक्ष्याश्च शूद्राः सर्व्वाभिनस्तथा ॥
अयतो दशते विप्रः क्षत्रियो दक्षिणेन तु।
वामपार्श्वे सदा वैश्यः पश्चाद्वै शूद्र आदशेत् ॥
मदकाले तु संप्राप्ते पीड्यमाना महाविषाः।
अवेलायां दशन्ते वै मैथुनार्त्ता भुजङ्गमाः ॥*॥
पुण्यगन्धाः स्मृता विप्राः क्षत्रियाश्चन्दनावहाः।
वैश्याश्च हृतगन्धा वै शूद्राः कूर्म्मस्य गन्धिनः ॥*
वासं तेषां प्रवक्ष्यामि यथावदनुपूर्व्वशः।
नदीकूपतडागेषु गिरिप्रस्रवणेषु च ॥
आरामेषु पवित्रेषु शुचिष्वायतनेषु च ॥
वसन्ति ब्राह्मणाः सर्पाः ग्रामद्वारे चतुष्पथे ॥
क्षत्रियो वसते नित्यं तोरणेषु पुरेषु च।
गोशालाखश्वशालासु पलालेषु तटेषु च ॥
गोष्ठेषु पथि हट्टेषु विप्र वैश्या वसन्ति च।
अविविक्तेषु स्थानेषु निर्झरेषु वनेषु च ॥
शून्यागारे श्मशाने च शूद्रा विप्र वसन्ति च ॥
श्वेताश्च कपिलाश्चैव ये सर्पास्त्वनलप्रभाः।
सात्त्विका मनस्विनो विप्र ब्राह्मणास्ते बुधैः
स्मृताः ॥
रक्तवर्णसुवर्णाभप्रवालमणिसन्निभाः।
सूर्य्यप्रभास्तथा विप्र क्षत्रियास्ते भुजङ्गमाः ॥
नानाविचित्रराजीभिरतसीवर्णसन्निभा।
वर्णपुष्पसुवर्णाभा वैश्यास्ते च भुजङ्गमाः ॥
काकोदरनिभाः केचित् ये च अञ्जनसन्निभाः।
काकवर्णा धूम्रवर्णास्ते शूद्राः परिकीर्त्तिताः ॥*
यस्य सर्पेण दष्टस्य दंशमङ्गुलमन्तरम्।
बालदष्टं विजानीयात् कश्यपस्य वचो यथा ॥
यस्य सर्पेण दष्टस्य दंशं द्व्यङ्गुलमन्तरम्।
यौवनस्थेन दष्टस्य एतद्भवति लक्षणम् ॥
यस्य सर्पेण दष्टस्य सार्द्धद्व्यङ्गुलमन्तरम्।
वृद्धदष्टं विजानीयात् कश्यपस्य वचो यथा॥*॥
अनन्तः प्रेक्षते पूर्व्वे वामपार्श्वे तु वासुकिः।
तक्षको दक्षिणे पार्श्वे कर्कोटः पृष्ठतस्तथा ॥
बलेन भ्रमते पद्मो महापद्मो निमज्जति।
विमज्जंस्तिष्ठते चैव शङ्खपालो मुहुर्म्मुहुः ॥
सर्व्वेषां कुरुते रूपं कुलिकः पन्नगोत्तमः।
अनन्तस्य दिशा पूर्व्वा वासुकेस्तु हुताशनः ॥
दक्षिणा तक्षकस्योक्ता कर्कोटस्य तु नैर्ऋती।
पश्चिमा पद्मनाभस्य महापद्मस्य वायुजा ॥
उत्तरा शङ्खपालस्य वैशानी कुलिकस्य तु।
अनन्तस्य भवेत् पद्मं वासुकेः स्यात्तथोत्पलम् ॥
स्वस्तिकं तक्षकस्योक्तं कर्कोटस्य त्रिरेखकम्।
पद्मस्य तु भवेत् पद्मं शूलमश्वतरस्य तु ॥
शङ्खजातिर्भवेच्छत्रं कुलिकस्यार्द्धचन्द्रकम्।
अनन्तः कुलिको विप्रः क्षत्रियौ शङ्खवासुकी ॥
महापद्मस्तक्षकश्च वैश्यौ विप्र प्रकीर्त्तितः।
पद्मकर्कोटकौ शूद्रौ सदा ज्ञेयौ मनीषिभिः ॥
अनन्तकुलिकौ शुक्लौ वर्णतो ब्रह्मसम्भवौ।
वासुकिः शङ्खपालश्च रक्तौ क्षत्रियसमुद्भवौ ॥
तक्षकश्च महापद्म इन्द्रात् पीतौ बभूवतुः।
पद्मकर्कोटकौ विप सर्पौ कृष्णौ बभूवतुः ॥*॥
इयं यानं इयं क्षत्रं राजानमथ पावकम्।
धरणीमुत्पाद्य हृतानेतान् सिद्धिकरान् विदुः ॥
पूर्णकुम्भः पताका च काञ्चनं मणयस्तथा।
शरसो मालिका कम्बूजीवञ्जीवेति सुव्रता ॥
एतेषां दर्शनं श्रेष्ठं कन्या च प्रीतिसूतिका।
चतुःषष्टिः समाख्याता भोगिनो मत्तपन्नगाः ॥
अष्टशास्त्रेषु षड्विंशा अष्टत्रिंशा महीधराः।
विंशास्तु कुलिताः प्रोक्ता सप्त मण्डलिनस्तथा।
राजीवास्तु दश प्रोक्ता दश षोड़श पञ्च च ॥
इन्दुभो दुन्दुभिर्यश्च चैड़भः श्रेष्ठवाहनः ॥
नागपुष्पसुवर्णाख्या निर्व्विषा ये च पन्नगाः।
एवमेवन्तु सर्पाणां शतद्विनवति स्मृतम् ॥
वराहकर्णं गजपिप्पलिञ्च
गान्धारिका पिप्पलदेवदारु।
मधूकसारं सह सिन्धुवारं
द्विगुञ्च पिष्ट्वा गुड़िका च कार्य्या ॥*॥
सुमन्तुरुवाच।
इत्युक्तवान् पुरा वीर गौतमस्य प्रजापतिः।
लक्षणं सर्व्वनागानां रूपवर्णविषैस्तथा ॥
तस्मात् संपूजयेन्नागान् सदा भक्त्या समन्वितः
विशेषतस्तु पञ्चम्यां पयसा पायसेन च ॥
श्रावणे मासि पञ्चम्यां शुक्लपक्षे नराधिप।
द्वारस्योभयतो लेखा गोमयेन विधोल्खणाः ॥
पूजयेद्विधिवद्वीर दधिदूर्व्वाक्षतैः कुशैः।
गन्धपुष्पोपहारैश्च ब्राह्मणानाञ्च तर्पणैः ॥
ये त्वस्यां पूजयन्तीह नागान् भक्तिपुरःसराः।
न तेषां सर्पतो वीर भयं भवति कर्हिचित् ॥"
इति भविष्ये पञ्चमीकल्पे ॥*॥
सुमन्तुरुवाच।
"तथा भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः।
तथालिख्य नरो नागान् कृष्णवर्णादिवर्णकैः ॥
पूजयेद्गन्धपुष्पैश्च सर्पिःपायसगुग्गुलैः।
तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः ॥
आसप्तमात् कुलात्तस्य न भयं नागतो भवेत्।
तस्मात् सर्व्वप्रयत्नेन नागान् वै पूजयेद्बुधः ॥"
इति भविष्ये पञ्चमीकल्पे ॥*॥
सुमन्तुरुवाच।
"तथा चाश्वयुजे मासि पञ्चम्यां कुरुनन्दन।
कृत्वा कुशमयान्नागान् इन्द्राण्या सह पूजयेत् ॥
घृतोदकाभ्यां पयसा स्नापयित्वा विशाम्पते।
गोधूमैः पयसा खिन्नैर्भक्ष्यैश्च विविधैस्तथा ॥
यस्यस्यां विधिवन्नागान् शुचिर्भक्त्या समन्वितः
पूजयेत् कुरुशार्दूल तस्य शेषादयो नृप ॥
नागाः प्रीता भवन्त्येह शान्तिमाप्नोति मानवः
सुशान्तिलोकमासाद्य मोदते शाश्वतीः समाः ॥
इत्येतत् कथितं विप्र पञ्चमीकल्पमुत्तमम्।
पन्नगान्मुच्यते मर्त्यः सर्व्वसर्पनिषेधकम् ॥"
ॐ कुरु कुल्ले नः फट् स्वाहा। इति भविष्य-
पुराणे शतसाहस्र्यां संहितायां पञ्चमीकल्पे ॥*
अन्यच्च।
सूत उवाच।
"प्राणेश्वरं गारुड़ञ्च शिवोक्तं प्रवदाम्यहम्।
स्नानान्नादौ प्रवक्ष्यामि नद्यां दष्टो न जीवति
चितावल्मीकशैलादौ कूपे च विवरे तरोः।
दंशे रेखात्रयं यस्य प्राच्छन्नं स न जीवति ॥
षष्ठाच्च कर्कटे मेषे मूलाश्लेषामघादिषु।
कक्षाश्रोणिगले सन्धौ शङ्खकर्णोदरादिषु ॥

दण्डी शस्त्रधरो भिषुर्लग्नादिः कालदूतकः ।
वक्त्रे बाही च ग्रीवायां पृष्ठे च नहि जीवति॥
पूर्व्वं दिनपतिर्भुङ्क्ते हृदयामन्ततोऽपरे ।
शेषा ग्रहाः प्रतिदिनं षट्सङ्ख्यापरिवर्त्तनैः ॥
नागभोगक्रमो ज्ञेयो रात्रौ वारविवर्त्तनैः ।
शेषोऽर्कः फणिपबन्द्रस्तक्षको भौम ईरितः ॥
कर्कोटो ज्ञो गुरुः पद्मो महापद्मश्च भार्गवः ।
शङ्खः शनैश्चरो राहुः कुलिकश्चाष्टयो ग्रहाः ॥
रात्रौ दिवा सुरगुरोर्भोगी स्यादमरान्तकः ।
पङ्गोः कालो दिवा राहुः कुलिकेन सह
स्थितः ॥
यामार्द्धसन्धिसंस्थः स वेलां कालयतीश्वरेत् ।
वारर्क्षदिग्घड्यजियुगभूरेकभागतः ॥
दिवा षड्वेदनेत्रादिपञ्चचिवसुस्वांशकैः ।
पादाङ्गुष्ठे पादपृष्ठे गुल्फे जानुनि लिङ्गके ॥
नाभौ हृदि स्तनतटे कण्ठे नासापुटेक्षणे ।
कर्णयोश्च भ्रुवोः शङ्के मस्तके प्रतिपत्क्रमात् ॥
तिष्ठेच्चन्द्रश्च जीवेन पुंसो दक्षिणभागके ।
कायस्य वामभागे तु स्त्रिया वासुवहात् करात्॥
भ्रमवस्त्वक्रतो मोहो निवर्त्तेत च मर्हनात् ।
आत्मनः परमं बीजं हंसाख्यं स्फाटिकामलम् ॥
ध्यातव्यं विषपापघ्नं बीजं तस्य चतुर्व्विधम् ।
बिन्दुपञ्चस्वरयुतमाद्यमुक्तं द्वितीयकम् ॥
षष्ठारूढं तृतीयं स्यात् सविसर्गं चतुर्व्विधम् ।
ॐ कुरु कुल्ले स्वाहा ॥
विद्यात्रैलोक्यरक्षार्थं गरुड़ेन धृता पुरा ।
वधेप्सुना च नागानां मुखेऽयं प्रथमं न्यसेत् ॥
गले कुरु न्यसेत् पश्चात् हृदि चैव विशेषतः ।
कुल्ले स्वा गुह्ययोः पादयुगे हान्यास ईरितः ।
गरुड़ेऽपि लिखित्वा यत्र तत्रागाः संत्यजन्ति च॥
सहस्रमन्त्रजप्तन्तु सूत्रं कर्णे धृतं तथा ।
यदङ्गेऽपि शर्करा जप्ता क्षिप्ता नागास्त्यजन्ति च ।
मन्त्रस्यास्य जप्याद्यैः सिद्धिः प्राप्ता सुरासुरैः ॥
ॐ सुवर्णरेखे कुक्कुटविग्रहरूपिणि स्वाहा ॥
एवञ्चाष्टदले पद्मे दले वर्णयुगं लिखेत् ।
नामैतत् वारिधाराभिः स्नातो दष्टो विषं
त्यजेत् ॥
ॐ पचि स्वाहा ।
अङ्गुष्ठादिकनिष्ठान्तं करे न्यस्याथ देहके ।
के वक्त्रे हृदि लिङ्गे च पादयोर्गरुड़ो हि सः ॥
नाक्रामन्ति च तच्छायां स्वप्नेऽपि विषपन्नगाः
यस्तु लक्षं जपेच्चाद्यां स दष्टा नाशयेद्विषम् ॥
ॐ क्रां क्रीं क्रौं भिरण्डाये नमः ॥
कर्णे जप्ता त्रियं विद्या दष्टकस्य विषं हरेत् ।
ब-आ न्यसेत्तु पादाग्रे ह-ईं गुल्फेऽथ जानुनि ॥
उ-ऊ प-ऐ कटितटे ओ नाभौ विन्यसेत्
सुधीः ।
हृदि औ वक्त्रदेशे च अङ्गे अः हंससंयुताः ॥
हंसो विषादि च हरेत् जप्तो ध्यातोऽथ पूजितः
गरुड़ोऽहमिति ध्यात्वा कुर्य्यादिषहरां क्रियाम्
हं मन्त्रं गात्रविन्यस्तं विषादिहरमीरितम् ।
न्यस्य हंसं वामकरे नासामुखनिरोधजत् ॥
मन्त्रो हरेत् दष्टकस्य त्वङ्मांसादिगतं विषम् ।
स वायुना समाक्रष्य दन्तानां गरलं हरेत् ।
तनौ न्यसेदृष्टकेव नीलकण्ठादि संस्मरेत् ॥*॥
पीतं प्रत्यङ्गिरामूलं तण्डुलाद्विर्विषापहम् ।
पुनर्नवाफलिनीनां मूलं चक्रजमोदृयम् ॥
मूलं शुक्लद्रुहत्यास्तु कर्क्कोट्या गैरिकर्णिकम् ।
अहिर्दष्टतोपेतलेपोऽयं विषमर्दनः ॥
विषसृष्टिं न व्रजेच्च उष्णं पिबति यो घृतम् ।
पद्माङ्कन्तु शिरोवस्य मूलं गृह्णनजन्तथा ।
सर्व्वाङ्गलेपतश्चापि पानाद्दा विषहृद्भवेत् ॥
क्ष्रौं गोनसादिविषहृत् ॥
ब्रह्मलाटविसर्गान्तं ध्यातं वश्यादिकृद्भवेत् ।
न्यस्तं योनौ वशेत् कन्यां कुर्य्यान्मदजलाविलाम्
जप्ता सप्ताष्टसाहस्रं गरुत्मानिव सर्व्वगः ।
कविः स्यात् श्रुतिधारी स्याद्दश्यस्त्रीश्चायुरा-
प्रयात् ।
विषहृत् स्यात् कथा तद्वन्मुनिर्वा सम्मतो
भुवम् ॥"
इति गारुड़े प्राणेश्वरं गारुड़ं समाप्तं १९
अध्यायः ॥*॥*॥ अपरञ्च ।
अग्निरुवाच ।
"नागादयोऽथ तारादिदशस्थानानि मर्म्म च ।
सूतकं दष्टवेष्टेति सप्तलक्षणमुच्यते ॥
शेषवासुकितक्षाख्याः कर्क्कोटोऽब्जो महाम्बुजः।
गृहपालश्च कुलिक इत्यष्टौ नागवर्य्यकाः ॥
दशाष्टपञ्चत्रिगुणशतमूर्द्धान्विताः क्रमात् ।
विप्रो नृपो विशौ शूद्रौ द्वौ द्वौ नागेषु कीर्त्तितौ॥
तदन्वयाः पञ्चशतं तेभ्यो जाता ह्यसङ्ख्यकाः ।
फणिमण्डलिराजीलवातपित्तकफात्मकाः ॥
व्यन्तरा दोषभिन्नास्ते सर्पा दर्वीकराः स्मृताः।
रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः ॥
गोनसा मन्दगा दीर्घा मण्डलैर्विविधैः स्थिताः।
राजीलाचित्रिताः स्निग्धास्तीर्य्यगूर्द्धञ्च
राजिभिः ॥
व्यन्तरा मिश्रचिह्नाश्च भूवर्णाम्बेयवायवः ।
चतुर्व्विधास्ते षड्विंश भेदाः षोड़श गोनसाः॥
त्रयोदश च राजीला व्यन्तरा एकविंशतिः ।
येऽनुक्तकाले जायन्ते सर्पास्ते व्यन्तराः स्मृताः॥
आषाढ़ादित्रिमासैः स्याद्गर्भो मासचतुष्टये ।
अण्डकानां शते द्वे च चत्वारिंशत् प्रसूयते ।
सर्पा ग्रसन्ति सूतौ तान् विनाक्षीपुंनपुंसकान् ।
उन्मीलतेऽचि सप्ताहात् दृष्टो मासाद्भवेद्दहिः ॥
द्वादशाहात् स्वबोधः स्याद्दन्ताः स्युः सूर्य्य-
दर्शनात् ।
द्वात्रिंशद्दिनविंशत्याद्यतस्रस्तेषु दंष्ट्रिकाः ॥
करालो मकरी कालरात्री च यमदूतिकाः ।
एतास्ताः सविषा दंष्ट्रा वामदक्षिणपार्श्वगाः॥
यस्मात्तस्मात् क्षतिं जीवेत् यष्टिसमाहृयम्।
नागाः सूर्य्यादिवारेशाः सप्त उक्ता दिवानिशि॥
तेषां षट् प्रतिवारेषु कुलिकः सर्व्वसन्धिषु ।
गृहेन वा महाजेन सह तस्योदयोऽथवा ॥
द्वयोर्व्वा नाड़िकामन्त्रमन्तरं कुलिकोदयः ।
दुष्टः सकालः सर्व्वत्र सर्व्वदंशे विनिर्दिशेत् ॥
कृत्तिका भरणी स्वाती मूलं पूर्व्वात्रयाश्विनी ।
विशाखार्द्रा मघाश्लेषा चित्रा श्रवणरोहिणी ॥
हस्ता मन्दकुजौ वारौ पञ्चमी चाष्टमीतिथिः।
षष्ठी रिक्ता शिवा निन्द्या पञ्चमी च चतुर्दशी॥
सन्ध्याचतुष्टयं दुष्टं दग्धयोगाश्च राशयः ।
एकद्विद्वयो दंशा दष्टविद्ध खण्डितम् ॥
अदंशमवगुप्तं स्याद्दंशमेव चतुर्व्विधम् ।
त्रयो द्वेरकक्षता दंशा वेदना रुधिरो नृणाम् ॥
नक्तं द्वैरकाह्निकूर्म्माभा दंशाश्च यमचोदिताः ॥
दाहो पिपीलिकास्पर्शो कण्डूशोथरुजान्वितः ।
सतोदो ग्रन्थितो दंशः सविषो व्यस्तनिर्व्विषः॥
देवालये शून्यगृहे वल्मीकोद्यानकोटरे ।
रथ्या सन्ध्या श्मशाने च श्मशाने सिन्धुसङ्गमे ॥
द्वीपे चतुष्पथे सौधे गृहेऽन्ते पर्व्वतायतः ।
विलद्वारे जीर्णकूपे जीर्णवेश्मनि कुड्यके ॥
शिग्रुश्लेष्मातकाक्षेषु जम्बूडुम्बरणेषु च ।
वटे च जीर्णप्राकारे खास्यद्वत्कच्छजलुणि ॥
तालौ शङ्के गले मूर्द्धि चिबुके नाभिपादयोः ।
दंशोऽशुभः शुभो भूतः पुष्पहस्तः सुवाक् सुधीः॥
लिङ्गवर्णसमानश्च शुक्लवस्त्रोऽमलः शुचिः ।
अपहारागतः शस्त्री प्रमादी भूगतेक्षणः ॥
विवर्णवासाः पाशादिहस्तो गद्गदवर्णभाक् ।
शुष्ककाष्ठाश्रितः खिन्नस्त्रिलाङ्गककरांशुकः ॥
आर्द्रवासाः क्षणरक्तपुष्पो हेमशिरोरुहः ।
कुचमर्दी नखच्छेदी गुदसृक् पादलेखकः ॥
केशलुञ्चो व्रणच्छेदी दुष्टा दूतास्त्वमेकलः ।
इड़ान्यावाहयद्वेधा यदि दूतस्य चात्मनः ॥
आभ्यां हाभ्यां दृष्टयान्यान् विद्यात् स्त्रीपुंनपुं-
सकान् ।
दूतः स्पृशति यद्गात्रं तस्मिन् दंशमुदाहरेत् ॥
दूताङ्गिचलनं दुष्टं सुखिभिर्निन्दितं शुभा ।
जीवपार्श्वे शुभो दूतो दुष्टोऽन्यत्र समागतः ॥
जीवो गतागते दुष्टः शुभो दूतनिवेदने ।
दूतस्य वाक् प्रदुष्टा सा पूर्व्वामजाद्यनिन्दिता॥
विभक्तैस्तस्य वाक्यान्तैर्व्विषनिर्व्विषकालता।
आद्यैः स्वरैश्च कार्द्यैश्च वर्गैर्भिन्नलिपिर्द्विधा ॥
स्वरजोवसुमान् वर्गो इति चेष्यश्च माठकाः ।
वाताग्नीन्द्रजलात्मानो वर्गेषु च चतुष्टयम् ॥
नपुंसकाः पञ्चमाः स्युः स्वराः शक्राम्बुयोनयः ।
दुष्टो दूतस्य वाक्पादौ वाताग्नी मध्यमो हरिः॥
प्रशस्ता वारुणा वर्णा अतिदुष्टा नपुंसकाः ।
प्रस्थाने मङ्गलं वाक्यं गर्ज्जितं मेघहस्तिनोः ॥
प्रदक्षिणं फले दृष्टे चास्य च हृतं जितम् ।
शुभा गीतादिशब्दाः स्युरीदृशं स्यादसिद्धये ॥
अनर्थगीताद्याक्रन्दो दक्षिणे विहृतं च्युतम् ।
वेश्या विप्रो नृपः कन्या गौर्दन्ती मुरजध्वजौ ॥
चीराज्यदधिशङ्खाम्बुच्छत्रं भेरी फलं सुराः ।
तण्डुला हेमरूप्यञ्च सिद्धयेऽभिमुखा अमी ॥
सकाष्ठः सानलः कारुर्मलिनाम्बरभारभृत् ।
गलस्खट्वी गोमायुर्गृध्रोलूककपर्दिकाः ॥
तेषां कपालकार्पासा निषेधो भस्मनष्टयेः

विषवेगाश्च सप्त सुधांशोर्द्वात्वन्तरास्थितः ॥
विषदंशो ललाटं यात्यतो नेत्रं ततो मुखम् ।
आस्याच्चरणनाभौ द्वौ धातून् प्राप्नोति हि क्रमात् ॥"
इत्याग्नेये २८४ अध्याये लक्षणानि ॥*॥

अग्निरुवाच ।

"मन्त्रध्यानौषधैर्दष्टचिकित्सां प्रवदामि ते ।
ॐ नमो भगवते नीलकण्ठायेति ॥
जपनाद्विषहानिः स्यादौषधं जीवरक्षणम् ।
साध्यं सकृद्रसं पेयं द्विविधं विषमुच्यते ॥
जङ्गमं सर्पमूषादि शृङ्गादि स्थावरं विषम् ।
शान्तस्वरान्वितो ब्रह्मा लोहितं तारकः शिवः॥
विषते नाम मन्त्रोऽयं तार्क्ष्यः शब्दमयः स्मृतः ।
ज्वल महामते हृदयाय । गरुड़विलासशिरसे ।
गरुड़शिखायै । गरुड़विषभञ्जन ३ प्रभेदन ३ ।
विद्रासय ३ विमर्दय ३ कवचाय । अप्रतिहतशासनं वं फ्रूं फट् अस्त्राय । उग्ररूपधारक सर्व्वभयङ्कर भीषय ३ सर्व्वं दह ३ भस्मीकुरु कुरु स्वाहा नेत्राय ।
समवर्णान्तयुग्माष्टदिग्दलस्वरकेशरात् ।
वर्णरत्नं बहिश्चाभूत् कर्णिकं माढकाम्बुजम् ।
कृत्वा हृदिस्थं तन्मन्त्री वामहस्ततले स्मरेत् ॥
अङ्गुष्ठादौ न्यसेद्वर्णान् विषभेदोदिताः कलाः ।
पात्रं वज्रचतुष्कोणं पार्थिवं शक्रदैवतम् ॥
हृत्तार्डमाप्यं पद्मार्हं शुक्लं वरुणदैवतम् ।
त्र्यस्रं स्वस्तिकयुक्तञ्च भैषजं वह्निदैवतम् ॥
हृत्तबिन्दुहृतं वायुदेवतं क्ष्माप्तमानिलम् ।
अङ्गुष्ठाद्यङ्गुलीमध्ये पर्य्यन्तेषु स्ववेश्मसु ॥
सवर्णनागवाहनवेष्टितेषु न्यसेत् क्रमात् ।
विषते चतुरो वर्णान् स्वमण्डलसमन्वितः ।
अरुपे वरतन्मात्रे आकाशे शिवदैवते ॥
कनिष्ठामध्यपर्व्वान्ते न्यसेत्तस्याद्यमक्षरम् ।
नागानामादिवर्णांश्च स्वमण्डलगतान्यसेत् ॥
भूतादिवर्णान् विन्यस्य अङ्गुष्ठाद्यन्तपर्व्वसु ।
तन्मात्रादिगुणाद्यर्णानङ्गुलीषु न्यसेद्बुधः ॥
स्वर्गनादेव तार्क्ष्येण हस्ते हन्याद्विषहृदयम् ।
मण्डलादिषु तान् वर्णान् विषते करयोजितान्॥
अष्टाद्यङ्गुलिभिर्दृष्टनाभिस्थानेषु पर्व्वसु ।
सजोन्नतः सवर्णाभमानाभे सुस्निग्धप्रभम् ॥
कुङ्कुमारुणमाकर्णादाकेशान्तात् सितेतरम् ।
ब्रह्माण्डव्यापिनं तार्क्ष्यं चन्द्रास्यं नागभूषणम् ॥
नीलाग्रनासमात्मानं महापक्षं स्मरेद्बुधः ।
एवं तार्क्ष्यात्मनो वाक्यान्मन्त्रः स्यान्निष्फलो विषे
स्वस्ति तार्क्ष्यकरस्थान्तःस्थिताङ्गुष्ठविषापहा ।
तार्क्ष्यहस्तं समुद्यम्य तत्पक्षाङ्गुलिचालनात् ॥
कुर्य्याद्विषस्य स्तम्भादीन्स्तदुक्तमदवोषया ।
आकाशादेशभूबीजः पक्षाङ्गाधिपतिर्मनुः ॥
संस्तम्भयेति वीपातो भाषया स्तम्भयेद्विषम् ।
व्यत्यस्तभूषया बीजो मन्त्रोऽयं साधुसाधितः ॥
संग्रवः स्रावयग्रसः शब्दाद्यः संहरेद्विषम् ।
दष्टमृत्यावयेद्दंशं स्वजप्ताम्भोऽभिषेकतः ॥
स्वजप्तशङ्खभेर्य्यादिनिस्वनश्रवणेन वा ।
संदंशात्येव संयुक्तो भूतेजोव्यत्ययात् स्थितः ॥
भूवायुव्यत्ययान्मन्त्रो विषं संक्रामयत्यसौ ।
अन्तस्थो निजवेश्मस्थो बीजान्नीन्दुजलाम्बुभिः ।
एतत् कर्म्म नयेन्मन्त्री गरुड़ाकृतिविग्रहः ।
तार्क्ष्यं वारणगेहस्थस्तर्जनात्राशयेद्विषम् ॥
जानुदण्डीन्दुमुदितं स्वधाग्नीबीजलाञ्छितम् ।
स्नानपानात् सर्व्वविषजरारोगापमृत्युजित् ॥
पक्षि पक्षिमहापक्षि महापक्षि विवि स्वाहा ।
पक्षिपक्षि महापक्षि महापक्षि चीची स्वाहा
द्वावेतौ पक्षिराड्मन्त्रौ विषघ्नावभिमन्त्रणात् ।
पक्षिराजाय विद्महे पक्षिदेवाय धीमहि तन्नो गरुडः प्रचोदयात् ॥
वह्निस्थो पार्श्वतत्पूर्व्वौ दन्तस्थौकौ च दन्तिनौ
सकलो लाङ्गली चेति नीलकण्ठाद्यमीरितः ॥
वक्त्रःकण्ठशिखा-खेतं न्यसेत् स्तम्भे सुसंस्कृतौ ।
हर हर हृदयाय नमः कपर्दिने च शिरसे
नीलकण्ठाय वैशिखाम् ॥
कालकूटविषभक्षणाय स्वाहायर्व्वं वर्म्म च ।
कण्ठिनेत्रं क्षत्तिवासं नेत्रैः प्रत्येकशस्त्रिभिः ।
पूर्व्वादैरानयेर्युक्तं खेतपो तारुणासितैः ॥
अभयं वरदस्थापं वासुकिञ्च दधज्जटः ।
यज्ञोपवीतपार्श्वन्तु गौरी रुद्रोऽस्य देवता ॥
पादजानुगुह्यनाभिहृत्कण्ठाननमूर्द्धसु ।
मन्त्रवर्णान्न्यस्य करयोरङ्गुष्ठाद्यङ्गुलीषु च ॥
तर्ज्जन्यादितदन्तासु सर्व्वमङ्गुष्ठयोर्न्यसेत् ।
ध्यात्वैवं संहरेत् क्षिप्रं बद्धया मूलमुद्रया ॥
कनिष्ठा ज्येष्ठया बद्धा तिस्रोऽन्याः प्रसृतिर्जवः ।
विषनाशो वामहस्तमन्यस्मिन् दक्षिणं करम् ॥
नमो भगवते नीलकण्ठाय चिः । अमलकण्ठाय चिः सर्व्वज्ञकण्ठाय चिः क्षिप ओम् स्वाहा ॥
नमो नीलकण्ठाय नैकसर्व्वविषापहाय । नमस्ते रुद्रमन्यव इति सम्मार्ज्जनाद्विषं विनश्यति ॥
न सन्देहः कर्णजाप्या उपनेत्रा विधानतः ।
यजेद्रुद्रविधानेन नीलग्रीवं महेश्वरम् ।
विषव्याधिविनाशः स्यात् कृत्वा रुद्र विधानतः॥"
इत्याग्नेये महापुराणे दष्टचिकित्सा नाम२८५ अध्यायः ॥ * ॥ * ॥ यात्राकाले तस्य शुभाशुभसूचकत्वं यथा,—

"गोनासदर्व्वीकरराजिलाद्या
जात्यैव सर्व्वे भयदा भुजङ्गाः ।
विलोक्य सर्पं यदि निर्व्विकल्पा
निवृत्तविघ्नस्य शुभं विचिन्त्यम् ॥
पाषाणसंस्तम्भितकण्टकेषु
दत्त्वा पदं यान्ति विनष्टविघ्नाः ।
सर्पेच्छया पक्षनखाभिधेयः
प्रयाणकाले स तु वामभागे ।
दृष्टः शुभैः सिद्धिकरुद्यतायः-
स्तिष्ठेत् पथोर्द्धं यदि राज्यलाभः ॥"

इति सर्पः । इति वसन्तराजशाकुने १५ वर्गः ॥
सर्पकङ्कालिका, स्त्री, (सर्पकङ्काली एव । स्वार्थे कन् ।) वृत्तविशेषः । तत्पर्य्यायः । तीक्ष्णा २ विषदंष्ट्रा २ विषापहा ४ । इतिरत्नमाला ॥
सहा ५ सर्पकङ्काली ६ विषनाशिनी ७ । इति शब्दचन्द्रिका ॥
सर्पकङ्काली, स्त्री, (सर्पस्य कङ्कालमिवाङ्गं यस्याः। ङीष् ।) सर्पकङ्कालिका । इति शब्दचन्द्रिका ॥
सर्पगन्धा, स्त्री, (सर्पं गन्धयते हिनस्तीति । गन्ध हिंसने + अण् । टाप् ।) वृत्तविशेषः । यथा, "छत्राकी सर्पगन्धा च रसना च पलङ्कषा ॥"
इति जटाधरः ॥
सर्पघातिनी, स्त्री, (सर्पं हन्तीति । हन + णिनिः। ङीष् ।) सर्पकङ्कालीभेदः । यथा,—
"सर्पसहा सर्पनामा सर्पाङ्गी सर्पघातिनी ॥"
इति रत्नमाला ॥
सर्पतृणः, पुं, (सर्पस्तृणमिव च्छेद्यो यस्य ।) नकुलः । इति हेमचन्द्रः ॥
सर्पदंष्ट्रः, पुं, (सर्पस्य दंष्ट्रेव पुष्पमस्य ।)दन्तीवृक्षः । इति शब्दचन्द्रिका ॥
सर्पदंष्ट्रा, स्त्री, (सर्पस्य दंष्ट्रेव ।) वृश्चिकाली । इति रत्नमाला ॥
सर्पदंष्ट्रिका, स्त्री, (सर्पदंष्ट्रा + स्वार्थे कन् । टापि अत इत्वम् ।) अजशृङ्गी । इति राजनिर्घण्टः ॥
सर्पदण्डा, स्त्री, (सर्पं दण्डयतीति । दण्ड + अण् । टाप् ।) सैंहली । इति राजनिर्घण्टः ॥
सर्पदण्डी, स्त्री, (सर्पं दण्डयतीति । दण्ड + अण् । ङीष् ।) गोरक्षी । इति राजनिर्घण्टः ॥
सर्पदन्ती, स्त्री, (सर्पस्य दन्त इव पुष्पमस्याः । गौरादित्वात् ङीष् ।) नागदन्ती । इति राजनिर्घण्टः ॥
सर्पदमनी, स्त्री, (सर्पस्य दमनमस्याः । ङीष् ।) वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥
सर्पनामा, स्त्री, (सर्पस्य नाम नाम यस्याः ।) सर्पकङ्कालीभेदः । इति रत्नमाला ॥
सर्पपुष्पी, स्त्री, (सर्पस्य दन्त इव पुष्पमस्याः । ङीष् ।) नागदन्ती । इति राजनिर्घण्टः ॥
सर्पफणजः, पुं, (सर्पस्य फणात् जायते इति । जन + डः ।) सर्पफणजातमणिः । इति शब्दरत्नावली ॥
सर्पभुक्, [ज्] पुं, (सर्पं भुङ्क्ते इति । भुज + क्विप् । मयूरः । इति हेमचन्द्रः ॥ सर्पभक्षके, त्रि, ॥
सर्पमाला, स्त्री, (सर्पस्य मालेव ।) सर्पकङ्कालीभेदः । इति कांचित् रत्नमाला ॥ सर्पनामा इति साधुपाठः ॥
सर्पराजः, पुं, (सर्पाणां राजा समासे टच् ।) वासुकिः । इत्यमरः । १ । ८ । ४ ॥ (सर्पश्रेष्ठे, त्रि । यथा, हरिवंशे ६८ । १५ ।
"एष मोहं गतः कृष्णो मग्नो वै कालिये ह्रदे ।
भक्ष्यते सर्पराजेन तदागच्छत मारिषम् ॥")
सर्पलता, स्त्री, (सर्प इव लता ।) नागवल्ली । इति राजनिर्घण्टः ॥
सर्पसत्रं, क्ली, (सर्पनाशकं सत्रम् ।)सर्पनाशकयज्ञविशेषः । यथा, श्रीभागवते ।१२।६।१६-२८।
"जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितम् ।
यथा जुहाव संक्रुद्धः सर्पान् सत्रे सह द्विजैः॥

सर्पसत्रे समिद्धाग्नौ दह्यमानान् महोरगान्।
दृष्ट्वेन्द्रं भयसंविग्नस्तक्षकः शरणं ययौ॥
अपश्यंस्तक्षकं तत्र राजा पारीक्षितो द्विजान्।
उवाच तक्षकः कस्मात् दह्येतोरगाधमः॥
तं गोपायति राजेन्द्र शक्रः शरणमागतम्।
तेन संस्तम्भितः सर्पस्तस्माद्वाग्नौ पतत्यसौ॥
पारीक्षित इति श्रुत्वा ब्राह्मणैर्जिज्ञ उदारधीः।
सहेन्द्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते॥
तच्छ्रुत्वा ऋत्विग्विप्राः सहेन्द्रं तक्षकं मखे।
तक्षकाय्य पतस्वेह सहेन्द्रेण मरुत्वता॥
इति ब्रह्मोदितावेषैः स्थानादिन्द्रः प्रचालितः।
बभूव संभ्रान्तमतिः सविमानः सतक्षकः॥
तं पतन्तं विमानेन सह तक्षकमम्बरात्।
विलोक्याङ्गिरसः प्राह राजानं तं हनिष्यति॥
नैष त्वया मनुष्येन्द्र वधमर्हति सर्पराट्।
अनेन पीतममृतमथवा अजरामरः॥
जीवितं मरणं जन्तोर्गतिः स्वेनैव कर्म्मणा।
राजंस्ततोऽन्यो नास्यस्य प्रदाता सुखदुःखयोः॥
सर्पचौरारिवह्न्यम्बुक्षुत्तृड्व्याध्यादिभिर्नृप।
पञ्चत्वमिच्छते जन्तुर्भुङ्क्त आराध्यकर्म्म तत्॥
तस्मात् सत्रमिदं राजन् संस्थितेताभिचारिकम्।
सर्पा अनागसो दग्धा जनैर्दृष्टं हि भुज्यते॥
इत्युक्तः स तथेत्याह महर्षेर्मानयन् वचः।
सर्पसत्रादुपरतः पूजयामास वाक्पतिम्॥"
(जरत्कारुपुत्रस्यास्तीकस्य वचनादेव जनमेजयः सर्पसत्रात् विररामेति पुराणान्तरमतम्॥)

सर्पसत्री, [न्] पुं, (सर्पसत्रमस्यास्तीति। इनिः।) जनमेजयराजः। इति शब्दरत्नावली॥

सर्पसहा, स्त्री, (सर्पं सहते इति। सह+अच्।) सर्पकङ्कालीभेदः। इति रत्नमाला॥

सर्पहा, [न्] पुं, (सर्पं हन्तीति। हन्+क्विप्।) नकुलः। इति हेमचन्द्रः॥

सर्पाक्षं, क्ली, (सर्पस्य अक्षीव अक्षं यस्य। बच्।) रुद्राक्षम्। इति राजनिर्घण्टः॥

सर्पाक्षी, स्त्री, (सर्पस्य अक्षीव पुष्पं यस्याः। अच्। ङीप्।) गन्धनाकुली। इति राजनिर्घण्टः॥ हृच्चविशेषः। सहचरी इति गन्धिनी इति च हिन्दि भाषा। तत्पर्य्यायः। गण्डाली २ नाड़ीकलापकः ३। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कृमिनाशित्वम्। वृश्चिकोन्दुरसर्पाणां विषनाशित्वम्। व्रणरोपणत्वञ्च। इति भावप्रकाशः॥

सर्पाख्यः, पुं, (सर्पस्य आख्या आख्या यस्य।) महिषकन्दभेदः। इति राजनिर्घण्टः। नागकेशरः। इति रत्नमाला॥ सर्पनामके, त्रि॥

सर्पाङ्गी, स्त्री, (सर्पस्येव अङ्गं यस्याः। ङीप्।) सर्पकङ्कालीभेदः। इति रत्नमाला॥ सेंइली। इति राजनिर्घण्टः॥

सर्पादनी, स्त्री, (सर्पस्य तद्विषस्य अदनं भक्षणं यस्याः। ङीप्।) नाकुली। इति राजनिर्घण्टः॥

सर्पारातिः, पुं, (सर्पस्य अरातिः।) गरुड़ः। इति हेमचन्द्रः॥

सर्पारिः, पुं, (सर्पस्य अरिः।) नकुलः। इति रानानिर्घण्टः॥ गरुड़श्च॥ (यथा, हरिवंशे। ६८। ३७।
"तं दृष्ट्वा पन्नगश्रेष्ठं सर्पं सर्पारिकेतनः।
अब्रुव एव भगवान् प्रत्युवाचोरगेश्वरम्॥")

सर्पावासः, क्ली, (सर्पस्य आवासो यत्र।) चन्दनम्। इति राजनिर्घण्टः॥ सर्पस्थाने, पुं॥ (यथा, हरिवंशे। ६८। २५।
"यशोदामनुगच्छन्त्यः सर्पावासमिमं क्रदम्।
प्रविशामो न यास्यामो विना दामोदरं व्रजम्॥")

सर्पाशनः, पुं, (सर्पमश्नातीति। अश+ल्युः।) मयूरः। इति हलायुधः॥ गरुड़श्च॥

सर्पिः, [स्] क्ली, (सर्पतीति। ऋप गतौ+"अर्चिशुचिहुसृपीति।" उणा० २। १०८। इति इसिः।) घृतम्। इत्यमरः। २। ५२॥ (यथा, मनुः। ३। २७४॥
"अपि नः स कुले जायात् यो नो दद्यात् त्रयोदशीम्।
पायसं मधुसर्पिर्भ्यां प्राक्छ्राद्धे कुञ्जरस्य च॥")

उदकम्। इति निघण्टुः। १। १२॥)

सर्पिणी, स्त्री, (सर्पतीति। ऋप्+णिनिः। ङीप्।) सर्पभार्य्या। सापिनी इति भाषा॥ यथा, शब्दरत्नावल्याम्।
"भार्य्यारायौ सर्पदंष्ट्रा तत्स्त्री सर्पी च सर्पिणी॥"

क्षुद्रक्षुपभेदः। तत्पर्य्यायः। भुजगी २ भोगी ३ कुण्डली ४ पन्नगी ५ फणी ६। तस्या गुणौ। विषघ्नत्वम्। कुचवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥

सर्पी, स्त्री, (सर्प+जातौ ङीष्।) सर्पिणी। इति शब्दरत्नावली॥

सर्पी, [न्] त्रि, गमनकर्त्ता। ऋपधातोर्णिन्प्रत्ययेन निष्पन्नः॥ (यथा, किराते। ५।३५।
"स एष कालास उपान्तसर्पिणः
करोत्यकालेऽस्तमयं विवस्वतः॥")

सर्पीष्टं, क्ली, (सर्पीषां सर्पभार्य्याणामिष्टम्।) श्वेतचन्दनम्। इति रत्नमाला॥

सर्पेष्टं, क्ली, (सर्पाणामिष्टम्।) श्वेतचन्दनम्। इति जटाधरः॥

सर्व्व, सर्पणे। इति कविकल्पद्रुमः॥(भ्वा०-पर० सक०-सेट्।) दन्त्यादिः। धोष्ठवर्गशेषोपधः। सर्व्वति सिसर्व्वयिषति। इति दुर्गादासः॥

सर्व्वः, पुं, (सर्व्वस्मिन् सर्व्वतीति सर्व्व गतौ+पचाद्यच्। यद्वा, सृ गतौ+"सर्व्वं निशृण्वेति।" उणा० १। १५३। इति वन्प्रत्ययेन साधुः।) शिवः। इत्यमरः। १। १। ३२॥ चितिमूर्त्तिरयम्। यथा, विसर्जनात् पूर्वं भविष्यपुराणोक्तं स्वभावसिद्धप्राच्यैशान्यादिदिक्षु वामावर्त्तेन पूजनम्। यथा, सर्व्वाय चितिमूर्त्तये नम इत्यादि तिथ्यादितत्त्वम्॥ विष्णुः। यथा,—
"असतश्च सतश्चैव सर्व्वस्य प्रभवाश्रयः।
सर्व्वस्य सर्व्वदा ज्ञानात् सर्व्वमेतं प्रचक्षते॥"
इति विष्णुपुराणम्॥
विष्णुसहस्रनामस्तोत्रेऽप्येवमेव॥

सर्व्वः, त्रि, (सृ+वन्।) सम्पूर्णः। इत्यमरः। ३। १। ६४॥ अस्य पर्य्यायः सकलशब्दे द्रष्टव्यः। प्रयोगो यथा,—
"सर्व्वरत्नमयो मेरुः सर्व्वाश्चर्य्यमयं नभः।
सर्व्वतीर्थमयो गङ्गा सर्व्वदेवमयो हरिः॥"
इति वह्निपुराणे देवाम्बरीषसंवादे २ अध्यायः॥

सर्व्वंसहा, स्त्री, (सर्व्वं सहते इति। सह+"पूःसर्व्वयोर्दारिसहोः।" ३। २। ४१। इति खच्। अरुर्द्विषदिति मुम्।) पृथिवी। इत्यमरः। २। १। ३॥ (यथा आर्य्यासप्तशत्याम्। १३८।
"जड़ामुनातिवाहय पृष्ठे लग्नापि कालमचलापि।
सर्व्वंसहे कठोरत्वचः किमङ्के न क्रमठस्य॥"

राज्ञि, पुं, । इति कायिका॥ सर्व्वक्लेशादिसहे, त्रि, । यथा, साहित्यदर्पणे। २। २०।
"कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्व्वंसहो
देवेदृशी तु कथं भविष्यति हहा हा देवि धीरा भव॥")

सर्व्वकः, त्रि, सकलः। सर्व्वशब्दस्य टेः पूर्व्वमकितस्मात् स्वार्थे के च निष्पन्नः। इति मुग्धबोधव्याकरणम्॥

सर्व्वकर्त्ता, [ऋ] पुं, (सर्वेषां कर्त्ता।) ब्रह्मा। इति शब्दरत्नावली॥

सर्व्वकर्म्मीणः, त्रिः (सर्व्वं कर्म्माणि व्याप्नोतीति। सर्व्वकर्म्म+"तत्सर्व्वादेः पथ्यङ्गकर्म्मपत्रपात्रं व्याप्नोति।" ५। २। ७। इति खः।) सकलकर्म्मकर्त्ता। यथा, भट्टौ ५ सर्गे।
"संग्रामे सर्व्वकर्म्मीणौ बाह्वोर्यस्यौपजानुकौ॥"

सर्व्वके, व्य, सर्व्वत्र। सर्व्वशब्दात् अकच्प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥

सर्व्वकेशी [न्] पुं, (सर्व्वकेशोऽस्यास्तीति। सर्व्वकेश+"सर्व्वादेर्वेति वक्तव्यम्।" ५। २। १३५। इत्यस्य वार्त्तिकोक्त्या इनिः।) नटः। इति शब्दरत्नावली॥

सर्व्वचारः, पुं, (सर्व्वेषां चारः।) चारभेदः। सावान् इति भाषा। इति केचित्॥ तत्पर्य्यायः। बहुचारः २ समूहचारकः ३ स्तोमचारः ४ महाचारः ५ मलारिः ६ चारमेलकः ७। अस्य गुणाः। अतिचारत्वम्। चक्षुष्यत्वम्। वस्तिशोधनत्वम्। उदावर्त्तकृमिनाशित्वम्। मलवस्तिविशोधनत्वञ्च। इति राजनिर्घण्टः॥

सर्व्वगं, क्ली, (सर्व्वं गच्छतीति। गम+"अकालत्मस्तार्ध्वं ति।" ३। २। ४८। इति डः।) जलम्। इति मेदिनी॥

सर्व्वगः, पुं, (सर्व्वं गच्छतीति। गम+डः।) शिवः। (यथा, महाभारते। १३। १७। १०४।
"प्रभावः सर्व्वगो वायुरर्य्यमा सविता रविः॥")

ब्रह्मा। इति मेदिनी॥ आत्मा। इति शब्द-

माला ॥ (भीमस्य पुत्रः । यथा, महाभारते । १ । ८५ । ७७ ।
भीमोऽपि काश्यां बलधरां नामोपयेमे वीर्य्यशुल्कां तस्यां सर्व्वगं नामोत्पादयामास ॥"
सर्व्वत्रगामिनि, त्रि ॥ (यथा, याज्ञवल्क्ये । ३ । १३० ।
"करणैरन्वितस्यापि पूर्व्वज्ञानं कथञ्चन ।
वेत्ति सर्व्वगतां कस्मात् सर्व्वगोऽपि न वेदनाम् ॥")
सर्व्वगन्धं, क्ली, (सर्व्वं गन्धा यत्रेति ।) चतुर्जातकादि । यथा, शब्दचन्द्रिकायाम् ।
"चतुर्जातककर्पूरकोलत्वङ्नागकुङ्कुमैः ।
सर्व्वगन्धमिदं चाद्यं मुनिभिः परिकीर्त्तितम् ॥"
अन्यच्च भावप्रकाशे ।
"चातुर्जातककर्पूरकोलागरुकुङ्कुमम् ।
लवङ्गसहितञ्चैव सर्व्वगन्धं विनिर्द्दिशेत् ॥"
(पुंलिङ्गेऽपि दृश्यते । यथा, हरिवंशे भविष्यपर्व्वणि । ४८ । ४२ ॥
"रक्तानि सर्व्वगन्धांश्च विल्वञ्च सवितृकृतम् ।
प्रशस्तानाञ्चौषधीर्हिरण्यं मङ्गलानि च ॥"
सर्व्वगन्धविशिष्टे, त्रि । यथा, छान्दोग्योपनिषदि । १ । १४ । २ ।
"आकाशात्मा सर्व्वकर्म्मा सर्व्वकामः सर्व्वगन्धः सर्व्वरसः सर्व्वमिदमभ्यात्तोऽवाक्यनादरः ॥")
सर्व्वगा, स्त्री, (सर्व्वं गच्छतीति । गम् + डः । टाप् ।) प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥
सर्व्वग्रन्थिः, पुं, (सर्व्वस्मिन् ग्रन्थिरिव यत्र ।) पिप्पलीमूलम् । इति राजनिर्घण्टः ॥
सर्व्वग्रन्थिकं, क्ली, (सर्व्वत्र ग्रन्थिरिवात्र । कन् ।) पिप्पलीमूलम् । इति हेमचन्द्रः ॥
सर्व्वचर्म्मीणः, त्रि, (सर्व्वचर्म्मणा कृतः । सर्व्वचर्म्मन् + "सर्व्वचर्म्मणः कृतः खखञौ ।" ५ । २ । ५ । इति खः ।) सकलचर्म्मनिर्म्मितः । इति सिद्धान्तकौमुदी ॥
सर्व्वजनीनः, त्रि, (सर्व्वजनाय हितः । सर्व्वजन + "सर्व्वजनात् ठञ् वक्तव्यः ।" ५ । १ । ८ । इत्यस्य वार्त्तिकोक्त्या खः ।) सर्व्वजनसम्बन्धी । इति सिद्धान्तकौमुदी ॥
सर्व्वजया, स्त्री, (सर्व्वेषां जयो यस्याः ।) स्त्रीकर्त्तव्यमार्गशीर्षादिद्वादशमासनिष्पाद्यव्रतविशेषः । यथा । अथ सर्व्वजयाव्रतम् । सामान्योक्तं कृत्वा अथ मार्गशीर्षे मासि अमुकपक्षे अमुकतिथौ विष्णुपदीसंक्रान्त्यारभ्य वर्षपर्य्यन्तं अमुकगोत्रा श्रीअमुकी द्वादशमासशाकादित्यागफलप्राप्तिपूर्व्वकपुत्रपौत्राद्यैश्वर्य्यप्राप्युत्तर-स्वर्गकामा मनोरथकामा वा गणेशादिहरगौरीपूजात्मकसर्व्वजयाव्रतमहं करिष्ये । ततः सामान्योक्तं नवग्रहपूजान्तं कृत्वा अङ्गन्यासं प्रणवेन कृत्वा गौरीसहितहरं ध्यायेत् ।
"श्वेतवर्षं वृषारूढं व्याघ्रयज्ञोपवीतिनम् ।
विभूतिभूषिताङ्गञ्च व्याघ्रचर्म्मधरं शुभम् ॥
पञ्चवक्त्रं दशभुजं जटिलं चन्द्रचूड़कम् ।
त्रिनेत्रं पार्व्वतीयुक्तं प्रमथैश्च समन्वितम् ।
प्रसन्नवदनं देवं वरदं भक्तवत्सलम् ॥"
इति ध्यात्वा ॐ नमः शिवाय स्त्रीं दुर्गायै नमः । इति मन्त्रेणार्घ्यं कृत्वा पुनरर्घ्यात्वा ॐ गौरीसहितहराय नमः । इत्यासनादिना पूजयेत् । ततः पञ्चपुष्पाञ्जलिदानं कृत्वा प्रणमेत् ।
"नमस्ते पार्व्वतीनाथ ! नमस्ते शशिशेखर ! ।
नमस्ते पार्व्वतीदेव्यै चण्डिकायै नमो नमः ॥"*
अथ कथा ।
लक्ष्मीरुवाच ।
"भगवन्तं सुखासीनं लक्ष्मीः पृच्छति केशवम् ।
केन व्रतेन देवेश स्त्रीणां सर्व्वमनोरथम् ॥
सौभाग्यमतुलञ्चापि पुत्रपौत्रविवर्द्धनम् ।
नानासुखसमायुक्तं लभ्यते वैष्णवं पदम् ॥
तद्व्रतं ब्रूहि मे देव ! क्रियते च यथा प्रभो ॥
श्रीभगवानुवाच ।
अस्ति सर्व्वजया नाम व्रतानां व्रतमुत्तमम् ।
तस्यानुष्ठानमात्रेण स्त्रीणां सर्व्वमनोरथम् ॥
लोकत्रयहिते युक्ता सिध्यतीह न संशयः ।
कुरु त्वं तद्व्रतं देवि ! प्रचारय महीतले ॥
लक्ष्मीरुवाच ।
प्रसन्नो यदि देवेश विधानं मयि कथ्यताम् ।
सुखेन येन देवेश ! क्रियते व्रतमुत्तमम् ॥
श्रीभगवानुवाच ।
सर्व्वजयाव्रतं वक्ष्ये शृणु पद्मे सुशोभनम् ।
नैव दृष्टं व्रतं देवि यथा सर्व्वजयाव्रतम् ॥
पुरुषाणां गयाश्राद्धं स्त्रीणां सर्व्वजयाव्रतम् ।
पितृद्वारकं नाम मनोरथप्रदायकम् ॥
व्रतराजमिदं भद्रे नारीणां सुखदायकम् ।
मार्गशीर्षे त्यजेत् शाकं पौष्करोकं फलं लभेत्
पौषे तु लवणं त्यक्त्वा गोसहस्रफलं स्मृतम् ।
माघे तैलं परित्यज्य श्रियं प्राप्नोति मानवी ॥
फाल्गुने च त्यजेत् पूगं भवेत् पतिव्रता सती ।
चैत्रे पुष्पं परित्यज्य सा याति परमां गतिम् ॥
भक्तं त्यक्त्वाथ वैशाखे याति चन्द्रपुरीं शुभाम् ।
ज्येष्ठे धाराजलं त्यक्त्वा वारुणं लोकमाप्नुयात् ॥
आषाढ़े च दधि त्यक्त्वा वारुणं लोकमाप्नुयात् ॥
श्रावणे वसनं त्यक्त्वा प्रजापतिपुरं व्रजेत् ।
भाद्रे तु व्यजनं त्यक्त्वा नारायणपुरं व्रजेत् ॥
आश्विने च घृतं त्यक्त्वा लावण्यमुत्तमं लभेत् ।
अथ्यान्तु कार्त्तिके त्यक्त्वा प्रयाति परमां गतिम् ।
मासान्ते चोपभुञ्जीत सर्व्वं दत्त्वा द्विजातये ।
अथा देया व्रते पूर्णे दानानि विविधानि च ।
गौर्य्या हरस्य संपूज्य शाकं भुञ्जीत पायसम् ॥
एवं या कुरुते नारी वर्षं यावत् समाप्यते ।
स्वर्गे वसति सा नित्यं पुत्रपौत्रप्रतिष्ठिता ॥
तत् कुरुष्व प्रयत्नेन येन सर्व्वजया भव ।
शचीव देवराजस्य रतीव मदनस्य च ।
तत्सदृशी भवेत् भद्रे व्रतस्यास्य प्रसादतः ॥"
इति स्कन्दपुराणोक्ता सर्व्वजयाव्रतकथा समाप्ता ।
ततः श्रुत्वा प्रणम्य विसृजेत् । वर्षान्ते प्रतिष्ठा कर्त्तव्या । द्रव्यदानेऽमुकमासामुकद्रव्यत्यागजन्य-मुक्तफलप्राप्तिकामा शिवदुर्गाप्रीतिकामा वा ब्राह्मण्यायाहं ददे इति वदेत् । इति कृत्यचन्द्रिका ॥
सर्व्वजित्, पुं, (सर्व्वान् जयतीति । जि + क्विप् ।) कालचक्रस्य एकविंशवर्षः । इति केचित् ॥ (त्वाष्ट्रे युगे भाव्यवत्सरः । यथा, हरिवंशे । ८ । ३७ ।
त्वाष्ट्रे युगे सर्व्वजिदाद्य उक्तः
संवत्सरोऽन्यः खलु सर्व्वधारी ॥")
सकलजयकर्त्तरि, त्रि ॥
सर्व्वज्ञः, पुं, (सर्व्वं जानातीति । ज्ञा + कः ।) शिवः । (यथा, महाभारते । १३ । १७ । ३९ ।
"सुवर्णरेताः सर्व्वज्ञः सुबीजो बीजवाहनः ॥"
बुद्धः । इत्यमरः । १ । १ । २५ ; १ । १ । ११ ॥ (विष्णुः । यथा, महाभारते । १३ । १४८ । ६१ ।
"सर्व्वदर्शी विमुक्तात्मा सर्व्वज्ञो ज्ञानमुत्तमम् ॥")
सकलज्ञातरि, त्रि ॥ (यथा, रघुः । १० । २० ।
"सर्व्वज्ञस्त्वमविज्ञातः सर्व्वयोनिस्त्वमात्मभूः ॥")
सर्व्वज्ञा, स्त्री, (सर्व्वं जानातीति । ज्ञा + कः । टाप् ।) दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
"उत्पत्तिक्षितिनाशेषु रजादित्रिगुणा मता ।
सर्व्वज्ञा सर्व्ववेत्तृत्वात् क्षान्तित्वात् क्षान्तिरुच्यते ॥"
सर्व्वतः, व्य, चतुर्दिगभिव्याप्तिः । तत्पर्य्यायः । समन्ततः २ परितः ३ विष्वक् ४ । इत्यमरः । ३ । ४ । १३ ॥ (यथा, मुण्डकोपनिषदि । ३ । २ । ५ ।
"ते सर्व्वगं सर्व्वतः प्राप्य धीरा
युक्तात्मानः सर्व्वमेवाविशन्ति ॥"*॥
सर्व्व + तसिल् । सर्व्वः । यथा, मनुः । १ । ५ ।
"अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः ॥"
"प्रसुप्तमिव सर्व्वतः प्रथमार्थे तसिः । स्वकार्य्यार्थमसित्यर्थः ।" इति तट्टीकायां कुल्लूकः ॥ पञ्चम्यास्तसिल् । सर्व्वस्मात् । सर्व्वेभ्यः । यथा, मनुः । ४ । २४७ ।
"सर्व्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणाम् ॥"
सप्तम्यास्तसिल् । सर्व्वस्मिन् । यथा, ऋतुसंहारे । १ । २३ ।
"भ्रमति गवययूथः सर्व्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥")
सर्व्वतःशुभा, स्त्री, (सर्व्वतः शुभं यस्याः ।) प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥
सर्व्वतन्त्रः, पुं, (सर्व्वं तन्त्रमस्येति ।) सकलतन्त्राध्येता । इति केचित् ॥ (क्लौ, सर्व्वं तन्त्रमिति ।) सकलशास्त्रञ्च ॥
सर्व्वतापनः, पुं, (सर्व्वान् तापयतीति । तप + णिच् + ल्युः ।) कामदेवः । इति केचित् ॥
सर्व्वतापके, त्रि, ॥
सर्व्वतिक्ता, स्त्री, (सर्व्वतस्तिक्ता ।) कायमाची । इति राजनिर्घण्टः ॥
सर्व्वतोभद्रं, क्ली, पुं, (सर्व्वतो भद्रमस्मादिति ।) ईश्वरगृहविशेषः । इत्यमरः । २ । २ । १० ॥ हारालिन्दादिभेदभिन्नाष्टगृहम् । तस्य लक्षणमुपन्यस्तं साङ्गन यथा,—

स्वस्तिकं प्राङ्मुखं यत् स्यादलिन्दानुगतं भवेत
तत्पार्श्वानुगतौ चान्यौ तत्पर्य्यन्तगतोऽपरः ॥
पनिपिद्दालिन्दभेदं चतुर्द्वारञ्च यदृग्दृहम् ।
तद्भवेत् सर्व्वतोभद्रं चतुरालिन्दशोभितम् ॥
प्राक्पश्चिमानुगतौ च शेषावुदरविस्तृतौ ।
यत्रालिन्दौ रुचक्यतो न चेत् स्यादुत्तरामुखम्
क्रमेणोपचीयमानं यत्रालिन्दत्रयं गृहे ।
तद्दर्शमानमित्याहुर्न चेत् स्यादुत्तरामुखम् ॥
दक्षिणानुगतालिन्दत्रयं यत् पश्चिमामुखम् ।
पूजनीयोत्तरोच्छ्रायं नन्द्यावर्त्तं वदन्ति तत् ॥
उपर्य्युपरि यद्गेहं तद्विच्छन्दकसंज्ञकम् ॥"
इति वचनेषु स्वस्तिकादीनां क्लीवत्वदर्शनात् स्वस्तिकादीनां पुंनपुंसकत्वं मन्तव्यम्। एवमादि प्रासौ रुचकवर्द्धमानौ पुंलिङ्गावपि यदुक्तम्।
"स्वस्तिकः सर्व्वतोभद्रो रुचको वर्द्धमानकः ।
नन्द्यावर्त्तादयश्चापि द्वारालिन्दादिभेदजाः ॥"
इति भरतः ॥*॥

लक्षणान्तरं यथा, भविष्योत्तरे।
"मेषादिचन्द्रे जातस्य नृपतेः स्युरनुक्रमात् ।
द्वादशैव गृहान् वक्ष्ये तेषां लक्षणमग्रतः ॥
सुनन्दः सर्व्वतोभद्रो भव्यो नान्दीमुखस्तथा ।
विनोदश्च विलासश्च विजयो विमलस्तथा ॥
रङ्गः केलिर्ज्जयो वीरो द्वादशैते प्रकीर्त्तिताः ॥"
तल्लक्षणं यथा,—
"द्वौ राजहस्तावायामे परिणाहे तथैव च ।
इत्ययं सर्व्वतोभद्रः शुक्रश्चास्याधिदेवता ॥
दानवा रुचकाश्चैव पूज्यास्ते चात्र यत्नतः ।
चतुर्द्वारास्य द्वाराणि क्षणचित्राहतानि च ॥
पीठपट्टाहतो क्षेपः सर्व्वानिष्टविनाशनः ।
अत्र स्थित्वा महीपालः सर्व्वान् शत्रून् निरुन्धति ॥"
दैर्घे २१ प्रस्थ २० इति सर्व्वतोभद्रः। इति युक्तिकल्पतरुः ॥ (सर्व्वतो मङ्गलप्रदे, त्रि। यथा, भागवते। १०।७१। ११।

"इत्यद्भववचो राजन् सर्व्वतोभद्रमच्युतम् ।
देवर्षिर्यदुवृद्धाय कृष्णाय प्रत्यपूजयत् ॥")
सर्व्वतोभद्रं, क्ली, (सर्व्वतो भद्रमस्येति।) द्वयोत्सर्गव्रतप्रतिष्ठादौ पूजाधारमण्डलविशेषः। यथा, शारदायाम्।
"चतुरस्रे चतुःकोष्ठे कर्णसूत्रसमन्विते ।
चतुर्ष्वपि च कोष्ठेषु कोणसूत्रचतुष्टयम् ॥
मध्ये मध्ये यथा मल्ला भवेयुः पातयेत्तथा ।
पूर्व्वापरायते द्वे द्वे मन्त्री याम्योत्तरायते ॥
पातयेत्तेषु मल्लेषु समं सूत्रचतुष्टयम् ।
पूर्व्ववत् कोणकोष्ठेषु कर्णसूत्राणि पातयेत् ।
तद्दृतेषु मल्लेषु दद्यात् सूत्रचतुष्टयम् ।
ततः कोष्ठेषु मत्स्याः स्युस्तेषु सूत्राणि पातयेत्
यावत् शतद्वयं मन्त्री षट्पञ्चाशत् पदान्यपि ।
तावत्तेनैव विधिना तत्र सूत्राणि पातयेत् ॥
षट्त्रिंशता पदैर्मध्ये लिखेत् पद्मं सुलक्षणम्।
बहिःपङ्क्त्या भवेत् पीठं षड्भियुग्मेन वीथिका
द्वारशोभोपशोभाश्च शिष्टाभ्यां परिकल्पयेत्
शास्त्रोक्तविधिना मन्त्री ततः पद्मं समालिखेत्॥
पद्मक्षेत्रस्य संत्यज्य द्वादशांशं बहिः सुधीः ।
तन्मध्यं विभजेत् तन्तैस्त्रिभिः समविभागतः ॥
आद्यं स्यात् कर्णिकास्थानं केशराणां द्वितीयकम्
तृतीयं पद्मपत्राणां मुक्तांशेन दलाग्रकम् ॥
बाह्यहस्तान्वरालस्य मानेन विधिना सुधीः ।
निधाय केशराग्रेषु परितोऽङ्गनिशाकरान् ॥
लिखित्वा सन्धिसंस्थानि तत्र सूत्राणि पातयेत
दलाग्राणाञ्च यन्मानं तन्मानादृत्तमालिखेत् ॥
तदन्तरालतन्मध्यसूत्रस्त्रीभयतः सुधीः ।
आलिखेद्बाह्यहस्तेन दलाग्राणि समन्ततः ॥
दलमूलेषु युगशः केशराणि प्रकल्पयेत् ।
एतत् साधारणं प्रोक्तं पङ्कजं तन्त्रवेदिभिः ॥
पदानि त्रीणि पादार्थं पीठकोणेषु मार्ज्जयेत्तु ।
अवशिष्टैः पदैर्विद्वान् पीतगात्राणि कारयेत् ॥
पदानि वीथ्यसंस्थानि मार्ज्जयेत्षड्भयेदतः ।
दिक्षु द्वाराणि रचयेत् द्विचतुःकोष्ठकैस्तथा ॥
पदैस्त्रिभिरथैकेन शोभाः स्युर्द्वारपार्श्वयोः ।
उपशोभाः स्युरेकेन त्रिभिः कोष्ठैरनन्तरम् ॥
अवशिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयम्
रञ्जयेत् पञ्चभिर्वर्णैर्मण्डलं तन्मनोहरम् ॥
पीतं हरिद्राचूर्णं स्यात् सितं तण्डुलसम्भवम्।
कुसुम्भचूर्णमरुणं कृष्णं दग्धपुलाकजम् ॥
विल्वादिपत्रजं श्यामं इत्यक्तं वर्णपञ्चकम्।
अङ्गुलोत्सेधविस्तराः सीमारेखाः सिताः शुभाः ॥
कर्णिकां पीतवर्णेन केशराख्यरुणेन च ।
शुक्लवर्णानि पत्राणि तत्सन्धीन् श्यामलेन च ॥
रजसा रञ्जयेन्मन्त्री यद्वा पीतैव कर्णिका ।
केशराः पीतरक्ताः स्युररुणानि दलान्यपि ॥
सन्धयः कृष्णवर्णाः स्युः सितेनाप्यसितेन वा ।
रञ्जयेत् पीठगर्भाणि पादाः स्युरुक्तप्रभाः ॥
गात्राणि तस्य शुक्लानि वीथीषु चतसृष्वपि ।
आलिखेत् कल्पलतिका दलपुष्पफलान्विताः ॥
वर्णैर्नानाविधैश्चित्रैः सर्व्वदृष्टिमनोहराः ।
द्वाराणि शेषवर्णानि शोभा रक्ताः समीरिताः
उपशोभाः पीतवर्णाः कोणान्यसितभानि च ।
तिस्रो रेखा बहिः कार्य्याः सितरक्तासिताः क्रमात् ॥
मण्डलं सर्व्वतोभद्रमेतत् साधारणं स्मृतम्॥"*॥
प्रकारान्तरं यथा,—
"चतुरस्रां भुवं भित्त्वा दिग्भ्यो द्वादशधा सुधीः
पातयेत्तत्र सूत्राणि कोष्ठानां दृश्यते शतम् ॥
चतुश्चत्वारिंशदाद्यं पश्चात् षट्त्रिंशताम्बुजम् ।
कोष्ठैः प्रकल्पयेत् पीठं षड्भिया नेवात्र वीथिका
द्वारशोभे यथा पूर्व्वसुशोभा न दृश्यते ।
अवशिष्टैः पदैः कुर्य्यात् षड्भिः कोणानि तन्त्रवित् ।
विदध्यात् पूर्व्ववत् शेषमेवं वा मण्डलं स्मृतम् ॥"
इति तन्त्रसारे १ परिच्छेदः ॥ * ॥

सर्व्वतोभद्रमण्डलस्य रूपं यथा।



नराणां शुभाशुभज्ञानार्थं चक्रविशेषः । यथा,
"अथातः संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपनम् ।
विख्यातं सर्व्वतोभद्रं सदाः प्रत्ययकारकम् ॥
कर्त्तृगा दश विन्यस्य तिर्य्यगे खाश्तथा दश ।
एकाशीतिपदं चक्रं जायते नात्र संशयः ॥
अकारादिस्वराः कोष्ठेष्वीशादी विदिशि क्रमात् ।
प्रदक्षिणक्रमाज्ज्ञेया ज्योतिःशास्त्रविशारदैः ॥
कृत्तिकादीनि धिष्ण्यानि पूर्व्वाशादि लिखेत्ततः
सप्त तप्त क्रमेणैव अष्टाविंशतिसंख्यया ॥
ध-व-क-ह-डाः पूर्व्वस्यां म-ट-प-र-ता हरिति दक्षिणस्याम् ।
न य-भ-ज-खा वारुण्यां ग-श-द-च ला-खोत्तरस्यां स्युः ॥
त्रयस्त्रयो हयाद्यास्तु पूर्व्वादिक्रमतो बुधैः ।
राशयो द्वादश ख्याप्या मेषान्ता दक्षमार्गतः ॥
शेषेषु कोष्ठकेष्वेवं नन्दादितिथिपञ्चकम् ।
वाराणां सप्तकं लेख्यं भौमाद्यं तत्तिथिक्रमात् ॥
इत्येवं सर्व्वतोभद्रप्रकारः कथितो मया ।
यस्मिन्भृक्षे स्थितः खेटस्ततो वेधत्रयं भवेत् ॥
ग्रहदृष्टिवशेनात्र वामदक्षिणसंमुखे ।
भुक्तं भोग्यं तयाक्रान्तं विद्धं क्रूरग्रहेण भम् ॥
शुभाशुभेषु कार्य्येषु वर्জ্জनीयं प्रयत्नतः ।
वक्रगे दक्षिणा दृष्टिर्वामा दृष्टिश्च शीघ्रगे ॥
संमुखी मध्यचारे च ज्ञेया भौमादिपञ्चके ।
सूर्य्यमुक्ता ग्रहाः शीघ्रास्तथा चार्के द्वितीयगे ॥
समास्तृतीयगे ज्ञेया मन्दा भानौ चतुर्थगे ।
वक्राः स्युः पञ्चषट्सप्तार्के त्वतिवक्रा नगाष्टगे ॥
नवमे दशमे भानौ जायते सहजा गतिः ।
द्वादशेकादशे सूर्य्ये लभन्ते शीघ्रतां पुनः ॥
रविस्थित्यंशकविंशावधेः संख्यात्र कल्पते ।
न तु राश्यन्तरस्थार्कात् द्वितीयादिनिरूपणम् ॥
राहुकेतू सदा वक्रौ शीघ्रगौ चन्द्रभास्करौ ।
गतेरेकस्वभावत्वादेषां दृष्टित्रयं सदा ॥
क्रूरा वक्रा महाक्रूराः सौम्या वक्रा महाशुभाः
स्युः सहजस्वभावस्थाः सौम्या क्रूराश्च शीघ्रगाः ॥
घ-ङ-छाः प-श-ठार्द्धे व ध-फ-ढान्छ-झ-आ-स्तथा ।
एतत् त्रिकं त्रिकं विद्धं विद्धैः क-प-भ-दैः क्रमात् ॥
घ-ङ-छा रौद्रगे वेधे व-ष-ठा ब्रह्मगे ग्रहे ।
घ-फ-ढाः पूर्व्वाषाढ़ायां ध-झ-आ भाद्र उत्तरे ॥
रवौ शशी खयौ चैव जयौ धनौ परस्परम् ।
एकेन हि हयं ज्ञेयं शुभाशुभग्रहव्यधे ॥
अवर्गादिस्वरद्वन्द्वे त्रिकवेधात् त्रयोर्व्यधः ।
युग्मवर्णात्मके वेधे अनुस्वारविसर्गयोः ॥"
आकारादियुग्मवर्णात्मकवेधवदनुस्वारविसर्गयोः
एकवेधादुभयवेध इत्यर्थः ।
"कोष्ठसन्नचयोर्मध्ये अन्यादिपादगे ग्रहे ।
अकारादिचतुष्केषु वेधः पूर्व्वतिथौ तथा ॥
एकादिक्रूरवेधेन फलं पुंसां प्रजायते ।
उद्वेगश्च भयं हानिर्व्याधिर्मृत्युः क्रमेण च ॥
ऋक्षे भ्रमोऽरिरे हानिः स्वरे व्याधिर्भयं तिथौ ।
राशौ विद्धे महाविघ्नः पञ्चविद्धो न जीवति ॥
एकवेधे भयं युद्धे युग्मवेधे धनक्षयः ।
त्रिवेधे तु भवेन्मृत्युर्वेधचतुष्टये ॥"
दिष्टित्रये उदाहरणमाह ।
"भरण्यकारद्वयभं नन्दां भद्रां तुलाश्च भम् ।
विशाखां हरिभं विध्येद्यद्यग्नेयसंस्थितः ॥"
उदाहरणान्तरमाह ।
"वं युग्ममौत्तरं कन्यां रेफं स्वातीमुकारकम् ।
अश्विनीं रोहिणीस्थोऽभिजिद्भमेवं परेष्वपि ॥
यथा दृष्टफलाः क्रूरास्तथा सौम्याः शुभप्रदाः ।
क्रूरयुक्ताः पुनः सौम्या ज्ञेयाः क्रूरफलप्रदाः ॥
पर्व्ववेधे मनस्तापो द्रव्यहानिश्च भूमुते ।
रोगपीड़ाकरः सौरी राहुकेतू च विघ्नदौ ॥
चन्द्रे मित्रफलं पुंसां रतिलाभश्च भार्गवे ।
बुधवेधे भवेत् प्रज्ञा जीवः सर्व्वशुभप्रदः ॥
खचेत्रस्थे बलं पूर्णं पादोनं मित्रभे ग्रहे ।
अर्द्धं समगृहे प्रोक्तं पादं शत्रुगृहे स्थिते ॥
दृष्टश्च सौम्यक्रूराणां बलं स्थानवशात् समम् ।
एतदेव फलं विद्धि सौम्यैः क्रूरैर्विपर्य्ययात् ॥
स्थानवेधसमायोगात् यत्संख्यं जायते बलम् ।
तत्संख्यं वेध्यवस्तूनां फलं ज्ञेयं शुभाशुभम् ॥
दृष्टिहीने पुनर्वेधे न स्यात् किञ्चित् शुभाशुभम् ।
ग्रहाः सौम्यास्तथा क्रूरा वक्राः शीघ्रोच्चगाः
स्थानञ्च वेध्यमित्येवं बलं ज्ञात्वा फलं वदेत ।
वक्रग्रहे फलं द्विगुणं त्रिगुणं स्वोच्चसंस्थिते ॥
स्वभावजं फलं शीघ्रे नीचस्थेऽर्द्धफलो ग्रहः ।
तिथिराशिभंनक्षत्रं विद्धं क्रूरग्रहेण यत् ॥
सर्व्वेषु शुभकार्य्येषु वर्জ্জयेत्तत् प्रयत्नतः ।
न नन्दति विवाहे च यात्रायां न निवर्त्तते ॥
रोगाच्च मुच्यते रोगी वेधवेलाज्ञतोयमः ।
रोगकाले भवेद्वेधः क्रूरक्षेचरसम्भवः ॥
वक्रगत्या भवेन्मृत्युः शीघ्रे ज्ञाप्यरुजान्वितः ।
वेधस्थाने रवौ भङ्गो दुर्गे खण्डः प्रजायते ॥
कविप्रवेशनं तत्र योधाघातश्च तत्र वै ॥"
कविचौरयोधा ।
"यत्र पूर्व्वादिकाष्ठायां हयराश्यादिगो रविः ।
सा दिगस्तमिता ज्ञेया शेषास्त्रिस्रः सदोदिताः
ऐशानस्थाः स्वराः प्राच्यां ज्ञेया याम्या-मथाग्निगाः ।
नैर्ऋतस्थाश्च वारुण्यां वायव्यां सौम्यगा मताः
नक्षत्राणि स्वरा वर्णा राशयस्त्रियो दिशः ॥
ते सर्व्वेऽस्तमिता ज्ञेया यत्र भानुस्त्रिमासिकः ॥
नक्षत्रेऽस्ते तथा वर्गे हानिः शोकः स्वरेऽस्तगे
राशौ विघ्नस्त्रियो भीतिः पञ्चास्ते मरणं भवेत् ॥
यात्रा युद्धं विवादश्च द्वारं प्रासादसंश्रयः ।
न कर्त्तव्यं शुभं चान्यदस्ताशाभिमुखं नरैः ॥
अस्ताशायां स्थितं यस्य नाम्नः प्रथममक्षरम् ।
स आर्त्तः सर्व्वकार्य्येषु ज्ञेयो दैवहतो नरः ॥
करौ कोष्ठे तथा इन्द्वे चातुरङ्गमहाबले ।
वर्ग्याद्यास्तं गता योधा यदीच्छेद्विजयं रवौ ॥
नक्षत्रेऽभ्युदिते पुष्टिर्वर्गे लाभः स्वरे सुखम् ।
राशौ जयस्त्रियो तेजः पदाप्तिः पञ्चकोदये ॥
प्रश्नकाले भवेद्विद्धं यद्यत्तं क्रूरखेचरैः ।
तद्दृष्टं शोभनं सौम्यैर्मिश्रैर्मिश्रफलं भवेत् ॥
ग्रहाविद्धन्तु यद्यत्तं फलं लग्नस्वभावतः ।
ज्ञातव्यमौचिते केन्द्रे भाषितं यन्नरादिकम् ॥
शीर्षोदये सौम्यविलग्नवर्गे
लग्नेऽपि वा सौम्ययुते शुभं स्यात् ।
अतोऽन्यथात्वे तु तदन्यथात्वं
मिश्रं विमिश्रैरधिकं बलाढ्यैः ॥
केन्द्रोपगा नवमपञ्चमगाश्च सौम्याः
केन्द्राष्टवर्ज्जमशुभाश्रयषष्ठसंस्थाः ।
सर्व्वार्थसाधनकराः परिपृच्छतां स्यु-
रेभिर्विपर्य्ययगतैस्तु विपर्य्ययः स्यात् ॥
लग्नाधिनाथो यदि केन्द्रगः स्यात्
तन्मित्रमेतस्य च केन्द्रगं वा ।
व्ययाष्टकेन्द्रानपहाय पापा
अन्यत्र याता यदि तच्छुभं स्यात् ॥
आद्यो लग्नाधिपः कार्य्ये लग्ने कार्य्याधिपो यदि
द्वितीयो लग्नपो लग्ने कार्य्ये कार्य्याधिपो यदि
लग्नपः कार्य्यपश्चापि लग्ने यदि तृतीयकः ।
चतुर्थः कार्य्यपौ स्यातां यदि लग्नपकार्य्यपौ ॥
कार्य्यसिद्धिस्तदा ज्ञेया मित्रक्षेदधिकं मतम् ।
एवं दृष्टिवशाज्ज्ञेयं फलं तत्तच्चतुष्टयम् ॥
पूर्णनाड़ीस्थितो दूतो यत् पृच्छति शुभाशुभम् ।
तत् सर्व्वं सिद्धिमाप्नोति शून्ये शून्यं समीरिते ॥
आद्यो शून्यगतः पृच्छेत्तस्मात् पूर्णां विशेद्यदि
तदा सर्व्वार्थसिद्धिः स्यात् वामे वामं न संशयः
श्वासप्रवेशकाले चेद्दूतो जल्पति वाञ्छितम् ।
तस्यार्थसिद्धिमाप्नोति निर्गमे नास्ति सुन्दरम्
कर्त्तरीवामाग्रतो दूतो ज्ञेयो वामपथस्थितः ।
पृष्ठे दक्षे तथाधस्ताद्दक्षवाही गतो मतः ॥
यात्रादानविवाहेषु वस्त्रालङ्कारभूषणे ।
शुभे कर्म्मणि सव्यो च प्रवेशे वामगः शुभः ॥
कलहद्यूतयुद्धेषु स्नानभोजनमैथुने ।
व्यवहारे भये भङ्गे दक्षनाड़ी प्रशस्यते ॥
क्रूरैरुभयतो विद्धा यस्याश्चरतिथिस्थराः ।
राशिर्विद्धश्च पञ्चापि तस्य मृत्युर्न संशयः ॥
मण्डलं नगरं ग्रामो दुर्गं देवालयं पुरम् ।
क्रूरैरुभयतो वेधे विनश्यन्ति न संशयः ॥
कृत्तिकायां तथा पुष्ये रेवत्याञ्च पुनर्वसौ ।
विद्धे सति क्रमाद्देवो वर्षेषु ब्राह्मणादिषु ॥
तौलं भाण्डं रसो धान्यं गजाश्वादिचतुष्पदाः ।
सर्व्वं महार्घतां याति यावत् क्रूरक्षये स्थितम्
क्रूरवेधसमायोगे यस्मोपग्रहसम्भवः ।
तस्य मृत्युर्न सन्देहो रोगाद्वाथ रणादपि ॥
सूर्य्यभात् पञ्चमं धिष्ण्यं ज्ञेयं विष्कुम्भसंज्ञकम्
शूलञ्चाष्टमकं प्रोक्तं सप्तविंशं चतुर्दशम् ॥
केतुरष्टादशं प्रोक्तमुल्का स्यादेकविंशतिम् ।
द्वाविंशतितमं कम्पं त्रयोविंशञ्च वज्रकम् ॥
निर्घातश्च चतुर्विंशमुक्ता अष्टावुपग्रहाः ।
प्रस्थाने विघ्नदाः प्रोक्ताः सर्व्वकार्य्येषु सर्व्वदा ॥"
इति सर्व्वतोभद्रचक्रम् । इति ज्योतिस्तत्त्वम् ॥

सर्व्वतोभद्रचक्रस्य रूपं यथा।

पूर्व्व

ष	३	४	५	६	७	८	९	आ
२	उ	ष	व	क	ह	ड	ऊ	१०
१	ल	ऌ	हयः	मिथुनः	कर्कटः	ॡ	म	११
२०	च	मेषः	ओ	नन्दा	औ	सिंहः	ट	१२
२६	द	मीनः	रिक्ता	पूर्णा	भद्रा	कन्या	प	१३
२५	य	कुम्भः	अः	जया	अं	तुला	र	१४
२४	ग	ऐ	मकरः	धनुः	वृश्चिकः	ए	त	१५
२३	ऋ	ख	ज	भ	य	न	ऋ	१६
ई	२२	०	२१	२०	१९	१८	१७	इ

उत्तर — दक्षिण

पश्चिम

सर्व्वतोभद्रः, पुं, सर्व्वतो (भद्रमस्येति) निरुक्तम्। इत्यमरः। २।४।६२॥ व्यूहविशेषः। इति तट्टीका॥ विष्णुरथः। इति शब्दरत्नावली। वंशः। इति शब्दचन्द्रिका॥ चित्रकाव्यविशेषः॥ इति मेदिनी॥

तदुदाहरणं यथा।

स	का	र	ना	ना	र	का	स
का	य	सा	द	द	सा	य	का
र	सा	ह	वा	वा	ह	सा	र
ना	द	वा	द	द	वा	द	ना

इति सर्व्वतोभद्रः। इति माघे। १९। २७॥ अस्यार्थः। "सकारेति। पुनः कौटशी। 'कारो बधे निश्चये च बले यज्ञे रतावपि।' इति विश्वः॥ सकाराः सयत्नाः सोत्साहाः नाना नानाविधाश्च ये आराः अरीणां समूहाः। भिदादिभ्योऽङ्। तेषां कासा गतिभेदाः काया विग्रहाश्च तेषां सादं ददतीति साददाः नाशकारकाः सायका यस्यां सा तथोक्ता। रसेन रागेणाहवो यस्याः सा रसाहवा रथरागिणीत्यर्थः। वाहसाराणां वाहश्रेष्ठानां ये नादा हेषादिघोषास्तेषां वादं कलहं ददतीति वाददानि। तैः सह कलहायमानानि वादनानि गाद्यानि यस्यां सा वाहसारनादवाददवादना तूर्य्यवादघोषेत्यर्थः। अतएव तेषां तुल्यतोक्तेरतिशयोक्तिः। सर्व्वतो भ्रमणात्। सर्व्वतोभद्राख्यचित्रबन्धः। अत एव दण्डी।

'तदिदं सर्व्वतोभद्रं भ्रमणं यदि सर्व्वतः।'इति।

उदाहरन्तु। चतुःकोष्ठे चतुरङ्कबन्धे पंक्तिचतुष्टये पादचतुष्कं विलिख्यानन्तरं षड्भिश्चतुष्टयेऽप्यधःक्रमेण पादचतुष्टयलेखने प्रथमासु चतसृषु प्रथमपादः सर्व्वतो वाच्यते। एवं द्वितीयादिषु द्वितीय इत्यादि।"इति तट्टीकायां मल्लिनाथः॥ (वटिकौषधविशेषः। यथा,—

"विश्वं गगनं श्राद्धं द्विकर्षं शुद्धगन्धकम्।
तोलकं तोलकार्द्धञ्च हिङ्गुलोत्थरसन्तथा॥
कर्पूरं केशरं मांसी तेजपत्रं लवङ्गकम्।
जातीकोषफलञ्चैव सूक्ष्मैलाकरिपिप्पली॥
कुष्ठं तालीशपत्रञ्च धातकी चोचमुस्तकम्।
हरीतकी मरिचञ्च शृङ्गवेरविभीतकम्॥
पिप्पल्यामलकञ्चैव शाणभागं विचूर्णितम्।
सर्व्वमेकीकृतं पिष्ट्वा वटीकुर्य्याद्विगुञ्जिकाम्॥
भक्षयेत् पर्ण्यखण्डेन मधुना सितयापि वा।
रोगं ज्ञात्वानुपानञ्च प्रातः कुर्य्याद्विचक्षणः॥
हन्ति मन्दानलान् सर्व्वानामदोषं विसूचिकाम्
पित्तश्लेष्मभवं रोगं वातश्लेष्मभवन्तथा॥
आनाहं मूत्रकृच्छ्रञ्च संग्रहग्रहणीं वमिम्।
अम्लपित्तं शीतपित्तं रक्तपित्तं विशेषतः।
चिरज्वरं पित्तभवं धातुस्थं विषमज्वरम्॥
कासं पञ्चविधं हन्ति कामलां पाण्डुमेव च।
सर्व्वलोकहितार्थाय शिवेन भाषितः पुरा।
सर्व्वतोभद्रनामायं रसः साक्षान्महेश्वरः॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे॥
"सूतं तपनगगनं कान्तलौहस्य चूर्णं
क्लेकस्मिन् दृशदि पिषित शृङ्गवेरस्य धारा।
युञ्जाद्रोगे यक्षतिगुदजे ग्रौक्षि सर्व्वज्वरेषु
गोधे पाण्डौ क्षमिक्षतगदे सर्व्वतः कामलायाम्
कासे श्वासे प्रमिहजठरे सर्व्वदोषप्रभूते
ख्यातो योगः सुरमणिकृतः सर्व्वरोगैकहन्ता॥"
इति च रसेन्द्रसारसंग्रहे श्वेहाधिकारे॥)

सर्व्वतोभद्रा, स्त्री, (सर्व्वतो भद्रं मङ्गलमस्या इति।) गम्भारी। नटयोषित्। इति मेदिनी॥

सर्व्वतोमुखं, क्ली, (सर्व्वतो मुखमस्येति।) जलम्। इत्यमरः। १।१०।४॥ आकाशम्। इति मेदिनी॥ (समन्ततोमुखविशिष्टे, त्रि। यथा, महाभारते। १। २११। १२।

"एवं सञ्चान् समादिश्य पूर्व्वतीरे महोदधेः।
क्रूरां मतिं समास्थाय जग्मतुः सर्व्वतोमुखौ॥"

सर्व्वतोमुखः, पुं, (सर्व्वतः मुखमस्येति।) शिवः॥ (यथा, महाभारते। १३। ३७। ६६।

"सर्व्वकामवरश्चैव सर्व्वदः सर्व्वतोमुखः॥")

ब्रह्मा। (यथा, कुमारे। २। ३।

"अथ सर्व्वस्य धातारं ते सर्व्वं सर्व्वतोमुखम्।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे॥")

आत्मा। इति मेदिनी॥ (विष्णुः। यथा, महाभारते। १३। १४८। १००।

"अमृतांशोऽमृतवपुः सर्व्वज्ञः सर्व्वतोमुखः॥")

ब्राह्मणः। इति शब्दरत्नावली॥ स्वर्गः। इति शब्दमाला॥ अग्निः। यथा,—

"सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः
विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु॥"

इति तिथ्यादितत्त्वधृताग्निप्रणयनमन्त्रः॥

सर्व्वत्र, व्य, (सर्व्वस्मिन्निति। सर्व्व + "सप्तम्यास्त्रल्। ५। ३। १०। इति त्रल्।) सर्व्वदिग्देशकाले। इति शब्दरत्नावली॥ (यथा, रघुः। ३। ६२।

"ततोष वीर्य्यातिशयेन हृद्यता
पदं हि सर्व्वत्र गुणैर्निधीयते॥")

सर्व्वत्रगः, पुं, (सर्व्वत्र गच्छतीति। गम + "उपपदे सर्व्वत्रपञ्चमयोरुपसंख्यानम्।" ३।२।४८। इत्यस्य वार्त्तिकोक्त्या डः।) वायुः। सर्व्वत्रगामिनि, त्रि। इति वक्ष्यमाणशब्ददर्शनात्॥ (यथा, गीतायाम्। ८। ६।

"यथाकाशस्थितो नित्यं वायुः सर्व्वत्रगो महान्
तथा सर्व्वाणि भूतानि मत्स्थानीत्युपधारय॥")
सर्व्वत्रगामी,[न्]पुं, (सर्व्वत्र गच्छतीति। गम + णिनिः।) वायुः। इति शब्दचन्द्रिका॥ सर्व्वदिग्देशकाले गमनकर्त्तरि, त्रि॥
सर्व्वथा, व्य, (सर्व्वेण प्रकारेण। सर्व्व + "प्रकारवचने थाल्।" ५। ३। २३। इति थाल्।) सर्व्वप्रकारम्। इति व्याकरणम्॥ (यथा, मनुः। २। १५।
"उदितेऽनुदिते चैव समयाध्युषिते तथा।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः॥")
प्रतिज्ञा। भृशम्। हेतुः। इति शब्दरत्नावली॥
सर्व्वदमनः,पुं,(सर्व्वान् दमयतीति। दम + ल्युः।) भरतराजः। स तु शकुन्तलापुत्रः। इति त्रिकाण्डशेषः॥ (अस्य नामनिरुक्तिर्यथा महाभारते। १। ७४। ५—७।
"षड्वर्ष एव बालः स कण्वाश्रमपदं प्रति।
सिंहान् व्याघ्रान् वराहांश्च महिषांश्च गजांस्तथा॥
बबन्ध हत्वे बलवानाश्रमस्य समीपतः।
आरोहन् दमयंश्चैव क्रीडंश्च परिधावति॥
ततोऽस्य नाम चक्रुस्ते कण्वाश्रमनिवासिनः।
अस्त्वयं सर्व्वदमनः सर्व्वान् हि दमयत्यसौ॥
स सर्व्वदमनो नाम कुमारः समपद्यत॥"*॥
सर्व्वदमनकर्त्तरि, त्रि। इति व्याकरणम्॥)
सर्व्वदर्शी, [न्] पुं, (सर्व्वं पश्यतीति। दृश + णिनिः।) बुद्धः। इति शब्दरत्नावली॥ सकलदर्शनकर्त्तरि, त्रि॥ (यथा, रामायणे। २। १०६। ६।
"सर्व्वज्ञः सर्व्वदर्शी च बुद्धिमांश्चासि राघव!॥")
सर्व्वदा, व्य, (सर्व्व + "सर्व्वैकान्यकिंयत्तदः काले दा।" ५। ३। १५। इति दा।) सर्व्वस्मिन् काले इत्यमरः। ३।४।२२॥ (यथा, नरसिंहपुराणे। १२। ५६।
"तत्पादपद्मे देवेश भक्तिं मे देहि सर्व्वदा।
यदि तुष्टो ममाद्य त्वमन्यदेकं वृणोम्यहम्॥")
सर्व्वदुःखक्षयः,पुं,(सर्व्वेषां दुःखानां क्षयो यत्र।) मोक्षः। इति हेमचन्द्रः॥ सकलपीड़ानाशश्च॥
सर्व्वदेवमुखः, पुं, (सर्व्वेषां देवानां मुखं यत्र।) अग्निः। इति जटाधरः॥
सर्व्वद्रङ्[ङ्]त्रि, सर्व्वस्य पूजकः। सर्व्वानञ्चतीत्यर्थे क्विप्प्रत्ययेन निष्पन्नः। इति व्याकरणम्॥
सर्व्वधारो,[न्]पुं,(सर्व्वं धरतीति। धृ + णिनिः।) कालचक्रस्य द्वाविंशवर्षः। इति केचित्॥ (यथा, बृहत्संहितायाम्। ८। २७।
"त्वाष्ट्रे युगे सर्व्वजिदाद्य उक्तः
संवत्सरोऽन्यः खलु सर्व्वधारी।
तस्मात् विरोधी विकृतः स्मरश्च।
अस्मो द्वितीयोऽथ भवाय शेषाः॥"*॥
सर्व्वधारके, त्रि॥)
सर्व्वधुरावहः, पुं, (सर्व्वा चासौ धूश्चेति। सर्व्वधुरा। ऋक्पूरित्यः। वहतीति। वह + अच्।
सर्व्वधुरायां वहः।) सकलभारवाहकः। रथलाङ्गलादीनां भारवाहकगवादिः। इत्यमरः॥
सर्व्वधुरीणः, पुं, (सर्व्वधुरां वहतीति। "खः सर्व्वधुरात्।" ४। ४। ७८। इति खः।) सकलभारवाहकः। रथलाङ्गलादीनां भारवाहकगवादिः। इत्यमरः। २। ८। ६६॥
सर्व्वन्दमः, पुं, (सर्व्वं दमयतीति। दम + अच्। द्वितीयायाः अलुक्।) भरतराजः। स तु शकुन्तलापुत्रः इति हेमचन्द्रः॥
सर्व्वपा, स्त्री, (सर्व्वं पातीति। पा + कः। टाप्।) बलिराजपत्नी। इति केचित्॥ सर्व्वरक्षणकर्त्तरि सर्व्वपालनकर्त्तरि च त्रि॥
सर्व्वपूर्णत्वं,क्ली, (सर्व्वैर्द्रव्यैः पूर्णत्वम्।) सभारः। इति त्रिकाण्डशेषः॥
सर्व्वप्रियः,त्रि,सर्व्वेषां जानानां प्रियः। सकलजनवल्लभः॥ सर्व्वस्य शिवस्य प्रियः। सर्व्व. प्रियो यस्येति वा। शिवभक्तः॥
सर्व्वभक्षा,स्त्री,(सर्व्वान् भक्षयतीति। भक्ष + अण् + टाप्।) गौ। इति हेमचन्द्रः॥ सर्व्वभक्षणकर्त्तरि, त्रि॥ (यथा, महाभारते। १। ६। १४।
"इति श्रुत्वा पुलोमायां भृगुः परममन्युमान्।
सशापाग्निमतिक्रुद्धः सर्व्वभक्षो भविष्यसि॥")
सर्व्वमङ्गला, स्त्री, (सर्व्वाणि मङ्गलानि अस्याः।) दुर्गा। इत्यमरः॥ अस्या व्युत्पत्तिर्यथा,—
"मङ्गलं मोक्षवचनं चाशब्दो दातृवाचकः।
सर्व्वान्मोक्षान् या ददाति सा एव सर्व्वमङ्गला॥
हर्षे सम्पदि कल्याणे मङ्गलं परिकीर्त्तितम्।
तान् ददाति च या देवी सा एव सर्व्वमङ्गला॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः॥
अपि च।
"सर्व्वमङ्गलशब्दश्च सम्पूर्णार्थवाचकः।
आकारो दातृवचनस्तस्मात् सा सर्व्वमङ्गला॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे सर्व्वमङ्गलास्तोत्रं २७ अध्यायः॥ अन्यच्च।
"सर्व्वाणि हृदयस्थानि मङ्गलानि शुभानि च।
ददाति चेप्सितान् लोके तेन सा सर्व्वमङ्गला॥"
इति देवीपुराणे ४५ अध्यायः॥
सर्व्वमयः, त्रि, सर्व्वात्मकः। सर्व्वशब्दात् मयट्प्रत्ययेन निष्पन्नः॥ (यथा, मार्कण्डेये। ८८। ३३।
"आप्यायन्ते चते यस्मात्त्वदाधारा हुताशन।
अतः सर्व्वस्य योनित्वं वह्ने सर्व्वमयस्तथा॥")
सर्व्वमूल्यं, क्ली,.(सर्व्वस्य मूल्यम्।) कपर्दकम्। इति त्रिकाण्डशेषः॥
सर्व्वमूषकः,पुं,(सर्व्वान् मुष्णातीति। मुष + ण्वुल्। पृषोदरादित्वात् साधुः।) कालः। इति हेमचन्द्रः॥
सर्व्वरसः, पुं, (सर्व्वो रसो यत्र।) सूरी। पण्डितः। इति शब्दरत्नावली॥ धूनकः। इत्यमरः॥ वाद्यभाण्डम्। तत्तु वीणाभेदः। इति मेदिनी॥ लवणरसः। इति हेमचन्द्रः॥(मधुरादिरसः। यथा, भागवते। २। ६। १।
"वाचां वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः।
हव्यकव्यामृतान्नानां जिह्वासर्व्वरसस्य च॥"
सर्व्वरसविशिष्टे, त्रि। यथा, छान्दोग्योपनिषदि। ३। १४। २।
"सर्व्वकामः सर्व्वगन्धः सर्व्वरसः इति॥")
सर्व्वरसोत्तमः, पुं, (सर्व्वरसेषु उत्तमः।) लवणरसः। इति हेमचन्द्रः॥
सर्व्वरात्रः, पुं, सर्व्वा रात्रिः। "अहःसर्व्वैकदेशसंख्यातपुण्याच्च रात्रेः।" ५। ४। ८७। इति अच्।) समस्तरजनी। इति सिद्धान्तकौमुदी॥
सर्व्वरी, स्त्री, शर्व्वरी। रात्रिः। इति वक्ष्यमाणशब्ददर्शनात्॥
सर्व्वरीकरः, पुं, (सर्व्वर्य्याः करः।) चन्द्रः। इति धरणिः॥
सर्व्वर्त्तुपरिवर्त्तः, पुं, (सर्व्वर्त्तूनां परिवर्त्तो यत्र।) वत्सरः। इति जटाधरः॥
सर्व्वर्त्तुफलं,क्ली, (सर्व्वर्त्तुजातं फलम्।) सकलर्त्तुजातफलम्। यथा,—
"सर्व्वर्त्तुकुसुमाकीर्णे सर्व्वर्त्तुफलशोभिते।
स्थिरच्छायद्रुमाकीर्णे सन्तानकवनाहृते॥"
इति भविष्यपुराणे शिवरात्रिव्रतकथा॥
सर्व्वरक्षाकवचं, क्ली, (सर्व्वरक्षणं सर्व्वरक्षाकरं कवचम्।) कवचविशेषः। यथा,—
"शिवोः स्वस्त्ययनं चक्रुस्तूर्णं ब्राह्मणपुङ्गवाः।
इत्वा दत्त्वा शिवोगर्भात्रे पपाठ कवचं द्विजः॥
वदामि तत्ते विप्रेन्द्र कवचं सर्व्वरक्षणम्।
तदत्तं मायया पूर्व्वं ब्रह्मणे नाभिपङ्कजे॥
निद्रिते जगतां नाथे जले च जलशायिनि।
भीताय स्तुतिकर्त्रे च मधुकैटभयोर्भयात्॥
योगनिद्रोवाच।
दूरीभूतं कुरु भयं भयं किन्ते मयि स्थिते।
स्थितायां मयि च ब्रह्मन् सुखी तिष्ठ जगत्पते॥*
श्रीहरिः पातु ते वक्त्रं मस्तकं मधुसूदनः।
श्रीकृष्णश्चक्षुषी पातु नासिकां राधिकापतिः॥
कर्णयुग्मञ्च कण्ठञ्च कपालं पातु माधवः।
कपोलं पातु गोविन्दः केशांश्च केशवः स्वयम्॥
अधरौष्ठं हृषीकेशो दन्तपंक्तिं गदाग्रजः।
रासेश्वरश्च रसनां तालुकं वामनो विभुः॥
वचः पातु मुकुन्दस्ते जठरं पातु दैत्यहा।
जनार्द्दनः पातु नाभिं पातु विष्णुश्च ते हनुम्॥
नितम्बयुग्मं गुह्यञ्च पातु ते पुरुषोत्तमः।
जानुयुग्मं जानकीशः पातु ते सर्व्वदा विभुः॥
ह्रस्तयुग्मं नृसिंहश्च पातु सर्व्वत्र सङ्कटे।
पादयुग्मं वराहश्च पातु ते कमलोद्भवः॥
ऊर्द्धं नारायणः पातु अधस्तात् कमलापतिः।
पातु पूर्व्वे च गोपालः पातु वह्नौ दयामयहा॥
वनमाली पातु याम्यां वैकुण्ठः पातु नैर्ऋते।
वारुणे वासुदेवश्च पातु ते जलशायिन!॥
पातु ते सन्ततमजो वायव्यां दिशरूपधृक्।
उत्तरे च सदा पातु शेषोऽनन्तोऽनन्तकः स्वयम्॥
ऐशान्यामीश्वरः पातु सर्व्वत्र पातु शत्रुजित्।
जले स्थले चान्तरीक्षे निद्रायां पातु माधवः॥*॥

इत्येवं कथितं ब्रह्मन् ! कवचं परमाद्भुतम् ।
कृष्णेन कृपया दत्तं स्मृतेनैव पुरा मया ॥
शम्भुना सह संग्रामे निर्जिते घोरदारुणे ।
गगनस्थितो यः सद्यः प्राप्तिमात्रेण शङ्कितः ॥
कवचस्य प्रसादेन धरण्यां पतितो मृतः ।
पूर्व्वं वर्षगतं खे च कृत्वा युद्धं भयावहम् ॥
मृते शम्भौ च गोविन्दः कृपालुर्गगने स्थितः ।
माल्यञ्च कवचं दत्त्वा गोलोकं स जगाम ह ॥
कल्पान्तरस्य वृत्तान्तं कृपया कथितं मुने ।
आर्य्या तव भयं नास्ति कवचस्य प्रभावतः ॥
कोटिशः कोटिशो नष्टा मया दृष्टाश्च सर्व्वशः ।
अहञ्च हरिणा सार्द्धं कल्पे कल्पे स्थिरा सदा ॥
इत्युक्त्वा कवचं दत्त्वा सान्तर्द्धानं चकार ह ।
निःशङ्को नाभिकमले तस्थौ स कमलोद्भवः ॥*॥
सुवर्णगुटिकायान्तु कृत्वेदं कवचं परम् ।
कण्ठे वा दक्षिणे बाहौ बध्नीयात् यः सुधीः सदा ॥
विषाग्निजलशत्रुभ्यो भयं तस्य न विद्यते ।
जले स्थले चान्तरीक्षे निद्रायां रक्षतीश्वरः ॥
संग्रामे वज्रपाते च विपत्तौ प्राणसङ्कटे ।
कवचस्मरणादेव सद्यो निःशङ्कतां व्रजेत् ॥
बद्ध्वेदं कवचं कण्ठे शङ्करस्त्रिपुरं पुरा ।
जघान लीलामात्रेण दुरन्तमसुरेश्वरम् ॥
बद्ध्वेदं कवचं कालो रक्तबीजं चखाद सः ।
सङ्ख्यातीर्णा वृत्तेदं विघ्नं धत्ते तिलं यथा ॥
आवां सनत्कुमारश्च धर्म्मः साक्षी च कर्म्मणाम् ।
कवचस्य प्रसादेन सर्व्वत्र जयिनो वयम् ॥
न्यस्य नन्दयशोः कण्ठे जगाम कवचं द्विजः ।
आत्मनः कवचं कण्ठे दधार च हरिः स्वयम् ॥
प्रभावं कथितं सर्व्वं कवचस्य हरेस्तथा ।
अनन्तस्याच्युतस्येव प्रभावमतुलं मुने ! ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२अध्यायः॥

सर्व्वला, स्त्री, (सर्व्वं लातीति । ला + कः । टाप्) तोमरः । इत्यमरः । २ । ८ । ८३ ॥

सर्व्वलिङ्गी, [न्] पुं, (सर्व्वेषां वर्णाश्रमाणां लिङ्गं चिह्नमस्त्यस्येति । इनिः ।) पाषण्डः । इत्यमरः ॥ ये वेदविरुद्धाचारेषु सर्व्ववर्णचिह्नधारिषु बौद्धजैनकादिषु । पापं संवन्ति ददति पाषण्डाः मनीषादित्वात् साधुत्वं मूर्द्धन्यमध्योऽयम् । सर्व्वेषां वर्णाश्रमाणां किञ्चित् किञ्चित् लिङ्गमस्त्येषामिति । इन् । इति भरतः ॥ सकलचिह्नधारिणि, त्रि ॥

सर्व्वली, स्त्री, (सर्व्वं लातीति । ला + कः । गौरादित्वात् ङीष् ।) तोमरः । इति शब्दरत्नावली ॥

सर्व्वलोहः, पुं, (सर्व्वो लोहो यस्य ।) लोहमयबाणः । यथा,—
"प्रक्ष्वेड्गः सर्व्वलोहो नाराच एवञ्च सः ।"
इति हेमचन्द्रः ॥
सकलधातुश्च ॥

सर्व्ववर्षिका, स्त्री, (सर्व्वं वर्षयतीति । वर्ष + ण्वुल् टापि अत इत्वम् ।) गम्भारीवृक्षः । इति जटाधरः ॥

सर्व्ववल्लभा, स्त्री, (सर्व्वेषां वल्लभा ।) असती नारी । इति धरणिः । इति केचित् ॥ सकलप्रिये, त्रि ॥

सर्व्ववित्, पुं, (सर्व्वं वेत्तीति । विद् + क्विप् ।) परमेश्वरः । यथा,—
"यः सर्व्वज्ञः सर्व्ववित्स यस्य ज्ञानमयं तपः ।
तस्मादेतत् ब्रह्मनाम रूपमन्नञ्च जायते ॥"
इति मुण्डकोपनिषत् । १ । १ । ९ ।
सर्व्वज्ञे, त्रि ॥)

सर्व्ववेदः, पुं, (सर्व्वान् वेदानधीते इति । "क्रतूक्थादिसूत्रान्तात् ठक् ।" ४ । २ । ६० । इति ठक् । "सर्व्वादेः सादेश्च लुग्वक्तव्यः ।" इति लुक् ।) सर्व्ववेदाध्येता ब्राह्मणः । इति केचित् ॥ सर्व्वज्ञे, त्रि ॥

सर्व्ववेदाः, [म्] पुं, (सर्व्वं धनं वेदयति निवेदयति ऋत्विग्भ्य इति । विद् + णिच् + असुन् ।) सर्व्वस्वदक्षिणयागी येनेष्टः सः । इत्यमरः ॥ सर्व्वस्वं दक्षिणा यत्र स सर्व्वस्वदक्षिणो विश्वजिन्नामयागः स येनेष्टः सम्पादितः स सर्व्ववेदा उच्यते । सर्व्वं स्वं वेदयति लम्भयति ऋत्विजे इति सर्व्ववेदाः विद लृ लाभे आत्मात् आसुसिति असु । इति भरतः ॥

सर्व्ववेशी, [न्] पुं, (सर्व्वेषां वेशोऽस्यास्तीति । इनिः ।) नटः । इति । हेमचन्द्रः ॥ सकलवेशधारिणि, त्रि ॥

सर्व्वशान्तिक्रियः, पुं, (सर्व्वशान्तिं करोतीति । कृ + क्विप् ।) भरतराजः । स तु शकुन्तलापुत्रः । इति शब्दरत्नावली ॥ सकलशमकारके, त्रि ॥

सर्व्वसङ्कृतः, पुं, (सर्व्वं सङ्कृतमस्येति ।) षष्टिकाधान्यम् । इति शब्दचन्द्रिका ॥ सकलसङ्कृतियुक्ते, त्रि ॥

सर्व्वसंसर्गलवणं, क्ली, (सर्व्वसंसर्गेण जातं लवणम् ।) औषरकम् । इति राजनिर्घण्टः ॥

सर्व्वसत्रहनार्थकः, पुं, (सर्व्वेषां सत्रहनस्य अर्थो यत्र ।) चतुरङ्गसैन्यसन्नाहः । तत्पर्य्यायः । सर्व्वाभिसारः २ सर्व्वौघः ३ । इत्यमरः ॥ सर्व्वसत्रहनं अर्थोऽभिधेयमस्य । सर्व्वैरभिसियर्त्यऽभिमुखं गम्यतेऽनेन सर्व्वाभिसारः करणे घञ् । सर्व्वेषां ओघो वृन्दमत्र सर्व्वौघः । इति भरतः ॥

सर्व्वसन्नाहः, पुं, (सर्व्वेषां सन्नाहो यत्र ।) सर्व्वाला इति हलायुधः ॥ सर्व्वसत्रहनञ्च ॥

सर्व्वसहः, पुं, (सर्व्वं सहते इति । सह + अच् ।) गुग्गुलुः । इति रत्नमाला ॥ सकलसहिष्णौ, त्रि ॥ (यथा, भागवते । ८ । ५ । ९ ।
"स त्वं जगन्नाथखलप्रशान्तये
निरूपितः सर्व्वसहो गदाभृता ॥")

सर्व्वसिद्धिः, पुं, (सर्व्वेषां सिद्धिरस्मात् ।) नौफलः । इति शब्दचन्द्रिका ॥ सकलसाधनञ्च ॥

सर्व्वस्वं, क्ली, (सर्व्वं स्वम् ।) समुदायधनम् । यथा,
"गुरवे दक्षिणां दद्यात् प्रत्यक्षाय शिवात्मने ।
सर्व्वस्वं वा तदर्द्धं वा तदर्द्धं वा तदाज्ञया ॥"
इति तन्त्रसारः ॥

सर्व्वाङ्ग, क्ली, [न्] पुं, वर्षभूरविशेषः । स तु गोपकन्यायां नापिताज्जातः । इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥ (सकलधनविशिष्टे, त्रि ॥

सर्व्वहितं, क्ली, (सर्व्वस्मिन् हितम् ।) मरिचम् । इति राजनिर्घण्टः ॥ सकलहितकारके, त्रि ॥

सर्व्वाङ्ग, क्ली, (सर्व्वं अङ्गम् ।) सकलावयवः । यथा,—
"पादौ रक्षतु मे केतुः सर्व्वाङ्गं मे नवग्रहाः ।
आपादमस्तकञ्चैव सर्व्वविघ्नविनाशकः ॥"
इति उन्मीलातन्त्रे नवग्रहकवचम् ॥
(पुं, महादेवः । इति महाभारतम् । १३ । १७ । ३१ ॥)

सर्व्वाङ्गसुन्दररसः, पुं, (सर्व्वस्मिन् अङ्गे सुन्दरः । स एव रसः ।) औषधविशेषः । यथा,—
"रसगन्धकतुल्यांशौ द्वौ भागौ टङ्कणस्य च ।
मौलिकं विद्रुमं शङ्खभस्मनीयं समांशतः ॥
हेमभस्मार्द्धभागञ्च सर्व्वं खल्वे निधापयेत् ।
निम्बुद्रवस्य योगेन पिष्टिकां कारयेद्भिषक् ॥
पश्चात् गजपुटं दद्यात् शीतलञ्च समुद्धरेत् ।
हेमभस्मसमं तीक्ष्णं तीक्ष्णार्द्धं दरदो मतः ॥
एकीकृत्य समस्तानि सूक्ष्मचूर्णानि कारयेत् ।
ततः पूजां प्रकुर्व्वीत भक्षयेत् दिवसे शुभे ॥
सर्व्वाङ्गसुन्दरो ह्येष रोगराजनिकृन्तनः ।
वातपित्तज्वरे घोरे सन्निपाते सुदारुणे ॥
अर्शस्सु ग्रहणीरोगे मेहे गुल्मे भगन्दरे ।
निहन्ति वातजान्रोगान् त्रैफलांश्च विशेषतः ॥
पिप्पलीमधुसंयुक्तं घृतयुक्तमथापि वा ।
भक्षयेत् पर्व्वखण्डेन सितया चार्द्रकेण वा ॥
गुडूचीसत्त्वसहितं प्रमेहे च विशेषतः ।
रसरत्नाकरप्रोक्तः सिद्धयोगो रसोत्तमः ।
राजिकादिङ्गुतैलाक्तं लवणाद्यं विवर्ज्जयेत् ॥"
सर्व्वाङ्गसुन्दररसः । इति भैषज्यरत्नावली ॥
(यथा च ।
"रसगन्धकयोः कर्षं शाल्मलेकं सुशोधितम् ।
ततः कज्जलिकां कृत्वा मृदुपाकेन साधयेत् ॥
जातीफलं तथा कोषं लवङ्गारिष्टपत्रके ।
सिन्धुवारदलञ्चैव एलाबीजं तथैव च ॥
एषाञ्च कर्षमात्रेण तोयेनाथ विमर्द्दयेत् ।
मुक्ताग्दे पुनः क्षाप्यं पुटपाकेन साधयेत् ॥
घनपङ्के वह्निसिद्धा पुटमध्ये निधापयेत् ।
गुञ्जाष्टकप्रमाणेन प्रत्यहं भक्षयेन्नरः ॥
एतत् प्रोक्तं कुमाराणां रक्षणाय महौषधम् ।
ज्वरघ्नं दीपनञ्चैव बलवर्णप्रसाधनम् ॥
दुर्व्वारं ग्रहणीरोगं जयत्येव प्रवाहिकाम् ।
सूतिकाञ्च जयेदेतद्रक्षार्थं रक्षसञ्चयम् ॥
पिशाचा दानवा दैत्या बालानां विघ्नकारकाः ।
यत्रौषधवरश्रेष्ठं तत्र सीमां न यान्ति ते ॥
बालानां गदयुक्तानां स्त्रीणाञ्चैव विशेषतः ।
महागन्धकमेतद्धि सर्व्वव्याधिनिसूदनम् ॥
विना पाकेन सर्व्वाङ्गसुन्दरोऽयं प्रकीर्त्तितः ॥"
इति वैद्यकरत्नसमुद्रसारसंग्रहेऽतिसाराधिकारे ॥)

सर्व्वाङ्गीणः, त्रि, (सर्व्वाङ्गं व्याप्नोतीति । "तत्सर्व्वादेः पथ्यङ्गकर्म्मपत्रपात्रं व्याप्नोति ।" ५ । २ । ७ । इति खः ।) सर्व्ववयवसम्बन्धयुक्तः । सर्व्ववयवव्याप्तः । यथा, भट्टौ । ४ । १० ।
"वसानस्तन्वकनिभं सर्व्वाङ्गीणे तरुत्वची ।
काश्मीरः खाड्गिकः शार्ङ्गी रचन् विप्रांस्तुचवान् ॥"

सर्व्वाणी, स्त्री, (सर्व्वस्य पत्नी । सर्व्व + "इन्द्रवरुणभवसर्व्वेति ।" ४ । १ । ४८ । इति ङीष् । आनुगागमश्च ।) दुर्गा । इत्यमरः । १ । १ । ३८ ॥ अस्या व्युत्पत्तिर्यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्याये ।
"सर्व्वान्मोक्षं प्रापयति जन्ममृत्युजरादिकम् ।
चराचरांश्च विश्वस्थान् सर्व्वाणी तेन कीर्त्तिता ॥"

सर्व्वानुकारिणी, स्त्री, (सर्व्वमनुकरोतीति । कृ + णिनिः । ङीष् ।) शालपर्णी । इति राजनिर्घण्टः ॥

सर्व्वानुभूतिः, स्त्री, (सर्व्वेषामनुभूतिर्यत्र ।) श्लेतन्त्रिहता । इत्यमरः । २ । ४ । १०८ ॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ।
"श्लेता त्रिहत्रा भण्डी स्यात्त्रिहता त्रिपुटापि च ।
सर्व्वानुभूतिः सरला निशोत्रा रेचनीति च ॥")
चतुर्व्विंशतिभूताईदन्तर्गताईक्षेदः । चतुर्व्विंशतिभाव्यईदन्तर्गताईक्षेदश्च । इति हेमचन्द्रः ॥

सर्व्वान्नभक्षकः, त्रि, (भक्षयतीति । भक्ष + ण्वुल् । सर्व्वेषामन्नं सर्व्वान्नम् । तस्य भक्षकः ।) सकलान्नभोजी । तत्पर्य्यायः । उदरपिशाचः २ सर्व्वान्नीनः ३ । इति हेमचन्द्रः ॥

सर्व्वान्नभोजी, [न्] त्रि, सर्व्वेषां चतुर्णां वर्णानामन्नं भुङ्क्ते सर्व्वान्नभोजी । इति भरतः ॥ भुज + णिनिः ।) सर्व्वेषामन्नभक्षकः । इत्यमरः । ३ । १ । २२ ॥ सर्व्वप्रकारान्नभक्षकः । इति केचित् ॥

सर्व्वान्नीनः, त्रि, (सर्व्वान्नानि भक्षयतीति । सर्व्वान्न + "अनुपदसर्व्वान्नायानयमिति ।" ५ । २ । ९ । इति खः ।) सर्व्वान्नभोजी । इत्यमरः ॥

सर्व्वाभिसन्धी, [न्] पुं, (सर्व्वस्मिन् विषये अभिसन्धास्यस्येति । इनिः ।) वैड़ालव्रतिकः । कपटतापसः । इति त्रिकाण्डशेषः ॥ सकलाभिसन्धानविशिष्टे, त्रि ॥

सर्व्वाभिसारः, पुं, (सर्व्वेषामभिसारो यत्र ।) चतुरङ्गसैन्यसन्नाहः । इत्यमरः । २ । ८ । ९४ ॥ अस्य पर्य्यायः सर्व्वसन्नहनशब्दे द्रष्टव्यः ॥

सर्व्वार्थसाधिका, स्त्री, (सर्व्वान् अर्थान् साधयतीति । साधि + ण्वुल् । टापि अत इत्वम् ।) दुर्गा । यथा, मार्कण्डेये देवीमाहात्म्ये ।
सर्व्वमङ्गलमङ्गल्ये शिवे सर्व्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥"
सकलप्रयोजनसाधके, त्रि ॥

सर्व्वार्थानुसाधिनी, स्त्री, (सर्व्वानर्थाननुसाधयतीति । अनु + साधि + णिनिः । ङीप् ।) दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
"धर्म्मादीन् चिन्तितान् यस्मात् सर्व्वलोकेषु यच्छति ।
ततो देवी समाख्याता सा सर्व्वार्थानुसाधिनी ॥"

सर्व्वार्थसिद्धः, पुं, सर्व्वेषु अर्थेषु सिद्धः ।) बुधः । इत्यमरः । १ । १ । ११५ ॥ सकलप्रयोजनसिद्धियुक्ते, त्रि ॥

सर्व्वावसरः, पुं, (सर्व्वेषामवसरो यत्र ।) अर्द्धरात्रः । इति त्रिकाण्डशेषः ॥

सर्व्वाशा, स्त्री, सर्व्वाणि अशानि यस्याः ।) बोड्शविद्यादेव्यन्तर्गतदेवीविशेषः । इति हेमचन्द्रः ॥ सकलाशायुक्ता च ॥

सर्व्वाङ्गः, पुं, (सर्व्वमङ्गः । "राजाहःसखिभ्यष्टच्" ५ । ४ । ९१ । इति टच् । "अङ्गोऽङ्ग एतेभ्यः ।" ५ । ४ । ८८ । इति अङ्गादेशः । चत्वच्च ।) समस्तदिनम् । इति व्याकरणम् ॥

सर्व्वीयः, त्रि, (सर्व्वस्मै हितः । सर्व्व + "सर्व्वाश्वस्य वा वचनम् ।" ५ । १ । १० । इत्यस्य वार्त्तिकोक्त्या घे छः ।) सर्व्वसम्बन्धी । सर्व्वशब्दात् छीयप्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

सर्व्वेश्वरः, पुं, (सर्व्वेषामीश्वरः ।) शिवः । इति केचित् ॥ सार्व्वभौमश्च । (निखिलप्रभौ, त्रि । यथा, भागवते । ६ । ८ । ३३ ।
"केवलजगदाधार लोकैकनाथ सर्व्वेश्वर लक्ष्मीनाथ इति ॥")

सर्व्वौघः, पुं, (सर्व्वेषामोघो यत्र ।) चतुरङ्गसैन्यसन्नाहः । इत्यमरः ॥ गुरुवेगः । इति मेदिनी ॥

सर्व्वौषधिः, पुं, (सर्व्वा ओषधयो यत्र ।) ओषधिवर्गविशेषः । यथा,—
"कुष्ठमांसीहरिद्राभिर्वचाग्नेयैश्चन्दनैः ।
सुराचन्दनकर्पूरैः सुस्नाः सर्व्वौषधिः स्मृतः ॥"
अत्र द्वितीयचन्दनपदं रक्तचन्दनपरम् ॥ इति राजनिर्घण्टः ॥ (क्वचित् स्त्रीलिङ्गेऽपि दृश्यते ॥)

सर्व्वौषधिगणः, पुं, (सर्व्वौषधीनां गणः ।) सुराद्योषधिसमूहः । यथा,—
"सुरा मांसी वचा कुष्ठं ग्रैलेयं रजनीद्वयम् ।
शटी चम्पकमुस्ताश्च सर्व्वौषधिगणः स्मृतः ॥"
इति शब्दचन्द्रिका ॥

अन्यच्च ।
"हरिद्रा चन्दनं दार्व्वी मुस्तकं देवताड़कम् ।
धन्याकं जीरकं मेथी धात्रीफलसुवीरकम् ॥
त्रिसुगन्धिः शटी गन्धमार्द्रो कर्पूरकं वचा ।
नखो मरुवकं कुष्ठं देवदारु विड़ङ्गकम् ॥
सरलं पद्मकाष्ठञ्च बालकं भद्रमुस्तकम् ।
ग्रन्थिकञ्च जटामांसी पलाशः ग्रैलजं ग्रमी ॥
अर्कर्क्षीगरुकं दूर्व्वा मुरामांसी च कुड़ुमम् ।
अपामार्गो मधुरिका विकासा खदिरः कुशा ॥
चातुर्ज्जातकसस्योऽथोऽष्टवर्गो यज्ञडुम्बरः ।
नागेश्वरश्च कस्तूरी त्रिफला पङ्कजेशरम् ॥
कङ्कोलं धातकीपुष्पं त्रिकटु रेणुकं यवः ।
तिलाः कुन्दुरु लशुनं भार्गी गोरोचना बला ॥
यष्टी पुष्पञ्च नड़ुनी श्रीफलं वंशलोचना ।
इन्दीवरं बकुलता वकुलं मालतीदलम् ॥
इन्द्रबीजं कोकनदं जयन्ती गजपिप्पली ।
श्वेतापराजितापुष्पं सर्व्वौषधिगणः स्मृतः ॥"
इति पाद्मोत्तरखण्डे १०७ अध्यायः ॥

सर्षपः, पुं, (सरतीति । सृ गतौ + "सर्त्तेरपः बुक् च ।" उणा० ३ । १४१ । इति अपः बुगागमश्च ।) शस्यविशेषः । सरिषा इति भाषा ॥ तत्पर्य्यायः । तण्डुभः २ कदम्बकः ३ । इत्यमरः । २ । ८ । १७ ॥ सरिषपः ४ । इति भरतः ॥ तण्डुकः ५ । इति रभसनाथः ॥ कटुस्नेहः ६ । इति जटाधरः ॥ शर्षपः ७ । इति शब्दरत्नावली ॥ राजसर्षपः ८ । इति राजनिर्घण्टः ॥ (यथा, छान्दोग्योपनिषदि । ३ । १४ । ३ ।
"एष म आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा इति ॥")
अस्य गुणाः । कफवातघ्नत्वम् । तीक्ष्णत्वम् ॥ उष्णत्वम् । रक्तपित्तकारित्वम् । कटुत्वम् । कृमिकुष्ठनाशित्वञ्च । सिद्धार्थस्यापि तद्गुणः । इति राजवल्लभः ॥ * ॥ अपरञ्च ।
"आसुरी राजिका राजी रक्तिका रक्तसर्षपः ।
तीक्ष्णगन्धा मधुरिका चवकः चतकः चवः ॥
आसुरी कटुतिक्तोष्णा वातश्लीहार्त्तिशूलनुत् ।
दाहपित्तप्रदा हन्ति कफगुल्मकृमिव्रणान् ॥*॥
सर्षपो राजचवकः कृष्णा तीक्ष्णफला राजिका राज्ञी सा कृष्णा सर्षपाख्या विज्ञेया राजसर्षपाख्या च ॥
राजसर्षपकस्तिक्तः कटूष्णो वातशूलनुत् ।
पित्तदाहप्रदो गुल्मकण्डूकुष्ठव्रणापहः ॥"
इति कालेयसरिषपः ॥ * ॥
"सर्षपस्त्वनयो गौरः सिद्धार्थो भूतनाशनः ।
कटुस्नेहो गरघ्नश्च कण्डूघ्नो राजिकाफलः ॥
तीक्ष्णश्च दुराधर्षो रक्तोघ्नः कुष्ठनाशनः ।
सिद्धप्रयोजनः सिद्धः साधनः सितसर्षपः ॥
सिद्धार्थः कटुकोष्णश्च वातरक्तग्रहापहः ॥"
त्वन्दोषशमनो रक्तो विषभूतव्रणापहः ॥"
इति सर्षपः ॥*॥

तत्तैलगुणाः ।
"सर्षपतैलं तिक्तं कटुकं वातकफविकारघ्नम् ।
पित्तास्रदोषदं कृमिकुष्ठघ्नं तिलजवच्चक्षुष्यम् ॥"
तत्पत्रशाकगुणाः ।
"सार्षपं पद्मलत्युष्णं रक्तपित्तप्रकोपणम् ।
विदाहि कटुकं स्वादु शुक्रकृत् रुचिदायकम् ॥"
इति राजनिर्घण्टः ॥ * ॥

अन्यच्च ।
"सर्षपः कटुकस्नेहस्तण्डुभः कदम्बकः ।
गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते ॥
सर्षपस्तु रसे पाके कटुर्हृद्यः सतिक्तकः ।
तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्द्धनः ॥
रक्तोहरो जयेत् कण्डूकुष्ठकोठकृमिग्रहान् ।
यथा रक्तस्तथा गौरः किन्तु गौरो वरो मतः ॥"

अथ राइ । क्षुद्रराइ ।
"राजी तु राजिका तीक्ष्णगन्धा क्षुद्रनिका सुरी ।
शवः क्षुताभिजनकः कृमिकः कृष्णसर्षपः ॥
राजिका कफवातघ्नी तीक्ष्णोष्णा रक्तपित्तकृत्

किञ्चिद्दूषाग्निदा कण्डूकुष्ठकोठक्रमीन् हरेत्॥
पतितीक्ष्णा विशेषेण तद्वत् क्षारापि राजिका"
तत्तैलगुणाः।
"दीपनं सार्षपं तैलं कटूपाकरसं लघु।
लेखनं स्वर्ग्यवीर्य्योष्णं तीक्ष्णं पित्तासदूषकम्॥
कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम्।
कण्डूकोठक्रमिश्वित्रकुष्ठदुष्टव्रणप्रणुत्॥
तद्वत् राजिकयोस्तैलं विशेषाच्मूत्रकृच्छ्रजित्॥"
राजिकयोः क्षुद्र राइ। आरण्य राइ।
तयोः॥*॥ तच्छाकगुणाः।
"कटुकं सार्षपं शाकं बहुमूत्रमलं गुरुः।
पक्वपाकं विदाहि स्वादुष्णं रूक्षं त्रिदोषकृत्॥
सदारं लवणं तीक्ष्णं स्वादुशाकेषु निन्दितम्।
तीक्ष्णोष्णं सार्षपं नालं वातघ्नं व्रणापहम्।
कण्डूक्रमिहरं दद्रुकुष्ठघ्नं रुचिकारकम्॥"
इति भावप्रकाशः॥*॥
स्थावरविषभेदः। इति हेमचन्द्रः॥ षड्लिख्या-परिमाणम्। यथा,—
"आत्मान्तरगते भानौ यच्चाक्षुर्दृश्यते रजः।
तच्चतुर्भिर्भवेल्लिख्या लिख्याषड्भिश्च सर्षपः॥"
इति शब्दचन्द्रिका॥
सर्षपतैलं, क्ली, (सर्षपोद्भवं तैलम्।) सर्षपजात-स्नेहः। यथा,—
"सर्षपतैलं तिक्तं कटुकं वातकफविकारघ्नम्।
पित्तासदोषदं कृमिकुष्ठघ्नं तिक्तजक्षुष्यम्॥"
इति राजनिर्घण्टः॥
सर्षपी,(स्त्री,(सृ गतौ+अपः पुगागमश्च। ततो ङीप्।) क्षुन्निका। इति त्रिकाण्डशेषः॥ (पिड़काविशेषः। यथा, सुश्रुते। २। ६।
"गौरसर्षपसङ्काशा तत्प्रमाणा तु सर्षपी॥")
सलं, क्ली, (सरतीति। सृ गतौ+अच्। रस्य लः। सल गतौ+अच् वा।) जलम्। इत्यमर-टीकायां भरतः॥
सलिलं,क्ली, (सलति गच्छतीति। सल गतौ+ "सलिकल्यनीति।" उणा० १। ५५। इति इलच्।) जलम्। इत्यमरः। १।१०।३॥ तत्र विण्मूत्रत्यागनिषेधो यथा, मनुः।
'न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां न च पर्व्वते॥
न जीर्णदेवायतने न वल्मीके कदाचन।
न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके।
वायुग्निविप्रादित्यमपः पश्यंस्तथैव च।
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्জ্জनम्॥"
इत्याह्निकतत्त्वम्॥
अपि च।
"मूत्रञ्चापुरीषादि यैरेतत्सृष्टानि वारिणि।
"ते पात्यन्ते च विण्मूत्रे दुर्गन्धे पूयपूरिते॥"
इति वामनपुराणे कर्म्मविपाको नाम १२ अध्यायः॥*॥ अथ सलिलपरीक्षा। पितामहः।
"तोयस्याथ प्रवक्ष्यामि विधिं धर्म्मं सनातनम्
मण्डलं पुष्यधूपाभ्यां कारयेत् सुविचक्षणः॥
शरान् संपूजयेद्गन्धा वैष्णवञ्च धनुस्तथा॥"
तत्र प्रथमतो वरुणं पूजयेत्। यथा नारदः।
"गन्धमाल्यैः सुरभिभिर्धूपैश्चीरघृतादिभिः।
वरुणाय प्रकुर्व्वीत पूजामादौ समाहितः॥"
ततो धर्म्मावाहनादिसकलदेवतापूजाहोमसमस्तकप्रतिष्ठापनगिरोनिवेशान्तं कर्म्म कुर्य्यात्। कात्यायनः।
"शरांस्त्वनायसान्वांस्तु प्रकुर्व्वीत विशुद्धये।
वेणुकाष्ठमयावेव वेणा च सुदृढं क्षिपेत्॥"
पितामहः।
"वेणा च क्षत्रियः कार्य्यः तद्वत्तिर्ब्राह्मणोऽथवा
अक्रूरहृदयः शान्तः सोपवासस्तथा शुचिः॥
दृषन्न प्रक्षिपेद्वीमान् मारुते वाति वा भृशम्।
विषमे भूप्रदेशे च दृश्यक्षाणसमाकुले॥"
नारदः।
"क्रूरं धनुः सप्तशतं मध्यमं षट्शतं मतम्।
मन्दं पञ्चशतं प्रोक्तमेष श्रेयो धनुर्विधिः॥"
अङ्गुलीनां समाधिकं शतं यस्य धनुषः परिमाणं तत् सप्तशतं एवं षट्शतादिकम्। पिता-महः।
"मध्यमेन तु चापेन प्रक्षिपेत्तु शरत्रयम्।
इक्षानाश्च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः॥
तेषाञ्च प्रेषितानान्तु शराणां शाल्मदेयनात्।
मध्यमस्तु शरो ग्राह्यः पुरुषेण बलीयसा॥
शराणां पतनं ग्राह्यं सर्षपं परिवर्জ্জयेत्।
सर्षपन् सर्षपन् शरो याति दूराद्दूरतरं यतः॥"
पतनं ग्राह्यमिति शरपतनस्थानपर्य्यन्तं गच्छे-दित्यर्थः। तेन प्रसरणपक्षेऽपि पतनस्थानकशर-ग्रहणम्। ततश्च प्रथमतः पुरुषान्तरेण तत्स्थाने शर आनेतव्यः। नारदः।
"नदीषु नातिवेगासु तडागेषु सरःसु च।
ह्रदेषु स्थिरतोयेषु कुर्य्यात् पुंसां निमज्जनम्॥"
नातिवेगासु स्थितिविरोधिवेगशून्यासु। विष्णुः।
"पङ्कशैवालदुष्टग्राहमत्स्यजलौकादिवर्জ्जिते तस्य नाभिमात्रजले मन्त्रस्मारागद्वेषिणः पुरुषस्यान्य-स्योरू गृहीत्वाभिमन्त्रिताभ्यः प्रविशेत्। तत्-समकालञ्च नातिक्रूरदृढेन धनुषा पुरुषोऽपरः शरमोक्षं कुर्य्यादिति। तस्य शोध्यस्येत्यर्थः। अन्यथा तस्येति व्यर्थं स्यात्॥*॥ अन्यपुरुषस्य स्तम्भधारणमाह स्मृतिः।
"उदके प्राक्षुखस्तिष्ठेदूर्ध्वस्थूर्णां प्रगृह्य च॥"
प्राड्विवाककर्त्तृजलाभिमन्त्रणमाह पिता-महः।
"तोयं त्वं प्राचिनां प्रायः सृष्टेराद्यन्तु निर्मितम्
शुद्धेश कारणं प्रोक्तं द्रव्याणां देहिनान्तथा।
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे॥"*॥
शोध्यकर्त्तृकाभिमन्त्रणमाह याज्ञवल्क्यः।
"सत्येन मामिरक्षस्व वरुणेत्यभिशाप्य कम्।
नाभिमात्रोदकस्थस्य गृहीत्वोरू जलं विशेत्॥"
मा मामभिशाप्य शपथं कारयित्वा कं जलं विशेत् निमज्जेत्। तोरणञ्च निमज्जनसमीपे समे स्थाने शोध्यकर्षप्रमाणोच्छ्रितं कार्य्यम्। यथा, नारदः।
"गत्वा तु तज्जलस्थानं तटे तोरणमुच्छ्रितम्।
कुर्व्वीत कर्षमात्रन्तु भूमिभागे समे शुचौ॥"
शरमोक्षे विशेषमाहतुर्नारदहरीतौ।
"शरप्रक्षेपणस्थानादृजुना जवसमन्वितः।
गच्छेत् परमया शक्त्या यत्रासौ मध्यमः शरः॥
मध्यमं शरमादाय पुरुषोऽन्यस्तथाविधः।
प्रत्यागच्छेत् तु वेगेन यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।
अन्तर्জ्जलगतं सम्यक् तदा शुद्धिं विनिर्दिशेत्॥
अन्यथा न विशुद्धः स्यादेकाङ्गस्यापि दर्शनात्।
स्थानाद्यान्यत्र गमनादृश्यस्मिन् पूर्व्वं निवेशयेत्॥"
जवित्वं विशेषयति नारदः।
"पञ्चाशतो धावकानां यौ स्यातामधिकौ जवौ
तौ च तत्र नियोक्तव्यौ शरानयनकर्म्मणि॥"
एकाङ्गस्य दर्शनादिति कर्षाद्यभिप्रायेण॥
"शिरोमात्रन्तु दृश्येत न कर्णौ नापि नासिके
अप्सु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत्॥"
इति विशेषाभिधानात्॥
कात्यायनः।
"निमज्जोत्प्लवते यस्तु दृश्येत प्राचिना नरः
पुनस्तत्र निमज्जेत दृग्यच्छिक्षविचारितः॥"
जलान्तर्गतमस्यजलौकादिना दृष्टः सन्नुत्प्लवते यदि तदा दृष्टे दृष्टे पुनर्निमज्जनीय इत्यर्थः॥*॥
पितामहः।
"गन्तुश्चापि च कर्त्तुश्च समं गमनमज्जनम्।
गच्छेत्तोरणमूलान्तु शरस्थानं जवी नरः॥
तस्मिन् गते द्वितीयोऽपि वेगादादाय शाय-कम्।
गच्छेत्तोरणमूलन्तु यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।
अन्तर्जलगतं सम्यक् ततः शुद्धिं विनिर्दिशेत्॥"
अत्र मज्जनसमकालं गमनाभिधानात् शर-मोक्षसमकालं गमनं शूलपाण्युक्तमयुक्तम्। मज्जनसमकालत्वित्तं मध्यमं शरमादायेत्यपर-सूत्रमपि प्रमाणशून्यम्। ततश्च त्रिषु शरेषु सृष्टेषु एको वेगवान् मध्यमशरपतनस्थानं गत्वा तमादाय तत्रैव तिष्ठति अन्यस्तु पुरुषो वेगवान् शरमोक्षस्थाने तोरणमूले तिष्ठति एवं स्थितयोस्तृतीयायां करतालिकायां प्राड़-विवाकदत्तायां शोध्यो निमज्जति तत्समकाल-मेव तोरणमूलस्थितोऽपि द्रुततरं मध्यमशर-पतनस्थानं गच्छति शरग्राही च तस्मिन् प्राप्ते द्रुततरं तोरणमूलं प्राप्यान्तर्জ्जलगतं यदि न पश्यति तदा शुद्धो भवतीति वर्त्तुलार्थः॥*॥
तत्र प्रयोगः। उत्तरवाहजलाशयनिकटे तत्रा तोरणं विधाय उत्तरदेशे लक्ष्यं कृत्वा तोरण-समीपे सशरं धनुः संपूज्य जलाशये वरुण-मावाह्य पूजयित्वा तत्तीरे धर्म्मादींश्च देवान् हवनान्तमिष्ट्वा दक्षिणां कृत्वा शोध्यस्य शिरसि प्रतिज्ञापत्रं कृत्वा प्राड्विवाको जलमभि-मन्त्रयेत्।

"ॐ तोय त्वं प्राणिनां प्राणः सृष्टेराद्यन्तु निर्म्मितम्।
शुद्धेय कारणं प्रोक्तं द्रव्याणां देहिनां तथा।
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे॥"
इति मन्त्रेण॥
शोधयस्तु ॐ सत्येन माभिरक्षस्व वरुणेत्यनेन जलमभिमन्त्र्य गृहीतस्यूनस्य शोधनाभिमानोदकावस्थितस्य बलीयसः प्राङ्मुखस्य पुरुषस्य समीपं जलमध्ये गच्छेत्। ततः शरेषु त्रिषु मुक्तेषु मध्यमशरपतनस्थाने मध्यमशरं गृहीत्वा जविन्येकस्मिन् पुरुषे स्थिते अन्यस्मिंश्च तोरणमूले स्थिते प्राङ्विदाकेन तालत्रये दत्ते शोध्यो गृहीतस्यूनप्राङ्मुखपुरुषस्योरू गृहीत्वा निमज्जति। तस्मिन्कालमेव तोरणमूलस्थोऽपि मध्यमशरस्थानं द्रुतं गच्छति। ततः शरग्राही च तस्मिन् प्राप्ते द्रुतं तोरणमूलं प्राप्य जलान्तःस्थं यदि न पश्यति तदा शुद्धः। कर्णाद्यङ्गं विना शिरोमात्रदर्शनेऽपि शुद्धः मज्जनस्थानादन्यत्र गमनेऽप्यशुद्धः। दक्षिणादिकं दद्यात्। इति दिव्यतत्त्वम्॥
सलिलकुन्तलः, पुं, (सलिलस्य कुन्तल इव।) शैवालः। इति त्रिकाण्डशेषः॥
सलिलजं, क्ली, (सलिले जायते इति। जन+डः।) पद्मम्। इति राजनिर्घण्टः॥ जलजाते, त्रि॥ (यथा, महाभारते। ७। १२५। २१।
"एष वृष्टिप्रवीरेण भ्राता सलिलजो भृशम्।
पृथिवीश्चान्तरीक्षञ्च निनादयति गह्वरात्॥")
सलिलाग्रयः, पुं, (सलिलानामाग्रयः।) जलाग्रयः। तस्य वैशद्यत्वे दोषो यथा,—
गर्ग उवाच।
"नगरादपसर्पन्ते समीपमुपयान्ति च।
नद्यो ह्रदाः प्रस्रवणाः विरसाश्च भवन्ति ते।
विवर्णं कलुषं तप्तं फेनवज्जन्तुसङ्कुलम्।
क्षीरं क्षेद्रं सुरां रक्तं वहन्ते चाकुलोदकाः॥
षण्मासाभ्यन्तरे तत्र परचक्रभयं भवेत्।
जलाग्रया नदन्ते वा प्रज्वलन्ति कथञ्चन॥
विसृजन्ति तथा ब्रह्मन् ज्वालाधूमरजांसि च।
अखाते वा जलोत्पत्तिः ससस्या वा जलाग्रयाः॥
संगीतशब्दा दृश्यन्ते जले मारभयं वदेत्।
दिव्यमभ्रोभयं सर्पिर्मधुना त्वभिषेचनम्।
जलग्रया वारुणा मन्त्रास्तोय होमो जले भवेत्॥
मध्वाज्ययुक्तं परमान्नमत्र
देयं द्विजानां द्विजभोजनार्थम्।
गावश्च देयाः सितवस्त्रयुक्ता-
स्तोयोद्भवाः सलिलाधमान्ये॥"
इति मात्स्ये २०८ अध्यायः॥
सलिलेन्धनः, पुं, (सलिलं इन्धनं यस्य।) वाडवानलः। इति त्रिकाण्डशेषः॥
सलीलः, त्रि, (लीलया सह वर्त्तमानः। लीलाविशिष्टः। यथा,—
"सुरद्रुमूलमण्डपे विचित्ररत्ननिर्म्मिते
सुसहितानभूषिते सलीलविभ्रमालसम्।
सुराङ्गनाभवक्त्रवीकरप्रपञ्चचामर-
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम्॥"
इति छन्दोमञ्जरी॥
सल्लकी, स्त्री, (सत्कृत्य लक्ष्यते स्वाद्यते गजैरिति। सत्+लक+कृत्। गौरादित्वात् ङीष्।) स्वनामख्यातवृक्षः। तत्पर्य्यायः। गजभक्ष्या २ सुवहा ३ सुरभी ४ रसा ५ महेरणा ६ कुन्दुरुकी ७ ह्लादिनी ८। इत्यमरः। २।४।१२४॥ गजभक्षा ९ सुरभिः १० सुरभीरसा ११ महेरुणा १२ शल्लकी १३ सिल्लकी १४ शिल्लकी १५ ह्लादिनी १६। इति तट्टीका॥ शब्द्यते श्राव्यते गजैः शल्लकी। शल क ङ श्राघे चुरादिः जेरभावपक्षे नान्त्रीति लकट्। श्लाविदहुमेदी शल्लकी शल्ला सवितर्कयोरिति तालव्यादी रभसः। सलति गच्छति सलगतौ दन्त्यादिः षकः भौवादिः निपातनात् लस्य ह्रित्वम्। सत्कृत्य लक्ष्यते स्वाद्यते गजैरिति वा सल्लकी दन्त्यादिरित्यन्ये। सिल्लकी चेत्येके। देशीप्रायियम्। सल्लकी सिल्लकी ह्लादेति रुद्रः। इति स्वामी। इत्यमरटीकायां भरतः॥
संव(म्ब)रं, क्ली, (संव्रियते इति। सं+वृ+अप्।) संयमः। इति त्रिकाण्डशेषः॥ बौद्धव्रतविशेषः। इति मेदिनी॥ जलम्। इत्यमरः। १।१०।४॥
"सम्बति सम्बरम्। सम्ब सर्पणे पूर्ब्बेण अर सम्बरं दन्त्यादि। शम्ब गतावित्यस्मादरे तालव्यादि च।
'क्लीवन्तु सम्बरं नीरबौद्धव्रतविशेषयोः।
विशेषे पुंसि दैत्यस्य मत्स्यस्य हरिणस्य च॥'
इति दन्त्यादौ रभसः॥
'शम्बरो हरिणे दैत्ये मत्स्ये च सलिले स्मृतः॥'
इति तालव्यादावजयः।" इति भरतः॥
संव(म्ब)रः, पुं, (संवृणोति आवृणोति जलमिति। सं+वृ+अच्।) सेतुः। यथा। सेतौ पक्ष्यालिसंवराः। इति हेमचन्द्रः॥ दैत्यविशेषः। हरिणविशेषः। मत्स्यविशेषः। शैलविशेषः। जिनविशेषः। इति मेदिनी॥ स तु भाव्यर्हन्, इति हेमचन्द्रः॥
संवरणं, क्ली. (सं+वृ+ल्युट्।) आवरणम्। (यथा, महाभारते। १। १४१। ७१।
"मन्त्रसंवरणे यत्नः सदा कार्य्योऽनसूयता॥")
इन्द्रियसंयमः। इति संवरादिशब्दटीकायां भरतः॥ (प्राकारः। यथा, रामायणे। २। ८८। २४।
"शून्यसंवरणारक्षामयन्त्रितहयद्विपाम्।
अनाहतपुरद्वारां राजधानीमरक्षिताम्॥"
"शून्यसंवरणारक्षां संवरणानां प्राकाराणामासमन्तात् रक्षया शून्याम्।" इति तट्टीका॥*॥
पुं, अजमीढपुत्रः। स च कुरोः पिता। इति महाभारतम्। १। ९५। ३७॥)
सवरारिः, पुं, (संवरस्य अरिः।) कामदेवः। इत्यमरः। १।१।२३॥ "संवरस्य दैत्यविशेषस्य अरिः। 'क्लीवन्तु संवरं नीरबौद्धव्रतविशेषयोः।
विशेषे पुंसि दैत्यस्य मत्स्यस्य हरिणस्य च॥'
इति दन्त्यादौ रभसः। संवरणं संवरः भावेऽल्। इन्द्रियसंयमः संवरस्तस्यारिरिति वा। तदुक्तं साहित्यकल्पतरुणा। रुद्रस्य समरारिश्च पुष्पवतीनां कुसुमधन्वेति तदयं संवरारिरिह तालव्यादिर्दन्त्यादिश्च॥ इति भरतः॥
संवरी, स्त्री, शतावरी। इति शब्दचन्द्रिका॥ मूषिकपर्णी। इत्यमरः। २।४। ८८॥ इन्दुरकाणी इति ख्यातायां शुलकुड़ी इति ख्यातायामिति केचित्। शं कल्याणं हृणोति शंवरी पूर्ब्ववदन् ईप् तालव्यशादिः दन्त्यसादिश्चेति स्वामी। इति भरतः॥
संवलं, क्ली, (संवृणोतीति। सं+वृ+अच्। रस्य लः।) जलम्। इति शब्दरत्नावली॥
संवलः, पुं, क्ली, पाथेयम्। तालव्यादिर्दन्त्यादिश्च। इत्यमरभरतौ॥
सवं, क्ली, (सूते रसानिति। सू+अच्।) जलम्। इति जटाधरः॥ पुष्परसः। इति केचित्॥
सवः, पुं, (सूयते सोमोऽत्रेति। सू+अप्।) यज्ञः। इत्यमरः। २।७।१३॥ (यथा, महाभारते। १। ८४। २५।
"राजसूयाश्वमेधाद्यैः सोऽयजत् बहुभिः सवैः॥")
सन्तानः। इति मेदिनी॥ सूर्य्यः। चन्द्रः। इति केचित्॥ (अन्ने, त्रि। यथा, वाजसनेयसंहितायाम्। ८। ३८।
"सविता त्वा सवानां सुवताम्।"
"सविता सवानां प्रसवानामन्नानामाधिपत्ये हे यजमान त्वा त्वां सुवतां प्रेरयतु।" इति तद्भाष्यम्॥)
सवनं, क्ली, (सु ञ् अभिषवे+ल्युट्।) यज्ञस्नानम्। (यथा, किराते। १२। १०।
"प्रविवेश गामिव क्रतुश्रुतस्य
नियमसवनाय गच्छतः।
तस्य पदविनमितो हिमवान्
गुरुतां नयन्ति हि गुणा न संहतिः॥")
तत्पर्य्यायः। सूत्या २ अभिषवः ३। इत्यमरः। २।७।४७॥ सोमसञ्चानम् ४। इति जटाधरः॥ सोमपानम्। इति भरतः॥ अध्वरम्। (यथा, रघुः। ८। ७५।
"अथ तं सवनाय दीक्षितः
प्रणिधानात् गुरुराश्रमस्थितः।
अभिषङ्क्रजुं विजन्निवान्
इति शिष्येण विलान्वबोधयत्॥")
सोमनिर्दलनम्। इति मेदिनी॥ प्रसवः। इति केचित्॥ (सु+युच्। चन्द्रे, पुं। इत्युणादिवृत्तौ उज्ज्वलदत्तः। २।७४॥ वनेन सह वर्त्तमानमिति विग्रहे वनविशिष्टे, त्रि। यथा, महाभारते। १। १८। ८।
"अथ पञ्चतराजानं तमनन्तो महाबलः।
उज्जहार बलाद्ब्रह्मन् सवनं सवनौकसम्॥"
सवयाः, [स्] स्त्री, (समानं वयोऽस्याः। "ज्योतिर्जनपदेति।" ६।३।८५। इति समानस्य सः।)

समवयस्का । तत्पर्य्यायः । आलिः २ वयस्या ३ सखी ४ सहचरी ५ । इति जटाधरः ॥
सवयाः, [स्] पुं, (समानं वयो यस्य ।) वयस्यः । इत्यमरः । ३ । ८ । १२ ॥ समानवयस्के, त्रि ॥ (यथा रघुः । ५ । ६५ ।
"सूतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुपसि वाग्भिरुदारवाचः ॥")
सवरः, पुं, सलिलम् । शिवः । इति त्रिकाण्डशेषः ॥
सवर्णः, त्रि, (समानो वर्णोऽस्य । "ज्योतिर्जनपदेति ।" ६ । ३ । ८५ । इति समानस्य सः ।) सदृशः । इति हेमचन्द्रः ॥ (यथा, रघुः । ८ । ५१ ।
"ग्रथितमौलिरसौ वनमालया
तरुपलाशसवर्णतनुच्छदः ॥")
समानवर्णः । (यथा, महाभारते । ७ । २२ । ४३ ।
"इन्द्रायुधसवर्णैस्तु कुन्तिभोजो हयोत्तमैः ।
आयात् सदश्वैः पुरुजित् मातुलः सव्यसाचिनः ॥")
तुल्यजातिः । यथा, मनुः ।
"पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते ।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्म्मणि ॥"
इत्युद्वाहतत्त्वम् ॥
एकस्थानोत्पन्नवर्णः । यथा । सवर्णेनाकदीर्घः । इति संक्षिप्तसारव्याकरणम् ॥
सवर्णा, स्त्री, (समानो वर्णो यस्याः ।) सूर्य्यपत्नी छाया । इति शब्दरत्नावली ॥ (समानवर्णा स्त्री । यथा, मनुः । ३ । ४ ।
"उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम् ॥")
सवहा, स्त्री, त्रिवृता । इत्यमरटीकायां भरतः ॥
सविकाशः, त्रि, विकशितः । प्रफुल्लः । विकाशेन सह वर्त्तमानः ॥
सविता, [तृ] पुं, (सूते लोकादीनिति । सू + तृच् ।) सूर्य्यः । इत्यमरः । १ । ३ । ३१ ॥ यथा, कुमारे । ५ । २० ।
"विजित्य नेत्रप्रतिघातिनीं प्रभा-
मनन्यदृष्टिः सवितारमैक्षत ॥")
तस्य व्युत्पत्तिर्यथा,—
"धीशब्दवाच्यो ब्रह्माणं प्रचोदयति सर्व्वदा ।
सृष्ट्यर्थं भगवान् विष्णुः सविता स तु कीर्त्तितः ॥
सर्व्वलोकप्रसवनात् सविता स तु कीर्त्यते ।
यतस्तद्देवता देवी सावित्रीत्युच्यते ततः ॥"
इति वह्निपुराणे गायत्रीकल्पो नामाध्यायः ॥
अर्कवृक्षः । इति चामरः । २ । ४ । ८० ॥
सविदेवतः, पुं, (सविता देवतं यस्य ।) हस्तनक्षत्रम् । इति हेमचन्द्रः ॥
सविदलः, त्रि, सविदसम्बन्धी । सविदशब्दात् लप्रत्ययेन निष्पन्नः ॥
सवित्रं, क्ली, (सूयतेऽनेनेति । सू प्रसवे + "अर्त्तिलूधूसूखनसहचर इत्रः ।" ३ । २ । १८४ । इति करणे इत्रः ।) प्रसवकरणम् । इति मुग्धबोधव्याकरणम् ॥
सवित्रियः, त्रि, (सवितुरयमिति । सविद + घः ।) सूर्य्यसम्बन्धीयः । इति सिद्धान्तकौमुदी ॥
सवित्री, स्त्री, (सूते या । सू + तृच् । ङीप् ।) माता । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । २४ ।
"तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकाशे ॥")
गौः । इति केचित् ॥
सविधः, त्रि, (समाना विधास्येदि ।) निकटम् । इत्यमरः । ३ । १ । ६७ ॥ (यथा, कथासरित्सागरे । ५३ । ३० ।
"अथ सविधमागत्य राज्ञस्तस्योपविष्टवान्")
समानप्रकारश्च ॥ (यथा, भागवते । ३ । ३ । ८ ।
"आसां मुहूर्त्त एकस्मिन् नानागारेषु योषिताम्
सविधं जगृहे पाणीननुरूपः स्वमायया ॥")
सविस्मयः, त्रि, (विस्मयेन सह वर्त्तमानः ।) विस्मयापन्नः । तत्पर्य्यायः । वौत्सापन्नः २ । इति हारावली ॥
सवेशः, त्रि, (वेशेन सह वर्त्तमानः ।) वेशान्वितः । इति धरणिः ॥ निकटम् । इत्यमरः । ३ । १ । ६७ ॥
सव्यः, त्रि, (सू प्रेरणे + "माच्छासिसूभ्यो यः ।" उणा० ४ । १०८ । इति यः ।) वामः । इत्यमरः । ३ । १ । ८५ ॥ (यथा, मनुः । २ । ६३ ।
"उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः ।
सव्ये प्राचीनावीती निवीती कण्ठसज्जने ॥")
दक्षिणः । (यथा, अनर्घराघवे । ६ । ७० ।
"एकेन सव्यपाणिना विशिखमुत्खाय किमाह रावणः । साधु रे मनुष्यडिम्भ साधु ।"
"सव्यपाणिना दक्षिणहस्तेन ।" इति तट्टीका ॥)
प्रतिकूलः । इति हेमचन्द्रः ॥
सव्यः, पुं, (सूते विश्वमिति । सू प्रसवे + "माच्छासिसूभ्यो यः ।" उणा० ४ । १०८ । इति यः ।) विष्णुः । इति शब्दमाला ॥
सव्यसाची, [न्] पुं, (सव्येन वामेन हस्तेनापि सचति सन्दधाति बाणमिति । सच सन्धाने + णिनिः ।) अर्জ্জुनः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ४ । १२ । १९ ।
"उभौ मे दक्षिणौ पाणौ गाण्डीवस्य विकर्षणे ।
तेन देवमनुष्येषु सव्यसाचीति मां विदुः ॥")
सव्येष्ठः, पुं, (सव्ये तिष्ठतीति । स्था + कः । "स्थाग्निस्थूणाम् ।" ८ । ३ । ९७ । इत्यस्य वार्त्तिकोक्त्या षत्वम् । इलदन्तादित्यलुक् ।) सारथिः । इति हलायुधः ॥
सव्येष्ठा, [ष्ठ] पुं, सव्ये तिष्ठतीति । स्था + "सव्ये स्थश्छन्दसि ।" उणा० २ । १०२ । इति छन्दसि ष्ठः । स च डित् । "स्थाग्निस्थूणाम् ।" ८ । ३ । ९७ । इति षत्वम् । सप्तम्या अलुक् ।) सारथिः । इत्यमरः । २ । ८ । ६० ॥
सशस्या, स्त्री, (शस्येन सह वर्त्तमाना ।) नागदन्ती । इति रत्नमाला ॥ शस्ययुक्तभूम्यादौ, त्रि ॥
सशूकः, पुं, (शूकेन दयया सह वर्त्तमानः ।) आस्तिकः । इति केचित् ॥
सश्मश्रुः, स्त्री, (श्मश्रुणा सह वर्त्तमाना ।) श्मश्रुयुक्तस्त्री । तत्पर्य्यायः । नरमालिनी २ । इति हेमचन्द्रः ॥ (श्मश्रुविशिष्टे, त्रि ॥)
सस्त्वा, स्त्री, (सत्त्वेन सह वर्त्तमाना ।) गर्भिणी । इति शब्दरत्नावली ॥ (यथा, रघुः । ३ । ८ ।
नदीमिवान्तःसलिलां सरस्वतीं
"नृपः ससत्त्वां महिषीममन्यत ॥")
प्राणियुक्ते, त्रि । यथा, "मनुः । ४ । ४७ ।
'न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे ॥'
'न ससत्त्वेषु गर्त्तेषु न गच्छन्नपि संस्थितः ॥'
ससत्त्वेषु प्राणिमत्सु ।" इत्याह्निकतत्त्वम् ॥
ससनं, क्ली, (सस नाशे + ल्युट् ।) यज्ञार्थपशुहननम् । इत्यमरटीका । २ । ७ । २६ ॥ तस्य रूपान्तर शमन शसनञ्च ॥
सस्मितः, त्रि, (स्मितेन सह वर्त्तमानः ।) ईषद्धास्ययुक्तः । यथा,—
"सस्मिताननसरोजमङ्गने
रिङ्गमाणमतिलोमकुन्तलम् ।
रोचनोल्लसितभालमस्तु मे
कैशवं मनसि शैशवं वपुः ॥"
इत्यनुमितौ जगदीशः ॥
सस्यं, क्ली, (सस खने + "माच्छासिसिसूभ्यो यः । उणा० ४ । १०८ । इति यः ।) दृक्षादीनां फलम् । यथा,—
"संसनं सीसकं सस्यं सस्तं साम्रा च साध्वसम् ॥"
इत्युज्ज्वलविवेकात् । इत्यमरटीकायां भरतः ॥
धान्यम् । यथा, हेमचन्द्रः ।
"धान्यस्तु सस्यं सीत्यञ्च व्रीहिस्तम्बकरिश्च तत्" ॥
शस्यम् । गुणः । इति विश्वः ॥ तस्य प्रशंसा यथा,
"जीर्णमन्नं प्रशंसीयात् भार्य्यां च गतयौवनाम् ।
रथात् प्रत्यागतं शूरं सस्यञ्च गृहमागतम् ॥"
इति चाणक्यशतकम् ॥
अन्यत् शस्यशब्दे द्रष्टव्यम् ॥
सस्यकः, पुं, (सस्येन गुणेन परिजातः सम्बद्धः । सस्य + "सस्येन परिजातः ।" ५ । २ । ६८ । इति कन् ।) मणिभेदः । (यथा, बृहत्संहितायाम् । ७ । २० ।
"हेमकान्तिरथवा शुक्लवर्णः
सस्यकेन मणिना सदृशो वा ॥")
अग्निः । इति मेदिनी ॥
"सस्यको नालिकेरान्तः सस्याभमणिखड्गयोः ॥"
इति हेमचन्द्रः ॥
(शालिः । साधुः । इति काशिका ॥)
सस्यमारी, [न्] पुं, (सस्यं मारयतीति । मृ + णिच् + णिनिः ।) महामूषकः । इति राजनिर्घण्टः ॥ सस्यनाशके, त्रि ॥
सस्यसंवरः, पुं (सस्यैः संव्रियते इति । सं + वृ + "वृञवृङ्भ्यां संहतसंक्षेत्रे ।" ३ । ३ । ५८ । इति अप् ।) सालवृक्षः । इत्यमरः । २ । ४ । ४४ ॥
सस्यसंवरणः, पुं, (सस्यैः संवरणमस्येति ।) अक्षकर्षवृक्षः । इति राजनिर्घण्टः ॥
सस्वेदा, स्त्री, (स्वेदेन सह वर्त्तमाना ।) दूषिता कन्या । इति शब्दरत्नावली ॥ (धर्म्मविशिष्टे, त्रि ॥)

सह, व्य, सहितम्। तत्पर्य्यायः। साकम्२ सार्द्धम्३ सत्रम्४ समम्५। इत्यमरः। ३।४।४॥ मलुः६। इति जटाधरः॥ (यथा, मनुः। १०।६१।
"यत्र क्वेते परिध्वंसा जायन्ते वर्णदूषकाः।
राष्ट्रिकः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति॥")
साकल्यम्। विद्यमानम्। सादृश्यम्। यौगपद्यम्। सङ्गतिः। सम्बन्धः। इति मेदिनी॥ सामर्थ्यम्। इति शब्दरत्नावली॥

सहं, क्ली, (सहते इति। सह+पचाद्यच्।) पांशुलवणम्। इति राजनिर्घण्टः॥

सहः, पुं, (सहते इति। सह+पचाद्यच्।) अपहायणमासः। (यथा, वाजसनेयसंहितायाम्। १४। २७।
"सहश्च सहस्यश्च दैवान्तिकावृतू॥"*॥
महादेवः। इति महाभारतम्। १३। १७। १२६॥) चमे, त्रि। इति हेमचन्द्रः॥ (यथा, महाभारते। १६। ८। १०।
"गदापरिघशक्तीनां सहाः परिघबाहवः।
न एवाभिनिहताः पश्य कालस्य पर्य्ययम्॥")

सहः, पुं, क्ली, (सहते इति। सह+अच्।) बलम्। इति मेदिनी॥

सहः, [स्] क्ली, (सहते इति। सह+"सर्व्वधातुभ्योऽसुन्।"उणा० ४।१८८। इति असुन्।) ज्योतिः। बलम्। इति शब्दरत्नावली॥ (यथा, रघुः। ८। ७।
"सदयं बुभुजे महाभुजः
सहसोर्द्धगमियं व्रजेदिति।
अचिरोपनतां स मेदिनीं
नवपाणिग्रहणां वधूमिव॥")

सहकारः, पुं,(सह युगपत् कारयति विचेपयति सौगन्धमिति। कृ+णिच्+अच्।) अतिसौरभाम्रः। इत्यमरः। २। ४। ३३॥ (यथा, रघुः। ४। ८।
"मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः॥")

सहकारी, [न्] पुं, (सह करोतीति। कृ+णिनिः।) प्रत्ययः। यथा,—
"अथ हेतुरुपादानं प्रत्यया सहकारिणः॥"
इति त्रिकाण्डशेषः॥
न्यायमते तद्भिन्नत्वे सति तज्जन्यजनकत्वं सहकारित्वम्॥ (मिलित्वा करणशीले, त्रि॥)

सहचरः, पुं, स्त्री, सह चरतीति। चर+अच्।) पीतझिण्टी। नीलझिण्टी। इति रत्नमाला॥ (यथा, सुश्रुते। १। ३८।
"पीततरुसहचरदयदर्भहच्चादनीति॥")

सहचरः, पुं, (सह चरतीति। चर+अच्।) झिण्टी। वयस्यः। (यथा, कथासरित्सागरे। २४। १३२।
"ततः सहचरैः साकं तस्यैवाश्रित्य यद्गृहम्॥")
प्रतिबन्धकः। इति हेमचन्द्रः॥ अनुचरे, त्रि। इति मेदिनी॥ (यथा, कुमारे। २। ६४।
"सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा॥")

सहचरी, स्त्री, (सह चरति या। चर+अच्। पचाद्यिषु चरतेष्टिलकरणात् ङीष्।) पीतझिण्टी। इत्यमरः। २। ४। ७५॥ सखी। इति जटाधरः॥ पत्नी। इति हेमचन्द्रः॥ (यथा, रघुः। ८। ५७।
"लक्ष्मीकृतस्य हरिणस्य हरिप्रभावः
प्रेक्ष्य क्षितां सहचरीं व्यवधाय देहम्।
आकर्णकृष्टमपि कामितया स धन्वी
बाणं कृपामृदुमनाः प्रतिसञ्जहार॥")

सहजः, पुं, (सह जायते इति। जन+डः।) सहोदरः। इत्यमरः। २। ६। ३४॥ निसर्गः। सहोत्थे, त्रि। इति मेदिनी॥ (यथा, रघुः। ८। ४३।
"विललाप स वाष्पगद्गदं
सजजामप्यपहाय धीरताम्।
अभितप्तमयोऽपि मार्दवं
भजते कैव कथा शरीरिषु॥")
जन्मलग्नात् तृतीयस्थानम्। यथा,—
"सुतमदननवान्त्ये पूर्णदृष्टिः सुरारि-
र्युगलदशमरागौ दृष्टिपादव्ययार्द्धः।
सहजरिपुचतुर्थेऽष्टमे चार्द्धदृष्टिः
स्थितिभवनमुपान्त्यं नैव दृश्यं हि राहोः॥"
इति ज्योतिस्तत्त्वम्॥

सहजमित्रं, क्ली, (सहजं मित्रम्।) स्वाभाविकसुहृत्। यथा,—
"अरिर्मित्रमुदासीनोऽनन्तरस्तत्परः परः।
क्रमशो मण्डलं चिन्त्यं सामादिभिरुपक्रमैः॥"
अरिः शत्रुः। मित्रं सुहृत्। उभयविलक्षण उदासीनः। ते च त्रयस्त्रिविधाः। सहजाः कृत्रिमाः प्राकृताश्चेति। सहजं मित्रं भागिनेयपैतृष्वस्रीयमातृष्वस्रीयादिः। इति मिताक्षरायामाचाराध्याये १ अध्यायः॥

सहजातः, त्रि, (सह जातः उत्पन्नः।) सहोदरः। यमजः इति केचित्॥ (सहोत्थे, त्रि। यथा, कथासरित्सागरे। ११३। २२।
"तारावलोकनामा च क्रमाद्वृद्धिं जगाम सः।
दानधर्म्मविवेकाद्यैः सहजातैर्गुणैः सह॥")

सहजारिः, पुं, (सहजः स्वाभाविकः अरिः।) स्वाभाविकशत्रुः। यथा।"सहजारिः सापत्न्यपितृव्यतत्पुत्रादिः।" इति मिताक्षरायामाचाराध्यायः॥

सहजोदासीनः, पुं, (सहज उदासीनः।) स्वाभाविकपरतरः। यथा। "सहजकृत्रिममित्रशत्रुलक्षणरहितौ सहजकृत्रिमौदासीनौ।" इति मिताक्षरायामाचाराध्यायः॥

सहण्डुकं, क्ली, मांसव्यञ्जनविशेषः। यथा,—
"छागादेर्म्मांससमूहादेः कुट्टितं खण्डितं पुनः।
शुद्धमांसविधानेन पचेदेतत् सहण्डुकम्।
सहण्डुकं गुणैरग्र्ये शुद्धमांसगुणं स्मृतम्॥"
इति भावप्रकाशः॥

सहदेवः, पुं, (पाण्डवविशेषः। इति मेदिनी॥ स च पाण्डुराजस्य पञ्चमपुत्रः। माद्रीगर्भे अश्विनीकुमाराभ्यां जातः॥ जरासन्धसुतः। स युधिष्ठिरसमकालीनो मगधेषु राजासीत्। इति श्रीभागवतम्॥ (हर्य्यश्वनसुतः। यथा, हरिवंशे। २८। ३।
"हर्य्यश्वनसुतो राजा सहदेवः प्रतापवान्।
सहदेवस्य धर्म्मात्मा नदीन इति विश्रुतः॥"
सोमदत्तपुत्रः। यथा, तत्रैव। ३२। ८०।
"सोमदत्तस्य दायादः सहदेवो महायशाः।
सहदेवसुतश्चापि सोमको नाम पार्थिवः॥
देवैः सह वर्त्तमाने, त्रि। यथा, भागवते। ४। २। ८।
"शृण्वतां ब्रह्मपर्य्यो मे सहदेवाः सहाग्नयः।
साधूनां ब्रुवतो वृत्तं नाज्ञाताश्चन मत्सरात्॥")

सहदेवा, स्त्री, (सह दीव्यतीति। दिव+अच्। टाप्।) बला। दन्तोत्पलः। शारिवौषधिः। इति मेदिनी॥ अर्द्धमाता। इति हेमचन्द्रः॥ (देवककन्यान्यतमा। सा तु वसुदेवपत्नी। यथा, भागवते। ९। २४। २३।
"शान्तिदेवोपदेवा च श्रीदेवा देवरक्षिता।
सहदेवा देवकी च वसुदेव उवाह ताः॥")

सहदेवी, स्त्री, सर्षपी। इति मेदिनी॥ पीतदन्तोत्पला। इति रत्नमाला॥ बलाप्रभेदः। तत्पर्य्यायः। महाबला २ ज्येष्ठबला ३ कटभरा ४ केशरुहा ५ केसरिका ६ मृगादनी७ वर्षपुष्पा ८ केशवर्द्धिनी ९ पुरासिनी १० देवबला ११ सारिणी १२ पीतपुष्पी १३ देवार्हा १४ गन्धवल्लरी १५ मृगा १६ मृगरसा १७। अस्या गुणाः। वृद्धोगवातार्शःश्लेष्महारित्वम्। शुक्रवृद्धिकारित्वम्। बल्यत्वम्। विषमज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ सहदेवपत्नी च॥

सहदेवीगणः, पुं, (सहदेवीनां गणः।) प्रतिष्ठायां देवस्नानार्थमोषधिसमूहः। यथा,—
"पद्मगर्भैः स्नापयेच्च सहदेव्यादिभिस्ततः।
सहदेवी बला चैव शतमूली शतावरी॥
कुमारी च गुडूची च सिंही व्याघ्री तथैव च।
य ओषधीति मन्त्रेण स्नानमोषधिमङ्गलैः॥"
इति गारुडे ४८ अध्यायः॥

सहधर्म्मिणी, स्त्री, (सह धर्म्मोऽस्त्यस्या इति। इनिः। ङीप्।) वेदविधानेनोढा। इत्यमरः। २। ६। ५॥

सहनं, क्ली, (सह+ल्युट्।)क्षान्तिः। तत्पर्य्यायः। तितिक्षा २ क्षमा ३। इति हेमचन्द्रः॥ (यथा, साहित्यदर्पणे। ६। ३८०।
"कार्य्यसंग्रह आदानं तदाक्षेपादनं पुनः।
कार्य्यार्थमपमानादेः सहनं खलु यत्नवेत्॥")

सहनः, त्रि, (सहते इति। सह+ल्युः।) सहनशीलः। इत्यमरः। ३। १। ३१॥ तत्पर्य्यायः। सहिष्णुः २ क्षमिता ३ क्षमी ४ तितिक्षुः ५ क्षन्ता ६। इति हेमचन्द्रः॥

सहनर्त्तनं, क्ली, (सह मिलित्वा नर्त्तनम्। एकत्र मण्डलाकारनृत्यकरणम्। इति केचित्॥
सहपांशुकिलः, पुं, (सह पांशुना रजसा किलति क्रीड़तीति। किल क्रीड़ने + कः।) वयस्यः। इति त्रिकाण्डशेषः॥
सहपानं, क्ली, (सह मिलित्वा पानम्।) एकत्र मद्यभक्षणम्। तत्पर्य्यायः। सपीतिः २। इति हेमचन्द्रः॥ तुल्यपानम् ३। इत्यमरः। २।८।१५५॥ सहपीतिः ४। इति शब्दरत्नावली॥
सहपूर्व्वाह्णं, क्ली, (पूर्व्वाह्णस्य सदृशम्। "अव्ययीभावे चाकाले। ६।३।८१। इत्यत्र अकाले इति कथनात् न सादेशः।) पूर्व्वाह्णसदृशम्। इति मुग्धबोधव्याकरणे अव्ययीभावसमासः॥
सहभावी, [न्] त्रि, (सह भवतीति। भू + णिनिः।) सहायः। इति त्रिकाण्डशेषः॥
सहभोजनं, क्ली, (सह मिलित्वा भोजनम्।) एकत्र भक्षणम्। तत्पर्य्यायः। सन्धिः २॥ इत्यमरः। २।८।१५५॥ (सहभोगकरणम्। यथा, महाभारते। १। १८६। २४।
एष नः समयो राजन् रत्नस्य सहभोजनम्।
न च तं हातुमिच्छामः समयं राजसत्तम॥")
सहमरणं, क्ली, (सह पत्या मरणम्।) मृतस्वामिसहितज्वलच्चितारोहण-पूर्व्वकमरणम्। यथा। "अथ सहानुगमनम्। अङ्गिराः।
'मृते भर्त्तरि या नारी समारोहेद्धुताशनम्।
सारुन्धतीसमाचारा स्वर्गलोके महीयते॥
तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे।
तावत्यब्दानि सा स्वर्गे भर्त्तारं यानुगच्छति॥
व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्।
तद्वद्भर्त्तारमादाय तेनैव सह मोदते॥
माढकं पैठकञ्चैव यच्च कन्या प्रदीयते।
पुनाति त्रिकुलं नारी भर्त्तारं यानुगच्छति॥
तत्र सा भर्त्तृपरमा परा परमलालसा।
क्रीड़ते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश॥"
भर्त्तृपरमा भर्त्ता परमो यस्याः सा तथा। परा परमलालसेत्यत्र स्तूयमानाक्षरोगपैरिति व्यासेन पठितम्।
'ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वापि यो नरः।
तं वै पुनाति सा नारी इत्याङ्गिरसभाषितम्॥
साध्वीनामेव नारीणामग्निप्रपतनादृते।
नान्यो धर्म्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित्॥
या नारीत्युपादानात् सहमरणाभावपक्षोऽपि सूचितः। नान्यो धर्म्म इति तु सहमरणस्तुत्यर्थम्। तथा च विष्णुः। मृते भर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा इति। ब्रह्मचर्य्यमैथुनवर्জ্জनं ताम्बूलादिवर्জ্জनञ्च। यथा प्रचेताः।
'ताम्बूलाभ्यञ्जनञ्चैव कांस्यपात्रे च भोजनम्।
यतिश्च ब्रह्मचारी च विधवा च विवर्জ্জयेत्॥'
अभ्यञ्जनमायुर्व्वेदोक्तं पारिभाषिकम्। यथा,
'मूर्द्धि दत्तं यदा तैलं भवेत् सर्व्वाङ्गसङ्गतम्।
स्नेनाभिस्तर्पयेद्यद्वा अभ्यङ्गः स उदाहृतः॥
तैलमल्पं यदाङ्गेषु न च स्याद्धातुतर्पणम्।
सा मार्ष्टिः पृथगभ्यङ्गो मस्तकादौ प्रकीर्त्तितः॥'
स्मृतिः।
'एकाहारः सदा कार्य्यो न द्वितीयः कदाचन।
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम्॥
गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तया पुनः।
तर्पणं प्रत्यहं कार्य्यं भर्त्तुस्तिलकुशोदकैः।
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्व्वकम्॥'
एतत् तु तर्पणं पुत्रपौत्राद्यभावविषयमिति मदनपारिजातः॥
'वैशाखे कार्त्तिके माघे विशेषनियमश्चरेत्।
स्नानं दानं तीर्थयात्रा विष्णोर्नामग्रहं मुहुः॥'
अत्र साध्वीत्वमाह।
'आर्त्ताऽऽर्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा।
मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता॥
छन्दोगपरिभाष्टीयमिति कल्पतरुः॥ साध्वीप्रसादेन लोकधारणमप्याह॥ ब्रह्मपुराणम्।
'तस्मात् साध्वीः स्त्रियः पूज्याः सततं देववज्जनैः।
तासां राज्ञा प्रसादेन धार्य्यते च जगत्त्रयम्॥'
महाभारते।
'अवमत्य च याः पूर्व्वं पतिं दुष्टेन चेतसा।
वर्त्तन्ते याश्च सततं भर्त्तॄणां प्रतिकूलतः॥
भर्त्तॄनुमरणं काले याः कुर्व्वन्ति तथाविधाः।
कामात् क्रोधात् भयाल्लोभात् सर्व्वाः पूता भवन्ति ताः॥'
अत्र ऐहिकब्रह्मघ्नपतेर्हानिनिषेधात् जन्मान्तरीयतत्पापवत्त्व एव सहमरणेनोद्धारः। ब्रह्मपुराणे।
'देशान्तरमृते पत्यौ साध्वी तत्पादुकाद्वयम्।
निधायोरसि संयुक्ता प्रविशेज्ज्वलतीवेदसम्॥
ऋग्वेदवादात् साध्वी स्त्री न भवेदात्मघातिनी।
ब्रह्महत्यौघे निवृत्ते तु आद्यं प्राप्नोति शास्त्रवत्॥'
ऋग्वेदवादात् इमा नारीरविधवा इत्यादिमन्त्रात्। एवञ्च अङ्गिरोब्रह्मपुराणवचनपर्य्यालोचनया ब्राह्मण्यादिसकलभार्य्याणां स्वगतभर्त्तृगतफलविशेषार्थिनीनां गर्भवतीबालापत्यादिव्यतिरिक्तानां सहमरणानुमरणयोरधिकार इति विवादकल्पतरुरत्नाकरौ। तत्र ब्राह्मण्यादनुमरणाधिकारोऽसङ्कुचितस्त्र्यास्त्वनिषेधात्। तथा च मिताक्षरायां देवबोधकृतयोग्नवल्क्यटीकायाञ्च गौतमः।
'पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति।
इतरासान्तु नारीणां स्त्रीधर्म्मोऽयं परः स्मृतः॥'
तस्मादब्राह्मण्याः सहमरणमेव इतरासान्तु उभयमिति। कल्पतरुरत्नाकरशुद्धितत्त्वादिषु पादुकाद्वयमिति दर्शनात् पादुकादिकमित्यपपाठः किन्तु पादुकाद्वयमित्युपलक्षणम्। उशनसा विप्रेतरासां द्रव्यविशेषमनुपादाय पृथक्चित्यारोहणमात्रोक्तेः। यथोशनाः।
'पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति।
अन्यासामेव नारीणां स्त्रीधर्म्मोऽयं परः स्मृतः॥'
मदनपारिजातोऽप्येवम्। शिष्टाचारोऽपि तथा। कृत्यतत्त्वार्णवे हृद्वारदीयम्।
'बालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा।
रजस्वला राजसुते! नारोहन्ति चितां शुभे॥'
राजसुते इति सगरमातुः सम्बोधनम्। बृहत्स्मृतिः।
'बालसम्बर्द्धनं त्यक्त्वा बालापत्या न गच्छति।
रजस्वला सूतिका च रक्षेद्गर्भञ्च गर्भिणी॥'
एवमन्यतमे बालस्य संवर्द्धनं स्यात् तदा तस्या अप्यधिकारः। व्यासः।
'दिनैकगम्यदेशस्था साध्वी चेत् कृतनिर्णया।
न दहेत् स्वामिनं तस्या यावदागमनं भवेत्॥'
भविष्यपुराणे।
'ऋतौ ऽऽङ्गिरसि उदक्यायां मृते भर्त्तरि वै द्विजाः।
तस्यानुमरणार्थाय स्थापयेदेकरात्रकम्॥'
तस्य भर्त्तुः। तथा,—
'एकां चितां समासाद्य भर्त्तारं यानुगच्छति।
तद्वर्षयः क्रियाकर्त्ता स तस्याश्च क्रियाश्चरेत्॥'
एतच्च पिण्डदानपर्य्यन्तम्।
'यश्चाग्निदाता प्रेतस्य पिण्डान्दद्यात् स एव हि।'
इति वायुपुराणैकवाक्यत्वात्॥
ब्रह्मपुराणे।
'आवयेद्भर्त्तृजायान्तु स्वभर्त्तृकुलपामिमाम्।
चितामारोपयन् प्राज्ञः प्रस्मृते धर्म्ममुत्तमम्॥
इमाः पतिव्रताः पुण्याः स्त्रियो या याः सुशोभनाः।
सह भर्त्तृशरीरेण संविशन्तु विभावसुम्॥
एवं श्रुत्वा ततो नारी श्रद्धाभक्तिसमन्विता।
पिष्टमेधेन यज्ञेन इष्ट्वा स्वर्गमवाप्नुयात्॥'
प्रस्मृते भर्त्तरीति शेषः। पिष्टमेधेन यज्ञेन चितारोहणरूपेण। पादुकाद्वयग्रहणपूर्व्वकानुमरणेऽपि सह भर्त्तृशरीरेण इत्यनुषङ्गः प्रयोज्यः। देशान्तरमृते पत्यावित्यादिना शरीरप्रतिनिधित्वेन तदीयद्रव्यविधानात् प्रतिनिधौ च यथाश्रुतमन्त्रपाठमाह कात्यायनः। ग्रन्थेऽविप्रतिपत्तिः इत्येतत् विततमेकादशोत्तत्वे॥*॥
न च अग्निजलप्रविष्टानां भृगुसंग्रामदेशान्तरमृतानां गर्भाणां जातदन्तानां मरणे त्रिरात्रेण शुद्धिः। इति काश्यपवचनात् सहमृतायाः अप्यग्निप्रवेशेन त्रिरात्राशौचं तत्रैव तस्याः पिण्डदानमिति वाच्यम्। प्रागुक्तब्रह्मपुराणे पृथक्चितिसमारोहणमात्रे ब्राह्माशौचविधानात् अन्यत्र भर्त्तृतुल्याशौचप्रतीतेः। सहमरणे काश्यपोक्तत्रिरात्राशौचाङ्गीकारेऽपि तस्याशौचस्य वृद्धा पत्यशौचकालावधिस्थायित्वम्॥
'अन्तर्दशाहे स्यातां चेत् पुनर्म्मरणजन्मनी।
तावत्स्यादशुचिर्विप्रो यावत्तत् स्यादनिर्दशम्॥'
इति मनूक्ताशौचसङ्करे पराशौचस्य पूर्व्वाशौचकालावधिस्थायित्वप्रतीतेः। ततश्च यथा अशौचकालसङ्कोचे तन्मध्य एव सङ्कलय्य पिण्ड-

दानं तथाशौचकालहृदावपि यावदशौचं यथाक्रमं दश पिण्डा देया इति। अतएव जिकनोयास्थेष्टिविध्यनुमरणविवेकयोर्व्यासः।
'संस्थितं पतिमालिङ्ग्य प्रविशेदग्नौ हुताशनम्।
तस्याः पिण्डादिकं देयं क्रमशः पतिपिण्डवत्॥'
विष्णुः।
'अन्विता पिण्डदानन्तु यथा भर्त्तुर्हविर्दिने।
तदन्वारोहिणी यस्मात्तस्मात् सा नात्मघातिनी'
अत्रानुः सहार्थः। पतिमालिङ्ग्येत्यनेनैकवाक्यत्वात्। स्वाग्न्यशौचाभ्यन्तरे पृथक्चितामृतायास्त्वहेण पिण्डदानं स्वाग्न्यशौचापगमे तु श्राद्धम्
'अन्वितायाः प्रदातव्या दर्शपिण्डास्त्वहेण तु।
स्वाग्न्यशौचव्यतीते तु तस्याः श्राद्धं विधीयते॥'
इति जिकनधृतपैठीनसिवचनात्॥
अग्निपुराणस्थे दमिति शूलपाणिः। अत्रानुः पश्चादर्थः। अतीते तु भर्त्रशौचे पादुकाद्वयमुपादाय ज्वलदग्निप्रवेशे त्र्याहाशौचव्यवस्थया पिण्डदानं चतुर्थदिने श्राद्धं पूर्व्वोक्तब्रह्मपुराणवचनात्। तत्र तु भर्तुः संग्रामहतत्वादिना सद्यःशौचं तत्र पृथक्चितामृताशौचस्य पूर्वोक्तब्रह्मपुराणवचनात् त्रिरात्रत्वेन बहुकालव्यापित्वेनाधहृदिमत्त्वात् तेनैव पूर्व्वाशौचस्य व्यपगमात् तत्र भर्त्तुरपि त्र्याहेण पिण्डदानम्। तत्राग्न्येकचितारोहणे भर्त्रशौचव्यपगमात् शुद्धिः। संस्थितं पतिमालिङ्ग्य इति अन्वितापिण्डदानमिति पूर्व्वोक्तवचनाभ्यां अग्निप्रवेशे सुमन्तुना सद्यःशौचविधानाच्च। यथा भृग्वग्निजलसंग्राम देशान्तरस्थसन्त्यासनग्नाग्निमहाध्वनिकानां उदकक्रिया कार्य्या सद्यःशौचं भवति इति। भृगुरुद्धदेशः। महाध्वनिकः पुण्यार्थं हिमालयावधिकमहापथगमनेन सम्पादितमरणः। न चैतत् सद्यःशौचं नित्यवेदाध्यापकरन्निहोत्रभिश्च एकाहाशौचिभिश्च कर्त्तव्यमिति हारलतादत्तविषयत्वेन नैतद्विषयकमिति वाच्यम् तन्मात्रविषयकत्वे प्रमाणाभावात्। सामान्यमुखप्रवृत्ततया वचनान्तरसंवादितया चेतद्विषयकमिति। अन्यथा कश्यपोक्तत्रिरात्राशौचमपि अग्निजलसंग्रामप्रविष्टानां प्रमादादेव मरण इति हारलतादर्शनात् अनुमरणविषयकं न स्यात् तस्मात् काश्यपवचनं ब्रह्मपुराणसमानविषयकं इति। सुमन्तुवचनं संग्रामहतभर्त्तृसहगमनविषयकमपीति॥*॥ एवञ्च समाधिना त्यक्तदेहस्य सुक्तस्य धृतराष्ट्रस्य पर्णीटजाग्निना देहदाहकाले तत्पत्न्या गान्धार्य्या अग्निप्रवेशदर्शनादिदानीं काश्यादिमृतस्य मुक्तस्यापि पत्युस्तत्पत्न्याः सहमरणं सङ्गच्छते। श्रीभागवते तदुक्तम्।
'दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे।
बहिःस्थिता पतिं साध्वी तमग्निमनुवेक्षति॥'
अनुवेक्षति अग्निप्रवेशनं करिष्यति इति युधिष्ठिराय नारदस्य भविष्यत्कथनम्।
'दयितं यान्यदेशस्थं मृतं श्रुत्वा पतिव्रता।
समारोहति शैवाग्नी तस्याः विधिं निबोधत॥'
इति व्यासवचनादिना सहमरणानुमरणयोर्निरवकाशनैमित्तिककाम्यत्वेन मलमासादावपि कर्त्तव्यता।
'नैमित्तिकानि काम्यानि निपतन्ति यथा यथा।
तथा तथैव कार्य्याणि न कालस्तु विधीयते॥'
इति दक्षवचनात्॥*॥
तदयं प्रयोगः। पुत्रादिना स्वगृह्योक्तविधिना अग्नौ दत्ते ज्वलितायां भर्त्तृचितायां सहगन्त्री साध्वी स्नाता परिहितधौतवासोयुगा कुशहस्ता प्राङ्मुखी वा दैवतीर्थेनाचान्ता तिलजलकुशत्रयमादाय ॐ तत् सदिति ब्राह्मणैरुच्चारिते नारायणं संस्मृत्य नमोऽद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रा श्रीमती अमुकीदेवी अरुन्धतीसमाचारत्वपूर्व्वकस्वर्गलोकमहीयमानत्वमानवाधिकारणकलोमसमसंख्याब्दावच्छिन्नस्वर्गवासभर्त्तृसहितमोदमानत्वमात्र-पित्र-श्वश्रूकुलत्रयपूतत्व-चतुर्दशेन्द्रावच्छिन्नकालाधिकरणकाक्षरोगवस्तूयमानत्व-पतिसहितक्रीड़मानत्वब्रह्मप्रपतिपूतत्वकामा भर्त्तृज्वलचितारोहणमहं करिष्ये इति। अनुमरणे तु भर्तृ ज्वलच्चितारोहणमित्यत्र ज्वलचितामित्यत्र भर्त्तृसहगमनमित्यत्र भर्त्तृमरणमित्यर्थे ज्वलच्चितामग्निं त्रिः प्रदक्षिणीकृत्य
'ॐ इमा नारीरविधवाः सपत्नी-
राञ्जनेन सर्पिषा संविशन्तु।
अनश्रवो अनमीवाः सुरत्ना
आरोहन्तु जनयोयोनिमग्रे॥'
इति ऋग्वेदोक्तमन्त्रे।१०।१८।७॥
'ॐ इमाः पतिव्रताः पुण्याः स्त्रियो या याः सुशोभनाः।
सह भर्त्तुः शरीरेण संविशन्तु विभावसुम्॥'
इति पौराणिके मन्त्रे च ब्राह्मणेन पठिते नमो नम इत्यन्तार्थ्य ज्वलच्चितां समारोहेत्॥*॥
आपस्तम्बः।
'चितिभ्रष्टा तु या नारी मोहाद्विचलिता भवेत्।
प्राजापत्येन शुध्येत्तु तस्माद्धि पापकर्म्मणः॥'
पाद्मात्यन्निर्णयाम्रते स्मृतिः।
'पक्वचित्यां समारूढौ दम्पती निधनं गतौ।
पृथक् श्राद्धं तयोः कुर्य्यादोदनन्तु पृथक् पृथक्॥
विद्याकरधृता स्मृतिः।
'एकाहेन मृतानान्तु बहूनामथवा द्वयोः।
तन्त्रेण श्रपणं कृत्वा पृथक् श्राद्धं प्रवर्त्तयेत्॥'
यत्तु।
'यदा नारी विशेदग्निं स्वेच्छया पतिना सह।
अशौचमुदकं तस्याः सह भर्त्रेति निश्चितम्।
तिथ्यन्तरमृतायान्तु पृथक् श्राद्धं न विद्यते॥'
इति चतुर्भुजभट्टाचार्य्यधृतयमवचनाद्भिन्नतिथिमृतायां अपि पत्युर्मृततिथौ श्राद्धमिति हरिदासतर्काचार्य्याः। तत्र अस्य वचनस्यामूलत्वात् समूलत्वेऽपि श्राद्धपदं पिण्डपरम्। एकोद्दिष्टमृताहनीति यमवचनविरोधात्।" इति शुद्धितत्त्वम्॥*॥ अन्यत् ब्रह्मवैवर्त्ते गणपतिखण्डे २८ अध्याये। मार्कण्डेयपुराणे दमचरिताध्याये विष्णुपुराणे ५ अंशे ३८ अध्याये। कल्किपुराणे ३३ अध्याये च द्रष्टव्यम्॥
सहायायी, [न्] त्रि, (सह यातीति। या+णिनिः।) मिलितगामी। यथा,—
"न नदीषु नदीं ब्रूयात् पर्व्वतेषु च पर्व्वतान्।[1]
आवासे भोजने वापि न त्यजेत् सहयायिनम्॥"
इति कूर्म्मपुराणे उपविभागे। १५। ५८॥
सहरसा, स्त्री, (सह रसो यस्याः।) मुद्गपर्णी।
इति शब्दरत्नावली॥
सहरि, व्य, हरेः सदृशम्। इति मुग्धबोधव्याकरणम्॥ सूर्य्ये हर्षे च, पुं। इति केचित्॥
सहर्षः, पुं, (सह हर्षो यत्र।) स्वर्द्दनम्। हर्षः।
इति त्रिकाण्डशेषः॥ (हर्षेण सह वर्त्तमानः।)
हर्षयुक्ते, त्रि॥ (यथा, कथासरित्सागरे।
२।२३।
"एतच्छ्रुत्वा वचः शम्भोः सहर्षोऽहमिहागतः॥")
सहसा, व्य, हठात्। तत्पर्य्यायः। अतर्कितः२। इत्यमरः। ३। ४। ७॥ अकस्मात् ३। इति शब्दरत्नावली॥ सहसा कर्म्मकरणनिषेधो यथा, किरातार्জ্জुनीये। २। ३०।
"सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः॥"
हास्ययुक्ते, त्रि। यथा,—
"प्रियतमेन यथा सरुषा स्थितं
न सहसा सहसा परिरभ्य तम्।
नयितुं चरमचरमतां गता
न सहसा सहसा कृतवेपथुः॥"
इति माघे। ६। ५७॥
सहसाहृष्टः, त्रि, हठात् हृष्टः। दत्तकपुत्रे, पु।
इति केचित्॥
सहसानः, पुं, (सहते इति। सह+"ऋज्रेन्द्राग्रवज्रेत्यादिभ्यः कित्।" उणा० २। ८३। इति असानच्।) मयूरः। यत्नः। क्षमायुक्ते, त्रि।
इत्युणादिकोषः॥ (ग्रभूणामभिभवितरि, त्रि।
इति सायणः॥ यथा, ऋग्वेदे। १। १८८। ८।
"मानस्य सूनुः सहसाने अग्नौ॥")
सहस्यः, पुं, (सहसि बले साधुः। तत्र साधुरिति यत्।) पौषमासः॥ इत्यमरः। १। ४। १५॥
(यथा, कुमारे। ५। २६।
"निनाय सात्यन्तहिमोत्किरानिलाः
सहस्यरात्रीरुदवासतत्पराः॥")

सहसं क्ली,(सहो बलमस्त्यस्मिन्निति। सहस्+ र:। "सहो बलनामसु व्याख्यातम्। रो मत्वर्थीयः। अल्पापि भाविनी शक्तिरस्मिन्नस्ति।" इति निघण्टुटीकायां देवराजयज्वा। ३।१।) दशशतसंख्या। इति हेमचन्द्रः॥ हाजार इति पारस्यभाषा। (यथा, मनुः। ३। १७७। "यावरोगी सहस्रस्य दातुर्नाश्नीयते फलम्॥") तदाचकानि यथा। जाह्नवीवक्त्रम् १ शेषशीर्षम् २ पद्मच्छदः ३ रविकरः ४ अर्জ্জुनबाणः ५ वेदशाखा ६ इन्द्रदृष्टिः ७। इति कविकल्पलता॥ (बहु। इति निघण्टुः।३।१॥ यथा,—

"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।" इति पुरुषसूक्तम्॥)

सहस्रकाण्डा, स्त्री, (सहस्रं काण्डानि यस्याः।) श्वेतदूर्व्वा। इति राजनिर्घण्टः॥

सहस्रकिरणः, पुं, (सहस्रं किरणानि यस्य।) सूर्य्यः। इति हलायुधः॥ (यथा, बृहत्संहितायाम्। ४२। १३।

"रागो रागो यस्मिन् शिशिरमयूखः सहस्रकिरणो वा॥")

सहस्रदंष्ट्रः, पुं, (सहस्रं दंष्ट्रा यस्य।) पाठीनमत्स्यः। इत्यमरः। १। १०। १८॥ (यथा, सुश्रुते। १। ४६। "रोहितपाठीनपाटलाराजीववर्म्मिगोमत्स्य-क्षत्रमत्स्य-वागुस्कारसुरलसहस्रदंष्ट्रप्रभृतयो नादेयाः॥")

सहस्रदंष्ट्री, [न्] पुं, (सहस्रदंष्ट्राः सन्त्यस्येति। इनिः।) वोदालमत्स्यः। इति शब्दरत्नावली॥

सहस्रदोः, [स्] पुं,(सहस्रं दोषो बाहवो यस्य।) कार्त्तवीर्य्यार्জ্জुनः। इति जटाधरः॥

सहस्रधारः, पुं, (सहस्रं धारा यस्य।) विष्णुचक्रम्। इति केचित्॥

सहस्रधारा, स्त्री, (सहस्रं बहवो धारा जलप्रपाता यत्र।) देवतास्नानार्थसहस्रच्छिद्रयुक्तपात्रगलितजलधारा। यथा,—

"सहस्रधारया देवीं स्नापयामि सुरेश्वरीम्॥" इति दुर्गोत्सवपद्धतिः॥

सहस्रनयनः, पुं,(सहस्रं नयनानि यस्य।)इन्द्रः। इति हलायुधः॥ (यथा, कथासरित्सागरे। १०१।२२७।

"कथं सहस्रनयनप्रेक्षणीया किमस्मराः। अनङ्गीरयथा पुष्पलग्नाग्रकरपल्लवा॥"

वाग्यलिङ्गेऽपि दृश्यते। यथा, महाभारते। १३। १४। २०४।

"किञ्चात्र बहुभिः सूक्तैर्हेतुवादैः पुरन्दर। सहस्रनयनं दृष्ट्वा त्वामेव सुरसत्तम॥")

सहस्रनेत्रः, पुं, (सहस्रं नेत्राणि यस्य।) इन्द्रः। इति हेमचन्द्रः॥ (यथा, रघुः। ६। २३।

"क्रियाप्रबन्धादयमध्वराणा-मजस्रमाहूतसहस्रनेत्रः। शश्वत्तिरं पाण्डुकपोललम्बान् मन्दारशून्यानलकांश्चकार॥"

वाग्यलिङ्गेऽपि दृश्यते। यथा, महाभारते। १। २१२। २७।

"एवं चतुर्म्मुखः स्थाणुर्महादेवोऽभवत्पुरा। तथा सहस्रनेत्रश्च बभूव बलसूदनः॥")

विष्णुः। इति श्रीभागवतम्॥

सहस्रपत्रं, क्ली, (सहस्राणि पत्राणि यस्य।) पद्मम्। इत्यमरः। १। १०। ४३॥ (यथा, रघुः। ७। ११।

"तासां मुखैरासवगन्धगर्भै-र्व्याप्तान्तराः सान्द्रकुतूहलानाम्। विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन्॥")

सहस्रपात्, [द्] पुं,(सहस्रं पादा यस्य। संख्यासुपूर्व्वस्येति पादस्यान्तलोपः।) विष्णुः। यथा, "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥" इति पुरुषसूक्तम्॥

(तथा च महाभारते। १३। १४८। ३७।

"सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात्॥" महादेवः। यथा, तत्रैव। १३। १७। १३०।

"हर्य्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात्॥" ऋषिविशेषः। यथा, तत्रैव। १। १०। ७।

"अहं पुरा हरे! नाम्ना ऋषिरासं सहस्रपात्। सोऽहं शापेन विप्रस्य भुजङ्गत्वमुपागतः॥")

सहस्रपादः, पुं, (सहस्रं पादा यस्य।)कारण्डपक्षी। सूर्य्यः। विष्णुः। इति मेदिनी॥

सहस्रबाहुः, पुं, (सहस्रं बाहवो यस्य।) बाणराजः। यथा,—

"बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः। सहस्रबाहुर्वाद्येन ताण्डवे तोषयन्मृड़म्॥"

इति श्रीभागवते। १०। ६२। २॥ (कार्त्तवीर्य्यार्জ্জुनः। शिवः। यथा, महाभारते। १३। १७। १३१।

"सहस्रबाहुः सर्व्वाङ्गः शरण्यः सर्वलोकजित्॥")

बहुबाहुविशिष्टे, त्रि। यथा, भागवते।४।५।३।

"ततोऽतिकायस्तनुवा स्पृशन् दिवं सहस्रबाहुर्घनरुक् त्रिसूर्य्यदृक्॥")

सहस्रभुजः, पुं, (सहस्रं भुजा यस्य।) विष्णुः। यथा,—

"पश्यन्त्यदोरूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम्। सहस्रमूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत्॥"

इति श्रीभागवते। १। ३। ४॥ कार्त्तवीर्य्यार्জ্জुनः॥ (बाणराजश्च॥)

सहस्रभुजा, स्त्री, (सहस्रं भुजा यस्याः।)महालक्ष्मीः। सा च महिषासुरमर्द्दिनी। यथा,—

"श्वेताननां नीलभुजां सुश्वेतस्तनमण्डलाम्। रक्तमध्यां रक्तदेहां नीलजङ्घोरुपालुकाम्॥ चित्रानुलेपनां कान्तां सर्व्वसौभाग्यदायिनीम्। अष्टादशभुजां पूज्यां सहस्रभुजां रणे॥ आयुधान्यत्र रक्तानि दक्षिणाधःकरक्रमात्। अक्षमालां च मुषलं बाणासिकुलिशं गदाम्॥ चक्रं त्रिशूलं परशुं शङ्खघण्टे च पाशकम्। शक्तिं दण्डं चर्म्म चापं पानपात्रं कमण्डलुम्॥ अलङ्कृतभुजा ह्येभिरायुधैः परमेश्वरी। कर्त्तव्या स्तुतिकालादौ महिषासुरमर्द्दिनी॥ इत्येषा राजसी मूर्त्तिः सर्व्वदेवमयी मता। यां ध्यात्वा मानवो नित्यं लभते हितमात्मनः॥" इति मार्कण्डेयपुराणीयदेवीमाहात्म्यपाठक्रमः॥

सहस्रमूर्द्धा, [न्] पुं, (सहस्रं मूर्द्धानो यस्य।) विष्णुः। अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यम्॥ (तथाच महाभारते। १३। १४८। ३७।

"सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात्॥" शिवः। यथा, महाभारते। १३। १७। १३०।

"सहस्रमूर्द्धा देवेन्द्रः सर्व्वदेवमयो गुरुः॥")

सहस्रमूली, स्त्री,(सहस्रं मूलानि यस्याः। ङीष्।) द्रवन्ती। इति राजनिर्घण्टः॥

सहस्रमौलिः, पुं,(सहस्रं मौलयो यस्य।) विष्णुः। अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यम्॥(अनन्तदेवः। यथा, देवीभागवते। १। २। ७।

"विष्णुस्तु शेषशयने सुप्तिमेति काले तन्नाभिपद्ममुकुले खलु तस्य जन्म। आधारतां किल गतोऽत्र सहस्रमौलिः सम्बोध्यतां स भगवान् हि कथं मुरारिः॥")

सहस्ररश्मिः, पुं, (सहस्रं रश्मयो यस्य।) सूर्य्यः। इति सहस्रकिरणशब्ददर्शनात्॥(यथा, माघे। १। ५३।

"अशक्नुवन् सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम्॥")

सहस्रवदनः, पुं,(सहस्रं वदनानि यस्य।)विष्णुः। इति शब्दरत्नावली॥

सहस्रवीर्य्या, स्त्री, (सहस्रं वीर्य्याण्यस्याः।) दूर्व्वा। इत्यमरः। २। ४। १५८॥ महाशतावरी। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। १८।

"शतवीर्य्यां सहस्रवीर्य्यां सिद्धार्थांश्च शिरसा धारयेत्॥"*॥ प्रभूतवीर्य्यशालिनि, त्रि। यथा, वाजसनेयसंहितायाम्। १३। २६।

"सहस्रवीर्य्यासि सा मा जिन्व॥")

सहस्रवेधं, क्ली, (सहस्रं वेधा यस्य।) चुक्रम्। काञ्जिकविशेषः। इति राजनिर्घण्टः॥

सहस्रवेधि, [न्] क्ली, (सहस्रं विधतीति। विध छिद्रिकरणे+णिनिः।) हिङ्गु। इति मेदिनीराजनिर्घण्टौ॥

सहस्रवेधी, [न्] पुं, (सहस्रं वेधितुं शीलमस्य। विध छिद्रकरणे+णिनिः) अम्बुवेतसः। इति मेदिनी॥ कस्तूरी। इति राजनिर्घण्टः॥ सहस्रवेधकर्त्तरि, त्रि॥

सहस्रशिखरः, पुं, (सहस्रं शिखराणि यस्य।) विन्ध्यपर्व्वतः। इति केचित्॥(यथा, मार्कण्डेये। ५५। १०।

"सहस्रशिखरश्चाद्रिः पारिपात्रः समृङ्गवान्॥")

सहस्रश्रवणः, पुं, (सहस्रं श्रवणानि यस्य।) विष्णुः। अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यम्॥

सहस्रदर्य्याग्रः, पुं, इन्द्ररथः। इति केचित् ॥
सहसा, स्त्री, (सहसं वीर्य्याणि सन्त्यस्यामिति। अच्। टाप्।) अम्बष्ठा। इति भावप्रकाशः ॥
सहस्रांशुः, पुं, (सहसं अंशवो यस्य।) सूर्य्यः। इत्यमरः। १। ३। २१ ॥ (यथा, मनुः। १।८।
"तदण्डमभवद्हैमं सहस्रांशुसमप्रभम्।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्व्वलोकपितामहः॥")
सहस्राक्षः, पुं, (सहसमक्षीण्यस्येति। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्।" ५।४।११३। इति षच्।) इन्द्रः। इत्यमरः। १।१। ४३ ॥ (यथा, महाभारते। १। २५। ८।
"नमुचिघ्न नमस्तेऽस्तु सहस्राक्ष शचीपते! ॥")
विष्णुः। यथा,—
"सहस्रमूर्षा पुरुषः सहस्राक्षः सहस्रपात्।"
इति पुरुषसूक्तम् ॥
(पीठस्थानविशेषः। यथा, देवीभागवते। ७। ३०। ६५।
"उत्पलाक्षौ सहस्राक्षे हिरण्याक्षे महोत्पला ॥")
सहस्राननः, पुं, (सहसं आननानि यस्य।) विष्णुः। अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यम् ॥
सहस्रानीकः, पुं, शतानीकराजपुत्रः। यथा,—
"शतानीकोऽभवत् पूर्व्वं पुराकल्पे महीपतिः।
इन्द्राय सुवचन् यज्ञान् श्रद्धापूतेन चेतसा ॥
यज्ञे यज्ञे सहस्राणि गजाश्वरथदन्तिनाम्।
ब्राह्मणेभ्योऽददद्राजन् श्यामानाञ्च शतं शतम् ॥
द्विजस्तुष्टो ददौ पुत्रं कौषिको भुभृते तथा।
पत्नास्तस्य स जातोऽपि कालात् कालं व्यवर्द्धत॥
वेदवेदाङ्गतत्त्वज्ञो धर्म्मज्ञो नियतव्रतः।
कान्त्या चन्द्रमसस्तुल्यः प्रतापात् सूर्य्यवत् प्रभुः॥
समत्वे धर्म्मराजेव क्षमया पृथिवीसमः।
एतद्गुणवतो ज्ञात्वा सुतं राज्ञो द्विजातयः।
सहस्रानीकनामानं चक्रुस्तस्य सुहर्षिताः ॥"
इति वह्निपुराणे पापनाशनतुलदानाध्यायः ॥
(तथा च भागवते। ९। २२। ३८—३९।
"तस्य पुत्रः शतानीको याज्ञवल्क्यात् त्रयीं पठन्।
अस्त्रज्ञानं क्रियाज्ञानं शौनकात् परमेष्यति ॥
सहस्रानीकस्तत्पुत्रस्ततश्चाश्वमेधजः ॥")
सहस्रारः, पुं क्ली, (सहसं आराणि कोणा यस्य।) शिरोऽवस्थिताधोमुखसहस्रदलकमलम्। यथा,
"सहस्रारे हिमनिभे सर्व्ववर्णविभूषिते।
अ-क-थादिक्षिरेखाढ्य-ह-ल-क्ष-त्रयभूषिते ॥
तन्मध्ये परविन्दुञ्च सृष्टिस्थितिलयात्मकम्।
एवं समाहितमना ध्यायेद्यासोऽयमान्तरः ॥"
इति तन्त्रसारोक्तान्तर्म्मातृकान्यासः ॥
(सहस्रं अराणि यस्येति। बहुव्रीह्यङ्गविशिष्टे, त्रि। यथा, देवीभागवते। ६। ५। १८।
"चक्रं सुमोच वेगेन सहस्रारं सुदर्शनम् ॥")
सहस्री, [न्] पुं, (सहसं बलमस्यस्येति। सहस्र+"तपःसहस्राभ्यां विनीनी।" ५। २। १०२। इति इनिः।) सहस्रेण यो बली। तत्-

पर्य्यायः। साहस्रः २। इत्यमरः। २। ८। ६२ ॥ दे हाजरा इति ख्याते। यो सहस्रेण सहस्रसंख्येन गजादिना बलिनः सैन्यवन्तः ते। सहस्रं बलानि सन्त्येषामिति अस्त्यर्थे विकारसंज्ञेत्यादिना खे नैकाजादिति इनि च रूपद्वयम्। इति भरतः ॥ (सहस्रविशिष्टे, त्रि। यथा, मनुः। ८। ३७६।
"ब्राह्मणीं यदगुप्ताञ्च गच्छेतां वैश्यपार्थिवौ।
वैश्यं पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम् ॥"
तथाच भागवते। १। ९। ३०।
"तदोपसंहृत्य गिरः सहस्रिणी-
विमुक्तसङ्गं मन आदिपूरुषे ॥"
"सहस्रिणीः सहस्रार्थवतीः।" इति तट्टीका ॥)
सहा, स्त्री, (सहत इति। सह+अच्। टाप्।) धृतकुमारी। मुद्गपर्णी। इत्यमरः। २।४।७३; २। ४। ११३ ॥ नखभेषजम्। दण्डोत्पला। पृथिवी। इति मेदिनी ॥ शुक्लझिण्टी। सर्पकङ्काली। इति शब्दचन्द्रिका ॥ रास्ना। स्वर्णचीरी। पौतदण्डोत्पला। इति रत्नमाला ॥ तरणीपुष्पम्। इति राजनिर्घण्टः ॥
सहाः, [स्] पुं, (सहते इति। सह+असुन्।) अयनायणमासः। इत्यमरः ॥ (यथा, भागवते। १२। ११। ४१ ॥
"अथांशुः कश्यपस्तार्क्ष ऋतसेनस्तथोर्व्वशी।
विद्युच्छत्रुर्महाशङ्खः सहोमासं नयन्त्यमी ॥")
हेमन्तकालः। इति मेदिनी ॥
सहाचरः, पुं, (सह आचरतीति। आ+चर+अच्।) पीतझिण्टी। इति शब्दरत्नावली ॥ (अस्य पर्य्यायो यथा,—
"सैरेयकः क्षेतपुष्पः सेरेयः कटसारिका।
सहाचरः सहचरः स च भिन्न्यपि कथ्यते ॥"
इति भावप्रकाश पूर्व्वखण्डे प्रथमे भागे ॥
यथा, सुश्रुते चिकित्सितस्थाने। ३७।
"सहाचरवरीविश्वाकाकमाचीविदारिभिः ॥"
यथाच।
"वासानिम्बपटोलवेतकीवलाकुशाण्डकेन्दीवरी-
वर्षाभूकुटजाम्बगन्धसहिते द्वे पूतिगन्धान्विते ॥
मांसं नागबलासहाचरपुरैर्हिङ्गार्द्रके नित्यशो
ग्राह्यास्तत्त्वचमेव न द्विगुणिता ये चेक्षुजाता घनाः ॥"
इति वैद्यकपरिभाषायाम् ॥)
सहचरश्च ॥
सहायः, पुं, (सह अयते इति। अय+अच्।) अनुकूलः। तत्पर्य्यायः। अनुप्लवः २ अनुचरः ३ अभिसरः ४। इत्यमरः। २।८। ७१ ॥ (यथा, मनुः। ६। ४८।
"अध्यात्मरतिरासीनो निरपेक्षो निरामिषः।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥")
राज्ञां सहाया यथा, माघे। २१५। ७४।
"सहत्ताय तथा पुष्टाः सततं प्रतिमानिताः।
राज्ञा सहायाः कर्त्तव्याः पृथिवीं जेतुमिच्छता ॥"

सहायता, स्त्री, (सहाय+"ग्रामजनबन्धुसहायेभ्यस्तल्।" ५। २। ४३। इति तल्।) सहायानां समूहः। इत्यमरः। ३। ३। ४१ ॥ (सहायस्य भावः कर्म्म वा। तल्।) साहाय्यञ्च ॥ (यथा, रघुः। ९। १९।
"स किल संयुगमूर्द्धि सहायतां
मघवतः प्रतिपद्य महारथः।
स्वभुजवीर्य्यमगापयदुच्छ्रितं
सुरवधूरवधूतभयाः शरैः ॥")
सहायत्वं, क्ली, सहायता। सहायस्य भावः। सहायशब्दाद्भावे त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे। ३०। ८७।
"अङ्गीचक्रे सहायत्वं राजा तस्यारिमर्द्दने ॥")
सहारः, पुं, (सहते इति। सह+"तुसाराद्यश्च।" उणा० ३।१३९। इत्यारन्।) आम्रवृक्षः। इत्युणादिकोषः ॥ महाप्रलयः। इति हलायुधः ॥
सहारोग्यः, त्रि, (आरोग्येण सह वर्त्तमानः।) नीरुक्। इति हेमचन्द्रः ॥
सहार्द्यः, त्रि, (हार्द्देन सह वर्त्तमानः ॥ सप्रेमः। स्नेहयुक्तः ॥
सहितः, त्रि, (सं+धा+क्तः। "समो वा हितततयोः।" ६।१।१४४। इत्यस्य वार्त्तिकोक्त्या मलोपः।) सहशब्दात् इतच्प्रत्ययेन च निष्पन्नः। इति सिद्धान्तकौमुदी ॥ समभिव्याहृतः। संयुक्तः। (मिलितः। यथा, मनुः। ८। २१२।
"सोदर्य्या विभजेरंस्तं समेत्य सहिताः समम्।
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥")
संहितः। सम्यग्हितः। इति मुग्धबोधव्याकरणम् ॥ हितेन सह वर्त्तमानश्च ॥
सहिता, [ऋ] त्रि, (सहते इति। सह+इट्। "तौसश्चेहितौ।" ७।२।४८। इति पक्षे इट्।) सहनशीलः। सोढा। इति सिद्धान्तकौमुदी ॥
सहित्रं, क्ली, (सह्यते अनेनेति। सह+"अर्त्तिलूधूसूखनसहचर इत्रः।" ३। २। १८४। इति इत्रः।) सहनकरणम्। इति व्याकरणम् ॥
सहिष्णुः, त्रि, (सहते इति। सह+अलंजसुनिराकाशिति।" ३। २। १३६। इति इष्णुच्।) सहनशीलः। तत्पर्य्यायः। सहनः २ क्षन्ता ३ तितिक्षुः ४ क्षमिता ५ क्षमी ६। इत्यमरः। ३। १। ३१ ॥ (यथा, किराते। २। ५०।
"अपरागसमीरणेरितः
क्रमशोषाकुलमूलसन्ततिः।
सुकरस्तरुवत्सहिष्णुना
रिपुरुन्मूलयितुं महानपि ॥")
सहिष्णुता, स्त्री, (सहिष्णोर्भावः। सहिष्णु+तल्।) सहिष्णोर्भावः। तत्पर्य्यायः। तितिक्षा २ क्षमा ३ शान्तिः ४। इति जटाधरः ॥ (यथा, सुश्रुते। ४। २४।
"श्रमक्लमपिपासोष्णशीतादीनां सहिष्णुता॥")
सहुरिः, पुं, (सहते इति। सह+"ऋसिसहीहरिन्।" उणा० २। ७३। इति उरिन्।) सूर्य्यः। इत्युणादिकोषः ॥

सहुरिः, स्त्री, (सह सहने + उरिन् ।) पृथिवी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

सहृदयः, त्रि, (हृदयेन अन्तःकरणेन सह वर्त्तमानः ।) प्रशस्तमनाः । इत्यमरटीकायां भरतः ३ । १ । ३ ॥ (यथा, रामायणे । २। ११ । २२ ।
"कुरु साधुप्रदानं मे बाले सहृदया ह्यसि ॥")

सहृल्लेखं, क्ली, (हृल्लेखेन सह वर्त्तमानम् ।) विचिकित्सितार्थम् । यथा,—
"विचिकित्सा तु हृदये यत्र यस्मिन् प्रजायते ।
सहृल्लेखन्तु विज्ञेयं पुरोपन्तु स्वभावतः ॥"
इति प्रायश्चित्तविवेकः ॥

सहोक्तिः, स्त्री, (सह उक्तिः ।) अलङ्कारविशेषः । यथा,—
"सहोक्तिः सहभावत्वेत् भासते जनरञ्जनः ।
दिगन्तमगमत्तस्य कीर्त्तिः प्रत्यर्थिभिः सह ॥"
इति चन्द्रालोकः ॥
(अस्य सत्त्वोदाहरणानि यथा, साहित्यदर्पणे । १० । ७०१ ।
"सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः ।
सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत् ॥"
अतिशयोक्तिरप्यत्राभेदाध्यवसायमूला कार्य्यकारणपौर्वापर्य्यविपर्य्ययरूपा च । अभेदाध्यवसायमूलापि श्लेषभित्तिका अन्यथा च । क्रमेणोदाहरणम् ।
"सहाधरदलेनाक्ष्णा यौवने रागभाक् प्रियः ॥"
अत्र रागपदे श्लेषः ।
"सह कुमुदकदम्बैः काममुल्लासयन्तः
सह घनतिमिरोघैर्धैर्य्यमुल्लासयन्तः ।
सह सरसिजषण्डैः स्वान्तमामीलयन्तः
प्रतिदिशमसृतांशोरंशवः सञ्चरन्ति ॥"
इदं मम । अत्रोल्लासादीनां सम्बन्धिभेदादेव भेदो न तु श्लिष्टतया ।
"सममेव नराधिपेन सा
गुरुसम्मोहविलुप्तचेतना ।
अगमत्तह तैलबिन्दुना
तनुदीपार्चिरिव स्थितेस्तलम् ॥"
इयञ्च मालयापि सम्भवति । तयोदाहृते सह कुमुदकदम्बैरित्यादौ ।
"लक्ष्मणेन समं रामः काननं गहनं ययौ ।"
इत्यादौ चातिशयोक्तिमूलत्वाभावान्नायमलङ्कारः ॥ * ॥)

सहोटजः, पुं, (उटजेन सह वर्त्तमानः ।) मुनीनां पर्णशाला । यथा,—
"मुनीनाञ्च चिताकुड्यां पर्णोटजसहोटजौ ।"
इति हारावली ॥

सहोढ़ः, पुं, (ऊढ्या सह वर्त्तमानः ।) द्वादशविधपुत्रान्तर्गतपुत्रविशेषः । इति जटाधरः ॥
"या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती ।
वोढुः स गर्भो भवति सहोढ़ इति चोच्यते ॥"
इति मानवे ८ अध्यायः ॥
या गर्भवती परिणीयते ज्ञातगर्भा ज्ञातगर्भा वा परिणीयते स गर्भस्तस्यां जातः परिणेतुः पुत्रो भवति सहोढ़ इति व्यपदिश्यते । इति कुल्लूकभट्टः ॥ (सोढ़ेन सहतद्व्यञ्च सह वर्त्तमाने, त्रि। यथा, मनुः । ८ । २७० ।
"न सोढ़ेन विना चौरं घातयेद्राजकिल्बिषी नृपः ।
सहोढ़ं सोपकरणं घातयेदविचारयन् ॥")

सहोदरः, पुं, (उदरेण सह वर्त्तते इति । सह समानं उदरं यस्येति वा ।) एकमाढगर्भजातभ्राता । तत्पर्य्यायः । सहजः २ सोदरः ३ भ्राता ४ सगर्भः ५ समानोदर्य्यः ६ सोदर्य्यः ७ । इति जटाधरः ॥ (यथा, मनुः । ९ । १९२ ।
"जनन्यां संस्थितायान्तु समं सर्व्वे सहोदराः ।
भजेरन् मातृकं रिक्थं भगिन्यश्च समाभयः ॥"

सहोवर्च्चं, क्ली, (सहसा तेजसा सह वर्त्तमानेति ।) दीप्तिलवणम् । इति केचित् ॥

सहोरः, त्रि, (सहते सर्व्वमिति । सह + "किशोरादयश्च ।" उणा० १ । ६६ । इति ओरन् ।) साधुः । इत्युणादिकोषः ॥

सह्यं, क्ली, (सह्यते इति । सह + यत् ।) आरोग्यम् । साम्यम् । सुमधुरम् । इति शब्दरत्नावली ॥ (प्रियम् । यथा, महाभारते । ३। २७७ । १० ।
"ततस्तं प्रत्युवाचाथ मारीचो राक्षसेश्वरम् ।
किन्ते सह्यं मया कार्य्यं करिष्याम्यवशोऽपि तत् ॥")

सह्यः, पुं, पर्व्वतविशेषः । इति मेदिनी ॥ (यथा, रघुः । ४ । ५२ ।
"असह्यविक्रमः सह्यं दूरात् सुह्यसुदन्वता ।
नितम्बमिव मेदिन्याः सस्नांशुकमलक्ष्यत ॥")
स तु पुनाख्यदेशस्य उत्तरपश्चिमदिशि वर्त्तते ॥

सह्यः, त्रि, (सोढुं शक्यः । सह + "शकिसहोश्च ।" ३ । १ । ९९ । यत् ।) सोढ़व्यः । सहनीयः इति मेदिनी ॥ (यथा, मार्कण्डेये । १०६ । ५६ ।
"सह्यं भवतु ते तेजो भूतानां भूतभावन ! ॥")

सा, स्त्री, गौरी । सह्यौः । इति शब्दरत्नावली ॥ पूर्व्वोत्तरपरामर्शविषयीभूता । प्रसिद्धा । इति स्त्रीलिङ्गतच्छब्दस्य प्रथमैकवचननिष्पन्ना । इति व्याकरणम् ॥ (यथा, साहित्यदर्पणे ।
"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः ।
सङ्गे सैव तदेका त्रिभुवनमपि तन्मयं विरहे ॥")

साङ्ख्यं, क्ली, (संख्या सम्यग्ज्ञानं सा अस्त्यत्रेति संख्या + अच् ।) सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वमनयेति संख्या सम्यक् ज्ञानं तस्यां प्रकाश्यमानमात्मतत्त्वं सांख्यम् । इति श्रीभगवद्गीताटीकायां श्रीधरस्वामी ॥ षड्दर्शनान्तर्गतदर्शनग्रन्थविशेषः । तत्पर्य्यायः । कापिलम् २ । इति हेमचन्द्रः ॥ यथा,—
"पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् ।
प्रोवाचासुरये साङ्ख्यं तत्त्वग्रामविनिर्णयम् ॥"
इति श्रीभागवते । १ । ३ । १० ॥
अपि च मात्स्ये । ३ । २८ ।
"सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते ॥"
अथ सांख्येराख्यायते परिणामवादे परिपन्थिनि जागरूके कथंकारं विवर्त्तवाद आदरणीयो भवेदेष हि तेषामाशयः । संक्षेपेण हि सांख्यशास्त्रे चतस्रो विधाः संभाव्यन्ते । कश्चिदिकृतिरेव कश्चिदिकृतिः प्रकृतिश्च । कश्चिदनुभय इति । तत्र केवला प्रकृतिः । प्रधानपदेन वेदनीया मूलप्रकृतिः । नासावन्यस्य कस्यचिदिकृतिः । प्रकरोतीति प्रकृतिरिति व्युत्पत्त्या सत्त्वरजस्तमोगुणानां साम्यावस्थाया अभिधानात् । तदुक्तम् । मूलप्रकृतिरविकृतिरिति । मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः । महदादेः कार्य्यकलापस्यासौ मूलं न त्वस्य प्रधानस्य मूलान्तरमस्ति अनवस्थापातात् । न च बीजाङ्कुरवदनवस्थादोषो न भवति इति वाच्यम् । प्रमाणाभावादिति भावः । प्रकृतयश्च महदहङ्कारतन्मात्रादि । तदप्युक्तम् । महदाद्याः प्रकृतिविकृतयः सप्त इति । अस्यार्थः । प्रकृतयश्च ता विकृतयश्चेति प्रकृतिविकृतयः सप्त महदादीनि तत्त्वानि । तत्रान्तःकरणादिपदेनेयं महत्तत्त्वमहङ्कारप्रकृतिः मूलप्रकृतेस्तु विकृतिः । एवमहङ्कारतत्त्वं अभिमानापरनामधेयमहतो विकृतिः । प्रकृतिश्च तदेवाहङ्कारतत्त्वं तामसं सत् पञ्चतन्मात्राणां सूक्ष्माभिधानम् । तदेव सात्त्विकं सत् प्रकृतिरेकादशेन्द्रियाणां बुद्धीन्द्रियाणां चक्षुःश्रोत्रघ्राणरसनात्वगाख्यानां कर्म्मेन्द्रियाणां वाक्पाणिपादपायूपस्थाख्यानामुभयात्मकस्य मनसश्च रजसस्तूभयत्र क्रियोत्पादनद्वारेण कारणमस्तीति न वैयर्थ्यम् । तदुक्तमीश्वरकृष्णेन ।
"अभिमानोऽहङ्कारस्तस्मात् द्विविधः प्रवर्त्तते सर्गः ।
एकादशकश्च गणस्तन्मात्रा पञ्चकश्चैव ॥
सात्त्विकमेकादशकः प्रवर्त्तते वैकृतादहङ्कारात्
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥
बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनात्वगाख्यानि
वाक्पादपाणिपायूपस्थाख्यानि कर्म्मेन्द्रियाण्याहुः ॥"

उभयात्मकमत्र मनःसङ्कल्पविकल्पात्मकमिन्द्रियञ्चेति । विवृतञ्च तत्त्वकौमुद्यामाचार्य्यवाचस्पतिभिः । किमवला विकृतयस्तु वियदादीनि पञ्चभूतानि एकादशेन्द्रियाणि च । तदुक्तं षोड़शकस्तु विकार इति षोड़शसंख्यावच्छिन्नो गणषोड़शको विकार एव न प्रकृतिरित्यर्थः । यद्यपि पृथिव्यादयो गोघटादीनां प्रकृतिस्थापि न ते पृथिव्यादिभ्यस्तत्त्वान्तरमिति न प्रकृतिः । तत्त्वान्तरोपादानत्वञ्चेह प्रकृतित्वमभिमतं गोघटादीनां स्थूलत्वेन्द्रियग्राह्यत्वयोः समानत्वेन तत्त्वान्तरत्वाभावः । तत्र शब्दस्पर्शरूपरसगन्धतन्मात्रेभ्यः पूर्व्वपूर्व्वसूक्ष्मभूतसहितेभ्यः पञ्च महाभूतानि

वियदादीनि क्रमेणैकद्वित्रिचतुःपञ्चगुणानि जायन्ते। इन्द्रियसृष्टिस्तु प्रागेवोक्ता। उक्तञ्च। प्रकृतेर्महान् ततोऽहङ्कारः तस्माद्गणश्च षोड़शकः तस्मादपि षोड़शकात् पञ्चभ्यः पञ्चभूतानीति। अनुभवात्मकः पुरुषः। तदुक्तम्। न प्रकृतिर्न विकृतिः पुरुष इति। पुरुषस्तु कूटस्थो नित्यः परिणामो न कस्यचित्। प्रकृतिर्नापि विकृतिः कस्यचिदित्यर्थः। एतत्पञ्चविंशतितत्त्वमाधकत्वेन प्रमाणत्रयमभिमतम्। तदप्युक्तम्। दृष्टमनुमानमाप्तवचनं सर्व्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धीति। इह कार्य्यकारणभावे चतुर्द्धा विप्रतिपत्तिः प्रसरति। असतः सज्जायत इति सौगताः सङ्गिरन्ते। नैयायिकादयः सतोऽसज्जायते इति। वेदान्तिनः सतो विवर्त्तः कार्य्यजातं न वस्तु सदिति। सांख्याः पुनः सतः सज्जायत इति। तत्रासतः सज्जायत इति न प्रामाणिकः पक्षः। असतो निरुपाख्यस्य शशविषाणवत् कारणत्वानुपपत्तेः तुच्छात्तुच्छयोत्पादात्मानुपपत्तेश्च। नापि सतोऽसज्जायते कारकव्यापारात् प्रागसतः शशविषाणवत् सता सम्बन्धलक्षणोत्पत्तेः। न हि नीलं निपुणतमेनापि पीतं कर्त्तुं पार्य्यते। ननु सत्त्वासत्त्वे घटस्य धर्म्माविति चेत्तदचारु। असति धर्म्मिणि तद्धर्म्म इति व्यपदेशानुपपत्तेर्धर्म्मिणः सत्त्वापत्तेः। तस्मात् कारकव्यापारात् प्रागपि कार्य्यम्। सदेव सतव्याभिव्यक्तिरुपपद्यते। यथा पीड़नेन तिलेषु तैलस्य दोहनेन सौरभेयीषु पयसः। असतः कारणे किमपि निदर्शनं दृश्यते। किञ्च कार्य्येण कारणं सम्बद्धं तज्जनकं असम्बद्धं वा प्रथमे कार्य्यस्य सत्त्वमायातं सतोरेव सम्बन्ध इति नियमात्। चरमे सर्व्वं कार्य्यजातं सर्व्वस्माज्जायेत असम्बद्धत्वाविशेषात्। तदाख्यायि सांख्याचार्य्यैः।

"असत्त्वान्नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः।
असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः॥"

अथैवमनुष्ठेयसम्बद्धमपि तदेव जनयति यत्र यच्छक्तं यत्रैव कार्य्यदर्शनोन्नेयेति तत्र संगच्छते। तिलेषु तैलजननशक्तिरित्यत्र तैलस्यासत्त्वे सम्बद्धत्वासम्बद्धत्वविकल्पेन तच्छक्तिरिति निरूपणायोगात् कार्य्यकारणयोरभेदाच्च। कार्य्यस्य सत्त्वं कारणात् पृथक् न भवति पटस्तन्तुभ्यो न भिद्यते तद्धर्म्मत्वान्न यदेवं न तदेवं यथा गौरश्वः। तद्धर्म्मश्च पटः तस्मान्नार्थान्तरं तर्हि प्रत्येकं त एव प्रावरणकार्य्यं कुर्य्युरिति चेन्न। संख्याभेदेनाविर्भूतपटभावानां प्रावरणार्थक्रियाकारित्वोपपत्तेः। यथा हि। कूर्म्मस्याङ्गानि कूर्म्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति एवं कारणतन्त्वादेः पटादयो विशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते निविशमानास्तिरोभवन्तो विनश्यन्तीत्युच्यन्ते न पुनरसतामुत्पत्तेः सतां वा विनाशः। यथोक्तं भगवद्गीतायाम्। नासतो विद्यते भावो नाभावो विद्यते सतः। इति। ततश्च कार्य्यानुमानात्तत्प्रधानसिद्धिः। तदुक्तम् असदकारणत्वादुपादानं ग्रहणात् सर्व्वसम्भवात्। शक्तस्य शक्यकरणात् कारणाभावाच्च सत्कार्य्यमिति। नापि सतो ब्रह्मतत्त्वस्य विवर्त्तः प्रपञ्चः बाधानुपलम्भात्। अधिष्ठानारोप्ययोः चिज्जड़योः कलधौतरौप्यादिवत् सारूप्याभेदेनापि संभवाच्च। तस्मात् सुखदुःखमोहात्मकस्य तथाविधकारणमवधारणीयम्। तथा च प्रयोगः। विमतं भावजातं सुखदुःखमोहात्मककारकं तदन्वितत्वात् यत् यैनान्वीयते तत्तत्कारणकं यथा रुचकादिकं सुवर्णान्वितं सुवर्णकारणकं तथा चेदं तस्मात्तथेति। तच्च जगत्कारणे यैयं सुखात्मकता तत् सत्त्वम्। या दुःखात्मकता तद्रजः। या च मोहात्मकता तत्तम इति त्रिगुणात्मककारणसिद्धिः। यथा हि प्रत्येकं भावान्नैगुण्यवन्तोऽनुभूयन्तो यथा मैत्रदारेषु सत्यवती मैत्रस्य सुखमाविरस्ति तं प्रति सत्त्वगुणप्रादुर्भावात्तत्प्रवणानां दुःखं ताः प्रति रजोगुणप्रादुर्भावात् तामसमभानस्य चैत्रस्य मोहो भवति तं प्रति तमोगुणसद्भावात्। एवमन्यदपि घटादिकं लभ्यमानं सुखं करोति परेरपि क्रियमाणं दुःखाकरोति उदासीनस्योपेक्षाविषयत्वं नोपतिष्ठते उपेक्षाविषयत्वं नामोहः सुष्ठ वैचित्र्ये इत्यस्मादातोर्मोहशब्दनिष्पत्तेः उपेक्षणीयेषु चित्तद्वत्त्वनुदयात्तस्मात् सर्व्वं भावजातं सुखदुःखमोहात्मकं त्रिगुणप्रधानकारणकमवगम्यते। तथा च श्वेताश्वतरोपनिषदि श्रूयते।

"अजामेकां लोहितशुक्लकृष्णां
बह्वीं प्रजां जनयन्तीं सरूपाम्।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः॥" इति॥

अत्र लोहितशुक्लकृष्णशब्दा रक्तत्वप्रकाशकत्वावरकत्वसाधर्म्म्यात् रजःसत्त्वतमोगुणत्वप्रतिपादनपराः। नन्वचेतनं प्रधानं चेतनानधिष्ठितं महदादिकार्य्ये न व्याप्रियते अतः केनचित् चेतनाधिष्ठात्रा भवितव्यम्। तथा च सर्व्वार्थदर्शे। परमेश्वरः स्वीकर्त्तव्यः स्यादिति चेत्। तदसङ्गती अचेतनस्य। यथा वत्सविवृद्ध्यर्थमचेतनं क्षीरं प्रवर्त्तते। यथा च जलमचेतनं लोकोपकाराय प्रवर्त्तते। तथा च प्रकृतिरचेतनापि पुरुषविमोक्षाय प्रवर्त्स्यतीति। तदुक्तम्। वत्सविवृद्ध्यर्थं क्षीरस्य यथा प्रवृत्तिरेतस्याः पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्येति। यस्तु परमेश्वरः करुणया प्रवर्त्तक इति परमेश्वरास्तित्ववादिनां डिण्डिमः स प्रायेण गतः विकल्पानुपपत्तेः। स किं सृष्टेः प्राक् प्रवर्त्तते सृष्ट्युत्तरकालं वा। आद्ये शरीराद्यभावेन दुःखानुपपत्तौ जीवानां दुःखप्रहाणेच्छानुपपत्तिः। द्वितीये परस्पराश्रयप्रसङ्गः। करुणया सृष्टिः सृष्ट्या कारुण्यमिति तस्मादचेतनस्यापि चेतनानधिष्ठितस्य प्रधानस्य महदादिरूपेण परिणामः पुरुषार्थप्रयुक्तप्रधानपुरुषसंयोगनिमित्तः। यथा। निर्व्यापारस्याप्ययस्कान्तसन्निधानेन लोहितस्य व्यापारः। तथा निर्व्यापारस्य पुरुषस्य सन्निधानेन प्रधानव्यापारो युज्यते। प्रकृतिपुरुषसम्बन्धश्च पङ्ग्वन्धवत् परस्परापेक्षानिबन्धनः। प्रकृतिर्हि भोग्यतया भोक्तारं पुरुषमपेक्षते। पुरुषोऽपि भेदाग्रहाद्दुश्छाया पन्नरा तद्गतं दुःखत्रयं वारयमाणः कैवल्यमपेक्षते। तत्प्रकृतिपुरुषविवेकनिबन्धनः। न च तदन्तरेण युक्तमिति कैवल्यार्थं पुरुषः प्रधानमपेक्षते। यथा खलु कौचित् पङ्ग्वन्धौ पथि सार्थेन गच्छन्तौ देवकृतादुपप्लवात् परित्यक्तसार्थौ मन्दमन्दमितस्ततः परिभ्रमन्तौ भयाकुलौ दैववशात् संयोगमुपगच्छेताम्। तत्र चान्धेन पङ्गुः स्कन्धमारोपितः पङ्गुदर्शितेन मार्गेणान्धः समीहितं स्थानं प्राप्नोति पङ्गुरपि स्कन्धाधिरूढः तथा परस्परापेक्षप्रधानपुरुषनिबन्धनः सर्गः पुरुषस्य दर्शनार्थं कैवल्यार्थतया प्रधानस्य पङ्ग्वन्धवत् उभयोरपि सम्बन्धस्तत्कृतः सर्गः इति। ननु पुरुषार्थनिबन्धना भवतु प्रकृतेः प्रवृत्तिः निवृत्तिस्तु कथमुपपद्यते इति चेदुच्यते यथा भर्त्रा दृष्टदोषा स्वैरिणी पुनर्भर्त्तारं नापेक्षते यथा वा कृतप्रयोजना नर्त्तकी नर्त्तने तथा प्रकृतिरपि यथोक्तं रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात् पुरुषस्य तथानन्दं प्रकाश्यः निवर्त्तते प्रकृतिरिति। तदर्थं निरीश्वरसांख्यशास्त्रप्रवर्त्तककपिलानुसारिणां मतमुपन्यस्तम्। इति माधवाचार्य्यकृतसर्व्वदर्शनसंग्रहे सांख्यदर्शनम्॥ अस्य चत्वारः अध्यायाः। तत्र प्रकृतिपुरुषयोरुभयोः सृष्टिकर्त्तृत्वं अन्धपङ्ग्वन्यायेन स्थापितम्। तत्त्वानां संख्यानञ्च कृतम्। इति केचित्॥

सांघातिकः, त्रि,(संघाते साधुः। संघात + "गुड़ादिभ्यष्ठञ्।" ४।४।१०३। इति ठञ्।) सम्यक्प्रकारेण हननकारकः। मारात्मकः॥ जन्मनश्चत्रावधिकषोड़शनक्षत्रम्। यथा,—

"जन्माद्यं कर्म्म ततोऽपि दशमं सांघातिकं
षोड़शभम्॥"

तत्फलम्।

"देहद्रविणबन्धूनां हानिः सांघातिके तथा।"
इति ज्योतिस्तत्त्वम्॥

सांदृष्टिकं, क्ली, (संदृष्टौ प्रत्यक्षे भवम्। संदृष्टि + ठञ्।) सद्यःफलम्। इत्यमरः॥ दृष्टिपरिकल्पनान्यायः। यथा। दौहित्रान्तसन्तानाभावे पितुरधिकारवत् दौहित्रान्तपिण्डसन्तानाभावे पितामहाधिकारस्य सांदृष्टिकन्यायसिद्धत्वाच्च। यथा पित्रभावे माता तथा पितामहाभावे पितामहीति सांदृष्टिकन्यायेन पितामह्यधिकारस्य सिद्धत्वाच्च। इति श्रीकृष्णतर्कालङ्कारकृतक्रमसंग्रहः॥

सांयात्रिकः, पुं, (संयात्रा द्वीपान्तरगमनम्। सा प्रयोजनमस्येति। संयात्रा + "तदस्य प्रयोजनम्।" इति ठञ्।) पोतवणिक्। इत्यमरः। १। १०।१२॥ इदं वहित्रगामिनि वणिग्जने। संपूर्व्वो यातिर्द्वीपान्तरगमनवृत्तिस्तत्स्वासुसिति त्रः स्त्रियामाप् संयात्रा द्वीपान्तरगमनं तदस्य प्रयोजनमिति विकारसंघेति ण्विकः। सम्यक् यात्रा संयात्रा तया व्यवहरतीति ठक्वे कादिति ण्विको वा। इति भरतः॥ (यथा, हरिवंशे। ५८। १४।

"सिद्धिः सांयात्रिकाणान्तु वेला त्वं सागरस्य च॥")

सांयुगीनः, त्रि, (संयुगे साधुः। संयुग + "प्रतिजनादिभ्यः खञ्।" ४। ४। ८८। इति खञ्।) युद्धकुशलः। रणे साधुः। इत्यमरः। २। ८। ७७॥ (यथा, रघुः। ११। ३०।

"इत्यापस्तम्बविप्रयोस्तयोः
सांयुगीनमभिनन्द्य विक्रमम्।
ऋत्विजः कुलपतेर्यथाक्रमं
वाग्यतस्य निरवर्त्तयन् क्रियाः॥")

सांराविणं, क्ली, (सं + रुल ध्वनौ + "अभिविधौ भावे इनुण्।" ३। ३। ४४। इति इनुण्। "अणिनुणः।" ५।४।१५। इति स्वार्थे अण्।) हृष्टस्य सम्यक् शब्दः। इति मुग्धबोधव्याकरणम्॥ संपूर्व्वं रुल ध्वनौ भावे णिनि णिलोपे हृद्दौ संराविण इति स्थिते ततः स्वार्थे णे णित्त्वे विराव्यच इति हृद्दौ ययोर्लोपे इत्यकारलोपे सांराविणं हृष्टस्य सम्यक् शब्दो व्याप्त इत्यर्थः। इति तट्टीकायां दुर्गादासः॥ (यथा, अनर्घराघवे। ७। ५७।

'यं दोर्मात्रपरिच्छदो युधि मुदोत्क्षिप्य प्रतीच्छन्मुहुः
संतेने दशभिर्निजैरपि मुखैः सांराविणं रावणः॥")

सांवत्सरः, पुं, (संवत्सरं तज्ज्ञानोपयोगि शास्त्रं वेत्ति अधीते वा। संवत्सर + अण्।) गणकः। इत्यमरः। २। ८। १४॥ (यथा, बृहत्संहितायाम्। २। १०—११।

"मुहूर्त्ते तिथिनक्षत्रकृतवर्षायने तथा।
सर्व्वास्वेवाकुलासु स्युर्न स्यात् सांवत्सरो यदि॥
तस्माद्राज्ञाभिगन्तव्यो विद्वान् सांवत्सरोऽग्रणीः।
जयं यशःश्रियं भोगान् श्रेयश्च समभीप्सता॥"

अस्य लक्षणादिकं तत्रैव २ अध्याये विशेषतो द्रष्टव्यम्॥*॥ फले, पर्व्वणि च क्ली। इति पाणिनिः। ४।३। १६॥ संवत्सरस्येदमिति। अण्।) संवत्सरसम्बन्धिनि, त्रि॥ (यथा, हरिवंशे। १४०। ३।

"स सांवत्सरदीक्षायां दीक्षितः षट्पुरालये।
आवर्त्तायां शुभे तीरे शुनद्या मुनिसुष्टुया॥")

सांवत्सरिकः, त्रि, (संवत्सर + "कालात् ठञ्।" ४।३।११। इति ठञ्।) संवत्सरं व्याप्य भूतः। प्रतिवर्षकर्त्तव्यश्राद्धम्। यथा अथ सांवत्सरिकश्राद्धम्। तत्र गोभिलः। अत ऊर्द्धं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यात् इति। अत ऊर्द्धं सपिण्डीकरणान्तश्राद्धनिमित्तादाद्यसंवत्सरादूर्द्धं संवत्सरे संवत्सरे प्रतिवर्षं यस्मिन्नहनि मृतस्तस्मिन्नहनि मृताय दद्यात्। व्याघ्रः। प्रतिसंवत्सरञ्चैवमेकोद्दिष्टं मृताहनि। एतेन सपिण्डीकरणापकर्षे आद्यसंवत्सरेऽपि मृताहे श्राद्धान्तरं कर्त्तव्यमिति मैथिलोक्तं हेयम्। व्यासश्चाह हेमाद्रिधृतं वचनम्।

"पूर्णे संवत्सरे श्राद्धं षोड़श्यं परिकीर्त्तितम्।
तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते॥"

अत्र पूर्णसंवत्सरक्रियमाणश्राद्धादृयोर्भयनिर्व्वाहस्थायषष्ठ-सपिण्डीकरणश्राद्धादप्युभयनिर्व्वाहो न पूर्णसंवत्सरे आब्दिकान्तरम्। एवं पञ्चदशश्राद्धेऽप्यन्वयम्। मत्स्यपुराणम्।

"ततः प्रभृति संक्रान्तावुपरागादिपर्व्वसु।
त्रिपिण्डमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि॥"

ततः प्रेतत्वपरीहारात् त्रिपिण्डं नैपुरुषम्। निरुपपदमृताहशब्दः मृतसम्बन्धिमासपक्षतिथिविशेषपरः। उपपदात्तु क्वचित्तिथिविशेषमात्रपरः। यथा मृताहे प्रतिमासं कुर्य्यादित्यादौ। शङ्खः।

"सपिण्डीकरणादूर्द्धं यत्र यत्र प्रदीयते।
तत्र तत्र त्रयं कुर्य्यात् वर्জ्जयित्वा मृताहनि॥
अमावास्यां त्रयो यस्य प्रेतपक्षेऽथवा पुनः।
सपिण्डीकरणादूर्द्धं तस्योक्तः पार्व्वणो विधिः॥"

त्रयं सम्प्रदानानां त्रयं कुर्य्यात् त्रिभ्यो दद्यात् इत्यर्थः। मृताहपर्य्युदस्तत्रित्वेतत्त्वस्य प्रतिप्रसवमाह। अमावास्यामिति। प्रेतपक्षोऽत्र पितृपक्षः अश्वयुक्कृष्णपक्ष इति यावत्। न तु कृष्णपक्षमात्रं कृष्णपक्षसामान्यपरत्वे अमावास्यापदवैयर्थ्यापत्तेः॥*॥ पितृपक्षं विशेषयति हेमाद्रिमाधवाचार्य्यधृतं नागरखण्डम्।

"नभो वाथ नभस्यो वा मलमासो यदा भवेत्।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः॥"

अत्र श्रावणभाद्रयोरन्यतरस्य मलमासत्वे भाद्रपदापेक्षया सप्तमपक्षस्य पितृपक्षत्वात्। अत्र मृतस्यैव प्रेतपक्षमृतत्वं न तु मलमासभाद्रकृष्णपक्षमृतस्य। ततश्च तत्र मृतस्य वर्षान्तरे अश्वयुक्कृष्णपक्षेऽपि तच्छ्राद्धकरत्वे न पार्व्वणम्। किन्त्वेकोद्दिष्टमिति। अत्र पार्व्वणो विधिः पार्व्वणेतिकर्त्तव्यताकैकोद्दिष्टविधिरिति नव्यवर्द्धमानप्रभृतयः। तत्रपूर्व्ववचनोक्तत्रैपुरुषिकस्य मृताहे पर्य्युदस्तस्य पार्व्वणो विधिरित्यनेन प्रतिप्रसवात्। तस्मादत्र सदेवतैकोद्दिष्टं न युक्तं किन्तु नैपुरुषिकं न तु षाट्पुरुषिकम्।

"कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोड़शम्।
प्रत्याब्दिकञ्च श्रेषेषु पिण्डाः स्युः षड्डिति स्थितिः॥"

इति छन्दोगपरिशिष्टवचनेन प्रत्याब्दिकव्यतिरेकेण षट्संख्यानियमात्॥*॥ एवमसावास्यादिमरणनिमित्तेन मातुरपि प्रत्याब्दिकं पार्व्वणविधिनैव।

"अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये
तेषामपि च देयं स्यादेकोद्दिष्टं न पार्व्वणम्॥"

इत्यापस्तम्बवचने अपुत्रा इति विशेषणोपादानात् सपुत्राणां पार्व्वणाभ्यनुज्ञानात्। एतच्च मात्रादित्रितयदैवतं कार्य्यम्। मात्रे पितामह्यै प्रपितामह्यै च पूर्व्ववत् ब्राह्मणान् भोजयित्वा इत्यन्वष्टकायां तथा दर्शनात्। अवसानदिननिमित्तेन पार्व्वणविधिना छन्दोगैरपि मात्रादित्रिकाणां श्राद्धं कर्त्तव्यम्। न योषिद्वर्ग्यं पृथग्दद्यादवसानादिनादृते। इति छन्दोगपरिशिष्टवचने विशेषतः प्रतिप्रसवात्। एवं सपिण्डीकरणेऽपि। एतच्च मृताहपार्व्वणं मातापित्रोरेव। तथा च हेमाद्रिधृतं कात्यायनवचनम्।

"सपिण्डीकरणादूर्द्धं पित्रोरेव हि पार्व्वणम्।
पितृव्यभ्रात्रमातृणामेकोद्दिष्टं सदैव तु॥"

मातृपदं सपत्नीमातृपरम्। सपत्नीमात्रित्यत्र मातृपदस्य राजदन्तादित्वात् परनिपातः। ततश्च वाक्ये मातृससपत्नीति न प्रयोज्यं किन्तु सपत्नीमातरित्यादिकम्॥*॥ एवं साग्निकौरसक्षेत्रजाभ्यां मृताहे पार्व्वणं कर्त्तव्यम्।

"औरसक्षेत्रजौ पुत्रौ विधिना पार्व्वणेन तु।
प्रलब्धमितरे कुर्य्युरेकोद्दिष्टं सुता दश॥"

इति जाबालवचनस्य।

"यत्र यत्र प्रदातव्यं सपिण्डीकरणात् परम्।
पार्व्वणेन विधानेन देयमग्निमता सदा॥"

इति मत्स्यपुराणवचनस्य चैकवाक्यत्वात्। उशनाः।

"प्रलब्धं दर्शवच्छ्राद्धं साग्निः कुर्व्वीत वै द्विजः।
एकोद्दिष्टं सदा कुर्य्यादनग्निः श्राद्धदः सुतः॥"

अत्र प्रागुक्तयुक्त्या प्रेतश्राद्धस्य एकोद्दिष्टत्वाभिधानात् सांवत्सरिकश्राद्धे यदेकोद्दिष्टपदमुक्तं तत् प्रेतश्राद्धधर्म्मग्राहित्वार्थम्। ततश्च योग्यत्वादेकार्घ्यादिलाभः। न तु यथा प्रेतश्राद्धे पितृशब्दस्थाने प्रेतपदोक्तिः तथा अत्रापीति वाच्यं सांवत्सरिके प्रेतत्वाभावात्तथाविधानानुपपत्तेः। एवं प्रतिसांवत्सरिकश्राद्धे सम्बन्धार्थपदं आशीःप्रार्थनं शेषभोजनञ्च कर्त्तव्यम्॥*॥ रजस्वलायां विशेषयति गौतमः।

"अपुत्रा तु यदा भार्य्या सम्प्राप्ते भर्त्तुराब्दिके।
रजस्वला भवेत् सा तु कुर्य्यात् तत्पञ्चमे दिने॥"

कुर्य्याच्छ्राद्धमिति शेषः। यत्तु श्राद्धचिन्तामणौ एकोद्दिष्टं त्रैवर्षिकेन सिद्धान्नेन कर्त्तव्यम्।

"एकोद्दिष्टं कर्त्तव्यं पाकेनैव सदा स्वयम्।
अभावे पाकपात्राणां तदहः सपुपोषणम्॥"

इति लघुहारीतवचनात्॥ पाकपात्राभावः पाकसामग्र्यभावोपलक्षकः। तदापि नामश्राद्धं किन्तूपोषणमेव श्राद्धस्थानीयमित्यर्थः। स्वयमित्यभिधानात् अपाटवादिनापि

नान्यद्वारा कारयितव्यम्। अतएव उपवासेनैव श्राद्धस्थानीयेन तदकरणप्रायश्चित्तेन वा कृतकृतत्वया श्राद्धविघ्ने इत्यादिवचनादपि नैकादश्यामनुष्ठानमिति तत्र। पिठलसे रजातत्वे नैकादश्यां तदनुष्ठानस्य युक्तत्वात्। अन्यथा षोड़शश्राद्धाधिकारिणः कदाचित्तथात्वे।
"यस्यैतानि न दीयन्ते प्रेतश्राद्धानि षोड़श।
पिशाचत्वं ध्रुवं तस्य दत्तैः श्राद्धशतैरपि॥"
इति यमवचनेन षोड़शश्राद्धाभावे प्रेतत्वपरीहारो न स्यात्। तस्मादुपवासो न श्राद्धार्थः किन्तु तदानीन्तनाकरणप्रायश्चित्तार्थः। यथा स्वकालाकृतसंस्कारे प्रायश्चित्तं कृत्वा कालान्तरे तत्करणं तथात्रापि तद्दिने उपवासं कृत्वा एकादश्यां श्राद्धं कर्त्तव्यमिति। एकोद्दिष्टं नान्यद्वारा कार्य्यमित्यत्रापि गोत्रजेतरत्वेन विशेषणीयम्।
"न कदाचित् सगोत्राय श्राद्धं कार्य्यमगोत्रजैः।"
इति प्रेतश्राद्धे ब्रह्मपुराणात्।
अत्र हि नागोत्रजस्य साक्षात्कर्त्तृत्वं निषिध्यते सगोत्रायेत्यसम्बन्धापत्तेः। तस्मात् अगोत्रजैर्हारभूतैः सगोत्राय श्राद्धं न कार्य्यमित्यर्थः। तथा च पर्य्युदासपक्षे गोत्रजद्वारा कारयितव्यमिति सुव्यक्तमेव। प्रसज्यपक्षे तु अगोत्रजविशेषणस्वरसात् गोत्रजलाभः। प्रेतश्राद्धधर्म्मग्राहित्वात् सांवत्सरिकमपि तथेति श्राद्धविवेकः। कल्पतरुरत्नाकरयोस्तु स्वगोत्रायेति पठितं स्वमात्मीयं गोत्रं यस्य स स्वगोत्रः विद्यमानगोत्र इत्यर्थः। यस्मै श्राद्धं कर्त्तव्यं तस्य स्वगोत्रजे विद्यमानेऽन्यगोत्रजेन संघातान्तर्गतेन रात्रा श्राद्धं न कारयितव्यमिति व्याख्यातञ्च। एतन्मते ऽप्यूढदुहित्रादीनामसगोत्रत्वेऽपि न निषेधः। वस्तुतस्तु तत्पाठेऽपि कर्म्मधारयापेक्षया बहुव्रीहेर्जघन्यत्वात् स्वमात्मीयञ्च तत् गोत्रञ्चेति तस्मै अन्यगोत्रजद्वारा श्राद्धं न कार्य्यमित्यर्थः। अतो लघुहारीतवचने स्वयं पदं स्वगोत्रपरम्। अन्यथा ब्रह्मपुराणोक्तागोत्रजपदवैयर्थ्यापत्तेः॥*
एवञ्च भविष्यपुराणप्रभासखण्डयोः।
"मृताहनि पितुर्श्यस्तु न कुर्य्यात् श्राद्धमादरात्।
मातुश्चैव वरारोहे वत्सरान्ते मृताहनि।
नाहन्तस्य महादेवि! पूजां गृह्णामि नो हरिः॥"
मरीचिः।
"पण्डिता ज्ञानिनो मूर्खाः स्त्रियोऽथ ब्रह्मचारिणः।
मृताहं समतिक्रम्य चाण्डालेष्वभिजायते॥"
इत्याभ्यां कालमाधवीयधृताभ्यां वचनाभ्यां सांवत्सरिकश्राद्धस्य मृताहकर्त्तव्यत्वेनावश्यकत्वात् भविष्यन्मृताहे स्वयं कर्त्तव्यत्वसम्भावनारहितेन मृताहात् पूर्व्वकालेऽपि प्रतिनिधीयते।
"प्रक्षिप्याग्निं स्वदारेषु परिकल्पार्त्विजं तथा।
प्रवसेत् कार्य्यवान् विप्रो ह्येवं न चिरं क्वचित्॥"
इति छन्दोगपरिशिष्टोक्तसायंप्रातर्होमप्रतिनिधिवत्। एवं सति प्रतिनिधकरण एव एकादश्यां क्रियते॥*॥ न च पाकस्याङ्गत्वेन प्रधानतिथिकर्त्तव्यतानियम इति वाच्यम्।
"व्रतोपवासनियमे घटिकैका यदा भवेत्।
सा तिथिः सकला ज्ञेया पित्र्ये चापराह्णिकी॥"
इति वचनेन मुहूर्त्तमात्रलाभेऽपि कर्त्तव्यतोपदेशात् तदानीं पाके तदसम्भवात्। एवमुदीच्याङ्गशेषभोजनेऽपि न तन्नियमः। इति श्राद्धतत्त्वम्॥ (गणके, पुं। यथा, हृहत्संहितायाम्। २। १२।
"नासांवत्सरिके देये वस्त्वभूतिमिच्छता।
चक्षुर्भूतो हि यत्रेष पापं तत्र न विद्यते॥")
सांवादिकः, पुं, (सम्यक् वादाय प्रभवतीति। संवाद+ठञ्।) नैयायिकः। यथा,—
"नैयायिकः साक्षपादः स्यात्सांवादिक आहितः॥"
इति जटाधरः॥
संवाददातरि, त्रि॥
सांशयिकः, त्रि, (संशयमापन्नः। संशय+"संशयमापन्नः।" ५। १। ७३। इति ठञ्।) संशययुक्तः। तत्पर्य्यायः। संशयापन्नमानसः २ इत्यमरः। ३। १। ५॥ सन्दिहानः ३। इति जटाधरः॥ हे संशयविषये स्याद्वादी। संशयमापन्नः सांशयिकः णिकः संशयमापन्नं मानसं यत्र स्याद्वादी स तथा। संशयमापन्नं मानसं यस्य स तथेति षष्ठ्यन्तपदार्थत्वे संशयितरि पुरुषादावप्येतच्छब्दस्य प्रवृत्तिः स्यादिति भरतः॥ (संशयविषयकः। यथा, मार्कण्डेये। १०। ४५।
"तद्ब्रूहि त्वं महाभाग यत् ते सांशयिकं हृदि॥")
सांस्थानिकः, त्रि, (संस्थाने व्यवहरतीति। संस्थान+"कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति।" ४। ४। ७२। इति ठक्।) समानदेशीयः। इति सिद्धान्तकौमुदी॥ संस्थानयुक्तश्च॥
सांस्राविणं, क्ली, (स्रुचस्य स्रुचं व्याप्य सम्यक् स्रावः। इति संक्षिप्तसारोणादिवृत्तिः॥
साकं, व्य, सहार्थम्। इत्यमरः। ३। ४। ४॥ (यथा, कथासरित्सागरे। ४। १३६।
"अहं जनन्या गुरुभिश्च साकं
मासाद्य लक्ष्मीमवसं चिराय॥")
साकल्यं, क्ली, (सकल+भावे ष्यञ्।) समुदायः। सकलस्य भावः। (यथा, मनुः। १२। २५।
"यो यदैषां गुणो देहे साकल्येनातिरिच्यते।
स तदा तद्गुणप्रायं तं करोति शरीरिणम्॥")
साकारः, त्रि, (आकारेण सह वर्त्तमानः।) आकारविशिष्टः यथा,—
"साकारञ्च निराकारं सगुणं निर्गुणं प्रभुम्।
सर्व्वाधारञ्च सर्व्वञ्च स्वेच्छारूपं नमाम्यहम्॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ३२। ३१॥
साकुरुण्डः, पुं, (सकुरुण्ड एव। स्वार्थे अण्।) हृक्षविशेषः। सकुरुण्डर इति गुर्ज्जरदेशीयभाषा। तत्पर्य्यायः। अन्थिफलः २ विकटः ३ वस्त्रभूषणः ४ कुरुण्डः ५ कार्ब्बूरफलः ६ सकुरुण्डः ७। अस्य गुणाः। कषायत्वम्। रुचिकारित्वम्। दीपनत्वम्। सारकत्वम्। श्लेष्मवातनाशित्वम्। वस्त्ररञ्जनकत्वम्। लघुत्वञ्च। इति राजनिघण्टः॥
साकेतं, क्ली, अयोध्यानगरम्। इति शब्दरत्नावली॥ (यथा, रघुः। ५। ३१।
जनस्य साकेतनिवासिनस्तौ
दृशौ प्रसादक्षमभूतामभिवन्द्यमस्त्वौ॥")
साक्षुकः, पुं, (सक्षुषु साधुः। सक्षु+"गुड़ादिभ्यष्ठञ्।" ४। ४। १०३। इति ठञ्।) यवः। इति सिद्धान्तकौमुदी॥ (सक्षूनां समूहः। सक्षु+"अचित्तहस्तिधेनोष्ठक्।" ४। २। ४७। इति ठक्।) सक्षुसमूहे, क्ली। सक्षुसम्बन्धिनि, त्रि॥ (सक्षवे प्रभवतीति। "तस्मै प्रभवति संतापादिभ्यः।" ५। १। १०१। इति ठञ्। सक्षु समर्थे च त्रि॥)
साक्षरं, त्रि, अक्षरयुक्तम्। अक्षरेण सह वर्त्तमानम्। इति बहुव्रीहिसमासनिष्पन्नम्॥
साक्षात्, व्य, प्रत्यक्षम्। (यथा, कुमारे। ६। २२।
"साक्षात् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा
प्रसीद कथयात्मानं न धियां पथि वर्त्तसे॥")
तुल्यम्। इत्यमरः। ३। ३। २४॥
साक्षी, [न्] त्रि, (अक्षेण दर्शनेन्द्रियेण सह वर्त्तमानं तत् यत् साक्षं प्रत्यक्षज्ञानम्। तदस्यास्तीति। साक्ष+इनिः।) दृष्टज्ञः। इति हेमचन्द्रः॥ तत्पर्य्यायः। प्रत्यक्षदर्शनः २। इति शब्दमाला॥ तस्य मिथ्याकथने अकथने च दोषो यथा, महाभारते आदिपर्व्वणि।
"दृष्टो हि साक्षी यः साक्ष्यं जानन्नप्यन्यथा वदेत्।
स पूर्व्वान्नामनः सप्त कुले हन्यात्तथापरान्॥
यश्च कार्य्यार्थतत्त्वज्ञो जानन्नपि न भाषते।
सोऽपि तेनैव पापेन लिप्यते नात्र संशयः॥"
अपि च।
"ब्रह्मस्वस्याप्यहारी च मिथ्यासाक्ष्यप्रदापकः।
मित्रद्रोही कृतघ्नश्च हृषवाहकसूपकृत्॥
एते महापातकिनस्त्रिषु लोकेषु निन्दिताः।
कालसूत्रे च नरके पतन्ति ब्रह्मणः शतम्॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ४४। ५०; ५४॥
अपरञ्च।
"मिथ्यासाक्ष्यं यो ददाति कामात् क्रोधात्तथा भयात्।
सभायां पाक्षिकं वक्ति स कृतघ्न इति स्मृतः॥
मिथ्यासाक्ष्यं पाक्षिकं वा भारते वक्ति यो नृप
यावदिन्द्राश्चतुर्दश्च सपंकुण्डे वसेद्ध्रुवम्॥
सन्तप्तं वेष्टितैः सर्पैर्भीतश्च भक्षितस्तथा।
भुङ्क्ते च सर्पविण्मूत्रं यमदूतेन ताड़ितः॥
कृकलासो भवेत्तत्र भारते सप्तजन्मसु।
सप्तजन्मसु मण्डूकः पिठलैः सप्तभिः सह॥
ततो भवेच्च हृक्षश्च महारण्ये च शाल्मलिः।
ततो भवेत्तरुः मूकस्ततः शूद्रस्ततः ऋषिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४८ अध्यायः॥*

सर्व्वशरीरेषु श्रीकृष्णस्य साक्षिरूपत्वं यथा,—
"स्थूलात् स्थूलतरं प्राप्तमतिसूक्ष्मदर्शनम्।
स्थितं सर्व्वशरीरेषु साक्षिरूपमदृश्यकम्।
शरीरवन्तं सगुणमशरीरं गुणोत्करम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।७।८४-८५॥
(पुं, विष्णुः। इति महाभारतम्।१३।१४८।१५॥)

साक्ष्यं, क्लौ, (साक्षिणो भावः कर्म्म वा। साक्षिन्+ष्यञ्। यद्वा, साक्षिणि भवम्। साक्षिन्+"दिगादिभ्यो यत्।" ४।३।५४। इति यत्।) साक्षिकर्म्म। यथा। मनुः।
"समत्वदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति।"
एतत् प्रमाणमात्रोपलक्षणम्।
"अनुभावी च यः कश्चित् कुर्य्यात्साक्ष्यं विवादिनाम्।"
इति तद्वचनान्तरात्॥
अतएवाकृतमपि साक्षिणमाह। मनुः।
"यत्रानिबद्धो वीक्षेत शृणुयाद्वापि किञ्चन।
पृष्टस्तत्रापि तद्ब्रूयात् यथादृष्टं यथाश्रुतम्॥"
अनिबद्धस्तत्र साक्षित्वेनानियुक्तः। परम्परयापि श्रवणमाह विष्णुः।
"उद्दिष्टसाक्षिणि मृते देशान्तरगतेऽपि वा।
तदभिहितश्रोतारः प्रमाणं नात्र संशयः॥"
अस्योत्तरसंग्रामाह नारदः।
"साक्षिणामपि यत् साक्ष्यं स्वपक्षे परिभाषताम्
श्रवणात् श्रावणाद्वापि स साक्ष्युत्तमसंज्ञकः॥"
स्वपक्षसम्बन्धिसाक्ष्यं परिभाषतां साक्षिणां यः स्वयं शृणोति अर्थिना श्राव्यते वा स श्रवणात् श्रावणादुत्तरसाक्षीत्यर्थः। एवं योऽर्थिना गूढतया प्रत्यर्थिवचनं श्रावितः स गूढसाक्षीत्याह स एव।
"अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम्।
यः श्राव्यते तदा गूढो गूढसाक्षी स उच्यते॥"
तेनान्यतरवाद्यभिहितार्थ-विषयकदृष्टकारणजं विज्ञापनं साक्ष्यमिति स्थितम्। तत्र नारदः।
"तेषामपि न वाचः स्युस्त्रैको न स्त्री न दुष्टकृत्।
न बान्धवो न चारतिब्रूयुस्ते कार्य्यमन्यथा॥"
कार्य्यं सदपि अन्यथा तद्विरुद्धत्वेन। एवञ्च यदि परमधार्म्मिकत्वेन बान्धवादीनामपि सत्यवादित्वं निश्चीयते तदा तेऽपि साक्षिणो भवितुमर्हन्तीति। तेषां साक्ष्यविधायकं वक्ष्यमाणमनुवचनमपि एतद्विषयम्॥*॥ याज्ञवल्क्यः।
"अवराः साक्षिणो ग्राह्या श्रौतस्मार्त्तक्रियारताः।
यथाजाति यथावर्णं सर्व्वे सर्व्वेषु वा स्मृताः॥"
त्रयोऽवरा निकृष्टा येषां ते त्रयवराः त्रिभ्यो न्यूना भवन्तीत्यर्थः। यथेति यो यज्जातीयस्तस्य तज्जातीयः साक्षी। स्त्रीणां स्त्रियोऽन्त्यजानामन्त्यजाः। यथावर्णं ब्राह्मणानां ब्राह्मणाः क्षत्रियादीनां क्षत्रियादयः। अभावे तु तत्तद्वर्णं विना सर्व्व एव॥*॥ अवरा इत्यस्यापवादमाह स एव।
"उभयानुमतः साक्षी भवेदेकोऽपि धर्म्मवित्।"
उभयानुमतत्वं धर्म्मवित्त्वञ्च नियतं तन्त्रम्। तदाह विष्णुः। अभिमतगुणसम्पन्नस्तूभयानुमतस्त्वेकोऽपि इति। अतएव श्रोत्रियमप्येकं निषेधयति हृद्धस्मृतिः।
"नव सप्त पञ्च वा स्युश्चत्वारस्त्रय एव वा।
उभौ तु श्रोत्रियौ ग्राह्यौ नैकं पृच्छेत् कदाचन॥
एको मिलितगुणसम्पन्नः प्रधानकल्पः। तदभावे उभयानुमतमात्रोऽपि ग्राह्यस्तदाह नारदः।
"उभयानुमतो यः स्याद्द्वयोर्विवदमानयोः।
भवत्येकोऽपि साक्षित्वे प्रष्टव्यः स्यात् स संसदि॥"
उभयानुमत एकोऽलुब्धत्वादिना सर्व्वजनप्रसिद्धश्चेत्तदा साक्षित्वे संसदि बहुजनसन्निधौ प्रष्टव्यः। तथात्वे स्त्रैरवैरादिसत्त्वेऽप्यकीर्त्तिभयात् सत्याभिधानसम्भवादित्याशयः। विचारस्य तत्त्वनिर्णयार्थत्वात्। तदाह मनुः।
"एकोऽप्यलुब्धः साक्षी स्यात् ब्रह्मः शुचोऽपि न स्त्रियः।
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येऽपि ये हताः॥"
एकोऽलुब्धस्तु साक्षी स्यादिति कुल्लूकभट्टधृतपाठः। एको लुब्धस्त्वसाक्षी स्यादिति जीमूतवाहनधृतपाठस्तु न युक्तः। लुब्धार्थं द बहवोऽप्यसाक्षिणो भवितुमर्हन्तीति। एकपदस्य व्यर्थतापत्तेः। भवतु वा तत्पाठः तथाप्येक इत्यनुरोधात् तन्निषेधमुखेनालुब्धस्यैकस्यानुमतिसत्त्वे धर्म्मवित्त्वमन्तरेण साक्षित्वं बोध्यम्। इत्यर्थतो न विरोधः। अतएव विश्वरूपप्रभृतीनां उभयानुमत एक एव साक्षीति व्याख्याने धर्म्मविदिति नोक्तम्। दोषैः स्तेयादिभिः। तथा च नारदः।
"स्तेनाः साहसिका धूर्त्ताः कितवा योधकाश्च ये।
असाक्षिणस्तु ते दुष्टास्तेषु सत्यं न विद्यते॥"
कितवा द्यूतकराः॥*॥ अपवादमाह उशनाः।
"दासोऽन्धो बधिरः कुष्ठी स्त्री बालः स्थविरादयः।
एतेऽप्यनभिसम्बन्धाः साहसे साक्षिणो मताः॥"
स्थविरो ग्लानेन्द्रियग्रामः। आदिशब्दात् कितवादयः। उभयानुमताभावे शुचिक्रियत्वादि गुणयुक्तश्चेको ग्राह्यः। तथा च व्यासः।
"शुचिक्रियश्च धर्म्मज्ञो योऽन्यत्राप्यनभूतवाक्।
प्रमाणमेकोऽपि भवेत् साहसेषु विशेषतः॥"
अनभूतवाक् स्थानान्तरे सत्यत्वेनेति। भवदेवभट्टोऽप्येवम्। कात्यायनः।
"अभ्यन्तरस्तु निःक्षेपे साक्ष्यमेकोऽपि दापयेत्।
अर्थिना प्रोहितः साक्षी भवेदेकोऽपि याचिते॥
संस्कृतं येन यत् पक्वं तत्तेनैव विभावयेत्।
एक एव प्रमाणं स विवादे परिकीर्त्तितः॥"
संस्कृतं गठितम्। पक्वं कुण्डलादि। विष्णुः। स्तेयसाहसवाग्दण्डपारुष्यसंग्रहणेषु साक्षिणो न परीक्षा इति। स्तेयपरदारगमनादिकार्य्याणां निष्कर्षेणैव क्रियमाणत्वात् देवादेव परं साक्षिणो भवन्तीति न परीक्षा इत्युक्तम्। तेषां वाक्यन्तु मित्रारिभावादिनिरूपणेनैवोपपत्त्यनुपपत्तिभ्यामालोचनीयं न तु वाक्यमात्रादिति व्यवहारमाहका॥ अतएव कात्यायनः।
"ऋणादिषु परीक्षेत साक्षिणः स्थिरकर्म्मसु।
साहसात्ययिकेनैव परीक्षा कुत्रचित् स्मृता॥"
इति॥*॥ श्रोत्रियादीनामसाक्ष्यमाह नारदः।
"श्रोत्रियास्तापसा दक्षा ये च प्रव्रजिता नराः।
वचनात्तेष्वसाक्षित्वं नात्र हेतुरुदाहृतः॥"
वचनादिति श्रोत्रियत्वादिरूपाभिधानात् न च तत्रान्यो हेतुरित्यर्थः। तथा च स्वोयवैदिककर्म्मकरणश्रुयतया परकीयकार्य्ये विस्मरणसम्भवात् साक्षित्वरूपलघुकार्य्यनियोगे तच्छ्राघयैव व्यवहारद्रष्टारोऽपि तत्र पृच्छन्तीति तत्साक्ष्यकरणानर्थक्याच्च न ते साक्षिणः कर्त्तव्याः। किन्त्वकृताः स्वयं साक्षिणो भवन्त्येव। उभौ तु श्रोत्रियौ स्यातामिति स्मृतेः। हृद्धस्यासाक्षित्वं हृद्धत्वादेव ग्लानेन्द्रियत्वादित्यर्थः॥*॥ मनुः।
"स्त्रीणां साक्ष्यं स्त्रियः कुर्य्युर्द्विजानां सदृशा द्विजाः।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः॥
अन्तर्वेश्मन्यरण्ये वा शरीरस्यात्ययेऽपि च।
स्त्रियाश्चसम्भवे कार्य्यं बालेन स्थविरेण वा।
शिष्येण बन्धुना वापि दासेन भृतकेन वा॥*॥
देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्।
उदङ्मुखान् प्राङ्मुखान् वा पूर्व्वाह्णे वै शुचिः शुचीन्॥
ब्रूहीति ब्राह्मणं पृच्छेत् सत्यं ब्रूहीति पार्थिवम्।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पातकैः॥"
गोबीजकाञ्चनापहारे यत् पापं तत्तत्वानृताभिधाने स्यादिति वैश्यम्। एतत् साक्ष्यानृताभिधाने भवान् सर्व्वैः पातकैः सम्बध्यते इत्युक्त्वा शूद्रञ्च पृच्छेत्।
"ब्रह्मघ्ना ये मृता लोके ये च स्त्रीबालघातिनः।
मित्रद्रुहः कृतघ्नाश्च ते ते स्युर्वदतो मृषा॥"
इति मनूक्तं दूषणम्॥ सत्फलञ्च।
"अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते॥"
इति मनुनारदोक्तं श्रावयेत्॥*॥ याज्ञवल्क्यः।
"न ददाति हि यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि॥"
कात्यायनः।
"अवीचिनरके वर्षं वसेयुः कूटसाक्षिणः।"
याज्ञवल्क्यः।
"सत्यां प्रतिज्ञां यस्योचुः साक्षिणः स जयी भवेत्
अन्यथा वादिनो यस्य ध्रुवस्तस्य पराजयः॥
वर्णानां हि वधो यत्र तत्र साक्ष्यनृतं वदेत्।
तत्पावनाय निर्व्वाप्यश्चरुः सारस्वतो द्विजैः॥"
गौतमः। नानृतवचने दोषो जीवनञ्चेत्तदधीनम्। न तु पापीयसो जीवनम्। इति।
"हैधे बह्वनां वचनं समेषु गुणिनां तथा।
गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तराः॥"
तेषामिति शेषः॥*॥ यत्तु।

"साक्षिणां लिखितानाञ्च निर्दिष्टानाञ्च वादिनाम्।
तेषामेकोऽन्यथावादी भेदात् सर्व्वेऽप्यसाक्षिणः॥"
इति कात्यायनवचनं तत् त्रयाणां तुल्यरूपाणां साक्षिणां मध्ये एकस्याप्यन्यथावादे अपरस्य तत्तुल्यस्य सत्प्रतिपक्षतया तृतीयस्य किञ्चिदादित्वे तत्र भेदात् परस्परविरुद्धार्थाभिधाने भेदात् साक्षिभ्यो न निर्णयः इति परम् ॥*॥
बृहस्पतिः। साक्षिद्वैधे कर्म्मनिष्ठानां ग्रहणमाह। गुणिद्वैधे क्रियावतामित्यनेन। तथा।
"साक्षिणोऽर्थिसमुद्दिष्टान् सत्सु दोषेषु दोषयेत्
अदुष्टं दूषयन् वादी तत्समं दण्डमर्हति॥" इति तत्समं विवादसमम्। सभासदादिविदितसाक्षिदूषणमेव ग्राह्यं न तु त्रावरादिसाक्षिभिः प्रतिपाद्यम्। अनवस्थापातात्। इत्याह नारदः।
"सभासदां प्रसिद्धं यल्लोकसिद्धमथापि वा।
साक्षिणां दूषणं ग्राह्यमसाध्यं दोषवर्ज्जनात्॥
अन्यैश्च साक्षिभिः साध्ये दूषणे पूर्व्वसाक्षिणाम्
अनवस्था भवेद्दोषस्तेषामप्यन्यसम्भवात्॥"
असाध्यं साधनानर्हम्। सिद्धत्वाद्दोषवर्ज्जनात्। अनवस्थाविरहात्। तस्मात् प्रसिद्धदूषणमेव ग्राह्यम् ॥*॥ दूषणमाह कात्यायनः।
"बालोऽज्ञानादसत्यात् स्त्री पापाभ्यासाच्च कूटकृत्।
विद्रूयात् बान्धवः स्नेहात् वैरनिर्यातनादरिः॥
यः साक्षी नैव निर्दिष्टो नाभूतो नैव दर्शितः।
ब्रूयाच्चिथ्येति तथ्यं वा दण्ड्यः सोऽपि नराधमः॥"
कात्यायनः।
"क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु
लेख्ये च सति वादेषु न दिव्यं न च साक्षिणः॥
समत्वं साक्षिणां यत्र दिव्यैस्तत्र विशोधयेत्॥"
एतत् संशयानुच्छेदे बोध्यम्। याज्ञवल्क्यः।
"निह्नुते लिखितानेकमेकदेशे विभावितः।
दाप्यः सर्व्वार्थमर्थान्न ग्राह्यस्त्वनिवेदितः॥"
यो लिखितानेकं सुवर्णादिकं अपलपति स एकद्रव्ये साक्ष्यादिभिर्व्विभावितः सन् सर्व्वान् दद्यात्। कात्यायनः।
"यत्रैकदेशग्राह्यापि क्रिया विद्येत मानुषी।
सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणाम्॥"
वदतां विवदतामित्यविशेषेण दर्शयति। पूर्णापि दैविकी समग्रविषयकापि न ग्राह्या। तेनैकदेशप्रतिपादिकया मानुष्या क्रियया समस्तसाध्यसिद्धिरिति।
"साध्यार्थांशे निगदिते साक्षिभिः सकलं भवेत्
स्त्रीसङ्गे साहसे चौर्य्ये यत् साध्यं परिकल्पितम्॥"
इतिकात्यायनवचनं तत्विषयप्रदर्शकम्। ऋणनिक्षेपाद्यपक्षेऽपि योज्यमिति ॥*॥ यत्तु।
"अनेकार्थाभियोगे तु यावत् संशोधयेद्धनी।
साक्षिभिस्तावदेवासौ लभते साधितं धनम्॥"
तदृणाद्यनभिज्ञपुत्रादिविषयकम्। तथा हि।
नानाविधपित्रर्णाद्यभियुक्तेनाजानता नाहं जानामीति उत्तरवादिना साक्ष्यादिभिर्यावहनं प्रतिपादयति तावदेव पुत्रेण दातव्यम्। एवमेव विश्वरूपजीमूतवाहनप्रभृतयः ॥*॥ कात्यायनः।
"अनुमानाद्दृढः साक्षी साक्षिभ्यो लिखितं गुरु
अनिरुद्धा त्रिपुरुषी भक्तिस्तेभ्यो गरीयसी॥"
अनुमानं प्रत्यासङ्गलिङ्गम्। तदाह मनुः।
"बाह्यैर्व्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम्।
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च॥"
स्वरो गद्गदादिः। वर्णोऽस्वाभाविकः। इङ्गितं स्वेदवेपथुरोमाञ्चादि। आकारो विकृतः। चक्षुषा कातरेण। चेष्टितेन स्थानत्यागादिना। एवाप्यन्यथासिद्धेर्दुर्निरूप्यत्वादेभ्यः साक्षी बलवान् इत्यर्थः। सुखनिरूप्यत्वे तु याज्ञवल्क्यः।
"देशादेशान्तरं याति स्फुरणं परिलेढि च।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च॥
परिग्रथ्यत्खलद्वाक्यो विरुद्धं बहु भाषते।
वाक् चक्षुः पूजयति नो तथौष्ठौ निर्भुजत्यपि॥
स्वभावाद्विकृतिं गच्छन्मनोवाक्कायकर्म्मभिः।
अभियोगे च साक्ष्ये च स दुष्टः परिकीर्त्तितः॥"
न परोक्षां वाचं प्रतिवचनेन पूजयति। तथौष्ठ चक्षुश्च परकीयवीक्षणेन निर्भुजति कुटिलीकरोति यदा मनोवाक्कायकर्म्मभिः स्वभावात् पूर्व्वोक्तां यथायोग्यां विकृतिं गच्छेत्तदा स दुष्टो इत्यर्थः। अतएव श्रीरामायणे।
"आकारश्चाद्यमानोऽपि न शक्योऽसौ निगूहितुम्।
बलादि विहृणोत्येव भावमन्तर्गतं नृणाम्॥"
आकारो देहधर्म्मः सुखाप्रसादवैवर्ण्यरूपः॥
नारदः।
"सुदीर्घेणापि कालेन लिखितं सिद्धिमाप्नुयात्
संजानन्नात्मनो लेख्यमजानंस्तत्तु लेखयेत्॥"
सुदीर्घेणेति संस्कारोद्बोधकलिखनसत्त्वादयं चिरेणापि साक्ष्यं दातुं शक्नोति इत्यर्थः ॥*॥
लिपिन्नं स्वहस्तेन लेखयेत् तदन्न परहस्तेनेत्याह व्यासः।
"अलिपिन्नो ऋणी यः स्यात् लेखयेत् स्वमतन्तु सः।
साक्षी वा साक्षिणान्येन सर्व्वसाक्षिसमीपगः॥"
बृहस्पतिः।
"सूचितं घातितं यच्च सीमायाश्च समन्ततः।
अकृतोऽपि भवेत् साक्षी ग्रामस्तच्च न संशयः॥"
अकृता अपि साक्षिणो भवन्तीत्याहतुर्म्मनुकात्यायनौ
"अन्ये पुनरनिर्दिष्टाः साक्षिणः समुदाहृताः।
ग्रामस्य प्राड्विवाकस्य राजा च व्यवहारिणाम्॥
कार्य्येष्वभ्यन्तरो यः स्यादर्थिना प्रहितश्च यः।
कुल्याः कुलविवादेषु भवेयुस्तेऽपि साक्षिणः॥"
स्मृतिः।
"दत्तादत्तेऽथ भृत्यानां स्वामिनां निर्गमे सति
विक्रीयादानसम्बन्धे क्रीत्वा धनमनिच्छति॥
द्यूते समाह्वये चैव विवादे समुपस्थिते।
साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेख्यकम्॥
प्रक्रान्ते साहसे वापि पारुष्ये दण्डवाचिके
बलोद्भवेषु कार्य्येषु साक्षिणो दिव्यमेव च॥"
बृहस्पतिः
"लेख्यं वा साक्षिणो वापि विवादे यस्य दूषिताः।
तस्य कार्य्यं न सिध्येत यावत्तन्न विशोधयेत्॥"
तल्लेख्यसाक्षिरूपप्रमाणम् ॥*॥ लेख्यशोधनमाह। कात्यायनः।
"सहस्तलेख्यसन्देहे जीवतो वा मृतस्य च।
तत् सहस्तलतैरन्यैः पत्रैस्तल्लेख्यनिर्णयः॥"
तथा।
"समवेतैश्च यद्दृष्टं वक्तव्यं तत्तथैव च।
विभिन्नैर्नैव कार्य्यं तु तद्वक्तव्यं पृथक् पृथक्॥
नादृष्टैरनियुक्तैर्वा समं सत्यं प्रयत्नतः।
वक्तव्यं साक्षिभिः साक्ष्यं विवादस्थानमागतैः॥
अनुद्विग्नेन चित्तेन दृष्टं सम्यग्विदा तु यत्।
प्रत्यक्षं तत् स्मृतं कार्य्यं साक्ष्यं साक्षी तु तद्दत्॥"
नारदः।
"यः परार्थेऽपहरति स्वां वाचं पुरुषाधमः।
आत्मार्थे किं न कुर्य्यात् स पापो नरकनिर्भयः॥
अर्था वै वाचि नियता वाङ्मूला वाग्विनिःसृता
यस्तु तांस्तेनयेद्वाचं स सर्व्वस्तेयकृन्नरः॥"
बौधायनः।
"पञ्च पञ्चनृते हन्ति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते॥
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन्।
सर्व्वं भूम्यनृते हन्ति साक्ष्ये साक्षी मृषा वदन्॥"
बृहस्पतिः।
"यस्यार्थेषु प्रतिज्ञातं साक्षिभिः प्रतिपादितम्।
स जयी स्यादन्यथा तु साध्यार्थं न समाप्नुयात्॥"
याज्ञवल्क्यः।
"उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तराः
द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्व्वसाक्षिणः॥"
अन्यथा पूर्व्वविपरीतार्थप्रकारेण। कूटा अनादेयवचनाः। तथा,—
"यः साक्ष्यं भावितोऽन्येभ्यो निह्नुते तमसाधुतः
स दाप्याऽष्टगुणं दण्डं ब्राह्मणञ्च विवासयेत्॥"
त्वमन्येभ्यः साक्ष्यं भावयेति वादिना प्रयुक्तो यः भावितः कारितश्चेत् पदसिद्धिः। एवम्भूतोऽपि सभायां निगदकाले साक्ष्यं निह्नुते यस्तस्याष्टगुणो दण्डः। इति व्यवहारतत्त्वम्॥ (त्रि, दृश्यः। इति श्रीधरस्वामी॥ यथा, भागवते। ५। ११। ७।
"तावानयं व्यवहारः सदावि-
द्येनान्यसाक्ष्यो भवति स्थूलसूक्ष्मः॥"
साक्षेयः, त्रि. (सख्युरिदम्। सखि + "वृद्धाच्छः।"४। २। ८०। इति छञ्।) सखिसम्बन्धी। इति सिद्धान्तकौमुदी॥
साक्ष्यं, क्ली, (सख्युर्भावः कर्म्म वा। सखि + ष्यञ्।) सख्यम्। इति धनञ्जयकोषः॥

सागरः, पुं, (सगरस्य राज्ञोऽयमिति । सगर + अण् ।) समुद्रः । इत्यमरः । १ । १० । १ ॥ सगरेणावतारितत्वात् तस्यायमिति ष्णे सागरो दन्त्यादिः । क्षीरोदादिष्वप्युपमया सागरव्यपदेशः इति भट्टाः । इति भरतः ॥ स तु सप्तविधः । यथा,—

"लवणः क्षीरसंज्ञश्च घृतोदो दधिसंज्ञकः ।
सुरोदेक्षुरसोदौ च स्वादूदः सप्तमो भवेत् ॥
चत्वारः सागरा ख्याताः पुष्करिण्यश्च ताः स्मृताः ॥"

इत्याद्य वह्निपुराणे गणभेदनामाध्यायः ॥ * ॥ (सगरस्यापत्यं पुमानिति । सगर + अण् । सगरपुत्रः । यथा, महाभारते । ३ । १०७ । ७ ।

"वध्यमानास्ततो लोकाः सागरैर्मन्दबुद्धिभिः ।
ब्रह्माणं शरणं जग्मुः सहिताः सर्व्वदेवतैः ॥") मृगविशेषः । इति शब्दचन्द्रिका ॥ दशपद्मसंख्या । यथा,—

"विन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः ॥"

इति ब्रह्माण्डपुराणम् ॥

(सागरस्येदमिति । सागरसम्बन्धिनि, त्रि । यथा, हरिवंशे । ५३ । ३८ ।

"आधत्स्व सरितां नाथ त्वङ्गे मां सागरीं तनुम् ॥")

सागरगामिनी, स्त्री, (सागरं गच्छतीति । गम + णिनिः । ङीप् ।) नदी । इति त्रिकाण्डशेषः ॥ (वाच्यलिङ्गेऽपि दृश्यते । यथा, रघुः । ६ । ५२ ।

नृपं तमावर्त्तमनोभिनाभिः
सा व्यत्यगादन्यवधूर्भवित्री ।
महीधरं मार्गवशादुपेतं
स्रोतोवहा सागरगामिनीव ॥")

सूक्ष्मैला । इति राजनिर्घण्टः ॥

सागरनेमिः, स्त्री, (सागरः नेमिरिव यस्याः ।) पृथिवी । इति हेमचन्द्रः ॥

सागरमेखला, स्त्री, (सागरः मेखलेव यस्याः ।) पृथिवी । इति हेमचन्द्रः ॥ (वाच्यलिङ्गेऽपि दृश्यते । यथा, महाभारते । ३ । १०७ । ६४ ।

"अनुशासानपि धर्म्मात्मा महीं सागरमेखलाम् ।
प्रशशास महाराज ! यथैवास्य पितामहः ॥")

सागराम्बरा, स्त्री, (सागरः अम्बरं वस्त्रमिव यस्याः ।) पृथिवी । इति हेमचन्द्रः ॥ (यथा, रघुः । ३ । ८ ।

"निधानगर्भामिव सागराम्बरां
शमीमिवाभ्यन्तरलीनपावकाम् ।
नदीमिवान्तःसलिलां सरस्वतीं
नृपः ससत्त्वां महिषीममन्यत ॥")

सागरालयः, पुं, (सागरः आलयो यस्य ।) वरुणः । इति शब्दमाला ॥

सागरोत्थं, क्लीं, (सागरादुत्तिष्ठतीति । उत् + स्था + कः ।) समुद्रलवणम् । इति राजनिर्घण्टः ॥

साङ्कलं, त्रि, (सङ्कल + "सङ्कलादिभ्यश्च ।" ४ । २ । ७५ । इति अञ् ।) सङ्कलेन निर्व्वृत्तम् । सङ्कलनाज्ञातम् । इति सिद्धान्तकौमुदी ॥

साङ्कृतिः, पुं, मुनिविशेषः । स तु वैयाघ्रपद्यगोत्रस्य प्रवरः । यथा,—

"वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च ।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे ॥"

इति तिथ्यादितत्त्वम् ॥

साङ्केपिकः, त्रि, (सङ्केपाय हितः । सङ्केप + ठञ् ।) संक्षिप्तः । इति सिद्धान्तकौमुदी ॥ (यथा, मनुटीकायां कुल्लूकः । १२ । ३४ ।

"इदं वक्ष्यमाणं साङ्केपिकं क्रमेण लक्षणं ज्ञातव्यम् ॥") संक्षेपकारकः । संक्षेपशब्दात् णिक-प्रत्ययनिष्पन्नः ॥

साङ्ख्यः, पुं, कपिलमुनिकृतदर्शनशास्त्रविशेषः । तत्पर्य्यायः । कापिलः २ । इति हेमचन्द्रः ॥ तथा च ।

"साङ्ख्यं कपिलमुनिना प्रोक्तं
संसारविमुक्तिकारणं हि ।
यत्रैताः सप्ततिरार्य्या
भाष्यं चात्र गौड़पादकृतम् ॥
एतत् पवित्रमग्र्यं
मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय
तेन च बहुधा कृतं तन्त्रम् ॥
शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्य्याभिः
संक्षिप्तमार्य्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥
सप्तत्यां किल येऽर्था-
स्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिका विरहिताः
परवादविवर्জ্জिताश्चापि ॥"

इति साङ्ख्यप्रवचनभाष्यम् ॥

साङ्ख्ययोगः, पुं, (साङ्ख्योक्तो योगः ।) ज्ञानयोगः । स च ब्रह्मविद्या । यथा,—

"द्वौतीयं शोकसन्तप्तमज्ञानं ब्रह्मविद्यया ।
प्रतिबोध्य हरियत्रे स्थितप्रज्ञस्य लक्षणम् ॥"

इति गीताटीकायां श्रीधरस्वामी । २ । १ ॥

तद्योगो यथा,—

श्रीभगवानुवाच ।

"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥
न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्व्वे वयमतः परम् ॥
देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥
मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥
यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥
नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ।
अविनाशि तु तद्विद्धि येन सर्व्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्त्तुमर्हति ॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्मात् युध्यस्व भारत ॥
य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥
न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥
वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ ! कं घातयति हन्ति कम् ॥
वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्व्वगतः स्थाणुरचलोऽयं सनातनः ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥
अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो ! नैनं शोचितुमर्हसि ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि ॥"

इत्यादि श्रीभगवद्गीतायां साङ्ख्ययोगे । २ । ११—३० ॥ * ॥

साङ्गमः, पुं, (सङ्गम एव । स्वार्थे अण् ।) सङ्गमः । इत्यमरटीकायां भरतः । ३ । २ । १८ ॥

साङ्ग्रामिकः, पुं, (संग्रामे साधुः । संग्राम + "गुड़ादिभ्यष्ठञ् ।" ४ । ४ । १०३ । इति ठञ् ।) सेनापतिः । सङ्ग्रामकुशले, त्रि । इति सिद्धान्तकौमुदी ॥ (सङ्ग्रामसम्बन्धिनि च त्रि । यथा, महाभारते । १ । २ । २३२ ।

"ते तस्य वचनं श्रुत्वा मन्त्रयित्वा च यद्धितम् ।
साङ्ग्रामिकं ततः सर्व्वं सज्जं चक्रुः परन्तपाः ॥")

साङ्मुख्ये, स्त्री, (सङ्मुखाय हिता । सङ्मुख + अण् । ङीप् ।) सायाह्नव्यापिनी तिथिः । यथा,—

"पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपच्चैव कर्त्तव्या साङ्मुखी तिथिः ॥"

इति पैठीनसिवचनस्य तु ।

'साङ्मुख्यं नाम सायाह्नव्यापिनी दृश्यते यदा ।'

इति स्कन्दपुराणेन सायाह्नव्यापितिथेः साङ्मुख्यविधानेन पूजादावनवकाशादुपवासपरत्वम् । सायाह्नव्यापित्वमपि सुङ्कर्त्तान्यूनत्वेन ग्रेयम् ॥

इति तिथ्यादितत्त्वम् ॥

साचि, व्यं, (सच + इण् ।) तिर्य्यगर्थः । तत्पर्य्यायः । तिरः २ । इत्यमरः । ३ । ४ । ६ ॥ (यथा, किराते । १० । ५७ ।

"सविनयमपराभिसृत्य साचि
स्मितसुभगैकलसत्कपोललक्ष्मीः ॥")

साचिव्यं, क्लीं, (सचिव + ष्यञ् ।) सचिवस्य भावः । सचिवशब्दात् भावे ष्यञ्प्रत्ययेन निष्पन्नम् ॥ (यथा, रामायणे । ५ । ५ । १ ।

"चन्द्रोऽपि साचिव्यमिवास्य कुर्व्वं-
स्तारागणैर्मध्यगतो विराजन्।
ज्योत्स्नावितानेन निपत्य लोका-
नुत्तिष्ठतेऽनेकसहस्ररश्मिः॥")

साचिवाटिका, स्त्री, (साचि यथा तथा वटति वेष्टयतीति। वट वेष्टने+ण्वुल्। टापि अत इत्वम्। यद्वा खेतपुनर्नवा। इति रत्नमाला॥

साचीकृतं, त्रि, (असाचि साचि कृतम्। अभूततद्भावे चिः।) वक्रीकृतम्। इति सिद्धान्तकौमुदी॥ (यथा, रघुः। ६। १४।

"प्रालम्बमुत्कृष्य यथावकाशं
निनाय साचीकृतचारुवक्त्रः॥")

साञ्जनः, पुं, (अञ्जनेन तदच्छरीरेण सह वर्त्तमानः।) कृकलासः। इति शब्दचन्द्रिका॥ (अञ्जनविशिष्टे, त्रि॥)

साट, त क प्रकाशने। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-अक०-सेट्।) द्वितीयस्वरयुक्तसकारादिरयम्। अससाटत्। इति दुर्गादासः॥

सात्, क्ली, (सात सुखे+क्विप्।) ब्रह्म। इति केचित्॥

सात, क सुखे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) दन्त्यादिः। सातयः। सौत्रधातुरयम्। इति दुर्गादासः॥

सातं, क्ली, (सात सुखे+अच्।) सुखम्। इत्यमरटीकायां भरतः॥ दत्तम्। नष्टम्। षणधातोः षोधातोश्च क्तप्रत्ययेन निष्पन्नम्॥

सातयः, त्रि, (सातयतीति। सात सुखे+अनुपसर्गात् लिम्पविन्देति।" ३। १। १३८। इति शः।) सुखजनकः। सात क सुखे इत्यस्मात् औ शप्रत्ययेन निष्पन्नः। इति मुग्धबोधटीकायां दुर्गादासः॥

सातला, स्त्री, (सातं सर्पविषादिनाशं लातीति। ला+कः।) चर्म्मकषा। इत्यमरः २।४।१४३॥ क्षुपविशेषः। स तु सेहुण्डभेदः। तत्पर्य्यायः। सप्तला २ सारी ३ बिन्दुला ४ विमला ५ अमला ६ बहुफेना ७ चर्म्मकषा ८ फेना ९ दीप्ता १० विषाणिका ११ स्वर्णपुष्पी १२ पत्रघना १३। अस्या गुणाः। कफपित्तघ्नत्वम्। लघुत्वम्। तिक्तत्वम्। कषायत्वम्। विसर्पविषनिस्फोटव्रणशोफनाशित्वञ्च। इति राजनिर्घण्टः॥

सातवाहनः, पुं, (सातः वाहनो यस्यः।) शालिवाहनराजः। इति हेमचन्द्रः॥ (सातनामकेन गुह्यकेनोढ़त्वादस्य तथा नाम। यथा, कथासरित्सागरे। ६। १०७—१०८।

"इत्युक्त्वान्तर्हिते तस्मिन् सातनामनि गुह्यके।
स राजा तं समादाय बालं प्रत्याययौ गृहम्॥
सातेन यस्मादूढ़ोऽभूत्तस्मात्तं सातवाहनम्।
नाम्ना चकार कालेन राज्ये चैनं न्यवेशयत्॥")

सातिः, स्त्री, (सन+क्तिन्। "जनसनखनामिति ६।४।४२। इति आत्वम्। यद्वा, सनु दाने+क्तिन्। "क्तिति-यूति-जूति-सातीति।" ३।३।९७। इति इत्वाभावो निपात्यते।) अवसानम्। दानम्। तीव्रवेदना। इत्यमरभरतौ॥ (संभजनम्। इति ऋग्भाष्ये सायणः॥ यथा, ऋग्वेदे। १०। १४३। ५।

"यातमच्छा पतत्रिभिर्नासत्या सातये कृतम्॥")

सातिसारः, त्रि, (अतिसारेण सह वर्त्तमानः।) अतिसाररोगयुक्तः। तत्पर्य्यायः। अतिसारकी २। इत्यमरः। २। ४। ५९॥

सातीलकः, पुं, (सतीलक एव। स्वार्थे अण्।) सतीलकः। इत्यमरटीकायां रायमुकुटः। २। ९। १६॥

सात्त्व (त्व) तः, पुं, (सात्वतस्यापत्यं पुमानिति। +अञ्।) बलदेवः। इति हेमचन्द्रः॥ (कृष्णः। यथा, महाभारते। १। २१९। १२।

"ततस्तत्र महाबाहुः शयानः शयने शुभे।
आपगानां वनानाञ्च कथयास सात्वते॥"

यादवमात्रे। यथा, तत्रैव। १। २२२। ३।

"अर्थलुब्धान् न वः पार्थो मन्यते सात्वतान् सदा।
स्वयंवरमनाधृष्यं मन्यते चापि पाण्डवः॥"*॥

सत्त्वमेव सात्त्वं तत् तनोतीति। तन+डः।) विष्णुः। इति चिकाण्डशेषः॥ (सच्छब्देन सत्त्वमूर्त्तिर्भगवान्। स उपास्यतया विद्यतेऽस्येति। मतुप्। ततः स्वार्थे अण्।) विष्णुभक्तविशेषः। यथा,—

"सत्त्वं सत्त्वाश्रयं सत्त्वगुणं सेवेत केशवम्।
योऽनन्यत्वेन मनसा सात्त्वतः समुदाहृतः॥
विहाय कास्यकर्म्मादीन् भजेदेकाकिनं हरिम्
सत्यं सत्त्वगुणोपेतो भक्त्या तं सात्त्वतं विदुः॥
मुकुन्दपादसेवायां तन्नामश्रवणेऽपि च।
कीर्त्तने च रतो भक्तो नान्यः स्यात् स्मरणे हरेः॥
वन्दनार्च्चनयोर्भक्तिरनिशं दास्यसख्ययोः।
रतिरात्मार्पणे यस्य दृढ़ानन्तस्य सात्त्वतः॥"

इति पाद्मोत्तरखण्डे ९९ अध्यायः॥*॥

यदुवंशीय सत्त्वतराजपुत्रः। यथा,—

"अनोस्तु पुरुकुत्सोऽभूदंशस्तस्य तु रिक्थभाक्।
अथांशोः सत्त्वतो नाम विष्णुभक्तः प्रतापवान्॥
महात्मा दाननिरतो धनुर्व्वेदविदां वरः।
स नारदस्य वचनाद्दासुदेवार्च्चनान्वितः॥
शास्त्रं प्रवर्त्तयामास कुण्डगोलादिभिः श्रुतम्।
तस्य नाम्ना तु विख्यातं सात्त्वतं नाम शोभनम्॥
प्रवर्त्तते महाशास्त्रं कुण्डादीनां हितावहम्।
सात्त्वतस्तस्य पुत्रोऽभूत् सर्व्वशास्त्रविशारदः॥
पुण्यश्लोको महाराजस्तेन चैतत् प्रकीर्त्तितम्।
सात्त्वतः सत्त्वसम्पन्नः कौशल्यान् सुषुवे सुतान्॥
अन्धकं वैभजं भोजं विष्णुं देवर्षिधं नृपम्॥"

इति कौर्म्मे पूर्व्वभागे यदुवंशानुकीर्त्तने। २४। ३१—३६॥ (सङ्करजातिविशेषः यथा, मनुः। १०। २३।

"वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च।
कारूषश्च विजन्मा च मैत्रः सात्त्वत एव च॥")

सात्त्व(त्व)ताः पुं, भूम्नि, देशभेदः। यथा,—

"यदवस्तु दशार्हाः स्युः सात्त्वताः कुकुराश्च ते।"

इति चिकाण्डशेषः॥

सात्त्व(त्व)ती, स्त्री, नाटकवृत्तिविशेषः। यथा,—

"अभिनेयप्रकाराः स्युर्भाषाः षट् संस्कृतादिकाः।
भारती सात्त्वती कैशिक्यारभट्यौ च वृत्तयः॥"

इति हेमचन्द्रः॥

(यथा, शृङ्गारतिलके। ३। ४२—४३।

"हर्षप्रधानाधिकसत्त्ववृत्ति-
त्यागोत्तरोदारवचोमनोज्ञा।
आर्य्यसम्पत्सुभगा च या स्या-
त्सा सात्त्वती नाम मतात्र वृत्तिः॥
नातिगूढ़ार्थसम्पत्तिः श्रव्यशब्दमनोरमा।
वीरे रौद्रेऽद्भुते शान्ते वृत्तिरेषा मता यथा॥
लक्ष्मास्त्वं जनको निधिश्च पयसां निःशेषरत्नाकरो
मर्य्यादानिरतस्त्वमेव जलधे! ब्रूतेऽत्र कोऽन्यादृशम्।
किं त्वेकस्य गृहं गतस्य बड़वावक्त्रैः सदा लक्ष्यया
क्लान्तस्योदरपूरणेऽपि न सहो यत्तन्मनाक्षम्यताम्॥
स्फारितोत्कटकठोरतारका-
कौर्णवक्त्रिकणसंततिः क्रुधा।
दुर्निमित्ततड़िदाकृतिर्बभौ
दृष्टिरिष्टसमरांशुमालिनः॥
अत्यद्भुतं नराधिप तव कीर्तिर्धवलयत्यप्यजगन्ति।
रक्तान् करोति सुहृदो मलिनयति च वैरिवदनानि॥
निवृत्तविषयासङ्गमधुना सुचिराय मे।
आत्मन्येव समाधानं मनः केवलमिच्छति॥"*॥

सात्त्वतस्यापत्यं स्त्री। सात्त्वत+अञ्। ङीप्।) शिशुपालमाता। इति केचित्॥ (यथा, महाभारते। २। ४५। ६।

"एष नः प्रथमस्तात पार्थिवः सात्त्वतीसुतः।
सात्त्वतानां नृशंसात्मा न हितोऽनपकारिणाम्॥"

सुभद्रा। यथा, महाभारते। १। २२२। ६६।

"स सात्त्वत्यामधिरथः सम्भृत्य धनञ्जयात्।
मखे निर्मथनेनेव शमीगर्भादुताशनः॥")

सात्त्विकः, पुं, (सत्त्वात् सत्त्वगुणप्रधानात् विष्णोर्भूतः। सत्त्व+ठञ्।) ब्रह्मा। (सात्त्वं सत्त्वगुणोऽस्यास्तीति। ठन्। विष्णुः। इति महाभारतम्। १३। १४८। १०६॥) त्रिविधभावान्तर्गतभावविशेषः। इति हेमचन्द्रः॥ तस्य लक्षणं यथा,—

"सत्त्वोत्कटे मनसि ये प्रभवन्ति भावा-
स्ते सात्त्विका इति विदुर्मुनिपुङ्गवास्ते।"

इति सर्व्वानन्दः॥

ते च यथा,—
"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः॥"
प्रलयो मूर्च्छा। इति भरतः॥
सात्त्विकः, त्रि, (सत्त्वेन निर्वृत्तः। तेन निर्वृत्तमिति ठञ्।) सत्त्वगुणनिष्पादितः। इत्यमरः। १। ७। १६॥ सत्त्वं मनोगुण आशयो वा तेन निष्पादितः सात्त्विकः स्वेदादिः। सत्त्वशब्दात् दृष्टं कादिति ष्ठिकः। इति भरतः॥*॥ सत्त्वगुणयुक्तः। तद्विवरणं यथा, गीतायाम्। १७।४।
"यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥"
सात्त्विकयज्ञो यथा, गीतायाम्। १७। ११।
"अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥"
सात्त्विकतपो यथा, तत्रैव। १७। १७।
"श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥"
सात्त्विकदानं यथा, तत्रैव। १७। २०।
"दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥"
सात्त्विकयोगो यथा, तत्रैव। १८। ८।
"कार्य्यमित्येव यत् कर्म्म नियतं क्रियतेऽर्জ্জুন।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः॥"
सात्त्विकज्ञानं यथा, तत्रैव। १८। २०।
"सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥"
सात्त्विककर्म्म यथा, तत्रैव। १८। २३।
"नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म्म यत्तत् सात्त्विकमुच्यते॥"
सात्त्विकबुद्धिर्यथा, तत्रैव। १८। ३०।
"प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥"
सात्त्विकी धृतिर्यथा, तत्रैव। १८। ३३।
"धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ!
सात्त्विकी॥"
सात्त्विकसुखं यथा, तत्रैव। १८। ३७।
"यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्॥"
सात्त्विकपुराणानि यथा,—
"वैष्णवं नारदीयञ्च तथा भागवतं शुभम्।
गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै॥"
सात्त्विकस्मृतयो यथा,—
"वाशिष्ठधर्म्मं च हारीतं व्यासं पाराशरं तथा।
भारद्वाजं काश्यपञ्च सात्त्विका मुनिदाः
शुभाः॥"
इति पाद्मोत्तरखण्डे ४१ अध्यायः॥
सात्त्विकप्रियाहारा यथा,—
"आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः
सात्त्विकप्रियाः॥"
इति श्रीभगवद्गीतायाम्। १७। ८॥
सात्त्विककर्त्ता कर्त्तृशब्दे सात्त्विकाहार आहारशब्दे च द्रष्टव्यः॥
सात्त्विकी, स्त्री, (सात्त्वं सत्त्वगुणोऽस्त्यस्या इति। सात्त्व+ठन्। ङीप्।) दुर्गा। इति शब्दरत्नावली॥ पूजाविशेषः। यथा,—
"शारदी चण्डिकापूजा त्रिविधा परिगीयते।
सात्त्विकी राजसी चैव तामसी चेति तत्
शृणु॥"
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः।
माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम्।
पाठस्तस्य जपः प्रोक्तः पठेद्वैमनास्तथा॥"
इति दुर्गोत्सवतत्त्वम्॥
सात्म्य, त्रि, सुखजनकम्। आत्मनो हितं कर्म्म आत्मं आत्मेन सह वर्त्तमानं सात्म्यम्। इति भैषज्यरत्नावली॥ (यथा, सुश्रुते। १। ४५।
"सर्व्वप्राणभृतां तस्मात् सात्म्यं क्षीरमिहोच्यते॥"
"सात्म्यं नाम तदृयत् सातत्येनोपसेव्यमानमुपयोगेते। तत्र ये घृतक्षीरतैलमांसरसलवणाम्लाः सर्व्वरससात्म्याश्च ते बलवन्तः क्लेशसहाः चिरजीविनश्च भवन्ति। रूक्षनित्याः पुनरेकरससात्म्याश्च ये ते प्रायेणाल्पबलायाक्लेशासहाः अत्यायुषोऽल्पसाधनाश्च।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥
"यो रसः कल्पते यस्य सुखायैव निषेवितः।
व्यायामजातमन्यद्वा तत्तात्म्यमिति निर्दिशेत्॥"
इति सुश्रुते सूत्रस्थाने ३६ अध्याये॥
क्ली, देवत्वम्। यथा, भागवते। ६।१८।२०
"इन्द्रेण प्रापिताः सात्म्यं किं तत् साधु
कृतं हि तैः॥"
सारूप्यम्। यथा, तत्रैव। ७। १०। ४०।
"नृपायैद्यादयः सात्म्यं हरेस्तच्चिन्तया ययुः॥")
सात्यकिः, पुं, (सत्यकस्यापत्यं पुमानिति। इञ्।) वृष्णिवंशीयसत्यकपुत्रः। स तु श्रीकृष्णस्य सारथिः। तत्पर्य्यायः। शैनेयः २ शिनिनप्ता ३ युयुधानः ४। इति त्रिकाण्डशेषः॥ योधः ५। इति जटाधरः॥ (अयं हि अर्জ্জুनस्य शिष्य आसीत् भारतयुद्धे युधिष्ठिरपक्षमाश्रित्य तुमुलं युद्धं विधाय च हतोऽपि निखिलबले वासुदेवेन पाण्डवैश्च सह जीवित आसीत्। तथाहि महाभारते अश्वत्थामवाक्ये। १०। ८। ४७।
"सप्त पाण्डवतः श्रेया धार्त्तराष्ट्रास्त्रयो वयम्।
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः।
अहञ्च कृतवर्म्मा च कृपः शारद्वतस्तथा॥)"
सात्यवतः, पुं, (सत्यवत्यां भवः। अण्।) वेदव्यासः। इति त्रिकाण्डशेषः॥
सात्यवतेयः, पुं, (सत्यवत्या अपत्यं पुमान् सत्यवती+ढक्) सत्यवतीसुतः। वेदव्यासः। इति हलायुधः॥

सादः, पुं, (सद+घञ्।) विषादः। (यथा, रघुः। ३। २।
"शरीरसादादसमग्रभूषणा
मुखेन सालक्ष्यत लोध्रपाण्डुना॥")
शरणम्। गतिः। (यथा, बृहत्संहितायाम्। ४६। ६०।
"यानं वाहवियुक्तं यदि गच्छेन्न व्रजेच्च वाहनयुतम्।
राष्ट्रभयं भवति तदा चक्राणां सादभङ्गे च॥")
सादनं, क्ली, (सद+स्वार्थे णिच्+ल्युट्।) सदनम्। इत्यमरटीकायां भरतः॥ (यथा, महाभारते। १। १५४। २८।
"अहमेको नयिष्यामि त्वामद्य यमसादनम्॥")
सादनी, स्त्री, (साद्यन्ते रोगा अनया। सद+णिच्+करणे ल्युट्। ङीप्।) कटुकी। इति राजनिर्घण्टः॥
सादिः, पुं, (सद गतौ+"वसिवपियजीति।" उणा० ४। १२४। इति इञ्।) सारथिः। इति हेमचन्द्रः॥ योद्धा। इत्युणादिकोषः॥ अवसन्नः। वायुः। इति संक्षिप्तसारोणादिवृत्तिः॥
सादितः, त्रि, (सद+णिच्+क्तः।) विषादितः। (यथा, रघुः। ७। ४४।
"यैः सादिता लक्षितपूर्व्वकेतून्
तानेव सामर्षतया निजघ्नुः॥)
शरणप्रापितः। गमितः। इति ऋान्तसदधातोः क्तप्रत्ययेन निष्पन्नः॥
सादी, [न्]पुं, (सद गतौ+णिनिः।) अश्वारूढः। इत्यमरः। २। ८। ६०॥ (यथा, रघुः। ७। ४७।
"पूर्व्वं प्रहर्त्ता न जघान भूयः
प्रतिप्रहारात्तमसह्यसादी॥")
गजारोहः। रथारोहः। इति मेदिनी॥
सादृश्यं, क्ली, (सदृशस्य भावः। सदृश+ष्यञ्।) सदृशत्वम्। तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वम्। यथा, चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यम्। इति सिद्धान्तमुक्तावली॥*॥ अथ सादृश्यानि। वेष्णाः सर्पः १ भ्रमरश्रेणिः २। केशपाशस्य चामरः १ मयूरपुच्छः २। धम्मिल्लस्य विधुन्तुदः १ अन्धकारः २। सीमन्तस्य मेघः १ पत्याः २ दण्डः ३। ललाटस्य अष्टमीचन्द्रः १ फलकम् २। कपोलस्य चन्द्रः १ मुकुरस्थलम् २। भ्रुवोः खड्गः १ धनुर्यष्टिः रेखा ३ पल्लवः ४ वल्लिः ५। दृशोः चकोरचक्षुः १ हरिणचक्षुः २ मदिरा ३ खञ्जनः ४ अम्बुजम् ५ कुमुदम् ६ नीलपद्मम् ७ प्राष्टीमत्स्यः ८। कर्णस्य दोला १ पाशः २। नासायाः वंशः १ केतकीपुष्पकण्टकः २ अधोमुखतूणीरः ३ चञ्चुः ४ तिलपुष्पम् ५ दण्डः ६। अधरस्य नवपल्लवम् १ बिम्बफलम् २ प्रवालः ३। दन्तानाम् मुक्ताश्रेणिः १ कुन्दपुष्पम् २ दाडिमबीजम् ३ हीरकम् ४। स्मितस्य ज्योत्स्ना १ पुष्पम् २ पीयूषम् ३। श्वासस्य पद्मगन्धः १

मुक्ताशीतलम् २। जिह्वायाः जवापुष्पम् १ चञ्चलवस्तु २। वाण्याः कोकिलशब्दः १ भ्रमरगुञ्जनम् २ सुधा ३ मधु४ वीणावाद्यम् ५। मुखस्य चन्द्रः १ पद्मम् २ दर्पणम् ३। कण्ठस्य शङ्खः १। चिबुकस्य दर्पणदन्तम् १। अंसस्य कुम्भः १। बाह्वोः वल्लरी१ मृणालम्२ तरङ्गः३ शाखा ४ पाशः ५। हस्तस्य मृणालादयः १। अङ्गुल्याः पल्लवम् १ पद्मदलम् २ चम्पकपुष्पम्३ नवदलम् ४ दीपः५। नखानां रत्नम्१ ताराः २ पुष्पम्३ चन्द्रः४। स्तनयोः पद्मसुकुलम्१ घटः २ हस्तिकुम्भः ३ गिरिः ४ चक्रवाकः ५ बिल्वयुग्मम्६। मध्यस्य वरटकमध्यम् १ सिंहमध्यम्२ वज्रमध्यम्३ क्षीणद्रव्यम् ५। लोमश्रेण्याः रेखा १ नीलकान्तमणिशिखा २ शैवाललता ३ धूमलता ४ हस्तिशुण्डः५। नाभेः आवर्त्तः १ पद्मम्२ ह्रदः ३ विवरम् ४ कूपः ५। त्रिवल्याः तरङ्गः १ सोपानम् २ निम्नश्रेणी ३। जघनस्य पुलिनम् १ पीठः२ फलकम्३। नितम्बस्य स्थलम्१ पर्व्वतः२ पृथिवी ३ स्थूलोपलम् ४ महाहस्तः ५। ऊर्व्वोः कदलीकाण्डः १ करिकरः २। जङ्घयोः स्तम्भः १। पादस्य पद्मम्१ नवपल्लवम् २। गतेः हंसगमनम् १ हस्तिगमनम् २ खञ्जनगमनम् ३॥

पुरुषस्त्रियोरौचित्येन साहश्यं वर्णनीयम्। पुरुषरूपे कोऽपि कुत्रचिद् विशेषो लिख्यते। स्कन्धस्य वृषस्कन्धः१ वज्रम् २ अश्वस्कन्धः ३। बाह्वोः वृक्षसर्पः १ हस्तिशुण्डः २ स्तम्भः ३ अर्गलदण्डः। वक्षसः शिला १ कवाटम् २। गतेः प्रमत्तानुद्भटगतिः १। यशसः चन्द्रकुन्दयूथिकाप्रभृतिशुक्लवर्णपदार्थाः १। प्रतापस्य अग्निः १ वाडवाग्निः २ रविः ३ रविकिरणादिः ४ जवापद्मप्रभृतिरक्तवर्णपदार्थाः ५। पुण्यस्य संस्कारः १ गौः २ वृक्षबीजम् ३ अङ्कुरः ४ शुक्लवर्णपदार्थाः ५। सामर्थ्यस्य महाहस्तः १ सिंहविक्रमादिः २। नीतेः साध्वी स्त्री १ प्रदीपज्वाला २ लतादिः ३। आम्नायाः वेदवाक्यम् १ गुरूपदेशः२ उत्कटेच्छादिः ३। शासनस्य प्रारब्धकर्म्म १ स्थिरवस्तूनि २। पापस्य कर्द्दमः १ कलङ्कः २ अकीर्त्तिः ३ कृष्णवर्णकैगमसीप्रभृतिवस्तूनि४ अन्धकारः५। अकीर्त्तेः मालिन्यम्१ कृष्णवर्णवस्तूनि२ अन्धकारः ३। कस्तूरिकायाः मेघः १ भ्रमरः २ नीलकान्तमणिः३ कज्जलम्४ सुगन्धिद्रव्यदाहजन्यधूमः ५ कृष्णवर्णपुष्पप्रभृतिः ६ स्थलविशेषः कन्दर्पायशः७ कामुकायशः८ कामिन्ययशश्च ९ कज्जलस्य पूर्व्वोक्तमेघादीनि९। कर्पूरस्य चन्द्रः१ चन्द्रकिरणः२ कुन्दयूथिकादिपुष्पम्३ हिण्डीरपिण्डः ४ विरहिगण्डप्रभृतिः ५। मनोरथस्य फलपुष्पादियुक्तवृक्षः १ कविबुद्धिरचना २। आनन्दस्य सुधासमुद्रः१ ब्रह्मसाक्षात्कारादिः२। कामिन्यवलोकनस्य नित्यसुखसाक्षात्कारः १ अमृतरसः २ पूर्णचन्द्रादिसाक्षात्कारः ३ अतिप्रियतमवस्तुप्राप्तिः ४ ब्रह्मसाक्षात्कारः ५। अमृतस्य कामिन्यधरादिः१ सत्काव्यम् २ ब्रह्मसाक्षात्कारः ३। विषस्य साध्वीस्त्रीविरहः १ पापम्२ मलिनवस्तु३ दुःखदवस्तु ४ग्रीष्माग्निः५ शीतकालीनशीतोदकम्६ व्यभिचारिणीभार्य्या७। विरहस्य अग्निः १ आधिः २ यातना ३ समुद्रः ४ तमोवस्तु ५ दुःखदवस्तूनि ६। पुण्यानां चन्द्रादिः १ कामिनी २ कर्पूरम् ३ यशः ४। चन्द्रस्य प्रमदामुखम् १ अतिशुभ्रवस्तु२ यशःपुष्पादिः ३। सूर्य्यस्य शिवनेत्राग्निः १ जवापुष्पम् २ वसन्तकालीनपलाशवृक्षः ३ काञ्चनवृक्षः ४ वाडवाग्निः ५। पद्मस्य पाटलपुष्पम् १ कामिनीमुखादिः २ रक्तवर्णद्रव्यम्। इन्दीवरस्य नीलकान्तमणिः१ कस्तूरी २ कामिनीनेत्रम् ३। कैरवस्य चन्द्रः १ कुन्दादिशुक्लवर्णवस्तु २। राज्ञः इन्द्रः १ कुबेरः २ चन्द्रः ३ सूर्य्यः४ मान्धातृभगीरथप्रभृतिप्रसिद्धचक्रवर्त्तिनः ५। मेघस्य कृष्णः १ कालो३ नीलपद्मसमूहः३ भ्रमरश्रेणिः ४ इन्दीवरवनम्५ दाक्षव्यक्तिः ६ कृष्णवर्णवस्तु ७। शरत्कालस्य चन्द्रप्रभृतिशुक्लवर्णपदार्थाः १। कन्दर्पस्य चन्द्रः १ पुरूरवाः २ अश्विनीकुमारः ३ नलः ४। प्रदीपस्य चम्पकपुष्पम्१ प्रतापः२ शास्त्रम्३ ऋषिः ४। वायोः शीघ्रगपदार्थः १। अश्वस्य वायुः १ हरिणः २ मनः ३। हस्तिनः पर्व्वतः १ मेघः १ तमालवृक्षः २ अन्धकारः ४। सौधस्य कैलासः १ ऐरावतः २ उच्चैःश्रवाः ३ चन्द्रः ४। शिवस्य पूर्व्वोक्तानि४। श्रीकृष्णस्य सजलजलदः१ तमालवृक्षः२ नीलमणिः ३भ्रमरश्रेणिः४ इन्दीवरम् ५ नीलपद्मम् ६ आकाशः ७। श्रीरामस्य पूर्व्वकथिताः पदार्थाः ७ दूर्व्वादलम् ८ वृक्षपल्लवम् ९। लक्ष्म्याः पार्व्वत्याः १ चन्द्रकान्तिः २ रतेः ३ सीतायाः ४ द्रौपद्याः ५ पद्मकान्तिः ६। सरस्वत्याः चन्द्रकलाः १ कैलासकान्तिः२ शुक्लवर्णपदार्थः ३। विपत्तेः समुद्रः १ पण्डितमनः २ नारायणोदरम् ३ ब्रह्माण्डम् ४। समुद्रस्य मेघादिकृष्णवर्णवस्तु १ विदूरभूमिः २ महाभारतम् ३ अपस्मारः ४। पुरस्य स्वर्गः १ कैलासः २ मनोरमबृहद्वस्तु ३। रथस्य पुष्पकम् १ वैकुण्ठः २ पुरी ३ द्यौः ४ पृथ्वी ५। कामिनीमुखस्य चन्द्रः १ पद्मम् २ दर्पणः ३। कामिन्याः तड़ित् १ तारा २ स्वर्णलता ३ स्वर्णवर्णा केतकी४। नायकस्य चन्द्रः१ कन्दर्पः २ ऐलः ३ अश्विनीकुमारः४। सभायाः सूर्य्यमण्डलम् १ सुधर्म्मा२ गण्डकौपर्व्वतः ३सुमेरुः४ गङ्गा ५। पण्डितस्य बृहस्पतिः १ शुक्रः २ ऋषिः ३ सरस्वती ४। विरहिणः श्रीरामः १ श्रीशिवः २ अजः ३ दुःखिव्यक्तिः ४ उन्मत्तव्यक्तिः ५ चन्दनतरुः ६ शिवशिरश्चन्द्रः ७ वाडवाग्नियुतसमुद्रः ८ बल्मीकः९ चन्द्रशेखरपर्व्वतः १०। दातुः कर्णः १ उशीनरः २ कल्पवृक्षः३ कामधेनुः४ रोहणः ५ समुद्रः ६ मेघः ७ बलिः ८ जैमिनिः ९ युधिष्ठिरः १०। वसन्तऋतोः मलयवायुः १ मद्यम् २ उन्मादरोगः३। विरहिणं प्रति यमः१ अग्निः२ विषम्३ सर्पः४ ग्रीष्मऋतोः अग्निः १ विरहः २ विरहिणीनिश्वासः३ सर्पनिश्वासः४। वर्षाऋतोः रात्रिः१ समुद्रः २ गगनम् ३ नारायणः ४। शरदृतोः काशपुष्पादिरूपचामरैरावतगजाः१ चन्द्रः २। शीतऋतोः अपस्मारिव्यक्तिः१ राज्यशून्यराजा २। शिशिरऋतोः राजागमनकालः। १।

गुणिनः समुद्रः १ पर्व्वतः २ पृथिवी ३ मदनः४ अश्विनी ५। सचिवस्य बृहस्पतिः १। वाक्यस्य कोकिलशब्दः १ भ्रमरगुञ्जनम् २ वीणावाद्यम् ३। इति कविकल्पलतायाम् ४ स्तवके ५ कुसुमम्॥

साध, य न भौ सिद्धौ। इति कविकल्पद्रुमः॥ (दिवा०-स्वा०च-पर०-अक०-निष्पादने सक०-अनिट्।) य, साध्यति। न, साध्नोति। भौ, सिधात्सति। सिद्धिर्निष्पत्तिः। साध्यति घटो निष्पन्नः स्यादित्यर्थः। सिद्धिर्निष्पादनेति गोविन्दभट्टः। साध्नोति साध्यति घटं कुलालः निष्पादयतीत्यर्थः। इति दुर्गादासः॥

साधकः,पुं, (साध्यति निष्पादयति कार्य्यमिति। साध+ण्वुल्।) साधनकर्त्ता। निष्पादकः। तस्य लक्षणं यथा,—

"अतः परं प्रवक्ष्यामि साधकानान्तु लक्षणम्। धर्म्मशीलास्तपोयुक्ताः सत्यवादिजितेन्द्रियाः। मात्सर्य्येण परित्यक्ताः सर्व्वसत्त्वहिते रताः॥ कर्म्मशीलास्तथोत्साहा मर्त्तव्यलोकेऽनुगुप्तकाः। परस्परसुसन्तुष्टानुकूलाः साधकस्य तु। इष्टैः साधनं कुर्य्यात् सुसहायैः सहैव तु॥"

इति देवीपुराणे नन्दीमाहात्म्यसमाप्त्याध्यायः॥

अपि च।

"चतुर्धा साधको ज्ञेयो मृदुमध्याधिमात्रकः। अधिमात्रतमः श्रेष्ठो भवाब्धौ लङ्घनक्षमः॥ मन्दोत्साही सुसंमूढो व्याधिस्थो गुणदूषकः। लोभी पापमतिर्यश्च ब्रह्मघ्नो वनिताश्रयः॥ चपलः कातरो रोगी पराधीनोऽतिनिष्ठुरः। मन्दाचारो मन्दवीर्य्यो ज्ञातव्यो मृदुना नरः॥ द्वादशाब्दे भवेत् सिद्धिरेतस्य यत्नतः परम्। मन्त्रयोगाधिकारी स ज्ञातव्यो गुरुणा ध्रुवम्॥१ समबुद्धिः समायुक्तः पुण्यकाङ्क्षी प्रियंवदः। मध्यस्थः सर्व्वकार्य्येषु सामान्यः स्यात्र संशयः। एतज्ज्ञात्वैव गुरुभिर्दीयते युक्तितो लयः॥२॥ स्थिरबुद्धिर्जये युक्तः स्वाधीनो वीर्य्यवानपि। महाशयो दयायुक्तः क्षमावान् वीर्य्यवानपि॥ शूरो जय्य श्रद्धावान् गुरुपादाब्जपूजकः। योगाभ्यासरतश्चैव ज्ञातव्याधिमात्रकः॥ एतस्य सिद्धिः षड्वर्षैर्भवेदभ्यासयोगतः। एतस्मै दीयते धीरैर्हठयोगस्य साधकः॥३॥ महावीर्य्यान्वितोत्साही मनोज्ञः शौर्य्यवानपि शास्त्रज्ञोऽभ्यासशीलश्च निर्ममश्च निराकुलः॥ नवयौवनसम्पन्नो मिताहारो जितेन्द्रियः। निर्भयश्च शुचिर्दक्षो दाता सर्व्वजनाश्रयः॥

अधिकारी स्थिरो धीमान् यथेच्छावस्थितः क्षमी।
सुशीलो धर्म्मचारी च गुप्तचेष्टः प्रियंवदः॥
शास्त्रविश्वाससम्पन्नो देवतागुरुपूजकः।
जनसङ्गविरक्तश्च महाव्याधिविवर्जितः॥
अणिमाव्रतयोग्यश्च सर्व्वयोगस्य साधकः।
त्रिभिः संवत्सरैः सिद्धिरेतस्य स्याच्च संशयः।
सर्व्वयोगाधिकारी च नात्र कार्य्या विचारणा॥"४॥
इति शिवसंहिता॥

साधका, स्त्री, दुर्गा। यथा,—
"साधनात् सिद्धिरित्युक्ता साधका वाथ ईश्वरी
स्वामित्वादानसिद्धित्वात् सिद्धैश्वर्य्या प्रकीर्त्तिता॥"
इति देवीपुराणे ४५ देवीनिरुक्ताध्यायः॥

साधनं, क्ली, (साध+ल्युट्।) करणकारकविशेषः। तत्र तृतीया स्यात्। इति व्याकरणम्॥ साध्यते कर्म्म निष्पाद्यतेऽनेनेति साधनम्। इति दुर्गादासः॥ (कारणम्। हेतुः। यथा, मनुः। ११। २३८।
औषधान्यगदो विद्या दैवी च विविधा स्थितिः।
तपसैव प्रसिध्यन्ति तपस्तेषां हि साधनम्॥")
मारणम्। (यथा, किराते। १४। १७।
"अथो शरस्तेन मदर्थमुज्झितः
फलञ्च तस्य प्रतिकायसाधनम्।
अविक्षते तत्र मयात्मसात् कृतेः
कृतार्थता नन्वधिका चमूपतेः॥")
मृतसंस्कारः। अग्निदानम्। गतिः। गमनम्। द्रव्यम्। धनम्। अर्थदापनम्। अर्थस्य धनभूम्यादेर्दापनम्। निर्व्वर्त्तनम्। निष्पादनम्। (यथा, रघुः। ४। १६।
"वार्षिकं सञ्चहारेन्द्रः धनुर्जैत्रं रघुर्दधौ।
प्रजार्थसाधने तौ हि पर्य्यायोद्यतकार्मुकौ॥")
उपकरणम्। सामग्री। यथा युद्धोपकरणं हस्त्यश्वादिः। (यथा, ऋतुसंहारे। ६। ३४।
"रम्यः प्रदोषसमयः स्फुटचन्द्रभासः
पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः।
मत्तालियूथविरुतं निशि शीधुपानं
सर्व्वं हि साधनमिदं कुसुमायुधस्य॥")
अनुव्रज्या। अनुगमनम्। इत्यमरभरतौ। ३। ३। ११८॥ सैन्यम्। सिद्धौषधिः। उपायः। इति मेदिनी॥ यथा,—
"तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्यतः।
दुर्भगत्वं वृथा लोको वहते सति साधने॥"
इति तिथ्यादितत्त्वधृतमत्स्यपुराणवचनम्॥
मेढ्रः। इति च मेदिनी॥ मैत्रम्। उधः। सिद्धिः। इति धरणिः॥ कारकः। प्रमाणम्। इति हेमचन्द्रः॥ व्याप्यम्। यथा,—
"धूमो वह्नुमानं स्यात् व्याप्यं लिङ्गञ्च साधनम्।"
इति त्रिकाण्डशेषः॥

मोहनम्। जवः। इत्यजयः॥ साधना। साधा इति भाषा। यथा,—
ब्रह्मोवाच।
"शशाप पार्व्वती रुष्टा स्त्रीस्वभावाच्च चापलात्
सर्व्वेषां साधनैनैव चन्तुमर्हन्ति साधवः॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे। १२। ५१॥
मन्त्रसिद्धिकरणम्। यथा,—
"मत्स्यं मांसञ्च मद्यञ्च मुद्रा मैथुनमेव च।
दिव्यानाञ्चैव वीराणां साधनं भवसाधनम्॥"
इति मुण्डमालातन्त्रम्॥
ब्रह्मज्ञानसाधनन्तु नित्यानित्यवस्तुविवेकेहामुत्रफलभोगविरागशमदमादिसम्पन्नमुमुक्षुत्वम्। इति वेदान्तसारः॥
साधना, स्त्री, (साध+णिच्+युच्+टाप्।) सिद्धिः। निष्पादना। इति साधधात्वर्थदर्शनात्॥ आराधना। अन्तसाधधातोरनप्रत्ययनिष्पन्ना॥
साधन्तः, त्रि, (साधयति भिक्षामिति। साध+"तृभूवहिवसिभासिसाधीति।" उणा० ३।१२८। इति झच्। सच पित्।) भिक्षुकः। इत्युणादिकोषः॥
साधयन्ती, स्त्री, (साधयतीति। साध+णिच्+शतृ। ङीप्।) उपासनाकर्त्री। यथा,—
"सखि मत्प्राणनाथन्तु साधयन्ती निरन्तरम्।
अतिश्रान्तासि सञ्जाता त्वयोरियमौचिती॥"
इति काव्यचन्द्रिका॥
साधारणः, त्रि, (आधारं अधिकृत्य कार्य्यादिभारधारणं तेन सह वर्त्तते इति।) समानः। सदृशः। इत्यमरः। २। १०। ३७॥ (यथा, कुमारे। १। ५२।
"कण्ठस्य तस्याः स्तनबिम्बुरस्य
मुक्ताकलापस्य च निस्तलस्य।
अन्योन्यशोभाजननात् बभूव
साधारणो भूषणभूष्यभावः॥")
सामान्यम्। अनेकसम्बन्ध्येकवस्तु। इति चामरः। ३। १। ८२॥ यथा,—
"साधारणं समाश्रित्य यत्किञ्चिद्दाहनायुधम्।
शौर्य्यादिनाप्नोति धनं भ्रातरस्तच्च भागिनः॥"
इति दायभागः॥
तदैदिकपर्य्यायः। खः १ पृश्निः २ नाकः ३ गौः ४ विष्टप् ५ नभः ६। इति षट् साधारणनामानि। इति वेदनिर्घण्टौ। १। ४॥*॥
पुं, न्यायमते हेत्वाभासविशेषः। यथा,—
"अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासस्तु पञ्चधा॥
आद्यः साधारणस्तु स्यात् स्यादसाधारणोऽपरः।
तथैवानुपसंहारी त्रिधानैकान्तिको भवेत्॥
यः सपक्षे विपक्षे च स तु साधारणो मतः।
यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः॥
तथैवानुपसंहारी केवलान्वयिपक्षकः॥"
इति भाषापरिच्छेदः॥

(देशविशेषः। क्ली, उदकविशेषश्च। यथा,—
"मिश्रचिह्नन्तु यो देशः स हि साधारणः स्मृतः
तस्मिन् देशे यदुदकं तत्तु साधारणं स्मृतम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
"उभयगुणसमेतं नातिरुक्षं न स्निग्धं
न च खरबहुलञ्च स्वेदनं कण्टकाढ्यम्।
भवति च जलमल्पं नातिशीतं नचोष्णं
समप्रकृतिसमेतं विद्धि साधारणञ्च॥"
इति हारीते प्रथमस्थाने चतुर्थेऽध्याये॥
"जाङ्गलं वातभूयिष्ठमनूपन्तु कफोल्बणम्।
साधारणं सममलं त्रिधा भूदेशमादिशेत्॥"
इति वाभटे सूत्रस्थाने प्रथमेऽध्याये॥)
साधारणदेशः, पुं, (साधारणो देशः।) जाङ्गलानूपलक्षणसम्यक्स्थानम्। तद्गुणाः। हृद्यत्वम्। दीपनत्वम्। मधुरत्वम्। लघुत्वञ्च। इति राजवल्लभः॥
साधारणधर्म्मः, पुं, (साधारणो धर्म्मः।) चतुर्वर्णकर्त्तव्यकर्म्म। यथा, मानवे ८ अध्याये।
"प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थञ्च मानवाः
तस्मात्साधारणो धर्म्मः श्रुतौ पत्न्या सहोदितः॥"
अपि च।
"अहिंसा सत्यमस्तेयं शौचमिन्द्रियसंयमः।
दमः क्षमार्জ্জवं दानं सर्व्वेषां धर्म्मसाधनम्॥"
इति गारुड़े। ८६। ३०॥
साधारणस्त्री, स्त्री, (साधारणा सामन्या अनेकसम्बन्धिनी स्त्री।) वेश्या। इति हेमचन्द्रः॥
साधारणी, स्त्री, (साधारणस्येयमिति। अण्॥ स्त्रियां ङीष्। कुञ्चिका। इति हेमचन्द्रः॥
साधारण्यं, क्ली, (साधारस्येदमिति। अञ्।) कुञ्चिका। इति हेमचन्द्रः॥ साधारणस्य भावश्च॥ (यथा, साहित्यदर्पणे १ परिच्छेदे।
"कीटानुविद्धरत्नादिसाधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥")
साधिका, स्त्री, (साधयतीति। साध+णिच्+ण्वुल्। टापि अत इत्वम्।) सुषुम्निः। इति हेमचन्द्रः॥ साधनकर्त्री। अधिकेन सह वर्त्तमाने, त्रि॥ (यथा, भागवते। ३। ११। २४।
"स्वं स्वं कामं मनुर्भुङ्क्ते साधिकां लोकसंस्थितिम्॥"
यथा च तत्रैव। ५। २१। १०।
"साईद्वादशलक्षाणि साधिकानि चोपयाति॥")
साधितः, त्रि, (साध+णिच्+क्तः।) दापितः। इत्यमरः। ३। १। ४०॥ ई धनादिकं दापितं धुतौ इति ख्यातं यस्मै दत्तं तत्रेति रमानाथः। दक्षिते इति विद्याविनोदः। शोधितद्रव्ये इति नयनानन्दः। ददातेर्ज्ञप्तात् क्तः ङ्ङी व्रीरौति पन् दैपो रूपमिति नयनानन्दः। दायित इति पाठ इति कलिङ्गपुरुषोत्तमौ। तत्र ञि दय ङ ग्रहणे गतौ वधे दाने इत्यस्मात् ञ्यन्तात् क्तः। साधेर्ज्ञप्तात् क्ते साधितः। इति भरतः॥
"दायितो दापितोऽपि स्यात् साधितः शोधितोऽपि च।"
इति शब्दरत्नावली।

साधिष्ठ ,त्रि,(अयमेषामतिशयेन वाढ़ः । वाढ़ + "अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् । "अन्तिकवाढ़योर्नेदसाधौ ।" ५ । ३ । ६३ । इति साधादेशः ।) अतिशयवाढ़ः । दृढ़तमः । इत्यमरः । ३ । १ । ११२ ॥ न्याय्यः । इति हेमचन्द्रः ॥ अत्यार्य्यः । इति मेदिनी ॥ (यथा, छान्दोग्ये । ४ । ९ । ३ । "श्रुतं ह्येव मे भगवद्दृशेभ्य आचार्य्येभ्य एव विद्या विदिता साधिष्ठं प्रापतीति ॥")

साधीयान् [स्] त्रि, (अयमनयोरतिशयेन वाढ़ः । इति । वाढ़ + "द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् । "अन्तिकवाढ़योरिति ।" ५ । ३ । ६० । इति साधादेशः ।) अतिशयवाढ़ः । अतिशयसाधुः । इत्यमरः । ३ । ३ । २३४ ॥ (यथा, साहित्यदर्पणे १ परिच्छेदे ।

"कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्करा-प्रवृत्तिः साधीयसी न स्यादिति ॥")

साधुः, पुं, (साध्यति निष्पादयति धर्म्मादिकार्य्यमिति । साध + "कृवापाजीति ।" उणा० १ । १ । इति उण् ।) उत्तमकुलोद्भवः । तत्पर्य्यायः ।। महाकुलः २ कुलीनः ३ आर्य्यः ४ सभ्यः ५ सज्जनः ६ । इत्यमरः । २ । ७ । ३ ॥ कुलजः ७ साधुजः ८ कुलकः ९ कुलिकः १० । इति शब्दरत्नावली ॥ कुल्यः ११ कौलेयकः १२ इति भरतः ॥ जिनः । मुनिः । इति हेमचन्द्रः ॥*॥

साधुलक्षणं यथा,—

"यथालब्धोऽरिसन्तुष्टः समचित्तो जितेन्द्रियः ।
हरिपादाश्रयो लोके विप्रः साधुरनिन्दकः ॥१॥
निर्वैरः सदयः शान्तो दम्भाहङ्कारवर्জ্জितः ।
निरपेक्षो मुनिर्वीतरागः साधुरिहोच्यते ॥२॥
लोभमोहमदक्रोधकामादिरहितः सुखी ।
कृष्णाङ्घ्रिशरणः साधुः सहिष्णुः समदर्शनः ॥३॥
समचित्तो मुनिः पूतो गोविन्दचरणाश्रयः ।
सर्व्वभूतदयः कार्ष्णी विवेकी साधुरुत्तमः ॥४॥
कृष्णार्पितप्राणशरीरबुद्धिः
शान्तेन्द्रियस्त्रीसुतसम्पदादिः ।
आसक्तचित्तः श्रवणादिभक्ति-
र्यस्येह साधुः सततं हरेर्यः ॥ ५ ॥
कृष्णाश्रयः कृष्णकथानुरक्तः
कृष्णे दृढब्रह्मस्मृतिपूजनीयः ।
कृष्णानिशं ध्यानमनास्त्वनन्यो
यो वै स साधुर्मुनिवर्य्यकार्ष्णिः ॥"६॥

इति पाद्मोत्तरखण्डे ८९ अध्यायः ॥*॥

अन्यच्च ।

"न प्रहृष्यति सम्माने नावमानेन कुप्यति ।
न क्रुद्धः परुषं ब्रूयादेतत् साधोस्तु लक्षणम् ॥"

इति गारुड़े । ११३ । ४२ ॥*॥

तस्य स्वभावो यथा,—

"त्यक्तात्मसुखभोगेच्छाः सर्व्वसत्त्वसुखैषिणः ।
भवन्ति परदुःखेन साधवो नित्यदुःखिताः ॥
परदुःखातुरा नित्यं स्वसुखानि महान्त्यपि ।
नापेक्षन्ते महात्मानः सर्व्वभूतहिते रताः ॥
परार्थमुद्यताः सन्तः सन्तः किं किं न कुर्व्वते ।
तादृगप्यम्बुधेर्व्वारि जलदैस्तत् प्रपीयते ॥
एक एव सतां मार्गो यदङ्गीकृतपालनम् ।
दहन्तमकरोत् क्रोड़े पावकं यदपां पतिः ॥
आत्मानं पीड़यित्वापि साधुः सुखयते परम् ।
ह्लादयन्नाश्रितान् हृक्षो दुःखञ्च सहते स्वयम्॥"

इति वह्निपुराणे दानावस्थानिर्णयनामाध्यायः॥ (तथा, महानिर्व्वाणतन्त्रे । १ । २२ ।

"देवायतनगा मर्त्या देवकल्पा दृढ़व्रताः ।
सत्यधर्म्मपराः सर्व्वे साधवः सत्यवादिनः ॥")

तस्य प्रशंसा यथा,—

यत्पूजायां भवेत् पूज्यो दृष्ट्वा च यमदर्शनम् ।
पापसंघः स्पर्शनाच्च किमहो साधुसङ्गमः ॥
साधूनां हृदयं धर्म्मो वाचो वो नः सनातनाः ।
कर्म्मण्यानि कर्म्माणि यतः साधुर्हरिः स्वयम्॥"

इति कल्किपुराणे ३० अध्यायः ॥*॥

(एतदाचारस्तु चतुर्व्विधधर्म्मप्रमाणान्यतमः । यथा, मनुः । २ । ६ ।

"वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदाम्
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥")

कलिशूद्रस्त्रीणां साधुत्वं तत्कारणञ्च यथा ।

"कलिः साधिति यत् प्रोक्तं शूद्रः साधिति योषितः ।
यज्ञाह भगवान् साधुर्धन्यार्येति पुनः पुनः ॥
तत् सर्व्वं श्रोतुमिच्छामो न चेत् गुह्यं महामुने
इत्युक्तो मुनिभिर्व्यासः प्रहस्येदमथाब्रवीत् ॥
शृणुतां भो मुनिगणा यदुक्तं साधु साधिति ।
यत् कृते दशभिर्व्वर्षैस्त्रेतायां हायनेन तत् ॥
द्वापरे तच्च मासेन अहोरात्रेण तत् कलौ ।
तपसो ब्रह्मचर्य्यस्य जपादेव फलं द्विजाः ॥
प्राप्नोति पुरुषस्तेन कलिः साधिति भाषितम्
ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन्॥
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ।
धर्म्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ ॥
स्वल्पायासेन धर्म्मास्ते न तुष्टोऽस्म्यहं कलेः॥*
व्रतचर्य्यापरैर्म्मार्गा वेदाः पूर्व्वं द्विजातिभिः ।
ततस्तु धर्म्मसंप्राप्तैर्यष्टव्यं विधिवद्दनैः ॥
हयाकथा हयाभोज्यं हयेच्छा च द्विजन्मनाम् ।
पतनाय तथा भाव्यं तैस्तु संयमिभिः सदा ॥
असम्यक्करणे दोषास्तेषां सर्व्वेषु वस्तुषु ।
भक्ष्याभेयादिकं चैषां नेच्छाप्राप्तिश्चरं द्विजाः ॥
पारतन्त्र्यं समस्तेषु तेषां कार्य्येषु वै यतः ।
जयन्ति ते निजान् लोकान् क्लेशेन महता द्विजाः ॥
द्विजशुश्रूषयैवेह पाकयज्ञाधिकारवान् ।
निजं जयति वै लोकं शूद्रो धन्यतरस्ततः ॥
भक्ष्याभक्ष्येषु नास्यास्ति पेयापेयेषु वा यतः ।
नियमो मुनिशार्दूलास्तेनासौ साध्वितीरितम् ॥
स्वधर्म्मस्याविरोधेन नरैर्लभ्यं धनं सदा ।
प्रतिपाद्यञ्च पात्रेषु यष्टव्यञ्च यथाविधि ॥
तस्यार्জনे महान् क्लेशः पालने च द्विजोत्तमाः ।
तथा सहनियोगाय विघ्नेथं गहनं नृणाम् ॥
एभिरन्यैस्तथा क्लेशैः पुरुषा द्विजसत्तमाः ।
निजान् जयन्ति वै लोकान् प्राजापत्यादिकान् क्रमात् ॥
योषित्शुश्रूषणं भर्त्तुः कर्म्मणा मनसा गिरा ।
कुर्व्वती समवाप्नोति तल्लोकं ततो द्विजाः॥
नातिक्लेशेन महता तानेव पुरुषो यथा ।
हतीयं व्याहृतं तेन मया साध्विति योषिताम्॥"

इति विष्णुपुराणे । ६ । २ । १२—२९ ॥

साधुः, त्रि, (साध्यति कार्य्यमिति । साध + उण्) वार्द्धुषिकः । चारुः । (यथा, महाभारते । १ । १०७ । ८ ।

"न किञ्चिदूचुर्नं राजन्नब्रुवीत् साध्वसाधु वा॥")

सज्जनः । इति मेदिनी ॥

साधुजः, त्रि, (साधौ सत्कुले जायते इति । जन + डः ।) उत्तमकुलोद्भवः । इति शब्दरत्नावली ॥

साधुधीः, स्त्री, (साधुर्धीर्यस्याः ।) श्वश्रूः । इति हारावली ।२०१॥ (साधुर्धीः ।) सुन्दरबुद्धिः । तद्युक्ते, त्रि ॥

साधुपुष्पं, क्ली, (साधु चारु पुष्पं यस्य ।)स्थल-पद्मम् । इति शब्दमाला ॥ उत्तमकुसुमञ्च ॥

साधुवाहः, पुं, (साधुरुत्तमो वाहः ।)विनीताश्वः। इति हेमचन्द्रः ॥ सुन्दरवाहनश्च ॥

साधुवाही, [न्] पुं, (साधु उत्तमं वहतीति । वह + णिनिः ।) शोभनवहनशीलघोटकः । सुशिक्षिताश्वः । तत्पर्य्यायः । विनीतः २ । इत्यमरः । २ । ८ । ४४ ॥ सुष्ठुवाहनशीलकः ३ । इति शब्दरत्नावली ॥ सुन्दरघोटकविशिष्टे, त्रि ॥ (साधुवहनशीले, त्रि । यथा, महाभारते । ६ । ४६ । ३६ ।

"तस्य क्रुद्धः स नागेन्द्रो वहतः साधुवाहिनः ।
पदा युगमधिष्ठाय जघान चतुरो हयान् ॥")

साधुवृक्षः, पुं, (साधुर्वृक्षः ।) कदम्बतरुः । इति शब्दचन्द्रिका ॥ वरुणवृक्षः । इति राजनिर्घण्टः ॥ शोभनतरुश्च ॥

साधुवृत्तिः, स्त्री, उत्तमजीविका । सद्विवरणम् । सुन्दरवर्त्तनम् । साध्वी चासौ वृत्तिश्चेति कर्म्मधारयसमासनिष्पन्ना । साधोर्वृत्तिरिति षष्ठी-तदपुरुषसमासनिष्पन्ना वा ॥

साधृतं, क्ली, मयूरसमूहः । पक्षवीथी । शात-पत्रम् । इत्यजयपालः ॥

साध्यः, पुं, (साध्यमस्यस्येति । अर्शआदित्वादच्) गणदेवताविशेषः । इत्यमरः । १ । १ । १० ॥ स तु द्वादशसंख्यकः । यथा, भरतः ।

"साध्या द्वादशविख्याता रुद्रार्थैकादश स्मृताः॥"

तेषां नामानि यथा,—

"मनो मन्ता तथा प्राणो नरोऽपानश्च वीर्य्यवान् ।
विनिर्भयो नयश्चैव दमो नारायणो हयः ।
प्रभुरेति समाख्याताः साध्या द्वादश पौष्किकाः॥"

इति वह्निपुराणे गणभेदनामाध्यायः ॥*॥

देवः। विंशभादिसप्तविंशतियोगान्तर्गतैकविंशयोगः। इति मेदिनी॥ तत्र जातफलम्।
"असाध्यसाध्यः किल साध्यजातः
शूरोऽतिधीरो विजितारिपक्षः।
बुद्धा क्षुपायैः परिसाधितार्थः
परं कृतार्थः सुतरां विनीतः॥"
इति कोष्ठीप्रदीपः॥

साध्यः, त्रि, (साध+ण्यत्।) साधनीयः। इति मेदिनी॥ यथा,—
"ऋणादिषु विवादेषु स्थिरप्रायेषु निश्चितम्।
क्षये वाप्यधिके चार्थे प्रोक्तं साध्यं न सिध्यति॥"
इति मिताक्षराधृतकात्यायनवचनम्॥
साधनार्हाभिमतः। स तु पक्षः। यथा,—
"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः॥"
साध्यं साधनार्हाभिमतं पक्षं विदुः। यद्यप्यत्रैव साध्यं प्राप्यं तद्विशिष्टधर्म्मी पक्ष इति भेदस्तथाप्यत्र वाक्प्रत्याय्यर्णादिधर्म्मविशेषविशिष्टस्य पक्षतया धर्म्मिणोऽधमर्णपदेरेव साध्यत्वात् साध्यपक्षयोरभेदाभिधानम्। इति व्यवहारतत्त्वम्॥*॥ अनुमितिविधेयः। यथा। साध्यतावच्छेदकमिति अनुमितिविधेयतावच्छेदकमित्यर्थः। इति सिद्धान्तलक्षणजागदीशीटीका॥
मन्त्रविशेषः। यथा,—
"नामाद्यक्षरमारभ्य यावन्नान्तादिमाक्षरम्।
चतुर्भिः कोष्ठकैरेकैकमिति कोष्ठचतुष्टयम्॥
पुनः कोष्ठगकोष्ठेषु सव्यतो नाम्न आदितः।
सिद्धः साध्यः सुसिद्धोऽरिः क्रमाज्ज्ञेया मनीषिभिः॥
सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः।
सुसिद्धो ग्रहणमात्रेण अरिर्मूलं निकृन्तति॥"
इति तन्त्रसारः॥

साध्यतावच्छेदकं, क्ली, (साध्यतामवच्छिनत्तीति। अव+छिद+ण्वुल्।) अनुमितिविधेयांशे भासमानो धर्म्मः। यथा साध्यतावच्छेदकमिति अनुमितिविधेयतावच्छेदकमित्यर्थः। तथा चोक्तव्याप्तिज्ञानाद्दण्डांशे दण्डत्वप्रकारिकादण्डत्ववत्त्वानित्येकानुमितिर्न तु दण्डिमान् इत्याकारा दण्डप्रकारिकापि तस्य व्यापकतावच्छेदकत्वेनाग्रहात् कारणवाधेन तदसम्भवादिति भावः इति। सिद्धान्तलक्षणस्य जागदीशी टीका॥

साध्यसिद्धिपादः, पुं, (साध्यस्य सिद्धिर्यत्र। तादृशः पादः।) व्यवहारस्य चतुर्थपादः। स च निर्णयपादः। यथा। प्रत्यर्थिनोऽग्रतो लेख्यमिति भाषापादः प्रथमः। श्रुतार्थस्योत्तरं लेख्यमित्युत्तरपादो द्वितीयः। ततोऽर्थी लेखयेत् सद्य इति क्रियापादस्तृतीयः। तस्मिन्नो सिद्धिमाप्नोति इति साध्यसिद्धिपादश्चतुर्थः। यथा,—
"भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः।
आख्यिश्चतुरंगस्तु चतुष्पादभिधीयते॥"
इति मिताक्षरा॥

साध्वसं, क्ली, (साधूनस्यतीति। साधु+अस+अच्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा, भागवते। २। १। १५।
"अन्तकालेऽपि पुरुष आगते गतसाध्वसः।
छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम्॥"
स्यति नाशयतीति। सो+"स्यतेर्धुक्।" इति असच् धुक् च। प्रतिभा। इत्युणादिटीकायां उज्ज्वलः। ३। ११७॥ भाषिकाहविशेषः। इति साहित्यदर्पणम्। ६। ५५६॥)
साध्वी, स्त्री, (साधु+ङीष्।) मेदा। इति राजनिर्घण्टः॥ पतिव्रता। इत्यमरः। २। ६। ६॥ तल्लक्षणमाह हारीतः।
"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिता मलिना कृशा।
मृते म्रियेत या पत्नी साध्वी ज्ञेया पतिव्रता॥"
("सा स्त्री ज्ञेया पतिव्रता।" इत्यपि क्वचित् पाठः॥*॥) तद्धर्म्मा यथा। अङ्गिराः।
"साध्वीनामेव नारीणामग्निप्रपतनादृते।
नान्यो धर्म्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित्॥"
इति श्रुद्धितत्त्वम्॥
तत्प्रशंसा यथा,—
"साध्वी स्त्री माहतुल्या च सर्व्वथा हितकारिणी।
असाध्वी वैरतुल्या च सततं सन्तापदायिका॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे। २। २५॥*॥
साध्वीस्त्रीणां पतिः प्रेम्णा शतपुत्राधिकः। यथा,—
"शतपुत्राधिकः प्रेम्णा सतीनाञ्च पतिर्नृप!।
निरूपितो भगवता वेदेषु हरिणा स्वयम्॥"
इति तत्रैव। ३४। ६२॥*॥
"कामिनीं कुलजाताञ्च रहस्ये कामिनीं सतीम्।
न पृच्छति कुले जात एवमेव श्रुतौ श्रुतम्॥
श्रुतौ पुराणे यासाञ्च चरित्रमनिरूपितम्।
तासु को विश्वसेत् प्राज्ञो अप्रज्ञाञ्च दुराशयाम्
तासां को वा रिपुर्मित्रं प्रार्थयन्ती नवं नवम्
दृष्ट्वा सुवेशं पुरुषमिच्छन्ति हृदये सदा॥
वाह्ये स्वात्मसतीत्वञ्च प्रापयन्ती प्रयत्नतः।
सत्त्वप्रधानं यद्रूपं तत् गुप्तञ्च स्वभावतः।
तदुत्तमञ्च विश्वेषु साध्वीरूपं प्रशंसितम्॥
स्वानाभावावात् क्षणभावात् मध्यवृत्तेरभावतः।
देहक्लेशेन रोगेण सत्सर्गेण सुन्दरि!॥
बहुगोष्ठीवृतेनैव रिपुराजभयेन च।
रजोरूपस्य साध्वीत्वमेतेनैव प्रजायते॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः॥*॥
अन्यच्च।
"सुते स्नानार्थे यः स्नेही याकाङ्क्षान्वेतिचोभिते
पतिस्नेहस्य साध्वीनां कलां नार्हन्ति षोड़शीम्
स्नानार्थे स्नवदानार्द्रं मिष्टान्ने भोजनावधि।
कान्ते चित्तं सतीनाञ्च स्वप्ने ध्याने च सन्ततम्॥
नाम्नि तृष्णा जले तृष्णा साध्वीनां स्वामिना विना।
यथा जारे पुंश्चलीनां साध्वीनान्तु तथा प्रिये॥
शोकं निमज्जमन्येषां कालेन पानभोजनात्।
विपरीतं कान्तशोको वर्द्धते भक्षणादहो॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। १७। ८७,८०,८७॥*॥ किञ्च।
"आकाशोऽसौ दिशः सर्व्वा यदिनश्यन्ति वायवः
तथापि साध्वीशापस्तु न नश्यति कदाचन॥"
इति तत्रैव। ४२। ३४॥
सानन्दः, पुं, (आनन्देन सह वर्त्तते इति।) षोड़शभृङ्गवकान्तर्गतभृङ्गवकभेदः। यथा,—
"अष्टादशाक्षरैर्युक्तो यशोदर्षप्रदो भृवः।
कङ्कणसंज्ञके ताले सानन्दो वीरके रसे॥"
इति सङ्गीतदामोदरः॥
गुच्छकरञ्जः। इति राजनिर्घण्टः॥ आह्लादयुक्ते, त्रि। यथा,—
"रामं नमयति सानन्दं धर्म्मानभिनिविश्य सन्॥"
इति मुग्धबोधव्याकरणम्॥
सानन्दूरः, पुं, तीर्थविशेषः। यथा,—
धरण्युवाच।
"द्वारकातः परं श्रेष्ठं अस्ति गुह्यं परं क्वचित्
ततो महीधरः श्रुत्वा विष्णुः कमललोचनः।
वाराहरूपी भगवान् प्रत्युवाच वसुन्धराम्॥
वराह उवाच।
सानन्दूरेति विख्यातं भूमे! गुह्यं परं मम।
उत्तरे तु समुद्रस्य मलयस्य च दक्षिणे।
तत्र तिष्ठामि वसुधे उदीचीदिग्गमाश्रितः॥
प्रतिमा वै मदीयास्ति नात्युच्चा नातिनीचका।
आयसीं तां वदन्त्येके अन्ये ताम्रमयीं तथा॥
कांस्यीं रीतिमयीमन्ये केचित् सीसकनिर्मिताम्
शिलामयीमित्यपरे महदाश्चर्य्यरूपिणीम्।
तत्र स्थानानि मे भूमे कथ्यमानं मया शृणु॥
मनुजा ये च मुच्यन्ते गताः संसारसागरम्।
तत्राश्चर्य्यं प्रवक्ष्यामि सानन्दूरे यशस्विनि!॥
सौवर्णं दृश्यते पद्मं मध्याह्ने तु दिवाकरे।
यत्र रामसरं नाम मम गुह्यं यशस्विनि॥
तत्रापि शृणु चाश्चर्य्यं यच्चापि परिवर्त्तते।
एवं तत्र लता दृश्यसुवस्थूलमहाद्रुमम्।
समुद्रमध्ये तिष्ठन्तं सोऽपि तत्र न पश्यति॥*॥
अन्यच्च ते प्रवक्ष्यामि महाश्चर्य्यं शृणुष्व मे।
मम भक्तांश्च पश्यन्ति तिष्ठन्तो हि स्वकर्म्मणा॥
बहुमत्स्यसहस्राणि कोट्यो ह्यर्व्बुदमेव च।
क्षिप्तः पिष्टश्च तत्रार्थे येन केन विकर्म्मिणा॥
एकस्तत्र स्थूलमत्स्यो भूमिचक्रेण चाङ्कितः।
तावत् क्वचिन्न गच्छति यावत्तेन न भक्षितः॥
तत्र रामसरं नाम तस्मिन् चैवे परं मम।
अगाधञ्चाप्यपारञ्च रक्तपद्मविभूषितम्॥
तत्र स्नानन्तु कुर्व्वीत एकरात्रोषितो नरः।
बुधस्य भवनं गत्वा मोदते नात्र संशयः॥
अथ प्राणान् प्रमुञ्चेत रम्ये रामसरे तथा।
बुधस्य भवनं त्यक्त्वा मरो लोकञ्च गच्छति॥
तत्र रामसरे भूमे महाश्चर्य्यं शृणुष्व मे।
मनुजास्तत्र पश्यन्ति मम कर्म्मपरायणाः॥

सत्सरः क्रोशविस्तारं बहुगुल्मलताकुलम् ।
मनोज्ञं रमणीयञ्च जलजैश्चापि संवृतम् ॥
तत्र मूढ़ाश्विपद्मानि द्योतयन्ति दिशो दश ।
एकन्तु दृश्यते श्वेतमेकं रक्तमयं तथा ॥
तत्र ब्रह्मसरं नाम गुह्यं क्षेत्रे परं मम ।
उत्तरेण तु पार्श्वेन मम क्षेत्रस्य सुन्दरि ॥
तत्र कुरुक्षं महाभागे पर्व्वते च समाश्रितम् ।
धारा यत्र पतेच्चैव स्खलन्ती मुषलसन्निभा ॥
तत्र स्नानञ्च कुर्व्वीत षष्ठकालोपितो नरः ।
ब्रह्मलोकं समासाद्य मोदते नात्र संशयः ॥
अथ प्राणान् प्रमुञ्चेत तत्र ब्रह्मसरे मम ।
ब्रह्मणा समनुज्ञातो मम लोकञ्च गच्छति ॥
तत्रार्य्ये महाभागे रम्ये ब्रह्मसरे शृणु ।
मङ्क्षा यानि पश्यन्ति घोरं संसारमोचनम् ॥
चतुर्व्विंशतिहादश्यां सा धारा पृथुलेक्षणे ।
मध्याह्ने पतते भूमि यावत् सूर्य्यः स तिष्ठति ॥
पराह्णे तु मध्याह्ने सा धारा न पतेद्भुवि ।
एवं तत्र महार्य्ये पुण्ये ब्रह्मसरे मम ॥"
इति वाराहे सानन्दूरमाहात्म्यनामाध्यायः ॥

सानसिः, पुं, (सन्यते दीयते दक्षिणार्थमिति । षण दाने + "सानसिवर्णसीति ।" उणा० ४ । १०७ । इति असिप्रत्ययेन साधुः ।) सुवर्णः । इत्युणादिकोषः ॥ (संभजनीये, त्रि । यथा, ऋग्वेदे । १० । १४० । ४ ।

"पृणचि सानसिं क्रतुम् ॥"

"सानसिं संभजनीयं क्रतुं कर्म्म पृणचि अस्माभिः संपर्चयसि फलेन वा संयोजयसि ॥" इति तद्भाष्ये सायणः ॥)

सानिका, स्त्री, (सनति सुस्वरमिति । षणुदाने + खुल् । टापि अत इत्वम् ।) वंशी । इति शब्दरत्नावली ॥

सानुः, पुं, क्ली, (सन्यते सेव्यते मुनिप्रभृतिभिरिति सन सेवायाम् + "ट्वसनिजनीति ।" उणा० १ । ३ । इति अुण् ।) पर्व्वतसमभूभागः । तत्पर्य्यायः । स्कुः २ प्रस्थः ३ । इत्यमरः । २ । ३ । ५ ॥ (यथा, रामायणे । २ । ३१ । २७ ।

"भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ।
अहं सर्व्वं करिष्यामि जायतः स्वपतश्च ते ॥")

वनम् । वात्या । मार्गः । अग्रम् । कोविदः । इति मेदिनी ॥ अर्कः । पल्लवः । इति जटाधरः ॥

सानुजं, क्ली, (सानौ जायते इति । जन् + डः ।) प्रपौण्डरीकम् । इति राजनिर्घण्टः ॥

सानुजः, पुं, (सानौ पर्व्वतप्रस्थे जायते इति । जन + डः ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥ अनुजेन सह वर्त्तमाने सानुजाते च त्रि ॥

सानुमान्, [त्] पुं, (सानुर्विद्यतेऽस्येति । सानु + मतुप् ।) पर्व्वतः । इति हेमचन्द्रः ॥ (यथा, रघुः । ८ । ६० ।

"न पृथग्जनवच्छोचो वप्रं वप्रिनामुत्तम ! गन्तुमर्हसि ।
द्रुमसानुमतां किमन्तरं
यदि वायौ द्वितयेऽपि ते चलाः ॥"

वाच्यलिङ्गेऽपि दृश्यते । यथा, रामायणे । २ । ४८ । १० ।

"आपगाश्च महानूपाः सानुमन्तश्च पर्व्वताः ॥")

सानेयिका, स्त्री, (सानेयी + स्वार्थे कन् ।) वंशी । इति शब्दरत्नावली ॥

सानेयी, स्त्री, वंशी । इति शब्दरत्नावली ॥

सान्तपनं, क्ली, (सन्तपनीति । सम् + तप + ल्युः । ततः स्वार्थे अण् ।) व्रतविशेषः । इत्यमरः । २ । ७ । ५२ ॥ यथा,—

"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥
एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥"

इति मानवे ११ अध्यायः ॥

गोमूत्रमिति । गोमूत्रादि एकीकृत्य एकस्मिन्नहनि भक्षयेत् नान्यत् किञ्चिदश्नात् अपरादिने चोपवासः । इत्येतत् सान्तपनं कृच्छ्रं स्मृतम् । यदा तु गोमूत्रादिषट् प्रत्येकं षड्दिनानुपभुज्यते सप्तमे दिने चोपवासः तदा महासान्तपनं भवति । तथा च याज्ञवल्क्यः ।

"कुशोदकञ्च गोक्षीरं दधि सूत्रं यजुद् घृतम् ।
जग्ध्वा परेऽह्नुपवसेत् कृच्छ्रं सान्तपनञ्चरन् ॥
पृथक्सान्तपनद्रव्यैः षड्भिः सोपवासिकः ।
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनं स्मृतम् ॥"

इति कुल्लूकभट्टः ॥

गारुड़े १०५ अध्यायेऽप्येवम् ॥ (सन्तापके, त्रि ॥ यथा, ऋग्वेदे । ७ । ५९ । ९ ।

"सान्तपना इदं हविर्मरुतस्वज्जुषन्त ॥"

"सान्तपनाः शत्रूणां संतापका हे मरुतः ॥"

इति तद्भाष्ये सायणः ॥ सन्तपनस्य सूर्य्यस्येदमिति । अण् । सूर्य्यसम्बन्धिनि च त्रि । यथा, वाजसनेयसंहितायाम् । १७ । ८५ ।

"स्वतवांश्च प्रवासी च सान्तपनश्च गृहमेधी च ।"

'सन्तपनः सूर्य्यस्तत्सम्बन्धी सान्तपनः ।' इति तद्भाष्यम् ॥)

सान्तरं, त्रि, विरलम् । इति जटाधरः ॥ (यथा, हरिवंशे । २२ । ३ ।

"यदि ताः स्युरेकरूपाः
शुभास्ततः सान्तरास्तु न शिवाय ॥")

अन्तरेण सह वर्त्तमानञ्च ॥ (सावकाशम् । यथा, महाभारते । ७ । ११ । १८ ।

"तस्य जिह्मममिप्रायं ज्ञात्वा द्रोणोऽथ तत्त्ववित् ।
तं वरं सान्तरं तस्मै ददौ संचिन्त्य बुद्धिमान् ॥")

सान्त्व, क सामयोगे । इति कविकल्पद्रुमः ॥ (चुरा० पर० सक० सेट् ।) क, सान्त्वयति शोतात्तं दयालुः । इति दुर्गादासः ॥

सान्त्व, त् क सान्त्वने । इति कविकल्पद्रुमः ॥ (अदन्तचुरा० पर० सक० सेट् ।) दन्त्यादिस्तमध्यः वकारोपधः । सान्त्वनं प्रियकरणम् । सान्त्वयति सान्त्वापयति । इति दुर्गादासः ॥

सान्त्वं, क्ली, (सान्त्व सान्त्वने + घञ् ।) अत्यर्थमधुरम् । तत्तु कर्णमनःप्रीतिजनकं वाक्यम् । (यथा, महाभारते । ५ । १४० । २ ।

"कानि सान्त्वानि गोविन्दः सूतपुत्रे प्रयुक्तवान् ॥")

साम । तच्च प्रियवादार्थप्रदानसम्बन्धादिभिः क्रोधोपशमनम् । इत्यमरभरतौ ॥ (यथा, माघे । २ । ५४ ।

"चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया ।
क्षेममामध्वरं प्राहुः कोऽभसा परिषिञ्चति ॥"

दाक्षिण्यम् । इति मेदिनी ॥

सान्त्वनं, क्ली, (सान्त्व + ल्युट् ।) सामोपायः । इति हेमचन्द्रः ॥ प्रियकरणम् । इति सान्त्वधातुटीकायां दुर्गादासः ॥ (यथा, महाभारते । २ । ३८ । ६ ।

"नाम्ने देयो धनुनयो नायमर्हति सान्त्वनम् ।
लोकद्वयहृते कृष्णे योऽर्हनां नाभिमन्यते ॥")

सान्त्वना, स्त्री, क्ली, सान्त्व + युच् । टाप् । क्लीबत्वे ल्युट् ।) सान्त्वनम् । प्रणयः । यथा । "प्रणयः सान्त्वना न सा ।" इति जटाधरः ॥

सान्त्ववादः, त्रि, (सान्त्वस्य सामस्य वादः कथनम् ।) सान्त्वनावाक्यम् । इति केचित् ॥

सान्दीपनिः, पुं, (सन्दीपनस्यापत्यमिति । सन्दीपन + इञ् ।) मुनिविशेषः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ८८ । ३० ।

"विश्वामित्रः सतानन्दो जाजलिस्तैतिलिस्तथा
सान्दीपनिश्च ब्रह्मर्षी योगिनां ज्ञानिनां गुरुः ॥"

अपि च ।

"विदिताखिलविज्ञानौ तत्त्वज्ञानमयावपि ।
शिथाचार्य्यक्रमं वीरौ ख्यातयन्तौ यदूत्तमौ ॥
ततः सान्दीपनिं काश्यमवन्तिपुरवासिनम् ।
अस्त्रार्थं जग्मतुर्व्वीरौ बलदेवजनार्द्दनौ ॥"

काश्यं काश्यां जातम् ।

"तस्य शिष्यत्वमभ्येत्य गुरुवृत्तिपरौ हि तौ ।
दर्शयाञ्चक्रतुर्व्वीरावाचारमखिले जने ॥
सरहस्यं धनुर्व्वेदं ससंग्रहमधीयताम् ।
अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्विज ॥
सान्दीपनिसंभाव्यं तयोः कर्म्मातिमानुषम् ।
विचिन्त्य तौ तदा मेने प्राप्तौ चन्द्रदिवाकरौ ॥
अल्पग्राममथैकस्मिन् प्रोक्तमात्रमवाप्य तौ ।
ऊचतुर्व्रियतां या ते दातव्या गुरुदक्षिणा ॥
सोऽप्यतीन्द्रियमालोक्य तयोः कर्म्म महामतिः ।
अयाचत सुतं पुत्रं प्रभासे लवणार्णवे ॥
अतीन्द्रियं अन्यत्राद्दृष्टपूर्व्वम् ।
"गृहीताक्षौ ततस्तौ तु सार्द्धपात्रौ महोदधिः
उवाच न मया पुत्रो हृतः सान्दीपनेरिति ॥
दैत्यः पञ्चजनो नाम शङ्खरूपः स बालकम् ।
जघ्राह सोऽस्ति सलिले ममैवारिनिसूदन ॥
इत्युक्तोऽन्तर्जलं गत्वा हत्वा पञ्चजनञ्च तम् ।
कृष्णो जघ्राह तस्यास्थिप्रभवं शङ्खमुत्तमम् ॥
तं पाञ्चजन्यमापूर्य्य गत्वा यमपुरीं हरिः ।
बलदेवश्च बलवान् जित्वा वेवस्वतं यमम् ॥
तं बालं यातनासंस्थं यथापूर्व्वगुरोरिणम् ।
पित्रे प्रदत्तवान् कृष्णो बलश्च बलिनां वरः ॥"

इति विष्णुपुराणे । ५ । २१ । १८ । ३० ॥

सान्दृष्टिकं, क्ली, (सन्दृष्टौ प्रत्यक्षे भवम्। सन्दृष्टि + ठञ्।) सद्यःफलम्। इत्यमरः। २।८।२९॥ दृष्टपरिकल्पनान्यायः। यथा पितामहदौहित्राभावे प्रपितामहप्रपितामह्योः क्रमेणाधिकारः प्रपितामहपिण्डस्य धनिभोग्यत्वात् पूर्व्वोक्तसांदृष्टिकन्यायसिद्धत्वाच्च। इति दायक्रमसंग्रहः॥

सान्द्रं, क्ली, (अदि बन्धने + बाहुलकात् रक्। अन्द्रेण सह वर्त्तते इति।) वनम्। इतिमेदिनी॥

सान्द्रः, त्रि, (अन्द्रेण निविड़बन्धनेन सह वर्त्तते इति।) घनः। इत्यमरः। ३। १। ६६॥ (यथा, माघे। ४। २८।

"उच्चैर्महारजतराजिविराजितासौ
दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा॥")

मृदुः। इति मेदिनी॥ स्निग्धः। मनोज्ञः। इति शब्दरत्नावली॥

सान्द्रपुष्पः, (सान्द्रं पुष्पमस्य।) विभीतकवृक्षः। इति शब्दचन्द्रिका॥

सान्द्रस्निग्धः, त्रि, (सान्द्रः स्निग्धश्च।) निविड़स्निग्धः। तत्पर्य्यायः। मेदुरः २। इति शब्दरत्नावली॥

सान्धिकः, पुं, (सन्धा मद्यसञ्जीकरणं शिल्पमस्य सन्धा + ठक्।) शौण्डिकः। इति शब्दमाला॥ (सन्धिं करोतीति। ठक्।) सन्धिकर्त्ता च॥

सान्धिवेलं, त्रि, (सन्धिवेला + "सन्धिवेलाऋतुनक्षत्रेभ्योऽण्।" ४। ३। १६। इति अण्।) सन्धिवेलायां भवम्। इति सिद्धान्तकौमुदी॥

सान्ध्यः, त्रिं, (सन्ध्यायां भवः। सन्ध्या + सन्धिवेलादित्वात् अण्।) सन्ध्यासम्बन्धीयः। (यथा, रघुः। २। २३।

"गुरोः सदारस्य निपीड्य पादौ
समाप्य सान्ध्यञ्च विधिं दिलीपः।
दोषावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छिन्नरिपुर्निषद्याम्॥")

सान्ध्यकुसुमा, स्त्री, सान्ध्यं सन्धिकालोद्भवं कुसुमं यस्याः।) त्रिसन्धिपुष्पवृक्षः। इति राजनिर्घण्टः॥

सान्नहनिकः, त्रि, (सन्नहनं प्रयोजनमस्येति। सन्नहन + तदस्य प्रयोजनमिति ठक्।) सन्नाहविशिष्टः। इति सिद्धान्तकौमुदी॥

साम्राय्यं, क्ली, (सम्यक् नीयते सोमार्थमिति। सं + नी + "पाय्यसाम्राय्येति।" ३।१।१२८। इतिक्यत्प्राप्तायादेशः समो दीर्घत्वञ्च निपात्यते हविः। इत्यमरः। ३। ७। २७॥

सान्निध्यं, क्ली, (सन्निधिरेव। सन्निधि + "चातुर्व्वर्ण्यादीनां स्वार्थे उपसंख्यानम्।" ५। १। १२४। इत्यस्य वार्त्तिकोक्त्या स्वार्थे ष्यञ्।) निकटम्। यथा,—

"अर्च्चकस्य तपोयोगात् अर्च्चनस्यातिशायनात्।
आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छति॥"

इति तिथ्यादितत्त्वम्॥

सान्निपातिकः, त्रि, (सन्निपातस्य शमनं कोपनं वा। "सन्निपाताच्च।" ५। १। ३८। इत्यस्य वार्त्तिकोक्त्या स्वार्थे ष्यञ्।) सन्निपातजरोगः। इति राजनिर्घण्टः॥ यथा, कुमारे। २। ४८।

"तस्मिन्नुपायाः सर्व्वे नः क्रूरे प्रतिहतक्रियाः।
वीर्य्यवल्लौषधानीव विकारे सान्निपातिके॥")

तद्विवरणं सन्निपातशब्दे द्रष्टव्यम्॥

सान्यासिकः, पुं, (संन्यासः प्रयोजनमस्येति। ठक्।) सन्यासी। तत्पर्य्यायः। भिक्षुः २ यतिः ३ कर्म्मन्दी ४ रक्तवसनः ५ परिव्राजकः ६ तापसः ७ पाराशरी ८ पारिकाङ्क्षी ९ मस्करी १० पारिव्रज्यकः ११। इति हेमचन्द्रः॥

सापत्न्यः, पुं, (सपत्न एव। स्वार्थे ष्यञ्) शत्रुः। इत्यमरटीकायां रमानाथः। २। ८। १०॥ (सपत्न्या अपत्यमिति। सपत्नी + ष्यञ्।) सपत्नीपुत्रः। यथा, बृहस्पतिः।

"पित्रा सह विभक्ता ये सापत्न्या वा सहोदराः।
जघन्यजाश्च ये तेषां पिण्डभागहरास्तु ते॥"

इति दायतत्त्वम्॥

(सपत्न्या भावः। सपत्नी + ब्राह्मणादित्वात् ष्यञ्।) सपत्नीभावे, क्ली॥ (यथा, माघे। ८। १५।

"गित्वाया निजवसतेर्निरासिरे य-
द्रागेण श्रियमरविन्दतः करायैः।
व्यक्तव्यं नियतमनेन निन्युरस्याः
सापत्न्यं चिरतिसृतविद्विषो महिष्यः॥")

सापिण्ड्यं, क्ली, (सपिण्डस्य भावः। सपिण्ड + ष्यञ्।) सपिण्डता। सा तु पुंसां सप्तमपुरुषपर्य्यन्तं अनूढकन्यानां त्रिपुरुषपर्य्यन्तञ्च स्यायिनी। यथा,—

"लेपभाजश्चतुर्थ्याद्याः पित्राद्याः पिण्डभागिनः
पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषम्
इति मत्स्यपुराणम्॥

अप्रत्तानां त्रिपौरुषम्। इति वशिष्ठः॥ अपि च

"पित्रादिषड्भिः सापिण्ड्यं तत्तत्सन्ततिसप्तकैः
गोत्रैक्ये सति तत्तु स्यात् षड्भिः पुत्रादिभिस्तथा।
अप्रत्तानान्तु कन्यानां त्रिभिः पित्रादिभिः स्मृतम्॥"

इति कारिका॥

अन्यत् सपिण्डशब्दे द्रष्टव्यम्॥

सप्तपदीनं, क्ली, (सप्तभिः पदैरवाप्यते इति। "सप्तपदीनं सख्यम्।" ५। २। २२। इति खञ् प्रत्ययेन साधुः।) सख्यम्। इत्यमरः। २। ८। १२॥ (यथा, कुमारे। ५। ३८।

"प्रयुक्तसत्कारविशेषमात्मना
न मां परं सम्प्रतिपत्तुमर्हसि।
यतः सतां सङ्गतमार्ये! सङ्गतं
मनीषिभिः सप्तपदीनमुच्यते॥")

सप्तपदसम्बन्धिनि, त्रि॥

साफल्यं, क्ली, (सफलस्य भावः। सफल + ष्यञ्) सफलता। (यथा, मुकुन्दमालायाम्। २८।

"जिह्वे श्रीकृष्णमन्त्रं जप जप सततं जन्म-
साफल्यमन्त्रम्॥")

साब्दी, स्त्री, द्राक्षाविशेषः। इति केचित्॥

साम, क सान्त्वे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) दन्त्यादिर्द्वितीयस्वरी। सान्त्वः प्रियकरणम्। क, सामयति दीनं दानेन दाता। इति दुर्गादासः॥

साम, त् क सान्त्वने। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-सक०-सेट्।) सान्त्वनं प्रियकरणम्। असत्सामत् दीनं दानेन दाता। इति दुर्गादासः॥

साम, [न्] क्ली, (स्यति छिनत्ति दुःखं गेयत्वात् स्यति दुःखयति दुरर्थं यत्नादिति वा। सो + "सातिभ्यां मनिन्मनिणौ।" उणा०४।१५२। इति मनिन्।) वेदविशेषः। इत्यमरः। २।६।३॥ स्यति पापं साम षो य नाशे त्रासुसिति मन्। इति भरतः॥ तल्लक्षणमाह जैमिनिः। गीतिषु सामाख्या इति। गीयमानेषु मन्त्रेषु सामसंज्ञेत्यर्थः। इति तिथ्यादितत्त्वम्॥ तत्तु चतुर्व्वेदान्तर्गतत्रयीवेदः। तस्य सप्तशाखा तस्योपनिषत् छान्दोग्यादिः। विवरणन्तु वेदशब्दे द्रष्टव्यम्॥* सामध्वनिश्रवणानन्तरं वेदपाठनिषेधस्तदधिष्ठातृदेवताकथनञ्च यथा,—

"सामध्वनावृग्यजुषी नाधीयीत कदाचन।
वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च॥
ऋग्वेदो देवदैवत्यो यजुर्व्वेदस्तु मानुषः।
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः॥"

इति मानवे। ४। १२३॥ * ॥

(वेदोऽयं गजोत्पत्तिकारणम्। तथा च रघुवंशटीकायां मल्लिनाथधृतपालकाव्ये। १६। ३।

"सूर्य्यस्याश्वकपाले हे समानीय प्रजापतिः।
हस्ताभ्यां परिगृह्याथ सप्तसामान्यगायत।
गायतो ब्रह्मणस्तस्मात् सप्तसामान्यजायत॥")

शत्रुवशीकरणोपायविशेषः। इत्यमरः। २। ८। २०॥ प्रियवादार्थप्रदानसम्बन्धादिभिः क्रोधोपशमनं साम। स्यति विरोधमिति षोऽन्तकर्म्मणीत्यस्मात् त्रासुसिति मन्। सान्त्व साम त् क सान्त्वने इत्यस्मात् नाम्नीति अन् वा। साम दन्त्यादि। शमयति विरोधमिति शम नान्तं तालव्यादि इति केचित्। इति भरतः॥ * ॥ अपि च।

मनुरुवाच।

"उपायांस्त्वं समाचक्ष्व सामपूर्व्वान्महाद्युते।
लक्षणञ्च तथा तेषां प्रयोगञ्च सुरोत्तम॥

मत्स्य उवाच।

साममेदस्तथा दानं दण्डश्च मनुजोत्तम।
उपेक्षा च तथा माया इन्द्रजालञ्च पार्थिव॥
प्रयोगाः कथिताः सप्त तन्मे निगदतः शृणु।
द्विविधं कथितं साम तथ्यञ्चातथ्यमेव च॥
तत्रापातथ्यं साधूनां आक्रोशायैव जायते।
तथ्यं साधुप्रियञ्चैव सामसाध्या नरा मताः॥
महाकुलीना ऋजवो धर्म्मनिष्ठा जितेन्द्रियाः।
सामसाध्या नरास्तथ्यं तेषु साम प्रयोजयेत्॥

तथञ्च साम कर्त्तव्यं कुलशीलादिवर्त्तिना।
तथा सदुपचाराणां कृतानाञ्चानुवर्णनम्॥
अनयैव तथा युक्त्या कृतघ्नाख्यापनं स्वकम्।
एवं सान्त्वेन कर्त्तव्या वशगा धर्म्मतत्पराः॥
सान्त्वा यद्यपि रक्षांसि गृह्णन्तीति परा श्रुतिः।
तथाप्येतदसाधूनां प्रयुक्तं नोपकारकम्।
अतिगान्तिकमित्येवं पुरुषं सामवादिनम्।
असाधवोऽवजानन्ति तस्मात् तेषु विवर्जयेत्॥
ये शुद्धवंशा ऋजवः प्रतीता
धर्म्मे स्थिताः सत्यपरा विनीताः।
ते साम साध्याः पुरुषाः प्रदिष्टा
मानोन्नता ये सततञ्च राजन्॥"

इति मात्स्ये राजधर्म्मे सामविधिः।२२२।१-१०॥
(प्रियवाक्यादिना सान्त्वनम्। यथा, देवीभागवते। १। १७। ३१।
"सामपूर्व्वमुवाचासौ तं चक्ता संस्थितं मुनिम्।
गच्छतां यत्र ते कार्य्यं यथेष्टं द्विजसत्तम!॥")

सामकं, क्ली, (समभेव सामम्। अण्। ततः स्वार्थे कन्।) मूलस्नेहम्। (यथा, मिताक्षरायाम्। २। ६४।
"हृद्विमात्रापाकरणार्थन्तु बन्धकं सामकं दत्त्वा प्रयाद्गणी समं मूल्यं समभेव सामकम्॥")

सामकः, पुं, (समतीति। सम अवैकल्ये + ण्वुल्।) तर्कज्ञानः। इति त्रिकाण्डशेषः॥ (साम अधीते वेद वा। साम + "ऋगादिभ्यो वुन्।" ४।२।६१। इति वुन्। सामाभिज्ञे, त्रि॥)

सामगः, पुं, (साम गायतीति। गै शब्दे + टक्। मामवेदो ब्राह्मणः। इति जटाधरः॥ (विष्णुः। इति महाभारतम्। १३। १४८। ७५॥ * ॥
सामवेदज्ञे, त्रि। यथा, भागवते।१।४।२१।
"तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः।
वैशम्पायन एवैको निष्णातो यजुषामुत॥")

सामगर्भः, पुं, (साम गर्भे यस्य।) विष्णुः। इति शब्दरत्नावली॥

सामगी, स्त्री, (साम गायतीति। गै + टक्। ङीप्।) सामगब्राह्मणपत्नी। इति केचित्॥

सामग्री, स्त्री, (समग्रस्य भावः। ष्यञ्। अभिधानात् स्त्रीत्वम्। ङीप्। यलोपः) कारणसमूहः। यथा,—
"सामग्री चेन्न फलविरहो व्यभिरेवेति तत्त्वम्"
इति पदाङ्कदूतः॥
द्रव्यम्। यथा,—
"एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम्।
अभावे पाकपात्राणां तदङ्गः समुपोषणम्॥"
इति लघुहारीतवचनात् पाकपात्राभावः पाकसामग्र्यभावोपलक्षणम्। इति श्राद्धतत्त्वम्॥

सामग्र्यं, क्ली, (समग्रस्य भावः। समग्र + ष्यञ्।) समुदायत्वम्। (यथा, कुमारे। ३। २८।
"वर्षप्रकर्षे सति कर्णिकारं
दुनोति निर्गन्धतया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां
पराङ्मुखी विश्वसृजः प्रवृत्तिः॥")

सामजः, पुं, (साम्नो वेदभेदात् जायते इति। जन + डः।) हस्ती। सासोर्त्थे, त्रि। इति मेदिनी॥ (उभयार्थे प्रमाणम्। यथा, माघे। १२। ११।
"नानाविधाविष्कृतसामजस्वरः
सहस्रवर्त्मा चपलैर्दुरध्ययः।
गान्धर्व्वभूयिष्ठतया समानतां
स सामवेदस्य दधौ बलोदधिः॥")

सामञ्जस्यं, क्ली, (समञ्जसस्य भावः। समञ्जस + ष्यञ्।) औचित्यम्॥

सामनी, स्त्री, पशुबन्धनरज्जुः। इति दामशब्दटीकायां भारतसुन्दरी॥

सामन्तः, पुं, (समन्तायाः संलग्ने कदेशाया भूमेरयमिति। समन्ता + तस्येदमिति अण्। समन्तात् भवः। तत्र भव इति अण् वा।) स्वविषयानन्तरराजा। सम् संलग्नोऽन्त एकदेशो यस्याः सा समन्ता स्वविषयानन्तरा भूमिः तस्या ईश्वरा इति षष्ठे सामन्ताः। इत्यमरटीकायां भरतः॥ (यथा, रघुः। ५। २८।
"सामन्तसम्भवनयैव धीरः
कैलासनाथं तरसा जिगीषुः॥"
सीमान्तरभवे, त्रि। यथा, मनुः। ८। २५८।
"साध्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः
सीमाविनिर्णयं कुर्य्युः प्रयता राजसन्निधौ॥"
"ग्रामसामन्ताः सीमान्तरवासिनः प्रष्टव्याः।" इति मेधातिथिः॥ "समन्तभवाः सामन्तास्तदासिनश्चत्वारो ग्रामवासिनः।" इति तट्टीकायां कुल्लूकः॥)

सामन्यः, पुं, (सामसु साधुः। सामन् + "तत्र साधुः।" ४।४।९८। इति यत्।) सामसेदग्रब्राह्मणः। (यथा, भट्टिः। ४। ९।
"ऋग्यजुषमधीयानान् सामन्यांश्च समर्चयन्।
बुभुजे देवसात्कृत्वा शूल्यमुख्यञ्च होमवान्।")

सामयिकः, त्रि, (समयः प्राप्तोऽस्य। समय + "समयश्चदक्ष प्राप्तम्।" ५।१।१०४। इति ठञ्) समयोचितः। (यथा, याज्ञवल्क्ये। २। १८८।
"निजधर्म्माविरोधेन यस्तु सामयिको भवेत्।
सोऽपि यत्नेन संरक्ष्यो धर्म्मो राजकृतश्च यः॥")

सामयोनिः, पुं, (साम्नः योनिः कारणम्।) ब्रह्मा (साम वेदभेदः योनिः कारणं यस्य।) हस्ती। सामोत्पत्तिवस्तुनि, त्रि। इति मेदिनी॥ (यथा, रघुः। १६। ३।
"चतुर्भुजांशप्रभवः स तेषां
दानप्रवृत्तेरनुपारतानाम्।
सुरद्विपानामिव सामयोनि-
र्भिन्नोऽष्टधा विप्रससार वंशः॥")

सामर्थ्यं, क्ली, (समर्थस्य भावः। समर्थ + ष्यञ्।) योग्यता। (यथा, रामायणे। २। ४३। २०।
"न हि मे जीवितं किञ्चित् सामर्थ्यमिह कल्पते
अपश्यन्त्याः प्रियं पुत्रं लक्ष्मणञ्च महाबलम्॥")
शक्तिः। इति मेदिनी॥ (यथा, गीतायाम्। २। ३६।
"अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्॥")

सामवायिकः, पुं, (समवायान् समवैति। समवाय + "समवायान् समवैति।" ४। ४।४३। इति ठक्।) मन्त्री। इति हेमचन्द्रः॥ समवायसम्बन्धिनि, त्रि॥

सामाजिकः, पुं, (समाजं समवतीति। समाज + "समवायान् समवैति।" ४।४।४३। इति ठक्। यद्वा, समाजं रक्षतीति। "रक्षति।" ४। ४। ३३। इति ठक्।) सभ्यः। इत्यमरः। २। ७। १६॥ (यथा, साहित्यदर्पणे। ३। २२९।
"सामाजिकैस्ततो ह्यस्यरसोऽयमनुभूयते॥")
समाजसम्बन्धिनि सभासम्बन्धिनि च त्रि॥(यथा, साहित्यदर्पणे। ३। ३९।
"ननु कथं रामादिरत्याद्युद्बोधकारणैः सीतादिभिः सामाजिकरत्याद्युद्बोध इत्युच्यते॥")

सामान्यं, क्ली, (समान एव। स्वार्थे ष्यञ्।) जातिः। यथा,—
"जातिर्जातश्च सामान्यं व्यक्तिस्तु पृथगालिका"
इत्यमरः। १। ४। ३०॥
तद्विविधं यथा, भाषापरिच्छेदे।
"सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते॥
परभिन्ना च या जातिः सैवापरतयोच्यते।
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते॥"
तल्लक्षणं यथा। नित्यत्वे सत्यनेकसमवेतत्वम्। अनेकसमवेतत्वं संयोगादीनामप्यस्ति अतः सत्यन्तं नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्ति अत उक्तं अनेकेति नित्यत्वे सति अनेकवृत्तित्वमत्यन्ताभावस्याप्यस्ति अतोवृत्तिसामान्यमुपेक्ष्य समवेतत्वमुक्तम्। एकव्यक्तिवृत्तिस्तु न जातिः। तथा चोक्तम्।
"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः॥"
एकव्यक्तिकत्वात् आकाशत्वं न जातिः। तुल्यवृत्तिकत्वात् घटत्वं कलसत्वं न जातिद्वयम्। संकीर्णत्वात् भूतत्वं मूर्त्तत्वं न जातिः। अनवस्थाभयात् सामान्यत्वं न जातिः। विशेषस्य व्यावृत्तस्वभावस्य रूपहानिः स्यादतो विशेषत्वं न जातिः। समवायसम्बन्धाभावात् समवायो न जातिः। द्रव्यादित्रिकवृत्तिरिति परत्वं अधिकदेशवृत्तित्वं अपरत्वमल्पदेशवृत्तित्वम्। सकलजात्यपेक्षया अधिकदेशवृत्तित्वात् सत्तायाः परत्वम्। एतद्बोधनाय द्रव्यादीति। तदपेक्षया चान्यासां जातीनां अपरत्वम्। परभिन्ना सत्ताभिन्ना। व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च। पृथिवीत्वाद्यपेक्षया व्यापकत्वात् अधिकदेशवृत्तित्वात् द्रव्यत्वस्य परत्वम्। सत्तापेक्षया अल्पदेशवृत्तित्वाद्द्रव्यत्वस्य अपरत्वञ्च। तथा च धर्म्मद्वयसमावेशात् उभयमविरुद्धम्। इति सिद्धान्तमुक्तावली॥ (साहश्यम्। समा-

नत्वम्। यथा, महाभारते। १२। २२८। ४।
"सामान्यमृषिभिर्गत्वा ब्रह्मलोकनिवासिभिः।
ब्रह्मोवामितदीप्तौजाः शान्तपाप्मा महातपाः।
विचचार यथाकामं त्रिषु लोकेषु नारदः॥")
सामान्य, त्रि, (समानस्य भावः। समान+ष्यञ्।) अनेकसम्बन्ध्येकवस्तु। साधारणम्। इत्यमरः। ३। १। ८२॥ यथा, देवलः।
"सामान्यं पुत्रकन्यानां सृतायां स्त्रीधनं विदुः।
अप्रजायां हरेद्भर्त्ता माता भ्राता पितापि वा॥"
इति दायतत्त्वम्॥
(यथा च कुमारे। ७। ४४।
"एकैव मूर्त्तिर्विभिदे त्रिधा सा
सामान्यमेषां प्रथमावरत्वम्।
विष्णोर्हरस्तस्य हरिः कदाचित्
वेधास्तयोस्तावपि धातुरादौ॥")
सामान्यलक्षणा, स्त्री, (सामान्यं साधारणधर्म्मः लक्षणं यस्याः।) अलौकिकसन्निकर्षविशेषः। स तु आश्रयज्ञापकसामान्यज्ञानम्। यथा। एकघटदर्शने सकलघटज्ञानं भवति ईदृशघटत्वादिज्ञानम्। तत्प्रमाणं यथा, भाषापरिच्छेदे।
"अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः।
सामान्यलक्षणा ज्ञानलक्षणा योगजस्तथा॥
आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते।
तदिन्द्रियजतद्धर्म्मबोधसामग्र्यपेक्षते॥"
सामान्यशासनं, क्ली, (सामान्यं शासनम्।) सामान्याधिकारः। यथा,—
"मन्वेन्द्रकोपी स्याद्ब्रह्मशासनं धर्म्मकीलकः।
सामान्यशासनं सौरं सुकृतिः शूद्रशासनम्॥"
इति पुरुषे शब्दरत्नावली॥
सामान्या, स्त्री, (सामान्य+टाप्।) साधारणी नायिका। अस्या लक्षणम्। धनमात्रलाभार्थसकलपुरुषाभिलाषा॥ सा त्रिधा। अन्यसम्भोगदुःखिता। वक्रोक्तिगर्व्विता। मानवती। वक्रोक्तिगर्व्वितापि द्विविधा। प्रेमगर्व्विता सौन्दर्य्यगर्व्विता च। एता नायिका अवस्थाभेदेन प्रत्येकं अष्टप्रकारा भवन्ति। यथा। प्रोषितभर्त्तृका १ खण्डिता २ कलहान्तरिता ३ विप्रलब्धा ४ उत्कण्ठिता ५ वासकसज्जा ६ स्वाधीनपतिका ७ अभिसारिका ८। इति रसमञ्जरी॥ (यथा च साहित्यदर्पणे। ३। १११—११२।
"धीरा कलाप्रगल्भा स्याद्धेया सामान्यनायिका।
निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि।
वित्तमात्रं समालोक्य सा रागं दर्शयेद् बहिः॥
काममङ्गीकृतमपि परित्रीणधनं नरम्।
मात्वा निष्क्रामयेद्देया पुनः सन्धानकाङ्क्षया॥
तस्कराः पण्डकाः मूर्खाः सुखग्राह्यधनास्तथा।
लिङ्गिनश्छद्मकामाद्या आसां प्रायेण वल्लभाः॥
क्वापि मदनासक्ता क्वापि सत्यानुरागिणी।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम्॥"
पण्डको वातरोगपण्डादिः। छद्म प्रच्छन्नं ये कामयन्ते ते छद्मकामाः। तत्र रागहीना यथा नटकमेलकादौ मदनमञ्जर्य्यादिः। रक्ता यथा मृच्छकटिकादौ वसन्तसेनादिः। पुनश्च।
"अवस्थाभिर्भवन्त्यष्टावेताः षोड़शभेदिताः॥
स्वाधीनभर्त्तृका तद्वत् खण्डिताथाभिसारिका
कलहान्तरिता विप्रलब्धा प्रोषितभर्त्तृका।
अन्या वासकसज्जा स्यादिरहोत्कण्ठिता
तथा॥"
एतासां लक्षणानि तु तत्तच्छब्दे विशेषतो द्रष्टव्यानि॥)
सामि, व्य, अर्द्धम्। निन्दा। इत्यमरः। ३। ३। २४८॥
सामिकृतः, त्रि, अर्द्धकृतः। सामिशब्दात् कृधातोः क्तप्रत्ययेन निष्पन्नः॥
सामिधेनी, स्त्री, (समिधां आधानी। समिध्+"सामिधामाधाने षेण्यण्।" ४। ३। १२०। इत्यस्य वार्त्तिकोक्त्या षेण्यण्। पित्वात् ङीष्) अग्निसमिन्धना ऋक्। अग्नेर्ज्वालने या ऋक् पठ्यते। तत्पर्य्यायः। धाय्या २। इत्यमरः। २। ७। २२॥ (यथा, महाभारते। ३। १३४। १६।
"नवैवोक्ताः सामधेन्यः पितॄणां
तथा प्राड्नैर्वयोगं विसर्गम्॥")
समित्। इति मेदिनी॥
सामिपीतः, त्रि, अर्द्धपानकृतः। सामिशब्दात् पाधातोः क्तप्रत्ययेन निष्पन्नः॥
सामिभुक्तः, त्रि, अर्द्धभुक्तः। सामिशब्दात् भुजधातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, रघुः। १८। १६।
"वल्लभाभिरुपसृत्य चक्रिरे
सामिभुक्तविषया समागमाः॥")
सामीची, स्त्री, वन्दना। इति हारावली॥
सामीप्य, क्ली, (समीपस्य भावः। समीप्+चतुर्वर्णादित्वात् ष्यञ्।) समीपत्वम्। नैकट्यम्। यथा,—
"वः कसामीप्यसाहश्यसाकल्यानुक्रमर्द्धिषु॥"
इति मुग्धबोधव्याकरणम्॥
अधिकरणविशेषः। आधारभेदः। यथा,—
"सामीपाश्लेषविषयैर्व्याप्याधारश्चतुर्विधः।"
इति कारके मुग्धबोधव्याकरणम्॥
सामुद्र, क्ली, (समुद्रे भवम्। अण्।) समुद्रलवणम्। इति हेमचन्द्रः॥ कारकच् इति भाषा। तत्पर्य्यायः।
"सामुद्रं यत्तु लवणं त्रिकुटं कड़कञ्च तत्॥"
इति रत्नमाला॥
अस्य गुणाः।
"सामुद्रं लवणं पाके नात्युष्णमविदाहि च।
भेदनं मधुरं स्निग्धं शूलघ्नं नातिपित्तलम्॥"
इति राजवल्लभः॥
अन्यत् समुद्रलवणशब्दे द्रष्टव्यम्॥ * ॥
समुद्रफेनम्। इति राजनिर्घण्टः॥ (समुद्रेण ऋषिणा प्रोक्तमिति। अण्।) देवचिङ्गम्। इति मेदिनी॥ (तल्लक्षणान्वितग्रन्थविशेषः।
इति केचित्॥) समुद्रजाते, त्रि। इति च मेदिनी॥ (पुं, समुद्रगामी वणिक्। यथा, याज्ञवल्क्ये। २। ३८।
"कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्।
दद्युर्व्वा स्वकृतां हार्द्दिं सर्व्वे सर्व्वासु जानिषु॥"
मशकविशेषः। यथा, सुश्रुते। ५। ८।
"मशकाः सामुद्रः परिमण्डलो हस्तिमशकः कृष्णः पार्व्वतीय इति पञ्च तैर्दष्टस्य तीव्रकण्डूदंशः शोफश्च। पार्व्वतीयस्तु कीटेः प्राग्वदरैः सुल्यलक्षणः॥"॥ देशविशेषः। यथा, मार्कण्डेये। ५८। १३।
"प्राग्ज्योतिषाः सलौहित्याः सामुद्राः पुरुषादकाः।
* * * *
वर्द्धमानाः कोशलाश्च मुखे कूर्म्मस्य संस्थिताः॥")
सामुद्रक, क्ली, (समुद्रमेव। स्वार्थे कन्।) समुद्रलवणम्। इति राजनिर्घण्टः॥ समुद्रोक्तस्त्रीपुंलक्षणग्रन्थः। तद्विवरणं यथा,—
श्रीकृष्ण उवाच।
"कौट्टग्यः पुरुषो वन्द्योऽवन्द्यो वा कौट्टगी भवेत्
कन्या वा कौट्टगी श्रस्या गर्हिता वापि
कौट्टगी॥
महेश उवाच।
शृणु कृष्ण प्रवक्ष्यामि समुद्रवचनं यथा।
लक्षणन्तु मनुष्याणां एकैकेन वदाम्यहम्॥
वामभागे तु नारीणां दक्षिणे पुरुषस्य च।
निर्द्दिष्टं लक्षणं तेषां समुद्रेण यथोदितम्॥
पूर्व्वमायुः परीक्षेत पश्चाल्लक्षणमेव च।
आयुर्हीनं नराणाञ्चेत् लक्षणैः किं प्रयोजनम्॥"
अथ पुरुषलक्षणम्।
"पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम्।
सप्तरक्तं त्रिगम्भीरं त्रिविशालं प्रशस्यते॥
बाहुनेत्रहृदयं कुक्षी ह्रौ तु नासा तथैव च।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते॥
ग्रीवाथ कर्णौ पृष्ठञ्च ह्रस्वे जङ्घे सुपूजिते।
चत्वारि यस्य ह्रस्वानि पूजां प्राप्नोति नित्यशः॥
सूक्ष्माण्यङ्गुलिपर्व्वाणि दन्तकेशनखत्वचः।
पञ्च सूक्ष्माणि येषां हि ते नरा दीर्घजीविनः॥
नासा नेत्रञ्च दन्ताश्च ललाटञ्च शिरस्तथा।
हृदयञ्चैव विज्ञेयमुन्नतं षट् प्रशस्यते॥
पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च।
तालुकोऽधरजिह्वा च सप्तरक्तं प्रशस्यते॥
स्वरो बुद्धिश्च नाभिश्च त्रिगम्भीरमुदाहृतम्।
उरः शिरो ललाटञ्च त्रिविस्तीर्णं प्रशस्यते॥
कटिर्विशाला बहुपुत्रभागी
विशालहस्तो नरपुङ्गवः स्यात्।
उरो विशालं धनधान्यभागी
शिरो विशालं नरपूजितः स्यात्॥
न श्रीस्त्यजति रक्ताङ्गं नार्थः कनकपिङ्गलम्।
दीर्घबाहुं न चैश्वर्य्यं न मांसोपचितांसकम्॥
कदादिदन्तुरो मूर्खः कदाचित् लोमशः सुखी।

कदाचित् तुन्दिलो दुःखी कदाचित् चञ्चला सती ॥
नेत्रस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् ।
हस्तस्नेहेन वैश्वर्य्यं पादस्नेहेन वाहनम् ॥
अकर्म्मकठिनौ हस्तौ पादावध्वनि कोमलौ ।
यस्य पाणितलौ रक्तौ तस्य राज्यं विनिर्दिशेत्॥
दीर्घलिङ्गेन दारिद्रं स्थूललिङ्गेन निर्धनः ।
क्षयलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपतिः ॥
रेखाभिर्बहुभिर्दुःखं स्वल्पाभिर्धनहीनता ।
रक्ताभिः श्रियमाप्नोति कृष्णाभिः प्रेष्यतां व्रजेत्
अङ्गुष्ठोदरमध्ये तु यवो यस्य विराजितः ।
उन्नतं भोजनं तस्य शतं जीवति मानवः ॥
अङ्कुशं कुलिशं छत्रं यस्य पाणितले भवेत् ।
तस्यैश्वर्य्यं विनिर्दिष्टं अशीत्यायुर्भवेद्ध्रुवम् ॥
धनुर्यस्य भवेत् पाणौ पङ्कजं वाथ तोरणम् ।
तस्यैश्वर्य्यञ्च राज्यञ्च अशीत्यायुर्भवेद्ध्रुवम् ॥
कनिष्ठातर्जनीं यावद्रेखा भवति चाञ्चता ।
विंशत्यब्दाधिकशतं नरो जीवत्यनामयः ॥
कनिष्ठामध्यमां यावद्रेखा भवति चाञ्चता ।
शताब्दं वाथ वाशीतिं नरो जीवेन्न संशयः ॥
कनिष्ठानामिकायाञ्चेत् रेखा भवति चाञ्चता ।
षष्टिं पञ्चाशदब्दं वा नरा जीवन्त्यसंशयम् ॥
रेखया भिद्यते रेखा स्वल्पायुश्च भवेन्नरः ।
कनिष्ठाधःस्थिता रेखाः संख्या यावतिकाः स्मृताः ।
तावतो पुरुषाणान्तु नारी भवति निश्चितम् ॥
करमध्यगता रेखा ध्रुवा ऊर्द्धभवेद् यदि ।
नृपो वा नृपतुल्यो वा ख्यातोऽर्थवान् भवेत् ॥
मत्स्यपुच्छप्रकीर्णेन विद्यावित्तसमन्वितः ।
पितामहस्य वा किञ्चिद्धनञ्च लभते ध्रुवम् ॥
मध्यमायां यदि यवा दृश्यन्तेऽत्यन्तशोभनाः ।
तदान्यसञ्चितं वित्तं प्राप्नोत्यङ्गुष्ठकेन तु ॥
यस्याथ चक्रमङ्गुष्ठे यवः पूर्णश्च दृश्यते ।
तदा पितामहादीनामर्জ্জितं धनमाप्नुयात् ॥
तर्जन्यामथ चक्रञ्च मित्रद्वारा धनम्भवेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
मध्यमायां स्थिते चक्रे देवद्वारा धनं लभेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
अनामिकायां भवेच्चक्रं सर्व्वद्वारा भवेद्धनम् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
कनिष्ठायां भवेच्चक्रं वाणिज्येन धनं भवेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
ललाटे दृश्यते यस्य चक्ररेखाचतुष्टयम् ।
अशीत्यायुः समाप्नोति पञ्चरेखाः शतं समाः ॥
यस्योन्नतं ललाटञ्च ताम्रवर्णञ्च दृश्यते ।
रेखाहीनश्च कक्षयं स चोन्मत्तो महीं भ्रमेत् ॥
यस्य जिह्वा भवेद्दीर्घा नासाग्रं लेढि सर्व्वदा ।
योगी भवति निर्व्वाणः पृथ्वीं भ्रमति सर्व्वदा ॥
दन्ताश्च विरला यस्य गण्डे कूपोऽपि जायते ।
परस्त्रीरमणो नित्यं परवित्तेन वित्तवान् ॥
कर्कशैः कठिनैर्लिङ्गैः प्रमाणान्निर्गतैः सदा ।
रमते च सदा दासीं निर्धनो भवति ध्रुवम् ॥
क्षयलिङ्गेन सूक्ष्मेण रक्तवर्णेन भूपतिः ।
बहुस्त्रीरमणो नित्यं नारीणां वल्लभो भवेत् ॥
यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम् ।
अङ्कुशं कुलिशं वापि स राजा भवति ध्रुवम् ॥
क्षयातिलोमशा ये स्युः केकराचाः कुचेलकाः ।
कातरं व्यालजिह्वाश्च ते दरिद्रा न संशयः ॥
कपिला मलिनाङ्गाश्च ह्रस्वाश्चैव हतव्रताः ।
क्षयातिदीर्घा मनुजास्ते दरिद्रा न संशयः ॥
चिबुके श्मश्रुशून्या ये निर्लोमहृदयाश्च ये ।
ते धूर्त्ता नैव सन्देहः समुद्रवचनं यथा ॥
सूचीमुखा भग्नपृष्ठाः क्षयदन्ता कुचेलकाः ।
वक्रनासा वञ्चनासास्ते नरा दुष्टमानसाः ॥
दयालवश्च दातारो रूपवन्तो जितेन्द्रियाः ।
परोपकारिणश्चैव तेऽपूर्व्वा मानवाः स्मृताः ॥"
इति पुरुषलक्षणम् ॥ * ॥

अथ स्त्रीलक्षणम् ।

"यस्याः पादतले रेखा सा भवेत् क्षितिपाङ्गना
भवेदखण्डभोगा च या मध्याङ्गुलिसङ्गता ॥
उन्नतो मांसलोऽकुष्ठो वर्त्तुलोऽतुलभगः गदः ।
वक्रो ह्रस्वश्च चिबिटः सुखसौभाग्यभञ्जकः ॥
दीर्घाङ्गुलीभिः कुलटा क्षयाभिरतिनिर्धना ।
ह्रस्वाभिः स्याच्च ह्रस्वायुः भग्नाभिर्भुग्नवर्त्तिनी॥
चिबिटाभिर्भवेद्दासी विरलाभिर्दरिद्रिणी ।
परस्परं समारूढा यदाङ्गुल्यो भवन्ति हि ॥
हत्वा बन्धनपि पतीन् परप्रेष्या तदा भवेत् ।
स्निग्धा समुन्नतास्ताम्रा हृत्ताः पादनखाः शुभाः ॥
राज्ञीत्वसूचकं स्त्रीणां पादपृष्ठं समुन्नतम् ।
समपार्ष्णी शुभा नारी पृथुपार्ष्णी सुदुर्भगा ॥
कुलटोन्नतपार्ष्णी स्यात् दीर्घपार्ष्णी च दुःख-भाक् ।
रोमहीने समे स्निग्धे जङ्घे च क्रमवर्त्तुले ॥
सा राजपत्नी भवति विग्रिरे सुमनोहरे ।
हृत्तं पिण्डितसंलग्नं जानुयुग्मं प्रशस्यते ॥
निर्म्मांसं स्त्रैरचारिण्या दरिद्रायाश्च विस्मयम् ।
विग्रिरेः करभाकारैरूरुभिर्मृगवैर्धनैः ।
सुहृत्ते रोमरहितेभवेयुर्भूपवल्लभाः ॥
चतुर्भिरङ्गुलैः श्रस्ता कटिर्विंशतिसंयुतैः ।
समुन्नतनितम्बाढ्या चतुरस्रा मृगीदृशाम् ॥
नितम्बविम्बो नारीणां उन्नतो मांसलः पृथुः ।
महाभोगाय संप्रोक्तः तदन्योऽधर्म्मनाय च ॥
गम्भीरा दक्षिणावर्त्ता नाभिः स्यात् सुखसम्पदे
वामावर्त्ता समुत्तानाऽव्यक्तग्रन्थी न शोभना ॥
उदरेणाभितुङ्गेन विग्रिरेण मृदुत्वचा ।
योषित् भवति भोगाढ्या नित्यमिष्टान्नसेविनी॥
कुम्भाकारं दरिद्राया जठरञ्च मृदङ्गवत् ।
कुम्भाग्रभं यवाभञ्च दुष्पूरं जायते स्त्रियाः ॥
निर्लोम हृदयं यस्याः समं निम्नत्ववर्जितम् ।
ऐश्वर्य्यं चाप्यवैधव्यं प्रियप्रेमा च सा भवेत् ।
घनौ वृत्तौ दृढौ पीनौ समौ श्रस्तौ पयोधरौ ।
स्थूलाग्रौ विरलौ सूक्ष्मौ वामोरूणां न शर्म्मदौ॥
दक्षिणोन्नतवक्षोजा पुत्रिणीष्वग्रणीर्मता ।
वामोन्नतकुचा सूते कन्यां सौभाग्यसुन्दरीम् ॥
मूले स्थूलौ क्रमक्षयावग्रे तौ क्षीणौ पयोधरौ ।
सुखदौ बाल्यकाले तु पश्चादत्यन्तदुःखदौ ॥
अभोजमुकुलाकारमङ्गुष्ठाङ्गुलिसम्मुखम् ।
हस्तहयं मृगाक्षीणां बहुभोगाय जायते ॥
मृदुमध्योन्नतं रक्तं तलं पाण्योररन्ध्रकम् ।
प्रशस्तं शस्तरेखाढ्यमन्यरेखं शुभप्रदम् ॥
विधवा बहुरेखेण विरेखेण दरिद्रिणी ।
भिक्षुकी सुशिराढ्येन नारी करतलेन वै ॥
मत्स्येन सुभगा नारी स्वस्तिकेन च सुप्रजा ।
पद्मेन भूपतेः पत्नी जनयेत् भूपतिं सुतम् ॥
चक्रवर्त्तिस्त्रियाः पाणौ नन्द्यावर्त्तप्रदक्षिणः ।
शङ्खातपत्रकमठा राजमातृत्वसूचकाः ॥
क्षयोन्नतस्य पत्नी स्याच्छकटेन युगेन वा ।
चामराङ्कुशकोदण्डैः राजपत्नी भवेद् ध्रुवम् ॥
अङ्गुष्ठमूलान्निर्गत्य रेखा याति कनिष्ठिकाम् ।
यदि स्यात् पतिहन्त्री सा दूरतस्तां त्यजेत् सुधीः ॥
त्रिशूलासिगदाशक्तिदुन्दुभ्याकृतिरेखया ।
नितम्बिनी कीर्त्तिमती करेण पृथिवीतले ॥
पाटलो वर्त्तुलः स्निग्धो रेखाभूषितमध्यभूः ।
सीमन्तिनीनामधरो राज्ञां चैव प्रियो भवेत् ॥
श्यामः स्थूलोऽधरोष्ठः स्यात् वैधव्यकलहप्रदः ।
मसृणो मत्तकाशिन्याश्चोत्तरोष्ठः सुभोगदः ॥
पीताः श्यामाश्च दशनाः स्थूला दीर्घा द्विषड्क्षयः ।
शुक्त्याकाराश्च विरला दुःखदौर्भाग्यकारणम् ।
अधस्तादधिकैर्दन्तैर्मातरं भक्षयेत् स्फुटम् ॥
पतिहीना च विकटैः कुलटा विरलैर्भवेत् ।
समहृत्तपुटा नासा लघुच्छिद्रा शुभावहा ॥
स्थूलाग्रा मध्यनम्रा च न प्रशस्ता समुन्नता ।
ललना लोचने श्रस्ते रक्तान्ते कृष्णतारके ॥
गोचीरवर्णविग्रदे सुस्निग्धे कृष्णपक्ष्मणी ।
उन्नताक्षी न दीर्घायुः हृत्ताक्षी कुलटा भवेत् ॥
मेषाक्षी महिषाक्षी च केकराक्षी न शोभना ।
कामगृद्धीता नितरां गोपिङ्गाक्षी सुदुर्मदा ॥
पारावताक्षी दुःशीला रक्ताक्षी भर्त्तृघातिनी ।
कोटरानयना दुष्टा गजनेत्रा न शोभना ॥
पुंवत्सौ वामकाणाक्षौ वन्ध्या दक्षिणकाणिका ।
मधुपिङ्गाक्षी रमणी धनधान्यसमृद्धिभाक् ।
प्रलम्बमलिकं यस्या देवरं हन्ति सा ध्रुवम् ॥
रोमशेन शिरालेन प्रांशुना रोगिणी मता ॥
स्थूलमूर्द्धा च विधवा दीर्घग्रीवा च बन्धकी ।
विशालेनापि शिरसा भवेद्दौर्भाग्यभाजनम् ॥
केशा अलिकुलच्छायाः स्निग्धाः सूक्ष्माः सुकोमलाः ।
किञ्चिदाकुञ्चिताग्राश्च कुटिलाश्चातिशोभनाः॥
भ्रुवोरन्तो ललाटे वा मशको राज्यसूचकः ।
वामे कपोले मशकः शोणो मिष्टान्नदः शुभः ॥
तिलकं लाञ्छनं वापि हृदि सौभाग्यकारणम् ।
यस्या दक्षिणवक्षोजे भवेत् तिलकलाञ्छनम् ॥
कन्याचतुष्टयं सूते सूते सा च सुतद्वयम् ।

तिलकं लाञ्छनं शोणं यस्या वामकुचे भवेत् ॥
एकं पुत्रं प्रसूयादौ अन्ते च विधवा भवेत् ।
गुह्यस्य दक्षिणे भागे तिलकं यदि योषितः ॥
तदा क्षितिपतेः पत्नी सूते च क्षितिपं सुतम् ।
नासाग्रे मशकः शोणो महिष्या एव जायते ॥
कृष्णः स एव भर्त्तृघ्नाः पुंश्चल्या वा प्रकीर्त्तितः ।
नाभेरधस्तात् तिलकं मशको लाञ्छनं शुभम् ॥
मशकस्तिलकं चिह्नं गुल्फदेशे दरिद्रकृत् ॥
सुलक्षणापि दुःशीला कुलक्षणशिरोमणिः ॥
कुलक्षणापि या साध्वी सर्व्वलक्षणभूस्तु सा ।
कृष्णा कपिलकेशी च मिलितभ्रूकुटिस्तथा ।
नमनं सत्वरञ्चैव त्यक्तव्या स्यात् सदा बुधैः ॥
यस्या गमनमात्रेण भूमौ कम्पः प्रजायते ।
ब्रह्मग्निनीं प्रलोभाच्च तां नारीं परिवर्जयेत् ॥
विरला दशना यस्याः कृष्णोष्ठी कृष्णजिह्विका
भर्त्तारं प्रथमं हन्ति द्वितीयञ्चैव विन्दति ॥
अङ्गुली विरला यस्याः सलोमा गात्रकर्कशा ।
भेका भेकस्वनी क्षुद्रा दूरतः परिवर्जयेत् ॥
त्रीणि यस्याः प्रलम्बानि ललाटं उदरं भगम् ।
त्रीणि सा भक्षयेच्चारी श्वशुरं देवरं पतिम् ॥
ललाटे श्वशुरं हन्यात् जठरे देवरं तथा ।
भगञ्च हन्याद्भर्त्तारं महादोषास्त्रयः स्मृताः ॥
यस्या अत्युत्कटं नार्य्या वक्त्रञ्च विस्तृतं भवेत् ।
उत्तरोष्ठे च लोमानि शीघ्रं सा भक्षयेत् पतिम् ॥
चरणानामिका यस्याः क्षितिं न स्पृशते यदि ।
द्वितीया वा तृतीया वा सा कन्या सुख-वर्জ্জिता ॥
नासाग्रे दृश्यते यस्याः तिलकं मशकोऽपि च ।
कृष्णदन्ता कृष्णजिह्वा दशाहेन पतिं हरेत् ॥
सूक्ष्मकेशा तु या कन्या गौरवर्णा च या भवेत्
अष्टौ जनयते पुत्रान् प्राप्नोति विपुलं सुखम् ॥"
इति सामुद्रके स्त्रीलक्षणं समाप्तम् ॥
(समुद्रसम्बन्धिनि, त्रि । यथा, महाभारते । ५ । ३५ । ४४ ।
"सामुद्रकं वाणिजकञ्च चौरं
शलाकवृत्तिञ्च चिकित्सकञ्च ।
अरिञ्च मित्रञ्च कुशीलवञ्च
नैतान् साक्ष्ये त्वधीकुर्व्वीत सप्त ॥")
सामुद्रिकः, त्रि, (समुद्रेण प्रोक्तं शास्त्रमधीते वेत्तीति वा । ठञ् ।) स्त्रीपंसचिह्नवेत्ता । इति हारावली ॥ समुद्रसम्बन्धी च ॥ (यथा, महाभारते । १२ । १६८ । २ ।
"सामुद्रिकान् स वणिजस्ततोऽपश्यत् स्थितान् पथि ।
स तेन सह सार्थेन प्रययौ सागरं प्रति ॥")
सान्नी, स्त्री. वैदिकच्छन्दोविशेषः । इति केचित्॥
साम्परायिकं, क्ली, (संपरायाय विपदे प्रभवतीति । संपराय + "तस्मै प्रभवति सन्तापादिभ्यः ।"५ । १ । १०१ । इति ठञ् ।)युद्धम् । इत्यमरः । २ । ८ । १०४ ॥ (सम्परायं उत्तरकाले हितम् । सम्पराय + ठक् ।) पारलौकिके, त्रि । यथा,—
"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते ।
न साम्परायिकं तस्य दुर्म्मतेर्विद्यते फलम् ॥"
इति मनुः । ११ । ३० ।
(सम्परायं युद्धमर्हतीति । तदर्हतीति ठक् । युद्धार्हे, त्रि । यथा, रघुः । १७ । ६२ ।
"पित्रा संवर्द्धितो नित्यं कृतास्त्रः साम्परायिकः
तस्य दण्डवतो दण्डः स्वदेहान्न व्यशिष्यत ॥")
साम्प्रतं,व्य, (सम् च प्रति च द्वयोः समाहारः । ततः प्रज्ञाद्यण् ।) युक्तम् । (यथा, कुमारे । २ । ५५ ।
"इतः स दैत्यः प्राग्जन्मन्येनत एवाहति श्रुतम् ।
विषह्यक्षोऽपि संवर्द्धं स्वयं छेत्तुमसाम्प्रतम् ॥")
इदानीम् । इत्यमरः । ३ । ४ । ११ । २३ ॥
(यथा, ऋतुसंहारे । १ । ७ ।
"समुन्नतस्तनोचिताङ्गसन्धयो
विमुच्य वासांसि गुरूणि साम्प्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना
निवेशयन्ते प्रमदाः सयौवनाः ॥"* ॥
सम्प्रति भवं साम्प्रतम् । अण् । इदानीन्तने, त्रि । यथा, हरिवंशे । ६ । १६ ।
"वैवस्वतेऽन्तरे चास्मिन् साम्प्रते समुपस्थिते ।
वैवस्वात् प्रभृति राजेन्द्र सर्व्वस्यैतस्य सम्भवः ॥"
तथाच तत्रैव । ७ । ३७ ।
"मनोर्वैवस्वतस्यैते वर्त्तन्ते साम्प्रतेऽन्तरे ।
इक्ष्वाकुप्रमुखाश्चैव दशपुत्रा महात्मनः ॥"
तथाच तत्रैव । ८ । ४३ ।
"तस्य ते कीर्त्तयिष्यामि मनोर्वैवस्वतस्य ह ।
विसर्गं भरतश्रेष्ठ साम्प्रतस्य महाद्युतेः ॥")
साम्ब,क सम्बन्धे । इति कविकल्पद्रुमः ॥ (चुरा० पर०-सक०-सेट् ।) ओष्ठ्यवर्गद्वितीयोपधः । द्वितीयस्वरी । क, साम्बयति धनं लोकः संबध्नाति इत्यर्थः । इति दुर्गादासः ॥
साम्बरं, क्ली, (सम्बरदेशे भवम् । अण् । गड़लवणम् । यथा,—
"गड़ादिलवणं शुभ्रं पृथ्वीजं गड़देजम् ।
गड़ोत्थञ्च महारम्भं साम्बरं सम्बरोद्भवम् ॥"
इति राजनिर्घण्टः ॥
साम्बरी, स्त्री,(सम्बरेण कृता । सम्बर + अण् + ङीष् ।) माया । यथा,—
"शाम्बरी सांबरी माया मायाकृच्छिल्पके नटे"
इति शब्दरत्नावली ॥
साम्भवी, स्त्री, रक्तलोध्रः । इति शब्दचन्द्रिका ॥
साम्मातुरः,पुं,(सम्मातुरपत्यं पुमान् । सम्मातृ + "मातुरुत्संख्यासंभद्रपूर्व्वायाः।"४।१।११५।इति अण् । उकारश्च ।) सतीतनयः । तत्पर्य्यायः । भाद्रमातुरः२ । इति हेमचन्द्रः । ३ । २२० ॥
साम्यं, क्ली, (समस्य भावः । सम + ष्यञ् ।) समता । तुल्यत्वम् । यथा,—
"चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति॥"
इति प्रायश्चित्ततत्त्वम् ॥
साम्यन्ते कथनात्यम् । इति मुग्धबोधव्याकरणम् ॥ (साम्यावस्थापन्ने, त्रि । यथा, भागवते । ८ । ३ । १२ ।
"नमः शान्ताय घोराय मूढ़ाय गुणधर्म्मिणे ।
निर्व्विशेषाय साम्याय नमो ज्ञानघनाय च ॥"
साम्राज्यं, क्ली, (सम्राजो भावः । ष्यञ् ।) समस्तराज्यम् । (यथा, रघुः । ४ । ५ ।
"छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥"
दशलक्षाधिपत्यम् । यथा,—
"लक्षाधिपत्यं राज्यं स्यात् साम्राज्यं दशलक्षके ।
शतलक्षे महेशानि महासाम्राज्यमुच्यते ॥"
इति वरदातन्त्रे २ पटलः ॥
साम्राणिकर्हमं, क्ली, जवादिनामकगन्धद्रव्यम् । इति राजनिर्घण्टः ॥
साम्राणिजं, क्ली, महापारेवतम् । इति राजनिर्घण्टः ॥
सायं,व्य, (स्यति समापयति दिनमिति । सो + बाहुलकात् णम् । युगागमाय ।) सायाह्नः । इत्यमरः । ३ । ४ । १८ । सन्ध्या । इति राजनिर्घण्टः ॥ तथा,—
"दिनान्ते पुंसि सायः स्यात् सायाह्ने सायमव्ययम् ।"
इति शब्दार्णवः ॥
(यथा, रघुः । १ । ४८ ।
"सदुष्प्रापयशाः प्रायादस्तमं श्रान्तवाहनः ।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥")
सायंकालः, पुं, (सायं सायाह्नः कालः ।) सायाह्नः । सायंसन्ध्यासमयः । यथा, स्मृतिसागरधृतमत्स्यसूक्तम् ।
"ज्येष्ठा वाप्यथवा षष्ठी सायंकाले न चेद्भवेत् ॥
सायमेव तथापि स्याद्विद्धाग्राह्याभिमन्त्रणम् ॥
इति तिथ्यादितत्त्वम् ॥
सायंसन्ध्या, स्त्री, (सायं सायाह्ने या सन्ध्या ।) सायंकालोपास्या देवता । सायंकालकर्त्तव्योपासना । सायंसन्ध्योपासनाकालश्च । तत्प्रमाणं सन्ध्याशब्दे द्रष्टव्यम् । पश्चिमा सन्ध्या । तस्या उत्पत्तिर्यथा,—
मार्कण्डेय उवाच ।
"नारायणः स्वयं सन्ध्यां पद्मगर्भायाप्रयाणिना ।
ततः पुरोऽभवत् तच्छरीरमभूत् क्षणात् ॥
महासुनेर्म्महायज्ञे तस्मिन् विघ्नोपकारिणि ।
नाग्निः क्रव्यादतां यातीत्येतदर्थं तथा कृतम् ॥
एवं कृत्वा जगन्नाथस्तत्रैवान्तरधीयत ।
सन्ध्याप्यगच्छदुदयं तेजो तत्र मेधातिथिर्मुनिः ॥
अथ विष्णोः प्रसादेन केनाप्यनुपलक्षिता ।
प्रविवेश तदा यज्ञं सन्ध्या मेधातिथेर्मुनेः ॥
वशिष्ठेन पुरा या तु वर्षीभूता तु सा सुता ।
उपदिष्टा तपस्तप्तुं वचनात् परमेष्ठिनः ॥

तमेव कृत्वा मनसि तपश्चर्य्योपदेशकम्।
पतित्वेन तदा सन्ध्या ब्राह्मणं ब्रह्मचारिणम्॥
समिद्धेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता।
तदा विष्णोः प्रसादेन सा विवेश विधेः सुता॥
तस्याः पुरोडाशमयं शरीरं तत्क्षणात्ततः।
दग्धं पुरोडाशगन्धं व्यस्तारयदलक्षितम्॥
वह्निस्तस्याः शरीरं तद्दग्ध्वा सूर्य्यस्य मण्डले।
शुद्धं प्रवेशयामास विष्णोराज्ञया पुनः॥
सूर्य्यो द्विधा विभज्याथ तत्शरीरं तदा रथे।
स्वके संस्थापयामास प्रीतये पितृदेवयोः॥
यदूर्द्धभागं तस्यास्तु शरीरस्य द्विजोत्तमाः।
प्रातःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा॥
यच्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगा।
सा सायमभवत् सन्ध्या पितृप्रीतिप्रदा सदा॥
सूर्य्योदयाच्च प्रथमं यदा स्यादरुणोदयः।
प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी॥
अस्तं गते ततः सूर्य्ये शोणपद्मनिभा सदा।
उदेति सायंसन्ध्या सा पितॄणां मोदकारिणी॥"
इति श्रीकालिकापुराणे अरुन्धतीजन्मकथने २२ अध्यायः॥

सायंसन्ध्यादेवता, स्त्री,(सायंसन्ध्याया देवता।) मरस्वती। इति कविकल्पलता॥

सायः,पुं, (स्यति समापयति दिनमिति। सो+ञ्याद्यधेति णः। ततो युगागमः।) दिनान्तः। इत्यमरः। १। ४। ३॥ बाणः। इति मेदिनी॥ सायोत्सवी विकालके। इति त्रिकाण्डशेषः॥

सा(शा)यकः, पुं, (स्यति क्षिनत्तीति। सो+खुल्+युक्।) बाणः। (यथा, रामायणे। २। ३१। १०।

"अभेद्ये कवचे दिव्ये तूणौ चाक्षय्यसायकौ॥")
खड्गः। इत्यमरः। ३।३।२॥ (यथा, महाभारते। ४। ४०। १४।

"कस्य पाञ्चनखे कोषे सायको हेमविग्रहः।
प्रमाणरूपसम्पन्नः पीत आकाशसन्निभः॥"

पञ्चमसंख्या। यथा, साहित्यदर्पणे। ४।२६४।

"सङ्करेण त्रिरूपेण संसृष्टा चैकरूपया।
वेदखाग्निशराः शुद्धैरिषुबाणाग्निसायकाः॥")

सायकपुङ्खा, स्त्री, (सायकस्य पुङ्ख इव पुङ्खो यस्याः।) शरपुङ्खा। इति राजनिर्घण्टः॥ (सायकस्य पुङ्खे, पुं। यथा, रघुः। २।३१।

"सन्नद्धाङ्गुलिः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे॥")

सायन्तनः, त्रि, (सायं भवः। सायम्+"सायं चिरंप्राह्णे प्रगव्ययेभ्यष्ट्युट्युलौ तुट् च।" ४।३। २३। इति ट्युल् तुट् च।) सायंकालभवः। यथा,—

"सन्ध्यां सायन्तनीं कुर्य्यात् द्वादश्यादिष्वपि प्रिये।
अकुर्व्वन्निरयं याति यतो नित्यागमक्रिया॥"
इति हरिभक्तिविलासतन्त्रे प्रथमपटलः॥

सायाङ्गः, पुं, (सायमङ्गः। "संख्याविसायेति।" ६। ३। ११०। ज्ञापकात् समासः।) पञ्चधा-विभक्तदिनपञ्चमांशः। दिवसस्य शेषमूहूर्त्तत्रयम्। यथा,—

"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्त्रावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तं स्यादपराह्णस्ततः परम्॥
सायाह्नस्त्रिमुहूर्त्तं स्यात् श्राद्धं तत्र न कारयेत्
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु॥"
इति तिथ्यादितत्त्वम्॥

तत्पर्य्यायः।

"सायो दिनान्तः सायाह्नो विकालः सायमेव च"
इति शब्दरत्नावली॥

सायिका,स्त्री,क्रमस्थितिः। इति शब्दरत्नावली॥

सायो, [न्] पुं, (सायति नाशयति गतिक्लेशमिति। सै क्षये+णिनिः।) अस्त्रारोहः। इति केचित्॥

सायुज्यं, क्लो, (सयुजो सहयोगस्य भावः। ब्राह्मणादित्वात् ष्यञ्।) सहयोगः। एकत्वम्। तत्तु पञ्चधामुक्त्यन्तर्गतमुक्तिविशेषः। यथा,—

"सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः॥"
इति श्रीभागवते। ३। २८। १३॥

"भक्तानां निष्कामतां कैमुतिकन्यायेनाह। सालोक्यं मया सह एकस्मिन् लोके वासम्। सार्ष्टिं समानैश्वर्य्यम्। सामीप्यं निकटवर्त्तित्वम्। सारूप्यं समानरूपताम्। एकत्वं सायुज्यम्। उत अपि दीयमानमपि न गृह्णन्ति कुतस्तत्कामना इत्यर्थः।" इति श्रीधरस्वामी॥

"एकत्वं भगवत्सायुज्यं ब्रह्मसायुज्यञ्च। अनयोस्त्रीलाभकत्वेन तत्सेवनार्थत्वाभावात् ग्रहणावश्यकत्वमेवेति भावः।" इति क्रमसन्दर्भः॥

सायं, व्य, दिनान्ते। सायंकाले। इति केचित्॥

सार, त् क दौर्ब्बल्ये। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-अक०-सेट्।) रेफोपधः। असासारत्। इति दुर्गादासः॥

सारं,क्लो,पुं,(सार त् क दौर्ब्बल्ये+अच्। सृ गतौ+घञ् इति वा।) जलम्। धनम्। (यथा, रघुः। ४। ७८।

"परस्परेण विज्ञातस्त्रेषूपायनपाणिषु।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा॥")
न्याय्यम्। इति मेदिनी॥ (सरात् जातम्। सर+अण्।)नवनीतम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते उत्तरतन्त्रे। २६।

"क्षीरशेषञ्च तन्मथ्यं शीतं सारमुपाहरेत्॥"
अमृतम्। यथा, भागवते। ७। ६। २५।

"धर्म्मादयः किमगुणेन च काङ्क्षितेन
सारंजुषां चरणयोरुपगायतां नः॥")
लौहम्। इति भावप्रकाशः। विपिनम्। इति शब्दरत्नावली॥* सारवस्तूनि यथा,—

"सारं रसानान्तु घृतं घृतसारं घृतञ्च यत्।
घृतस्य सारं स्वर्गञ्च स्वर्गात् सारन्तु योषितः॥
अतो राजन् प्रदेयाः स्युः स्त्रियः स्वर्गमभीप्सतः।
तथैवेह सुखं ताभिः सह राज्यं नृपोत्तम॥"
इति वह्निपुराणे दासीदानाध्यायः॥

अपि च।

"असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुसेवनम्॥"
इति कवितारत्नाकरधृतपुराणवचनम्॥

सारः, पुं, (सृ+"सृ स्थिरे।" ३।३। १७। इति घञ्।) बलम्। (यथा, महाभारते। १।१५५। २३।

"तरस्य भीम मा क्रोड जहि रक्षो विभीषणम्।
पुरा विकुरुते मायां भुजयोः सारमर्पय॥")
स्थिरांशः। इत्यमरः। ३। ३। १७०॥ (यथा, रघुः। १०। १०।

"प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम्।
कौस्तुभाख्यमपां सारं बिभ्राणं हृदतोरसा॥")
मज्जा। इत्यमरः। २। ४। १२॥ वज्रञ्चारम्। इति राजनिर्घण्टः॥ वायुः। इति जटाधरः॥ रोगः। इति धरणिः॥ पाशकः। इति शब्दरत्नावली॥ दध्युत्तरम्। इति शब्दचन्द्रिका॥ (अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ७३१।

"उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते॥"
यथा,—

"राज्ये सारं वसुधा वसुधायामपि पुरं पुरे सौधम्।
सौधे तल्पं तल्पे वराङ्गनासर्व्वस्वम्॥")

सारः, त्रि, (सृ+घञ्।) अतिदृढः। इति शब्दरत्नावली॥ वरः। श्रेष्ठः। इत्यमरमेदिनीकरौ॥ यथा,—

"सर्व्वसारो यथा कृष्णो व्रतानां पुष्पकं तथा॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ३।३०॥

अपि च।

श्रीमार्कण्डेय उवाच।

"जगत् सर्व्वन्तु निःसारमनित्यं दुःखभाजनम्।
उत्पद्यते क्षणादेतत् क्षणादेतत् विपद्यते॥
यथैवोत्पद्यते सारान्निःसारं जगदञ्जसा।
पुनस्तस्मिन्निलीयन्ते महाप्रलयसङ्क्रमे॥
उत्पत्तिप्रलयाभ्यान्तु जगन्निसारतां हरिः।
ज्ञापयै दर्शयामास भावेन जगतां पतिः॥
एकं शिवं शान्तमनन्तमच्युतं
परात्परं ज्ञानमयं विशेषम्।
अद्वैतमव्यग्रमचिन्त्यरूपं
सारन्त्वेकं नास्ति सारं त्वदन्यत्॥
यस्मादेतज्जायते विश्वमग्रं
यस्माज्ज्ञानं स्यात् तत्पश्चात् स्थितञ्च।
आकाशवन्मेघजालस्य मृत्या
यद्विश्वं वै म्रियते तच्च सारम्॥
अष्टाङ्गयोगैर्यदामुमिच्छन्
योगी युनक्त्यात्मरूपं सदैव।
निवर्त्तते प्राप्य यत्रैव लोके
तद्वै सारं सारमन्यन्न चास्ति॥

सारो द्वितीयो धर्म्मस्तु यो नित्यप्राप्तये भवेत्।
यो वै निवर्त्तको नाम तत्सारः प्रवर्त्तकः॥
सर्व्वं चरति लोकेऽस्मिन् धर्म्मो नैव च्युतो भवेत्
स्वधर्म्माद्यो न चलति स एवाच्चर उच्यते॥
एतद्वः कथितं सारं निःसारञ्च यथा जगत्।
यथा स्वयं ददर्शाग्र प्रभुर्न्नारिन स्वेऽन्तरि॥
एतद्वै दर्शयामास स विष्णुर्जगतां पतिः।
स्वयं जग्राह मनसा ध्यानेनात्मनि शङ्करः॥
सारं तत्त्वं परमं निष्कलं य-
न्मूर्त्या हीनं मूर्त्तिमान् धर्म्म एषः।
सारोऽन्योऽसौ सारहीनं तदन्यत्
ज्ञात्वैवेत्थं याति नित्यं महाधीः॥"
इति श्रीकालिकापुराणे २७ अध्यायः॥

सारकः, पुं, (सारयति मलमिति। सृ + णिच् + ण्वुल्।) जयपालः। इति राजनिर्घण्टः॥ विरेचके, त्रि। इति वैद्यकम्॥

सारखदिरः, पुं, (सारः अतिदृढः खदिरः।) दुःखदिरः। इति राजनिर्घण्टः॥

सारगन्धः, पुं, (सारो गन्धो यस्य।) चन्दनम्। इति शब्दचन्द्रिका॥

सारग्राही, [न्] त्रि, (सारं गृह्णातीति। ग्रह + णिनिः) सारग्रहणकर्त्ता॥

सारघं, क्ली, (सरघाभिर्मधुमक्षिकाभिः कृतमिति सरघा + अण्।) मधु। इति जटाधरः॥
(यथा, भागवते। १०। १६। ४३।
"पीत्वा मुकुन्दमुखसारघमक्षिभृङ्गै-
स्तार्पं जहुर्विरहजं व्रजयोषितोऽङ्ग॥")

सारङ्गः, पुं, (सरतीति। सृ गतौ + "सृहृज्योर्ह्रस्वश्च।" उणा० १। १२१। इति अङ्गच्। ह्रस्वश्च।) चातकपक्षी। इत्यमरः। २। ५। १७॥
(यथा, रामायणे। २। ६३। १६।
"उष्णमन्तर्दधे सद्यः स्निग्धा दद्दुरिरे घनाः।
ततो जहृषिरे सर्व्वे मेकसारङ्गबर्हिणः॥")
हरिणः। (यथा, भट्टिः। ३। २६।
"गोमायुसारङ्गगणाश्च सम्यक्
नायासिषुर्भीममरासिषुश्च॥")
मातङ्गजः। इति मेदिनी॥ पक्षिभेदः। भृङ्गः। इति विश्वः॥ यथा,—
"नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक्।
कुशलान्याशु सिध्यन्ति नेतराणि कृतानि यत्॥"
इति श्रीभागवते। १। १८। ७॥
"ननु अधर्म्महेतुं कलिं सर्व्वथा किं न हतवान् तत्राह नानुद्वेष्टीति। सारङ्गो भ्रमर इव सारग्राही। सारमाह यत् यस्मिन् कृशलानि पुण्यानि आशु संकल्पमात्रेण फलन्ति इतराणि पापानि आशु न सिध्यन्ति यतस्तानि कृतान्येव सिध्यन्ति न तु संकल्पितमाचाणीति।" इति श्रीधरस्वामी॥ क्लीबम्। राजहंसः। चित्रमृगः। (यथा, महाभारते। ७। २२। २१।
"आक्रीड़न्तो वहन्ति स्म सारङ्गशबला हयाः॥")
वाद्यभेदः। अंशुकम्। इति शब्दरत्नावली॥ नानावर्णः। मयूरः। कामदेवः। धनुः। केशः। स्वर्णम्। आभरणम्। पद्मम्। शृङ्गः। चन्दनम्। कर्पूरम्। पुष्पम्। कोकिलः। मेघः। पृथिवी। रात्रिः। दीप्तिः। सिंहः। इत्यनेकार्थकोषः॥
सारङ्गहरिणमांसगुणाः।
"सारङ्गं जाङ्गलं स्निग्धं मधुरं लघु हृद्यदम्।"
इति राजनिर्घण्टः॥

सारङ्गः, त्रि, (सृ + अङ्गच्।) शबलः। इत्यमरः। १। ३। २३॥ "शारङ्गघातके ख्यातः शबले हरिणेऽपि च। इति तालव्यादावजयः। अतएव सारङ्गो दन्त्यादिस्तालव्यादिश्च।" इति भरतः॥

सारङ्गिकः, पुं, (सारङ्गं हन्तीति। सारङ्ग + "पक्षिमत्स्यमृगान् हन्ति।" ४। ४। ३५। इति ठक्।) व्याधः। इति सिद्धान्तकौमुदी॥

सारङ्गी, स्त्री, वाद्यविशेषः। इति केचित्॥

सारजं, क्ली, (सारात् जायते इति। जन + डः।) नवनीतम्। इति शब्दचन्द्रिका॥

सारणं, क्ली, (सारयतीति। सृ + णिच् + ल्युः।) गन्धभेदः। इति धरणिः॥

सारणः, पुं, (सृ + णिच् + ल्युः।) अतीसाररोगः। रावणमन्त्री। इति हेमचन्द्रः॥ भद्रबला। इति धरणिः॥ आम्रातकः। इति शब्दचन्द्रिका॥

सारणिः, स्त्री, (सृ + णिच् + अनिः। इत्युणादिवृत्तौ उज्ज्वल। २। १०१।) क्षुद्रनदी। प्रसारणी। इत्युणादिकोषः॥

सारणिकः, त्रि, पथिकः। सरणिशब्दात् स्वार्थिकप्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। १२। ८१। ३६।
"यदा सारणिकान् राजा पुत्रवत् परिरक्षति।
भिनत्ति च न मर्य्यादां स राज्ञो धर्म्म उच्यते॥")

सारणिकघ्नः, पुं, (सारणिकान् पथिकान् हन्तीति हन + टक।) दस्युः। इति केचित्॥

सारणी, स्त्री, (सारणि + वा ङीष्।) प्रसारणी। खल्वनदी। इति मेदिनी॥ (यथा, अनर्घराघवे। २। २५।
"आलवालवलयेषु भूरुहां
मांसलस्निमितमन्तरान्तरा।
कैरलौचिकुरभङ्गिभङ्गुरं
सारणीषु पुनरम्बु दृश्यते॥")

सारण्डः, पुं, सर्पाण्डः। इति जटाधरः॥

सारतरुः, पुं, (सारं जलं तत्प्रधानस्तरुः।) कदलीवृक्षः। इति धनञ्जयः॥

सारथिः, पुं, (सरत्यश्वानिति। सृ + अन्तर्भावितण्यर्थः + "सर्त्तेर्णिच्च।" उणा० ४। ८८। इति थिन्। णिच्च।) रथादिघोटकनियोगकर्त्ता। तत्पर्य्यायः। नियन्ता २ प्राजिता ३ यन्ता ४ सूतः ५ क्षत्ता ६ सञ्जेष्टा ७ दक्षिणस्थः ८ रथकुटुम्बी ९। इत्यमरः। २। ८। ५८-६०॥ सादी १० सञ्जेष्टः ११ नियामकः १२ चातुरिकः १३। इति जटाधरः॥ प्रवेता १४ रथनागरः १५। इति शब्दरत्नावली॥ सरथस्यापत्यं सारथिः बाह्राद्यत इति णिः। सह रथेन वर्त्तते योऽसौ सरथोऽश्वः तं प्रेरयति ढके कादिति णिर्व्वा। सारयति अश्वान् इति आन्तात् सृ गताविति स्मात् नान्नीति अथिप्रत्ययो वा। इत्यमरटीकायां भरतः॥ तल्लक्षणं यथा, मात्स्ये। २१५। २०—२१।
"निमित्तशकुनज्ञानो हयशिक्षाविशारदः।
हयायुर्व्वेदतत्त्वज्ञो भूरिभागविशेषवित्॥
स्वामिभक्तो महोत्साहः सर्व्वेषाञ्च प्रियंवदः।
शूरश्च कृतविद्यश्च सारथिः परिकीर्त्तितः॥"
समुद्रः। इति संक्षिप्तसारोद्धृतिः॥

सारदा, स्त्री, (सारं ददातीति। दा + कः।) सरस्वती। इति शब्दरत्नावली॥ दुर्गा। यथा। शरत्कालबोधनीयत्वेन शारदापदव्युत्पत्तेस्तत्पदं तालव्यादि सारं ददातीति व्युत्पत्तिसुकाल्पनिकी। इति तिथ्यादितत्त्वम्॥ सारदातरि, त्रि॥

सारद्रुमः, पुं, (सारः अतिदृढः द्रुमः।) खदिरः इति राजनिर्घण्टः॥ (यथा, हरिवंशे। ४३। ५८।
"उत्थापयेत् लक्ष्म सहस्रचक्षुषः
सारद्रुमाभग्नकुमारिकान्वितम्॥")

सारपादपः, पुं, (सारः अतिदृढः पादपः।) धामनिवृक्षः। इति रत्नमाला॥

सारभाण्डं, क्ली, (सारस्य भाण्डमिव।) अकृत्रिमपात्रम्। यथा मृगनाभ्यादि॥ (यथा, याज्ञवल्क्यः। २। २५०।
"समुद्रपरिवर्त्तञ्च सारभाण्डञ्च कृत्रिमम्।
आधानं विक्रयं वापि नयतो दण्डकल्पना॥")

सारमितिः, पुं, वेदः। इति हेमचन्द्रः॥ सारं यथार्थं मीयते ज्ञायते अनेन सारमितिः। सारोपपदात् माधातोर्नान्नीति तिः॥

सारमूषिका, स्त्री, (सारे मूषिकेव) देवदाली। इति राजनिर्घण्टः॥

सारमेयः, पुं, (सरमाया अपत्यं पुमानिति ढक्।) कुक्कुरः। इत्यमरः। २। १०। ३१॥ (यथा, महाभारते। ६। ८। ७३।
"अन्योन्यस्यावलुम्पन्ति सारमेया इवामिषम्।
राजानो भरतश्रेष्ठ भोक्तुकामा वसुन्धराम्॥")

सारमेयी, स्त्री, (सरमाया अपत्यं स्त्री। ढक्। ङीष्।) कुक्कुरी। इति शब्दरत्नावली॥

सारलोहं, क्ली, (सारं श्रेष्ठं लोहम्।) लोहसारः। इति भूरिप्रयोगः॥ इष्यात इति भाषा॥

सारवः, त्रि, (सरयूं भवः। अण्। "दाण्डिनायनहास्तिनायनेति।" ६। ४। १७४। इति निपातनात् साधुः।) सरयूनदीसमुत्पन्नः। इत्यमरः। १। १०। ३६॥

सारवर्ज्जितः, त्रि, स्थिरांशरहितः। असारवस्तु। सारेण वर्ज्जित इति द्वितीयातत्पुरुषसमासनिष्पन्नः॥

सारसं, क्ली, (सरसि भवम्। सरस् + अण्।) पद्मम्। इत्यमरः। १। १०। ४०॥ स्त्रीकट्यामरणम्। इति केचित्॥

सारसं, त्रि, (सरसि भवम् । सरस्+अण् ।) सरोवरोद्भवजलादि । तज्जलगुणाः । तथा,—
"नद्याः शैलवराच्चाभ्रो यत्र संस्रुत्य तिष्ठति ।
तत् सरोजजलं छन्नं तदद्भः सारसं स्मृतम् ॥
सारसं सलिलं बल्यं लघ्वन्नं मधुरं लघु ।
रोचनं तुवरं रूक्षं वह्निमूत्रमलं सितम् ॥"
इति भावप्रकाशः ॥
(यथा च ।
"सारं घनं वातकफानुकारि
त्वग्दोषकृत् तत् कटु दीपनञ्च ।
प्रोक्तं विपाके भ्रमशोषकारि
स्यात् सारसं नो सुखकारि वारि ॥"
इति हारीते प्रथमस्थाने सप्तमेऽध्याये ॥)
सारसः, पुं, चन्द्रः । इति मेदिनी ॥
सारसः, पुं स्त्री, (सरसि भवः । अण् ।) खनाम-ख्यातपक्षी । तत्पर्य्यायः । पुष्कराङ्गः २ । इत्यमरः । २ । ५ । २२ ॥ गोनर्दः ३ नाङ्गुरः ४ लक्ष्मणः ५ लक्षणः ६ सरसोकः ७ सरोत्सवः ८ इति शब्दरत्नावली ॥ रसिकः ९ कामी १० । तस्यांसगुणाः । मधुरत्वम् । अम्लत्वम् । कषायत्वम् । महातिसारपित्तग्रहण्यर्शोनाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ तस्य शकुनं यथा,—
"इष्टार्थसिद्धिः सकलासु दिक्षु
स्यात् सारसद्वन्द्वविलोकनेन ।
श्रुत्वास्य पृष्ठे निनदं न गच्छेत्
सिध्यत्यभीष्टं गृह एव यस्मात् ॥
वामेन योषित्कुललाभकारी
शब्दस्तथाग्रे नृपतोऽर्थलब्धेः ।
यः सारसाभ्यां युगपद्विरावः
क्षतोऽचिरेण क्रमतोऽपि वामः ।
स वेदितव्यः कथितार्थकारी
क्रौञ्चद्वयस्याप्ययमेव वर्गः ॥"
इति वसन्तराजशाकुने सारसवर्गः ॥
सारसनं, क्ली, (सारं सनोति ददातीति । षण दाने + अच् ।) काञ्ची । स्त्रीकट्याभरणम् । इत्यमरः । २ । ६ । १०८ ॥ अस्य पर्य्यायः काञ्ची-शब्दे द्रष्टव्यः ॥ कक्षुकदार्ढ्यार्थं मध्यकायनिबद्ध-पट्टिकादि । तत्पर्य्यायः । अधिकाङ्गम् २ । इत्यमरः । २ । ८ । ६३ ॥ हे कक्षुकदार्ढ्यार्थं मध्यकाये निबद्धे पट्टिकादौ । सकक्षुकाः सस-न्नाहाः मध्ये दार्ढ्यार्थं यद्बध्नन्ति तत् सारसनं अधिकाङ्गमुच्यते । इति भरतः ॥ (यथा, किराते । १८ । ३२ ॥
"तवोत्तरीयं करिचर्म साङ्गजं
ज्वलन्मणिः सारसनं महाहिः ।
सगास्थिपङ्क्तिः शवभस्म चन्दनं
कला हिमांशोश्च समश्चकासति ॥")
सारसी, स्त्री, (सारस + जातौ ङीष् ।) सारस-पक्षिणी । इति हेमचन्द्रः ॥ (यथा, महाभारते । ११ । १८ । १४ ।
"हंसगद्गदभाषिण्यो दुःखशोकप्रमोहिताः ।
सारस्य इव रासन्त्यः पतिताः पश्य माधव ! ॥")
सारस्तः, पुं, सरस्वती देवतास्येति । अण् ।) बिल्वदण्डः । (सरस्त्या अयमिति । तस्येदमित्यण् ।) देशविशेषः । स तु हस्तिनापुरस्य उत्तरपश्चिमभागे प्रसिद्धः । इति हेमचन्द्रः ॥ यथा । कूर्म्माङ्गस्थदेशानाह ।
"मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः
पाञ्चालगाल्वमाण्डव्यकुरुचेदिगजाह्वयाः ॥"
इति ज्योतिस्तत्त्वम् ॥
सरस्वतीनदीपुत्रमुनिविशेषः । सारस्वतदेशो-द्भवब्राह्मणः । यथा,—
"सारस्वताः कान्यकुब्जा गौड़मैथिलकोत्कलाः ।
पञ्च गौड़ा इति ख्याता विन्ध्यस्योत्तरवासिनः ॥"
इति पुराणम् ॥
कल्पविशेषः ॥ यथा,—
"सारस्वतस्य कल्पस्य मध्ये ये स्युर्न रामराः ।
तद्वृत्तान्तोऽयं लोके तद्भागवतमुच्यते ॥"
इति मात्स्ये ५० अध्यायः ॥
व्याकरणविशेषः । (नवमहापरयुगस्य व्यासः । यथा, देवीभागवते । १ । ३ । २८ ।
"सारस्वतस्तु नवमे त्रिधामा दशमे तथा ॥"
घृतविशेषे, क्ली । यथा,—
"समूलपत्रामादाय ब्रह्मीं प्रक्षाल्य वारिणा ।
उदूखले चोदयित्वा रसं वस्त्रेण गालयेत् ॥
रसे चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत् ।
औषधानि तु पेयानि तानीमानि प्रदापयेत् ॥
हरिद्रा मालती कुष्ठं त्रिफला सहरीतकी ।
एतेषां पलिकान्भागान् शेषाणिकार्षिकाणि तु
पिप्पल्योऽथ विड्गानि सैन्धवं शर्करा वचा ।
सर्व्वमेतत् समालोड्य शनैर्वह्निना पचेत् ॥
एतत्प्राशितमात्रेण वाग्मिशुद्धिश्च जायते ।
सप्तरात्रप्रयोगेण किन्नरैः सह गीयते ॥
अर्द्धमासप्रयोगेण सोमराजीवपुर्भवेत् ।
मासमात्रप्रयोगेन श्रुतमात्रन्तु धारयेत् ॥
इत्यष्टादशकुष्ठानि अर्शांसि विविधानि च ।
पञ्चगुल्मान् प्रमेहांश्च कासं पञ्चविधं जयेत् ॥
बन्ध्यानाञ्चैव नारीणां नराणामल्परेतसाम् ।
घृतं सारस्वतं नाम बलवर्णाग्निवर्द्धनम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे रसायनाधिकारे ॥
इदमेव ब्रह्मीघृतमित्याख्ययापि प्रसिद्धम् ॥*॥
त्रि, सरस्वतीसम्बन्धी । (यथा, याज्ञवल्क्ये । २ । ८३ ।
"वर्णिनां हि वधो यत्र यत्र साक्ष्यनृतं वदेत् ।
तत्पावनाय निर्व्वाप्यवृषः सारस्वतो द्विजैः ॥")
सारस्वतदेशसम्बन्धी ॥ (सरस्वतीनदीसम्बन्धी। यथा, मेघदूते । ५१ ।
"क्षत्वा तासामभिगममपां सौम्य सारस्वतीना-मन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥")
सारस्वतकल्पः, पुं, (सारस्वतः कल्पः ।) सरस्व-त्युपासनाप्रकरणम् । यथा,—
ब्रह्मोवाच ।
"शृणु ब्रह्मन् परं गुह्यं कल्पं सारस्वतं मम ।
यस्य विज्ञानमात्रेण ज्ञानापहरणं भवेत् ॥
सर्व्वशास्त्रप्रकाशश्च सर्व्वज्ञो जायतेऽचिरात् ।
अभ्यासाच्च भवेद्दृश्यस्य वाचस्पतिना भवन्ति हि ॥
अवापुस्त्रिदशा व्यासं वागीशत्वं बृहस्पतिः ।
द्वैपायनोऽपि यां ज्ञात्वा वेदव्यासोऽभवन्मुनिः ॥
मन्त्रोद्धारं प्रवक्ष्यामि साङ्गावरणपूजनैः ।
अनन्तं बिन्दुना युक्तं वामगण्डान्तभूषितम् ॥
जपेत् द्वादशलक्षन्तु मूकोऽपि वाक्पतिर्भवेत् ।
नाभौ शुभ्रारविन्दञ्च ध्यायेद्दशदलं सुधीः ॥
तन्मध्ये भावयेन्मन्त्री मण्डलानां त्रयं चिरम् ।
रत्नसिंहासनं तत्र वर्णज्योत्स्नामयं पुनः ॥
तस्योपरि पुनर्ध्यायेद्देवीं वागीश्वरीं ततः ।
मुक्ताकान्तिनिभां देवीं ज्योत्स्नाजाल-विकाशिनीम् ॥
मुक्ताहारयुतां शुभ्रां शशिखण्डविमण्डिताम् ।
बिभ्रतीं दक्षहस्ताभ्यां व्याख्यां वर्णस्य मालि-काम् ॥
अमृतेन तथा पूर्णं घटं दिव्यञ्च पुस्तकम् ।
दधतीं वामहस्ताभ्यां पीनस्तनभरान्विताम् ॥
मध्ये क्षीणां तथा स्वच्छां नानारत्नविभूषिताम्
आत्मामेदेन ध्यात्वैवं ततः संपूजयेत् क्रमात् ॥
आद्येन दीर्घयुक्तेन कुर्य्यादङ्गानि हस्तयोः ।
हृदयादौ तथा कुर्य्याद्बीजेनाङ्गक्रिया पुनः ॥
भ्रुवोर्मध्ये तथा नाभौ गुह्ये च देशिकस्तथा ।
न्यसेद्बीजं पुनर्वक्त्रे व्यापकं विन्यसेत्ततः ॥
पीठन्यासं ततो कुर्य्यात् देवताभावगुह्यये ।
मातृकायान्तु यत् प्रोक्तं पीठमभ्यर्च्य यत्नतः ॥
वर्णाब्जेनासनं दद्यात् मूर्त्तिं मूलेन कल्पयेत् ।
आवाह्य पूजयेत्तत्रां देवीं वागीश्वरीं ततः ॥
अङ्गैः प्रथमा हृत्तिः स्यात् द्वितीया शक्ति-भिस्ततः ।
दलाग्रेषु समभ्यर्च्य ब्रह्माण्याद्या यथाविधि ॥
लोकपालाः बहिः पूज्यास्तेषामस्त्राणि तद्बहिः ।
एवं सम्पूजयेन्मन्त्री जपहोमरतस्सदा ॥
कवित्वं लभते वाग्मी लक्षैर्दादभिर्ध्रुवम् ।
प्रातर्जप्ता सहस्रन्तु पिबेद्ब्राह्मीं घृतान्वितम्
न विस्मरति मेधावी श्रुतान् वेदागमानपि ।
कण्ठमात्रोदके स्थित्वा ध्यायेन्मार्त्तण्डमण्डले ॥
ज्योतिःपुञ्जनिभां देवीं परिवारसमन्विताम् ।
वराभययुतां हस्ते मुद्रापुस्तकधारिणीम् ॥
जपन् सहस्रमाणेन षण्मासं विजितेन्द्रियः ।
भौमां सम्प्राप्य वाक्सिद्धिं कवीनामग्रणीर्भवेत् ॥
अथ योगं प्रवक्ष्यामि ज्ञानानाशकरं परम् ।
रात्रिशेषे समुत्थाय शुचिर्भूत्वा समाहितः ॥
गुरुभावेन चात्मानं गुरुञ्च परिकल्पयेत् ।
तत्प्रभापटलव्याप्तं जगत् सर्व्वं विचिन्तयेत् ॥
मूलाधारे स्थितां देवीं कुण्डलीं परदेवताम् ।
सुप्तां प्रोत्थाप्य तां शक्त्या क्रमाच्चक्राणि भेदयेत् ॥
ततः परशिवे नीत्वा सौधीञ्च प्रापयेत्ततः ।
ऊर्द्धग्रन्थिं विनिर्भिद्य जिह्वां दीपसरूपिणीम्
बीजरूपसशक्त्या तु प्रोज्ज्वलन्तीं परात्मिकाम् ।
शब्दब्रह्मस्वरूपाञ्च नियता चिन्तयेत् पुनः ॥
तत्प्रभापटलव्याप्तं शरीरं चिन्तयेत्ततः ॥

नित्यं सहस्रमाणेन जपेत् संवत्सरं यदि ।
ततः संजायते मन्त्री वाचस्पतिरिवापरः ॥
छन्दोऽलङ्कारतर्कादिनानाशास्त्रार्थविद्भवेत् ।
कवित्वं ज्ञानशक्त्या तु पाण्डित्यमधिकं भवेत्॥*
अथापरं प्रवक्ष्यामि योगं भुवि सुदुर्लभम् ।
नाभिचक्रस्थितां सौम्यां रक्ताकारां विचिन्तयेत् ॥
क्षीणावहनितम्बाढ्यां रक्ताभरणभूषिताम् ।
पाशाङ्कुशधरां दिव्यां वराभययुतां पुनः ॥
दृष्ट्वा चामृतवर्षिण्या पूरयन्तीं मनोरथान् ।
एवं ध्यात्वा जपेल्लक्षं मनुजो विहितं ततः ॥
होमं कुर्य्यात् त्रिमध्वक्तं रक्तोत्पलयुतैर्द्विजः ।
ततः सन्तर्पयेद्देवीं दुग्धयुक्तेन सर्पिषा ॥
पायसेन बलिं दद्यात् दधिपिष्टमधुप्लुतैः ।
एवं कृत्वा विधानन्तु साक्षाद्देवी भवेत् ॥
सिद्धार्थैस्त्रिमधूपेतैर्हुत्वा जगदघं नयेत् ।
यद्यदानेन महतीं प्राप्नुयात् श्रियमूर्जिताम् ॥
देवीहृदयविद्याया नास्ति किञ्चित् सुदुर्लभम् ।
स्वेहभावेन सम्प्रोक्तं न देयं यस्य कस्यचित् ॥
एतत्ते कथितं दिव्यं विद्योत्पत्तेश्च कारणम् ।
विष्णुना दत्तमस्मभ्यं मया तुभ्यं द्विजोत्तम ॥
सिद्धमन्त्री यदा मन्त्री बालिशस्यापि मूर्द्धनि ।
हस्तं दत्त्वा जपेत् सोऽपि सौधीं वाचमनर्गलाम् ॥"
इति स्वायम्भुवमाल्लकातन्त्रे सारस्वतः पटलः ।
इति तन्त्रसारः ॥

सारस्वतव्रतः, पुं, (सारस्वतः सरस्वतीदेवताकः व्रतः ।) सरस्वत्या व्रतविशेषः । यथा,—
मनुरुवाच ।
"मधुरा भारती केन व्रतेन मधुसूदन ।
तथैव जनसौभाग्यमतिविद्यासुकौशलम् ॥
अभेदश्चापि दम्पत्योस्तथा बन्धुधनेन च ।
आयुश्च विपुलं पुंसां तन्मे कथय माधव ॥
मत्स्य उवाच ।
सम्यक् पृष्टं त्वया राजन् शृणु सारस्वतं व्रतम्
यस्य सङ्कीर्त्तनादेव तुष्यतीह सरस्वती ॥
यो यद्भक्तः पुमान् कुर्य्यादेतद्व्रतमनुत्तमम् ।
तदासरादौ संपूज्य विप्रानेतत् समारभेत् ॥
अथवादित्यवारेण ग्रहताराबलेन वा ।
पायसं भोजयेद्विद्वान् कृत्वा ब्राह्मणवाचनम् ॥
शुक्लवस्त्राणि दत्त्वा च सहिरण्यानि शक्तितः ।
गायन्तीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः ॥
यथा न देवो भगवान् ब्रह्मा लोकपितामहः ।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा ॥
वेदाः शास्त्राणि सर्व्वाणि नृत्यगीतादिकञ्च यत्
न विद्धीनं त्वया देवि तथा मे सन्तु सिद्धयः ॥
लक्ष्मीर्म्मेधा धरा पुष्टिर्गौरीतुष्टिः प्रभा मतिः ।
एताभिः पाहि तनुभिरष्टाभिर्म्मां सरस्वति ॥
एवं सम्पूज्य गायन्तीं वीणाञ्चमाल्यधारिणीम् ।
शुक्लपुष्पाक्षतैर्भक्त्या सकमण्डलुपुष्पकम् ॥
मौनव्रतेन भुञ्जीत सार्द्धं प्रातश्च धर्म्मवित् ।
पञ्चम्यां प्रतिपच्चैव पूजयेत् शब्दवासिनीम् ॥

तथैव तण्डुलप्रस्थं घृतपात्रेण संयुतम् ।
क्षीरं दद्याद्धिरण्यञ्च गायत्री प्रीयतामिति ॥
सन्ध्यायाञ्च तथा मौनमेतत् कुर्व्वन् समाचरेत् ।
नान्तराभोजनं कुर्य्यात् यावन्मासान्तयोदश ॥
समाप्ते तु व्रते दद्यात् भोजनं शुक्लतण्डुलैः ।
सुवर्णं वस्त्रयुग्मञ्च गाञ्च विप्राय शोभनाम् ।
देव्या वितानं घण्टाञ्च सितनेत्रपटावृताम् ।
चन्दनं वस्त्रयुग्मञ्च दध्यन्नं शिखरं पुनः ।
तथोपदेष्टारमपि भक्त्या सम्पूजयेद्गुरुम् ॥
वित्तशाठ्येन रहितो वस्त्रमाल्यानुलेपनैः ।
अनेन विधिना यस्तु कुर्य्यात् सारस्वतं व्रतम् ।
विद्यावानर्थयुक्तश्च व्यक्तकण्ठश्च जायते ॥
सरस्वत्याः प्रसादेन ब्रह्मलोके महीयते ।
नारी वा कुरुते या तु सापि तत्फलभागिनी
ब्रह्मलोके वसेद्राजन् यावत् कल्पायुतत्रयम् ।
सारस्वतं व्रतं यस्तु शृणुयादथवा पठेत् ।
विद्याधरपुरे सोऽपि वसेदब्दायुतत्रयम् ॥"
इति मत्स्यपुराणे । ६६ । १—२४ ॥

सारस्वताः, पुं भूम्नि, (सारस्वते भवाः । अण्।) सारस्वतदेशजातमनुष्याः । यथा, हेमचन्द्रे ।
"काश्मीरास्तु माधुमताः सारस्वतास्तु विकर्णिकाः ॥"

सारस्वतोत्सवः, पुं, (सारस्वतः सरस्वतीसम्बन्धी उत्सवः ।) सरस्वत्या उत्सवः । इति तिथ्यादितत्त्वम् ॥ अस्य प्रमाणादिकं सरस्वतीशब्दे द्रष्टव्यम् ॥

सारा, स्त्री, (सारयतीति । सृ + णिच् + अच् । टाप् ।) कृष्णत्रिवृता । इति शब्दरत्नावली ॥ दूर्व्वा । इति शब्दचन्द्रिका ॥ (सेहुण्डभेदः ॥ शालता अनेन नाम्ना प्रसिद्धा ॥ यथा,—
"सालता सप्तला सारा विमला विदुला च सा
तथा निगदिता भूरिफेना चर्म्मकषेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सारालः, पं, (सारेण सरणेन अलति पर्य्याप्नोतीति । अल अच् ।) तिलः । इति शब्दचन्द्रिका ॥

सारिः, पुं, स्त्री, (सरतीति । सृ + इण् ।) पाशकः । इति शब्दरत्नावली ॥

सारिका, स्त्री, (सरति गच्छतीति ॥ सृ + ण्वुल् टाप् ।) पक्षिविशेषः । इत्यमरः । ३ । ५ । ८ ॥ शालिक इति भाषा ॥ (यथा, रामायणे । २ । ५३ । २२ ।
"मन्ये प्रीतिविशिष्टा सा मत्तो लक्ष्मण !
सारिका ।
यत्तस्याः श्रूयते वाक्यं शुक पादमरेर्हयं ॥")
तत्पर्य्यायः । पीतपादा २ गोराटी ३ गोकिराटिका ४ । इति हेमचन्द्रः ॥ शारिका ५ सारी ६ शारी ७ चित्रलोचना ८ । इति शब्दरत्नावली ॥ मधुरालापा ९ पूती १० मेधाविनी ११ गोराण्टिका १२ गोकिराटी १३ गोरिका १४ कलहप्रिया १५ । इति राजनिर्घण्टः ॥

सारिणी, स्त्री, (सरतीति । सृ + णिनि । ङीप्।) सहदेवी । कार्पासी । दुरालभा । कपिलशिंशपा । प्रसारिणी । रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

सारिवा, स्त्री, लताविशेषः । अनन्तमूल इति ख्याता । गोरिया साउ इति हिन्दी भाषा । सा तु जम्बुवत्पत्रा दुग्धगर्भा व्रततिर्भवति । तत्पर्य्यायः । शारदा २ गोपी ३ गोपकन्या ४ गोपवल्ली ५ प्रतानिका ६ लता ७ आस्फोता ८ काष्ठसारिवा ९ । इति राजनिर्घण्टः ॥ गोपा १० उत्पलसारिवा ११ अनन्ता १२ शारिवा १३ श्यामा १४ । इति शब्दरत्नावली ॥ अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । हृद्यत्वम् । पित्तप्रणाशित्वञ्च । इति राजनिर्घण्टः ॥ * ॥
कृष्णसारिवा । सा तु इन्द्रजम्बुवत्पत्रा सुगन्धा कलघण्टेति प्रसिद्धा । करिया साउ इति हिन्दी भाषा । श्यामालता इति वङ्गभाषा । तत्पर्य्यायः । कृष्णमूली २ कृष्णा ३ चन्दनसारिवा ४ भद्रा ५ चन्द्रनगोपा ६ चन्दना ७ कृष्णवल्ली ८ । अस्या गुणाः । चिरोपशमनत्वम् । तिक्तत्वम् । कटुरसत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"सारिवाद्वौ तु मधुरौ हिमौ भूतनिकृन्तनौ ।
कुष्ठकण्डूज्वरहरौ देहदुर्गन्धिनाशनौ ॥"
इति राजनिर्घण्टः ॥

किञ्च ।
"सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु ।
अग्निमाद्यरुचिश्वासकासामविषनाशनम् ।
दोषत्रयास्रप्रदरज्वरातिसारनाशनम् ॥"
इति भावप्रकाशः ॥

सारि, स्त्री, (सारि + वा ङीप् ।) सारिकापक्षिणी । पाशकः । इति शब्दरत्नावली ॥ सप्तला । इति राजनिर्घण्टः ॥ (सप्तलाशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

सारोष्ट्रिकः, पुं, (सारोष्ट्रे देशे भवः । सारोष्ट्र + ठञ् ।) विषभेदः । सारोष्ट्रो देशभेदस्तत्र भवः सारोष्ट्रिकः ठवे कादिति णिकः दन्त्यादिः । सुराष्ट्रशब्दात् सौराष्ट्रिकः । इति स्वामी । इत्यमरभरतौ । १ । ८ । १० ॥

सार्थः, पुं, (सरतीति । सृ + "सर्त्तेर्णिच्च ।" उणा० २ । ५ । इति थन् । सच णित् ।) जन्तुसंघः । इत्यमरः । २ । ९ । ४१ ॥ वणिक्समूहः । (यथा, रघुः । १७ । ६४ ।
"वापीष्विव स्रवन्तीषु वनेषूपवनेष्विव ।
सार्थाः खेरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु ॥")
समूहमात्रम् । इति मेदिनी ॥ (यथा, बृहत्संहितायाम् । ८६ । ४८ ।
"पश्चिमे गर्व्वरीभागे नोमृकोलुकपिङ्गलाः ।
सर्व्व एव विपर्य्यस्ता ग्राह्याः सार्थेषु योधिताम् ॥")

सार्थः, त्रि, अर्थेन सह वर्त्तमानः । अर्थयुक्तः । इति हेमचन्द्रः ॥ यथा, वनपर्व्वणि ।

"सार्थं प्रसवतो मित्रं भार्य्या मित्रं गृहे सतः।
आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः॥"
इति शुद्धितत्त्वम्॥

सार्थकः, त्रि, (सार्थ+कन्।) अर्थेन सह वर्त्तमानः। यथा,—
"शब्दान्तरमपेक्ष्यैव सार्थकः सार्थबोधकृत्।
अप्रसिद्धिः प्रत्ययार्थे व निपातार्थे ति स त्रिधा॥"
इति शब्दशक्तिप्रकाशिका॥
(सफलः। यथा, भागवते। १०। ४१। ४५।
"प्राह नः सार्थकं जन्म पावितञ्च कुलं प्रभो।
पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वाम्॥"

सार्थवाहः, पुं, (सार्थं वहतीति। वह+अण्।) वणिक्। इत्यमरः। २। ९। ७८॥ (यथा, कलाविलासे। १। ११।
"भुक्तोत्तरं सङ्कटयराख्यानीसंस्थितं कदाचित्तम्।
अभ्येत्य सार्थवाहो दत्तमहार्हैरुपहारमणिकनकैः॥")

सार्द्रं, त्रि, (आर्द्रेण सह वर्त्तमानम्।) आर्द्रम्। इत्यमरः। ३। १। १०५॥ आर्द्रयुक्ते, त्रि।
"अङ्गुष्ठमात्रं स्त्रीत्वेन बाहुमात्रः प्रमाणतः।
सार्द्रं च सप्तभाग्रञ्च दण्ड इत्यभिधीयते॥"
इति प्रायश्चित्ततत्त्वधृताङ्गिरोवचनम्॥

सार्द्धं, व्य, सहितम्। इत्यमरः। ३। ४। ४॥ (यथा महाभारते। ७। २७। २।
"सुशर्म्मा भ्रातृभिः सार्द्धं युद्धार्थी पृष्ठतोऽन्वयात्॥")

सार्द्धं, त्रि, अर्द्धेन सह वर्त्तमानम्। अर्द्धयुक्तम्। यथा,—
"मुनिभिर्हिरणं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम्।
अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः॥"
इति तिथ्यादितत्त्वम्॥

अपि च।
"गतेऽब्दे हितये सार्द्धे पञ्चपक्षे दिनद्वये।
दिवसस्याष्टमे भागे पतत्येकोऽधिमासकः॥"
इति मलमासतत्त्वम्॥

सार्षपः, त्रि, (सर्षपैः अयं सर्षपा संस्कृतो वा। सर्षप्+अण्।) सर्षपसम्बन्धी। सर्षपैः संस्कृतवस्तु। सर्षपशब्दात् ष्णप्रत्ययेन निष्पन्नः॥

सार्षप्यं, त्रि, (सर्षप्+"तेन संस्कृतम्॥"इति ठक्।) सर्षपैः संस्कृतम्। यथा,—
"सार्षप्यं दाधिकं सर्पिर्दधिभ्यां संस्कृतं क्रमात्।"
इति हेमचन्द्रः॥

सार्ष्यः, पुं, (सर्षा देवता यस्य। अण्।) अश्लेषानक्षत्रम्। इति हेमचन्द्रः॥ (यथा, रामायणे। १। १८। १५।
"पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः।
सार्ष्ये जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ
सर्षस्यायमिति।) सर्षसम्बन्धिनि, त्रि॥

सार्व्वः, पुं, (सर्व्वस्मै हितः। सर्व्व+"सर्व्वसर्व्वपुरुषाभ्यां णढञौ।"५। १। १०। इति णः। वृद्धः। जिनः। इति हेमचन्द्रः॥ सर्व्वसम्बन्धिनि, त्रि॥

सार्व्वजनिकः, त्रि, (सर्व्वजनाय हितः। "सर्व्वजनात् ठञ्ठञौ।" ५। १। १८। इत्यस्य वार्त्तिकोक्त्या ठञ्।) सकलजनहितः। सर्व्वजनशब्दात् ष्णिकप्रत्ययेन निष्पन्नः॥

सार्व्वजनीनः, त्रि, (सर्व्वजनाय हितः। सर्व्वजन+खः।) सार्व्वजनिकः। सर्व्वजनशब्दात् खीनप्रत्ययेन निष्पन्नः॥

सार्व्वभौमः, पुं, (सर्व्वभूमौ विदितः। "तत्र विदितः इति च।" ५। १। ४३। इत्यण्।) उत्तरदिग्गजः। इत्यमरः। १। ३। ४॥ सर्व्वभूमीश्वरः। तत्पर्य्यायः। चक्रवर्त्ती २ एकजन्मा ३ नृपाग्रणीः ४। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। ८३। ९।
"भरतस्य च वीरस्य सार्व्वभौमस्य पार्थिव!।
ध्रुवं प्राप्स्यति दुष्प्रापान् लोकांस्तीर्थपरिप्लुतः॥")
विदूरथपुत्रः। यथा,—
"परिचिरनपत्योऽभूत् सुरथो नाम जाह्नवः।
ततो विदूरथस्तस्मात् सार्व्वभौमस्ततोऽभवत्॥"
इति श्रीभागवते ९ स्कन्धे २२ अध्यायः॥
(पुरुवंशीयाहंयातिनृपस्य पुत्रः। यथा, महाभारते। १। ८५। १५—१६। "अहंयातिः खलु ऋतवीर्य्यदुहितरमुपयेमे भानुमतीं नाम। तस्यामस्य यज्ञे सार्व्वभौमः। सार्व्वभौमः खलु जित्वा जहार कैकेयीं सुनन्दां नाम तामुपयेमे॥"*॥) सकलभूमिसम्बन्धिनि, त्रि॥

सार्व्वलौकिकः, त्रि, (सर्व्वलोके विदितः। "लोकसर्व्वलोकात् ठञ्।" ५। १। ४४। इति ठञ्।) सर्व्वजनविदितः। यथा,—
"भवन्तं कार्त्तवीर्य्यो यो द्वीपसन्धिमचीकरत्।
जिगाय तस्य हन्तारं स रामः सार्व्वलौकिकः॥"
इति भट्टिकाव्ये ५ सर्गः॥

सार्व्वलौकिकः सर्व्वलोकविदितः। इति तट्टीका

सार्व्ववेद्यः, पुं, (सर्व्ववेदं वेत्तीति। सर्व्ववेद+यञ्।) सकलवेदज्ञब्राह्मणः। सर्व्ववेदशब्दात् ष्णप्रत्ययेन निष्पन्नः॥

सार्षपः, त्रि, (सर्षपस्यायमिति। सर्षप+अण्।) सर्षपसम्बन्धीयशाकतैलादिः। यथा,—
"घृतञ्च सार्षपं तैलं यत्तैलं पुष्पवासितम्।
अदुष्टं पक्वतैलञ्च स्नानाभ्यङ्गेषु नित्यशः॥"
इति तिथ्यादितत्त्वम्॥

सालः, पुं, (श्रथ्यते इति। श्रल गतौ+घञ्।) शालमत्स्यः। इत्यमरटीकायां भरतः॥ हस्तमात्रम्। प्राकारः। इति मेदिनी॥ रालः। इति राजनिर्घण्टः॥ (सारोऽस्त्यत्रेति। अच्। रस्य लः।) स्वनामख्यातवृक्षः। इत्यमरः। २। २। ३॥ सखुया इति हिन्दी भाषा। तत्पर्य्यायः। सर्ज्जः २ सर्ज्जरसः ३ कलः ४ कलतरुः ५ वल्लीवृक्षः ६ चीरपर्णः ७ रालकार्य्यः ८ पुस्तकान्तरे रालः कर्य्यश्चेति शब्दद्वयम्। अजकर्णकः ९ वस्तकर्णः १० कषायी ११ ललनः १२ गन्धवृक्षकः १३ वंशः १४ रालनिर्य्यासः १५ दिव्यसारः १६ सुरेष्टकः १७ शूरः १८ अग्निवल्लभः १९ यज्ञधूपा २० सिद्धिकः २१। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। हिमत्वम्। स्निग्धत्वम्। अतिसारपित्तासृद्दीपकुष्ठकण्डूविस्फोटवातनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"सालस्तु सर्ज्जकार्य्याश्वकर्णकाः शस्यसम्बरः।
अश्वकर्णः कषायः स्याद्वृक्षे दकफक्रिमीन्॥
व्रणविद्रधिवाधिर्य्ययोनिकर्णगदान् हरेत्॥"
अथ सालप्रभेदाः।
"सर्ज्जकोऽन्योऽजकर्णः स्याच्छालो मरिचपत्रकः।
अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति।
कफपाण्डुश्रुतिगदान् मेहकुष्ठविषव्रणान्॥"
इति भावप्रकाशः॥

सालङ्गः, पु, रागस्य प्रकारविशेषः। यो रागो रागान्तरामिश्रितः सन् रागान्तराभासयुक्तः। इति सङ्गीतशास्त्रम्॥

सालनः, पुं, (सालः कारणत्वेनास्त्यस्येति। प्रमादित्वात् नः।) सर्ज्जरसः। इति रत्नमाला॥

सालनिर्य्यासः, पुं, (सालस्य निर्य्यासः।) सर्ज्जरसः। इति रत्नमाला॥

सालपर्णी, स्त्री, (सालस्य पर्णमिव पर्णमस्याः। ङीष्।) शालपर्णी। इत्यमरः। २। ४। ११५॥ शालपानि इति भाषा। यथा,—
"शालपर्णी सालपर्णी स्थिरा चांशुमती ध्रुवा॥"
इति शब्दरत्नावली॥
"अभावे पृश्निपर्ण्याश्च शालपर्णीं नियोजयेत्।"
इति वैद्यशास्त्रम्॥

सालपुष्पं, क्ली, (सालस्येव पुष्पमस्य।) स्थलपद्मम्। इति शब्दरत्नावली॥

सालभञ्जिका, स्त्री, (सारं भनक्तीति। भन्ज+ण्वुल्। टापि अत इत्वम्। रस्य लः।) पुत्तलिका। यथा,—
"पाञ्चालिका तु पाञ्चाली पुत्तिका सालभञ्जिका।"
इति जटाधरः।
वेश्या। यथा,—
"वेश्या तु गणिका क्षुद्रा वारस्त्री सालभञ्जिका"
इति च जटाधरः॥

सालरसः, पुं, (सालस्य रसः।) रालः। इति राजनिर्घण्टः॥

सालवाहनः, पुं, (सालः तन्नामा यज्ञो वाहनं यस्य।) शालिवाहनराजः। इति केचित्॥
(अस्य विवरणं सातवाहनशब्दे द्रष्टव्यम्॥)

सालवेष्टः, पुं, (सालस्य वेष्टः निर्य्यासः।) धूनकः। इति भूरिप्रयोगः॥

सालशृङ्गं, क्ली, (सालस्य शृङ्गमिव।) प्राचीरार्थम्। इति केचित्॥

सावनः,क्लो,(सावः प्रकारोऽस्यस्या इति। अच्। टाप्।) गृहम्। इत्यमरटीकायां भरतः॥
सावकारी, स्त्री, युद्धे पराजितनारी। इति केचित्॥
सावातुरीयः,पुं,पाणिनिमुनिः। इति हेमचन्द्रः॥ तालव्यशकारादिः साधुपाठः। यथा,—
"शालातुरीयशालङ्किदाक्षिपुत्राश्च पाक्षिनौ।"
इति शब्दरत्नावली॥
सालारं, क्लो, (सालां रातीति। रा+कः।) द्रव्यरक्षणार्थमिष्टिकस्थकोलकः। डाङ्गा इति भाषा। इति केचित्॥
सालाहकः, पुं, (सालायां हक इव।) कुक्कुरः। शृगालः। तरक्षुः। इति केचित्॥ तालव्यशकारादिरयम्॥
सालूरः, पुं, मण्डूकः। इति शब्दरत्नावली॥ तालव्यशकारादिश्च॥
सालेयः,पुं,मधुरिका। इत्यमरटीका॥ तालव्यशकारादिश्च॥
साल्वः,पुं,विष्णुवधराजविशेषः। इति हेमचन्द्रः स तु सौभदेशाधिपतिः। इति महाभारते कर्णपर्व्व॥ देशविशेषः। तद्देशे, पुं भूम्नि। तद्देशसम्बन्धिनि, त्रि॥ तालव्यादिश्च॥
साल्वहा, [न्] पुं, (साल्वं हन्तीति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥
साल्विकः,पुं,पक्षिविशेषः। सालिक इति भाषा यथा,—
"शवमक्षः क्षुद्रचुड़ो गूथलक्षश्च साल्विकः।"
इति शब्दचन्द्रिका॥
सावकः, त्रि, शिशुः। इति केचित्॥ तालव्यशकारादिः साधुपाठः॥
सावधानः, त्रि, (अवधानेन सह वर्त्तमानः।) सचेतनः। सतर्कः। यथा, त्राद्धतत्त्वे।
"आगच्छन्तु महाभागा विश्वेदेवा वरप्रदाः।
ये यात्र विहिताः त्राद्धे सावधाना भवन्तु ते॥"
सावनं,क्लो,(सवनं सोमयज्ञस्तत्सम्बन्धिदिनम्) सवनसम्बन्धिदिनम्। यथा। सोमयागे सवनत्रयस्याहोरात्रसाध्यत्वात् तत्सम्बन्धि दिनं सावनम्। इति माधवाचार्य्यः॥ अपि च। ब्रह्मसिद्धान्ते। सावनं दण्डाः षष्टिरहः खलग्नखगुणांशाभ्यासादेनं भवेत्। इति मलमासतत्त्वम्॥ (यथाच सूर्य्यसिद्धान्ते।
"उदयादुदयं भानोः सावनं तत् प्रकीर्त्तितम्।
सावनानि स्मृतेनेह यज्ञकालविधिस्तु तैः॥")
सावनः, पुं, (सवनस्यायमिति। अण्) यज्ञकर्म्मान्तः। यजमानः। वरुणः। इति मेदिनी॥ दिवसविशेषः। यथा,—
"तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्त्तितः।
अहोरात्रेण चैकेन सावनो दिवसः स्मृतः॥"
इति मलमासतत्त्वम्॥
मासभेदः। स च त्रिंशदहोरात्रात्मकः। यथा,
"त्रिंशता सौरदिवसैः सावनः परिकीर्त्तितः।"
इति शब्दरत्नावली॥
अपि च। ब्रह्मसिद्धान्ते।
"चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः।
एकराशौ रविर्यावत् कालं मासः स भास्करः।
सर्व्वत्रैवपरिवर्त्तेच नाक्षत्र इति चोच्यते॥"
विष्णुधर्म्मोत्तरे च।
"सक्रिकर्षादयारभ्य सक्रिकर्षमथापरम्।
चन्द्रार्कयोर्युधेर्म्मासश्चान्द्र इत्यभिधीयते।
सावने च तथा मासि त्रिंशत्सूर्य्योदयाः स्मृताः॥
आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तितः।
सर्व्वत्रैवपरिवर्त्तेच नाक्षत्र इति चोच्यते॥"*॥
सावनमासकर्त्तव्यकर्म्मादि यथा,—
"सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः॥
पितामहः।
"आब्दिके पिण्डकर्त्तव्ये चमासश्चान्द्रमसः स्मृतः।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः॥"
अत्र आदिपदेन सत्रभृतिहविष्प्रायश्चित्तायुर्द्दायौचे-गर्भाधान-पुंसवन-सीमन्तोन्नयन-नामकरणान्नप्राशन-निष्क्रमण-चूड़ादिग्रहणम्। तथा च विष्णुधर्म्मोत्तरम्।
"अध्ययनञ्च व्रतचारकर्म्म
सौरेण मानेन सदाध्यवस्येत्।
सत्राण्युपास्यान्यथ सावनेन
लौकिञ्च यत् स्याद्व्यवहारकर्म्म॥"
इति मलमासतत्त्वम्॥*॥
वर्षविशेषः। यथा,—
"सौरेणाब्दस्तु मानेन यदा भवति भार्गव।
सावनेन च मानेन दिनषट्कं प्रपूर्य्यते॥"
सौरसंवत्सरे दिनषट्काधिकः सावनः संवत्सरो भवतीति। इति मलमासतत्त्वम्॥
सावरः,पुं,(सवराणामयमिति। अण्।) शोभ्रः। इत्यमरटीका शब्दरत्नावली च॥ (यथा, सुश्रुते। ४। २२।
"शारिवोत्पलबल्याङ्गसावरागुरुचन्दनैः॥")
पापम्। अपराधः। इति विश्वः॥ (मृगविशेषमांसे, क्लो। तस्य गुणा यथा,—
"सावरं पललं स्निग्धं शीतलं गुरु च स्मृतम्।
रसे पाके च मधुरं कफदं रक्तपित्तहृत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
तालव्यशकारादिरप्ययम्॥
सावर्णः,पुं, (सवर्ण एव। स्वार्थे अण्। सवर्णायाः छायाया अपत्यमिति अण् वा।) अष्टममनुः। यथा,—
"छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः
पूर्व्वजस्य सवर्णोऽसौ सावर्णस्तेन कथ्यते॥"
इति देवीभागवतम्॥
(तथाच हरिवंशे। ९। १९।
"पूर्व्वजस्य मनोस्तात सदृशोऽयमिति प्रभुः।
मनुरेवाभवत्तस्मात् सावर्णं इति चोच्यते॥")
यथाच मात्स्ये। ९। ३१—३३।
"सावर्णस्य प्रवक्ष्यामि मनोर्भावि तथान्तरम्।
अश्वत्थामा गरद्वाजः कौशिको गालवस्तथा॥
सतानन्दः कश्यपश्च रामस्य ऋषयः स्मृताः।
धृतिर्व्वरीयान् यवसः सुवर्णो हविरेव च॥
चरिष्णुरोद्यः सुमतिः वसुः सुभ्रुश्च वीर्य्यवान्।
भविष्या दशसावर्णा मनोः पुत्राः प्रकीर्त्तिताः॥"
सावर्णलक्षं,क्लो,(सावर्णस्य समानवर्णस्य पूर्व्वाक्तेरिति यावद् लक्षं तस्मात्।) चर्म्म। इति शब्दरत्नावली॥
सावर्णिः, पुं, (सवर्णाया अपत्यमिति। इञ्।) अष्टममनुः। स च सूर्य्यपुत्रः। यथा,—
"विवस्वतश्च द्वे जाये विश्वकर्म्मसुते उभे।
संज्ञा छाया च राजेन्द्र ये प्रागभिहिते तव॥
तृतीयां वड़वामेके तासां संज्ञासुतास्त्रयः।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु॥
सावर्णिस्तपती कन्या भार्य्या संवरणस्य या।
शनैश्चरस्तृतीयोऽभूदश्विनौ वड़वात्मजौ॥
अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः।
निर्म्मोकविरजस्काद्याः सावर्णितनया नृप॥
तत्र देवाः सुतपसो विरजा अमृतप्रभाः।
तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति॥
दत्त्वेमां याचमानाय विष्णवे यः पदत्रयम्।
राज्यमिन्द्रपदं हित्वा ततः सिद्धिमवाप्स्यति॥
योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः।
निवेशितोऽधिके स्वर्गादधुनास्ते खराड़िव
बालवो दीप्तिमान्नामो द्रोणपुत्रः कृपस्तथा।
ऋष्यशृङ्गः पितास्माकं भगवान् बादरायणः।
इमे सप्तर्षयस्तत्र भविष्यन्ति स्वयोमतः॥
इदानीमासते राजन् स्वे स्वे आश्रममण्डले।
देवगुह्यात् सरस्वत्यां सार्व्वभौम इति प्रभुः।
स्थानं पुरन्दराड़्त्वा वसये दास्यतीश्वरः॥"
इति श्रीभागवते। ८। १३। ८—१७॥
(अस्य विशेषविवरणन्तु मार्कण्डेयपुराणे देवीमाहात्म्ये द्रष्टव्यम्॥) गोत्रविशेषः। यथा। वात्सासावर्णिगोत्रयोरौर्व्वच्यवनभार्गवजामदग्न्याग्नवरुषवराः। इत्युद्वाहतत्त्वम्॥
सावित्रं, क्लो, (सविता देवता अस्येति। अण्।) यज्ञोपवीतम्। इति शब्दरत्नावली॥ (तत्सम्बन्धिनि, त्रि। यथा, भागवते। ४।३१।१०।
"किं जन्मभिस्त्रिभिर्व्वेह शौक्रसावित्रयाज्ञिकैः।
कर्म्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधायुषा॥")
सावित्रः, पुं, (सविता देवता अस्येति। अण्।) ब्राह्मणः। इति हेमचन्द्रः॥ अग्निः। वसुः। इति मेदिनी॥ (स्वार्थे अण्।) सूर्य्यः। गर्भः। इति शब्दरत्नावली॥ (सवितुरपत्यं पुमान्। अण्। कर्णः। यथा, महाभारते। १।१३७। ८।
"सोऽब्रवीत् मेघगम्भीरस्वरेण वदतां वरः।
भ्राता भ्रातरमज्ञातं सावित्रः पाकशासनिम्॥"
सूर्य्यवंशीये, त्रि। यथा, उत्तरचरिते १ अङ्के।
"यत् सावित्रैर्दीपितं भूमिपालैः
लोकश्रेष्ठैः साधु शुद्धं चरित्रम्।
मत्सम्बन्धात् कश्मला किंवदन्ती
स्याच्चेदस्मिन् हन्त धिक् मामधन्यम्॥"

सवितृसम्बन्धिनि च त्रि। यथा, मनुः। ४। १५०।
"सावित्रान् शान्तिहोमांश्च कुर्य्यात् पर्व्वसु नित्यशः॥")
सावित्री, स्त्री, शाल्वदेशीयसत्यवद्राजपत्नी। सा तु मद्रदेशीयाश्वपतिराजकन्या।(अस्या विशेषविवरणन्तु महाभारते वनपर्व्वणि २८२ अध्यायमारभ्य द्रष्टव्यम्॥*॥) उमा। इति मेदिनी॥
तन्नामकरणं यथा,—
"त्रिदशैरर्चिता देवी वेदयोगेषु पूजिता।
भावगृह्यस्वरूपा तु सावित्री तेन सा स्मृता॥"
इति देवीपुराणे ४४ अध्यायः॥
अपि च।
"सर्व्वलोकप्रसवनात् सविता स तु कीर्त्यते।
यतस्तद्देवता देवी सावित्रीत्युच्यते ततः।
वेदप्रसवनाच्चापि सावित्री प्रोच्यते बुधैः॥"
इति वह्निपुराणे ब्राह्मणप्रशंसानामाध्यायः॥
गायत्री। इति त्रिकाण्डशेषः॥*॥ (उपनयनकर्म्म। यथा, मनुः। २। ३८।
"आ षोड्शात् ब्राह्मणस्य सावित्री नातिवर्त्तते।
आ द्वाविंशात् क्षत्रबन्धोरा चतुर्व्विंशतेर्व्विशः॥"
"सावित्रीशब्देन तदनुवचनसाधनमुपनयनाख्यं कर्म्म लक्ष्यते।" इति मेधातिथिः॥) ब्रह्मपत्नी। सा तु सवितुः पद्भ्यां पद्भ्यां जाता। अस्या उत्पत्तिनामान्तराणि यथा,—
"ततः संजप्यतस्तस्य भित्त्वा देहमकल्मषम्।
स्त्रीरूपमर्द्धमकरोद्दर्द्धं पुरुषरूपवत्॥
शतरूपा च सा ख्याता सावित्री च निगद्यते।
सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप॥"
इति मात्स्ये। ३। ३०—३२॥*॥
तस्या शतनामानि यथा,—
विष्णुरुवाच।
"सावित्री पुष्करे नाम तीर्थानां प्रवरे शुभे।
वाराणस्यां विशालाक्षी नैमिषे लिङ्गधारिणी।
प्रयागे ललिता देवी कामुका गन्धमादने।
मानसे कुमुदा नाम विश्वकाया तथाम्बरे॥
गोमते गोमती नाम मन्दारे कामचारिणी।
मदोत्कटी चैत्ररथे जयन्ती हस्तिनापुरे॥
कान्यकुब्जे तथा गौरी रम्भा मलयपर्व्वते।
एकाम्रके कीर्त्तिमती विश्वा विश्वेश्वरे तथा॥
जया वराहशैले तु कमला कमलालये।
रुद्रकोट्यान्तु रुद्राणी काली कालञ्जरे गिरौ॥
महालिङ्गे तु कपिला कर्कोटे मुकुटेश्वरी।
शालग्रामे महादेवी शिवलिङ्गे जनप्रिया॥
नीलोत्पला मीयापुर्य्यां सन्ध्यां ललिते तथा।
उत्पलाक्षी सहस्राक्षे हिरण्याक्षी महोत्पले॥
गङ्गायां मङ्गला नाम विमला पुरुषोत्तमे।
विशालायाममोघाक्षी पाण्डुला पाण्डुपर्व्वते॥
नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी।
विपुले विपुला नाम कल्याणी मलयाचले॥
कोटरी कोटरीतीर्थे सगन्धा गन्धमादने।
कुशाम्रके विशल्या तु गङ्गाद्वारे हरिप्रिया॥
शिवचण्डे शुभा चण्डा नन्दिनी देविकातटे।
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने॥
देवकी मथुरायान्तु पाताले परमेश्वरी।
सीता विन्ध्ये तथा रौद्री कालिन्द्यां विन्ध्यवासिनी॥
सङ्घाद्वैकवीरा तु हरिश्चन्द्रे तु चन्द्रिका।
रमणा रामतीर्थे तु यमुनायां मृगावती॥
करवीरे महालक्ष्मीरुमा देवी विनायके।
अरोगे तु रोगहन्त्री महाकाले महेश्वरी॥
अभयेत्युष्णतीर्थे तु अमृता विन्ध्यकन्दरे।
माण्डव्ये माद्रवी देवी महागौरी महेश्वरी॥
गणेशे च प्रचण्डा तु चण्डिकामरकण्टके।
सोमेश्वरी वराहे तु प्रभासे पुष्करावती॥
देवी माता सरस्वत्यां पारावारतटे स्थिता।
महालये महापद्मा पयोष्ण्यां पिङ्गलेश्वरी।
सिंहिका क्षतसौरे च कार्त्तिकेये तु शङ्करी।
उत्पलावर्त्तके काला सुभद्रा सिन्धुसङ्गमे॥
माता सिन्धुवने लक्ष्मीस्तरङ्गा भरताश्रमे।
जालन्धरे विश्वमुखी तारका विन्ध्यपर्व्वते॥
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले।
भीमा देवी हिमाद्रौ तु सेतुर्व्वल्मीकेश्वरे तथा॥
कपालमोचने शुद्धा माता कायावरोहणे।
शङ्खोद्धारे ध्वनिर्नाम धृतिः पिण्डारके वने॥
काली तु चन्द्रभागायामच्चोदे सिद्धिदायिनी।
नरनारायणे देवी वदर्य्यामुर्व्वशी तथा॥
ओषधीशोत्तरकुले कुशद्वीपे कुशोदका।
मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी॥
अश्वत्थवन्यनीका तु विविक्ते श्रमणालये।
गायत्री वेदशालायां सावित्री ब्रह्मसन्निधौ॥
सूर्य्यबिम्बे प्रभा नाम मातृणां वैष्णवी मता।
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा॥
व्रजे ब्रह्मकला नाम शक्तिः सर्व्वशरीरिणाम्।
एतदुद्दैशतः प्रोक्तं नामाष्टशतमुत्तमम्॥
अष्टोत्तरस्य तीर्थानां शतमेतदुदाहृतम्।
यो जपेत् शृणुयाद्वापि सर्व्वपापैः प्रमुच्यते॥
एषु तीर्थेषु यत् कृत्वा स्नात्वा पश्येन्नरो दिवः यः
सर्व्वपापविनिर्मुक्तः कल्पं ब्रह्मपुरे वसेत्॥
नामाष्टशतकं यस्तु श्रावयेद्ब्रह्मसन्निधौ।
पौर्णमास्याममावस्यां बहुपुत्रो भवेन्नरः॥
गोदाने श्राद्धदाने च अहन्यहनि वा पुनः।
देवार्च्चनविधौ विद्वान् परं ब्रह्माधिगच्छति॥"
इति पद्मपुराणे सृष्टिखण्डे १७ अध्यायः॥*॥
अपि च।
नारद उवाच।
"तुलस्युपाख्यानमिदं श्रुतमीश सुधोपमम्।
तत्तु सावित्र्युपाख्यानं तस्मे व्याख्यातुमर्हसि॥
पुरा येन समुद्भूता सा श्रुता च श्रुतिप्रसूः।
केन वा पूजिता देवी प्रथमे कैश्च वा परे॥
नारायण उवाच।
ब्रह्मणा वेदजननी पूजिता प्रथमे मुने।
द्वितीये च वेदगर्भैस्तत्प्रयाद्विदुषां गणैः॥
तदा चाश्वपतिः पूर्व्वं पूजयामास भारते।
तत्पश्चात् पूजयामासुर्व्वर्णाश्चत्वार एव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। २३। १—४॥
सावित्रीव्रतं, क्ली, (सावित्र्या व्रतम्।) ज्येष्ठकृष्णचतुर्द्दश्यां स्त्रीकर्त्तव्यनियमविशेषः। तद्विवरणं यथा,। पराशरः।
"मेषे वा वृषभे वापि सावित्रीं तां विनिर्द्दिशेत्॥"
तां चतुर्द्दशीम्।
"ज्येष्ठकृष्णचतुर्द्दश्यां सावित्रीमर्च्चयन्ति याः।
वटमूले सोपवासा न ता वैधव्यमाप्नुयुः॥"
राजमार्त्तण्डकृत्यचिन्तामण्योः।
"ज्येष्ठे मासि चतुर्द्दश्यां सावित्रीव्रतमुत्तमम्।
अवैधव्याय कुर्व्वन्ति स्त्रियः श्रद्धासमन्विताः॥"
व्रतमात्रे तु अनन्तचतुर्द्दशीव्रतोक्तमाचरन्ति। दृष्टपरिकल्पनान्यायात्। तदुक्तं मत्स्यपुराणे।
"गर्भिणी सूतिका नक्तं कुमारी च रजस्वला।
यदाशुद्धा तदार्द्धं न कारयेत् क्रियते सदा॥"
उपवासाशक्तौ नक्तं भोजनं कुर्य्यात्।
"उपवासेष्वशक्तानां नक्तं भोजनमिष्यते।"
इति तद्धृतवचनान्तरात्। अशुद्धा चेत् पूजां कारयेत्। कायिकञ्चोपवासादिकं सदा शुद्धया अशुद्धया च स्वयं क्रियते। एवं स्मृतिपरिभाषायां वर्द्धमानोपाध्यायाः। नारदः।
"दिवाभागे त्रयोदश्यां यदा चतुर्द्दशी भवेत्।
तत्र पूज्या महासाध्वी देवी सत्यवता सह॥"
दिवाभागे दण्डद्वयमात्रसत्त्वेऽपि अतएव प्रदोषे व्रतमाचरन्ति। पूर्व्वाह्णे तद्विद्धत्वेऽपि पराह्णे त्रिसन्ध्यव्यापित्वे पराह्ण एव त्रिसन्ध्यव्यानीति वचनात्। यदा तु पूर्व्वापरयोर्न तथाविधा। तदापि पराह्ण एव। यथा। ज्योतिषे।
"चतुर्द्दश्याममावास्या यदा भवति नारद!।
उपोष्य पूजनीया सा चतुर्द्दश्यां विधानतः॥"
सा सावित्री। ततश्चामावास्यायां सावित्रीव्रतविधानं शिवा घोरा तथा प्रेतेति वचनञ्चैतत्परम्। पराशरः।
"सावित्रीमर्च्चयित्वा तु फलाहारा परेऽहनि।
ततश्चाविधवा नारी वित्तभोगान् लभेत सा॥"
इति तिथ्यादितत्त्वम्॥
अन्यत् वनपर्व्वीयसावित्रीव्रतकथायां द्रष्टव्यम्॥
सावित्रीसूत्रं, क्ली, (सावित्रीदीक्षाकालिकसूत्रम्।) यज्ञोपवीतम्। इति शब्दरत्नावली॥
साश्वयन्दकः, पुं, ज्येष्ठौ। इति केचित्॥
साशूकः, पुं, कम्बलः। इति हारावली। १५६॥
साश्रुधीः, स्त्री, श्वश्रूः। इति त्रिकाण्डशेषः॥
साश्वितास्त्रार्द्धं, क्ली, (साश्वि अश्विसहितं तास्त्रार्द्धं यत्र।) कांस्यम्। इति त्रिकाण्डशेषः॥
सास्ना, स्त्री, (घस स्नञ् + "राजासास्नास्नुनावीणाः" उणा० ३। १५। इति नप्रत्ययेन साधुः। गलकम्बलः। इत्यमरः। २। ८। ६१॥ (यथा, माघे। ५। ६२।
"रोमन्थमन्थरचलद्गुरुसास्नमासासक्ते निमीलदलसेक्षणमौक्षकेण॥")

साहचर्य्यं, क्ली, (सहचरस्य भावः कर्म्म वा। सहचर+ष्यञ्।) सहचरस्य भावः। (यथा, कुमारे। ३। ११।

"मधुश्च ते मन्मथ! साहचर्य्या-
दसावनुक्तोऽपि सहाय एव
समीरणो नोदयिता भवेति
व्यादिश्यते केन हुताशनस्य॥")

सहगमनम्। सहचरशब्दात् ष्यञ्प्रत्ययेन निष्पन्नम्॥ सहचारः। सामानाधिकरण्यम्। एकाधिकरणवृत्तित्वम्। यथा,—

"प्रायशो रूपभेदेन साहचर्य्याच्च कुत्रचित्।"
इत्यमरः॥

(सहधर्म्माचरणम्। इति मल्लिनाथः॥ यथा, रघुः। १६। ८७।

"तस्याः सृष्टे मनुजपतिना साहचर्य्याय हस्ते
माङ्गल्योर्णावलयिनि पुरः पावकस्योच्छ्रिखस्य॥")

साहयः, त्रि, (साहयतीति। साहि+"अनुपसर्गात् लिम्पविन्देति।" ३। १। १३८। इति यः।) सहनकारयिता। इति व्याकरणम्॥

साहसं, क्ली, (सहसा बलेन निर्वृत्तम्। सहस्+"तेन निर्वृत्तम्।" ४।२।६८। इति अण्।) दण्डः। इत्यमरः। २।८।२१॥ स च त्रिविधः। यथा, याज्ञवल्क्यः।

"साध्यौतिपणसाहस्रो दण्ड उत्तमसाहसः।
तदूर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृतः॥"
इति प्रायश्चित्ततत्त्वम्॥

बलात्कारकृतकार्य्यम्। इति मेदिनी॥ (यथा, "वैगरोधात् क्षयाच्चैव साहसाद्विषमाशनात्। त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात्॥" इति माधवकरसंगृहीतरुग्विनिश्चये यक्ष्माधिकारि॥"साहसादिति साहसो बलवद्विग्रहादिरूपः क्षोभहेतुस्तेन कारणत्वम्॥" इति तट्टीकायां विजयरक्षितः॥*॥ दुष्कृतकर्म्म। अविमृश्यकृतिः। (यथा, महाभारते। १।४२।१।

"यद्येतत् साहसं तात! यदि वा दुष्कृतं कृतम्
प्रियं वाप्यप्रियं वा ते वागुक्ता न मृषा भवेत्॥")

द्वेषः। इति हेमचन्द्रः॥ पश्चाद्दोषमनालोच्य करणम्। तत्तु चौर्य्यपरदारगमनादि। इति मुग्धबोधटीकायां दुर्गादासः॥*॥ साहसमाह नारदः।

मनुष्यमारणं स्तेयं परदाराभिमर्षणम्।
पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम्॥"

अत्र सद्य एवोत्तरदापनम्। यथा,—

साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियाम्।
विवादयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृतः॥"
विवादयेत् सद्य एवोत्तरं दापयेत्। इति शूलपाणिः॥ तत्र दासादयोऽपि साक्षिणो भवन्ति यया, उशना।

"दासोऽन्धो बधिरः कुष्ठी स्त्रीबालस्थविरादयः।
एतेऽप्यनभिसम्बन्धाः साहसे साक्षिणो मताः॥"
इति व्यवहारतत्त्वम्॥

(तद्युक्ते, त्रि। यथा, हरिवंशे भविष्यपर्व्वणि। ३८। ३०।

"न जाने इति यद्ब्रूषे किमतः साहसं वचः॥")

साहसः, पुं, (सहसे बलाय हितः। सहस्+अण्।) अग्निविशेषः। यथा,—

"प्रायश्चित्ते विधुर्ये च पाकयज्ञे तु साहसः।
लक्षहोमे च वह्निः स्यात् कोटिहोमे हुताशनः॥"
इति तिथ्यादितत्त्वम्॥

साहसाङ्कः, पुं, (साहसः एव अङ्कश्चिह्नं यस्य।) विक्रमादित्यराजः। इति जटाधरः॥

साहसिकः, त्रि, (सहसा बलेन वर्त्तते इति। सहस्+"ओजःसहोम्भसा वर्त्तते।" ४। ४। २७। इति ठक्।) मनुष्यमारकः। चौरः। पारदारिकः। परुषवादी। अनृतवादी। इति साहसशब्दार्थदर्शनात्। एते असाक्षिणः। यथा नारदः।

"स्तेनाः साहसिका धूर्त्ताः कितवा योधकाश्च ये।
असाक्षिणस्तु ते दुष्टास्तेषु सत्यं न विद्यते॥"
इति व्यवहारतत्त्वम्॥

(हठकारी। यथा। "केचित् साहसिकाः स्खलोचनमिति पेठुः।" इति कुमारटीकायां मल्लिनाथः। ३। ४४॥)

साहसं, क्ली, (सहसानां समूहः। सहस+"भिक्षादिभ्योऽण्।"४। २। ३८। इति अण्।) सहस्रसमूहः। इत्यमरः। ३। २। ४५॥ (यथा, महाभारते। २। ५८। १३।

"एतावन्ति च दासानां साहस्राण्यत सन्ति मे॥"

सहस्रमेव। स्वार्थे अण्।) सहस्रमात्रम्। यथा,—

"हरिस्ते साहसं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रायाणां रक्षायै त्रिपुरहर जागर्त्ति जगताम्॥
इति महिम्नस्तवः॥

(सहस्रेण क्रीतमिति। "शतमानविंशतिकसहस्रवसनादण्।"५। १। २७। इति अण्।) सहस्रेण क्रीते, त्रि॥ (सहस्रस्येदमिति। अण्।) सहस्रसम्बन्धिनि च त्रि॥ (यथा, विष्णुपादादिकेशान्तवर्णनस्तोत्रे। १४।

"साहस्री वापि संख्या प्रकटमभिहिता सर्व्ववेदेषु येषाम्॥")

साहस्रः, पुं (सहस्रमस्यास्तीति। सहस्र+"अण् च।" ५। २। १०३। अण्।) सहस्रसङ्ख्यकगजादिना बली। इत्यमरः। २। ८। ६२॥ (सहस्रविशिष्टे, त्रि। यथा, मनुः। ८। ३८३।

"सहस्रं ब्राह्मणो दण्ड्यो गुप्ते तु तै व्रजन्
शूद्रायां क्षत्रियविशोः साहस्रो वै भवेदमः॥")

साहायकं, क्ली, (सहायस्य भावः कर्म्म वा। सहाय+"योपधात् गुरूपोत्तमात् वुञ्।" ५।१।१३२।इत्यत्र सहायादेति वक्तव्यम् इत्युक्तेः पाचिको वुञ्।) साहाय्यम्। सहायस्य भाव इत्यर्थे कण्प्रत्ययेन निष्पन्नम्॥ (यथा, रघुः। १७। ५।

"स कुलोचितमिन्द्रस्य साहायकमुपेयिवान्।
जघान समरे दैत्यं दुर्जयं तेन चावधि॥")

साहाय्यं, क्ली, (सहायस्य भावः कर्म्म वा। सहाय+पचे ब्राह्मणादित्वात् ष्यञ्।) सहायता। सहायशब्दात् ष्यञ्प्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते। १। १५५। १८।

"साहाय्येऽस्मि स्थितः पार्थ! पातयिष्यामि राक्षसम्॥"

साहित्यं, क्ली, स्त्री, (सहित+ष्यञ्।) मेलनम्। सहितस्य भावः इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥ परस्परसापेक्षाणां तुल्यरूपाणां युगपदेकक्रियान्वयित्वं साहित्यम्। इति साहित्यविवेकः॥ तुल्यपदैकक्रियान्वयित्वम्। बुद्धिविशेषविशेषत्वं वा। इति शब्दशक्तिप्रकाशिका॥ साहित्यं एककियान्वयित्वम्। तदयथा। धवखदिरपलाशांश्छिन्धि इत्यत्र धवखदिरपलाशप्रतियोगिकं यत् साहित्यं तन्निरूपितं यदवयवविभागरूपफलं तज्जनिका या छिदिक्रिया तदनुकूलकृतिमांस्त्वम्। इति सारमञ्जरी॥ मनुष्यकृतश्लोकमयग्रन्थविशेषः। स तु भट्टि-रघु-कुमारसम्भव-माघ-भारवि-मेघदूत-विदग्धमुखमण्डनग्रान्तिशतकप्रभृतयः॥

साह्नं, क्ली, (सहस्य भावः। सह+ष्यञ्।) मेलनम्। सहितत्वम्। इति धरणिः॥ (साहाय्यम्। यथा, महाभारते। ५। ७। ११।

"ततो दुर्य्योधनः क्षत्तरुवाच प्रहसन्निव।
विग्रहेऽस्मिन् भवान् साह्नं मम दातुमिहार्हति॥")

साह्नकृत्, पुं, (साह्नं करोतीति। क्त+क्विप्।) समभिव्याहारी॥

साह्नयः, पुं, (आह्नयेन सह वर्त्तमानः।) मेषादिप्राणिप्रभृतम्। पशुयुद्धम्। यथा,—

"मेषादिप्राणिप्रभृते स्यात् साह्नयश्च समाह्नयः।"
इति शब्दरत्नावली॥

(नामयुक्ते, त्रि। यथा, भागवते। १। ४। ६।

"कथमालक्षितः पौरैः स प्राप्तः कुरुजाङ्गलम्।
उन्मत्तमूकजड़वत् विचरन् गजसाह्वये॥")

सिंहः, पुं, (सिंहति तेजः पशुषु इति। सिंच+"सिंचेः सम्प्रायां हनुमौ कश्च।" उणा० ५। ६२। इति कः। अन्त्यादेशे हकारः। नुम् च। पृषोदरादित्वात् अन्तविपर्य्यये हिनस्तीति सिंह इत्यपि भवति।) स्वनामख्यातपशुः। (यथाह कश्चित्।

"सिंहो बली हिरदकुञ्जरमांसभोजी
संवत्सरेण कुरुते रतिमेकवारम्।
पारावतः खलु शिलाकणमात्रभोजी
कामी भवेदनुदिनं वद कोऽत्र हेतुः॥")

तत्पर्य्यायः। मृगेन्द्रः २ पशुखः ३ हर्य्यक्षः ४ केशरी ५ हरिः ६। इत्यमरः। २

पारीन्द्रः ७ श्वेतपिङ्गलः ८ कण्ठीरवः ९ पञ्चशिखः १० शैलाटः ११ भीमविक्रमः १२ सटाङ्कः १३ मृगराट् १४ मृगराजः १५ मरुत्प्लवः १६ केशी १७ लग्नौकाः १८ करिदारकः १९। इति शब्दरत्नावली ॥ महावीरः २० श्वेतपिङ्गः २१ मजमोचनः २२ मृगारिः २३। इति जटाधरः ॥ इभारिः २४ नखरायुधः २५ महानादः २६ मृगपतिः २७। इति हेमचन्द्रः ॥ पञ्चमुखः २८ नखी २९ मानी ३० क्रव्यादः ३१ मृगाधिपः ३२ शूरः ३३ विक्रान्तः ३४ हिरदान्तकः ३५ बहुबलः ३६ दीप्तः ३७ बली ३८ विक्रमी ३९ दीप्तपिङ्गलः ४०। तन्मांसगुणाः। अर्शःप्रमेहजठरामयजाड्यनाशित्वम्। इति राजनिर्घण्टः ॥ अपि च।

"सिंहव्याघ्रहृका ऋक्षतरक्षुहीपिनस्तथा।
वभ्रुजम्बुकमार्जारा इत्याद्यास्तु गुहाशयाः॥
गुहाशया वातहरा गुरुष्णमधुराश्च ते।
स्निग्धा बल्या हिता नित्यं नेत्ररुग्व्रणविकारिणाम् ॥"

इति भावप्रकाशः ॥ * ॥

पदान्ते श्रेष्ठार्थवाचकः। इत्यमरः। ३।१।५८॥ (यथा, रामायणे। २। ७३। ७।

'क्व यास्यसि महाराज! हित्वेमं दुःखितं जनम्।
हीनं पुरुषसिंहेन रामेणाक्लिष्टकर्मणा ॥')

अर्हतां ध्वजः। इति हेमचन्द्रः ॥ रक्तगिरुः। इति राजनिर्घण्टः ॥ (यथा, सुश्रुते। ४। ८।

"तुत्थालकटुकाव्योषसिंहार्कक्षयमारकाः ॥")

मेषादिद्वादशराश्यन्तर्गतपञ्चमराशिः। तत्पर्य्यायः। लेयः २। इति सत्क्रत्यमुक्तावली ॥ तस्याधिष्ठात्री देवता सिंहः। स च मघापूर्व्वफल्गुनी-समुदायोत्तरफल्गुनी-प्रथमपादेन भवति। अग्निराशिः। पीतवर्णः। रूक्षः। एवं धूम्रवर्णः। पित्तप्रकृतिः। पूर्व्वदिक्स्वामी। पर्व्वतचारी। क्षत्रियवर्णः। क्रूरः। महाशब्दः। अल्पसन्तानः। अल्पस्त्रीसङ्गश्च। तत्र जातफलम्। क्रोधी। शीघ्रगतिः। हास्यवाग्मिः। अतिवक्ता। चञ्चलः। शीतलः। सत्यप्रियश्च। इति बृहज्जातकादयः ॥ * ॥ मेषादिद्वादशलग्नान्तर्गतपञ्चमलग्नम्। तत्र जातफलम्।

"सिंहलग्ने समुद्भूतो भोगी शत्रुविमर्द्दनः।
स्वल्पोदरोऽल्पपुत्रश्च सोत्साही गजविक्रमः॥"

इति कोष्ठीप्रदीपः ॥

सिंहकेलिः, पुं, (सिंहस्येव केलिर्यस्य।) मञ्जुघोषः। जिनविशेषः। इति त्रिकाण्डशेषः ॥

सिंहकेशरः, पुं, (सिंहस्येव केशरो यस्य।) वकुलः। इति त्रिकाण्डशेषः ॥ सिंहस्य जटा च ॥

सिंहतलः, पुं, (सिंहस्येव तलमत्र। यद्वा, सिंहतलः। पृषोदरादित्वात् साधुः।) कृताञ्जलिः। करद्वययोजनम्। इत्यमरटीकायां रामाश्रमः। २। ६। ८५ ॥

सिंहतुण्डः, पुं, (सिंहस्य तुण्डमिव पुष्पमस्य।) सेहुण्डवृक्षः। इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—

"सेहुण्डः सिंहतुण्डः स्यात् वज्री वज्रद्रुमोऽपि च।
सुधासमन्तदुग्धा च स्रुक् स्त्रियां स्यात् स्रुही गुड़ा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ सिंहस्य तुण्डमिव तुण्डमस्य। मत्स्यविशेषः। यथा, मनुः। ५। १६।

"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः॥"

सिंहमुखे, क्ली ॥)

सिंहद्वारं, क्ली, (सिंहचिह्नितं द्वारमिति मध्यपदलोपिकर्म्मधारयः।) प्रवेशद्वारम्। तत्पर्य्यायः। प्रवेशनम् २। इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे। ४३। १७५।

"सिंहद्वारे युवा देवि दृष्टोऽस्माभिर्महाव्रती।
सहितीयोऽपि यो धत्ते सौन्दर्य्येणाद्वितीयताम्॥")

सिंहध्वनिः, पुं, (सिंहस्य ध्वनिः।) सिंहशब्दः। सिंहनादसदृशशब्दः। यथा,—

"तुषारसंघातशिलाः क्षुराग्रैः
समुल्लिखन् दर्पकलः ककुद्मान्।
दृष्टः कथञ्चिद्वयविविग्नै-
रसोढ़सिंहध्वनिरुन्नदाद ॥"

इति कुमारसम्भवम् ॥

सिंहनादः, पुं, (सिंहस्येव नादः।) योधानां रणोत्साहजरवः। तत्पर्य्यायः। चेड्वा २। इत्यमरः। २। ८। १०७॥ गजयूथदर्शनात् तद्भङ्गाय यथा सिंहस्य नादस्तथा परबलभङ्गाय स्वोत्साहविद्रवये च यो रावः सः। सिंहस्येव नादः सिंहनादः। इति भरतः॥ (यथा आर्य्यासप्तशत्याम्। ७००।

"कविसमरसिंहनादः स्वरातुनादः सुधैकसंवादः।
विद्वद्विनोदकन्दः सन्दर्भोऽयं मया सृष्टः॥"

महादेवः। इति महाभारतम्। १३। १७। ११०॥ * ॥ सिंहस्य नादः।) सिंहशब्दश्च ॥

सिंहनादकः, पुं, (सिंह इव नदतीति नद + ण्वुल्।) वृकारः। इति हारावली। १८४॥ सिङ्गा इति भाषा ॥

सिंहनादिका, स्त्री, सिंहमपि नादयतीति। नद + णिच् + ण्वुल्। टापि अत इत्वम्।) दुरालभा। इति शब्दचन्द्रिका ॥

सिंहपर्णी, स्त्री, सिंहस्य शिरोः पर्णमिव पर्णमस्याः। ङीष्।) वासकः। इति जटाधरः ॥

सिंहपुच्छिका, स्त्री, (सिंहपुच्छी + स्वार्थे कन्।) चित्रपर्णिका। इति रत्नमाला ॥ क्षुद्रचाकुलिया इति भाषा ॥

सिंहपुच्छी, स्त्री, (सिंहस्य पुच्छ इव पुष्पमस्याः। ङीष्।) चित्रपर्णिका। पृश्निपर्णी। इत्यमरः। २। ४। ८१ ॥ माषपर्णी। इति रत्नमाला ॥

सिंहपुष्पी, स्त्री, (सिंहस्य पुच्छ इव पुष्पमस्याः। ङीप्।) पृश्निपर्णी। इति राजनिर्घण्टः ॥

सिंहमुखी, स्त्री, (सिंहस्य मुखमिव पुष्पमस्याः। ङीप्।) वासकः। इति राजनिर्घण्टः ॥

सिंहयाना, स्त्री, (सिंहो यानं वाहनं यस्याः।) दुर्गा। इति हेमचन्द्रः ॥

सिंहरथा, स्त्री, (सिंह एव रथो यस्याः।) दुर्गा। इति शब्दरत्नावली ॥ (यथा, हरिवंशे। १७६। १७।

"वराङ्गनां सिंहरथां बहुरूपां हयध्वजाम् ॥")

सिंहलं, क्ली, (सिंहलो देशः प्रभवत्वेनास्त्यस्येति। अच्।) रङ्गम्। इति हेमचन्द्रः ॥ रीतिः। त्वचम्। इति राजनिर्घण्टः ॥

सिंहलः, पुं, क्ली, (सिंहं लाति प्राप्नोतीति। ला + कः।) देशविशेषः। शिलोन इति ख्यातः। यथा,—

"दक्षिणेऽवन्तिमाहेन्द्रमलया ऋष्यमूककाः।
चित्रकूटमहारण्यकाश्चीसिंहलकोङ्कणाः॥"

इति ज्योतिस्तत्त्वम् ॥

(अयञ्च जम्बुद्वीपस्य अष्टप्रसिद्धद्वीपानामन्यतमः। यथा, भागवते। ५। १९। २८—३०।

"जम्बुद्वीपस्य च राजन् उपद्वीपानष्टौ हैक उपदिशन्ति सागरात्मजैरन्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान्। तद्यथा स्वर्णप्रस्थचन्द्रशुक्ल आवर्त्तनो रमणको मन्दहरिणः पाञ्चजन्यः सिंहलो लङ्केति॥" * ॥ तद्देशवासिनि, पुं भूम्नि। यथा, महाभारते। १। १७६। ३५।

"पौण्ड्रान् किरातान् यवनान् सिंहलान्
बर्ब्बरान् खशान्।
ससर्ज्ज फेनतः सा गौर्म्लेच्छान् बहुविधानपि॥")

सिंहलक्ष्मा, स्त्री, (सिंहले तिष्ठति या। क्ष्मा + कः।) सैंहली। इति राजनिर्घण्टः ॥ सिंहलदेशवासिनी च ॥

सिंहलास्थानः, पुं, (सिंहल आस्थानं यस्य।) तालवृक्षसदृशवृक्षविशेषः। यथा,—

"प्रोत्फलः सिंहलास्थानश्छड़ी पिच्छा छटापि च ॥"

इति शब्दमाला ॥

सिंहलीलः, पुं, (सिंहस्य लीलेव लीला यत्र।) रतिबन्धविशेषः। तस्य लक्षणं यथा,—

"लिङ्गोपरिस्थिता नारी भूमौ दत्त्वा पदद्वयम्।
हृदये दत्तहस्ता च सिंहलीलः प्रकीर्त्तितः॥
लिङ्गोपरिस्थिता नारी कान्तोरुस्थपदद्वया।
हृदये दत्तहस्ता च सिंहलीलोऽप्यसावपि ॥"

इति रतिमञ्जरी ॥

सिंहवाहिनी, स्त्री, सिंहरूपो वाहो वाहनमस्त्यस्या इति। इनि।) दुर्गा। यथा,—

"सिंहमारुह्य कल्पान्ते निहतो महिषो यतः।
महिषघ्नी ततो देवी कथ्यते सिंहवाहिनी ॥"

इति देवीपुराणे ४५ अध्यायः ॥

सिंहविक्रान्तः, पुं, (सिंह इव विक्रान्तः ।) अश्वः । इति हारावली ।५२। शब्दमाला च ॥ सिंहतुल्यविक्रमविशिष्टे, त्रि ॥

सिंहविद्रा, स्त्री, (सिंह इव विद्रा विद्राता ।) मासपर्णी । इति राजनिर्घण्टः ॥

सिंहसंहननः, त्रि, (सिंहस्येव संहननं अवयवो यस्य ।) वराङ्गरूपोपेतः । इत्यमरः ।३।१।१२॥ प्रत्येकमवयवशुद्धया सुन्दरः । सिंहसंहननः स स्याद्यो हि सर्व्वाङ्गसुन्दरः । इति कोषान्तरम्॥ सिंहस्येव संहननं देहोऽस्य सिंहसंहननः । रूढ़िशब्दोऽयं यथाकथञ्चिदन्वयः । इति भरतः॥ (सिंहस्य संहननम् ।) सिंहनाशने, क्ली ॥

सिंही, स्त्री, (सिंहयतीति । सिंह + कः । अन्त्यादेशो ङीकारः । नुम् च । टाप् ।) नाड़ी । इति राजनिर्घण्टः ॥

सिंहाणं, क्ली, लौहमलम् । इत्यमरटीका । २। १ । ८ । ८ ॥

सिंहानं, क्ली, लौहमलम् । इत्यमरः । २।१।८८॥ तस्य रूपान्तराणि यथा । शिंघाणम्२ सिंहाणम् ३ सिंघाणम्४ । इति तट्टीका ॥ नासिकामलम् सिक्नी इति भाषा । तत्पर्य्यायः । सिंहाणकम् । २ सिंघाणम् ३ सिंघणम् ४ । इति शब्दरत्नावली ॥ कफः ५ श्लेष्मा ६ खेटः ७ । इति जटाधरः ॥

सिंहासनं क्ली, (सिंहचिह्नितमासनम् ।) स्वर्णमयराजासनम् । इत्यमरः । २ । ८ । ३२ ॥ अथ सिंहासनयुक्तिः ।

"राज्ञो वरासनं नाम श्रीसिंहासनमुच्यते ॥
शुभे मुहूर्त्ते शुभमासवर्षे
शुवारवेलातिथिचन्द्रयोगे ।
काले निरुत्पातनिरीतिभावे
सिंहासनावस्थविधिं वदन्ति ॥
स्थिरराशिस्थिते भानौ चन्द्रे च स्थिरभोदिते ।
आसनारम्भमिच्छन्ति गृहारम्भोऽपि येषु च॥"

एतेन गृहारम्भसिंहासनयोरारम्भः । तत्र क्रमः ।

"बाणवेदाग्निपक्षाणि सोपानानि युगैः क्रमात् ।
चत्वारिंशत्तथा त्रिंशत् विंशतिः षोड़शैव च ॥
सिंहान्वितानि श्रेयांसि चरणानि युगैः क्रमात् ।
मद्रः शङ्खो गजो हंसः सिंहो भृङ्गो मृगो हयः ॥
अष्टौ सिंहासनानीति नीतिशास्त्रविदो विदुः ।
आदित्यादिदशाजानां भूपतीनां यथाक्रमम् ॥
राज्ञः सहस्तैरष्टाभिरायामपरिणाहयोः ।
राजपात्रमिदं नाम सोपानं पुरुषोत्तम् ॥
तदर्द्धमानं तन्मध्ये राज्ञासनमुदाहृतम् ।
अर्द्धोन्नतमिदं रम्यं प्रोक्तं कलिमहीभुजाम् ।
दिगष्टकं ग्रन्थिकोणः स्याद्ब्रह्मादीनां यथा-
यथम् ॥"

अथाष्टानां लक्षणानि ।

"गजारोकाष्टघटितः पद्ममालोपचित्रितः ।
पद्मरागविचित्राङ्गः शुद्धः काञ्चनमण्डितः ॥
चरणाग्रे पद्मकोषात् पद्मरागविचित्रिताः ।
द्वित्रयष्टौ पुत्तिका राजद्दशाङ्गुलिसम्मिताः ॥
राजासनं चतस्रश्च एवं द्वादशपुत्तिकाः ।
रत्नैश्च नवभिः कार्य्यं निर्म्माणं चान्तरान्तरा ॥
रक्तवस्त्रावृतं श्लक्ष्णं तत् पद्मसिंहासनं मतम् ।
अत्रोपित्वा नरपतिः प्रतापमतिविन्दति ॥१॥
भद्रेन्द्रकाष्ठघटितः शङ्खमालोपशोभितः ।
शुद्धस्फटिकचित्राङ्गः शुद्धरूप्योपशोभितः ॥
चरणाग्रे शङ्खनाभिः पुत्तिकाः सप्तविंशतिः ।
स्थाने स्थाने विधातव्याः शुद्धस्फटिकमस्रृताः ।
शुक्लपट्टावृतं श्लक्ष्णं तत् शङ्खसिंहासनं मतम् ॥२॥
पनसेनोपघटितो गजमालोपशोभितः ।
विद्रुमैरपि वैदूर्य्यैः काञ्चनेनापि शोभितः ॥
चरणाग्रे गजशिरः पुच्छादेकैकपुत्तिका ।
माणिक्यरचिता रक्तवस्त्रादिकविभूषणम् ।
गजसिंहासनं नाम साम्राज्यफलदायकम् ॥३॥
शालकाष्ठेन घटितो हंसमालोपशोभितः ।
पुष्यरागैः काञ्चनेन कुरुविन्देश्च चित्रितः ॥
चरणाग्रे हंसरूपं पुत्तिकास्वेकविंशतिः ।
गोमेदकोपघटितापीतवस्त्रविभूषणम् ।
हंससिंहासनं नाम सर्व्वानिष्टविनाशनम् ॥४॥
चन्दनेनोपघटितः सिंहमालोपभूषितः ।
शुद्धहीरकचित्राङ्गः शुद्धकाञ्चननिर्म्मितः ॥
चरणानां सिंहलेखः पुत्तिकाश्चैकविंशतिः ।
मुक्ताशुक्तिभिरन्यैश्च निर्म्मलैरेव भूषणम् ॥
शुद्धशुक्लावृतं श्लक्ष्णं तत् सिंहसिंहासनं मतम् ।
अत्रोपित्वा नरपतिः क्षत्रस्त्रां साधयति
क्षितिम् ॥ ५ ॥
भृङ्गमालोपमहितं शुद्धचम्पककल्पितम् ।
शुद्धैर्म्मरकतैर्युक्तं पादाग्रे पद्मकोषिका ॥
द्वाविंशतिः पुत्तिकास्तु नीलवस्त्रादिभूषणम् ।
भृङ्गसिंहासनं नाम शत्रुक्षयजयप्रदम् ॥ ६ ॥
निम्बकाष्ठेन घटनामृगमालोपशोभितम् ।
इन्द्रनीलैर्म्महानीलैः काञ्चनेनापि चित्रितम् ॥
चरणाग्रे मृगशिरश्चत्वारिंशच्च पुत्तिकाः ।
नीलवस्त्रादियुक्तन्तु मृगसिंहासनं मतम् ।
लक्ष्मीविजयसम्पत्तिर्नैरुज्यपदमुत्तमम् ॥ ७ ॥
केशरेणोपघटितं हयमालोपशोभितम् ।
समस्तवस्त्रैर्भूषाश्च पुत्तिकाः पञ्चसप्ततिः ॥
चरणाग्रे हयशिरश्चित्रवस्त्रादिभूषणम् ।
हयसिंहासनं नाम लक्ष्मीविजयवर्द्धनम् ॥ ८ ॥
इत्येतत् कथितं सारं महासिंहासनाष्टकम् ।
यथा गोजेन लिखितं यथा चान्यैश्च पण्डितैः ॥
एतस्मादिक्रमं दत्त्वा कुर्य्यात् पृथिवीपतिः ।
अचिरादेव कुरुते तस्य मृत्युरतिक्रमम् ॥
परासनस्थो यो राजा यो राजा च निरासनः ।
स परैर्हन्यते सिंहैरिव मत्तगजाधिपः ॥
स्वलग्नमित्रासनमध्यसंस्थिति-
र्न दुष्यतीति प्रवदन्ति तज्ज्ञाः ॥"
इति युक्तिकल्पतरुः ॥ * ॥

चतुराजीक्रीड़ायां जयविशेषः । यथा, तिथ्यादितत्त्वे ।

"अन्यद्राजपदं राजा यदा याती युधिष्ठिर ।
तदा सिंहासनं तस्य भण्यते नृपसत्तम ॥
राजा च नृपतिं हत्वा कुर्य्यात् सिंहासनं यदा ।
द्विगुणं वाहयेत् पश्चमन्यच्चैकगुणं भवेत् ॥
मित्रसिंहासनं पार्थ यदा रोहति भूपतिः ।
तदा सिंहासनं नाम सर्व्वं नयति तद्बलम् ॥
यदा सिंहासनं कर्त्तुं राजा षष्ठपदाश्रितः ।
तदा घातेन हन्तव्यो बलेनापि सुरक्षितः ॥"

योगासनविशेषः । यथा, हठप्रदीपे ।

"गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ।
दक्षिणे सव्यगुल्फन्तु दक्षगुल्फन्तु सव्यके ॥
हस्तौ च जान्वोः संस्थाप्य स्वाङ्गुलीः संप्रसार्य्य च ।
व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः ॥
सिंहासनं भवेदेतत् पूजितं योगिभिः सदा ।
बन्धत्रयस्य सन्धानं कुरुते चासनोत्तमम् ॥"

सिंहासनः, पुं, (सिंहस्य आसनं उपवेशनमिव आसनं यत्र ।) षोड़शरतिबन्धान्तर्गतचतुर्थबन्धः । तस्य लक्षणं यथा,—

"स्वजङ्घाहृदयाङ्के च कृत्वा योषापदद्वयम् ।
स्तनौ धृत्वा रमेत् कामी बन्धः सिंहासनो मतः॥"
इति रतिमञ्जरी ॥

सिंहासनचक्रं, क्ली, (सिंहासनमिव चक्रम् ।) सप्तविंशति-नक्षत्राङ्कित-नराकार-चक्र-त्रयम् । यथा,—

"अथातः संप्रवक्ष्यामि चक्रं सिंहासनत्रयम् ।
सप्तविंशतिनक्षत्रैरेकैकञ्च नवात्मकम् ॥
अश्विनोमवमूलाद्यं पञ्चनाड़ीविभेदतः ।
अश्विन्याद्युत्तरं भागं मघाद्यं पूर्व्वतः स्थितम् ॥
मूलाद्यं दक्षिणे भागं ज्ञातव्यं नृपतित्रयम् ।
इतरेषु च राज्येषु नृपनामर्क्षतो वदेत् ॥
शुभाशुभमिदं सर्व्वं यत्र यस्य शनिः स्थितः ।
नाड़िकापञ्चवेधेन एकैकस्यासनं भवेत् ॥
आधारमासनं पट्टं सिंहं सिंहासनं तथा ।
ग्रहैर्व्वेधवशाज्ज्ञेयं सौम्यैः क्रूरैः शुभाशुभम् ॥
ऋक्ष आधारगे राजा अभिषिक्तो य आसने ।
पराधीनगतं राज्यं कुरुते नात्र संशयः ॥
आसनस्थेन ऋक्षेण नीतियुक्तो भवेन्नृपः ।
प्रधानपुरुषो देवः प्रजाशान्तिकरो भवेत् ॥
षड़ ऋक्षे यदा राजा उपविष्टो नृपासने ।
पूर्व्वराजस्थितस्तुल्यश्चिरं पालयते महीम् ॥
सिंहरूपो भवेद्राजा सिंहर्क्षेणासने स्थितः ।
संग्रामस्य प्रियो नित्यमसाध्यो मल्लिमण्डलैः ।
सिंहासनगते धिष्ण्ये तेजस्वी भीषणाकृतिः ।
चलचित्तो महाक्रोधी प्रजापीड़ाकरो नृपः ॥
तत्कालेन्दुगते ऋक्षे क्रूरनिर्व्वेधनाड़िके ।
शुभावस्था शुभे लग्ने संस्थाप्यो नृप आसने ।
दृष्टे च समायोगे उपविष्टो य आसने ।
उच्छाद्य शत्रुसंघातमेकच्छत्रं करोति सः ॥
क्रूरग्रहमतां नाड़ीमुपविष्टो य आसने ।
बन्धनं भूमिनाशञ्च तथा मृत्युः प्रजायते ॥
आधार ऋक्षगः सौरिरनाविष्टं करोति च ।
दुर्भिक्षं रौरवं तत्र प्रजापीड़ां च जायते ॥
आसने च यदा सौरिर्युधे भङ्गप्रदो भवेत् ।

अथवा व्याधिपीड़ा च मनोदुःखं प्रजायते ॥
षट् ऋक्षे यदा सौरिः षट्राज्ञो विनश्यति ।
प्रियो वाथ कुमारो वा मन्त्रिबन्धुक्षयोऽपि वा ॥
सिंहे सिंहासने वापि यदा तिष्ठति सूर्य्यजः ।
तदा मृत्युर्न सन्देहो यदि शक्रसमो नृपः ॥
शनिराहुर्कमाहेया यदा चन्द्रेण संयुताः ।
यस्यासनगता एते तस्य राज्ञो भयङ्कराः ॥
क्रूरयुक्तोऽथ वक्रस्तु क्रूरनाड़ीगतोऽपि वा ।
आसने चन्द्रयोगेन कालरूपो शनैश्चरः ॥
एवं शुभफलं दद्याद्देवमन्त्रो न संशयः ।
करोति विपुलं राज्यं यस्यासनगतो गुरुः ॥"
इति ज्योतिस्तत्त्वम् ॥

सिंहास्यः, पुं, (सिंहस्य आस्यमिव पुष्पमस्य ।) वासकः । इत्यमरः । २ । ४ । १०३ ॥ सिंहतुल्यमुखे, त्रि ॥

सिंहिका, स्त्री, कश्यपपत्नी । राहुमाता । यथा
"कश्यपस्य गृहिणी तु सिंहिका
राहुवास्तुतनयावजीजनत् ।
पूर्व्वजो हरिनिकृत्तकन्धरो
देवतेरवरजो निपातितः ॥"
इति वास्तुयागतत्त्वम् ॥
(पीठस्था देवीविशेषः । यथा, देवीभागवते । ७ । ३० । ७५ ।
"सिंहिका क्षतशीचे तु कार्त्तिके त्वतिशाङ्करी ॥"

सिंहिकासूनुः, पुं, (सिंहिकायाः सूनुः पुत्रः । राहुः । इति शब्दरत्नावली । वास्तुपुरुषः । इति वास्तुयागतत्त्वम् ॥

सिंही, स्त्री, (सिंह + ङीष् ।) सिंहपत्नी । (यथा, कथासरित्सागरे । ६ । १०२ ।
"अयं स वर्द्धितोऽन्यासां सिंहीनां पयसा मया ॥")
वार्त्ताकी । इत्यमरः । २ । ४ । ११४ ॥ कण्टकारी । वासकः । इति मेदिनी ॥ बृहती । राहुमाता । इति विश्वः ॥ सुद्रपर्णी । इति राजनिर्घण्टः ॥

सिंहीलता, स्त्री, (सिंह्याः लता ।) बृहती । इति भावप्रकाशः ॥

सिक, सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० सक०-सेट् ।) दन्त्यादिः । सिकता । इति दुर्गादासः ॥ सौत्रधातुरयम् ॥

सिकता, स्त्री (सिक सेचने + बाहुलकात् अतच् । सिकतिलः । वालुकायुक्तभूमिः । इति मेदिनी ॥ ते, १६८ ॥ वालुका । इति राजनिर्घण्टः ॥

सिकताः, स्त्री, भूम्नि, (सिक + अतच् ।) वालुका । इति मेदिनी । ते, १६८ ॥ अमरश्च । ३ । ३ । ७३ ॥ (यथा, महाभारते । २ । ७६ । १६ ।
"सिकता वपन् सव्यसाचो राजानमनुगच्छति
असक्ताः सिकतास्तस्य यथा संप्रति भारत ।
असक्तं शरवर्षाणि तथा मोक्ष्यति शत्रुषु ॥")

सिकतामयं, क्ली, (सिकतात्मकम् । मयट् ।) वालुकामयतटम् । तत्पर्य्यायः । सैकतम् २ । इत्यमरः । १ । १० । ८ ॥

सिकतावान्, [न्] त्रि, (सिकताः सन्त्यत्रेति । मतुप् । मस्य वः ।) वालुकावहुलदेशः । तत्पर्य्यायः । सिकता २ सिकतिलः ३ सैकतः ४ । इत्यमरभरतौ । २ । १ । ११ । ॥

सिकतिलः, त्रि, (सिकताः सन्त्यत्रेति । सिकता + "देशे लुबिलचौ च ।" ५ । २ । १०५ । इति इलच् ।) सिकतावान् । इत्यमरटीकायां भरतः । २ । १ । ११ ॥

सिक्, [च] स्त्री, (सिच्यते इति । सिच् + क्विप् ।) वस्त्रम् । इति हेमचन्द्रः ॥ (जालम् । यथा, भागवते । ६ । १२ । ८ ।
"लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे ।
द्विजा इव सिचावद्धाः स काल इह कारणम् ॥")

सिक्तः, त्रि, (सिच् + क्तः ।) सेकाश्रयः क्षतसेचनः । यथा, वायुपुराणे गयापदतौ ।
"आम्राश्च सिक्ताः पितरश्च तृप्ता
एका क्रिया द्व्यर्थकरी प्रसिद्धा ॥"

सिक्थं, क्ली, (सिञ्चति चरतीति । सिच चरणे + "पातृतुदिवचीति ।" उणा० २ । ७ । इति थक् ।) मधूच्छिष्टम् । इति मेदिनी ॥ मोम इति भाषा ॥ (यथा,—
"तिक्तासिक्थनिशायष्टीनक्ताह्वफलपत्रकैः ।
पटोलमालतीनिम्बपत्रैर्घृतं घृतं स्मृतम् ॥"
इति तिक्ताद्यघृतम् ॥
इति वैद्यकचक्रपाणिसंग्रहे व्रणशोथाधिकारे ॥)
नीली । इति हेमचन्द्रः ॥

सिक्थः, पुं, (सिच + थक् ।) भक्तपुलाकः । (सिटी इति भाषा ॥ यथा,—
"————पेया सिक्थसमन्विता ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
ग्रासः । इति मेदिनी ॥ (यथा, कथासरित्सागरे । १०८ । ७७ ।
"भक्तसिक्थहयं प्राप्य पाकभाण्डादभक्षयम् ॥")

सिक्थकं, क्ली, (सिक्थमेव । स्वार्थे कन् ।) मधूच्छिष्टम् । इत्यमरः । २ । ६ । १०७ ॥ (पुं, भक्तपुलाकः । सिटी इति भाषा । यथा,—
"सिक्थकैरहितो मण्डः पेया सिक्थसमन्विता
यवागूबहुसिक्था स्याद्विलेपी विरलद्रवा ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥
यथा च बृहत्संहितायाम् । २६ । ८ ।
"दन्तेर्नागा गोहयाश्चय लोम्ना
हेम्ना भूपाः सिक्थकेन द्विजाद्याः ।
तद्वद्देशा वर्षमासा दिशश्च
शेषद्रव्याण्यात्मरूपस्थितानि ॥")

सिक्थः, पुं, स्फटिकः । इति कैचित् ॥

सिङ्घणं, क्ली, नासिकामलम् । इति शब्दरत्नावली ॥ सिक्नी इति भाषा ॥

सङ्घाण, क्ली, नासिकामलम् । इति शब्दरत्नावली ॥

सिङ्घाणकं, क्ली, नासिकामलम् । इति शब्दरत्नावली ॥ (यथा, वाभटे उत्तरस्थाने २८ अध्याये ।
"अजस्रं पिच्छिलं पीतं पक्वं सिङ्घाणकं घनम् ॥"

सिङ्घिनी, स्त्री, नासिका । इति हलायुधः ॥

सिचयः, पुं, (सिचं सिञ्चनमिति प्राप्नोतीति । इन् + अच् ।) वस्त्रम् । इति हेमचन्द्रः । (यथा, राजतरङ्गिण्याम् । १ । १ ।
"भूयाभोगिफणारत्नरोचिःसिचयचारवे ।
नमः प्रलीनमुक्ताय हरकल्पमहीरुहे ॥")
जीर्णवस्त्रम् ॥ इति त्रिकाण्डशेषः ॥

सिञ्चन्, [तृ] त्रि, (सिञ्चतीति । सिच् + शतृ ।) सेचनकर्त्ता ॥

सिञ्चिता, स्त्री, (सिञ्च + णिच् + क्तः । टाप् ।) पिप्पली । इति शब्दचन्द्रिका ॥

सिञ्जा, स्त्री, अलङ्कारध्वनिः । इति कैचित् ॥ तालव्यशकारादिः साधुपाठः ॥

सितं, क्ली, (सितः शुक्लवर्णोऽस्यास्तीति । अच् ।) रौप्यम् । मूलकम् । इति राजनिर्घण्टः ॥ चन्दनम् । इति रत्नमाला ॥ (तत्तु शुक्लचन्दनम् । यथा,—
"सितं मलयजं शीतं गोशीर्षं सितचन्दनम् ॥"
इति गारुड़े २०८ अध्याये ॥)

सितः, पुं, (सिनोतीति । सि बन्धने + "अञ्जिधृसिभ्यः क्तः ।" उणा० ३ । ८६ । इति क्तः ।) शुक्लवर्णः । इत्यमरः । ३ । ३ । ८० ॥ शुक्राचार्य्यः । इति शब्दरत्नावली ॥ शरः । इति नानार्थध्वनिमञ्जरी ॥

सितः, त्रि, (सितः शुक्लवर्णोऽस्यास्तीति । अच् ।) शुक्लवर्णयुक्तः । इत्यमरः । ३ । ३ । ७६ ॥ (यथा, माघे । १ । २५ ।
सितं सितिम्ना सुतरां मुनेर्वपु-
र्विसारिभिः सौधमिवाथ लम्भयन् ॥" *॥
सो + क्तः ।) समाप्तः । निवहः । ज्ञातः । इति विश्वः ॥

सितकण्टा, स्त्री, (सितः शुक्लः कण्टो यस्याः ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

सितकण्टारिका, स्त्री, श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

सितकण्ठः, पुं, (सितः कण्ठो यस्य ।) दात्यूहपक्षी । इति शब्दरत्नावली । श्वेतकण्ठयुक्ते, त्रि ॥

सितकरः, पुं, (सितः शुक्लः करो यस्य ।) कर्पूरः । इति राजनिर्घण्टः ॥ चन्द्रश्च ॥

सितकर्णी, स्त्री, (सितः कर्ण इव पुष्पमस्याः । ङीष् ।) वासकः । इति राजनिर्घण्टः । (सितपर्णी इति क्वचित् पाठः ॥ गुणादयोऽस्या वासकशब्दे ज्ञातव्याः ॥)

सितकुञ्जरः, पुं, (सितः कुञ्जरो यस्य ।) इन्द्रः । (सितः शुक्लः कुञ्जरः । इन्द्रहस्ती । इति कैचित् ॥

सितगुञ्जा, स्त्री, सिता गुञ्जा ।) श्वेतगुञ्जा । इति राजनिर्घण्टः ॥

सितचिह्नः, पुं, (सितानि चिह्नानि यत्र ।) वालुकागड़ः । इति हारावली ॥ वेलिया मत्स्य इति भाषा ॥

सितच्छत्रं, क्ली, (सितं छत्रम् ।) राजच्छत्रम् । इति भूरिप्रयोगः ॥

सितच्छदा, स्त्री, (सितं छदमिव पुष्पमस्याः ।) शतपुष्पा । इत्यमरः । २ । ४।१५२॥ (विहृतिरस्याः शतपुष्पाशब्दे द्रष्टव्या ॥)

सितच्छत्रितः, पुं, (सितच्छत्रं जातमस्येति । इतच् ।) श्वेतच्छत्रयुक्तः । यथा, नैषधे । १ । १ ।

"निपीय यस्य चिन्तिरक्षिणः कथां
तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्त्तिमण्डलः
स राशिरासीन्महसां महोज्वलः ॥"

सितच्छदः, पुं, (सितौ छदौ पक्षौ यस्य ।) हंसः । इति हेमचन्द्रः ॥

सितच्छदा, स्त्री, (सितच्छदो यस्याः ।) श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

सितदर्भः, पुं, (सितो दर्भः ।) श्वेतकुशः । इति राजनिर्घण्टः ॥

सितदीधितिः, पुं, चन्द्रः । सिता शुक्ला दीधितिः किरणो यस्य इति बहुव्रीहिसमासनिष्पन्नः ॥

सितदीप्यः, पुं, (सितं दीप्यं दीप्तिर्यस्य ।) श्वेतजीरकः । इति राजनिर्घण्टः ॥

सितदूर्व्वा, स्त्री, (सिता दूर्व्वा ।) श्वेतदूर्व्वा । इति रत्नमाला ।

सितदुः, पुं, (सितः दुर्हृच्छो यस्य ।) मोरटविशेषः । इति रत्नमाला ॥ (सितो दुरिति ।) शुक्लवर्णदुश्च ॥

सितधातुः, पुं, (सित + शुक्लो धातुः ।) कठिनी । इति राजनिर्घण्टः ॥ शुक्लवर्णधातुमात्रश्च ॥

सितपक्षः, पुं, (सितौ पक्षौ यस्य ।) हंसः । इति शब्दरत्नावली ॥ (सितः पक्षः ।) शुक्लपक्षः । यथा, हरिवंशे । ६० । २० ।

"उदगयने सितपक्षे
त्रिशिरगभस्तौ च जीववर्गस्थे ॥")

सितपर्णी, स्त्री, (सितं पर्णमस्याः । ङीष् ।) अर्कपुष्पिकावृक्षः । इति रत्नमाला ॥

सितपाटलिका, स्त्री, (सिता पाटलिका ।) शुक्लपाटलावृक्षः । श्वेतपाड़रि इति हिन्दी भाषा । तत्पर्य्यायः । सितकुम्भी २ फलेरुहा ३ सितामोघा ४ कुबेराक्षी ५ श्वेताङ्गा ६ काष्ठपाटला ७ धवलपाटली ८ । अस्या गुणाः । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वातदोषवर्मिहिक्काकफश्रमशोफनाशित्वञ्च । इति राजनिर्घण्टः ॥

सितपुङ्खा, स्त्री, (सितः पुङ्खो यस्याः ।) श्वेतशरपुङ्खा । इति राजनिर्घण्टः ॥

सितपुष्पं, क्ली, (सितं पुष्पमस्य ।) कैवर्त्तीमुस्तकम् । इति जटाधरः ॥ तालव्यशकारादिरपि पाठः ॥

सितपुष्पः, पुं, (सितं पुष्पमस्य ।) तगरवृक्षः । इति शब्दरत्नावली ॥ श्वेतरोहितः । काशः । इति राजनिर्घण्टः ॥

सितपुष्पा, स्त्री, (सितं पुष्पं यस्याः ।) मल्लिका । इति शब्दरत्नावली ॥

सितपुष्पी, स्त्री, (सितं पुष्पं यस्याः । ङीष् ।) श्वेतापराजिता । इति राजनिर्घण्टः ॥ अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"गवाक्ष्यश्वखुरी श्वेता श्वेतभण्डापराजिता ।
द्विविधा सा सिता नीला गिरिकर्णी गवादनी॥"

सितमरिचं, क्ली, (सितं मरिचम् ।) श्वेतमरिचम् । तत्पर्य्यायः । सिताख्यम् २ सितवल्लीजम् ३ वालुकम् ४ बहुलम् ५ धवलम् ६ चन्द्रकम् ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । विषभूतदृष्टिरोगनाशित्वम् । बहुत्वम् । बस्त्या रसायनत्वञ्च । इति राजनिर्घण्टः ॥

सितमाषः, पुं, (सितो माषः ।) राजमाषः । इति शब्दरत्नावली ॥

सितरञ्जनः, पुं, (सितं रञ्जयतीति । रञ्ज + ल्युः ।) पीतवर्णः । इति हेमचन्द्रः ॥

सितरश्मिः, पुं, चन्द्रः । सितः शुक्लो रश्मिः किरणो यस्य सः ॥

सितवर्षाभूः, पुं, (सितो वर्षाभूः ।) पुनर्नवा । इति राजनिर्घण्टः ॥

सितशायका, स्त्री, (सिता शायका ।) श्वेतशरपुङ्खा । इति राजनिर्घण्टः ॥

सितशिम्बिकः, पुं, (सिता शिम्बिर्यस्य । कप् ।) गोधूमः । इति हेमचन्द्रः ॥ शितिशिम्बिकोऽपि पाठः ॥

सितशिवं, क्ली, (सितं शुक्लं शिवं मङ्गलजलकञ्च ।) सैन्धवलवणम् । तस्य रूपान्तराणि । शितशिवम् । सितसिवम् । शीतशिवम् । शीतसिवम् । इत्यमरटीका । २ । ९ । ४२ ॥

सितशिंशपा, स्त्री, (सिताः शिंशपा ।) श्वेतशिंशपावृक्षः । इति राजनिर्घण्टः ॥

सितशूकः, पुं, (सितः शूकोः यस्य ।) यवः । इत्यमरटीकायां भरतः ॥ (यवशब्दोऽस्य विवरणं ज्ञातव्यम् ॥)

सितशूरणः, पुं, (सितः शूरणः ।) वनशूरणः । इति राजनिर्घण्टः ॥

सितसर्षिः, पुं, (सिता सर्पयो घोटका यस्य ।) अर्জ্জুनः । इति केचित् ॥ (यथा, किरातेऽ१।१८

"स भवस्य भवाय यैकहेतोः
सितसर्पिष येव विधास्यतोः सहार्थम् ।
रिपुरापि पराभवाय मध्यं
प्रकृतिप्रत्यययोरिवानुबन्धः ॥" * ॥

सितः सर्पिः ।) श्वेताश्वश्च ॥

सितसर्षपः, पुं, (सितः सर्षपः ।) गौरसर्षपः । इति राजनिर्घण्टः ॥

सितसारः, पुं, (सितः सारो निर्य्यासो यस्य ।) शालिञ्चशाकः । इति राजनिर्घण्टः ॥

सितसारकः, पुं, (सितसार एव । स्वार्थे कन् ।) शालिञ्चशाकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"शालिञ्चः सितसारश्च पनुरो लोहमारकः ॥)

सितसिंही, स्त्री, (सिता सिंहीव ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

सितसिन्धुः, स्त्री, (सिता शुक्लजला सिन्धुः ।)गङ्गा । इति शब्दरत्नावली ॥

सिता, स्त्री, (सित + टाप् ।) शर्करा । इत्यमरः । २ । ९ । ४३ ॥ अस्या गुणाः ।

"खण्डस्तु सिकतारूपः सुश्वेतः शर्करा सिता ।
सिता सुमधुरा रुच्या वातपित्तास्रदाहहृत् ।
मूर्च्छाच्छर्द्दिज्वरान् हन्ति सुगीता शुक्रकारिणी ॥"

इति राजनिर्घण्टः ॥

(यथा, महानिर्व्वाणतन्त्रे । ९ । ७८ ।

"ततो दुग्धं सितायुक्तं दत्त्वा पाकविधानतः ।
सुपक्वेत् संस्कृते वह्नौ सावधानेन सुव्रते ॥") मल्लिका । इति शब्दरत्नावली ॥ श्वेतकण्टकारी । वाकुची । विदारी । श्वेतदूर्व्वा । चन्द्रिका । कुटुम्बिनी । मद्यम् । पिङ्गा । वाग्भाषा । तेजनी । इति राजनिर्घण्टः । पर्व्वतजातापराजिता । इति रत्नमाला ॥

सितांशुः, पुं, (सिता अंशवो यस्य ।) चन्द्रः । (यथा, नैषधे । १ । १२ ।

"सितांशुवर्णैर्वयति भ्रु तन्तुभि-
र्मृगाभिवेन्द्रः सचकोरसुन्दरीं वधूम् ।
दिगङ्गनाः कर्णभरणं रणाङ्गने
यशःपटं तच्चटचातुरीतुरी ॥")

कर्पूरः । इति शुभ्रांशुशब्ददर्शनात् ॥

सितांशुतैलं, क्ली, (सितांशुजातं कर्पूरसम्भवं तैलम् ।) कर्पूरतैलम् । इति राजनिर्घण्टः ॥

सिताखण्डः, पुं, (सितायाः खण्डो यत्र ।) मधुजातशर्करा । तत्पर्य्यायः । खण्डकः २ सितजा ३ शर्करजा ४ माधवी ५ मधुशर्करा ६ माक्षीकशर्करा ७ । अस्य गुणाः । अतिमधुरत्वम् । चक्षुष्यत्वम् । कृमिकुष्ठव्रणकफश्वासहिक्कापित्तास्रदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

सिताग्रः, पुं, (सितः अग्रो यस्य ।) कण्टकम् । इति हारावली ॥

सिताङ्गः, पुं, (सितः अङ्गो यत्र ।) वालुकागड़मत्स्यः । इति हारावली । १९० ॥ (सिताङ्ग इति पाठः साधुः ॥

सिताङ्गः, पुं, (सितमङ्गं यस्य ।) श्वेतरोहितः । इति राजनिर्घण्टः ॥ (वालुकागड़मत्स्यः । इति हारावली । १९० ॥)

सिताजाजी, स्त्री, श्वेतजीरकः । इति राजनिर्घण्टः॥ (गुणादयोऽस्याः श्वेतजीरकशब्दे ज्ञेयाः ॥)

सितादिः, पुं, (सितायाः आदिः कारणम् ।) गुड़ः । इति राजनिर्घण्टः ॥

सिताननः, पुं, (सितमाननं यस्य ।) मरुड़ः । इति केचित् ॥ शुक्लमुखयुक्ते, त्रि ॥

सितापाङ्गः, पुं, (सितौ अपाङ्गौ यस्य ।) मयूरः । इति त्रिकाण्डशेषः ॥

सिताङ्गं, क्ली, (सितमङ्गम् ।) श्वेतकमलम् । इति राजनिर्घण्टः ॥ (यथा, सरस्वतीध्याने । "कुचभरनमिताङ्गी सन्निषण्णा सिताङ्गे ॥")

सिताभः, पुं, (सिता शुक्ला आभा यस्य ।) कर्पूरः । इत्यमरटीकायां रायमुकुटः ॥

सिताभा, स्त्री, (सिता आभा यस्याः ।) तक्राह्वा । इति राजनिर्घण्टः ॥

सिताभ्रः, पुं, (सितं शुक्लमभ्रमिति प्राप्नोतीति । अभ्र गतौ + अच् ।) कर्पूरः । इत्यमरः ।२।६।१३०॥ (अस्य पर्य्यायो यथा,—

"पुंसि क्लीवे च कर्पूरः सिताभ्रो हिमवालुकः घनसारश्चन्द्रसंज्ञो हिमनामापि स स्मृतः ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सिताभ्रकं, क्ली, (सितं शुभ्रमभ्रमिति प्राप्नोतीति । अभ्र + खुल् ।) कर्पूरम् । इति रत्नमाला ॥

सिताम्बरः, पुं, (सितमम्बरं यस्य ।) श्वेतवस्त्रपरिधानकर्त्ता । इति हलायुधः ॥ शुक्लवस्त्रपरिधायिनि, त्रि ॥

सिताम्भोजं, क्ली, (सितं अम्भोजम् ।) श्वेतपद्मम् । इत्यमरः । १ । ८ । ४१ ॥

सितार्জ্জकः, पुं, (सितमर्জ্জयतीति । अर्জ্জ + खुल् ।) श्वेततुलसी । श्वेताजवला इति हिन्दी भाषा । तत्पर्य्यायः । वैकुण्ठः २ वटपत्रः ३ कुठेरकः ४ जम्बीरः ५ गन्धवहलः ६ सुमुखः ७ कटुपत्रकः ८ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातनेत्रामयनाशित्वम् । रुच्यत्वम् । सुखप्रसवकारकत्वञ्च । इति राजनिर्घण्टः ॥

सितालकः, पुं, (आलयति भूषयतीति । अल + णिच् + खुल् । सितः आलकः ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

सितालता, स्त्री, (सिता लता ।) श्वेतदूर्व्वा । इति रत्नमाला ॥ (श्वेतदूर्व्वाशब्देऽस्या विषयो ज्ञातव्यः ॥)

सितालिकटभी, स्त्री, श्वेतकिणिहीहृच्चः । इति राजनिर्घण्टः ॥

सितावरः, पुं, (सितमाहृणोतीति । आ + हृ + अच् ।) शाकविशेषः । सुसुनी इति भाषा । तत्पर्य्यायः । सूच्याह्वः २ सूचीपत्रकः ३ ग्रीवारकः ४ शिखी: ५ वभ्रः ६ स्वस्तिकः ७ सुनिषण्णकः ८ कुक्कुटः ९ कुकुटः १० सूचीदलः ११ श्वेतावरः १२ मेधाक्षत् १३ शाकिकः १४ । अस्य गुणाः । सर्व्याहित्वम् । कफापत्यत्वम् । उष्णत्वम् । विदोषनाशित्वम् । मेधारुचिप्रदत्वम् । दाहज्वरहारित्वम् । रसायनत्वञ्च । इति राजनिघण्टः॥ निद्राकारित्वम् । इति लोकप्रसिद्धम्॥ तस्य लक्षणं यथा,—

"चाङ्गेरीसदृशः पत्रैश्चतुर्दलं इतीरितः । शाकी जलान्विते देशे चतुष्पत्रीति चोच्यते ॥" इति भावप्रकाशः ॥

सितावरी, स्त्री, (सितमाहृणोतीति । आ + हृ + अच् । ङीष् ।) वाकुचौ । इति राजनिर्घण्टः ॥

सितासितः, पुं, (वर्णेन सितः वस्त्रेण चासितः ।) बलदेवः । इति हेमचन्द्रः ॥ शुक्लसहितश्च ॥ यथा । ज्योतिस्तत्त्वे ।

"सितासितौ चन्द्रमसो न कश्चित् बुधः शशी सौम्यसितौ रवीन्दू । रवीन्दुभौमा रविसूनुमित्रा मित्रारिशत्रुश्च समः प्रदिष्टः ॥"

शुक्लसहितलक्षणञ्च ॥ (यथा, महाभारते । ७ । १३० । २८ ।

"ते इया बद्धशोभन्त मित्रिता वातरंहसः । सितासिता महाराज यथा व्योम्नि बलाहकाः॥"

सिताङ्गयः, पुं, (सित आङ्गयो यस्य ।) श्वेतशिग्रुः । श्वेतरोहितः । इति राजनिर्घण्टः ॥

सितिः, त्रि, शुक्लः । कृष्णः । इत्यमरटीकायां रमानाथः ॥

सितिकण्ठः, पुं, (सितिः कृष्णः कण्ठो यस्य ।) शितिकण्ठः । शिवः । इत्यमरटीकायां सितिशब्दस्य दन्त्यादित्वदर्शनात् ॥

सितिमा, [न्] पुं, (सितस्य सितेर्वा भावः । इमनिच् । शुक्लता । (यथा, माघे । १ । २५ ।

"सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लम्भयन् ॥")

कृष्णता । इति सितिशब्दादिमन्प्रत्ययेन निष्पन्नः

सितिवारः, पुं, (सितिं वृणोतीति । वृ + अण्) सुनिषण्णकः । इति भावप्रकाशः ॥

सितिवासाः, [स्] पुं, (सिति नीलं वासो यस्य ।) बलदेवः । इति नीलाम्बरशब्ददर्शनात् ॥(यथा, माघे । १ । ६ ।

"पिशङ्गमौक्षीयुजमर्জ্জनच्छविं वसानमैनाजिनमञ्जनद्युति । सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं सितिवाससस्तनुम् ॥")

सितेक्षुः, पुं, (सितः इक्षुः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

सितेतरः, पुं, (सितादितरः ।) श्यामशालिः । कुलत्थः । इति राजनिर्घण्टः ॥ शुक्लेतरवर्णश्च ॥ (यथा, कुमारे । ३८ ।

"नीविमतिक्रम्य सितेतरस्य तन्मेखलामध्यमणेरिवार्চ্চिः ॥"

सितेतरत्व इतरत्व इति विग्रहे । कृष्णशुक्लौ । अत्र द्विवचनप्रयोगः स्यात् । यथा, भागवते । १० । ४१ । ४१ ।

"नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः । रङ्गद्वारं वालगजौ पूर्व्वलीव सितेतरौ ॥")

सितेतरगतिः, पुं, (सितेतरा कृष्णा गतिरस्य ।) अग्निः । इति हलायुधः ॥

सितोदरः, पुं, (सितमुदरं यस्य ।) कुबेरः । इति हेमचन्द्रः ॥ शुक्लकुक्षियुक्ते, त्रि ॥ (सितमुदरमिति ।) शुक्लकुक्षौ, क्ली ॥

सितोड्रवं, क्ली, (सित उड्रवो यस्य ।) श्वेतचन्दनम् । इति केचित् ॥ (सिताया उड्रवो यस्य ।) शर्करालाते, त्रि ॥

सितोपलं, क्ली, (सितमुपलमिव ।) कठिनी । इति चिकाणशेषः ॥

सितोपलः, पुं, (सितः उपलः ।) स्फटिकः । इति राजनिर्घण्टः ॥

सितोपला, स्त्री, (सित उपल इव आकृतिर्यस्याः स्त्रियां टाप् ।) शर्करा । इति हेमचन्द्रः ॥ (यथा,—

"सिता सितोपला चैव मत्स्यण्डी शर्करा स्मृता" इति गारुडे २०८ अध्यायः ॥

अस्या गुणा यथा,—

"सितोपला सरा लघ्वी वातपित्तहरी हिमा॥" इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

सिद्धं, क्ली, (सिध + क्तः ।) सैन्धवलवणम् । इति राजनिर्घण्टः ॥

सिद्धः, पुं, (सिध + क्तः) देवयोनिविशेषः । इत्यमरः ।१। १। ११ ॥ स तु अणिमादिगुणोपेतो विद्याधरसुप्रभृतिः । इति भरतः ॥ (यथा, कुमारे । १ । ५ ।

"उद्वेजिता दृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥")

व्यासादिः । विस्रब्धादिसप्तविंशतियोगान्तर्गतैकविंशयोगः । इति मेदिनी ॥ तत्र जातफलम् ।

"जितेन्द्रियः सर्व्वकलानिधानो गौरोऽतिशूरो मधुरो विनीतः । सत्योपपन्नः कृतभूरिभोगो यस्य प्रसूतौ किल सिद्धयोगः ॥" इति कोष्ठीप्रदीपः ॥

व्यवहारः । इति शब्दरत्नावली ॥ कृष्णधुस्तूरः । गुडः । इति राजनिर्घण्टः ॥

सिद्धः, त्रि, (सिध + क्तः ।) प्रसिद्धः । (यथा, भागवते । १० । १८ । १६ ।

"एवं तौ लोकसिद्धाभिः क्रीड़ाभिश्चेरतुर्वने ॥") नित्यः । निष्पन्नः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ६८ । ८ ।

"सिद्धार्थः खलु सौमित्रिर्यश्चन्द्रविमलोपमम् । मुखं पश्यति रामस्य राजीवाक्षं महाद्युतिम्॥") मुक्तः । इति हेमचन्द्रः ॥ (यथा, भागवते १६। १२ । १६ ।

"अहो दानव सिद्धोऽसि यस्य ते मतिरीदृशी॥") पक्वम् । यथा, सुश्रुतः ।

"पर्য্युषितं पुनःसिद्धमभोज्यमन्यत्र हिरण्योदकस्पर्शात् ।" इति आह्निकतत्त्वम् ॥ मन्त्रसिद्धिविशिष्टः । यथा,—

अथ मन्त्रसिद्धेरुपायाः । गौतमीये ।

"सम्यगनुष्ठितो मन्त्रो यदि सिद्धिर्न जायते । पुनस्तेनैव कर्त्तव्यं ततः सिद्धो भवेद्ध्रुवम् ॥ पुनरनुष्ठितो मन्त्रो यदि सिद्धिर्न जायते । पुनस्तेनैव कर्त्तव्यं ततः सिद्धो न संशयः ॥ पुनः सोऽनुष्ठितो मन्त्रो यदि सिद्धिर्न जायते । उपायास्तत्र कर्त्तव्याः सप्त शङ्करभाषिताः । भ्रामणं रोधनं वश्यं पीड़नं शोषणोषणम् । दहनान्तं क्रमात् कुर्য্यात् ततः सिद्धो भवेन्मनुः॥

भ्रामणं वायुबीजेन यथानुक्रमयोगतः ।
तन्मन्त्रं यन्त्र आलिख्य सिद्धकूर्चकुङ्कुमैः ।
उशीरचन्दनाभ्यान्तु मन्त्रं संग्रथितं लिखेत् ।
क्षीराज्यमधुतोयानां मध्ये तल्लिखितं भवेत्॥
पूजनाज्जपनाद्धोमात् भ्रामितः सिद्धिदो भवेत्
भ्रमितो यदि न सिद्धः स्याद्रोधनं तस्य कारयेत्
मारस्तेन बीजेन संपुटीकृत्य संजपेत् ।
एवं रुद्धे भवेत् सिद्धो न चेदेतद्वशीकुरु ॥
अलक्तचन्दनं कुष्ठं हरिद्रा मादनं शिला ।
एतैस्तु मन्त्रमालिख्य भूर्जपत्रे सुशोभने ।
धार्य्यकण्ठे भवेत् सिद्धः पीड़नं वास्य कारयेत्॥
अधरोत्तरयोगेन पदानि परिजप्य वै ।
ध्यायेच्च देवतां तद्वत् अधरोत्तररूपिणीम् ॥
विद्यामादित्यदुग्धेन लिखित्वाक्रम्य चाङ्घ्रिणा
तथाभूतेन मन्त्रेण होमः कार्य्यो दिने दिने ॥
पीड़ितो लज्जयाविष्टः सिद्धः स्यादथ पोषयेत्।
बालायान्त्रितयं बीजं आद्यन्ते तस्य योजयेत्॥
गोक्षीरमधुनालिख्य विद्यां पाणौ विभावयेत्।
पोषितोऽयं भवेत् सिद्धो न चेत् कुर्व्वीत शोषणम् ॥
हाभ्यान्तु वायुबीजाभ्यां मन्त्रं कुर्य्याद्विदर्भितम्
एषा विद्या गले धार्य्या लिखित्वा वरभस्मना ॥
शोषितोऽपि न सिद्धः स्यात् दहनीयोऽग्निबीजतः ।
आग्नेयेन तु बीजेन मन्त्रस्यैकैकमक्षरम् ॥
आद्यन्तमध ऊर्द्धञ्च योजयेद्दाहकर्म्मणि ।
ब्रह्मवृक्षस्य तैलेन मन्त्रमालिख्य धारयेत् ॥
कण्ठदेशे ततो मन्त्रः सिद्धः स्याच्छङ्करोदितम् ।
इत्येतत् कथितं सम्यक् केवलं तव भक्तितः ॥
एकेनैव कृतार्थः स्यादन्यैर्बहुभिः किमु सुव्रते ॥"
इति तन्त्रसारः ॥ *

सिद्धिविशिष्टः । स च चतुस्त्रिंशद्विधः । यथा,—
"चतुस्त्रिंशद्विधः सिद्धः सर्व्वकर्म्मोपकारकः ।
तमुपैति स्वयं सिद्धं भक्तस्तं नैव वाञ्छति ॥
द्वात्रिंशद्विधं सिद्धं सर्व्वसाधनकारणम् ।
मन्मुखात् श्रूयतां नन्द सिद्धमन्त्रं गृहाण च ॥
अणिमा लघिमा प्राप्तिः प्राकाम्य महिमा तथा
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥
दूरश्रवणमेवेति परकायप्रवेशनम् ।
मनोयायित्वमेवेति सर्व्वज्ञत्वमभीप्सितम् ॥
वह्निस्तम्भं जलस्तम्भं चिरजीवित्वमेव वा ।
वायुस्तम्भं क्षुत्पिपासानिद्रास्तम्भनमेव च ॥
कायव्यूहश्च वाक्सिद्धं मृतानयनमीप्सितम् ।
सृष्टीनां कारणञ्चैव प्राणाकर्षणमेव च ॥
प्राणानाञ्च प्रदानञ्च लोभादीनाञ्च स्तम्भनम् ।
इन्द्रियाणां स्तम्भनञ्च बुद्धिस्तम्भनमेव च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।७८।२०-२८

सिद्धकः, पुं, (सिद्ध इव । इवार्थे कन् ।) सिन्धुसारः । शालः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । ५ । ३ ।
"धवाश्वकर्णासनपारिभद्रा
सपाटलाः सिद्धकमोचकौ च ॥")

सिद्धकामेश्वरी, स्त्री, (सिद्धा कामेश्वरी ।) कामाख्यायाः पञ्चमूर्त्तान्तर्गतपञ्चममूर्त्तिः । तस्या रूपं यथा, कालिकापुराणे ६१ अध्याये ।
"रविशशियुतकर्णा कुङ्कुमापीतवर्णा
मणिकनकविचित्रा लोलकर्णा त्रिनेत्रा ।
अभयवरदहस्ता सोत्पलसूत्रप्रशस्ता
प्रणतसुरवरेण्या सिद्धकामेश्वरी सा ॥
अरुणकमलसंस्था रक्तपद्मासनाख्या
नवतरुणशरीरा मुक्तकेशी सुहारा ।
शवहृदि पृथुतुङ्गस्तन्ययुग्मा मनोज्ञा
शिशुरविसमवस्त्रा सिद्धकामेश्वरी सा ॥
विपुलविभवदात्री स्मेरवक्त्रा सुकेशी
दलितकरकदन्ता सासिचन्द्रावतंसा ।
मनसिजहृदिस्था योनिमुद्रालसन्ती
पवनचलनशक्ता संयुतस्थानभागा ॥"

सिद्धगङ्गा, स्त्री, (सिद्धा गङ्गा । 'क्वचित् सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम्।' रामा० २ । ९५।८। इत्युक्तेः सिद्धसेविता गङ्गा इति वा ।) मन्दाकिनी । इति जटाधरः ॥

सिद्धजलं, क्ली, (सिद्धं पक्वं जलं यत्र ।) काञ्जिकम् । इति हारावली ॥ (सिद्धं जलमिति ।) पक्वतोयं च ॥

सिद्धदेवः, पुं, (सिद्धो देवः ।) शिवः । इति शब्दरत्नावली ॥

सिद्धधातुः, पुं, (सिद्धो धातुः ।) पारदः । इति त्रिकाण्डशेषः ॥

सिद्धपीठः, पुं, (सिद्धः पीठः ।) सिद्धस्थानम् । यथा —
"जातो लक्षवलिर्यत्र होमो वा कोटिसंख्यकः।
महाविद्याजपः कोटिः सिद्धपीठः प्रकीर्त्तितः॥"
इति तन्त्रम् ॥

सिद्धपुरं, क्ली, (सिद्धं पुरम् ।) भूगोलस्थाधोदेशविशेषः । यथा,—
"लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च ।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वडवानलञ्च ॥
कुब्जन्तपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति ॥"
इति सिद्धान्तशिरोमणिः ॥

सिद्धपुष्पः, पुं, (सिद्धप्रियं यन्त्रसिद्धं वा पुष्पमस्य) करवीरवृक्षः । इति राजनिर्घण्टः ॥

सिद्धप्रयोजनः, पुं, (सिद्धानां प्रयोजनं यत्र ।) गौरसर्षपः । इति राजनिर्घण्टः ॥

सिद्धमन्त्रः, पुं, (सिद्धो मन्त्रः ।) सिद्धप्राप्तमन्त्रः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।७८।२१ ; २७—२८ ।
"द्वात्रिंशद्विधं सिद्धं सर्व्वसाधनकारणम् ।
मन्मुखात् श्रूयतां नन्द सिद्धमन्त्रं गृहाण च॥"
"ओम् सर्व्वेश्वराय सर्व्वविघ्नविनाशिने मधुसूदनाय स्वाहेत्येवं मन्त्रस्य सर्व्वेषां कल्पादपः ।
सामवेदे च कथितः सिद्धानां सर्व्वसिद्धिदः ॥
अनेन योगिनः सिद्धा मुनिन्द्राश्च सुरास्तथा ।
शतलक्षजपेनैव मन्त्रसिद्धिर्भवेत् सताम् ॥"

सिद्धमोदकः, पुं, (सिद्धान् मोदयतीति । मुद + णिच् + ण्वुल् ।) तवराजोक्तवस्तुखण्डः । इति राजनिर्घण्टः ॥

सिद्धयोगिनी, स्त्री, (सिद्धा योगिनी ।) योगिनीविशेषः । इत्यपराजितास्तोत्रम् ॥ (यथा, कथासरित्सागरे । ३७ । १६१ ।
"इत्युक्त्वैव गतायाञ्च तस्यां सा सिद्धयोगिनी ।
तत्प्रतीघातहेतोर्मामवोचद्वत्सभोचिनी ॥")

सिद्धरसः, पुं, (सिद्धो रसः ।) पारदः । रससिद्धः । इत्यजयपालः ॥

सिद्धरसः, त्रि, (सिद्धो रसो यस्य ।) धातुप्रभृतिः । इति मेदिनी ॥

सिद्धविद्या, स्त्री, (सिद्धा विद्या ।) महाविद्याविशेषः । यथा,—
"कालो तारा महाविद्या षोड़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगलामुखी सिद्धविद्या मातङ्गी कमलात्मिका
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः"
इति तन्त्रसारः ॥

सिद्धसलिलं, क्ली, (सिद्धं पक्वं सलिलं यत्र ।) काञ्जिकम् । इति त्रिकाण्डशेषः ॥

सिद्धसाधनं, क्ली, (सिद्धस्य साधनम् ।) सिद्धस्य वस्तुनः साधनम् । साध्यवत्त्वानिश्चयसत्त्वेऽप्यनुमानम् । यथा,—
"अतएव न स्वरूपासिद्धिः सिद्धसाधनं वा ।"
इति सिद्धान्तलक्षणे जगदीशः ॥

सिद्धसाधनः, पुं, (सिद्धानां साधनमस्मादिति ।) गौरसर्षपः । इति राजनिघण्टः ॥

सिद्धसाध्यः, पुं, (सिद्धात् साध्यः ।) मन्त्रविशेषः । यथा,—
"सिद्धसिद्धो यथोक्तेन द्विगुणात् सिद्धसाध्यकः ।
सिद्धसुसिद्धोऽर्जपात् सिद्धारिर्हन्ति बान्धवान्॥"
इति तन्त्रसारः ॥

सिद्धसिद्धः, पुं, (सिद्धात् सिद्धः ।) मन्त्रविशेषः । यथा,—
"सिद्धसिद्धो यथोक्तेन द्विगुणात् सिद्धसाध्यकः ।
सिद्धसुसिद्धोऽर्जपात् सिद्धारिर्हन्ति बान्धवान्॥"
इति तन्त्रसारः ॥

सिद्धसिन्धुः, स्त्री, (सिद्धसेविता सिन्धुः ।) गङ्गा । इति त्रिकाण्डशेषः ॥

सिद्धसुसिद्धः, पुं, (सिद्धात् सुसिद्धः ।) मन्त्रविशेषः । अस्य प्रमाणं सिद्धसाध्यशब्दे द्रष्टव्यम् ।

सिद्धसेनः, पुं, (सिद्धा सेना यस्य ।) कार्त्तिकेयः । इति शब्दरत्नावली ॥

सिद्धसेवितः, पुं, (सिद्धैः सेवितः ।) वटुकभैरवः । इति तन्त्राष्टोत्तरशतनामस्तोत्रम् ॥

सिद्धसेवितः, त्रि ॥

सिद्धा, स्त्री, (सिध + क्तः । टाप् ।) ऋद्धिः । इति राजनिर्घण्टः ॥ योगिनीविशेषः । यथा, ज्ञातकदीपिकायाम् ।

"मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा।
उल्का सिद्धा सङ्कटा च योगिन्योऽष्टौ प्रकीर्त्तिताः॥"

सिद्धान्तः, पुं, (सिद्धः अन्तो यस्मात्।) पूर्व्वपक्षं निरस्य सिद्धपक्षस्थापनम्। इति भरतः॥ (यथा, महाभारते। १।७०।४३।
"स्थापनाद्येषसिद्धान्तपरमार्थत्वतां गतैः॥")
तत्पर्य्यायः। राद्धान्तः २। इत्यमरः।१।५।४॥
नवविधज्योतिर्गणाः। यथा। ब्रह्मसिद्धान्तः१ सूर्य्यसिद्धान्तः २ सोमसिद्धान्तः ३ बृहस्पतिसिद्धान्तः ४ गर्गसिद्धान्तः ५ नारदसिद्धान्तः ६ पराशरसिद्धान्तः७ पुलस्त्यसिद्धान्तः८ वशिष्ठसिद्धान्तश्च९॥ तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः। स च चतुर्विधः। सर्व्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् सर्व्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्व्वतन्त्रसिद्धान्तः॥१॥ समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः॥२॥ यस्मिंडावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः॥३॥ अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः॥४॥ इति गोतमसूत्रम्॥ (तथास्य विवृतिर्यथा,—
"अथ सिद्धान्तः। सिद्धान्तो नाम यः परीक्षकैर्बहुविधं परीक्ष्य हेतुभिः साधयित्वा स्थाप्यते निर्णयः स सिद्धान्तः। स चोक्तचतुर्विधः। सर्व्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगमसिद्धान्त इति।
तत्र सर्व्वतन्त्रसिद्धान्तो नाम सन्ति निदानानि, सन्ति व्याधयः, सन्ति सिद्ध्युपायाः साध्यानामिति प्रतितन्त्रसिद्धान्तो नाम तस्मिंस्तस्मिंस्तन्त्रे तत्तत् प्रसिद्धं यथान्यत्राष्टौ रसाः षड्न्यत्र। पञ्चेन्द्रियाणि यथान्यत्र षड्इन्द्रियाणि। वाताधिक्कताः सर्व्वविकारा यथान्यत्र वातादिक्कता भूतक्कताश्च प्रसिद्धाः।
अधिकरणसिद्धान्तो नाम यस्मिन्नधिकरणे संस्थूयमाने सिद्धान्यन्यान्यपि अधिकरणानि भवन्ति। न मुक्तः कर्म्मानुबन्धिकं कुरुते निस्पृहत्वादिति प्रस्तुते सिद्धाः कर्म्मफलमोक्षपुरुषप्रेत्यभावा भवन्ति।
अभ्युपगमसिद्धान्तः। अभ्युपगमसिद्धान्तो नाम यमर्थमसिद्धमपरीक्षितमनुपदिष्टमहेतुकं वा वादकालेऽभ्युपगच्छन्ति भिषजः। तदयथा द्रव्यं न प्रधानमिति क्कत्वा वक्ष्यामः। गुणाः प्रधाना इति क्कत्वा वक्ष्यामः। इत्येवमादिश्चतुर्विधः सिद्धान्तः।" इति चरके विमानस्थाने ८ अध्यायः॥)

सिद्धान्ताचारः, पुं, (सिद्धोऽन्तो यस्य। तादृशश्चासौ आचारः।) तान्त्रिकाचारविशेषः। यथा,—
"आत्मानं देवतां मत्वा यजेद्देवीञ्च मानसैः।
सदा शुद्धः सदा शान्तः सिद्धान्ताचार उच्यते॥"
इत्याचारभेदतन्त्रम्॥

सिद्धान्ती, [न्]पुं, (सिद्धान्तोऽस्यास्तीति। इन्।) मीमांसकः। इति भूरिप्रयोगः॥

सिद्धापगा, स्त्री, सिद्धसेविता आपगा।) गङ्गा। इति हेमचन्द्रः॥
सिद्धायिका, स्त्री, चतुर्व्विंशतिबुद्धशासनदेवतान्तर्गतदेवीविशेषः। इति हेमचन्द्रः॥
सिद्धारिः, पुं, मन्त्रविशेषः। एतत्प्रमाणं सिद्धसाध्यशब्दे द्रष्टव्यम्॥
सिद्धार्थः, पुं, (सिद्धोऽर्थो यस्य।) वृक्षार्हस्थितः। इति हेमचन्द्रः॥ शाक्यसिंहः। इति मेदिनी॥ (सिद्धोऽर्थो यस्मात्।) श्वेतसर्षपः। इत्यमरः। २।९।१८॥ (यथा, भागवते। ४।९।५८।
"ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः।
सिद्धार्थाश्चतदध्यस्मै पूजोपायफलानि च।
उपजह्रुः प्रयुञ्जाना व्यात्मन्यादात्मिषः सतीः॥")
अस्य पर्य्यायगुणाः गौरसर्षपशब्दे द्रष्टव्याः॥ वटीवृक्षः। इति राजनिर्घण्टः॥ प्रसिद्धार्थः। यथा,—
"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥"
इति व्याकरणटीका॥

सिद्धार्था, स्त्री, (सिद्धोऽर्थो यस्याः।) चतुर्थ्यजिनमाता। इति हेमचन्द्रः॥
सिद्धिः, स्त्री, (सिध+क्तिन्।) दुर्गा। यथा,—
साधनात् सिद्धिरित्युक्ता साधका वाथ ईश्वरी॥"
इति देवीपुराणे ४५ अध्यायः॥
ऋद्धिनामौषधम्। इत्यमरः। २।४।११२॥
योगविशेषः। निष्पत्तिः। यथा, मनुः।२।९७।
"वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च।
न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित्॥")
पादुका। अन्तर्द्धिः। वृद्धिः। इति मेदिनी॥ मोक्षः। इति हेमचन्द्रः॥ (यथा, मनुः। १२।११।
"कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति॥")
सम्पत्तिः। इति धरणिः॥ बुद्धिः। इति शब्दरत्नावली॥* अष्टसिद्धिनामलक्षणानि यथा,
"अणिमा महिमा चैव लघिमा प्राप्तिरेव च।
प्राकाम्यञ्च तथेशित्वं वशित्वञ्च तथापरम्॥
यत्र कामावसायित्वं गुणानेतानथेश्वरान्।
प्राप्नोत्यष्टौ नरव्याघ्र परनिर्व्वाणसूचकान्॥
सूक्ष्मात् सूक्ष्मतरोऽणीयान् शीघ्रत्वाल्लघिमा गुणः।
महिमाशेषपूज्यत्वात् प्राप्तिर्नाप्राप्यमस्य यत्॥
प्राकाम्यमस्य व्यापित्वात् ईशित्वं चेश्वरो यतः।
वशित्वात् वशिता नाम योगिनः सप्तमो गुणः॥
यत्रेच्छास्थानमप्युक्तं यच्च कामावसायिता।
ऐश्वर्य्यं कारणैरेभिर्योगिनः प्रोक्तमष्टधा॥"
इति मार्कण्डेये दत्तात्रेयालर्कसंवादे योगवल्लभनामाध्यायः॥* (अष्टादशसिद्धिनामानि यथा, ब्रह्मवैवर्त्ते। १।६।१८—१९।
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च सर्व्वकामावसायिता॥
सर्व्वज्ञत्वं दूरश्रवणं परकायप्रवेशनम्।
वाक्सिद्धिः कल्पवृक्षत्वं स्रष्टुं संहर्त्तुमीशता।
अमरत्वञ्च सर्व्वाङ्गे सिद्धयोऽष्टादश स्मृताः॥")
भावनासिद्धिर्यथा,—
"तीर्थे कान्तेऽभीष्टदेवे गुरौ मन्त्रे भवौषधे।
श्रद्धा च यादृशी यासां सिद्धिस्तासाञ्च तादृशी॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे३९अध्यायः॥
ज्ञानात् सिद्धिर्यथा,—
"तस्मात् त्वमपि भूपाल देहि न्यायार्জ্জितं धनम्।
दानात् ज्ञानं ततः प्राप्य ज्ञानात् सिद्धिमवाप्स्यसि॥"
इति वह्निपुराणे शिवरुपाख्याननामाध्यायः॥

सिद्दिः, पुं, (सिद्धिं ददातीति। दा+कः।) वटुकभैरवः। इति तस्य स्तोत्रम्॥ सिद्धिदातरि, त्रि। (यथा, देवीभागवते। ६।२।५१।
"तं कुन्ती वचनं प्राह मम मन्त्रोऽस्ति कामदः
दत्तो दुर्व्वाससा पूर्व्वं सिद्धिदः सर्व्वथा प्रभो॥")
यथा च।
"मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्दशी।
प्रोक्ता मदनभञ्जीति सिद्धिदा तु महोत्सवे॥"
इति तिथ्यादितत्त्वम्॥

सिद्धियोगः, पुं, (सिद्धैर्योगो यत्र।) तिथिवारघटितशुभयोगविशेषः। यथा,—
"शुक्रे नन्दा बुधे भद्रा शनौ रिक्ता कुजे जया
गुरौ पूर्णा च संयुक्ता सिद्धियोगः प्रकीर्त्तितः॥
इति ज्योतिःसागरः॥

सिद्धियोगिनी, स्त्री, (सिद्धिप्रिया योगिनी।) योगिनीभेदः। यथा,—
"प्रणवाद्याश्च या विद्याः शूद्रादौ न समीरिताः
अस्यास्त्वेव विशेषो यत् योषित्त्वेत् समुपासयेत्॥
डाकिनी सा भवत्येव डाकिनीभिः प्रजायते।
पतिहीना पुत्रहीना यथा स्यात् सिद्धियोगिनी"
इति तन्त्रसारः॥*॥

दक्षस्य षष्ट्यशत् कन्याः। तथा,—
"सती ज्योतिः स्मृतिः ख्याता ज्ञानसूया क्षमा तथा।
प्रीतिः क्षमा च संभूतिः सन्नतिश्च अरुन्धती॥
कौर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः
बुद्धिर्लज्जा वपुःशान्तिस्तुष्टिः सिद्धिस्तथा रतिः॥
अरुन्धती वसुर्यामी लम्बा भानुर्मरुत्वती।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामतः
अदितिश्च दितिश्चैव दनुः कालादनायुषा।
सिंहिका सुरसा कद्रुर्विनता सुरभिः खसा॥
क्रोधा इरा च प्राधा च दक्षकन्याः प्रकीर्त्तिताः
षष्ट्यशत् सिद्धियोगिन्यः सर्व्वलोकस्य मातरः॥"
इति वह्निपुराणे गणभेदनामाध्यायः॥

सिद्धिली, स्त्री, (सिद्धिं लातीति। ला+कः। ङीष्।) क्षुद्रपिपीलिका। इति केचित्॥
सिद्धिस्थानं, क्ली, (सिद्धेः स्थानम्।) पुण्यस्थानविशेषः। यथा,—
"अतः परं प्रवक्ष्यामि सिद्धिस्थानानि यानि तु

यस्मिन्नाराधिता देवी क्षिप्रं भवति सिद्धिदा ॥
तुङ्गारं शक्तशृङ्गञ्च त्रिकूटं पर्व्वतं तथा ।
विन्ध्या गङ्गा सरिद्यञ्च रेवातीरमथापि वा ॥
पयोष्णी असुराख्या तु अथवा मण्डलेश्वरे ।
शङ्करेश्वररामेशे अथवा अमरेश्वरे ॥
वेत्रवत्यास्तटे रम्ये हरिश्चन्द्रे तथा प्रिये ।
सरस्वतीतटे पुण्ये सुगन्धायतनेऽपि वा ।
स्थानेष्वेषु जपं कुर्य्यात् नन्दाद्दे क्षतमानसः ।
भैरवं शूलभेदञ्च चण्डीग्रं त्रिपुरान्तकम् ॥
अष्टचक्रं चक्रोच्छासं कपालाद्यग्रनामकम् ।
अजाविकं खरोष्ट्राख्यं स्थानान्येतानि वर्जयेत्॥"

इति देवीपुराणे कुण्डप्रवेशनामाध्यायः ॥

सिद्धेश्वरी, स्त्री, (सिद्धा ईश्वरी ।) देवीविशेषः । यथा,—

"सिद्धां सिद्धेश्वरीं सिद्धविद्याधरगणैर्युताम् ।
मन्त्रसिद्धिप्रदां योनिसिद्धिदां लिङ्गशोभिताम्॥

इति सुण्डमालातन्त्रे ११ पटले महाविद्यास्तोत्रम् ॥ अपि च ।

"कृष्णेन बलभद्रेण गोपैः कंसजिघांसुभिः ।
सङ्केतकं कृतं तत्र मन्त्रनिश्चयकारकम्॥
तदा सङ्केतकैः सा च सिद्धा देवी प्रतिष्ठिता ।
सिद्धिप्रदा भोगदा च तेन सिद्धेश्वरी स्मृता ।
सङ्केतकेश्वरीञ्चैव दृष्ट्वा सिद्धिमवाप्नुयात् ॥"

इति वाराहे मथुरापरिक्रमप्रादुर्भावनामाध्यायः ॥

सिद्धौघः, पुं, (सिद्धानामोघः ।) गुरुक्रमविशेषः। यथा, तन्त्रे ।

"अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान् ।
ऊर्द्धकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ॥
दिव्यौघाः सिद्धिदा वक्ष सिद्धौघान् शृणु यत्नतः ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः ॥
हरिनाथो मानवौघान् शृणु वक्ष्यामि तद्गुरून् ।
तारावती भानुमती जयाविद्या महोदरी ॥
सुखानन्दः परानन्दः पारिजातः कुलेश्वरः ।
विरूपाख्यः रेवती च कथितं तारिणीकुलम् ।
आनन्दनाथशब्दान्ता गुरवः सर्व्वसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकीर्त्तिताः ॥"

इति तन्त्रसारः ॥

अन्यच्च ।

"ब्रह्मानन्दः पूर्णदेवश्चलचित्तश्चलाचलः ।
कुमारः क्रोधनश्चैव तथा च स्मरदीपनः ॥
माया मायावती चैव मानवौघान् शृणु प्रिये ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः ।
हरिनाथो मानवौघानथ वक्ष्यामि सद्गुरून् ॥"

इति शक्तिरत्नाकरतन्त्रम् ॥

तथा ।

"नारदः काश्यपः शम्भुर्भार्गवः कुलकौशिकः ।
एते पञ्च महादेव सिद्धौघाः परिकीर्त्तिताः ॥"

इति तन्त्रम् ॥

सिध्र, [न्] क्ली, (सिध+मन् । स च कित् ।) किलासरोगः । इत्यमरः ।२। ६ । ५३ ॥(यथा, सुश्रुते । २ । ५ ।

"क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठञ्चर्म्मदलं विसर्पः परिसर्पः सिध्म विचर्चिका किटिमं पामा रकसा चेति ॥")

सिध्मं, क्ली, (सिध+बाहुलकात् मक् ।)किलासरोगः । इति हेमचन्द्रः ॥ सप्तमहाकुष्ठान्तर्गतकुष्ठरोगविशेषः । तल्लक्षणं यथा,—

"श्वेतं ताम्रं तनु च यद्रजो दृष्टं विमुञ्चति ।
प्रायशोरसि तत् सिध्ममलावुकुसुमोपमम् ॥"

इति माधवकरः ॥

लक्ष्मात्रगता सिध्मपुष्पिका इति अलावुपुष्पवत् श्वेतं सिध्मं सिध्मपुष्पिका । महाकुष्ठन्तु सिध्मं धातुप्रविष्टं सिध्मपुष्पिकेतरं श्वेतलोहितवर्णम् एतेन सिध्मस्य द्वैविध्यं सूचितम्। इति विजयरक्षितादयः ॥

सिध्मपुष्पिका, स्त्री, (सिध्मस्य किलासस्य पुष्पं विद्यते यस्याः । सिध्मपुष्प+ठन् ।) कुष्ठव्याधिभेदः । सा च लक्ष्मात्रगता अलावुपुष्पवत्श्वेता इति रुग्विनिश्चयटीकायां विजयरक्षितादयः ॥

सिध्मलः, त्रि, (सिध्मं अस्यास्तीति । सिध्म+ "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) किलासी । इत्यमरः । २ । ६ । ६१ ॥ (यथा, वाजसनेयसंहितायाम् । ३० । १७ ।

"विश्वेभ्यो भूतेभ्यः सिध्मलं भूत्यै जागरणमभूत्यै इति ॥")

सिध्मला, स्त्री,(सिध्ममस्या अस्तीति । लच् । टाप्।) मल्यविक्लृतिः । इति मेदिनी॥(औषधविशेषः । तदृयथा,—

"त्वगादिहीनाः संशुष्काः प्रत्यग्राः शकुलादयः ।
श्लक्ष्णचूर्णीकृतं तेषां शीतं पलशतत्रयम् ॥
शतेन कटुतैलेऽस्य व्योषरामठधान्यकैः ।
क्रिमिघ्नदीप्यकनिशाचविकाग्रन्थिकार्द्रकैः ॥
जीरकद्वयहपुषैरसुरसार्जकसिग्रुकैः ।
दशमूलात्मगुप्ताभ्यां मार्कवैर्वलवर्षाभूभिः ॥
चूर्णितैः पलिकैः सार्द्धं मारणालपरिप्लुतैः ॥
विन्यसेत् श्लेष्मपात्रे तु धान्यराशौ पुनर्न्यसेत् ।
सप्तरात्रात् समुद्धृत्य पानभक्षणभोजनैः ।
सिध्मलेयं प्रयोक्तव्या सामे वायौ विशेषतः ॥
भग्नक्षतार्त्तभूतहता: कम्पिनः पीठसर्पिणः ।
गृध्रसीमन्यिसादञ्च शूलगुल्मोदराणि च ।
वलीपलितखालित्यं हत्वास्यरमलेन्द्रियाः ॥"

इति वैद्यकचक्रपाणिसंग्रहे आमवाताधिकारे)

सिध्मवान्,[त्]त्रि, (सिध्ममस्त्यस्येति । सिध्म+ मतुप् । मस्य वः ।) किलासरोगविशिष्टः इति सिध्मशब्दादस्त्यर्थे वतुप्रत्ययेन निष्पन्नः ॥

सिध्मा, स्त्री, किलासरोगः । इति हेमचन्द्रः ॥

सिध्यः, पुं, (सिध्यन्त्यस्मिन्नर्था इति । सिध+ "पुषसिध्यो नक्षत्रे ।" ३ । १ । ११६ । इति क्यप्प्रत्ययेन निपातितः ।) पुथनक्षत्रम् । इत्यमरः । १ । ३ । २२ ॥

सिध्र:, पुं, साधुः । वृक्षः । इत्युणादिकोषः ॥

सिध्रका, स्त्री, (सिध्र + स्वार्थे कन् । अभिधानात् स्त्रीत्वम् ।) वृक्षविशेषः । इत्यमरः ।३।५।८॥

सेधति रोगहन्तृत्वमिति सिध्रमा । सीध इति ख्यातो वृक्षः । षिधु गत्यां नाम्नीति रक् ततः स्वार्थे कः संज्ञाविधेरनित्यत्वात् न इत् । इति भरतः ॥

सिध्रकावणं, क्ली,(सिध्रकाणां वनमिति । णत्वम्।) देवोद्यानम् । इति त्रिकाण्डशेषः ॥

सिनं, क्ली,(सिनोति बध्नाति आत्मानमिति। षिञ् बन्धने + "इण्सिञ्जीति।" उणा० ३ । २ । इति नक् ।) शरीरम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (अन्नम् । इति निघण्टुः ।२।७॥

सिनः, पुं, (सिनोतीति । षिञ् बन्धने + "इण्सिञ्जीति।" उणा० ३ । २ । इति नक् ।) ग्रासः । इति मुग्धबोधव्याकरणम् ॥ काणः । इति केचित् ॥ शुक्लगुणविशिष्टे, त्रि ॥

सिनी, स्त्री, शुक्लगुणविशिष्टा । यथा । श्वेता सिता सिनी श्येनी । इति व्याडिः । इति सिनीवाली-शब्दटीकायां भरतः ॥

सिनी(वा)वाली, स्त्री, (सिनी शुक्ला बाला चन्द्रकला अस्यामिति। यद्वा, सिन्या शुक्लया चन्द्रकलया वक्ष्यते मिश्र्यते या । वल मिश्रणे + घञ् । ततो ङीष् ।) दृष्टेन्दुकलामावास्या । इत्यमरः । १ । ४ । ८ ॥ सा चतुर्दशीयुक्तामावस्या । सिनी श्वेता वाला चन्द्रकलास्यां सिनीवाली नदादित्वादीप् । इति तट्टीकायां भरतः ॥ (यथा, भागवते । ४ । १२ । ४८ ।

"पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथवा ॥".)

दुर्गा । इति मेदिनी ॥

सिन्दुकः, पुं, सिन्दुवारवृक्षः । इत्यमरः ।२।४।६८॥ (तस्य पर्य्यायगुणाश्च ।

"सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारकः॥
नीलपुष्पो तु निर्गुण्डो शेफालो सुवहा च सा ।
सिन्दुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः॥
केश्यो नेत्रहितो हन्ति शूलशोथाममारुतान् ।
कृमिकुष्ठारुचिश्लेष्मज्वरान्नोलापि तद्विधा ।
सिन्दुवारदलं जन्तु-वातश्लेष्महरं लघु ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सिन्दु(न्धु)वारः, पुं, सिन्धुं गजमदं वारयति तिरस्त्वात् । इ + अण् । पाक्षिको धस्य दः ।) वृक्षविशेषः । निसिन्दा इति भाषा। इनकुर इति च क्वचित् । तत्पर्य्यायः । सिन्दुकः २ इन्द्रसुरिसः३ निर्गुण्डी४ इन्द्राणिका५ । इत्यमरः। २।४।६८॥ सिन्धुकः ६ सिन्धुवारकः७ इन्द्राणी ८ पौलोमी९ शक्राणी १० कासनाशिनी११। इति रत्नकोषः ॥ श्वेतपुष्पः १२ सिन्दुवारकः १३ स्थिरसाधनकः १४ अनन्तः १५ सिद्धकः १६ अर्थसिद्धकः १७ । अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कफवातक्षयकुष्ठकण्डूतिशूलनाशित्वम्। कायसिद्धिदत्वञ्च । इति राजनिर्घण्टः॥

अपि च ।
"सिन्धुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः ।
कैश्यो नेत्रहितो हन्ति शूलशोथाममारुतान् ॥
कृमिकुष्ठारुचिश्लेष्मव्रणान् नीलापि तद्विधा ।
सिन्धुवारदलं तत्तु वातश्लेष्महरं लघु ॥"
इति भावप्रकाशः ॥*॥
"स्यन्दं वारयति सिन्दुवारः षण् निपातनात् जिः अत उच्च । सिन्दुकसिन्दुवारौ दन्त्यसादौ तवर्गद्वतीयवन्ताविति भरतः । केचित्तु सिन्धुं समुद्रमपि वारयति शोषयति तीक्ष्णरसत्वेन कफघ्नत्वात् सिन्धुवारः सिन्धुकसिन्धुवारौ तवर्गचतुर्थवन्तावित्याहुः ।" इति भरतः ॥
सिन्दूरं, क्ली, (स्यन्दते इति स्यन्दू ङ चरणे + "स्यन्देः सम्प्रसारणञ्च ।" उणा० १ । ६८ । इति ऊरन् । सम्प्रसारणञ्च ।) रक्तवर्णचूर्णविशेषः । सिंदूर इति भाषा । तत्पर्य्यायः । नागसम्भवम् २ । इत्यमरः । २ । ९ । १०५ ॥ नागरेणुः ३ रक्तम् ४ सौमन्तकम् ५ नागजम् ६ नागगर्भम् ७ शोणम् ८ वीररजः ९ गणेशभूषणम् १० सन्ध्यारागम् ११ शृङ्गारकम् १२ सौगाग्यम् १३ अरुणम् १४ मङ्गल्यम् १५ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । व्रणविरोपणत्वम् । कुष्ठाश्वभ्रमकण्डूतिविसर्पशमनत्वञ्च । इति राजनिर्घण्टः ॥*॥ अपि च ।
"सिन्दूरं रक्तरेणुश्च नागगर्भश्च सीसजम् ।
सीसोपधातुः सिन्दूरं गुणैस्तत् सीसवन्मतम् ॥
संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः ।
सिन्दूरमुष्णं वीसर्पकुष्ठकण्डूविषापहम् ।
भग्नसन्धानजननं व्रणशोधनरोहणम् ॥"*॥
सिन्दूरस्य शोधनमाह ।
"दुग्धाम्लयोगतस्तस्य विशुद्धिर्गदिता बुधैः ।"
इति भावप्रकाशः ॥*॥
सिन्दूरदानमन्त्रो यथा,—
"सिन्दूरञ्च वरं रम्यं भाले शोभाविवर्द्धनम् ।
पूरणं भूषणानाञ्च सिन्दूरं प्रतिगृह्यताम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः ॥*॥
तस्य धारणात् पत्युरायुर्व्वृद्धिर्भवति । यथा,—
"हरिद्रां कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा ।
कार्पासकञ्च ताम्बूलं माङ्गल्याभरणं शुभम् ॥
केशसंस्कारकवरीकरकर्णविभूषणम् ।
भर्त्तुरायुष्यमिच्छन्ती दूरयेन्न पतिव्रता ॥"
इति काशीखण्डे ४ अध्यायः ॥
सिन्दूरः, पुं, (स्यन्दते इति । ऊरन् ।) वृक्षविशेषः । इति मेदिनी ॥
सिन्दूरकारणं, क्ली, (सिन्दूरस्य कारणमिति ।) सीसकम् । इति हेमचन्द्रः ॥
सिन्दूरतिलकः, पुं, (सिन्दूरस्येव तिलको यस्य ।) हस्ती । इति मेदिनी ॥
सिन्दूरतिलका, स्त्री, (सिन्दूरस्य तिलको यस्याः ।) साधवा नारी । इति मेदिनी ॥
सिन्दूरपुष्पी, स्त्री, (सिन्दूरवत् रक्तवर्णं पुष्पं यस्याः । पाककर्मेति ङीप् ।) पुष्पवृक्षविशेषः ।
तत्पर्य्यायः । सिन्दूरी २ वीरपुष्पी ३ व्रणपुष्पी ४ करञ्जदा ५ शोणपुष्पी ६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । श्लेष्मवातशिरोऽर्त्तिभूतनाशित्वम् । चण्डीप्रियत्वञ्च । इति राजनिर्घण्टः ॥
सिन्दूरी, स्त्री, (सिन्दूरं तद्वर्णोऽस्या अस्तीति । अच् । गौरादित्वात् ङीष् ।) रोचनी । रक्तचेलिका । धातकी । इति मेदिनी ॥
सिन्धुः, पुं, (स्यन्दते इति । स्यन्दू प्रस्रवणे + "स्यन्देः सम्प्रसारणं धश्च ।" उणा० १ । १२ । इति उः । धकारादेशः सम्प्रसारणञ्च ।) समुद्रः । इत्यमरः । १ । १० । १ ॥ यथा, भागवते । ३ । ११ । ३१ ।
"तावच्त्रिभुवनं सद्यः कल्पान्तेधितसिन्धवः ।
प्लावयन्त्युत्कटाटोपचण्डवातेरितोर्म्मयः ॥")
वसुधुः । देशविशेषः । (यथा, रघुः । १५ । ८७ ।
"युधाजितस्य सन्देशात् स देशं सिन्धुनामकम् ।
ददौ दत्तप्रभावाय भरताय शतघ्नजः ॥")
नदविशेषः । इति मेदिनी ॥ इन्दस् इति ख्यातः । (यथा, रघुः । ४ । ६७ ।
"विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः ।
दुधुवुर्वाजिनः स्कन्धान् लग्नकुङ्कुमकेसरान् ॥")
गजमदः । इति हेमचन्द्रः ॥ सिन्धुवारवृक्षः । इति शब्दचन्द्रिका ॥ श्वेतदूर्व्वम् । इति राजनिर्घण्टः ॥ रागविशेषः । स च मालकौशरागपुत्रः । यथा,—
"माधवः शोभनः सिन्धुर्म्मारुसेवाडुकुन्तलाः ।
कलिङ्गः सोमसंयुक्तः कौशिकस्य सुता इमे ॥"
इति सङ्गीतदामोदरः ॥
सिन्धुः, स्त्री, (स्यन्दते इति । स्यन्द + डः । सम्प्रसारणम् । दस्य धश्च ।) नदी । इति मेदिनी ॥ (यथा, मुग्धबोधनिघण्टौ । २ । १ । ९ ।
"अतः समुद्रा गिरयश्च सर्व्वे-
ऽस्मात् स्यन्दन्ते सिन्धवः सर्व्वरूपाः ।
अतश्च सर्व्वा ओषधयो रसश्च
येनैष भूतैस्तिष्ठते ह्यन्तरात्मा ॥")
नदीविशेषः । तज्जलगुणाः । यथा,—
"शतद्रोर्विपाशायुजः सिन्धुनद्याः
सुशीतं लघु स्वादु सर्व्वामयघ्नम् ।
जलं निर्म्मलं दीपनं पाचनञ्च
प्रदत्ते बलं बुद्धिमेधायुषञ्च ॥"
इति राजनिर्घण्टः ॥
सिन्धुकः, पुं, (सिन्धुरेव । स्वार्थे कन् ।) सिन्धुवारवृक्षः । इति शब्दचन्द्रिका ॥ (यथा, बृहत्संहितायाम् । ५८ । ६ ।
"वैश्यानां जीवकखदिर-
सिन्धुकभद्रनाय ग्रभफलदाः ॥")
सिन्धुकफः, पुं, (सिन्धोः कफ इव ।) समुद्रफेनः । इति शब्दरत्नावली ॥
सिन्धुकरं, क्ली, (सिन्धौ सिन्धुदेशे कीर्य्यते इति कृ + अप् ।) श्वेतदूर्व्वम् । इति राजनिर्घण्टः ॥
सिन्धुखेलः, पुं, (सिन्धौ तत्समीपे खेलतीति । खेल + कः ।) सिन्धुदेशः । इति शब्दरत्नावली ॥
सिन्धुजं, क्ली, (सिन्धोर्जायते इति । जन + डः ।) सैन्धवलवणम् । इत्यमरः । २ । ९ । ४२ ॥ (यथा, सुश्रुते । ४ । ३७ ।
"वचापुष्करकुष्ठेलामदनामरसिन्धुजैः ॥")
समुद्रजाते, त्रि ॥ (यथा, महाभारते । ३ । ७१ । १४ ।
"शुद्धान् दशभिरावर्त्तैः सिन्धुजान् वातरंहसः ॥")
सिन्धुजन्मन्, [न्]क्ली, (सिन्धोर्जन्म उत्पत्तिर्यस्य ।) सैन्धवलवणम् । इति रत्नमाला ॥
सिन्धुजन्मा, [न्] पुं, (सिन्धोः क्षीरसमुद्रात् जन्म यस्य ।) चन्द्रः । इति जटाधरः ॥
सिन्धुजा, स्त्री, (सिन्धोर्जायते इति । जन + डः ।) लक्ष्मीः । इति जटाधरः ॥
सिन्धुड़ा, स्त्री, मालवरागभार्य्या । यथा,—
"धानुषी मालसी रामकिरी च सिन्धुड़ा तथा ।
अम्बुवारी सैरवी च मालवस्य प्रिया इमाः ॥
इति सङ्गीतदामोदरः ॥
सिन्धुनन्दनः, पुं, (सिन्धोः क्षीरोदस्य नन्दनः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥
सिन्धुनाथः, पुं, (सिन्धुनां नदीनां नाथः ।) समुद्रः । इति केचित् ॥ (यथा, माघे । १४ । ६८ ।
"मत्कुलाविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुषः ।
गच्छतः स्म मधुकैटभौ विभोः
यस्य नैद्रसुखविघ्नतां क्षणम् ॥")
सिन्धुपुत्रः, पुं, (सिन्धोः पुत्रः ।) मर्कटेन्दुः । इति शब्दचन्द्रिका ॥ चन्द्रश्च ॥
सिन्धुपुष्पः, पुं, (सिन्धौ पुष्पाति प्रकाशते इति । पुष्प पुष्पने + अच् ।) शङ्खः । इति शब्दचन्द्रिका ॥
सिन्धुसम्भवं, क्ली, (सिन्धौ सम्भवात् जायते इति । जन + डः ।) सैन्धवलवणम् । इति रत्नमाला ॥
सिन्धुरः, पुं, (सिन्धुं मदं राति ददातीति । रा + कः ।) हस्ती । इति हेमचन्द्रः ॥ (यथा, आर्य्यासप्तशत्याम् । १९८ ।
"गतिमन्थरितवरयुवतिः करी कपोलौ करोतु मदमलिनौ ।
सुखबन्धमात्रसिन्धुर लम्बोदर किं मदं वहसि ॥")
सिन्धुरङ्गेषौ, [न्] पुं, (सिन्धुरं हस्तिनं हन्तीति । हिंस + णिनिः ।) सिंहः ॥
सिन्धुलवणं, क्ली, (सिन्धुजातं लवणम् ।) सैन्धवम् । इति रत्नमाला ॥
सिन्धुवारः, पुं, (सिन्धुमपि वृणोति गच्छेति ॥ वृ + अण् ।) वृक्षोत्तमः । इति त्रिकाण्डशेषः । (सिन्धुं मदजलमपि वारयति तिरस्करोति तिक्तरसेन । वृ + णिच् + अण् ।) सिन्धुवारवृक्षः । इत्यमरः । २ । ४ । ६८ ॥ यथा,—
"विसुन्धकः सिन्धुवारः सिन्धुकं सुरसोऽपि च ।
तयेन्द्रसुरसस्त्विन्द्रसुरिसः सिन्धुवारितः ।

निर्गुण्डीन्द्राणिकेन्द्राणी सुरसा सिन्धुवारकः॥"
इति शब्दरत्नावली ॥
अस्य गुणाः।
"सिन्धुवारो विषश्लेष्मव्रणकुष्ठक्षयापहः।"
इति राजवल्लभः॥
सिन्धुवारकः, पुं, (सिन्धुवार एव। स्वार्थे कन्।) सिन्धुवारवृक्षः। इति शब्दरत्नावली ॥
सिन्धुवारितः, पुं, (सिन्धुर्मदजलं वारितो येन।) सिन्धुवारवृक्षः। इति शब्दरत्नावली ॥
सिन्धुवेषणः, पुं, गन्धारीवृक्षः। इति शब्दचन्द्रिका ॥
सिन्धुशयनः, पुं, (सिन्धुः क्षीरोदः शयनं यस्य।) विष्णुः। क्षीरोदशायित्वात् ॥
सिन्धुसङ्गमः, पुं, (सिन्धूनां सङ्गमो यत्र।) नदीनदसमुद्राणां परस्परमेलकः। तत्पर्य्यायः। सम्भेदः २। इत्यमरः। १। १०।३५॥ सिन्धोर्नद्योः सङ्गमो मेलकः सम्भेदः। सन्धिदन्ति मिलन्ति अस्मिन्निति सम्भेदः घञ्। सिन्धुशब्देन नदी नदः समुद्रश्चोच्यते तेन नद्योर्नदयोर्नदीसमुद्रयोश्च मेलकः सम्भेदः। इति वेङ्कटाद्रयः। इति भरतः॥
सिन्धूद्भवं, क्ली, (सिन्धोरुद्भवो यस्य।) सैन्धवलवणम्। इति रत्नमाला ॥ (यथा, सुश्रुते। १। ४४।
"विड्ङ्गसारो मरिचं सदारु-
योगः स सिन्धूद्भवमूत्रयुक्तः॥")
सिन्धूपलं, क्ली, (सिन्धोः समुद्रस्य उपलमिव।) सैन्धवलवणम्। इति हारावली। ५५ ॥
सिप्रं, क्ली, (सिच् + क्विप्। सिचं चरणं रातीति। रा + कः। पृषोदरादित्वात् चस्य पः।) सरोवरविशेषः। यथा, कालिकापुराणे ४१ अध्याये।
"एतस्मिन्नन्तरे शम्भुः सिप्रं त्यक्त्वा तदा सरः।
गङ्गावतारमगमत् हिमवत्प्रस्थमुत्तमम्॥"
सिप्रः, पुं, (सिच् चरणे + क्विप्। तं रातीति। रा + कः। पृषोदरादित्वात् साधुः।) चन्द्रः। इति त्रिकाण्डशेषः॥ निदाघसलिलम्। घर्म्मः। इति मेदिनी ॥
सिप्रा, स्त्री, (सिप्र + स्त्रियां टाप्।) नदीभेदः। इति मेदिनी ॥ सा तु उज्जयनीदेशसमीपे वर्त्तते। (यथा, रघुः। ६। ३५।
"अनेन यूना सह पार्थिवेन
रम्भोरु! कच्चित् मनसो रुचिस्ते।
सिप्रातरङ्गानिलकम्पिताषु
विहर्त्तुमुद्यानपरम्परासु॥")
तस्या उत्पत्तिर्यथा कालिकापुराणे २३ अध्याये।
"एवं विवाह्य विधिवत् सौवर्णे मानसाचले।
अरुन्धतीं वशिष्ठस्तु मोदमाप तया सह॥
तत्र यत् पतितं तोयं मानसाचलकन्दरे।
विवाहावभृतार्थाय शान्त्यर्थं च पुरा कृतम्॥
ब्रह्मविष्णुमहादेवपाणिभिः समुदीरितम्।
तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात्॥
हेमाद्रेः कन्दरे मानौ सरस्याश्च पृथक् पृथक्।
तत्तोयं पतितं सिप्रे देवभोग्ये सरोवरे।
तेन सिप्रा नदी जाता विष्णुना प्रेरिता
स्वितम्॥"
सिमः, पुं, (षि ञ् बन्धने + "अविसिविसिशुभिभ्यः कित्।" उणा० १। १४३। इति मन्। सच कित्।) समुदायः। सिमः सर्व्वः। इति सिद्धान्तकौमुदी॥ (यथा, ऋग्वेदे। १। ११५। ४।
रात्री व्यख्यदायती सिमस्मै॥")
सिम्बा, स्त्री, (षम वैक्लव्ये + उल्वादयश्चेति साधुः।) शमी। यथा,—
"शमी समी शिम्बिशिम्बसिम्बासिम्बिरपीष्यते
इति हिरूपकोषः॥
इह छिमिड़ा इति ख्याते शुँठी इति ख्याते। शाम्यति हविरनया शमी शमयिर्य शमे नान्त्रीति इः पाच्छोणादीति ईपि शमी तालव्यादिः शमेः पूर्व्वेषु वे निपातनादकारस्य इत्वे शिम्बापि तालव्यादिः। सिम्बा दन्त्यादिरिति पुरुषोत्तमादयः। सिम्बिशब्दोऽप्यत्र शिम्बिरपि तालव्यादिर्दन्त्यादिश्च। इति भरतः॥
सिम्बिः, स्त्री, शिम्बा। इति हिरूपकोषः॥ नखीनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥
सिम्बिजा, स्त्री, शमीधान्यम्। इति भावप्रकाशः॥ तालव्यशकारादिरपि॥
सिम्बी, स्त्री, (सिम्बि + पचे ङीष्।) निष्पावी। इति राजनिर्घण्टः॥ अपि च।
"सिम्बा सिम्बी पुस्तसिम्बिस्तथा पुस्तकसिम्बिका
शिम्बिद्वयञ्च मधुरं रसे पाके हिमं गुरु।
वल्यं दाहकरं प्रोक्तं श्लेष्मलं वातपित्तजित्॥"
इति भावप्रकाशः॥
सिरः, पुं, क्लीबे, (सिनोतीति। षिञ् बन्धने + रक्। इत्युणादौ उज्ज्वलः। २। १३१।) नाड़ी। (यथा, सुश्रुते। ३। ७।
"व्याप्नुवन्त्यभितो देहं नाभितः प्रसृताः सिराः।
प्रतानाः पद्मिनीकन्दादिसादीनां यथा जलम्॥"
यथा च।
"धानाद्धमन्यः स्रवणात् स्रोतांसि सरणात् सिराः॥"
इति चरके सूत्रस्थाने त्रिंशेऽध्याये॥
तथा च।
"सप्त सिराशतानि भवन्ति। याभिरिदं शरीरमारामं इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यतेऽनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः। द्रुमपत्रसेवनीनामिव च तासां प्रतानास्तासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्द्धमधस्तिर्य्यक् च॥ भवतश्चात्र॥
यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम्।
नाभ्यां सर्व्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः॥
नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्यपाश्रिता।
सिराभिराहृता नाभिश्चक्रनाभिरिवारकैः॥
तासां मूलसिरायत्वारिंशत्तासां वातवाहिन्यो दश पित्तवाहिन्यो दश कफवाहिन्यो दश दश रक्तवाहिन्यः। तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चसप्ततिशतं भवति तावत्य एव पित्तवाहिन्यः पित्तस्थाने कफवाहिन्यश्च कफस्थाने रक्तवाहिन्यश्च यकृत्प्लीह्नोरेवमेतानि सप्त सिराशतानि।
तत्र वातवाहिन्यः सिरा एकस्मिन् सक्थिपञ्चविंशतिः एतेनेतरसक्थिबाहू च व्याख्यातौ। विशेषतस्तु कोष्ठे चतुस्त्रिंशत्तासां गुदमेढ्राश्रिताः स्रोतसष्टौ द्वे द्वे पार्श्वयोः षट् पृष्ठे तावत्य उदरे दश वक्षसि। एकचत्वारिंशज्जत्रुण उ तासां चतुर्दश ग्रीवायां कर्णयोश्चतस्रः। नव जिह्वायाम्। षट् नासिकायाम्। अष्टौ नेत्रयोः। एवमेतत् पञ्चसप्तत्यधिकशतं वातवहानां सिराणां व्याख्यातम्। एष एव विभागः ग्रीवाणामपि। विशेषतस्तु पित्तवाहिन्यो नेत्रयोर्द्वे शृङ्गकर्णयोर्द्वे। एवं रक्तवहाः कफवहाश्च। एवमेतानि सप्त सिराशतानि सविभागानि व्याख्यातानि। भवन्ति चात्र।
क्रियाणामप्रतीघातमोहं बुद्धिकर्म्मणाम्।
करोत्यन्यान् गुणांश्चापि खाः सिराः पवनश्चरन्॥
यदा तु कुपितो वायुः खाः सिराः प्रतिपद्यते।
तदास्य विविधा रोगा जायन्ते वातसम्भवाः॥
भ्रान्तिशूतामत्ररुचिमग्निदौर्बल्यमरोगताम्।
संसर्पत् खाः सिराः पित्तं कुर्य्याच्चान्यान्
गुणानपि॥
यदा प्रकुपितं पित्तं सेवते स्रवहाः सिराः।
तदास्य विविधा रोगा जायन्ते पित्तसम्भवाः॥
श्लेष्मश्लेषु सन्धीनां स्थैर्य्यं बलमुदीर्णताम्।
करोत्यन्यान् गुणांश्चापि बलासः खाः सिराश्चरन्॥
यदा तु कुपितः श्लेष्मा खाः सिराः प्रतिपद्यते
तदास्य विविधा रोगा जायन्ते श्लेष्मसम्भवाः॥
धातूनां पूरणं वर्णं स्वर्गज्ञानमसंशयम्।
खाः सिराः सञ्चरद्रक्तं कुर्य्याच्चान्यान् गुणानपि
यदा तु कुपितं रक्तं सेवते स्रवहाः सिराः।
तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः॥
नहि वातं सिराः काश्चित् पित्तं केवलमथा।
श्लेष्माणं वा वहन्त्येता यतः सर्व्ववहाः स्मृताः॥
प्रदुष्टानां हि दोषाणां सुच्छ्रितानां प्रधावताम्
ध्रुवमुन्मार्गगमनमतः सर्व्ववहाः स्मृताः॥
तत्रारुणा वातवहाः पूर्य्यन्ते वायुना सिराः।
पित्तादुष्णाश्च नीलाश्च शीता गौर्य्यः स्थिराः
कफात्॥
अस्रग्वहास्तु रोहिण्यः सिरा नातिसिताशीतलाः
अत ऊर्द्धं प्रवक्ष्यामि न विध्येद्दयाः सिरा
भिषक्॥
वैकल्यं मरणञ्चापि व्यधात्तासां ध्रुवं भवेत्।
सिराशतानि चत्वारि विद्याच्छाखासु बुद्धिमान्

षट्त्रिंशच्च शतं कोष्ठे चतुःषष्टिश्च मूर्द्धनि ।
शाखासु षोड़श शिराः कोष्ठे द्वात्रिंशदेव तु ॥
पञ्चाशल्लक्षणयोर्द्वमवेध्याः परिकीर्त्तिताः ॥"
इति सुश्रुते शारीरस्थाने सप्तमेऽध्याये ॥)
अम्बुवाहिनी । इति हेमन्द्रः ॥
सिक्थकी, स्त्री, शक्थकीवत्तः । इत्यमरटीकायां भरतः । २ । ४ । १२४ ॥
सिक्थरः, पु, हस्ती । इति जटाधरः ॥
सिषाधयिषा, स्त्री, (साधयितुमिच्छा । साध + सन् + अः । स्त्रियां टाप् ।) साधनेच्छा । यथा, भाषापरिच्छेदे । ७० ।
"सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तिस्तज्ज्ञानादनुमितिर्भवेत् ॥"
सिहुण्डः, पुं, स्नुहीवृक्षः । इति शब्दरत्नावली ॥ (स्नुहीशब्दस्य विवृतिर्विश्वेया ॥)
सिक्थः, पुं, (स्निह्यति मनो यत्र । स्निह + घञ् । पृषोदरादित्वात् साधुः ।) गन्धद्रव्यविशेषः । सिल्हा इति ख्यातः । तत्पर्य्यायः । तुरुष्कः २ पिण्डकः ३ यावनः ४ । इत्यमरः । २।४।१२८॥
सिक्थकः ५ पिण्याकः ६ कपिचक्षुलः७ तैलाख्यः ८ यावः ९ यावलः १० । इति शब्दरत्नावली ॥ सक्तकोद्रवः११ पिष्टकः१२ तैलपर्णी १३ हुक-धूपः १४ कल्कधूपः १५ । इति जटाधरः ॥
सिक्थकः, पुं, (सिक्थ एव । स्वार्थे कन् ।) सिक्थः । इति शब्दरत्नावली ॥ (शिलारसः । अस्य पर्य्यायो यथा,—
"कपिनामा कपितैलं कृत्रिमं कपिलश्वलः ।
तुरुस्को मुक्तिमुक्तश्च पिण्डातः सिक्थको रसः॥"
इति वैद्यकरत्नमालायाम् ॥
"सिक्थकस्तु तुरुष्कः स्यादृयतो यवनदेशजः ।
कपितैलश्च सङ्घातस्तथाच कपिनामकः ॥"
अस्य गुणा यथा,—
"सिक्थकः कटुकः स्वादुः स्निग्धोष्णः शुक्र-कान्तिकृत् ।
तृष्णः कण्ठाः स्वेदकुष्ठज्वरदाहग्रहापहः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सिक्थकी, स्त्री, सक्थकी । इति शब्दरत्नावली ॥
सिक्थभूमिका, स्त्री, सक्थकी । इति शब्दरत्नावली ॥
सीक, ऋ ङ सेके । इति कविकल्पद्रुमः ॥ (भ्वा॰-आत्म॰-सक॰-सेट् ।) ऋ, असिसीकत् । ङ, सेकते । इति दुर्गादासः ॥
सीक, कि आमृशि । इति कविकल्पद्रुमः॥ (चुरा॰-पक्षे भ्वा॰-पर॰-सक॰-सेट् ।) कि, सीकयति सीकति । आमृशि स्पर्शे । प्रमाणं तालव्यादौ दृश्यम् । इति दुर्गादासः ॥
सीकरः, पुं, शीकरः । इत्यमरटीकायां भरतः । १ । ३ । ११ ॥ (यथा, रघुः । ५ । ४२ ।
"स नर्म्मदा रोधसि सीकरार्द्रै-
र्मरुद्विरानर्त्तितनक्तमाले ।
निवेशयामास विलङ्घिताध्वा
क्लान्तं रजोधूसरकेतु सैन्यम् ॥")
सीता, स्त्री, (सिनोतीति । सिञ् बन्धे + बाहुलकात् क्तः । दीर्घश्च । इत्युणादौ उज्ज्वलः ।३। ९० ।) लाङ्गलपद्धतिः । इत्यमरः । २।८।१४॥
"ई लाङ्गलरेखायां सिनोति खनति भूमिं सीता पि न ग अ बन्धे नाक्नीति तः निपातनाद्दीर्घः । सीता दन्त्यसादिः । शेते भुवि इति शीता तालव्यादिश्च ।" इति भरतः ॥ (यथा, कुमारे । ५ । ६१ ।
"न वेद्मि स प्रार्थितदुर्लभः कदा
सखीभिरस्रोत्तरमौचितामिमाम् ।
तपःक्रमाभ्युपपत्स्यते सखीं
दृष्ट्वेव सीतां तदवग्रहक्षताम् ॥")
जनकराजनन्दिनी । सा तु श्रीरामपत्नी । तत्पर्य्यायः । वैदेही २ मैथिली ३ जानकी ४ धरणीसुता५ । इति हेमचन्द्रः ॥ भूमिसम्भवाद् इति जटाधरः ॥ अस्या उत्पत्तिर्यथा, वाल्मीकीये रामायणे । ६६ । १३–१४ ।
"अथ मे क्षयतः क्षेत्रं लाङ्गलादुत्थिता ततः । क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता॥
भूतलादुत्थिता सा तु व्यवर्द्धत ममात्मजा ।
वीर्य्यशुल्केति मे कन्या स्थापितेयमयोनिजा ॥"
अपि च तट्टीकायामुत्तरपद्मपुराणम् ।
"अथ लोकेश्वरो लक्ष्मीर्जनकस्य पुरे सुतः ।
शुभक्षेत्रे हलोत्खाते तारे चोत्तरफल्गुने ॥
अयोनिजा पद्मकरा बालार्कशतसन्निभा ।
सीतामुखे समुत्पन्ना बालभावेन सुन्दरी ॥
सीतानुखोद्भवात् सीता इत्यस्या नाम चाकरोत् ततोऽभूदौरसो तस्य उर्म्मिला नाम कन्यका॥"
तज्जन्मव्रतादि गौतमं प्रति शिवेनोक्तं यथा,—
"वैशाखशुक्लपक्षे त्वष्टम्यां संयमनं कुरु ।
परेद्युर्विकुरुष्वे तज्जानकीजन्मनो व्रतम् ॥
सन्तुष्टा जानकी तेन भविष्यति न संशयः ।
एतद् व्रतं ममाप्यस्ति कर्त्तव्यं खो द्विजोत्तमः॥
माहात्म्यं तस्य गदितुं नास्ति मे निश्चलं मनः।
अहं तद्रसलोलोऽस्मि शक्तस्तद्वदितुं न हि ॥
तस्मादेकं वदामि त्वां मार्कण्डेयाश्रमेऽधुना ।
गत्वा मुनीन्द्रः सकलं मार्कण्डेयोऽनुपृच्छ्यताम्
सर्व्वं निवेदितं तस्मै व्रतमाहात्म्यमुत्तमम् ।
विधानञ्च फलं तस्य स मुनिस्त्वां वदिष्यति ॥
मार्कण्डेयोपदिष्टेन विधिनाचर तद्व्रतम् ।
यथाशक्त्यपि कुर्व्वाणो व्रतस्योक्तमवाप्नुयात् ॥
लप्स्यसे सकलान् कामान्नात्र कार्य्या विचारणा ॥"
इत्यादि गौतमप्रश्नानन्तरं श्रीमार्कण्डेय उवाच
"त्रेतायुगे उत्तरायां गते कमलिनीपतौ ।
सर्व्वर्त्तुनिकरश्रेष्ठ ऋतौ तु कुसुमाकरे ॥
मासि पुण्यतमे विप्र माधवे माधवप्रिये ।
नवम्यां शुक्लपक्षे च वासरे मङ्गले शुभे ॥
सार्क्ष ऋक्षे च मध्याह्ने जानकी जनकालये ।
आविर्भूता स्वयं देवी योगीषु गतिरुत्तमा ॥
एतद्योगे कृतश्चैतद्व्रतं प्रोक्तमनन्तकम् ॥
अष्टम्यां यदि विद्धा स्यान्नवमी माधवे सिते ।
कुर्य्यान्नेदं व्रतं तस्यां कृतघ्नेनानता भवेत् ॥
मध्याह्नव्यापिनी ग्राह्या व्रतेऽस्मिन्नवमी तिथिः
दिनद्वयगतायान्तु तस्यां कार्य्या परा नरैः ॥
एतैर्योगैर्विनापि स्यात् तद्दिनं पापनाशनम् ।
व्रतानां नित्यमाख्यातं कर्त्तव्यं व्रतमुत्तमम् ॥*॥
यस्तु नो कुरुते मोहात् जानकीजन्मसम्भवम् ।
व्रतं स पच्यते घोरे नरके नात्र संशयः ॥
तस्मिन्नहनि मूढात्मा भुक्ताप्यन्नन्तु यो नरः ।
मुने स कृमिसङ्घातं सपूयं खादति स्फुटम् ॥
न करोति हि यः श्रुत्वा व्रतानामुत्तमं व्रतम् ।
स महापातकी ज्ञेयः सर्व्वधर्म्मबहिष्कृतः ॥*॥
कुरुते यो व्रतं सोऽपि पृथ्वीदानफलं लभेत् ।
महाषोड़शदानानां यज्ञानां सुनिपुङ्गव ! ॥
प्राप्नोति सर्व्वतीर्थानां प्राप्नुयात् सकलं फलम्
सर्व्वभूतदयां कृत्वा फलमाप्नोति यज्ञनः ।
तत्प्राप्नोति व्रतादस्मात् नात्र कार्य्या विचारणा
अष्टम्यां प्रातरुत्थाय कृत्वा शौचमतन्द्रितः ।
महानद्यां तड़ागे वा कूपे वाप्यन्तिकेऽपि वा॥
स्नात्वा कुर्य्यान्नित्यकर्म्म प्रातःसन्ध्यादिवन्दनम्
देवान् पितॄंश्च संतर्प्य हविष्याशी च संयतः ॥
एकभुक् ब्रह्मचारी स्याद्भूमिशायी च गौतम॥
नवम्यां प्रातरुत्थाय दान्तो भूत्वा समाहितः ॥
तीर्थादौ विधिवत् स्नात्वा कृतनित्यक्रियो नरः
कुर्व्वीत मण्डपं रम्यं षोड़शस्तम्भमण्डितम् ॥
अष्टस्तम्भयुतं वापि चतुःस्तम्भमथापि वा ।
तोरणैः सहितं कुर्य्यादितानवरशोभितम् ॥
द्वारेषु शङ्खचक्रादिपताकाभिर्ध्वजैस्तथा ।
अलङ्कुर्य्यात् प्रतिस्तम्भं स्थापयेत् कलसान् शुभान् ॥
शुद्धतण्डुलराशीषु पूर्णपात्रैरलङ्कृतान् ।
मध्ये तु चत्वरं कुर्य्यात् चतुर्हस्तप्रमाणतः ॥
हस्तमात्रोच्छ्रितं रम्यं चतुरस्रं मृदा मुने ।*।
पलद्वयमितां कुर्य्यात् जानकीप्रतिमां शुभाम्
काञ्चनीमथवा शक्त्या कुर्य्यादेकपलोन्मिताम्।
तदर्द्धेन तदर्द्धेन कुर्य्याच्छक्त्या चतुर्भुजाम् ॥
वित्तशाठ्यमशक्तत्वेवं राजतीमपि कारयेत् ।
मौड़म्बरीं पैत्तलीं वा मृण्मयीं वृत्तजामुत ॥
कुर्य्यं पटेऽथ वा लेख्या वर्णकैः प्रतिमां वराम् ।
लेख्यञ्च सूतिकागारं सर्व्वतश्च पटावृतम् ॥
पर्य्यङ्कशयने सुप्ता तत्र राज्ञी महामतिः ।
तस्याः समीपतः सुप्ता मैथिली स्तनपायिनी ॥
जातकर्म्मकरो लेख्यो जनकश्च महीपतिः ।
शतानन्दः पुरोधाश्च लेखनीयः प्रयत्नतः ॥
इत्यादि चरितं लेख्यं जानकीजन्मसम्भवम् ।
यथाशक्ति हलं कुर्य्यात् काञ्चनं किल गौतम॥
राजतं चेन्ममलं स्वर्णसिंहासनं तथा ।
कुर्य्यात्ताम्रमयं कुम्भं पूर्णपात्रावृतं सुखे ॥
तन्मध्ये पञ्चरत्नादि तीर्थाम्बु निक्षिपेन्मुने॥
आचार्य्यं शास्त्रकुशलं वेदाध्ययनकोविदम् ।
दृष्टयादिमलाचारमवतंसाङ्गदासनैः ॥
अन्तरीयोत्तरीयैश्च पद्मपात्रादिभिर्व्रती ।
श्रीफलादिभिरभ्यर्च्य गन्धमाल्यानुलेपनैः ॥

हणुयाद्दे विधानेन ततः षोड़श ऋत्विजः ॥
विद्यावतः सदाचारानष्टौ वा भक्तिसंयुतः ।
मध्ये वेदौ समालेख्या विचित्रैर्व्वर्णकैस्ततः ॥
पद्ममष्टदलं तत्र स्थापयेत् कलसं ततः ।
रत्नसिंहासनं रम्यं संस्थाप्य विजितेन्द्रियः ॥
तत्राधिवासनं कुर्य्यादग्न्युत्तारणपूर्व्वकम् ।
प्रतिमायां विधानेन देवीमावाहयेत्ततः ॥*॥
प्राचीनायम्य मूलेन त्रिरेकाग्रेण चेतसा ।
मूलमन्त्रस्य जनकं मुनिं विन्यस्य मूर्द्धनि ॥
मुखे छन्दश्च गायत्री सीतादेवीं हृदि न्यसेत् ।
नाभौ तु विन्यसेद्ब्रह्मन् लक्ष्मीबीजं सबिन्दुकम्
पादयोश्च नमः शक्त्यै ततो विन्यस्य मन्त्रवित् ।
श्रीं श्रीमित्यादिभिर्बीजैर्द्वादषट्स्वरसंयुतैः ।
कृत्वा करषड़ङ्गेषु न्यासं ध्यायेत्ततो व्रती ॥*॥
चतुर्भुजां सुवर्णाभां रामालोकनतत्पराम् ।
श्रीराघवान्वितां सीतां चिन्तयेद्धृदि सर्व्वदा ॥
इति ध्यात्वा समुच्चार्य्य मूलमन्त्रं कृताञ्जलिः ।
सविन्दुकमलाबीजं पूर्व्वमुच्चार्य्य गौतम ॥
सीतायै इति पश्चात्तु नमशब्दं वदेत् किल ।
संपूज्य प्रतिमां रात्रौ कृत्वैवमधिवासनम् ।
ब्रह्मचारी भूमिशायी तस्यां रात्रौ भवेद्व्रती ॥
तस्यां नवम्यां विधिवत् कृत्वा शौचमतन्द्रितः ।
नद्यादौ विमले स्नात्वा नित्यकर्म्म विधाय च ॥
ततस्तु प्रथमे यामे नित्यपूजाविधिं व्रती ।
कृत्वा द्वितीयप्रहरे गीतवाद्यपुरःसरम् ॥
मध्याह्नसमये भक्त्या कुर्य्यादेकाग्रचेतसा ।
आसने उपविश्यादौ मूलं विन्यस्य पूर्व्ववत् ॥
चतुरस्रञ्च षट्कोणं त्रिकोणञ्च पुरस्ततः ।
कृत्वा मण्डलमाधारं तत्र संपूज्य मन्त्रवित् ॥
मूलेन शङ्खं संस्थाप्य जलमासिच्य निर्म्मलम् ।
चिन्मयं तत्र संचिन्त्य तीर्थमङ्गुश्यमुद्रया ॥
आकृष्य मूलमन्त्रेण सप्तवाराभिमन्त्रितैः ।
जलैः संप्रोक्षयेद्द्रव्यान् सामग्रीं पूजनोचिताम् ॥
पात्राणि तास्त्रहैमादिनिर्म्मितानि ततो मुने ।
पाद्यार्घप्रदानार्थञ्च मधुपर्कार्थमेव च ॥
तथैवाचमनीयार्थमेवमासादयेत् क्रमात् ।
एकस्मिन्नथवा पात्रे पाद्यादीनि प्रकल्पयेत् ॥
पात्राणीत्थं समासाद्य ततोऽन्तर्यागमाचरेत् ।
पुष्पाञ्जलिं समादाय ध्यायेद्धृदि प्रतिमागताम् ॥
शङ्खचक्रगदापद्मान्याश्रयन्तीं चतुर्भुजैः ।
महामतेस्तथा प्राप्तां जनकस्य महात्मनः ॥
इन्दीवरालयनतः साक्षादाविर्भूतां स्वतः श्रियम् ।
सीतां देवीं हृदि ध्यात्वा मूलमन्त्रेण मन्त्रवित्
पुष्पाञ्जलित्रयं देव्यै प्रतिमामूर्द्धनि क्षिपेत् ।
हिरण्यवर्णां मन्त्रेण देवीमावाहयेत्ततः ॥
आवाहनादिमुद्राणामष्टकं संप्रदर्शयेत् ।
तामावाह्य इतुरतो मन्त्री दैव्यासने मुने ॥
अक्षपूर्णामर्घदानं पाद्यं कार्षोऽक्षिमन्त्रतः ।
चन्द्रप्रभेति मन्त्रेण दद्यादाचमनीयकम् ॥
आदित्यवर्ण इतुरतो मन्त्रः पञ्चामृते भवेत् ।
अप्यायस्वेति मन्त्रेण पयसा स्नापयेत्ततः ॥
दधिक्राव्णस्ततो दध्ना घृतेन घृतवतुरत ।
मधुना मधुवातेति वृचया सितया मुने ॥
स्वादुपवस्वमन्त्रेण ततस्तीर्थाम्बुभिः क्रमात् ।
उपैतु मामिति प्रोक्तः सीतायाः स्नपने मनुः ॥
सर्व्वसिंहासने रम्ये प्रतिमां स्थापयेद्व्रती ।
वासोभिः क्षुत्पिपासेति पूजयेद्विमलोत्तमैः ॥
गन्धद्वारामिति भवेद्दाने गन्धादिकस्य तु ।
मनसः काममित्याद्यैर्म्मन्त्रमाभरणादिके ॥
मधुपर्कं ततो दद्यात् सीतादेव्यै विधानतः ।
कस्तूरीकुसुमोपेतैः कर्पूरागुरुचन्दनैः ॥
प्रतिमां पूजयेद्भक्त्या यतः पुष्पैः स्वकालिकैः ।
सुगन्धैः कर्दमेनेति मन्त्रेण किल गौतम ॥
अर्चयेत्तुलसीपत्रैः कोमलैर्म्मञ्जरीयुतैः ।
प्रतिमां मूलमन्त्रेण शतमष्टोत्तरं जपेत् ।
ततः संपूजयेद्विद्वान् राजानं जनकं व्रती ॥"
जनकपूजामन्त्रः ।
"देवी पद्मालया साक्षादवतीर्णा यदालये ।
मिथिलापतये तस्मै जनकाय नमो नमः ॥"
महामतिपूजामन्त्रः ।
"श्रीसीताजननी मातर्म्महिषी जनकस्य च ।
पूजां गृहाण महतां महामति नमोऽस्तु ते ॥"
शतानन्दपूजनमन्त्रः ।
"निधानं सर्व्वविद्यानां विद्वत्कुलविभूषणः ।
जनकस्य पुरोधास्त्वं शतानन्दाय ते नमः ॥"
हलपूजनमन्त्रः ।
"जीवयस्यखिलं विश्वं चालयन् वसुधातलम् ।
प्रादुर्भावयसे सीतां सीर तुभ्यं नमोऽस्तु वै ॥"*
सुभगापूजनमन्त्रः ।
"त्वयैवोत्पादितं सर्व्वं जगदेतच्चराचरम् ।
त्वमेवासि महामाया मुनीनामपि मोहिनी ॥
त्वयायत्ता इमे लोकाः श्रीसीतावल्लभा वरा ।
वन्दनीयासि देवानां सुभगे त्वां नमाम्यहम्॥*॥
ततोऽष्टदलमध्यस्थजयाद्या भक्तितः क्रमात् ।
संपूजयेद्विशुद्धात्मा गन्धपुष्पाक्षतादिभिः ॥
बहिर्म्मण्डलवर्त्तिन्यः षोड़शाद्यास्तु देवताः ।
अणिमाद्यभिधाः पूज्या बहिः सर्व्वा ऋचस्ततः॥
संपूज्यावरणाग्रेवं मुख्यदेव्यास्ततो व्रती ।
दशाङ्गैर्गुग्गुलैर्द्याद्धूपमाप्तः सतंविभिः ॥
दीपन्तु साज्यवर्त्तीभिरार्द्रपुष्करिणामिति ।
नैवेद्यं घृतपक्वान्नैर्नानाव्यञ्जनसंयुतैः ॥
प्रदद्यात् पायसाद्यैरप्यार्द्रापःकरिणामिति ।
राज्ञे च गुड़लड्डूकान् महामत्यै निवेदयेत्॥
ताम्बूलञ्च ततो दद्यात् कर्पूरादैः सुसंयुतम् ।
साङ्गतासिद्धये देव्या यथाशक्ति च दक्षिणा ॥
नीराजयेत्ततो देवीं प्रणमेत्तदनन्तरम् ।
तामाङ्क्य च मन्त्रेण पुष्पाञ्जलिमथार्पयेत् ॥*॥
मूलेन द्वावयेत् विप्रैरष्टोत्तरसहस्रकम् ।
अष्टोत्तरशतं वापि पायसं शर्क्करायुतम् ॥
आहुतीनां ततः पश्चान्मुने कुर्य्यात् प्रदक्षिणाम्
पुनः पुष्पाञ्जलिं दद्यात् सीतामूर्द्धनि भक्तितः
आदाय तुलसीपत्रं पुष्पं यत्किञ्चिदेव वा ।
सीताङ्घ्रिपद्मजाक्षत्या तदाकारं विभावयन् ॥
इति नम्रशिरा भूत्वा रोपयेत्तत् स्वमूर्द्धनि ।
ततः सीतापदाम्भोजहृयं संस्पृश्य मङ्गलम् ॥
कराञ्जलिपुटं बद्ध्वा प्रार्थयेद्रामवल्लभाम् ।
भक्त्या परमया ब्रह्मन् साभिः कोमलयुक्तिभिः
दुरन्तसंसारसमुद्रमग्नं
सीते शरण्यां शरणागतं त्वाम् ।
उद्धारयस्वाशु कृतं मयैत-
द्धृतं ततो देवि मयि प्रसीद ॥
संप्रार्थ्य जानकीमेवं दण्डवत् प्रणमेत् पुनः ।
पुष्पाञ्जलिं पुनर्द्धृत्वा स्तुवीत परमेश्वरीम् ॥
नीलनीरजदलायतेक्षणां
कौशलेशभुजसावलम्बनाम् ।
सानुरागहरिमेधमीक्षतीं
भावये मनसि रामवल्लभाम् ॥
मन्दहंसगतिगाश्च कृशाङ्गीं
कामकान्तिपरिभूतचन्द्रिकाम् ।
ताड़कारिसहगे मविमग्नां
भावये मनसि रामवल्लभाम् ॥
कुन्तलालककपोलमाननां
राहुवक्त्रगसुधासमद्युतिम् ।
वाससा पिदधतीं हियाकुलां
भावये मनसि रामवल्लभाम् ॥
कायवाङ्मनसगोःपतिर्व्यधात्
स्वप्रजाग्रतिषु राघवेश्वरः ।
शिवविरिञ्चिभिरङ्घ्रिवन्दितां
भावये मनसि रामवल्लभाम् ॥
भक्तैकगम्यां प्रकृतेः पराञ्च
चित्ते भृशं लोकनमस्कृताञ्च ।
भूवायुवह्निवननाकसंस्थितां
विभावये चेतसि रामवल्लभाम् ॥
इन्द्ररुद्रधनदानुपालकैः
सहिमानगणमास्थितैर्दिवि ।
पुण्यवर्षमनुसंस्तुतशीलां
भावये मनसि रामवल्लभाम् ॥
ध्येयमानममरैश्च स्वरूपां
वामधामतनुनिर्ज्जितहैमाम् ।
फुल्लनीरजविभावराननां
भावये मनसि रामवल्लभाम् ॥
सङ्गयैर्हविसदां विमानगै-
र्व्विस्मयाकुलमनोभिरीक्षिताम् ।
तेजसापि दधतीं सदा दिशं
भावये मनसि रामवल्लभाम् ॥
एतदष्टकमनिष्टहानिकृद्
यः पठेदथ शृणोत्यहर्म्मुखे ।
अन्तरापरहिता तु मैथिली
तस्य भक्तिमतुलां प्रयच्छति ॥
स्तुत्वेत्थं जानकीदेवीं गीतवाद्यादिभिर्व्रती ।
रात्रौ जागरणैः सर्व्वां तां रात्रिमपवाहयेत् ॥
ततः प्रातर्द्द्विजाग्र्यांश्च पूर्व्वोक्तविधिना द्विज ।
प्रतिमां पूजयित्वादौ वा चार्य्यं पूजयेत्ततः ॥
तस्मै सोपस्करां दद्यात् सवस्त्रां गां पयस्विनीम्
दक्षिणाञ्च यथाशक्ति ततः पूर्णाहुतिं चरेत् ॥
पूर्णाहुतिविधानेन कृत्वा च प्रतिमादिकम् ।

सीतायाः प्रीतये दद्यात् मण्डपादि विसृज्य च ॥
सीतामीतिं वाचयीत ब्राह्मणाचार्य्यभाषितैः ।
अन्येभ्योऽपि यथाशक्त्या भूयसीं दक्षिणां ददेत् ॥
अतिथिभ्योऽन्नदानञ्च कर्त्तव्यं तद्दिने किल ।
सन्तोष्य सकलान् लोकान् कुटुम्बसहितो व्रती ॥
विधिना पारणं कुर्य्यात् भूमिशायी च मानवः ।
तस्योपरि सदा प्रीता सीता स्यान्नात्र संशयः ॥*
यदृष्टेर्हे नित्यपूज्या स्यात् प्रतिमा तत्र गौतम ।
तस्यामेवोत्सवं कुर्य्याज्ज्ञानक्त्या पूजनादिकम् ॥
नित्यपूज्या न यस्य स्यात् सीतायाः प्रतिमा यदा
शालग्रामशिलायां स कुर्य्यात् सीतोत्सवं बुधः ॥
लक्ष्मीनारायणौ यस्मात्तस्यां संवसतः सदा ।
पूर्व्वोक्तविधिना सीतानवम्या उत्सवं द्विज ॥
पूजां कुर्व्वीत वै तस्याः सर्व्वां पञ्चामृतादिभिः ।
तुष्येत तेन वै तस्मिन् जानकीरघुनन्दनौ ॥*॥
इत्थं निगदितं सर्व्वं जानकीजन्मनो व्रतम् ।
कुर्व्वन्तीन्द्राद्यः सर्व्वे व्रतमेतदनुत्तमम् ॥
गन्धर्व्वाः किन्नरा यक्षा गुह्यकाः सिद्धचारणाः ।
नामाथ सुनयथापि प्रकुर्व्वन्ति व्रतं द्विज ॥
यः कुर्य्याद्व तमेतर्हि जानकीजन्मसम्भवम् ।
स लभेत् सकलं ब्रह्मन् पृथ्वीयात्राफलं किल ॥
तथा षोड्शदानानां फलं प्राप्नोति मानवः ।
अश्वमेधादियज्ञानां तीर्थानामपि गौतम ॥
अत्युग्रतपसां वापि वेदोक्तायुश्च विन्दति ।
गौतमेदं व्रतं तस्मादवश्यं कुरु भक्तितः ॥
नैतं वक्तुं समर्थास्ते फणीन्द्रचतुराननाः ।
कृताद्वोत्तमादस्माद्दीर्घायुः प्राप्तवानहम् ।
व्रतानां नित्यमाम्नातं भक्तिदं कुर्व्वतां सताम् ॥

सूत उवाच ।

मुनये गौतमायैत्थं जानकीजन्मसम्भवम् ।
व्रतञ्च व्रतमाहात्म्यं विधानं श्रुतिचोदितम् ।
जगाद सकलं व्यक्तं मार्कण्डेयो मुनीश्वरः ॥"
इत्यादि श्रीभविष्यपुराणे श्रीसीतानवमीव्रत-
माहात्म्यं समाप्तम् ॥ * ॥ स्वर्गगङ्गा । इति
मेदिनी ॥ सा तु भद्राश्ववर्षगङ्गा । यथा, श्रीभाग-
वते ५ स्कन्धे । "सीता तु ब्रह्मसदनात् केशव-
चलादिगिरिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्ध-
मादनसूर्द्धसु पतित्वान्तरेण भद्राश्वं वर्षं प्राच्यां
दिशि चारसमुद्रमभिप्रविशति ॥" अपि च ।

मार्कण्डेय उवाच ।

"यत्र देवसभा भूता सानौ तस्य महागिरेः ।
तत्र जाता देवनदी सीताख्या वचनाद्विधेः ॥
स्नापयित्वा यथा चन्द्रं सीतातोयैर्मनोहरैः ।
चन्द्रं पपुर्व्रह्मवाक्यात् सर्व्वे ते त्रिदिवौकसः ॥
तदा सीताजलं चन्द्रस्नानयोगाच्च सामृतम् ।
भूत्वा निपतितं तस्मिन् हृद्वोहितसंज्ञके ॥
तद्विह्वलं तदा तोयं तस्मिन् सरसि निर्म्मलम् ।
तद्दृष्ट्वं स्वयं ब्रह्मा विह्वलं साधु तज्जलम् ॥
तद्दृष्ट्वेनाज्जलात्तस्मादुत्थिता कनकोत्तमा ।
चन्द्रभागेति तन्नाम विधिश्चक्रे स्वयं ततः ।
भार्य्यार्थे सागरस्तान्तु जग्राह ब्रह्मसम्मते ॥"

इति कालिकापुराणे २२ अध्यायः ॥

लक्ष्मीः । उमा । शस्याधिदेवता । इति नानार्थ-
ध्वनिमञ्जरी ॥ मदिरा । इति राजनिर्घण्टः ॥
गङ्गास्रोतः । यथा,—
"गङ्गायान्तु भद्रसोमा महाभद्राथ पाटला ।
तस्याः स्रोतसि सीता च वङ्क्षुर्भद्रा च कीर्त्तिता
तद्वै देऽलकनन्दापि शारिणी त्वल्पनिम्नगा ॥"
इति शब्दमाला ॥
(नदीविशेषः । इति केचित् ॥ यथा, महा-
भारते । ३ । १८८ । १०० ।
"गाङ्गं शतद्रुं सीताञ्च यमुनामथ कौशिकीम् ।
* * * *
एतास्वन्यास्च सरितः पृथिव्यां या नरोत्तम ।
परिक्रामन् प्रपश्यामि तस्य कुक्षौ महात्मनः ॥")
सीतापतिः, पुं, (सीतायाः पतिः ।) श्रीरामचन्द्रः ।
इति शब्दरत्नावली ॥
सीतायाःपतिः, पुं, (सीतायाः पतिः । अलुक्-
समासः ।) श्रीरामचन्द्रः । इति शब्दरत्ना-
वली ॥ (यथा, रामायणटीकाकृतो मङ्गला-
चरणे ।
"रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाःपतये नमः ॥")
सीतीलकः, पुं, सतीलकः । इत्यमरटीकायां
रायमुकुटः ॥
सीत्कारः, पुं, (सीत्+कृ+भावे घञ् ।) मनु-
ष्याणां गुणानुरागजशब्दः । (यथा, आर्य्या-
सप्तशत्याम् । २१६ ।
"गेहिण्या चिकुरग्रहसमयसीत्कारमीलित-
दृशापि ।
बाला कपोलपुलकं विलोक्य निहतोऽस्मि
शिरसि पदा ॥")
सीत्कृतं, क्ली,(सीत्+कृ+भावे क्तः ।) मनु-
ष्याणां गुणानुरागजशब्दः । यथा,—
"शब्दो गुणानुरागोत्थः प्रणादः सीत्कृतं
नृणाम् ॥"
इति हेमचन्द्रः ॥
सीत्यं, क्ली,(सीतया निर्वृत्तमिति । सीता+यत्)
धान्यम् । इति हेमचन्द्रः ॥
सीत्यं, त्रि, (सीतया सम्मितम् । सीता+"नी-
वयोधर्म्मेति ।" ४ । ४। ९१ । इति यत् ।)
कृष्टचलादि । इत्यमरः । २ । ९ । ८ ॥
सौत्यं, क्ली, आलस्यम् । इति भूरिप्रयोगः ॥
सौधुः, पुं, (शोधुः । पृषोदरादित्वात् शस्य सः ।)
मद्यम् । इति शब्दरत्नावली ॥ (यथा, देवी-
भागवते । ५ । २४ । ६० ।
"अशोकं कुरुराजानं पादघातविकाशितम् ।
वकुलं सौधुसेकेन तथा कुरुवकं कुरु ॥")
मद्यभेदः । इत्यमरः । २।१०।४२ ॥ यथा,—
"इक्षोः पक्वं रसं सिद्धः सौधुः पक्वरसञ्च सः ।
आमस्तेरेव यः सौधुः स च शीतरसः स्मृतः ॥
सौधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् ।
वातपित्तकरो हृद्यः स्नेहनो रोचनो हरेत् ॥
विबन्धभेदशोफार्शः शोफोदरकफामयान् ।
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ॥"
इति राजनिर्घण्टः ॥
(यथा च ।
"सौधुः कषायाम्लकमाधुरो वा
सन्दीपनो भेदमलापहश्च ।
आमातिसारानिलपित्तशूल-
श्लेष्मामयार्शोग्रहणीगदघ्नः ॥"
इति हारीते प्रथमे स्थाने ११ अध्यायः ॥)
सौधुगन्धः, पुं,(सौधोरिव गन्धो यस्य ।) वकुलः ।
इति शब्दरत्नावली ॥
सौधुपुष्पः, पुं,(सिधुवत् गन्धयुक्तं पुष्पं यस्य ।)
कदम्बः । वकुलः । इति राजनिर्घण्टः ॥
सौधुपुष्पी,स्त्री,(सौधुवत् गन्धयुक्तं पुष्पं यस्याः ।
ङीष् ।) धातकी । इति राजनिर्घण्टः ॥
(धातकीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)
सौधुरसः, पुं, (सौधोरिव रसो यस्य ।) आम्र-
वृक्षः । इति राजनिर्घण्टः ॥
सौधुसंज्ञः, पुं, (सौधोः संज्ञा संज्ञा यस्य ।)
वकुलवृक्षः । इति राजनिर्घण्टः ॥
सौध्रं, क्ली, अपामम् । इति केचित् ॥
सौपः, पुं, तर्पणाद्यर्थजलपात्रम् । कोषा इति
भाषा । यथा,—
"वस्तुतस्तु अत्रानुवृत्तस्य सोपासञ्चवात् उद्धृत-
पदं हस्तादन्येन सौपादिनोद्धृतपरम् । तेन
सौपादियुक्तकरतर्पणे तत्रैव जले तिलान्
मिश्रयेत् ।" इति गोपालन्यायपञ्चाननकृत-
विचारतिर्णयः ॥
सौमन्तः, पुं, (सीम्नोऽन्तः । अकञ्चादित्वात्
साधुः ।) केशेषु वर्त्म । इति हेमचन्द्रः ॥
सिंति इति भाषा ॥(यथा महाभारते ।१।४४।२
"अपश्यन्त तथा यान्तमाकाशे नागमुत्तमम् ।
सौमन्तमिव कुर्व्वाणं नभसः पञ्चवर्ण्णम् ॥")
सौमन्तोन्नयनसंस्कारः । यथा, याज्ञवल्क्यः ।
१ । ११ ।
"गर्भाधानसृतौ पुंसःसवनं स्पन्दनात् पुरा ।
षष्ठेऽष्टमे वा सौमन्तः प्रसवे जातकर्म्म च ॥"
(प्रत्यङ्गविशेषः । यथा, सुश्रुते । ३ । ५ ।
"चतुर्दशैव सौमन्ताः । ते चाक्षिसंघातवङ्क्ष-
नीया यतस्तैर्युक्ता अक्षिसंघाताः । ये शुक्लाः
संघातास्तु खल्वष्टादशैकेषाम् ॥")
सौमन्तकं, क्ली, (सौमन्ते कायति शोभते इति ।
कै+कः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥
सौमन्तकः, पुं, नरकावासः । यथा,—
"लक्ष पञ्चैव नरकावासा सौमन्तकादयः ॥"
इति हेमचन्द्रः ॥
सौमन्तिनी, स्त्री, (सौमन्तोऽस्या अस्तीति ।
इनिः । ङीप् ।) नारी । इत्यमरः । २।६।२ ॥
(यथा, रामायणे । २ । ३५ । २१ ।
"मास्म सौमन्तिनी काचित् जनयेत् पुत्रमी-
दृशम् ।
सौमित्रे ! योऽहमम्बाया दृष्ट्वा शोकमनन्त-
कम् ॥")

सीमन्तोन्नयनं, क्ली. (सीमन्तस्य उन्नयनं उत्तोलनं यत्र।) संस्कारविशेषः। इति जटाधरः॥ तद्विधानञ्च यथा,—

अथ सीमन्तोन्नयनम्।

"यदि पुंसवनं न कृतं तदा तस्मिन्नेव दिने प्रायश्चित्तात्मकमहाव्याहृतिहोमं कृत्वा पुंसवनञ्च कृत्वा सीमन्तोन्नयनं कार्य्यम्। तथा च नारदः।

'येषान्तु न कृताः पित्रा संस्कारविधयः क्रमात्। कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात्॥ अविद्यमाने पितर्यें स्वांशादुद्धृत्य वा पुनः। अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्वसंस्कृतैः॥ क्रमात् भ्रातॄणां संस्काराणाञ्च पौर्व्वापर्य्यक्रमात् भ्रातृक्रमस्तु मोदरविषय एव। विवाहे तथा दर्शनात्। छन्दोगपरिशिष्टम्।

देवतानां विपर्य्यासे जुहोतिषु कथं भवेत्। सर्व्वं प्रायश्चित्तं कृत्वा क्रमेण जुहुयात् पुनः॥ संस्कारा अतिपत्येरन् स्वकालाच्चेत् कथञ्चन। हुत्वैतदेव कुर्व्वीत ये तूपनयनादधः॥'

एतदित्यनेन सर्व्वं प्रायश्चित्तमनुकृष्टं तच्च प्रागेव विहृतम्। उभयकरणे तन्त्रेणैव मातृकापूजादि।

'गणशः क्रियमाणे तु मातृभ्यः पूजनं सकृत्। सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु॥'

इति छन्दोगपरिशिष्टात्॥ * ॥

गोभिलः। अथ सीमन्तोन्नयनं प्रथमे गर्भे चतुर्थे मासि षष्ठेऽष्टमे वा। अथ पुंसवनानन्तरम्। सीमन्तः केशरचनाविशेषः। वाशब्देक्वाऽत्र चतुर्थादिमासानां तुल्यवद्विकल्पः। किन्तु पूर्व्वपूर्व्वकालः प्रशस्तः। समर्थस्य लोपायोगात् इति न्यायात्। ततश्च नवममासादौ प्रायश्चित्तं कृत्वैव कर्त्तव्यम्। प्रथमगर्भ इत्युपादानात्। यदि कथञ्चिदकृतं तत्तस्मिन् संस्कारे गर्भनाशे पुनर्गर्भोत्पत्तौ अयं कालनियमो न किन्तु गर्भस्यन्दने सीमन्तोन्नयनं यावन्न बालप्रसवः। इति शङ्खलिखितोक्तकालो ग्राह्यः। बृहद्राजमार्त्तण्डे।

'या नार्य्यकृतसीमन्ता प्रसूते च कथञ्चन। अङ्गे विधाय तं बालं पुनः संस्कारमर्हति॥'

षष्ठे मासेऽष्टमेऽब्दे ज्यकुजदिनकृतां नन्दभद्रे तिथौ चे
मैत्रे मूले मृगाङ्के करपितृपवने पौष्णविष्णुत्रियुग्म
पुष्याश्वादित्यरौद्रे युवतिहरिभसे हर्यके वापि लग्ने।
चन्द्रे तारानुकूले शुभमपि नियतं स्याच्च
सीमन्तकर्म॥
मृगाजरहिते लग्ने नवांशे पुंग्रहस्य च।
केचिदिच्छन्ति सीमन्तं तथा रिक्ततरे तिथौ॥

गोभिलः। प्रातः सशिरस्काश्चतोदगग्रेषु दर्भेषु पश्चादग्नेः प्राङ्मुपविशति उक्तार्थमेतत्। पश्चात् पतिरवस्थाय युगमन्तमौडुम्बरं शलाटुग्रथ्नमावधाति अयमूर्ज्जावतो हृच्च इति। अग्नेः पश्चात् पतिः स्थित्वा। युगानि फलानि यस्मिन् शलाटुग्रथ्नौ नीलस्तवके स युगमान् तं मतुवन्तम्। तथा च भट्टनारायणधृतं छन्दोगपरिशिष्टम्। 'शलाटु नीलमित्युक्तं ग्रथ्नस्तवक उच्यते। कपुच्छिकाभितः केशा मूर्द्धि पश्चात् कपुच्छलः एतद्वचनं नारायणोपाध्यायेन धृतम्। उडुम्बरभवमौडुम्बरम्। अयमूर्ज्जावतो हृच्च इति मन्त्रेण भार्य्यायाः करण्ठे बध्नाति॥ * ॥ अथ सोमन्तमूर्द्धं नयति भूरिति दर्भपिञ्जलीभिरेव प्रथमं भुव इति द्वितीयं स्वरिति तृतीयम्। अथानन्तरं यत्र सिन्दूरं स्त्री ददाति तं सीमन्तं ललाटोर्द्धं नयति भूरिति मन्त्रेण दर्भपिञ्जलीभिस्तिसृभिः। एकवारकरणाद्यावन्त्युन्नयनानि तावतीभिरेव तिसृभिरित्यर्थः। प्रथमादिपदानि तु व्याहृतीनां पिञ्जलीनाञ्च पृथङ्नियोगार्थम् पिञ्जली पवित्रम्। तथा च छन्दोगपरिशिष्टम्

'अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्। एतदेव हि पिङ्गल्या लक्षणं समुदाहृतम्॥'

गोभिलः। अथ वीरतरेण येनादितेरित्येतयर्च्चा वीरास्तरन्त्यनेन युद्धमिति वीरतरः शरः॥ तथा च छन्दोगपरिशिष्टम्।

'श्वाविच्छलाका शलली तथा वीरतरः शरः। तिलतण्डुलसम्पाकः क्षपरः सोऽभिधीयते॥'

ततश्च शरेण येनादितेरिति मन्त्रेण सीमन्तमूर्द्धं नयति इति पूर्व्वसूत्रादनुवर्त्तते॥ * ॥ अथ पूर्णेन सूत्रचात्रेण वाकामहमित्येतयर्च्चा। चात्रं तर्कुः। तेन सूत्रपूर्णेन वाकामहमिति मन्त्रेण सीमन्तमूर्द्धं नयतीति शेषः। त्रिः श्वेतया शलल्या यास्ते वाके सुमतय इति स्थानत्रितये शुक्लेन शेजाजन्तुकरण्टकेन यास्ते इति मन्त्रेण सीमन्तमूर्द्धं नयतीति शेषः। क्षपरः स्थालीपाक उत्तरघृतस्रुमवेक्षेत्। क्षपर उक्तः। स्थालीपाकक्षपरः स उपरि दत्तघृतस्रुं वध्वाः प्रदर्शयेत्। स्थालीपाकपदं चरुस्थाल्यां क्षपरस्य अपवार्थम्। मनुष्यार्थत्वात् द्विःप्रक्षालनम् ततश्च यः कश्चिन्महानसे अपयित्वा स्थापयेत्। किम्पश्यसीत्युक्ता प्रजामिति वाचयेत् किं पश्यसीति पतिरुक्ता प्रजामित्यादि मन्त्रं गर्भिणीं वाचयेत्। तं सा स्वयं भुञ्जीत। तमेवेक्षितं क्षपरम्। वीरसूर्जीवसूर्ज्जीवपत्नीति ब्राह्मणो मङ्गल्यादिभिर्व्वाग्भिरुपासीरन्। वीरान् विक्रान्तान् पुत्रान् सूत इति वीरसूस्त्वं भवेति वाक्यशेषः प्रतिपदं स्यात्। जीवतो दीर्घायुषः पुत्रान् सूत इति जीवसूः जीवतः पत्नी जीवपत्नी अविधवेत्यर्थः। एवं प्रकाराभिर्व्वाग्भिरनुनयेयुः। क्रमश्च महाव्याहृतिभिर्हुत्वा श्रीडुम्बरफलस्तवकं करण्ठे बद्ध्वा प्रजामिति वाचयेदित्यन्तं तन्त्रं कृत्वा व्याहृतिभिर्होमादितन्त्रं समापयेत् ततो ब्राह्मण उपासीरन्।"

इति संस्कारतत्त्वम्॥

सोमा, [न्]) स्त्री, (सीयते इति। सि + "नामन्सोमा,) सीमन्व्योमन्निति।" उणा० ४। १५०। इति मनिन्प्रत्ययेन साधुः। "डावुभाभ्यामन्यतरस्याम्।" ४। १। १३। इति पाक्षिको ङाप्।) ग्रामादीनामवधारितान्तभागः। सीमाना इति भाषा। नत्पर्य्यायः। मर्य्यादा २ अवधिः ३ आघाटः ४। इति जटाधरः॥ (यथा, मनुः। ८। २५३—२५४।

"यदि संशय एव स्यात् लिङ्गानामपि दर्शने। साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णये॥ ग्रामीयककुलानाञ्च समक्षं सीम्नि साक्षिणः। प्रष्टव्याः सीमलिङ्गानि तयोर्यें व विवादिनोः॥")

स्थितिः। (यथा, माघे। ३। ५७।

"यस्यामजिह्मा महतीमयङ्गाः
सिमानमत्यायतयोऽत्यजन्तः।
जनेरजातस्खलनैर्ण जातु
हयेऽप्यमुच्यन्त विनीतमार्गाः॥")

क्षेत्रम्। मण्डकोषः। इति मेदिनी॥ (यथा,—

"केशेषु चमरी हन्ति सीम्नि पुष्कलको हतः॥"

इति सिद्धान्तकौमुदी। २। ३। ३६॥)

वेला। इति विश्वः॥

सीमाविवादः, पुं, (सीमायाः विवादः।) ग्रामादीनां सीमाविषयककलहः। यथा। अधुना सीमाविवादनिर्णय उच्यते।

"सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः गोपाः सीमाकृषाणा ये सर्व्वे च वनगोचराः॥ नयेयुरेते सीमानं स्थलाङ्गारतुषद्रुमैः। सेतुवल्मीकनिम्नास्थिक्षेत्राद्यैरुपलक्षितम्॥"

ग्रामद्वयसम्बन्धिनः क्षेत्रस्य सीम्नो विवादेतयैकग्रामान्तर्व्वर्त्तिक्षेत्रमर्य्यादाविवादे च सामन्तादयः स्थलाङ्गारादिभिः पूर्व्वकृतैः सीमालक्षणैरुपलक्षितां चिह्नितां सीमां नयेयुः निधिनियुः सीमा क्षेत्रादिमर्य्यादा सा चतुर्व्विधा। जनपदसीमा १ ग्रामसीमा २ क्षेत्रसीमा ३ गृहसीमा ४ चेति। सा च यथासम्भवं पञ्चलक्षणा तदुक्तं नारदेन।

"ध्वजिनी मस्मिनी चैव नैधानी भयवर्जिता। राजशासननीता च सीमा पञ्चविधा स्मृता॥"

ध्वजिनी वृक्षादिलक्षिता। वृक्षादीनां प्रकाशकत्वेन ध्वजतुल्यत्वात्। मस्मिनी सलिलवती मस्यशब्दस्य स्वधारजललक्षणत्वात्। नैधानी निखाततुषाङ्गारादिमती। तेषां निखातत्वेन निधानतुल्यत्वात्। भयवर्जिता अर्थिप्रत्यर्थिपरस्परसम्मतिपत्तिनिर्म्मिता। राजशासननीता। ज्ञातृचिह्नाभावे राजेच्छया निर्म्मिता एवम्भूतायां षोढ़ा विवादः संभवति। यथाह कात्यायनः।

"आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च। अभोगभुक्तिः सीमा च षड्भूवादस्य हेतवः॥"

इति। तथा हि। ममाच पञ्चनिवर्त्तनाया भूमेरधिका भूरस्तीति केनचिदुक्ते पञ्चनिवर्त्तनैव नाधिकेत्याधिक्ये विवादः। पञ्चनिवर्त्तना मदीया भूरित्युक्तेन ततो न्यूनैवेति न्यूनतायाम्। पञ्चनिवर्त्तनो ममांश इत्युक्तेऽंश एव नास्तीत्यस्ति-

नास्तित्वविवादः सम्भवति। मदीया भूः प्राग-विद्यमानभोगैव भुज्यत इत्युक्तेन सन्तता चिर-न्तन्येव मे भुक्तिरित्यभोगभुक्तौ विवादः। इयं मर्य्यादेयञ्चेति सीमाविवाद इति षट्प्रकार एव विवादः सम्भवति। षट्प्रकारेऽपि भूविवादे श्रुत्यर्थाभ्यां सीमाया अपि निर्णीयमानत्वात् सीमानिर्णयप्रकरणे तस्यान्तर्भावः। समन्ता-द्वाः सामन्ताः। चतसृषु दिक्षनन्तरा ग्रामा-दयस्ते च प्रतिसीमं व्यवस्थिताः।

"ग्रामो ग्रामेषु सामन्तः क्षेत्रं क्षेत्रस्य कीर्त्ति-तम्।
गृहं गृहस्य निर्दिष्टं समन्तात् परिरभ्य हि॥"

इति कात्यायनवचनात्। ग्रामादिशब्देन तत्-स्थाः पुरुषा लक्ष्यन्ते। ग्रामः पलायत इति यथा। सामन्तग्रहणञ्च तत्संसक्तादुपलक्षणार्थम्। उक्तञ्च कात्यायनेन।

"संसक्तकास्तु सामन्तास्तत्संसक्तास्तथोत्तराः।
संसक्तसक्तसंसक्ताः पञ्चाकाराः प्रकीर्त्तिताः॥"

इति। स्थविरा वृद्धाः। आदिग्रहणेन मौलोद्ध-तयोर्ग्रहणम्। वृद्धादिलक्षणञ्च तेनैवोक्तम्।

"निष्पाद्यमानं यद्दृष्टं तत् कार्य्यं तद्गुणा-न्विताः।
वृद्धा वा यदि वावृद्धास्ते च वृद्धाः प्रकीर्त्तिताः॥
ये तत्र पूर्व्वं सामन्ताः पश्चाद्ग्रान्तरं गताः।
तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्त्तिताः॥
उपश्रुतिसम्भोगकाय्यैराख्यानोपचिह्नकाः।
उद्धरन्ति पुनर्यस्मादुद्धतास्ते ततः स्मृताः॥"

गोपा गोचारकाः।

"सौमाक्षपाणाः सीमासंनिहितक्षेत्रकर्षकाः।"

सर्व्वे च वनगोचरा वनचारिणो व्याधादयस्ते च मनुनोक्ताः।

"व्याधान् शाकुनिकान् गोपान् कैवर्त्तान्
मूलखातकान्।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान्॥"

स्थलमुन्नतो भूप्रदेशः। अङ्गारोऽग्नेरुच्छिष्टम्। तुषा धान्यत्वचः। द्रुमा न्यग्रोधादयः। सेतु-र्जलप्रवाहबन्धः। चैत्यं पाषाणादिबन्धः। आद्यशब्देन वेणुवालुकादीनां ग्रहणम्। एतानि च प्रकाशाप्रकाशभेदेन द्विःप्रकाराणि। तथा च मनुः।

"सीमावृक्षांस्तु कुर्व्वीत न्यग्रोधाश्वत्थकिंशुकान्
शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पाद-पान्॥
गुल्मान् वेणूंश्च विविधान् शमी वल्ली स्थलानि च।
शरान् कुब्जकगुल्मांश्च तथा सीमा न नश्यति॥
तडागानुदपानानि वाप्यः प्रस्रवणानि च।
सीमासन्धिषु कार्य्याणि देवतायतनानि च॥"

इति प्रकाशरूपाणि॥

"उपच्छन्नानि चान्यानि सीमालिङ्गानि
कारयेत्।
सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्य्ययम्॥
भस्मनोऽस्थीनि गोबालांस्तुषान् भस्मकपा-लिकाः।
करीषमिष्टकाङ्गारशर्करावालुकास्तथा॥
यानि चैवं प्रकाराणि कालाभ्रूमिं भक्षयेत्।
तानि सन्धिषु सीमाया अप्रकाशानि कारयेत्॥
एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः॥"

प्रच्छन्नलिङ्गानि एतैः प्रकाशाप्रकाशरूपैर्लिङ्गैः सामन्तादिप्रदर्शितैः सीमां प्रति विवदमानयोः सीमानिर्णयं कुर्य्याद्राजा॥ * ॥ यदा पुनश्चि-ह्नानि न सन्ति विद्यमानानि वा लिङ्गालिङ्ग-तया सन्दिग्धानि तदा निर्णयोपायमाह।

"सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा
रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः॥"

सामन्ताः पूर्व्वोक्तलक्षणाः। समग्रामाश्चत्वा-रोऽष्टौ दशापि वा इत्येवं समसंख्याः प्रत्यासन्न-ग्रामीणाः। रक्तस्रग्विणो रक्ताम्बरधराः मूर्द्धा-रोपितक्षितिखण्डाः सीमानं नयेयुः प्रदर्शयेयुः सामन्ता वेति विकल्पाभिधानं स्मृत्युत्तरोक्त-साक्ष्यभिप्रायम्। यथाह मनुः।

"साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः।"

तत्र च साक्षिणां निर्णेतृत्वं मुख्यं तदभावे सामन्तानाम्। तदुक्तम्।

"साक्ष्यभावे तु चत्वारो ग्रामाः सीमन्तवासिनः
सीमाविनिर्णयं कुर्य्युः प्रयता राजसन्निधौ॥"

तदभावे तत्संसक्तादीनां निर्णेतृत्वम्। यथाह कात्यायनः।

"स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौरवात्।
तत्संसक्तैस्तु कर्त्तव्य उद्धारो नात्र संशयः॥
संसक्तसक्तदोषे तु तत्संसक्ताः प्रकीर्त्तिताः।
कर्त्तव्या न प्रदुष्टास्तु राज्ञा धर्म्मं विजानता॥"

सामन्ताद्यभावे मौलादयो ग्राह्याः। तेषाम-भावे सामन्ता मौलवृद्धोद्धृतादयः। स्थावरे षट्प्रकारेऽपि कार्य्या नात्र विचारणेति कात्या-यनेन क्रमविधानात्। एते च सामन्तादयः संख्यागुणातिरेकेण सम्भवन्ति।

"सामन्ताः साधनं पूर्व्वं निर्दोषाः स्युर्गुणा-न्विताः॥
द्विगुणास्तूत्तरा ज्ञेयास्ततोऽन्ये त्रिगुणा मताः।
इति स्मरणात्॥ * ॥

ते च साक्षिणः सामन्तादयश्च स्वैः स्वैः शपथैः शापिताः सन्तः सीमां नयेयुः।

"गिरीभिस्ते गृहीत्वोर्व्वीं स्रग्विणो रक्तवाससः
सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम्॥
इति स्मरणात्॥

नयेयुरिति बहुवचनं द्वयोर्निरासार्थं नैकस्य।

"एकश्चेदुन्नयेत् सीमां शेषवाक्यैः समुन्नयेत्।
रक्तमाल्याम्बरधरो भूमिमादाय मूर्द्धनि॥"

इति नारदेनैकस्याभ्यनुज्ञानात्। यत्तु।

"नैकः समुन्नयेत् सीमां नरः प्रत्ययवानपि।
गुरुत्वादस्य कार्य्यस्य त्रयेषा बहुषु स्थिता॥"

इत्येकस्य निषेधः। स उभयानुमतधर्म्मविहिति-रिक्तविषय इत्यविरोधः॥ * ॥

स्थलादिचिह्नाभावेऽपि साक्षिसामन्तादीनां सीमाज्ञान उपायविशेषो नारदेनोक्तः।

"निम्नगापङ्कतोत्कृष्टनष्टचिह्नासु भूमिषु।
तत्प्रदेशानुमानाच्च प्रमाणाद्योगदर्शनात्॥"

निम्नगाया नद्या अपकृतेनापहरणेनोत्सृ-ष्टानि स्वस्थानात् प्रच्युतानि नष्टानि वा लिङ्गानि यासु मर्य्यादाभूमिषु तत्र तत्प्रदेशा-नुमानात् उत्सृष्टनष्टचिह्नानां प्राचीनप्रदेशा-नुमानाद् ग्रामादारभ्य सहस्रदण्डपरिमितं क्षेत्रमस्य ग्रामस्य पश्चिमे भाग इत्येवं विधानात् प्रमाणाद्धा प्रत्यर्थिसमक्षमविप्रतिपन्नायाः स्मार्त्तकालोपलक्षितैर्भुक्तैर्वा निश्चिनुयुः। वृद्ध-स्मृतिना चात्र विशेषो दर्शितः।

"भागमश्च प्रमाणञ्च भोगं कालञ्च नाम च।
भूभागलक्षणञ्चैव ये विदुस्तत्र साक्षिणः॥"

एते च साक्षिसामन्तादयः शपथैः शापिताः सन्तः कुलादिसमक्षं राज्ञा प्रष्टव्याः। यथाह मनुः।

"ग्रामेयककुलानान्तु समक्षं सीम्नि साक्षिणः।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः॥
ते पृष्टाः साक्ष्यादयः समस्ता ऐकमत्येन सीम्नि
निणयं कुर्य्युः। तैर्निर्णीतां सीमां तत्प्रदर्शित-सकललिङ्गयुक्तां साक्ष्यादिनामान्वितां चावित्स्म-रणार्थं पत्रे समारोपयेत्। उक्तञ्च मनुना।

"ते पृष्टास्तु यथा ब्रूयुः सामन्ताः सीम्नि
निर्णयम्।
निबध्नीयात्तथा सीमां सर्व्वांस्तांश्चैव नामतः॥
एतेषां साक्षिसामन्तप्रभृतीनां सीमाचंक्रमण-दिनादारभ्य यावत् त्रिपक्षं राजदैविकं व्यसनं क्षेत्रोपपद्यते तदा तत्प्रदर्शनात् सीमानिर्णयः। अयञ्च राजदैविकव्यसनावधिः कात्यायनोक्तः।

"सीमाचंक्रमणे कोपे पादस्पर्शे तथैव च।
त्रिपक्षपक्षसप्ताहं दैवराजिकमिष्यते॥"इति॥

यदा त्वमीषां उक्तसाक्ष्यवचसां त्रिपक्षाभ्यन्तरे रोगादिर्दृश्यते। अथवा प्रतिवादिनिर्दिष्टाभ्य-धिकसंख्यागुण-साक्ष्यन्तरविरुद्धवचनता तदा ते मृषाभाषितया दण्डनीयाः। तदाह।

"अनृते तु पृथग्दण्ड्या राज्ञा मध्यमसाहसम्॥"

अनृते मिथ्यावदने निमित्तभूते सति सर्व्वेसा-मन्ताः प्रत्येकं मध्यमसाहसेन चत्वारिंशदधि-केन पणशतेन दण्डनीयाः। सामन्तविष-यता चास्य साक्ष्यमौलादीनां स्मृत्यन्तरे दण्डान्तरविधानादवगम्यते। तथा च मनुः।

"यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः।
विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम्॥"

नारदोऽपि।

"अथ चेदनृतं ब्रूयुः सामन्ताः सीम्नि निर्णये।
सर्व्वे पृथक् पृथक् दण्ड्या राज्ञा मध्यमसाह-सम्॥"

सामन्तानां मध्यमसाहसं दण्डमभिधाय।

"शेषाश्चेदनृतं ब्रूयुर्नियुक्ता भूमिकर्म्मणि।
प्रत्येकन्तु जघन्यास्ते विनयाः पूर्व्वसाहसम्॥"

तत्संयुक्तादिषु प्रथमं साहसमुत्तमवान्। मौलादीनामपि तमेव दण्डमाह।
"मौलहृदयस्वन्ये दण्डगत्या पृथक् पृथक्।
विनेयाः प्रथमेनैव साहसेनानृते स्थिताः॥"
इति।
आदिग्रहणेन गोपशाकुनिकव्याधवनगोचराणां ग्रहणम्॥ * ॥ यद्यपि शाकुनिकादीनां पापरतत्वाल्लिङ्गदर्शन एवोपयोगो न साक्षात्सीमानिर्णये तथापि लिङ्गदर्शन एव मृषाभाषित्वसम्भवात् दण्डविधानमुपपद्यत एव। अनृते तु पृथग्दण्डा इत्येतदण्डविधानमज्ञानविषयम्।
"बहूनान्तु गृहीतॄणां न सर्व्वे निर्णयं यदि।
कुर्य्युर्भयाद्वा लोभाद्वा दण्डास्तूत्तमसाहसम्॥"
इति ज्ञानविषये साक्ष्यादीनां कात्यायनेन दण्डान्तरविधानात्॥ * ॥ तथा साक्षिवचनभेदेऽप्ययमेव दण्डस्तेनैवोक्तः। कीर्त्तिते यदि भेदः स्याद्दण्डास्तूत्तम-साहसमिति। एवमज्ञानादिना अनृतवदने साक्ष्यादीन् दण्डयित्वा पुनः सीमाविचारः प्रवर्त्तयितव्यः। अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेदित्युक्तम्।
"त्यक्त्वा दुष्टांस्तु सामन्तानन्यान् मौलादिभिः सह।
संमिश्रैः कारयेत् सीमामेवं धर्म्मविदो विदुः॥"
इति निर्णयप्रकारस्तेनैवोक्तः॥ * ॥ यदा पुनः सामन्तप्रभृतयो ज्ञातारश्चिह्नानि च न सन्ति तदा कथं निर्णय इत्यत आह।
"अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्त्तिता॥
ज्ञातॄणां सामन्तादीनां लिङ्गादीनाञ्च। वृक्षादीनामभावे राजैव सीम्नः प्रवर्त्तिता प्रवर्त्तयिता। अन्तर्भावितोऽत्र स्वार्थः। ग्रामद्वयमध्यवर्त्तिनीं विवादास्पदीभूतां भुवं समं प्रविभज्यास्येयं भूरस्येयमित्युभयो समर्प्य तन्मध्ये सीमालिङ्गानि कुर्य्यात्। यदा तस्यां भूमावन्यतरस्योपकारातिशयो दृश्यते तदा तस्यैव ग्रामस्य सकला भूः समर्पणीया। यथाह मनुः।
"सीमायामविषह्यायां स्वयं राजैव धर्म्मवित्।
प्रदिशेद्भूमिमेकेषामुपकारादिभिः स्थितिः॥"*
अमत्यामप्यतद्भावाग्रङ्गायामस्याः स्मृतेर्न्यायमूलतां द्योतयितुमतिदेशमाह।
"आरामायतनग्रामनिपानोद्यानवेश्मसु।
एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु॥"
आरामः पुण्यफलोपचयहेतुः भूभागः। आयतनं निवेशनं पलालकूटाद्यर्थं विभक्तो प्रदेशः ग्रामः प्रसिद्धः। ग्रामग्रहणञ्च नगराद्युपलक्षणम्। निपानं पानीयस्थानं कूपवापीप्रभृतिकम्। उद्यानं क्रीड़ार्थाभूमिः। वेश्म गृहम्। एतेष्वारामादिष्वयमेव सामन्तसाक्ष्यादिलक्षणो विधिर्ज्ञातव्यः। तथा प्रवर्षणाद्भूतेषु जलप्रवाहेषु अनयोर्गृहयोर्मध्ये न जलौघः प्रवहत्यनयोर्वेत्येवं प्रकारे विवादे आदिग्रहणात् प्रासादादिष्वपि प्राचीन एव विधिर्ज्ञेयः वेदितव्यः।
तथा च कात्यायनः।
"क्षेत्रकूपतड़ागानां केदारारामयोरपि।
गृहप्रसादावसथवृत्तदेवगृहेषु च॥" इति॥*॥
सीमानिर्णयमुक्त्वा तत्प्रसङ्गेन मर्य्यादाप्रभेदनादौ दण्डमाह।
"मर्य्यादायाः प्रभेदे तु सीमातिक्रमणे तथा।
क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः॥"
अनेकक्षेत्रव्यवच्छेदिका साधारणी भूमर्य्यादा तस्याः प्रकर्षेण भेदनेसीमातिक्रमणे सीमामतिलङ्घ्य कर्षणे क्षेत्रस्य च भयादिप्रदर्शनेन हरणे यथाक्रमेणाधमोत्तममध्यमदण्डा वेदितव्याः। क्षेत्रग्रहणञ्च गृहारामाद्युपलक्षणार्थम्। यदा पुनः स्वीयभ्रान्त्या क्षेत्रादिकमपहरति तदा द्विगुणो दमो वेदितव्यः॥ यथाह मनुः।
"गृहं तड़ागमारामं क्षेत्रं वा भीषया हरन्।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विगुणो दमः॥"
इति॥
अपह्रियमाणक्षेत्रादि भूयस्त्वपर्य्यालोचनया कदाचिदुत्तमोऽपि दण्डः प्रयोक्तव्यः। अत एवाह।
"वधः सर्व्वस्वहरणं पुरान्निर्व्वासनार्हणे।
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसः॥"
इति॥ * ॥
यः पुनः परक्षेत्रे सेतुकूपादिकं प्रार्थनया अर्थदानेन वा सम्यानुज्ञो निर्मातुमिच्छति तं निषेधतः क्षेत्रस्वामिन एव दण्ड इत्यत आह।
"न निषेधोऽल्पबाधस्तु सेतुः कल्याणकारकः।
परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः॥"
परकीयां भूमिमपहरन्नाश्रयन्नपि सेतुर्जलप्रवाहबन्धः क्षेत्रस्वामिना न प्रतिषेध्यः स चेदौषत्पीड़ाकरो बहूपकारकश्च भवति। कूपश्चाल्पक्षेत्रव्यापित्वेनाल्पबाधो बहूदकत्वेन बहूपकारको नैव निवारणीयः। कूपग्रहणञ्च वापीपुष्करिण्याद्युपलक्षणार्थम्। यदा पुनरसौ सर्व्वक्षेत्रवर्त्तितया बहुबाधो नद्यादिसमीपक्षेत्रवर्त्तितया वा अल्पोपकारकस्तदासौ निषेध्य इत्यर्थादुक्तं भवति॥ * ॥ सेतोश्च द्वैविध्यमुक्तं नारदेन।
"सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च।
तोयप्रवर्त्तनात् खेयो बन्ध्यः स्यात्तन्निवर्त्तनात्॥"
इति॥
यदा स्वन्यनिर्म्मितं सेतुं भेदनादिना नष्टं स्वयं संस्करोति तदा पूर्व्वस्वामिनं तद्भृत्यं वा सृष्ट्वैव संस्कुर्य्यात्। यथाह नारदः।
"पूर्व्वप्रवृत्तमुत्सृष्टं स्वामिनन्तु यः।
सेतुं प्रवर्त्तयेत् कश्चित् न स तत्फलभाक् भवेत्॥
मृते तु स्वामिनि पुनस्तद्भृत्ये वापि मानवे।
राजानमामन्त्र्य ततः कुर्य्यात् सेतुप्रवर्त्तनम्॥"
इति॥ * ॥
क्षेत्रस्वामिनं प्रति उपदिष्टमिदानीं सेतोः प्रवर्त्तयितारं प्रति आह।
"स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत्।
उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः॥"
क्षेत्रस्वामिनमनभ्युपगम्य तदभावे राजानं वा यः परक्षेत्रे सेतुं प्रवर्त्तयत्यसौ न फलभागभवत्यपि तु तदुत्पन्ने फले क्षेत्रस्वामिनो भोगस्तदभावे राज्ञः। तस्मात् प्रार्थनयार्थदानेन वा क्षेत्रस्वामिनं तदभावे राजानं वाभ्यनुज्ञाप्यैव परक्षेत्रे सेतुः प्रवर्त्तनीय इति तात्पर्य्यार्थः॥*॥
क्षेत्रस्वामिना सेतुर्न प्रतिषेध्य इत्युक्तमिदानीं तस्यैव प्रसक्तानुप्रसक्त्या क्वचिद्विध्यन्तरमाह।
"फालाहृतमपि क्षेत्रं न कुर्य्यादुदयो न कारयेत्।
स प्रदाप्यः क्षतफलं क्षेत्रमन्येन कारयेत्॥"
यः पुनः क्षेत्रस्वामिनः पार्श्वेऽहमिदं क्षेत्रं कृषामि इत्यङ्गीकृत्य पश्चादुत्सृजति न चान्येन कर्षयति तच्च क्षेत्रं यद्यपि फालाहृतमीषद्भिन्नं विदारितं न सम्यग्बीजवापार्हं तथापि तस्याक्षतस्यफलंयावत्तत्क्षेत्रोत्पन्नार्हं सामन्तादिकल्पितं तावदसौ कर्षको दापनीयः। तच्च क्षेत्रं पूर्वकर्षकादुच्छिद्यान्येन कारयेत्। इति सीमाविवाद प्रकरणम्। इति मिताक्षरा॥ * ॥ अपि च।
"सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः।
ज्येष्ठे मासि नयेत् सीमां सुप्रकाशेषु सेतुषु॥
सीमावृक्षांश्च कुर्व्वीत न्यग्रोधाश्वत्थकिंशुकान्।
शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पादपान्॥
गुल्मान् वेणूंश्च विविधान् शमीवल्लीस्तथानि च।
शरान् कुब्जकगुल्मांश्च तथा सीमा न नश्यति॥
तड़ागान्युदपानानि वाप्यः प्रस्रवणानि च।
सीमासन्धिषु कार्य्याणि देवतायतनानि च॥
उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत्
सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्य्ययम्
अश्मनोऽस्थीनि गोवालान् तुषान् भस्म कपालिकाः।
करीषमिष्टकाङ्गारान् शर्करा वालुकास्तथा॥
यानि चैवं प्रकाराणि कालाद्भूमिन्न भक्षयेत्।
तानि सन्धिषु सीमायामप्रकाश्यानि कारयेत्॥
एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः।
पूर्व्वभुक्त्या च सततमुदकस्यागमेन च॥
यदि संशय एव स्यात् लिङ्गानामपि दर्शने।
साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः॥
ग्रामीयककुलानाञ्च समक्षं सीम्नि साक्षिणः।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः॥
ते दृष्टास्तु तथा ब्रूयुः समन्ताः सीम्नि निश्चयम्
निबध्नीयात्तथा सीमां सर्व्वांस्तांश्चैव नामतः॥
शिरोभिस्ते गृहीत्वोर्व्वीं स्रग्विणो रक्तवाससः
सुव्रतैः स्नापिताः स्वे स्वे नयेयुस्ते समञ्जसम्॥
यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः।
विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम्॥
साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः।
सीमाविनिर्णयं कुर्य्युः प्रयता राजसन्निधौ॥
सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम्॥
इमानप्यनुयुञ्जीत पुरुषान् वनगोचरान्॥

व्याधान् शाकुनीकान् गोपान् केवर्त्तान् मूलखानकान्।
व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनचारिणः॥
ते दृष्टास्तु यथा ब्रूयुः सीमासन्धिषु लक्षणम्।
तत्तथा स्थापयेद्राजा धर्म्मेण ग्रामयोर्द्वयोः॥
क्षेत्रकूपतड़ागानामारामस्य गृहस्य च।
सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः॥
सामन्तास्ते मृषा ब्रूयुः सेतौ विवदतां नृणाम्।
सर्व्वे पृथक् पृथक् दण्ड्या राज्ञा मध्यमसाहसम्॥
गृहं तड़ागमारामं क्षेत्रं वा भीषया हरन्।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्विगतो दमः॥
सीमायामविषह्यायां स्वयं राजैव धर्म्मवित्।
प्रदिशेत् भूमिमेतेषामुपकारादिति स्थितिः॥"

इति मानवे ८ अध्यायः॥

सौमिकः, पुं, (स्यमति शब्दायते इति। स्यमु शब्दे+"स्यमेः संप्रसारणञ्च।" उणा० २। ४३। इति किकन् धातोः सम्प्रसारणं दीर्घश्च।) वृक्षभेदः। वल्मीकः। सूक्ष्मकृमिजातिः। इति संक्षिप्तसारोणादिवृत्तिः॥

सौ(शौ)रः, पुं, (सिनोति सीयते इति वा। सि बन्धे+"शसिचिमिजां दीर्घश्च।" उणा० २। २५। इति क्रन्। दीर्घश्च।) सूर्य्यः। इति मेदिनी॥ अर्कवृक्षः। इलः। इत्यमरः। २। ८। १४॥ (यथा, मेघदूते। १६।

"सद्यः सीरोत्कर्षणसुरभि क्षेत्रमारुह्य मालं किञ्चित्पश्चात् व्रज लघुगतिः किञ्चिदेवोत्तरेण॥")

सौ(शौ)रकः, पुं, (सौर+संज्ञायां कन्।) शिशुमारः। इति शब्दमाला॥ (सौर+स्वार्थे कन्।) सौरशब्दार्थोऽप्यत्र॥

सौ(शौ)रध्वजः, पुं, (सौरः ध्वजे यस्य।) चन्द्रवंशीयराजविशेषः। स तु ऋक्षरोमराजपुत्रः। यस्य पुत्रार्थं यजनभुवं क्षणतः सीरे सीता दुहिता समुत्पन्ना तस्य पुत्रो भानुमान्। इति विष्णुपुराणे। ४। ५। १२॥ (भागवतमतेऽस्य पुत्रः कुशध्वजः। यथा, तत्रैव। ९। १३। १८।

"ततः सीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीम्।
सीता सीराग्रतो जाता तस्मात् सीरध्वजः स्मृतः॥
कुशध्वजस्तस्य पुत्रस्ततो धर्म्मध्वजो नृपः॥")

सीरपाणिः, पुं, (सीरः पाणौ यस्य।) बलदेवः। इत्यमरः। १। १। २५॥

सीरी, [न्] पुं, (सीरोऽस्यास्तीति। इनिः।) बलदेवः। इति हलायुधः भूरिप्रयोगश्च॥

सीलन्ध्रः, पुं, मद्यभेदः। सिलिन्ध्रा इति भाषा। तस्य गुणाः।

"सीलन्ध्रः श्लेष्मलो ह्रद्यो विपाके मधुरो गुरुः।
वातपित्तहरो ह्रद्य आमवातकरश्च सः॥"

इति भावप्रकाशः॥

सीवनं, क्ली, (सिव्यु तन्तुसन्ताने+ल्युट्। ष्ठिवु सिव्योर्ल्युटि वा दीर्घः इति स्वामी। मुग्धबोधमते "ष्ठीवनसीवने वा।" इति सूत्रात् निपातितः।) तन्तुसन्तानम्। सूचीकर्म्म। सेयानी इति सेलायी इति च भाषा। तत्पर्य्यायः। सेवनम् २ सूतिः ३। इत्यमरः। ३। २। ५॥ क्षतिः ४ व्यूतिः ५। इति शब्दरत्नावली॥ (यथा, सुश्रुते। ४। १।

"यथोक्तं सीवनं तेषु कार्य्यं सन्धानमेव च॥")

सीवनी, स्त्री, (सिव+ल्युट्। स्त्रियां ङीप्।) लिङ्गमध्यधःसूत्रम्। लिङ्गाद्यात् गुह्यपर्य्यन्तसीवनम्। इति हेमचन्द्रः॥

सीसं, क्ली, सीसकम्। इति हेमचन्द्रः॥ (यथा, महाभारते। ५। ४८। ७८।

"सुवर्णस्य मलं रूप्यं रूप्यस्यापि मलं त्रपु।
ज्ञेयं त्रपु मलं सीसं सीसस्यापि मलं मलम्॥")

अथ सीसस्योत्पत्तिर्नामगुणाश्च।

"दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोच यत्।
वीर्य्यं जातस्ततो नागः सर्व्वरोगापहो नृणाम्।
सीसं वङ्गञ्च वप्रञ्च योगेष्टं नागनामकम्॥
नागनामकं नागः भुजङ्ग इत्यादि।
सीसं रङ्गगुणं ज्ञेयं विशेषात् मेहनाशनम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सीसकं, क्ली, (सीसमेव। स्वार्थे कन्।) धातुविशेषः। सीसा इति भाषा। तत्पर्य्यायः। नागम् २ योगेष्टम् ३ वप्रम् ४। इत्यमरः। २। ८। १०५॥ सीसम्५ सीसपत्रकम्६ गण्डूपदभवम्७ सिन्दूरकारणम् ८ वर्हम् ९ स्वर्णारि १० यवनेष्टम् ११ सुवर्णकम् १२। इति हेमचन्द्रः॥ वप्रम् १३ पिच्चटम् १४ सुवर्णारि १५ त्रपु १६ त्रपुः १७। इति शब्दरत्नावली॥ वप्रकम् १८ महाबलम् १९ यवनेष्टकम् २०। इति जटाधरः॥ बहुमलम् २१ चीनम् २२ पिष्टम् २३। इति रत्नमाला॥ जड़म् २४ भुजङ्गमम् २५ उरगम् २६ कुरङ्गम् २७ परिपिष्टकम्२८ मृदुक्षणायसम्२९ पद्मम्३० तारग्रहिकरम् ३१ शिराढ्यत्तम् ३२ वयोवङ्गम् ३३ चीनपिष्टम् ३४। अस्य गुणाः।

"सीसन्तु वङ्गसाम्यं स्याद्रसवीर्य्यविपाकतः।
उष्णञ्च कफवातघ्नमग्नेर्दीप्तं गुरु लेखनम्॥
वर्षे नीलं मृदु स्निग्धं निर्म्मलञ्च सुगौरवम्।
रौप्यसंशोधने स्निग्धं सीसकञ्च तदुत्तमम्॥"

इति राजनिर्घण्टः॥

अथ सीसस्योत्पत्तिनामगुणाः।

"दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोच यत्।
वीर्य्यं जातस्ततो नागः सर्व्वरोगापहो नृणाम्।
सीसं वङ्गञ्च वप्रञ्च योगेष्टं नागनामकम्।
नागः भुजङ्ग इत्यादि।
सीसं वङ्गगुणं ज्ञेयं विशेषान्मेहनाशनम्॥
नागस्तु नागग्रततुल्यबलं ददाति
व्याधिं विनाशयति जीवनमातनोति।
वह्निं प्रदीपयति कामबलं करोति
हत्यञ्च नाशयति सन्ततसेवितः सः॥
पाकेन हीनो किल रङ्गनागो
कुष्ठानि गुल्मांश्च तथा निकृष्टान्।
पाण्डुप्रमेहानिलसादशोथ-
भगन्दरादीन् कुरुतः प्रयुक्तो॥"

अथ सीसकस्य शोधनम्।

"तस्य साहजिका दोषा यङ्गस्येव निदर्शिताः।
शोधनञ्चापि तस्येव भिषग्भिर्गदितं पुरा॥"

अथ सीसकस्य मारणविधिः।

"ताम्बूलरससंपिष्टशिलालेपात् पुनः पुनः।
द्वाविंशद्भिः पुटैर्नाशो निरुक्तं भस्म जायते॥"

शिला मनःशिला। अन्यच्च।

"अम्लत्वचिञ्चात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत्।
मृत्पात्रे विद्रुतो नागो लोहदर्व्या प्रचालितः॥
यामैकेन भवेद्भस्म तत्तुल्या स्यान्मनःशिला।
काञ्जिकेन इयं पिष्टा पचेद्दृढपुटेन च॥
क्षाङ्गेरीतं पुनः पिष्टा शिलया काञ्जिकेन च।
पुनः पचेत् शरावाभ्यामेवं षष्टिपुटैर्भ्रुतिः॥"

इति भावप्रकाशः॥

मारितस्यास्य गुणाः पूर्व्ववत्॥ अपि च।

"तैले तक्रे गवां मूत्रे काञ्जिके च कुलत्थके।
त्रिधा त्रिधा विशुद्धिः स्यात् स्वर्णादीनां समासतः॥"

अथ सीसकस्य मारणम्।

"कुड़वं नागपत्राणां कुनट्याः स्यात् पलार्द्धकम्।
तण्डुलीयरसैर्य्यामं यामं वासारसैस्तथा॥
संमर्द्य च क्रियां कृत्वा चर्म्मे संशोष्य तं पुनः।
सरावसंपुटे कृत्वा पचेदन्योपलैर्भिषक्॥
एवं सप्तपुटैर्नागो भस्मीभवति निश्चितम्।
द्विगुञ्जोऽयं ध्रुवं हन्यात् प्रमेहानखिलानपि॥"

इति वैद्यदर्पणः॥

सीसपत्रकं, क्ली, सीसकम्। इति हेमचन्द्रः॥

सीहुण्डः, पुं, सेहुण्डवृक्षः। स्नुही। इत्यमरः। २। ४। १०५॥

सु, गतौ। ऐश्वर्य्ये। प्रसवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) सवति। इति दुर्गादासः॥

सु, अ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-अनिट्।) अ, सुसाव सुषुवे। इति दुर्गादासः॥

सु, व्य, निर्भरम्। इत्यमरः। ३। ४। २॥ (यथा, महाभारते। १। १५८। १६।

"विदित्वा व्यवसिष्यामि यद्यपि स्यात् सुदुष्करम्॥")

पूजा। इत्यमरः। ३। ४। ५॥ (शोभनम्। यथा, मनुः। ७। ३१।

"प्रणेतुं शक्यते दण्डः सुसहायेन धीमता॥")

अनुमतिः। छन्दः। सम्बुद्धिः। इति मेदिनी॥ अनायासः। इति भरतैकार्थसंग्रहः॥ उपसर्गविशेषः। यथा। सुपूजानायासातिशयेषु। इति मुग्धबोधटीकायां दुर्गादासः॥ सप्तम्या बहुवचनविभक्तिः। इति व्याकरणम्॥

सुकण्टकः, क्ली, (सुष्ठु कण्टकोऽस्याः।) हृतकुमारी। इति राजनिर्घण्टः॥

सुकण्डु:, पुं, (सु शोभना कण्डूर्यत्र ।) कण्डूरोग-इति शब्दरत्नावली ॥

सुकन्द:, पुं, (सु सुन्दर: कन्दो यस्य ।) कशेरु:। इति राजनिर्घण्ट: ॥

सुकन्दक:, पुं, (सु सुन्दर: कन्दो यस्य । कप् ।) पलाण्ड:। इत्यमर:।२।४।१४७॥ वाराहीकन्द:। धरणीकन्द:। इति राजनिर्घण्ट: ॥

सुकन्दी, [न्] पुं, (सुकन्दोऽस्यास्तीति । इनि:।) शूरण:। इति राजनिर्घण्ट: ॥

सुकन्यक:, त्रि, शोभना कन्या यस्य । इति मुग्ध-बोधव्याकरणम् ॥

सुकन्या, स्त्री, (सु शोभना कन्या ।) शर्य्यातिराज कन्या । सा तु च्यवनर्षिपत्नी। यथा, श्रीभागवते ९ । ३ । अध्याये ।

"शर्य्यातिर्मानवो राजा ब्रह्मिष्ठ: संबभूव ह ।
सुकन्या नाम तस्यासीत् कन्या कमललोचना॥
सुकन्या च्यवनं प्राप्य पतिं परमकोपनम् ।
प्रीणयामास चित्तज्ञा अप्रमत्तानुवृत्तिभि: ॥"

शोभना कन्या च ॥

सुकन्याक:, त्रि, (शोभना कन्या यस्य ।) सुकन्यक:। इति मुग्धबोधव्याकरणम् ॥

सुकर:, त्रि, (सुखेन क्रियते इति । सु + कृ + "ईषदु:सुषु कृच्छ्राकृच्छ्रार्थेषु खल् ।" ३ । ३। १२३ । इति खल् ।) सुखकर: । अक्लेशसाध्य:। यथा,—

"क्रियमाणन्तु यत् कर्म स्वयमेव प्रसिध्यति।
सुकरै: स्वैर्गवै: कर्तु: कर्मकर्त्तेति तद्विदु: ॥"

इति मुग्धबोधव्याकरणम् ॥

सुकरा, स्त्री, (सु सुखं करोतीति । कृ + अच् ।) सुशीला गौ:। इत्यमर:। २ । ८ । ७० ॥

सुकर्णक:, पुं, (सुन्दर: कर्ण इव कन्दो यस्य ।) हस्तिकन्द:। इति राजनिर्घण्ट: ॥ सुन्दरकर्ण-युक्ते, त्रि ॥

सुकर्णिका, स्त्री, (सुन्दर: कर्ण इव पर्णमस्या:। कापि पत इत्वम् ।) मूषीकर्णी। इति शब्द-रत्नावली ॥

सुकर्णी, स्त्री, (शोभन: कर्ण इव पत्रमस्या:। ङीष् ।) इन्द्रवारुणी। इति राजनिर्घण्ट: ॥

सुकर्म्मा, [न्] पुं, (सु शोभनं कर्म्म यस्मात् ।) विस्रकम्भादिसप्तविंशतियोगान्तर्गतसप्तमयोग:। तत्र जातफलम् ।

"परोपकारी कुशल: कलासु
हर्षेण युक्तो नितरां यशस्वी ।
प्रसूतिकाले यदि चेत् सुकर्म्मा
नर: सुकर्म्मा भवति प्रसिद्ध: ॥"

इति कोष्ठीप्रदीप: ॥

विश्वकर्म्मा। इति मेदिनी ॥

सुकर्म्मा, [न्] त्रि, (सु शोभनं कर्म्म यस्य ।) शोभनकर्म्मयुक्त:। सत्क्रिय:। इति हेम-चन्द्र: ॥

सुकल्प:, त्रि (सुष्ठु कल्पते इति । सु + कल्प + घञ् ।) दाढर्योक्तव्यक्ति:। इत्यमर: ।३।१।८॥ य एव दत्ते भुङ्क्ते च तत्र । विख्या-तत्वात् सुष्ठु अतिशयेन वा कल्पते शब्दायते वा असौ सुकल्प:। इति भरत: ॥

सुकाण्ड: पुं, (सु शोभन: काण्डो यस्य ।) कार-वेल्ल:। इति राजनिर्घण्ट: ॥ सुन्दरकाण्डयुक्त-वृक्षादिश्च ॥

सुकाण्डिका, स्त्री, (सुन्दर: काण्डो यस्या:। कन् टाप्रि अत इत्वम् ।) काण्डीरलता। इति राज-निर्घण्ट: ॥

सुकाण्डी, [न्] पुं, (सुन्दरा: काण्डा इव चर-णानि सन्त्यस्येति । इनि: ।) भ्रमर:। इति राजनिर्घण्ट: ॥ सुन्दरकाण्डयुक्तश्च ॥

सुकामा, स्त्री, (सुष्ठु काम्यतेऽसौ। सु + कम् + कर्म्मणि घञ् ।) त्रायमाणा। इति राज-निर्घण्ट: ॥ (सुष्ठु कामो यस्या: ।) शोभन-कामयुक्ता च ॥

सुकालुका, स्त्री, डोड़ीशुप:। इति राज-निर्घण्ट: ॥

सुकाष्ठकं, क्ली, (सु शोभनं काष्ठमस्येति । कन् ।) देवकाष्ठम्। इति राजनिर्घण्ट: ॥ सुन्दर-दारु च ॥

सुकाष्ठा, स्त्री, (सु शोभनं काष्ठमस्या: ।) कट्टी। काष्ठकदली। इति राजनिर्घण्ट: ॥

सुकुन्दक:, पुं, पलाण्डु:। इति शब्दरत्नावली ॥

सुकुन्दन:, पुं, वल्वर:। इति राजनिर्घण्ट: ॥

सुकुमार:, त्रि, (सुष्ठु कुमारयत्यनेनेति। सु + कुमारत् क केलौ + घञ् ।) कोमल:। इत्य-मर: । ३ । १ । ७८ ॥ (यथा, महाभारते। १। १५४। १४।

"सुभ्रूनासाचिबिम्बान्तं सुकुमारनखत्वचम् ॥")

पुं, उत्तमबालकश्च ॥

सुकुमार:, पुं, (सु + कुमारत् क केलौ + अच्। घञ् वा ।) पुण्ड्रेक्षु:। इति मेदिनी ॥ वन-चम्पक:। शव:। श्यामाक:। इति राज-निर्घण्ट:॥ दैत्यविशेष:। इति केचित् ॥(मोदकौ-षधविशेष:। यथा,—

"त्रिवृद्दर्शं पलं चूर्णं सिताचौद्रं पलं पलम् ।
एलात्वग्मरिचानाञ्च निष्कं प्रति विमिश्रयेत्॥
किञ्चिन्मृद्वग्निना तप्तं कर्षहृद्यञ्च भक्षयेत् ।
विरेक: सुकुमाराणां रक्तपित्तनिलापह: ॥"

इति सुकुमारमोदक:।

इति वैद्यकपत्रीसंग्रह: ॥)

सुकुमारक:, क्ली, (सुकुमार इव । कन् ।) तमाल-पत्रम्। इति राजनिर्घण्ट: ॥

सुकुमारक:, पुं, (सुकुमार एव । स्वार्थे कन् ।) शालि:। इति राजनिर्घण्ट: ॥ सुन्दरबालक:। यथा हरिवंशे । ३८ । ३६ ।

"सिंहप्रसेनमवधीत् सिंहो जाम्बवता हत:।
सुकुमारक ! मा रोदीस्तव ह्येष स्यमन्तक: ॥"

सुकुमारा, स्त्री, (सुकुमार + टाप् ।) जातौ। नवमालिका। कदली। पृक्का। मालती। इति राजनिर्घण्ट: ॥

सुकुमारी, स्त्री, (सुकुमार + ङीष् ।) नव-मालिका। इति राजनिर्घण्ट: ॥ (अङ्गिनी। तत्पर्य्यायो यथा,—

"अङ्गिनी सुकुमारी च ।"

इति गारुड़े २०८ अध्याय: ॥ कोमलाङ्गी स्त्री। यथा, रामायणे। २।३८।४। "सुकुमारी च बाला च सततञ्च सुखोचिता।
नेयं वनस्य योग्येति सत्यमाह गुरुर्मम ॥")

सुकृत, त्रि,(सुष्ठु करोतीति । कृ + "सुकर्म्मपाप-मन्त्रपुण्येषु कृञ:।" ३ । २ । ८९ । इति क्विप् ।)पुण्यवान्। इति जटाधर: ॥ धार्म्मिक: इति विकाण्डशेष: ॥ (यथा, रघु: ।११।५० ।

"सद्य एव सुकृतां हि पच्यते
कल्पवृक्षफलधर्म्मि काङ्क्षितम् ॥")

सुकृतं, क्ली, (सु + कृ + क्त: ।) पुण्यम्। इत्य-मर: । १ । ४ । २४ ॥ (यथा, कुमारे । ६ । ४७ ।

"अथ ते मुनयो दिव्या: प्रेक्ष्य हैमवतं पुरम्।
स्वर्गाभिसन्धिसुकृतं वचनामिव मेनिरे ॥")

शुभम्। सुविहिते, त्रि। इति मेदिनी ॥ (यथा, भागवते । ८ । २३ । ३१ ।

"क्रियमाणे कर्म्मण्येतं दैवे पित्र्येऽथ मानुषे ।
यत्र यत्रानुकीर्त्तेयत तत् तेषां सुकृतं विदु: ॥")

सुकृतन्तु मनुष्यै: सह गच्छति। यथा,—

"सुकृतं दुष्कृतं लोके गच्छन्तमनुगच्छति ।
तस्माद्वित्तं समासाद्य दैवाद्वा पौरुषादथ ।
दद्यात् सम्यक् द्विजातिभ्य: कीर्त्तनानि च कारयेत् ॥"

इति वाह्निपुराणे वैष्णवक्रियायोगे यमानुशा-सनोनामाध्याय: ॥

सुकृति:, स्त्री, (सु + कृ + क्तिन् ।) पुण्यम्। मङ्गलम्। सत् कर्म्म ॥

सुकृती, [न्] त्रि, (सुकृतमस्यास्तीति । इनि: ।) पुण्यवान्। इत्यमर: । ३ । १ । ३ ॥ शुभयुक्त:। इति मेदिन्यां सुकृतशब्दार्थदर्शनात् ॥ (यथा, गीतायाम् । ७ । १६ ।

"चतुर्व्विधा भजन्ते मां जना सुकृतिनोऽर्জ্জুন।
आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥")

सुकेशर:, पुं, (सुन्दर: केशरो यस्य ।) बीजपूर:। इति राजनिर्घण्ट: ॥

सुकेशा, स्त्री, (शोभन: केशो यस्या: ।) सुन्दर-केशयुक्ता। यथा। "सुकेशी सुकेशा रम्या।" इति मुग्धबोधव्याकरणम् ॥

सुकेशी, स्त्री (शोभन: केशो यस्या: । ङीष् ।) स्वर्गवेश्याभेद:। इति पुराणम् ॥ (यथा, महा-भारते । १३ । १८ । ४५ ॥

"मनोहरा सुकेशी च सुमुखी हासिनी प्रभा।
एतायान्याश्च वै ब्रह्म: प्रनृत्तास्सरस: शुभा: ॥")

शोभनकेशयुक्ते, त्रि ॥ (यथा, महाभारते ।३। ६४ । ६४ ।

"शुभ्रू: सुकेशी सुश्रोणी सुकुचा सुद्विजानना:
सा विवेशाश्रमपदं वीरसेनसुतप्रिया ॥")

सुकोलो,स्त्री,(सुशोभना कोलीः)क्षीरकाकोली। इति रत्नमाला ॥ शोभनवदरी च ॥

सुकोशकः,पुं,(सु शोभनः कोशो यस्य।)कोषाम्रः। इति राजनिर्घण्टः ॥

सुख, त् क तत्करोती। इति कविकल्पद्रुमः ॥ (अदन्तचुरा०पर०-सक०-सेट्।) तत्क्रतिः सुखक्रिया। श्रीजयदेवकवेरिति गीतं सुखयतु केशवपदमुपनीतम्। इति दुर्गादासः ॥

सुखं, क्ली, (सुखयतीति। सुख+अच्।) आत्मवृत्तिगुणविशेषः। इति नैयायिकाः॥ मनसो धर्म्मः। इति वैदान्तिकाः॥ तत्पर्य्यायः। मुत्२ प्रीतिः ३ प्रमदः ४ हर्षः ५ प्रमोदः६ आमोदः ७ संमदः ८ आनन्दथुः ९ आनन्दः १० शर्म्म११ शातम् १२। इत्यमरः ।१।४।२५ ॥ मदः १३ भोगः १४ रभसः १५ निर्वृतिः १६ धृतिः १७ वीचिः १८। इति जटाधरः ॥ संमेदः १९ मोदः २० नन्दथुः २१ नन्दः २२ मुदा २३ सौख्यम् २४उपजोषम् २५ आनन्दम्२६जोषम् २७। इति शब्दरत्नावली॥ न्यायमते जगतां काम्यं धर्म्मजन्यमिदम्। यथा,—

"सुखन्तु जगतामिव काम्यं धर्म्मेण जन्यते।
अधर्म्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम् ॥*

तस्य मनोगोचरत्वं यथा,—

"मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः
कृतिः ॥"

इति भाषापरिच्छेदः ॥ * ॥

"सुखं चतुर्विंशतिगुणान्तर्गतगुणविशेषः। तत्तु नित्यं जन्यञ्च। नित्यं परमात्मनो विशेषगुणान्तर्व्वर्त्ति। जन्यसुखं जीवात्मनो विशेषगुणान्तर्व्वर्त्ति। तच्च शुभादृष्टजन्यं धनमित्रलाभारोग्यमिष्टान्नपानपुरीषोत्सर्गपुत्रादिजन्मतत्प्राप्तिरूपं कान्तासम्भोगादिजन्यञ्च तस्य द्विक्षणस्थायित्वं स्वोत्तरोत्पन्नानुभवनाश्यत्वात्। सुखाद्यपरागेणेवात्मनो मानसबोधः। सुखं तदुपायश्चेष्टः। बालस्य स्तन्यपानप्रवृत्तौ सुखसाधनत्वज्ञानं हेतुः तत्र सुखस्यैवेष्टत्वम्। दुःखजनकगमनादिप्रवृत्तौ सुखोपायो धनं तदेवेष्टं तत्साधनत्वज्ञानमेव हेतुः। यागादिप्रवृत्तावपि पारलौकिकसुखसाधनत्वज्ञानं कारणं सुखोपायस्वर्गादिरूपेष्टसाधनत्वज्ञानमपि कारणम्। सुखस्य कालावच्छेद्यत्वं शरीरावच्छेद्यत्वञ्चातोऽध्यात्मवृत्तित्वं शरीरैकदेशावच्छेदेन दुःखसम्भवेऽप्यन्यदेशावच्छेदेन सुखसम्भवात् एकक्षणावच्छेदेन जीवस्य दुःखसम्भवेऽपि क्षणान्तरावच्छेदेन सुखसम्भवाच्च तत्तु विस्फोटकवतो मिष्टान्नभोजनादौ द्रष्टव्यम्। इति तार्किकाः ॥ * ॥ तत्कारणं यथा,—

"सुदिनं दुर्दिनं श्वभ्रदभ्रमत्वेव भवे भव।
सर्व्वेषां प्राक्तनानाञ्च हे बौजे सुखदुःखयोः ॥
सुखादभवति हर्षश्च दर्पः शौर्य्यं प्रमत्तता।
राग ऐश्वर्य्यकामौ च विद्वेषश्च परस्परम् ॥
दुःखात् शोकात् समुद्वेगाद्भयं नित्यं प्रवर्त्तते।
इत्यन्यैतानि सर्व्वाणि इति,बीजे महेश्वर ॥
सुदिनं दुर्दिनञ्चैव सर्व्वं कर्म्माङ्गिवं भव ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।४३।४८-५१

तस्य कारणान्तरं लक्षणञ्च यथा,—

"रागद्वेषादियुक्तानां न सुखं क्वचित् द्विज।
विचार्य्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः॥
यत्र स्नेहो भयं तत्र स्नेहो दुःखस्य भाजनम्।
स्नेहमूलानि दुःखानि तस्मिंस्त्यक्ते महत्
सुखम् ॥
शरीरमेवायतनं दुःखस्य च सुखस्य च।
जीवितञ्च शरीरञ्च जात्यैव सह जायते ॥
सर्व्वं परवशं दुःखं सर्व्वमात्मवशं सुखम्।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः ॥
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्।
सुखं दुःखं मनुष्याणां चक्रवत् परिवर्त्तते ॥"

इति गारुडे ११३ अध्यायः ॥ * ॥

सर्व्वभूतसुखकर्त्तृत्वं यथा, देवीपुराणे देवीसंवत्सरबलिहरणाध्याये।

"क्रमिकीटपतङ्गेषु भूमौ दध्योदनं क्षिपेत्।
सर्व्वदा सर्व्वभूतानां सुखं कार्य्यं सुखार्थिनाम्॥"

सुख-दुःख-साधनानामस्थिरत्वं सुखस्य मनोविलासमात्ररूपत्वञ्च यथा,—

"वस्त्वेकमेव दुःखाय सुखायेर्ष्योद्भवाय च।
कोपाय च यतस्तस्माद्वस्त्वात्मकं कुतः॥
तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते।
तदेव कोपाय ततः प्रसादाय च जायते ॥
तस्माद्दुःखात्मकं नास्ति न च किञ्चित् सुखात्मकम्।
मनसः परिणामोऽयं सुखदुःखोपलक्षणः ॥"

इति विष्णुपुराणे। २। ६। ४१-४५ ॥

"सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम्।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति॥"

इति मृच्छकटिकम् ॥ * ॥

तद्वैदिकपर्य्यायः। शिम्बाता १ शतरा २ शातपन्ता ३ शिल्गुः ४ स्मुमकम् ५ शेवधम्६ मयः ७ सुम्नम् ८ सुदिनम् ९ शूषम् १० शुनम्११ शम्मम् १२ भेषजम् १३ जलाशम्१४ स्योनम् १५ सुम्नम् १६ शेवम् १७ शिवम् १८ शम्१९कम्२०। इति विंशतिः सुखनामानि ॥ इति वेदनिघण्टौ। ३। ६ ॥ * ॥ त्रिविधसुखं यथा,—

"अभ्यासाद्रमते यत्र दुःखान्तञ्च नियच्छति।
यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ॥
तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्॥१
विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम्।
परिणामे विषमिव तत् सुखं राजसं स्मृतम्।२
यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्य प्रमादोत्थं तत्तामसमुदाहृतम्॥"३॥

इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥

स्वर्गः। इति मेदिनी ॥ दुर्दिनामौषधम्। इति राजनिर्घण्टः ॥ जलम्। इति केचित् ॥ सुखविशिष्टे, त्रि। यथा,—

"यस्तूच्चाय त्रिषु द्रव्ये पापं पुण्यं सुखादि च।"

इत्यमरः ।१।४।२६॥

"पापपुण्यशब्दौ सुखादयः शस्तान्ताय गुणे यथोक्तलिङ्गाः उपचारात्तद्इति द्रव्ये विशेष्ये वर्त्तमाना वाच्यलिङ्गाः। यथा,—

"पापा ऋतुमती कन्या पापो राजाप्यरक्षकः।
पापं व्याधकुलं हिंस्रं पापो विप्रश्च सेवकः ॥'
पुण्यं तीर्थं पुण्या नदी पुण्य आश्रमः। सुखा भूतिः सुखो वासः सुखं कामिकुलम्।" इति भरतः ॥

सुखकरः, त्रि, (सुखं कर्त्तुं शीलमस्येति। सुख+कृ+टः।) सुकरः। यथा। कर्त्तुः सुकरः सुखकरैरित्यर्थः। इति मुग्धबोधटीकायां दुर्गादासः ॥

सुखगः, त्रि, (सुखेन गच्छतीति। गम्+डः।) सुखेन गमनकर्त्ता ॥

सुखङ्करी, स्त्री, (सुखं करोतीति। कृ+खच्। मुम्। ङीप्।) जीवन्तीवृक्षः। इति राजनिर्घण्टः ॥ सुखकरी च ॥

सुखङ्कुणः,पुं,शिवखट्वाङ्गः। इति त्रिकाण्डशेषः।

सुखचरः, त्रि,सुखगामी। सुखेन चरति इत्यर्थे टप्रत्ययेन निष्पन्नः। ग्रामविशेषे, पुं, । सुखेन चरति अत्र इत्यर्थे अल्प्रत्ययेन निष्पन्नः ॥

सुखचारः,पुं,(सुखेन चरत्यनेनेति। चर+घञ्) उत्कृष्टाश्वः। इति शब्दमाला ॥

सुखजातः, त्रि, (सुखेन जातः। यद्वा, जातं सुखमस्येति।) जातसुखः। यथा भट्टौ ५।३८।

"सुखजातः सुरापीतो नृजन्धो मास्यधारयः॥"

(सुखस्य जनने, क्ली, यथा,गीतगोविन्दे।१०।१

"घटय भुजबन्धनं जनय रदखण्डनं
येन वा भवति सुखजातम् ॥")

सुखदं, क्ली, (सुखं ददातीति। दा+कः।) विष्णोः स्थानम्। विष्णोरासनम्। इति केचित्

सुखदः,पुं,(सुखं ददातीति। दा+कः।) विष्णुः यथा। सुखदोऽनैकदोऽग्रजः। इति तस्य सहस्रनामस्तोत्रम् ॥ तालभेदः। यथा,—

"विंशत्यक्षरसंयुक्तो ध्रुवः सुखदसंज्ञकः।
शृङ्गारवीरयोर्ज्ञेयो गुरुणैकेन मण्डितः ॥"

इति संगीतदामोदरः ॥

सुखदातरि, त्रि ॥ (यथा, हरिवंशे। १०४। ३८।

"हरिणप्लुतयाविचित्रितं
रिपुगते मनसः सुखदं गुरौ ॥"

सुखदा, स्त्री, (सुखं ददाति या। दा+कः। टाप्।) सुखदात्री। गङ्गा। यथा,—

"सद्यःपातकसङ्घानां सद्योदुःखविनाशिनी।
सुखदा मोक्षदा गङ्गा गङ्गैव परमा गतिः ॥"

इति गङ्गाप्रणाममन्त्रः ॥

स्वर्गवेश्या। इति शब्दरत्नावली ॥ गर्मोहक्षः। इति राजनिर्घण्टः ॥

सुखदोह्या, स्त्री, (सुखेन दोह्या दोहनयोग्या।) सुखसंदोह्या गौः। इति हेमचन्द्रः॥

सुखभाक्, [ज्] त्रि, सुखी। सुखं भजते इति। ठाञ्जवइसहो विण्। इत्यनेन सुखशब्दपूर्व्वक-भज्धातोर्विण्प्रत्ययेन निष्पन्नः। इति मुग्ध-बोधव्याकरणम्॥ (यथा, हरिवंशे। ४७। ५।

"निर्व्वैराः क्षितिपाः सुखभाजः
संहृष्टाश्च जना गतरोगाः॥)

दृष्टपरिष्वङ्गः। इति महाभारते मोक्षधर्म्मः॥

सुखमोदा, स्त्री, (सुखकरो मोदो यस्याः।) सन्न-कीवृक्षः। इति राजनिर्घण्टः॥

सुखरात्रिः, } स्त्री, (सुखकरी रात्रिर्यस्या-
सुखरात्रिका, } मिति। पचे कप्।) दीपा-न्वितामावास्यारात्रिः। तद्विधानं यथा, ज्योतिषे।

"तुलाराशिगते भानौ अमावास्यां नराधिपः।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च
क्षत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुड़ादिभिः।
ततोऽपराह्णसमये घोषयेन्नगरे नृपः।
लक्ष्मीः संपूज्यतां लोका उल्काभिरपि
वेष्ट्यताम्॥"*॥

दर्शद्वैधे प्रदोषव्याप्तया निर्णयः।

"तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः।
उल्काहस्ता नराः कुर्य्युः पितॄणां मार्गदर्शनम्॥"
इति ज्योतिषात्॥

उभयतः प्रदोषप्राप्तौ परदिन एव युग्मात्।

"दर्शैकरजनीयोगो दर्शस्य स्यात् परेऽहनि।
तदा विहाय पूर्व्वेद्युः परेऽह्नि सुखरात्रिका॥"
इति ज्योतिर्व्वचनाच्च॥

उभयत्र प्रदोषाव्याप्तावपि उल्कादानं परदिने पूर्व्वोक्तपार्व्वणानुरोधात्।

"भूताद्दे ये प्रकुर्व्वन्ति उल्काग्रहमचेतसः।
निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम्॥"
इति ज्योतिर्व्वचनाच्च॥*॥

अत्रैव लक्ष्मीः पूर्व्वाह्णे रात्रौ पूज्या।

"अमावास्या यदा रात्रौ दिवाभागे चतुर्दशी।
पूजनीया तदा लक्ष्मीर्व्विज्ञेया सुखरात्रिका॥"
इति ज्योतिर्व्वचनात्॥*॥

उल्काग्रहणादिपिढ़कृत्यत्वात् प्राचीनावीतिना दक्षिणामुखेन कर्त्तव्यम्। तथा च मनुः।

"प्राचीनावीतिना सव्यमपसव्यमतन्द्रिणा।
पित्र्यमानिधनात् कार्य्यं विधिवद्भूपार्थिना॥"

तत्र गृहणमन्त्रः।

"यमाय यमदूतानाञ्च भूतानां भूतदर्शयोः।
उज्ज्वलज्योतिषा देहं दहेयं व्योमवर्त्मना॥"

दानमन्त्रश्च।

"अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम
उज्ज्वलज्योतिषा दग्धास्तेयान्तु परमां गतिम्॥"

विसर्জ্জनमन्त्रः।

"यमलोकं परित्यज्य आगता ये महालये।
उज्ज्वलज्योतिषा वर्त्म प्रपश्यन्तो व्रजन्तु ते॥"*

ब्रह्मपुराणम्।

"अमावास्यां यदा देवाः कार्त्तिकेमासि केशवात्
अभयं प्राप्य सुप्ताय क्षीरोदार्णवसानुषु॥
लक्ष्मीर्दैत्यभयात्त्रस्ता सुखं सुप्ताम्बुजोदरे।
चतुर्युगसहस्रान्ते ब्रह्मा स्वपिति पङ्कजे॥
अतोऽत्र विधिवत् कार्य्या मनुष्यैः सुखरात्रिका
दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात्॥
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्।
दीपवृक्षास्तथा कार्य्या भक्त्या देवगृहेष्वपि॥
चतुष्पथश्मशानेषु नदीपर्व्वतसानुषु।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च॥
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः।
दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम्॥
ब्राह्मणान् भोजयित्वादौ विभोज्य च बुभुक्षि-तान्।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना।
स्निग्धैर्म्मुग्धैर्व्विदग्धैश्च बान्धवैर्भृत्यकैः सह॥"
मुग्धैः सुन्दरैः। मुग्धः सुन्दरमूढ़योरिति विश्वः॥*॥अत्र लक्ष्मीपूजायां पुष्पदानकाले।
"नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात् त्वदर्चनात्"
लक्ष्म्यै नमः। इत्यनेन वारत्रयं पूजयेत्।
"सुखरात्रां प्रदोषे तु कुबेरं पूजयन्ति ये॥"
इति रुद्रधरधृतात् कुबेरमपि पूजयन्ति।
"धनदाय नमस्तुभ्यं निधिपद्माधिपाय च।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः॥"
इति पठित्वा कुबेराय नमः। इति त्रिः पूज-येत्। ततो देवगृहादिषु दीपान् दद्यात्। तत्र मन्त्रः।
"अग्निज्योतीं रविज्योतिश्चन्द्रज्योतिस्तथैव च।
उत्तमः सर्व्वज्योतीनां दीपोऽयं प्रतिगृह्यताम्॥"
ततो ब्राह्मणान् बन्धून् भोजयित्वा स्वयं भुक्त्वा सुखं सुप्त्वा प्रत्यूषे भविष्योक्तं कर्म्म कुर्य्यात्। यथा,—

"सुखरात्रेरुषःकाले प्रदीपोज्ज्वलितालये।
बन्धुर्बन्धूनबन्धूंश्च वाचा कुशलयार्च्चयेत्॥
प्रदीपवन्दनं कार्य्यं लक्ष्मीमङ्गलहेतवे।
गोरोचनाचतर्च्चैव दद्यादर्घेषु सर्व्वतः॥"
लक्ष्मीपूजामन्त्रः।
"विश्वरूपस्य भार्य्यासि पद्मे पद्मालये शुभे।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम्।
सुखरात्रिप्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता।
संवत्सरप्रिया या च सा ममास्तु सुमङ्गला॥
माता त्वं सर्व्वभूतानां देवानां सृष्टिसम्भवा।
आख्याता भूतले देवि सुखरात्रि नमोऽस्तु ते॥"
लक्ष्म्यै नमः। इति त्रिः पूजयेत्। इति तिथ्यादि तत्त्वम्॥

सुखवर्द्धकः, पुं, (सुखं वर्द्धयति उद्दीपयतीति। वर्द्ध+णिच्+खुल्) सर्জিकाक्षारः। इत्य-मरः। २। ९। १०९॥

सुखवर्द्धः, [स्] पुं, (सुखं वर्द्धयतीति। वर्द्ध+असुन्।) सर्জিकाक्षारः। इति राज-निर्घण्टः॥

सुखवासः, पुं, (सुखकरो वासो यस्य।) फल-विशेषः। तरमूज इति भाषा। तत्पर्य्यायः। शीर्षवन्तः २। इति रत्नमाला॥

सुखवासनः, पुं, (सुखं वासयतीति। वस+णिच्+ल्युः।) सुखवासनगन्धद्रव्यम्। यथा,—

"सुखवासकरो गन्ध आमोदो सुखवासनः।
सुखवासन इत्येके शुभवासन इत्यपि॥"
इति शब्दरत्नावली॥

सुखसन्दुह्या, स्त्री, सुशीला गौः। इत्यमरटीकायां भरतः। २। ९। ७१॥

सुखसन्दोह्या, स्त्री, (सुखेन सन्दोह्या।) सुशीला गौः। तत्पर्य्यायः। सुव्रता २। इत्यमरः। २। ९। ७१॥ सुखदोह्या ३। इति हेमचन्द्रः॥ सुखदुह्या ४। इति भरतः॥

सुखा, स्त्री, (सुखमस्त्यस्यामिति। अच्। टाप्।) वरुणपुरी। इति मेदिनी॥

सुखाधारः, पुं, (सुखानामाधारः।) स्वर्गः। इति शब्दरत्नावली॥ सुखस्याधारे, त्रि॥

सुखायतः, पुं, (सुखेन आयम्यते इति। आ+यम+क्तः।) सुशिक्षिताश्वः। यथा,—

"सुखायतः शुद्धसुखः सुखचारः सुखायनः।"
इति शब्दमाला॥

सुखायनः, पुं, (सुखेन अयति गच्छति अनेनेति अय+ल्युट्।) सुशिक्षिताश्वः। यथा,—

"सुखायतः शुद्ध सुख सुखचारः सुखायनः।"
इति शब्दमाला॥

सुखावतीश्वरः, पुं, (सुखावत्या ईश्वरः।) बुद्ध-भेदः। हेमचन्द्रः॥

सुखावहः, त्रि, (आवहतीति। आ+वह+अच् सु। सुखस्य आवहः।) सुखदाता। यथा,

"सर्व्वापद्हरं पुण्यं सर्व्वापद्निवारकम्।
सर्व्वकामार्थदं देवि! साधकानां सुखावहम्॥"
इति वटुकभैरवस्तोत्रम्॥

सुखाशः, पुं, (सुखा सुखयुक्ता आशा यस्य। यद्वा सुखायां पुर्य्यां शेते इति। शी+डः।) वरुणः। (सुखेन अश्नते इति। अश+घञ्।) राज-तिनिम्बः। (अश भोजने+भावे घञ्। सुखेन आशः।) सुखभोजनम्। इति मेदिनी॥

सुखाशकः, पुं, (सुखाश एव। स्वार्थे कन्।) राजतिनिम्बः। इति शब्दमाला॥

सुखी, (न्) त्रि, (सुखमस्त्यस्यौति। सुख+इन्।) सुखविशिष्टः। यथा, रामकवचम्।

"स चिरायुः सुखी पुत्री विनयी विजयी भवेत्॥"
"स्वजनं हि कथं हत्वा सुखिनः स्याम माधव।"
इति भगवद्गीता॥

"सा श्रीर्या न मदं कुर्य्यात् स सुखी न्यग्योऽ-भितः।
तन्मित्रं यत्र विश्वासः पुरुषः स जितेन्द्रियः॥"
इति गारुड़े ११६ अध्यायः॥

सुखोत्सवः, पुं, (सुखकरः उत्सवो यस्मात्।) पतिः। इति त्रिकाण्डशेषः॥ (सुखजनक उत्सवः।) आनन्दोत्सवश्च॥

सुखोदकं, क्ली, (सुखजनकमुदकम्।) सुखजनकतज्जलम्। तत्पर्य्यायः। सुखोष्णम् २। इति रत्नमाला॥

सुखोर्ज्जिकः, पुं, सर्ज्जिकाक्षारः। इति राजनिर्घण्टः॥

सुगं, क्ली, (सुखेन गच्छति निर्य्यातीति। गम+डः।) विष्ठा। इति शब्दचन्द्रिका॥ (सुखेन गच्छत्यस्मिन्निति। "सुदुरोरधिकरणे।" ३। २। ४८। इत्यस्य वार्त्तिकोक्त्या डः। सुखगन्तव्यो देशादिः॥) सुन्दरगामिनि, त्रि॥ (सुन्दरं गायतीति। गै+कः। शोभनगीतशालिनि च त्रि॥ यथा, भागवते। १०। १२। ३४।

"गीतैः सुगा वाद्यधराश्च वाद्यकैः
स्तवैश्च विप्रा जयनिस्वनैर्गणाः॥")

सुगण्, त्रि, (सुगणयतीति। सु+गण+क्विप्।) सुन्दरगणकः। इति सिद्धान्तकौमुदी॥

सुगतः, पुं, (सु शोभनं गतं गमनं ज्ञानं वा यस्येति।) बुद्धः। इत्यमरः। १। १। ११॥ (तद्धर्म्मावलम्बी। यथा, कथासरित्सागरे। २८। ४०।

"तेनाभिपूज्य सुमतान् भासयामास तत्र सा॥")

सुन्दरगमनविशिष्टे, त्रि॥

सुगतिः, पुं, (शोभना गतिर्यस्य।) अतीतकल्पीयाईन्भेदः। इति हेमचन्द्रः॥ ग्रन्थकर्त्तृविशेषः। यथा, सुगतिसोपानप्रभृतयोऽप्येवमिति स्मार्त्तलिखनम्॥ (गयस्य पुत्रविशेषः। यथा, भागवते। ५। १५। १४।

"गयात् मायन्त्यां चित्ररथः सुगतिरवरोधन इति त्रयः पुत्रा बभूवुः।" शोभना गतिर्य्यस्येति। शोभनगतिशीले, त्रि। यथा, बृहत्संहितायाम्। ९। ४५।

"सुगतिरविज्ञतो जयान्वितः
कृतयुगरूपकरः सिताक्षयः॥"

स्त्री, सद्गतिः। यथा, महाभारते। १। २। ३३५।

यत्र धर्म्मं समाश्रित्य विदुरः सुगतिं गतः॥")

सुगन्धं, क्ली, (शोभनो गन्धो यस्य।) क्षुद्रजोरकम्। गन्धदण्डम्। इति रत्नमाला॥ (भूदण्डम्। तत्पर्य्यायो यथा,—

"गुच्छबीजन्तु भूतीकं सुगन्धं जन्तुरुप्रियम्।
भूदण्डन्तु भवेच्छत्रा मालादण्डमित्यपि॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) नीलोत्पलम्। चन्दनम्। इति राजनिर्घण्टः॥ गन्धिपर्णम्। इति भावप्रकाशः॥

सुगन्धः, पुं, (शोभनो गन्धो यस्य।) रक्तगिरिः। गन्धकः। चणकः। भूदण्डम्। इति राजनिर्घण्टः॥ (भूपलाशः। तत्पर्य्यायो यथा,—

"आस्फातकः सुगन्धश्च भूपलाशो विशल्यकृत्॥"

इति वैद्यकरत्नमालायाम्॥

कुन्दुरुः। सुगन्धद्रव्यशल्लकीनिर्य्यासः। तत्पर्य्यायो यथा,—

"कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ क्रिमिभेदः। यथा,—

"अन्नादा उदरावेष्टा हृदयादा महागुदाः।
सुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्व्वते॥"

इति वैद्यकरुग्विनिश्चयसंग्रहे क्रिम्यधिकारे॥) समवायातिरिक्तसम्बन्धेन सद्गन्धविशिष्टे, त्रि॥ (यथा, भट्टिः। २ सर्गे।

"आघ्रायिवान् गन्धवहः सुगन्धः॥")

सुगन्धकः, पुं, (शोभनो गन्धो यस्य। ततः कन्।) रक्ततुलसी। गन्धकः। इति रत्नमाला॥ नागरङ्गकः। इति त्रिकाण्डशेषः॥ कर्कोटकः। इति हेमचन्द्रः॥ (शालिधान्यम्। यथा,—

"रक्तशालिः मकलमः पाण्डुकः शकुनाहृतः।
सुगन्धकः कर्दमको महाशालिश्च दूषकः॥
पुण्याण्डकः पुण्डरीकस्तथा महिषमस्तकः।
दीर्घशूकः काञ्चनको हायनो लोध्रपुष्पकः॥
इत्याद्याः शालयः सन्ति बहवो बहुदेशजाः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुगन्धतैलनिर्य्यासं, क्ली, (सुगन्धः तैलस्य निर्य्यासो यत्र।) जवादिनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

सुगन्धपत्रा, स्त्री, (सुगन्धानि पत्राणि यस्याः।) रुद्रजटा। इति राजनिर्घण्टः॥

सुगन्धभूदण्डं, क्ली, (सुगन्धो भूदण्डम्।) गन्धदण्डम्। इति राजनिर्घण्टः॥

सुगन्धमूला, स्त्री, (सुगन्धं मूलं यस्याः।) स्वनपद्मिनी। राम्रा। इति राजनिर्घण्टः॥ (लवली। तत्पर्य्यायो यथा,—

"सुगन्धमूला लवली पाण्डुः कोमलवल्कला॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुगन्धा, स्त्री, (शोभनो गन्धो यस्याः।) राम्रा। इत्यमरः। २। ४। ११४॥ शटी। इति शब्दरत्नावली॥ बन्ध्याकर्कोटकी। रुद्रजटा। शतपुष्पा। नाकुली। नवमालिका। स्वर्ण्णयूथिका। पृक्का। गङ्गापत्री। सल्लकी। माधवी। इति राजनिर्घण्टः॥ अनन्ता। मातुलुङ्गा। तुलसी। इति रत्नमाला॥ (पीठस्थानस्थदेवीविशेषः। यथा, देवीभागवते। ७। ३०। ६८।

"कोटवौ कोटतीर्थे तु सुगन्धा माधवे वने॥")

सुगन्धामलकं, क्ली, (सुगन्धमामलकम्।) मिलितौषधविशेषः। यथा,—

"सर्व्वौषधिसमायुक्ताः शुष्कास्त्वामलकत्वचः।
यदा तदायं योगः स्यात् सुगन्धामलकाभिधः॥"

इति राजनिर्घण्टः॥

सुगन्धिः, पुं, (शोभनो गन्धो यस्य। "गन्धस्येदुत्पूतिसुरभिभ्यः।" ५। ४। १३५। इति इत्।) सद्गन्धः। तत्पर्य्यायः। इष्टगन्धः २ सुरभिः ३। प्राचतर्णः ४। इत्यमरः। १। ५। ११॥ परमात्मा। इति मोक्षधर्म्मटीकायां नीलकण्ठधृतवेदः॥ सहकारः। इति शब्दचन्द्रिका॥

सुगन्धियुक्ते, त्रि, इति मेदिनी॥ (यथा, कुमारे। ३। ५६।

सुगन्धिनिश्वासविहृष्टषण्ढं
विम्बाधरासन्नचरं द्विरेफम्।
प्रतिक्षणं संभ्रमलोलदृष्टि-
र्लीलारविन्देन निवारयन्ती॥")

सुगन्धि, क्ली, (शोभनो गन्धो यस्य। इत्।) एलवालुकम्। इत्यमरः। २। ४। १२१॥ (अथ एलवालुकं कक्कोलसदृशं कुष्ठगन्धि।

"एलवालुकमैलेयं सुगन्धि हरिवालुकम्।
ऐलवालुकमेलालुकपित्थं पत्रमीरितम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) मुस्ता। कशेरु। गन्धदण्डम्। धान्यकम्। पिप्पलीमूलम्। इति राजनिर्घण्टः॥

सुगन्धिकं, क्ली, (शोभनो गन्धो यस्य। इत्। ततः स्वार्थे कन्।) कङ्कारम्। इति शब्दरत्नावली॥ पुष्करमूलम्। गौरसुवर्णम्। सुरपर्णम्। उशीरम्। इति राजनिर्घण्टः॥

सुगन्धिकः, पुं, (सु शोभनो गन्धो यस्य। इत्। ततः कन्।) महाशालिः। इति हेमचन्द्रः॥ तुरुष्कः। इति राजनिर्घण्टः॥ गन्धकः। इत्यमरटीकायां रायमुकुटः॥

सुगन्धिकुसुमः, पुं, (सुगन्धि कुसुमं यस्य।) पीतकरवीरः। इति राजनिर्घण्टः॥ सुगन्धिपुष्पे, क्ली॥

सुगन्धिकुसुमा, स्त्री, (सुगन्धि कुसुमं यस्याः।) पृक्का। इति जटाधरः॥

सुगन्धिता, स्त्री, (सुगन्धेर्भावः। तल्। टाप्।) सौगन्धिः। सौरभम्। इति हलायुधः॥ (यथा, माघे। ३। ५४।

सुगन्धितामप्रतियत्नपूर्व्वां
विभ्रन्ति यत्र प्रमदाय पुंसाम्।
मधूनि वक्त्राणि च कामिनीना-
मामोदकर्म्मव्यतिहारमौयुः॥")

सुगन्धित्रिफला, स्त्री, (सुगन्धि त्रिफलं त्रिशिराकं फलं यस्याः।) जातीफलम्। पूगफलम्। लवङ्गकलिकाफलम्। इति राजनिर्घण्टः॥

सुगन्धिनी, स्त्री, (सुगन्धोऽस्त्यस्या इति। इनिः। ङीप्।) आरामशीतला। इति राजनिर्घण्टः॥ (सुवर्णकेतकी। अस्याः पर्य्यायो यथा,

"केतकः सूचिकापुष्पो जम्बुकः क्रकचच्छदः।
सुवर्णकेतकी त्वन्या लघुपुष्पा सुगन्धिनी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुगन्धिमूलं, क्ली, (सुगन्धि मूलमस्य।) उशीरम्॥ इति राजनिर्घण्टः॥

सुगन्धिमूषिका, स्त्री, (सुगन्धिर्गन्धविशिष्टा मूषिका।) छुछुन्दरी। इति राजनिर्घण्टः॥

सुगमः, त्रि, (सु+गम+खल्।) सुखेन गम्यते प्राप्यते यः। यथा, पद्ये सुगमम्। इति सुग्धबोधीयादादिप्रकरणलिखनम्॥ (यथा, भागवते। १०। ८४। ३६।

"चित्तस्योपशमोऽयं वै कविभिः शास्त्रचक्षुषा।
दर्शितः सुगमो योगो धर्म्यश्चात्मुदावहः॥")
सुगहनः, त्रि, (सुन्दरो गहनः।) निविड़ः। इत्यमरटीकायां रामाश्रमः॥
सुगहना, स्त्री, कुम्बा। सुगहनेतिविशेषणमिति केचित्। नाम इत्यन्ये। इत्यमरटीकायां रमानाथः॥
सुगहनाकृतिः, स्त्री, कुम्बा। इत्यमरः॥ यत्रस्थाने अस्पृश्यादिदर्शनवारणाय या सुगहना निरवकाशा कृतिर्वेष्टनं सा कुम्बा। इति भरतः॥
सुगृहः, पुं, (सुन्दरं गृहं यस्य।) चक्षुःश्रवापक्षी। इति हेमचन्द्रः॥ (सुन्दरं गृहम्।) सुन्दरालये, क्ली॥
सुगृहीतः, त्रि, (सु+ग्रह+क्तः।) सुन्दररूपेण कृतग्रहणः॥
सुगृहीतनामा, [न्] पुं, (सुगृहीतं नाम यस्य।) शुभकाम्यया प्रातः स्मर्य्यते यः। स च युधिष्ठिरादिः। इति त्रिकाण्डशेषः॥
सुग्रन्थिः, पुं, (शोभना ग्रन्थयो यत्र।) चोरकः। इति राजनिर्घण्टः॥ सुन्दरग्रन्थियुक्ते, त्रि॥
सुग्रीवः, पुं, (शोभना ग्रीवा यस्य। विष्णोरश्वः। (यथा, महाभारते। २। २। १४।
"प्रययौ पुण्डरीकाक्षः शैत्यसुग्रीववाहनः॥")
प्राखासृगीश्वरः। इति मेदिनी॥ स तु सूर्य्यपुत्रः किष्किन्धाधिपतिः श्रीरामचन्द्रस्य सखा यथा, वल्मीकीये रामायणे बालकाण्डे १७ सर्गे।
"वानरेन्द्रं महेन्द्राभमिन्द्रो बालिनमात्मजम्।
सुग्रीवं जनयामास तपनस्तपतां वरः॥"
किञ्च तत्रैव किष्किन्धाकाण्डे ५ सर्गे।
"दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतम्।
तयोर्मध्ये तु सुप्रीतो निदधौ सुसमाहितः॥
ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम्।
सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ॥"*॥
अर्हत्पिता। स च वर्त्तमानयुगीयनवमजिनपिता। इति हेमचन्द्रः॥ शिवः। इन्द्रः। राजहंसः। असुरः। पर्व्वतविशेषः। अस्त्रविशेषः। नागभेदः। इति केचित्॥ शोभनग्रीवायुक्ते, त्रि। इति विश्वः॥
सुग्रीवी, स्त्री, (शोभना ग्रीवा यस्याः। ङीप्।) ताम्रागर्भजाता कश्यपदुहिता। यथा,—
"षट्सुतास्तु महासत्त्वास्ताम्रायाः परिकीर्त्तिताः।
शुकी श्येनी च भासी च सुग्रीवी शुचिगृध्रिका।
शुकी शुकाननजनयत् उलूकी प्रत्युलूकान्।
शुचीदकान् पक्षिगणान् सुग्रीवी तु व्यजायत॥"
इति गारुड़े ६ अध्यायः॥
सुग्रीवेशः, पुं, (सुग्रीवस्य ईशः।) श्रीरामचन्द्रः। इति शब्दरत्नावली॥
सुग्लः, त्रि, (सुग्लायतीति। सु+ग्लै+"आतश्चोपसर्गे।" ३। १। १३६। इति कः।) अत्यन्तदुर्बलयविशिष्टः। इति सिद्धान्तकौमुदी॥

सुचक्षुः, [स्] पुं, (शोभनं चक्षुरिव फलं यस्य।) उड़ुम्बरः। इति जटाधरः॥ शोभनलोचने, क्ली॥ तद्युक्ते, त्रि॥
सुचक्षुका, स्त्री, (सुष्ठु चक्षुरिव शिखा यस्याः। कप्। टाप्।) महाचक्षुश्शाकः। इति राजनिर्घण्टः॥
सुचरित्रा, स्त्री, (शोभनं चरित्रं यस्याः।) साध्वी। इत्यमरः। २। ६। ६॥ शोभनचरित्रयुक्ते, त्रि॥
सुचर्म्मा, [न्] पुं, (शोभनं चर्म्म यस्य।) भूर्जवृक्षः। इति राजनिर्घण्टः॥ शोभनचर्म्मविशिष्टे, त्रि॥
सुचारुः, त्रि, (शोभनश्चारुश्च।) मनोहरः। यथा, कालिकापुराणोक्तदशभुजादुर्गाध्याने।
"सुचारुदशनां तद्वत् पीनोन्नतपयोधराम्॥"
सुचित्रकः, पुं, (सुन्दराणि चित्राणि यत्र।) मत्स्यराजः। चित्रसर्षः। इति शब्दरत्नावली॥ सुन्दरचित्रयुक्ते, त्रि॥
सुचित्रबीजा, स्त्री, सुचित्रं बीजं यस्याः।) बिड़ङ्गा। इति राजनिर्घण्टः॥
सुचित्रा, स्त्री, (शोभनानि चित्राणि यस्याः।) चिर्भिटा। इति राजनिर्घण्टः॥
सुचिरायुः, [स्] पुं, (सुचिरं आयुर्यस्य।) देवता। इति शब्दरत्नावली॥
सुचुटो, स्त्री, अन्यायद्युदरणार्थलौहादियन्त्रविशेषः चिम्टा इति भाषा। इति केचित्॥
सुचेलकः पुं, (शोभनश्चेलकः।) शोभनवस्त्रम्। सरु कापड़ इति भाषा। तत्पर्य्यायः। पटः २। इत्यमरः। २। ६। ११६॥ पटिः ३ पटी ४। इति तट्टीका॥ सुन्दरवस्त्रयुक्ते, त्रि॥
सुच्छत्री, स्त्री, शतदुन्दौ। इति शब्दरत्नावली॥ शतलज् इति ख्याता॥
सुजनः, पुं, (सु सुन्दरो जनः। साधुः। सज्जनः। यथा,—
"दुर्ज्जनस्य हि सङ्गेन सुजनोऽपि विनश्यति।
प्रसङ्गं जलमित्याहुः कर्दमैः कलुषीकृतम्॥"
इति गारुड़े १५ अध्यायः॥
सुजनता, स्त्री, (सुजनस्य भावः। तल्। टाप्।) सौजन्यम्। यथा,—
"धिगस्त्वेतां विद्यां धिगपि कवितां धिक्सुजनतां
वयो रूपं वा धिक् धिगपि च यशो निर्धनवताम्।
असौ जीयादेकः सकलगुणहीनोऽपि धनवान्
वहिर्यस्य द्वारे दशबलसमाः सन्ति गुणिनः॥"
इत्युद्भटः॥
सुजलं, क्ली, (शोभनं जलं यस्मात्। कमलम्। इति राजनिर्घण्टः॥ सुन्दरसलिलञ्च॥ सुन्दरजलसम्बन्धिनि, त्रि॥
सुजल्पः, पुं, (सुन्दरो जल्पः कथनम्।) वाक्यविशेषः। यथा,—
"यत्राज्ञानात् सगाम्भीर्य्यं सदैन्यं सहचापलम्
सोत्कण्ठञ्च हरिः स्मृतः स सुजल्पो निगद्यते॥"
इत्युज्ज्वलनीलमणिः॥

सुजाता, स्त्री, (सु+जन+क्तः।) तुवरी। इति राजनिर्घण्टः॥
सुजीवन्ती, स्त्री, (सुजीवतीति। सु+जीव+शतृ। ङीप्।) स्वर्णजीवन्ती। इति राजनिर्घण्टः॥
सुट्, क तौच्छ्ये। अनादरे। इति कविकल्पद्रुमः (चुरा॰-परः-सक॰-सेट्।) पञ्चमस्वरी टइयान्तः। क, सुट्यति। दन्त्यादिरयमिति भीमः। तौच्छ्यमस्त्रीभावः। इति दुर्गादासः॥
सुतः, पुं, (सूयते स्मेति। सु+क्तः।) पुत्रः। इत्यमरः। २। ६। २७॥ "सूयते सुतः कर्म्मणि क्तः। पुतो नरकभेदात् त्रायते इति पुत्रः। 'पुन्नाम्नो नरकादयस्मात् पितरं त्रायते सुतः। तस्मात् पुत्र इति ख्यातः स्वयमेव स्वयम्भुवा॥'
इति स्मृतिः॥
किंवा पुनाति मातापितराविति त्रैसुसिति वे निपातात् ङस्त्वे पुत्रः। पुत्रो हितकारः एकतकारश्च।" इत्यमरटीकायां भरतः॥ * ॥
मातृपितृस्वभाववत्स्वभावे सुतकन्ये भवतः। यथा,—
"शौलं संभजते पुत्रो मातुस्तातस्य वै सुता।
यथाशीला भवेन्माता तथाशीलो भवेत् सुतः॥
यदर्णा वै भवेद्भूमिस्तदर्णं सलिलं भवेत्॥
मातृणां शीलदोषेण पितृशीलगुणेन च।
विभिन्नास्तु प्रजाः सर्व्वा भवन्ति भवशीलिनाम्॥"
इति वह्निपुराणे काश्यपीयवंशः॥
पार्थिवः। इति मेदिनी॥*॥ (उत्पन्ने, त्रि॥)
सुतजीवकः, पुं, (सुतं जीवयतीति। जीव+ण्वुल् पुत्रजीवकवृक्षः। इति राजनिर्घण्टः॥
सुतनुः, स्त्री, (शोभना तनुर्यस्याः।) नारी। इति राजनिर्घण्टः॥ (शोभना तनुः शरीरम्।) शोभनशरीरम्॥ तद्युक्ते, त्रि॥ (यथा, उत्तरचरिते १ अङ्के।
"स्मरसि सुतनु! तस्मिन् पर्व्वते लक्ष्मणेन प्रतिविहितसपर्य्यासुस्थयोस्त्वान्यहानि॥")
सुतपाः, [स्] पुं, (सुष्ठु तपतीति। सु+तप्+"गतिकारकरोः पूर्व्वपदप्रकृतिस्वरत्वम्।" उणा॰ ४।२२६। इति असिः।) सूर्य्यः। इति सिद्धान्तकौमुदी॥ शोभनं तपो यस्य। मुनिः॥ (रौच्यमनुपुत्रविशेषः। इति मार्कण्डेयपुराणम् ८४। २५॥ विष्णुः। इति महाभारतम्। १३। १४८। ३४॥ उग्रतपस्यायुक्ते, त्रि। यथा, कथासरित्सागरे। ११२। १४१।
"स एव जातः संकल्पदोषाद्याकुले द्विजः।
भार्य्यास्य सा च सुतपा जातेयं ते सुता नृप॥")
सुतपादिका, स्त्री, (सुताः समकालोनमुत्पन्नाः पादा मूलानि यस्याः। कप्। टापि अत इत्वम्।) इंसपदी। इति राजनिर्घण्टः॥
सुतरां, व्य, (सु+द्विवचनविभज्येत्यादिना तरप्।) अवधारितार्थप्रतिपादकम्। यथा। क्रियेव काल इति मते तु सुतरां नाधिकरणता। इति

सपिण्डीकरणसमाख्यासिद्ध्यर्थं सुतरां तत्रतया-चरणम्। इति च तिथ्यादितत्त्वम्॥ अपि च।
"अपुत्रा जन्मिनः पापात् प्राणिनः समवस्थिताः।
मनुजास्तत्र सुतरां भवन्ति गृहकर्म्मिणः॥"
इति पाद्मे सृष्टिखण्डे ४३ अध्यायः॥
"शृणु द्विज महाबुद्धे दग्धेनापि स्मृतो हरिः।
ददाति मोक्षं सुतरां किं पुनर्ह्यभवर्जनात्॥"
इति तत्रैव पातालखण्डम्॥

सुतकारी, स्त्री, देवदालीलता। इति राजनिर्घण्टः॥

सुतर्दनः,पुं,(सुष्ठु तर्दति पीड़यति विरहिनमिति तर्द् अर्दने+ल्युः।)कोकिलः। इति त्रिकाण्डशेषः॥

सुतलः, पुं, (शोभनं तलं यत्र।) अट्टालिकाबन्धः। नागलोकप्रभेदः। इति मेदिनी॥ स तु पातालषष्ठखण्डः। तद्विवरणं यथा,—
"ततोऽधस्तात् सुतलं उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा वटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकम्प्यैवपुनः प्रवेशित इन्द्रादिष्वविद्यमानया सुसम्पदया श्रियाभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवन्तमाराधनोद्यमपगतसाध्वस आस्ते अधुनापि।"
इति श्रीभागवते। ५। २४। १८॥ (तथाच देवीभागवते। ८। १९। १३—१२।
"ततोविलाधस्तात् प्रोक्तं सुतलाख्यं विलेश्वरम्
पुण्यश्लोको बलिर्नाम आस्ते वैरोचनिर्मुने!॥
महेन्द्रस्य च देवस्य चिकिर्षुः प्रियमुत्तमम्।
त्रिविक्रमोऽपि भगवान् सुतले बलिमानयत्॥
त्रैलोक्यलक्ष्मीमाविश्य स्थापितः किल दैत्यराट्।
इन्द्रादिष्वप्यलभ्या या सा श्रीस्तमनुवर्त्तते॥
तमेव देवदेवेशमाराधयति भक्तितः।
व्यपेतसाध्वसोऽद्यापि वर्त्तते सुतलाधिपः॥
* * * *
एवं दैत्यपतिः सोऽयं बलिः परमपूजितः।
सुतले वर्त्तते यस्य द्वारपालो हरिः स्वयम्॥
एकदा दिग्जये राजा रावणो लोकरावणः।
प्रविशन् सुतले येन भक्तानुग्रहकारिणा॥
पादाङ्गुष्टेन प्रक्षिप्तो योजनायुतमत्र हि॥
एवम्प्रभावोऽयं बलिः सर्व्वसुखैकभुक्।
आस्ते सुतलराज्यस्थो देवदेवप्रसादतः॥")

सुतवत्करा, स्त्री, (सुताः वत्कराः पक्षिण इव बहुत्वात् यस्याः।) सप्तपुत्रप्रसूः। इति त्रिकाण्डशेषः॥

सुतश्रेणी, स्त्री, (सुता उत्पन्ना श्रेणी यस्याः। एकत्र बहुजातत्वात् तथात्वम्। मूषिकपर्णी। इत्यमरः।२। ४। ८८॥ उन्दुरविलोया इति हिन्दी भाषा। तत्पर्य्यायः। द्रवन्ती २ न्यग्रोधी ३ मूषिकाह्वया ४ चिपा ५ मूषकमारी ६ प्रत्यक्श्रेणी ७ अम्बरी ८। अस्या गुणाः। चक्षुष्यत्वम्। कटुत्वम्। वातुविषव्रणदोषनेत्रामयनाशित्वञ्च। इति राजनिर्घण्टः॥ पुस्तकान्तरे सुतश्रेणीति च पाठः॥

सुतद्विषुकयोगः, पुं, विवाहोक्तयोगविशेषः। यथा, ज्योतिःसारसंग्रहे।
"सुतद्विषुकवियद्दिलग्नधर्म्मे-
ष्वमरगुरुर्यदि दानवार्चितो वा।
यदशुभमुपयाति तच्छुभं स्यात्
शुभमतिदृढिमुपैति तत्प्रभावात्॥"
अपि च ज्योतिस्तत्त्वे।
"लग्ने तत्पञ्चमे तूर्य्ये नवमे दशमे तथा।
गुरुर्भृगुर्व्वा दोषघ्नो विवाहे वर्द्धते शुभम्॥"
अयमेव सुतद्विषुकयोगः॥

सुता, स्त्री, (सूयते स्म या। सु+क्तः। टाप्।) कन्यापत्यम्। कन्या। इति मेदिनी॥ यथा—
"आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी।
आदुर्दुहितरं सर्व्वे————॥"
इत्यमरः। २। ६।२७-२८॥
"अमी आत्मजाद्याः स्त्रियां वर्त्तमाना दुहितरमाहुः। यथा। आत्मजा। तनया। सूनोः प्रत्ययान्तराभावात् स्त्रियामपि सूनुरेव। सुता पुत्रा। स्वार्थे के केऽकस्य इति ह्रस्वत्वे ह्रे षसुतपुत्रेत्यादिना विभाष्या अत इति पुत्रिका पुत्रिका च। शोणादिपाठात् पुत्री च। मा भैषीः पुत्रि सीतेति महानाटकम्।" इति तट्टीकायां भरतः॥ (यथा, भट्टिः। २। ४७।
"हिरण्मयी शालतेव जङ्गमा
च्युतादिव स्वाद्रिवाचिरप्रभा।
शशाङ्कान्तरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली॥")
दुरालभा। इति शब्दचन्द्रिका॥

सुतात्मजः,पुं, (सुतस्य सुताया वा आत्मजः।) पौत्रः। दौहित्रः। इति सुतात्मजशब्ददर्शनात्॥

सुतात्मजा, स्त्री, (सुतस्य सुताया वा आत्मजा) पौत्री। दौहित्री। इत्यमरः। २। ६। २८॥

सुतारका, स्त्री, (शोभने तारके यस्याः।) चतुर्विंशतिबुद्धासनदेवतान्तर्गतदेवताविशेषः। इति हेमचन्द्रः॥ शोभनतारकायुक्ते, त्रि॥

सुतिक्तः, पुं, (सुष्ठु तिक्तः।) पर्पटः। इति राजनिर्घण्टः॥

सुतिक्तकः,पुं,(सुष्ठु तिक्तः। ततः कन्।) पारिभद्रः। इति जटाधरः॥ भूनिम्बः। इति शब्दरत्नावली॥

सुतिक्ता, स्त्री, (सुष्ठु तिक्ता।) कोषातकी। इति राजनिर्घण्टः॥

सुतीः, त्रि, पुत्रेच्छुः। पुत्रवदाचरणकर्त्ता। इति मुग्धबोधव्याकरणम्॥

सुतीन,[न्] त्रि,(सुतमस्यास्तीति। इनिः।) सुतविशिष्टः। यथा, हितोपदेशे।
"गुणिगणगणनारम्भे
न पतति कठिनी ससम्भ्रमात् यस्य।
तेनाम्बा यदि सुतिनी
वद वन्ध्या कीदृशी भवति॥"

सुतीक्ष्णः,पुं,(सुष्ठु तीक्ष्णः।) शोभाञ्जनः। इति जटाधरः॥ श्वेतशिग्रुः। इति राजनिर्घण्टः॥ मुनिविशेषः। यथा, भट्टौ ४ सर्गे।
"पुरो रामस्य शुश्राव सुतीक्ष्णस्कार ज्वलने वपुः।
शरभङ्गः प्रदिक्षारात् सुतीक्ष्णमुनिकेतनम्॥"
अतिशयखरे, त्रि॥ (यथा, ऋतुसंहारे।१।२८।
"समदमधुकराणां कोकिलानाञ्च नादैः
कुसुमितसहकारैः कर्णिकारैश्च रम्यैः।
द्रुमभिरिव सुतीक्ष्णैर्मानसं मानिनीनां
तुदति कुसुमबाणो मन्मथोद्दीपनाय॥")

सुतुङ्गः, पुं,(सुष्ठु तुङ्गः।) नारिकेलवृक्षः। इति शब्दरत्नावली। १००॥ अष्टादशां उद्यानविशेषः। तस्य नामान्तरं अन्यतुङ्गः। यथा, सङ्गीतसुत्रावल्याम्।
"सूर्य्यायुधान् क्रियद्वपङ्कगस्त्रीकुलीरान्त्यर्यके दिग्वक्त्रीन्द्रहयतिथिग्रहान् सप्तविंशांश्च विंशान् अंशानेतान् वदति जवनस्तान्यतुङ्गान् सुतुङ्गान् तानेवांशान् मदनभवनेष्वाह नीचान् सुनीचान्॥"
अतिशयोच्चे, त्रि॥

सुतेजनः, पुं,(सुतेजयतीति। सु+तिज+ल्युः।) धन्वन्तरुवृक्षः। इति भावप्रकाशः॥ (तस्य गुणाः।
"धन्वद्रुः कफपित्तास्रकासकृच्छ्रसुखरो लघुः।
दृंहणो बलकृद्वृष्यः सन्धिकृद्व्रणरोपणः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुतेजाः,[स्] पुं,(सुष्ठु तेजो यस्य। यद्वा,सुतेजयतीति। सु+तिज+"गतिकारकयोरिति।" उणा० ४। २२६। इति असिः।) अतीतकल्पीयार्हदेवः। इति हेमचन्द्रः। आदित्यभक्ता। इति राजनिर्घण्टः॥ शोभनतेजोयुक्ते, त्रि॥ (यथा, छान्दोग्योपनिषदि। ५।१२।१।
"एष वैसुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से॥")

सुतैला, स्त्री, (सुष्ठु तैलमस्यामिति।) महाज्योतिष्मती। इति राजनिर्घण्टः॥

सुत्रामा,[न्]पुं,(सु+त्रै+मनिन्।)इन्द्रः। इत्यमरः। १।१।४५॥ सुष्ठु त्रायते भुवनं सुत्रामा आसुसिति मन् सोः पक्षे दीर्घत्वं सूत्रामा च। इति रुद्रः। इति भरतः॥ (यथा,अथर्व्वाष्टके।३।
"यत्राग्नयो मरुतो यत्रागजा वसतु कुत्रापि निस्तुलशुका
सुत्रामकालसुखसम्भावनप्रकरसुत्राणकारिचरणा॥"
वाजसनेयिभिरपि दृश्यते। यथा, वाजसनेयसंहितायाम्। १०। ५१।
"इन्द्राय सुत्रामृचे पच्यस्व।"
"सुष्ठु त्रायते इति सुत्रामा तस्मै सुत्रामृचे शोभनत्राणकर्त्रे सुत्रातमाय वा इन्द्राय पच्यस्व" इति तद्भाष्यम्॥)

सुत्वा, [न्] पुं, (सु + "सुयजोर्ङ्वनिप्।" ३।२। १०३। इति ङ्वनिप्।) अभिषवे क्रतौ। इत्यमरः। २। ७। ४७॥ अभिषवः स्नानमात्रं इह तु प्रस्तावात् यज्ञाङ्गस्नानं तत् कृतवान् यः स सुत्वा कथ्यते। सुञः क्वनिप् तन् सुत्वा क्रतौति अधीतिवत्। क्रते इति पाठे सप्तमी। इति भरतः॥

सुद, इ शोभे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) सुन्दरम्। इति दुर्गादासः॥ सौत्रधातुरयम्॥

सुदग्धिका, स्त्री, (सुष्ठु दग्धं दाहोऽस्यस्या इति सुदग्ध + ठन्।) दग्धानामहत्त्वः। इति राजनिर्घण्टः॥

सुदण्डः, पुं, (शोभनो दण्डो यस्मात्।) वेत्रः। इति राजनिर्घण्टः॥

सुदण्डिका, स्त्री, गोरक्षी। इति राजनिर्घण्टः॥

सुदन्, [त्] त्रि,(शोभना दन्ता यस्य। "वयसि दन्तस्य दत्।" ५।४।१४१। इति दत्।) शोभनदन्तविशिष्टः। (स्त्रियां ङीप्। यथा, रघुः। ६।३७।

"विधाय सृष्टिं ललितां विधातु-
र्जगाद भूयः सुदतीं सुनन्दा॥"

शोभनो दत् दन्तः इति विग्रहे सुदत् इत्येव स्यात्। शोभनदन्तः। यथा, भागवते। ३। २३। ३२।

"सुस्रुवा सुदता श्रुक्सिधापाङ्गेन चक्षुषा। पद्मकोशस्रुधा नीलैरलकैश्च लसन्मुखम्॥")

सुदन्तः, पुं,(शोभनो दन्तो यस्य। वयोगम्यमानाभावात् न दत्रादेशः।)नटः। इति केचित्। शोभनदन्तश्च॥

सुदन्ती, स्त्री, (शोभनो दन्तो यस्याः। ङीप्। वयोगम्यमानाभावात् न दत्रादेशः।) दिक्करिणीविशेषः। शुभदन्तीशब्ददर्शनादिति केचित्॥

सुदर्भा, स्त्री,(सुष्ठु दर्भो यत्र!) इक्षुदर्भा। इति राजनिर्घण्टः॥ शोभनकुशयुक्ते, त्रि॥

सुदर्शनं, क्ली, (सुष्ठु दृश्यते इति। सु + दृश् + ल्युट्। शोभनं दर्शनमस्येति वा।) इन्द्रनगरम्। इति मेदिनी॥

सुदर्शनः,पुं,क्ली,(शोभनं दर्शनमस्येति।)विष्णुचक्रम्। इत्यमरः। १।१।२८। तस्योत्पत्तिर्यथा,—

"तस्मात् प्रसादं कुरु मे यदनुग्रहभागहम्। अपनेष्यामि ते तेजः कृत्वा यन्त्रे दिवाकर॥ रूपं तव करिष्यामि लोकानन्दकरं प्रभो। तथेत्युक्तः स रविणा भ्रमौ कृत्वा दिवाकरम्॥ पृथक् चकार तत्तेजश्चक्रं विष्णोरकल्पयत्। त्रिशूलञ्चापि रुद्रस्य वज्रमिन्द्रस्य चाधिकम्। दैत्यदानवसंहर्त्तुः सहस्रकिरणात्मकम्॥"

इति मात्स्ये। ११।२७-३०॥*॥

अपि च पाद्मोत्तरखण्डे १४५ अध्याये।

ईश्वर उवाच।

"नायमेभिर्महातेजाः शस्त्रास्त्रैर्वध्यते मया। देवाश्च स्वतेजांसि शस्त्रार्थं दीयतां मम॥

नारद उवाच।

अथ विष्णुमुखा देवाः स्वतेजांसि ददुस्तथा। तान्यैक्यं वै गतानीशो दृष्ट्वा स्वास्यमुवन्मुहः॥ तेनाकरोन्महादेवः सहसा शस्त्रमुत्तमम्। चक्रं सुदर्शनं नाम ज्वालामालातिभीषणम्। तेजःशेषेण च तथा वज्रञ्च कृतवान् हरः॥" तच्च शिवेन विष्णवे दत्तम्। यथा,—

"ततः प्रीतः प्रभुः प्रादात् विष्णवे प्रवरं वरम्। प्रत्यक्षं तेजसां श्रीमान् दिव्यं चक्रं सुदर्शनम्॥ तद्दत्त्वा देवदेवाय सर्व्वभूतभयप्रदम्। कालचक्रनिभं चक्रं शङ्करो विष्णुमब्रवीत्॥ वरायुधोऽयं देवेश सर्व्वायुधनिवर्हणः। सुदर्शनो द्वादशारो यो मनःषट्शो जवी॥ आरात् स्थिता अमी चात्र देवा मासाश्च राशयः। शिष्टानां रक्षणार्थाय संस्थिता ऋतवस्तु षट्॥ अग्निः सोमस्तथा मित्रो वरुणश्च प्रजापतिः। इन्द्राग्नी चाप्यथो विश्वे प्रजापतय एव च॥ हनूमांश्चाथ बलवान् देवो धन्वन्तरिस्तथा। तूणस्थेव तापसश्च द्वादशैते प्रतिष्ठिताः॥ चत्रांद्याः फाल्गुनान्ताश्च मासास्तत्र प्रतिष्ठिताः॥

त्वमेवमादाय विभो वरायुधं
शत्रुं सुराणां जहि मा विशङ्किथाः।
अमोघ एषोऽमरराजपूजितो
धृतो मया देहगतस्तपोबलात्॥"

इति वामने ७८ अध्यायः॥*॥

वैष्णवाङ्के तच्चिह्नधारणविधिः यथा। ब्रह्माण्डे। "कृत्वा धातुमयीं मुद्रां तापयित्वा स्वकां तनुम्। चक्रादिचिह्नितां भूप धारयेद्वैष्णवो नरः॥"

नारदीयपञ्चरात्रे।

"द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम्। हरेः सुदर्शनं तस्मं धारयेत्तद्विचक्षणः॥"

इति श्रीहरिभक्तिविलासे १५ विलासः॥

अन्यत् सुदर्शनशब्दे द्रष्टव्यम्॥*॥ श्रीमन्दिरोपरि देयतच्चक्रप्रमाणं यथा—

विस्तारार्द्धमानं चक्रन्तु त्रिभागेणाथ कारयेत्। द्वात्रिंशदङ्गुलं ज्येष्ठं कनिष्ठं त्वष्टधानितः॥ प्रतिमातूर्य्यभागेन कारयेद्वा सुदर्शनम्। लोहजं शैलजं वापि कारयेच्चक्रपूर्व्वकम्॥ अष्टारं द्वादशारं वा मध्ये मूर्त्तिसमन्वितम्। नारसिंहेन रौद्रेण विश्वरूपेण वा पुनः॥" इत्यादि॥*॥

"अधिवास्य विधानेन चक्रं दण्डं ध्वजं तथा। देववत् सकलं कृत्वा मण्डपस्थापनादिकम्॥ नेत्रोन्मीलनकं कृत्वा पूर्व्वोक्तं सर्व्वमाचरेत्। अधिवासयेत विधिना शय्यायां प्राप्य देशिकः॥ ततः सहस्रशीर्षेति सूक्तं चक्रे न्यसेद्धुधः।

तथा सौदर्शनं मन्त्रं मनस्तत्त्वं निवेशयेत्॥ मनोऽनुरूपेणास्त्रेण सजीवकरणं स्मृतम्। पारिषु मूर्त्तयो न्यस्याः केशवाद्याः सुरोत्तमाः॥ नाभ्यञ्चप्रतिनेमीषु न्यसेत्तत्त्वानि देशिकः। नारसिंहं विश्वरूपमध्ये निवेशयेत्॥ सकलं विन्यसेद्दण्डे सूत्रात्मानं सजीवकम्। निष्कलं परमात्मानं ध्वजे ध्यायन् न्यसेद्धरिम्॥ तच्छक्तिं व्यापिनीं ध्यायेत् ध्वजरूपाम्बुजानाम्। ततो मण्डपमध्येतु स्नाप्य पुण्य यथाविधि॥ पूर्व्वोक्तेन विधानेन होमं कुण्डेषु कारयेत्॥ ततः प्रभातसमये मूर्त्तिपैः सह देशिकः। मूर्त्तिपः आचार्य्यः। कलसे स्वर्णशकलं न्यस्य रत्नानि पञ्च च। स्नापयेच्चक्रमन्त्रेण स्वर्णचक्रमधस्ततः॥ पारदेन तु संप्लाव्य नेत्रपट्टेन स्नापयेत्। ततो निवेशयेच्चक्रं द्वादशारं सुदर्शनम्॥ दुर्निरीक्ष्यं सुरैर्दैत्यैर्भ्रमद्भिस्तु लिङ्गकम्। तन्मध्ये चिन्तयेद्देवं नृसिंहं दैत्यनिर्दलम्॥ स्फुरत्सौदामिनीजिह्वं ज्वलज्ज्वलनकेशरम्। दीप्तार्कनयनं चन्द्रकोटिभास्वरदंष्ट्रिणम्॥ तप्तस्य तपनीयस्य सदृशं परुषाननम्। सर्व्वदुष्टहरं देवं दुर्ज्ञेयं देवदानवैः॥ सर्व्ववर्णास्तबीजेन चतुर्थ्यन्तेन च। बिन्दुनालङ्कृतेनादौ प्रणवेन प्लुतेन च। अन्ते प्रकृतियुक्तेन स्नापयेद्दृष्टनाशनम्॥"

इति श्रीहरिभक्तिविलासे १८ विलासः॥*॥

चक्रमन्त्रो यथा। ॐ नमो भगवते सुदर्शनाय निर्णाशितसकलरिपुध्वजाय भगवन्नारायणकराम्भोरुहस्वर्णदुर्ल्लक्षिताय।

"एह्येहि त्वं सहस्रार चक्रराज सुदर्शन। यज्ञभागं प्रगृह्यास्य पूजाञ्चैव नमो नमः॥"

इति च तत्रैव १५ विलासः॥

सुमेरुः। जम्बूवृक्षः। इति मेदिनी॥ (यथा, मात्स्ये। ११३। ७४—७५।

"सुदर्शनो नाम महान् जम्बूवृक्षः सनातनः। नित्यपुष्पफलोपेतः सिद्धचारणसेवितः॥ तस्य नाम्ना समाख्यातो जम्बूद्वीपो वनस्पतेः। योजनानां सहस्रञ्च शतधा च महान् पुनः॥ उत्तरो हत्तरराजस्य दिवमाहत्य तिष्ठति॥")

हत्तार्हत्पिता। जिनानां बलदेवः। इति हेमचन्द्रः॥ (मत्स्यः। तत्पर्य्यायो यथा,—

"मत्स्यो मीनो विसारश्च झषो वैसारिणोऽण्डजः। शकुली पृथुरोमा च स सुदर्शन इत्यपि। रोहिताद्यास्तु ये जीवास्तेमत्स्याःपरिकीर्त्तिताः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे हितीये भागे॥)

सुदर्शनः, त्रि, सुदृश्यः। सुखेन दृश्यते असौ इति सुपूर्व्वकदृशधातोः कर्म्मण्यनप्रत्ययेन निष्पन्नः। इति सुग्धशोधटीकायां दुर्गादासः॥ (शोभनं दर्शनं यस्येति वा। यथा, भागवते।४।२४।५१

"श्यामश्रोण्यधिरोचिष्णुदुकूलस्वर्णमेखलम्। समचार्व्यङ्घ्रिजङ्घोरु निम्ननाभ्युदरं नम॥"

सुदर्शनचूर्णं, क्ली, (सुदर्शनं सुदृश्यं चूर्णं यस्य ।) ज्वररोगस्य औषधविशेषः । यथा,—
"त्रिफला रजनीयुग्मं कण्टकारीयुगं वटी ।
त्रिकटु ग्रन्थिकं मूर्व्वा गुडूची धन्वयासकः ॥
कटुका पर्पटो मुस्तं चायमाणा च वालुकम् ।
निम्बं पुष्करमूलञ्च मधुयष्टी च वल्लकः ॥
यवानीन्द्रयवो भार्गी ग्रिगुबीजं सुराष्टजा ।
वचा त्वक् पद्मकोशीरचन्दनातिविषाबलाः ॥
शालिपर्णी पृश्निपर्णी विड्ङ्गं तगरं तथा ।
चित्रकं देवकाष्ठञ्च चव्यं पत्रं पटोलजम् ॥
जीवकर्षभकौ चैव लवङ्गं वंशलोचना ।
पुष्करीकञ्च काकोलिपत्रकं जातिपत्रकम् ॥
तालीशपत्रमेतानि समभागानि चूर्णयेत् ।
अर्द्धांशं सर्व्वचूर्णस्य किरातं प्रक्षिपेत् सुधीः ॥
एतत् सुदर्शनं नाम चूर्णं दोषत्रयापहम् ।
ज्वरांश्च निखिलान् हन्यान्नात्र कार्य्या विचारणा ॥
पृथग्द्वन्द्वागन्तुजांश्च धातुस्थान् विषमज्वरान् ।
सन्निपातोद्भवांश्चापि मानसानपि नाशयेत् ॥
श्रोतादीनपि दाहादीन् मोहं तन्द्रां भ्रमं क्लमम् ।
कासं श्वासञ्च पाण्डुञ्च हृद्रोगं कामलामपि च ॥
त्रिकपृष्ठकटीजानुपार्श्वशूलञ्च नाशयेत् ।
श्रोताम्बुना पिबेदेतत् सर्व्वज्वरनिवृत्तये ॥
सुदर्शनं यथा चक्रं दानवानां विनाशनम् ।
तद्वज्ज्वराणां सर्व्वेषां चूर्णमेतत् प्रणाशनम् ॥"* पुष्करमूलाभावे कुष्ठमपि दद्यात् । भार्ग्यभावे कण्टकारीमूलम् । सौराष्ट्राभावे स्फुटिकां दद्यात् । तमरालाभे कुष्ठं देयम् । जीवकर्षभयोरभावे विदारीकन्दस्य भागद्वयं दद्यात् । पुण्डरीकं श्वेतकमलम् । काकोल्यभावे अश्वगन्धामूलं दद्यात् । तालीशपत्रकाभावे स्वर्णतालो प्रदीयते इति । अथवा कण्टकारीजटा देया । इति भावप्रकाशः ॥

सुदर्शनद्वीपः, क्ली, (सुदर्शनस्य तन्नाम्ना प्रसिद्धस्य जम्बूवृक्षस्य द्वीपम् ।) जम्बूद्वीपम् । इति पुराणम् ॥

सुदर्शना, स्त्री, (सुखेन दृश्यतेऽसौ । सु + दृश + भावायां शासियुधीति युच् । टाप् ।) सुदर्शनवृक्षः । सुदर्शनगुलञ्च इति पद्मगुल इति च ख्यातः । तत्पर्य्यायः । चक्राङ्गा २ दृश्यकर्णी ३ दृश्यानी ४ । इति रत्नमाला ॥ सोमवल्ली ५ मधुपर्णिका ६ चक्राङ्गा ७ । अस्या गुणाः । स्वादुत्वम् । उष्णत्वम् । कफशोफास्रवातनाशित्वञ्च । इति भावप्रकाशः ॥ विषनाशित्वम् । इति राजवल्लभः ॥ आद्या । औषधिविशेषः । इति विश्वमेदिन्यौ ॥

सुदर्शनी, स्त्री, (सुष्ठु दर्शनं यस्याः । ङीप् ।) अमरावती । इति विश्वः ॥

सुदलः, पुं, (सुष्ठु दलमस्य ।) चौरमोरटा । इति रत्नमाला ॥

सुदला, स्त्री, (सुष्ठु दलान्यस्याः ।) शालपर्णी । तरुणी । इति राजनिर्घण्टः ॥

सुदान्तः, पुं, (सुष्ठु दान्तः ।) शाक्यमुनिशिष्यविशेषः । इति त्रिकाण्डशेषः ॥ (अतिशयशान्ते, त्रि । यथा, महाभारते ।१।३८।१२ ।
"सुदान्तानपि चेवाहं दद्यामष्टादशापरान् ॥")

सुदाता, [तृ] पुं, (सुष्ठु ददातीति । दा + "आतो मनिन्क्वनिप्वनिपश्च ।" ३ । २ । ७४ इति मनिन् ।)मेघः । पर्व्वतः । इति मेदिनी ॥ गोपभेदः । समुद्रः । इति शब्दरत्नावली ॥ ऐरावतः । इति त्रिकाण्डशेषः ॥ श्रीकृष्णशरणागत-विप्रविशेषः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११२ अध्याये ।
"सद्यो जहार दारिद्र्यं सुदाम्नो ब्राह्मणस्य च ।
समागतस्य स्वगृहात् द्वारकां शरणार्थिनः ॥"

सुदामा, [न्] पुं, (सु + दा + मनिन् ।) सुदाता सुष्ठु ददातीत्यर्थे मन्प्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

सुदामा, स्त्री, नदीविशेषः । यथा, वाल्मीकीये रामायणे अयोध्याकाण्डे ७० सर्गे ।
"स प्राप्य खो राजगृहादभिनिर्याय वीर्य्यवान्
ततः सुदामां ह्यतिमान् सन्तीर्य्याविक्ष्य तां नदीम् ॥"

सुदायः, पुं, (सुष्ठु दीयते इति । सु + दा + घञ् युगागमः ।) देयद्योतकादि । इत्यमरः । २ । ८ । २८ ॥ यथा । यौतकं आदिना उपनयनभिक्षाप्रसादादि च यत् देयं तत् दायहरणपदवाच्यम् । कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्राह्मणादिभ्यश्च यद्द्रव्यं दीयते तत्र दायादिदयमित्यर्थः । युतकं योनिसम्बन्धः तत्र भवमिति छो यौतकम् । युतयोर्व्वधूवरयोरिदमिति वा कणि यौतकम् । यौतुकमुकारमध्यमपि । यौतकं यौतुकञ्च तत् । इति वाचस्पतिः दीयते दायः कर्म्मणि घञ् सुष्ठु दीयते सुदाय इति पाठ इत्यन्ये । इति भरतः ॥ पितृमातृभर्त्तृकुलसम्बन्धो । यथा,—
"सुदायेभ्यः पितृमातृभर्त्तृकुलसम्बन्धिभ्यो लब्धं सौदायिकम् ।" इति दायतत्त्वम् ॥

सुदारुः, पुं, (सुष्ठु दारु यत्र ।) पारिपात्रपर्व्वतः तत्पर्य्यायः । पारिपात्रिकः २ । इति हेमचन्द्रः ॥

सुदि, व्य, शुक्लपक्षः । इति पञ्चिमदेशे प्रसिद्धः ॥

सुदिनं, क्ली, (शोभनं दिनम् ।) शुभदिवसः । यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ४३।४८।५१ ।
"सुदिनं दुर्दिनं शश्वत् भ्रमत्येव भवे भव ।
सर्व्वेषां प्राक्तनानाञ्च हे बीजे सुखदुःखयोः ॥
सुदिनं दुर्दिनञ्चैव सर्व्वं कर्म्मोद्भवं भव ।
तत्कर्म्म तपसा साध्यं कर्म्मणाच्च शुभाशुभम् ॥"

सुदिनाह्नं, क्ली, (सुदिनेषु शुभदिनेषु अह्नः शुभदिनम् । यद्वा, सुदिनं प्रशस्तमह्नः । टच् समासे ।) प्रशस्तदिनम् । यथा । उत्तमैकाभ्याञ्च । आभ्यामह्नादेशो न । उत्तमशब्दः अन्यार्थः पुण्यशब्दमाह । पुण्येकाभ्यामित्येव सूत्रयितुमुचितम् । पुण्याह्नम् । सुदिनाह्नम् । सुदिनशब्दः प्रशस्तवाची । इति सिद्धान्तकौमुदी ॥

सुदीर्घः, त्रि, (सुष्ठु दीर्घः ।) अतिविस्तारः । यथा,—
"विवाह्य योन्नियैर्भुक्तं राज्ञामात्मैस्तथैव च ।
सुदीर्घेणापि कालेन तेषां तत्तु न सिध्यति ॥"
इति व्यवहारतत्त्वम् ॥

सुदीर्घघर्म्मा, स्त्री, (सुदीर्घः अतिशयः घर्म्मो यस्याः ।) असनपर्णी । इति शब्दचन्द्रिका ॥

सुदीर्घफलिका, स्त्री (सुदीर्घं फलं यस्याः । कप् । टापि अत इत्वम् ।) वार्त्ताकुविशेषः । इति रत्नमाला ॥ झिङ्गा वेगुन इति भाषा ॥

सुदीर्घा, स्त्री, (सुष्ठु दीर्घा ।) चीनाकर्कटी । इति राजनिर्घण्टः ॥

सुदुःखितः, त्रि, (सुष्ठु दुःखितः ।) अतिशयव्यथितः । यथा । ज्योतिस्तत्त्वे भीमपराक्रमवचनम् ।
"विष्णुभाये त्रिके चित्रे ज्येष्ठायां ज्वलने यमे ।
एभिर्व्विवाहिता कन्या भवत्येव सुदुःखिता ॥"

सुदुर्लभः, त्रि, (सु + दुर् + लभ + खल् ।) अतिदुष्प्राप्यः । यथा,—
"ब्रह्मत्वादपि देवत्वादिन्द्रत्वादमरादपि ।
अमृतात् सिद्धिलाभाच्च हरिदास्यं सुदुर्लभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ९७अध्यायः ॥

सुदुश्चरः, त्रि, (सु + दुर् + चर + खल् ।) अतिशयदुःखेनाचरणीयः । यथा, श्रीभागवते ११। २९ । १ ।
"सुदुश्चरामिमां मन्ये योगचर्य्यामनात्मनः ।
यथाञ्जसा पुमान् सिध्येत् तन्मे ब्रूह्यञ्जसाच्युत ॥"
(कार्त्तिकेये, पुं, । यथा, महाभारते । ३ । २३१ । ७ ।
"प्रभुर्नेता विशाखश्च नैगमेयः सुदुश्चरः ॥")

सुदुष्करः, त्रि, (सु + दुर् + कृ + खल् ।)अत्यन्तक्लेशकरः । यथा, श्रीभागवते । ४ । ८ । ६९ ।
"सुदुष्करं कर्म्म कृत्वा लोकपालैरपि प्रभुः ।
एथत्यचिरतो राजन् यशो विपुलयंस्तव ॥"

सुदुस्तरः, त्रि, (सु + दुर् + तॄ + खल् ।) अतिदुःखेन तरणीयः । यथा, श्रीभागवते । १० । २ । ३१ ।
"स्वयं समुत्तीर्य्य सुदुस्तरं द्युमन्
भवार्णवं भीममदभ्रसौहृदाः ।
भवत्पदाम्भोरुहनावमत्र ते
निधाय याताः सदनुग्रहो भवान् ॥"

सुदुस्त्यजः, त्रि, (सु + दुर् + त्यज + खल् ।) अतिदुःखेन त्याज्यः । यथा,—
"त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधाव-
द्वन्दे महापुरुष ते चरणारविन्दम् ॥"
इत्याश्रिकतत्वधृतश्रीभागवतवचनम् ॥

सुदूरः, त्रि, (सुष्ठु दूरः।) अतिदूरतरः। तत्पर्य्यायः। दवीयान् २ दविष्ठः ३। इत्यमरः। ३।१।६८॥

सुदूरपराहतः, त्रि, (सुदूरे पराहतः निराकृतः।) अतिदूरनिराकृतः। चिरध्वस्तः। यथा। "अननुगमेन तत्तज्जातिघटितलक्षणासम्भवात् लक्षणानुपपत्तिरूपयुक्तेः सुदूरपराहतत्वात् इति भाववर्णनं अनुपादेयमेव।" इत्यवयवग्रन्थगादाधरी॥

सुदृक्, [ग्] त्रि, (सुष्ठु दृक् नेत्रं यस्य।) सुन्दरचक्षुर्युक्तः। यथा, श्रीभागवते। १०।३०।२७।

"भीता सुदृक् पिधायास्यं भेजे भीतिविड़म्बनम्॥"

"सुदृक् सुनयनं आस्यं पिधाय। सुदृक् वराक्षीति वा। भीतिविड़म्बनं भयानुकरणम्।" इति श्रीधरस्वामी॥ शोभनचक्षुषि, क्ली॥

सुदृढ़, क्ली, (सुष्ठु दृढ़म्।) गाढ़म्। तद्वति, त्रि। इति शब्दरत्नावली॥

सुद्युम्नः, पुं, वैवस्वतमनुपुत्रः। स तु इड़राजः। यथा, वह्निपुराणे सागरोपाख्याननामाध्याये।

"जलक्रीड़ागतो यत्र पार्व्वत्या सहितो हरः। स्त्रीरूपधारिभिर्व्वालस्तः स हिमवद्गिरौ॥
ततोऽविशदिड़स्तत्र मृगयाक्षिप्तचेतनः। बभूव नृपतिः सद्यः सानुयात्रबलान्वितः॥
इदं स्त्रीलिङ्गमापन्नः प्रतिभ्रमति काननं। ततो बुधाश्रमं प्रायादिड़ारूपाश्रया सती॥
बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता। सोमपुत्राद्बुधाद्राजन् तस्यां जज्ञे पुरूरवाः॥
जनयित्वा पुनः सा तं पुनः सुद्युम्नतां गता। प्रसादात् शङ्करस्यापि बुधेनाराधितस्य च॥
सुद्युम्नस्य तु दायादः सवः परमधार्म्मिकः॥"

सुधन्वा, [न्] त्रि, (सुष्ठु धनुर्यस्य। धनुषश्चेत्यनङ्।) प्रौढ़धानुष्कः। इति मेदिनी॥ (यथा, वाजसनेयसंहितायाम्। १६। २६।

"नमस्तीक्ष्णेषवे चायुधिने च नमः स्रायुधायच सुधन्वने॥")

सुधन्वा, [न्] पुं, (सुष्ठु धनुर्यस्य।) विश्वकर्म्मा। इति मेदिनी॥ राजविशेषः। इति पुराणम्॥ (यथा, हरिवंशे। १२। १०।

"सम्भूतस्य च दायादः सुधन्वा रिपुमर्द्दनः। सुधन्वनः सुतश्चासीत् त्रिधन्वा नाम पार्थिवः॥'
विदुरः। यथा, भागवते। ३। २१। ३५।

"तस्मिन् सुधन्वन्यहनि भगवान् यत् समादिशत्। उपादायाश्रमपदं मुनेः शान्तव्रतस्य तत्॥")

सुधन्वाचार्य्यः, पुं, व्रात्यवैश्यात् सवर्णायां जातोजातिविशेषः। यथा,—

"वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च कारुषश्च विजन्मा च मैत्रः सात्वत एव च॥"

इति मानवे १० अध्यायः॥

सुधर्म्मः, पुं, जिनगणाधिपविशेषः। इति हेमचन्द्रः॥

सुधर्म्मा, स्त्री, (शोभनो धर्म्मोऽस्यामिति। अनिच्। ततः "डाबुभाभ्यामन्यतरस्याम्।"४।१।१३। इति पक्षे डाप्।) देवसभा। इत्यमरः। १।१।५१॥ (यथा, रघुः। १७।२७।

"स राजककुदव्यग्रपाणिभिः पार्श्ववर्त्तिभिः। ययावुदीरितालोकः सुधर्म्मानवमां सभाम्॥"

"सुधर्म्मायां देवसभायां अनवमां अन्यूनाम्।" इति तट्टीकायां मल्लिनाथः॥)

सुधर्म्मा,[न्] पुं, (सुष्ठु धर्म्मो यत्र।"धर्मादनिच् केवलात्।" ५।४।१२४। इति अनिच्।) देवसभा। कुटुम्बी। इत्युणादिकोषः। २।१८७॥ (देवसभार्थे स्त्रीलिङ्गोऽपि भवति॥*॥ सु+धृ+"मिथुने सनिः।" उषा० ४।१५१। इति सनिः चक्षिप्रत्ययः। इत्युज्ज्वलदत्तः॥ सहधर्म्मविशिष्टे, त्रि यथा, हरिवंशे। ११५। ७५।

"सुधर्म्मणे सुधर्म्मां तां क्षणायाक्लिष्टकारिणे। देवो देवसभां दत्त्वा वायुरन्तरधीयत॥")

सुधर्म्मी, स्त्री, देवसभा। इत्यमरटीका। १।१।५१

सुधा, स्त्री, (सुखेन धीयते पीयते इति। धेट पाने+"आतश्चोपसर्गे।",३।३।१०६। इत्यङ्। टाप्।) अमृतम्। इत्यमरः। १।१।५१॥ (यथा, रामायणे। २। ६१। १३।

"न पयात्तेऽपि मन्यन्तेसुधामपि सुरोपमाः॥")

लेपनम्। (यथा, माघे। १२। ६२।

"सेनासुधाचालितसौधसम्पदां पुरां बलानां परभागमाप सा॥")

मूर्व्वा। स्नुही। (यथा,—

"सेक्षुरः सिंहतुण्डः स्याद्भद्रो वज्रद्रुमोऽपि च सुधा समन्तदुग्धा च स्रक् स्त्रियां स्यात् स्नुही गुड़ा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) गङ्गा। इष्टका। इति मेदिनी॥ विद्युत्। रसः। तोयम्। (यथा,—

"रसायनमिवर्षीणां देवनामामृतं यथा। सुधेवोत्तमनागानां भेषज्यमिदमस्तु ते॥"

इति सुश्रुते सूत्रस्थाने ४३ अध्यायः॥) धात्री। इति नानार्थध्वनिमञ्जरी॥ हरितकी मधु। इति शब्दचन्द्रिका॥ शालपर्णी। इति राजनिर्घण्टः॥

सुधांशुः, पुं, (सुधायुक्ताः अंशवो यस्य।) चन्द्रः। इत्यमरः। १।३।१४॥ (यथा, कथासरित्सागरे। १०१। १२८।

"दौप्रदावानलशिखाः सुधांशोरपि रश्मयः। तस्याः सुन्दरसेनोत्कचेतसो वत जज्ञिरे॥"

कर्पूरः। चन्द्रसेन्नत्वात्॥)

सुधांशुतैलं, क्ली, (सुधांशोः कर्पूरस्य तैलम्।) कर्पूरतैलम्। इति राजनिर्घण्टः॥

सुधांशुरत्नं, क्ली, (सुधांशुप्रियं रत्नम्।) मौक्तिकम्। इति राजनिर्घण्टः॥

सुधाकरः, पुं, (सुधायुक्ताः करा यस्य।) चन्द्रः। इति शब्दरत्नावली॥ (यथा,भार्य्यासप्तशत्याम् ११८।

"उल्लसिति लाञ्छनोऽयं ज्योत्स्नावर्षी सुधाकरः स्फुरति। आसक्तक्षणचरणः शकट इव प्रकटितचौरः॥"

सुधाङ्गः, पुं, (सुधामयं अमृतात्मकमङ्गमस्य। सुधेव शुक्लमङ्गमस्येति वा।) चन्द्रः। इति त्रिकाण्डशेषः॥

सुधाजीवी, [न्] पुं, (सुधा+जीव+णिनिः।) सुधया लेपनेन जीवति यः। राज इतिभाषा। तत्पर्य्यायः। पलगण्डः २ लेपकः ३। इति त्रिकाण्डशेषः॥

सुधाधारः, पुं, (सुधाया आधारः।) चन्द्रः। इति शब्दरत्नावली॥ अमृतपात्रञ्च॥

सुधानिधिः, पुं, (सुधाया निधिः।) चन्द्रः। इति शब्दरत्नावली॥

सुधापयः, [स्] क्ली, सुधेवशुक्लं पयः निर्य्यासः। स्नुहीक्षीरम्। इति केचित्॥

सुधापाणिः, पुं,(सुधा पाणौ यस्य।)धन्वन्तरिः। इति केचित्॥

सुधाभुक्, [ज्] पुं, (सुधां भुङ्क्ते इति। भुज्+क्विप्।) देवः। इति हेमचन्द्रः॥

सुधाभृतिः, पुं, (सुधाया भृतिर्यस्मात्।) चन्द्रः। यज्ञः। इति सुद्राङ्कितमेदिनी॥ इस्नाक्षर मेदिन्यां सुधासूतिरिति पाठः॥

सुधामयः, पुं,(सुधात्मकः इति। सुधा+मयट्।) भूपालभवनम्। इति शब्दरत्नावली॥ अमृतात्मके, त्रि। यथा, श्रीजयदेवः।

"रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवामभ्यर्णे परिरभ्य निर्भरमुरः प्रेमान्धया राधया साधु स्खलदिदं सुधामयमिति व्याहृत्य गीतस्तुतिव्याजादुज्जृम्भितः स्मितमनोहारी हरिः पातु वः॥"

सुधामोदकः, पुं, (सुधेव मोदयतीति। मुद+णिच्+खुल्।) यवासशर्करा। इति राजनिर्घण्टः॥

सुधामोदकजः, पुं, (सुधामोदात् जायते इति। जन+डः।) तवराजोऽश्वखण्डः। इति राजनिर्घण्टः॥

सुधावर्षी, [न्] पुं, (सुधां वर्षतीति। वृष+णिनि।) ब्रह्मा। इति शब्दरत्नावली॥ बुद्धभेदः। इति त्रिकाण्डशेषः॥

सुधावासः, पुं,(सुधाया आवासः।) चन्द्रः। यथा, "ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः नमस्ते रोहिणीकान्त सुधावास नमोऽस्तुते॥"

इति तिथ्यादितत्त्वम्॥

(त्रपुसम्। तत्पर्य्यायो यथा,—

"त्रपुसं कण्टकिफलं सुधावासः सुशीतलम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुधावासा, स्त्री,(सुधाया वासो यत्र।) त्रपुषी। इति राजनिर्घण्टः॥

सुधासिन्धुः, पुं, (सुधायाः सिन्धुः।) अमृतसमुद्रः। यथा,—

"सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे।
शिवाकारे मञ्चे परमशिवपर्य्यङ्कनिलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम्॥"
इत्यानन्दलहरी॥

सुधासूतिः, पुं, (सुधायाः सूतिरुत्पत्तिर्यत्र।) यज्ञः। चन्द्रः। पद्मम्। इति शब्दरत्नावली॥

सुधास्रवा, स्त्री, (स्रवतीति। स्रु+अच्। टाप्। सुधायाः स्रवा।) प्रतिजिह्वा। अलिजिह्विका। इति त्रिकाण्डशेषः॥ उदन्तोऽयम्। इति राजनिर्घण्टः॥

सुधाहरः, पुं, (सुधां हरतीति। हृ+अच्। सुधाया हर इति वा।) गरुड़ः। इति शब्दरत्नावली॥

सुधाहृत्, पुं, (सुधां हरतीति। हृ+क्विप्।) गरुड़ः। इति हेमचन्द्रः॥

सुधितिः, पुं, स्त्री, स्वधितिः। इत्यमरटीकायां रायमुकुटः॥

सुधीः, पुं, (सु शोभना धीर्यस्य।) पण्डितः। इत्यमरः। २। ७। ५॥

सुधीः, स्त्री, (शोभना धीः।) सुन्दरबुद्धिः। सुष्ठुधीः। इति मुग्धबोधव्याकरणम्॥ शोभना धीर्यस्य।) शोभनबुद्धियुक्ते, त्रि॥ (यथा, भट्टिः। १२। ६।

"मात्रातिमात्रं शुभयैव बुद्धया
चिरं सुधीरभ्यधिकं समाधात्॥")

सुधूम्यः, पुं, स्वादुनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

सुधोद्भवः, पुं, (सुधया सह उद्भवो यस्य।) धन्वन्तरिः। इति त्रिकाण्डशेषः॥

सुधोद्भवा, स्त्री, (सुधाया उद्भवो यस्याः।) हरीतकी। इति त्रिकाण्डशेषः॥ (हरीतकीशब्देऽस्य विवरणं द्रष्टव्यम्॥)

सुनन्दं, क्ली, (सुष्ठु नन्दयतीति। नन्द+अच्) बलभद्रस्य मुषलम्। इति शब्दमाला॥ (कुजृम्भदैत्यस्य मुषलम्। यथा, मार्कण्डेये। ११६।१८

"सुनन्दं नाम मुषलं त्वष्टा यच्चिर्मितं पुरा।
तज्जहार स दुष्टात्मा तेन हन्ति रणे रिपून्॥")

सुन्दरानन्दजनके, त्रि॥

सुनन्दः, पुं, (सुष्ठु नन्दयतीति। नन्द+अच्) औक्रोष्टस्य पार्थवदेवभेदः। यथा, श्रीभागवते १०। ८८। ५६।

"सुनन्दनन्दप्रमुखैः स्वपार्षदैः
चक्रादिभिर्मूर्त्तिधरैर्निजायुधैः।
पुष्ट्या श्रिया कीर्त्त्यजयाखिलर्द्धिभि-
र्निषेव्यमाणं परमेष्ठिनां पतिम्॥"

द्वादशविध-राजगृहान्तर्गतगृहविशेषः। यथा,

"यदृच्छयोच्यते मानं तस्य तेनैव कल्पना।
राज्ञः स्वहस्तमेकन्तु दीर्घं सर्व्वत्र निःक्षिपेत्॥
आयामेन सुनन्दः स्याद्राजहस्तैश्च पञ्चभिः।
परिणाहे चतुर्भिश्च राजहस्तैः प्रतिष्ठितः॥
अस्याधिदेवता भौमो रक्षतीदं वसुन्धरा।
द्वाराणि विंशतिश्चास्य रक्षाचित्राहृतानि च॥
रक्षापट्टावृतो गेहः सकलार्थप्रसाधकः।
अत्र स्थित्वा महीपालः सुचिरं पाति मेदिनीम्॥"

दीर्घः ५१ प्रस्थः ४०। इति सुनन्दः॥ सुन्दरः इति च पाठः। इति युक्तिकल्पतरुः॥

सुनन्दा, स्त्री, (सुष्ठु नन्दयति या। नन्द+अच्। टाप्।) उमा। गोरोचना। इति मेदिनी॥ नारी। इति विश्वः॥ उमासखीभेदः। इति शब्दमाला॥ (अजपत्न्या इन्दुमत्याः सखी द्वारपालिका। यथा, रघुः। ६। २०।

"ततो नृपाणां श्रुतवृत्तवंशा
पुंवत्प्रगल्भा प्रतिहाररक्षी।
प्राक् सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा॥")

अर्कपत्रीवृक्षः। इति रत्नमाला॥ इक्षुरसून इति भाषा॥ (पुरुवंशीयसार्व्वभौमनृपतेः पत्नी। यथा, महाभारते। १। ८५। १६।

"सार्व्वभौमः खलु जित्वा जहार कैकेयीं सुनन्दां नाम तासूपयेमे। तस्यामस्य जज्ञे जयत्सेनो नाम॥"* दुष्मन्तपुत्रभरतस्य पत्नी। यथा, तत्रैव। १। ८५। ३२।

"भरतः खलु काशेयीमुपयेमे सार्व्वसेनीं सुनन्दां नाम। तस्यामस्य जज्ञे भुमन्युः॥"* चेदिराजकन्या। यथा, तत्रैव। ३। ६५। ५०।

"एवमुक्त्वा ततो भैमीं राजमाता विशांपते।
उवाचेदं दुहितरं सुनन्दां नाम भारत॥")

सुनयनः, पुं, (शोभने नयने यस्य।) मृगः। इति शब्दचन्द्रिका॥ शोभनचक्षुर्युक्ते, त्रि॥ (यथा, रघुः। ८। ५२।

"दृष्टश्चरध्वनि तं वनदेवताः
सुनयनं नयनन्दितकोशलम्॥")

सुनयना, स्त्री, (सु शोभने नयने यस्याः।) नारी। इति राजनिर्घण्टः॥

सुनाकृतः, पुं, कर्पूरकः। इति शब्दचन्द्रिका।

सुनाभः, पुं, (सुष्ठु नाभिरस्य। अच् समासे।) मैनाकपर्व्वतः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। १०। ३०।

"इन्द्रकीलः सुनाभश्च तथा दिव्यो च पर्व्वतौ॥")

धृतराष्ट्रपुत्रविशेषः। यथा, तत्रैव। १।११७।५।

"उर्णनाभः सुनाभश्च तथानन्दोपनन्दकौ॥")

सुष्ठु नाभिश्चक्रमध्यमस्येति। सुदर्शनचक्रे, क्ली यथा, भागवते। ३। ३। ६।

"सुतं मृधे खं वपुषा ग्रसन्तं
दृष्ट्वा सुनाभोऽथितं धरित्र्या।
आमन्त्रितस्तत्तनयाय शेषं
दत्त्वा तदन्तःपुरमाविवेश॥"

वाद्यलिङ्गेऽपि दृश्यते। यथा, महाभारते। ३। ३। ४८।

"तत्तेजसा कृतं चक्रं सुनाभं विश्वकर्म्मणा।
देवारीणां मदो येन नाशितः शार्ङ्गधन्वना॥")

सुनामद्वादशी, स्त्री, (सुनामा द्वादशी। यद्वा, सुनामप्रिया द्वादशी।) द्वादशमासीयद्वादशकर्त्तव्यव्रतविशेषः। यथा,—

अम्बरीष उवाच।

"कथं सुनामभिर्देवो द्वादश्यां मुनिसत्तम।
पूज्यते केशवो मर्त्तैर्भुक्तिकामफलार्थिभिः॥

वशिष्ठ उवाच।

शृणुष्वैकमना भूयः सुनामद्वादशीं शुभाम्।
सर्व्वपापहरां स्वर्ग्यां भुक्तिमुक्तिप्रदायिकाम्॥
मनसापि चिकीर्षन्ति ये द्वादशीं नरोत्तमाः।
तेऽपि घोरं न पश्यन्ति पुनः संसारसागरम्॥
आद्यं सर्व्वव्रतानान्तु वैष्णवानां नृपोत्तम।
नरैः स्त्रीभिश्च कर्त्तव्यं विष्णोस्तुष्टिकरं परम्॥*
मार्गशीर्षे शुभे मासि शुक्लपक्षे यतव्रतः।
प्रथमं चैव गृह्णीयात् द्वादशीं विधिवन्नरः॥
मनोवाक्कायचेष्टाभिः स विशुद्धो जितेन्द्रियः।
दशम्यां नियतः स्नात्वा प्रणिपत्य जनार्द्दनम्॥
इविष्यान्नकृताहारः शुचिर्भूत्वा भवेद्व्रती।
उपलिप्ते शुचौ देशे भक्षयेत् दन्तधावनम्॥
उपोष्यैकादशीं सम्यक् पूजयित्वा जनार्द्दनम्।
सुनामद्वादशीं देव अहं भोक्ष्ये परेऽहनि॥
एवं सङ्कल्प्य नियमं प्रणम्य गरुड़ध्वजम्।
दशम्यामेकभक्ताशी संयतः संवसेन्निशाम्॥
एकादश्यां ततः कुर्य्यादेकचित्तः समाहितः।
पूर्व्वं प्रपूजयेत् सूर्य्यं ततोदेवं प्रपूजयेत्॥
नमस्ते देवदेवेश नमस्ते भक्तवत्सल।
भास्कराय नमस्तुभ्यं रवये कार्य्यभानवे॥
नमः सूर्य्याय देवाय नमस्ते सप्तसप्तये।
एकस्त्वं हि नमस्तुभ्यमेकचक्ररथाय च॥
ज्योतिषां पतये नित्यं सर्व्वतेजोहराय च।
दिवाकर नमस्तेऽस्तु प्रभाकर नमोऽस्तु ते॥
एवं संपूज्य विधिवत् पुष्पधूपानुलेपनैः।
दीपैर्व्वस्त्रैः सुनैवेद्यैस्ततो विष्णुगृहं व्रजेत्॥
ततोऽनु स्नापयेद्देवं दधिक्षीरघृतादिभिः।
सर्व्वौषधिजलैः पुण्यैस्तथा चन्दनवारिभिः॥
कुङ्कुमोशीरकर्पूरैश्चन्दनेन विलेपयेत्।
अच्युतं चार्च्चयेद्भक्त्या मालतीकुसुमैर्भृशम्॥
गुग्गुलुं घृतसंयुक्तं धूपं दद्यादहर्निशम्।
पायसापूपसंयावकरम्भाद्यकदम्बकैः॥
नैवेद्यं हरये दद्यात् फलमोदकयान्वितैः।
गीतवाद्यैर्हरेश्चैव प्रणमेच्च सुदुर्मुदः॥
एवं पूजां हरेः कृत्वा द्विजं ज्ञानप्रदायकम्।
पूजयेदन्तरं नास्ति विप्रकेशवयोरपि॥
ततोऽव्रणं समालभ्य चन्दनेन नवं घटम्।
सन्विणं तोयसम्पूर्णं न्यसेद्देवस्य सन्निधौ॥
सहेममौक्तिकाचन्तु वज्ररत्नसुवर्णकम्।
न्यस्य गर्भे सवस्त्रन्तु पूजयेत्तत्र केशवम्॥
यस्य रोम्नि स्थिता मेघाः सर्व्वसन्धिषु पन्नगाः॥
सागराः कुक्षिदेशस्थाः सोऽव्ययात्मा जगत्पतिः।
वनस्पतिरसो दिव्यः सर्व्वगन्धेषु चोत्तमः।
इदं सहस्रसोन्मिश्रो धूपोऽयं प्रतिगृह्यताम्॥
केशवः केशिहा केशिकंसारिष्टनिसूदनः।

सर्व्वकामप्रदो देवः स मे पापं व्यपोहतु ॥
एवमभ्यर्च्च देवेशं प्रणिपत्य क्षमापयेत् ।
हादश्यां तत्र तोयेन स्नापयेत्तेन मानवः ॥
सर्व्वपापविनिर्मुक्तो वैष्णवीं लभते तनुम् ।
कृताभिषेकः पुण्यात्मा सम्यगभ्यर्च्च केशवम् ॥
नवनीतक्रतां धेनुं ब्राह्मणायोपपादयेत् ।
केशवः प्रीयतां देवः केशिहन्ता महाद्युतिः ।
स मे भवेतु सुप्रीतः इष्टान् कामान् प्रयच्छतु
एवं प्रदक्षिणं कृत्वा शृणु तस्यापि यत् फलम्॥
त्रिंगदब्दकृतं पापं हित्वा स त्रिविधं नरः ।
षष्टिं वर्षसहस्राणि स्वर्गे मोदति देववत् ॥
यदा कालादिहायाति सधर्म्मो धनवान् भवेत्
अभावादद्य धेनूनां तत् पात्रं कल्पयेत्ततः ॥
तत्फलं हि विनिर्दिष्टं यथाशक्त्या तु दक्षिणा ।
भक्त्या फलं समाप्नोति भक्तिरेवात्र कारणम् ॥*
पौषस्यैव तु मासस्य योऽप्येवं क्षपयेन्नरः ।
समाहितमना भूप रसधेनुप्रदायकः ॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं वर्त्मनी तस्मात् नारायण इति स्मृतः ॥
नारायणः प्रीयतां मे देवो नरप्रियः सदा ।
इष्टकामप्रदो नित्यं स मे पापं व्यपोहतु ॥
ततः प्रदक्षिणं कृत्वा ब्राह्मणान् भोजयेत्ततः ।
एवं हि पौषमासस्य तस्य पुण्यफलं शृणु ॥
यच्चा वाब्दैः कृतं पापं स्वल्पं वा यदि वा बहु
हत्वा स्वर्गं समाप्नोति वर्षाणामयुतायुतम् ॥*॥
माघस्यैव तु मासस्य हादशीं शुक्लपक्षतः ।
यः क्षिपेद्धि शुचिर्भूत्वा एकचित्तः समाहितः ॥
स्नापने पूजने नित्यं ब्राह्मणानाञ्च तर्पणे ।
प्रदाने नृपशार्दूल इमं मन्त्रमुदीरयेत् ॥
मा लक्ष्मीश्च पुरात्रेयी भगिनी शशिनोऽनुजा ।
भर्त्ता त्वमपि तस्याश्च सर्व्वकामद माधव ॥
प्रीयतां माधवो देवो मधुकैटभसूदनः ।
वासुदेवो जगन्नाथो मम पापं व्यपोहतु ॥
एवं यः कुरुते सद्यस्तस्य पुण्यफलं शृणु ।
यावज्जन्मक्रतं पापं हत्वा सर्व्वमशेषतः ॥
दिव्यवर्षसहस्राणि स्वर्गे वसति षोड़श ।
गुड़धेनुप्रदो माघे इहायातः सदा सुखी ॥
भवेद्राजन् निरातङ्कः पुत्रैश्वर्य्यसमन्वितः ।
तत्र विष्णुपरो भूत्वा क्रमान्मोक्षमवाप्नुयात्॥*॥
फाल्गुनामलपक्षस्य हादश्यां नियतः शुचिः ।
पूजयित्वा विधानेन देवदेवं स्वशक्तितः ॥
अनेनैवानेन राजेन्द्र गोविन्दः प्रीयतामिति ।
गवां भक्तोऽसि गोस्वामी गोवासो गोक्रतालयः
सर्व्वकामप्रदो नित्यं स मे पापं व्यपोहतु ।
सुव्रतं शर्कराधेनुं भक्त्या दद्यात् द्विजातये ॥
ततः प्रदक्षिणं कृत्वा शृणु पुण्यं यथातथम् ।
वत्सोवर्हसहस्राणां दशानां धूर्विवाहिनाम् ॥
न तत्फलमाप्नोति हादश्या यत्नवैभव ।
दिव्यवर्षसहस्राणि स्वर्गे तिष्ठति स्वर्गिवत् ॥*॥
चैत्रस्य हादशीं शुक्लां समुपोष्य नृपोत्तम ।
स्नात्वा प्रपूजयेद्विष्णुं जगतोऽन्तरचारिणम् ॥
पूर्व्वोक्तविधिवत् स्नात्वा गोमूत्रैर्गोमयेन च ।
स्नापयित्वामृतेनैव पञ्चानां गव्यसंयुतैः ॥
अद्भिः पवित्रात् प्रपूज्यैव गन्धधूपविलेपनैः ।
पुष्पैर्व्वासोभिरेवं हि मन्त्रेणानेन बुद्धिमान् ॥
प्रवेशने यथाशक्तौ जगतां रक्षणाय च ।
दुर्व्वृत्तानां विनिर्जेतुमसि विष्णुरतो हरे ॥
विष्णुर्भवतु मे प्रीतो विष्णुर्देवः सनातनः ।
सर्व्वपापविनाशाय विष्णुर्मे प्रीयतामिति ॥
मधुधेनुमभावाच्च शक्तितः पात्रमेव च ।
दत्त्वा यत् फलमाप्नोति तदिहैकमनाः शृणु ॥
पूर्व्वजन्मनि यत् पापमिह जन्मनि साम्प्रतम् ।
वर्त्तते सकलं हत्वा स्वर्गलोके महीयते ॥ * ॥
वैशाखस्य तु मासस्य पूजयेन्मधुसूदनम् ।
पूर्व्वोक्तविधिना राजन् सौवर्णं मधुसूदनम् ॥
जलकुम्भे तु संस्थाप्य मन्त्रेणानेन पूजयेत् ।
एकार्णवे जले धातुर्द्रुता वेदाः पुरा हरे ॥
मधुना ते हृतः सोऽपि तेनासि मधुसूदनः ।
स मे भवतु सुप्रीतो देवदेवः सनातनः ॥
सर्व्वपापविनाशाय प्रीयतां मधुसूदनः ।
घृतधेनुमथो दत्त्वा ब्राह्मणान् भोजयेत्ततः ॥
ततः प्रदक्षिणं कुर्य्यात् दत्त्वा देयान् यथोपगान्
एवन्तु क्षपयतस्य तस्य पुण्यफलं शृणु ॥
कपिलानां सहस्रस्य सम्यग्दत्तस्य पुष्करे ।
तत्फलं समवाप्नोति भक्तियुक्तोऽप्यसंशयः ।
यावदिन्द्रो वसेत् स्वर्गे तावदेव स तिष्ठति ॥*॥
ज्येष्ठस्यैव तु मासस्य शुक्लपक्षे तु हादशीम् ।
पूजयेद्विधिवद्भक्त्या समुपोष्य त्रिविक्रमम् ॥
जलधेनुमथो दद्याद्विप्राय नियतः शुचिः ।
यज्ञभागभुजो दैत्यान् सन्निहत्य क्रमैस्त्रिभिः ॥
त्रैलोक्यमाहृतं तस्मात् तेनासि त्वं त्रिविक्रमः
त्रिविक्रमं त्रिलोकेशं प्रीणयामि त्रिविक्रमम्॥
ततः प्रदक्षिणं कृत्वा ब्राह्मणेभ्यश्च दक्षिणाम् ।
दत्त्वा तु भोजयेत्तांस्तु शृणु तस्यापि यत् फलम्
वाजपेयस्य यज्ञस्य सम्यगिष्टस्य पार्थिव ।
तत्फलं लभते मर्त्त्यः परत्रेह सुखी भवेत् ॥*॥
वामनस्तु तथाषाढे समुपोष्य प्रयत्नतः ।
हादशौनियताहारो वामनं तत्र पूजयेत् ॥
हिताय सर्व्वदेवानां आदित्यः कामदो यथा ।
तथा त्वं भव मे देव वामनो बलिबन्धनः ॥
तिलधेनुं ततो दद्यात् वामनः प्रीयतामिति ।
तदभावात्तथा पात्रं यथाशक्त्या च दक्षिणाम् ॥
पूर्व्वजन्मक्रतं पापमिहजन्मक्रतञ्च यत् ।
तत् सर्व्वं विनिहत्याशु परत्र च शुभां गतिम्॥*॥
श्रावणस्य तु मासस्य हादश्यां शुक्लपक्षतः ।
यः क्षिपेन्नियतो भूत्वा समुपोष्य जनार्द्दनम् ॥
समर्च्चयेत् यथाशक्त्या पूर्व्वोक्तविधिना ततः ।
धेनुं सर्व्वगुणोपेतां ब्राह्मणाय निवेदयेत् ॥
मन्त्रेणानेन राजेन्द्र पौराणविहितेन च ।
समादाय ततो लक्ष्मीं लोकेभ्यः क्षीरसागरे ।
क्षपिपि श्रावणे मासि श्रीधरोऽसि जगत्पते ॥
श्रावणे श्रीधरो देवः श्रीवत्सः श्रीनिकेतनः ।
प्रीयतां हि श्रियः कान्तो गतिमिष्टां ददातु मे
गवां दशसहस्रेण पात्रदत्तेन यत् फलम् ।
सकलं लभते मर्त्यो भक्तियुक्तो न संशयः ।
स्वर्गेषु विपुलान् भोगान् भुनक्ति सुरराड़िव॥*॥
तेनैव विधिना राजन् मासे भाद्रपदे ततः ।
समुपोष्य ततो भक्त्या हृषीकेशं प्रपूजयेत् ॥
मुक्ताधेनुमथो दद्यात् यथाविभवविस्तरात् ।
हृषीकाणीन्द्रियाण्याहुस्तेषामीशो जगत्पतिः॥
करोति कर्त्तृभूतोऽसौ हृषीकेशो भवानतः ।
देवदेवं हृषीकेशं भूतेषु प्रभवाव्ययम् ॥
प्रीणयामि सुसंप्रीतो मम पापं व्यपोहतु ।
एवं प्रदक्षिणं कृत्वा विष्णुलोके महीयते ॥*॥
हादश्यां समुपोष्यैव पद्मनाभं तथार्च्चने ।
पूजयेद्विधिवद्भक्त्या गन्धधूपविलेपनैः ।
गन्धधेनुं ततो दद्यात् कर्पूरागुरुचन्दनैः ।
कुङ्कुमेन हि राजेन्द्र वित्तशाठ्यं विवर्ज्जयेत् ॥
एकार्णवगते तोये शयतो यस्य वेधसः ।
निवासाय भवताभ्यां पद्मनाभोऽसि देवभुत ॥
प्रीयतां पद्मनाभो मे दुष्कृतं चोपशाम्यतु ।
इत्युक्त्वा तं समभ्यर्च्च दद्यात् धेनुं द्विजायते ॥
इत्येवं क्षपमाणस्य तस्य पुण्यमतः शृणु ।
समग्रजन्मक्रतं पापं स्वल्पं वा यदि वा बहु ।
दग्ध्वा तत् सकलं भूप विष्णुलोकं स गच्छति॥*॥
कार्त्तिकस्य तु मासस्य एकादश्यामुपोषितः ।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥
नृत्यैर्गीतैस्तथा वाद्यैर्ऋग्यजुःसाममङ्गलैः ।
वीणापणवशब्दैश्च पुराणश्रवणेन च ॥
वासुदेवकथाभिश्च स्तोत्रैरन्यैश्च वाग्वैः ।
सुभाषितैरिन्द्रजालैर्भूमिशोभाभिरेव च ॥
पुष्पैर्धूपैश्च नैवेद्यैर्दीपैश्चैव शोभनैः ।
क्षीरेभक्ष्यैरपूपैश्च फलैः शाकैश्च पायसैः ।
घृतोविकारैर्मधुना द्राक्षाखोड़ैः सदाड़िमैः ।
कुठेरकस्य मञ्जर्य्या सर्ज्जिकालवणेन च ॥
हृद्याभ्यां श्वेतरक्ताभ्यां चन्दनाभ्याञ्च सर्व्वदा ।
कुङ्कुमालक्तकाभ्याञ्च रक्तसूत्रैः सकङ्कणैः ॥
तथा नानाविधैः पुष्पैर्द्रव्यैर्विचित्रियाघनैः ।
तस्यां रात्र्यां व्यतीतायां हादश्यामरुणोदये ।
स्नात्वा नदीजलैः पुण्यैः प्रतिमां स्नापयेत्ततः ॥
उत्थितां त्वपरे रम्यां ताम्रां रौप्यां सुवर्णजाम्।
वैष्णवी प्रतिमा यत्र चित्रे सुस्नाक्वचित् भवेत्।
तत्र स्नानादिपूजा च वेद्यां कार्य्या च विष्णवे ॥
आदौ घृतेन तैलेन मधुना तदनन्तरम् ।
दध्ना क्षीरेण च ततः पञ्चगव्येन शास्त्रवित् ॥
उद्वर्त्तनं माषचूर्णं मसूरामलकानि च ।
रौद्रं कालीयकञ्चैव नागरं वर्षकं तथा ॥
सर्षपाद्य प्रियङ्गुश्च मातुलुङ्गरसैस्तथा ।
सर्व्वौषध्यः सर्व्वगन्धाः सर्व्वबीजानि काञ्चनम्॥
माङ्गल्यानि यथालाभं रत्नानि च कुशोदकम्।
हस्तिदन्तोद्धृता मृच्च वृषशृङ्गोद्धृता तथा ॥
नदीतीराद्रवां स्नानात् वल्मीकात् सङ्गमात्
ह्रदात् ।
इन्द्रस्थानाच्च सरसस्तथा पर्व्वतमस्तकात् ॥
एताभिः स्नाप्य देवेश दद्यात् गोरोचनां शुभाम्
ततस्तु कलसा देया यथाप्राप्तं सलङ्कृताः ॥

जातीपल्लवसंयुक्ताः सफलाश्च सकाञ्चनाः।
पुण्याहवेदशब्देन वीणावेणुरवेण च॥
शब्देन मधुरेणैव सूतमागधवन्दिनाम्।
एवं संस्थाप्य गोविन्दं स्नानुलिप्तं स्वलङ्कृतम्॥
सुवासं पूजयेत्तन्तु सुमनोभिश्च कुङ्कुमैः।
दीपैर्धूपैर्मनोज्ञैश्च पायसेन तु भूरिणा॥
नानारत्नप्रदानैश्च होमैः पुण्यैः सदक्षिणैः।
वासोभिर्भूषणैर्दिव्यैर्गोभिरश्वैर्गजैरपि॥
ब्राह्मणाः पूजनीयाश्च विष्णोराद्याः समूर्त्तयः।
विष्णो रात्रौ प्रसुप्तस्य दामोदरगतं यतः॥
ब्रह्माण्डस्य च तेनासि दामोदर इति स्मृतः।
दामोदर इमां धेनुं गृह्णातु स्वयमेव हि॥
हिरण्यरूपेण ते विष्णो प्रकल्पेयं सनातनी।
इत्येवं पृथिवीदानात् फलं प्राप्नोति मानवः॥
सुवर्णस्य महाधेनुं दत्त्वा नृपवरोत्तमः।
हत्वा पापान्यशेषाणि शतजन्मान्तराणि वै॥
वैष्णवं लोकमाप्नोति यावदिन्द्राश्चतुर्दश।
सम्यगत्र व्रते चीर्णे सप्तजन्मानुगं फलम्॥
ददाति भगवान् विष्णुः कामान् मोक्षं नरेश्वर।
ब्राह्मणान् भोजयेद्भक्त्या भक्ष्यैश्चोच्चावचैरपि॥
ततः प्रदक्षिणं कृत्वा यथाशक्त्या च दक्षिणाम्।
कलसान् द्वादशैवैवं ब्राह्मणेभ्यः प्रदापयेत्॥
वस्त्रेणावेष्टितग्रीवान् हेमगर्भोपशोभितान्।
दधिक्षीरयुतांश्चैव सगुडान् नृप भूरिशः।
शक्तिर्यथा तथा दद्यात् भक्तिरेवात्र कारणम्॥
प्रसङ्गेनापि यो राजन् सुनामद्वादशीं नरः।
करोति पुण्यभागी स यथा दैत्येश्वरो बलिः॥
एवं यः कुरुते राजन् सुनामद्वादशीं नरः।
राजसूयस्य यज्ञस्य फलं समधिकं भवेत्॥
सर्व्वदानेषु यत् पुण्यं यच्च पुण्यं तपोवने।
सर्व्वतीर्थेषु यत् पुण्यं तत् पुण्यं समुदाहृतम्॥
गावो द्वादश दातव्या वस्त्रयुग्मानि काञ्चनम्।
अलाभे चैव गामेकां पात्रं वा स्वर्णसंयुतम्॥
मासे मासेऽथवाप्येवं चञ्चलं जीवितं यतः।
बहुविघ्ना हि धर्म्मस्य कर्त्तुश्छिद्रं न जायते॥
एतज्ज्ञात्वा सुमेधावी न तत्र ग्लपयेन्मनः।
न तस्य वित्तलाभोऽस्ति भक्तिग्राह्यो हि केशवः॥
अनेन विधिना यस्तु द्वादशीं प्रतिवत्सरम्।
कृत्वा नरः परं याति विष्णुलोकमनामयम्॥
सुनामद्वादशी चैव व्रतानामुत्तमा नृप।
आद्या नरैस्तु कर्त्तव्या तोषयद्भिर्जनार्द्दनम्॥
यश्चैनां कीर्त्तयेत् पुण्यां शृणुयाद्वापि नरः॥
तावुभौ गच्छतः स्वर्गं कर्त्ता विष्णुपुरं व्रजेत्॥"
इति वह्निपुराणे सुनामद्वादशीनामाध्यायः॥

सुनारः, पुं, (सुष्ठु नालमस्य। नस्य रः।) शनीस्तन्यम्। सर्पाक्षः। कलविङ्कः। इति मेदिन्यौ॥

सुनालकः, पुं, (सुष्ठु नालमस्य। कप्।) वकपुष्पवृक्षः। इति शब्दचन्द्रिका॥ सुन्दरनालयुक्ते, त्रि॥

सुनासिका, स्त्री, (सुष्ठु नासिका यस्याः।) काञ्चनासा। इति राजनिर्घण्टः॥ (शोभना नासिका।) शोभननासा। तद्युक्ते, त्रि॥ (यथा, भागवते। ४। २४। ४६।
"पद्मकोषपलाशाक्षं सुन्दरभ्रु सुनासिकम्॥")

सुनासीरः, पुं, (सुष्ठु नासीरं अग्रगामित्वेन यस्य।) इन्द्रः। इत्यमरः। १। १।४४॥ (देवः। यथा, भागवते। ४। ७। ७।
"ततो मौङ्गल्यसमानम्य सुनासीराः सहर्षिभिः।
भूयस्तद्देवयजनं समीदृद्धसो ययुः॥")
सुनाशीरश्च॥

सुनिर्यासा, स्त्री, (शोभनो निर्य्यासो यस्याः।) जिङ्गिनीवृक्षः। इति भावप्रकाशः॥

सुनिश्चितः, पुं, (सुष्ठु निश्चितं निश्चयो यस्य।) बुद्धविशेषः। इति त्रिकाण्डशेषः॥

सुनिश्चितः, त्रि, (सुष्ठु निश्चितः।) सुन्दरनिश्चयविषयीभूतः। इति हलायुधः॥

सुनिषण्णं, क्ली, (सुष्ठु निषण्णं निद्रा यस्मात्।) सुनिषण्णकशाकम्। इति त्रिकाण्डशेषः॥ (यथा, सुश्रुते। ६। ४५।
"पटोलशेलुसुनिषण्णयूथिका
वटातिमुक्ताङ्कुरमिन्द्रवारजम्।
हितञ्च शाकं घृतसंस्कृतं सदा
तथैव धात्रीफलदाडिमान्वितम्॥"
क्वचित् पुंलिङ्गेऽपि दृश्यते। यथा,—
सुनिषण्णो हिमो ग्राही मोहदोषत्रयापहः।
अविदाही लघुः स्वादुः कषायो रूक्षदीपनः।
हृद्यो रुच्यो ज्वरश्वासमेहकुष्ठभ्रमप्रणुत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुनिषण्णकं, क्ली, पुं, (सुनिषण्णमेव। स्वार्थे कन्।) शाकविशेषः। सुषुणी इतिभाषा। तत्पर्य्यायः। वितुन्नम्२। इत्यमरः। २। ४। १४८॥ सुनिषण्णम्३ चुच्यू४। इति त्रिकाण्डशेषः॥ (यथा,
"शितिवारः शितिवरः स्वस्तिकः सुनिषण्णकः।
शीवारकः सूचिपत्रः पर्णकः कुक्कुटः शिखी॥
चाङ्गेरीसदृशं पत्रं चतुर्दलं इतीरितः।
शाको जलान्विते देशे चतुःपत्रौति चोच्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
अस्य गुणाः। यथा,—
"अविदाही त्रिदोषघ्नः संग्राही सुनिषण्णकः।"
इति राजवल्लभः॥
अन्यत् सितावरशब्दे द्रष्टव्यम्॥

सुनिष्टप्तः, त्रि, अत्यन्ततप्तः। सुपूर्व्वनिर्पूर्व्वतपधातोः क्तप्रत्ययेन निष्पन्नः॥

सुनीतिः, स्त्री, (शोभना नीतिः।) शोभनतनयः। ध्रुवमाता। इति मेदिनी॥ सा तु उत्तानपादस्य राज्ञोऽप्रेयसी पत्नी। यथा, भागवते। ४। ८। ८।
"जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः।
सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः॥")
शोभननीतिविशिष्टे, त्रि॥

सुनीथः, त्रि, (सुष्ठु नयति धर्म्ममिति। सु+नी+"इनिकुषिनीरमिकाशिभ्यः क्थन्।" उणा० २। २। इति क्थन्।) धर्म्मशीलकः। इत्युणादिकोषः॥ पुं, ब्राह्मणः। इति संक्षिप्तसारोणादिवृत्तिः॥ (चन्द्रवंशीयालर्करराजपौत्रः। यथा, भागवते। ९। १७। ८।
"अलर्कात् सन्ततिस्तस्मात् सुनीथोऽथ निकेतनः॥")

सुनीलं, क्ली, (सुष्ठु नीलम्।) लामज्जकम्। इति राजनिर्घण्टः॥

सुनीलः, पुं, (अतिशयो नीलः।) दाड़िमः। इति राजनिर्घण्टः॥ सुन्दरनीलवर्णश्च॥

सुनीलकः, पुं, (सुनील एव। स्वार्थे कन्।) नीलभृङ्गराजः। नीलासनः। नीलरत्नम्। इति राजनिर्घण्टः॥

सुनीला, स्त्री, (अतिशयनीला) अतसी। विष्णुक्रान्ता। जरतीतृणम्। इति राजनिर्घण्टः॥

सुनु, [नौ] क्ली, जलम्। शोभना नौर्यत्र तत् सुनु जलम्। इति सुग्धबोधटीकायां दुर्गादासः॥

सुनौः, त्रि, शोभननौकाविशिष्टः। शोभना नौर्यस्य वा इति बहुव्रीहिसमासनिष्पन्नः। शोभननौकायाम्, स्त्री॥

सुन्दः, पु, वानरविशेषः। यथा,—
"जाम्बवान् ऋषभः सुन्दो वन्धः शतबलिः पृथुः।
व्यूढानीकाश्च यत्ताश्च हुमानादाय सर्व्वतः॥"
इति वाल्मीकीये रामायणे युद्धकाण्डे ४०सर्गः॥
राक्षसविशेषः। यथा,—
"अथ कालोपमौ युद्धे सुतौ सुन्दोपसुन्दयोः।
यन्नविघ्नकरौ तौ ते नैव दास्यामि पुत्रकम्॥"
इति रामायणे बालकाण्डे २० सर्गः॥
(संह्रादपुत्रः। यथा, हरिवंशे। ३। ७२।
"संह्रादपुत्रौ सुन्दश्च निसुन्दश्चैव तावुभौ॥"
विष्णुः। इति महाभारतम्। १३।१४८।८८॥)

सुन्दरं, त्रि, (सुष्ठु उनत्ति आर्द्रीकरोति चित्तमिति। सु+उन्द क्लेदने+अरः। शकन्ध्वादित्वात् साधुः।) मनोहरम्। तत्पर्य्यायः॥ रुचिरम्२ चारु३ सुषमम्४ साधु५ शोभनम्६ कान्तम्७ मनोरमम्८ रुच्यम्९ मनोज्ञम्१० मञ्जु११ मञ्जुलम्१२। इत्यमरः। ३। १। ५१॥ मनोहारि१३ सौम्यम्१४ भद्रकम्१५ रमणीयम्१६ रामणीयकम्१७। इति तट्टीका॥ बन्धुरम्१८ बन्धुरम्१९ पेशलम्२० पेसलम्२१ वामम्२२ रामम्२३ अभिरामम्२४ नन्दितम्२५ सुमनम्२६॥ इति शब्दरत्नावली॥ वल्गु२७ हारि२८ स्वरूपम्२९ अभिरूपम्३० दिव्यम्३१। इति जटाधरः॥
सुन्दरः, पुं, (सु+उन्द+अरः।) कामदेवः॥ इति कश्चित्॥ वृक्षविशेषः। सुंदरी इति भाषा॥ यथा,—
"जम्बुवब्वोलखदिरविन्धवाराश्च सुन्दरः।
एषामन्यतमाङ्गारं निर्म्मलास्यनि भावयेत्॥"
इति सुखबोधः।
सुन्दरी, स्त्री, (सुन्दर+गौरादित्वात् ङीष्।) नारीभेदः। इत्यमरः। २। ६। ४॥ सुष्ठु उनत्ति

आर्द्रयति मनः इति सुन्दरी। उन्द क्लेदे सुपूर्वः नान्द्रोति भरः निपातनादुत्त्वोपः नदादित्वादीप्। रूपलावण्यसम्पन्ना सुन्दरी। इति तट्टीकायां भरतः॥ तद्भेदः। इति मेदिनी॥ इरिद्रा। इति शब्दचन्द्रिका॥ त्रिपुरसुन्दरी। यथा,—

"षड्दलानामिकायोगात् वामहस्तस्य पार्श्वतः।
तर्पयेत् सुन्दरीं देवीं समुद्राञ्च सवाहनाम्॥"

इति तन्त्रसारे श्रीविद्याप्रकरणम्॥

योगिनीविशेषः। यथा,—

"तावच्चक्रं जपेद्धीरान् यावदायाति सुन्दरी।
ज्ञात्वा दृढं साधकेन्द्रं निर्गीर्य याति निश्चितम्॥"

इति तत्रैव योगिनीसाधनप्रकरणम्॥

सुम्भ, द्युतौ। हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-हिंसे सक०-सेट्।) सुम्भते। इति दुर्गादासः॥

सुम्भन्, [त्] त्रि, यज्ञकर्त्ता। "सुञो यज्ञसंयोगे।" ३। २। १३२। इति सुनोतेः शतृप्रत्ययः॥ सर्व्वे सुम्भन्तः। सर्व्वे यजमानाः सन्निधः। इति सिद्धान्तकौमुदी॥

सुपक्षः, पुं, (सु+पक्ष+क्षः।) सुगन्धात्मा। इति शब्दचन्द्रिका॥ शोभनपरिपक्षे, त्रि॥ (यथा, भागवते। १। ८। ४०।

"इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः।
वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षिताः॥")

सुपत्रं, क्ली, (शोभनं पत्रमस्य।) तेजपत्रम्। इति शब्दचन्द्रिका॥

सुपत्रः, पुं, (शोभनं पत्रमस्येति।) आदित्यपत्रः। पत्रिवाहटक्षम्। इति राजनिर्घण्टः॥

सुपत्रकः, पुं, (शोभनं पत्रमस्य। कप्।) शिग्रुः। इति राजनिर्घण्टः॥ (शिग्रुशब्देऽस्य विशेषो ज्ञातव्यः॥)

सुपत्रा, स्त्री, (शोभनं पत्रमस्याः।) वृद्धजटा। शतावरी। पालक्यम्। शमी। शालपर्णी। इति राजनिर्घण्टः॥

सुपत्रिका, स्त्री, जतुका। इति राजनिर्घण्टः॥

सुपथः, पुं, (सु शोभनः पन्थाः। थः समासे।) सन्मार्गः। यथा,—

"सत्पथस्त्वतिपन्थाश्च सुपन्थाः सुपथोऽपि च।"

इति शब्दरत्नावली॥

(यथा, कथासरित्सागरे। २०। १८२।

"विषयाक्रमणाशा हि तिष्ठन्ति सुपथे कथम्॥"

शोभनपथयुक्ते, त्रि॥

सुपथ्या, स्त्री, (सुष्ठु पथ्यं यस्याः।) श्वेतचिञ्चा। इति राजनिर्घण्टः॥ सत्पथ्ये, त्रि॥

सुपन्थाः पुं, (शोभनः पन्थाः।) सत्पथः। इति शब्दरत्नावली॥

सुपद्मः, पुं, पद्मनाभदत्त-कृतव्याकरणविशेषः। यथा,—

"धैर्य्यावधेयं धीराः श्रीपद्मनाभनिवेदितम्।
उक्तो व्याकरणादर्शः सुपद्मस्यास्य पञ्जिका॥
ततो हि बालबोधाय प्रयोगाणाञ्च दीपिका।
उद्यादिहस्ती रचिता च धातुकौमुदी॥"

इति तदीयपरिभाषावृत्तिः॥

(पुं, क्ली। शोभनं पद्मम्।) शोभनपद्मञ्च। शोभनपद्मविशिष्टे, त्रि॥

सुपद्मा, स्त्री, वचा। इति शब्दचन्द्रिका॥

सुपर्णः, पुं, (सुष्ठु पर्णं पक्षो यस्य।) गरुडः। इत्यमरः। १।१।३१॥ (यथा, रघुः। १०। ६१।

"उद्धन्ते स्म सुपर्णेन वेगाक्षिप्तपयोमुचा॥")

स्वर्णचूडपक्षी। कृतमालकवृक्षः। इति मेदिनी (पक्षिमात्रम्। यथा, मनुः। १। ३७।

"नागान् सर्पान् सुपर्णांश्च पितॄणाञ्च पृथग्गणान्॥"

विष्णुः। इति महाभारतम्। १३। १४८। ३४॥) शोभनपर्णविशिष्टे, त्रि॥

सुपर्णकः, पुं, (सु शोभनानि पर्णानि यस्य। कन्) आरग्वधवृक्षः। इति रत्नमाला॥ सप्तच्छदवृक्षः। इति जटाधरः॥ गरुडः। इति हेमचन्द्रः॥

सुपर्णकेतुः, पुं, (सुपर्णः केतौ यस्य।) विष्णुः। इति हलायुधः॥

सुपर्णी, स्त्री, (सु शोभनानि पर्णानि पत्राणि यस्याः।) पद्मिनी। इति शब्दमाला॥

सुपर्णेशः, पुं, (सुपर्ण इति आख्या यस्य।) नागकेश्वरः। इति त्रिकाण्डशेषः॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"दीपः सर्पः सुपर्णाख्यश्चाम्बो यो नागकेशरः॥")

सुपर्णिका, स्त्री, (शोभनानि पर्णानि यस्याः। कप्। टापि अत इत्वम्।) स्वर्णजीवन्ती। पलाशी। शालपर्णी। रेणुका। वाकुची। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—

"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका।
अग्निलेखा कृष्णफला सोमा पूतिफलीति च।
सोमवल्ली कालमेघी कुष्ठघ्नी च प्रकीर्त्तिता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुपर्णी, स्त्री, (सुष्ठु पर्णान्यस्याः। गौरादित्वात् ङीष्।) कमलिनी। गरुडमाता। इति मेदिनी॥ (पक्षिणीमात्रे च। यथा, महाभारते। ३। २२४। १०।

"सुपर्णी सा तदा भूत्वा निर्जगाम महावनात्")

सुपर्णीतनयः, पुं, (सुपर्ण्यास्तनयः।) गरुडः। इति हलायुधः॥

सुपर्व्वा, [न्] पुं, (सुष्ठु पर्व्व यस्य।) देवताः। इत्यमरः। १। १। ७॥ बाणः। वंशः। पर्व्व। धूमः। इति मेदिनी॥

सुपर्व्वा, स्त्री, (शोभनं पर्व्व यस्याः।) श्वेतदूर्व्वा इति राजनिर्घण्टः॥ सुन्दरपर्व्वविशिष्टा च॥

सुपात्रं, क्ली, (सुपाकाय हितम्। सुपाक+यत्। विड्लवणम्। इति राजनिर्घण्टः॥

सुपात्रं, क्ली, (सुष्ठु पात्रम्।) योग्यव्यक्तिः। (यथा, भागवते। ७। १४। ४१।

"पुरुषेष्वपि राजेन्द्र सुपात्रं ब्राह्मणं विदुः।
तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम्॥")

तत्र दानविधिर्यथा,—

"तस्मात्सर्व्वात्मना पात्रे दद्यात्कनकदक्षिणाम्।
इति।
सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः।
पतन्तं त्रायते यस्मादतीव नरकार्णवादिति॥
पात्राख्याध्यात्मिका मुख्या विप्रदाक्षाग्निहोत्रिणः।
देवताश्च तथा मुख्या गोदानं ह्येतदुत्तममिति॥
सर्व्वेषु गुणवद्दानं श्रद्धाकादिष्वपि स्मृतम्।
देशे काले विधानेन पात्रे दत्तं विशेषतः॥"
पात्रे विद्यातपस्यादिगुणयुक्ते। इति च प्रायश्चित्ततत्त्वम्॥ अपि च।

"तस्मात् सर्व्वात्मना पात्रे दद्यात् कनकमुत्तमम्।
अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे॥"

इति शुद्धितत्त्वम्॥ *॥

शोभनभाजनम्। शोभनञ्च तत्पात्रञ्चेति कर्म्मधारयसमासनिष्पन्नम्। उत्तमपात्रयुक्ते, त्रि॥

सुपानः, त्रि, (सुखेन पीयते इति। सु+पा+"आतो युच्।" ३। ३। १२८। इति युच्।) पानयोग्यः। सुखेन पीयतेऽसौ। आतोऽनोऽदरिद्र इत्यनेन कर्म्मणि अनप्रत्ययेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥

सुपार्श्वः, पुं, (सुष्ठु पार्श्वोऽस्य।) चतुर्व्विंशतितीर्थङ्करान्तर्गततीर्थङ्करविशेषः। इति हेमचन्द्रः॥ वृक्षवृक्षः। इति राजनिर्घण्टः॥ पक्षिविशेषः। स तु सम्पातिपुत्रः। यथा,—

"निर्दग्धपक्षं सम्पातिं वानराः सुमहौजसः।"

इत्युपक्रम्य।

"क्व सीता केन वा दृष्टा को वा हरति मैथिलीम्।
तदाख्यातु भवान् सर्व्वं गतिर्भव वनौकसाम्॥
अहरौद्रं प्रतिसंसुप्तान् सीतास्मृतिसमाहितान्।
पुनराश्वासयन् प्रीत इदं वचनमब्रवीत्॥
अहमस्मिन् गिरौ दुर्गे बहुयोजनमायते।
चिरान्निपतितो दृष्टः शौचप्राणपराक्रमः॥
तं मामेवं गतः पुत्रः सुपार्श्वो नाम नामतः।
आहारेच्छ यथाकालं विभर्त्ति पततां वरः॥"

इति वाल्मीकीये रामायणे किष्किन्धाकाण्डे ५८ सर्गः॥ (पौठस्थानविशेषः। यथा, देवीभागवते। ७। ३०। ६६।

"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥"

इलावृतवर्षस्य पर्व्वतविशेषः। यथा, विष्णुपुराणे। २। २। १७।

"विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः॥")

सुपार्श्वकः, पुं, (सुष्ठु पार्श्वो यस्य। कन्।) चतुर्व्विंशतिभाव्यर्हदन्तर्गतार्हद्विशेषः। इति हेमचन्द्रः॥ गर्हभाण्डवृक्षः। इत्यमरः। २। ४। ४३॥ (अथ विप्पलभेदः। गजडुण्डसहोरा इति लोके।

"पारौषोऽन्यः पलाशश्च कपिचूतः कमण्डलुः।
गर्हभाण्डश्चन्दरालः कपोतनः सुपार्श्वकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुपिङ्गला, स्त्री, (सुष्ठु पिङ्गला ।) जीवन्ती । ज्योतिष्मती । इति राजनिर्घण्टः ॥

सुपौड़नं, क्ली, (सु+पौड़+ल्युट् ।) सुष्ठु मर्द्दनम् इति केचित् ॥ गाचापा इति भाषा ॥

सुपीतं, क्ली, (सु+पा+क्तः ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

सुपीवा, [न्] त्रि, (सुष्ठु पिबतीति । सु+पा+ "श्वातो मनिन्क्वनिप्वनिपश्च ।"३ । २ । ७४। इति क्वनिप् ।) शोभनपानकर्त्ता । इति मुग्धबोधटीकायां दुर्गादासः ॥

सुपुटः,पुं, (सुष्ठु पुटमस्य ।) कोलकन्दः । विष्णुकन्दः । इति राजनिर्घण्टः ॥

सुपुत्रिका, स्त्री, (शोभना पुत्रिकेव ।) जतुका । इति राजनिर्घण्टः ॥

सुपुष्करा,स्त्री,स्थलपद्मिनी । इति राजनिर्घण्टः॥

सुपुष्पं, स्त्री, (शोभनं पुष्पमस्य ।) लवङ्गम् इति शब्दचन्द्रिका ॥ आड्ढ्यम् । प्रपौण्डरीकम् । तूलम् । इति राजनिर्घण्टः ॥ स्त्रीणां रजः । यथा,—

"सुपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो
पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव
मनुम् ।"

इति तन्त्रसारः ॥

सुपुष्पः, पुं, (शोभनानि पुष्पाणि यस्य ।) रक्तपुष्पकः। इति शब्दचन्द्रिका ॥ पालितामादार इति भाषा ॥ शिरीषः । हरिद्रुः । राजतरुणी । इति राजनिर्घण्टः ॥

सुपुष्पिका, स्त्री, (शोभनानि पुष्पाणि यस्याः । ङीष् । ततः कन् ।) पाटला । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः पाटलाशब्दे ज्ञातव्याः ॥)

सुपुष्पी, स्त्री, (सुष्ठु पुष्पं यस्याः । ङीष् ।)श्वेतापराजिता । जीर्णफल्गी । शतपुष्पी । मिश्रेया। द्रोणपुष्पी । इति राजनिर्घण्टः ॥ कदली । इति शब्दचन्द्रिका ॥

सुपूरः, पुं, बीजपूरः । इति राजनिर्घण्टः ॥

सुपूरकः, पुं, (सुष्ठु पूरयतीति । पूर+ण्वुल् ।) वकपुष्पवृक्षः । इति रत्नमाला ॥

सुप्, क्ली,लिङ्गोत्तरप्रयुज्यमानप्रत्ययविशेषः ।स तु सप्तमीविभक्तेर्बहुवचनम् । इति मुग्धबोधव्याकरणम् ॥ सुपद्मादिव्याकरणमते एकविंशतिविभक्तीनां संज्ञा ॥ (यथा, "सुप्तिङन्तचयो वाक्यम् ।" इति व्याकरणटीकायां वाक्यलक्षणम् ॥

सुप्तं, क्ली, (स्वप्+क्तः ।) सुषुप्तिः । तत्पर्य्यायः । साधिका २ । इति हेमचन्द्रः ॥

सुप्तः, त्रि, (स्वप्+क्तः ।) निद्रितः । तत्पर्य्यायः। निद्राणः २ शयितः ३ । इति हेमचन्द्रः ॥ तस्य बोधने विधिनिषेधौ यथा,—

"क्षुधितस्तृषितः कामी विद्यार्थी ऋणकारकः।
भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत्॥
मक्षिका भ्रमरी सर्पो राजा वै बालकस्तथा।
परस्त्रापि च मूर्खश्च सप्त सुप्तान्न बोधयेत् ॥"

(स्वकार्य्यार्थम् । यथा,—

"त्वयूचा स्फुटिता सुप्ता क्षया क्षुण्णा च तुद्यते
आतन्यते सरागा च पर्व्वरुक्त्वगगतेऽनिले ॥"

इति माधवकरसंगृहीतरुग्विनिश्चये वातव्याध्यधिकारे । ६ ॥)

सुप्तघातकः, त्रि, (सुप्तमपि हन्तीति । हन+ खुल् ।) हिंस्रः । तत्पर्य्यायः । दंशेरः २ । इति त्रिकाण्डशेषः ॥

सुप्तजनः, पुं, (सुप्ता जना यत्र ।) अर्द्धरात्रः । इति जटाधरः ॥ (सुप्तो जनः ।) निद्रितलोकश्च॥

सुप्तज्ञानं. क्ली. (सुप्ते निद्रावस्थायां ज्ञानम् ।) स्वप्नः । इति जटाधरः ॥

सुप्तविज्ञानं, क्ली, (सुप्ते निद्रावस्थायां विज्ञानम् ।) स्वप्नः । इति जटाधरः ॥

सुप्तिः, स्त्री, (स्वप्+क्तिन् । अशुद्धता । निद्रा । (यथा, भागवते । ४ । २८ । ७१ ।

"सुप्तिमूर्च्छोपतापेषु प्राणायनविघाततः ।
नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि ॥")

विश्रब्धः । शयनम् । इति मेदिनी ॥

सुप्रतिभा,स्त्री,(सुष्ठु प्रतिभा यस्याः ।) मदिरा । इति राजनिर्घण्टः ॥

सुप्रतिष्ठा, स्त्री, (सुष्ठु प्रतिष्ठा यस्याः ।) पद्माचराद्वृत्तिच्छन्दः । स तु द्विविधः । षड्लिः । प्रिया च यथा,—

"उक्थात्युक्था तथा मध्या प्रतिष्ठा सा
सुपूर्व्विका ।
गायत्री च ततश्चोष्णिगनुष्टुप् बृहतौ तथा ॥"

षड्लक्षोदाहरणं तच्छब्दे द्रष्टव्यम् । प्रियाया यथा । स-ल-गैः प्रिया ।

"व्रजसुभ्रुवो विलसल्लसाः ।
अभवन् प्रिया सुरवैरिणः ॥"

इति छन्दोमञ्जरी ॥

(शोभना प्रतिष्ठा ।) सुन्दरप्रशंसा च । (शोभनप्रतिष्ठाविशिष्टे, त्रि । यथा, महाभारते । ३ । ६४ । ६४ ।

"सुभ्रूः सुकेशी सुश्रोणी सुकुचा सुद्विजानना ।
वर्च्चस्विनी सुप्रतिष्ठा खसितायतलोचना ।
सा विवेशाश्रमपदं वीरसेनसुतप्रिया ॥")

सुप्रतिष्ठितः,पुं,(सुष्ठु प्रतिष्ठितः ।)उड्डस्वरवृक्षः। इति राजनिर्घण्टः ॥ सुन्दरप्रतिष्ठायुक्ते, त्रि ॥ (यथा, महाभारते । २ । ५८ । ४ ।

"अयं सहस्रसमितो वैयाघ्रः सुप्रतिष्ठितः ॥"

तथाच ।

"अस्मादपि याति देवत्वं महद्भिः सुप्रतिष्ठितः॥"

इत्युद्भटः ॥)

सुप्रतीकः, पुं,(शोभनाः प्रतीका अङ्गानि यस्य । ईश्वानदिग्गजः । इत्यमरः । १ । १ । ४ ॥ (यथा, रघुः । ५ । ७५ ।

"मदपटुनिनदद्भिर्बोधितो राजहंसैः
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥")

शिवः । कामदेवः । इति केचित् ॥ (साधुः । इति श्रीधरस्वामी ॥ यथा, भागवते ।१०।८।३१।

"एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तो
स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते ॥"

शोभनः प्रतीकः ।) शोभनाङ्गम् । तद्युक्ते,त्रि॥ (यथा, भागवते । ५ । ३ । २ ।

"भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदय इति ॥")

सुप्रभः, पुं, (सुष्ठु प्रभा यस्य ।) शुक्लबलः । इति हेमचन्द्रः ॥ सुन्दरप्रभायुक्ते, त्रि ॥ (यथा, मार्कण्डेये । ८० । २७ ।

"वसुः पुष्णास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥")

सुप्रभा, स्त्री, (सुष्ठु प्रभा यस्याः ।) वाकुची । इति राजनिर्घण्टः ॥ अग्निशिखाविशेषः । यथा,—

"सुप्रभा पद्मरागाभा वारुण्यां दिशि संस्थिता॥"

इति तन्त्रसारः ॥

शोभनदीप्तिश्च ॥

सुप्रभातं, क्ली, (सुष्ठु प्रभातम् ।) शुभसूचकप्रातःकालः । (यथा, भ्रमराष्टके । ८ ।

"रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजालम् ।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥")

प्राभातिकपाठ्यमङ्गलनाक्यम् । यथा,—

सुकेशिरुवाच ।

"किं तदुक्तं सुप्रभातं शङ्करेण महात्मना ।
प्रभाते यत् पठन्मर्त्यो मुच्यते पापबन्धनात् ॥

ऋषय ऊचुः ।

श्रूयतां राक्षसश्रेष्ठ सुप्रभातं हरोदितम् ।
श्रुत्वा स्मृत्वा पठित्वा च सर्व्वपापैः प्रमुच्यते ॥
ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुः शुक्रः सह भानुजेन
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
स्कन्दो गणेशः क्रतुरङ्गिराश्च
मनुः पुलस्त्यः पुलहः सगौतमः ।
रैभ्यो मरीचिर्यवनोऽमलोडुः
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
सनत्कुमारः सनकः सनन्दनः
सनातनोऽप्यासुरिपिङ्गलौ च ।
सप्तस्वराः सप्तरसातलाश्च
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
पृथ्वी सगन्धा सरसास्तथापः
सस्पर्शवायुर्ज्वलितञ्च तेजः ।
नभः सशब्दं महता सहैव
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
सप्तार्णवाः सप्त कुलाचलाश्च
सप्तर्षयो द्वीपवराश्च सप्त ।
भूरादि कृत्वा भुवनानि सप्त
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥

इत्थं प्रभाते परमं पवित्रं
यः संस्मरेद्वा शृणुयाच्च भक्त्या ।
दुःस्वप्ननाशो ननु सुप्रभाते
भवेच्च सत्यं भगवत्प्रसादात् ॥"
इति वामनपुराणे १४ अध्यायः ॥

सुप्रभाता, स्त्री, नदीविशेषः । यथा । अरुणा तृष्णा आङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः । इति श्रीभागवते ५ । २० । ४ ॥ शोभनप्रभातयुता रात्रिश्च ॥

सुप्रयुक्तः, त्रि, (सु + प्र + युज + क्तः ।) शोभनप्रयोगविशिष्टः । (यथा, साहित्यदर्पणे । १परिच्छेदे ।
एकः शब्दः सुप्रयुक्तः सम्यक् ज्ञातः स्वर्गे लोके च कामधुग् भवति ॥")

सुप्रयुक्तशरः, पुं, (सुप्रयुक्तः शरो येन ।) कृतास्त्रः । इति हेमचन्द्रः ॥

सुप्रयोगविशिखः, पुं, सुशिक्षितबाणमोक्षकः । साध्यसाधनक्षमत्वात् शोभनः प्रयोगो निक्षेपो यस्य स सुप्रयोगः तादृशो विशिखो बाणो यस्य स तथा । कृतास्त्रः सुप्रयोगविशिखः कृतपुङ्खवत् । इत्यमरभरतौ । २ । ८ । ६८ ॥

सुप्रलभ्नः, पुं, (सु + प्र + लभ + खल् । "उपसर्गात् खल्घञोः ।"७ । १ । ६७ । इति नुम् ।) सुखलभ्यः । इति सिद्धान्तकौमुदी ॥

सुप्रलापः, पुं, (सु + प्र + लप + घञ् ।) सुवचनम् इत्यमरः । १ । ६ । ३८ ॥

सुप्रसन्नः, पुं, (सुष्ठु प्रसन्नः ।) कुबेरः । इति शब्दमाला ॥ सुप्रसादयुक्ते, त्रि ॥ (यथा, मार्कण्डेये । १०५ । ७ ।
"तथानुकम्पां पुत्राणां सुप्रसन्नो रवे मम ।
कुरु प्रसन्नार्त्तिहर स्थितिकर्त्ता त्वमुच्यते ॥")

सुप्रसन्नकः, पुं, (सुप्रसन्न + संज्ञायां कन् ।) कृष्णार्जकः । इति राजनिर्घण्टः ॥

सुप्रसरा, स्त्री, (सुप्रसरतीति । सु + प्र + सृ + अच् । टाप् ।) प्रसारिणी लता । इति राजनिर्घण्टः ॥

सुप्रसादः, पुं, (सुष्ठु प्रसादो यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥ (विष्णुः । इति महाभारतम् । १३ । १४८ । ३८ ॥ सु + प्र + सद् + घञ् ।) सुप्रसन्नता च । (प्रसन्नतायुक्ते, त्रि । यथा, महाभारते । १२ । ५७ । ३१ ।
"त्रिप्रकारो जितक्रोधः सुप्रसादो महामनाः ॥")

सुप्रिया, स्त्री, (सुष्ठु प्रिया ।) सुन्दरस्त्री । अस्याः प्रमाणं सुभगाशब्दे द्रष्टव्यम् ॥ (अप्सरोविशेषः । यथा, महाभारते । १ । १२३ । ६० ।
"असिता च सुबाहुश्च सुप्रिया सुवपुस्तथा ॥")

सुफलः, पुं, (सुष्ठु फलं यस्य ।) कर्णिकारः । दाड़िमः । वदरः । मुद्गः । इति राजनिर्घण्टः ॥ कपित्थः । इति शब्दचन्द्रिका ॥ शोभनफलयुक्ते, त्रि । (यथा, मार्कण्डेये । १२० । १६ ।
"सुफलानि च शस्यानि रसवन्ति फलानि च ॥"
शोभनफले, क्ली ॥ * ॥ सुष्ठु फलं यस्येति विग्रहे शोभनफलाविशिष्टे, त्रि । यथा, महाभारते । ४ । ४० । १२ ।
"सुफलश्चित्रकोषश्च किङ्किणीजालको महान् ।
कस्य हेमत्सरुर्हिंस्रः खड्गः परमनिर्मलः ॥")

सुफला, स्त्री, (सुष्ठु फलं यस्याः ।) इन्द्रवारुणी । कुमाण्डी । काश्मरी । कदली । रूपिलद्राक्षा इति राजनिर्घण्टः ॥

सुफेनः, पुं, (सुष्ठु फेनः ।) समुद्रफेनः । इति राजनिर्घण्टः ॥ (क्वचित् क्लीवलिङ्गोऽपि दृश्यते ॥)

सुबन्धः, पुं, (सुष्ठु बन्धो यस्य ।) तिलः । इति शब्दचन्द्रिका ॥

सुब्रह्मण्यः, पुं, कार्त्तिकेयः । इति केचित् ॥

सुब्रह्मवासुदेवः, पुं, ब्रह्मरूपवसुदेवसुतः । यथा,
"सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च ।
शान्तिरस्तु शिवञ्चास्तु इत्युक्त्वा तान् विसर्জ্জयेत्
इति तिथ्यादितत्त्वे जन्माष्टमीप्रकरणम् ॥

सुभगः, पुं, (सुष्ठु भगं माहात्म्यं श्रीर्वा यस्य ।) टङ्कणः । चम्पकः । रक्तज्ञानः । अशोकः । इति राजनिर्घण्टः ॥

सुभगः, त्रि, (सुष्ठु भगं श्रीर्यस्य ।) सुदृश्यः । तत्पर्य्यायः । चक्षुष्यः २ । इति हेमचन्द्रः ॥ (यथा, रघुः । ११ । ८० ।
"केवलोऽपि सुभगो नवाम्बुदः
किं पुनस्त्रिदशचापलाञ्छितः ।")
शोभनैश्वर्य्यादियुक्तश्च ॥

सुभगा, स्त्री, (सुष्ठु भगं यस्याः ।) कैवर्त्ती । शालपर्णी । हरिद्रा । नीलदूर्व्वा । तुलसी । प्रियङ्गुः । कस्तूरी । सुवर्णकदली । इति राजनिर्घण्टः ॥ वनमल्ली । इति शब्दरत्नावली ॥ पतिप्रिया । यथा, मार्कण्डेयः ।
"मघा ऋक्षं परित्यज्य यदा सिंहे गुरुर्भवेत् ।
तदाब्दे कन्यका चोढ़ा सुभगा सुप्रिया भवेत् ॥"
इति मलमासतत्त्वम् ॥

सुभगासुतः, पुं, (सुभगायाः सुतः ।) सौभाग्यिनेयः । इत्यमरः । २ । ६ । २४ ॥

सुभङ्गः, पुं, (सुखेन भज्यते इति । सु + भञ्ज + घञ् ।) नारिकेलवृक्षः । इति जटाधरः ॥

सुभद्रः, पुं, (सुष्ठु भद्रं यस्मात् ।) विष्णुः । इति शब्दमाला ॥ राजभेदः । इति हेमचन्द्रः ॥ (पौरवीगर्भसम्भूतो वसुदेवस्य पुत्रविशेषः । यथा, भागवते । ८ । २४ । ४७ ।
"सुभद्रो भद्रबाहुश्च दुर्म्मदो भद्र एव च ।
पौरव्यास्तनयो ह्येते भूताद्या द्वादशाभवन् ॥)
शोभनमङ्गलयुक्ते, त्रि ॥ (यथा, महाभारते । १ । २३३ । १७ ।
"त्वत्त एताः पुनः शुक्र वीरुधो हरितच्छदाः ।
जायन्ते पुष्करिण्यश्च सुभद्राश्च महीरुहः ॥")

सुभद्रकः, पुं, (सुष्ठु भद्रमस्मात् । ततः कन् ।) देवरथः । यथा, शब्दरत्नावल्याम् ।
"व्योमयानं दिव्यरथो विमानोऽस्त्री सुभद्रकः ॥
विल्ववृक्षः । इति शब्दचन्द्रिका ॥

सुभद्रा, स्त्री, (शोभनं भद्रमस्याः ।) श्यामालता । इति शब्दमाला ॥ (अस्याः पर्य्यायो यथा,—
"कालपेषी महाश्यामा सुभद्रोत्पलशारिवा ।
दीर्घमूला च पालिन्दी मसूरविदला च सा ॥"
इति वैद्यकरत्नमालायाम् ॥)
घृतमण्डा । इति शब्दचन्द्रिका ॥ काश्मरी । इति राजनिर्घण्टः ॥ श्रीकृष्णभगिनी । सा च अर्জ্জুनभार्य्या । यथा,—
श्रीकृष्ण उवाच ।
"ममैषा भगिनी पार्थ सारणस्य सहोदरा ।
सुभद्रा नाम भद्रं ते पितुर्मे दयिता सुता ।
यदि ते वर्त्तते बुद्धिर्व्वक्ष्यामि पितरं स्वयम् ॥
अर्জ্জुन उवाच ।
दुहिता वसुदेवस्य वासुदेवस्य च स्वसा ।
रूपेण चैषा सम्पन्ना कमिवैषा न मोहयेत् ॥
निहत्तयार्জ্জुनस्तत्र विवाहं कृतवान् प्रभुः ।
पूर्णे तु द्वादशे वर्षे खाण्डवप्रस्थमागतः ॥"
इति महाभारते आदिपर्व्वणि २२१ अध्यायः
(पीठस्थानस्थदेवीविशेषः । यथा, देवीभागवते । ७ । ३० । ७५ ।
"उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे ॥")

सुभद्राणी, स्त्री, त्रायन्ती । इति रत्नमाला ॥ बहुला इति ख्याता ॥

सुभद्रेयः, पुं, (सुभद्राया ईयः ।) अर्জ্জुनः । इति हेमचन्द्रः ॥

सुभाञ्जनः, पुं, (सु शोभनं भञ्जनं यस्मात् ।) शोभाञ्जनवृक्षः । इति भरतहिरूपकोषः ॥

सुभाषितः, पुं, (सुष्ठु भाषितं यस्य ।) बुधभेदः । यथा,—
"कोमाभो द्वादशास्यश्च वीतरागः सुभाषितः ॥"
इति त्रिकाण्डशेषः ॥

सुन्दरकथिते, त्रि ॥ (सुन्दरवाक्यविशिष्टे च त्रि । यथा, महाभारते । ३ । ६० । ४ ।
"नलश्च हृतसर्व्वस्वमुपलभ्येदमब्रवीत् ।
हृदयसेनामतियशां तां धात्रीं परिचारिकाम् ।
हितां सर्व्वार्थकुशलामनुरक्तां सुभाषिताम् ॥*
सुष्ठु भाषितम् । सुवाक्ये, क्ली, ॥ यथा, हितोपदेशे ।
"विषादप्यमृतं ग्राह्यममेध्यादपि काञ्चनम् ।
नीचादप्युत्तमां विद्यां बालादपि सुभाषितम् ॥"

सुभिक्षः, त्रि, (सुखेन लभ्या भिक्षा यत्र ।) सुलभभैक्षद्रव्यम् । सुलभभैक्षयुक्तकालादिश्च । यथा,—
"द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ ।
दाताचास्त्र तु दुर्भिक्षे सुभिक्षे वस्त्रहेमदः ॥"
इति वह्निपुराणे आह्निकतपोनामाध्यायः ॥
किञ्च ।
"क्षेमे सुभिक्षं ब्राह्मणपीड़ां निर्दिशेद्राज्ञो ॥"
इति तिथ्यादितत्त्वम् ॥

सुभिक्षा, स्त्री, (सुष्ठु भिक्ष्यतेऽसौ । सु + भिक्ष + घञ् ।) धात्रपुष्पिका । इत्यमरः । २ । ४ । १२४ ।
(अस्याः पर्य्यायो यथा,—

"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
सुभीरकः, पुं, पलाशवृक्षः। इति हारावली॥
सुभूः, त्रि, (शोभना भूरुत्पत्तिर्यस्य।) सुजन्मा।
इति मुग्धबोधव्याकरणम्॥(शोभना भूर्भूमिः।)
उत्कृष्टभूमौ, स्त्री। तत्सम्बन्धिनि, त्रि॥
सुभूतिकः, पुं, (सुष्ठु भूतिर्यत्र। कप्।)बिल्ववृक्षः।
इति राजनिर्घण्टः॥
सुभूमः, पुं, कार्त्तवीर्य्यः। स तु जिनानां अष्टम-
चक्रवर्त्ती। इति हेमचन्द्रः॥
सुभृशं, क्ली, (सुष्ठु भृशम्।) बाढम्। अतिशयम्।
इति शब्दरत्नावली॥ (यथा, देवीभागवते।
२।६।२६।
"यक्ष्यामि तं द्विजश्रेष्ठ येन मन्त्रः समर्पितः।
त्वाञ्चापि सुभृशं कुन्ति! नो चेत् मां त्वं
भजिष्यसि॥")
तृहति, त्रि॥
सुभ्रुः } स्त्री. (सुष्ठु भ्रूर्यस्याः। वा ङीष्।)
सुभ्रूः } नारी। इति जटाधरः॥ (शोभना
भ्रूः। यथा, भागवते। ३।२१।३२।
"सुभ्रुवा सुदता श्लक्ष्णस्निग्धापाङ्गेन चक्षुषा।
पद्मकोषस्पृधा नीलैरलकैश्च लसन्मुखम्॥")
सुन्दरभ्रुयुक्ते, त्रि॥ (यथा,भागवते।४।८।४५।
"सुनसं सुभ्रुवं चारु कपोलं सुरसुन्दरम्॥")
सुमं, क्ली,(सुष्ठु मातीति। मा+कः।) पुष्पम्।
इत्यमरटीकायां भरतः॥ (यथा, राजेन्द्र-
कर्णपूरे। ७४।
"किं हारैः किमु कङ्कणैः किमु सुमैः किं
कर्णपूरैरलं
केयूरैर्मणिकुण्डलैरलमलं साङ्गदैरङ्गदैः।
पुंसामेकमखण्डनं पुनरिदं शश्वोर्मते मण्डनं
यच्चिष्पोड़ितपार्व्वणेन्द्रशकलस्यन्दोपमाः
सूक्तयः॥")
सुमः, पुं,(सुष्ठु माति सौन्दर्य्यमिति। मा+कः।)
चन्द्रः। नभः। इति संक्षिप्तसारोणादिवृत्तिः॥
सुमङ्गला, स्त्री, (सुष्ठु मङ्गलं यस्याः।) वाय-
सोली। इति रत्नमाला॥ माकड़ाता इति
माकड़िया इति च भाषा॥ अर्हतां माता।
इति हेमचन्द्रः॥ कामाख्यादेवीयनदीविशेषः।
यथा, कालिकापुराणे ८१ अध्याये।
"नदी सुमङ्गला नाम हिमपर्व्वतनिर्गता।
पूर्व्वस्यां मणिकूटस्य सदा स्रवति शोभना॥
मणिकूटं समारुह्य यस्यां पश्यति वै नदीम्।
स गङ्गास्नानजं पुण्यमवाप्य त्रिदिवं व्रजेत्॥"
अतिशयशोभयुक्ते, त्रि॥
सुमतः, त्रि, सुन्दरज्ञानविषयः। सुशब्दपूर्व्वक-
मनधातोः क्तप्रत्ययेन निष्पन्नः॥
सुमतिः, पुं,(शोभना मतिर्यस्य।) वर्त्तमानकल्पी-
यार्हद्भेदः। भूतकल्पीयार्हद्भेदः। इति हेम-
चन्द्रः॥ सुन्दरमतियुक्ते, त्रि। (यथा, भाग-
वते। १०।६०।३८।
"त्वं वै समस्तपुरुषार्थमयः फलात्मा
यद्दाच्छया सुमतयो विसृजन्ति कृत्स्नम्।
तेषां विभो समुचितो भवतः समाजः
पुंसः स्त्रियाश्च रतयोः सुखदुःखिनोर्न॥"*॥
शोभना मतिः।) शोभनमतौ, स्त्री॥
सुमतिः, स्त्री, (शोभना मतिर्यस्याः।) विष्णु-
यशसः पत्नी। सा कल्किमाता। यथा,—
"सम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम्।
सुमत्यां मातरि विभोः कन्यायां तन्निदेशतः।
चतुर्भिर्भ्रातृभिर्देव करिष्यामि कल्किक्रियम्॥"
इति कल्किपुराणे २ अध्यायः॥
अपि च। तत्रैव।
"सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम्॥"
"सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्पतिम्
पूर्णकामा विप्रमुख्यानाहूयादाद्गवां शतम्॥"
सुमदनः, पुं, (सुष्ठु मदयति कोकिलादीनिति।
सु+मद+णिच्+ल्युः।) आम्रवृक्षः। इति
राजनिर्घण्टः॥
सुमदात्मजा, स्त्री, (सुमदः आत्मज इव यस्याः।
सुमदस्य आत्मजेव इति वा।) अप्सरसः। इति
त्रिकाण्डशेषः॥
सुमधुरं, क्ली, (सुष्ठु मधुरम्।) अत्यर्थमधुर-
वाक्यम्। तत्पर्य्यायः। सान्त्वम् २। इति हेम-
चन्द्रः॥ अतिशयमधुररसयुक्ते, त्रि॥ (यथा,
महाभारते। १३। ५४। १५।
"गीतध्वनिं सुमधुरं तथैवाध्यापनध्वनिम्।
हंसान् सुमधुरांश्चापि तत्र शुश्राव पार्थिवः॥")
सुमधुरः, पुं, (सुष्ठु सुधुरो रसो यत्र।) जीव-
शाकः। इति राजनिर्घण्टः॥
सुमनः, पुं,(सुष्ठु मन्यते इति। सु+मन+अच्।)
गोधूमः। इत्यमरः। २।९।१८॥ (अस्य
पर्य्यायो यथा,—
"गोधूमः सुमनोऽपि स्यात्त्रिविधः स च कीर्त्तितः।
महागोधूम इत्याख्यः पश्चाद्देशात् समागतः॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
धुस्तूरः। इति शब्दमाला॥ मनोहरे, त्रि।
इति शब्दरत्नावली॥
सुमनः, [स्]क्ली, (शोभनं मनो यस्मात्।)पुष्पम्।
इत्यमरः॥ (यथा, भागवते। ४।१५।७।
"प्रशंसन्ति स्म तं विप्रा गन्धर्व्वप्रवरा जगुः।
सुमुचुः सुमनोधाराः सिद्धा नृत्यन्ति स्मःस्त्रियः॥")
उत्तममनस्य। शोभनमनोयुक्ते, त्रि॥ (यथा,
महाभारते। १।४८।१०।
"ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव स्वकर्म्मसु।
स्थिताः सुमनसो राजंस्तेन राज्ञा सुधि-
ष्ठिताः॥")
सुमनःपत्रिका, स्त्री, (सुमनसो जात्याः पत्रिका।)
जातीपत्रिका। इति राजनिर्घण्टः॥
सुमनःफलं, क्ली, (सुमनसो जात्याः फलम्।)
जातीफलम्। इति राजनिर्घण्टः॥
सुमनःफलः, पुं,(सुष्ठु मनो यस्मात् तादृशं फलं
यस्य।) कपित्थवृक्षः। इति शब्दचन्द्रिका॥
सुमनसः, स्त्री, भूम्नि, पुष्पम्। इत्यमरः।२।४।१७॥
सुप्रीतं मन आभिरिति सुमनसः नित्यबहुवच-
नान्तत्वात् बहुवचननिर्देशः। भूम्नि स्त्रियः
सुमनसः। इति रत्नकोषः॥ बहुवयं समा-
सिकता अप् सुमनसोऽप्सरस इति भूम्नि वाम-
नोऽपि। भूम्नि भूरिप्रयोगः। एकत्वञ्च दृश्यते।
सुमनाः पुष्पमाल्यत्योः स्त्रियां ना धीरदेवयो-
रिति मेदिनी। वेश्या श्मशानसुमना इव वर्জ্জ-
नीया इति शूद्रकप्रयोगश्च। सुमनसः क्लीवत्व-
मपि पुष्पं सुमनः कुसुममिति नाममालादिदर्শ-
नात्। अप्रत्याख्येये दधिसुमनसीति क्लीवत्वं
छान्दसमित्येके। इति भरतः॥ (यथा, महा-
भारते। १३।८८।२०—२२।
"मनो ह्लादयते यस्मात् श्रियञ्चापि ददाति च।
तस्मात् सुमनसः प्रोक्ता नरैः सुकृतकर्म्मभिः॥
देवताभ्यः सुमनसो यो ददाति नरः शुचिः।
तस्य तुष्यन्ति वै देवास्तुष्टाः पुष्टिं ददत्यपि॥
यं यमुद्दिश्य दीयेरन् देवं सुमनसः प्रभो।
मङ्गलार्थं स तेनास्य प्रीतो भवति दैत्यप!॥")
सुमना, स्त्री, जातीपुष्पवृक्षः। इति शब्दरत्ना-
वली॥ (यथा, भरतधृतसुश्रुतः।
"सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा॥")
सुमनाः, [स्]पुं, (शोभनं मनो यस्य।) देवता।
इत्यमरः। १।१।७॥ सुष्ठु मन्यते सुमना-
अस्। शोभनं मनोऽस्य इति वा। इति भरतः॥
पण्डितः। इति मेदिनी॥ पूतिकरञ्जः। इति
शब्दमाला॥ निम्बः। महाकरञ्जः। गोधूमः।
इति राजनिर्घण्टः॥(शोभनचित्ते, त्रि। यथा,
महाभारते। ३।२६।२१।
"ततस्ते ब्राह्मणाः सर्व्वे वकं दाल्भ्यमपूजयन्॥
युधिष्ठिरे स्तूयमाने भूयः सुमनसोऽभवन्॥")
सुमनाः, [स्]स्त्री, (सुष्ठु मनो यस्याः।) पुष्पम्।
मालती। इति मेदिनी॥ जाती। शतपत्री।
इति राजनिर्घण्टः॥ "सुष्ठु मन्यते जनैर्मनोज्ञ-
त्वात् शोभनं मनोऽस्यामिति वा सुमनाः सान्तः
स्त्रीलिङ्गश्च।
'स्त्रियां सुमनसो भूम्नि पुष्पे जाती च भेदतः।
विदुषापि यदा दृष्टस्तदा भेदेन लिख्यते॥'
इति व्याडिः।
'सुमनाः पुष्पमाल्यत्योः स्त्रियां नाधीरदेवयोः।'
इति सान्तेषु मेदिनी। आवन्तापि सुमनास्ति।
'सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा।'
इति सुश्रुतः।" इत्यमरटीकायां भरतः॥
सुमनोरजः, [स्] क्ली, (सुमनसां रजः।)
परागः। इत्यमरः। २।४।१७॥
सुमन्तुः, पुं,सुनिविशेषः। स चायर्व्ववेदशाखा-
प्रचारकः। वक्तृवारकश्च। यथा,—
"तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः।
वैशम्पायन एवैको निष्णातो यजुषामुत॥
अथर्व्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः।
इतिहासपुराणानां पिता मे रोमहर्षणः॥"
इति श्रीभागवते। १।४।२०—२२॥

"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः॥"
इति पुराणम्॥
(सुष्ठु मन्तुरपराधो यस्य।)अत्यपराधिनि,त्रि॥
सुमन्त्रः, पुं, कल्किदेवस्य ज्येष्ठभ्राता। यथा,—
"कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्त्रकाः
तातमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः॥"
इति कल्किपुराणे २ अध्यायः॥
अपि च।
"विशाखयूपभूपालः प्रायात् साधुजनप्रियः।
कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च सम्भले॥
कविं प्राज्ञं सुमन्त्रञ्च पुरस्कृत्य महाप्रभम्।
गार्ग्यभार्ग्यविशालैश्च ज्ञातिभिः परिवारितम्॥"
इति तत्रैव ३ अध्यायः॥
दशरथराजस्य सारथिः मन्त्री च। यथा,—
"तद्गच्छ त्वरितं सूत राजपुत्रं यशस्विनम्।
राममानय भद्रं ते नात्र कार्य्या विचारणा॥
श्रुत्वा राजवचनं कथं गच्छामि भामिनि।
तच्छ्रुत्वा मन्त्रिणो वाक्यं राजा मन्त्रिणमब्रवीत्
सुमन्त्र रामं द्रक्ष्यामि शीघ्रमानय सुन्दरम्॥"
इति वाल्मीकीये रामायणे अयोध्याकाण्डे १४ सर्गः॥
सुमित्रः,पुं, चतुर्विंशतिवर्त्तमानार्हत्पित्रन्तर्गत-विंशार्हत्पिता। इति हेमचन्द्रः॥ इक्ष्वाकुवंशीयदृढाश्वान्वयः सुरथराजपुत्रः। इति विष्णुपुराणे ४ अंशे २२ अध्यायः॥
सुमित्रभूः,पुं, सगरः। स तु जिनानां चक्रवर्त्तिभेदः। इति हेमचन्द्रः॥
सुमित्रा, स्त्री,दशरथराजपत्नी। सा तु लक्ष्मण-शत्रुघ्नमाता। यथा, भट्टौ २ सर्गे।
"प्रासोष्ट शत्रुघ्नसुदारचेष्ट-
मेका सुमित्रा सह लक्ष्मणेन॥"
तत्पर्य्यायः। लक्ष्मणप्रसूः २। इति शब्दरत्नावली॥
सुमुखं, क्ली, नखक्षतविशेषः। इति शब्दरत्नावली॥ (शोभनं मुखमिति।) उत्तमाख्यञ्च॥
सुमुखः, पुं, (शोभनं मुखं यस्य।) गरुड़पुत्रः। (यथा, महाभारते। ५। १०१। २।
"वैनतेयसुतैः सूत षड़्भिस्तत्तमिदं कुलम्।
सुमुखेन सुनाम्ना च सुनेत्रेण सुवर्चसा।
सुरुचा पक्षिराजेन सुबलेन च मातले!॥")
गजभेदः। शाकभेदः। नागभेदः। इति शब्दरत्नावली॥ (यथा, महाभारते। १।३५।१४।
"इस्तपिण्डः पिठरकः सुमुखः कौणपाशनः।
कुठरः कुक्षरश्चैव तथा नागः प्रभाकरः॥")
पक्षिभेदः। इति विश्वः॥ सितार्ज्जकः। वनवर्ब्बरिका। वर्ब्बरः। इति राजनिर्घण्टः॥
सुमुखः, त्रि, (सुष्ठु सुखं यस्य।) मनोज्ञः। सुन्दराननः। इति शब्दरत्नावली॥ (यथा, भागवते। ४। २१। १५।
"सुनासः सुमुखः सौम्यः पीनांसः सुहृदुल्लसितः॥")
सुमुखसूः, पुं, (सुमुखस्य सूरुत्पत्तिर्यस्मात्।) गरुड़ः। इति त्रिकाण्डशेषः॥ उत्तमाननपुत्रपिता च॥
सुमुखा, स्त्री, (शोभनं मुखं यस्याः। टाप्।) सुन्दरी नारी। सुन्दराननेति भरतहिरूपकोषः॥ सुमुखा शाला। इति मुग्धबोधव्याकरणम्। दर्पणः। इति केचित्॥
सुमुखी, स्त्री, (सुष्ठु मुखं यस्याः। "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्।" ४। १। ५४। इति ङीष्।) सुन्दरी नारी। सुन्दराननेति। (यथा, कुमारे। १। २६।
"ङ मेति मात्रा तपसो निविद्धा
पश्चादुमाख्यां सुमुखो जगाम॥")
सुमुष्टिः,पुं,(सुष्ठु मुष्टिर्यस्मात्।) विषमुष्टिचुपः। इति राजनिर्घण्टः॥
सुमूलः, पुं, (सुष्ठु मूलं यस्य।) खेतशिग्रुः। इति राजनिर्घण्टः॥
सुमूलकं, क्ली, (शोभनं मूलं यस्य। कप्।) गर्ज्जरम्। इति राजनिर्घण्टः॥
सुमूला,स्त्री.(शोभनं मूलं यस्याः।) शालपर्णी पृश्निपर्णी। इति राजनिर्घण्टः॥ सुन्दरमूलयुक्ते, त्रि॥
सुमेखलः,पुं,(शोभना मेखला यस्मात्।) मुञ्जः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा,—
"मुञ्जो मुञ्जातको बाणः स्थूलदर्भः सुमेखलः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) शोभनमेखलायुक्ते, त्रि॥
सुमेधाः, [स्] स्त्री, (सुष्ठु मेधा अस्याः। "नित्यमसिच् प्रजामेधयोः।" ५। ४। १२२। इति असिच्।) ज्योतिष्मती। (सुष्ठु मेधा यस्य।) सुबुद्धौ, त्रि। इति मेदिनी॥ (यथा, भागवते। ८। ४। ३।
"इमे अङ्गिरसः सत्रमासतेऽद्य सुमेधसः॥")
सुमेरुः,पुं,(सुष्ठु मिनोति क्षिपति ज्योतींषि इति सु+मि+"मिषोभ्यां रुः।" उणा० ४।१०१। रुः।) पर्व्वतविशेषः। तत्पर्य्यायः। मेरुः २ हेमाद्रिः ३ रत्नसानुः ४ सुरालयः ५। इत्यमरः। १। १।५२॥ अमरादिः ६ भूस्वर्गः ७। इति जटाधरः॥ तद्विवरणं यथा,—
"एषां मध्ये इलावृतं नाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामससुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनवितत्तो मूले षोड़शसहस्रं तावतान्तर्भूम्यां प्रविष्टः॥" ७॥
"मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भगिरय उपकल्पिताः॥ ११॥
चतुर्षु एतेषु चूतजम्बूकदम्बन्यग्रोधाः चत्वारः पादपप्रवराः पर्व्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपवितततयः शतयोजनपरिणाहाः॥ १२॥
ऋटाश्चत्वारः पयोमधुघृतगुडसम्पृक्तजलाः यदुपस्पर्शिनं उपदेवगणा योगैश्वर्य्याणि स्वाभाविकानि धारयन्ति॥ १३॥
देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति॥"१४॥
"मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपकॢप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति॥ २८॥
तामनुपरितो लोकपालानामष्टानां यथादिशं स्वयारूपं तुरीयमानेन पुरोऽष्टावुपकॢप्ताः।"२८॥
इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥
"अस्मिन्नेन्द्रीं पुरीं पूर्व्वस्यां मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चादुरणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम।" इति च तत्रैव।५।२१।७॥*॥
अपि च।
"परिमण्डलस्तयोर्मध्ये मेरुः कनकपर्व्वतः।
चातुर्व्वर्णः स सौवर्णश्चतुरस्रः समुच्छ्रितः॥
नानावर्णः स पार्श्वे तु पूर्व्वान्ते श्वेत उच्यते।
पीतन्तु दक्षिणं तत्र शृङ्गपत्रनिभं परम्॥
उत्तरं तस्य रक्तं वै इति वर्णसमन्वितः।
मेरुस्तु शुशुभे दिव्यो राजवत् समधिष्ठितः॥
आदित्यतरुणाभासो विधूम इव पावकः।
योजनानां सहस्राणि चतुरशीतिरुच्छ्रितः॥
प्रविष्टः षोड़शाधस्तादष्टाविंशतिविंशतिः।
विस्तारात्त्रिगुणस्तस्य परिणाहः समन्ततः॥
स पर्व्वतो महादिव्यो दिव्यौषधिसमन्वितः।
भुवनैराहृतः सर्व्वैर्जातरूपपरिष्कृतैः॥
तत्र देवगणाः सर्व्वे गन्धर्व्वोरगराक्षसाः।
शैलराजे प्रमोदन्ते सर्व्वतोऽप्सरसस्तथा॥
स तु मेरुः परिहृतो भुवनैर्भूतभावनैः।
यस्येमे चतुरो देशा नानापार्श्वेषु संस्थिताः॥
भद्राश्वो भारतश्चैव केतुमालश्च पश्चिमे।
उत्तरावेव कुरवः कृतपुण्यप्रतिश्रयाः॥
विष्कम्भपर्व्वतास्तद्वन्मन्दरो गन्धमादनः।
विपुलश्च सुपार्श्वश्च सर्व्वरत्नविभूषितः॥"
इति मात्स्ये ८५ अध्यायः॥*॥
किञ्च।
"मध्ये पृथिव्यामद्रीन्द्रो भास्वान् मेरुर्हिरण्मयः
योजनानां सहस्राणि चतुरशीतिः समुच्छ्रितः॥
प्रविष्टः षोड़शाधस्ताद्रत्नां धरणीधरः।
तावत्प्रमाणा पृथिवी पर्व्वतस्य समन्ततः॥
तस्य शृङ्गत्रयं मूर्द्धि स्वर्गो यत्र प्रतिष्ठितः।
नानाद्रुमलताकीर्णं नानारत्नोपशोभितम्॥
मध्यगं पश्चिमं पूर्व्वं मेरोः शृङ्गाणि त्रीणि वै।
प्रयुतोच्छ्रितमात्राणि हे शृङ्गे तस्य मध्यतः॥
मध्यस्थं स्फाटिकं शृङ्गं वैदूर्य्यकरकामयम्।
इन्द्रनीलमयं पूर्व्वं माणिक्यं पश्चिमं स्मृतम्॥
योजनानां सहस्राणि नियुतानि चतुर्दश।
उच्छ्रितं मध्यगं शृङ्गं स्वर्गो यत्र प्रतिष्ठितः॥
प्रयुतान्तरितं शृङ्गं मूर्द्धि, छत्राकृति स्थितम्
पूर्व्वमध्यमशृङ्गाणां सकलं मध्यमस्य च॥

विपृष्टो नाकपृष्ठो वा अप्सरःशान्तिनिर्हृती ।
आनन्दोऽथ प्रमोदश्च स्वर्गाः शृङ्गे च मध्यमे ॥
श्वेतश्च पौष्टिकश्चैव उपशोभनमन्मथौ ।
आह्लादः स्वर्गराजश्च स्वर्गाः शृङ्गे तु पश्चिमे ॥
निर्ममो निरहङ्कारः सौभाग्यद्यातिनिर्मलः ।
स्वर्गार्थिते द्विजश्रेष्ठ पूर्व्वशृङ्गे समर्थिताः ॥
एकविंशत्यमी स्वर्गा निविष्टा मेरुमूर्द्धनि ॥*॥
अहिंसादानकर्त्ता च यज्ञानां तपसां तथा ।
तेषु तेषु वसन्ति स्म जनाः क्रोधविवर्जिताः ।
जलप्रवेशी चानन्दः प्रमोदं वह्निसाहसः ॥
भृगुप्रपाते सौम्यस्तु रणे चैवास्य निर्ममः ॥
अनशने तु संवासे मृतो गच्छेत्त्रिपिष्टपम् ।
क्रतुयाजी नाकपृष्ठमग्निहोत्री च निर्वृतिम् ॥
तड़ागकूपकर्त्ता च लभते पौष्टिकं द्विज ।
सौवर्णदायी सौभाग्यं लभेत् स्वर्गं महातपाः ॥
शीतकाले महावह्निं प्रज्वालयति यो नरः ।
सर्व्वसत्त्वहितार्थाय स्वर्गं चाप्सरसं लभेत् ॥
हिरण्यगोप्रदानेन निरहङ्कारमाप्नुयात् ।
भूमिदानेन शुद्धेन लभते शान्तिकं पदम् ॥
रौप्यदानेन शुद्धेन स्वर्गं गच्छति निर्ममः ।
अश्वदानेन पुण्याढ्यं कन्यादानेन मङ्गलम् ॥
द्विजेभ्यस्तर्पणं कृत्वा दत्त्वा वस्त्राणि भक्तितः ।
श्वेतन्तु लभते स्वर्गं यत्र गत्वा न शोचति ॥
कपिलागोप्रदानेन परार्द्धं चानुभूयते ।
गोदक्षस्य प्रदानेन स्वर्गं मन्मथमश्नुते ॥
स पुमान् स सरित्स्नायी तिलधेनुप्रदस्तथा ।
क्षीरोपानहदाता च स्वर्गं तत्फलशोभनम् ॥
देवायतनकर्त्तारो शुश्रूषणपरस्तथा ।
तीर्थयात्रापरश्चैव स्वर्गराजे महीयते ॥
एकान्नभोजी यो मर्त्यो नक्तभोजी च नित्यशः ।
उपवासी त्रिरात्राद्यैः शान्तस्वर्गं शुभं लभेत् ॥
सरित्स्नायी जितक्रोधी ब्रह्मचारी दृढ़व्रतः ।
निर्ममं स्वर्गमाप्नोति तथा भूतहिते रतः ।
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात् ॥
येन येन हि भावेन यद्यदानं प्रयच्छति ।
तत्तत् स्वर्गमवाप्नोति यद्यदिच्छति मानवः ॥
यस्तु सर्व्वाणि दानानि ब्राह्मणेभ्यः प्रयच्छति ।
संप्राप्य न निवर्त्तेत दिवं शान्तमनामयम् ॥
शृङ्गन्तु पश्चिमं यच्च ब्रह्मा तत्र स्थितः स्वयम् ।
पूर्व्वशृङ्गे स्वयं विष्णुर्मध्ये चैव शिवः स्थितः॥"
इति नारसिंहे । ३० । १४—४५ ॥
अन्यत् कौर्म्मे ४२ । ४३ अध्याययोः वाराहे-रुद्रगीतासु च द्रष्टव्यम् ।

सुस्नुतृष्टः, पुं, कर्पूरकः । इति शब्दचन्द्रिका ॥
सुश्रः, पुं, देशविशेषः । इति शब्दरत्नावली ॥
सुयामुनः, पुं, (शोभनं अतिप्रियं यामुनं यमुना-सम्बन्धि जलं यस्य ।) विष्णुः । वल्लराजः । प्रासादः । अद्रिविशेषः । इति हेमचन्द्रः ॥ मेघविशेषः । इति मेदिनी ॥
सुयोधनः, पुं, (सुखेन युध्यतेऽसौ । सु + युध + युच् ।) दुर्य्योधनराजः । इति त्रिकाण्डशेषः ॥ यथा, महाभारते । १ । १५५ । ३५ ।
"शीघ्रं गच्छाम भद्रं ते न नो विद्यात् सुयोधनः ॥")

सुर, ञ भैश्वर्य्ययोः । इति कविकल्पद्रुमः ॥ (तुदा०-परः०-अकः०-सेट् ।) दन्त्यादिः । ञ, सुरति सोरिता सुषोर सुसोर । भा, दीप्तिः । ऐश्वं ऐश्वर्य्यम् । इति दुर्गादासः ॥
सुरः, पुं, (सुष्ठु राति ददात्यभीष्टमिति । रा + कः । यद्वा, सुरति शोभते इति । सुर + इगुपधेति कः । यद्वा, सुनोतीति । षुञ् अभिषवे + "सुसूधाञ्गृधिभ्यः क्रन् ।" उणा० २ । २४ । क्रन् ।) देवः । इत्यमरः । १ । १ । ७ ॥ (यथा, रघुः । ३ । ५६ ।
"चुकोप तस्मै स मृगं सुरस्त्रियः
प्रसह्य केशव्यपरोपणादिव ॥"
सूर्य्यः । पण्डितः । इति केचित् ॥ (स्वरः । यथा, महाभारते । १३ । ८५ । ८१ ।
"लक्षणानि सुरास्तोमा निरुक्तं सुरपङ्क्तयः ॥")

सुरकरीन्द्रदर्पापहा, स्त्री, (सुरकरीन्द्रस्य ऐरावतस्य दर्पं हन्तीति । हन + डः । टाप् ।) गङ्गा । यथा,—
"भगीरथपथानुगा सुरकरीन्द्रदर्पापहा
महेशमुकुटप्रभा गिरिशिरःपताका सिता ।
सुरासुरनरोरगैरजभवाच्युतैः संस्तुता
विमुक्तिफलदायिनी भगवतो स्वयं राजते ॥"
इति कल्किपुराणे ३४ अध्यायः ॥

सुरकारुः, पुं, विश्वकर्म्मा । "सुराणां कारुः शिल्पीति बहुव्रीहिसमासेनिष्पन्नः ॥
सुरक्षता, स्त्री, (सुरेण क्षता ।) गुड़ची । इति राजनिर्घण्टः ॥
सुरक्तः, त्रि, (सु + रञ्ज + क्तः ।) शोभनरागयुक्तः । अतिशयरक्तविशिष्टः । अत्यनुरक्तः । इति केचित् ॥
सुरक्तकः, पुं, (सुरक्त + संज्ञायां स्वार्थे वा कन् ।) कोषस्रः । स्वर्णगैरिकम् । इति राजनिर्घण्टः ।
सुरखण्डनिका, स्त्री, बौषाभेदः । इति शब्दरत्नावली ॥ सुरमण्डलिका इति पाठान्तरम् ॥
सुरगण्डः, पुं, रोगविशेषः । इति भूरिप्रयोगः ॥ राजगाँड़ इति भाषा ॥
सुरगुरुः, पुं, (सुराणां गुरुः ।) बृहस्पतिः । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । ११५ । ७२ ।
"ततो मुक्ता रणं देवसैन्येऽपीन्द्रमनुद्रुते ।
निनाय ब्रह्मभवनं भीतः सुरगुरुः स्वयम् ॥"
देवपूज्ये, त्रि । यथा, महाभारते । १ । १ । ३२ ।
"यस्मात् पितामहो जज्ञे प्रभुरेकः प्रजापतिः ।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ ॥")
सुरग्रामणीः, पुं, (सुराणां ग्रामणीर्नेता ।) इन्द्रः । इति त्रिकाण्डशेषः ॥
सुरङ्गं, क्ली, (सुष्ठु रङ्गो यस्मात् ।) हिङ्गुलम् । पत्तङ्गम् । इति राजनिर्घण्टः ॥
सुरङ्गः, पुं, (सुष्ठु रङ्गो यस्मात् ।) नागरङ्गः । इति राजनिर्घण्टः ॥ गर्त्तविशेषः । इति सुरङ्गयुक्-शब्ददर्शनात् ॥

सुरङ्गटं, क्ली, (सुष्ठु रङ्गं ददातीति । दा + कः ।) पत्तङ्गम् । इति राजनिर्घण्टः ॥
सुरङ्गधातुः, पुं, (सुष्ठु रङ्गो यस्मात् तादृशो धातुः ।) गैरिकम् । इति राजनिर्घण्टः ॥
सुरङ्गयुक्, [ज्] पुं, (सुरङ्गं युनक्तीति । युज् + क्विप् ।) सुरङ्गं कृत्वा अपहरति यः । यथा,—
"कुजम्भिलः सुरङ्गाहिरधर्य्योः सुरङ्गयुक् ॥"
इति शब्दरत्नावली ॥)
सुरङ्गा, स्त्री, सन्धिः । सोँध इति भाषा । इति हलायुधः ॥ कैवर्त्तिका । इति राजनिर्घण्टः ॥
सुरङ्गिका, स्त्री, मूर्व्वा । इति राजनिर्घण्टः ॥
सुरङ्गी, स्त्री, (सुष्ठु रङ्गो यस्याः । ङीप् ।) काकनासा । इति राजनिर्घण्टः ॥ रक्तगवाह्वानः । इति रत्नमाला ॥
सुरजःफलः, पुं, (सुष्ठु रजो यत्र तादृशं फलं यस्य ।) पनसवृक्षः । इति भूरिप्रयोगः ॥
सुरजनी, स्त्री, (सुशोभना रजनी ।) रात्रिः । इति शब्दचन्द्रिका ॥
सुरज्येष्ठः, पुं, (सुरेषु ज्येष्ठः । ब्रह्मा । इत्यमरः । १ । १ । १६ ॥
सुरञ्जनः, पुं, (सुष्ठु रञ्जयतीति । रञ्ज + णिच् + ल्युः ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः ॥
सुरतं, क्ली, (सुष्ठु रतं रमणं यत्र ।) निधुवनम् । इति मेदिनी ॥ (यथा, कुमारे । १ । १० ।
"भवन्ति यत्रौषधयो रजन्या-
मतैलपूराः सुरतप्रदीपाः ॥")
सुरते वर्णनीयानि । यथा,—
सुरते सात्त्विका भावाः शीत्कारः कुटुम्बलाचता ।
काञ्चीकङ्कणसञ्जोररवाधरनखक्षतिः ॥"
इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम् ॥
दयाली, त्रि । इत्यमरटीका सारसुन्दरी । १ । १ । १५ ॥ अत्रार्थे सूरतः इति पाठः साधुः ॥ क्रीड़ायुक्तः । इति उणादिवृत्तौ उज्ज्वलदत्तः । ५ । १४ ॥)
सुरततालो, स्त्री, (सुरतं तालयतीति । तल + णिच् + अण् । गौरादित्वात् ङीष् ।) दूती । शिरस्क । इति मेदिनी ॥
सुरता, स्त्री, (सुराणां भावः समूहो वा । सुर + तल् ।) देवत्वम् । इति मेदिनी ॥ (यथा, महाभारते । ५ । ८८ । १४ ।
"भवनं पश्य वारुण्यं यदेतत् सर्व्वकाञ्चनम् ।
यत् प्राप्य सुरतां प्राप्ताः सुराः सुरपतेः सखे ॥")
सुरसमूहः । इति व्याकरणम् ॥ (सुष्ठु रता । अप्सरोविशेषः । यथा, महाभारते । १ । ६५ । ५१ ।
"केशिनी च सुवाहुश्च सुरता सुरजा तथा ॥")
सुरतोषकः, पुं, (सुरान् तोषयतीति । तुष् + णिच् + ण्वुल् ।) कौस्तुभमणिः । इति शब्दरत्नावली ॥ देवप्रीतिकारके, त्रि ॥
सुरथः, पुं, चन्द्रवंशीयचैत्रराजपुत्रः । यथा,—
श्रीनारायण उवाच ।
"अत्रिश्च ब्रह्मणः पुत्रस्तस्य पुत्रो निशाकरः ।

स च क्रत्वा राजसूयं द्विजराजो बभूव ह ॥
गुरुपत्न्यान्तु तारायां तद्बभूव बुधः सुतः।
बुधपुत्रश्च वैन्यश्च तत्पुत्रः सुरथश्च सः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ५८। ४—५ ॥
सच स्वारोचिषमन्वन्तरे कोलापुर्य्यधिपतिः।
तेनादौ पृथिव्यां दुर्गापूजा कृता। तत्प्रसादेन
च असौ सावर्णिर्नाम मनुर्जातः। यथा,—
"कालान्तरे पूजिता सा सुरथेन महात्मना।
राज्ञा मेधसमाख्येन सुरम्यान्ये सरित्तटे ॥
मेधादिभिस्त्र महिषैः क्षुद्रसारैश्च गण्डकैः।
छागैर्मांसैश्च कुल्माण्डैः पक्षिभिर्बलिभिर्भुने ॥
वैदोक्तानि च दत्त्वैव उपचाराणि षोडश।
कृत्वा च कवचं ध्यात्वा संपूज्य च विधानतः ॥
राजा स्तुत्वा परीहारं वरं प्राप यथेप्सितम्।
मुक्तिं संप्राप वैश्यश्च संपूज्य च सरित्तटे ॥
तुष्टाव राजा वैश्यश्च साश्रुनेत्रः पुटाञ्जलिः।
विससर्ज्ज मृण्मयीं तां गभीरे निर्म्मले जले ॥
दृष्ट्वा मृण्मयीं मृण्मयीं हृत्वा जलधौतां नराधिपः।
रुरोद तत्र वैश्यश्च ततः स्नानान्तरं ययौ ॥
त्यक्त्वा देहञ्च वैश्यश्च पुष्करे दुष्करं तपः।
कृत्वा जगाम गोलोकं दुर्गादेवीवरेण च ॥
राजा ययौ स्वराज्यञ्च पूज्यो निष्कण्टकं बली
भोगञ्च बुभुजे भूपः षष्टिवर्षसहस्रकम् ॥
भार्य्यां स्वराज्यं संन्यस्य पुत्रे स कालयोगतः।
मनुर्बभूव सावर्णिस्त्यक्त्वा च पुष्करे तपः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥*॥
विस्तारस्तु दुर्गाशब्दे द्रष्टव्यः ॥

सुरदारु, क्ली, (सुरप्रियं दारु।) देवदारु। इति रत्नमाला ॥ (यथा, भागवते। ८।२।१३।
"पिचुमर्दैः कोविदारैः सरलैः सुरदारुभिः ॥")

सुरदीर्घिका, स्त्री, (सुराणां दीर्घिका।) स्वर्गगङ्गा। इत्यमरः। १।१।५२ ॥

सुरदुन्दुभी, स्त्री, (सुराणां दुन्दुभीव आह्लादकत्वात्।) तुलसी। इति राजनिर्घण्टः ॥

सुरद्रुमः, पुं, (सुराणां द्रुमः।) देवनलः। इति राजनिर्घण्टः ॥ देवदारु च ॥ (कल्पवृक्षादिः। यथा, भागवते। १०। ३८। २२।
"न तस्य कश्चिद्दयितः सुहृत्तमो
न चाप्रियो द्वेष्य उपेक्ष्य एव वा।
तथापि भक्तान् भजते यथा तथा
सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥")

सुरद्विट्, [ष्] पुं, सुरान् द्वेष्टीति। द्विष्+क्विप्।) असुरः। इत्यमरः। १।१।१२ ॥ (यथा, रघुः। १०। १५।
"प्रक्षिप्यत सुरास्त्रैस्तं शमयित्वे सुरद्विषाम्।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ॥"
राहुः। यथा, तत्रैव। २। ३८।
"उपस्थिता शोणितपारणा मे
सुरद्विषश्चन्द्रमसी सुधेव ॥"
तथाच हरिवंशे। ८७। २।
"षड्भिः सितस्य मासैरन्धेन अनेः सुरद्विषो
ऽन्धार्वात् ॥")

देवद्वेषकः ॥ (यथा, भागवते। १। ३। २४।
"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम्।
बुद्धो नामाञ्जनसुतः कीकटेषु भविष्यति ॥")

सुरद्विपः, पुं, (सुराणां द्विपः।) देवहस्ती। इति केचित् ॥ (ऐरावतः। यथा, रघुः। ३। ५५।
"हरेः कुमारोऽपि कुमारविक्रमः
सुरद्विपास्फालनकर्कशाङ्गुली।
भुजे शचीपत्रविशेषकाङ्किते
स्वनामचिह्नं निचखान सायकम् ॥")

सुरधनुः, [स्] क्ली, (सुरस्य धनुः।) इन्द्रधनुः। इति जटाधरः ॥ (यथा, किरातेः। ७।१६।
"यातस्य ग्रथिततरङ्गसैकताभे
विच्छेदं विषयसि वारिवाहजाले।
भातेतुस्त्रिदशवधूजनाङ्गभाजां
सन्मानं सुरधनुषः प्रभामयीनाम् ॥")

सुरधूपः, पुं, (सुरप्रियो धूपः।) राल्लः। इति राजनिर्घण्टः ॥

सुरनदी, स्त्री, (सुराणां नदी।) गङ्गा। इति भूरिप्रयोगः ॥ (यथा, महाभारते। ६।८०।५।
"गङ्गायाः सुरनद्या वै स्वादुभूतं यथोदकम्।
महोदधिगुणाभ्यासात् लवणत्वं नियच्छति॥")

सुरनन्दा, स्त्री, (सुरान् नन्दयतीति। नन्द+णिच्+अण्। टाप्।) नदीविशेषः। इति शब्दरत्नावली ॥

सुरनालः, पुं, (सुरप्रियं नालमस्य।) देवनलः। इति राजनिर्घण्टः ॥

सुरनिम्नगा, स्त्री, (सुराणां निम्नगा।) गङ्गा। इत्यमरः। १।१०।३१ ॥ (यथा, कथासरित्सागरे। ५२। ३४२।
"त्यक्त्वा सर्व्वं तनुं त्यक्त्वंस्तापसा सुरनिम्नगाम्॥")

सुरनिर्गन्ध, क्ली, पत्रकम्। इति राजनिर्घण्टः ॥

सुरपतिः, पुं, (सुराणां पतिः।) इन्द्रः। इत्यमरः। १।१।४६॥ (यथा, महाभारते।७।१०१। १८।
"पुनर्हतो सुरपतिर्म्मह्यं वर्म्म सुसंग्रहम् ॥")

सुरपत्यं, क्ली, (सुराणां पत्न्याः। समासे अः।) आकाशम्। इति हेमचन्द्रः ॥

सुरपर्णं, क्ली, (सुरप्रियं पर्णमस्य।) ओषधिविशेषः। माचीपत्री इति ख्यातः। तत्पर्य्यायः। देवपर्णम् २ वीरपर्णम्३ सुगन्धिकम्४ माचीपत्रम् ५ सूक्ष्मपत्रम् ६ देवार्हम् ७ गन्धपत्रकम् ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कृमिश्लेष्मवातलासकफकासनाशित्वम्। दीपनत्वम् वर्ण्यत्वम्। बालहितत्वञ्च। इति राजनिर्घण्टः॥

सुरपर्णिकः, पुं, (सुरप्रियं पर्णमस्त्यस्येति। ठन्।) सुरपुन्नागः। इति राजनिर्घण्टः ॥

सुरपर्णिका, स्त्री, (सुरपर्णी। संज्ञायां कन्।) पुन्नागः। इति हेमचन्द्रः ॥

सुरपर्णी, स्त्री, (सुरप्रियं पर्णमस्याः। ङीष्।) पलाशी। इति राजनिर्घण्टः।

सुरपादपः, पुं, (सुराणां पादपः।) कल्पवृक्षः। देवतरुशब्दस्वरसात् ॥ (यथा, भागवते। ८।५।१७।
"चैत्रकौचकवेणूनां गुल्मानि सुरपादपान् ॥")

सुरपुन्नागः, पुं, (सुरप्रियः पुन्नागः। पुन्नागवृक्षविशेषः। तत्पर्य्यायः। नमेरुः २ सुरेष्टः ३ सुरपर्णिकः ४ सुरताङ्गः ५। अस्य गुणाः पुन्नागवत्। इति राजनिर्घण्टः ॥

सुरपुरी, स्त्री, (सुरस्य पुरी।) अमरावती। इति त्रिकाण्डशेषः ॥

सुरप्रियः, पुं, (सुराणां प्रियः। अगस्त्यपुष्पवृक्षः। इति राजनिर्घण्टः ॥ इन्द्रः। हरिणमृगः। इति केचित् ॥ देवयुक्ते, त्रि ॥

सुरप्रिया, स्त्री, (सुराणां प्रिया।) जाती। स्वर्गरम्भा। इति राजनिर्घण्टः ॥ (अप्सराः। यथा, भागवते। ८। १५। १८।
"हेमजालाक्षनिर्गच्छद्धूमेनागुरुगन्धिना।
पाण्डरेण प्रतिच्छन्नमार्गं यान्ति सुरप्रियाः ॥")

सुरभि, क्ली, (सुष्ठु रमतेऽनेनेति। सु+रभ+इन्।) स्वर्णम्। गन्धाश्म। इति शब्दरत्नावली ॥ सुन्दरः। साधुगन्धः। इति धरणिः ॥

सुरभिः, पुं, (सु+रभ+इन्।) सुगन्धिः। इत्यमरः। १। ५। ११ ॥ चम्पकः। वसन्तर्त्तुः। जातीफलवृक्षः। इति मेदिनी ॥ श्रमीवृक्षः। कदम्बवृक्षः। कणगुग्गुलुः। गन्धद्रव्यम्। वकुलवृक्षः। रालः। इति राजनिर्घण्टः ॥ चैत्रमासः। धीरः। इति धरणिः ॥ गन्धफलः। इति शब्दरत्नावली ॥

सुरभिः, स्त्री, (सुर+रभ+इन्।) शल्लकी। माढभेदः। मुरा। गौः। इति मेदिनी ॥ पुस्तकान्तरे सुराख्याने सुरा इति पाठः। वृक्षजटा। वनमालिका। तुलसी। पाची। इति राजनिर्घण्टः ॥ पृथिवी। इति धरणिः ॥ गोमाता। (यथा, रघुः। १। ८१।
"सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥"
तस्या उत्पत्त्यादिर्यथा,—
नारद उवाच।
"सा का वा सुरभी देवी गोलोकादागता च या
तत्कर्म्मचरितं ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः॥
श्रीनारायण उवाच।
गवामधिष्ठातृदेवी गवामाद्या गवां प्रसूः।
गवां प्रधाना सुरभी गोलोके सा समुद्भवा ॥
सर्व्वादिसृष्टिकथनं कथयामि निशामय।
बभूव येन तत्कर्म्म पुरा वृन्दावने वने ॥
एकदा राधिकानाथो राधया सह कौतुकात्।
गोपाङ्गनापरिवृतः पुष्पं वृन्दावनं ययौ ॥
सहसा तत्र रहसि विजहार च कौतुकात्।
बभूव क्षीरपानेच्छा तदा स्वेच्छामयस्य च ॥
ससृजे सुरभिं देवी लीलया वामपार्श्वतः।
वत्सयुक्तां दुग्धवतीं वत्सो नाम्ना मनोरथः ॥
दृष्ट्वा सवत्सां सुदामा रत्नभाण्डे दुदोह च।
क्षीरं सुधातिरिक्तञ्च जन्ममृत्युजराहरम् ॥
तदुष्णञ्च पयः स्वादु पपौ गोपीपतिः स्वयम्।
सरो बभूव पयसा भाण्डविस्रंसनेन च ॥
दैर्घ्ये च विस्तृते चैव परितः शतयोजनम्।

गोलोके सुप्रसिद्धश्च स च क्षीरसरोवरः ॥
गोपिकानाञ्च राधायाः क्रीड़ावापी बभूव सा।
रत्नेन खचिता तूर्णं भूता वापीश्वरेच्छया ॥
बभूवुः कामधेनूनां सहसा लक्षकोटयः।
तावन्तो हि च वत्साश्च सुरभीलोमकूपतः ॥
तासां पुत्राः प्रपौत्राश्च सम्बभूवुरसंख्यकाः।
कथिता च गवां सृष्टिस्तया च पूजितं जगत्॥
पूजाञ्चकार भगवान् सुरभ्याश्च पुरा मुने।
ततो बभूव तत्पूजा त्रिषु लोकेषु दुर्लभा ॥
दीपान्वितापरदिने श्रीकृष्णस्याज्ञया हरेः।
बभूव सुरभीपूजा धर्म्मवक्त्रादिति श्रुतम् ॥
ध्यानं स्तोत्रं मूलमन्त्रं यद्यत् पूजाविधिक्रमम्।
वेदोक्तञ्च महाभाग निबोध कथयामि ते ॥
ॐ सुरभ्यै नम इति मन्त्रस्तस्याः षडक्षरः।
सिद्धो लक्षजपेनैव भक्तानां कल्पपादपः ॥
ध्यानं यजुर्व्वेदोक्तं तत् पूज्यञ्च सर्व्वसम्मतम्।
ऋद्दिदं हृद्दिदञ्चैव सुस्थिदं सर्व्वकामदम् ॥
लक्ष्मीस्वरूपां परमां राधासहचरीं पराम्।
गवामधिष्ठातृदेवीं गवामाद्यां गवां प्रसूम् ॥
पवित्ररूपां पूज्याञ्च भक्तानां सर्व्वकामदाम्।
यथा पूतं सर्व्वविघ्नं तां देवीं सुरभीं भजे ॥
घटे वा धेनुशिरसि वह्नस्तम्भे गवामपि।
शालग्रामे जले वाग्नौ सुरभीं पूजयेद्द्विजः ॥
दीपान्वितापरदिने पूर्व्वाह्णे भक्तिसंयुतः।
यः पूजयेच्च सुरभिं स च पूज्यो भवेद्भुवि ॥
एकदा त्रिषु लोकेषु वाराहे विष्णुमायया।
क्षीरं जहार सहसा चिन्तिताश्च सुरादयः ॥
ते गत्वा ब्रह्मलोकञ्च ब्रह्माणं तुष्टुवुस्तदा।
तदाज्ञया च सुरसीं तुष्टाव पाकशासनः ॥

महेन्द्र उवाच।

नमो देव्यै महादेव्यै सुरभ्यै च नमो नमः।
गवां बीजस्वरूपायै नमस्ते जगदम्बिके ॥
नमो राधाप्रियायै च पद्मांशायै नमो नमः।
नमः कृष्णप्रियायै च गवां मात्रे नमो नमः ॥
कल्पवृक्षस्वरूपायै सर्व्वेषां सततं परम्।
श्रीदामधनदायै च हृद्दिदायै नमो नमः।
यशोदायै कीर्त्तिदायै धर्म्मदायै नमो नमः ॥
स्तोत्रश्रवणमात्रेण तुष्टा हृष्टा जगत्प्रसूः।
आविर्ब्बभूव तत्रैव ब्रह्मलोके सनातनी ॥
महेन्द्राय वरं दत्त्वा वाञ्छितञ्चातिदुर्लभम्।
जगाम सा च गोलोकं ययुर्देवादयो गृहम् ॥
बभूव विश्वं सहसा दुग्धपूर्णञ्च नारद।
दुग्धादृतं ततो यज्ञस्ततः प्रीतिः सुरस्य च ॥
इदं स्तोत्रं महापुण्यं भक्तियुक्तश्च यः पठेत्।
स गोमान् धनवांश्चैव कीर्त्तिमान् पुत्रवान् भवेत् ॥
स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः।
इह लोके सुखं भुक्त्वा यात्यन्ते कृष्णमन्दिरम् ॥
सुचिरं निवसेत्तत्र करोति कृष्णसेवनम्।
न पुनर्भवनं तस्य ब्रह्मपुत्र भवे भवेत् ॥"
इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे सुरभ्युपाख्यानं नाम ४७ अध्यायः ॥

सुरभिः, त्रि, (सु+रभ+इन्।) सुगन्धिः। (यथा, मनुः। ३। २०९।
"उपवेश्य तु तान् विप्रानासनेष्वनुगुप्तितान्।
गन्धमाल्यैः सुरभिभिरर्च्चयेद्दैवपूर्व्वकम् ॥")
कान्तम्। इति मेदिनी ॥ (यथा, रघुः। २।२।
"निवर्त्तय राजा दयितां दयालु-
स्तां सौरभेयीं सुरभिर्यशोभिः।
पयोधरीभूतचतुःसमुद्रां
जुगोप गोरूपधरामिवोर्व्वीम् ॥")
धीरः। विख्यातः। इति धरणिः ॥
सुरभिका, स्त्री, (सुरभि+स्वार्थे कन्।) स्वर्णकदली। इति राजनिर्घण्टः ॥
सुरभिगन्धिः, त्रि,(सुरभिर्गन्धो यस्य। "गन्धस्येदुत्पूतिसुसुरभिभ्यः।" ५। ४। १३५। इति इकारः।) शोभनगन्धयुक्तः। इति केचित् ॥
सुरभित्रिफला,स्त्री, (सुरभिः सुगन्धित्रिफला।) सुगन्धत्रिफला। इति राजनिर्घण्टः ॥
सुरभित्वक्, [च्] स्त्री, (सुरभिः त्वक् यस्याः।) हडदेला। इति राजनिर्घण्टः ॥
सुरभिदारुः, पुं, (सुरभि सुगन्धि दारु यस्य। सरलवृक्षः। इति राजनिर्घण्टः ॥
सुरभिपत्रा, स्त्री (सुरभि पत्रं यस्याः।) जम्बूवृक्षः। राजजम्बूः। इति राजनिर्घण्टः ॥
सुरभिबाणः, पुं, (सुरभिः साधुगन्धः बकुलादिपुष्पं वा बाणो यस्य।) कामदेवः। इति केचित् ॥
सुरभिवल्कलं, क्ली, (सुरभि सुगन्धि वल्कलं यस्य।) गुड़त्वक्। इति शब्दरत्नावली ॥
सुरभिस्रवा,स्त्री,(सुरभिः सुगन्धिः स्रवो निर्य्यासो यस्याः।) सल्लकी। इति राजनिर्घण्टः ॥
सुरभी, स्त्री, (सुरभि+वा ङीष्।) सुगन्धिः। इत्यमरटीकायां भरतः। २। ४। १२३ ॥
शल्लकी। इति शब्दचन्द्रिका ॥ (यथा,—
"शल्लकी गजभक्ष्या च सुवहा सुरभी रसा।
महेरुणा कुन्दरुकी वल्लकी च बडुसवा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
ह्रस्वेकारान्तसुरभिशब्दार्थोऽप्यत्र ॥ गोमाता। यथा,—
"सा का वा सुरभी देवी गोलोकादागता च या।
तज्जन्मचरितं ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४७ अध्यायः ॥
(ह्रस्वेकारान्तसुरभिशब्देऽस्याः विशेषविवरणं द्रष्टव्यम् ॥) अथ गोयात्राप्रवेशविक्रयदिनम्। तत्र तिथय अमावस्याष्टमीचतुर्दशीविष्टिभिन्नाः तत्र नक्षत्राणि रोहिणी पूर्व्वफल्गुनी पूर्व्वाषाढ़ा पूर्व्वभाद्रपद उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् श्रवणा भरणी चित्रा एतद्व्यतिरिक्तानि। योगाः व्यतीपातवैधृतिभिन्नाः। तत्र वाराः क्रूरग्रहभिन्नाः। इति ज्योतिषतत्त्वम् ॥
सुरभीरसा, स्त्री,शल्लकीवृक्षः। इत्यमरटीकायां मथुरेशः। २। ४। १२३ ॥

सुरभूरुहः, पुं, (सुराणां भूरुहः।) देवदारुः। इति भावप्रकाशः ॥ (कल्पवृक्षादिश्च ॥)
सुरमृत्तिका,स्त्री,(सुरप्रिया मृत्तिका।) तुवरी। इति राजनिर्घण्टः ॥
सुरमेदा, स्त्री,(सुरप्रियो मेदो यस्याः।) महामेदा। इति राजनिर्घण्टः ॥ (महामेदाशब्देऽस्या विशेषो ज्ञातव्यः।)
सुरर्षिः, पुं, (सुरश्चासौ ऋषिश्चेति।) देवर्षिः। इत्यमरः। १। १। ५१ ॥ स तु नारदतुम्बुरुकोलाहलादिः। यथा। ब्रह्मर्षिदेवर्षिराजर्षिमहर्षिपरमर्षिकाण्डर्षिश्रुतिभेदात् सप्तप्रकारऋषयस्तत्र नारदाद्याः सुरर्षय उक्ता इति भरतः ॥ (यथा, भागवते। ४। २४। ६३।
"महानहं खं मरुदग्निवार्धराः
सुरर्षयो भूतगणा इदं यतः ॥"
तथाच महाभारते। १। १। २२७।
"इति राज्ञां चतुर्विंशत्यवतारेण सुरर्षिणा।
पुत्रशोकाभितप्ताय पुरा शैव्याय कीर्त्तितम्॥")
सुरलता, स्त्री, (सुरप्रिया लता।) महाज्योतिष्मती। इति राजनिर्घण्टः ॥
सुरला, स्त्री, (सुरान् लातीति। ला+कः।) गङ्गा। इति हारावली ॥ नदीविशेषः। इति शब्दचन्द्रिका ॥
सुरलासिका, स्त्री, (सुरानपि लासयति आह्लादयतीति। लस्+णिच्+ण्वुल्। टापि अत इत्वम्।) वंशीवाद्यम्। यथा,—
"सालेयिका च सालेयी सालिका सुरलासिका॥",
इति शब्दरत्नावलीति केचित् ॥
सुरलोकः, पुं, (सुराणां लोकः।) स्वर्गः। इत्यमरः। १।१।६॥ (यथा, भागवते।७।१०।१३।
"कीर्त्तिं विशुद्धां सुरलोकगीतां
विहाय मामेष्यति मुक्तबन्धः ॥")
सुरवर्त्म,[न्] क्ली,(सुराणां वर्त्म।) आकाशम्। इत्यमरः। १। २। १ ॥
सुरवल्लभा,स्त्री,(सुराणां वल्लभा।) श्वेतदूर्व्वा। इति राजनिर्घण्टः ॥
सुरवल्ली, स्त्री, (सुराणां वल्ली।) तुलसी। इति राजनिर्घण्टः ॥
सुरवैरी, [न्] पुं, (सुराणां वैरी।) असुरः ॥ इति शब्दरत्नावली ॥ [हलायुधः ॥
सुरश्रवुः, पुं, (सुराणां श्रवुः।) असुरः। इति सुरशाखी,[न्]पुं,(सुराणां शाखी।)कल्पवृक्षः। इति जटाधरः ॥
सुरश्रेष्ठा, स्त्री, (सुरेषु श्रेष्ठा।) ब्राह्मी। इति राजनिर्घण्टः ॥
सुरसं, क्ली, (शोभनो रसो यस्य।) गोरसम्। त्वचम्। गन्धदृव्यम् इति राजनिर्घण्टः ॥ तुलसी। इति मेदिनी ॥
सुरसः, पुं,(शोभनो रसो यस्य।) सिन्धुवारः। इति शब्दरत्नावली ॥ (अस्य पर्य्यायो यथा,—
"इन्द्राणी चेन्द्रः सुरसो निर्गुण्डी श्वेतवारकः।"
इति वैद्यकरत्नमालायाम्।)

मीचरसः। इति राजनिर्घण्टः॥ (पीतशालः। अस्य पर्य्यायो यथा,—
"सुरसो बीजकर्यं च पीतशालोऽभिधीयते॥"
इति गारुड़े २०८ अध्यायः॥
तुलसीविशेषः। अस्य गुणा यथा,—
"हिक्काकासविषश्वासपार्श्वशूलविनाशनः।
पित्तकृत्कफवातघ्नः सुरसः पूतिगन्धनुत्॥"
इति चरके सूत्रस्थाने। २७ अध्यायः॥
"कफानिलविषश्वासकासदौर्गन्ध्यनाशनः।
पित्तकृत् पार्श्वशूलघ्नः सुरसः समुदाहृतः॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)
सुरसः, त्रि,(शोभनो रसो यस्य।) स्वादुः। इति मेदिनी॥ सुन्दररसयुक्तश्च। (यथा, हरिवंशितायाम्। ५४। १०३।
"तस्यां प्रभूतं सुरसञ्च तोयं
क्षणाथवा यत्र च रक्षसत् वा॥")
सुरसद्म, [न्]क्ली,(सुराणां सद्म।) स्वर्गः। इति हलायुधः॥ (देवगृहम्। यथा, कथासरित्सागरे। ८३। ८३।
"एत मोक्षं प्रयातेति वदन्त्यामिव दूरतः।
वाताचिप्तसमुत्क्षिप्तैः सुरसद्मध्वजांशुकैः॥")
सुरसभवा, स्त्री, (सुरप्रियः सभवो यस्याः।) आदित्यभक्ता। इति राजनिर्घण्टः॥
सुरसरित्, स्त्री,(सुराणां सरित्।) गङ्गा। इति हलायुधः॥ (यथा, रघुः। २। ७५।
"सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम्॥")
सुरसर्षपकः, पुं,(सुरप्रियः सर्षपः। ततः कम्।) देवसर्षपः। इति राजनिर्घण्टः॥
सुरसा, स्त्री, (शोभनो रसो यस्याः।) तुलसी। यथा। सुरसा स्त्री तु पर्णासे। इति शब्दरत्नावली॥ पर्णासे तु नपुंसकम्। इति मुद्राङ्कितमेदिनी॥ पर्णासे पुंनपुंसकम्। इति हलायुधः॥ सुरसस्तु त्रिषु स्वादौ पर्णासे न नपुंसकम्। इति च कस्याश्चिन्मेदिन्यां पाठः॥*॥ राज्ञा। इत्यमरः। २। ४। ११४॥ मित्रेया। इति शब्दचन्द्रिका॥ ब्राह्मी। इति रत्नमाला॥ महाशतावरी। इति राजनिर्घण्टः॥ दुर्गा। इति केचित्॥ नागमाता। इति मेदिनी॥ यथा,—
"ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
अब्रुवन् सूर्य्यसङ्काशां सुरसां नागमातरम्॥
अयं वातात्मजः श्रीमान् प्लवते सागरोपरि।
हनूमान्नाम तस्य त्वं मुहूर्त्तं विघ्नमाचर॥
राक्षसं रूपमास्थाय सुघोरं पर्व्वतोपमम्।
दृष्ट्वा करालं पिङ्गाक्षं वक्त्रं कृत्वा नभस्थलम्॥
बलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमम्।
त्वां विजेष्यत्युपायेन विषादं वा गमिष्यति॥"
इति वाल्मीकीये रामायणे सुन्दराकाण्डे १ सर्गः॥
नदीभेदः। इति श्रीभागवते ५ स्कन्धे १८ अध्यायः॥ (अप्सरोविशेषः। यथा, महाभारते। १। १२३। ६०।
"पुष्करोका सुगन्धा च सुरसा च प्रमाथिनी॥"
राक्षसीविशेषः। तद्विषयको मन्त्रो यथा,—
"हिमवदुत्तरे कूले सुरसा नाम राक्षसी।
तस्या नूपुरशब्देन विप्रस्या गुर्व्विणी भवेत्॥"
इति हारीते चिकित्सितस्थाने ५१ अध्याये॥)
सुरसाष्टः, पुं, वृक्षगणविशेषः। यथा,—
"निर्गुण्डी तुलसी ब्राह्मी वृहती कण्टकारिका
पुनर्नवेति मुनिभिः सुरसाष्टः प्रकीर्त्तितः॥"
इति शब्दचन्द्रिका॥
सुरसिन्धुः, पुं, (सुराणां सिन्धुः।) गङ्गा। इति केचित्॥ (यथा, कथासरित्सागरे। १८। ६२।
"निवसन्ति च देशेऽपि सुरसिन्धुसमाश्रिते॥")
सुरसुन्दरी, स्त्री, (सुराणां सुन्दरी रमणी सुरेषु सुन्दरी इति वा।) अप्सरसः। दुर्गा। इति केचित्॥योगिनीविशेषः। तद्विवरणं योगिनीशब्दे द्रष्टव्यम्॥ (सुरस्त्री। यथा, किरातेः। ५। २८।
"अस्मिन् रतिश्रमनुदश्च सरोजवाताः
स्मर्त्तुं दिशन्ति न दिवः सुरसुन्दरीभ्यः॥")
सुरा, स्त्री, (सु अभिषवे + क्रन्। स्त्रियां टाप्। इत्युणादिवृत्तौ उज्ज्वलः। २। २४। यद्वा, सुष्ठु, राजयत्यनयेति। सु + रै शब्दे + "आतश्चोपसर्गे। ३। ३। ११६। इत्यङ्। टाप्।) चषकम्। मद्यम्। इति मेदिनी॥ अस्याः पर्य्यायगुणादि मदिराशब्दे मद्यशब्दे च द्रष्टव्यम्। सुराया विशेषगुणा यथा,—
"क्षुधानां सक्तमूत्राणां ग्रहण्यर्शोविकारिणाम्
सुरा प्रशस्ता वातघ्नो स्तन्यरक्तक्षयेषु च॥"
इति राजवल्लभः॥
तत्पानप्रायश्चित्तं यथा,—
"ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः।
सेतुं दृष्ट्वा विशुध्यन्ते तत्संयोगी च पञ्चमः।
ततो धेनुशतं दद्यात् ब्राह्मणानान्तु भोजनम्॥"
इति गारुड़े २२६ अध्यायः॥*॥
तत्पाने शुक्राचार्य्यशापो यथा,—
"सुरापानादहन्यानां प्रापयित्वा
संज्ञानाशं चेनमस्यातिघोरम्।
दृष्ट्वा कचञ्चापि तथापि रूपं
पौत तथा सुरया मोहितेन॥
समन्युरुत्थाय महानुभाव-
स्तदोशना विप्रहितं चिकीर्षुः।
काव्यः स्वयं वाक्यमिदं जगाद
सुरापानं प्रति वै जातमन्युः॥
यो ब्राह्मणोऽद्यप्रभृतीह कश्चित्
मोहात् सुरां पास्यति मन्दबुद्धिः।
अपेतधर्म्मा ब्रह्महा चैव स स्यात्
अस्मिन् लोके गर्हितः स्यात् परे च॥
मया चेमां विप्रधर्म्मोक्तसीमां
मर्य्यादां वै स्थापितां सर्व्वलोके।
सन्तो विप्राः शुश्रुवांसो गुरूणां
देवा दैत्यायोपशृण्वन्तु सर्व्वे॥"
इति महाभारते। १। ७६। ५८—६२॥
ब्राह्मणक्षत्रियवैश्यानां विविधसुरापानप्रायश्चित्तादि यथा,—
"सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्।
तया स्वकाये निर्दग्धे मुच्यते किल्बिषात्ततः॥
गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा।
पयो घृतं वा मरणाद्गोसकृद्रसमेव वा॥
कणान् वा भक्षयेद्दद्यं पिण्याकं वा सकृन्निशि।
सुरापानापनुत्त्यर्थं वालवासा जटी ध्वजी॥
सुरा वै मलमन्नानां पाप्मा च मलमुच्यते।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्॥
गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।
यथैवैका तथा सर्व्वा न पातव्या द्विजोत्तमैः॥
यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम्।
तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः॥
अमेध्यं वा पतेन्मत्तो वैदिकं वाप्युदाहरेत्।
अकार्य्यमन्यत् कुर्य्याद्वा ब्राह्मणो मदमोहितः॥
यस्य कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत्।
तस्य व्यपैति ब्राह्मण्यं शूद्रत्वञ्च स गच्छति॥
एषा विचित्राभिहिता सुरापानस्य निष्कृतिः॥
इति मानवे ११। ९१—९९॥
सौत्रामण्यिमन्नेऽपि तत्पाननिषेधो यथा,—
"यद्ब्राह्मणस्तो विहितः सुरायास्तथा पशोरालभनं न हिंसा।
एवं व्यवायः प्रजया न रत्यै
इमं विशुद्धं न विदुः स्वधर्म्मम्॥"
इति श्रीभागवते। ११। ५। १३॥*॥
"यस्मात् सुराया घ्राणभक्षः अवघ्राणं स एव विहितः न पानं तथा पशोरपि आलभनमेव विहितं न तु हिंसा। अतो न यथेष्टभक्षणाभ्यनुज्ञेत्यर्थः। व्यवायोऽपि प्रजया निमित्तभूतया न रत्यै। अतो मनोरथवादिन इमं विशुद्धं स्वधर्म्मं न विदुरिति।" इति तट्टीकायां श्रीधरस्वामी॥ अन्यत् प्रायश्चित्तशब्दे द्रष्टव्यम्॥*॥ सुरापाने वर्णनौयानि यथा,—
सुरापाने विकलता स्खलनं वचने गतौ।
लज्जा मानच्युतिः प्रेमाधिक्यं रक्तान्तता भ्रमः॥"
इति कविकल्पलतायां १ स्तवके ३ कुसुमम्॥
सुराः,[रे] पुं स्त्री,धनवान्। सु शोभनो रा धनं यस्येति बहुव्रीहौ कृते रैशब्दस्य रादेशेन निष्पन्नः॥
सुराकरः, पुं, (सुराया आकरः।) नारिकेलवृक्षः। इति केचित्। मद्योत्पत्तिस्थानम्। यथा।
"आकराः शुचयः सर्व्वे वर्जयित्वा सुराकरम्।"
इति शुद्धितत्त्वे बौधायनवचनम्॥
सुराङ्गना, स्त्री, (सुराणामङ्गना।) देवपत्नी अप्सरसः॥ इति केचित्। यथा,—
"सुरद्रुमूलमण्डपे विचित्ररत्ननिर्म्मिते
लसद्वितानभूषिते सलील-विभ्रमालसम्।
सुराङ्गनाभवल्लरीकरप्रपञ्च चामर-
स्फुरत्समीर-वीजितं सदाश्रुतं भजामि तम्॥"
इति छन्दोमञ्जर्य्याम् २ स्तवकः॥
सुराचार्य्यः, पुं, (सुराणामाचार्य्यः।) बृहस्पतिः। इत्यमरः। १। २। २४॥

सुराजकः, पुं, सुष्ठु राजते इति । राज + खल् ।) भृङ्गराजः । इति शब्दमाला ॥

सुराजा, [न्] पुं, (सुष्ठु पूजितो राजा । "न पूजनात् ।" ५।४।६८ । इति न टच् ।) शोभनो राजा । इति मुग्धबोधव्याकरणम् ॥ (सुष्ठु-राजा यस्य । सुन्दरनृपतियुक्ते देशादौ, त्रि । यथा,—

"सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान् ॥"

इत्यमरः । २ । १३ ॥)

सुराजीवी, [न्] पुं, सुरया जीवतीति । जीव + णिनिः ।) शौण्डिकः । यथा,—

"कल्यपालः सुराजीवी शौण्डिको मण्डहारकः वारिवासः पानवणिक् ध्वजो ध्वज्यासुतौबलः ॥

इति हेमचन्द्रः ॥

(यथा याज्ञवल्क्यः । १ । १६४ ।

"चैलधावसुराजीविसङ्घोपपतिवेश्मनाम् ॥")

सुरापः, (त्रि, सुरां पिबतीति । पा + कः ।) सुरापानकर्त्ता । यथा,—

"ब्रह्महा जायते यक्ष्मी सुरापः श्यावदन्तकः । सुवर्णहारी कुनखी दुष्यर्म्मा गुरुतल्पगः ॥"

इति प्रायश्चित्तविवेकः ॥

सुरापगा, स्त्री, (सुराणां आपगा ।) गङ्गा । इति जटाधरः ॥ (यथा, किरातं । ५ । ४० ।

"इह सनियमयोः सुरापगाया-
सुषसि सयावकसव्यपादलेखा ।
कथयति शिवयोः शरीरयोगं
विषमपदा पदवी विवर्त्तनेषु ॥")

सुरापाणः, पुं, भूम्नि, (सुरा पानं येषाम् । "पानं देशे ।" ८।४।८ इति णत्वम् ।) पूर्व्वदेशस्थाः । यथा । सुरापाणाः प्राच्याः । इति संक्षिप्तसार-टीकायां गोयीचन्द्रः ॥

सुरापा(णं)नं, क्ली, (सुरायाः पानम् । "वा भाव-करणयोः ।" ८ । ४ । १० । इति विभाषया णत्वम् ।) मद्यपानम् । यथा,—

"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः । महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥"

इति प्रायश्चित्तविवेकः ॥

अवदंशः । इति शब्दरत्नावली ॥

सुराभागः, पुं, (सुरायाः भागः ।) सुरायाः अग्र-भागः । इति शब्दचन्द्रिका ॥

सुरामण्डः, पुं, (सुरायाः मण्डः ।) सुरायाः अग्र-भागः । तत्पर्य्यायः । कारोत्तरः २ । इत्य-मरः । २ । १० । ४३ ॥ कारोत्तमः ३ । इति तट्टीका ॥ कालोत्तरः ४ सुराभागः ५ । इति शब्दचन्द्रिका ॥

सुरारिः, पुं, (सुराणां अरिः ।) असुरः । इति शब्दरत्नावली ॥ (यथा, कुमारे । ३ । ८ ।

"प्रसोढ विश्राम्यतु वीर वत्सं
श्रमैर्म्मदीयैः कतमः सुरारिः ।
विभेतु मोघोद्यतबाहुवीर्य्यः
क्षोभ्योऽपि कोपस्फुरिताधराभ्यः ॥")

सुरारिहन्ता, [ऋ] पुं, (सुरारीणां हन्ता ।) विष्णुः । यथा,—

मैत्राद्यपादे स्वपितीह विष्णु-
र्वैष्णव्यमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥"

इति तिथ्यादितत्त्वम् ।

सुरार्हं, क्ली, (सुरान् अर्हतीति । अर्ह + अण् ।) हरिचन्दनम् । इति राजनिर्घण्टः ॥ स्वर्णम् । इति केचित् ॥

सुरालयः, पुं, (सुराणां आलयः ।) सुमेरुः । इत्य-मरः । १ । १ । ५२ ॥ स्वर्गः । यथा गारुडे ।

"गङ्गां यैऽत्रावगाहन्ते विधिना च नराधिप । चतुर्युगसहस्रं ते न पतन्ति सुरालयात् ॥"

इति तिथ्यादितत्त्वम् ॥ (देवमन्दिरम् । यथा, भागवते ।७।१५। ४८ ।

"पूर्त्तं सुरालयारामकूपाजीव्यादिलक्षणम् ॥"

सुराया आलयः ।) सुरानिलयश्च ॥

सुराष्ट्रः, पुं, (शोभनं राष्ट्रं यस्य ।) देशवि-शेषः । सुरत् इति ख्यातः । स तु भारतवर्षस्य प्रतीच्यां दिशि वर्त्तते । इति सौराष्ट्रिकशब्द-टीकायां भरतः ॥(यथा महाभारते ।३।८८।१८।

"सुराष्ट्रे क्षत्रिये वक्ष्यामि पुण्यान्यायतनानि च॥"

श्रीरामचन्द्रस्य परिवारविशेषः । स तु श्रीराम-यन्त्रे पद्मदलमध्यतः पूज्यः । यथा, अगस्त्य-संहितायाम् ।

"धूम्रं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम् । अकोपं धूम्रपालाख्यं सुमन्त्रं दलमध्यतः ॥"

इति तिथ्यादितत्त्वम् ॥

सुराष्ट्रजं, क्ली, (सुराष्ट्रे जायते इति । जन् + डः । तुवरिका । इत्यमरः ।२।४।१३१॥ अस्य पर्य्यायो यथा,—

"सौराष्ट्री तुवरी काष्ठी मृतालकसुराष्ट्रजे । आढकी चापि साख्याता मृत्स्ना च सुर-मृत्तिका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

सुराष्ट्रजः, पुं, (सुराष्ट्रे जायते इति । जन् + डः ।) क्षत्रमुद्गः । इति राजनिर्घण्टः ॥ विष-भेदः । इति शब्दचन्द्रिका ॥ तद्देशजाते, त्रि ॥

सुराष्ट्रजा, स्त्री, (सुराष्ट्रे जायते इति । जन् + डः । टाप् ।) तुवरी । इति राजनिर्घण्टः ॥ (तुवरीशब्देऽस्या विशेषो विज्ञेयः ॥)

सुराङ्गः, पुं, (सुरस्य आङ्गा आङ्गा यस्य ।) देव-दारु । इति शब्दरत्नावली ॥ (क्वचित् क्ली । अस्य पर्य्यायो यथा,—

"सुरदारु हुकिलिमं सुराङ्गं भद्रदारु च । देवकाष्ठं पोतदारु देवदारु च दारु च ॥"

इति वैद्यकरत्नमालायाम् ॥)

सुरिद्रुहः, पुं, मरुवकः । इति राजनिर्घण्टः ॥

सुरि, [रि] त्रि, (सु शोभनं रा धनं यस्य ।) शोभनधनवत् । इति मुग्धबोधव्याकरणम् ॥

सुरङ्गः, पुं, शोभाञ्जनः । इति शब्दमाला ॥

सुरङ्गा, स्त्री, सुरङ्गा । सौंध इति सुरङ्ग इति च भाषा । तत्पर्य्यायः । सन्धिला २ सन्धिः ३ । इति जटाधरः ॥ (यथा, महाभारते । १ । १४८ । ११ ।

"ज्ञात्वा तु तद्गृहं सर्व्वमादीप्तं पाण्डुनन्दनाः । सुरङ्गां विविशुस्तूर्णं मात्रा सार्द्धं मरिन्दमाः ॥"

सुरङ्गाद्रिः, पुं, (सुरङ्गायामद्रिरिव ।) चौर-विशेषः । यथा,—

"कुजम्भिलः सुरङ्गाद्रिरधर्म्मीरः सुरङ्गयुक् ।"

इति शब्दरत्नावली ॥

सुरूपं, क्ली, (सु शोभनं रूपमस्य ।)तूलम् । इति राजनिर्घण्टः ॥

सुरूपः, त्रि, (सु सुन्दरं रूपमस्य ।)शोभनरूप-विशिष्टः । यथा,—

"सुन्दरं रुचिरं चारु मनोज्ञं मञ्जु मञ्जुलम् । कान्तं मनोरमं रुच्यं सुषमं साधु शोभनम् ॥ वल्गु हारि सुरूपाभिरूपदिव्यमनोहरम् ॥"

इति जटाधरः ॥

(यथा, बृहत्संहितायाम् । ५८ । ४० ।

"शाम्बश्च गदाहस्तः प्रद्युम्नश्चापभृत् सुरूपश्च ॥"

विद्वान् । यथा,—

"विद्वान् विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः व्यक्तो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः ॥ धीमान् शूरिः क्रतिः क्रतुष्टिर्लब्धवर्णो विचक्षणः । प्राप्तरूपसुरूपाभिरूपदूरदृशाः समाः ॥"

इति जटाधरः ॥

सुरूपा यथा । नकुलः१ पुरुरवाः २ अश्विनौ-कुमारौ ३ नलकूबरौ ४ कन्दर्पः ५ शाम्बः ६ । इति कविकल्पलता ॥

सुरूपा, स्त्री, (सु शोभनं रूपं यस्याः ।) शालपर्णी भार्गी । इति राजनिर्घण्टः ॥

सुरूहकः, पुं, गन्धभाद्दः । इति हेमचन्द्रः ॥

सुरेज्यः, पुं, (सुराणां इज्यः ।) बृहस्पतिः । इति केचित् ॥ (यथा, बृहत्संहितायाम् । ८ । २१ ।

"विष्णुः सुरेज्यो बलभिद्धुताश-
स्वष्टोत्तरप्रोष्ठपदाधिपश्च ॥")

सुरेज्या, स्त्री, (सुराणामिज्या ।) तुलसी । इति राजनिर्घण्टः ॥

सुरेन्द्रः, पुं,(सुरेषु इन्द्रः ऐश्वर्य्यशाली ।) इन्द्रः । इति केचित् ॥ (यथा, भागवते ।८।७।३१ ।

"न ते गिरित्राखिललोकपाल-
विरिञ्चवैकुण्ठसुरेन्द्रगम्यम् ॥"

लोकपालः । इति मल्लिनाथः ॥ यथा, रघुः । ३ । ११ ।

"सुरेन्द्रमातास्त्रिगर्भगौरवात्
प्रयत्नमुक्तासनया मुहागतः ॥"

तथाच मनुः । ७ । ५ ।

"यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्म्मितो नृपः ।
तस्मादभिभवत्येष सर्व्वभूतानि तेजसा ॥")

सुरेन्द्रजित्, पुं, (सुरेन्द्रं देवराजं जितवानिति। जि+क्विप्। तुगागमश्च।) गरुडः। इति हलायुधः॥ इन्द्रजिच्च॥

सुरेभं, क्ली, (सु+रेभ+अच्।) रङ्गम्। इति त्रिकाण्डशेषः॥

सुरेवटः, पुं, रामपूगः। इति त्रिकाण्डशेषः॥

सुरेश्वरः, पुं, (सुराणामीश्वरः।) रुद्रः। इति जटाधरः॥ (यथा, मात्स्ये। ५। २८—३०।

"अजैकपादहिर्बुध्नो विरूपाक्षोऽथ रैवतः।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः।
एते रुद्राः समाख्याता एकादश गणेश्वराः॥"

इन्द्रः। यथा, रघुः। ३। ६४।

"नरेन्द्रसूनुः प्रतिसंहरन्निषुं
प्रियंवदः प्रत्यवदत् सुरेश्वरम्॥"

देवश्रेष्ठे, त्रि। यथा, भागवते। ४। १५। ८।

"ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः।
वैकुण्ठस्य दक्षिणे हस्ते ददृशे चिह्नं गदाभृतः।
पादयोरविन्दञ्च तं वै मेने हरेः कलाम्॥"

सुरेश्वराचार्य्यः। यथा, पञ्चदश्यां। ६। १८०।

"अन्योन्याध्यासमत्रापि जीवकूटस्थयोरिव।
ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः॥")

सुरेश्वरी, स्त्री, (सुराणामीश्वरी।) स्वर्गगङ्गा। इति शब्दरत्नावली॥ दुर्गा च॥

सुरेष्टः, पुं, (सुराणामिष्टः।) शिवमल्लौ। शालः। सुरपुन्नागः। इति राजनिर्घण्टः॥

सुरेष्टा, स्त्री, (सुराणामिष्टा।) ब्राह्मी। इति राजनिर्घण्टः॥

सुरोत्तमः, पुं, (सुरेषु उत्तमः।) सूर्य्यः। इति केचित्॥ देवश्रेष्ठश्च॥ (यथा, महाभारते। ३। ५६। ७।

"विप्रियं ह्याचरन् मर्त्यो देवानां ह्यतुमृच्छति
त्रायि मामनवद्याङ्गि! वरयस्व सुरोत्तमान्॥"

सुरोत्तरः, पुं, (सुरेषु तत्पूजनेषु उत्तरः श्रेष्ठः।) चन्दनम्। इति शब्दचन्द्रिका॥

सुरोदः, पुं, (सुरा उदकं यस्य। उत्तरपदस्येत्युदकस्योदादेशः।) सुरासमुद्रः। इति जटाधरः॥ (यथा, भागवते। ५। १। ३३।

"क्षारोदेक्षुरसोद-सुरोद-घृतोद-क्षीरोद-दधिमण्डोद-शुद्धोदाः सप्त जलधयः॥")

सुलक्षणा, स्त्री, (सुशोभनं लक्षणं यस्याः।) उमासखीविशेषः। इति शब्दमाला॥ सुन्दरलक्षणयुक्ते, त्रि॥ (यथा, कथासरित्सागरे। १५। ६८।

"तच्छ्रुत्वा व्यसृजत् राजा सोऽथ प्रत्ययितान् द्विजान्।
गत्वा सुलक्षणा सा वा न वेत्यालोचतामिति॥

सुलभः, त्रि, सुखेन लभ्यते इति। सु+लभ+खल्। "न सुदुर्भ्यां केवलाभ्याम्।" ७। १। ६८। इति तुमागमो न।) सुखलभ्यः। अनायासप्राप्यः। यथा, श्राद्धिकतत्त्वे।

"सुलभं सकलं पुण्यं यज्ञदानादिजं फलम्।
गङ्गातोयेन सदृशैर्जलैर्भं पितृतर्पणम्॥

सुलभा, स्त्री, (सुखेन लभ्यते इति। लभ+खल्। टाप्।) माषपर्णी। धूम्रपत्रा। इति राजनिर्घण्टः॥

सुलोचनः, पुं, (शोभने लोचने यस्य।) हरिणः। इति राजनिर्घण्टः॥ दुर्य्योधनः। इति केचित्॥ (धृतराष्ट्रपुत्राणामन्यतमः। यथा, महाभारते। १। ६७। ८४।

"विविंशतिर्विकर्णश्च जलसन्धः सुलोचनः॥")

सुन्दरचक्षुर्युक्ते, त्रि॥ (यथा, महाभारते। ३। ५५। १३।

"अतीवसुकुमाराङ्गीं तनुमध्यां सुलोचनाम्।
आच्छिपन्तीमिव च भाः शशिनः खेन तेजसा॥")

सुलोचना, स्त्री, (शोभने लोचने यस्याः।) माधवराजपत्नी। यथा,—

माधव उवाच।

"श्रीमद्विक्रमभूभर्त्तुः पुत्रोऽहं माधवाह्वयः।
सर्व्वभावैर्भविष्यामि वशगस्तव सुन्दरि!॥

चन्द्रकलोवाच

समुद्रपारे तरुणपुरन्दरपुरोपमा।
प्रत्यक्षदेवेऽस्ति विख्याता दीव्यन्ती संज्ञया पुरी॥
गुणाकराह्वयस्तत्र राजा श्रेष्ठो महायशाः।
सुशीला नाम तद्भार्य्या सर्व्वलक्षणसंयुता॥
सुलोचनाह्वया कन्या वीर तत्कुक्षिसम्भवा।
गृहाण तां विवाहेन स्वर्गभोगं यदीच्छसि॥"

इत्युपक्रम्य।

"ततः शुभे क्षणे तस्मिन् पृष्ठमारुह्य वाजिनः।
प्रचेष्टाख्येन भृत्येन विलङ्घ्य जलधिं ययौ॥
ततो गन्धर्व्वविधिना स राजतनयः सुधीः।
चक्रे विवाहं तां कन्यां तत्रैव प्राप्तकौतुकः॥"

इति पाद्मे क्रियायोगसारे ५ अध्यायः॥

सुलोमशा, स्त्री, (शोभना लोमशा।) काकजङ्घा। इति राजनिर्घण्टः॥ शोभनलोमयुते, त्रि॥

सुलोमा, स्त्री, (सुष्ठु लोमान्यस्याः। डाप्।) ताम्रवल्ली। मांसच्छदा। इति राजनिर्घण्टः॥

सुलोहकं, क्ली, (सुष्ठु लोहमिव। कन्।) पित्तलम्। इति हेमचन्द्रः॥

सुलोहिता, स्त्री, (सुष्ठु लोहिता।) अग्निजिह्वाविशेषः। इति शब्दमाला॥ (यथा, मुण्डकोपनिषदि। १। २। ४।

"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरुची च देवी
लोलायमाना इति सप्त जिह्वाः॥"

सुन्दररक्तवर्णे, पुं॥ तद्वति, त्रि॥

सुवक्त्रः, पुं, (सुष्ठु वक्त्रं यस्मात्।) वनवर्व्वरी। इति राजनिर्घण्टः॥ सुन्दराननेऽपि, त्रि॥ (यथा, महाभारते। १४। ८। १६।

"उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे॥")

सुवचनं, क्ली, (सुष्ठु वचनम्॥) शोभनोक्तिः। तत्पर्य्यायः। सुप्रलापः २। इत्यमरः। १। ६। १७॥ (यथा, उत्तरचरिते। १ अङ्के।

"स्नानस्य जीवकुसुमस्य विकाशनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि॥")

सुवचनी, स्त्री, (सुष्ठु वचनं यस्याः। टित्त्वात् ङीप्। एतदाराधनया आराधयितुर्वाक्यसाफल्यात्तथात्वम्।) देवीविशेषः। विपदि स्त्रियो यस्याः पूजां मन्वते कुर्व्वन्ति च। आचारमार्कण्डे शुभसूचनीति वर्त्तते॥

सुवचाः, [स्] त्रि, (सुष्ठु वचो यस्य।) वाग्मी। इति जटाधरः॥

सुवनः, पुं, (सूते विश्वमिति। सू+"भूसूधूभ्रस्जिभ्यश्छन्दसि।" उणा० २। ८०। इति क्युन्।) सूर्य्यः। अग्निः। इत्युणादिकोषः॥ चन्द्रः। इति केचित्॥

सुवर्चकः, पुं, खर्জ্জिकाचारः। इति जटाधरः॥

सुवर्चला, स्त्री, सूर्य्यपत्नी। इति त्रिकाण्डशेषः॥ अतसी। इति रत्नमाला॥ सूर्य्यमुखीपुष्पम्। इति केचित्। आदित्यभक्ता। (अस्याः पर्य्यायो गुणाश्च यथा,—

"सुवर्चला सूर्य्यभक्ता वरदावदराऽपि च।
सूर्य्यावर्त्ता रविप्रीतापरा ब्रह्मसुदुर्लभा॥
सुवर्चला हिमा रूक्षा स्वादुपाका सरा गुरुः।
अपित्तला कटुः क्षारा विष्टम्भकफवातजित्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) ब्राह्मी। इति राजनिर्घण्टः॥ देवविशेषे, पुं॥

सुवर्चाः, [स्] त्रि, शोभनतेजोविशिष्टः। शोभनं वर्चो यस्येति बहुव्रीहिसमासनिष्पन्नः॥ (यथा, महाभारते। ३। ५३। ७।

"तं स भीमः प्रजाकामस्तोषयामास धर्म्मवित्
महिष्या सह राजेन्द्र सत्कारेण सुवर्चसम्॥"*

पुं, धृतराष्ट्रपुत्रविशेषः। १। ६७। १०१। "दृढहस्तः सुहस्तश्च वातवेगसुवर्चसौ॥")

सुवर्चिकः, पुं, खर्জ্জिकाचारः। इति राजनिर्घण्टः॥ (यथा,—

"कथितः खर्জ্জिकाभेदो विशेषज्ञैः सुवर्चिकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) सुवर्चिका, स्त्री, जतुका। इति राजनिर्घण्टः॥ (खर्জ্জिकाचारः। अस्याः पर्य्यायो यथा,—

"कापोतं खर्জ্জिका खर्জ্জिः खर्জ্জकः च सुवर्चिका॥"

इति वैद्यकरत्नमालायाम्॥

तथास्या गुणाः।

"सुवर्चिका खर्জ্জिकावद् बोद्धव्या गुणतो जनैः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) सुवर्ची, [न्] पुं, खर्জ্জिकाचारः इति राजनिर्घण्टः॥

सुवर्ण, क्ली, (शोभनो वर्णो यस्य।) धातुविशेषः। सोना इति भाषा। तत्पर्य्यायः। स्वर्णम् २ कनकम् ३ हिरण्यम् ४ हेम ५ हाटकम् ६ तपनीयम् ७ शातकुम्भम् ८ गाङ्गेयम् ९ भर्म्म १० कर्व्वरम् ११ चामीकरम् १२ जातरूपम् १३

महारजतम् १४ काञ्चनम् १५ रुक्मम् १६ कार्त्तस्वरम्१७ जाम्बूनदम्१८ अष्टापदम्१९। इत्यमरः। २। ६। ९४॥ शातकौम्भम् २० भर्म्मम्२१ कर्व्वरम्२२ कर्चुरम्२३ रुग्मम्२४। इति तट्टीका॥ भद्रम् २५ भूरि २६ पिञ्जरम् २७ द्रविणम् २८ गैरिकम् २९ चाम्पेयम् ३० भरुः३१ चन्द्रः३२ कलधौतम्३३। इति जटाधरः॥ अभ्रकम्३४ अग्निबीजम्३५लोहवरम् ३६ उडुमारुकम् ३७ सूर्य्यमणिप्रभवम् ३८ मुख्यधातु ३९। इति शब्दरत्नावली॥ उज्ज्वलम् ४० कल्याणम् ४१ मनोहरम् ४२ अग्निवीर्य्यम् ४३ अग्नि ४४ भास्करम् ४५ पिञ्जानम् ४६ अपिञ्जरम् ४७ तेजः ४८ दीप्तम्४९ अग्निभम् ५० दीप्तकम् ५१ मङ्गल्यम् ५२ सौमञ्जकम्५३ भृङ्गारम् ५४ जाम्बवम् ५५ आग्नेयम् ५६ निष्कम् ५७ अग्निशिखम् ५८। अस्य गुणाः। स्निग्धत्वम्। कषायत्वम्। तिक्तत्वम्। मधुरत्वम्। दोषत्रयध्वंसनत्वम्। शीतत्वम्। स्वादुत्वम्। रसायनत्वम्। रुचिकारित्वम्। चक्षुष्यत्वम्। आयुष्यत्वम्। प्रज्ञावीर्य्यबलस्मृतिकरत्वञ्च। तद्भारगस्य गुणाः। कान्तिदुरितक्षयश्रीकारित्वम्॥ * ॥ तत्परीक्षादि यथा,—

"दाहेऽतिरक्तमथ यच्च सितं छिदायां
काश्मीरकान्ति च विभाति निकषपट्टैः।
स्निग्धञ्च गौरवमुपैति च यत्तुलायां
जानीत देवकनकं मृदु रक्तपीतम्॥
तत्रैकं रसवेधजं तदपरं जातं स्वयं भूमिजं
किञ्चान्यद्दहु लोहसङ्करभवं चेति त्रिधा
काञ्चनम्।
तत्राद्यं कलधौतरक्तमपरं रक्तं ततोऽन्यद्यथा
गौराभं तदिति क्रमेण गदितं स्यात् पूर्व्व-
पूर्व्वोत्तमम्॥"
इति राजनिर्घण्टः॥*॥

अपिच सुवर्णस्योत्पत्तिनामलक्षणगुणाः।

"पुरा निजाश्रमस्थानां सप्तर्षीणां जिता-
त्मनाम्।
पत्नीर्विलोक्य लावण्यलक्ष्मीसम्पन्नयौवनाः॥
कन्दर्पदर्पविध्वस्तचेतसो जातवेदसः।
पतितं तद्वराष्ठे रेतस्तु हैमतामगात्॥
कृत्रिमं चापि भवति तद्रसेन्द्रस्य वेधतः।
स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्॥
तपनीयं कलधौतं गाङ्गेयं भर्म्म काञ्चनम्।
चामीकरं शातकुम्भं तथा कार्त्तस्वरञ्च तत्॥
जाम्बूनदं जातरूपं महारजतमित्यपि।
दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम्॥
तारशुल्बाऽभिहतं स्निग्धं कोमलं गुरु हेम
सत्॥"

सत् उत्तमम्।

"तच्छ्वेतं कठिनं रूक्षं विवर्णं समलं दलम्।
दाहे छेदेऽसितं श्वेतं कषे त्याज्यं लघुस्फुटम्॥"
दलं दोषत इति लोकेः। स्फुटं यद्दाहतं स्फुटति॥

"सुवर्णं शीतलं स्वर्ण्यं बल्यं गुरु रसायनम्।
स्वादु तिक्तञ्च तुवरं पाके च स्वादु पिच्छिलम्॥
पवित्रं हृद्यं नेत्रं मेधास्मृतिमतिप्रदम्।
हृद्यमायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत्।
विषद्वयत्वयोन्मादक्षिप्तदोषज्वरशोषजित्॥
बलं सवीर्य्यं हरते नराणां
रोगव्रजं पोषयतीह कायें।
असौख्यकार्य्यंव सदा सुवर्ण-
मशुद्धमेतन्मरणञ्च कुर्य्यात्॥
असम्यक्सारितं स्वर्णं बलं वीर्य्यञ्च नाशयेत्।
करोति रोगान्मृत्युञ्च तद्दन्त्यादृद्यन्नतस्ततः॥"
इति भावप्रकाशः॥ * ॥

अथ सुवर्णकरणम्।

"मध्याह्ने गुडताम्रञ्च करेणामाक्षिकं रसम्।
धमनाच्च भवेद्रौप्यं सुवर्णकरणं शृणु॥
पीतं धुस्तूरपुष्पञ्च सीसकञ्च पलं मतम्।
पाठा लाङ्गलगाखा च मूलमावर्त्तनाद्भवेत्॥"
इति गारुड़े १८८ अध्यायः॥*॥

अपि च।

श्रीशङ्कर उवाच।

"आनीय पारदं देवि स्थापयेत् प्रस्तरोपरि।
तस्योपरि जपेन्मन्त्रं सर्व्वबन्धमयात्मकम्॥
साष्टसहस्रं देवेशि प्रजपेत् साधकाग्रणीः।
स्वयम्भुपुष्पसंयुक्ते वस्त्रे चारुणसन्निभे॥
संस्थाप्य पारदं देवि मृत्पात्रे युगले शिवे।
पुण्ययुक्तेन सूत्रेण बध्नीयात् बहुयत्नतः॥
मृत्तिकया रजनैव धान्यस्य परमेश्वरि।
लेपयेद्दृढयत्नेन रौद्रे शुष्काणि कारयेत्॥
पुनश्च लेपयेद्धीमान् ततो वह्नौ विनिःक्षिपेत्।
अष्टमौनवमोरात्रौ क्षिपेन्नैव सुरेश्वरि॥
अथवा परमेशानि मृत्पात्रे स्थापयेद्रसम्।
वह्नीरसेन तद्द्रव्यं शोधयेद्दृढयत्नतः॥
धृतनारीरसेनैव तथैव शोधनं चरेत्।
एवं कृते तु गुटिकां यदि स्यात् दृढबन्धनम्॥
धुस्तूरञ्च समानीय मध्ये शून्यञ्च कारयेत्।
कृष्णाख्यातुलसीयोगे तथा धृतकुमारिका॥
एवं कृते वह्नियोगे भस्मसात् जायते किल।
भस्मयोगे भवेत् स्वर्णं धनदायाः प्रसादतः।
विवर्णं जायते द्रव्यं यदि पूजां न चाचरेत्॥"
इति मालतीमाधवतन्त्रे ५ पटलः॥*॥

अस्य धार्य्यत्वं सर्व्वदेवतात्मकत्वञ्च यथा, रामायणे महाभारते च परशुरामं प्रति वशिष्ठवाक्यम्।

"सर्व्वरत्नानि निर्मथ्य तेजोराशिं समुत्थितम्।
सुवर्णमेभ्यो विप्रेन्द्र रत्नं परमनुत्तमम्॥
एतस्मात् कारणाद्देवगन्धर्व्वोरगराक्षसाः।
मनुष्याश्च पिशाचाश्च प्रयता धारयन्ति तत्॥"

तथा।

"तस्मात् सर्व्वपवित्रेभ्यः पवित्रं परमं स्मृतम्॥"

तथा।

"अग्निर्व्वै सकला देवाः सुवर्णञ्च तदात्मकम्।
तस्मात् सुवर्णं ददता दत्ताः स्युः सर्व्वदेवताः॥"
तस्मात्तत् पदादौ न धार्य्यं देवतात्मकत्वात्।

इति शुद्धितत्त्वम्॥*॥ तद्दानफलं यथा,—

अम्बरीष उवाच।

"न सुवर्णं विना दानं तिलैर्व्वा मुनिसत्तम।
कस्मात् पवित्रमित्युक्तं भवानेतत् ब्रवीतु मे॥

वशिष्ठ उवाच।

अत्र ते कथयिष्यामि इतिहासं पुरातनम्।
जामदग्न्यस्य रामस्य मुनिभिः सह पार्थिव॥
निःसत्त्वत्वं पृथिवीं मुनीन् पप्रच्छ पार्थिव।
श्रुत्वा तु क्षत्रियविष्टो निःक्षत्रां भार्गवः पुरा॥

राम उवाच।

क्रोधादिदं कृतं कर्म्म मया मुनिवरोत्तमाः।
कथं कस्मादिमुच्येऽहं पापात् क्षत्रवधादतः॥
इत्युक्ता धर्म्मतत्त्वज्ञाः पापानां पावनं परम्।
दानञ्चेह सुवर्णस्य ते तमूचुर्म्महर्षयः॥
एतत् पवित्रमतुलं सम्भूतमिह शुश्रुम।
अग्नेर्वीर्य्यात् परं तेजो ह्यपत्यं जातवेदसः॥
सहजं कार्त्तिकेयस्य रुद्रशुक्रसमुद्भवम्।
पवित्रं यत् सुरैः सर्व्वैर्धार्य्यन्ते मुकुटादिभिः।
अग्निस्तु देवताः सर्व्वाः प्रीयन्ते सर्व्वदेवताः।
तस्मात् सुवर्णं ददता सुवर्णञ्च तदात्मकम्॥
दश पूर्व्वापरांश्चैव प्रोवाचेदं हसिष्यतिः।
सुवर्णं ये प्रयच्छन्ति नरकात्तारयन्ति ते॥
सर्व्वान् कामान् प्रयान्त्येते पितामहसुतोऽब्रवीत।
मरीचिर्भगवान् पूर्व्वं ये प्रयच्छन्ति काञ्चनम्॥
यः सुवर्णं नरो नित्यं ब्राह्मणेभ्यः प्रयच्छति।
स चिरं विरजा विद्वान् देववद्दिवि मोदते॥
सर्व्वेषामेव दानानामेकजन्मानुगं फलम्।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम्॥
विद्यमानं सुवर्णं तु यो लोभान्न प्रयच्छति।
स सदा जनपापेषु वेष्टितो नरकं व्रजेत्॥
कृत्वापि सुमहत् पापं जातरूपं ददाति यः।
स सद्यस्तेन पापेन मुच्यते नात्र संशयः॥
एवं ज्ञात्वा तु सुलभं सुवर्णं देहि भार्गव।
तुलामारुह्य कायस्य समानमात्मनस्तथा॥
इत्युक्तो मुनिभिर्दिव्यै रामो धर्म्मभृतांवरः।
प्रादात् सुवर्णं विप्रेभ्यः ततः पापादमुच्यत॥
तस्मात्त्वमपि राजेन्द्र द्विजेभ्यो देहि काञ्चनम्
विष्वक्सेनं समुद्दिश्य यदीच्छेः शाश्वतीं गतिम्॥"
इति वह्निपुराणे तुलापुरुषदाननामाध्यायः॥*॥

अपि च।

"सुवर्णदानं गोदानं भूमिदानं तथैव च।
नाशयन्त्याशु पापानि महापातकजान्यपि॥"
इति प्रायश्चित्ततत्त्वम्॥*॥

उत्सृष्टस्वर्णस्य गृहे चिरस्थापननिषेधो यथा,

"न चिरं स्थापयेद्गेहे हेम संप्रोक्षितं बुधः।
तिष्ठत् भयावहं यस्मात् शोकव्याधिकरं नृणाम्॥
शीघ्रं परलोकरणात् त्रेयः प्राप्नोति पुष्कलम्॥"
संप्रोक्षितं पात्रमुद्दिश्य त्यक्तम्। अतएव विष्णुपुराणे।

"तस्मात् सर्व्वात्मना पात्रे दद्यात् कनकमुत्तमम्
अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे॥

प्रमादतस्तु तद्रष्टं तावन्मात्रं नियोजयेत्।
अन्यथा स्तेययुक्त: स्यात् हेन्नादत्ते विनाग्निना"
तद्धेम ब्राह्मणायोत्सृष्टं ब्राह्मणसादकृतं यदि
चौरादिना अपक्रियते तदा तावदेव पुनरुत्सृज्य देयमिति दानसागर: ॥*॥ तस्तु अग्निदैवतम्। यथा,—
"आग्नेयं कनकं प्रोक्तं सर्व्वलोहानि वाप्यथा"
इति शुद्धितत्त्वम् ॥
(अथास्य मारणविधि:।
"गलितस्य सुवर्णस्य षोड़शांशेन मौसकम्।
योजयित्वा समुद्धृत्य निम्बुनीरेण मर्द्दयेत् ॥
गोलं कृत्वा गन्धचूर्णं समं दद्यात्तदुपरि।
शरावसंपुटे कृत्वा पुटेत्क्षिप्तग्रहनोपलैः।
एवं मुनिपुटैर्हेम नीत्यानं लभते पुनः ॥"
अस्य गुणाः।
"कषायं तिक्तमधुरं सुवर्णं गुरु लेखनम्।
हृद्यं रसायनं बल्यं चक्षुष्यं कान्तिदं शुचि ॥
आयुष्यं मेधावयःस्थैर्य्यवाग्विशुद्धिस्मृतिप्रदम्।
क्षयोन्मादगराशाघ्न कुष्ठानां नाशनं परम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥*॥) इरिचन्दनम्। इति मेदिनी ॥ स्वर्णगैरिकम्। इति रत्नमाला ॥ धनम्। इति हेमचन्द्र: ॥ नागकेशरम्। इति राजनिर्घण्ट: ॥
सुवर्ण:, पुं, क्ली, (सुष्ठु वर्णोऽस्य।) हेम्नोऽष्टक:। स अशीतिरक्तिकापरिमितस्वर्णम्। तत्पर्य्याय: विस्त: २। इत्यमर:। २। ९। ८६ ॥ कर्ष सुवर्णस्य सुवर्ण संज्ञम्। इति लीलावती ॥ कर्षपरिमाणम्। इति वैद्यकपरिभाषा ॥ (यथा,—
"विद्यात्कर्षं तथा चापि सुवर्णं कवलग्रहम् ॥"
इति गारुड़े २०८ अध्याय: ॥)
सुवर्ण:, पुं, (शोभनो वर्णो यस्य।) स्वर्णकर्ष:। यज्ञविशेष:। इति मेदिनी ॥ धुस्तूर:। इत्यमर: ॥ कणगुग्गुलु:। इति राजनिर्घण्ट: ॥ सुष्ठु वर्णे, त्रि। इति शब्दरत्नावली ॥ (यथा, महाभारते। १३। ६८। ३३।
"वाससां सम्प्रदानेन स्वदारनिरतो नर:।
सुवर्णस्य सुवेश्यस्य भवतीत्यनुशुश्रुम ॥")
सुवर्णकं, क्ली, (सुवर्णमिव। इवार्थे कन्।) पित्तलम्। इति हेमचन्द्र: ॥ (स्वार्थे कन्। सुवर्णम्। यथा, महाभारते। ३। ८२। ७५।
"तत्र स्नात्वा नरश्रेष्ठ लभेत् बहु सुवर्णकम् ॥"
सुष्ठु वर्णो यस्य। कन्।) सुन्दरवर्णयुक्ते, त्रि॥
सुवर्णक:, पुं, (सुष्ठु वर्णो यस्य। कन्।) आरग्वधवृक्ष:। इत्यमर:। २। ४। २४ ॥
सुवर्णकदली, स्त्री, (सुवर्णा सुवर्णवर्णा सुन्दरवर्णा वा कदली।) कदलीविशेष:। चाँपा कला इति भाषा। तत्पर्य्याय:। सुवर्णरम्भा २ कनकमोचा ३ पीता ४ सुवर्णमोचा ५ चम्पकरम्भा ६ सुरभिका ७ सुभगा ८ हेमफला ९ स्वर्णफला १० कनकरम्भा ११ पीतरम्भा १२ गौरी १३ गौररम्भा १४ काञ्चनकदली १५ सुरप्रिया १६। अस्या गुणा:। मधुरत्वम्। हिमत्वम्। स्वल्पाशने दीपनकारित्वम्। क्षुधादाहनाशित्वम्। कफावहत्वम्। हृद्यकारित्वम्। गुरुत्वञ्च। इति राजनिर्घण्ट: ॥
सुवर्णकार:, पुं, (सुवर्णं स्वर्णभूषणादिकं करोतीति। कृ+अण्।) स्वर्णकार:। इति हलायुध: ॥ सेकरा इति भाषा ॥ (यथा, मनु:। ४। २१८।
"राजानं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम्।
आयु: सुवर्णकारान्नं यशश्चर्म्मावकर्त्तिन: ॥")
सुवर्णगैरिकं, क्ली, (सुवर्णं सुन्दरवर्णं गैरिकम्।) गैरिकभेद:। वर्णकमाटि इति वङ्गभाषा। पीत गेरु इति हिन्दी भाषा। तत्पर्य्याय:। स्वर्णधातु: २ सुरक्तक: ३ सन्ध्याभ्रम ४ वभ्रुधातु: ५ शिलाधातु: ६। अस्य गुणा:। गैरिकं मधुरं शीतं कषायं व्रणरोपणम्। विस्फोटार्शोऽग्निदाहघ्नं वरं स्वर्णादिगं शुभम्॥"
इति राजनिर्घण्ट: ॥
(तथाच।
"गैरिकं रक्तधातुश्च गैरेयं गिरिजन्मतथा।
सुवर्णगैरिकं, त्वन्यत्ततो रक्ततरं हि तत् ॥
गैरिकद्वितयं स्निग्धं मधुरन्तुवरं हिमम्।
चक्षुष्यं दाहपित्तासक्फहिक्काविषापहम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
सुवर्णनकुली, स्त्री, (सुवर्णा नकुली।) महाज्योतिष्मती। इति राजनिर्घण्ट: ॥
सुवर्णपुष्प:, पुं, (सुवर्णवत् पुष्पं यस्य।) राजतरुणी। इति राजनिर्घण्ट: ॥ (यथा, बृहत्संहितायाम्। २९। १०।
"अर्केा सुवर्णपुष्पै:
पद्मै र्विप्रा: पुरोहिता: कुमुदै: ॥")
सुवर्णप्रसर, क्ली, (सुवर्णस्य प्रसर इव यत्र।) एलवालुकम्। इति वैद्यकम् ॥
सुवर्णबणिक्, पुं, (सुवर्णस्य बणिक् क्रयविक्रयादिकर्त्ता।) जातिविशेष:। सोनार वेणिया इति भाषा। स तु अम्बष्ठाद्वैश्यायां जात: मध्यमवर्णसङ्कर:। इति केचित्॥ तस्य पातित्यकारणं यथा, ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १०। ८५।
"कश्चिद्वणिग्विशेषस्य संसर्गात् स्वर्णकारिक:।
स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापत:॥"
अपि च।
"गान्धिक: ग्राङ्किकश्चैव कांस्यको मणिकारक:।
सुवर्णजीविकश्चैव पञ्चैते वणिज: स्मृता:॥
अम्बष्ठाद्वणिजपुत्रान्तु जायते गान्धिको वणिक्।
गन्धचन्दनधूपादिक्रयविक्रयकारक:॥
गान्धिक्यां राजपुत्राच्च संजात: ग्राङ्किको वणिक्।
शङ्खं दत्त्वा मुने: प्रत्रैर शङ्खजीवी प्रकीर्त्तित:॥
ग्राङ्किक्यां गान्धिकाज्जातस्ताम्रकांस्योपजीविक:।
ग्राङ्किकात् कांस्यकन्यायां मणिकार: प्रजायते।
कांस्यकाराच्च माणिक्यां सुवर्णजीविकोऽभवत्॥"
इति पराशरपद्धतौ भार्गवरामकृतवर्णसङ्करजातिमाला ॥
सुवर्णबिन्दु:, पुं, (सुवर्णवत् बिन्दुर्यत्र।) विष्णु:। इति हेमचन्द्र: ॥
सुवर्णयूथी, स्त्री, (सुवर्णवत् पीता यूथी।) पीतवर्णयूथिका। स्वर्णयूइ इति भाषा। तत्पर्य्याय: सुगन्धा २ हेमयूथिका ३ युवतोष्टा ४ रत्नगन्धा ५ शिखण्डी ६ नागपुष्पिका ७ हरिणी ८ पीतयथी ९ पीतिका १० कनकप्रभा ११ मनोहरा १२ गन्धाढ्या १३। अस्या गुणा:। स्वादुत्वम्। शिशिरत्वम्। शर्करार्त्तिपित्तदाहदृष्टिनाशित्वम्। व्रणदोषनाशित्वञ्च। इति राजनिर्घण्ट: ॥ अपि च।
"यूथिका गणिकाम्बष्ठा सा पीता हेमपुष्पिका
यूथीयुगं हिमं तिक्तं कटूपाकं सरं लघु ॥
मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम्।
व्रणास्रमुखदन्ताक्षिशिरोरोगविषापहम् ॥"
इति भावप्रकाश: ॥
सुवर्णवर्ण:, पुं, (सुवर्णवत् वर्णो यस्य।) विष्णु:। यथा,—
"सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी।"
इति तस्य सहस्रनामस्तोत्रम् ॥
सुवर्णवर्णा, स्त्री, (सुवर्णवत् वर्णो यस्या:।) हरिद्रा। इति शब्दचन्द्रिका ॥ स्वर्णवर्णयुक्ते, त्रि ॥
सुवर्चा, स्त्री, (सुष्ठु वर्णो यस्या:।) क्षणागुरु। इति मेदिनी ॥ बाव्यालक:। इति शब्दचन्द्रिका॥ स्वर्णचीरी। हरिद्रा। इति राजनिर्घण्ट: ॥ (हास्तिनापुरकर्त्तुर्हस्तिनो माता। यथा, महाभारते।१।९५। ३४। "सुहोत्र: खलु इक्ष्वाकुकन्यामुपयेमे सुवर्णां नाम तस्यामस्य जज्ञे हस्ती य इदं हास्तिनपुरं स्थापयामास एतदस्य हास्तिनपुरत्वम् ॥"
सुवर्णाख्य:, पुं, (सुवर्णस्य आख्या आख्या यस्य।) नागकेशर:। इति रत्नमाला ॥ धुस्तूरवृक्ष:। इति कनकाह्वयशब्ददर्शनात् ॥ (तीर्थविशेषे, क्ली। इति महाभारतम्। ३। ८४। १७॥)
सुवर्णी, स्त्री, (सुष्ठु वर्णो यस्या:। गौरादित्वात् ङीष्।) आखुपर्णी। इति राजनिर्घण्ट: ॥ (विवृतिरस्या आखुपर्णीशब्दे ज्ञातव्या ॥)
सुवया:, [स्] स्त्री, (सुष्ठु वयो यस्या:।) प्रौढ़ा स्त्री। इति राजनिर्घण्ट: ॥
सुवल्लि:, स्त्री, (शोभना वल्लि:।) सोमराजी। इत्यमर:। २। ४। ८५ ॥
सुवल्ली, स्त्री, (सुवल्लि+पक्षे ङीष्।) सोमराजी। इत्यमरटीकायां भरत: ॥
सुवसन्त:, पुं, (शोभनो वसन्तो यत्र।) चैत्रावली इति त्रिकाण्डशेष: ॥ सुन्दरवसन्तकाल: सुजातोयवसन्तरोगय ॥
सुवसन्तक:, पुं, (शोभनो वसन्तो यत्र। कप्।) वासन्ती। मदनोत्सव:। इति मेदिनी ॥
सुवह:, त्रि, (सुखेन उह्यते इति। सु+वह+खल्।) सुखवाह्य:। इति मेदिनी ॥ (सुष्ठु वहतीति। वह+अच्। सम्यग्वह:। इति हेमचन्द्र: ॥

सुवहा, स्त्री,(सुष्ठु वहति सौगन्ध्यमिति। सु+वह+अच्।) शेफालिका। राज्ञा (अस्याः पर्य्यायो यथा,—

"राज्ञा युक्तरसा रम्या सुवहा रसना रसा।
एलापर्णी च सुरसा सुगन्धा प्रेयसी तथा॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥) गोधापदी। फलापर्णी। इत्यमरः।२।४।७०॥ शल्लकी। (अस्याः पर्य्यायो यथा,भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।

"शल्लकी गजभक्ष्या च सुवहा सुरभीरसा।
महेरुणा कुन्दरुकी वल्लकी च बहुस्रवा॥")

वीणा। इति मेदिनी॥ त्रिवृता। इति शब्दचन्द्रिका भरतश्च॥ रुद्रजटा। हंसपदी। गन्धनाकुली। मुशली। नीलसिन्धुवारः। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—

"सिन्धुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारकः।
नीलपुष्पी तु निर्गुण्डी शेफाली सुवहा च सा॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

सुवासः, पुं, (शोभनो वासः।) शोभनगन्धः। उत्तमनिवासः। इति केचित्॥ (महादेवः। इति महाभारतम्। १३। १७। ११५॥)

सुवासिनी, स्त्री, (सुखेन वसतीति। सु+वस+णिनिः।) चिरिण्टी। इत्यमरः। २। ६। ८॥ सुखेन वयतीति सुवासिनीति द्राविड़ाः। पिट्ठकुलञ्चेद्यात् चिरमेटति गच्छति चिरिण्टी। इट गतौ अन् मनीषादिः। सुवासिन्यां चिरिण्टी स्यात् द्वितीयवयसि स्त्रियामिति रुद्रः। चरण्टीत्येके। इति तट्टीकायां भरतः॥

सुविद्, पुं, (सुष्ठु वेत्तीति। विद्+क्विप्।) पण्डितः। गुणयुक्तनार्य्याम्, स्त्री। इत्यमरे सौविदल्लशब्दटीकायां रामाश्रमः॥

सुविदः, पुं, (सुष्ठु वेत्तीति। सु+विद्+कः।) सौविदः। इत्यमरटीकायां रायमुकुटः॥ राजा। इति भरतः॥

सुविदत्, पुं, (सुष्ठु वेत्तीति। विद्+क्विप्। तमतीति। अत्+क्विप्।) राजा। इत्यमरे सौविदल्लशब्दटीकायां रायमुकुटः॥

सुविदत्र, त्रि, (सुष्ठु वेत्तीति। सु+विद्+"सुविदेः कत्रन्।" उणा० ३। १०८। इति कत्रन्।) कुटुम्बः। इत्युणादिकोषः॥

सुविदत्रं, क्ली, अन्तःपुरम्। इत्यमरटीकायां रायमुकुटः॥

सुविदत्रा, स्त्री ऊढ़ा नारी। इत्यमरे सौविदल्लशब्दटीकायां रायमुकुटः॥

सुविधिः, पुं, (सु शोभनो विधिर्यस्य।) अर्हद्भिशेषः। इति हेमचन्द्रः॥ उत्तमविधाच्च॥

सुविनीता, स्त्री, (सुष्ठु विनीता।) सुकरा गौः। इति शब्दरत्नावली॥ अतिशयविनयविशिष्टे, त्रि॥

सुबीजः, पुं, (सु शोभनं बीजं यस्य।) खस्खसः इति राजनिर्घण्टः॥ (महादेवः। इति महाभारतम्। १३। १७। ३८॥) सुन्दरबीजे, क्ली। तद्वति, त्रि॥

सुवीरकं, क्ली, (सु+वीर शौर्य्ये+खुल्।) सौवीराञ्जनम्। इति शब्दचन्द्रिका। (पर्य्यायोऽस्य यथा,—

"सुवीरकं पार्व्वतेयं सौवीरं नीलमञ्जनम्॥"

इति वैद्यकरत्नमालायाम्॥)

सुवीराञ्जं, क्ली, (सुवीरं अतिशयतेजःशालि अञ्जं यस्य।) काञ्जिकम्। इति जटाधरः॥

सुवीर्य्यं, क्ली, (सुष्ठु वीर्य्यं यस्य।) वदरीफलम्। इति जटाधरः॥ उत्तमवीर्य्यञ्च॥

सुवीर्य्या, स्त्री, (सुष्ठु वीर्य्यं यस्याः।) वनकार्पासी। इति शब्दरत्नावली॥ (वनकार्पासीशब्देऽस्या विशेषो ज्ञेयः॥)

सुहत्तः, पुं, (शोभनो हत्तः।) शूरणः। इति राजनिर्घण्टः॥ त्रि, सुन्दरवर्त्तुलः॥ (यथा, भारते। १। १५४। ८।

"पश्य बाहू सुहत्तौ मे हस्तिहस्तनिभाविमौ॥"

सुष्ठु हत्तं चरित्रं यस्येति। सच्चरित्रः। यथा, रघुः। ८। ७७।

"मयि तस्य सुहत्त! वर्त्तते
लघुसन्देशपदा सरस्वती।
शृण विस्रुतसञ्चमार! तां
हृदि चैनामुपधातुमर्हसि॥")

सुहत्ता, स्त्री, (सुष्ठु हत्ता।) पतपत्री। काकलीद्राक्षा। इति राजनिर्घण्टः॥

सुवेगा, स्त्री, (सुष्ठु वेगो यस्याः।) महाज्योतिष्मती। इति राजनिर्घण्टः॥

सुवेलः, पुं, (सुगता वेला समुद्रकूलं येन। यद्वा, सुष्ठु वेला स्थितिर्यस्य।) त्रिकूटपर्व्वतः। इति हेमचन्द्रः॥ यथा, रघुवंशे। ६। १७।

"श्रुत्वा दाशरथौ सुवेलशिखरे साटोपमर्घ्यधनुष्टङ्कारैः परिपूरयन्ति ककुभः प्रोच्छन्ति कौचेयकान्॥")

सुवेलः, त्रि, (शोभना वेला मर्य्यादा स्थितिर्यस्य।) प्रशस्तः। शान्तः। इति मेदिनी॥

सुवे(प)शः, पुं, (शोभनो वेशो यस्य।) श्वेतेक्षुः। इति राजनिर्घण्टः॥ सुन्दरवेशयुक्ते, त्रि। यथा,

"सुवेशं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम्।
योनिः क्लिद्यति नारीणां सत्यं सत्यं हि नारद॥"

इति महाभारतम्॥

सुवेशी, [न्] त्रि, (सुवेशोऽस्यास्तीति। इनिः।) सुन्दरवेशयुक्तः॥

सुव्रतः, पुं, (सुष्ठु व्रतं यस्य।) भाविकल्पीयार्हद्भिशेषः॥ वर्त्तमानकल्पीयार्हद्भिशेषः। इति हेमचन्द्रः॥ (कार्त्तिकेयः। यथा, महाभारते। ३। २३१। ७।

"सुव्रतो ललितश्चैव बालक्रीड़नकप्रियः॥")

शोभनव्रतयुक्ते, त्रि॥ (यथा, महाभारते। १। २३४। २७।

"सुव्रता चापि कल्याणी सर्व्वभूतेषु विश्रुता।
पतिमन्वगमद्भक्त्या वशिष्ठमृषिसत्तमम्॥")

सुव्रता, स्त्री, (सुष्ठु व्रतं यस्याः।) सुखसंदोहा गौः। इत्यमरः। २। ८। ७१॥ शोभनव्रता। इति मेदिनी॥ वर्त्तमानकल्पीयषष्ठदशार्हज्जिनमाता। इति हेमचन्द्रः॥ (यष्ठी। तत्पर्य्यायो यथा,—

"यष्ठी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका।
गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

सुशर्म्मा, [न्] पुं, राजविशेषः। इति पुराणम्॥ निन्दितब्राह्मणविशेषः। यथा,—

"सुशर्म्मा नाम को देव किं जातीयः किमात्मकः
कुतस्तस्य च वै मुक्तिः केन वा यत्र हेतुना॥
श्रीभगवानुवाच।
सुशर्म्मा नाम दुर्म्मेधाः सीमा पापात्मनामभूत्।
अनाम्नायविदां वंशे विप्राणां क्रूरकर्म्मणाम्॥"

इति पाद्मोत्तरखण्डे ८० अध्यायः॥

सु+शृ गि हिंसे+"अन्येभ्योऽपि दृश्यन्ते।" ३। २। ७५। इति मनिन्।) सुशृणाति यः। इति सुग्धबोधटीकायां दुर्गादासः॥ शोभनसुखविशिष्टे, त्रि॥

सुशल्यः, पुं, (सुष्ठु दृढं शल्यं कण्टकं यस्य।) खदिरः। इति राजनिर्घण्टः॥ (खदिरशब्देऽस्य विवरणं ज्ञातव्यम्॥)

सुशवी, स्त्री, कारवेल्लः। कृष्णजीरकः। इत्यमरटीकायां भरतः। २। ४। १५५॥

सुशाकं, क्ली, (सुष्ठु शाको यस्मात्।) आर्द्रकम्। इति राजनिर्घण्टः॥

सुशाकः, पुं, (सुष्ठु शाको यस्य।) चञ्चुः। भिण्डी। तण्डुलीयः। इति राजनिर्घण्टः॥

सुशान्ता, स्त्री, शशिध्वजराजपत्नी। यथा, कल्किपुराणे २२ अध्याये।

"शशिध्वजो महातेजा गजायुतबलः सुधीः।
तस्य पत्नी महादेवी विष्णुव्रतपरायणा॥
सुशान्ता स्वामिनं प्राह कल्किना योद्धुमुद्यतम्
नाथ कान्तं जगन्नाथं सर्व्वान्तर्यामिनं प्रभुम्।
कल्किं नारायणं साक्षात् कथं त्वं प्रहरिष्यसि॥"

सुशिखः, पुं, (शोभना शिखा यस्य।) अग्निः। इति जटाधरः॥ उत्तमशिखायुक्ते, त्रि॥

सुशिखा, स्त्री, (शोभना शिखा।) मयूरशिखा। इति राजनिर्घण्टः॥ (सुन्दरकेशः। यथा, भागवते। ३। २०। ३६।

"मध्यं विषीदति हृदुत्स्तनभारभीत
श्रान्तेव दृष्टिरमला सुशिखासमूहः॥")

सुशीतं, क्ली, (शोभनं शीतम्।) पीतचन्दनम्। इति शब्दचन्द्रिका॥ अतिशयशीतञ्च। तद्वति, त्रि॥

सुशीतः, पुं, (सुष्ठु शीतः।) स्फटिकः। इति राजनिर्घण्टः॥

सुशीतलं, क्ली, (सुष्ठु शीतलम्।) गन्धतृणम्। इति रत्नमाला॥ (गन्धतृणशब्देऽस्य विशेषो ज्ञेयः॥) अतिशीतगुणविशिष्टे, त्रि॥ (यथा, महाभारते। ३। ६५। ४।

"निर्म्मलस्वादु शीतलं मनोहारि सुशीतलम्॥")

सुपरिश्रान्तवाहास्ते निवेशाय मनो दधुः॥")

सुशीला, स्त्री, (सुष्ठु शीला।) शतपत्री। इति राजनिर्घण्टः॥

सुशीविका, स्त्री, कन्दविशेषः। वाराहीकन्दः। इति शब्दचन्द्रिका॥

सुशोभः, पुं, शोभनगुणः। इत्यमरटीकायां स्वामी॥ तद्वति, त्रि॥

सुशीलः, पुं, (सु शोभनं शीलमस्य।) चोलराजः। यथा,—

"यो विष्णुदासः स तु पुण्यशीलो
यश्चोलभूपः स सुशीलनामा।
आवामुभौ तत्समरूपभाजौ
द्वाःस्थौ कृतौ तेन रमाप्रियेण॥"

इति पाद्मे उत्तरखण्डे ५४ अध्यायः॥

शोभनशीलविशिष्टे, त्रि॥ (यथा, भागवते। ६। १। १७।

"सुशीलाः साधवो यत्र नारायणपरायणाः॥"

शोभनं शीलमिति। मध्यपदलो, क्ली। यथा, महाभारते। ३। २८७। ४३।

"त्वया सुशीलव्रतपुण्ययुक्तया
ममेदृशं सार्ध्व पुनः कुलीनया॥")

सुशीलता, स्त्री, (सुशीलस्य भावः। तल्। टाप्। मत्स्वभावः। सुशीलत्वम्॥

सुशीला, स्त्री, (शोभनं शीलं यस्याः। टाप्। (श्रीकृष्णस्याष्टमहिष्यन्तर्गतमहिषीविशेषः। यथा,—

"अष्टौ महिष्यस्ताः सर्व्वा रुक्मिण्याद्या महात्मनः।
रुक्मिणी सत्यभामा च कालिन्दी च शुचिस्मिता॥
मित्रविन्दा जाम्बवती नाग्नजिती सुलक्षणा।
सुशीला नाम तन्वङ्गी महिष्यश्चाष्टमाः स्मृताः॥"

इति पाद्मोत्तरखण्डे ६८ अध्यायः॥

यमभार्य्या। इति केचित्॥

सुश्रोका, स्त्री, (शोभना श्रीः शोभा यस्याः। कप्।) सश्रीकः। इति राजनिर्घण्टः॥ सुन्दरश्रीयुक्ते, त्रि॥ (यथा, हरिवंशे। १८३। ११३।

"द्वारोपशोभितां कृत्वा सर्व्वां द्वारवतीं पुरीम्।
संमृष्टरथ्यां सुश्रोकां बहुरत्नोपशोभिताम्॥")

सुश्रुतः, पुं, विश्वामित्रमुनिपुत्रः। स तु चिकित्साशास्त्रकर्त्ता। यथा,—

"तथा धन्वन्तरिर्देवो जातः क्षीराब्धिमन्थने।
देवादीनां जीवनाय आयुर्व्वेदमुवाच ह।
विश्वामित्रसुतायैव सुश्रुताय महात्मने॥"

इति गारुडे १५० अध्यायः॥

अथ सुश्रुतप्रादुर्भावः।

"अथ ज्ञानदृगा विश्वामित्रप्रभृतयोऽवदन्।
अयं धन्वन्तरिः काश्यां काशिराजोऽयमुच्यते॥
विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमूचवान्।
वत्स वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम्॥
तत्र नाम्ना दिवोदासः काशिराजोऽस्ति बाहुजः।
स हि धन्वन्तरिः साक्षादायुर्व्वेदविदां वरः॥
आयुर्व्वेदं ततोऽधीत्य लोकोपकृतिहेतवे।
सर्व्वप्राणि दया तीर्थमुपकारो महामखः॥
पितुर्व्वचनमाकर्ण्य सुश्रुतः काशिकां गतः।
तेन सार्द्धं समध्येतुं मुनिसूनुशतं ययौ॥
अथ धन्वन्तरिं सर्व्वज्ञानप्रस्थाश्रमे स्थितम्।
भगवन्तं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम्॥
काशिराजं दिवोदासं तेऽपश्यन् विनयान्विताः।
स्वागतं व इति स्माह दिवोदासो यशोधनः॥
कुशलं परिपप्रच्छ तथागमनकारणम्।
ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम्॥
भगवन् मानवान् दृष्ट्वा व्याधिभिः परिपीडितान्।
क्रन्दतो म्रियमाणांश्च जातास्माकं हृदि व्यथा॥
आमयानां शमोपायं विज्ञातुं वयमागताः।
आयुर्व्वेदं भवानस्मानध्यापयतु यत्नतः॥
अङ्गीकृत्य वचस्तेषां नृपतिस्तानुपादिशत्।
व्याख्यातं तेन ते यत्नात् मुनयो मुदमन्वितः॥
काशिराजं जयाशीर्भिरभिनन्द्य मुदान्विताः।
सुश्रुताद्याः सुसिद्धार्था जग्मुर्गेहं स्वकं स्वकम्॥
प्रथमं सुश्रुतस्तेषु स्वं तन्त्रं कृतवान् स्फुटम्।
सुश्रुतस्य सखायोऽपि पृथक् तन्त्राणि तेनिरे॥
सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्यतः।
तस्मात्तत् सुश्रुतं नाम्ना विख्यातं क्षितिमण्डले॥"

इति भावप्रकाशः॥

(क्ली, गोष्ठीश्राद्धे ऋत्विग्भेदः। यथा, मनुः। ३। २५४।

"पित्रेऽग्नौ खदितमित्येव वाच्यं गोष्ठे तु सुश्रुतम्।
सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि॥")

सुषमः, त्रि, (सुष्ठु समं सर्व्वं यस्मात्। "सुविनिर्दुर्भ्यः सुपिसूतिसमाः।" ८।३। ८८। इति षत्वम्।) शोभनम्। इत्यमरः। ३। १। ५२॥ समः। इति मेदिनी॥

सुषमा, स्त्री, (सु शोभनं समं सर्व्वं यथा।) परमा शोभा। इत्यमरः। १। ३। १७॥ (यथा, नैषधे। १८। २।

"जयजय महाराज प्राभातिकीं सुषमामिमां
सफलयतमां दानादक्षोदैरालमपक्ष्मणोः॥")

निजानां कालभेदः। इति हेमचन्द्रः॥

सुषवी, स्त्री, (सुष्ठु सूते फलानीति। सु + सू + अच् गौरादित्वात् ङीष्।) कारवेल्लः। इत्यमरः। २। ४। ११५। क्षणजीरकः। जीरकः। इति मेदिनी॥ क्षुद्रकारवेल्लः। इति राजनिर्घण्टः॥

सुषिः, स्त्री, (सुष्ठु स्यतीति। सु + सो + बाहुलकात् किः।) शुषिः। इत्यमरः। १।८।१॥

सुषिरं, क्ली, (सुष शोषणे + "इषिमदीति।" उणा० १। ५२। इति किरच्। पृषोदरादित्वात् शस्य सः। यद्वा, सुषिरस्यास्तीति। सुषि + "ऋयसुषि मुष्कमधो रः।" ५। २। १०७। इति रः।) शुषिरम्। इत्यमरटीकायां भरतः। १।८।१॥ (काष्ठम्। इति काश्चिका॥ छिद्रयुक्ते, त्रि। यथा, बृहत्संहितायाम्। ५३। ८८।

"शस्तौषधिद्रुमलतामधुरा सुगन्धिः
स्निग्धा समा न सुषिरा च मही नराणाम्॥)

सुषीमः, पुं, सर्पविशेषः। इति मेदिनी॥ चन्द्रकान्तमणिः। इति जटाधरः॥

सुषीरः, त्रि, शीतगुणयुक्तः। इत्यमरः। १।३।१८॥ मनोज्ञः। इति मेदिनी॥

सुषुप्तं, क्ली, (सु + स्वप + क्तः॥ यथा,—

"यो जागरे बहिरनुक्षणधर्म्मिणोऽर्थान्
भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान्।
स्वप्ने सुषुप्त उपसंहरते स एकः
स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः॥"

इति श्रीभागवते। ११। १३। ३२।

सुषुप्तियुक्ते, त्रि॥ (यथा, भागवते। ६। १६। ५३।

"यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि।
आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः॥")

सुषुप्तिः, स्त्री, (सु + स्वप् + क्तिन्।) सत्त्वप्रधानं अज्ञानम्। तस्य नामान्तरम्। कारणशरीरम्। आनन्दमयकोषश्च। इति वेदान्तसारः। सर्व्वस्य स्थूलसूक्ष्मोपाधेः कारणोपाधौ लीनत्वं सुषुप्तित्वम्। इति तट्टीका॥ अवस्थाविशेषः। यथा, "स्वप्नावस्था परीक्षिता सुषुप्तावस्येदानीं परीक्ष्यते। तत्रैताः सुषुप्तविषयाः श्रुतयो भवन्ति यदृयत्रैतत् सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्यासु नाड़ीषु सृप्तो भवतीति। नाड़ीरनुक्रम्य श्रूयते। ताभिः प्रत्यवसृप्य पुरीतति शेत इति। विकल्पमानेषु तु सुषुप्तिस्थानेषु कदाचिन्नाड़ीभ्यः प्रतिबुध्यते कदाचित् पुरीततः कदाचिदात्मन इत्यशासिष्यत्। तस्मादप्यात्मैव तु सुप्तिस्थानमिति।" इति शारीरिकभाष्ये ३ अध्याये २ पादः॥ किञ्च। "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्।" इति माण्डूक्योपनिषत्॥ सुनिद्रा च॥

सुषुम्ना, स्त्री, (सुषु इत्यव्यक्तशब्दं म्नायतीति। म्ना + कः।) मेरुदण्डवाह्ये इड़ापिङ्गलानाड़ीमध्यस्थनाड़ीविशेषः। यथा,—

"मेरोर्बाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षे निषण्णे
मध्ये नाड़ी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्य्याग्निरूपा।"

इति षट्चक्रभेदः॥ *॥

तस्या अशुभलक्षणं यथा,—

"क्षयं वामे क्षयं दत्ते यदा वहति मारुतः।
सुषुम्ना सा च विज्ञेया सर्व्वकार्य्येष्वशोभना॥
तस्यां नाड्यां स्थितो वह्निर्ज्वलत्कालस्वरूपिणः
विषमं तं विजानीयात् सर्व्वकार्य्यविनाशनम्॥
यदानुक्रममुल्लङ्घ्य तस्यां नाड्यां हयं वहेत्।
तदा तस्य विजानीयादशुभं समुपस्थितम्॥"

इति ब्रह्मयामलम्॥

"मेरुबाह्ये इड़ा नाड़ी पिङ्गलया समन्विता।
सुषुम्ना भानुमार्गेण ब्रह्मद्वारावधिस्थिता॥"

इति योगस्वरोदयः॥

सुषेणः, पुं, (करमर्द्दकः। इत्यमरः। २। ४। ६७॥ विष्णुः। (यथा, महाभारते। १३।१४९।७१।

सुसवी

"महावराहो गोविन्दः सुवेणः कनकाङ्गदी ॥"
"शोभना सेना स्वगणात्मिका यस्य।"इति तत्र शाङ्करभाष्यम् ॥ वानरराजसुग्रीववैद्यः। इति मेदिनी ॥ वेतसः। इति राजनिर्घण्टः। (वसुदेवपुत्रविशेषः। यथा, भागवते। ९। २४। ५३—५४।
"वसुदेवस्तु देवक्यामष्टपुत्रानजीजनत्।
कीर्त्तिमन्तं सुषेणञ्च भद्रसेनमुदारधीः॥
ऋजुं समर्दनं भद्रं सङ्कर्षणमहीश्वरम्।
अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल॥"
नागविशेषः। इति महाभारतम्।१।५७।१६॥
नृपविशेषः। स च शूरसेनाधिपतिः। यथा, रघुः। ६। ४५।
"सा शूरसेनाधिपतिं सुषेण-
मुद्दिश्य लोकान्तरगीतकीर्त्तिम्।
आचारशुद्धोभयवंशदीपं
शुद्धान्तरक्षा जगदे कुमारी॥")
सुवेणिका, स्त्री, क्षणत्विड्लता। इत्यमरः। २। ४। १०८ ॥
सुवेणी, स्त्री, विद्युत्। इति राजनिर्घण्टः॥
सुषोमा, स्त्री, नदीभेदः। इति श्रीभागवते।५। १९। १७।
सुष्ठु, व्य, (सुतिष्ठतीति। सु+स्था+"अषदुःसुषु स्थः।" उणा० १। २६। इति कुः। षत्वमादित्वात् षत्वम्। प्रशंसा। अतिशयम्। इत्यमरः। ३। ४। १ ॥ सत्यम्। इति संक्षिप्तसारोणादिवृत्तिः॥(यथा, भागवते।४।२२।१७
"पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्ठु मितं मधु।
समयमान इव प्रीत्या कुमारः प्रत्युवाच ह॥"
"सुष्ठु गम्भीरार्थम्।" इति तट्टीका॥)
सुष्म, क्ली, रज्जुः। इत्यमरटीकायां स्वामी॥
सुसंयतः, त्रि, (सु+सम्+यम+क्तः।) यथाविधिसंयमविशिष्टः। यथा, ब्रह्मपुराणम्।
"यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे।
कृतोपवासः शुचिरप्रमत्तः
संपूजयेत् भक्तिनम्रो गणेशम्॥"
इति प्रायश्चित्ततत्त्वम्॥
सुसंस्कृतं, त्रि, (सुष्ठु संस्क्रियते इति। सु+सं+कृ+क्तः।) घृतादिनानाद्रव्येण प्रयत्नसंस्कृतव्यञ्जनादि। तत्पर्य्यायः। प्रयस्तम् २ इत्यमरः॥
"तैलपाकसुसंस्कारि प्रयस्तमुपसंस्कृतम्॥"
इति शब्दरत्नावली॥
उत्तमसंस्कारविशिष्टञ्च॥
सुसत्या, स्त्री, जनकराजभार्य्या। यथा,—
"जानामि पितरं चाहं विदेहाधिपतिं नृपम्।
तस्य भार्य्यां सुसत्याख्यामहं जानामि मातरम्॥
भ्रातरस्तत्सुताः सर्व्वे सीता मे भगिनी शुभा।
सुसत्या मम मातेति लोको जानाति सन्ततम्॥"
इति कालिकापुराणे ३७ अध्यायः॥
सुसवी, स्त्री, सुषवी। इत्यमरटीकायां रायमुकुटः। २। ४। १५५॥

सुहिता

सुसम्पत्, सुसम्पद् } (सुष्ठु सम्पत्। प्रादिसमासः।) सौभाग्यम्। तत्पर्य्यायः। परभागः३ इति त्रिकाण्डशेषः॥
सुसह्यः, त्रि, सुखसह्यः॥ दुःसहभिन्नः। सुखेन सह्यतेऽसाविति सहधातोः कर्म्मण्यल्प्रत्ययेन निष्पन्नः॥
सुसारः, पुं (सुष्ठु सारो यस्य।) रक्तखदिरः। इति राजनिर्घण्टः॥ अतिशयसारविशिष्टे, त्रि॥
सुसारवत्, क्ली, (सुसारोऽस्यास्येति। मतुप्। मस्य वः।) स्फाटिकम्। इति त्रिकाण्डशेषः॥
सुसिकता, स्त्री, (सुष्ठु सिकतैव।) शर्करा। इति राजनिर्घण्टः॥ उत्तमवालुका च॥
सुसीमा, स्त्री, दुस्तार्हस्नाता। सा तु षष्ठजिनजननी। इति हेमचन्द्रः॥ (शोभना सीमा।) उत्तमसीमा च॥
सुस्थः, त्रि, (सु+स्था+कः।) सुखेन तिष्ठतीति यः। अरोगी। यथा, श्रीभागवते। १०। ३। २७।
"मर्त्यो मृत्युव्यालभीतः पलायन्
सर्व्वान् लोकान् निर्भयं नाध्यगच्छत्।
त्वत्पादाब्जं प्राप्य यदृच्छयाद्य
स्वस्थः शेते मृत्युरस्मादपैति॥"
सुस्थता, स्त्री, (सुस्थस्य भावः। तल्।) आरोग्यम्। इति शब्दचन्द्रिका॥
सुस्थिरः, त्रि, (सुष्ठु स्थिरः।) स्थिरतरः। यथा, श्रीभागवते। ११। ९। ३१।
"न ह्येकस्मादगुरोर्ज्ञानं सुस्थिरं स्यात् सुपुष्कलम्।
ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः॥"
सुस्नाः, पुं (सुष्ठु स्नात्यनेन रूक्षत्वात्। सु+स्ने+क्विप्।) शमीधान्यभेदः। खेसारी इति भाषा। अस्य गुणाः।
"सुस्ना दुर्व्वातलो रूक्षः कषायो विशदो गुरुः।"
इति राजनिर्घण्टः॥
सुस्नातः, पुं (सुष्ठु +स्नातः।) यस्त्रान्तस्नानकृत्। इति शब्दावली॥ सुन्दररूपकृतस्नाने, त्रि। यथा,—
"अघाहःसु निवृत्तेषु सुस्नाताः कृतमङ्गलाः।
आशुचयोऽपि प्रमुच्यन्ते ब्राह्मणान् स्वस्तिवाच्य च॥"
इति शुद्धितत्त्वम्॥
सुस्मिता, स्त्री, (सुष्ठु स्मितं यस्याः।) स्त्रीभेदः। इति हेमचन्द्रः॥ सुन्दरमधुरहास्ययुक्ते त्रि॥
सुहस्तो, [न्] पुं, बौद्धभेदः। यथा,—
"महागिरिसुहस्त्यद्या वज्रान्ता दशपूर्व्विणः।"
इति हेमचन्द्रः। ३४॥
सुहितः, त्रि, (सु+धा+क्तः।) विहितः। तप्तः। इति विश्वः॥ (यथा, बृहत्संहितायाम्। ५१। २९।
"अतिबहु तदा भुक्तान्नं संस्थितः सुहितो वदेत्॥")
सुहिता, स्त्री, (सु+धा+क्तः। टाप्।) अग्निजिह्वाविशेषः। इति जटाधरः॥

सूक्तं

सुहृत् } पुं, (सु शोभनं हृत् हृदयं यस्य।)
सुहृद् } मित्रम्। सखा। इत्यमरः।२।८।१२॥
(यथा, हितोपदेशे।
"सुहृदां हितकामानां यः शृणोति न भाषितम्।
विपत्सन्निहिता तस्य स नरः शत्रुनन्दन॥")
एकस्माज्जन्मात्तत्वतुर्थलग्नम्। यथा—
"पातालं हिबुकञ्चैव सुहृदभ्यतुर्थकम्।"
इति ज्योतिस्तत्त्वम्॥
"शशिजः सुहृद्दृग्दृगतः करोति चातुर्थ्यहास्यधनवन्तं वचसामधिपः।"इत्यादिकोष्ठीप्रदीपः॥
(महादेवः। इति महाभारतम्।१३।१७।८८॥)
सुहृदयः, त्रि, (सुष्ठु हृदयमन्तःकरणं यस्य।) प्रशस्तमनाः। तत्पर्य्यायः। हृदयालुः२। इत्यमरः। ३। १। ३॥ सहृदयः३। इति शब्दरत्नावली॥
सुहोत्रः, पुं, चन्द्रवंशीयबृहदिपुराजपुत्रः। यथा,
"बृहदिषोथ दायादः सुहोत्रो नाम धार्म्मिकः
सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह॥"
इति महाभारते हरिवंशे पितृकल्पे २० अः॥
(सहदेवपुत्रः। यथा, महाभारते।१।८५।८०।
"सहदेवोऽपि माद्रीमेव स्वयंवरे विजयां नामोपयेमे मद्रराजस्य दुरितमतो दुर्हितरं तस्यां पुत्रमजनयत् सुहोत्रं नाम॥"* ॥ भरतवंशीयस्य भुमन्योः पुत्रविशेषः। यथा, तत्रैव। १। ९४। २४।
"सुहोत्रश्च सुहोता च सुहविः सुयज्ञस्तथा।
पुष्करिण्यामृचीकश्च भुमन्योरभवन् सुताः॥")
सूः, स्त्री, सूतिः। प्रेषः। सूधातोः क्विप्प्रत्ययेन निष्पन्नमिति केचित्॥
सूकः, पुं, बाणः। वातः। उत्पलम्। इति मेदिनी॥
सूकरः, पुं, (सूदत्यव्यक्तशब्दं कर्त्तुं शीलमस्य। कृ+टः।) वराहः। इत्यमरः। २। ५। २॥
(यथा, वैराग्यशतके। १६।
"कामिजनपरमभीष्मे कामसुखे धारयन्ति वीभत्सम्।
सन्तः शमसुखरसिकाः सुधाशनाः सूकरान्न इव॥" * ॥
सुष्ठु कर्त्तुं शीलमस्य। सु+कृ+टः। पक्षे उपमगस्य दीर्घत्वम्।) कुम्भकारः। इति शब्दरत्नावली॥ मृगभेदः। इति जटाधरः॥
सूकरी, स्त्री, (सूकर+जातौ ङीष्।) सूकरभार्य्या॥ (यथा. याज्ञवल्क्ये। ३। २५६।
"पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत्।
इहैव सा शुनी गृध्री सूकरी चोपजायते॥")
वराहक्रान्ता। इति शब्दमाला॥
सूक्तं, त्रि,(सुष्ठु उक्तम्।) शोभनोक्तिविशिष्टम्। वेदोक्तस्तोत्रमन्त्रादि। यथा। ऋग्वेदस्य अग्निमीळे, इत्यादि अग्निसूक्तम्। १। १। १॥ * ॥ सहस्रशीर्षेत्यादि पुरुषसूक्तम्। १०।९०।१॥ * ॥ अहं रुद्रेभिरित्यादि देवीसूक्तम्१०।१२५।१॥ *

हिरण्यवर्णामित्यादि श्रीसूक्तम्॥*॥रात्री व्यख्यदायतीत्यादि रात्रिसूक्तम् ।२०।१२७।१ ॥ * ॥ आतून इन्द्र शुमन्तमित्यादि गणेशसूक्तम्। ८। ७०।१॥*॥ इयमददाद्रभसम् इत्यादि सरस्वतीसूक्तम् । ६। ६१। १॥*॥ अतो देवा अवन्तु न इत्यादि विष्णुसूक्तम् ।१।२२।१६॥*॥ मेदिनो देवीत्यादि भूसूक्तम् ॥*॥आदित्यानामित्यादि-आदित्यसूक्तम् ।७।५१।१।१॥*॥त्वं सोम इत्यादि सोमसूक्तम्।१।९१।१॥ इत्यादि ऋग्वेदस्य सूक्तमहस्रम्। यथा। सहस्रमेकं सूक्तानामित्यादि चरणव्यूहः॥ यजुर्व्वेदस्य विश्वमेशमित्यादि कुमारसूक्तम्। सोमाय पितृमते इत्यादि पितृसूक्तम्। पवमान स्वर्ज्जन इत्यादि पावमानीसूक्तम्। इत्यादि वेदप्रसिद्धम्॥ तथा,—

"जप्यानि सूक्तानि तथैव चेषा-
मनुक्रमेणापि यथास्वरूपम्।"

इति मलमासतत्त्वम्॥

अपि च।

"सन्दर्शनार्थमम्नाया नदीपुलिनसंस्थितः।
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

सूक्ता,स्त्री,(सुष्ठु उक्तं कथनं यस्याः।)शारिका। यथा, त्रिकाण्डशेषे।

"सूक्ता मदनशलाका चित्राक्षी शारिकाव-
चण्डा च॥"

सूक्ष्मं, क्ली, (सूच्यते इति। सूच पैशुन्ये + "सूचेः स्मन्।" उणा० ४। १७६। इति स्मन्।) कैतवम्। अध्यात्मम्। इति मेदिनी॥ (यथा, भागवते। ३। ८। १४।

"तस्यार्थसूक्ष्माभिनिविष्टदृष्टे-
रन्तर्गतोऽर्थो रजसा तनीयान्॥")

अलङ्कारविशेषः। यथा,—

"सूक्ष्मं पराशयाभिज्ञे त्वरसाकूतचेष्टितम्।
मयि पश्यति सा केशैः सीमन्तमणिमाहृणोत्॥

इति चन्द्रालोकः॥

सूक्ष्मः, पुं, (सूच्+स्मन्।) कतकवृक्षः। इति शब्दरत्नावली॥ अणुः। अल्पे, त्रि। इति मेदिनी॥ (यथा, महाभारते। १। २१३। १५।

"न तस्याः सूक्ष्ममप्यस्ति यन्नावे रूपसम्पदा।
नियुक्ता यत्र वा दृष्टिर्न सज्जति निरीक्षताम्॥")

तत्पर्य्यायः।

"अल्पे स्तोके शुक्लसूक्ष्म शुक्लकञ्च क्षयं तनु।
दभ्रं खुल्ल खुल्लकञ्च स्त्रियां मात्रा त्रुटौ कणा।
पुमानणुर्लवो लेशः कणोऽपि च निगद्यते॥"

इति शब्दरत्नावली॥

सूक्ष्मकृष्णफला,स्त्री,सूक्ष्मं कृष्णञ्च फलं यस्याः।) मध्यमजम्बुवृक्षः। इति रत्नमाला॥

सूक्ष्मतण्डुलः, पुं, (सूक्ष्मं तण्डुलं बीजं यस्य।) खस्खसः। इति राजनिर्घण्टः॥

सूक्ष्मतण्डुला,स्त्री,(सूक्ष्मं तण्डुलं बीजं यस्याः।) पिप्पली। इति राजनिर्घण्टः॥

सूक्ष्मदर्शी, [न्] त्रि, (सूक्ष्मं पश्यतीति। दृश + णिनिः।) अतिशयबुद्धिमान्। तत्पर्य्यायः। कुशाग्रीयमतिः२ तत्कालधीः ३ प्रत्युत्पन्नमतिः ४। इति हेमचन्द्रः॥ (यथा, महाभारते। १३। १४। २३।

"न विदुर्यस्य भवनमादित्याः सूक्ष्मदर्शिनः।
स कथं नरमात्रेण शक्यो ज्ञातुं सतां गतिः॥")

सूक्ष्मदारु, क्ली, (सूक्ष्मं दारु।) तनुकाष्ठम्। तत्पर्य्यायः। कलिञ्जः ३। इति त्रिकाण्डशेषः॥

सूक्ष्मपत्रः, पुं (सूक्ष्माणि पत्राणि यस्य।) धान्यकम्। वनजीरकः। देवसर्षपः। लघुवदरः। सूरपर्णम्। वनवर्व्वरी। लोहितेक्षुः। कुक्कुटद्रुः। इति राजनिर्घण्टः। यथा,—

"वावलः स्वर्णपुष्पश्च सूक्ष्मपत्रश्च कण्टलः॥"

इति शब्दचन्द्रिका॥

सूक्ष्मपत्रिका, स्त्री, (सूक्ष्माणि पत्राणि यस्याः। ततः कन्। टापि अत इत्त्वम्।) शतपुष्पा। शतावरी। लघुब्राह्मी। क्षुद्रोपोदकी। दुरालभा। आकाशमांसी। इति राजनिर्घण्टः॥

सूक्ष्मपर्णा, स्त्री, (सूक्ष्मं पर्णमस्याः।) जीर्णफल्गो। डोड़ो। इति राजनिर्घण्टः॥

सूक्ष्मपर्णी, स्त्री, (सूक्ष्मं पर्णमस्याः। ङीष्।) रामदूतीवृक्षः। यथा,—

"रामदूती पर्व्वपुष्पी विशल्या नागदन्तिका।
काण्डली सूक्ष्मपर्णी च भरद्वाङ्गा फणिज्झका॥"

इति शब्दचन्द्रिका॥

सूक्ष्मपिप्पली, स्त्री, (सूक्ष्मा पिप्पली।) वनपिप्पली। इति राजनिर्घण्टः॥

सूक्ष्मपुष्पी, स्त्री, यवतिक्ता। इति राजनिर्घण्टः॥

सूक्ष्मफलः, पुं, (सूक्ष्मं फलमस्य।) भूकर्व्वुदारः। इति राजनिर्घण्टः॥

सूक्ष्मफला, स्त्री, (सूक्ष्मं फलमस्याः।) भूम्यामलकी। इति रत्नमाला॥

सूक्ष्मबदरी, स्त्री, (सूक्ष्मा बदरी।) भूबदरी। इति राजनिर्घण्टः॥

सूक्ष्मबीजः, पुं, (सूक्ष्मं बीजं यस्य।) खस्खसः। इति राजनिर्घण्टः॥

सूक्ष्मभूतं, क्ली, (सूक्ष्मं भूतम्।) अपञ्चीकृताकाशादिभूतम्। इति वेदान्तसारः॥

सूक्ष्ममक्षिकः, पुं, (सूक्ष्मा मक्षिका तद्वदाकृतिरस्यस्येति। अच्।) मशकः। इति राजनिर्घण्टः॥

सूक्ष्ममूला, स्त्री, (सूक्ष्मं मूलं यस्याः।) जयन्ती। इति राजनिर्घण्टः॥

सूक्ष्मवल्ली, स्त्री, (सूक्ष्मा वल्ली।) ताम्बूलवल्ली। जतुका। इति राजनिर्घण्टः॥

सूक्ष्मवस्त्रं, क्ली,(सूक्ष्मं वस्त्रम्।) श्लक्ष्णवसनम्। सरु कापड़ इति भाषा। यथा। उपभोगोऽपि न सूक्ष्मवस्त्रपरिधानादिना। इति दायभागः॥

सूक्ष्मशरीराणि, क्ली, (सूक्ष्माणि शरीराणि।) ज्ञानेन्द्रियपञ्चकं कर्म्मेन्द्रियपञ्चकं वायुपञ्चकं बुद्धिमनसी चेति सप्तदशावयवानि। इति वेदान्तसारः॥

सूक्ष्मशर्करा, स्त्री, (सूक्ष्मा शर्करेव।) बालुका। इति राजनिर्घण्टः॥

सूक्ष्मशाखः, पुं (सूक्ष्मा शाखा यस्य।) जालवर्व्वरः। इति राजनिर्घण्टः॥

सूक्ष्मशालिः, पुं, (सूक्ष्मः शालिः।) अणुधान्यविशेषः। तत्पर्य्यायः। सूचिशालिः २ पावशालिः ३ सूचकः ४। अस्य गुणाः। सूक्ष्मधुरत्वम्। लघुत्वम्। पित्तास्रदाहनाशित्वञ्च। इति राजनिर्घण्टः॥

सूक्ष्मषट्चरणः, पुं, (सूक्ष्माणि षट्चरणानि यस्य।) पक्षयूकः। इति राजनिर्घण्टः॥

सूक्ष्मा, स्त्री, (सूक्ष्म+टाप्।) यूथिका। इति शब्दचन्द्रिका॥ क्षुद्रैला। करुणी। वालुका। इति राजनिर्घण्टः॥

सूक्ष्मैला, स्त्री, (सूक्ष्मा एला।) क्षुद्रैला। गुजराटी एलाचि इति भाषा। तत्पर्य्यायः। वराह्या २ तीक्ष्णगन्धा ३ त्रुटी ४ त्रुटि ५। इति रत्नमाला॥

सूच,त् क पैशुन्ये। इति कविकल्पद्रुमः॥(अदन्तचुरा०-परo-सकo-सेट्।) दीर्घौ। अस्यसूचत् कथां लोकः कथितवान् इत्यर्थः। इति रमानाथः। पैशुन्यमन्तर्द्दीह इत्येके। इति दुर्गादासः॥

सूचः,पुं,(सोव्यति चरणौ इति। सिव + "सिवेष्टेरूच।" उणा० ४। ८३। इति चट्। टेरूत्वञ्च।) कुशाङ्कुरः। इति केचित्॥

सूचकः, त्रि, (सूचयतीति। सूचपैशुन्ये + ण्वुल्।) पिशुनः। इत्यमरः। ३।१।४७॥ (यथा, मनुः। ४। ७१।

"लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः।
स विनाशं व्रजत्याशु सूचकोऽशुचिरेव च॥")

अस्य विवरणं कर्णेजपशब्दे द्रष्टव्यम्॥ (सूचनकर्त्ता। यथा महाभारते। १। १३६। २७।

"द्वारदेशात् समुद्भूतो माहात्मबलसूचकः।
वज्रनिष्पेषसदृशः शुश्रुवे भुजनिस्वनः॥")

सूचकः, पुं, (सीव्यत्यनेनेति। सिव + "सिवेष्टेरूच।" उणा० ४।८३। इति चट्। टेरूत्वञ्च। ततः स्वार्थे कन्।) सीवनद्रव्यम्। (सूचयतीति। सूच + ण्वुल्।) बोधकः। कुक्कुरः। विड़ालः। काकः। इति मेदिनी। के, १६८॥ पिशुनः। बुधः। सिद्धः। पिशाचः। इति शब्दरत्नावली॥ सूचधारः। कथकः। इति हेमचन्द्रः॥ सूक्ष्मशालिः। इति राजनिर्घण्टः॥

सूचनं, क्ली, (सूच + ल्युट्।) गन्धनम्। इत्यमरः। ३।३। ११४॥ ज्ञापनम्। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। १५। १४८।

"भङ्गिसूचनविधौ विशारदो
नारदो मुनिरदर्शनं ययौ॥")

सूचना, स्त्री, (सूच + णिच् + युच्। टाप्।) व्यधनम्। दृष्टिः। गन्धनम्। अभिनयः इति।

विश्वमेदिन्यौ । (ज्ञापनम् । यथा, साहित्यदर्पणे । ६ । ३१२ ।
"यत्र स्याद्दूरं एकस्मिन्नङ्गानां सूचनाखिला ।
तदङ्गमुखमित्याहुर्बीजार्थख्यापकञ्च तत् ॥")
सूचिः, स्त्री, (सूच्यतेऽनयेति । सूच + णिच् + "अच इः ।" उणा० ४ । १३८ । इति इः ।) व्यधनी । इत्यमरः । ३ । ५ । ७ ॥ (यथा, कथासरित्सागरे । १०४ । ७५ ।
"चन्द्रोऽग्निर्विषमाहारो गीतानि श्रुतिसूचयः ।
उद्यानं बन्धनं पौष्पी माला दिग्धा शरावली ॥"
"विव्यथे भरतोऽतीव व्रणे तुद्येव सूचिना ।"
इति रामायणे । २ । ७५ । १७ । इत्यत्र तु महाकविप्रयोगवशात् साधुत्वम् ॥) नृत्यप्रभेदः । शिखा । यथा,—
"सूचिर्नृत्यप्रभेदे च व्यधनीशिखयोरपि ।"
इति रत्नकोषः ॥
(यथा, कुमारे । ५ । ४३ ।
"अलभ्यशोकाभिभवेयमाकृति-
र्विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत् पन्नगरत्नसूचये ॥"* ॥
केतकीपुष्पम् । इति सूचिपुष्पशब्ददर्शनात् ॥ यथा, ऋतुसंहारे । २ । २१ ।
"मुदित इव कदम्बैर्जातपुष्पैः समन्तात्
पवनचलितशाखैः शाखिभिर्नृत्यतीव ।
हसितमिव विधत्ते सूचिभिः केतकीनां
नवसलिलनिषेकात् शान्ततापो वनान्तः ॥"
व्यूहविशेषः । यथा, मनुः । ७ । १८१ ।
"संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून् ।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत् ॥")
सूचिकः, पुं, सूच्या जीवति यः । दरजी इति भाषा । तत्पर्य्यायः । सौचिकः २ सौचिः ३ तुन्नवायः ४ सूचभित् ५ । इति शब्दरत्नावली ॥ (यथा, बृहत्संहितायाम् । १० । ९ ।
"हस्ते नापितचार्किकचीरभिषक्सूचिक-
द्विपद्याहाः ॥")
सूचिका, स्त्री, (सूचिरेव स्वार्थे कन् ।) सूचिः । हस्तिशुण्डः । इति केचित् ॥
सूचिकाधरः, पुं, (सूचिकायाः शुण्डस्य धरः ।) हस्ती । इति शब्दमाला ॥
सूचिकाभरणः, पुं, औषधविशेषः । यथा,—
"विषं पलमितं सूतः शाणकञ्चूर्णयेद्दयम् ।
तच्चूर्णं संपुटे कृत्वा काचलिप्तशरावयोः ॥
मुद्रां कृत्वाथ संशोष्य ततश्चुल्लां निवेशयेत् ।
वह्निं मन्दैः मन्दैः कुर्य्यात् प्रहरद्वयसङ्ख्यया ॥
ततः उद्घाट्य तन्मुद्रामुपरिस्थशरावकात् ।
सलग्नो यो भवेद्धूमस्तं शुल्लीयाच्छनैः शनैः ॥
वायुस्पर्शो यथा न स्यात्ततः कूप्यां निवेशयेत् ।
यावत् सूच्या मुखे लग्नं कूप्या निर्याति भेषजम् ।
तावन्मात्रो रसो देयो मूर्च्छिते सन्निपातिनि ॥
क्षुरेण प्रच्यते मूर्द्धि तत्राङ्गुल्या च घर्षयेत् ॥
रक्तभेषजसम्पर्कात् मूर्च्छितोऽपि हि जीवति ।
तथैव सर्पदष्टोऽपि मृतावस्थोऽपि जीवति ।
यदा तापो भवेत्तस्य मधुरं तत्र दीयते ॥"
इति सूचिकाभरणो रसः ॥
इति भेषज्यरत्नावली ॥ * ॥ अपि च ।
"विषं पलं रसं शाणं तच्चूर्णं काचलेपिते ।
मृत्संपुटे च संरुध्य चुल्लां संस्थाप्य पाचयेत् ॥
शनैर्व्यामद्वयं पक्त्वा तं समुद्धृत्य शीतलम् ।
ऊर्द्धपात्रगतं धूमं गृहीत्वा सृष्टमारुतम् ॥
यावत् सूच्या मुखे लग्नं कूप्या आयाति भेषजम् ।
क्षुरेण प्रच्यते शीर्षे तत्राङ्गुल्या च घर्षयेत् ॥
त्रिदोषे मूर्च्छितो जीवो रक्तभेषजसङ्गमात् ।
सर्पदष्टो मृतावस्थः सोऽपि जीवति तत्क्षणात् ।
दद्याच्च मधुरं तोयं सूचिकाभरणे रसे ॥"
इति सूचिकाभरणरसः सन्निपाते ॥
इति रसप्रदीपः ॥ * ॥ (अपि च ।
"रसगन्धकनागञ्च विषं स्थावरजङ्गमम् ।
मात्स्यवाराहमायूरच्छागपित्तैर्विभावयेत् ॥
सूचिकाभरणो नाम भैरवेण प्रकीर्त्तितः ।
सूचिकाग्रेण दातव्यः सन्निपातनिवर्हणः ॥"
इति सूचिकाभरणो रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)
सूचिकामुख, क्ली, (सूचिकेव क्रमसूक्ष्मं मुखं यस्य) शङ्खः । इति हारावली । ११० ॥ सूच्यास्ये, त्रि ॥
सूचितः, त्रि, (सूच + क्तः ।) कथितः । बोधितः । (यथा, साहित्यदर्पणे । ६ । ३११ ।
"अङ्गान्ते सूचितः पात्रैस्तदङ्गस्याविभागतः ।
यत्राङ्गोऽवतरत्येषोऽङ्कावतार इति स्मृतः ॥")
सूचिपत्रकः, पुं, (सूचिवत् सूक्ष्माणि पत्राणि यस्य । कप् ।) सितावरशाकः । इति राजनिर्घण्टः ॥
सूचिपुष्पः, पुं, (सूच्याकारं पुष्पमस्य । सूचिरिति नाम्ना ख्यातं पुष्पमस्येति वा ।) केतकवृक्षः । इति जटाधरः ॥
सूचिरोमा, [न्] पुं. (सूचिवत् रोमाणि यस्य ।) वराहः । इति हारावली ॥
सूचिवदनः, पुं, (सूचिवत् सूक्ष्मं वदनं यस्य ।) नकुलः । मसकः । इति राजनिर्घण्टः ॥
सूचिवान्, [त्] पुं, (सूचिस्तदाकारचञ्चुरस्त्यस्येति । मतुप् । मस्य वः ।) गरुडः । इति शब्दरत्नावली ॥
सूचिशालिः, पुं, (सूचिवत् सूक्ष्माः शालिः ।) इति राजनिर्घण्टः ॥
सूची, स्त्री, (सीव्यतेऽनया । सिव + "सिवेष्टेरूच उपधा० ४ । ९३ । इति चट् । टेरूत्वञ्च । टित्वात् ङीप् । गौरादित्वात् ङीष् इति केचित् सूच + इः । ऋदिकारादिति ङीष् वा ।) सीवनद्रव्यम् । सूंच इति भाषा । (यथा, महाभारते । ५ । ५८ । १८ ।
"यावद्धि सूच्यास्तीक्ष्णाया विध्येदग्रेण मारिष ।
तावदप्यपरित्याज्यं भूमेर्नः पाण्डवान् प्रति ॥"
वैद्यकोक्तकार्य्यमस्या यथा,—
"एषस्यागतिमन्विष्य चारसूत्रानुसारिणीम् ।
सूचीं विदध्यादगत्यन्ते चोभयाग्रञ्च निर्हरेत् ॥
सूत्रस्यान्तं समानीय गाढबन्धनमाचरेत् ।
ततः क्षारबलं वीक्ष्य सूत्रमन्यत् प्रवेशयेत् ॥
क्षाराक्षं मतिमान् वैद्यो यावन्न छिद्यते गतिः ।
भगन्दरेऽप्येष विधिः कार्य्यो वैद्येन जानता ॥
अर्ब्बुदादिषु चोत्क्षिप्य मूले सूत्रं न धापयेत् ।
सूचीभिर्यववक्त्राभिराचितं वासमन्ततः ।
मूले सूत्रेण बध्नीयाच्छिन्ने चोपचरेद्व्रणम् ॥"
इति वैद्यकचक्रपाणिग्रहे नाड़ीव्रणाधिकारे ॥)
आङ्गिकाभिनयविशेषः । अङ्गहारावेष्टा । इति मेदिनौ ॥ करणम् । इति हेमचन्द्रः ॥ दृष्टिः । इति केचित् ॥ (केतकीपुष्पम् । इति सूचिशब्ददर्शनात् ॥ व्यूहविशेषः । यथा, मनुः । ७ । १८७ ।
"वराहमकराभ्यां वा सूच्या वा गरुडेन वा ॥")
सूचौ, [न्] त्रि, (सूचयतीति । सूच + णिनिः ।) सूचकः । (पिशुनः । यथा, महाभारते । ५ । ३५ । ४६ ।
"पूर्व्वकारी च सूची च मित्रध्रुक् पारदारिकः ॥")
सूचीदलः, पुं, (सूचीवत् दलानि यस्य ।) सितावरः । इति राजनिर्घण्टः ॥
सूचीपत्रा, स्त्री, (सूचीवत् पत्राणि यस्याः ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥
सूचीपुष्पः, पुं, (सूचीवत् सूक्ष्मं पुष्पमस्य । सूचीति नाम्ना प्रसिद्धं पुष्पमस्येति वा ।) केतकी । इति रत्नमाला ॥
सूचीमुखं, क्ली, (सूचीवत् सूक्ष्मं मुखं यस्य ।) हीरकम् । इति हेमचन्द्रः ॥ (यथा, साहित्यदर्पणे । ८ । ६१२ ।
"सूचीमुखेन सङ्गत्य कृतव्रणसन्धं
मुक्ताकलापं लुठसि स्तनयोः प्रियायाः ।
बाणैः स्मरस्य शतशो विनिकृत्तमर्म्मा
स्वप्नेऽपि तां कथमहो न विलोकयामि ॥"* ॥
नरकविशेषः । यथा, भागवते । ५ । २६ । ७ ।
"पर्य्यावर्त्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभूमयः ॥"* ॥ सूच्या मुखम् । यथा, कादम्बरी । "तमसि सूचीमुखाग्रसंभेद्ये इति ॥"
सूच्यास्ये, त्रि । (यथा, महाभारते । ६ । १८ । ५ ।
"सूचीमुखमनीकं स्यादल्पानां बहुभिः सह ॥"
तथा, मार्कण्डेये । १४ । ५५ ।
"दुष्टास्ते पूयनिर्य्यासभुजः सूचीमुखास्तु ते ॥")
सूचीमुखः, पुं, (सूचीवत् सूक्ष्मं मुखं यस्य ।) सितकुशः । इति राजनिर्घण्टः ॥
सूचीरोमा, [न्] पुं, (सूचीवत् रोमाणि यस्य ।) शूकरः । इति चिकित्साशब्देषः ॥ सूचीतुल्यलोमविशिष्टे, त्रि ॥
सूच्यग्रस्थूलकः, पुं, (सूच्या अग्रमिव स्थूलः । ततः कन् ।) तृणविशेषः । उलु इति भाषा । यथा,—
"सूच्यग्रस्थूलको दर्भो जूर्णाख्यश्च खरच्छदः ॥"
इति रत्नमाला ॥

सूचास्यः, पुं, (सूचीवत् आस्यं मुखं यस्य।) मूषिकः। इति हेमचन्द्रः॥ सूचीमुखे, त्रि॥ सूचाह्वः, पुं, (सूचा आह्वा आह्वा यस्य।) सितावरः। इति राजनिर्घण्टः॥

सूतः, पुं, (सू प्रेरणे ऐश्वर्य्ये प्रसवे च+क्तः।) सारथिः। (यथा, रघुः। ३। ४२।

"स पूर्व्वतः पर्व्वतपक्षशातनं
ददर्श देवं नरदेवसम्भवः।
पुनः पुनः सूतनिषिद्धचापलं
हरन्तमश्वं रथरश्मिसंयतम्॥")

त्वष्टा। इत्यमरः। ३। ४। ६१॥ क्षत्रियात् ब्राह्मणीसुतः। (यथा, मनुः। १०। ११।

"क्षत्रियात् विप्रकन्यायां सूतो भवति जातितः।
अश्वसारथ्यमेवैतेषां जीविका। यथा, तत्रैव।
१०। ४७।

"सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम्॥
वन्दो। (यथा, रघुः। ५। ६५।

"सूतात्मजाः सवयसः प्रियतप्रबोधं
प्राबोधयन्नुपसि वाग्भिरुदारवाचः॥")

पारदः। इति मेदिनी॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे।

"इतो हन्ति जराव्याधिं मूर्च्छितो व्याधिघातकः।
बद्धः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः॥

सूर्य्यः। इत्यनेकार्थकोषः॥ पुराणवक्ता। यथा,

"सवान्ते सूतमनघं नैमिषीया महर्षयः।
पुराणसंहितां पुण्यां पप्रच्छुर्लोमहर्षणम्॥
त्वया सूत महाबुद्धे भगवान् ब्रह्मवित्तमः।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः॥
अस्य ते सर्व्वरोमाणि वचसा कृपितानि यत्।
ह्रैपायनस्य भगवांस्ततो वै रोमहर्षणः॥
भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः।
मुनीनां संहितां वक्तुं व्यासः पौराणिकीं पुरा
त्वं हि स्वायम्भुवे यज्ञे सत्यादौ वितते सति।
संभूतः संहितां वक्तुं स्वांशेन पुरुषोत्तम॥"

इति कौर्म्मे। १। ३—६॥ *॥

अपि च।

"नियोगाद्ब्रह्मणः सार्द्धं देवेन्द्रेण महौजसः।
वेणपुत्रस्य वितते पुरा पैतामहे मखे॥
सूतः पौराणिको जज्ञे मायारूपः स्वयं हरिः।
प्रवक्ता सर्व्वशास्त्राणां धर्म्मज्ञो गुणवत्सलः॥
तं मां वित्त मुनिश्रेष्ठाः पूर्व्वोद्भूतं सनातनम्।
एतस्मिन्नन्तरे व्यासः कृष्णद्वैपायनः स्वयम्॥
श्रावयामास याः प्रीत्या पुराणपुरुषो हरिः।
मदन्वये च ये सूताः संभूता वेदवर्ज्जिताः।
तेषां पुराणवक्तृत्वं हरिरासीदजाज्ञया॥"

इति कौर्म्मे १२ अध्यायः॥*॥

किञ्च।

"ब्रह्मणः पौष्करे यज्ञे सत्याद्ये वितते सति।
पृथदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः॥
वक्ता वेदादिशास्त्राणां त्रिकालामलतत्त्ववित्।
तीर्थयात्राप्रसङ्गेन नैमिषारण्यमागमत्॥"

इति वह्निपुराणे १ अध्यायः॥*॥

अन्यच्च।

"दक्षे तु दक्षिणे चक्रं दृष्ट्वा तस्य पितामहः।
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ॥४४॥
तस्य वै जातमात्रस्य यज्ञे पैतामहे शुभे।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामते॥५०
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः।
प्रोक्तौ तदा मुनिवरैस्तावुभौ सूतमागधौ॥५१
स्तूयतामेष नृपतिः पृथुर्वैण्यः प्रतापवान्॥"५२

इति विष्णुपुराणे। १। १३ अध्यायः॥*॥

यून एव पृथोर्जातत्वात् जातमात्रस्य यज्ञ इत्युच्यते। पृथुरेवाभवत् यस्मात्ततः पृथुरजायत इति मात्स्योक्तेः। पैतामहे पितामहदैवत्ये पृथोरेव यज्ञे न तु पितामहकर्त्तृके। यथाह वायुः। वैण्यस्य हि पृथोर्यज्ञे वर्त्तमाने महात्मनः। सूतः सूत्यां समुत्पन्न इति। सूत्यामिति सूतिरभिषूतिः अभिषूयते कण्ड्यते सोमोऽस्यामिति सूतिः सोमाभिषवभूमिस्तस्याम्। सौत्येऽहनि तस्मिन्नेव दिने। इति तट्टीका॥*॥

किञ्च।

"एतस्मिन्नेव काले तु यज्ञे पैतामहे शुभे।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि पुराणवित्॥
तेषां यज्ञे पुनस्त्वेवमुत्पन्नौ सूतमागधौ।
पृथोः स्तवार्थं तौ तत्र समाहूतौ महर्षिभिः॥
ते ऊचुर्ऋषयः सर्व्वे स्तूयतामेष पार्थिवः।
तैर्नियुक्तौ सुकर्म्माणि पृथोर्याणि महात्मनः॥
तुष्टुवुस्तानि सर्व्वाणि आशीर्व्वादांस्ततः परान्।
तयोः स्तवान्ते सुप्रीतः पृथुः प्रादात् जनेश्वरः॥
अनूपदेशं सूताय मागधान् मागधाय च।
तं दृष्ट्वा परमप्रीताः प्रजाः प्राहुर्महर्षयः॥
हर्त्तोनामेष वो दाता भविष्यति नरेश्वरः॥"

इति वह्निपुराणे पृथोरुपाख्याननामाध्यायः॥

सूतः, पुं, क्लो, (सू+क्तः।) पारदः। इत्यमरः॥ (यथा,—

"रसोनखरसैः सूतो नागवल्लीदलोत्थितैः।
त्रिफलायास्तथा क्वाथैः रसो मद्यैः प्रयत्नतः॥
ततस्तेभ्यः पृथक्कृत्वा सूतं प्रक्षाल्य काञ्जिकैः।
सर्व्वदोषविनिर्म्मुक्तं योजयेद्रसकर्म्मसु॥"

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥)

सूतः, त्रि, (सू+क्तः।) प्रसूतः। प्रेरितः। इति मेदिनी॥

सूतकं, क्लो, (सू+भावे क्तः। ततः स्वार्थे कन्। जन्म। इति मेदिनी॥ (सूतकं जन्म कारणत्वेनास्त्यस्येति। अच्।) जननाशौचम्। यथा,

"मृतेन सूतकं गच्छेन्नेतरत् सूतकेन तु।" इति। हेमाद्रौ मनुरपि।

"शावस्योपरि शावे तु सूतकोपरि सूतके।
शेषाहोभिर्व्विशुद्धिः स्यादुदक्यां सूतिकां विना॥"

मरणाशौचम्। यथा,—

"सर्व्वं गोत्रमसंस्पृश्यं तत्र स्यात् सूतके सति।
मध्येऽपि सूतके दद्यात् पिण्डान् प्रेतस्य तत्क्षये॥"

इति शुद्धितत्त्वम्॥

प्रतिबन्धकम्। यथा,—

"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम्॥"

इति तिथ्यादितत्त्वम्॥

(उपरागः। ग्रहणम्। यथा, मनुः। ४।११०।

"प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम्।
त्रीहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके॥"

"राजा चन्द्रमास्तस्य सूतकं राहुं प्रत्यसूतसवणं चशब्दात् सूर्य्यस्य च। अथवा जनपदेश्वरस्य राज्ञः सूतकं पुत्रजन्मोत्सवः। राहोः सूतकं चन्द्रसूर्य्ययोरुपरागः ग्रहणमिति प्रसिद्धम्॥" इति तत्र मेधातिथिः॥)

सूतकः, पुं, क्लो, (सूत एव। स्वार्थे कन्।) पारदः। इति मेदिनी॥ (पर्य्यायोऽस्य यथा,—

"रसेन्द्रः पारदः सूतः सूतराजश्च सूतकः।
शिवतेजो रसः सप्त नामान्येवं रसस्य तु॥"

इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥)

सूतका, स्त्री, सूतिका। इति सूतकागृहशब्ददर्शनात्॥

सूतकागृह, क्लो, (सूतकायाः गृहम्।) सूतिकागृहम्। इत्यमरटीकायां भरतः। ३।२।८॥

सूततनयः, पुं, (सूतस्य अधिरथस्य सूर्य्यस्य वा तनयः।) कर्णः। इति हेमचन्द्रः॥ (सौतिः। इति महाभारतम्॥)

सूतपुत्रः, (सूतस्य अधिरथस्य सूर्य्यस्य वा पुत्रः। कर्णः। इति शब्दरत्नावली॥ (यथा, महाभारते। १। १३५। ११।

"स्पर्द्धमानस्तु पार्थेन सूतपुत्रोऽत्यमर्षणः।
दुर्य्योधनं समाश्रित्य भोऽवमन्यत पाण्डवान्॥"

सौतिः। यथा, तत्रैव। १। ५। ११।

"सूतपुत्र! यथा तस्य भार्गवस्य महात्मनः।
च्यवनत्वं परिख्यातं तन्ममाचक्ष्व पृच्छतः॥")

सूतपुत्रकः, पुं, (सूतपुत्र एव। स्वार्थे कन्।) कर्णः। इति त्रिकाण्डशेषः॥ (सौतिः। इति महाभारतम्॥)

सूतराट्, [ज्] पुं, (सूतः सन् राजते इति। राज्+क्विप्।) पारदः। इति राजनिर्घण्टः॥

सूतिः, स्त्री, (सू+क्तिन्।) सोमाभिषवभूमिः। यथा। "अभिषूयते कण्ड्यते सोमोऽस्यामिति सूतिः सोमाभिषवभूमिः।" इति सूतशब्दे विष्णुपुराणटीका॥ जननम्। (यथा, भागवते। १। १६। १।

"यथा हि सूत्यामभिजातकोविदाः
समादिशन् विप्र महद्गुणस्तथा॥")

सन्तानः। सीवनम्। इति केचित्॥

सूतिका, स्त्री, (सू+क्तः। टाप्। ततः स्वार्थे कन्। यद्वा, सूतं प्रसवोऽस्त्यस्यामिति। ठन्।) नवप्रसूता। यथा,—

"शावस्योपरि शावे तु सूतकोपरि सूतके।
शेषाहोभिर्व्विशुद्धिः स्यादुदक्यां सूतिकां विना॥"

इति शुद्धितत्त्वम्॥*॥

तदन्नभोजनप्रायश्चित्तं यथा । शङ्खः ।
"चाण्डालान्नं मूमिपान्नमजजीविश्वजीविनाम्
गौण्डिकान्नं सूतिकान्नं भुक्त्वा मासं व्रती भवेत्॥"
इति प्रायश्चित्ततत्त्वम् ॥*॥
तदवलोकनतदालपनतत्संस्पर्शनिषेधो यथा—
"नालपेत् जगविद्विष्टान् वीरहीनां तथा स्त्रियम् ।
देवता-पितृमच्छास्त्रयज्ञमद्यादिनिन्दकैः ॥
कृत्वा तु स्पर्शनालापं शुध्येताकामवीक्षणात् ।
अवलोक्य तथोदक्यामन्त्यजं पतितं शवम् ॥
विधर्मिसूतिकाषण्डविवस्त्रान्तावसायिनः ।
मृतनिर्यातकांश्चैव परदाररतांश्च ये ।
एतदेव हि कर्त्तव्यं प्राज्ञैः शोधनमात्मनः ॥"
पारिभाषिकसूतिकालक्षणं यथा,—
"अभोज्यसूतिकाषण्डमार्जाराखूंश्च कुक्कुटान् ।
पतितापविद्धचाण्डालसूतहारांश्च धर्म्मवित् ॥
संस्पृश्य शुध्यते स्नानात् उदक्यामसूकरौ ।
तद्वच्च सूतिकाशौचदूषितौ पुरुषावपि ॥
अलर्क उवाच ।
भवत्या कीर्त्तिता भोग्या य एते सूतिकादयः ।
अमीषां श्रोतुमिच्छामि तत्त्वतो लक्षणानि च॥
मदालसोवाच ।
ब्राह्मणी ब्राह्मणस्यैव यावत्शेषत्वमागतौ ।
तावुभौ सूतिकेत्युक्तौ तयोरन्नं विगर्हितम् ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥
वामनपुराणे १४ अध्याये च द्रष्टव्यम् ॥
सूतिकागारं, क्ली, (सूतिकाया आगारम् ।)
प्रसवगृहम् । इति जटाधरः ॥ (यथा, हरिवंशे । १६३ । ४७ ।
"आकृत्य शम्बरेण त्वमिहानीतोऽसि मानद ।
ममरात्रे त्वसम्पूर्णे सूतिकागारमध्यतः ॥")
सूतिकागृहं, क्ली, (सूतिकाया गृहम् ।) प्रसवालयः । तत्पर्य्यायः । अरिष्टम् २ । इत्यमरः । १ । २ । ८ ॥ सूतकागृहम् ३ । इति तट्टीका ॥ सूतौगृहम् ४ सूतिगृहम् ५ । इति जटाधरः ॥
तस्याकृतिर्यथा,—
"अष्टहस्तायतं चारु चतुर्हस्तविशालकम् ।
प्राचीद्वारमुदग्द्वारं विदध्यात् सूतिकागृहम्॥"
इति भावप्रकाशः ॥
तत्र पिशाचानां वासो यथा,—
"सर्व्वत्रगानप्रतिघान् सूतिकागृहसेविनः ।
पृष्ठतः पाणिपादांश्च पृष्ठगोवान् सुरेश्वम् ॥
एवविधान् पिशाचांश्च दृष्ट्वा ब्रह्मानुकम्पया ।
अन्तर्धानं वरं प्रादात् कामगायित्वमेव च ॥"
इति वह्निपुराणे प्रजापतिसर्गनामाध्यायः ॥
प्रसवात् पूर्व्वं तत्संस्कारमाह साङ्गायनगृह्यम्
काकादन्या मेचकधातव्या बृहत्याः कोपतव्या कालक्लीतकस्य मूलानि पेषयित्वा उपलेपयेद्देशं यस्मिन् प्रजायते रक्षसामपहत्यै इति। काकादनी काकजङ्घा । मेचकधातकीकाकमोचिका कोपातकी घोषकम् । कालक्लीतकः यष्टिमधुकेति कल्पतरुः ॥ अतएव हरिवंशे ।
"एष मानुषको यज्ञो मानुषैरेव साध्यते ।
श्रूयतां येन देवं हि महिषैः प्रतिहन्यते ॥
मन्त्रग्रामैः सुविहितैरौषधैश्चैव योजितैः ।
यत्नेन चानुकूलेन दैवमप्यनुलोम्यते ॥"
इत्यनुचरान् प्रति कंसवाक्यम् । इति ज्योतिस्तत्त्वम् ॥
सूतिकागेहं, क्ली, (सूतिकाया गेहम् ।) प्रसवगृहम् । यथा,—
"जगाम सूतिकागेहं नारीरूपं विधाय भूः ।
जयशब्दः शङ्खशब्दो दधिशब्दो बभूव ह ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥
सूतिकाभवनं, क्ली, (सूतिकाया भवनम् ।) प्रसवगृहम् । इति हलायुधः ॥
सूतिकावासः, पुं,(सूतिकाया आवासः ।) प्रसवगृहम् । यथा,—
"सूतिकावासनिलया जन्मदा नाम देवताः ।
तासां यागनिमित्तन्तु शुद्धिर्जन्मनि कीर्त्तिता ।
षष्ठेऽह्नि रात्रियागन्तु जन्मदानान्तु कारयेत् ॥"
इति शुद्धितत्त्वम् ॥
सूतिकारोगः, पुं, (सूतिकाया रोगः ।) नवप्रसूताया व्याधिभेदः । तन्निदानादि यथा,—
"मिथ्योपचारात् संक्लेशात् विषमाजीर्णभोजनात् ।
सूतिकायास्तु ये रोगा जायन्ते दारुणाश्च ते ॥"
मिथ्योपचारात् अनुचिताचरणात्। प्रवातादिसेवनात्। संक्लेशात् संक्लिश्यन्ते दोषा अनेन इति संक्लेशः दोषजनकमन्नं तस्मात्। दारुणाः कष्टसाध्याः । के ते व्याधय इत्याकाङ्क्षायामाह।
"अङ्गमर्दो ज्वरः कासः पिपासा गुरुगात्रता ।
शोथः शूलातिसारौ च सूतिकारोगलक्षणम् ॥"
एतेऽङ्गमर्दादयः प्रायेण सूतिकाया भवन्तः सूतिकारोगत्वेन लक्ष्यन्ते ॥ * ॥ ज्वरादीनां रोगविशेषाणां निदानविशेषमाह ।
"ज्वरातीसारशोथाश्च शूलानाहबलक्षयाः ।
तन्द्रारुचिप्रसेकाद्या वातश्लेष्मसमुद्भवाः ॥
कृच्छ्रसाध्या हि ते रोगाः शोणमांसबलाश्रिताः
ते सर्व्वे सूतिका नाम्ना रोगास्ते चाप्युपद्रवाः॥"
सूतिकाभवत्वेन सूतिकानाम्ना ते रोगाः । आश्रयाश्रितयोरभेदोपचारात्। ते चाप्युपद्रवा इति । त एव ज्वरादय उक्तानां रोगाणामन्यतमं प्रधानीकृत्योपद्रवाश्च ॥ * ॥
अथ सूतिकारोगचिकित्सा ।
"सूतिकारोगशान्त्यर्थं कुर्य्यात् वातहरीं क्रियाम् ।
दशमूलकृतं क्वाथं कोष्णं दद्यात् घृतान्वितम्॥
अमृतानागरसहचरभद्रोत्कटपञ्चमूलकं जलदम् ।
घृतयोतं मधुयुक्तं शमयत्यचिरेण सूतिकातङ्कम्॥
देवदारु वचा कुष्ठं पिप्पली विश्वभेषजम् ।
भूनिम्बकटफलं मुस्तं तिक्ताधान्यं हरीतकी ॥
गजकृष्णा सदुःस्पर्शा गोक्षुरं धन्वयासकः ।
हन्त्यतिविषा च्छित्वा कर्कटः कृष्णशीरकः ॥
समभागान्वितैरेतैः सिन्धुरामठरूषकैः ।
क्वाथमष्टावशेषन्तु प्रसूतां पाययेत् स्त्रियम् ॥
शूलकासज्वरश्वासमूर्च्छाकम्पग्निरोऽर्त्तिभिः ।
युक्तं प्रलापपटूदाहतन्द्रातीसारवान्तिभिः ॥
निहन्ति सूतिकारोगं वातपित्तकफोद्भवम् ।
कषायो देवदार्व्वादिः सूतायाः परमौषधम् ॥"
इति देवदार्व्वादिक्वाथः ॥*॥
"जीरकः स्थूलजीरश्च शतपुष्पाह्वयस्तथा ।
यवानी वाजमोदा च धान्यकं मेथिकापि च ॥
शुण्ठी कृष्णा कणामूलं चित्रकं हपुषापि च ।
बदरीफलचूर्णञ्च कुष्ठं कम्पिल्लकं तथा ॥
एतानि पलमात्राणि गुडं शतपलं मतम् ।
क्षीरं प्रस्थद्वयं दद्यात् सर्पिषः कुडवत्रयम् ॥
पञ्चजीरकपाकोऽयं प्रसूतानां प्रशान्तये ।
युज्यते सूतिकारोगे योनिरोगे ज्वरे क्षये ।
कासे श्वासे पाण्डुरोगे कार्श्ये वातामयेषु च ॥"
इति पञ्चजीरकपाकः ॥*॥
"आज्यस्याञ्जलियुग्ममत्र पयसःप्रस्थद्वयंखण्डतः
पञ्चाशत्पलमत्र चूर्णितमथ प्रक्षिप्यते नागरम् ।
प्रस्थार्द्धं गुडवद्विपाच्य विधिना सुष्टित्रयं धान्यकात्
मिश्राः पञ्चपलं पलं कृमिरिपोः साजाजिजीरादपि ॥
व्योषाम्भोददलोरगेन्द्र-सुमनस्तत्द्राविड़ीनां पलं
पक्वं नागरखण्डसंज्ञकमिदं सौभाग्यदं योषिताम् ।
कट्श्वासज्वरदाहशोथशमनं सश्वासकासापहं
प्लीहव्याधिविनाशनं कृमिहरं मन्दाग्निसन्दीपनम् ॥"
दलं पत्रकम् । उरगेन्द्रसुमुखनागकेशरम् ।
द्राविड़ी सूक्ष्मैला । सौभाग्यगुणोपाकः । इति भावप्रकाशः ॥
सूतिकाषष्ठी,स्त्री, (सूतिकायाः षष्ठी । सूतिकागृहपूज्या षष्ठीति मध्यपदलोपी कर्म्मधारयो वा ।) सूतिकागारे जातबालकस्य षष्ठदिने पूज्यदेवीविशेषः । अथ सूतिकाषष्ठी-पूजा । विष्णुधर्म्मोत्तरे ।
"सूतिकावासनिलया जन्मदा नाम देवताः ।
तासां यागनिमित्तार्थं शुद्धिर्जन्मनि कीर्त्तिता॥
षष्ठेऽह्नि राचियागन्तु जन्मदा नाम्ना कारयेत् ।
रक्षणीया सदा षष्ठी निशा तत्र विशेषतः ॥
राम ! जागरणं कार्य्यं जन्मदानां तथा बलिः ॥"
रामेति सम्बोधनम् ॥*॥ तत्रागौचान्तरदोषोऽपि नास्ति ।
"अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् ।
कर्त्तुस्तात्कालिकी शुद्धिः पूर्व्वागौचादिशुध्यति ॥"
इति प्रजापतिवचनात् । पुत्रजन्मेति श्रवणात् पितुरेवागौचाभावः न तु मातुः कर्त्तुरिति पुंलिङ्गनिर्देशाच्च । कार्य्येदिति अन्यगौचव्यतिरिक्तप्रायेण ॥*॥ तत्रादौ विनयकादिसहितषोडशमातृकापूजनम् । तथा च कृत्यचिन्तामणौ ।

"छागजागरणं कार्य्यं खड्गो धार्य्यः समीपतः।
आवाह्य पूजयेद्देवीं गणेशं मातरं गिरिम् ॥"
देवीं षष्ठीम्। गिरिं मन्थानदण्डम् ॥*॥ मातृनामान्याह। बह्वृचगृह्यपरिशिष्टम्।
"गौरी पद्मा शची मेधा सावित्री विजया जया
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह।
आदौ विनायकः पूज्यो अन्ते च कुलदेवताः॥"
तानाभिधाय भविष्ये।
"पूज्याश्चित्रेऽथवा कार्य्या वरदाभयपाणयः।"
मातरः इति सर्व्वासां विशेषणम्। अतएव गौर्य्यै मात्रे नमः। इत्यादिप्रयोगः। एता मातरो लोकमातरो ज्ञेयाः अतएव तयोर्व्वैदुर्ल्लभ्यं निर्देशः ॥*॥ गणेशपूजायां प्रार्थनामन्त्रो यथा,
"सर्व्वविघ्नहरो देव एकदन्तो गजाननः।
षष्ठीगृहेऽर्च्चितः प्रीत्या शिशुं दीर्घायुषं कुरु ॥"
ततः।
"आयाहि वरदे देवि महाषष्ठीति विश्रुता।
अस्मिन्रूपेण मे पुत्रं रक्ष जागरवासरे ॥"
इति षष्ठ्या आवाहनम्। ततः षष्ठीं पूजयेत्।
"गौर्य्याः पुत्रो यथा स्कन्दः सदा संरक्षितस्त्वया।
तथा ममाप्ययं बालो रक्ष्यतां षष्ठि ते नमः ॥"
इति त्रिः पूजयेदिति। भोजराजः।
"गणेशस्यैव नन्दा च पूतना मुखमण्डिका।
विडालिका शकुनिका शुष्कनन्दा च जम्भिका ॥
आचार्य्यका रेवती च पिलिपिच्छा ततः परम्।
स्कन्दा च ग्रहाग्रेतेऽर्च्चाः रक्षार्थं मातृकाग्रहाः ॥"
कृत्यचिन्तामणौ स्तुतिः।
"जय देवि जगन्मातर्जगदानन्दकारिणि।
प्रसीद मम कल्याणि नमोऽस्तु षष्ठि देवि ते ॥"
वरप्रार्थनम्।
"रूपं देहि यशो देहि भाग्यं भगवति देहि मे।
पुत्रान्देहि धनं देहि सर्व्वान् कामांश्च देहि मे॥
धात्री त्वं कार्त्तिकेयस्य महाषष्ठीति विश्रुता।
त्वत्प्रसादादविघ्नेन चिरं जीवतु बालकः॥
देवतानामृषीणाञ्च सर्व्वेषां हितकारिणि।
समर्पितं रक्ष पुत्रं महाषष्ठि नमोऽस्तु ते ॥
इत्यनेन बालं व्यजनस्थं कृत्वा समर्पयेत् ॥"
मन्थानदण्डं पूजयेत्।
"मन्थानमन्दरोऽसि त्वं मथितः सागरस्त्वया।
तथा ममापि पुत्रस्य मन्य विघ्नं नमोऽस्तुते ॥"
ततः षट्कृत्तिकाः पूजयेत्। ताश्च।
"शिवा सम्भूतिनामा च कीर्त्तिः सन्ततिरेव च।
अनसूया क्षमा चैव षड्ेता: कृत्तिकाः स्मृताः॥"
मार्कण्डेयपुराणम्।
"अन्यस्मिन्पशुगृह्ये च निर्य्यपे सूतिकागृहे।
अदीपशस्त्रमूषले भूतिसर्षपवर्जिते।
अनुप्रविश्य या जातमपहृत्यात्मसम्भवम्।
क्षणप्रसविनी बालं तत्रैवोत्सृज्यते द्विज ॥
सा जातहारिणी नाम सुघोरा पिशिताशना।
तस्मात् संरक्षणं कार्य्यं यत्नतः सूतिकागृहे ॥"
यूपो बहच्छागस्तम्भः। पशुः छागः। छागजागरणं कार्य्यमित्येकवाक्यत्वात् ॥*॥ पाद्मे।
"पायसं सर्पिषा मिश्रं द्विजेभ्यो यः प्रयच्छति।
गृहं तस्य न रक्षांसि धर्षयन्ति कदाचन ॥"
इति ज्योतिस्तत्त्वम् ॥
अन्यत् षष्ठीशब्दे द्रष्टव्यम् ॥
सूतिगृहं, क्ली, (सूत्याः प्रसवस्य गृहम्।) प्रसवगृहम्। इति शब्दरत्नावली ॥
सूतिमासः, पुं, (सूतेः प्रसवस्य मासः।) प्रसवमासः। तत्पर्य्यायः। वैजननः २। इत्यमरः। २। ६। ३८।
"सूतिमासो वैजननो नवमो दशमोऽपि च।"
इति जटाधरः ॥
सूतीगृहं, क्ली, (सूत्याः गृहम्।) प्रसवागारः। इति शब्दरत्नावली ॥ (यथा, भागवते। १०। ८५। २०।
सूतीगृहे ननु जगाद भवानजो नो
संजज्ञ इत्यनुयुगं निजधर्म्मगुप्त्यै ॥")
सूत्कारः, पुं, (सूत् इति शब्दस्य कारः करणम्।) अनुकरणशब्दविशेषः। सूत् इति शब्दं करोति। यथा, सौत्कारादिः ॥
सूत्थानः, त्रि, (सुष्ठु उत्थानं उद्योगो यस्य।) चतुरः। इत्यमरः ॥ सुन्दरोत्थाने, क्ली ॥
सूत्परं, क्ली, सुरासन्धानम्। इति शब्दचन्द्रिका॥
सूत्या, स्त्री (सू+क्यप्। निपातनात् साधुः।) यज्ञस्नानम्। तत्पर्य्यायः। अभिषवः २ सवनम् ३। इत्यमरः ॥ सोमलतारसपानम्। इति भरतः ॥
सूत्याशौचं, क्ली, (सूतिनिमित्तकमाशौचम्।) जननाशौचम्। यथा,—
"दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः।
आवाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते ॥"
इति शुद्धितत्त्वम् ॥
सूत्र, त् क अन्यने। इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट्।) दीर्घो दन्त्यवर्गाद्यमध्यः। वेष्टने इत्यन्ये। सूत्रयति सूत्रापयति सूत्रेण इदं लोकः। इति दुर्गादासः ॥
सूत्र, क्ली, (सूत्रयतेऽनेनेति। सूत्रत् क अन्यने+णिच्+"एरच्।" इत्यच्। यद्वा षिव्यु तन्तुसन्ताने+"सिविमुच्योष्टेरू च।" उणा० ४। १६२। इति ष्ट्रन्। टेरू च।) वस्त्रारम्भकम्। सूता इति भाषा। तत्पर्य्यायः। तन्तुः २। इत्यमरजटाधरौ ॥ सूत्रतन्तुः ३। इति भरतधृतहारावली ॥ (यथा, रघुः। १। ४।
"अथवा कृतवागद्वारे वंशेऽस्मिन् पूर्व्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥")
यज्ञसूत्रम्। यथा, [महानिर्व्वाणे। १। ४८।
"ब्राह्मण्यचिह्नमेतावत् केवलं सूत्रधारणम् ॥")
व्यवस्था। शास्त्रादिसूचनाग्रन्थः। इति मेदिनी॥
सूत्रलक्षणं यथा,—
"स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥"
इति मुग्धबोधटीकायां दुर्गादासः॥
(कारणम्। निमित्तम्। यथा, भागवते। ४। ६। ४३।
त्वमेव धर्म्मार्थदुघाभिपत्तये
दक्षेण सूत्रेण ससर्ज्जिथाध्वरम् ॥")
सूत्रकण्ठः, पुं, (सूत्रं कण्ठे यस्य।) विप्रः। खड्गरोटः। कपोतः। इति मेदिनी ॥
सूत्रकोणः, पुं, (सूत्रबद्धः कोणो यस्य।) डमरुः। इति हारावली ॥
सूत्रकोणकः, पुं, (सूत्रकोण एव। स्वार्थे कन्।) डमरुः। इति त्रिकाण्डशेषः ॥
सूत्रगण्डिका, स्त्री, (सूत्रं गण्डयतीति। गण्ड+ण्वुल्।) तन्त्रवायोपकरणविशेषः। तत्पर्य्यायः। एषणी २। इति शब्दरत्नमाला ॥
सूत्रतन्तुः, पुं, (सूत्रमेव तन्तुः।) सूत्रम्। इति हारावली ॥
सूत्रतर्कुटी, स्त्री, (सूत्रस्य तर्कुटी।) तर्कुटी। इति जटाधरः ॥ टेको इति भाषा ॥
सूत्रधरः, पुं, (धरतीति। धृ+अच्। सूत्रस्य धरः।) सूत्रधारः। इति केचित् ॥
सूत्रधारः, पुं, (सूत्रं धरति धारयति वा। धृ+णिच् वा+अण्।) शचीपतिः। इन्द्रः। नान्यन्तरसञ्चारी। स तु रङ्गभूमिं परिक्रम्य नाटकीयकथासूत्रसूचकः। (यथा, साहित्यदर्पणे। ६। २८३।
"पूर्व्वरङ्गं विधायैव सूत्रधारो निवर्त्तते।
प्रविश्य स्थापकस्तद्वत् काव्यमास्थापयेत्ततः॥")
शिल्पिप्रभेदः। कुतार इति भाषा। इति मेदिनी ॥ स च शूद्रागर्भे विश्वकर्म्मण औरसेन जातः। इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १०अध्यायः।
सूत्रपुष्पः, पुं, (सूत्रार्थं पुष्पमस्य।) कार्पासः। इति त्रिकाण्डशेषः ॥
सूत्रवीणा, स्त्री, (सूत्रबद्धा वीणा।) वीणाभेदः। तत्पर्य्यायः। लावुकी २। इति हारावली ॥
सूत्रभित्, पुं, (सूत्रं भिनत्तीति। भिद्+क्विप्।) सूत्रभिद्, सौचिकः। इति शब्दरत्नावली ॥
सूत्रमध्यभूः, पुं, (सूत्रमध्यवत् भूरुत्पत्तिर्यस्य।) यज्ञधूपः। इति शब्दचन्द्रिका ॥
सूत्रयन्त्रं, क्ली (सूत्रस्य यन्त्रम्।) सूत्रवेष्टनकाष्ठम्। तांत इति भाषा। यथा,—
"आवापनं सूत्रयन्त्रं यत्सूत्रैरभिवेष्टते ॥"
इति शब्दमाला ॥
सूत्रला, स्त्री, (सूत्रं लातीति। ला+कः।) तर्कुटी। इति हारावली ॥
सूत्रवेष्टनं, क्ली, (वेष्टतेऽनेनेति। वेष्ट+करणे ल्युट्। सूत्रस्य वेष्टनम्। तन्त्रवायोपकरणम्। तासनी इति भाषा। तत्पर्य्यायः। त्रसरः २। इत्यमरः। ३। २। २४ ॥ तसरः ३। इति भरतः ॥

सूत्रामा, [न्] पुं, सुष्ठु त्रायते इति। सु+त्रै+ "सर्व्वधातुभ्यो मनिन्।" उणा० ४। १४४। इति मनिन्। पक्षे उपसर्गस्य दीर्घत्वम्।) इन्द्रः। इत्यमरः। १। १। ४५॥

सूत्रावली, स्त्री,(सूत्रस्य आवली श्रेणिर्यत्र।) गलसूत्रम्। तत्पर्य्यायः। गलमेखला २। इति हारावली॥

सूत्री,[न्] पुं, (सूत्रमस्यास्तीति। सूत्र+इनिः। काकः। इति त्रिकाण्डशेषः॥सूत्रविशिष्टे, त्रि॥

सूदः,पुं,(सूदयति रसानिति। सूद क्षरणे+णिच्+अच्।) सूपकारः। (यथा, महाभारते। १। १३४। २१।

"तं दृष्ट्वा नित्यमुद्युक्तमिष्वस्त्रं प्रति फाल्गुनम्। आहूय वचनं द्रोणो रहः सूदमभाषत॥") व्यञ्जनम्। इत्यमरः। ३। ३। ८०॥ (यथा, महाभारते। १। १२८। ३४।

"भक्ष्यं भोज्यञ्च पेयञ्च चोष्यं लेह्यमथापि वा। उपाहृतं नरैस्तत्र कुशलैः सूदकर्म्मणि॥") सूपः। इति विश्वः॥ सारथ्यम्। अपराधः। लोध्रः। पापम्। इत्यजयपालः॥

सूदनं, क्लीं, (सूद+ल्युट्।) अङ्गीकरणम्। हननम्। (यथा, हरिवंशे। १६३। ४२।

"वैष्णवास्त्रं प्रयच्छास्मै वधार्थं शम्बरस्य च। अमोघं कवचं तस्य प्रयच्छासुरसूदने॥") निःक्षेपणम्। षूदधातोरनट्प्रत्ययेन निष्पन्नम्॥ तद्धति, त्रि। (यथा, महाभारते। १।१८२।०।

"तत्र दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि। चिन्तयामास तच्चक्रं विष्णुर्दानवसूदनम्॥")

सूदशाला, स्त्री, (सूदस्य शाला।) पाकशाला। तथा,—

"सूदशाला रसवती पाकस्थानं महानसम्॥" इति हेमचन्द्रः॥

सूदाध्यक्षः, पुं, (सूदानां सूपकाराणामध्यक्षः।) पाकशालाध्यक्षः। तत्पर्य्यायः। पौरोगवः १। इति हेमचन्द्रः॥ पुरोगमः ३। इति शब्दरत्नावली॥ तल्लक्षणं यथा,—

"अनाहार्य्यः शुचिर्दक्षश्चिकित्सितविदांवरः। सूदशास्त्रविशेषज्ञः सूदाध्यक्षः प्रशस्यते॥" इति मात्स्ये १८८ अध्यायः॥

सूनं, क्लीं,(सू प्रो ङ य सूतौ+क्तः।) प्रसवः। पुष्पम्। विकसिते, त्रि। इति विश्वमेदिन्यौ॥

सूनः, त्रि, (सू+क्तः। "ओदितश्च।" ८।२।४५। इति निष्ठातस्य नः।) जातः। इति मुग्धबोधव्याकरणम्॥

सूनवान्, [त्] त्रि, (सू+क्तवतु।) जातः। इति मुग्धबोधव्याकरणम्॥

सूना, स्त्री, (सूयते क्षेति। सू+क्तः। टाप्।) पुत्री। (सुञ् पीड़ने+"सुजो दीर्घश्च।" उणा० ३। १३। इति नः। दीर्घश्च धातोः।) वधस्थानम्। गलशृङ्खिका। इति मेदिनी। ने, २४॥ शूगादिमांसविक्रयः। शूनपचिवधस्थानम्। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, भागवते। १। १७। ३८।

"अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ। द्यूतं पानं स्त्रियः सूना यत्राधर्म्मश्चतुर्व्विधः॥") जाता। इति सूनशब्दार्थदर्शनात्। सूनाप्रकाराणि तत्पापापनोदकानि च पञ्चसूनाशब्दे द्रष्टव्यानि॥

सूनी,[न्]पुं,(सूना अस्त्यस्येति। इनिः।) व्याधः। मांसविक्रयी। (यथा, याज्ञवल्क्ये। १।१४१।

"प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः। दुष्टा दशगुणं पूर्व्वात् पूर्व्वादेते यथाक्रमम्॥") सूनुः, पुं, (सूयते इति। सू+"सुवः कित्।" उणा० ३। ३५। इति नुः। स च कित्।) पुत्रः। (यथा, रघुः। १। ८५।

"सूनुः सूनृतवाक् स्रष्टुः विससर्ज्जोदितश्रियम्॥") अनुजः। सूर्य्यः। इति मेदिनी॥ अर्कवृक्षः। इत्यमरः॥

सूनुः,) स्त्री, (सू+नुः। वा ङीप्।) कन्या।
सूनूः,) इति हेमचन्द्रः॥

सूनृतं,क्लीं,(सूनृत्यत्यनेनेति।सु+नृत्+घञर्थे कः उपसर्गस्य दीर्घः।)सत्यप्रियवाक्यम्। इत्यमरः। १।६।१८॥ (यथा, साहित्यदर्पणे। ३। १५५।

"भाषते सूनृतं स्निग्धमनुरक्ता नितम्बिनी॥") मङ्गलम्। इत्यजयः॥ तद्धति, त्रि। (यथा, भागवते। १। १८। ३१।

"प्रणम्य मूर्द्ध्नावहितः कृताञ्जलि-
र्नत्वा गिरा सूनृतयान्वपृच्छत्॥")

सून्मदः, त्रि, (सुष्ठु उन्मदः।) उन्मत्तः। उन्मदिष्णुः। इत्यमरे उन्मदशब्दटीकायां भरतः। ३। १। २०॥

सून्मादः, त्रि, (सुष्ठु उन्मादः।) उन्मादरोगविशिष्टः। इत्यमरे उन्मदशब्दटीकायां रमानाथः॥

सूपः,पुं,(सौतिरसानिति। सु+"घुसृभ्यां निच्च।" उणा० ३। २६। इति पः। चकारात् कित् दीर्घत्वञ्च।) व्यञ्जनविशेषः। डाल इति भाषा। सूदः। इति मेदिनी॥ भाण्डम्। शायकम्। इति शब्दरत्नावली॥ * ॥ अथ दालौ।

"दलितन्तु यमौधान्यं दालिर्दालौ स्त्रियामुभौ। दालौ तु सलिले सिद्धा लवणाद्यं कडिङ्गभिः। संयुक्ता सूपनाम्नी स्यात् कथ्यते तद्गुणा अथ॥ सूपो विष्टम्भको रूक्षः शीतस्तु स विशेषतः। निस्तुषो गुरुसिद्धः स लाघवं सुतरां व्रजेत्॥" इति भावप्रकाशः॥

सूपकारः, पुं, (सूपं करोतीति। कृ+अण्।) पाककर्त्ता। तत्पर्य्यायः। वल्लवः २ आरालिकः ३ आन्वयिकः ४ सूदः ५ औदनिकः ६ गुदः ७। इत्यमरः। २। ९। २८॥ पाचकः ८। इति शब्दरत्नावली॥ पाकुकः ९। इत्युणादिकोषः॥ भक्ष्यकारः १०। इति हेमचन्द्रः॥ तस्य लक्षणं यथा, चाणक्यम्।

"इङ्गिताकारतत्त्वज्ञो बलवान् मिष्टपाचकः। शूरश्च कठिनर्यश्च सूपकारः स उच्यते॥" शूद्रपाकोपजीवी। यथा,ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्याये।

"देवोपजीवाजीवी यः देवलश्च प्रकीर्त्तितः। शूद्रपाकोपजीवी यः सूपकारः प्रकीर्त्तितः॥ सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः। उक्तपूर्व्वप्रकारेण लक्षणं हृषलीपतेः॥ एते महापातकिनः कुम्भीपाकं प्रयान्ति ते। कुम्भान्यन्यानि ते यान्ति निबोध कथयामि तान्॥"

सूपधूपनं,क्लीं,(सूपस्य धूपनमस्मादिति।) छिङ्गः। इति त्रिकाण्डशेषः॥

सूपपर्णी,स्त्री,(सूपकरं सूपस्य स्वादुताकरं पर्णमस्याः। ङीष्।) मुद्गपर्णी। इति रत्नमाला॥

सूपश्रेष्ठः, पुं, (सूपेषु तत्साधनेषु श्रेष्ठः।) मुद्गः। इति राजनिर्घण्टः॥

सूपाङ्गं,क्लीं, (सूपस्य अङ्गम्। तत्साधनत्वात्॥ छिङ्ग। इति राजनिर्घण्टः॥

सूमं,क्लीं, (सू+"इषियुधीति।"उणा०१।१४४। इति मक्।) क्षीरम्। आकाशम्। इति मेदिनी॥ जलम्। इति शब्दरत्नावली॥

सूरः, पुं, (सूते जगदिति। सू+"सुसूधाञ्गृधिभ्यः क्रन्।" उणा० २। २४। इति क्रन्।) सूर्य्यः। (यथा, ऋग्वेदे। १। १६३। २।

"सूरादश्वं वसवो निरतष्ट॥") अर्कवृक्षः। इत्यमरः।१।३।२८;२।४।८०॥हस्तार्हतृपिटविशेषः। इति हेमचन्द्रः॥ पण्डितः। इति केचित्॥

सूरणः, पुं, शूरणः। इति शब्दरत्नावली॥ कार्त्तिकमासे तस्य भक्षणनिषेधो यथा, कर्म्मलोचने।

"मकरे मूलकञ्चैव सिंहे चालावुकं तथा। कार्त्तिके शूरणञ्चैव सद्यो गोमांसभक्षणम्॥"

सूरतः, त्रि, (सुष्ठु रमते इति। सु+रम+"मो रमतेः क्तो दमे पूर्व्वपदस्य च दीर्घः।" उणा० ५। १४। इति क्तः सुशब्दस्य च दीर्घः।) कृपालुः। इत्यमरः। ३। १। १५॥

सूरसूतः, पुं, (सूरस्य सूर्य्यस्य सूतः सारथिः।) अरुणः। स सूर्य्यसारथिः। इत्यमरः।१।३।२२॥

सूरिः, पुं, (सूते सद्वाक्यानीति। सू+"सृडः क्रिः।" उणा० ४। ६४। इति क्रिः।) पण्डितः। इत्यमरः। २। ७। ६॥ (यथा, भागवते। १। १। १।

"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्॥
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः॥") यादवः। सूर्य्यः। इत्युणादिकोषः॥

सूरी, [न्] पुं, (सूरः सूर्य्ये उपासनतया अस्त्यस्येति। सूर+इनिः।) पण्डितः। इति शब्दरत्नावली॥

सूरी, स्त्री, (सू+क्रिः। ङीष्।) राजसर्षपः। इति रत्नमाला॥ (विद्वषी। इत्युणादिवृत्तौ

उज्ज्वलः । ४ । ६४ ॥ * ॥ सूर्य्यस्य स्त्री । "यंयोगादाख्यायाम्" ४।१।४८। इति ङीप् । सूर्य्येतिव्यागस्येति यलोपः । कुन्ती । इति व्याकरणम् ॥)

सूर्क्ते, नारदे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रेफयुक्तः षष्ठस्वरो दन्त्यादिः । सूर्क्षेति दुर्गा लोकः । सुसूर्क्ष । इति दुर्गादासः ॥

सूर्क्षणं, क्ली. (सूर्क्ष + ल्युट् ।) अनादरः । इति शब्दरत्नावली ॥

सूर्क्ष, अनादरे । ईर्षे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) दन्त्यादिर्दीर्घो रेफमध्यः । सूर्क्षति सुसूर्क्ष । इति दुर्गादासः ॥

सूर्क्षः, पुं, (सूर्क्षते अनादियते इति । सूर्क्ष + क्विप् ।) मासः । इति शब्दरत्नावली ॥

सूर्पः, पुं, क्ली, शूर्पः । इति शब्दरत्नावली ॥ कुम्भपरिमाणम् । द्विद्रोणपरिमाणम् । इति वैद्यकपरिभाषा ॥

सूर्म्मी, स्त्री, शूर्म्मी । इतिकेचित् ॥

सूर्य्यः, पुं, (सरति आकाशे सुवति कर्म्मणि लोकं प्रेरयति वा । सृ गतौ सूप्रेरणे वा + "राजसूय-सूर्य्यमृषोद्येति ।" ३।१।११४। इति क्यप्प्रत्ययेन साधुः ।) ग्रहविशेषः । अर्कपर्णः । इति मेदिनी ॥ बलिपुत्रः । इति केचित् ॥ (यथा, हरिवंशे । ३ । ७४ ।

"बलेः पुत्रशतञ्जज्ञे बाणज्येष्ठं नराधिप ।
धृतराष्ट्र सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः ॥")

दानवविशेषः । यथा,—

"अभवन् दनुपुत्राणां वंशे ख्याता महासुराः ।
विप्रचित्तिप्रधानास्ते शतं तीव्रपराक्रमाः ॥
स्वर्भानुर्वृषपर्व्वा च कुहूश्च महासुरः ।
धृतराष्ट्र सूर्य्यश्च दनुमानिन्द्रतापनः ॥"

इति वह्निपुराणे काश्यपीयवंशः ॥

ग्रहविशेषस्य पर्य्यायो यथा । सूरः२ अर्य्यमा३ आदित्यः४ द्वादशात्मा५ दिवाकरः६ भास्करः ७ ग्रहस्करः ८ क्लमः ९ प्रभाकरः १० विभाकरः ११ भास्वान्१२ विवस्वान्१३ समाख्य१४ हरिदश्वः १५ उष्णरश्मिः १६ विवर्त्तनः १७ कर्कः१८ मार्त्तण्डः१९ मिहिरः२० अरुणः२१ दर्पा २२ दुःसहिः २३ तरणिः २४ मित्रः२५ सविता२६ दिवाकरः २७ विभावसुः २८ यज्ञपतिः २९ त्रिवेदायतिः ३० ग्रहपतिः ३१ भानुः ३२ खगः ३३ सहस्रांशुः ३४ तपनः ३५ भास्करोऽहे रविः ३६ इत्यमरः ।१।३।२८—३१॥ शरः ३८ अगः ३९ कुम्भः ४० पद्मिनीवल्लभः ४१ हारः ४२ दिनमणिः ४३ चण्डांशुः ४४ सप्तसप्तिः ४५ गभस्तिमान् ४६ अंशुमाली ४७ काश्यपेयः ४८ खगः ४९ भानुमान् ५० लोकलोचनः ५१ पद्मबन्धुः ५२ ज्योतिष्मान् ५३ अव्ययः ५४ तापनः ५५ चित्ररथः ५६ रश्मिमालिः ५७ दिवामणिः ५८ गभस्तिहस्तः५९ वेलिः ६० पतङ्गः ६१ अर्चिः६२ दिनमणीः६३ वेदोदयः ६४ कालकृतः ६५ ग्रहराजः ६६ तमोनुदः ६७ रसाधारः ६८ प्रतिदिवा ६९ ज्योतिःपोथः ७० इनः ७१ । इति शब्दरत्नावली ॥ कर्म्मसाक्षी ७२ जगच्चक्षुः ७३ त्रयीतनुः ७४ प्रद्योतनः ७५ खद्योतः ७६ लोकबान्धवः ७७ पद्मिनीकान्तः ७८ शंशुमत्कः ७९ पद्मपाणिः ८० शिरश्छेदी ८१ पीनः ८२ अदितिसुतः ८३ अमः ८४ हरिदश्वः ८५ अम्बगोपः ८६ धामनिधिः ८७ विभावरिः ८८ गोपतिः ८९ कुम्भारः ९० द्युमणिः ९१ सुतः ९२ तमोपहः९३ गभस्तिः ९४ । इति जटाधरः ॥*॥ अस्य वर्णः रक्तश्याममिश्रितः । स च पूर्व्वदिक्पुरुष-क्षत्रियजाति-सत्त्वगुण-कटुरससिंहराशीनामधिपतिः । धान्यादिसुवर्णद्रव्यचतुष्पदगोभूमिस्वामी । चतुष्कोणाकृतिः । मध्याह्नकाले प्रबलः । हृद्यः । रणचारी । तिक्तरसप्रियश्च । इति बृहज्जातकादयः ॥ * ॥ अस्ययज्ञे तु । वर्त्तुलाकारः । मण्डलमध्यस्थः । अस्य जन्मभूमिः कलिङ्गदेशः । गोत्रः काश्यपः । वर्णः रक्तः । पूर्व्वमुखः । जातिः ब्राह्मणः । बलिर्गुग्गुलूदनम् । धूपो गुग्गुलुः । गन्धो रक्तचन्दनम् । समित् अर्कः । अस्य ध्यानम् ।

"क्षत्रियं काश्यपं रक्तं कालिङ्गं द्वादशाङ्गुलम् ।
पद्महस्तद्वयं पूर्व्वाननं सप्ताश्ववाहनम् ।
शिवाधिदैवतं ध्यायेद्रुक्मिप्रत्यधिदैवतम् ॥"

अस्य मन्त्रः ।

"आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन् ॥" दक्षिणा धेनुः । इति ग्रहयागसंस्कारतत्त्वे ॥*॥ तस्योत्पत्तिरार्य्यया,—

"अथान्तरीक्षादाभाष्य काश्यपं मुनिसत्तमम् ।
सतोयमेघगम्भीरो वागुवाचाशरीरिणी ॥
मारितश्च यतः प्रोक्तमेतदण्डं त्वयादितिम् ।
तस्मात्तवैष सुतस्तेऽयं मार्त्तण्डाख्यो भविष्यति ॥
सूर्य्याधिकारञ्च विभुर्जगत्येष करिष्यति ।
इत्युक्त्वा विरराम्भोदो यज्ञभागहरानलौ ॥
देवा निशम्येति वचो गगनात् समुपागतम् ।
प्रहर्षमतुलं याता दानवाश्च हतौजसः ॥
ततो युद्धाय दैतेयानाजुहाव शतक्रतुः ।
सह देवैर्मुदा युक्तो दानवाश्च तमभ्ययुः ॥
तेषां युद्धमभूद्घोरं देवानामसुरैः सह ।
अस्त्रास्त्रदीप्तिसन्दीप्तसमस्तभुवनान्तरम् ॥
तस्मिन् युद्धे भगवता मार्त्तण्डेन निरोक्षिताः ।
तेजसा दह्यमानास्तु भस्मीभूता महासुराः ॥
ततः प्रहर्षमतुलं प्रापुः सर्व्वे दिवौकसः ।
तुष्टुवुस्तेजसो योनिं मार्त्तण्डमदितिं तथा ॥
स्वाधिकारं ततः प्राप्तयज्ञभागाश्च पूर्व्ववत् ।
भगवानपि मार्त्तण्डः स्वाधिकारमथाकरोत् ॥
कटम्बपुष्पवद्वासानधश्चोर्द्ध्वञ्च रश्मिभिः ।
दृश्योऽग्निविग्रहसदृशो दक्ष नातिस्फुटं वपुः ॥"

इति मार्कण्डेयपुराणे मार्त्तण्डोत्पत्तिः ॥*॥

मार्कण्डेय उवाच ।

"अथ तस्मै ददौ कन्यां संज्ञां नाम विवस्वते ।
प्रसाद्य प्रणतो भूत्वा विश्वकर्म्मा प्रजापतिः ॥
विवस्वतस्तु संभूतौ मनू द्वौ चरितं तयोः ।
पूर्व्वमेव तथाख्यातं मयैतदखिलं द्विज ॥
चौष्यपत्न्यामथो तस्यां जनयामास गोपतिः ।
द्वौ पुत्रौ रामदाक्षौ कन्याञ्च यमुनां नदीम् ॥
मनुर्वैवस्वतो ज्येष्ठः श्राद्धदेवः प्रजापतिः ।
तिस्रो यमौ यमी चैव यमलौ संभभूवतुः ॥
तस्यैकोऽधिकं चैव मार्त्तण्डस्य विवस्वतः ।
अश्वरूपी तु तच्छेत्रं त्वां छायां वीक्ष्य साग्रवीत्

संज्ञोवाच ।

अहं यास्यामि भद्रं ते स्वकञ्च भवनं पितुः ।
निर्विकारं त्वयाप्यत्र स्थेयं मच्छासनात् शुभे ॥
इमौ च बालकौ मह्यं कन्या च वरवर्णिनी ।
संभाव्या नैव चाख्येयमिमं भगवते त्वया ॥

छायोवाच ।

आक्रोशग्रहणाद्देवि शापाच्चैव कथञ्चित् ।
आख्यास्यामि सतं तुभ्यं गम्यतां यत्र वाञ्छितम् ॥
इत्युक्ता छायया संज्ञा जगाम पितृमन्दिरम् ।
तत्रावसत् पितृगृहे कञ्चित् कालं शुभेक्षणा ॥
भर्त्तुः समीपं यास्यामीति पित्रोक्ता सा पुनः पुनः ।
अगच्छद्वडवा भूत्वा कुरून् विप्रोत्तरांस्ततः ॥
तत्र तेपे तपः साध्वी निराहारा महामुने ।
पितुः समीपं यातायाः संज्ञाया वाक्यतत्परा ॥
तद्रूपधारिणी च्छाया भास्करं समुपस्थिता ।
तस्याञ्च भगवान् सूर्य्यः संज्ञे यमिति चिन्तयन् ॥
तथैव जनयामास पुत्रौ द्वौ कन्यकां तथा ।
पूर्व्वजस्य मनोस्तुल्यः सावर्णिस्तेन सोऽभवत् ॥
यस्तयोः प्रथमं जातः पुत्रयोर्द्विजसत्तम ।
द्वितीयो योऽभवच्छान्यः स ग्रहोऽभूत् शनैश्चरः ॥
कन्याभूत्तपती या तां वव्रे संवरणो नृपः ।
संज्ञा तु पार्थिवी तेषामात्मजानां यथाकरोत् ॥
स्नेहं न पूर्व्वं जातानां तथा कृतवती सती ।
मनुस्तत् चक्रवांस्तस्या यमयास्या न चक्रमे ॥
बभूवुः पौड्यमानास्तु पितुः पक्षा सुदुःखितः ।
स वै कोपाच्च बाल्याच्च भाविनोऽर्थस्य वै बलात् ।
पदा संतर्जयामास च्छायां संज्ञासुतौ यमः ।
तं शशाप ततः क्रुद्धा संज्ञा सा पार्थिवी शुभम् ॥

छायोवाच ।

यदा तर्जयसे यस्मात् पितृभार्य्यां गरीयसीम् ।
तस्मात्तवैष चरणः पतिष्यति न संशयः ॥
यमस्तु तेन शापेन भृशं पीड़ितमानसः ।
मनुना सह धर्म्मात्मा सर्व्वं पित्रे न्यवेदयत् ॥

यम उवाच ।

सर्व्वेषु तुल्यमस्मासु माता देव न वर्त्तते ।
विसृज्य न्याय्यसोऽप्यस्मान् कनीयांसो बुभूषति ।
तस्मा मयोद्यतः पादो न तु देहे निपातितः ।
बाल्यादा यदि वा मोहात् तद्वान् क्षन्तुमर्हसि ।
शशोऽहं तात कोपेन जनन्या तनयो यतः ।
ततो न मन्ये जननी ममैषा तपतां वर ॥
निर्गुणेष्वपि पुत्रेषु न माता निर्गुणा भवेत् ।
पादस्ते पततां पुत्र कथमेतत्तयोदितम् ॥
तव प्रसादाधरणी न पतेत् भगवन् यथा ।

माद्यमापादयं मेऽद्य तथा चिन्तय गोपते ॥
रविरुवाच ।
असंशयमिदं पुत्र भविष्यत्यत्र कारणम् ।
येन त्वामाविशत् क्रोधो धर्म्मज्ञं सत्यवादिनम् ॥
सर्व्वेषामेव शापानां प्रतिघातो हि विद्यते ।
न तु मद्वाभिशप्तानां क्वचिच्छापनिवर्त्तनम् ॥
न शक्यमेतन्मिथ्या तु कर्त्तुं मातुर्व्वचस्तव ।
किं चित्ते संविधास्यामि पुत्रस्नेहादनुग्रहम् ।
कृमयो मांसमादाय प्रयास्यन्ति महीतलम् ।
कृतं तस्या वचः सत्यं त्वच्च माता भविष्यसि ॥
मार्कण्डेय उवाच ।
आदित्यस्त्वब्रवीच्छायां किमर्थं तनयेषु वै ।
तुल्येष्वप्यधिकस्नेह एकत्र क्रियते त्वया ॥
ननं न चैषां जननी संज्ञा क्वापि त्वमागता ।
विगुणेष्वप्यपत्येषु माता शापं न दास्यति ॥
सा तत् परिहरन्तीव नाचचक्षे विवस्वतः ।
स चात्मानं समाधाय युक्तस्तत्त्वमवैक्षत ॥
तं शशुमुद्यतं दृष्ट्वा छायासंज्ञा दिनाधिपम् ।
भयेन कम्पिता ब्रह्मन् यथावृत्तं न्यवेदयत् ॥
विवस्वांस्तु तदा क्रुद्धः श्रुत्वा श्वशुरमभ्यगात् ।
स चापि तं यथान्यायमर्च्चयित्वा दिवाकरम् ।
निर्द्दग्धुकामं रोषेण शान्तयामास सुव्रतः ॥
विश्वकर्म्मा उवाच ।
तवातितेजसा व्याप्तमिदं रूपं सुदुःसहम् ।
असहन्तो ततः संज्ञा वने चरति वै तपः ॥
दृश्यते तां भवानद्य स्वां भार्य्यां शुभचारिणीम् ।
रूपार्थं भवतोरश्वी चरन्तीं सुमहत्तपः ॥
मतं मे ब्रह्मणो वाक्यात् यदि वै देव पृच्छसे ।
रूपं निधत्तेत्यस्यैव तव काले दिवाकर ॥
मार्कण्डेय उवाच ।
यतो हि भास्वतो रूपं प्रागासीत् परि-
मण्डलम् ।
ततस्त्वेति तं प्राह त्वष्टारं भगवान् रविः ॥
विश्वकर्म्मा त्वनुज्ञातः शाकद्वीपे विवस्वतः ।
भ्रमिमारोप्य तत्तेजः शातनायोपचक्रमे ॥
देवाश्च ब्रह्मणा सार्द्धं भास्वन्तमभितुष्टुवुः ।
लिख्यमानं सहस्राग्रं प्रेक्षुः सर्व्वदेवताः ॥
ततः कोलाहले तस्मिन् सर्व्वदेवसमागमे ।
तेजसः शातनं चक्रे विश्वकर्म्मा शनैः शनैः ॥"
इति मार्कण्डेयपुराणे सूर्य्यतेजःशातनम् ॥*॥
"शातितं चास्य यत्तेजस्तेन चक्रं विनिर्म्मितम्
विष्णोः शूलञ्च सर्व्वस्य शिविका धनदस्य च ॥
दक्षः प्रेतपतेः शक्तिर्दैवसेनापतेस्तथा ।
अन्येषाञ्चैव देवानामायुधानि स विश्वकृत् ।
चकार तेजसा भानोर्भासुराण्यरिशान्तये ॥
इति शातिततेजाः स शशुरेणातिशोभनम् ।
वपुर्दधार मार्त्तण्डः पुष्पचापसमोरमम् ॥
न ददर्श समाधिस्थां स्वां भार्य्यां बड़वाकृतिम्
अपापां सर्व्वभूतानां तपसा नियमेन च ॥
ततो जगाम भास्वान् वै संज्ञा यत्र व्यवस्थिता ॥
सा च दृष्ट्वा तमायान्तं परपुंसो विशङ्कया ।
जगाम संमुखं तस्य त्वरयोत्पतितत्वरा ॥
ततश्च नासिकायोगात् तयोस्तत्र समेतयोः ।
नासत्यदस्रौ तनयावश्ववक्त्रादिनिर्गतौ ॥
रैवतस्त्वेष च रेवन्तः खड्गी धन्वी तनुत्रधृक् ।
अश्वारूढः समुत्पन्नो बाणतूणसमन्वितः ॥
ततः स्वरूपमतुलं दर्शयामास भानुमान् ।
तस्याश्च सा समालोक्य स्वरूपं मुदमाददौ ॥
स्वरूपधारिणीं चैनामानिनाय निजालयम् ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥
ततः पूर्व्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः ।
द्वितीयश्च यमः शापात् पाददर्शनतत्परः ॥
कृमयो मांसमादाय पादतस्ते महीतलम् ।
पतिष्यन्तीति शापान्तं तस्य चक्रे पिता स्वयम्
धर्म्मदृष्टियतश्चासौ समो मित्रे तथाहिते ।
ततो नियोगे तं यम्ये चकारतिमिरापहः ॥
यमुनाञ्च नदीञ्चक्रे कलिन्दान्तरवाहिनीम् ।
अश्विनौ देवभिषजौ कृतौ पित्रा महात्मना ॥
गुह्यकाधिपतित्वे च रेवन्तो विनियोजितः ॥
रैवन्तमप्याह ततो भगवान् लोकभावनः ।
त्वमप्यश्वेषलोकस्य पूज्यो वत्स भविष्यसि ॥
अरण्योरग्नौ महादावे वैरिदस्युभयेषु च ।
त्वां स्मरिष्यन्ति ये मर्त्या मोक्ष्यन्ते ते महाभयात् ॥
क्षेमं दृष्टिं सुखं राज्यमारोग्यं कीर्त्तिमुन्नतिम् ।
नराणां परितुष्टस्त्वं पूजितः संप्रदास्यसि ॥
छायासंज्ञासुतश्चापि सावर्णः सुमहायशाः ।
भाव्यः सोऽनागते काले मनुः सावर्णिकोऽष्टमः ॥
मेरुपृष्ठे तपो घोरमद्यापि चरति प्रभुः ।
भ्राता शनैश्चरस्तस्य यद्वोऽभूच्छासनाद्ववः ॥
यमीयसी च या कन्या तस्य चासीद्विशोत्तम ।
अभवत् सा सरिच्छ्रेष्ठा तपसी लोकपावनी ॥
यस्तु ज्येष्ठो महाभाग सर्गो तस्येह सम्प्रतम् ।
विस्तरं तस्य वक्ष्यामि मनोर्वैवस्वतस्य च ॥
य इदं जन्म देवानां शृणुयाद्वा पठेत्तथा ।
विवस्वतस्तु जातानां रवेर्माहात्म्यमेव च ।
आपदं प्राप्य मुच्येत प्राप्नुयाच्च महद्यशः ॥
अहोरात्रकृतं पापमेतत् शमयति श्रुतम् ।
माहात्म्यमादित्यस्य मार्त्तण्डस्य महात्मनः ॥"
इति मार्कण्डेयपुराणे भास्करमाहात्म्यनामाध्यायः ॥ अपि च ।
प्रजापाल उवाच ।
"शरीरस्य कथं मूर्त्तिर्ग्रहाणां ज्योतिषां द्विज ।
एतन्मे संशयं छिन्धि प्रणतस्य द्विजोत्तम ॥
महातपा उवाच ।
योऽसावात्मा ज्ञानशक्तिरेक एव सनातनः ।
स द्वितीयं यदा चैच्छत् तदा तेजः समुत्थितम् ॥
तत् सूर्य्य इति भास्वांस्तु अन्योन्येन महात्मनः ।
लोलीभूतानि तेजांसि भासयन्ति जगत्त्रयम् ॥
तस्मिन् सर्व्वे सुराः सिद्धा गणाः सर्व्वे महर्षिभिः ।
स्तुतयं भूत इति विभो तस्मात् सूर्य्यस्तु सोऽभवत्
लोलीभूतस्य तस्याथ तेजसोऽभूच्छरीरकम् ।
पृथक्त्वेन रविः सोऽथ कीर्त्यते वेदवादिभिः ॥
भासयन् सर्व्वलोकांस्तु यतोऽसावुत्थितो दिवि ।
अतोऽसौ भास्करः प्रोक्तः प्राकर्षाच्च प्रभाकरः ।
दिवा दिवस इत्युक्तस्तत्कारित्वाद्दिवाकरः ।
सर्व्वस्य जगतस्त्वादिरादित्यस्तेन उच्यते ॥
एतस्य द्वादशादित्याः संभूतास्तेजसः पृथक् ।
प्रधान एक एवायं जगत्सु परिवर्त्तते ॥
तं दृष्ट्वा जगतो व्याप्तिं कुर्व्वाणं परमेश्वरम् ।
तस्थिवान्सःस्थिता देवा विनिष्क्रम्य स्तुतिं जगुः ॥"
इति वाराहे आदित्योत्पत्तिनामाध्यायः ॥*॥
उत्तरायणदक्षिणायनयोरनुलोमप्रतिलोमं गन्तव्यानि मण्डलानि प्रतिमासं सूर्य्यभ्रमणाधिकारिणश्च यथा,—
"अशीतिमण्डलशतं काष्ठयोरन्तरं द्वयोः ।
आरोहणावरोहाभ्यां भानोरन्तेन या गतिः ॥
स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीभिर्महात्मभिः ॥
धाता कृतस्थली चैव पुलस्त्यो वासुकिस्तथा ।
रथकृत्ग्रामणीश्चैतिस्मुरुर्य्यश्च मन्मथः ॥
एते वसन्ति वै चैत्रे मधुमासे सदैव हि ।
मैत्रेय स्यन्दने भानोः सप्त मासाधिकारिणः ॥
अर्य्यमा पुलहश्चैव रथौजाः पुञ्जिकस्थली ।
प्रहेतिः कच्छनीरश्च नारदश्च रथे रवेः ।
माधवे निवसन्त्येते शुचिमासे निबोध मे ॥
मित्रोऽत्रिस्तत्तको रक्षः पौरुषेयोऽथ मेनका ।
हाहा रथस्वनश्चैव मैत्रेयैते वसन्ति वै ॥
वशिष्ठो वरुणो रम्भा सहजन्यो हुहूर्वधूः ।
रथचित्रस्तथा शुक्रे वसन्त्याषाढमासिते ॥
इन्द्रो विश्वावसुः सोत एलापत्रस्तथाङ्गिराः ॥
प्रम्लोचा च नभस्येते सर्पयार्के वसन्ति हि ॥
विवस्वानुग्रसेनश्च भृगुरायुरणस्तथा ।
प्रम्लोचा गह्वपालश्च व्याघ्रो भाद्रपदे तथा ॥
पूषा च सुरविध्वंसो गौतमोऽथ धनञ्जयः ।
सुषेणोन्नो घृताची च वसन्त्याश्वयुजे रवौ ॥
विश्वाचसुर्भरद्वाजः पर्जन्यो रावणो तथा ।
विश्वाचीसेनजित्संज्ञौ कार्त्तिके चाधिकारिणः ॥
अंशुकश्चपतश्चान्तु महापद्मस्तथोर्व्वशी ।
चित्रसेनस्तथा विद्युत् मार्गशीर्षाधिकारिणः ॥
ऋतुर्भगस्तथौर्णायुस्कर्कोटकस्तथा ।
अरिष्टनेमिर्यज्ञाश्च पूर्व्वचित्तिर्व्वराप्सराः ।
पौषमासे वसन्त्येते सप्त भास्करमण्डले ॥
लोकप्रकाशनार्थाय विप्रवर्य्याधिकारिणः ।
त्वष्टा च जमदग्निश्च कश्यपोऽथ तिलोत्तमा ॥
ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रश्च सप्तमः ।
माघमासे वसन्त्येते सप्त मैत्रेय भास्करे ॥
श्रूयतां चापरे सूर्य्ये फाल्गुने निवसन्ति ये ।
विष्णुरत्नतरो रम्भा सूर्य्यवर्च्चाश्च सत्यजित् ॥
विश्वामित्रस्तथा रक्षो यज्ञापेतो महामुने ।
मासेष्वेतेषु मैत्रेय वसन्त्येतेषु सप्तकाः ॥
सवितुर्मण्डले ब्रह्मन् विष्णुशक्त्युपबृंहिताः ।
स्तुवन्ति मुनयः सूर्य्यं गन्धर्व्वैर्गीयते पुरः ॥
नृत्तन्त्यप्सरसो यान्ति सूर्य्यस्यानु निशाचराः ॥
वहन्ति पन्नगा यत्नः क्रियतेऽभीषु संयतः ॥
बालखिल्यास्तथैवैनं परिवार्य्य समासते ।

सोऽयं सप्तगणः सूर्य्यमण्डले मुनिसत्तम ।
हिमोष्णवारिदृष्टीनां हेतुत्वं समुपागतः ॥"
इति विष्णुपुराणे २ अंशे १० अध्यायः ॥*॥

सूत उवाच ।

"एवमेष महादेवो देवदेवः पितामहः ।
करोति नियतं कालं कालात्मा ह्यीश्वरो तनुः॥
तस्य ये रश्मयो विप्राः सर्व्वलोकप्रदीपकाः ।
तेषां श्रेष्ठाः पुनः सप्त रश्मयो ग्रहयोनयः ॥
सुसुम्नो हरिकेशश्च विश्वकर्म्मा तथैव च ।
विश्वव्यचाः पुनश्चान्यः सम्पदसुरतः परः ।
अर्वाग्वसुरिति ख्यातः स्वराड्न्यः प्रकीर्त्तितः॥
सुसुम्नः सूर्य्यरश्मिस्तु पुष्णाति शिशिरद्युतिम् ।
तिर्य्यग्गूर्द्ध प्रचारोऽसौ सुसुम्नः परिगीयते ॥
हरिकेशस्तु यः प्रोक्तो रश्मिर्नक्षत्रपोषकः ।
विश्वकर्म्मा तथा रश्मिर्बुधं पुष्णाति सर्व्वदा ॥
विश्वव्यचास्तु यो रश्मिः शुक्रं पुष्णाति नित्यदा
सम्पदसुरिति ख्यातः स पुष्णाति च लोहितम्॥
बृहस्पतिं प्रपुष्णाति रश्मिरर्व्वाग्वसुः प्रभोः ।
अनैश्चरं प्रपुष्णाति सप्तमश्च स्वराट् तथा ॥
एवं सूर्य्यप्रभावेण सर्व्वा नक्षत्रतारकाः ।
वर्द्धन्ते वर्द्धिता नित्यं नित्यमप्याययन्ति च ॥
दिव्यानां पार्थिवानाञ्च नैयानाञ्चैव सर्व्वशः ।
आदानाच्चित्यमादित्यस्तेजसा तमसां प्रभुः ।
आदत्ते स तु नाड़ीनां सहस्रेण समन्ततः ॥
नादेयांश्चैव सामुद्रान् कूपांश्चैव सहस्रशः ।
स्थावरान् जङ्गमांश्चैव यच्च कुत्स्नादिकं पयः ॥
तस्य रश्मिसहस्रन्तु शीतवर्षाणिनिस्वरम् ।
तासां चतुःशतं नाद्यो वर्षन्ते चित्रमूर्त्तयः ॥
छन्दनार्थं च याज्ञाय कोतना हेकनास्तथा ।
अमृता नाम ताः सर्व्वा रश्मयो हृष्टिसर्ज्जनाः॥
हिमोदहाय तासान्तु रश्मयस्त्रिशतं पुनः ।
रश्मयो मेघजा येऽथ ह्लादिन्यो हिमसर्ज्जनाः॥
चन्द्रास्ता नामतः सर्व्वाः पीताभाः स्वर्गभस्तयः ।
शुक्राय कक्षुभश्चैव गावो विश्वभृतस्तथा ॥
शुक्रास्ता नामतः सर्व्वास्त्रिविधा धर्म्मसर्ज्जनाः ।
समं बिभर्त्ति ताभिः स मनुष्यपितृदेवताः ॥
मनुष्यानौषधेनेह स्वधया च पितॄनपि ।
अमृतेन सुरान् सर्व्वान् तिसृभिस्तर्पयत्यसौ ॥
वसन्ते ग्रैष्मिके चैव शतं सन्तपति त्रिभिः ।
शरद्यपि च वर्षासु चतुर्भिः सम्प्रवर्षति ।
हैमन्ते शिशिरे चैव हिममुत्सृजति त्रिभिः ॥
वहणो माधवमासे तु सूर्य्यः पूषा तु फाल्गुने ।
चैत्रे मासि भवेदीशो पाता वैशाखतापनः ॥
ज्येष्ठमूले भवेदिन्द्र आषाढे सविता रविः ।
विवस्वान् श्रावणे मासि प्रोष्ठपद्यां भगः स्मृतः॥
पर्य्यन्योऽश्वयुजि त्वष्टा कार्त्तिके मासि भास्करः
मार्गशीर्षे भवेन्मित्रः पौषे विष्णुः सनातनः ॥
पञ्चरश्मिसहस्राणि वरुणस्यार्ककर्म्मणि ।
षड्भिः सहस्रैः पूषा तु देवोऽंशसप्तभिस्तथा॥
धाताष्टभिः सहस्रैस्तु नवभिस्तु शतक्रतुः ।
विवस्वान् दशभिः पाति पात्वेकादशभिर्भगः ॥
सप्तभिस्तपते मित्रस्त्वष्टा चैवाष्टभिस्तपेत् ।
पर्य्यन्यो दशभिः पाति पर्य्यन्यो नवभिस्तपेत् ।
षड्भी रश्मिसहस्रैस्तु मित्रस्तपति विश्रुधक्॥
वसन्ते कपिलः सूर्य्यो ग्रीष्मे काञ्चनसप्रभः ।
श्वेतो वर्षासु वर्णेन पाण्डरः शरदि प्रभुः ॥
हैमन्ते ताम्रवर्णः स्यात् शिशिरे लोहितो रविः
ओषधीषु बलं धत्ते स्वधामपि पितृष्वथ ॥
सूर्य्योऽमरत्वममृतत्वयं त्रिषु नियच्छति ।
अन्ये चाष्टौ ग्रहा ज्ञेयाः सूर्य्ये चाधिष्ठिता द्विजाः ॥
चन्द्रमाः सोमपुत्रश्च शुक्रश्चैव बृहस्पतिः ।
भौमो भानुसुतो राहुः केतुमानपि चाष्टमः ॥
सर्व्वे ध्रुवे विरुद्धा यैर्ग्रहास्ते वातरश्मिभिः ।
भ्राम्यमाणा यथायोगं भ्रमन्त्यनु दिवाकरम् ॥
अलातचक्रवद्यान्ति वातचक्रेरिता द्विजाः ।
यस्माद्वहति तान् वायुः प्रवहस्तेन वै स्मृतः ।*
रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः ।
वामदक्षिणतो युक्ता दश तेन निशाकरः ॥
वीथ्याश्चयाणि चरति नक्षत्राणि रवियथा ।
क्रमशश्च विप्रेन्द्रा ध्रुवाधाराणि सर्व्वदा ॥
स सोमः शुक्लपक्षे तु भास्करे परतस्थिते ।
आपूर्य्यन्ते परोऽप्यन्तः सततं दिवसक्रमात् ॥
क्षीणोऽपि तं सुरैः सोममाप्याययति नित्यदा ।
एकेन रश्मिना विप्राः सुसुम्नाख्येन भास्करः ॥
एषा सूर्य्यस्य वीर्य्येण सोमस्याप्यायिता तनुः ।
पौर्णमास्यां स दृश्येत संपूर्णो दिवसक्रमात् ॥
संपूर्णमण्डलं सोमं तं सोमसमृतात्मकम् ।
पिबन्ति देवता विप्रा यतस्तेऽमृतभोजनाः ॥
ततः पञ्चदशे भागे किञ्चिच्छिष्टे कलात्मके ।
अपराह्णे पितॄणां स जघन्यां पर्य्युपासते ॥
पिबन्ति हि फलं कालं शिष्टा तस्य कला तु या ।
स्वधामृतमयीं पुण्यां तामिन्दोरमृतात्मिकाम्॥
निःसृतं तदमावास्यां गर्भस्थेभ्यः स्वधामृतम् ।
मासद्वन्द्वमवाप्यान्नं पितरः सन्ति निर्वृताः ॥
न सोमस्य विनाशः स्यात् सुधा देवैस्तु पीयते ।
एवं सूर्य्यनिमित्तोऽस्य क्षयो वृद्धिश्च सत्तमाः ॥"

इति कौर्म्मे ४० अध्यायः ॥*॥

अस्य भार्य्यापत्यानि यथा ।

सूत उवाच ।

"अदितिः सुषुवे पुत्रमादित्यं कश्यपात् प्रभुम्।
तस्यादित्यस्य चैवासीद्भार्य्याणान्तु चतुष्टयम् ॥
संज्ञा राज्ञी प्रभा च्छाया पुत्रांस्तासां निबोधत
संज्ञा त्वाष्ट्री तु सुषुवे सूर्य्यान्मनुमनुत्तमम् ।
यमञ्च यमुनाञ्चैव राज्ञी रेवन्तमेव च ॥
प्रभा प्रभातमादित्याच्छाया सावर्णिमात्मजम्
शनिञ्चैव तपतीञ्च विष्टिञ्चैव यथाक्रमम् ॥"

इति कौर्म्मे २० अध्यायः ॥*॥

तस्य मण्डलपरिमाणं यथा,—

सूत उवाच ।

"सूर्य्याचन्द्रमसावेतौ भ्रमतो यावदेव तु ।
समानाञ्च समुद्राणां द्वीपानाञ्चाति विस्तरः ॥
विस्तारार्द्धं पृथिव्यास्तु भवेदत्यन्त वाङ्मतः ।
पर्य्यासपरिमाणात्तु चन्द्रादित्यौ प्रकाशतः ॥
पर्य्यासपरिमाणेस्तु बुधैस्तुल्यं दिनं स्मृतम् ।
अवतीमांस्त्रयो लोकान् यस्मात् सूर्य्यः परिभ्रमात् ॥
अचिरात्तु प्रकाशे तु भवनात् स रविः स्मृतः॥
तयोर्भूयः प्रवक्ष्यामि प्रमाणं चन्द्रसूर्य्ययोः ॥
महित्वान्महीशब्दो यस्मिन्नर्थे निपात्यते ।
अस्य भारतवर्षस्य विष्कम्भात्तुल्यविस्तृतम् ॥
मण्डलं भास्करस्याथ योजनैस्त्रिशतं शृणु ।
नवयोजनसाहस्रो विस्तारो मण्डलस्य तु ॥
विस्तारात्त्रिगुणस्यापि परिणाहोऽत्र मण्डले ।
विष्कम्भमण्डलाच्चैव भास्करात् द्विगुणः शशी॥"

तस्य गतिनिरूपणं यथा,—

"मानसस्योत्तरे पृष्ठे लोकपालाश्चतुर्दिशम् ।
स्थिता धर्म्मव्यवस्थार्थं लोकसंरक्षणाय च ॥
लोकपालोपरिष्टात्तु सर्व्वतो दक्षिणायने ।
काष्ठागतस्य सूर्य्यस्य गतिन्तस्य निबोधत ॥
दक्षिणोपक्रमः सूर्य्यः क्षिप्तेषुरिव सर्पति ।
ज्योतिषां चक्रमादाय सततं परिगच्छति ॥
मध्यतोमरावत्यां यदा भवति भास्करः ।
वैवस्वते संयमने ऊर्द्धं तत्र प्रदृश्यते ॥
सुखायामर्द्धरात्रन्तु विभावर्य्यस्तमेति च ।
वैवस्वते संयमने मध्याह्ने तु रविर्यदा ॥
सुखायामथ वारुण्यामुत्तिष्ठन् स तु दृश्यते ।
विभावर्य्यामर्द्धरात्रं माहेन्द्र्यामस्तमेति च ।
सुखायामथ वारुण्यां मध्याह्ने चार्य्यमा यदा
विभावर्य्यां सोमपुर्य्यां उत्तिष्ठति विभावसुः ॥
रात्र्यर्द्धं चामरावत्यामस्तमेति यमस्य च ।
सोमपुर्य्यां विभावर्य्यां मध्याह्ने चार्य्यमा यदा ॥
अमरावत्यां महेन्द्रस्य तद्गच्छति दिवाकरः ।
अर्द्धरात्रं संयमने वारुण्यामस्तमेति च ॥
सुशीघ्रमेव पर्य्येति भास्करोऽलातचक्रवत् ।
भ्रमन् वै भ्रममाणानि ऋक्षाणि चरते रविः ॥
एवं चतुर्षु पार्श्वेषु दक्षिणान्तेषु सर्पति ।
उदयास्तमये चासावुत्तिष्ठति पुनः पुनः ॥
पूर्व्वाह्णे चापराह्णे तु द्वौ द्वौ देवालयौ तु सः ।
तपत्येकश्च मध्याह्ने ताभिरेव च रश्मिभिः ॥
उदितो वर्द्धमानाभिर्मध्याह्ने तपते रविः ।
अतः परं ह्रसन्तीभिर्गीभिरस्तञ्चियच्छति ॥
उदयास्तमयाभ्याञ्च स्मृते पूर्व्वापरे तु वै ।
यावत् पुरस्तात्तपति तावत् पृष्ठे ऽथ पार्श्वयोः॥
यैरर्को यत्र दृश्येत तेषां स उदयः स्मृतः ।
प्रणाशं गच्छते यत्र तेषामस्तः स उच्यते ॥
सर्व्वेषामुत्तरे मेरुर्लोकालोकश्च दक्षिणे ।
विदूरभावादर्कस्य भूमेर्लेखागतस्य च ॥
म्रियन्ते रश्मयो यस्मात्तेन रात्रौ न दृश्यते ।
ऊर्द्धं शतसहस्रन्तु स्थितस्तत्र प्रदृश्यते ॥
एवं पुष्करमध्येन यदा भवति भास्करः ।
त्रिंशद्भागन्तु मेदिन्या मुहूर्त्तेन स गच्छति ॥
योजनाद्यां मुहूर्त्तस्य इमां संख्यां निबोधत ।
पूर्णे शतसहस्राणामेकत्रिंशत्तु ताः स्मृताः ॥
पञ्चाशच्च सहस्राणि तथान्यान्यधिकानि च ।
मौहूर्त्तिकी गतिर्ह्येषा सूर्य्यस्य तु विधीयते ॥

एतेन गतियोगेन यदा काष्ठान्तु दक्षिणाम् ।
पर्य्यागच्छत् पतङ्गोऽसौ वामकोष्ठेऽत्तरेऽहनि ॥
मध्येन पुष्करस्याथ भ्रमते दक्षिणायने ।
मानसोत्तरमेरोस्तु अन्तरं त्रिगुणन्तु तत् ॥*॥
सर्पतो दक्षिणायान्तु काष्ठायान्तु निबोधत ।
नवकोट्यः प्रसंख्याता योजनैः परिमण्डलम् ॥
तथा शतसहस्राणि चत्वारिंशच्च पञ्च च ।
अहोरात्रा पतङ्गस्य गतिरेषा विधीयते ॥
दक्षिणाद्दिनिवृत्तोऽसौ विषुवस्थो यदा रविः ।
क्षीरोदस्य समुद्रस्य उत्तरातो दिशञ्चरन् ।
मण्डलं विषुवस्थापि योजनैस्तन्निबोधत ॥
तिस्रः कोट्यस्तु संपूर्णं विषुवस्थाथ मण्डलम् ।
तथा शतसहस्राणां विंशत्येकाधिका पुनः ॥*॥
श्रावणे चोत्तरां काष्ठां चित्रभानुर्यदा भवेत् ।
गोमेदकस्य द्वीपस्य उत्तरास्तु दिशञ्चरन् ॥
उत्तरायाः प्रमाणन्तु काष्ठाया मण्डलस्य तु ।
दक्षिणोत्तरमध्यानि तानि विद्याद् यथाक्रमम्॥
स्थानं जरद्गवं मध्ये तथैरावतमुत्तमम् ।
वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ॥
नागवीथ्युत्तरा वीथी अजवीथ्याश्च दक्षिणे ।
उभे आषाढ़मूलन्तु अजवीथ्युदयास्रयः ॥
अभिजित् पूर्व्वतः स्थातो नागवीथ्युत्तरास्रयः।
अश्विनी क्षत्तिका याम्या नागवीथ्युत्तरा स्मृता॥
रोहिण्यार्द्रा मृगशिरो नागवीथीरिति स्मृता ।
पुष्याश्लेषा पुनर्व्वस्वोर्वीथीरैरावतो स्मृता ॥
तिसस्तु वीथयो ह्येता उत्तरो मार्ग उच्यते ।
पूर्व्वा उत्तरफल्गुन्योर्मघा चैवार्यमा भवेत् ॥
पूर्व्वोत्तरे प्रोष्ठपदे गोवीथी रेवती स्मृता ।
श्रवणा तु धनिष्ठा च वारुणश्च जरद्गवम् ।
एताश्च वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥
हस्ता चित्रा तथा स्वाती नागवीथीरिति
स्मृता ।
विशाखमित्रदैवत्य नागवीथीरिहोच्यते ॥
मूलपूर्व्वोत्तराषाढ़ा वियोर्व्वह्नानरौ तथा ।
स्मृतास्तिस्रस्तु वीथ्यस्ता मार्गे वै दक्षिणे बुधैः॥
काष्ठयोरन्तरं त्वेता वक्ष्यन्ते योजनैः पुनः ।
एतच्छतसहस्राणामेकत्रिंशत्तु वै स्मृतम् ॥
शतानि त्रीणि चान्यानि त्रयस्त्रिंशच्च योजनैः
काष्ठयोरन्तरं ह्येवं योजनाग्रात् प्रकीर्त्तितम्॥
काष्ठयोर्लेखयोश्चैव अयने दक्षिणोत्तरे ।
ते वक्ष्यामि प्रसंख्याय योजनैस्तु निबोधत ॥
एकैकमन्तरन्तत्र युक्तान्येतानि सप्ततिः ।
सहस्रे रतिरिक्ता च ततोऽन्या पञ्चविंशतिः ॥
लेखयोः काष्ठयोश्चैव बाह्याभ्यन्तरयोश्चरन् ।
अभ्यन्तरं स पर्य्येति मण्डलान्युत्तरायणम् ॥
बाह्यतो दक्षिणेनैव सततं सूर्य्यमण्डलम् ।
चरत्यसौ प्रतीच्यान्तु व्रयोत्रिंशमण्डलं शतम् ॥
तरणिर्दक्षिणे तावत् क्रमते मण्डलानि तु ।
प्रमाणं मण्डलस्यापि योजनाग्रान्निबोधत ॥
योजनानां सहस्राणि दश चाष्टौ ततः स्मृतः ।
अधिकान्यष्टपञ्चाशत् योजनानि च वै पुनः ॥
विष्कम्भो मण्डलस्यैतत्तिर्य्यक् स तु विधीयते ।
अहस्तु चरते नाभिं सूर्य्यो वै मण्डलक्रमात् ॥
कुलालचक्रपर्य्यन्तं यथा रविः ग्रहो तथा ।
दक्षिणे चक्रवत् सूर्य्यस्तथा शीघ्रं निवर्त्तते ॥
तस्मात् प्रकृष्टां भूमिन्तु कालेनाल्पेन गच्छति।
सूर्य्यो द्वादशभिः शीघ्रं मुहूर्त्तैर्दक्षिणायने ॥
त्रयोदशार्द्धसूत्राणां मध्ये चान्तरमण्डलम् ।
मुहूर्त्तैस्तानि ऋक्षाणि नक्षत्राष्टादशैश्चरन् ॥
कुलालचक्रमध्यस्थो यथामन्दं प्रसर्पति ।
उदगयने तथा सूर्य्यः स सर्पेत् मन्दविक्रमः ॥
तस्मात् दीर्घेण कालेन भूमिं सोऽल्पां प्रसर्पति
सूर्य्योऽष्टादशभिर्वृद्धो मुहूर्त्तैरुदगायने ॥
त्रयोदशानां मध्ये तु ऋक्षाणां चरते रविः ।
मुहूर्त्तैस्तानि ऋक्षाणि रात्रौ द्वादशभिश्चिरम्॥
ततो मन्दतरं ताभ्यां चक्रन्तु भ्रमतां पुनः ।
मृत्पिण्ड इव मध्यस्थो भ्रमतेऽसौ ध्रुवस्तथा ।
मुहूर्त्तैस्तावत् चिंशद्भिरहोरात्रं ध्रुवं भ्रमन् ।
उभयोः काष्ठयोर्म्मध्ये भ्रमते मण्डलानि तु ॥
उत्तरे प्रक्रमेऽर्कस्य दिवा मन्दगतिः स्मृता ।
तस्यैव तु पुनर्नक्तं शीघ्रा सूर्य्यस्य वै गतिः ॥
दक्षिणे क्रमणे चापि दिवा शीघ्रं विधीयते ।
गतिः सूर्य्यस्य वै नक्तं मन्दा चापि पुनः स्मृता॥
एवं गतिविशेषेण विभजेद्व्रात्रहानि तु ।
अजवीथ्या दक्षिणं यत्नोकालोकस्य चोत्तरम् ॥
लोकसन्तानको ह्येष वैश्वानरपथाद्दिशः ।
व्युष्टा यावत् प्रभा सौरी पुष्करात् संप्रकाशते।
पार्श्वेभ्यो बाह्यतस्तावत् लोकालोकस्तु पर्व्वतः ॥
योजनानां सहस्राणि दशोर्द्धं चोच्छ्रितो गिरिः।
प्रकाश्याप्रकाश्यश्च सर्व्वतः परिमण्डलः ॥
नक्षत्रचन्द्रसूर्य्याश्च ग्रहास्तारागणैः सह ।
अभ्यन्तरे प्रकाश्यन्ते लोकालोकस्य वै गिरेः ॥

इति मात्स्ये १०१ अध्यायः ॥

अस्य राहुग्रस्तादिकारणं यथा,—

नन्द उवाच ।

"राहुग्रस्तः कथं सूर्य्यश्चन्द्रो वापि जगत्प्रभो ।
नष्टचन्द्रः कथं भाद्रे चतुर्थ्यान्च सितासिते ।
वेदानां जनकस्त्वञ्च कं पृच्छामि त्वया विना ॥

श्रीभगवान् उवाच ।

शृणु नन्द प्रवक्ष्यामि कथामेतां पुरातनीम् ।
यां श्रुत्वा निष्कलङ्कश्च तौर्य्यत्रायी भवेन्नरः ॥
एकदा यमदग्निश्च महाकौतूहलान्वितः ।
रेणुकासहितस्तुष्टो जगाम नर्म्मदातटम् ।
निर्ज्जने नर्म्मदातीरे विजहार तया सह ॥
चन्द्रनोचितसर्व्वाङ्गं वल्कलाम्बरधरं मुनिम् ।
महाराजसराज्ञं तमुवाच भास्करः स्वयम् ॥
वेदकर्त्तुः प्रपौत्रस्त्वं ब्रह्मणश्च जगत्पतेः ।
चतुर्व्वेदविधेयेषु मुनिख्यातः सदा शुचिः ॥
वेदप्रथितो धर्म्मो ह्यधर्म्मस्तद्विपर्य्ययः ।
धर्म्मं त्यजति धर्म्मज्ञो अधर्म्मेण रतः कथम् ॥
दिवामैथुनदोषञ्च वक्ति वेदो विशेषतः ।
अहञ्च कर्म्मणां साक्षी तेन त्वां कथयामि ते ॥
सूर्य्यस्य वचनं श्रुत्वा तत्याज मैथुनं द्विजः ।
दृष्ट्वा पुनो विप्ररूपं सूर्य्यं तेजस्विनं सुरम् ।
उवाच सूर्य्यं रक्ताक्षः कोपलज्जासमन्वितः ॥
रेणुका लज्जिता तत्र विधाय वाससी सती ॥

यमदग्निरुवाच ।

अद्य मे निर्ज्जनस्थाने रसभङ्गस्त्वया कृतः ।
मम शापात् पापदृष्टो राहुग्रस्तो भविष्यति ॥
द्रष्टुं त्वां मेघगणाः सर्व्वे दूरीभूता भवन्ति ते ।
त्वामाच्छन्नं करिष्यन्ति वायुना प्रेरितास्तथा॥
स्वतेजसा भवान् गर्व्वी हृततेजा भविष्यति ।
मेघाच्छन्नः स्वतेजा राहुग्रस्तो भवान् भव ॥
ब्राह्मणस्य वचः श्रुत्वा भगवान् भास्करः स्वयम्
त्रस्तः पुटाञ्जलिर्भूत्वा तुष्टाव मुनिपुङ्गवम् ॥

सूर्य्य उवाच ।

अहमेव त्वया ग्रस्तो मया ग्रस्तो भवान् भव ।
अन्यथा मां वदन्त्येवं सूर्य्यं निस्तेजसं जनाः ॥
पराभूतः क्षत्रियेण भविष्यसि द्विजेश्वरः ।
मरणं क्षत्रियास्त्रेण भवतश्च भविष्यति ॥
सूर्य्यस्य वचनं श्रुत्वा शुकोप ब्राह्मणः पुनः ।
तं शशापातिरक्ताक्षः शप्तुना च जितो
भवान् ॥
उभयोः कलहं ज्ञात्वा कश्यपेन सह व्रज ।
आजगाम स्वयं ब्रह्मा विधाता जगतामपि ॥
आगत्य ब्रह्मा संत्रस्तं बोधयामास भास्करम् ।
मुनिश्रेष्ठश्च धर्म्मज्ञं धर्म्मज्ञानां गुरोर्गुरुः ॥

ब्रह्मोवाच ।

चमस्व भास्कर त्वञ्च साक्षान्नारायणो भवान् ।
युष्माकं परिपालयाप्यवध्यो ब्राह्मणः सदा ॥
अहं करोमि भवतो विप्रशापान्तसुखक्षम् ।
शान्तो भव सुरश्रेष्ठ साक्षी त्वं सर्व्वकर्म्मणाम् ॥
कुत्रचिद्दिवसे ब्रह्मन् वृत्तौ त्वं कुत्रचित् क्षयम् ।
भविष्यसि घनाच्छन्नः सद्यो मुक्तो भविष्यसि ॥
न्यूनातिरिक्ते वर्षे वा राहुग्रस्तो भविष्यसि ।
तत्राद्दृश्यश्च केषाञ्चित् पुण्यदृश्यो हि कस्यचित्॥
अन्यथा सर्व्वकाले नापुण्यदृश्यो भवान् भुवि ।
त्वां दृष्ट्वा च नमस्कृत्य सर्व्वे निष्पापिणो जनाः॥
जन्मसप्ताष्टरिष्फाङ्कचतुर्थे दशमे विधौ ।
जन्मर्क्षे निधने नृणां अदृश्यस्त्वं भविष्यसि ॥
अस्तकाले घनाच्छन्ने मध्याह्नस्थे जलेऽपि वा
अर्द्धादिते च काले च पापदृश्यो भविष्यसि ॥
भार्य्यादुःखनिमित्तेन भार्य्यया हेतुभूतया ।
ग्रस्तरेषु ग्रालकेन हृततेजा भविष्यसि ॥
अन्यथा तव तेजश्च संज्ञा सहितमक्षमा ।
मालिसुमालियुद्धे च शम्भुना त्वं पराजितः ॥
इत्येवमुक्त्वा सूर्य्यञ्च बोधयामास ब्राह्मणम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।७८।१-५०॥
ब्रह्माण्डपुराणे ५८ अध्यायेऽप्येवम् ॥

अथ सूर्य्यमन्त्राः ।

"तारो हृषिर्भृगुः पश्चादवामकर्णविभूषितः ।
वक्त्रासनो मरुत् ग्रीषः सनेत्रोऽदिस्त्वपयिमः ।
अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतः परः ॥"
ॐ हृषि सूर्य्य आदित्य । अस्य पूजा । प्रातः
कृत्यादिप्राणायामान्तं विधाय पौठन्यासं कुर्य्यात्
तत्र विग्रेषः । हृदयस्य पूर्व्वादिदिक्षु मध्ये च ।

प्रभूतं विमलं सारं समाराध्यं परमसुखं विन्यस्य आधारशक्त्यादि यं सूर्य्यमण्डलाय हृदयकलात्मने नमः इत्यन्तं विन्यसेत्। तथा च निबन्धे।
"पीठे कृसे च प्रथमं दिक्षु मध्ये च संयजेत्।
प्रभूतं विमलं सारं समाराध्यमनन्तरम्॥
परमादि सुखं पीठं स्वविम्बान्तं प्रकल्पयेत्॥"
ततः केशरेषु मध्ये च वां दीप्तायै नमः॥
एवं वीं सूक्ष्मायै वूं जयायै वें भद्रायै वैं विभूत्यै वों विमलायै वौं अमोघायै वं विद्युतायै वः सर्व्वतोमुख्यै। तथा च निबन्धे।
"दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला पुनः
अमोघा विद्युता सर्व्वतोमुखी पीठशक्तयः॥
दीप्तदीपशिखाकारान् बीजन्यासान् विदुः क्रमात्।
अक्लीवक्लत्रितयस्वरान् विन्दुनिसंयुतान्॥"
तदुपरि ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः। यथा च शारदायाम्।
"वदेत् पदं चतुर्थ्यन्तं ब्रह्मविष्णुशिवात्मकम्।
सौराय योगपीठाय नमःपदमनन्तरम्॥
पीठमन्त्रोऽयमाख्यातो दिनेशस्य जगत्पतेः॥"
तत ऋष्यादिन्यासः। शिरसि देवभागऋषये नमः। मुखे गायत्रीच्छन्दसे नमः। हृदि आदित्याय देवतायै नमः। निबन्धे।
"देवभागी मुनिः प्रोक्तो गायत्रीच्छन्द ईरितम्
आदित्यो देवता प्रोक्तो दृष्टादृष्टफलप्रदः॥"
ततः करान्यासौ। सत्याय तेजोज्वालामणे ङैं फट् स्वाहा अङ्गुष्ठाभ्यां नमः। एवं ब्रह्मणे १०तर्ज्जनीभ्यां स्वाहा। विष्णवे१०मध्यमाभ्यां वषट्। रुद्राय१०अनामिकाभ्यां हुम्। अग्नये १० कनिष्ठाभ्यां वौषट्। सर्व्वाय १० करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। तथा च शारदायाम्।
"सत्याय हृदयं प्रोक्तं ब्रह्मणे शिर ईरितम्।
विष्णवे स्याच्छिखावर्म्म रुद्राय परिकीर्त्तितम्॥
अग्नये नेत्रमाख्यातं सर्व्वायास्त्रमुदीरितम्।
तेजोज्वालामणे ङैं फट् हृदन्ताः परिकीर्त्तिताः॥"
ततो मूर्त्तिन्यासः। यथा शिरसि ॐ आदित्याय नमः। मुखे एं रवये। हृदये ऊं भानवे। गुह्ये ईं भास्कराय। चरणयोः यं सूर्य्याय। तथा च निबन्धे।
"आदित्यं विन्यसेन्मूर्द्ध्नि रविं मुखगतं न्यसेत्।
हृदये भानुनामानं भास्करं गुह्यदेशतः।
सूर्य्यं चरणयोर्न्यस्येद्वैः सत्यादिपञ्चभिः॥"
ततो मन्त्रन्यासः। शिरसि ॐ ॐ नमः। मुखे ॐ हृ नमः। कण्ठे ॐ त्रिं नमः। हृदि ॐ सृ नमः। कुक्षौ ॐ र्य्यं नमः। नाभौ ॐ र्या नमः। लिङ्गे ॐ दि नमः। पादयोः ॐ त्यं नमः। तथा च।
"मूर्द्धास्यकण्ठहृदयकुक्षिनाभिध्वजादिषु।
मन्त्रवर्णान्यसेदष्टौ प्रत्येकं प्रणवादिकान्॥"*॥
ततो ध्यानम्।

"रक्ताम्बुजासनमशेषगुणैकसिन्धुं
भानुं समस्तजगतामधिपं भजामि।
पद्मद्वयाभयवरान् दधतं कराब्जै-
र्माणिक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम्॥"
एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनं कृत्वा गुरुपंक्तिं संपूज्य पीठपूजां कुर्य्यात्। ततः खं खखोल्काय नमः। इति मन्त्रेण मूर्त्तिं संकल्प्य पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। तथा च निबन्धे।
"तारादि खं खोल्काय मनुना मूर्त्तिकल्पना
साधिपं सर्व्वलोकानां तस्यामावाह्य पूजयेत्"
केशरेष्वन्यादिकोणेषु मध्ये दिक्षु च सत्याय तेजोज्वालामणे ङैं फट् स्वाहा हृदयाय नमः। एवं ब्रह्मणे शिरसे स्वाहा। विष्णवे शिखायै वषट्। रुद्राय कवचाय हुम्। अग्नये नेत्रत्रयाय वौषट्। सर्व्वाय अस्त्राय फट्। दिक्पत्रेषु पूर्व्वादि ॐ आदित्याय नमः। एवं एं रवये ऊं भानवे ईं भास्कराय। विदिक्पत्रेषु अग्न्यादि उं उषायै पं प्रज्ञायै पं प्रभायै सं सन्ध्यायै। तथा च।
"अङ्गानि पूजयेदादौ दिक्पत्रेष्वर्कमूर्त्तयः।
आदित्याद्यास्तसोर्ज्जाः शक्तयः कोणपत्रगाः॥"
स्वस्वनामादिवर्णाः स्युः स्वासां बीजान्यनुक्रमात्
उषा प्रज्ञा प्रभा सन्ध्या शक्तयः परिकीर्त्तिताः॥"
ततः पत्राग्रेषु ब्राह्म्याद्याः संपूज्य पुरतोऽरुणमर्चयेत्। तथा च शारदायाम्।
"पत्राग्रसंस्था ब्राह्म्याद्याः पुरतोऽरुणमर्चयेत्।"
तदाद्ये चन्द्रादीन् पूजयेत्। यथा चन्द्राय नमः एवं मङ्गलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतवे। तथा च शारदायाम्।
"चन्द्रादीन्पूजयेत्पश्चात्पद्मानष्टौ ततो बहिः॥"
ततः इन्द्रादीन् वज्रादींश्च सम्पूज्य धूपादि विसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणमष्टलक्षजपः। तथा च।
"वसुलक्षं जपेन्मन्त्रं समिद्भिः क्षीरशाखिनाम्।
तत्सहस्रं प्रजुहुयात् क्षीराज्ताभिर्जितेन्द्रियः॥"
वाचनिक एवाष्टसहस्रहोमः॥*॥मन्त्रान्तरं यथा
"आकाशमग्निदीर्घेन्दुसंयुतं भुवनेश्वरी।
सर्गान्वितो भृगुर्भानोस्त्राक्षरोऽयं समीरितः॥"
क्रौं क्रौं सः। अस्य पूजाप्रयोगः। प्रातःस्नात्यादिपूर्व्वमन्त्रोक्तपीठन्यासं विधाय पूर्व्ववत् ऋष्यादिन्यासं कुर्य्यात्। ततो मन्त्रन्यासः। यथा आधारादिपादपर्य्यन्तं क्रौं नमः। कण्ठादाधारपर्य्यन्तं क्रौं नमः। मूर्द्धादिकण्ठपर्य्यन्तं सः नमः। शारदायाम्।
"आधारादिपदान्तं कण्ठादाधारकावधि।
मूर्द्धादिकण्ठपर्य्यन्तं क्रमाद्बीजत्रयं न्यसेत्॥"
ततः करान्यासौ। क्रौं अङ्गुष्ठाभ्यां नमः। क्रौं तर्ज्जनीभ्यां स्वाहा। ईं मध्यमाभ्यां वषट् क्रैं अनामिकाभ्यां हुं। क्रौं कनिष्ठाभ्यां वौषट्। क्रः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। तथा च निबन्धे।
"षड्दीर्घभाजा मध्येन बीजेनाङ्गानि कल्पयेत्॥"
ततो ध्यानम्।
"रक्ताम्बुजासनमशेषगुणैकसिन्धुं
भानुं समस्तजगतामधिपं भजामि।
पद्मद्वयाभयवरान् दधतं कराब्जै-
र्माणिक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम्॥"
एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनं कृत्वा पूर्व्वोक्तक्रमेण पीठपूजां विधाय मूर्त्तिमन्त्रेण मूर्त्तिं संकल्प्य पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजामारभेत्। अग्निनिर्ऋतिवायवीशानेषु मध्ये दिक्षु च क्रौं हृदयाय नमः इत्यादिना पूजयेत्। पत्रेषु चन्द्रादीन् पूजयेत्। तत इन्द्रादीन् वज्रादींश्च पूजयेत् ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं हृदयलक्षजपः। तथा च।
"भानुलक्षं जपेन्मन्त्रमाज्येन च दशांशतः।
तिलैर्व्वा मधुरासिक्तैर्जुहुयाद्विजितेन्द्रियः॥"
मन्त्रान्तरम्।
"आकाशमग्निपवनसत्यान्तार्घीशबिन्दुमत्।
मार्त्तण्डभैरवं नाम बीजमेतदुदाहृतम्॥
पुटितं विम्बबीजेन सर्व्वकामफलप्रदम्॥"
विम्बबीजमाह।
"टान्तं दहनमेन्दुसहितं तदुदाहृतम्॥"
ठ्रिं क्रौड़ं ठ्रिम्। अस्य पूजाप्रयोगः। प्रातःस्नात्यादि पूर्व्ववत् एतन्मन्त्रोक्तपीठन्यासान्तं कर्म्म विधाय ऋष्यादिन्यासं कुर्य्यात्। ततो मूर्त्तिन्यासः। ठ्रं सूर्य्याय नमोऽङ्गुष्ठयोः। ठ्रिं भास्कराय नमस्तर्ज्जन्योः। ठ्रुं भानवे नमः मध्यमयोः। ठ्रैं रवये नमोऽनामिकयोः। ठ्रौं दिवाकराय नमः कनिष्ठयोः। ततः शिरसि वदने हृदये गुह्ये पाददेशेषु तास्तत्तद्बीजादिका न्यसेत्। तथा च निबन्धे।
"पञ्चक्रस्वाद्यबीजेन पञ्चमूर्त्तीः प्रविन्यसेत्।
अङ्गुष्ठादिकनिष्ठान्तं अङ्गुलिषु क्रमादिमाः॥
सूर्य्यस्तु भास्करो भानुस्ततो रविदिवाकरौ।
शिरोवदनहृद्गुह्यपाददेशेषु ताः क्रमात्॥"
ततः करान्यासौ। ठ्रां अङ्गुष्ठाभ्यां नमः। ठ्रीं तर्ज्जनीभ्यां स्वाहा। ठ्रूं मध्यमाभ्यां वषट्। ठ्रैं अनामिकाभ्यां हुम्। ठ्रौं कनिष्ठाभ्यां वौषट्। एवं हृदयादिषु। ठ्रां हृदयाय नमः इत्यादि। तथा च निबन्धे।
"दीर्घयुक्तेन बीजेन नेत्रास्ताङ्गानि विन्यसेत्।"
ततो मूलबीजेन व्यापकं कृत्वा ध्यायेत्। तथा च।
"व्यापकं मूलबीजेन कुर्य्यात् तदनन्तरम्।"
ध्यानम्।
ईषाम्भोजप्रवालप्रतिमनिजरुचिं चारु-
खट्वाङ्गपद्मौ
चक्रं शक्तिं सपाशं नृचिमतिरुचिरामक्ष-
मालां कपालम्।

हस्ताम्भोजैर्दधानं त्रिनयनविलसद्देवताभिरामं
मार्त्तण्डं वल्लभार्द्धं मणिमयमुकुटं हारदीप्तं
भजामः ॥"
एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कुर्य्यात्
ततः पूर्व्वोक्तक्रमेण पीठं संपूज्य पूर्व्वादिदिक्षु
कर्णिकायाम्। ॐ उषायै नमः। एवं पं प्रभायै
पं प्रज्ञायै सं सन्ध्यायै इति संपूज्य मूर्त्तिं मूलेन
कल्पयेत्। ततः पूर्व्वादिदिक्षु सूर्य्यं भास्करं भानुं
रविञ्च पूजयेत्। कोणेषु दिवाकरम्। ततः
पूर्व्वदक्षिणपश्चिमोदीचेषु दिक्षु ह्रां हृदयाय
नमः। इत्यादिना पूजयेत्। ईशाने ह्रौं नेत्र-
त्रयाय वौषट्। शारदायाम्।
"सूर्य्यादीन् चतुरो दिक्षु विदिक्षन्यं समर्चयेत्
अङ्गपूजा यथापूर्व्वा नेत्रमीशानदिग्गतम्॥"
ततः पूर्व्ववच्चन्द्रादिग्रहान् पूजयेत्। ततो
लोकपालान् पूजयेत्। तथा च निबन्धे।
"ग्रन्थानष्टौ तथा बाह्ये लोकपालांस्ततःपरम्॥"
ततो धूपादिविसर्জ্জनान्तं कर्म्म समापयेत्।
अस्य पुरश्चरणजपो लक्षत्रयसंख्यः। त्रिमधुरो-
पेतैः कमलैर्हवांशहोमः। तथा च।
"लक्षत्रयं जपेन्मन्त्री बीजं बिम्बपुटीकृतम्।
दशांशं कमलैः शुक्लैर्जुहुयान्मधुरोक्षितैः॥
इमं मन्त्रं जपन्मर्त्यः कान्तिं पुत्रान् धनं द्युतिम्
वाक्सिद्धिममितां लक्ष्मीं सौभाग्यमपि साधयेत्
इति तन्त्रसारः॥ * ॥
अस्य प्रकारान्तरमन्त्रध्यानपूजादिकं गरुड-
पुराणे ३८ अध्याये द्रष्टव्यम्॥ * ॥ सूर्य्ये वर्ण-
नीयानि यथा। अरुणता१ रविमणिप्रकाशः२
चक्रवाकप्रीतिः ३ पद्मप्रकाशः४पथिकप्रीतिः५
लोचनप्रीतिः ६ तारार्त्तिः ७ चन्द्रप्रकाशः ८
दीपाप्रकाशः ९ ओषधिप्रकाशः १० पेच-
कार्त्तिः११तमोऽभावः १२ चौरार्त्तिः १३ कुमु-
दार्त्तिः १४ कुलटार्त्तिः १५। इति कविकल्प-
लता॥
सूर्य्यकान्तः, पुं, (सूर्य्यः कान्तो यस्य। सूर्य्यस्य
कान्तः प्रियो वा।) स्फटिकः। इति हला-
युधः॥ मणिविशेषः (यथा, रघुवंशे। ११।
२१।
"ज्योतिरिन्धननिपाति भास्करात्
सूर्य्यकान्त इव ताड़कान्तकः॥")
तत्पर्य्यायः। सूर्य्यमणिः २ सूर्य्याश्मा३ दहनो-
पमः४। इति हेमचन्द्रः॥तपनमणिः५ तापनः६
रविकान्तः ७ दीप्तोपलः ८ अग्निगर्भः९ ज्वल-
नाश्मा १० अर्कोपलः ११। अस्य गुणाः।
उष्णत्वम्। निर्म्मलत्वम्। रसायनत्वम्। वात-
श्लेष्महरत्वम्। मेध्यत्वम्। पूजनाद्रवितुष्टिदत्वञ्च
इति राजनिर्घण्टः॥ पुष्यद्रुचविशेषः। तत्-
पर्य्यायः। सूर्य्यमणिः२पुष्यरत्नः३पचत्पुटः ४।
इति शब्दचन्द्रिका॥
सूर्य्यकान्तिः, स्त्री, (सूर्य्यस्येव कान्तिर्यस्याः।)
पुष्पविशेषः। यथा,—
"सूर्य्यकान्तिस्ताम्रवर्णा षोड़शपर्य्याय इत्यपि॥"
इति शब्दचन्द्रिका॥
सूर्य्यस्य दीप्तिश्च॥
सूर्य्यकालः, पुं, (सूर्य्योपलक्षितः कालः।)दिवसः।
इति शब्दचन्द्रिका॥
सूर्य्यकालानलचक्रं, क्ली, नरयां शुभाशुभज्ञानार्थं
नक्षत्रघटितचक्रविशेषः। यथा,—
"ऊर्द्धगास्त्रिशूलाधास्तिस्रस्तिर्य्यग्व्यवस्थिताः
द्वे द्वे नाड्यौ स्थिते कोणे शृङ्गयुग्मं तयैकया॥
मध्यत्रिशूलदण्डादौ भानुभाद्यं भमण्डलम्।
साभिजित्तत्र दातव्यं सव्यमार्गेण सर्व्वदा॥
नाम ऋक्षं स्थितं यत्र ज्ञेयं तत्र शुभाशुभम्।
अधोगतैस्त्रिनक्षत्रैरुद्देगो वधबन्धनम्॥
रेखाष्टके जयो लाभ ऋक्षषट्के तथा पुनः।
शृङ्गयुग्मे रुजाभङ्गो मृत्युः शूलत्रये स्मृतम्॥
विवादे व्यसने युद्धे रोगार्त्ते गमने तथा।
सूर्य्यकालानलं चक्रं ज्ञातव्यन्तु प्रयत्नतः॥"
इति स्वरोदयः॥
सूर्य्यग्रहः, पुं, (सूर्य्यरूपो ग्रहः।) नवग्रहाणां
प्रथमग्रहः। (सूर्य्यस्य ग्रहः ग्रहणम्।)
सूर्य्योपरागः। यथा, गारुड़े।
"सूर्य्यग्रहः सूर्य्यवारे सोमे सोमग्रहो भवेत्।
चूड़ामणिरयं योगस्तत्रानन्तफलं स्मृतम्॥"
इति तिथ्यादितत्त्वम्॥
सूर्य्यग्रहणं, क्ली, (सूर्य्यस्य ग्रहणम्।) सूर्य्योप-
रागः। तत्कारणं यथा, वह्निपुराणे गणभेद-
नामाध्याये।
"सूर्य्येन्दोरुपरागस्तु गोलकच्छायाया भवेत्।
अन्योन्ययोस्तयोरेव व्यापयोरेव कारणात्॥
ग्रासमोक्षौ तु जायेते तथातः पूर्व्वपश्चिमौ।
तत्र पुष्पफलाद्रागः कृतो राहोस्तु विष्णुना॥"
अन्यत् ग्रहणशब्दे द्रष्टव्यम्॥
सूर्य्यजः, पुं,(सूर्य्यात् जायते इति। जन+डः।)
सुग्रीववानरः। इति जटाधरः॥ शनिग्रहः।
(यथा, वृहत्संहितायाम्। १०४। ४४।
"गच्छत्यध्वानं सप्तमे चाष्टमे च
हीनः स्त्रीपुत्रैः सूर्य्यजे दीनचेष्टः॥"
यमः। मनुः। रेवन्तः। कर्णश्च॥)
सूर्य्यजा, स्त्री, (सूर्य्यात् जायते इति। जन+डः।
टाप्।) यमुना नदी। इति हेमचन्द्रः॥
सूर्य्यतनयः, पुं, (सूर्य्यस्य तनयः।) शनैश्चरग्रहः।
यमः। (सावर्णिमनुः। रेवन्तः।) यथा,—
"तस्य पत्नीत्रयन्तद्वत् संज्ञा राज्ञी प्रभा तथा।
रेवतस्य सुता राज्ञी रेवन्तं सुषुवे सुतम्।२।
प्रभा प्रभातं सुषुवे त्वाष्ट्री संज्ञा तथा मनुम्।
यमञ्च यमुना चैव यमजौ तु बभूवतुः॥ ३॥
जनयामास तस्यान्तु पुत्रञ्च मनुरूपिणम्।
सवर्णत्वाच्च सावर्णिर्मनोर्वैवस्वतस्य च॥ ८॥
ततः शनिञ्च तपतीं विष्टिञ्चैव क्रमेण तु।
छायायां जनयामास संज्ञे यमिति भास्करः॥"९
इति मात्स्ये ११ अध्यायः॥
(वानरराजः सुग्रीवः। कर्णश्च॥)
सूर्य्यतनया, स्त्री,(सूर्य्यस्य तनया।)यमुना नदी।
इत्यमरः। १। १०। ३२॥
सूर्य्यपत्रः, पुं, (सूर्य्य इव तीक्ष्णं पत्रमस्य।)
आदित्यपत्रः। इति राजनिर्घण्टः॥
सूर्य्यपुत्रः, पुं, सूर्य्यस्य पुत्रः।) वरुणः। शनिः।
इति केचित्॥ (यथा, महाभारते।६।३१२।
"मघास्वङ्गारको वक्रः श्रवणे च बृहस्पतिः।
भाग्यं नक्षत्रमाक्रम्य सूर्य्यपुत्रेण पीड्यते॥")
यमः। यथा,—
"धर्म्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्र नमोऽस्तु ते॥"
इति तिथ्यादितत्त्वम्॥
(अश्विनीकुमारौ। यथा, महाभारते। १३।
१५७। १८।
"पिबेतामश्विनौ सोमं भवद्भिः सहितावुभौ।
उभावेतावपि सुरौ सूर्य्यपुत्रौ सुरेश्वर!॥")
अन्यत् सूर्य्यतनयशब्दे द्रष्टव्यम्॥
सूर्य्यपुत्री, स्त्री, (सूर्य्यस्य पुत्री।) यमुना। यथा,
महाभारते।
"यमस्वसर्नमस्तेऽस्तु यमुने लोकपूजिते।
वरदा भव मे नित्यं सूर्य्यपुत्रि नमोऽस्तु ते॥"
इति तिथ्यादितत्त्वम्॥
विद्युत्। इति केचित्॥
सूर्य्यफणिचक्रं, क्ली, सर्व्वकार्य्यशुभाशुभज्ञापक-
चक्रविशेषः। यथा,—
"सप्तविंशतिभान्यत्र षड्त्रियुग्मा क्रमेण तु।
त्रान्तरत्रान्तरे वेधः फणिचक्रं त्रिनाड़िकम्॥
यत्र ऋक्षे स्थितो भानुर्भेदादौ गणयेद्बुधः।
नाम ऋक्षं स्थितं यत्र ज्ञेयं तत्र शुभाशुभम्॥
कुर्य्यान्मृत्युञ्च रोगञ्च नाड़ीवेधगतं नृणाम्।
वर्জ্জयेत् सर्व्वकार्य्येषु युद्धकाले विशेषतः॥
निर्व्वेधऋक्षमध्यस्थं यस्य नाम प्रजायते।
सिध्यन्ति सर्व्वकार्य्याणि संग्रामे च जयो भवेत्॥"
इति स्वरोदयः॥
सूर्य्यभक्तः, पुं,(सूर्य्यस्य भक्तः प्रियः।) बन्धूक-
पुष्पवृक्षः। सूर्य्यपूजके, त्रि। इति मेदिनी॥
सूर्य्यभक्तकः, पुं, (सूर्य्यभक्त एव। स्वार्थे कन्।)
बन्धूकपुष्पवृक्षः। इति शब्दमाला॥ सूर्य्य-
पूजके, त्रि॥
सूर्य्यमणिः, पुं,(सूर्य्यप्रियो मणिः।) सूर्य्यकान्त-
मणिः। इति हेमचन्द्रः॥ पुष्यद्रुचविशेषः।
यथा, शब्दचन्द्रिकायाम्।
"सूर्य्यकान्तः सूर्य्यमणिः पुष्यरत्नः पचत्पटः॥"
सूर्य्यमण्डलं, क्ली, (सूर्य्यस्य मण्डलम्।) सूर्य्य-
सन्निधिवेष्टनम्। तत्पर्य्यायः। परिवेशः२परिधिः
३ उपसूर्य्यकम् ४ मण्डलम् ५। इत्यमरः।१।
३। ३२॥ यथा,—
"सायाह्ने शिवरूपाञ्च ह्रीं हंसभवाहिनीम्।
सूर्य्यमण्डलमध्यस्थां सामवेदसमाश्रिताम्॥"
इत्याह्निकतत्त्वम्॥
सूर्य्यलता, स्त्री, (सूर्य्यप्रिया लता।) आदित्य-
भक्ता। इति राजनिर्घण्टः॥

सूर्य्यलोकः, पुं, (सूर्य्यस्य लोकः ।) सौरभुवनम् । यथा,—
"विनीषधैर्विना वैद्यैर्विना पथ्यपरिग्रहैः ।
कालेन निधनं प्राप्य सूर्य्यलोके महीयते ॥"
इति काशीखण्डे सूर्य्यार्घ्यदानफलम् ॥
अपि च ।
"सौरं लोकमवाप्य क्षणेन स विमानगः ।
यथा कदम्बकुसुमं किञ्जल्कैः सर्व्वतोवृतम् ॥
देदीप्यमानं हि तथा समन्ताद्भानुभानुभिः ।
दूराद्रविं स विज्ञाय धृततामरसद्वयम् ॥
नवभिर्योजनानाच्च सहस्रैः सम्मितेन च ।
विचित्रेणैकचक्रेण सप्तसप्तियुतेन च ॥
अनूरुणाधिष्ठितेन सर्व्वतो धृतरश्मिना ।
अप्सरोमुनिगन्धर्व्वसर्पग्रामणिनैर्ऋतैः ॥
स्यन्दनेनातिजविना प्रणनाम कृताञ्जलिः ।
तस्य प्रणामं देवोऽपि भ्रूभङ्गेनानुमन्य च ।
अतिदूरं नभोवर्त्म प्रतिचक्राम स क्षणात् ॥
प्रक्रान्ते युगणौ दूरं शिवधर्म्मातिधर्म्मवान् ।
प्रोवाच भगवद्भृत्यौ कथं लभ्यं रवेः पदम् ॥"
इति स्कन्दपुराणे काशीखण्डे सूर्य्यलोकवर्णनं नाम ८ अध्यायः ॥

सूर्य्यवंशः, पुं, (सूर्य्यस्य वंशः ।) सूर्य्यस्य सन्तानः । तद्विवरणं यथा । परमेश्वरात् ब्रह्मा जातः । तस्य पुत्रो मरीचिः । तस्य कश्यपः । तस्य सूर्य्यः । तस्य वैवस्वतो मनुः । सत्ययुगे मनुरेव राजासीत् । त्रेतायुगे तस्य पुत्रः इक्ष्वाकुः अयोध्यायां राजासीत् । अस्मिन् युगे अतिदीर्घायुषो राजानो बहुकालं राज्यं कृतवन्तः । त्रेताद्वापरयोः सन्धौ श्रीरामचन्द्रो दशरथसुतरूपेण अवतीर्णः । द्वापरयुगस्य प्रथमे तस्य पुत्रः कुशो जातः । तद्वंशः सुमित्रान्तः कलेः सहस्रवर्षपर्य्यन्तं राज्यं कृतवन्तः एतत्पर्य्यन्तं सूर्य्यवंशविश्रान्तिः । पुनः सत्ययुगे मरुः नष्टं सूर्य्यवंशं भावयिष्यति । यः योगसिद्धः सन् कलापग्रामे आस्ते । इति श्रीभागवतमतम् ॥ वंशवर्णनविस्तारस्तु मत्स्यपुराणे ११ अध्यायादौ गरुड़पुराणे १४३ अध्याये च द्रष्टव्यः ॥

सूर्य्यवल्ली, स्त्री, (सूर्य्यप्रिया वल्ली ।) अर्कपुष्पिकावृक्षः । इति रत्नमाला ॥

सूर्य्यसंज्ञ, क्ली, (सूर्य्यस्य संज्ञा संज्ञा यस्य ।) कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ (पुं, अर्कवृक्षः । इत्यमरे अर्काह्व इति दर्शनात् । २ । ४ । ८० ।)

सूर्य्यसारथिः, पुं, (सूर्य्यस्य सारथिः ।) अरुणः । इति शब्दरत्नावली ॥ (यदुक्तं महाभारते । १ । २६ । २३ ।
"अरुणो दृश्यते ब्रह्मन् प्रभातसमये सदा ।
आदित्यरथमध्यास्ते सारथ्यं समकल्पयत् ॥")

सूर्य्यहृदयं, क्ली, (सूर्य्यस्य हृदयमिव ।) सूर्य्यस्य स्तवविशेषः । यथा,—
"अथोपतिष्ठेदादित्यमुदयन्तं समाहितः ।
मन्त्रैस्तु विविधैः सौरैर्ऋग्यजुःसामसम्भवैः ॥
उपस्थाय महायोगं देवदेवं दिवाकरम् ।
कुर्व्वीत प्रणतिं भूमौ सूर्ण्णा नित्यञ्च मन्त्रतः ॥
ॐ खं खसोल्काय शान्ताय कारणत्रयहेतवे ।
निवेदयामि चात्मानं नमस्ते ज्ञानरूपिणे ॥
क्वचित् पुस्तके खखोल्कायेति च पाठः ।
नमस्ते हृषिने तुभ्यं सूर्य्याय ब्रह्मरूपिणे ।
त्वमेव ब्रह्म परममापो ज्योतो रसोऽमृतम् ॥
भूर्भुवः स्वस्त्वमोङ्कारः सर्व्वे रुद्राः सनातनाः ।
पुरुषः सम्ग्रहोऽतस्त्वां प्रणमामि कपर्द्दिनम् ॥
त्वमेव विश्वं बहुधा जातं वै जायते च न ।
नमो रुद्राय सूर्य्याय त्वामहं शरणं गतः ॥
प्रचेतसे नमस्तुभ्यमुमायाः पतये नमः ।
नमो नमस्ते रुद्राय त्वामहं शरणं गतः ॥
हिरण्यबाहवे तुभ्यं हिरण्यपतये नमः ।
अम्बिकापतये तुभ्यमुमायाः पतये नमः ॥
नमस्ते नीलकण्ठाय नमस्तुभ्यं पिनाकिने ।
विलोहिताय भर्गाय सहस्राक्षाय ते नमः ॥
नमो हंसाय ते नित्यं आदित्याय नमोऽस्तु ते ।
प्रपद्ये त्वां विरूपाक्ष महतं परमेश्वरम् ॥
हिरण्मये गृहे गुप्तमात्मानं सर्व्वदेहिनाम् ।
नमस्यामि परं ज्योतिर्ब्रह्मणं त्वां परामृतम् ॥
विश्वं पशुपतिं भीमं नरनारीश्वरीरिणम् ।
नमः सूर्य्याय रुद्राय भास्वते परमेष्ठिने ॥
उग्राय सर्व्वभक्षाय त्वां प्रपद्ये सदैव हि ॥
एतद्वै सूर्य्यहृदयं जप्त्वा स्तवमनुत्तमम् ।
प्रातःकालेऽथ मध्याह्ने नमस्कुर्य्याद्दिवाकरम् ॥
इदं पुत्राय शिष्याय धार्म्मिकाय द्विजातये ।
प्रदेयं सूर्य्यहृदयं ब्रह्मणा तु प्रदर्शितम् ॥
सर्व्वपापप्रशमनं वेदसारं समुद्धृतम् ।
ब्राह्मणानां हितं पुण्यं ऋषिसङ्घैर्निषेवितम् ॥
यस्तु नित्यं पठेद्धीमान् प्रेचन्नादित्यमण्डलम् ।
महापातकयुक्तोऽपि पूयते नात्र संशयः ॥
क्षयापस्मारकुष्ठाद्यैर्व्याधिभिः पीड़ितोऽपि सन् ।
जप्त्वा शतगुणं स्तोत्रं स ह्याद्यो भवति द्रुतम् ॥
भूतप्रदृपिशाचातिबीजव्यसनकर्षिभिः ।
स्तुवन् ध्यात्वा हरिं विप्रो मुच्यते महतो भयात् ॥
इति कूर्म्मपुराणे उपविभागे १७ अध्यायः ॥
गारुड़े ५० अध्याये चैतद्दृष्टव्यम् ॥ (भविष्योत्तरोक्तसूर्य्यहृदयन्तु बहुभिः समादियते पठ्यते च अतस्तत् सम्प्रक्रियमुच्यते । अथ आदित्यहृदयप्रारम्भः । आचम्य देशकालौ संकीर्त्य ममारोग्यावाप्तये श्रीसवितासूर्य्यनारायणप्रीत्यर्थं हृदयनमस्काराख्यं कर्म्म करिष्ये । अथ ध्यानम्
"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
एकचक्रो रथो यस्य दिव्यः कनकभूषितः ।
स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥"
मित्राय नमः । रवये नमः । सूर्य्याय नमः । भानवे नमः । खगाय नमः । पूष्णे नमः । हिरण्यगर्भाय नमः । मरीचये नमः । आदित्याय नमः । सवित्रे नमः । अर्काय नमः । भास्कराय नमः ।
"नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने ॥
नमोऽस्तु सूर्य्याय सहस्ररश्मये
सहस्रशाखान्वितसम्भवात्मने ।
सहस्रयोगोद्भवभावभागिने
सहस्रसङ्ख्यायुधधारिणे नमः ॥
आदित्यस्य नमस्कारं ये कुर्व्वन्ति दिने दिने ।
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ॥
इति नमस्काराः ॥
शतानिक उवाच ।
"कथमादित्यमुद्यन्तमुपतिष्ठेद्विजोत्तमः ।
एतन्मे ब्रूहि विप्रेन्द्र प्रपद्ये शरणं तव ॥
सुमन्तुरुवाच ।
इदमेव पुरा पृष्टः शंखचक्रगदाधरः ।
प्रणम्य शिरसा देवमर्জ্জুनेन महात्मना ॥
कुरुक्षेत्रे महाराज निहते भारते रणे ।
कृष्णनाथं समासाद्य प्रार्थयित्वाब्रवीदिदम् ॥
अर्জ্জুन उवाच ।
ज्ञानञ्च धर्म्मशास्त्राणां गुह्यादगुह्यतरं तथा ।
मया कृष्ण परिज्ञातं वाङ्मयं सचराचरम् ॥
सूर्य्यस्तुतिमयं न्यासं वक्तुमर्हसि माधव ।
भक्त्या पृच्छामि देवेश कथयस्व प्रसादतः ॥
सूर्य्यभक्तिं करिष्यामि कथं सूर्य्यं प्रपूजयेत् ।
तदहं श्रोतुमिच्छामि त्वत्प्रसादेन यादव ॥
श्रीभगवानुवाच ।
रुद्रादिदेवतैः सर्व्वैः दृष्टेन कथितं मया ।
वक्ष्येऽहं सूर्य्यविन्यासं शृणु पाण्डव यत्नतः ॥
अस्माकं यत्नया दृष्टमेकचित्तो भवार्জ্জुन ।
तदहं सम्प्रवक्ष्यामि आदिमध्यावसानकम् ॥
अर्জ্জुन उवाच ।
नारायण सुरश्रेष्ठ पृच्छामि त्वां महायशाः ।
कथमादित्यमुद्यन्तमुपतिष्ठेत् सनातनम् ॥
श्रीभगवानुवाच ।
साधु पार्थ महाबाहो बुद्धिमानसि पाण्डव ।
यन्मां पृच्छस्युपस्थानं तत् पवित्रं विभावसोः ॥
सर्व्वमङ्गलमाङ्गल्यं सर्व्वपापप्रणाशनम् ।
सर्व्वरोगप्रशमनमायुर्व्वर्द्धनमुत्तमम् ॥
अमित्रदमनं पार्थ संग्रामे जयवर्द्धनम् ।
वर्द्धनं धनपुत्राणामादित्यहृदयं शृणु ॥
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ।
त्रिषु लोकेषु विख्यातं निःश्रेयसकरं परम् ॥
देवदेवं नमस्कृत्य प्रातरुत्थाय चार्জ্জुन ।
विघ्नान्यनेकरूपाणि नश्यन्ति स्मरणादपि ॥
तस्मात् सर्व्वप्रयत्नेन सूर्य्यभावाश्रयेत् सदा ।
आदित्यहृदयं नित्यं जाप्यं तच्छृणु पाण्डव ॥
यज्जपान्मुच्यते जन्तुर्दारिद्र्यादार्त्त दुस्तरात् ।
लभते च महासिद्धिं कुष्ठव्याधिविनाशिनीम् ॥
अस्मिन् मन्त्रे ऋषिश्छन्दो देवताग्निरिव च ।
सर्व्वमेव महाबाहो कथयामि तवाग्रतः ॥
मया ते गोपितं न्यासं सर्व्वशास्त्रप्रबोधितम् ।

अथ ते कथयिष्यामि उत्तमं मन्त्रमेव च ॥"
ॐअस्य श्रादित्यहृदयस्तोत्रमन्त्रस्य । श्रीकृष्ण
ऋषिः श्रीसूर्य्यात्मा त्रिभुवनेश्वरो देवता ।
अनुष्टुप् छन्दः । हरितहयरथं दिवाकरं
हृणिरिति बीजम् । ॐ नमो भगवते जित-
वैश्वानरजातवेदसे इति शक्तिः । ॐ नमो
भगवते आदित्याय नम इति कीलकम् ॥
ॐ अग्निगर्भदेवता इति मन्त्रः ॥ ॐ नमो
भगवते तुभ्यमादित्याय नमो नमः । श्रीसूर्य्य-
नारायणप्रीत्यर्थे जपे विनियोगः । अथ न्यासः ।
ॐ क्रां अङ्गुष्ठाभ्यां नमः । ॐ क्रीं तर्जनीभ्यां
नमः । ॐ क्रूं मध्यमाभ्यां नमः । ॐ क्रैं अना-
मिकाभ्यां नमः । ॐ क्रौं कनिष्ठिकाभ्यां नमः।
ॐ क्रः करतलकरपृष्ठाभ्यां नमः । ॐ क्रां
हृदयाय नमः । ॐ क्रीं शिरसे स्वाहा । ॐक्रूं
शिखायै वषट् । ॐ क्रैं कवचाय हुम् । ॐक्रौं
नेत्रत्रयाय वौषट् । ॐ क्रः अस्त्राय फट् ।
ॐ क्रां क्रीं क्रूं क्रैं क्रौं क्रः । इति दिग्बन्धः ॥
अथ ध्यानम् ।
"भास्वद्रत्नाढ्यमौलिं स्फुरदधररुचा रञ्जितं
चारुकेशं
भास्वन्तं दिव्यतेजः करकमलयुतं स्वर्णवर्ण-
प्रभाभिः ।
विख्याताग्रावकाग्रग्रहपतिशिखरे भाति
यश्चोदयाद्रौ
सर्व्वानन्दप्रदाता हरिहरनमितः पातु मां
विश्वचक्षुः ॥
पूर्व्वमष्टदलं पद्मं प्रणवादिप्रतिष्ठितम् ।
मायाबीजं दलाष्टाग्रे यन्त्रमुद्धारयेदिति ॥
आदित्यं भास्करं भानुं रविं सूर्य्यं दिवाकरम् ।
मार्त्तण्डं तपनं चेति दलेष्वष्टसु योजयेत् ॥
दीप्ता सूक्ष्मा जया भद्रा विभूतिर्व्विमला तथा ।
अमोघा विद्युता चेति मध्ये ग्रीः सर्व्वतोमुखी॥
सर्व्वज्ञः सर्व्वगश्चैव सर्व्वकारणदेवता ।
सर्व्वेशं सर्व्वहृदयं नमामि सर्व्वसाक्षिणम् ॥
सर्व्वात्मा सर्व्वकर्त्ता च सृष्टिजीवनपालकः ।
हितः स्वर्गापवर्गाय भास्करेश नमोऽस्तु ते ॥"
इति प्रार्थना ॥
"नमो नमस्तेऽस्तु सदा विभावसो
सर्व्वात्मने सप्तहयाय भानवे ।
अनन्तशक्तिर्मणिभूषणेन
ददस्व भक्तिं मम मुक्तिमव्ययाम् ॥
अर्कन्तु मूर्द्धि विन्यस्य ललाटे तु रविं न्यसेत् ।
विन्यसेन्नेत्रयोः सूर्य्यं कर्णयोश्च दिवाकरम् ॥
नासिकायां न्यसेद्भानुं मुखे वै भास्करं न्यसेत्।
पर्ज्जन्यमोष्ठयोर्न्यस्य तौ ष्ण्यं जिह्वान्तरं न्यसेत्॥
सुवर्णरेतसं कण्ठे स्कन्धयोस्त्विग्मतेजसम् ।
बाह्वोस्तु पूषणं न्यस्य मित्रं वै पृष्ठतो न्यसेत् ॥
वरुणं दक्षिणे हस्ते त्वष्टारं वामतः करे ।
हस्तावुष्णकरः पातु हृदयं पातु भानुमान् ॥
उदरं तु यमं विन्द्यादादित्यं नाभिमण्डले ।
कट्यां तु विन्यसेद्धंसं वृद्रमूर्व्वोस्तु विन्यसेत् ॥
जान्वोस्तु गोपतिं न्यस्य सवितारन्तु जङ्घयोः ।
पादयोश्च विवस्वन्तं गुल्फयोश्च दिवाकरम् ॥
बाह्यतस्तु तमोध्वंसं भगमभ्यन्तरे न्यसेत् ।
सर्व्वाङ्गेषु सहस्रांशु दिग्विदिक्षु भगं न्यसेत्॥"
इति दिग्बन्धः ॥
"एष आदित्यविद्यासो देवानामपि दुर्लभः ।
इमं भक्त्या न्यसेत् पार्थ सयाति परमां गतिम्
कामक्रोधकृतात् पापात् मुच्यते नात्र संशयः ।
सर्पादपि भयं नैव संग्रामेषु पथिष्वपि ॥
रिपुसंघट्टकालेषु तथा चौरसमागमे ।
त्रिसन्ध्यं जपतो न्यासं महापातकनाशनम् ॥
विस्फोटकसमुत्पन्नं तीव्रज्वरसमुद्भवम् ।
शिरोरोगं नेत्ररोगं सर्व्वव्याधिविनाशनम् ॥
कुष्ठव्याधिस्तथा दद्रुरोगाश्च विविधाश्च ये ।
जपमानस्य नश्यन्ति सृणु भक्त्या तदर्जुन ॥
आदित्यो मन्त्रसंयुक्त आदित्यो भुवनेश्वरः ॥
आदित्यात्परो देवो नादित्यः परमेश्वरः ॥
आदित्यमर्च्चयेद् ब्रह्मा शिव आदित्यमर्च्चयेत् ।
यदादित्यमयं तेजो मम तेजस्तदर्जुन ॥
आदित्यं मन्त्रसंयुक्तमादित्यं भुवनेश्वरम् ।
आदित्यं ये प्रपश्यन्ति मां पश्यन्ति न संशयः ॥
त्रिसन्ध्यमर्च्चयेत् सूर्य्यं स्मरेद्भक्त्या तु यो नरः
न स पश्यति दारिद्र्यं जन्मजन्मनि चार्जुन ॥
एतत्ते कथितं पार्थ आदित्यहृदयं मया ॥
मृत्युञ्जुङ्गा च पापेभ्यः सूर्य्यलोके महीयते ।
ॐनमो भगवते तुभ्यमादित्याय नमो नमः ।
आदित्यः सविता सूर्य्यः खगः पूषा गभस्तिमान्
सुवर्णः स्फटिको भानुः स्फुरितो विश्वतापनः।
रविर्व्विश्वो महातेजाः सुवर्णः सुप्रबोधकः ॥
हिरण्यगर्भस्त्रिशिरास्तपनो भास्करो रविः ।
मार्त्तण्डो गोपतिः श्रीमान् कृतज्ञश्च प्रतापवान्
तमिस्रहा भगो हंसो नासत्यश्च तमोनुदः ।
शुद्धो विरोचनः केशो सहस्रांशुर्महाप्रभुः ॥
विवस्वान् पूषणो मृत्युर्मिहिरो जामदग्न्यजित्
धर्म्मरश्मिः पतङ्गश्च शरण्योऽमित्रहा तपः ॥
दुर्व्विज्ञेयगतिः शूरस्त्रेजो राशिर्म्महायशाः ।
शम्भुस्त्रिलोकदः सौम्यो हव्यकव्यप्रदायकः ॥
अंशुमानुत्तमो देव ऋग्यजुः साम एव च ।
हरिदश्वस्तमोदारः सप्तसप्तिर्मरीचिमान् ॥
अग्निगर्भोऽदितेः पुत्रः शम्भुस्त्विमिरनाशनः ।
पूषा विश्वम्भरो मित्रः सुवर्णः सुप्रतापवान् ॥
आतपी मण्डली भास्वान् तपनः सर्व्वतापनः ।
कृतविश्वो महातेजाः सर्व्वरत्नमयोऽद्भवः ॥
अचरश्च चरश्चैव प्रभाकरविभाकरौ ।
चन्द्रश्चन्द्राङ्गदः सौम्यो हव्यकव्यप्रदायकः ॥
अङ्गारकोऽङ्गदोऽगस्ती रक्ताङ्गश्चाङ्गवर्द्धनः ।
बुधो बुद्धासनो बुद्धिर्बुद्धात्मा बुद्धिवर्द्धनः ॥
बृहद्भानुर्बृहद्भासो बृहद्भामा बृहस्पतिः ।
शुक्रस्त्वं शुक्ररेतास्त्वं शुक्राङ्गः शुक्रभूषणः ॥
अग्निमान् अग्निरूपस्त्वं अग्नेगच्छसि सर्व्वदा।
अनादिरादिरादित्यस्ते जोराशिर्म्महातपाः ॥
अनादिरादिरूपस्तुमादित्यो दिक्पतिर्य्यमः ।
भानुमान् भानुरूपस्त्वं स्वर्भानुर्भानुदीप्तिमान् ॥
धूमकेतुर्म्महाकेतुः सर्व्वकेतुरनुत्तमः ।
तिमिरावरणः शम्भुः स्रष्टा मार्त्तण्ड एव च ॥
नमः पूर्व्वाय गिरये पश्चिमाय नमो नमः ।
नमोत्तराय गिरये दक्षिणाय नमो नमः ॥
नमो नमः सहस्रांशो श्रादित्याय नमो नमः ।
नमः पद्मप्रबोधाय नमस्ते द्वादशात्मने ॥
नमो विश्वप्रबोधाय नमो भ्राजिष्णुजिष्णवे ।
ज्योतिषे च नमस्तुभ्यं ज्ञानार्काय नमो नमः ॥
प्रदीप्ताय प्रगल्भाय युगान्ताय नमो नमः ।
नमस्ते द्योतपतये पृथिवीपतये नमः ॥
नमोङ्कार वषट्कार सर्व्वयज्ञ नमोऽस्तु ते ।
ऋग्वेदादि यजुर्वेद सामवेद नमोऽस्तु ते ॥
नमो हाटकवर्णाय भास्कराय नमो नमः ।
जयाय जयभद्राय हरिदश्वाय ते नमः ॥
दिव्याय दिव्यरूपाय ग्रहाणां पतये नमः ।
नमस्ते शुचये नित्यं नमः कुरु कुलात्मने ॥
नमस्त्रैलोक्यनाथाय भूतानां पतये नमः ।
नमः कैवल्यनाथाय नमस्ते दिव्यचक्षुषे ॥
त्वं ज्योतिस्त्वं द्युतिर्ब्रह्मा त्वं विष्णुस्त्वं प्रजापतिः
त्वमेव रुद्रो रुद्रात्मा वायुरग्निस्त्वमेव च ॥
योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ।
एकेन निमिषार्द्धेन क्रममाण नमोऽस्तु ते ॥
नवयोजनलक्षाणि सहस्रद्वितयानि च ।
यावद्भटोग्रमाणेन क्रममाण नमोऽस्तु ते ॥
अग्रतश्च नमस्तुभ्यं पृष्ठतश्च सदा नमः ।
पार्श्वतश्च नमस्तुभ्यं नमस्ते चास्तु सर्व्वदा ॥
नमः सुरारिघ्ने च सोमसूर्य्याग्निचक्षुषे ।
नमो दिव्याय व्योमाय सर्व्वतत्त्वमयाय च ॥
नमो वेदान्तवेद्याय सर्व्वकर्म्मादिसाक्षिणे ।
नमो हरितवर्णाय सुवर्णाय नमो नमः ॥
अरुणो माघमासे तु सूर्य्यो वै फाल्गुने तथा ।
चैत्रमासे तु वेदाङ्गो भानुर्वैशाखतापनः ॥
ज्येष्ठमासे तपेदिन्द्र आषाढ़े तपते रविः ॥
गभस्तिः श्रावणे मासि यमो भाद्रपदे तथा ॥
इषे सुवर्णरेताश्च कार्त्तिके च दिवाकरः ॥
मार्गशीर्षे तपेन्मित्रः पौषे विष्णुः सनातनः ॥
पुरुषस्त्वधिके मासि मासाधिक्ये तु कल्पयेत् ।
इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्त्तिताः॥
उग्ररूपा महात्मानस्तप्ते विष्णुरिवेषुः ।
धर्म्मार्थकाममोक्षाणां प्रस्कृटा हेतवो नृप ॥
सर्व्वपापहरश्चैवमादित्यं संप्रपूजयेत् ।
शतधा दशधा चैव शतधा च सहस्रधा ॥
तपन्ते विश्वरूपेण सृजन्ति संहरन्ति च ।
एष विष्णुः शिवश्चैव ब्रह्मा चैव प्रजापतिः ॥
महेन्द्रश्चैव कालश्च यमो वरुण एव च ।
नक्षत्रग्रहताराणामधिपो विश्वतापनः ॥
वायुरग्निर्धनाध्यक्षो भूतकर्त्ता स्वयं प्रभुः ।
एष देवो हि देवानां सर्व्वमाप्यायते जगत् ॥
एष कर्त्ता हि भूतानां संहर्त्ता रक्षकस्तथा ।
एष लोकानुलोकश्च सप्तद्वीपाश्च सागराः ॥
एष पातालसप्तस्थो दैत्यदानवराक्षसाः ।

एष धाता विधाता च वीजं चैत्रं प्रजापतिः॥
एष एव प्रजा नित्यं संवर्द्धयति रश्मिभिः।
एष यज्ञः स्वधा स्वाहा श्रीः श्रीश्च पुरुषोत्तमः
एष भूतात्मको देवः सूक्ष्मो व्यक्तः सनातनः।
ईश्वरः सर्व्वभूतानां परमेष्ठी प्रजापतिः॥
कालात्मा सर्व्वभूतात्मा वेदात्मा विश्वतोमुखः
जन्ममृत्युजराव्याधिसंसारभयनाशनः॥
दारिद्र्यव्यसनध्वंसी श्रीमान् देवो दिवाकरः।
विकर्त्तनो विवस्वांश्च मार्त्तण्डो भास्करो रविः
लोकप्रकाशकः श्रीमाँल्लोकचक्षुरधीश्वरः।
लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा॥
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः।
गभस्तिहस्तो ब्रह्मण्यः सर्व्वदेवनमस्कृतः॥
आयुरारोग्यमैश्वर्यं नरा नार्य्यश्च मन्दिरे।
यस्य प्रसादात् सन्तुष्टिरादित्यहृदयं जपेत्॥
इत्येतैर्नामभिः पार्थ आदित्यं स्तौति नित्यशः।
प्रातरुत्थाय कौन्तेय तस्य रोगभयं न हि॥
पातकान्मुच्यते पार्थ व्याधिभ्यश्च न संशयः।
एकसन्ध्यं द्विसन्ध्यं वा सर्व्वपापैः प्रमुच्यते॥
त्रिसन्ध्यं जपमानस्तु पश्येच्च परमं पदम्॥
यदहः कुरुते पापं तदहः प्रतिमुच्यते॥
यद्रात्र्यां कुरुते पापं तद्रात्र्यां प्रतिमुच्यते।
दद्रुस्फोटककुष्ठानि मण्डलानि विषूचिका॥
सर्व्वव्याधिमहारोगभूतबाधास्तथैव च॥
डाकिनी शाकिनी चैव महारोगभयं कृतः॥
ये चान्ये दुष्टरोगाश्च ज्वरातीसारकादयः।
जपमानस्य नश्यन्ति जीवेच्च शरदां शतम्॥
संवत्सरेण मरणं यदा तस्य ध्रुवं भवेत्।
अग्नीषोमौ पश्यति छायामहोरात्रं धनञ्जय॥
यस्त्विदं पठते मन्त्रं भानुवारे महामनः।
प्रातःस्नाने कृते पार्थ एकाग्रकृतमानसः॥
सुवर्णचक्षुर्भवति न चान्धस्तु प्रजायते।
पुत्रवान् धनसम्पन्नो जायते चारुजः सुखी॥
सर्व्वसिद्धिमवाप्नोति सर्व्वत्र विजयी भवेत्।
आदित्यहृदयं पुण्यं सूर्य्यनामविभूषितम्॥
श्रुत्वा च निखिलं पार्थ सर्व्वपापैः प्रमुच्यते।
अतःपरतरं नास्ति सिद्धिकामस्य पाण्डव॥
एतज्जपस्व कौन्तेय येन श्रेयो ह्यवाप्स्यसि।
आदित्यहृदयं नित्यं यः पठेत् सुसमाहितः॥
भ्रूणहा मुच्यते पापात् कृतघ्नो ब्रह्मघातकः।
गात्रः सुरापो दुर्भोगी दुष्कृतिग्रहकारकः॥
पातकानि च सर्व्वाणि दहत्येव न संशयः।
य इदं शृणुयान्नित्यं जपेद्वापि समाहितः॥
सर्व्वपापविशुद्धात्मा सूर्य्यलोके महीयते।
अपुत्रो लभते पुत्रान् निर्धनो धनमाप्नुयात्॥
कुरोगी मुच्यते रोगाद्भक्त्या यः पठते सदा।
यस्त्वादित्यदिने पार्थ नाभिमात्रजले स्थितः॥
उदयाचलमारूढं भास्करं प्रणतः स्थितः।
जपते मानवो भक्त्या शृणुयादपि भक्तितः॥
स याति परमं स्थानं यत्र देवो दिवाकरः।
अभिवदमनं पार्थ यदा कर्त्तुं समारभेत्॥
तदा प्रतिकृतिं कृत्वा शत्रोश्च रथपांशुभिः।
आक्रम्य वामपादेन आदित्यहृदयं जपेत्॥
एतन्मन्त्रं समाहृत्य सर्व्वसिद्धिकरं परम्॥"
ॐ ह्रीं हिमालोटं स्वाहा। ॐ ह्रीं निलोटं
स्वाहा। ॐ ह्रीं मालोटं स्वाहा। इति मन्त्रः।
"विभिद्य रोगी भवति ज्वरी भवति पञ्चभिः।
जपेत्तु सप्तभिः पार्थ राक्षसीं तनुमाविशेत्॥
राक्षसेनाभिभूतस्य विकारान् शृणु पाण्डव।
गीयते नृत्यते नग्न आस्फोटयति धावति॥
शिवारुतञ्च कुरुते हसते क्रन्दते पुनः।
एवं संपीड्यते पार्थ यद्यपि स्यान्महेश्वरः॥
किं पुनर्मानुषः क्वचिच्छौचाचारविवर्जितः।
पीड़ितस्य न संदेहो ज्वरो भवति दारुणः॥
यदा चानुग्रहं तस्य कर्त्तुमिच्छेच्छुभङ्करम्।
तदा सलिलमादाय जपेन्मन्त्रमिममब्धुधः॥
नमो भगवते तुभ्यमादित्याय नमो नमः।
जयाय जयभद्राय हरिदश्वाय ते नमः॥
जापयेत्तेन मन्त्रेण शुभं भवति नान्यथा॥
अन्यथा च भवेद्दोषो नश्यते नात्र संशयः॥
अतस्ते निखिलः प्रोक्तः पूजाश्चैव निबोध मे।
उपलिप्ते शुचौ देशे नियतो वाग्यतः शुचिः॥
वृत्तं वा चतुरस्रं वा लिप्तभूमौ लिखेच्छुचिः।
त्रिधा तत्र लिखेत् पद्ममष्टपत्रं सकर्णिकम्॥
अष्टपत्रं लिखेत् पद्मं लिप्तगोमयमण्डले।
पूर्व्वपत्रे लिखेत् सूर्य्यमाग्नेय्यान्तु रविं न्यसेत्
याम्यायाञ्च विवस्वन्तं नैर्ऋत्यान्तु भगं न्यसेत्।
प्रतीच्यां वरुणं विन्द्यादायव्यां मित्रमेव च॥
आदित्यमुत्तरे पत्रे ईशान्यां विष्णुमेव च।
मध्ये तु भास्करं विन्द्यात् क्रमेणैव समर्च्चयेत्॥
अतः परतरं नास्ति सिद्धिकामस्य पाण्डव।
महातेजःसमुद्यन्तं प्रणमेत् सञ्जताञ्जलिः॥
सकेसराणि पद्मानि करवीराणि चार्ज्जुन।
तिलतण्डुलसंयुक्तं कुशगन्धोदकेन च॥
रक्तचन्दनमिश्राणि कृत्वा वै ताम्रभाजने।
धृत्वा शिरसि तत्पात्रं जानुभ्यां धरणीं स्पृशेत्॥
मन्त्रपूतं गुड़ाक्तेशं चार्घ्यं दद्याद्भास्करे।
सायुधं सरथञ्चैव सूर्य्यमावाहयाम्यहम्॥"
स्वागतो भव। सुप्रतिष्ठो भव। सन्निधो भव।
सन्निहितो भव। सम्मुखो भव। इति पञ्चमुद्राः
स्फुटयित्वाह्वयेत् सूर्य्यं भुक्तिं मुक्तिं लभेन्नरः॥
ॐ श्रीं विद्यां किलिकिलि कटकेष्टसर्व्वार्थसा-
धनाय स्वाहा। ॐ श्रीं क्रां क्रीं क्रः हंसः सूर्य्याय
नमः स्वाहा। ॐ श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः
सूर्य्यमूर्त्तये स्वाहा। ॐ श्रीं क्रीं खं खः लोकाय
सर्व्वमूर्त्तये स्वाहा। ॐ क्रूं मार्त्तण्डाय स्वाहा।

"नमोऽस्तु सूर्य्याय सहस्रभानवे
नमोऽस्तु वैश्वानर जातवेदसे।
त्वमेव चार्घ्यं प्रतिगृह्ण देव
देवाधिदेवाय नमो नमस्ते॥

नमो भगवते तुभ्यं नमस्ते जातवेदसे।
दत्तमर्घ्यं मया भानो त्वं गृहाण नमोऽस्तु ते
एहि सूर्य्य सहस्रांशो तेजोराशे जगत्पते।
अनुकम्पय मां देव गृहाणार्घ्यं नमोऽस्तु ते॥
नमो भगवते तुभ्यं नमस्ते जातवेदसे॥
ममेदमर्घ्यं गृह्ण त्वं देवदेव नमोऽस्तु ते॥
सर्व्वदेवाय देवाय आधिव्याधिविनाशिने।
इदं गृहाण मे देव सर्व्वव्याधिविनश्यतु॥
नमः सूर्य्याय शान्ताय सर्व्वरोगविनाशिने।
ममेप्सितं फलं दत्त्वा प्रसीद परमेश्वर॥"
ॐ नमो भगवते सूर्य्याय स्वाहा। ॐ शिवाय
स्वाहा। ॐ सर्व्वात्मने सूर्य्याय नमः स्वाहा।
ॐ पचत्यतेजसे नमः स्वाहा।
"सर्व्वसंकटदारिद्र्यं गृह्ण नाशय नाशय।
सर्व्वलोकेषु विख्यातो सर्व्वात्मा सर्व्वदर्शकः॥
नमो भगवते सूर्य्य कुष्ठरोगान् विनाशय।
आयुरारोग्यमैश्वर्य्यं देहि देव नमोऽस्तु ते॥
नमो भगवते तुभ्यमादित्याय नमो नमः॥"
ॐ पचत्यतेजसे नमः। ॐ सूर्य्याय नमः।
ॐ विश्वमूर्त्तये नमः।
"आदित्यश्च शिवं विन्द्याच्छिवमादित्यरूपिणम्
उभयोरन्तरं नास्ति आदित्यस्य शिवस्य च॥
एतद्विज्ञाय्यहं श्रोतुं पुरुषो वै दिवाकरः।
उदये ब्रह्मणो रूपं मध्याह्ने तु महेश्वरः॥
अस्तमाने स्वयं विष्णुस्त्रिमूर्त्तिश्च दिवाकरः।
नमो भगवते तुभ्यं विष्णवे प्रभविष्णवे॥
ममेदमर्घ्यं प्रतिगृह्ण देव
देवाधिदेवाय नमो नमस्ते॥"
श्रीसूर्य्याय साङ्गाय सपरिवाराय श्रीसूर्य्य-
नारायणायेदमर्घ्यम्।
"हिमघ्नाय तमोघ्नाय रक्षोघ्नाय च ते नमः।
कृतघ्नघ्नाय सत्याय तस्मै सत्यात्मने नमः॥
जयो जयश्च विजयो जितप्राणो जितश्रमः।
मनोजवो जितक्रोधो वाजिनः सप्त कीर्त्तिताः॥
हरितश्चयरथं दिवाकरं
कनकमयाम्बुजरेणुपिञ्जरम्।
प्रतिदिनमुदयं नवं नवं
शरणमुपैमि हिरण्यरेतसम्॥
न तं व्याधाः प्रबाधन्ते न व्याधिभ्यो भयं भवेत्
न नागेभ्यो भयञ्चैव न च भूतभयं क्वचित्॥
अग्निगर्भ्भं भयं नास्ति पार्थिवेभ्यस्तथैव च।
दुर्गतिं तरते घोरां प्रजाश्च लभते पशून्॥
सिद्धिकामो लभेत् सिद्धिं कन्याकामस्तु
कन्यकाम्।
एतत्पठेच्च कौन्तेय भक्तियुक्तेन चेतसा॥
अश्वमेधसहस्रस्य वाजपेयशतस्य च।
कन्याकोटिसहस्रस्य दत्तस्य फलमाप्नुयात्॥
इदमादित्यहृदयं योऽधीते सततं नरः।
सर्व्वपापविशुद्धात्मा सूर्य्यलोके महीयते॥
नास्त्यादित्यसमो देवो नास्त्यादित्यसमा गतिः
प्रत्यक्षो भगवान् विष्णुर्येन विश्वं प्रतिष्ठितम्॥
नवतियोजनं स्वर्गं सहस्राणि शतानि च।
यावद्दृष्टिप्रमाणेन तावच्चरति भास्करः॥
गवां शतसहस्रस्य सम्यग् दत्तस्य यत् फलम्।
तत् फलं लभते विद्वान् शान्तात्मा स्तौति यो
रविम्॥

योऽधीते सूर्यहृदयं सकलं सफलं भवेत् ।
अष्टानां ब्राह्मणानाञ्च लेखयित्वा समर्पयेत् ॥
ब्रह्मलोकऋषीणाञ्च जायते मानुषोऽपि वा ।
जातिस्मरत्वमाप्नोति मृतात्मा नात्र संशयः ॥
अजाय लोकत्रयपावनाय
भूतात्मने गोपतये हृषाय ।
सूर्य्याय सर्व्वप्रलयान्तकाय
नमो महाकाद्यिकोत्तमाय ॥
विवस्वते ज्ञानभृतान्तरात्मने
जगत्प्रदीपाय जगद्धितैषिणे ।
स्वयम्भुवे दीप्तसहस्रचक्षुषे
सुरोत्तमायामिततेजसे नमः ॥
सुरैरनेकैः परिसेविताय
हिरण्यगर्भाय हिरण्मयाय ।
महात्मने मोक्षपदाय नित्यं
नमोऽस्तु ते वासरकारकाय ॥
आदित्यार्चितो देव आदित्यः परमं पदम् ।
आदित्यो माहको भूत्वा आदित्यो वाह्यं जगत्
आदित्यं पश्यते भक्त्या मां पश्यति ध्रुवं नरः ।
नादित्यं पश्यते भक्त्या न स पश्यति मां नरः ॥
त्रिगुणश्च त्रितत्त्वश्च त्रयो वेदास्त्रयोऽग्नयः ।
त्रयाणाञ्च त्रिमूर्त्तित्वं तुरीयत्वं नमोऽस्तु ते॥
नमः सवित्रे जगदेकचक्षुषे
जगत्सृतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने ॥
यस्योदये नेह जगत्प्रबुद्धते
प्रवर्त्तते चाखिलकर्म्मसिद्धये ।
ब्रह्मेन्द्रनारायणरुद्रवन्दितः
स नः सदा यच्छतु मङ्गलं रविः ॥
नमोऽस्तु सूर्य्याय सहस्ररश्मये
सहस्रशाखान्वितसम्भवात्मने ।
सहस्रयोगोद्भवभावभागिने
सहस्रसंख्यायुगधारिणे नमः ॥
यन्मण्डलं दीप्तिकरं विशालं
रत्नप्रभं तीव्रमनादिरूपम् ।
दारिद्र्यदुःखक्षयकारणञ्च
पुनातु मां तत्सवितुर्वरेण्यम् ॥
यन्मण्डलं देवगणैः सुपूजितं
विप्रैः स्तुतं भावनमुक्तिकोविदम्।
तं देवदेवं प्रणमामि सूर्य्यं
पुनातु मां तत्सवितुर्वरेण्यम् ॥
यन्मण्डलं ज्ञानघनं त्वगम्य
त्रैलोक्यपूज्यं त्रिगुणात्मरूपम् ।
समस्ततेजोमयदिव्यरूपं
पुनातु मां तत्सवितुर्वरेण्यम् ॥
यन्मण्डलं गूढ़मतिप्रबोधं
धर्म्मस्य वृद्धिं कुरुते जनानाम् ।
तत् सर्व्वपापक्षयकारणञ्च
पुनातु मां तत्सवितुर्वरेण्यम् ॥
यन्मण्डलं व्याधिविनाशदक्षं
ऋग्यजुःसामसु सम्प्रगीतम् ।

प्रकाशितं येन च भूर्भुवः स्वः
पुनातु मां तत्सवितुर्वरेण्यम् ॥
यन्मण्डलं वेदविदो वदन्ति
गायन्ति यच्चारणसिद्धसङ्घाः ।
यद्योगिनो योगजुषाञ्च सङ्घाः
पुनातु मां तत्सवितुर्वरेण्यम् ॥
यन्मण्डलं सर्व्वजनेषु पूजितं
ज्योतिश्च कुर्य्यादिह मर्त्यलोके ।
यत्कालकालादिमनादिरूपं
पुनातु मां तत्सवितुर्वरेण्यम् ॥
यन्मण्डलं विष्णुचतुर्मुखाख्यं
यदक्षरं पापहरं जनानाम् ।
यत्कालकल्पक्षयकारणञ्च
पुनातु मां तत्सवितुर्वरेण्यम् ॥
यन्मण्डलं विश्वसृजं प्रसिद्ध-
मुत्पत्तिरक्षाप्रलयप्रगल्भम् ।
यस्मिन् जगत् संहरतेऽखिलञ्च
पुनातु मां तत्सवितुर्वरेण्यम् ॥
यन्मण्डलं सर्व्वगतस्य विष्णो-
रात्मा परं धाम विशुद्धतत्त्वम् ।
सूक्ष्मान्तरैर्योगपथानुगम्यं
पुनातु मां तत्सवितुर्वरेण्यम् ॥
यन्मण्डलं ब्रह्मविदो वदन्ति
गायन्ति यच्चारणसिद्धसङ्घाः ।
यन्मण्डलं वेदविदः स्मरन्ति
पुनातु मां तत्सवितुर्वरेण्यम् ॥
यन्मण्डलं वेदविदोपगीतं
यद्योगिनां योगपथानुगम्यम् ।
तत् सर्व्ववेदं प्रणमामि सूर्य्यं
पुनातु मां तत्सवितुर्वरेण्यम् ॥
मण्डलाष्टमिदं पुण्यं यः पठेत् सततं नरः ।
सर्व्वपापविशुद्धात्मा सूर्य्यलोके महीयते ॥
ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
शङ्खचक्रं रविमण्डले स्थितं
कुशेशयाक्रान्तमनन्तमच्युतम् ॥
भजामि ब्रह्मा तपनीयमूर्त्तिं
सुरोत्तमं चित्रविभूषणोज्वलम् ॥
एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः ।
कीर्त्तयन्ति सुरश्रेष्ठं देवं नारायणं विभुम् ॥
वेदवेदाङ्गधारीदं दिव्यदीप्तिकरं परम् ।
रथोत्तं रत्नवर्णञ्च सृष्टिसंहारकारकम् ॥
एकचक्रो रथो यस्य दिव्यः कनकभूषितः ।
स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥
आदित्यः प्रथमं नाम द्वितीयन्तु दिवाकरः ।
तृतीयं भास्करः प्रोक्तं चतुर्थन्तु प्रभाकरः ॥
पञ्चमन्तु सहस्रांशुः षष्ठञ्चैव त्रिलोचनः ।
सप्तमं हरिदश्वश्च अष्टमश्च विभावसुः ॥
नवमं दिनकृत् प्रोक्तं दशमं द्वादशात्मकः ।
एकादशं त्रयीमूर्त्तिं द्वादशं सूर्य्य एव च ॥

द्वादशादित्यनामानि प्रातःकाले पठेन्नरः ।
दुःस्वप्ननाशनञ्चैव सर्व्वदुःखञ्च नश्यति ॥
दद्रुकुष्ठहरञ्चैव दारिद्र्यं हरते ध्रुवम् ।
सर्व्वतीर्थप्रदञ्चैव सर्व्वकामप्रवर्द्धनम् ॥
यः पठेत् प्रातरुत्थाय भक्त्या नित्यमिदं नरः ।
सौख्यमायुस्तथारोग्यं लभते मोक्षमेव च ॥
अग्निमीले नमस्तुभ्यमिषेत्वोर्जेस्वरूपिणे ।
अग्न आयाहि वीतस्त्वं नमस्ते ज्योतिषां पते ।
ग्रावोदेवी नमस्तुभ्यं जगच्चक्षुर्नमोऽस्तु ते ।
पक्षमायोपवेदाय नमस्तुभ्यं नमो नमः ॥
पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ताश्वरथसंयुक्तो द्विभुजः स्यात् सदा रविः ॥
आदित्यस्य नमस्कारं ये कुर्व्वन्ति दिने दिने ।
जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते ॥
उदयगिरिमुपेतं भास्करं पद्महस्तं
निखिलभुवननेत्रं भक्तरत्नोपमेयम् ।
तिमिरकरिमृगेन्द्रं बोधकं पद्मिनीनां
सुरवरमभिवन्दे सुन्दरं विश्ववन्द्यम् ॥"
इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे
आदित्यहृदयस्तोत्रं संपूर्णम् ॥*॥)

सूर्य्या, स्त्री.(सूर्य्यस्य भार्य्या । टाप् ।) सूर्य्यभार्य्या संज्ञा । इति शब्दरत्नावली ॥ इन्द्रवारुणी । इति राजनिर्घण्टः । नवोढ़ा । इति शब्दरत्नावली ॥ यथा, श्रीभागवते । १० । १ । २८ ।
"तस्यां हि कर्हिचिच्छौरिर्ब्बसुदेवः कृतोद्वहः ।
देवक्या सूर्य्यया सार्द्धं प्रयाणे रथमाहरत् ॥"
(वाक् । इति निघण्टुः । १ । ११ । "सर्त्तेर्गत्यर्थात् सुवतेर्व्वा प्रेरणार्थात् राजसूय-सूर्य्येत्यादिना निपातनात् क्यपि सर्त्तेरुत्वं सुवतेर्व्वा रुड़ागमः । सरति गच्छति क्षोतून् प्रति, कर्म्मण्यन्यस्मिं वा सुवति प्रेरयति चोदनारूपा पुरुषादीनिदं कुर्व्वन्ति । यद्वा, सुपूर्व्वादीरतेः क्त्यप्युटो बहुलम्। इति कर्म्मण्यपि क्यपि निपातनाद्रूपसिद्धिः । सुष्ठु ईर्य्यते उच्चार्य्यते इति सूर्य्या । यद्वा, षु प्रेरणेसुसूधीभ्यः क्रन्इति क्रन्-प्रत्ययः । प्रेर्य्यते उच्चारणकाले प्राणेन सूरा छन्दसि स्वाध इति यत्प्रत्ययः सूर्य्या । यद्वा, सूरयो मेधाविनः तानर्हति छन्दसि च,इति यत् प्रत्ययः । यद्वा, सूरिषु साधुः । तत्र साधुः इति यत् ।" इति तट्टीकायां देवराजयज्वा ॥)

सूर्य्यार्घ्यं, क्ली.(सूर्य्याय देयमर्घ्यं ।) सूर्य्यसम्प्रदानकार्घ्यम् । अग्निपूजायां पच्छिद्रावधारणार्थं सूर्य्यार्घ्यदानम् । यथा,—
"ततो भास्करबीजेन सहितेनासुना पुनः ।
मन्त्रेण भास्कराय्यार्घ्यमच्छिद्रार्थं निवेदयेत् ॥
नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे ।
जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने ॥
ततः कृताञ्जलिर्भूत्वा पठित्वा मन्त्रमीरितम् ।
एकाग्रमनसा वाग्भिरच्छिद्रमवधारयेत् ॥
यन्न्यूनं तपन्न्यूनं यच्छिद्रं पूजने मम
सर्व्वं तदच्छिद्रमस्तु भास्करस्य प्रसादतः ॥"
इति कालिकापुराणे ५६ अध्यायः ॥*।

रोगादिशान्त्यर्थं सूर्य्यस्य हंसादिसप्ततिनामभिः सप्ततिधार्घ्यप्रदानप्रमाणं यथा,—
"हंसो भानुः सहस्रांशुस्तपनस्तापनो रविः।
विकर्त्तनो विवस्वांश्च विश्वकर्म्मा विभावसुः॥
विश्वरूपो विश्वकर्त्ता मार्त्तण्डो मिहिरोंऽशुमान्।
आदित्यश्चोष्णगुः सूर्य्योऽर्य्यमा ब्रध्नो दिवाकरः॥
द्वादशात्मा सप्तहयो भास्करोऽहस्करः खगः।
सूरः प्रभाकरः श्रीमान् लोकचक्षुर्ग्रहेश्वरः॥
त्रिलोकेशो लोकसाक्षी तमोरिः शाश्वतः शुचिः।
गभस्तिहस्तस्त्रीवांशुस्तरणिः शुभदोरणिः॥
द्युमणिर्हरिदश्वोऽर्को भानुमान् भयनाशनः।
छन्दोऽश्वो वेदवेद्यश्च भास्वान् पूषा हृषाकपिः॥
एकचक्ररथो मित्रो मन्दहारिस्तमिस्रहा।
दैत्यहा पापहर्त्ता च धर्म्माधर्म्मप्रकाशकः॥
ज्ञैत्रिकश्चित्रभानुश्च कलिघ्नस्तार्क्ष्यवाहनः।
दिक्पतिः पद्मिनीनाथः कुशेशयकरो हरिः॥
धर्म्मरश्मिर्दुर्निरीक्षश्चण्डांशुः कश्यपात्मजः।
एभिः सप्ततिसंख्याकैः पुण्यैः सूर्य्यस्य नामभिः॥
प्रणवादिचतुर्थ्यन्तैर्नमस्कारसमन्वितैः।
प्रत्येकमुत्तरावाम हृष्टा हृष्टा दिवाकरम्॥
विगुणञ्च पाणियुग्मेन ताम्रपात्रं सुनिर्म्मलम्।
जानुभ्यामवनीं गत्वा परिपूर्य्य जलेन च॥
करवीरादिकुसुमै रक्तचन्दनमिश्रितैः।
दूर्व्वाङ्कुरैरक्षतैश्च निःक्षिप्तैः पात्रमध्यतः॥
दद्यादर्घ्यमनर्घ्याय सवित्रे ध्यानपूर्व्वकम्।
उपमौलिसमानौ च तत्पात्रं नान्यदृक्षतः॥
प्रतिमन्त्रं नमस्कुर्य्यादुदयास्तमयौ रविम्।
अनया नाम सप्तत्या महामन्त्ररहस्यया॥
एवं कुर्व्वन्नरो जातु न दरिद्रो न दुःखभाक्।
व्याधिभिर्म्मुच्यते घोरैरपि जन्मान्तरार्জ্জितैः॥
विनौषधैर्व्विना वैद्यैर्व्विना पथ्यपरिग्रहैः।
कालेन निधनं प्राप्य सूर्य्यलोके महीयते॥"
इति स्कन्दपुराणे काशीखण्डे ८ अध्यायः॥

सूर्य्यालोकः, पुं, (सूर्य्यस्य आलोकः।) आतपः। इति राजनिर्घण्टः॥

सूर्य्यावर्त्तः, पुं, (सूर्य्य इव आवर्त्तते इति। आ+वृत्+घञ्।) चुपविशेषः। डुड़डुड़िया इति भाषा। अस्य गुणः। सूर्य्यावर्त्तो विबन्धघ्नः। इति राजवल्लभः॥ शाकविशेषः। सुलचिया इति भाषा। तत्पर्य्यायः।
"पार्व्वतेयश्च करभो वह्निः कपिपिप्पली।
जामाताखी क्वचित् प्रोक्तः सूर्य्यावर्त्तः सितोऽपरः॥"
इति रत्नमाला॥
"वराहकालो कथितः सूर्य्यावर्त्तस्तु शाब्दिकैः॥"
इति हारावली॥

सूर्य्यावर्त्ता, स्त्री, (सूर्य्य इव आवर्त्तते या। आ+वृत्+घञ्। टाप्।) आदित्यभक्ता। इति राजनिर्घण्टः॥

सूर्य्याश्मा, [न्] पुं, (सूर्य्यप्रियोऽश्मा प्रस्तरः।) सूर्य्यकान्तमणिः। इति हेमचन्द्रः॥

सूर्य्याश्वः, पुं, (सूर्य्यस्य अश्वः।) सूर्य्यघोटकः। तत्पर्य्यायः। वाताटः २ हरितः ३। इति त्रिकाण्डशेषः॥

सूर्य्यास्तं, क्ली, (सूर्य्यस्य अस्तम्।) सूर्य्यस्यास्ताचलगमनम्। यथा,—
"निशीथाद्ध इत्यनेन अर्द्धरात्रपूर्व्वकालत्वेन सूर्य्यास्तमयकालस्यापि लाभात्॥" इति तिथ्यादितत्त्वम्॥

सूर्य्याङ्गं, क्ली, (सूर्य्यस्य आङ्गा आङ्गा यस्य।) ताम्रम्। इति त्रिकाण्डशेषः॥ सूर्य्यनामके, त्रि॥

सूर्य्याह्वः, पुं, (सूर्य्यस्य आह्वा आह्वा यस्य।) अर्कवृक्षः। इति राजनिर्घण्टः॥

सूर्य्येन्दुसङ्गमः, पुं, (सूर्य्येण सह इन्दोः सङ्गम एकराश्यवस्थानरूपमेलनं यत्र।) अमावास्या। इत्यमरः। १। ४। ८॥ सूर्य्यचन्द्रमेलनञ्च॥

सूर्य्योढ़ः, पुं, (सूर्य्यं ऊढ़ोऽङ्गतो यत्र।) सूर्य्यास्तकालप्राप्तोऽतिथिः। यथा,—
"सूर्य्योढ़स्तु स सम्प्राप्तो यः सूर्य्येऽस्तं गतेऽतिथिः॥"
इति हेमचन्द्रः॥

यथा, विष्णुपुराणम्।
"दिवातिथौ तु विमुखे गते यत् पातकं भवेत्
तदेवाष्टगुणं विद्यात् सूर्य्योढ़े विमुखे गते॥"
इत्याह्निकाचारतत्त्वम्॥

सूर्य्योदयः, पुं, (सूर्य्यस्य उदयः।) सूर्य्यस्य प्रकाशः। यथा, विष्णुधर्म्मोत्तरे।
"सावने च तथा मासि त्रिंशत्सूर्य्योदयाः स्मृताः
आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तितः॥"
इति मलमासतत्त्वम्॥

तत्र शयननिषेधो यथा,—
"सूर्य्योदये चास्तमिते च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम्॥"
इति लक्ष्मीचरितम्॥ * ॥

तत्काले स्नानादेः कर्त्तव्यता यथा,—
"सूर्य्योदयं विना नैव स्नानदानादिकाः क्रियाः
इति प्रायश्चित्ततत्त्वम्॥

सूष, प्रसवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) षष्ठस्वरौ। सूषति। इति दुर्गादासः॥

सृ, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) सरति। नालानं करिणा सत्ते इति रघौ कर्म्मकर्त्तृत्वादिति रमानाथः। तच्चिन्त्यं कर्त्तृस्थभावधातूनां तन्निषेधात्। वस्तुतस्तु गणकृतानित्यत्वादात्मनेपदम्। नालानैरिति वा पाठ्यं तत्र कर्म्माविवक्षायां भावे प्रत्ययः। इति दुर्गादासः॥

सृ, क गतौ। स्तुतौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, सारयति। इति दुर्गादासः॥

सृ, र लि गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) र, वैदिकः। लि, ससर्त्ति। इति दुर्गादासः॥

सृक्, [ज्] पुं, (सृजतीति। सृज्+क्विप्।) सृष्टिकर्त्ता। तस्य रूपान्तराणि। सृग्। सृट्। सृड्। इति सिद्धान्तकौमुदी॥

सृक, पुं, (सरतीति। सृ गतौ+"सृहृभूशुधिमुधिभ्यः कक्।" उणा० ३। ४१। इति कक्। कैरवः। बाणः। इत्युनादिकोषः॥ पद्मम्। वायुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (वज्रः। इति निघण्टुः। २। २०॥ सरणशीले, त्रि। यथा, ऋग्वेदे। १०। १८०। २।
"सृकं संशाय पविमिन्द्रतिग्मम्॥"
"सृकं सरणशीलम्।" इति तट्टीकायाम्॥)

सृकण्डुः, स्त्री, कण्डूरोगः। इति शब्दरत्नावली॥

सृकालः, पुं, शृगालः। इति शब्दचन्द्रिका॥

सृक्क, [न्] क्ली, (सृजति लालादीनिति। सृज्+बाहुलकात् कनिन्।) सृक्कणी। इति सुभूतिः॥ इत्यमरटीकायां भरतः॥ (यथा, महाभारते। ३। १२५। २।
"भयात्संस्तम्भितभुजः सृक्कणी लेलिहन्मुहुः॥")

सृक्कं, क्ली, सृक्कणी। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। २। १६।
"जन्तवश्चात्र मूर्च्छन्ति सृक्कस्योभयतोमुखात्॥")

सृक्कणी, स्त्री, ओष्ठयोः प्रान्तभागः। इति पाणिनिः। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते। ६। ६०।
"भ्रूमौ यः प्रसरति सर्पवत् कदाचित्
सृक्कण्यौ विलिहति जिह्वया प्रसह्य॥")

सृक्कि, क्ली, सृक्कणी। इत्यमरः। इत्यमरटीकायां भरतः॥

सृक्क, [न्] क्ली, (सृजति लालादीनिति। सृज्+वनिप्।) ओष्ठप्रान्तभागः। यथा,—
"————प्रान्तावोष्ठस्य सृक्कणी।"
इत्यमरः॥
"ओष्ठयोर्व्वामदक्षिणौ प्रान्तौ सृक्कणी उच्येते ओष्ठस्येति जातावेकत्वम्। सृजतो लालादि सृक्कणी व्रासुसिति क्वनिप् निपातनात् कङ्। सृक्कणा कर्णेतिप्रयोगात् वसंयोगः। अन्यथा टायां सदानोऽङ्गोप इत्यङ्गोपः स्यात्।
'महासृक्काय शोभितौ नृसिंहनखराग्रवत्।'
इति श्रेषात् ककारद्वयसंयोगोऽपि। सृक्क नान्तं क्लीवं सृक्कणी क्लीवे इति सुभूतिः। प्रान्तावोष्ठस्य सृक्कणी क्लीवकाण्डेऽमरदत्तश्च। ईबन्तापि सृक्कणी। सृक्कण्यौ विलिहति जिह्वया तथैवेति रुद्रविनिश्चयः।
'स सृक्कणीप्रान्तमसृक्प्रदिग्धं
प्रलेलिहानो हरिणा विरुब्धैः।'
इति पाणिनिः॥

सृक्कि क्लीवमिदन्तञ्च सक्थ्यस्थिनी दधि सर्पिश्च तथा वारिः स्यादित्यरुणः। सृक्कं क्लीवमदन्तञ्च
'सृक्के द्वे चैव विज्ञेये चत्वारिंशच्च वक्त्रजाः।'

इत्युक्तेः। वामं लिहन् सृक्कमरण्यघूर्णं इति वसन्तराजप्रयोगाच्च।" इति भरतः॥

सृक्कं, क्लो, ओष्ठप्रान्तभागः। इति वसन्तराजप्रयोगः। इत्यमरटीकायां भरतः॥

सृक्कणी,स्त्री,ओष्ठप्रान्तभागः। कस इति भाषा। इति पाणिनिः। इत्यमरटीकायां भरतः। २। ६। ८१॥

सृक्कि, क्लो, ओष्ठयोः प्रान्तभागः। इत्यरुणः। इत्यमरटीकायां भरतः। २। ६। ८१॥

सृक्किणी, स्त्री, ओष्ठयोरन्तरम्। इति राजनिर्घण्टः॥

सृगः, पुं, (सरतीति। सृ+बाहुलकात् गक्।) भिन्दिपालः। इत्यमरः। २। ८। ८१॥

सृगालः,पुं,(सृजति मायामिति। सृज्+बाहुलकात् कालन्। न्यङ्कादित्वात् कुत्वम्)जम्बुकः। इति शब्दरत्नावली॥दैत्यविशेषः। इति केचित्॥

सृङ्का, स्त्री,शब्दवती रत्नमयी माला। यथा,—

"तमब्रवीत् प्रीयमाणो महात्मा
वरं तवेहाद्य ददामि भूयः।
तवैव नाम्ना भवितायमग्निः
सृङ्कां चेमामनेकरूपां गृहाण॥"

इति कठोपनिषदि प्रथमा वल्ली॥

"सृङ्कां शब्दवतीं रत्नमयीं मालां इमामनेकरूपां विचित्रां गृहाण स्वीकुरु। सृङ्कां वाकुत्सितां गतिं कर्म्ममयीं गृहाण। अन्यदपि कर्म्मविज्ञानमनेकहेतुत्वात् स्वीकुर्व्वित्यर्थः।" इत्यादिशाङ्करभाष्यम्॥

सृज, श्रौ ग्र विसर्गे। इति कविकल्पद्रुमः॥(तुदः पर०-सक०-अनिट्।) श्रौ, असाक्षीत्। ग्र, सृजति। इति दुर्गादासः॥

सृज, य ङ श्रौ विसर्गे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।)य ङ,सृज्यते। श्रौ, स्रष्टा। सरीसृज्यते। विसर्गस्त्यागः। त्यागो व्युद्ग्रां पर एव अन्यत्र करोतीत्यर्थः। यथा। उपासनामेत्य पितुः स्म सृज्यते इति नैषधम्॥ संपूर्व्वोऽयमकर्म्मकः। यथा। संसृज्यते सरसिजैररुणांशुभिन्नैः निशापरिणामवायुरिति रघुः। इति दुर्गादासः॥

सृजकाचारः, पुं, सर्ज्जिकाचारः। इत्यमरटीकायां रमानाथः॥

सृणिः,पुं,(सरतीति। सृ+"सृविषिभ्यां कित्।" उणा० ४। ४९। इति निः। सच कित्। णत्वञ्च।) शत्रुः। इति शब्दमाला॥

सृणिः, स्त्री, (सृ+निः। णत्वञ्च।) अङ्कुशः। इत्यमरः। २। ८।४१॥ (सृणिद्वयोरित्युणादिवृत्तौ उज्ज्वलदत्तः॥ तथा च शिशुपालवधे। ५। ५।

"आरुचमग्नमवमत्य सृणिं सिताग्रमेकः पलायत जवेन कृतार्त्तनादः॥")

सृणिका, स्त्री, लाला। इत्यमरः। २। ६।६७॥

सृणी, स्त्री, (सृणि+कृदिकारादिति ङीष्।) अङ्कुशः। इत्यमरः। २। ८। ४१॥

सृणीका, स्त्री,लाला। इत्यमरटीकायां रामाश्रमः। २। ६। ६७॥

सृतः, त्रि, (सृ+क्तः।) गतः। (यथा, महाभारते। ८। २३। २८।

"गान्धारराजस्तु पुनर्वाक्यमाह ततो बली।
निवर्त्तध्वमधर्म्मज्ञा युध्यध्वं किं सृतेन वः॥")

सृतिः, स्त्री, (सृ+क्तिन्।) गमनम्। मार्गः। इति मेदिनी॥ (यथा, गीतायाम्। ८। २७।

"नैते सृती पार्थ जानन् योगी मुह्यति कश्चन।
तस्मात् सर्व्वेषु कालेषु योगयुक्तो भवार्জ্জুন॥"*

जन्म। इति स्वामी॥ यथा, भागवते। १०। ६०। ४३।

"स्वाग्ने तवाङ्घ्रिवरणं सृतिभिर्भ्रमन्त्या
यो वै भजन्तमुपयात्यसृतापवर्गः॥"

निर्म्माणम्। यथा, भागवते। ३। २। १३।

"कार्त्स्न्येन चाप्येष गतं विधातुर्व्वाक्सृती कौशलमित्यमन्यत॥"

"पूर्व्वाक्सृती पूर्व्वाचीनसंसारनिर्म्माणे मनुष्यनिर्म्माणे वा।" इति तट्टीका॥)

सृत्वरः,त्रि,(सरति तच्छीलः। सृ गतौ+"इनन्यञ्जिसर्त्तिभ्यः करप्।" ३। २। १६३। इति करप्।) गमनकर्त्ता। सृधातोः क्वरप्प्रत्यये तनागमेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥

सृत्वरी,स्त्री,(सृ+करप्। सृ+ङीनिप्। ङीप्) माता। इति संक्षिप्तसारोणादिवृत्तिः॥ गमनकर्त्री। इति मुग्धबोधव्याकरणम्॥

सृत्वा, [न्]पुं,(सृ गतौ+"शॄङ्कृगॄकृहीति।" उणा० ४। ११३। इति क्वनिप्।) विसर्गः। हृद्दिः। प्रजापतिः। इति संक्षिप्तसारोणादिवृत्तिः॥

सृदरः,पुं, (दॄ विदारणे+"कृदराद्यश्च।" उणा० ५। ४१। इति अच्प्रत्ययेन निपातनात् साधुः।) सर्पः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

सृदाकुः, पुं, (सरतीति। सृ+"सर्त्तेर्दुक् च।" उणा० ३। ७८। इति काकुर्दुगागमश्च।) वायुः। वज्रम्। अग्निः। प्रतिसूर्य्यकः। इति मेदिनी॥मृगः। इति संक्षिप्तसारोणादिवृत्तिः॥

सृदाकुः, स्त्री,(सरतीति। सृ गतौ+काकुर्दुगागमश्च।) नदी। इत्युणादिकोषः॥

सृप, सृ श्रौ गत्याम्। इति कविकल्पद्रुमः॥(स्वाः पर०-सक०-अनिट्।) स्र, असृपत्। अस्य स्रदित्वेऽपि क्षुभस्तम्भस्रुभृ इति विशेषविधानात् पक्षे व्यां सिः तेन असार्षीत् असाक्षीत् इत्यपि। श्रौ, सर्प्ता। इति दुर्गादासः॥

सृपाटः, पुं, सृपाटी। इति स्त्रीपुंलिङ्गसंग्रहटीकायां भरतः। ३। ५। ३८॥

सृपाटिका, स्त्री, चक्षुः। इति हेमचन्द्रः॥

सृपाटी, स्त्री, (सृपाट+गौरादित्वात् ङीष्।) परिमाणभेदः। इति स्त्रीपुंलिङ्गसंग्रहटीकायां भरतः। ३।५।३८॥ रत्नधारा। इति तट्टीकायां गोवर्द्धनः॥

सृप्रः, पुं, (सृप गतौ+"स्फायितञ्चिवञ्चीति।" उणा० २। १३। इति रक्।) चन्द्रः। इत्युणादिकोषः॥

सृफ,उ हिंसे। इति कविकल्पद्रुमः॥(भ्वा०-परसक०-सेट्। क्वावेट्।) सस्रमस्वरौ। उ, सर्भित्वा सृभ्वा। इति दुर्गादासः॥

सृमरः, पुं,(सरति तच्छीलः। सृ गतौ+"सृचस्यदः क्मरच्।" ३।२।१६०। इति क्मरच्।) पशुविशेषः। इत्यमरः। २। ५। ११॥ बालमृगः। इति केचित्॥ (यथा, रामायणे। ३। १०३। ४२।

"वराहमृगसिंहाश्च महिषाः सुमरास्तथा।
व्याघ्रगोकर्णगवया विव्रेसुः पृषतैः सह॥"

सृष्टं, त्रि, (सृज्+क्तः।) निर्म्मितम्। युक्तम्। निश्चितम्। बहुलम्। इति मेदिनी॥ भूषितम्। इत्यजयः॥ त्यक्तम्। (यथा, रामायणे। २। ३५। १५।

"महाब्रह्मर्षिसृष्टा वा ज्वलन्तो भीमदर्शनाः।
धिक्वाग्दण्डा न हिंसन्ति रामप्रव्राजने स्थिताम्॥")

सृष्टिः स्त्री,(सृज्+क्तिन्।)निर्म्मितिः। स्वभावः। इति मेदिनी॥ निर्गुणः इति शब्दरत्नावली॥* ब्रह्माण्डसृष्टिर्यथा। सृष्टेः पूर्व्वं मनश्चक्षुराद्यगोचरो भगवान् एक एवासीत्। यदा स स्वेच्छया द्रष्टा सन् दृश्यं नापश्यत् तदा विगुणमयीं मायां प्रकाशयामास। ततो भगवान् स्वांशेन पुरुषरूपं कृत्वा तस्यां मायायां स्ववीर्य्यं चैतन्यं आधत्त। सा समष्टिजीवरूपं महत्तत्त्वं जनयामास। तस्मात् त्रिविधोऽहङ्कारो जातः तत्र सात्त्विकाहङ्कारात् मनइन्द्रियाधिष्ठातृदेवताश्च जाताः। राजसाहङ्कारात् दशेन्द्रियाणि जातानि। तामसाहङ्कारात् पञ्च महाभूतानि तेषां पञ्च गुणाश्च जाताः। एवं प्रकृत्यादिभिरैतैश्चतुर्विंशतितत्त्वैर्ब्रह्माण्डं निर्म्माय भगवान् तस्मिन्नेकेनांशेन प्रविश्य गर्भोदकसंज्ञकं जलं ससर्ज। तज्जलमध्ये योगनिद्रया सहस्रयुगमितं कालं स्थितवान्। तदन्ते उत्थाय स्वयमंशेन ब्रह्मा भूत्वा सर्व्वान् सृष्ट्वा नानावतारान् कृत्वा पालयति। कल्पान्ते रुद्ररूपेण संहरति च। इति श्रीभागवतमते संक्षेपसृष्टिः॥ * ॥ अपि च।

"स्थावरान्ताः सुराद्यास्तु प्रजा ब्रह्मांशतुर्विधाः।
ब्रह्मणः कुर्व्वतः सृष्टिं जज्ञिरे मानसीस्तु ताः॥
ततो देवासुरपितॄन् मनुष्यांश्च चतुष्टयम्।
सिसृक्षुरात्मांशेतानि स्वमात्मानमयूयुजत्॥
युक्तात्मनस्तमोमात्रा उद्रिक्ताभूत् प्रजापतेः।
सिसृक्षोर्जघनात् पूर्व्वमसुरा जज्ञिरे ततः॥
उत्ससर्ज ततस्तान्तु तमोमात्रात्मिकां तनुम्।
सा तु त्यक्ता तनुस्तेन मैत्रेयाभूद्दिभावरी॥
सिसृक्षुरन्यदेहस्थः प्रीतिमाप ततः सुराः।
सत्त्वोद्रिक्ताः समुद्भूता मुखतो ब्रह्मणो द्विज॥

त्यक्त्वा सापि तनुस्तेन सत्त्वप्रायमभूद्दिनम् ।
ततो हि बलिनो रात्रावसुरा देवता दिवा ॥
सत्त्वमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम् ।
पितृवन्मन्यमानस्य पितरस्तस्य जज्ञिरे ॥
उत्ससर्ज्ज ततस्तान्तु पितॄन् सृष्ट्वापि स प्रभुः ।
सा चोत्सृष्टाभवत् सन्ध्यादिननक्तान्तरस्थितिः॥
रजोमात्रात्मिकामन्यां जगृहे स तनुं ततः ।
रजोमात्रोत्कटा जाता मनुष्या द्विजसत्तम ॥
तामप्याशु स तत्याज तनुमाद्यः प्रजापतिः ।
ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या यामिधी-
यते ॥
ज्योत्स्नोद्भवे तु बलिनो मनुष्याः पितरस्तथा ।
मैत्रेय सन्ध्यासमये तस्मादेते भवन्ति वै ॥
ज्योत्स्ना रात्राहनी सन्ध्या चत्वार्य्येतानि वै
प्रभोः ।
ब्रह्मणस्तु शरीराणि त्रिगुणोपाश्रयाणि तु ॥
रजोमात्रात्मिकामेव ततोऽन्यां जगृहे तनुम् ।
ततः क्षुद्ब्रह्मणो जाता जज्ञे कोपस्तया ततः॥
क्षुत्क्षामानन्धकारेऽथ सोऽसृजद्भगवांस्ततः ।
विरूपाः श्मश्रुला जातास्तेऽभ्यधावन्त तं
प्रभुम् ॥
मैवं भो रक्षतामेष येरुक्तं राक्षसास्तु ते ।
ऊचुः खादाम इत्यन्ये ये ते यक्षास्तु यक्षणात्॥
अप्रियेणाथ तान् दृष्ट्वा केशाः शीर्य्यन्त वेधसः ।
हीनाश्च शिरसो भूयः समारोहन्त ते शिरः ॥
भर्षणात्त्व भवन् सर्पा हीनत्वादहयः स्मृताः ।
ततः क्रुद्धो जगत्स्रष्टा क्रोधात्मानो विनिर्ममे ॥
वर्णेन कपिशेनोग्राः भूतास्ते पिशिताशनाः ।
धयन्तो गां समुत्पन्ना गन्धर्व्वास्तस्य तत्क्षणात्
पिबन्तो जज्ञिरे वाचं गन्धर्व्वास्तेन ते द्विज ।
एतानि सृष्ट्वा भगवान् ब्रह्मा तच्छक्तिचोदितः॥
ततः स्वच्छन्दतोऽन्यानि वयांसि वयसोऽसृजत्
अवयो वक्षसश्चक्रे मुखतोऽजाः स सृष्टवान् ॥
सृष्टवानुदराद्गाश्च पार्श्वाभ्याञ्च प्रजापतिः ।
पद्भ्यां चाश्वान् समातङ्गान् रासभान् गवयान्
मृगान् ॥
उद्भानश्वतरांश्चैव न्यङ्कूनन्यांश्च जातयः ।
ओषध्यः फलमूलानि रोमभ्यस्तस्य जज्ञिरे ॥
त्रेतायुगमुखे ब्रह्मा कल्पस्यादौ द्विजोत्तम ।
सृष्ट्वा पशूंश्चौषधीः सम्यक् युयोज स तदाध्वरे॥
गौरजो पौरुषो मेषो अश्वाश्वतरगर्द्दभाः ।
एतान् ग्राम्यपशूनाहुरारण्यांश्च निबोध मे ॥
श्वापदो द्विखुरो हस्ती वानरः पक्षिपञ्चमः ।
औदकाः पशवः षष्ठाः सप्तमास्तु सरीसृपाः ॥
गायत्रञ्च ऋचश्चैव त्रिवृत्साम रथन्तरम् ।
अग्निष्टोमञ्च यज्ञानां निर्म्ममे प्रथमान्मुखात्॥
यजूंषि त्रैष्टुभं छन्दः स्तोमं पञ्चदशं तथा ।
बृहत्साम तथोक्थञ्च दक्षिणादसृजन्मुखात् ॥
सामानि जगती च्छन्दः स्तोमं सप्तदशं तथा ।
वैरूपमतिरात्रञ्च पश्चिमादसृजन्मुखात् ॥
एकविंशमथर्व्वाणमाप्तोयामाणमेव च ।
अनुष्टुभं स वैराजमुत्तरादसृजन्मुखात् ॥
उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे ।
देवासुरपितॄन् सृष्ट्वा मनुष्यांश्च प्रजापतिः ॥
ततः पुनः ससर्ज्जादौ सङ्कल्पात् स पितामहः ।
यक्षान् पिशाचान् गन्धर्व्वान् तथैवाप्सरसां
गणान् ॥
नरकिन्नररक्षांसि वयःपशुमृगोरगान् ।
अव्ययञ्च व्ययञ्चैव यदिदं स्थाणुजङ्गमम् ।
तत् ससर्ज्ज तदा ब्रह्मा भगवानादिकृत् प्रभुः ॥
तेषां यै यानि कर्म्माणि प्राक्सृष्टा प्रतिपेदिरे
तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः ॥
हिंसाहिंसे मृदुक्रूरे धर्म्माधर्म्मावृतानृते ।
तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते ॥
इन्द्रियार्थेषु भूतेषु शरीरेषु च स प्रभुः ।
नानात्वं विनियोगञ्च धातैव व्यसृजत् स्वयम् ॥
नाम रूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनम् ।
वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥
ऋषीणां नामधेयानि यथा वेदश्रुतानि वै ।
तथा नियोगयोग्यानि अन्येषामपि सोऽकरोत्॥
यथर्त्तावृतुलिङ्गानि नानारूपाणि पर्य्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥
करोत्येवंविधां सृष्टिं कल्पादौ स पुनः पुनः ।
सिसृक्षाशक्तियुक्तोऽसौ सृज्यशक्तिप्रचोदितः ॥"

इति विष्णुपुराणे । १ । ५ । २७—६५ ॥

सृष्टिप्रदा, स्त्री, (सृष्टिं तद्धेतुभूतगर्भं प्रददातीति प्र + दा + कः ।) गर्भदात्रीचुपः । इति राजनिर्घण्टः ॥

सृ, गि हिंसे । इति कविकल्पद्रुमः ॥ (क्रा०-पर०-सक०-अनिट् ।) दन्त्यादिर्वकारोपधः तद्रहितोऽपीति केचित् । गि, सृणाति । सीर्णः सीर्णिः । इति दुर्गादासः ॥

सेक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, असिसेकत् । ङ, सेकते । इति दुर्गादासः ॥

सेकः, पुं, (सिच् + घञ् ।) सेचनम् । तत्पर्य्यायः । धारः २ । इति हेमचन्द्रः ॥ (यथा, रघुः । १ । ५१ ।
"सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितबल्क-
कम् ।
विश्वासाय विहङ्गानामालबालाम्बुपायिनाम्॥
तथास्य गुणाः ।
"सेकः श्रमघ्नोऽनिलदृङ्नग्नसन्धिप्रसाधकः ।
क्षतादिग्दग्धाभिहतविषृष्टानां कृजापहः ॥
जलसिक्तस्य वर्द्धन्ते यथा मूलेऽङ्कुरास्तरोः ।
तथा धातुविवृद्धिर्हि स्नेहसिक्तस्य जायते ॥"
इति सुश्रुते चिकित्सास्थाने २४ अध्याये ॥)

सेकपात्रं, क्लो, (सेकाय पात्रम्) जलसेचनाधारः । सिंउनी इति भाषा । तत्पर्य्यायः । सेचनम् ३ । इत्यमरः । १ । १० । १३ ॥

सेकिमं, क्लो, (सेकेन निर्वृत्तमिति । सेक + "भाव प्रत्ययान्तादिमप् वक्तव्यः ।" ४ । ४ । २० । इत्यस्य वार्त्तिकोक्त्या इमप् ।) मूलकम् । इति हेमचन्द्रः ॥ (सेकनिर्वृत्ते, त्रि ॥)

सेक्ता, [क्तृ]पुं, (सिञ्चति रेतः । सिच् + तृच् ।) भर्त्ता । इति हेमचन्द्रः ॥ सेचनकर्त्तरि, त्रि ॥ (यथा, ऋग्वेदे । ३ । ३२ । १५ ।
"सेक्तेव कोशं सिसिचे पिबध्यै ॥")

सेक्तृ, क्लो, (सिञ्चत्यनेनेति । सिच् + "दात्रीशसयुयुजेति ।" ३ । २ । १८२ । इति करणे ष्ट्रन् ।)
सेकपात्रम् । इति सिद्धान्तकौमुदी ॥

सेचकः, पुं, (सिञ्चतीति । सिच् + ण्वुल् ।) मेघः । सेककर्त्तरि, त्रि । इति मेदिनी ॥

सेचनं, क्लो, (सिच क्षरणे + ल्युट् ।) क्षरणम् । सेकः । (यथा, मार्कण्डेये । ३१ । १३ ।
"भुक्त्वा चाचामतां यच्च जलं यच्चाङ्घ्रिसेचने ।
ब्राह्मणानां तथैवान्ये तेन तृप्तिं प्रयान्ति वै ॥")
नौकायाः सेकभाजनम् । इति मेदिनी ॥ (अभिषेकः । यथा, महानिर्व्वाणे । २ । ११५ ।
"तद्दशांशेन हवनं तर्पणं तद्दशांशतः ।
सेचनं तद्दशांशेन तद्दशांशेन सुन्दरि ! ॥")

सेटुः, पुं, फलविशेषः । तरमुज् इति भाषा । तत्पर्य्यायः । चेलानः २ चित्रफलम् ३ सुखाशः ४ राजतेमिषः ५ लतापनसः ६ नाटाम्रः ७ । इति त्रिकाण्डशेषः जटाधरश्च ॥

सेतिका, स्त्री, अयोध्या । इति भूतशुद्धितन्त्रम् ॥

सेतुः, पुं, (सिनोति बध्नाति जलमिति । सि + अ तन्त्रने + "सितनिगमिमसीति ।" उणा० १ । ७० । इति तुन् । चेत्वादेरालिः । इत्यमरः । २ । १ । १४ ॥ तत्पर्य्यायः । आली २ । इति भरतः ॥ पूरणः ३ पिण्डलः ४ । इति शब्दरत्नावली ॥ पङ्क्तारः ५ जङ्गालः ६ सङ्करः ७ । इति जटाधरः ॥ पिण्डिलः ८ । इति शब्दरत्नावली॥ धरणः ९ । इति त्रिकाण्डशेषः ॥*॥ तद्दानादिफलं यथा,—
"सेतुप्रदानादिन्द्रस्य लोकमाप्नोति मानवः ।
प्रपाप्रदानाद्वरुणलोकसाप्नोत्यसंशयम् ॥
संक्रमाणान्तु यः कर्त्ता स स्वर्गं तरते नरः ।
स्वर्गलोके च निवसेदिष्टकासेतुकृत् सदा ॥"
इति मठादिप्रतिष्ठातत्त्वम् ॥*॥

वरुणवृक्षः । इति मेदिनी राजनिर्घण्टश्च ॥ (अस्य पर्य्यायो गुणाश्च यथा,—
"वरुणो वरणः सेतुस्त्रिकण्टाकोऽग्निदीपनः ।
वरुणः पित्तलो भेदी श्लेष्मकृच्छ्राश्ममारुतान् ॥
निहन्ति गुल्मवातास्रक्रिमीन्योषणोऽग्निदीपनः ।
कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रणवः । इति तन्त्रसारः ॥ अपि च ।
"मन्त्राणां प्रणवः सेतुस्तत्सेतुः प्रणवः स्मृतः ।
सर्वत्रनौक्षतं पूर्व्वं परस्ताच्च विशीर्य्यते ॥
नमस्कारो महामन्त्रो देव इत्युच्यते सुरैः ।
द्विजातीनामयं मन्त्रः शूद्राणां सर्व्वकर्म्मणि ॥
अकारश्चाप्युकारश्च मकारश्च प्रजापतिः ।
वेदत्रयात् समुद्धृत्य प्रणवं निर्म्ममे पुरा ॥
स उदात्तो द्विजातीनां राज्ञां स्यादनुदात्तकः ।
स्वरितश्चोद्भवानां मनसापि तथा स्मरेत् ॥

चतुर्दशस्वरो योऽसौ सेतुरीकारसंज्ञकः।
म चानुस्वारचन्द्राभ्यां शूद्राणां सेतुरुच्यते॥
निःसेतुश्च यथा तोयं क्षणान्निम्नं प्रसर्पति।
मन्त्रस्तथैव निःसेतुः क्षणात् क्षरति यज्वनाम्॥
तस्मात् सर्व्वेषु मन्त्रेषु चतुर्व्वर्णा द्विजादयः।
पार्श्वयोः सेतुमादाय जपकर्म्म समारभेत्॥
शूद्राणामादिसेतुर्व्वा द्विसेतुर्व्वा यथेच्छतः।
हे सेतू वः समाख्याताः सर्व्वदैव द्विजातयः॥"
इति कालिकापुराणे ५५ अध्यायः॥

सेतुकः, पुं, (सेतुरेव। स्वार्थे कन्।) वरुणवृक्षः। इति शब्दरत्नावली॥

सेतुबन्धः, पुं, (सेतोर्बन्धः।) लङ्कागमनार्थश्रीरामकृतसमुद्रबन्धनसेतुः। तत्पर्य्यायः। समुद्रारुः २। इति जटाधरः॥ तद्विवरणं यथा,—
"ततोऽब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः।
नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्म्मणः॥
सुतो धीमान् समर्थोऽस्मिन् कार्य्ये लब्धवरो हरिः।
कीर्त्तिं गायन्तु ते लोकाः सर्व्वलोकमलापहाम्॥
इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम्।
ततोरामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः।
नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धने॥
ततोऽतिहृष्टः प्लवगेन्द्रयूथपै-
र्महानगेन्द्रप्रतिमैर्युतो नलः।
बबन्ध सेतुं शतयोजनायतं
सुविस्तरं पर्व्वतपादपैर्दृढम्॥"
इति श्रीमदध्यात्मरामायणे लङ्काकाण्डे ३अः॥
"सेतुमारभ्यमाणस्तु तत्र रामेश्वरं शिवम्।
सङ्कल्पनियतो गत्वा पुरीं वाराणसीं नरः॥
आनीय गङ्गासलिलं रामेश्वरमभिषिच्य च।
क्षिप्त्वा समुद्रे तद्वारि ब्रह्म प्राप्नोत्यसंशयः॥
कृतानि प्रथमेनाह्ना योजनानि चतुर्दश।
द्वितीयेन तथा चाह्ना योजनानाञ्च विंशतिः॥
तृतीयेन तथा चाह्ना योजनान्येकविंशतिः।
चतुर्थेन तथा चाह्ना द्वाविंशति तथा कृतम्॥
पञ्चमेन त्रयोविंशयोजनानां समन्ततः।
बबन्ध सागरे सेतुं नलो वानरसत्तमः॥
तेनैव जग्मुः कपयो योजनानां शतं द्रुतम्।
असंख्याताः सुवेलाद्रिं रुरुहुः प्लवगोत्तमाः॥
आरुह्य मारुतिं रामो लक्ष्मणोऽप्यङ्गदं तथा।
दिदृक्षू राघवौ लङ्कां नानाचित्रध्वजाकुलाम्॥"
इति तत्रैव ४ अध्यायः॥
(चैत्रादेरालिबन्धनम्। यथा, महाभारते। ७। ८४। २।
"गतोदकं सेतुबन्धो यादृक् तादृगयं तव।
विलापो निष्फलो राजन् मा शुचो भरतर्षभ॥"

सेतुभेदी, [न्] पुं, (सेतुं भिनत्तीति। भिद्+णिनिः।) दन्तीवृक्षः। इति शब्दचन्द्रिका॥

सेतुवृक्षः, पुं, (सेतुनामको वृक्षः।) वरुणवृक्षः। इति शब्दमाला राजनिर्घण्टश्च॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"वरुणस्तिक्तशाकश्च सेतुवृक्षोऽश्मसां पतिः॥")

सेचं, क्ली, (सीयतेऽनेनेति। षिञ् बन्धने+"दान्त्रीशसयुयुजेति।" ३। २। १८२। इति ट्रन्।) निगड़ः। इति सिद्धान्तकौमुदी॥ बेड़ी इति भाषा॥

सेना, स्त्री, चतुर्व्विंशतिहस्त्यर्हमातॄणां कृतीया माता। इति हेमचन्द्रः॥ इनेन प्रभुणा सह वर्त्तते या। (यद्वा, सिनोति शत्रुमिति। षिञ् बन्धने+"कृञ्जृषीति।" उणा० ३। १०। इति नः। स च नित्। टाप्।) चतुरङ्गबलम्। फौज इति पारस्यभाषा। (यथा, रघुः। १।१९।
"सेनापरिच्छदस्तस्य द्वयमेवार्थसाधनम्।
शास्त्रेष्वकुण्ठिता बुद्धिर्म्मौर्व्वी धनुषि चातता॥")
तत्पर्य्यायः। ध्वजिनी २ वाहिनी ३ पृतना ४ अनीकिनी ५ चमूः ६ वरूथिनी ७ बलम् ८ सैन्यम् ९ चक्रम् १० अनीकम् ११। इत्यमरः। २। ८। ७८॥ वाहना १२ पूतना १३ गुल्मिनी १४ वरचमूः १५। इति शब्दरत्नावली॥ केचित्तु ध्वजिन्यादि सप्तकं सेनायाम्। बलादि चतुष्कं सेनाङ्गे इत्याहुः। अतएव ध्वजिन्यादि सप्तकं सामान्येन सेनायाम्। बलादि चतुष्कन्तु सामान्येन सेनायां सेनाङ्गे च इति मतम्॥ इति भरतः॥

सेनाङ्गं, क्ली, (सेनाया अङ्गम्।) हस्त्यश्वरथपदातीनां समूहः। यथा,—
"हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्॥"
इत्यमरः। २। ८। ३३॥
(यथा, बृहत्संहितायाम्। ११। ४२।
"सेनाङ्गेषु नृपाणां गृहतरुशैलेषु चापि देशानाम्॥")

सेनाचरः, त्रि, (सेनायां चरतीति। चर+"भिक्षासेनादायेषु।" ३। २। १७। इति टः।) सैन्यानुगामी। सेनया सह गन्ता। इति केचित्॥ (यथा, महाभारते। १। १३०। १४।
"मृगयाञ्चरतो राज्ञः शान्तनोश्च यदृच्छया।
कञ्चित् सेनाचरोऽरण्ये मिथुनं तदपश्यत॥")

सेनानीः, पुं, (सेनां नयतीति। नी+"सत्सूद्विषेति।" ३। २। ६१। इति क्विप्।) कार्त्तिकेयः। इत्यमरः। १। १। ४२॥ (यथा, रघुः। २। ३७।
"अथैनमद्रेस्तनया शुशोच
सेनान्यमालोढ़मिवासुरास्त्रैः॥")
वाहिनीपतिः। इति चामरः। २। ८। ६२॥ (यथा, महाभारते। ४। २। ६।
"स तु कामान्निसंतप्तः सुदृष्णामभिगम्य वै।
प्रहसन्निव सेनानीरिदं वचनमब्रवीत्॥")

सेनापतिः, पुं, (सेनायाः पतिः।) कार्त्तिकेयः। (क्वचित् वाच्यलिङ्गेऽपि दृश्यते। यथा, महानिर्व्वाणतन्त्रे १। १४।
"किमुच्यते महाप्राज्ञे कथ्यतां प्राणवल्लभे।
यदकथ्यं गणेशेऽपि स्कन्दे सेनापतावपि॥")
अनीकाधिपतिः। इति मेदिनी॥ अस्य पर्य्यायः। सेनानीः २ वाहिनीपतिः ३। इत्यमरः। २। ८। ६२॥ सेनापतिलक्षणं यथा,—
"कुलीनः शीलसम्पन्नो धनुर्व्वेदविशारदः।
हस्तिशिक्षाश्वशिक्षासु कुशलः श्लक्ष्णभाषणः॥
निमित्तेषु शकुनज्ञाने वेत्ता चैव चिकित्सिते।
कृतज्ञः कर्म्मणां शूरस्तथा क्लेशसहो ऋजुः॥
व्यूहतत्त्वविधानज्ञः फल्गुसारविशेषवित्।
राज्ञा सेनापतिः कार्य्यो ब्राह्मणः क्षत्रियोऽथवा॥"
इति मात्स्ये राजधर्म्मे। २१५। ८—१०॥
सेनापतौ वर्णनीयानि यथा,—
"सेनापतिर्व्वितावासः स्वामिभक्तः सुधीरधीः।
अभ्यासी वाहने शस्त्रे शास्त्रे च विजयी रणे॥"
इति कविकल्पलतायाम् १ स्तवके वर्ण्यस्थितिर्नाम ३ कुसुमम्॥

सेनामुखं, क्ली, (सेनाया मुखम्।) पत्तित्रयः। स तु सेनासङ्गाविशेषः। तद्यथा। हस्ती ३ रथः ३ अश्वः ९ पदातिः १५ समुदायेन त्रिंशत् ३०। इत्यमरः। २। ८। ८१॥ (यथा च महाभारते। १। २। १९।
"एको रथो गजश्चैको नराः पञ्च पदातयः।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते॥
पत्तिस्तु त्रिगुणामेतामाहुः सेनामुखं बुधाः॥")
पुरद्वारसंमुखवर्त्तिपथः। इति केचित्॥

सेनारक्षः, पुं, (सेनां रक्षतीति। रक्ष+अण्।) सेनारक्षकप्रहरिकादिः। तत्पर्य्यायः। सैनिकः २ इत्यमरः। २। ८। ६१॥

सेफः, पुं, शेफः। इति जटाधरः॥

सेमन्ती, स्त्री, पुष्पविशेषः। सेंउती इति भाषा। यथा, नारसिंहे ५२ अध्याये।
"चम्पकानां पुष्पशतादशोकं पुष्पमुत्तमम्।
अशोकानां सहस्राद्धि सेमन्ती पुष्पमुत्तमम्॥"

सेराहः, पुं, पीयूषवर्णाश्वः। स तु दुग्धवच्छ्वेतवर्णः इति हेमचन्द्रः॥

सेरुः, त्रि, (षि ञ् बन्धने+"दाधेटसिग्रदसदो रुः।" ३। २। १५९। इति रुः।) बन्धनकर्त्ता। इति मुग्धबोधव्याकरणम्॥

सेल, ऋ चालगत्योः। इति कविकल्पद्रुमः॥ (भ्वा० पर०-सक० सेट्।) ऋ, असिसेलत्। इति दुर्गादासः॥

सेलुः, पुं, श्लेलुवृक्षः। स तु श्लेष्मातकः। इति भरतहिरुपकोषः॥

सेव, अ ङ ऋ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-आत्म०-च-सक०-सेट्।) अ, सेवति सेवते। ङ, सेवते। ऋ, असिसेवत्। सेवनं आराधनं उपभोगः आश्रयणञ्च। विष्णुं सेवते। सुखं सेवते। तीर्थं सेवते साधुः। अन्ये त्वस्मात् परस्मैपदमप्यन्यमानाः। नीचं सम्बद्धमपि सेवति नीच एव। स्वाधीने विभवेऽप्यहो नरपतिं सेवन्ति किं मानिनः॥ इत्यादौ गणकृतानित्यत्वमाहुः। इति दुर्गादासः॥

सेवं, क्ली, (सेव्यते यादृति। सेव+घञ्।) सेविफलम्। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो गुणाश्च यथा,—

"मुष्टिप्रमाणं वदरं सेवं सिवितिकाफलम्।
सेवं समोऽपित्तघ्नं हृद्दृणं कफकृद्गुरु:।
रसे पाके च मधुरं शिशिरं रुचिशुक्रकृत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सेवक:, पुं, (सेवते इति। सेव+ण्वुल्।) प्रसेवक:। इति मेदिनी॥

सेवक:, त्रि, (सेवते इति। सेव सेवने+ण्वुल्।) अनुजीवी। भृत्य:। इति मेदिनीशब्दरत्नावली॥ (यथा, हृहत्संहितायाम्। ५। ३४।

"पूर्व्वेण सलिलपूर्णां करोति वसुधां समागतो दैत्य:।
पश्चात् कर्षकसेवकबीजविनाशाय निर्दिष्ट:॥")

तस्य प्रभुसन्निधौ प्रश्नकरणत्वमत्वं यथा,—

"किङ्कर: किङ्करी वापि सर्व्वथा प्रष्टुमीश्वर:।
यो यस्य सेवानिरत: स कं पृच्छति तं विना॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३अध्याय:॥
(आश्रयिता। यथा, भागवते। ४। १६। १६।

"दृढव्रत: सत्यसन्धो ब्रह्मण्यो हृढसेवक:।
शरण्य: सर्व्वभूतानां मानदो दीनवत्सल:॥")

सेवकालु:, पुं, निशाभङ्गाहृद्य:। दुग्धपेया इति ख्यात:। इति शब्दचन्द्रिका॥

सेवती, स्त्री, पुष्पविशेष:। सेँउती इति भाषा। तत्पर्य्यायगुणा:।

"शतपत्री तरुण्युक्ता कर्णिका चारुकेसरा।
महाकुमारी गन्धाढ्या लक्षपुष्पातिमञ्जुला॥
शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघु:।
दोषत्रयासृजिद्दर्ष्मा तिक्ता कटुी च पाचनी॥"
इति भावप्रकाश:॥

सेवधि:, पुं, (सेव: सेवनं धीयतेऽस्मिन्निति। सेवां विना निधिलाभाभावादित्यर्थ:। धा+कि:।) निधि:। इत्यमरटीकायां भरत:॥ तालव्यशकारादिरप्ययम्॥

सेवनं, क्ली, (सिव तन्तुसन्ताने+ल्युट्।) सूच्यादिना वस्त्रादिसीवनम्। सेलाइ इति सेयासी इति च भाषा। तत्पर्य्याय:। सीवनम् २ सूति: ३। इत्यमर:। ३। २। ५॥ ऊति: ४ व्यूति: ५। इति शब्दरत्नावली॥ [यथा, सुश्रुते। १। ८।

"सूच्य: सेवने। इत्यष्टविधे कर्म्मण्युपयोग: शस्त्राणां व्याख्यात:॥"॥ सेव सेवने+ल्युट्।) उपास्ति:। उपासना। इति मेदिनी॥ (यथा, भागवते। ४। १८। १६।

"तमन्वीयुर्भागवता ये च तत्सेवनोत्सुका:॥"
आश्रय:। यथा, भागवते। ७। १२। २०।

"सत्यानृतञ्च वाणिज्यं श्वहृत्तिर्नीचसेवनम्।
वर्ज्जयेत् तां सदा विप्रो राजन्यश्च जुगुप्सिताम्॥"
उपभोग:। यथा, मनु:। ११। १७८।

"यत् करोत्येकरात्रेण हृषलीसेवनात् द्विज:।
तद्भुज्यभुग्जपित्वा त्रिभिर्व्वर्षैर्व्यपोहति॥")

सेवनी, स्त्री, (सीव्यत्यनयेति। सिव+ल्युट्। ङीप्।) सूची। इति हेमचन्द्र:॥ शरीरावयवसंयोगविशेष:। यथा,—

"सेवन्य: सप्त तासान्तु भवेयु: पञ्च मस्तके।
एका शेफसि जिह्वायामेको विहृन्नता: क्वचित्॥"
इति भावप्रकाश:॥

(यथा च माधवकरसंगृहीतरुग्विनिश्चयेऽर्श्व्यधिकारे।

"सामान्यलिङ्गं रुङ्नाभिसेवनीवस्तिमूर्हसु॥")

सेवा, स्त्री, (सेव्यते सेवने+"गुरोश्च हल:।" ३। ३। १०३। इत्य:। टाप्।) सेवनम्। तत्पर्य्याय:। श्वहृत्तिः २। इत्यमर:। २। ८। २॥ (यथा, मनु:। ४। ६।

"सत्यानृतञ्च वाणिज्यं तेन चैवापि जीव्यते।
सेवाश्वहृत्तिराख्याता तस्मात् तां परिवर्ज्जयेत्॥")

आराधना। उपभोग:। आश्रयणम्॥ इति सेवधात्वर्थदर्शनात्। (यथा, मनु:। १२।८७।

"वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणाञ्च संयम:।
अहिंसा गुरुसेवा च नि:श्रेयसकरं परम्॥")

अथ माघादिहादशमासेषु विष्णुसेवाविधिस्तत्फलञ्च। यथा,—

व्यास उवाच।

"विप्र हादशमासेषु माघादिषु सनातन:।
पूजितव्यो विधानेन शृणु तानि वदाम्यहम्॥
माघे मासि समायाते सर्व्वमासोत्तमे शुभे।
आमिषं मैथुनञ्चैव वर्ज्जयेद्वैष्णवो जन:॥
प्रात:स्नायी भवेन्नित्यं तैलान्यपि च वर्ज्जयेत्।
हविर्भोजनं परान्नञ्च माघे मासि परित्यजेत्॥
प्रात: शुक्लाम्बरधर: कृतपञ्चमहाध्वर:।
सपर्य्यामारभेद्विष्णो: स्थिरहृत्तो हि वैष्णव:॥
ईषदुष्णजलैर्हृद्यै: स्नापयेद्विष्णुमव्ययम्।
अतिस्निग्धैश्चन्दनेन विष्णोरङ्गञ्च लेपयेत्॥
पूजायै जगदीशस्य देवदेवस्य चक्रिण:।
प्रक्षालितानि पात्राणि जलहीनानि कारयेत्॥
स्नापयित्वा जगन्नाथमीषदुष्णजलैस्तत:।
प्रोक्षितव्यं तच्छीरं दिव्यवस्त्रेण यत्नत:॥
सलिलैरीषदुष्णैश्च य: स्नापयति केशवम्।
माघे मासि द्विजश्रेष्ठ फलं तस्य मयोच्यते॥
विमुक्त: पातकै: सर्व्वैर्ज्जन्मजन्मान्तरार्ज्जितै:।
इह भुक्त्वा सुखं सर्व्वं शेषे याति हरेर्गृहम्॥
यत्नात् प्रक्षाल्य पात्राणि कृत्वा हीनानि वारिभि:।
य: पूजयेज्जगन्नाथं तस्य पुण्यं निशामय॥
इह भुक्त्वा वरान् भोगान् रोगशोकविवर्ज्जित:।
अन्ते युगसहस्राणि तिष्ठेत् केशवमन्दिरे॥
प्रभातेऽपि च सन्ध्यायां पुरतश्चक्रपाणिन:।
ज्वलन्तं स्थापयेद्वह्निं निर्धूमं वैष्णवो जन:॥
शीतस्यावरणार्थाय प्रात: सायञ्च यो जन:।
माघे विष्णुव्रतो वह्निं ज्वालयेत्तत्फलं शृणु॥
इह भुक्त्वाखिलान् भोगान् पुत्रपौत्रसमन्वित:।
अन्ते विष्णुपुरं याति दैवतैरपि दुर्लभम्॥
यथैवात्मा तथा विष्णु: सन्देहो नात्र विद्यते।
तस्मादात्मानुमानेन विष्णुसेवा विधीयते॥
प्रभाते रौद्रदेये च पवित्रे स्थापयेद्धरिम्।
न भुनक्ति द्विजश्रेष्ठ यावत् शीतं सुदु:सहम्॥
स्वपन्तं देवदेवेशं पर्य्यङ्कोपरि केशवम्।
स्नापयेन्निशि निर्व्वाते देशे च वैष्णवो जन:॥
न प्राप्नोति यथा शीतं देवदेवो जगद्गुरु:।
शुक्लै: पवित्रैर्हृद्यैस्तं वस्त्रै राच्छादयेद्बुध:॥
आत्मन: कुरुते मर्त्यो यथा शीतनिवारणम्।
तथा शीतक्षयं कुर्य्याद्देवदेवस्य चक्रिण:॥
चौरेण स्नापयेद्दध्यस्तु माघे मासि जनार्द्दनम्।
तस्मै देवोत्तमो विष्णु: सन्तुष्टो न ददाति किम्॥
य: पूजयेत् सकृन्माघे स्नापयित्वा जनार्द्दनम्।
नारिकेलोदकैर्हृद्यै: फलं तस्य वदाम्यहम्॥
नरकाब्धौ मज्जमानान् दुस्तरे स्वेन कर्म्मणा।
उद्धृत्य कोटिपुरुषान् मन्दिरं याति चक्रिण:॥
माघे मासि च शुक्लायां पञ्चम्यां द्विजसत्तम।
एकादश्याञ्च सप्तम्यां हरि: पूज्यो विशेषत:॥
दातव्यो देवदेवाय सघृताय मुरारये।
पायसोऽपूपसहितो माघे मासि दिने दिने॥
अपूपं पायसं यस्तु माघे यच्छति चक्रिणे।
तस्य पुण्यमहं वक्ष्मि शृणु वैष्णव जैमिने॥
अन्ते विष्णुपुरं गत्वा मन्वन्तरचतुष्टयम्।
भुङ्क्ते मनोरथान् भोगान् प्रसादाच्चक्रपाणिन:॥
पुनरागत्य धरणीं चक्रवर्त्ती नृपो भवेत्।
भुङ्क्ते भोगञ्च सुचिरं मृतो याति हरेर्गृहम्॥
पञ्चम्याञ्चैव सप्तम्यामेकादश्याञ्च जैमिने।
अग्रक्ष्या वैष्णवो दद्यात् परमान्नं मुरारये॥
कृष्णपक्षाद्विजश्रेष्ठ शुक्लपक्षो विशिष्यते।
शुक्लपक्षे तिथिष्वासु दद्यादन्नं मुरारये॥
एकाहमपि यो माघे विष्णवे दैत्यजिष्णवे।
सापूपं पायसं दद्यात्र तस्य दुर्लभो हरि:॥
यत्किञ्चित् विष्णुतुष्यर्थं माघे मासि प्रदीयते।
तदक्षय भवेत् सर्व्वं कोऽपि नास्यत्र संशय:॥
माघे मासि कृतं कर्म्म शुभमशुभमेव च।
तस्य नास्ति क्षयं विप्र मन्वन्तरशतैरपि॥
माघे चम्पकपुष्पेण योऽर्च्चयेत् कमलापतिम्।
स गच्छेत् परमं धाम विमुक्त: सर्व्वपातकै:॥
यावन्ति स्वर्णपुष्पाणि दीयन्ते चक्रपाणये।
तावत् युगसहस्राणि स्थीयते विष्णुमन्दिरे॥
मेरुतुल्यसुवर्णानि दत्त्वा भवति यत् फलम्।
एकेन स्वर्णपुष्पेण दत्त्वा भवति तत् फलम्॥
सुवर्णपुष्पं विप्रेन्द्र सर्व्वदा केशवप्रियम्।
माघे मासि विशेषेण पवित्रे केशवोपमे॥
सुवर्णकुसुमैर्हृद्यैर्येन नाराधितो हरि:।
रत्नै र्हीन: सुवर्णाढ्य: स भवेज्जन्मजन्मनि॥"
इति पाद्मे क्रियायोगसारे ८।१० अध्याये॥

व्यास उवाच।

"फाल्गुने ब्राह्मणश्रेष्ठ श्रीकृष्णं सुरवन्दितम्।
पूजयेद्भक्तिभावेन प्रत्यहं वैष्णवो जन:॥
फाल्गुने स्नापयेद्यस्तु सर्पिषा देवकीसुतम्।
फलं तस्य प्रवक्ष्यामि मत्त: सम्यक् निशामय॥
सर्व्वयज्ञफलं प्राप्य सर्व्वदानफलं तथा।
अन्ते याति हरे: स्थानं सर्व्वपापविवर्ज्जित:॥
युगकोटिसहस्राणि भुक्त्वा भोगं हरेर्गृहे।
तत्रैव मोक्षमाप्नोति संप्राप्य ज्ञानमुत्तमम्॥
यस्तु यच्छति कृष्णाय शिशिरे गोपमूर्त्तये॥

तिलानां मोदकं दिव्यं स गच्छेद्धरिमन्दिरम् ॥
यो दुग्धलड्डुकं दद्यात् केशवाय महात्मने ।
स पिबेदमृतं स्नात्वा मन्वन्तरशतावधि ॥
हरये ललितं खण्डं यस्तु यच्छति जैमिने ।
तस्य विष्णुः प्रसन्नात्मा छिनत्ति भवबन्धनम् ॥
विचित्रफाणितं यस्तु दद्याद्भगवते द्विज ।
अन्ते शक्रपुरं गत्वा स भवेत् सुरवन्दितः ॥
निर्मलां शर्करां यच्छेद्यस्तु कृष्णाय भक्तिमान् ।
स किं न लभते विप्र वासुदेवप्रसादतः ॥
सुपक्वं फाल्गुने मासि मधुरं बदरीफलम् ।
यस्तु यच्छति कृष्णाय फलं तस्य मयोच्यते ॥
इह भुङ्क्ते सुखं सर्व्वं पुत्रपौत्रसमन्वितः ।
अन्ते हरेर्गृहं याति रथमारुह्य शोभनम् ॥
न दद्यादगुडसंयुक्तं हरये बदरीफलम् ।
अज्ञानाद्ब्राह्मणश्रेष्ठ दद्याच्चेन्नारकी भवेत् ॥
फाल्गुने मासि यो दद्याद्धरये दाड़िमीफलम् ।
सुपक्वं तत्फलं विप्र वदतो मे निशामय ॥
तत्र यावन्ति बीजानि तिष्ठन्ति दाड़िमीफले ।
तावन्मन्वन्तरं विष्णोर्गृहे तिष्ठति वैष्णवः ॥
फाल्गुने मासि यो दद्याद्धरये गुड़पिष्टकम् ।
सवित्रे यो द्विजश्रेष्ठ वाजिमेधसहस्रकृत् ॥*॥
चैत्रे मासि द्विजश्रेष्ठ मधुना मधुसूदनम् ।
स्नापयेल्लभते मर्त्यस्तद्विष्णोः परमं पदम् ॥
मधुना स्नापयेत् यस्तु नारायणमनामयम् ।
न चर्च्चा क्रियते तस्य कदाचिद्रविसूनुना ॥
चैत्रे किंशुकपुष्पेण योऽर्च्चयेत् कमलापतिम् ।
तन्नाम चित्रगुप्तेन पञ्जिकायां न लिख्यते ॥
चैत्रिके जगतामीशं कृष्णं तिलकपुष्पकैः ।
यजतो नास्ति वै जन्म पुनरस्मिन् महीतले ॥
कृष्णं वञ्जुलपुष्पेण सर्व्वदेवशिरोमणिम् ।
पूजयेन्मनुजो विप्र लभते नापदं क्वचित् ॥
वासन्तीभिः सुगन्धाभिर्व्वसन्ते यस्तु पूजयेत् ।
भगवन्तं परात्मानं स देवैरपि पूज्यते ॥
जयाकिंशलयैर्दिव्यैरखण्डैर्योऽर्च्चयेद्धरिम् ।
तं वदन्ते समुत्थाय स्वयं पीठादयमोऽपि च ॥
धात्रीपत्रैर्नवीनैश्च कोमलैर्हरिमर्च्चयन् ।
अचिरेणैव लभते सकलं वाञ्छितं जनः ॥
शाण्डिल्याखण्डपत्रैश्च धुस्तूरैश्चार्कपुष्पकैः ।
योऽर्च्चयेद्विष्णुमीशञ्च स संसाराब्धिपारगः ॥
यो दद्याद्विष्णवे विप्र कदलीफलमुत्तमम् ।
शक्राद्यास्त्रिदशाः सर्व्वे वदन्ते तमहर्निशम् ।
यो दद्याच्चैत्रिके मासि भक्त्या गोपालरूपिणे ।
गोधूमपिष्टकं विप्र सर्व्वपापैः प्रमुच्यते ॥ * ॥
आयाते माधवे मासि पवित्रे माधवप्रिये ।
आमिषं मैथुनं तैलं विष्णुभक्तः परित्यजेत् ॥
प्रातः समाचरेत् स्नानं माधवे मासि वैष्णवः ।
परित्यजेत् परान्नञ्च न च कुर्य्यात् द्विभोजनम्॥
प्रभाते पूजयेद्विष्णुं पूर्व्वोक्तविधिना द्विजः ।
वैशाखे स्नापयेद्विष्णुं पुष्पवासितवारिणा ॥
स्नापयेत् शीततोयेन सन्ध्यापर्य्यन्तमच्युतम् ।
त्रिसन्ध्यं पूजयेद्भक्त्या नैवेद्यैर्व्विविधैः प्रभुम् ॥
वैशाखे चामलस्रग्भिर्लक्ष्मीपतिरलङ्कृतः ।
न किं ददाति विप्रर्षे प्रसन्नः परमेश्वरः ॥
वैशाखे मासि यो दद्यात् यवान्नं चक्रपाणये ।
तस्य पुण्यानि संख्यातुं कः समर्थोऽस्ति पण्डितः
यत्किञ्चिन्माधवे मासि माधवप्रीतिहेतवे ।
दीयते मानवैर्व्विप्र तत् सर्व्वमक्षयं भवेत् ।
यदन्यत् सुकृतं कर्म्म क्रियते मासि माधवे ।
माधवप्रीतये विप्र क्षयं तस्य न विद्यते ॥
वैशाखो दुर्ल्लभो मासः सर्व्वकामफलप्रदः ।
पूजितव्यो हरिस्तत्र हित्वा कार्य्यशतान्यपि ॥
एकाहमपि यः पूजां वैशाखे कुरुते हरेः ।
शतवर्षं हरिं यष्ट्वा यत् फलं लभते स तत् ॥
वैशाखे मासि यः कुर्य्यात् प्रपां माधवतुष्टये ।
दिने दिनेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥
वैशाखे सिञ्चयेन्नित्यं विष्णुमक्षत्यरूपिणम् ।
चतुर्व्वर्गफलावाप्तिहेतवे वैष्णवो जनः ॥
गण्डूषमात्रतोयेन कुर्य्यादर्घ्योऽक्षत्यसेचनम् ।
सोऽपि याति परं स्थानं विमुक्तः पाप-
कोटिभिः ॥

व्यास उवाच ।

साक्षादेवः स्वयं विष्णुरक्षत्योऽखिलविश्वराट् ।
तद्भक्तिं कुर्व्वतः पुंसो विद्यते नाशुभं क्वचित् ॥
अक्षत्यं सेवते यस्तु विष्णुं बुद्धा नरोत्तमः ।
तस्य प्रसन्नो भगवान् ददाति परमं पदम् ॥"

इति पाद्मे क्रियायोगसारे ११ अध्यायः ॥*॥

व्यास उवाच ।

"ज्येष्ठे मासि द्विजश्रेष्ठ भगवन्तं जनार्द्दनम् ।
पूजयेद्भक्तिभावेन जलैः संस्राप्य शीतलैः ॥
उद्वर्त्तनञ्च दातव्यं सुगन्धामलकीं तथा ।
तैलं सुगन्धं हरये ग्रीष्मकाले दिने दिने ॥
सुवासिते शीतले च मन्दिरेऽतिमनोहरे ।
प्रत्यहं कमलाकान्तं स्थापयेत् जलमण्डपे ॥
न रौद्रदेशे विप्रेन्द्र सधूमे रन्धनालये ।
न सूतिकागृहे चैव स्थापयेत् कमलापतिम् ॥
चामरैर्वीजितः क्षौमैः सुदीर्घैः कमलापतिः ।
ज्येष्ठे मासि द्विजश्रेष्ठ सुप्रीतः किं न यच्छति ॥
मयूरपुच्छव्यजनैर्निदाघे पूजितो हरिः ।
ददात्यभिमतं सर्व्वं अचिरेणव सत्तम ॥
तालवृन्तकवातेन पवित्राम्बरवायुना ।
यैर्ग्रीष्मे वीज्यते विष्णुस्ते सर्व्वे स्वर्गगामिनः ॥
यो गात्रलेपनं कुर्य्यात् सुवर्ण्यैर्यक्षकर्द्दमैः ।
ग्रीष्मे हरेश्चन्दनेन स विशेन्माधवीं तनुम् ॥
गन्धैर्मृगमदाद्यैश्च यो लिम्पेन्माधवीं तनुम् ।
उषागमे द्विजश्रेष्ठ स मुक्तो नात्र संशयः ॥
प्रफुल्लकुमुदोद्याने तुलसीकानने तथा ।
सन्ध्यायां स्थापयेद्विष्णुं देशे धीरसमीरणे ॥
सुगन्धिः पाटलिपुष्पाणां येन विष्णुरलङ्कृतः ।
ज्येष्ठे मासि स विप्रेन्द्र यो वाजिमेधसहस्रकृत् ॥
यस्तु मुक्तावलीं दद्यात् ग्रीष्मे श्रीपतये जनः ।
भूपालत्वं हरिस्तस्मै यच्छेज्जन्मनि जन्मनि ॥
यस्तु मण्डयति ग्रीष्मे श्रीकृष्णं मणिमालया ।
तस्य पुण्यफलं विप्र वदतो मे निशामय ॥
यावद्ब्रह्मा सृजत्येतत् जैमिने सकलं जगत् ।
तावद्विष्णुपुरे तिष्ठेन्मणिमालाविभूषितः ॥
सुवर्णाभरणैर्यस्तु रजताभरणैस्तथा ।
कृष्णं मण्डयति ग्रीष्मे सोऽपि तत्फलमाप्नुयात्
विचित्रं यस्तु पर्य्यङ्कं सगण्डूकं प्रयच्छति ।
हरये देवदेवाय न स्यादुःखी कदापि सः ॥
ग्रीष्मकाले न देयानि गुरूणि वसनानि च ।
हरये ब्राह्मणश्रेष्ठ देयं तन्त्वंशूकं शुचि ॥
यस्तु चूतफलैर्दिव्यैः सुपक्वैः पूजयेद्धरिम् ।
अन्ते शक्रपुरं गत्वा स पिबेदमृतं मुदा ॥
पियालानां फलैः पक्वैर्योऽर्च्चयेत् कमलापतिम्
सोऽपि तत्फलमाप्नोति किमन्यैर्ब्बहुभाषितैः॥
निदाघे हरये दद्यादृयवागूमतिशीतलाम् ।
नानाव्यञ्जनसंयुक्तां श्रद्धया वैष्णवो जनः ॥*॥
आषाढे मासि विप्रेन्द्र देवदेवं जगत्पतिम् ।
दधिभिः स्नापयित्वा तु पूजयेद्भक्तितो बुधः ॥
दधिभिः स्नापयेद्यस्तु भगवन्तं जनार्द्दनम् ।
मातुः पयोधरपयः पुनस्तेन न पीयते ॥
घनागमे घनश्यामं कदम्बकुसुमैर्हरिम् ।
आराध्य यान्ति विप्रर्षे पापिनोऽपि परां
गतिम् ॥
कदम्बपुष्पमालाभिर्मण्डयत्यजलोचनम् ।
यस्तस्य ब्राह्मणश्रेष्ठ पुण्यं वक्ष्मि निशामय ॥
तस्यां यावन्ति मालायां तिष्ठन्ति कुसुमानि वै ।
प्रतिपुष्पे द्विजश्रेष्ठ वाजिमेधफलं लभेत् ॥
सुगन्धैः केतकीपुष्पैः पूजितः कमलेक्षणः ।
सर्व्वं दुःखं हरत्येव मानवानां द्विजोत्तम ॥
पनसानां फलैर्दिव्यैः सुपक्वैर्घृतमिश्रितैः ।
पूजितो भगवान् विष्णुर्दात्यैश्वर्य्यमुत्तमम् ॥
आषाढे मासि दध्यन्नं हरये प्रतिवासरम् ।
श्रद्धया वैष्णवो दद्यान्मुक्तिमिच्छुर्द्विजोत्तम ॥
कृष्णाय नवनीतं यो ददाति वैष्णवो जनः ।
तस्य पुण्यं न संख्यातुं शक्नोम्यब्दशतैरपि ॥
हेयङ्गवीनं यो दद्याद्गोपालाय महात्मने ।
आमिक्षां सगुड़ाञ्चैव स महात्मा हरेः प्रियः ॥
सशर्कराणि दुग्धानि कृष्णाय यस्तु यच्छति ।
तस्य प्रसन्नो भगवान् ददात्यभिमतं फलम् ॥*॥
श्रावणे मासि विप्रेन्द्र दैवकीनन्दनं प्रभुम् ।
स्नापयेन्निर्म्मलैस्तोयैः शुद्धैः कलुषवर्ज्जितैः ॥
मल्लिकाकुसुमैर्विष्णुं योऽर्च्चयेद् वैष्णवो जनः ।
विमुक्तः सकलैः पापैर्ब्रह्मलोकं स गच्छति ॥
शेफालिकाप्रसूनैश्च यूथिकाकुसुमैस्तथा ।
अर्च्चयन् कमलाकान्तं मनुजो नावसीदति ॥
सुगन्धैस्तगरैः पुष्पैः सप्तलाकुसुमैस्तथा ।
योऽर्च्चयेत् कमलाकान्तं तस्य वश्यं जगत्त्रयम् ॥
प्रफुल्लमालतीपुष्पैः सुगन्धैर्योऽर्च्चयेद्धरिम् ।
तत्पुण्यं नास्ति तत्तुल्यो येन स्यादुभुवि
मानवः ॥
कुन्दपुष्पैश्च बन्धूकैर्जगद्बन्धुं जनार्द्दनम् ।
अर्च्चयन् सकलं काममाप्नोति भुवि मानवः ॥
महासहाप्रसूनैश्च तथा कुरुवकैर्हरिम् ।
कुरण्टकैः पूजयेद्यस्तस्य तुष्टः सदा हरिः ॥
शैरीषकुसुमैर्विष्णुं प्रस्थपुष्पैश्च योऽर्च्चयेत् ।

करवीरप्रसूनेश्च स याति हरिमन्दिरम् ॥
श्रावणे मासि यो दद्यात् लाजान् घृतसमन्वितान् ।
हरये तस्य विप्रर्षे न विपत्तिर्गृहे भवेत् ॥
श्रावणे पिष्टकं यस्तु हरये मुद्गपूरकम् ।
ददाति तस्य विप्रर्षे गृहे योनिश्चला भवेत् ॥*॥
भाद्रे मासि द्विजश्रेष्ठ नारायणमनामयम् ।
अर्चया पूजयेत् प्राज्ञश्चतुर्वर्गफलप्रदम् ॥
निर्दोषे नूतनागारे सर्व्वोपद्रववर्ज्जिते ।
स्थापयेत् पुण्डरीकाक्षं भगवन्तं जनार्दनम् ॥
दंशैश्च मशकैश्चैव प्रकीर्णैर्मक्षिकादिभिः ।
हरिं पुरातनागारे स्थापयेन्न हि भक्तिमान् ॥
सकर्दमे पतद्वारि गलद्वृत्तौ गृहे तथा ।
हरिं न स्थापयेत् प्राज्ञो वर्षासु परमेश्वरम् ॥
विष्णुालये द्विजश्रेष्ठ बध्नीयाद्यस्तु मानवः ।
चन्द्रातपं विचिन्वंश्च चन्द्रलोकं स गच्छति ॥
रात्रौ नानाविधैर्धूपैर्मन्दिरे जगतीपतेः ।
दंशांश्च मशकांश्चैव वर्षाकाले निवारयेत् ॥
मसारिकाभिः प्राहृत्य मज्जयायिनमच्युतम् ।
प्रावृषि स्थापयेद्विष्णुं निशायां दिव्यमन्दिरे ॥
कह्लारपद्मैर्वेशं सुगन्धैर्नूतनैस्तथा ।
मुमुक्षुः पूजयेन्मर्त्यो भाद्रे मासि दिने दिने ॥
न भाद्रे केतकीपुष्पैः पूजितव्यो जनार्दनः ।
यतो भाद्रपदे मासि केतकी स्यात् सुरासमा ॥
पक्वस्वादफलैर्हृद्यैर्यो ऽर्चयेद्वैदृयदुनन्दनम् ।
गर्भवासमहादुःखं स भूयो लभते न हि ॥
संयुक्तं घृतदुग्धाभ्यां पक्वतालं मुरारये ।
यो दद्यात् श्रद्धया मर्त्यः स गच्छेन्मन्दिरं हरेः ॥
भाद्रे मासि द्विजश्रेष्ठ हरये तालविष्टकम् ।
सघृतं वैष्णवो दद्यात् कैवल्यप्राप्तिहेतवे ॥
मासि भाद्रपदे विप्र न कुर्य्याच्छाकभक्षणम् ।
न रात्रौ भोजनं कुर्य्यान्मुमुक्षुर्वैष्णवो जनः ॥*॥
आश्विने मासि विप्रेन्द्र कैशवं क्लेशनाशनम् ।
पूजयेद्भक्तिभावेन पूर्व्वोक्तविधिना जनः ॥
पूर्व्वाह्णे पूजयेद्यस्तु भक्त्या लक्ष्मीपतिं हरिम् ।
विष्णुपूजाफलं विप्र सम्पूर्णं तेन लभ्यते ॥
यत्तोयं दीयते विप्र पूर्व्वाह्णे हरये जनैः ।
पीयूषमिव तत्तोयं गृह्णाति कमलापतिः ॥
मध्याह्ने दीयते यत्र सलिलं चक्रपाणये ।
तोयं तोयमिव स्वामी तद्गृह्णाति द्विजोत्तम ॥
अपराह्णे तु यत्तोयं गोविन्दाय प्रदीयते ।
तत्तोयं रक्ततुल्यं स्याच्च गृह्णाति यतो हरिः ॥
अतएव द्विजश्रेष्ठ पूर्व्वाह्णे हरिमर्चयेत् ।
सकलं लभते कामं कैशवस्यानुकम्पया ॥
एकवस्त्रेण विप्रेन्द्र न कुर्य्यात् पूजनं हरेः ।
कुर्य्याद्यदि तदा पूजां तां न गृह्णाति कैशवः ॥
अधौतेन च वस्त्रेण या पूजा कमलापतेः ।
विफला सा च पूजा स्याच्च विष्णुः प्रसीदति
यस्त्ववद्यग्रिहः पूजां चक्रिणः कुरुते जनः ।
पूजाफलं न चाप्नोति अनिर्य्याच्या च सा भवेत् ॥
अमंस्कृतगृहे पूजा क्रियते या जगत्पतेः ।
सा पूजा ब्राह्मणश्रेष्ठ अनिर्य्याच्या भवेत् खलु॥
स्नानं देवार्चनञ्चैव दानञ्च पितृतर्पणम् ।
तिलकेन विना विप्र न च कुर्य्याद्विचक्षणः ॥
तिलकान्न गृहीत्वा यत् पुण्यकर्म्म विधीयते ।
भस्मीभवति तत् सर्व्वं कर्त्ता च नारकी भवेत्
शङ्खचक्रगदापद्मैरङ्कितं यस्य दृश्यते ।
शरीरं ब्राह्मणश्रेष्ठ विज्ञेयः सोऽच्युतः स्वयम् ॥"
इत्यादि ॥
"विपत्तीक्षतदूर्व्वाभिराश्विने योऽर्च्चयेद्धरिम् ।
दूर्व्वेव सन्ततिस्तस्य अविच्छिन्ना प्रवर्त्तते ॥
आश्विने मासि यो दद्याद्धरये कर्कटीफलम् ।
शोको न जायते तस्य कदाचिद्धृदये द्विज ॥*॥
कार्त्तिके तु समायाते सर्व्वमासोत्तमे शुभे ।
दामोदरं देवदेवं भक्त्या प्राज्ञः प्रपूजयेत् ॥
कार्त्तिके मासि विप्रेन्द्र विष्णुप्रीणनहेतवे ।
यथोक्तविधिना प्राज्ञः प्रातःस्नानं समाचरेत् ॥
आमिषं मैथुनञ्चैव कार्त्तिके मासि यस्त्यजेत् ।
जन्मान्तराज्जितैः पापैर्मुक्तो याति परां गतिम्॥
तुलाराशिगते सूर्य्ये प्रातःस्नानं द्विजोत्तम ।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम् ॥
आमिषं मैथुनञ्चैव कार्त्तिके यस्तु न त्यजेत् ।
जन्मजन्मनि विप्रेन्द्र स भवेत् ग्राम्यशूकरः ॥
द्विर्भोजनं परान्नञ्च तैलञ्च वैष्णवो जनः ।
आयाते कार्त्तिके मासि यत्नादपि परित्यजेत् ॥
दामोदराय नभसि प्रदीपं यस्तु यच्छति ।
फलं तस्य प्रवक्ष्यामि समासेन शृणु द्विज ॥
ब्रह्महत्यादिभिः पापैर्विमुक्तः क्लेशदायकैः ।
दामोदरपुरं गत्वा तिष्ठेत् कोटियुगावधि ॥
दीपं ज्वलन्तं नभसि त्रिदशा वासवादयः ।
विलोक्य हर्षिताः सर्व्वे वदन्तीति परस्परम् ॥
असौ पुण्यात्मनां श्रेष्ठः कैशवार्चनतत्परः ।
प्रदीपं कार्त्तिके मासि यतो यच्छति चक्रिणे ॥
आगमिष्यति पुण्यात्मा कदायं त्रिदिवं प्रति ।
करिष्यामि कदा मख्यमनेन हरिसेविना ॥
मुहूर्त्तमपि यो दद्याद्दीपं नभसि चक्रिणे ।
कार्त्तिके मासि विप्रेन्द्र तस्य तुष्टः सदा हरिः॥
दद्यादक्षयदीपं यः कार्त्तिके हरिमन्दिरे ।
दिने दिनेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥
तुलसीदललक्षैर्यः कार्त्तिके पूजयेद्धरिम् ।
लक्षैकवाजिमेधस्य मानवो लभते फलम् ॥
विल्वच्छदनलक्षेण योऽर्च्चयेत् विष्णुमव्ययम् ।
कार्त्तिके शङ्करं वापि लभते सोऽपि तत्फलम्
कार्त्तिके वकपुष्पेण हरिपूजनकृन्नरः ।
परमं मोक्षमाप्नोति प्रसादाज्जगतीपतेः ॥
यत्किञ्चित् कार्त्तिके मासि विष्णुमुद्दिश्य दीयते
तदक्षयं भवेत् सर्व्वं सत्यमेतन्मयोच्यते ॥
घृतान्नं शूरणान्नं यः कार्त्तिके विष्णवे नरः ।
दद्याद्दिने दिने विप्र तस्य विष्णुपुरे स्थितिः ॥
प्रफुल्लपद्मपुष्पेण सितेनाप्यसितेन वा ।
योऽर्च्चयेत् कमलाकान्तं तस्य किं भुवि दुर्लभम्
कमलैः कार्त्तिके मासि सितैर्वा लोहितैस्तथा ।
संपूज्य पद्मिनं मर्त्यो लभते परमं पदम् ॥
प्रदत्तं कार्त्तिके मासि हरये येन पङ्कजम् ।
न दत्तं तेन किं विप्र विष्णवे दैत्यजिष्णवे ॥
एकमेवाम्बुजं यस्तु ददाति केटभारये ।
तस्मै किं भगवान् विष्णुर्न ददाति श्रियः पतिः॥
कमलैः कार्त्तिके मासि येन नाराधितो हरिः।
जन्मजन्मनि तद्गेहे कमला न हि तिष्ठति ॥
पद्मबीजानि यो दद्यात् केशवाय महात्मने ।
स जायते विप्रकुले गृहे च प्रतिजन्मनि ॥
ब्राह्मणस्य कुले जातः स चतुर्व्वेदविद्भवेत् ।
धनवान् बहुपुत्रश्च कुटुम्बानाञ्च पोषकः ॥
नास्ति पद्मसमं पुण्यं जैमिने सत्यमुच्यते ।
येन संपूज्य गोविन्दं पापात्मापि च मोक्षभाक्॥
सत्यं सत्यं पुनः सत्यं सत्यमेव मयोच्यते ।
कमलैर्हरिमभ्यर्च्च्य लभते परमं पदम् ॥
एकमेवारविन्दं यः प्रददाति मुरारये ।
तस्य नास्ति पुनर्जन्म संसारेऽस्मिन् सुभैरवे ॥"
इति पाद्मे क्रियायोगसारे १२ अध्यायः ॥*॥

व्यास उवाच ।

"मार्गशीर्षे द्विजश्रेष्ठ महालक्ष्म्या समन्वितम्
पूजयेदव्ययं विष्णुं भक्तिभावेन वैष्णवः ॥
उच्छिष्टदेशे विप्रेन्द्र तथैव पतितालये ।
दुर्गन्धैश्च परिव्याप्ते स्थाने विष्णुं न पूजयेत् ॥
पाषण्डानां समीपे तु महापातकिनां तथा ।
असत्यभाषिणाञ्चैव न कुर्य्याद्विष्णुपूजनम् ॥
तस्मादेकमना भूत्वा भक्तिश्रद्धासमन्वितः ।
पूजयेत् कमलाकान्तं चतुर्व्वर्गफलाप्तये ॥
शाल्यन्नं सघृतञ्चैव मुद्गपूपसमन्वितम् ।
सवास्तूकादिशाकञ्च दद्यात् सदधि विष्णवे ॥
नागरङ्गफलं दिव्यं सुपक्वं यस्तु यच्छति ।
कैशवाय द्विजश्रेष्ठ सोऽस्माभिरपि पूज्यते ॥
यद्यन्नं नूतनं वस्तु प्रियं भगवतो हरेः ।
तदेवाग्रहायणे मासि भक्त्या दद्यान्मुरारये ॥*॥
पौषे मासि समायाते श्रीकृष्णं वरदं प्रभुम् ।
नित्यमिक्षुरसैर्हृद्यैः स्नापयेद्वैष्णवो जनः ॥
यः स्नापयति विप्रेन्द्र विष्णुमिक्षुरसैः प्रभुम् ।
इह भुङ्क्ते सुखं सर्व्वं मृतो यातीक्षुनागरम् ॥
यो दद्यादिक्षुनैवेद्यं देवदेवाय विष्णवे ।
सोऽपि तत्फलमाप्नोति किमन्यैर्बहुभाषितैः ॥
सदुग्धं पृथुकं पौषे दधिभिर्व्वा समन्वितम् ।
दत्त्वा मुरारये मर्त्यः सर्व्वान् कामानवाप्नुयात्
सर्व्वं पुरातनं वस्त्रं दूरीकृत्य मुरारये ।
शीतस्य वारणार्थाय दद्याद्वस्त्रञ्च नूतनम् ॥
पौषे संक्रमणे विप्र सलक्ष्मीकाय विष्णवे ।
दद्यान्मुमुक्षुर्मनुजो दशवर्षञ्च पिष्टकम् ॥
यस्तु शङ्खध्वनिं कुर्य्यात् संपूज्य कमलापतिम्।
तस्य पुण्यफलं वक्ष्मि शृणु वत्स समाहितः ॥
अगम्यागमनाच्चैव विमुक्तः सर्व्वपातकैः ।
शेषे विष्णुपुरं गत्वा विष्णुना सह मोदते ॥
वैनतेयाञ्चितां घण्टां यस्तु वादयते हरेः ।
पूजाकाले द्विजश्रेष्ठ तस्य पुण्यं वदाम्यहम् ॥
अभक्ष्यभक्षणाच्चैव मुक्तः पापैः सुदारुणैः ।
प्रयाति मन्दिरं विष्णो रथमारुह्य शोभनम् ॥
तत्र भुक्त्वाखिलं भोगं कल्पकोटिशतावधि ।

पुनरागत्य धरणीं चतुर्व्वेदी द्विजो भवेत् ॥
तच्च भुक्त्वा सुखं सर्व्वं शोकदुःखविवर्जितः ।
पुनर्व्विष्णुपुरं गत्वा मोक्षं प्राप्नोत्यनुत्तमम् ॥
वीणां वादयते यस्तु पूजाकाले जगत्पतेः ।
पण्डितानामग्रणीः स्यात् प्रतिजन्मनि जन्मनि ॥
मृदङ्गवाद्यकृद्यस्तु पूजायां कैटभद्विषः ।
तस्य प्रसन्नो देवेशो ददात्यभिमतं फलम् ॥
डमरुं डिण्डिमञ्चैव झर्झरीं मधरीं तथा ।
पटहं दुन्दुभिञ्चैव काहलं सिन्धुवादनम् ॥
कांस्यञ्च करतालञ्च वेणुं वादयते च यः ।
पूजाकाले महाविष्णोस्तस्य पुण्यं निशामय ॥
स्तोत्रादैः पातकैर्मुक्तो मन्दिरं याति चक्रिणः ।
परमं स्थानमासाद्य तत्रैव परिमुच्यते ॥
करशब्दञ्च यः कुर्य्यात् पूजाकाले जगद्गुरोः ।
मुखवाद्यञ्च विप्रेन्द्र तस्य पुण्यं मयोच्यते ॥
कोटिकोटिकुलैर्युक्तः प्रयाति हरिमन्दिरम् ।
ज्ञानमासाद्य तत्रैव मोक्षमक्षयमाप्नुयात् ॥
विष्णोरायतने यस्तु भक्तियुक्तः प्रनृत्यति ।
स याति ब्राह्मणश्रेष्ठ तद्विष्णोः परमं पदम् ॥
यस्तु गायति गीतानि भक्त्या नारायणाग्रतः ।
स नर्त्तकत्वमाप्नोति गन्धर्व्वाणां पुरेषु च ॥
स्तौति स्तोत्रं जगन्नाथं यो भक्त्या वैष्णवो जनः ।
तस्य प्रसन्नो भगवान् सर्व्वान् कामान् प्रयच्छति ॥
मासे मासे हरिं यस्तु विधिनानेन पूजयेत् ।
अचिरेणैव विप्रर्षे प्रसादयति सोऽच्युतम् ॥
जगदुदधिमिमं ये तर्त्तुमिच्छन्ति मर्त्याः
प्रचुरतरभयौघं सर्व्वदुःखप्रदञ्च ।
परमपुरुषपादाम्भोजयुग्मं मनोज्ञं
त्रिदशगणवरेण्यं ते तु सर्व्वे यजन्तु ॥"
इति पाद्मे क्रियायोगसारे १३ अध्यायः ॥*॥

अथ द्वात्रिंशत् सेवापराधाः । भगवद्भक्तानां क्षत्रियसिद्धान्नभोजनम् १ अनिषिद्धदिने दन्तधावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं कृत्वास्नात्वा विष्णोरुपसर्पणम् ३ मृतं नरं स्पृष्ट्वास्नात्वा विष्णुकर्म्माकरणम् ४ रजस्वलां स्पृष्ट्वा विष्णुगृहप्रवेशनम् ५ मानवं शवं स्पृष्ट्वास्नात्वा विष्णुसन्निधावस्थानम् ६ विष्णुं स्पृशतः पायुवायुप्रयोगः ७ विष्णोः कर्म्म कुर्व्वतः पुरीषत्यागः ८ विष्णुशास्त्रमनादृत्य शास्त्रान्तरप्रशंसा ९ अतिमलिनं वासः परिधाय विष्णुकर्म्माचरणम् १० अविधानेनाचम्य विष्णोरुपसर्पणम् ११ विष्णोरपराधं कृत्वा विष्णोरुपसर्पणम् १२ कुक्षुस्य विष्णुस्पर्शनम् १३ निषिद्धपुष्पेण विष्णुर्च्चनम् १४ रक्तं वासः परिधाय विष्णोरुपसर्पणम् १५ अन्धकारे दीपेन विना विष्णोश्च स्पर्शनम् १६ कृष्णवस्त्रं परिधाय विष्णोः कर्म्माचरणम् १७ वायसोद्धृतवासः परिधाय विष्णोः कर्म्माचरणम् १८ विष्णवे कुक्कुरोच्छिष्टदानम् १९ वराहमांसं भुक्त्वा विष्णोरुपसर्पणम् २० हंसजालपदसरारिमांसं भुक्त्वा विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा हस्तमप्रक्षाल्य विष्णोः स्पर्शनं कर्म्मकरणं वा २२ श्मशानं गत्वास्नात्वा विष्णुपसर्पणम् २३ पिण्याकं भुक्त्वा विष्णोरुपसर्पणम् २४ विष्णवे वराहमांसनिवेदनम् २५ मद्यमादाय पीत्वा वा स्पृष्ट्वा विष्णुगृहप्रवेशनम् २६ परकीयेणाशुचिना वस्त्रेण परिहितेन विष्णुकर्म्माचरणम् २७ विष्णवे नवान्नमप्रदाय तद्भोजनम् २८ गन्धपुष्पेऽप्रदाय धूपदीपदानम् २९ उपानद्भ्यामारुह्य विष्णुस्थानप्रवेशनम् ३० भेरीशब्देन विना विष्णुप्रबोधनम् ३१ अजीर्णे सति विष्णुसपर्शनम् ३२। एतदुपलक्षणम् । इत्याह्निकाचारतत्त्वम् ॥ *॥

अपि च ।

धरण्युवाच ।

"तवापराधात् देवेश वर्ज्यान् यान् वैष्णवेन च ।
निरापराधो मनुजः सापराधश्च जायते ॥
कर्म्मणाचरणे येन करणेन जुगुप्सितम् ।
तच्च पूजाफलं सर्व्वं जायते तद्वदस्व मे ॥

वराह उवाच ।

कर्म्मणा मनसा वाचा ये पापरुचयो जनाः ।
भक्षणं दन्तकाष्ठस्य राजान्नस्य तु भोजनम् ॥
मैथुनं शवसंस्पर्शं पुरीषोत्सर्गमेव च ।
सूतकृदकाः क्षपणं स्पर्शनं मेहनं तथा ॥
अभाष्यभाषणं कोपं पिण्याकस्य च भक्षणम् ।
रक्तपारक्यमलिनं वस्त्रधारित्वनीलिजम् ॥
गुरोरालोकनिर्व्वन्द्यं पतितान्नस्य भक्षणम् ।
अभक्ष्यभक्षणञ्चैव तण्डुलीयविभीतकम् ॥
अदानं तु वरान्नस्य जालपादवराकयोः ।
भक्षणं देवतागारे सोपानत्कोपसर्पणम् ॥
तथैव देवपूजाजां निषिद्धकुसुमार्च्चनम् ।
अनुत्तार्य्य च निर्म्माल्यं पूजा जीर्णान्धकारयोः ॥
पानं सुराया देवस्य अन्धकारे प्रबोधनम् ।
वातकर्म्मार्च्चने विष्णोरनमस्करणं तथा ॥
अपराधास्त्रयस्त्रिंशत् समाख्याता मया धरे ।
एभिर्युक्तस्तु पुरुषो विष्णुं नैव प्रपश्यति ॥
दूरस्थो न नमस्कारं कुर्य्यात् पूजा तु राक्षसी ॥"

तत्प्रायश्चित्तं यथा,—

"एकरात्रं द्विरात्रं वा त्रिरात्रं स्नानमेव च ।
सवासाः पञ्चगव्याग्नौ मलवस्त्रान्तिकं क्रमात् ॥
नीलीरङ्गापनोदार्थं गोमयेन प्रघर्षणम् ।
प्राजापत्येन शुद्धिः स्यात् नीलीवस्त्रस्य धारणात् ।
चान्द्रायणद्वयं कुर्य्यात् गुरोः क्षमितमुत्तमम् ।
चान्द्रायणं पराकञ्च पतितान्नस्य भक्षणात् ॥
चान्द्रायणं पराकञ्च प्राजापत्यं तथैव च ।
गोप्रदानञ्च भोज्यञ्च अभक्ष्यस्य च भक्षणे ॥
उपवासस्तु पञ्चाहं पञ्चगव्येन शुध्यति ।
सोपानत्कश्चरेत् पादं कृच्छ्रस्य द्विरभोजनम् ॥
पुष्पाभावेऽर्च्चनं स्नानं देवस्पर्शञ्च कारयेत् ।
अनिर्म्माल्ये नमस्कारं स्नानं पञ्चामृतेन तु ॥
सुरापाने द्विजातीनां चान्द्रायणचतुष्टयम् ।
तथैव ह्यादशाष्टौ तु प्राजापत्यत्रयं चरेत् ॥
ब्रह्मकूर्च्चेन शुद्धिः स्यात् गोप्रदानत्रयेण च ।
त्रयाणामेकरात्रेण पञ्चामृतनिषेवणात् ॥
मुच्यते त्वपराधैस्तु तथा विष्णोः स्तवं पठन् ।
एतत्ते कथितं गुह्यं किमन्यत् श्रोतुमिच्छसि ॥

धरण्युवाच ।

अस्ति कश्चिदुपायोऽत्र येन त्वं नृषु तुष्यसि ।
पूजितः सफलस्यासि अपराधविशोधनः ॥

वराह उवाच ।

संवत्सरस्य मध्ये तु तीर्थे सौकरवे मम ।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात् ।
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् ॥
अनयोस्तीर्थयोरेव यः सेवेत सकृन्नरः ।
सहस्रजन्मजनितानपराधान् जहाति सः ।
स्नानात् पानात् तथा ध्यानात् कीर्त्तनाद्धारणात्तथा ।
श्रवणान्मननाच्चैव दर्शनाद् याति पातकम् ॥
इति वाराहपुराणे अपराधप्रायश्चित्तनामाध्यायः ॥

सेवि, क्ली, (सेव्यते लोकैरिति । सेव + इन् ।) फलविशेषः । सेओ इति हिन्दी भाषा । तत्पर्य्यायः । वदरम् २ सिद्धितिकाफलम् ३ मुष्टिप्रमाणम् ४ सेवितम् ५ सेवम् ६ । अस्य गुणाः । वातपित्तहरत्वम् । गुरुत्वम् । बृंहणत्वम् । कफकरत्वम् । हृद्यत्वम् । पाके स्वादुरसत्वम् । हितत्वञ्च । इति राजनिर्घण्टः ॥

सेविका, स्त्री, मिष्टान्नविशेषः । सेओयाजि इति भाषा । यथा,—

"समितावर्त्तिकाः कृत्वा सुसूक्ष्मा यवसन्निभाः ।
शुष्काः चीरेण संसाध्या भोज्या घृतसिताञ्चिताः ॥"

अस्या गुणाः ।

"सेविका तर्पणी बल्या गुर्व्वी पित्तानिलापहा
ग्राहिणी सन्धिकृद्रुच्या तां खादेन्नातिमात्रयया"

इति भावप्रकाशः ॥

(दासी । भुजिष्या । इति केचित् ॥)

सेवितः, त्रि, (सेव + क्तः ।) समुपासितगुर्व्वादिः । तत्पर्य्यायः । वरिवसितः २ वरिवस्यितः ३ उपासितः ४ उपचरितः ५ । इति शब्दरत्नावली ॥ आराधितः । उपभुक्तः । आश्रितः । इति सेवधातोरर्थदर्शनात् ॥ (यथा, महाभारते । १ । १७ । ६ ।

"काञ्चनाभरणं चित्रं देवगन्धर्व्वसेवितम् ॥")

सेविफले, क्ली । इति राजनिर्घण्टः ॥

सेव्यं, क्ली, (सेव्यते इति । सेव + ण्यत् ।) वीरणमूलम् । इत्यमरः । २ । ४ । १६४ ॥ (अस्य पर्य्यायो यथा,—

"वीरणस्य तु मूलं स्यादुशीरं नलदञ्च तत् ।
अमृणालञ्च सेव्यञ्च समगन्धिकमित्यपि ॥"

इति भावप्रकाशे पूर्व्वखण्डे १ भागे ॥

लामज्जकम् । उशीरवत्पोतच्छविलक्षणविशेषः । तत्पर्य्यायो यथा,—

"लामज्जकं सुनालं स्यादमृणालं लयं लघुः ।
इष्टकापथकं सेव्यं नलदञ्चावदातकम् ॥"

इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"स्वादुशीरं मृणालञ्च सैन्यं लामज्जकन्तथा।"
इति गारुड़े २०८ अध्यायः॥)
सेव्यः, पुं, (सेव्यते इति। सेव + ण्यत्।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥ हिज्जलवृक्षः। इति शब्दरत्नावली॥
सेव्यः, त्रि, (सेव सेवने + ण्यत्।) सेवार्हः। इति मेदिनी॥ (यथा, कथासरित्सागरे। ५२। १३७।
"अहं तं सेव्यमन्येषां करिष्यामीश्वरं क्षणात्। तत्तं वृणीष्व भर्त्तारं यदि ते पुत्रि रोचते॥")
सेव्या, स्त्री. (सेव + ण्यत्। टाप्।) वन्दावृक्षः। इति शब्दरत्नावली॥
से, क्षित्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) सायति। क्षितिः क्षयः। इति दुर्गादासः॥
सैंहः, त्रि, (सिंहस्यायमिति। सिंह + अण्।) सिंहसम्बन्धी। सिंहतुल्यः। इति सिद्धान्तकौमुदी॥ (स्त्रियां ङीप्। यथा, माघे। १।४७।
"सटाच्छटाभिन्नघनेन विभ्रता
नृसिंह सैंहीमतनुं तनुं त्वया।
स मुग्धकान्तास्तनसङ्गभङ्गुरै-
रुरोविदारं प्रतिचस्करे नखैः॥
सैंहली, स्त्री, (सिंहले देशे भवा। सिंहल + अण्। ङीप्।)सिंहपिप्पली। तत्पर्य्यायः। सर्पदण्डा २ सर्पाक्षी ३ ब्रह्मभूमिजा ४ पार्व्वतीपुटी ५ शैलजा ६ ताम्रा ७ लम्बबीजा ८ उत्कटा ९ अद्रिजा १० सिंहलक्षा ११ लम्बदन्ता १२ जीवला १३ जीवाला १४ जीवनेत्री १५ कुरुण्टी १६। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। जन्तुनाशित्वम्। दीपनत्वम्। कफश्वासमीरारुचिशमनत्वम्। कोष्ठशोधनत्वञ्च। इति राजनिर्घण्टः॥ सिंहलद्वीपभवे, त्रि॥
सैंहिकः, पुं, (सिंहिकायां भवः। अण्।) राहुः। इति शब्दरत्नावली॥
सैंहिकेयः, पुं, (सिंहिकाया अपत्यं पुमानिति। सिंहिका + ढक्।) राहुः। इत्यमरः॥ (यथा, माघे। २। ३५।
"म्रियते यावदेवकोऽपि रिपुस्तावत् कुतः सुखम्
पुरः क्षिप्यति सोमं हि सैंहिकेयोऽसुरद्विषाम्॥")
सैकतं, क्ली, (सिकताः सन्त्यत्रेति। अण्।) वालुकामयतटम्। इत्यमरः। १। ३। २६॥ (यथा, कुमारे। १। २८।
"मन्दाकिनीसैकतवेदिकाभिः
सा कन्दुकैः क्रत्रिमपुत्रकैश्च।
रेमे मुहुर्मध्यगता सखीनां
क्रीड़ारसं निर्विशतीव बाल्ये॥"
सैकतः, त्रि, (सिकताः सन्त्यत्रेति। सिकता + "सिकतायकराभ्याञ्च।" ५। २। १०४। इति अण्।) सिकतामयः। इत्यमरः।१। १०। ८॥ तत्पर्य्यायः। सिकतिलः२ सिकतावान्३। इति राजनिर्घण्टः॥ (यथा, भागवते। ११।२८।१२।
"शैलो दारुमयो लौही लेप्या लेख्या च सैकती।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता॥")
सैकतिकं, क्ली, माढ्यावा। मङ्गलसूचकम्। इति मेदिनी॥
सैकतिकः, पुं,(सैकतं पुलिनं प्रियत्वेनास्त्यस्येति। सैकत + ठन्।) संन्यस्तः। चपणकः। सन्देहजीविनि, त्रि। इति मेदिनी॥
सैकतेष्टं, क्ली,(सैकतं स्थानमिष्टमस्य।)आर्द्रकम्। इति राजनिर्घण्टः॥ वालुकामयप्रियै, त्रि॥
सैतवाहिनी, स्त्री, वाहुदानदी। इत्यमरः। १। १०। ३३।
सैद्धान्तिकः, त्रि,(सिद्धान्तं वेत्तीति। सिद्धान्त + ठक्।) सिद्धान्तज्ञः। इति हेमचन्द्रः कौमुदी च॥
सेनापत्यं, क्ली,(सेनापतेर्भावः कर्म्म वा। सेनापति + "पत्यन्तपुरोहितादिभ्यो यक्।" ५।१।१२८। इति यक्।) सेनापतेर्भावः। तत्कर्म्म च। इति सिद्धान्तकौमुदी॥(यथा,मनुः।१२।१००।
"सैनापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च।
सर्व्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति॥"
सेनापतेरिदमिति।"दित्यदित्यादित्येति।"४। १। ८५। इति ष्यञ्।) सेनापतिसम्बन्धिनि, त्रि॥
सैनिकः,पुं,(सेनां समवैतीति। सेना + "सेनाया वा।" ४। ४। ४५। इति पचे ठक्।) सेनायां समवेतः। इत्यमरः। २। ८। ६१॥ मिलितहस्त्यश्वरथपादातं सेना तत्र ये समवेताः एकदेशीभूतास्ते सैन्याः सैनिकाश्च। इति भरतः॥ (यथा, रघुः। ३। ६१।
"निमेषमात्रादवधूय तद्व्यथां
सहोत्थितः सैनिकदर्षनिस्वनैः॥")
सैन्धवः। इति मेदिनी अमरश्च॥ प्राणिवधनियुक्तः। यथा, श्रीभागवते पञ्चमस्कन्धे।
"ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च तांश्च ते पशव इह निहता यमसदने यातयन्तो रक्षोगणाः सैनिका इव स्वधितिना अवदायासृक् पिबन्तीति। सैनिकाः प्राणिवधनियुक्ताः। इति तिथ्यादितत्त्वम्॥ सेनासम्बन्धिनि, त्रि॥(यथा, महाभारते। ७। १९०। ४१।
'एवं तं निहतं संख्ये दृष्ट्वा सैनिको जनः॥")
सैन्धवं, क्ली, पुं,(सिन्धौ समुद्रतीरे सिन्धुदेशे वा भवम्। सिन्धु + "अणञौ च।"४।३।३३। इति अण्।)लवणविशेषः। स तु सिन्धुनद्युपलक्षितदेशोद्भवः। तत्पर्य्यायः। शीतशिवम् २ माणिमन्थम् ३ सिन्धुजम् ४। इत्यमरः। २।९।४२॥ वशिरम् ५ सिन्धुदेशजम् ६ माणिबन्थम् ७। इति जटाधरः॥ शितशिवम् ८। इति शब्दरत्नावली॥ नादेयम् ९ शिवम् १० सिन्धम् ११ शिवालजम् १२ पथ्यम् १३। अस्य गुणाः।
"सैन्धवं लवणं वृष्यं चक्षुष्यं दीपनं रुचि।
पूतं स्वादु त्रिदोषघ्नं व्रणदोषविबन्धजित्॥
सैन्धवं द्विविधं ज्ञेयं सितं रक्तमिति क्रमात्॥
रसवीर्य्यविपाकेषु गुणाढ्यं कथितं सितम्॥"
इति राजनिर्घण्टः॥
अपि च।
"सैन्धवं लवणं स्वादु दीपनं पाचनं तनु।
स्निग्धं रुच्यं हिमं हृद्यं सूक्ष्मनेत्रं त्रिदोषहृत्॥"
इति भावप्रकाशः॥
किञ्च।
"सैन्धवं दोषजिद्धृद्यं चक्षुष्यमविदाहि च।
अग्निसन्दीपनं स्निग्धं रोचनं मधुरं लघु॥"
इति राजवल्लभः॥
तच्च हविष्यात्वम्। यथा, स्मृतिः।
"लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी।"
इति हविष्यान्नगणने तिथ्यादितत्त्वम्॥
सैन्धवः, पुं, (सिन्धुरभिजनोऽस्येति। सिन्धु + "सिन्धुतक्षशिलादिभ्योऽणञौ।"४।३।९३।इति अण्।) घोटकः। स तु सिन्धोरदूरभवः। विकारसंज्ञेति अदूरभवार्थे ष्यञ्। इत्यमरभरतौ। २।८।४४। (यथा, भागवते।८।१।२३।
"स एकदा महाराज! विचरन् मृगयां वने।
हतः कतिपयामात्यैरश्वमारुह्य सैन्धवम्॥"
सिन्धुदेशाधिपतिः। जयद्रथः। यथा, महाभारते। १। १। १९६।
"यदा द्रोणः कृतवर्म्मा कृपश्च
कर्णो द्रौणिर्भद्रराजश्च शूरः।
अमर्षयन् सैन्धवं वध्यमानं
तदा नाशंसे विजयाय सञ्जय॥"
सिन्धुदेशोत्पन्नमात्रे। यथा, तत्रैव। ३। ५१। २४
"हारहूनांश्च चीनांश्च तुखारान् सैन्धवांस्तथा॥")
सैन्धी, स्त्री, तालादिरसनिर्य्यासः। तत्पर्य्यायः। हाला २। अस्या गुणाः। शीतत्वम्। कषायत्वम्। अम्लत्वम्। पित्तदाहनाशित्वम्। वातदत्वञ्च। इति राजनिर्घण्टः॥
सैन्यं, क्ली, (सेना एव। चतुर्वर्णादित्वात् ष्यञ्।) सेना इत्यमरः। २। ८। ७८॥ (यथा, मार्कण्डेये। ८७। २१।
"इतश्चेषं ततः सैन्यं दृष्ट्वा चक्रं निपातितम्।
मुक्तञ्च समहावीर्य्यं दिशो भेजे भयातुरम्॥")
सैन्यः,पुं, (सेनां समवैतीति। सेना + "सेनाया वा।" ४।४। ४५। इति ष्यञ्।) सेनासमवेतः। इत्यमरः। २। ८। ६१।"मिलितहस्त्यश्वरथपादातं सेना तत्र ये समवेता एकदेशीभूतास्ते सैन्याः सैनिकाश्च।" इति भरतः॥ किञ्च।
"सैन्यं क्लीवं बलेऽन्यै ना समवेते तु वाच्यवत्॥"
इति मेदिनी॥
सैन्यपृष्ठं,क्ली, (सैन्यस्य पृष्ठम्।) सैन्यस्य पश्चाद्भागः। यत्र स्थिते राजा स्वसैन्यं प्रतिगृह्णाति। तत्पर्य्यायः। प्रतिग्रहः २। इत्यमरः॥ परिग्रहः ३। इति भरतः॥ पतद्ग्रहः ४। इति टीकान्तरम्॥

समन्तिकं,क्लो,सिन्दूरम्। इति केचित्॥सीमन्त-शब्दात् ष्णिकप्रत्ययेन निष्पन्नम्॥

सैरन्ध्री, स्त्री, (स्वैरं स्वाच्छन्द्यं धरतीति। धृ+मूलविभुजादित्वात् कः। पृषोदरादित्वात् साधुः।) अन्यवेश्मस्था स्वतन्त्रा शिल्पजीविनी। इत्यमरः। २। ६। १८। (यथा, महाभारते। ३। ६५। ५१।

"सैरन्ध्रीमभिजानीध्वं सुनन्दे देवरूपिणीम्। वयसा तुल्यतां प्राप्ता सखी तव भवत्वियम्॥")

द्रौपदी। इति हेमचन्द्रः॥ (वर्णसङ्करसम्भूत-स्त्री। यथा, महाभारते। १३। ४८। १९।

"अगम्यागमनाच्चैव जायते वर्णसङ्करः। ब्राह्मानामनुजायन्ते सैरन्ध्र्यां मागधेषु च। प्रसाधनोपचारान्नमदासन्दासजीवनम्॥")

सैरिकः, पुं, (सीर+ठक्।) सीरेण लाङ्गलेन खनति यः। क्षुपान् इति भाषा॥ (सीरं वहतीति। सीर+"हलसीरात् ठक्।" ४। ४। ८१। इति ठक्।) सीरस्य वोढा। हैलेगरु इति भाषा॥ (सीरस्येदमिति। "हलसीरात् ठक्।" ४। ३। १२४। इति ठक्।) सीर-सम्बन्धिनि, त्रि। तेषां पर्य्यायः। हालिकः २ लाङ्गलिकः ३। इत्यमरः। २। ९। ६४॥

सैरिन्ध्री, स्त्री, (स्वैरं स्वातन्त्र्यं धरतीति। धृ+मूलविभुजादित्वात् कः। पृषोदरादित्वात् साधुः। गौरादित्वात् ङीष्।) परवेश्मस्था स्ववशा शिल्पकारिका। इत्यमरः। २। ६। १८॥ तत्पर्य्यायः। सैरन्ध्री २ सैरिन्ध्रिः ३। इति तट्टीका॥ (यथा, महाभारते। ४। ८। २।

"वासस्य परिधायेकं कृष्णं सुमलिनं महत्। कृत्वा वेषं हि सैरिन्ध्र्याः कृष्णा च व्यचरत् तदा॥")

वर्णसङ्करसम्भूतस्त्री। महल्लिका। इति मेदिनी। द्रौपदी। इति धरणिः॥ (यथा, महाभारते। ४। २३। ५।

"यथा सैरिन्ध्रीदोषेण न ते राजन्निदं पुरम्। विनाशमेति वै क्षिप्रं तथा नीतिर्विधीयताम्॥"

सैरिभः, पुं, (सीरे लाङ्गलवहने इभ इव। शक-न्धादित्वात् साधुः। ततः स्वार्थे अण्।)महिषः। इत्यमरः। २। ५। ४॥ स्वर्गः। इति त्रिकाण्ड-शेषः॥

सैरीयः, पुं, (सीरे भवः। अण्। सेरः कर्मक्षेत्र भवः। हलात् छः।) झिण्टी। इति शब्द-रत्नावली॥

सैरीयकः, पुं, (सैरीय एव। स्वार्थे संज्ञायां वा कन्।) झिण्टी। इत्यमरः। २। ४। ७५॥ अस्य गुणः। कफवातनाशित्वम्। इति राज-वल्लभः॥

सैरेयः, पुं,(सैरे कर्षे भवः। सैर+"तत्रादिभ्यो ठक्।" ४।२।८७। इति ठक्।) झिण्टी। इति शब्दमाला भरतश्च॥ (अस्य पर्य्यायो यथा,—

"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका। सहाचरः सहचरः स च भिन्न्यपि कथ्यते॥"

अथास्य गुणाः।

"सैरेयः कुष्ठवातास्रकफकण्डूविषापहः। तिक्तोष्णो मधुरोऽनम्लः सुस्निग्धः केशरञ्जनः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सैरेयकः,पुं,(सैरेय एव। स्वार्थे कन्।) झिण्टी। इति राजनिर्घण्टो भरतश्च॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका। सहाचरः सहचरः स च भिन्न्यपि कथ्यते॥")

सैवालं, क्लो, शैवालम्। यथा,—

"या पांशुपाण्डरवपुर्व्विरसा पुरासीत् सैवालकाङ्कुरलतामधुना विभर्त्ति। वक्त्रं प्रसर्पति तनोर्वितनोति लक्ष्मीं प्रायः पयोधरसमुन्नतिरत्र हेतुः॥"

इति प्रसिद्धश्लेषकाव्यम्॥

सोः, स्त्री, पार्व्वती। इति केचित्॥ षोधातोः क्विप्प्रत्ययेन निष्पन्ना।

सोढ़ः, त्रि, (सह मर्षणे+क्तः। "सहिवहोरोद-वर्णस्य।" ६। ३। ११२। इति अवर्णस्य ओत्।) क्षान्तः। इत्यमरः। ३। १। ८७॥ दुःखादिसहनशीलः। इति तट्टीकायां नील-कण्ठः॥

सोढ़ा, [ऋ] त्रि, (सहते इति। सह+तृच्) क्षमायुक्तः। शक्तः। इति मेदिनी॥ (यथा, महाभारते। ७। २६। ६।

"सोढ़ा शस्त्रनिपातानामग्निस्पर्शस्य चानघ। स पाण्डवबलं सर्व्वमद्येको नाशयिष्यति॥")

सोत्कण्ठः, त्रि, (उत्कण्ठया सह वर्त्तमानः।) उत्कण्ठायुक्तः। तत्पर्य्यायः। उत्कः २ उन्मनाः ३। इति जटाधरः॥ (यथा, कथासरित्-सागरे। ३१। ४५।

"तत्रोद्यानगतं सा तं वत्सेशं सख्युदीरितम्। ददर्श दूरात् सोत्कण्ठा चकोरीवाम्बुतल्लि-षम्॥")

सोत्रासं, क्लो, (उत्रासेन सह वर्त्तमानम्।) प्रियावाक्यम्। यथा, शब्दरत्नावल्याम्।

"सोल्लुण्ठनन्तु सोत्रासं चटु चाटु प्रियोदितम्॥"

सोत्रासः, पुं, (उत्रासेन आधिक्येन सह वर्त्त-मानः।) सशब्दहास्यम्। यथा,—

"सोत्रास आच्छुरितकमवच्छुरितकं तथा। अट्टहासो महाहासो हासः प्रहास इत्यपि॥"

इति शब्दरत्नावली॥

सोदर्यं,त्रि,उदरेण सह वर्त्तमानम्। उदरियुक्तम्। मुद् समेत् इति भाषा। यथा,—

"दत्तां कन्यां हरन् दण्ड्यो व्ययं दद्याच्च सोदरम्। मृतायां वरमादद्यात् परिदाधोभयव्ययम्॥"

इत्युदाहृतत्वधृतयाज्ञवल्क्यवचनम्॥

सोदरः, पुं, (सह समानं उदरं यस्य। सहस्य सः।) सहोदरः। इति शब्दरत्नावली॥ (यथा, मनुः। ८। २९९।

"भार्य्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः। प्रायापराधास्ताड्याः स्यूरज्ज्वा वेणुदलेन वा॥")

सोदरा, स्त्री, सहोदरा भगिनी। इति सोदर-शब्दादाप्प्रत्ययेन निष्पन्ना॥

सोदर्य्यः, पुं, (समानोदरे भवितः। सोदर+"सोदरात् यः।" ४।४।१०९। इति यः।) सहो-दरः। इत्यमरः।२।६।३४॥ (यथा,रघुः।१५।२६।

"स हत्वा लवणं वीरस्तदा मेने महौजसम्। भ्रातुः सोदर्य्यमात्मानमिन्द्रजिद्वधशोभिनः॥")

सोनड़ः, पुं, लसुनम्। इति शब्दरत्नावली॥

सोन्मादः, त्रि, (उन्मादेन सह वर्त्तमानः।) उन्मदः। उन्मदिष्णुः। तस्य रूपान्तराणि यथा। उन्मादः। सूमादः। सून्मदः। इत्य-मरटीकायां भरतः। ३। १। २३॥

सोपकरणं. त्रि, उपकरणेन सह वर्त्तमानम्। उपकरणविशिष्टम्। यथा,—

"एवञ्च अमुककाम इति सोपकरणं वत्सतरी-चतुष्टययुक्तं हवमिति चाभिलप्य उत्सर्गः सङ्-कल्पते।" इति हवोत्सर्गतत्त्वम्॥ इदं सोप-करणमामान्नमेवेद्यमसुकदेवतायै नमः। इति च पूजापद्धतिः॥

सोपकारः, त्रि, उपकारविशिष्टः। उपकारेण सह वर्त्तमान इति बहुव्रीहिसमासे कृते सह-शब्दस्य सादेशेन निष्पन्नः॥

सोपधं, त्रि, (उपधया सह वर्त्तमानमिति।) सच्छद्मदानादि। यथा हारीतः। अथासद्द्रव्य-दानमस्वर्ग्यं यच्च दत्त्वा परितप्यते। तच्छद्मदान-मफलं यच्चोपकारिणे ददाति तन्मात्रं परि-क्षिप्तं यच्च सोपधं ददाति अन्यश्रावितमल्पं यच्चापात्राय ददाति अनिष्टदानं स्रवति यच्च दत्त्वा प्रकीर्त्तयते स्वयदानं यच्चाश्रद्धया ददाति क्रोधाद्राक्षसं यच्चाक्रुश्य ददाति दत्त्वा वाक्रो-शति असत्कृतं पैशाचं यच्चावज्ञातं ददाति दत्त्वा वावजानीते सुमूर्षोस्तामसं यच्चाप्रकृतो ददाति। एते दानोपसर्गा यैरुपसृष्टं दान-मप्रसिद्धमस्वर्ग्यं मयश्चास्यमभ्रुवफलं भवत्यल्पफलं वेति। तर्हि त्यागानन्तरकाले हस्तार्पणसम्भवे-ऽपि अदानमसमर्पणम्। उपकारिणि व्यसनो-पकारिणे। तन्मात्रं यथोक्तोपकरणरहितम्। सोपधं सच्छद्म। अन्यश्रावितं लोकसम्भाव-नार्थं प्रकाशितम्। अनिष्टदानं अवज्ञे दानम्। स्वयो मानभङ्गः। अप्रकृतो भयादिमान्। इति शुद्धितत्त्वम्॥

सोपप्लवः,पुं,(उपप्लवेन सह वर्त्तमानः।) राहु-ग्रस्तः चन्द्रः सूर्य्यश्च। इत्यमरः। १। ४। १०॥

सोपवासः, त्रि, (उपवासेन सह वर्त्तमानः।) उपवासविशिष्टः। यथा,—

"मत्स्यांस्तु कामतो भुक्त्वा सोपवासस्त्रयहं वसेत्॥"

इति तिथ्यादितत्त्वे याज्ञवल्क्यवचनम्॥

सोपाकः,पुं,श्वपाकः। इति केचित्॥(चण्डालात् पुक्कस्यां समुत्पन्नोऽन्यजजातिविशेषः। यथा, मनुः। १०। ३८।

"चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान्। पुक्कस्यां जायते पापः सदा सज्जनगर्हितः॥")

सोपाधिः, त्रि, (उपाधिना सह वर्त्तमानः ।) उपाधियुक्तः । प्रतिलाभेच्छादिना दानादिः । यथा नारदः ।
"अदत्तन्तु भयक्रोधकामशोकरुगन्वितैः ।
बालमूढ़ार्त्तमत्तोन्मत्तापवर्जितैः ॥
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत्॥"
प्रतिलाभेच्छया सोपाधिदत्तमुपाध्यधिष्ठितविसिक्तमिति विवादचिन्तामणिः । इति शुद्धितत्त्वम्॥
सोपानं, क्ली, (उपानमुपरिगमनं तेन सह विद्यमानम् ।) आरोहणम् । इत्यमरः । २।२।१८॥ इष्टकादिरचिते पथिष्ठा इति ख्याते । देशान्तरे खड़्खड़ीति यत् प्रसिद्धम् । आरुह्यते अनेन आरोहणं अनट् । उपपूर्व्वादनितेर्भावे अल् अनेकार्थत्वादुपानं ऊर्द्ध्वगमनं तेन सह वर्त्तते सोपानम् । सोपानसिद्धसाध्याः संवाधसमूढ़सत्राणीति दन्त्यादावुभविवेकः । इति भरतः॥ किञ्च ।
"आरोहणञ्च सोपानं पैठा इति समाह्वये ।
सोपाने काष्ठघटिते निःश्रेण्यिस्त्वधिरोहिणी ॥
निःश्रेणी स्यान्निःश्रयणी तथा निःश्रेयिणीत्यपि ॥"
इति शब्दरत्नावली ॥
(यथा, कुमारे । १ । २९ ।
"मध्येन सा वेदिविलग्नमध्या
बलित्रयं चारु बभार बाला ।
आरोहणार्थं नवयौवनेन
कामस्य सोपानमिव प्रयुक्तम् ॥"
सोभाञ्जनः, पुं, शोभाञ्जनः । इत्यमरटीकायां भरतः । २ । ४ । २१ ॥
सोमं, क्ली, (सुप्रसवैश्वर्य्ययोः + मन्) काञ्चिकम्। स्वर्गः । इति केचित् ॥
सोमः, पुं, (सौति अमृतमिति । षु प्रसवे + "अर्त्तिस्तुसुहुसिति ।" उणा० १ ।१३८। इति मन् ।) चन्द्रः । इत्यमरः । १ । ३ । १४॥(यथा, हरिवंशे । ४ । २ ।
"द्विजानां वीरुधाञ्चैव नक्षत्रग्रहयोस्तथा ।
यज्ञानां तपसाञ्चैव सोमं राज्येऽभ्यषेचयत् ॥")
कर्पूरः । इति चामरः ।२।६।१३० ॥ वानरः । कुबेरः । यमः । वायुः । वसुभेदः । (यथा, मात्स्ये । ५ । २१ ।
"आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥")
जलम् । सोमलतौषधिः । इति मेदिनी ॥ (अस्य विवरणं यथा,—
"ब्रह्मादयोऽसृजन् पूर्व्वमृतं सोमसंज्ञितम् ।
जरामृत्युविनाशाय विधानं तस्य वक्ष्यते ॥
एक एव खलु भगवान् सोमः स्थाननामाकृतिवीर्य्यविशेषैश्चतुर्व्विंशतिधा भिद्यते । तद्यथा,
अंशुमान् भूरिवांश्चैव चन्द्रमा रजतप्रभः ।
दूर्व्वासोमः कनीयांश्च श्वेताश्वः कनकप्रभः ॥
प्रतानवांस्तालपत्रः करवीरोऽश्ववानपि ।
स्वयम्भुवो महासोमो यश्चापि गरुड़ाङ्कितः ॥
गायत्रश्चैष्टुभः पाङ्क्तो जागतः शाङ्करस्तथा ।
अग्निष्टोमो रैवतश्च यथोक्त इति संज्ञितः ॥
गायत्रा त्रिपदा युक्तो यथोड्डुपतिरुच्यते ।
एते सोमाः समाख्याता वेदोक्तैर्नामभिः शुभैः॥
सर्व्वेषामेव चैतेषामेको विधिरुपासने ।
सर्व्वे तुल्यगुणाश्चैव विधानं तेषु वक्ष्यते ॥
अतोऽन्यतमं सोममुपयुयुक्षुः सर्व्वोपकरणपरिचारकोपेतः प्रशस्तदेशे चिह्नितमागारं कारयित्वा कृतदोषः प्रतिसंसृष्टभक्तः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु अंशुमन्तमादायाध्वरकल्पे नाङ्कितमभियुतमभिहुतं चान्तरागारे कृतमङ्गलः सोमकन्दं सुवर्णसूच्या विदार्य्य पयो गृह्णीयात् सौवर्णे पात्रेऽञ्जलिमात्रं ततः सक्तदेवोपयुञ्जीत नासादयंस्तत उपस्पृश्य शेषमस्तुवसाद्य यमनियमाभ्यामात्मानं संयोज्य वाग्यतोऽभ्यन्तरतः सुहृद्भिरुपास्यमानो विहरेत् ॥ रसायनं पीतवांस्तु निवाते तन्मनाः शुचिः । आसीत तिष्ठेत् क्रामेच्च न कथञ्चन सविशेत्॥ सायं वा भुक्तवान् स्नुतशान्तिः कुशशय्यायां कृष्णाजिनोत्तरायां सुहृद्भिरुपास्यमानः शयीत हृषितो वा शीतोदकमात्रां पिबेत्ततः प्रातरुत्थायोपस्पृतशान्तिः कृतमङ्गलो गां स्पृष्ट्वा तर्पयेत्ततोऽसीत । तस्य जीर्णे सोमे हृदिरुपपद्यते ततः शोणितात्तं क्रमिव्याप्तिमशं छर्द्दितवतः सायं स्नुतशीतं क्षीरं पिबेत्ततः । ततस्तृतीयेऽहनि क्रमिव्याप्तिमशमतिसार्य्यते स तेनानिष्टप्रतियहभुक्तप्रभृतिभिर्विशेषैर्मुक्तः शुद्धतनुर्भवति ततः सायं स्नातस्य पूर्व्ववदेव क्षीरं पिबेत् । क्षौमवस्त्रास्तृतायां चैनं शय्यायां शाययेत् ततश्चतुर्थेऽहनि तस्य स्नायुरुत्पद्यते । ततः सर्व्वाङ्गेभ्यः क्रमयो निष्क्रामन्ति तदहश्च शय्यायां पांशुभिरवकीर्य्यमाणः शयीत । ततः सायं पूर्व्ववदेव क्षीरं पिबेत् । एवं पञ्चमषष्ठयोर्दिवसयोर्वर्त्तेत केवलमुभयकालमस्मै क्षीरं पिबेत्ततः सप्तमेऽहनि निर्म्मांसस्नायुगस्थिभूतः केवलं सोमपरिग्रहादेवोच्छ्वसिति । तदहश्च क्षीरेण सुखोष्णेन परिषिच्य तिलमधुकचन्दनानुलिप्तदेहं पयः पाययेत् । ततोऽष्टमेऽहनि प्रातरेव क्षीरपरिषिक्तं चन्दप्रादिग्धगात्रं पयः पाययित्वा पांशुशय्यां समुत्सृज्य क्षौमास्तृतायां शाययेत्ततो मांसमाप्याय्यते त्वक्चाप्यदलति । दन्तनखरोमाणि चास्य पतन्ति । तस्य नवमदिवसात् प्रभृत्यणुतैलाभ्यङ्गः सोमवल्ककषायपरिषेकः । ततो दशमेऽहन्येतदेव क्षीरं पिबेत्ततोऽस्य त्वक्स्थिरतामुपैति । एवमेकादशहशयोर्वर्त्तेत । तत्र त्रयोदशात् प्रभृति सोमवल्ककषायपरिषेकः । एवमाषोड़शाहर्वर्त्तेत ततः सप्तदशाष्टादशयोर्द्विवसयोर्द्विगुणा जायन्ते शिखरिणः स्निग्धवच्चवैदूर्य्यस्फटिकनिकाशाः समाः स्थिराः सहिष्णवः । तदा प्रभृति चानवैः शालितण्डुलैः क्षीरयवागूमुपसेवेत यावत् पञ्चविंशतिरिति । ततोऽस्मै दध्याच्छाद्योदनं मृदूभयकालं पयसा ततोऽस्य नखा जायन्ते विद्रुमेन्द्रगोपकतरुणादित्यप्रकाशाः स्थिराः स्निग्धा लक्षणसम्पन्नाः केशाश्च जायन्ते त्वक् च नीलोत्पलातसीपुष्पवैदूर्य्यप्रकाशा । ऊर्द्ध्वं सामान् केशान् वापयेत् वापयित्वा चोशीरचन्दनकृष्णतिलकल्कैः शिरः प्रदिह्यात् पयसा वा स्नापयेत् ॥
ततोऽस्थानन्तरं समराचात् केशा जायन्ते भ्रमराञ्जननिभाः कुञ्चिताः स्निग्धास्ततस्थिराचात् प्रथमपरिसरान्निष्क्रम्य मुहूर्त्तं स्थित्वा पुनरेवान्तः प्रविशेत् । ततोऽस्य बलातैलमभ्यङ्गार्थेऽवचार्य्यम् । यवपिष्टमुद्वर्त्तनार्थे । सुखोष्णञ्च पयः परिषेकार्थे । अजकर्णकषायमुत्सादनार्थे । सोशीरं कूपोदकं स्नानार्थे । चन्दनमनुलेपनार्थे। आमलकरस-विमिश्रास्तस्य यूषसूपविकल्पाः । क्षौरमधुकसिद्धञ्च कृष्णतिलमवचारणार्थे । एवं दशरात्रं ततोऽन्यद्दशरात्रं द्वितीये परिसरे वर्त्तेत । ततस्तृतीये परिसरे स्थिरीकुर्व्वन्नात्मानमन्यदशरात्रमासीत । किञ्चिदातपपवनान् वा सेवेत पुनश्चान्तः प्रविशेत् । न चात्मानमादर्शेषु वा निरीक्षेत रूपगालित्यात् ततोऽन्यद्दशरात्रं क्रोधादीन् परिहरेदेवं सर्व्वेषामुपयोगः । विशेषतस्तु वल्लीप्रतानक्षुपादयः सोमा भक्षयितव्याः । तेषान्तु प्रमाणमर्द्धचतुर्थमुष्टयः ।
अंशवस्तं सौवर्णे पात्रेऽभिषुणुयात् । चन्द्रमसं राजते चोपज्याष्टगुणमैश्वर्य्यमवाप्येशानन्देवमनुप्रविशति । शेषांस्तु ताम्रमये मृण्मये वा रोहिते वा चर्म्मणि वितते शूद्रवर्ज्जं त्रिभिर्वर्णैः सोमा उपयोक्तव्याः । ततश्चतुर्थे मासे पौर्णमास्यां शुचौ देशे ब्राह्मणानर्चयित्वा कृतमङ्गलो निःक्रम्य यथोक्तं व्रजेदिति ॥
ओषधीनाम्पतिं सोममुपयुज्य विचक्षणः ।
दशवर्षसहस्राणि नवान् धारयते तनुम् ॥
नाग्निर्न तोयं न विषं न शस्त्रं नास्त्रमेव च ।
तस्यालमायुःक्षपणे समर्थाश्च भवन्ति हि ॥
भद्राणां षष्टिवर्षाणां प्रसूतानामनेकधा ।
कुञ्जराणां सहस्रस्य बलं समधिगच्छति ॥
क्षीरोदं शक्रसदनमुत्तरांश्च कुरूनपि ।
यत्रेच्छति स गन्तुं वा तत्राप्रतिहता गतिः ॥
कन्दर्प इव रूपेण कान्त्या चन्द्र इवापरः ।
प्रह्लादयति भूतानां मनांसि स महाद्युतिः ॥
साङ्गोपाङ्गांश्च निखिलान् वेदान्विन्दति तत्त्वतः ।
चरत्यमोघसङ्कल्पो देववच्चाखिलं जगत् ॥
सर्व्वेषामेव सोमानां पत्राणि दश पञ्च च ।
तानि शुक्ले च कृष्णे च जायन्ते निपतन्ति च॥
एकैकं जायते पत्रं सोमस्याहरहस्तदा ।
शुक्लस्य पौर्णमास्यान्तु भवेत् पञ्चदशच्छदः ॥
शीर्य्यते पत्रमेकैक दिवसे दिवसे पुनः ।
कृष्णपक्षक्षये चापि लता भवति केवला ॥
अंशुमानाज्यगन्धस्तु कन्दवान्नलतप्रभः ।
कदल्याकारकन्दस्तु भूरिवांल्लघुनच्छदः ॥
चन्द्रमाः कनकाभासो जले चरति सर्व्वदा ।
गरुड़ाङ्कितनामा च श्वेताश्चश्चापि पाण्डुरो ॥

सर्पनिर्मोकसदृशौ तौ हृत्वाग्रावलम्बिनौ।
तथान्यैर्मण्डलैश्चित्रैश्चित्रिता इव भान्ति ते॥
सर्व्व एव तु विज्ञेयाः सोमाः पञ्चदशच्छदाः।
क्षीरकन्दलतावन्तं पत्रैर्नानाविधैः स्मृताः॥
हिमवत्यर्व्वुदे सह्ये महेन्द्रे मलये तथा।
श्रीपर्व्वते देवगिरौ गिरौ देवसहे तथा॥
पारिपात्रे च विन्ध्ये च देवसुन्दे कृदे तथा।
उत्तरेण वितस्तायाः प्रहृता ये महीधराः॥
पञ्च तेषामधो मध्ये सिन्धुनामा महानदः।
हठवत् प्रवते तत्र चन्द्रमाः सोमसत्तमः॥
तस्योद्देशेषु वाप्यस्ति सुस्रवानंशुमानपि।
काश्मीरेषु सरो दिव्यं नाम्ना क्षुद्रकमानसम्॥
गायत्र्यास्त्रैष्टुभः पाङ्क्तो जागतः शाङ्करस्तथा।
अत्र सन्त्यपरे चापि सोमाः सोमसमप्रभाः॥
न तान् पश्यन्त्यधर्म्मिष्ठाः कृतघ्नाश्चापि मानवाः।
भेषजद्वेषिणश्चापि ब्राह्मणद्वेषिणस्तथा॥"
इति सुश्रुते चिकित्सितस्थाने एकोनत्रिंशत्तमोऽध्यायः॥*॥ "सोमनामौषधिराजः पञ्चदशपर्णः स सोम इव क्षीयते वर्द्धते च।" इति चरके चिकित्सास्थाने प्रथमेऽध्याये॥ * ॥*॥)
शिवः। दीधितिः। इत्युणादिकोषः। दिव्यौषधिः। सोमलतारसः। इति हेमचन्द्रः॥ (यथा,मनुः। ३। २५७।
"मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतम्।
अचारलवणक्षैव प्रकृत्या हविरुच्यते॥")
अमृतम्। पर्व्वतविशेषः। इति केचित्॥*॥
चन्द्रस्य विवरणं तथा। स च वायुकोणस्थौ-वैश्यजातिसत्त्वगुणलवणरसमृगशिरोनक्षत्रसमुद्राणामधिपतिः। इति बृहज्जातकादयः॥ एकहस्तप्रमाणशरीरः। श्वेतवस्त्रपरिधानः। शुक्लवर्णः। दक्षिणहस्तवरदः। गदायुक्तवामहस्तः। दशाश्वः। श्वेतपद्महस्तः। उमाधिदैवतः। जलप्रत्यधिदैवतः। सूर्य्याभिमुखः। यथा,—
"सामुद्रं वैश्यमात्रेयं हस्तमात्रं सिताम्बरम्।
श्वेतं द्विबाहुं वरदं दक्षिणं सगदेतरम्॥
दशाश्वं श्वेतपद्मस्थं विचिन्त्योमाधिदैवतम्।
जलप्रत्यधिदैवञ्च सूर्य्याभ्यासान्नयेत्तथा॥"
इति ग्रहयागतत्त्वम्॥ * ॥
तस्योत्पत्त्यादिर्यथा,—
ऋषय ऊचुः।
"सोमः पितॄणामधिपः कथं शास्त्रविशारदः।
तद्वंशे के तु राजानो बभूवुः कीर्त्तिवर्द्धनाः॥
सूत उवाच।
आदिष्टो ब्रह्मणा पूर्व्वमत्रिः सर्गविधौ पुरा।
अतुलं नाम तपः सृष्टयर्थं तप्तवान् प्रभुः॥
महानन्दकरं ब्रह्म जगतः क्षेमनाशनम्।
ब्रह्मविष्णुकरुद्राणामभ्यन्तरमतीन्द्रियम्॥
शान्तिक्षमादान्तमनसस्तदन्तर्नयने स्थितम्।
माहात्म्यात्तपसो विप्राः परमानन्दकारकम्॥
यस्मादुमापतिः साक्षादुमया तमधिष्ठितः।
तद्दृष्ट्वा अष्टमांशेन तस्मात् सोमोऽभवद्विधुः॥
अथ सुस्राव नेत्राभ्यां धाम तच्चाशुभं त्यजे।
दीपयन् विश्वमखिलं ज्योत्स्नया सचराचरम्॥
तद्दिशो जगृहुर्दाम स्त्रीरूपेण सुतेच्छया।
गर्भो भूत्वोदरे तासामास्थितोऽब्दशतत्रयम्॥
तास्तमूचुर्व्वयं गर्भमशक्ता धारणे ततः।
समादायाथ तद्गर्भमेकीकृत्य चतुर्म्मुखः॥
युवानमकरोद्ब्रह्मा सर्व्वायुधधरं वरम्।
स्यन्दनेऽथ सहस्राश्वे वेदशक्तिमये प्रभुः॥
आरोप्य लोकमनयदात्मीयं स पितामहः।
ततो ब्रह्मर्षिभिः प्रोक्तमस्तुस्तोमौ भवत्वयम्॥
ऋषिभिर्देवगन्धर्व्वैरोषधीभिस्तथैव च।
तुष्टुवुः सोमदैवत्यैर्ब्रह्माद्या मन्त्रसंग्रहैः॥
स्तूयमानस्य तस्याभूदधिको महसाञ्च यः।
तेजोवितानादभवद्भुवि दिव्यौषधीगणः॥
तद्दीप्तिरधिका तस्माद्रात्रौ भवति सर्व्वदा।
तेनौषधीशः सोमोऽभूत् द्विजेज्यश्चाभिगद्यते॥
वेदधामा रसश्चापि यदिदं चन्द्रमण्डलम्।
क्षीयते वर्द्धते चैव शुक्ले कृष्णे च सर्व्वदा॥
ततो विंशत्तथा सप्त दक्षः प्राचेतसो ददौ।
रूपलावण्यसंयुक्तास्तस्मै कन्याः सुवर्च्चसः॥"
इति मात्स्ये। २३। १—१५॥ * ॥
अपि च।
महातपा उवाच।
"ब्रह्मणो मानसः पुत्रः अत्रिर्नाम महातपाः।
तस्य पुत्रोऽभवत् सोमो दक्षजामाद्यतां गतः॥
सप्तविंशतिर्याः कन्या दाक्षायण्यः प्रकीर्त्तिताः।
सोमपत्न्योऽपि मान्यास्तास्तासां श्रेष्ठा तु रोहिणी॥
तामेव रमते सोमः नेतरा इति शुश्रुम।
इतराः प्रोचुरागत्य चन्द्रस्यासमतां पितुः॥
दक्षोऽप्यसकृदागत्य तमुवाच स नाकरोत्।
समतां सोऽपि तं दक्षः शशापान्तर्हितो भव॥
एवमुक्तः क्षयं सोमो अगमद्दक्षशापतः॥
देवा मनुष्याः पशवो नष्टे सोमे सवीरुधः।
क्षीणाभवंस्तदा सर्व्वा ओषध्यश्च विशेषतः॥
क्षयं गच्छद्भिरित्यर्थमोषधीभिः सुरर्षभाः।
मूलेषु वीरुधां सोमः स्थित इत्यूचुरातुराः॥
तेषां चिन्ताभवत्तीव्रा विष्णुञ्च शरणं ययुः।
भगवानाह तान् सर्व्वान् ब्रूत किं क्रियते मया॥
ते चाहुर्देव दक्षेण शप्तः सोमो विनाशितः।
तानुवाच तदा देवो मथ्यतां कलसोदधिः॥
ओषध्यः सर्व्वतो देवाः प्रक्षिप्याम्बुषु संयतैः।
एवमुक्ता ततो देवान् दध्यौ रुद्रं हरिः स्वयम्॥
ब्रह्माणञ्च तथा दध्यौ वासुकिं नेत्रकारणात्।
ते सर्व्वे तत्र सहिता मन्थनुर्वरुणालयम्॥
तस्मिंस्तु मथिते जातः पुनः सोमो महीप्रते।
योऽसौ चैवन्नसंज्ञो वै देहेऽस्मिन् पुरुषः परः॥
स एव सोमो मन्तव्यो देहिनां जीवसंज्ञकः।
परेच्छया स मूर्त्तिन्तु पृथक् सौम्यां प्रपेदिवान्॥
तमेव देवमनुजाः षोड़शेमाश्च देवताः॥
उपजीवन्ति हृत्याश्च तथैवौषधयः प्रभुम्॥
रुद्रस्तमेव सकलं दधार शिरसा तदा।
तदालिका भवन्त्यापो विश्वमूर्त्तिरसौ स्मृतः॥
तस्य ब्रह्मा ददौ प्रीतः पौर्णमासीतिथिं प्रभुः।
तस्यानुपोषयेद्राजन् तमर्थं प्रतिपादयेत्॥
स चान्द्राहारश्च भवेत् तस्य ज्ञानं प्रयच्छति।
कान्तिं पुष्टिञ्च राजेन्द्र धनं धान्यञ्च केवलम्॥"
इति वाराहे सोमोत्पत्तिरष्टसप्ततमाध्यायः॥*॥
तस्य व्रतस्य विधानं यथा,—
ब्रह्मोवाच।
"राका चानुमती चैव द्विविधा पूर्णिमा मता।
सिनीवाली कुहूश्चैव अमावास्या द्विधैव तु॥
अमा नाम रवेः रश्मिश्चन्द्रलोके प्रतिष्ठिता।
यस्मात् सोमो वसत्यस्यामतोऽमावासी ततः स्मृता॥
पूर्व्वोदितकलाभिस्तु पौर्णमास्या निशाकरः।
पूर्णिमानुमती ज्ञेया पश्चात् स्तमितभास्करे॥
यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह।
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता॥
यदा चास्तमिते सूर्य्ये पूर्णश्चन्द्रस्य चोदगमः।
युगपत् सोत्तरारागस्तदानुमतिपूर्णिमा॥
राकां तामनुमन्यन्ते देवताः पितृभिः सह।
रश्मिनाश्चैव चन्द्रस्य राकेति कवयोऽब्रुवन्॥
सिनीवाली प्रमाणन्तु क्षीणश्चैवो निशाकरः।
अमावास्यां विशत्यर्कं सिनीवाली ततः स्मृता॥
कुहेति कोकिलेनोक्तो यः कालस्तु समाप्यते।
तत्कालसंज्ञा त्वेषा वै अमावास्या कुहूः स्मृता॥
अनुमत्याः सराकायाः सिनीवाल्याः कुहूं विना
एतासां विरलः कालः कुमार्व्वेति कुहूः स्मृता॥"
विरलस्थाने हिलवेति च पाठः।
"कलाः षोड़श सोमस्य शुक्ले वर्द्धयते रविः।
अमृतेनामृतं कृष्णे पीयते दैवतैः क्रमात्॥
प्रथमां पिबते वह्निर्द्वितीयां पवनः कलाम्।
विश्वेदेवास्तृतीयान्तु चतुर्थीन्तु प्रजापतिः॥
पञ्चमीं वरुणश्चापि षष्ठीं पिबति वासवः।
सप्तमीमृषयो दिव्या वसवोऽष्टौ तथाष्टमीम्॥
नवमीं कृष्णपक्षस्य पिबतीन्द्रः कलामपि।
दशमीं मरुतश्चापि रुद्रा एकादशीं कलाम्॥
द्वादशीन्तु कलां विष्णुर्धनदश्च त्रयोदशीम्।
चतुर्दशीं पशुपतिः कलां पिबति नित्यशः॥
ततः पञ्चदशीञ्चैव पिबन्ति पितरः कलाम्।
कलावशिष्टो निष्पीतः प्रविष्टः सूर्य्यमण्डलम्॥
अमायां विशते रश्मौ अमावासी ततः स्मृता॥
पूर्व्वाह्णे विशते चार्कं मध्याह्ने तु वनस्पतिम्।
अपराह्णे विशत्यप्सु स्वयोनिं वारिसम्भवः॥
आपः प्रविष्टः सोमश्च ग्रेषया कलयैकया।
क्षणगुल्मलताद्यान्निष्पादयति चौषधीः॥
तमोषधिं स्थितं गावश्चरन्त्यापः पिबन्ति च।
तदङ्गानुगतं गोभ्यः क्षीरत्वमुपगच्छति॥
तत् क्षीरममृतं भूत्वा मन्त्रभूतं द्विजातयः।
स्वाहाकारवषट्कारैर्जुह्वत्याहुतयः क्रमात्॥
हुतमग्निषु देवाय पुनः सोमं विवर्द्धयेत्॥
एवं संक्षीयते सोमः क्षीणश्चाप्यायते पुनः।
तस्मात् सूर्य्यः ग्रहाङ्गस्य व्रतहृद्विधिरेर्विभुः॥"
इत्याद्ये देवीपुराणे चन्द्रव्रतहृद्विनामाध्यायः॥*

तस्य राहुग्रासकारणं यथा,—
ब्रह्मोवाच ।
"यदयं वदते लोको वालिशत्वान्महामते ।
तदहं संप्रवक्ष्यामि चन्द्रसूर्य्योपरागिकम् ॥
यदि सत्यमयं ग्रस्तस्तेजोराशिर्दिवाकरः ।
तत् कथं नोदरस्थेन राहुनं भस्मसात् कृतः ॥
अथवा राहुणाक्रम्य शत्रुवक्त्रं प्रवेशितः ।
तत् कथं दग्धनैस्तीक्ष्णैः शतधा न विखण्डितः॥
विभुक्त्वा पुनर्दृष्टस्तथैवाखण्डमण्डलः ।
न चास्यापहृतं तेजो न स्थानादपसारितः ॥
यदि वा ग्रस्त एवैष निर्य्यातः कथं दीप्ततरोऽभवत् ।
तस्मात् तेजसां राशौ राहोर्वक्त्रं गमिष्यति ॥
भक्ष्यार्थं सर्व्वदेवानां सोमः सृष्टः स्वयम्भुवा ।
तत्रस्थममृतस्यापि सम्भूतं सूर्य्यतेजसा ॥
पिबन्त्यम्बुमयं देवाः पितरश्च स्वधामृतम् ।
त्रयश्च त्रिंशतश्चैव त्रयस्त्रिंशतथैव च ।
त्रयश्च त्रिसहस्राश्च देवाः सोमं पिबन्ति ये ॥
राहोरप्यमृतं भागं पुरा सृष्टं स्वयम्भुवा ।
तस्मात्तद्राहुरागत्य पातुमिच्छति पर्व्वसु ॥
उद्भूत्य पार्थिवीं छायामभ्राकारां तमोमयः ।
पातुमिच्छन् ततश्चन्द्रमाच्छादयति छायया ॥
शुक्ले च चन्द्रमभ्येति कृष्णे पर्व्वणि भास्करम्।
सूर्य्यमण्डलसंस्थस्तु चन्द्रमेव जिघांसति ॥
तस्मात् पिबति तं राहुस्तनुमस्याविनाशयन् ।
अविहिंसन् यथा पद्मं पिबति भ्रमरो मधु ।
चन्द्रस्यमृतं तद्वदमेदाद्राहुरश्नुते ॥
चन्द्रकान्तो मणिर्यद्वत्तुहिनं चरते चणात् ।
चरन्नपि न हीयेत तेजसा नैव मुच्यते ॥
यथा सूर्य्यमणिः सूर्य्यादुत्पाद्य पावकं शुभम् ।
न भवत्यङ्गहीनोऽपि तेजसा नैव मुच्यते ॥
एवं चन्द्रश्च सूर्य्यश्च ह्रादितावपि राहुणा ।
स्वतेजसा न मुच्येते नाङ्गहीनौ बभूवतुः ॥
पर्व्वसंधं च चन्द्रस्य माणिक्यकनकाकृतिः ।
सोमो देवतसंयोगात् छायायोगाच्च पार्थिवात्
राहोश्च वरलब्धाद्वै प्रचरेदमृतं शशी ॥
क्षदोहकाले सम्प्राप्ते वत्सं दृष्ट्वा च गौर्यथा ।
स्वाङ्गादेव चरेत् क्षीरं तथेन्दोः चरतेऽमृतम् ॥
पितेव सूर्य्यो देवानां सोमो मातेव लक्ष्यते ।
यथा मातुः स्तनं पीत्वा जीवन्ते सर्व्वजन्तवः ।
पीत्वामृतं तथा सोमात् क्षय्यन्ते सर्व्वदेवताः ॥
सम्भृतं सर्व्वयागेषु तथा यं चरते शशी ।
तं चरन्तं यथामागमुपजीवन्ति देवताः ॥
तस्मिन् काले समभ्येति राहुरप्यवकर्षति ।
सर्व्वमर्द्धं त्रिभागञ्च पादं पादार्द्धमेव च ॥
आक्रम्य पार्थिवीच्छायां यावन्तं चन्द्रमण्डलम्
स्मृतः स भागो राहोस्तु देवभागास्तु शेषकाः॥
दर्शं विधाय देवानां राहोः पर्व्वगतस्य च ।
चन्द्रो न क्षयमायाति तेजसा नैव मुच्यते ॥
तिथिभागाय यावन्तः पुनस्यर्कं प्रमाणतः ।
सर्व्वच्छायास्थितः कालस्तावानेव प्रकीर्त्तितः॥
अतो राहुभुजः सोमः सोमाद्दर्शं दिवाकरः ।
पर्व्वकाले स्थितिस्त्वेवं विपरीता पुनः पुनः ॥
अतश्छादयते राहुरभ्रवच्छशिभास्करौ ।
राहुरभ्रकसंस्थानः सोममाच्छाद्य तिष्ठति ॥
उद्भूत्य पार्थिवीं छायां धूममेघ इवोत्थितः ।
चन्द्रस्य यदवष्टब्धं राहुणा भास्करस्य च ॥
तत्रावखण्डितं तस्य केवलं श्यामलीकृतम् ।
कर्दमेन यथा वस्त्रं शुक्लमप्युपहन्यते ॥
एकदेशेऽथ सर्व्वं वा राहुणा चन्द्रमास्तथा ।
प्रक्षालितं तदेवेह पुनः शुक्लतरं भवेत् ॥
राहुयुक्तं भवेत्तद्वत् निर्म्मलं चन्द्रमण्डलम् ।
राहुणाच्छादितौ वापि दृष्ट्वा चन्द्रदिवाकरौ ॥
विप्राः शान्तिपरा भूत्वा पुनराप्याययन्ति तम्।
एवं न गृह्यते सूर्य्यश्चन्द्रमास्तच्च गृह्यते ॥
अबुधास्तं न पश्यन्ति मानुषा मांसचक्षुषः ।
जगत्सम्मोहनश्चैतत् ग्रहणं चन्द्रसूर्य्ययोः ॥"
इति देवीपुराणे ग्रहणविवेकनामाध्यायः ॥
सोमत्रयः, पुं, (सोमस्य चन्द्रस्य त्रयो यत्र ।) अमावस्या । इति महाभारते दानधर्म्मः ॥
सोमगर्भः, पुं, (सोमः अमृतं तद्रूपो गर्भे यस्य ।) विष्णुः । इति त्रिकाण्डशेषः ॥
सोमज, क्लो, (सोमवत् जायते इति । जन + डः ।) दुग्धम् । इति हेमचन्द्रः ॥ चन्द्रजाते, त्रि ॥
सोमतीर्थ, क्लो, (सोमेन कृतं तीर्थम् ।) प्रभासतीर्थम् । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ८३ । १८ ।
"ततो जयन्त्यां राजेन्द्र सोमतीर्थं समाविशेत् ।
स्नात्वा फलमवाप्नोति राजसूयस्य मानवः ॥")
तस्य विवरणं यथा,—
"यत्र तप्तं तपस्तेन सोमेन सुमहात्मना ।
पञ्चवर्षसहस्राणि एकपादेन तिष्ठता ॥
पञ्चवर्षसहस्राणि तथैवोर्द्धमुखः स्थितः ।
एवम्भूतः पुनः पञ्चपञ्चमौनव्रतस्थया ॥
तथैवैकेन पादेन दश पञ्च च तिष्ठति ।
एवमुग्रं तपः कृत्वा कान्तिमानभवच्च सः ॥
ममापराधान्मुक्तश्च ब्राह्मणानां पतिस्तथा ।
प्राप्नोति यन्महाभागो सोमतीर्थं कृतोदकः ॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
जायते ब्राह्मणः सुभ्रु वेदवेदान्तपारगः ॥
द्रव्यवान् गुणवांश्चैव संविभागी यशस्विनि ।
मद्भक्तश्चैव जायेत अपराधविवर्जितः ॥
स एष ब्राह्मणो भूत्वा संसाराद्विप्रमुच्यते ।
तस्य किञ्चित् प्रवक्ष्यामि सोमतीर्थस्य सुन्दरि॥
तत्तीर्थं येन विज्ञेयं मम मार्गानुसारिणा ।
वैशाखस्य तु मासस्य शुक्लपक्षस्य द्वादशीम् ॥
प्रवृत्ते चान्धकारे तु यत्र कञ्चिन्न दृश्यते ।
सोमेन च विना भूमे दृश्यते चन्द्रमःप्रभा ॥
आलोकश्चैव दृश्येते सोमस्तत्र न दृश्यते ।
एवं त्वां वच्मि हे भद्रे एष वै विस्मयः परः ॥
एतच्चित्रं महाभागे पुष्पे सौकरवे मम ।
सोमतीर्थं विशालाक्षि येन मुच्यन्ति जन्तवः ॥
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
प्रभावमस्य क्षेत्रस्य विस्मयं परमं महत् ॥
अकामा तु मृता तीर्थे आत्मनः कर्म्मनिश्चयात्

मम क्षेत्रप्रभावेण मृगाली मानुषी भवेत् ।
रूपवती गुणवती चतुःषष्टिकलान्विता ॥"
इति वाराहे सोकरवतीर्थमाहात्म्यनामाध्यायः॥
सोमधारा, स्त्री, (सोमस्य धारेव ।) आकाशगङ्गा ।
इति त्रिकाण्डशेषः ॥
सोमपः, पुं, (सोमं पिबतीति । पा + कः ।) यागे पीतसोमलतारसः । तत्पर्य्यायः । सोमपीती २। इत्यमरः । २ । ७ । ८ ॥ सोमपाः ३ । इति तट्टीका ॥ (यथा, गीतायाम् । ९ । २० ।
"त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ॥")
सोमपत्रः, पुं, (सोमस्य पत्रमिव पत्रमस्य ।) तृणविशेषः । उलु खड़ इति भाषा । यथा,—
"दर्भः पवित्रः शमः सोमपत्रः परात्प्रियः॥"
इति शब्दचन्द्रिका ॥
दर्भशब्देऽस्य गुणादयो ज्ञातव्याः ॥
सोमपाः, पुं, (सोमं पिबतीति । पा + क्विप् ।) यज्ञे सोमलतारसपानकर्त्ता । इत्यमरटीकायां रामाश्रमः । २ । ७ । ८ ॥ (सोमरसपानशीले, त्रि । यथा, भागवते । ३ । ३२ । ३ ।
"तत्श्रद्दधानाक्रान्तमतिः पितृदेवव्रतः पुमान् ।
गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ॥")
सोमपीती, [न्] पुं, (सोमस्य पीतं पानमस्यास्तीति । इनिः ।) सोमपः । इत्यमरः । २ । ७ । ८ ॥ (वाच्यलिङ्गेऽपि दृश्यते । यथा, महाभारते । १ । १ । १६४ ।
"सौकन्यमपि चाख्यानं चावनो यत्र भार्गवः ।
अश्र्व्यातियज्ञे नासत्यौ कृतवान् सोमपीतिनौ॥"
तस्य रूपान्तरं सोमपीथी । सोमपीवी । इति केचित् ॥
सोमबन्धुः, पुं, (सोमो बन्धुर्यस्य ।) कुमुदः । इति शब्दरत्नावली ॥ सूर्य्यः । बुधः । यथा,—
"मित्राणि सूर्य्याच्छशिभौमजीवाः
सूर्य्येन्दुजौ सूर्य्यशशाङ्कजीवाः ।
आदित्यशुक्रौ रविचन्द्रभौमा
बुधार्कजौ चन्द्रजभार्गवौ च ॥"
इति ज्योतिस्तत्त्वम् ।
सोमभूः, पुं, (सोमात् भूरुत्पत्तिर्यस्य ।) जिनराजभेदः । इति हेमचन्द्रः ॥ बुधग्रहः । सोमपुत्रत्वात् । सोमवंशोद्भवः, त्रि ॥
सोमयागः, पुं, (सोमात्मको यागः ।) सोमलतारसपानाङ्गकत्रैवार्षिकयज्ञविशेषः । यथा,—
नारद उवाच ।
"सोमयागविधानञ्च ब्रूहि मां मुनिसत्तम ।
कथं तं कारयामास गुरुश्च किं फलं परम् ॥
नारायण उवाच ।
ब्रह्महत्याप्रशमनं सोमयागफलं मुने ।
वर्षं सोमलतापानं यतमानः करोति च ॥
वर्षमेकं फलं भुङ्क्ते वर्षमेकं जलं सुदा ।
त्रैवार्षिकमिदं यागं सर्व्वपापप्रणाशनम् ॥
यस्य चैवार्षिकं धान्यं निहितं भूतिहेतवे ।
अधिकं वापि विद्येत स सोमं पातुमर्हति ॥

महाराजस्य देवी वा यागं कर्त्तुमलं मुने।
न सर्व्वसाध्वी यज्ञोऽयं बह्वन्नो बहुदक्षिणः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।६०।५४-५८॥
सोमयाजी, [न्] पुं, (सोमेन यजते इति। यज + णिनिः।) सोमयागकर्त्ता॥
सोमयोनि, क्ली, (सोमो योनिर्यस्य।) चन्दन-विशेषः। यथा,—
"सुगौतलं चन्दनं यत् तैलपर्णिकमुच्यते।
उभौ तु तस्य पर्य्यायौ सोमयोनि शिलोद्भवम्॥"
इति शब्दचन्द्रिका॥
सोमराजिका, स्त्री, (सोमराजी एव। स्वार्थे कन्।) सोमराजी। इतिशब्दरत्नावली॥
सोमराजी, [न्] पुं, सोमेन सोमवद्वा राजते इति। राज + णिनिः।) ओषधिविशेषः। सोमराज इति क्वाचित्क इति च भाषा। तत्पर्य्यायः। अवल्गुजः २ सुवल्लिः ३ सोमवल्लिका ४ कालमेषी ५ कृष्णफला ६ वाकुची ७ पूतिफली ८। इत्यमरः। २। ४। ८६॥ सोमराजी ८ सुवल्ली १० सोमवल्लिः ११ कालमेषी १२। इति भरतः॥ सोमवल्ली १३ वागुजी १४ वाकुजी १५ कालमेषिका १६ सोमराजिका १७। इति शब्दरत्नावली॥ अन्यच्च।
"वागुजी चन्द्रलेखा स्यात् सोमराजी त्ववल्गुजा।
कृष्णा पूतिफला कुष्ठनाशिनी सा सिता परा॥"
इति रत्नमाला॥
अस्य गुणाः। वातकफकुष्ठत्वग्दोषनाशित्वम्।
इति राजवल्लभः॥ अपि च।
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका।
शशिलेखा कृष्णफला सोमा पूतिफलीति च॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता।
वाकुची मधुरा तिक्ता कटूपाका रसायनी॥
विष्टम्भहृद्धिमा रुच्या सरा श्लेष्मासपित्तनुत्।
रूक्षा छर्द्या श्वासकुष्ठमेहज्वरकृमिप्रणुत्॥
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु।
केश्यं त्वच्यं कृमिश्वासकासशोथामपाण्डुहृत्॥"
इति भावप्रकाशः॥
राजनिर्घण्टोक्तगुणपर्य्यायौ वाकुचीशब्दे द्रष्टव्यौ
सोमराजी, स्त्री, (सोमेन राजते इति। राजदौप्तौ + अच्। गौरादित्वात् ङीष्।) वाकुची। इत्यमरटीकायां भरतः। २।४। ८६॥ (यथा, बृहत्संहितायाम्। ४४। १०।
"श्वेतां सपूर्णकोशां
कटभरात्रायमाणसहदेवीः।
नागकुसुमं खगुमां
शतावरीं सोमराजीञ्च॥")
षड्यरच्छन्दोविशेषः। यथा,—
"हरे सोमराजीसमा ते यशः श्रीः।
जगन्मण्डलस्य च्छिनत्त्यन्धकारम्॥
इति छन्दोमञ्जरी॥
चन्द्रश्रेणी च॥

सोमरोगः, पुं, स्त्रीरोगविशेषः। यथा,—
अथ सोमरोगाधिकारः।
तत्र सोमरोगस्य निदानपूर्व्विकां सम्प्राप्तिमाह।
"स्त्रीणामतिप्रसङ्गेन शोकाच्चापि श्रमादपि।
अतिसारकयोगाद्वा गरयोगात्तथैव च॥
आपः सर्व्वशरीरस्थाः क्षुभ्यन्ति प्रस्रवन्ति च।
तस्मात्ताः प्रच्युताः स्थानान्मूत्रमार्गं व्रजन्ति हि॥"
अथ तस्य लक्षणमाह।
"प्रसन्ना विमला शीता निर्गन्धा नीरुजः सिताः।
स्रवन्ति चातिमात्रं ताः सा न शक्नोति दुर्ब्बला॥
वेगं धारयितुं तासां न विन्दति सुखं क्वचित्।
शिरःशिथिलता तस्या मुखं तालु च शुष्यति॥
मूर्च्छा जृम्भा प्रलापश्च त्वग्भ्रंशो वातिमात्रतः॥
भक्ष्यं भोज्यं पेयं न हृद्यं लभते सदा॥
सन्धारणाच्छरीरस्य ता आपः सोमसंज्ञिताः।
ततः सोमक्षयात् स्त्रीणां सोमरोगं इति स्मृताः"
अथ सोमरोगस्य चिकित्सा।
"कदलीनां फलं पक्वं धात्रीफलरसं मधु।
शर्करासहितं खादेत् सोमधारणमुत्तमम्॥१॥
माषचूर्णं समधुकं विदारीं मधुशर्करां।
पयसा पाययेत् प्रातः सोमधारणमुत्तमम्॥२॥
स एव सरुजः सोमः स्रवेन्मूत्रेण चेन्मुहुः।
तत्रैलापत्रचूर्णेन पाययेत्तरुणीं सुराम्॥३॥
जलेनामलकौजोजकल्कं समधुशर्करम्।
पिबेद्दिनत्रयेणैव श्वेतप्रदरनाशनम्॥ ४॥
तक्रोदनाहाररता संपिबेन्नागकेशरम्।
त्रयहं तक्रेण संपिष्टं श्वेतप्रदरनाशनम्॥"*॥
तत्रैव मूत्रातीसारस्य लक्षणं चिकित्साञ्चाह।
"सोमरोगे चिरं जाते यदा मूत्रमतिस्रवेत्।
मूत्रातिसारं तं प्राहुर्बलविध्वंसनं परम्॥
तालकन्दञ्च खर्জ্জूरं मधुकञ्च विदारिकाम्।
सितामधुयुतां खादेत् मूत्रातीसारनाशनम्॥१
चक्रमर्द्दकमूलन्तु संपिष्टं तण्डुलाम्बुना।
प्रभातसमये पीतं जलप्रदरनाशनम्॥"२॥
इति सोमरोगे मूत्रातिसाराधिकारः। इति भावप्रकाशः॥ (तथाचास्य चिकित्सोपयोगिवटिकौषधं यथा,—
"कर्षं जारितलौहञ्च तदर्द्धं रसगन्धकम्।
एलापत्रं निशायुग्मं जम्बुवीरणगोक्षुरम्॥
विड्ङ्गं जीरकं पाठा धात्रीदाड़िमटङ्कणम्।
चन्दनं गुग्गुलुं लोध्रप्रियालार्জ্জुनरसाञ्जनम्॥
छागीदुग्धेन वटिकां कारयेद्यवरक्तिकाम्।
निर्म्मितो नित्यनाथेन सोमनाथरसस्त्वयम्॥
सोमरोगं बहुविधं प्रदरं हन्ति दुर्জ্জयम्।
योनिशूलं मेढ्रशूलं सर्व्वजं चिरकालजम्।
बहुमूत्रं विशेषेण दुर्জ্জयं हन्त्यसंशयः॥"
इति सोमनाथरसः॥
इति वैद्यकरसेन्द्रसारसंग्रहे सोमरोगाधिकारे॥)
सोमलता, स्त्री, (सोम एव लता।) स्वनामख्याता लता। तत्पर्य्यायगुणाः।
"सोमवल्ली सोमलता सोमा क्षीरी द्विजप्रिया।
सोमवल्ली त्रिदोषघ्नी कटुस्तिक्ता रसायनी॥"
इति भावप्रकाशः॥
अपि च।
"सोमवल्ली महागुल्मा यज्ञयष्टा धनुर्लता।
सोमाह्वा गुल्मवल्ली च यज्ञवल्ली द्विजप्रिया।
सोमक्षीरा च सोमा च यज्ञाङ्गा रुद्रसंख्यया॥
सोमवल्ली कटुः शीता मधुरा पित्तदाहहृत्।
कृष्णा विशोषशमनी पावनी यज्ञसाधनी॥"
इति राजनिर्घण्टः॥
सोमलतिका, स्त्री, (सोमलतैव। इवार्थे कन्।) गुडूची। इति राजनिर्घण्टः॥
सोमवंशः, पुं, (सोमस्य वंश उत्पत्तिस्थानत्वेनास्त्यस्य।) युधिष्ठिरराजः। इति धरणिः॥ (सोमस्य वंशः।) चन्द्रसन्तानः। तद्विवरणं यथा,
हरिरुवाच।
"सूर्य्यस्य कथितो वंशः सोमवंशं शृणुष्व मे।
नारायणसुतो ब्रह्मा ब्रह्मणोऽत्रिसमुद्भवः॥
अत्रेः सोमस्तस्य भार्य्या तारा सुरगुरोः प्रिया।
सोमात्तस्यां बुधो जज्ञे बुधपुत्रः पुरूरवाः॥
बुधपुत्रादथोर्व्वश्यां षट् पुत्रास्तु श्रुतायुषः।
विश्वावसुः श्रुतायुश्च आयुर्द्धीमानमावसुः॥
अमावसोरभूद्भौमो भीमपुत्रश्च काञ्चनः।
काञ्चनस्य सुहोत्रोऽभूत् जह्नुश्चाभूत् सुहोत्रतः॥
जह्नोः सुमन्तुरभवत् सुमन्तो रूपराजकः।"
रूपराजकस्थाने अपजापकोऽपि पाठः।
"बलाकाश्वोऽस्य पुत्रोऽभूत् बलाकाश्वात् कुशः स्मृतः॥
कुशाश्वः कुशनाभश्चामूर्त्तरयो वसुः कुशात्।
गाधिः कुशाश्वात् संजज्ञे विश्वामित्रस्तदात्मजः
कन्या सत्यवती दत्ता ऋचीकाय द्विजाय सा।
ऋचीकादयमदग्निश्च रामस्तस्याभवत् सुतः॥
विश्वामित्राद्धिरातमधुच्छन्दादयः सुताः।
आयुषो नहुषः पुत्रस्त्वनेनाराजिरभवत्॥
क्षत्रवृद्धः क्षत्रवृद्धात् सुहोत्रस्याभवन्नृपः।
काश्यकाशगृत्समदाः सुहोत्रादभवन्सुताः॥
गृत्समदाच्छौनकोऽभूत् काश्यादीर्घतमस्तथा।
वैद्यो धन्वन्तरिस्तस्मात् केतुमांश्च तदात्मजः॥"
वैद्यस्थाने रैभ्य इत्यपि पाठः।
भीमरथः केतुमतो दिवोदासस्तदात्मजः।
दिवोदासात् प्रतर्दनोऽभूच्छत्रुजित् सोऽत्र विश्रुतः॥
ऋतध्वजस्तस्य पुत्रो ह्यलर्कश्च ऋतध्वजात्।
अलर्कात् सन्नतिर्जज्ञे सुनीथः सन्नतेः सुतः॥
सत्यकेतुः सुनीथस्य सत्यकेतोर्विभुः सुतः।
विभोस्तु सुविभुः पुत्रः सुविभोः स्वर्गमारकः॥"
स्वर्गमारकस्थाने सुकुमारकोऽपि पाठः।
"स्वर्गमारादृष्टकेतुर्वीतिहोत्रस्तदात्मजः।
वीतिहोत्रस्य भार्गोऽभूत् भार्गभूमिस्तदात्मजः॥
भार्गभूमिस्थाने भासभूमिरिति च पाठः।
"वैष्णवाः सुमहात्मान इत्यनेकाश्रयो नृपाः॥*
पञ्चपुत्रशतान्यासन्नृजेः शक्रेण संहताः।
प्रतिक्षत्रः क्षत्रवृद्धात् सञ्जयश्च तदात्मजः॥

विजयः सञ्जयस्यापि विजयस्य कृतः सुतः।
कृताद्यर्षवर्हनश्च सहदेवस्तदात्मजः॥"
हर्षवर्हनस्थाने हृणहल इति च पाठः।
"सहदेवादधीनोऽभूत् जयत्सेनोऽप्यदीवतः॥
जयत्सेनात् संकृतिश्च क्षत्रधर्म्मा च संकृतेः।
यतिर्ययातिः संयातिरायातिर्व्ययतिः कृतिः।
नहुषस्य सुताः ख्याता ययातेर्नृपतेस्तथा।
यदुश्च तुर्व्वसुश्चैव देवयानी व्यजायत॥
द्रुह्युश्चानुश्च पूरुश्च शर्म्मिष्ठा वार्षपर्व्वणी।
सहस्रजित् क्रोष्टुतमा रघुश्चैव यदोः सुतः॥
सहस्रजितः शतजित्तस्माद्धैहयहैहयौ।
सुधो वेणुहयपुत्रो धर्म्मो हैहयतोऽभवत्॥
धर्म्मस्य धर्म्मनेत्रोऽभूत् कुन्तिर्व्वै धर्म्मनेत्रतः।
कुन्तेर्बभूव साहञ्जिर्म्महिष्यांश्च तदात्मजः॥"
साहञ्जिस्थाने साहञ्जिरिति च पाठः।
"भद्रश्रेण्यस्य पुत्रो भद्रश्रेण्यस्य दुर्म्मदः॥"
दुर्म्मदस्थाने दुर्दम इति च पाठः।
"धनकी दुर्म्मदाच्चैव कृतवीर्य्यश्च धानकिः।
कृताग्निः कृतकर्म्मा च कृतभोग्यः सुमद्बलः॥"
कृतभोग्यस्थाने कृतौजा इति च पाठः।
"कृतवीर्य्यादर्জ্জुनोऽभूत् अर्জ্জुनाच्छूरसेनकः।
जयध्वजो मधुः शूरो वृषणः पञ्चसुव्रताः॥
जयध्वजात्तालजङ्घो भरतस्तालजङ्घतः।
वृषणस्य मधुः पुत्रो मधोर्व्वृष्णादिवंशकः॥
क्रोष्टोर्हि जिनवान् पुत्र आहिस्तस्य महात्मनः।"
आहिस्थाने स्वाहिरिति च पाठः।
"आहिरश्वङ्गुः संजज्ञे तस्य चित्ररथः सुतः॥
शशबिन्दुश्चित्ररथात् पत्नयो लक्षञ्च तस्य ह।
दशलक्षञ्च पुत्राणां पृथुकीर्त्त्यादयो वराः॥
पृथुकीर्त्तेः पृथुजयः पृथुदानः पृथुश्रवाः।
पृथुश्रवसोऽभूत्तम उशना तमसोऽभवत्॥
तत्पुत्रः शितयुर्नाम श्रीरुक्मकवचस्ततः।"
शितयुर्नामस्थाने श्वेतकर्णायुरिति च पाठः।
"रुक्मेषुः पृथुरुक्मश्च ज्यामघः पालितो हरिः।
श्रीरुक्मकवचस्यैते विदर्भो ज्यामघात्तथा।
भार्य्यायाश्चैव शैव्यायां विदर्भात् क्रथकौशिकौ॥
रोमपादो रोमपादाद्बभ्रुर्व्वभ्रोर्धृतिस्तथा।
कौशिकस्य चिदिः पुत्रस्ततश्चैद्यो नृपः किल॥
कुन्तिः किलस्य पुत्रोऽभूत् कुन्तेर्हृष्णिः सुतः स्मृतः।
हृष्णेश्च निर्हृतिः पुत्रो दशार्हो निर्हृतेस्तथा॥
दशार्हस्य सुतो व्योमो जीमूतश्च तदात्मजः।"
व्योमस्थाने व्योमा इति च पाठः।
"जीमूताद्विकृतिर्जज्ञे ततो भीमरथोऽभवत्।
ततो मधुरतो जज्ञे शकुनिस्तस्य चात्मजः।
करम्भिः शकुनेः पुत्रस्तस्य देवमतः सुतः॥
देवक्षत्रो देवमताद्देवक्षत्रान्मधुः स्मृतः।
कुरुवंशो मधोः पुत्रो ह्यनुश्च कुरुवंशतः॥
पुरुहोत्रो ह्यनोः पुत्रः अंशुश्च पुरुहोत्रतः।
सत्वश्रुतः सुतस्यांशोरिते वै सात्वता नृपाः॥"
भजिनो भजमानश्च सात्वतादन्धकः सुतः।
महाभोजो हृष्णिदेव्यामन्धो देवाहुकोऽभवत्॥
निमिहृष्णी भजमानादशमभाजित्तथैव च।"
अशमभाजित्स्थाने अयुताजित् इति च पाठः।
"शतजिच्च सहस्राजित् वभ्रुर्देवो हृषस्यति॥
महाभोजात्तु भोजोऽभूत् हृष्णेश्चैव सुमित्रकः।
सुधाजित् संश्रकस्तस्मादनमित्रश्चिनी तथा॥
अनमित्रस्य निघ्नोऽभूत् निघ्नात् सत्राजितोऽभवत्।
प्रसेनश्चापरः ख्यातो ह्यनमित्राच्छिनिस्तथा॥
शिनेस्तु सत्यकः पुत्रः सत्यकात् सात्यकिस्तथा
सात्यकेः सञ्जयः पुत्रः कुणिश्चैव तदात्मजः॥
कुणेर्युगन्धरः पुत्रस्ते त्रैनेयाः प्रकीर्त्तिताः॥"
कुणिस्थाने कुलिरिति च पाठः।*।
"अनमित्रान्वयो हृष्णिः स्वफल्कश्चित्रकस्तथा॥"
चित्रकस्थाने चित्रवक्त्र इति च पाठः।
"स्वफल्काच्चैव गान्दिन्यामक्रूरो वैष्णवोऽभवत्
उपमद्गुरथाक्रूरान्मृदवाद्याश्चतः स्मृताः॥
देववानुपदेवश्च अक्रूरस्य सुतौ स्मृतौ।
पृथुर्विपृथुश्चित्रस्य चान्धकस्य शुचिः स्मृतः॥
कुकुरो भजमानस्तु तथा कम्बलबर्हिषः।
हृष्णस्तु कुकुराज्जज्ञे तस्मात् कापोतरोमकः॥
तदात्मजो विलोमा च विलोम्नस्तुम्बुरुः स्मृतः।
तस्माच्च दुन्दुभिर्জज्ञे पुनर्व्वसुरतः सुतः॥
तस्याहुकश्चाहुकी च कन्या चैवाहुकस्य च।
देवकश्चोग्रसेनश्च देवकात् दैवकी त्वभूत्॥
उपदेवोपदेवा च सहदेवा सुरक्षिता।
श्रीदेवी शान्तिदेवी च वसुदेव उवाह ताः॥
देवस्यानुपदेवश्च सहदेवासुतौ स्मृतौ।
उग्रसेनस्य कंसोऽभूत् सुनामा च वटादयः॥
विदूरथो भजमानाच्छूरस्याभूद्विदूरथात्।"
शूरस्थाने शिव इति च पाठः।
"विदूरथसुतस्याथ शूरस्यापि शमी सुतः॥
प्रतिक्षत्रस्तु शमिनः स्वयम्भोजस्तदात्मजः।
हृदिकश्च स्वयम्भोजात् कृतवर्म्मा तदात्मजः॥
देवः शतधनुश्चैव शूराद्यै देवमीढुषः।
दशपुत्रा मारिषायां वसुदेवादयोऽभवन्॥
पृथा च श्रुतदेवी च श्रुतकीर्त्तिः श्रुतश्रवाः।
राजाधिदेवी शूराच्च पृथां कुन्तेः सुतामदात्॥
सा दत्ता कुन्तिना पाण्डोस्तस्यां धर्म्मानिलेन्द्रकैः।
युधिष्ठिरो भीमपार्थौ नकुलः सहदेवकः॥
माद्र्यां नासत्यदस्राभ्यां कुन्त्यां कर्णः पुराभवत्।
श्रुतदेव्यां दन्तवक्त्रं जज्ञे वै हृदयग्रीवः॥
सन्तर्हनादयः पञ्च श्रुतकीर्त्त्याश्च कैकयात्।
राजाधिदेव्यां विन्दश्च अनुविन्दश्च जज्ञिरे॥
श्रुतश्रवा दमघोषात् प्रजज्ञे शिशुपालकः।
पौरवी रोहिणी भार्य्या मदिरानकदुन्दुभेः॥
देवकीप्रमुखा भद्रा रोहिण्यां बलभद्रकः।
सारणाद्याः शठश्चैव रेवत्यां बलभद्रतः॥
निशठश्चोल्मुको जातो देवक्यां षट्च जज्ञिरे।
कौर्त्तिमांश सुषेणश्च उदार्य्यो भद्रसेनकः॥
ऋतुदासो भद्रदेवः कंस एवावधीच्च तान्।
सङ्कर्षणः सप्तमोऽभूदष्टमः कृष्ण एव च॥
षोड़श स्त्रीसहस्राणि भार्य्याणां स्वाभवन् हरेः।
रुक्मिणी सत्यभामा च लक्ष्मणा चारुहासिनी॥
ज्येष्ठा जाम्बवती चाष्टौ जज्ञिरे तान् बहून् सुतान्।
प्रद्युम्नश्चारुदेष्णश्च प्रधानाः साम्ब एव च॥
प्रद्युम्नादनिरुद्धोऽभून्मनस्विन्यां महाबलः।"
मनस्विन्यां स्थाने ककुद्मिन्यामिति पाठः।
"अनिरुद्धात् सुभद्रायां वज्रो नाम सुतोऽभवत्॥
प्रतिबाहुर्वज्रसुतश्चारुस्तस्य सुतोऽभवत्।
वह्निश्चारोः सुतो जज्ञे वह्नेर्भार्गोऽभवत् सुतः॥"
इत्यत्र वह्निस्तु तुर्व्वसोर्वंशः इत्याद्यपादे पाठः।
"भर्गाद्भानुरभूत् पुत्रो भानोः पुत्रः करन्धमः।
करन्धमस्य मरुतो दुष्मोर्व्वंशं निबोध मे॥*॥
दुष्मोस्तु तनयः सेतुरारब्धश्च तदात्मजः।
आरब्धस्यैव गान्धारो धर्म्मो गान्धारतोऽभवत्॥"
आरब्धस्थाने आरब्ध इति आवर इति च पाठः
"धृतस्तु धर्म्मोपुत्रोऽभूद्दुर्दमश्च धृतस्य तु।
प्रचेता दुर्दमस्यैव अनोर्व्वंशं शृणुष्व मे॥*॥
अनोः सभानवः पुत्रस्तात् कालञ्जयोऽभवत्।"
सभानवस्थाने स्वभावन इति सुतारण इति च
कालञ्जयस्थाने कालानल इत्यपि पाठः।
"कालञ्जयात् सृञ्जयोऽभूत् सृञ्जयात्तु पुरञ्जयः
जनमेजयस्ततश्चाभूत् महाशालस्तदात्मजः।
महामना महाशालादुशीनर इति स्मृतः॥
उशीनराच्छिविर्जज्ञे वृषदर्भः शिवेः सुतः।
महामनो जातिभिक्षोः पुत्रोऽभूत्तु जयद्रथः॥
हैमो जयद्रथाज्जज्ञे सुतपा हैमतोऽभवत्।"
जयद्रथस्थाने वृषद्रथ इति च पाठः।
"बलिः सुतपसो जज्ञे अङ्गवङ्गकलिङ्गकाः॥
शुचपौण्ड्राश्च बालेया अनपानस्तथाङ्गतः।
अनपानाद्दिविरथस्तमो धर्म्मरथोऽभवत्॥
रोमपादो धर्म्मरथाच्चतुरङ्गस्तदात्मजः।
पृथुलाक्षः सुतस्तस्य चम्पोऽभूत् पृथुलाक्षतः॥
चम्पपुत्रस्तु हर्य्यङ्गस्तस्य भद्ररथः सुतः।
हृहत्कर्म्मा सुतस्तस्य बृहद्भानुस्ततोऽभवत्॥
हृहन्मना बृहद्भानोस्तस्य पुत्रो जयद्रथः।
जयद्रथस्य विजयो विजयस्य धृतिः सुतः॥
धृतेर्धृतव्रतः पुत्रः सत्यकर्म्मा धृतव्रतात्।
तस्य पुत्रस्त्वधिरथः कर्णस्तस्य सुतोऽभवत्॥
वृषसेनस्तु कर्णस्य पूरुवंशं शृणुष्व मे॥"

इत्यादि-गारुड़े १४३ अध्यायः॥*॥

हरिरुवाच।

"जनमेजयस्य पूरोश्च मनस्युर्जनमेजयात्।
तस्य पुत्रश्चाभयदः सुधुस्वाभूत्तदात्मजः॥"
सुधुस्थाने सुसूरिति च पाठः।
"सुधोर्बहुगतः पुत्रः संयातिस्तस्य चात्मजः।
वत्सजातिश्च संयाते रौद्राश्वस्य तदात्मजः॥"
वत्सजातिस्थाने वर्गजातिरिति च पाठः।
"ऋतेयुः स्यण्डिलेयुश्च कक्षेयुश्च कृतेयुकः।
जलेयुः संहतेयुश्च रौद्राश्वस्य सुता वराः॥
रतिनावः कृतेयोश्च तस्य प्रतिरथः सुतः।
तस्य मेधातिथिः पुत्रस्तुर्वसोरैनिलः सुतः॥

ऐनिलस्य तु दुष्मन्तो भरतस्तस्य चात्मजः ।
शकुन्तलायां संजज्ञे वितथो भरतादभूत् ॥
वितथस्य मन्युः पुत्रो मन्योश्चैव नरः सुतः ।
नरस्य संकृतिः पुत्रः सुसन्धिः संकृतेः सुतः ॥"
सुसन्धिस्थाने गर्गस्य इति पाठः ।
"गर्गादमन्यु पुत्रो वै शिनिस्तस्य व्यजायत ।"
अमन्यु स्थाने भुमन्यु रिति च पाठः ।
"अमन्योश्च महावीर्य्यादुरुक्षयः सुतोऽभवत् ॥
उरुक्षयात् त्रय्यारुणिवृहत्क्षत्राश्च मन्युजात्
सुहोत्रस्तस्य हस्ती च अजमीढ़द्विमीढ़कौ ॥
हस्तिनः पुरुमीढ़श्च कण्वोऽभूदजमीढ़तः ।
कण्वान्मेधातिथिर्जज्ञे यतः काण्वायना द्विजाः ॥
अजमीढ़ाद्बृहदिषुस्तत्पुत्रश्च बृहद्धनुः ।
बृहत्कर्म्मा तस्य पुत्रस्तस्य पुत्रो जयद्रथः ॥
जयद्रथाद्विश्वजिच्च सेनजिच्च तदात्मजः ।
रुचिराश्वः सेनजितः पृथुसेनस्तदात्मजः ॥
पारस्तु पृथुसेनस्य पारान्नीपोऽभवन्नृपः ।
नीपस्य समरः पुत्रः सुकृतिस्तु ततोऽभवत् ॥
विभ्राजः सुकृतेः पुत्रो विभ्राजादनुहोऽभवत् ।
कृत्वां तस्माद्ब्रह्मदत्तो विश्वक्सेनस्तदात्मजः ॥
यवीनरो द्विमीढस्य धृतिमांश्च यवीनरात् ।
धृतिमतः सत्यधृतिर्दृढ़नेमिस्तदात्मजः ॥
दृढ़नेमेः सुपार्श्वोऽभूत् सुपार्श्वात् सन्नतिस्तथा ।
कृतस्तु सन्नतेः पुत्रः कृतादुग्रायुधोऽभवत् ॥
उग्रायुधाच्च क्षेम्योऽभूदम्बरीषस्तदात्मजः ।
पुरञ्जयस्त्वम्बरीषात् तस्य पुत्रो विदूरथः ॥"
अम्बरीषस्थाने सुवीर इति च पाठः ।
"अजमीढ़ान्नलिन्यान्च नीलो नाम सुतोऽभवत्
नीलाच्छान्तिरभूत् पुत्रः सुशान्तिस्तस्य
चात्मजः ॥
सुशान्तेश्च पुरुजातो ह्यर्कस्तस्य सुतोऽभवत् ।
अर्कस्य चैव हर्य्यश्वो हर्य्यश्वान्मुद्गलोऽभवत् ॥
यवीनरो बृहदिषुः कम्पिल्यः सृञ्जयस्तथा ।
याज्ञावाल्युद्गलाज्जज्ञे शरद्वांस्तस्य चात्मजः ॥"
तस्य चात्मजस्थाने वैणवो महान इति च पाठः
"दिवोदासो द्वितीयश्च अहल्यायां शरद्वतः ।
शतानन्दोऽभवत् पुत्रस्तस्य सत्यधृतिः सुतः ॥
कृपः कृपी सत्यधृतेरुर्व्वश्यां वीर्य्यहानितः ।
द्रोणपत्नी कृपी जज्ञे अश्वत्थामानमुत्तमम् ॥
दिवोदासाच्चित्ररथ मित्रयोश्चयवनोऽभवत् ।
सुदासश्चयवनाज्जज्ञे सौदासस्तस्य चात्मजः ॥
सहदेवस्तस्य पुत्रः सहदेवात्तु सोमकः ।
जन्तुस्तु सोमकाज्जज्ञे पृषतश्चापरो महान् ॥
पृषतात् द्रुपदो जज्ञे धृष्टद्युम्नस्ततोऽभवत् ।
धृष्टद्युम्नात् धृष्टकेतुर्भार्गवोऽभूदजमीढ़तः ॥
ऋक्षात् संवरणो जज्ञे कुरुः संवरणादभूत् ।
सुधन्वश्च परिक्षिच्च जह्नुश्चैव कुरोः सुताः ॥
सुधनुषः सुहोत्रोऽभूत् चवनोऽभूत सुहोत्रतः ।
चावनात् कृतको जज्ञे यथोपरिचरो वसुः ॥
बृहद्रथश्च प्रत्यग्रः सत्याद्याश्च वसोः सुताः ।
बृहद्रथात् कुशाग्रश्च कुशाग्रात् ऋषभोऽभवत् ॥
ऋषभात् पुष्पवांस्तस्माज्जज्ञे सत्यहितो नृपः ।
सत्यहितात् सुधन्वाभूज्जह्नुश्चैव सुधन्वतः ॥"
जह्नुस्थाने जन्तुरिति च पाठः ।
"बृहद्रथाज्जरासन्धः सहदेवस्तदात्मजः ।
सहदेवाच्च सोमापिः सोमापेः श्रुतवान् सुतः ॥
भीमसेनप्रसेनौ च श्रुतसेनोऽपराजितः ।"
प्रसेनस्थाने उग्रसेन इति च पाठः ।
"जनमेजयश्चान्योऽभूज्जह्नोस्तु सुरथोऽभवत् ।
विदूरथस्तु सुरथात् सार्व्वभौमो विदूरथात् ॥
जयत्सेनः सार्व्वभौमादराधीतस्तदात्मजः ।
अयुतायुस्तस्य पुत्रस्तस्य चाक्रोधनः सुतः ॥
अक्रोधनस्यातिथिश्च ऋक्षोऽभूदतिथेः सुतः ।
ऋक्षाच्च भीमसेनोऽभूद्दिलीपो भीमसेनतः ॥
प्रतीपोऽभूद्दिलीपात्तु देवापिस्तु प्रतीपतः ।
शान्तनुश्चैव वाह्लीकस्त्रयस्ते भ्रातरो नृपाः ।
वाह्लीकात् सोमदत्तोऽभूत् भूरिभूरिश्रवास्ततः॥
शलश्च शान्तनोर्भीष्मो गङ्गायां धार्म्मिको
महान् ।
चित्राङ्गदविचित्रौ तु सत्यवत्यान्तु शान्तनोः ॥
विचित्रवीर्य्यभार्य्ये तु अम्बिकाम्बालिका तयोः
धृतराष्ट्रश्च पाण्डुश्च तद्दास्यां विदुरस्तथा ॥
व्यास उत्पादयामास गान्धार्य्यां धृतराष्ट्रतः ।
शतं पुत्रं दुर्य्योधनाद्यं पाण्डोः पञ्च प्रजज्ञिरे॥
प्रतिविन्ध्यः सुतः सोमः श्रुतकीर्त्तिस्तु चार्জ्जुनात्
शतानीकः श्रुतकर्म्मा द्रौपद्यां पञ्च वै क्रमात् ॥
यौधेयी च हिडिम्बा च काशी चैव शुभद्रिका
विजया वै वेणुमती पञ्चभ्यस्तु सुताः क्रमात् ॥
देवको घटत्कचश्च अभिमन्युश्च सर्व्वगः ।
सुहोत्रो निरमित्रश्च परिक्षिदभिमन्युजः ॥"
अत्र अहोत्रो निरपत्रश्चेति तृतीयचरणे पाठः।
"जनमेजयश्च ततो भविष्यश्च नृपाञ्छृणु ॥"
इति गारुड़े १४४ अध्यायः ॥
सोमवल्कः, पुं, (सोमस्येव वल्को यस्य ।) खैर-खदिरः । इत्यमरः । २।४।५०॥ (अस्य पर्य्यायो यथा,—
"सोमवल्को ब्रह्मयष्टिः कदरः खदिरोपमः ॥"
इति वैद्यकरत्नमालायाम् ।)
कट्फलः । इति मेदिनी॥(अस्य पर्य्यायो यथा,
"कट्फलः सोमवल्कश्च कैटर्य्यः कुञ्चिकापि च
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च ॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥)
करञ्जः । इति जटाधरः ॥ (अस्य पर्य्यायो यथा,
"स चोक्तः पूतिकरञ्जः सोमवल्कश्च स स्मृतः।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
रोठाकरञ्जः । इति राजनिर्घण्टः ॥
सोमवल्लरिः, स्त्री, (सोमस्य वल्लरिः । वा
सोमवल्लरी, ङीप् ।) सोमलता । तत्पर्य्यायः ।
ब्राह्मी २ मत्स्याक्षी ३ वयःस्था ४ । इत्यमरः ।
२ । ४ । १३७ ॥ चत्वारि सोमलतायाम् ।
ब्राह्मीशाक इति केचित् । अतिपवित्रत्वेन
ब्रह्मणः प्रियत्वात् ब्रह्मणो ब्राह्मणस्य वा इयं
ब्राह्मी यां नञा निर्दिष्टं व्यभिचरतीति मन-
वर्জ्जानिति निषेधाभावे नोर्लोपो ताविति नस्य
लोपः णित्त्वे त्रिरिति वृद्धिः षित्वादीप् अनित-
श्चेत्युक्तेर्णित्त्वाभावविवक्षया वृद्धाभावे ब्राह्मी च
"ब्राह्मी वयःस्था मत्स्याक्षी ब्राह्मी च सोम-
वल्लरी ।"
इति वाचस्पतिः ॥
मत्स्याक्षितुल्यपुष्पत्वात् मत्स्याक्षी । वयो यौवनं
तिष्ठत्यनया वयःस्था भिदादित्वात् ङः मध्य-
विसर्गा मनीषादित्वात् विसर्गलोपे निर्व्विसर्गा
च । सोमेन यागार्थमुपात्तेति सोमवल्लरी अर्थ-
परत्वात् इन्दुवल्लरी चन्द्रवल्लरी इत्याद्यपि ।
वल्लर्य्या लतार्थपरत्वात् सोमवल्ली सोमलता
सोमवल्लिका इत्याद्यपि पाठः । इति भरतः ॥
सोमवल्लिका, स्त्री, (सोमवल्लीव । इवार्थे कन् ।)
सोमराजी । इत्यमरः । २।४ । ८५ ॥ (सोमस्य
वल्लिका ।) सोमलता । इति भरतः ॥
सोमवल्ली, स्त्री, (सोमस्य वल्लीव ।) गुड़ूची ।
इत्यमरः । २।४ । ४३ ॥ सोमलता इति तट्टी-
कायां भरतः ॥ सोमराजी । इति शब्दरत्ना-
वली ॥ पातालगरुड़ी । ब्राह्मी । सुदर्शना ।
इति राजनिर्घण्टः ॥(यथा, वृहत्संहितायाम् ।
५४ । १०८ ।
"या सोमवल्लाश्च समानरूपा
साध्याश्च तोयं कुरुतेऽत्ययज्ञ ॥")
सोमवारः, पुं, (सोमस्य वारः ।) सोमस्य भोग्य-
दिनम् । चन्द्रवासरम् । यथा,—
"सोमवारेऽप्यमावास्या आदित्याहे च सप्तमी
चतुर्थी भौमवारे च अक्षयादपि चाक्षया ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
तद्दिवसीयवारवेला यथा,—
"रवौ वर्ज्ये चतुः पञ्च सोमे सप्त इयं तथा ।"
इति ज्योतिःसागरसारः ॥
तद्रात्रौ कालवेला यथा,—
"रवौ षष्ठं विधौ वेदं कुजवारे द्वितीयकम् ।
बुधे सप्त गुरौ पञ्च भृगुवारे चतुर्थकम् ।
शनावाद्यं तथा चान्तं रात्रौ कालं विवर्জ्जयेत्॥"
इति ज्योतिःसारः ॥
सोमवारव्रतं, क्ली, (सोमवारकर्त्तव्यं व्रतम् ।)
प्रतिसोमवारोपवासपूर्व्वकसायंकालकर्त्तव्यशिव-
दुर्गापूजारूपव्रतविशेषः । तद्दिवरणं यथा,—
"सोमवारे विशेषेण प्रदोषादिगुणैर्युते ।
केवलं वापि ये कुर्य्युः सोमवारे शिवार्च्चनम् ।
न तेषां विद्यते किञ्चिदिहामुत्र च दुर्लभम् ॥
उपोषितः शुचिर्भूत्वा सोमवारे जितेन्द्रियः ।
वैदिकैर्लौकिकैर्व्वापि विधिवत्पूजयेच्छिवम् ॥
ब्रह्मचारी गृहस्थो वा कन्या वापि सभर्त्तृका ।
विभर्त्तृका वा संपूज्य लभते वरमीप्सितम् ॥*॥
तथाहं कथयिष्यामि कथां श्रोत्रमनोरमाम् ।
श्रुत्वा श्रुतधियः शश्वोर्भक्तिं कुर्व्वन्तु निश्चलाम्
आर्य्यावर्त्ते नृपः कश्चिदासीद्धर्म्मभृतां वरः ।
चित्रवर्म्मेति विख्यातो धर्म्मराजो दुरात्मनाम्॥
सोऽनुकूलः स्वपत्नीषु पुत्रमेकं न लब्धवान् ।
चिरेण प्रार्थितां लेभे कन्यामेकां मनोहराम् ॥

स एकदा जातकलक्षणज्ञा-
नाहूय सर्व्वान् द्विजमुख्यवर्गान्।
कुतूहलेनापि निविष्टचेताः
पप्रच्छ तस्या जनने विचारम् ॥*॥
अथ तं प्रावदत् कोऽपि बहुज्ञो द्विजसत्तमः।
एका सौमन्तिनी मान्या कन्या तव महीपते॥
अथान्योऽपि द्विजः प्राह धैर्य्यवानतिगर्ब्बितः।
एषा चतुर्दशे वर्षे वैधव्यं प्रतिपत्स्यति ॥
इत्याकर्ण्य वचस्तस्य वज्रनिर्घातनिष्ठुरम्।
मुहूर्त्तमभवद्राजा चिन्ताव्याकुलमानसः ॥
सापि सिमन्तिनी बाला क्रमेण गतशैशवा।
वैधव्यमात्मनो भावि सा शुश्राव सखीमुखात्॥
परं निर्व्वेदमापन्ना तदाकर्ण्य शुचिस्मिता।
याज्ञवल्क्यामुनेः पत्नीं मैत्रेयीं पर्य्यपृच्छत ॥
मातस्त्वच्चरणाम्भोजं प्रपन्नाहं भयाकुला।
सौभाग्यवर्द्धनं कर्म्म मम संज्ञितुमर्हसि ॥*॥
इति प्रपन्नां नृपतेः कन्यामाह मुनेः सती।
शरणं व्रज तन्वङ्गि पार्व्वतीं शिवसंयुताम् ॥
सोमवारे शिवं गौरीं पूजयस्व समाहिता।
उपोषिता वा सुस्नाता विरजाम्बरधारिणी ॥
यतवाङ्मनियतमतिः पूजां कृत्वा यथोचिताम्।
ब्राह्मणान् भोजयित्वा च शिवं सम्यक् प्रसादय
यावच्चयोऽभिषेकेण साम्राज्यं पीठपूजनात्।
सौभाग्यमखिलं सौख्यं गन्धमाल्याद्यलङ्कारात्
धूपदानेन सौगन्ध्यं कान्तिर्दीपप्रदानतः।
नैवेद्येन महाभोगी लक्ष्मीस्ताम्बूलदानतः ॥
धर्म्मार्थकाममोक्षाणां नमस्कारः प्रसाधनम्।
अष्टैश्वर्य्यादिसिद्धीनां जप एव हि साधनम् ॥
होमेन सर्व्वकामानां समृद्धिरपि जायते।
सर्व्वेषामेव देवानां तुष्टिर्ब्राह्मणभोजनात् ॥
इत्यमाराधय शिवं सोमवारे शिवामपि।
प्राप्ता विपद्भिर्बहुभिर्दुःखैर्व्वा न विहन्यसे ॥
घोरात् घोरं प्रपन्नापि महाक्लेशं भयानकम्।
शिवपूजाप्रभावेण तरिष्यति महोदयम् ॥*॥
इत्थं सीमन्तिनी सम्यक् तच्चिरम्य सतीमुखात्
ययौ सापि वरारोहा राजपुत्री तथापि च ॥
इत्यादि स्कन्दपुराणे ब्रह्मोत्तरखण्डे सोमवार-व्रतमाहात्म्यम् ८ अध्यायः ॥

सोमविक्रयी, [न्] पुं, (सोमं विक्रीणातीति। वि+क्री+णिनिः।)सोमलतारसविक्रयकर्त्ता। यथा,"पापो हि सोमविक्रयी।"इति मलमासतत्त्वे आश्वलायनब्राह्मणम् ॥ (एतत्सम्प्रदानादेव दातुः प्रत्यवायो भवति। यथा, मनुः। ३।१८०।
"सोमविक्रयिणे विद्वा भिषजे पूयशोणितम्।
नष्टं देवलके दत्तमप्रतिष्ठन्तु वाडुषी ॥"

सोमवृक्षः, पुं,(सोमस्येव वृक्षो यस्य।) कट्फलवृक्षः। इति रत्नमाला ॥ श्वेतखदिरः। इति राजनिर्घण्टः ॥

सोमशकला, स्त्री, (सोमस्य शकलमिव यत्र।) शृगाण्डुली। इति राजनिर्घण्टः। चन्द्रखण्डविशिष्टा च ॥

सोमसंज्ञं, क्ली, (सोमस्य चन्द्रस्य संज्ञा संज्ञा यस्य कर्पूरम्। इति रत्नमाला ॥
सोमसारः, पुं, (सोमस्येव शुक्लः सारो यस्य।) श्वेतखदिरः। इति राजनिर्घण्टः ॥
सोमसिद्धान्तः, पुं, बुधभेदः। इति जटाधरः ॥
ज्योतिर्ग्रन्थविशेषश्च॥ कापालिकवेशधारी।यथा,
"ततः प्रविशति कापालिकवेशधारी खड्गहस्तः सोमसिद्धान्तः।"इति श्रीकृष्णमिश्रकृतप्रबोधचन्द्रोदयनाटके ३ अङ्कः ॥ सोमसिद्धान्त इति उमया सह वर्त्तमानः सोमो महादेवस्तद्भाषितसिद्धान्त आगमश्चास्त्रम्। इति श्रीयुक्तहरिहरतर्कालङ्कारतनूजश्रीरुद्रविनिर्म्मिततट्टीका ॥
सोमसिद्धान्ती,[न्]पुं,सोमसिद्धान्तवेत्ता। सोमसिद्धान्तशब्दादिन्प्रत्ययेन निष्पन्नः ॥
सोमसिन्धुः, पुं, (सोमस्यामृतस्य तद्वत्सोमस्य वा सिन्धुरिव।) विष्णुः। इति त्रिकाण्डशेषः॥
सोमसुत्, त्रि, (सोमं सुनोतीति। सोम+सु क्विप्।) यागे सोमलतारसक्षेपकर्त्ता। इति सिद्धान्तकौमुदी॥ (यथा, रघुः।१८।२७।
"तस्यौरसः सोमसुतः सुतोऽभूत्
नेत्रोद्भवः सोम इव द्वितीयः ॥")
सोमसुता, स्त्री, (सोमस्य सुता।) नर्म्मदानदी। इति राजनिर्घण्टः ॥ बुधे, पुं॥ (यथा मार्कण्डेये। १२३। ११।
"अवैत्तैनं देवानां गुरुः सोमसुतो बुधः।
नावैत्तैनमादित्यो नार्कसुनुर्न भूमिजः ॥")
सोमसूत्रं, क्ली, (सोमस्य जलस्य सूत्रं निर्गमप्रणालीव।) प्रणालम्। तच्च शिवलिङ्गस्य गौरीपट्टजलनिर्गमस्थानम्। यथा,—
"शिवप्रदक्षिणे मन्त्री अर्द्धचन्द्रक्रमेण तु।
सव्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत् ॥"
सोमसूत्रं जलनिःसरणस्थानम्। इति तन्त्रसारे सामान्यपूजापद्धतिः ॥
सोमाख्यं,क्ली.(सोमं सोमलतां आख्याति वर्णनेति। आ+ख्या+कः।) रक्तकैरवम्। इति रत्नमाला ॥
सोमाभा,स्त्री,(सोमस्य आभा इव आभा यस्याः।) चन्द्रावली। इति भक्तिरसामृतसिन्धुः ॥
सोमालः, त्रि, (सोमाय अलति पर्य्याप्नोतीति। अल्+अच्।) कोमलः। इति हेमचन्द्रः ॥
सोमाहः, पुं, (सोमस्य अहः। समासे टच्।) सोमवारः। इति ज्योतिषम् ॥
सोमेश्वरः, पुं, (सोमस्य ईश्वरः।) काश्यां सोमकर्त्तृकप्रतिष्ठितशिवः। यथा,—
"शिवरूपाधिष्ठितस्तु शिवरूपो गिरिः स्मृतः।
सोमेन तत्र संस्थाप्य स्नात्वा लिङ्गमुत्तमम् ॥
वर्षाणान्तु सहस्रं वै स्वयमस्य निहत्तये।
ततः क्षयादिनिर्म्मुक्तस्तेजसा च परिप्लुतः ॥
स्वकं तेजोबलंप्राप्य तुष्टाव गिरिजापतिम्।
सोमेश्वराच्च वरदमाविर्भूतं त्रियम्बकम् ॥"

इति वाराहे सोमेश्वरादिलिङ्गमहिमावमुक्तिक्षेत्रविवेश्वादिमहिमनामाध्यायः ॥ (पीठस्थानविशेषः। यथा, देवीभागवते।७।३०।७३।
"सोमेश्वरे वरारोहा प्रभासे पुष्करावती ॥")
सोमोद्भवा, स्त्री, (सोमादुद्भवो यस्याः।) नर्म्मदानदी। इत्यमरः। १।१०।३२॥ (यथा, रघुः। ५।५८।
तथेत्युपस्पृश्य पयः पवित्रं
सोमोद्भवायाः सरितो नृसोमः।
उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं
जजाप तस्मान्निगृहीतशापात् ॥")
सोमजानि, त्रि ॥
सोल्लुण्ठः,पुं, (उल्लुण्ठेन सह वर्त्तमानः।)सोल्लुण्ठनम्। इति हलायुधः ॥ (वाच्यलिङ्गोऽयमिति केचित् ॥)
सोल्लुण्ठनं, क्ली, (उल्लुण्ठेन सह वर्त्तमानम्।) स्तुतिपूर्ब्बकदुर्व्वादः। यथा,—
"दुर्व्वादः स्यादुपालम्भस्तत्र यः स्तुतिपूर्ब्बकः।
सोल्लुण्ठनं सनिन्दस्तु यस्तत्र परिभाषणम् ॥"
इति जटाधरः ॥
(वाच्यलिङ्गेऽप्ययमिति केचित् ॥)
सोल्लुण्ठोक्तिः,स्त्री,(सोल्लुण्ठा उक्तिः।)सव्यङ्गोक्तिः यथा। उपनायकमानेतुं प्रेषितां तदुपभोगलुब्धचन्द्रनादौन् वापीस्नानव्याजेन गोपयन्तीं दूतीं प्रति सोल्लुण्ठोक्तिरियमिति निःशेषच्युतचन्दनं इति श्लोकव्याख्याने काव्यप्रकाशटीकायां महेश्वरन्यायालङ्कारः॥
सौकरः, त्रि, (सूकरस्यायमिति। सूकर+अण्।) सूकरसम्बन्धी। (यथा, किराते।१२।५३।
"स तमाससाद घननीलमभिसुखमुपस्थितं मुनेः।
पोत्रनिकषणविभिन्नभुवं
दनुजं दधानमथ सौकरं वपुः ॥")
सौकरिकः, पुं, (सूकरं हन्तीति। सूकर+ठञ्।) व्याधः। सिकारी इति भाषा। इति केचित् ॥ (यथा, बृहत्संहितायाम्। १५। २२।
"वरुणेशे पाशिकमत्स्यबन्धजलजानि जलचराजीवाः।
सौकरिकरजकशौण्डिक-
शाकुनिकाद्यापि वर्गेऽस्मिन् ॥"
सौकर्य्यं, क्ली, (सूकरस्य भावः कर्म्म वा। सूकर+यञ्।) अनायासः। (यथा, साहित्यदर्पणे। १०।६८।
"सौकर्य्येण च कार्य्यस्य विरुद्धं क्रियते यदि॥"*
सूकरस्य भावः कर्म्म वा। सूकर+यञ्।) सूकरस्य क्रिया। इति विश्वः॥
सौक्ष्म्यं, क्ली, सूक्ष्मता। सूक्ष्मस्य भावः इत्यर्थे ष्यञ् (यञ्) प्रत्ययेन निष्पन्नम् ॥
सौखसुप्तिकः,त्रि,(सुखसुप्तिं सुखेन शयनं पृच्छतीति। सुखसुप्ति+ठञ्।) वैतालिकः। यथा,
"वैतालिका बोधकरा अर्थिकाः सौखसुप्तिकाः।"
इति हेमचन्द्रः ॥

सौखिकः, त्रि, (सुखेन जीवतीति । सुख + "वेतनादिभ्यो जीवति।" ४ । ४ । १२ । इति ठक्।) सुखार्थी । सौखीन इति भाषा ॥ (यथा, महाभारते । १२ । १८ । २३ ।
"श्रिया विहीनेरधनैरस्वल्पमित्रैरकिञ्चनैः । सौखिकैः सम्भृतानर्थान् यः सन्त्यजति किन्तु तत् ॥")
सौख्यं, क्ली, (सुखमेव । स्वार्थे ष्यञ् ।) सुखम् । इति हेमचन्द्रः ॥ यथा, उत्तररामचरिते २ अङ्के ।
"अकिञ्चिदपि कुर्व्वाणः सौख्यैर्दुःखान्यपोहति । तत्तस्य किमपि द्रव्यं योहि यस्य प्रियो जनः॥"
सुखस्य भावः कर्म्म वा । सुख + ष्यञ् ।) सुखत्वम् । सुखस्य भावः इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम्॥
सौगतः, पुं, (सुगत एव । स्वार्थे अण् ।) बुद्धविशेषः । तत्पर्य्यायः । शून्यवादी २ । इति हेमचन्द्रः ॥ (यथा, माघे । २ । २८ ।
"सर्व्वकार्य्येष्वरीरेषु मूलाङ्गस्कन्धपञ्चकम् । सौगतानामिवात्मान्यो नास्ति मन्यो महीभृताम् ॥"
सुगतसम्बन्धिनि, सुगतमताध्यायिनि च त्रि ॥)
सौगतिकः, पुं, (सौगतं मतं वेत्तीति । ठक् ।) बुद्धविशेषः । इति केचित् ॥
सौगन्ध्यं, क्ली, (सुष्ठु गन्धो यस्य । ततः स्वार्थे अण् ।) कत्तृणम् । यथा,—
"सौगन्धिकञ्च सौगन्ध्यं रामकर्पूरके ढणे ॥"
इति शब्दरत्नावली ॥
(पुं, सङ्करजातिविशेषः । यथा, महाभारते । १३ । ४८ । २२ ।
"चतुरो मागधो सूते क्रूरान्मायोपजीविनः । मांसं स्वादुकरं शौद्रं सौगन्ध्यमिति विश्रुतम्॥"
शोभनगन्धयुक्ते, त्रि ॥
सौगन्धिकं, क्ली, (सुगन्धोऽस्यास्येति । सुगन्ध + ठन् । ततः स्वार्थे अण् ।) कत्तृणम् । (अस्य पर्य्यायो यथा,—
"कत्तृणं रौहिषं दैवजग्धं सौगन्धिकन्तथा । भूतिकं व्यामपौरञ्च श्यामकं धूमगन्धिकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कह्लारम् । इत्यमरः । १ । १० । ३६ ॥ पद्मरागमणिः । इति मेदिनी ॥ नीलोत्पलम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"इन्दीवरं कुवलयं पद्मं नीलोत्पलं स्मृतम् । सौगन्धिकं शतदलमब्जं कमलमुच्यते ॥"
इति गारुडे २०८अध्यायः ॥
यथा, महाभारते । ३।१५४ । २ ।
अपश्यत्तत्र पाञ्चाली सौगन्धिकमनुत्तमम् । अनिलोढ़मितो नूनं सा वहनि परीप्सति ॥")
सौगन्धिकः, पुं, (सौगन्धोऽस्यास्तीति । ठन् ।) गन्धकः । इत्यमरः । २ । ९ । १०२ ॥ सुगन्धव्यवहारी । इति मेदिनी ॥ गन्धौरा हिन्दी भाषा ॥ (स्थे अनिमित्तकक्रिमिविशेषः । यथा, चरके विमानस्थाने ७ अध्याये । "तेषां त्रिविधानां स्थेअनिमित्तानां क्रिमीणां नामानि अन्नादा उदरादा हृदयादाश्चरवो दर्भपुष्पाः सौगन्धिका महागुदाश्च इति ॥")
सौगन्ध्यं, क्ली, सुगन्धत्वम् । सुगन्धस्य भाव इत्यर्थे सुगन्धशब्दात् ष्यञ् (ष्यञ्) प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । १ । ६३ । ७८ ।
"एवमुक्ता वरं वव्रे गात्रसौगन्ध्यमुत्तमम् ॥")
सौचिः, पुं, सौचिकः । इति शब्दरत्नावली ॥
सौचिकः, पुं, (सूच्या जीवतीति । सूची + ठक् ।) सूचीकर्म्मोपजीवी । दर्जी इति भाषा । तत्पर्य्यायः । तुन्नवायः २ । इत्यमरः । २।१०।६ ॥
सूचिकः ३ सौचिः ४ सूत्रभित्५ । इति शब्दरत्नावली ॥
सौजन्यं, क्ली, (सुजनस्य भावः कर्म्म वा । सुजन + ष्यञ् ।) सुजनता । यथा,—
"सौजन्यं वरवंशजन्म विभवो दीर्घायुरारोग्यता विद्वत्वं विनयित्वमिन्द्रियवशः सत्पात्रदाने रुचिः । सम्मन्त्री सुसुतः प्रिया प्रियतमा भक्तिश्च नारायणे सत्पुण्यैर्न विना त्रयोदश गुणाः संसारिणां दुर्लभाः ॥"
इत्युद्भटः ॥
सौण्डी, स्त्री, पिप्पली । इति शब्दचन्द्रिका ॥ (पिप्पलीशब्देऽस्या विशेषो विज्ञेयः ॥)
सौत्रः, पुं, (सूत्रं यज्ञसूत्रमर्हतीति । सूत्र + अण् ।) ब्राह्मणः । इति हेमचन्द्रः ॥ (सूत्रे पठितः पाणिन्यादिभिः कर्म्मविशेषार्थेति । अण् ।) नियतप्रयोगाभावधातुविशेषः । यथा,—
"धातूनामिह सौत्राणां द्विचत्वारिंशदीरिताः॥"
इति कविकल्पद्रुमः ॥
(सूत्रस्येदमित्यण् ।) सूत्रसम्बन्धिनि, त्रि ॥
सौत्रामणी, स्त्री, (सुत्रामा इन्द्रो देवता अस्याः । सुत्रामन् + अण् । बहुलवचनात् न टिलोपः । ततः स्त्रियां ङीप् ।) यागविशेषः । यथा ।
अथ सौत्रामणी त्रिभिरध्यायैः प्रक्रियते । स एतं महाक्रतुमपश्यत् सौत्रामणीमिति श्रुतेः । तत्र सुरां सन्धीयते । तत्र मन्त्रः । खादोन्खा खादुना तीव्रां तीव्रेणासतामसृतेन । मधुमतो मधुमता सृजामि सं सोमेन सोमोऽस्यश्विभ्यां पचस्व सरस्वत्यै पचस्वेन्द्राय सुत्रामणे पचस्व॥
सौत्रामण्याः ऋषिः प्रजापतिः । सुरा देवता । अनुष्टुप् छन्दः । इति यजुर्व्वेदस्य काण्वशाखायाम् २१ अध्यायः ॥ विस्तारस्तु तत्रैव २१ । २२ । २३ । अध्यायेषु द्रष्टव्यः । योगक्रमस्तु कात्यायनसूत्रभाष्ये द्रष्टव्यः ॥ (अत्र सुरां पित्वा ब्राह्मणः पतितो न भवति । यदुक्तम्
"सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत् सुराम् ।
अन्यत्र कामतः पीत्वा पतितस्तु द्विजो भवेत्॥"
सौदामनी, स्त्री, (सुदामा मेघः पर्व्वतो वा । तत्र "एकदिक्। तत्रैकदिक्।" ४ । ३ । ११२ ॥ इति अण्) विद्युत् । इत्यमरः । ३।१ । ८ ॥ (सुदामा ऐरावतस्तस्य स्त्री सौदामनी पद्मादौप् ङ्ङिच्च मनीषादित्वात् । श्वेतद्विपः सुदामा चेति ऐरावतपर्य्याये त्रिकाण्डशेषः ॥
"खेऽभ्रं जगाम काञ्चन-
सरसमसौदामनीलताधामास्तम् ।
कुवलयमयमिव मरजः
सरसमसौदामनीलताधामास्तम् ॥"
इति हरिप्रबोधयमकात् सौदामिनीत्यपपाठ इति मुकुटः । इति भरतः ॥*॥ यथा, महाभारते । १ । १७२ । ४२ ।
"ततो लालप्यमानस्य पार्थिवस्यायतेक्षणा । सौदामनीव चाब्भ्रेषु तत्रैवान्तरधीयत ॥")
अप्सरोभेदः । विद्युद्भेदः । इति मेदिनी ॥ (यथा, भागवते । १ । ६ । २८ ।
"एवं कृष्णमतेर्ब्रह्मवासनात्मस्वमलात्मनः । कालः प्रादुरभूत् काले तडित् सौदामनी यथा॥"
सुदामा माला तत्र भवा सौदामनी मालाकारा इत्यर्थः । सुदामा पर्व्वतः तेनैकदिगिति सूत्रेण अण् स्फटिकमयपर्व्वतप्रान्तभागभवा हि विद्युदतिस्फुटा भवति । इतितट्टीकायां श्रीधरस्वामी ॥)
सौदामिनी, स्त्री, विद्युत् । इत्यमरटीका । १।३।८ (यथा, ऋतुसंहारे । ३ । १२ ।
"नष्टं धनुर्बलभिदो जलदोदरेषु
सौदामिनी स्फुरति नाद्य वियत्पताका ॥
तड़िद्भेदः । (यथा, महाभारते । ३।५३।१२ ।
"तत्र स्म राजते भैमी सर्व्वाभरणभूषिता । सखीमध्येऽनवद्याङ्गी विद्युत् सौदामिनी यथा॥
अप्सरोभेदः । इति हेमचन्द्रः ॥ देशविशेषः । इत्यजयः ॥
सौदाम्नी, स्त्री, सौदामनी । इति शब्दरत्नावली ॥
सौदायिकं, त्रि, (सुदायेभ्यः पितृमातृभर्त्तृकुलसम्बन्धिभ्य आगतमिति । सुदाय + ठञ् ।) पितृमातृभर्त्तृकुललब्धस्त्रीधनम् । यथा, कात्यायनः ।
"जड़या कन्यया वापि पत्युः पितृमृहेऽथवा । भर्त्तुः सकाशात् पित्रोर्व्वा लब्धं सौदायिकं स्मृतम् ॥
सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते यस्मात् तदात्मग्रंस्यार्थं तैर्दत्तं तत्प्रजीवनम् ॥
सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम् विक्रये चैव दाने च यथेष्टं स्वावरेष्वपि ॥"
सुदायेभ्यः पितृमातृभर्त्तृकुलसम्बन्धिभ्यो लब्धं सौदायिकम् । आत्मग्रंस्यमनैष्ठुर्य्यम् । इति दायतत्त्वम् ॥
सौदासः, पुं, इक्ष्वाकुवंशीयः अयोध्याधिपतिः । अस्य नामान्तरम् । कल्माषपादः १ मित्रसहः २ । इति पुराणम् ॥ (यथा, महाभारते । १ । १२२ । २१ ।
"सौदासेन च रक्षोरु निसृष्टा पुत्रजग्धिनि । मदयन्ती जगामर्षिं वसिष्ठमिति नः श्रुतम् ॥"
अस्य विशेषविवरणन्तु कल्माषपादशब्दे द्रष्टव्यम् ॥)

सौधः, पुं, क्ली, (सुधालेपोऽस्यास्तीति । ज्योत्स्नादित्वादण् । (राजसदनम् । इत्यमरः । २।२।१०॥ (यथा, रघुः । ८ । ८३ ।
"तस्य प्रसन्न हृदयं किल शोकदुः
प्रज्ञप्ररोह इव सौधतलं विभेद ॥")
रौप्यम् । इति राजनिर्घण्टः ॥ सुधासम्बन्धिनि, त्रि ॥ (यथा, रामायणे । २ । ८० । १८ ।
"प्रसादमालासंयुक्ताः सौधप्राकारसंहताः ॥"
तथाच सुश्रुते । १ । ४४ ।
"विरेचनानां तीक्ष्णानां पयः सौधं परं मतम् ॥")
सौधः, पुं, दुग्धपाषाणः । इति राजनिर्घण्टः ॥
सौधारः, पुं, नाटकस्य चतुर्थभागैकभागः । इति केचित् ॥
सौधासं, क्ली, (सौधवत् भसति पर्य्याप्नोतीति । भस + अच् ।) शिवमन्दिरम् । इति केचित् ॥
सौनन्दं, क्ली, (सुनन्दमेव । स्वार्थे अण् ।) बलदेवमुषलम् । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । ८ । ६३ ।
"सौनन्दश्च ततः श्रीमान्विरानन्दकरं हिषाम् ।
सख्येन सात्वतां श्रेष्ठो जग्राह मुषलोत्तमम् ॥")
सौनन्दी, [न्] पुं, (सौनन्दं मुषलमस्यास्तीति । इनिः ।) बलदेवः । इति त्रिकाण्डशेषः ॥
सौनिकः, पुं, (सूनया पश्वादिवधस्थानेन चरतीति सूना + ठक् ।) पशुपक्षिमांसविक्रयकर्त्ता । तत्पर्य्यायः । यैतंसिकः २ मांसिकः ३ कौटिकः ४। इति हेमचन्द्रः ॥ (यथा, मनुः । ४ । ८६ ।
"दश सूनासहस्राणि यो वाहयति सौनिकः ।
तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः ॥")
तालव्यशकारादिरपि ॥
सौन्दर्य्यं, क्ली, (सुन्दरस्य भावः । सुन्दर + अञ्) सुन्दरत्वम् । सुन्दरस्य भावः । तस्य लक्षणं यथा,
"अङ्गप्रत्यङ्गकानां यः सन्निवेशो यथोचितम् ।
सुश्लिष्टः सन्धिबन्धः स्यात् तत् सौन्दर्य्यमुदाहृतम् ॥
इत्युज्ज्वलनीलमणिः ॥
(यथा, कुमारे । १ । ४८ ।
सर्व्वोपमाद्रव्यसमुच्चयेन
यथाप्रदेशं विनिवेशितेन ।
सा निर्म्मिता विश्वसृजा प्रयत्ना-
देकस्थसौन्दर्य्यदिदृक्षयेव ॥")
सौपर्णं, क्ली, (सुपर्णं गरुड़ं तदर्णमित्यर्थः अर्हतीति । सुपर्ण + अण् ।) मरकतम् । गण्डी । इति राजनिर्घण्टः ॥ (गरुड़पुराणम् । यथा, भागवते । १२ । १३ । ८ ।
"एकोनविंशं सौपर्णं ब्रह्माण्डं द्वादशेवतु ॥"
गारुत्मतास्त्रम् । यथा, रघुः । १६ । ८० ।
"विभूषणप्रत्युपहारहस्ता-
सुपस्थितं वीक्ष्य विशाम्पतिस्तम् ।
सौपर्णमस्त्रं प्रतिसंहरार
प्रह्वेष्वनिर्बन्धरुषो हि सन्तः ॥")
सुपर्णसम्बन्धिनि, त्रि ॥ (यथा, महाभारते । ६ । ८७ । ६८ ।
"ध्यायमानस्तु नागैः स ध्यात्वा राक्षसपुङ्गवः ।
सौपर्णं रूपमास्थाय भक्षयामास पन्नगान् ॥")
सौपर्णी, स्त्री, पातालगरुड़ी लता । इति राजनिर्घण्टः ॥
सौपर्ण्यः, पुं, (सुपर्णस्य अपत्यं पुमानिति । "स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।) गरुड़ः । इति हेमचन्द्रः ॥ गायत्र्यादिच्छन्दांसि । यथा,
"विनतायास्तु पुत्रौ द्वावरुणो गरुड़स्तथा ।
प्रभावत्यः सुसारश्च यवीयस्यस्तयोः स्मृताः ॥
गायत्र्यादीनि च्छन्दांसि सौपर्ण्यानि विदुः ।
इत्यष्टाङ्गानि सर्व्वाणि दिशु संनियतानि च ॥"
इति वह्निपुराणे काश्यपीयवंशकथननामाध्यायः ॥
सौप्तिकं, क्ली, (सुप्तौ सुप्तिकाले भवम् । सुप्ति + ठञ् ।) रात्रियुद्धम् । तत्पर्य्यायः । निशारणम् २ । इति जटाधरः ॥ रात्रिमारणम् ३ । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १० । ४ । ३२ ।
"अहन्तु कदनं कृत्वा सृञ्जयानामथ सौप्तिके ।
ततो विश्रमिता चैव स्वपा च विगतज्वरः ॥")
महाभारतीयपर्व्वविशेषः । यथा,—
"आदिः सभावनविराटमथोद्यमश्च
भीष्मो गुरू रविजमद्भवसौप्तिकञ्च ।
स्त्रीपर्व्व शान्तिरनुशासनमश्वमेध-
व्यासाश्रमो सुषलयादिदिवारोहः ॥"
इति महाभारतटीका ॥
सुप्तसम्बन्धिनि, त्रि ॥
सौभं, क्ली, हरिश्चन्द्रपुरम् । इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः । कामचारिपुरम् २ । इति जटाधरः ॥ (शाल्वराजपुरम् । यथा, महाभारते । ३ । १२ । ३३ ।
"इतः सौभपतिः शाल्वस्त्वया सौभश्च पातितम् ।"
अस्य विशेषविवरणन्तु तत्रैव १४ अध्यायमारभ्य विस्तरशो द्रष्टव्यम् ॥)
सौभद्रः, पुं, (सुभद्रायाः अपत्यं पुमानिति । सुभद्रा + अण् ।) सुभद्रापुत्रः । स चाभिमन्युः । यथा,—
"सौभद्रो द्रौपदेयाश्च सर्व्व एव महारथाः ॥"
इति भगवद्गीतायां १ अध्यायः ॥
(सुभद्रा प्रयोजनमस्य । "संग्रामे प्रयोजनयोद्भ्यः ।" ४ । ३ । ५६ । इति अण् । संग्रामविशेषः । सुभद्रामधिकृत्य कृतो ग्रन्थः । "अधिकृत्यकृते ग्रन्थे ।" ४ । ४ । ८७ । इत्यण् । ग्रन्थविशेषः । इति काशिका ॥ * ॥ तीर्थविशेषे, क्ली । यथा महाभारते । १ । २१७ । ३—४ ।
"अगस्त्यतीर्थं सौभद्रं पौलोमञ्च सुपावनम् ।
कारन्धमं प्रसन्नञ्च हयमेधफलञ्च तत् ॥
भारद्वाजस्य तीर्थन्तु पापप्रशमनं महत् ।
एतानि पञ्चतीर्थानि ददर्श कुरुसत्तमः ॥")
सुभद्रासम्बन्धिनि, त्रि ॥
सौभद्रेयः, पुं, (सुभद्रायाः अपत्यं पुमानिति । सुभद्रा + "स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।) अभिमन्युः । सुभद्रायाः अपत्यत्वात् ॥ विभीतकवृक्षः । इति शब्दचन्द्रिका ॥
सौभरिः, पुं, मुनिविशेषः । यथा,—
"मीनान् सुदुःखितान् दृष्ट्वा दीनान् मीनपतौ हृते ।
कृपया सौभरिः प्राह तत्पत्न्यैमामाचरत् ॥"
इति श्रीभागवते । १० । १७ । १० ।
(अस्य विशेषविवरणन्तु विष्णुपुराणे ४ अंशस्य २ अध्यायमारभ्य द्रष्टव्यम् ॥)
सौभागिनेयः, पुं, (सुभगायाः अपत्यं पुमानिति । सुभगा + "कल्याणादीनामिनङ्" । ४ । १ । १२६ । इति ढक् इनङादेशश्च । "ङ्ङ्गसिञ्ञ्ञ्

मन्त्रेणानेन राजेन्द्र ततस्तं परमेश्वरम् ॥
गम्भीरायेति पादौ तु सुभगायेति वै कटिम्।
उदरं देवदेवाय त्रिनेत्रायेति वै मुखम् ॥
वाचस्पतये च शिरो रुद्रायेति च सर्व्वतः।
एवमभ्यर्च्च्य मेधावी विष्णुं लक्ष्म्या समन्वितम्॥
घृतं वा गौरीसंयुक्तं गन्धपुष्पादिभिः क्रमात्।
ततस्तस्याग्रतो होमं कारयेत् मधुसर्पिषा ॥
तिलैः सह महाराज सौभाग्यपतयेति च।
ततश्चचारविरसं निक्षेपं धरणीतले ॥
गोधूमान्नन्तु भुञ्जीत कृष्णेऽप्येवं विधिः स्मृतः।
आषाढ़ादिद्वितीये तु पारणं तत्र भोजयेत् ॥
यवान्नन्तु ततः पश्चात् कार्त्तिकादिषु पार्थिव।
श्यामाकं तत्र भुञ्जीत त्रीन् मासान् नियतः ॥
शुचिः ॥
ततो माघे सिते पक्षे तृतीयायां नराधिप।
सौवर्णीं कारयेद्गौरीं रुद्रं चैकञ्च बुद्धिमान् ॥
मलक्ष्मीकं हरिद्रापि यथाशक्त्या प्रसन्नधीः।
ततस्तां ब्राह्मणे दद्यात् पात्रभूते विचक्षणे ॥
अन्नेन हीने वेदानां पारगे साधुवर्त्तिनि।
सदाचारेऽथवा दद्यात् विष्णुभक्ते विशेषतः ॥
षड्भिः पात्रैरुपेतन्तु ब्राह्मणाय निवेदयेत्।
एकं मधुमयं पात्रं द्वितीयं घृतपूरितम् ॥
तृतीयं तीलतैलस्य चतुर्थं गुड़संयुतम्।
पञ्चमं लवणैः पूर्णं षष्ठं गोक्षीरसंयुतम् ॥
एतानि दत्त्वा पात्राणि समजन्मान्तरं भवेत्।
सुभगो दर्शनीयश्च नारी वा पुरुषोऽपि वा ॥"
इति वाराहे सौभाग्यव्रतनामाध्यायः ॥

सौभाग्यचिन्तामणिः, पुं, (सौभाग्याय चिन्तामणिरिव।) औषधविशेषः। यथा,—
"सौभाग्यामृतजीरपञ्चलवणव्योषाभयाचानला
निश्चन्द्राभकयुग्मगन्धकरसानेकीकृतान् भावयेत्।
निर्गुण्डीयुगशङ्खराजकृतवापामार्गपत्रोद्भवत्
प्रत्येकं स्वरसेन सिद्धवटिका भ्रान्ति त्रिदोषोदयम् ॥
येषां शीतमतीव देहमखिलं स्वेदप्रदाद्रोद्भवं
निद्रा घोरतरा समस्तकरणव्यामोहमूढ़ं मनः।
शूलश्वासबला कासस्हितं मूर्च्छारुचिं कट्वरं
तेषां वै परिकृत्य जीवितमसौ गच्छति मृत्योर्मुखात् ॥"
इति सारकौमुदी ॥

सौभाग्यतृतीया, स्त्री, (सौभाग्याय तृतीया।) भाद्रशुक्लतृतीया। सा च मन्वन्तरा। इति स्मृतिः ॥

सौभाञ्जनः, पुं, (सोभाञ्जन एव। स्वार्थे अण्।) शोभाञ्जनवृक्षः। इत्यमरटीकायां रायमुकुटः। २।४।३१ ॥

सौभिकः, पुं, (सौभं कामचारिपुरादिनिर्म्माणं शिल्पमस्य। ठक्।) इन्द्रजालिकः। इति हारावली।

सौमनसा, स्त्री, जातीपत्री। इति राजनिघण्टः ॥

सौमनस्यं, क्ली, (सुमनसो भावः। ष्यञ्।) श्राद्धे पिण्डदानानन्तरब्राह्मणहस्ते पुण्यदानमन्त्रः। यथा मातातपः।
"पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते।
स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते॥
अक्षय्यदक्षिणास्तिसौमनस्यमथास्त्विति ॥"
छन्दोगपरिशिष्टम्।
"अथाग्नभूमिमासिञ्चेत् सुसंप्रोक्षितमस्त्विति।
शिवा आपः सन्त्विति च युग्मानेवोदकेन च ॥
सौमनस्यमस्त्विति च पुण्यदानमनन्तरम्।
अक्षतञ्चारिष्टञ्चास्त्विति च अक्षतानपि दापयेत् ॥"
अथ प्रकृतब्राह्मणाचमनान्तरम्। ब्राह्मणायभूमिं सुसंप्रोक्षितमस्त्विति प्रोक्षयेत्। शिवा आप इत्यादिना उदकेन हस्ते सिञ्चेत् ॥ सौमनस्यमस्त्वित्यनेन हस्ते पुण्यदानं कुर्य्यात्। इति आह्निकतत्त्वम् ॥ सुमनसो भावः सौमनस्यं तदत्र श्राद्धे दत्तं पुण्यं सौमनस्यं मनसः प्रसादजनकं भवतु। इति गुणविष्णुः ॥ (सन्तुष्टचित्तता। यथा श्राद्धे। ७। २८।
"रथचरणवराङ्गनाकराज-
व्यतिकरसम्पदुपात्तसौमनस्याः ॥"
प्रसन्नचित्तार्हे, त्रि। यथा,भागवते।४।१२।४४।
"धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत्।
स्वर्ग्यं श्रौव्यं सौमनस्यं प्रशस्यमघमर्षणम् ॥")

सौमनस्यायनी, स्त्री, (अयति प्राप्नोत्यनयेति। अय+ल्युट्। ङीप्। सौमनस्यस्य प्रसन्नचित्तताया अयनी।) मालतीपुष्पकलिका। इति त्रिकाण्डशेषः ॥ (यथा।"सुमनाः सौमनस्यायिनीहरिद्रादारुहरिद्राद्वयीरपुनर्नवामहासहाक्षुद्रसहाकपायैश्च।" इति चरके विमानस्थाने अष्टमेऽध्याये ॥)

सौमिकी, स्त्री, (सोमस्तद्दीक्षा प्रयोजनमस्याः। ठक्।) दीक्षणीयेष्टिः। इति हेमचन्द्रः ॥

सौमित्रः, पुं, (सुमित्रायां भवः। सुमित्रा+अण्।) लक्ष्मणः। इति शब्दरत्नावली ॥

सौमित्रिः, पुं, (सुमित्रायाः अपत्यं पुमानिति। बाह्वादित्वात्। इञ्।) लक्ष्मणः। इति शब्दरत्नावली ॥ (यथा, रामगीतायाम्। २।
"सौमित्रिणा पृष्ट उदारबुद्धिना
रामः कथाः प्राह पुरातनीः शुभाः ॥")

सौमेधिकः, पुं, (सुमेधया निर्व्वृत्तः। सुमेधा+ठक्। सिद्धः। इति हारावली॥ शोभनमेधासम्बन्धिनि, त्रि ॥

सौमेरुकं, क्ली, सुवर्णम्। इति राजनिर्घण्टः ॥ सुमेरुसम्बन्धिनि, त्रि ॥ (क्वचित् सौमेरवमिति पाठो दृश्यते ॥)

सौम्यः, पुं, (सोमस्यापत्यं पुमान्। सोम+अञ्। बुधग्रहः। इत्यमरः। १।३।२६ ॥ (यथा, हृहत्संहितायाम्। ५।६०।
"पश्यन् प्रस्तं सौम्यो घृतमधुतैलचयाय
राज्ञश्च ॥"
सोम इव सोम्यः। ततः प्रज्ञाद्यण्।) विषः। इति शब्दमाला ॥ उडुम्बरवृक्षः। इति राजनिर्घण्टः ॥ हयकर्कटकन्याङ्गधिकमकरमीनराशयः। यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
इति ज्योतिस्तत्त्वम् ॥
भूखण्डविशेषः। यथा,—
"गन्धर्व्वो वरुणः सौम्यो वह्निः कङ्क एव च।
कुसुदश्च कसेरुश्च नागो भद्रारकस्तथा ॥
चन्द्रेन्द्रमलयाग्नेयवाङ्गकगभस्तिमान्।
ताम्राकुश्च कुमारी च तत्र द्वीपदशाष्टभिः ॥"
इति शब्दमाला ॥

सौम्यकृच्छ्रव्रतम्। यथा,—
"प्राजापत्यः सान्तपनः शिशुकृच्छ्रः पराकश्च।
अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रकः ॥"
सौम्यः सौम्यकृच्छ्रः। इति प्रायश्चित्ततत्त्वम् ॥ (पिङ्गलगणविशेषः। यथा, मनुः। ३। १९८।
"अग्निदग्धानग्निदग्धान् काव्यान् बर्हिषदस्तथा
अग्निष्वात्तांश्च सौम्यांश्च विप्राणामेव निर्दिशेत्॥

सौम्यः, त्रि, (सोमो देवतास्य। सोम+"सोमात् ष्यण्।" ४।२।३०। इति ष्यण्।) सोमदैवतः। मनुषः। मनोज्ञः। इति मेदिनी ॥ (यथा रघुः। १२। ३६।
"संरम्भं मैथिलीहासः क्षणसौम्यां निनाय ताम्।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः ॥"
भव्यः। यथा, भागवते। २। ४। २३।
"नमस्तस्मै भगवते वासुदेवाय वेधसे।
पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवम् ॥")

सौम्यकृच्छ्रः, पुं, (सौम्यः अनुग्रः कृच्छ्रः।) व्रतविशेषः। यथा, गारुड़े। १०५। ६८।
"पिण्याकाचामतक्राम्बुयवक्वथानां प्रतिवासरम्।
एकैकमुपवासञ्च कृच्छ्रः सौम्योऽयमुच्यते ॥"

सौम्यगन्धी, स्त्री, (सौम्यो गन्धो यस्याः। ङीप्।) शतपत्री। इति राजनिर्घण्टः ॥

सौम्यग्रहः, पुं, (सौम्यो ग्रहः।) शुभग्रहः। स च पूर्णचन्द्रः पापग्रहायुक्तबुधः बृहस्पतिः शुक्रश्च। यथा, ज्योतिस्तत्त्वे।
"अर्द्धेनेन्दर्कगौरारा: पापाः सौम्यास्तथापरे।
पापयुक्तो बुधः पापो राहुकेतू च पापदौ ॥"

सौम्यधातुः, स्त्री, (सौम्यो धातुः।) कफः। इति राजनिर्घण्टः ॥

सौम्या, स्त्री, (सोम इव सौम्यः। शाखादित्वात् यः। ततः प्रज्ञाद्यण्। स्त्रियां टाप्।) दुर्गा। यथा,—
"सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ॥"
इति देवीमाहात्म्यम् ॥

महेन्द्रवारुणी। रुद्रजटा। महाज्योतिष्मती। महिषवल्ली। गुञ्जा। शालपर्णी। ब्राह्मी। यष्टी मल्लिका। इति राजनिर्घण्टः॥

सौम्याः, स्त्री, (सोमो देवता यासाम्। सोम+ऋण्।) इन्द्राणाः। तासु मृगशिरोनक्षत्रशिरःस्थाः पञ्च ताराः। इति विश्वहेमचन्द्रौ॥

सौरः, पुं, (सूरस्य सूर्य्यस्यायमिति। सूर+अण्।) शनैश्चरः। इत्यमरटीकायां भरतः। १। ३। २६॥ (यथा, हरिवंशे। १०। ४।

"बहुलाश्वे पौण्ड्रके सौरेऽम्बुपजीविन-
समूपाय॥")

तुम्बुरुवृक्षः। इति राजनिर्घण्टः॥ सूर्य्यैकराशिभोगावच्छिन्नमासादिः। यथा, विष्णुधर्म्मोत्तरम्।

"आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तितः॥
विवाहादिकर्म्मसु सौरमासस्यात्तेषः कर्त्तव्यः। यथा, पितामहः।

"आब्दिके पिण्डकृत्ये च मासचन्द्रमसः स्मृतः।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः॥"

विवाहादावित्यत्रादिपदं यात्राग्रहचारपरम्। यत्कर्म्म सूर्य्यभोग्यराश्युद्देशेन विहितं यच्च विशेषोदगयनादिविहितं तत्परञ्च। अयनस्य सौरमासघटितत्वेन वक्ष्यमाणत्वात्। तच्च चूड़ोपनयनादि। विष्णुधर्म्मोत्तरम्।

"अध्यायनञ्च ग्रहचारकर्म्म
सौरेण मानेन सदाध्यवस्येत्।
सत्राण्यपास्यान्यथ सावनेन
लोकस्य यत् स्यादृव्यवहारकर्म्म॥"

अध्यायनं अध्वगमनं यात्रेति यावत्। इति ज्योतिस्तत्त्वम्॥ *॥ सूर्य्योपासकः। (यथा, महानिर्व्वाणतन्त्रे। ३। १४२।

"शाक्ताः शैवा वैष्णवाश्च सौरा गाणपतास्तथा।
विप्रा विप्रेतराश्चैव सर्व्वेऽप्यत्राधिकारिणः॥")

गुरुविशेषः। यथा,—

"गौड़ाः शाक्ताश्च वाः सौरा मागधाः केरलास्तथा।
कोशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः॥"

इति तन्त्रसारे १ परिच्छेदः॥

(उपपुराणविशेषे, क्ली। यथा, देवीभागवते। १। ३। १५।

"सौरं पराशरप्रोक्तमादित्यञ्चातिविस्तरम्॥"

सूर्य्यसम्बन्धिनि, त्रि। यथा,—

"शैवानि गाणपत्यानि शाक्तानि वैष्णवानि च।
साधनानि च सौराणि चान्यानि यानि कानि च
श्रुतानि तानि देवेश तव वक्त्राब्जसम्भवानि च॥"

इति तन्त्रसारे ३ परिच्छेदः॥ *॥

यथा च हरिवंशे भविष्यपर्व्वणि। ४८। ५२।

"यदा सौरं वपुरिति स्तुत्या स्तां जगतीपते।
तदा तद्भावनायोगात् सूर्य्य एव विराजसे॥")

सौरजः, पुं, (सौरात् तेजसः जायते इति। जन+डः।) तुम्बुरुवृक्षः। इति राजनिर्घण्टः॥

सौरजाते, त्रि॥

सौरदिवसः, पुं, (सौरो दिवसः।) सूर्य्यसम्बन्धिदिनम्। तत्तु रविभुक्तांशाधिकषष्टिदण्डैर्भवति। यथा,—"सावनं दण्डाः षष्टिरहः खलग्नस्वगुणांशाभ्यास्तदैनं भवेत्॥" इति मलमासतत्त्वम्॥

"त्रिंशता सौरदिवसैः सावनः परिकीर्त्तितः॥"

इति शब्दरत्नावली॥

सौरनक्तं, क्ली, व्रतविशेषः। यथा,—

"इस्तयुक्ते अर्कदिने सौरनक्तं समाचरेत्।
ज्ञात्वा चार्कं समभ्यर्च्य नीरोगी चिरजीवति॥
आत्मनो द्विगुणच्छायं यदा सन्तिष्ठते रविः।
सौरनक्तं विजानीयात् नक्तञ्च निशिभोजनम्॥

इति नारसिंहे ६४ अध्यायः॥

सौरभं, क्ली, (सौरभमस्यास्तीति। अच्।) कुङ्कुमम्। इति त्रिकाण्डशेषः॥ वोलम्। इति राजनिर्घण्टः॥ सह्यः। सुरभेर्भाव इत्यर्थे ष्ण(अण्) प्रत्ययेन निष्पन्नम्॥ (यथा, नैषधे। २। ८२।

"समेषमदैर्यदापणे
तुलयन् सौरभलोभनिर्यसम्।
पणिता न जनारवैरवै-
दपि गुञ्जन्तमलिं मलीमसम्॥"

तद्विशिष्टे, त्रि। यथा, भागवते। ८। २। ८।

"सरित्सरोभिरच्छोदैः पुलिनैर्मणिबालुकैः।
देवस्त्रीमज्जनामोदसौरभाम्बुनिलैर्युतः॥")

सौरभेयः, पुं, (सुरभेरपत्यमिति। सुरभि+ढक्। इयः। इत्यमरः। २। ८। ६०॥ (यथा, भागवते। १। १७। ८।

"मा सौरभेयात्र शुचो व्येतु ते वृषलात् भयम्॥"

सुरभिसम्बन्धिनि, त्रि॥

सौरभेयी, स्त्री, (सुरभेरपत्यं स्त्री। सुरभि+ढक्। ङीप्।) गौः। इत्यमरः। २। ८। ३॥ (यथा, रघुः। २। ३।

"निवर्त्त्य राजा दयितां दयालु-
स्तां सौरभेयीं सुरभिर्यशोभिः।
पयोधरीभूतचतुःसमुद्रां
जुगोप गोरूपधरामिवोर्व्वीम्॥"

अप्सरोविशेषः। यथा, महाभारते। २।१०।११।

"विश्वाची सहजन्या च प्रम्लोचा उर्व्वशी इरा
वर्गा च सौरभेयी च समीची बुदुदा लता॥")

सौरभ्यं, क्ली, (सुरभेर्भावः। सुरभि+ष्यञ्।) मनोज्ञत्वम्। सौगन्ध्यम्। (यथा, आर्य्यासप्तशत्याम्। २१३।

"गुणविधुता सखि तिष्ठसि तथैव देहेन किन्तु हृदयं ते।
द्रुतमसुना मालायाः समीरणेनेव सौरभ्यम्॥")

गुणगौरवम्। इति मेदिनी॥

सौरभ्यः, पुं, (सौरभ्यं गुणगौरवमस्यास्तीति। अच्।) कुबेरः। इति शब्दरत्नावली॥

सौरमासः, पुं, (सौरो मासः।) सूर्य्यैकराशिभोगावच्छिन्नकालः। यथा, ब्रह्मसिद्धान्ते।

"एकराशौ रविर्यावत्कालं मासः स भास्करः॥"

इति मलमासतत्त्वम्॥

अपि च।

"अथ षड्भिः सौरमासैरयनं परिकीर्त्तितम्॥"

इति शब्दरत्नावली॥

अस्यान्यद्विवरणं सौरशब्दे द्रष्टव्यम्॥

सौरसंवत्सरः, पुं, (सौरः संवत्सरः।) सूर्य्यस्य द्वादशराशिभोगावच्छिन्नकालः। यथा,—

"सौरसंवत्सरस्यान्ते मानेन ऋक्षिजेन तु।
एकादशातिरिक्तान्ते दिनानि भृगुनन्दन॥"

अपि च।

"सौरेनाब्दस्तु मानेन यदा भवति भार्गव।
सावनेन तथा मासि दिनषट्कं प्रपूर्य्यते॥"

इति मलमासतत्त्वम्॥

सौरसेयः, पुं, स्कन्दः। इति शब्दमाला॥ सुरसाया अपत्यञ्च॥ (सुरसमर्हतीति। सुरस+"वुञ्छण्कठजिति।" ४। २। ८०। इति सख्यादित्वात् ढञ्। सुरसार्हे, त्रि॥)

सौरसैन्धवः, त्रि, (सुरसिन्धोरयम्। सुरसिन्धु+अण्।) गङ्गासम्बन्धीयः। स च भौमादिः। (सौरः सूर्य्यसम्बन्धी सैन्धवः घोटकः।) सूर्य्यघोटके, पुं॥

सौराष्ट्रः, पुं, (सुराष्ट्र एव। अण्।) देशविशेषः। इति जटाधरः॥ सुरट् इति भाषा॥ कुन्दुरुकः। इति राजनिर्घण्टः॥ कांस्ये, क्ली। इति केचित्॥

सौराष्ट्रकं, क्ली, (सुराष्ट्रे भवम्। अण्। ततः कन्।) पद्मलोहम्। इति हेमचन्द्रः॥

सौराष्ट्री, स्त्री, (सुराष्ट्रे भवा। अण्।) तुवरी। इति राजनिर्घण्टः॥

सौराष्ट्रिकं, क्ली, (सुराष्ट्रे देशे भवम्। अध्यात्मादित्वात् ठञ्।) विषभेदः। इति शब्दरत्नावली भरतश्च॥ (अस्य पर्य्यायो लक्षणञ्च। यथा,—

"विषन्तु गरलं चूड़स्तस्य भेदानुदाहरे।
वत्सनाभः स हारिद्रः सक्तकश्च प्रदीपनः॥
सौराष्ट्रिकः शृङ्गिकश्च कालकूटस्तथैव च।
हलाहलो ब्रह्मपुत्रो विषभेदा अमी नव॥"
"सुराष्ट्रविषये यः स्यात् स सौराष्ट्रिक उच्यते॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सौराष्ट्रदेशसम्बन्धिनि, त्रि॥

सौराष्ट्री, स्त्री, (सुराष्ट्रे भवा। अण्। ङीष्।) सौराष्ट्रदेशीयसुगन्धिमृत्तिका। तत्पर्य्यायः। पार्व्वती २ काशी ३ मृत्स्ना ४ काची ५ पर्पटी ६। इति रत्नमाला॥ कालिका ७ सती ८। इति हेमचन्द्रः॥ अस्या गुणाः। कफपित्तवीसर्पव्रणनाशित्वम्। इति राजवल्लभः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ तुवरीशब्दे द्रष्टव्यौ॥

सौरिः, पुं, (सूरस्यापत्यमिति। सूर+इञ्।) शनिः। इत्यमरः। १। ३। २६॥ यथा, हरिवंशे। १०४। १४७।

"कृष्णद्वेषी सौरिः सौम्यो मधिरजततिलकुसुमैर्गुरुः परिपीतकैः॥")

असनवृक्षः। आदित्यभक्ता। इति राजनिर्घण्टः॥

सौरिकः, पुं, (सुरेभ्यो हितः। सुर+ठक्।) स्वर्गः। इतिशब्दरत्नावली॥ (सुरया चरतीति। सुरा+ठक्।) सुराविक्रयकर्त्ता। इति केचित्॥ स्वार्थे कप्रत्यये शनैश्चरः॥ (सुराया अयमिति। सुरासम्बन्धिनि, त्रि। यथा, मनुः। ८। १५८।
"प्रातिभाव्यं हृथादानमाक्षिकं सौरिकञ्च यत्। दण्डशुल्कावशेषञ्च न पुत्रो दातुमर्हति॥")

सौरिरत्नं, क्ली,(सौरेः शनैश्चरस्य रत्नम्।) नीलमणिः। इति राजनिर्घण्टः॥

सौरी, स्त्री,(सूर्य्य+अण्। ङीप्।"सूर्य्यतिष्येति।" ६। ४। १४८। इति यलोपः।) सूर्य्यस्यापत्यं स्त्री। इति मुग्धबोधव्याकरणम्॥

सौरीयं, त्रि,(सूर्य्य+छः।"सूर्य्यागस्त्ययोश्छे च ङ्याश्च।"६। ४। १४९। इत्यस्य वार्त्तिकोक्त्या यलोपः।) सूर्य्याय हितम्। इति मुग्धबोधव्याकरणम्॥ सौर्य्ये भवः। यथा। सूर्य्यस्येदं इत्यर्थे ष्णः सौर्य्यं तेजः पुनः सौर्य्ये भव इत्यर्थे ईयप्रत्यये अनेन यलोपे सौरीयः। इति मुग्धबोधटीकायां दुर्गादासः॥

सौरेयः, }
सौरेयकः, } पुं, शुक्लझिण्टीवृक्षः। यथा,—
"सौरेयकः श्वेतपुष्पः सौरेयः कटसारिका।
सहाचरः सहचरः स च विन्ध्यपि कथ्यते॥
कुरण्टकोऽत्र पीते स्याद्रक्तः कुरवकः स्मृतः।
नीलो वाणो द्वयोरक्तो दास आर्त्तगलश्च सः॥
सौरेयः कुष्ठवातास्रकफकण्डूविषापहः।
तिक्तोष्णो मधुरो दन्त्यः सुस्निग्धः केशरञ्जनः॥"
इति भावप्रकाशः॥

सौल्वकः, पुं, (सुल्व ताम्रपात्रादिनिर्म्माणं शिल्पमस्य। सुल्व+ठक्।) ताम्रकुट्टकः। इत्यमरटीका॥

सौवं,त्रि,स्वस्य इदम्। (स्व+अण्।) स्वसम्बन्धि। स्वर्गे भवम्। इति मुग्धबोधव्याकरणम्॥ (स्वःस्वम्बन्धि। तथा, वाजसनेयसंहितायाम्। १३। ५७।
"तस्य श्रोत्रं सौवम्॥"
"तस्य स्वर्गस्य सम्बन्धि श्रोत्रं कौट्टशं सौवं स्वः इदं सौवं तस्येदमिति अण्। द्वारादित्वाट्टेर्जागमः। अव्ययानां भमात्रे टिलोपः।" इति तट्टीकायाम्॥) शासनम्। इति केचित्॥

सौवग्रामिकं, त्रि, (स्वग्रामे भवम्।स्वग्राम+ठक् स्वग्रामभववस्तु। इति मुग्धबोधव्याकरणम्॥

सौवरं, त्रि, (स्वरस्येदमिति। स्वर+अण्। "द्वारादीनाञ्च।" ७।३।४। इति ऐजागमः।) स्वरसम्बन्धि। स्वरशब्दात् ष्णप्रत्यये उमागमेन निष्पन्नम्। इति मुग्धबोधव्याकरणम्॥

सौवर्च्चलं, क्ली, (सुवर्च्चले देशे भवम्। सुवर्च्चल+अण्।) सुवर्च्चलदेशभवलवणम्। सचललवण इति भाषा। तत्पर्य्यायः। अच्चम् २ रुचकम्३। इत्यमरः। २। ९। ४२॥ क्षणलवणम् ४। इति रत्नमाला॥ तिलकम् ५ द्वयगन्धकम् ६ रुच्यम् ७ कौद्रविकम् ८। इति राजनिर्घण्टः॥ अस्य गुणाः। रुचिकारित्वम्। उष्णवीर्य्यत्वम्। निर्म्मलत्वम्। कटुत्वम्। गुल्मशूलविबन्धनाशित्वम्। किञ्चित्पित्तकरत्वम्। लघुत्वञ्च। इति राजवल्लभः॥ अपि च।
"सौवर्च्चलं लघु क्षारं कटूष्णं गुल्मशूलनुत्।
ऊर्द्ध्ववातामशूलार्त्तिविबन्धारोचकान् जयेत्॥"
इति राजनिर्घण्टः॥
अन्यच्च।
"सौवर्च्चलं स्वादुचकमच्यं पाक्यञ्च तन्मतम्।
रुचकं रोचनं भेदि दीपनं पाचनं परम्॥
सक्षे ह्वातनुन्नातिपित्तलं विशदं लघु।
उद्गारशुद्धिदं सूक्ष्मं विबन्धानाहशूलहृत्॥"
इति भावप्रकाशः॥
सर्ज्जिकाचारः। इत्यमरः। २। ९। १०९॥
सुवर्च्चलासम्बन्धिनि, त्रि॥

सौवर्णं, त्रि, (सुवर्णस्येदम्। सुवर्ण+अण्।) सुवर्णसम्बन्धि। कर्षमितहेमसम्बन्धि। यथा, मत्स्यपुराणम्।
"सौवर्णी राजती वापि ताम्री रत्नमयी तथा।"
इत्युपक्रम्य॥
"शुभदारुमयी वापि देवतार्च्चा प्रशस्यते॥"
इति देवप्रतिष्ठातत्त्वम्॥

सौवर्णभेदिनी,स्त्री,(सौवर्णमिव वर्णमभिनत्ति प्रकाशयतीति। भिद्+णिनिः। ङीप्।) प्रियङ्गुः। इति शब्दमाला॥

सौवस्तिकः, पुं(स्वस्ति तत् करणे साधुः।स्वस्ति+ठक्।) पुरोहितः। इति हेमचन्द्रः॥ स्वस्तिसम्बन्धिनि, त्रि। इति व्याकरणम्॥

सौवास्तवः, त्रि, (सुवास्तोरिदम्। सुवास्तु+सुवास्त्वादिभ्योऽण्।" ४। २। ७७। इत्यण्।) सुन्दरवास्तुसम्बन्धी। सुशब्दपूर्ब्बकवास्तुशब्दात् ष्णप्रत्ययेन निष्पन्नः॥ (सुवास्तोरदूरभवः। इति काशिका॥)

सौविदः, पुं, (सुष्ठु वेत्तीति। सु+विद+कः। ततः प्रज्ञाद्यण्।) अन्तःपुररक्षकः। इत्यमरः। २। ८। ८।

सौविदल्लः,पुं,(सुष्ठु विदन्तं विज्ञमपि लाति वशवर्त्तिनं करोतीति। सुविदत्+ला+कः।ततः स्वार्थे अण्।) अन्तःपुररक्षकः। (यथा, कथासरित्सागरे।३९। २८।
"तदन्यस्य न लाभोऽस्ति सौविदल्लाभिरक्षिते।
अन्तःपुरेऽत्र पुंसो यदतोऽसौ तेन संगता॥")
तत्पर्य्यायः। कञ्चुकी २ स्थापत्यः ३ सौविदः४। इत्यमरः। २। ८। ८॥ स्थपतिः ५ सुविदः ६। इति तट्टीका॥ चत्वारि महल्लरक्षके। बहिःसञ्चरन्तीनां पुरस्त्रीणां प्रेक्षणपुरुषान्तरवारणाय राज्ञा स्त्रागारे ये वेत्रधरा नियुक्तास्ते बहिर्महल्लकाः सौविदल्लादिशब्दवाच्याः। शोभनं विदन्ति सुविदः पण्डिताः क्विप् तान् अतति सत्येन गच्छति सुविदत् भूपालः तं लाति सुविदलं अन्तःपुरं हनजनाति डः स्त्री लस्तोरिति लः तत्र नियुक्ता इति ढचे कादिति ष्णे सौविदल्लाः। इति भरतः॥

सौविदल्लकः,पुं, (सौविदल्ल एव। स्वार्थे कन्।) सौविदल्लः। इति शब्दरत्नावली॥

सौवीरं,क्ली,बदरम्। काञ्जिकम्। स्रोतोञ्जनम्। इत्यमरः। २। ४। ३७। २। ९। ३९। २। ९। १००॥ एतेषां विशेषा यथा,—
"————सौवीरं बदरं महत्।"
इति रत्नमाला॥
"सौवीरन्तु यवैरामैः पक्वैर्वा निस्तुषैः कृतम्।
गोधूमैरपि सौवीरमाचार्य्यैः कैश्चिदूचिरे॥
सौवीरन्तु ग्रहण्यर्शःकफघ्नं भेदि दीपनम्।
उदावर्त्ताङ्गमर्दास्थिशूलानाहेषु शस्यते॥"
इति भावप्रकाशः॥
सौवीराञ्जनम्। यथा,—
"सुवीरकं पार्व्वतेयं सौवीरं नीलमञ्जनम्।"
इति रत्नमाला॥

सौवीरः,पुं,(सुष्ठु वीरा यत्र। ततः स्वार्थे अण्।) देशविशेषः। इति मेदिनी॥ (यथा,हरिवंशे। ९०। १९।
"सौवीरराजः शैव्यश्च पाण्ड्यश्च बलिनां वरः॥")

सौवीरकं, क्ली, (सौवीरमेव। स्वार्थे कन्।) काञ्जिकविशेषः। तत्पर्य्यायः। सुरीराम्लम् २ गोधूमसम्भवम् ३ यवाम्लजम् ३ यवोत्थम् ५ तुषोत्थम् ६ तुषोदकम् ७। अस्य गुणाः। अम्लरसत्वम्। केश्यत्वम्। मस्तकदोषजराग्रैथिल्यनाशित्वम्। बलकारित्वम्। सन्तर्पणत्वञ्च। इति राजनिर्घण्टः॥

सौवीरकः, पुं,(सौवीर+संज्ञायां कन्।) बदरवृक्षः। इति राजनिर्घण्टः॥

सौवीरसारं, क्ली, स्रोतोञ्जनम्। इति राजनिर्घण्टः॥

सौवीराञ्जनं, क्ली, (सौवीरनामकमञ्जनम्।) अञ्जनप्रभेदः। तत्पर्य्यायः। अञ्जनम् २ यामुनम् ३ क्षणम् ४ नाटेयम् ५ मेचकम् ६ स्रोतोजम्७ दुष्प्रदम्८ नीलम् ९ सुवीरजम् १० नीलाञ्जनम् ११ चक्षुष्यम् १२ वारिसम्भवम्१३ कपोतकम् १४ कापोतम् १५। अस्य गुणाः। शीतत्वम्। कटुत्वम्। तिक्तत्वम्। कषायत्वम्। चक्षुष्यत्वम्। कफवातविषनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

सौष्ठवं,क्ली,(सुष्ठु भावः। सुष्ठु+"प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्।"५। १। १२८। इत्यञ्।) आतिशय्यम्। (यथा, महाभारते। १। १३४। १४।
"तुलेष्वस्त्रप्रयोगेषु लाघवे सौष्ठवेषु च।
सर्व्वेषामेव शिष्याणां बभूवाभ्यधिकोऽर्জ্জुनः॥")
प्रशंसनत्वम्। इति सुष्ठुशब्दार्थदर्शनात्।(यथा हरिवंशे। ४०। ३४।
"आयुःशैक्षाप्युपचयो लक्षणं रूपसौष्ठवम्॥")
नाटकाङ्गविशेषः। इति केचित्॥

सौहार्दं, क्ली, (सुहृदः सुहृदयस्य वा भावः कर्म्म वा। सुहृत् सुहृदय वा + "हायनान्तयुवादिभ्योऽण्।" ५। १। १३०। इत्यण्। हृदयस्य हृदादेशः। "हृदयसिन्भन्ते पूर्व्वपदस्य च।" ७। ३। १८। इति उभयपदवृद्धिः।) सुहृदो भावः। तत्पर्य्यायः। सख्यम् २ सौहृदम् ३ साम्पदीनम् ४ मैत्री ५ भजर्य्यम् ६ सङ्गतम् ७ इति हेमचन्द्रः॥ (यथा, महाभारते। १। ७७। ११।

"सौहार्दं चानुरागं च वेत्थ मे भक्तिमुत्तमाम्।
न मामर्हसि धर्म्मज्ञ त्यक्तुं भक्तामनागसम्॥")

सौहार्दः, पुं, (सुहृदोऽपत्यमिति। सुहृद् + अण्। सुहृत्पुत्रः। इति कैचित्॥

सौहार्द्यं, क्ली, (सुहृदयस्य भावः। सुहृदय + ष्यञ्। "वा शोकष्यञ्रोगेषु।" ६। ३। ५१। इति हृदयस्य हृदादेशः।) सौहार्दम्। इति सिद्धान्तकौमुदी॥

सौहित्यं, क्ली, (सुहितस्य भावः कर्म्म वा। सुहित + "पत्यन्तपुरोहितादिभ्यो यक्।" ५। १। १२८। इति यक्।) तृप्तिः। इत्यमरः। २।८।५६॥ (यथा, महाभारते। १२।२४४।१३।

"अहेरिव गणाद्भीतः सौहित्यादिव पन्नगात्।
कृणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः॥

सौहृदं, क्ली, (सुहृदः कर्म्म भावो वा। सुहृत् + अण्।) सख्यम्। सौहार्दम्। इति हेमचन्द्रः॥ तस्य प्राशस्त्यं यथा,—

"तद्भुज्यते यद्विजभुक्तशेषं
स बुद्धिमान् यो न करोति पापम्।
तत् सौहृदं यत् क्रियते परोक्षे
दर्भं विना यः क्रियते स धर्म्मः॥"

इति गारुडे ११५ अध्यायः॥

स्कद, द ङ आप्लवे। उड्डतौ। उत्प्लुत्य गत्याम् इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सक० च-सेट्।) आद्यस्वरौ। इ, स्कन्यते। ङ, स्कन्दते चिस्कन्दिषते। पञ्चमस्वरौ धातुप्रदीपकारौ। स्कन्दते स्कुन्दते चापि पड़ाप्लवनवाचिनः। इति भट्टमल्लोऽपि। चुस्कुन्दिषते। इति दुर्गादासः॥

स्कन्द, इर् ओर ग्रोषणे। गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) इर्, अस्कदत्। अस्कांक्षीत्। भौ, स्कन्ता चस्कन्द। इति दुर्गादासः॥

स्कन्द, त ङ समाप्तौ। इति कविकल्पद्रुमः॥ (अनन्तचुरा०-परo-सक०-सेट्।) दन्त्यवर्गद्वितीयोपधोऽयम्। तवर्गतृतीयोपध इति कैचित्। स्कन्दयति स्कन्दापयति अचस्कन्दत्। इति दुर्गादासः॥

स्कन्दः, पुं, (स्कन्दते उत्प्लुत्य गच्छति स्कन्दति शोषयति दैत्यान् वा। स्कन्द + अच्।) कार्त्तिकेयः। इत्यमरः। १।१।४२॥ तस्य उत्पत्तिषड़ाननषण्नामचतुर्म्मूर्त्त्यभिषेकगणवाहनाद्यादि यथा,—

नारद उवाच।

"किमर्थमेषकः क्रौञ्चो भिन्नः स्कन्देन सुव्रत।
एतन्मे विस्तराद्ब्रह्मन् कथयस्वामितद्युते॥

पुलस्त्य उवाच।

एतां ते कथयिष्यामि कथां पुण्यां पुरातनीम्।
यशोहृदिं कुमारस्य कार्त्तिकेयस्य नारद॥
यत् पीतं वीतिहोत्रेण वीर्य्यं यत्तं पिनाकिनः।
तेनाक्रान्तोऽभवद्ब्रह्मन् मन्दतेजा हुताशनः॥
ततो जगाम देवानां सकाशममितद्युतिः।
दैवतैः प्रहितस्तूर्णं ब्रह्मलोकं जगाम ह॥
स गच्छन् कुटिलां देवीं ददर्श पथि पावकः।
तां दृष्ट्वा प्राह चाधत्स्व तेजो यन्मम दुर्द्धरम्॥
महेश्वरेण सन्त्यक्तं निर्दहेत् भुवनान्यपि।
तद्धारणाच्च कुटिले पुत्रो धन्यो भविष्यति॥
इत्यग्निना सा कुटिला श्रुत्वा सुतमनुत्तमम्।
पक्षिणमात्रं जग्राह तेजः ऐशं महाप्रभा॥
ततस्त्वधारयद्देवी गार्ब्बं तेजः स्वपुष्पवत्।
हुताशनोऽपि च भयात् यच्च तत्र परिभ्रमन्॥
पञ्चवर्षसहस्राणि ह्यध्यास्ते हव्यभुक् ततः।
मांसमस्थीनि रक्तानि मेदोमज्जस्त्वचस्तथा॥
रोमाणि चाचिकेशाद्याः सर्व्वे जाता हिरण्मयाः।
हिरण्यरेता लोकेऽस्मिन् विख्यातः पावकस्ततः॥
पञ्चवर्षसहस्राणि कुटिला ज्वलनोपमम्।
धारयन्ती तदा गर्भं ब्रह्मणः स्थानमागता॥
पितामहस्तां क्षीणाङ्गीं सन्तप्यन्तीं महाप्रभाम्।
दृष्ट्वा पप्रच्छ केनायं तव गर्भः समाहितः॥
सा चाह गार्ब्बरं तेजः पावकेन समर्पितम्।
अप्यग्नकेन तेनाद्य निक्षिप्तं मयि सत्तम॥
पञ्चवर्षसहस्राणि धारयन्त्या पितामह।
अन्नपानादिकमपि न मेऽपच्यत कर्हिचित्॥
तच्छ्रुत्वा भगवानाह गच्छ त्वमुदयं गिरिम्।
तत्रास्ति योजनशतं विस्तीर्णं सुरसेवितम्॥
तमनुप्राप्य सुश्रोणि विस्तीर्णं गिरिसानुनि।
दशवर्षसहस्रान्ते ततो बालो भविष्यति॥
ब्रह्मणो वचनं श्रुत्वा कुटिला गिरिमागता।
आगत्य गर्भं तत्याज मुखेनैवाद्रिनन्दिनी॥
सा तु संत्यज्य तं बालं ब्रह्माणं सहसागमत्।
आपोमयी मन्त्रवशात् संयता कुटिला सती॥
तेजसा चापि गार्ब्बेण रौक्मः शरवणोऽभवत्।
तस्मिन्वासवतायां वै पादपा मृगपक्षिणः॥
ततो दशसु पूर्णेषु शरदृग्यतेष्वथ।
बालार्कदीप्तिः संजातो बालः कमललोचनः॥
उत्तानशायी भगवान् दिव्ये शरवणे स्थितः।
मुखेऽङ्गुष्ठं समाक्षिप्य रुरोद घनराड़िव॥
एतस्मिन्नन्तरे दैव्यः कृत्तिकाः षट् सुतेजसः।
ददृशुः स्वेच्छया याभ्यो बालं शरवणे स्थितम्॥
कृपायुक्ताः समाजग्मुर्यत्र स्कन्दः स्थितोऽभवत्।
अहं पूर्व्वमहं पूर्व्वं तस्मै स्तन्यं हि चुक्रुशुः॥
विवदन्तीः स ता दृष्ट्वा षण्मुखः समजायत।
अवीभरन्तस्ताः सर्व्वाः शिशुं स्नेहाच्च कृत्तिकाः॥
भ्रियमाणः सतीभिस्तु बालो हृद्दिगजन्मने।
कार्त्तिकेय इति ख्यातो जातः स बलिनांवरः॥
एतस्मिन्नन्तरे ब्रह्मन् पावकं प्राह पद्मभूः।
क्रियत्प्रमाणः पुत्रस्ते वर्त्तते साम्प्रतं गुहः॥
स तद्वचनमाकर्ण्य अजानन् तं हरात्मजम्।
प्रोवाच पुत्रं देवेश न वेद्मि कतमो गुहः॥
तं प्राह भगवान् युक्तं तेजः पीतं पुरा त्वया।
त्रैयम्बकं त्रिलोकेशं जातः शरवणे शिशुः॥
श्रुत्वा पितामहवचः पावकस्त्वरितोऽभ्यगात्।
उदयाद्रिञ्च कुटिलां तं ददर्श हिते रतां॥
पप्रच्छ कुटिलां देवीं क्व शीघ्रं व्रजसे कवे।
सोऽब्रवीत् पुत्रदर्शार्थं जातं शरवणे शिशुम्॥
साब्रवीत्तनयो मह्यं ममेत्याह च पावकः।
विवदन्तौ ददर्शाथ स्वेच्छाचारौ जनार्द्दनः॥
तौ पप्रच्छ किमर्थं वा विवादमिह चक्रतुः।
तमूचतुः पुत्रहेतो रुद्रशुक्लोद्भवादिति॥
तावुवाच हरिर्देवौ गच्छतं त्रिपुरान्तकम्।
स यदक्षति देवेशः कुरुतं तदसंशयम्॥
इत्युक्तौ वासुदेवेन कुटिलाग्नी हरान्तिकम्।
समभ्येत्योचतुस्तथ्यं कस्य पुत्रो भवेदगुहः॥
रुद्रस्तदाकर्ण्यमाकर्ण्य हर्षनिर्भरमानसः।
दिष्ट्या दिष्ट्येति गिरिजां प्रोद्भूतपुलकोऽब्रवीत्॥
ततोऽम्बिका प्राह हरं देव गच्छाव तं शिशुम्।
दृष्ट्वा समागमिष्यां स तस्याः पुत्रो भविष्यति॥
वाढ़मित्येव भगवान् समुत्तस्थौ वृषध्वजः।
सहोमया कुटिलया पावकेन च धीमता॥
सम्प्राप्तास्ते शरवणं हरोमाकुटिलाग्नयः।
ददृशुः शिशुकं तत्र कृत्तिकौत्सङ्गशायिनम्॥
ततः स बालकस्तेषां मत्वा चिन्तितमादरात्।
योगी चतुर्म्मूर्त्तिरभूत् षण्मुखः स शिशुः पितुः॥
कुमारः शङ्करमगात् विशाखो गिरिजामगात्।
कुटिलामगमच्छाखो नैगमेयोऽग्निमभ्यगात्॥
ततः प्रीतियुतो रुद्रः उवाच कुटिलां तथा।
पावकञ्चापि देवेशः परां मुदमवाप च॥
ततोऽब्रुवन् कृत्तिकास्ताः षण्मुखः किं हरात्मजः।
ता अब्रवीत् हरः प्रीत्या विवेश वचनं मुने॥
नाम्ना तु कार्त्तिकेयेति युष्माकञ्च भवत्वसौ।
कुटिलायाः कुमारेति पुत्रोऽयं भवितास्यतः॥
स्कन्द इत्येव विख्यातो गौरीपुत्रो भवत्वसौ।
गुह इत्येव नाम्ना च ममासौ तनयः स्मृतः॥
महासेन इति ख्यातो हुताशस्यास्तु पुत्रकः।
सारस्वत इति ख्यातः सुतः शरवणस्य च॥
एवमेष महायोगी पृथिव्यां ख्यातिमेष्यति।
षड़ास्यत्वान्महाबाहुः षण्मुखो नाम गीयते॥
इत्येवमुक्त्वा भगवान् शूलपाणिः पितामहम्।
सस्मार देवतैः सार्द्धं तेऽप्यागम्मुस्त्वरान्विताः॥
प्रणिपत्य च कामारिं उमाञ्च गिरिनन्दिनीम्।
दृष्ट्वा हुताशनं प्रीत्या कुटिलां कृत्तिकास्तथा॥
ददृशुर्बालमत्युग्रं षण्मुखं सूर्य्यसन्निभम्।
मुष्णन्तमिव चक्षूंषि देवानां स्वेन तेजसा॥
कौतुकाभिहताः सर्व्वे एवमूचुः सुरोत्तमाः।

देवकार्य्यं त्वया देव कृतं देव्याग्निना तथा ॥
तदुत्तिष्ठ व्रजामोऽद्य तीर्थमौजसमव्ययम् ।
कुरुक्षेत्रे सरस्त्यामभिषिञ्चाम यत्नतः ॥
सेनायाः पतिरस्त्वेष देवगन्धर्व्वकिन्नराः ।
महिषं घातयत्वेष तारकञ्च सुदारुणम् ॥
वाढमित्यब्रवीच्छर्व्वः समुत्तस्थुः सुरास्ततः ।
कुमारसहिता जग्मुः कुरुक्षेत्रं महाफलम् ॥
तत्रैव देवताः सेन्द्रा ब्रह्मविष्णुजनार्दनाः ।
यज्ञमस्याभिषेकार्थं चक्रुर्म्मुनिगणैः सह ॥
ततोऽम्बुना सप्तसमुद्रवाहिनी-
नदीजलेनापि महाफलेन ।
वनौषधीभिश्च सहस्रमूर्त्तिभि-
स्तदाभ्यषिञ्चन्त हराच्युताद्याः ॥
अभिषिञ्चति सेनान्यां कुमारे दिव्यरूपिणि ।
ननृतुर्गन्धर्व्वपतयो ननृतुश्चाप्सरोगणाः ॥
अभिषिक्तं कुमारञ्च निरीक्ष्य हि ।
स्वं हात्तसङ्गमं स्कन्दं मूर्ध्निजिघ्रन्मुहुर्म्मुहुः ॥
जिघ्रती कार्त्तिकेयस्य अभिषेकार्द्रमाननम्
भात्यद्रिजा यथेन्द्रस्य देवमातादितिः पुरा ॥
तदाभिषिक्तं तनयं दृष्ट्वा गर्व्वी सुतं ययौ ।
पावकः कृत्तिकाश्चैव कुटिला च यशस्विनी ॥
ततोऽभिषिक्तस्य हरः सेनापत्ये गुहस्य तु ।
प्रथमांश्चतुरः प्रादाच्छक्रतुल्यपराक्रमान् ॥
घण्टाकर्णं लोहिताक्षं नन्दिषेणं सुदारुणम् ।
चतुर्थं बलिनां मुख्यं ख्यातं कुसुदमालिनम् ॥
हरदत्तान् गणान् दृष्ट्वा देवाः स्कन्दस्य नारद ।
प्रददुः प्रमथानन्यान् सर्व्वे ब्रह्मपुरोगमाः ॥
स्थाणुर्ब्रह्मा गणं प्रादाद्विष्णुः प्रादात् गणत्रयम्
संक्रमं विक्रमञ्चैव तृतीयञ्च पराक्रमम् ॥
उशेयं पङ्कजं शक्रो रविर्दण्डकपिञ्जली ।
चन्द्रो मणिं वसुमणिं अग्निर्नन्दिनन्दिनौ ॥
ज्योतिर्हुताशनः प्रादात् ज्वालाजिह्वं तथा-
परम् ।
कुन्दनिष्कुन्दकुमुदान् धाता चानुचरान् ददौ ॥
चक्रानुचक्रौ त्वष्टा च वेधातिस्थिरदुस्थिरौ ।
पाणित्यजं कालकञ्च प्रादात् पूषा महाबलौ ॥
स्वर्णमालं धनार्कञ्च हिमवान् प्रमथोत्तमौ ।
प्रादाद्वोच्छ्रितो विन्ध्यस्तुतिशृङ्गञ्च पार्षदम् ॥
सुवर्चसञ्च वरुणः प्रददौ चातिवर्चसम् ।
सघटं विग्रहञ्चैव नागाभिजयसंजयौ ॥
उन्मादं शङ्कुकर्णञ्च पुष्पदन्तं तथाम्बिका ।
दुर्गञ्चातिबलञ्चैव श्रेष्ठौ चानुचरावुभौ ॥
परिघं चटकं भीमं दाहाभिदहनौ तथा ।
प्रददावंशमाख्यञ्च प्रमथान् यक्ष्मणोऽहरत् ॥
यमः प्रमाथमुन्माथं कालसेनमलासुखम् ।
तालयक्षं नाडिजङ्घं पड्वेवानुचरान् ददौ ॥
सुप्रभं शुभकर्म्माणं विश्रुतो दानवेश्वरो ।
सुप्रसूत्यं सत्रमित्रं सुप्रजञ्च द्विजोत्तम ॥
अनन्तः शङ्खपीठञ्च निकुम्भकुमुदावजः ।
एकार्कं कुलटीचक्रः किरीटः कलशोदरः ॥"
किरीटस्थाने किरीटः इति च पाठः ।
"सुग्रीवञ्च: लोकनदः प्रदासः सिन्धुकोऽव्ययः ।
गणाः पञ्चदशैते वै यत्तेर्दत्त्वा गुहस्य च ।
कालिन्द्याः कलकन्दश्च नर्म्मदाया रणोत्कटः ।
गोदावर्य्याः सिद्धपाश्चसमसायास्तु पङ्कजः ॥
सहस्रबाहुः सीताया वज्रलाया: स्मितोदरः ।
मन्दाकिन्याः सुबाहुश्च विपाशायाः प्रियङ्करः ॥
ऐरावत्याश्चतुर्दंष्ट्रः षोड्शाद्योऽपरस्तथा ।
मार्जारं कौशिकी प्रादात् क्रथकैशी च
गौतमी ॥
बाहुदा शतशीर्षञ्च वाहा गोनन्दनन्दिनी ।
भीमं भीमरथी प्रादात् दुर्गारिं सरयूर्ददौ ॥
अष्टबाहुं ददौ काशी सुबाहुमपि गण्डकी ।
महानन्दी चित्रदेवं चित्रा चित्ररथं ददौ ॥
कुङ्कुः कुवलयं प्रादात् मधुवर्णं मधूदका ।
जम्बूकं धूतपापा च वेखा पेटाननं ददौ ॥
स्तुता प्रथमपर्णञ्च रेवा सागरवेगिनम् ।
प्रभावा पाशजं प्रादात् काञ्चना कनकप्रभम् ॥
धृतपत्रञ्च विमला चारुवक्त्रं मनोहरा ॥
अपापा च महारामं वेखा विद्रुमसुप्रभम् ॥
सुप्रसादं सुवेखा च जिष्णु मोघवती ददौ ।
यज्ञबाहुं विशाला च सरस्वत्या ददुर्गणान् ॥
कुटिलातनयस्यादात् दशशक्रबलान्वितान् ।
करालं श्वितकेशञ्च कृष्णकेशं जटाधरम् ॥
मेघनादं चतुर्दंष्ट्रं विद्युज्जिह्वं दशाननम् ।
सोमाध्यायनमेवोग्रं देवयाजिनमेव च ॥
हंसास्यं कुण्डजठरं बहुग्रीवं हयाननम् ।
कूर्म्मग्रीवञ्च पञ्चैतान् ददुः पुत्राय कृत्तिकाः ॥
स्थूलजङ्घं कुण्डवक्त्रं लोहजङ्घं महाननम् ।
विष्कारकञ्च पञ्चैतान् ददुः स्कन्दाय चर्षयः ॥
नागजिह्वं चन्द्रभासं पाणिकूर्म्मं शशिष्करम् ।
वासवञ्च सजम्बूकं ददौ तीर्थः पृथूदकः ॥
चक्रतीर्थं सुचक्राख्यं मकराक्षं गयाशिरः ।
गणं पञ्चशिखं नाम ददौ कनखलः स्वयम् ॥
बभ्रुदत्तं वालिशिरो वालुसारञ्च पुष्करम् ।
सर्व्वलिसं माहिषकं मानसं पिङ्गलं तथा ॥
रुद्रकोटिगणम् प्रादात् ततोऽन्या मातरो ददुः ।
वसुदामां शोणतीर्थः प्रभासो नन्दिनोमपि ॥
इन्द्रतीर्थं विशोकाख्यं उदयानं घनस्वनम् ।
सप्तसारस्वतः प्रादात् मातरश्चतुरोऽद्भुताः ॥
जितप्रियां माधवीञ्च तीर्थनेमिं सिताननाम् ।
एकलूतां नागतीर्थः कुरुक्षेत्रं पलाशदाम् ॥
ब्रह्मात्मनिः खण्डशिलां भद्रकालीं त्रिपिष्टपः ।
वैष्णवीं भैरवीं योगभैरवीं प्रादादुरदरपावनः ॥
सोपानीयां महान्प्रादाच्छालिकां मानसोद्भवः
शतपुष्पां शतानन्दां तथोलूखलमेखलाम् ॥
पद्मावतीं माधवीञ्च ददौ बदरिकाश्रमः ।
सुखसामैकचूलाञ्च देवीं धर्म्मधरां तथा ॥
उकाथनीं वेदमित्रां केदारो मातरौ ददौ ।
सुनक्षत्राञ्च कारुषां सुप्रभावां सुमङ्गलीम् ॥
वेदमित्रां चित्रसेनां ददौ रुद्रो महाबलः ।
कोटराक्षीं सयताक्षामसतीं बहुपुत्रिकाम् ।
पलितां कमलाक्षीञ्च प्रयासां मानसो ददौ ॥
सुपर्णीं मधुकुम्भाञ्च ख्यातिं दहदहां पराम् ।
प्रादाद्वै कार्त्तिकेयाय सर्व्वपापविमोचनः ॥
सान्तानिकां विकलिकां क्रमुकां खरवासिनी
जलेश्वरी कुक्कुटिका सुदामा लोहमेखला ॥
वपुष्मत्युग्रकाली च कैकनामा महाग्रणी ।
रौद्रा भूभुविका तुष्टा श्वेततीर्थो ददौ त्विमाः ॥
एतानि भूतानि गणाश्च मातरो
दृष्ट्वा महात्मा विनतातनूजः ।
ददौ मयूरं स्वसुतं महाजवं
तथाद्वयाङ्तरत्नसुत्तमम् ॥
अग्निं हुताशोऽद्दिसुता तु वज्रं
दण्डं गुरुः सा कुटिला कमण्डलुम् ।
मालां हरिः शूलधरः पताकां
कण्ठे च हारं मघवानुरस्थः ॥
गणैर्वृतो मातृभिरन्वितश्च
मयूरसंस्थो वरशक्तिपाणिः ।
सेनाधिपत्ये स हतो भवेन
रराज सूर्य्येव महाविपुष्मान् ॥"
इति वामनपुराणे कार्त्तिकेयोत्पत्तौ ५४ अध्यायः॥
देव्या द्वारपालविशेषः । तस्य बलिर्यथा—
"महानवम्यां शरदि रात्रौ स्कन्दविशाखयोः ।
यवचूर्णमयं कृत्वा रिपुं मृन्मयमेव वा ॥
शिरश्छित्त्वा बलिं दद्यात् कृत्वा तस्य तु मन्त्रतः
अनेनैव तु मन्त्रेण खड्गमामन्त्र्य यत्नतः ॥
रक्तं किलकिली घोरघोरा धारविशिंखकः ।
ब्रह्मशिख्याम्बिकाशिख्यमसुकं चारिसत्तमम् ॥
तान्तो विसर्गसहितः स च बिन्दुयुतोऽपरः ।
ब्रह्माग्नियोगचन्द्रेण बिन्दुना च समन्वितः ॥
शिरश्छित्त्वा बलिं दद्यात् कृत्वा तस्य तु
मन्त्रतः ।
अनेनैव तु मन्त्रेण बिन्दुना च समन्वितः ॥
फड़न्ते बलिषु प्रोक्तः खड्गे स्कन्दविशाखयोः ।
रक्तद्रव्यैः सेचयित्वा कृत्तिमं तं रिपुं बलिम् ॥
कुचन्दनस्य तिलकं ललाटेऽभिनिवेशयेत् ।
रक्तमाल्यधरं कृत्वा रक्तवस्त्रधरं तथा ॥
कण्ठे बद्ध्वा रक्तसूत्रैर्नाभौ माल्यञ्च कृत्रिमम् ।
दक्षोत्तरशिरःस्कन्धं कृत्वा खड्गेन च्छेदयेत् ॥
शिरस्तस्य ततो दद्यात् स्कन्दाय तेन मन्त्रतः ।
चतुर्दशस्वराग्निभ्यां संयुक्तः स परः शमम् ॥
परतः परतः पूर्व्वं चन्द्रबिन्दुसमन्वितः ।
स्कन्दस्य मूलमन्त्रोऽयं तेन तस्यै बलिं यजेत् ॥
चतुर्दशस्वराग्निभ्यां पञ्चतीयन्तु पूर्व्ववत् ।
प्रोक्तो विशाखमन्त्रोऽयं तेन तस्यै बलिं यजेत्॥
कुटिलाद्यौ कृष्णपिङ्गवर्णौ रक्तांशुधारिणौ ।
त्रिशूलं करवालञ्च पाणिभ्यां दक्षिणे तथा ॥
बिभ्रतौ नृकपालञ्च कर्त्तृकाञ्चापि वामतः ।
त्रिनेत्रौ नरमुण्डानां मालामुरसि बिभ्रतौ ॥
विकटौ दंष्ट्रिभिर्भीमैर्गणेशौ द्वारपालकौ ।
ध्यानेन चिन्तयेद्व्याः पुरतः संस्थितौ सदा ॥"
इति कालिकापुराणे ६६ अध्यायः ॥ * ॥
(महादेवः । इति महाभारतम् ।१३।१७।१०३॥
नृपतिः । इति जटाधरः ॥ शरीरम् । इति
त्रिकाण्डशेषः ॥ पारदः । इति राजनिर्घण्टः ॥

"पयोधरैराश्रमबालहञ्चकान्
संवर्द्धयन्ती स्वबलानुरूपैः।
असंशयं प्राक् तनयोपपत्तेः
स्तनन्धयप्रीतिमवाप्स्यसि त्वम्॥")

स्तनन्धया, स्त्री, (स्तनन्धय+टाप्।) अतिबालिका। इत्यमरटीकायां भरतः।२।६।४१॥

स्तनन्धयी, स्त्री, (स्तनन्धय+टित्त्वात् ङीप्।) अतिबालिका। इत्यमरः। २। ६। ४१॥

स्तनपः, पुं, स्तनं पिबतीति। पा+कः।) अतिशिशुः। इति भरतः॥ स्तनपानकर्त्तरि, त्रि॥

स्तनपा, स्त्री (स्तनं पिबति या। पा+कः। टाप्।) अतिबालिका। इत्यमरः।२।६।४१॥

स्तनपायिका, स्त्री, अतिबालिका। दुग्धपोष्या। स्तनशब्दपूर्व्वकपाधातोर्णक्(खुल्) प्रत्यये आप्-प्रत्ययेन निष्पन्नम्॥

स्तनभरः, पुं, (स्तनयोर्भरः।) स्थूलस्तनभारः। तत्पर्य्यायः। स्तनभोगः २। इति त्रिकाण्ड-शेषः॥

स्तनभवः, पुं, (स्तनाभ्यां भव उत्पत्तिर्यस्य। रति-बन्धविशेषः। यथा,—

"स्वजङ्घाहृदयमध्ये तु कृत्वा योषित्पदद्वयम्।
स्तनौ धृत्वा रमेत् कामी बन्धः स्तनभवः स्मृतः॥"

इति स्मरदीपिका॥

स्तनजाते, त्रि॥

स्तनमुखः, पुं, (स्तनयोर्मुखम्। अभिधानात् पुंस्त्वम्।) स्तनाग्रभागः। यथा। चुचुकन्तु स्तना-ग्रन्तश्चिखासुखाः। इति हेमचन्द्रः।३।२६७॥

स्तनयित्नुः, पुं, (स्तनयतीति। स्तन त्नाभ्रशब्दे+ "स्तनिक्षिपिपुषीति।" उणा० ३। २८। इति इत्नुच्। "अयमन्तेति।" ६। ४। ५५। इति अयादेशः।) मेघः। इत्यमरः। १। ३। ६॥ (यथा, उत्तररामचरिते ३ अङ्के।

"किमभ्यस्तोऽसि निनदे कृतस्थेऽपि त्वमीदृशी।
स्तनयित्नोर्मयूरीव चकितोत्कण्ठिता स्थिता॥")

मुस्तकः। इति चामरः।२।४।१५८॥ मेघध्वनिः। इति मेदिनी॥ विद्युत्। इति शब्दरत्नावली॥ मृत्युः। रोगः। इति हेमचन्द्रः॥

स्तनहन्तः, पुं, (स्तनयोर्हन्तम्। अभिधानात् पुंस्त्वम्।) स्तनमुखम्। इति हेमचन्द्रः।३।२६७॥ स्तनेर बोँटा इति भाषा॥

स्तनग्रिखा, स्त्री, (स्तनयोः ग्रिखा।) स्तनहन्तः। इति हेमचन्द्रः। ३। २६७॥

स्तनाग्रं, क्ली, (स्तनयोरग्रम्।) स्तनहन्तम्। इति राजनिर्घण्टः॥

स्तनान्तरं, क्ली, (स्तनयोरन्तरम्।) हृदयम्। इति हेमचन्द्रः॥ (यथा, रघुः। १०। ६२।

"बिभ्रत्या कौस्तुभन्यासं स्तनान्तरविलम्बिनम्
पर्य्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया॥")

स्त्रीवैधव्यलक्षणविशेषः। इति केचित्॥

स्तनाभोगः, पुं, (स्तनयोराभोगः।) स्तनभरः। इति त्रिकाण्डशेषः॥ स्तनस्य परिपूर्णता च॥

स्तनितं, क्ली, (स्तन+क्तः।) मेघनिर्घोषः। इत्य-मरः। १। ३। ८॥ (यथा, मनुः। ४।१०३।

"विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संभवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥").

करतालिशब्दः। इति केचित्॥ (शब्दमात्रम्। यथा, हरिवंशे। ८९। ४८।

"आर्त्तस्तनितसंनादे रुधिराम्बुह्रदाकुले॥")

ग्रन्थिते, त्रि॥

स्तनितफलः, पुं, (स्तनितानि फलानि यस्य।) विकङ्कतवृक्षः। इति राजनिर्घण्टः॥

स्तन्यं, क्ली, (स्तने भवम्। स्तन+"शरीरावय-वाच्च।" ४। ३। ५५। इति यत्।) दुग्धम्। इति हेमचन्द्रः॥ (यथा, रघुः। २। ६८।

"स नन्दिनीस्तन्यमनिन्दितात्मा
सद्वत्सलो वत्सहुतावशेषम्।
पपौ वसिष्ठेन कृताभ्यनुज्ञः
शुभ्रं यशो मूर्त्तमिवातितृष्णः॥"

स्तनाय हितमिति।"शरीरावयात् यत्।"५। १। ६। इति यत् स्तनहिते, त्रि॥)

स्तब्धः, त्रि, स्तम्भितः। जड़ीकृतः। स्तम्भधातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, कथासरित्-सागरे। २०। ८६।

"स्वयमुत्क्षिप्तकलशस्तब्धबाहुरभूत्तटा॥")

स्तब्धरोमा, [न्] पुं, (स्तब्धानि रोमाणि यस्य।) शूकरः। इत्यमरः। २। ५। २॥ स्तम्भित-लोमयुक्ते त्रि॥ (यथा, आर्य्यासप्तशत्याम्।५३२।

"विमुखे चतुर्मुखेऽपि स्थितवति चानीशभाव-भीशेऽपि।
मन्मथहोनिस्तारे हरिः परं स्तब्धरोमाभूत्॥")

स्तभ, ष्टु ङ स्तम्भे। इति कविकल्पद्रुमः॥(भ्वा०-आत्म०-अक०-सक०-च सेट्।) दन्त्यादिः। ष्टु, स्तभ्नते। ङ, स्तब्धते। तिङन्तमयिषति। तिस्त-भयिषति। स्तम्भो जड़ीभावस्तत्करणञ्च। स्तम्भः स्थूणाजड़ीभावात्यमरोक्तेः। क्षीरे-नावस्तब्धो जड़ीकृतः इत्यर्थ इति क्रमदीश्वरो-क्तेश्च। स्तम्भ इह क्रियानिरोधः इति भौम्रः। दोषहरिरिति गोविन्दभट्टः। स्तम्भो रुद्धीकर-णञ्च। स्तम्भते कवाटेन द्वारं लोकः। इति दुर्गादासः॥

स्तम्भः, पुं, स्थाणुः। इति शब्दरत्नावली॥

स्तम्बः पुं, (तिष्ठतीति। स्था+"स्थः स्तोऽम्बज-वकौ।" उणा० ४।८६। इति अम्बच्। स्तादे-शश्च।) प्रकाण्डरहितवृक्षः। स तु भिण्टि-कादिः। तत्पर्य्यायः। गुल्मः २। इत्यमरः।२। ४। ८॥ ढणादिः। तत्पर्य्यायः। गुच्छः २। इति चामरः॥ गुल्मः ३। इति तट्टीका॥ विटपः ४। इति जटाधरः॥

स्तम्बकरिः, पुं, (स्तम्बं करोतीति। स्तम्ब+क+ स्तम्बशकृतोरिन्।" ३। २। २४। इति इन्।) धान्यम्। इत्यमरः। २। ९। २१॥ अपि च। "पुंसि स्तम्बकरिर्धान्यं व्रीहिर्ना धान्यमात्रके।" इति शब्दरत्नावली॥

स्तम्बकारः, त्रि, (स्तम्बं करोतीति। क+अण्।) गुच्छकारकः। स्तम्बशब्दात् कृञधातोः घञ्-प्रत्ययेन निष्पन्नः॥

स्तम्बघनः, त्रि, (स्तम्बः हन्यतेऽनेनेति। स्तम्ब+हन्+"स्तम्बे क च।"३।३।८३। इति चकारात् अप् घनादेशश्च।) तृणादिच्छेदनकारिखनित्रादिः। तत्पर्य्यायः। स्तम्बघ्नः २ इत्यमरः। ३।२।३५॥ स्तम्बहननः ३। इति सारसुन्दरी॥ स्तम्बघ्नः, त्रि, (स्तम्बो हन्यते येनेति। स्तम्ब+हन्+"स्तम्बे क च।"३।३।८३ इति कः।) स्तम्बघनः। इत्यमरः। ३। २। ३५॥

स्तम्बपूः, [र्] स्त्री, (स्तम्बानां पूरिव।) पुरीभेदः। तत्पर्य्यायः।

"तामलिप्तं दामलिप्तं ताम्रलिप्तौ तमालिनी।
स्तम्बपूर्व्विणगुच्छश्च स्याद्दिर्भा तु कुक्किनम्॥"

इति हेमचन्द्रः॥

स्तम्बहननः, त्रि, (स्तम्बो हन्यतेऽनेनेति। हन+करणे ल्युट्।) स्तम्बघनः। इत्यमरटीकासार-सुन्दरौ। ३। २। ३५॥

स्तम्बेरमः, पुं, (स्तम्बे रमते इति। स्तम्ब+रम+ "स्तम्बकर्णयो रमिजपोः।"३।२।१३। इत्यच्। "तत्पुरुषे कृति बहुलम्।"६।३। १४। इति समासे अलुक्।) हस्ती। इत्यमरः।२।८।३५॥ (यथा, रघुः। ५। ७२।

"अन्यां जहात्युभयपक्षविनीतनिद्राः
स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते॥")

स्तभ्, ग न ङ रोधने। इति कविकल्पद्रुमः॥ (क्रया० स्वा० अ०-पर०-सक०सेट्। ज्ञावेट्।) ग, स्तभ्नाति। न, स्तभ्नोति। ङ, स्तम्भित्वा स्तब्ध्वा। रोधनमावरणम्। इति दुर्गादासः। सौत्रधातुरयम्॥

स्तम्भः, पुं, (स्तभ्नातीति। स्तभ्+पचाद्यच्।) स्थूणा। थाम इति खुँटी इति च भाषा। जड़ीभावः। स तु निष्प्रतिभता। इत्यमर-भरतौ। ३।३।१३४॥ (यथा, माघः, ।५।४८।

"स्तम्भं महान्तमुचितं सहसा समोच
दानं ददावतितरां सहसाग्रहस्तः।
बद्धापराणि परितो निगड़ान्यलावीत्
खातन्त्र्यमुज्ज्वलमवाप करेणुराजः॥"

"महान्तं स्तम्भं आलानं जाड्यञ्च सहसा समोच। स्तम्भः स्थूणाजड़त्वहोरिति विश्वः।" इति तट्टीका॥ काण्डम्। यथा, रघुः।५।१५।

"आरण्यकोपात्तफलप्रसूतिः
स्तम्बेन नीवार इवावशिष्टः॥")

स्तम्भकरः, पुं, (करोतीति। क+अच्। स्तम्बस्य करः।) वेष्टनम्। इति केचित्॥ स्थूणाकारके जाड्यकारके च त्रि॥

स्तम्भकी, [न्] पुं, वाद्यविशेषः। इति केचित्॥

स्तम्भनं, क्ली, (स्तभ्+ल्युट्।) जड़ीकरणम्। यथा, वगलामुखीस्तोत्रे।

"दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणम्॥"

षट्कर्म्मान्तर्गताभिचारकर्म्मविशेषः। यथा,—

"उलूककाकयोः पक्षौ गृहीत्वा मन्त्रवित्तमः।
आलिख्य वै शरावे निशायाञ्च साध्याक्षर-
संपुटितम् ॥
मन्त्रं स्थापितपवनं सहस्रजप्तं चतुष्पथे निखनेत्
स्तम्भनमेतदवश्यं भविता जगतान्च नात्र
सन्देहः ॥"
स्थापितपवनं कृतप्राणप्रतिष्ठम्।
"कृत्वा प्रतिकृतिमथवा
श्मशानाङ्गारकेशभववसनजाम्।
सम्यगधिष्ठितपवनां
दुष्टतनान्नीं समन्ललाटाम् ॥
वसनाधिष्ठितपवनां
सहस्रजप्तां तदुल्कया वसनाम्।
दग्धां कृत्वा निखनेत्
श्मशानदेशे सपदि वाक्स्तभः ॥
आलिख्य चेष्टकायुगले मन्त्रं सनामपुटितम्।
निशया निशीथकाले सहस्रजप्तं प्रतिष्ठित-
प्राणम् ॥
बन्धनमतितीक्ष्णतरं स्तम्भनमतितीक्ष्णाम्बु-
निःक्षिप्तम्।
लिखितमन्त्रचितामयकीलकं,
सहितकर्म्म सनाम समाहृतम् ॥
कृतजपं त्रिसहस्रकसंख्यया
पथि खनेदथ याननिवारणम्।
विहितनिम्नतरौ रिपुनामयुतं
मनुमिमं निशया कृतनामकम्।
नवसहस्रजपादिसुसाधितं
पथि खनेदथ सैन्यनिरोधनम् ॥"
इति स्तम्भनम् ॥
इति फेत्कारिणीतन्त्रे ५ पटलः ॥ * ॥
अथाग्निस्तम्भनम्।
"मालूरस्य रसं गृह्य जलौकां तत्र पेषयेत्।
हस्तौ तु लेपयेत्तेन अग्निस्तम्भनमुत्तमम् ॥
शाल्मलीरसमादाय खरमूत्रे निधाय तम्।
अग्न्यागारे क्षिपेत्तेन अग्निस्तम्भनमुत्तमम् ॥
वायसी उदरं गृह्य मण्डूकवसया सह।
गुडिकां कारयेत्तेन ततोऽग्नौ प्रक्षिपेद्यदी ॥
एवमेतत्प्रयोगेण अग्निस्तम्भनमुत्तमम् ॥
रक्तपाटलमूलन्तु अवष्टब्धञ्च मूलकैः।
दिव्यं स्तम्भयते क्षिप्रं पयः पिण्डं बलान्तकम् ॥
मुण्डीतकवचाकुष्ठं मरीचं नागरं तथा।
चर्व्वित्वा च इमं सद्यो जिह्वया ज्वलनं लिहेत्
गोरोचनां भृङ्गराजं चूर्णीकृत्य घृतं समम्।
दिव्यस्तम्भञ्च पीत्वा स्यात् मन्त्रे णानेन वै तथा
ॐ ह्रां अग्निस्तम्भनं कुरु ॥ ॐ नमो भगवते
जलं स्तम्भय स्तम्भय सं समं सके कके कचर।
जलस्तम्भनमन्त्रोऽयं जलं स्तम्भयते ध्रुवं ॥"
इति गारुड़े पूर्व्वखण्डे। १८६। ११—१८ ॥
प्रकारान्तरं षट्कर्म्मशब्दे द्रष्टव्यम् ॥

स्तम्भनः, पुं, (स्तम्भयतीति। स्तम्भ + णिच् + ल्युः।) कामदेवस्य पञ्चबाणान्तर्गत-बाण-विशेषः। यथा,—

"उन्मादनः शोषणश्च तापनस्तम्भनस्तथा।
सम्मोहनश्च पञ्चैते विख्याताः कामशायकाः ॥"
इति जटाधरः ॥
(स्तम्भके, त्रि। यथा, सुश्रुते। १। ४२।
"कषायः संग्राहको रोपणः स्तम्भनः शोधनो लेखनः शोषणः पीड़नः क्लेदोपशोषणश्चेति ॥")
स्तम्भितः, त्रि, जड़ीभूतः। जड़ीकृतः। इति स्तम्भशब्दात् इतोऽस्य जाते इतप्रत्ययेन स्तम्भधातोः क्तप्रत्ययेन वा निष्पन्नः ॥
स्तरिमा, (न्) पुं, (स्तृणोति आच्छादयतीति। स्तृ + "हृभृधृसृस्तृभ्य इमनिच्।" उणा० ४। १४१। इति इमनिच्।) तल्पम्। इत्युणादिकोषः ॥
स्तरी, स्त्री, (स्तृणोति आच्छादयतीति। स्तृ + "अवितृस्तृतन्त्रिभ्य ईः।" उणा० ७। १५८। इति ईः।) धूमः। इति हेमचन्द्रः ॥
स्तवः, पुं, (स्तूयतेऽनेनेति। स्तु + अप्।) प्रशंसा। तत्पर्य्यायः। स्तोत्रम् २ नुतिः ३ स्तुतिः ४। इत्यमरः। १। ६। ११ ॥ स्तवनम् ५। इति शब्दरत्नावली ॥ वर्णः ६। इति जटाधरः ॥ (यथा, हरिवंशे। १२८। २८।
"तुष्टाव च तमीशानं मारीचः कश्यपस्तदा।
वेदोक्तैः स्वकृतैश्चैव स्तवैः स्तुत्यं जगद्गुरुम् ॥")
स्तवकः, पुं, (तिष्ठतीति। स्था + "स्थः स्तोऽम्बजवकौ।" उणा० ४। ८६।) इति अवकः धातोश्च स्तादेशः।) गुच्छकः। इत्यमरः। २। ४। १६ ॥ "ई स्तवके थलो इति ख्याते बहुभिः पुष्पैः फलैर्व्वा संबाधः पल्लवग्रन्थिः गुच्छः। गूयते ध्वन्यते भ्रमरैरत्र गुच्छः। गु घु ङ ङ ध्वनौ नाञ्चोति छक्।
'पुष्पादिस्तवके गुच्छो मुक्ताहारकलापयोः।'
इति चवर्गान्तेषु रन्तिदेवः ॥
'स्यात् गुच्छः स्तवके स्तम्बे हारभेदकलापयोः॥'
इति चवर्गद्वितीयान्ते मेदिनी ॥
स्वार्थे के गुच्छकः गुत्सकः इति च पठन्ति। तदा वुध्यति वेष्टते इति गोधन्ते क्रीड़न्ति भ्रमरा अत्रेति वा गुत्सः। गुध्य वेष्टे गुथ ङ क्रीड़े इत्यस्माद्वा नाञ्चोति सः। स्वार्थे कः गुत्सकः॥
'स्तवके हारभेदे च गुत्सः स्तम्बे च कीर्त्तितः॥'
इति दन्त्यान्तेषु रुद्रः।
'गुल्मः स्यात् स्तवके स्तम्बे हारभिद्ग्रन्थि-
पर्णयोः।'
इति दन्त्यसान्तेषु मेदिनी।
'मुकुरः कुट्मलेष्वापि स्तवको गुल्मकाविति॥'
इति हलन्तः।
स्तूयते इति स्तवकः। ष्टुञ् ल स्तुतौ अल् स्तवः स्वार्थे अभिधानात् नित्यकः। इति भरतः ॥*
स्तुतिः। इतिविश्वः॥ ग्रन्थपरिच्छेदः। समूहः। इति केचित् ॥ स्तवकारके, त्रि ॥
स्तवरकः, पुं, आवरकः। इति केचित् ॥
स्तावः, पुं, स्तवः। स्तुधातोर्भावे घञ् प्रत्ययेन निष्पन्नः ॥

स्तावकः, त्रि, (स्तौतीति। स्तु + ण्वुल्।) स्तवकर्त्ता। स्तुधातोर्ण्वुलप्रत्ययेन निष्पन्नः ॥ (यथा, भागवते। ४। १५। २१।
"स्तावकान् तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान्।
मेघनिर्ह्रादया वाचा प्रहसन्निदमब्रवीत् ॥")
स्तिमितः, त्रि, (स्तिम + क्तः।) अचञ्चलः। (यथा, रघुः। १३। ४८।
"एषा प्रसन्नस्तिमितप्रवाहा
सरिद्विदूरान्तरभावतन्वी।
मन्दाकिनी भाति नगोपकण्ठे
मुक्तावली कण्ठगतेव भूमेः ॥"
आर्द्रः। यथा, "स्तिमितोऽचञ्चलार्द्रयोः।" इति मेदिनी ॥
स्तिभिः, पुं, (स्तभ्नातीति। स्तभ + "क्रमितमिशतिस्तभामत इच्च।" उणा० ४। १२१। इति इन् अत इच्च।) समुद्रः। वाधा। इत्युणादिकोषः ॥
स्तीर्व्विः, पुं, (स्तृणातीति। स्तृ + "स्तृञ्जुहुस्तृजाग्भ्यः क्विन्।" उणा० ४। ५४। इति क्विन्।) नभः। रुधिरम्। क्षत्रजातिः। अध्वर्य्युः। पयः। शक्रः। इति संक्षिप्तसारोणादिवृत्तिः ॥
स्तुतः, त्रि, (स्तु + क्तः।) स्तुतिविषयः। तत्पर्य्यायः। ईलितः २ शस्तः ३ पणायितः ४ पनायितः ५ प्रणुतः ६ पथितः ७ पनितः ८ अपिगीर्णः ९ वर्षितः १० अभिष्टुतः ११। इत्यमरः। ३। २। ११० ॥ गीर्णः १२ ईड़ितः १३। इति शब्दरत्नावली ॥ नुतः १४। इति जटाधरः ॥ (यथा, महाभारते। १२। २८४। १८।
"नमः स्तुताय स्तुत्याय स्तूयमानाय वै नमः॥")
स्तुतिः, स्त्री, (स्तु + क्तिन्।) स्तवः। इत्यमरः। १। ६। ११ ॥ (यथा, नैषधे। ३। ११६।
"इतः स्तुतिः का खलु चन्द्रिकाया
यदब्धिमप्युत्तरलीकरोति ॥")
दुर्गा। यथा,—
"स्तुतिः सिद्धिरिति ख्याता श्रियाः संयमणाच्च सा।
लक्ष्मीर्वा ललना वापि क्रमात् सा कान्तिरुच्यते"
इति देवीपुराणे ४५ अध्यायः ॥
स्तुतिपाठकः, पुं, (स्तुतिं पठतीति। पठ + ण्वुल्।) राजादेर्यात्रादौ वीर्य्यस्तुतिकर्त्ता। तत्पर्य्यायः। वन्दी २। इत्यमरः। २। ८। ८७ ॥ लग्नः ३ स्तुतिव्रतः ४ सूतः ५ मागधः ६ मधुकः ७। इति जटाधरः ॥ प्रातर्गेयः ८। इति त्रिकाण्डशेषः ॥
स्तुतिव्रतः, पुं, (स्तुतिरेव व्रतं यस्य।) स्तुतिपाठकः। इति जटाधरः ॥
स्तुत्यः, त्रि, स्तवनीयः। स्तुधातोः क्यप्प्रत्ययेन निष्पन्नः। इति सुबोधव्याकरणम् ॥ (यथा, रघुः। ४। ६।
"परिकल्पितसाविध्या काले काले च वन्दिषु।
स्तुत्यं स्तुतिभिरर्थाभिरुपतस्थे सरस्वती ॥")
स्तुनकः, पुं, छागः। इति शब्दचन्द्रिका ॥

स्तुभ्, ग न ड रोधने । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (क्रया०-स्रा०-च०-पर०-सक०-सेट् । क्रावेट्।) दन्त्यादिः । पञ्चमस्वरी । ग, स्तुभ्नाति । न, स्तुभ्नोति । ड, स्तुम्भित्वा स्तुब्धा । रोधनमावरणम् । इति दुर्गादासः ॥

स्तुभः, पुं, क्लागः । इत्यमरटीकायां भरतः २ । ८ । ७६ ॥ (अग्निविशेषः । यथा, महाभारते । २ । २२० । १४ ।

"चातुर्मास्ये तु नित्यानां हविषां योनिरग्रहः। चतुर्भिः सहितः पुत्रैर्भानोरेवान्वयः स्तुभः ॥")

स्तुवेय्यः, पुं, (स्तूयते इति । स्तु + "स्तुवः केय्यञ्छन्दसि ।" उणा० ३ । ८८ । इति केय्यः । किच्चादगुणाभावे सत्युवङादेशः ।) इन्द्रः । इत्युणादिकोषः ॥

स्तुपेय्यः, त्रि, श्रेष्ठः । उत्तमः । वैदिकशब्दोऽयम् । ष्टुधातोरौणादिकसेय्यप्रत्ययेन निष्पन्नम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

स्तूप, क उच्छ्राये । इति कविकल्पद्रुमः ॥ (चुरा० पर०-सक०-सेट् ।) षष्ठस्वरी । उच्छ्रायो राशीकरणम् । स्तूपयति धान्यं कृषकः । तुष्टूपयिषति । इति दुर्गादासः ॥

स्तूप, य इर उच्छ्राये । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) षष्ठस्वरी । य, स्तूप्यति । इर्, अस्तूपत् अस्तूपीत् । अस्मात् पुवादित्वान्नित्यं ङ इत्यन्ये । अतुस्तूपत् । इति दुर्गादासः ॥

स्तूपः, पुं, (स्तूयते इति । स्तु + "सुवो दीर्घश्च" उषा० ३ । २५ । इति पः दीर्घश्च ।) मृदादिकूटः । राशीकृतवृत्तिकादिः । इति पुंलिङ्गसंग्रहे अमरः । ३ । ५ । १८ ॥ संघातः । निष्पर्योजनम् । बलम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

स्तृ, न प्रीतिरक्षाप्रापणे । इति कविकल्पद्रुमः ॥ (स्रा०- पर० सक०-अक०-च-अनिट् ।) न, स्तृणोति । इति दुर्गादासः ॥

स्तृ, न ञ स्तृतौ । इति कविकल्पद्रुमः ॥ (स्रा० उभ०-सक०-अनिट् ।) न ञ, स्तृणोति स्तृणुते स्तृतिराच्छादनम् । इति दुर्गादासः ॥

स्तृच, गत्याम् । इति कविकल्पद्रुमः ॥ (स्वा०-पर०-सक०-सेट ।) सप्तमस्वरयुक्ततमध्यः । स्तृचति । तरीस्तृचते । इति दुर्गादासः ॥

स्तृह, ऊ य वधे । इति कविकल्पद्रुमः ॥ (तुदा० पर०-सक०-वेट् ।) ऊ, अस्तर्हीत् अस्तृचत् । य, स्तृहति । तिस्तर्हयिषति । इति दुर्गादासः ॥

स्तृ ञ गि क्षादने । इति कविकल्पद्रुमः ॥ (क्रया० उभ०-सक०-अनिट्।) ञ गि, स्तृणाति स्तृणीते स्तौर्यं स्तोर्णिः । इति दुर्गादासः ॥

स्तृह, ऊ य वधे । इति कविकल्पद्रुमः ॥ (तुदा० पर०-सक०-वेट् ।) ऊ, अस्तृहीत् अस्तृचत् । य, स्तृहति स्तृहन्ती । तिस्तृहयिषति । इति दुर्गादासः ॥

स्तेन, त् क चौर्य्ये । इति कविकल्पद्रुमः ॥(अदन्त चुरा०-पर०-सक०-सेट् ।) अतिस्तेनत् धनं चौरः । इति दुर्गादासः ॥

स्तेनं, क्ली, (स्तेनत् क चौर्य्ये + भावे अच् ।) स्तेयम् । इत्यमरटीकायां भरतः ।२।१०।२४॥

स्तेनः, पुं, (स्तेनयतीति । स्तेन + पचाद्यच् ।) चौरः । इत्यमरः । २ । १० । २४ ॥ तस्य दण्डनिर्णयो यथा,—

"स्तेनस्यातः प्रवक्ष्यामि विधिं दण्डविनिर्णये । परमं यत्नमातिष्ठेत् स्तेनानां निग्रहे नृपः । स्तेनानां निग्रहादस्य यशो राष्ट्रञ्च वर्द्धते ॥ अब्रादे भ्रूणहा मार्ष्टि पत्नी भार्य्यापचारिणी। गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम् ॥

यस्तु तान्युपकल्पानि द्रव्याणि स्तेनयेन्नरः । तमाद्यं दण्डयेद्राजा यश्चाग्निं चौरयेदगृहात्॥ येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते । तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥"

इति मानवे ८ अध्यायः ॥

तद्वैदिकपर्य्यायः । लुपः १ तक्का २ रिभ्वा ३ रिपुः ४ रिक्का ५ रिङ्खायाः ६ तायुः ७ तस्करः ८ वनर्गुः ९ हरश्चित् १० सुषीवान्११ मलिम्लुचः १२ अघग्रंसः १३ हकः १४ । इति चतुर्दशैव स्तेननामानि । इति वेदनिघण्टौ । १ । २४ ॥ * ॥

देवायानिवेद्यान्नादिभोक्ता । यथा, श्रीभगवद्गीतायाम् । ३ । १२ ।

"इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः। तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः॥"

स्तेप, क क्षेपे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) एकादशस्वरी । क, स्तेपयति । तिस्तेपयिषति । इति दुर्गादासः ॥

स्तेमः, पुं, (स्तिम आर्द्रे + घञ् ।) आर्द्रीभावः । इत्यमरः । ३ । २ । २९ ॥

स्तेयं, क्ली, (स्तेनस्य भावः कर्म्म वा । स्तेन + "स्तेनाद्यन्नलोपश्च ।" ५ । १ । १२५ । इति यत् । नलोपश्च) चौर्य्यम् । तत्तु चौरस्य भावः तस्य कर्म्म च इत्यमरभरतौ ।२ । १० । २५ ॥ तस्य लक्षणं यथा, प्रायश्चित्तविवेके ।

"प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिवा यत् परद्रव्यहरणं स्तेयं तत् परिकीर्त्तितम् ॥"

तत्कारणे नरकं प्रतिप्रसवश्च यथा,—

व्यासोवाच ।

"न हिंस्यात् सर्व्वभूतानि नानृतञ्च वदेत् क्वचित् नाहितं नाप्रियं वाक्यं न स्तेनः स्यात् कदाचन । तृणं वा यदि वा शाकं मृदं वा जलमेव वा । परस्यापहरन् जन्तुर्नरकं प्रतिपद्यते ॥ न राज्ञां प्रतिगृह्णीयान्न शूद्रपतितादपि। न चान्यस्मादगृह्यञ्च निन्दितान् वर्जयेद्बुधः ॥ नित्यं याचनको न स्यान्न पुनर्दत्त प्रयाचयेत् ॥ न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते । देवस्वञ्चापि यत्नेन सदा परिहरेत्ततः ॥ पुष्पे शाकोदके काष्ठे तथा मूले फले तृणे । अदत्तादानमस्तेयं मनुराह प्रजापतिः ॥ गृहीतव्यानि पुष्पाणि देवार्च्चनविधौ द्विजैः । नैकस्मादेव नियतमननुज्ञाय केवलम् ॥ तृणं काष्ठं फलं पुष्पं प्रकाशं वै हरेद्बुधः । धर्म्मार्थं केवलं ग्राह्यमन्यथा पतितो भवेत् ॥ तिलमुद्गयवादीनां मुष्टिर्ग्राह्या पथि स्थितैः । क्षुधार्त्तैर्नान्यथा विप्र विधिविद्भिरितिस्थितिः ॥"

इति कौर्म्मे उपविभागे । १६ । १—१० ॥

स्तेयप्रायश्चित्तं यथा,—

"एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवम् । स्तेयदोषापहर्त्तॄणां व्रतानां द्यूतजां विधिः ॥ धान्यान्यधनचौर्य्याणि कृत्वा कामाद् द्विजोत्तमः ।

स्वजातीयगृहादेव कृच्छ्रार्द्धेन विशुध्यति ॥ मनुष्याणान्तु हरणे स्त्रीणां क्षेत्रगृहस्य च । कूपवापीजलानाञ्च शुद्धिश्चान्द्रायणं स्मृतम् ॥ द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मनः । चरेत् सान्तपनं कृच्छ्रं तत्सापरिग्रहे ॥ भक्षभोज्यापहरणे यानशय्यासनस्य तु । पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम् ॥ तृणकाष्ठद्रुमाणान्तु पक्वान्नस्य गुड़स्य तु । तैलचर्म्मामिषाणान्तु त्रिरात्रं स्यादभोजनम् ॥ मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य तु । अयस्कांस्योपलानाञ्च द्वादशाहं कणाभुक् ॥ कार्पासकीटकोर्णानां द्विशफैकशफस्य च । पक्षिगन्धौषधानाञ्च रज्ज्वाश्चैव त्रिरात्रं पयः ॥ एतैर्व्रतैर्व्यपोहेत पापं स्तेयकृतं बुधः ॥"

इति मात्स्ये २०१ अध्यायः ॥ * ॥

स्तेयस्य दण्डविधिर्दण्डशब्दे द्रष्टव्यः । सुवर्णस्तेयप्रायश्चित्तं प्रायश्चित्तशब्दे द्रष्टव्यम् ॥

स्तेयी, [न्] पुं, (स्तेयमस्यास्तीति । इनिः । चौरः । यथा । सुमन्तुः । सुवर्णस्तेयी मासं सावित्र्यष्टसहस्रं आज्याहुतीर्जुहुयात् त्रिरात्रमुपवसेत् तप्तकृच्छ्रेण वा पूतो भवति । इति प्रायश्चित्तविवेकः॥ स्वर्णकारः । इति केचित् ॥

स्तैनं, क्ली, (स्तैनस्य चौरस्य भावः कर्म्म वा) स्तेन + अण् ।) चौर्य्यम् । इत्यमरटीकायां भरतः । २ । १० । २५ ॥

स्तैन्यं, क्ली, (स्तेनस्य भावः कर्म्म वा । स्तेन + ष्यञ् ।) चौर्य्यम् । इत्यमरभरतौ ।२।१०।२५॥ (यथा, महाभारते । ३ । २७२ । ७ ।

"इमां हि पत्नीमस्माकं धर्म्मज्ञां धर्म्मचारिणीम् संस्पृशेदोदृशो भावः शुचिं स्तैन्यमिवानृतम्॥")

स्तैन्यः, पुं, (स्तेन एव । स्वार्थे ष्यञ् ।) चौरः । इति शब्दरत्नावली ॥

स्तैमित्यं, क्ली, (स्तिमितस्य भावः । स्तिमत + ष्यञ् ।) जड़ता । इति राजनिर्घण्टः ॥ (आर्द्रत्वम । यथा, "स्तैमित्यं स्तिमितो वेगः ।" इति वैद्यमाधवकरसंग्रहीतरुग्विनिश्चयस्य ज्वराधिकारे ॥ "स्तैमित्यमङ्गस्यार्द्रपटावगुण्ठितत्वमिव ॥" इत्यस्य व्याख्याने विजयरक्षितः ॥)

स्तोकः, पुं, (स्तुच्यते इति । स्तुच प्रसादे + घञ् ।) चातकः । इति मेदिनी ॥ बिन्दुः । कणा । इति केचित् ॥ (यथा, मार्कण्डेये । ४९ । ५९ ।
"हृष्टावरुद्धैरभवत् स्रोतः खातानि निम्नगाः ।
ये पुरस्तादपां स्तोका आपन्नाः पृथिवीतले ॥")
तथा च भागवते । ८ । ६ । ४८ ।
"एवं गृहेष्वभिरतो विषयान् विविधैः सुखैः ।
सेवमानो न चातुष्पाद्याज्यस्तोकैरिवानलः ॥")
स्तोकः, त्रि, (स्तुच् + घञ् ।) अल्पः । इत्यमरः । ३ । १ । ६१ ॥ (यथा, महाभारते । १ । १ । २१८ ।
"सङ्गयैर्वर्गते प्राणांस्त्यक्तुमिच्छामि मारिष ।
स्तोकं ह्यपि न पश्यामि फलं जीवितधारणे ॥")
स्तोककः, पुं, (स्तोक एव । स्वार्थे कन् ।) चातकपक्षी । इत्यमरः ॥ (यथा, मनुः । १२ । ६७ ।
"रक्षांसि हत्वा वांसांसि जायते जीवजीवकः ।
हत्वा मृगेभं व्याघ्रोऽश्वं फलमूलन्तु मर्कटः ।
स्तोकैस्तुस्तोमको वारि यानान्युष्ट्रः पशूनजः ॥")
स्तोता, [ऋ] त्रि, (स्तौतीति । स्तु + ग्वुल् ।) स्तवकर्त्ता । ष्टुधातोस्तृण्प्रत्ययेन निष्पन्नः ॥ (यथा, ऋग्वेदे । ८ । ४४ । १८ ।
"स्तोता स्यां तव शर्म्मणि ॥")
तद्वैदिकपर्य्यायः । रेभः १ जरिता २ कारुः ३ नदः ४ स्तामुः ५ कौरिः ६ गौः ७ सूरिः ८ नादः ९ छन्दः १० स्तुप् ११ रुद्रः १२ छपण्युः १३ । इति त्रयोदश स्तोतृनामानि । इति वेदनिघण्टौ । ३ । १६ ॥ (विष्णुः । इति महाभारतम् । १३ । १४९ । ८६ ॥)
स्तोत्रं, क्ली, (स्तूयतेऽनेनेति । स्तु + "दाम्नीशसयुयुजेति ।" ३ । २ । १८२ । इति ष्ट्रन् ।) स्तवः । इत्यमरः । १ । ६ । ११ ॥ तच्चतुर्व्विधं यथा, मात्स्ये १२१ अध्याये ।
"अत्र वो वर्णयिष्यामि विधिं मन्वन्तरस्य तु ।
ऋचो यजूंषि सामानि तथावत् प्रति दैवतम् ।
विधिस्तोत्रं तथा स्तोत्रं पूर्व्ववत् संप्रवर्त्तते ॥
द्रव्यस्तोत्रं कर्म्मस्तोत्रं विधिस्तोत्रं तथैव च ।
तथैवाभिजनस्तोत्रं स्तोत्रमेतच्चतुष्टयम् ॥
मन्वन्तरेषु सर्व्वेषु यथा भेदाश्चरन्ति ये ।
प्रवर्त्तयन्ति तेषां वै ब्रह्मस्तोत्रं पुनः पुनः ॥"
स्तोभः, पुं, (स्तुभ + घञ् ।) सामावयवविशेषः स तु गौतालापपूरणाक्षरः । स च त्रयोदशविधो यथा । अयं वावलोको ह्याउकारो १ वायुर्हाइकार२श्चन्द्रमाअथकारः ३ । आत्मेहकारो ४ ऽग्निरीकारः ५ आदित्य ऊकारः ६ । निहव एकारो ७ विश्वे देवा औहोइकारः ८ प्रजापतिर्हिंकारः ९ । प्राणः स्वरो १० ऽन्नं या ११ वाग्विराड्निरुक्त १२ स्त्रयोदशः स्तोभः सञ्चरो हुंकारः १३ । दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवं साम्नामुपनिषदं वेदोपनिषदं वेद । इति छान्दोग्योपनिषद्ब्राह्मणे प्रथमप्रपाठकः समाप्तः ॥ * ॥
अस्य भाष्यम् । भक्तिविषयोपासनं सामावयवसम्बन्धमित्यतः सामावयवान्तरस्तोभाक्षरविषयाण्युपासनान्तराणि संहतान्युपदिश्यन्ते । अनन्तरं सामावयवसम्बन्धत्वाविशेषादयंवावायमेव लोको ह्याउकारः स्तोभो रथन्तरे साग्नि प्रमिह इयं वै रथन्तरमित्यस्मात् सम्बन्धसामान्याद्ह्याउकारः स्तोभोऽयं लोक इत्येवमुपासीत ।१।
वायुर्हाईकारो वामदेव्ये सामनि हाइकारः प्रमिहो वायुसम्बन्धश्च वामदेव्यस्य साम्नो योनिरित्यस्मात् सामान्याद्ह्याइकारं वायुदृष्ट्योपासीत ।२।
चन्द्रमा अथकारः चन्द्रदृष्ट्या अथकारमुपासीत अत्रै होदं स्थितमन्नात्मा चन्द्रः थकाराकारसामान्याच्च । ३ ।
आत्मा इह कार इहेति स्तोभः प्रत्यक्षो ह्यात्मा इहेति व्यपदिश्यते इहेति च स्तोभः । ४ ।
तत्सामान्यादग्निरीकार इति । इ निधानानि चाग्नेयानि सर्व्वाणि सामानीत्यतः ।५।
तत्सामान्यादादित्य ऊकारः । उच्चैरूर्द्धं सन्तं आदित्यं गायत्युकारश्चायं स्तोभआदित्य दैवत्ये साग्नि स्तोभ इत्यादित्य ऊकारः । ६ ।
निहव इत्याह्वानमेकारस्तोभः एहोति चाह्वयन्तीति । ७ ।
तत्सामान्यादिश्वे देवा औहोइकारो वैश्वदेव्ये साग्नि स्तोभस्य दर्शनात् ।८।
प्रजापतिर्हिंकार अनिरुक्ताद्विकारस्य चाव्यक्तत्वात् । ९ ।
प्राणः स्वरः स्वर इति स्तोभः प्राणस्य च स्वरहेतुत्वसामान्यात् । १० ।
अन्नं या या इति स्तोभोऽन्न अन्नेन होदं यातीत्यतः । ११ ।
तत्सामान्यात् वागिति स्तोभो विराड्नं देवताविशेषो वा वैराजे साग्नि स्तोभदर्शनात् अनिरुक्तोऽव्यक्तत्वात् इदमेवेदमेवेति निर्व्वक्तुं न शक्यत इत्यतः ।१२ ।
सञ्चरो विकल्पमानस्वरूप इत्यर्थः कोऽसावित्याह हुंकारोऽव्यक्तो ह्ययतोऽनिरुक्तविशेष एवोपास्य इत्यभिप्रायः ॥१३॥
स्तोभाक्षरोपासनाफलमाह । दुग्धेऽस्मै वाग् दोहमित्याद्युक्तार्थं य एतामेवं यथोक्तलक्षणं साम्नां सामावयवस्तोभाक्षरविषयामुपनिषदं दर्शनं वेद तस्यैतत् यथोक्तं फलमित्यर्थः । हिरण्यशोऽध्यायपरिसमाप्त्यर्थः सामावयवविषयोपासनाग्रेषः परिसमाप्त्यर्थो वेति ॥ * ॥ इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्य्यस्य श्रीमच्छङ्करभगवत्पादस्य कृतौ छान्दोग्योपनिषद्विवरणे प्रथमः प्रपाठकः समाप्तः ॥ * ॥ * ॥ हैलनम् । स्तम्भनम् । इति हैमचन्द्रः ॥ अपि च ।
साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥"
इति श्रीभागवते । ६ । २ । १४ ॥
"साङ्केत्यं पुत्रादौ साङ्केतिकम् । पारिहास्यं परिहासेन कृतम् । स्तोभं गीतालापपूरणार्थं कृतम् । हेलनं किं विष्णुनेति सावज्ञमपि च वैकुण्ठनामोच्चारणम् ।" इति तट्टीकायां श्रीधरस्वामी ॥
स्तोम, त् क श्लाघने । इति कविकल्पद्रुमः ॥ अदन्त चुरा०-परo-सकo-सेट् ।) अतुस्तोमत् । इति दुर्गादासः ॥
स्तोभं, क्ली, (स्तूयते इति । स्तु + "अर्त्तिस्तुसुहुसीति ।" उणा० १ । १३८ । इति मन् ।) मस्तकम् । धनम् । अश्वम् । लोहाग्रदण्डः । वक्त्रे, त्रि । इति केचित् ॥
स्तोमः, पुं, (स्तु + मन् ।) समूहः । इत्यमरः । २ । ५ । ३९ ॥ (यथा, उत्तररामचरिते । १ अङ्के
"ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः ॥")
यज्ञः इति हैमचन्द्रः ॥ स्तवः । इति चामरः । ३ । ३ । २४१ ॥
स्तोपिकं, क्ली, बुद्धद्रव्यविशेषः । इति त्रिकाण्डशेषः ॥ ओघा इति हिन्दी भाषा ॥
स्त्यानं, क्ली, (स्त्यै + क्तः ।) स्निग्धम् । प्रतिध्वानम् । घनत्वम् । (यथा, उत्तररामचरिते । २ अङ्के ।
"दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्त्यानमभ्यूहतानि ॥")
आलस्यम् । इति विश्वमेदिन्यौ ॥
स्त्यानः, त्रि, संहतिकर्त्ता । ध्वनिकर्त्ता । इति स्त्यैधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥
स्त्योनः, पुं, (स्त्यायतीति । स्त्यै + "श्याखाभ्रस्त्रिभ्यइनच् ।" उणा० २ । ४६ । इति इनच् ।) चौरः । अमृतम् । इत्युणादिकोषः ॥
स्त्यै संहतौ । ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वा परo-अकo-अनिट् ।) दन्त्यादिरन्तः स्वाद्युत्तमध्यः । स्त्यायति तिस्त्यासति । इति दुर्गादासः ॥
स्त्री, स्त्री, (स्त्यायति गर्भो यस्यामिति । स्त्यै + "स्त्यायतेः ष्ट्रट् ।" उणा० ४ । १६५ । ष्ट्रट् । ङित्त्वात् टिलोपः । टित्त्वात् ङीप् ।) स्तनयोन्यादिमती तत्पर्य्यायः । योषित् २ अबला ३ योषा ४ नारी ५ सीमन्तिनी ६ वधूः ७ प्रतीपदर्शिनी ८ वामा ९ वनिता १० महिला ११ इत्यमरः । २ । ६ । २ ॥ प्रिया १२ रामा १३ जनिः १४ जनी १५ योषिता १६ जोषित् १७ जोषा १८ जोविता १९ वनिका २० महेलिका २१ महेला २२ । इति शब्दरत्नावली ॥ गर्व्वरी २३ सिन्दूरतिलका २४ सुभ्रूः २५ । इति जटाधरः ॥ सुनयना २६ वामदृक् २७ अङ्गना २८ ललना २९ कान्ता ३० पुरन्ध्री ३१ वरवर्णिनी ३२ सुतनुः ३३ तन्वी ३४ तनुः ३५ कामिनी ३६ तन्वङ्गी ३७ रमणी ३८ कुरङ्गनयना ३९ भीरुः ४० भाषिणी ४१ विलासिनी ४२ नितम्बिनी ४३ मत्तकाशिनी ४४ सुनेत्रा ४५ प्रमदा

४१ सुन्दरी ४७ चकितभ्रू: ४८ ललिता ४९ हासिता ५० भामिनी ५१ वरारोहा ५२ मताङ्गी ५३ विनता ५४ वरा ५५ श्यामा ५६ चारुवर्णा ५७। इति राजनिर्घण्टः ॥ * ॥

सा चतुर्विधा। पद्मिनी१ चित्रिणी२ शङ्खिनी ३ हस्तिनी ४। तासां लक्षणानि यथा,—

"भवति कमललेखा नासिकाक्षुद्ररन्ध्रा
अतिरलकुचयुग्मा दीर्घकेशी कृशाङ्गी।
मृदुवचनसुशीला नृत्यगीतानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा ॥ १ ॥
भवति रतिरसज्ञा नातिदीर्घा न खर्व्वा
तिलकुसुमसुनासा स्निग्धदेहोत्पलाक्षी।
कठिनघनकुचाढ्या सुन्दरी सा सुशीला
सकलगुणविचित्रा चित्रिणी चित्रवक्त्रा ॥२॥
दीर्घा सुदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता।
रेखात्रदेश च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा ॥३॥
स्थूलाधरा स्थूलनितम्बभागा
स्थूलाङ्गुली स्थूलकुचा सुशीला।
कामोत्सुका गाढ़रतिप्रिया च
नितम्बखर्व्वा खलु हस्तिनी सा ॥ ४ ॥

पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी। शङ्खिनी चारगन्धा च मदगन्धा च हस्तिनी ॥ शशके पद्मिनी तुष्टा मृगे तुष्टा च चित्रिणी। वृषभे शङ्खिनी तुष्टा हये तुष्टा च हस्तिनी ॥ पद्मिनी शशयोर्योनिर्मृदुको चतुरङ्गुली। चित्रिणीमृगयोर्योनिर्मृदुको च तथाविधौ ॥ शङ्खिनीवृषयोरष्टाङ्गुली तावेव सम्मतौ। हस्तिनीवाजिनोरेव तावेव द्वादशाङ्गुली॥"

तस्या अवस्था यथा,—

"आ षोड़शात् भवेद्बाला तरुणी त्रिंशता मता।
पञ्चपञ्चाशतं यावत् प्रौढ़ा वृद्धा ततः परम्॥"

इति रसमञ्जरी ॥ * ॥

"बाला तु प्राणदा प्रोक्ता युवती प्राणधारिणी
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥
निदाघशरदोर्व्बाला प्रौढ़ा वर्षावसन्तयोः।
हेमन्ते शिशिरे योग्या न वृद्धा क्वापि शस्यते ॥
नार्त्तवे षोड़शाद्वर्षात् सप्तत्याः परतो न च।
आयुःकामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
त्रिभिस्त्रिभिरहोभिश्च सेवेत प्रमदां नरः।
सर्व्वेष्वृतुषु यौवेषु पक्षान्मासाद्वजेद्धः ॥
पञ्चपञ्चाशतो नारी सप्तसप्ततितः पुमान्।
द्वावेतौ न प्रसूयेते प्रसूयेते विपर्य्ययात् ॥"

इति राजवल्लभे रात्रिकृत्यम् ॥*॥

स्त्रियाः शुभाशुभलक्षणानि यथा,—

श्रीहरिरुवाच।

"यस्यास्तु कुञ्चिताः केशा मुखञ्च परिमण्डलम्
नाभिश्च दक्षिणावर्त्ता सा कन्या कुलवर्द्धिनी ॥
या च काञ्चनवर्णाभा रक्तहस्तांघ्रिरुद्वहा।
सहस्राणान्तु नारीणां भवेत् सापि पतिव्रता ॥
वक्रकेशा च या कन्या मण्डलाक्षी च या भवेत्
भर्त्ता च म्रियते तस्या नियतं दुःखभागिनी ॥
पूर्णचन्द्रमुखी कन्या बालसूर्य्यसमप्रभा।
विशालनेत्रा बिम्बोष्ठी सा कन्या लभते सुखम्॥
रेखाभिर्व्वहुभिः क्लेशं स्वल्पाभिर्धनहीनताम्।
रक्ताभिः सुखमाप्नोति कृष्णाभिः प्रेष्यतां व्रजेत्॥
कार्य्येऽपि मन्त्री पत्नी स्यात् सखी स्यात्
करणेषु च।
स्त्रेहेषु भार्य्या माता स्यात् वेश्या च शयने
शुभा ॥
अङ्कुशं कुञ्जलं चक्रं यस्याः पाणितले भवेत्।"

पुस्तकान्तरे चक्रं स्थाने छत्रमिति च पाठः।

"पुत्रं प्रसूयते नारी नरेन्द्रं लभते पतिम् ॥
यस्यास्तु रोमशौ पार्श्वौ रोमशौ च पयोधरौ।
उन्नतौ चाधरौष्ठौ च क्षिप्रं मारयते पतिम् ॥
यस्याः पाणितले रेखा प्राकारं तोरणं भवेत्।
अपि दासकुले जाता राज्ञीत्वमुपगच्छति ॥
उद्वृत्तकपिला यस्या रोमराजी निरन्तरम्।
अपि राजकुले जाता दासीत्वमुपजायते ॥
यस्या अनामिकाङ्गुष्ठौ पृथिव्यां नैव तिष्ठतः।
पतिं मारयते क्षिप्रं स्वातन्त्र्येणैव वर्त्तते ॥
यस्या गमनमात्रेण भूमिकम्पः प्रजायते।
पतिं मारयते क्षिप्रं स्वेच्छाचारेण वर्त्तते ॥
चक्षुःस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम्।
त्वचः स्नेहेन शय्याञ्च पादस्नेहेन वाहनम् ॥
स्निग्धोन्नतौ ताम्रनखौ नार्य्याश्च चरणौ शुभौ।
मत्स्याङ्कुशाब्जचिह्नौ च चक्रलाञ्छललक्षितौ ॥
अस्वेदिनौ मृदुतलौ प्रशस्तौ चरणौ स्त्रियाः।
शुभे जङ्घे विरोमे च ऊरू हस्तिकरोपमौ ॥
अश्वत्थपत्रसदृशं विपुलं गुह्यमुत्तमम्।
नाभिः प्रशस्ता गम्भीरा दक्षिणावर्त्तिका शुभा
अरोमा त्रिवली नार्य्या हृत्स्तनौ रोमवर्जितौ॥

इति गारुड़े नरस्त्रीलक्षणम् ६४ अध्यायः॥

तस्याश्चरित्रं यथा,—

"विषकुम्भाकाररूपामृतास्याश्च सन्ततम्।
हृदये क्षुरधाराभां शस्त्रमधुरभाषिणीम् ॥
स्वकार्य्यपरिनिष्पन्नतत्परां सततं सदा।
स्वान्तर्मलिनरूपाञ्च प्रसन्नवदनेक्षणाम्॥
श्रुतौ पुराणे यासाञ्च चरित्रमनिरूपितम्।
तासु को विश्वसेत् प्राज्ञः अप्राज्ञाश्च दुराशयाम्॥
तासां को वा रिपुर्मित्रं प्रार्थयन्ती नवं नवम्"
दृष्ट्वा सुवेशं पुरुषमिच्छन्ती हृदये सदा ॥
बाह्ये स्वात्मसतीत्वञ्च पापयन्ती प्रयत्नतः।
शस्त्रत्कामाच्च वामाच्च कामाधारां मनोहराम्॥
बाह्ये भावं क्षादयन्तीं स्वान्तर्म्मैथुनमानसाम्।
कान्तं प्रसन्तीं रहसि बाह्येऽतीव सुलज्जिताम्॥
मानिनीं मैथुनाभावे कोपनां कलहाङ्कुराम्।
सुप्रीतां भूरिसंयोगात् स्वल्पमैथुनदुःखिताम् ॥
सुमिष्टान्नात् प्रीततोयादाकाङ्क्षन्तीञ्च मानसः।
सुन्दरं रसिकं कान्तं युवानं गुणिनं सदा ॥
सुतात् परमपि स्नेहं कुर्व्वतीं रतिकर्त्तरि।
प्राणाधिकं प्रियतमं सम्भोगकुशलं प्रियम्।
पश्यन्तीं रिपुतुल्यञ्च दृष्ट्वा वा मैथुनात्तमम्।
कलहं कुर्व्वतीं शश्वत् तेन सार्द्धं सकोपनाम् ॥
चर्व्वया भक्षयन्तीं तं कीनाश इव गोजरम्।
दुःसाहसस्वरूपाञ्च सर्व्वदोषाश्रयां सदा ॥
शश्वत् कपटरूपाञ्च दुःसाध्यमप्रतीतकाम्।
ब्रह्मविष्णुशिवादीनां दुर्ज्ञेयाज्ञां मोहकारिणीम् ॥
तपोमार्गार्गलां शश्वत् मुक्तिमार्गकपाटिकाम्।
हरेर्भक्तिव्यवहितां सर्व्वमायाकरण्डिकाम् ॥
संसारकारागारे च शश्वन्निगड़रूपिणीम्।
इन्द्रजालस्वरूपाञ्च मिथ्यातत्त्वप्ररूपिणीम् ॥
बिभ्रतीं बाह्यसौन्दर्य्यमधोऽङ्गमतिकुत्सितम्।
लालाविण्मूत्रपूयानामाधारं मलसंयुतम्।
दुर्गन्धिदोषसंयुक्तं रक्ताक्तकमसंस्कृतम् ॥
मायारूपां मायिनाञ्च विधिना निर्म्मितां पुरा
विषरूपां मुमुक्षूणामदृश्यामप्यवाञ्छिताम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १६ अध्यायः॥*॥

तस्या निन्दा यथा,—

"दुर्निवार्य्यस्य सर्व्वेषां स्त्रीस्वभावस्य चापलः।
दुर्ज्ञाज्ञं योगिभिः सिद्धैरस्माभिश्च तपस्विभिः॥
जितेन्द्रियैर्जितक्रोधैः स्त्रीरूपं मोहकारणम्।
सर्व्वमायाकरण्डञ्च कामवर्द्धनकारणम् ॥
ब्रह्मास्त्रं कामदेवस्य दुर्भेद्यं जयकारणम्।
सुनिर्म्मितञ्च विधिना सर्व्वाद्यं ब्रह्मपूर्व्वजम्॥
मोक्षद्वारकवाटञ्च हरिभक्तिविरोधनम्।
संसारबन्धनस्तम्भरज्जुरूपमकृन्तनम् ॥
वैराग्यनाशबीजञ्च शश्वद्रागविवर्द्धनम्।
पत्तनं साहसानाञ्च दोषाणामालयं सदा ॥
अप्रत्ययानां क्षेत्रञ्च स्वयं कपटमूर्त्तिमत्।
अहङ्काराश्रयं शश्वद्विपक्षुभ्रं सुधामुखम् ॥
सर्व्वैरसाध्यमानञ्च दुराराध्यञ्च सर्व्वदा।
स्वकार्य्यसाध्यं चाराध्यं कलहाङ्कुरकारणम् ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ६।५५—६१॥

स्त्रीसंसर्गयुक्तपुंदर्शननिषेधो यथा,—

"रहःस्थलनियुक्तञ्च न दृश्यः स्त्रीयुतः पुमान्।
स्त्रीसंसक्तञ्च पुरुषं य पश्यति नराधमः ॥
करोति रसभङ्गं वा कालसूत्रं व्रजेत् ध्रुवम्।
तत्र तिष्ठति पापीयान् यावच्चन्द्रदिवाकरौ ॥
विशेषतश्च पितरं गुरुं वा भूमिपं द्विज।
रहःसु रतिसंसक्तं न हि पश्येद्विचक्षणः ॥
कामतः कोपतो वापि यः पश्येत्सुरतोन्मुखम्।
स्त्रीविच्छेदो भवेत्तस्य ध्रुवं सप्तसु जन्मसु ॥
श्रोणीं वक्षःस्थलं वक्त्रं यः पश्यति परस्त्रियाः।
कामतो वापि मूढ़श्च षण्ढो भवति निश्चितम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे।४२।१०—१४॥

सा च त्रिधा रक्षितव्या यथा,—

"स्त्रीजातिरबला शश्वद्विषीदा स्वबन्धुभिः।
जनकस्वामिपुत्रैश्च गर्हितान्यैश्च निश्चितम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।४।१८॥*॥

अपि च।

"पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।
पुत्रश्च स्थाविरे रक्षेत् न स्त्री स्वातन्त्र्यमर्हति॥"

इति दायतत्त्वम् ॥*॥

अन्यच्च ।
"कौमारे रचिता तातो दत्त्वा पात्राय सत्कृतौ
सर्व्वदा रचिता कान्तस्तदभावे च तत्सुतः ॥
त्रिष्ववस्थासु नारीणां रचितारस्त्रयः सदा ।
याः स्वतन्त्राश्च ता नष्टाः सर्व्वधर्म्मबहिष्कृताः॥
असत्कुलप्रसूताश्चाः कुलटा दुष्टमानसाः ।
शतजन्मकृतं पुण्यं तासां नश्यति पद्मज ! ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।१७।८२-८४
अपरञ्च ।
"रक्षेत् कन्यां पिता बाल्ये यौवने पतिरेव ताम् ।
वार्द्धके रक्षते पुत्रो ह्यनाथां ज्ञातयस्तथा ॥
पतिं विना न तिष्ठेत दिवा वा यदि वा निशि॥"
इति गारुड़े । ८५ । ३१—३२ ॥*॥
सा सूर्य्यैरपि अदृश्या कर्त्तव्या । यथा,—
"परस्पृष्टा च या नारी या स्पृहां कुरुते परम् ।
सापि दुष्टा परित्याज्या चेत्याह कमलोद्भवः ॥
तस्माचारी परैर्यद्वाददृष्टा कृतिभिः कृता ।
असूर्य्यम्पश्या या रामाः शुद्धास्ताश्च पतिव्रताः ॥
स्वच्छन्दगामिनी या च स्वतन्त्राः शूकरीसमाः ।
अन्तर्दुष्टा सदा सैव निन्दितं परगामिनी ॥
स्वामिसाध्वी च या नारीकुलधर्म्मभिया स्थिता।
कान्तेन सार्द्धं सा कान्ता वैकुण्ठं याति
निश्चितम् ॥"
इतिब्रह्मवैवर्त्तेश्रीकृष्णजन्मखण्डे१८।११६-११९
तस्यामानावमानयोर्गुणदोषौ यथा,—
"पदे पदे शुभं तस्य यः स्त्रीमानञ्च रक्षति ।
अवमन्य स्त्रियं मूढो यो याति पुरुषाधमः ।
पदे पदे तदशुभं करोति पार्व्वती सती ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे३२अध्यायः ॥
उपयाचिकास्त्रीत्यागे दोषो यथा,—
मोहिन्युवाच ।
"इङ्गितेनैव नारीणां सद्यो मत्तो भवेत् पुमान्
करोत्याकृष्य सम्भोगं यः स एवोत्तमो विभो ॥
ज्ञात्वा स्फुटमभिप्रायं नार्य्या संप्रेरितो हि यः
पश्चात् करोति शृङ्गारं पुरुषः स च मध्यमः ॥
पुनः पुनः प्रेरितश्च स्त्रिया कामार्त्तया च यः ॥
तया न स्त्रिसो रहसि स क्लीवो न पुमानहो ॥
गृही तपस्वी कामी वा त्यजेत् स्त्रियमुपस्थिताम्
व्रजेत् परत्र नरकमपूज्यश्च भवेदिह ॥
भ्रष्टश्रीर्भ्रष्टरूपश्च भ्रष्टदर्पो भवेद्ध्रुवम् ।
स सद्यः क्लीवतां याति ब्रह्मन् शापेन योषितः॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।३३।३-७॥
परस्त्रीसङ्गदोषो यथा,—
"सदापकीर्त्तिर्व्वसति परस्त्रीषु च वस्तुषु ।
तस्मात्ते नैव गच्छन्ति सन्तः स्वक्लेशकारणे ॥
स्मर मामन्तरे बाह्ये मदीयं विषयं कुरु ।
अतस्तेन मनो लोलं भविता परवस्तुषु ॥
योषिद्रूपा च मे माया सर्व्वेषां मोहकारिणी ।
लोलया कुरुते मोहं ह्यात्मारामस्य सन्ततम् ॥
नृणां मूत्राग्रये देशे रागिणां सन्ततं रतिः ।
स्मृनाभिधे मांसपिण्डे ऽधरे लालालयेऽशुचौ ॥
स्तनौ वक्षः स्थलं तासां कामदेवालयं सदा ।
तस्मात्ता न हि पश्यन्ति सन्तो हि धर्म्मभीरवः॥
को धर्म्मः किं यशस्तेषां का प्रतिष्ठा च किन्तपः ।
किं बुद्धिर्विद्या ज्ञानञ्च परस्त्रीषु च यस्य नः ॥
इहाप्ययशो दुःखं नरकेषु परत्र च ।
वासः प्रहारस्तेषाञ्च ताड़नैः कृमिभक्षणैः ॥
दुःखबीजं सुखं मत्वा मूढाश्च देवदोषतः ।
परस्त्रीसेवणं प्रीत्या कुर्व्वन्ति सततं मुदा ॥
उत्तमा मत्पदाम्भोजं मत्कर्म्म मध्यमाः सदा ।
स्मरन्ति शश्वदधमाः परस्त्रीसेवनं मुदा ॥
विपत्तिः सन्ततं तस्य परवस्तुषु यस्य नः ।
विशेषतः परस्त्रीषु सुवर्णेषु च भूमिषु ॥
दैवात् परस्त्रियं दृष्ट्वा विरमेदयो हरिं स्मरन् ।
स्पृष्ट्वा परसुवर्णञ्च हस्तप्रक्षालनाच्छुचिः ॥
सन्ततं नातिसंसक्ताः सन्तः स्त्रीषु च कामतः ।
यस्मात्साधिष्ठानहानिलोकनिन्दाभयेन च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।३५।७८-८६॥
सभर्त्तृकायास्तु व्रतोपवासादिः पृथङ्निषिद्धो
मनुना यथा,—
"नास्ति स्त्रीणां पृथक् यज्ञो न व्रतं नाप्युपोषणम्
पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते ॥"
विष्णुनापि भर्त्तुः समानव्रतचारित्वमित्युक्तम् ।
समानव्रतचारित्वं भर्त्तुर्व्रताचरणे तदानुकूल्य-
कारित्वम् । यत्र तु सावित्रीव्रतादौ विशेषविधि
स्तत्र भर्त्रनुज्ञया पृथगपि । यथा शङ्खः ।
कामं भर्त्तुरनुज्ञया व्रतोपवासेनियमेज्यादी-
नामभ्यासः स्त्रीधर्म्म इति । यत्तु ।
"पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् ।
आयुः संहरते पत्युः सा नारी नरकं व्रजेत् ॥
इति विष्णुं तदनुज्ञातविषयम् । इत्येकादश्यो
तत्त्वम् ॥ * ॥ स्त्रीधर्म्मादि यथा,—
"या स्त्री भर्त्तुरसौभाग्या सा सौभाग्या च
सर्व्वतः ।
शयने भोजने तस्या न सुखं जीवनं तथा ॥
यस्या नास्ति प्रियप्रेम तस्या जन्म निरर्थकम् ।
तत् किं पुत्रे धने रूपे सम्पत्तौ यौवनेऽथवा ॥
यद्भक्तिर्नास्ति कान्ते च सर्व्वप्रियतमे परे ।
साशुचिर्धर्म्महीना च सर्व्वकर्म्मविवर्जिता ॥
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव च ।
सर्व्वस्माच्च गुरुः स्वामी न गुरुः स्वामिनः परः॥
पिता माता सुतो भ्राता क्लिष्टो दातुमिदं धनम्
सर्व्वस्वदाता स्वामी च मूढानां योषितां सुराः
काचिदेव हि जानाति महासाध्वी च
स्वामिनम् ।
अतिसद्वंशजाता च सुशीला कुलपालिका ॥
असद्वंशप्रसूता या दुःशीला धर्म्मवर्जिता ।
सुखदुष्टा योनिदुष्टा पतिं निन्दति कोपतः ॥
या स्त्री हरिं सर्व्वपरं पतिं विष्णुसमं गुरुम् ।
कुम्भीपाके पतति सा यावदिन्द्राश्चतुर्दश ॥
व्रतं चानशनं दानं सत्यं पुण्यं तपश्चिरम् ।
पतिभक्तिविहीनाया भस्मीभूतं निरर्थकम् ॥
अतः किञ्चित्र वक्ष्यामि निष्ठुरं पतिमीश्वरम् ।
भूत्वापराधैर्दैवेन प्राणांस्त्यक्ष्यामि निश्चितम् ॥
पतिदोषे महासाध्वी पतिं न निष्ठुरं वदेत् ।
यदि सोढुमशक्ता च प्राणां स्त्यजति धर्म्मतः ॥
पतिसेवा व्रतं स्त्रीणां पतिसेवा परं तपः ।,
पतिसेवा परो धर्म्मः पतिसेवा सुरार्च्चनम् ।
पतिसेवा परं सत्यं दानतीर्थान्यतीर्थकम् ॥
सर्व्वदेवमयः स्वामी सर्व्वदेवमयः शुचिः ।
सर्व्वपुण्यस्वरूपश्च पतिरूपी जनार्द्दनः ॥
या सती भर्त्तुरुच्छिष्टं भुङ्क्ते पादोदकं सदा ।
तस्या दर्शनमुपस्पर्शं नित्यं वाञ्छन्ति देवताः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।४७। ७-२०॥
अपिच ।
"भर्त्ता हि दैवतं स्त्रीणां भर्त्ता च गतिरुच्यते ।
जीवपत्याः स्त्रियो भर्त्ता दैवतं प्रभुरेव च ॥
या धर्म्मचारिणी नारी पतिव्रता परायणा ।
नानुवर्त्तति भर्त्तारं सा यद्विघ्नं प्रपद्यते ॥
पतिव्रता भर्त्तृपरा नारी भर्त्तृपरायणा ।'
इह कीर्त्तिं परां प्राप्य प्रेत्य स्वर्गे महीयते ॥
भर्त्तुश्चितानुगामिन्या देवाराधनशीलया ।
गार्हस्थधर्म्मरतया भर्त्ता सेव्यस्त्विह त्वयः ॥"
इति वह्निपुराणम् ॥*॥
गृहिणीधर्म्मा यथा,—
"गृहिणीनां सदाचारं शृणुतां यत् श्रुतौ श्रुतम्।
गृहिणी पतिभक्ता च देवब्राह्मणपूजिता ॥
सा शुद्धा प्रातरुत्थाय नमस्कृत्य पतिं सुरम् ।
प्राङ्गणे मण्डलं दद्यात् गोमयेन जलेन च ॥
गृहकृत्यञ्च कृत्वा च स्नात्वागत्य गृहं सती ।
सुरं विप्रं पतिं नत्वा पूजयेत् गृहदेवताम् ॥
गृहकृत्यं सुनिर्वृत्य भोजयित्वा पतिं सती ।
अतिथिं पूजयित्वा च स्वयं भुङ्क्ते सुखं सती॥"
इतिब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।८४।१३-१६॥
स्त्रीणां वैविध्यं यथा,—
"उत्तमा पतिभक्ता सा किञ्चिद्धर्म्मसमन्विता ।
प्राणान्तेऽपि न कुरुते तं जारमयशस्करम् ॥
पूजयेत् सा यथा कान्तं तथा देवद्विजातिथिम् ।
व्रतानि चोपवासांश्च कुरुते सर्व्वपूजनम् ॥
गुरुणा रचिता यत्नात् जारञ्च न भजेत् भयात्
सा कृत्तिया मध्यमा च यथाकिञ्चित्पतिं व्रजेत्
स्थानं नास्ति क्षणं नास्ति नास्ति प्रार्थयिता नरः
तेन ह्ये नन्द तासाञ्च सतीत्वमुपजायते ॥
अधमा परमा दुष्टात्यन्तासद्वंशजा तथा ॥
अधर्म्मशीला दुःशीला दुर्म्मुखा कलहप्रिया ॥
पतिं भर्त्सयते नित्यं जारञ्च सेवयेत् सदा ।
दुःखं ददाति कान्ताय विपत्तुल्यञ्च पश्यति ॥
जारहारमुपायेन हन्ति कान्तं मनोहरम् ॥"
जारहारं स्थाने आयहारमिति पाठः ।
"ददाति भर्त्रे नाहारं विषोक्तिं वक्ति सन्ततम् ।
धर्म्मिष्ठञ्च वरिष्ठञ्च गरिष्ठञ्च महीतले ॥
कामदेवसमञ्चापि जारं पश्यति कामतः ।
शुभदृष्ट्या कटाक्षेण शश्वत्पीयूषसी मुदा ॥
सुवेशं पुरुषं दृष्ट्वा युवानं रतिशूरकम् ।
योनिः क्लिद्यति नारीणां कामुकोनां निरन्तरम्
अधर्म्मं चिन्तयेत् शश्वत् जारञ्च परमं सुदा ॥

गुरुभिर्मन्त्रिता सा च रक्षिता च यतेन च ।
तथापि जारं कुरुते नापि साध्या नृपैरपि ॥
नास्ति तस्याः प्रियं किञ्चित् सर्व्वं कार्य्यवशेन च
गावस्तृणमिवारण्ये प्रार्थयन्ती नवं नवम् ॥
विद्युद्भासा जले रेखा तस्याः प्रीतिस्तथैव च ।
अधर्म्मयुक्ता सततं कपटं वक्ति निश्चितम् ॥
व्रते तपसि धर्म्मे च न मनो गृहकर्म्मणि ।
न गुरौ न च देवेषु जारे स्निग्धञ्च चञ्चलम् ॥
स्त्रीजातिनिर्विधानाञ्च कथा च कथिता मया॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।८४।२६-४०
स्त्रीसंसर्गे दोषो यथा,—
सनत्कुमार उवाच ।
"यदि भ्रातः किं करोषि कुशलं युवतीपते ।
स्त्रीपुंसोर्व्वर्द्धते प्रेम नित्यं तन्नित्यनूतनम् ॥
अर्गलं ज्ञानमार्गस्य भक्तिद्वारकपाटकम् ।
मोक्षमार्गव्यवहितं चिरं बन्धनकारणम् ॥
गर्भवासस्य बीजञ्च परं नरककारणम् ।
पीयूषबुद्ध्या गरलं भुङ्क्ते पापी नराधमः ॥"
इति च तत्रैव । १३० । ३१—३३ ॥*॥
स्त्रीणां स्वभावो यथा,—
"स्त्रीस्वभावं चरित्रञ्च आश्चर्य्यं पापकारकम् ॥
चण नास्ति रहो नास्ति नास्ति क्रत्वे विभावना
तेन नारद नारीणां सतीत्वमुपजायते ॥
एकवासा तथा गौरी श्यामा वा वरवर्णिनी ।
मध्यगण्डा प्रगल्भा च वयोऽतीतास्तथा स्त्रियः
सुरूपं पुरुषं दृष्ट्वा चरन्ति मुनिसत्तम ।
स्वभाव एष नारीणां शाश्वस्य शृणु कारणम् ॥"
इति वाराहे सूर्य्यप्रतिष्ठाननामाध्यायः ॥*॥
अपि च ।
"विद्याघातो ह्यनभ्यासः स्त्रीणां घातः कुचेलता
व्याधीनां भोजनं जीर्णं श्रद्धोर्घातः प्रगल्भता
तस्करस्य वधो दण्डः कुमित्रस्याल्पभाषणम् ।
पृथक् शय्या तु नारीणां ब्राह्मणस्यानिमन्त्रिता
दुर्जनाः गिल्पिनो दासा दुष्टाश्च पटहाः
स्त्रियः ।
ताड़िता मार्दवं यान्ति न ते सत्कारभाजनाः ॥
जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे ।
मित्रञ्चापदि काले च भार्य्याञ्च विभवक्षये ॥
स्त्रीणा द्विगुणमाहारः प्रज्ञा चैव चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामाश्चाष्टगुणाः स्मृताः॥
न स्वप्नेन जयेन्निद्रां न कामेन स्त्रियं जयेत् ।
न चेन्धनैर्ज्जयेदग्निं न मद्येन तृषां जयेत् ।
समांसभोजनैः स्निग्धैर्मद्यैः सीधुसरासवैः ।
यस्मान्मनोहरैर्भाव्यैः कामः स्त्रीषु विजृम्भते ॥
ब्रह्मचार्य्येव वक्तव्यः प्राप्तं मन्मथचेष्टितम् ।
हृदयं हि पुरुषं दृष्ट्वा योनिः प्रह्रष्यते स्त्रियाः ॥
सुवेशं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् ।
गरं वा भिक्षुकं वाऽपि मिच्छन्ति सततं स्त्रियः॥
नद्यश्च नार्य्यश्च समस्वभावाः
स्वतन्त्रता वेगबलाधिकत्वं ।
तोयैश्च दोषैश्च निपातयन्ति
नद्यो हि कूलानि कुलानि नार्य्यः ॥
नदी पातयते कूल नारी पातयते कुलम् ।
नारीणाञ्च नदीनाञ्च स्वच्छन्दललिता गतिः ॥
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्व्वभूतानां न पुंसां वामलोचना ॥
मनोऽनुकूलाः प्रमदा रूपवत्यः स्वलङ्कृताः ।
वासः प्रासादपृष्ठेषु स्वर्गः स्याच्छुभकर्म्मणः ॥
न दानेन न मानेन नार्জ্জवेन न सेवया ।
न शस्त्रेण न शास्त्रेण सर्व्वदा विषमाः स्त्रियः॥
इति गारुड़े १०८ अध्यायः ॥ * ॥
स्त्रीवधनिषेधो यथा,—
"अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतेष्वपि ।
स त्वं सुपृथिवीपाल न धर्म्मं त्यक्तुमर्हसि ॥"
इति वह्निपुराणे पृथुरुपाख्याननामाध्यायः ॥
स्त्रीणामात्मदाने अस्वतन्त्रा यथा,—
"ततोऽब्रवीच्चाप्यवजा नार्हं त्वां पार्थिवात्मज ।
दातुं शक्ता तथात्मानं स्वतन्त्रा न हि योषितः॥"
इत्युपक्रम्य ॥
"विश्वकर्म्मसुता साध्वी नाम्ना चित्राङ्गदाभवत् ।
सा कदाचिन्महारण्यं सखीभिः परिवारिता ।
जगाम नैमिषं नाम स्नातुं कमललोचना ।
सा स्नातुमवतीर्णा च अथाभ्यागान्नरेश्वरः ॥
सुदेवतनयो धीमान् सुरथो नाम नामतः ।
तां ददर्श च तन्वङ्गीं शुभाङ्गीं मदनातुरः ॥
संवृत्तः सा सखीं प्राह वचनं सत्त्वसंयुता ।
असौ नराधिपसुतो मदनेन कदर्थते ।
मदर्थञ्च त्वमं मेऽस्य स्वप्रदानं सुरूपिणः ॥
सख्यस्तामब्रुवन् बाले न प्रगल्भासि सुन्दरि ।
न स्वातन्त्र्यं तवास्तीह प्रदाने स्वात्मनोऽनघे ॥
पिता तवास्ति धर्म्मिष्ठः सर्व्वशिल्पविशारदः ।
न ते युक्तमिहात्मानं दातुं नरपते स्वयम् ॥"
इति वामनपुराणे ६० अध्यायः ॥ * ॥
स्त्रीणां मध्य गुरवो यथा,—
"मातामही मातुलानी तथा मातुश्च सहोदरा ।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु॥
इत्युक्तो गुरुवर्गोऽयं माद्रतः पितृतो द्विजाः ।
अनुवर्त्तनमेतासां मनोवाक्कायकर्म्मभिः ॥"
इत्यादि ॥
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यावत् पिता च माता च द्वावेतौ निर्व्वि-
कारिणौ ।
तावत् सर्व्वं परित्यज्य पुत्रः स्यात्तत्परायणः ॥
माता पिता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि ।
स पुत्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ॥
नास्ति मातृसमं देवः नास्ति मातृसमं गुरुः ।
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ॥
तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसा गिरा ।
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाचरेत् ॥"
इति कौर्म्मे उपविभागे ।११।२७,३१,३४-३७॥
व्यभिचारिण्याः स्त्रिया निर्व्वास्यत्वं यथा,—
"हृताधिकारां मलिनां पिण्डमात्रोपसेविनीम्
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ॥"
स्त्रीणां मेध्यत्वं त्याज्यत्वञ्च यथा,
"सोमः शौचं ददौ तासां गन्धर्व्वाय शुभां
गिरम् ।
पावकः सर्व्वभक्षित्वं मेध्या वै योषितो घृतः ॥
व्यभिचारादृतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्त्तृवधे तासां तथा महति पातके ॥
सुरापी व्याधिता धूर्त्ता वन्ध्यार्थघ्न्यप्रियंवदा ।
भर्त्तव्या चान्यथा ह्येन ऋषयो हि भवेन्महत् ॥"
तस्याः प्रशंसा यथा,—
"यत्राविरुद्धं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते ।
मृते जीवति वा पत्यौ या नान्यमुपगच्छति ॥
सेह कीर्त्तिमवाप्नोति मोदते चोमया सह ।
शुभां त्यजंस्तृतीयांशं दाप्यो ह्याभरणं स्त्रियाः ।
स्त्रीभिर्भर्त्तृवचः कार्य्यं एष धर्म्मः परः स्त्रियाः॥"
स्त्रीगमनार्हकालो यथा,—
षोड़शर्त्तुर्निशाः स्त्रीणां तासु युग्मासु
संविशेत् ।
ब्रह्मचार्य्येव पर्व्वाद्याश्चतस्रस्तु वर्জ্জयेत् ॥
एवं गच्छेत् स्त्रियं शान्तां मघां मूलञ्च वर्জ্জयेत्
लक्षण्य जनयेदेव पुत्रं रोगविवर्জ্জितम् ॥
यदा कामी भवेद्वापि स्त्रीणाम्बरमनुस्मरन् ।
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतस्ततः ॥"*॥
भूषणादिना भर्त्रादिभिः स्त्रियः पूज्या यथा,—
"भर्त्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ।
बन्धुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ॥
स्त्रीभिः श्वश्रूश्वशुरयोः पादवन्दनं सदा कार्य्यम्
यथा,—
"संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी ।
श्वश्रूश्वशुरयोः कुर्य्यात् पादयोर्वन्दनं सदा ॥"
प्रोषितभर्त्तृ कया क्रीड़ादिकं वर्জ্জनीयं यथा
"क्रीड़ां शरीरसंस्कारं समाजोत्सवदर्शनम्
हास्यं परगृहे यानं त्यजेत् प्रोषितभर्त्तृका ॥"
ज्येष्ठया स्त्रिया सह धर्म्मकर्म्मानुष्ठानं कर्त्तव्यम् ।
यथा,—
"ज्येष्ठां धर्म्मविधौ कुर्य्यान्न कनिष्ठां कदाचन ।
दाहयित्वाग्निहोत्रेण स्त्रियं हृत्तवतीं पतिः ॥
आहरेद्विधिवद्दारानग्निञ्चैवाविलम्बितः ।
हिता भर्त्तुर्द्विवं गच्छेदिह कीर्त्तिमवाप्य च ॥"
इति गारुड़े । ८५ । ३२—३३ ॥
चञ्चलस्त्रीणां कुलनाशकत्वं यथा,—
"लवणजलान्ता नद्यः स्त्रीभेदान्तश्च मैथुनम् ।
पैशुन्यं जनवार्त्तान्तं वित्तं दुःखत्रयान्तकम् ॥
राज्यश्रीर्ब्रह्मणापान्तं द्यूतान्तं ब्रह्मवर्चसम् ।
आचारं घोषवासान्तं कुलस्यान्तं स्त्रियश्चलाः ॥
सर्व्वं क्षयान्तं निचयाः पतनान्ताः समु-
च्छ्रिताः ॥"
स्त्रीनायके वामनिषेधादि यथा,—
अनायके न वस्तव्यं वस्तव्य बहुनायके ।
स्त्रीनायके न वस्तव्यं वस्तव्य बालनायके ॥
त्यजेदन्यामष्टमाब्दे नवमे तु मृतप्रजाम् ।
एकादशे स्त्रीजननीं सद्यश्चाप्रियवादिनीम् ॥
अनर्थित्वान्मनुष्याणां भिया परिजनस्य च ।

मर्य्यादपेतमर्य्यादाः स्त्रियस्तिष्ठन्ति भर्त्तृषु ॥"
इति गारुड़े । ११५ । ५८—५९ ; ६२—६५॥
स्त्रियो धन्या यथा,—
"योषितः साधु धन्यास्ताभ्यो धन्यतरोऽस्ति कः ॥"
इत्युपक्रम्य ।
"कलिः साध्विति यत् प्रोक्तं मूढ़ैः साध्विति योषितः ।
तच्चाह भगवान् साधुर्धन्याश्चेति पुनः पुनः ॥
तत् सर्व्वं श्रोतुमिच्छामो न वेदगुह्यं महामुने
इत्युक्तो मुनिभिर्व्यासः प्रहस्येदमथाब्रवीत् ॥
योषिच्छुश्रूषणं भर्त्तुः कर्म्मणा मनसा गिरा ।
कुर्व्वतो लभतेऽवश्यं तल्लोकं ततो द्विजाः ॥
नातिक्लेशेन महता तानेव पुरुषो यथा ।
लभतेऽयं व्याहृतं तेन मया साध्विति योषिताम्॥"
इति विष्णुपुराणे । ६ । २ । ८२—८३ ॥
वेश्यास्त्रीणां धर्म्मा यथा,—
श्रीकृष्णमहिषा ऊचुः ।
वेश्यानामपि यो धर्म्मस्तत्त्वो ब्रूहि तपोधन ।
दाल्भ्य उवाच ।
यः कश्चित् शुल्कमादाय गृहमेष्यति वः सदा ।
निरूद्धस्तेनैवोपचर्य्यः स तदान्यत्र दाम्भिकात् ॥
देवतानां पितॄणाञ्च पुण्याहे समुपस्थिते ।
गोभूहिरण्यदानानि प्रदेयानि च शक्तितः ॥
ब्राह्मणेभ्यो वरारोहाः कार्य्याणि वचनानि च ।
यच्चाप्यन्यद्धितं सम्यगुपदेक्ष्यामि तच्चतः ॥
अविचारेण सर्व्वाभिरनुष्ठेयन्तु तत् पुनः ।
संसारोत्तारणायालमेतद्धि विदितं विदुः ॥
यदा सूर्य्यटिने हस्तः पृथ्वी वाथ पुनर्व्वसुः ।
भवेत् सर्व्वौषधिस्नानं सम्यङ्नारी समाचरेत् ।
तदा पञ्चशरस्याथ सन्निधानत्वमिष्यते ॥
अर्च्चयेत् पुण्डरीकाक्षमनङ्गस्यानुकीर्त्तनैः ।
कामाय पादौ संपूज्य जङ्घे वै मोहकारिणे ॥
मेढ्रं कन्दर्पनिधये कटिं प्रीतिमते नमः ।
नाभिं सौख्यसमुद्राय रामाय च तथोदरम् ॥
हृदयं हृदयेशाय स्तनावाह्लादकारिणे ।
उत्कण्ठायेति वै कण्ठमाप्यमानन्दकारिणे ॥
वामांसं पुष्पचापाय पुष्पबाणाय दक्षिणम् ।
नमोऽनङ्गाय वै मौलिं विलोलायेति च ध्वजम्
सर्व्वात्मने शिरस्तद्वदेवटेवस्य पूजयेत् ।
नमः शिवाय शान्ताय पाशाङ्कुशधराय च ॥
गदिने पीतवस्त्राय शङ्खचक्रधराय च ॥
नमो नारायणायेति कामदेवात्मने नमः
नमः शान्त्यै नमः प्रीत्यै नमो रत्यै श्रिये नमः।
नमा पुष्ट्यै नमस्तुष्ट्यै नमः सर्व्वार्थसम्पदे ॥
एवं संपूज्य गोविन्दमनङ्गात्मानमीश्वरम् ।
गन्धैर्माल्यैस्तथा धूपैर्नैवेद्येन च भामिनी ॥
तत आहूय धर्म्मज्ञं ब्राह्मणं वेदपारगम् ।
अभ्यङ्गावयवं पूज्य गन्धधूपार्च्चनादिभिः ॥
शालेयतण्डुलप्रस्थं घृतपात्रेण संयुतम् ।
तस्मै विप्राय सा दद्यान्माधव प्रीयतामिति ॥
यथेष्टाहारयुक्तं वै तमेव द्विजसत्तमम् ।
रत्यर्थं कामदेवोऽयमिति चित्तेन धार्य्यताम् ॥
यदृयदिच्छति विप्रेन्द्रस्तत्तत् कुर्य्यात् विलासिनी
एवमादित्यवारेण सदा तद्वत्तमाचरेत् ।
तण्डुलप्रस्थदानञ्च यावन्मासांस्त्रयोदश ॥
ततस्त्रयोदशे मासि सम्प्राप्ते तस्य भाविनी ।
विप्रस्योपकरेयुक्तां शय्यां दद्याविलक्षणाम् ।
सोपधानकविन्यासां स्वास्तरावरणां शुभाम् ॥
दीपिकोपानहच्छत्रं पादुकासनसंयुताम् ।
सपत्नीकमलङ्कृत्य हेमसूत्राङ्गुलीयकैः ॥
सूक्ष्मवस्त्रैः सकटकैर्धूपमाल्यानुलेपनैः ।
कामदेवं सपत्नीकं गुड़कुम्भोपरिस्थितम् ॥
ताम्रपात्रासनगतं हैमं नेत्रपटावृतम् ।
सकांस्यभाजनोपेतमिक्षुदण्डसमन्वितम् ।
दद्यादेतेन मन्त्रेण तथैकां गां पयस्विनीम् ॥
यथान्तरं न पश्यामि कामकेशवयोः सदा ।
तथैव सर्व्वकामानिरस्तु विष्णो सदा मम ॥
यथा न कामिनी देहात् प्रयाति तव केशव ।
तथा ममापि देवेश शरीरे त्वं कुरु प्रभो ॥
तथा च काञ्चनं देवं प्रतिगृह्य द्विजोत्तमः ।
कोऽदात् कस्मा अदादिति वेदिकं मन्त्रमीरयेत् ॥
ततः प्रदक्षिणीकृत्य विसर्ज्य द्विजसत्तमम् ।
शय्यासनादिकं सर्व्वं ब्राह्मणस्य गृहं नयेत् ॥
ततः प्रभृति योऽन्योऽपि रत्यर्थं गेहमागतः ।
सामान्यं सूर्य्यवारे च स संपूज्यो भवेत्तदा ॥
एवं त्रयोदशं यावत् मासमेकं द्विजोत्तमम् ।
तर्पयेत यथाकालं प्रोषितेऽन्यं समाचरेत् ॥
तदनुज्ञारूपवन्तं यावदस्यागमो भवेत् ।
आत्मनोऽपि तया विघ्नं गर्भसूतकराजसम् ॥
देवं वा मानुषं वा स्यादुपरागेण वा ततः ।
साचारानिष्टयशसो यथाशक्त्या समाचरेत् ॥
एतद्वः कथितं सम्यग्भवतीनां विशेषतः ।
स्वधर्म्मोऽयं यतो भार्य्या वेश्यानामिह सर्व्वदा ॥
पुरश्चरेन यत् प्रोक्तं दानवेषु पुरा मया ।
तदिदं साम्प्रतं सर्व्वं भवतीष्वपि युज्यते ॥
सर्व्वपापप्रशमनमनन्तफलदायकम् ।
कल्याणिनीनां कथितं कुरुध्वञ्च वरानना ॥
करोसि याग्नेयमखण्डमेतत्
कल्याणिनी माधवलोकमस्या ।
सा पूजिता देवगणैरशेषै-
रानन्दकृत् स्थानमुपैति विष्णोः ॥
तपोधनः सोऽप्यभिधाय चैत-
दनङ्गदानव्रतमङ्गनानाम् ।
स्वस्थानमेथत्वनु ताः समस्त-
मित्थं करिष्यन्ति च वेदयोनि ॥"
इति मत्स्यपुराणेऽनङ्गदानव्रतम् । ७०।३०—६४
स्त्रीरोगनाशकारीषधं यथा,—
हरिरुवाच ।
"एकं पुनर्नवामूलं अपामार्गस्य वा शिव ।
सरसं योनिविच्छिन्नं वराङ्गस्य व्यथां हरेत् ॥
प्रसूतिवेदनाश्चैव तरुणीनां व्यथां हरेत् ॥
भूमिकुष्माण्डमूलं वै शालितण्डुलवारिणा ।
सप्ताहं दुग्धपीतं स्यात् स्त्रीणां वहुपयस्करम्॥
रुद्रेन्द्रवारुणीमूललेपात् स्त्रीस्तनवर्द्धना ।
नश्येत् घृतविपक्वा च कार्य्यावल्यन्तु पालिका ।
भक्षिता सा महेशान योनिशूलं विनाशयेत् ॥
प्रलेपिता कारवेल्लमूलेनैव विनिर्गता ।
योनिः प्रवेशमायाति नात्र कार्य्या विचारणा ॥
नीलीपटोलमूलानि साज्यानि तिलवारिणा ।
पिष्टान्येषां प्रलेपो वै ज्वालागर्भगरोगनुत् ॥
पाठामूलं रुद्रपीतं पिष्टं तण्डुलवारिणा ।
पापरोगहरं स्याच्च कुष्ठपानन्तथैव च ॥
वाप्योदकञ्च समधु पीतमन्तर्गतस्य वै ।
पापरोगस्य सन्तापनिवृत्तिं कुरुते शिव ॥
कदलीलिकुचं पीतं पिष्टा तण्डुलवारिणा ।
स्त्रीणाञ्चैव महादेव रक्तस्रावं हि वारयेत् ॥
घृततुल्या रुद्र लाक्षा पीता चौरेण वै सह ।
प्रदरं हरते रोगं नात्र कार्य्या विचारणा ॥
द्विजयष्टीविकटुकं चूर्णं पीतं हरेच्छिव ।
तिलक्वाथेन संयुक्तं रक्तगुल्मं स्त्रिया हर ॥
कुसुमस्य निवद्दञ्च तरुणीनां महेश्वर ।
रक्तोत्पलस्य वै कन्दं शर्करातिलसंयुतम् ॥
पीतं सशर्करं स्त्रीणां धारयेत् गर्भपातनम् ।
रक्तस्रावस्य नाशः स्यात् शीतोदकनिषेवणात्॥
पीतन्तु काञ्चिकं रुद्र कथितं शरपुङ्खया ।
हिङ्गु सैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥
मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत् ।
अपामार्गस्य वै मूलं योनिस्थञ्च प्रसूतिकृत् ॥
अपामार्गस्य वै मूले गर्भवत्यास्तु नाभितः ।
उत्पाट्यमाने सकले पुत्रः स्यादन्यथा सुता ॥
अपामार्गस्य वै मूले नारीणां शिरसि स्थिते ।
गर्भशूलं विनश्येत नात्र कार्य्या विचारणा ॥
कर्पूरमदनफलं मधुकैः पूरितः शिव ।
योनिः शुभः स्याद्भार्य्या युवत्याः किं पुनर्हर ।
माषस्य विदलान्येव वितुषाणि महेश्वर ।
घृतभावितशुष्काणि पयसा साधितानि वै ॥
समध्वाज्यपयोभिश्च भक्षयित्वा च कामयेत् ।
स्त्रीणां शतं महादेव तत्क्षणाद्भात्र संशयः ॥
रसञ्च रण्डतैलेन गन्धकेन शुभो भवेत् ।
लिफलोदकसंघृष्टो बलक्षुद्वक्षणाद्भवेत् ॥
दुग्धं वितुषमाषैश्च शिम्बीबीजैश्च साधितम् ।
अपामार्गस्य तैलेन पीतं स्त्रीशतकामकृत् ॥"
इति गारुड़े १९६ अध्यायः ॥
(स्त्रीसम्भूतेः कारणं यथा,—
"स्त्रीरेतसोऽधिकत्वेन हीनशुक्रेन्द्रियादपि ।
रजसोऽप्यधिकत्वेन स्त्रीसम्भूतिः प्रजायते ॥
समधातुबलेनापि प्रकृत्या विकृतेः समे ।
ऋतुव्यासरजःस्त्रीणां या या भवति भावना ॥
सात्त्विकी राजसी वापि तामसी वापि सत्तम ।
तादृशं जनयेद्बालं गुणैर्वा तादृशैरपि ॥"
इति हारीते शारीरस्थाने प्रथमेऽध्याये ॥
स्त्र्यक्षरच्छन्दोविशेषः । यथा, छन्दोमञ्जर्य्याम् ।
"गौ स्त्री । गोपस्त्रीभिः कृष्णो रमे ॥")

स्त्रीगवी, स्त्री, (स्त्री चासौ गौश्चेति । समासे षच् । स्त्रीयां ङीप् ।) धेनुः । गाइ इति भाषा । तत्पर्य्यायः । तुम्बा २ निलिम्पा ३ रोहिणी ४ । इति त्रिकाण्डशेषः ॥ (यथा, काशिकायाम् । ३ । ३ । ७१ । "स्त्रीगवीषु पुङ्गवानां गर्भाधानाय प्रथमसुपसरणमुच्यते॥")

स्त्रीगुरुः, पुं, (स्त्री चासौ गुरुश्चेति ।) दीक्षाकर्त्री । मन्त्रमात्रोपदेष्टरि । तल्लक्षणं यथा,—

"साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया।
सर्व्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता ॥
सर्व्वलक्षणसम्पन्ना रूपिका पद्मलोचना।
रत्नालङ्कारसंयुक्ता सर्व्वाभरणभूषिता ॥
शान्ता कुलीना कुलजा चन्द्रास्या सर्व्वबुद्धिगा।
अनन्तगुणसम्पन्ना रुद्रत्वदायिनी प्रिया ॥
गुरुरूपा शक्तिदात्री शिवज्ञानविरूपिणी।
गुरुयोग्या भवेत् सा हि विधवा परिवर्জ্জिता॥*
स्त्रियो दीक्षा शुभा प्रोक्ता मातृवाष्टगुणा स्मृता।
पुत्रिणी विधवा ग्राह्या केवलानन्दकारिणी ॥
सिद्धमन्त्रं यदि तदा गृह्णीयादिधवामुखे।
केवलं सुफलं तत्र मातुरष्टगुणं स्मृतम् ॥
स्वयं वा स्वप्नविषये ददाति यदि मन्त्रनुम्।
तत्राष्टगुणमाप्नोति यदि सा पुत्रिणी सती ॥
यदि माता स्त्रीयमन्त्रं ददाति तनुजाय च।
तदाष्टसिद्धिमाप्नोति भक्तिमार्गे न संशयः ॥
तदेव दुर्ल्लभं देव यदि माता प्रदीयते ॥
आदौ भक्तिं ततो मुक्तिं सम्प्राप्य कामरूपधृक्।
महस्रकोटिविद्यार्थं जानाति नात्र संशयः ॥
स्वप्ने वा यदि वा माता ददाति च समन्त्रकम्॥
पुनर्दीक्षां सोऽपि ज्ञात्वा दानवत्समवाप्नुयात् ॥
यदि भाग्यवशेनैव जननीच्छानुवर्त्तनी।
तदा सिद्धिमवाप्नोति तत्र मन्त्रं विचारयेत् ॥
स्त्रीयमन्त्रोपदेशेन न कुर्य्यादगुरुचिन्तनम् ॥"

इति स्त्रीगुरुकथनम् ॥

इति रुद्रयामले उत्तरखण्डे २पटलः पूर्व्वखण्डे १५ पटलश्च ॥ * ॥ तद्ध्यानं गुप्तसाधनतन्त्रे २ पटले तत्पूजनं हृदयौल्लासतन्त्रे २पटले तत्स्तोत्रं कङ्कालमालिनीतन्त्रे ७ पटले द्रष्टव्यम् । तद्गीता च कङ्कालमालिनीतन्त्रे २ पटले वेदितव्या ॥

स्त्रीघोषः, पुं, (स्त्रीणां घोषो यत्र ।) प्रत्यूषः । इति केचित् ॥

स्त्रीचित्तहारी, [न्] पुं, (स्त्रीणां चित्तं हरतीति । हृ + णिनिः ।) शोभाञ्जनः । इति त्रिकाण्डशेषः ॥ नारीमनोहारिणि, त्रि ॥

स्त्रीचिह्नं, क्ली, (स्त्रियाश्चिह्नम् ।) योनिः । इति जटाधरः ॥ नारीलक्षणञ्च ॥

स्त्रीचौरः, पुं, (स्त्रियाश्चौरः ।) कामुकः । तत्पर्य्यायः । रतश्चिण्डकः २ । इति त्रिकाण्डशेषः ॥ नारीहर्त्तरि, त्रि ॥

स्त्रीजितः, पुं, (स्त्रिया जितः ।) स्त्रीवशीभूतः। यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।४२।१५।

स्त्रीजितस्यैश्वर्य्यमात्रेण सर्व्वं पुत्रं प्रयच्छति ।
न भूमौ पातकी पापात् पापिनां स्त्रीजितात् परः ॥"

स्त्रीता, स्त्री, स्त्रीत्वम् । स्त्रिया भावः इत्यर्थे तल्प्रत्ययटाप्प्रत्ययाभ्यां निष्पन्नम् ॥

स्त्रीधनं, क्ली, (स्त्रिया धनम् ।) स्त्रीस्वत्वास्पदीभूतधनम् । तत् षड्विधम् । यथा,—

"अध्यग्न्यध्यावाहनिकं भर्त्तृदायं तथैव च ।
भ्रातृदत्तं पितृभ्यान्च षड्विधं स्त्रीधनं स्मृतम्॥"

इति दायभागधृतनारदवचनम् ॥ * ॥

अथ स्त्रीधनम् । तत्र कात्यायनः ।

"प्राप्तं शिल्पेन यद्दत्तं प्रीत्या चैव यदन्यतः।
भर्त्तुः स्वाम्यं भवेत्तत्र शेषन्तु स्त्रीधनं स्मृतम्॥"

अन्यतः पितृमातृभर्त्तृकुलव्यतिरिक्तादयल्लब्धं शिल्पेन वा यदर्জ্জितं तत्र भर्त्तुः स्वातन्त्र्यं तेन स्त्रिया अपि धनं न स्त्रीधनं अस्वातन्त्र्यात् एतद्व्यतिरिक्तधने स्वत्वं स्त्रिया एव दानाद्यधिकारात् । मनुर्विष्णुः ।

"पत्यौ जीवति यः कश्चिदलङ्कारो धृतो भवेत्।
न तं भजेरन् दायादा भजमानाः पतन्ति ते ॥"

पत्युरदत्तेऽपि तदनुज्ञया परिदितोऽलङ्कारस्तावता एव भार्य्यायाः स्त्रीयो भवतीति मेधातिथिः ॥ कात्यायनः ।

"कन्यया वापि पत्नीः पितृगृहेऽथवा।
भर्त्तुः सकाशात् पित्रोर्व्वा लब्धं सौदायिकं स्मृतम् ॥

सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते यस्मात्तदानृशंस्यार्थं तैर्दत्तं तत् प्रजीवनम् ॥

सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥"

सौदायिकः पितृमातृभर्त्तृकुलसम्बन्धिभ्यो लब्धं सौदायिकम् । आनृशंस्यमनेष्टव्यैम् । नारदः ।

"भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत्
सा यथाकाममश्नीयाद्यद्वा स्थावरमर्हति ॥"

भर्त्तृदत्तविशेषणात् भर्त्तृदत्तस्थावरार्हतेऽन्यस्थावरं देयमेव । अन्यथा यथेष्टं स्थावरेष्वपि इति कात्यायनोक्तं विरुध्यते । कल्पतरुरत्नाकरयोः कात्यायनः ।

अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिनी ।
व्यभिचाररता या च स्त्रीधनं न च सार्हति ॥"

याज्ञवल्क्यः ।

"दुर्भिक्षे धर्म्मकार्य्ये वा व्याधौ संप्रतिरोधके ।
गृहीतं स्त्रीधनं भर्त्ता नाकामो दातुमर्हति॥"

संप्रतिरोधके भोजनाद्यवरोधकारिण्युत्तमर्णादिके । अन्यत्र तु कात्यायनः ।

"न भर्त्ता नैव च सुतो न पिता भ्रातरो न च ।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः ॥"*

अथ स्त्रीधनाधिकारिणः । देवलः ।

"सामान्यं पुत्रकन्यानां मृतायां स्त्रीधनं विदुः ॥
अप्रजायां हरेद्भर्त्ता माता भ्राता पितापिवा" ।

अत्र इन्द्रनिर्देशात् पुत्रकन्ययोस्तुल्याधिकारः । अन्यतराभावे अन्यतरस्य तद्ग्रहणम् । एतयोरभावे जाताया दुहितुः पुत्रवत्याः सभर्त्तृकायाश्च तुल्याधिकारः । स्वपुत्रहारीत्यत्र पार्व्वणे ।

"सपिण्डीकरणादूर्द्धं यत् पितृभ्यः प्रदीयते ।
सर्व्वेष्वंशहरा माता इति धर्म्मेषु निश्चयः ॥"

इति भ्रातापौत्रतद्भोग्यपतिपिण्डदानसम्भवात् । तथा च नारदः ।

"पुत्राभावे तु दुहिता तुल्यसन्तानदर्शनात् ॥"

अतएव एतादृशदुहित्रभावे पौत्राधिकारः । तदभावे दौहित्राधिकारः ।

"दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्रवत्॥"

इति मनुवचने दौहित्रे पौत्रधर्म्मातिदेशात् । पुत्रेण परिणीतदुहितुर्व्वाधाद्याधकपुत्रेण वाध्यदुहितृपुत्रवाधस्य न्याय्यत्वात् । एवं तदभावे प्रपौत्रः तद्भोग्यपिण्डदाट्टत्वात् । तदभावे बन्ध्याविधवयोर्म्माट्टधनाधिकारः तयोरपि तत्प्रजात्वात् । तदभावे तु भर्त्ता । तत्र न पितृमाट्टदत्तधनविषयं तत्र भ्रातुरधिकारात् । तथा च हृदकात्यायनः ।

"पितृभ्यश्चैव यद्दत्तं दुहितुः स्थावरं धनम् ।
अप्रजायामतीतायां भ्रातृगामि तु सर्व्वदा ॥"

मातुः परिणयनकाललब्धन्तु पुत्रसत्त्वेऽपि क्रमेणानूढोढ़दुहित्रोरेवाधिकारः । मातुः पारिणाय्यं स्त्रियो भजेरन्निति वशिष्ठोक्तेः । स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्चेति गौतमवचनेन प्रथममप्रत्तानामवागुद्दत्तानां तदभावे त्वप्रतिष्ठितानां वागुद्दत्तानां ईषदर्थे नञ् तदभावे चकारसमुच्चितानामूढानां स्त्रीधनं दुहितॄणामिति सामान्यतः प्रागुक्तत्वात् अप्रत्तानामित्यादेस्तु क्रमार्थत्वेनोपसंहारार्थत्वात् । व्यक्तमाह मनुः ।

"मातुस्तु यौतुकं यत् स्यात् कुमारीभाग एव सः ॥"

यौतुकपदं तु मित्राणे इत्यस्मात् सिद्धं मित्रता च स्त्रीपुंसयोर्व्विवाहाङ्गवति । यदेतत् हृदयन्तव तदस्तु हृदयं मम यदिदं हृदयं मम तदस्तु हृदयं तव इति मन्त्रलिङ्गात् । यौतुकं तदिति वाचस्पतिमिश्ररायमुकुटधृतात् यौतुकं यौतकमपि साधु । परिणयनकालः परिणयनपूर्व्वापरीभूतकालः स च हृद्व्यारम्भत्यभिवादनान्तो विवाहतत्त्वे विवृतः । यत्तु मनुवचनम् ।

"स्त्रियास्तु यद्भवेद्दित्तं पित्रा दत्तं कथञ्चन ।
ब्राह्मणो तद्हरेत् कन्या तदपत्यस्य वा भवेत् ॥"

इति तत् पित्रा दत्तमिति विशेषणाद्विवाहसमयादन्यदपि पितृदत्तं कन्यायां एवेत्येतदर्थम् । ब्राह्मणीपदन्तु कन्यामात्रपरम् । यद्वा क्षत्रियादिस्त्रीणामनपत्यानां पितृदत्तं धनं सपत्नीदुहिता ब्राह्मणीकन्या हरेत् न पुनरप्रजस्त्रीधनं भर्त्तुरिति वचनावकाशः । इति वचनार्थः । तभावे पुत्राधिकारः ।

"दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्भवेत् ॥"
इति मनुवचनात् ॥

एवं पुत्राधिकारात् प्राक् दुहित्रधिकारविधायकवचनान्तराण्येतद्विषयकाणि । पुत्राद्यभावे तु ब्राह्मादिषण्णकविवाहकालीनं स्त्रीधनं भर्त्तुः । आसुरादित्रयविवाहकालीनन्तु मातुः तदभावे पितुः । यथा मनुः ।

"ब्राह्मदैवार्षगान्धर्व्वप्राजापत्येषु यद्धनम् ।
अतीतायामप्रजायां भर्त्तुरेव तदिष्यते ॥
यत्स्त्रीभ्यो दत्तं विवाहेष्वासुरादिषु ।
अतीतायामप्रजायां मातापित्रोस्तदिष्यते ॥"

कन्याधनाधिकारे क्रममाह बौधायनः ।

"रिक्थं मृतायाः कन्याया गृह्णीयुः सोदराः समम् ।
तदभावे भवेन्मातुस्तदभावे भवेत् पितुः ॥"

अत्र क्रमदर्शनात् पूर्व्ववचने मातापित्रोरित्यत्र पाठक्रमेणाधिकारो न तु इन्द्वनिर्देशात् समुच्चितेन । इष्टप्राप्तिः ।

"मातृस्वसा मातुलानी पितृव्यस्त्री पितृस्वसा श्वश्रूः पूर्व्वजपत्नी च मातृतुल्या प्रकीर्त्तिताः ॥
यदासामौरसो न स्यात् सुतो दौहित्र एव वा ।
तत्सुतो वा धनं तासां स्वसीयाद्याः समाप्नुयुः ॥"

औरसपदं कन्यापुत्रोभयपरम् । मृत इति सपत्नीपुत्रपरम् ।

"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् ।
सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥"
इति मनुस्मृतेः ।

एकपत्नीनामिति एकः पतिर्यासां ताः । न तु सुतपदमौरसविशेषणं वैयर्थ्यात् । सपत्नीपुत्रसद्भावे स्वसीयाद्यधिकारापत्तेश्च । तत्सुत इति पौत्रः सपत्नीपौत्रपरं न तु दौहित्रपुत्रपरं तस्य स्वभोग्यभर्त्तृपिण्डदानानधिकारात् । अत्र प्रागुक्तानुसारात् दौहित्रपर्य्यन्तानन्तरमेव सपत्नीपुत्रतत्पुत्रयोरधिकारः । न तु प्रागुक्तभर्त्रादिपितृपर्य्यन्ताभावेऽपीति वाच्यं भर्त्रादीनां धवि-भोग्यपार्व्वणपिण्डदानानधिकारात् । तस्मादेतेषां सपत्नीपौत्रान्तानां तत्सुतो वेति वाग्बन्धसमुचितानाम् ।

"सामान्यं पुत्रकन्यानां मृतायां स्त्रीधनं विदुः ।
अप्रजायां हरेत् भर्त्ता माता भ्राता पितापि वा ॥"

इति देवलोक्तानां भर्त्रादिपितृपर्य्यन्तानामभाव एव सत्यपि श्वशुरभ्रातृश्वशुरादिषु स्वसीयाद्या इत्यनेन भगिनीसुतभर्त्तृभगिनेय-भर्त्तृज्येष्ठकनिष्ठोभयरूपभ्रातृसुत-स्वभ्रातृसुत-जामातृ-देवराणां मातृस्वसादिधने अधिकारः । अनन्यगतेर्व्यवनात् । अत्र ।

"त्रयाणामुदकं कार्य्यं त्रिषु पिण्डः प्रवर्त्तते ।
चतुर्थः सम्प्रदातेषां पञ्चमो नोपपद्यते ॥"
इति दायभागप्रकाशीयमनुस्मृतेः ।

पिण्डदोऽग्रहर इति याज्ञवल्क्यीयात् । मातृतुल्याः प्रकीर्त्तिता इत्यनेन स्वसीयादीनां पुत्रत्वज्ञापनेन एकप्रयोजनकत्वात् ।

"मातुलो भागिनेयस्य स्वसीयो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च ॥
एतेषाञ्चैव भार्य्याभ्यः स्वसुर्मातुः पितुस्तथा ।
पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिः ।
इति ज्ञातातपवनात् ।

पिण्डदानविशेषेणैव यस्यामेषामधिकारक्रमः प्रतिपत्तव्यः । पाठक्रमादर्थक्रमस्य बलवत्त्वात् । अन्यथा सर्व्वत्रैव देवराधिकारे महाजनविरोधः स्यात् । तत्र प्रथमं देवरः तत्पिण्डतद्भर्त्तृपिण्डतद्भर्त्तृदेयपुरुष-त्रय-पिण्डदत्वात् सपिण्डत्वाच्च भ्रातृस्त्रीधने अधिकारी । तदभावे भ्रातृश्वशुरदेवरयोः सुतौ तत्पिण्डतद्भर्त्तृपिण्डतद्भर्त्तृदेय-पुरुषद्वयपिण्डदत्वात् सपिण्डत्वाच्च । तयोरभावे त्वसपिण्डोऽपि भगिनीपुत्रः तत्पिण्डतत्पुत्रदेय-तत्पित्रादित्रयपिण्डदत्वात् । तदभावे भर्त्तृभागिनेयः पुत्राद्भर्त्तुर्दुर्ब्बलत्वेन तत्स्थानपातिनोरपि भगिनीपुत्रभर्त्तृभागिनेययोस्तथैव बलाबलस्य व्याख्येन तद्भर्त्तृदेयपुरुषत्रयपिण्डदत्वात् तत्पिण्डदत्वात् तद्भर्त्तृपिण्डदत्वाच्च मातुलानीधने अधिकारी । तदभावे भ्रातृपुत्रः तत्पिण्डततत्पुत्रदेयतत्पित्रादिपिण्डत्रयदत्वात् पितृस्वसृधने अधिकारी । तदभावे श्वशुरयोः पिण्डदानात् जामाता श्वश्रूधने अधिकारीति क्रमः । स्वसीयाद्या इति अधिकारिमात्रपरं न पाठिकक्रमपरं एषां यथां प्रातिस्विकौलानामभावे सपिण्डानन्तर्य्येण श्वशुरादिवदधिकारी न च सपिण्डाभावे मातृस्वसेति वचनं वाच्यं अस्मिन्नधिकारिनिरूपणे देवरततत्सुतभ्रातृश्वशुरसुतानामधिकारज्ञापनादासन्नतरश्वशुरभ्रातृश्वशुरादेः परित्यागादिति । इति दायतत्त्वम् ॥

स्त्रीधर्म्मः, पुं, (स्त्रिया धर्म्मः ।) ऋतुः । तत्पर्य्यायः । पुष्पम् २ आर्त्तवम् ३ रजः ४ । इति हेमचन्द्रः ॥ (मैथुनम् । यथा हरिवंशे । ८४ । ६१ ।

"मृक्षतो ग्रामजननीर्व्याधः श्रोत्रसुखावहाः ।
वर्हिणाश्चैव विरुतं खगानाञ्च विकूजितम् ॥
अभीक्ष्णमभिमृक्षन्तो स्त्रीधर्म्मं सा व्यरोचयत् ॥")

स्त्रीणां शुभकर्म्मादिः । यथा, मनुः । १।११४।

"स्त्रीधर्म्मयोगं तापस्यं मोक्षं सन्यासमेव च ॥")

स्त्रीधर्म्मिणी, स्त्री, (स्त्रीधर्म्मोऽस्या अस्तीति । इनिः । ङीप् ।) ऋतुमती । इत्यमरः । २ । ६ । २० ॥ (यथा, महाभारते । २।७७ । १४ ।

"स्त्रीधर्म्मिणी वरारोहा शोचितेन परिप्लुता ।
एकवस्त्राथ पाञ्चाली पाण्डवानभ्यवैक्षत ॥")

अस्य विवरणं रजस्वलाशब्दे द्रष्टव्यम् ॥

स्त्रीधवः, पुं, (स्त्रीणां धवः प्रियः ।) पुरुषः । इति जटाधरः ॥

स्त्रीपरः, पुं, (स्त्रीषु परः निरतः ।) विटः । कामुकः । इति केचित् ॥

स्त्रीपण्योपजीवी, [न्] पुं, (स्त्रीपण्येन उपजीवतीति । उप + जीव + णिनिः ।) सम्भोगार्थमन्यस्मै स्त्रियं दत्त्वा तद्धनोपजीवी । इति महाभारते दानधर्म्मः ॥

स्त्रीपुंधर्म्मः, पुं, (स्त्री च पुमांश्च स्त्रीपुंसौ । तयोर्धर्म्मः ।) स्त्रीपुंसयोर्व्यवहारः । स च अष्टादशविवादपदान्तर्गतविवादविशेषः । यथा,—

"स्त्रीपुंधर्म्मो विभागश्च द्यूतमाह्वयमेव च ।
पदान्यष्टादशैतानि व्यवहारस्थितावित ॥"
इति मानवे ८ अध्यायः ॥

तद्विवरणं यथा,—

"पुंसश्च स्त्रियाश्चैव धर्म्मे वर्त्मनि तिष्ठतोः ।
संयोगे विप्रयोगे च धर्म्मान् वक्ष्यामि शाश्वतान् ॥
अक्षतन्त्राः स्त्रियः कार्य्याः पुरुषैः स्वैर्दिवानिशम् ॥
विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे ॥
पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥
कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः ।
मृते भर्त्तरि पुत्रस्तु वाच्यो मातुररक्षिता ॥
सृष्ट्योऽपि प्रसृज्य स्त्रियो रक्षा विशेषतः ।
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥
इमं हि सर्व्ववर्णानां पश्यन्तो धर्म्मसुत्तमम् ।
यतन्ते रक्षितुं भार्य्यां भर्त्तारो दुर्ब्बला अपि ॥
स्वां प्रसूतिं चरित्रञ्च कुलमात्मानमेव च ।
स्वञ्च धर्म्मं प्रयत्नेन जायां रक्षन् हि रक्षति ॥
पतिर्भार्य्यां संप्रविश्य गर्भो भूत्वेह जायते ।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥
यादृशं भजते हि स्त्री सुतं सूते तथाविधम् ।
तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत् प्रयत्नतः ॥
न कश्चित् योषितः शक्तः प्रसह्य परिरक्षितुम् ।
एतैरुपाययोगैस्तु शक्याः परिरक्षितुम् ॥
अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्म्मेऽन्नपक्तौ च पारिणाह्यस्य चेक्षणे ॥
अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः ।
आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः ॥
पानं दुर्ज्जनसंसर्गः पत्न्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट् ॥
नेता रूपं परीक्षन्ते नासां वयसि संस्थितिः ।
सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते ॥
पौंस्नाच्चलचित्ताच्च नैर्घृण्याच्च स्वभावतः ।
रक्षिता यत्नतोऽपीह भर्त्तृभ्येता विकुर्व्वते ॥
एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजम् ।
परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति ॥
शय्यासनमलङ्कारं कामं क्रोधमनार्ज्जवम् ।
द्रोहभावं कुचर्य्याञ्च स्त्रीभ्यो मनुरकल्पयत् ॥
नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्म्मो व्यवस्थितः ।
निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः ।
तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि ।
स्खलनस्खपरीवार्थं तासां श्रुत निष्कृतीः ॥
यस्मे माता प्रसुलभे विचरन्त्यपतिव्रता ।
तस्मे रेतः पिता ह्यस्मिन्नित्यस्येतच्चिदर्शनम् ॥
श्वावत्यनिष्टं यल्लिप्सेत् पाक्षिण्याद्यस्य चेतसा

तस्यैव व्यभिचारस्य निष्कृतः सम्यगुच्यते ॥
यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि ।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा ॥
अक्षमाला वसिष्ठेन संयुक्ताधमयोनिजा ।
शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम् ॥
एताश्चान्याश्च लोकेऽस्मिन्नपकृष्टप्रसूतयः ।
उत्कर्षं याचितः प्राप्ताः स्त्रैः स्त्रैर्भर्तृगुणैः शुभैः ॥
एषोदिता लौकयात्रा नित्यं स्त्रीपुंसयोः शुभा ।
प्रेत्येह च सुखोदर्कान् प्रजाधर्मान्निबोधत ॥
प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः ।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥
उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥
अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा ।
दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह ॥
पतिं या नाभिचरति मनोवाग्देहसंयता ।
सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते ॥
व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिञ्चाप्नोति पापरोगैश्च पीड्यते ॥
पुत्रं प्रत्युदितं सद्भिः पूर्वजैश्च महर्षिभिः ।
विज्ञजन्यमिमं पुण्यमुपन्यासं निबोधत ॥
भर्तुः पुत्रं विजानन्ति श्रुतिद्वैधन्तु भर्तरि ।
आहुरुत्पादकं केचिदपरं क्षेत्रिणं विदुः ॥
क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान् ।
क्षेत्रबीजसमायोगात् सम्भवः सर्वदेहिनाम् ॥
विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव कुत्रचित् ।
उभयन्तु समं यत्र सा प्रसूतिः प्रशस्यते ।
बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते ।
सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता ॥
यादृगं तूप्यते बीजं क्षेत्रे कालोपपादितं ।
तादृग्रोहति तत्तस्मिन् बीजं स्वैर्व्यञ्जितं गुणैः ॥
इयं भूमिर्हि भूतानां शाश्वतो योनिरुच्यते ।
न च योनिगुणान् काञ्चिद्बीजं पुष्यति पुष्टिषु ॥
भूमावप्येककेदारे कालोप्तानि कृषीबलैः ।
नानारूपाणि जायन्ते बीजानीह स्वभावतः ॥
व्रीहयः शालयो मुद्गास्तिला माषास्तथा यवाः ।
यथाबीजं प्ररोहन्ति लशुनानीक्षवस्तथा ॥
अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते ।
उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति ॥
तत् प्राज्ञेन विनीतेन ज्ञानविज्ञानवेदिना ।
आयुष्कामेन वप्तव्यं न जातु परयोषिति ॥
अत्र गाथा वायुगीताः कीर्त्तयन्ति पुराविदः ।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे ॥
नश्यतीदुर्यथा विद्धः क्षे विद्धमनुविध्यतः ।
तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे ॥
पृथोरयमिमां पृथिवीं भार्यां पूर्वविदो विदुः ।
स्थाणुच्छेदस्य केदारमाहुः शस्यवतो मृगम् ॥
एतावतैव पुरुषो यज्ञायात्मा प्रजेति ह ।
विप्राः प्राहुस्तथा चैतद्यो भर्त्ता सा स्मृताङ्गना ।
न निष्क्रयविसर्गाभ्यां भर्तृभार्या विमुच्यते ।
एवं धर्मं विजानीमः प्राक् प्रजापतिनिर्मितम् ॥
सकृदंशो निपतति सकृत् कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सतां सकृत् ॥
यथा गोऽश्वोष्ट्रदासीषु महिष्यजाविकासु च ।
नोत्पादकः प्रजाभागी तथैवान्याङ्गनास्वपि ॥
ये क्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः ।
ते वै गम्यस्य जातस्य न लभन्ते फलं क्वचित् ॥
यदन्यगोषु वृषभो वत्सानां जनयेच्छतम् ।
गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम् ॥
तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः ।
कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥
फलन्त्यनभिसन्धाय क्षेत्रिणां बीजिनां तथा ।
प्रत्यक्षं क्षेत्रिणामर्थो बीजादप्योनिर्गरीयसी ॥
क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत् प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥
ओषधानाञ्च बीजं यस्य क्षेत्रे प्ररोहति ।
क्षेत्रिकस्यैव तद्बीजं न वप्ता लभते फलम् ॥
एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च ।
विच्छङ्कमहिषीणाञ्च विज्ञेयः प्रसवं प्रति ॥
एतद्धि सारफल्गुत्वं बीजयोन्योः प्रकीर्त्तितम् ।
अतः परं प्रवक्ष्यामि योषितां धर्ममापदि ॥
भ्रातुर्ज्येष्ठस्य भार्यां या गुरुपत्न्यनुजस्य सा ।
यवीयस्तु या भार्यां स्नुषा ज्येष्ठस्य सा स्मृता ।
ज्येष्ठो यवीयसो भार्यां यवीयान् वाग्यजस्त्रियम् ।
पतितौ भवतो गत्वा नियुक्तावप्यनापदि ॥
देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन ॥
द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः ।
अनिर्दृत्तं नियोगार्थं पश्यन्तो धर्मतस्त्रयः ॥
विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम् ॥
नियुक्तौ यौ विधिं हित्वा वर्त्तेयातान्तु कामतः ।
तावुभौ पतितौ स्यातां स्नुषागुरुतल्पगौ ॥
नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवा वेदनं पुनः ॥
अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः ।
मनुष्याणामपि प्रोक्तो वेणे राज्यं प्रशासति ।
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा ।
वर्णानां सङ्करं चक्रे कामोपहतचेतनः ॥
ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजत्यपत्यार्थं तं विगर्हन्ति साधवः ॥
यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेदप्रसवात् सकृत् सकृदृतावृतौ ॥
न दत्त्वा कस्यचित् कन्यां पुनर्दद्यात् विचक्षणः ।
दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ।
विधिवत् प्रतिगृह्यापि त्यजेत् कन्यां विगर्हिताम् ।
व्याधितां विप्रदुष्टां वा छद्मना चोपपादिताम् ॥
यस्तु दोषवतीं कन्यामनाख्यायोपपादयेत् ।
तस्य तद्धितयं कुर्यात् कन्यादातुर्दुरात्मनः ॥
विधाय वृत्तिं भार्यायाः प्रवसेत् कार्यवान्नरः ।
अवृत्तिकर्शिता हि स्त्री प्रदुष्येत् स्थितिमत्यपि ॥
विधाय प्रोषिते वृत्तिं जीवेच्चरितमास्थिता ।
प्रोषिते त्वविधायैव जीवेच्छिल्पैरगर्हितैः ॥
प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योऽष्टौ नरः समाः ।
विद्यार्थं षड् यशोऽर्थं वा कामार्थं त्रींस्तु वत्सरान् ॥
संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः ।
ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ॥
अतिक्रामेत् प्रमत्तं या मत्तं रोगार्त्तमेव वा ।
सा त्रीन् मासान् परित्याज्याविभूषणपरिच्छदा ॥
उन्मत्तं पतितं क्लीबमबीजं पापरोगिणम् ।
न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्त्तनम् ॥
मद्यपासाधुवृत्ता च प्रतिकूला च या भवेत् ।
व्याधिता चाधिवेत्तव्या हिंसार्थघ्नी च सर्वदा ॥
वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥
या रोगिणी स्यात्तु हिता सम्पन्ना चैव शीलतः ।
सानुज्ञापाधिवेत्तव्या नावमान्या च कर्हिचित् ॥
अधिविन्ना तु या नारी निर्गच्छेदुषिता गृहात् ।
सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥
प्रतिषिद्धा पिबेद्या तु मद्यमभ्युदयेष्वपि ।
प्रेक्षासमाजं गच्छेद्वा सा दण्ड्या कृष्णलानि षट् ॥
यदि स्वाद्यापरार्धे वा विन्देरन् योषितो द्विजाः ।
तासां वर्णक्रमेणैव ज्येष्ठं पूज्या च वेश्म च ॥
भर्तुः शरीरशुश्रूषां धर्मकार्यञ्च नैत्यिकम् ।
स्वा चैव कुर्यात् सर्वेषां नान्यजातिः कथञ्चन ॥
यस्तु तत् कारयेन्मोहात् स्वजात्या स्त्रियान्यया ।
यथा ब्राह्मणचाण्डालः पूर्वदृष्टस्तथैव सः ॥
उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि ॥
कामममरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि ।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ॥
त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती ।
ऊर्ध्वन्तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥
अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम् ।
नैनः किञ्चिदवाप्नोति न च यं साधिगच्छति ॥
अलङ्कारं नादद्यात् पित्र्यं कन्या स्वयंवरा ।
मातृकं भ्रातृदत्तं वा स्तेना स्यात् यदि तं हरेत् ॥
पित्रे न दद्याच्छुल्कन्तु कन्यामृतुमतीं हरन् ।
स हि स्वाम्यमतिक्रामेदृतूनां प्रतिरोधनात् ॥
त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥
देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः ।
तां साध्वीं बिभ्रयान्नित्यं देवानां प्रियमाचरन् ॥

प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थञ्च मानवाः।
तस्मात् साधारणो धर्म्मः श्रुतौ पत्न्या सहोदितः॥
कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्यानुमन्यते॥
आददीत न शुल्कोऽपि शुल्कं दुहितरं ददत्।
शुल्कं हि गृह्णन् कुरुते ऋत्वं दुहितृविक्रयम्॥
एतत्तु न परे चक्रुर्नापरे ज्ञातु माधवः।
यदन्यस्य प्रतिज्ञाय पुनरन्यस्य दीयते॥
नानुगच्छेम ज्ञात्वेतत् पूर्व्वेष्वपि हि जन्मसु।
शुल्कसंज्ञं न मूल्येन ऋत्वं दुहितृविक्रयम्॥
अन्योन्यस्याव्यभिचारो भवेदामरणान्तिकः।
एष धर्म्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः॥
तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ।
यथा नाभिचरेतां तौ वियुक्तावितरेतरम्॥
एष स्त्रीपुंसयोरुक्तो धर्म्मो वो रतिसंहितः।
आपत्यप्राप्तिञ्च दायभागं निबोधत॥"

इति मानवे ९ अध्यायः॥

स्त्रीपुंसलक्षणा, स्त्री, स्त्रीपुंसयोर्लक्षणं चिह्नं स्तन-श्मश्र्वादिरूपं यस्यां सा। इति भरतः॥ तत्पर्य्यायः। पोटा २। इत्यमरः॥

स्त्रीपुंसौ, पुं, (स्त्री च पुमांश्च। "अचतुरविचतुरेति।" ५। ४। ७७। इति अच्प्रत्ययेन साधुः।) स्त्रीपुंसयोर्युग्मम्। तत्पर्य्यायः। मिथुनम् २ द्वन्द्वम् ३। इत्यमरः। २। ५। ३८। द्विवचनान्तोऽयम्॥ (यथा, मनुः। ९। २५।

"एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभा॥"

स्त्रीपूर्व्वः, पुं, (स्त्री पूर्व्वे प्रधानतया सर्व्वकार्य्येषु अग्रगामिनौ यस्य।) स्त्रीजितः। इति महाभारते दानधर्म्मः॥

स्त्रीप्रियः, पुं, (स्त्रियाः प्रियः।) आम्रवृक्षः। इति त्रिकाण्डशेषः॥ नारीप्रियद्रव्ये, त्रि॥

स्त्रीमुखपः, पुं, (स्त्रीमुखं पातीति। पा + कः।) दोहलः। इति राजनिर्घण्टः॥

स्त्रीरञ्जनं, क्ली, (स्त्रियमपि रञ्जयति रागयतीति। रञ्ज + ल्युः।) ताम्बूलम्। इति केचित्॥

स्त्रीरोगः, पुं, (स्त्रिया रोगः।) नारीणामामयः। तस्य चिकित्सा यथा,—

धन्वन्तरिरुवाच।

"स्त्रीरोगादिचिकित्सान्तु वक्ष्ये सुश्रुत तां शृणु।
योनिव्यापत्सु भूयिष्ठं गच्छते कर्म्म वातजित्॥
वचोपकुञ्चिकाजातीकृष्णाहपंकसैन्धवम्।
अजमोदा यवक्षारं चित्रकं शर्करान्वितम्॥
पिष्ट्वालाब्वा जलाद्येन खादयेद्घृतभर्ज्जितम्।
योनिपार्श्वार्त्तिहृद्रोगगुल्मार्शोविनिवृत्तये॥
बदरीपत्रमंलेपात् योनिर्भिन्ना प्रशाम्यति।
लोध्रं तुम्बीफलालेपो योनिदार्व्यं करोति च॥
पद्मपल्लवशय्यकमालतीकुसुमैर्घृतम्।
रविपक्वमसृग्धारा योनिगन्धविनाशनम्॥"

असृग्धारास्थाने असृग्बाधा इति च पाठः।

"सकाञ्चिकं जवापुष्पं प्रसृष्टं ज्योतीरतीदलम्।
दूर्व्वापिष्टञ्च संप्राश्य वनिता नार्त्तवं लभेत्॥
धात्रास्त्रनाभयाचूर्णं तोयपीतं यदा भवेत्।
यदा भवेदित्यत्र रजो हरेदिति च पाठः।
"सदुग्धा लक्ष्मणा पीता न स्याद्वा पुत्रदा ध्रुवम्।
दुग्धस्यार्द्धाढकं चात्तमश्वगन्धा च पुत्रदा।
बन्ध्या पुत्रं लभेत् पीत्वा घृतेन व्योषकेशरम्॥
कुशकाशशरेक्षूणां मूलैर्गोक्षुरकस्य च।
दुग्धञ्चैव सितायुक्तं गर्भिण्याः शूलनुत्परम्॥
पाठालाङ्गलिसिंहास्यमयूरकुटजैः पृथक्।
नाभिवस्तिभगालेपात् सुखं नारी प्रसूयते॥
सूतायाः कृच्छ्रशोणितशूलं वै मन्दसंज्ञितम्।
यवक्षारं पिबेत्तत्र मस्तुनोष्णोदकेन वा॥
कुशमूलोद्भवः क्वाथः साध्यः सूतिरुजापहः।
शालितण्डुलचूर्णन्तु सदुग्धं दुग्धकृद्भवेत्॥
विदारिकुसुमरसं मूलं कार्पासजं तथा।
धात्री स्तन्यविशुद्ध्यर्थं मुहुर्यवरसायनी॥
कुष्ठा वचाभया ब्राह्मी मधुरी चौद्रसर्पिषी।
वर्णायुःकान्तिजननं लेहं बाले प्रदापयेत्॥
स्तन्याभावे पयश्छाग्यं गव्यं वा तद्गुणं भवेत्
मुस्तगण्डीविषा बाला कुटजा घातिसारनुत्॥
व्योषं मधु मातुलुङ्गं क्षिकाच्छर्दिनिवारणम्।
कुष्ठेन्द्रयवसिद्धार्थनिशा दूर्व्वा च कुष्ठजित्॥
समच्छदामयनिशाचन्दनैर्वानुलेपनम्।
शङ्खाब्जबीजरुद्राक्षवचालोहादिधारणम्॥"

इति गारुडे। १७६। १—१८॥

स्त्रीसभं, क्ली, (स्त्रीणां सभा। अशालाचेति नपुंसकत्वम्।) नारीणां सभा। इति केचित्॥

स्त्रीस्वभावः, पुं, (स्त्रीणां स्वभाव इव स्वभावो यस्य।) मङ्गलकः। इति शब्दमाला॥ नारीणां शीलञ्च॥ (यथा, महाभारते। ३। ७१। ६।

"स्त्रीस्वभावञ्चलो लोके मम दोषश्च दारुणः।
स्यादेवमपि कुर्य्यात् सा विवशा गतसौहृदा॥")

स्त्रैणं, क्ली, (स्त्रिया इदम्। स्त्री + नञ्।) स्त्रीस्वभावः। यथा, भट्टिः।

"कर्णेजपैराहितराज्यलोभा
स्त्रैणेन नीता विकृतिं लघिम्ना।
रामप्रवासे व्यसृपन्न दोषं
जनापवादं सनरेन्द्रसूनुम्॥"

(यथा, च भागवते। ४। ४। ३।

"पित्रोरगात् स्त्रैणविमूढधीर्गृहान्
प्रेम्णात्मनो योऽर्धमदात् सतां प्रियः॥")

स्त्रीणां समूहः। स्त्री + नञ्। स्त्रीसमूहः। इति काशिका। ४। १। ८७॥ यथा, शान्तिशतके।

"तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित् पुण्येऽरण्येऽपि शिव शिवेति प्रलपतः॥")

स्त्रैणः, त्रि, (स्त्रीषु भवः। स्त्रीभ्य आगतः। स्त्रीभ्यो हितो वा। स्त्री + "स्त्रीपुंसाभ्यां नञ् स्नञौ भवनात्।" ४। १। ८७। इति नञ्।) स्त्रीसम्बन्धी। इति सुग्धबोधव्याकरणम्॥ स्त्रिया अपत्यं स्त्रैणः। स्त्रिया इदं स्त्रीणां समूहो वा स्त्रैणम्। इति तट्टीकायां दुर्गादासः॥ (रमणी रतः। यथा, भागवते। १। ११। ४०।

"तं मेनिरेऽबला मौढ्यात् स्त्रैणं चानुव्रतं हरेः।
अप्रमाणविदो भर्त्तुरीश्वरं मतयो यथा॥")

स्थः, त्रि, (तिष्ठत्यस्मिन्निति स्था + घञर्थे कः।) स्थलम्। यथा,—

"स्थली दैवकर्त्तृकेऽन्यत् स्थलं क्लीवे स्थ इत्यपि।"

इति शब्दरत्नावली॥

(सुबन्तोपपदे तु "सुपि स्थः।" ३। २। ४। इति कप्रत्ययः। स्थितिशीलः। यथा, रघुः। १२। १५।

"चित्रकूटवनस्थस्य कथितस्वर्गतिर्गुरोः।
लक्ष्मणो निमन्त्रयाञ्चक्रे तमनुच्छिष्टसम्पदा॥")

स्थगम् ए संहतौ। इति कविकल्पद्रुमः॥ (स्वा०-पर०-सक०-सेट्।) दन्त्यादिरयमध्यः। म, सिस्थगयिषति। ए, अस्थगीत्। इति दुर्गादासः।

स्थगः, त्रि, (स्थगति संहृणोति आत्मानमिति। स्थग + अच्।) धूर्त्तः। यथा,—

"धूर्त्ते स्थगश्च निर्लज्जः पटुः पाटविकोऽपि च॥"

इति शब्दरत्नावली त्रिकाण्डशेषश्च॥

स्थगनं, क्ली, (स्थग + ल्युट्।) अपवारणम्। यथा,—

"व्यवधानं तिरोधानमन्तर्हितं स्वपवारणम्।
छदनं व्यवधानन्तर्ह्यपिधानस्थगनानि च॥"

इति हेमचन्द्रः॥

स्थगितं, त्रि, (स्थग + क्तः।) तिरोहितम्। तत्पर्य्यायः। संवीतम् २ रुद्धम् ३ आहतम् ४ संहृतम् ५ पिहितम् ६ छन्नम् ७ अपवारितम् ८ अन्तर्हितम् ९ तिरोधानम् १०। इति हेमचन्द्रः॥ (यथा, किराते। १४। ३१।

"उदूढवत्सः स्थगितैकदिङ्मुखो
विकृष्टविस्फारितचापमण्डलः॥")

स्थगी, स्त्री, (स्थग्यतेऽनयेति। स्थग + घञर्थे कः। गौरादित्वात् ङीष्।) ताम्बूलपात्रम्। पानेर वाटा इति भाषा। तत्पर्य्यायः। ताम्बूलकरङ्कः २। इति हेमचन्द्रः॥

स्थगु, क्ली, गडुः। कुज् इति भाषा। यथा,—

"हृदये ते निविष्टास्ता भूयस्यान्याः सहस्रशः।
तदेव स्थगु यद्दीर्घं रथघोणमिवायतम्॥
लब्धार्था च प्रतीता च लेपयिष्यामि ते स्थगु।
मुखे च तिलकं चित्रं जातरूपमयं शुभम्॥"

इति रामायणे अयोध्याकाण्डे ९ सर्गः॥

स्थण्डिलं, क्ली, (तिष्ठत्यस्मिन्निति। स्था + सिथिलादयश्चेति इलच्प्रत्ययेन निपातनात् साधुः।) चत्वरम्। इत्यमरः। २। ७। १८॥ हे वेदीरभितोऽन्यच्च वा यज्ञार्थं परिष्कृतायामनिम्नोन्नतायां विस्तृतायां भूमौ। असवाधेन तिष्ठन्त्यत्र स्थण्डिलं नास्तीति डिण्डिलः। चत्वते निवासाय याचते चत्वरं चते अ याचे पूर्व्वेण वरः। इति भरतः॥ यथा च।

"यज्ञे परिष्कृतस्थाने स्यातां स्थण्डिलचत्वरे।"

इति शब्दरत्नावली॥ *॥

होमनिमित्तान्निस्थापनार्थं स्थण्डिलविधिर्यथा, वशिष्ठसंहितायाम्।

"तस्मात् सम्यक् परीक्ष्यैवं कर्त्तव्यं शुभवेदिकम्।
हस्तमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्म्मणि॥"

क्रियासारेऽपि ।
"कृष्णमेवंविधं न स्यात् स्थण्डिलं वा समाश्रयेत् ॥"
शारदातिलकेऽपि ।
'नित्यं नैमित्तिकं काम्यं स्थण्डिले वा समाचरेत्
हस्तमात्रन्तु तत् कुर्य्यात् चतुरस्रं समन्ततः ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
अपि च । गोभिलः । अनुगुप्ता अप आहृत्य प्रागुदक्प्लवनं देशं समं वा परिसमूह्य उपलिप्य मध्यतः प्राचीं रेखामुल्लिख्य उदीचीञ्च संहतां पश्चान्मध्ये प्राचीमुल्लिख्याभ्युच्चयेत् लक्षणाहदेशा सर्व्वत्रेति । अनुगुप्ता आच्छादिताः । पतितादिभिरदृष्टा इति यावत्॥ प्राङ्नीचादिफलमाह गृह्यासंग्रहे गोभिलपुत्रः ।
"प्राङ्नीचं ब्रह्मवर्च्चस्यमुदङ्नीचं यशोत्तमम् ।
प्रियं दक्षिणतो नीचं प्रतिष्ठालक्षकं समम् ॥"
यशोत्तममित्यत्र सान्ता अप्यदन्ता इत्यत्तरदन्तोऽपि यशश्चन्दः गयाशिरः इतिवत् । परिसमूह्य सर्व्वतः कुशैः पांश्वादिकमपसार्य्य उत्तरस्यां दिशि साईहस्तोपरि क्षिपेत् । परिसमूह्य वितस्तित्रये उत्तरत उत्करं करोतीति हरिर्म्मश्रुतवचनात् । तत उपलेपनम् ॥*॥
तत्र कारणमाह गृह्यासंग्रहः ।
"इन्द्रेण वज्राभिहतः पुरा वृत्रो महासुरः ।
मेदसा तस्य संक्लिन्नातदर्थमुपलेपयेत् ॥"इति।
मध्यतः स्थण्डिलाभ्यन्तरे दक्षिणांशे न तु मध्यांशे उदगतैकविंशत्यङ्गुलरेखानुरोधात् । अन्यथा ॥
"कुशैः संमार्ज्जयेद्भूमिं शुद्धामादौ शुचिस्मितः ।
हस्तमात्रां चतुरस्रां गोमयेनोपलेपयेत् ॥"
इति भारद्वाजीयहस्तप्रमाणस्थण्डिले तदनुपपत्तेः । प्राचीं प्राग्गताम् । उदीचीञ्च संहतां पश्चादिति । प्राग्गतायाः पश्चिमे भागे संलग्नामुदग्गाम् । मध्ये उदग्गतायाः प्राचीः प्राग्यास्त्रिस्रो रेखा उल्लिख्याभ्युच्चयेदिति । रेखाभ्य उद्धृतमृत्तिकोद्धरणपूर्व्वकमभ्युच्चयेत् । उल्लिख्य उद्धृत्याभ्युच्चयेदिति कात्यायनसूत्रात् ॥ * ॥
उत्करप्रक्षेपदेशमाह गृह्यासंग्रहः ।
"उत्करं गृह्य रेखाभ्योऽरत्निमात्रे निधापयेत् ।
द्वारमेतत् पदार्थानां प्रागुदीच्यां दिशि स्मृतम्
इति ॥
परिसमूहनादिपरिवेषान्तं कर्म्म लक्षणसंज्ञकं तस्य लक्षणस्याहृत प्रक्रिया सर्व्वत्र यत्र यत्राग्निप्रणयनं तत्र बोध्या ॥ * ॥ रेखाप्रमाणमाह कृष्णोगपरिशिष्टे कात्यायनः ।
"दक्षिणे प्राग्गतायास्तु प्रमाणं द्वादशाङ्गुलम्
तन्मूललग्ना यौदीची तस्या एवं नवोत्तरम् ॥
उदग्गतायाः संलग्नाः शेषाः प्रादेशमात्रिकाः ।
समसप्ताङ्गुलांस्त्यक्त्वा कुशेनैव समुल्लिखेत् ॥"
नवोत्तरं नवाधिकं द्वादशाङ्गुलमेकविंशत्यङ्गुलमित्यर्थः । शेषाः उत्तरेखात्रयोरवशिष्टास्तिस्रः ।
कुशेन इति सर्व्वत्राभिसम्बध्यते । एवकारेण शाखान्तरोक्तस्य व्यावृत्तिः ॥ * ॥ रेखाणां देवता वर्णांश्चाह स्मृतिः ।
"प्राग्गता पार्थिवी ज्ञेया चाग्नेयी चापुरुद्गता ।
प्राजापत्या तथा चैन्द्री सौमी च प्राक्कृता स्मृता ॥
पार्थिवी पीतवर्णा स्यादाग्नेयी लोहिता भवेत्
प्राजापत्या भवेत् कृष्णा नीला चैन्द्री प्रकीर्त्तिता ॥
श्वेतवर्णेन सौमी स्यात् रेखाणां वर्णलक्षणम्॥"
अग्निस्थापनपर्य्यन्तं सव्यहस्तप्रादेशस्य विधानमाह । गृह्यासंग्रहः ।
"सव्यं भूमौ प्रतिष्ठाप्य प्रोल्लिखेदक्षिणेन तु ।
तावन्नोत्थापयेत् पाणिं यावदग्निं निधापयेत्॥"
मानकर्त्तारमाह छन्दोगपरिशिष्टे कात्यायनः।
"मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि ।
मानकृदयजमानः स्यादिदुषामेष निश्चयः ॥"
अङ्गुष्ठाङ्गुलिमानमाह स एव ।
"अङ्गुष्ठाङ्गुलिमानन्तु यत्र यत्रोपदिश्यते ।
तत्र तत्र कृतज्ञैस्तन्मध्यपर्व्वभिर्म्मितुयात् सदा ॥"
यजमानासन्निधौ होमे तु साधारणाङ्गुलिमानम् । यथा कपिलपञ्चरात्रम् ।
"अष्टभिस्तैर्भवेज्ज्येष्ठं मध्यमं सप्तभिर्यवैः ।
कन्यसं षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तमैः ॥"
तैः प्रक्रम्यमाणयवैः । कन्यसं कनिष्ठम् । मानन्तु पार्श्वेन । षड्यवाः पार्श्वसंमिताः । इति कात्यायनवचनात् । इति संस्कारतत्त्वम् ॥
स्थण्डिलशायी, [न्] पुं, (स्थण्डिले शेते इति । शी + "व्रते ।" ३ । २ । ८० ।) यो व्रतवशात् स्थण्डिले शेते सः । तत्पर्य्यायः । स्थाण्डिलः २। इत्यमरः । २।७।४४ ॥ स्थण्डिलेशयः ३ । इति शब्दरत्नावली ॥ (वाचस्त्रिष्वपि वर्त्तते । यथा, भट्टिः । ३ । ४१ ।
"वाचंयमान् स्थण्डिलशायिनश्च
युयुक्षमाणानभिगम्य मुमुक्षून् ।
अध्यापयन्तं विनयात् प्रणेमुः
पद्मा भरद्वाजमुनिं सशिष्यम् ॥")
स्थण्डिलसिकतं, क्ली, (स्थण्डिले सिकता यत्र ।) वेदिः । इति हारावली ॥
स्थण्डिलेशयः, पुं, (स्थण्डिले शेते इति । शी + अच् । अलुक्समासः ।) स्थण्डिलशायी । इति शब्दरत्नावली ॥ (वाचस्त्रिष्वपि प्रयुज्यमिति केचित् ॥ यथा, भागवते । ४ । २३ । ६ ।
"आकण्ठमग्नः शिशिरे उदके स्थण्डिलेशयः॥")
स्थपतिः, पुं, (तिष्ठन्त्यस्मिन्निति । स्था + कः । स्थः स्थानम् । तं पातीति । पा + बाहुलकात् अतिः इत्युणादिवृत्तौ उज्ज्वलः । ४ । ५८ ।) गौण्यतौष्टियज्वा । हृदयतिसवननामकयागकर्त्ता । कारुभेदः । राज इति भाषा । इत्यमरः । २ । ७ । ६० ॥ कारुः शिल्पी तद्भेदे यद इति ख्याते । स्थपतिः कारुभेदो मुख्यतक्षेति स्वामी । हृदयतियाग-
याजिनि कुक्कुटिनि च । इति भरतः ॥*॥ तस्य लक्षणं यथा,—
"वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः ।
दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्त्तितः ॥"
इति मात्स्ये । २१५ । ३८ ॥
कक्षुकी । इति मेदिनी ॥ कुबेरः । 'इत्यजयपालः ॥ अधीशः । इति हेमचन्द्रः ॥ (यथा, रामायणे । २ । ५२ । ५ ।
"स तु रामस्य वचनं निशम्य प्रतिगृह्य च ।
स्थपतिस्तूर्णमाहूय सचिवानिदमब्रवीत् ॥")
स्थपतिः, त्रि, (तिष्ठन्ति स्वधर्म्मे इति स्थाः सन्तस्तेषां पतिः ।) सत्तमः । इति मेदिनी ॥
स्थपुटः, त्रि, विषमसंस्थानजीवी । इति त्रिकाण्डशेषः ॥ विषमोन्नतम् । इति हेमचन्द्रः ॥
स्थल, ऊस्थाने । इति कविकल्पद्रुमः ॥ (स्वा०पर० अक०-सेट् ।) ऊ, स्थालः स्थलः । तिस्थालयिषति । अयं नास्तीति केचित् । इति दुर्गादासः ॥
स्थलं, क्ली, स्त्री, (स्थल + अच् ।) जलशून्याकृत्रिमभूभागः । तत्पर्य्यायः । स्थली २ । इत्यमरः । २ । १ । ५ । स्थत्यते स्थीयतेऽत्र स्थलं स्थलज स्थाने अल् । एवं स्थली नारी सखी इत्यादिना अकृत्रिमत्वे ऽपि स्त्री निपात्यते कृत्रिमत्वे तु भावेव स्थला । कृत्रिमाकृत्रिमसामान्ये तु स्थलं प्रयुज्यते । इति हेमाः । स्थलशब्दः स्त्रीनपुंसकलिङ्गः । इति भरतः ॥ (यथा, मनुः । ७ । १८२ ।
"स्थन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः स्थले ॥"
यथा च तैत्तिरीयसंहितायाम् । १ । ६ । १० । ५ ।
"यज्ञो यजमानाय वर्षति स्थलयोदकं परिगृह्णन्ति ॥")
स्थलं, क्ली, (स्थल + अच् ।) जलशून्यकृत्रिमाकृत्रिमभूभागः । इत्यमरटीकायां भरतः । २ । १ । ५ । (स्थानमात्रम् । यथा, रघुः । ५ । ५२ ।
उवाच वाग्मी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः ॥")।
वस्त्रगृहम् । यथा,—
"पटवासः पटमयं दूष्यं वस्त्रगृहं स्थलम् ॥"
इति त्रिकाण्डशेषः ॥
स्थलकन्दः, पुं, (स्थलजातकन्दः ।) पद्माख्य कन्दः । इति रत्नमाला ॥ वनपोल इति भाषा ॥
स्थलकमलं, क्ली, (स्थलस्थं कमलम् ।) स्थलपद्मम् । (यथा, गीतगोविन्दे । १० । ७ ।
"स्थलकमलगञ्जनं मम हृदयरञ्जनं
जनितरतिरङ्गपरभागम् ॥")
तत्पर्य्यायः । पद्मचारिणी २ अतिचरा ३ व्यथा ४ पद्मा ५ चारटी ६ । अस्य गुणाः । अनुष्णत्वम् । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । कफवातमूत्रकृच्छ्राश्मगुल्मश्वासकासविषापहत्वम् । इति भावप्रकाशः ॥

स्थलकुमुदः, पुं, (स्थलस्य कुमुदः।) करवीरः। इति राजनिर्घण्टः॥

स्थलपद्मं, क्लो, (स्थलस्य पद्मम्।) स्वनामख्यातपुष्पविशेषः। (यथा, भट्टिः। २। ३।

"विभ्वागतैस्तीरवनैः समृद्धिं
निजां विलोक्यापगतां पयोभिः।
कूलानि सामर्षतयेव तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः॥")

तत्पर्य्यायः। क्षत्रपत्रम् २ तमालकम् ३। इति त्रिकाण्डशेषः॥ तच्चतुर्व्विधं यथा,—

"चतुर्था स्थलपद्मानि सेवन्ती गुलदावदी।
नैपाली च गुलाबश्च वकुलश्च कदम्बकः॥"

इति रावणकृतार्कप्रकाशः॥

स्थलपद्मः, पुं,(स्थलजातः पद्म इव।) मानकः। इति रत्नमाला॥ मानकचु इति भाषा॥ (यथा,—

"स्थलपद्ममयं कल्कं पयसा लोध्र पाययेत्।
श्लीहामयहरश्चैव सर्व्वाङ्गैकाङ्गशोथजित्॥"

इति वैद्यकचक्रपाणिसंग्रहे शोथाधिकारे॥)

स्थलपद्मिनी, स्त्री, (स्थलस्य पद्मिनी।) स्थलपद्मम्। वेटतामर इति हिन्दी भाषा। तत्पर्य्यायः। पद्माक्षा २ चारटी ३ पद्मचारिणी४ सुगन्धमूला ५ अम्बुरुहा ६ लक्ष्मीः ७ श्रेष्ठा ८ सुपुष्करा ९ रम्या १० पद्मावती ११ अतिचरा १२ स्थलरुहा १३ पुष्करिणी १४ पुष्करपर्णिका १५ पुष्करनाड़ी १६। अस्या गुणाः। गौरत्वम् तिक्तत्वम्। शीतत्वम्। वान्तिरक्तपित्तमेहभूतातीसारनाशित्वञ्च। इति राजनिर्घण्टः॥

स्थलमञ्जरी,स्त्री,(स्थलस्य मञ्जरी।)अपामार्गः। इति रत्नमाला॥

स्थलशृङ्गाटः, पुं, (स्थलजातः शृङ्गाटः।) गोक्षुरद्वयः। इति रत्नमाला॥

स्थलशृङ्गाटकः, पुं, (स्थलशृङ्गाट एव। स्वार्थे कन्।) गोक्षुरकः। इति राजनिर्घण्टः॥

स्थलसीमा,[न्]पुं,(स्थलस्य सीमा।) स्थण्डिलः। इति भूरिप्रयोगः॥

स्थली, स्त्री, (स्थल+टाप्।) जलशून्याकृत्रिमभूमिः। इत्यमरटीकायां भरतः। २। १। ५॥ (अस्याः प्रमाणं स्थलशब्दे द्रष्टव्यम्॥)

स्थली, स्त्री, (स्थल+ङीष्।) जलशून्याकृत्रिमा भूमिः। इत्यमरटीकायां भरतः। २। १। ५। (यथा, साहित्यदर्पणे।

"सैषा स्थली यत्र विचिन्वता त्वां
भ्रष्टं मया नूपुरमेकमूर्व्वोः।
अदृश्यत त्वच्चरणारविन्द-
विश्लेषदुःखादिव बद्धमौनम्॥")

स्थलीदेवता,स्त्री,(स्थल्या देवता।) ग्राम्यदेवता। इति केचित्॥

स्थलेरुहा, स्त्री,(स्थले रोहतीति। रुह+कः।) गृहकुमारी। दग्धाङ्गुलः। इति राजनिर्घण्टः॥ स्थलजाते, त्रि॥

स्थलेशयः,पुं,(स्थले शेते इति। इति शी+अच्।) क्रोड़रुरुकुरङ्गादयः। इति राजनिर्घण्टः॥ स्थलशायिनि, त्रि॥

स्थविः, पुं,(तिष्ठतीति। स्था+"क्रविष्ठ्वीति।" उणा० ४। ५६। इति क्विन्प्रत्ययेन साधुः।) तन्तुवायः। स्वर्गः। जङ्गमः। इति संक्षिप्तसारोणादिवृत्तिः॥

स्थविरं, क्लो,(स्था+"अजिरशिशिरेति।"उणा० १। ५४। किरच्प्रत्ययेन साधुः।) शैलेयम्। इति राजनिर्घण्टः॥

स्थविरः, पुं, (स्था+किरच्।) ब्रह्मा। इति हेमचन्द्रः॥

स्थविरः, त्रि, (तिष्ठतीति। स्था+"अजिरशिशिरेति।" उणा० १। ५४। इति किरच्प्रत्ययेन साधुः।) वृद्धः। इत्यमरः। २। ६। ४२॥ (यथा, मनुः। २। १२०।

"ऊर्द्धं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते॥"

भिक्षुः। इत्युणादिवृत्तौ उज्ज्वलदत्तः॥१।४५॥) अचलः। इत्युणादिकोषः॥

स्थविरा, स्त्री, (स्था+किरच्। टाप्।) महाश्रावणी। इति राजनिर्घण्टः॥ वृद्धा च॥

स्थविष्ठः, त्रि, (अयमेषामतिशयेन स्थूलः। स्थूल+इष्ठन्। "स्थूलदूरेति।" ६। ४। १५६। इति साधुः।) अतिशयस्थूलः। इत्यमरः।३। २। १११॥ (यथा, भागवते। २। १। २४।

"विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम्॥"

स्थाणुः,पुं,(तिष्ठतीति। स्था+"स्थोणुः।"उणा० ३। ३७। इति णुः।) शिवः। इत्यमरः। १। १। ३६॥ (यथा, रघुः। ११। १३।

"स्थाणुदग्धवपुषस्तपोवनं
प्राप्य दाशरथिरात्तकार्म्मुकः।
विघ्नहेतुमदनस्य चारुणा
सोऽभवत् प्रतिनिधिर्न कर्म्मणा॥")

तन्नामकारणं यथा,—

"समुत्तिष्ठन् जलात्तस्मात् प्रजास्ताः सृष्टवानहम्
ततोऽहं ताः प्रजा दृष्ट्वा रहिता एव तेजसा॥
क्रोधेन महता युक्तो लिङ्गमुत्पाट्य चाच्युतम्।
उत्तिष्ठं सरसो मध्ये ऊर्द्धमेव यदा स्थितम्।
तदा प्रभृति लोकेषु स्थाणुरित्येव विश्रुतम्॥"

इति वामने ४६ अध्यायः॥

(ब्रह्मा। यथा, महाभारते। १। १। ३२।

"यस्मात् पितामहो जज्ञे प्रभुरेकः प्रजापतिः।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ॥")

कीलः। इति मेदिनी॥ जीवकगन्धद्रव्यम्। यथा,

"जीवके जीवनो जीवो निधिः स्थाणुः प्रकोर्त्तितः॥"

इति शब्दचन्द्रिका॥

स्थाणुः, पुं, क्लो. (स्था+णुः।) निःग्राखवृक्षः। मुड़ा गाछ इति भाषा॥ (यथा, देवीभागवते। १। १७। ५३।

"छायायामातपे चैव समदर्शी महातपाः।
ध्यानं कृत्वा तथैकान्ते स्थितः स्थाणुरिवाचलः॥")

तत्पर्य्यायः। ध्रुवः२ शङ्कुः३। इत्यमरः।२।४।८॥ अशाखवृक्षः ४। इति जटाधरः॥ अस्त्रभेदः। इति नीलकण्ठः॥

स्थाणुः,त्रि,(स्था+णुः।) स्थिरः। इति धरणिः॥ (यथा, विष्णुपुराणे। १। ५। ५८।

"अव्ययश्च व्ययश्चैव यदिदं स्थाणुजङ्गमम्।
तत् ससर्ज्ज तदा ब्रह्मा भगवानादिकृत् विभुः॥"

स्थाणुतीर्थं, क्लो,(स्थानोस्तीर्थम्।)तीर्थविशेषः। यथा, वामने ४३ अध्याये।

"स प्रोवाच महादेवो ब्रह्माणं प्रणतस्थितम्।
पुण्यप्रदं नृणाञ्चैव तीर्थमाहात्म्यमुत्तमम्॥
एतत् सन्निहितं प्रोक्तं सरः पुण्यप्रदं महत्।
स्थाणुलिङ्गस्य माहात्म्यं ब्रह्मन् मेऽवहितः शृणु॥
अचेतनः सचेता वा अज्ञो वा प्राज्ञ एव वा।
लिङ्गस्य दर्शनादेव मुच्यते सर्व्वपातकैः॥
पुष्करादीनि तीर्थानि समुद्रचरणानि च।
स्थाणुतीर्थे समेष्यन्ति मध्यं प्राप्ते दिवाकरे॥
तत्र स्थास्यति यो ब्रह्मन् माञ्च स्तोष्यति भक्तितः।
तस्याहं सुलभो नित्यं भविष्यामि न संशयः॥
इत्येवमुक्त्वा वचनं देवदेवो गतः प्रभुः।
देवाश्च ऋषयः सर्व्वे स्वानि स्थानानि भेजिरे॥
ततः प्रभृति लोकेऽस्मिन् स्थाणुतीर्थं वदन्ति हि॥"

स्थाण्डिलः, पुं, (स्थण्डिले शयितुं व्रतमस्य। स्थण्डिल+"स्थण्डिलात् शयितरि व्रते।" ४॥ २। १५। इति अण्।) स्थण्डिलशायी। इत्यमरः।२।७।४५॥(वाच्यलिङ्गोऽयमिति केचित्॥)

स्थाण्वीश्वरः, पुं, (स्थाणुरीश्वरः।) शिवलिङ्गविशेषः। यथा,—

"स्थाणुर्नाम्ना हि लोकेषु पूजनीयो दिवौकसाम्
स्थाणुरीश्वरः स्थितो यस्मात् स्थाण्वीश्वरस्ततः स्मृतः॥
ये स्मरन्ति सदा स्थाणुं ते मुक्ताः सर्व्वकिल्बिषैः।
भविष्यन्ति शुद्धदेहा दर्शनान्मोक्षगामिनः॥
इत्येवमुक्त्वा देवेन ऋषयो ब्रह्मणा सह।
तस्माद्दारुवनं लिङ्गं नेतुं समुपचक्रमुः॥"

इति वामने ४२ अध्यायः॥

स्थातव्यं,त्रि,(स्था+तव्य।) स्थेयम्। स्थानीयम्। यथा, कालिदासकृतशृङ्गारतिलके।

"वाणिज्येन गतः स मे गृहपतिर्वार्त्तापि न श्रूयते
प्रातस्त्वज्जननी प्रसूततनया जामाद्यगेहं गता।
बालाहं नवयौवना निशि कथं स्थातव्यमस्मद्गृहे
सायं सम्प्रति वर्त्तते पथिक हे स्थानान्तरं गम्यताम्॥"

स्थानं,क्लो, (स्था+ल्युट्।) नीतिवेदिनां त्रिवर्गान्तर्गतवर्गविशेषः। इत्यमरः।२। ८। १८॥

नीतिवेदिनां नीतिशास्त्रज्ञानां क्षयादिभिस्त्रिवर्गः। अन्येषान्तु धर्म्मकामार्थैः पूर्व्वमुक्तः। अष्टवर्गस्योपचयः क्षयः। तस्यैवोपचयो वृद्धिः। तस्य नोपचयो नापापचयः स्थानम्। अष्टवर्गो यथा,—

"क्षपिर्व्वणिक्पण्यो दुर्गं सेतुकुञ्जरबन्धनम्।
कन्याकरबलादानं सैन्यानाञ्च निवेशनम्॥
अष्टवर्गः स्मृतो राज्ञामिति————॥"

इति भरतः॥ * ॥

सादृश्यम्। अवकाशः। स्थितिः। इति मेदिनी। (यथा, मनुः। ६। २२।

"स्थानासनाभ्यां विहरेत् सवनेषूपयत्नवः॥") सन्निवेशः। इति हेमचन्द्रः॥ वसतिः। इति चतुर्थकाण्डे हेमचन्द्रः॥ यथाह कश्चित्।

"स्थानं प्रधानं न बलं प्रधानं
स्थानस्थितः कापुरुषोऽपि सिंहः॥")

यत्यसन्धिः। इति त्रिकाण्डशेषः॥ भाजनम्। इति हलायुधः॥ निकटम्। यथा,—

"त्वमत्र कृत्तिकास्थाने कथयामासुरीश्वर।
सर्व्वे धर्म्मादयो देवा धर्म्माधर्म्मस्य साक्षिणः॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे। १५।१६॥

अपि च।

"एते ह्यपत्यास्तस्यैते धारयन्ति चराचरम्।
पुरा मद्वचनैः सिद्धस्तत्स्थाने इति मे श्रुतम्॥"

इति वामने ३० अध्यायः॥*॥

स्वधर्म्मानुष्ठायिनां असम्यग्वर्त्तिनाञ्च स्थानविशेषप्राप्तिर्यथा,—

"वर्णानामाश्रमाणाञ्च सम्यग्धर्म्मानुपालिनाम्
असम्यग्वर्त्तिनां लोकान् ब्रह्मा चक्रे यथा च यत्
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम्
क्षत्रियाणां तथा चेन्द्रं संग्रामेष्वनुवर्त्तिनाम्॥
वैश्यानां मारुतं स्थानं स्वधर्म्मेष्वनुवर्त्तिनाम्।
गान्धर्व्वं शूद्रजातीनां परिचर्य्यानुकारिणाम्॥
अष्टाशीतिसहस्राणां यतीनामूर्द्ध्वरेतसाम्।
स्मृतं तेषान्तु यत् स्थानं तदेव गुरुवासिनाम्॥
सप्तर्षीणाञ्च यत् स्थानं स्मृतं तद्वत् वनौकसाम्।
प्राजापत्यं गृहस्थानां गृहधर्म्मानुवर्त्तिनाम्॥
न्यासिनान्तु परं ब्रह्म योगिनाममृतं स्मृतम्।
एकान्तवासिनां ब्रह्मध्यायिनां परमं पदम्॥
तामिस्रमन्धतामिस्रं महारौरवरौरवम्।
असिपत्रवनं घोरं कालपत्रमवीचिमत्॥
वेदस्य निन्दकानान्तु यज्ञव्याघातकारिणाम्।
स्थानमेतत्समाख्यातं स्वधर्म्मविनिवर्त्तिनाम्॥"

इति वह्निपुराणे सर्गकथननामाध्यायः॥

स्थानकं, क्ली, स्थानमिव। कन्। स्थाने कं जलं यत्रेति वा।) आलवालम्। इति हेमचन्द्रः॥ नगरम्। फेनम्। इति केचित्॥ (स्थानमेव। स्वार्थे कन्। स्थानशब्दार्थोऽपि। यथा, महाभारते। १३। २६। ८४।

तत् स्थानकं ब्राह्ममभीप्समानै-
र्गङ्गा सदैवात्मवशैरुपास्या॥")

स्थानचञ्चला, स्त्री,(स्थाने चञ्चला।)वर्व्वरीवृक्षः इति शब्दचन्द्रिका॥

स्थानच्युतः, त्रि,(स्थानात् च्युतः।) स्थानभ्रष्टः। यथा, गारुडे। ११। ७१।

"स्थानस्थितस्य पद्मस्य मित्रौ वरुणभास्करौ।
स्थानच्युतस्य तस्यैव क्लेदशोषणकारकौ॥"

स्थानपालः, पुं, स्थानं पालयति यः। (स्थान+पालि+अण्।) स्थानरक्षकः। (यथा, याज्ञवल्क्ये। २। १७६।

"शौल्किकैः स्थानपालैर्व्वा नष्टापहृतमाहृतम्
अर्व्वाक् संवत्सरात् स्वामी हरेत परतो नृपः॥"

स्थानभ्रष्टः, त्रि, (स्थानात् भ्रष्टः।) पदच्युतः। यथा,—

"स्थानस्थितानि पूज्यन्ते पूज्यन्ते च पदस्थिताः
स्थानभ्रष्टा न पूज्यन्ते केशा दन्ता नखा नराः॥

इति गारुडे। ११५। ७३।

स्थानाध्यक्षः, पुं, (स्थानस्य अध्यक्षः।) स्थानरक्षकः। तत्पर्य्यायः। स्थानिकः २। इति हेमचन्द्रः॥

स्थानिकः, पुं, (स्थानमस्येति। ठन्।) स्थानाध्यक्षः। इति हेमचन्द्रः॥

स्थानी, [न्] त्रि, स्थानविशिष्टः। स्थानं विद्यतेऽस्य इत्यर्थे इन्प्रत्ययेन निष्पन्नः। यथा, स्थानिवदादेशः। इति मुग्धबोधव्याकरणम्॥

स्थानीयं, क्ली. (स्थानाय हितमिति। स्थान+छः) नगरम्। इत्यमरः। २। २। १॥ स्थानसम्बन्धिनि, त्रि॥

स्थाने, व्य. योग्यम्। (यथा, रघुः। ५। १६।

"स्थाने भवानेकनराधिपः स-
नकिञ्चनत्वं मखजं व्यनक्ति॥")

कारणार्थः। सादृश्यम्। सत्यम्। इति शब्दरत्नावली॥

स्थापकः, त्रि, (स्थापयतीति। स्था+णिच्+ण्वुल्।)स्थापनकर्त्ता। आन्तस्याधातोर्णकप्रत्ययेन निष्पन्नः॥

स्थापत्यः, पुं, (स्थपतिरेव। स्थपति+अञ्।) अन्तःपुररक्षकः। इत्यमरः।२।८।८॥ स्थपतेर्भावे, क्ली॥

स्थापनं क्ली, (स्था+णिच्+ल्युट्।) रोपणम्। पुंसवनम्। इति मेदिनी॥ समाधिः। इति विश्वः॥ (पादादिपिण्डीकरणम्। इति श्रीधरस्वामी॥ यथा, भागवते। १०। ४४। ५।

"उत्थापनैरुत्थयनैर्वालनैः स्थापनैरपि।
परस्परं जिगीषन्तावपचक्रतुरात्मनः॥"

स्थापना, स्त्री, (स्था+णिच्+युच्+टाप्।) स्थापनम् निवेशनम्। (यथा, महाभारते। १२। २८१। २४।

"स्थापना वै सुमहती त्वया देव प्रवर्त्तिता॥"

विचाराङ्गविशेषः। तद्यथा,—

"अथ स्थापना। स्थापना नाम तस्या एव प्रतिज्ञाया हेतुभिर्दृष्टान्तोपनयनिगमैः स्थापना पूर्व्वं हि प्रतिज्ञा पश्चात् स्थापना किञ्चप्रतिज्ञातं स्थापयिष्यति यथा नित्यः पुरुष इति प्रतिज्ञा हेतुरकृतकत्वात् इति। दृष्टान्तः यथा, अकृतकमाकाशं तच्च नित्यम्। उपनयो यथा, चाकृतकमाकाशन्तथा पुरुषः। निगमनन्तस्मान्नित्यइति।"इति चरके विमानस्थानेऽध्याये॥

स्थापनी, स्त्री,(स्थाप्यतेऽनयेति। स्था+णिच्+ल्युट्। ङीप्।) पाठा। इति मेदिनी अमरश्च। २। ४। ८४॥

स्थापितं, त्रि, (स्था+णिच्+क्तः।) निश्चितम्। न्यस्तम्। इति मेदिनी॥ (यथा,देवीभागवते। २। ८। ४३।

"मणिमन्त्रधराः शूराः स्थापितास्तत्र रक्षणे॥")

स्थाम, [न्] क्ली, (तिष्ठत्यनेनेति। स्था+सर्व्वधातुभ्यो मनिन्।" उणा० ४। १४४। इति मनिन्।)सामर्थ्यम्। इत्यमरः। २। ८। १०२॥ (नादः। यथा, महाभारते। १। १३१। २४।

"अश्वस्येवास्य यत् स्थाम नदतः प्रदिशो गतम्।
अश्वत्थामेव बालोऽयं तस्मान्नाम्ना भविष्यति॥"

स्थायिभावः, पुं, (स्थायी भावः।)रसस्य त्रिधाभावान्तर्गतभावविशेषः। यथा,—

"सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते॥
न भावहीनोऽस्ति रसो न भावो रसवर्ज्जितः।
परस्परकृता सिद्धिरनयो रसभावयोः॥"

इत्युक्तदिशा परमालोचनया परमविश्रान्तिस्थानेन रसेन सहैव वर्त्तमाना अपि राजानुगतविहारप्रवृत्तभृत्यवत् आपाततो यत्र प्राधान्येनाभिव्यक्ता व्यभिचारिणः देवमुनिगुरुनृपादिविषया रतिः उद्बुद्धमात्रावित्यादिभिरपरिपुष्टतया रसतामनापाद्यमानाश्च स्थायिनो भावा भावशब्दवाच्याः। उद्बुद्धमात्रस्थायीभावो यथा,—

"ईषत्तु किञ्चित् परिहृत्य धैर्य्यं
चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि॥"

अत्र पार्व्वतीविषया भगवतो रतिः। इति साहित्यदर्पणे रसभावादिनिरूपणो नाम ३ परिच्छेदः॥

स्थायी, [न्] पुं, (तिष्ठतीति। स्था+णिनिः।) भावभेदः। यथा,—

"स्थायिसात्त्विकसञ्चारिप्रभेदैः स्याद्रतिः पुनः॥"

इति हेमचन्द्रः॥

(यथा, साहित्यदर्पणे। ३। २०५—२०७।

"अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।
आस्वादाङ्कुरकन्दोऽसौ भावःस्थायीति सम्मतः॥

यदुक्तम्।

सकलसूचकहेतुतया भावानामन्येषामनुगामुकः।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम्॥

तद्भेदानाह।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति सप्तैते प्रोक्ताः समोऽपि च॥

तत्र
रतिर्मनोऽनुकूलेऽर्थे मनसः प्रवणायितम्।
वागादिवैक्लवोद्रेकोविकासो हास इष्यते॥
इष्टनाशादिभिर्यत्तो वेक्लव्यं शोकशब्दभाक्।
प्रतिकूलेषु तैक्ष्ण्यात्मावबोधः क्रोध इष्यते॥
कार्य्यारम्भेषु संरम्भः स्थैर्यानुत्साह उच्यते।
रौद्रश्चक्षा तु जनितं चित्तवैक्लव्यदं भयम्॥
दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा।
विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु॥
विस्कारश्चेतसो यस्तु स विस्मय उदाहृतः।
शमो निरीहावस्थायामात्मविश्रामजं सुखम्॥
यथा मालतीमाधवे रतिः। नटकमेलके हासः।
रामायणे शोकः। महाभारते शमः। एवमन्येऽपि। एते हि एतेष्वन्तरा उत्पद्यमानैस्तैस्तैर्विरुद्धैरविरुद्धैश्च भावैरनुच्छिन्नाः प्रत्युत परिपुष्टा एव स्वहृदयानुभवसिद्धाः॥"*॥) स्थितिविशिष्टे, त्रि॥ (तथा, महाभारते। ६।३।२६।
"संवत्सरस्थायिनौ च ग्रहौ प्रज्वलितावुभौ॥")

स्थायुकः, पुं, (स्थातुं शीलमस्य। स्था+"लषपतपदेति।"३।२।१५४। इति उकञ्।) एकग्रामाधिकृतः एकस्मिन् ग्रामे नियोजितः। इत्यमरः। २। ८। ७॥ (स्थितिशीले, त्रि। यथा, भट्टिः। २। २२।
"आयोधने स्थायुकमस्त्रजात-
ममोघमभ्यर्णमहाहवाय।
ददौ वधाय क्षणदाचराणां
तस्मै मुनिः श्रेयसि जागरूकः॥")

स्थालं, क्ली, (तिष्ठत्यस्मिन् अन्नादिकमिति स्था+"स्थाचतिमूजेरिति।" उणा० १। ११५। इति आलच्।) ईषादिकृतभोजनपात्रम्। थाल इति भाषा। इत्यमरः। ३।५। ३२॥ स्थलति तिष्ठति अन्नादिकमत्र स्थालं स्थल ज स्थाने घञ्। इति भरतः॥ (अस्थिविशेषः। यथा, याज्ञवल्क्यः। ३। ८५।
"स्थालैः सह चतुःषष्टिर्हण्डा वै विंशतिर्नखाः॥"
"स्थालानि दन्तमूलप्रदेशस्थान्यस्थीनि।" इति तत्र मिताक्षरा॥)

स्थाली, स्त्री, (तिष्ठन्त्यत्रान्नादीनीति। स्था+आलच्। गौरादित्वात् ङीष्। इत्युणादिवृत्तौ उज्ज्वलः। १। ११५।) पाकपात्रविशेषः। हाँड़ी इति थाली इति च भाषा। तत्पर्य्यायः। पिठरः २ उखा ३ कुण्डम् ४। इत्यमरः। २। ९। ३१॥ पिठरी ५ स्थालम् ६ उषा ७ कुण्डी ८। इति तट्टीका॥ कुण्डा ९ कुण्डिका १०। इति शब्दरत्नावली॥ पाकः ११ पातिली १२। इति जटाधरः॥ (यथा, हरिवंशे। २६। ४०।
"पूरयित्वाग्निना स्थालीं गन्धर्व्वाय तमब्रुवन्।
अनेनेष्टा च लोकाश्च प्राप्तास्ति त्वं नराधिप॥")
पाटलावृक्षः। इत्यमरटीका। २। ४। ५४॥
मेदिनी च॥

स्थालीपक्वं त्रि, (स्थाल्यां पक्वम्।) स्थाल्यां पक्वान्नादि॥

स्थालीपाकः, त्रि, (स्थाल्यां पाको यस्य।) भाजनपक्वान्नादिः। यथा, चातुर्म्मास्यव्रते माघे।
"लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन्॥"
इति तिथ्यादितत्त्वम्॥
(स्थाल्यां पच्यते इति। पच्+घञ्। स्थालीकृतपाकविशेषे, चरुविशेषे च पुं। यथा, महाभारते। ३। २३२। ३२।
"ये च धर्म्माः कुटुम्बेषु श्वश्र्वा मे कथिताः पुरा।
भिक्षाबलिश्राद्धमिति स्थालीपाकाश्च पर्व्वसु॥
मान्यानां मानसत्कारो ये चान्ये विदिता मम।
तान् सर्व्वाननुवर्त्तामि दिवारात्रमतन्द्रिता॥")
मांसाष्टकाश्राद्धे स्थालीपाकस्य मांसप्रतिनिधित्वं यथा, "पशुभावे स्थालीपाकेन यथा गोभिलः। 'अपि वा स्थालीपाकं कुर्व्वीत इति।' तद्विधानन्तु।
"स्थालीपाकं पशुस्थाने कुर्य्यादद्यानुकल्पिकम्।
अपयेत्तं सवत्सायास्तरुण्या गोः पयस्यनु॥"
इति छन्दोगपरिशिष्टोक्तं ग्राह्यम्। अन्विति ओदनचरोः पश्चात्।" इति तिथ्यादितत्त्वम्॥
(वैद्यकोक्तस्थालीपाकविधिर्यथा,—
अथ स्थालीपाकविधिः।
"इत्यमादित्यपाकान्ते स्थाल्यां पाकमुपाचरेत्।
स्थालीपाके फलद्राक्षामयसस्त्रिगुणोद्धृतम्॥
तस्य षोड़शिकं तोयमष्टभागावशेषितम्।
मृदुमध्यकठोराणामन्नेषामयसा समम्॥
क्वथनीयं समादाय चतुष्टी च षोड़श।
गुणानां स्राव्यते तोयं श्रेष्ठवैद्यसा समम्॥
खरसस्यापि लौहेन स्थालीपाके समानता।
स्थाल्यां क्वाथादिकं दत्त्वा यथाविधिविनिर्म्मितम्
पाकेन चोयते यस्मात् स्थालीपाक इति स्मृतः॥
हस्तिकर्णपलाशस्य मूलञ्च शतमूलिका॥
भृङ्गराजाख्यराजानमेषां निजरसैः सह।
मिलित्वा वा विधातव्यं स्थालीपाके फलादनु।
यथा दोषोवधेनापि स्थालीपाको विधीयते॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥)

स्थालीपुलाकः, पुं. (स्थालीस्थः पुलाको भक्तगुलिका यत्र।) न्यायविशेषः। यथा,—
"स्थालीस्थास्तण्डुला एते सर्व्वे विक्लित्तिभागिनः
समकालाग्निसंयोगभागित्वात् प्रतिपन्नवत्॥"
इति स्थालीपुलाकन्यायेन वैदिकक्लिङ्त्वावच्छेदेनापूर्व्वं शक्तिकल्पनात्। प्रतिपत्रं हस्तमर्दनादिना स्फुटितत्वेन ज्ञातम्। इति मलमासतत्त्वम्॥

स्थालीबिलं, क्ली,(स्थाल्या बिलम्।) पाकपात्रस्याभ्यन्तरम्। स्थाल्याः ग्रन्थभागः। इति सिद्धान्तकौमुदी॥

स्थालीबिलीयः, स्थालीबिल्यः, त्रि, (स्थालबिलमर्हतीति। "स्थालीबिलात्।" ५।१।७०। इति छः यच्।) पाकयोग्यतण्डुलादिः। यथा, स्थालीबिलीयास्तण्डुलाः। स्थालीबिल्याः पाकयोग्या इत्यर्थः। इति सिद्धान्तकौमुदी॥

स्थालीवृक्षः, पुं, (स्थालीवत् वृक्षः।) तरुभेदः। वेलियापोपर इति हिन्दी भाषा। तत्पर्य्यायः। नन्दीवृक्षः २ अश्वत्थभेदः ३ प्ररोही ४ गजपादपः ५ चयतरुः ६ चीरी ७ वनस्पतिः ८। अस्य गुणाः। लघुत्वम्। स्वादुत्वम्। तिक्तत्वम्। तुवरत्वत्। उष्णत्वम्। कटुपाकरसत्वम्। ग्राहित्वम्। विषपित्तकफास्रनाशित्वञ्च। इति भावप्रकाशः॥

स्थावरं, क्ली, (तिष्ठति धनुषीति स्था+वरच्।) धनुर्गुणः। इति त्रिकाण्डशेषः॥

स्थावरः, पुं, (तिष्ठतीति। स्था+वरच्। पर्व्वतः। इति शब्दरत्नावली त्रिकाण्डशेषश्च॥

स्थावरः, त्रि, (तिष्ठतीति। स्था+"स्थेशभासपिसकसो वरच्।" ३। २। १७५। इति वरच्।) जङ्गमेतरः। अचलवस्तु। इत्यमरः। ३। १। ७३॥ जङ्गमा गोमच्छिष्यादयः ततोऽन्यो वृक्षादिः स्थावरः। इति भरतः॥ *॥
स च ब्रह्मणः सप्तमः सर्गः षड्विधश्च। यथा,—
"सप्तमो मुख्यसर्गस्तु षड्विधस्त्वथाच्च यः।
वनस्पत्योषधिलता त्वक्सारो वीरुधो द्रुमाः॥"
तेषां लक्षणं यथा,—
"उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः॥"
इति श्रीभागवतम्॥
"ये पुष्पं विना फलन्ति ते वनस्पतयः। ओषधयः फलपाकान्ताः। लता आरोहणापेक्षाः। त्वक्सारो वेणुादयः। लता एव काठिन्येन आरोहणानपेक्षा वीरुधः। ये पुष्पैः फलन्ति ते द्रुमाः। ऊर्द्धं स्रोत आहारसञ्चारो येषां ते। तमःप्रायाः अव्यक्तचैतन्याः। अन्तःस्पर्शाः स्पर्शमेव जानन्ति नान्यत्तदापि अन्तरेव न बहिः। विशेषिणः अव्यवस्थितपरिणामाद्यनेकभेदवन्तः" इति तट्टीकायां श्रीधरस्वामी॥*॥ स्थावरधनं सान्निध्येतरेभ्यो न विक्रेतव्यम्। यथा,—
"स्थावरं धनमन्यर्म्म स्थिते सान्निध्यवर्त्तिनि।
योग्ये क्रेतरि विक्रेतुं न शक्तः स्थावराधिपः॥
सान्निध्यवर्त्तिनां ज्ञातिः सवर्णो वा विशिष्यते।
तयोरभावे सुहृदो विक्रेर्विक्रा गरीयसी।
निर्णीतमूल्ये पण्येन स्थावरस्य क्रयोद्यमे।
तन्मूल्यश्चेत् समीपस्थो राति क्रेता न चापरः॥
मूल्यं दातुमशक्तश्चेत् सम्मतो विक्रयेऽपि वा।
सन्निधिस्थस्तदान्यस्मै गृह्णीयाच्छक्तये विक्रये॥
क्रीतश्चेत् स्थावरं देवि! परोक्षे प्रतिवासिनः।
श्रवणादेव तन्मूल्यं दत्त्वासौ प्राप्तुमर्हति॥
क्रेता तत्र गृहारामान् विनिर्म्माति भुनक्ति वा
मूल्यं दत्त्वापि नाप्नोति स्थावरं सन्निधिस्थितः॥
इति महानिर्व्वाणतन्त्रे द्वादशोल्लासः॥
स्थावरे विशेषो यथा, याज्ञवल्क्यः।
"मांसशुक्रप्रवालानां सर्व्वस्यैव पिता प्रभुः।
स्थावरस्य तु सर्व्वस्य न पिता न पितामहः॥"
अपि च।
"स्थावरं द्विपदश्चैव यदप्यर्जितमक्षयम्।
असम्भूय सुतान् सञ्जैर्न दानं न च विक्रयः॥"

किञ्च ।
"पितुः प्रसादात् भुञ्जन्ते वस्त्राण्याभरणानि च
स्थावरन्तु न भुञ्जीत प्रसादे सति पैतृके ॥"
इति मिताक्षराधृतवचनमपि पितामहधनपरम् । पित्रा च स्वोपार्जितं स्थावरं दत्तं भुञ्जत एव इति ॥
"स्थावरे विक्रयो नास्ति कुर्य्यादाधिमनुज्ञया ॥"
इति स्थावरस्य केवलविक्रयप्रतिषेधात् विक्रयेऽपि कर्त्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपेण स्थावरविक्रय इतिविज्ञानेश्वरः । वस्तुतस्तु स्थावरविक्रयनिषेधोऽविभक्तस्थावरविषयः ॥* पूर्व्वपुरुषार्जितनष्टोद्धारे विशेषयति मिताक्षरायाम्
"स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम् ।
असम्भूय सुतान् सर्व्वान् न दानं न च विक्रयः॥"
अस्याप्यपवादमाह ।
"एकोऽपि स्थावरे कुर्य्यात् दानाधमनविक्रयम्
आपत्काले कुटुम्बार्थे धर्म्मार्थे च विशेषतः ॥"
अनुपभोगे तु सर्व्वस्य क्रौतादेर्हानिर्यथा ह्यहस्पतिः ।
"संविभागक्रयप्राप्तं पित्र्यं लब्धञ्च राजतः ।
स्थावरं सिद्धिमाप्नोति भुक्त्या ह्यानिरुपेक्षया॥*
सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकल्पितम्
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥"
नारदः ।
"भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत्
सा यथा काममश्नीयात् दद्याद्वा स्थावराद्ऋते॥"
यमः ।
"अविभक्तं स्थावरं यत् सर्व्वेषामेव तद्भवेत् ।
विभक्तं स्थावरं प्राप्तं नान्योदर्य्यैः कदाचन ॥"
सर्व्वेषां सोदरासोदराणाम् । स्थावरातिरिक्तन्तु विभक्ताविभक्तसोदराणामेवेत्यर्थतः सिद्धम् । तेषां तत्पिण्डदाढत्वेन तन्माढभोग्यपार्व्वणपिण्डदाढत्वेन चाधिकारात् । इति दायतत्त्वम्॥*
(अथातः स्थावरविषविज्ञानीयमध्यायं व्याख्यास्यामः ।
"स्थावरञ्जङ्गमञ्चैव द्विविधं विषमुच्यते ।
दशाधिष्ठानमाद्यन्तु द्वितीयं षोड़शाश्रयम् ॥
मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सार एव च ।
निर्य्यासो धातवश्चैव कन्दश्च दशमः स्मृतः ॥
तत्र क्रौतकाष्ठमारगुल्मासुबन्धगर्गरकंकरघाटविद्युच्छिखाविजयानीत्यष्टौ मूलविषाणि । विषपत्रिका-लम्बावरदारुककरम्भ-महाकरम्भाणि पञ्च पत्रविषाणि । कुमुदतीवेणुकाकरम्भकङ्काकरम्भकर्कोटकरेणुकखद्योतकचर्म्मरीभगन्धासर्षधातिनन्दनसारपाकानीति द्वादश फलविषाणि । वेत्रकादम्बवल्लीजकरम्भमङ्काकरम्भाणि पञ्च पुष्पविषाणि । अन्नपाचकर्कर्त्तरौयसौरीयककरघाटकरम्भनन्दनवराटकानि सप्तत्वक्सारनिर्य्यासविषाणि कुमुदाम्लेक्षुहोजालचौर्य्याणि त्रीणि क्षीरविषाणि । फेणाश्मभस्महरितालञ्च हे धातुविषे । कालकूटवत्सनाभसर्षपकपालुककर्द्दमकवैराटकमुस्तकशृङ्गीविषप्रपौण्डरिकमूलकहलाहलमहाविषकर्कटकानीति त्रयोदश कन्दविषाणि । इत्येवं पञ्चपञ्चाशत् स्थावरविषाणि भवन्ति ॥
चत्वारि वत्सनाभानि मुस्तके द्वे प्रकीर्त्तिते ।
षट् चैव सर्षपाख्यानि शेषाण्येकैकमेव तु ॥
उद्दिष्टन मूलविषैः प्रलापो मोह एव च ।
जृम्भाङ्गोद्वेष्टनश्वासा ज्ञेयाः पञ्चविधेन तु ॥
मुष्कशोफः फलविषैर्हृल्लासोऽरुचिरेव एव च ।
भवेत् पुष्पविषैश्छर्द्दिराध्मानं मोह एव च ॥
त्वक्सारनिर्य्यासविषैरुपयुक्तैर्भवन्ति हि ।
आस्यदौर्गन्ध्यपारुष्यशिरोरुक्कफसंस्रवाः ॥
फेणागमः क्षीरविषे विड्भेदो जिह्वजिह्वता ।
हृत्पीड़नं धातुविषैर्म्मूर्च्छा दाहश्च तालुनि ॥
प्रायेण कालघातीनि विषाण्येतानि निर्द्दिशेत्
कन्दजानि तु तीक्ष्णानि तेषां वक्ष्यामि विस्तरम्
सर्षपाज्ञानं कालकूटे वेपथुः स्तम्भ एव च ।
ग्रीवास्तम्भो वत्सनाभे पीतविण्मूत्रनेत्रता ॥
सर्षपे वातवेगुण्यमानाहो ग्रन्थिजन्म च ।
ग्रीवा दौर्ब्बल्यवाक्सङ्गौ पालकेऽनुमताविह ॥
प्रसेकः कर्द्दमाख्ये तु विड्भेदो नेत्रपीतता ।
वैराटकेनाङ्गदुःखं शिरोरोगश्च जायते ॥
गात्रस्तम्भो वेपथुश्च जायते मुस्तकेन तु ।
शृङ्गीविषेणाङ्गसाददाहोदरविवृद्धयः ॥
पुण्डरीकेण रक्तत्वमक्ष्णोर्हृल्लथोदरे ।
वैवर्ण्यं मूलकैर्यद्धिक्काशोफप्रमूढ़ता ॥
चिरेणोच्छ्वसिति श्यावो नरो हालाहलेन वै ।
महाविषेण हृदये ग्रन्थिशूलोद्गमो भृशम् ॥
कर्कटैर्नोत्पतत्यूर्द्ध्वं हसन् दन्तान् दशत्यपि ।
कन्दजान्युग्रवीर्य्याणि प्रयुक्तानि त्रयोदश ॥
सर्व्वाणि कुशलैर्ज्ञेयान्येतानि दशभिर्गुणैः ।
रूक्षमुष्णं तथा तीक्ष्णं सूक्ष्ममाशु व्यवायि च॥
विकाशि विशदञ्चैव लघ्वपाकि च तत स्मृतम्
तद्रौक्ष्यात् कोपयेद्वायुमौष्ण्यात् पित्तं सशोणितम् ॥
मानसं मोहयेत्तैक्ष्ण्यादङ्गबन्धान् क्षिणत्यपि ।
शरीरावयवान् सौक्ष्म्यात् प्रविशेद्धिकरोति च ॥
आशुत्वादाशु तद्यन्ति व्यवायात् प्रकृतिं भजेत् ।
कफयेच्च विकाशित्वाद्धोषान् धातुमलानपि ॥
वैशद्यादतिरिच्येत दुश्चिकित्स्यञ्च लाघवात् ।
दुर्ज्जरत्वाविपाकित्वात्तस्मात् क्लेशयते चिरम् ॥
स्थावरं जङ्गमं यच्च कृत्रिमं चापि यद्विषम् ।
सद्यो व्यापादयेत्तत्तु ह्रीयं दशगुणान्वितम् ॥
यत् स्थावरं जङ्गमकृत्रिमं वा
देहादशेषं यदनिर्गतं तत् ।
जीर्णं विषघ्नौषधिभिर्हृतं वा
दावाग्निवातातपशोषितं वा ॥
स्वभावतो वा गुणविप्रहीनं
विषं हि दूषीविषतामुपैति ।
वीर्य्याल्पभावान्न निपातयेत्तत्
कफाहृतं वर्षगणानुबन्धि ॥
तेनार्द्दितो भिन्नपुरीषवर्च्चो
विगन्धवैरस्यमुखः पिपासी ।
मूर्च्छन् वमन् गद्गदवाग्विषण्णो
भवेच्च दूष्योदरलिङ्गजुष्टः ॥
आमाशयस्थे कफवातरोगी
पित्ताशयस्थेऽनिलपित्तरोगी ।
भवेन्नरो ध्वस्तशिरोरुहाङ्गो
विलूनपक्षस्तु यथा विहङ्गः ॥
स्थितं रसादिष्वथ वा यथोक्तान्
करोति धातुप्रभवान् विकारान् ।
कोपञ्च शीतानीलदुर्द्दिनेषु
यात्याशु पूर्व्वं शृणु तत्र रूपम् ॥
निद्रा गुरुत्वञ्च विजृम्भणञ्च
विश्लेषहर्षावयवाङ्गमर्द्दैः ।
ततः करोत्यन्नमदाविपाकाऽ-
वरोचकं मण्डलकोठमोहान् ॥
धातुक्षयं पाटकरास्यशोफं
दकोदरं छर्द्दिमथातिसारम् ।
वैवर्ण्यमूर्च्छाविषमज्वरान् वा
कुर्य्यात् प्रवृद्धां प्रबलां तृषां वा ।
उन्मादमन्यज्जनयेत्तथाऽन्य-
दानाहमन्यत् क्षपयेच्च शुक्रम् ।
गात्रस्यमन्यज्जनयेच्च कुष्ठं
तांस्तान् विकारांश्च बहुप्रकारान् ॥
दूषितं देशकालान्नदिवास्वप्नैरभिक्षणशः ।
यस्माद्दूषयते धातून् तस्माद्दूषीविषं स्मृतम् ।
स्थावरस्योपयुक्तस्य वेगे तु प्रथमे नृणाम् ।
श्यावा जिह्वा भवेत् स्तब्धा मूर्च्छाश्वासश्च जायते ।
द्वितीये वेपथुः स्वेदो दाहः कण्डूरुजस्तथा ।
विषमाशयप्राप्तं कूजते हृदि वेदनाः ॥
तालुशोषं तृतीये तु शूलं चामाशये भृशम् ।
दुर्व्वर्णं हरिते शूने जायेते चास्य लोचने ॥
पक्वाशयगते तोदो हिक्काकासोऽन्त्रकूजनम् ।
चतुर्थे जायते वेगे शिरसश्चातिगौरवम् ॥
कफप्रसेको वैवर्ण्यं पञ्चभेदश्च पञ्चमे ।
सर्व्वदोषप्रकोपश्च पक्वाधाने च वेदना ॥
षष्ठे प्रज्ञाप्रणाशश्च भृशं वाप्यतिसार्य्यते ।
स्कन्धपृष्ठकटीभङ्गः सन्निरोधश्च सप्तमे ॥
प्रथमे विषवेगे तु वान्तं शीताम्बुसेवितम् ।
अगदं मधुसर्पिर्भ्यां पाययेत समायुतम् ॥
द्वितीये पूर्व्ववद्वान्तं पाययेत्तु विरेचनम् ।
तृतीयेऽगदपानन्तु हितं नस्यं तथाञ्जनम् ॥
चतुर्थे स्नेहसंमिश्रं पाययेदगदं भिषक् ।
पञ्चमे क्षौद्रमधुकक्काथयुक्तं प्रदापयेत् ॥
षष्ठेऽतिसारवल्लिहिरवपीड़्य सप्तमे ।
मूर्द्ध्नि काकपदं कृत्वा साङ्ग्वापि क्षितं क्षिपेत्
वेगान्तरे त्वन्यतमे कृते कर्म्माणि शीतलाम् ।
यवागूं सघृतक्षौद्रमिमां दद्याद्विचक्षणः ॥
कोषातक्योऽग्निकः पाठासूर्य्यवल्लामृताभयाः ।
शिरीषः किणिहीशेलुगिर्य्याह्वा रजनीद्वयम् ॥
पुनर्नवे हरेणुश्च त्रिकटुः सारिवे बला ।
एषां यवागूर्निक्वाथे कृता हन्ति विषद्वयम् ॥
मधूकं तगरं कुष्ठं भद्रदारु हरेणवः ।
पुन्नागलैलबालूनि नागपुष्पोत्पलं सिता ।

विड्गं चन्दनं पत्रं प्रियङ्गु ध्यामकं तथा।
इग्रिट्टे इे हृहत्यौ च सारिवे च स्थिरासहा॥
कल्कैरेषां घृतं सिद्धमजेयमिति विश्रुतम्।
विषाणि हन्ति सर्व्वाणि शीघ्रमेवाजितं क्वचित्॥
दूषीविषार्त्तं सुस्निग्धमूर्द्ध्वाधमध्य शोधितम्।
पाययेतागदं नित्यमिमं दूषीविषापहम्॥
पिप्पल्यो ध्यामकं मांसी सावरः परिपेलवम्।
सुवर्च्चिका सस्नुक्क्षीला तोयं कनकगैरिकम्॥
क्षौद्रयुक्तोऽगदो ह्येष दूषीविषमपोहति।
एष नाम्ना विषारिस्तु न चान्यत्रापि वार्य्यते॥
ज्वरे दाहे च हिक्कायामानाहे शुक्रसंक्षये।
शोफेऽतिसारे मूर्च्छायां हृद्रोगे जठरेऽपि वा॥
उन्मादे वेपथौ चैव ये चान्ये सुरुपद्रवाः।
यथास्वं तेषु कुर्व्वीत विषघ्ने रोषधैः क्रियाम्॥
साध्यमात्मवतः सद्यो याप्यं संवत्सरोत्थितम्।
दूषीविषमसाध्यन्तु क्षीणस्याहितसेविनः॥"

इति सुश्रुते कल्पस्थाने २ अध्यायः॥)

स्थावरादि, क्ली, (स्थावरं आदिः कारणं यस्य।) वत्सनाभविषम्। इति राजनिर्घण्टः॥

स्थाविरं, क्ली, (स्थविरस्य भावः कर्म्म वा। स्थविर + "हायनान्तयुवादिभ्योऽण्।" ५। १।१३०। इत्यण्।) स्थविरत्वम्। हृद्धत्वम्। इत्यमरः। २। ३। ४०॥ (यथा, महाभारते। २।१८८।३।
"गार्हस्थ्येऽथवा बाल्ये यौवने स्थाविरेऽपि वा।
यथाफलं समश्नाति तथा त्वं कथयस्व मे॥")
तत्तु सप्ततिवर्षात् परम् यथा,—
"आ षोड़शाद्भवेद्बालस्तरुणस्तत उच्यते।
वृद्धः स्यात् सप्ततेरूर्द्धं वर्षीयान् नवतेः परम्॥"

इति भरतधृतस्मृतिवचनम्॥

स्थासकः, पुं, चार्च्चिक्यम्। इत्यमरः। २।६।१२२॥ जलादेर्व्बुद्बुदम्। इति मेदिनी॥

स्थास्नु, क्ली, शरीरबलम्। ष्ठाधातोः स्नुप्रत्ययेन निष्पन्नम्। इति केचित्॥

स्थास्नुः, त्रि, (तिष्ठतीति। स्था + "ग्लाजिस्थश्च क्स्नुः।" ३।२।१३९। इति स्नुः।) स्थिरतरः। इत्यमरः। ३।१।७२॥ (यथा, भट्टिः। २। ४७।
"हिरण्मयी शालतेव जङ्गमा
च्युता दिवः स्थास्नुरिवाचिरप्रभा।
शशाङ्ककान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली॥")
आस्थतः। इति भरतः॥ (यथा, किराते। २।१९।
"अभिमानधनस्य गत्वरै-
रसुभिः स्थास्नु यशश्चिचीषतः।
अचिरांशुविलासचञ्चला
ननु लक्ष्मीः फलमानुषङ्गिकम्॥"

स्थावरः। इति श्रीभागवतटीकायां श्रीधरस्वामी। २। ६। ४०॥ (यथा, मनुः। १।५६।
"यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च।
समाविशति संसृष्टस्तदा मूर्त्तिं विमुञ्चति॥"

स्थिकः, पुं, कटिग्रीवः। यथा, शब्दरत्नावल्याम्।
'कटिग्रीवः कटिग्रीवः पुल्लः स्थिकः स्त्रियां स्थिचा॥"

स्थितः, त्रि, (स्था + क्तः।) प्रतिज्ञातवान्। (यथा, हरिवंशे। २५५। ८५।
"पत्नीन्द्रवचनं श्रुत्वा दानवेन्द्रोऽब्रवीदिदम्।
स्थितोऽस्मि समये तस्य अनन्तस्य महात्मनः॥")
ऊर्द्ध्वः। निश्चलः। इति मेदिनी॥ (वर्त्तमानः। गतिनिवृत्तिविशिष्टः। यथा, रघुः। २। ६।
"स्थितः स्थितामुच्चलितः प्रयातां
निषेदुषीमासनबन्धधीरः।
जलाभिलाषी जलमादधानां
छायेव तां भूपतिरन्वगच्छत्॥"*॥

क्ली, स्था + भावे क्तः। अवस्थानम्। कुलमर्य्यादा। यथा, रामायणे। २। ३८। २४।
"साध्वीनान्तु स्थितानान्तु शीले सत्ये श्रुते स्थिते
स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते॥")

स्थितप्रज्ञः, त्रि, (स्थिता प्रतिष्ठिता आत्मानात्मविवेकजा प्रज्ञा यस्य।) मनोगतसर्व्ववासनारहितः। यथा, श्रीभगवद्गीतायाम् २। ५५—५६
"प्रजहाति यदा कामान् सर्व्वान् पार्थ! मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्म्मुनिरुच्यते॥"

स्थितप्रेमा, [न्] पुं, (स्थितं प्रेम यस्य।) स्थिरतरबन्धुः। इति केचित्॥

स्थितिः, स्त्री, (स्था + क्तिन्।) न्याय्यपथस्थितिः। तत्पर्य्यायः। संस्था २ मर्य्यादा ३ धारणा ४। इति चतुष्टयवर्गे अमरः। २। ८। २६॥ संस्थितिः ५। इति शब्दरत्नावली॥ (यथा, कुमारे। १। १८।
"स मानसीं मेरुसखः पितॄणां
कन्यां कुलस्य स्थितये स्थितिज्ञः।
मेनां मुनीनामपि माननीया-
मात्मानुरूपां विधिनोपयेमे॥")
अवस्थानम्। तत्पर्य्यायः। आस्था २ आसना ३। इति सङ्कीर्णवर्गे अमरः। ३। २। २१॥ (यथा, रघुः। १। ८९।
"प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः॥")
सीमा। इति मेदिनी॥ *॥ (नियमः। यथा, महाभारते। ३। १३१। २०।
"श्येनः कपोतानत्तीति स्थितिरेषा सनातनी।
मा राजन् सारमज्ञात्वा कदलीस्कन्धमासजः॥")
द्रव्यविशेषे स्थितिनिषेधो यथा,—
"नास्थिभस्मकपालानि न केशान् वा कथञ्चन।
तुषाङ्गारकविष्ठानामधितिष्ठेत् कदाचन॥

इति कौर्म्मे उपविभागे। १६। ७८॥

स्थिरः, पुं, (तिष्ठतीति। स्था + "अजिरशिशिरेति। उणा०। १। ५४। इति किरच्प्रत्ययेन साधुः।) देवः। पर्व्वतः। कार्त्तिकेयः। वृक्षः। इति शब्दरत्नावली॥ शनिः। मोक्षः। इति मेदिनी॥ अनड्वान्। इति राजनिर्घण्टः॥ धववृक्षः। इति भावप्रकाशः॥ वृषसिंहवृश्चिककुम्भराशयः। यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"

इति ज्योतिस्तत्त्वम्॥

तत्र जातफलं यथा,—
"अस्थिरविभूतिमित्रं चलमटनं स्खलितनियममपि चरभे।
स्थिरभे तद्विपरीतं क्षेमान्वितं दीर्घसूत्रञ्च॥
द्विशरीरे त्यागयुतं क्षतदृढमुत्साहिनं विविधचेष्टम्॥"

इति दीपिका॥*॥

स्थिरवस्तूनि यथा। युद्धे प्रधानभटः १ साध्वी२ धर्म्मः ३ अधर्म्मः ४ सज्जनः ५। अस्थिरवस्तूनि यथा। अबला १ दोला २ अपाङ्गः ३ यौवनम्४ दुर्জनः ५ स्वामिप्रसादः ६ हस्तिकर्णः ७ स्वर्णम् ८ मत्स्यः ९ कपिः १० स्त्रीः ११। इति कविकल्पलता॥

स्थिरः, त्रि, (स्था + किरच्। कठिनः। निश्चलः। इति धरणिः॥ यथा,—
"अभ्रच्छाया खलैः प्रीतिः परनारीषु सङ्गतिः॥
पञ्चैते अस्थिरा भावा यौवनानि धनानि च॥
अस्थिरं जीवितं लोके अस्थिरं धनयौवनम्।
अस्थिरं पुत्रदारादि धर्म्मः कीर्त्तिर्यशः स्थिरम्॥"

इति गारुड़े। ११५। २५—२६॥

स्थिरगन्धः, पुं, (स्थिरो गन्धो यस्य।) चम्पकवृक्षः। इति राजनिर्घण्टः॥ चिरस्थायिसौरभयुक्ते, त्रि॥

स्थिरगन्धा, स्त्री, (स्थिरो गन्धो यस्याः।) पाटला। केतकी। इति राजनिर्घण्टः॥

स्थिरचक्रः, पुं, (स्थिरं चक्रं यस्य।) जिनविशेषः। तत्पर्य्यायः। मञ्जुश्रीः २ ज्ञानदर्शनः ३ मञ्जुभद्रः ४ मञ्जुघोषः ५ कुमारः ६ अष्टारचक्रवान् ७ वज्रधरः ८ प्रज्ञाकायः ९ वादिराट् १० नीलोत्पली ११ महाराजः १२ नीलः १३ ग्राहूलवाहनः १४ धियाम्पतिः १५ पूर्व्वजिनः १६ खड्गी १७ दण्डी १८ विभूषणः १९ बालव्रतः २० पञ्चचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४। इति त्रिकाण्डशेषः॥

स्थिरच्छदः, पुं, (स्थिरा च्छदा यस्य।) भूर्জ्জपत्रः। इति रत्नमाला॥

स्थिरच्छायः, पुं, (स्थिरा निश्चला च्छाया यस्य।) वृक्षमात्रम्। इति शब्दमाला॥ छायातरुः। इति त्रिकाण्डशेषः॥ (नियतच्छायायुक्ते, त्रि। यथा, महानिर्व्वाणे। १। ३।
"स्थिरच्छायद्रुमच्छायाच्छादिते स्निग्धमङ्कुले॥")

स्थिरजिह्वः, पुं, (स्थिरा जिह्वा यस्य।) मत्स्यः। इति हेमचन्द्रः॥

स्थिरजीविता, स्त्री, (स्थिरं बहुकालस्थायि जीवितं यस्याः।) शाल्मलिवृक्षः। इति शब्दमाला॥

स्थिरतरः, त्रि, (अयमनयोरतिशयेन स्थिरः। स्थिर+तरप्।) अतिशयस्थिरः। तत्पर्य्यायः। स्थास्नुः २ स्थेयान् ३। इत्यमरः। ३।१।७३॥ दृढ़तरः ४। इति शब्दरत्नावली॥ स्थेयः ५। अतिस्थिरः ६ स्थेष्ठः ७। इति हेमचन्द्रः॥

स्थिरदंष्ट्रः, पुं, (स्थिरा दंष्ट्रा यस्य।) भुजङ्गः। वराहाकृतिविष्णुः इति मेदिनी॥ ध्वनिः। इत्यजयः॥

स्थिरपत्रः, पुं, (स्थिराणि पत्राणि यस्य।) हिन्तालः। इति राजनिर्घण्टः॥

स्थिरपुष्पः, पुं, (स्थिराणि पुष्पाणि यस्य।) चम्पकवृक्षः। वकुलः। इति राजनिर्घण्टः॥

स्थिरपुष्पी, [न्] पुं, (स्थिरपुष्पमस्यास्तीति। इनिः।) तिलकवृक्षः। इति राजनिर्घण्टः॥

स्थिरफला, स्त्री, (स्थिरं फलं यस्याः।) कुष्माण्डी। इति केचित्॥

स्थिरमतिः, स्त्री, (स्थिरा मतिः।) निश्चला बुद्धिः। यथा,—

"स्थिरमतिं सुमतिं कमनीयतां
कुशलतां हि नृणामुपभोगिताम्।
हृषगतो हिमगुर्भगमादिशेत्
सुकृतिनः कृतिनश्च सुखान्यपि॥"

इति कोष्ठीप्रदीपः॥

तद्युक्ते, त्रि। स्थिरा मतिर्यस्येति बहुव्रीहिसमासः॥

स्थिरयोनिः, पुं, (स्थिरा योनिरुत्पत्तिर्यस्य।) कायातरुः। इति भूरिप्रयोगः॥

स्थिरयौवनः, पुं, (स्थिरं यौवनं यस्य।) विद्याधरः। इति त्रिकाण्डशेषः॥ (स्थिरं यौवनमिति। निश्चलयौवने, क्ली। यथा, मार्कण्डेये। ६०। ३।

"तस्य ते वै फलरसं पिबन्तः पुरुषाः सदा।
स्थिरयौवनसम्पन्नाः स्त्रियश्चोत्पलगन्धिकाः॥")

चिरस्थायितरुणावस्थे, त्रि॥ (यथा, विष्णुपुराणे। १२१। ६२।

"सत्यभामोत्तमा स्त्रीणां सुभगा स्थिरयौवना।
जरां न यास्यति वधूर्यावत्त्वं कृष्ण मानुषः॥")

स्थिररङ्गा, स्त्री, (स्थिरो रङ्गो रागो यस्याः।) नीली। इति राजनिर्घण्टः॥

स्थिररागा, स्त्री, (स्थिरो रागो यस्याः।) दारुहरिद्रा। इति राजनिर्घण्टः॥

स्थिरश्रीः, त्रि, स्थिरा श्रीर्लक्ष्मीर्यस्य। स्थिरलक्ष्मीकः। यथा, तिथ्यादितत्त्वे मत्स्यपुराणम्।

"स्थिरोपायो हि पुरुषः स्थिरश्रीरेव जायते।
रचितुं नैव शक्नोति चपलश्चपलां स्त्रियम्॥"

स्थिरसाधनकः, पुं, (स्थिरं साधयतीति। साधि+ल्युः। ततः कन्।) सिन्दुवारवृक्षः। इति राजनिर्घण्टः॥

स्थिरसारः, पुं, (स्थिरः सारो यस्य।) शालवृक्षः। इति राजनिर्घण्टः॥

स्थिरा, स्त्री, (स्था+किरच्। टाप्।) पृथिवी। शालपर्णी। इत्यमरः। २।१।२। २।४।११५॥ काकोली। इति जटाधरः॥ शाल्मलिवृक्षः। इति शब्दचन्द्रिका॥ स्थैर्य्ययुक्ता स्त्री च॥

स्थिराङ्घ्रिपः, पुं, (स्थिरः अङ्घ्रिपः वृक्षः।) हिन्तालवृक्षः। इति राजनिर्घण्टः॥

स्थिरायुः, [स्] पुं, (स्थिरं आयुर्यस्य।) शाल्मलिवृक्षः। इत्यमरः। २।४।४६॥ चिरजीविनि, त्रि॥

स्थुड, शि इत्याम्। इति कविकल्पद्रुमः॥ (तुदा०-कुटा०-पर०-सक० सेट्।) दन्त्यादिः। शि, स्थुड़ति अस्थुड़ीत् तुस्थोड़। इत्यां वरणे। इति दुर्गादासः॥

स्थूरी, [न्] पुं, स्थौरी। इत्यमरटीकायां रायमुकुटः॥

स्थूणा, स्त्री, (तिष्ठतीति। स्था+"राजास्थासास्थूणाबीणाः।" उणा० ३।१५। इति नप्रत्ययेन साधुः।) गृहस्तम्भः। खुँटी इति भाषा॥ (यथा, साहित्यदर्पणे। ३। १७२।

"हृद्योऽन्यः पतिरेष मच्चकगतः स्थूणावशेषं गृहं
कालोऽभ्यर्णजलागमः कुशलिनी वत्सस्य
वार्त्तापि नो।
यन्नात् सञ्चिततैलबिन्दुघटिका भग्नेति पर्य्याकुला
दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं
रोदिति॥")

शूर्म्मी। लौहप्रतिमा। इत्यमरः। ३। ३।५०॥

स्थूमः, पुं, दीप्तिः। चन्द्रः। इति केचित्॥

स्थूरः, पुं, (तिष्ठतीति। स्था+"स्थः किच्च।" उणा० ५। ४। इति उरन्।) हृषः। इति संक्षिप्तसारोणादिवृत्तिः। मनुष्यः। इति सिद्धान्तकौमुदी॥

स्थूरी, [न्] पुं, साहश्येन स्थूरो हृषोऽस्यास्तीति। इनिः।) खरहृषभवत् पृष्ठेन भारवाहकोऽश्वः। पृष्ठेन वहति पृष्ठस्यमपि बाह्यमुपचारात् पृष्ठं तद्वहति वा पृष्ठः ढधे कादिति यः स्थूयते संक्रियते पृष्ठमनया स्थूरा। स्थूल त् क ङ ह्रंहणे सेमक्लात् सरोरिति अः निपातनात् लस्य रत्वं स्थूरा पर्य्ययणं तस्या इदमिति णे स्थौरं पृष्ठारोपितभारादिकं तदस्त्यस्येति इनि स्थौरी स्थूरी च स्थौरीति स्वामी। इत्यमरटीकायां भरतः॥

स्थूल, त् क ङ ह्रंहणे। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-आत्म० अक०-सेट्।) दीर्घी ङ, अतुस्थूलत्। ह्रंहणं वृद्धिः। इति दुर्गादासः॥

स्थूलं, त्रि, (स्थूलयतीति। स्थूल+अच्।) उपचितावयवम्। मोटा इति भाषा। तत्पर्य्यायः। पीनम् २ पीवम्३ पीवरम्४। यथा, कुमारे। २। ११।

"दृषः सङ्घातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः।
श्लक्ष्णो श्लक्ष्णतरश्चासि प्राकाम्यं ते विभूतिषु॥")

जड़ः। इत्यमरः। ३। ३। २०३॥ (यथा, महाभारते। १२। ३०५। १६।

न यः संसत्सुः कथयेत् ग्रन्थार्थं स्थूलबुद्धिमान्।
स कथं मन्दविज्ञानो ग्रन्थं वक्ष्यति निर्णयात्॥")

स्थूलं, क्ली, (स्थूल+अच्।) कूटम्। समूहः। इति मेदिनी॥

स्थूलः, पुं, (स्थूलत् क ङ ह्रंहणे+अच्।) पनसः। इति राजनिर्घण्टः॥ (विष्णुः। इति महाभारतम्। १३। १४८। १०३॥ कन्दविशेषः। रक्तलशुनः। इति केचित्॥ यथा, सुश्रुते। १। ४६। "स्थूलशूरणमाणकप्रभृतयः कन्दा ईषत्कषायाः कटुका रूक्षा विष्टम्भिनो गुरवः कफवातलाः पित्तहराश्च।
माणकं स्वादु शीतञ्च गुरु चापि प्रकीर्त्तितम्।
स्थूलकन्दस्तु नात्युष्णः शूरणो गुदकीलहा॥")

स्थूलकः, पुं, (स्थूल एव। कन्।) तृणविशेषः। उलु इति भाषा। यथा, रत्नमालायाम्।

"सूच्यग्रः स्थूलको दर्भो जूर्णाख्यश्च खरच्छदः॥"

स्थूलकः, त्रि, (स्थूल+स्वार्थे कन्। यद्वा, स्थूलप्रकार इति। "स्थूलादिभ्यः प्रकारवचने कन्" ५। ४।३। इति कन्।) स्थूलः। स्थूलशब्दात् स्वार्थे कप्रत्ययेन निष्पन्नः॥

स्थूलकङ्गुः, पुं, (स्थूलः कङ्गुः।) वरकधान्यम्। इति राजनिर्घण्टः॥

स्थूलकणा, स्त्री, (स्थूला कणा यस्याः।) स्थूलजीरकः। इति राजनिर्घण्टः॥

स्थूलकण्टकः, पुं, (स्थूलाः कण्टका यस्य।) जालवर्व्वूरः। इति राजनिर्घण्टः॥

स्थूलकण्टकिका, स्त्री, (स्थूलाः कण्टका यस्याः। ततः कापि अत इत्वम्।) शाल्मलिवृक्षः। इति शब्दचन्द्रिका॥

स्थूलकण्टा, स्त्री, (स्थूलः कण्टो यस्याः।) बृहती। इति राजनिर्घण्टः॥

स्थूलकन्दः, पुं, स्थूलः कन्दः।) रक्तलशुनः। (यथा, सुश्रुते। १। ४६।

"स्थूलकन्दस्तु नात्युष्णः शूरणो गुदकीलहा॥")

शूरणः। हस्तिकन्दः। माणकन्दः। इति राजनिर्घण्टः॥

स्थूलकाष्ठधक्, [ह्] पुं (स्थूलकाष्ठं दहतीति। दह+क्विप्। स्थूलकाष्ठस्य धक् इति वा।) बृहत्काष्ठाग्निः। तत्पर्य्यायः। स्कन्धानलः २। इति जटाधरः॥

स्थूलकाष्ठाग्निः, पुं, (स्थूलकाष्ठस्य अग्निः।) बृहत्काष्ठानलः। तत्पर्य्यायः। स्कन्धाग्निः २। इति हारावली॥

स्थूलचेड़ः, पुं,। (स्थूलः चेड़ः।) बाणः। इति त्रिकाण्डशेषः॥

स्थूलचञ्चुः, पुं, (स्थूला चञ्चुरिव शिखा यस्य।) महाचञ्चुकाकः। इति राजनिर्घण्टः॥

स्थूलचापः, पुं, (स्थूलश्चापः।) तूलपरिष्कारार्थधनुः। इति शब्दरत्नावली॥ तूलचाप इति साधुपाठः॥

स्थूलजीरकः, पुं, (स्थूलो जीरकः।) जीरकभेदः। कालजिरा इति वङ्गभाषा। मगरेला इति कलौञ्जी इति च हिन्दीभाषा। तत्पर्य्यायः। दिव्या २ उपकुञ्चिका ३ कालाः ४ कृष्णी ५

स्थूलकणा ६ पृथुः ७ मनोज्ञा ८ जारणी ९ जीर्णा १० तरुणः ११ सुषुवी १२ कारवी १३ पृथ्वीका १४ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातगुल्मामदोषश्लेष्माध्मानजन्तुनाशित्वम् । जीर्णत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥*॥ त्रिविधजीरकनामगुणाः । "जीरको जरणोऽजाजी कणा स्याद्दीर्घजीरकः क्रमणजीरः सुगन्धश्च तथैवाहारशोधनः ॥ कणाजाजी तु सुषवो कालिका चोपकालिका पृथ्वीका कारवी पृथ्वी पृथुः क्रमणोपकुञ्चिका। उपकुञ्चो च कुञ्चो च बृहज्जीरक इत्यपि ॥ जीरकत्रितयं रूक्षं कटुकं दीपनं लघु । संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ॥ ज्वरघ्नं पाचनं बल्यं हृद्यं रुच्यं कफापहम् । चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत् ॥" इति भावप्रकाशः ॥

स्थूलतालः, पुं, (स्थूलस्तालः ।) हिन्तालः । इति राजनिर्घण्टः ॥

स्थूलत्वचा,स्त्री,(स्थूला त्वक् यस्याः ।)काश्मरी । इति राजनिर्घण्टः ॥

स्थूलदण्डः, पुं, स्थूलो दण्डो यस्य ।) देवनलः । इति राजनिर्घण्टः ॥

स्थूलदर्भः, पुं, (स्थूलो दर्भो यस्य । मुञ्जः । इति राजनिर्घण्टः ॥

स्थूलदला, स्त्री, (स्थूलं दलं यस्याः ।) गृहकन्या । इति राजनिर्घण्टः ॥

स्थूलनालः, पुं, (स्थूलो नालः देवनलः । इति राजनिर्घण्टः ॥

स्थूलनासः, पुं, (स्थूला नासा यस्य ।) सूकरः । इति हेमचन्द्रः ॥

स्थूलनासिकः, पुं, (स्थूला नासिका यस्य । "अज्ञासिकायाः संज्ञायां नसं चास्थूलात् ।" ५।४ । ११८ । इत्यत्र स्थूलवर्জ्जनात् न नसादेशः ।) शूकरः । इति त्रिकाण्डशेषः॥ पीननासायुक्ते, त्रि ॥

स्थूलपटः, त्रि, (स्थूलः पटो यस्य । पौवरवस्त्रयुक्तः । यथा,—

"क्रमगट्टाः स्थूलपटा यवगोधूमशालिनः । प्रलयेऽपि न सीदन्ति यदि कन्या न विद्यते ॥"

इति पुराणम् ॥

(स्थूलवस्त्रे, पुं क्ली ॥)

स्थूलपटः, पुं, स्थूलः पटः कौपेय इव ।)कार्पासः । इति शब्दरत्नावली ॥

स्थूलपटाकः, (पुं, स्थूलपटं कार्पासं अकति प्राप्नोति कारणत्वेनेति । अक गतौ + अण् ।) स्थूलवस्त्रम् । इति शब्दरत्नावली ॥

स्थूलपादः, पुं, (स्थूलः पादो यस्य ।)हस्ती । इति शब्दमाला ॥ श्लीपदी च ॥

स्थूलपुष्पः, पुं, (स्थूलं पुष्पमस्य ।) वकवृक्षः । इति रत्नमाला ॥ झण्टुचुपः । इति राजनिर्घण्टः ॥

स्थूलपुष्पा, स्त्री, (स्थूलं पुष्पं यस्याः ।) पर्व्वतजातापराजिता । इति रत्नमाला ॥

स्थूलपुष्पी, स्त्री, (स्थूलं पुष्पं यस्याः । ङीष् ।) यवतिक्ता । इति राजनिर्घण्टः ॥

स्थूलफलः, (स्थूलं फलं यस्य ।) शाल्मलिवृक्षः । इति राजनिर्घण्टः ॥

स्थूलफला, स्त्री, (स्थूलं फलं यस्याः ।) शणपुष्पी । इति राजनिर्घण्टः ॥

स्थूलभद्रः, पुं, (स्थूलं प्रचुरमित्यर्थः भद्रं शुभं यस्य ।) श्रुतकेवलिनामजैनभेदः । इति हेमचन्द्रः ॥

स्थूलभूतं, क्ली, (स्थूलं भूतम् ।) पञ्चीकृताकाशादिभूतम् । इति वेदान्तसारः ॥

स्थूलमरिचं, क्ली, (स्थूलं मरिचम् ।) कक्कोलम् । इति राजनिर्घण्टः ॥

स्थूलमूलं, क्ली, (स्थूलं मूलमस्य ।)चाणक्यमूलम् । इति राजनिर्घण्टः ॥

स्थूललक्षः, त्रि, (स्थूलं प्रचुरं लक्षयति दानार्थमिति । लक्ष + अण् ।) बहुप्रदः । इत्यमरटीकायां रायमुकुटः । ३ । १ । ६ ॥ (यथा, याज्ञवल्क्यः । १ । ३०८ ।

"महोक्षाजः स्थूललक्षः कृतज्ञो वृद्धसेवकः । विनीतः सत्त्वसम्पन्नः कुलीनः सत्यवाक् शुचिः ॥")

स्थूललक्ष्यः, त्रि, (स्थूलं प्रचुरं वस्तु लक्ष्यमस्य ।) बहुप्रदः । इत्यमरः । ३ । १ । ६ ॥ (यथा, महाभारते । ३ । ४५ । ११ ।

"अकत्थनो मानयिता स्थूललक्ष्यः प्रियंवदः । सुहृदयान्नपानेन विविधेनाभिवर्षति ॥")

स्थूलवर्त्मकृत्, पुं, (स्थूलस्य वर्त्मनः कृत् कारकः ।) ब्राह्मणयष्टिका । इति शब्दचन्द्रिका ॥

स्थूलवल्कलः, पुं, (स्थूलं वल्कलं यस्य ।) रक्तलोध्रः । इति जटाधरः ॥

स्थूलवृक्षफलः, पुं, (स्थूलं वृक्षफलं यस्य ।) स्निग्धपिण्डौतकः । इति राजनिर्घण्टः ॥

स्थूलवेदेही, स्त्री, (स्थूला वेदेही विदेहभवा च ।) गजपिप्पली । इति राजनिर्घण्टः ॥

स्थूलशरः, पुं, (स्थूलः शरः ।) शरविशेषः । मोटा शर इति भाषा । तत्पर्य्यायः । महाशरः २ स्थूलशायकः ३ इक्षुरकः ४ क्षुरपत्रः ५ बहुमूलः ६ दीर्घमूलकः ७ । अस्य गुणाः । मधुरत्वम् । सुतिक्तत्वम् । कोष्णत्वम् । कफभ्रान्तिमदापहरत्वम् । बलवीर्य्यकारित्वम् । नित्यं सेवितश्चेत् किञ्चिद्घातकरत्वञ्च । इति राजनिर्घण्टः ॥

स्थूलशाटकः, पुं, (स्थूलः शाटकः ।) पौनवस्त्रम् । मोटा कापड़ इति भाषा । तत्पर्य्यायः । वराशिः २ । इत्यमरः । २ । ६ । ११६ ॥ वरासिः ३ । इति जटाधरः ॥

स्थूलशाटका, स्त्री, स्थूलवस्त्रम् । इत्यमरटीका । २ । ६ । ११६ ॥

स्थूलशाटिका, स्त्री, (स्थूला शाटिका ।) स्थूलवस्त्रम् । इत्यमरटीका । २ । ६ । ११६ ॥

स्थूलशाटिः, पुं, (स्थूलः शाटिः ।) वराशिः । इति हेमचन्द्रः ॥

स्थूलशालिः, पुं, (स्थूलः शालिः ।) शालिधान्यभेदः । तत्पर्य्यायः । महाशालिः २ स्थूलाङ्गः ३ स्थूलतण्डुलः ४ । अस्य गुणाः । स्वादुत्वम् । मधुरत्वम् । शिशिरत्वम् । पित्तशमनत्वम् । जीर्णज्वर-दाह-जठररुजा-शीघ्र-शमनत्वम् । शिशूनां यूनां जरतां च हितकरत्वम् । सदा सेवनेनानलबलवीर्य्यकारित्वञ्च । इति राजनिर्घण्टः ॥

स्थूलशिरः, [स्] क्ली, (स्थूलं शिरः ।) वृहन्मस्तकम् । (स्थूलं शिरो यस्य । मुनिविशेषः ॥ यथा, महाभारते । २ । ४ । ११ ।

"वको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः ॥")

स्थूलमस्तकयुक्ते, त्रि । इति केचित् ॥

स्थूलशौर्पिका, स्त्री, शरीरापेक्षया स्थूलं शौर्पमस्याः स्थूलशौर्पा स्वार्थे के स्थूलशौर्पिका ॥ क्षुद्रपिपीलिका । इति हेमचन्द्रः॥ वृहन्मस्तके, त्रि ॥

स्थूलषट्पदः, पुं, (स्थूलः षट्पदः ।) वरेलः । इति भूरिप्रयोगः ॥ बोलता इति भाषा ॥

स्थूलस्कन्धः, पुं, (स्थूलः स्कन्धो यस्य ।) लकुचः । इति राजनिर्घण्टः ॥

स्थूलहस्तः, पुं, (स्थूलो हस्तः ।) हस्तिशुण्डम् । इति त्रिकाण्डशेषः ॥ (यथा, मेघदूते । १४ ।

"स्नानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥"

स्थूलौ हस्तौ यस्येति ।) पीनभुजे, त्रि॥

स्थूला, स्त्री, (स्थूल + टाप् ।) गजपिप्पली । इति शब्दचन्द्रिका ॥ एर्व्वारुः । इति राजनिर्घण्टः॥ वृहदेला । इति रत्नमाला ॥

स्थूलांशा, स्त्री,(स्थूलोऽंशो यस्याः ।)गन्धपत्रा । इति राजनिर्घण्टः ॥

स्थूलाम्रः, पुं, (स्थूलः आम्रः ।) महाराजचूतः । इति राजनिर्घण्टः ॥

स्थूलास्यः, पुं, (स्थूलं आस्यं यस्य ।) सर्पः । इति शब्दचन्द्रिका ॥ वृहन्मुखे, त्रि ॥

स्थूली, [न्] पुं, (स्थूलं शरीरमस्यास्तीति। इनिः ।) उष्ट्रः । इति केचित् ॥

स्थूलैरण्डः, पुं, (स्थूल एरण्डः ।)वृहदेरण्डवृक्षः । तत्पर्य्यायः । महैरण्डः २ महापञ्चाङ्गुलः ३ । अस्य गुणाः ।

"स्थूलैरण्डो गुणाढ्यः स्याद्रसवीर्य्यविपक्तिषु॥"

इति राजनिर्घण्टः ॥

स्थूलेला, स्त्री, (स्थूला एला ।) एलाविशेषः । वड़ एलाचि इति भाषा । तत्पर्य्यायः । वृहदेला २ त्रिपुटा ३ त्रिदिवोद्भवा ४ सुरभीत्वक् ५ महैला ६ पृथ्वी ७ कन्या ८ कुमारिका ९ कायस्था १० गोपुटा ११ भद्रैला १२ कान्ता १३ घृताचीगर्भसम्भवा १४ इन्द्राणी १५ दिव्यगन्धा १६ ऐन्द्री १७ । एलाद्वयगुणाः । शीतलत्वम् । तिक्तत्वम् । उष्णत्वम् । सुगन्धित्वम् ।

पित्तार्त्तिकफापहत्वम्। हृद्रोगमलार्त्तिवस्ति-कारित्वम्। पुंस्त्वनाशित्वम्। अत्र स्त्रविराया गुणाध्यत्वञ्च ॥ स्थूलैलागुणाः। रोचनत्वम्। तीक्ष्णत्वम्। लघुत्वम्। उष्णत्वम्। कफपित्त-हृल्लासत्रिपत्यस्याग्निरोरुग्वमिकासनाशि-त्वञ्च। इति राजनिर्घण्टः ॥

स्थूलोच्चयः, पुं, (स्थूलानामुच्चयो यत्र।) गण्डो-पलः। गजानां मध्यमगतिः। (यथा, माघे। १२। १६।

स्थूलोच्चयैनागमदन्तिकागतां
गजोऽग्रयायाग्रकरः करेणुकाम् ॥")

असाकल्यम्। वरण्डः। इति मेदिनी ॥ हस्ति-दन्तरत्नम्। इति शब्दमाला ॥

स्थेयः, पुं, (तिष्ठति विवादनिर्णयार्थमस्मिन्निति। स्था+यत्।) विवादपत्तस्य निर्णेता। (यथा, राजतरङ्गिण्याम्। ६। १३ :

"कात्तान्तिको भिषक् सभ्यो गुरुर्मन्त्री पुरोहितः
दूतः स्थेयो लेखको वा न तदाभूदपण्डितः॥")

पुरोहितः। इति मेदिनी ॥ स्थिरतरे, त्रि। इति हेमचन्द्रः ॥ (क्ली, स्था+भावे यत्। स्थात-व्यम्। यथा, हरिवंशे। ८५। ७।

"बलिनः सन्निकर्षे तु न स्थेयं पण्डितेन वै।
अयंक्रामेद्धि कालघ्नः समर्थो युद्धमावहेत् ॥")

स्थेयान् [स्थेयस्] त्रि, (अयमनयोरतिशयेन स्थिरः। स्थिर+इयसुन्। "प्रियस्थिरेति।" ६। ४। १५७। इति स्थादेशः।)अतिस्थिरः। इत्यमरः। ३। १। ७३ ॥ (यथा, महागणपतिस्तोत्रे। १५।

"श्रेयःस्थेयः स देयान् मम विमलदृशो बन्धुरं सिन्धुरास्यः॥")

गाढतः। इति भरतः ॥

स्थेष्ठः, त्रि, (अयमेषामतिशयेन स्थिरः। स्थिर+इष्ठन्। "प्रियस्थिरेति। ६। ४। १५७। इति स्थादेशः।) अतिस्थिरः। इति हेमचन्द्रः ॥

स्थैर्य्यं, क्ली, (स्थिरस्य भावः। स्थिर+ष्यञ्।) स्थिरत्वम्। गर्भस्थस्याङ्गानां स्थैर्य्यं चतुर्थे मासि भवति। इति सुश्रुतः ॥ (यथा, याज्ञवल्क्यः। ३। ८०।

"स्थैर्य्यं चतुर्थे लक्षानां पञ्चमे शोणितोद्भवः।
षष्ठे बलस्य वर्णस्य नखरोमाच्च सम्भवः॥"*॥

दृढता। यथा, महाभारते। ६। १३। ८।

"महेन्द्रसदृशः शौर्य्ये स्थैर्य्ये च हिमवानिव।
समुद्र इव गाम्भीर्य्ये सहिष्णुत्वे धरासमः॥")

स्थौरी, [न्] पुं, भारवाहकाश्वः। इति भरत-द्विरूपकोषः ॥

स्थौणेयं, क्ली, (स्थूणायां भवम्। स्थूणा+ढक्।) ग्रन्थिपर्णनामकगन्धद्रव्यम्। इत्यमरः। २।४। १३२ ॥ गाँठियाला इति भाषा ॥ अथ ग्रन्थि-पर्णस्येव गुणः। इषत्सुगन्धि स्थौणेयं गुरु-र्हृद्यं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत् मेधाशुक्रकरं त्वच्यं रक्तोऽत्रीज्वरजन्तुजित् ॥ हन्ति कुष्ठास्रदद्रूदाहदौर्गन्ध्यतिलकालकान्॥"

अथ ग्रन्थिपर्णस्येव भेदो भण्डिउर इति नेपाल-देशे भवति।

"निशाचरो धनहरः क्षितवो गण्डमालकः।
रोचको मधुरस्तिक्तः कटुः पाके कटुर्लघुः ॥
तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफा-निलान्।
रक्तोऽत्रीखेदमेदोऽस्रज्वरगन्धविषव्रणान् ॥"

इति भावप्रकाशः ॥

स्थौणेयकं, क्ली, (स्थौणेयमेव। स्वार्थे कन्।) सुगन्धद्रव्यभेदः। युनिरा इति हिन्दी भाषा। तत्पर्य्यायः। बर्हिशिखम् २ शुकच्छदम् ३ मयूरचूडम् ४ शुकपुच्छकम् ५ विकीर्णरोम ६ कौरवर्णकम् ७ विकीर्णसन्नम् ८ हरितम् ९। अस्य गुणाः। कफवातनाशित्वम्। सुगन्धि-त्वम्। कटुत्वम्। तिक्तत्वम्। पित्तप्रकोपशम-नत्वम्। बलपुष्टिविवर्द्धनत्वञ्च। इति राज-निर्घण्टः। भावप्रकाशोक्तगुणपर्य्यायौ पूर्व्वोक्त-शब्दे द्रष्टव्यौ ॥

स्थौरी, [न्] पुं, खरवृषभवत् पृष्ठेन भारवाहको-ऽश्वः। तत्पर्य्यायः। पृष्ठ्यः २। इत्यमरः २।८। ४६ ॥ हे खरवृषभवत् पृष्ठेन भारवाहकोऽश्वे। पृष्ठेन वहति पृष्ठस्यमपि बाह्यमुपचारात् तद-र्हति वा पृष्ठ्यः ढ्यः कादिति यः। स्थूल्यते संव्रियते पृष्ठमनया स्थूरा स्थूलत् कङ बृंहणे-सेमक्तात् सरोरिति अः निपातनात् लस्य रत्वं स्थूरा पर्य्ययणं तस्या इदमिति ष्णे स्थौरं पृष्ठा रोपितभारादिकं तदस्यस्येति इनि स्थौरी स्थूरी च स्थौरीति स्वामी। इति भरतः ॥

स्थौलशीर्षं, त्रि, (स्थूलशिरस इदमिति। स्थूल-शिरस्+अण्। "अचि शीर्षः।" ६।१।६२। इति शीर्षादेशः।) हृद्दम्भस्तकसम्बन्धि। इति काशिका ॥

स्थौल्यं, त्रि, (स्थूलस्य भावः। स्थूल+ष्यञ्।) स्थूलता। (यथा, भागवते। ३। ११। ३।

"एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम ॥")

स्नपनं, क्ली, (स्ना+णिच्+ल्युट्।) स्नानम्। यथा, दुर्गोत्सवप्रकरणे तिथ्यादितत्त्वे।

"पूजनात् स्नपनं श्रेष्ठं स्नपनात्तर्पणं स्मृतम्।
तर्पणान्मांसदानन्तु मद्दिषाजनिपातनम् ॥"

स्नपितः, त्रि, (स्ना+णिच्+क्तः।) कृतस्नानः। (यथा, गीतगोविन्दे। १२। १।

"गतवति सखीवृन्दे मन्दत्रपाभरनिर्भर-स्मरशरवशाकूतस्फीतस्मितस्नपिताधराम् ॥")

स्रवः, पुं, (स्रु प्रस्रवणे+"ऋदोरप्।" इत्यप्।) स्रवणम्। चरणम्। इत्यमरः। ३। २। ८॥

स्रसा, स्त्री, आयुः। इति हेमचन्द्रः ॥

स्नातः, त्रि, (स्ना+क्तः।) कृतस्नानः। यथा,—

"स्नानोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि
अस्नातस्य क्रियाः सर्व्वा भवन्ति हि यतोऽफलाः
प्रातः समाचरेत् स्नानमतो नित्यमतन्द्रितः॥"

इति प्रायश्चित्ततत्त्वम् ॥

स्नातकः, पुं, (स्नात एव। स्ना+"यावादिभ्यः कन्।" ५। ४। २८। इति स्वार्थे कन्।) आप्लुतव्रती। इत्यमरः। २। ७। ४३ ॥ हे समाप्तवेदाध्ययने स्नानशीले स्नातं स्नानं शील-मस्य। स्नातकः विकारसंज्ञेति कः। आप्लुतं स्नानं तत्र व्रती नित्यस्नायी। स्ना प्लुत्यां भावे क्तः आप्लवव्रतीति क्वचित् पाठः। ब्रह्मचर्य्यं त्यक्त्वा यो गृहाश्रमं गतः स स्नातकः। समाप्त-वेदाध्ययनो यः स्नानशीलः आश्रमान्तरं न गतः सोऽपि स्नातकः। स्नातकस्त्रिविधः। ब्रह्मचर्य्या-चरणस्य यः शास्त्रबोधितोऽवधिः। तावद्वेद-मुपास्याश्रमान्तरं वेद एवाश्रमान्तरं गतो यः स व्रतस्नातकः। वेदमधीत्यगुरुसन्निधौ वेदाभ्यासं यः करोति स विद्यास्नातकः। पालितसम्यग्-व्रतः प्राप्तवेदो यो द्वितीयाश्रमं गतः स उभय-स्नातकः। इति टीकान्तरे। इति भरतः ॥

स्नानं, क्ली, (स्ना+ल्युट्।) मज्जनम्। अव-गाहनम्। तत्पर्य्यायः। आप्लावः २ आप्लवः३। इत्यमरः। २। ६। १२१ ॥ अभिषेकः ४ इति शब्दरत्नावली ॥ उपस्पर्शनम् ५ सवनम् ६ सर्ज-नम् ७। इति जटाधरः ॥ तदनुकल्पः सम-विधः। मान्त्रम्१ भौमम् २ आग्नेयम् ३ वायव्यम् ४ दिव्यम् ५ वारुणम् ६ मानसम ७। एतेषां विवरणं पश्चात् स्फुटीभविष्यति ॥ * ॥

अस्य गुणाः।

"स्नानं पवित्रमायुष्यं श्रमस्वेदमलापहम्।
शरीरबलसन्धानं केश्यमोजस्करं परम् ॥
उष्णाम्बुनाधःकायस्य परिषेको बलावहः।
तेनैव तूत्तमाङ्गस्य बलकृत् केशचक्षुषोः ॥
विनिहन्ति शिरः स्नानं दृष्णातास्नास्यशोध-णम्।
मलोष्णपीड़काकण्डूं शिरोरोगांश्च पैत्तिकान्॥
मधुकामलकैः स्नानं पित्तघ्नं तिमिरापहम्।
स्नानं वचाघनैरिष्टं श्लेष्मघ्नं तिमिरापहम् ॥
स्नानं क्षुत्तिलैर्यापि चक्षुष्यमनिलापहम्।
अस्नातस्य शरीरस्य उष्मा सर्व्वाङ्गगोचरः ॥
स्नानेनैकत्वमायाति तेन दीप्यति पावकः।
स्नानमर्द्दितनेत्रास्यकर्णरोगातिसारिषु ॥
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम्।
दौर्गन्ध्यं गौरवं कण्डूं कच्छुं मलमरोचकम्।
स्वेदं बीभत्सतां हन्ति शरीरपरिमार्জ্জनम् ॥"

इति राजवल्लभः ॥*॥

अथ स्नानविधिः। दक्षः।

"चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्।
तिलपुष्पकुशादीनि स्नानशाटमिमे जले ॥"

कुर्य्यादिति शेषः। तथा च।

"अस्नात्वा चाप्यदत्त्वा च भुङ्क्ते ऽदत्त्वा च
यो नरः।
देवादीनामृणी भूत्वा नरकं प्रतिपद्यते ॥"*॥

अथ स्नानम्। दक्षः।
"अस्नात्वा नाचरेत् कर्म्म जपहोमादि किञ्चन।
लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान्॥
अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः।
सवत्सैव दिवारात्रौ प्रातःस्नानं विशोधनम्॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टफलं हि तत्।
सर्व्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम्॥
अज्ञानात् यदि वा मोहात् रात्रौ दुश्चरितं कृतम्।
प्रातःस्नानेन तत् सर्व्वं शोधयन्ति द्विजातयः॥"
दृष्टं मलापकर्षादि अदृष्टं प्रत्यवायपरीहारादि॥
प्रातः सूर्य्योदयात् प्राक्कालः। प्रातःस्नाय्यरुणकिरणग्रस्तां प्राचीमवलोक्य स्नायात्। इति विष्णूक्तेः॥ * ॥ प्रातःस्नाने मध्याह्नस्नानधर्म्मातिदेशमाह कात्यायनः।
"यथाह्नि तथा प्रातर्नित्यं स्नायादनातुरः।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत्॥"
यथा तथेतिकर्त्तव्यतया। सा च।
"आचरेदुषसि स्नानं तर्पयेत् देवमानुषान्।"
इति जाबाल्युक्ता॥
वैदिके कर्म्मणि वामहस्ते बहुतरकुशान् दक्षिणेन पवित्रं धारयेत्। मार्कण्डेयः।
"सर्व्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः
श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः।
सप्तमीं नवमीञ्चैव पर्व्वकालञ्च वर्জ्जयेत्॥"*॥
विष्णुधर्म्मोत्तरे।
"त्वराक्रोधौ तथा वर्জ्यौ दैवकर्म्मणि पण्डितैः।
दृष्टुरापः पयश्चैव ताम्बूलं फलमौषधम्।
अश्नयित्वा तु कर्त्तव्याः स्नानदानादिकाः क्रियाः॥"
भविष्योत्तरे।
"स्नातुस्तु वरुणस्तेजो जुह्वतोऽग्निः श्रियं हरेत्
भुञ्जानस्य यमस्त्वायुस्तस्मात्र व्याहरेत्त्रिषु॥"
स्नातुः स्नानं कुर्व्वतः। न व्याहरेत् न कथयेत्॥
अशुचेरवगाहनानन्तरं स्नानमाह योगियाज्ञवल्क्यः।
"तूष्णीमेवावगाहेत यदा स्यादशुचिर्नरः।
आचम्य तु ततः पश्चात् स्नानं विधिवदाचरेत्॥"
वामनपुराणम्।
"नाभिमात्रजले गत्वा स्नात्वा केशान् द्विधा द्विजः।
निरुध्य कर्णौ नासाञ्च त्रिस्त्रो मज्जनं ततः॥"
तत्रैव हयग्रीवयाज्ञवल्क्यः।
"स्रोतसां संमुखो मज्जेत् यत्रापः प्रवहन्ति वै।
स्नात्वरेषु गृहे चैव सूर्य्यसंमुख आप्लवेत्॥"
हारीतः। नातुरो न भुक्त्वा न जीर्णवासा न बहुवासा न नग्नो नाग्नन् नावसक्थिको नालङ्कृतो नाजस्रं नाप्नाते जले नाकुले नाशुचौ न प्रभूतजले न नामेध्यजले न पत्वले नोपहारे नो सन्ध्यायां न निशायां स्नायादिति। पत्वले काकादिवलिस्थले इति श्रीदत्तः॥ उपहारे हारसमीपे। अत्रैकेन मुनिना वस्त्रबहुवाससोर्निषेधविधानात् स्नाने द्विवाससः एवाधिकारः प्रतीयते॥ * ॥ एकवस्त्रस्नाने दोषमाह समुद्रकरकृतभाष्ये गोतमः।
"एकवस्त्रेण यत् स्नानं सूच्या विद्धेन चैव हि।
स्नातस्तु न भवेत् शुद्धः स्त्रिया च परिहीयते॥"
अतएव।
"स्नानं तर्पणपर्य्यन्तं कुर्य्यादेकेन वाससा।"
इति॥
यदि समूलं तदा प्रेततर्पणपरमिति। अत्रैकवस्त्रा श्रुतय इत्यादिना एकवस्त्रत्वविधानात्। एकेन एकजातीयेन इति वाचस्पतिमिश्रः॥ येन वाससा स्नानं कृतं जलस्थस्य तेनैव तर्पणम्। इति कृत्यतत्त्वार्णवः॥ न च।
"स्नानशाट्यान्तु दातव्या शुद्धस्त्रिसो विशुद्धये।
जलमध्ये तु यः कश्चित् द्विजातिर्ज्ञानदुर्बलः।
निष्पीड्यति तदस्त्रं स्नानं तस्य हृथा भवेत्॥"
स्नानशाट्यामिति तदस्त्रमिति एकवचननिर्देशेन च स्नानेऽप्येकवस्त्रत्वमिति वाचं अत्र विशुद्धये इत्यभिधानेनाधौतवस्त्रस्यैव सूत्रयेण प्रक्षालनं न तूत्तरीयस्य एतदर्थमेकवचनम्। अत एव सूत्रयेणाधरीयवस्त्रं प्रक्षाल्य इत्याह्निकचिन्तामणिः॥ वशिष्ठवचनस्यैकवाक्यतया स्नातो नाङ्गानि निर्मज्यात् स्नानशाट्या न पाणिना। इति विष्णुपुराणीयेनाधरीयवस्त्रेण गात्रमार्জनं निषिध्यते। एतेन निष्पीड्य स्नानवस्त्रमिति कात्यायनवचने एकत्वमविवक्षितमिति निरस्तम्। अतएव सर्व्वत्रैकत्वनिर्देशः। शिष्टानामाचारोऽपि तथेति॥ * ॥ नाजस्रमिति पुनः पुनः स्नाननिषेधः रागप्राप्तस्नानविषयो दृष्टार्थकत्वात्। एवञ्चैकस्मिन् दिने नानातीर्थादिनिमित्तप्राप्तस्नानावृत्तिर्भवत्येव वैधत्वात्। अत्रापि तन्त्रप्रसङ्गयोः सत्त्वे सकृदेवेति॥ * ॥ आतुरं प्रति जाबालः।
"अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु कर्म्मिणाम्।
आर्द्रेण वाससा वापि दैहिकं मार्জनं स्मृतम्॥"
कर्म्मिणाम्।
"शिरस्नातस्तु कुर्व्वीत दैवं पैत्रमथापि वा।"
इति मार्कण्डेयपुराणोक्तकर्म्मविकीर्षूणां मार्জनमिह प्रोक्तम्। योगियाज्ञवल्क्यः।
"असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया।
मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः॥
मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च।
वारुणं मानसञ्चैव सप्तस्नानं प्रकीर्त्तितम्॥
आपोहिष्ठेति वै मान्त्रं भूदाहभस्तु पार्थिवम्
आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्॥
यत्तु स्नातपवर्षेण स्नानं तद्दिव्यमुच्यते।
वारुणस्नावयाद्यच्च मानसं विष्णुचिन्तनम्॥
समस्तं स्नानमुद्दिष्टं मन्त्रस्नानक्रमेण तु।
कालदोषादसामर्थ्यात् सर्व्वं तस्य फलं स्मृतम्॥"
आपोहिष्ठेति आपोहिष्ठादि ऋक्त्रयमत्र विवक्षितम्। एवञ्च।
कालदोषादसामर्थ्यात् न शक्नोति यदाप्नुयात्।
तदा स्नात्वा तु ऋषिभिर्मन्त्रैर्जुष्टन्तु मार्জनम्॥
अत्र आपस्तु दृषदा आपोहिष्ठाघमर्षणम्।
एभिस्तुभिर्ऋषिभिर्मन्त्रस्नानमुदाहृतम्॥"
इति योगियाज्ञवल्क्यीयं यन्मन्त्रस्नानान्तरं तत् प्राधान्यख्यापनाय अतएव पिप्पलदयितायां सन्ध्यातः पूर्व्वं तल्लिखितम्। मृदाहरणन्तु गङ्गादिमृत्तिकातिलकरूपः। भस्मना संस्कृतभस्मना इति छन्दोगाह्निकः। अवगाह्य मन्त्राद्यङ्गशून्यावगाहनमात्रं विवक्षितं अतो मुख्यावगाहनरूपस्नानानुकल्पत्वमप्युक्तम्। कालदोषोऽतिहृष्टादिः। असामर्थ्यं शरीरापाटवहेतुः। जलस्य स्वल्पत्वेन सम्पूर्णवारुणस्नानविधिकालायोग्यत्वं वेति। एतन्मूलकं गेहे चेत्तदमन्त्रवदिति छन्दोगपरिशिष्टीयं पूर्व्वोक्तं अन्यथा मूलभूतश्रुत्यन्तरकल्पनापत्तेः॥ सामर्थ्यं तूद्धृतजलेनापि सन्त्रकस्नानमाह पराशरभाष्ये व्यासः।
"शीतास्वपो निषेव्योष्णा मन्त्रसंस्कारसंस्कृताः
गेहेऽपि शस्यते स्नानं तद्दीनमफलं स्मृतम्॥"
पद्मपुराणम्।
"नैर्मल्यं भावशुद्धिञ्च विना स्नानं न जायते।
तस्मान्नरोविशुद्ध्यर्थं स्नानमादौ विधीयते।
अनुद्धृतैरुद्धृतैर्व्वा जलैः स्नानं सदाचरेत्।
तीर्थं प्रकल्पयेद्विद्वान् मूलमन्त्रेण मन्त्रवित्॥
नमो नारायणायेति मूलमन्त्र उदाहृतः।
दर्भपाणिस्तु विधिना आचान्तः प्रयतः शुचिः॥
चतुर्हस्तसमायुक्तं चतुरस्रं समन्ततः।
प्रकल्प्यावाहयेद्गङ्गां एभिर्मन्त्रैर्विचक्षणः॥
विष्णोः पादप्रसूतासि वैष्णवी विष्णुपूजिता।
पाहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकात्॥
तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत्
दिवि भुव्यन्तरीक्षे च तानि ते सन्ति जाह्नवि॥
नन्दिनीत्येव ते नाम देवेषु नलिनीति च।
दक्षा पृथ्वी च सुभगा विश्वकायाशिवा सिता॥
विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी।
क्षमा च जाह्नवी चैव शान्ता शान्तिप्रदायिनी॥
एतानि पुण्यनामानि स्नानकाले प्रकीर्त्तयेत्।
भवेत् सन्निहिता तत्र गङ्गा त्रिपथगामिनी॥
सप्तवाराभिजप्तेन करसंपुटयोजितम्।
मूर्द्ध्नि दद्यात् जलं भूयस्त्रिसप्त सप्त वा।
स्नानं कुर्य्यान्मृदा तद्वत् मन्त्रवच्च विचक्षणः॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्॥
उद्धृतासि वराहेण कृष्णेन शतबाहुना॥
मातर्मम गात्राणि सर्व्वं पापं प्रमोचय।
नमस्ते सर्व्वभूतानां प्रभवारिणि सुव्रते॥"*॥
नमो नारायणाय इत्यष्टाक्षररूपमूलमन्त्रेण चतुरस्रं चतुष्कोणरूपं समन्ततः सर्व्वदिक्षु चतुर्हस्तं जलं प्रतिदिक्षु हस्तमात्रेण व्यवच्छिद्य तीर्थं प्रकल्पयेत्। विततं नद्यादिजले स्नानस्नानं परिच्छिन्द्यात्। तत्र विष्णोः पाद इत्यादिना

शान्तिप्रदायिनीत्यन्तेन मन्त्रेण गङ्गामावाहयेत् सप्तवाराभिजप्तेनेति सप्तवाराभिजप्तेन नमो नारायणायेति मन्त्रेणाभिमन्त्रेति शेषः। एकवचननिर्देशात् तस्य मूलमन्त्रतोक्त्या च अत्रापि विनियोगोऽवगम्यते। ततश्च सप्तवारपठितनारायणमन्त्रेण जलमभिमन्त्र्य करयुगेन त्रिवारादि मूर्द्धि क्षिपेत्। ततश्चाक्रान्त इति मन्त्राभ्यां तद्दिति जप्ताभ्याम्।

"मृत्तिकाः सप्त न ग्राह्या वल्मीके मूषिकोत्करे।
अन्तर्जले श्मशाने च हृत्तमूले सुरालये।
परस्नानावशिष्टे च शेषस्कामैः सदा नरैः॥"

इति दक्षप्रतिषिद्धेतरां मृदमामन्त्र्य तया मृदा शिरःप्रभृत्यालभ्यानुद्धृतैर्व्या जलैः शिरः प्रभृत्यङ्गस्नानमवगाहनरूपप्रधानं वारुणस्नानं समाचरेदिति पूर्व्वोक्तेनान्वयः। मृदग्रहणमन्त्रे प्रभवारिणि इति प्रभवमुत्पत्तिमर्त्तुं प्रापयितुं शीलमस्यास्तत्सम्बोधनमिदम्। अवगाहनन्तु चक्षुःकर्णनासिकामङ्गलीभिराच्छाद्य कुर्य्यात्।

"अङ्गुलीभिः पिधायैवं श्रोत्रदृङ्नासिकामुखम्
निमज्जेत प्रतिस्रोतस्त्रिः पठेदघमर्षणम्॥"

इति समुद्रकरधृतात्।

अत्रानुद्धृते वारत्रयमेवावगाहनं प्रागुक्तवामनपुराणात्। एष विधिः पौराणिकत्वात् सर्व्वशाखिसाधारणः। वेदमन्त्ररहितत्वादनधीतवेदानामपि सर्व्वथादरणीयः॥ *॥ मत्स्यपुराणम्।

"नद्यां प्रत्येकशः स्नाने भवेद्गोदानजं फलम्।
गोप्रदानेन दशभिस्तासां पुण्यन्तु सङ्गमे॥"

वशिष्ठः।

"योऽनेन विधिना स्नाति यत्र तत्राम्भसि द्विज।
स तीर्थफलमाप्नोति तीर्थं तु द्विगुणं फलम्॥"

अनेन तीर्थावाहनादिना। अतो गङ्गायामप्यावाहनं कुर्व्वन्ति शिष्टाः। अत्र च। माघसप्तम्यादिनिमित्तकतीर्थविशेषनिमित्तकमन्त्रपाठस्तु मृदालम्भनानन्तरं कार्य्यः। आगन्तुकानामन्ते ऽभिनिवेश इति न्यायात्। एवं गङ्गायां विशेषमन्त्रानन्तरमेव दशहरादिमन्त्राः पाठ्याः। तत्र गङ्गायां विशेषमन्त्रौ विद्याकरधृतौ।

"विष्णुपादार्घ्यसम्भूते गङ्गे त्रिपथगामिनि।
धर्म्मद्रवीति विख्याते पापं मे हर जाह्नवि॥
अद्भया भक्तिसम्पन्ने श्रीमातर्हेदि जाह्नवि।
अमृतेनाम्बुना देवि भागीरथिपुनीहि माम्॥"

गोविन्दहादश्यां स्नाने गङ्गायां पद्मपुराणीयो मन्त्रः।

"महापातकसंज्ञानि यानि पापानि सन्ति मे।
गोविन्दहादशीं प्राप्य तानि मे हर जाह्नवि॥"

गङ्गासागरसङ्गमे मन्त्रः।

"त्वं देव सरितां नाथ त्वं देवि सरितांवरे।
उभयोः सङ्गमे स्नात्वा सुखामि दुरितानि वै॥"

लौहित्यस्नाने तु मन्त्रः।

"ब्रह्मपुत्र महाभाग शान्तनोः कुलनन्दन।
अमोघागर्भसंभूत प्राप्तं लौहित्य मे हर॥"*॥

करतोयास्नानमन्त्रः॥

"करतोये सदानीरे सरित्श्रेष्ठे सुविश्रुते।
पीडान् शमयसे नित्यं पापं हर करोद्भवे॥"*॥

विष्णुः। स्नातः शिरो नावधुनेत् नाङ्गेभ्यस्तोयमुद्धरेत्। न तैलं वा संस्पृशेत् नाप्रोक्षितं पूर्व्वधृतं वासो बिभृयात्। स्नात एव सोष्णोदो धौतं वाससी बिभृयात् न म्लेच्छान्त्यजपतितैः सह सम्भाषणं कुर्य्यात् इति। नाङ्गेभ्यस्तोयमुद्धरेदिति स्नानशाटीपाटिभ्यां पूरणीयम्।

"स्नातो नाङ्गानि निर्मृज्यात् स्नानशाट्या न पाणिना॥"

इति विष्णुवचनात्।

अत्र वासोऽन्तरधारणात् प्राक्कृततैलस्पर्शनिषेधः प्रतीयते।

"शिरःस्नातस्तु तैलेन नाङ्गं किञ्चिदुपस्पृशेत्॥"

इति मनुवचनमेतत्परम्॥*॥

याज्ञवल्क्यः।

"ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते।
तूष्णीमेव हि शूद्रस्य मनसस्कारकं मतम्॥
अगम्यागमनात् स्तेयात् पापिभ्यश्च प्रतिग्रहात्
रहस्याचरितात् पापात् सुच्यते स्नानमाचरन्॥
प्रकर्त्तुमसमर्थश्चेत् जुहोति यजति क्रियाः।
स्नानध्यानजपैर्दानैरात्मानं शोधयेद्बुधः॥"

ब्रह्मपुराणम्।

"नद्यां प्रत्येकशः स्नाने भवेत् गोदानजं फलम्
गोप्रदानैस्तु दशभिस्तासां पुण्यन्तु सङ्गमे॥"*

मनुः।

"न स्नानमाचरेत् भुक्त्वा नातुरो न महानिशि।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये॥"

न स्नानमाचरेद्भुक्तेति रागप्राप्तस्नाननिषेधः। नित्यस्याप्राप्तत्वात्। नैमित्तिकस्य च निषेद्धुमशक्यत्वात्। आतुरः स्नानसम्बन्धकरोगवान्।

"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्।
तस्यां स्नानं न कर्त्तव्यं काम्यनैमित्तिकादृते॥"

न वासोभिः सह इत्यनेनैव बहुवासोनिषेधात् स्नाने द्विवासस्त्वं प्रतीयते। अजस्रं पुनः पुनः। तेन वारुणादिसंक्रान्त्यादि-निमित्तभेद-प्राप्तमेकदा नानास्नानं निषिध्यते। किन्तु तन्त्रेण प्रसङ्गेन चैकं स्नानम्। तथा च निगमः।

"नातर्त्तयेत् पुनः कर्म्म तर्पणादिकमन्वहम्।
काम्यनैमित्तिके हित्वा एकं श्लोकत्र वासरे॥
विषुवद्दिग्गते प्राप्ते पञ्चतीर्थी विधानतः।
स्नात्वा सङ्कर्षणं कृष्णं दृष्ट्वा भद्राञ्च भो द्विजाः।
नरः समस्तयज्ञानां फलं प्राप्नोति दुर्लभम्॥"

इति ब्रह्मपुराणोक्तमार्कण्डेयह्रदे प्रद्युम्नसरोवरे समुद्रकूपादितीर्थादौ तन्त्रप्रसङ्गयोरभावात् पुनः पुनरेकदिनेऽपि नानास्नानमिति॥*॥

"परकीयनिपानेषु स्नायान्नैव कदाचन।
निपानकर्त्तुः स्नात्वा हि दुष्कृतांशेन लिप्यते॥"

निपानं जलाधारमात्रम्। तथा च याज्ञवल्क्यः।

"पञ्च पिण्डाननुद्धृत्य न स्नायात् परवारिणि॥"

योगियाज्ञवल्क्यः।

"अनुद्धृत्य तु यः स्नायात् परकीयजलाशये।
हृया तस्य भवेत् स्नानं कर्त्तुः पापेन लिप्यते॥
स्नानं दानं तपो ध्यानं पितृदेवार्च्चनं तथा।
पावनानि मनुष्याणां दुष्कृतस्येह कर्म्मणः॥"

छन्दोगपरिशिष्टम्।

"यच्चदृश्यं श्रावणादि सर्व्वा नद्यो रजस्वलाः।
तासु स्नानं प्रकुर्व्वीत वर्ज्जयित्वा समुद्रगाः॥
उपाकर्म्मणि चोत्सर्गे प्रेतस्नाने तथैव च।
चन्द्रसूर्य्यग्रहे चैव रजोदोषो न विद्यते॥"

निगमः। न दुष्येत्तीरवासिनाम्। व्याघ्रपादः।

अभावे कूपवापीनामन्येनापि समुद्धृते।
रजोदुष्टेऽपि पयसि ग्रामभोगो न दुष्यति॥
अन्येन कुम्भादिना।

"अन्यैरपि कृते कूपे सेतौ वाप्यादिके तथा।
तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं समाचरेत्॥"

तथा।

"प्रभूते विद्यमाने तु उदके सुमनोहरे।
नाल्पोदके द्विजः स्नायात् नदीस्रोतःसृज्य क्षत्रिये॥"

इति बहुभिर्धृतम्॥

ब्रह्मपुराणे।

"नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते।
तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम्॥
श्मश्रुकर्म्मास्रुपातञ्च मैथुनं क्षुरदर्शनं तथा।
अस्पृश्यस्पर्शनं कृत्वा स्नायादार्द्र्या जलक्रिया॥"

यत्र तु रोगादिना स्नानं न कृतं तत्रापि गात्रमार्जनादिनाशौचमुत्पाद्य पित्र्यप्रसिद्धये तर्पयेत्। तदाह शातातपः।

"तर्पणन्तु शुचिः कुर्य्यात् प्रत्यहं स्नातको द्विजः।
देवेभ्यश्च ऋषिभ्यश्च पित्र्यस्य यथाक्रमम्॥*॥

पुण्ये वा जन्मनक्षत्रे व्यतीपाते च वैधृतौ।
अमावास्यां नदीस्नानं दृष्ट्वान्यज्जन्मदुष्कृतम्॥"

वराहपुराणम्।

"दक्षिणावर्त्तशङ्के च पात्रे ऽप्यौड्डम्बरे स्थितम्।
उदकं यः प्रतीच्छेत शिरसा हृष्टमानसः।
तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति॥
अच्छिन्नपद्मपत्रेण सर्व्वरत्नोदकेन च।
स्रोतसा वै नरः स्नात्वा सर्व्वपापैः प्रमुच्यते॥"

विष्णुधर्म्मोत्तरे।

"तथा दर्भोदकैः स्नानं सर्व्वपापप्रणाशनम्।
गोमूत्रेण च यत् स्नानं सर्व्वाघविनिसूदनम्॥
तथा पुण्योदकस्नानं भवेदारोग्यकारकम्।
केवलैर्व्वा तिलैः स्नानं अथवा गौरसर्षपैः।
स्नानं प्रियङ्गुणा प्रोक्तं तथा सौभाग्यवर्द्धनम्॥
आयुष्यञ्च यशस्यञ्च धर्म्यं मेधाविवर्द्धनम्।
स्नानं पवित्रं माङ्गल्यं तथा कामनवारिणा॥"

शङ्खः।

"स्नातस्य वह्नितोयेन तथा च परवारिणा।
कायशुद्धिं विजानीयात् न तु स्नानफलं लभेत्"

स्नानफलं वैधम्। आयुर्वेदीयन्तु भवत्येव यमः।

"नित्यं नैमित्तिकञ्चैव क्रियाङ्गमलकर्षणम्।
तीर्थाभावे च कर्त्तव्यमुष्णोदकपरोदकैः॥"

विष्णुपुराणम्।
"स्नानार्द्रां धरणीञ्चैव दूरतः परिवर्जयेत्।"
इत्याह्निकतत्त्वम् ॥*॥
तान्त्रिकस्नानविधिर्यथा। तत्र नद्यादौ वैदिकस्नानं कृत्वा तान्त्रिकस्नानमाचरेत्। तथा च गौतमीये।
"अथ स्नानं तथा कुर्य्यात् यथाशास्त्रविधानवित्।
मलप्रक्षालनं स्नानं स्वशाखोक्तं समाचरन्।
मन्त्रस्नानं ततः कुर्य्यात् कर्म्मणां सिद्धिहेतवे॥"
तदयथा। अग्नेत्यादि अमुकदेवताप्रीतये मन्त्रस्नानमहं करिष्ये इति सङ्कल्पं कुर्य्यात्। तथा च कुलचूड़ामणौ।
"ताम्रपात्रं सदूर्व्वञ्च सतिलं सजलं ततः।
गृहीत्वामुकदेवस्य प्रीतये स्नानमाचरेत्॥"
ततः षड़ङ्गन्यासप्राणायामौ कृत्वा गङ्गेच इत्यनेनाङ्गमुद्रया सूर्य्यमण्डलात्तीर्थमावाह्य वमिति धेनुमुद्रयामृतीकृत्य कवचेनावगुण्ठ्यास्त्रेण संरक्ष्य मूलेन एकादशधाभिमन्त्र्य सूर्य्याभिमुखं हादशधारा विनिःक्षिप्य तस्मिन्निष्टदेवताचरणारविन्दनिःसृतजले निमज्य देवतां ध्यायन् मूलमन्त्रं यथाशक्ति जपन् उन्मज्य उदकेन चिवारजसे न कलसमुद्रया त्रिवारमात्मानमभिषिच्य वैदिकसन्ध्यादिकं कृत्वा सूर्य्यार्घं दत्त्वा तान्त्रिकाघमर्षणादिवारिधारान्तं कर्म्म कुर्य्यात्। इति तन्त्रसारः ॥*॥ अन्यच्च।
"जन्मान्तरसहस्रेण यत् पापं कुरुते नरः।
मुच्यते सर्व्वपापेभ्यः स्नात्वा चारुणवे सकृत्॥
याम्यं हि यातनादुःखं नित्यस्नायी न पश्यति
स्नानं मध्यंदिने कुर्य्यात् जीर्णेऽन्ने तु निरामयः
नद्यामस्तमिते स्नानं न कुर्व्वीत सदा बुधः।
नद्यां स्नात्वा नदीं चान्यां न प्रशंसेत पण्डितः॥
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात्।
स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने।
आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्जयेत्॥
नदीदेवनिखातेषु तड़ागेषु सरःसु च।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च॥
निपातनादुद्धृतं पुण्यं ततः प्रस्रवणादिकम्।
ततोऽपि सारसं पुण्यं ततो नादेयमुच्यते।
तीर्थतोयं ततः पुण्यं गङ्गातोयं ततोऽधिकम्॥"
इति वह्निपुराणे आह्निकतत्त्वनामाध्यायः॥
किञ्च।
नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम्
क्रियास्नानं तथा षष्ठं षोढ़ास्नानं प्रकीर्त्तितम्॥
अस्नातस्तु पुमान्नार्हो जप्यादिहैवनादिषु।
प्रातःस्नानं तदर्थन्तु नित्यस्नानं प्रकीर्त्तितम्॥
चाण्डालश्ववराहादेः स्पृष्टो स्नानं रजस्वलाम्।
स्नानार्हश्च यदा स्नाति स्नानं नैमित्तिकं हि तत्॥
पुण्यस्नानादिकं स्नानं दैवज्ञविधिचोदितम्।
तद्धि काम्यं समुद्दिष्टं नाकामस्तत् प्रयोजयेत्
जलकामः पवित्राणि अर्च्चयन् देवतातिथीन्।
स्नानं समाचरेदेयस्तु क्रियाङ्गं तत् प्रकीर्त्तितम्
मलापकर्षणं नाम्ना स्नानमभ्यङ्गपूर्व्वकम्।
मलापकर्षणार्थाय प्रवृत्तिस्तत्र नान्यथा॥
सर्व्वेषु देवखातेषु तीर्थेषु च नदीषु च।
स्नानमेव क्रिया यस्मात् क्रियास्नानमतः स्मृतम्
इति गारुड़े १०५ अध्यायः॥*॥
कुग्रहस्तस्य वैष्णवविशेषस्य स्नानादिनिषेधो मानसस्नानप्रशंसा च यथा,—
"सर्व्वकर्म्मफलत्यागी हरेः संकल्पवर्जितः।
नो द्विजः कुग्रहस्तः स्यात् स्नानपूजाजपादिषु॥
कदाचिद्दर्भस्तो न त्यक्तकामस्तु वैष्णवः।
स्नानादिषु च कृत्येषु गोविन्दस्यार्च्चनादिषु॥
मृदासनः कुग्रकरो वैष्णवो न भवेद्विजः।
हरेः कुर्य्यात् प्रयत्नेन सर्व्वसेवाजपादिषु॥
अस्नातो न जपेन्मन्त्रं गोविन्दस्य महात्मनः।
कदाचिदशुचिर्भूत्वाप्यस्नातोऽपि च मानवः॥
मानसस्नातको लोको मुकुन्दस्यार्च्चनादिषु।
पूतात्मा यदि मन्त्रस्य शुद्धो भवति जापकः॥
भवेत्तु मानससायी यो बाह्याभ्यन्तरः शुचिः।
जपाधिकारी स भवेत् क्षणमन्त्रस्य मानवः॥
ऐन्द्रस्नानाहरं काम्यं काम्यादाग्नेयमेव च।
आग्नेयादाशुचं श्रेष्ठं वारुणञ्चाशुचादपि॥
अवगाहं वारुणात्तु वैदिकञ्चावगाहनात्।
वैदिकादपि नैमित्तं तस्माद्धे मार्জ্জनं वरम्॥
मार्জ্জनान्मान्त्रिकं श्रेष्ठं भौमं स्यान्मान्त्रिकाधिकम्।
भौमस्नानाहरं ब्राह्मं ब्राह्मतः पौष्णमेव च॥
पौष्णतो नैर्मलं स्नानं वायव्यञ्च ततोऽधिकम्।
वायव्यान्मानसञ्चेह सर्व्वस्नानात् परं वरम्॥
मर्त्तयेत् मानससातः सर्व्वत्र विजयी भवेत्।
गोविन्दसर्व्वसेवासु चार्हतामेति धारणा॥
न जापको वैष्णवः स्यात् हरेर्भजनतत्त्ववित्।
मानसस्नानवान् यो वा भक्तश्चात्र सदा सुखी॥"
इति पाद्मोत्तरखण्डे १०८ अध्यायः॥*॥
अन्यच्च।
"मानसं वैदिकं चैव मान्त्रिकं मार्জ্জनं तथा।
अवगाहनञ्च नैमित्तमाशुचं पुण्यमेव च॥
नैर्मलं वारुणं ब्राह्मं मैत्रं काम्यञ्च नारद।
वायव्यं भौममाग्नेयं षोड़शस्नानमीरितम्॥
गोविन्दमन्त्रग्रहणं दीक्षया तु गुरोर्नृणाम्।
यदाभिषिक्तं चित्तं स्यात्तत्स्नानं मानसं शुभम्
मर्त्त्यस्य नामग्रहणं यदा कार्ष्णाश्चरे गुरोः।
स्नानदेहेन्द्रियमनस्तत् स्नानं मानसं भवेत्॥
नामसंकीर्त्तनं विष्णोर्नरः कुर्य्यादकैतवात्।
सदैव चेन्महास्नानं शरीरसुखकारणम्॥
कथा कस्त्वा स्वस्ति नद्येत् यदि वेदैश्च वैदिकम्
दर्भाग्रान्तरदकैः स्नानं यस्यान्ते अभिषेचनम्॥
सहस्रशीर्षा तद्विष्णोरिति मन्त्रादिभिर्द्विज।
चेत् पयोऽभ्युक्षणं स्नानं मान्त्रिकं समुदाहृतम्
ॐ शन्न आपोहिष्ठेति ऋतञ्चेत्यादिभिर्यदि।
पाठे कुर्य्यात् कुशस्नानं मार्জ্জनं द्विज ईरितम्
जलेषु मज्जतां नृणां मज्जनन्तु यदा शिरः।
तदा सर्व्ववपुश्च स्यादवगाहनमुच्यते।
गोविन्दद्वादशीमाघीवारुण्यर्क्षोदयादिषु।
स्नानं यत्तच्च नैमित्तं ग्रहणे चन्द्रसूर्य्ययोः॥
मैथुने वमने रेतःस्खलने मृतके तथा।
विण्मूत्रादिग्रवस्त्रेण शवानुगमनेऽपि च॥
निद्रान्ते जातकेनृणामस्पृश्यस्पर्शनादिषु।
रजस्वलाचतुर्थाह्नि यत् स्नानं स्यात्तदाग्नेयम्॥
गङ्गादिमर्व्वतीर्थेषु विष्णुपादोदकैस्तथा।
यत् स्नानमभिषेकञ्च पुण्यं तत् परिकीर्त्तितम्
हेलया श्रद्धया नृणां भक्त्या यत्नेन नारद।
गङ्गाम्भोयष्टिवत्स्नानं महापापादिनाशनम्॥
गङ्गास्नानं मनुष्याणां सर्व्वकल्मषनाशनम्।
स्तम्बवच्चापि काष्ठस्य भवेन्मूषलवत् यदि॥
स्नानं स्यात् सर्व्वतीर्थेषु नानायज्ञफलप्रदम्।
ग्रालग्रामशिलावारि योऽभिषेकं समाचरेत्॥
अकालमृत्युहरणं सर्व्वव्याधिविनाशनम्।
विष्णोः पादोदकं पीत्वा शिरसा धारयेद्यदि
यदि सर्व्वमनुष्याणां बाह्यान्तर्मलशोधनम्।
तदेव नैर्मलस्नानं शरीराणां भवेत् ध्रुवम्॥
स्वेदाश्रुमज्जाविण्मूत्रचिकुराः क्षतजा वसा।
दूषिका कर्णविट् श्लेष्मा नृणां बाह्यमलाः स्मृताः
मलैस्तु मलिनो देहो नवच्छिद्रैश्च क्षिद्रितः।
सर्व्वत्यविरतं पूर्णो दिवारात्रौ मलानतः॥
अद्भिश्च गोमयैश्चापि मलानामपमार्জ্जनम्।
सर्व्वत्र क्षालनं कृत्वा सर्व्वाङ्गप्रयतो मुनिः॥
अष्टाङ्गयोगाभ्यासेन देहप्रक्षालनं ततः।
नरोऽम्बुमज्जनं कुर्व्वन् स्नानं भवति नैर्मलम्॥"
इति पाद्मे उत्तरखण्डे ११३ अध्यायः॥*॥
किञ्च।
"तुलामकरमेषेषु प्रातःस्नानं विधीयते।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम्॥
अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनम्।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहाभवेत्
करेण मार्জ্জयेद्रात्रं स्नानवस्त्रेण वा यदि।
शुनास्पृष्टं भवेद्रात्रं पुनः स्नानेन शुध्यति॥
अप्रक्षाल्य तु पादौ यः स्नात्वा गच्छति मन्दिरम्
संवत्सरकृतं पुण्यं तत्क्षणादेव नश्यति॥
स्नानं रजकतीर्थेषु भोजनं गणिकालये।
शयनं पूर्व्वपादे च ब्रह्महत्या दिने दिने॥"
इति कर्म्मलोचनः॥
अन्यत् मत्स्यसूक्ततन्त्रे ३८ पटले द्रष्टव्यम्॥
स्नानट॰, क्लो, (स्नानाय टक्॥) कुशः। इति शब्दमाला॥
स्नानयात्रा, स्त्री, (स्नानस्य यात्रा उत्सवः।) ज्यैष्ठपौर्णमास्यां श्रीविष्णोर्महास्नानरूपोत्सवः यथा, ब्रह्मपुराणम्।
"मासि ज्यैष्ठे तु संप्राप्ते नक्षत्रे शक्रदैवते।
पौर्णमास्यां तदा स्नानं सर्व्वपापं हरेद्विजाः॥
तस्मिन् काले तु ये मर्त्याः पश्यन्ति पुरुषोत्तमम्
बलभद्रं सुभद्राञ्च ते यान्ति पदमव्ययम्॥"
स्कन्दपुराणविष्णुधर्म्मोत्तरयोः।
"ज्यैष्ठामहस्यावतीर्णस्तत् पुण्यं जन्मवासरम्।

तस्यां मे स्वपनं कुर्य्यान्महास्नानविधानतः ॥
ज्येष्ठां प्रातःस्नानकाले ब्रह्मणा सहितञ्च माम्
रामं सुभद्रां संस्थाप्य मम लोकमवाप्नुयात् ॥"
इति तिथ्यादितत्त्वम् ॥
अन्यत् यात्राशब्दे द्रष्टव्यम् ॥

स्नानीयं, क्ली, (स्नात्यनेनेति । स्ना + करणे अनीयर् । यद्वा, स्नानाय हितम् । स्नान + छः ।) स्नानयोग्यम् । स्नानसम्पादकद्रव्यम् । यथा,—
"गङ्गादीनाञ्च तीर्थानां वारि कुम्भप्रपूरितम् ।
स्नानीयं ते प्रयच्छामि स्नानं कुरु विलोचने ॥"
इति दुर्गासप्तशतिः ॥

स्नायी, [न्] त्रि, (स्नातीति । स्ना + णिनिः ।) स्नानकर्त्ता । यथा, तिथ्यादितत्त्वे ।
"प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुणौ ॥"

स्नायुः, स्त्री, (सा + बाहुलकात् उण् । "आतोयुक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् । इत्युणादिवृत्तौ उज्ज्वलः । १ । १ ।) वायुवाहिनी नाड़ी । महुर इति ख्याता । इति भरतः ॥ तत्पर्य्यायः । वसना २ इत्यमरः । २ । ६ । ६६ ॥ स्नसा ३ नसा ४ । इति राजनिर्घण्टः ॥ स तु गर्भस्थस्य सप्तभिर्मासैर्भवति । इति सुश्रुतसंहितायां शारीरस्थाने ४ अध्यायः ॥ (यथा, याज्ञवल्क्यः । ३ । १०० ।
"शिराः शतानि सप्तैव नवस्नायुशतानि च ॥"
"नवस्नायुशतानि तासां शाखासु षट्शतानि । द्वे शते त्रिंशच्च कण्ठे । ग्रीवा प्रत्यूहं सप्ततिः ॥ एकैकस्यान्तु पादाङ्गुल्यां षट्निचितास्त्रिंशत्तावत्य एव तलकूर्चगुल्फेषु । तावत्य एव जङ्घायाम् । दशजानुनि । चत्वारिंशदूरौ । दश वङ्क्षणे । शतमध्यर्द्धमेवमेकस्मिन् सक्थ्नि भवन्ति । एतेनेतरसक्थि बाहू च व्याख्यातौ । षष्टिः बाह्वाम् । अशीतिः पृष्ठे । पार्श्वयोः षष्टिः । उरसि त्रिंशत् ॥ षट्त्रिंशदग्रीवायाम् मूर्द्धनि चतुस्त्रिंशत् । एवं नव स्नायुशतानि व्याख्यातानि । भवन्ति चात्र ।
स्नायुश्चतुर्व्विधा विद्यात्तासु सर्व्वा निबोध मे ।
प्रतानवत्यो वृत्ताश्च पृथ्व्यश्च सुषिरास्तथा ॥
प्रतानवत्यः शाखासु सर्व्वसन्धिषु चाप्यथ ।
वृत्तास्तु कण्डराः सर्व्वा विज्ञेया कुशलैरिह ॥
आमपक्वाशयान्तेषु वस्तौ च शुषिराः खलु ।
पार्श्वोरसि तथा पृष्ठे पृथुलाश्च शिरस्यथ ॥
नौरिवा फलकास्तीर्णा बन्धनैर्बहुभिर्युता ।
भारक्षमा भवेदस्तु पृथुला सुसमाहिता ।
एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः ॥
स्नायुभिर्व्वहुभिर्व्वद्धास्तेनभारसहा नराः ।
नह्यस्नोनि न वा पेश्यो न शिरा न च सन्धयः ॥
व्यापादितास्तथा हन्युर्यथा स्नायुः शरीरिणम् ।
यः स्नायुः प्रविजानाति वाह्याभ्यन्तरास्तथा
गूढं स शल्यमाहर्त्तुं देहाच्छक्नोति देहिनाम् ॥"
इति सुश्रुते शरीरस्थाने पञ्चमेऽध्याये ॥)

स्नायुमं, [न्] क्ली, नेत्ररोगप्रभेदः । तस्य लक्षणं यथा
"स्थिरं प्रस्तारि मांसाढ्यं शुष्कं स्नायुमपक्ष्मम् ॥"
इतिमाधवकरः ॥ अन्यत् नेत्ररोगशब्दे द्रष्टव्यम्

स्नावा, [न्] पुं, (स्ना + "स्नामदिपदीति ।" उणा० ४ । ११२ । इति वनिप् ।) स्नायुः । इति केचित् ॥ (यथा, वाजसनेयसंहितायाम् ३८ । १०
"मांसेभ्यः स्वाहा स्नावभ्यः स्वाहा ॥"
"स्नवभ्यः स्नावानः स्नायवो नसाः ।" इति तट्टीकायाम् ॥ * ॥ त्रि, रसिकः । इत्युणादिवृत्तौ उज्ज्वलदत्तः ॥)

स्निग्धं, क्ली, (स्निह + क्तः ।) घृतकम् । इति राजनिर्घण्टः ॥

स्निग्धः, पुं, (स्निह्यति स्नेहति । स्निह + अकर्म्मकत्वात् कर्त्तरि क्तः ।) वयस्यः । इत्यमरः । २ । ८ । १२ ॥ रक्तैरण्डः । सरलवृक्षः । इति राजनिर्घण्टः ॥

स्निग्धः, त्रि, (स्निह + क्तः ।) स्नेहयुक्तः । मसृणः । (यथा, महाभारते । १ । १५३ । ९ ।
"अष्टौ दंष्ट्राः सुतीक्ष्णायाश्चिरस्यापातदुःसहाः
देहेषु मज्जयिष्यामि स्निग्धेषु पिशितेषु च ॥")
तत्पर्य्यायः । चिक्कणम् २ मसृणम् ३ । इत्यमरः । २ । ८ । ४६ ॥ आमृष्टम् ४ चिक्कम् ५ चक्कणम् ६ । इति वैश्यवर्गे शब्दरत्नावली ॥
"स्निग्धन्तु वक्रलो वक्रः स्नेहयुक्तजने भवेत् ।"
इति च विशेषनिघ्नवर्गे शब्दरत्नावली ॥

स्निग्धतण्डुलः, पुं, (स्निग्धस्तण्डुलः ।) षष्टिशालिः । इति राजनिर्घण्टः ॥

स्निग्धता, स्त्री, (स्निग्धस्य भावः । तल् ।) प्रियता । यथा,—
"हार्दं प्रियत्वं प्रियता स्निग्धतायां निगद्यते ।"
इति शब्दरत्नावली ॥

स्नेहः । इति राजनिर्घण्टः ॥

स्निग्धदारुः, पुं, (स्निग्धं चिक्कणं दारु काष्ठं यस्य ।) सरलवृक्षः । इति जटाधरः । देवदारुः । इति राजनिर्घण्टः ॥

स्निग्धपत्रकः, पुं, (स्निग्धानि पत्राणि यस्य । कप् ।) गजरक्षणम् । घृतकरञ्जः । गुच्छकरञ्जः । इति राजनिर्घण्टः ॥

स्निग्धपत्रा, स्त्री, पुं, (स्निग्धं पत्रं यस्याः ।) बदरी । इति जटाधरः ॥ पालक्यम् । काश्मरी । इति राजनिर्घण्टः ॥

स्निग्धपिण्डीतकः, पुं, (स्निग्धः पिण्डीतकः ।) मदनवृक्षविशेषः । यथा,—
"वाराह्यन्यः कृष्णवर्णो महापिण्डीतको महान् ।
स्निग्धपिण्डीतकाख्यः स्थूलवृक्षफलस्तथा ॥
अन्यो च मदनौ श्रेष्ठौ कटुतिक्तरसान्वितौ ।
छर्द्दनौ कफवृद्रोगपक्वामाशयशोधनौ ॥"
इति राजनिर्घण्टः ॥

स्निग्धफला, स्त्री, (स्निग्धं फलं यस्याः । नाकुली । इति राजनिर्घण्टः ॥

स्निग्धा, स्त्री, (स्निग्ध + टाप् ।) मेदा । इति राजनिर्घण्टः ॥

स्निट, क स्नेहे । इति कविकल्पद्रुमः ॥ (चुरा० पर० अक० सेट् ।) क, स्नेटयति । इति दुर्गादासः ॥

स्नुः, पुं, (स्नु प्रस्रवणे + मितद्वादित्वात् डुः ।) सानुः । पर्व्वतस्य समभूभागः । इत्यमरः । २ । ३ । ५ ॥

स्नुः, स्त्री, (स्नु + डुः ।) स्नायुः । यथा,—
"चिष्टुप् मांसात् स्नुतोऽनुष्टुप् जगत्यस्थः प्रजापतेः ।
तस्योष्णिगासीन्नोमभ्यो गायत्री च त्वचो विभोः ॥"
इति श्रीभागवते । ३ । १२ । २८ ॥

स्नुक्, [ह्] स्त्री, (स्नुह + क्विप् ।) स्नुहीवृक्षः । इत्यमरः । २ । ४ । ५ ॥

स्नुक्कटः, पुं, (चीरकञ्चुकीवृक्षः । इति रत्नमाला ॥

स्नुतः, त्रि, (स्नु + क्तः ।) चरितजलादिः । इत्यमरः । ३ । १ । ९२ ॥ (सिक्तः । यथा, भागवते । १ । ११ । ३० ।
"ताः पुत्रमङ्कमारोप्य स्नेहस्नुतपयोधराः ।
हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥")

स्नुषा, स्त्री, (स्नौति मनो यस्यामिति । स्नु प्रस्रवणे + "स्नुवञ्चिकुञ्चिभ्यः कित् ।" उणा० ३ । ६६ । इति सः । स च कित् ।) पुत्रवधूः । इत्यमरः । २ । ६ । ९ ॥ (यथा, रघुः । ८ । १४ ॥
"स किलाश्रममन्वमाश्रितो
निवसन्नावसथे पुराहृदिः ।
समुपास्यत पुत्रभोग्यया
स्नुषयेवाविकृतेन्द्रियः श्रिया ॥")
श्वश्वा सह तस्या विरोधकारणं श्वश्रूशब्दे द्रष्टव्यम् ॥ स्नुहीवृक्षः । इति शब्दचन्द्रिका ॥

स्नुहा, स्त्री, (स्नुह + भागुरिमते टाप् । स्नुहीवृक्षः इत्यमरटीकायां भरतः । २ । ४ । १०५ ॥

स्नुहिः, स्त्री, (स्नुह + इन् ।) स्नुहीवृक्षः । इत्यमरटीका । २ । ४ । १०५ ॥

स्नुही, स्त्री, (स्नुहि + कृदिकारादिति ङीष् ।) वृक्षविशेषः । मनसासिज इति भाषा । तत्पर्य्यायः । सीहुण्डः २ व्रजद्रुः ३ स्नुक् ४ गुड़ा ५ समन्तदुग्धा ६ । इत्यमरः । २ । ४ । १०५ ॥ सिहुण्डः ७ थीहुण्डः ८ वज्रः ९ स्नुहा १० स्नुहिः ११ गुड़ो १२ गुड़ः १३ । इति तट्टीका ॥ वज्री १४ । इति शब्दरत्नावली ॥ सुधा १५ वज्रकण्टकः १६ क्षीरासारः १७ । इति जटाधरः ॥ अस्या दुग्धगुणाः ।
"बहुदोषे प्रयोक्तव्यमग्नितुल्यं सुधापयः ।"
इति राजवल्लभः ॥
राजनिर्घण्टोक्तपर्य्यायगुणौ सीहुण्डशब्दे द्रष्टव्यौ ॥ तत्र मनसा पूजा । यथा,—
"सुप्ते जनार्द्दने कृष्णे पद्मभ्यां भवनाङ्गने ।
पूजयेन्मनसा देवीं स्नुहीविटपसंस्थिताम् ॥
पद्मनाभे गते शय्यां देवैः सर्व्वैरनन्तरम् ।
पद्मभ्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥"
इति तिथ्यादितत्त्वे देवीपुराणम् ॥

स्नेहः, पुं, (स्निह + घञ् ।) प्रेम । इत्यमरः । १ । ७ । २७ ॥ (तल्लक्षणं यथा,—
"दर्शने स्पर्शने वापि श्रवणे भाषणेऽपि वा ।
यत्र द्रवत्यन्तरङ्गं स स्नेह इति कथ्यते" ॥)

स्नेहस्य दुःखमूलत्वम्। यथा—
"यत्र स्नेहो भयं तत्र स्नेहो दुःखस्य भाजनम्।
स्नेहमूलानि दुःखानि तस्मिंस्त्यक्ते महत् सुखम्॥"
इति गारुडे। ११३। ५८॥
तैलादिरसभेदः। इति मेदिनी॥ (यथा, माघः। २। ८५।
"मृदुव्यवहितं तेजो भोक्तुमर्थान् प्रकल्पते।
प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया॥"
यथा च मनुः। ५। २४।
"यत्किञ्चित् स्नेहसंयुक्तं भोज्यं भोज्यमगर्हितम्।
तत् पर्य्युषितमप्याद्यं हविःशेषञ्च यद्भवेत्॥")
न्यायमते गुणविशेषः। जलीयपरमाणावयं नित्यः। अन्यत्र त्वनित्यः। तैलादावस्य प्रकर्षो वर्त्तते अतस्तेषां दाहो भवति यथा,—
"स्नेहो जलेऽणौ नित्योऽयमनित्योऽवयविन्यसौ।
तैलान्तरे तत्प्रकर्षात् दहनस्यानुकूलता॥"
इति भाषापरिच्छेदः॥

स्नेहनं, क्ली, (स्निह्यत्यनेनेति। स्निह+ल्युट्।) तैलमर्द्दनम्। तत्पर्य्यायः। स्नेहः २ स्निग्धता ३ स्नक्षणम् ४ स्नक्षः ५ अभ्यङ्गः ६ अभ्यञ्जनम् ७। इति राजनिर्घण्टः॥ (स्नेहयतीति। स्निह+णिच्+ल्युः। स्निग्धकारिणि, त्रि। यथा, सुश्रुते। १। ४५।
"घृतं सौम्यं शीतवीर्य्यं मृदुमधुरमस्नाभिष्यन्दि स्नेहनमिति॥")

स्नेहप्रियः, पुं, (स्नेहः प्रियो यस्य।) प्रदीपः। इति हेमचन्द्रः॥ तैलादिप्रिये, त्रि॥

स्नेहबीजः, पुं, (स्नेहयुक्तानि बीजानि यस्य।) पियालवृक्षः। इति राजनिर्घण्टः॥ स्नेहकारणे, क्ली॥

स्नेहभूः, पुं, (स्नेहात् भूरुत्पत्तिर्यस्य।) क्षेमा। इति हेमचन्द्रः॥ (स्नेहा भूरिति।) स्निग्धभूमौ, स्त्री॥ (स्नेहान्विता भूर्यस्येति स्निग्धभूमिविशिष्टे, त्रि॥)

स्नेहरङ्गः, पुं, (स्नेहेन रज्यते इति। रञ्ज+घञ्।) तिलः। इति शब्दरत्नावली॥

स्नेहवती, स्त्री, (स्नेहोऽस्या अस्तीति। स्नेह+मतुप्। मस्य वः। ङीप्।) मेदा। इति राजनिर्घण्टः॥ (तैलादिरसविशिष्टे प्रीतिविशिष्टे च त्रि। यथा, मार्कण्डेये। २३। ७७।
"एवमुक्तौ ततस्तेन पित्रा स्नेहवता तु तौ।
गत्वा तस्य पुरं सख्यू रेमाते तेन धीमता॥")

स्नेहवस्तिः, स्त्री, (स्नेहस्य वस्तिः।) अनुवासनविस्तः। तैलपिचकिरी इति भाषा। यथा,—
"वस्तिर्हिधानुवासाख्यो निरूहश्च ततः परः।
यः स्नेहैर्दीयते स स्यादनुवासननामकः॥"
इति भावप्रकाशः॥
एतद्विवरणं वस्तिशब्दे द्रष्टव्यम्॥

स्नेहविद्धं, क्ली, (स्नेहेन विद्धम्।) देवदारु। इति जटाधरः॥

स्नेहा, [न्] पुं, (स्निह्यतीति। स्निह+"ग्रसुस्निहीति।" उणा० १। ११। इति डः।) रोगभेदः। इत्युणादिकोषः॥ चन्द्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

स्पद, इ ङ ईषत्कम्पे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) इ, स्पन्यते। ङ, स्पन्दते चक्षुः। पस्पन्दे। काशे स्पन्द कुशे स्पन्द स्पन्दतं शत्रुमस्तके। इत्यादौ गणकृतानित्यत्वमिति रमानाथः। वस्तुतस्तु स्पन्दते स्पन्दः पचाद्यित्वादन् ततः स्पन्द इवाचरति इति क्वौ सिद्धिः। इति दुर्गादासः॥

स्पन्दः, पुं, (स्पन्द+घञ्।) प्रस्फुरणम्। ईषत्कम्पनम्। यथा,—
"चक्षुःस्पन्दं भुजस्पन्दं तथा दुःस्वप्नदर्शनम्।
शत्रूणाञ्च समुत्थानमश्वत्थ शमयाशु मे।
अश्वत्थरूपो भगवान् प्रीयतां मे जनार्द्दनः॥"
इति मलमासतत्त्वम्॥ *॥
अङ्गविस्फुरणे शुभाशुभफलं यथा,—
मनुरुवाच।
"ब्रूहि मे त्वं निमित्तानि अशुभानि शुभानि च।
सर्व्वधर्म्मभृतां श्रेष्ठ! त्वं हि धर्म्मविदुच्यसे॥
मत्स्य उवाच।
अङ्गदक्षिणभागे तु अस्तं प्रस्फुरणं भवेत्।
अप्रशस्तं यथा वामे पृष्ठस्य हृदयस्य च॥
मनुरुवाच।
अङ्गानां स्पन्दनञ्चैव शुभाशुभविचेष्टितम्।
तन्मे विस्तरतो ब्रूहि येन स्युस्तद्विदो भुवि॥
मत्स्य उवाच।
पृथ्वीलाभो भवेत् मूर्द्ध्नि ललाटे रविनन्दन!।
स्थानं विद्वद्विमायाति भ्रूनसोः प्रियसङ्गमः॥
भृत्यलब्धिर्व्यक्षिदेशे दृगुपान्ते धनागमः।
उत्कण्ठोपगमो मध्ये दृष्टं राजन्! विचक्षणैः॥
दृगबन्धने सङ्करे च जयं शीघ्रमवाप्नुयात्।
योषिल्लाभोऽपाङ्गदेशे श्रवणान्ते प्रिया श्रुतिः॥
नासिकायां प्रीतिसौख्यं प्रियासिरधरोष्ठयोः।
कण्ठे तु भोगलाभः स्यात् भोगवृद्धिरथांसयोः॥
सुहृत्स्नेहश्च बाहुभ्यां हस्ते चैव धनागमः।
पृष्ठे पराजयो यीधे जयो वक्षःस्थले भवेत्॥
कुक्षिभ्यां प्रीतिवृद्धिश्च स्त्रियाः प्रजननं स्तने।
स्थानभ्रंशो नाभिदेशे भग्ने चैव धनागमः॥
जानुसन्धौ परैः सन्धिर्बलवद्भिर्भवेन्नृप!।
दिग्धैकदेशनाशोऽथ जङ्घाभ्यां रविनन्दन!॥
उत्तमं स्थानमाप्नोति पद्भ्यां प्रस्फुरणान्नृप!।
मलभङ्गाध्वगमनं भवेत् पदतले नृप!॥
लाञ्छनं पिटकश्चैव स्नेयं प्रस्फुरणं तथा।
विपर्य्ययेन विहितं सर्वं स्त्रीणां विपर्य्ययम्॥
दक्षिणेऽपि प्रशस्तोऽङ्गे प्रशस्तं स्यादविशेषतः।
अप्रशस्तं तथा वामे त्वप्रशस्तं विशेषतः॥
अतोऽन्यथासिद्धिरजल्पनात्तु
फलस्य शस्तस्य च निन्दितस्य।
अनिष्टचिह्नोपगमे द्विजानां
कार्य्यं सुवर्णेन च तर्पणं स्यात्॥"
इति मात्स्ये यात्रानिमित्तदेहस्पन्दनं नाम २४१। ३—१४॥

स्पन्दनं, क्ली, (स्पन्द+ल्युट्।) प्रस्फुरणम्। ईषत्कम्पनम्। (यथा, याज्ञवल्क्यः। १। ११।
"गर्भाधानमृतौ पुंसःसवनं स्पन्दनात् पुरा।
षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म्म च॥")

स्पर्शा, [ऋ] त्रि, दुःखकारणम्। तच्च शत्रुदुर्जनरोगादि। इति केचित्॥

स्पर्शिः, पुं, स्पर्शः। इति केचित्॥

स्पर्ध, ङ संहर्षे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) संहर्षः परिभवेच्छा। इति बोपदेवः॥ ङ, स्पर्द्धते बलिनं बली। पस्पर्द्धे। इति दुर्गादासः॥

स्पर्द्धा, स्त्री, (स्पर्ध+भिदादित्वादङ्। टाप्।) संहर्षः। (यथा, महाभारते। १। २१। १७।
"महानदीभिर्वेगौघैः स्पर्द्धयेव सहस्रशः।
अभिसार्य्यमाणमनिशं दृश्यते महार्णवम्॥")
क्रमसमुन्नतिः। साम्यम्। इति मेदिनी॥

स्पर्श, क ङ ग्रहणे। स्पृशे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ङ, स्पर्शयते। इति दुर्गादासः॥

स्पर्शः, पुं, (स्पृश स्पर्शने, स्पर्श ग्रहणे वा+घञ्।) रुजा। दानम्। स्पर्शनम्। (यथा, उत्तररामचरिते। १ अङ्के।
"विनियेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च संमीलयति च॥")
स्पर्शकः। सम्प्रायः। प्रणिधिः। इति मेदिनी॥ उपतापः। इत्यमरः। ३। २। १४॥ वर्णान्तरम्। इति हेमचन्द्रः॥ (यथा, भागवते। २। ८। ६।
"स चिन्तयन् द्व्यक्षरमेकदाम्भ-
स्युपाशृणोत् द्विर्गदितं वचो विभुः।
स्पर्शेषु यत् षोड़शमेकविंशं
निष्किञ्चनानां नृप! यद्धनं विदुः॥")
वायुः। इति केचित्॥ कामिनां बन्धभेदः। इति शब्दरत्नावली॥ कादिवर्गपञ्चकम्। यथा,—
"स्पर्शस्तस्याभवज्जीवः सरो देह उदाहृतः॥"
इति श्रीभागवते ३ स्कन्धे १२ अध्यायः॥
स्पर्शः कादिवर्गपञ्चकम्। इति तट्टीकायां श्रीधरस्वामी॥ न्यायमते त्वगिन्द्रियग्राह्यगुण-

विशेषः। त्वगुपकारकः। स च त्रिविधः। उष्णः। शीतः। अनुष्णाशीतः। पृथिव्याः स्पर्शः काठिन्यादिः पाकजः। जलपरमाणुस्पर्शः नित्यः। अन्यत्रानित्यः। वैशेषिकमते पार्थिवपरमाणुमात्रस्य पाकजस्पर्शः। नैयायिकमते तु द्व्यणुकादिस्पर्शोऽपि पाकजः। यथा,—

"स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः।
अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः॥
काठिन्यादिः क्षितावेव नित्यतादि च पूर्ब्ववत्।
एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्॥
तत्रापि परमाणौ स्यात् पाको वैशेषिके नये।
नैयायिकानान्तु नये द्व्यणुकादावपीष्यति॥"

इति भाषापरिच्छेदः॥

स्पर्शं निरूपयति। स्पर्श इति। उपकारक इति स्पर्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः। अनुष्णाशीतेति। पृथिव्या वायोः स्पर्शोऽनुष्णाशीतः जलस्य शीतः। तेजस उष्णः। काठिन्येति। कठिनसुकुमारस्पर्शः पृथिव्या एव इत्यर्थः। कठिनत्वादिकन्तु न संयोगनिष्ठो जातिविशेषः, वस्तुर्याद्यतापत्तेः। पूर्ब्ववत् जलतेजोवायुपरमाणुस्पर्शौ नित्यौ इत्यर्थः। तद्भिन्नाः स्पर्शास्त्वनित्या इत्यर्थः। एतेषां रूपरसगन्धस्पर्शानाम्। नान्यत्रेति। पृथिव्या हि रूपरसगन्धस्पर्शपराहत्तिः पाकरससंयोगादुपलभ्यते। न हि शतधापि ध्मायमाने जलादौ रूपादिकं परावर्त्तते नीरे शीकरभीषणञ्च नयव्यतिरेकाभ्यामुपाधेरेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत् पृथिवीत्वेपि मध्ये परमाणावेव रूपादीनां प्राकः इति वैशेषिका वदन्ति। नैयायिकानामिति नैयायिकानां मते द्व्यणुकादौ त्र्ययवित्वेपि पाको भवति। इति सिद्धान्तमुक्तावली॥ * ॥ ०

पुराणमते एकादशविधस्पर्शो यथा। उष्णः १ शीतः २ सुखः ३ दुःखः ४ स्निग्धः ५ विशदः ६ खरः ७ मृदुः ८ श्लक्ष्णः ९ लघुः १० गुरुः ११। इति महाभारते मोक्षधर्म्मः॥ कठिनः। इति तत्रैव आश्वमेधिकपर्ब्ब॥ आचमनाङ्गस्पर्शनं आचमनशब्दे द्रष्टव्यम्॥ * ॥ उच्छिष्टस्य स्पर्शनिषेधो यथा,—

"न स्पृशेत् पाणिनोच्छिष्टो विप्रगोब्राह्मणानलान्।
न चानलं पदा वापि न देवप्रतिमां स्पृशेत्॥"

इति कौर्म्मे उपविभागे। १६। ३५॥

अथ उच्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तम्। आपस्तम्बः।

"भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा।
प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्यादिदं शोधनम्॥
गायत्र्यष्टसहस्रन्तु द्वुपदां वा शतं जपेत्।
त्रिरात्रोपोषिता भूत्वा पञ्चगव्येन शुध्यति॥
भुक्तोच्छिष्टोऽन्यजैः स्पृष्टः प्राजापत्यं समाचरेत्।
अर्द्धोच्छिष्टे स्मृतः पादः पाद आमाशने तथा॥"

प्राजापत्यं स्नाने। अर्द्धोच्छिष्टो येन आद्यग्रासः आस्ये निःक्षिप्तः न तु निर्गीर्णः। दक्षः।

"पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः।
स्पर्शनं यदि गच्छेत्तु श्वोदक्यान्त्यजैः सह॥
दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयम्।
दिनत्रयं मैथुने स्यात् पाने स्याच्च चतुष्टयम्॥"

काश्यपः।

"श्वशूकरान्त्यचाण्डालमद्यभाण्डरजस्वलाः।
यद्युच्छिष्टः स्पृशेत् तत्र कृच्छ्रं सान्तपनं चरेत्॥"

एतज्ज्ञानाभ्यासे। सान्तपने धेनुद्वयम्। ब्रह्मपुराणे।

"उच्छिष्टेन तु शूद्रेण विप्रः स्पृष्टस्तु तादृशः।
उपवासेन शुद्धिः स्यात् शुना संस्पृष्ट एव वा॥
उच्छिष्टेन तु विप्रेण विप्रः स्पृष्टस्तु तादृशः।
उभौ स्नानं प्रकुरुतः सद्य एव समाहितौ॥"

अनुच्छिष्टब्राह्मणस्य नक्तमिति प्रायश्चित्तविवेकः॥ * ॥ अथ रजस्वलास्पर्शप्रायश्चित्तम्। काश्यपः।

"रजस्वला तु संस्पृष्टा ब्राह्मणी ब्राह्मणी यदि।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी तु या।
त्रिरात्रेण विशुद्धिः स्यात् व्याघ्रस्य वचनं यथा॥
रजस्वला तु संस्पृष्टा वैश्या ब्राह्मणी च या।
पञ्चरात्रनिराहारा पञ्चगव्येन शुध्यति॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि।
षड्रात्रेण विशुध्येत्तु ब्राह्मणी कामचारतः॥
अकामतस्त्वरेदं ब्राह्मणी सर्ब्बजातिषु॥"

एतेन रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानं कामतः। अकामतस्त्वदं नक्तव्रतम्। असवर्णरजस्वलास्पर्शे त्रिरात्रपञ्चरात्रषड्रात्रोपवासाः। अकामतस्त्वदं एतच्चतुर्थाहानन्तरं कर्त्तव्यम्।

"चाण्डालेन ह्यपाकेन संस्पृष्टा चेद्रजस्वला।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत्॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति।
तां स्पृशन्तु व्यतिक्रम्य स्वजात्युक्तन्तु कारयेत्॥"

इति वचनान्तरदर्शनात्॥

एतत् कामतः। अत्र दिनभेदोऽपि नास्ति। अज्ञाने बृहस्पतिः।

"पतितान्त्यश्वपाकैस्तु संस्पृष्टा स्त्री रजस्वला।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्॥
प्रथमेऽह्नि त्रिरात्रन्तु द्वितीये द्व्यहमाचरेत्।
अर्द्धरात्रं तृतीयेऽह्नि परतो नक्तमाचरेत्॥"

चतुर्थेऽह्नीति शुद्धिस्नानात् पूर्ब्बम्। व्याघ्रः।

"रजस्वला यदा स्पृष्टा श्वजम्बुकखरैः क्वचित्।
निराहारा भवेत्तावत् यावत् स्नानेन शुध्यति॥"

अत्रापि बृहस्पत्युक्तदिनभेदव्यवस्था। वृद्धशातातपः।

"रजस्वले तु ये नार्य्यावन्योऽन्यं स्पृशतो यदि।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्चमतः परम्॥"

पञ्चगव्यपानं व्रतरूपं तेनोपवासः। ब्रह्मकूर्चमाह जाबालः।

"अक्षीणरोधितो भूत्वा पौर्णमास्यां विशेषतः।
पञ्चगव्यं पिबेत् प्रातः ब्रह्मकूर्चविधिः स्मृतः॥"

तदशक्तौ पुराणैकं दातव्यम्। उच्छिष्टशूद्रादिस्पर्शे बृहस्पतिः।

"शुना चोच्छिष्टया शूद्रा संस्पृष्टा द्व्यहमाचरेत्।
अहोरात्रं तृतीयेऽह्नि परतो नक्तमाचरेत्॥"

परतश्चतुर्थदिने स्नानात् पूर्वमिति ज्ञेयम्। इति प्रायश्चित्ततत्त्वम्॥ मत्स्यसूक्तोक्तास्पृश्यस्पर्शनप्रायश्चित्तं स्नानशब्दे द्रष्टव्यम्॥ (त्रि, स्पर्शकः। आनन्दजनकः। यथा, भागवते। ३। २१। ८।

"श्वेतोत्पलक्रीड़नकं मनःस्पर्शमितेक्षणम्॥")

स्पर्शकः, त्रि, (स्पृशतीति। स्पृश + ण्वुल्।) स्पर्शनकर्त्ता। स्पृशधातोः कर्त्तरि णकप्रत्ययेन निष्पन्नः॥

स्पर्शनं, क्ली, (स्पृश + ल्युट्।) दानम्। स्पर्शः। इति मेदिनी॥ (यथा, भागवते। १। १०। १२।

"तस्मिन्नस्तधियः पार्था महेरन् विरहं कथम्।
दर्शनस्पर्शनालापशयनासनभोजनैः॥"

सम्बन्धः। इति मल्लिनाथः॥ यथा, रघुवंशे। २। ५०।

"तदत्र कल्याणपरम्पराणां
भोक्तारमूर्জ্জस्वलमात्मदेहम्।
महीतलस्पर्शनमात्रभिन्न-
मृद्धं हि राज्यं पदमैन्द्रमाहुः॥")

स्पर्शनः, पुं, (स्पृशतीति। स्पृश + ल्युः।) वायुः। इत्यमरः। १। १। ६४॥

स्पर्शमणिः, पुं, (स्पर्शप्रधानो मणिः। स्पर्शेन स्वर्णोत्पादकत्वात् तथात्वम्।) स्पर्शमात्रेण स्वर्णजनकप्रस्तरविशेषः। परशपातर इति भाषा। इति वक्ष्यमाणशब्ददर्शनात्॥

स्पर्शमणिप्रभवं, क्ली, (स्पर्शमणिः प्रभवो यस्य।) स्वर्णम्। इति शब्दरत्नावली॥

स्पर्शलज्जा, स्त्री, (स्पर्शात् लज्जा संकोचनरूपव्रपा यस्याः।) लज्जालुवृक्षः। इति शब्दचन्द्रिका॥

स्पर्शशुद्धा, स्त्री, (स्पर्शे शुद्धा।) शतमूली। इति शब्दचन्द्रिका॥

स्पर्शस्यन्दः, पुं, (स्पर्शेन स्यन्दते मूत्रयतीति। स्यन्द + अच्।) भेकः। इति केचित्॥

स्पर्शा, स्त्री, (स्पृशति परपुरुषमिति। स्पृश + अच्। टाप्।) कुलटा। इति धरणिः॥

स्पर्शानन्दाः, स्त्री, (स्पर्शेन आनन्दो यासाम्।) अप्सरसः। इति त्रिकाण्डशेषः॥

स्पर्ष्टा, [र्ष्टृ] त्रि, (स्पृशतीति। स्पृश + ष्टच्।) उपतापकमात्रम्। रोगः। इत्येके। इत्यमरटीकायां भरतः। ३। २। १४॥

स्पश, अ अन्यवाधयोः। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) अ, स्पशति स्पशते। पस्पाश। अन्यस्थाने स्पर्शनं पठन्ति केचित्। इति दुर्गादासः॥

स्पृशः, पुं, (स्पृशतीति। स्पृश+पचाद्यच्।) चरः। (यथा, महाभारते। १।१४७।२५।
"वयन्तु यदि दाक्षस्य विध्यतः प्रद्रवेमहि।
स्पृशेर्नो घातयेत् मर्म्मान् राज्यलुब्धः सुयोधनः॥")
अभिसरः। इत्यमरः। ३।३।२१३॥ चरो गूढ़पुरुषः। अभिसरो यूथम्। प्राणनिरपेक्षो यो द्रव्यार्थं व्याडं हस्तिनं वा योधयति सोऽभिसरः। इत्येके। इमौ द्वौ स्पृशौ। इति भरतः॥

स्पृष्टं, त्रि, स्पृश्यते स्मेति। स्पृश+क्त+क्तः। "वा दान्तशान्तेति।" ७।२।२७। इति माधुः।) व्यक्तम्। तत्पर्य्यायः। स्फुटम् २ प्रव्यक्तम् ३ उल्वणम् ४। इत्यमरः।३।१।८१॥ उद्रिक्तम् ५ प्रकटम् ६। इति जटाधरः॥ (यथा, श्रीमद्भागवते। ४।१५।२२।
"भोः सूत हे मागध सौम्य वन्दिन्
लोकेऽधुना स्पष्टगुणस्य मे स्यात्।
किमाशयो मे स्तव एष योज्यतां
मा मय्यभूवन् वितथा गिरो वः॥")

स्पष्टोक्तं, त्रि, व्यक्तीकृतम्। क्रधातौ परे स्पष्टशब्दादभूततद्भावे चिप्रत्ययेन निष्पन्नम्॥

स्पृ, न प्रीतिरक्षापालने। इति कविकल्पद्रुमः॥ (स्वां०-पर०-सक०-सेट्।) न, स्पृणोति। इति दुर्गादासः॥

स्पृक्का, स्त्री, पृक्का। स्पृश्यते सौगन्ध्यात् स्पृश संस्पर्शे बाहुल्यात् कः पृषोदरादित्वात् शस्य कः स्पृक्का दन्त्यादिरिति केचित्। इत्यमरटीकायां भरतः। २।४।१३३॥ (यथा, बृहत्संहितायाम्। ७७।५।
"त्वक्क्षीरेणुनलिका-
स्पृक्कारसतगरबालकैस्तुल्यैः।
कैमरपत्रविमिश्रै-
र्नरपतियोग्यं शिरःस्नानम्॥")

स्पृश, श श्रौ स्पृशि। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-अनिट्।) श, स्पृशति। श्रौ, अस्पार्क्षीत् अस्पृक्षत्। हस्तेन पस्पर्श तदङ्गमिन्द्रः। इति कुमारः। इति दुर्गादासः॥

स्पृशा, स्त्री. (स्पृशतीति। स्पृश+कः। टाप्।) भुजङ्गघातिनीवृक्षः। कङ्कालिका इति ख्याता। इति शब्दचन्द्रिका॥

स्पृशी, स्त्री, कण्टकारी। इत्यमरः। २।४।८३॥

स्पृष्टः, त्रि. (स्पृश+क्तः।) कृतस्पर्शः। यथा, प्रायश्चित्ततत्त्वधृतब्रह्मपुराणवचनम्।
"उच्छिष्टेन तु शूद्रेण विप्रः स्पृष्टस्तु तादृशः।
उपवासेन शुद्धिः स्यात् शुना संस्पृष्ट एव वा॥"

स्पृष्टास्पृष्टं, क्ली. (स्पृष्टेन वा सम्यक् स्पृष्टम्।) परस्परस्पर्शनम्। यथा,—
"अथ जातिगुणान् वक्ष्ये स्पृष्टास्पृष्टं महेश्वरि!।
अधर्मैः शिष्टसंस्पर्शे प्रायश्चित्तं यथाविधि॥
ब्राह्मणस्य श्ववाङ्क्ष्ये क्षत्रियाद्यैः कदाचन।
स्पृष्टाचम्य हरिं स्मृत्वा उपवासेन क्षत्रियः॥
व्रतस्थशूद्रस्पर्शेऽपि हरिमस्मरणे शुचिः।
सेवयोपस्पृशेद् यस्तु प्रायश्चित्तं न विद्यते॥
ब्राह्मणो यस्तु शूद्रस्य सेवयोपस्पृशेत् क्वचित्।
स्नात्वाचम्य हरिं स्मृत्वा प्राणायामेन शुध्यति॥
शूद्रस्तु त्रिविधो ज्ञेयो व्रतस्थश्चोत्तमः स्मृतः।
कारुस्थः पावको मध्यो भिन्नाचारोऽधमो मतः॥
उत्तमैर्ब्राह्मणः स्पृष्ट उपस्पृश्य द्विजः शुचिः।
अधमः सूर्य्यगामग्निं स्पृष्टः शुध्यति ब्राह्मणः॥"
इति मत्स्यसूक्ते ३८ पटलः॥

स्पृष्टास्पृष्टि, अ, (स्पृष्टेन स्पृष्टेन यत् भवति। "इच् कर्म्मव्यतिहारे।" ५।४।१२७। इति इच्।) "अन्येषामपि दृश्यते।" ६।४।१३७। इति दीर्घः।) परस्परस्पर्शनम्। छोयाकुँयि इति भाषा। यथा, रत्नाकरे बृहस्पतिः।
"तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे।
नगरग्रामदाहे च स्पृष्टास्पृष्टि न दुष्यति॥
आपदापि च कष्टायां रुग्भये पीड़िते तथा।
मातामित्रोर्गुरोश्चैव निदेशे वर्त्तनात्तथा॥"
स्पृष्टास्पृष्टि इत्यव्ययं क्रियाव्यतीहारे। तथेति न दुष्यतीत्यर्थः। इति प्रायश्चित्ततत्त्वम्॥ मत्स्यसूक्ते ३८ पटलेऽप्यन्यत् द्रष्टव्यम्॥

स्पृष्टिः, स्त्री, (पृश+क्तिन्।) स्पर्शः। तत्पर्य्यायः। पृक्तिः २। इत्यमरः। ३।२।८॥ स्पर्शनम् ३। इति शब्दरत्नावली॥

स्पृह, त् क ईप्से। इति कविकल्पद्रुमः॥ (भ्वादन्त चुरा०-पर०-सक०-सेट्।) ईप्सा आप्तुमिच्छा। स्पृहयति। इति दुर्गादासः।

स्पृहणीयं, त्रि, (स्पृह+अनीयर्।) वाञ्छनीयम्। यथा, ऋतुसंहारे। १।१।
"प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसञ्चयः।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये॥"

स्पृहयालुः, त्रि, (स्पृहयति तच्छीलः। स्पृह+"सृहिगृहिपतीति। ३।२।१५८। इति आलुच्।) स्पृहाशीलः। लोभी। इति मुग्धबोधव्याकरणम्॥ (यथा, रघुः। १४।४५।
"प्रजावती दोहदसंज्ञिनी ते
तपोवनेषु स्पृहयालुरेव॥")

स्पृहा, स्त्री, (स्पृह+अङ्। टाप्।) इच्छा। इत्यमरः। १।७।२७॥ तस्याः निन्दाप्रशंसे यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे। ३५।७३—७५; ८४—८५।
"तपो धनं ब्राह्मणानां तपः कल्पतरुस्तथा।
तपस्या कामधेनुश्च सन्ततं तपसि स्पृहा॥
ऐश्वर्य्ये क्षत्रियाणाञ्च वाणिज्ये च तथा विशाम्।
शूद्राणां विप्रसेवायां स्पृहा वेदेष्वनिन्दिता॥
क्षत्रियाणाञ्च तपसि स्पृहानीवप्रशंसिता।
ब्राह्मणानां विवादेषु स्पृहातीव विनिन्दिता॥
क्षत्रियाणां रणे धर्म्मो रणे मृत्युर्न गर्हितः।
रणे स्पृहा ब्राह्मणानां लोके वेदे विडम्बना॥
तपोधनानां विप्राणां वाग्बलानां युगे युगे।
शान्तिस्वस्त्ययनं कर्म्म विप्रधर्म्मो न सङ्करः॥"

स्पृह्यः, पुं, (स्पृह्यते इति। स्पृह+यत्।) मातुलुङ्गकः। इति शब्दचन्द्रिका॥ वाञ्छनीये, त्रि॥

स्पष्टा, [ष्ट्रि] त्रि, (स्पृशतीति। स्पृश+ष्ट्रच्।) उपतापकमात्रम्। इत्यमरः। ३।२।१४॥ रोगः। इत्येके। इति भरतः॥ (सार्थकः। यथा, महाभारते। १४।२०।२१।
"धाता भक्षयिता द्रष्टा स्रष्टा श्रोता च पञ्चमः।
मन्ता बोद्धा च मर्म्मज्ञो भवन्ति परमर्त्विजः॥")

स्फट इ। गौर्णौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) द्वावाद्यस्वरिणावोष्ठ्यवर्गद्वितीययुक्तौ। पञ्चमस्वरिणाविति भ्रमो हेयः। तथात्वे सजातीयतया स्फुटक् भिदीत्यादीनां सन्निधावेवापठिष्यत्। एवं संख्यापि न संमञ्जते। स्फुटिर्विगरणे इत्यनेनैवेष्टसिद्धे शेषघातोश्च वैयर्थ्यं स्यात्। अतएव रमानाथोऽपि स्फुटिर्विशरणे इत्यत्र उकारशून्यः स्फट इति केचित् पठन्ति। पचाद्यजादिनि स्फटा फणा इति सुभूतिरित्यन्तमाह। इ, स्फण्यते। स्फटति गात्रे बाणः। पस्फाट पस्फाट स्फटिकम्। इति दुर्गादासः॥

स्फटः, पुं, (स्फटतीति। स्फट+अच्।) फणा। इत्यमरः। १।८।८॥

स्फटा, स्त्री, (स्फट+अच्। टाप्।) फणा। इत्यमरः। १।८।८॥

स्फटिकः, पुं, (स्फट गौर्णौ+बाहुलकात् इकन्।) सूर्य्यकान्तमणिः। इति हलायुधः॥ खनामख्यातमणिः। फटिक् इति भाषा। तत्पर्य्यायः। स्फाटिकम् २ स्फाटकम् ३। इति शब्दरत्नावली॥ भासुरः ४ स्फाटिकोपलः ५ शालिपिष्टम् ६ धौतशिलम् ७। इति त्रिकाण्डशेषः॥ सितोपलः ८ विमलमणिः ९ निर्म्मलोपलः १० स्वच्छः ११ स्वच्छमणिः १२ अमररत्नम् १३ निस्तुषरत्नम् १४ शिवप्रियः १५। अस्य गुणादि यथा,—
"स्फटिकः समवीर्य्यश्च पित्तदाहार्त्तिदोषनुत्।
तस्मात्तमालां जपता दत्ते कोटिगुणं फलम्॥"
तत्परीक्षा यथा,—
"यद्गङ्गातोयबिन्दुच्छविविमलतमं निस्तुषं नैव रूक्षं
स्निग्धं गुर्व्यन्तरालं मधुरमतिहिमं पित्तदाहार्त्तिहारि।
पाषाणे यच्चिरेष्टं स्फुटितमपि निजां स्वच्छतां नैव जह्यात्
तज्जात्यं जातु लभ्यं शुभमुपचिनुते शैवरत्नस्य रत्नम्॥"
बिन्दुस्थाने विषुदिति च पाठः। इति राजनिर्घण्टः॥ अपि च।
"मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादिकम्।
मणिरत्नं सरं शीतं कषायं स्वादुलेखनम्।
चक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम्॥'
इति राजवल्लभः॥ * ॥
तस्य उत्पत्तिपरीक्षे यथा,—
"कावेरविन्ध्यवनचीननेपालभूमिषु।
लाङ्गलो व्यकिरत्सेतौ दानवस्य प्रयत्नतः॥

आकाशगङ्गं तेलाख्यमुत्पन्नं स्फटिकं ततः ।
मृत्नालशङ्खधवलं किञ्चिद्वर्णान्तरान्वितम् ॥
न तत्तुल्यं हि रत्नानामथवा पाषनाशनम् ।
संस्कृतं शिल्पिना सद्यो मूल्यं किञ्चिन्नमेत्ततः ॥"
इति गारुडे पूर्व्वविभागे । ७८।१—३ ॥*॥
तथा ।
"हिमालये सिंहले च विन्ध्याटवितटे तथा ।
स्फटिकं जायते चैव नानारूपं समप्रभम् ॥
हिमाद्रौ चन्द्रसङ्काशं स्फटिकं तत् द्विधा भवेत् ।
सूर्य्यकान्तञ्च तत्रैकं चन्द्रकान्तं तथा परम् ॥
सूर्य्यांशुसंसर्गमात्रेण वह्निं वमति यत् क्षणात् ।
सूर्य्यकान्तं तदाख्यातं स्फटिकं रत्नवेदिभिः ॥
पूर्णेन्दुकरसंस्पर्शादमृतं स्रवति क्षणात् ।
चन्द्रकान्तं तदाख्यातं दुर्लभं तत् कलौ युगे ॥
अशोकपल्लवच्छायं दाड़िमीबीजसन्निभम् ।
विन्ध्याटवितटे देशे जायते मन्दकान्तिकम् ॥
सिंहले जायते क्षणमाकरे गन्धनौलके ।
पद्मरागभवे स्थाने विविधं स्फटिकं भवेत् ॥
अत्यन्तनिर्म्मलं स्वच्छं स्रवतीव जलं शुचि ।
ज्योतिर्ज्वलनमाश्लिष्टं मुक्ताज्योतीरसं द्विज ॥
तदेव लोहिताकारं राजावर्त्तमुदाहृतम् ।
आनीलं तत्तु पाषाणं प्रोक्तं राजमयं शुभम् ॥
ब्रह्मसूत्रमयं यत्तु प्रोक्तं ब्रह्ममयं द्विज ॥"
इति स्फटिकपरीक्षा । इति भोजराजकृतयुक्तिकल्पतरुः ॥

स्फटिका, स्त्री, स्फटिकारिः । इति भावप्रकाशः ॥

स्फटिकाचलः, पुं, (स्फटिकवत् शुभ्रोऽचलः । स्फटिकस्य अचलो वा ।) कैलासपर्व्वतः । इति हेमचन्द्रः ॥

स्फटिकात्मा, [न्] पुं, (स्फटिक एव आत्मा स्वरूपं यस्य ।) स्फटिकः । इति शब्दरत्नावली ॥

स्फटिकाद्रिभिदः, पुं, (स्फटिकाद्रिं कैलासपर्वतमपि, भिनत्ति वर्णेनेति । भिद + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) कर्पूरः । इति केचित् ॥

स्फटिकाभ्रः, पुं, (स्फटिकवत् शुभ्रो यो अभ्रः स इव शुक्लत्वात् ।) कर्पूरः । इति राजनिर्घण्टः ॥

स्फटिकारिः, स्त्री, (स्फटिकस्य अरिः ।) श्वेतवर्णबधिरद्रव्यविशेषः । फट्‌किरी इति भाषा ॥
यथा,—
"नवसारयवक्षारस्फटिकारित एव काचवकयन्त्रैः ।
बहुशः पात्यं सत्वं तद्धि महाद्रावकं नाम ॥"
इति रत्नावली ॥
तद्भेदान्तराणि । स्फटिकारी । स्फटिकारिका । फट्‌करी । इति महाद्रावकप्रकरणे भैषज्यरत्नावली ॥

स्फटी, स्त्री. (स्फठतीति । स्फट + अच् । ङीष् ।) स्फटिकारिः । तत्पर्य्यायः । स्फटिकी २ श्वेता ३ शुभ्रा ४ रङ्गदा ५ रङ्गदृढ़ा ६ दृढ़रङ्गा ७ रङ्गाङ्गा ८ । अस्या गुणाः । कटुत्वम् । स्निग्धत्वम् । कषायत्वम् । प्रदरमेहकृच्छ्रवमिशोषदोषनाशित्वम् । दृढ़रङ्गदाढ़त्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"स्फटिका तु कषायोष्णा वातपित्तकफव्रणान् ।
निहन्ति श्वित्रवीसर्पान् योनिमङ्गोचकारिणी ॥"
इति भावप्रकाशः ॥

स्फड, इ क नर्म्मणि । (चुरा०-पर०-सक०-सेट् ।) यथा । स्फुड़ि क नर्म्मणि इत्यत्र नर्म्म इह परीहासः । आद्यस्वरीति कातन्त्राद्याः । इति दुर्गादासः ॥

स्फर, श्र स्फूर्त्तौ । चले । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-सेट् ।) श्र, स्फरतो स्फरन्तौ । पस्फार । स्फरणं स्फुरणमित्यमरः । इति दुर्गादासः ॥

स्फरणं, क्ली, (स्फर + ल्युट् ।) स्फुरणम् । इत्यमरः । ३ । २ । १० ॥

स्फल, श्र चाले । स्फूर्त्तौ । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-सेट् ।) श्र, स्फलतो स्फलन्तौ । पस्फाल । सुरहिपास्फालनकर्कशाङ्गुलाविति रघुः । चालचलनम् । इति दुर्गादासः ॥

स्फाटकं, क्ली, स्फटिकम् । इति काचित् शब्दरत्नावली ॥ जलबिन्दौ, पुं । इति केचित् ॥

स्फाटिकं, क्ली, (स्फटिकमेव । स्वार्थे अण् ।) स्फटिकम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । २ । ५५ । १७ ।
"सहस्रस्तम्भां हैमवैदूर्य्यचित्रां
शतद्वारां तोरणस्फाटिकाख्याम् ।
सभामग्र्यां क्रोशमात्रायतां मे
तद्विस्तारामाशु कुर्व्वन्तु युक्ताः ॥"
स्फटिकस्येदमिति । स्फटिक + अण् । स्फटिकसम्बन्धिनि, त्रि । यथा, महाभारते । १ । ६३ । १३ ।
"देवोपभोग्यं दिव्यञ्च आकाशे स्फाटिकं महत् ।
आकाशगं त्वां महत्तं विमानमुपपत्स्यते ॥")

स्फाटिकोपलः, पुं, (स्फाटिक उपलः) स्फाटिकम् । इति त्रिकाण्डशेषः ॥

स्फाटीकं, क्ली, स्फटिकम् । इति शब्दरत्नावली ॥

स्फातः, त्रि, वृद्धियुक्तः । स्फायधातोः क्तप्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

स्फातिः, स्त्री, (स्फाय + क्तिन् ।) वृद्धिः । इत्यमरः । ३ । २ । ८ ॥

स्फाय, ई ङ वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) ई, स्फीतः स्फातः । ङ, स्फायते पस्फाये । स्फायत्रिमौकसन्धीति गणकृतानित्यत्वात् । इति रमानाथः । वस्तुतस्तु स्फायते स्फायः पचादित्वादन् ततः स इवाचरतीति क्वी शबन्तम् । इति दुर्गादासः ॥

स्फारं, क्ली, (स्फायते इति । स्फाय + "स्फायितञ्चीति ।" उणा० २ । १२ । इति रक् ।) प्रचुरम् । इत्यमरः । ३ । १ । ६३ ॥

स्फारः, पुं, (स्फाय + रक् । यद्वा, स्फुर चलने + घञ् । "स्फुरतिस्फुलत्योर्घञि ।" ६ । १ । ४७ । इति एच आत्वम् ।) विकटः । कनकादेर्व्वृद्धुदः । इति मेदिनी ॥ विपुले, त्रि । इति हेमचन्द्रः ॥ (यथा साहित्यदर्पणे । ३ । १०१ ।
"यशश्चदशत्त स्फारस्फारैरपाङ्गविलोकितैस्त्रिभुवनजये सा पञ्चेषोः करोति सहायताम् ॥")

स्फारणं, क्ली, (स्फर + णिच् + ल्युट् ।) स्फुरणम् । इत्यमरटीकायां रमानाथः । ३ । ३ । १० ॥

स्फालः, पुं, (स्फल चलने + घञ् । "स्फुरतिस्फुलत्योर्घञि ।" ६ । १ । ४७ । इति एच आत्वम् ।) स्फूर्त्तिः ।

स्फिक्, [च्] स्त्री, (स्फाय वृद्धौ + बाहुलकात् डिच् ।) कटिप्रोथः । इत्यमरः । २ । ६ । ७५ ॥ (यथा, मनुः । ८ । २८१ ।
"सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः ।
कट्यां कृताङ्को निर्व्वास्यः स्फिचं वास्यावकर्त्तयेत् ॥")

स्फिक्घातनकः, पुं, (स्फिचं घातयतीति । स्फिच् + हन + णिच् + ल्युः । ततः स्वार्थे कन् ।) कट्फलः । इति शब्दचन्द्रिका ॥

स्फिट, क इत्याम् । हिंसे । अनादरे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, स्फेटयति । इतिरन्धेर्न मन्यते । इति दुर्गादासः ॥

स्फिरं, त्रि, (स्फाय वृद्धौ + "अजिरशिशिरशिथिलेति ।" उणा० १ । ५४ । इति किरच्प्रत्ययेन साधुः ।) प्रचुरम् । इत्यमरः । ३ । १ । ६३ ॥

स्फीतः, त्रि, (स्फाय + क्तः । "स्फायः स्फी निष्ठायाम् ।" ६ । १ । २२ । इति धातोः स्फी ।) वर्द्धितः । यथा,—
"स्फीतान् जनपदांस्तत्र पुरग्रामव्रजाकरान् ।
खेटखर्व्वटवाटीश्च वनान्युपवनानि च ॥"
इति श्रीभागवते । १ । ६ । ११ ॥
"स्फीतान् समृद्धान् देशान् । तत्र तस्यां दिशि । पुरग्रामव्रजाकरान् तत्र पुराणि राजधान्यः । ग्रामा भृगुप्रोक्ताः ।
'विप्राश्च विप्रभृत्याय यत्र चैव वसन्ति ते ।
स तु ग्राम इति प्रोक्तः शूद्राणां वाम एव चेति ॥'
व्रजा गोकुलानि । आकरा रत्नाद्युत्पत्तिस्थानानि । तान् । खेटाः कर्षकग्रामाः । खर्व्वटाः गिरितटग्रामाः । भृगुप्रोक्ता वा ।
'एकतो यत्र तु ग्रामो नगरं चैकतः स्थितम् ।
मिश्रन्तु खर्व्वटं नाम नदीगिरिसमाश्रयमिति ॥'
वाट्यः पुष्पवाट्यस्ताः । वनानि स्वतः सिद्धवृक्षाणां समूहाः । उपवनानि रोपितवृक्षाणां समूहाः तानि च ।" इति तटीकायां श्रीधरस्वामी ॥

स्फुट, इ क नर्म्मणि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) नर्म्मेह परीहासः । इ क, स्फुण्टयति सखायं लोकः । अयमन्धेर्न मन्यते । इति दुर्गादासः ॥

स्फुट, इर् विश(स)रणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-भेदने सक०-सेट् ।) इर, अस्फुटत् अस्फोटीत् । विशरणं भेदनम् ।

स्फोठयति गात्रं बाणः। विसरण इति दन्त्यमध्यपाठे विकसन इत्यर्थः। स्फोटति मल्लिकाकलिका॥

स्फुट, क भिदि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, स्फोटयति कण्टकः पदम्। इति दुर्गादासः॥

स्फुट, ङ विसरणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ङ, स्फोटन्ते नवकुङ्मलानि कुटजप्रायेषु हृत्वेत्यिति हलायुधः। इति दुर्गादासः॥

स्फुट, त् क विसरणे। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-अक०-सेट्।) विसरणं विकसनम्। स्फुटयति चम्पककलिका। अपुस्फुटत्। इति दुर्गादासः॥

स्फुट, शि विकासे। इति कविकल्पद्रुमः। (तुदा०-पर०-अक०-सेट्।) विकास इति कस ज गताविति दन्त्यान्तस्य घञि रूपं विपूर्व्वेणार्थान्तरवाचितया विकसनमित्यर्थः। शि, स्फुटति केतकीकोरकः। अस्फुटीत् पुष्फोट। इति दुर्गादासः॥

स्फुट, क हिंसे। आङ्पूर्व्वोऽयम्। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) आङ् उपसर्गः। क, आस्फोटयति। इति दुर्गादासः॥

स्फुटः, त्रि, (स्फुटति प्रकाशते इति। स्फुट्+कः।) व्यक्तः। (यथा, रघुः। ३। ६३।

"अवेहि मां प्रीतमृते तुरङ्गमाद्
किमिच्छसीति स्फुटमाह वासवः॥")

प्रफुल्लः। इति मेदिनी॥ शुक्लः। इत्यजयः॥ भिन्नः। इति स्फुटधात्वर्थदर्शनात्॥ * ॥ स्फुटग्रहा यथा,—

"स्यात् संस्कृतो मध्यफलेन मध्यो
मन्दस्फुटः स्यात् चलकेन्द्रमुक्तम्।
विधाय शैघ्रेण चलेन चैवं
खेटस्फुटः स्यादसकृत् फलाभ्याम्॥"

कुजस्य विशेषमाह।

"दलीकृताभ्यां प्रथमं फलाभ्यां
ततोऽखिलाभ्यामसकृत् कुजस्तु।
स्फुटो रवीन्दू मृदुनैव वैद्यौ
शैघ्राख्यतुङ्गस्य तयोरभावात्॥"

इति सिद्धान्तशिरोमणिः॥

स्फुटनं, क्ली, (स्फुट्+ल्युट्। कुटादित्वात् न गुणः।) विदरणम्। इत्यमरः। ३। २। ५॥ विकसनम्। इति स्फुटधात्वर्थदर्शनात्॥

स्फुटबन्धनी, स्त्री, (स्फुटं बन्धनं यस्याः। ङीष्।) पारावतपदी। नफटको इति भाषा। इति रत्नमाला॥ स्फुटवल्कलीति क्वचित्॥

स्फुटा, स्त्री, (स्फुटति विकाशते इति। स्फुट+कः। टाप्।) फटा। फणा। इत्यमरटीकायां रामाश्रमः। ३। २। ५॥

स्फुटिः, स्त्री, (स्फुटतीति। स्फुट+इन्।) पादस्फोटरोगः। निर्भिन्नकर्कटीफलम्। इति मेदिनी॥

स्फुटितः, त्रि, (स्फुट+क्तः।) विकसितः। इति हेमचन्द्रः॥ भिन्नः। (यथा, मृच्छकटिके ३ अङ्के।

"असदृशजनसंप्रयोगभीरो-
र्हृदयमिव स्फुटितं महाम्बुहस्य॥")

परिहसितः। इति स्फुटधात्वर्थदर्शनात्। व्यक्तीकृतः। इति स्फुटशब्दार्थदर्शनात्॥

स्फुटी, स्त्री, (स्फुटि+कृदिकारादिति ङीष्।) पादस्फोटरोगः। कर्कटीफलम्। फुटी इति भाषा। इति शब्दरत्नावली॥

स्फुट, क् अनादरे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, स्फुटयति। इति दुर्गादासः॥

स्फुड, इ क नर्म्मणि। इति कविकल्पद्रुमः॥ (चरा०-पर०-सक०-सेट्।) नर्म्म इह परीहासः। इ क, स्फुण्डयति सखायं लोकः। पुस्फुण्डयिषति। आद्यस्वरौति कातन्त्राद्याः। पञ्चमस्वरयुक्तो नर्म्मे। इति गोविन्दभट्टः। इति दुर्गादासः॥

स्फुड, इ ङ फुल्ले। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) फुल्लं विकसनम्। इ, स्फुण्डते। ङ, स्फुण्डते कुन्दकोरकः। पुस्फुण्डे। इति दुर्गादासः॥

स्फुड, शि हत्याम्। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) शि, स्फुड़ति। अस्फुड़ीत्। पुस्फोड़। हत्यां वरणे। इति दुर्गादासः॥

स्फुत्करः, पुं, (करोतीति। क्त+अच्। स्फुदित्यव्यक्तशब्दस्य करः।) अग्निः। इति शब्दचन्द्रिका॥

स्फुत्कारः, पुं, फुत्कारः। स्फुदिति क्रियते इति स्फुत्शब्दपूर्व्वकृधातोर्भावे घञ्प्रत्ययेन निष्पन्नः॥

स्फुर, शि स्फुर्त्तौ। चले। इति कविकल्पद्रुमः॥ (तुदा०-चुरा०-पर०-अक०-सेट्।) स्फुर्त्तिः प्रकाशः। चलश्चलनम्। शि, स्फुरति चामरम्। अस्फुरीत्। पुस्फोर। इति दुर्गादासः॥

स्फुरः, पुं, (स्फुरतीति। स्फुर+कः।) फलकम्। इति हेमचन्द्रः॥ (स्फुर+भावे घञ्।) स्फुरणम्। इत्यमरटीका। ३। २। ८॥

स्फुरणं, क्ली, (स्फुर+ल्युट्।) किञ्चिच्चलनम्। इति भरतः॥ तत्पर्य्यायः। स्फरणम् २। इत्यमरः। ३। २। ८॥ स्फुलनम् ३ स्फोरणम् ४ स्फुरः ५ स्फुरणा ६ स्फारणम् ७। इति तट्टीका॥ स्फूर्त्तिः। इति शब्दरत्नावली॥ * ॥ अङ्गस्फुरणस्य शुभाशुभफलं यथा,—

"ब्रूमोऽधुनाङ्गस्फुरितस्य सम्यक्
प्रत्येकमव्यक्तफलप्रभावम्।
सर्व्वत्र यत्रावगते स्वदेहा-
दुत्पद्यते कर्म्मविपाकसंवित्॥
मूर्द्ध्नि स्फुरत्याशु पृथिव्यधीशः
स्थानप्रहृद्धि ललाटदेशे।
भ्रूभ्राजमध्ये प्रियसङ्गमः स्यात्
नासाग्रिमध्ये च सहायलाभः॥
दृगन्तमध्यस्फुरणेऽर्थलाभोत्-
कण्ठौ क्रमादिस्फुरितं दृगादौ।
जयो दृशाधःस्फुरणे रणः स्यात्
प्रियश्रुतिः स्यात् स्फुरिते च कर्णे॥
योषित्समृद्धिः स्फुरिते च गण्डे
घ्राणे तु सौमुख्यमुदौ भवेताम्।
भोज्येष्टसङ्गावधरोर्द्धयोश्च
स्कन्धे गले भोगविहृद्विलाभौ॥
स्पन्दो भुजस्येष्टसमागमाय
स्पन्दः करस्य द्रविणाप्तिहेतुः।
स्पन्दश्च वृद्धस्य पराजयाय
स्पन्दो जयायोरसि मानवानाम्॥
पार्श्वप्रकम्पे विषयस्य लाभः
कटिप्रकम्पे तु बलप्रमोदौ।
नाभिप्रकम्पे निजदेशलाभः
धनर्द्धिबन्धुसुखं भुवि प्रकम्पे॥
दुःखं धनान्तं हृदयस्य कम्पे
स्फिक्पायुकम्पेऽपि च वाहवाप्तिः।
वराङ्गकम्पे वरयोषिदाप्ति-
र्मूर्ध्नि सकम्पे तनयस्य जन्म॥
वस्तौ सकम्पे युवतिप्रवृत्तिः
दोषश्च कम्पे पुनरूरुवृष्टे।
उरः पुनः स्यात् सुसहायलाभः
स्याज्जानुकम्पे त्वचिरेण सिद्धिः॥
जङ्घाप्रकम्पे निजदेशनाशः
स्थानाग्निरुद्वरणस्य कम्पे।
याचा सलाभाङ्घितलप्रकम्पे
पुंसां सदा दक्षिणदेहभागे॥
स्त्रीणाञ्च वामावयवे प्रजातः
स्पन्दः फलानि प्रदिशत्यवश्यम्॥"

इति वसन्तराजशाकुने नरेङ्गितेऽङ्गस्फुरणप्रकरणं चतुर्थम्॥

स्फुरचा, स्त्री, (स्फुर+क्विप्+युच्। टाप्।) स्फुरणम्। इत्यमरटीका। ३। २। १०॥

स्फुरन्, [त्] त्रि, (स्फुर+शतृ।) कम्पनयुक्तः। स्फूर्त्तिविशिष्टः। यथा,—

"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्फणि-
स्फुर्जत्स्फुत्कृतिभीतिसम्भृतचमत्कारस्फुरत्-
सम्भ्रमा।
आनन्दामृतवापिकां विदधती चित्तं गिरीश-
प्रभो-
स्त्वां पायाच्चवसङ्गमे भगवती लज्जावती
पार्व्वती॥"

इति काव्यचन्द्रिका॥

स्फुरितं, क्ली, (स्फुर+क्तः।) स्फुरणम्। स्फुरणविशिष्टे, त्रि। यथा। भ्रूमोऽधुनाङ्गस्फुरिते च सम्यक् इति। प्रिया श्रुतिः स्यात् स्फुरिते च। कर्णे इति च। वसन्तराजशाकुनम्॥

स्फुर्च्छ, आ विस्मृतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ङिपि राङ्लोपे स्फूः स्फुरौ स्फुरः। आ स्फूर्च्छितं स्फूर्णं तेन। स्फूर्च्छति कथां मथयः। इति दुर्गादासः॥

स्फु(स्फू) ज, टु श्रो श्रा वज्रनिर्घोषे ॥ (भ्वा०-सर०-अक०-सेट्।) टु, स्फुर्जथुः। श्रो, स्फूर्णः। श्रा, स्फूर्जितं स्फुर्णं तेन। वज्रनिर्घोषो वज्रकर्त्तृकः शब्दः। स्फूर्जति वज्रम्। इति दुर्गादासः ॥

स्फुर्ज्जकः, पुं, (स्फुर्जतीति। स्फुर्ज+ण्वुल्।) स्फुर्जकवृक्षः। इत्यमरटीकायां रायमुकुटः ॥

स्फुर्जथुः, पुं, (स्फुर्ज+अथुच्।) वज्रपतनजनितशब्दः। इत्यमरटीकायां भरतः ॥

स्फुर, शि स्फुर्णी। चले। चये। इति कविकल्पद्रुमः ॥ (तुदा०-कुटा०-पर०-अक०-सेट्।) शि, स्फुरति अस्फुरीत् पुस्फोल। स्फूर्त्तिः प्रकाशः। चलः खलनम्। चयः सञ्चयः। इति दुर्गादासः ॥

स्फुलं, क्लो, (स्फलतीति। स्फुल स्फुर्त्तौ चले+कः।) वस्त्रवेश्म। इति शब्दरत्नावली ॥ तँबु इति भाषा ॥

स्फुलनं क्लो, (स्फुल+ल्युट्।) स्फुरणम्। इत्यमरटीकायां नीलकण्ठः ॥

स्फुलिङ्गः, वि, (स्फुल+इङ्गच्। यद्वा, स्फुत्कारेण लिङ्गतीति। लिङ्ग+अच्।) अग्निकणः। इत्यमरः। १। १। ६०॥ फिनकी इति फिन्‌कुटी इति च भाषा॥ हे अग्निचूर्णे। स्फुत्कारेण लिङ्गति गच्छति स्फुलिङ्गः। इति तट्टीकायां भरतः ॥ (यथा, महाभारते। ५। ४८। ५१।

"बलाहकादुच्चरतः सभीमान्
विद्युत्स्फुलिङ्गानिव घोररूपान् ॥")

स्फुलिङ्गिनी, स्त्री, (स्फुलिङ्गोऽस्या अस्तीति। इनिः। ङीप्।) अग्निसप्तजिह्वान्तर्गतजिह्वाविशेषः। इति जटाधरः ॥ (यथा, मुण्डकोपनिषदि। १। २। ४।

"काली करालो च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरुपी च देवी
लेलायमाना इति सप्त जिह्वाः ॥")

स्फूर्ज्जकः, पुं, (स्फूर्जति अग्नौ क्षिप्तः सन्निति। स्फूर्ज+ण्वुल्।) तिन्दुकवृक्षः। इत्यमरः। २। ४। ३८॥ स्फूर्जति वह्नौ क्षिप्तः स्फूर्ज्जकः। वा स्फूर्जावज्रनिर्घोषे णकः। स्फूर्जेर्वा दीर्घः भर्त्सने इति परतात्पर्यात् स्फूर्ज्जकः स्फूर्जकश्च स्फूर्त्तौ यशः स इव दृढसारत्वात् स्फूर्जक इत्यन्ये। इति भरतः ॥

स्फूर्जथुः, पुं, (स्फूर्जतीति। स्फूर्ज वज्रनिर्घोषे+अथुच्।) वज्रपातजनितशब्दः। तत्पर्य्यायः। वज्रनिर्घोषः २। इत्यमरः। १। ३। १०॥ स्फुर्जथुः ३ विस्फूर्जथुः ४ विस्फुर्जथुः ५ वज्रनिर्घोषः ६। इति तट्टीका ॥

स्फूर्त्तिः, स्त्री, (स्फुर्+क्तिन्।) स्फुरणम्। इत्यमरटीकायां रमानाथः। ३। २। १०॥ (यथा, पद्मपुराणम्। ८। ३२।

"ममङ्गत्वविकाराभ्यां विम्बलक्षणहीनता।
स्फूर्त्तिरूपत्वमेतस्य विम्बवद् भासनं विदुः ॥")

स्फूर्त्तिमान्, [त्] वि, (स्फुर्त्तिरस्यास्तीति। स्फूर्त्ति+मतुप्।) पाशुपतः। यथा,—

"पाञ्चार्थिकः पाशुपतश्चिद्रूपः स्फूर्त्तिमान् मतः ॥"

इति त्रिकाण्डशेषः ॥

स्फूर्त्तिविशिष्टे, त्रि ॥

स्फेयान्, [स्] त्रि, (इदमनयोरतिशयेन स्फिरः। स्फिर+ईयसुन्। "प्रियस्थिरस्फिरेति।" ६। ४। १५७। इति स्फादेशः।) अतिशयः। इति व्याकरणम् ॥

स्फेष्ठः, त्रि, (अयमेषामतिशयेन स्फिरः। स्फिर+इष्ठन्। "प्रियस्थिरेति।" ६। ४। १५७। इति स्फादेशः।) अतिशयः। इत्यमरः। ३। १। ११२ ॥

स्फोटः, पुं, (स्फुटतीति। स्फुट+अच्।) स्फोटकः। इति राजनिर्घण्टः ॥ (यथा, सुश्रुते। १। १२।

"स्फोटाः शीघ्रं प्रजायन्ते ज्वरस्तृष्णा च वर्द्धते ॥" * ॥

स्फुट+भावे घञ्। विदारणम्। यथा, महाभारते। ३। ११। ५८।

"तयोर्भुजविनिष्पेषादुभयोर्बलिनोस्तदा।
शब्दः समभवत् घोरो वेणुस्फोटसमो युधि ॥"

स्फुटते व्यक्तते वर्णैरिति स्फुटत्यर्थो यस्मादिति वा। स्फुट विकसने+घञ्। शब्दव्यापारविशेषः। तथा चोक्तम्। "वर्णानां वाचकत्वानुपपत्तौ यद्वादार्थप्रतिपत्तिः स स्फोट इति वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्यः शब्दः स्फोटः॥" यथा, हरिवंशे भविष्यपर्व्वणि। १६। ५२।

"अक्षराणामकारत्वं स्फोटस्तं वर्णसंश्रयः॥")

स्फोटकः, पुं, (स्फुटतीति। स्फुट+ण्वुल्।) रोगविशेषः। फाड़ा। इति भाषा। तत्पर्य्यायः। पिड़कः २ गण्डः ३। इति हेमचन्द्रः ॥ स्फाटः ४ विस्फोटः ५। इति राजनिर्घण्टः ॥ अस्य विवरणं विस्फोटशब्दे द्रष्टव्यम्। भेदकपरीहासकयोरपि ॥

स्फोटनं, क्लो, (स्फुट+ल्युट्।) विदारणम्। इत्यमरटीकायां भरतः। ३। २। ५॥ (यथा, सुश्रुते। ६। ४२।

"अङ्गुस्फोटनवत्तस्य यस्मात्तीव्राश्च वेदनाः।
शूलासदृक्षस्य लक्ष्यन्ते तस्मात् शूलमिहोच्यते ॥")

प्रकाशनम्। इति स्फुटधात्वर्थदर्शनात्॥ (शब्दः। यथा, साहित्यदर्पणे। ३। २३२।

"भ्रूविभङ्गोष्ठनिर्देशवाङ्स्फोटनतर्ज्जनाः॥"

स्फोटयतीति। स्फुट+णिच्+ल्युः। भेदके, त्रि॥ यथा, हरिवंशे। २४७। १२।

"शतपर्व्वमहारौद्रं स्फोटनं सर्व्वतोमुखम्।
प्रगृह्य रुचिरं वज्रं दीप्तरौद्राट्टहासिनम्।
दैत्यानयोधयत् सर्व्वान् महेन्द्रः पाकशासनः॥")

स्फोटनी, स्त्री, मणिशङ्खवेधोपकरणम्। भोंडरी इति ख्याता। यथा,—

"आस्फोटनी स्फोटनी च तत्र ह्यास्फोटनी मता ॥"

इति भरतहिरूपकोषः ॥

किञ्च।

"ह्यास्फोटन्यां वेधनी च स्फोटनी ह्यवदंशिका।"

इति भरतधृतवाचस्पतिः ॥

स्फोटबीजकः, पुं, (स्फोटकारकं बीजं यस्य। ततः कन्।) भल्लातकः। इति राजनिर्घण्टः ॥

स्फोटा, स्त्री, सर्पफणा। इति केचित् ॥

स्फोटायनः, पुं, (स्फोट एव अयनं परायणं यस्य।) मुनिविशेषः। तत्पर्य्यायः। कक्षीवान् २। इति हेमचन्द्रः ॥

स्फोटिका, स्त्री, (स्फुटतीति। स्फुट+ण्वुल्। टापि अत इत्वम्।) क्षुद्रपुत्तिका। इति त्रिकाण्डशेषः ॥ अन्यान्तरे फोटिका इति पाठः ॥

स्फ्यं, क्लो, खड्गाकारकाष्ठम्। यथा। स्फ्याग्निष्टेऽधिकरणञ्च। स्फ्यस्य खड्गाकारकाष्ठस्य भल्लाग्नेषनिमित्तकेऽन्यायामिष्टित्वेन प्रकृतिवद्विकृतिरित्यतिदेशेन दर्शात्मकप्रकृतिधर्म्माणां प्राप्तौ पूर्ब्बदिनप्रातःकालीनं ह्वनीयदेवताह्वानमपि प्राप्तं तच्च तदानीं न विधीयते नैमित्तिके निमित्तनियतत्वेऽधिकारितया प्रकृते श्येनाभिचरणाग्नेषरूपनिमित्तसंश्रयेण प्रधानानधिकारिणोऽङ्गानधिकारात् तदुत्तरदिने च निमित्तनियते तदधिकारसिद्धावपि नाग्नाह्वानानुष्ठानं आग्नाह्वनस्य पूर्ब्बदिनप्रातःकालनैयत्यादितीज्याया आग्नाह्वनं विनैवानुष्ठानमिति। इति तिथ्यादितत्त्वम् ॥

स्म, व्य, शोकपादपूरणम्। इत्यमरः। ३। ४। ५। (यथा, रामायणे। २। ६४। २२।

"यच्चेतदशुभं कर्म्म न स्म मे कथयेः स्वयम्।
फलेन् मूर्द्धा स्म ते राजन् सप्तधाग्निसमधा ॥")

तद्योगे अतीतकाले कोविभक्तिर्भवति। यथा,

"हन्ति स्म रावणं रामः।"

इति मुग्धबोधव्याकरणम् ॥

स्मयः, पुं, (स्मयनमिति। स्मि+अच्।) अद्भुतः। गर्व्वः। इति मेदिनी ॥ (यथा, रघुः। ५। १८ ॥

"ततो यथावद् विहिताध्वराय
तस्मै स्मयावेशविवर्जिताय।
वर्णाश्रमाणां गुरवे स वर्णी
विचक्षणः प्रस्तुतमाचचक्षे ॥")

स्मरः, पुं, (स्मरयति उत्कण्ठयतीति। स्मृ+णिच्+अच्। कामदेवः। इत्यमरः। १। १। २६॥ (यथा, कुमारे। ४। ८।

"स्मरसि स्मर मेखलागुणै-
रुत गोवल्गुलितेषु बन्धनम्।
च्युतकैरवदूषितेक्षणा-
श्चयतंसोत्पलताडनानि वा ॥"*॥

स्मृ+अप्।) स्मरणञ्च ॥

स्मरकूपकः, पुं, (स्मरस्य कूप इव कन्।) भगम्। इति त्रिकाण्डशेषः ॥

स्मरकूपिका, स्त्री, योनिः। स्मरकूपकशब्दादाप्-प्रत्ययेन निष्पन्ना॥

स्मरगुरुः, पुं, (स्मरस्य गुरुः पिता। ऋणावतारे प्रद्युम्नजनकत्वात् तथात्वम्।) विष्णुः। इति केचित्॥

स्मरगृहं, क्ली, (स्मरस्य गृहम्।) योनिः। इति जटाधरः॥

स्मरचक्रः, पुं, (स्मरस्य चक्रमिव चाक्षतिर्यस्य।) रतिबन्धविशेषः। यथा, स्मरदीपिकायाम्।

"धृत्वा वामकरेणोरुं कृपादस्योपरिस्थितम्।
दृढञ्च रमते कामी स्मरचक्रप्रकीर्त्तितः॥"

स्मरच्छत्रं, क्ली, (स्मरस्य छत्रमिव।) योनिः। इति केचित्॥

स्मरणं, क्ली, (स्मृ+ल्युट्।) स्मृतिः। तत्पर्य्यायः। आध्यानम् २ स्मृतिः ३। इति हेमचन्द्रः॥ चिन्ता ४ चर्चा ५। इति जटाधरः॥ (यथा, कुमारे। ६। १८।

"सत्यमर्कांश्च सोमांश्च परमध्यास्महे पदम्।
अथ तूष्णीस्तरं ताभ्यां स्मरणानुग्रहात् तव॥"

अलङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ६६८॥

"सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते।"

यथा,—

"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम्।
स्मरामि वदनं तस्याश्चारु चञ्चललोचनम्॥"

"मयि सकपटमित्यादौ च" स्मृतेः सादृश्यानुभवं विनोत्थापितत्वान्नायमलङ्कारः। राघवानन्दमहापात्रास्तु वैसादृश्यात् स्मृतिमपि स्मरणालङ्कारमिच्छन्ति। तन्मतादरणं तेषामेव यथा,—

"शिरीषमृद्वी गिरिषु प्रपेदे
यदा यदा दुःखशतानि सीता।
तदा तदास्याः सदनेषु सौख्य-
लक्षाणि दध्यौ गलदश्रु रामः॥"

स्मरणापत्यतर्पकः, पुं, (स्मरणेन अपत्यं तर्पयतीति। तृप्+ण्वुल्।) कच्छपः। इति केचित्॥

स्मरदशा, स्त्री, (स्मरस्य दशा।) कामावस्था। तद्दशविधा यथा. उज्ज्वलनीलमणिः।

"नयनप्रीतिः प्रथमं चिन्तासङ्गस्ततोऽथ सङ्कल्पः।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः।
उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युरित्याचक्षते॥"

स्मरध्वजं, क्ली, (स्मरस्य ध्वजमिव।) योनिः। इति शब्दरत्नावली॥

स्मरध्वजः, पुं, (स्मरस्य ध्वज इव।) वायम्। इति हेमचन्द्रः॥ लिङ्गम्। इति केचित्॥

स्मरध्वजा, स्त्री, (स्मरस्य ध्वजो गर्व्वो यया) ज्योत्स्नारात्रिः। इति केचित्॥

स्मरप्रिया, स्त्री, (स्मरस्य प्रिया।) रतिः। इति जटाधरः॥

स्मरमन्दिरं, क्ली, (स्मरस्य मन्दिरम्।) योनिः। इति हेमचन्द्रः॥

स्मरलेखनी, स्त्री, (स्मरस्य लेखनीव।) शारिका-पक्षी। इति शब्दरत्नावली॥

स्मरवल्लभः, पुं, (स्मरस्य प्रद्युम्नस्य वल्लभः।) अनिरुद्धः। इति केचित्॥

स्मरवीथिका, स्त्री, (स्मरस्य वीथिका।) वेश्या। इति राजनिर्घण्टः॥

स्मरवृद्धिसंज्ञः, पुं, (स्मरस्य वृद्धिर्यस्मात् स स्मरवृद्धिः। स एव संज्ञा यस्य।) कामवृद्धिक्षुपः। इति राजनिर्घण्टः॥

स्मरसखः, पुं, (स्मरस्य सखा। समासे टच्।) चन्द्रः। इति केचित्॥ (स्मरस्य उद्दीपके, त्रि। यथा, रघुः। ८। ३६।

"पतिषु निर्व्वविशुर्मधुमङ्गना-
स्मरसखं रसखण्डनवर्ज्जितम्॥")

स्मरस्तम्भः, पुं, (स्मरस्य स्तम्भ इव।) उपस्थः। इति शब्दरत्नावली॥

स्मरस्वर्य्यः, पुं, (स्मरः स्वर्य्यो यस्य।) गर्दभः। इति त्रिकाण्डशेषः॥

स्मरहरः, पुं, (स्मरं हरति नाशयतीति। हृ+हरतेरनुद्यमने अच्।) शिवः। इत्यमरः। १। १। ३५॥

स्मरागारं, क्ली, (स्मरस्य आगारम्।) भगम्। इति शब्दरत्नावली॥

स्मराङ्कुशः, पुं, (स्मरस्य अङ्कुश इव।) नखम्। इति शब्दरत्नावली॥

स्मरास्त्रः, पुं, (स्मरोद्दीपकं अस्त्रः।) राजास्त्रः। इति राजनिर्घण्टः॥

स्मरासवः, पुं, (स्मरस्य आसवः इव।) लाला। यथा,—

"स्मरासवो मुखसुरं पारि स्यात् पानभाजनम्।"

इति त्रिकाण्डशेषः॥

मद्यभेदः। इति केचित्॥

स्मार्त्तं, क्ली, (स्मृतेरिदम्। स्मृति+अण्।) स्मृतिशास्त्रोक्तकर्म्म। यथा,—

"श्रौतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत्।
अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः॥"

इति तिथ्यादितत्त्वम्॥

अपि च।

"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी।
अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत् सता॥"

इति श्राद्धतत्त्वम्॥

स्मार्त्तः, त्रि, (स्मृतेरिदमिति। अण्।) स्मृति-सम्बन्धीयः। (यथा, मनुः। १। १०८।

"आचारः परमो धर्म्मः श्रुत्युक्तः स्मार्त्त एव च।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः॥")

स्मृतिशास्त्रव्यवसायी। स्मृतिशब्दात् ष्णप्रत्ययेन निष्पन्नः॥

स्मि, क ङ अनादरे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-अनिट्।) दन्त्यादिः। क ङ, स्माययते। इति दुर्गादासः॥

स्मिट, क अनादरे। खेड़े। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) ओष्ठ्यवर्गशेषयुक्तः। क, स्मेटयति। इति दुर्गादासः॥

स्मितं, क्ली, (स्मि ङ ईषद्हसनम्+क्तः।) ईषद्-हास्यम्। इत्यमरः। १। ७। ३४॥ (यथा, महाभारते। १। १५३। २२।

"विलज्जमानेव नता दिव्याभरणभूषिता।
स्मितपूर्व्वमिदं वाक्यं भीमसेनमथाब्रवीत्॥"

विकसिते, त्रि। इति त्रिकाण्डशेषः॥ (यथा, माघे। ६। ५४।

"स्मितसरोरुहनेत्रसरोजखा-
मतिसिताङ्गविडङ्गसहिष्णु॥")

स्मील, निमेषणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ओष्ठ्यवर्गशेषयुक्तः। स्मीलति चक्षुः पक्ष्मभिराहतं स्यादित्यर्थः। इति दुर्गादासः॥

स्मृ, स्मृतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) स्मरति। स्मृतिर्ज्ञानविशेषः। तथा च।

"सञ्चिन्मगवती द्वेधा स्मृत्यनुभवभेदिका।"

इति तार्किकाः॥

तेन णौ णिजन्तकर्त्तुः कर्म्मत्वम्। गुरुः शिष्यं शास्त्रं स्मारयति। इति दुर्गादासः॥

स्मृ, म औत्सर्गे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० इति केचित्-अनिट्।) म, स्मरयति। उत्कः उत्कण्ठितः तस्य भावः औत्सुक्यमुत्कण्ठा। आध्याने इति प्राचः। आ समन्तात् ध्यानमाध्यानं इति क्वचित्। उत्कण्ठिका इति काशिकाहत्तिर्वोपदेवौ। उत्कण्ठापूर्व्वकं स्मरणमिति हृदाः। मुहुरनुस्मर-यन्तमनुचरं त्रिपुरदाहमिति किराते। इति दुर्गादासः॥

स्मृतः, त्रि, (स्मृ+क्तः।) स्मृतिविषयः। ज्ञात-स्मरणः। यथा,—

"श्राद्धिके पिण्डकाले च मासश्चान्द्रमसः स्मृतः।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः॥"

इति मलमासतत्त्वम्॥

स्मृतिः, स्त्री, (स्मृ+क्तिन्।) अनुभूतविषय-ज्ञानम्। इति चण्डीटीकायां नागोजीभट्टः॥ स्वाभ्यासितक्रियाजन्यसंस्कारजन्यज्ञानम्। इति रसमञ्जरी॥ अनुभव-संस्कार-जन्य-ज्ञानम्। यथा,—

"सञ्चिन्मगवती द्वेधा स्मृत्यनुभवभेदिका॥"

इति कविकल्पद्रुमटीकायां दुर्गादासः॥

किञ्च।

"विभुर्व्वह्न्यादिगुणवान् बुद्धिस्तु द्विविधा मता।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्व्विधा॥"

इति भाषापरिच्छेदः॥

अन्यच्च।
"अनुभूतं प्रियादिनामर्थानां चिन्तनं स्मृतिः। तत्र कम्पाङ्गवैवश्यश्वासनिश्वसितादयः॥"
इत्युज्ज्वलनीलमणिः॥
तत्पर्य्यायः। चिन्ता २ आध्यानम् ३। इत्यमरः। १।७। २८॥ चिन्तिया ४। इति भरतधृतरभसः॥ चिन्तः ५। इति चौरस्वामी॥ आध्या ६। इति रामाश्रमः॥ चिन्तितिः ७ ध्यानम् ८। इति शब्दरत्नावली॥ स्मरथम् ९ चर्च्या १०। इति जटाधरः॥ सा तु गर्भस्थस्य अष्टभिर्मासैर्भवति। इति सुखबोधः॥ *॥
स्मृतिकारकौषधं यथा,—
"ब्रह्मपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला। अभया च गुडूची च अटरूषकवाकुची॥
एतैरष्टसमैर्भागैर्घृतं प्रस्थं विपाचयेत्। कण्टकार्य्या रसं प्रस्थं द्वयञ्च समन्वितम्॥
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम्॥"
इति गारुडे १९८ अध्यायः॥ *॥
मन्वादिमुनिप्रणीतशास्त्रविशेषः। स्मरन्ति वेदमनया स्मृतिः। महर्षिभिर्वेदार्थचिन्तनं स्मृतिः। तद्योगात् ग्रन्थोऽपि स्मृतिरिति सुकुटः। स्मृतिकर्त्तॄणां नामानि धर्म्मशास्त्रशब्दे द्रष्टव्यानि। तत्र मनोः स्मृतेः प्राधान्यम्। यथा,—
"वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम्।
मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते॥"
इतिकुल्लूकभट्टधृतबृहस्पतिवचनम्॥
तत्पर्य्यायः। धर्म्मसंहिता २। इत्यमरः। १। ६। ६॥ धर्म्मशास्त्रम् ३। इति जटाधरः॥ संहिता ४ स्मृतिजीविका ५। इति शब्दरत्नावली॥ स च सात्त्विकराजसतामसभेदेन त्रिविधः। यथा,—
"तथैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणान्विताः।
सात्त्विका राजसाश्चैव तामसाः शृणु तद्गुणे॥
वाग्मिहं चैव हारीतं व्यासं पाराशरं तथा।
भारद्वाजं काश्यपञ्च सात्त्विका मुक्तिदाः शुभाः॥
आत्रेयं दाक्षमेव च।
कात्यायनं वैष्णवञ्च राजसाः स्वर्गदा मताः॥
गौतमं बार्हस्पत्यञ्च संवर्त्तञ्च यमं स्मृतम्।
सांख्यं चौशनसं देवि तामसा निरयप्रदाः॥
किमत्र बहुनोक्तेन पुराणेषु स्मृतिष्वपि।
तामसा नरकायैव वर्जयेत्तान् विचक्षणः॥
अतो हि राजसं कर्म्म तामसञ्च वरानने।
प्राणान्ते नैव कुर्य्याद्वै विवेकी तत्त्वविन्नरः॥
विना तु सात्त्विकं कर्म्म यच्चामाधारणं हरेः।
कदाचिद्राजसं कार्य्यं मानसैस्तामसं न तु॥
श्रुतिस्मृतिपुराणोपपुराणेष्वागमेषु च।
संहितातन्त्रयाम्लेषु गिरिजे यामलादिषु।
प्रश्नरात्रादिष्वपीह सारो यः सात्त्विको मतः॥"
इति पाद्मोत्तरखण्डे ४३ अध्यायः॥

स्मृतिमान्, [न्] त्रि, (स्मृतिर्विद्यतेऽस्येति। स्मृति+मतुप्।) स्मृतिविशिष्टः। चिन्तावान्। (यथा, मनुः। ७। ३४।
"अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित्।
वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते॥")
स्मृतिविरुद्धः, त्रि, (स्मृतेर्विरुद्धः।) धर्म्मशास्त्रविपरीतः। यथा, कूर्म्मपुराणे हिमालयं प्रति देवीवाक्यम्।
"यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च।
श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी॥
करालभैरवश्चैव यामलं नाम यत् कृतम्।
एवमादीनि चान्यानि मोहनार्थानि तानि वै॥
मया सृष्टानि चान्यानि मोहार्थेषां भवार्णवे॥"
इति मलमासतत्त्वम्॥
स्मृतिशास्त्रं, क्ली, (स्मृतिरेव शास्त्रम्।) धर्म्मसंहिता। यथा, एकादशीतत्त्वधृतभविष्यपुराणवचनम्॥
"स्मृतिशास्त्रे विकल्पस्तु श्राद्धाद्यापूरणे सति॥"
स्मृतिहेतुः, पुं, (स्मृतेर्हेतुः।) स्मरणकारणम्। तत्पर्य्यायः। वासना २ संस्कारः ३ भावना ४। इति जटाधरः॥
स्मृत्युपेतः, त्रि, (स्मृतेरुपेतः।) स्मृतिविरुद्धः। इति केचित्॥
स्मेरः, त्रि, (स्मि ङ ईषद्धसने+"नमिकम्पिस्मायजसकमहिंसदीपो रः।" ३। २। १६०। इति रः।) विकशितः। इति हेमचन्द्रः॥ (यथा, साहित्यदर्पणे। ३। १००।
"कान्तिः काञ्चनचम्पकप्रतिनिधिर्व्वाणी सुधास्यन्दिनी॥
स्मेरेन्दीवरदामसोदरवपुस्तस्याः कटाक्षच्छटा॥")
ईषद्धसशीलः। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, कुमारे। ५। ७०।
"इयञ्च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्य्यया।
त्रिलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति॥")
स्मेरविष्किरः, पुं, (स्मेरः प्रफुल्लः विष्किरः पक्षी।) मयूरः। इति केचित्॥
स्यदः, पुं, (स्यन्द+घञ्। "स्यदो जवे।" ६। ४। १८। इति निपातनात् साधुः।) वेगः। इत्यमरः। १। १। ६७॥
स्यन्द, ऊ ङ व ल्ल स्रुतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आ०-सक०-वेट्।) अन्तःस्थायुक्तः। ऊ, अस्यन्दिष्ट अस्यन्त। ङ, स्यन्दते। व, स्यनत्स्यति स्यन्दिष्यति। ल्ल, अस्यदत्। स्रुतिः चरणम्। प्रस्यन्नमदगस्रलुब्धमधुपेत्यत्र गणकृतानित्यत्वमिति रमानाथः। वस्तुतस्तु प्रस्यन्दते प्रस्यन्दः पचाद्यित्वादन् ततः प्रस्यन्द इवाचरतीति क्वौ शचन्तम्। इति दुर्गादासः॥
स्यन्दः, पुं, स्यन्दनम्। स्यन्दधातोर्घञ् प्रत्ययेन निष्पन्नः॥ (यथा, राजतरङ्गिण्याम्। १। २४।
"तदमन्दमजस्यन्दसुन्दरेयं निपीयताम्।
श्रोत्रशुक्तिपुटैः सृष्टसङ्गराजतरङ्गिणी॥"
रोगविशेषः। यथा, सुश्रुते। २। ४६।
"स्यन्दाग्निसादच्छर्द्यादीनामयान् जनयेद्बहून्
खेदोद्भमः। इति श्रीधरस्वामी॥ यथा, भागवते। ५। ११। ८।
"यत्रोदिते तस्य समानसूत्रनिपाते निम्लोचति यत्र क्वचन स्यन्देनाभितपतीति॥")
स्यन्दनं, क्ली, (स्यन्द+ल्युट्।) चरणम्। (स्यन्दते इति। स्यन्द+"बहुलमन्यत्रापि।" उणा०। २। ७८। इति युच्।) जलम्। इति मेदिनी॥ गमनञ्च॥
स्यन्दनः, पुं, (स्यन्दते चलतीति। स्यन्द+युच्।) चक्रयुक्तयुद्धप्रयोजनयानम्। रथ इति ख्यातम्। (यथा, रघुः। १। ३६।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव॥")
तिनिशवृक्षः। इत्यमरः। २।४।२६॥ वृत्ताई-द्विशेषः। इति हेमचन्द्रः॥ वायुः। इति केचित्॥ शोभे, त्रि॥ (स्यन्दके, च त्रि॥ यथा, कथासरित्सागरे। १०३। ६२।
"ग्रहैः परिवृतं चन्द्रमवतीर्णमिवाम्बरात्।
रूपोपमानमन्येषामसृतस्यन्दनं दृशोः॥")
स्यन्दनद्रुमः, पुं, (स्यन्दन एव द्रुमः।) तिनिशवृक्षः। इति शब्दरत्नावली॥
स्यन्दनारोहः, पुं, (स्यन्दनमारोहतीति। आ+रुह+अण्।) रथस्थितयोद्धा। रथी। इत्यमरः। २। ८। ६०॥
स्यन्दनिः, पुं, तिनिशवृक्षः। इति रत्नमाला॥
स्यन्दनी, स्त्री, (स्यन्दते इति। स्यन्द+ल्युः। ङीप्।) लाला। इति राजनिर्घण्टः॥ मूत्रनाड़ीति केचित्॥
स्यन्दिनी, स्त्री, (स्यन्दते इति। स्यन्द+णिनिः। ङीप्।) लाला। इत्यमरः। २। ६। ६७॥
स्यन्दी, [न्] त्रि, स्रवति यः। स्रावकः। स्यन्दधातोर्णिन्प्रत्ययेन निष्पन्नः। इत्यमरटीकायां रामाश्रमः॥ (यथा, उत्तररामचरिते १ अङ्के।
"जीवयन्निव ससाध्वसश्रम-
स्वेदबिन्दुरधिकण्ठमर्प्यताम्।
बाष्पुरेन्दवमयूखचुम्बित-
स्यन्दिचन्द्रमणिहारविभ्रमः॥")
स्यन्नः, त्रि, (स्यन्द+क्तः। सुतः। इत्यमरः। ३। १। ८२॥ (यथा, भट्टिः। ५। ८३।
"अथायास्यन् कषायाक्तः स्वस्वेदकणोल्वणः।
सन्दर्शितान्तराकूतस्तामवादीदशाननः॥")
स्यन्नवीणः, त्रि, (स्यन्ना वीणा यत्र।) स्रुतः। इति हेमचन्द्रः॥
स्यम, उ ण श ध्वनौ। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट् क्लान्वेट्।) अन्तःस्थादियुक्तः। उ, स्यमित्वा स्यान्त्वा। ण, स्येमतुः स्येमतुः। श, स्यमती स्यमन्ती। इति दुर्गादासः॥

स्यम, अ क वितर्के। इति कविकल्पद्रुमः॥(चुरा०-उभ०-सक०-सेट्।) अन्तःस्यादियुक्तः। अस्य स्यार्थे औ क्रयो न स्यात् प्रेरणे औ तु स्यादेवेति प्राञ्चः। स्यमते मनीषादित्वात् सिद्धिः। अ क, स्यामयति स्यामयते लोकः पुरुषं स्थाणुत्वेन। इति दुर्गादासः॥

स्यम, त् क ध्याने। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-सक०-सेट्।) अन्तःस्यादियुक्तः। स्यमयति। इति दुर्गादासः॥

स्यमन्तकः, पुं, श्रीकृष्णस्य हस्तमणिः। यथा,—

"मणिः स्यमन्तको दक्षे भुजमध्ये तु कौस्तुभः।"

इति हेमचन्द्रः॥ * ॥

अथ स्यमन्तकोपाख्यानम्।

शौनक उवाच।

"आसीत् सत्राजितः सूर्य्यो भक्तस्य परमः सखा।
प्रीतस्तस्मै मणिं प्रादात् स च तुष्टः स्यमन्तकम्॥
स तं बिभ्रन्मणिं कण्ठे भ्राजमानो यथा रविः।
प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः॥
तं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः।
दीव्यतेऽक्षैर्भगवते शशंसुः सूर्य्यशङ्किताः॥
नारायण नमस्तेऽस्तु शङ्खचक्रगदाधर।
दामोदराराविन्दाक्ष गोविन्द यदुनन्दन॥
एष आयाति सविता त्वां दिदृक्षुर्जगत्पतेः।
मुष्णन् गभस्तिचक्रेण नृणां चक्षूंषि तिग्मगुः॥
नन्वन्विच्छन्ति ते मार्गं त्रिलोक्यां विबुधर्षभाः।
ज्ञात्वाय गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो॥

शौनक उवाच।

निशम्य बालवचनं प्रहस्याम्बजलोचनः।
प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन्॥
सत्राजित् स्वगृहं श्रीमत् कृतकौतुकमङ्गलम्।
प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत्॥
दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो।
दुर्भिक्षमार्त्यरिष्टानि सर्पाधिव्याधयोऽशुभाः॥
न सन्ति मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणिः।
स याचितो मणिं क्वापि यदुराजाय शौरिणा।
नैवार्थकामुकः प्रादात् याच्ञाभङ्गमतर्कयन्॥
तमेकदा मणिं कण्ठे प्रतिमुच्य महाप्रभम्।
प्रसेनो हयमारुह्य मृगयां व्यचरद् वने॥
प्रसेनं सहयं हत्वा मणिमाच्छिद्य केशरी।
गिरिं विशन् जाम्बवता निहतो मणिमिच्छता॥
सोऽपि चक्रे कुमारस्य मणिं क्रीड़नकं गले।
अपश्यन् भ्रातरं भ्राता सत्राजित् पर्य्यतप्यत॥
प्रायः कृष्णेन निहतो मणिग्रीवो वनं गतः।
भ्राता ममेति तत् श्रुत्वा कर्णे कर्णेऽजपन् जनाः॥
भगवांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनि।
मार्ष्टुं प्रसेनपदवीमन्वपद्यत नागरैः॥
हतं प्रसेनमश्वञ्च वीक्ष्य केशरिणा वने।
तच्चाद्रिपृष्ठे निहतमृक्षेण दददृक्षुजनाः॥
ऋक्षराजविलं भीममन्धेन तमसावृतम्।
एको विवेश भगवानवस्थाप्य बहिः प्रजाः॥
तत्र दृष्ट्वा मणिश्रेष्ठं बालक्रीड़नकं कृतम्।
हर्त्तुं कृतमतिस्तस्निन्नवतस्थेऽर्भकान्तिके॥

तमपूर्व्वे नरं दृष्ट्वा धात्री चुक्रोश भीतवत्।
तत् श्रुत्वाभ्यद्रवत् क्रुद्धो जाम्बवान् बलिनां वरः॥
स वै भगवता तेन युयुधे स्वामिनात्मनः।
आसीच्चदृष्टविंशाहमितरेतरमुष्टिभिः॥
क्षीणसत्त्वः खिन्नगात्रस्तमाहातीवविस्मितः।
जाने त्वां सर्व्वभूतानां प्राण ओजः सहो बलम्।
विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरम्॥
इति विज्ञातविज्ञानमृक्षराजानमच्युतः।
व्याजहार महाराज भगवान् देवकीसुतः॥
मणिहेतोरिह प्राप्ता वयमृक्षपते विलम्।
मिथ्याभिशापं प्रमृजन्नात्मनो मणिनामुना॥
इत्युक्तः स्वां दुहितरं कन्यां जाम्बवतीं मुदा।
अर्हणार्थं स मणिना कृष्णायोपजहार सः॥
सत्राजितं समाहूय सभायां राजसन्निधौ।
प्रादिशाख्याय भगवान् मणिं तस्मैन्यवेदयत्॥
सोऽनुध्यायंस्तदेवाघं बलवद्विग्रहाकुलः।
कथं मृजाम्यात्मरजः प्रसीदेदाच्युतः कथम्॥
एवं व्यवसितो बुद्धा सत्राजित् स्वसुतां शुभाम्।
मणिञ्च स्वयमुद्यम्य कृष्णायोपजहार सः॥
भगवानाह न मणिं प्रतीच्छामो वयं नृप।
तवास्तु देवभक्तस्य वयञ्च फलभागिनः॥"

इति भागवते १० स्कन्धे ५६ अध्यायः॥

सौरभाद्रीयचतुर्थ्यां चन्द्रदर्शने तदुपाख्यानश्रवणविधिर्यथा, ब्रह्मपुराणे सिंहार्कोधिकारे।

"नारायणोऽभिशप्तस्तु निशाकरमरोचिषु।
स्थितश्चतुर्थ्यामद्यापि मनुष्यायापतेच्च सः॥
अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्दीक्ष्य मानवः।
पठेदाख्येयिकावाक्यं प्राप्नुयो वाप्युदङ्मुखः॥"

अभिशप्तः परीवादविषयीभूतः। सोऽभिशापः। धाख्येयिकावाक्यं विष्णुपुराणे।

"सिंहः प्रसेनमवधीत् सिंहो जाम्बवताहतः।
सुकुमारक मारोदीस्तव ह्येष स्यमन्तकः॥"

अनेन मन्त्रेणाभिमन्त्रितं जलं पेयम्। आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम्। इति तिथ्यादितत्त्वम्॥

स्यमीकः, पुं, (स्यमतीति। स्यमु शब्दे+"स्यमेरीट् च।" उणा० ३।४६। इति कन्। ईट् च।) वल्मीकम्। वृक्षविशेषः। इति मेदिनी॥ कालः। मेघः। इति केचित्॥

स्यमीका, स्त्री, नौलिका। इति मेदिनी॥

स्यालः, पुं, श्यालकः। इत्यमरटीकायां स्वामी। २। ६। ३२॥ (यथा कथासरित्सागरे।४।८६।

"अतः स्याल स ते किञ्चित् त्वदगुणैः समवाप्यते॥")

स्युवं, क्ली, आह्वादः। इति केचित्॥

स्यूतः, त्रि, (षिव्यु तन्तुसन्ताने+क्तः। ष्टोरित्वूट्।) सूत्रितः। तन्तुसन्ततम्। वोना इति भाषा॥ तत्पर्य्यायः। ओतम् २ उतम् ३। इत्यमरः॥ (यथा, महाभारते। ३। १५७। ४२।

"वड़िशोऽयं त्वया ग्रस्तः कालसूत्रेण लम्बितः।
मत्स्योऽम्भसीव स्यूतास्यः कथमद्य भविष्यसि॥")

स्यूतः, पुं, (सिव+क्तः।) सूत्ररचितभाण्डम्। धोक्ड़ा इति ख्यातम्। तत्पर्य्यायः। प्रसेवः २। इत्यमरः। २। ८। २६। स्यूनः ३ स्योनः ४ धौतकटः ५ स्योतः ६। इति भरतः॥

स्यूतिः, स्त्री, (सिव+क्तिन्। ऊट्।) सूच्यादिना वस्त्रादिसीवनम्। सीयनो इति सेलाइ इति च भाषा। तत्पर्य्यायः। सेवनम् २ सीवनम् ३। इत्यमरः। ३। २। ५॥ क्षुतिः ४ व्यूतिः ५। इति शब्दरत्नावली॥

स्यूनः, पुं, (सोव्यते इव येनेति। सिव+"सिवेष्टेर्यूच।" उणा० ३। ८। इति नः। टेर्यू च।) किरणः। सूर्य्यः। इति मेदिनी॥ स्यूतः। धुक्ड़ो इति भाषा। इत्यमरटीकायां भरतः। २। ८। २६॥ शब्दरत्नावली च॥

स्यूमं, क्ली, (सिव+"अविसिविसिशुपिभ्यः कित्।" उणा० १। १४३। इति मन्। ज्वरत्वरेत्यूट्।) जलम्। रश्मिः। इति संक्षिप्तसारोणादिवृत्तिः॥

स्यूमः, पुं, (सिव+मन्। ऊट्।) किरणः। इत्युणादिकोषः॥

स्योतः, पुं, स्यूतः। इत्यमरटीकायां भरतः। २। ८। २६॥

स्योनः, पुं, (सिव+बाहुलकात् कैवलोऽपि नः ऊड़ादेशो गुणश्च। इत्युणादिवृत्तौ उज्ज्वलः। ३। ८।) धौतकटः। धुक्ड़ो इति भाषा॥ इत्यमरटीकायां भरतः। २। ८। २६॥ सूर्य्यः। किरणः। इति मेदिनी॥ आनन्दे, क्ली। इति केचित्॥

स्रंसनं, क्ली, (स्रंस+ल्युट्।) ऊर्द्धगतदोषस्याधोनयनम्। इति सुश्रुतटीका॥ (यथा, सुश्रुते। ६। १०।

"पित्तस्यन्दे पात्तके चाधिमन्थे
रक्तास्रावः स्रंसनञ्चापि कार्य्यम्॥"

अधःपतनम्। भ्रंशः। इति स्रंसधात्वर्थदर्शनात्॥ * ॥ स्रंसयतीति। स्रंस+णिच्+ल्युः। अधःपतनकारके, त्रि। यथा, सुश्रुते। १। ४६।

"स्रंसनं कटुकं पाके लघुवातकफापहम्॥")

स्रंसिनीफलः, पुं, श्रिरीषवृक्षः। इति शब्दमाला॥

स्रंसी, [न्] पुं, (स्रंसते इति। स्रंस+णिनिः।) पीलुवृक्षः। इत्यमरः। २। ४। २८॥ अधःपतनशीले, त्रि॥

स्रक, इ ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) इ, सङ्क्रते। ङ, सङ्क्रते। इति दुर्गादासः॥

स्रक्, [ज्] } स्रग्, [ज्] } स्रजौ, (सृजति शोभामिति सृज्यते इति वा। सृज+ऋत्विगादिना कर्त्तरि कर्म्मणि वा क्विन्।) माल्यम्। मूर्द्ध्न्यस्तपुष्पदाम। इत्यमरः। २। ६। १३५॥ (यथा, मनुः। ४। ६६।

"उपानहौ च वासश्च धृतमन्यैर्न धारयेत्।
उपवीतमलङ्कारं स्रजं करकमेव च॥")

स्रंसा: पर्य्यायादि मालाशब्दे द्रष्टव्यम्॥

स्रग्वान्, [त्] त्रि, (स्रक् विद्यतेऽस्येति । स्रज्+मतुप् । मस्य वः ।) माल्यविशिष्टः । इति व्याकरणम् ॥

स्रग्वी, [न्] त्रि, (स्रगस्त्यस्येति । स्रज्+"अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ।) माल्यविशिष्टः । इति व्याकरणम् ॥ (यथा, रघुः । १७ । २५ ।

"आमुक्ताभरणः स्रग्वी हंसचिह्नदुकूलवान् ।
आसीदतिशयप्रेक्ष्यः स राजश्रीवधूवरः ॥")

स्रजिष्ठः, त्रि, (अयमेषामतिशयेन स्रग्वी । स्रग्विन्+इष्ठ । "विन्मतोर्लुक् ।" ५ । ३ । ६५ । इति विनो लुक् ।) माल्यविशिष्टः ॥

स्रजीयान्, [स] त्रि,(अयमनयोरतिशयेन स्रग्वी । स्रग्विन्+ईयसुन् । "विन्मतोर्लुक् ।" ५।३।६५। इति विनो लुक् ।) माल्यविशिष्टः ।

स्रष्टा, स्त्री, प्रजापतिः । रज्जुः । तन्तुपटसंघातः । इति संक्षिप्तसारोणादिवृत्तिः ॥

स्रदूः, स्त्री, वातकर्म्म । इति केचित् ॥ सृधधातोरूपत्ययेन निष्पन्नः । तालव्यशकारादिः साधुपाठः ॥

स्रन्भ, उ ङ प्रमादे । इति कविकल्पद्रुमः ॥भ्वा०-आत्म०-अक०-सेट् । ज्ञावेट् ।) प्रमादोऽनवधानता । उ, स्रम्भिता स्रम्भ्वा । ङ, स्रम्भते धर्म्मे नीचः । इति दुर्गादासः ॥

स्रन्भ, लृ उ ङ विश्वासे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । ज्ञावेट् ।) विश्वासः ग्रहारक्षितीभावः । लृ, अस्रम्भत् । उ, स्रम्भित्वा स्रम्भ्वा । ङ, स्रम्भते पुत्रो मातरि । तालव्यादिरयमित्येके । इति दुर्गादासः ॥

स्रन्ष, लृ उ ङ भ्रंशे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । ज्ञावेट् ।) रेफयुक्तः दन्त्यादिः । लृ, अस्रंसत् । उ, स्रंसित्वा स्रंस्वा । ङ, स्रंसते । भ्रंशः अधःपतनम् । इति दुर्गादासः ॥

स्रन्स, ङ उ प्रसादे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । ज्ञावेट् ।) ङ, स्रंसते । उ, स्रंसित्वा स्रंस्वा । प्रसादः प्रसन्नीभावः । इति दुर्गादासः ॥

स्रवः, पुं, (स्रु+अप् ।) स्रुवणम् । तत्पर्य्यायः । स्रावः २ । इत्यमरः । ३ । २ । ८ ॥ श्रवः ३ । इति तट्टीका ॥ प्रस्रावः ४ स्रुवः ५ । इति शब्दरत्नावली ॥ निर्झरः । तत्पर्य्यायः । सरः २ सरिः ३ उत्साः ४ प्रस्रवणम् ५ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १५३ । ८ ।

"उपपन्नश्चिरस्याद्य भवोऽयं मम सुप्रियः ।
स्नेहस्रवान् प्रस्रवति जिह्वा पर्य्येति मे मुखम् ॥")

स्रुवर्षं, क्ली, (स्रु+स्युट् ।) स्रुवणम् । इति राजनिर्घण्टः ॥ घर्म्मः । इति शब्दरत्नावली ॥ घरणम् । इति स्रुधात्वर्थदर्शनात् ॥

स्रवद्गर्भा, स्त्री, (स्रवन् गर्भो यस्याः ।) दैववशात् पतितगर्भा गौः । तत्पर्य्यायः । अवतोका २ । इत्यमरः । २ । ८ । ६८ ॥ पतितगर्भामात्रश्च ॥

स्रवद्रज्जुः, पुं, (स्रवन् रज्जो यत्र ।) पण्यग्रन्थिः । बाजार इति पारस्यभाषा ॥ इति हारावली ॥

स्रवन्ती, स्त्री, (स्रु+शतृ । ङीप् ।) नदी । इत्यमरः । १ । १० । ३० ॥ (यथा, मनुः । ११ । १३३ ।

"उपस्पृशेत् स्रवन्त्यां वा सूक्तं वाब्दैवतं जपेत् ॥")

गुल्मस्नानम् । ओषधिभेदः । इति मेदिनी ॥ चरणविशिष्टे, त्रि । यथा । स्रवन् । स्रवन्तौ । स्रवत् ॥

स्रवा, स्त्री, (स्रवतीति । स्रु+अच् । टाप् ।) सूर्व्वा । इत्यमरटीकायां रायमुकुटः ।२।४।८३ ॥

स्रष्टा, [ऋ] पुं, (सृजतीति । सृज+तृच् ।) ब्रह्मा । इत्यमरः । १ । १ । १७ ॥ (यथा, महानिर्व्वाणतन्त्रे । ३ । ४० ।

"कारणं सर्व्वभूतानां स एकः परमेश्वरः ।
लोकेषु सृष्टिकरणात् स्रष्टा ब्रह्मेति गीयते ॥")

शिवः । इति हलायुधः ॥ (विष्णुः । इति महाभारतम् । १३ । १४८ । ११८ ॥) सृष्टिकर्त्तरि, त्रि । इति सृजधात्वर्थदर्शनात् ॥ (यथा, महाभारते । ७ । ७८ । ४५ ।

"स्रष्टारं वारिधाराणां भुवश्च प्रकृतिं पराम् ।
देवदानवयक्षाणां मानवानाञ्च साधनम् ॥")

स्रस्तं, त्रि, (स्रन्स+क्तः ।) च्युतम् । इत्यमरः । ३ । १ । १०४ ॥ (यथा, माघे । ५ । १७ ।

"स्रस्तावगुण्ठनपटाः चपलस्तनाग्र-
वस्त्रस्त्रियः सभयकौतुकमीक्षते स्म" ॥)

स्रस्तरः, पुं, आसनम् । यथा । अघस्रस्तरे व्रतहमनश्चन्त आसीरन् इति । अघस्रस्तरे उपवेशनादौ पीठादिनिषेधात् अघनिमित्तेन कटादिविधानात् अघस्रस्तरः कटादिः । इति शुद्धितत्त्वम् ॥

स्राक्, व्य, द्रुतम् । इत्यमरः । ३ । ४ । २ ॥

स्रावः, पुं, (स्रु+घञ् ।) स्रवः । इत्यमरटीकायां भरतः । ३ । २ । ८ ॥ (यथा, महाभारते । ८ । १७ । ७८ ।

"ततो सुद्गर्त्तात् तेऽपश्यन् रजो भौमं समुत्थितम् ।
विविधैः स्रोतसां स्रावैः प्रशान्तं पुरुषर्षभ ॥")

नेत्ररोगान्तर्गतसन्धिगतरोगविशेषो यथा,—

"गत्वा सन्धीनसृमार्गेण दोषाः
कुर्य्युः स्रावान् रुग्विदाहोपनाहान् ।
तान् वै स्रावान् नेत्रनाड्यो मथैके
तस्मा लिङ्गं कीर्त्तयिष्ये चतुर्धा ॥
पाकः सन्धौ संस्रवेद्यच्च पूयं
पूयास्रावो नैकरूपः प्रदिष्टः ।
श्वेतं साम्द्रं पिच्छिलं यः स्रवेच्च
श्लेष्मास्रावो नीरुजः स प्रदिष्टः ॥
रक्तास्रावः शोणितोत्थः सरक्तं
कोष्णं नाशं संस्रवेत्सन्धिमध्यात् ॥
पीताभासं नीलसुच्चं जलाभं
पित्तस्रावं संस्रवेत्सन्धिमध्यात् ॥"

इत्युत्तरतन्त्रे द्वितीयेऽध्याये सुश्रुतेनोक्तम् ॥)

स्रावकं, क्ली, (स्रावयतीति । स्रु+णिच्+ण्वुल् ।) मरीचम् । इति शब्दचन्द्रिका ॥ चरके, त्रि ॥

स्रावणी, स्त्री, ऋद्धिवृक्षः । इति केचित् ॥

स्रिन्भ, उ हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ज्ञावेट् ।) रेफयुक्तादिः । तृतीयस्वरी । उ, स्रिम्भिता स्रिम्भ्वा । इति दुर्गादासः ॥

स्रिभ, उ हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ज्ञावेट् ।) रेफयुक्तादिः । तृतीयस्वरी । उ, स्रेभित्वा स्रिभ्वा । इति दुर्गादासः ॥

स्रिव, य उ शौषे । गतौ । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् । ज्ञावेट् ।) रेफयुक्तः । सकारादिः । तृतीयस्वरी । य, स्रीव्यति । उ, स्रेवित्वा । स्रित्वा । सिस्रेव । इति दुर्गादासः ॥

स्रु, स्रुतौ । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-स्रुतौ अक०-गतौ सक०-अनिट् ।) स्रवति । इति दुर्गादासः ॥

स्रुक् [च्] / स्रुग् } स्त्री, (स्रवति हुतादिकमस्या इति । स्रु स्रुतौ+"चिक्च ।" उणा० २ । ६२ । इति चिक् ।) यज्ञपात्रविशेषः । यथा,—

"ध्रुवोपभृच्छुर्ना तु स्रुचो भेदाः स्रुचः स्त्रियः ॥"
इत्यमरः । २ । ७ । २५ ॥

ध्रुवा वटपत्राकृतिः । उपभृच्छाकाराः । शुद्धः अर्द्धचन्द्राकृतिः ।

"वैकङ्कतौ ध्रुवा प्रोक्ता आम्रत्थी चोपभृन्मता ।
शुद्धः पलाशकाष्ठस्य खदिरस्य स्रुवो मतः ॥"
इति भरतः ॥

"स्रुवादिकन्तु यज्ञादौ पात्रमित्यभिधीयते ।
स्रुवः पुमानेकहस्तो बाहुमात्रा स्रुगीरिता ।
तद्विशेषाः शरावाग्राः स्त्री शुद्धरूपधृत् ध्रुवा ॥"
इति शब्दरत्नावली ॥

स्रुग्दारु, क्ली, (स्रुचो दारु ।) व्याघ्रपादवृक्षः । इति जटाधरः ॥

स्रुघ्नी, स्त्री, खर्जिकाचारः । यथा, हेमचन्द्रः ।

"समास्तु खर्जिकाचारकापोतसुखवर्धिकाः ।
सर्जिस्तु सर्जिका स्रुघ्नी योगवाही सुवर्चिका ॥"

स्रुतं, त्रि, (स्रु+क्तः ।) चरितजलादि । तत्पर्य्यायः । स्रवम् २ रीणम् ३ च्युतम् ४ । इत्यमरः । ३ । १ । ८२ ॥ (यथा, मनौ । ४।१२२ ।

"अतिथिञ्चानुज्ञाप्य मारुते वाति वा स्वयम् ।
शिरसि च स्रुते गात्राच्छ्रमेण च परिप्लुते ॥")

द्रुतम् । इति जटाधरः ॥

स्रुता, स्त्री, (स्रु+क्तः । टाप् ।) हिङ्गुलीपत्री । इति शब्दचन्द्रिका ॥

स्रुवः, पुं, स्त्री, (स्रवति हुतादिकमस्मादिति । स्रु+"स्रुवः कः ।" उणा० २ । ६१ । इति कः ।) यज्ञपात्रविशेषः । इति मेदिनी ॥ (यथा, मनुः । ५ । ११७ ।

"चरूणां सुक्स्रुवाणाञ्च खदिरेण वारिणा ॥")

तद्विवरणं सुक्शब्दे द्रष्टव्यम् ॥

सुवा, स्त्री, (सु+कः। टाप्।) शुक्रकी। मूर्व्वा। इति मेदिनी॥ (स्रुक्। इति च मेदिनी॥ अस्याः पर्य्यायो यथा,—
"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा। मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

स्रुवाहृच्चः, पुं, (स्रु वायाः वृक्षः।) विकङ्कतवृक्षः। इत्यमरः।२।४।३७॥ (अथास्य पर्य्यायाः यथा. भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे। "विकङ्कतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः। स एव यज्ञवृक्षश्च कण्टको व्याघ्रपादपि"॥)

स्रुः, स्त्री, (स्रु स्रुतौ+"क्विप् वचिप्रच्छीति।" उणा० २।५७। इति क्विप् दीर्घश्च।) यज्ञपात्रविशेषः। स्रवति घृतादिकमस्याः। इत्यमरटीकायां भरतः। २।७।२५॥ निर्झरः। यथा, "स्रूः स्रवे निर्झरेऽपि च।" इति हेमचन्द्रः॥

स्रै, पचि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) रेफयुक्तः। सायति। पचि पाके। इति दुर्गादासः॥

स्रोतं, क्ली, स्रोतः। इत्यमरटीकायां भरतः॥ (यथा, महाभारते। ३।६८।१३।
"पतिशोकाकुलां दीनां शुष्कस्रोतां नदीमिव॥" पुंस्लिङ्गान्तोऽयमिति उणादिटीकायां उज्ज्वलदत्तः। ४।२०१॥)

स्रोतः, [स] क्ली, (स्रवतीति। स्रु गतौ+"स्रुरीभ्यां तुट् च।" उणा० ४।२०१। इति असुन्। तुट् च।) स्रवतोऽम्बुसरणम्। इत्यमरः।१।१०।११॥ वेगेन जलवहनं स्रोतः। स्रवतः स्वयमम्बुनः सरणं गमनं स्रोतः इत्यञ्चयः। स्रवत इत्यात्महेतुकं न परहेतुकम्। तस् क्लेरिति दृतीयायास्तस् स्रवति स्रोतः स्रुदुवत् व्रास्रुसिति अस् निपातनात्तन् स्रोतः सान्तम्। स्रोतः सद्यः सकलसलिलं सिंहकं सक्रमूलम्। इति दन्त्यादावुष्मभेदः। स्रोतमदन्तश्च। स्रोतः स्रोतं महानदः स्रवः पैङ्गवमस्त्रियाम्। इति हेमचन्द्रः। इत्यमरटीकायां भरतः॥ (यथा, आर्य्यासप्तशत्याम्। ४८१।
"दशशरसप्रसरस्खलिभिरग्रे नतं प्रियं प्रति मे। स्रोतस इव निम्नं प्रतिरागस्य द्विगुण आवेगः॥") नदी। यथा, गीतायाम्। १०।३१।
"झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥" शरीरस्थनवच्छिद्राणि। (मनःप्राणान्नपानोयादिव शरीरस्थासंख्यमार्गविशेषः। इति भावप्रकाशादयः॥) यथा,—
"स्रोतांसि खानि छिद्राणि कालखण्डं यकृच्च तम्॥" इति राजनिर्घण्टः॥
("यावन्तः पुरुषे मूर्त्तिमन्तो भावविशेषास्तावन्त एवास्मिन् स्रोतसां प्रकारविशेषा सर्व्वभावा हि पुरुषेणान्तरेण स्रोतांस्यभिनिर्व्वर्त्तन्ते क्षयं वा न गच्छन्ति। स्रोतांसि खलु परिणाममापद्यमानानां धातूनामभिवाहीनि भवन्ति अयनार्थेनापि चैके स्रोतसामेव समुदायं पुरुषमिच्छन्ति सर्व्वगतत्वात् सर्व्वसरत्वाच्च दोषप्रकोपप्रशमानानां नत्वेतदेवं यस्य सहि स्रोतांसि यच्च वहन्ति यच्चावहन्ति यत्र चावस्थितानि सर्व्वं तदन्यत्तेभ्यः। अतिबहुत्वात्तु खलु केचिदपरिसङ्ख्येयानि आचक्षते स्रोतांसि परिसङ्ख्येयानि पुनरन्ये तेषां स्रोतसां यथास्थूलं कतिचित् प्रकारान् मूलतश्च प्रकोपपरिज्ञानतथानुव्याख्यास्यामः ये भविष्यन्त्यलमनुक्तार्थज्ञानवते विज्ञानाय चाज्ञानाय तद्यथा प्राणोदकान्नरसरुधिरमांसमेदोऽस्थि-मज्जाशुक्र-मूत्रपुरीषस्वेदवहानि वातपित्तश्लेष्मणां पुनः सर्व्वशरीरचराणां सर्व्वस्रोतांसि अयनभूतानि। तदेतदतीन्द्रियाणां पुनः सत्त्वादीनां केवलं चेतनावत् शरीरमयनभूतमधिष्ठानभूतञ्च तदेतत् स्रोतसां प्रकृतिभूतत्वात् न विकारैरुपस्रुज्यते शरीरम्।" इति चरके विमानस्थाने पञ्चमाध्याये॥)

स्रोतर्ईयः, पुं, (स्रोतसामीशः।) समुद्रः। इति हेमचन्द्रः॥

स्रोतस्यः, पुं, शिवः। चौरः। स्रोतःशब्दात् यत्प्रत्ययेन निष्पन्नः। इति केचित्॥ (स्रोतसि भवः। स्रोतस्+"स्रोतसो विभाषाड्ङौ।" ४।४।११३। इति ञ्यः। स्रोतोभवे, त्रि। इति काशिका॥)

स्रोतस्वती, स्त्री, (स्रोतोऽस्त्यस्यामिति। मतुप्। मस्य वः। उगितश्चेति ङीप्।) नदी। इत्यमरः।१।१०।३०॥

स्रोतस्विनी, स्त्री, (स्रोतोऽस्त्यस्यामिति। स्रोतस्+"अस्यायावेधासञ्जो विनिः।" ५।२।१२१। इति विनिः।) नदी। इत्यमरटीकायां भरतः। १।१०।३०॥

स्रोतोञ्जनं, क्ली, (स्रोतोभवमञ्जनम्) यमुनास्रोतोभवाञ्जनम्। तत्पर्य्यायः। सौवीरम् २ कापोताञ्जनम् ३ यामुनम् ४ इत्यमरः।२।८।१००॥ अञ्जयते नयनमनेन चक्षुष्यत्वादञ्जनं ल्युट्। यमुनायाः स्रोतोभवत्वात् स्रोतसोऽञ्जनं स्रोतोञ्जनम्। सुवीरदेशे भवं सौवीरं ष्णः। स्रोतोञ्जनाहिलक्षणं सौवीरमिति ख्यातम्। अदूरभवत्वाद्देशेऽपि एकत्वोपनिबन्धनमिति सुभूतिः। कपोतस्यायं कापोतो वर्णः तद्युक्तमञ्जनं कापोताञ्जनम्। कापोतवर्णमञ्जनं कापोताञ्जनमिति स्वामी। यमुनायां भवं यामुनं ष्णः। इति तट्टीकायां भरतः॥ *॥
अपरञ्च।
"स्रोतोञ्जनं नदीजञ्च कृष्णं श्वेतञ्च लोहितम्॥" इति रत्नमाला॥
तत्पर्य्यायान्तरं यथा। वारिभवम्५ स्रोतोभवम् ६ स्रोतनदीभवम् ७ सौवीरसारम् ८ कपोतसारम् ९ वल्मीकशीर्षम् १०। अस्य गुणाः। शीतत्वम्। कटुत्वम्। कषायत्वम्। कृमिनाशित्वम्। रसायनत्वम्। रसे योग्यत्वम्। स्तन्यहितकरत्वञ्च। तस्य लक्षणं यथा,—
"वल्मीकशिखराकारं भिन्नं नीलाञ्जनप्रभम्। दृष्टे च नैरिकावर्णं श्रेष्ठं स्रोतोञ्जनञ्च तत्॥"
इति राजनिर्घण्टः॥
अपि च।
"स्रोतोञ्जनं मतं श्रेष्ठं विशुद्धं सिन्धुसम्भवम्। दृष्टे कण्डूमलहरं दाहक्लेदरुजापहम्॥ अक्ष्णो रूपावहत्वेन सहते मारुतातपौ। नेत्ररोगा न जायन्ते तस्मादञ्जनमाचरेत्॥" स्रोतोऽञ्जनं कृष्ण सुरमा इति। शोधनं विनापि सिन्धुनामपर्व्वतस्थञ्च भवम्। इति।
अथ सुरमा सौवीर।
"अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि। तच्च स्रोतोञ्जनं कृष्णं सौवीरं श्वेतमीरितम्॥ स्रोतोञ्जनसमं श्रेयं सौवीरं तत्तु पाण्डुरम्। स्रोतोञ्जनं स्मृतं स्वादु चक्षुष्यं कफपित्तनुत्॥ कषायं लेखनं स्निग्धं ग्राहि छर्द्दिविषापहम्। सिध्मक्षयास्रदृच्छीतं सेवनीयं सदा बुधैः॥ स्रोतोञ्जनगुणाः सर्व्वे सौवीरेऽपि मता बुधैः। किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्रोतोञ्जनं स्मृतम्॥"
इति च भावप्रकाशः॥

स्रोतावहा, स्त्री, (वहतीति। वह+अच्। टाप्। स्रोतसो वहा।) नदी। इति जटाधरः॥ (यथा, रघुः।६।५२।
"नृपं तमावर्त्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भविक्लौ। महोदरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव॥")

स्वं, पुं, क्ली, (स्वन शब्दे+अन्येभ्योपीति डः।) धनम्। इत्यमरः।३।३।२१०॥ (यथा, मनुः।८।४१७।
"विप्रस्वं ब्राह्मणः शूद्रात् द्रव्योपादनमाचरेत्। नहि तस्यास्ति किञ्चित् स्वं भर्त्तृहार्य्यधनो हि सः॥")

स्वं, त्रि, आत्मीयम्। इत्यमरः।३।३।२१०॥ (यथा, कथासरित्सागरे।२६।१०५।
"मया त्वय्य प्रवेष्टव्या स्वा तनुश्च पुरी च सा॥")

स्वः, पुं, ज्ञातिः (यथा, मनुः।५।१०४।
"न विप्रं स्वेषु तिष्ठत्सु स्मृतं शूद्रेण नाययेत्। अस्वर्य्या ह्याहुतिः सा स्यात् शूद्रसंस्पर्शदूषिता॥")
आत्मा। इत्यमरः।३।३।२१०॥ (यथा, रघुः।२।५५।
"सेयं स्वदेहार्पणनिष्कृयेव न्यासा मया मोचयितुं भवत्तः॥"
विष्णुः। इति महाभारतम्। १३।१४८।११७॥)

स्वकं त्रि, (स्वमेव। कन्।) स्वीयम्। आत्मीयम्। यथा,—
"नार्ष्टिकश्चैव कुरुते तक्षणं शास्त्रदर्शिभिः स्वकम्। अदत्तत्यक्तविक्रीतं ज्ञात्वा स्वं लभते धनी॥"
इति प्रायश्चित्ततत्त्वम्॥

स्वकम्पनः, पुं, (स्वेनैव कम्पते इति। कम्प+ल्युः) वायुः। इति शब्दरत्नावली॥

स्वकर्म्म, [न्] क्ली, (स्वस्य कर्म्म।) आत्मकृतकार्य्यम्। यथा,—
कुन्त्युवाच।
"स्वकर्म्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहम्।
तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे॥"
इति पाण्डवगीता॥

स्वकर्म्मकृत्, त्रि, निजकार्य्यकारी। इति स्वकर्म्मशब्द-पूर्ब्बक-कृधातोः कर्त्तरि क्विप्-प्रत्ययेन निष्पन्नः॥

स्वकीयः, त्रि, (स्वस्यायमिति। गहादिषु स्वस्य वेति छः कुत्वागमश्च।) स्वीयः। तत्पर्य्यायः। निजः २ आत्मीयः ३ स्वः ४। इति हेमचन्द्रः॥

स्वकुलक्षयः, पुं, (स्वकुलस्य क्षयो यस्मात्।) मत्स्यः। इति हेमचन्द्रः॥ निजवंशनाशश्च। तत्कर्त्तरि तद्विशिष्टे च त्रि॥

स्वग, इ सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वकारमध्यः। इ, स्वङ्गति। इति दुर्गादासः॥

स्वगतं, क्ली, (स्वगतम्।) मनोगतम्। (तन्तु नाट्योक्तीनामन्यतमम्। तल्लक्षणं यथा, साहित्यदर्पणे। ६। ४२५।
"अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्॥")
यथा। अहम्। स्वगंतम्। दम्भग्राह्योऽयं देशः। भवत्वस्मिन्नासने उपविशामि। इति प्रबोधचन्द्रोदयनाटके २ अङ्कः॥ आत्मप्राप्ते तस्मादृते च त्रि॥

स्वगुप्ता, स्त्री, (स्वेन गुप्ता।) शूकशिम्बी। इति शब्दरत्नावली॥ लज्जालुः। इति राजनिर्घण्टः॥

स्वग्रहः, पुं, (स्वकृतं ग्रहं यस्य।) कलिकारपक्षी इति जटाधरः॥ निजालये, पुं, क्ली॥

स्वङ्गः, त्रि, (सु शोभनानि अङ्गानि यस्य।) सुन्दराङ्गविशिष्टः। तत्पर्य्यायः। सिंहसंहननः २। इति हेमचन्द्रः॥ (सु शोभनमङ्गमिति।) शोभनावयवे, क्ली॥

स्वच्छं, क्ली, (सुष्ठु अच्छम्।) विमलोपरसः। मुक्ता। इति राजनिर्घण्टः॥

स्वच्छः, त्रि, (सुष्ठु अच्छः।) रोगविमुक्तः। इति शब्दरत्नावली॥ शुक्लः। निर्म्मलः। इति केचित्॥ (यथा, महानिर्व्वाणतन्त्रे। ८।८१।
"असनं वसनं पात्रं शय्या यानं निकेतनम्।
गृह्यकं वस्तुजातञ्च स्वच्छात् स्वच्छं प्रशस्यते॥"
कपटतादिदोषशून्यः। यथा, तत्रैव। ८।५२।
"स्वच्छौ नस्रः शुचिर्दक्षो युक्तः स्यात् सर्व्वकर्म्मसु॥")

स्वच्छः, पुं, (सुष्ठु अच्छः निर्म्मलः।) स्फटिकः। इति राजनिर्घण्टः॥

स्वच्छन्दः, त्रि, (स्वस्य छन्दोऽभिप्रायो यत्र।) स्वाधीनः। स्वतन्त्रः। इत्यमरः। ३। १।१५॥ (यथा, कथासरित्सागरे। ३३। १८४।
"स्वच्छन्दासौ न ते राजन् पाणिस्पर्शमिहार्हति॥"
स्वस्य अभिप्राये, पुं। यथा, हरिवंशे।१२२।२८।
"बुभुक्षा वा पिपासा वा ग्लानिर्वाप्यथवा जरा।
देववद्वारयन्त्यास्ते स्वच्छन्दो न भविष्यति॥")

स्वच्छपत्रं, क्ली (स्वच्छं पत्रं यस्य।) अभ्रकम्। इति हेमचन्द्रः॥

स्वच्छमणिः, पुं, (स्वच्छो मणिः।) स्फटिकः। इति राजनिर्घण्टः॥

स्वच्छवालुकं, क्ली, (स्वच्छं वालुकम्।) विमलोपरसः। इति राजनिर्घण्टः॥

स्वच्छा, स्त्री, (सुष्ठु अच्छा।) श्वेतदूर्व्वा। इति राजनिर्घण्टः॥

स्वज, क्ली, (स्वस्मात् जायते इति। जन+डः।) रक्तम्। इति मेदिनी॥

स्वजः, पुं, (स्वस्मात् जायते इति। जन+डः।) पुत्रः। स्वेदः। इति मेदिनी॥ त्रि, आत्मजातः॥ (स्वाभाविकः। यथा, रामायणे।२।११२।१६।
"आगता त्वामियं बुद्धिः स्वजा वैनयिकी च या।
अशस्यमसहसे तात रक्षितुं पृथिवीमपि॥")

स्वजनः, पुं, (स्वस्य जनः।) ज्ञातिः। इत्यमरः। २। ६। ३४॥ आत्मीयलोकश्च॥ (यथा, कुमारे। ४। २६।
"स्वजनस्य हि दुःखमग्रतो
विहतद्वारमिवोपजायते॥")

स्वजा, स्त्री, (स्वस्मात् जायते या। जन+डः। टाप्।) कन्या। इति शब्दरत्नावली॥

स्वट,क गत्यसंस्कृतसंस्कृतेषु। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्)। क, स्वाठयति। इति दुर्गादासः॥

स्वतः [स] व्य, (स्व+तसिल्।) आत्मनः। आपन हइते इति भाषा। यथा। स्रोतोऽम्बुसरणं स्वतः। इत्यमरः। १। १०। ११॥ (यथा, रघुः। ३। ५८।
"अतिप्रबन्धप्रहिताक्षवृष्टिभि-
स्तमाश्रयं दुष्प्रसहस्य तेजसः।
शशाक निर्वापयितुं न वासवः
स्वतश्रुतं वह्निमिवाङ्गिरस्भुवः॥"
धनात्। यथा, मनुः। ८। १६६।
"अग्रहीता यदि नष्टः स्यात् कुटुम्बार्थे कृतोऽव्ययः।
दातव्यं बान्धवैस्तत् स्यात् प्रविभक्तैरपि स्वतः॥")
अस्य अव्ययत्वप्रमाणं यथा। तद्धितश्चासर्व्वविभक्तिः। यस्मात् सर्व्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात्। परिगणनं कर्त्तव्यम्। तसिलादयः प्राक् पाशपः। इति सिद्धान्तकौमुदी।

स्वतन्त्रः, त्रि, (स्वस्य तन्त्रं प्राधान्यं यत्र।) स्वाधीनः। तत्पर्य्यायः। अपाहतः २ स्वैरी ३ स्वच्छन्दः ४ निरवग्रहः ५। इत्यमरः। ३। १। १५॥ निर्यन्त्रिणः ६ यथाकामी ७ निरर्गलः ८ निरङ्कुशः ९। इति जटाधरः॥ स्वरुचिः १०। इति हेमचन्द्रः॥ स्वतन्त्रास्वतन्त्रव्यक्तयो यथा, नारदः।
"स्वातन्त्र्यन्तु स्मृतं ज्येष्ठे ज्येष्ठं गुणवयःकृतम्।
अस्वतन्त्राः प्रजाः सर्व्वाः स्वतन्त्रः पृथिवीपतिः॥
अस्वतन्त्रः स्मृतः शिष्य आचार्य्यस्य स्वतन्त्रता।
अस्वतन्त्राः स्त्रियः सर्व्वाः पुत्रा दासाः परिग्रहाः॥"
परिग्रहा अनुजीविप्रभृतयः।
"स्वतन्त्रस्तत्र तु ग्रही यस्य तत् स्यात् क्रमागतम्।
गर्भस्थैः सप्तभी श्रेयो अष्टमाद्वत्सरात् शिशुः॥
बाल आषोड़शाद्वर्षात् पौगण्डोऽपि निगद्यते
परतो व्यवहारज्ञः स्वतन्त्रः पितराहृते॥
जीवतोर्न स्वतन्त्रः स्यात् जरयापि समन्वितः
तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात्
अभावे बीजिनो माता तदभावे च पूर्व्वजः॥
स्वतन्त्रोऽपि हि यत कार्य्यं कुर्य्यादप्रकृतिं गतः।
तदप्यकृतमेव स्यादस्वातन्त्र्यस्य हेतुतः॥"
इति व्यवहारतत्त्वम्॥

स्वतः, पुं, अन्यः। इति केचित्॥

स्वत्वं, क्ली, (स्वस्य भावः। स्व+त्व।) शास्त्रसम्मतयथेष्टविनियोगार्हत्वम्। असपदार्थातिरिक्तपदार्थः। निरूपकतासम्बन्धेन स्वामित्वम्। यथा। स्वत्वञ्च यथेष्टविनियोगार्हत्वेन शास्त्रबोधितत्वमिति प्राञ्चः॥ अतिरिक्तपदार्थ इति शिरोमणिः॥ स्वामित्वञ्च तद्विरूपकत्वम्। निरूपकतया तदेव वा। तच्च द्रव्यगतं गुणगतञ्च द्रव्यस्य दानादिश्रुतेः। नीलं वा द्रषमुत्सृजेदित्यादौ लोहित्यादिगुणविशिष्टपरिमाणिकनीलद्रव्योत्सर्गश्रुतेश्च। वस्तुतस्तु आत्मसमवेतं स्वामित्वमेवातिरिक्तपदार्थः। विक्रयदानादीनां तत्प्रयोजकत्वे क्रयप्रतिग्रहादीनाञ्च तद्धेतुत्वे सम्बन्धलाघवसम्भवात् तदेव निरूपकतया स्वत्वव्यवहारहेतुः। अतएव निबन्धादौ भाविन्यपि स्वत्वमिति। अन्यथा प्रतिमासं प्रतिवर्षं वा देयत्वेन प्रतिश्रुतधान्यादिरूपस्य भाविनो तत्र तदुत्पत्त्यनुपपत्तेरिति चूड़ामणिसम्मतो लीलावतीरहस्यपन्थाः समीचीनः। तत्र स्वत्वधारावाहाय सजातीयस्वत्वं प्रतिस्वत्वं विरोधि सजातीयमिति करणात् पराजितनृपतिराज्यान्तर्व्वर्त्तितत्तत्पुरुषीयक्रमागतस्थावरादौ जयादिना जेतुर्नृपतेः करग्रहणोपयोगिस्वत्वोत्पादे तथा क्रीते प्रतिगृहीतराज्यान्तर्व्वर्त्तिनि तादृशस्थावरादौ च क्रेत्रादेः क्रयाद्यधीनस्वत्वोत्पादेऽपि न व्यभिचार इति संक्षेपः। इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः॥

स्वदनं, क्ली, (स्वद+ल्युट्।) भक्षणम्। इति हेमचन्द्रः॥ लेहः। इति राजनिर्घण्टः।

स्वदाराः, पुं, (स्वस्य दाराः।) स्त्री। यथा, आह्निकतत्त्वधृतविष्णुपुराणवचनम्।
"मृतो नरकमभ्येति हीयेतावापि चायुषः।
परदाररतिः पुंसामुभयत्रापि गौतिदा॥
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत्।
यथोक्तदोषहीनेषु सदासेष्वनृतावपि॥"

स्वधर्म्मः, पुं, क्ली, (स्वस्य धर्म्मः।) स्वजात्युक्ताचारः। यथा,—

"श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात्।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः॥"

इति श्रीभगवद्गीतायां ३ अध्यायः॥*॥

अपि च।

"यो यस्य विहितो धर्म्मः स तज्जातिः प्रकीर्त्तितः।
तस्मात् स्वधर्म्मं कुर्व्वीत द्विजो नित्यमनापदि॥
चत्वारो वर्णा राजेन्द्र चरेयुर्यापि वाश्रमाः।
ऋते स्वधर्म्मं विपुलं न ते यान्ति परां गतिम्॥
स्वधर्म्मेण यथा नृणां नरसिंहः प्रतुष्यति।
न तुष्यति तथान्येन वेदवाक्येन कर्म्मणा॥"

इति श्रीनारसिंहपुराणम्॥*॥

स्वधर्म्मत्यागी कृतघ्नः। यथा,—

सनातन उवाच।

"स्वधर्म्मं हन्ति यो विप्रः सन्ध्यात्रयविवर्जितः।
अतर्पणञ्च यत् स्नानं विष्णुनैवेद्यवर्जितः॥
विष्णुमन्त्रविष्णुपूजाविष्णुभक्तिविहीनकः।
एकादशीविहीनश्च श्रीकृष्णजन्मवासरे॥
शिवरात्रौ च यो भुङ्क्ते श्रीरामनवमीदिने।
पितृकृत्यं देवकृत्यं स कृतघ्न इति स्मृतम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ५१। ४५—४७॥

स्वधा, व्य, (स्वद्यतेऽनेनेति। स्वद आस्वादने + आ। "स्वदेर्धश्च।" इति दस्य धः। इत्युणादिवृत्तौ उज्ज्वलदत्तः।) देवहविर्दानमन्त्रः। यथा,

"स्वाहा देवहविर्दाने श्रौषट् वौषट् वषट् स्वधा॥"

इत्यमरः। ३। ४। ८॥

"स्वाहा श्रौषट् वौषट् वषट् स्वधा एते पञ्चशब्दा देवहविर्दाने वह्निमुखहुतौ वर्त्तन्ते देवाय हविषो दानं देवहविर्दानं तत्र देवा इन्द्रादयः। अत्र पितरो देवताः इति स्मृतेस्तेऽपि देवाः। हविर्दान इत्यनेन एते मन्त्रा इति सूचितम्।

'अमन्तत्वे स्वाहयेव हविर्भुजम्।' इति रघुः। स्वाहाव्ययं मन्त्रभेदे स्त्रियां स्वाहाग्नियोषितीति कोषान्तरम्। स्वाहा दन्त्यादिः। श्रौषट् तालव्यादिमूर्द्धन्यमध्यम्। वौषट् वषट्द्वयं मूर्द्धन्यमध्यम्। स्वधा दन्त्यादिः। इन्द्राय स्वाहा इत्यादिप्रयोगः।" इति भरतः॥*॥

पितृसम्प्रदानमन्त्रः। यथा,—

"दैत्येभ्योऽलं हरिः पूर्णे वषट् सङ्गो हितं सुखम्।
स्वाहाग्नये स्वधा पित्रे स्वस्ति धात्रे नमः सते॥"

इति मुग्धबोधव्याकरणम्॥

हरिर्दैत्येभ्योऽलं समर्थः पूर्णे वषट् सङ्गो हितं सङ्गः सुखं अग्नये स्वाहा पित्रे स्वधा धात्रे स्वस्ति एतानि सप्तानि। नमः सते इति सते नित्याय विष्णवे नमः इत्यर्थः। सर्व्वत्र भवतेर्गम्यमानत्वादकर्म्मकाद्धात्वर्थसमाप्तिः। वषट्स्वाहास्वधानमसां त्यागार्थतया सम्प्रदानत्वेनैवेष्टसिद्धौ पृथग्ग्रहणं मन्त्रान्तर्गतानामपि प्राप्तार्थं तेन शिखायै वषट् शिरसे स्वाहा पितृभ्यः स्वधोच्यताम्। हृदयाय नमः। हृदयादि सिद्धम् इति तट्टीकायां दुर्गादासः॥ पितृणामन्नम्। यथा,—

"भुङ्क्ते त्वं यथा वै स्वधाख्या
तद्वत् स्वाहा हव्यभोक्त्री स्वयं देवि।"

इति ऋग्वेदे देवीसूक्तम्॥

स्वधा वै पितृणामन्नम्। इति स्मृतिश्च॥

स्वधा, स्त्री, (स्वान् दधातीति। धा + क्विप्।) दत्तकन्या। सा तु पितृणां पत्नी। तस्या द्वे कन्ये। यमुना धारिणी च। एतयोस्तत्सन्त्योः सन्ततिर्नास्ति। इति श्रीभागवतमतम्॥ सा च ब्रह्मणो मानसी कन्या। यथा,—

श्रीनारायण उवाच।

"शृणु नारद वक्ष्यामि स्वधोपाख्यानमुत्तमम्।
पितृणाञ्च ऋषिकरं श्राद्धानां फलवर्द्धनम्॥
सृष्टेरादौ पितृगणान् ससर्ज्ज जगतां विधिः।
चतुरश्चतुर्म्मूर्त्तिमतस्त्रींश्च तेजःस्वरूपिणः॥
दृष्ट्वा मग्नं पितृगणान् सिद्धरूपान्मनोहरान्।
आहारं संसृजे तेषां श्राद्धं तर्पणपूर्ब्बकम्॥
स्नानं तर्पणपर्य्यन्तं श्राद्धान्तं देवपूजनम्।
आह्निकञ्च त्रिसन्ध्यान्तं विप्राणाञ्च श्रुतौ श्रुतम्॥
नित्यं न कुर्य्यादृषो विप्रस्त्रिसन्ध्यं श्राद्धतर्पणम्।
बलिं वैश्वदेवञ्च सोऽपि विप्रहीनो यथोरगः॥
हरिसेवाविहीनश्च श्रीहरेरनैवेद्यभुक्।
भस्मान्तं सूतकं तस्य न कर्म्मार्हः स नारद॥
ब्रह्मा श्राद्धादिकं सृष्ट्वा जगाम पितृहेतवे।
न प्राप्नुवन्ति पितरो ददति ब्राह्मणादयः॥
सर्व्वे प्रजग्मुः क्षुभिता विषण्णा ब्रह्मणः सभाम्।
सर्व्वं निवेदनं चक्रुस्तमेव जगतां विधिम्॥
ब्रह्मा च मानसीं कन्यां ससर्ज्ज तां मनोहराम्।
रूपयौवनसम्पन्नां शतचन्द्रसमप्रभाम्॥
विद्यावतीं गुणवतीमतिरूपवतीं सतीम्।
श्वेतचम्पकवर्णाभां रत्नभूषणभूषिताम्॥
विशुद्धां प्रकृतेरंशां स्मितां वरदां शुभाम्।
स्वधाभिधानां सुदतीं लक्ष्मीलक्षणसंयुताम्॥
शतपद्मदलन्यस्तपादपद्मञ्च बिभ्रतीम्।
पत्नीं पितृणां पद्मास्यां पद्मजां पद्मलोचनाम्॥
पितृभ्यस्तां ददौ ब्रह्मा तुष्टेभ्यस्तुष्टिरूपिणीम्।
ब्राह्मणांश्चोपदेशञ्च चकार गोपनीयकम्॥
स्वधान्तं मन्त्रमुच्चार्य्य पितृभ्यो देहि चेति च।
क्रमेण तेन विप्राय पित्रे दानं ददुः पुरा॥
स्वाहा श्रुत्वा देवदाने पितृदाने स्वधा परा।
सर्व्वत्र दक्षिणा श्रुत्वा हृतयज्ञमदक्षिणम्॥
पितरो देवता विप्रा मुनयो मनवस्तथा।
पूजां चक्रुः स्वधां शान्तां तुष्टाव परमादरम्॥
देवादयश्च सन्तुष्टाः परिपूर्णमनोरथाः।
विप्रादयश्च पितरः स्वधादेवीवरेण च॥
इत्येवं कथितं सर्व्वं स्वधोपाख्यानमुत्तमम्।
सर्व्वेषाञ्च तुष्टिकरं किं भूयः श्रोतुमिच्छसि॥*॥

नारद उवाच।

स्वधापूजाविधानञ्च ध्यानं स्तोत्रं तथा मुने।
श्रोतुमिच्छामि यत्नेन वद वेदविदांवर॥

श्रीनारायण उवाच।

तद्ध्यानं स्तवनं ब्रह्मन् वेदोक्तं सर्व्वसम्मतम्।
सर्व्वं जानासि च कथं ज्ञातुमिच्छसि हृद्ये॥
शरत्कृष्णत्रयोदश्यां मघायां श्राद्धवासरे।
स्वधां संपूज्य यत्नेन ततः श्राद्धं समाचरेत्॥
स्वधां नाभ्यर्च्च यो विप्रः श्राद्धं कुर्य्यादहम्मतिः।
न भवेत् फलभाक् सत्यं श्राद्धस्य तर्पणस्य च॥
ब्रह्मणो मानसीं कन्यां शश्वत् सुस्थिरयौवनाम्।
पूज्यां पितृणां देवानां श्राद्धानां फलदां भजे॥
इति ध्यात्वा शालग्रामेऽथवा मङ्गले घटे।
दद्यात् पाद्यादिकं तस्यै मूलेनेति श्रुतौ श्रुतम्॥
ॐ क्लीं श्रीं क्लीं स्वधादेव्यै स्वाहेति च मनुम्।
सप्तार्थं च संपूज्य स्तुत्वा तां प्रणमेद्द्विजः॥*॥

स्तोत्रं शृणु मुनिश्रेष्ठ ब्रह्मपुत्र विशारद।
सर्व्ववाञ्छाप्रदं नृणां ब्रह्मणा यत् कृतं पुरा॥

ब्रह्मोवाच।

"स्वधोच्चारणमात्रेण तीर्थस्नायी भवेन्नरः।
मुच्यते सर्व्वपापेभ्यो वाजपेयफलं लभेत्॥
स्वधा स्वधा स्वधेत्येवं यदि वारत्रयं स्मरेत्।
श्राद्धस्य फलमाप्नोति वलेश्च तर्पणस्य च॥
श्राद्धकाले स्वधास्तोत्रं यः शृणोति समाहितः।
लभेत् श्राद्धशतानाञ्च पुण्यमेव न संशयः॥
स्वधा स्वधा स्वधेत्येवं त्रिसन्ध्यं यः पठेन्नरः।
प्रियां विनीतां स लभेत् साध्वीं पुत्रं गुणान्वितम्॥
पितॄणां प्राणतुल्या त्वं द्विजजीवनरूपिणी।
श्राद्धाधिष्ठातृदेवी च श्राद्धादीनां फलप्रदा॥
बर्हिर्गच्छ मन्मनसः पितॄणां तुष्टिहेतवे।
संप्रीतये द्विजातीनां गृहिणां वृद्धिहेतवे॥
नित्या त्वं नित्यरूपासि पुण्यरूपासि सुव्रते।
आविर्भावतिरोभावौ सृष्टौ च प्रलये तव॥
ॐ स्वस्ति च नमः स्वाहा स्वधा त्वं दक्षिणा तथा।
निरूपितायतुर्व्वेदे षट् प्रशस्ताय कर्म्मणाम्॥
पुरासीस्त्वं स्वधा गोपी गोलोके राधिकासखी।
धृतोरसि स्वमात्मानं कृष्णत्वेन स्वधा स्मृता॥
ध्वस्ता त्वं राधिकाशापात् गोलोकादिस्वमागता।
कृष्णश्चिष्टा तया दृष्टा पुरा वृन्दावने वने॥
कृष्णालिङ्गनपुण्येन भूता मे मानसी सुता।
अदृश्या सुरतौ तेन चतुर्णां स्वामिनां प्रिया॥
स्वाहा च सुन्दरी गोपी पुरासीद्राधिकासखी।
त्वं कृष्णमाह रतये तेन स्वाहा प्रकीर्त्तिता॥
कृष्णेन सार्द्धं सुचिरं रमते रासमण्डले।
प्रमत्ता सुरतौ शिष्टा दृष्टा सा राधया पुरा॥
तस्याः शापेन प्रध्वस्ता गोलोकादिस्वमागता।
कृष्णालिङ्गनपुण्येन बभूव वह्निकामिनी॥
पवित्ररूपा परमा देवानां वन्दिता नृणाम्।
यन्नामोच्चारणेनैव नरो मुच्येत पातकात्॥

स्वनः

सा सुशीलाभिधागोपी पुरासीद्राधिकासखी।
उवास दक्षिणे क्रोडे कृष्णस्य राधिकामतः॥
प्रध्वस्ता सा च तत्शापात् गोलोकादिरमा-
मता।
कृष्णालिङ्गनपुण्येन सा बभूव च दक्षिणा॥
प्रेयसी सुरतो दत्ता प्रशस्ता सर्व्वकर्म्मसु।
उवास दक्षिणे भर्त्तुर्हरिणा तेन कीर्त्तिता॥
बभूवुस्तिस्रो गोप्यश्च स्वधा च दक्षिणा तथा।
कर्म्मिणां कर्म्मपूर्णार्थं पुरा चैवेश्वरेच्छया॥
इत्येवमुक्त्वा स ब्रह्मा ब्रह्मलोके ससंसदि।
तस्यौ च सहसामात्यः स्वधा सावित्र्यभूव ह॥
तदा पितृभ्यः प्रददौ तामेव कमलालयाम्।
तां संप्राप्य यतस्ते च पितरश्च सहर्षिताः॥
स्वधास्तोत्रमिदं पुण्यं यः शृणोति समाहितः।
स स्नातः सर्व्वतीर्थेषु वेदपाठफलं लभेत्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४१ अध्यायः॥

स्वधाप्रियः, पुं, (स्वधायाः प्रियः।) कृष्णतिलः। इति शब्दरत्नावली॥ अग्निश्च॥

स्वधाभुक्, [ज्] पुं, (स्वधां भुङ्क्ते इति। भुज्+क्विप्।) पितृगणः। इति त्रिकाण्डशेषः॥ (यथा, रघुः। ८। ३०।

"ऋषिदेवगणस्वधाभुजां
श्रुतयागप्रसवैः स पार्थिवः।
अमृतत्वमुपेयिवान् बभौ
परिधेर्मुक्त इवोष्णदीधितिः॥"

देवता। इति हेमचन्द्रः॥

स्वधितिः, पुं, स्त्री, (सं धियति दधातीति। धि+क्तिच्।) कुठारः। इत्यमरः। २। ८। ८२॥ तालव्यमादिश्च॥ (यथा, भागवते। १०। ५५। ५।

"सदा महानसं नीत्वावद्यन् स्वधितिनाद्भुतम्॥"

वज्रः। इति निघण्टुः। २। २०॥)

स्वधितिहैतिकः, पुं, (स्वधितिर्हेतिर्यस्य। कन्।) परशुधारियोद्धा। इति केचित्॥

स्वन, ण शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) वकारयुक्तः। स्वेनतुः सस्वनतुः। अच स्वन च स्वन च इत्युभयपाठो लेखकप्रमादजतः। इति दुर्गादासः॥

स्वन, त् क ध्वाने। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-अक०-सेट्।) वकारयुक्तः। स्वनयति। इति दुर्गादासः॥

स्वन, मि तंसने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) वकारयुक्तः। शब्दे इत्यनुवर्त्तते। तंसने भूषणे कर्त्तरि शब्देऽर्थेऽयमित्यर्थः। स्वेनतुः सस्वनतुर्नूपुरौ। मि, स्वनयति स्वानयति कङ्कणं वधूः। अन्यत्र स्वानयति घण्टां जनः। इति दुर्गादासः॥

स्वनः, पुं, (स्वननमिति। स्वन शब्दे+"स्वनहसोर्वा।" ३। ३। ६२। इति अप्।) शब्दः। इत्यमरः। १। ७। २२॥ (यथा, महाभारते। १। १२३। ४६।

"आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः॥")

स्वप्नः

स्वनचक्रः, पुं, रतिबन्धविशेषः। तस्य लक्षणं यथा,—

"धृत्वा बाहू तथा कण्ठं पादतोऽपि शिरः स्थितः।
गूढश्च कामयेत् कामी स्वनचक्रः प्रकीर्त्तितः॥"

इति रतिमञ्जरी॥

स्वनिः, पुं, (स्वन+इन्।) शब्दः। इति हेमचन्द्रः॥

स्वनितं, क्ली, (स्वन+क्तः। गर्ज्जितम्। मेघशब्दः। इति हेमचन्द्रः॥ ध्वनिते, वि। इत्यमरः। १। १। ८४॥

स्वनिताह्वयः, पुं, (स्वनितमाह्वयते इति। आ+ह्वे+अच्।) तण्डुलीयः। इति राजनिर्घण्टः॥

स्वनोत्साहः, पुं, (स्वनेन उत्साहो यस्य।) गण्डकः। इति रत्नावली॥ पुस्तकान्तरे श्वनोत्साह इति च पाठः॥

स्वपनं, क्ली, (स्वप+ल्युट्।) निद्रा। इति शब्दरत्नावली॥ (यथा, सुश्रुते। १। ४।

"बालवृद्धस्त्रीकर्षितक्षतक्षीणमद्यनित्ययानवाहनाध्वकर्म्मप्रतिश्रान्तानामभुक्तवतां मेदःखेदकफरसरक्तक्षीणानामजीर्णिनाञ्च मुहूर्त्तं दिवास्वपनमप्रतिषिद्धम्॥")

स्वपिण्डा, स्त्री, पिण्डखर्জ্জूरी। इति राजनिर्घण्टः॥

स्वपितिकर्म्मा, [न्] पुं, (स्वपितिरिति कर्म्म यस्य।) शयनकर्त्ता। तद्दैदिकपर्य्यायौ। स्वपिति १ स्वस्ति २। इति द्वौ स्वपितिकर्म्माणौ इति वेदनिघण्टौ ३ अध्यायः॥

स्वप्नः, पुं, (स्वप+"स्वपो नन्।" ३। ३। ९१। इति नन्। यद्वा "कृवृभूधिदुपनीति।" उणा० ३। १०। इति नन्।) निद्रा। इत्यमरः। १। ७। ३६॥ यथा,—

"तस्माच्च जाग्रद्यात्रायां दिवास्वप्नञ्च वर्জ্জयेत्।
ज्ञात्वा दोषकरावेतौ बुधः स्वप्नं मितञ्चरेत्॥")

प्रसुप्तस्य विज्ञानम्। यथा,—

"पूर्व्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः।
रजोयुक्तेन मनसा यङ्कात्यर्थान् शुभाशुभान्॥
करणानान्तु वैकल्ये तमसाभिप्रवर्द्धिते।
अस्वपन्नपि भूतात्मा प्रसुप्त इव चोच्यते॥"

इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥)

दर्शनम्। इति मेदिनी॥ २॥ सुस्वप्ना यथा,—

नन्द उवाच।

"केन स्वप्नेन किं पुण्यं केन पुंसां भवेत् सुखम्।
कोऽपि कोऽपि च सुस्वप्नात् सर्व्वं कथय प्रभो!॥"

श्रीभगवानुवाच।

"वेदेषु सामवेदश्च प्रशस्तः सर्व्वकर्म्मसु।
तत्रैव काण्वशाखायां पुण्यकाण्डे मनोहरे॥
सुप्तश्चो यश्च सुस्वप्नः शश्वत् पुण्यफलप्रदः।
तत् सर्व्वं लिखितं तात! कथयामि निशामय॥
स्वप्नाध्यायं प्रवक्ष्यामि बहुपुण्यफलप्रदम्।
स्वप्नाध्यायं नरः श्रुत्वा गङ्गास्नानफलं लभेत्॥

स्वप्नस्तु प्रथमे यामे संवत्सरफलप्रदः।
द्वितीये चाष्टभिर्म्मासैस्त्रिभिर्म्मासैस्तृतीयके॥
चतुर्थे चार्द्धमासेन स्वप्नः स्यात्तु फलप्रदः।
दण्डाद्दे फलदः स्वप्नोऽप्यरुणोदयदर्शने॥
प्रातः स्वप्नश्च फलदस्तत्क्षणं यदि बोधितः।
दिने मनसि यद्दृष्टं तत् सर्व्वञ्च समेदभ्रुवम्॥
चिन्ताव्याधिसमायुक्तो नरः स्वप्नञ्च पश्यति।
तत् सर्व्वं निष्फलं तात प्रयात्येव न संशयः॥
जरो मूत्रपुरीषेण पीडितश्च भयाकुलः।
दिगम्बरो मुक्तकेशो न लभेत् स्वप्नजं फलम्॥
दृष्ट्वा स्वप्नञ्च निद्रान्तुर्यदि निद्रां प्रयाति च।
विमूढो वह्नि चेद्रात्रौ न लभेत् स्वप्नजं फलम्॥
उक्त्वा काश्यपगोत्रे च विप्रश्चिं लभते ध्रुवम्।
दुर्गते दुर्गतिं याति नीचे व्याधिं प्रयाति च॥
शत्रौ भयञ्च लभते मूर्खे च कलहो भवेत्।
कामिन्यां धनहानिः स्याद्राज्ञो चौरभयं भवेत्॥
निद्रायां लभते शोकं पण्डिते वाञ्छितं फलम्।
न प्रकाश्यञ्च सुस्वप्नः पण्डितैः काश्यपे व्रज॥"

गवाञ्च कुञ्जराणाञ्च हयानाञ्च व्रजेश्वर।
प्रासादानाञ्च शैलानां द्रुमाणाञ्च तथैव च॥
आरोहणञ्च धनदं भोजनं रोदनं तथा।
प्रतिग्रहञ्च तथा वीथ्यां शस्याढ्यां भूमिमालभेत्॥
शस्याक्षेत्रे यदा विद्वो व्रणेन कृमिणा तथा।
विष्ठया रुधिरेणैव संयुक्तोऽप्यर्थमालभेत्।
स्वप्नेऽप्यगम्यागमनं भार्य्यालाभं करोति च।
मूत्रसिक्तं पिबेत् शुक्रं नरकञ्च विशत्यपि॥
नगरं प्रविशेद्रत्नं समुद्रं वा सुधां पिबेत्।
शुभवार्त्तामवाप्नोति विपुलस्वार्थमालभेत्॥"

रत्नं स्थाने नक्रं समुद्रं स्थाने समूत्रं सुधां स्थाने सुरां इति च पाठः।

"गजं नृपं सुवर्णञ्च वृषभं धेनुमेव च।
दीपमन्नं फलं पुष्पं कन्यां छत्रं रथं ध्वजम्॥
कुटुम्बं लभते दृष्ट्वा कीर्त्तिञ्च विपुलां श्रियम्।
पूर्णकुम्भं द्विजं वह्निं पुष्पं ताम्बूलमन्दिरम्॥
शुक्लधान्यं नटं वेश्यां दृष्ट्वा श्रियमवाप्नुयात्।
गोश्चीरञ्च घृतं दृष्ट्वा चार्थं पुष्पं धनं लभेत्॥
पायसं पद्मपत्रे च दधि दुग्धं घृतं मधु।
मिष्टान्नं खस्तिकं भुक्त्वा ध्रुवं राजा भविष्यति॥
पक्षिणां मानुषाणाञ्च भुङ्क्ते मांसं नरो यदि।
वस्त्रार्थं शुभवार्त्ताञ्च लभते वाञ्छितं फलम्॥
छत्रं वा पादुकाम्वापि सस्याढ्यानञ्च गच्छति।
असिञ्च निर्म्मलं तीक्ष्णं तत्रैव भविष्यति॥
भिक्षया सन्तरेद्योषि च प्रधानं भविष्यति।
दृष्ट्वा च फलिनं वृक्षं धनमाप्नोति निश्चितम्॥
यस्य क्षेत्रेण सर्पेण दश्यते दक्षिणे भुजे।
सोऽचिराल्लभते भार्य्यां विनीतां प्रियवादिनीम्॥
सर्पेण भक्षितो यो हि पर्य्यङ्कात्मव तत्रैव।
स्वप्ने सूर्य्यं विधुं दृष्ट्वा सुचते व्याधिबन्धनात्॥
वड़वां कुक्कुटीं क्रौञ्चीं दृष्ट्वा भार्य्यां लभेद्-
ध्रुवम्।
स्वप्ने यो निगड़ैर्बद्धः प्रतिष्ठामुत्तमां लभेत्॥
उत्तमां स्थाने पुत्रमिति वा पाठः।

दध्यन्नं पायसं भुङ्क्ते तड़ागे वा नदीतटे ।
विशीर्णे पद्मपत्रे च सोऽपि राजा भविष्यति ॥
तड़ागे वा स्थाने पद्मपत्रे इति वा पाठः ।
जलौकसं हस्तिकच्छं मर्पञ्च यदि पश्यति ।
धनं पुत्रञ्च विजयं प्रतिष्ठाञ्च लभेदिति ॥
मृत्तिभिर्देष्टिभिः कोलैर्वानरैः पीड़ितो यदि ।
निश्चितञ्च भवेद्राजा धनञ्च विपुलं लभेत् ॥
मद्यं मांसं मौक्तिकञ्च शङ्खचन्दनरोरकम् ।
यस्तु पश्यति स्वप्नान्ते विपुलं धनमाप्नुयात् ॥
सुराञ्च रुधिरं स्वर्णं भुक्ता विप्रो धनं लभेत् ।
प्रतिमां शिवलिङ्गञ्च लभेद्दृष्ट्वा जयं धनम् ॥
फलितं पुष्पितं विल्वमाम्रं दृष्ट्वा लभेत् धनम् ।
दृष्ट्वा च ऋजदग्निञ्च धनं बुद्धिं श्रियं लभेत् ॥
आमलकं धात्रीफलं उत्पलञ्च धनागमम् ।
देवताश्च द्विजा गावः पितरो लिङ्गिनस्तथा ।
उत्पलं स्थाने तत्पद्ममिति वा पाठः।
यद्ददाति मित्रः स्वप्ने तत्तथैव भविष्यति ॥
शुक्लाम्बरधरां नारीं शुक्लमाल्यानुलेपनाम् ।
समाश्लिष्यति यः स्वप्ने तस्य श्रीः सर्व्वतः सुखम् ॥
पीताम्बरधरां नारीं पीतमाल्यानुलेपनाम् ।
उपगूहति यः स्वप्ने कल्याणं तस्य जायते ॥

सर्व्वाण्यि शुक्लानि प्रशंसितानि
भस्मास्थि कार्पासविवर्जितानि ।
सर्व्वाण्यि कृष्णानि विनिन्दितानि
गोहस्तिदेवद्विजवर्जितानि ॥

दिव्या स्त्री सस्मिता विप्रा रत्नभूषणभूषिता ।
यस्य मन्दिरमायाति स श्रियं लभते ध्रुवम् ॥
स्वप्ने च ब्राह्मणो देवो ब्राह्मणो देवकन्यका ।
कुमारी चाष्टवर्षीया रत्नभूषणभूषिता ।
यस्य तुष्टा भवेत् स्वप्ने तस्य तुष्टा च पार्व्वती ॥
इत्यत्र स भवेत् कविपण्डितः इति च पाठः ।
ब्राह्मणो ब्राह्मणी वापि सन्तुष्टः सस्मिता सती ।
फलं ददाति यस्मै च तस्य पुत्रो भविष्यति ॥
यं स्वप्ने ब्राह्मणो नन्द ! करोति च शुभाशिषम् ।
यद्ददति भवेत्तस्य तस्यैश्वर्य्यं भवेद्ध्रुवम् ॥
परितुष्टो द्विजश्रेष्ठ आयाति यस्य मन्दिरम् ।
नारायणः शिवो ब्रह्मा प्रविशेत्तु तदाश्रमम् ॥
सम्पत्तिस्तस्य भवति यशश्च विपुलं शुभम् ।
पदे पदे सुखं तस्य सम्मानं गौरवं लभेत् ॥
अकस्मादपि स्वप्ने तु लभते सुरभीं यदि ।
भूमिलाभो भवेत्तस्य भार्य्या चापि पतिव्रता ॥
करेण कृत्वा हस्तौ यं मस्तके स्थापयेद्यदि ।
राज्यलाभो भवेत्तस्य निश्चितञ्च श्रुतौ श्रुतम् ॥
स्वप्ने तु ब्राह्मणस्तुष्टः समाश्लिष्यति यं व्रज ।
तीर्थस्नायी भवेत् सोऽपि निश्चितञ्च श्रियान्वितः ।
स्वप्ने ददाति पुष्पञ्च यस्मै पुष्पवते द्विजः ।
जययुक्तो भवेत् सोऽपि यशस्वी च धनी सुखी ॥
स्वप्ने दृष्ट्वा च तीर्थानि सौधरत्नगृहाणि च ।
जययुक्तश्च धनवांस्तीर्थस्नायी भवेन्नरः ॥
स्वप्ने तु पूर्णकलसं कश्चित् कस्मै ददाति वा ।
पुत्रलाभो भवेत्तस्य सम्पत्तिं वा समालभेत् ॥
हस्ते कृत्वा तु कुड़वं भाद्रकं वापि सुन्दरी ।
यस्य मन्दिरमायाति स लक्ष्मीं लभते ध्रुवम् ॥
दिव्या स्त्री यदयं गत्वा पुरीषं विसृजेद्द्विज ।
अर्थलाभो भवेत्तस्य दारिद्र्यञ्च प्रयाति च ॥
यस्य गेहं समायाति भार्य्यया सह ब्राह्मणः ।
पार्व्वत्या सह शम्भुर्व्वा लक्ष्मीनारायणोऽथवा ।
ब्राह्मणो ब्राह्मणो वापि स्वप्ने यस्मै ददाति वा ।
धान्यं पुष्पाञ्जलिं वापि तस्य श्रीः सर्व्वतोसुखी ॥
सर्व्वतोसुखीत्यत्र सर्व्वतः सुखीति च पाठः ।
मुक्ताहारं पुष्पमाल्यं चन्दनञ्च शुभं व्रज ।
शुभं व्रज स्थाने लभेद्विज इति वा पाठः ।
स्वप्ने ददाति विप्रश्च तस्य श्रीः सर्व्वतः सुखी ॥
गोरोचनां पताकां वा हरिद्रामिक्षुदण्डकम् ।
स्निग्धान्नञ्च लभेत् स्वप्ने तस्य श्रीः सर्व्वतः सुखी ॥
स्निग्धान्नस्थाने सिद्धान्नमिति वा पाठः ।
ब्राह्मणो ब्राह्मणी वापि ददाति यस्य मस्तके ।
छत्रं वा शुक्लधान्यं वा स च राजा भविष्यति ॥
स्वप्ने रथस्थः पुरुषः शुक्लमाल्यानुलेपनः ।
तक्रौदनं दधि भुङ्क्ते च पायसं वा नृपो भवेत् ॥
स्वप्ने ददाति विप्रश्च ब्राह्मणी वा सुधां दधि ।
प्रशस्तपात्रं तस्मै वा सोऽपि राजा भवेद्ध्रुवम् ॥
ददाति पुस्तकं स्वप्ने यस्मै पुष्पवते द्विजः ।
स भवेद्विश्वविख्यातः कवीन्द्रः पण्डितेश्वरः ॥
यं पाठयति स्वप्ने या मातेव च सुतं यथा ।
सरस्वतीसुतः सोऽपि तत्परो नास्ति पण्डितः ॥
ब्राह्मणः पाठयेद्यस्य पितेव यत्नपूर्व्वकम् ।
ददाति पुस्तकं प्रीत्या स च तत्सदृशो भवेत् ॥
प्राप्नोति पुस्तकं स्वप्ने पथि वा यत्र तत्र वा ।
स पण्डितो यशस्वी च विख्यातश्च महीतले ॥
स्वप्ने यस्मै मङ्गलमन्नं विप्रो विप्रा ददाति चेत् ।
स भवेत् पुरुषः प्राज्ञो धनवान् गुणवान् सुधीः ॥
स्वप्ने ददाति मन्त्रं वा प्रतिमां वा शिलामयीम् ।
यस्मै ददाति विप्रश्च मन्त्रसिद्धिश्च तत्क्षणात् ॥
विप्रा विप्रसमूहश्च दृष्ट्वा नत्वाशिषं लभेत् ।
राजेन्द्रः स भवेद्वापि किम्वा च कविपण्डितः ॥
शुक्लधान्ययुतां भूमिं यस्मै विप्रः समुत्सृजेत् ।
स्वप्ने च परितुष्टश्च स भवेत् पृथिवीपतिः ॥
स्वप्ने विप्रो रथे स्थित्वा नानास्वर्गं प्रदर्शयेत् ।
चिरजीवी भवेदायुर्धनहस्तिर्भवेद ध्रुवम् ॥
विप्रा विप्रश्च सन्तुष्टो यस्मै कन्यां ददाति च ।
स्वप्ने च स भवेन्नित्यं धनाढ्यो भूपतिः स्वयम् ॥
स्वप्ने सरोवरं दृष्ट्वा समुद्रं वा नदीं नदम् ।
शुक्लाहिं शुक्लगैलञ्च दृष्ट्वा प्रियमवाप्नुयात् ॥"
प्रियं स्थाने श्रियमिति च पाठः ।
यः पश्यति मृतं स्वप्ने स भवेच्चिरजीवनः ।
अरोगोऽरोगिणं दृष्ट्वा सुखिनञ्च सुखी भवेत् ॥
दिव्या स्त्री यं प्रवदति मम स्वामी भवान् भव ।
स्वप्ने दृष्ट्वा च जागर्त्ति स च राजा भवेद्ध्रुवम् ॥
स्वप्ने च बालिकां दृष्ट्वा लब्ध्वा स्फाटिकमालिकाम् ।
दक्षहस्ते शुक्लधनं स प्रतिष्ठां लभेद ध्रुवम् ॥
स्वप्ने विप्रो वदति यं मम दासो भवेति च ।
हरिदासस्य तत्सर्व्वं लब्ध्वा स वैष्णवो भवेत् ॥
स्वप्ने विप्रो हरिः शम्भुर्ब्राह्मणी कमला शिवा ।
शुक्ला स्त्री वेदमाता वा जाह्नवी वा सरस्वती ॥
गोपालिकावेशधरा बालिका राधिका मम ।
बालश्च बालगोपालः स्वप्नविद्भिः प्रकाशितः ॥
एष ते कथितो नन्द सुस्वप्नः पुण्यहेतुकः ।
श्रोतुमिच्छसि किं वा त्वं किं भूयः कथयामि ते ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे सुस्वप्नदर्शनं ७७ अध्यायः ॥ * ॥

अक्रूरदृष्टसुस्वप्ना यथा,—

"अथाक्रूरः स्वभवनं गत्वा कंसेन प्रेरितः ।
चकार शयनं तल्पे भुक्ता मिष्टान्नमुत्तमम् ॥
सकर्पूरञ्च ताम्बूलं चखाद वासितं जलम् ।
जगाम निद्रां सुखतः सुखसम्भोगमाचरतः ॥
ततो ददर्श सुस्वप्नं पुराणश्रुतिसम्मतम् ।
निशावशेषसमये वायादिपरिवर्जितः ॥
अरोगी बद्धकेशश्च वस्त्रयुग्मसमन्वितः ।
सुतल्पशायी सुस्निग्धचिन्ताशोकविवर्जितः ॥
किशोरवयसं श्यामं द्विभुजं सुरलीधरम् ।
पीतवस्त्रपरीधानं वनमालाविभूषितम् ॥
चन्दनोक्षितसर्व्वाङ्गं मालतीमाल्यशोभितम् ।
भूषितं भूषितार्हञ्च मुद्रारत्नमणिभूषणैः ॥
मयूरपुच्छचूड़ञ्च सस्मितं पद्मलोचनम् ।
एवम्भूतं द्विजश्रेष्ठं ददर्श प्रथमे सुने ॥
ततो ददर्श रुचिरां पतिपुत्रवतीं सतीम् ।
पीतवस्त्रपरीधानां रत्नभूषणभूषिताम् ॥
ज्वलद्प्रदीपहस्ताञ्च शुक्लमाल्यकरां वराम् ।
शरच्चन्द्रनिभास्याञ्च सस्मितां वरदां शुभाम् ॥
ततो ददर्श विप्रश्च कुर्व्वन्तञ्च शुभाग्निहम् ।
श्वेतपद्मगतं हंसं तुरगञ्च सरोवरम् ॥
ददर्श चित्रितं चारु फलितं पुष्पितं शुभम् ।
आम्रनिम्बनारिकेलगुवाकाकदलीतरुम् ॥
दशन्तं श्वेतसर्पञ्च स्वात्मानं पर्व्वतस्थितम् ।
वृक्षस्थञ्च गजस्थञ्च तरिस्थं तुरगस्थितम् ॥
वीणां वादितवन्तञ्च शुक्लवस्त्रञ्च पायसम् ।
दधिक्षीरयुताञ्चैव पद्मपत्रस्थमोक्षितम् ॥
क्षमिविट्सहिताङ्गञ्च रुदन्तं मोक्षितं तथा ।
शुक्लधान्यपुष्पधरं क्षणं चन्दनचर्चितम् ॥
समुद्रस्थं प्रासादस्थमात्मानञ्च सलोक्षितम् ।
छिन्नभिन्नचलताङ्गञ्च मेदःपूयसमन्वितम् ॥
ततो ददर्श रजतं मणिशुभ्रञ्च काञ्चनम् ।
सुधामाणिक्यरत्नञ्च पूर्णकुम्भं घनं जलम् ॥
सुरभिञ्च सवत्साञ्च हस्तमेन्द्रं मयूरकम् ।
शुक्लञ्च सारसं शङ्खं छिन्नं खञ्जनमेव च ॥
ताम्बूलं पुष्पमाल्यञ्च ज्वलदग्निं सुरार्चनम् ।
पार्व्वतीप्रतिमां लक्ष्मीप्रतिमां शिवलिङ्गकम् ॥
विप्रबालाञ्च बालञ्च सुशुक्लफलितं क्षितिम् ।
देवस्त्रलोकं राजेन्द्रं सिंहं व्याघ्रं गुरुं सुरम् ॥
दृष्ट्वा स्वप्नं समुत्तस्थौ चकाराह्निकमोक्षितम् ।
उद्धवं कथयामास सर्व्ववृत्तान्तमेव च ॥"

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ७०।१-१८ ॥
दुःस्वप्ना यथा,—

नन्द उवाच।

"श्रुतं सर्व्वं महाभाग दुःस्वप्नं कथय प्रभो।
उवाच तत्र भगवान् श्रूयतामिति तद्दचः॥"

श्रीभगवानुवाच।

"स्वप्ने हसति यो हर्षादिवाङ्गं यदि पश्यति।
नर्त्तनं गीतमिष्टञ्च विपत्तिस्तस्य निश्चितम्॥
दन्ता यस्य विशीर्य्यन्ते विचरन्तञ्च पश्यति॥
धनहानिर्भवेत्तस्य पीड़ा चापि शरीरजा॥
अभ्यङ्गितस्तु तैलेन यो गच्छेद्दक्षिणां दिशम्।
खरोष्ट्रमहिषारूढो मृत्युस्तस्य न संशयः॥
स्वप्ने चूर्णं जवापुष्पमशोकं करवीरकम्।
विपत्तिस्तस्य तैलञ्च लवणं यदि पश्यति॥
नग्नां कृष्णां छिन्ननासां शूद्रस्य विधवां तथा।
कपर्दकं तालफलं दृष्ट्वा शोकमवाप्नुयात्॥
स्वप्ने दृष्टं ब्राह्मणञ्च ब्राह्मणीं कोपसंयुताम्।
विपत्तिश्च भवेत्तस्य लक्ष्मीर्याति गृहाद्ध्रुवम्॥
वनपुष्पं रक्तपुष्पं पलाशञ्च सुपुष्पितम्।
कार्पासं शुक्लवस्त्रञ्च दृष्ट्वा दुःखमवाप्नुयात्॥
गायन्तीञ्च हसन्तीञ्च कृष्णाम्बरधरां स्त्रियम्।
दृष्ट्वा कृष्णाञ्च विधवां नरो मृत्युमवाप्नुयात्॥
देवता यत्र नृत्यन्ति गायन्ति च हसन्ति च।
आस्फोटयन्ति धावन्ति तस्य देशो विनश्यति॥
वान्तं मूत्रं पुरीषं वा वैद्यं रौप्यं सुवर्णकम्।
प्रत्यक्षमथवा स्वप्ने जीवितं दशमासिकम्॥
कृष्णाम्बरधरां नारीं कृष्णमाल्यानुलेपनाम्।
उपगूहति यः स्वप्ने तस्य मृत्युर्भविष्यति॥
मृतं वत्सञ्च मुण्डञ्च मृगस्य च नरस्य वा।
यः प्राप्नोत्यस्थिमालाञ्च विपत्तिस्तस्य निश्चितम्।
अभ्यङ्गितस्तु हविषा क्षौरेण मधुनापि वा।
तक्रेणापि गुड़ेनैव पीड़ा तस्य विनिश्चितम्॥
रथं खरोष्ट्रसंयुक्तं एकाकी योऽधिरोहयेत्।
तत्रस्थोऽपि च जागर्त्ति मृत्युरेव न संशयः॥
रक्ताम्बरधरां नारीं रक्तमाल्यानुलेपनाम्।
उपगूहति यः स्वप्ने व्याधिस्तस्य विनिश्चितम्।
पतितं नखकेशञ्च निर्व्वाणाङ्गारमेव च।
भस्मपूर्णां चितां दृष्ट्वा लभते मृत्युमेव च॥
श्मशानं शुष्ककाष्ठञ्च तृणानि लौहमेव च।
मसीञ्च किञ्चित् कृष्णां वा दृष्ट्वा दुःखं लभेत् ध्रुवम्॥
पादुकां फलकं रक्तपुष्पमाल्यं भयानकम्।
माषं मसूरं मुद्गं वा दृष्ट्वा सद्यो व्रणं लभेत्॥
कण्टकं सरलं काकं भल्लूकं वानरं खरम्।
पूयं गात्रमलं स्वप्ने केवलं व्याधिकारणम्॥
भग्नभाण्डं क्षतं शूद्रं गलत्कुष्ठञ्च रोगिणम्।
रक्ताम्बरञ्च जटिलं शूकरं महिषं खरम्॥
अन्धकारं महाघोरं मृतजीवं भयानकम्।
दृष्ट्वा स्वप्ने योनिछिद्रं विपत्तिं लभते ध्रुवम्॥
कुवेषरूपं म्लेच्छञ्च यमदूतं भयङ्करम्।
पाशहस्तं पाशयुक्तं दृष्ट्वा मृत्युं लभेन्नरः॥
ब्राह्मणो ब्राह्मणी बालो बालको वा सुतः सुता
विदार्य्य कुरुते कोपात् दृष्ट्वा दुःखमवाप्नुयात्॥
कृष्णपुष्पञ्च तन्माल्यं भस्मयुक्तास्थधारिणम्।
म्लेच्छाञ्च विकृताकारं दृष्ट्वा मृत्युं लभेत् ध्रुवम्॥
वाद्यान्च नर्त्तनं गीतं गायनं रक्तवाससम्।
मृदङ्गवाद्यमानन्दं दृष्ट्वा दुःखं लभेद्ध्रुवम्॥
वाद्यां स्थाने वाद्यमिति वा पाठः।
आनन्दं स्थाने आनद्दमिति युक्तम्।
मस्यादि धारयेद्यो हि तद्भ्रातुर्म्मरणं ध्रुवम्॥
छिन्नं वापि कबन्धं वा विकृतं वा मुण्डकेशिनम्।
चितां नृत्यञ्च कुर्व्वन्तं दृष्ट्वा मृत्युं लभेन्नरः॥
मृतो वापि मृता वापि कृष्णा म्लेच्छा भयानका।
उपगूहति यं स्वप्ने तस्य मृत्युर्व्विनिश्चितः॥
येषां दन्ताश्च भग्नाश्च केशाश्चापि पतन्ति च।
धनहानिर्भवेत्तेषां पीड़ा वा तच्छरीरजा॥
उपद्रवन्ति यं स्वप्ने मृङ्गिणो दंष्ट्रिणोऽपि वा।
बालका मानवाश्चैव तस्य राजकुलाद्भयम्॥
छिन्नं भिन्नं पतन्तञ्च शिलादृष्टिं तृपं क्षुरम्।
रक्ताङ्गारं भस्मदृष्टं दृष्ट्वा दुःखमवाप्नुयात॥
गृहं पतन्तं शैलं वा धूमकेतुं भयानकम्।
भग्नस्कन्धं तरोर्व्वापि दृष्ट्वा दुःखमवाप्नुयात्॥
रथगेहशैलहर्म्यगोहस्तितुरगात् खरात्।
पतन्ति भूमौ ये स्वप्ने विपत्तिस्तस्य सङ्कुला॥
उच्चैः पतन्ति गर्त्तेषु भस्माङ्गारचितासु च।
क्षारकुण्डेषु चूर्णेषु मृत्युस्तेषां न संशयः॥
बलाद्गृह्णाति दुष्टश्च क्षतञ्च यस्य मस्तकात्।
पितुर्नाशो भवेत्तस्य गुरोर्व्वापि नृपस्य वा॥
सुरभी यस्य गेहाच्च याति वत्सा सवत्सिका।
प्रयाति पापिनस्तस्य लक्ष्मीरपि वसुन्धरा॥
पाशेन बद्ध्वा बद्धञ्च यं गृहीत्वा प्रयान्ति च।
यमदूताश्च ये म्लेच्छास्तस्य मृत्युर्न संशयः॥
गर्दभो ब्राह्मणो वापि ब्राह्मणो वा गवस्तथा।
परिरौति यं विपत्तिस्तस्य निश्चितम्॥
विरोधिनश्च काकाश्च कुक्कुरा भल्लुकास्तथा।
पतन्त्यागत्य यद् गात्रे तस्य मृत्युर्न संशयः॥
महिषा भल्लुका उष्ट्राः शूकरा गर्दभास्तथा।
दृष्ट्वा धावन्ति यं स्वप्ने सरोगी निश्चितं भवेत्॥"

तेषां शान्तिर्यथा, —

"रक्तचन्दनकाष्ठानि घृताक्तानि च यो जुहुयात्।
गायत्र्याश्च सहस्रेण तेन शान्तिर्व्विधीयते॥
सहस्रधा जपेद्यो हि भक्त्या तं मधुसूदनम्।
निष्पापोऽपि भवेत् सोऽपि दुःस्वप्नः सुस्वप्नो भवेत्॥
अच्युतं केशवं विष्णुं हरिं सत्यं जनार्द्दनम्।
हंसं नारायणञ्चैव पतत्राष्टकं शुभम्॥
शुचिः पूर्व्वमुखः प्राज्ञो दशकृत्वश्च यो जपेत्।
निष्पापो हि भवेत् सोऽपि दुःस्वप्नः सुस्वप्नोभवेत्॥
विष्णुं नारायणं कृष्णं माधवं मधुसूदनम्।
हरिं नरहरिं रामं गोविन्दं दधिवामनम्॥
शुचिः पूर्व्वमुखो भूत्वा भक्तिग्रहायुतो जपेत्।
निष्पापो हि भवेत् सोऽपि दुःस्वप्नः सुस्वप्नो भवेत्॥
भक्त्या चैतानि भद्राणि दश नामानि यो जपेत्।
शतकृत्वो भक्तियुक्तो जन्मा रोगी च रोगतः॥
लक्षधा हि जपेद्यो हि बन्धनान्मुच्यते ध्रुवम्।
जन्मा च दशलक्षञ्च महाबन्ध्या प्रसूयते॥
हविष्याशी यतः शुद्धो दरिद्रो धनवान् भवेत्।
शतलक्षञ्च जन्मा च जीवन्मुक्तो मनेश्वरः॥
ॐ शिवं दुर्गां गणपतिं कार्त्तिकेयं दिनेश्वरम्।
धर्म्मं गङ्गाञ्च तुलसीं राधां लक्ष्मीं सरस्वतीम्॥
नामान्येतानि भद्राणि जले स्मृत्वा च योजपेत्।
वाञ्छितञ्च लभेत् सोऽपि दुस्वप्नः सुस्वप्नो भवेत्॥
ॐ ह्रीं श्रीं क्लीं पूर्व्वं दुर्गतिनाशिन्यै महामायायै स्वाहा।
कल्पद्रुमो हि लोकानां मन्त्रः सप्तदशाक्षरः।
शुचिश्च दशधा जप्तो दुःस्वप्नः सुस्वप्नो भवेत्॥
शतलक्षजपेनैव मन्त्रसिद्धिर्भवेन्नृणाम्।
सिद्धमन्त्रश्च लभते सर्व्वसिद्धिञ्च वाञ्छितम्॥
ॐ नमो मृत्युञ्जयायेति स्वाहान्तं लक्षधा जपेत्।
दृष्ट्वा च मरणं स्वप्ने शतायुश्च भवेन्नरः॥
पूर्व्वोत्तरमुखो भूत्वा स्वप्नं प्राज्ञे प्रकाशयेत्॥
काश्यपे दुर्गते नीचे देवब्राह्मणनिन्दके।
मूर्खे चैवानभिज्ञे च न च स्वप्नं प्रकाशयेत्॥
अश्वत्थे गणके विप्रे पितृदेवार्च्चनेषु च।
आचार्य्ये वैष्णवे मित्रे दिवास्वप्नं प्रकाशयेत्॥
इति ते पुण्यमाख्यानं कथितं पापनाशनम्।
धन्यं यशस्यमायुष्यं किं भूयः श्रोतुमिच्छसि॥
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे दुःस्वप्नदर्शनम्
८२ अध्यायः॥ * ॥ कंसदृष्टदुःस्वप्ना यथा,—

नारायण उवाच।

"अथ कंसो विचिन्त्यैवं दृष्ट्वा दुःस्वप्नमेव च।
समुद्विग्नो महाभीतो निराहारो निरुत्सवः॥
पात्रं मित्रं बुधगणं बान्धवञ्च पुरोहितम्।
समानीय सभामध्ये तानुवाच सुदुःखितः॥

कंस उवाच।

मया दृष्टो निशाशेषे यो दुःस्वप्नो भयप्रदः।
तं निबोध बुधाः सर्व्वे बान्धवाश्च पुरोहित॥
बिभ्रती षोड़शपुष्पाणां मालां सरक्तचन्दनाम्।
रक्ताम्बरं खड्गतोयं खर्परञ्च भयङ्करम्॥
प्रकृत्योट्टाट्टहासञ्च कोलजिह्वा भयङ्करी।
अतीव्रहृदा कृष्णाङ्गी नगरे मम नृत्यति॥
मुक्तकेशी छिन्ननासा कृष्णा कृष्णाम्बरापि सा।
विधवा सा महाशूद्री मामालिङ्गितुमिच्छति॥
मलिनं चेलखण्डञ्च बिभ्रती रूक्षमूर्द्धजान्।
ददाति चूर्णतिलकं कपाले मम वक्षसि॥
कृष्णवर्णानि पक्वानि छिन्नभिन्नानि सत्वरम्।
पतन्ति कृत्वा शब्दांश्च शस्यशालफलानि च॥
कुचेलो विकृताकारो म्लेच्छो हि रूक्षमूर्द्धजः।
ददाति मद्यमूषायां छिन्नभिन्नकपर्दकान्॥
महादृष्टा च दिव्या स्त्री पतिपुत्रवती सती।
बभञ्ज पूर्णकुम्भञ्च अभिशप्य पुनः पुनः॥
म्लानामोड़मालाञ्च रक्तचन्दनचर्च्चिताम्।
ददाति मह्यं विप्रश्च महारुष्टोऽभिशप्य च॥
चषमङ्गारदृष्टिश्च भस्मदृष्टिः क्षणं क्षणम्।

चर्णं चर्णं रक्तदृष्टिर्भवेद्य नगरे मम ॥
वानरं वायसं श्वानं भस्मुकं शूकरं खरम् ।
पश्यामि विकृताकारं शब्दं कुर्व्वन्तमुल्वणम् ॥
पश्यामि शुष्ककाष्ठानां राशिमत्युन्नतकज्जलम् ।
भरणादयवेलायां कर्षं छिन्ननखानि च ॥
पीतवस्त्रपरीधाना शुक्लचन्दनचर्चिता ।
बिभ्रती मालतीमाला रत्नभूषणभूषिता ॥
क्रीड़ाकमलहस्ता सा सिन्दूरबिन्दुशोभिता ।
ज्वलाभिशापं मां दृष्टा याति मत्मन्दिरात् सती ॥
पाशहस्तांश्च पुरुषान् मुक्तकेशान् भयङ्करान् ।
अतिरूक्षांश्च पश्यामि विशतो नगरं मम ॥
नग्ना नारीर्मुक्तकेशीर्नृत्यन्तीश्च गृहे गृहे ।
अतीव विकृताकाराः पश्यामि सस्मिताः सदा ॥
छिन्ननासा च विधवा मत्साशुद्धी दिगम्बरी ।
मां तैलाभ्यक्तितं मांश्च करोत्यतिभयङ्करी ॥
निर्व्वाणाङ्गारसंयुक्ता भस्मपूर्णा भयङ्कराः ।
अतिप्रभातमसये चिताः पश्यामि सस्मितः ॥
पश्यामि च विवाहञ्च नृत्यगीतमहोत्सवम् ।
रक्तवस्त्रपरीधानान् पुरुषान् मुक्तमूर्द्धजान् ॥
रक्तं वमन्तं पुरुषं नृत्यन्तं नग्नमुल्वणम् ।
धावन्तञ्च शयानञ्च पश्यामि सस्मितं सदा ॥
राहुग्रस्तञ्च गगने मण्डलं चन्द्रसूर्य्ययोः ।
एककाले च पश्यामि सर्व्वग्रासञ्च बान्धवाः ॥
उल्कापातं धूमकेतुं भूकम्पराहुविप्लवम् ।
झञ्झावातं महोत्पातं पश्यामि च पुरोहित ॥
वायुना घूर्णमानांश्च छिन्नस्कन्धान् महीरुहान् ।
पतितान् पर्व्वतांश्चैव पश्यामि पृथिवीतले ॥
पुरुषं छिन्नशिरसं नृत्यन्तं नग्नमुत्सृतम् ।
मुण्डमालाधरं घोरं पश्यामि च गृहे गृहे ॥
दग्धं सर्व्वाश्रमं भस्मपूर्णमङ्गारसङ्कुलम् ।
हाहाकारञ्च कुर्व्वन्तं सर्व्वं पश्यामि सर्व्वतः ॥
इत्येवमुक्ता राजा स विरराम सभातले ।
श्रुत्वा स्वप्नं बान्धवाश्च नतवक्त्रा निरुद्यमाः ॥
जहार चेतनं सद्यः सत्यवत पुरोहितः ।
मत्वा विनाशं कंसस्य यजमानस्य नारद ॥
रुरोद नारीवर्गञ्च पिता माता च शोकतः ।
मेनिरे नाशकालञ्च सद्यः स्वयमुपस्थितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६३ अध्यायः ॥
परशुरामदृष्टदुःस्वप्नाः ब्रह्मवैवर्त्ते गणेशखण्डे ३१ अध्याये कार्त्तवीर्य्यार्জ্জুनदृष्टदुःस्वप्नास्तत्रैव ३४ अध्याये घोरासुरदृष्टदुःस्वप्ना देवीपुराणे २२ अध्याये कालिकापुराणे पुष्याभिषेके ८७ अध्याये मत्स्यपुराणे यात्रानिमित्तस्वप्नाध्याय-कथने २४२ अध्याये च ते द्रष्टव्याः ॥ (वैद्य-कोक्तस्वप्नशकुनं यथा,—

"इत्युक्तं दूतशकुनं स्वप्ननर्घं प्रचक्षते ।
स्वप्ने मद्यं सह प्रेतैर्यः पिबन् कथते श्रुना ।
स मर्त्यो मृत्युना शीघ्रं ज्वररूपेण नीयते ॥
रक्तमाल्यवपुर्वस्त्रो यो हसन् क्रियते स्त्रिया ।
सोऽस्रपित्तेन महिषखरराहोष्ट्रगर्दभैः ॥
यः प्रयाति दिशं याम्यां मरणं तस्य यत्नतः ।
लताकण्टकिनी वंशस्थाली वा हृदि जायते ॥
यस्य तस्याश्च गुल्मेन यस्य बर्हिमनर्हिषम् ।
लुप्ततो लुप्तसिक्तस्य नग्नस्योरसि जायते ॥
मद्यं स नश्यते कुष्ठेन चण्डालैः सह यः पिबेत् ।
खेदं बहुविधं स्वप्ने स प्रमेहेण नश्यति ॥
उन्मादेन जले मज्जेद्यो मृत्यन् राक्षसैः सह ।
अपस्मारेण यो मर्त्यो नृत्यन् प्रेतेन नीयते ॥
यानं खरोष्ट्रमार्জ্জারकपिशार्दूलशूकरैः ।
यस्य प्रेतैः शृगालैर्वा स मृत्योर्वर्त्तते मुखे ॥
अपूपशष्कुलीर्जग्ध्वा विवृद्धस्तद्विधं वमन् ।
न जीवत्यधिरोगाय सूर्य्येन्दुग्रहणेक्षणम् ॥
सूर्य्याचन्द्रमसोः पातदर्शनं दृग्विनाशनम् ।
मूर्द्धि वंशलतादीनां सम्भवो वयसां तथा ॥
निलयो मुण्डताकाकगृध्राद्यैः परिवारणम् ।
तथा प्रेतपिशाचक्रव्यादविड़ाम्बुगवाशनैः ॥
सङ्गो वैतालतावंशग्रहणकण्टकसङ्कटे ।
श्वभ्रश्मशानशयनं पतनं पांशुभस्मनोः ॥
मज्जनं जलपङ्कादौ शीघ्रेण स्रोतसाहृतिः ।
नृत्यवादित्रगीतानि रक्तस्रग्वस्त्रधारणम् ॥
वयोऽङ्गदधिरभ्यङ्गो विवाहः श्मश्रुकर्म्म च ।
पक्वान्नभोजनमद्याशः प्रच्छर्द्दनविरेचने ॥
हिरण्यलोहयोर्लाभः कलिर्बन्धपराजयौ ।
उपानद्युगनाशश्च प्रपातः पादचर्म्मणोः ॥
हर्षो भग्नं प्रकुपितैः पितृभिश्चावभर्त्सनम् ।
प्रदीप्तपवनज्वलदग्निदैवतचक्षुषां ॥
पतनं वा विनाशो वा भेदनं पर्व्वतस्य च ।
कानने रक्तकुसुमे पापकर्म्मनिवेशने ॥
चिन्तान्धकारमस्वाधे जलमध्ये प्रवेशनम् ।
पातः प्रासादशैलादेर्मत्तस्तेन ग्रसनस्तथा ॥
काषायिणामसौम्यानां नग्नानां दण्डधारिणाम् ।
रक्ताम्बराणां च कृष्णानां दर्शनं जातु नेष्यते ॥
कृष्णा पापा ज्ञानाचारा दौर्भाग्यनखस्तनी ।
विरागा वाप्यवसना स्वप्नकालनिशा मता ॥
मनोवहानां पूर्णत्वात् स्रोतसां प्रबलैर्मलैः ।
दृश्यन्ते दारुणाः स्वप्ना रोगो यैर्याति पञ्चताम् ॥
अरोगः संशयं प्राप्य कश्चिदेव विमुच्यते ।
दृष्टः श्रुतोऽनुभूतश्च प्रार्थितः कल्पितस्तथा ॥
भाविको दोषजश्चेति स्वप्नः सप्तविधो मतः ।
तेष्वद्या निष्फलाः पञ्च यथा स्वप्नस्तिर्दिवा ॥
विस्मृतो दौर्बल्यक्षोऽति पूर्व्वरात्रे चिरात् फलम् ॥
दृष्टः करोति तुल्यञ्च गोमर्गे तदहर्महत् ॥
निद्रया चानुपहतः प्रतौपैर्व्वचनैस्तथा ॥
याति पापोऽल्पफलतां दानहोमजपादिभिः ॥
अकल्याणमपि स्वप्नं दृष्ट्वा तत्रैव यः पुनः ।
पश्येत् सौम्यं शुभं तस्य शुभमेव फलं भवेत् ॥
देवान् द्विजान् गोवृषभान् जीवतः सुहृदो-
नृपान् ।
साधून् यशस्विनो वह्निमित्रं स्वज्ञान् जलाश-
यान् ॥
कन्यां कुमारकान् गौरान् शुक्लवस्त्रान् सुतें-
जसः ।
नराश्वनं दीप्ततनुं समन्ताद्रुधिरोक्षितः ॥
यः पश्येन्नभते यो वा छत्रादर्श्यविषाभिषम् ।
शुक्लाः सुमनसो वस्त्रममेध्यालेपनं फलम् ॥
शैलप्रासादसफलद्रुचसिंहनरद्विपान् ।
आरोहेन्नोऽक्षयानञ्च तरेदुदकदोधीन् ॥
पूर्व्वोत्तरेण गमनमयस्यागमनं मृतम् ।
मध्याह्नार्द्धरात्रितिर्देवैः पितृभिर्याभिनन्दनम् ।
रोदनं पतितोत्थानं हिंसताद्यावमर्द्दनम् ।
यस्य स्वादायुरारोग्यं वित्तं बहु च सोऽश्नुते ॥"
इति वाभटे शारीरस्थाने षष्ठेऽध्याये ॥)

स्वप्नकृत्, क्लो. (स्वप्नं निद्रां करोतीति। क + क्विप्। तुगागमश्च।) सुनिषण्णकम्। सुखणी शाक इति भाषा। इति शब्दचन्द्रिका। स्वप्नकारके, त्रि॥

स्वप्नक्, [ज्] त्रि, (स्वपिति तच्छीलः इति। स्वप + "स्वपिपतिवासिजिङ्।" ३। २। १७२। इति नजिङ्।) निद्राशीलः। इत्यमरः। ३। १। ३३॥) यथा, भट्टिः। ७। २५।

"अहं स्वप्नक् प्रसादेन तव वन्दारुभिः सह ॥")

स्वप्नदोषः, पुं, (स्वप्नस्य दोषः।) निद्रावस्थायां रेतःस्खलनम्। इति लोकप्रसिद्धम्॥ (अस्यौषधं यथा,—

"वटाङ्कुरस्य निर्यासान् माक्षिकेण समन्वितान्।
सायं प्रयोज्य मतिमान् स्वप्नदोषं निवारयेत्॥"
इति वैद्यकम्॥)

स्वप्नविचारी, [न्] त्रि, स्वप्नविचारकर्त्ता। शुभाशुभस्वप्नव्याख्याकर्त्ता। स्वप्नं विचारयतीत्यर्थे णिन्प्रत्ययेन निष्पन्नः॥

स्वभाजनं, क्लो, (स्वस्य भाजनम्।) आनन्दनम्। इत्यमरटीकायां रायमुकुटः। ३। २। ७॥

स्वभावः, पुं, (स्वस्य भावः।) स्वकीयभावः। तत्पर्य्यायः। संसिद्धिः २ प्रकृतिः ३ स्वरूपम् ४ निसर्गः ५। इत्यमरः। १। ७। ३८॥ भावः ६। इति शब्दरत्नावली॥ सर्गः ७। इति जटाधरः॥ स्वत एव आविर्भावः। यथा,—

"बहिर्हेत्वनपेक्षो तु स्वभावोऽथ प्रकीर्त्तितः।
भिसर्गश्च स्वरूपश्चेत्येषोऽपि भवति द्विधा॥
निसर्गः सुदृढाभ्यासजन्यः संस्कार उच्यते।
अजन्यस्तु स्वतः सिद्धः स्वरूपं भाव इष्यते॥"
इत्युज्ज्वलनीलमणिः॥

"वचनेषु च बुद्धौ च स्वभावे च चरित्रतः।
आचारे व्यवहारे च ज्ञायते हृदयं नृणाम्॥*॥
लोकाः कर्म्मवशीभूतास्तत् कर्म्म यत् कृतं पुरा।
स्वकर्म्मभुक् फलं भुङ्क्ते जन्तुर्जन्मनि जन्मनि॥
केचिदन्तोति भवेत् स्वकृतेन च कर्म्मणा।
केचिदन्ति दैवेन स्वभावेनेति केचन॥
त्रिविधाश्च मता वेदे वेदवेदाङ्गपारगाः॥
स्वयञ्च कर्म्मजनकस्तत् कर्म्म दैवकारणम्।
स्वभावो जायते नृणामात्मनः पूर्व्वकर्म्मणा॥*॥
स एवात्मा सर्व्वसेव्यः सर्व्वेषाञ्च फलप्रदः।
स च सृजति दैवञ्च स्वभावं कर्म्म एव च॥*॥
अहो श्रीकृष्णदासानां कः स्वभावः सुनिर्म्मलः।
हृतभार्य्यसुच्छ्रितञ्च न शशाप रिपुं गुरुः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ५७। २१—२८। २१। ४१॥ अपि च।

"सुदिनं दुर्दिनञ्चैव सर्व्वं कर्म्माह्वये भव ।
तत् कर्म्म तपसां साध्यं कर्म्मणाञ्च शुभाशुभम् ॥
तपः स्वभावसाध्यञ्च स्वभावोऽभ्यासतो भवेत् ।
संसर्गसाध्योऽभ्यासश्च संसर्गः पुण्यतो भवेत् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४३।५१-५२ ॥
अन्यच्च । चाणक्यवाक्यम् ।
"स्वभावो यादृशो यस्य न यत्नाति कदाचन ।
अङ्गारः शतधौतेन मलिनत्वं न मुञ्चति ॥"
"सर्व्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः ।
अतीत्य हि गुणान् सर्व्वान् स्वभावो मूर्द्धि वर्त्तते ॥"
इति हितोपदेशे मित्रलाभनामप्रथमकथासंग्रहः ॥

स्वभूः, पुं, (स्वेनैव भवतीति । भू + क्विप् । विष्णुः । इत्यमरः । १ । १ । १८ ॥ ब्रह्मा । इति मेदिनी ॥ (यथा, भागवते । ३ । १२ । ५ ।
"तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः ॥")
शिवश्च ॥

स्वमेकः, पुं, संवत्सरः । यथा,—
"स्वमेकमेकं वरदा दृशा भवति चण्डिका ।
रुधिरेणोरणस्थेह तर्पिता विधिवन्नृप ॥"
स्वमेकं संवत्सरम् । स्वमेकः संवत्सरः यज्ञो मासः । इति श्रुतेः । उरणस्य मेषस्य । इति तिथ्यादितत्त्वम् ॥

स्वयं, [म्] व्य, आत्मना । आपनि इति भाषा । इत्यमरः । ३ । ४ । १६ ॥ आत्मनेत्यर्थे स्वयं दृतीयान्तम् । यथा । स्वयम्भूः । इति भरतः ॥ (यथा, रघुः । १ । ७० ।
"तया होनं विधातर्म्मां कथं पश्यन्न दूयसे ।
सिक्तं स्वयमिव स्नेहाद् वन्द्यमाश्रमपादपम् ॥")

स्वयंवरा, स्त्री, (स्वय + वृ + अच् । टाप् ।) स्वयं वृणोति पतिं या । स्वेच्छया पत्यन्वेषिणी । तत्पर्य्यायः । पतिंवरा २ वर्य्या ३ । इत्यमरः । २ । ६ । ७ ॥ स्वयंवरे वर्णनीयानि यथा । अचीरचा १ मत्स्यसज्जता २ मण्डपसज्जता ३ राजपुत्राः सन्निधौ राजसौन्दर्य्यादिवंशचेष्टावर्णनम् ४ । इति कविकल्पलतायां १ स्तवके २ कुसुमम् ॥

स्वयंहारिका, स्त्री, स्त्रीविशेषः । सा च ब्रह्ममानससृष्टदुःसहस्य निर्माल्यां पत्न्यां जाता । यथा,—
"दुःसहस्याभवत् भार्य्या निर्माल्यिर्नाम नामतः ।
जाता कलेस्तु पाप्मायां ऋतौ चाण्डालदर्शनात् ॥
तयोरपत्यान्यभवन् जगद्व्यापीनि षोड़श ।
अष्टौ कुमाराः कन्याश्च तथाष्टावतिभीषणाः ॥
नियोजिका वै प्रथमा तथैवान्या विरोधिनी ।
स्वयंहारकरी चैव भ्रामणी ऋतुहारिका ॥
मृतिबीजहरे चान्ये तयोः कन्ये सुदारुणे ।
अष्टमी हेषणी नाम कन्या चातिभयावहा ॥
एतासां कर्म्म वक्ष्यामि दोषप्रशमनञ्च यत् ।
धान्यं खलाद्गृहाद्गोष्ठात् पयः सर्पिस्तथापरा ॥
मृद्गृहिमृद्गिमद्गव्यादपहरन्ति च कन्यकाः ।
सा स्वयंहारिकेत्युक्ता सदान्तर्द्धानतत्परा ॥
महानसादर्द्धसिद्धमन्नागारस्थितम् तथा ।
परिवेष्यमानञ्च सदा सार्द्धम् भुङ्क्ते च भुञ्जता ॥
उच्छिष्टानां मनुष्याणां हरत्यन्नञ्च दुर्हरा ।
कर्म्मान्ताङ्गारशालाभ्यः सिद्धृद्धिं हरति द्विज ॥
गोस्थोस्तनेभ्यश्च पयः चोरहारी सदैव सा ।
दध्ना घृतं तिलात्तैलं सुरागारात्तथा सुराम् ॥
रङ्गं कुसुम्भकादिभ्यः कार्पासात् सूत्रमेव च ।
सा स्वयंहारिका नाम हरत्यविरतं द्विज ॥"
तच्छान्तिर्यथा,—
"कुर्य्यात् शिखण्डिकोद्दाम् रक्षार्थं कृत्रिमस्त्रियम् ।
रक्षा चैव गृहे लेख्या वर्ज्या चोच्छिष्टता तथा ॥"
शिखण्डिकोद्दाम् स्थाने शिखण्डिनोद्दामिति च पाठः ।
"होमाग्निदेवताधूपभक्षणा च परिक्रिया ।
कार्य्या चोरादिभाण्डानामेवं तद्रक्षणं स्मृतम् ॥"
इति मार्कण्डेयपुराणे दुःसहवंशोत्पत्तिनामाध्यायः ॥

स्वयंकृतः, स्त्री, (स्वयमात्मना कृतः ।) आत्मकृतः । यथा,—
"ऋत्विक् च त्रिविधो दृष्टः पूर्व्वैर्ज्ञिष्टः स्वयंकृतः ।
यदृच्छया च यः कुर्य्यादार्त्विज्यं प्रौतिपूर्व्वकम् ॥"
इति तिथ्यादितत्त्वम् ॥

स्वयंगुप्ता, स्त्री, (स्वयमात्मना गुप्ता) शूकशिम्बिका । इति शब्दरत्नावली, (गुणादायोऽस्याः शूकशिम्बिकाशब्दे ज्ञातव्याः ॥)

स्वयंदत्तः, पुं, (स्वयमात्मना दत्तः) द्वादशविधपुत्रान्तर्गतपुत्रावयवः । इति जटाधरः ॥ तल्लक्षणम् यथा । दत्तात्मा तु स्वयंदत्तः । इति याज्ञवल्क्यवचनम् ॥ दत्तात्मा तु पुत्रो मातापित्रविहीनस्ताभ्यां मुक्तो वा तवाहं पुत्रो भवामीति स्वयंदत्त उपनतः । इति मिताक्षरा ॥

स्वयमुपस्थितः, त्रि, (स्वयमात्मना उपस्थितः ।) स्वयमागतः । यथा,—
"यदि त्यजसि मां मूढ़ कामात् स्वयमुपस्थिताम् ।
युवयोश्च विपत्तिश्च भविष्यति न संशयः ॥
कामातुरां यौवनाढ्यां भार्य्यां स्वयमुपस्थिताम् ।
न त्यजेद्धर्म्मभीरुश्च श्रुतं मध्यन्दिने पुरा ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६२ । ४० । ४५ । अध्यायः ॥ (तथा च भागवते । १।१३।१०॥
"नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितम् ।
नावेदयत् सकरुणो दुःखितान् द्रष्टुमक्षमः ॥")

स्वयंप्रभः, पुं, (स्वयं प्रभा यस्य ।) चतुर्विंशतिभाव्यर्हदन्तर्गतचतुर्थार्हन् । इति हेमचन्द्रः ॥ (स्वयंप्रकाशे, त्रि । यथा, भागवते । ३।१६।२७॥
"अथ ये मुनयो दृष्ट्वा नयनानन्दभाजनम् ।
वैकुण्ठं तदधिष्ठानं विष्वक्सेनञ्च स्वयंप्रभम् ॥"
रसायनाधिकारोक्तसोमसंज्ञकौषधिविशेषः ।
स्वयंप्रभो महासोमो यश्चापि गरुड़ाहृतः ॥"
इति सुश्रुते चिकित्सितस्थाने १९ अध्याये ॥
स्त्री, अप्सरोविशेषः । यथा, महाभारते । ३ । ४३ । २९ ॥
"घृताची मेनका रम्भा पूर्व्वचित्तिः स्वयंप्रभा ॥")

स्वयम्भुः, पुं, (स्वयम्भवतीति । स्वयं + भू + डुः ।) ब्रह्मा । इति रूपकोषः ॥

स्वयम्भुवः, पुं, (स्वयम्भवतीति । भू + कः ।) आदिमनुः । ब्रह्मा । इति केचित् ॥ स्वयमुत्पन्ने, त्रि । यथा, महाभारते । १२ । ३३४ । ८ ।
"कृते युगे महाराज पुरा स्वायम्भुवेऽन्तरे ।
नरो नारायणश्चैव हरिः कृष्णः स्वयम्भुवः ॥")

स्वयंभुवा, स्त्री, (स्वयम्भवतीति । भू + कः । टाप्) धूम्रपत्रा । इति राजनिर्घण्टः ॥

स्वयंभूः, पुं, (स्वयम्भवतीति । भू + क्विप् ।) ब्रह्मा । इत्यमरः । १ । १ । १६ ॥ जिनचक्रवर्त्तिविशेषः । तत्पर्य्यायः । रुद्रतनयः २ । इति हेमचन्द्रः ॥ कालः । इति शब्दरत्नावली ॥ कामदेवः । विष्णुः । शिवः । इति केचित् ॥ माषपर्णी । लिङ्गिनी । इति राजनिर्घण्टः ॥ (स्वयमुत्पन्ने, अपौरुषेये च त्रि ॥ यथा मनुः । १ । ३ ।
"त्वमेकोऽग्रस्य सर्व्वस्य विधानस्य स्वयंभुवः ।
अचिन्त्यस्याप्रमेयस्य कार्य्यतत्त्वार्थवित् प्रभो ॥")

स्वर, त् क आर्त्तिपे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरा०-परo-सकo-सेट् ।) वकारयुक्तः रेफोपधः । स्वरयत्यतिरुष्टोऽपि न कञ्चन परिग्रहम् । इति हलायुधः । पञ्चमस्वरयुक्तः । इति चतुर्भुजः । स्वरयति । इति दुर्गादासः ॥

स्वर्, व्य, स्वर्गः । (यथा, रामायणे । २।७६।८ ।
"त्वयि प्रयाते स्वस्तात रामे च वनमाश्रिते ।
विधवा पृथिवी राजंस्त्वया हीना न राजते ॥")
परलोकः । इत्यमरः ।१।१।५॥३।४।२५३ ॥ आकाशम् । शोभनम् । इति शब्दरत्नावली ॥ (व्याहृतिविशेषः । यथा, मनुः । २ । ७६ ।
"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः ।
वेदत्रयान्निरदुहद्भूर्भुवःस्वरितीति च ॥")

स्वरः, पुं, (स्वर + अच्) उदात्तादित्रयः । इत्यमरः । १ । ६ । ४ ॥ उदात्तानुदात्तस्वरितास्त्रयः स्वरशब्दवाच्याः । स्वरन्ति शब्दायन्ते स्वराः सृ ऊ शब्दोपतापयोः अन् उश्चैरादीयते उच्चार्य्यते उदात्तः उंदाङ्पूर्व्वाद्दाञः कर्म्मणि क्तः । तद्विपरीतोऽनुदात्तः । समाहृतः स्वरितः स्वरः सञ्जातोऽत्रेति इतोऽस्य जाते इति इतः । यदाहुः । उच्चैरुच्चारणादुदात्तः । नीचैरनुदात्तः । समाहारः स्वरितः । इति । छान्दसत्वात् नोक्तः । तदुक्तं उदात्तस्यानुदात्तस्य स्वरितस्य प्रचितस्वरो व्रयः स्वराः । चतुर्थः प्रचितो नोक्तो यतोऽसौ छान्दसः स्मृतः ॥ इति भरतः ॥ (यथा, माघे । २ । ८५ ।

"तदोत्थितारं चेदीनां भवांस्तमवमंस्त मा।
निहन्त्यरीनेकपदे य उदात्त: स्वरानिव॥")
तन्त्रीकण्ठोत्थितनिषादादिसप्तध्वनि:। सुर इति भाषा। यथा,—
निषादर्षभगान्धारषड्जमध्यमधैवता:।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिता: स्वरा:॥"
इत्यमर:। १। ७। १॥
निषादादय: सप्त तन्त्रीसमुत्था: कण्ठसमुत्थाश्च स्वरा: स्वरशब्दवाच्या:। निषादादिकदम्बादि यथाक्रममिति स्थितमिति। नारदोऽप्याह।
"षड्जं रौति मयूरो हि गावो नर्दन्ति चर्षभम्।
अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमम्।
पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्।
अश्वश्च धैवतं रौति निषादं रौति कुञ्जर:॥"
इति।
अन्योऽप्याह।
"स स्वरो य: श्रुतिस्थाने स्वनन् हृदयरञ्जक:॥"
"षड्जर्षभगान्धारो मध्यम: पञ्चमस्तथा।
धैवतश्च निषादश्च स्वरा: सप्त प्रकीर्त्तिता:॥
मयूरवृषभच्छागक्रौञ्चकोकिलवाजिन:।
मातङ्गश्च क्रमेणाहु: स्वरानेतान् सुदुर्गमान्॥"
इति॥
एते च समदा: पञ्चमं गायन्ती। तथा च विशाखिन:।
"अश्वस्तु धैवतं सोऽपि मत्त: पञ्चमसंज्ञकम्।
निषादन्तु गजो गर्জ्जल्युन्मदोऽसौ सपञ्चम-
मिति॥"
भरतोऽप्याह।
"षड्जञ्च पञ्चमश्चेति मयूरो नदति द्विधा।
अश्वाद्या धैवतादींश्च प्राहुर्मत्ताय पञ्चम-
मिति॥"
निषीदन्ति स्वरा अस्मिन्निति निषाद: सदेरा-धारे घञ् गौक इति पत्वम्। तथा च।
"निषीदन्ति स्वरा अस्मिन्निषादस्तेन हेतुना।
अशेषसन्धिविषयं स हि व्याप्यावतिष्ठते॥
ऋषति ऋतुं ऋषभ: ऋषी य गतौ नान्त्रीति कभ:।
"वायु: समुद्गतो नाभे: कण्ठशीर्षसमाहत:।
नदत्यृषभवद्यस्मात्तेनैष ऋषभ: स्मृत:॥"इति।
गन्धानां समूहो गान्धं णा: स्वरान्तस्य गान्धं इयर्त्ति गान्धार: ऋर्लि गत्यां घञ् षश्चिति षण्।
"वायु: समुद्गतो नाभे: कण्ठशीर्षसमाहत:।
नानागन्धवह: पुंसो गान्धारस्तेन हेतुना॥"
इति।
गान्धारोऽभिजनोऽस्येति गान्धार इत्यब्धे।
षड्भ्यो जायते षड्ज: इनजनादिति ङ:।
"नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रित:।
षड्भ्य: संजायते यस्मात्तस्मात् षड्ज इति
स्मृत:॥" इति।
मध्ये नाभिदेशे भवो मध्यम:। तत्राद्यश्चिर-दचिरेत्यादिना म:।
"तद्देवोत्थितो वायुरुर:कण्ठसमाहत:।
नाभिप्राप्तो महानादो मध्यमस्तेन स स्मृत:॥"
इति।
धीमद्भिर्गीयते इति धैवत: टधेकादिति ष्ण:
मनीषादित्वात् मस्य व:। धीयतेऽयमिति विकारसंज्ञेति ष्णो वा। स्वरान् धयतीति वा।
धेट पाने नान्त्रीति धैवत:।
"अभिसन्धयते यस्मात् स्वरांस्तेनैष धैवत:।
स तु तावत्प्रधानत्वात् ललाटे व्यवतिष्ठते॥"
इति पञ्चानां स्वराणां पूरण: पञ्चम:। नो सङ्ख्यादेर्मड़िति मट्।
वायु: समुद्गतो नाभेरुरौ हृत्कण्ठमूर्द्धसु।
विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते॥"
इति।
स्वरन्ति शब्दायन्ते स्वरा: स्वृ ऊ शब्दोपतापयो: पचादित्वादन्। इति भरत:॥*॥
अपि च।
"स स्वरो य: श्रुतिस्थाने स्वरन् हृदयरञ्जक:॥
षड्जऋषभगान्धारा मध्यम: पञ्चमस्तथा।
धैवतश्च निषादश्च स्वरा: सप्त प्रकीर्त्तिता:॥
मयूरवृषभच्छागीक्रोष्टुकोकिलवाजिन:।
मतङ्गाश्च क्रमेणाहु: स्वरानेतान् सुदुर्गमान्॥
ऋषभं चातको वक्ति धैवतञ्चापि दर्दुर:।"
इति केचित्॥
"वायु: संमूर्च्छितो नाभेर्नाद्याय हृदयस्य च।
पार्श्वयोर्मस्तकस्यापि वक्त्रं षड्ज: प्रजायते।
नाभिमूलादुदयदा वर्त्म उत्थित: कुरुते ध्वनिम्।
वृषभस्येव निर्याति हेतुना ऋषभ: स्मृत:॥
नाभे: समुद्गतो वायुर्गत्वं ग्रीवे च चालयन्।
सप्तभ्दस्तेन निर्याति गान्धारस्तेन कथ्यते॥
मध्यमो मध्यमस्थानात् शरीरस्योपजायते।
नाभिमूलाच्च गम्भीर: किञ्चित्तार: स्वभावत:॥
प्राणोदान: समानश्च उदानो व्यान एव च।
एतेषां समवायेन जायते पञ्चम: स्वर:॥
गत्वा नाभेरधोभागं वस्ति प्राप्योर्द्धग: पुन:।
धावन्निव च यो याति कण्ठदेशं स धैवत:॥
षड्जादय: षड़ेतेऽत्र स्वरा: सर्व्वे मनोहरा:।
निषीदन्ति यतो लोके निषादस्तेन कथ्यते॥*॥
चतस्र: पञ्चमे षड्जे मध्यमे श्रुतयो मता:।
ऋषभे धैवते तिस्रो द्वे गान्धारनिषादके॥"*॥
संपूर्णस्वरा:। ष ऋ ग म प ध नि। षाड़वा: निषादोज्झिता:। ष ऋ ग म प ध। औड़व-स्वरा: ऋ-प-वर्জ्जिता:। ष ग म ध नि।
संपूर्णरागा: सप्तभि: स्वरैर्यथा नाटवसन्तादय:। षाड़वरागा: षड्भि: स्वरैर्यथा मल्लारादय:।
अधुना स्वरप्रस्तार:।
"क्रमेणैव स्वरा: स्थाप्या: पूर्व्वपूर्व्वपरादध:।
मूलक्रम: क्रमात् पृष्ठे पुरस्तपरिवर्त्तिन:॥
स चेदुपरि तत्पूर्व्वं इत्थं प्रस्तारचक्रम:॥"*॥
अथ स्वरप्रस्तारे पिङ्गलवल्लीष्टमेरुपताका-सूचीसप्तसागरप्रभृतय: सन्ति ग्रन्थविस्तार-भयान्नोक्ता:।
"कंसारेर्व्वंशिकावाद्ये स्वरा: सप्त चकाशिरे।"
इति शुभङ्करकृतसङ्गीतदामोदर:॥*॥*॥
अकारादिवर्णा:। इति मेदिनी॥ तस्य नामान्तरं अच् २। इति वोपदेव:॥ मात्रा ३। इति स्वरोदय:॥ ते च ह्रस्वदीर्घप्लुता भवन्ति यथा,—
"एकमात्रो भवेत् ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्॥"
इति मुग्धबोधटीकायां दुर्गादास:॥
स्वरवर्णा यथा। अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अ:। एतेषां उत्पत्तिस्थानानि यथा। अत्रयं ए-ह-क-ख-ग-घ-ङा: कण्ठ्या:। इत्रयं च-छ-ज-झ-ञ-श्चा ए-ऐ यास्तालव्या:। ऋत्रयं ट-ठ-ड-ढ-ण-र षा मूर्द्धन्या:। ऌत्रयं त-थ-द-ध-न-ल-सा वो दन्त्या:। उत्रयं प-फ-ब-भ-म-वा ओ-औ ओष्ठ्या:। इति मुग्धबोधव्याकरणम्॥ ए-ह-क-ख-ग-घ-ङा इत्येकपदोक्त्या एषां उत्पत्तिस्थानं कण्ठमुक्त्वा पश्चात् ए ऐ इत्युभयं तालव्यकार्य्यार्थं तालव्यमध्येऽपि ए-ऐ-या इति भिन्नपदे पठितवान्। ओ औ इत्युभयमोष्ठकार्य्यार्थमोष्ठमध्येऽपि ओ औ ओष्ठ्या इति भिन्नपदे पठितवान्। तालव्यकार्य्यञ्च इवर्णस्य समत्वात् गुण एकार: इह्रिरेकार:। उकारस्य गुण ओकार: इह्रिरोकार:। ननु ए ऐ ओ औ चतुर्णां स्वभावात् कण्ठजातानामपि तालव्यौष्ठकार्य्यकारित्वं कथमिति चेन्न यत: कुन्त्या प्रसूतस्य कर्णस्य राधाप्रतिपालनात् राधेयत्वं संगच्छते। इति तट्टीकायां दुर्गादास:॥*॥
अन्यच्च।
"नाटकायां स्वरा: प्रोक्ता: स्वरा: षोड़श-
मङ्गया।
तेषां द्वावन्तिमौ त्याज्यौ चत्वारश्च नपुंसका:॥
शेषा दश स्वरास्तेषु स्यादेकैको द्विके द्विके।
ज्ञेया अतोऽस्वराश्चाद्या ह्रस्वा: पञ्च स्वरोदये॥
स्वरा हि नाटकोद्धारा मात्राव्याप्तं जगत्त्रयम्।
तस्मात् स्वरोद्भवं सर्व्वं त्रैलोक्यं सचराचरम्॥
अकारादिस्वरा: पञ्च ब्रह्माद्या: पञ्चदेवता:।
निवृत्त्याद्या: कला: पञ्च इच्छाद्यं शक्तिपञ्चकम्॥
मयाद्याश्चक्रभेदाश्च धराद्यं भूतपञ्चकम्।
शब्दाद्या विषयास्ते च कामबाणा इतीरिता:।
पिण्डं पदं तथा रूपं रूपातीतं निरञ्जनम्।
स्वरभेदे स्थितं ज्ञानं ज्ञायते गुरुत: सदा॥
अकारादिस्वरा: पञ्च तेषामष्टौ भिदास्त्वमू:।
मात्रावर्णो ग्रहो जीवो राशिर्भं पिण्डयोगकौ॥
प्रसुप्तो भाषते येन येनागच्छति शब्दित:।
तत्र नाम्नाद्यवर्णे या मात्रा मात्रास्वर: सहि॥"
इति मात्रास्वरचक्रम्॥*॥
"कादिहान्तान् लिखेद्वर्णान् स्वराधो ङ-ञ-
णोज्झितान्।
तिर्य्यक् षड्त्रिक्रमेणैव पञ्चविंशत् प्रकोष्ठके॥
नरनामादिमो वर्णो यस्मात् स्वरादध: स्थित:।

स्वरः

स स्वरस्तस्य वर्णस्य वर्णस्वर इहोच्यते ॥
स प्रोक्ता ङ-ञ-ण-ना वर्णा नामादौ सन्ति ते न हि ।
चेद्भवन्ति तदा ज्ञेया ग-ज डास्ते यथाक्रमम् ॥
यदि नाम्नि भवेदर्थः संयुक्ताक्षरलक्षयः ।
आद्यस्तस्यादिमो वर्णः इत्युक्तं ब्रह्मयामले ॥"
इति वर्णस्वरचक्रम् ॥*॥

अस्वरे मेषसिंहालिः कन्यायुग्मककर्कटाः ।
उस्वरे च धनुर्मीनौ एस्वरे च तुलाऽवधौ ॥
ओस्वरे मकरः कुम्भौ च राशिसम्भूयहस्वराः ।
स्वराधः स्थापयेत् खेटं राशेर्यो यस्य नायकः ॥
मेषवृश्चिकयोर्भौमः शुक्रो वृषतुलाभृतोः ।
बुधः कन्यामिथुनयोः कर्कटस्य च चन्द्रमाः ॥
स्थाम्नोतधनुषोर्जीवः शनिर्मकरकुम्भयोः ।
सिंहास्याधिपतिः सूर्यः कथितो गणकोत्तमैः ॥"
इति ग्रहस्वरचक्रम् ॥*॥

"ओकारमाचरोऽवर्गः स्यात् कादिवर्गास्तु पञ्चकाः ।
चतुर्थो य वर्गो सङ्घा वर्गेषु कोर्त्तिताः ॥
नाम्नो वर्णाः स्वरा ग्राह्या वर्गाणां वर्णसंख्यया ।
पिण्डिताः पञ्चभिर्भक्ताः शेषं जीवस्वरे विदुः ॥"
इति जीवस्वरचक्रम् ॥ * ॥

"मेषवृषाक्षरे च मिथुनाद्याः षड्ंशकाः ।
मिथुनांशास्त्रयश्चैव इकारे सिंहकर्कटौ ।
कन्या तुला उकारे च वृश्चिकस्य त्रयोऽंशकाः ।
एकारे धनुषोऽन्त्याः कार्मुकः षड्मृगादिमाः ॥
अंशाऋयो मृगाद्यास्त्र्याः कुम्भमीनौ तथा स्वरे ।
एवं राशिस्वरः प्रोक्तो नवांशक्रमोदयः ॥"
इति राशिस्वरचक्रम् ॥*॥

"अकारे सप्त ऋक्षाणि रेवत्यादिक्रमेण च ।
पञ्च पञ्च इकारादावेवमृक्षस्वरोदयः ॥"
इति नक्षत्रस्वरचक्रम् ॥*॥

"मात्रा वर्णस्वरात् सङ्ख्या सङ्ख्या जीवस्वरा तथा ।
पिण्डीकृते स्वरैः शेषः पिण्डस्वर इहोच्यते ॥"
इति पिण्डस्वरचक्रम् ॥*॥

"मात्रादिवर्णभेदेन स्वरानुत्थाप्य नामतः ।
योगी भवति तत्र शेषो योगस्वरो मतः ॥"
इति योगस्वरचक्रम् ॥

"प्रोक्ता वैसर्गिकाद्यष्टौ साद्या नामजाः स्वराः ॥"॥

मात्रादिस्वरचक्रबलेन कर्त्तव्यकर्म्माणि यथा,—
"साधनं मन्त्रयन्त्रस्य यन्त्रयोगश्च सर्व्वदा ।
अधीसुखानि कर्म्माणि मात्रास्वरबले कुरु ॥*॥
वर्णस्वरबले सर्व्वं कर्त्तव्यञ्च शुभाशुभम् ।
सिद्धिः सर्व्वकार्य्येषु युद्धकाले विशेषतः ॥*॥
मारणं मोहनं स्तम्भं विद्वेषोच्चाटने वशम् ।
विवादं विग्रहं घातं कुर्य्याद्ग्रहस्वरोदये ॥*॥
यानपानादिकं सर्व्वं ब्रह्मालङ्कारभूषणम् ।
विचारश्च विवाहश्च कर्त्तव्यो जीवस्वरोदये ॥"॥
प्रासादारामहर्म्याणि देवताऽऽपनानि च ।

स्वरः

राजाभिषेचनं दीक्षा कर्त्तव्यं राशिके स्वरे ॥* ॥
शान्तिकं पौष्टिकञ्चैव प्रदेशो बीजवापनम् ।
स्त्रीविवाहस्तथा यात्रा कर्त्तव्या भस्वरोदये ॥*॥
शत्रूणां देशभङ्गश्च कौटयुद्धस्य वेष्टनम् ।
सेनाध्यक्षस्तथा मन्त्रो कर्त्तव्यः पिण्डकोदये ॥*॥
योगेन साधयेद् योगं देहस्थं ज्ञानसम्भवम् ।
आग्नेयं आग्नवञ्चैव आग्नेयञ्च तृतीयकम् ॥ * ॥
तिथिवारौ च नक्षत्रं पृथक् पृथक् प्रभाषितम् ।
यत् तदेकत्र सन्निक्ष्य कुर्य्याद्वर्णस्वरोदये ।
यस्य नामादिको वर्णस्तिथिवारर्क्षजं मृतम् ।
तद्दिनं वर्जयेत्तस्य ज्ञानिस्त्वत्युकरं यतः ॥
अनेन स्वरयोगेन शत्रूणां मारणादिकम् ।
मन्त्रयन्त्रक्रियां मोहं साधयेत्तद्दिने बुधः ॥"
इत्यादि नरपतिजयचर्य्यास्वरोदयधृतब्रह्मयामलम् ॥*॥ नाडावायुः । इति मेदिनी ॥ तत्र अजपाजपप्रमाणं यथा,—
"हंस हंसेति यन्मन्त्रं जीवो जपति सर्व्वदा ।
शतैः षड्भिश्च युक्तानि सहस्राण्येकविंशतिः ॥
अजपा नाम गायत्री योगिनां मोक्षसाधनम् ।
अस्याः सङ्कल्पमात्रेण सर्व्वपापैः प्रमुच्यते ॥"
इति महाभारते आश्रमेधिकपर्व्वणि उत्तरगीता ॥ * ॥ अपि च ।
"इडा च पिङ्गला चैव नासिकाद्वारगामिनी ।
आमूलाद्ब्रह्मद्वारान्तं सुषुम्ना मध्यगामिनी ॥
वृहत्यूर्द्धमुखेनैव प्राणवायुश्च सर्व्वदा ।
पानं करोत्यपानञ्च अधोवक्त्रेण चैव हि ॥
अग्निरूपः स्थितस्तत्रो वामनामाप्रवाहकः ।
शिवरूपधरः सूर्य्यो दक्षनामापुटे तथा ॥
हकारे निःसरेद्वायुः सकारश्च प्रवेशने ।
अजपानामगायत्रीं जीवो जपत्यहर्निशम् ॥*॥
सुश्रिमीवानेऽप्युक्तम् ।
षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः ।
एतत्सङ्ख्यं मन्त्रमन्त्रं जीवो जपति सर्व्वदा ॥
ब्राह्मे मुहूर्त्ते योगीन्द्रो जपमेवं समर्पयेत् ।
समर्पणक्रमश्चैव उच्यते गुरुतस्ततः ॥
मूलाधारे गणेशाय षट्शतञ्च समर्पयेत् ।
तत्रैव ब्रह्मणे नित्यं षट्सहस्रं निवेदयेत् ॥
स्वाधिष्ठाने च हरये षट्सहस्रं निवेदयेत् ।
षट्सहस्रं मणिपूरे हराय च समर्पयेत् ॥
जीवात्मने सहस्रञ्च तत्रैव परिकल्पयेत् ।
परमात्मने सहस्रन्तु अनाहते निवेदयेत् ॥
सहस्रन्तु परमशिवे सहस्रे समर्पयेत् ।
एवं समर्पयेदयस्तु पापैः पुण्यैर्न लिप्यते ॥"
इति श्रीपूर्णानन्दगिरिविरचितश्रीतत्त्वचिन्तामणौ तत्त्वसारपरिच्छेदे षट्चक्रकथनम् ॥*॥ अन्यत् स्वरोदयग्रन्थे द्रष्टव्यम् ॥ * ॥ * ॥

अथ पक्षिस्वरज्ञानम् ।
"शीतकीर्त्तविचारमिदानीं
कुर्म्महे यमधिगम्य मनुष्यः ।
भाविकर्म्मफलप्राप्तिपरीक्षा-
क्षत्वमी भवति योगिसहजः ॥

स्वरः

लाभदयिनि चिलीति निनादः
शूकि शूलि निनदोऽपि तथैव ।
कुचि कुचि निनदोऽपि जलार्थे
व्याहृतः कूचि कूचि स्वरयुक्तः ॥
कोरु कोरु इति यो मधुरोऽसौ
कामतस्तु निनदाः स्खलिताख्याः ।
स्नाय्याय नियमेन च चौ चि-
र्निस्वनो ह्यसुकुनाद इहार्थः ॥
कष्टदयिरि चिरीति विराव-
श्चीकुचीकुरिति चान्यविरावौ ।
एवमीदृग्फला दश नादाः
प्रस्फुटा निगदिता भगवत्या ॥
प्रत्येकमाख्यातफलं नराणां
यस्मिन् दशानां शकुनस्वराणाम् ।
जानात्यवश्यं पुरुषो विशेषं
प्रयोजनं भावि स वेत्त्यशेषम् ॥* ॥
वामी निनादः फलदः प्रवासे
स्याद्दक्षिणेऽनर्थफलानिहेतुः ।
पृष्ठस्थितानां फलदश्च पृष्ठे
निषेधकारी पुनरग्रभागे ॥
युद्धप्रवेशेऽथ पृष्ठप्रवेशे
ज्ञेयः प्रदद्यान्निनदोऽपसव्यः ।
वामः पुनः पार्श्ववयुद्भवत्वा
भवत्यभीष्टप्रतिकूलवर्त्ती ॥ * ॥
पार्थिवस्त्रिलिचिलिस्वर उक्तः
शूलि शूलिरिति यः स तथैव ।
कूचि कूचि कुचि कुचीति च शब्दौ
द्वाविमौ निगदितौ पुनराद्यौ ॥
कोरु कोरुरिति तैजससंज्ञ-
स्तैजसाश्च निनदाः स्खलिताख्याः ।
मारुतावपि चिलिस्वनवौचि-
स्वनौ निगदितौ मुनिमुख्यैः ॥
अम्बरस्थिरि चिरीति निनाद-
श्चोकु चोकुरिति तादृश एव ।
पञ्च चैव निनदा दश नादा
भूतपञ्चकनिवासभवेन ॥
क्रमादमी पार्थिवनादपूर्व्वाः
पञ्चापि शब्दाः शकुनैकदेश्याः ।
भवन्ति चेत्तन्नियतं भवन्ति
फलानि पूर्णान्यचिरेण पुंसाम् ॥
क्रमेण पृथ्वीजलपावकानां
भवन्ति शब्दा यदि क्षणिकायाः ।
मनोरथेभ्योऽभ्यधिकानि तूर्णं
तदा फलानि ध्रुवमुद्दहन्ति ॥
अनन्तरं पार्थिवनादतश्चेद्-
वह्निस्वरस्तत्फलमप्यतं स्यात् ।
वायव्यशब्दौ यदि नाभसौ वा
भूत्वा फलं नश्यति तत् समस्तम् ॥
शान्तौ निनादौ पृथिवीजलाख्यौ
दीप्तौ समीराम्बरनामधेयौ ।
तेजःप्रधानो विजयावलम्बी
भवेत् समं येन फलेन तादृक्

शमेषु कार्य्येष्वशुभाय शान्तौ
दोषो भयादो भयनाशनाय ।
विपर्य्यये द्वावपि न प्रशस्ता-
वस्थित्वनास्थित्वफलौ यतस्तौ ॥"

इति वसन्तराजशाकुने स्वरप्रकरणम् ॥

स्वरपत्तनं, क्ली, (स्वराणां षड्जादीनां पत्तनमाश्रयस्थानम् ।) सामवेदः । इति त्रिकाण्डशेषः ॥

स्वरभङ्गः, पुं, (स्वरस्य भङ्गो यस्मात् ।) गलरोगविशेषः । अस्य विवरणं स्वरभेदशब्दे द्रष्टव्यम् ॥

स्वरभङ्गी, [न्] पुं, (स्वरस्य भङ्गोऽस्यास्तीति । इनिः ।) पक्षिविशेषः । यथा,—

"स्वरभङ्गी नवो दृङ्चुविकटश्चकुनभेदकाः ॥"

इति शब्दचन्द्रिका ॥

स्वरभेदः, पुं, (स्वरस्य भेदो यस्मात् ।) स्वरभङ्गरोगः । यथा । अथ स्वरभेदाधिकारः । तत्र स्वरभेदस्य निदानसम्प्राप्तिपूर्ब्बकं लक्षणमाह ।

"अत्युच्चभाषणविषाध्ययनाभिघातैः
सन्दूषणैः प्रकुपिताः पवनादयस्तु ।
स्रोतःसु ते स्वरवहेषु मताः प्रतिष्ठां
हन्युः स्वरं भवति चापि हि षड्विधः सः ॥"

अध्ययनमुच्चैर्व्वेदादिपाठः । अभिघातः कण्ठादिदेशे लगुडादिभिः । एतैरत्युच्चभाषणादिभिश्चतुर्भिः संदूषणैरन्यैरपि । निजैर्दुष्टहेतुभिः । स्रोतःसु सुश्रुतोक्तेषु चतुर्षु । प्रतिष्ठाम् स्थितिम् । हन्युः स्वरमिति लक्षणम् । स्वरभेदः षड्विधः । वातपित्तकफसन्निपातक्षयभेदोभवभेदैः ॥* तत्र वातिकस्वरभेदिनो लक्षणमाह ।

"वातेन श्यावनयनाननमूत्रवर्च्चा
भिन्नं ध्वनेर्वदति गद्गदवत् स्वरञ्च ।"*।

पित्तेनाह ।

"पित्तेन पीतनयनाननमूत्रवर्च्चा
ब्रूयाद्दहेन स च दाहसमन्वितेन ॥"

गलदाहोऽत्र वचनसमय एव बोद्धव्यः ॥*॥

कफेनाह ।

"ब्रूयात् कफेन सततं कफरुद्धकण्ठः ।
क्षयं ध्वनेर्व्वदति चापि दिवाविशेषात् ॥"

दिवा सूर्य्यरश्मिभिः कफस्यास्रोभावात् ॥*॥

सन्निपातेनाह ।

"सर्व्वात्मके भवति सर्व्वविकारसम्य-
क्साध्यासाध्यसमयः स्वरभेदमाहुः ॥"*॥

क्षयजमाह ।

"धूप्येत वाक्क्षयकृते क्षयमाप्नुयाच्च
क्षीणेषु चापि हृतवाक् परिवर्ज्जनीयः ॥"

वाक् धूप्येत सधूमेव निःसरति क्षयञ्चाप्नुयात् क्षीणेषु ॥ * ॥ मेदोभवमाह ।

"अन्तर्गलं स्वरमलक्ष्यपदं चिरेण
मेदोऽन्वयाद्वदति दिग्धगलस्तृषार्त्तः ॥"

अन्तर्गलं गलमध्ये एव स्वरं वदति । दिग्धगलः मेदसा श्लेष्मणावलिप्तगलः । तृषार्त्तः मेदसोऽम्बुमार्गावरोधात् ॥ * ॥ असाध्यमाह ।

"क्षीणस्य हृद्दस्य क्षतस्य चापि
चिरोत्थितो यश्च सहोपजातः ।
मेदस्विनः सर्व्वसमुद्भवश्च
स्वरामयो यो न स सिद्धिमेति ॥"

क्षीणस्य क्षयरोगिणः । क्षतस्य क्षतयुक्तस्य ॥*॥

अथ स्वरभेदस्य चिकित्सा ।

"वातादिजनितश्वासकासघ्ना ये प्रकीर्त्तिताः ।
योगास्तानत्र युञ्जीत यथादोषं चिकित्सकः ॥
वाते सलवणं तैलं पित्ते सर्पिः समाक्षिकम् ।
कफे सक्षारकटुकक्षौद्रः कवल इष्यते ॥
गले तालुनि जिह्वायां दन्तमूलेषु चाश्रितः ।
तेन निष्कृष्यते श्लेष्मा स्वरश्च प्रसीदति ॥
आद्ये कोष्णं जलं पेयं भुक्ता घृतगुडौदनम् ।
क्षीरानुपानं पित्तोत्थे पिबेत् सर्पिरतन्द्रितः ।
पिप्पलीं पिप्पलीमूलं मरिचं विश्वभेषजम् ।
पिबेन्मूत्रेण मतिमान् कफजे स्वरसंक्षये ॥
निदिग्धिका तुला ग्राह्या तदर्द्धं ग्रन्थिकस्य तु ।
तदर्द्धं चित्रकस्यापि दशमूलस्य तत्समम् ॥
जलद्रोणद्वये क्वाथ्यं पूतशेषादाढ़कं ततः ।
पूते पिबेत्तदर्द्धन्तु पुराणस्य गुड़स्य च ॥
सर्व्वमेकत्र कृत्वा तु लेहवत् साधु साधयेत् ।
अष्टौ पलानि पिप्पल्याश्चित्रातकपलं तथा ॥
मरिचस्य पलं चैकं सर्व्वमेकत्र चूर्णितम् ।
मधुनः कुड़वं दत्त्वा तदग्नौ स्थादृयथानलम् ॥
निदिग्धिकावलेहोऽयं भिषग्भिर्मुनिभिर्मतः ।
स्वरमेदहरो मुख्यः प्रतिश्यायहरस्तथा ॥
काश्यश्वासाग्निमान्द्यादीन् गुल्ममेहगलामयान् ।
नाशयेत् सूत्रकृच्छ्राणि हन्यादपस्मारमर्बुदानि च ॥"

इति निदिग्धिकावलेहः ॥*॥

"मृगनाभिः सुकृष्णैलालवङ्गकुसुमान्वितैः ।
त्वक्क्षीरी चेति लेहोऽयं सर्पिर्मधुसमायुतः ॥
ब्राह्मी वचाभया वासा पिप्पली मधुसंयुता ।
अस्य प्रयोगात् सप्ताहात् किन्नरैः सह
गायति ॥"

इति स्वरभेदाधिकारः ॥ इति भावप्रकाशः ॥*॥

अन्यच्च ।

"विभीतकस्य वै चूर्णं पिप्पलीसैन्धवस्य च ।
पीतं सकाक्षिकं हन्ति स्वरभेदं महेश्वर ॥"

इति गारुड़े । १९४ । २८ ॥

(तथास्य चिकित्सान्तरं यथा,—

"भृङ्गराजामृतावल्ली वासकदशमूलकासमर्हरसैः ।
सर्पिः सपिप्पलीकं सिद्धं स्वरभेदकासनिग्रहणम् ॥"

इति भृङ्गराजाद्यं घृतम् ॥

इति वैद्यकचक्रपाणि संग्रहे स्वरभेदाधिकारे ।

तथाच पथ्यापथ्यनियमो यथा,—

"स्वेदो वस्तिर्धूमपानं विरेकः कवलग्रहः ।
नस्यं भाले शिरावेधो यवा गोहितशालयः ॥
हंसाटवीताम्रचूड़कैकिमांसरसाः सुरा ।
गोकण्टकः काकमाची जीवन्ती बालमूलकम् ।
द्राक्षा पथ्या मातुलुङ्गं लशुनं लवणार्द्रकम् ।
ताम्बूलं मरिचं सर्पिः पथ्यानि स्वरभेदिनाम् ॥"

अपथ्यानि यथा,—

"आम्रं कपित्थं वकुलं शालूकं जम्बवानि च ।
तिन्दूकानि कषायाणि वमिं स्वप्नं प्रजल्पनम् ॥
अनुपानञ्च यत्नेन स्वरभेदी विवर्ज्जयेत् ॥"

इति वैद्यकपथ्यापथ्यविधिः ॥)

स्वरमण्डलिका, स्त्री, (स्वराणां मण्डलमस्यत्रेति । स्वरमण्डल + ठन् ।) वीणाविशेषः । इति शब्दरत्नावली । क्वचित् पुस्तके सुरमण्डलिका इति पाठः ॥

स्वरलासिका, स्त्री, (स्वरैर्लसतीति । लस + ण्वुल् । टापि अत इत्वम् ।) वंशी । इति शब्दरत्नावली ।

स्वरसः, पुं, (स्वस्य रसः । स्व आत्मीयो रसो वा ।) शिलापिष्टकल्कः । यथा,—

"स्वो रसः स्वरसः प्रोक्तः कल्को दृग्दि
पेषितः ॥"

इति शब्दचन्द्रिका ॥ * ॥

कषायविशेषः । यथा,—

"सद्यः क्षुण्णाद्रव्याद्दलयन्त्रादिपीड़नात् ।
यो रसस्त्वभिनिर्याति स्वरसः सः प्रकीर्त्तितः ॥"

इति वैद्यकम् ॥

अन्यच्च ।

"पिष्टः कल्को विनीयश्च स्वरसः पीड़ितो रसः ।
क्वाथः कषायो निर्य्यूहो निर्य्यासो वेष्टकस्तथा ॥"

इति रत्नमाला ॥

("यन्त्रप्रपीड़नाद्द्रव्याद्रसः स्वरस उच्यते ॥"

इति चरके सूत्रस्थाने चतुर्थेऽध्याये ॥

"शुष्कद्रव्यसुपादाय स्वरसानामसम्भवे ।
वारिद्विगुणे साध्यं ग्राह्यं पादावशेषितम् ॥"

इति वैद्यकचक्रपाणिसंग्रहे स्वरभेदाधिकारे ॥)

स्वरा, स्त्री, ब्रह्मणो ज्येष्ठपत्नी । गायत्रीसपत्नी । यथा,—

"पाद्मस्यस्यान्तरे पूर्व्वं मनोर्देवः पितामहः ।
सह्याद्रिशिखरे रम्ये यजनायोद्यतोऽभवत् ॥
स कृत्वा यज्ञसम्भारान् सर्व्वदेवगणैर्व्वृतः ।
युक्तो हरिहराभ्यां हि तद्गिरेः शिखरं ययौ ॥
ब्रह्मादयो मुनिगणा मुहूर्त्ते ब्राह्मदैवते ।
तस्य दीक्षाविधानाय समाजं चक्रुराहृताः ॥
अथ ज्येष्ठां स्वरां पत्नीमाहूयाचक्रुरीश्वराः ।
सा श्रुत्वैरायतो तावत् भृगुर्विष्णुमुवाच ह ॥*॥

भृगुरुवाच ।

विष्णो स्वरा त्वयाहूता साध्वायाति नहि
त्वरम् ।
मुहूर्त्तातिक्रमे चैव कार्य्यो दीक्षाविधिः कथम् ॥

विष्णुरुवाच ।

नायाति चेत् स्वरा शीघ्रं गायत्र्यत्र विधीयताम् ।
एषापि न मेवेदस्य भार्य्या किं पुरुषकर्म्मणि ॥

नारद उवाच ।

एवमेव हि रुद्रोऽपि विष्णुवाक्यमभ्यनन्दत ।
तच्छ्रुत्वा स भृगुर्व्याक्यं गायत्रीं ब्रह्मचोदयत् ॥

निवेश्य दक्षिणे भागे दोषाविधिमथाकरोत् ॥
यावद्दोषाविधिं तस्य विधेश्चक्रुर्मुनीश्वराः ।
तावदभ्याययौ तत्र स्वरा यज्ञस्थले नृप ॥
ततस्तां दीक्षितां दृष्ट्वा गायत्रीं ब्रह्मणा सह ।
सपत्नीर्षापरा क्रोधात् स्वरा वचनमब्रवीत् ॥

स्वरोवाच ।

अपूज्या यत्र पूज्यन्ते पूज्यानाञ्च व्यतिक्रमः ।
त्रीणि तत्र भविष्यन्ति दुर्भिक्षं मरणं भयम् ॥
मदासने कनिष्ठेयं भवद्भिः सविवेशिता ।
तस्मात् सर्व्वे जड़ीभूता नदीरूपा हि निश्चितम् ॥
दयञ्च दक्षिणे भागे ध्रुवविष्टा मदासने ।
तस्माल्लोके सदादृश्या तनुरूपास्तु निम्नगा ॥

नारद उवाच ।

अतस्तत् शापमाकर्ण्य गायत्री कम्पिताधरा ।
समुत्थायाशपद्देवैर्वार्य्यमाणापि तां स्वराम् ॥

गायत्र्युवाच ।

तव भर्त्ता यथा ब्रह्मा समाप्येष तथा खलु ।
हया यपसि यस्मात्मां भव त्वमपि निम्नगा ॥"
इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये १५५ अध्यायः ॥

स्वराङ्गः, पुं, (स्वरस्य अंगः ।) संगीते स्वरस्यार्द्धं पादं वा । इति केचित् ॥

स्वराट्, [ज्] पुं, (स्वेन राजते इति । राज+ "सत्सूद्विषेति ।" ३ । २ । ६१ । इति क्विप् ।) वेदस्य छन्दोविशेषः । यस्य प्रत्येकद्विपादे अष्टाक्षरः एकपादे दशाक्षरः । इति केचित् ॥ (स्वतो भासमाने, त्रि । यथा, महाभारते । १२ । ४१ । ११ ।

"सम्राट् विराट् स्वराट् चैव सुरराजो भवोद्भवः ॥"

ब्रह्मा । इति विष्णुपुराणटीकायां श्रीधरस्वामी । १ । १२ । ५८ ॥)

स्वरापगा, स्त्री, (स्वः स्वर्गस्य आपगा ।) स्वर्गङ्गा । इति हेमचन्द्रः ॥

स्वरालुः, पुं, वचा । इति शब्दचन्द्रिका ॥

स्वरितः, पुं. (स्वर+जातार्थे इतच् ।) स्वरविशेषः । यथा,—

"उदात्तश्चानुदात्तश्च स्वरितोऽमी त्रयः स्वराः ॥"
इति जटाधरः ॥

स्वरः संजातोऽत्रेति इतोऽस्य जाति इति इतः । यदाहुः । उच्चैरुच्चारणादुदात्तः नीचैरनुदात्तः समाहारः स्वरितः । इति छान्दसत्वात् प्रचितस्वरो नोक्तः । तदुक्तम् ।

"उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः ।
चतुर्थः प्रचितो नोक्तो यतोऽसौ छान्दसः स्मृतः ॥"
इति भरतः ॥

स्वरयुक्ते, त्रि ॥

स्वरः, [स्] पुं, वज्रम् । इत्यमरटीकायां नीलकण्ठः ॥

स्वरः, पुं, (स्वर्यन्ते प्राप्यन्तेऽनेनेति । स्वृशब्दोपतापयोः + "सृस्वृस्निहित्रपीति ।" उणा० १ । ११ । इति उः । स च नित् ।) वज्रम् । इत्यमरः । १ । १ । ५० ॥ यूपदण्डम् । (यथा, ऋग्वेदे । ७ । ३५ । ७ ।

"यं नः स्वरुभ्यो मितयो भवन्ति ॥")

यज्ञः । शरः । इति मेदिनी ॥ सूर्य्यरश्मिः । इति केचित् ॥

स्वरुचिः, त्रि, (स्वस्य रुचियस्य ।) स्वतन्त्रः । इति हेमचन्द्रः ॥ (स्वस्य रुचिः ।) स्वेच्छायां, स्त्री । यथा,—

"स्वरुच्या क्रियमाणे तु यत्रावश्यं क्रिया क्वचित् ।
चोद्यते नियमः सोऽत्र ऋतावभिगमो यथा ॥"
इति प्रायश्चित्ततत्त्वम् ॥

स्वरूपं, क्ली, (स्वस्य रूपं यस्मात् ।) स्वभावः । इत्यमरः । १ । ७ । ३८ ॥ निजरूपञ्च ॥ (यथा, महाभारते । ३ । ६६ । १३ ।

"स दृष्ट्वा विस्मितस्तस्यावात्मानं विकृतं नलः ।
स्वरूपधारिणं नागं ददर्श स महीपतिः ॥")

स्वरूपः, त्रि, (स्वेनैव रूपं यस्य ।) पण्डितः । मनोज्ञः । तथा पर्य्यायः । प्राप्तरूपः २ अभिरूपः ३ । इत्यमरः । ३ । २ । १११ ॥

स्वरेणुः, स्त्री, सूर्य्यपत्नीविशेषः । सा तु संज्ञा । इति विकाण्डशेषः ॥

स्वरोदयः, पुं, (स्वराणामुदयो यत्र । स्वरज्ञापकग्रन्थविशेषः । यथा,—

सूत उवाच ।

"हरेः श्रुत्वा हरो गौरीं देहस्थं ज्ञानमब्रवीत् ।
कुजो वह्नौ रविः पृथ्वी सौरिरापः प्रकीर्त्तितः ॥
वायुसंस्थः स्थितो राहुर्दक्षचरन्त्रावभासकः ।
गुरुः शुक्रस्तथा सोम्यश्चन्द्रश्चैव चतुर्थकः ॥
वामनाड्यान्तु मध्यस्थान् कारयेदात्मनस्तथा ।
यदा चार इड़ायुक्तस्तदा कर्म्म समाचरेत् ॥
स्नानसेवां तथा ध्यानं पाणिग्रं राजदर्शनम् ।
अन्यानि शुभकर्म्माणि कारयेत प्रयत्नतः ॥
दक्षनाड़ीप्रवाहे तु अनिर्भीमश्च सैंहिकः ।
इतश्चैव तथाग्नेय पापानामुदयो भवेत् ॥
शुभाशुभविवेको हि ज्ञायते तु स्वरोदयात् ।
देहमध्ये स्थिता नाड्यो बहुरूपाः सुविस्तराः ॥
नाभेरधस्ताद् यः कन्दो बहुराज्ञत्र निगताः ।
द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः ॥
चक्रवच्च स्थितास्तासु सर्व्वाः प्राणहराः स्मृताः ।
तासां मध्ये त्रयः श्रेष्ठा वामदक्षिणमध्यमाः ॥
वामा सोमात्मिका प्रोक्ता दक्षिणा रविसन्निभा ।
मध्यमा च भवेदग्निः फलदा कालरूपिणी ॥
वामा शुभ्रतरूपा च जगदाप्यायने स्थिता ।
दक्षिणा रौद्रभागेन जगच्छोषयते सदा ॥
द्वयोर्व्वाहे तु मृत्युः स्यात् सर्व्वकार्य्यविनाशिनी ।
निर्गमे च भवेद्वामा प्रवेशे दक्षिणा स्मृता ॥
कारयेत् क्रूरकर्म्माणि प्राणे पिङ्गलसंस्थिते ।
इड़ाचारे तथा सौम्यं चन्द्रसूर्य्यगतस्तथा ॥
यात्रायां सर्व्वकार्य्येषु विषापहरणे इड़ा ।
भोजने मैथुने युद्धे पिङ्गला सिद्धिदायिका ॥
उच्चाटमारणाद्येषु कर्म्मस्वेतेषु पिङ्गला ।
मैथुने चैव संग्रामे भोजने सिद्धिदायिका ॥
शोभनेषु च कार्य्येषु यात्रायां विषकर्म्मणि ।
शान्तिमुत्त्यर्थमिड़ा च इडा योज्या नराधिपैः ॥
हाभ्यान्चैव प्रवाहे च क्रूरसौम्यविवर्জ্জने ।
विषुवं तन्तु जानीयात् संस्मरेत्तु विचक्षणः ॥
सौम्यादि शुभकार्य्येषु लाभादिजयजीविते ।
गमनागमने चैव वामा सर्व्वत्र पूजिता ॥
युद्धादिभोजने घाते स्त्रीणाञ्चैव तु सङ्गमे ।
प्रशस्ता दक्षिणा नाड़ी प्रवेशे क्षुद्रकर्म्मणि ॥
शुभाशुभानि कार्य्याणि लाभालाभौ जयाजयौ ।
जीवो जीवाय यत्पृच्छेत् न सिध्यति च मध्यमा ॥
वामाचारेऽथवा दक्षे प्रश्ने यत्र नायकः ।
तनुस्थः पृच्छते यस्तु तत्र सिद्धिर्न संशयः ॥
वैच्छन्दो वामदेवस्तु यदा वहति चात्मनि ।
तत्र भागे स्थितः पृच्छेत् सिद्धिर्भवति निश्चला ॥
वामे वा दक्षिणे वापि यत्र संक्रमते शिवा ।
घोरे घोराणि कार्य्याणि सौम्ये सौम्यानि च ॥
प्रस्थिते भागतो हंसे हाभ्यां वै सर्व्ववाहिनि ।
तदा सूक्ष्मं विजानीयादृयोगो योगविशारदः ॥
यत्र यत्र स्थितः पृच्छेद्दामदक्षिणसंमुखः ।
तत्र तत्र समं दिग्याद्दातस्योदयनं सदा ॥
अग्रतो वामिका श्रेष्ठा पृष्ठतो दक्षिणा शुभा ।
वामेन वामिका प्रोक्ता दक्षिणे दक्षिणा शुभा ॥
जीवो जीवति जीवेन यच्छून्यं तत् स्वरो भवेत् ॥
यत्किञ्चित् कार्य्यमुद्दिष्टं जयादिशुभलक्षणम् ।
तत् सर्व्वं पूर्णनाड्यान्तु जायते निर्व्विकल्पतः ॥
अन्यनाड्यादिपर्य्यन्तपञ्चत्वयमुदाहृतम् ।
यावत् षष्ठीन्तु पृच्छायां पूर्णायां प्रथमो जयेत् ॥
रिक्तायान्तु द्वितीयन्तु कथयेत्तदशङ्कितः ।
वामाचारक्रमो वायुर्जायते कर्म्मसिद्धिदः ॥
प्रहत्ते दक्षिणे मार्गे विषमे विषमाचरम् ।
अन्यत्र वामवाहे तु नाम वे विषमाचरम् ॥
तदासौ जयमाप्नोति योधः संग्राममध्यतः ।
दक्षवातप्रवाहे तु यदि नाम समाचरम् ॥
जायते नात्र सन्देहो नाड़ीमध्ये तु जयेत् ।
पिङ्गलान्तर्गते प्राणे शमनीयादवस्थेयेत् ॥
यावन्नाड्योदयं चारस्तां दिशं यावदापयेत् ।
न दातुं जायते सोऽपि तत्र कार्य्या विचारणा ॥
अथ संग्राममध्ये तु यत्र नाड़ी सदा वहेत् ।
सा दिशा जयमाप्नोति शून्ये भङ्गं विनिर्दिशेत् ॥
जातचारे जयं विद्यान्मृतके मृतमादिशेत् ।
जयं पराजयं चैव यो जानाति स पण्डितः ॥
वामे वा दक्षिणे वापि यत्र सञ्चरते शिवम् ।
कृत्वा तत्पदमाप्नोति याचा सन्ततिशोभना ॥
अग्निसूर्य्यप्रवाहे तु सति युद्धं समाचरेत् ।
तनुस्थः पृच्छते यस्तु स साधु जायते ध्रुवम् ॥
यां दिशं वहते वायुस्तां दिशं यावदाजयेत् ।
जयते नात्र सन्देहः स्वयमेव स्थितः ॥
मेषाद्या दश या नाड्या दक्षिणा वामसंस्थिता ।
चरस्थिरद्विमार्गे तास्तादृश्यः क्रमात् ॥
निगमे निर्गमं याति संग्रहे संग्रहं विदुः ।

पृच्छकस्य वचः श्रुत्वा घण्टाकारेण लक्षयेत् ॥
वामे वा दक्षिणे वापि पञ्चतत्त्वस्थितः शिवे ।
ऊर्द्धेऽग्निरध आपश्च तिर्यक्संस्थः प्रभञ्जनः ॥
मध्ये तु पृथिवी ज्ञेया लाभः सर्व्वत्र सर्व्वदा ।
ऊर्द्धे मृत्युरधः शान्तिस्तिर्यक् चोच्चाटयेत् सुधीः ।
मध्ये स्तम्भं विजानीयाच्चः सर्व्वत्र सर्व्वगे ॥"
इति गारुडे पवनविजयादिः ६७ अध्यायः ॥*॥
अथ ।
श्रीपार्व्वत्युवाच ।
"देवदेव महादेव तत्त्वज्ञ परमेश्वर ।
कथयस्व प्रभो ज्ञानं कृपां कृत्वा ममोपरि ॥
कथं ब्रह्माण्डमुत्पन्नं कथं वा परिवर्त्तते ।
कथं विलीयते देव वद ब्रह्माण्डनिर्णयम् ॥
श्रीमहादेव उवाच ।
तत्त्वाद्ब्रह्माण्डमुत्पन्नं तत्त्वेन परिवर्त्तते ।
तत्त्वेन लीयते देवि तत्त्वाद्ब्रह्माण्डनिर्णयः ॥
देव्युवाच ।
तत्त्वमेव परं मूलं निश्चितं तत्त्ववेदिभिः ।
तत्त्वस्वरूपं किं देव तत्त्वमेव प्रकाशय ॥
ईश्वर उवाच ।
निरञ्जनो निराकार एकदेवो महेश्वरः ।
तस्मादाकाशमुत्पन्नं आकाशाद्वायुसम्भवः ॥
वायोस्तेजस्ततश्चापस्ततः पृथ्वीसमुद्भवः ।
एतानि पञ्चतत्त्वानि विस्तीर्णानि च पञ्चधा ॥
तेभ्यो ब्रह्माण्डमुत्पन्नं तैरेव परिवर्त्तते ।
विलीयते च तत्रैव तत्रैव रमते पुनः ॥ * ॥
पञ्चतत्त्वमये देहे पञ्चतत्त्वानि सुन्दरि ।
सूक्ष्मरूपेण वर्त्तन्ते ज्ञायते तत्त्वयोगिभिः ॥
अत एव प्रवक्ष्यामि शरीरस्थं स्वरोदयम् ।
हंसचारस्वरूपेण भवेद् ज्ञानं त्रिकालगम् ॥
गुह्याद्गुह्यतरं सारमुपकारप्रकाशकम् ।
इदं स्वरोदयं ज्ञानं ज्ञानिनां मस्तके मणिः ॥
सूक्ष्मात् सूक्ष्मतरं ज्ञानं सुबोधं सत्यप्रत्ययम् ।
आद्यर्थे नास्तिके लोके आधारस्वास्तिके जने ॥
शान्ते शुद्धे सदाचारे गुरुभक्तैकमानसे ।
दृढ़चित्ते कृतज्ञे च देयश्चैव स्वरोदयम् ॥
शठे च दुर्ज्जने शूद्रे अशान्ते गुरुलोपके ।
हीनसत्त्वे दुराचारे स्वरज्ञानं न दीयते ॥*॥
शृणु त्वं कथितं देवि देहस्थ ज्ञानमुत्तमम् ।
येन विज्ञानमात्रेण सर्व्वज्ञत्वं प्रजायते ॥
स्वरे वेदाश्च शास्त्राणि स्वरे गान्धर्व्वमुत्तमम् ।
स्वरे सर्व्वाश्च त्रैलोक्यं स्वरे आत्मस्वरूपकः ॥
स्वरहीनोऽथ दैवज्ञो नाथहीनं यथा गृहम् ।
शास्त्रहीनो यथा वक्ता शिरोहीनश्च यद्वपुः ॥
नाड़ीभेदं यथा प्राणं तत्त्वभेदं तथैव च ।
सुषुम्नाभिज्ञमेदश्च यो जानाति स सुव्रतिगः ॥
साकारे वा निराकारे शुभवायुबले सति ।
कथयन्ति शुभं क्वचित् स्वरज्ञानं वरानने ॥
ब्रह्माण्डखण्डपिण्डाद्यं स्वरेणैव हि निर्म्मितम् ।
सृष्टिसंहारकर्त्ता च स्वरः साक्षान्महेश्वरः ॥
स्वरज्ञानात् परं मित्रं स्वरज्ञानात् परं धनम् ।
स्वरज्ञानात् परं गुह्यं न वा दृष्टं न वा श्रुतम् ॥
शत्रुं हन्यात् स्वरबलस्तथा मित्रसमागमः ।
लक्ष्मीप्राप्तिः स्वरबलैः कीर्त्तिः स्वरबलैस्तथा ॥
कन्याप्राप्तिः स्वरबलैः स्वरबले राजदर्शनम् ।
स्वरबलैर्देवतासिद्धिः स्वरबलैः क्षितिपो वशः ॥
स्वरबलैर्गम्यते देशे भोज्यं स्वरबलैस्तथा ।
लघु दीर्घं स्वरबलैर्मलक्षेत्रं निवारयेत् ॥
सर्व्वशास्त्रपुराणादिस्मृतिवेदाङ्गपूर्व्वकम् ।
स्वरज्ञानात् परं मित्रं नास्ति किञ्चिद्धरानने ॥
नामरूपादिकाः सर्व्वे मिथ्या सर्व्वे कविभ्रमाः ।
अज्ञानमोहिता मूढ़ा यावत्तत्त्वं न विद्यते ॥
इदं स्वरोदयं शास्त्रं सर्व्वशास्त्रोत्तमोत्तमम् ।
आत्मघटप्रकाशार्थं प्रदीपकलिकोपमम् ॥
यस्मै कस्मै परस्मै वा न प्रोक्तं प्रश्नहेतवे ।
तस्मादेतत् स्वयं ज्ञेयमात्मनैवात्मनात्मनि ॥
न तिथिर्न च नक्षत्रं न वारग्रहदेवताः ।
न विष्टिर्न व्यतीपातो विरुद्धाद्यास्तथैव च ॥
कुयोगा नैव देवेशि प्रभवन्ति कदाचन ।
प्राप्ते स्वरबले सिद्धिं सर्व्वमेव फलं शुभम् ॥*॥
देहमध्ये स्थिता नाड्यो बहुरूपाः सविस्तराः ।
ज्ञातव्याश्च बुधैर्नित्यं स्वदेहे ज्ञानहेतवे ॥
नाभिस्थानककन्दोर्द्ध मङ्कुरादेव निर्म्मिताः ।
द्विसप्ततिसहस्राणि देहमध्ये व्यवस्थिताः ।
नाड़ीस्था कुण्डली शक्तिर्भुजङ्गाकारशायिनी ।
ततो दशोर्द्ध गा नाड्यो दशैवाधः प्रतिष्ठिताः ॥
देहे तिर्य्यगता नाड्यस्तेषिंर्द्विगतिसंख्यया ।
प्रधाना दश नाड्यस्तु दश वायुप्रवाहकाः ॥
तिर्य्यगूर्द्धमधस्ताद्या वायुर्देहे समन्वितः ।
चक्रवत्तु स्थिता देहे सर्व्वाः प्राणसमाश्रिताः ॥
तासां मध्ये दश श्रेष्ठा दशानां तिस्र उत्तमाः ।
इड़ा च पिङ्गला चैव सुषुम्ना च ह्यतोयिका ॥
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलम्बुषा कुहूश्चैव शङ्खिनी दशमी तथा ॥
इड़ा वामे स्थिता भागे दक्षिणे पिङ्गला तथा ।
सुषुम्ना मध्यदेशे तु गान्धारी वामचक्षुषि ॥
दक्षिणे हस्तिजिह्वा च पूषा कर्णे च दक्षिणे ।
यशस्विनी वामकर्णे आनने चाप्यलम्बुषा ॥
कुहूश्च लिङ्गदेशे तु मूलस्थाने च शङ्खिनी ।
एवं द्वारं समाश्रित्य तिष्ठन्ति दशनाड़िकाः ॥
इड़ा पिङ्गला सुषुम्ना च प्राणमार्गे समाश्रिताः ।
एता हि दश नाड्यस्तु देहमध्ये व्यवस्थिताः ।
नामानि नाड़िकानान्तु वातानां प्रवदाम्यहम् ।
प्राणोऽपानः समानश्चोदानो व्यानस्तथैव च ॥
नागः कूर्म्मश्च कुकरो देवदत्तो धनञ्जयः ।
हृदि प्राणो वहेन्नित्यमपानो गुदमण्डले ॥
समानो नाभिदेशे तु उदानः कण्ठमध्यगः ।
व्यानो व्यापी शरीरेषु प्रधानाः पञ्च वायवः ॥
प्राणाद्याः पञ्च विख्याता नागाद्याः पञ्च वायवः ।
तेषामपि च पञ्चानां स्थानानि च वदाम्यहम् ॥
उद्गारे नाग आख्यातः कूर्म्मउन्मीलने स्मृतः ।
कृकरः क्षुत्कृतो ज्ञेयो देवदत्तो विजृम्भणे ।
न जहाति मृते कापि सर्व्वव्यापी धनञ्जयः ।
एते नाड़ीषु सर्व्वासु भ्रमन्ते जीवरूपिणः ॥
प्रकटप्राणसञ्चारं लक्षयेत् देहमध्यतः ।
इड़ापिङ्गलासुषुम्नाभिर्नाड़ीभिस्तत्त्वभिर्बुधः ॥
इड़ा वामे च विज्ञेया पिङ्गला दक्षिणे स्मृता ।
इड़ानाड़ीस्थिता वामा ततो व्यस्ता च पिङ्गला ॥
इड़ायां संस्थितश्चन्द्रः पिङ्गलायाञ्च भास्करः ।
सुषुम्ना शम्भुरूपेण शम्भुर्ईसस्वरूपकः ॥
हंकारो निर्गमे प्रोक्तः सकारस्तु प्रवेशने ।
हंकारः शिवरूपेण सकारः शक्तिरुच्यते ॥
शक्तिरूपः स्थितश्चन्द्रो वामनाड़ीप्रवाहकः ।
दक्षनाड़ीप्रवाहश्च शम्भुरूपी दिवाकरः ॥
श्वासे सकारसंस्थे तु यदानं दीयते बुधैः ।
तदानं जीवलोकेऽस्मिन् कोटिकोटिगुणं भवेत् ॥
अनेन लक्षयेद् योगी चैकचित्तः समाहितः ।
सर्व्वमेव विजानीयान्मार्गं तच्चन्द्रसूर्य्ययोः ॥
आयेत्तत्त्वं स्थिरे जीवे अस्थिरे न कदाचन ।
दृष्टसिद्धिर्भवेत्तस्य महालाभो जयस्तथा ॥
चन्द्रसूर्य्यौ यदाभ्यासी ये कुर्व्वन्ति सदा नराः ।
अतीतानागतज्ञानं तेषां हस्तगतं सदा ॥
वामे चामृतरूपश्च जगदाप्यायिनी परा ।
दक्षिणा चरमे भागे जगदुत्पादयेत् सदा ॥
मध्यमा भवति क्रूरा दुष्टा सर्व्वत्र कर्म्मसु ।
सर्व्वत्र शुभकार्य्येषु वामा भवति पुष्टिदा ॥
निर्गमे च शुभा वामा प्रवेशे दक्षिणा शुभा ।
शुभकार्य्ये शुभा वामा दक्षिणा क्रूरकर्म्मसु ॥
चन्द्रः समस्तु विज्ञेयो रविस्तु विषमः सदा ।
चन्द्रः स्त्री पुरुषः सूर्य्यश्चन्द्रो गौरो रविः सितः ॥
इड़ा पिङ्गला सुषुम्ना च तिस्रो नाड्यः प्रकीर्त्तिताः ।
इड़ायाञ्च प्रवाहेण सौम्यकर्म्माणि कारयेत् ॥
पिङ्गलायाः प्रवाहेण रौद्रकर्म्माणि कारयेत् ।
सुषुम्नायाः प्रवाहेण सिद्धिमुक्तिफलानि च ॥*॥
आदौ चन्द्रः सिते पक्षे भास्करस्तु सितेतरे ।
प्रतिपत्तो दिनान्याहुः त्रीणि त्रीणि क्रमोदये ॥
सार्द्धद्विघटिका ज्ञेया शुक्ले कृष्णे शशी रविः ।
वहत्येकदिनेनैव यथाषष्टिघटीक्रमात् ॥
वहेत्तावद्घटीमध्ये पञ्चतत्त्वानि निर्द्दिशेत् ।
प्रतिपत्तो दिनान्याहुर्विपरीते विपर्य्ययः ॥
शुक्लपक्षे वहेद्वामा कृष्णपक्षे च दक्षिणा ।
जानीयात् प्रतिपत्पूर्व्वं योगी तत्रतमानसः ॥
उदयचन्द्रमार्गेण सूर्य्येणास्तं गतो यदि ।
ददाति गुणसंघातं विपरीते विपर्य्ययम् ॥
अशक्तं वारयेद्रात्रौ दिवा कार्य्यो दिवाकरः ।
इत्यभ्यासरतो योगी स योगी नात्र संशयः ॥
सूर्य्येण बध्यते सूर्य्यश्चन्द्रश्चन्द्रेण बध्यते ।
या जानाति क्रियामेतां त्रैलोक्यं वशयेत् क्षणात् ॥*॥
गुरुशुक्रबुधेज्यानां वासरे वामनाड़िका ।

सिद्धिदा सर्व्वकार्य्येषु शुक्लपक्षे विशेषतः
पर्व्वाङ्गारकसौरीणां वासरे दक्षनाड़िका ।
कर्त्तव्या चरकार्य्येषु कृष्णपक्षे विशेषतः ॥
एकैकस्य घटोपक्रमेणैवोदयन्ति च ।
क्रमादेकैकनाड्यन्तु तत्त्वानां पृथगुद्भवः ॥
अहोरात्रस्य मध्ये तु ज्ञेया द्वादश संक्रमाः ।
कृपणार्कटकन्यालिमृगमीने निशाकरः ॥
मेषे सिंहे च धनुषि तुलायां मिथुने घटे ।
उदयो दक्षिणे ज्ञेयः शुभाशुभविनिर्णयः ॥*॥
तिष्ठेत् पूर्व्वोत्तरे चन्द्रः सूर्य्यो दक्षिणपश्चिमे ।
वामाचारप्रवाहेण न गच्छेत् पूर्व्व उत्तरे ॥
दक्षनाड़ीप्रवाहे तु न गच्छेत् याम्यपश्चिमे ।
परिपन्थिभयं तस्य गतोऽसौ न निवर्त्तते ॥
तस्मात्तत्र न गन्तव्यं बुधैः सर्व्वहितैषिभिः ।
तदा तत्र तु संघातमृत्युरेव न संशयः ॥
सूर्य्योदये यदा सूर्य्यचन्द्रचन्द्रोदये यदा ।
सध्यन्ति सर्व्वकार्य्याणि दिवारात्रिगतान्यपि ॥
शुक्लपक्षे द्वितीयायामर्के वहति चन्द्रमाः ।
दृश्यते लाभदः पुंमां सोमे सौख्यं प्रजायते ॥
चन्द्रकाले यदा सूर्य्यः सूर्य्यचन्द्रोदये भवेत् ।
उद्वेगः कलहो हानिः शुभं सर्व्वं निवारयेत् ॥*॥
विपरीतलक्षणम् ।
यदा प्रत्यूषकाले तु विपरीतोदयो भवेत् ।
चन्द्रस्थाने वहत्यर्को रविस्थाने च चन्द्रमाः ॥
प्रथमे मानसोद्वेगं धनहानिं द्वितीयके ।
तृतीये गमनं प्रोक्तमिष्टनाशं चतुर्थके ॥
पञ्चमे राज्यविभ्रंशं षष्ठे सर्व्वार्थनाशनम् ।
सप्तमे व्याधिदुःखानि अष्टमे मृत्युमादिशेत् ॥
कालत्रये दिनान्यष्टौ विपरीतं यदा भवेत् ।
तदा दुष्टफलं प्रोक्तं किञ्चिन्यूने तु शोभनम् ॥
प्रातर्मध्याह्नयोश्चन्द्रः सायंकाले दिवाकरः ।
तदा नित्यं जयं लाभं विपरीतन्तु दुःखदम् ॥
दक्षिणे यदि वा वामे यत्र संक्रमते शिवः ।
तत्पादमग्रतः कृत्वा निःसरेत् निजमन्दिरे ॥
चन्द्रः समपदः कार्य्यो रविस्तु विषमः सदा ।
पूर्णपादं पुरस्कृत्य यात्रा भवति सिद्धिदा ॥
चन्द्रचारे चतुष्पादं पञ्चपादाद्य भास्करे ।
एवन्तु गमनं श्रेष्ठं साधयेद्भुवनत्रयम् ॥
यत्राङ्गे चरते वायुस्तदङ्गस्य करस्थलम् ।
सुप्तोत्थितो मुखं स्पृष्ट्वा लभते वाञ्छितं फलम् ॥
परदत्ते तथा ग्राह्ये गृहाद्विर्गमनेऽपि च ।
यदङ्गे वहते नाड़ी ग्राह्यं गतिकरादिषु ॥
न हानिः कलहो नैव कण्टकैर्नापि भिद्यते ।
निवर्त्तते सुखेनैव सर्व्वापद्भिर्व्विवर्जितः ॥
गुरुबन्धुसुहृन्मात्या अन्यैश्चोपोषितदायिनः ।
पूर्णाङ्गे खलु कर्त्तव्या कार्य्यसिद्धिमभीप्सता ॥
आसने शयने वापि पूर्णाङ्गविनिवेशिताः ।
वशीभवन्ति कामिन्यो न कर्म्म नियमान्तरम् ॥
अरिचौराधमाद्याय अन्ये उत्पातविग्रहाः ।
कर्त्तव्याः खलु रिक्ताङ्गे जयलाभसुखार्थिभिः ॥
दूरदेशे विधातव्यं गमनं तूष्णिमेव च ।
अभ्यर्णदेशे दीर्घे तु तरणाविदति कैचन ॥
यत्किञ्चित् पूर्व्वमुद्दिष्टं लाभादिसमरागमः ।
तत् सर्व्वं पूर्णनाड़ीषु जायते निर्व्विकल्पकम् ॥
शून्यनाड्यां रिपुं जेतुं यत् पूर्व्वं प्रतिपादितम् ।
जायते नान्यथा चैव यथा सर्व्वज्ञभाषितम् ॥
रिपुं जेतुमित्यत्र विपर्य्यस्तमिति च पाठः ।
व्यवहारे खलोच्चाटे हेषिविद्वादिवश्यकाः ।
कुपितस्वामिचौराद्याः पूर्णस्था सुभयङ्कराः ॥
दूराध्वनि शुभयन्त्रो निर्व्विघ्नमिष्टसिद्धिदः ।
प्रवेशकार्य्यहेतुः स्यात् सूर्य्यः शीघ्रं प्रशस्यते ॥
अग्रतो वामिका श्रेष्ठा पृष्ठतो दक्षिणा शुभा ।
वामे च वामिका प्रोक्ता दक्षिणे दक्षिणा स्मृता ॥
चन्द्रचारे विषं हन्ति सूर्य्यो बालावशं नयेत् ।
सुषुम्नायां भवेच्चैक एव विधा स्मृतः ॥
अयोग्ये योग्यता नाड़ी योग्यस्थानेऽप्ययोग्यता ।
कार्य्यानुबन्धतो जीवः कथं रुद्र समाचरेत् ॥
शुभाशुभानि कार्य्याणि क्रियन्तेऽहर्निशं यदा ।
तदा कार्य्यानुबन्धेन कार्य्यं नाड़ीप्रचालनम् ॥*॥

अथ इड़ा ।

स्थिरकर्म्मण्यलङ्कारे दूराध्वगमने तथा ।
आश्रमे धर्म्मप्रासादे वस्तूनां संग्रहेऽपि च ॥
वापीकूपतड़ागादिप्रतिष्ठा स्तम्भदेवयोः ।
यात्रादाने विवाहे च वस्त्रालङ्कारभूषणे ॥
शान्तिकं पौष्टिकं चैव दिव्यौषधिरसायने ।
स्वस्वामिदर्शने मैत्रे वाणिज्ये धनसंग्रहे ॥
गृहप्रवेशे सेवायां क्षेत्रां बीजादिवापने ।
शुभकर्म्मणि सन्धौ च निर्गमे च शुभः शशी ॥
विद्यारम्भादिकार्य्येषु वास्तवानाञ्च दर्शने ।
जलमोक्षेषु धर्म्मेषु दीक्षायां मन्त्रसाधने ॥
कालविज्ञानसूत्रेण चतुष्पादग्रहागमे ।
कलाव्याधिचिकित्सायां स्वामिसम्बोधने तथा ॥
गजाश्वारोहणे धन्वो गजाश्वानाञ्च बन्धने ।
परोपकरणे चैव ज्ञानौषधीनां स्थापने तथा ॥
गीतवादोऽपि नृत्ये च गीतशास्त्रविचारणे ।
पुरग्रामप्रवेशे च तिलके मूत्रधारणे ॥
पुत्रशोके विषादे च ज्वरिते मूर्च्छितेऽपि वा ।
स्वजनस्वामिसम्बन्धे धान्यादिदारसंग्रहे ॥
स्त्रीणां दन्तादिभूषायां क्षपेरागमने तथा ।
गुरुपूजा विषादीनां चालनञ्च वरानने ॥
इड़ायां सिद्धिदं प्रोक्तं योगाभ्यासादिकर्म्म च ।
तत्रापि वर्ज्जयेद्वायुं स्तेज आकाशमेव च ॥
सर्व्वमार्य्याणि सिध्यन्ति दिवारात्रिगतान्यपि ।
सर्व्वेषु शुभकार्य्येषु चन्द्रचारः प्रशस्यते ॥*॥

अथ पिङ्गला ।

कठिनक्रूरविद्यानां पठने पाठने तथा ।
स्त्रीसङ्गवेश्यागमने महानीकाधिरोहणे ॥
नष्टकार्य्ये सुरापाने वीरमन्त्राद्युपासने ।
बहुलध्वंसदेशादिविषदानादिवैरिणि ॥
अश्वाभ्यासे च गमने मृगयापशुविक्रये ।
दृष्टकाकाष्टपाषाणरङ्गघर्षणदारुणे ॥
गत्यभ्यासे यन्त्रतन्त्रे दुर्गपर्व्वततरोहणे ।
द्यूते चौर्य्ये गजाश्वादिरथसाधनवाहने ॥
व्यायामे मारणोच्चाटे षट्कर्म्मादिकसाधने ।
नदीजलौघतरणे भेषजे लिपिलेखने ॥
मारणं मोहनं स्तम्भं विद्वेषोच्चाटनं वशम् ।
प्रेरणाकर्षणे क्षोभे दाने च क्रयविक्रये ॥
खड्गयुद्धे वैरियुद्धे भोगे वा राजदर्शने ।
भोज्ये स्नाने व्यवहारे क्रूरे दीप्ते रविः शुभः ॥
भुक्तमात्रेण मन्दाग्नौ क्षौणां वह्न्यादिकर्म्मणि ।
शयनं सूर्य्यवाहेन कर्त्तव्यन्तु सदा बुधैः ॥
क्रूराणि यानि कर्म्माणि चराणि विविधानि च ।
तानि सिध्यन्ति सूर्य्ये च नात्र कार्य्या विचारणा ॥*॥

अथ सुषुम्ना ।

क्षणं वामे क्षणं दक्षे यदा वहति मारुतः ।
सुषुम्ना सा च विज्ञेया सर्व्वकार्य्यहरा स्मृता ॥
तस्यां नाड्यां स्थितो वह्निर्व्वलन्तं कालरूपिणम् ।
विषुवन्तं विजानीयात् सर्व्वकार्य्यविनाशनम् ॥
यदानुक्रममुल्लङ्घ्य यस्य नाड़ीद्वयं वहेत् ।
तदा तस्य विजानीयादशुभं समुपस्थितम् ॥
क्षणं वामे क्षणं दक्षे विषमं भावमादिशेत् ।
विपरीतफलं ज्ञेयं ज्ञातव्यञ्च वरानने ॥
उभयोरेव सञ्चारे विषुवन्तं समादिशेत् ।
न कुर्य्यात् क्रूरसौम्यानि तत्सर्व्वं निष्फलं भवेत् ॥
जीविते मरणे प्रश्ने लाभालाभौ जयाजयौ ।
विषुवे विपरीतं स्यात् संस्मरेच्छ्रीगदीश्वरम् ॥
ईश्वरस्मरणं कार्य्यं योगाभ्यासादिकर्म्मसु ।
अन्यत्तत्र न कर्त्तव्यं जयलाभसुखार्थिभिः ॥
सूर्य्ये च वहमानायां सुषुम्नायां सुदुर्म्मुखः ।
शापं दद्यात् वरं दद्यात् सर्व्वथा च तदन्यथा ॥
नाड़ीसंक्रमणे काले तत्त्वसंक्रमणे तथा ।
शुभं किञ्चित्र कर्त्तव्यं पुण्यदानादि कोटिषु ॥
विषमस्योदये यात्रां मनसापि न चिन्तयेत् ।
यात्रा हानिकरी तस्य मृत्युः क्लेशो न संशयः ॥
पुरो वामोऽर्कचन्द्रौ दक्षाधः पृष्ठतो रविः ।
पूर्णरिक्तविवेकोऽयं ज्ञातव्यो देशिकैः सदा ॥
ऊर्द्ध्ववामाग्रतो दूतो ज्ञेयो वामपथि स्थितः ।
पृष्ठे दक्षे तथाधस्तात् सूर्य्यवाहगतः शुभः ॥
अनादिविषमं सन्धिं निराधारं निराकुलम् ।
परे मूले विलीयेत सा सन्ध्या सन्धिरुच्यते ॥
न सन्ध्यां सन्धिमित्याहुः सन्ध्या सन्धिर्निगद्यते ।
विषुवत् सन्धिगः प्राणः सा सन्ध्या सन्धिरुच्यते ॥
न वेदं वेदमित्याहुर्व्वेदे वेदो न विद्यते ।
परात्मा विद्यते येन स वेदो वेद उच्यते ॥"

इति नाड़ीभेदः समाप्तः ॥ * ॥

अथ तत्त्वनिर्णयः ।

देव्युवाच ।

"देवदेव महादेव संसारार्णवतारक ।
स्थितं त्वदीयहृदये रहस्यं वद मे प्रभो ॥

ईश्वर उवाच ।

स्वरज्ञानं रहस्यं तु न किञ्चिदिष्टदेवता ।
स्वरज्ञानरतो योगी स योगी परमो मतः ॥
पञ्चतत्त्वात् भवेत् सृष्टिस्तत्त्वं विद्धीयते ।

पञ्चतत्त्वं परं तत्त्वं तत्त्वातीतं निरञ्जनम् ॥
तत्त्वानां नाम विज्ञेयं सिद्धियोगेन योगिनाम् ।
भूतानां दुष्टचिह्नानि जानन्ति हि स्वरोत्तमाः ॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
पञ्चभूतात्मकं सर्व्वं यो जानाति स पूजितः ॥
सर्व्वलोकेषु जीवानां न देहे भिन्नतत्त्वकम् ।
भूर्लोकात् सत्यपर्य्यन्तं नाड़ीभेदः पृथक् पृथक् ॥
वामे वा दक्षिणे वापि उदयाः पञ्च कीर्त्तिताः ।
अष्टधा तत्त्वविज्ञानं शृणु वक्ष्यामि सुन्दरि ॥
प्रथमे तत्त्वसंख्यायां द्वितीये श्वाससन्धिषु ।
तृतीये स्वरचिह्नानि चतुर्थे स्थानमेव च ॥
पञ्चमे तस्य वर्णस्य षष्ठे तु प्राणमेव च ।
सप्तमे स्वादुसंयुक्तमष्टमे गतिलक्षणम् ॥
एवमष्टविधं प्राणं विधुवन्तं चराचरम् ।
स्वरात् परतरं देवि नान्यथा त्वम्बुजासने ।
निरीक्षितव्यं यत्नेन यदा प्रत्यूषकालतः ।
कालस्य वञ्चनार्थाय कर्म्म कुर्व्वन्ति योगिनः ॥
भ्रुवोरन्तर्मुखी मध्याङ्गुल्यौ नासापुटद्वये ।
वदनप्रान्तयोरन्ते तर्ज्जन्यौ तु दृगन्तयोः ॥
अस्यान्तरं पार्थिवादितत्त्वज्ञानं भवेत् क्रमात् ।
पीतखेतारुणश्यामबिन्दुभिर्निर्दिशेधि खम् ॥
दर्पणेन ममालोक्य स्वास्यं तत्र विनिक्षिपेत् ।
आकारैस्तु विजानीयात् तत्त्वभेदं विचक्षणः ॥
चतुरस्रं चार्द्धचन्द्रं त्रिकोणं वर्त्तुलं स्मृतम् ।
बिन्दुभिस्तु नभो ज्ञेयमाकारैस्तत्त्वलक्षणम् ॥
मध्ये पृथ्वी ह्यधस्तापद्वहं वहति चानलः ।
तिर्य्यग् वायुप्रचारश्च नभो वहति संक्रमे ॥ * ॥
माहेयं मधुरं स्वादु कषायं जलमेव च ।
तिक्तं तेजश्च वायव्यं आकाशं कटुकं तथा ॥
अष्टाङ्गुलं वहेद्वायुरनलश्चतुरङ्गुलम् ।
द्वादशाङ्गुलमाहेयं षोड़शाङ्गुलवारुणम् ॥
आपः श्वेताः क्षितिः पीता रक्तवर्णो हुताशनः ॥
मारुतो नीलजीमूत आकाशं भूमिवर्णकम् ॥*॥
स्कन्धदेशे स्थितो वह्निः नाभिमूले प्रभञ्जनः ।
जानुदेशे महीतोयं पादान्ते मस्तके नभः ॥
ऊर्द्ध मृत्युरधः शान्तिस्तिर्य्यग्गुच्चाटनं तथा ।
मध्ये स्तम्भं विजानीयात् नभः सर्व्वत्र मध्यगम् ॥
पृथिव्यां स्थिरकर्म्माणि चरकर्म्माणि वारुणे ।
तेजसा समकार्य्याणि मारणोच्चाटनेऽनिले ॥
व्योम्नि किञ्चिन्न कर्त्तव्यमभ्यसेत् योगसेवया ।
शून्यता सर्व्वकार्य्येषु नात्र कार्य्या विचारणा ॥*
पृथ्वीजलाभ्यां सिद्धिः स्यात् मृत्युर्व्वह्नौ जयोऽनिले ।
नभसि निष्फलं सर्व्वं ज्ञातव्यं तत्त्ववेदिभिः ॥
चिरलाभः क्षितौ ज्ञेयस्तत्क्षणात्तोयतत्त्वतः ।
हानिः स्याद्वह्निवाताभ्यां नभसो निष्फलं भवेत् ॥
पीतः ग्रनैर्मरुद्वाहो गुणयाश्च गुरुध्वनिम् ।
त्रिकोणः पार्थिवो वायुः स्थिरकार्य्यप्रसाधकः ॥
अधोवाहो गुरुध्वानः शीघ्रगः शीतलः स्निग्धः ।
वृत्तः षोड़शाङ्गुलो वायुः स प्रायः शुभकर्म्मकृत् ॥
आवर्त्तगत्यात्युष्णश्च शोणाभश्चतुरङ्गुलः ।
ऊर्द्ध वाहो तु यः क्रूरः कर्म्मकारी स तैजसः ॥
उष्णशीतः कृष्णवर्णस्तिर्य्यग्गामी षड़ङ्गुलः ।
वायुः पवनसंज्ञो यः चरकर्म्मसु सिद्धिदः ॥
यः समीरः समरसः सर्व्वतत्त्वगुणावहः ।
अम्बरं तं विजानीयात् योगिनां योगदायकम् ।
पीतश्चैव चतुष्कोणं मधुरं मध्यमाव्ययम् ।
भौगदं पार्थिवं तत्त्वं प्रवाहे द्वादशाङ्गुलम् ॥
श्वेतमर्द्धेन्दुसङ्काशं स्वादु काषायमादकम् ।
लाभक्षयकरं तत्त्वं प्रवाहे षोड़शाङ्गुलम् ॥
रक्तं त्रिकोणं तिक्तं स्यात् ऊर्द्धमार्गप्रवाहकम् ।
दोषघ्नं तैजसं तत्त्वं प्रवाहे चतुरङ्गुलम् ॥
नीलवर्त्तुलसङ्काशं स्वाद्वम्लं तिर्य्यगान्वितम् ।
चपलं मारुतं तत्त्वं प्रवाहेऽष्टाङ्गुलं स्मृतम् ॥
वर्णाकारं स्वादुवाहं सर्व्वज्ञं सर्व्वगामि च ।
मोक्षदं व्योमतत्त्वं हि सर्व्वकार्य्येषु निष्फलम् ॥
पृथ्वीजले शुभे तत्त्वे तेजोमिश्रफलोदये ।
हानिमृत्युकरौ पुंसामशुभौ व्योममारुतौ ॥
अप्पूर्व्वा पश्चिमे पृथ्वी तेजश्च दक्षिणे तथा ।
वायुरुत्तरदिग्भागे मध्यकोणे गतं नभः ॥
चिरलाभः क्षितौ ज्ञेयस्तत्क्षणात्तोयतत्त्वतः ।
हानिः स्याद्वह्निवाताभ्यां नभस्यालिङ्गनं लभेत् ।
चन्द्रे पृथ्वीजले स्यातां सूर्य्येचाग्निर्यदा भवेत् ।
तदा सिद्धिर्न सन्देहः सौम्यासौम्येषु कर्म्मसु ॥
लाभः पृथ्वीक्रतो वह्निर्निगायां लाभकज्जलम् ।
वह्नौ मृत्युः क्षतिर्वायौ नभः स्थानं दहेत् क्वचित् ॥
जीवितव्ये जये लाभे क्रयाद्यं धनकर्षणे ।
मन्त्रार्थे युद्धपत्रे च गमनागमने तथा ॥
आयाति वारुणे तत्त्वे तत्रस्थोऽपि शुभं क्षितौ ।
प्रयाति वायुतोऽन्यत्र हानिर्मृत्युर्नभोऽनले ॥ *॥
पृथिव्यां मूलचिन्ता स्यात् जीवस्य जलवातयोः ।
तेजसा धातुचिन्तां स्यात् शून्यमाकाशतो वदेत् ॥
पृथिव्यां वहपादाः स्युर्दिपदास्तोयवायुतः ।
तेजसा च चतुष्पादा नभसा पादवर्जिताः ॥
कुजो वह्नौ रविः पृथ्वी भौरिराप्यः प्रकीर्त्तिताः ।
वायुस्थानस्थितौ राहुर्दक्षरन्ध्रप्रवाहकः ॥
जलं चन्द्रो बुधः पृथ्वी गुरुर्वातः क्षितौऽनलः ।
वामनाड्यां स्थिताः सर्व्वे सर्व्वकार्य्येषु निन्दिताः ॥
प्रवासिपक्षाः ।
"चन्द्रादित्यौ परित्यज्य यदा राहुगतोऽनिलः ।
तदासौ चलितो ज्ञेयः स्थानान्तरमपेक्षते ॥
आयाति वारुणे तत्त्वे तत्रैवास्ति शुभं क्षितौ ।
प्रयाभी पवनेऽन्यत्र मृत्युरेवानले वदेत् ॥
पृथ्वीतो मूलविज्ञानं जीवज्ञानं जले तथा ।
आग्नेय्यां धातुविज्ञानं व्योम्नि शून्यं विनिर्द्दिशेत् ।
तुष्टिपुष्टिरतिक्रीड़ा जयो हास्यं धरातले ।
तेजो वायुश्च सुप्ताः ज्वरकम्पप्रवासिनः ॥
गतायुर्मृत्युराकाशे चन्द्रावस्थाः प्रकीर्त्तिताः ।
द्वादशैता प्रयत्नेन ज्ञातव्या देशिकोत्तमैः ॥
पूर्व्वायां पश्चिमे याम्ये उत्तरायां यथाक्रमम् ।
पृथिव्यादीनि भूतानि बलिष्ठानि विनिर्द्दिशेत् ॥*
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
पञ्चभूतात्मकं देहं ज्ञातव्यञ्च वरानने ॥
अस्थि मांसं त्वचा नाड़ी रोम चैव तु पञ्चमम् ।
पृथ्वी पञ्चगुणोपेता ब्रह्मज्ञानेन भाषितम् ॥
शुक्रशोणितमज्जा च लालामूत्रञ्च पञ्चमम् ।
आपः पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
क्षुधा तृष्णा तथा निद्रा भ्रान्तिरालस्यमेव च ।
तेजःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
धारणं चालनं गन्धं स्पन्दोचनप्रसारणे ।
वायोः पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषिताः ॥
रागद्वेषौ तथा लज्जा भयं मोहश्च पञ्चमः ।
नभःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥*॥
पृथिवीपलपञ्चाशत् चत्वारिंशदप्स्तथा ।
तेजस्त्रिंशद्विजानीयाद्वायोर्विंशतिरेव नभः ॥
पार्थिवे चिरकालेन लाभश्चापे क्षणात् भवेत् ।
जायते पवनात् स्वल्पः सिद्धाऽप्यग्नौ विनश्यति ॥
वह्निवायुक्षते प्रश्ने लाभालाभं वदेद्बुधः ।
परतो वान्यलाभः स्थिरेण च पुरन्दरे ॥
ज्ञातव्यं जीवने शून्यं सिद्धो व्योम्नि विनश्यति ॥
पृथ्व्या पञ्च अपां वेदाः गुणास्तेजो द्विवायुतः ।
नभ एकगुणश्चैव तत्त्वज्ञानमिदं भवेत् ॥
फुत्कारकृत् प्रस्फुटिता विदीर्णा पतिता धरा ।
ददाति सर्व्वकार्य्येषु अवश्यासदृशं फलम् ॥*॥
भरणी कृत्तिका पुष्या अघा पूर्व्वा च फल्गुनी
पूर्व्वभाद्रपदः स्वातिः तेजस्तत्त्वमिति प्रिये ॥
विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्व्वसुः ।
अश्विनी मृगशीर्षा च वायुतत्त्वमुदाहृतम् ॥
पूर्व्वाषाढ़ा तथाश्लेषा मूलमार्द्रा च रोहिणी ।
उत्तरभाद्रप्रदा तोयतत्त्वं शतभिषा प्रिये ॥
धनिष्ठा रोहिणी ज्येष्ठानुराधा श्रवणा तथा ।
अभिजिच्चोत्तराषाढ़ा पृथ्वीतत्त्वमुदाहृतम् ॥
वहस्वाड़ीस्थितो दूती यत् पृच्छति शुभाशुभम् ।
तत् सर्व्वं सिद्धिमायाति शून्ये शून्यं न संशयः ।
तत्त्वं रामो जयं प्राप्तः सुतत्त्वे च धनक्षयः ।
कौरवा निहताः सर्व्वे युद्धे तत्त्वविपर्य्यये ॥
जन्मान्तरीयसंस्कारात् प्रसादादथवा गुरोः ।
केषाञ्चिज्जायते तत्त्वे वासना विमलात्मनाम् ॥'

अथ पञ्चतत्त्वध्यानम् ।

"लं बीजं धरणीं ध्यायेत् चतुरस्रां सुपीतभाम् ।
सुगन्धं स्वर्णवर्णत्वमारोग्यं देहलाघवम् ॥
वं बीजं वारुणं ध्यायेदर्द्धचन्द्रं शशिप्रभम् ।
क्षुत्पिपासासहिष्णुत्वं जलमध्येषु मज्जनम् ॥
रं बीजं शिखिनं ध्यायेत् त्रिकोणमरुणप्रभम् ।
वह्निप्रपानभोक्तृत्वमातपाग्निसहिष्णुता ॥
यं बीजं पवनं ध्यायेद्वर्त्तुलं श्यामलप्रभम् ।
आकाशगमनादयश्च पक्षिवद्गमनं तथा ॥
हं बीजं गगनं ध्यायेत् निराकारं बहुप्रभम् ।
ज्ञानं त्रिकालविषयमैश्वर्य्यमणिमादिकम् ॥
स्वरज्ञानी नरो यत्र धनं नास्ति ततः परम् ।
स्वरज्ञानेन गमयेत् अनायासफलं भवेत् ॥
सर्व्वञ्च धनमधनं सर्व्वाधिकारसंयुतम् ।
तत्त्वैकेन न सिध्यन्ति तत्त्वहीना यदा नराः ॥

घातं तेन समस्ततीर्थसलिलैः स्वर्ग्यापिथक्रावनि-
र्यज्ञानाञ्च कृतं हि काम्यमखिलं देवाय
सन्तर्पिताः ।
संसाराच्च समुद्धृताः स्वपितरः त्रैलक्ष्य-
पूज्योऽप्यसौ
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः
प्राप्नुयात् ।"
इति तत्त्वज्ञानं संपूर्णम् ॥

अथ युद्धप्रकरणम् ।

देव्युवाच ।

"देवदेव महादेव महाज्ञानं स्वरोदयम् ।
त्रिकालविषयज्ञानं कथं भवति शङ्कर: ॥

ईश्वर उवाच ।

अर्थकाण्डं जयप्रश्नं शुभाशुभमिति त्रिधा ।
एतत् त्रिकालविज्ञानं नान्यथा भवति सुन्दरि ॥
तत्त्वे शुभाशुभं कार्यं तत्त्वे जयपराजयौ ।
तत्त्वे समर्घमार्घ्यं तत्त्वे विपदमुच्यते ॥

श्रीदेव्युवाच ।

देवदेव महादेव सर्व्वसंसारतारक ।
किं नराणां परं मित्रं सर्व्वकार्य्यार्थसाधकम् ॥

शिव उवाच ।

प्राण एव परं मित्रं प्राण एव परः सखा ।
प्राणतुल्यः परो बन्धुर्नास्ति नास्ति वरानने ॥

देव्युवाच ।

कथं प्राणस्थितो वायुर्देहे किं प्राणरूपकम् ।
तत्त्वेषु सञ्चरेत् प्राणो ज्ञायते योगिभिः कथम् ॥

शिव उवाच ।

कायानगरमध्ये तु मारुतः क्षितिपालकः ।
भोजने वपने चैव गतिरष्टादशाङ्गुला ॥
प्रवेशे दशभिः प्रोक्तो निर्गमे द्वादशाङ्गुलः ।
प्राणस्थे तु गतिर्देवि स्वभावाद्दादशाङ्गुला ॥
गमने च चतुर्विंशा नेत्रवेदाङ्गुलावने ।
मैथुने षण्णवत्यस्य शयने च शताङ्गुला ॥
एकाङ्गुलक्षते न्यूने प्राणे निष्क्रामता मता ।
आनन्दस्तु हितायैव स्यात् कविप्रशस्तिकृतौ-
यके ॥

वाचामभिहतार्थे तु दूरदृष्टिस्तु पञ्चमे ।
षष्ठे त्वाकाशगमनं चण्डवेगश्च सप्तमे ॥
अष्टमे सिद्धयश्चाष्टौ नवमे निधयो नव ।
दशमे दशमूर्त्तित्वं क्षयनाशो दशैककै ॥
द्वादशे हंसचारस्य गङ्गामृतरसं पिबेत् ।
आनन्दाग्रे प्राणपूर्णे कस्य भक्ष्यञ्च भोजनम् ॥
एवं प्राणविधिः प्रोक्तः सर्व्वकार्यफलप्रदः ।
ज्ञायते गुरुवाक्येन न विद्याशास्त्रकोटिभिः ॥
प्रातश्चन्द्रो रविः सायं यदि देवान्न लभ्यते ।
मध्याह्नान्मध्यरात्राद्वा परतस्तु प्रवर्त्तते ॥
दूरयुद्धे जयी चन्द्रः समीपे च दिवाकरः ।
वहन्नाड्यां गतः पादे सर्व्वसिद्धिः प्रजायते ॥
यात्रारम्भे विवाहे च प्रवेशे नगरादिके ।
शुभकार्य्येषु सर्व्वेषु चन्द्रचारः प्रशस्यते ॥
अयनतिथिदिनेशः स्वोदयतत्त्वेन युक्तो
यदि वहति कथञ्चित् दैवयोगेन पुंसाम् ।

स जयति रिपुसैन्यं स्तम्भमात्रस्वरेण
प्रभवति न च विघ्नः कोऽपि वस्यापि लोके ॥
जीवलक्षं जीवरक्षां जीवाङ्के परिधाय च ।
जीवो व्रजति यो युद्धे जीवो जयति मेदिनीम् ॥
भूमौ जले च कर्त्तव्यं गमनं शान्तिकर्म्मसु ।
वह्नौ वायौ प्रदीप्ते तु खे पुनर्न भवत्यपि ॥
जीवेन शस्त्रं बध्नीयात् जीवेनैव विकाशयेत् ।
जीवेन प्रक्षिपेत् शस्त्रं युद्धे जयति सर्व्वथा ॥
आक्रम्य प्राणपवनं समागोहेत वाहनम् ।
मन्त्ररत्नं पदं दत्त्वा सर्व्वकार्य्याणि साधयेत् ॥
अपूर्णशत्रुसामग्रीं पूर्णां वा स्ववलं यदा ।
कुरुते पूर्णतत्त्वस्थो जयत्येको वसुन्धराम् ॥
यत्राङ्गे वहते चाङ्गे तस्यामेवार्चयेद्देवता ।
सन्मुखापि दिशा तेषां सर्व्वकार्यफलप्रदा ॥
आदौ तु क्रियते मुद्रा पश्चाद्युद्धं समाचरेत् ।
सर्व्वा मुद्रा कृता येन तेषां सिद्धिर्न संशयः ॥

चन्द्रप्रवाहेऽथ सूर्य्यवाहे
भटाः समायान्ति च युद्धकामाः ।
समीक्ष्यस्तत्त्वविदा प्रयातो
वा शून्यता वा प्रतिकूलदृष्टा ॥

यद्दिशं वहते वायुर्युद्धं तद्दिशि दापयेत् ।
जयत्येव न सन्देहः शक्रोऽपि यदि वाग्रतः ॥
यत्र नाड्यां वहेद्वायुस्तटस्थः प्राणमेव च ।
आक्रम्य गच्छेत् कर्णान्तं जयत्येव पुरन्दरम् ॥
प्रतिपक्षप्रहारेभ्यः पूर्णाङ्गं योऽभिरक्षति ।
न तस्य रिपुभिः शस्त्रैर्बलिभिरपि हन्यते ॥
अङ्गुष्ठतर्जनीवक्त्रे पादाङ्गुष्ठस्तथाध्वनि ।
युद्धकाले च कर्त्तव्यं लक्षयोद्धा जयो भवेत् ॥
निशाकरे रवौ चारे मध्ये यस्य समीरणः ।
स्थितो रचेत् दिनान्यानि नवाकाङ्क्षी नरः
सदा ॥
स्नानप्रेषणकालेषु दूतो जयति वाञ्छितम् ।
तस्यार्थाः सिद्धिमायान्ति निर्गमे नैव सुन्दरि ॥
लाभादोऽपि कार्य्याणि पृष्टानि कौर्त्तितानि च
जीवे विशति सिध्यन्ति हानिर्निःसरणे भवेत् ॥
नदि दत्त्वा स्वकीया च स्त्रियं वामा प्रशस्यते ।
कुम्भकं युद्धकाले च तिस्रो नाड्यश्च या गतिः ॥
इकारस्य सकारस्य विना भेदं स्वरः कथम् ।
सोऽहं हंसपदेनैव जीवो जपति सर्व्वदा ॥
शून्याङ्गं पूरितं कृत्वा जीवाङ्गं गोपयेद् यदि ।
जीवाङ्गे घातमाप्नोति शून्याङ्गं रक्षते सदा ॥
वामे वाप्यथवा दत्ते यदि पृच्छति पृच्छकः ।
तत्र घातो न जायेत शून्ये घातं विनिर्दिशेत् ॥
भूतत्त्वेनोदरे घातः पादस्थानेऽम्बुमा भवेत् ।
उरःस्थानेऽग्नितत्त्वेन करस्थाने च वायुना ॥
शिरसि व्योमतत्त्वेन कृत आघातनिर्णयः ।
एवं पञ्चविधो घातः स्वरशास्त्रे प्रकाशितः ॥
युद्धकाले यदा चन्द्रः स्थायी जयति निश्चितम् ।
यदा सूर्य्यप्रवाहस्तु वादी विजयते तथा ॥
जयमध्ये तु सन्देहो नाड़ीमध्ये तु लक्षयेत् ।
सपुङ्खायां गतः प्राणं समरे शत्रुसङ्कटे ॥
यस्यां नाड्यां भवेच्चारस्तादृशं युद्धमाश्रयेत् ।

तेनासौ जयमाप्नोति नात्र कार्य्या विचारणा ॥
यदि संग्रामकाले तु वामनाड्यां सदा वहेत् ।
स्थायिनो विजयं विन्द्यात् रिपवश्चादयोऽपि च ॥
यदि संग्रामकाले तु सूर्य्येस्तु व्याहतो वसेत् ।
तदा जयी जयं विन्द्यात् स देवासुरमानवात् ॥
रणे हरति शक्रस्य वामायां प्रविशेश्वरः ।
स्थानं हित्वावचाराभ्यां जयं सूर्य्येण धावति ॥
योधहयगजे प्रश्ने पूर्णस्य प्रथमो जयः ।
रिक्ते चैव हितीयस्तु जयो भवति नान्यथा ॥
पूर्णनाड़ीगतः पृष्ट शून्याङ्गश्च तदग्रतः ।
शून्यस्थाने कृतः शत्रुर्म्रियते नात्र संशयः ॥
वामचारे समं नाम यस्य तस्य जयो भवेत् ।
पृच्छको दक्षिणे भागे वजयी विषमाक्षरः ॥
यदा पृच्छति चन्द्रस्थस्तदा सन्मानमादिशेत् ।
पृच्छेद्यदा च सूर्य्यस्थस्तदा जानीहि विग्रहम् ॥
पार्थिवे च समं युद्धं सिद्धिर्भवति वारुणे ।
एकौ युद्धे भयस्तस्य मृत्युर्वायौ च नाभसे ॥
नैमित्तिकप्रमादाद्वा यदा न ज्ञायतेऽनिलः ।
प्रश्नकाले तदा कुर्य्यात् द्वन्द्वं यत्नेन बुद्धिमान् ॥
निश्चलां धारणां कृत्वा पृच्छं हस्तात् निपातयेत् ।
पूर्णाङ्गे पुष्पपतनं शून्ये वा तत्फलं वदेत् ॥
तिष्ठन्नुपविशन् वापि प्राणमाकर्षयेन्निजम् ।
मनोभङ्गमकुर्व्वाणः सर्व्वकार्य्येषु पूजितः ॥
न कालो विविधं घोरं न शस्त्रं न च पन्नगाः ।
न शत्रुव्याधिचौराद्याः मृत्युस्त्रं नाशितुं क्षमाः ॥
जीवेन स्थापयेदायुं जीवेनारभयेत् पुनः ।
जीवेन क्रीड़ते नित्यं द्यूतं जयति सर्व्वदा ॥
सर्व्वसिद्धिप्रदो युद्धे स्वरज्ञानं विना नृपः ।
स्वरज्ञानबलादग्रे निष्फलं कोटिधा भवेत् ।
इह लोके परत्रैव स्वरज्ञानी बली सदा ॥
दशशतायुतं सत्त्वं देवाधिपबलं क्वचित् ।
शतक्रतुसुरम्द्राणां बलं कोटिगुणं भवेत् ॥
ॐकारः सर्व्ववर्णानां ब्रह्माण्डे भास्करो यथा ।
मर्त्यलोके तथा पूज्यः स्वरज्ञानो पुमानपि ॥
एकाक्षरप्रदातारं नाड़ीभेदविवेदकम् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चानृणी भवेत् ॥

देव्युवाच ।

परस्परं मनुष्याणां युद्धे प्रोक्तो जयस्त्वया ।
यमयुद्धे समुत्पन्ने मनुष्याणां कथं जयः ॥

ईश्वर उवाच ।

ध्यायेद्देवं स्थिरे जीवे जुहुयात् जीवसङ्गमे ।
इष्टसिद्धिर्भवेत्तस्य महालाभो जयो भवेत् ॥
निराकारात् समुत्पन्नं साकारं सकलं जगत् ।
तत् साकारं निराकारे ज्ञाने भवति तन्मयम् ॥"

इति युद्धप्रकरणम् ॥

श्रीदेव्युवाच ।

"नरयुद्धं यमयुद्धं श्रुतं प्रोक्तं महेश्वर ।
इदानीं देवदेवीनां वशीकरणकं वद ॥

ईश्वर उवाच ।

चन्द्रं सूर्य्येण चाक्रम्य स्थापयेज्जीवमण्डले ।
आजन्मवशगा वामा कथितोऽयं तपोधनैः ॥
जीवेन गृह्यते जीवो जीवो जीवस्य दीयते ॥

जीवस्थाने गतो जीवो बालाजीवान्तवश्यकृत् ।
चन्द्रं पिबति सर्य्येण सूर्य्यं पिबति चन्द्रतः ।
अन्योन्यकालभावेन जीवेदाचन्द्रतारकम् ॥
एतज्जानाति यो योगी एतत् पठति नित्यशः ।
सर्व्वदुःखविनिर्म्मुक्तो लभते वाञ्छितं फलम् ॥
मेरोर्व्वङ्के वहते नाड़ी तन्नाड़ीबोधनं कुरु ।
करे ब्रह्मा स्वमुष्कञ्च जरणं जयते युवा ॥
उभयोः कुम्भकं कृत्वा मुखे ग्रासं निपीयते ।
निश्चला च यदा नाडी देवकन्यावशं कुरु ॥
रात्रौ च यामवेलायां प्रसुप्ते कामिनीजने ।
ब्रह्मभोजं पिबेद् यस्तु बालाजीवहरो नरः ॥

इति देवीवश्यप्रकरणम् ॥*॥

अष्टाक्षरं जपित्वा तु तस्मिन् काले ऋतौ सति ।
तत्क्षणं दीयते चन्द्रो मोहमायाति कामिनी ॥
शयने वा प्रसङ्गे वा सुखमालिङ्गनेऽपि वा ।
यः सूर्य्येण पिबेच्चन्द्रं स भवेन्मकरध्वजः ॥
शिवमालिङ्गते शक्त्या प्रसङ्गे दक्षिणेऽपि वा ।
तत्क्षणाद्यपेदद्वस्तु मोहयेत् कामिनीशतम् ॥
मनवयवपञ्चवारात् सङ्क्रांस्तु सूर्य्यगे ।
चन्द्रे त्रिसूर्य्यषट् कृत्वा वश्या भवति कामिनी ॥
सूर्य्यचन्द्रौ समाकृष्य सर्पाकान्त्याधरोष्ठयोः ।
महापद्मे मलं स्पृष्ट्वा पानं वारमिदं चरेत् ।
आधारपेति पवस्य यादग्विद्रावगं गता ।
पश्याज्जायति वेलायां पीड्यते मलचक्षुषो ॥
अनेन विधिना कामी वशयेत् सर्व्वकामिनीम् ।
इदं न वाच्यमन्यस्मिन्निजाज्ञा परमेश्वरि ॥

इति स्त्रीवश्यप्रकरणम् ॥*॥

अथ गर्भप्रकरणम् ।

ऋतुकालभवा नारी पञ्चमेऽह्नि यदा भवेत् ।
सूर्य्याचन्द्रममोर्योगे सेवनात् पुत्रसम्भवः ॥
शङ्खवल्लो गवां दुग्धं पृथ्व्यापो वहते यदा ।
भर्त्तारमे वहेद्वायुं मर्य्यं देहि त्रिभिर्व्वचः ॥
ऋतुस्नाता पिबेन्नारी ऋतुदानञ्च योजयेत् ।
रूपलावण्यसम्पन्नो नरसिंहः प्रसूयते ॥
सुषुम्ना सूर्य्यगन्धेन ऋतुदानञ्च योजयेत् ।
अङ्गहीनः प्रमान् यस्तु जायते क्षयविग्रहः ॥
विषमाह्नि दिवा रात्रौ विषमाह्नि दिनाधिपः ।
चन्द्रनेत्राग्नितत्त्वेषु वन्ध्या पुत्रमवाप्नुयात् ॥
रतारम्भे रविः पुंसां सुरतान्ते सुधाकरः ।
अनेन क्रमयोगेन नादत्ते दैवदण्डकः ।
रतारम्भे रविः पुंसां स्त्रियाश्चैव सुधाकरः ।
उभयोः सङ्गमे प्राप्ते वन्ध्या पुत्रमवाप्नुयात् ॥
चन्द्रनाड़ी वहेत् प्रश्ने गर्भे कन्या तदा भवेत् ।
सूर्य्ये भवेत्तदा पुत्रो शून्ये गर्भो निहन्यते ॥
चन्द्रे स्त्री पुरुषः सूर्य्ये मध्यमार्गे नपुंसकः ।
गर्भप्रश्ने यदा दूतः तदा पुत्रः प्रजायते ॥
पृथ्व्यां पुत्री जले पुत्रः कन्यका तु प्रभञ्जने ।
तेजसा गर्भपातः स्यात् नभस्यपि नपुंसकम् ॥
शून्ये शून्यं युगे युग्मं गर्भपातस्तु संक्रमे ।
सूर्य्यभागे क्षते पुत्रश्चन्द्रचारे तु कन्यका ॥
विषुवे गर्भपातः स्यात् भावी वाथ नपुंसकः ।
तत्त्वे वित्तं विजानाति कथितं तत्र सुन्दरि ॥

गर्भाधानं भवते स्याच्च दुःखी
दिग्याख्यातो वारुणे सौख्ययुक्तः ।
गर्भस्रावो खल्पजीवी च वह्नौ
भोगी भव्यः पार्थिवेनार्थयुक्तः ॥
धनवान् मोक्ष्यसंयुक्तो भोगवान् गर्भसंस्थितः ।
स्थास्नियं वारुणे तत्त्वे व्योम्नि गर्भं निहन्यते ॥
माहेयेषु सुतोत्पत्तिर्व्वारुणे दुहिता भवेत् ।
शेषेषु गर्भहानिः स्यात् जातमात्रस्य वा मृतिः
रविमध्यगतश्चन्द्रश्चन्द्रमध्यगतो रविः ।
ज्ञातव्यं गुरुतः शीघ्रं न विद्याशास्त्रकोटिभिः ॥

इति गर्भप्रकरणम् ॥*॥

अथ संवत्सरप्रकरणम् ।

चैत्रशुक्लप्रतिपदि प्रातस्तत्त्वविभेदतः ।
पश्येद्दिनक्षणो योगी दक्षिणे चोत्तरायणे ॥
चन्द्रस्योदयवेलायां वहमानोऽथ तत्त्वतः ।
पृथिव्यापस्तथा वायुः सुभिक्षं सर्व्वशस्यजम् ॥
तेजो व्योम्नि भय घोरं दुर्भिक्षं कालतत्त्वतः ।
एवं तत्त्वफलं ज्ञेयं वर्षे मासे दिने तथा ॥
पृथिव्यादिकतत्त्वेन दिनमामाब्दजं फलम् ।
शोभनञ्च तथा दृष्टं व्योममारुतयङ्किभिः ॥
मध्यमा भवति क्रूरा दुष्टा च सर्व्वकर्म्मसु ।
देशभङ्गमहारोगक्लेशकष्टादिदुःखदा ॥
मेषसंक्रान्तिदिवसे स्वरभेदं विचारयेत् ।
सम्वत्सरफलं ब्रूयात् लोकानां तत्त्वचिन्तकः ॥
सुभिक्षं राष्ट्रवृद्धिः स्यात् वह्नेरस्या वसुन्धरा ।
बहुवृष्टिस्तथा सौख्यं पृथ्वीतत्त्व वहेद्यदि ॥
अतिवृष्टिः सुभिक्षं स्यादारोग्यं सौख्यमेव च ।
बहुशस्या तथा पृथ्वी जलतत्त्वं वहेद्यदि ॥
दुर्भिक्षं राष्ट्रभङ्गः स्याद्रोगोत्पत्तिस्तु दारुणा ।
अस्यादल्पतरा वृष्टिरग्नितत्त्वं वहेद्यदि ॥
ततुपातोपद्रवा भीतिरल्पवृष्टिः क्षुरीतयः ।
मेषसंक्रान्तिवेलायां वायुतत्त्वं वहेद्यदि ॥
उष्णतापज्वरा भीतिरल्पा वृष्टिः चिरी
भवेत् ।
मेषसंक्रान्तिवेलायां व्योमतत्त्वं वहेद्यदि ॥
तत्रापि शून्यता ज्ञेया शस्यादीनां सुखस्य च ।
पूर्णे प्रवेशने श्वासे स्वस्वतत्त्वेन निर्दिशेत् ॥
सूर्य्ये चन्द्रेऽन्यथाभूते संग्रहः सर्व्वनिर्दिशेत् ।
विषमे वह्नितत्त्वस्य जायते केवलं नभः ॥
तत् कुर्य्याद्दस्तु संग्राह्यं हिमासे च महार्घता ।
स्वरज्ञानं शिवः पश्येन्नक्षोपतिस्तथा भवेत् ॥
एकत्र शरीरं यस्य सुखं तस्य सदा भवेत् ।
नाड़ीत्रयं विजानाति तत्त्वज्ञानं तथैव च ॥
नैव तेन भवेत्तुल्यं लक्षकोटिरसायनम् ।
रवौ भंक्रमणे नाड़ी गलान्ते च प्रवर्त्तते ॥
सलिले वह्नियोगेऽपि शैरवं जगतीतले ।

इति संवत्सरफलम् ॥*॥

अथ रोगप्रकरणम् ।

मङ्गीतत्त्वे स्वरोगश्च जले च जलमातरः ।
रवौ चारे तेजस्तत्त्वे वायुतत्त्वे च शाकिनी ॥
शून्यतत्त्वेन रोगश्च पित्तदोषसमुद्भवः ।
दानपुण्यं द्विजातीनां पिण्डश्राद्धं विधीयते ॥

आदौ शून्यगतं पृच्छेत् पश्चात् पूर्णो विशेद्
यदि ।
मूर्च्छितोऽपि ध्रुवं जीवेत् यदर्थं परिपृच्छति ॥
चन्द्रस्थाने स्थितो जीवः सूर्य्यस्थाने च पृच्छति ।
तदा प्राणविनिर्म्मुक्तो यदि वैद्यशतैर्वृतः ॥
पिङ्गलायां स्थितो जीवो वामे दूतस्य पृच्छति ।
तदापि म्रियते रोगी यदि त्राता महेश्वरः ॥
दक्षिणेन यदा वायुर्दुःखं रौद्राक्षरं वदेत् ।
तदा जीवति जीवोऽसौ चन्द्रे समफलं भवेत् ॥
जीवाकारञ्च वा धृत्वा जीवाकारं विलोकयन् ॥
जीवस्थो जीवितं पृच्छेत्तस्माज्जीवन्ति ते
ध्रुवम् ॥
प्रश्ने वाधः स्थितो जीवस्तदा जीवो हि जीवति ।
ऊर्द्धचारगतो जीवो याति जीवो यमालयम् ॥
विपरीताक्षरं प्रश्ने रिक्तायां पृच्छको यदि ।
विपर्य्ययञ्च विज्ञेयं विषमस्योदये सति ॥
यस्मिन् भागे चरेत् जीवस्तस्यः परिपृच्छति ।
तदा जीवति जीवोऽसौ यदि रोगैः प्रपीड़ितः ॥
वातोदये वातकरञ्च भक्ष्यं
पित्तोदये पित्तकरञ्च भक्ष्यम् ।
श्लेष्मोदये श्लेष्मकरञ्च भक्ष्यं
पुंसि प्रभुक्ते प्रभवन्ति रोगाः ॥
पक्षस्य भूतस्य विपर्य्ययेण
रोगाभिभूतिर्भवतीह पुंसाम् ।
तयार्द्धयोर्बन्धुसुहृद्विपत्तिः
पक्षत्रये व्यत्ययतो मृतिः स्यात् ॥

इति रोगज्ञानम् ॥*॥

अथ कालज्ञानम् ।

मासादौ वत्सरादौ च पक्षादौ च यथाक्रमम् ।
क्षयं कालं परीक्षेत वायुचारवशात् सुधीः ॥
पञ्चभूतात्मकं देहं शशी खेहेन सिञ्चति ।
रक्षयेत् सूर्य्यवातेन तेन जीवः स्थिरो भवेत् ॥
मारुतं बन्धयित्वा तु सूर्य्यं बन्धयते यदि ।
अभ्यासाज्जीवते जीवः सूर्य्यकालेऽपि वर्त्तते ॥
गगनादवते चन्द्रः कायापद्मानि सिञ्चति ।
कर्म्मयोगः सदाभ्यासात् रमते शशिनः सुवात् ॥
शशाङ्कं वारयेद्वामे दिवा वार्य्यो दिवाकरः ।
इत्यभ्यासरतो योगी स योगी नात्र संशयः ॥
दिवा न पूजयेत् लिङ्गं रात्रौ देवीं न पूजयेत् ।
रहसि ज्ञानजनकं पञ्चसूत्रे समन्वितम् ॥
अहोरात्रं यदैकत्र वहते यस्य मारुतः ।
तदा तस्य भवेदायुः संपूर्णं वत्सरद्वयम् ॥
अहोरात्रद्वयं यस्य पिङ्गलायां सदागतेः ।
तस्य वर्षद्वयं ज्ञेयं जीवितं तत्त्ववेदिभिः ॥
विरात्रं वहते यस्य वायुरेकपुटे स्थितः ।
वत्सरं यावदायुः स्यात् प्रवदन्ति मनीषिणः ॥
रात्रौ चन्द्रो दिवा सूर्य्यो वहेद्यस्य निरन्तरम् ।
विजानीयात्तस्य मृत्युः षण्मासाभ्यन्तरे सुधीः ॥
एकादिषोड़शाहानि यदि भानुर्निरन्तरम् ।
वहेद्यस्य च वै मृत्युः त्रिपक्षेण च मासिकैः ॥
सम्पूर्णं वहते सूर्य्यश्चन्द्रमा नैव दृश्यते ।
पक्षेण जायते मृत्युः कालज्ञानेन भाषितम् ॥

सम्पूर्णं वहते चन्द्रः सूर्य्यो नैव च दृश्यते ।
मासेन दृश्यते मृत्युः कालज्ञानेन भाषितम् ॥
मूत्रं पुरीषं वायुश्च समकालं प्रजायते ।
तदासौ चलितो ज्ञेयो दशाहे म्रियते ध्रुवम् ॥
एवं चन्द्रप्रवाहस्य सुखनाभजयस्तथा ।
सूर्य्यचन्द्रप्रणाशे तु मध्यो मृत्युर्न संशयः ॥
अरुन्धती ध्रुवश्चैव विष्णोस्त्रीणि पदानि च ।
आयुर्हीना न पश्यन्ति चतुर्थं मातृमण्डलम् ॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते ।
भ्रुवोर्मध्ये विष्णुपदं तारकं मातृमण्डलम् ॥
नवध्रुवः मप्तमो वा पञ्चतारा त्रिनासिका ।
जिह्वामेकादिनं प्रोक्तं म्रियते मानवो ध्रुवम् ।
कोणमण्डूकुलीभ्यान्तु किञ्चित् पीड्य निरी-
क्षयेत् ।
यदा न दृश्यते बिन्दुर्दशाहेन जनो मृतः ॥
इति कालज्ञानम् ॥*॥
इडा गङ्गेति विज्ञेया पिङ्गला यमुना नदी ।
मध्ये सरस्वती विद्यात् प्रयागादि समन्ततः ॥
आदौ साधनमाख्यातं सद्यःप्रत्ययकारकम् ।
बद्धपद्मासनो योगी बन्धयेदुड्डियानकम् ॥
पूरकः कुम्भकश्चैव रेचकश्च ह्यनौपकः ।
ज्ञातव्यो योगिभिर्नित्यं देहसंसिद्धिहेतवे ॥
पूरकः कुरुते पुष्टीर्धातुसाम्यं तथैव च ।
कुम्भकः स्तम्भनं कुर्य्यात् जीवरक्षाविवर्द्धनम् ॥
रेचको हरते पापं कुर्य्यादुयोगपदं व्रजेत् ।
पश्चात् संग्रामवत्तिष्ठेत् पद्मे बन्धे च कारयेत् ॥
कुम्भयेत् सहजं वायुं यथाशक्त्या प्रयत्नतः ।
रेचयेच्चन्द्रमार्गेण सूर्य्येण पूरयेत् सुधीः ॥
चन्द्रं पिबति सूर्य्यश्च सूर्य्यं पिबति चन्द्रमाः ।
अन्योन्यकालभावेन जीवेदाचन्द्रतारकम् ॥
स्वीयाङ्गे वहते नाड़ी तन्नाड़ीरोधनं कुरु ।
मुखबन्धममुञ्चन् वै पवनं जायते युवा ॥
मुखनासाक्षिकर्णानामङ्गुलीभिर्निरोधयेत् ।
तत्त्वोदयमिति ज्ञेयं सम्मुखीकरणं प्रिये ॥
तस्य रूपं गतिः स्वादो मण्डलं लक्षणन्त्विदम् ।
यो वेत्ति वा नरो लोके स तु शूद्रोऽपि योग-
वित् ॥
निराशीर्निर्ममो योगी न किञ्चिदपि चिन्तयेत् ।
यामनासुमना कृत्वा कालं जयति लीलया ॥
विश्वस्य वैश्विका शक्तिर्नेत्राभ्यां परिदृश्यते ।
तत्त्वं तु मनो यस्य यामभावं भवेदिह ॥
तस्यायुर्व्वर्द्धते नित्यं घटिका त्रिप्रमाणतः ।
शिवेनोक्तं पुरा तन्त्रे सिद्धस्य गुणगह्वरम् ॥
बद्ध्वा पद्मासनस्थो गुदपवनलयं मंनिरुध्योर्द्ध-
मुच्चैः
प्राणं रन्ध्रेण कुम्भत्वयजितमनिलं प्राणशक्त्या
निरुध्य ।
एकीभूतं सुषुम्नाविवरमुखगतं ब्रह्मरन्ध्रे च
नीत्वा
निःचिन्त्याकाशमार्गे शिवचरणरता यान्ति ते
केऽपि धन्याः ॥*॥
एतज्ज्ञानाति यो योगी एतत् पठति नित्यशः ।
सर्व्वदुःखैर्विनिर्म्मुक्तो लभते वाञ्छितं फलम् ॥
स्वरज्ञानं गिरौ यस्य लक्ष्मीः करतले भवेत् ।
एतत्तु शरीरे यस्य सुखं तस्य सदा भवेत् ॥
प्रणवः सर्व्ववेदानां ब्रह्माण्डे भास्करो यथा ।
सर्व्वलोके तथा पूज्यः स्वरज्ञानी पुमानपि ॥
नाड़ीत्रयं विजानाति तत्त्वज्ञानं तथैव च ।
नेत्रेण भवेन्मुख्यं लक्षकोटिरसायनम् ॥
एकाक्षरप्रदातारं नाड़ीभेदनिवेदकम् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चानृणो भवेत् ॥
स्वरस्तत्त्वं तथा युद्धं देववश्यं स्त्रियस्तथा ।
गर्भाव्दरोगकालाख्यं नवप्रकरणान्वितम् ॥
एवं प्रवर्त्तितं लोके सिद्धिदं सिद्धयोगिभिः ।
आचन्द्रार्कं महीं जीयात् पठनात् सिद्धि-
दायकम् ॥
सुखासने समासीनं निद्रामाहारमल्पकम् ।
चिन्तयेत् परमात्मानं यदीच्छेत्तद्विशिष्यति ॥"
इति शिवगौरीसंवादे नवप्रकरणान्वितपवन-
विजयं नाम स्वरोदयं समाप्तम् ॥

स्वर्गः, पुं, (स्वरिति गीयते इति । गै+कः । यद्वा, सुष्ठु अर्ज्यते इति । अर्ज अर्जने+घञ् । गृज्वादित्वात् कुत्वम् ।) देवतानामालयः । तत्पर्य्यायः । स्वः २ नाकः ३ त्रिदिवः ४ त्रिदशालयः ५ सुरलोकः ६ द्यौः ७ द्यौः ८ त्रिपिष्टपम् ९ । इत्यमरः । १ । १ । ६ ॥ मन्दरः १० अवरोहः ११ गौः १२ रमतिः १३ फलोदयः १४ । इति जटाधरः ॥ देवलोकः १५ स्वर्लोकः १६ ऊर्द्धलोकः १७ सुखाधारः १८ सौरिकः १९ शक्रभुवनम् २० दिवानम् २१ । इति शब्दरत्नावली ॥*॥ तस्य गुणदोषा यथा,—

सुबाहुरुवाच ।
"स्वर्गस्य मे गुणान् ब्रूहि साम्प्रतं द्विजसत्तम ।
एतत् सर्व्वं द्विजश्रेष्ठ करिष्यामि न संशयः ॥
जैमिनिरुवाच ॥
नन्दनादीनि दिव्यानि रम्याणि विविधानि च ।
तत्रोद्यानानि पुण्यानि सर्व्वकामशुभानि च ॥
सर्व्वकामफलैर्वृक्षैः शोभितानि समन्ततः ।
विमानानि सुदिव्यानि परितान्यप्सरोगणैः ॥
सर्व्वत्रैव विधिवाणि कामगानि रसानि च ।
तरुणादित्यवर्णानि मुक्ताजालान्तराणि च ॥
चन्द्रमण्डलशुभ्राणि हेमशय्यासनानि च ।
सर्व्वकामसमृद्धाश्च सुखदुःखविवर्जिताः ॥
नराः सुकृतिनस्ते तु विचरन्ति यथासुखम् ।
न तत्र नास्तिका यान्ति न स्तेया नाजितेन्द्रियाः ॥
न नृशंसा न पिशुनाः कृतघ्ना न च मानिन ।
सत्यास्तपःस्थिताः शूरा दयावन्तः क्षमापराः ॥
यज्वानो दानशीलाश्च तत्र गच्छन्ति ते नराः ।
न रोगो न जरा मृत्युर्न शोको न हिमादयः ॥
न तत्र क्षुत्पिपासा च कस्य ग्लानिर्न दृश्यते ।
एते चान्ये च बहवो गुणाः सन्ति च भूपते ॥
दोषास्तत्रत्य ये सन्ति तान् शृणुष्व च साम्प्रतम् ।
शुभस्य कर्म्मणः कृत्स्नं फलं तत्रैव भुज्यते ।
न चात्र क्रियते भूयः सोऽत्र दोषो महान् श्रुतः ॥
असन्तोषश्च भवति दृष्ट्वा दानां परश्रियम् ।
संग्रामे कर्म्मणामन्त महमा पतनं तथा ॥
इह यत् क्रियते कर्म्म फलं तत्रैव भुञ्जते ।
कर्म्मभूमिरियं राजन् फलभूमिस्त्वसौ स्मृता ॥"
इति पाद्मे भूखण्डे ९० अध्यायः ॥
अन्यत् वह्निपुराणे शिवेरुपाख्याननामाध्याये
मात्स्ये १०३ । १०४ अध्याययोरपि द्रष्टव्यम् ॥
अपि च ।
सुनन्द उवाच ।
शृणु राजन् प्रवक्ष्यामि विष्णोरद्भुतकर्म्मणः ।
विराड़्रूपस्य संस्थानमाख्यानं महदद्भुतम् ॥
यावतो भू समहिष्टा समुद्रादिकानना ।
प्रतिभाता महाराज किरणैश्चन्द्रसूर्य्ययोः ॥
वियच्च तावदुपरि विस्तारपरिमण्डलम् ।
पञ्चविंशतिकोट्यस्तु योजनानान्तु तत्स्मृतम् ॥
नवतीनां सहस्राणि योजनानि महीपते ।
भूमेरूर्द्धञ्च लोकानां सिद्धचारणसत्तमाम् ॥
ये च विद्याधरा यक्षरक्षोगन्धर्व्वकिन्नराः ।
भूतप्रेतपिशाचाश्च तेषां तत् स्थानमीरितम् ॥
ततो राहुर्महाबाहो चयोदशसहस्रकम् ।
योजनानां प्रविस्तारं मण्डलं तस्य कथ्यते ॥
स्मरन् वैरं पुरा प्राप्तं यः पर्व्वणि महाग्रहः ।
ग्रासाय धावति क्रोधात् पुण्यवन्तौ महीपते ॥
तदैव भगवच्चक्रं सहस्रार्कोपमद्युति ।
उपतिष्ठति तन्नीत्वा पुनरेव निवर्त्तते ॥
उपरागं वदन्त्येवं पुण्यकालस्य कथ्यते ।
लक्षयोजनतो भानुर्भूमेरेष व्यवस्थितः ॥
भानोः सकाशादुपरि लक्षे लक्ष्मः क्षपाकरः ।
नक्षत्रमण्डलं चन्द्राल्लक्षयोजनमुच्छ्रितम् ॥
नक्षत्रमण्डलात् सौम्य उपरिष्टाद्विलक्षतः ।
बुधात् शुक्रो द्विलक्षे तु शुक्राद्भौमो द्विलक्षके ॥
मङ्गलादुपरिष्टाच्च गौण्यतिर्लक्षकद्वये ।
द्विलक्षयोजनोत्सेधः सौरिर्देवपुरोहितात् ॥
शतायुतसमुच्छ्रायं सौरेः सप्तर्षिमण्डलम् ।
सप्तर्षिभ्यः सहस्राणां शतादूर्द्धं ध्रुवस्थितिः ॥
पादगम्यं हि यत्किञ्चिदस्त्यस्मिन् धरणीतले ।
तद्भूर्लोक इति ख्यातं शाकद्वीपादिकाननम् ॥
भूर्लोकाच्च भुवर्लोकः सूर्य्यादिध्रुवदीरितः ।
आदित्यादाध्रुवं राजन् स्वर्लोकः कथ्यते बुधैः ॥
महर्लोकः क्षितेरूर्द्धमेककोटिप्रमाणतः ।
कोटिद्वये वर्त्तमानो जनो भूर्लोकतो नृप ॥
उपरिष्टात् क्षितेरष्टौ कोट्यः सत्यमीरितम् ।
सत्यादुपरि वैकुण्ठो योजनानां प्रमाणतः ॥
भूर्लोकात् परिसंख्यातः कोटिरष्टादश प्रभो ।
यत्रास्ते श्रीपतिः साक्षात् सर्व्वेषामभयप्रदः ॥
वैकुण्ठादुत्तरे शैवो लोकः षोड़शकोट्यः ।
तिर्य्यगेव महाराज कैलासाख्यस्तु पर्व्वतः ॥
पार्व्वत्या सहितः शम्भुर्यत्रास्ते स्वगणैर्वृतः ॥"
इति पाद्मे स्वर्गखण्डभूरादिलोकवर्णनं ६ अः ॥
स्वर्गस्वरूपं कर्म्मविशेषेण स्वर्गविशेषगमनञ्च
यथा,—

सूत उवाच ।
"स्वर्गस्थानं महापुण्यं प्रोच्यमानं निबोध मे ।
भारते कृतपुण्यानां देवानामपि चालयम् ॥
मध्ये पृथिव्यामष्टौन्द्री भास्वान् मेरुर्हिरण्मयः ।
योजनानां सहस्राणि चतुरशीतिः समुच्छ्रितः ॥
प्रविष्टः षोड़शाधस्ताद्धरण्यां धरणीधरः ।
तावत्प्रमाणा पृथिवी पर्व्वतस्य समन्ततः ॥
तस्य शृङ्गत्रयं मूर्द्धि स्वर्गो यत्र प्रतिष्ठितः ।
नानाद्रुमलताकीर्णं नानारत्नोपशोभितम् ॥
मध्यगं पश्चिमं पूर्व्वं मेरोः शृङ्गाणि त्रीणि वै ।
प्रयुतोच्छ्रितमात्राणि हे शृङ्गे तस्य मध्यतः ॥
मध्यस्थं स्फाटिकं शृङ्गं वैदूर्य्यकरकामयम् ।
इन्द्रनीलमयं पूर्व्वं माणिक्यं पश्चिमं स्मृतम् ॥
योजनानां सहस्राणि नियुतानि चतुर्दश ।
उच्छ्रितं मध्यगं शृङ्गं स्वर्गो यत्र प्रतिष्ठितः ॥
प्रयुतान्तरितं शृङ्गं मूर्द्धि ऋक्षाकृति स्थितम् ।
पूर्व्वपश्चिमशृङ्गाणां सकलं मध्यमस्य च ॥
त्रिपिष्टपो नाकपृष्ठो अक्षरः शान्तिनिर्व्वृतौ ।
आनन्दोऽथ प्रमोदश्च स्वर्गाः शृङ्गे च मध्यमे ॥
श्वेतश्च पौष्टिकश्चैव उपशोभनमञ्जयौ ।
आह्लादः स्वर्गराजश्च स्वर्गाः शृङ्गे तु पश्चिमे ॥
निर्म्मलो निरहङ्कारः सौभाग्ययातिनिर्मलः ।
सौख्यश्च निर्व्वृतिश्चैव पुण्याहश्च तथा द्विज ॥
स्वर्गावेते द्विजश्रेष्ठ पूर्व्वशृङ्गे समर्थिताः ।
एकविंशति ये स्वर्गा निर्दिष्टा मेरुमूर्द्धनि ॥
अहिंसादानकर्त्तारो यज्ञानां तपसां तथा ।
तेषु तेषु वसन्ति स्म जनाः क्रोधविवर्जिताः ॥
जलप्रवेशो चानन्दः प्रमोदं वह्निसाहसः ।
शृगुप्रपाते सौख्यस्तु रणे चैवास्य निर्म्मलः ॥
अनशने तु सम्प्राप्ते मृतो गच्छेत्त्रिविष्टपम् ।
क्रतुयाजी नाकपृष्ठमग्निहोत्री च निर्व्वृतिम् ॥
तड़ागकूपकर्त्ता च लभते पौष्टिकं द्विज ।
सौवर्णदायी सौभाग्यं लभेत् स्वर्गं महातपाः ॥
शीतकाले महावह्निं प्रज्वालयति यो नरः ।
सर्व्वसत्त्वहितार्थाय स्वर्गं चाप्सरसं लभेत् ॥
हिरण्यगोप्रदानेन निरहङ्कारमवाप्नुयात् ।
भूमिदानेन शुद्धेन लभते शान्तिकं पदम् ॥
रौप्यदानेन शुद्धेन स्वर्गं गच्छति निर्म्मलम् ।
अश्वदानेन पुण्याढ्यं कन्यादानेन मङ्गलम् ॥
द्विजेभ्यस्तर्पणं कृत्वा दत्त्वा वस्त्राणि भक्तितः ।
श्वेतन्तु लभते स्वर्गं यत्र गत्वा न शोचति ॥
कपिलागोप्रदानेन परार्द्धं चानुभूयते ।
गोहस्य प्रदानेन स्वर्गं मन्मथमश्नुते ॥
माघमासे सरित्स्नायी तिलधेनुप्रदस्तथा ।
कूपोपानहदाता च स्वर्गं यात्युपशोभनम् ॥
देवायतनकर्त्ता वै शुश्रूषणपरस्तथा ।
तीर्थयात्रापरश्चैव स्वर्गराज्ये महीयते ॥
एकान्नभोजी यो मर्त्यो नक्तभोजी च नित्यशः ।
उपवासी त्रिरात्राद्यैः शान्तिस्वर्गं शुभं लभेत् ॥
सरित्स्नायी जितक्रोधी ब्रह्मचारी दृढ़व्रतः ।
निर्म्मलं स्वर्गमाप्नोति तथा भूतहिते रतः ॥
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात् ।
येन येन हि भावेन यद्यदानं प्रयच्छति ।
तत्तत् स्वर्गभवाप्नोति यद्यदिच्छति मानवः ॥
यस्तु सर्व्वाणि दानानि ब्राह्मणेभ्यः प्रयच्छति ।
स प्राप्य न निवर्त्तेत दिवं शान्तमनामयम् ॥
शृङ्गन्तु पश्चिमं यच्च ब्रह्मा तत्र स्थितः स्वयम् ।
पूर्व्वशृङ्गे स्वयं विष्णुर्मध्ये चैव शिवः स्थितः ॥*॥
अतः परन्तु विप्रेन्द्र स्वर्गाध्वानमिमं शृणु ।
विमलं विपुलं शुद्धमुपर्य्युपरिसंस्थितम् ।
प्रथमे तु कुमारस्तु द्वितीये मातरः स्थिताः ॥
दृतीये सिद्धगन्धर्व्वास्तुर्य्ये विद्याधरा द्विज ।
पञ्चमे नागराजश्च षष्ठे तु विनतासुतः ॥
सप्तमे दिव्यपितरो धर्म्मराजस्तथाष्टमे ।
नवमे तु तथा दक्ष आदित्या दशमे पथि ॥*॥
भूर्लोकाच्छतसाहस्रमूर्द्धं चरति भास्करः ।
योजनानां सहस्रे द्वे विष्कम्भेन समन्वितः ॥
त्रिगुणः परिणाहेन सूर्य्यबिम्बप्रमाणतः ॥
सोमपूर्य्यां विभावर्य्यां मध्याह्ने चार्य्यमा यदा ।
महेन्द्रस्यामरावत्यां ततस्तिष्ठति भास्करः ॥
मध्याह्ने त्वमरावत्यां यदा भवति भास्करः ।
तदा संयमने याम्ये तदोर्ध्वंस्तु प्रदृश्यते ॥
मेरुं प्रदक्षिणं कुर्व्वन् भात्येवं सविता सदा ।
ध्रुवाधाररथे तिष्ठन् वालिखिल्यादिभिः स्तुतः ॥
सूर्य्यमण्डलमानात्तु द्विगुणं सोममण्डलम् ।
पूर्णे शतसहस्रे तु तस्मान्नक्षत्रमण्डलम् ॥
द्विलक्षे तु बुधस्यापि स्थानं नक्षत्रमण्डलात् ।
तावत्प्रमाणभागे तु बुधस्याप्युशना स्थितः ॥
अङ्गारकोऽपि शुक्रस्य तावन्माने व्यवस्थितः ।
लक्षद्वये तु भौमस्य स्थितो देवपुरोहितः ॥
गौरिर्बृहस्पतेर्योर्द्धं द्विलक्षे तु व्यवस्थितः ।
तस्मात् शनैश्चरादूर्द्धं लक्षे सप्तर्षिमण्डलम् ॥
सप्तर्षिमण्डलादूर्द्धमेकलक्षे ध्रुवः स्थितः ।
मेघीभूतः समस्तस्य ज्योतिश्चक्रस्य सत्तम ॥
भास्वांस्तपति विप्रेन्द्र ऊर्द्धं किरणरश्मिभिः ।
कालसंख्यां त्रिलोकस्य स करोति युगे युगे ॥
जनस्तपस्तथा सत्यमेतान्लोकान् द्विजाश्रया ।
ब्रह्मणो मुनिशार्दूल विष्णुशक्तिविदीपिताः ॥
ऊर्द्धं गतैर्द्विजश्रेष्ठ रश्मिभिस्तपते रविः ।
अधोगतैस्तु भूर्लोकं द्योतते दीप्तदीधितिः ॥
तमःपापहरः सूर्य्यः कर्त्ता त्रिभुवनस्य च ।
ध्रुवन्तु परिदृश्येत मण्डलाग्रमण्डलं चरन् ॥
द्विगुणेन च विस्तीर्णं भूतलात्तत् प्रतिष्ठितम् ।
आदित्यमण्डलाधस्तात् भुवो लोकः प्रतिष्ठितः ॥
तदधस्तात्तु विप्रेन्द्र भूर्लोकः संप्रतिष्ठितः ।
एवमेतत्त्रिभुवनं विष्णुकाये व्यवस्थितम् ॥
त्रैलोक्यस्येश्वरत्वञ्च विष्णुदत्तं शतक्रोतोः ।
लोकपालैश्च सहितो लोकान् रक्षति धर्म्मतः ।
वसन् स्वर्गे महाभाग देवेन्द्रः स तु कीर्त्तितः ॥
अतोऽधस्तादृद्विजश्रेष्ठ पातालन्तु स्वयंप्रभम् ।
न तत्र तपते सूर्य्यो न रात्रिर्न निशाकरः ॥
दिव्यं रूपं समास्थाय तपन्ते सततं जनाः ।
पातालस्थाः द्विजश्रेष्ठ दीप्यामानाः स्वतेजसा ॥
सर्लोकात्तु महर्लोकः कोटिमाने व्यवस्थितः ।
ततो योजनमानेन द्विगुणो मण्डलेन तु ॥
जनलोकस्थितो विप्र पञ्चमो मुनिसेवितः ।
तस्योपरि तपोलोकश्चतुर्भिः कोटिभिः स्मृतः ॥
सत्यलोकोऽष्टकोटीभिः सर्व्वेषामुपरिस्थितः ।
सर्व्वे ह्यवाकृतिर्ज्ञेया भुवना भुवनोपरि ॥
ब्रह्मलोकाद्विष्णुलोको द्विगुणेन व्यवस्थितः ।
वाराहे तस्य माहात्म्यं कथितं लोकचिन्तकैः ॥
ततः परं द्विजश्रेष्ठ ततो ह्यण्डकपालकम् ।
ब्रह्माण्डात् परतः साक्षात् निर्लेपः पुरुषः स्थितः ॥
यमुपास्य विमुच्येत तपोज्ञानसमन्वितः ।
इति ते संस्थितिः प्रोक्ता भूगोलस्य मयानघ ॥
यस्तु सम्यगिमां वेत्ति स याति परमां गतिम् ।"
इति नृसिंहपुराणे ३० अध्यायः ॥
पारिभाषिकस्वर्गो यथा,—
"मनोऽनुकूलाः प्रमदा रूपवत्यः सलक्षणाः ।
वासः प्रासादपृष्ठेषु स्वर्गः स्याच्छुभकर्म्मणः ॥"
इति गारुड़े । १०९ । ४४ ॥
व्युत्पत्तिलभ्यमस्य लक्षणं यथा । दुःखासम्भिन्नत्वादिविशिष्टसुखत्वं स्वर्गत्वं तदेव स्वर्गपदशक्यतावच्छेदकमिति सिद्धान्तः । आदिपदेन अनन्तरदुःखग्रस्तभिन्नत्वाभिलाषोपनीतत्वयोः परिग्रहः । अतएव ।
"यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं यत् तत् सुखं स्वःपदास्पदम् ॥"
इति स्वरादिपदशक्तिग्राहकार्थवादोऽपि संगच्छते । इति गदाधरभट्टाचार्य्यकृतवादार्थः ॥*॥
किञ्च ।
"मनःप्रीतिकरः स्वर्गो नरकस्तद्विपर्य्ययः ।
नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तमाः ॥"
इति ब्रह्मपुराणे १९ अध्यायः ॥
स्वर्गयायी, [न्] त्रि, (स्वर्गं गच्छतीति । गम + णिनिः ।) स्वर्गगमनकर्त्ता । यथा,—
"सर्व्वभूतेषु विहिंसा ये ये च सर्व्वेसदा नराः ।
सर्व्वस्य प्रियभूताश्च ते नराः स्वर्गयायिनः ॥"
इति कर्म्मलोचनः ॥
स्वर्गङ्गा, स्त्री, (स्वर्गस्य गङ्गा ।) मन्दाकिनी ।
इति शब्दरत्नावली ॥
स्वर्गजित्, त्रि,(स्वर्गं जयतीति । जि + क्विप् तुगागमश्च ।) स्वर्गजेता । (यथा, महाभारते । १२ । ७५ । ३४ ।
"यस्मिन् भयार्दितः सम्यक् क्षेमं विन्दत्यपि क्षणम् ।
स स्वर्गजित्तमोऽस्माकं सत्यमेतत् ब्रवीमि ते ॥")
स्वर्गपतिः, पुं, (स्वर्गस्य पतिः ।) इन्द्रः । इति हेमचन्द्रः ॥
स्वर्गबधूः, स्त्री, (स्वर्गस्य स्वर्गस्थितलोकस्य बधूः ।) अप्सरसः । इति हेमचन्द्रः ॥
स्वर्गलोकेशः, पुं, (स्वर्गलोकाय ईशः । शरीरजन्यकर्म्मक्षयमृते स्वर्गप्राप्त्यभावात्तदात्वमस्य ।) शरीरम् । इति जटाधरः ॥ (स्वर्गलोकस्य ईशः ।) इन्द्रश्च ॥

स्वर्गसरिद्वरा, स्त्री, (स्वर्गस्य सरिद्वरा।) गङ्गा। इति राजनिर्घण्टः॥

स्वर्गापगा, स्त्री, (स्वर्गस्य आपगा।) गङ्गा। इति हेमचन्द्रः॥

स्वर्गिगिरिः, } पुं, (स्वर्गस्य पक्षे स्वः गिरिः
स्वर्गरिः, } पर्व्वतः।) सुमेरुः। इति हेमचन्द्रः॥

स्वर्गिवधूः, स्त्री, (स्वर्गिणां देवानां वधूः।) अप्सरसः। इति हेमचन्द्रः॥

स्वर्गी,[न्]पुं, (स्वर्गोऽस्यास्य भोग्यत्वेनेति। स्वर्ग+इनिः।) देवता। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। २। ४५।

"भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते।
खिलीभूते विमानानां तदापातभयात् पथि॥")

स्वर्गगामिनि, त्रि। तल्लक्षणं यथा,—

"दया भूतेषु संवादो परलोकं प्रतिक्रिया।
सत्यं परहिता चोक्तिर्व्वेदप्रामाण्यदर्शनम्॥
गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः।
सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुः॥"

इति गारुड़े २२८ अध्यायः॥

स्वर्गौकाः,[स्]पुं, (स्वर्ग ओको वासस्थानं येषाम् देवता। इति हलायुधः॥ (यथा, कुमारे। १। ५८।

"अनर्घ्यमर्घ्येण समद्रिनाथः
स्वर्गौकसामर्च्चितमर्च्चयित्वा।
आराधनायास्य सखीसमेतां
समादिदेश प्रयतां तनूजाम्॥")

स्वर्ग्यः, त्रि, (स्वर्गस्य निमित्तं संयोग उत्पादो वा स्वर्ग+"गोदयचोर्यसंख्यापरिमाणाश्वादेर्यत्।" ५। १। ३९। इति यत्। यद्वा स्वर्गः प्रयोजनमस्य। "स्वर्गादिभ्यो यद्वक्तव्यः।" ५। १।१११। इत्यस्य वार्त्तिकोक्त्या यत्।) स्वर्गीयः। स्वर्गशब्दात् ष्यञ्प्रत्ययेन निष्पन्नः॥ (यथा, भागवते। ४। १२। ४४।

"धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत्।
स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणम्॥")

स्वर्जिकः, पुं, मर्जिकाचारः। इति राजनिर्घण्टः॥ यवक्षारः। यथा,—

"पाक्यः क्षारो यवक्षारो यावशूको यवाग्रजः।
स्वर्जिकोऽपि स्मृतः क्षारः कापोतः सुखवर्च्चकः॥
कथितः स्वर्जिकाभेदो विशेषज्ञैः सुवर्चिका।
यवक्षारो लघुः स्निग्धः सुस्निग्धो वह्निदीपनः।
निहन्ति शूलं वातामश्लेष्मप्लीहासगुल्मायान्॥
स्वर्जिकात्यगुणा तस्मात् विशेषात्गुल्मशूलहृत्।
सुवर्चिका स्वर्जिकावत् बोद्धव्या गुणतो जनैः॥"

इति भावप्रकाशः॥

स्वर्जिकाक्षारः, पुं, स्वर्जिक्षारः। साचिक्षार इति भाषा। अस्य गुणाः।

"यवक्षारः जयेद्दर्शः श्वासान् वातकफामयान्।
गुल्महृद्ग्रहणीपाण्डुप्लीहानाहगलामयान्।
तस्मादल्पान्तरगुणः स्वर्जिकाक्षार उच्यते॥"

इति राजवल्लभः॥

स्वर्जिक्षारः, पुं, (स्वर्जी एव क्षारः।) सर्जिकाक्षारः। तत्पर्य्यायः। स्वर्जिकः २ क्षारः ३ स्वर्जी ४ सुखोर्जिकः ५ सुवर्चिकः ६ सुवर्चिः७ सुखवर्च्चाः ८। अस्य गुणाः। पटुत्वम्। कटुत्वम्। तीक्ष्णत्वम्। वातकफार्त्तिनाशित्वम्। गुल्माध्मानक्रमिव्रणजठरदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

स्वर्ज्जी, [न्] पुं, (सुष्ठु अर्ज्जयतीति। सु+अर्ज्ज+णिनिः। स्वर्जिक्षारः। इति राजनिर्घण्टः॥

स्वर्ण, क्ली, (सुष्ठु वर्णो वर्णो यस्य।) सुवर्णम्। भुस्सूरः। इत्यमरः। २। ८। ८४॥ गौरसुवर्णशाकम्। नागकेशरम्। इति राजनिर्घण्टः॥*॥

स्वर्णस्योत्पत्तिर्यथा,—

"एकदा सर्व्वदेवाश्च समूषुः स्वर्गसंसदि।
तत्र कृत्वा च नृत्यञ्च गायन्त्यप्सरसां गणाः॥
विलोक्य रम्भां सुश्रोणीं सकामो वह्निरेव च।
पपात वीर्य्यं चस्कन्द लज्जया वाससा तदा॥
उत्तस्थौ स्वर्णपद्मञ्च वस्त्रं छित्त्वा ज्वलत्प्रभः।
क्षणेन वर्द्धयामास स सुमेरुर्बभूव ह॥
स्थिरश्चरेतसं वह्निं प्रवदन्ति मनीषिणः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३१।३३-३७॥

तस्य गुणाः।

"सुवर्णं तिक्तमधुरं कषायं गुरु लेखनम्।
हृद्यं रसायनं बल्यं चक्षुष्यं कान्तिदं शुचि॥
आयुर्मेधाबलःस्थैर्य्यवाग् विशुद्धिप्रदम्।
त्रयोन्मादगदार्त्तानां शमनं परमुच्यते॥"

इति राजवल्लभः॥*॥

सुवर्णस्य शोधनमारणविधिर्यथा। मारणाय योग्यं सुवर्णमाह।

"दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम्।
तारगुल्काग्निभं स्निग्धं कोमलं गुरु हेम सत्॥"

सत् उत्तमम्।

"तच्छेतं कठिनं रूक्षं विवर्णं समलं दलम्।
दाहे च्छेदेऽसितं श्वेतं कषे स्फुटलघु त्यजेत्॥"

अथ शोधनविधिः।

"पत्तलीकृतपत्राणि हेम्नो वह्नौ प्रतापयेत्।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके॥
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा।
एवं हेम्नः परिशुद्धं धातूनां शोधनं भवेत्॥"*॥

अथाशुद्धस्य सुवर्णस्य दोषमाह।

"बलं सवीर्य्यं हरते नराणां
रोगव्रजं पोषयतीह कायें।
असौख्यकार्य्यं च सदा सुवर्ण-
मशुद्धमेतन्मरणञ्च कुर्य्यात्॥"

अथ स्वर्णमारणविधिः।

"स्वर्णस्य द्विगुणं सूतमग्निना सह मर्दयेत्।
तद्गोलकममं गन्धं निदध्यादधरोत्तरम्॥"

स्वर्णस्य अतितानूकृतपत्रस्य। गन्धं गन्धकचूर्णम्।

"गोलकञ्च ततो रुद्ध्वा सरावद्वयसंपुटे॥
त्रिंशदुपलैर्दद्यात् पुटान्येवं चतुर्दश।
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः॥"

रुद्ध्वा सवस्त्रकुटितचिक्कणमृत्तिकया। वनोपलः गोदटा इति लोके। निरुत्थं यत् पुनर्न जीवति॥*॥ अथान्यप्रकारः।

"काञ्चने गलिते नागं षोड़शांशेन निःक्षिपेत्।
चूर्णयित्वा तयाम्लेन घृष्ट्वा क्वथ्य तु गोलकम्॥
गोलकेन समं गन्धं दत्त्वा चैवाधरोत्तरम्।
सरावसंपुटे धृत्वा पुटे त्रिंशदुपलैः॥
एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते।
अत्रापि पूर्व्ववद्गन्धः प्रदातव्यः पुनः पुनः॥
काञ्चनारिरसैर्घृष्ट्वा समसूतकगन्धयोः।
कज्जलीहेमपत्राणि लेपयेत् समया तया॥
काञ्चनारित्वचः कल्कैर्मूषायुग्मं प्रकल्पयेत्।
धृत्वा तत् संपुटे गोलं मृन्मूषासंपुटे च तत्॥
निधाय सन्निरोधञ्च कृत्वा संशोष्य गोलकम्।
वह्निं खरतरं कुर्य्यादेवं दद्यात् पुटत्रयम्॥
निरुत्थं जायते भस्म सर्व्वकर्म्मसु योजयेत्।
काञ्चनारिप्रकारेण काञ्चनीं वह्नि काञ्चनम्॥
काञ्चली करिहारी।
व्याघ्रासुखो तथा हन्त्यात्तया हन्ति मनःशिलाम्।
शिखासिन्दूरयोर्गुणसमयोरर्कदुग्धकैः॥
सप्तधा भावनां दद्याच्छोषयेच्च पुनः पुनः।
ततस्तु मलिते हेम्नि कल्कोऽयं दीयते समः॥
पुनर्घृष्टेदतितरां यथा कल्को विलीयते।
एवं वेलात्रयं दद्यात् कल्कं हेमसमं भवेत्॥
एवं मारितस्य सुवर्णस्य गुणाः।
सुवर्णं शीतलं हृद्यं बल्यं गुरु रसायनम्।
स्वादु तिक्तञ्च तुवरं पाके च स्वादु पिच्छिलम्।
पवित्रं हृद्यं नेत्र्यं मेधास्मृतिमतिप्रदम्॥
त्रयमायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत्।
विषहृद्यत्रयोन्मादत्रिदोषज्वरशोषजित्॥"
हृद्यं हृद्याय कामुकाय हितम्॥*॥
असम्यक्सारितं स्वर्णं बलं वीर्य्यञ्च नाशयेत्।
करोति रोगान्मृत्युञ्च तन्नाद्य यत्नतस्ततः॥"

इति भावप्रकाशः॥

अन्यत् सुवर्णशब्दे द्रष्टव्यम्॥

स्वर्णकणः, पुं, (स्वर्णवत् पीतः कणो यस्य।) कणगुग्गुलुः। इति राजनिर्घण्टः॥ (स्वर्णस्य कणः।) सुवर्णकणा च॥

स्वर्णकणिका, स्त्री, (स्वर्णस्य कणिका।) कनककणा यथा,—

"कुर्व्वत्याः सरसि स्नानं पार्व्वत्यास्तु शरीरजाः।
निःसृताः स्वर्णकणिकास्ता वहन्ति जलेरिमाः॥"

इति कालिकापुराणे ८२ अध्यायः॥

स्वर्णकायः, पुं, (स्वर्ण इव पीतः कायो यस्य।) गरुड़ः। इति हेमचन्द्रः॥ सुवर्णमयशरीरे, त्रि॥

स्वर्णकारः, पुं, (स्वर्णं स्वर्णालङ्कारं करोतीति। कृ+अण्।) जातिविशेषः। सेकरा इति भाषा। तत्पर्य्यायः। नाड़ीघ्मः २ कलादः ३ रूपकारः ४। इत्यमरः। २।१०।८॥ कणादः ५। इति तट्टीकासारसुन्दरी॥ हेमलः ६। इति जटाधरः॥ तस्योत्पत्तिर्यथा,—

"विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः।
ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः।
कुम्भकारः कंसकारः षड्ऐते शिल्पिनां वराः॥
सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च।
पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्कराः॥
स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम।
बभूव सद्यः पतितो ब्रह्मशापेन कर्म्मणा॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १०। १९—२२॥
तस्य कर्म्मविपाको यथा,—
"तैलचौरस्तैलकीटो मूर्ब्बि कीटश्च जन्मकम्।
ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ८५।१२८॥

स्वर्णकृत्, पुं, (स्वर्णं सुवर्णालङ्कारं करोतीति। कृ+क्विप्। तुक् च।) स्वर्णकारः। इति शब्दमाला॥

स्वर्णकेतकी, स्त्री, (स्वर्णवर्णा केतकी।) हरिद्रावर्णकेतकीपुष्पम्। तत्पर्य्यायः। हेमकेतकी २ कनकप्रसवा ३ हैमी ४ क्षितरुहा ५ विष्टारुहा ६ स्वर्णपुष्पी ७ कामरुद्रदा ८। अस्या गुणाः।
"केतकीकुसुमं वर्ण्यं केशदौर्गन्ध्यनाशनम्।
हेमाभं मदनोन्मादबाहुल्य सौख्यकारि च॥
तस्यास्तनोति गिरिजः कटुः पित्तकफापहः।
रसायनकरो वर्ण्यो देहदार्ढ्यकरः परः॥"
इति राजनिर्घण्टः॥

स्वर्णचौरी, स्त्री, (स्वर्णवर्णा चौरी।) ओषधिविशेषः। तत्पर्य्यायः पटुपर्णी २ हैमवती ३ हिमावती ४। इत्यमरः। २। ४। १३८॥
चत्वारि स्वर्णचौर्य्याम्। इयं पीतचीरा नागजिह्विकाकारा।
"हैमवर्णं पयस्तस्या हिमवद्भूमिसम्भवा।
सा नागजिह्विकाकारा तन्मूलं वाग्विजीवधमिति॥"
पटूनि निश्छिद्राणि पर्णानि अस्याः पटुपर्णी जातेरत इति ङीप्। हिमवति जाता हैमवती पृषो०। स्वर्णमिव पीतत्वात् चौरमस्याः स्वर्णचौरी नदादिः। हिमयुक्तोत्पत्तिस्थानयोगात् हिमावती मोक्षमूलपाढतुरिति वतुः नाच्चास्त्रर्थे इति दीर्घः। इति भरतः॥ * ॥ अपि च।
"स्वर्णचौरी स्वर्णदुग्धा स्वर्णाङ्गक्षिणी तथा।
सुवर्णा हेमदुग्धी च हेमचौरी च काञ्चनी॥
स्वर्णचौरी हिमा तिक्ता कृमिपित्तकफापहा।
मूत्रकृच्छ्राश्मरीशोफदाहज्वरहरा परा॥"
इति राजनिर्घण्टः॥

स्वर्णगैरिकं, क्ली, (स्वर्णवत् पीतं गैरिकम्।) सुवर्णगैरिकम्। वर्णक् माटी इति भाषा। इति राजनिर्घण्टः॥ अस्य विवरणं गैरिकभेदशब्दे द्रष्टव्यम्॥

स्वर्णग्रीवा, स्त्री, (स्वर्णवर्णा ग्रीवा यस्याः।) नाटकगैलपूर्ब्बभागान्निःसृतनदीविशेषः। यथा,—
"या निःसृणापूर्ब्बभागात् तस्मान्निरिवरानदी।
स्वर्णग्रीवेति विख्याता सा गङ्गासदृशी फले॥"
इति कालिकापुराणे ८२ अध्यायः॥

स्वर्णचूडः, पुं, (स्वर्णवर्णा चूडा यस्य।) पक्षिविशेषः। यथा,—
"चाषः कोकीदिविः स्वर्णचूडोऽथ पीतमुखकः॥"
इति जटाधरः॥

स्वर्णज, क्ली. (स्वर्णात् जायते इति। जन+डः) रङ्गम्। यथा,—
"वङ्गं नृपः स्वर्णजनागजीवने
सदङ्गरङ्गे गुरुपत्रपिण्डटे।
स्याद्वङ्गसंज्ञं तमरङ्ग नागजं
कस्तीरमाखीनकसिंहले अपि॥"
इति हेमचन्द्रः॥

स्वर्णजीवन्ती, स्त्री, (स्वर्णवर्णा जीवन्ती।) वृक्षविशेषः। तोनाजीवड इति हिन्दी भाषा। तत्पर्य्यायः। हेमाह्वा २ हेमजीवन्ती ३ ढक्कग्रन्थिः ४ हिमाह्वया ५ स्वर्णपर्णी ६ सुजीवन्ती ७ स्वर्णजीवा ८ सुपर्णिका ९ हेमपुष्पा १० स्वर्णलता ११ हेमवल्ली १२ हेमलता १३। अस्या गुणाः। वृष्यत्वम् मधुरत्वम्। चक्षुष्यत्वम्। शिशिरत्वम्। वातपित्तास्रदाहनाशित्वम्। बलवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥

स्वर्णदी, स्त्री,(स्वः स्वर्गस्य नदी।) मन्दाकिनी। इत्यमरः। १।१। ५२॥ हृषिकालो। इति राजनिर्घण्टः॥ सितगङ्गा। सा तु कामाख्यायाः पूर्ब्बभागे दिक्करवासिन्याः प्रान्ते स्थिता। यथा,—
"नद्याः स्वर्णश्रिया पूर्व्वं नदी कामाह्वया तथा।
कामाख्यायाः पूर्ब्बभागे नदी सोमासनाह्वया।
सोमासनायाः पूर्ब्बस्यां नदी नाम्ना त्रयोदका।
ततः पूर्ब्बे कामरूपपीठान्ते जगतां प्रसूः।
जगन्माया महामाया देवी दिक्करवासिनी॥
एता या कथिता नद्यः सकला दक्षिणस्रवाः।
तासु स्नात्वा च पीत्वा च स्वर्गलोकमवाप्नुयात्॥
प्रान्ते दिक्करवासिन्याः सदा वहति स्वर्णदी।
सितगङ्गाह्वया लोके साक्षात् गङ्गाफलप्रदा॥
सा भूमिपीठसंस्था तु देवी दिक्करवासिनी।
पश्यन्ती सकलैः स्नात्वया यान्ति प्रत्यक्षतां सुरैः॥
सितगङ्गाजले स्नात्वा दृष्ट्वा शम्भुं हरिं विधिम्।
दृष्ट्वा ललितकान्ताख्यां पुनर्योनौ न जायते॥"
इति कालिकापुराणे ८२ अध्यायः॥

स्वर्णदीधितिः, पुं, (स्वर्णवत् दीधितिः किरणं यस्य।) अग्निः इति त्रिकाण्डशेषः॥

स्वर्णद्रुः पुं, स्वर्णवर्णो द्रुः।) आरग्वधः। इति राजनिर्घण्टः॥

स्वर्णपक्षः, पुं, (स्वर्णवत् पीतौ पक्षौ यस्य।) गरुड़ः। इति त्रिकाण्डशेषः॥

स्वर्णपद्मा, स्त्री, (स्वर्णस्य पद्मं यस्यामिति।) स्वर्णगङ्गा। इति शब्दरत्नावली॥

स्वर्णपाटकः, पुं (स्वर्णं पाटयतीति। पट+णिच् ण्वुल।) टङ्कणः। इति शब्दमाला॥ (क्वचित् स्वर्णपाचकः पठ्यते॥ तत्पर्य्याया यथा। टङ्कणः स्वर्णपाचकः। इति वैद्यकरत्नमालायाम्॥)

स्वर्णपारेवतं, क्ली, (स्वर्णवर्णं पारेवतम्।) महापारेवतम्। इति राजनिर्घण्टः॥

स्वर्णपुष्पः, पुं, (स्वर्णवर्णं पुष्पमस्य।) आरग्वधः। चम्पकः। इति राजनिर्घण्टः। चम्पकपुष्पैर्विष्णुपूजाफलं यथा,—
"माघे चम्पकपुष्पेण योऽर्च्चयेत् कमलापतिम्।
स गच्छेत् परमं धाम विमुक्तः सर्व्वपातकैः॥
यावन्ति स्वर्णपुष्पाणि दीयन्ते चक्रपाणये।
तावद्युगसहस्राणि स्वीयते विष्णुमन्दिरे॥
मेरुतुल्यसुवर्णानि दत्त्वा भवति यत् फलम्।
एकेन स्वर्णपुष्पेण दत्त्वा भवति तत् फलम्॥
सुवर्णपुष्पं विप्रेन्द्र सर्व्वदा केशवप्रियम्।
माघे मासि विशेषेण पवित्रं केशवार्च्चने॥
सुवर्णकुसुमैर्दिव्यैर्येन नाराधितो हरिः।
रत्नैर्हीनः सुवर्णाद्यैः स भवेज्जन्मजन्मनि॥"
इति पाद्मे क्रियायोगसारे ८ अध्यायः॥
वावलहड़ः। इति शब्दचन्द्रिका॥

स्वर्णपुष्पा, स्त्री, (स्वर्णवत् पुष्पं यस्याः) कलिकारिः। स्वर्णुली। सातला। इति राजनिर्घण्टः॥ (स्वर्णुलीशब्देऽस्या गुणाः ज्ञातव्याः॥)

स्वर्णपुष्पी, स्त्री. (स्वर्णवत् पीतं पुष्पं यस्याः। ङीष्।) आरग्वधः। इति शब्दचन्द्रिका॥ स्वर्णकेतकी। इति राजनिर्घण्टः॥

स्वर्णफला, स्त्री, (स्वर्णवत् पीतं फलं यस्याः।) पीतरम्भा। इति राजनिर्घण्टः॥

स्वर्णबणिक्, [ज्] पुं, (स्वर्णस्य बणिक्) वर्णसङ्करजातिविशेषः। सोनार बेणे इति भाषा। तस्य कर्म्मविपाको यथा,—
"तैलचौरस्तैलकीटो मूर्ब्बि कीटश्च जन्मकम्।
ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः॥
तमःकुण्डे वर्षशतं स्थित्वा स्वर्णबणिग् भवेत्।
जन्मैकञ्च दुराचारो जन्मैकं करणो भवेत्।
विश्वैकलिपिकर्त्ता च भवदातुर्दनं हरेत्।
कायस्थेनोदरस्थेन मातुर्मांसं न खादितम्।
तत्र नास्ति कृपा तस्य दम्भाभावेन केवलम्॥
स्वर्णकारः स्वर्णबणिक् कायस्थश्च व्रजेश्वर।
नरेषु मध्ये ते धूर्त्ताः कृपाहीना महीतले॥
हृदयं क्षुरधाराभं तेषाञ्च नास्ति सादरम्।
शतेषु सज्जनः कोऽपि कायस्थो नेतरौ च तौ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५।१२८-१३२॥

स्वर्णबिन्दुः, पुं, (स्वर्णस्य बिन्दुर्यत्र।) विष्णुः। इति त्रिकाण्डशेषः॥ सुवर्णकणिका च॥

स्वर्णभृङ्गारः, पुं, (स्वर्णवर्णो भृङ्गारः।) स्वर्णभृङ्गराजः। इति राजनिर्घण्टः॥ सुवर्णकलसश्च॥

स्वर्णमहा, स्त्री, नदीविशेषः। यथा,—
"तत्रोमायाः शरीरात्तु संस्रवन्ति जलैः सह।
ततः स्वर्णमहा नाम स्वर्णश्रीः सर्व्वतोऽधिका॥
एतासु चैत्रमासे तु स्नात्वा मर्त्यो नरर्षभ।
कृष्णपक्षे चतुर्दश्यां त्रिकालं यस्य मानवः॥

चिरं शिवगृहे स्थित्वा शेषे ब्रह्मगृहं व्रजेत्।
भूमाववभृतः पश्चात् सार्व्वभौमनृपो भवेत्॥"
इति कालिकापुराणे ८२ अध्यायः॥

स्वर्णमाक्षिकं, क्ली, (स्वर्णवत् पीतं माक्षिकम्।) स्वनामख्यात उपधातुः। तस्य नामानि गुणाश्च।
"स्वर्णमाक्षिकमाख्यातं तापिञ्जं मधुमाक्षिकम्।
तोयं माक्षिकधातुश्च मधुधातुश्च स स्मृतः॥
किञ्चित्सुवर्णसादृश्यात् स्वर्णमाक्षिकमीरितम्।
उपधातुः सुवर्णस्य किञ्चित्स्वर्णगुणान्वितम्॥
तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम्।
किन्तु तस्यानुकल्पत्वात् किञ्चिद्धीनगुणास्ततः॥
न केवलं स्वर्णगुणा वर्त्तन्ते स्वर्णमाक्षिके।
द्रव्यान्तरस्य संसर्गात् सन्त्यन्योऽपि गुणास्ततः॥*
सुवर्णमाक्षिकं स्वादु तिक्तं हृद्यं रसायनम्।
चक्षुष्यं वस्तिरुक्कण्ठपाण्डुमेहविषोदरम्।
अर्शः शोथं विषं कण्डुं त्रिदोषमपि नाशयेत्॥"*॥

अशुद्धस्वर्णमाक्षिकस्य दोषमाह।
"मन्दानलत्वं बलहानिमुग्रां
विष्टम्भितां नैत्रगदान् सकुष्ठान्।
मालां तथैव व्रणपूर्व्विकाञ्च
कुर्य्यादशुद्धं खलु माक्षिकञ्च॥"*॥
तद्दोषशमाय्यं शोधनमाह।
"माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च।
मातुलुङ्गद्रवैर्व्वाप्य जम्बीरस्य द्रवैः पचेत्॥
चालयेल्लोहजे पात्रे यावत् पात्रं सुलोहितम्।
भवेत्ततस्तु संशुद्धं स्वर्णमाक्षिकमुच्यते॥"*॥
तन्मारणं यथा,—
"कुलत्थस्य कषायेण भृष्टा तैलेन वा पुटेत्।
तैलेनैवाजमूत्रेण म्रियते स्वर्णमाक्षिकम्॥
इति भावप्रकाशः॥
(तथास्य शोधनं यथा,—
"स्वर्णमाक्षिकचूर्णन्तु वस्त्रे बद्ध्वा विपाचयेत्।
कालमाक्षिकगालिन्या क्वाथे दोलाविधानतः।
तदधः पतितं ग्रस्तमिवं शुध्यति माक्षिकम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥)

स्वर्णयूथी, स्त्री, (स्वर्णवर्णा यूथी।) पीतवर्णयूथिका। तत्पर्य्यायः। हरिणी २ पीतिका ३ हेमपुष्पिका ४। इति जटाधरः॥ हेमा ५। इति शब्दरत्नावली॥

स्वर्णलता, स्त्री,(स्वर्णवर्णा लता।) ज्योतिष्मती। इति राजनिर्घण्टः॥ (ज्योतिष्मतीशब्देऽस्याविवरणं ज्ञातव्यम्॥)

स्वर्णवर्णा, स्त्री, (स्वर्णवत् वर्णो यस्याः।) हरिद्रा। इति राजनिर्घण्टः॥ सुवर्णसदृग्वर्णयुक्ते, त्रि॥ (यथा, भ्रमराष्टके। १।
"गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा
पद्मस्याद्या शुचिमधुपः पुष्पमध्ये पपात।
अन्याभूतः कुसुमरजसा कण्टकैश्छिन्नपक्षः
स्यातुं गन्तुं हृयमपि सखे नैव शक्तो हिरेफः॥")

स्वर्णवल्कलः, पुं, (स्वर्णवत् वल्कलं यस्य) श्योनाकवृक्षः। इति शब्दचन्द्रिका॥

स्वर्णवल्ली, स्त्री, (स्वर्णवर्णा वल्ली।) लतांविशेषः। तत्पर्य्यायः। रक्तफला २ काकायुः ३ काकवल्ली ४। अस्या गुणाः। शिरःपीड़ात्रिदोषनाशित्वम्। दुग्धदाहत्वञ्च। इति राजनिर्घण्टः॥ (तथास्याः पर्य्यायाः गुणाश्च।
"स्वर्णवल्लीरक्तफला काकायुः काकवल्लरी।
स्वर्णवल्ली शिरःपीड़ां त्रिदोषाम् हन्ति दुग्धदा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

स्वर्णसेफालिका, स्त्री,स्वर्णवर्णा सेफालिका।) आरग्वधः। इति शब्दमाला॥ पीतसेफालिका च॥

स्वर्णाङ्गः, पुं, (स्वर्णवत् पीतमङ्गं यस्य।) आरग्वधः। इति राजनिर्घण्टः॥ (तथास्य पर्य्यायाः।
"आरग्वधो राजवृक्षः सम्पाकश्चतुरङ्गुलः।
आरेवतो व्याधिघातः शतमालः सुवर्णकः॥
कर्णिकारी दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

स्वर्णारिः, पुं,(स्वर्णस्य अरिः।) गन्धकम्। इति केचित्॥

स्वर्णुली, स्त्री, क्षुपविशेषः। तत्पर्य्यायः। हेमपुष्पी २ स्वर्णपुष्पा ३ अधजा ४। अस्या गुणाः। कटुत्वम् शीतत्वम्। कषायत्वम्। व्रणापहत्वञ्च। इति राजनिर्घण्टः॥

स्वर्त्त, क गत्यातङ्के। इति कविकल्पद्रुमः॥ (चुरा॰-पर॰-गतौ सक॰-आतङ्के अक॰-सेट्॥) तङ्को दुःखेन जीवनम्। क, स्वर्त्तयति जने गच्छति दुःखेन जीवति वेत्यर्थः। असिस्वर्त्तत्। इति दुर्गादासः॥

स्वर्द, ङ, प्रीतिलिह्योः। इति कविकल्पद्रुमः॥ (भ्वा॰-आत्म॰-सक॰-सेट्। प्रीतिः प्रीतिकरणम्। लिट्रसोपादानम्। ङ, स्वर्दते विविधास्वादं स्वादते च रसायनमिति हलायुधः। इति दुर्गादासः॥

स्वर्नदी, स्त्री, (स्वः स्वर्गस्य नदी।) स्वर्गङ्गा। इत्यमरः॥ स्वः स्वर्गस्य नदी स्वर्णदी पृषो॰ इति योगविभागात् णत्वम्। पूर्व्वपदे संज्ञायां णत्वमिति परेषाम् प्रकरणे गिरिनद्यादीनामुपसंख्यानमिति वा णत्वम्। इति मधुमाधवः॥ स्वर्णदी दन्त्यनकारवतीत्येके। इति भरतः॥

स्वर्भानवः, पुं, (स्वर्भानोरयं प्रियत्वात्। स्वर्भानु+अण्।) गोमेदकमणिः। इति राजनिर्घण्टः॥

स्वर्भानुः, पुं, (स्वराकाशे भातीति। स्वर्+भा+"दाभाभ्यां नुः।" ऊणा॰ ३। ३२। इति नुः।) राहुः। इत्यमरः।१। ३ २६॥ (यथा, माघे। २। ४८।
"तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत्।
हिमांशुमाशु ग्रसते तन्मुहिम्नः स्फुटं फलम्॥"
सत्यभामागर्भजातः श्रीकृष्णपुत्रविशेषः। यथा, भागवते। १०। ६१। ११।
"भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा
चन्द्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः।
श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश॥")

स्वर्भानुसूदनः, पुं, (स्वर्भानोः सूदनं यत्र।) सूर्य्यः। इति पुराणम्॥ (यथा, महाभारते। ३। ३०१। १८।
"तच्छ्रुत्वा भगवान् देवो भानुः स्वर्भानुसूदनः।
उवाच तं तथेत्येव कर्णं सूर्य्यः समयन्निव॥")

स्वर्यातः, त्रि, (स्वः स्वर्गं यातः।) मृतः। यथा, याज्ञवल्क्यः।
"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः॥
एषामभावे पूर्व्वस्य धनभागुत्तरोत्तरः।
स्वर्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः॥"
इति दायभागः॥

स्वर्लोकः, पुं, (स्वरेव लोकः। स्वर्गः। इति शब्दरत्नावली॥ (यथा, भागवते २।५।४२।
"भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः।
स्वर्लोकः कल्पितो मूर्द्ध्न इति वा लोककल्पना॥")

स्वर्व्वधूः, स्त्री. (स्वः स्वर्गस्य वधूः।) अप्सराः। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। १७। १६।
"अथाजगाम भूलोकं तामादाय पुरूरवाः।
स्वर्वधूदर्शनायर्थ्यमर्पयन् मर्त्यचक्षुषाम्॥")
स्वर्गीयस्तीमात्रश्च॥

स्वर्व्यापी, स्त्री, (स्वः स्वर्गस्य व्यापी) गङ्गा। इति हेमचन्द्रः॥

स्वर्व्वेश्या, स्त्री, (स्वः स्वर्गस्य वेश्या।) उर्व्वश्याद्यप्सरसः। इत्यमरः। १। १। ५५॥

स्वर्व्वैद्यौ, पुं, (स्वःस्वर्गस्य वैद्यौ।) अश्विनीकुमारौ। तत्पर्य्यायः। अश्विनीसुतौ २ नासत्यौ ३ अश्विनौ ४ दस्रौ ५ आश्विनेयौ ६। इत्यमरः। १। १। ५४॥ द्वित्वविशिष्टत्वादेकवचनाभावः। इति स्वामी। सर्व्व एते नित्यद्विवचनान्ता एकत्वविवक्षायां एकवचनान्ता अपि। यथा,—
"नासत्यौ च दस्रश्च स्मृतौ द्वौ नामतोऽश्विनौ॥"
इति मार्कण्डेयपुराणम्॥ इति भरतः॥

स्वलीनः, पुं, (स्वस्मिन् लीनः।) दानवविशेषः। यथा,—
"तामायान्तीन्तु रोधाय स्वलीनो नाम दानवः।
पार्व्वतं रूपमास्थाय वर्षाणान्तु शतैर्द्विजाः॥
ततो भगीरथो राजाराधयामास कौशिकम्।
स तुष्टः प्रददौ नागं वाहनं तं भगीरथः।
तमारुह्यागमत्तत्र यत्र देवा भगीरथी॥
तेन नागेन तं दैत्यं संविदार्य्य न सङ्कटम्।
ततश्चा तां समाधाय मूर्द्ध्नैरावतो गजः॥
महीतलं समापेदे स याववागसाह्वयम्।
तस्माद्राजर्षिनाद्विप्रा अभूद्भागपुरं वरम्॥"
इति वह्निपुराणे गङ्गावतरणनामाध्यायः॥

स्वल्पः, त्रि, (सुष्ठु अल्पः ।) अत्यल्पः । यथा,—
"नेहातिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥"
इति भगवद्गीतायाम् । २ । ४० ॥

स्वल्पकेशरी, [न्] पुं, (स्वल्पः केशरोऽस्यास्तीति । इनिः ।) कोविदारः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुण्डली ताम्रपुष्पश्च अन्तकः स्वल्पकेशरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

स्वल्पकेशी, [न्] पुं, (स्वल्पः केशोऽस्यास्तीति । इनिः ।) भूतकेशः । यथा,—
"गोलोमी स्वल्पकेशी च भूतकेशश्च केशहृत् ॥"
इति शब्दचन्द्रिका ॥

अल्पस्वल्पकेशविशिष्टे, त्रि ॥

स्वल्पपत्रकः, पुं, (स्वल्पानि पत्राणि यस्य । कप् ।) मौरशाकः । स तु मधूकभेदः । यथा,—
"मौरशाणी मधुपोऽस्त्री गिरिजः स्वल्पपत्रकः ॥"
इति रत्नमाला ॥

स्वल्पफला, स्त्री, (स्वल्पं फलं यस्याः ।) क्षुद्रपाभेदः । तत्पर्य्यायः । कच्छ्वी २ श्वाङ्गनाग्निनी ३ श्वेतश्वदः ४ विषघ्नी ५ कफघ्नी ६ अपराजिता ७ । अस्या गुणाः क्षुद्रपागुणतुल्याः । इति राजनिर्घण्टः ॥

स्ववासिनी, स्त्री, (स्वस्मिन् पितृगृहे वसतीति । वस+णिनिः । ङीप् ।) ऊढा अनूढा वा पितृगृहस्थिता । तत्पर्य्यायः । चिरिण्टी २ । इत्यमरः ॥ "हे ऊढायामनूढायां वा पितृगृहस्थितायाम् । पितृकुलंस्वेहात् चिरं पटति गच्छति चिरिण्टी । इट मतौ अन् मनौपादिः ।
'स्ववासिन्यां चिरिण्टी स्यात् द्वितीयवयसि स्त्रियाम् ।'
इति रुद्रः ॥
चिरिण्टीत्येके । स्वेषु ज्ञातिषु वसति स्ववासिनी अण्हादित्वाण्णिन् । सुखेन वसति सुवासिनीति द्राविड़ाः ।" इत्यमरटीकायां भरतः ॥

स्ववीजः, पुं, (स्वं एव वीजं यस्य ।) आत्मा । इति शब्दरत्नावली ॥ निजकारणे स्वीयबीजे च क्ली ॥

स्वसा, [ऋ] स्त्री, (सुष्ठु अस्यते क्षिप्यते इति । सु+अस्+"सुञासेर्क्वन् ।" उणा० २ । ८७ । इति ऋन् यणादेशश्च । भगिनी । इत्यमरः । २ । ६ । २८ ॥ (यथा, मनुः । २ । ५० ।
"मातरं वा स्वसारं वा मातुलां भगिनीं निजाम् ।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ॥")

स्वस्क, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० सक० सेट् ।) ङ, स्वस्कते । इति दुर्गादासः ॥

स्वस्ति, व्य, (सु+अस्+"सावसेः ।" उणा० ४ । १८० । इति तिः । बहुलवचनात् न भूभावः ।) आशीः । क्षेमम् । (यथा, महाभारते । ३ । १६६ । १३ ।
"स्वस्ति प्राप्नुहि कौन्तेय काम्यकं पुनराश्रमम् ॥")
पुण्यादि । इत्यमरः । ३ । ३ । २४० ॥ आशीराशीर्व्वादः । क्षेमं निरुपद्रवः । पुण्यं पापप्रचालनम् । एषु । आदिना मङ्गलादौ च स्वस्ति । स्वस्ति मङ्गलाशीर्व्वादपापनिर्णेजनादिष्विति भागुरिः । इति भरतः ॥ दानस्वीकारमन्त्रः । यथा, "ओमित्युक्त्वा प्रतिगृह्य स्वस्तीत्युक्त्वा सावित्रीं पठित्वा कामस्तुतिं पठेत् ॥" इति गृहितत्त्वम् ॥ तदर्थयोगे चतुर्थी स्यात् । यथा,—
"स्वाहाग्नये स्वधा पित्रे स्वस्ति धात्रे नमः सते ॥"
इति मुग्धबोधव्याकरणम् ॥
(स्त्रीलिङ्गेऽपि दृश्यते । यथा, भागवते । ४ । २४ । ३३ ।
"जितं ते आत्मविद्धर्य्य स्वस्तये स्वस्तिरस्तु मे ।
भवता राधसा राद्धं सर्व्वस्मा आत्मने नमः ॥"
तथा च वाजसनेयसंहितायाम् । १३ । १८ ।
"अस्मिन्नभिपातु मह्या स्वस्या छर्दिषा शन्तमेन ॥")

स्वस्तिकः, पुं, क्ली, (स्वस्ति क्षेमं कायति कथयतीति । कै+कः ।) आख्यानां गृहविशेषः । इत्यमरः । २ । २ । १० ॥ तस्य लक्षणं यथा,—
"स्वस्तिकं प्राक्मुखं यत् स्यादक्षिन्यातुगतं भवेत् ।
तत्पार्श्वानुगतौ चान्यौ तत्पर्य्यन्तगतोऽपरः ॥"
इति भरतधृतमाञ्जिष्ठः ॥
अन्यद्वास्तुशब्दे द्रष्टव्यम् ॥ सितावरणाकः । इति राजनिर्घण्टः ॥
("शितिवारः शितिवरः स्वस्तिकः क्षुनिषण्णकः ।
आवारकः सूचिपत्रः पर्णकः कुक्कुटः शिखी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
योगाङ्गासनविशेषः । तस्य लक्षणं आसनशब्दे द्रष्टव्यम् ॥

स्वस्तिकः, पुं, (क्ली,) (स्वस्ति क्षेमं कायतीति । कै+कः) मङ्गलद्रव्यम् । तत्तु तण्डुलचूर्णनिर्म्मितचिकोषाकाराधिवासद्रव्यम् । चतुष्पथः । गृहभेदः । इति मेदिनी ॥ पिष्टकविकारः । रततालिकः । इति विश्वः ॥ जिनानां चतुर्व्विंशतिचिह्नान्तर्गतचिह्नविशेषः । यथा,—
"वृषो गजोऽजः प्लवगः क्रौञ्चोऽब्जं स्वस्तिकः शशी ।
मकरः श्रीवत्सः खड्गी महिषा सूकरस्तथा ॥
श्येनो वज्रं मृगच्छागौ नन्द्यावर्त्तो घटोऽपि च ।
कूर्म्मो नीलोत्पलं शङ्खः फणी सिंहोऽर्हतां ध्वजाः ॥"
इति हेमचन्द्रः ॥
द्रसोनकः । इति विकाण्डशेषः । (सर्षपफलाक्षितनीलरेखाविशेषः । यथा, रामायणे । १ । १८५ ।
"शिरोभिः पृथुभिर्नागा व्यक्तस्वस्तिकलक्षणैः ।
वमन्तः पावकं घोरं ददृशुर्दशनैः शिलाः ॥")

स्वस्तिमुखः, पुं, (स्वस्ति मुखे प्रथमे वदने वा यस्य ।) लेखः । ब्राह्मणः । वन्दिनि, त्रि । इति मेदिनी ॥

स्वस्तिवाचनं, क्ली, (स्वस्ति मङ्गलस्य वाचनम् ।) माङ्गल्यकर्म्मारम्भकालीनवक्ष्यमाणमन्त्रोच्चारणपूर्व्वकतण्डुलविकिरणम् । तन्मन्त्रो यथा । अमुककर्म्मणि पुण्याहं भवन्तो ब्रुवन्तु । इत्युक्ते पुण्याहमिति ब्राह्मणैरुक्ते अमुककर्म्मणि ऋद्धिं भवन्तो ब्रुवन्तु । ततः ऋद्धतामिति ब्राह्मणास्त्रिब्रूयुः । एवं स्वस्ति भवन्तो ब्रुवन्तु । इत्युक्ते स्वस्ति इति ब्राह्मणास्त्रिब्रूयुः । ततः ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ इति पठित्वा तण्डुलान् विकिरेत् ॥ * ॥ प्रमाणं यथा, व्यासः ।
"संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति वाचयेत् ।
धर्म्मे कर्म्मणि माङ्गल्ये संग्रामाद्भुतदर्शने ॥"
धर्म्मे कर्म्मणि इति मन्त्रमीनिर्देशात् अमुककर्म्मणि स्वस्ति भवन्तो ब्रुवन्तु इति ब्रूयात् । यमः ।
"पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्य्यात् क्षत्रियवैश्ययोः ॥
सोङ्कारं ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत् ॥"
इत्युद्वाहतत्त्वम् ॥ * ॥
अपि च ।
नन्द उवाच ।
"अलङ्घितोऽस्मिन्नृक्षमि मामकैरपि गोव्रजे ।
कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्व्वकम् ॥"
इति श्रीभागवते १० स्कन्धे ८ अध्यायः ॥

स्वस्थः, त्रि,(स्वस्मिन् तिष्ठतीति । स्व+स्था+कः । सुस्थः । यथा,—
"दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।"
इति देवीमाहात्म्यम् ॥
("स्वस्थस्यापि समधातूनां साम्यानुग्रहार्थमेव क्षुधा रसगुणानाहारविकारांश्च पर्य्यायेणेच्छन्त्युपयोक्तुम् । मात्रासमाख्यातानेकप्रकारभूयिष्ठांश्चोपयुञ्जानास्तद्विपरीतकरणलक्षणसमाख्यातचेष्टया समभिच्छन्ति कर्त्तुम् । देशकालात्मगुणविपरीतानां हि कर्म्मणां आहारविकाराणाञ्च क्रमेणोपयोगः सम्यक् । सर्व्वाभियोगोऽनुदीर्णानां सन्धारणमसन्धारणमुदीर्णानाञ्च गतिमतां साहसानाञ्च वर्জ্জनम् । स्वस्थवृत्तमेतदातुरां साम्यानुग्रहार्थमुपदिश्यते ।"
इति चरके शारीरस्थाने षष्ठेऽध्याये ॥ * ॥
"उत्थायोत्थाय सततं स्वस्थेनारोग्यमिच्छता ।
धीमता यदनुष्ठेयं तत् सर्व्वं संप्रचक्ष्यते ॥
तत्रादौ दन्तपवनं द्राक्षाङ्गुलमायतम् ।
कनिष्ठिकापरीणाहमृजुग्रथितमव्रणम् ॥"
इत्यादिकं सुश्रुते चिकित्सितस्थाने २४ अः ॥
"समदोषः समाग्निश्च समधातुमलक्रियः ।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥"
इति च तन्त्रोत्तरतन्त्रे ६४ अध्यायः ॥)

स्वस्त्ययः, पुं, (स्वसुरपत्यं पुमानिति । स्वस्+"स्वसुश्छः ।" ४ । १ । १४३ । इति छः ।

भागिनेयः। इत्यमरः। २। ६। ३२॥ (यथा, मनुः। ३। १४८।
"भ्रातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम्।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत्॥")
स्वसीया, स्त्री, (स्वसुरपत्यं स्त्री। स्वस+ढक्। टाप्।) भागिनेयी। (यथा, मनुः।११।१७२।
"पैतृष्वस्रेयां भगिनीं स्वसीयां मातुरेव च।
भ्रातुश्च भ्रातृतनयां गत्वा पान्द्रायणं चरेत्॥")
स्वायपादः, पुं,(न्यायपादः न्यायशास्त्रप्रवर्त्तयिता। तस्येदमित्यण्। न्यायपादं न्यायशास्त्रं सुष्ठु न्याय पादं अधीते इति अण्।) नयायिकः। इति जटाधरः॥
स्वास्वरः, पुं, (स्वस्य अक्षराणि यत्र।) स्त्रीयाक्षरः। सही इति दस्तखत इति च पारस्यभाषा॥
स्वागतं, क्ली, (सुखेनागतमिति।) कुशलप्रश्नः। इति हारावली॥ (यथा, कुमारे। २। १८।
"स्वागतं स्वानधिकारान् प्रभावैरवलम्ब्य वः।
युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः॥")
सुखेनागतं स्वेनागतञ्च॥ (सुष्ठु आगते, त्रि। यथा, मनुः। ४। २२६।
अहरेष्वपि पूर्वेद्युः नित्यं कुर्यादतन्द्रितः।
अहाकृते ह्यधे ते भवतः स्वागतैर्धनैः॥")
स्वाङ्किकः, पुं, माईङ्किकः। इति शब्दरत्नावली॥
स्वाच्छन्द्यं, क्ली, (स्वच्छन्द+ष्यञ्।) स्वच्छन्दस्य भावः। स्वच्छन्दता। स्वच्छन्दशब्दात् ष्यञ्प्रत्ययेन निष्पन्नम्॥ (यथा, मनुः। ३। ३१।
"ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म्म उच्यते॥")
स्वातन्त्र्यं क्ली,(स्वतन्त्रस्य भावः। स्वतन्त्र+ष्यञ्।) स्वतन्त्रस्य भावः। यथा,—
"पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।
पुत्रश्च स्थविरे रक्षेत् न स्त्री स्वातन्त्र्यमर्हति॥"
इत्युद्वाहतत्त्वम्॥
"सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्।"
इति दायतत्त्वञ्च॥
स्वातिः, स्त्री, सूर्य्यपत्नीविशेषः। यथा,—
"संज्ञा तु यमकालिन्दीरेवन्तमनुदस्रसूः।
त्वष्टरेणुर्मनुर्मद्रावीर्य्या स्वातिः सूर्य्या सुवर्चला।
सरेणुर्द्युमयी त्वाष्ट्री प्रिये चैते विवस्वतः॥"
इति त्रिकाण्डशेषः॥
स्वस्रः। इति धरणिः॥
स्वातिः, स्वाती, } पुं. स्त्री, (स्वेनैव अततीति। अत+इन्। वा ङीष्।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतपञ्चदशनक्षत्रम्। इत्यमरः। ३। ५। ३८॥ हस्ता स्वाती श्रवणा अक्लीवे। इति तिथ्यादितत्त्वम्॥ स च कुङ्कुमसदृशरक्ततारकः। अस्याधिदेवता पवनः। यथा,
"कुङ्कुमारुणतरैकतारके
वायुभे मुदति मौलिमागते।
शायकाम्बरचराङ्गनाः कला-
वच्चलाश्चि जगदुर्मुगोदयात्॥"
दं ३। १५। इति कालिदासकृतरघुविंशनिरूपकग्रन्थः॥ तस्य रूपं विद्रुमप्रवालसदृशम्। इति मुहूर्त्तचिन्तामणिः॥॥ तत्र जातफलम्।
"कन्दर्परूपप्रभया समेतः
कान्ताजनप्रीतिरतिप्रसक्तः।
स्वातिः प्रसूतौ यदि नित्यं स्यात्
महामतिः प्राप्तविभूतियोगः॥"
इति कोष्ठीप्रदीपः॥
स्वाद, ङ प्रीतिलिप्सोः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) दन्त्यादिः। प्रीतिः प्रीतिकरणम्। लिट्रसोपादानम्। ङ।
"अपां हि ह्लादाय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारा।"
इति श्रीहर्षः।
"स्वर्दते विविधास्वादं स्वादते च रसायनम्॥"
इति हलायुधः। इति दुर्गादासः॥
स्वादः, पुं, (स्वाद्+घञ्।) रसग्रहणम्। (यथा, कथासरित्सागरे। ६५। १४१।
"सभार्य्यः स तदा भुङ्क्ते सङ्गं श्रवणवर्जितान्।
अन्यस्यान्नस्य बुबुधे नैव स्वादं स जातुचित्॥"
प्रीतिकरणम्। इति स्वादधातोरल्प्रत्ययेन निष्पन्नः॥
स्वादनं, क्ली, (स्वाद+ल्युट्।) प्रीतिकरणम्। रसग्रहणम्। स्वादधातोरनट्प्रत्ययेन निष्पन्नम्॥
स्वादितः, त्रि, प्रीतः। आस्वादितः। इति स्वादधातोः क्तप्रत्ययेन निष्पन्नः॥
स्वादुः, पुं, (स्वद आस्वादने+"कृवापाजीति।" उणा० १। १। इति उण्।) मधुररसः। यथा,—
"मधुरस्तु रसज्येष्ठो गुरुः स्वादुर्म्मधूलकः।"
इति हेमचन्द्रः॥
गुडः। यथा,—
"गण्डोलं स्यात् गुडः स्वादुः।"
इति त्रिकाण्डशेषः।
जीवकौषधिः। यथा,—
"इक्षाङ्गो मधुरः स्वादुः प्राणकश्चिरजीवकः।"
इति जटाधरः॥
सुगन्धिद्रव्यभेदः। तत्पर्य्यायः। अगुरुसारः २ सुधूम्यः ३ गन्धधूमजः ४। अस्य गुणाः। कटुत्वम्। कषायत्वम्। उष्णत्वम्। सधूमामोदत्वम्। वातनाशित्वञ्च। इति राजनिर्घण्टः॥
स्वादुः, स्त्री, (स्वद्+उण्।) द्राक्षा। इति स्वादीयशब्दटीकायां भरतः। २। ४। १०७॥
स्वादुः, त्रि, (स्वद्+उण्।) इष्टः। मनोज्ञः। मधुरः। मिष्टः। इत्यमरभेदिन्यौ। ३। ३८४॥ (तदुक्तम्। यथा,—
"स्वादुं सघृतं पयोदधियुतं ये भुञ्जते मानवा
स्तेषामिन्द्रियनिग्रहो यदि भवेद् पङ्गुस्तरेत् सागरम्॥")
स्वादुकण्टकः, पुं, (स्वादूनि कण्टकानि यस्य।) विकङ्कतवृक्षः। गोक्षुरकः। इत्यमरः। २। ४। ३७। २। ४। ८८॥ विकङ्कतवृक्षः। इति राजनिर्घण्टः॥ (विकङ्कतार्थे पर्य्यायो यथा,
"विकङ्कतो स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि॥"
गोक्षुरकार्थे पर्य्यायो यथा,—
"गक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि॥
पलङ्कषा ग्रदंष्ट्रा च तथा स्वादिक्षुगन्धिका॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
स्वादुकन्दा, स्त्री, (स्वादुः कन्दो यस्याः।) विदारी। इति राजनिर्घण्टः॥ (यथास्याः पर्य्यायः।
"विदारी स्वादुकन्दा च सा तु क्षीरेक्षुसिता स्मृता।
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वराहदंष्ट्रा गृष्टिर्वदरेत्यपि कथ्यते॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
स्वादुका, स्त्री, (स्वादुना रसेन कायतीति। कै+कः।) नागदन्ती। इति राजनिर्घण्टः॥
स्वादुखण्डः, पुं, (स्वादुः खण्डो यस्य।) गुडः। इति शब्दरत्नावली॥ मधुरभागश्च॥
स्वादुगन्धा, स्त्री, (स्वादुर्गन्धो यस्याः। भूमिकुष्माण्डः। इति जटाधरः॥ रक्तगोभाख्यनः। इति रत्नमाला॥
स्वादुधन्वा, [न्] पुं, (स्वादु धनुर्यस्य।) कामदेवः। इति केचित्॥
स्वादुपर्णी, स्त्री, (स्वादूनि पर्णानि यस्याः। ङीष्।) दुग्धिका। इति राजनिर्घण्टः॥ (यथास्याः पर्य्यायः।
दुग्धिका स्वादुपर्णी स्यात् क्षीरा विक्षीरिणी तथा॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
स्वादुपाका, स्त्री, स्वादुः पाको यस्याः।) काकमाची। इति राजनिर्घण्टः॥ (काकमाचीशब्देऽस्या विषयो ज्ञातव्यः॥)
स्वादुपिण्डा, स्त्री, (स्वादुः पिण्डो यस्याः।) पिण्डखर्ज्जूरी। इति राजनिर्घण्टः॥
स्वादुपुष्पः, पुं,(स्वादूनि पुष्पाणि यस्य।) कटभी। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा,—
"कटभी स्वादुपुष्पश्च मधुरेक्षुः कटम्भरः॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥")
स्वादुफलं, क्ली, (स्वादूनि फलानि यस्य।) वदरीफलम्। इति शब्दरत्नावली॥
स्वादुफला, स्त्री, (स्वादु फलं यस्याः।) कोलिः। इति शब्दरत्नावली॥ (द्राक्षा। तत्पर्य्यायो यथा,—
"द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च।

स्वाधिष्ठा

यद्दीक्षा दारहरा च मोक्षतो चापि कीर्त्तिता ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

स्वादुमज्जा, [न्]पुं, (स्वादु मज्ज यस्य ।) पर्व्वतजपोलुः । इति जटाधरः ॥

स्वादुमांसी, स्त्री, (स्वादु मांसं अन्तःसारं यस्याः । ङीप् ।) काकोली । इति राजनिघण्टः ॥

(गुणादयोऽस्याः काकोलीशब्देऽभिहिताः ॥)

स्वादुमूलं, क्ली, (स्वादु मूलं यस्य ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

स्वादुरसा, स्त्री, (स्वादुः रसो यस्याः ।) काकोली । इत्यमरः । २ । ४ । १४ ॥ आम्रातकफलम् । इति शब्दरत्नावली ॥ मदिरा । इति हेमचन्द्रः ॥ शतावरी । इति राजनिर्घण्टः । द्राक्षा । इति केचित् ॥

स्वादुलता, स्त्री, (स्वादुः लता ।) विदारी । इति राजनिर्घण्टः ॥

स्वादुशृङ्गं, क्ली, (स्वादु शृङ्गमिति ।) सैन्धवलवणं सामुद्रलवणं वा । इति केचित् ॥

स्वाद्वम्लः, पुं, (स्वादुरम्लरसो यत्र ।) दाड़िमवृक्षः । इति त्रिकाण्डशेषः ॥

स्वाद्वी, स्त्री, (स्वादु+"वोतो गुणवचनात् ।" ४ । १ । ४५ । इति ङीप् ।) द्राक्षा । इत्यमरः । २ । ४ । १०७ ॥

स्वाधिष्ठानं, क्ली, (स्वं लिङ्गं तत्र अधिष्ठानं यस्य । स्वस्य लिङ्गस्य अधिष्ठानं यस्मात् इति वा । स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुरित्युक्तेस्तथात्वम् ।) षट्चक्रान्तर्गतद्वितीयचक्रम् । तन्तु लिङ्गमूलस्थवादिलान्तवर्णयुक्तसौरकसमप्रभषड्दलपद्मम् । अत्र शिवाग्नौ वर्त्तते । यथा,—

"षड्दले वैद्युतनिभे स्वाधिष्ठानेऽनलत्विषि ।
व-भ-मैर्य-र-लैर्युक्ते वर्णैः षड्भिश्च सुव्रत ॥"

अपि च ।

"स्वाधिष्ठानाख्यचक्रे तु सबिन्दुं राकिणीं तथा ।
वादिलान्तं प्रविन्यस्य नाभौ तु मणिपूरके ॥"

इति तन्त्रसारः ॥

अन्यच्च ।

"सिन्दूरपूरकचिरारुणपद्ममध्यत्
सौवुन्नमध्यघटितं ध्वजमूलदेशे ।
अङ्गच्छदैः परिलसं तडिताभवर्णै-
र्ध्यायेः सबिन्दुलसितैश्च पुरन्दरार्णैः ॥
तस्यान्तरे प्रविलसद्विपदप्रकाश-
मम्भोजमण्डलमधो वरुणस्य तस्य ।
अर्द्धेन्दुरूपलसितं शरदिन्दुशुभ्रं
वह्नारबीजममलं मकराधिरूढम् ॥
तस्याङ्कदेशलसितो हरिरेव पाया-
च्चीलप्रकाशरुचिरस्त्रियमादधानः ।
पीताम्बरः प्रथमयौवनगर्व्वधारी
श्रीवत्सकौस्तुभधरो धृतवेदबाहुः ॥
तत्रैव भाति सततं खलु राकिणी सा
नीलाम्बुजारुचिमहोदरकान्तिशोभा

स्वाधीन

नानायुधोद्यतकरैर्लसिताङ्गलक्ष्मी-
र्दिव्याम्बराभरणभूषितमत्तचित्ता ॥
स्वाधिष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद्यो मुनीन्द्र-
स्तस्याहङ्कारदोषादिकसकलरिपुः क्षीयते तत्क्षणेन ।
योगीशः सोऽपि मोहाद्भुततिमिरचये भानु-
तुल्यप्रकाशो गद्यैः पद्यैः प्रबन्धैर्विरचयति सुधाकाव्यसन्दोहलक्ष्मीम् ॥"

इति पूर्णानन्दगिरिकृतषट्चक्रक्रमः ॥

स्वाधीनः, त्रि, (स्वस्य अधीनः ।) स्वतन्त्रः । अपराधीनः । यथा,—

"स्वाधीनवृत्तेः साफल्यं न पराधीनवृत्तिता ।
ये पराधीनकर्म्माणो जीवन्तोऽपि च ते मृताः ॥"

इति गारुडे । ११५ । ३७ ॥

स्वाधीनपतिका, स्त्री, नायिकाविशेषः । तस्या लक्षणं यथा । स्वाधीनः पतिर्यस्याः सा स्वाधीनपतिका । सदाज्ञाकरप्रियतमा । अस्यावेष्टा वनविहारादिमदनोत्सवदर्शनं मदाग्रहारमनोरथावासिप्रभृतयः । सा पञ्चविधा । मुग्धा मध्या प्रौढ़ा परकीया सामान्या चेति । मुग्धा स्वाधीनपतिका यथा,—

"मध्ये नो क्षणिमा स्तने न गरिमा देहे न वः कान्तिमा
श्रोणौ न प्रथिमा गतौ न जड़िमा नेत्रे न वा वक्रिमा ।
लास्ये न द्रढ़िमा न वाचि पटिमा हास्ये न वा स्फीतिमा
प्राणेशस्य तथापि मज्जति मनो मय्येव किं कारणम् ॥ १ ॥

मध्या स्वाधीनपतिका यथा,—

यदपि रतिमहोत्सवे नकारो
यदपि करेण च नीविधारणानि ।
प्रियसखि पतिरेष पार्श्वदेशं
तदपि न सुप्यति चेत् किमाचरामि ॥२॥

प्रौढ़ा स्वाधीनपतिका यथा,—

वक्त्रस्याधरपल्लवस्य वचसो हास्यस्य लास्यस्य वा
धन्यानामरविन्दसुन्दरदृशां कान्तस्तनोति स्तुतिम् ।
स्वप्नेऽप्यि न गच्छति श्रुतिपथं चेतःपथं दृक्पथं
काप्यन्या दयितस्य मे सखि कथं तस्यास्तु भेदग्रहः ॥३॥

परकीया स्वाधीनपतिका यथा,—

स्त्रीयाः सन्ति गृहे सरोरुहदृशो यासां विलासक्षणं
काश्चौत्सुक्यसहेमकङ्कणझणत्कारो न विद्यास्यति ।
को हेतुः सखि कानने पुरपथे वीथे सखी-
सविधौ

स्वान्तं

भ्राम्यन्तीमपि पल्लवस्य परितो दृष्टिं न मां मुञ्चति ॥४॥

सामान्या स्वाधीनपतिका यथा,—

सख्येव प्रतिमन्दिरं जगद्यो यासां सुधा-
सागर-
स्रोतःस्रुतसरोजसुन्दरचमत्कारा दृशो-
र्विभ्रमाः ।
चित्तं किन्तु विचित्रमन्मथकलावैदग्ध्यकेतोः पुन-
र्वित्तं चित्तहरं प्रयच्छति युवा मय्येव किं कारणम् ॥"५॥

इति रसमञ्जरी ॥

स्वाधीनभर्त्तृका, स्त्री, (स्वस्या निजायाः अधीनो भर्त्ता यस्याः । कप् ।) स्वाधीनपतिका । सा च नायिकाभेदः ॥ यथा,—

"स्वच्छितोत्कण्ठिता लब्धा तथा प्रोषितभर्त्तृका ।
कलहान्तरिता वासकसज्जा स्वाधीनभर्त्तृका ॥"

इति जटाधरः ॥

(तल्लक्षणं यथा, साहित्यदर्पणे । ३ । ११३ ।

"कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् ।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्त्तृका ॥")

स्वाध्यायः, पुं, (सुष्ठु आवृत्य अध्यायः वेदाध्ययनमिति ।) आवृत्य वेदाध्ययनम् । तत्पर्य्यायः । जपः २ । इत्यमरः । २ । ७ । ४७ ॥ जापः ३ । इति जटाधरः ॥

"स्वाध्यायो जप इत्युक्तो वेदाध्ययनकर्म्मणि ।"

इति शब्दरत्नावली ॥

इङ् आवृत्य वेदाध्ययने । सु सुकृताय आवृत्य अध्यायोऽधीतिः स्वाध्यायः इङो घञ् । जपनं जपः अल् घञि जापश्च । इति भरतः ॥

स्वाध्यायवान्, [त्] पुं, (स्वाध्यायोऽस्यास्तीति । मतुप् । मस्य वः ।) स्वाध्यायविशिष्टः । वेदपाठकः । (यथा, महाभारते । १ । ४० । १० ।

"स तूर्द्धरेताश्चपसि प्रसक्तः
स्वाध्यायवान् वीतभयः कृतात्मा ।
चचार सर्व्वां पृथिवीं महात्मा
न चापि दारान् मनसाप्यकाङ्क्षत ॥")

स्वाध्यायी, [न्] पुं, स्वाध्यायोऽस्यास्तीति । इनिः ।) पक्षनवधिक । इति त्रिकाण्डशेषः ॥ त्रि, वेदपाठकश्च ॥ (यथा, महाभारते । ३ । २४ । १५ ।

"ब्राह्मणाः सान्निहोत्राश्च तथैव च निरग्नयः ।
स्वाध्यायिनो भिक्षवश्च तथैव वनवासिनः ॥")

स्वानः, पुं, (स्वननमिति । स्वन शब्दे + "स्वनहसीवाः ।" ३ । ३ । ६२ । इति घञ् ।) शब्दः । इत्यमरः । १ । ७ । २४ ॥ (यथा, माघे । ४ । ५७ ।

"या बिभर्त्ति कलवल्गकी गुरु-
स्वानमानमतिकान्तिमाधया ।
नात्र कान्तमुपगीतया तया
स्वानमानमति कान्तिमाधया ॥")

स्वान्तं, क्ली, (स्वन्यते स्वेति । स्वन + क्त । "चुस्वान्तध्वान्तेति ।" ७ । २ । १८ । इति अनिट

कत्वं निपातितञ्च।) मनः। इत्यमरः।१।४।३१॥ (यथा, भट्टिः। ६। २२।

"तस्यालिपत गोत्राग्निः स्वान्तं काष्ठमिव ज्वलन्।
अस्त्रिसेवानिलः शीतो वने तं न त्वजिघ्रदत्॥")

गह्वरम्। इति मेदिनी॥ (स्वञ्च अन्ते, पुं, क्लो। यथा, भागवते।२। ६। ३४।

"यो ग्राममायाविभवश्च पर्य्यगाद्
यथा नभः स्वान्तमथापरे कृतः॥")

शब्दिते, त्रि॥

स्वापः, पुं, (स्वप + घञ्।) निद्रा। इत्यमरः। १। ७। ३६॥ (यथा, भागवते।३।२६।२८।

"संप्रयोऽथ विपर्य्यासो नियमः स्मृतिरेव च।
स्वाप इत्युच्यते तुर्य्यस्तत्त्वं हित्वा पृथक्॥")

शयनम्। अर्थाग्रहः। अज्ञानम्। इति विश्वमेदिन्यौ॥ (विषयोऽस्य यथा,—

"सर्व्वर्त्तुषु दिवास्वापः प्रतिसिद्धोऽन्यत्र ग्रीष्मात्॥"

इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥)

स्वापतेयं, क्लौ, (स्वपतौ धनस्वामिनि साधुः। स्वपति + "पथ्यतिथिवसतिस्वपतेर्ढञ्।" ४। ४। १०४। इति ढञ्। आगतादित्वाद्वेजागमः।) धनम्। इत्यमरः। २। ८। ८९॥ (यथा, माघे। १४। ८।

"स्वापतेयमधिगम्य धर्म्मतः
पर्य्यपायमवबुध्य यत्।
तीर्थगामि करवै विधानतः
स्वस्य पस्य जुहवानि चानले॥")

स्वापदः, पुं, (श्वापदः। पृषोदरादित्वात् साधुः।) श्वापदः। इति हलायुधः॥

स्वाभाविकः, त्रि, (स्वभावे भवः। स्वभाव + ठक्। स्वभावसिद्धः। स्वभावत उत्पन्नः। यथा,—

"शैत्यं नाम गुणस्तवैव सहजः स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवन्ति शुचयः सर्गेण यस्यापरे।
किञ्चान्यत् कथयामि ते स्तुतिपदं त्वं जीवितां जीवनं
त्वय्येवोचितयेन गच्छसि पयः कन्यां निषेक्तुं क्षमः॥"

इति वल्लालसेनं प्रति सच्चरणसेनप्रेरितश्लोकः॥ (व्याधिप्रकारभेदः। यथा,—

"तदुःखसंयोगा व्याधय इत्युच्यन्ते। चतुर्व्विधाः आगन्तवः शारीरा मानसाः स्वाभाविका इति। स्वाभाविकाः क्षुत्पिपासाजराशृत्युनिद्राप्रभृतयः॥" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये॥)

स्वामिजही, [न्] पुं, परशुरामः। इति शब्दमाला॥

स्वामी, [न्] त्रि, (स्वमस्यास्तीति। स्व + "स्वामिन्नैश्वर्य्ये।" ५। २। १२९। इति आमिन्प्रत्ययेन निपातितः।) अधिपतिः। तत्पर्य्यायः। ईश्वरः २ प्रतिः ३ ईशिता ४ अधिभूः ५ नायकः ६ नेता ७ प्रभुः ८ परिवृढः ९ अधिपः १०। इत्यमरः। ३। १। १०॥ अवमतिः ११ ईशः १२ आर्य्यः १३। इति जटाधरः॥ पालकः १४। इति शब्दरत्नावली॥

स्वामी, [न्] पुं, (स्वमस्यास्तीति। स्व + आमिन्।) कार्त्तिकेयः। इति मेदिनी॥ राजा। यथा,—

"स्वाम्यमात्यः सुहृत् कोषो राष्ट्रदुर्गबलानि च।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च॥"

इत्यमरः। २। ८। १७॥

विभुः। हरः। हरिः। इति शब्दरत्नावली॥

गुरुः। भर्त्ता। इति धरणिः॥ वाल्मीकिमुनिः। इति त्रिकाण्डशेषः॥ गरुड़ः। इति केचित्॥ अतीतकल्पीयार्हभेदः। इति हेमचन्द्रः॥ परमहंसः। यथा, श्रीधरस्वामिप्रभृतयः॥ * ॥

स्वाम्यर्थमरणफलं यथा, वह्निपुराणे संग्रामप्रशंसानामाध्याये।

"ऋक्षिभिर्दंष्ट्रिभिर्व्वापि तथा श्वेच्छैस्तस्करैः।
स्वाम्यर्थे ये हता राजन् तेषां स्वर्गो न संशयः॥
हते गोस्वामिविप्रार्थे नरमेधफलं हि तत्॥"

स्वामिप्रशंसा यथा,—

"स्त्रीगर्व्वः पतिसौभाग्याद्धते च दिने दिने।
सुखी चेहिभवो यस्मात्तं भजेद्धर्म्मतः सदा॥
पतिर्बन्धुः कुलस्त्रीणामधिदेवः सदा पतिः।
परं सम्यक्स्वरूपञ्च सुखरूपञ्च मूर्त्तिमान्॥
धर्म्मदः सुखदः शश्वत् प्रीतिदः शान्तिदः सदा।
सम्मानदो मानदश्च मान्यश्च मानखण्डनः॥
साराच्छारतमः स्वामी बन्धूनां बन्धुदर्शनः।
न च भर्त्तुः समो बन्धुर्बन्धोर्बन्धुषु दृश्यते॥
भरणादेव भर्त्तारं पालनात् पतिरुच्यते।
शरीरेशश्च स स्वामी कामदात् कान्त उच्यते।
बन्धुश्च सुखबन्धाच्च प्रीतिदानात् प्रियः परः।
ऐश्वर्य्यदानादीशश्च प्राणेशात् प्राणनायकः॥
रतिदानाच्च रमणः प्रियो नास्ति प्रियात् परः।
पुत्रस्तु स्वामिनः शुक्रात् जायते तेन स प्रियः॥
शतपुत्रात् परः स्वामी कुलजानां प्रियः सदा।
असत्कुलप्रसूता या कान्तं विज्ञातुमक्षमा॥
ज्ञानञ्च सर्व्वतोवेदे सर्व्वयज्ञेषु दीक्षणम्।
प्रादक्षिण्यं पृथिव्याश्च सर्व्वाणि च तपांसि च॥
सर्व्वाण्येव व्रतानीति महादानानि यानि च।
उपोषणानि पुण्यानि ग्राम्यधर्म्माणि च विद्यतः॥
गुरुसेवा विप्रसेवा देवसेवादिकञ्च यत्।
स्वामिनः पादसेवायाः कलां नार्हन्ति षोड़शीम्॥
गुरुर्विप्रेष्टदेवेषु सर्व्वेभ्यश्च पतिर्गुरुः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ४२। २९—३०॥

स्वाम्युपकारकः, पुं, (स्वामिन उपकारकः।) भृत्यः। इति केचित्॥ प्रभुहितकारके, त्रि॥

स्वायम्भुवः, पुं, (स्वयम्भुवोऽपत्यमिति। स्वयम्भू + अण्। संज्ञापूर्व्वकस्य विधेरनित्यत्वात् न गुणः।) प्रथममनुः। स च सृष्टिहृदये ब्रह्मणो दक्षिणाङ्गाज्जातः। वामाङ्गात् शतरूपा स्त्री तस्य महिषी आसीत्। अस्मिन्मन्वन्तरे यज्ञोऽवतारः स एव इन्द्रः। यमादयो देवाः मरीच्यादिसप्तर्षयः। स्वायम्भुवो मनुः। प्रियव्रतोत्तानपादौ मनुपुत्रौ। आकूतिः देवहूतिः प्रसूतिः कन्याः। इति श्रीभागवतमतम्॥ * ॥ अपि च।

"यामा नाम पुरा देवाः आसन् स्वायम्भुवेऽन्तरे।
सप्तैव ऋषयः पूर्व्वं ये मरीच्यादयः स्मृताः॥
अग्निध्रयाग्निबाहुश्च रिभुः सवन एव च।
ज्योतीमान् द्युतिमान् हव्यो मेधा मेधातिथिर्व्वसुः॥
स्वायम्भुवस्यास्य मनोर्ब्रह्मैते वंशवर्द्धनाः।
प्रतिसर्गमसौ ज्ञात्वा जग्मुस्ते परमं पदम्॥
एतत् स्वायम्भुवं प्रोक्तं स्वारोचिषमतः परम्॥"

इति मात्स्ये। ८। ३—६॥ * ॥

अपरञ्च।

"ततो ब्रह्मात्मसंभूतं पूर्व्वं स्वायम्भुवं प्रभुः।
आत्मनः सदृशं चक्रे प्रजापाल्ये मनुं तदा॥
शतरूपाञ्च तां नारीं तपोनिर्धूतकल्मषाम्।
स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे प्रभुः॥
तस्याञ्च पुरुषात् पुत्रौ शतरूपा व्यजायत।
प्रियव्रतोत्तानपादौ प्रख्यातावात्मकर्म्मभिः॥
कन्ये द्वे च तथाकूतिः प्रसूतिश्च ततः पिता।
ददौ प्रसूतिं दक्षाय तथाकूतिं रुचेः पुरा॥
प्रजापतिः स जग्राहे तयोर्यज्ञः सदक्षिणः।
पुत्रो जज्ञे महाभागः दम्पत्योर्मिथुनं ततः॥
यज्ञस्य दक्षिणायास्तु पुत्रो द्वादश जज्ञिरे॥
यामा इति समाख्याता देवाः स्वायम्भुवेऽन्तरे।
तस्य पुत्रास्तु यज्ञस्य दक्षिणायां सुभास्वराः॥
प्रसूत्याञ्च तथा दक्षसुतास्तो विंशतिस्तथा।
ससर्ज कन्यास्तासान्तु सम्यक् नामानि मे शृणु॥"

इति मार्कण्डेयपुराणे दुःसहाशसनामाध्यायः॥ (तत्सम्बन्धिनि, त्रि। यथा, हरिवंशे। ७। ९।

"यामा नाम तथा देवा आसन् स्वायम्भुवेऽन्तरे॥"

ब्रह्मसम्बन्धिनि च त्रि। यथा, कुमारे।२।१।

"तस्मिन् विप्रकृताः काले तारकेण दिवौकसः।
तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः॥")

स्वायम्भुवमनुपिता, [तृ] पुं, (स्वयम्भुवमनोः पिता।) ब्रह्मा। इति पुराणम्॥

स्वायम्भुवी, स्त्री, (स्वयम्भुव इयमिति। अण्। ङीष्।) ब्राह्मी। इति राजनिर्घण्टः॥

स्वराट्, [ज] पुं, (स्वः स्वर्गे राजते इति। राज् + क्विप्।) इन्द्रः। इत्यमरः। १। १। ४६॥

स्वारोचिषः, पुं, (स्वरोचिषोऽपत्यमिति। अण्।) द्वितीयो मनुः। अस्मिन् मन्वन्तरे विभुरवतारः। रोचन इन्द्रः। तुषितादयो देवाः। ऊर्ज्जस्तम्बादयः सप्तर्षयः। अग्निसुतः स्वारोचिषो मनुः। द्युमत्सुषेणरोचिष्मत्प्रमुखा मनुपुत्राः। इति श्रीभागवतमतम्॥ अपि च।

"स्वारोचिषस्य तनयाश्चत्वारो देववर्चसः।

नभोनभस्यप्रसूतिभानवः कीर्त्तिवर्द्धनाः ॥
दक्षोलिखावनस्वस्वः प्राणः कश्यप एव च ।
और्व्वो हविर्भुतिर्वैव सप्त सप्तर्षयः स्मृताः ॥
देवाश्च तुषिता नाम स्मृताः स्वारोचिषेऽन्तरे ।
इन्द्रश्चैत्रः सुकृतो मूर्त्तिरापज्योतिरयः स्वयः ॥
वशिष्ठस्य सुताः सप्त ये प्रजापतयस्तदा ।
द्वितीयमेतत् कथितं मन्वन्तरमतः परम् ॥"
इति मार्कण्डेये । ८ । ७—१० ॥

स्वार्थः, पुं, (स्वस्य अर्थः ।) स्वीयाभिधेयः । स्वकीयधनम् । स्वीयवस्तु । आत्मप्रयोजनम् । (यथा, माघे । २ । ६५ ।
"यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपत्विनः ।
वयं इनाम द्विषतः सर्व्वः स्वार्थे समीहते ॥")
स्वनिवृत्तिः । इति अर्थशब्दार्थदर्शनात् ॥ लिङ्गार्थविशेषः । यथा,—
"स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्या कर्म्मादिरेव च ।
अमी पञ्चैव लिङ्गार्थास्त्रयः केषाञ्चिदग्रिमाः ॥
स्वार्थो विशेषणम् । द्रव्यं विशेष्यम् । लिङ्गं पुंस्त्वादि । संख्या एकत्वादिः । कर्म्मादिर्दादिः ।"
इति मुग्धबोधटीकायां दुर्गादासः ॥

स्वास्थ्यं, क्ली, (स्वस्थस्य भावः । स्वस्थ + ष्यञ् ।) आरोग्यम् । इति शब्दरत्नावली ॥ (यथा,—
"गतवेगे भवेत् स्वास्थ्यं सर्व्वेष्वाक्षेपकादिषु ।"
इति माधवकरकृतरुग्विनिश्चयसंग्रहे वातव्याध्यधिकारे ॥) सन्तोषः । इति हेमचन्द्रः ॥ (यथा, साहित्यदर्पणे । ३ । २४८ ।
"किं वक्त्रन्यपकलषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ॥")

स्वाहा, व्य, (सुष्ठु आह्वयन्ते देवा अनेनेति । सु + आ + ह्वे + डा ।) देवहविर्दानमन्त्रः । तत्पर्य्यायः । औषट् २ वौषट् ३ वषट् ४ स्वधा ५ । इत्यमरः । ३ । ४ । ८ ॥ अस्य टीका स्वधाशब्दे द्रष्टव्या ॥ (यथा, देवीभागवते । १ । ५४ ।
"त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥")

स्वाहा, स्त्री, अग्निभार्य्या । सा दक्षकन्या । इति श्रीभागवतम् ॥ तत्पर्य्यायः । अग्नायी २ हुतभुक्प्रिया ३ । इत्यमरः । २ । ३ । २१ ॥ हिठः ४ अनलप्रिया ५ । इति बीजवर्णाभिधानम् ॥ वह्निवधूः । ६ । इति शब्दरत्नावली ॥* ॥ मतान्तरे तस्या उत्पत्तिर्यथा,—
नारद उवाच ।
"स्वाहा देवहविर्दाने प्रशस्ता सर्व्वकर्म्मसु ।
पिण्डदाने स्वधा श्रेष्ठा दक्षिणा सर्व्वतो वरा ॥
एतासां चरितं जन्म फलं प्राधान्यमेव च ।
श्रोतुमिच्छामि त्वद्वक्त्राद्वेदविदां वर ॥
सौतिरुवाच ।
नारदस्य वचः श्रुत्वा प्रहस्य मुनिपुङ्गवः ।
कथां कथितुमारेभे पुराणोक्तां पुरातनीम् ॥

श्रीनारायण उवाच ।
सृष्टेः प्रथमतो देवाश्चाहारार्थं ययुः पुरा ।
ब्रह्मलोके ब्रह्मसभामगम्यां सुमनोहराम् ॥
मत्वा निवेदनक्लेशाहारहेतुकं मुने ।
ब्रह्मा श्रुत्वा प्रतिज्ञाय सस्मरे श्रीहरिं परम् ॥
यन्नरूपो हि भगवान् कलया च बभूव सः ।
यज्ञे यद्यद्विर्हानं दत्तं तस्मय कर्म्मणा ॥
हविर्हरति विप्राय भक्त्या च क्षत्रियादयः ।
सुरा नैव प्राप्नुवन्ति तद्दानं मुनिपुङ्गव ! ॥
देवा विषण्णास्ते सर्व्वे ततः सभाश्च ययुः पुनः ।
गत्वा निवेदनं चक्रुराहाराभावहेतुकम् ॥
ब्रह्मा श्रुत्वा तु ध्यानेन श्रीकृष्णवरणं ययौ ।
पूजाञ्चकार प्रकृतेर्धानेनैव तदाज्ञया ॥
प्रकृतेः कलया चैव सर्व्वशक्तिस्वरूपिणी ।
बभूव दाहिका शक्तिरग्नेः स्वाहा स्वकामिनी ॥
श्रीकृष्णध्यानजमार्त्तण्डप्रभाच्छादनकारिणी ॥
अतीवसुन्दरी रामा रमणीया मनोहरा ।
ईषद्धास्यप्रसन्नास्या भक्तानुग्रहकातरा ॥
उवाचेति विधेरग्रे पद्मयोने ! वरं वृणु ।
विधिस्तद्वचनं श्रुत्वा संभ्रमात् समुवाच ताम् ॥
ब्रह्मोवाच ।
त्वमग्नेर्दाहिका शक्तिर्भव पत्नी च सुन्दरि ! ।
दग्धुं न शक्तस्त्वत्तो हुताशश्च त्वया विना ॥
तन्नामोच्चार्य्य मन्त्रान्ते यो दास्यति हविर्नरः ।
सुरेभ्यस्तत् प्राप्नुवन्ति सुराः स्वानन्दपूर्व्वकम् ॥
अग्नेः सम्पत्स्वरूपा च श्रीरूपा सा वरेश्वरी ।
देवानां पूजिता शश्वत् नरादीनां भवाम्बिके ॥
ब्रह्मणश्च वचः श्रुत्वा सा विषण्णा बभूव ह ।
तमुवाच ततो देवी स्वाभिप्रायं स्वयम्भुवम् ॥
स्वाहोवाच ।
अहं कृष्णं भजिष्यामि तपसा सुचिरेण च ॥
ब्रह्मंस्तदन्यत् यत्किञ्चित् स्वप्नवद्भ्रम एव च ॥
विधाता जगतां त्वञ्च शम्भुर्मृत्युञ्जयः प्रभो ।
विभर्त्ति शेषो विश्वञ्च धर्म्मः साक्षी च धर्म्मिणाम् ॥
सर्व्वाद्यपूज्यो देवानां गणेषु च गणेश्वरः ।
प्रकृतिः सर्व्वसूः सर्व्वपूजिता यत्प्रसादतः ॥
ऋषयो मुनयश्चैव पूजितां यं निषेव्य च ।
तत्पादपद्मं पद्मैकभावेन चिन्तयाम्यहम् ॥
पद्मास्या पाद्ममित्युक्ता पद्मनाभानुसारतः ।
जगाम तपसे पाद्मे पद्मादीक्षस्य पद्मजा ॥
तपस्तेपे लक्षवर्षमेकपादेन पद्मजा ।
तदा ददर्श श्रीकृष्णं निर्गुणं प्रकृतेः परम् ॥
अतीवकमनीयञ्च रूपं दृष्ट्वा च रूपिणी ।
मूर्च्छां संप्राप कामेन कामेशस्य च कामुकी ॥
विज्ञाय तदभिप्रायं सर्व्वेशस्तामुवाच सः ।
समुत्थाप्य च स्वक्रोडे चीर्णाङ्गीं तपसा चिरम् ॥
श्रीकृष्ण उवाच ।
वाराहे च त्वमंशेन मम पत्नी भविष्यसि ।
नाम्ना नाग्नजिती कन्या कान्ते नग्नजितस्य च ।
अधुनाग्नेर्दाहिका त्वं भव पत्नी च भाविनि ! ।
मन्त्ररूपा च पूता च मत्प्रसादाद्भविष्यसि ॥

वह्निस्त्वां भक्तिभावेन संपूज्य च गृहेश्वरीम् ।
रमिष्यते त्वया सार्द्धं रामया रमणीयया ॥
इत्युक्त्वान्तर्दधे देवी देवीमाश्वास्य नारद ! ।
तदाजगाम मंत्रज्ञो वह्निर्ब्रह्मनिदेशतः ॥
सामवेदोक्तध्यानेन ध्यात्वा तां जगदम्बिकाम् ।
संपूज्य परितुष्टाव पाणिं जग्राह मन्त्रतः ॥
तदा दिव्यवर्षशतं स रेमे रामया सह ।
अतीवनिर्जने रम्ये संभोगसुखदे सदा ॥
बभूव गर्भस्तस्याश्च हुताशस्य च तेजसा ।
तद्धार च सा देवी दिव्यं द्वादशवत्सरम् ॥
ततः सुषाव पुत्रांश्च रमणीयान्मनोहरान् ।
दक्षिणाग्निर्गार्हपत्याहवनीयान् क्रमेण च ॥
ऋषयो मुनयश्चैव ब्राह्मणाः क्षत्रियादयः ।
स्वाहान्तं मन्त्रमुच्चार्य्य हविर्ददति नित्यशः ॥
स्वाहायुक्तञ्च मन्त्रञ्च यो गृह्णाति प्रशस्तकम् ।
सर्व्वसिद्धिर्भवेत्तस्य ब्रह्मन् ग्रहणमात्रतः ॥
विषहीनो यथा सर्पो वेदहीनो यथा द्विजः ।
पतिसेवाविहीना स्त्री विद्याहीनो यथा नरः ॥
फलशाखाविहीनश्च यथा वृक्षो हि निन्दितः ।
स्वाहाहीनस्तथा मन्त्रो न हुतं फलदायकः ॥
परितुष्टाः द्विजाः सर्व्वे देवाः संप्रापुराहुतिम् ।
स्वाहान्तेनैव मन्त्रेण सफलं सर्व्वकर्म्म च ॥
इत्येवं कथितं सर्व्वं स्वाहोपाख्यानमुत्तमम् ।
सुखदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥
नारद उवाच ।
स्वाहापूजाविधानञ्च ध्यानं स्तोत्रं मुनीश्वर ।
संपूज्य वह्निस्तुष्टाव येन तां वद मे प्रभो ! ॥
श्रीनारायण उवाच ।
ध्यानञ्च सामवेदोक्तं स्तोत्रं पूजाविधानकम् ।
वदामि शृणुतां ब्रह्मन् सावधानं निशामय ॥
सर्व्वयज्ञारम्भकाले ग्रामग्रामे घटेऽथवा ।
स्वाहां संपूज्य यत्नेन यज्ञं कुर्य्यात् फलाप्तये ॥
स्वाहां मन्त्राङ्गभूताञ्च मन्त्रसिद्धिस्वरूपिणीम् ।
सिद्धाञ्च सिद्धिदां नृणां कर्म्मणां फलदां भजे ॥
इति ध्यात्वा च मूलेन दत्त्वा पाद्यादिकं नरः ।
सर्व्वसिद्धिं लभेत् स्तुत्वा मूलं स्तोत्रं शृणु ॥
ॐ ह्रीं श्रीं वह्निजायायै देव्यै स्वाहेत्यनेन च ।
यः पूजयेच्च तां देवीं सर्व्वेष्टं लभते ध्रुवम् ॥
वह्निरुवाच ।
स्वाहायाः प्रकृतेरंशा मन्त्राङ्गस्वरूपिणी ।
मन्त्राणां फलदात्री च धात्री च जगतां सती ॥
सिद्धिरूपा च सिद्धा च सिद्धिदा सर्व्वदा नृणाम् ।
हुताशदाहिका शक्तिस्तत्प्राणाधिकरूपिणी ॥
संसारसाररूपा च घोरसंसारतारिणी ।
देवजीवनरूपा च देवपोषणकारिणी ॥
षोड्शैतानि नामानि यः पठेद्भक्तिसंयुतः ।
सर्व्वसिद्धिर्भवेत्तस्य सर्व्वकर्म्म सुशोभनम् ।
अपुत्रो लभते पुत्रमभार्य्यो लभते प्रियाम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे स्वाहोपाख्यानं नाम । ४० । ७—५६ ॥* ॥ बोडशशक्तिविशेषः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ श्रीः ५ मनोरमा ६ तारिणी ७ जया ८

स्वीकारः

अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वेश्या १४ नीलसरस्वती १५ गङ्गिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचनास्या २१। इति त्रिकाण्डशेषः ॥

स्वाहापतिः, पुं, (स्वाहायाः पतिः।) अग्निः। इति धरणिः ॥

स्वाहाप्रियः, पुं, (स्वाहायाः प्रियः।) अग्निः। इति हलायुधः ॥

स्वाहाभुक्, [ज्] पुं, (स्वाहया भुङ्क्ते इति। भुज+क्विप्।) देवता। इति त्रिकाण्डशेषः ॥

स्वित्, अ, प्रश्नः। (यथा, महाभारते। ५।१५।८।

"किं ब्राह्मणा वै श्रेयांसो दितिजाः सिद्धिरोचन ॥")

वितर्कः। इत्यमरः। ३। ३। २४१ ॥ (यथा, मेघदूते। १४।

"अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखोभिर्दृष्टोच्छ्रायश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ॥"

पादपूरणम्। इति मेदिनी ॥ प्रश्ने पृच्छायाम्। यथा स्विदेकाकी विचरसि। वितर्के नानापक्षावमर्षः। स्वित् प्रश्ने च वितर्के च तथैव पादपूरणे। इति मेदिनी। इति भरतः ॥

स्विदितः, त्रि, स्वेदितः। यथा। विभाषायामादिकर्मणोः। भावे आदिकर्मणि चादितो निष्ठाया इड् वा स्यात्। प्रस्वेदितयत्नः। प्रेस्वेदितं तेन। ञि स्विदेति भ्वादिरत्र गृह्यन्ते ञिष्विदां साहचर्य्यात्। स्विद्यतेस्तु स्विदित इत्येव। इति सिद्धान्तकौमुदी ॥

स्विन्नः, त्रि, (स्विद्+क्तः।) घर्म्मयुक्तः। यथा। स्विन्नो घर्मोपितो जनः। इति हलायुधः ॥ (यथा च कुमारे। ७। ७७।

"रोमोद्गमः प्रादुरभूदमायाः स्विन्नाङ्गुलिः पुङ्खवकेतुरासीत् ॥"

पक्वम्। यथा,—

"अस्यं चैत्रगातं प्राहुः सतुषं धान्यमुच्यते। आमं वितुषमित्युक्तं स्विन्नमल्पमुदाहृतम् ॥"

इति त्रिकाण्डशेषधृतवशिष्ठवचनम् ॥

स्वीकारः, पुं, (अस्वस्य स्वस्य कारः करणम्। स्व+क+घञ्। अभूततद्भावे च्वेः।) अङ्गीकारः। यथा,—

"सम्विदागूः प्रतिज्ञा च सन्धावाचश्च सङ्गरः। अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ संश्रवोद्धारनियमोररीकाराश्रवा अपि ॥"

इति जटाधरः ॥

प्रतिज्ञानम्। इति शब्दरत्नावली ॥ अस्वं स्वं कुर्व्वन् व्यापारः। यथा। न च स्वीकारात् स्वत्वं स्वीकर्त्तुरेव दाढर्ट्यापत्तेः। किञ्च। मनसा पात्रमुद्दिश्य इत्यादि ग्राह्यं स्वीकारात् प्रागेव दानपदं दृष्टम्। ननु ग्रहणं स्वीकारोऽभूततद्भावे विधेयत्वात् अस्वं स्वं कुर्व्वन् व्यापारः भवति कथं ततः प्रागेव स्वत्वम्। उच्यते उत्पन्नमपि

स्वीया

स्वत्वं सम्प्रदानव्यापारेण ममेदमिति ज्ञानेन व्यवहाराई क्रियत इति स्वीकारशब्दार्थः। इति दायभागः ॥

स्वीयः, त्रि, (स्वस्यायमिति। स्व+छः।) स्वकीयः। आत्मीयः। यथा, स्कान्दे शिववाक्यम्।

"शूद्रः कर्म्मापि यो नित्यं स्वीयानि कुरुते प्रिये। तस्याहमर्द्धं गृह्णामि चन्द्रखण्डविभूषिते! ॥"

इति तिथ्यादितत्त्वम् ॥

स्वीया, स्त्री, (स्वस्येयमिति। स्व+छः। टाप्।) नायिकाभेदः। तस्या लक्षणम्। स्वामिन्येवानुरक्ता पतिव्रता इति यावत्। अस्याश्चेष्टा स्वामिशुश्रूषा शीलरक्षा सरलता क्षमा च। सा च त्रिविधा। मुग्धा मध्या प्रगल्भा च। एताः सर्व्वा नायिका अवस्थाभेदेन प्रत्येकं नवविधा। प्रोषितभर्त्तृका खण्डिता कलहान्तरिता विप्रलब्धा उत्कण्ठिता वासकसज्जा स्वाधीनपतिका अभिसारिका प्रवत्स्यत्पतिका च। एताः प्रत्येकं उत्तममध्यमाधममेदेन अष्टाविंशत्युत्तरशतनायिका भवन्ति। एतासां दिव्यादिव्यगुणभेदेन चतुरशीत्युत्तरशतत्रयप्रकारा भवन्ति। तत्र प्रमाणं यथा। नायिका त्रिविधा। स्वीया परकीया सामान्यवनिता चेति। तत्र स्वामिन्येवानुरक्ता स्वीया। न च परिणीतायां परगामिन्यामतिव्याप्तिस्तव पतिव्रताया एव लक्ष्यत्वात्। तस्या परगामितया परकीयत्वमेव समायाति। अस्याश्चेष्टा। भर्त्तुः शुश्रूषा। शीलसंरक्षणम्। आर्জ্জवम्। क्षमा च। यथा,—

"गतागतकुतूहलं नयनयोरपाङ्गावधि स्मितं कुलनतभ्रुवामधर एव विश्राम्यति। वचः प्रियतमश्रुतेरतिथिरेव कोपक्रमः कदाचिदपि चेत्तदा मनसि केवलं मज्जति ॥"

अपि च।

"सञ्चारो रतिमन्दिरावधि सखीकर्णावधि व्याहृतं चेतः कान्तसमीहितावधि पदन्यासावधि प्रेक्षितम्। हास्यश्चाधरपल्लवावधि महामानोऽपि मौनावधि सर्व्वं स्वावधि नावधिः कुलभुवां प्रेम्णः परं केवलम् ॥"

अपि च।

"पदन्यासो गेहाद्बहिरहिफणारोहसमः स्वगेहादन्यत् यद्वनमपरदीपत्युलितम्। वचो लोकालभ्यं क्षपणधनतुल्यं मृगदृशः पुमानन्यः कान्ताद्विधुरिव चतुर्थीसमुदितः ॥"

स्वीयापि त्रिविधा। मुग्धा मध्या प्रगल्भा च। तत्राङ्कुरितयौवना मुग्धा। सा च प्रातयौवना अप्रातयौवना च। सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढा। सैव क्रमशो जातप्रत्यया विश्रब्धनवोढा। अस्याश्चेष्टा। क्रिया मनोहर

स्वीया

कोपे माईवं नवविभूषणे सभीहा च ॥ * ॥

मुग्धा यथा,—

"आज्ञप्तं किल कामदेवधरणीपालेन काले गृभे वस्तुं वास्तुविधिं विधास्यति तनौ तारुण्यभेणीदृशः। दृष्ट्वा खञ्जनचातुरी मुखरुचा सौधाकरी माधुरी वाचा किञ्च सुधासमुद्रलहरी लावण्यमामन्यते ॥"

अप्रातयौवना यथा,—

"नीरात्तीरमुपागता श्रवसयोः सीम्नि स्फुरन्नेत्रयोः श्रोत्रे लग्नमिदं किमुत्पलमिति घ्रातुं करं न्यस्यति। सैवालाङ्कुरशङ्कया शिखिमुखी रोमावलीं प्रोञ्छति श्रान्ताश्रीति सुहृः सखीमविदितश्रोणीभरा पृच्छति ॥"

प्रातयौवना यथा,—

"स्वयम्भुः शम्भुरम्भोजलोचने! तत्पयोधरः। नखेन कस्य धन्यस्य चन्द्रचूडो भविष्यति ॥"*॥

नवोढा यथा,—

"हस्ते धृतापि शयने विनिवेशितापि क्रोडे कृतापि यतते बहिरेव गन्तुम्। जानोमहे नवबधूरय तस्य वश्या। यः पारदं स्थिरयितुं क्षमते करेण ॥"

यथा च।

"बलान्नीता पार्श्वं सुखमनुसुखं नैव कुरुते धुनाना मूर्द्धानं क्षिपति वदनं चुम्बनविधौ। हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना नवोढा वोढारं रमयति च सन्तापयति च ॥"*॥

विश्रब्धनवोढा यथा,—

"दरमुकुलितनेत्रापाङ्गिनीवो- नियमितबाहुकृतोरुयुग्मबन्धम्। मरकतकुचकुम्भं नवोढा स्थापयति समीपमुपेत्य कस्य पूनः ॥"*॥

समानलज्जामदना मध्या। एषा चातिप्रत्ययादतिविश्रब्धनवोढा। अस्याश्चेष्टा सागसि प्रेयसि धैर्य्यं वक्रोक्तिरधैर्य्यं परुषवाक्। यथा,—

"स्थापे प्रियाननविलोकनहानिरेव स्थापच्युतौ प्रियकरग्रहणप्रसङ्गः। इत्थं सरोरुहमुखी परिचिन्तयन्ती स्थापं विधातुमपि हातुमपि प्रपेदे ॥"*॥

पतिमात्रविषयकेलिकलापकोविदा प्रगल्भा। वेश्यायां कुलटायाञ्च पतिमात्रविषयत्वाभावात् न तत्रातिव्याप्तिः। अस्याश्चेष्टा रतिप्रीतिरानन्दादात्मसंमोहः। प्रथमं यथा,—

"संसृश्य स्तनमाकलय्य वदनं संश्लिष्य कण्ठं स्वलं निष्पीयाधरबिम्बमम्बरमपाकृष्य व्युदस्यालकम्।

देवस्याम्बुजिनीपतेः समुदयं जिज्ञासमाने प्रिये
वामाक्षी वसनाञ्चलेः श्रवणयोर्नीलोत्पलं
निह्नुते ॥"* ॥

यथा च ।

"नखाङ्कितमुरःस्थलेऽधरतले रदस्य क्षतं
च्युता बकुलमालिका विगलिता च मुक्तावली ।
रतान्तसमये मया सकलमेतदालोकितं
स्मृतिः क्व च पतिः क्व च क्व च तवापि शिक्षा-
विधिः ॥"

अपि च ।

"कान्ते तल्पमुपागते विगलिता नीवी स्वयं
बन्धनात्
वासश्च श्रथमेखलागुणधृतं किञ्चित् नितम्बे
स्थितम् ।
एतावत् सखि वेद्मि केवलमहो तस्याङ्गसङ्गे पुनः
कोऽसौ काऽहि रतञ्च कौट्टमिति स्वल्पापि मे
न स्मृतिः ॥" * ॥

मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे ।
धीरा अधीरा धीराधीरा चेति । व्यङ्ग्यकोप-
प्रकाशा धीरा । अव्यङ्ग्यकोपप्रकाशा अधीरा ।
व्यङ्ग्याव्यङ्ग्यकोपप्रकाशा धीराधीरा । इयांस्तु
विशेषः । मध्यमायाः धीरायाः कोपव्यञ्जिका
गीः । अधीरायाः परुषवाक् । धीराधीरायाः
वचनरुदिते प्रकाशिके । प्रौढ़ाधीरायास्तु
रतावौदास्यम् । अधीरायास्तर्जनताडनादिः ।
धीराधीरायाः रतावौदास्यं तर्जनादि च कोप-
प्रकाशकम् । यत्तु धीरादिभेदः स्वीयाया एव
न परकीयाया इति प्राचीनलिखनं तदाज्ञा
मात्रं धीरात्वमधीरात्वं तदुभयञ्च माननियत-
मेव परकीयाया मानञ्च नेति वक्तुमशक्यत्वात्
परकीयाया मानस्यैतेषामप्यावश्यकत्वादिति
भावः ॥ * ॥ मध्या धीरा यथा,—

"लोलालिपुञ्जे व्रजतो निकुञ्जे
स्फारा बभूवुः श्रमवारिधाराः ।
देहे ममेहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥" * ॥

मध्या अधीरा यथा,—,

"जातस्ते निशि जागरो मम पुनर्नेत्राम्बुजे शोणिमा
निर्यातं भवता मधु प्रविततं व्याघूर्णितं मे
मनः ।
भ्राम्यद्भृङ्गघने निकुञ्जभवने लब्धं त्वया श्रोफलं
पद्मेषुः पुनरेष मां बहुतरैः क्रूरैः शरैः
क्रन्तति ॥" * ॥

मध्या धीराधीरा यथा,—

"कान्तानुरागचतुरोऽसि मनोहरोऽसि
नाथोऽसि किञ्च नवयौवनभूषितोऽसि ।
इत्थं निगद्य सुदृशा वदने प्रियस्य
निश्वस्य वाससुलिता निहिता दृगन्ताः ॥"*॥

प्रौढ़ा धीरा यथा,—

"नो तल्पं भजसे न जल्पसि सुधाधारानुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाश-
च्छलात् ।
इत्थं केतकगर्भगौरि दयिते कोपस्य भंगोपनं
किं स्यादेव न चेत् पुनः सहचरो कुर्व्वीत
साचि स्मितम् ॥"*॥

प्रगल्भा अधीरा यथा,—

"प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्यावासमाशङ्कमाना ।
गिरिशमचलकन्या तर्ज्जयामास कम्प-
प्रचलवलयवेल्लत्कान्तिभाजा करेण ॥"* ॥

प्रगल्भा धीराधीरा यथा,—

"तल्पोपान्तमुपेयुषि प्रियतमे साचीकृतग्रीवया
काकुव्याकुलवाचि साचिहसितस्फूर्ज्जत्कपोल-
श्रिया ।
हस्तन्यस्तकरे पुनर्मृगदृशा लाक्षारसाङ्कलित-
प्रौष्ठोदृष्टमयूखमांसलरुचो विस्फारिता
दृष्टयः ॥"*॥

एते धीरादिषड्भेदा द्विविधा । धीरा ज्येष्ठा
कनिष्ठा च । अधीरा ज्येष्ठा कनिष्ठा च
धीराधीरा ज्येष्ठा कनिष्ठा च इत्यपि क्वचित्
पाठः एते धीरादित्रयो भेदात् द्विविधा
भवन्ति । ज्येष्ठा कनिष्ठा च । परिणीतत्वे
सति भर्त्तरधिकस्नेहा ज्येष्ठा । परिणीतत्वे
सति भर्त्तुर्न्यूनस्नेहा कनिष्ठा । अधिकस्नेहासु
न्यूनस्नेहासु सामान्यवनितादिषु नातिव्याप्तिः ।
परिणीतत्वपदेन व्यावर्त्तनात् । नापि परकी-
यायामतिव्याप्तिः । भर्त्तृपदेन तद्व्यावृत्तेः । धीरा
ज्येष्ठा कनिष्ठा च यथा,—

"एकस्मिन् शयने सरोरुहदृशोर्विज्ञाय निद्रां
तयो-
रेकां पल्लवितावगुण्ठनपटामुत्कन्धरो दृष्टवान्
अन्यस्याः सविधं समेत्य निभृतं व्यालोलहस्ता-
ङ्गुलि-
व्यापारैर्वसनाञ्चलञ्चपलयन् स्वाण्युतिं क्रुध्य
वान् ॥"॥*॥

अधीरा ज्येष्ठा कनिष्ठा यथा,—

"अन्तःकोपकषायिते प्रियतमे पश्यन् घने
कानने
पुष्पस्यावचयाय नम्रवदनामेकां समायोजयन् ।
अर्द्धोन्मीलितलोचनाञ्चलचमत्कारामिरामा-
ननां
क्षोरार्द्राधरपल्लवां नवबधूमन्यां समालिङ्गति ॥"

धीराधीरा ज्येष्ठा कनिष्ठा च यथा,—

"धैर्य्याधैर्य्यपरिग्रहग्रहिलयोरेणोदृशोः प्रीतये
रत्नद्वन्द्वमनन्तकान्तिरुचिरं मुष्टिद्वये न्यस्यवान् ।
एकस्याः कलयन् करे प्रथमतो रत्नं परस्याः
प्रियो
हस्ताहस्तिमियात् स्पृशन् कुचतटोमानन्दमा-
विन्दति ॥"

इति रसमञ्जरी ॥

स्वूर्च्छ, आ विस्मृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) दन्त्यादिः क्ङ्खौ वकार-
युक्तः । क्विपि राङ्कोर्लोपे स्वूः स्वुरौ स्वुरः ।
आ स्वूर्च्छितं स्वूर्णं तेन । स्वर्च्छति कथां
मथपः । इति दुर्गादासः ॥

स्वृ, ङ शब्दोपतापयोः । इति कविकल्पद्रुमः ॥
(भ्वा०-पर०-शब्दे अक०-उपतापे सक०-वेट् ।)
दन्त्यादिर्वकारोपधः । ङ, अस्वारीत् पिकः ।
अस्वार्षीत् खलं राजा । इति दुर्गादासः ॥

स्वृ, गि हिंसने । इति कविकल्पद्रुमः ॥ (क्रया०-
पर०-सक०-अनिट् ।) दन्त्यादिर्वकारोपधः ।
तद्हितोऽपीति केचित् । गि, स्वृणाति स्वूर्णः
स्वूर्णिः । इति दुर्गादासः ॥

स्वेक, ऋ,ङ गतौ । इति कविकल्पद्रुमः ॥(भ्वा०-
आत्म०-सक०-सेट् ।) वकारयुक्तः । ऋ, असि-
स्वेकत् । ङ, स्वेकते । इति दुर्गादासः ॥

स्वेच्छा, स्त्री, (स्वस्य इच्छा ।) स्वकीयेच्छा ।
तत्पर्य्यायः । यदृच्छा २ स्वैरिता ३ । इति
हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । २५।४८ ।
"स च मत्स्योऽम्बिमध्येन तत्कालं स्वेच्छया
चरन् ।
उत्स्थलद्वीपनिकटं जगाम विधियोगतः ॥")

स्वेच्छामृत्युः, पुं, (स्वेच्छया मृत्युर्यस्य ।) भीष्मः ॥
इति त्रिकाण्डशेषः ॥ स्वेच्छया मरणञ्च । तद्-
युक्ते, त्रि ॥

स्वेदः, पुं, (स्विद्+घञ् ।) घर्म्मः इत्यमरः ॥
१ । ७ । ३३ ॥ स्वेदनम् । इति मेदिनी ॥ भावरा
इति भाषा ॥ * ॥ उष्मा । तापः । अथातः
स्वेदाध्यायं व्याख्यास्यामः । इति ह स्माह
भगवानात्रेयः ।

"अथ स्वेदान् प्रवक्ष्यामि यैर्यथावत् प्रयोजितैः
स्वेदसाध्याः प्रशाम्यन्ति गदा वातकफात्मकाः ॥
स्नेहपूर्व्वप्रयुक्तेन स्वेदेनावजितेऽनिले ।
पुरीषमूत्ररेतांसि न सज्जन्ति कदाचन ॥
शुष्काण्यपि च काष्ठानि स्नेहस्वेदोपपादनैः ।
नमयन्ति यथान्यायं किं पुनर्जीवतो नरान् ॥
योगर्त्तुव्याधितापेक्षो नात्युष्णोऽतिमृदुर्न च ।
द्रव्यवान् कल्पितो देशे स्वेदः कार्य्यकरो मतः ॥
व्याधौ शीते शरीरे च महान् स्वेदो महाबले ॥
दुर्ब्बले दुर्ब्बलः स्वेदो मध्यमे मध्यमो हितः ॥*॥
वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते ।
स्निग्धरूक्षस्तथास्निग्धोरूक्षाभ्युपक्लिप्तः ॥
आमाशयगते वाते कफे पक्वाशयाश्रिते ।
रूक्षपूर्व्वो हितः स्वेदः स्नेहपूर्व्वस्तथैव च ॥
हृषणो हृदयं दृष्टौ स्वेदयेन्मृदु वा न वा ।
मध्यमं वंक्षणौ शेषमङ्गावयवमिष्टतः ॥
सुखैलेक्षुकैः पिण्डैरा गोधूमानामथापि वा ।
पद्मोत्पलपलाशैर्व्वा स्वेदः सम्मृत्य चक्षुषी ॥
मुक्तावलोभिः शीताभिः शीतलैर्भाजनैरपि ।
जलार्द्रैर्जलजैर्हस्तैः स्त्रियतो हृदयं स्पृशेत् ॥
शीतशूलव्युपरमे स्तब्धगौरवनिग्रहे ।
संजाते मार्द्दवे स्वेदे स्वेदनादिरतिर्मता ॥
पिपासा गात्रसदनं मूर्च्छापित्तप्रकोपनम् ।
दाहः स्वेदोऽतिदीर्घ्यस्मतिस्निग्धस्य लक्षणम् ॥

उक्तस्वाग्नितोये यो नैमित्तिकः सर्व्वगो विधिः।
सोऽतिस्निग्धस्य कर्त्तव्यो मधुरस्निग्धशीतलः॥"
पयितोये अयनाध्याये॥ * ॥
"कषायमद्यनित्यानां गर्भिण्या रक्तपित्तिनाम्।
पित्तिनां सातिसाराणां रूक्षाणां मधुमेहिनाम्॥
विदग्धभ्रष्टवन्नानां विषमद्यविकारिणाम्।
क्षान्तानां नष्टसंज्ञानां स्थूलानां पित्तमेहिनाम्॥"
क्षान्तानां क्लान्तानाम्।
"क्षतानां क्षुत्परीतानां क्लान्तानां शोचतामपि।
कामस्त्रीदरिणाश्चैव क्षतानामाव्यरोगिणाम्॥
दुर्ब्बलातिविशुष्काणामुपचीनौजसान्तथा।
भिषक् तैमिरिकाणाञ्च न स्वेदमवतारयेत्"॥*॥
प्रतिश्याये च कासे च हिक्काश्वासेष्वलाघवे।
कर्णमन्याशिरःशूले स्वरभेदे गलग्रहे॥
अर्द्धितैकाङ्गसर्व्वाङ्गपक्षाघाते विनामके।
कोष्ठानाहविबन्धेषु मूत्राघाते विजृम्भके॥
पार्श्वपृष्ठकटीकुक्षिसंग्रहे गृध्रसीषु च।
मूत्रकृच्छ्रे महास्वे च शुष्कयोरङ्गमर्द्दके॥
पादोरुजानुजङ्घार्त्तिसंग्रहे क्षयथावपि।
खल्वोष्ठामे च शीते च वेपथौ वातकण्टके॥
सङ्कोचायामशूलेषु स्तब्धगौरवसुप्तिषु।
सर्व्वेष्वेषु विकारेषु स्वेदनं हितमुच्यते॥ ०॥
तिलमाषकुलत्थानां वृतं तैलामिषौदनैः।
पायसैः क्षीरसिद्धैश्च पिण्डस्वेदान् प्रयोजयेत्॥
गोखराश्ववराहोष्ट्रगजहस्तिभिः सतुषैर्यवैः।
सिकतापांशुपाषाणकरीषायसपूटकैः॥
नैमित्तिकान् स्वेदयेत् पूर्व्वैर्व्याधितिकान् ममुपाचरेत्
द्रव्याण्येतानि शस्यन्ते यथास्वं प्रस्तरेष्वपि॥
भूगृहेषु च जेन्ताकेष्वग्निगर्भगृहेषु च।
विधूमाङ्गारतप्तेष्वभ्यक्तः स्विद्यति ना सुखम्॥
ग्राम्यानूपौदकं मांसं पयोवस्तिशिरस्तथा।
वराहमद्यपित्तासृक्स्नेहवत्तिलतण्डुलाः॥
इत्येतानि समुत्क्राथ्य नाड़ीस्वेदं प्रयोजयेत्।
देशकालविभागज्ञो युक्त्यपेक्षी भिषक्तमः॥*॥
वीरणाम्बुतकैरण्डशिग्रुमूलकसर्षपैः।
वासावंशकरञ्जार्कपत्रैरम्लकस्य च॥
शोभाञ्जनकशैवीरमाषतीसुरसार्जकैः।
पत्रैरुत्क्राथ्य सलिलं नाड़ीस्वेदं प्रयोजयेत्॥
भूतीकपद्ममूलाभ्यां सुरया दधिमस्तुना।
मूत्रैरम्लैश्च सक्षैर्नाड़ीस्वेदं प्रयोजयेत्॥ * ॥
एत एव च निर्यूहाः प्रयोज्या जलकोष्ठके।
स्वेदनार्थं घृतक्षीरतैलकोष्ठांश्च कारयेत्॥
गोधूमयवकलैर्यूषैर्यवानामम्लसंयुतैः।
सस्नेहकिण्वलवणैरुपनाहः प्रशस्यते॥ * ॥
अन्यैः सुराया किण्वेन जीवन्त्या शतपुष्पया।
उमया कुष्ठतैलाभ्यां युक्तया चोपनाहयेत्॥*॥
चर्म्मभिर्योपनह्यः सलोमभिरपूतिभिः।
उष्णवीर्य्यैरलाभे तु कौशेयाविकशाटकैः॥
रात्रौ वस्त्रं दिवा मुञ्चेत् सुखेद्रात्रौ दिवाकृतम्।
विदाहपरिहारार्थं स्यात् प्रकर्षस्तु शीतलैः॥

सहरः १ प्रस्तरो २ नाड़ी परिषेको४ऽवगाहनम् ५।
जेन्ताकोऽग्निघनः ७ कर्षुः ८ कुटी ९ भूः १० कुम्भिरेव च ११॥
कूपो १२ होलाक १३ इत्येते स्वेदयन्ति त्रयोदश।
ते यथावत् प्रवक्ष्यन्ते सर्व्व एवानुपूर्व्वशः॥"
इति॥*॥
तत्र वस्त्रान्तरितैरवस्त्रान्तरितैर्व्वा पिण्डैर्यथोक्तैः स्वेदनं सहरस्वेद इति विद्यात्॥१॥ मूलकशमीधान्यपुलाकानां वेशवारपायसक्षीरोत्कारिकादीनां वा प्रस्तरे कौशेयाविकोत्तरच्छदे पक्षाङ्गुलोत्तुकार्कपत्रच्छदे वा स्वभ्यक्तसर्व्वगात्रस्य शयानस्योपरि स्वेदनं प्रस्तरस्वेद इति विद्यात्॥ २॥ स्वेदनद्रव्याणां पुनर्मूलफलपत्रभङ्गादीनां मृगशकुनिपिशितशिरःपदादीनामुष्णस्वभावानां वा यथार्हमम्ललवणस्नेहोपसंहितानां मूत्रक्षीरादीनां वा कुम्भ्यां वाप्यमन्थमन्थ्यामुत्क्वथितानां माद्या शरीषोकावंशदलकरञ्जार्कपत्रान्यतमस्तृतया गजाग्रहस्तसंस्थानया व्यामदीर्घया व्यामार्द्धदीर्घया वा व्यामचतुर्भागाष्टभागमूलाग्रपरिणाहस्रोतसा सर्व्वतो वातहरपत्रसंवृतच्छिद्रया द्विस्त्रिर्व्वा विनमितया वातहरसिद्धस्नेहाभ्यक्तगात्रस्य वाप्यमुपहरेत्। वाप्यो ह्यनुर्द्धगामीवृद्धतरुणवेगस्त्वचमविदहन् सुखं स्वेदयतीति नाड़ीस्वेदः॥३॥ वातिकोत्तरवातिकानां पुनर्मूलादीनामुत्क्वाथ्यैः सुखोष्णैः कुम्भीर्व्वपूनिकाः प्रनाड़ीर्व्वा पूरयित्वा यथार्हसिद्धस्नेहाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः॥ ४॥ वातहरोत्क्वाथक्षीरघृततैलपिच्छितरसोष्णसलिलकोष्ठकावगाहस्तु यथोक्त एवावगाहः॥ ५॥ अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत। तत्र पूर्व्वस्यां दिशि उत्तरस्यां वा गुणवति प्रशस्ते भूमिभागे क्षौद्रसर्पिस्तिके सुवर्णवर्णमृत्तिके वा परीक्षापुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा सुपतीर्थे समसुविभक्तभूमिभागे सम्राष्टौ वा अरत्नोः सुप्रक्रम्योदक्प्राङ्मुखमुदङ्मुखं वा अभिमुखतीर्थं कूटागारं कारयेत्। उत्सेधविस्ततः परमरत्नोः षोड़श समन्तात् सुहृतं मृत्कर्म्मसम्यक्रमनेकवातायनम्। अस्य कूटागारस्यान्तः समन्ततो भित्तिमरत्निविस्तारोत्सेधां पिण्डिकां कारयेत् आकपाटात। मध्ये चास्य कूटागारस्य चतुष्किष्कुमात्रं पुरुषप्रमाणं वृत्तमयं कन्दुसंस्थानं बहुसूक्ष्मच्छिद्रमङ्गारकोष्ठकस्तम्भं सविधानं कारयेत्। तत्र खादिरासाराश्वकर्णादीनां वा काष्ठानां पूरयित्वा प्रदीपयेत्। स यदा जानीयात् साधु दग्धानि काष्ठानि व्रतधूमानि अवतप्तश्च केवलमग्निना तदग्निगृहं स्वेदयोग्येन क्षीरेण युक्तमिति तदैवं पुरुषं वातहराभ्यक्तगात्रं वस्त्रावच्छन्नं प्रवेशयेत्। प्रवेश्यैवमनुशिष्यात् सौम्य प्रविश-

कषायायारोग्याय चेति। प्रविश्य चैनां पिण्डिकामधिरुह्य पार्श्वापरपार्श्वाभ्यां यथासुखं शयीथाः। न च त्वया स्वेदमूर्च्छापरीतेनापि सता पिण्डिकैषा विमोक्तव्या आप्राणोच्छ्वासात्। भ्रश्यमानो हृतः पिण्डिकावकाशात् द्वारमनधिगच्छन् स्वेदमूर्च्छापरीततया सद्यःप्राणान् जह्याः। तस्मात् पिण्डिकामेनां न कथञ्चन मुञ्चेथाः। त्वं यदा जानीयाः विगताभिष्यन्दमात्मानं सम्यक् प्रस्रुतस्वेदपिच्छं सर्व्वस्रोतोविमुक्तं लघुभूतमपगतविबद्धस्तब्धसुप्तिवेदनागौरवमिति ततस्त्वां पिण्डिकामनुसरन् द्वारं प्रपद्येथाः। निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतोदकसुपस्पृशेथाः। अपगतसन्तापक्लमस्तु मुहूर्त्तात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽश्नीयाः। इति जेन्ताकः स्वेदः॥ ६॥
"शयानस्य प्रमाणेन ललाटसमयीं शिलाम्।
तापयित्वा मारुतघ्नैरिन्धनैः संप्रदीपितैः॥
व्यपोह्य सर्व्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा।
तां शिलामथ कुर्व्वीत कौशेयाविकसंस्तराम्॥
तस्यां स्वभ्यक्तसर्व्वाङ्गः शयानः स्विद्यते सुखम्।
वीरवाजिनकौशेयप्रावाराद्यैः सुसंवृतः॥
इत्युष्णोऽग्निघनस्वेदः कर्षूस्वेदः प्रवक्ष्यते॥ ७॥
खानयेत् शयनस्याधः कर्षूस्थानविभागवित्।
दीर्घैरध्यर्द्धैरङ्गारैस्तां कर्षूं पूरयेत्ततः॥
तस्यामुपरि शय्यायां स्वपन् स्विद्यति ना सुखम्॥८॥
अनत्युत्सेधविस्तारां वृत्ताकारामलोचनाम्।
घनभित्तिं कुटीं कृत्वा कुष्ठाद्यैः संप्रलेपयेत्॥
कुटीमध्ये भिषक् शय्यां स्वास्तीर्णायोपकल्पयेत्।
प्रावाराजिनकौशेयकुथकम्बलगोलकैः॥
इषन्तिकाभिरङ्गारैः पूर्णाभिस्ताश्च सर्व्वशः।
परिवार्य्यान्तरारोहैरभ्यक्तः स्विद्यति ना
सुखम्॥ ९॥
य एवाग्निघनस्वेदविधिर्भूमौ स एव तु॥ १०॥
प्रशस्तायां निवातायां समायामुपदिश्यते।
कुम्भीं वातहरक्वाथपूर्णां भूमौ निखानयेत्॥
अर्द्धभागं त्रिभागं वा शयनं तत्र चोपरि।
खापयेदासनं वापि नातिमान्द्यपरिच्छदम्॥
अथ कुम्भ्यां सुसन्तप्तान् प्रक्षिपेदयसो गुड़ान्।
पाषाणान् वोष्णया तेन तत्स्थः स्विद्यति ना
सुखम्॥ ११॥
सुसंवृताङ्गः स्वभ्यक्तः स्वेदैरनिलनाशनैः।
कूपं शयनविस्तारं द्विगुणोच्छ्रायं वेधतः॥
देशे निवाते शस्ते च कुर्य्यादन्तः सुमार्जितम्।
हस्त्यश्वगोखरोष्ट्राणां करीषैर्दग्धपूरिते॥
स्ववच्छन्नः सुसंस्तीर्णेऽभ्यक्तः स्विद्यति ना
सुखम्॥ १२॥
धौतौकान्तु करीषाणां यथोक्तानां प्रदीपयेत्॥
धौतौकां गुडिकाम्।
शयनान्तःप्रमाणेन शय्यासुपरि तत्र च।
सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत्॥
स्ववच्छन्नः सुखं यत्राभ्यक्तः स्विद्यति वा सुखम्।

होलाकस्वेद इत्येष सुखप्रोक्तो महर्षिणा ॥१३॥
इति त्रयोदशविधः स्वेदोऽग्निगुणसंश्रयः ॥*॥
व्यायाम उष्णमदनं गुरुप्रावरणं क्षुधा ।
बहुपानं भयक्रोधावुपनाहोऽतपो वातः ।
स्वेदयन्ति दशैतानि नरमग्निगुणाहते ॥
इत्युक्तो द्विविधः स्वेदः संयुक्तोऽग्निगुणैर्न च ।
एकाङ्गसर्व्वाङ्गगतः स्निग्धो रूक्षस्तथैव च ॥
इत्येतत् द्विविधं द्वन्द्वं स्वेदमुद्दिश्य कीर्त्तितम ।
स्निग्धस्वेदैरुपक्रम्य स्विन्नः पथ्याशनो भवेत् ।
तदहः स्विन्नमात्रस्तु व्यायामं वर्जयेन्नरः ॥"
इति ॥ * ॥

तत्र श्लोकाः ।
"स्वेदो यथा कार्य्यकरो हितो यैर्व्यश्च यद्विधः ।
यत्र देशे यथायोग्यो देशो रूक्षस्य यो यथा ॥
स्विन्नातिस्विन्नरूपाणि तथातिस्विन्नभेषजम् ।
अस्वेद्याः स्वेदयोग्याश्च स्वेदद्रव्याणि कल्पना ॥
त्रयोदशविधः स्वेदो विना दशविधोऽग्निना ।
संग्रहेण च षट् स्वेदाः स्वेदाध्याये निदर्शिताः ॥
स्वेदाधिकारे तदाचमक्रमेतन्महर्षिणा ।
शिष्यैस्तु प्रतिपत्तव्यमुपदेष्टा पुनर्व्वसुः ॥"
इति चरकीयस्वेदाध्यायः समाप्तः ॥ * ॥

अथ स्वेदविधिः ।
"स्वेदयत्तर्व्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञितः ।
उपनाहो द्रवस्वेदः सर्व्वे वातार्त्तिहारिणः ॥"
तापस्वेदः उष्मस्वेदश्च ताभ्यां संज्ञितः । उपनाहः उपनाहस्वेदः ।
"स्वेदौ तापोष्मजौ प्रायः श्रेष्मन्नौ समदोषितौ ।
उपनाहस्तु वातघ्नः पित्तरोगे द्रवो हितः ॥"
द्रवो द्रवस्वेदः ।
"महाबले महाव्याधौ शीते स्वेदो महान् स्मृतः ।
दुर्ब्बले दुर्ब्बलस्वेदो मध्यमे मध्यमो मतः ॥
बलासे रूक्षणः स्वेदो रूक्षः स्निग्धः कफानिले ॥"
रूक्षयतीति रूक्षणः नन्द्यादित्वात् ल्यनप्रत्ययः ।
"कफमेदोवृते वाते कोष्णगेहं रवेः करात् ।
नियुद्धं मार्गगमनं गुरुप्रावरणं ध्रुवम् ॥
चिन्ताव्यायाममाराञ्च सेवेतामयमुक्तये ।
येषां नस्यं प्रदातव्यं वस्तिर्यापि हि देहिनाम् ।
शोधनेभ्यश्च ये केचित् पूर्ब्बस्वेदाश्च ते मताः ।
स्वेद्याः ऊर्द्धं त्रयोऽपोह भगन्दर्य्यर्शसस्तथा ।
अश्मर्य्या चातुरो जन्तुः श्रमयेच्छस्त्रकर्म्मणः ॥"
शस्त्रकर्म्मण ऊर्द्धं पश्चाच्चेति सुश्रुते ।
"पश्चात् स्वेद्या हते शल्ये मूढगर्भगदे तथा ।
काले प्रजातेऽकाले वा पश्चात् स्वेद्या नितम्बिनी ।
सर्व्वान् स्वेदाविवाते च जीर्णेऽन्ने वा विचारयेत् ॥
स्वेदाद्यातुस्विता दोषा स्वेदक्लिन्नस्य देहिनः ।
द्रवत्वं प्राप्य कोष्ठान्तर्गत्वा यान्ति विरेकिताम् ॥
स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी ।
श्रेयमानस्य च सुहृद्धृदयं शीतलैः स्पृशेत् ॥

शीतैरार्द्रवस्त्रादिभिः ॥
"अजीर्णी दुर्ब्बलो मेही क्षतक्षीणः पिपासितः ।
अतीसारी रक्तपित्ती पाण्डुरोगी तथोदरी ।
मेदस्वी गर्भिणी चैव न हि स्वेद्या विजानता ॥
स्वेदादेषां यान्ति देहा विनाशं
नो साध्यत्वं यान्ति चैषां विकाराः ॥
एतानपि मृदुस्वेदैः स्वेदसाध्यानुपाचरेत् ।
मृदुस्वेदं प्रयुञ्जीत तथा क्षुद्रष्कदृष्टिषु ॥
अतिस्वेदात् सन्धिपीडा दाहतृष्णा क्लमो भ्रमः ।
पित्तासृक्पिड़कोपस्तत्र शीतैरुपाचरेत् ॥"
तत्र तापस्वेदमाह ।
"तेषु तापाभिधः स्वेदो बालुकावस्त्रपाणिभिः ।
प्रतप्तैरस्त्रमिक्तैश्च कार्य्यः श्लक्ष्णकवेष्टितैः ॥"*॥
उष्मस्वेदमाह ।
"अथवा वातनिर्गुण्डद्रव्यक्काथरसादिभिः ।
उष्णैर्घटं पूरयित्वा पार्श्वे च्छिद्रं विधाय च ॥
विमृज्यास्यं चिरखण्डञ्च धान्यजां काष्ठजामुत ।
षड़ङ्गुलास्यां गोपुच्छां नाड़ीं युञ्जीत हिङ्गुहस्तिकाम् ॥
सुखोपविष्टं स्नेह्यञ्च गुरुप्रावरणावृतम् ।
हस्तिशुण्डिकया नाड्या स्वेदयेद्वातरोगिणम् ॥"
त्रिखण्डमिति स्वेदमौकर्य्यार्थम् । षड़ङ्गुलास्यामिति मूले षड़ङ्गुलविशालमुखाम् । गोपुच्छमिव क्रमस्थूलां तेनार्थे गोपुच्छाग्रपरिमाणेन छाद्यां नाड़ीं अतः सरन्ध्राम् । हिङ्गुहस्तिकां हस्तद्वयपरिमाणाम् । हस्तिशुण्डिकयेति हस्तिशुण्डवत् क्रमस्थूलत्वात् नाड्या इयं संज्ञा ।
"पुरुषायाममात्रान्तु भूमिं संमार्ज्ज्य खादिरैः ।
काष्ठैरिध्मा तथाभ्युप्य क्षीरधान्याम्लवारिभिः ॥
वातघ्नपत्रैराच्छाद्य शयानं स्वेदयेन्नरम् ।
एवं मासादिभिः स्निग्धैः शयानः स्वेदमाचरेत् ॥"
उपनाहस्वेदः ।
"तथोपनाहस्वेदञ्च कुर्य्याद्धातहरौषधैः ।
प्रदिह्य देहं वातार्त्तं क्षीरमांसरसादिभिः ॥
अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः ।
ततो ग्राम्यानूपमांसैर्जीवनीयगणेन च ॥
दधिसीवोरकक्षीरैर्वीरतर्व्वादिना तथा ।
कुलत्थमाषगोधूमैरतसीतिलसर्षपैः ॥
शतपुष्पाद्देवदारुशेफालीमूलजीरकैः ।
एरण्डमूलबीजैश्च राजामूलकशिग्रुभिः ॥
मिसिक्तृणाकुठेरैश्च लवणैरम्लसंयुतैः ।
प्रसारणाश्वगन्धाभ्यां बलाभिर्हंशमूलकैः ॥
गुड़ूच्या वानरीबीजैर्यथालाभं समाहृतैः ।
चूर्णैः स्निग्धैश्च वस्त्रेण बद्धैः संस्वेदयेन्नरम् ॥
महाशाल्वनसंज्ञोऽयं योगः सर्व्वानिलार्त्तिहृत् ॥"
अस्यायमर्थः । उपनाहस्वेदश्च कुर्य्यात् । केन प्रकारेण इत्याकाङ्क्षायां तत्प्रकारमाह वातहरौषधैः । कथंभूतैः । अम्लपिष्टैः अम्लेन काञ्जिकतक्रादिना पिष्टैः सलवणैः स्नेहयुक्तैः क्षीरमांसरसान्वितैः । सुखोष्णैः । वातार्त्तदेहे प्रदिह्य प्रलिप्य स्वेदयेदित्यर्थः । अथवाम्लेन संपिष्टैः

कोष्णैः सूक्ष्मपटस्थितैः । भेषजैः स्वेदयेत् ।
किंवा स्निग्धैः कोष्णैः पटस्थितैः ॥ * ॥ द्रवस्वेदमाह ।
"द्रवस्वेदस्तु वातघ्नद्रव्यक्काथेन पूरिते ।
कटाहे कोष्ठके वापि सूपविष्टोऽवगाहयेत् ॥
सौवर्णे राजते वापि ताम्रे लौहे च दारुजे ।
कोष्ठकं तत्र कुर्व्वीतोच्छ्राये षड़्विंशदङ्गुलम् ।
आयामे तावदेव स्याच्चतुष्कोणस्तु चिक्कणम् ॥"
पश्चान्तरमाह ।
"नाभेः षड़ङ्गुलं यावन्मग्नः क्काथस्य धारया ।
कोष्णया स्कन्धयोः सिक्तस्तिष्ठेत् स्निग्धतनुर्नरः ॥"
अयमर्थः । प्रथमतो वातघ्नद्रव्यक्काथेन कटाहं पूरिते कोष्ठके कटाहे वा सूपविष्टस्तिष्ठेत् अथवा नाभेः षड़ङ्गुलमूर्द्धं यावत् क्काथे मग्न उपविष्टः । पश्चात् क्काथस्य धारया स्कन्धयोः सिच्यमानस्तिष्ठेत् । तथा च कोष्ठकं परिपूर्णं भवतीत्यर्थः । क्काथपक्षे प्रथमतः स्नेहाभ्यक्ततनुरुपविशेत् ।
"मुहूर्त्तैकं समारभ्य यावत् स्यात्तच्चतुष्टयम् ।
तावत्तदवगाहेत यावदारोग्यनिश्चयम् ॥
एवं तैलेन दुग्धेन सर्पिषा स्वेदयेन्नरम् ।
एकान्तरो द्व्यन्तरो वा युक्तः स्नेहोऽवगाहने ॥
एतावता क्काथो दुग्धञ्च नित्यमेव युज्यते ॥"
स्नेहस्तु दिनमेकं द्वे वा दिने गमयित्वा युक्तः । अग्निमान्द्यशङ्कयेति भावः ।
"शिरामुखैर्लोमकूपैर्धमनीभिश्च तर्पयन् ।
शरीरे बलमाधत्ते युक्तः स्नेहोऽवगाहने ॥
जलसिक्तस्य वर्द्धन्ते यथा मूलेऽङ्कुरादयः ।
तथैव धातुवृद्धिर्हि स्नेहसिक्तस्य जायते ॥
नातः परतरः कश्चिदुपायो वातनाशनः ।
शीतशूलव्युपरमे स्तब्धगौरवनिग्रहे ।
दोषेऽग्नौ माईवे जाते स्वेदनाद्विरतिर्मता ॥"
इति भावप्रकाशः ॥

स्वेदचूषकः, पुं, (स्वेदं चूषति पिबतीति । चूष + खुल् ।) शीतलवायुः । इति केचित् ॥

स्वेदजः, त्रि, (स्वेदात् जायते इति । जन + डः ।) स्वेदाज्जातजन्तुः । क्रमिदंशादिः । इत्यमरः । ३ । १ । ५१ ॥ तद्गणा यथा,—
"संस्वेदजविकाराश्च यथा येभ्यो भवन्ति च ।
मानुषस्वेदमलजा मक्षिकाद्या भवन्ति च ॥
नवमेघप्रसिक्तायां पिपीलिकगणादयः ।
संस्वेदजाऽपि विज्ञेया वृक्षगोपशुजन्तवः ॥
समिग्रा माषमुद्गेभ्यः फलेभ्यश्चैव जन्तवः ।
जायन्ते कृमयो विप्राः काष्ठेभ्यो घुणकादयः ॥
तथा शुक्रविकारेभ्यः पूतिकाः प्रभवन्ति च ।
संस्वेदजाश्च जायन्ते इक्षिकाः शुष्कगोभयात् ॥
गोभ्यो हि महिषेभ्यश्च मानुषेभ्यश्च जन्तवः ।
मत्स्यादिभ्यश्च विविधा जन्तवः कुत्सिते यतः ॥
अथान्यानि च सूक्ष्माणि सूक्ष्मयूकाप्तवे च ।
गोभ्योऽन्येभ्यस्तथा चैव अष्टापदकिलीनकाः ॥
मक्षिकाणां विकाराश्च उत्सृष्टोदककर्दमैः ।

ग्रावति विकाराय करीषेभ्यो भवन्ति हि ॥
एवमादिरमख्यातो गणः संखेदजो मया ।
ममासान्निहितो ह्येष प्राक्कर्म्मवशजः स्मृतः ॥"
इति वह्निपुराणे काश्यपीयवंशनामाध्यायः ॥

स्वेदनं, क्ली, (स्विद्+ल्युट्।) स्वेदः। इति मेदिनी ॥ स्वेदनयन्त्रं यथा,—
"निबहमौषधं सूतं भूर्জ্জे तच्चिगुणाम्बरे ।
रसपोटलिकां काष्ठे दृढं बद्ध्वा गुणेन हि ॥
सन्धानपूर्णे कुम्भान्तः स्थापयेत्स्वेदसंस्थितम् ।
अधस्ताज्ज्वालयेद्वह्निं तत्तदुक्तक्रमेण हि ।
दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि ॥"
सन्धानं काञ्जिकादि ।
"साम्बुस्थालीमुखे बद्धे वस्त्रे स्वेद्यं निधाय च ।
पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम् ॥"
इति भावप्रकाशः ॥
(स्वेदयतीति । स्विद्+णिच्+ल्युः। स्वेदके, त्रि। यथा, सुश्रुते । ३ । ४ ।
"स्वेदनो दुर्गन्धः पीतगिथिलाङ्गस्तास्रनखनयनतालुजिह्वोष्ठपाणिपादतल इत्यादि ॥"

स्वेदनिका, स्त्री, (स्वेदनमस्त्यस्या इति । ठन् ।) कन्दुः । इति हेमचन्द्र ॥ भर्জ্জनपात्रम् । भर्জ্জनशाला च ॥

स्वेदनी, स्त्री, (स्विद्यतेऽनयेति । स्विद्+ल्युट् । ङीप् ।) लौहमयपात्रम् । ताओया इति लोहता इति च ख्यातम् । इति भरतः ॥ तत्पर्य्यायः । कन्दुः २ । इत्यमरः । २ । ८ । ३० स्वेदनिका ३ । इति हेमचन्द्रः ॥

स्वेदमलोज्झितदेहः, पुं, (स्वेदमलेन उज्झितः देहो यस्य ।) सर्व्वकल्मषविनोत्तमः । इति हेमचन्द्रः ॥ स्वेदमलत्यक्तकायश्च । तद्युक्ते, त्रि ॥

स्वेदविप्रुट्, [प्] स्त्री, घर्म्मबिन्दुः । स्वेदस्य विप्रुट् बिन्दुः । इति षष्ठीतत्पुरुषसमासनिष्पन्ना ॥

स्वैरः, त्रि, (स्वेन स्वातन्त्र्येण ईर्त्ते इति । ईर गतौ + अच् । "स्वादीरेरिणोः ।" ६ । १ । ८८ । इत्यस्य वार्त्तिकोक्त्या ह्रस्वः ।) स्वच्छन्दः । (यथा, रघुः । २ । ५ ।
"अव्याहतैः स्वैरगतैः स तस्याः
सस्वाट् ममाराधनतत्परोऽभूत् ।")
मन्दः । इति मेदिनी ॥ (यथा, महाभारते । ४ । ६६ । ४८ ।
"अथोत्तरः शुभैर्गन्धैर्माल्यैश्च विविधैस्तथा ।
आकीर्य्यमाणः संहृष्टो नगरं स्वैरमागमत् ॥"॥
हयालापः । यथा, तत्रैव । १ । ४२ । २ ।
"नैवान्यथेदं भविता पितरेष ब्रवीमि ते ।
नाहं मृषा ब्रवीम्येव स्वैरेष्वपि कुतः प्रभुः ॥")

स्वैरता, स्त्री, (स्वैरस्य भावः । स्वैर+तल् ।) स्वैरिता । इत्यमरटीकायां रायमुकुटः । ३ । २ । २ ।

स्वैरिणी, स्त्री, (स्वेनैव ईरयितुं शीलमस्याः । ईर+णिनिः । ङीप् । स्वादीरेरिणोरिति ह्रस्वः ।) व्यभिचारिणी इत्यमरः । २ । ६ । ११ ॥ सा तु चतुःपुरुषगामिनी (यथा, महाभारते । १ । १२३ । ७३—७४ ।
"पाण्डुस्तु पुनरेवैनां पुत्रलोभात् महायशाः ।
वक्तुमेच्छद्धर्म्मपत्नीं कुन्तीं तेनमथाब्रवीत् ॥
नातश्चतुर्थं पुरुषमापत्स्वपि वदन्त्युत ।
अतः परं स्वैरिणी स्याद्भ्रष्टो पञ्चमे भवेत् ॥")

स्वैरिता, स्त्री, (स्वैरिणो भावः । तल् । टाप् ।) स्वच्छन्दता । तत्पर्य्यायः । यदृच्छा २ । इत्यमरः । ३ । २ । २ ॥

स्वैरिन्त्री, स्त्री, परवेश्मस्था स्ववशा शिल्पकारिणी नारी । इति शब्दरत्नावली ॥ परगृहस्था स्वतन्त्रा प्रसाधनानुलेपनादिशिल्पकारिणीति विशेषणद्वययुक्ता या सा स्वैरिन्त्री । स्वैरं स्वाच्छन्द्यं धरतीति स्वैरिन्त्री निपातनात् । स्वैरिन्त्री परवेश्मस्था शिल्पकृत् स्ववशा स्त्रियाम् । इति दन्त्यादौ रभसः । इत्यमरटीकायां भरतः ॥ अस्या रूपान्तरं सैरन्त्री सैरिन्ध्रिः इति च टीकान्तरम् ॥

स्वैरी, [न्] त्रि, स्वेनैव ईरितुं शीलमस्य । ईर गतौ + णिनिः । स्वतन्त्रः । इत्यमरः । ३ । १ । १५ ॥ (यथा, महाभारते । १३ । १४२ । २१ ।
"सिद्धिवादेषु संमिश्रास्तथा वननिवासिनः ।
स्वैरिणो दारसंयुक्तास्तेषां धर्म्मः कथं स्मृतः ॥"

स्वोपार्জ্জितः, त्रि, (स्वेनोपार्জ্जितः ।) स्वयमर्জ্जितः । स्वयमुपात्तः । यथा, पिता चेत् पुत्रान् विभजेत्तस्य स्वेच्छा स्वयमुपात्तेऽर्थे पैतामहे तु पितापुत्रयोस्तुल्यं स्वामित्वम् । इति विष्णुसूत्रम् । अपि च । मनुर्विष्णुः ।
"षण्ढकन्तु पिता द्रव्यमनवाप्तं यदाप्नुयात् ।
न तत् पुत्रैर्भजेत् सार्द्धमकामः स्वयमर्জ्जितम् ॥"
तत् स्वयमर्জ्जितमिति कृत्वा न विभजेदित्यन्वयः । एतत्तु स्थावरविषयम् । मस्यादावनुद्धृतेऽपि पितुरेव स्वाच्छन्द्यम् ।
"स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्জ्जितम् ।
तस्मिन्नृणं सुतान् सर्व्वान् न दानं न च विक्रयः ॥
पितुः प्रसादात् भुञ्जन्ते वस्त्राण्याभरणानि च ।
स्थावरन्तु न भुञ्जीत प्रसादे सति पण्डके ॥"
इति मिताक्षराधृतवचनमपि पितामहधनपरम् । पित्रा च स्वोपार्जितं स्थावरं दत्तं भुञ्जत एवेति । अन्यथा मूलभूतस्यत्यन्तरकल्पनापत्तेः । इति दायतत्त्वम् ॥ * ॥ स्वोपार्जितं द्विविधम् । पित्रादिधनानुपघातेन स्वेनोपार्जितम् । तदनुपघातेन उपार्जितञ्च । तद्धनविभागविधिर्यथा । व्यासः ।
"अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति यद्धनम् ।
दायादेभ्यो न तद्दद्यात् विद्यालब्धञ्च यद्भवेत् ॥"
कात्यायनः ।
"हृंशहरोऽहरो वा पुत्रवित्तार्জनात् पिता ।"
पुत्रावित्तार्জनात् । ज्ञातद्रविणो भावा द्रव्यवत् प्रकाशते इति न्यायात् पुत्रार्जितावित्तात् पितुर्हृंशित्वं पितृधनानुपघातविषयं भ्रातृधनोपघातविषयञ्च । अर्জकस्य तु हृंशित्वम् । भ्रातृधनोपघाते तु तेषामप्येकांशित्वं वक्ष्यमाणवचनात् । पितुरहरत्वन्तु पितृद्रव्योपघातादगुण-

वत्त्वाद्वा इति दायभागः ॥ अनुपघाते पिता हृंशहरः । अर्জकत्वात् स्वयमपि हृंशहरः । इतरेषामनंशित्वम् । भ्रातृद्रव्योपघाते तु तेषामप्येकांशः । इति हृंशाहृंशयोर्भेदकथनम् ॥*॥ साधारणधनार्জितेऽपि विशेषमाह व्यासः ।
"साधारणं ममाश्रित्य यल्लिखित् वहनायुधम् ।
शौर्य्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः ।
तस्य भागद्वयं देयं शेषास्तु ममभागिनः ॥"
अत्र भ्रातर इत्युपलक्षणं पितृव्यादयोऽपि बोद्धव्याः । तस्यार्जकस्य । साधारणोपघाते यस्य यावतोऽंशस्यांशस्य महतो वा उपघातस्तस्य तदनुसारेण भागकल्पना कार्य्या । इति दायभागः ॥ इति च दायतत्त्वम् ॥

स्वोरसः, पुं, शिलापिष्टकल्कः । यथा,—
"स्वोरसः स्वरसः प्रोक्तः कल्को दृषदि पेषितः ॥"
इति शब्दचन्द्रिका ॥

ह

ह, हकारः । स तु व्यञ्जनवर्णेषु ऊष्मवर्णः । अष्टमवर्गीयचतुर्थवर्णश्च । तस्य उच्चारणस्थानं कण्ठः । इति व्याकरणम् ॥ (यथा च शिक्षायाम् । १७ ।
"कण्ठ्या वह्निविसर्জनीयमूलीया ओष्ठजावुपू ॥")
अस्य स्वरूपं यथा,—
"हकारं शृणु चार्व्वङ्गि ! चतुर्व्वर्गप्रदायकम् ।
कुण्डलीद्वयसंयुक्तं रक्तविद्युल्लतोपमम् ।
रजःसत्त्वतमोयुक्तं पञ्चदेवमयं सदा ।
पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा ।
त्रिबिन्दुसहितं वर्णं हृदि भावय पार्व्वति ! ॥"
इति कामधेनुतन्त्रम् ॥*॥
(वङ्गीयवर्णमालायाम्) अस्य लेखनप्रकारो यथा,—
"ऊर्द्धादाकुञ्चिता मध्ये कुण्डलीत्वं गता त्वधः ।
ऊर्द्धं गता पुनः सैव तासु ब्रह्मादयः क्रमात् ।
मात्रा च पार्व्वती ज्ञेया ध्यानमस्य प्रचक्ष्यते ॥
करीषभूषिताङ्गीञ्च साट्टहासां दिगम्बराम् ।
अस्थिमाल्यामष्टभुजां वरदामम्बुजेक्षणाम् ॥
नागेन्द्रहारभूषाढ्यां जटासुकुटमण्डिताम् ।
सर्व्वसिद्धिप्रदां नित्यां धर्म्मकामार्थमोक्षदाम् ॥
एवं ध्यात्वा हकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"हः शिवो गगनं हंसो नागलोकोऽम्बिकापतिः ।
नकुलीशो जगत्प्राणः प्राणेशः कपिलामलः ॥
परमात्मात्मजो जीवो यवाकः शान्तिदोऽङ्गनः ।
मृगा भयोऽरुणा स्थाणुः क्रूटकूपविरावणः ॥
लक्ष्मीगृविहरः शम्भुः प्राणशक्तिर्ललाटजः ।
खकोपवारणः शूली चैतन्यं पादपूरणः ।
महालक्ष्मीः परं शम्भुः शाखोटः सोममण्डलः ॥"
इति वर्णाभिधानम् ॥ * ॥

अपि च।
"शुक्रयाय हकारोऽग्नः प्राणः सान्तः शिवो वियत्।
अकुलो नकुलीशश्च हंसः शून्यश्च हाकिनी।
अनन्तो नकुली जीवः परमात्मा ललाटजः॥"
इति बीजवर्णाभिधानम्।
अपि च।
"हकारो नकुलीशोऽपि हंसः प्राणोऽङ्गुशः प्रिये।
महेशो नकुली चैव वराहो गगनं रविः।
लिङ्गं शून्यो महाशून्यः प्राणश्च परमेश्वरि!॥"
इति श्रीरुद्रयामले ८ पटले मन्त्राभिधानम्॥
ह, व्य. (हन हिंसागत्योः + अन्येभ्योऽपीति डः।) पादपूरणम्। इत्यमरः। ३। ४। ५॥ (यथा, रामायणे। १। १। ५८।
"पम्पातीरे हनुमता सङ्गतो वानरेण ह॥")
सम्बोधनम्। विनियहः। नियोगः। क्षेपः। कुत्सा। इति मेदिनीशब्दरत्नावल्यौ॥
हं, [म्] व्य, रुषोक्तिः। अनुनयः। इति मेदिनी॥
हः, पुं, शिवः। जलम्। शून्यम्। धारणम्। मङ्गलम्। गगनम्। नकुलीशः। रक्तम्। स्वर्गः। इति मेदिनी॥ पापहरणम्। चन्द्रः। इति शब्दरत्नावली॥ सकोपवारणः। शुष्कः। इत्येकाक्षरकोषः॥
हंसः, पुं. (हन्ति सुन्दरं गच्छतीति। हन हिंसागत्योः + "हनृवदिहनीति।" उणा० ३। ६२। इति सः।) पक्षिविशेषः। हाँस इति भाषा। तत्पर्य्यायः। श्वेतगरुत् २ चक्राङ्गः ३ मानसौकाः ४। इत्यमरः। २।५।२३॥ कलकण्ठः ५ सितच्छदः ६। इति जटाधरः॥ सितपक्षः ७ सरःकाकः ८ पुरुदंशकः ९। इति शब्दरत्नावली॥ धवलपक्षः १० मानमानसः ११। इति राजनिर्घण्टः॥ अस्य मांसगुणाः। वातहरत्वम्। हृद्यत्वम्। स्वर्य्यत्वम्। मांसबलप्रदत्वञ्च। इति राजवल्लभः॥*॥
अपि च।
"स्निग्धं हिमं गुरु हृद्यं मांसं जलपक्षिणान्तु वातघ्नम्।
तेष्वपि च हंसमांसं हृद्यतमं तिमिरहरञ्च॥"
इति राजनिर्घण्टः॥
अपि च।
"हंससारसकाचाह्वबकक्रौञ्चसरारिकाः।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः।
प्लवन्ते सलिले यस्मात् एते तस्मात् प्लवाः स्मृताः॥"
काचाहः कपर्दिकाक्षो बृहद्बकः। क्रौञ्चः शरहिङ्गः स्यात्। टेक इति लोके। शरारिका सिम्बु इति लोके।
"स्थूला कठोरा हृत्ता च यस्याश्चञ्चुर्व्यवस्थिता।
गुटिकाचक्षुसदृशी ज्ञेया नन्दीमुखीति सा॥"
कादम्बः करावा इति लोके। बला बगुली इति लोके।
"प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः॥"
इति भावप्रकाशः॥*॥
(यथा च।
"गुरुस्निग्धमधुराः स्वरवर्णबलप्रदाः।
बृंहणाः शुक्रलाश्लोक्ता हंसा मारुतनाशनाः॥"
इति चरके सूत्रस्थाने २७ अध्याये॥)
अस्या डिम्बगुणाः हंसबीजशब्दे द्रष्टव्याः॥*॥
तस्य शकुनं यथा,—
"काष्ठासु सर्व्वासपि दर्शनेन
हंसस्य शब्देन तु सर्व्वसिद्धिः।
नामानि हंसस्य गृणीति यस्तु
प्रयान्ति नाशं दुरितानि तस्य॥
चौरैः समं दर्शनमाद्यशब्दे
निधिर्द्वितीयेऽथ भयं तृतीये।
युद्धं चतुर्थे नृपतिप्रसादः
स्यात् पञ्चमे हंसरवे नराणाम्॥"
इति वसन्तराजशाकुने ८ वर्गः॥
निर्लोभिनृपः। विष्णुः। (यथा महाभारते। १२। ४३। ७।
"शुचिश्रवा ह्रषीकेशो हृताश्चिर्हंस उच्यते॥")
सूर्य्यः। (यथा, महाभारते। ३। ३। ६१।
"त्वं हंसः सविता भानुरंशुमाली हृषाकपिः॥")
परमात्मा। मत्सरः। योगिभेदः। मन्त्रभेदः। शरीरस्थवायुविशेषः। तुरङ्गमप्रभेदः। इति मेदिनी॥ (गोविशेषः। यथा, बृहत्संहितायाम्। ६१। १७।
"सितवर्णः पिङ्गाक्षस्ताम्रविषाणोत्तमो महावक्त्रः।
हंसो नाम शुभफलो यूथस्य विवर्द्धनः प्रोक्तः॥")
गुरुः। पर्व्वतः। इति शब्दरत्नावली॥ शिवः। इत्यनेकार्थकोषः॥ अग्रतः स्थितः। श्रेष्ठः। इति हेमचन्द्रः॥ विशुद्धः। इत्यजयः॥*॥ अथ हंसमन्त्रविवरणम्। अस्याजपागायत्रीमन्त्रस्य शिरसि हंसऋषये नमः। मुखे अव्यक्तगायत्रीच्छन्दसे नमः। हृदि परमहंसदेवतायै नमः। लिङ्गे हं बीजाय नमः। आधारे सः शक्तये नमः। परमात्मप्रीतये उच्छ्वासनिश्वासाभ्यां षट्शताधिकैकविंशतिसहस्रजपेन पूर्व्वभूतेभ्यो निवेदयामि। मूलाधारमण्डपे स्वर्णवर्णे चतुर्दलपद्मे वादिसान्तचतुर्व्वर्णान्विते गायत्रीसहिताय गणनाथाय षट्शतसंख्यजपमहर्निशं समर्पयामि नमः। स्वाधिष्ठानमण्डपे अनेकविद्युल्लिभे वादिलान्तषड्वर्णान्विते षड्दलपद्मे सावित्रीसहिताय ब्रह्मणे अजपामन्त्रषट्सहस्रं निवेदयामि नमः। मणिपूरमण्डपे नीलोत्पलमेघनिभे डादिफान्तदशवर्णान्विते दशदलपद्मे लक्ष्मीसहिताय विष्णवे षट्सहस्रजपं समर्पयामि नमः। अनाहतमण्डपे तरुणरविनिभे टादशवर्णयुते द्वादशदलपद्मे गौरीसहिताय शिवाय अजपाषट्सहस्रजपं समर्पयामि नमः। विशुद्धमण्डपे षोडशदलकर्णिकामध्ये जीवात्मने अकारादि-अःकारान्ते अजपामहस्रसंख्यजपं निवेदयामि नमः। आज्ञामण्डपे श्वेतचन्द्रप्रभे द्विदलपद्मे ह-क्ष-वर्णान्विते मायासहितगुरुमूर्त्तये एकसहस्रजपं निवेदयामि नमः। ब्रह्मरन्ध्रमण्डपे नानावर्णोज्ज्वले सहस्रपद्मस्थिताय परमात्मने अकारादिक्षकारान्तसहिताय एकसहस्रजपं निवेदयामि नमः। सहस्रशब्दोऽसंख्यपर इति बोध्यम्। उक्तञ्च पद्मं कोटिसमन्वितमिति। इति जपं समर्प्य अष्टोत्तरशतसंख्यमजपाजपं कुर्य्यात्। अकारादिक्षकारान्ता वर्णा हंस इति शिवशक्तिबिन्दूना ब्रह्म अ इति विसर्गरूपबिन्दूभ्यां हरिहरयोरभेदः। सोऽहमित्यभेदभावनया ब्रह्मरूपतां स्वं स्वं परिभाव्य उक्तः। षट्शताधिकैकविंशतिसहस्रजपेन परदेवतारूप श्रीपरमेश्वरः प्रीयतामित्येकवारं सङ्कल्प्य ध्यायेत्॥*॥ हंसस्य ध्यानं यथा,—
"आराधयामि मणिसन्निभमात्मलिङ्गं
मायापरोहृदयपङ्कजसन्निविष्टम्।
अज्ञानदोषमलचित्तजलावगाहं
नित्यं समाधिकुसुमैरपुनर्भवाय॥"*॥
प्रसङ्गाल्लघुहंसं लिख्यते। पञ्चाशद्वर्णसंपुटत्वेनानुलोम्यप्रातिलोम्येन ब्रह्मरूपं मेरुं चकारं परिकल्प्य तया मह जपं कुर्य्यादिति टोषलेशैर्न बाध्यते। एतेन विलक्षमेव हंसमाह्वयोरेकाकारेण कालात्मना लोके चिदात्म उच्यते। अजपाविधानं विना श्रीविद्यादिसकलविद्याया अनधिकारी भवेत्। तदुक्तम्।
"हंसज्ञानविमुग्धेन कृतमप्यकृतं भवेत्।"इति।
"अजपाधारणं देवि! कथयामि तवानघे!।
यस्य विज्ञानमात्रेण परं ब्रह्मैव देशिकः॥
इसः पदं परेशानि प्रत्यहं प्रजपेश्वरः।
मोहरन्ध्रं न जानाति मोक्षस्तस्य न विद्यते॥
श्रीगुरोः कृपया देवि! ज्ञायते जप्यते यदा।
उच्छ्वासनिश्वासतया तदा बन्धक्षयो भवेत्॥
उच्छ्वासे चैव निश्वासे हंस इत्यक्षरद्वयम्।
तस्मात् प्राणस्तु हंसात्मा आत्माकारेण संस्थितः।
नाभेरुच्छ्वासनिश्वासात् हृदयाग्नेर्व्यवस्थितः॥"
इति राघवभट्टधृतदक्षिणामूर्त्तिसंहितायां ७ पटलः॥*॥ अहोरात्रमध्येऽजपाजपसंख्या यथा,—
"षष्टिश्वासैर्भवेत् प्राणः षट्प्राणा नाड़िका मता।
षष्टिनाड्या अहोरात्रं जपसंख्याक्रमो मतः॥
एकविंशतिसाहस्रं षट्शताधिकमीश्वरि।
जपते प्रत्यहं प्राणी सान्द्रानन्दमयीं पराम्।
उत्पत्तिश्च जपारम्भो मृत्युश्चास्य निवेदनम्॥"
इति तत्रैव ७ पटलः॥*॥
अजपानामकारणमपि तत्रैव।
"विना जपेन देवेशि! जपो भवति मन्त्रिणः।
अजपेयं ततः प्रोक्ता भवपाशनिकृन्तनी॥
एवं जपं महेशानि प्रत्यहं विनिवेदयेत्।

गणेशब्रह्मविष्णुभ्यो हराय परमेश्वरि ! ॥
जीवात्मने क्रमेणैव तथैव परमात्मने ।
षट्शतानि सहस्राणि सहस्रञ्च तदेव हि ।
पुनः सहस्रं गुरवे क्रमेण च निवेदयेत् "*॥
एवं यथास्थानावस्थितेभ्यो गणेशादिभ्यस्त-
त्तदुपसमर्पणमुद्रा तत्तत्स्थानानां तत्तदवस्थित-
मातृकार्णानाञ्च रूपमाह तत्रैव ।
"आधारे स्वर्णवर्णेऽस्मिन् वादिसान्तानि
संस्मरेत् ।
द्रुतजीवर्णवर्णानि वर्णानि परमेश्वरि ! ॥
स्वाधिष्ठाने विद्रुमाभे वादिलान्तानि च स्मरेत् ।
विद्युत्पुञ्जप्रभाभानि सुनीले मणिपूरके ॥
डफान्तानि महानीलप्रभाणि च विचिन्तयेत् ।
पिङ्गवर्णे महावह्निकलिकाभानि चिन्तयेत् ॥
कादिठान्तानि वर्णानि चतुर्थेऽनाहते प्रिये ।
विशुद्धौ धूम्रवर्णे च रक्तवर्णान् स्वरान् यजेत् ॥
आज्ञायां विद्युदाभायां शुभ्रौ हक्षौ विचि-
न्तयेत् ॥
कर्पूरद्युतिसंराजत्सहस्रदलनीरजे ।
नादात्मकं ब्रह्मरन्ध्रं जानीहि परमेश्वरि ।
एतेषु सप्तचक्रेषु स्थितेभ्यः परमेश्वरि ! ॥
जपं निवेदयित्वा तं अहोरात्रभवं प्रिये ।
सहजं परमेशानि न्यासं कुर्याद्विचक्षणः ॥
ऋषिर्हंसोऽव्यक्तरूपगायत्री च्छन्द उच्यते ।
देवता परमात्मा तु हंसोऽहं बीजमुच्यते ॥
सः शक्तिः कीलकं सोऽहं प्राणवस्तु त्वमेव हि ।
नेत्रत्रयं भवेत् श्वेतं वर्णश्च परमेश्वरि ! ॥
तदा तत्त्वञ्च इत्येवं मनोरस्य प्रकीर्त्तितः ।
मोक्षार्थे विनियोगः स्यादेवं जानीहि पार्व्वति ॥
ततः षड़ङ्गविन्यासं कुर्य्याद्देहस्य सिद्धये ।
सूर्य्यं सोमं महेशानि निरञ्जनमतः परम् ॥
निराभासं चतुर्थन्तं स्वाहान्तं क्रमतो न्यसेत् ।
नवचान्तं प्रविन्यस्य ततोऽनन्तपदं स्मरेत् ॥"
इति च तत्रैव ७ पटलः ॥*॥
अजपाया दैविध्यमुक्तं यथा,—
"हंसेति प्रकृतिर्ज्ञेया ॐकारः प्रकृतेर्गुणः ।
हंकारेण बहिर्याति सकारेण विशेत् पुनः ॥
हंसेति परमं मन्त्रं जीवो जपति सर्व्वदा ।
षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः ॥
अजपा नाम गायत्री योगिनां मोक्षदायिनी ।
अजपा द्विविधा देवि ! व्यक्ता गुप्ता क्रमेण च ।
व्यक्ता च द्विविधा प्रोक्ता शब्दज्योतिःस्वरू-
पिणी ।
ज्योतीरूपा च सा देवी हृदिस्थाने प्रतिष्ठिता ।
ठकाररूपा गुप्ता च शिवशक्तिः प्रकीर्त्तिता ।
चन्द्रबीजं ठकारस्तु बोधितः स्वर उच्यते ॥
अजापार्थमयी गुप्ता वह्निजाया प्रकीर्त्तिता ।
अस्याः सङ्ख्यमात्रेण पुरश्चरणमुच्यते ॥"
इति निरुत्तरतन्त्रे ४ पटलः ॥
(जरासन्धनृपतेः सेनापतिविशेषः । यथा, महा-
भारते । २ । २२ । ३१—३२ ।
"स तु सेनापतिं राजा संस्मार भरतर्षभ ! ।
कौशिकं चित्रसेनञ्च तस्मिन् युद्ध उपस्थिते ॥
ययोस्ते नामनी राजन् ! हंसेति डिभकेति च ।
पूर्व्वं संकथिते पुंभिर्नृलोके लोकमत्कृते ।"*॥
मेरोरुत्तरस्थपर्व्वतविशेषः । यथा, विष्णुपुराणे ।
२ । २ । २८ ।
"शङ्खकूटोऽथ ऋषभो हंसो नागस्तथा परः ।
कालञ्जराद्याश्च तथा उत्तरे केशराचलाः ॥")
हंसकः, पुं, (हंस इव कायति मधुरध्वनित्वात् ।
कै शब्दे + कः ।) पादकटकः । यथा,—
"पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ।
हंसकः पादकटकः किङ्किणी क्षुद्रघण्टिका ॥"
इत्यमरः । २ । ६ । १०८ ॥
"षट् नूपुरे। केचित्तु पादाङ्गदादिचतुष्कं चरण-
भूषणे नूपुर इति ख्याते । हंसकादिद्वयं रवशून्ये
हंसाकृतिचरणभूषणे इत्याहुः । हंस इव
कायति मधुरध्वनित्वात् हंसकः । कै शब्दे डः ।
हंसाकृतित्वात् हंस इव हंसकः इति वा ।
इवार्थेविकारसंघ इत्यादिना कः ।"इति भरतः ॥
(हंस इवेति । इवे प्रतिकृताविति कन् । स्वार्थे
कन् वा) राजहंसः । इति शब्दचन्द्रिका ॥
(यथा, माघे । ७ । २३ ।
"सरित इव सविभ्रमप्रयात-
प्रणदितहंसकभूषणा विरेजुः ॥"
तालप्रभेदः । यथा,—
"लघुर्गुरुर्लघुर्यत्र स तालो हंसकः स्मृतः ॥"
इति सङ्गीतदामोदरः ॥
हंसकीलकः, पुं, (हंस इव कौलतीति । कौल
बन्धने + खुल् ।) रतिबन्धविशेषः । यथा,—
"नारीपादद्वयं कृत्वा कान्तस्योरुयुगोपरि ।
कटिमान्दोलयेद् यत्नात् बन्धोऽयं हंस-
कीलकः ॥"
इति स्मरदीपिका ॥
हंसकूटः, पुं, ककुत् । इति केचित् ॥ (पर्व्वत-
विशेषः । यथा, महाभारते । १ । ११६ । ४६ ।
"इन्द्रद्युम्नः सरः प्राप्य हंसकूटमतीत्य च ।
शतशृङ्गं महाराज तापसः समतप्यत ॥")
हंसगद्गदा, स्त्री, (हंस इव गद्गदो यस्याः ।)
मधुरभाषिणी । तत्पर्य्यायः । मधुरनिस्वना २ ।
इति त्रिकाण्डशेषः ॥
हंसगामिनी, स्त्री, (हंस इव गच्छतीति । गम +
णिनिः । ङीप् । हंसगमनमिव गमनं यस्याः
सा इति वा ।) नारीविशेषः । (हंसेन गच्छ-
तीति ।) ब्रह्माणी । इति हंसारूढाशब्द-
दर्शनात् ॥
हंसदाहनं, क्ली, (हंसं श्रेष्ठं सुरभित्वात् दाहनं
यस्य ।) अगुरु । इति शब्दचन्द्रिका ॥ (गुणा-
दयोऽस्या अगुरुशब्दे ज्ञातव्याः ।)
हंसनादिनी, स्त्री, (हंस इव नदतीति । नद +
णिनिः । ङीप् । नारीविशेषः । तस्या लक्षणं
यथा, शब्दमालायाम् ।
"गजेन्द्रगमना तन्वी कोकिलानां स्वतान्विता ।
नितम्बगुर्व्विणी या सा कथ्यते हंसनादिनी ॥"
हंसपदी, स्त्री. (हंसस्येव पादा मूलान्यस्याः ।
ङीप् । पादस्य पद्भावः ।) गोधापदी । इति
राजनिर्घण्टः ॥ हंसपदीविशेषः । तत्पर्य्यायः ।
मधुस्रवा २ हंसपादी ३ त्रिपदी ४ । इति रत्न-
माला ॥ (अस्याः पर्य्यायो यथा,—
"हंसपादी हंसपदी कौटमाता त्रिपादिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हंसपादं, क्ली, (हंसस्य पाद इव वर्णो यस्य ।)
हिङ्गुलम् । इति हलायुधः ॥ (पुं, यथा,—
"हिङ्गुलन्दरदं म्लेच्छमिङ्गुलञ्चूर्णपारदम् ।
दरदस्त्रिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः ॥
हंसपादस्तृतीयः स्यात् गुणवानुत्तरोत्तरम् ।
चर्म्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः ।
जवाकुसुमसङ्काशो हंसपादो महोत्तमः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हंसचरणे च पुं ॥
हंसपादिका, स्त्री, (हंसपादी एव स्वार्थे कन् ।
टाप् ।) हंसपदी । इति राजनिर्घण्टः ॥
हंसपादी, स्त्री, (हंसस्य पादा इव मूलान्यस्याः ।
ङीप् ।) हंसपदीविशेषः । इति रत्नमाला ॥
(अस्याः पर्य्यायो गुणाश्च यथा,—
"हंसपादी हंसपदी कौटमाता त्रिपादिका ।
हंसपादी गुरुः शीता हन्ति रक्तविषव्रणान् ॥
विसर्पदाहातिसारशूलाभूताग्निरोहिणीः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हंसबीजं, क्ली, (हंसस्य बीजम् ।) हंसडिम्बः ।
तस्य गुणाः यथा, राजनिर्घण्टे ।
"हंसबीजं परं बल्यं दृंहणं वातनाशनम् ।
पाके लघुतरं प्रोक्तं सर्व्वामयविनाशनम् ॥"
हंसमाला, स्त्री, (हंसस्य माला ।) कादम्बः ।
इति शब्दचन्द्रिका ॥ हंससमूहः । यथा,—
"तां हंसमालाः शरदीव गङ्गां
महौषधीर्नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले
पपेदिरे प्राक्तनजन्मविद्याः ॥"
इति कुमारसम्भवे । १ । ३० ॥
हंसमाषा, स्त्री, हंसः श्रेष्ठो माषो यस्याः ।)
माषपर्णी । इति राजनिर्घण्टः ॥
हंसरथः, पुं, (हंसो रथो वाहनं यस्य ।) ब्रह्मा ।
इति त्रिकाण्डशेषः ॥
हंसलोमशं, क्ली, (हंस इव लोमशम् ।) कासी-
सम् । इति राजनिर्घण्टः ॥
हंसलोहकं, क्ली, (हंसं श्रेष्ठं लोहमिव । कन् ।)
पित्तलम् । इति हेमचन्द्रः ॥ (विवरणमस्य
पित्तलशब्दे ज्ञातव्यम् ॥)
हंसवती, स्त्री, (हंस इव हंसपदाकार इव
मूलमस्यस्या इति । हंस + मतुप् । ङीप् ।
मस्य वः ।) हंसपदीलता । इति जटाधरः ॥
हंसयुक्ते, त्रि ॥
हंसवाहनः, पुं, (हंसो वाहनं यस्य ।) ब्रह्मा ।
इति कश्चिदमरः । १ । १ । १७ ॥ (यथा,
श्रीमद्भागवते । ७ । १ । १६ ।

"तप्यन्तं तपसा लोकान् यथाब्भ्रापिहितं रविम्।
विलक्ष विस्मितः प्राह हंसस्तं हंसवाहनः॥")
हंसाङ्घ्रिः, पुं, (हंसस्य अङ्घ्रिरिव रक्तवर्णत्वात्।) हिङ्गुलम्। इति केचित्॥ हंसपादश्च॥
हंसाधिरूढा, स्त्री, (हंसमधिरूढा।) सरस्वती। यथा.—
"वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभां
चन्द्रार्द्धाङ्कितमस्तकां निलकरैः संबिभ्रतीमादरात्।
वीणामक्षगुणं सुधाव्यकलसं विद्याञ्च तुङ्गस्तनीं
दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे॥"
इति तन्त्रसारः॥
हंसाभिख्यं, क्ली, (हंसस्येव अभिख्या शोभा यस्य शुक्लवर्णत्वात्।) रूप्यम्। इति हेमचन्द्रः॥
हंसारूढः, पुं, (हंसमारूढः।) ब्रह्मा। यथा। रक्तवर्णं चतुर्म्मुखंदिभुजं अक्षसूत्रकमण्डलुधरं हंसारूढं ब्रह्माणम्। इति वैदिकसन्ध्याप्राणायामे ब्रह्मध्यानम्॥ (यथा, बृहत्संहितायाम्। ५। ५७।
"दण्डी यमो महिषगो
हंसारूढश्च पाशभृद्वरुणः॥")
हंसारूढा, स्त्री, (हंसमारूढा।) ब्रह्माणी। यथा,
"चतुर्मुखीं जगद्धात्रीं हंसारूढां वरप्रदाम्।
सृष्टिरूपां महाभागां ब्रह्माणीं तां नमाम्यहम्॥"
इति बृहन्नन्दिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतिः॥
हंसिका, स्त्री, (हंसी एव। स्वार्थे कन्। टाप्।) हंसी। इति शब्दरत्नावली॥
हंसी, स्त्री, (हंसस्य पत्नी। हंस+ङीप्।) हंसभार्य्या। तत्पर्य्यायः। चक्राङ्गी २ वरटा ३ चक्राकी ४ वरटी ५ सरःकाकी ६ हंसिका ७ वारला ८ हंसयोषित् ९। इति शब्दरत्नावली॥ वरला १० मरालो ११ मन्थुगमना १२ मृदुगामिनी १३। इति राजनिर्घण्टः॥ द्वाविंशत्यक्षरपादच्छन्दोविशेषः। यथा,—
"मौ गौ नायत्वारो गो गो वसुभुवनयतिरिति भवति हंसी।
सार्द्धं कान्तेनैकान्तेऽसौ विकचकमलमधुसुरभि पिबन्ती
कामक्रीड़ाकूतस्फीतप्रमदसरभसभरमलघु रवन्ती।
कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे
कंसारातेः पश्य स्वेच्छं रसभसगतिरिह विलसति हंसी॥"
इति छन्दोमञ्जर्य्यां २ स्तवकः॥
हंसस्त्रीजातिः। इति मुग्धबोधव्याकरणम्॥
हंसोदकं, क्ली, (हंसं श्रेष्ठमुदकम्।) पानीयविशेषः। यथा,—
"नादेयं नवसङ्घटेषु निहितं सन्तप्तमर्कांशुभिर्यामिन्याञ्च निविष्टमिन्दुकिरणैर्म्मन्दानिलान्दोलितम्।
एलाद्यैः परिवासितं श्रमहरं पित्तोष्णदाहे विषे
मूर्च्छारक्तमदात्ययेषु च हितं शंसन्ति हंसोदकम्॥"
इति राजनिर्घण्टः॥
हंहो, व्य, सम्बोधनम्। (यथा, महाभारते। १२। २६७। ८।
"तां गामृषिः सूमरश्मिः प्रविश्य यतिमब्रवीत्।
हंहो वेदा यदि मता धर्म्माः केनापरे मताः॥")
दर्पः। दम्भः। प्रश्नः। इति शब्दरत्नावली॥
हक्कः, पुं, (हक् इत्यव्यक्तशब्देन कायतीति। के+कः।) गजसमाह्वानम्। इति जटाधरः॥
हक्कारः, पुं. (हक् इत्यव्यक्तशब्दस्य कारः करणम्।) आह्वानम्। इति केचित्॥
हञ्चा, व्य, नाट्योक्तौ चेटीसम्बोधनम्। इत्यमरटीकायां भरतः॥
हञ्चिः, पु, चुत्। इति जटाधरः॥
हञ्चिका, स्त्री, भार्गी। इति भावप्रकाशः॥ (अस्याः पर्य्यायो गुणाश्च। यथा,—
"ब्राह्मण्यङ्गारवल्ली च खरशाका च हञ्चिका।
अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत्॥
व्रणोरःक्षतवीसर्पकृमिकुष्ठगदापहा।
अलक्ष्मीको गुणैस्तद्वत् विशेषाद्वह्निनाशनः॥")
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
हञ्जे, व्य, नाट्योक्तौ चेटीसम्बोधनम्। यथा,—
"हण्डे हञ्जे हलाह्वानं नीचं चेटीं सखीं प्रति॥"
इत्यमरः। १। ७। १५॥
"हण्डे नीचस्यसम्बोधनम्। हञ्जे चेटीसम्बोधनम्। हला सखी सम्बोधनम्। त्वयमेवाव्ययम्। यथा। हण्डे कुम्भिल। अरे हञ्जे काञ्चनमाले। हला सउन्तले इति। त्वयमप्यादन्तमव्ययमस्ति। हण्डा हञ्जा हला शब्दास्त्रयः सम्बोधनवाचकाः। इति प्राकृतहत्तावव्ययपरिच्छेदे वसन्तराजः॥
'हञ्जेति चेटिकाह्वानं सख्याह्वानं हलेति च।
हण्डेति कुत्सिताह्वानमार्य्यो मारिष उच्यते॥"
इति भागुरिश्च॥
अनव्ययश्च हलाशब्दः सखीपर्य्यायोऽस्ति। बाला वासुः सखी हलेति विकाण्डशेषे वोपालितः॥' अलमेतोऽहं मरिष्यामि हे हले भाषितस्य चेति तड़ितमिश्रः। त्वयमिदमव्युत्पन्नम्।" इति भरतः॥
हट, त्विषि। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) त्विषि दीप्तौ।। हटति। इति दुर्गादासः॥
हटपर्षि, क्ली. शैवालम्। इति शब्दरत्नावली॥
हट्टः, पुं, क्रयविक्रयस्थानम्। हाट इति भाषा। इत्यमरः। ३। ५। ८८॥
हट्टचौरकः, पुं, (हट्टस्य चौरः। ततः कन्।) चौरविशेषः। हाटचोर इति भाषा। तत्पर्य्यायः। मक्षीकरः २ माचलः ३ चिल्लाभः ४।
इति शब्दरत्नावली॥ वन्दीकारः ५ प्रसङ्गचौरः ६। इति विकाण्डशेषः॥
हट्टविलासिनी, स्त्री, (हट्टे विलसतीति। वि+लस+णिनि। ङीप्।) गन्धद्रव्यविशेषः। तत्पर्य्यायः। धमनी २ अञ्जनकेशी ३ हनुः ४। इत्यमरः। २। ४। १३०॥ अस्याः पर्य्यायो यथा,—
"नखं व्याघ्रनखं व्याघ्रायुधन्तच्चक्रकारकम्।
नखं खल्वनखी प्रोक्ता हनुर्हट्टविलासिनी॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
हरिद्रा। इति भावप्रकाशः॥ पुस्तकान्तरे हरिविलासिनीति च पाठः॥ (वाराङ्गना। यथा, आर्य्यासप्तशत्याम्। ४३३।
"मृगमदनिदानमटवी कुङ्कुमपि क्षपकवाटिका वहति।
हट्टविलासिनि भवती परमेका पौरसर्व्वस्वम्॥")
हठ, कौलबन्धे। बलात्कृतौ। प्रभुतौ। इति कविकल्पद्रुमः॥ (भा०-पर०-भक-प्रभुतौ अक०-सेट्।) कौले बन्धः कौलबन्धः। हठति छागं कौले बध्नाति इत्यर्थः। कात्यादौ बलात्कारमात्रे। हठति परचक्रं बली। इति दुर्गादासः॥
हठः, पुं (हठ+पुंसीति घः।) बलात्कारः। इत्यमरः। २। ८। १०८॥ प्रभौ। इति मेदिनी॥ (हठयोगः। यथा, हठयोगप्रदीपिकायाम्। १। १०।
"अशेषतापतप्तानां समाश्रयमठो हठः।
अशेषयोगयुक्तानामाधारकमठो हठः॥)
हटपर्णी, स्त्री, (हठति प्लवते। इति। हठ+अच्। तादृशं पर्णमस्याः। ङीप्।) शैवालः। इति विकाण्डशेषः॥
हठयोगः, पुं, (हठेन योगः।) योगविशेषः। यथा,—
"इदानीं हठयोगस्तु कथ्यते हठसिद्धिदः।
कृत्वासनं पवनाग्रं शरीरे रोगहारकम्॥
पूरकं कुम्भकञ्चैव रेचकं वायुना भजेत्।
इत्थं क्रमोत्क्रमं ज्ञात्वा पवनं सुधयेत् सदा॥
धौत्यादिकर्म्मषट्कञ्च संकुर्य्याद्धठसाधकः।
एतन्नाड्यान्तु देवेशि! वायुपूर्णं प्रतिष्ठितम्॥
ततो मनो नियतं स्यात्तत आनन्द एव हि।
हठयोगात्र कालः स्यान्मनः शून्ये भवेद्यदि॥
इदानीं हठयोगस्य हितोयं भेदवत् शृणु।
आकाशे नासिकाग्रे तु सूर्य्यकोटिसमं स्मरेत्॥
श्वेतं रक्तं तथा पीतं कृष्णमित्यादिरूपतः।
एवं ध्यात्वा चिरायुः स्यादङ्गाजननवर्जितः॥
शिवतुल्यो महात्मासौ हठयोगप्रसादतः।
हठाज्ज्योतिर्म्मयो भूत्वा ह्यन्तरेष शिव भवेत्।
अतोऽयं हठयोगः स्यात् सिद्धिदः सिद्धसेवितः॥"
इति योगस्वरोदयः॥
हठात्, स्त्री, (हठे प्लवने अलति पर्य्याप्नोतीति। अल+उण्।) कुम्भिका। इति शब्दचन्द्रिका॥
हठी, स्त्री, वारिपर्णी। इति धरणिः।

हड़ि:, पुं, काष्ठयन्त्रविशेषः। हाड़ड़ इति भाषा। यथा,—
"निगड़ो लोहबन्धेऽस्त्री हड़ि: काष्ठस्य यन्त्रणे॥"
इति चत्रियवर्गे शब्दमाला॥

हड़िक, पुं, नीचजातिविशेषः। हाड़ि इति भाषा। तत्पर्य्यायः।
"हड़िकस्तु मलाकर्षी डम्बकश्चावपुच्छिका॥"
इति शब्दमाला॥

हड्ड, क्ली, अस्थि। हाड़ इति भाषा। इति शब्दचन्द्रिका॥

हड्डक:, पुं, नीचजातिविशेषः। इति शब्दमाला। हाड़ि इति भाषा॥

हड्डजं, क्ली, मज्जा। इति शब्दचन्द्रिका॥

हड्डि:, हड्डिक: } पुं, हड्डिपजातिः। हाड़ि इति भाषा। स तु चाण्डालीगर्भे लेटस्य वीरमेन जातः। यथा,—
"सत्यशाण्डालकन्यायां लेटवीर्य्येण शौनक!।
बभूवतुस्त्रयो पुत्रौ हड्डिकशौण्डिकौ तथा॥"
हड्डिकशौण्डिकावित्यत्र दुष्टौ हड्डिडमौ तथेत्यपि।
पाठः। इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १०अध्यायः॥

हड्डिप:, पुं, मत्स्यग्रहिः। इति मुग्धबोधव्याकरणम्॥ हाड़ि इति भाषा॥

हण्डा, व्य, नाट्योक्तो नीचसम्बोधनम्। इत्यमर टीकायां भरतः॥ स्त्री, मृत्पात्रभेदः। हाँड़ा इति भाषा। इति वक्ष्यमाणशब्ददर्शनात्॥

हण्डिका, स्त्री, (हण्डा+स्वार्थे कन्। टापि अत इत्वम्।) मृत्पात्रविशेषः। हाँड़ी इति भाषा। इति वक्ष्यमाणशब्ददर्शनात्॥

हण्डिकासुतः, पुं, (हण्डिकायाः सुत इव।) क्षुद्रहण्डिका। तत्पर्य्यायः। क्षणनः २। इति तिकाण्डशेषः॥ [कैचित्॥

हण्डी, स्त्री, हण्डिका। हाँड़ी इति भाषा। इति

हण्डे, व्य, नाट्योक्तो नीचसम्बोधनम्। इत्यमरः। २। ७। १५॥

हतः, त्रि, (हन+क्तः।) आधारहितः। तत्पर्य्यायः। मनोहतः २ प्रतिहतः ३ प्रतिबद्धः ४। इत्यमरः। ३। १। ४१॥ नष्टः तत्पर्य्यायः। प्रमाथितः २ निवर्हितः ३ निकारितः ४ निगारितः ५ प्रवासितः ६ परानितः ७ निषूदितः ८ निर्हिसितः ९ निर्व्यासितः १० संक्षपितः ११ निर्व्यलयितः १२ अपासितः १३ निस्तर्हितः १४ निकृतः १५ क्षपितः १६ परिवर्जितः १७ निर्व्यापितः १८ विनासितः १९ मारितः २० प्रतिघातितः २१ उद्वासितः २२ प्रमथितः २३ क्षपितः २४ उत्सादितः २५ आलम्भितः २६ पिंसितः २७ विमारितः २८ घातितः २९ उत्सखितः ३० वधितः ३१। इत्यमरदर्शनात्॥ पूरितारुः। तत्पर्य्यायः। पिण्डितम् २ गुणितम्। इति त्रिकाण्डशेषः॥ हननं, क्ली॥*॥ पारिभाषिकहता यथा,—
"अश्वेषणो हता विप्रो हतं आद्धमधुस्रम्।
अब्रह्मस्थं हतं क्षेत्रमनाचारं हतं कुलम्॥
सदश्वस्य हतो धर्म्मः क्रोधेनैव हतं तपः।
अष्टदृश्च हतं ज्ञानं प्रमादेन हतं श्रुतम्॥
गुर्व्वभक्त्या हता नारी ब्रह्मचारी तथा हतः।
अदीक्षेऽग्नौ हतो होमो हता त्वजिरमृत्तिका॥
उपजोष्या हता कन्या स्वार्थं पाकक्रिया हता।
गूढभिक्षोर्हतो योगः कृपणस्य हतं धनम्॥
अनभ्यासहता विद्या हतो राजा विरोधकृत्।
जीवनार्थं हतं तीर्थं जीवनार्थं हतं व्रतम्॥
असत्या च हता वाणी तथा पैशुन्यवादिनी।
सन्दिग्धोपहतो मन्त्रो व्यस्तचित्तो हतो जपः॥
हतमश्रोत्रिये दानं हतो लोकश्च नास्तिकः।
अश्रद्धया हतं सर्व्वं यत् कृतं पारलौकिकम्॥
इह लोको हतो नृणां दरिद्राणां परन्तप।
मनुष्याणां तथा जन्म माघस्नानं विना हतम्॥"
इति पाद्मोत्तरखण्डे ४ अध्यायः॥

हतकः, पुं, (हत इव। कन्।) नीचलोकः। इति केचित्॥ (यथा, साहित्यदर्पणे। ६। ३८५।
"दैव अजातशत्रौ अथापि दुर्य्योधनहतके॥")

हतमूर्खः, पुं, (मूर्खः हत इव।) अतिमूर्खः। यथा,—
"क्रूरः खलो हतमूर्खः पापशीलो भवेन्नरः।
बुधस्यागमने नित्यं जायते स नराधमः॥"
इति जातरत्नकोष्ठीप्रदीपे॥

हताशः, त्रि, (हता आशा यस्य।) निर्दयः। आशारहितः। पिशुनः। इति मेदिनी॥ बन्ध्यः। इति शब्दरत्नावली॥

हतिः, स्त्री, (हन+क्तिन्।) अपकर्षः। यथा। मुख्यार्थहतिर्दोषः। हतिरपकर्षः। इति काव्यप्रकाशे ७ उल्लासः॥ हत्वा च॥ (यथा, महाभारते। १२। ३६०। ८।
"आश्रया ह्यभिपन्नानामकृत्वाश्रुप्रमार्ज्जनम्।
राजा वा राजपुत्तो वा भ्रूणहत्यैव युज्यते॥"
ताड़नम्। यथा, गीतगोविन्दे। १। १२।
"वहसि वपुषि विपदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम्॥"
विनाशः। यथा, भागवते। ११। ३। १८।
"कर्म्माण्यारभमाणानां दुःखहत्यै सुखाय च।
पश्येत् पाकविपर्य्यासं मिथुनीचारिणां नृणाम्॥"

हन्तृ:, पुं, (हन्ति शरीरमिति। हन+"कृहनिभ्यां कन्तृन्।" उणा० ३। ३८। इति कन्तृन्।
"अनुदात्तोपदेशेति।" ६। ४। ३७। इति अनुनासिकलोपः।) व्याधिः। शस्त्रम्। इति उणादिकोषः॥ (हननशीले, त्रि। यथा, ऋग्वेदे। १। २५। २।
"मा नो वधाय हत्नवे जिहीडानस्य रीरधः॥")

हत्या, स्त्री, (हन+भावे क्यप्।) हननम्। वधः। यथा,—
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥"
इति प्रायश्चित्तविवेकादिः॥

हद्दः, पुं, (हन्ति शुक्रमिति। हन+"हनिकुषीति।" उणा० २। २। इति क्थन्।) विषम्। इति संक्षिप्तसारोणादिवृत्तिः। उणादिकोषश्च॥

हद, ङ औ खर्दे। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० अक० अनिट्।) खर्दः विष्ठोत्सर्गः। ङ, हदते जनः। औ, हत्ता। इति दुर्गादासः॥

हदनं, क्ली, (हद+ल्युट्।) विष्ठात्यागः। हागा इति भाषा। यथा। विट्सृजिर्हदनम्। इति धातुटीकायां दुर्गादासः॥ हदधात्वर्थोऽप्येवम्॥

हद्दा, स्त्री, मेषादिलग्नानां त्रिंशदंशः। तैरंशैर्हादशलग्नेषु पञ्चानां पञ्चानां ग्रहाणां सङ्गाविशेषेण भागविशेषो भवति। नराणां वर्षप्रवेशादौ शुभाशुभगणनायामस्य प्रयोजनम्। तद्भागविशेषो यथा।
मेषलग्ने प्रथमं बृहस्पतेः ६ भागाः। ततः शुक्रस्य ६ अंशाः। ततो बुधस्य ८ भागाः। ततो मङ्गलस्य ५ भागाः। ततः शनेरपि ५ अंशाः। समुदायेन त्रिंशदंशाः भवन्ति॥
वृषलग्ने प्रथमं शुक्रस्य ८ भागाः। ततो बुधस्य ६ अंशाः। गुरोः ८ भागाः। शनेः ५ अंशाः। मङ्गलस्य ३ अंशाः॥
मिथुनलग्ने प्रथमं ६ भागाः बुधस्य। ततः शुक्रस्य ६ भागाः। बृहस्पतेः ५ अंशाः। मङ्गलस्य ७ अंशाः। शनेः ६ अंशाः॥
कर्कटलग्ने प्रथमं मङ्गलस्य ७ अंशाः। ततः शुक्रस्य ६ भागाः। बुधस्यापि ६ भागाः। बृहस्पतेः ७ अंशाः। शनेः ४ अंशाः॥
सिंहलग्ने प्रथमं ६ भागाः बृहस्पतेः। शुक्रस्य ५ अंशाः। शनेः ७ भागाः। बुधस्य ६ भागाः। मङ्गलस्यापि ६ भागाः॥
कन्यालग्ने प्रथमं बुधस्य ७ अंशाः। शुक्रस्य १० अंशाः। गुरोः ४ अंशाः। मङ्गलस्य ७ भागाः। २ भागौ शनैश्चरस्य॥
तुलालग्ने आदौ ६ अंशाः शनेः। ८ भागाः बुधस्य। गुरोः ७ भागाः। शुक्रस्यापि ७ अंशाः। २ भागौ मङ्गलस्य॥
वृश्चिकलग्ने आदौ मङ्गलस्य ७ भागाः। शुक्रस्य ४ अंशाः। ८ भागाः बुधस्य। बृहस्पतेः ५ अंशाः। ६ भागाः शनेः॥
धनुर्लग्ने प्रथमं बृहस्पतेः १२ अंशाः। ततः शुक्रस्य ५ अंशाः। बुधस्य ४ अंशाः। मङ्गलस्य ५ भागाः। शनेः ४ अंशाः॥
मकरलग्ने आदौ बुधस्य ७ अंशाः। गुरोरपि ७ भागाः। ८ अंशाः शुक्रस्य। शनेः ४ अंशाः। मङ्गलस्यापि ४ अंशाः॥
कुम्भलग्ने प्रथमं बुधस्य ७ भागाः। शुक्रस्य ६ भागाः। बृहस्पतेः ७ अंशाः। मङ्गलस्य ५ भागाः। शनेरपि ५ भागाः॥
मीनलग्ने आदौ १२ अंशाः शुक्रस्य। ४ भागाः बृहस्पतेः। बुधस्य ३ अंशाः। मङ्गलस्य ८ भागाः। ततः शनेः २ भागौ॥

एषां प्रमाणानि यथा,—
"मेषेऽङ्गतर्काष्टशरेषुभागा
जीवास्फुजिज्ज्ञारशनैश्चराणाम् १।
वृषेऽष्टतर्काष्टशरानलांगाः
शुक्रज्ञजीवार्किकुजेग्रहाः॥ २॥
युग्मे षडङ्गेषुनगाङ्गभागाः
सौम्यास्फुजिज्जीवकुजार्किहद्दाः॥ ३॥
कर्केऽद्रितर्काङ्गनगाब्धिभागाः
कुजास्फुजिज्ज्ञेज्यशनैश्चराणाम्॥ ४॥
सिंहेऽङ्गभूताद्रिरसाङ्गभागा
देवेज्यशुक्रार्किबुधारहद्दाः। ५।
स्त्रियां नगाग्न्यब्धिनगाब्धिभागाः
सौम्यौशनोजीवकुजार्किहद्दाः॥ ६॥
तुले रसाष्टाद्रिनगाब्धिभागाः
कालज्ञजीवास्फुजिदारनाद्याः। ७।
कीटे नगाब्ध्यष्टशराङ्गभागा
भौमास्फुजिज्ज्ञेज्यशनैश्चराणाम्॥ ८॥
चापे रवीन्वम्बुविपद्भवेदा
जीवास्फुजिज्ज्ञारशनैश्चराणाम्। ९।
मृगे नगाद्यष्टयुगाम्बुतीनां
सौम्येज्यशुक्रार्किकुजेग्रहाः॥ १०॥
कुम्भे नगाङ्गाद्रिशरेषुभागा
ज्ञशुक्रजीवारशनैश्चराणाम्। ११।
मीनेऽर्कवेदानलनन्दपक्षाः
सितेज्यसौम्यारशनैश्चराणाम्॥"१२॥

इति नीलकण्ठीयताजकम्॥

हन, ल ओ गतौ। बधे। इति कविकल्पद्रुमः। (अदा०-पर०-सक०-अनिट्।) ल. हन्ति। ओ, हन्ता। गणक्रतमनित्यमिति न्यायात् श्नप स्थितौ हनतीत्यपि वररुचिः। तेन सर्व्वा एवाहनत् पृथक् इत्यादि साधुः। इति दुर्गादासः॥

हन्, ब्य, रुषोक्तिः। अनुनयः। इति मेदिनी॥

हनः, पुं, हननकर्त्ता। यथा। हन्तर्घत्वञ्च। घत्वमभ्यासस्य उत्तरस्य त्वभ्यासस्येति कुत्वम्। घनाघनः। पाटेर्णिलुक् च दीर्घश्चाभ्यासस्य पाटुपटः। पक्षे हनः पटः। इति सिद्धान्तकौमुदी किपि हन्। तस्य प्रथमैकवचने हा॥

हननं, क्ली, (हन+ल्युट्।) मारणम्। यथा,—
"स्यात् प्राणवियोगफलकव्यापारो हननं स्मृतम्॥"

इति प्रायश्चित्तविवेकः॥

(यथा, भागवते। ८। ११। २०।
"नेदं यशो रघुपतेः सुरयाच्ञयात्त-
लीलातनोरधिकसाम्यविमुग्धधाम्नः।
रक्षोवधो जलधिबन्धनमस्तपूर्गैः
किं तस्य शत्रुहनने कपयः सहायाः॥")

पूरणम्। इत्यङ्गाख्यम्॥

हनीलः, पुं, केतकी। इति रत्नमाला॥ हलीनोऽपि पाठः॥

हनुः, पुं, स्त्री, (हन्ति कठिनद्रव्यादिकमिति। हन+"हनिकुषिनीरमीति।" उणा० १। ११। इति उः। म च नित्।) कपोलहनुपरमुखभागः। चोयालि इति भाषा। इत्यमरः॥ ताभ्यां कपोलाभ्यां परो मुखभागो हनुरुच्यते। यत्र जम्भाख्या दन्ता जायन्ते इति सुश्रुतः। हन्ति कठारमपि द्रव्यं हनु नाम्नोतिः उः। तत्परेति पाठे हनोः स्त्रीत्वम्। हनुः कपोलावयवे द्वयोरिति कश्चित्। तन्वादेर्व्वा इत्यपि हनुश्च॥ पुंस्यपीति स्वामी। पुंयोगे कर्णहनू नपुंसके श्मश्रु जानु च गुदस्येति वररुचिः। इति भरतः॥

हनुः, स्त्री, (हन्ति पुरुषमिति। हन+उः।) दृष्टविलासिनी। इत्यमरः।) रोगः। अस्त्रम्। मृत्युः। इति जटाधरः॥

हनुमान्, [त्] पुं, (हनुरस्यास्येति। हनु+मतुप्।) वानरविशेषः। स तु अञ्जनागर्भे पवनौरसाज्जातः। रोवणवधार्य श्रीरामदूतश्च। तत्पर्य्यायः। मनूमान् २ आञ्जनेयः ३ योगचरः ४ अनिलौ ५ हिडिरारमणः ६ रामदूतः ७ अञ्जनध्वजः ८। इति शिकाण्डशेषः॥ मरुतात्मजः ९। इति जटाधरः॥ * ॥ अथ हनूमत्कल्पः।

देव्युवाच।
"शैवानि गाणपत्यानि शाक्तानि वैष्णवानि च।
साधनानि च सौराणि चान्यानि यानि कानि च।
युतानि तानि देवेश! त्वद्भक्त्याभिःसतानि च॥
किञ्चिदन्यत्तु देवानां साधनं यदि कथ्यताम्।

शङ्कर उवाच।
शृणु देवि! प्रवक्ष्यामि सावधानावधारय॥
हनूमत्साधनं पुण्यं महापातकनाशनम्॥
एतद्गुह्यतमं लोके शीघ्रसिद्धिकरं परम्।
जपी यस्य प्रसादेन लोकत्रयजितो भवेत्॥ * ॥
तत्साधनविधिं वक्ष्ये नृणां सिद्धिकरं द्रुतम्॥
वियत् सलवकं हनूमते च तदनन्तरम्।
रुद्रात्मकाय कवचं फडिति दादशाक्षरः॥
एतन्मन्त्रं समाख्यातं गोपनीयं प्रयत्नतः।
तव स्नेहेन भक्त्या च दासोऽस्मि तव सुन्दरि!॥
एतन्मन्त्रं अर्জ্জुनाय प्रदत्तं हरिणा पुरा।
जपेन साधनं कृत्वा जितं सर्व्वं चराचरम्॥
नदीकूले विष्णुगेहे निर्জ্জने पर्व्वते वने।
एकाग्रचित्तमाधाय साधयेत् साधनं महत्॥"
ध्यानमाह।
"महाशैलं समुत्पाट्य धावन्तं रावणं प्रति।
तिष्ठ तिष्ठ रणे दुष्ट घोररावं समुत्सृजन्॥
लाक्षारक्तारुणं रौद्रं कालान्तकयमोपमम्।
ज्वलदग्निसमं नेत्रं सूर्य्यकोटिसमप्रभम्॥
अङ्गदादैर्महावीरैर्वेष्टितं रुद्ररूपिणम्।
एवंरूपं हनूमन्तं ध्यात्वा यः प्रजपेन्मनुम्॥
लक्षजपात् प्रसन्नः स्यात् सत्यं ते कथितं मया।
ध्यानैकसाधनः पुंसां सिद्धिरेव न संशयः॥
प्रातः स्नात्वा नदीतीरे उपविश्य कुशासने।
प्राणायामं षडङ्गञ्च मूलेन सकलं चरेत्॥
पुष्पाञ्जल्यष्टकं दत्त्वा ध्यात्वा रामं ससीतकम्।
ताम्रपात्रे ततः पद्ममष्टपत्रं सकेशरम्॥
रक्तचन्दनघृष्टेन लिखेत्तस्य शलाकया।
कर्णिकायां लिखेन्मन्त्रं तत्रावाह्य कपिं प्रभुम्॥
कर्णिकायां हनूमन्तं ध्यात्वा पाद्यादिकं ततः।
सुग्रीवं लक्ष्मणं चैव अङ्गदं नलनीलकम्॥
जाम्बवन्तञ्च कुमुदं केशरिणं दले दले।
पूर्व्वादिक्रमतो देवि! पूजयेदिन्द्रचन्द्रनैः॥
पवनाञ्जनाभ्यां पूजयेदिन्द्रवामतः।
दलाग्रेषु कपिभ्योऽपि पुष्पाञ्जल्यष्टकं ततः॥
ध्यात्वा तु मन्त्रराजं वै लक्षं यावत्तु साधकः।
लक्षान्तदिवसं प्राप्य कुर्य्याच्च पूजनं महत्॥
एकाग्रचित्तमनसा तस्मिन् पवननन्दने।
दिवारात्रौ जपं कुर्य्यात् यावत् सन्दर्शनं भवेत्॥
सुदृढं साधकं मत्वा निशीथे पवनात्मजः।
सुप्रसन्नस्ततो भूत्वा प्रयाति साधकाग्रतः॥
यथेप्सितं वरं दत्त्वा साधकाय कपिप्रभुः।
वरं लब्ध्वा साधकेन्द्रो विहरेदात्मनः सुखैः॥
एतद्धि साधनं मुख्यं देवानामपि दुर्लभम्।
तव स्नेहात् समाख्यातं भक्तासि मयि पार्व्वति॥"
इति गारुडे हनूमत्साधनमिति तन्त्रसारः॥*॥
"हनूमतोऽतिगुह्यन्तु लिख्यते वीरसाधनम्।
ब्राह्मे मुहूर्त्ते उत्थाय कृतनित्यक्रियो द्विजः॥
गत्वा नदीं ततः स्नात्वा तीर्थमावाह्य चाष्टधा।
मूलमन्त्रं ततो जप्त्वा सिञ्चेदादित्यसंख्यया॥"
ततो वाससी परिधाय गङ्गातीरे पर्व्वते वा उपविश्य हां अङ्गुष्ठाभ्यां नमः इत्यादिना करान्यासौ कुर्य्यात्। ततः प्राणायामः। अकारादिवर्णानुद्धार्य्य वामनासापुटेन वायुं पूरयेत् पञ्चवर्गानुद्धार्य्य वायुं स्तम्भयेत्। यकारादिवर्णानुद्धार्य्य दक्षिणनासापुटेन रेचयेत्। एवं वारत्रयं कृत्वा मन्त्रवर्णैरङ्गन्यासं कृत्वा ध्यायेत्॥ * ॥
"ध्यायेद्रणे हनूमन्तं कपिकोटिसमन्वितम्।
धावन्तं रावणं जेतुं दृष्ट्वा सत्वरमुत्थितम्॥
लक्ष्मणञ्च महावीरं पतितं रणभूतले।
गुरुञ्च क्रोधमुत्पाद्य गृहीत्वा गुरुपर्व्वतम्॥
हाहाकारैः सदर्पैश्च कम्पयन्तं जगत्त्रयम्।
ब्रह्मब्राण्डं समाच्छाद्य कृत्वा भीमं कलेवरम्॥"

इति ध्यात्वा षट्सहस्रं जपेत्॥

अथ मन्त्रः।
"सबीजं पूर्व्वमुद्धार्य्य पवनञ्च ततो वदेत्।
नन्दनञ्च ततो देयं ङेऽवसानेऽनलप्रिया॥
दशार्णोऽयं मनुः प्रोक्तो नराणां सुरपादपः॥"
हां पवननन्दनाय स्वाहा। इतिमन्त्रः। सप्तमदिवसे दिवारात्रं व्याप्य जपेत्। ततो महाभयं दृष्ट्वा त्रिभागशेषासु निशासु नियतमागच्छति। साधको यदि मायां तरति तदेप्सितं वरं प्राप्नोति।
"विद्यां वापि धनं वापि राज्यं वा शत्रुनिग्रहम्।

तत्क्षणादेव चाप्नोति सत्यं सत्यं सुनिश्चितम् ॥"
इति च तन्त्रसार: ॥

हनू:, स्त्री. (हनु+पचे ऊङ् ।) हनु: । इत्यमरटीकायां भरत: ॥ (यथा,—
"शाखासु हन्वो: कथ्यास्तु चेटावन्तस्तु सन्धय: ॥"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ॥)

हनूमान्, [त्] पु, (हनूरस्यस्येति । हनू+मतुप् ।) हनुमान् । इति त्रिकाण्डशेष: ॥ (यथा, महाभारते । ३ । १४७ । २७ ।
"अहं केसरिण: क्षेत्रे वायुना जगदायुना ।
जात: कमलपत्राक्ष हनूमान्नाम वानर: ॥")

हनूष:, पुं. (हन्ति मानुषानिति । हन+"ऋहनिभ्यामूषन् ।" उणा० ४।७३। इति ऊषन् ।) राक्षस: । इति त्रिकाण्डशेष: ॥

हन्त, व्य, हर्ष: । अनुकम्पा । (यथा, गीतायाम् । १० । १९ ।
"हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतय: ।
प्राधान्यत: कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥")
वाक्यारम्भ: । विषाद: । इत्यमर: । ३।३।२४३ ॥ (यथा, भ्रमराष्टके । ८ ।
"रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजालम् ।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥")
अर्त्ति: । वाद: । संभ्रम: । इति शब्दरत्नावली ॥ खेद: इति मेदिनी ॥ (यथा, रामायणे ।
"काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया ॥"
अन्तकरणम् । इत्यजयपाल: ॥

हन्तकार:, पुं, (हन्त इत्यस्य कार: करणम् ।) अतिथिदेयतण्डुलम् । इति केचित् ॥ हन्तशब्द: । यथा । यत्तु ।
"निवीती हन्तकारेण मनुष्यांस्तर्पयेदय ।
कुशस्य मध्यदेशेन तृतीर्थेन उदङ्मुख: ॥"
इति लघुविष्णुक्रम् ॥
हन्तप्रयोगेण जलदानमुक्तं तत् सनकादिप्रत्येकतर्पणे । यथा । सनकस्तृप्यतां तस्यैतदुदकं हन्त इत्यादौ । न तु पद्मपुराणीयमिलिततर्पणे । इत्याह्निकाचारतत्त्वम् ॥ * ॥ अतिथये दानार्थयोऽन्नयासा: । यथा,—
"पूजयेदतिथिं नित्यं नमस्योदर्शयेद्विजम् ।
मनोवाक्कर्म्मभि: शान्तमागतं स्वगृहन्तत: ॥
हन्तकारमथाग्रं वा भिक्षां वा शक्तितो द्विज: ।
दद्यादतिथये नित्यं बुद्धा तं परमेश्वरम् ॥
भिक्षाभाद्दुर्यसमावमयश्च स्याच्चतुर्गुणम् ।
पुष्कलं हन्तकारश्च तच्चतुर्गुणमुच्यते ॥"
इति कूर्म्मपुराणे उपविभागे । १८।११३-११५ ॥
अपि च ।
"भिक्षाश्च याचतां दद्यात् परिव्राड्ब्रह्मचारिणाम् ।
यावत्प्रमाणं भिक्षा स्याद्दद्यं तावच्चतुष्टयम् ॥
अपं चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमा: ।
भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा ।
अदत्त्वा तु न भोक्तव्यं यथाविभवमात्मन: ॥"
इति मार्कण्डेयपुराणे मदालसोपाख्याने । २८ । ३४-३६ ॥

हन्ता, [ऋ] त्रि, (हन्तीति । हन+तृच् । हननकर्त्ता । यथा, भट्टौ ५ सर्गे ।
"भवन्तं कार्त्तवीर्य्यो यो हीनमन्धिमचोकरत् ।
जिगाय तस्य हन्तारं स राम: सार्व्वलौकिक: ॥"

हन्तु:, पुं, मृत्यु: । वृष: । हनधातो: तृप्रत्ययेन निष्पन्न: । इति केचित् ॥ (विनाश: । यथा, भागवते । ११ । ५ । ५० ।
"भूभारासुरराजन्यहन्तवे गुप्तये सताम् ।
अवतीर्णस्य निर्व्वृत्यै यशो लोके वितन्यते ॥")

हन्तोक्ति:, स्त्री, (हन्त इत्यस्य उक्ति: ।) अनुकम्पोक्ति: । इति केचित् ॥

हन्न:, त्रि, (हद्+क्त: ।) क्षतपुरीषोत्सर्ग: । इत्यमर: । ३ । १ । ८६ ॥

हन्यमान:, त्रि, (हन+कर्म्मणि शानच् ।) वर्त्तमानहननीयवस्तु । हनधातो: कर्म्मणि शानप्रत्ययेन निष्पन्न: । यथा,—
"हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ।
अभ्यधावद्विशुम्भोऽथ मुख्यायासुरसेनया ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥

हपुषा, स्त्री, वक्षिगुद्रव्यविशेष: । तच्च मरीचहस्तवहीर्घकृष्णवर्णवस्तु । हडुप् इति ख्यातम् । इति वैद्या: ॥ हौबेर इति हिन्दीभाषा । तत् द्विविधम् । तत्राध्ये प्रथमं फलं मत्स्यमद्दशं विस्रगन्धम् । द्वितीयमश्वत्थफलसदृशं मस्राग्रगन्धम् । तयोर्गुणानि गुणाश्च ।
"हपुषा वपुषा विस्रा पराग्रत्यफला स्मृता ।
मत्स्यगन्धा श्लीहहन्त्री विषघ्नी श्वाङ्गनाशिनी ॥
हपुषा दीपनी तिक्ता मृदूष्णा तुवरा गुरु: ।
पित्तोदरप्रमेहार्शोग्रहणीगुल्मशूलहृत् ॥
पराग्येतद्गुणा प्रोक्ता रूपभेदो द्वयोरपि ॥"
इति भावमिश्रकृतभावप्रकाश: ॥ * ॥
अपि च ।
"हपुषा हडुषा विस्रा विस्रगन्धा विगन्धिका ।
अन्या चासौ स्वल्पफला कक्कुभी श्वाङ्गनाशिनी ॥
श्लीहग्रहविषघ्नी च कफघ्नी चापराजिता ।
पूर्व्वा तु पञ्चनाम्नी स्यादपरा सप्तधाभिधा ॥
हपुषा कटुतिक्तोष्णा गुरुश्लेष्मवलासजित् ।
प्रदरोदरविष्टम्भशूलगुल्मार्शसां हरा ॥"
इति श्रीनरहरिपण्डितविरचितराजनिर्घण्टे शताह्वादिवर्गश्चतुर्थ: ॥

हडुषा, स्त्री, हपुषा । इति राजनिर्घण्ट: ॥

हम्बा, स्त्री, गोध्वनि: । तत्पर्य्यायाय: । हम्भा २ रेभणम्३ । इति जटाधर: ॥ हम्भा ४ रम्भा ५ । इति हेमचन्द्र: ॥ (यथा, महाभारते । १ । १६६ । ३१ ।
"क्रोधरक्तेक्षणा सा गौर्हम्बारवघनस्वना ।
विश्वामित्रस्य तत्सैन्यं व्यद्रावयत सर्व्वश: ॥")

हम्भा, स्त्री, गोध्वनि: । इति हेमचन्द्र: । विकाण्डशेषश्च ॥

हम्म, गतौ । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् ।) महयान्त: । हम्मति । इति दुर्गादास: ॥

हय, क्षये । गतौ । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-क्षये अक०-गतौ सक०-सेट् ।) हयति । क्षयो ग्लानि: । इति दुर्गादास: ॥

हय:, पुं, (हयति गच्छतीति । हय+अच् । हिनोतीति । हि+अच् वा ।) घोटक: । इत्यमर: । २ । ८ । ४४ ॥ अथ हयायुर्व्वेद: ।
धन्वन्तरिरुवाच ।
"हयायुर्व्वेदमाख्यास्ये हय: सर्व्वार्थरक्षणम् ।
काकुटो कृष्णजिह्वश्च कृष्णाख्य: कृष्णनासुक: ॥
करालो हीनदन्तश्च शृङ्गी चाधिकदन्तक: ।
एकाण्डश्चैव जातण्ड: कक्षुकी द्विखुरी स्तनी ॥
मार्जारपादो व्याघ्राभ: कुक्षविद्वृश्चिसन्निभ: ।
यमजो यामनश्चैव मार्जारकपिलोचन: ॥
एतद्दोषी हयस्त्याज्य उत्तमोऽश्वश्चतुष्कर: ।
एते दोषाश्च कथिता हयहस्त्यादिवृत्तमा: ॥
मध्योऽर्द्धहस्तहीनोऽश्वो मुष्टिहस्तविहीनक: ।
कनीयांश्चार्द्धमान: स्यादर्द्धमस्तु दीर्घत: ॥
षण्मुष्टिहीन: पञ्चोन उत्तमाश्चास्तु दीर्घत: ।
असंहता ये च वाहा ह्रस्वकर्णास्तथैव च ॥
स्वरनेत्रप्रभावेषु न दीनाश्चिरजीविन: ।
रेवन्तपूजनाद्रोमाद्रक्षा स्यात् द्विजभोजनात् ॥
लोहकं निम्बपत्राणि गुग्गुलुमर्षपा घृतम् ।
तिलश्चैव वचा हिङ्गु वश्चौयाद्राजिनां गले ॥
आगन्तुकं दोषजन्तु व्रणं द्विविधमौरितम् ।
चिरपाकं खरं वातात् पित्तजं चिप्रपाकिकम् ॥
कण्डुदाह्यात्मकं पित्तात् सोष्मादं मन्दवेदनम् ।
घनं कफात् सन्निपातात् सर्व्वरूपं द्विदोषजम् ॥
आगन्तुकन्तु शस्त्राद्यैर्दुष्टव्रणविशोधनम् ।
दन्तीमूलं हरिद्रे द्वे चित्रकं विल्वमेषजम् ॥
रसोनं सैन्धवं वापि तक्रकाञ्जिकपेषितम् ।
तिलशक्तुकपिण्डीका दधियुक्ता ससैन्धवा ॥
निम्बपत्रयुतं पिण्डं तिलै: शोधनरोपणम् ।
करवीरकदल्यर्कक्षुद्रीकुटजचित्रकै: ॥
भल्लातस्य पचेत्तैलं नाडीव्रणहरं परम् ।
पञ्चवल्कलकल्केन घृतेन च प्रलेपयेत् ॥
द्वे हरिद्रे विड्ङानि तथा लवणपञ्चकम् ।
पटोलं निम्बपत्रञ्च वचा चित्रकमेव च ॥
पिप्पली शृङ्गवेरञ्च चूर्णमेकत्र कारयेत् ।
एतत्पानं क्रमिश्लेष्मदानिलविनाशनम् ॥
निम्बपत्रं पटोलञ्च त्रिफला खदिरं तथा ।
क्वाथयित्वा ततो वाहं घृतरक्तं विचक्षण: ।
व्रणेषु च कुष्ठेषु तैलं सर्षपजं हितम् ।
पञ्चवल्कलतैलं वा दशमूलञ्च शोषनुत् ॥
लशुनादीन् वदे कल्पान् सुस्निग्धानान्तु लेपत: ।
मातुलुङ्गरसोपेतं मांसलारसकेन वा ॥"
मांसलाख्याने मांसानामिति च पाठ: ।

"रसं दद्याद्रसोनस्य अन्यैर्व्वा तैलसंयुतैः ।
पलद्वयं प्रथमेऽह्नि एकैकपलहानितः ॥
यावद्धि शान्तिपूर्णा स्यात्तावदेवोत्तमात्मके ।
मध्यमे चतुर्दश स्युरधमेऽष्टपलानि च ॥
शरन्निदाघयोर्नैव देयो नैव तु दापयेत् ।
तैलेन वातिके पित्ते शर्करान्यपयोऽन्वितैः ॥
कटुतैलैः कफे व्योषैः कफे मुद्गान् कुलत्थकान् ।
शालिषष्टिकदुग्धाशी हयोऽखिलजुगुप्सितः ॥
पक्वजम्बूनिभो हैमवर्णः श्रेष्ठश्च गुग्गुलुः ।
यद्दप्रहरणे सूर्य्ये गुग्गुलुं पाययेद्धयम् ॥
भोजनं पायसं दुग्धं नाड़ोस्विन्नस्तनोति सः ।
विकाले भोजयेदन्नं शाल्यन्नं वातुले ददेत् ॥
मांसानाञ्च रसैः पित्ते मधुमुद्गरसाज्यकैः ।
कफे मुद्गान् कुलत्थान् वा कटुतिक्तान् घृतान् हये ॥
व्याधिते व्याधिते ज्ञासे त्रिदोषादौ तु गुग्गुलुम् ।
वामेर्द्दव्वा सर्व्वरोगे प्रथमेऽह्नि पलं ददेत् ॥
विवर्द्धयेत् ततो वर्षमेकादिपलपञ्चकम् ।
उत्तमे स्याच्च चत्वारि त्रीणि मध्यजघन्ययोः ॥
पानेन भोजनेनैव अशीतिपलकं वरे ।
मध्ये षष्टिश्चाधमेऽथ चत्वारिंशच्च भोगिषु ॥
व्रणे कुष्ठेषु खल्लेषु त्रिफलाक्वाथसंयुतम् ।
मन्दाग्नौ ग्रीवरोगे च गवां मूत्रेण योजयेत् ॥
वातपित्तोल्वणे व्याधौ गोक्षीरेक्षुतसंयुतम् ।
देयं क्षयाणां पुष्ट्यर्थं माषैर्यूषाञ्च भोजनम् ॥
सुपिष्टायाः प्रदातव्यं गुड़ूच्याः पलपञ्चकम् ।
प्रभाते घृतसंयुक्तं शरद्यश्वेषु वाजिनाम् ॥
रोगघ्नं पुष्टिदञ्चापि बलतेजोविवर्द्धनम् ।
तदेवाश्वाय दद्याद्वै क्षीरयुक्तमथापि वा ॥
गुड़ूचीकल्कयोर्गेन शतावर्य्यश्वगन्धयोः ।
चत्वारि त्रीणि मध्यस्य जघन्यस्य पलानि हि ॥
अकस्मादथवा वाहानामेकरूपं यदा भवेत् ।
म्रियते च तदा क्षिप्रं उपसर्गं तमादिशेत् ॥
होमाद्यैरथवा विप्रभोजनैर्बलिकर्म्मणा ।
शान्त्योपसर्गशान्तिः स्यादहरीतक्यादिकल्पतः ॥
हरीतकी सगोमूत्रा तैलेन लवणान्विता ।
आदौ पञ्च ततः पञ्चवृद्धया पूर्णा शतावधि ।
उत्तमाश्वे शतं प्रोक्तमग्रातिः षष्टिरुत्तरे ॥*॥
गजायुर्व्वेदमाख्याय उक्ता: कल्पा गजे हिताः ।
गजे चतुर्गुणा मात्रा ताभिर्गजरुगर्हणम् ॥
गजोपसर्गव्याधीनां शमनं शान्तिकर्म्म च ।
पूजयित्वा सुरान् विप्रान् ब्राह्मणे कपिलां ददेत् ॥
दन्तिदन्तद्वये मालां विबध्नीयादुपोषितः ।
मन्त्रवं मन्त्रिता वैद्यो वचासिद्धार्थकामले ॥
सूर्य्याद्याः शिवदुर्गाश्चेर्विघ्नता रक्षसां गणाः ।
बलिं दद्याच्च भूतेभ्यः स्नापयेच्च चतुर्घटैः ॥
भोजनं मन्त्रितं दद्यात् भक्षनोद्वनयेद्गजम् ।
भूती रक्षा शुभा मेध्या वारुणी रक्षसां सदा ॥
त्रिकला पञ्चकोले च दशमूलं विड़ङ्गकम् ।
शतावरी गुड़ूची च निम्बवासकिंशुकाः ॥
गजरोगविनाशाय प्रोक्ताः कल्काः क्वाथकाः ।
आयुर्व्वेदो गजाख्यानामुक्तः संक्षेपसारतः ॥"

इति गारुड़े हयायुर्व्वेदः २०७ अध्यायः ॥

युक्तिकल्पतरूक्तहयपरीक्षा घोटकशब्दे द्रष्टव्या ॥ * ॥ हये वर्णनीयानि यथा । वेगः १ औन्नत्यम् २ तेजः ३ सन्नत्वगस्थितिः ४ खुरोत्खातरजः ५ रूपम् ६ जातिः ७ गतिविचित्रता ८ । इति कविकल्पलता ॥ * ॥ अथ हयशकुनः ।

"हेषारवं मुञ्चति वामतो यः
क्षुच्चित्तिदंक्षिणपादघातैः ।
कंण्डूयते दक्षिणमङ्गभागं
तुङ्गं तुरङ्गः स पदं ददाति ॥"

इति वसन्तराजे हयशकुनः १३ वर्गः ॥

हयकातरा, स्त्री, (हयः कातरो यस्याः ।) अश्वकातराहृक्षः । घोड़काथरा इति हिन्दी भाषा ॥

हयकातरिका, स्त्री, (हयकातरा एव । स्वार्थे कन् । टाप् अत इत्वम् ।) अश्वकातराहृक्षः । घोड़काथरा इति हिन्दी भाषा । यथा,—

"कातरा हयपर्य्यायैः कातरान्तैः प्रकीर्त्तिताः ।
अश्वकातरिका तिक्ता वातघ्नी दीपनी परा ॥"

इति राजनिर्घण्टः ॥

हयगन्धं, क्ली, (हयस्येव गन्धो यस्य ।) काचलवणम् । इति राजनिर्घण्टः ॥ (विवरणमस्य काचलवणशब्दे ज्ञातव्यम् ॥)

हयगन्धा, स्त्री, (हयस्येव गन्धो यस्याः ।) अश्वगन्धा । इति रत्नमाला ॥ (अस्याः पर्य्यायो यथा,—

"गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया ।
वराहकर्णी वरदा बलदा कुष्ठगन्धिनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

अजमोदा । इति राजनिर्घण्टः ॥

हयग्रीवः, पुं. (हयस्य ग्रीवा इव ग्रीवा यस्य ।) मधुकटभहृतवेदोद्धारार्थं विष्णोरवतारविशेषः । तस्य रूपं यथा,—

"सुनासिकेन कायेन भूत्वा चन्द्रप्रभस्तदा ।
कृत्वा हयशिरः शुभ्रं वेदानामालयं प्रभुः ॥
तस्य मूर्द्धा समभवत् द्यौः सनक्षत्रतारका ।
केशास्तस्याभवन्दीर्घा रवेरंशुसमप्रभाः ॥
कर्णावाकाशपातालौ ललाटं भूतधारिणी ।
गङ्गा सरस्वती श्रोणी भ्रुवावास्तां महोदधी ॥
चक्षुषी सोमसूर्य्यौ ते नासा सन्ध्या पुनः स्मृता ।
प्रणवस्तस्य संस्कारो विद्युज्जिह्वा च निर्म्मिता ॥
दन्ताश्च पितरो राजन् सोमपा इति विश्रुताः ।
गोलोको ब्रह्मलोकश्च ओष्ठावास्तां महात्मनः ॥
ग्रीवा चास्याभवद्राजन् कालरात्रिर्गुणोत्तरा ।
एतद्धयशिरः कृत्वा नानामूर्त्तिभिरावृतम् ॥"

इति महाभारतम् ॥*॥

(हयग्रीवदैत्यवधार्थमेव भगवान् हयग्रीवमूर्त्तिरभवत् । इति देवीभागवतमतम् ॥ अस्य विवरणन्तु तत्रैव १ स्कन्धे ५ अध्याये द्रष्टव्यम् ।) विष्णुवध्यदैत्यविशेषः । इति हेमचन्द्रः ॥ स च कल्पान्ते ब्रह्मणि प्रसुप्ते वेदं हृतवान् । तद्देवोद्धारणार्थं विष्णुना मत्स्यावतारेण स हतः । इति केचित् ॥ * ॥ अपि च ।

"ब्रह्मगङ्गाजलस्यान्तस्तीरे ब्रह्मसुतस्य च ।
विघ्ननाशाह्वयो देवः शिवलिङ्गसमन्वितः ।
विघ्नदेवी महादेवी योनिमण्डलरूपिणी ॥
हयग्रीवेण युयुधे तत्र देवी जगत्पतिः ।
हयग्रीवं यत्र हत्वा मणिकूटं तथागमत् ॥"

इति कालिकापुराणे ८२ अध्यायः ॥

हयग्रीवहा, [न्] पुं, (हयग्रीवं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

हयग्रीवा, स्त्री, दुर्गा । यथा,—

"नारसिंही हयग्रीवा हिरण्याक्षविनाशिनी ।"

इति तस्याः सहस्रनामस्तोत्रम् ॥

हयङ्गवः, पुं, (हयं उच्चैःश्रवसं कषतीति । कष + खच् ।) मातलिः । स तु इन्द्ररथारथिः । इति त्रिकाण्डशेषः ॥

हयनं, क्ली, (हयति गच्छत्यनेनेति । हय + ल्युट् ।) कर्णीरथः । इत्यमरः ॥ तस्य रूपान्तरं डयनम् । इति तट्टीकायां भरतः ॥

हयपुच्छी, स्त्री, (हयस्य पुच्छमिव आकृतिर्यस्याः । ङीप् ।) माषपर्णी । इत्यमरः । २ । ४।१३८ ॥

हयप्रियः, पुं, (हयस्य प्रियः ।) यवः । इति हेमचन्द्रः ॥ (यवशब्देऽस्य गुणादयो ज्ञेयाः ॥)

हयप्रिया, स्त्री, (हयस्य प्रिया ।) अश्वगन्धा । खर्জ্জूरी । इति राजनिर्घण्टः ॥

हयमारः, पुं, (हयं मारयतीति । मृ + णिच् + अण् ।) करवीरः । इति राजनिर्घण्टः ॥

हयमारकः, पुं, (हयं मारयतीति । मृ + णिच् । ण्वुल् ।) करवीरवृक्षः । इत्यमरः । २।४।७६ ॥

हयमारणः, पुं, (हयं मारयतीति । मृ + णिच् + ल्युः ।) अश्वत्थवृक्षः । इति शब्दचन्द्रिका ॥

हयवाहनः, पुं, (हयो वाहनमस्य ।) रैवन्तः । स तु सूर्य्यपुत्रः । इति हेमचन्द्रः ॥ कुबेरः । इति केचित् ॥

हयवाहनगद्गरः, पुं, रत्नकाञ्चनः । इति शब्दचन्द्रिका ॥

हयशाला, स्त्री, (हयस्य शाला ।) अश्वालयः । यथा, माघे । २१० । १८—२३ ।

"गवां स्थानं तथैवाश्वतुरगाणान्तथैव च ।
उत्तराभिमुखा श्रेष्ठा तुरगाणां विधीयते ॥
दक्षिणाभिमुखा वाथ परिशिष्टास्तु गर्हिताः ।
तुरगास्तु तथा धार्य्याः प्रदीपैः सर्व्वरात्रिकैः ॥
कुक्कुटा वानराश्चैव मर्कटाश्च नराधिप ।
धारयेदश्वशालायां सवत्सां धेनुमेव च ।
अजाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा ॥
गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमम् ।
अस्तं गते न कुर्व्वीत देवदेवे दिवाकरे ॥"

हयशीर्षः, पुं, (हयस्य शीर्षं शीर्षं यस्य ।) विष्णुः । यथा,—

"ततो जगाम क्षीरोब्धौ द्रष्टुं वाजिमुखं प्रभुम् ।

तत्र देवऋदे स्नात्वा तर्पयित्वा पितॄन् सुरान्।
संपूज्य हयशीर्षञ्च जगाम गजसाह्वयम्॥"
इति वामनपुराणे ७१ अध्यायः॥

हया, स्त्री, (हयस्तद्वन्योऽस्त्यस्या इति। अच्। टाप्।) अश्वगन्धा। इति राजनिर्घण्टः॥

हयाध्यक्षः, पुं, (हयस्य अध्यक्षः।) अश्वाध्यक्षः। तस्य लक्षणं यथा,—
"हयशिक्षाविधानज्ञस्त्वश्चिकित्सितपारगः।
अश्वाध्यक्षो महीभर्तुः सामन्तश्च प्रशस्यते॥"
इति मात्स्ये। २१५। ३७॥

हयानन्दः, पुं, (हयस्य आनन्दो यस्मात्।) मुद्गः। इति राजनिर्घण्टः॥ (गुणादयोऽस्य मुद्गशब्दे ज्ञातव्याः॥)

हयायुर्वेदः, पुं, (हयस्य आयुर्वेदः। घोटकचिकित्साशास्त्रविशेषः। तच्छास्त्रं हयशब्दे द्रष्टव्यम्॥

हयारिः, पुं, (हयस्य अरिः।) करवीरः। इति रत्नमाला॥

हयाशना, स्त्री, (हयानामशनं यस्याः।) शङ्खपुष्पी वृक्षः। इति शब्दचन्द्रिका॥

हयी, स्त्री, (हयस्य स्त्री। हय+ङीप्।) घोटकी। इति जटाधरः॥

हयेष्टः, पुं, (हयनामिष्टः।) यवः। इति राजनिर्घण्टः॥

हयोत्तमः, पुं, (हयेषु उत्तमः। कुलीनाश्वः। तत्पर्य्यायः। वाताश्वः २ जात्यः ३ आजानेयः ४। इति त्रिकाण्डशेषः॥

हरः, पुं, (हरति पापानीति। हृ+अच्।) शिवः। इत्यमरः। १। १। ३५॥ (यथा, रघुः। ४। ३२।
"स सेनां महतीं कर्षन् पूर्व्वसागरगामिनीम्।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः॥")
अग्निः। गर्हणम्। इति केचित्॥ हरणम्। इत्यङ्गशास्त्रम्॥ त्रि, हरणकर्त्ता। (यथा, भागवते। ३। १८। ११।
"एते वयं न्यासहरा रसौकसां
गतक्रियो गदया द्राविताः क्षते॥")

हरकः, पुं, (हर एव। स्वार्थे कन्।) शिवः। चौरः। इति केचित्॥ हरणकर्त्तरि, त्रि॥

हरगौरी, स्त्री, (हरेण सह गौरी।) अर्द्धनारीश्वरमूर्त्तिः। यथा,—
देव्युवाच।
"यथा तवाहं सततं छायेवानुगता हर।
भवेयं साहचर्य्येण तथा मां कर्त्तुमर्हसि॥
सर्व्वगात्रेण संस्पर्शं नित्यालिङ्गनविभ्रमम्।
अहमिच्छामि भवतस्त्वं चेत् कर्त्तुमर्हसि॥
श्रीभगवानुवाच।
रोचते तन्महद्भद्रमपि यत्त्वमिच्छसि भाविनि!।
तवोत्सायमहं वक्ष्ये यदि शक्नोषि तत् कुरु॥
अर्द्धं मम शरीरस्य गृहाण त्वं मनोहरे।
अर्द्धं भवतु मे नारी तथैवार्द्धं पुमानिति॥
यदि त्वं न हि शक्नोषि कर्त्तुं तत्त्वमीदृशम्।
तदाहं ते हरिष्यामि शरीरार्द्धं वरानने!॥
तवैवार्द्धं तथा नारी अर्द्धं भवतु पूरुषः।
विद्यते तत्र शक्तिर्मे त्वमनुज्ञातुमर्हसि॥
श्रीदेव्युवाच।
"तवैवाहं हरिष्यामि शरीरार्द्धं वृषध्वज!।
किन्त्वहं त्वैकमिच्छामि यच्चेत्त्वं हर इच्छसि॥
तथाहमर्द्धं भवतो हृत्वा तिष्ठामि तावता।
त्यजाम्यहं यदा तेऽर्द्धं मम पूर्णं स्यात्तदा हयम्॥
इत्यर्द्धभागहरणं भवेद्यदि यथेप्सितम्।
तदैवाहं तदा शम्भोः शरीरार्द्धं हराम्यहम्॥"
ईश्वर उवाच।
एवमस्तु भवेच्चित्यं यथा त्वं कर्त्तुमिच्छसि।
शरीरार्द्धस्य हरणं भूयात्तव यथेप्सितम्॥
श्रीऔर्व्व उवाच।
अथ गौरी तदा पूर्व्वमनुभूतं तपःस्थिती।
योगनिद्रास्वरूपं तदात्मानोऽचिन्तयद्धिया॥
हरं प्रणम्य प्रथमं ब्रह्माणञ्च ततः परम्।
ततस्त्रिजगतामीशं हरिं नारायणं प्रभुम्॥
चिन्तयित्वा तथा तेषामेकतां सा जगन्मयी।
आत्मानं योगनिद्राञ्च चिन्तयित्वा मनस्विनी॥
दक्षिणे स्वशरीरस्य भागार्द्धं शशिभृद्धृतः।
शरीरस्य तथा वाममतिप्रेम्णा निजं हरे॥
हरोऽपि स्वशरीरार्द्धं गौरीकाये तदा स्वयम्।
प्रेम्णानिवेशयत्तस्याश्चिकीर्षुः प्रियमद्भुतम्॥
अथ स्थित्वा तदा भर्गः काल्या सह चिरं तदा।
परित्यज्य शरीरार्द्धं पृथगेव बभौ रुचा॥
कालो भूत्वा स्वर्णगौरो शरीरार्द्धन्तु शाङ्करम्।
प्राप्य मोदान्तदात्मानं सन्तुष्टा च जगन्मयी॥
एवं यदा शरीरार्द्धमादाय परमेश्वरी।
हरस्य तिष्ठति तदा राजतेऽतीवशोभना॥
अर्द्धं धम्मिलसंयुक्तं जटाजूटार्द्धयोजितम्।
एकस्मिन् श्रवणे भोगी भागे जाम्बूनदोचितम्।
कुण्डलं श्रवणेऽन्यस्मिन् शौर्ये तस्या व्यराजत॥
अर्द्धं मृगाक्षि चास्यार्द्धं हयभाक्षि व्यराजत।
अर्द्धं स्खलनसं चारु तिलपुष्पनसं परम्॥
दीर्घश्मश्रु तथैवार्द्धमर्द्धं भ्रूभ्रुविवल्गितम्।
आरक्तचारुदशनं रक्तौष्ठमेकतस्तथा॥
अपरं शुक्लविपुलदीर्घाकृति रदं परम्।
अर्द्धं नीलमलङ्काहमपरं हारसंयुतम्॥
अर्द्धं कङ्कणकेयूरयुक्तबाहु तथापरम्।
नागकेयूरसंयुक्तस्थूलबाहु निरूपितम्॥
अर्द्धं विषायतभुजं करिहस्तभुजं परम्।
एकत्र सोर्म्मिकाः शाखाः करस्यान्यत्र तां विना॥
एकस्तनन्तु हृदयं रोमावल्यर्द्धसंयुतम्।
रम्भास्तम्भसमानोरु सुपार्ष्णि मृदुपादकम्॥
एकं तथापरं स्थूलसंहतोरु पदाम्बुजम्।
एकस्मिन् मृदु स्थूलजघनं सुमनोहरम्॥
तथापरं दृढ़कटि संहतोर्द्धपदाम्बुजम्।
एकं वैयाघ्रचर्म्मोपयुक्तं भूतिविलेपनम्॥
अपरं मृदुकौषेयवसनं चन्दनोचितम्।
एवमर्द्धं तथा जातं यौषिल्लक्षणसंयुतम्॥
अपरं बलवद्भूरि सुदृढ़ं पुरुषाकृति।
एवमर्द्धं स्मरारिर्बभार गिरिजा सती॥
हिताय सर्व्वजगतां कामाख्या कालिकोपमा।
तस्याः शरीरं राजेन्द्र हरतन्वर्द्धसंयुतम्।
येनोपमेयं तन्नास्ति मार्गितं भुवनत्रये॥
सन्तानः पारिजातो वा एकान्तविषदस्तरुः।
उमोभया तया वन्द्यौ तौ चापि ययतुर्नहि॥
बहुधा च पृथक्कृत्वा तां रेमाते नरेश्वर।
अर्द्धनारीश्वरौ भूत्वा न तु रेमे कदाचन॥
इति यद्यपि भूतेशः स्वयं शक्नोति कालिकाम्।
गौरीं कर्त्तुं तदा सर्व्वभूतकारणकारणः॥
तथापि तां गिरिसुतां संयोज्य विविधैः पुरा।
तपस्ययोजयद्देव क्रियोपायैरनेकशः॥
तपोनिर्धूतसर्व्वाङ्गीं पश्चाद्गौरीमथाकरोत्।
अर्द्धञ्च ददौ तस्यै शरीरस्य महेश्वरः॥
नैवास्य तत्त्वं जानन्ति शक्राद्याः सकलाः सुराः।
शरीरार्द्धप्रदानस्य तपसो योजनस्य च॥
एतस्य तत्त्वं जानन्ति महात्मानो महाबलाः।
नन्दी भृङ्गी महाकालो वेतालो भैरवस्तथा।
अङ्गभूता महेशस्य वीतभीतास्तपोधनाः॥
ये मानुषशरीरेण प्राप्तिरे तपसो बलात्।
गणानामाधिपत्यन्तु ते जानन्ति हरं परम्॥
एवं सदा त्वया योज्याः सानुगा नृपसत्तम!।
वनिताः सत्क्रियोपायैस्ततो भद्रमवाप्स्यसि॥
य इदं शृणुयान्नित्यमद्भुतं पुण्यदायकम्।
शिवयोः प्रीतिकरणं शरीरार्द्धं गृहं तथा॥
गौरीत्वापादनञ्चैव कालिकायाः शुभावहम्।
न तस्य विघ्ना जायन्ते स च पुण्यतमो मतः।
दीर्घायुः स सुखी भूयात् पुत्रपौत्रसमन्वितः॥
सततं परिशृण्वानः शिवयोश्चरितं महत्।
शिवलोकमवाप्नोति सुचिरं शिववल्लभः॥"
इति श्रीकालिकापुराणे ४४ अध्यायः॥

हरचूड़ामणिः, पुं, (हरस्य चूड़ामणिः शिरोभूषणमिव।) चन्द्रः। इति भूरिप्रयोगः॥ शिवशिरोरत्नञ्च॥

हरणं, क्ली, (क्रियते इति। कृ+ल्युट्।) यौतकादिदेयद्रव्यम्। (यथा, रघुः। ७। ६२।
"सत्त्वानुरूपाहरणाकृतश्रीः
प्रास्थापयत् राघवमन्वगाच्च॥")
तत्पर्य्यायः। दायः २। इत्यमरः। २। ८।२८॥ यौतकं आदिना उपनयनभिक्षाप्रसादादि च यत् देयं तत् दायहरणपदवाच्यं कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्रह्मणादिभ्यश्च यत् द्रव्यं दीयते तत्र दायादिहयमित्यर्थः। युतकं योनिसम्बन्धः तत्र भवमिति ष्ण्ये यौतकं युतयोर्बधूवरयोरिदमिति वा कणि यौतकं यौतुकमुकारमध्यमपि। यौतकं यौतुकञ्च तत् इति वाचस्पतिः। दीयते दायः, कर्म्मणि घञ् सुष्ठु दीयते सुदायः इति पाठः इत्यन्ये। क्रियते हरणं कर्म्मणि ल्युट्। इति भरतः॥ *॥

भुजः। इति मेदिनी ॥ (यथा, भागवते। १०। ५०। ६।
"एतदर्थोऽवतारोऽयं भूभारहरणाय मे।
संरक्षणाय साधूनां कृतोऽन्येषां वधाय च ॥")
शुक्रम्। स्वर्णम्। कपर्दकम्। उशीरकम्। इति केचित्॥ भाज्याङ्गात् भाजकाङ्गद्वारा-भागग्रहणम्। इति लीलावती॥
हरतेजः, [स्] क्लो, (हरस्य तेजः।) पारदम्। इति राजनिर्घण्टः॥ शिववीर्य्यञ्च॥
हरनेत्रं, क्लो, (हरस्य नेत्रम्।) शिवचक्षुः। संख्याविशेषः। इति ज्योतिःशास्त्रम्॥
हरबीजं, क्लो, (हरस्य बीजम्।) पारदम्। इति भूरिप्रयोगः॥
हररूपः, पुं, (हरस्य रूपमिव रूपमस्य।) शिवः। इति शब्दरत्नावली॥
हरशेखरा, स्त्री, (हरस्य शेखरं आवासत्वेनास्त्यस्या इति। अच्।) गङ्गा। इति हेमचन्द्रः॥
हरहरां, स्त्री, हारहरा। द्राक्षा। इति केचित्॥
हराद्रिः, पुं, (हरस्य अद्रिः।) कैलासपर्व्वतः। इति केचित्॥ (यथा, कथासरित्सागरे। ११३। ६६।
"विद्याधराः शृणुत यः कुरुते ममात्र
धर्म्मव्यतिक्रममितः प्रभृति प्रजासु।
वध्यः स मे नियतमित्यभितो हराद्रि-
मुद्घोषणाच्च स ततो भयमाससाद॥")
हरिः, पुं, (हरति पापानीति। हृ+"हृषिभिदिकदिकटिकहीति।" उणा० ४। १२८। इति इन्।) विष्णुः। (यथा, रघुः। १०। ८६।
"हरिरिव युगदीर्घैर्दोभिरंशैस्तदीयैः
पतिरयनिपतीनां तैयकाशे चतुर्भिः॥")
सिंहः। (यथा, रघुः। २। ५८।
"स न्यस्तशस्त्रो हरये स्वदेह-
मुपानयत् पिण्डमिवामिषस्य॥")
शुकपक्षी। सर्पः। वानरः। भेकः। इत्यमरः॥ चन्द्रः। सूर्य्यः। वायुः। अग्निः। (यथा, महाभारते। ३। १६६। ५।
"ततः स हरिभिर्युक्तं जाम्बूनदपरिस्कृतम्।
मेघनादिनमारुह्य श्रिया परमया ज्वलन्॥")
यमः। शिवः। ब्रह्मा। किरणः। इन्द्रः। (यथा, रघुः। १२। १०३।
"यन्ता हरेः सपदि संहृतकार्म्मुकज्य-
मापृच्छ्य रावणमनुष्ठितदेवकार्य्यम्॥")
वर्षविशेषः। इति मेदिनी॥ मयूरः। कोकिलः। हंसः। अग्निः। इति शब्दरत्नावली॥ भर्त्तृहरिः। इति त्रिकाण्डशेषः॥ पिङ्गवर्णः। हरिद्वर्णः। इति हेमचन्द्रः॥ * ॥ हरेरष्टोत्तरशतनामानि यथा,—
श्रीसदाशिव उवाच।
श्रीकृष्णाष्टोत्तरशतं नाम मङ्गलदायकम्।
तत्शृणुष्व महाभाग! सर्व्वकल्मषनाशनम्॥
श्रीकृष्णः पुष्करीकाक्षो वासुदेवो जनार्द्दनः।
नारायणो हरिर्व्विष्णुर्माधवः पुरुषोत्तमः॥
गोविन्दः केशवोऽनन्तो वामनो मधुसूदनः।
दामोदरो हृषीकेशः पद्मनाभस्त्रिविक्रमः॥
वैकुण्ठश्चाच्युतो रामश्चक्रपाणिरधोक्षजः।
पीताम्बरो जगन्नाथो नृसिंहो गरुड़ध्वजः॥
राधिकापतिरानन्दस्वरूपो विश्वमोहनः।
यशोदानन्दनः सत्यः श्रीगोपीजनवल्लभः॥
गदाधरो हयग्रीवो वराहश्च गवीश्वरः।
गोवर्द्धनधरो विश्वबीजं कमललोचनः॥
सर्व्वान्तर्य्यामी जगदीशश्चानूरमर्द्दनः प्रभुः।
विश्वम्भरो यज्ञभोक्ता वनमाली सनातनः॥
पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः।
देवकीनन्दनः श्यामः श्रीश्यामाप्राणवल्लभः॥
अनिरुद्धः परं ब्रह्म मुरारिः श्रीधरस्तथा।
श्रीगोपीमोहनः शार्ङ्गधन्वा तु ब्राह्मणप्रियः॥
ब्रह्मण्यदेवः चेदज्ञस्तापत्रयविनाशनः।
कैटभारिर्गुणातीतो रुक्मिणीरमणो विराट्॥
सङ्कर्षणः श्रेषशायी दैत्यारिर्बकभित्तथा।
सर्व्वशास्त्रप्रणेता च मुकुन्दो भक्तवत्सलः॥
अघासुरघ्नः प्रद्युम्नो हंसश्च सुरलीधरः।
कुवलयापीड़हाता च पद्मधारी चतुर्भुजः॥
भक्तालोकैकशरणो गोपालो वैष्णवप्रियः।
वंशीपाणिर्गुणमयः कोटिकन्दर्पमोहनः॥
वेणुवाद्यविनोदी च कंसारिर्यादवस्तथा।
चतुर्व्वेदमयो नित्यः सच्चिदानन्दविग्रहः।
दीनानाथैकशरणं भक्तानुग्रहकारकः॥*॥
एतदष्टोत्तरशतं कृष्णनाम्नां नृमङ्गलम्।
प्रत्यहं यः पठेत् प्रातस्तिसन्ध्यां वा विशेषतः॥
हिजादिश्चेश्वरो भक्त्या शृणोति जपति स्मरेत्।
दुःखप्रनाशनं तस्य मनोमलविनाशनम्।
सर्व्वापराधशमनं सर्व्वपापक्षयो भवेत्।
पावनं शान्तिदं पुण्यं तापत्रयविनाशनम्॥
आयुष्यं सर्व्वसुखदं सर्व्वदुःखापहं मुने!।
व्रतयज्ञतपोदानयागतीर्थफलप्रदम्॥
पुत्रदं धान्यबन्धानां ग्रहपीड़ादिनाशनम्।
सर्व्वाभीष्टप्रदं सर्व्वैश्वर्य्यदं विघ्ननाशनम्॥
सर्व्वापद्वरदारिघ्ननाशनं मानवस्य तु।
सद्बुद्धिविद्याविज्ञानयशोधर्म्मप्रदं तथा॥
सर्व्वभीतिहरं भक्तिमुक्तिधान्यधनप्रदम्।
सर्व्वरोगक्षयकरं वाङ्मनःशुद्धिदं परम्॥
फलकामिनो वैष्णवस्य सर्व्वकामफलप्रदम्।
सर्व्वशत्रुक्षयो याति हरिभक्तिश्च जायते॥
सरस्वती च वशगा कमलाविरतं भवेत्।
क्षेत्रतीर्थे च मरणं गङ्गायां वा विशेषतः॥
मोचनं भवबन्धस्य यमभीतिविनाशनम्।
निष्कामिनस्त्वनन्यस्य प्रेमभक्तिसुखप्रदम्।
भवेदहैतुकं ज्ञानं साक्षात् कृष्णः प्रसीदति॥"
इति पाद्मोत्तरखण्डे १११ अध्यायः॥*॥
श्रीहरिपादचिह्नादि यथा,—
श्रीसदाशिव उवाच।
"सच्चिदानन्दरूपस्य कृष्णस्याद्भुतकर्म्मणः।
संस्मरेत् पादचिह्नानि प्रातर्भक्त्या नरोत्तमः॥
अतिगुह्यानि देवर्षे! यानि भक्तिप्रदानि च।
सर्व्वसुखप्रदानीह तव प्रोक्तानि वेधसा॥
मयापि भुवनेश्वर्य्यै कथितानि प्रयत्नतः।
पुरासौ तुष्टचित्ताभूत् श्रुत्वा कृष्णसुखप्रदा॥
दिलीप उवाच।
कानि कानि च चिह्नानि कृष्णस्य पादयोर्म्मुने।
वशिष्ठ! श्रोतुमिच्छामि कथयस्वानुपूर्व्वकम्॥
वशिष्ठ उवाच।
यदूचिवान् स्वयं ब्रह्मा नारदाय नराधिप!।
तत् शृणुष्व महत् पुण्यमतिगोप्यतमं वचः॥
विधिर्देवर्षिणा पृष्ट उपाख्यानमिदं पुरा।
महाभागवतं पुण्यमेकदा तमुवाच ह॥
ब्रह्मोवाच।
शृणु नारद वक्ष्यामि पादयोश्चिह्नलक्षणम्।
भगवत्कृष्णरूपस्य ह्यानन्दैकरसस्य च॥
अवतारा ह्यसंख्याश्च कथिता ये तवाग्रतः।
परं सम्यक् प्रवक्ष्यामि कृष्णस्तु भगवान् स्वयम्॥
देवानां कार्य्यसिद्ध्यर्थमृषीणां वा नृणां तथा।
आविर्भूतस्तु भगवान् स्वानां प्रियचिकीर्षया॥
केनैव ज्ञायते देवो भगवान् भक्तवत्सलः।
तान्यहं वेद्मि नान्योऽस्ति सत्यमेतन्मयोदितम्॥
ऊनविंशतिचिह्नानि मया दृष्टानि तत्पदे।
दक्षिणे दश चिह्नानि वामे च नव नारद!॥
ध्वजातपत्रं कमलं वज्राख्यमङ्कुशो यवः।
स्वस्तिकं चोर्द्धरेखा चाष्टकोणं चक्रमेव च॥*॥
नवान्यानि प्रवक्ष्यामि साम्प्रतं वैष्णवोत्तम!।
चिह्नानि वामचरणे गोविन्दस्याङ्कितानि च॥
इन्द्रचापं त्रिकोणञ्च कलसश्चार्द्धचन्द्रकम्।
गङ्गोऽम्बरं मत्स्यचिह्नं गोपदं जाम्बवं स्मृतम्॥
अन्यान्येतानि भो विप्र! दृश्यन्ते च यदा कदा।
कृष्णाख्यन्तु परं ब्रह्म भुवि जातं न संशयः॥
दशं वाथ त्रयं वाथ चत्वारः पञ्च एव वा।
दृश्यन्ते ब्रह्मवित्श्रेष्ठ ह्यवतारा: कथञ्चन॥
मध्ये ध्वजा तु विज्ञेया पद्मं छत्रञ्च मानतः।
वज्रन्तु दक्षिणे पार्श्वे चाङ्कुशो वै तदग्रतः॥
यवोऽप्यङ्कुशमूले स्यात् स्वस्तिकं तत्र कुत्रचित्।
आतपत्रं चोर्द्धरेखा वामे चक्रञ्च दक्षिणे॥
आद्यमङ्गुलिमारभ्य यावद्वै मध्यमा स्थिता।
तावद्वै चोर्द्धरेखा च कथिता पद्मसंज्ञके॥
अष्टकोणं ततो वत्स! समानाष्टाङ्गुलैश्च तत्।
निर्दिष्टं दक्षिणे पादे चेत्याहुर्मुनयो हरेः॥*॥
एवं पादस्य चिह्नानि नान्यं वहति वैष्णवः।
दक्षिणेतरस्थानानि संवदामीह संस्मरेत्॥
चतुरङ्गुलमानेन हयाङ्गुलिसमीपतः।
इन्द्रचापं ततो विद्यादन्यत्र च न ते क्वचित्॥
त्रिकोणं मध्यनिर्दिष्टं कलसो यत्र कुत्रचित्।
अष्टाङ्गुलप्रमाणेन तद्वैरर्द्धचन्द्रकम्॥
अर्द्धचन्द्रसमाकारं कलसो निर्दिष्टं तस्य हुव्रत।
इन्द्रं वै यत्र चिह्नन्तु ह्याद्यन्ते वै निरूपितम्॥
त्रिकोणं दक्षिणे भागे लम्बरं तदधो यवः।
जम्बूफलं त्रिकोणस्य वामपार्श्वे निरूपितम्॥

हरिः

गोष्पदं दिखुरं ज्ञेयं तदा द्व्यङ्गुलमानतः ।
त्रिकोणाधस्तु निर्दिष्टमथवा कलसो यथा ॥
श्रीनारद उवाच ।
न श्रुतं न च दृष्टञ्च चिह्नमेतन्मयोदितम् ।
रूपं वै सदृशं ब्रह्मन् वद त्वं मामृतं मम ॥
श्रीब्रह्मोवाच ।
पताका च ध्वजा प्रोक्ता प्रान्ते त्रैलोक्यकारणयः ।
पद्मं वै वाह्मपत्रञ्च ज्ञातव्यं श्रुतिनोदितम् ॥
वज्रं खण्ड इति प्रोक्तं दृष्टं वै गोव्रजित्करे ।
सहस्रारं समाख्यातं क्वचिद्देवविदो विदुः ॥
अङ्कुशो नागशिक्षास्थं निर्मितं यदि पुत्रक ।
तादृशं तद्वदेच्चिह्नं विज्ञेयं वैष्णवैर्नरैः ॥
यवोऽप्यङ्कुशमूलेषु कथितो मुनिभिर्ध्रुवम् ।
आतपत्रं नृपच्छत्राकारं वत्म सुशोभनम् ॥
चक्रं सुदर्शनाकारं यच्चिह्नं तन्मनोहरम् ।
वासुदेवकरे यद्वत् मुनिभिः परिकीर्त्तितम् ॥
विवाहादौ च माङ्गल्ये पुत्रे जाते तथैव च ।
स्त्रीभिर्यैव सदा कार्य्यं स्वस्तिकञ्च तदुच्यते ॥
रेखायत्तस्रः संख्याताश्चिह्नगूढा यदीक्षिताः ।
पद्मेन च संयुक्तमष्टकोणं तदुच्यते ॥
दण्डाकारोर्द्ध्वरेखा स्यात् नवक्रा दृश्यते यदा ।
मध्यमाङ्गुष्ठमानेन कथिता मुनिभिः किल ॥
दर्भाभिषिक्तैः पादं वन्द्यं पूज्यञ्च सर्व्वदा ।
चिह्नान्येतानि भो विप्र दक्षिणे चरणे विभोः ।
स श्रीकृष्ण इति ज्ञेयो बुद्धिमद्भिर्नरोत्तमैः ॥*॥
यद्वामपि च चिह्नानि वामपादे च तत् शृणु ।
इन्द्रचापं धनुर्व्विद्यात् द्व्यङ्गुलञ्च चतुर्गुणम् ।
मौर्व्वीसंयुक्तवक्रं चेत्तदाहुर्मुनयो ध्रुवम् ॥
त्रिकोणन्तु त्रिरेखाख्यं शकटाकारकं यदा ।
तदा वै तत्त्रिकोणाख्यं चिह्नन्तु मुनिनोदितम् ॥
कलसो वर्त्तुलाकारो ग्रीवया सहितो यदा ।
दृश्यते तादृशं पुत्र चिह्नितं सकलाधिकम् ॥
द्वितीयायां यथा चन्द्रो दृश्यते चाम्बरे क्वचित् ।
तदर्द्धं चन्द्रं विज्ञेयं श्रुतौ च प्रतिपादितम् ॥
अम्बरं बिन्दूरित्येवं हिरेखासुसमन्वितम् ।
वर्त्तुलञ्च सदा दृष्टं श्रीकृष्णे परमात्मनि ।
मत्स्याकारो भवेद्यत्र तच्चिह्नं मत्स्यसंज्ञकम् ।
जम्बूफलसमाकारं जम्बूचिह्नं विदुर्बुधाः ॥
एतच्चिह्नं समाख्यातमूनविंशतिसंख्यकम् ।
पादयोरुभयोराहुः कृष्णस्य मुनयोऽनघाः ॥७॥
एवं वृन्दावनेश्वर्य्याः पादयोर्मुनिसत्तम ! ।
ऊनविंशतिचिह्नानि कथयामीह तत् शृणु ॥
दक्षिणे नव चिह्नानि राधायाः दश वामतः ।
भेदोऽयं कथितो विप्र कृष्णस्यार्द्धकरूपिणो ॥
एतानि पदचिह्नानि दृष्टानि च श्रुतानि च ।
त्वदग्रे कथितान्येव पुनः किं कथयाम्यहम् ॥
नारद उवाच ।
चिह्नान्येतानि भो ब्रह्मन् किं कर्त्तव्यानि वैष्णवैः ।
कथयस्व हि सर्व्वज्ञ युगयोः पादयोर्मम ॥
ब्रह्मोवाच ।
सौवर्णं राजतं वापि पाषाणं काष्ठजादिकम् ।
युगलं युगलं पादं कृत्वा चिह्नैश्च चिह्नितम् ॥

हरिः

स्वगात्रे विन्यसेत्तानि पदचिह्नानि वैष्णवः ।
नाभेरूर्द्धं मुनिः स्नात्वा वत्स वृन्दावनेगयोः ॥
अथवा चिह्नितं पादं कृत्वा भागवतोत्तम ! ।
पूजामारभते तावत् यावज्जीवति नारद ! ॥
पूजितो देवदेवेशः फलं भवति देहिनाम् ।
तथा तच्चिह्नितं पादं अर्चनं कुरुते यदि ॥
राजसूयाश्वमेधादिफलं भवति सर्व्वथा ।
तदनन्तगुणं प्रोक्तं यत्रैकं पूजयेत् सुधीः ॥"
इति पाद्मोत्तरखण्डे श्रीकृष्णपदचिह्नमाहात्म्यं नाम ११२ अध्यायः ॥*॥ तन्नाममाहात्म्यं यथा,
श्रीसदाशिव उवाच
"शृणु नारद ! भद्रं ते कथयिष्यामि चानघ ।
पार्व्वत्यै यदहं पृष्टः प्रावोचन्तु यथातथम् ॥
वेदस्याध्ययनं यज्ञं तपो योगः शमो दमः ।
कृष्णनामसहस्रांशैर्देवर्षे ! नहि तुल्यकम् ॥
स्नानं देवार्च्चनं ध्यानं धारणा नियमो यमः ।
प्रत्याहारः समाधिश्च हरिनाममसमं न च ॥
गोविन्दनाममन्त्रं न त्यागो न व्रतं मुने ! ।
न मङ्त्यो नापि शौचं न पुण्यं न फलं तथा ॥
वानप्रस्थं ब्रह्मचर्य्यं गार्हस्थ्यं कर्म्मत्यागकम् ।
धर्म्म एव सदाचारो न हरेर्नामतुल्यकः ॥
न हरेर्नामसदृशं कर्म्म किञ्चित् तपस्तथा ।
सर्व्वतीर्थाटनञ्चैव चतुर्द्धा मुक्तिरेव च ॥
कृष्णनाम परा मुक्तिः कृष्णनाम परा गतिः ।
कृष्णनाम परं पुण्यं कृष्णनाम परं फलम् ॥
कृष्णनाम परो धर्म्मः कृष्णनाम परं तपः ।
कृष्णनाम परा शान्तिः कृष्णनाम परा स्तुतिः ॥
कृष्णनाम परा भक्तिः कृष्णनाम परा स्मृतिः ।
कृष्णनाम परं यज्ञं कृष्णनाम परा मतिः ॥
कृष्णनाम परं ज्ञानं कृष्णनाम परा क्षितिः ।
कृष्णनाम परं दानं कृष्णनाम जगत्प्रियम् ॥
कृष्णनाम परं श्राद्धं पितृणां तर्पणं सदा ।
कृष्णनाम परा प्रीतिः कृष्णनाम परः प्रभुः ॥
कृष्णनाम जगत् सत्यं जन्तूनां कारणं परम् ।
जीवनं शरणं कृष्णनामैव विपुलं धनम् ॥
कृष्णनाम जगद्बन्धुर्जगद्धीजं गुणः परः ।
विश्व धारं कृष्णनाम जगतां पावनं परम् ॥
कृष्णनाम जगज्जन्म यत् किञ्चित् सचराचरम् ।
धार्य्यते पोष्यते विश्वं कृष्णनाम्ना प्रलीयते ॥
यत् किञ्चित् क्रियते कर्म्म कृष्णनाम परायणः ।
तत् कर्म्म कर्म्म एव स्यात् साक्षाद्दृष्टाति केशवः ॥
श्रीहरेर्नाम ग्रहणं प्रशस्तञ्च युगे युगे ।
कृत्वापि न भवेत् सिद्धिर्हित्वा तन्नाम कर्म्म च ॥
विशेषतः कलियुगे कृष्णनामैव केवलम् ।
त्यक्त्वा नास्त्येव देवर्षे ! लोकस्य गतिरन्यथा ॥
हरिनामपरः शान्तः क्षमाशीलो जितेन्द्रियः ।
नीत्वा कुलसहस्राणि कृष्णं प्राप्नोति खानि च ॥
श्रीकृष्णहरिगोविन्ददासनामादिको जनः ।
यः कश्चिदुयाति कलुषं सर्व्वं तन्नामकीर्त्तनात् ॥
हत्यायुतं पानसहस्रमुग्रं
गर्भ्भत्रुकोटिनिषेवणञ्च ।

हरिः

स्तेयान्यनेकानि हरेः प्रियेण
गोविन्दनाम्ना निहतानि सद्यः ॥
अग्निक्षयापि दहति स्पृष्टो हुतवहो यथा ।
हरिनाम दहेत् पापं तथाज्ञमुखनिर्गतम् ॥
सकृदुच्चारितं येन हरे कृष्णेति नित्यम् ।
यमाधिकारं नो याति कापट्येन विना मुने ॥
अज्ञानादथवा ज्ञानादस्यभावेन वा पुनः ।
कृष्णनामैव यच्चित्ते न याति परमं पदम् ॥
ब्रह्महा मद्यपः स्तेयी ह्यज्ञानाद्गुरुतल्पगः ।
भवार्णवं तरेदन्ते कृष्णनामपरायणः ॥
पितृहा नृपहा गोघ्नः स्त्रीहन्ता पापिनोऽपरे ।
गोविन्दनामोच्चारेण पश्चात्ते शुद्धिमाप्नुयुः ॥
यद्भूतं पापमज्ञानाद्दत्तमानञ्च नारद ।
यद्भविष्यति तत् सर्व्वं कृष्णनाम दहेद्ध्रुवम् ॥
जीवानान्तु सदा द्रोही चात्महा निन्द्यकर्म्मकृत् ।
स यूतो जायते धन्यो नामकीर्त्तनतो हरेः ॥
क्षेत्रतीर्थतपोदानव्रतार्च्चनं फलं तथा ।
यत्किञ्च सर्व्वयज्ञानां मुक्तेरध्यात्मवस्तुनः ॥
ज्ञानञ्च देवमहतां सर्व्वसिद्धिप्रदं फलम् ।
नैमित्तिकानां नित्यानां तथा च काम्यकर्म्मणाम् ॥
वर्णाश्रमाणां योगानां स्थापितं येषु नामसु ।
आकृत्य सर्व्वाघहरं पुरा कृष्णेन नारद ॥
त्रैलोक्ये यानि पुण्यानि धर्म्मकर्म्मफलानि च ।
तुल्यतां तानि नो यान्ति हरिनामानुकीर्त्तने ॥
नास्त्रोऽस्य यावती शक्तिः पापनिर्हरणे हरेः ।
तावत् कर्त्तुं न शक्नोति पातकं पातकी जनः ।
व्रतपत्रो व्रजिनं कर्त्तुं नहि शक्नोति यत्नतः ॥
तावद्वर्त्तुं मुने यावत् कृष्णनामानुकीर्त्तनम् ।
मानसं कर्म्मजं वाग्जं लोके तन्नास्ति कल्मषम् ।
सर्व्वाघभङ्गं गदितं यद्धरेर्नामकीर्त्तनम् ।
चान्द्रायणादिभिः कृच्छ्रैः शुद्धिर्न स्यात्तथा नृणाम् ॥
कीर्त्तनेन हरेर्नाम्नः सकृदेव भवेद्यथा ।
सकृदाख्यातितं येन कृष्णनाम सुमङ्गलम् ।
तञ्चिक्षा वैष्णवी नान्यं वचो वक्त्यप्यकारणम् ॥
ऋग्वेदो हि यजुर्व्वेदः सामवेदोऽप्यथर्व्वणम् ।
अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥
पापिनोऽपि हरेर्नाम कीर्त्तयन्ति यथा यथा ।
सर्व्वाघं भस्मसात् कृत्वा कृष्णभक्तिस्तथा तथा ॥
सकृन्नारायणेत्युक्त्वा पुमान् कल्पशतत्रयम् ।
गङ्गादिसर्व्वतीर्थेषु स्नातो भवति नारद ! ॥
पुराणशास्त्रागमवेदपाठ-
तीर्थावगाहादिफलं यदिष्टम् ।
गोविन्दनाम्नोऽपि कलाशतांशै-
स्तुल्यं भवेदेव मुने कदाचित् ॥
मा ऋचो मा यजुर्व्विप्र न साम पठ किञ्चन ।
कृष्णगोविन्दनामादि गेयं गायस्व नित्यशः ॥
गोकोटिदानं ग्रहणे खगस्य
प्रयागगङ्गामुनि कल्पवासः ।
यज्ञायुतं मेरुसुवर्णदानं
गोविन्दनाम्नो न समं शतांशैः ॥

हरिः

कुरुक्षेत्रेण किं तस्य किं काश्या पुष्करेण च ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥
विद्युतानि बहून्येव तीर्थानि बहुधा न च ।
कोट्यंशेनापि तुल्यानि नामकीर्त्तनतो हरेः ॥
दृष्टापूर्त्तानि कर्म्माणि सुबहूनि कृतान्यपि ।
भवहेतूनि तान्येव हरेर्नाम तु मुक्तिदम् ॥
परिहासेऽपि हास्यादिर्विशेषगृह्णन्ति नाम ये ।
कृतार्थास्तेऽपि मनुजास्तेभ्योऽपीह नमो नमः ॥
स्त्री शूद्रः पुरुषो वापि ये चान्ये पापयोनयः ।
कीर्त्तयन्ति हरिं भक्त्या तेभ्योऽपीह नमो नमः ॥
न देशनियमस्तत्र न कालनियमस्तथा ।
नोच्छिष्टादौ निषेधश्च नामलुब्धस्य श्रीहरेः ॥
चक्रायुधस्य नामानि सदा सर्व्वत्र कीर्त्तयेत् ।
नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः ॥
न कालशौचनियमा न देशशौचनिर्णयः ।
हरेः संकीर्त्तनादेव नास्रो नारद मुच्यते ॥
स्नाने कालोऽस्ति दाने च कालोऽस्ति जप-
यज्ञयोः ।
कृष्णसङ्कीर्त्तने कालो नास्त्यत्र पृथिवीतले ॥
किं सांख्ययोगैः किं यज्ञैस्तपोभिः किं करिष्यति ।
चेन्मुक्तिमिच्छेद्भक्तिञ्च कुर्य्याद्गोविन्दकीर्त्तनम् ॥
परदाररतः पापो परहिंसापकारकः ।
मुक्तिमायाति संशुद्धो हरेर्नामानुकीर्त्तनात् ॥
कृष्णनामधनः कृष्णनामग्राही सदा नरः ।
तत्त्वतः कृष्णमाप्नोति कृष्णनामजनप्रियः ॥
हित्वा गोविन्दनामानि सर्व्वकर्म्म करोति यः ।
बन्धाय तस्य तत् कर्म्म न मोक्षाय तु नारद ! ॥
सर्व्वकर्म्म परित्यज्य हरिनाम स्मरेत् सदा ।
यस्तस्य कर्म्मसिद्धिः स्यात् कृष्णनामप्रसङ्गतः ॥
कामांस्त्यक्त्वा मनोभोगान् विषयांश्च चरन्ति ये ।
तेषां ददात्यरां भक्तिं हरिनामपरायणः ॥
हरिनामरतो भूत्वा सर्व्वकर्म्म परित्यजेत् ।
स सर्व्वपापान् मुक्तो यः पद्मं हित्वोटकं यथा ।
कृष्णनामैव यच्चित्ते देवर्षे तस्य कर्म्म च ।
स लोकान् सकलान् जित्वा तत्त्वतः कृष्ण-
मापुयान् ॥
हरिनाम सदा गीत्वा विचरन्ति महीतले ।
न प्राप्नुवन्ति तद्भाग्यं देवा इन्द्रादयोऽपरे ॥
श्रद्धया हेलया यैस्तु हरिनाम सुमङ्गलम् ।
गायन्त्येकान्तिनस्तेऽच्युतस्तिष्ठति सन्ततम् ॥
एकान्तिनः कृष्णनामाश्रया ये च हरेः प्रियाः ।
यदि स्युरन्यजा वेदपारगा न तथा मुने ! ॥
कृष्णनामानि गायन्ति तस्य सेवादिकर्म्म च ।
सदा कुर्व्वन्ति ये विप्र ! तेभ्यो नित्यं नमो नमः ॥
स्तेयी गुर्व्वङ्गनागामी ब्रह्मघ्नो मद्यपः खलः ।
तत्पापेभ्यः स मुक्तोऽङ्ग श्रीहरेर्नाम यत्तपः ॥
पूर्व्वजन्मपरित्यक्तो ह्यासङ्गः कृष्णनामसु ।
यथात्मा भौतिकाद्देहात् स मुक्तः सर्व्वपातकात् ॥
हरिनाम व्रतं यस्य हरिनाम च यत्तपः ।
स्वयं भवार्णवात् त्राता गोविन्दो मुनिपुङ्गव ! ॥
श्रद्धयाविरतं कृष्णनामगानरतो जनः ।
कुर्य्यात् सदैव सर्व्वत्र तच्चिन्तां कृपयाच्युतः ॥

हरिः

मात्सर्य्यलोभमोहैश्च कामक्रोधमदैर्युतः ।
सर्व्वापहारी तन्मुक्तः कृष्णनामैव यत्तपः ॥
सर्व्वदोषयुतो विप्र व्यालग्रासैकपातकैः ।
मुक्तः स हृज्जिनादस्मात् कृष्णनामैव यत्तपः ॥
स्वधर्म्मवर्জ्जितः पापो जीवद्रोही च हिंसकः ।
स मुक्तः सर्व्वपापेभ्यः कृष्णनामैव यत्तपः ॥
विप्रक्षत्रियविट्शूद्राः सङ्करान्त्यजजारजाः ।
कानीना गोलकाश्चैव पितृजाताश्च चेटजाः ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
यद्यते पापिनो विप्र ! महापातकिनोऽपि वा ॥
उपपातकिनश्चातिपापिनो ह्यनुपापिनः ।
भ्रष्टाचाराश्च पाषण्डाः स्वस्वधर्म्मविवर्জ्जिताः ।
जीवहत्यारता त्यक्त्वा निन्दकाश्चाजितेन्द्रियाः ।
पयाज्ज्ञानमुत्पन्ना गुरोः कृष्णप्रसादतः ॥
ततस्तु यावज्जीवन्ति हरिनामपरायणाः ।
मुक्तास्तेऽखिलपापेभ्यः पूर्व्वजेभ्यो हि नारद ! ॥
नामादेशं रटन्तस्तु श्रीहरेः स्मृतिपूर्व्वकम् ।
महाद्भयं यमं जित्वा परं गोविन्दमाप्नुयुः ॥
गृहान्धकूपपतिताः सर्व्वदोषैस्तु संभृताः ।
संसारवासनालिप्ताः सर्व्वधर्म्मबहिष्कृताः ॥
मुक्तास्ते सर्व्वतस्तस्मादुच्चरन्तो हरेर्द्विज ।
मृत्योर्म्मूर्द्धन्नये नाम यान्ति गोविन्दमव्ययम् ॥
हरिनामानि तिष्ठन्ति सन्ति वक्त्राणि प्राणिनाम् ।
भवन्ति कर्म्मसम्बद्धा लोका नरकगामिनः ॥
विसृज्य कृष्णनामानि कर्म्ममार्गरता नराः ।
पुनर्जन्म पुनर्मृत्युं भ्रमन्तः स्युस्ततस्ततः ॥
कृष्णनामानि गायन्ति कुर्व्वन्ति तस्य सेवनम् ।
ते यान्ति वासुदेवस्य स्थानं परममव्ययम् ॥
वर्णाश्रमस्थिता विप्र ! हरिनामपरायणाः ।
तेषां वक्तुं न शक्नोमि महिमानमहं यदि ॥
हित्वा गोविन्दनामानि कर्म्माण्येवं करोति यः ।
पथमप्राप्य कृष्णस्य भ्रमते कर्म्मवर्त्मनि ॥
मायामोहितचित्तेन पापिष्ठास्ते नराधमाः ।
त्यक्त्वा कृष्णस्य नामानि भ्रमन्ते सर्व्वयोनिषु ॥
यदृच्छयागया नाम शिक्षया यः स्मरेद्धरेः ।
सर्व्वाघमुक्तो देवर्षे ! सततं कृष्णनामतः ॥
येन तेन प्रकारेण मुकुन्दनामजल्पकः ।
घोराङ्घवार्णवात् पूतो मुक्तः स कृष्णनामतः ॥
नामाङ्कितं जनं दृष्ट्वा यस्य यद्वा भवेद्धरेः ॥
स याति वैष्णवं धाम परमं कृष्णनामतः ॥
दृष्ट्वा प्रमाणं कुर्व्वन्ति हरेर्नामाश्रयं जनम् ।
सकलादंहसो मुक्ता मानवाः साधुवज्जनाः ॥
कृष्णनाम सदा नीत्वा विचरेत् कृष्णसन्निधौ ।
सत्यं वदामि ते विप्र ! क्रीतस्तस्य जनार्द्दनः ॥
नीत्वा करोति नामानि श्रीहरेः करतालिकाम् ।
विक्रीतोऽहमृतं तस्य वदामि तव नारद ! ॥
एकान्ती नाम नीत्वा तु सन्निधौ नर्त्तयेद्धरेः ।
सत्यं तस्य हरिः क्रीतो देवतानाञ्च का कथा ॥
ये भावगद्गदा भूत्वा वदन्त्यच्युतसन्निधौ ।
तेषां कृष्णः परिक्रीतो ब्रह्मादीनाञ्च का कथा ॥
ये पतन्त्यवनौ गीत्वा हरेर्नामानि गद्गदाः ।
भावेन तेषां गोविन्दः क्रीतो नारद ! नान्यथा ॥

हरिः

जन्मना ये न गृह्णन्ति कृष्णदोषां सतो गुरोः ।
तेषां न दर्शनं कार्य्यं दूरतः परिवर्জयेत् ॥
कदाचित् यो न गृह्णाति कृष्णनाम भवामृतम् ।
मृतः खरकुलानां स तु योनिषु जायते ॥
देवर्षे ! हरिनामानि भवनिस्तारहेतुनि ।
न गृह्णीयात्तु यो मोहान्मृते स्यात्तदधोगतिः ॥
गुणकर्म्माणि नामानि न गृह्णाति च यो हरेः ।
दर्शनस्पर्शने चैव ध्रुवं तस्य विवर्জयेत् ॥
मनुष्यजन्म संप्राप्य न नामग्रहणं हरेः ।
कुर्य्यात् कदापि स्वप्ने वा स्पृष्टश्यः स नराधमः ॥
ध्यानं सत्ययुगे विष्णोः त्रेतायां यज्ञसाधनम् ।
अर्च्चनं द्वापरयुगे हरिनाम कलौ मुने ॥
ध्यानं तपः सत्ययुगे त्रेतायां यज्ञकर्म्म च ।
द्वापरे पूजनं दानं हरेर्नाम कलौ युगे ॥
कलौ भवार्णवोत्तीर्णा मानवो मुनिपुङ्गव ! ।
वर्त्तते यस्य जिह्वाग्रे हरिरित्यक्षरद्वयम् ॥
सर्व्वलोको जितस्तेन कृष्णः प्रीतः सनातनः ।
सकृदुच्चारितं येन हरेर्नाम चिदात्मकम् ॥
फलं नास्य क्षमो वक्तुं सहस्रवदनो विधिः ।
जितं तेन जितं तेन जितं तेनेति निश्चितम् ।
वर्त्तते यस्य जिह्वाग्रे हरिरित्यक्षरद्वयम् ॥
सत्यं कलियुगे विप्र ! श्रीहरेर्नाम मङ्गलम् ।
परं स्वस्ययनं नृणां नास्त्येव गतिरन्यथा ॥"
इति पाद्मोत्तरखण्डे श्रीकृष्णनाममाहात्म्ये ९८
अध्यायः ॥*॥ कलौ दशसहस्रवर्षपर्य्यन्तं पृथिव्यां
तस्यावस्थितिर्यथा,—
"शालग्रामो हरेर्मूर्त्तिर्ज्ञगन्नाथश्च भारतम् ।
कलेर्दशसहस्रान्ते ययौ त्यक्त्वा हरेः पदम् ॥
वैष्णवाश्च पुराणानि गङ्गानि श्राद्धतर्पणम् ।
वेदोक्तानि च कर्म्माणि ययुस्तैः सार्द्धमेव च ॥
हरिपूजा हरेर्नाम तत्कीर्त्तिगुणकीर्त्तनम् ।
वेदाङ्गानि च शास्त्राणि ययुस्तैः सार्द्धमेव च ॥
सत्त्वञ्च धर्म्मः सत्यञ्च वेदाश्च ग्रामदेवताः ।
व्रतं तपश्चानशनं ययुस्तैः सार्द्धमेव च ॥
वामाचाररताः सर्व्वे मिथ्या कापट्यमेव च ।
तुलसीवर्জिता पूजा भविष्यन्ति ततः परम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । ७ । १२—१६ ॥
तस्य स्वरूपं यथा,—

गर्ग उवाच ।

"अये नन्द प्रवक्ष्यामि वचनं ते सुखावहम् ।
प्रस्थापितोऽहं वसुना येन तत् श्रूयतामिति ॥
वसुना सूतिकागारे शिशुः प्रत्यर्पणीकृतः ।
पुत्रोऽयं वसुदेवस्य ज्येष्ठस्य तस्य च ध्रुवम् ॥
कन्या ते च येन नीता मथुरां कंसभीरुणा ।
अस्याश्चप्राशनायाहं नामानुकरणाय च ॥
गूढेन प्रेषितस्तेन तस्य यागं कुरु व्रज ॥
पूर्णब्रह्मस्वरूपोऽयं शिशुस्ते मायया महीम् ।
आगत्य भारहरणं कर्त्ता धात्रा च सेवितः ॥
गोलोकनाथो भगवान् श्रीकृष्णो राधिकापतिः ।
नारायणो यो वैकुण्ठे कमलाकान्त एव च ॥
क्षेत्रद्वीपनिवासी यः पाता विष्णुश्च सोऽप्यजः ।
कपिलोऽन्ये तदंशाश्च नरनारायणावृषी ॥

हरिः

पक्कीभूय च सर्व्वेषां तेजसां राशिमूर्त्तिमान्।
तं वसुं दर्शयित्वा च गिरशरूपो बभूव ह॥
सामृतं सूतिकागारादाजगाम तवालयम्।
अयोनिसम्भवश्चायमाविर्भूतो मनोतले॥
वायुपूर्णं माढगर्भं कृत्वा च मायया हरिः।
आविर्भूय वसुं मूर्त्तिं दर्शयित्वा जगाम ह॥
युगे युगे वर्षभेदो नामभेदोऽस्य वत्सव!।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः॥
शुक्लवर्णः सत्ययुगे सुतेत्रतेजसा हृतः।
त्रेतायां रक्तवर्णोऽयं पीतोऽयं द्वापरे विभुः॥
कृष्णवर्णः कलौ श्रीमांस्तेजसां राशिरेव च।
परिपूर्णतमं ब्रह्म तेन कृष्ण इति स्मृतः॥"*॥
तस्य कृष्णनाम्नो व्युत्पत्तिर्यथा,—
"ब्रह्मणो वाचकः कोऽयमृकारोऽनन्तवाचकः।
गिरस्य वाचकः पश्च णकारो धर्म्म एव च॥
अकारो विष्णोर्व्वदनं खेतद्वीपनिवासिनः।
नरनारायणोऽयस्य विभगं वाचकः स्मृतः॥
सर्व्वेषां तेजसां राशिः सर्व्वमूर्त्तिस्वरूपकः।
सर्व्वाधारः सर्व्वबीजस्तेन कृष्ण इति स्मृतः॥
कृषिर्निर्व्वाणवचनो णकारो मोक्ष एव च।
अकारो दात्तवचनस्तेन कृष्ण इति स्मृतः॥
कृषिर्निश्चेष्टवचनो णकारो भक्तिवाचकः।
अकारो दात्तवचनस्तेन कृष्ण इति स्मृतः॥
कर्म्मनिर्म्मूलवचनः कृषिर्णो दास्यवाचकः।
अकारः प्राप्तिवचनस्तेन कृष्ण इति स्मृताः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।१३ ४५—६२॥
तस्य नामान्तराणां व्युत्पत्तिर्यथा,—
"राम नारायणानन्त मुकुन्द मधुसूदन।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन॥
इत्येकादश नामानि पठेद्वा पाठयेदयदि।
जन्मकोटिसहस्राणां पातकादमुच्यते॥
राशब्दो विश्ववचनो मयापीश्वरवाचकः।
विश्वानामीश्वरो यो हि तेन रामः प्रकीर्त्तितः॥
रमते रमया सार्द्धं तेन रामं विदुर्बुधाः।
रमाया रमणस्थानं रामं रामविदो विदुः॥
रा चेति लक्ष्मीवचनो मयापीश्वरवाचकः।
लक्ष्मीपतिं पतिं रामं प्रवदन्ति मनीषिणः॥
नाम्नां सहस्रं दिव्यानां स्मरणे यत् फलं भवेत्॥
तत्फलं लभते नूनं रामोच्चारणमात्रतः॥
सारूप्यमुक्तिवचनो नारेति च विदुर्बुधाः।
यो देवोऽप्ययनं तस्य स च नारायणः स्मृतः॥
नाराच्च कृतपापाद्याप्ययनं ममनं स्मृतम्।
यतो हि गमनं तेषां सोऽयं नारायणः स्मृतः॥
मङ्गलारायणेत्युक्त्वा पुमान् कल्पशतत्रयम्।
गङ्गादिसर्व्वतीर्थेषु स्नातो भवति निश्चितम्॥
नारश्च मोक्षणं पुण्यमयनं ज्ञानमीप्सितम्।
तयोर्ज्ञानं भवेद्यस्मात् सोऽयं नारायणः प्रभुः॥
नास्यन्तो यस्य वेदेषु पुराणेषु चतुर्षु च।
शास्त्रेष्वन्येषु योगेषु तेनानन्तं विदुर्बुधाः॥*॥
मुकुमव्ययमान्तश्च निर्व्वाणमोक्षवाचकम्।
तद्दाति च यो देवो मुकुन्दस्तेन कीर्त्तितः॥
मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम्।

हरिः

यस्तद्दाति भक्तेभ्यो मुकुन्दस्तेन कीर्त्तितः॥*॥
सूदनं मधुदैत्यस्य यस्मात् स मधुसूनः।
इति सन्तो वदन्तीशं वेदैर्भिन्नार्थमीप्सितम्॥
मधु क्लीवञ्च माध्वीके कृतकर्म्मशुभाशुभे।
भक्तानां कर्म्मणाञ्चैव सूदनं मधुसूदनः॥
परिणामाशुभं कर्म्म भ्रान्तानां मधुरं मधु।
करोति सूदनं यो हि स एवं मधुसूदनः॥*॥
कृषिश्च कृष्टवचनो णश्च सद्भक्तिवाचकः।
अथापि दात्तवचनः कृष्णं तेन विदुर्बुधाः॥
कृषिश्च परमानन्दे णश्च तद्दास्यकर्म्मणि।
तयोर्हाता च यो देवस्तेन कृष्णः प्रकीर्त्तितः॥
कोटिजन्मार्জ্জिते पापे कृषिः क्लेशे च वर्त्तते।
भक्तानां णश्च निर्व्वाणे तेन कृष्णः प्रकीर्त्तितः॥
नाम्नां सहस्रं दिव्यानां त्रिरावृत्त्या तु यत्
फलम्।
एकावृत्त्या तु कृष्णस्य तत् फलं लभते नरः॥
कृष्णनाम्नः परं नाम न भूतं न भविष्यति।
सर्व्वेभ्यश्च परं नाम कृष्णेति वैदिका विदुः॥
कृष्ण कृष्णेति हे गोपि यस्तं स्मरति नित्यशः।
जलं भित्त्वा यथा पद्मं नरकादुद्धरत्यसौ॥
कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते।
भस्मीभवन्ति सद्यस्तु महापातककोटयः॥
अश्वमेधसहस्रेभ्यः फलं कृष्णजपस्य च।
वरं तेभ्यः पुनर्ज्जन्म नातो भक्तः पुनर्भवः॥
सर्व्वेषामपि यज्ञानां दानानि च व्रतानि च।
तीर्थस्नानानि सर्व्वाणि तपांस्यनशनानि च॥
वेदपाठसहस्राणि प्रादक्षिण्यं भुवः शतम्।
कृष्णनामजपस्यास्य कलां नार्हन्ति षोड़शीम्॥
तेषां भोगावहं स्वर्गफलञ्च सुचिरं नृणाम्।
स्वर्गादवश्यं पुंसश्च जपकर्त्तुर्हरेः प्रदम्॥*॥
के जले सर्व्वदेहेऽपि शयनं यस्य चात्मनः।
वदन्ति वेदिकाः सर्व्वे तं देवं केशवं परम्॥
कंसश्च पातके विघ्ने रोगे शोके च दानवे।
तेषामरिर्निहर्त्ता यः स कंसारिः प्रकीर्त्तितः॥
रुद्ररूपेण संहर्त्ता विश्वानामपि नित्यशः।
भक्तानां पालको यो हि हरिस्तेन प्रकीर्त्तितः॥
कुण्ठं जड़श्च विश्वौघं विशिष्टञ्च करोति या।
विकुण्ठां प्रकृतिं वेदास्तत्यजारञ्च वदन्ति ताम्॥
गुणाश्रयेण भगवान् तस्यां जातः स्वसृष्टये।
परिपूर्णतमं तेन वैकुण्ठश्च विदुर्बुधाः॥*॥
वामो विपत्तौ नष्टेदे साचाद्देवेषु वर्त्तते।
सुराणां विपदां छेत्ता वामनस्तेन कीर्त्तितः॥
एवं नाम्नाञ्च सर्व्वेषां व्युत्पत्तिश्च श्रुतौ श्रुता।
यथागमञ्च कथितं सर्व्वं जानाति माधवः॥*॥

यशोदोवाच।

वासुदेवश्च गोविन्दो मुरारिर्माधवस्तथा।
नाम्नां चतुर्णां व्युत्पत्तिं वद चान्यच्च तिष्ठतु॥

राधिकोवाच।

वसुः सर्व्वनिवासश्च विश्वानि यस्य लोमसु।
स च देवः परं ब्रह्म वासुदेव इति स्मृतः॥१॥
गाश्च विश्वसमूहश्च विन्दते योऽवलीलया।
ज्ञानसिन्धुसमूहश्च गोविन्दस्तेन कीर्त्तितः॥२॥

हरिः

सुरः क्लेशे च सन्तापे कर्म्मभोगे च कर्म्मिणाम्।
दैत्यभेदेऽप्यरिस्तेषां मुरारिस्तेन कीर्त्तितः॥३॥
मा च ब्रह्मस्वरूपा या मूलप्रकृतिरीश्वरी।
नारायणीति विख्याता विष्णुमाया सनातनी॥
महालक्ष्मीस्वरूपा च वेदमाता सरस्वती।
राधा वसुन्धरा गङ्गा तासां स्वामी च माधवः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। १। १।
१९—५२; ५५—६०॥ तस्य भूषणास्त्रस्वरूपं
यथा,—

श्रीमैत्रेय उवाच।

"भूषणास्त्रस्वरूपेण यथैतदखिलं जगत्।
बिभर्त्ति भगवान् विष्णुस्तन्ममाख्यातुमर्हसि॥

श्रीपराशर उवाच।

नमस्कृत्वाप्रमेयाय विष्णवे प्रभविष्णवे।
कथयामि यथाख्यातं वशिष्ठेन ममाभवत्॥
आत्मानमस्य जगतो निर्लेपमगुणामलम्।
बिभर्त्ति कौस्तुभमणिस्वरूपं भगवान् हरिः॥
श्रीवत्समंशयानघरमनन्ते च समाश्रितम्।
प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे॥
भूतादिमिन्द्रियादींश्च दिधाहङ्कारमीश्वरः।
बिभर्त्ति शङ्खरूपेण गार्ङ्गरूपेण च स्थितम्॥
बलस्वरूपमत्यन्तजवेनान्तरितानिलम्।
चक्रस्वरूपञ्च मनो धत्ते विष्णुः करस्थितम्॥
पद्मरूपा तु या माला वैजयन्ती गदाभृतः।
सा भूतहेतुसंघातो भूतमाला च वै द्विज॥
यानीन्द्रियाण्यशेषाणि बुद्धिकर्म्मात्मकानि वै।
शररूपाण्यशेषाणि तानि धत्ते जनार्दनः॥
बिभर्त्ति यच्चासिरत्नमच्युतोऽत्यन्तनिर्म्मलम्।
विद्यामयन्तु तज्ज्ञानमविद्याचर्म्मसंस्थितम्॥
इत्थं पुमान् प्रधानञ्च बुद्ध्यहङ्कारमेव च।
भूतानि च हृषीकेशे मनः सर्व्वेन्द्रियाणि च।
विद्याविद्ये च मैत्रेय सर्व्वमेतत् समाश्रितम्॥
अस्त्रभूषणसंस्थानस्वरूपं रूपवर्জ্जितः।
बिभर्त्ति मायारूपोऽसौ श्रेयसे प्राणिनां हरिः॥
सविकारं प्रधानं यत् पुमांश्चैवाखिलं जगत्।
बिभर्त्ति पुण्डरीकाक्षस्तदेवं परमेश्वरः॥
या विद्या या तथाविद्या यत् यच्चासदव्यय-
यम्।
तत् सर्व्वं सर्व्वभूतेशे मैत्रेय मधुसूदने॥
कलाकाष्ठानिमेषादिदिनर्त्वयनहायनैः।
कालस्वरूपो भगवानपरो हरिरव्ययः॥
भूर्लोकोऽथ भुवर्लोकः स्वर्लोको मुनिसत्तम!।
महर्জनस्तपः सत्यः सप्त लोका इमे विभुः॥
लोकात्ममूर्त्तिः सर्व्वेषां पूर्व्वेषामपि पूर्व्वजः।
आधारः सर्व्वविद्यानां स्वयमेव हरिः स्थितः॥
देवमानुषपश्वादिस्वरूपैर्व्वृहभिर्विभुः।
स्थितः सर्व्वेश्वरोऽनन्तो भूतमूर्त्तिरमूर्त्तिमान्।
ऋचो यजूंषि सामानि तथैवाथर्व्वणानि च।
इतिहासोपवेदाश्च वेदाङ्गेषु तथोक्तयः॥
वेदाङ्गानि समस्तानि मन्वादिगदितानि च।
शास्त्राण्यशेषाण्याख्यानान्यनुवादाश्च ये
क्वचित्॥

हरिः

काव्यालापाश्च ये केचित् गीतकान्यखिलानि च ।
सर्व्वमूर्त्तिधरस्येते वपुर्विष्णोर्महात्मनः ॥
यान्यमूर्त्तानि मूर्त्तानि यान्यव्यक्तान्यतानि वा क्वचित् ।
सन्ति वै वस्तुजातानि तानि सर्व्वाणि तद्वपुः ॥"

इति विष्णुपुराणे १ अंशे २२ अध्यायः ॥ * ॥

हरि सान्निध्यस्थानानि यथा,—

भरद्वाज उवाच ।

"केषु केषु विभो नित्यं स्थानेषु पुरुषोत्तम ! ।
सान्निध्यं भवतो ब्रूहि श्रोतुमिच्छामि तत्त्वतः ॥

वामन उवाच ।

शृणुतां कथयिष्यामि येषु येषु गुरो ह्यहम् ।
निवसामि सुपुण्येषु स्थानेषु बहुरूपवान् ॥
ममावतारैर्बहुधा नभःस्थलं
पातालमभ्योनिचयं दिवञ्च ।
दिशः समस्ता गिरयोऽम्बुराश
व्याप्ता भरद्वाज ममानुरूपैः ॥
ये दिव्या ये च भौमा जलगगनचरा स्थावरा
येऽत्र विश्वे
सेन्द्राः सार्कीः सचन्द्रा यमवसुवरुणाः साग्नयः
सर्व्वपालाः ।
ब्रह्माद्याः स्थावरान्ता द्विजखगसहिता मूर्त्ति-
मन्तो ह्यमूर्त्ता-
स्ते सर्व्वे मत्प्रसूता बहुविविधगुणाः पूरणार्थं
पृथिव्याः ॥
एते हि मुख्याः सुरसिद्धदानवैः
पूज्यास्तथा सन्निहिता महीतले ।
यैर्दृष्टमात्रैः सहसैव नाशं
प्रयाति पापं द्विजवर्य्य कीर्त्तितैः ॥"

इति वामने ८५ अध्यायः ॥ * ॥

अपि च ।

श्रीभगवानुवाच ।

आद्यं मत्स्यं महद्रूपं संस्थितं मानसे ह्रदे ।
सर्व्वपापक्षयकरं कीर्त्तनस्मरणादिभिः ॥
कौर्म्ममन्यत् सन्निधानं कौशिक्यां पापनाशनम् ।
हयग्रीवञ्च कृष्णाङ्गे गोविन्दं हास्तिने पुरे ॥
त्रिविक्रमञ्च कालिन्यां लिङ्गभेदे भवं विभुम् ।
केदारे माधवं शौचं कुजाम्रे कृष्णमूर्जजम् ॥
नारायणं वदर्य्याञ्च वाराहे गरुड़ासनम् ।
जयेशं रुद्रकर्णे च विपाशायां द्विजप्रियम् ॥
क्षतशौचे नृसिंहञ्च गोकर्णे विश्वकर्म्मिणम् ।
प्राचीने कामपालञ्च पुष्करीकं महाम्भसि ॥
विशाखयूपे च व्रजितं हंसं हंसपदे तथा ।
पयोष्णायाञ्च तमः खण्डं वितस्तायां खरुविलम् ॥
मणिमत्पत्तने ब्रह्मन् ! ब्रह्माणञ्च प्रजापतिम् ।
मधुनद्यां चक्रधरं शूलबाहुं हिमाचले ॥
विद्धि विष्णुं मुनिश्रेष्ठ स्थितमौषधसञ्ज्ञनि ।
भृगुतुङ्गे सुवर्णाख्यं नैषधे प्रीतवाससम् ॥
गयायां गोपतिं देवं गदापाणिनमोश्वरम् ।
त्रैलोक्यनाथं वरदं गोप्रभावे कुशेशयम् ॥
अर्द्धनारीश्वरं पुण्ये महेन्द्रे दक्षिणे गिरौ ।
गोपालमुत्तरे नित्यं महेन्द्रे सोमपिण्डिनम् ॥

हरिः

वैकुण्ठमपि सह्याद्रौ पारिपात्रे पराजितम् ।
कपेरुदेशे देवेशं विश्वरूपं तपोधन ! ॥
मलयाद्रौ च सौगन्धिं विन्ध्यपादे सदाशिवम् ।
अवन्तिविषये विष्णुं निषेधेश्वमरेश्वरम् ॥
पाञ्चालिकञ्च ब्रह्मर्षे पञ्चालेषु व्यवस्थितम् ।
महोदये हयग्रीवं प्रयागे योगशायिनम् ॥
स्वयम्भुवं मधुवने प्रयोगन्धिञ्च पुष्करे ।
तथैव विप्रवर वाराणस्याञ्च केशवम् ॥
अविमुक्तमत्रैव लोलयात्रैव गीयते ।
पद्मायां पद्मकिरणं समुद्रे वड़वामुखम् ॥
कुमारवने वाह्नीशं कार्त्तिकेयञ्च बर्हिणम् ।
यज्ञेशं शम्भुमनघं स्थाणुञ्च कुरुजाङ्गले ॥
वनमालिनमार्द्रायां किष्किन्धावासिनो जनाः ।
वीरं कुवलयारूढं शङ्खचक्रगदाधरम् ॥
श्रीवत्साङ्कमुदाराङ्गं नर्म्मदायां श्रियः पतिम् ।
माहिष्मत्यां विनयनं तत्रैव च हुताशनम् ॥
अर्व्वुदेषु चिसीपर्णं क्षाधरं शूकराचले ।
चित्राचितेनं ब्रह्मर्षे प्रभासेषु कपर्द्दिनम् ॥
तथैवात्रापि विख्यातं तृतीयं शशिशेखरम् ।
उदये शशिनं सूर्य्यं ध्रुवञ्च चितयं स्थितम् ॥
मन्दरे यज्ञपुरुषं स्कन्दं शरवणे स्थितम् ।
महालये स्मृतं ह्रदं चत्वरेषु कुरुश्रेष्ठ ॥
पद्मनाभं मुनिश्रेष्ठ सर्व्वसौख्यप्रदायकम् ।
सप्तगोदावरे ब्रह्मन् विख्यातं हाटकेश्वरम् ॥
तत्रैव च महावासं प्रयागेऽपि वटेश्वरम् ।
भल्लीवने महायोगं मदेषु पुरुषोत्तमम् ॥
प्रभावतरणे श्रीमत्श्रीनिवासं द्विजोत्तमम् ।
सूर्पारके चतुर्व्वाहुं मगधायां सुधापतिम् ॥
गिरिव्रजे पशुपतिं शोकखण्डं यमुनातटे ।
वनस्थितिं समाख्यातं दण्डकारण्यवासिनम् ॥
कालञ्जरे नीलकण्ठं शरण्यां शम्भुमुत्तमम् ।
हंसयुक्तं महाकोश्यां सर्व्वपापप्रणाशनम् ॥
गोकर्णे दक्षिणे सर्व्वं वासुदेवं प्रजामुखे ।
विन्ध्यशृङ्गे महासौरिं कथायां मधुसूदनम् ॥
त्रिकूटशिखरे ब्रह्मं चक्रमाणिनमीश्वरम् ।
लोहदण्डे हृषीकेशं कौशलायां मनोहरम् ॥
महाबाहुं सुराष्ट्रे च नवराष्ट्रे यशोधरम् ।
भूधरं देविकानद्यां महोदायां कुशप्रियम् ॥
गोमत्यां दारितगदं शङ्खोद्धारे च शङ्खिनम् ।
सुनेत्रं सैन्धवारण्ये शूरं शूरपुरे स्थितम् ॥
भद्राश्वञ्च हिरण्यत्यां वीरभद्रं त्रिविष्टपे ।
शङ्कुकर्णञ्च भीमायां भीमं शालवने विदुः ॥
विश्वामित्रञ्च गदितं कैलासे हयभध्वजम् ।
महेशं महिलाशैले कामरूपे शशिप्रभम् ॥
वड़भ्यामपि गोमित्रं पटहे पङ्कजप्रियम् ।
उपेन्द्रं सिंहलद्वीपे शङ्काख्ये कुन्दमालिनम् ॥
रसातले च विख्यातं सहस्रशिरसं मुने ! ।
कालाग्निरुद्रं तत्रैव तथान्यं कीर्त्तिवाससम् ॥
सुतले कूर्म्ममचलं वितले पङ्कजासनम् ।
महातले गुरुं ख्यातं देवेशं छागलेश्वरम् ॥
तले सहस्रचरणं सहस्रभुजमीश्वरम् ।
महस्राक्षं परिख्यातं मुषलाख्यदानवम् ॥

हरिः

पाताले योगिनामीशं स्थितञ्च हरिशङ्करम् ।
धरातले कोकनदं मेदिन्याञ्चक्रपाणिनम् ॥
भुवर्लोके च गरुड़ं स्वर्लोके विष्णुमव्ययम् ।
मर्त्यलोके तथागस्त्यं कपिलञ्च जले स्थितम् ॥
तपोलोके स्थितं ब्रह्मन् ! वाराहं सत्यसंयुतम् ।
ब्रह्माणं ब्रह्मलोके तु सप्तमे वै प्रतिष्ठितम् ॥
सनातनं तथा शैवे परं ब्रह्म च वैष्णवे ।
अप्रतर्क्यं निरालम्बे निराकाशे तपोमयम् ॥
जम्बद्वीपे चतुर्व्वाहुं कुशद्वीपे कुशेशयम् ।
प्लक्षद्वीपे मुनिश्रेष्ठ ख्यातं गरुड़वाहनम् ॥
पद्मनाभं तथा क्रौञ्चे शाल्मले हयभध्वजम् ।
सहस्रांशुः स्थितः शाके धनराट् पुष्करे स्थितः ॥
तथा पृथिव्यां ब्रह्मर्षे ! शालग्रामे स्थितोऽस्मा-
हम् ।
सजलस्थलपर्य्यन्तं चरेषु स्थावरेषु च ॥
एतानि पुण्यानि ममालयानि
ब्रह्मन् पुराणानि सनातनानि ।
धर्म्मप्रधानानि महौजसानि
संकीर्त्तनीयान्यघनाशनानि ॥
सङ्कीर्त्तनात् स्मरणाद्दर्शनाच्च
संस्पर्शनादेव च देवताद्याः ।
धर्म्मार्थकामान्यपवर्गमेव
लभन्ति दैत्या मनुजाः ससाध्याः ।
एतानि तुभ्यं विनिवेदितानि
ममालयानीह स्थनिष्ठितानि ॥"

इति वामनपुराणे स्थानोत्पत्तिर्नाम ८६ अः ॥

हरिहरयोरभेदो यथा,—

"या श्रीः सा गिरिजा प्रोक्ता यो हरिः स
त्रिलोचनः ।
एवं सर्व्वेषु शास्त्रेषु पुराणेषु च पठ्यते ॥
एतस्मादन्यथा यस्तु ब्रूते शास्त्रं पृथक् तया ।
तं नास्तिकं विजानीयात् सर्व्वधर्म्मबहिष्कृतम् ।

इति वाराहे सौभाग्यव्रतनामाध्यायः ॥ * ॥

ब्रह्मविष्णुमहेश्वराणामेकत्वं सत्त्वादिरूपत्वञ्च यथा,—

महेश्वर उवाच ।

"नारायणः परो देवः सत्त्वरूपी जनार्दनः ।
त्रिधात्मानं स भगवान् ससर्ज परमेश्वरः ॥
रजस्तमोभ्यां युक्तोऽभूद्रजःसत्त्वाधिकं विभुः ।
ससर्ज नाभिकमलात् ब्रह्माणं कमलासनम् ॥
रजसा तमसा युक्तं सोऽपि मां त्वसृजत् प्रभुः ।
यत् सत्त्वं स हरिर्देवो यो हरिस्तत् परं पदम् ॥
ये सत्त्वरजसी सोऽपि ब्रह्मा कमलसम्भवः ।
यो ब्रह्मा सैव देवस्तु यो देवः स चतुर्मुखः ।
यद्रजस्तमसीपेतं सोऽयं नास्त्यत्र संशयः ।
सत्त्वं रजस्तमश्चैव तृतीयं चैतदुच्यते ॥
सत्त्वेन मुच्यते जन्तुः सत्त्वं नारायणात्मकम् ।
न तस्मात् परतो देवो भविता न भविष्यति ॥
यो विष्णुः स स्वयं ब्रह्मा यो ब्रह्मा सोऽह-
मेव च ।
वेदत्रयेऽपि यज्ञेऽस्मिन् पण्डितैश्चैष निश्चयः ॥
यो भेदं कुरुतेऽस्माकं त्रयाणां द्विजसत्तम ।

स पापकारी दुष्टात्मा दुर्गतिं समवाप्नुयात् ॥
इति तत्रैव रुद्रगीतानामाध्यायः ॥*॥
तद्गुणा यथा,—
"ब्रह्मादयः सुराः सर्व्वे ये चान्ये देवदानवाः ।
मनुष्याः पक्षिवृक्षाद्याः सर्व्वे तद्ब्रह्मसंभवा ॥
तत्र योऽसौ परो देवो व्यापको मुनिसत्तम ।
निर्लेपो ह्यचलः सूक्ष्मः कारणैः परिवर्जितः ॥
अनौपम्यस्वनिर्देश्यो ह्यक्षरादक्षरं परम् ।
निष्पक्षो निराधारो विषयातीतगोचरः ॥
सर्व्वज्ञः सर्व्वकर्त्ता च प्रत्यक्षं सर्व्वदाक्षरम् ।
अनामा नामकोटीनां गीयते तदनेकधा ॥
अगम्यमथवा गम्यमदृश्यं दृश्यमेव च ।
अक्षरं स्वरसंयुक्तमघोषं घोषरूपकम् ॥
सकलं निष्कलं चैव निर्म्मलं मलसंयुतम् ।
हरिमेतद्गुणैर्युक्तं मया ते परिकीर्त्तितम् ॥*॥
मरीचिरुवाच ।
अक्षयं चाव्ययं चैव यदङ्गे ते प्रकीर्त्तितम् ।
कथं तस्य विनाशोऽस्ति सर्व्वज्ञः केन हेतुना ॥
अगम्यं कीर्त्तितं वक्त्रे गम्यं चैव कथं भवेत् ।
अवर्णश्च समाख्यातं वर्णयुक्तं हि कारणम् ॥
अक्षरं स्वरसंयुक्तं कथं तद्गम्यते हरिः ।
अप्रमाणं त्वया प्रोक्तं प्रमाणञ्च कथं भवेत् ॥
अनादेस्तु कथं चादिर्लभ्यते किं विभावसो ।
कथयस्वविशेषेण येन सम्पद्यते सुखम् ॥*॥
वह्निरुवाच ।
स्थावरं जङ्गमञ्चैव अण्डजं स्वेदजं तथा ।
विनश्यन्तीह भूतानि विनाशी तेन कथ्यते ॥
अगम्यमप्रबुद्धानां कामाद्यासक्तचेतसाम् ।
स्वकर्म्मविनिवृत्तानां गम्यं तच्छुभकर्म्मणा ॥
ज्ञानचक्षुर्विहीनानामदृश्यं सर्व्वजन्तुषु ।
ज्ञानचक्षुःसमायुक्ताः स्थितं पश्यन्ति नित्यशः ॥
अन्धकारे यथा दीपो दर्शयेत् गृहमेधिनाम् ।
विद्याचक्षुस्तथा विप्रो दर्शयेत् परमं पदम् ॥
ये नरा वेद सिद्धान्तैर्बोधिता गुरुणा च ये ।
अनेकरूपसंयुक्तं पश्यन्ति परमेश्वरम् ॥
ये स्वकर्म्मतपोहीनविषयासक्तचेतसः ।
वर्णरूपं न जानन्ति वेदसिद्धान्तवर्जिताः ।
भ्रान्तिं पश्यन्ति सर्व्वत्र सविकल्पाश्च मानवाः ॥
जीवाख्यं वर्णनिर्मुक्तं शून्यसंज्ञन्तु कथ्यते ॥
यदा वर्णसमायुक्तस्तदा वर्णस्तु जायते ॥
स्वरं तु गृह्यते यावत्तावद्बोधस्तु कीर्त्यते ।
बिन्दुहीनस्तु निर्बोधो निराकारः स एव तु ॥
यदा सृजति भूतानि प्रकृतिस्थो हरिः स्वयम् ।
तावत् कर्त्ता स वै ज्ञेयः कर्त्ता प्रकृतिवर्जितः ॥
नामारम्भेण निर्याति अङ्गुलानि दशैव यम् ॥
निर्म्मलः स विभुर्ज्ञेयः समलो देहवर्द्धितः ॥
अप्रमाणं भवेत्तावत् यावत् शास्त्रं न विन्दति ।
शास्त्रज्ञानमधीते यः प्रमाणं तस्य लभ्यते ॥
तेन सर्व्वमिदं विश्वं व्यापितं सचराचरम् ।
सूक्ष्मः सर्व्वगतस्तूष्णीं लक्षणोपायवर्जितः ॥"
इत्याद्ये वह्निपुराणे सर्गकथननामाध्यायः ॥*॥
पूजितविष्णुदर्शनादिफलं वह्निपुराणे शुद्धिव्रत-
नामाध्याये क्रियायोगनामाध्याये च द्रष्टव्यम् ।
तस्य यमाष्टकस्तोत्रं नृसिंहपुराणे ६ अध्याये
तत्पूजायां द्रव्यविशेषदानफलञ्च तत्रैव ३२
अध्याये द्रष्टव्यम् ॥*॥ शिवस्य हरेराराधन-
प्रमाणं यथा,—
ब्रह्मोवाच ।
"अहं गतोऽद्रिं कैलासमिन्द्राद्यैर्दैवतैः सह ।
तत्र दृष्टो महारुद्रो ध्यायमानः परं पदम् ॥
पृष्टो नमस्कृतो देवः किं त्वं ध्यायसि शङ्कर ।
त्वत्तो नान्यं परं देवं जानामि ब्रूहि मां ततः ।
सारात् सारतरं तत्त्वं श्रोतुकामः सुरैः सह ॥
रुद्र उवाच ।
अहं ध्यायामि तं विष्णुं परमात्मानमीश्वरम् ।
सर्व्वगं सर्व्वदं सर्व्वं सर्व्वप्राणिहृदि स्थितम् ॥
भस्मोद्धूलितदेहस्तु जटामण्डलमण्डितः ।
विष्णोराराधनार्थं मे व्रतचर्य्या पितामह ॥
तमेव गत्वा पृच्छामः सारं यच्चिन्तयास्यहम् ।
विष्णुं जिष्णुं पद्मनाभं हरिं देहविवर्जितम् ॥
शुचिं शुचिपदं हंसं तत्परं परमेश्वरम् ।
युक्ता सर्व्वात्मनात्मानं तं देवं चिन्तयाम्यहम् ॥
यस्मिन् विश्वानि भूतानि तिष्ठन्ति च विशन्ति
च ।
गुणभूतानि भूतेशे सूत्रे मणिगणा इव ॥
सहस्राक्षं सहस्राङ्घ्रिं सहस्रोरुकराननम् ।
अणीयसामणीयांसं स्थविरञ्च स्थवीयसाम् ॥
गरीयसां गरिष्ठञ्च श्रेष्ठञ्च श्रेयसामपि ।
यं वाक्येष्वनुवाकेषु निषत्सूपनिषत्सु च ॥
गृणन्ति सत्यकर्म्माणं सत्यं सत्येषु माममु ।
पुराणे पुरुषः प्रोक्तो ब्रह्म प्रोक्तो द्विजादिषु ॥
ऋचे मङ्क्षर्षः प्रोक्तस्तमुपास्यमुपास्महे ।
यस्मिन् लोकाः स्फुरन्तीमे जले शकुनयो यथा ॥
ऋतमेकाक्षरं ब्रह्म यत्तत् सदसतः परम् ।
अर्चयन्ति च यं देवा यक्षराक्षसकिन्नराः ॥
यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ
क्षितिः ।
चन्द्रादित्यौ च नयने तं देवं चिन्तयाम्यहम् ॥
यस्य त्रिलोकी जठरे यस्य काष्ठाः सुबाहवः ।
यस्योच्छ्वासश्च पवनस्तं देवं चिन्तयाम्यहम् ॥
यस्य कुक्षौ जीमूता नद्यः सर्व्वाङ्गसन्धिषु ।
कुक्षौ समुद्राश्चत्वारस्तं देवं चिन्तयाम्यहम् ॥
परः कालात् परो यज्ञात् परः सदसतश्च यः ।
अनादिरादिर्विश्वस्य तं देवं चिन्तयाम्यहम् ॥
मनसश्चन्द्रमा यस्य चक्षुषश्च दिवाकरः ।
मुखादग्निश्च संजज्ञे तं देवं चिन्तयाम्यहम् ॥
पद्भ्यां यस्य क्षितिर्जाता श्रोत्राभ्याञ्च तथा
दिशः ।
मूर्द्धभागादिवं यस्य तं देवं चिन्तयाम्यहम् ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं यस्मात् तं देवं चिन्तयाम्यहम् ॥
यं तं ध्यायाम्यहं यस्माद्व्रजामः सार-
मीक्षितुम् ॥"
इति गारुड़े । २ । ८—२७ ॥

तद्भक्तिर्यथा,—
सूत उवाच ।
"विष्णुभक्तिं प्रवक्ष्यामि यया सर्व्वमवाप्यते ।
यथा भक्त्या हरिस्तुष्येत्तथा नान्येन केनचित् ॥
महतः श्रेयसो मूलं प्रसवः पुण्यसन्ततेः ।
जीवितस्य फलं स्वादु ददाति स्मरणं हरेः ।
भज इत्येष वै धातुः सेवायां परिकीर्त्तितः ।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिसाधनभूयसी ॥
ते भक्ता लोकनाथस्य नामकर्म्मादिकीर्त्तने ।
मुह्यन्त्यश्रूणि हर्षात् ये च हृष्टतनूरुहा ॥
जगद्धातुर्महेशस्य दिव्याज्ञाचरणाव्यया ।
इह नित्यक्रियाः कुर्य्युः स्निग्धा ये वैष्णवास्ते ॥
प्रणामपूर्व्वकं चाज्ञां यो वहेत् वैष्णवो हि सः ।
तद्भक्तजनवात्सल्यं पूजायाश्चानुमोदनम् ॥
तत्कथाश्रवणे प्रीतिः स्मरनेत्राङ्गविक्रिया ।
येन सर्व्वात्मना विष्णौ भक्त्या भावो निवेशितः ॥
विप्रेष्वीश्वरदृष्टिश्च महाभागवतो हि सः ।
विष्णोश्च कारणं नित्यं तदन्नं दम्भवर्जितम् ॥
स्वयमभ्यर्चनञ्चैव यो विष्णुं वोपजीवति ।
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते ॥
स विप्रेन्द्रो मुनिः श्रीमान् स ज्ञातः स च
पण्डितः ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा हरिः ॥
स्मृतः संभाषितो वापि पूजितो वा द्विजोत्तमः ।
पुनाति भगवद्भक्तश्वपाकोऽपि यदृच्छया ॥
प्रणताय प्रपन्नाय तवास्मीति च यो वदेत् ।
अभयं सर्व्वभूतेभ्यो ददाम्येतद्व्रतं हरेः ॥
मन्त्रयाजिसहस्रेभ्यः सर्व्ववेदान्तपारगाः ।
सर्व्ववेदान्तवित्कोट्या विष्णुभक्तो विशिष्यते ॥
ऐकान्तिकाश्च पुरुषा गच्छन्ति परमं पदम् ।
ऐकान्तिना समो विष्णुर्यस्मादेषां परायणः ।
तस्मादैकान्तिनः प्रोक्तास्तद्भागवतचेतसः ।
प्रियाणामपि सर्व्वेषां देवदेवस्य स प्रियः ।
आपत्स्वपि सदा यस्य भक्तिरव्यभिचारिणी ।
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
विष्णुं संस्मरतः सा मे हृदयान्नापसर्पतु ॥
अन्तर्गतोऽपि वेदानां सर्व्वशास्त्रार्थवेद्यपि ।
यो न सर्व्वेश्वरे भक्तस्तं विद्यात् पुरुषाधमम् ॥
नाधीतवेदशास्त्रोऽपि न कृतं चापसव्यवत् ।
यो भक्तिं वहते विष्णौ तेन सर्व्वं कृतं भवेत् ॥
यज्ञानां क्रतुमुख्यानां सर्व्वेषां पारगा अपि ।
न तां यान्ति गतिं भक्त्या यां यान्ति मुनिसत्तम ॥
यः कश्चित् वैष्णवो लोके मिथ्याचारोऽप्यना-
श्रमी ।
पुनाति सकलान् लोकान् सहस्रांशुरिवोदितः ॥
ये नृशंसा दुरात्मानः पापाचाररतास्तथा ।
तेऽपि यान्ति परं स्थानं नारायणपरायणाः ॥
दृढ़ा जनार्द्दने भक्तिर्यदैवाव्यभिचारिणी ।
तदा कियत् स्वर्गसुखं सैव निर्व्वाणहैतुकी ॥
भ्राम्यतां तव संसारे नराणां कर्म्मदुर्गमे ।
हस्तावलम्बनो ह्येको भक्तितुष्टो जनार्द्दनः ॥
न शृणोति गुणान् दिव्यान् देवदेवस्य चक्रिणः

स नरो वधिरो ज्ञेयः सर्व्वधर्म्मबहिष्कृतः ॥
नाम्नि संकीर्त्तिते विष्णोर्यस्य पुंसो न जायते ।
शरीरं पुलकोद्भासि तद्वत् कुणपोपमम् ॥
यस्मिन् स्मृते द्विजश्रेष्ठ ! मुक्तिरप्यचिराद्भवेत् ।
विष्णौ निविष्टमनसां किं पुनर्वृजिनक्षयः ॥
स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥
अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥
क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं नियच्छति ।
विप्रेन्द्र ! प्रतिजानीहि विष्णुभक्तो न नश्यति ॥
धर्म्मार्थकामैः किन्तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा हरौ ॥
दैवी ह्येषा गुणमयी हरेर्म्माया दुरत्यया ।
तमेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
कियदाराधने पुंसां श्रियते हरिमेधसः ।
भक्त्यैवाराध्यते विष्णुर्नान्यं तत्तोषकारकम् ॥
न दानैर्व्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्द्दनः ॥
संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।
कदाचित् केशवे भक्तिस्तद्भक्तैर्व्वा समागमः ॥
पत्रेषु पुष्पेषु फलेषु सत्सु
तोयेषु लभ्येषु सदैव सत्सु ।
भक्त्यैकलभ्ये पुरुषे पुराणे
मुक्त्यै कथं नु क्रियते प्रयत्नः ॥
आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः ।
वैष्णवोऽस्मत्कुले जातः स नः सन्तारयिष्यति ॥
अज्ञानिनः सुरवरं समधिच्छन्ति
ये पापिनोऽपि शिशुपालसुयोधनाद्याः ।
मुक्तिं गताः स्मरणमात्रविधूतपापाः
कः संशयः परमभक्तिमतां जनानाम् ॥
शरणं तं प्रपद्या ये ध्यानयोगविवर्ज्जिताः ।
तेऽपि मृत्युमतिक्रम्य यान्ति तद्देवयं पदम् ॥
गवोद्भवक्लेशशताहतस्तथा
परिभ्रमन्निन्द्रियबन्धकैः पथैः ।
नियम्यतां माधव ! मे मनोऽय-
स्वदङ्घ्रिशङ्खौ दृढभक्तिबन्धने ॥
विष्णुरेव परं ब्रह्म ह्यभेद इह पठ्यते ।
सेदसिद्धान्तमार्गेषु तं न जानन्ति मोहिताः ॥
वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः ।
चितिपसुमतिरम्यमात्मनोऽन्तः
क्षयति च चाशुतयेवमात्मपाशे ॥"

इति गारुड़े भगवद्भक्तिः २३१ अध्यायः ॥*॥
तस्य नमस्कारादिकं तत्रैव २३२ । २३३ । २३४
अध्यायेषु द्रष्टव्यम् ॥ * ॥ तस्य द्वादशमासकृत्यं
यथा—
"मासकृत्यं प्रवक्ष्यामि विष्णोः प्रीतिकरं परम् ।
ज्येष्ठे तु स्नापनं कुर्य्यात् श्रीविष्णोः स्नानवासरे ॥
तेनन्दिनन्तु दुरितं पञ्चमासाहृतार्ज्जितम् ।
ब्रह्महत्यासहस्राणि श्वानाश्वानकृतानि च ॥
स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च ।
कोटिकोटिसहस्राणि ह्युपपापानि यानि च ॥
सर्व्वाण्यपि प्रणश्यन्ति पौर्णमास्यान्तु वासरे ।
अभिषिञ्चेच्च तन्मूर्द्धि तदेतत् कलसोदकम् ॥
पुरुषसूक्तेन मन्त्रेण पावमानी ऋचा तथा ।
नारिकेलोदकेनाथ तथा तालफलाम्बुना ॥
रत्नोदकेन गन्धेन तथा पुण्योदकेन च ।
पञ्चोपचारैराराध्य यथाविभवविस्तरैः ॥
घं घण्टायै नम इति घण्टावाद्यं निवेदयेत् ॥
पादे तस्य महाध्यानं ध्वस्तपातकपङ्कजे ।
पाहि मां पापिनं घोरं संसारार्णवपातितम् ॥
य एवं कुरुते विद्वान् ब्राह्मणः श्रीप्रियः शुचिः ।
सर्व्वपापैः प्रमुच्येत विष्णुलोकं स गच्छति ॥ १ ॥
आषाढ़शुक्ले कादश्यां कुर्य्यात् स्नापमहोत्सवम् ।
आषाढ़े च रथं कुर्य्यात् श्रावणे श्रवणा-
विधिम् ॥ २ ॥ ३ ॥
भाद्रे च जन्मदिवसे उपवासपरो भवेत् । ४ ।
प्रसुप्तञ्च परिवर्त्तमाश्विने मासि कारयेत् ॥
उत्थानञ्च हरेः कुर्य्यादन्यथा विष्णुद्रोहकृत् ।
शमे चैवाश्विने मासि महामायां प्रपूजयेत् ॥५॥
कार्त्तिके मासि यत् कृत्यं शृणु देवि वरानने ! ।
सप्तवर्त्याः प्रमाणेन दीपः स्याच्चतुरङ्गुलः ॥
पञ्चान्ते च प्रकर्त्तव्या दीपमालावलिः शुभा ॥६॥
मार्गशीर्षे सिते पक्षे षष्ठ्याञ्च सितवस्त्रकैः ।
पूजयेज्जगदीशञ्च तूलवस्त्रैर्विशेषतः ॥ ७ ॥
पौषे पुष्पाभिषेकञ्च वर्জ्जयेच्चन्दनं यथा ॥८॥
संक्रान्त्यां माघमासे च साधिवासिततण्डुलान् ।
निवेद्य विष्णवे भक्त्या इमं मन्त्रमुदीरयेत् ॥
जीवनं सर्व्वभूतानां जनकस्त्वं जगद्गुरो ! ।
त्वन्मायामोहितां प्राप्ता त्वयैव जनिता प्रभो ! ॥
कर्पूराद्यैतिद्रव्याणि घृतान्नानि निवेदयेत् ।
ब्राह्मणान् भोजयेद्भक्त्या देवदेवपुरस्थितान् ॥
अभ्यर्च्य भगवद्भक्त्या द्विजांश्च भगवत्प्रिया ।
एकस्मिन् भोजिते भक्ते कोटिर्भवति भोजितः ।
विप्रभोजनमात्रेण व्यङ्गं साङ्गं भवेत् ध्रुवम् ॥
पञ्चम्यां शुक्लपक्षे तु स्नापयित्वा च केशवम् ।
पूजयेद्भगवद्भक्त्या चूतपल्लवसंस्थितैः ॥ ९ ॥
फलगुचूर्णैश्च विविधैर्व्वासितैः पटवासितैः ।
काननं रमणीयञ्च प्रदीप्तदीपदीपितम् ॥
द्राक्षेक्षुरम्भाजम्बीरनागरङ्गकपूगकम् ।
नारिकेलञ्च धात्रीं च वंशतालहरीतकीं ॥
अन्यैश्च ऋतुखण्डैश्च सर्व्वर्त्तुकुसुमाचितम् ।
पुष्पैश्च विविधैश्चैव फलपुष्पसमन्वितम् ॥
वितानैः कुसुमोद्यानैर्व्वारिपूर्णघटैस्तथा ।
चूतशाखोपशाखाभिः शोभितं छत्रचामरैः ॥
विशेषतः कलियुगे दोलोत्सवो विधीयते ।
फाल्गुने च चतुर्दश्यामष्टमे यामसंज्ञके ॥
अथवा पौर्णमास्यान्तु प्रतिपत्प्रभृतिषु क्रमात् ।
पूजयेद्विधिवद्भक्त्या फलगुचूर्णैश्चतुर्व्विधैः ॥
सितरक्तैर्गौरपीतैः कर्पूरादिविमिश्रितैः ।
हरिद्राचारयोगाश्च रङ्गरम्यैर्मनोहरैः ॥
अन्यैर्व्वा रङ्गरम्यैश्च प्रीणयेत् परमेश्वरम् ॥
एकादश्यां समारभ्य पञ्चम्यन्तं समापयेत् ॥
पञ्चाहानि त्रयाहानि स्युर्दोलोत्सवो विधीयते ।
दक्षिणाभिमुखं कृष्णं दोलयानं सकेशवाः ॥
दृष्ट्वाराधनिचर्य्यैर्मुक्तास्तु नात्र संशयः ॥ १० ॥
निःक्षिप्य जलमात्रे तु मासे माधवसंज्ञिते ।
सौवर्णपात्रे तास्रे वा रौप्ये वा मृन्मयेऽपि वा ॥
तोयस्थं योऽर्च्चयेद्देवं शालग्राममसुद्भवम् ।
प्रत्यहं मां महाभागे तस्य पुण्यं न गच्छते ॥
दमनारोपणं कृत्वा श्रीविष्णौ च समर्पयेत् ।
वैशाख्यां श्रावणे भाद्रे कर्त्तव्यञ्च तदर्पणम् ॥११॥
वैशाखे च तृतीयायां जलमध्ये विशेषतः ।
अथवा मण्डपे कुर्य्यात् मण्डले वा हुताशने ॥
सुगन्धचन्दनेनाङ्गं सुपुष्टाङ्गो दिने दिने ।
यथा प्रयततः कार्य्यः कृष्णाङ्गो नैव पूजितः ॥
चन्दनागुरुकस्तूरीकुङ्कुमरोचना ।
जटामांसी वचा चैव विष्णोर्गन्धाष्टकं तथा ।
एतैर्गन्धयुतैर्यापि अङ्गानि च विलेपयेत् ॥
तृप्तश्च तुलसीकाष्ठं कर्पूरागुरुयोगतः ।
अथवा केशरैर्योज्यं हरिचन्दनमच्युते ॥
अस्मिन् काले कृष्णभक्त्या ये प्रयच्छन्ति मानवाः ।
न तेषां पुनराहृत्तिः कल्पकोटिशतैरपि ॥
सुगन्धिमिश्रितैस्तोयैः स्नापयित्वा जगद्-
गुरुम् ।
अथवा पुष्पमध्यं च स्नापयेज्जगदीश्वरम् ॥
वृन्दावनं तत्र कृत्वा उपस्कृतफलानि च ।
विष्णुभक्तेन योग्येन भोजयेत्तदशेषतः ॥
नारिकेलं फलं नीरं कोषस्थोद्धृत्य दापयेत् ।
कृष्णफलञ्च पनसं कोषमुद्धृत्य दीयते ॥
यथा पचेत्तथा दद्यादृग्यथाग्नियोगतः ।
दग्ध्वा विमिश्रितञ्चाज्यं घृतेनाप्लुत्य दापयेत् ।
पाचितं पिष्टकं धातुरष्टाङ्गं घृतेन च ।
तिलैश्च तिलसंमिश्रैः फलं गुडञ्च दापयेत् ॥
यद्यदेवात्मनः श्रेयस्तत्तदीयाय कल्पयेत् ।
दत्त्वा नैवेद्यवस्त्रादीन्नादेदीत कथञ्चन ॥
त्यक्तव्यं विष्णुमुद्दिश्य तद्भक्तेभ्यो विशेषतः ।
इति ते कथितं किञ्चित् समासेन महेश्वरि ! ।
गोप्तव्यञ्च प्रयत्नेन स्वयोनिरिव पार्व्वति ! ॥१२॥

श्रीकृष्णरूपगुणवर्णनगास्वर्गे
बोधाधिकार इह चेदलमन्दपारैः ।
तत्प्रेमभावबलभक्तिविलासनाम-
ह्रासेषु चेद्यदि रतिः किमु कामिनीभिः ॥
तच्चेतसा विभजतां व्रजबालकेन्द्र
वृन्दावनं चिततलं यमुनाजलञ्च ।
तल्लोकनाथपदपङ्कजधूलिभिश्चे-
ज्जिह्मं वपुः किल हयागुरुचन्दनार्द्रीः ॥"

इति पाद्मे पातालखण्डे १२ अध्यायः ॥

हरिः, त्रि, (हरति नेत्रदुःखमिति । हृ + इन् ।) पिङ्गलवर्णः । इरिद्वर्णः । इति मेदिनी ॥ (यथ रघुः ।३। ४१ ।
"शतैस्तमश्यामनिमेषवृत्तिभि-
र्हरिं विदित्वा हरिभिश्च वाजिभिः ।

अवोचदेनं गगनसृगा रघः
स्वरेण धीरेण निवर्त्तयन्निव ॥")
पीतवर्णः। इत्यनेकार्थकोषः ॥
हरिकः, पुं, (हरिरेव। हरि+स्वार्थे संज्ञायां वा कन्।) पीतहरितवर्णाश्वः। तत्पर्य्यायः। हालकः २। इति हेमचन्द्रः ॥ चोरः। अश्वक्रीड़कः। इति केचित् ॥
हरिकेलीयः, पुं, (हरिकेलिमर्हतीति। हरिकेलि+छः।) वङ्गदेशः। इति हेमचन्द्रः। तद्देशस्थे, त्रि ॥
हरिकेशः, पुं, (हरिः पिङ्गलः केशो यस्य।) शिवः। इति केचित् ॥ (यथा, महाभारते। १३। १७। ४४।
"दोर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ॥")
विष्णुः। यथा, महाभारते। ६। ६२। ५०।
"महोरग वराहाश्च हरिकेश विभो! जय ॥")
शिवभक्तयक्षविशेषः। स तु शिवप्रसादात् दक्षपार्षित्वं क्षेत्रपालत्वादिकञ्च प्राप्तवान्। यथा,
"एवमुक्ता ततो देवः सह देव्या जगत्पतिः।
जगाम यत्रो यत्रास्ते कृशो धमनिसन्ततः।
तं दृष्ट्वा प्रणतं भक्त्या हरिकेशं हरध्वजः।
दिव्यं चक्षुरदात्तस्मै येनापश्यत् स शङ्करम् ॥
सूत उवाच।
अथ यत्तस्तदा तत्र शनैरुन्मील्य चक्षुषी।
अपश्यत् स शिवं देवं हृष्टं क्षेत्रमुपाश्रितम् ॥
देव उवाच।
जरामरणनिर्मुक्तः सर्व्वशोकविवर्जितः।
भविष्यसि गणाध्यक्षो वरदः सर्व्वपूजितः ॥
अजेयश्चापि लोकानां योगैश्वर्य्यसमन्वितः।
अजरश्चापि लोकेभ्यः क्षेत्रपालो भविष्यसि ॥
महाबलो महासत्त्वो ब्रह्मरूपो मम च प्रियः।
त्वाञ्चैव दक्षपार्षिञ्च महायोगी तथैव च ॥
उद्भ्रमः सम्भ्रमश्चैव गणौ ते परिचारकौ।
तवाज्ञया करिष्येते लोकस्योद्भ्रमसम्भ्रमौ ॥"
इति मात्स्ये। १०। ८८—९०; ९६—९८ ॥
हरिक्रान्ता स्त्री, (हरिणा क्रान्ता।) विष्णुक्रान्ता। इति राजनिर्घण्टः ॥
हरिगृहं, क्ली, (हरेर्गृहम्।) हरेरालयः। पुरीविशेषः। तत्पर्य्यायः। एकचक्रम् २ ब्रह्मपुरी ३। इति त्रिकाण्डशेषः ॥
हरिचन्दनं, पुं, क्ली, (हरिरिन्द्रस्य प्रियं चन्दनम्।) देवतरुविशेषः यथा,—
"पञ्चैते देवतरवो मन्दारः पारिजातकः।
सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥"
इति स्वर्गवर्गे अमरः। १। १। ५३ ॥
देवभूमावेव सम्भवात् देवतरुः। चन्दयति आह्लादयति चन्दनं यदि आह्लादे दीप्तौ नन्द्यादित्वादनः। हरिरिन्द्रस्य चन्दनं हरिचन्दनम्। इति तट्टीकायां भरतः ॥* ॥ चन्दनविशेषः। तत्पर्य्यायः। तैलपर्णिकम् २ गोशीर्षम् ३। इति मनुष्यवर्गे अमरः। २।६।१३१ ॥
चौषि हरिचन्दनैः। चन्दनविशेषाणां पृथक् पृथक् नामानीत्यन्ये। तथा च तिलस्येव पर्णमस्य तिलपर्णी दृक्षभेदः ततो जातं तैलपर्णिकम्। धवलं सुशीतलं चन्दनं तैलपर्णिकम्। गोः शीर्षं गोशीर्षं तदाकारे मलयेकदेशे जातं गोशीर्षम्। कालतास्रश्यामिश्यवर्णसुत्पलगन्धि अतिसुरभि शीतलतया सदैव सर्पैर्वेष्टितं गोशीर्षम्। कपिलवर्णत्वात् हरि च तच्चन्दनञ्चेति हरिचन्दनम्। हरेरिन्द्रस्य चन्दनं वा। हरिर्मण्डूकस्तदाकारे पर्व्वतभागे जातत्वाद्वा हरिचन्दनम्। इति भरतः ॥ तत्पर्य्यायान्तरं सुरार्हम् २ हरिगन्धम्३ इन्द्रचन्दनम्४ दिव्यम् ५ दिविजम् ६ महागन्धम् ७ नन्दनजम् ८ लोहितजम् ९। हरिचन्दनं कोकणे प्रसिद्धम्। अस्य गुणाः।
"हरिचन्दनन्तु दिव्यं हिमं तदिह दुर्व्वहं मनुजैः।
पित्तातोपविलोपि वमथुभ्रमशोषमान्द्यमेदोहृत् ॥"
इति राजनिर्घण्टः ॥* ॥
(पीतचन्दनम्। कलम्ब इति लोके।
"काश्मीयकन्तु कालीयं पीताभं हरिचन्दनम्।
हरिप्रियं कालसारं तथा कालानुसार्य्यकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पारिभाषिकहरिचन्दनं यथा,—
"हृष्टश्च तुलसीकाष्ठं कर्पूरागुरुयोगतः।
अथवा केशरैर्योज्यं हरिचन्दनमुच्यते ॥"
इति पाद्मे पातालखण्डे १२ अध्यायः ॥
हरिचन्दनं, क्ली, (हरिचन्दनं तदर्हार्थोऽस्येति। अच्।) ज्योत्स्ना। कुङ्कुमम्। इति मेदिनी ॥ पद्मकेशरम्। इति हलायुधः ॥ कान्ताङ्गम्। इति शब्दरत्नावली ॥
हरिणः, पुं, (हरति मनः क्रियते गीतादिना वा। हृ+"शॄस्वृहृमृदृभ्य इनच्।" उणा० २। ४६। इति इनच्।) सनामाख्यातपशुः। तत्पर्य्यायः। मृगः २ कुरङ्गः ३ वातायुः ४ अजिनयोनिः ५। इत्यमरः। २। ५। ८ ॥ सारङ्गः ६ चलनः ७ पृषत् ८ भीरुहृदयः ९ मधुः १० इति जटाधरः ॥ चारुलोचनः ११ जिनयोनिः १२ कुरङ्गमः १३ ऋष्यः १४ ऋश्यः १५ रिष्यः १६ रिश्यः १७ एणः १८ एणकः १९। इति शब्दरत्नावली ॥ क्षणतारः २० सुलोचनः २१ पृषतः २२। अस्य मांसगुणाः।
"एणस्य मांसं लघु शीतहृद्यं
त्रिदोषहृत् षड्रसदञ्च रुच्यम्।
कुरङ्गमांसं मधुरञ्च यद्वत्
कफापहं पित्तहरं मरुत्प्रदम् ॥"
इति राजनिर्घण्टः ॥* ॥
अपि च।
"हरिणः शीतलो बद्धविण्मूत्रो दीपनो लघुः।
रसे पाके च मधुरः सुगन्धिः सन्निपातहा ॥
एणः कषायो मधुरः पित्तास्रकफनाशनः।
संग्राही रोचनो हृद्यो बलस्रज्वरनाशनः ॥"
इति राजवल्लभः ॥* ॥
अन्यच्च।
"कुरङ्गो हृद्यो बल्यः शीतलः पित्तहृद्गुरुः।
मधुरो वातहृद् ग्राही किञ्चित्कफकरो मतः ॥
इति भावप्रकाशः ॥* ॥
हरिणस्य पञ्चभेदो यथा,—
"हरिणादापि विज्ञेयः पञ्चभेदोऽत्र भैरव।
ऋष्यः खड्गो रुरुश्चैव पृषतश्च मृगस्तथा।
एते बलिप्रदानेषु चर्म्मदाने च कीर्त्तिताः ॥"
इति कालिकापुराणे ६६ अध्यायः ॥* ॥
शुक्लवर्णः। विष्णुः। शिवः। (यथा, महाभारते। १३। १७। ११८।
"आषाढश्च सुषाढश्च ध्रुवोऽथ हरिणो हरः ॥")
सूर्य्यः। हंसः। इति केचित् ॥ (ऐरावतवंशोद्भूतनागविशेषः। यथा, महाभारते। १। ५७। ११।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः।
ऐरावतकुलादेते प्रविष्टा ह्यग्रजाहनम् ॥")
पाण्डुवर्णः। तदयुक्तं, त्रि ॥ इत्यमरः। १। ५। १३ ॥ (यथा, महाभारते,। १। १। १३५।
"स भोगान् विविधान् भुञ्जन् रत्नानि विविधानि च।
कथितो धृतराष्ट्रस्य विवर्णो हरिणः कृशः ॥")
हरिणनर्त्तकः, पुं, (हरिण इव नृत्यतीति। नृत्+ण्वुल्।) किन्नरः। इति शब्दरत्नावली ॥
हरिणहृदयः, त्रि, (हरिणस्येव भीतं हृदयं यस्य।) भीरुः। इति शब्दरत्नावली ॥
हरिणाक्षी, स्त्री, हृद्दविलासिनीनामगन्धद्रव्यम्। इति शब्दचन्द्रिका ॥ (हरिणस्य अक्षिणीव अक्षिणी यस्याः। समासे षः। ङीप्। मृगलोचना रमणी ॥)
हरिणाङ्कः, पुं, (हरिणः अङ्कचिह्नं यस्य।) चन्द्रः। इति शब्दरत्नावली ॥
हरिणी, स्त्री, (हरिण+ङीष्।) मृगी। (यथा, रघुः। २। ११।
"धनुर्भृतोऽप्यस्य दयार्द्रभाव-
माख्यातमन्तःकरणैर्विशङ्कैः।
विलोकयन्त्यो वपुरापुरक्ष्णां-
प्रकामविस्तारफलं हरिण्यः ॥")
स्वर्णप्रतिमा। इत्यमरः। ३। ४। ५० ॥ (हरित+ङीष्। तस्य नः।) हरिता। नारीभेदः। दृक्षभेदः। इति मेदिनी ॥ (तल्लक्षणं यथा,—
"नसमरला गः षड्वेदैर्हयैर्हरिणी मता ॥"
विस्तारस्तु छन्दःशब्दे द्रष्टव्यः ॥) मञ्जिष्ठा। स्वर्णयूथी। इति राजनिर्घण्टः ॥ तरुणी। वरस्त्री। इति शब्दरत्नावली ॥ (सुराङ्गनाभेदः। यथा, रघुः। ८। ७८।
"चरतः किल दुश्चरं तप-
श्चरमेऽहन्यहिरिन्दुना पुरा।
प्रजिघाय समाधिभेदिनीं
हरिरम्भो हरिणीं सुराङ्गनाम् ॥")

हरित्, पुं. (हरति नयनमनांसीति। हृ + "हृसृरुहियुधिभ्य इतिः।" उणा० १। ८८। इति इतिः।) नीलपीतमिश्रितवर्णः। सवुजरङ् इति भाषा॥ तत्पर्य्यायः। पालाशः २ हरितः ३। इत्यमरः। १। ५। १४॥ श्यामः ४। इति शब्दरत्नावली॥ अश्वविशेषः। इति मेदिनी॥ सूर्य्याश्वः। इति त्रिकाण्डशेषः॥ यथा, कुमारे। २। ४३।

"उत्पाट्य मेरुशृङ्गाणि तुङ्गानि हरितां खुरैः।
आक्रीड़पर्व्वतास्तेन कल्पिताः खेषु वेश्मसु॥")

मुद्गः। इति हेमचन्द्रः॥ सिंहः। सूर्य्यः। विष्णुः। इति केचित्॥ हरिदर्णविशिष्टे, त्रि॥

हरित्, स्त्री, (हृ + इतिः।) दिक्। इत्यमरः। १। ३। १॥ (यथा, रघुः। ३। ३०।

"ततार विद्याः पवनातिपातिभि-
र्दिशो हरिद्भिर्हरितामिवेश्वरः॥")

हरिद्रा। इति राजनिर्घण्टः॥

हरित्, पुं, क्लीं, (हृ + इतिः।) व्रणम्। इति मेदिनी॥

हरितं, क्लीं, (हृ + इतन्।) स्त्रीपेयकम्। इति राजनिर्घण्टः॥

हरितः, पुं, (हरति नयनमनांसीति। हृ + "हृग्रोभ्यामितन्। "उणा० ३। ८३। इति इतन्।) हरिदर्णः। इत्यमरः। १। ५। १४॥ सिंहः। इति केचित्॥ मन्यानकव्रणम्। इति राजनिर्घण्टः॥ हारीत इति लोके। तदर्थे पर्य्यायो यथा,—

"हारीतो रक्तपित्तः स्याद्धरितोऽपि स कथ्यते॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) हरिदर्णयुक्ते, त्रि। इति मेदिनी॥ (यथा, किराते। ५। ३८।

"परिसरविषयेषु लीढ़मुक्ता:
हरितलषोढ़मगङ्गया मृगीभिः॥")

हरितकं, क्लीं, (हरितो वर्णोऽस्यस्येति। अच्। ततः कन्।) शाकम्। इत्यमरः। २। ८। ३४॥ (यथा, माघे। ५। ५८।

"अश्रावि भूमिपतिभिः क्षणवीतनिद्रै-
रग्रन् पुरो हरितकं सुदमादधानः॥")

हरितपत्रिका, स्त्री, (हरितानि पत्राणि यस्याः। ततः स्वार्थे कन्। टापि अत इत्वम्।) पाची। इति राजनिर्घण्टः॥

हरितशाकः, पुं, (हरितः हरिदर्णः शाकः।) शिग्रुः। इति राजनिर्घण्टः॥ (शिग्रुशब्देऽस्य गुणादयो ज्ञातव्याः॥)

हरिता, स्त्री, (हरितो वर्णोऽस्यस्या इति। अच्। टाप्।) दूर्व्वा। इति मेदिनी॥ जयन्ती। हरिद्रा। कपिलद्राक्षा। पाची। नीलदूर्व्वा। इति राजनिर्घण्टः॥

हरितालं, क्लीं, (हरितं तदर्णं आलातीति। आ + ला + कः।) पीतवर्णधातुविशेषः। स तु हरिर्व्वीर्य्यम्। यथा,—

"हरितालं हरिर्व्वीर्य्यं लक्ष्मीवीर्य्यं मनःशिला।
पारदं शिववीर्य्यं स्यात् गन्धकं पार्व्वतीरजः॥"

इति वैद्यकम्॥

तत्पर्य्यायः। पिञ्जरम् २ पीतकम् ३ तालम् ४ आलम् ५ हरितालकम् ६। इत्यमरः। २। ८। १०३॥ गोदन्तम् ७ पीतलम् ८ नटमण्डनम् ९ हरिबीजम् १० सिद्धधातुः ११। इति जटाधरः॥ वर्णकम् १२ नटभूषणम् १३। इति रत्नमाला॥ पीतम् १४ गोरोचम् १५ चित्राङ्गम् १६ पिञ्जरकम् १७ वैदलम् १८ तालकम् १९ कनकरसः २० काञ्चनकम् २१ विड़ालकम् २२ चित्रगन्धम् २३ पिङ्गम् २४ पिङ्गसारम् २५ गौरीललितम् २६। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। स्निग्धत्वम्। त्वग्दोषभूतभौतिविषयवातरक्तानाशित्वञ्च। इति राजनिर्घण्टः॥ *॥

अपि च।

"हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम्।
तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परम्॥
स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत्।
पत्राख्यं तालकं विद्यात् गुणाढ्यं तद्रसायनम्॥
निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु।
स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिण्डतालकम्॥
हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम्।
कण्डुकुष्ठास्यरोगास्रकफपित्तव्रणान्॥
हरति च हरितालं चारुतां देहजातां
सृजति च बहुतापानङ्गसङ्कोचपीड़ाः।
वितरति कफवातौ कुष्ठरोगं विदध्या-
दिदमसितमशुद्धं मारितं चाप्यसम्यक्॥"

इति भावप्रकाशः॥ *॥

अथ तालस्याशुद्धस्य दोषमाह।

"अशुद्धं तालमायुर्हृत् कफमारुतमेहकृत्।
तापस्फोटाङ्गसंकोचान् कुरुते तेन शोधयेत्॥"

अथ तालकस्य शोधनविधिः।

"तालकं कणशः कृत्वा तच्चूर्णं काञ्जिके क्षिपेत्।
दोलायन्त्रेण यामैकं ततः कुल्माषजे द्रवे॥
तिलतैले पचेद्यामं यामञ्च विफलारसे।
दोलायन्त्रे चतुर्यामं पक्वं शुध्यति तालकम्॥"*॥

अथ तालकस्य मारणविधिः।

"सदलं तालकं ग्राह्यं पौनर्नवरसेन तु।
खल्वे विमर्दयेदेकं दिनं पश्चाद्विशोधयेत्॥
संशोध्य गोलकं तस्य कुर्य्यात्तच्च विशोधयेत्।
ततः पुनर्नवाचारैः स्थाल्यामर्द्धं प्रपूरयेत्॥
तत्र तद्गोलकं धृत्वा पुनस्तेनैव पूरयेत्।
आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे॥
स्थालीं चूर्ण्यां समारोप्य क्रमाद्वह्निं विवर्द्धयेत्।
दिनान्यन्तरशून्यानि पञ्चविंशं प्रदीपयेत्॥
एवं तन्म्रियते तालं मात्रा तस्यैकरत्तिका।
अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत्॥"

एवं शोधितस्य मारितस्य तालकस्य गुणाः।

"हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम्।
कण्डुकुष्ठास्यरागास्रकफपित्तव्रणान्॥"

अन्यच्च।

"तालकं हरते रोगान् कुष्ठमृत्युज्वरापहम्।
शोधितं कुरुते कान्तिं वीर्य्यवृद्धिं तथायुषः॥"

इति च भावप्रकाशः॥

हरितालः, पुं, पीतवर्णपक्षिविशेषः। हरियाल इति भाषा। तस्य मांसगुणाः।

"हरितालोऽविट्कः स्यात् कषायो मधुरो लघुः।
रक्तपित्तप्रशमनस्तृष्णाघ्नो वातकोपनः॥"

इति राजवल्लभः॥

हरितालकं, क्लीं, (हरितालमेव। स्वार्थे कन्।) हरितालम्। इत्यमरः। २। ८। १०३॥

हरितालिका, स्त्री, दूर्व्वा। इति त्रिकाण्डशेषः॥ सौरभाद्रशुक्लचतुर्थी हरितालिका। सौरभाद्रकृष्णचतुर्थ्यामुदितचन्द्रस्य नष्टचन्द्र इति संज्ञा। इति पञ्जिकायां प्रसिद्धा। तत्र चन्द्रदर्शननिषेधो यथा। भोजदेवः।

"शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम्।
मिथ्याभिशापं कुरुते न पश्येत्तत्र तत्ततः॥"

चतुर्थ्यां दर्शननिषेधात् तत्रोदितस्य चन्द्रस्य पञ्चम्यां दर्शने तु न दोषः। अतः।

"पञ्चाननगते भानौ पञ्चयोरुभयोरपि।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन॥"

चतुर्थ्यां नेक्षितव्य इति मुनिभिरुदित उक्त इत्यर्थः। अथवा चतुर्थ्यामित्यस्य प्रधानक्रियान्वयाभ्यर्हितत्वादीक्षितव्य इत्यनेनान्वयो न तूदित इत्यनेन। तथा च अभ्यर्हं प्रधानगामि इति सूत्रेऽभ्यर्हस्य शब्दस्य प्रधानेन सह सम्बन्ध इति भट्टनारायणव्याख्यानं इति। उदितस्त्वदर्शोदितव्याप्तिपरः स्वरूपाख्यानपरो वा।

"ब्राह्मणी तु शुना दष्टा जम्बुकोष्ट्रेण वा गवा।
उदितं सोमनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत्॥"

इति पराशरोक्तोदित इतिवत्॥ *॥

नन्वेकपदस्य कथमनेकार्थता इति चेन्न यावन्तोऽर्थास्तावन्ति पदानीति। तथा चोक्तम्।

"यावतामेव धातूनां लिङ्गं रूढ़िगतं भवेत्।
अर्थस्यैवाभिधेयस्तु तावद्भिर्गुणविग्रहः॥"

लिङ्गं समार्थम्। रूढ़िगतं प्रसिद्धम्। न त्वप्रसिद्धम्। इन हिंसागत्योरित्यादौ गमनादिकम्। अभिधेया वाच्यः। तावद्भिर्धातुभिर्गुणविग्रहो गुणैर्गणनाभिर्विग्रहो ग्रहणं यत्रार्थे स तथा। एतेन धातुसमसंख्यार्थत्वं पदस्य। ब्रह्मपुराणे सिंहार्काधिकारे।

"नारायणोऽभिशप्तस्तु निशाकरमरीचिषु।
स्थितश्चतुर्थ्यामद्यापि मनुष्याय पतेच्च सः॥
अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्दीक्ष्य मानवः।
पठेद्वाचेयिकावाक्यं प्राङ्मुखो नाप्युदङ्मुखः॥
अभिशप्तः परीवादविषयीभूतः। सोऽभिशापः।
धाचेयिकावाक्यं विष्णुपुराणे।

"सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।
सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः॥"

अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम्। इति तिथ्यादितत्त्वम्॥

हरितालो, स्त्री. (हरिताल+ङीष् ।) दूर्व्वा । आकाशरेखा । इति मेदिनी ॥ खड्गलता । इति विश्वः ॥ सौरभाद्रीयनक्षत्रविशेषयुक्त-चतुर्थी । यथा,—

"भाद्रे मासि सिते पक्षे वसुदैवतसंयुता ।
हरितालो चतुर्थी स्यात् सर्व्वाणीप्रीतिदा सदा ॥
भाद्रे मासि सिते पक्षे चतुर्थ्याख्याभियोगतः ।
ददाति खिखिषं घोरं दृष्टचन्द्रो न संशयः ॥
करचित्रानलचैंषु हरौ सूर्य्ये चतुर्थिका ।
हरितालो समाख्याता रुद्राणीप्रीतिदा सदा ॥"

इति राजमार्त्तण्डः ॥

हरिताश्म, [न्] क्ली, (हरितं अश्म ।) तुत्थम् । पेरोजम् । इति राजनिर्घण्टः ॥

हरित्पर्ण, क्ली, (हरित् पर्णमस्य ।) मूलकम् । इति राजनिर्घण्टः ॥ हरिद्वर्णपत्रयुक्ते, त्रि ॥

हरिदश्वः, पुं, (हरित् अश्वो यस्य ।) सूर्य्यः । (यथा, रघुः । ३ । २२ ।

"पुपोष हृद्यं हरिदश्वदीधिते-
रनुप्रवेशादिव बालचन्द्रमाः ॥")

अर्कद्रुमः । इत्यमरः । १ । ३ । २८ ॥

हरिदेवः, पुं, (हरिर्देवोऽधिष्ठात्रीदेवता यस्य ।) श्रवणनक्षत्रम् । इति हेमचन्द्रः ॥ हरिर्देवो यस्य इति बहुव्रीहौ, त्रि । हरिवासी देव-येति कर्म्मधारये हरिमात्रबोधकः ॥

हरिद्गर्भः, पुं, (हरिद्वर्णो गर्भो यस्य ।) हरिद्वर्ण-कुशः । हरिदर्भ इति च पाठः । तत्पर्य्यायः । खरपत्रः २ बृहच्छदः ३ अत्र पृथुच्छदोऽपि पाठः । शूरी ४ रूक्षदर्भः ५ दीर्घपत्रः ६ पवित्रकः ७ । अस्य गुणाः ।

"दर्भौ हौ च गुणे तुल्यौ तथापि च सिता-
धिकः ।
यदि श्वेतकुशाभावे त्वपरं योजयेद्विधिवत् ॥"

इति राजनिर्घण्टः ॥

अपि च ।

"दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीदाहवस्तिरुक्पदरास्रजित् ॥"

इति भावप्रकाशः ॥

तन्मूलगुणाः ।

"कुशमूलं हिमं रूक्षं मधुरं पित्तनाशनम् ।
रक्तज्वरदाहशोषकामलादोषमोक्षकृत् ॥"

इति राजनिर्घण्टः ॥

हरिद्रवः, पुं. (हरिवर्णः पिङ्गलवर्णः द्रव इव ।) नागकेशरचूर्णम् । इति चिकाण्डशेषः ॥

हरिद्रा, स्त्री, (हरितं पीतवर्णं रातीति । हरित् +रा+कः । टाप् ।) ओषधिविशेषः । हलुद इति भाषा । तत्पर्य्यायः । निशा २ काञ्चनी ३ पीता ४ वरवर्णिनी ५ । इत्यमरः । २ । ८ । ४१ ॥ कावेरी ६ उमा ७ वर्णवती ८ गौरी ९ पीष्या १० । इति जटाधरः ॥ पीतवालुका ११ हेमनामा १२ भद्रवासा १३ वर्षिणी १४ । इति शब्दरत्नावली ॥ पीतिका १५ रजनी १६ निशा १७ मेदिन्नी १८ बहुला १९ वर्षिनी २० रात्रिनामिका २१ । इति रत्नमाला ॥ हरित् २२ रञ्जनी २३ स्वर्णवर्णा २४ सुवर्णा २५ शिवा २६ दीर्घरागा २७ हलही २८ वराङ्गी २९ जनेष्टा ३० वरा ३१ वर्णदात्री ३२ पवित्रा ३३ हरिता ३४ विषघ्नी ३५ पिङ्गा ३६ मङ्गल्या ३७ मङ्गला ३८ लक्ष्मीः ३९ भद्रा ४० शिफा ४१ शोभा ४२ शोभना ४३ सुभगाह्वया ४४ श्यामा ४५ जयन्तिका ४६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफवातास्र-कुष्ठमेहकण्डूव्रणनाशित्वम् । देहवर्णविधायि-त्वञ्च । इति राजनिर्घण्टः ॥* । अन्यच्च ।

"हरिद्रा कफपित्तास्रशोथकण्डूव्रणापहा ।"

इति राजवल्लभः ॥

अपि च ।

"हरिद्रा काञ्चनी पीता निशाख्या वर-
वर्णिनी ।
क्रमिघ्ना हलदी योषित्प्रिया हरिविलासिनी ॥
हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत् ।
वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा ॥"*॥

अथ वनहरिद्रा ।

"वरण्डहलदीकन्दः कुष्ठवातास्रनाशनः ।"*।

अथ कर्पूरहरिद्रा ।

"दार्व्वी मेदास्रगन्धा च सुरभिश्चारु दारु च ।
कर्पूरा पद्मपत्रा स्यात् सुरभिः सुरनायिका ॥
आम्रगन्धिहरिद्रा या सा पीता वातला
मता ।
पित्तघ्नमधुरा तिक्ता सर्व्वकण्डूविनाशिनी ॥"

इति भावप्रकाशः ॥

हरिद्रागणेशः, पुं, (हरिद्रावर्णो गणेशः ।) गणेशविशेषः । तन्मन्त्रो यथा,—

अथ हरिद्रागणेशः ।

"पञ्चान्तको धरासंस्थो बिन्दुभूषितमस्तकः ।
एकाक्षरो महामन्त्रः सर्व्वकामफलप्रदः ॥"

अथ वशिष्ठ ऋषिर्गायत्री छन्दो हरिद्रागण-पतिर्देवता गकारो बीजं लकारः शक्तिर्बीजे-नैव षडङ्गकम् । ध्यानन्तु ।

"हरिद्राभं चतुर्ब्बाहुं हारिद्रावसनं विभुम् ।
पाशाङ्कुशधरं देवं मोदकं दन्तमेव च ॥"

ऐवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनादि-पीठमन्त्रान्तां पीठपूजां विधाय पुनर्ध्यात्वा गण-पतिं पूजयेत् । आवरणपूजाविनियोगादिकं एकाक्षरगणपतिवत् । अस्य पुरश्चरणं चतु-र्लक्षजपः । त्रिमधुरयुक्तहरिद्राचूर्णमिश्रितैः स्रक्कुसुमैरयुतहोमः । इत्यादि तन्त्रसारः ॥

हरिद्राङ्गः, पुं, (हरिद्राया इव अङ्गं यस्य ।) हरितालपक्षी । इति शब्दचन्द्रिका ॥

हरिद्राभः, पुं, (हरिद्राया आभा इव आभा यस्य ।) पीतशालः । कर्पूरकः । इति शब्द-चन्द्रिका ॥ पीतवर्णः । तद्युक्ते, त्रि ॥ इत्य-मरः । १ । ५ । १४ ॥ (यथा, तन्त्रसारे ।

"हरिद्राभं चतुर्ब्बाहुं हारिद्रावसनं विभुम् ॥")

हरिद्रारागः, त्रि, (हरिद्रायाः राग इव रागो यस्य । अचिरस्थायित्वाट्टेवास्य तथात्वम् ।) अस्थिरसौहृदः । इति हेमचन्द्रः ॥ तत्पर्य्यायः । क्षणमात्रानुरागी २ । हरिद्रा राग इव रागो-ऽस्येति हरिद्रारागः । हरिद्रारागस्याचिर-स्थायित्वात् तथेति यावत् । यथा,—

"क्षणमात्रानुरागी च हरिद्रारागं उच्यते ॥"

इति हलायुधः ॥

हरिद्रुः, पुं, (हरिवर्णः द्रुर्वृक्षः ।) वृक्षः । इति हेमचन्द्रः ॥ दारुहरिद्रा । इत्यमरः । २ । ४ । १० । १ ॥ तथा चोक्तम् ।

"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव च पञ्चधा ॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रुश्च हरिद्रुश्च पीतदारु कपीतकम् ।
दार्व्वी निशागुणा किन्तु नेत्रकर्णरुजं हरेत् ॥"

इति भावप्रकाशः ।*॥

वृक्षविशेषः । हलदीवा इति हिन्दी भाषा । तत्पर्य्यायः । पीतदारु ५ पीतकाष्ठः ३ पीतकः ४ कदम्बकः ५ सुपुष्पः ६ सुरालः ७ पीतकद्रुमः ८ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । मङ्ग-ल्यत्वम् । पित्तवातनानात्वग्दोषनाशित्वम् । अङ्गकान्तिकरत्वम् । बल्यत्वञ्च । इति राज-निर्घण्टः ॥

हरिद्वारं, क्ली, (हरेस्तत्प्राप्तेर्द्वारमिव ।) स्वनाम-ख्यातनगरम् । तच्च तीर्थविशेषः । यथा,—

"शृणु देवि महामाये पठेच्चर्ढीं शृणोत्यपि ।
गयायाश्चैव यत् पुण्यं काश्यां विश्वेश्वरार्चनात् ॥
प्रयागे सुष्ठुनाश्चैव हरिद्वारे हरेर्गृहे ।
तुल्यं पुण्यं भवेद्देवि सत्यं दुर्गे शिवे रमे ॥"

इति रुद्रयामले हरगौरीसंवादे रुद्रचण्डी ।*॥

तच्च गङ्गावतरणात् गङ्गाद्वारमिति ख्यातम् । तत्र स्नानादिफलं यथा,—

"ततो गच्छेत धर्म्मज्ञ नमस्कृत्य महागिरिम् ।
स्वर्गद्वारेण तत्तुल्यं गङ्गाद्वारं न संशयः ॥
तत्राभिषेकं कुर्व्वीत कोटितीर्थे समाहितः ।
लभते पुण्डरीकन्तु कुलञ्चैव समुद्धरेत् ॥
तत्रैकरात्रिवासेन गोसहस्रफलं लभेत् ॥"

इति पाद्मे भूमिखण्डे १२ अध्यायः ॥

अपिच ।

"सर्व्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ।
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥
सवासवाः सुराः सर्व्वे गङ्गाद्वारं मनोरमम् ।
समागत्य प्रकुर्व्वन्ति स्नानदानादिकं मुने ॥
दैवयोगान्मुने तत्र ये त्यजन्ति कलेवरम् ।
मनुष्यपक्षिकीटाद्यास्ते लभन्ते परं पदम् ॥"

इति तत्रैव क्रियायोगसारे ३ अध्यायः ।*॥

पुस्तकान्तरे गङ्गाद्वारस्थाने हरिद्वारमिति पाठः ॥

हरिनाम, [न्] क्ली, (हरेर्नाम ।) श्रीहरि-राख्यानम् । तन्माहात्म्यं यथा,—

"न कालनियमस्तत्र न देशनियमस्तथा ।

नोच्छिष्टादौ निषेधोऽस्ति हरेर्नामनि लुब्धक ॥
ध्यानं देवार्च्चनं ध्यानं धारणा नियमो यमः ।
प्रत्याहारः समाधिश्च हरिनामसमं न च ॥"
इति पाद्मोत्तरखण्डे ९८ अध्यायः ॥
अपि च ।
"हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥"
इति श्रीहरिभक्तिविलासस्य ११ विलासे बृहन्नारदीयपुराणवचनम् ॥ * ॥ वैष्णवानां जप्यहरिनामानि यथा,—
"हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।
हरे राम हरे राम राम राम हरे हरे ॥"
अस्य प्रमाणादि यथा,—
त्रिपुरोवाच ।
"वासुदेव महाबाहो ! शृणुष्व परमं वचः ।
त्वं हि देव सुरश्रेष्ठः किमर्थं तप्यते तपः ॥
कुलाचारं विना पुत्र ! नहि सिद्धिः प्रजायते ।
शक्तिहीनस्य ते सिद्धिः कथं भवति रे सुत ! ॥
ममांशसम्भवां लक्ष्मीं त्यक्त्वा किं तप्यते तपः ।
वृथा श्रमं वृथा पूजां जपञ्च विफलं सुत ! ॥
संयोगं कुरु यत्नेन शक्त्या सह तपोधन ! ।
सुखं विना सुतश्रेष्ठ ! विद्यासिद्धिर्न जायते ॥
साधके क्षोभमापन्ने देवता क्षोभमाप्नुयात् ।
तस्माद्भोगयुतो भूत्वा जपकर्म्म समारभेत् ॥
भोगं विना सुतश्रेष्ठ ! नहि मोक्षः प्रजायते ।
शृणु पुत्र सुतश्रेष्ठ दीक्षाया आनुपूर्व्विकीम् ॥
दशवर्षे तु संप्राप्ते द्वादशाभ्यन्तरे सुत ! ।
शृणुयाद्धरिनामानि षोड़शानि पृथक् पृथक् ।
हरिनाम विना पुत्र ! कर्णशुद्धिर्न जायते ॥
श्रीवासुदेव उवाच ।
शृणु मातर्म्महामाये विश्वबीजस्वरूपिणि ! ।
हरिनाम महामाये क्रमात्तत्त्व मतं वद ॥ * ॥
त्रिपुरोवाच ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।
हरे राम हरे राम राम राम हरे हरे ॥
द्वात्रिंशदक्षरैवेतं कलानामसृतं सदा ।
शृणु च्छन्दः सुतश्रेष्ठ ! हरिनाम्नस्तु वैव हि ॥
छन्दो हि परमं गुह्यं महत् पदमनव्ययम् ।
सर्व्वशक्तिमयं तत्त्वं हरिनाम तपोधन ! ॥"*॥
अस्य श्रीहरिनाममन्त्रस्य वासुदेव ऋषिर्गायत्री च्छन्दः श्रीत्रिपुरा देवता मम महाविद्यासिद्ध्यर्थे विनियोगः ॥ * ॥
"एतन्मन्त्रं सुतश्रेष्ठ ! प्रथमं शृणुयाद्वरः ।
श्रुत्वा द्विजमुखात् पुत्र दक्षकर्णे तपोधन ! ॥
आदौ छन्दस्ततो मन्त्रं श्रुत्वा गुरो भवेद्वरः ।
द्वादशाभ्यन्तरे श्रुत्वा कर्णशुद्धिमवाप्नुयात् ॥
कर्णशुद्धिं विना पुत्र महाविद्यामुपालभेत् ।
नारी वा पुरुषो वापि तत्क्षणान्नारकी भवेत् ॥
ततस्तु षोड़शे वर्षे संप्राप्ते सुरवन्दित ! ।
महाविद्यां ततः शुद्धां नित्यां ब्रह्मस्वरूपिणीम् ।
श्रुत्वा कुलसुखाद्विप्रात् साक्षात् ब्रह्ममयो भवेत् ।
कुर्य्यादेवद्वयं यः शिवोक्तञ्च तपोधन ! ।
तस्य सिद्धिर्भवेद्विद्या अष्टैश्वर्य्यमवाप्नुयात् ॥
रहस्यं हि विना पुत्र ! श्रम एव हि केवलम् ।
अतएव सुतश्रेष्ठ ! रहस्यरहितस्त्वं ।
रहस्यरहितां विद्यां न जपेत्तु कदाचन ॥ * ॥
हकारस्तु सुतश्रेष्ठ ! शिवः साक्षान्न संशयः ।
रेफस्तु त्रिपुरादेवी मम मूर्त्तिमयी सदा ॥
एकारश्च भगं विद्यात् साक्षादयोनिं तपोधन ! ।
एकारः शून्यरूपी च रेफो विग्रहधारिणः ।
हरे तु त्रिपुरा साक्षान्मम मूर्त्तिर्न संशयः ॥
ककारः कामदा कामरूपिणी स्फुरदव्ययम् ।
ऋकारश्च सुतश्रेष्ठ ! ज्येष्ठा शक्तिरितीरिता ॥
ककारश्च ऋकारश्च कामिनी वैष्णवी कला ॥
षकारश्चन्द्रमा देवः कलाषोड़शसंयुतः ॥
णकारश्च सुतवर ! साक्षान्निर्वृतिरूपिणी ।
हयोरैक्यं तपःश्रेष्ठ ! महामाया जगन्मयी ॥
कृष्ण कृष्ण सुतश्रेष्ठ ! महामाया जगन्मयी ।
हरे हरे ततो देवि ! शिवशक्तिस्वरूपिणी ॥
हरे रामेति च पदं शिवशक्तिमयं सुत ! ।
हरे हरे इति पदं शक्तिहृदयसमन्वितम् ॥
आद्यन्ते प्रणवं दत्त्वा यो जपेद्दशधा द्विजः ।
स भवेत् सुतवर ! श्रेष्ठो महाविद्यासु सुन्दरः ॥
हरिनाम सुतश्रेष्ठ ! ज्येष्ठं तु वैष्णवं मतम् ॥
एवं षोड़श नामानि द्वात्रिंशदक्षराणि च ।
आद्यन्ते प्रणवं दत्त्वा चतुस्त्रिंशदनुत्तम ! ॥
हरिनाम विना पुत्र ! दीक्षा च विफला सदा ।
कुलदेवसुखाच्छ्रुत्वा हरिनाम पराचरम् ॥
ब्राह्मणश्चत्रवैश्याश्च शूद्रः श्रुत्वा पराचरम् ।
दीक्षां कुर्य्यात् सुतश्रेष्ठ ! महाविद्यासु सुन्दर ! ॥
दीक्षां वापि हरेर्न्नाम यदि शूद्रमुखात् प्रिये ! ।
अज्ञानादथवा गृह्णीयात् तस्य पापफलं शृणु ॥
शूद्रः शूद्रमुखात् श्रुत्वा पित्र्यां वा मन्त्रमुत्तमम् ।
कोटिवंशान् समादाय रौरवं प्रति गच्छति ।
अपि दाढ्यहोत्रोर्वा द्वयोरपि समं फलम् ॥
ब्रह्महत्यामवाप्नोति अक्षरं अक्षरं प्रति ।
शृणु पुत्र ! वासुदेवप्रसङ्गाद्वचनं मम ॥"
इति श्रीवासुदेवमाहात्म्ये राधातन्त्रे त्रिपुरावासुदेवसंवादे द्वितीयपटलः ॥
हरिनामा, [न्] पुं, (हरेर्नाम नाम यस्य ।) मुद्गः । इति त्रिकाण्डशेषः ॥
हरिनेत्रं, क्ली, (हरेर्नेत्रमिव ।) श्वेतपद्मम् । इति राजनिर्घण्टः ॥ श्रीहरेर्नेत्रम् । यथा,—
"विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ।
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥
हरिपर्णचतुष ॥
हरिनेत्रः, पुं, (हरेर्मर्कटस्येव नेत्रमस्य) पेचकः । इति त्रिकाण्डशेषः ॥
हरिन्मणिः, पुं, (हरिवर्णो मणिः ।) मरकतमणिः । इत्यमरः । २।८।८२ ॥ (यथा, माघे । २ । ४८ ।
"हरिन्मणिश्यामलषाभिरामै-
र्गृहाणि नीलैरिव यत्र रेजुः ॥")
हरिन्मुद्गः, पुं, (हरिवर्णो मुद्गः ।) शारदमुद्गः । इति राजनिर्घण्टः ॥
हरिपर्णं, क्ली, (हरि हरिवर्णं पर्णं यस्य ।) मूलकम् । इति हेमचन्द्रः ॥
हरिप्रियं, क्ली, (हरेः प्रियम् ।) कृष्णचन्दनम् । इति शब्दचन्द्रिका ॥ तच्च कालीयकम् कालियाकाष्ठमिति ख्यातम् । इति रत्नमाला ॥ (यथा, "कालीयकन्तु कालीयं पीताभं हरिचन्दनम् ।
हरिप्रियं कालसारं तथाकालानुसार्य्यकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
उशीरम् । इति राजनिर्घण्टः ॥
हरिप्रियः, पुं, (हरेः प्रियः ।) कदम्बवृक्षः । इति शब्दचन्द्रिकामरौ । २ । ४ । ४२ ॥ पीतभृङ्गराजः । विष्णुकन्दः । करवीरः । शुक्लः । बन्धूकः । इति राजनिर्घण्टः ॥ शिवः । वातुलः । कङ्कुकः । इति केचित् ॥
हरिप्रिया, स्त्री, (हरेः प्रिया ।) लक्ष्मीः । इत्यमरः । १ । १ । २८ ॥ तुलसी । द्वादशीतिथिः । पृथिवी । इति केचित् ॥
हरिबालुकं, क्ली, (हरिप्रिया बालुका यत्र) एलवालुकम् । इत्यमरः । २ । ४ । १२१ ॥
हरिभक्तः, पुं, (हरेर्भक्तः ।) हरिसेवकः । तस्य लक्षणं यथा,—
"सर्व्वजीवेषु यो विष्णुं भावयेत् समताधिया ।
हरौ करोति भक्तिञ्च हरिभक्तः स च स्मृतः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥
हरिभद्रं, क्ली, (हरेर्भद्रं यस्मिंस्यात् ।) हरिबालुकम् । इति शब्दचन्द्रिका ॥
हरिभाविणी, स्त्री, हरिं भावयितुं शीलं यस्याः सा । (हरि + भू + णिनि । ङीप् ।) हरिभावनाशीला । इति मुग्धबोधव्याकरणम् ॥
हरिभुक्, [ज्] पुं, (हरिं भेकं भुङ्क्ते इति । भुज् + क्विप् ।) सर्पः । इति शब्दरत्नावली ॥
हरिमन्थः, पुं, गणिकारिका । इति शब्दरत्नावली ॥ चणकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"चणको हरिमन्थः स्यात् सकलप्रिय इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
देशविशेषः । इति हरिमन्थजशब्दटीकायां भरतः ॥
हरिमन्थकः, पुं, (हरिमन्थ एव । स्वार्थे कन् ।) चणकः । इत्यमरः । २ । ९ । १८ ॥
हरिमन्थजः, पुं, चणकः । इत्यमरः । २ । ९ । १८ ॥ हरिमन्थे देशे प्राचुर्य्येण जातवान् हरिमन्थजः । हनजनादिति डः । इति भरतः ॥ (क्लीबेऽपि इष्यते । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"स्वादुपाकरसं शाकं दुर्ज्जरं हरिमन्थजम् ॥")
कृष्णसुद्गः । इति हेमचन्द्रः ॥
हरियः, पुं, (हरिं पीतवर्णं याति प्राप्नोतीति । या + कः ।) पीतवर्णघोटकः । इति हेमचन्द्रः ॥
हरिले, अ, नार्य्यामौ चेटीसम्बोधनम् । इति केचित् ॥

हरिलोचनः, पुं, (हरेरिव लोचनमस्य।) कुलीरः। इति त्रिकाण्डशेषः॥ पेचकः। इति केचित्॥ हरिदर्णचक्षुर्युक्ते, त्रि॥

हरिवर्षं, क्ली, (हरिप्रियं वर्षम्।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः॥ स तु निषधहेमकूटपर्व्वतयोर्मध्ये वर्त्तते। यथा। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्। इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥ किञ्च। हरिवर्षे चापि भगवान् नरहरिरूपेणास्ते। तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलचरितः प्राह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते। इति च तत्रैव १८ अध्यायः॥

हरिवंशः, पुं, (हरेर्वंशः।) श्रीकृष्णस्य सन्तानः। यथा,—

"हरिवंशं प्रवक्ष्यामि कृष्णमाहात्म्यलक्षणम्।
वसुदेवात्तु देवक्यां वासुदेवो बलोऽभवत्॥
रुक्मिणीसत्यभामाद्या अष्टौ पत्न्यो हरेः पुरा।
षोड़शस्त्रीसहस्राणि अन्योन्यासन् महात्मनः॥
तासां पुत्राश्च पौत्राद्याः शतशोऽथ सहस्रशः।
रुक्मिण्याञ्चैव प्रद्युम्नो न्यवधीत् सम्बरञ्च यः॥
तस्य पुत्रोऽनिरुद्धोऽभूत् उषाबाणसुतापतिः।
अनिरुद्धाद्बभूवज्रः स च राजा गते हरौ।
साम्बोपनिं गुरुं चक्रे सपुत्रं यादवाधिपः॥"

इति गारुड़े १४८। १; ६—८; ११॥

विस्तारस्तु महाभारतीयहरिवंशपर्व्वणि द्रष्टव्यः॥

हरिवल्लभा, स्त्री, (हरेर्वल्लभा।) जया। तुलसी। इति राजनिर्घण्टः॥ लक्ष्मीश्च॥

हरिवान्, [त्] पुं, (हरिरश्वोऽस्यास्येति। मतुप्। "छन्दसीरः।"८।२।१५। इति मस्य वः। इन्द्रः। इति हलायुधः॥ हरिविशिष्टे, त्रि॥ (यथा, वाजसनेयसंहितायाम्। २०। ३८।

"सुपाणो बर्हिर्हरिवान्न इन्द्रः
प्राचीनं शीदत्प्रदिशा पृथिव्याः॥")

हरिवासरं, क्ली, (हरेर्वासरम्।) श्रीहरेर्दिनम्। तत्तु एकादशीद्वादशीतिथिरूपम्। यथा,—

"एकादशी द्वादशी च प्रोक्ता श्रीचक्रपाणिनः॥"
"एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्।
न चात्र विधिलोपः स्यादुभयोर्देवता हरिः॥"

इति च तिथ्यादितत्त्वम्॥

अपि च।

"यानि कानि च पापानि ब्रह्महत्यादिकानि च।
अन्नमाश्रित्य सर्व्वाणि तिष्ठन्ति हरिवासरे॥
अघं स केवलं भुङ्क्ते यो भुङ्क्ते हरिवासरे॥"

इत्येकादशीतत्त्वम्॥ * ॥

द्वादश्याः प्रथमपादः। यथा। विष्णुधर्म्मोत्तरे।

"द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः।
तमतिक्रम्य कुर्व्वीत पारणं विष्णुतत्परः॥"

इति तिथ्यादितत्त्वम्॥ * ॥

अथ हरिवासरे जागरणादिविधिः। स्कान्दे श्रीब्रह्मनारदसंवादे।

"शृणु नारद! वक्ष्यामि जागरस्य तु लक्षणम्।
येन विज्ञातमात्रेण दुर्लभो न जनार्दनः॥
गीतं वाद्यं च नृत्यं च पुराणपठनं तथा।
धूपं दीपं च नैवेद्यं पुष्पगन्धानुलेपनम्॥
फलमर्घ्यञ्च श्रद्धा च दानमिन्द्रियनिग्रहः।
सत्यान्वितं विनिद्रञ्च मुदा युक्तं क्रियान्वितम्॥
सायर्ज्यं चैव सोत्साहं पापालस्यादिवर्ज्जितम्।
प्रदक्षिणाभिसंयुक्तं नमस्कारपुरःसरम्॥
नीराजनसमायुक्तमनिर्विण्णेन चेतसा।
यामे यामे महाभाग! कुर्य्यादारात्रिकं हरेः।
एतैर्गुणैः समायुक्तं कुर्य्याज्जागरणं हरेः॥"*॥

किञ्च।

"य एवं कुरुते भक्त्या वित्तशाठ्यविवर्ज्जितः।
जागरं वासरे विष्णोर्लीयते परमात्मनि॥
धनवान् वित्तशाठ्येन यः करोति प्रजागरम्।
तेनात्मा हारितो नूनं कितवेन दुरात्मना॥"

तत्रैव श्रीमदुमामहेश्वरसंवादे।

"सशास्त्रं जागरं यत्र नृत्यगान्धर्व्वसंयुतम्।
सवाद्यं तालसंयुक्तं सदीपं साधुभिर्युतम्॥
उपचारैश्च संयुक्तं यथोक्तैर्भक्तिभावितैः।
मनसस्तुष्टिजननं समुदं लोकरञ्जनम्॥
गुणैर्द्वादशभिर्युक्तं जागरं माधवप्रियम्।
कर्त्तव्यं तत् प्रयत्नेन पक्षयोः शुक्लकृष्णयोः॥"*॥

किञ्च।

"परापवादयुक्तं तु मनः प्रशमवर्ज्जितम्।
शास्त्रहीनमगान्धर्व्वं तथा दीपविवर्ज्जितम्॥
गन्धोपचाररहितमुदासीनं सनिद्रकम्।
कलियुक्तं विशेषेण जागरं नवधाधमम्॥"*॥

किञ्च। तत्रैव।

"अभावे वाचकस्यापि गीतं नृत्यञ्च कारयेत्।
वाचके सति देवेशि! पुराणं प्रथमं पठेत्॥"*॥

अथ जागरणनित्यत्वम्।

स्कान्दे ब्रह्मनारदसंवादे।

"अतीतानागतान् वापि पातयिष्यन्ति पूर्व्वजान्।
अकुर्व्वाणाः प्रपत्स्यन्ति पुत्रधर्म्मव्यतिक्रमम्।
जायते नरके वासः पितृभिः सह कालयः॥
न पुरश्चरणात् पापं व्रतैर्दानैः समाधिभिः।
विलयं याति विप्रेन्द्र! विना द्वादशीजागरम्॥"

तत्रैवोमामहेश्वरसंवादे।

"संप्राप्ते जागरे विष्णोर्ये न कुर्व्वन्ति जागरम्।
भ्रश्यते सुकृतं तेषां वैष्णवानाञ्च निन्दया॥
मतिर्न जायते यस्य द्वादश्यां जागरं प्रति।
न हि तस्याधिकारोऽस्ति पूजने केशवस्य हि॥"

अतएवोक्तं ब्रह्मणा। तत्रैव।

"हृदये वर्त्तते यस्य सदा योगीश्वरो हरिः।
मतिस्तत्पद्यते तस्य द्वादशीजागरोपरि॥"*॥

सामान्येन पुरास्मेषि गीतनृत्यादिनित्यता।
अधुना लिख्यते सैव जागरे च विशेषतः॥"

अथ जागरे गीतादिनित्यत्वम्। स्कान्दे उमामहेश्वरसंवादे।

"मूकवत्तिष्ठते यो वै गानं पाठञ्च नाचरेत्।
सप्त जन्मानि मूकत्वं जायते जागरे हरेः॥
यो न नृत्यति मूढ़ात्मा पुरतो जागरे हरेः।
पङ्गुत्वं जायते तस्य सप्त जन्मादि पार्व्वति!॥

पाद्मे पत्नवर्द्धनीप्रस्तावे।

"स्तुवन्ति न प्रशंसन्ति ये जना जागरं हरेः।
नोत्सवो भवते तेषां सप्तहे जन्मानि सप्त च॥
स्तुवन्ति ये प्रशंसन्ति जागरं चक्रपाणिनः।
नित्योत्सवो भवेत्तेषां जन्मानि दश पञ्च च॥"

अथ जागरणमाहात्म्यम्।

स्कान्दे ब्रह्मनारदसंवादे तथा श्रीप्रह्लादसंहितायाञ्च।

"न गयापिण्डदानेन न तीर्थैर्बहुभिर्मखैः।
पूर्व्वजा मुक्तिमायान्ति विना द्वादशीजागरम्।
सर्व्वावस्थोऽपि यः कुर्य्याद्वादश्यां जागरं हरेः।
यामेनैकेन दहते पापं जन्मसहस्रजम्॥*॥
यः कुर्य्याद्दीपदानन्तु रात्रौ जागरणे हरेः॥
निमिषे निमिषे विप्र! लभते गोशतं फलम्॥
यः कुर्य्याज्जागरे पूजां द्वादश्यां कुसुमैर्हरेः।
पुष्पे पुष्पेऽश्वमेधस्य फलमाप्नोति मानवः॥
यो दद्याद्गुरुं विष्णोः पूजां कृत्वा तु जागरे।
निमिषार्द्धेन लभते तिलपात्रशतं फलम्॥
निमेषञ्च दहेद्रूपं सप्ततं गुग्गुलुं हरेः।
लभते जागरे विप्र! पुण्यं मासससुद्भवम्॥
यो दद्याज्जागरे विष्णोर्हविष्यान्नससुद्भवम्॥
नैवेद्यं लभते पुण्यं शालिशैलससुद्भवम्॥
पक्वान्नानि च यो दद्यात् फलानि विविधानि च॥
जागरे पद्मनाभस्य लभते गोऽयुतं फलम्॥
सकर्पूरञ्च ताम्बूलं यो ददाति हि जागरे।
पद्मनाभप्रसादेन श्वेतद्वीपे वसेच्चिरम्॥
जागरे पद्मनाभस्य यः कुर्य्यात् पुष्पमण्डपम्।
स पुष्पकविमानैस्तु क्रीड़ते ब्रह्मसद्मनि॥
जागरे पद्मनाभस्य सकर्पूरं तथागुरुम्।
दहते दहते पापं जन्मलक्षसमुद्भवम्॥
ज्ञानं ददाति कृष्णस्य दधिक्षीरघृतादिभिः।
रात्रौ जागरणे विप्रा! मुक्तिभागी भवेद्धि सः॥
दिव्याम्बराणि यो दद्याज्जागरे समुपस्थिते।
मन्वन्तराणि वसते तन्तुसंख्यासमानि वै॥
दद्यादाभरणं विष्णोर्हेमजं रत्नसम्भवम्।
सप्तकल्पानि वसते सोत्सङ्गे मत्प्रियो हि सः॥
श्रीचन्दनं सकर्पूरं सागुरुं तु सकेशरम्।
युक्तं सुगमदेनापि यच्छते हरिजागरे॥
एकैकं सुनिशार्द्धल! अश्वमेधाधिकं फलम्।
कलौ भवेन्न सन्देहो वासुदेवप्रसादतः॥
घृतेन दीपकं विष्णोर्गव्येन च विशेषतः।
ज्वालयेज्जागरे रात्रौ निमेषे गोऽयुतं फलम्॥
जागरे वासुदेवस्य कर्पूरेण च दीपकम्।
यो ज्वालयति कोटीनां कपिलानां लभेत् फलम्।
आरात्रिकं हरेर्यस्तु सकर्पूरन्तु जागरे।
कुरुते मोक्षमाप्नोति कुलायुतसमन्वितः॥
विना हि योऽपि कर्पूरं कुर्य्यादारात्रिकं हरेः॥

निःस्रोऽपि जागरे विष्णोर्दाता भूरिफलं लभेत् ॥
वारिजं वारिणा पूर्णं शिरसि स्थापयेद्धरिम् ।
बिभर्त्ति शिरसा सोऽयं गङ्गास्नानकृतं फलम् ॥
कृत्वा पूजां हरेर्यस्तु जागरे पुरतः शुचिः ।
पठेन्नामसहस्रन्तु गीतां नागविमोक्षणम् ॥
माङ्गल्यस्तवनं पुण्यं स्तवराजमनुस्मृतिम् ।
वैदिकानि च अध्यानि भक्त्या रात्रौ मुहुर्मुहुः ॥
भवेत् प्रत्यक्षरं पुण्यं कपिलागोशतोद्भवम् ।
जागरे यज्ञरूपस्य पुरतः पठतो हरेः ॥
यः पुनः कुरुते गीतं सनृत्यं वाद्यसंयुतम् ।
न तत् क्रतुशतैः पुण्यं व्रतदानशतैरपि ॥
यः पुनः कुरुते गीतं विलज्जो नृत्यते यदि ।
लभते निमिषार्द्धेन चतुराश्रमजं फलम् ॥
जागरे पद्मनाभस्य कुर्य्यात् पुस्तकवाचनम् ।
श्लोकसंख्यां वसेत् स्वर्गे युगानि हरिसन्निधौ ॥
कुर्य्याद्दन्दनमालां यो रम्भास्तम्भैः सुशोभनैः ।
चूतपल्लोद्भवैः पत्रैर्जागरे चक्रपाणिनः ॥
युगानि पत्रसंख्यानां स्वर्गे तस्योत्सवो भवेत् ।
पूज्यते वासवाद्यैश्च क्रीड़ते चाप्सरोगतः ॥
नृत्यमानस्य मर्त्यस्य ये केचिन्निरयं गताः ।
विमुक्ता धर्म्मराजेन मुक्तिं यान्ति हरेः पदम् ॥
गीतध्वनिसमन्तुष्टो जागरे तु रमापतिः ।
वासवंस्याधिकं सौख्यं दद्यान्मन्वन्तरं शतम् ॥
नृत्येन मर्त्ये सौख्यं तु स्वर्गे नृत्येन जागरे ।
रसातले तथा सौख्यं मुक्तिर्नृत्यादवाप्यते ॥
प्रेक्षणीयप्रदानेन यत् पुण्यं कथितं बुधैः ।
न तत् कोटिमखैः पुण्यं योगैः सांख्यैरवाप्यते ॥
दीपमालां हरेरग्रे यः करोति प्रजागरे ।
विमानकोटिसंयुक्तः कल्पान्तं वसते दिवि ॥*॥
चरितं रामचन्द्रस्य यः शृणोति हरेर्दिने ।
रात्रौ वाल्मीकिना प्रोक्तं तत्समो न हि वैष्णवः ॥
यः पुनः पठते रात्रौ महाभारतसम्भवाम् ।
कथां जागरणे विष्णोः कुलकोटिं नयेद्दिवम् ॥
औत्तानपादेश्चरितं ध्रुवस्य च महात्मनः ।
कृष्णस्य बालचरितं जागरे पठते हि यः ॥
युगकोटिसहस्रस्य क्षयः पापस्य जायते ।
तस्माज्जागरणं कार्य्यं पक्षयोः शुक्लकृष्णयोः ॥
श्रीमद्भागवतं भक्त्या पठते विष्णुसन्निधौ ।
जागरे तत्पदं याति कुलहन्दसमन्वितः ॥
अष्टादश पुराणानि पुराणपुरुषस्य च ।
दयितानि सदा विष्णोर्विशेषेण तु जागरे ॥
यो गीतां पठते रात्रौ विष्णोर्नामसहस्रकम् ।
वेदोत्थानां पुराणानां जागरी पुण्यमाप्नुयात् ॥
धेनुदानं तु यः कुर्य्याज्जागरे चक्रपाणिनः ।
लभते नात्र सन्देहः सप्तद्वीपावनीफलम् ॥
जागरे पद्मनाभस्य यः कुर्य्याच्छुभमण्डपम् ।
मण्डले ध्रुवलोकस्य यावत्तिष्ठति पद्मभूः ॥ * ॥
सर्व्वेषामेव पुण्यानां महत् पुण्यं महीतले ।
द्वादश्यां जागरे विप्र ! प्रसिद्धं भुवनत्रये ॥
जागरं ये चिकीर्षन्ति कर्म्मणा मनसा गिरा ।
न तेषां पुनरावृत्तिर्विष्णुलोकात् कथञ्चन ॥
जागरे नृत्यमानन्तु दृष्ट्वा वै द्वादशीदिने ।
रात्रौ मार्जयते शौरिः पापं तस्य युगार्ज्जितम् ॥"
इति श्रीहरिभक्तिविलासे १३ विलासः ॥

हरिवाहनः, पुं, (हरिर्वाहनः ।) गरुड़ः । इति हारावली ॥ (हरिरश्वैश्यवा वाहनं यस्येति । इन्द्रः । यथा, महाभारते । १ । २६ । १ ।
एवं स्तुतस्तदा कद्रू भगवान् हरिवाहनः ।
नीलजीमूतसङ्घातैः सर्व्वमम्बरमावृणोत् ॥"
तथाच तत्रैव । ३ । ४६ । ५२ ।
"तत आनाय्य तनयं विविक्ते हरिवाहनः ।
सान्त्वयित्वा शुभैर्व्वाक्यैः स्वयमानोऽभ्यभाषत ॥")

हरिवीजं, क्ली, (हरेर्वीजं वीर्य्यम् ।) हरितालम् । इति जटाधरः ॥

हरिवर्षं, क्ली, हरिवर्षम् । इति भूरिप्रयोगः ॥

हरिशयनं, क्ली, (हरेः शयनम् ।) श्रीहरेर्निद्रा । यथा । उपनयने दीपिकायाम् ।
"जीवार्केन्दूड़ुगौ हरिशयनवह्निर्भास्करे चोत्तरस्थे
स्वाध्याये वेदवर्षाधिप इह शुभदे चौरमे नादितौ च ।"
इत्यादि ज्योतिस्तत्त्वम् ॥*॥
तद्विधिर्यथा । वामनपुराणे ।
"एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् ।
शेषाद्विभोगपर्य्यङ्कं कृत्वा संपूज्य केशवम् ॥
अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः ।
लब्ध्वा पीताम्बरधरं देवं निद्रां समानयेत् ॥"
अनुज्ञां लब्ध्वेत्यन्वयः । एकादशीसमये दिवा शयनं परिकल्पयेत् रात्रौ द्वादशीदिने निद्रेति ॥ * ॥ व्यक्तं वाराहे ।
"आषाढ़शुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्म्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्कोऽपि मन्त्रेण नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्धापि हि तत्रीणं चातुर्म्मास्यं व्रतं नरः ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत्समापयेत् ॥"
मात्स्ये ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
मधुस्वरो भवेन्नित्यं नरो गुड़विवर्ज्जनात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्गः प्रजायते ।
कटुतैलपरित्यागात् शत्रुनाशः प्रजायते ॥
लभते सन्ततिं दीर्घां क्षालीपाकमभक्षयन् ।
सदा सुखी सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निराधिर्नीरुगोजस्वी विष्णुभक्तश्च जायते ।
एकान्तरोपवासेन विष्णुलोकमवाप्नुयात् ॥
धारणाव्रतलोलश्च गङ्गास्नानं दिने दिने ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ॥
घृतत्यागात् सुलावण्यं सर्व्वं स्निग्धं वपुर्भवेत् ।
फलत्यागात्तु मतिमान् बहुपुत्रश्च जायते ॥
नमो नारायणायेति जप्तानशनजं फलम् ।
पादाभिवन्दनाद्विष्णोर्लभेद्दानजं फलम् ।
एवमादिव्रतैः पार्थ ! तुष्टिमायाति केशवः ॥ *
सनत्कुमारः ।
"इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! यद्यपूर्णं त्वहं स्त्रिये ।
तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥"
समाप्तौ च ।
"इदं व्रतं मया देव ! कृतं प्रीत्यै तव प्रभो ! ।
न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ! ॥"*॥
अत्रैव यतिमधिकृत्य काठकगृह्यम् ।
"एकरात्रं वसेद् ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥"
एतदग्रहणविषयम् । ऊर्द्धं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासीति गृह्योक्तेः ॥ * ॥ मात्स्ये ।
"शेते विष्णुः सदाषाढ़े भाद्रे च परिवर्त्तते ।
कार्त्तिके परिबुध्येत शुक्लपक्षे हरेर्दिने ॥"
भविष्यनारदीययोः ।
"मैत्राद्यपादे स्वपितीह विष्णु-
र्वैष्णव्यमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥"
मैत्रमनुराधा वैष्णव्यं श्रवणा । पौष्णं रेवती ॥*॥
भविष्ये ।
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् ॥"
अन्यत्र स्वापादिविहितरात्र्यादीतरकाले दशमीप्रदोषदोष ।
"किं तस्मैवाद्यपादेन दशम्यंशेन यो दिवा ।
पौष्णशेषेण किन्तेन प्रतिपद्यश्च यो निशि ॥"
दशम्यंशेन दशम्या अंशो यत्र पादे तेन यः पादो दिवा प्राप्तस्तेन वा किम् । अत्र दशमीप्रतिपदोर्व्वर्ज्जनात् तदितरैकादश्यादिपञ्चतिथिषु मैत्रादिनक्षत्रपादविशेषलाभे द्वादशीं विनापि शयनादिरिति प्रतीयते ॥ * ॥
वचनान्तरम् ।
"रेवत्यन्तो यदा रात्रौ द्वादश्या च समायुतः ।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥"
दिनान्तेत्रिधाविभक्तदिनत्रितीयभागे दिवोत्थानमित्यनुरोधात् । विष्णुधर्म्मोत्तरे ।
"विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते ।
द्वादश्यामृक्षसंयोगे पादयोगो न कारणम् ॥
अप्राप्ते द्वादशीभूते उत्थानशयने हरेः ।
पादयोगेन कर्त्तव्ये नाहोरात्रं विचिन्तयेत् ॥"
वराहपुराणम् ।
"द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे ।
आ-भा-का-सितपक्षेषु शयनावर्त्तनादिकम् ॥"
आ-भा-कानां आषाढ़भाद्रकार्त्तिकानाम् ॥ * ॥
यतश्च द्वादश्यां निशादौ नक्षत्रमाद्ययोगात् । द्वादश्यामृक्षाभावे तिथ्यन्तरे निशाद्यनादरेण पादविशेषयोगात् । तदभावे द्वादश्यां सन्ध्यायामेव शयनादिकम् । बोधनन्तु द्वादश्यां रात्र

रेवत्यन्तपादयोगे दिनद्वतीयभागे इति विश्वेषः ॥
शयने मन्त्रमाह वराहपुराणम् ।
"नमो नारायणायेत्युक्त्वा इमं मन्त्रमुदीरयेत् ।
पश्यन्तु मेघान्यपि मेघश्यामं
त्वामागतं सिध्यमानं महीमिमाम् ।
निद्रां भगवान् गच्छातु लोकनाथ
वर्षास्विमं पश्यतु मेघवृन्दम् ॥
ज्ञात्वा च पश्येव च देवनाथ
मासाश्चत्वारि वैकुण्ठस्य तु पश्यनाथ ! ॥"
ततश्च ।
"सुप्ते त्वयि जगन्नाथे जगत् सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत जगत् सर्व्वं चराचरम् ॥"
इत्यनेन पूजयेत् ॥* पार्श्वपरिवर्त्तने तु ।
"वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव ! ॥"
इति पठेत् ॥
"त्वयि सुप्ते जगन्नाथे जगत् सुप्तं भवेदिदम् ।
विबुद्धे त्वयि बुध्येत जगत् सर्व्वं चराचरम् ॥"
इत्यनेन पूजयेत् ॥
नैयतकालिककृत्यतरौ ब्रह्मपुराणम् । कार्त्तिक-शुक्लपक्षमधिकृत्य ।
"उपवासः प्रकर्त्तव्य एकादश्यां प्रजागरः ।
द्वादश्यां वासुदेवस्य पूजितव्यः प्रयत्नतः ॥"*॥
उत्थानमन्त्रस्तु ।
महेन्द्ररुद्रैरभिनूयमानो
भवान्मुनिर्वन्दितवन्दनीयः ।
प्राप्ता तवेयं किल कौमुदाख्या
जागृध्व जागृध्व च लोकनाथ ! ॥
मेघा गता निर्म्मलपूर्णचन्द्रः
शारद्यपुष्पाणि च लोकानाथ ! ।
अहं ददानीति च पुष्पहेतो-
र्जागृध्व जागृध्व च लोकनाथ ! ॥"
ततः ।
"उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते ।
त्वया चोत्थीयमानेन उत्थितं भुवनत्रयम् ॥"
इति पठित्वा पूजयेत् ॥
इति तिथ्यादितत्त्वम् ॥

हरिगरः, पुं, (हरिः गरो यस्य ।) शिवः । इति केचित् ॥ त्रिपुरदहनार्थं हरिरेव यतस्तस्य गरोऽभूत्तस्मात् । यथा, पुष्पदन्तः ।
"रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्तो न खलु परतन्त्राः प्रभुधियः ॥"
हरिचन्द्रः, पुं, नृपविशेषः । तु त्रेतायुगे सूर्य्यवंश्यीयः अष्टाविंशराजः । तत्पर्य्यायः । त्रिशङ्कुजः २ । इति हेमचन्द्रः ॥ अपि च । त्रिशङ्कोर्हरिचन्द्रस्तस्मादोहिताश्वस्ततश्च हरितः । इति विष्णुपुराणे । ४ । ३ । १५ ॥

हरिचन्द्रपुरं, क्लो, (हरिचन्द्रस्य पुरम् ।) हरिश्चन्द्रराजनगरम् । तत्पर्य्यायः श्रीभपुरम् २ । इति त्रिकाण्डशेषः ॥

हरिषः, पुं, हर्षः । इति केचित् ॥
हरिषेणः, पु, जिनचक्रवर्त्तिविशेषः । तत्पर्य्यायः । हरिसुतः २ । यथा,—
"हरिषेणो हरिसुतो जयो विजयनन्दनः ।
ब्रह्मसूनुर्ब्रह्मदत्तः सर्व्वे चेक्ष्वाकुवंशजाः ॥"
इति हेमचन्द्रः ॥
हरिसङ्कीर्त्तनं, क्लो, (हरेः सङ्कीर्त्तनम् ।) श्रीहरेर्नामोच्चारणम् । यथा,—
"दानं व्रतं तपो यज्ञः श्राद्धं वा विप्रतर्पणम् ।
सकलं निष्फलं राजन् ! हरिसङ्कीर्त्तनं विना ॥"
इति कर्म्मलोचनम् ॥
अपि च ।
"नरके पच्यमानानां नराणां पापकर्म्मणाम् ।
मुक्तिः संजायते तस्मात् नामसंकीर्त्तनाद्धरेः ॥"
इति हरिभक्तिविलासधृतं इतिहासोत्तमवचनम् ॥
हरिसुतः, पुं, (हरेः सुत इव ।) हरिषेणराजा । इति हेमचन्द्रः ॥ हरेः पुत्रश्च ॥
हरिहयः, पुं, (हरिरेव हयो यस्य ।) इन्द्रः । इत्यमरः । १ । १ । ४६ ॥ (यथा, महाभारते । १ । ६७ । ५० ।
"द्वितीयस्तु ततोस्तेषां श्रीमान् हरिहयोपमः ।
अपराजित इत्येव स बभूव नराधिपः ॥")
सूर्य्यः । कार्त्तिकेयः । गणेशः । इति केचित् ॥
हरिहरः, पुं, (हरिणा सह हरः ।) संयुक्त हरिहरमूर्त्तिः । यथा,—
पुलस्त्य उवाच ।
"विमुक्तपापा देवेशं वासुदेवमथाब्रुवन् ।
क्वासौ वद जगन्नाथ ! शम्भुस्तिष्ठति केशव ।
यं शीघ्राभिषेण स्नापयामो विधानतः ॥
अथोवाच सुरान् विष्णुरेष तिष्ठति शङ्करः ।
महेहे किन्न पश्यध्वं योगप्रायं प्रतिष्ठितम् ॥
तमूचुर्नैव पश्यामस्त्वत्तो वै त्रिपुरान्तकम् ।
सत्यं वद सुरेशान ! महेशानः क्व तिष्ठति ॥
ततोऽब्रवीद्धरिः स हरिः स्वङ्गत्पङ्कजयोनिम् ।
दर्शयामास देवानां सुरारिर्लिङ्गमेश्वरम् ॥
ततः सुराः क्रमेणैव शीघ्रादिभिरनन्तरम् ।
स्नापयाञ्चक्रिरे लिङ्गं शाश्वतं ध्रुवमव्ययम् ॥
गोरोचनया त्वालिप्य चन्दनेन सुगन्धिना ।
विल्वपत्राम्बुजैर्हैवं पूजयामासुरञ्जसा ॥
पूजयित्वा गुरुं भक्त्या निवेद्य परमौषधीः ।
जग्राहुर्गतनामानि प्रणामं चक्रिरे ततः ॥
इत्येवं चिन्तयन्तश्च देवा देवौ हराच्युतौ ।
कथं योगत्वमापन्नौ संराध्यतममात्मनः ॥
सुराणां चिन्तितं ज्ञात्वा विश्वमूर्त्तिरभूद्विभुः ।
सर्व्वलक्षणसंयुक्तः सर्व्वायुधधरोऽव्ययः ॥
सार्द्धं त्रिनेत्रं कमलाक्षिकुण्डलं
जटाभराभारशिरोजमण्डितम् ।
हरिं हरश्चैव नगेन्द्रभूषणं
पीताजिनाच्छन्नकटिप्रदेशकम् ॥
चक्रासिहस्तं धनुःशार्ङ्गपाणिं
पिनाकशूलाजगवान्वितञ्च ।
कन्दर्पखट्वाङ्गकपालघण्टा-
सगङ्गचक्राब्जधरं महर्षे ! ॥
दृष्ट्वैव देवा हरिशङ्करं तं
नमोऽस्तु ते सर्व्वगताव्ययेति ॥"
इति वामनपुराणे ५८ अध्यायः ॥ * ॥
शिवविष्णोरभेदेनार्च्चकस्य रूपन्त्वेवम् । यथा,-
"निरामया नाम गणाः समायाता जगद्-गुरो ।
सार्द्धहिनेत्राः पद्माक्षाः शीवत्साङ्कितवक्षसः ॥
समायाताः खगारूढा वृषभध्वजिनोऽव्ययाः ।
महापाशुपता नाम शूलचक्रधरास्तथा ।
भैरवो विष्णुना सार्द्धमभेदेनार्च्चितो हि यैः ॥"
इति तत्रैव ४ अध्यायः ॥
अन्यच्च ।
"अथवा विष्णुरूपेण पूजयेच्छङ्करं सदा ।
शङ्करं वामभागस्थं सर्व्वकाममवाप्नुयात् ॥"
इति देवीपुराणे १२ अध्यायः ॥
हरिहरक्षेत्रं, क्लो, (हरिहरस्य क्षेत्रम् ।) तीर्थविशेषः । स तु पाटलिपुत्रनगरस्यभागीरथ्युत्तरपारे वर्त्तते । तस्य नामान्तरं ददरिक्षेत्रं तद्देशीया वदन्ति । तत्र गङ्गागण्डकीसङ्गमे कार्त्तिकपौर्णमास्यां स्नानार्थं जनसमूहसमेलनं भवति । तस्य नामकारणं यथा,—
"ततः स पञ्च रात्राणि स्थित्वा वै विधिपूर्व्वकम् ।
गोधनान्यग्रतः कृत्वा हरिक्षेत्रं जगाम ह ।
हरिणाधिष्ठितं क्षेत्रं हरिक्षेत्रं ततः स्मृतम् ॥
सदा नन्दी शूलपाणिर्गोधनेन पुरस्कृतः ।
स्थितवांस्तद्दिनादेव तत्क्षेत्रं हरिहरात्मकम् ।
देवानामटनाच्चैव देवाट इति संज्ञितम् ॥"
इति वाराहे भगवच्छास्त्रे सोमेश्वरादिलिङ्गमहिमाविमुक्तक्षेत्रत्रिवेण्यादिमहिमानाम्नाध्यायः ॥
हरिहरात्मकः, पुं, (हरिहरौ आत्मानौ यस्य । कप् ।) गरुडः । शिवबहुः । इति शब्दरत्नावली ॥
हरिहरक्षेत्रं, क्लो ॥ (हरिहरात्मरूपे, त्रि । यथा, हरिवंशे । १८१ । ३० ।
"अनादिमध्यनिधनमेतद्वरमव्ययम् ।
तदेव ते प्रवक्ष्यामि रूपं हरिहरात्मकम् ॥")
हरितकी, स्त्री, (हरि पीतवर्णं फलमिता प्राप्ता इति हरीता । ततः संज्ञायां कन् गौरादित्वात् ङीष् ।) स्वनामख्यातवृक्षः । हरड़ा इति हिन्दी भाषा । तत्पर्य्यायः । अभया २ अव्यथा ३ पथ्या ४ वयःस्था ५ पूतना ६ अमृता ७ हैमवती ८ चेतकी ९ श्रेयसी १० शिवा ११ । इत्यमरः । २ । ४ । ५९ ॥ सुधा १२ कायस्था १३ कन्था १४ रसायनफला १५ । इति शब्दरत्नावली ॥ विजया १६ । इति जटाधरः ॥ जया १७ चेतनकी १८ रोहिणी १९ प्रपथ्या २० जीवप्रिया २१ जीवनिका २२ भिषग्वरा २३ पुस्तकान्तरे भिषक्प्रिया इति पाठः । जीवन्ती २४ प्राणदा २५ जीव्या २६ देवी २७ दिव्या २८ । अस्या गुणाः ।

"हरीतकी पञ्चरसा च रेचनी
कोष्ठामयघ्नी लवणेन वर्ज्जिता।
रसायनी नेत्ररुजापहारिणी
त्वगामयघ्नी किल योगवाहिनी॥"

अन्यच्च।

"वीजास्थितिक्तं मधुरा तदन्त-
स्त्वग्भागतः सा कटुकषणवीर्य्या।
मांसांशतश्चास्रकषाययुक्ता
हरीतकी पञ्चरसा स्मृतेयम्॥
पथ्यामज्जा तु चक्षुष्यो वातपित्तहरी गुरुः॥"

तस्या भेदा यथा,—

"हरीतक्यस्तोत्पन्ना सप्तभेदैरुदीरिता।
तस्या नामानि वर्णांश्च वक्ष्याम्यथ यथाक्रमात्॥
विजया रोहिणी चैव पूतना चामृताभया।
जीवन्ती चेतकी चेति नाम्ना सप्तविधा स्मृता॥
अलावुवृत्ता विजया सुवृत्ता रोहिणी मता।
स्वल्पत्वक् पूतना ज्ञेया स्थूलमांसामृता स्मृता॥
पञ्चासा चाभया ज्ञेया जीवन्ती स्वर्णवर्णभाक्।
त्रास्रा तु चेतकी विद्यादित्यासां रूपलक्षणम्॥
विन्ध्याद्री विजया हिमाचलभवा स्याच्चेतकी पूतना
सिन्धौ स्यादथ रोहिणी तु विजया जाता प्रतिष्ठानके।
चम्पायामसृताभया च जनिता देये सुराष्ट्राह्वये
जीवन्तीति हरीतकी निगदिता सा सप्तभेदा बुधैः॥*॥

सर्व्वप्रयोगे विजयाथ रोहिणी
क्षतेषु लेपेषु च पूतनोदिता।
विरेचने स्यादमृता गुणाधिका
जीवन्तिका स्यादिह जीर्णरोगजित्॥
स्याच्चेतकी सर्व्वरुजापहारिका
नेत्रामयघ्नीमभयां वदन्ति ताम्।
इत्थं यथारोगमियं प्रयोजिता
ज्ञेया गुणाढ्या न कदाचिदन्यथा॥
चेतकी च धृता हस्ते यावत्तिष्ठति देहिनः।
तावद्विरिच्यते वेगात्तत्प्रभावाच्च संशयः॥
सप्तानामपि जातीनां प्रधानं विजया स्मृता।
सुखप्रयोगसुलभा सर्व्वव्याधिषु शस्यते॥
चिक्षाप्सु निमज्जति या सा ज्ञेया गुणवती भिषग्वरैः।
यस्या यस्या भूयो निमज्जनं सा गुणाढ्या स्यात्॥
हरते प्रसभं व्याधीन् भूयस्तकति यद्गुः।
हरीतकी तु सा प्रोक्ता तकतिर्दोषवाचिका॥
हरीतकी तु कण्ठायां हनुसन्धे गलग्रहे।
शोथे नवज्वरे चीणे गुर्विण्यां नैव शस्यते।"

इति राजनिर्घण्टः॥*॥

अपि च।

"दक्षं प्रजापतिं स्वस्रं अश्विनौ वाक्यमूचतुः।
कुतो हरीतकी जाता तस्यास्तु कति जातयः॥
रसाः कति समाख्याताः कति चोपरसाः स्मृताः॥
नामानि कति चोक्तानि कश्च तासाञ्च लक्षणम्॥
के च वर्णा गुणाः के च का च कुत्र प्रयुज्यते।
केन द्रव्येण संयुक्ता कांश्च रोगान् व्यपोहति॥
पृच्छाम्येतदृषया पृष्टं भगवन्! वक्तुमर्हसि।
अश्विनोर्व्वचनं श्रुत्वा दक्षो वचनमब्रवीत्॥
पपात बिन्दूर्म्मेदिन्यां शक्रस्य पिबतोऽमृतम्।
ततो दिव्यात् समुत्पन्ना सप्तजातिर्हरीतकी॥
हरीतक्यभया पथ्या कायस्था पूतनामृता।
हैमवत्यव्यया चापि चेतकी श्रेयसी शिवा।
वयस्था विजया चापि जीवन्ती रोहिणीति च।
विजया रोहिणी चैव पूतना चामृताभया।
जीवन्ती चेतकी चेति पथ्यायाः सप्तजातयः॥*॥
अलावुवृत्ता विजया वृत्ता सा रोहिणी स्मृता।
पूतनास्थिमती सूक्ष्मा कथिता मांसलामृता॥
पञ्चरेखाभया प्रोक्ता जीवन्ती स्वर्णवर्णिनी।
त्रिरेखा चेतकी ज्ञेया सप्तानामियमाकृतिः॥*॥
विजया सर्व्वरोगेषु रोहिणी व्रणरोहिणी।
प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता॥
अचिरोगेऽभया शस्ता जीवन्ती सर्व्वरोग-
घ्नी॥
चूर्णार्थं चेतकी शस्ता यथा युक्तं प्रयोजयेत्॥*॥
चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णतः।
षड़ङ्गुलायता शुक्ला कृष्णा चैकाङ्गुलायता॥
काचिदास्वादमात्रेण काचिद्गन्धेन भेदयेत्।
काचित् स्पर्शेन दृष्टान्या चतुर्धा भेदयेच्छिवा।
चेतकीपादपच्छायामुपसर्पन्ति ये नराः।
भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादयः॥
चेतकी तु धृता हस्ते यावत्तिष्ठति देहिनः।
तावद्विरेचयेद्वेगैस्तु प्रभावाच्च संशयः॥
नृपादिसुकुमाराणां क्रूराणां भेषजद्विषाम्।
चेतकी परमा शस्ता हिता सुखविरेचनी॥
सप्तानामपि जातीनां प्रधाना विजया स्मृता।
सुखप्रयोगा सुलभा सर्व्वरोगेषु शस्यते॥
हरीतकी पञ्चरसालवणा तुवरा परम्।
रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी।
चक्षुष्या लघुरायुष्या वृंहणीचानुलोमिनी।
श्वासकासप्रमेहार्शःकुष्ठशोथोदरक्रिमीन्॥
वैस्वर्य्यग्रहणीरोगविबन्धविषमज्वरान्॥
गुल्माध्मानव्रणच्छर्द्दिहिक्काकण्डूदामयान्॥
व्रणस्थाने हृषा इति क्वचित् पुस्तके पाठः।
कामलां शूलमानाहं प्रीहानञ्च यकृत्तथा।
अश्मरीमूत्रकृच्छ्रञ्च मूत्राघातञ्च नाशयेत्॥
स्वादुतिक्तकषायत्वात् पित्तघ्नी कफघ्नी सा।
कटुतिक्तकषायत्वादस्रत्वाद्वातघ्नच्छिवा॥
पित्तकृत् कटुकास्लत्वात् वातघ्नं कथं शिवा।
प्रभावाद्धोपदेशत्वं सिद्धं यत्तत् प्रकाश्यते॥
हेतुभिः शिथबोधार्थं न पूर्व्वं क्रियतेऽधुना।
कर्म्मण्यत्वं गुणैः साम्यं दृष्टमाश्रयभेदतः।
यतस्ततो नेति चिन्त्यं धात्रीलकुचयोर्यथा॥
पथ्याया मज्जनि स्वादुः स्नायावम्लो व्यवस्थितः।
वृन्ते तिक्तस्त्वचि कटुरस्थिस्तुवरो रसः॥*॥

नवा स्निग्धा घना हृद्या गुर्व्वी स्थिरा च याश्मनि।
निमज्जेत् सा सुप्रशस्ता कथितातिगुणप्रदा॥
नवादिगुणयुक्तत्वं तथैकत्र हिकर्षता।
हरीतक्याः फले यत्र हृद्यं तच्छ्रेष्ठमुच्यते॥
चर्व्विता वर्द्धयत्यग्निं पेषिता मलशोधिनी।
स्निग्धा संग्राहिणी पथ्या भृष्टा प्रोक्ता त्रिदोषघ्नत्॥

उन्मीलिनी बुद्धिमतेन्द्रियाणां
निर्म्मूलिनी पित्तकफानिलानाम्।
विस्रंसिनी मूत्रपुरीषवर्त्मनां
हरीतकी स्यात् सह भोजनेन॥
अन्नपानकृतान् दोषान् वातपित्तकफोद्भवान्।
हरीतकी हरत्याशु भुक्तस्योपरियोजिता॥
लवणेन कफं हन्ति पित्तं हन्ति सशर्करा।
घृतेन वातजान् रोगान् सर्व्वरोगान् गुडान्विता।
सिन्धूत्थशर्कराशुण्ठीक्षणामधुगुड़ैः क्रमात्।
वर्षादिष्वभया प्राश्या रसायनगुणैषिणा॥

अध्वातिस्त्रिस्त्रो बलवर्जितस्य
रूक्षः कृशो लङ्घनकर्शितस्य।
पित्ताधिको गर्भवती च नारी
विसृष्टरक्तस्त्वभयां न खादेत्॥"

इति भावप्रकाशः॥*॥

अन्यच्च।

"जीवन्ती रोहिणी चैव विजया चाभयामृता।
पूतना कालिका चेति सप्तजातिर्हरीतकी॥
सुवर्णवर्णा जीवन्ती रोहिणी कपिलद्युतिः।
अलावुवृत्ता विजया पञ्चांशा चाभया स्मृता॥"

पञ्चांशा पञ्चशिरा।

"स्थूलमांसामृता ज्ञेया पूतनास्थिमती मता।
त्रिंशा च कालिकेत्येवं सप्तजातिर्हरीतकी॥
लेपनेषु सर्व्वेषु जीवन्ती तु प्रशस्यते।
रोहिणी व्रतरोगेषु विजया सर्वकर्म्मसु॥
पूतना लेपने ज्ञेया अमृता तु विरेचने।
अभया नेत्ररोगेषु गन्धयुक्ता तु कालिका॥
हरस्य भवने जाता हरिता च स्वभावतः।
हरते सर्व्वरोगांश्च तेन नाम्ना हरीतकी॥*॥
पीयूषं पिबतस्त्रिपिष्टपपतेर्ये विन्दवो निर्गतास्तेभ्योऽभूदभया दिवाकरकरश्रेणीव दोषापहा।
कालिन्दीव बलप्रमोदजननी गौरीव शुद्धिप्रिया
वह्निद्योतकरी हृताहृतिरिव क्षीणीव नानारसा॥

पथ्या पञ्चरसायुक्ता चक्षुष्यालवणा सरा।
मेध्योष्णा दीपनी कुष्ठदोषशोथव्रणापहा॥"*॥

पञ्चरसस्य विवरणम्। त्वक् कटुः। मांसं अम्लकषायम्। अस्थि तिक्तम्। तन्मध्ये माधुर्य्यम्॥*॥

तन्मज्जगणाः।

"पथ्यामज्जा तु चक्षुष्यो वातपित्तहरी गुरुः॥"

इति राजवल्लभः॥

हरीषा, स्त्री, मांसव्यञ्जनविशेषः। आस इति हिन्दी भाषा। यथा,—

"पाकपात्रे तु वृहति मांसखण्डानि निःक्षिपेत्।

पानीयं प्रचुरं मर्पि: प्रभूतं छिङ्गु जीरकम् ॥
हरिद्रामार्द्रकं शुण्ठी लवणं मरिचानि च ।
तण्डुलां चापि गोधूमान् जम्बीराणां रसान्
बह्वन् ॥
यथा सर्व्वाणि वस्तूनि सुपक्वानि भवन्ति हि ।
तथा पचेत निपुणो बहुमण्डस्थितिर्यथा ॥
एषा हरीषा बलकृद्वातपित्तापहा गुरुः ।
शीतोष्णा शुक्रदा स्निग्धा सरा सन्धान-
कारिणी ॥"
इति भावप्रकाशः ॥

हरेणुः, स्त्री, (क्रियते इति । डु+"कृञ्भ्या-मेणुः ।" उणा० २ । १ । इति एणुः ।) रेणु-कानामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२० ॥ कुलयोषित् । इति मेदिनी ॥

हरेणुः, पुं, (क्रियते इति । डु+एणुः ।) सतीलः । इति मेदिनी ॥ (गुणादयोऽस्य सतीलशब्दे ज्ञातव्याः ॥)

हरेणुकः, पुं, (हरेणुरिव । कन् ।) कलायः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"कलायो वर्त्तुलः प्रोक्तः सतीलश्च हरेणुकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हर्त्ता, [र्त्तृ] पुं, (हरति ध्वान्तमिति । हृ+तृच् ।) सूर्य्यः । यथा,—
"लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥"
इति शाम्बपुराणे सूर्य्यस्तवः ॥
हरणकर्त्तरि, त्रि ॥ (यथा, भागवते ।४।२४।५।
"अन्तर्धानो नभस्वत्यां हविर्धानमविन्दत ।
य इन्द्रमश्वहर्त्तारं विद्वानपि न जघ्निवान् ॥")

हर्म्म, [न्] क्ली, (हरति ग्लानिमिति । हृ+मनिन् ।) जृम्भणम् । इति शब्दरत्नावली ॥

हर्म्मितं, त्रि, (हर्म्म जातमस्येति । इतच् ।) क्षिप्तम् । दग्धम् । इति मेदिनी ॥ जृम्भितम् । इति हर्म्मशब्दार्थदर्शनात् ॥

हर्म्मुटः, पुं, सूर्य्यः । कच्छपः । इति केचित् ॥

हर्म्म्य, क्ली, (हरति जनमनांसीति । हृ+अग्रा-दित्वात् यत् मुट् च । धनिनां वासः । इत्य-मरः । २ । २ । ८ ॥ धनिनां व्यवहारिकादीनां वासः काष्ठेष्टकादिना कृतं धवलगृहं हर्म्म्यादि-संज्ञकं स्यात् । हरति मनो हर्म्म्यं नाम्नीति हृजो म्यः इति भरतः । अन्यच्च । हरति मनो हर्म्म्यं अग्रानित्वात् यत् मुट् च हर्म्म्यम् । आदिशब्देन खस्तिकाट्टालिकादेर्ग्रहणम् । धनिनां राजव्यतिरिक्तानां वासो गृहम् । एकं काष्ठेष्टकादिकृतस्य धनिगृहस्य । इत्यमर-टीकायां रायमुकुटः ॥ (यथा,—
"हर्म्म्याग्रावाक्षेदिभूमिर्नभसि च शयनं शीकरोष्ण-
प्रहीणे ॥"
इति वैद्यकपथ्यापथ्यविधौ वर्षोपचारे ॥)

हर्य, क्लमे । गतौ । इति कविकल्पद्रुमः ॥ भ्वा०-पर०-क्लमे अक०-गतौ सक०-सेट् ।) रैफोपधः । हर्यति । क्लमो ग्लानिः । इति दुर्गादासः ॥

हर्य्यक्षः, पुं, (हरि पिङ्गलं अक्षि यस्य । षच् ।) सिंहः । इत्यमरः । २ । ५ । १ ॥ कुबेरः । इति जटाधरः ॥ (पिङ्गलनेत्रे, त्रि । यथा, महा-भारते । ३ । २०७ । ५ ।
"तथैवावद्धकवचं कनकोज्ज्वलकुण्डलम् ।
हर्य्यक्षं हयमस्कन्धं यथास्य पितरं तथा ॥")

हर्य्यतः, पुं, (हर्य्यति गच्छतीति । हर्य्य+"भृञ्-दृशियजीति ।" उणा० ६ । ११० । इति अतच् ।) घोटकः । इति सिद्धान्तकौमुद्या-मुणादिवृत्तिः ॥ अश्वमेधीयाश्वः । इत्युणादि-कोषः ॥

हर्य्यश्वः, पुं, (हरिनामा हरिवर्णो वा अश्वो यस्य ।) इन्द्रः । इति केचित् ॥ (यथा, भाग-वते । ८ । ११ । २१ ।
"हरीन् दशगतान्याजौ हर्य्यश्वस्य बलः शरैः ।
तावद्भिरहरायासं युगपल्लघुहस्तवान् ॥"
हरिनामा हरिवर्णो वा अश्वः इति कर्म्मधारयेण इन्द्राश्वः । यथा, महाभारते । ३ । २८९ । १३ ।
"अयं हर्य्यश्वयुग् जैत्रो मघोनः स्यन्दनोत्तमः ।
अनेन शक्रः काकुत्स्थ समरे दैत्यदानवान् ।
शतशः पुरुषव्याघ्र ! रथोदारेण जघ्निवान् ॥")

हर्षः, पुं, (हृष तुष्टौ+घञ् ।) इष्टश्रवणजन्य-सुखम् । इति महाभारते मोक्षधर्म्मः ॥ आह्लादः । तत्पर्य्यायः । मुत् २ प्रीतिः ३ प्रमदः ४ प्रमोदः ५ आमोदः ६ सम्मदः ७ आनन्दथुः ८ आनन्दः ९ शर्म्म १० शातम् ११ सुखम् १२ । इत्यमरः । १ । ४ । २४ ॥ मुदा १३ मुदिता १४ आनन्दिः १५ नन्दिः १६ सातम् १७ सौख्यम् १८ । केचित्तु मुदादिसप्तकं प्रीतौ आनन्दथ्वादिषट्कं सुखे । प्रीतिश्च सुखजो विकारः इत्याहुः । इति सटीकायां भरतः ॥ तथा च ।
"मुत् प्रीतिः प्रमदामोदसम्मोदमोदसम्मदाः ।
प्रमोदो हर्ष इत्येव हर्षपर्य्याय ईरितः ॥
आनन्दो नन्दथुर्नन्दः सुखमानन्दथुर्मुदा ।
सौख्यं शर्म्मोपजोषः स्यादानन्दं जोषमित्यपि ॥
मुदादिजोषपर्य्यन्तमेकपर्य्यायः इत्यपि ॥"
इति शब्दरत्नावली ॥ * ॥

हर्षस्य पुत्रः कन्दर्पः । यथा,—
पुलस्त्य उवाच ।
"कन्दर्पो हर्षतनयो योऽसौ कामो निगद्यते ।
स शङ्करेण संदग्धो ह्यनङ्गत्वमुपागतः ॥"
इति वामने ५ अध्यायः ॥
(रोमाञ्चः । यथा । "हृष्यते हर्षयुक्तो भवतः हर्षस्य रोमाञ्चप्रायः ।" इति दग्धिनिश्चयस्य वातव्याधिव्याख्याने विजयरक्षितः ॥)

हर्षकः, पुं, (हर्षयतीति । हृष+णिच्+ण्वुल् ।) पर्व्वतविशेषः । इति शब्दमाला ॥ हर्षकारके, त्रि । इति शब्दरत्नावली ॥

हर्षणं, क्ली, (हृष+ल्युट् ।) हर्षः । इति धरणिः ॥ (यथा, महाभारते । ७ । १४४ । ११५ ।
"तच्छरैः सिन्धुराजस्य शरैर्बहुमवाहयत् ।
दुर्हृदामप्रहर्षाय सुहृदां हर्षणाय च ॥")

हर्षणः, पुं, (हर्षयतीति । हृष+णिच्+ल्युः ।) विष्कम्भादिसप्तविंशतियोगान्तर्गतचतुर्दशयोगः । तत्र जातफलम् ।
"सुचारुगात्रं स्फुटपद्मनेत्रं
शास्त्रप्रयत्ने विनयोपपन्नः ।
प्रसूतिकाले यदि हर्षणः स्या-
दमर्षणो नैव जनः कदाचित् ॥"
इति कोष्ठीप्रदीपः ॥*॥
चक्षूरोगविशेषः । आह्वविशेषः । आह्वदेवः ॥ हर्षकारके, त्रि । इति शब्दरत्नावली ॥ (यथा, महाभारते । ७ । ३१ । ७६ ।
"एवं सुकलिलं युद्धमासीत् कव्यादहर्षणम् ।
महद्भिस्तैरभीतानां यमराष्ट्रविवर्द्धनम् ॥")

हर्षमाणः, त्रि, (हर्ष+ताच्छील्ये आनच् ।) हर्षयुक्तः । तत्पर्य्यायः । विकुर्व्वाणः २ प्रमनाः ३ हृष्टमानसः ४ इत्यमरः । ३ । १ । ७ ॥ प्रीत-मानसः ५ । इति शब्दरत्नावली ॥

हर्षयितृः, पुं, (हर्षयतीति । हृष तुष्टौ+णिच्+"स्तनिहृषिपृषीति ।" उणा० ३ । २९ । इति षेरित्रुच् ।) पुत्रः । स्वर्गे, क्ली । इति मेदिनी ॥ हर्षणशीले, त्रि ॥

हर्षस्वनः, पुं, (हर्षसूचकः स्वनः ।) आनन्द-ध्वनिः तत्पर्य्यायः । किलकिला २ । इति त्रिकाण्डशेषः ॥

हर्षिणी, स्त्री, हर्षयतीति । । हृष+णिच्+णिनिः । ङीप् ।) विजया । इति राजनिर्घण्टः ॥

हर्षितः, त्रि, आह्लादितः । हर्षोऽस्य जात इत्य-नेन इतप्रत्ययेन निष्पन्नः ॥

हर्षुलः, पुं, (हृष तुष्टौ+"हृषेरुलच् ।) उणा० १ । ८८ । इति उलच् ।) मृगः । कामुकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ हर्षण-शीले, त्रि ॥ (यथा, कथासरित्सागरे । १२२ । २६ ।
"प्राभृतं प्रत्युतेदृङ्मे सिद्धमर्थेति हर्षुलः ॥")

हल, भू विलेखे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) भू, हालः । हलः । हलति भूमिं कृषकः । इति दुर्गादासः ॥

हलं, क्ली, (हलति भूमिमिति । हल+अच् ।) लाङ्गलम् । इत्यमरः । २ । ८ । १३ ॥ तत्पर्य्यायः । "हलन्तु लाङ्गलं गोदारणश्च सीरकुन्तली ।"
इति जटाधरः ॥
तत्र गोयोजने दोषादोषौ । हारीतः ।
"अष्टौगवं धर्म्महलं षड्गवं जीवितार्थिनाम् ।
चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम् ॥"
इति तृतीययामार्द्धकृत्ये आह्निकतत्त्वम् ॥*॥
हलप्रवाहदिनादि यथा । दीपिकायाम् ।
"पूर्व्वाग्नियाम्यफल्गुपित्र्यग्रिवान्त्यभेषु
रिक्ताष्टमीविगतचन्द्रतिथिं विहाय ।
द्वाङ्गालिगोसमुदये विकुजार्किवारे
शस्तेन्दुयोगकरणेषु हलप्रवाहः ॥*॥
हलप्रवाहवद्बीजवपनस्य विधिः स्मृतः ।
चित्रायाञ्च शुभे केन्द्रे स्थिरर्क्षमनुजोदये ॥"

भीमपराक्रमे ।
"वामे कृष्णं बलीवर्दं दक्षिणे लोहितं न्यसेत् ।
उत्तराभिमुखो भूत्वा कर्षकः क्षपिमारभेत् ॥
हले तु योजिते यत्र चेत्रे ग्रासं करोति गौः ।
तत्र स्याद्विगुणं शस्यमवश्यं गर्गभाषितम् ॥"*॥
कृत्यचिन्तामणौ बलभद्रः ।
"सुखदा प्रतिपच्चैव द्वितीया कार्य्यसाधिनी ।
आरोग्यदा तृतीया च चतुर्थी कौटकृत् सदा ॥
पञ्चमी श्रीप्रदा नूनं षष्ठी च कलहप्रिया ॥
सप्तमी स्थानदा भोग्या हृषं हन्ति तथाष्टमी ॥
नवमी शस्यनाशाय दशमी भूतिदा सदा ।
एकादशी तथा कुर्य्याद्धनं धान्यं मनोरथम् ॥
द्वादशी प्राणसन्देहा सर्व्वसिद्धा त्रयोदशी ।
चतुर्दशी पतिं हन्ति पञ्चदश्येव निष्फला ॥
अमावस्याष्टमीषष्ठीरिक्ताश्च परिवर्ज्जयेत् ।
सौरिभौमदिने चैव कृषारम्भे धनक्षयः ॥
प्राजेशविष्णुतिथ्येषु पित्रुकरोत्तरेषु च ।
अश्विनीवातपौष्णेषु मूलादितीन्दुभे तथा ॥
वारे भानुजशुक्रे च जीवे शीतकरे तथा ।
लग्ने स्त्रीगोमीनयुग्मे कृषारम्भं शुभं विदुः ॥
ऐशान्यां पुष्पनैवेद्यैः चेत्रपालञ्च पूजयेत् ।
सालङ्कारो हलधरः सगभिश्च पूजितं हलम् ।
दध्याज्यमधुभिः श्रेष्ठं फलाग्रञ्च प्रलेपितम् ।
कर्षं प्रावर्त्तयेत् प्राज्ञो नूतनेन हलेन च ॥*॥
हस्ताश्वितिष्यचन्द्रेषु ब्रह्मेन्द्रविष्णुवारुणे ।
वायव्येन्द्राग्निभे चैव रोहिण्यामुत्तरासु च ॥
वारे जीवसितशुक्रे च सोमे दिनकरे तथा ।
युग्मे युवतिगोमीने शस्यं स्याद्बीजवापनम् ॥"
राजमार्त्तण्डे ।
"प्राजेशश्रवणोत्तरादितिमघामार्त्तण्डतिथ्या-
श्विनी-
पौष्णानुष्णमरीचयः शतभिषा स्वातौ विशाखा
तथा ।
जीवार्केन्दुभितेन्दुनन्दनदिने वारे स्थिरस्योदये
शस्यानां वपने भवन्ति लवने शस्ते तिथौ
रोपणे ॥"
देवलः ।
"गुरुसोमसूर्य्यशुक्राः चेम्याः सम्पत्करा-
शुभाः ।
बुधार्किभूमिपुत्राश्च न भवन्ति फलप्रदाः ॥
हन्ति मेषः पशून् सर्व्वान् स्वभावेनाथ हस्तिकः ।
कर्कटेन भवेत् सौख्यं तुलायां न प्ररोहति ॥
केशरी शस्यघाती स्यात् पार्थिवोपद्रवं धनुः ।
मकरे चैव कुम्भे च भयमेव विनिर्दिशेत् ।
गोस्त्रीमन्मथमीनेषु शस्यं सम्पद्यते महत् ॥*॥
प्रशस्ते चन्द्रतारे च शुचिः शुक्लेन वाससा ।
स्नात्वा गन्धैश्च पुष्पैश्च पूजयित्वा विधानतः ॥
पृथ्वीञ्च गृहसंयुक्तां पूजयित्वा प्रजापतिम् ।
अग्निं प्रदक्षिणीकृत्य दीयते भूरिदक्षिणा ॥
कृष्णौ वृषौ नियोक्तव्यौ नवनीतैर्घृतेन वा ।
सुखपार्श्वं तयोर्लिप्यात् फालाग्रं कनकैः सृशेत् ।
उत्तराभिमुखो भूत्वा चोरेणार्घं प्रदापयेत् ।
ततः शुभकरः श्रीमान् कृषिकर्म्म समाचरेत् ॥*
वर्ज्जयेत् भग्नशृङ्गञ्च क्षुरभङ्गञ्च वर्ज्जयेत् ।
विकलं छिन्नलाङ्गूलं कपिलं वृषभं तथा ॥
हलप्रवाहणं कार्य्यं नीरुगभिः कृषिकर्म्मकैः ।
हलादिभिर्दृढैः चेममदृढैर्न शुभं भवेत् ॥
वृषभा यदि मुह्यन्ति तस्य विघ्नप्रदा भवेत् ॥"
कृषिरिति शेषः ।
"तस्मात् सर्व्वप्रयत्नेन निर्व्विघ्नं कारयेत् सदा ॥
एका जयकरी रेखा द्वितीया चार्थदायिका ।
पञ्चमी या भवेद्रेखा बहुशस्यफला हि सा ॥
अत ऊर्द्धं न कर्त्तव्यं महादोषप्रदा भवेत् ॥
संपूज्याग्निं द्विजं देवं कुर्य्याद्धलप्रवर्त्तनम् ।
हैमनि पुष्टफालाग्रं छिद्ररेखां न कारयेत् ॥
स्मर्त्तव्या वसवश्चेन्द्रः पृथूरामः सचन्द्रमाः ।
पराशरो बलभद्रः सर्व्वविघ्नोपशान्तये ॥*॥
हले प्रवाह्यमाणे तु कूर्म्म उत्पद्यते यदि ।
गृहिणी म्रियते तस्य ततोऽग्नेश्च भयं भवेत् ॥
लाङ्गलं भिद्यते चापि प्रभुस्तत्र विनश्यति ।
ईशभङ्गो यदा कर्त्तुः संशयो जीवितस्य च ॥
शुतनाशो युगभङ्गे समीने म्रियते सुतः ।"
समीने योक्त्रबन्धनकाष्ठहये ।
"योक्त्रच्छेदे तु व्यासङ्गः शस्यहानिश्च जायते ॥
हले प्रवाह्यमाणे तु गौरेकः प्रपतेद्यदि ।
प्रपतेद्युक्तमात्रस्तु बन्धनं स प्रपद्यते ।
ज्वरातिसाररोगेण क्षपिभङ्गं विनिर्दिशेत् ॥
प्रवहेत् युक्तमात्रस्तु ततो गौः म्रियते यदि ।
वत्सालोढेन नर्दन्ति ततः शस्यं चतुर्गुणम् ॥*॥
हैमवारिविलिप्तस्य बीजस्योप्तस्य शुचिः ।
इन्द्रं चित्ते विधायाथ स्वयं मुष्टित्रयं वपेत् ॥
कृत्वा चान्योन्यप्रोक्षाहं कर्षको हृष्टमानसः ।
प्राङ्मुखः कलमं गृह्य इमं मन्त्रमुदीरयेत् ॥
त्वं वै वसुन्धरे सीते बहुपुष्पफलप्रदे ।
नमस्ते मे शुभं नित्यं कृषिं मेधां शुभे कुरु ॥
रोहन्तु सर्व्वशस्यानि काले देवः प्रवर्षतु ।
कर्षकास्तु भवन्त्वग्रा धान्येन च धनेन च
स्वाहा ॥"*॥
कृत्यरत्नाकरे ब्रह्मपुराणम् ।
"चैत्रे च कृष्णपञ्चम्यां काश्मीरो च रजस्वला ।
निम्बं भवति तस्मात्तां कृत्वा शैलमयीं स्त्रियम् ॥
अभ्यङ्गवस्त्रनैवेद्यैः पूजयेच्च दिनत्रयम् ।
पुष्पालङ्कारधूपैश्च गोरसं वर्ज्जयन्ति च ॥"
काश्मीरा पृथ्वी ।
"अष्टम्याञ्च ततः स्नाप्य ताभिरेव गृहे गृहे ।
सुस्नाताभिः प्रहृष्टाभिर्जीवपत्नीभिरेव च ।
अनन्तरं द्विजैः स्नाप्या सर्व्वौषधियुतैर्जलैः ।
गन्धैर्बीजैस्तथा रत्नैः फलैः सिद्धार्थकैस्तथा ॥
स्नापयित्वा च तां देवीं गन्धैर्माल्यैश्च पूजयेत् ।
तत्रिवेदितमिष्टञ्च प्राशितव्यं गृहे गृहे ॥
अतः परमृतुस्नाता गर्भं गृह्णाति मेदिनी ॥"*॥
तथा ।
"ब्रह्मा विष्णुश्च रुद्रश्च काश्यपः सुरभी तथा ।
इन्द्रः प्रचेताः पर्জ्जन्यः शेषश्चन्द्रार्कावृक्षयः ॥
बलदेवो हलं भूमिर्हृषभो रामलक्ष्मणौ ।
रक्षोघ्नी जानकी सीता युगं गगनमेव च ॥
सीता लाङ्गलपद्धतिः । युगं युगकाष्ठम् ।
"एते द्वाविंशतिः प्रोक्ताः प्रजानां पतयः शुभाः ।
गोमङ्गले तु संपूज्याः कृष्यारम्भे महोत्सवे ॥
गन्धैः पुष्पैश्च धूपैश्च माल्यैः रत्नैः पृथक् पृथक् ।
हलेन वाहयेद्भूमिं स्वयं स्नातः सलङ्कृतः ॥"
तथा ।
"उप्ता बीजन्तु तत्रैव भोक्तव्यं बान्धवैः सह ॥"
बीजवपनं प्राजापत्यतीर्थेन । यथा, हारीतः ॥
कनिष्ठायाः पश्चात् प्राजापत्यमावपनं होम-
तर्पणे प्राजापत्येन कुर्य्यात् । इति । होमतर्पणे
लाजहोमसनकादितर्पणे । राजमार्त्तण्डे ।
"नित्यं दशहले लक्ष्मीर्नित्यं पञ्चहले धनम् ।
नित्यञ्च त्रिहले भक्तं नित्यमेकहले कृषम् ॥"*॥
कृषिपराशरः ।
"वैशाखे वपनं श्रेष्ठं मध्यमं रोहिणीरवौ ।
अतः परिक्षिन्नधमं न जातु श्रावणे शुभम् ॥"
ज्योतिषे ।
"पूर्व्वभाद्रपदा मूलं रोहिण्युत्तरफल्गुनी ।
विशाखा शतभिषा वाथ धान्यानां रोपणे
वराः ॥
सदोह्या रजनीं नीलीं पुत्रवित्तैर्विभुज्यते ।
स्वयं जाते पुनस्ते द्वे पालयत्येव दुष्यति ॥
आरामे गृहमध्ये वा मोहात् सर्षपमावपन् ।
पराभवं रिपोर्याति ससाधनधनक्षयम् ॥
निशा नीली पलाग्रश्च चिञ्चा श्वेतापराजिता ।
कोविदारश्च सर्व्वत्र सर्व्वं निघ्नन्ति मङ्गलम् ॥"
निशा हरिद्रा । कोविदारको रक्तकाञ्चनः ॥*
"हैमाश्मसा तृत्तबीजं स्नातो मन्त्रेण रोपयेत् ॥
वसुधेति सुशीलेति पुष्पदेति धरेति च ।
नमस्ते सुभगे नित्यं द्रुमोऽयं वर्द्धतामिति ॥"
लिखित्वालक्तकेनापि मन्त्रं शस्येषु बन्धयेत् ।
न व्याधिकीटहिंस्राणां भयं तत्र भवेत् क्वचित् ॥"
सिद्धिः प्रबलतरतरङ्गतरलितमृदुतरसमीरण-
वनोद्देशे श्रीमद्रामभद्रपादाः कुशलिनः समुद्र-
तटे नानाशतसहस्रवानराणां मध्ये खरनखर-
पक्षोद्दलाङ्गूलं पवनसुतं वायुवेगं परचक्रप्रमथनं
श्रीमद्धनूमन्तमाज्ञापयन्ति असुकस्याखण्डचेत्रे
वाताभोग्यो गान्धीरती पाण्डरमुखी धूली-
शृङ्गारतल्पा क्षपराङ्गना फड़िङ्गा एला वानरा
गरुड़ा इसड़ुका महिषादिरोगं खण्डयत क्षण-
मपि विलम्बं मा चरत यदि विलम्बं कारयत
तदा युष्मान् शतखण्डं कारयामीति । ॐ व्रां
व्रीं व्रौं श्रीरामाय नमः । इति शस्येषु बन्ध-
येत् ॥*॥ धान्यच्छेदनम् । दीपिकायाम् ।
"याम्याजपादहिधनानलतोयशक्र-
चित्रोत्तरोडुषु कुजार्कजवारवर्जम् ।
शस्तेन्दुयोगकरणेषु तिथौ विरिक्ते
धान्यच्छिदिः स्थिरनरस्वमृगोदयेषु ॥"
बलभद्रः ।
"रेवतीहस्तमूलेषु श्रवणे नागयाम्ययोः ।

पिढदेवे तथा सौम्ये धान्यच्छेदं मृगोदये।"

अथ धान्यच्छेदप्रकारः।

"सपत्नौ माषमुद्गौ च यवधान्ये सकाण्डके!
छिन्धात्तिलञ्च निष्पन्नमेतत् पाराशरं मतम्॥"

पराशरः।

"न मुष्टिग्रहणं कुर्य्यात् कदाचिद्दर्पणोषयोः।
ईशाने लवनं कुर्य्यात् सार्द्धमुष्टित्रयं शुचिः॥
पौष्णे पुष्ये शुभार्द्रे वा पूजयित्वेष्टदेवताम्।
शस्यविघ्नप्रशान्त्यर्थं क्षेत्रे वाह्यकभोजनम्॥"

बौधायनः।

"रथाश्वगजधान्यानां गवां चैव रजः शुभम्।
यथाशस्यं समूहिन्याः श्वाजाविखरवाय-
साम्॥"

समूहिनी संमार्জ্জनी॥*॥ कृत्यचिन्तामणौ मेधिरोपणम्।

वटश्च सप्तपर्णश्च गम्भारी शाल्मली तथा।
पौडुम्बरी तथा धात्री या चान्या क्षीर-
धारिणी।
क्षीरान्नी कर्षकैर्नित्यं मेधिः कार्य्या फलप्रदा॥"

बीजसञ्चयदिनादि तच्छब्दे द्रष्टव्यम्॥*॥*॥

अथ प्रयोगः।

पौर्णमास्यन्तचैत्रीयकृष्णपक्षभ्यां पृथ्वी रजस्वला तां दिनत्रयमेकस्मिन् पर्व्वताकारे उच्चप्रदेशे सधवाः स्त्रियः प्रपूजयेयुरष्टम्यां तां स्नापयित्वा ताः पूजयेयुः। ततः शुभदिने बीजवपनदिने वा सर्व्वौषधिगन्धबीजरत्नफलक्षेत्रसर्षपैः पृथ्वीं स्नापयित्वा गन्धादिभिः पूजयेत्। नैवेद्यशेषञ्च पश्चाद्भोक्तव्यम्॥*॥ अथ हलप्रवाहदिने बीजवपनदिने च कृतस्नानादिराचान्तो गर्त्तं क्षेत्रे कृत्वा जलेनापूर्य्य तत्र प्रजापतिं सूर्य्यादिनवग्रहान् पृथ्वीञ्च पूजयेत्।

"हिरण्यगर्भे वसुधे शेषस्योपरिशायिनि।
वसाम्यहं तव पृष्ठे गृहाणार्घ्यं धरित्रि मे॥"

इति मन्त्रेण क्षौरेणार्घ्यं दद्यात्। ऐशान्यां पुष्पनैवेद्यैः प्रणवादिनमोऽन्तेन ब्रह्मणे विष्णवे। नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहा॥ इत्यनेन त्रिः पूजयेत्। रुद्राय कश्यपाय सुरभ्यै इन्द्राय। तदर्घ्यमन्त्रस्तु।

"शक्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः।
शतयज्ञाधिपो देव तुभ्यमिन्द्राय वै नमः॥"

प्रचेतसे पर्জ্জन्याय शेषाय चन्द्राय अर्काय वरुणाय बलदेवाय हलाय भूमये वृषभाय रामाय लक्ष्मणाय जानक्यै सीतायै युगाय गगनाय इति हाविंगतिं पूजयेत् क्षेत्रपालमग्निं द्विजञ्च पूजयेत्। अग्निं प्रदक्षिणीकृत्य ब्राह्मणाय दक्षिणां दद्यात्। आम्रपल्लवोदनदधीनि गर्त्ते निःक्षिप्य मृत्तिकाभिः पूरयेत्। कृष्णौ वृषौ नवनीतैर्घृतेन वा सुखपार्श्वयोर्निलिम्पेत्। हलप्रवाहकान् गन्धादिना भूषयित्वा हलं माल्यादिभिः पूजयित्वा दधिघृतमधुभिः फालाग्रं प्लक्ष्य क्षेत्रा फालाग्रं घर्षयित्वा कर्षयेत्। वह्निन्द्रपृथुरामेन्दुपराशरबलभद्रान् स्मरेत्। एका तिस्रः पञ्च वा रेखा हलेन कार्य्याः। भग्नशृङ्गखुरलाङ्गूलाः कपिलाश्च वृषा न योजयाः। हलप्रवाहकाश्च समर्थाः कर्त्तव्याः। हलानि नवानि दृढानि कर्त्तव्यानि। वृषभयुहादिकं न शुभदं वृषभाणां नर्दनेन चतुर्गुणं शस्य मूत्रपुरीषोत्सर्गे तथा॥*॥ बीजवपने त्विदमधिकम्। सुवर्णजलसंयुक्तं बीजमुष्टित्रयं इन्द्रं ध्यायन् स्वयं प्राजापत्येन तीर्थेन वपेत्। उभयत्रैव प्राङ्मुखः जलपूर्णं कलसं गृहीत्वा।

"त्वं वै वसुन्धरे सीते बहुपुष्पफलप्रदे।
नमस्ते मे शुभं नित्यं कृषिं मेधां शुभे कुरु॥
रोहन्तु सर्व्वशस्यानि काले देवः प्रवर्षतु।
कर्षकास्तु भवन्त्वग्र्या धान्येन च धनेन च
साहेति प्रार्थयेदिति॥"

इति ज्योतिस्तत्त्वम्॥*॥

अपि च।

"अमावस्यां पितृश्राद्धे अम्बुवाचीदिने तथा।
लाङ्गलेन यतं क्षेत्रं पृथिवी कम्पते सदा॥"

इति कर्म्मलोचनम्॥*॥

स्मृतिसागरसारे गोभिलः।

"हलैर्व्वा शकटैर्व्वापि वाहयेत् यो वृषं स्वयम्।
प्राजापत्यद्वयं कुर्य्यात् द्विगुणं योषितां गवाम्॥
वृषभन्तु समुत्सृष्टं कपिलां वापि कामतः॥
योजयित्वा हले कुर्य्यात् व्रतं चान्द्रायणद्वयम्॥"

इति तिथ्यादितत्त्वम्॥

हलद्दी, स्त्री, हरिद्रा। इति राजनिर्घण्टः॥

हलधरः, पुं, (धरतीति। धृ+अच्। हलस्य धरः।) बलदेवः। यथा,—

"नीलाम्बरो हलधरो हलमुद्दालभृत् बलः॥"

इति शब्दरत्नावली॥

(यथा च महाभारते। १। २२०। ७।

"ततो हलधरः श्रीमो रेवतीसहितः प्रभुः।
अनुगम्यमानो गन्धर्व्वैरचरत्तत्र भारत!॥")

हालिकः। यथा, ज्योतिस्तत्त्वे।

"सालङ्कारो हलधरः स्वर्गभिव पूजितं हलम्॥"

हलभूतिः, स्त्री, (हलसाध्या भूतिः।) कृषिकर्म्म। यथा,—

"अथ सेवा वृत्तिः स्यात् स्त्रियां कृषिश्च
कर्षणम्।
कर्षोऽस्तुतश्च प्रकृतं हलभूतिर्महाधनम्॥"

इति शब्दरत्नावली॥

हलभृत्, पुं,(हलं बिभर्त्तीति। भृ+क्विप्। हलस्य भृदिति वा।) बलदेवः। इति त्रिकाण्डशेषः॥ (यथा, मेघदूते। ६१।

"अंसन्यस्ते सति हलभृतो मेघके वाससीव॥")

हलभृतिः, पुं, (हलेन भृतिर्भरणमस्य।) मुनिविशेषः। तत्पर्य्यायः। उपवर्षः २ कृतकोटिः ३ अयाचितः ४। इति त्रिकाण्डशेषः॥ (हलस्य हलेन वा भृतिः।) कृषिकर्म्म च॥

हलराज्यं, क्ली, आढ्यत्वम्। इति राजनिर्घण्टः॥

हला, व्य, नाट्योक्तौ सखीं प्रत्याह्वानम्। इत्यमरः। १। ७। १५॥

हला, स्त्री, सखी,। इति जटाधरः॥ मद्यम्। पृथिवी। जलम्। इत्यनेकार्थकोषः॥

हलायुधः, पुं, (हलमायुधं यस्य।) बलदेवः। इत्यमरः। १। १। २४॥ (यथा, महाभारते। १। २२१। २१।

"ततस्ते तद्वचः श्रुत्वा ब्राह्मरूपं हलायुधात्।
तूष्णींभूतास्ततः सर्व्वे साधु साध्विति चाब्रुवन्॥")

हलाहः, पुं, चित्रितास्रः। इति हेमचन्द्रः॥

हलाहलः, पुं, (हलमिव आ समन्तात् सर्व्वाङ्गेषु हलति कर्षतीति। आ+हल+अच्।) विषभेदः। यथा,—

"समौ कालकनिर्म्मौक्षौ क्ष्वेडस्तु गरलं विषम्।
पुंसि क्लीवे च काकोलकालकूटहलाहलाः॥"

इत्यमरः। १। ८। १०॥

हलमिव आ समन्तात् हलति विलिखति हलाहलः। हलज विलेखे अन् स्वार्थे णः। हालाहलञ्च। निपातनात् ललोपे हाहलञ्च।

"हालाहलं हालहलं हाहलञ्च हलाहलम्॥"

इति रुद्रः॥

एते काकोलादयस्त्रयः पुंसि क्लीवे चेत्यन्वयः। केचित्तु क्ष्वेडभेदा इति पुंस्त्वे वक्ष्यमाणत्वात् पुंसि क्लीवे चेत्यस्य विषमित्यनेन सम्बन्धः। इत्याहुः। तन्नातिदृश्यम्।

"काकोलसमतेजः स्यात् कृष्णच्छवि महा-
विषम्।"

इति वैद्यकम्।

"तत् कालकूटं विषमुग्रतेजः
कण्ठे धृतं पर्व्वतराजकन्ये॥"

इति व्यासः॥

हालाहलं विषमिव प्रगुणं तदेव इति वामनः॥

"मधु तिष्ठति वाचि योषितां हृदये हलाहलं
मर्म्मविषम्।
अतएव निपीयतेऽधरो हृदयं मुष्टिभिरेव
ताड्यते॥"

इति कुलचरितेऽश्वघोषः। इति भरतः॥

(मूलजविषभेदः।

"सङ्कोचं मर्कटं शृङ्गिविषं हलाहलन्तथा।
एवमादीनि चान्यानि मूलजानि स्थिराणि च॥"

इति चरके चिकित्सास्थाने २५ अध्याये॥)

हलाहलः, पुं, (हलाहलोऽस्यास्तीति।) अर्च्।) ब्रह्मसर्पः। अञ्जना। इति मेदिनी॥ बुधविशेषः। इति त्रिकाण्डशेषः॥

हलिः, पुं, (हलति कर्षति भूमिमिति। हल+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन् बृद्धहलम्। इति शब्दरत्नावली॥ तत्पर्य्यायः। जित्या २। इति हेमचन्द्रः॥

हलिनी, स्त्री, (हलमिव आकारोऽस्यस्या इति। इनिः। ङीप्।) लाङ्गलिकीवृक्षः। विषलाङ्गला इति भाषा इति रत्नमाला॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।

"कलिहारी तु हलिनी लाङ्गली शक्रपुष्पपि।
विषल्याग्निशिखानन्ता वह्निवक्त्रा च गर्भगुत॥"

"लाङ्गली हलिनौ च स्यात्" इति गारुडे २०८ अध्याये ॥) हलसमूहश्च ॥

हलिप्रियः, पुं, (हलिनो बलदेवस्य प्रियः।) कदम्बवृक्षः। इत्यमरः। २।४।४२ ॥ (पर्य्यायो यथा,—

"कदम्बः प्रियको नीपो वृत्तपुष्पो हलिप्रियः ॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हलिप्रिया, स्त्री, (हलिनो बलदेवस्य प्रिया।) मदिरा। इति राजनिर्घण्टः। अमरश्च। २। १०। ३८ ॥ (विवरणमस्या मदिराशब्दे ज्ञातव्यम् ॥)

हली, स्त्री, (हल्यते इति। हल+इन्। ङीष्।) कलिकारीवृक्षः। इति राजनिर्घण्टः ॥

हली, [न्] पुं, (हलमस्यास्तीति। हल+इनि।) बलदेवः। इत्यमरः। १।१।२४ ॥ (यथा, उपदेशशतके। ६८।

"क्रुद्धो हली कुरुणां पुरमुत्याप्य चिपन्नद्याम्। अनुनीतस्तदमुञ्चत् क्रोधाविष्टोऽनुनेतव्य ॥")

कृषिकर्म्मकर्त्ता। तत्पर्य्यायः। कुटुम्बी २ कर्षकः ३ क्षेत्री ४ कृषिकः ५ कार्षिकः ६ कृषीवलः ७। इति हेमचन्द्रः ॥

हलीनः, पुं, (हलाय हितः। हल+छः।) शाकवृक्षः। इति शब्दचन्द्रिका ॥

हलीमकः, पुं, रोगविशेषः। यथा पाण्डुरोगस्यैव भेदं हलीमकञ्चाह।

"यदा तु पाण्डोर्व्वर्णः स्याद्धरितश्यावपीतकः। बलोत्साहः क्षयस्तन्द्रामन्दाग्नित्वं मृदुज्वरः ॥ स्रोध्वहर्षोऽङ्गमर्दश्च श्वासष्ठीवारुचिस्तमाः। हलीमकं तदा तस्य विद्यादनिलपित्ततः ॥"

पाण्डोः पाण्डुरोगिणः ॥ तस्य चिकित्सा यथा,

"मारितस्यायसचूर्णं मुस्ताचूर्णेन संयुतम्। खदिरस्य कषायेण पिबेद्वन्तं हलीमकम् ॥ सिता तिक्ता बला यष्टी त्रिफला रजनीयुगैः। लेहं लिह्यात् समध्वाज्यं हलीमकनिहत्तये ॥ अमृतलतारसकल्कप्रसाधितं तुरगविहिषः सर्पिः। क्षीरचतुर्गुणमेतद्धितरेच हलीमकार्त्तेभ्यः ॥"

इति अमृताघृतम् ॥ * ॥

"मधुरैरन्नपानैस्तं वातपित्तहरैर्हरेत्। कामलापाण्डुरोगोक्तक्रियाचात्रोपयोजयेत् ॥"

अथ सामान्यतः पाण्डुरोगकामलाहलीमककृच्छ्रिकित्सा।

"फलत्रिकामृतावासातिक्ताभूनिम्बनिम्बजः। क्वाथः क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम् ॥१ त्रायमाणं त्रिफला मुस्तं विड्गं चव्यचित्रके। दार्व्वी त्वक्क्षीरिको धातुर्ग्रन्थिको देवदारु च ॥ एषां द्विपलिकान् भागान् कृत्वा चूर्णं पृथक् पृथक्। मण्डूरं द्विगुणं चूर्णाच्छुद्धमञ्चनसन्निभम् ॥ मूत्रे चाष्टगुणे पक्त्वा तस्मिंस्तत् प्रक्षिपेत्ततः। क्षौद्रसदृशमान् कृत्वा वटकांस्तान् यथाग्नि च। उपयुञ्जीत तक्रेण जीर्णे साम्यञ्च भोजनम्। मण्डूरवटका हन्ति प्राणदाः पाण्डुरोगिणाम् ॥ कुष्ठानि जठरं शोथमूरुस्तम्भं कफामयान्। अर्शांसि कामलां मेहं प्लीहानं शमयन्ति च ॥"

इति नूपणादिमण्डूरवटकः ॥२॥

"किराततिक्तं सुरदारु दार्व्वी मुस्ता गुडूची कटुका पटोलम्। दुरालभा पर्पटकं सनिम्बं कटुत्रिकं वह्निफलत्रिकञ्च ॥ फलं विड्गस्य समांशकानि सर्व्वैः समं चूर्णमथायसञ्च। सर्पिर्मधुभ्यां वटिका विधेया तक्रानुपानात् भिषजा प्रयोज्या ॥ निहन्ति पाण्डुञ्च हलीमकञ्च शोथं प्रमेहं ग्रहणीगदञ्च। श्वासञ्च कासञ्च सरक्तपित्त- मर्शांस्यथोरुग्रहमामवातम् ॥ व्रणांश्च गुल्मान् कफविद्रधिञ्च क्षिप्रञ्च कुष्ठञ्च ततः प्रयोगात् ॥"

इति भैषज्यरत्नावल्याम् ॥ ३ ॥

"यवगोधूमशाल्यन्नै रसैर्जाङ्गलजैर्हितैः। सुहाढ़कौमसूरार्द्धैरु भोजनमिष्यते ॥"

एषु पाण्डुरोगकामलाहलीमकेषु ॥ ४ ॥

इति भावप्रकाशः ॥

हलीषा, स्त्री, (हलस्य ईषा। शकन्धादित्वात् साधुः।) लाङ्गलदण्डः। इति मुग्धबोधव्याकरणम् ॥

हल्यं, त्रि, (हलेन कृष्टम्। हल+यत्।) कर्षितक्षेत्रम्। इत्यमरः। २।८।८ ॥ अस्य पर्य्यायः क्रष्टशब्दे द्रष्टव्यः ॥ (हलस्येदमिति।) हलसम्बन्धि च ॥ (पुं, हलस्य कर्षः। हल+"मतजनहलात् करणजल्पकर्षेषु।" ४।४।८७ ॥ इति यत् ॥)

हल्यं, क्ली, (हलस्येदमिति। यत्।) वेरूप्यम्। इति केचित् ॥

हल्या, स्त्री, (हलस्य समूहः। हल+"पाशादिभ्यो यः।" ४।२।।४८। इति यः।) हलसमूहः। इत्यमरः। ३। ३। ४१ ॥

हल्लकं, क्ली, रत्नकङ्कारम्। हेला इति भाषा। तत्पर्य्यायः। रत्नसन्थकम् २। इत्यमरः। १। १०। ३६ ॥ रत्नसौगन्धिकम् ३ रेचना ४। इति जटाधरः ॥ अल्पगन्धम् ५ सोमाख्यम् ६ रत्नकैरवम् ७। इति रत्नमाला ॥

हल्लनं, त्रि, प्रचलायितम्। इति जटाधरः ॥

हल्लीषं, क्ली, स्त्रीणां सह नर्त्तनम्। इति त्रिकाण्डशेषः ॥ (पुं, उपरूपकविशेषः। तल्लक्षणं यथा, साहित्यदर्पणे। ६। ५५५।

"हल्लीष एव एकाङ्कः सप्ताष्टौ दश वा स्त्रियः। वागुदात्तैकपुरुषः कैशिकीवृत्तसङ्कुलः। सुखान्तिमो तथा सन्धी बहुताललयस्थितिः ॥")

हल्लीषकं, क्ली, (हल्लीषमेव। स्वार्थे कन्।) स्त्रीणां मण्डलिकानृत्यम्। इति जटाधरः ॥

"मण्डलेन तु यन्नृत्यं स्त्रीणां हल्लीषकन्तु तत्॥

इति हेमचन्द्रः ॥

एकस्य पुंसो बहुभिः स्त्रीभिः क्रीड़नम्। तच्च रासक्रीड़ा। यथा,—

"गोपीनां मण्डलीनृत्यबन्धे हल्लीषकं विदुः ॥"

इति कोषात् ॥

तल्लक्षणञ्च।

"पृथुं सुहृत्तं मसृणं वितस्ति- मात्रोन्नतं को विनिखन्य शङ्कुकम्। आक्रम्य पद्माभितरेतरन्तु हस्तैर्भ्रमीड्यं खलु रासगोष्ठी ॥"

इति हरिवंशटीकायां नीलकण्ठः ॥

हल्लीसकं दन्त्यसकारमध्यमपि ॥

हवः, पुं, (हु लि होमे+अप्।) होमः। आह्वा। (ह्वे+"भावेऽनुपसर्गस्य।" ३। ३। ७५। इति अप् सम्प्रसारणञ्च।) आह्वानम्। अध्वरः। इत्यमरः। १। २। ८ ॥

व ह्वः, पुं, कांस्यपात्रे दधिमिश्रितान्नभक्षणम्। इति केचित् ॥

हवनं, क्ली, (हु+ल्युट्।) होमः। इति शब्दरत्नावली ॥ (यथा, महाभारते। १। १६८। ३४।

"याजस्तु हवनस्यान्ते देवीमाज्ञापयत्तदा। प्रेहि मां राज्ञि पृथति! मिथुनं त्वामुपस्थितम् ॥")

हवनायुः, [स्] पुं, (हवनमेव आयुर्यस्य।) अग्निः। इति शब्दरत्नावली ॥

हवनी, स्त्री, (ह्रियतेऽनेति। हु+ल्युट्। ङीप्।) होमकुण्डम्। इति त्रिकाण्डशेषः ॥

हवनीयं, त्रि, होमीयद्रव्यम्। हव्यम्। हुधातोरनीयप्रत्ययेन निष्पन्नम् ॥

हविः, [स्] क्ली (ह्रियतेऽनेनेति। हु+"अर्हिहुचिहुभ्यः सिरिति।" उणा० २। १०९। इति इसिः।) हवनीयद्रव्यम्। तत्पर्य्यायः। साज्याम् २। घृतम्। इत्यमरः। २। ३। २७ ॥ (यथा, महाभारते। १। ८५। ११।

"न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥")

जलम्। इति केचित् ॥ (विष्णुः। इति महाभारतम्। १३। १४८। ५२ ॥ शिवः। इति च तत्रैव। १३। १७। १०२ ॥)

हविची, स्त्री, होमकुण्डम्। इति हेमचन्द्रः ॥

हविरग्नः, पुं, (हविरग्नं यस्य।) अग्निः। इति हेमचन्द्रः ॥ घृतभोजने, क्ली ॥

हविर्गन्धा, स्त्री, (हविषो गन्धो यस्याम्।) शमी। इति राजनिर्घण्टः ॥ शमीशब्देऽस्या गुणादयो ज्ञातव्याः ॥

हविर्गेहं, क्ली, (हविषो गेहम्।) होमगृहम्। तत्पर्य्यायः। शौत्रीयम् २। इति हेमचन्द्रः ॥

हविर्मन्थः, पुं, (हविषो हवनीयाय मथ्यते इति। मन्थ+घञ्।) गणिकारीवृक्षः। इति रत्नमाला ॥

हविष्यं, क्ली, (हविषे हितम्। हविस्+"ओषधिवादिभ्यो यत्।" ५।१।२। इति यत्।) घृतम्। यथा,—

"घृतं हविष्यमाज्यञ्च हविराघारमर्पिषी ॥"
इति हेमचन्द्रः ॥

हविष्यान्नम् । यथा,—
"वयोदश्यां कृतस्नानो ब्रह्मचारी समाहितः ।
निरामिषं हविष्यं वा भक्षयीत नान्यथा ॥"
इति शिवरात्रिव्रतकथा ॥*॥

अन्यच्च ।
"हैमन्ते प्रथमे मासि नन्द व्रजकुमारिकाः ।
चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्चनव्रतम् ॥"
इति श्रीभागवतम् ॥

हविष्यान्नं, क्ली, (हविष्यमन्नम् ।) व्रतादौ भक्षणीयद्रव्यविशेषः । यथा, स्मृतिः ।
"हैमन्तिकं सितासिन्नं धान्यं मुद्गास्तिला यवाः ।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका ॥
षष्टिका कालशाकञ्च मूलकं केसुकेतरत् ।
लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी ।
तिन्तिड़ी जीरकञ्चैव नागरङ्गकपिप्पली ॥
कदली लवली धात्री फलान्यगुड़सैन्धवम् ।
अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते ॥"
अचाखिन्नमित्युपादानादन्यत्र खिन्नधान्यतण्डुलेन दोषः । हैमन्तिकमित्यभिधाय अगस्त्यसंहितायाम् ।
"नारिकेलफलञ्चैव कदलीं लवलीन्तथा ।
आम्रमामलकञ्चैव पनसञ्च हरीतकीम् ।
व्रतान्तरप्रशस्तञ्च हविष्यं मन्वते बुधाः ॥"
इति तिथ्यादितत्त्वम् ॥

हव्यं, क्ली, (ह्रियते इति । हु+यत् ।) देवान्नम् । इत्यमरः । २ । ७ । २४ ॥ (यथा, मनुः । ३।८७।
"नश्यन्ति हव्यकव्यानि नराणामविजानताम् ।
भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः ॥")
हवनीयद्रव्यञ्च ॥

हव्यपाकः, पुं, (हव्याय पाको यस्य ।) चरुः । इत्यमरः । २ । ७ । २२ ॥

हव्यवाहः, पुं, हव्यं वहतीति । वह+अण् ।) अग्निः । इति रत्नमाला ॥ (यथा, महाभारते । १ । २२४ । ५८ ।
"एतच्छ्रुत्वा हुतवहाङ्गवान् सर्व्वलोकभृत् ।
हव्यवाहमिदं वाक्यमुवाच प्रहसन्निव ॥")

हव्यवाहनः, पुं, (हव्यं वाहयतीति । वह+णिच्+ल्युः ।) अग्निः । इत्यमरः । १ । १ । ५८ ॥ (यथा, महाभारते । १ । २२४ । १३ ।
"न ह्येतत् कारणं ब्रह्मन्नन्यं सम्प्रतिभाति मे ।
यद्दाह सुमहद्रुद्रः खाण्डवं हव्यवाहनः ॥")

हव्याशः, पुं, (हव्यमश्नातीति । हव्य+अश्+अण् ।) हुताशनः । इति शब्दरत्नावली ॥

हव्याशनः, पुं, (हव्यं अशनं यस्य ।) अग्निः । इति हेमचन्द्रः ॥

हस, ए हासे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-उपहासे सक०-सेट् ।) ए, अहसीत् । हासोऽपूर्व्वप्रतीत्या कपोलस्य विकसितीकरणम् । तत्रैवाकर्म्मकः । हसति शनैः शुष्करुदितस्वरो । इति गोवर्द्धनः । यदा तु कस्य चिद्दोषादिकमुद्दिश्य तत् ख्यात्तदा सकर्म्मकः । हसन्तमन्तर्व्वलमर्व्वतां रवेरिति श्रीहर्षः ॥ हसन्ति साधवोरम् । इति दुर्गादासः ॥

हसः, पुं, (हसनमिति । हस+"सनहसोर्वा ।" ३ । ३ । ६२ । इति अप् ।) हास्यम् । इत्यमरः । १ । ७ । १८ ॥ (यथा, वाजसनेयसंहितायाम् । ३० । ६ ।
"हसाय कारिमानन्दाय स्तोषखमिति ॥")

हसन्, [त्] त्रि, हास्यं कुर्व्वन् । हसधातोः शतृप्रत्ययेन निष्पन्नः ॥ (यथा, हरिवंशे । १४६ । २७ ।
"हसन् विहासांश्च जहाति हर्षात्
वाष्पागमं क्षणविनोदनार्थम् ॥")

हसनं, क्ली, (हस+ल्युट् ।) हास्यम् । इति मेदिनी ॥ (यथा, हृहत्संहितायाम् । ४६ । २५ ।
"हसने देशभ्रंशं रुदिते च व्याधिबाहुल्यम् ॥)

हसनी, स्त्री, (हसतीति । हस+ल्युट् इति ल्युट् । टिड्ढेति ङीप् ।) अङ्गारधानी । इति मेदिनी ॥

हसनोमणिः, पुं, अग्निः । इति त्रिकाण्डशेषः ॥

हसन्तिका, स्त्री अङ्गारधानी । इति हेमचन्द्रः ॥

हसन्ती, स्त्री, (हसतीति । हस+शतृ । ङीप् ।) अङ्गारधानिका । इत्यमरः । २ । ६ । २९ ॥ मल्लिकाविशेषः । शाकिनीभेदः । इति मेदिनी ॥ (हास्यं कुर्व्वती । यथा कथासरित्सागरे । ११ । ३१ ।
"अस्तीहोज्जयिनी नाम नगरी भूषणं भुवः ।
हसन्तीव सुधाधौतैः प्रासादैरमरावतीम् ॥")

हसिकः, त्रि, (हसो हास्योऽस्त्यस्येति । ठन् ।) हास्यकर्त्ता । इति कैचित् ॥ हसशब्दात् ष्ठिकप्रत्ययेन निष्पन्नः ॥

हसितं, क्ली, (हस+क्तः ।) हास्यम् । (यथा, हृहत्संहितायाम् । ६८ । ७४ ।
"हसितं शुभदमकम्पं
स निमीलितलोचनश्च पापस्य ।
हृष्टस्य हसितमसकृत्
सोन्मादस्यासकृत् प्रान्ते ॥")
कामदेवधनुः । इति कैचित् ॥ (हास्यकारणम् । यथा, कथासरित्सागरे । ५८ । १५८ ।
"अथ कर्म्मगतिं चित्रां दृष्ट्वास्य हसितं मया ॥"
परिहासः । यथा, किरातें । १३ । ४७ ।
"कीर्त्तितानि हसितैऽपि तानि यं
व्रीड़यन्ति चरितानि मानिनम् ॥")

हसितः, त्रि, (हस+क्तः ।) विकसितः । इति शब्दमाला ॥ कृतहास्यश्च ॥

हस्तं, क्ली, (हस+तन् ।) चर्म्मप्रसेविका । इति कैचित् ॥

हस्तः, पुं, (हसति विकशयतीति । हस+"हसिमृग्रिण्वामीति ।" उणा० ३ । ८६ । इति तन् ।) शरीरावयवविशेषः । स च कर्म्मेन्द्रियः । हात इति भाषा । ततपर्य्यायः । पाणिः २ समः ३ शयः ४ । इत्यमरमाला ॥ पञ्चशाखः ५ । इत्यमरः ॥ करः ६ भुजः ७ । इति जटाधरः ॥ कुलिः ८ भुजादलः ९ । इति शब्दरत्नावली ॥
"हस्तावध्यात्ममित्याहुरध्यात्मविदुषो जनाः ।
अधिभूतञ्च कर्म्माणि शुक्रस्त्वाधिदैवतम् ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥
हस्तस्य शुभाशुभलक्षणं बाहुशब्दे द्रष्टव्यम् ॥*॥
विस्तृतकरप्रकोष्ठः । इत्यमरः । २ । ६ । ६८ ॥
स च चतुर्विंशत्यङ्गुलपरिमाणम् । इति भरतः ॥
यथा,—
"यवानां तण्डुलैरेकमङ्गुलं चाष्टभिर्भवेत् ।
अदीर्घयोजितैर्हस्तश्चतुर्विंशतिभिरङ्गुलैः ॥"
इति तिथ्यादितत्त्वधृतकालिकापुराणम् ॥
अपि च ।
"यवोदरैरङ्गुलमष्टसंख्यै-
र्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः
क्रोशः सहस्रद्वितयेन तेषाम् ॥"
इति लीलावती ॥*॥
हस्तमात्रदत्तस्नेहादिद्रव्यभक्षणनिषेधो यथा,
"हस्तदत्तान्य यै स्नेहा लवणं व्यञ्जनानि च ।
दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते तु किल्बिषम् ॥
तस्मादन्तरितं कृत्वा पर्णेनाथ तृणेन वा ।
प्रदद्यात् न तु हस्तेन नायसेन कदाचन ॥"
इति श्राद्धतत्त्वधृतवशिष्ठवचनम् ॥*॥
एकहस्तदत्तद्रव्यभोजननिषेधो यथा,—
"एकेन पाणिना दत्तं शूद्रदत्तं न भक्षयेत् ।"
इति तद्धृतादिपुराणवचनम् ॥*॥
हस्तिशुण्डः । यथा, रामायणे । २ । २३ । ४ ।
"अग्रहस्तं विधुन्वंस्तु हस्ती हस्तमिवात्मनः ॥")
हस्तानच्चम् । (यथा, मार्कण्डेये । ३३ । ११ ।
"प्रयाति श्रेष्ठतां सद्यं हस्ते श्राद्धप्रदो नरः ॥")
कैशात् परे तत्समूहवाचकः । इति मेदिनी ॥

हस्तज्योड़िः, पुं, करज्योड़िवत् । हाताजुड़ि इति हिन्दी भाषा । अस्य गुणः । रसबद्धादिवश्यकृत् । इति राजनिर्घण्टः ॥

हस्तधारणं, क्ली, (हस्तस्य धारणम् ।) मारणोद्यतस्य निवारणम् । इति हस्तिवारणशब्दटीकायां रामाश्रमः । ३ । २ । ५ ॥ (परिचाणम् । यथा, महाभारते । १ । २१४ । १० ।
"ब्राह्मणस्ये हृते चौरैर्धर्म्मार्थे च विलोपिते ।
रोरूयमाणे च मयि क्रियतां हस्तधारणम् ॥")

हस्तपुच्छं, क्ली, (हस्तस्य पुच्छम् ।) हस्तावयवविशेषः । हातेर पोंछा इति भाषा । तत्पर्य्यायः । कक्षषम् २ । इति त्रिकाण्डशेषः ॥

हस्तबिम्बं, क्ली, (हस्तस्य बिम्बं यत्र ।) खासकः । स तु चन्दनादिना देहविलेपनविशेषः । इति हेमचन्द्रः ॥ करप्रतिबिम्बञ्च ॥

हस्तवारणं, क्ली, (हस्तेन वारणम् ।) परिचाणम् । तच्च मारणोद्यतस्य निवारणम् । इत्यमरः । ३ । २ । ५ ॥ करेण निषेधनञ्च ॥

हस्तसिद्धिः, स्त्री, (हस्तस्य सिद्धिः ।) भृतिः । वेतनम् । यथा,—
"प्रतीकारमिमं ज्ञात्वा शीतादेस्ताः प्रजाः पुनः ।
वार्त्तोपायं ततश्चक्रुस्तस्मिन्हि कर्म्मजाम् ॥"
इति विष्णुपुराणे १ अंशे ६ अध्यायः ॥
हस्तसिद्धिं हस्ताभ्यां साध्यां सिद्धिं भृतिं तामिवाह कर्म्मजां तत्कर्म्मनिमित्ताम् । इति तट्टीका ॥ करणे साधनश्च ॥

हस्तसूत्र, क्ली, (हस्तस्य सूत्रम् ।) वलयम् । यथा,
"कटको वलयं पारिहार्य्यावापौ तु कङ्कणम् ।
हस्तसूत्रं प्रतिसरः कर्म्मिका त्वङ्गुलीयकम् ॥"
इति हेमचन्द्रः ॥
(विवाहादिकालीनमङ्गलार्थनिबद्धकरसूत्रम् । यथा, कुमारे । ७ । २५ ।
"बबन्ध चास्याकुलदृष्टिरस्याः
स्थानान्तरे कल्पितसन्निवेशम् ।
धात्र्यङ्गुलीभिः प्रतिसार्य्यमाण-
मूर्णामयं कौतुकहस्तसूत्रम् ॥")

हस्ता, पुं, स्त्री, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतत्रयोदशनक्षत्रम् । तत्तु हस्ताकृतिपञ्चतारात्मकम् । अस्याधिदेवता दिनकृत् । जन्मकालीनोऽयं जघन्यगुणदायकः । इति ज्योतिस्तत्त्वम् ॥*॥ तद्दर्शनेन लग्ननिरूपणं यथा,—
"मस्तकोपरि करालतौ करे
तिष्ठतीन्दूमुखि ! वाणतारके ।
लिप्तिकाः शरकुपक्षसंज्ञकाः
नायकामनविलग्नतो गताः ॥"दं ३।३५ ।
इति कालिदामकृतराशिलग्ननिरूपणस्य ॥*॥ तत्र जातफलम् ।
"दाता यशस्वी सुतरां मनस्वी
भूदेवदेवार्च्चनकृन्नयज्ञः ।
प्रसूतिकाले किल यस्य हस्ता
हस्तस्थिता तस्य समस्तसम्पत् ॥"
इति कोष्ठीप्रदीपः ॥

हस्ताङ्गुलिः, पुं, (हस्तस्य अङ्गुलिः ।) करशाखा । यथा,—
"हस्ताङ्गुलय एव स्युरायुर्दा ललिताः शुभाः ।"
इति गारुडे ६६ अध्यायः ॥
अस्य विवरणं बाहुशब्दे द्रष्टव्यम् ॥

हस्तामलकं, क्ली, (हस्तस्थितं आमलकम् ।) करस्थितामलकीफलम् । (यथा, रामायणे ।
"त्वया दृष्टं जगत्सर्व्वं हस्तामलकवत् सदा ॥") वेदान्तग्रन्थविशेषः । तल्लिख्यते । श्रीमच्छङ्कराचार्य्यस्य दिग्विजयसमये पथिमध्ये कञ्चित् बालकं प्रति प्रश्नः ।
"कस्त्वं शिशो ! कस्य कुतोऽसि गन्ता
किं नाम ते त्वं कुत आगतोऽसि ।
एतद्वदं त्वं मम सुप्रमिदं
मन्प्रीतये प्रीतिविवर्द्धनोऽसि ॥"
बालकस्योत्तरम् ।
"नाहं मनुष्यो न च देवयक्षौ
न ब्राह्मणक्षत्रियवैश्यशूद्राः ।
न ब्रह्मचारी न गृही वनस्थो
भिक्षुर्न चाहं निजबोधरूपः ॥"
एतस्य श्लोकस्य गङ्गराचार्य्येण भाष्यं न ज्ञातम् ॥
"निमित्तं मनश्चक्षुरादिप्रवृत्तौ
निरस्ताखिलोपाधिराकाशकल्पः ।
रविर्लोकचेष्टानिमित्तं यथा यः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥१॥
यमग्न्यूष्णवन्नित्यबोधस्वरूपं
मनश्चक्षुरादीन्यबोधात्मकानि ।
प्रवर्त्तन्त आश्रित्य निष्कम्पमेकं
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ २ ॥
सुखाभासको दर्पणे दृश्यमानो
सुखत्वात् पृथक्त्वेन नैवास्ति वस्तु ।
चिदाभासको धीषु जीवोऽपि तद्वत्
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ३ ॥
यथा दर्पणाभाव आभासहानौ
मुखं विद्यते केवलं नाद्वितीयम् ।
तथा धीवियोगे निराभासको यः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ४ ॥
मनश्चक्षुरादेर्विमुक्तः स्वयं यो
मनश्चक्षुरादेर्मनश्चक्षुरादिः ।
मनश्चक्षुरादेरगम्यस्वरूपः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ५ ॥
य एको विभाति क्षतः क्षद्धचेताः
प्रकाशस्वरूपोऽपि नानेव धीषु ।
शरावोदकस्थो यथा भानुरेकः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ६ ॥
यथानेकचक्षुः प्रकाशो रविर्न
क्रमेण प्रकाशीकरोति प्रकाश्यम् ।
अनेका धियो यस्तथैकप्रबोधः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ७ ॥
विवस्वत्प्रभातं यथा रूपमर्च्चं
प्रगृह्णाति नाभातमेवं विवस्वान् ।
यथा भाति आभासयत्यर्कमेकः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ८ ॥
यथा सूर्य्य एकोऽप्यनेकत्वलाभ
स्थिराख्यस्यनन्वन्विभाव्यस्वरूपः ।
चलासु प्रभिन्नासु धीष्वेक एवं
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ९ ॥
घनच्छन्नदृष्टिर्घनच्छन्नमर्कं
यथा निष्प्रभं मन्यते चातिमूढः ।
तथा बद्धवद्भाति यो मूढदृष्टेः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ १० ॥
समस्तेषु वस्तुष्वनुस्यूतमेकं
समस्तानि वस्तूनि यन्न स्पृशन्ति ।
वियद्वत् सदा शुद्धमच्छस्वरूपं
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ११ ॥
उपाधौ यथा भेदता मन्मणीनां
तथा भेदता बुद्धिभेदेषु तेषु ।
यथा चन्द्रकाणां जले चञ्चलत्वं
तथा चञ्चलत्वं तवापीह विष्णो ॥"१२॥
इति हस्तामलकं समाप्तम् ॥

हस्तिकं, क्ली, (हस्तिनां समूहः । कन् ।) हस्तिसमूहः । तत्पर्य्यायः । गजता २ । इति शब्दरत्नावली ॥
हस्तिकक्षः, पुं, (हस्ती कक्षे यस्य ।) सिंहः । व्याघ्रः । इति केचित् ॥
हस्तिकन्दः, पुं, (हस्तिनः पद इव कन्दो यस्य ।) वृक्षकन्दविशेषः । तत्पर्य्यायः । हस्तिपदः २ स्थूलकन्दः ३ अतिकन्दकः ४ बृहत्पत्रः ५ अतिपत्रः ६ हस्तिकर्णः ७ सुकर्णकः ८ त्वग्दोषारिः ९ कुष्ठहन्ता १० गिरिवासी ११ नागाह्वयः १२ गजकन्दः १३ नागकन्दः १४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयत्वग्दोषयमकुष्ठविषवेसर्पनाशित्वञ्च । इति राजनिर्घण्टः ॥
हस्तिकरञ्जः, पुं, (हस्तीव महान् करञ्जः ।) महाकरञ्जः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य महाकरञ्जशब्दे ज्ञातव्याः ॥)
हस्तिकर्णः, पुं, (हस्तिनः कर्णमिव पर्णमस्य ।) एरण्डः । पलाशभेदः । गणदेवताभेदः । इति मेदिनी ॥ हस्तिकन्दः । रत्नैरण्डः । इति राजनिर्घण्टः ॥ हस्तिकर्णपलाशस्य गुणाः ।
"हस्तिकर्णः परं हृद्यो मेधायुर्बलवर्द्धनः ।"
इति राजवल्लभः ॥
अपि च ।
श्रीहरिरुवाच ।
"हस्तिकर्णस्य वै मूलं गृहीत्वा चूर्णयेद्वर ! ।
सर्व्वरोगविनिर्म्मुक्तं चूर्णं पलयुतं शिव ! ॥
सक्षीरं भक्षितं कुर्य्यात् सप्ताहेन हयध्वज ! ।
नरं श्रुतिधरं शूरं सृगेन्द्रगतिविक्रमम् ॥
पञ्चगोरप्रतीकाशं युतं दधिघृतायुषा ।
षोड़शाब्दाङ्गतिं रुद्र ! सततं दुग्धभोजितम् ॥
मधुसर्पिःसमायुक्तं जन्मसायुष्करं भवेत् ।
तल्लब्धं मधुना सार्द्धं दशवर्षसहस्रिकम् ॥
कुर्य्यान्नरं श्रुतिधरं प्रमदाजनवल्लभम् ।
दद्या नित्यं भक्षितन्तु वज्रदेहकरं शिव ! ॥
लक्षवेधसमायुक्तं नरं वर्षसहस्रिणम् ।
तच्च काञ्जिकसंयुक्तं नरं कुर्य्याच्च भक्षितम् ॥
शतवर्षं दिव्यदेहं वलीपलितवर्জ্জितम् ।
जन्धं त्रिफलया युक्तं चक्षुष्मन्तं करोति वै ॥
अन्धः पश्येत्तु चूर्णस्य साज्यस्यैव तु भक्षणात् ।
मक्षिकाचीरसंयुक्तं तल्लेपः क्लृप्तकेशकृत् ॥
खल्लीटस्य च वै केशा भवन्ति हयध्वज ! ।
तैलयुक्तेन चूर्णेन वलीपलितवर्জ্জितम् ॥
तद्दर्शनमात्रेण सर्व्वरोगैः प्रमुच्यते ।
सक्षागक्षीरचूर्णेन दृष्टिः पक्षमासतोऽञ्जनात् ॥"
इति गारुडे १० अध्यायः ॥
हस्तिकर्णकः, पुं, (हस्तिनः कर्ण इव पर्णमस्य । कप् ।) किंशुकभेदः । इति शब्दरत्नावली ॥
हस्तिकर्णदलः, पुं, (हस्तिनः कर्ण इव दलमस्य । पलाशभेदः । इत्यमरमाला ॥
हस्तिकोलिः, पुं, (हस्तीव कोलिः ।(बदरीभेदः । तत्पर्य्यायः । गोपघोण्टा २ घोण्टा ३ बदरीच्छदा ४ । इति रत्नमाला ॥

हस्तिगिरिः, पुं, (हस्तिप्रधानो गिरिर्यत्र ।)काञ्चिदेशः । इति केचित् ॥

हस्तिघोषा, स्त्री, (हस्तीव बृहती घोषा ।) बृहद्घोषा । बड़ी तोरई इति हिन्दी भाषा । तत्पर्य्यायः । ऐभी २ महत्पुष्पा ३ सघोतिका४ महाकोशातकी ५ । अस्या गुणाः । स्निग्धत्वम् । शारकत्वम् । पित्तानिलनाशित्वञ्च । इति मदनविनोदः ॥ (पर्य्यायान्तरं यथा,—

"महाकोशातकी प्रोक्ता हस्तिघोषा महाफला ।
धामार्गवी घोषकश्च हस्तिपर्णश्च स स्मृतः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हस्तिघोषातकी, स्त्री, (हस्तीव बृहती घोषातकी ।) हस्तिघोषा । इति रत्नमाला ॥ (गुणादिकमस्या हस्तिघोषाशब्दे ज्ञातव्यम् ॥)

हस्तिघ्नः, पुं, (हस्तिनं हन्तुं शक्तः । हस्तिन्+हन+"शक्तौ हस्तिकपाटयोः ।" ३ । २ । ५४ । इति टक् ।) मनुष्यः । इति केचित् ॥ करिनाशके, त्रि ॥

हस्तिचारिणी, स्त्री, (हस्तीव चरतीति । चर+णिनिः । ङीप् ।) मत्ताकरञ्जः । इति राजनिर्घण्टः ॥

हस्तिदन्तं, क्ली, (हस्तिनो दन्त इव आकारोऽस्येति । अच् ।) मूलकम् । इति राजनिर्घण्टः ॥

हस्तिदन्तः, पुं, (हस्तिनो दन्त इव आकारोऽस्य । अच् ।) मूलकम् । इति शब्दरत्नावली ॥ (हस्तिनो दन्त इव ।) द्वारस्थार्थभित्तिस्थकीलकः । (हस्तिनो दन्तः) गजदशनश्च ॥ (यथा,—

"हस्तिदन्तमसौ ज्ञात्वा सुश्रुतेन रसाञ्जनम् ।
लोमान्धनेन जायन्ते नृणां पाण्डितलेष्वपि ॥"

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे ॥)

हस्तिदन्तकं, क्ली, (हस्तिदन्तमेव । कन् ।) मूलकम् । इति शब्दमाला ॥ (मूलकशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

हस्तिदन्तफला, स्त्री, (हस्तिदन्त इव फलमस्याः ।) एर्व्वारुः । इति राजनिर्घण्टः ॥

हस्तिहयः, त्रि, गजपरिमाणम् । हस्तिशब्दात् हयसच्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

हस्तिनखः, पुं, (हस्तिनो नख इव ।) पुष्पौषधि यत् कूटं तत् । इत्यमरः । २ । २ । १७ ॥ द्वारोपरि दुर्गार्थं यत् कूटं कृत्तिकाराग्निस्तस्मिन् हस्तिनखो दमदमा इति ख्यातः । दुर्गद्वारावरणार्थः क्रमनिम्नोन्नतखातोत्तमृत्कूटो हस्तिनख इत्यन्योऽपि । दुर्गपुरद्वारसमीपे युद्धार्थं यद्दिरदटमस्तःसोपानयुक्तं मृत्कूटं यत्र स्थित्वा विपक्षेषु काष्ठादिकं क्षिप्यते तत्र हस्तिनखो दुरुज इति ख्यात इत्यपरे । हस्तिनो नख इव हस्तिनखः । इति तट्टीकायां भरतः । (यथा, माघे । ३ । ६८ ।

"अनैरनीयन्त रथात् पतन्तो
रथाः क्षितिं हस्तिनखादखेदैः ।
सयत्नसूतायतरश्मिभुग्न-
ग्रीवाप्रसंसन्नगुणैस्तुरङ्गैः ॥")

हस्तिनपुरं, क्ली, हस्तिनापुरम् । इति हेमचन्द्रः ॥

हस्तिनापुरं, क्ली, चन्द्रवंशीयहस्तिनामकराजनिर्म्मितनगरम् । परिक्षित्गङ्ग इति दिल्ली इति च ख्यातम् । तत्पर्य्यायः । नागाह्वः २ हस्तिनपुरम् ३ हास्तिनम् ४ गजाह्वयम् ५ गजाह्वम् ६ गजसाह्वयम् ७ । इति शब्दरत्नावली ॥ हस्तिनोपुरम् ८ । इति हेमचन्द्रः । यतानीकादभ्यमेधदत्तो भविता । तस्मादधिसीमकृष्णः । अधिसीमकृष्णात् निचक्षुः । यो गङ्गयापहृते हस्तिनापुरे कौशाम्ब्यां निवत्स्यति । इति विष्णुपुराणे ४ अंशे २१ । ३ ॥

हस्तिनी, स्त्री, (हस्तिनः स्त्री । ङीप्) गजपत्नी । हातिनी इति भाषा । तत्पर्य्यायः । करेणूः २ करिणीः ३ रेणुका ४ करेणुका ५ धेनुका ६ वासिता ७ वासा ८ करिणी ९ विद्या १० । इति शब्दरत्नावली ॥ कटभरा ११ पुष्करिणी १२ कक्षा १३ वसा १४ गणिका १५ गजयोषित् १६ । इति जटाधरः ॥ इभी १७ प्रभिनी १८ मातङ्गी १९ । अस्या दुग्धगुणाः । मधुरत्वम् । हृद्यत्वम् । गुरुत्वम् । कषायत्वम् । स्निग्धत्वम् । स्थैर्य्यकरत्वम् । शीतत्वम् । चक्षुष्यत्वम् । बलवर्द्धनत्वञ्च ॥ तद्घृतगुणाः । कषायत्वम् । लघुत्वम् । उष्णत्वम् । पित्तश्लेष्मशमनत्वम् । रुचिप्रदत्वम् । दीप्तिदत्वम् । बलासगदनाशित्वम् । वीर्य्यवर्द्धनत्वम् । उत्तमबलप्रदत्वञ्च ॥ तन्नवनीतगुणाः । कषायत्वम् । शीतत्वम् । लघुत्वम् । तिक्तत्वम् । विदग्धिजन्तुपित्तकफक्रमिनाशित्वञ्च ॥ तद्दधिगुणाः । कफपित्तविषक्रमिनाशित्वम् । कषायत्वम् । विदग्धित्वम् । तिक्तत्वम् । अग्निकरत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ चतुर्व्विंधस्त्रीमध्ये स्त्रीविशेषः । तल्लक्षणं यथा,—

"स्थूलाधरा स्थूलनितम्बभागा
स्थूलाङ्गुली स्थूलकुचा सुशीला ।
कामोत्सुका गाढरतिप्रिया च
नितम्बखर्व्वा खलु हस्तिनी स्यात् ॥"

इति रतिमञ्जरी ॥

इहविलासिनी । इति शब्दचन्द्रिका ॥

हस्तिनीपुरं, क्ली, हस्तिनापुरम् । इति हेमचन्द्रः ॥

हस्तिपः, पुं, (हस्तिनं पाति रक्षतीति । पा+कः ।) हस्त्यारोहः । इति शब्दमाला ॥ (यथा, मार्कण्डेये । ३९ । १८ ॥

"वस्त्रं मत्तं यथेच्छातो नागं नयति हस्तिपः ।
तथैव योगी स्वच्छन्दः प्राणं नयति साधितम् ॥")

हस्तिपकः, पुं, (हस्तिप एव । कन् ।) गजारोहः । माउत इति भाषा । तत्पर्य्यायः । आधोरणः २ हस्त्यारोहः ३ निषादी ४ । इत्यमरः । २ । ८ । ५९ ॥ आधौ पालकौ परौ योग्यावितिकेचित् । इति भरतः ॥ (यथा, माघे । ५ । ४९ ।

"जघ्ने जनैर्मुकुलिताञ्जमनाददाने
संरब्धहस्तिपकनिष्ठरनोदनाभिः ।
गम्भीरवेदिनि पुरः कवलं करीन्द्रे
मन्दोऽपि नाम न महानवमन्यते साध्यः ॥")

हस्तिपर्णः, पुं, (हस्तिनः कर्ण इव पर्णमस्य । हस्तिकन्दः । इति राजनिर्घण्टः ॥

हस्तिपर्णिका, स्त्री, (हस्तिनः कर्ण इव पर्णमस्याः कन् । टापि अत इत्वम् ।) राजकोशातकी । इति राजनिर्घण्टः ॥

हस्तिपर्णी, स्त्री, (हस्तिनः पर्णमिव पर्णमस्याः । ङीष् ।) मोरटालता । इति रत्नमाला ॥ कर्कटी । इति राजनिर्घण्टः ॥

हस्तिमदः, पुं, (हस्तिनो मदः ।) करिगण्डचरितमदजलम् । तत्पर्य्यायः । गजमदः २ गजदानम् ३ मदः ४ कुम्भिमदः ५ दन्तिमदः ६ दानम् ७ द्विपमदः ८ । अस्य गुणाः । स्निग्धत्वम् । तिक्तत्वम् । केश्यत्वम् । अपस्मारविषकुष्ठकण्डूतिव्रणदद्रुविसर्पनाशित्वञ्च । इति राजनिर्घण्टः ॥

हस्तिमल्लः, पुं, (हस्तिषु मल्लः ।) गणेशः । मल्लनागः । ऐरावतः । इति मेदिनी ॥

हस्तिरोहकः, पुं, (हस्तीव रोहते इति । रुह+ण्वुः । ततः कन् ।) महाकरञ्जः । इति राजनिर्घण्टः ॥

हस्तिलोध्रकः, पुं, (हस्तीव महान् लोध्रः । ततः कन् ।) लोध्रः । इति राजनिर्घण्टः ॥

हस्तिवाहः, पुं. (हस्तिनं वाहयतीति । वह+णिच्+अण् ।) महुतः । इति शब्दरत्नावली ॥ गजवाहकश्च ॥

हस्तिविषाणी, स्त्री, कदली । इति राजनिर्घण्टः ॥ (विवरणमस्याः कदलीशब्दे ज्ञातव्यम् ॥)

हस्तिशाला, स्त्री, (हस्तिनः शाला ।) गजगृहम् । फीलखाना इति पारस्यभाषा । तत्पर्य्यायः । चतुरम् २ । इति हेमचन्द्रः ॥

हस्तिशुण्डा,) स्त्री, (हस्तिनः शुण्ड इव आकारो-
हस्तिशुण्डी,) ऽस्त्यस्येति । अच् । विभाषया ङीप् ।) क्षुपविशेषः । हातिशुंड़ा इति भाषा । तत्पर्य्यायः । हस्तिनी २ भुरुण्डी ३ जलेच्छया ४ । इति शब्दचन्द्रिका ॥ नागशुण्डी ५ शुण्डी ६ धूसरपत्रिका ७ । (पर्य्यायान्तरं यथा, "हस्तिशुण्डी चातिविषा वृषपर्णं हेममाक्षिकम्॥ इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥) अस्या गुणाः । कटुत्वम् । उष्णत्वम् । सन्निपातज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ करिकरे, पुं ॥

हस्तिश्यामाकः, पुं, (हस्तीव स्थूलः श्यामाकः ।) शस्यविशेषः । हातियाश्यामा इति भाषा । अस्य गुणाः । धातुशीतत्वम् । पित्तश्लेष्मनाशित्वम् । वायुवर्द्धनत्वम् । रूक्षत्वञ्च । इति राजवल्लभः ॥

हस्ती, [न्] पुं, सुहोत्रराजपुत्रः । यथा । बृहत्क्षत्रस्य सुहोत्रः पुत्रः सुहोत्रादजमीढो य इदं हस्तिनापुरं निर्म्मापयामास । इति विष्णुपुराणे ४ अंशे १८ अध्यायः ॥ अपि च ।

"सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह।
तेनेदं निर्मितं पूर्वं पुरेव हस्तिनापुरम् ॥
हस्तिनश्चैव दायादास्त्रयः परमधार्मिकाः।
अजमीढो द्विमीढश्च पुरुमीढस्तथैव च ॥"

इति हरिवंशे पितृकल्पे २० अध्यायः ॥ * ॥

अजमीढा। इति राजनिर्घण्टः ॥ (हस्तोऽस्यस्येति। हस्त+इनिः।·) हस्तत्वप्रशस्तिभेदः। हाती इति भाषा। तत्पर्य्यायः। दन्ती २ दन्तावलः ३ हिरदः ४ अनेकपः ५ द्विपः ६ मतङ्गजः ७ गजः ८ नागः ९ कुञ्जरः १० वारणः ११ करी १२ इभः १३ स्तम्बेरमः १४ पद्मी १५। इत्यमरः।२। ८। ३४ ॥ मतङ्गजः १६ मातङ्गः १७ पीलुः १८ वराङ्गः १९ पुष्करी २० जलकङ्गः २१ मङ्गलगः २२ स्तरमः २३ मूर्षकर्णः २४ सिन्धुरः २५ सामजः २६ कटी २७ मन्तःखेदः २८ दीर्घमातृतः २९ विलोमजिह्वः ३० वरटी ३१ पिण्डपादः ३२ मङ्गामदः ३३ पेटवी ३४ कटकी ३५ कुम्भी ३६ निर्झरः ३७। इति शब्दरत्नावली ॥ सिन्दूरतिलकः ३८ पद्मनखः ३९ अङ्गारी ४० करेणुः ४१ अर्षिकी ४२ सिन्धी ४३ सामयोनिः ४४। इति जटाधरः ॥ राजीवः ४५ जलकाङ्गः ४६ जतालकः ४७ पैचिलः ४८। इति त्रिकाण्डशेषः ॥ हिरदनः ४९ करभी ५० विषाणी ५१ रदनी ५२ मङ्गावलः ५३ भद्रः ५४ द्विमातरिः ५५ षष्टिहायनः ५६। इति राजनिर्घण्टः ॥ * ॥ स च चतुर्जातितिर्यग्वा,—

"भद्रो मन्द्रो मृगो मिश्रश्चत्वारो गजजातयः ॥"

इति हेमचन्द्रः ॥ * ॥

तद्धारा भ्रमणगुणाः। वातकोपनत्वम्। अङ्गक्लेश्यत्वजन्यत्वकारित्वञ्च। इति राजवल्लभः ॥*॥

कामुकीभक्षणगजारोग्यदोषो यथा।

"नारोहेत् कामुकीभक्षं गजं राजा कदाचन।
आरुह्य कामुकं तन्तु परत्रेह विपद्यते ॥"

इति कालिकापुराणे ८८ अध्यायः ॥ * ॥

अथ गजावुर्व्वेदः।

"गजावुर्व्वेदमाख्यास्ये उक्ता यत्र गजे हिताः।
गजे चतुर्गुणा मात्रा ताभिर्गजवगर्हणम् ॥
गजोपसर्गव्याधीनां शमनं शान्तिकर्म च।
पूजयित्वा सुरान् विप्रान् ब्राह्मणे चर्पितां ददेत् ॥
दन्तिदन्तद्वये मालां शिवशीर्षादुपोषितः।
मन्त्रणं मन्त्रिता वैद्यो यदा सिद्धार्थकामसौ ॥
सूर्य्यायाः शिवदुर्गा श्रीविष्णुना रचनाङ्गः।
बलिं दद्याच्च भूतेभ्यः आपदेव चतुर्दशैः ॥
भोजनं मन्त्रितं दद्यात् भक्षनीयृनयेद्गजम्।
भूतो रक्षा शुभा मन्त्रा वादनी रक्षसां सदा ॥
त्रिफला पद्मकोशे च दग्धमूलं विडङ्गकम्।
शतावरी गुडूची च निम्बवासकसिंहकाः ॥
गजरोगविनाशाय प्रीतः कल्पः प्रकाशकः।
आयुर्व्वेदो गजानानामुक्तः संक्षेपकारतः ॥"

इति गारुडे। २०७। ३६—४२ ॥ * ॥ गजे वर्ज्जनीयानि यथा,—

"गजे सप्तसयोधित्वमुक्तं कर्णचापलम्।
परिध्युडुविभेदित्वं कुम्भमुक्तामदाद्यः ॥"

इति कविकल्पलतायां १ स्तवके २ कुसुमम् ॥*॥

तच्छकुनानि यथा।

"जहूँ करं यः कुरुतेऽथवा यो
भक्ते करं दक्षिणदन्तभागे।
यो वा भवेत् ह्रंक्षितपूरिताग्रः
करी भवेदध्वगपूरिताग्रः ॥"

इति वसन्तराजशाकुने चतुष्पदशाकुनम् ॥ * ॥

स च प्रजापतिदेवताकः। यथा विष्णुधर्म्मोत्तरे।

"अभयं सर्व्वदैवत्यं भूमिर्यं विष्णुदेवता।
कन्या दासस्तथा दासी पाजापत्याः प्रकीर्त्तिताः।
प्राजापत्यो गजः प्रोक्तस्तुरगो यमदैवतः ॥"

इत्यादि ॥ * ॥

तस्य प्रतिग्रहे आदरश्च याज्ञम्। यथा।

"करे गृह्य तथा कन्यां दासदासौ द्विजोत्तमाः।
करन्तु हृदि विन्यस्य धर्म्मो ज्ञेयः प्रतिग्रहः।
आदत्त च गजश्रोत्रः कर्णे चाश्वस्य
कीर्त्तितः ॥"

इत्यादि ॥ * ॥

प्रतिग्रहायत्नेन तदग्राह्यम्। यथा, ब्रह्मपुराणे।

"ब्राह्मणः प्रतिगृह्णीयादुद्धरार्थं साधुतत्त्ववित्।
अश्वमप्यथ मातङ्गतिलगौश्च वर्ज्जयेत् ॥"

इत्यादि ॥

तद्दानफलम्। यथा नन्दिपुराणे।

"योऽश्वं रथं गजं वापि ब्राह्मणे प्रतिपादयेत्।
स याज्ञसेनिको के यज्ञतुल्यो युगात् दय।
प्राप्यान्ते चैव मानुषं राजा भवति बुद्धिमान् ॥"

इति गृहितत्वम् ॥*॥

अपि च।

"गामश्वञ्च मही हैम मणीनथ गजांश्चिरान्।
ये प्रयच्छन्ति पर्वसु निरता सर्व्वदा मुने ! ।
न तेषां रौरवः पन्था दक्षैषां दानमिश्रुत ॥"

इति वह्निपुराणे यमयर्म्मिलोपाख्याननाम्नाध्यायः ॥ * ॥ अथ गजपरीक्षा। तत्र जातिः।

"ऐन्द्रमित्रवरुणानिलमुख्या-
वन्हतोयधरविहारिजतारे।
सूर्य्यभद्रगुरुचोमजवारे
जेयसे भवति कुञ्जरवानन ॥
लग्ने चरे शुभसमन्वितवीक्षिते वा
चन्द्रश्च दन्तिरिभयानविधौ विजया।
सौम्ये दिने करिगवाटचतुष्पथक्ष-
तोयेषु मैत्रमदितिश्च शुभप्रदाः ॥
ज्ञात् कुञ्जरजयदर्शनदानलाभाः
श्रेयेषु दुःखजनमार्क्षगुरुस्थितिश्च ॥

गजानामष्टधा भेदाः संक्षेपेण प्रकाश्यते।
ऐरावतः पुष्करीको वामनः कुमुदोऽञ्जनः ॥
पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः।
एषां संग्रहतत्त्वाद्यानामष्टजातयः ॥

ये कुञ्जराः पाण्डरवर्णदेहाः
वृदीर्घदन्ताः सितपुष्पदन्ताः।
श्लोमप्रभा भव्यभुजो बलाढ्या
महाप्रमाणा लघुपुष्टलिङ्गाः ॥
क्रुद्धाः समीके वृदवोऽन्यकाले
लघुध्वपाना बहुलोपदानाः।
विस्तीर्णदानारुणलोमपुच्छा
ऐरावतस्याभिजनप्रसूताः ॥
तेष्वेव सर्व्वेषु विशुद्धवर्णा
अतीवहृत्ताः प्रभवन्ति सुत्राः।
नाल्पेन पुच्छेन सहीपतीनां
स्पृशन्ति भूमण्डलमध्यमेते।
दन्ता विभग्ना अपि युद्धरङ्गे
पुनः प्ररोहन्ति पुरेव तेषाम् ॥ १ ॥
ये कुञ्जराः श्लोमलसर्व्वदेहाः
पुच्छा न दीर्घाः खरगण्डदेशाः।
खवभ्रदाः सन्ततरोषभाजोऽ-
मरप्रियाः सर्व्वभुजो बलाढ्याः ॥
सुतीक्ष्णदन्ता रसना गजानां
ते पुष्करीकप्रवरप्रसूताः।
ते पद्मगन्धं विहसन्ति रेतो
दानञ्च तेषां बभुः प्रभूता ॥
न तोयपानेऽभ्यधिका स्पृहा च
श्रमेऽपि नेते बलमुत्सृजन्ति।
अमी तु येषां निवसन्ति राज्ञां
ते वै समस्तक्षितिभासनार्हाः ॥ २ ॥
ये कुञ्जराः कर्कशगण्डदेशाः
कदापि माद्यन्ति गजप्रदाश्च।
आहारयोगाद्बलवीर्य्यभाजो
नात्यल्पकामा बहुलोमगण्डाः।
विरूपदन्ताश्चतुपुच्छवर्णा
ज्ञेया वर्षेर्ज्जामनवंशजाताः ॥ ३ ॥
ये दीर्घदेहाश्चतुदीर्घगण्डाः
कृदन्तभाजो मलपूर्णदेहाः।
अविद्धगण्डाः कलहप्रियाश्च
ते कुञ्जराः स्युः कुमुदस्य वंश्याः।
अन्यद्विपान् दर्शनमात्रतस्तु
निघ्नन्ति ते दुर्गमनाश्च पुंसाम् ॥ ४ ॥
ये स्निग्धदेहाः सलिलाभिलाषा
महाप्रमाणास्तनुगण्डदन्ताः
अविद्धदन्ताः श्रमदुःसहाश्च
ते कुञ्जराश्चाञ्जनवंशजाताः ॥ ५ ॥
रेतश्च दानञ्च बलञ्च यस्य-
दानूपदेशे प्रभवन्ति ये तु।
ते पुष्पदन्ताभिजनप्रसूता
महाजवाढ्या ततपुच्छभागाः ॥ ६ ॥
वृदीर्घदन्ता बहुलोमभाजो
महाप्रमाणाश्च सुवर्णभाङ्गाः।
भाग्यन्ति नाध्वश्रमणाभियोगा-
आहारपानादिषु चातियत्नैः ॥
सदप्रदेशे विचरन्ति ते वै
सुप्राजवानामिह जन्म मध्ये।
महाजवीरातिसुवर्णभाङ्गा
नारिष्टदन्ता बृहुगुह्यदन्ताः ॥

मद्राश्रयाः क्षीणपुरीषमूत्र-
विस्तीर्णकर्णाक्षितुरीमगण्डाः ।
ते सार्व्वभौमाभिजनप्रसूता
विप्लवसुत्राः प्रभवन्ति पेचु ॥ ७ ॥
ये दीर्घशुण्डाः सुविभक्तदेहा
मद्राजवाः क्षीणपरीतकाय ।
विस्तीर्णकर्णाक्षितुपुच्छदन्ताः
उदाग्रनद्वैव यथाप्रियाय ॥
प्रह्लादगण्डास्तनुलोमयुक्ताः ।
ते क्षत्रतीकप्रवरप्रसूताः ।
मद्राप्रमाणामितमौक्तिकानि
भवन्ति तैतत्रिजगाद काव्यः ॥८॥*॥
एकजातिसमुत्पन्नो गजः शुद्ध इति स्मृतः ।
लक्षणञ्च यथा प्रोक्तं शुद्धत्वेतन्न दृश्यते ॥
शुद्धद्विजातिसम्भूतस्तल्लक्षणसमन्वितः ।
जारजो नाम विख्यातो यथार्थं बलवीर्य्यवान् ॥
द्विजातिस्त्रयजातो यः स शुद्ध इति काव्यते ।
द्विजातिजारजोत्पन्न उद्धान्त इति काव्यते ॥
एवं संयोगभेदेन गजजातिरनेकधा ।
तां यो जानाति तत्त्वेन स राज्ञः पात्रमर्हति ॥
ब्रह्मादिजातिभेदेन तेषां भेदचतुर्विधः ।
विप्राणाङ्गः पवित्राश्च ब्राह्मणाः स्वल्पभो-
जिनः ॥
शूरा विप्राणा बलाढ्याः क्षुद्राः क्षत्रिय-
जातयः ॥ * ॥
अथ गुणाः ।
"यथा रक्तं यथा स्निग्धं यथा स्त्री सप्तयो यथा ।
परीक्ष्यन्ते गुणैरेवं गजानामपि निर्णयः ॥
रम्यो भीमो ध्वजोऽधीरो वीरः शूरोऽष्ट-
मङ्गलः ।
सुनन्दः सर्व्वतोभद्रः स्थिरो गम्भीरवेद्यपि ।
वरारोह इति प्रोक्ता गजा द्वादश सत्तमाः ॥"
तदुक्तयश्च भोजः ।
"विभक्तावयवः पुष्टः सुदन्तः सुमहानपि ।
तेजस्वी रम्य रत्युक्तो गजः सम्पत्तिवर्द्धकः ॥ १ ॥
अङ्कुशादिप्रहारेण यस्य भीतिर्न जायते ।
स भीमोऽयं गजः श्रेष्ठो राज्ञः सर्व्वार्थसाधनः ॥२॥
शुण्डाग्रात् पुच्छपर्य्यन्त रेखा यस्यैव दृश्यते ।
ध्वजः शुभो गजो नाम सङ्ग्राम्यप्राणदा-
यकः ॥ ३ ॥
सभी क्षुभी खराकारो आवर्त्ती तत्र चोच्यते ।
अधीरोऽयं गजो नाम्ना राज्ञां विघ्न विना-
शनः ॥ ४ ॥
आवर्त्तः शुद्धतो यस्य खनाभिमभिविन्दति ।
पुष्टाङ्गो बलवान् वीरो राज्ञामभिमतप्रदः ॥५॥
मद्राप्रमाणः पुष्टाङ्गः सुदन्तश्चागजध्वजः ।
भद्रणे भद्रवे शान्तः शूरो लक्ष्मीविवर्द्धनः ॥६॥
सितौ दन्तौ सितः पुच्छः सिता रेखाः सिता
नखाः ।
रक्तकृष्णाधिपोर्य्याङ्गैर्विहीनः शोऽष्टमङ्गलः ॥
अयं गजेन्द्रो यस्यास्ते तस्य याति गजेन्द्रता ।
नारिष्टानीतयस्तत्र यत्रास्तेऽयं गजेश्वरः ॥
आयोजनगतं यावदनर्थं कुरुते क्षयम् ।
नाम्यमुर्द्धरयं प्राप्तो मनुशैन्द्रैः यशो युवि ।८॥
इभो दन्ती शुभः शुण्डः शुभो कुम्भी शुभव्रतुः ।
गण्डयोर्गण्डयोर्मध्ये आवर्त्तः शुभलक्षणः ॥
शत्रुशब्दस्तुतिपरिप्लुतगण्डदेशा-
स्तीक्ष्णाङ्कुशेन विनिवारयितुं न शक्याः ।
क्षान्तिदिपो नयपयोदरवा गभीरा:
पृथ्वीभुजां सकलसौख्यकरा भवन्ति ॥"
अथ दोषाः ।
"दीनः क्षीणोऽथ विषमो विरूपो विकलः
खरः ।
विमदो भापकः शाको धूम्रो जटिल इत्यपि ॥
अजिनी मण्डली भिन्नो हतावर्त्तो महाभयः ।
राष्ट्रहा सुषली भाली निःसत्त्व इति धिंयमितिः ।
महादोषाः समाख्याता गजानां भोजभूभुजा ॥"
तदुक्तयः,—
"अतिक्षीणतरः क्षीणस्तुदन्तोऽतिनिष्प्रभः ।
दीनाख्यः कुरुते दीनं भूभुजं नात्र संशयः ॥ १ ॥
सर्व्वगुणो महापुच्छो निश्वासो वेगवर्जितः ।
क्षीणोऽयं कुरुते क्षीणं स्वामिनं धनसम्पदा ॥ २
कुम्भे दन्तेऽक्षिकर्णे च वैषम्यं पार्श्वयोस्तथा ।
यस्यायं विषमो नागो नागवत् कुरुते क्षयम् ॥३॥
भास्कन्धात्तु शिरः क्षीणं पश्चाद्भागश्च पुष्टता ।
विरूप इति नागोऽयं कुरुते भूधनक्षयम् ॥ ४ ॥
नानाभोगैरपि क्लान्तैर्यश्च नो जायते मदः ।
युद्धाय नोपक्रमते विज्ञानं तं विवर्जयेत् ॥ ५ ॥
खरता सकला यस्य शरीरेऽतीति लक्ष्यते ।
तनुदन्तकरो दन्ती खरः कुलविनाशनः ॥ ६ ॥
न जायते मदो यस्य स्रवकाले जायतेऽथवा ।
विरूपो विषमो वापि विमदं दूरतस्त्यजेत् ॥७॥
क्षुद्रप्रमाणः क्षीणाङ्गस्तनुशुण्डशिरोदरः ।
अन्यान्तं क्षिपति क्षिप्रं यः पतेद्वै नैपयोर्नरम् ॥
क्षिप्ते पुच्छाग्रतो वापि आवर्त्ती मण्डलोऽथवा ।
वह्निः प्रकुपते क्षिप्रं सर्व्वथा गतपीडवत् ॥
भूभुजा नहि वीक्ष्योऽयं शापक्लान्तो गजाधमः ।
यदीच्छेच्छ्रेयसस्तर्हि भूतिं श्रीरारोग्यमेव वा ॥८॥
शुद्धदेशी यस्य भग्नो स्वान्यदेशोऽतिगुप्तकः ।
जारोऽयं कुरुते क्षत्रं स्वामिनो नात्र संशयः ॥९॥
विमली शुद्धनी दन्ती यस्य शुण्डविरोधिनी ।
मिथ्येति वा विदीर्य्येतां स्वयं मृत्यान्तरावुभौ ।
कुरुते व्याधितं नाथं भृत्यनाशं गजाधमः ॥१०॥
मूर्खजाः कर्कशा रूक्षा जटारूपाशुबन्धिनः ।
यस्यायं जटिलो नागः कुरुते धनसंक्षयम् ॥११॥
स्वप्ने वा शास्त्रदृष्टे वा लक्षं चर्म्मोज्वलक्षणे ।
अजिनो नाम नागोऽयं कुरुते भूधनक्षयम् ।
नैनं स्वप्नेऽपि वीक्षेत यदीच्छेदात्मनः श्रियम् ॥१२॥
मण्डलानि प्रदृश्यन्ते एकं द्वे वा त्रीणि वा ।
विरूपाण्यशुभानीव मण्डली कुलनाशनः ॥१३॥
तानि श्वेतानि चेत्पश्येत् भिन्नो वा धनहानये ॥१४
हृदये उदरे चैव तिसृषु पुच्छस्य मूलतः ।
शुदि भेदे पदे चैव आवर्त्तेन क्षयश्रियम् ।
योनिनं कुरुते भूपं प्रधानिनमुपद्रुतम् ॥ १५ ॥
गच्छतो यस्य गुल्फाभ्यां भवेत् संघर्षणं
मुहुः ।
अपि सर्व्वगुणैर्युक्तस्त्याज्यश्च स महाभयः ॥
राष्ट्रं धनं कुलं सैन्यं सेवं दारान् तथा प्रजाः ॥
अपत्यमुभौ नागो हन्त्यसावो न संशयः ॥
तस्मादन्विष्यते लोकस्तस्य यत्नभयं भवेत् ।
व्याधिवह्निभयं वाथ यत्नास्ते स महाभयः ॥१६॥
भग्नं सन्ताड्यमानस्तु पार्श्वकं यो न गच्छति ।
पृष्ठोदरं समाहत्य रेखा रक्तसमा यदि ॥
न्यस्ताग्निमण्डलस्थाने पश्चात् पातः पदे यदि ।
अपि सर्व्वगुणैर्युक्तो राष्ट्रघ्नायं गजाधमः ॥
राष्ट्रादपाक्रियतेऽयं भूभुजा श्रियमिच्छता ।
राष्ट्रान्ते रक्षितो मोहात् कुरुते राष्ट्रसंक्ष-
यम् ॥ १७ ॥
पादाद्यास्यन्तविषमा दन्ती चाग्नीध्यवेषभी ।
यक्षरो दृश्यते भग्न पक्षो वाष्टो द्वयोऽथवा ॥
दन्ती वा चलतो यस्य किंचु वा न प्ररोहतः ॥
क्षुभी वा विषदौ यस्य सुखलीस गजाधमः ।
राष्ट्रदुर्गबलामात्यत्रयत्नं परित्यजेत् ॥ १८ ॥
शुभैरुपद्रवाभाति भाली यस्यातिजर्जरः ।
भाली स कुरुते नागो भर्तुः कुलधनक्षयम् ॥१९॥
पुष्टो विप्रान्तः शुद्धान्तः शत्कारोऽपि शुभोऽपि
सन् ।
न रक्षे साधसो यस्य स निःसत्त्वो गजाधमः ॥
सर्व्वैर्वा गजदोषाणामुक्त एव महाभयम् ।
यैरेकेन गुणाः सर्व्वे क्षयायन्ते सुनिश्चितम् ॥"१०
पालकाप्यस्तु ।
"क्षीणदन्ताङ्गपुच्छत्वं विषमत्वं रदादिषु ।
शिरः क्षीणमधः पुष्टिरेते दोषा गजे मताः ॥"*
गार्ग्यस्तु ।
"ये कुब्जराश्चतुरदाश्चतुरङ्गशुण्डाः
क्षीणाः सुदीनवपुषो गुरुदीर्घपुच्छाः ।
यत्राहिभिः खलु गुणैरधिता जिताय
ते भूभुजामभिमता नहि वीक्षणीयाः ॥
यो न स्वभिन्नदजलं तनुमूर्द्धभागो
निर्व्वीर्य्यिताशुपगतो बहुभोजनेऽपि ।
नैकत्वसाधुपगतानपराजिनस्तं
भूमीभुजा न हि गजोऽयमवेक्षणीयः ॥
दोषैर्दुष्टान् गजान्राजा न दीक्षेत कदाचन ।
व्यसिद्धा परराष्ट्रेषु नगरात् क्षियते बलिः ॥
दद्यात् द्विजेभ्यः शुक्लेभ्यो गवाद्यायथवा क्षयः ।
हन्ता यदि गजान् दुष्टान् दद्याच्छ्रियमतं द्विजे ।
पुरं नीराजयेद्वापि आत्मानं वाथवा सुतम् ।
देवकुलेन सुकृद्यादयुतं यातितत्परः ॥
तिलान् वा क्षुद्रयादन्ती तत्रतीकारईतवे ।
ब्रह्मादिजातिभेदेन जातिरुक्ता चतुर्विधा ॥
चतुर्विधानां भूपानां वाहने ये शुभप्रदाः ।
ये दोषा दोषवन्तानां न एव स्युः गजातिजः ॥
ये व्याधयो नराणां स्युस्ते गजानामपि स्मृताः ।
चिकित्सापि तथा तेषां साधा चैव गरीयसी ॥"
इति गजपरीक्षा ॥
इति भोजराजप्रतसुक्तिकल्पतरुः ॥

हस्ते, व्य, पाणौ। यथा। हस्ते करोति। इति सुग्धबोधव्याकरणम्॥

हस्तेकरणं, क्ली, पाणिग्रहणम्। विवाहः। इति केचित्॥

हस्त्यः, त्रि, (हस्त+"तेन यथाकथाचहस्ताभ्यां यथती।" ५।१।८८। इति यत्।) हस्तेन दत्तः। हस्तेन कृतः। इति सिद्धान्तकौमुदी॥

हस्त्यध्यक्षः, पुं, (हस्तिषु अध्यक्षः) गजाध्यक्षः। तल्लक्षणं यथा—

"हस्तिनिक्षाविधानज्ञो वन्यजातिविशारदः।
लोभवर्जस्तथा राज्ञो गजाध्यक्षः प्रशस्यते॥"

इति मात्स्ये १८८ अध्यायः॥

हस्त्यायुर्व्वेदः, पुं, (हस्तिन आयुर्व्वेदः।) गजायुर्व्वेदः। हस्तिचिकित्साग्राह्यम्। तत्प्रमाणं हस्तिशब्दे द्रष्टव्यम्॥

हस्त्यारोहः, पुं, (हस्तिनमारोहतीति। हस्त+रुह+कः।) हस्तिपकः। इत्यमरः। २।८।५८॥ तल्लक्षणं यथा,—

"एतैरेव गुणैर्युक्तः खासनश्च विशेषतः।
गजारोहो नरेन्द्रस्य सर्व्वयन्त्रेषु शस्यते॥"

एतैर्हस्त्यध्यक्षगुणैः। इति मात्स्ये १८८ अः॥

हस्रः, त्रि, (हसति निरर्थकमिति। हस+"स्फायितञ्चीति।" उणा० २।१३। इति रक्।) मूर्खः। इत्युणादिकोषः॥

हहलं, क्ली, घासाहरम्। इति शब्दचन्द्रिका॥

हहाः, पुं, घासानामगन्धर्वः। इति शब्दमाला॥

हा, ओ लि त्यागे। इति कविकल्पद्रुमः॥ (ह्रा० पर० सक० अनिट्।) ओ हाक त्यागे इति प्रसिद्धोयम्। यत्र हाक इति पठ्यते तत्रा-खेव। तेन दासा गे हाक इत्यादि सूत्रेणाच्च धीयते इत्यादि। ओ हीनः। लि जहाति। अयमेकोऽयम्। यथा। आर्य्यहीनः। एवं जहाति त्यजेति आर्य्यो यस्यासौति जहत्स्वार्य्यो हस्तिः। इति दुर्गादासः॥

हा, ओ ङ लिगतौ। इति कविकल्पद्रुमः॥ (ह्रा० आत्म० सक० अनिट्।) ओ, हायः। ङ लि, लिङीते। इति दुर्गादासः॥

हा, व्य, विषादः। शोकः। अर्त्तिः। इत्यमरः। ३।४।२५५॥ (यथा, महाभारते। ३।६१।१॥

"हा नाथ! हा महाराज! हा स्वामिन्!
किं जहासि माम्।
हा वृताक्षि विनष्टाक्षि भीताक्षि विजने वने॥")

इत्युणा इति मेदिनी॥

हाङ्कारः, पुं, अनाभव्यातज्ञजन्तुः। इति शब्द चन्द्रिका॥ तत्पर्य्यायः अवहारकशब्दे द्रष्टव्यः॥

हाटकं, क्ली, (हटति शोभते इति। हट शोभौ+ण्वुल्।) स्वर्णम्। (यथा, माघे। ११।६१।

"नवहाटकेष्टकचित्तं दृढमर्ग्गलः।
चितिपक्ष वक्षमव तत्र संवदि॥"

अस्य पर्य्यायो यथा,—

"हाटकं सुवर्णं कनकं हिरण्यं हेम हाटकम्।
तपनीयञ्च गाङ्गेयं जलधौतञ्च जातरूपम्॥
चामीकरं शातकुम्भं तथा कार्त्तस्वरञ्च तत्।
जाम्बुनदं जातरूपं महाराजत इत्यपि॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

हाटकपरिमितः। "जातरूपेभ्यः परिमाणे।" ४।३।१५३। इति यण्॥) धुस्तूरः। इत्यमरः। २।६।८४॥ स्वर्णनिर्म्मिते, त्रि॥

हाटकमयं, त्रि, स्वर्णमयम्। हाटकशब्दात् मयट् प्रत्ययेन निष्पन्नम्॥

हाटकेश्वरः, पुं, (हाटकस्य ईश्वरः।) गोदावरी-तीरस्थशिवः। यथा,—

"एतस्मिन्नन्तरे प्राप्तः सर्व्व एवर्षिपार्थिवाः।
द्रष्टुं त्रैलोक्यभर्त्तारं भक्तवत्सं हाटकेश्वरम्॥
ततः कपिवरः प्राप्तो हृताशा सह सुन्दरि!।
स्नात्वा गोदावरीतीर्थे दृष्ट्वा हाटकेश्वरम्॥"

इति वामने ६२ अध्यायः॥

(वितत्रस्थितो मन्वादेवः। यथा, भागवते। ५।२४।१७। "ततोऽधस्तादितस्ते हरो भग-वान् हाटकेश्वरः सपार्षदभूतगणावृतः प्रजा-पतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनी-भूयास्ते। यतः प्रसूता सरित्प्रवरा हाटकी नाम भवयोर्वीर्य्येण। यत्तद्विबभानुर्मातरिश्वना समिध्यमान ओजसा पिबति। तद्विधृतं हाट काख्यं सुवर्णं भूषणेनासुरेन्द्राबरोधेषु पुरुषाः सह पुरुषैर्भिधारयन्ति॥")

हातव्य, त्रि, (हा+तव्य।) त्यजनीयम्। यथा। "हातव्योऽयमसार एवविरसःसंसार इत्यादिकम्। सर्व्वस्यैव हि भाषि चेतसि पुनः सख्याति पुष्यात्मनः।"

इति भ्रान्तिशतकम्॥

हानं, क्ली, (हा+ल्युट्।) चेतनम्। इति सिद्धान्त-कौमुद्यामुणादिवृत्तिः॥ प्रस्थानम्। मरणम्। त्यागः। इति संक्षिप्तसारोणादिवृत्तिः॥

हानं, क्ली, (हा+भावे क्तः।) त्यागः। इति जटाधरः॥

हानिः, स्त्री, (हा+"वहिश्रिस्रुयुद्रुस्रुभ्य इति।" उणा० ४।५। इति निः। यद्वा, हा+क्तिन्। "स्त्रियाज्याख्याभ्यो निः।" ३।३।९४। इत्यस्य वार्त्तिकोक्त्या निः।) क्षतिः। तत्पर्य्यायः। अपकारः २ अपचयः ३। इति जटाधरः॥ (यथा, महाभारते। ५।८८।४।

"अथाब्रुवन् सुरैः पीत्वा निर्हितं निर्हतारिभिः।
अतः सोमस्य हानिर्न इत्येवं ब्रह्मवादिनः॥")

हानुकः, त्रि, हातुकः। इति केचित्॥

हान्दं, क्ली, (हन्द+"अन्दृनिगमिनमिहनीति॥" उणा० ४। १५८। इति इन् हस्य धः।) मरणम्। इत्युणादिकोषः॥

हापुत्रिका, स्त्री, पत्रिविशेषः। तत्पर्य्यायः। सर्व्वपत्री २ खड्गपत्रिका ३ तुलिका ४ स्फोटिका ५। इति त्रिकाण्डशेषः॥

हापुत्री, स्त्री, हापुत्रिका। यथा,—

"गोमण्डोरः पद्मकोरो हापुत्री राजमहिका॥"

इति शब्दरत्नावली॥

हाफिका, स्त्री, जृम्भा। हाफ इति भाषा। तत्पर्य्यायः। उपयुध्यिका २। इति शब्दरत्नावली॥

हायनः, पुं, क्ली, (जहाति त्यजति जिघ्रति प्राप्नोति वा आयानिति। हा त्यागे वा गतौ वा+"हय ह्रीक्षिकालयोः।" ३।१।१४८। इति ल्युट्।) वत्सरः। इत्यमरः। १।४।२०॥ (यथा, भागवते। १।६।८।

"अहञ्च तद्ब्रह्मकुले ऽवियान्दशयेनया।
दिग्देशकालाव्युत्पन्नो बालकः पञ्चहायनः॥")

हायनः, पुं, (जहात्युदकमिति। हा+"भव ह्रीक्षिकालयोः।" ३।१।१४८। इति ल्युट्।) ह्रीविभेदः। अग्निशिखा। इति मेदिनी॥

हारं, त्रि, (हरतीदं। हरि+अण्। पक्षे हर-तीति। हरं तदेव। हर+स्वार्थे अण्।) हरिसम्बन्धीयम्। हरणकर्त्तृ। यथा,—

"यच्छृण्वतोऽपैत्यरतिश्चिदुच्चया
सत्त्वञ्च शुध्यत्यचिरेण पुंसः।
भक्तिर्हरौ तत्पुरुषे च सख्यं
तदेव हारं यद्द मन्यसे चेत्॥"

इति श्रीभागवते। १०।७२॥

"तदेव हारं हरिचरितं मनोहरं वा॥"

इति तट्टीकायां श्रीधरस्वामी॥

हारः, पुं, ह्रियते मनो येन। हृ+घञ्।) सुक्ता-माला। तत्पर्य्यायः। सुक्तावली २। इत्यमरः। २।६।१०५॥ हारा ३ यष्टिः ४ यष्टी ५ लता ६। इति शब्दरत्नावली॥ (यथा, कुमारे। ५।८।

"विमुच्य सा हारमदार्द्रनिर्गया
विलोलयष्टिप्रविलम्बचन्दनम्।
बबन्ध बालादपबभ्रु वल्कलं
पयोधरोत्सेधविशीर्णसंहति॥"

ह्रियन्ते प्राणा यत्रेति।) युद्धम्। इति मेदिनी॥ (हृ+भावे घञ्। हरणम्। यथा, भाग वते। १०।६१।१७।

"धेनुमगान् हिंसया वर्त्तमानान्
जघ्नेतस्ते भारहाराय भूमेः॥")

हारकः, पुं, (हरतीति। हृ+ण्वुल्।) शिवः। चोरः। मद्यभेदः॥ विज्ञानविशेषः। इति मेदिनी॥ माषोटङ्कः। इति शब्दचन्द्रिका॥ भाजनाङ्गः। इति जोसायती॥ हरणकर्त्तरि, त्रि॥ (यथा, मनुः। ११।५१।

"ब्रह्मापहारकः स्तेयं पञ्चतामश्नुतेऽवशः॥")

हारहारा, स्त्री, कपिलद्राक्षा। इति राज-निर्घण्टः॥

हारङ्गः, पुं, मद्यम्। इति हेमचन्द्रः॥

हारङ्गरा, स्त्री, द्राक्षा। इति शब्दमुक्तावली॥ (पर्य्यायो यथा,—

"द्राक्षा गोस्तनिका प्रोक्ता तथा मधुरसापि च।
मधुरा हारङ्गरा च जीवनी चापि
जीर्णिका॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हारावली, स्त्री, पुरुषोत्तमप्रणीतकोषविशेषः। यथा,
"सुक्षामयातिमधुरा मसृणावदात-
च्छायाधिरागतरलामलसद्गुणश्रीः।
साध्वी सतां भजतु कण्ठमनी विवेक
हारावली विरचिता पुरुषोत्तमेन॥"
इति तद्धृतश्लोकः॥
(हारस्य आवली।) हारश्रेणी च॥ (यथा, गीतगोविन्दे। ११। १२।
"हारावलीतरलकाञ्चनकाञ्चिदाम-
मञ्जीरकङ्कणमणिद्युतिदीपितश्च॥")

हारिः, स्त्री, (हरतीति। हृ+बाहुलकात् इञ्। इत्युणादिवृत्तौ उज्ज्वलदत्तः। ४।१२४।) पक्षिसन्तानः। धूतादिभङ्गः। इति मेदिनी। हरिरे, वि॥

हारिकण्ठः, पुं, (हारी मनोहरः कण्ठः कण्ठस्वरो यस्य।) कोकिलः। (हारी हारयुक्तः कण्ठो यस्य।) हारान्वितगले, वि। इति मेदिनी॥

हारिकः, पुं, (हरिणं हन्तीति। हरिण+"पथिमथ्यृभुक्षामात् हन्ति।" ४। ४। ३५। इति ठक्।) व्याधः। हरिणघातकः। इति केचित्॥

हारितः, पुं, पक्षिविशेषः। तत्पर्य्यायः। हरितोलुकः २। इति जटाधरः॥ हारीतः १। इति मेदिनी॥ अस्य मांसगुणाः हारीतशब्दे दृष्टव्याः। हरिदर्थेऽपि॥ (हरितस्य हरिचन्दनस्यापत्यं पुमानिति। हरित+अण्। हरितपुत्रः। यथा, हरिवंशे। ११। २८।
"हरितो रोहितश्चाथ चञ्चुर्हारित उच्यते॥")

हारितकं, क्ली, (हरितकमेव। स्वार्थे अण्।) शाकम्। इति शब्दरत्नावली॥

हारिद्रः, पुं, कदम्बवृक्षः। (हरिद्रया रक्तम्। हरिद्रा+"हरिद्रामञ्जिष्ठाभ्यामञ् वक्तव्यः।" ४। २। २। इत्यस्य वार्त्तिकोक्त्या अञ्।) हरिद्रारञ्जिते, वि। इति मेदिनी॥ हरिद्रावर्णः। इति हेमचन्द्रः॥ (यथा, बृहत्संहितायाम्। ५। ५८।
"दूर्वाकाण्डश्यामे हारिद्रे वापि निर्दिशेच्छरदम्॥")
विषभेदः। यथा,—
"हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः।"
इति भावप्रकाशः॥

हारी, स्त्री, सुरा। यथा,—
"सुरा सुलाप्यकं यत्तिबीजं हारी च मोदिनम्॥")
इति शब्दरत्नावली॥

हारी, [न्] त्रि, (हारोऽस्त्यस्येति। इनिः।) हारविशिष्टः। यथा,—
"केयूरवान् कनकदण्डलवान् किरीटी
हारी चिरञ्जयधनुर्भृतमङ्कपाशः।"
इति नारायणभाषम्।
(हरतीति। हृ+णिनिः।) हरणकर्त्ता॥ यथा, महाभारते। १। २। ६५।
"क्रियते बध्यमानोऽपि नरो हारिभिरिन्द्रियैः।
विमूढधर्म्मो दुष्टाश्वैरुद्भ्रान्तैरिव सारथिः॥"
मनोहरः। यथा, शाकुन्तले प्रस्तावनायाम्।
"तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्मन्तः सारङ्गेणातिरंहसा॥")

हारीतः, पुं, पक्षिभेदः। (अस्य लक्षणं गुणाश्च।
"हारीतो रक्तपित्तः स्याद्धरितोऽपि स कथ्यते।"
हारीतो हारील इति लोके।
"हारीतो रूक्षः उष्णश्च रक्तपित्तकफापहः।
क्लेदस्वरकरः प्रोक्तः दीपनश्च सः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
धातुभेदे कर्त्तरि च। यथा,—
"अग्निवेशश्च भेलश्च जतूकर्णः पराशरः।
हारीतः क्षारपाणिश्च जतूकस्तान्त्रिवेचः॥"
इति चरके सूत्रस्थाने प्रथमेऽध्याये॥)
मुनिभेदः। स च धर्म्मशास्त्रकर्त्ता। (यथा, याज्ञवल्क्यः। १। ४।
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥"
अथञ्च पौराणिक आसीत्। यथा, भागवते। १२। ७। ५।
"वेद्यस्ततोऽथ सावर्णिरकृतव्रणः।
वैयास्यायनहारीतौ षड् वै पौराणिका इमे॥")
केतवः। इति मेदिनी॥

हारीतकः, पुं, (हारीत एव। स्वार्थे कन्।) हारीतपक्षी। हारिल इति हरिताल इति च भाषा। तस्य मांसगुणाः। लघुत्वम्। कफपित्तास्रदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

हार्द्द, क्ली, (हृदयस्य भावः कर्म्म वा। हृदय+"हृदयान्तयुवादिभ्योऽण्।" ५। १। ११०। इत्यण्। "हृदयस्य हृल्लेखयदण्डकासेषु।" ६। ३। ५०। इति हृदादेशः।) प्रेम। स्नेहः। इत्यमरः। १। ७। २७॥ (यथा, महाभारते। १३। ७१। ५२।
"गावो लोकांस्तारयन्ति चरन्त्यो
गावश्चार्द्धं संजनयन्ति लोके।
यच्चाज्ञानन्न गवां हार्द्दमेति
स वै गन्ता निरयं पापचेताः॥"
अभिप्रायः। यथा, भागवते। १। ७। ५५।
"अर्জुनः सहसाजाय हरेर्हार्द्दमथाग्निना।
मर्द्दितं जठरं मूर्द्धन्यं द्विजस्य सख मूर्द्दजम्॥")

हार्दी, [न्] त्रि, (हार्द्दमस्यास्तीति। इनिः।) स्नेहयुक्तः। यथा,—
"अयञ्च निजतः पुत्रैर्हार्दैर्भृत्यैस्तथोज्झितः।
अजनेन च सम्पत्स्यतेऽयं हार्दी तथाप्यति॥"
इति देवीभागवतम्॥

हार्य्यः, पुं, (क्रियते इति। कृ+"कृदभोज्यात्।" ३। १। १२४। इति ण्यत्।) विभीतकवृक्षः। उत्तमे, त्रि। इति मेदिनी॥ (यथा, कुमारे। ५। ७०।
"दयस्व तेऽन्या पुरतो विडम्बना
यदृच्छया वारणराजहार्य्यया।
विलोक्य दर्पोद्यमधिष्ठितं त्वया
महाजनः खेरमुखो भविष्यति॥")
हरणीयाहः। तत्पर्य्यायः। भाव्यः २। इति जटाधरः॥

हालः, पुं, (हलेन क्रीड़तीति। अण्। यद्वा, हलतीति। हल+"ज्वलितिकसन्तेभ्यो णः।" ३। १। १४०। इति णः।) बलरामः। इति विश्वकोषः॥ शालिवाहनराजः। इति हेमचन्द्रः॥ हलः। इति मेदिनी॥

हालकः, पुं, पीतहरितवर्णाश्वः। यथा,—
"हरितः पीतहरितश्चाश्वः स एव हालकः।"
इति हेमचन्द्रः॥

हालहलं, क्ली, विषभेदः। इति शब्दरत्नावली॥

हालाहालं, क्ली, विषभेदः। इति शब्दरत्नावली॥

हाला, स्त्री, (हल्यते लक्ष्यते इव चित्तमनयेति हल+घञ्। टाप्।) मद्यम्। इत्यमरः। २। १०। ३८॥ (पर्य्यायो यथा,—
"मद्यन्तु सीधुमैरेयमिरा च नदिरा सुरा।
कादम्बरी वारुणी च हालापि बलवल्लभा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
ताडादिनिर्य्यासमद्यम्। इति राजनिर्घण्टः॥ (यथा, माघे १०। २१।
"योषिदित्यभिलषाय न हालां
दुष्यजः खलु सुखादपि मानः॥")

हालाढ्यः, पुं, विषवर्णचौटकः। इति केचित्॥

हालाढ्यं, क्ली, पुं (हालामपि हलतीति। हल+अच्।) विषभेदः। तत्पर्य्यायः। हालहलम् २ हाढ्यहलम् ३ हलाढ्यहलम् ४ हालाहलम् ५ हाढालम् ६। इति शब्दरत्नावली॥ तस्य स्वरूपं यथा—
"गोस्तनाभफलो गुच्छस्तालपत्रच्छदस्तथा।
तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः॥
असौ हालाढ्यको ज्ञेयः किञ्चिन्न्यायां द्विमात्रयो॥
दक्षिणाम्बितटे देशे कोङ्कणेऽपि च जायते॥"
इति भावप्रकाशः॥
मद्यम्। इति राजनिर्घण्टः॥ (यथा च वामटे उत्तरस्थाने १५ अध्याये।
"कालकूटेन्द्रवत्साख्यनखीहालाढ्यादिकम्॥")

हालाढ्यः, पुं, (हालाढ्यमस्यास्येति। अच्।) चौटविशेषः। तत्पर्य्यायः। अम्लिका २ हुडिचचौटकः ३। इति राजनिर्घण्टः॥

हालाढ्यधरः, पुं, (धरतीति। धृ+अच्। हालाढ्यञ्च धरः।) शिवः। इति शब्दरत्नावली॥

हालाढ्या, स्त्री, (हालाढ्यमस्त्यस्या इति। अच्। टाप्।) क्षुद्रमूषिका। यथा—
"हालाढ्याक्षुच्छलिका गिरिका खास-
मूषिका।"
इति जटाधरः॥

हाला-इनी, स्त्री, मदिरा। इति राजनिर्घण्टः॥
हालिकः, त्रि, हलेन खनति यः। (हलस्यायमिति वा हल + "हलसीरात् ठक्।" ४।३।१२४। इति ठक्) हलस्य वोढा। हलमस्त्यस्मै। तत्पर्य्यायः। सैरिकः २। इत्यमरः।२।८।६४॥ (यथा, वक्रोक्तिपञ्चाशिकायाम्। २।
"त्वं हालाहलभृत्यरोपि मनसो मूर्च्छां समालिङ्गितो
हालां नेव बिभर्मि नेव च हलं मुग्धे! कथं हालिकः।
सत्यं हालिकतैव ते समुचिता गङ्गस्य गोवाहने
वक्त्रोत्थेति जितो हिमाद्रिसुतया स्मेरो हरः पातु वः॥")
हालिनी, स्त्री, स्थूलपत्नी। इति हेमचन्द्रः॥
हाली, स्त्री, कनिष्ठा भ्रातृजाया। इति हेमचन्द्रः॥
हालुः, पुं, (हन्यतेऽनेनेति। हल + उण्। इत्युणादिवृत्तौ उज्ज्वलः। १। १।) दन्तः। इति त्रिकाण्डशेषः॥
हावः, पुं, (हे + घञ्।) आह्वानम्। इति जटाधरः॥ स्त्रीणां शृङ्गारभावजाः क्रियाः। यथा,
"स्त्रीणां विलासविब्बोकविभ्रमा ललितं तथा।
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः॥"
इत्यमरः। १। ७। ३१॥
स्त्रीणां विलासादयः शृङ्गारभावजाः क्रियाः हावशब्देनोच्यन्ते। क्रियाः चेष्टाः। शृङ्गारभावो रतिः तत्र जाताः शृङ्गारभावजाः। ह्वयन्ते रागिणोऽत्र हावः इति हौमेऽदने आधारे घञ्। ह्वयन्ते रागिणः कामान्मावनेनेति करणे वा घञ्। यदुक्तम्।
"युवानोऽनेन ह्वयन्ते नारीभिर्मदनानले।
अतो निरुच्यते हावस्ते विलासादयो मताः॥"
इति।
हा कष्टं वयति शोषयतीति वै शोषे इत्यस्मात् डे वा। यदाह भरतः।
"बलहारात्र नाट्यज्ञैर्ज्ञेया भावरसाश्रयाः।
यौवनेचधिकाः स्त्रीणां विकारा वङ्गजाः॥"
तथा।
"लीला विलासो विच्छित्तिर्विभ्रमः किल किञ्चितम्।
मोट्टायितं कुट्टमितं विब्बोको ललितं तथा।
विक्षेपश्चेति मन्तव्या दश स्त्रीणां स्वभावजाः॥"
इत्यमरभरतौ॥०॥

तत्रत्वं यथा,—
"शोकादिरसंयुक्तो भ्रूनेत्रादिविकाशवत्।
भावादीषत्प्रकाशो यः स हाव इति कथ्यते॥"
इत्युज्ज्वलनीलमणिः॥
हासः, पुं, (हस + घञ्।) हास्यम्। इत्यमरः। १। ७। १८॥ (यथा, रघुः। १२। ३६।
"संरम्भं मैथिलीहासः चक्षुषीम्यां निनायताम्।
निवातस्तिमितां वेलां चन्द्रोदय इवोदधेः॥")

विकाशः। यथा, भट्टिः। २। १।
"विम्बागतैस्त्रीरवनेः समन्ततः
निजां विलोक्यापतितां पयोभिः।
कूलानि मामर्षतयेव तेनुः
सरोजलक्ष्मीं स्मितपल्लवाग्रैः॥")
हासाः, [स्] पुं, (अश्नाति शीतकिरणमिति। हा + "वहिहाधाभ्यश्छन्दसि।" उणा० ४। २२०। इति असुन्। तस्य सुट् च।) चन्द्रः। वैदिकशब्दोऽयम्॥
हासिका, स्त्री, हास्यम्। इति हेमचन्द्रः॥
हास्तिकं, क्ली, (हस्तिनां समूहः। हस्तिन् + "अधिकहस्तिधेनोष्ठक्।" ४। २। ४७। इति ठक्।) हस्तिसमूहः। इत्यमरः। २। ८। ३६॥ (यथा, महाभारते। ८। ४८। १०।
"दत्त्वा च दानं विविधं नानारत्नसमन्वितम्।
सगोहास्तिकदासीकं साज्ञावि गतवान् वनम्॥"
हस्तिना चरतीति। "चरति।" ४। ४। ८। इति ठक्।) हस्त्यारोहे, त्रि॥
हास्तिनं क्ली, (हस्तिना कृषेव निर्वृत्तमिति। हस्तिन् + अण्।) हस्तिनापुरम्। इति विकाण्डशेषः। (हस्ती प्रमाणमस्य। हस्तिन् + "पुरुषहस्तिभ्यामण् च।" ५। २। ३८। इति अण्।) गजपरिमाणे हस्तहस्तिसम्बन्धिनि च त्रि॥
हास्तिनपुरं, क्ली, (हास्तिनं पुरम्।) हस्तिनापुरम्। इति हेमचन्द्रः॥ (यथा, महाभारते। ८। ३५। ६।
"स गत्वा हास्तिनपुरं धृतराष्ट्रं समेत्य च।
उक्तवान् वचनं तथ्यं हितञ्चैव विशेषतः॥")
हास्यं, क्ली, (हस + ण्यत्।) रसविशेषः। स च कौतुकोद्भवम्। तत्पर्य्यायः। हासः २ हसः ३। इत्यमरः। १। १। १८॥ हसनम् ४ घर्घरः ५ हासिका ६। इति हेमचन्द्रः॥०॥ अथ हासः।
"विकृताकारवाग्वेषचेष्टादेः कुतुकाद् भवेत्।
हास्यो हासः स्थायिभावः श्वेतः प्रमथदेवतः॥
विकृताकारवाक्चेष्टं यदालोक्य हसेज् जनः।
तदवज्ञास्मयं प्राहुः तच्चेष्टोद्दीपनं मतम्॥
अनुभावोऽक्षिसङ्कोचवदनस्मेरतादिकः।
निद्रालस्यावहित्थाद्या अत्र व्यभिचारिणः॥
ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च।
नीचानामपहसितं तथातिहसितञ्च षड्भेदाः॥
ईषद्विकासि कथनं स्मितं स्यात् स्पन्दिताधरम्।
किञ्चिल्लक्ष्यदशनं तत्र हसितं कथितं बुधैः॥
मधुरस्वरं विहसितं सांसगिरः कथ्यमवहसितम्।
अपहसितं साश्रुशिरोविचिक्षाङ्गं भवत्यतिहसितम्॥"
यथा मम।
"गुरोर्गिरः पत्र दिनान्धधीत्य
वेदान्तमाक्षाक्षि दिनद्वयञ्च।
श्रमो समाजाय च तर्कपादान्
समागताः कुक्कुटमिश्रपादाः॥"

यत्र नाटकमेलकप्रभृतिषु परिषोषो द्रष्टव्यः। यत्र च।
"यत्र हासः स चेत् क्वापि साक्षादेव निबध्यते
तथाप्येष विभावादिसामर्थ्यादुपलभ्यते॥
अनेन विभावादि साधारण्यात् प्रतीयते।
सामाजिकैस्तती हास्यरसोऽयमनुभूयते॥"
एवमन्येष्वपि रसेषु द्रष्टव्यम्। इति साहित्यदर्पणे ३ परिच्छेदः॥ ०॥ तस्य गुणागुणलक्षणं यथा,—
"अकस्मं हसितं श्रेष्ठं मौलिताक्षमवाक्षजम्।
अस्मज्जहसितं दुष्टेत् तत् सोन्मादस्य नैकधा॥"
इति गारुडे। ६५। ३१ अध्यायः॥
(हासयोग्ये, त्रि। यथा रघुः। २। ४३।
संरुद्धचेष्टस्य मृगेन्द्र! कामं
हास्यं वपुस्तादृयदं विवक्षुः॥")
हाहलं, क्ली, हलाहलविषम्। इति शब्दरत्नावली॥
हाहाः, [स्] पुं, देवगन्धर्वविशेषः। इत्यमरटीकायां भरतः॥
हाहाः, पुं, देवगन्धर्वविशेषः। यथा,—
"हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम्॥"
इत्यमरः। १। १। ५५॥
देवतानां हाहाहूहूविशेषवर्णनमुपरिचरप्रभृतयो गन्धर्वशब्दवाच्याः। उपास्तोपासकसम्बन्धः। व्युत्पत्तिपक्षोऽयं हाहाशब्दः। हाहेति शब्दं जहोतीति वाहुलिति हाजौ विच् इत्येवं व्युत्पत्तौ तु यस्माच्चि चोरालोपोऽथवाविल्लोपः स्यात्। अमि प्रत्यये हाहाशब्दश्च साम्नोऽपि। गन्धर्वो हाहमि प्रोक्तो गन्धर्वो गावनेऽपि च। इति साहसाहः। गन्धर्वं पीतिहाहसोरिति वादश्चति। हाहाशब्दोऽपि दृश्यते। छंदो हाहा हूह च दौ हयवर्यैव तुम्बुरुरिति व्याडिप्रभृतयः। इति भरतः॥ ०॥ विस्मयशब्दे शोकशब्दे च द्य। यथा,—
"ततो हाहा कृतं सर्व्वं दैत्यसैन्यं ननाद तत्॥
प्रहर्षञ्च परं जग्मुः सकला देवतागणाः॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्ये। ३। ४०॥
हाहाकारः, पुं, (हाहा इत्यव्यक्तशब्दस्य कारः करणम्।) युद्धकलरवः। इति केचित्॥ (यथा, महाभारते। १। १८। १६।
"हाहाकारः समभवत्तत्र सङ्कुलगः।
अन्योन्यं छिन्दतां शस्त्रैरादित्ये लोहितायति॥"
शोकध्वनिः। यथा,—
"उद्वृत्तो विकटो वायुः करालो वात्ययान्वितः।
देवद्रुमलतानाञ्च हाहाकाराय कल्पते॥"
इति ज्योतिषे वायुफलम्॥
हाहालं, क्ली, विषम्। इति शब्दरत्नावली॥
हि, न वर्द्धने। गतौ इति क्रियाकल्पद्रुमः। (स्वादिपरः-सकः-अनिट्।) गतिरिह अन्तर्भूतन्यर्थत्वात् गतिप्रेरणम्। न, प्रीणने इत्यमरः। वर्द्धने विरलप्रयोगः। इति दुर्गादासः॥

हि, अ, हेतुः। (यथा, रामायणे। २। ६४। ३०।
"नाभिवादयसे मातः न च मामभिभाषसे।
किंचिद्रोषे तु भूमौ त्वं वत्स! किं कुपितो ह्यसि॥")
हेत्वपदेशः। सम्भ्रमः। असूया। इति मेदिनी॥ शोकः इति शब्दरत्नावली॥

हिंसकः, पुं, (हिनस्ति तच्छीलः। हिंस+ण्वुल्।) हिंस्रपशुः। अथर्ववेदब्राह्मणः। शत्रुः। इति शब्दरत्नावली॥

हिंसकः, त्रि, (हिंस+ण्वुल्।) हिंसाकर्त्ता। तत्पर्य्यायः। घातुकः २ हिंस्रः ३ अरादः ४ हन्ता ५। इति शब्दरत्नावली॥ स चाष्टविधः। यथा,—
"भोक्तानुमन्ता संस्कर्त्ता क्रयविक्रयिहिंसकाः।
उपहर्त्ता वातयिता हिंसकाश्चाष्टधा मताः॥"
इति काशीखण्डम्॥*॥
माध्वीभार्य्यादिहिंसने दोषो यथा,—
"भार्य्यां प्रियमखीं यस्तु साध्वीं हिंसति निर्घृणः।
न तेऽस्तं प्राप्नुवन्ति हिंसका दुष्टयोनिजाः॥"
इति वाराहे ब्राह्मणादीचासूतनामाध्यायः॥*॥
अरण्यागतादिहिंसकस्य अप्रत्यवायित्वं यथा,—
"अरण्यागतमालस्त्रीहिंसकान् संवसेन्न तु।
घोरव्रतानपि सदा ज्ञातत्वसहितानिमान्॥"
इति प्रायश्चित्ततत्त्वधृतयाज्ञवल्क्यवचनम्॥

हिंसा, स्त्री, (हिंसनमिति। हिंस+भावः। टाप्।) घातः। इति मेदिनी॥ चौर्य्यादिकर्म्म। यथा। हिंसा चौर्य्यादिकर्म्म च। इत्यमरः। ३।३।२१८॥ चौरस्य कर्म्म चौर्य्यं आदिना बन्धनताडनदृत्तिनागग्रामादि च एकारादधोऽपि हिंसा। इति तट्टीकायां भरतः॥*॥ हिंसिते प्रतिहिंसायां दोषाभावो यथा,—
"क्षमी प्रतिकृतं कुर्य्यात् हिंसिते प्रतिहिंसितम्।
न तत्र दोषं पश्यामि दुष्टे दोषं समाचरेत्॥"
इति गारुडे। ११५। ४७॥
त्रिभुवनानां ब्राह्मणादीनाञ्च हिंसाकर्त्तुरुचिराजाग्नो यथा,—
"दुष्टा यदा मे भक्तानां ब्राह्मणानां गवामपि।
क्रतूनां देवतानाञ्च हिंसां कुर्व्वन्ति नित्यशः।
तदाचिरन्ते नश्यन्ति यथा वह्नौ तृणानि च॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। ६।६१-६२॥
पशुहिंसानिषेधो बलिशब्दे द्रष्टव्यः॥*॥ अथ वैधहिंसाविचारः। मा हिंस्यात् सर्व्वा भूतानि इत्यत्र सर्व्वशब्दस्य व्यापकार्थपरतया एतद्विधिमनुसृत्य। वायव्यं श्वेतमालभेत। इत्यादिविधिविषयाप्राप्तेरगत्या वैधातिरिक्तविषयत्वम्। सर्व्वाः सर्व्वाणि छन्दांसि वेत्यनेन तत् पदं सिद्धम्। यद्यपि नानादर्शनटीकाकृद्भिर्वाचस्पतिमिश्रैस्तत्त्वकौमुद्यां अभिहितम्। न च मा हिंस्यात् सर्व्वा भूतानि इति सामान्यशास्त्रं विशेषशास्त्रेणाग्नीषोमीयं पशुमालभेत इत्यनेन बाध्येत इति वार्त्तं विरोधाभावात् विरोधे हि बलीयसा दुर्ब्बलं बाध्यते। न चात्रि विरोधः भिन्नविषयत्वात्। तथा हि मा हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरकरणार्थमपि। न चानर्थहेतुत्वाकृतोपकारकत्वयोः कश्चिदस्ति विरोधः। हिंसा हि पुरुषस्य दोषमावहति श्रुतोच उपकरिष्यतीत्यन्तेन। तदपि सांख्यनये। मीमांसकमते तु विरोध एव। तथा हि। गुरुनये न खलु सर्व्वभूतहिंसाभावविषयकं कार्य्यं इति निषेधविध्यर्थस्य बाधं विना अग्नीषोमीयपशुालम्भनविषयकं कार्य्यं इति भावविध्यर्थं उपपद्यते। भट्टनये तु अङ्गे यथा तथास्तु। न च मुख्यपशुयागे पुरुषार्थे पशुहिंसनस्यार्थसाधनत्वमनर्थसाधनत्वञ्चोपपद्यते विरोधात्। वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव कुतो विधेरेष स्वभावो यः स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति अन्यथा अङ्गानां प्रधानोपकारकत्वमपि नाङ्गीक्रियते। अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्टसाधनत्वम्। अनर्थसाधनत्वं बलवदनिष्टासाधनत्वम्। न चानयोरेकत्र समावेश इति। अतएवोक्तं तस्मात् यज्ञे वधोऽवध इति। नन्वेवं श्येनेनाभिचरन् यजेत इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वमवगतं अभिचारो मूलकर्म्म चेति मनुना उपपातकगणनमध्ये पाठात् अनिष्टसाधनत्वमवगतं तदेतत् कथमुपपद्यतामिति चेन्नैवम्। आततायिनमायान्तं हन्यादेवाविचारयन् इत्येकवाक्यतया आततायिस्थले इष्टसाधनत्वम्। अनाततायिस्थले तूपपातकत्वेन बलवदनिष्टसाधनत्वम्। इत्यविरोध इति। गुरुचरणा अप्येवम्। इति तिथ्यादितत्त्वम्॥*॥ ब्राह्मणस्य हिंसानिषेधो यथा,—
"हिंसा चैव न कर्त्तव्या वैधहिंसा तु राजसी।
ब्राह्मणैः सा न कर्त्तव्या यतस्ते सात्त्विका मताः॥"
इति श्राद्धविवेकटीकायां गोविन्दानन्दधृतबृहन्नन्दिवचनम्॥

हिंसाकर्म्म, [न्] क्ली, (हिंसाप्रधानं कर्म्म।) अथर्ववेदोक्तमन्त्रयन्त्रादिनिष्पादितमारणोच्चाटनादि। तत्पर्य्यायः। अभिचारः २। इत्यमरः। ३। २। १८॥

हिंसारुः, पुं, (हिनस्तीति। हिंस+आरुः।) व्याघ्रः। इति त्रिकाण्डशेषः॥

हिंसालुः, त्रि, वधशीलः। घातुकः। हिंसधातोरालुप्रत्ययेन निष्पन्नः॥

हिंसालुकः, पुं, (हिंसालु+स्वार्थे संज्ञायां वा कन्।) हिंसाशीलकुक्करः। यथा,—
"हिंसालुकः खादुकः स्या योगिनोऽलर्क इष्यते।"
इति शब्दरत्नावली॥
उत्तमशीले, त्रि॥

हिंसितः, त्रि, (हिंस+क्तः।) हिंसाप्राप्तः। यथा,—
"यस्तु भागवतान् दृष्ट्वा भूत्वा भागवतः ऋषिः।
अभ्युत्थानं न कुर्व्वीत अहं तेनापि हिंसितः॥
यस्तु कन्यां पिता दत्त्वा न प्रयच्छति तां पुनः।
अष्टौ पितृगणास्तेन हिंसिता नात्र संशयः॥"
इति वाराहे ब्राह्मणदीचासूतनामाध्यायः॥

हिंसोरः, पुं, (हिनस्तीति। हिंस्+"हिंसेरीरनीरचौ।" उणा० ५। १८। इति ईरन्।) व्याघ्रः। खले, त्रि। इति उणादिवृत्तिः॥

हिंस्रः, त्रि, (हिनस्तीति। हिंस+"नमिकम्योरिति।" ३। २। १६७। इति रः।) हिंसाशीलः। तत्पर्य्यायः। अरादः २ घातुकः ३। इत्यमरः। १। १। २८॥ हिंसकः ४ हन्ता ५। इति शब्दरत्नावली॥ मार्व्वरः ६। इति जटाधरः॥*॥ हिंस्राणां हिंसने दोषाभावो यथा,—
"ऋषयो यानि कार्य्याणि शस्तानि हिंसयेषु च जन्तुषु।
हिंसायां न हि दोषस्य हिंस्राणाञ्च व्रजेश्वर!॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः।

हिंस्रः, पुं, (हिनस्तीति। हिंस+रः।) धारः। भीमसेनः। हरः। इत्युणादिकोषः॥

हिंस्रकः, पुं, (हिंस्र एव। कन्।) हिंस्रपशुः। इति शब्दरत्नावली॥

हिंस्रपशुः, पुं, (हिंस्रः) पशुः।) हिंसकजन्तुः। तत्पर्य्यायः। व्याडः २ हिंस्रकः ३ हिंसकः ४ श्वापदः ५। इति शब्दरत्नावली॥ श्वापदः ६। इति त्रिकाण्डशेषः॥

हिंस्रा, स्त्री, (हिनस्तीति। हिंस+रः। टाप्।) एलावली। काकादनी। मांसी। जटामांसी। इति मेदिनीकरहेमचन्द्रौ॥ गवेडुका। गवेधुका। नाड़ी। शिरा। इति शब्दचन्द्रिका॥

हिक्क, अ कूजे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्।) कोपधः। अ, हिक्कति हिक्कते। कूजोऽव्यक्तशब्दः। हिक्कायामेवायमिति भट्टमल्लः। हिक्कति लोकः। इति दुर्गादासः॥

हिक्क, क ङ हिंसे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) कोपधः। क ङ, हिक्कयते। इति दुर्गादासः॥

हिक्का, स्त्री, (हिक्क कूजे+गुरोश्चेत्यः। टाप्। यद्वा, हिक्कानैऽनयेति। हिक्क+करणे घञ्।) रोगोपसर्गविशेषः। हिंचकी इति भाषा। इत्यमरः। १। ५। ८॥ हैंकटी इति ख्यातो व्याधिविशेषः। हिक्कति कूजत्यनया हिक्का। हिक्क अ कूजे सेमन्तात् सरोरिति यः। हिक्कयते हिनस्तीति वा। हिक्क क ङ हिंसे पचाद्यच्। हिगिति कृत्वा कायति शब्दायते

इति वा हिक्का के शब्दे हनजनादिति डः। इति भरतः॥ * ॥ अथ हिक्कारोगनिदानम्।

धन्वन्तरिरुवाच।

"हिक्कारोगनिदानञ्च वक्ष्ये सुश्रुत! तच्छृणु।
श्वासैकहेतुप्रायूपसंख्याप्रकृतिसंश्रया॥
हिक्का भक्तोद्भवा क्षुद्रा यमला महतीति च।
गम्भीरा च मरुत्तत्र त्वरया मुक्तिमेविते:॥
रूक्षतीक्ष्णखराश्यान्तैरशपानेरपीड़ितः।
करोति हिक्कामरुजां मन्दशब्दां क्षुधानुगाम्॥
समं मत्स्यान्नपानेन या प्रायाति च सान्नजा।
आयासात् पवनः क्रुद्धः क्षुद्रां हिक्कां प्रवर्त्तयेत्॥
जत्रुमूलप्रविसृतामल्पवेगयुतान्च सा।
हृद्विमायामतो याति भुक्तमात्रे च मार्द्दवम्॥
चिरेण यमलैर्व्वेगैराहारेऽप्यनुवर्त्तते।
परिणाममुखे हृद्धिं परिणामे च गच्छति॥
कम्पयन्ती शिरो ग्रीवामाक्षातस्थानिष्ठत्यतः।
प्रलापच्छर्द्दितीसारनेत्रविप्लुतजृम्भिता॥
यमलावेगिनी हिक्का परिणामवती च सा।
ध्वस्तभ्रूभङ्गयुग्मस्य श्रुतिविप्लुतचक्षुषः॥
स्तम्भयन्ती तनुं वाचं स्मृतिं संज्ञाञ्च मुञ्चती।
तुदन्ती मार्गमन्यस्य कुर्व्वती मर्म्मघट्टनम्॥
पृष्ठतो नमनं साध्यं महाहिक्का प्रवर्त्तते।
महामूला महाशब्दा महावेगा महाबला॥
पक्काशयाधो नाभेर्व्वा पूर्व्ववत् सा प्रवर्त्तते।
तद्रूपा सा महत् कुर्य्याज्जृम्भमङ्गप्रसारणम्॥
गम्भीरेण निनादेन गम्भीरां तु सुसाधयेत्।
आद्ये हि वर्ज्जयेदन्ये सर्व्वलिङ्गाश्च वेगिनोम्॥
सर्व्वस्य सञ्चितामस्य स्रविरस्य व्यवायिनः।
व्याधिभिः क्षीणदेहस्य भक्तच्छेदकृशस्य च॥
सर्व्वेऽपि रोगा नाशाय मत्वैवं शीघ्रकारिणः।
हिक्काश्वासौ तथा तौ हि मृत्युकाले कृतालयौ॥"

इति गारुड़े १५५ अध्यायः॥ * ॥

तदौषधं यथा,—

"कुलत्थः श्वासहिक्कानुत् कफगुल्मानिलापहः॥
विदोषघ्नं मधु प्रोक्तं वातलञ्च प्रकीर्त्तितम्।
हिक्काश्वासकमिच्छर्दिमेहकण्डूविषापहम्॥"

इति च गारुड़े। १७३। ६; ५० अध्यायः॥

"तथा हिक्कां हरेत् पीता सौवर्च्चलयुता सुरा॥"

इत्यपि गारुड़े १८० अध्यायः॥ * ॥

अन्यच्च।

अथ हिक्काधिकारः।

तत्र हिक्काया विप्रकृष्टनिदानमाह।

"विदाहिगुरुविष्टम्भिरूक्षातिष्यन्दिभोजनैः।
शीतपानाशनस्थानरजोधूमैस्तथानिलैः॥
व्यायामकर्म्मभाराध्ववेगाघातापतर्पणैः।
हिक्काश्वासश्च कासश्च नृणां समुपजायते॥"

अपतर्पणमनशादि॥ * ॥

सम्प्राप्तिमाह।

"वायुः कफेनानुगतः पद्महिक्कां करोति हि।
अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा॥"

सामान्यलक्षणमाह।

"मुहुर्म्मुहुर्व्वायुरुदेति सस्वनो
यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन्।
स दोषवानाशु हिनस्त्यसून् यत-
स्ततस्तु हिक्केत्यभिधीयते बुधैः॥"

वायुरत्र सोदानः प्राणो बोद्धव्यः। उदेति ऊर्द्धं याति। सस्वनो हिगिति शब्दवान्। ऊर्द्धगमनं विशिनष्टि यकृदित्यादि। प्लिहन्शब्दोऽप्यस्ति दीर्घत्वविकल्पात्। मुखादिति त्वक्लोपे पञ्चमी। तेन यकृत्प्लीहान्त्राणि मुखमानीय आक्षिपन् निःसारयन्निवेत्यर्थः। स वायुः। दोषवान् दोषोऽत्र कफः तद्वान्। वायुः कफेनानुगत इति संप्राप्तेः। हिनस्तीति हिक्का पृषोदरादित्वात् रूपसिद्धिः। हिगिति कायति शब्दं करोतीति वा॥ * ॥ पूर्व्वरूपमाह।

"कण्ठोरसोर्गुरुत्वञ्च वदनस्य कषायता।
हिक्कानां पूर्व्वरूपाणि कुक्षेराटोप एव च॥"

वदनस्य कषायता वातात्। न तु कफात् माधुर्य्यं व्याधिप्रभावात्॥ * ॥ अन्नजाया लक्षणमाह।

"वानाग्नेरतिसंयुक्तैः सहसा पीड़ितोऽनिलः।
हिक्कायत्यूर्द्ध्वगो भूत्वा तां विद्यादन्नजां भिषक्॥"

अनिलः प्राणो वायुः॥*॥ यमलालिङ्गमाह।

"चिरेण यमलैर्व्वेगैर्या हिक्का संप्रवर्त्तते।
कम्पयन्ती शिरोग्रीवं यमलां तां विनिर्द्दिशेत्॥"

क्षुद्रामाह।

"विकृष्टकालैर्या वेगैर्मन्दैः समभिवर्त्तते।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधावति॥"

विकृष्टकालैः चिरेण। जत्रु कक्षोरसोः सन्धिः॥ गम्भीरामाह।

"नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी।
अनेकोपद्रववती गम्भीरा नाम सा स्मृता॥"

अनेकोपद्रववती तृष्णाज्वरादियुक्ता॥ * ॥ महतीमाह।

"मर्म्माण्यापीड़यन्तीव सततं या प्रवर्त्तते।
महाहिक्केति सा ज्ञेया सर्व्वगात्रप्रकम्पनी॥"

मर्म्माणि वस्तिहृदयशिरःप्रभृतीनि॥ * ॥असाध्यत्वमाह।

"आयम्यते हिक्कते यस्य देही
दृष्टिर्योर्द्धं भ्राम्यते नित्यमेव।
क्षीणोऽन्नहृट् क्षीति यश्चातिमात्रं
तौ द्वौ चान्यौ वर्ज्जयेद्धिक्कमानौ॥"

आयम्यते विस्तार्य्यत इव। तौ द्वाविति आयम्यत इत्यादिना नित्यमेवेत्यन्तेनैको हिक्कमानः। क्षीण इत्यादिनातिमात्रमित्यन्तेनापरः। तौ द्वौ। अन्यौ च गम्भीरया महत्या च हिक्कमानौ वर्ज्जयेत्। अपरञ्च।

"अतिसञ्चितदोषस्य भक्तच्छेदकृशस्य च।
व्याधिभिः क्षीणदेहस्य वृद्धस्यातिव्यवायिनः॥
आयासाच्च समुत्पन्ना हिक्का हन्त्याशु जीवितम्।
यमिका च प्रलापार्त्तिमोहतृष्णासमन्विता॥"

साध्यमाह।

"यक्षीणसाध्यदीनस्य स्थिरधातेन्द्रियस्य यः
तस्य साधयितुं शक्या यमिका हन्यतोऽन्यथा॥" *॥*॥

अथ हिक्कायाश्चिकित्सा।

"यत्किञ्चित् कफवातघ्नमुष्णं वातानुलोमनम्।
भेषजं पानमन्नं वा हिक्काश्वासेषु तद्धितम्॥
हिक्काश्वासान्तरे पूर्व्वं तैलाक्तं स्वेद उच्यते।
ऊर्द्ध्वाधः शोधनं शस्तं दुर्ब्बले शमनं मतम्॥
प्राणावरोधतर्ज्जनविस्मापनशीतवारिपरिषेकैः।
चित्रैः कथाप्रयोगैः शमयेद्धिक्कां मनोऽभिघातैश्च॥
हिक्कार्त्तस्य पयस्त्यागं हितं नागरसाधितम्।
मधु सौवर्च्चलोपेतं मातुलुङ्गरसं पिबेत्॥
मधुकं मधुसंयुक्तं पिप्पली शर्करान्विता।
नागरं गुड़संयुक्तं हिक्काघ्नं लावणत्रयम्॥
कृष्णामलकशुण्ठीनां चूर्णं मधु सितायुतम्।
सुहृर्मुहुः प्रयोक्तव्यं हिक्काश्वासेषु तद्धितम्॥
चूर्णं कणागैरिकयोः सक्षौद्रं चावलेहयेत्॥
प्रवालशङ्खविफलाचूर्णं मधुघृतप्लुतम्।
पिप्पली गैरिकक्षौद्रं लेहो हिक्कानिवारणः॥
नैपाल्या गोविषाणाद्वा कुक्षात् सर्ज्जरसस्य वा।
धूपं कुशस्य वा साज्यं पिबेद्धिक्कोपशान्तये॥"

नैपाली मनःशिला।

"निर्धूमाङ्गारनिःक्षिप्तहिङ्गुमाषं बलोद्भवः।
हिक्कायस्यापि हन्त्याशु धूमः पीतो न संशयः॥
हरेणूनां कणानाञ्च क्वाथो हिङ्गुसमन्वितः।
हिक्काप्रशमनः श्रेष्ठो धन्वन्तरिवचो यथा॥
चन्द्रशूरस्य बीजानि चिपेदष्टगुणे जले।
यदा मृदूनि गृह्णीयात्ततो वाससि गालयेत्॥
हिक्कातिवेगविकलस्तज्जलं पलमात्रया।
पिबेत् पुनः पुनर्यापि हिक्कावेगं प्रशाम्यति॥"

चन्द्रशूररसः॥*॥ इति हिक्काधिकारः। इति भावप्रकाशः॥

हिङ्कारः, पुं, (हिं इत्यव्यक्तशब्दं करोतीति। कृ+अण्।) व्याघ्रः। इति केचित्॥ (हिं इत्यस्य कारः। करणम्। यथा, वाजसनेयसंहितायाम्। २२।७।

"हिङ्काराय स्वाहा हिङ्कृताय स्वाहेति॥")

हिङ्गु, क्ली, मूलविशेषनिर्य्यासः। स तु पारस्यखोरासानमूलतानादिदेशे भवति। हिं इति भाषा। तत्पर्य्यायः। सहस्रवेधि २ जतुकम् ३ वाह्लीकम् ४ रामठम् ५। इत्यमरः।२८४॥ वाह्लिकम् ६ रामठम् ७। इति भरतः॥ जन्तुघ्नम् ८। इति रत्नमाला॥ पिण्याकम् ९ वाह्लीं १० सहस्रवेधी ११ गृहिणी १२ मधुरा १३ सूपधूपनम् १४ जतु १५। इति शब्दरत्नावली॥ कैशरम् १६। इति जटाधरः॥ उग्रगन्धम् १७ भूतारि १८ जन्तुनाशनम् १९ सूपाङ्गम् २० रुचोग्नम् २१ उग्रवीर्य्यम् २२ अगूढगन्धम् २३ जरणम् २४ भेदनम् २५ दीप्तम् २६। अस्य गुणाः। हृद्यत्वम्। कटुत्वम्। उष्णत्वम्।

क्रमिवातकफविबन्धाध्मानशूलगुल्मनाशित्वम्। चक्षुष्यत्वञ्च। इति राजनिर्घण्टः॥ अपि च॥
"हिङ्गूष्णं पाचनं रूक्षं तीक्ष्णं वातबलासहृत्। रसे पाके च कटुकं स्निग्धञ्च वह्निदीपनम्। शूलगुल्मोदरानाहक्रमिघ्नं पित्तवर्द्धनम्॥"
इति भावप्रकाशः॥*॥
अन्यच्च।
"हिङ्गु तीक्ष्णं कटुरसं शूलाजीर्णविबन्धनुत्। लघूष्णं पाचनं स्निग्धं दीपनं कफवातजित्॥"
इति राजवल्लभः॥
वंशपत्री। इति भावप्रकाशः॥ (काकादनी। तदर्थे पर्य्यायो यथा,—
"हिङ्गु काकादनी मता।"
इति गारुडे २०८ अध्याये॥
क्वचिद्रामठार्थे, पुं। तत्पर्य्यायो यथा,—
"रामठं हिङ्गुरुच्यते।"
इति च तत्रैव २०८ अध्याये॥)
हिङ्गुनाड़िका, स्त्री, (हिङ्गुनः नाड़िरिव नाड़िर्यस्याः। कप्।) नाड़ीहिङ्ग। इति राजनिर्घण्टः॥
हिङ्गुनिर्यासः, पुं, (हिङ्गुन इव निर्य्यासोऽस्य।) निम्बवृक्षः। इत्यमरः। २। ४। ६२॥ (पर्य्यायो यथा,—
"निम्बः स्यात् पिचुमर्दश्च पिचुमदश्च तिक्तकः। अरिष्टः पारिभद्रश्च हिङ्गुनिर्यास इत्यपि॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)
हिङ्गुरसः। इति मेदिनी॥
हिङ्गुपत्रः, पुं, (हिङ्गुन इव पत्रमस्य।) इङ्गुदीवृक्षः। इति राजनिर्घण्टः॥ (विवरणमस्येङ्गुदीशब्दे ज्ञातव्यम्॥)
हिङ्गुपत्री, स्त्री, हिङ्गुनः पत्रम्। हिङ्गुपत्रमिव पत्रमस्याः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। कारवी २ पृथुला ३ पृथुः ४ वाप्यीका ५ कवरी ६ पृथ्वी ७ लक्पत्री ८ कर्ब्बरी ९। इति जटाधरः॥ पृथ्वीका १० वाप्यिका ११ वाप्यका १२ वाप्या १३ पत्री १४। इति शब्दरत्नावली॥ दीर्घिका १५ तप्ती १६ दारुपत्री १७ विल्वी १८ वाप्यी १९। अस्या गुणाः। कटुत्वम्। तीक्ष्णत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातामक्रमिहरत्वम्। रूक्षत्वम् पथ्यत्वम्। दीपनत्वम्। पाचनत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"हिङ्गुपत्री भवेद्रुच्या तीक्ष्णोष्णा पाचनी कटुः। हृद्हस्तिरुग्विबन्धार्शःश्लेष्मगुल्मानिलापहा॥"
इति भावप्रकाशः॥
हिङ्गुपर्णी, स्त्री, (हिङ्गुन इव पर्णमस्याः। ङीप्।) वंशपत्री। इति रत्नमाला॥
हिङ्गुलः, पुं, क्ली, (हिङ्गु तद्वर्णं लातीति। ला+कः।) रागद्रव्यविशेषः। तत्पर्य्यायः। हिङ्गुलः २। इत्यमरभरतौ। १। ५। २०॥ हिङ्गुलम् ३ रक्तम् ४ मर्कटशीर्षम् ५ दरदः ६ रसः ७। इति रत्नमाला॥ हंसपादम् ८ कुरुविन्दः ९। इति हेमचन्द्रः॥ हिङ्गुलिः १० रक्तपारदः ११। इति जटाधरः॥ वर्ब्बरम् १२ सुरङ्गम् १३ सुपरम् १४ रक्तनम् १५ दरदम् १६ म्लेच्छम् १७ चित्राङ्गम् १८ चूर्णपारदम् १९ चर्म्मारकम् २० मणिरागम् २१ रसोद्भवम् २२ रक्तकम् २३ रसगर्भम् २४। अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। उष्णत्वम्। वातकफत्रिदोषद्वन्द्वदोषज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ *॥ अपि च।
अथ हिङ्गुलस्य नामानि लक्षणानि गुणाय।
"हिङ्गुलं दरदं म्लेच्छं विचास चूर्णपारदम्। दरदस्त्रिविधः प्रोक्तश्चर्म्मारः शुक्लतुण्डकः। हंसपादस्तृतीयः स्यादुत्तरोत्तरः॥ चर्म्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः। जवाकुसुमसङ्काशो हंसपादो मनोत्तमः॥
तिक्तं कषायं कटु हिङ्गुलं स्या-
च्छ्लेष्मामयघ्नं कफपित्तहारि।
कुष्ठासकुष्ठज्वरकामलांश
प्लीहामवातौ च परं निहन्ति॥"
क्वचित्पातनयुक्त्या तु डमरुयन्त्रपाचितम्। हिङ्गुलं तस्य सूतं तु शुद्धमेव न शोधयेत्॥"
इति॥*॥
तत्र हिङ्गुलस्य शोधनविधिः।
"मेषोच्चीरेण दरदमम्लवर्गेण भावितम्। सप्तवारान् प्रयत्नेन शुद्धिमायाति निश्चितम्॥"
एवं शोधितस्य हिङ्गुलस्य गुणाः।
"तिक्तं कषायं कटु हिङ्गुलं स्या-
च्छ्लेष्मामयघ्नं कफपित्तहारि।
कुष्ठासकुष्ठज्वरकामलांश
प्लीहामवातौ च परं निहन्ति॥"इति॥*॥
(पर्य्यायः शोधनप्रकारान्तरञ्च यथा,—
"हिङ्गुले हिङ्गुलुर्याति दरदः शुकतुण्डकः। रसगन्धकसम्भूतो हिङ्गुलो दैत्यरक्तकः॥ अम्लवर्गद्रवैः पिष्टा दरदो माहिषेण च। दुग्धेन सप्तधा पिष्टः शुद्धीभूतो विशुध्यति॥"
तथाच प्रकारान्तरम्।
"आदर्कैर्लकुचद्रावैः सप्तधा भावितो यदि। हिङ्गुलः शुद्धतां याति निर्दोषो जायते खलु॥ विम्बाभं हिङ्गुलं दिव्यं रसगन्धकसम्भवम्॥ मेहकुष्ठहरं रूक्षं बल्यं मेधाग्निवर्द्धनम्॥"
इति हिङ्गुलशुद्धिः॥*॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे।) अथ हिङ्गुलादसाकर्षणविधिः।
"निम्बरसैर्निम्बपत्ररसैर्वा याममात्रकम्। पृष्ट्वा दरदमूर्द्धं तु पातयेत् सूतयुक्तिवत्॥ तयोर्ऊर्द्ध पिठरीलग्नं गृह्णीयाद्रसमुत्तमम्। शुद्धमेव हि तत् सूतं सर्व्वकर्म्मसु योजयेत्॥"
इति च भावप्रकाशः॥
हिङ्गुला, स्त्री, देशविशेषः। यथा,—
"ब्रह्मरन्ध्रं हिङ्गुलायां भैरवो भीमलोचनः। कोट्टरी सा महामाया त्रिगुणा या दिगम्बरी॥"
इति तन्त्रचूड़ामणौ पीठमाला॥*॥
हिङ्गीरः, पुं, (हस्तिपादबन्धः। यथा,—
"विन्दूजालं पुनः पद्मं शृङ्खलो निगड़ोऽन्दूकः। हिङ्गीरश्च पादपाशो वारिस्तु राजतन्यभूः॥"
इति हेमचन्द्रः॥

हिड, इ ङ गतौ अनादरे। इति कविकल्पद्रुमः॥ (स्वा०-आत्म०-सक०-सेट्।) इ, हिण्डते। ङ, हिण्डते। इति दुर्गादासः॥

हिडिम्बः, पुं, राक्षसविशेषः। स भीमसेनेन हतः। इति महाभारतम्॥ (एतद्विवरणन्तु तत्रैव आदिपर्व्वणि १५३ अध्यायादारभ्य द्रष्टव्यम्॥) हिड्म्ब इति च पाठः॥

हिडिम्बजित्, पुं, (हिडिम्बं जितवानिति। जि+क्विप्।) भीमसेनः। इति त्रिकाण्डशेषः॥

हिडिम्बनिसूदनः, पु, (हिडिम्बं निसूदयतीति। नि+सूद+णिच्+ल्युः।) भीमसेनः। इति भूरिप्रयोगः॥

हिडिम्बभित्, [द्] पुं, (हिडिम्बं भिनत्तीति। भिद्+क्विप्।) भीमसेनः। इति भूरिप्रयोगः॥

हिडिम्बा, स्त्री, हिडिम्बराक्षसभगिनी। यथा,—
"हतो मानुषमांसस्य महाकायो महाबलः।
आघ्राय मानुषं गन्धं भगिनीमिदमब्रवीत्॥
उपपन्नश्चिरस्याद्य भक्ष्योऽयं मम सुप्रियः।
स्नेहस्रवान् प्रस्रवति जिह्वा पर्य्येति मे मुखम्॥
एवमुक्ता हिडिम्बा तु हिडिम्बेन तदा वने।
भ्रातुर्व्वचनमाज्ञाय त्वरमाणेव राक्षसी॥"
इति महाभारते आदिपर्व्वणि १५३ अध्यायः॥ तद्गर्भे भीमसेनौरसेन घटोत्कचो जातः। यथा,
"प्रजज्ञे राक्षसी पुत्रं भीमसेनान्महाबलम्।
विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम्॥
प्रणम्य विकचः पादावग्रहात् स पितुस्तदा।
मातुश्च परमेष्वासौ च नामास्य चक्रतुः॥
घटो ह्यास्योत्कच इति माता तं प्रत्यभाषत।
अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह॥"
इति महाभारते आदिपर्व्वणि १५५ अः॥

हिडिम्बापतिः, पुं, (हिडिम्बायाः पतिः।) हनूमान्। इति शब्दरत्नावली॥

हिडिम्बारमणः, पुं, (हिडिम्बाया रमणः।) हनूमान्। इति त्रिकाण्डशेषः॥

हिण्डनं, क्लो, (हिण्ड+ल्युट्।) भ्रमणम्। रतम्। इति मेदिनी॥ लेखनम् इति विश्वः॥

हिण्डिकः, पुं, लग्नाचार्य्यः। इति हारावली॥

हिण्डिरः, पुं, हिण्डीरः। इति शब्दरत्नावली॥

हिण्डी, स्त्री, दुर्गा। इति त्रिकाण्डशेषः॥

हिण्डीप्रियतमः, पुं, (हिण्डायाः दुर्गायाः प्रियतमः।) शिवः। इति शब्दरत्नावली॥

हिण्डीरः, पुं, (हिण्डते इतस्ततो गच्छतीति। हिण्ड+ईरन्। इत्युणादिवृत्तौ उज्ज्वलदत्तः। ४। ३०।) समुद्रफेनः। इत्यमरः। २। ८। १०५॥ (यथा, साहित्यदर्पणे। १०। ६८३।
"एतद्विभाति चरमाचलचूड़चुम्बि
हिण्डीरपिण्डरुचिशोतमरीचिबिम्बम्।
उज्जृम्भितस्य रजनीं मदनानलस्य
धूमं दधत्प्रकटलाञ्छनकैतवेन॥")

वार्त्ताकुः। पुरुषः। इति मेदिनी॥ दधकम्। इत्युणादिकोषः॥ (क्लो, दाड़िमम्। इत्युज्ज्वलधृतहारावली। ४। ३०॥)

हितं, त्रि, (हि गतिप्रेरणे धा धारणे पुष्टौ वा+क्तः।) पथ्यम्। यतम्। धृतम्। इति मेदिनी॥ इष्टसाधनम्। इति मुग्धबोधटीकायां दुर्गादासः॥ मङ्गलम्। यथा,—
"गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतो न यत्।
सर्व्वसत्त्वहितार्थाय तत् प्रवृत्तिरिव चेष्टितम्॥
अहितहितविचारशून्यबुद्धेः
श्रुतिसमयैर्बहुभिर्विवर्जितस्य।
उदरभरणमात्रतुष्टबुद्धेः
पुरुषपशोः पशोश्च को विशेषः॥"
इति गारुड़े ११५ अध्यायः॥ मित्रम्। यथा,—
"हितममरिपुसंज्ञा ये निसर्गे निरुक्ता
अधिहितहितमध्यास्तेऽपि तत्कालमित्रैः।"
इति ज्योतिस्तत्त्वम्॥

हितकः, पुं, (हितमर्हतीति। हि+संज्ञायां कन्।) शिग्रुः। इति राजनिर्घण्टः॥

हितकारी, [न्] त्रि, (हितं करोतीति। कृ+णिनिः।) मङ्गलकारकः। शुभकारकः। यथा,—
"लक्ष्मणेन च धर्म्मात्मन्! भ्रात्रा तद्धितकारिणा।
माद्रभिर्भ्राद्रसहितं पश्यामोऽद्य वयं नृप!॥"
इति श्रीरामायणे उत्तरकाण्डे १ सर्गः॥

हितप्रणीः, पुं, (हितं प्रणयतीति। प्र+नी+क्विप्।) चारः। इति शब्दरत्नावली॥

हितवादी, [न्] त्रि, हितकथनशीलः। सत्परामर्शी। हितशब्दपूर्व्वकवदधातोर्णिन्प्रत्ययेन निष्पन्नः॥

हितावली, स्त्री, (हितानां आवली यत्र।) औषधविशेषः। हियावली इति हिन्दी भाषा। तत्पर्य्यायः। हृद्गन्धा २ कुष्ठघ्नः ३ अङ्गारकुष्ठकः ४ अङ्गारग्रन्थिः ५ ग्रन्थिः ६ ग्रन्थिलः ७। अस्या गुणाः। सारकत्वम्। तिक्तत्वम्। प्लीहगुल्मोदरकृमिकुष्ठगदान्त्यग्रहर्क्षकण्डूतिनाशित्वञ्च। इति राजनिर्घण्टः॥

हितैषी, [न्] त्रि, (हितमिच्छतीति। इष+णिनिः।) हितेच्छाकारी। यथा, बृहद्धर्म्मपुराणे।
"यात्राविवाहव्रतबन्धवेश्म-
प्रासादचूड़ाकरणं हितैषी।
नष्टे भृगौ नोपदिशेच्चराणां
देवप्रतिष्ठामपि कर्त्तुमेधम्॥"
इति मलमासतत्त्वम्॥

हितोक्तिः, स्त्री, (हितस्य उक्तिः।) पथ्यवचनम्। इति धनञ्जयः॥

हितोपदेशः, पुं, (हितानामुपदेशः।) सत्परामर्शदानम्। यथा, महाभारते। १।२।१०१।
"हितोपदेशश्च पथि धर्म्मराजस्य धीमतः।
विदुरेण कृतो यत्र हितार्थं म्लेच्छभाषया॥"
हितानामुपदेशो यत्र।) विष्णुशर्म्मकृतमित्रलाभसुहृद्भेदविग्रहसन्धिनामकथाचतुष्टयात्मकनीतिशास्त्रम्। यथा,—

"सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः।
जाह्नवीफेनरेखेव यन्मूर्द्धि शशिनः कला॥
श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु।
वाचां सर्व्वत्र वैचित्र्यं नीतिविद्यां ददाति च॥"
इति हितोपदेशग्रन्थमङ्गलाचरणम्॥

हिन्तालः, पुं, वृक्षविशेषः। हेँताल इति भाषा। तस्य फलं उदुम्बरम्। इत्यमरः। २। ४। १६८॥ तत्पर्य्यायः। पूगरोटः २। तत्फलम् किरिटि। इति त्रिकाण्डशेषः॥ * ॥ तस्य पर्य्यायान्तरं गुणाश्च।
"हिन्तालः स्थूलतालश्च बन्यपत्रो बृहद्दलः।
स्थिरपत्रो द्विधालेख्यः शिरापत्रोऽस्थिराह्विकः॥
गर्भस्रावी नीलतालो भीषणो बहुकण्टकः।
भस्मसारो बृहत्तालः स्याच्चतुर्ग्रन्थाभिधः॥
हिन्तालो मधुराम्लश्च कफकृत् पित्तदाहनुत्।
श्रमघ्नश्छर्द्दिहारी च शिशिरो वातदोषकृत्॥"
इति राजनिर्घण्टः॥
(व्यवहारोऽस्य यथा,—
"गुड़ूचीबालहिन्तालवासकीनीलझिण्टिकाः॥"
इति वैद्यकरसेन्द्रसारसंग्रहे कुष्ठाधिकारे माणिक्यरसे॥) स तु द्वयराजविशेषः। यथा, क्रियाकौमुद्यां वशिष्ठः।
"गुवाकतालहिन्तालास्तथा ताड़ी च केतकी।
खर्জ্জूरनारिकेली च सप्तैते द्वयराजकाः॥
द्वयराजशिरापर्व्वैः कुर्य्याद्धिन्तधावनम्।
तावद्भवति चण्डालो यावन्नं नैव पश्यति॥"
इत्याह्निकाचारतत्त्वम्॥

हिन्दुः, पुं, (हीनं दूषयतीति। दुष+डुः। पृषोदरादित्वात् साधुः।) जातिविशेषः। हिँदु इति भाषा। यथा,—
"पश्चिमाम्नायमन्त्रास्तु प्रोक्ताः पारस्यभाषया।
अष्टोत्तरशतान्येतेषां संसाधनात् कली॥
पञ्च खानाः सप्त मौरा नव शाहा महाबलाः।
हिन्दुधर्म्मप्रलोभारो जायन्ते चक्रवर्त्तिनः॥
हीनञ्च दूषयत्येव हिन्दुरित्युच्यते प्रिये!॥
पूर्व्वाम्नाये नवशतं षड़शीतिः प्रकीर्त्तिताः।
फिरङ्गभाषया मन्त्रास्तेषां संसाधनात् कली॥
अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः।
हंरेजा नव षट् पञ्च लण्डजायापि भाविनः॥"
इति मेरुतन्त्रे ३३ प्रकाशः॥

हिन्दोलः, पुं, (हिन्दोल+घञ्।) श्रावणशुक्लपञ्चविहितभगवद्दोलारोहविशेषः। झुलनयात्रा इति यस्य प्रसिद्धिः। षड़्रागान्तर्गतरागविशेषः। हिंडोल इति हिन्दी भाषा। यथा,
"भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा।
श्रीरागो मेघरागश्च षड़ेते पुरुषाज्ञया॥"
अस्य स्त्रियः।
"वेलावती रामकली देशाख्या पटमञ्जरी।
ललिता सहिता एता हिन्दोलस्य वराङ्गनाः॥"
अथ हिन्दोलध्यानम्।
"नितम्बनीमन्दतरङ्गितासु
दोलासु खेलासुखमादधानः।

खर्व्वः कपोलद्युतिकामयुक्तो
हिन्दोलरागः कथितो मुनीन्द्रैः ॥"
तत्पुत्रा यथा, सङ्गीतदर्पणे।
"भाभीरः शुभ्रधवली चन्द्रकामविमोहकाः।
चन्द्रकान्तः खेदवेदः हिन्दोलात्मजकीर्त्तितः ॥"
तस्य गानसमयो यथा,—
"हिन्दोलः पञ्चमः सिन्धुर्ललितश्च वसन्तकः।
भखारी भटीयारी च आद्ययामे प्रगीयते ॥"
इति बृहत्सङ्गीतरत्नाकरः ॥ * ॥
हनूमन्मते षड्रागाणां मध्ये द्वितीयरागः। ब्रह्मणः शरीरान्निर्गतः। केचिन्मते नाभितः। अस्य जातिः औडवः। अर्थात् प ग म प नि इति पञ्चस्वरमिलितः। अस्य गेहं षड्जस्वरः। वसन्तर्त्तौ दिवाप्रथमभागे गानसमयः। रागमालायामस्य रूपम्। अल्पवयःसुन्दरः पीतवर्णः उत्तमाङ्गः स्वर्णमयहिन्दोलारूढः सुसज्जितसुन्दरोखोभिः गीतं गायन्तीभिः हिन्दोलाद्योलयन्तीभिश्च सह परमानन्देन हास्यकौतुककारी। अस्य पञ्च रागिण्यः। यथा। रामकरी १ देशाखी २ ललिता ३ विलावली ४ पटमञ्जरी ५। अस्य पुत्रा अष्टौ यथा। चन्द्रविम्बः १ मङ्गलः २ शुभः ३ आनन्दः ४ विनोदः ५ प्रधनः ६ गौरः ७ विभासः ८ ॥ * ॥ भरतमते अस्य रागिण्यो यथा। रामकली १ मालावती २ आशावरी ३ देवारी ४ गुणकली ५। तन्मते पुत्रा यथा। वसन्तः १ मालवः २ मारुः ३ कुमलः ४ शङ्कारवन्दः ५ लङ्कादाहनः ६ नागधुनः ७ धवलः ८। एषां भार्य्या यथा। लीलावती १ केरवी २ चयती ३ पूरवी ४ पारावती ५ तिरवणी ६ देवगिरी ७ सुरसती ८। इति सङ्गीतशास्त्रम् ॥
हिन्दोलकः, पुं, (हिन्दोल एव। कन्।) यानविशेषः। तत्पर्य्यायः। प्रेङ्खा २ दोला ३। इति जटाधरः ॥ दोलिका ४ हिन्दोला ५। इति हारावली ॥
हिन्दोला, स्त्री, (हिन्दोल+व्रज+टाप्।) दोलिका। हिंदला इति भाषा। इति हारावली ॥
हिमं, त्रि, (हन्ति उष्णमिति। हन+"हनेर्हिं च।" उणा० १। १४६। इतिमक् हि च।) शीतगुणविशिष्टः। शीतलवस्तु। तत्पर्य्यायः। सुषीमः २ शिशिरः ३ जड़ः ४ तुषारः ५ शीतलः ६ शीतः ७। इत्यमरः। १। ३। १८ ॥ (यथा, सुश्रुते। ४। २८। "अपराह्णे हिमाभिरद्भिः परिषिक्तगात्रः शालीनां षष्टीकानाञ्च पयसा शर्करामधुरेणौदनमश्नीयात् ॥")
हिमं, क्ली, (हन+मक्। हन्तेर्हिं च।) अकाशवाष्पः। तत्पर्य्यायः। अवश्यायः २ नीहारः ३ तुषारः ४ तुहिनम् ५ प्रालेयम् ६ महिमा ७। इत्यमरः। १। ३। १८ ॥ इन्द्राग्निधूमः ८ खवाष्पः ९ रजनीजलम् १०। इति हारावली ॥ (यथा, रघुः। ८। ४५।
"अथवा मृदुवस्तु हिंसितुं
मृदुनैवारभते प्रजान्तकः।
हिमसेकविपत्तिरत्र मे
नलिनी पूर्व्वनिदर्शनं मता ॥")
अस्य गुणः। कफवायुवहत्वम्। इति राजवल्लभः ॥ चन्दनम्। इति मेदिनी ॥ पद्मकाष्ठम्। रङ्गम्। मौक्तिकम्। इति राजनिर्घण्टः ॥ नवनीतम्। इति शब्दचन्द्रिका ॥ शीतम्। इति हेमचन्द्रः ॥ (कर्पूरः। पर्य्यायो यथा,—
"पुंसि क्लीवे च कर्पूरः सिताभ्रो हिमवालुकः।
घनसारश्चन्द्रसंज्ञः हिमनामापि स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हिमः, पुं,(हन+मक् हन्तेर्हिं च।) चन्दनवृक्षः। इति हेमचन्द्रः। चन्द्रः। इति शब्दचन्द्रिका ॥ कर्पूरः। इति राजनिर्घण्टः ॥ हेमन्तर्त्तुः। स तु अयनद्वयेऽपीषमासात्मकः। यथा,—
"हिमशिशिरवसन्तग्रीष्मवर्षाशरत्सु
स्तनतपनवनाम्भोहर्म्यगोक्षीरपानैः।
सुखमनुभव राजंस्तद्दिशो यान्तु नाशं
दिवसकमललज्जाशर्व्वरीरेणुपङ्काः ॥"
इति ऋतुसंहारः ॥
हिमालयपर्व्वतः। इति हिमजादिशब्ददर्शनात् ॥
हिमकः, पुं, (हिमेन कायतीति। कै+क।) विकङ्कतवृक्षः। इति राजनिर्घण्टः ॥
हिमकरः, पुं,(हिमः शीतलः करः किरणो यस्य।) चन्द्रः। यथा,—
"इदं द्वाघीयस्या दरदरितनीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे!।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥"
इत्यानन्दलहरी ॥
कर्पूरः। इति राजनिर्घण्टः ॥
हिमकूटः, पुं,(हिमस्य कूटो यत्र।) गिरिवर्त्तुः। इति राजनिर्घण्टः ॥ (हिमस्य कूट इति। हिमालयशृङ्ग, पुं, क्ली ॥ यथा, भागवते। ५। १७। ८। "तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद् बह्वनि परिकूटान्यतिक्रम्य हेमकूटहिमकूटोन्यतिरभसतरंहा खण्डयतीति ॥")
हिमगिरिः, पुं, (हिमप्रधानो गिरिः।) हिमालयपर्व्वतः। यथा,—
"धनुः पौष्पं मौर्व्वी मधुकरमयी पञ्च विशिखा
वसन्तः सामन्तो मलयमरुदायोधनरथः।
तथाप्येकः सर्व्वं हिमगिरिसुते! कामपि कृपा-
मपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ॥"
इत्यानन्दलहरी ॥
(यथा च।
"आग्नेया विन्ध्यशैलाद्याः सौम्यो हिमगिरिर्मतः ॥"
इति पूर्व्वखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम्॥)
हिमजः, पुं, (हिमात् हिमालयात् जायते इति। जन+डः।) मैनाकगिरिः। इति मेदिनी ॥
हिमजा, स्त्री, (हिमात् हिमालयात् जायते इति। जन+डः। टाप्।) पार्व्वती। शटी। इति मेदिनी ॥ क्षीरिणी। इति राजनिर्घण्टः ॥
हिमज्झटिः, पुं, (हिमानां कुज्झटिः। पृषोदरादित्वात् साधुः।) कुज्झटिः। इति हारावली ॥ क्वचित् पुस्तके हिमझण्टिरिति पाठः ॥
हिमतैलं, क्ली, (हिमजातं तैलमिति।) कर्पूरतैलम्। इति राजनिर्घण्टः ॥
हिमदुग्धा, स्त्री, (हिमवत् शुभ्रं दुग्धमस्याः।) क्षीरिणी। इति राजनिर्घण्टः ॥
हिमदुर्दिनं, क्ली, (हिमेन दुर्दिनम्।) हिमसमूहपातेन दुःखदायकदिनम्। तत्पर्य्यायः। पत्रहिमम् २। इति त्रिकाण्डशेषः
हिमद्युतिः, पुं, (हिमा द्युतिर्यस्य।) चन्द्रः। इति शब्दमाला ॥ (यथा, माघे। ८। १२।
"अविभाव्यतारकमदृष्टहिम-
द्युतिबिम्बमस्तमितभानुनभः ॥")
हिमद्रुमः, पुं, (हिमो द्रुमः।) महानिम्बः। इति राजनिर्घण्टः ॥
हिमधातुः, पुं, (हिमो धातुरिव यत्र।) हिमालयपर्व्वतः। इति कैचित् ॥
हिमप्रस्थः, पुं, (हिमप्रधानः प्रस्थो यत्र।) हिमालयः। इति हेमचन्द्रः ॥
हिमवत्सुतः, पुं, (हिमवतः सुतः।) मैनाकपर्व्वतः। इति त्रिकाण्डशेषः ॥
हिमवत्सुता, स्त्री, (हिमवतः सुता।) गङ्गा। इति धनञ्जयः ॥ (यथा, महाभारते। ३। १०८। ८। "ततः पपात गगनाद् गङ्गा सा हिमवत्सुता ॥") उमा च।
हिमवान्, [त्] पुं, (हिममस्यास्तीति। हिम+मतुप्। मस्य वः।) हिमालयपर्व्वतः। इत्यमरः। २। ३। ३ ॥ तत्कन्या गङ्गा। यथा,—
"गङ्गा हिमवतो जज्ञे सर्व्वलोकैकपावनी।
स्वयोगाग्निबलाद्देवी लेभे पुत्रीं महेश्वरीम् ॥"
इति देवीपुराणे १२ अध्यायः ॥
हिमविशिष्टे, त्रि ॥
हिमवालुकः, पुं, (हिमस्य वालुका इव।) कर्पूरः। इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"पुंसि क्लीवे च कर्पूरः सिताभ्रो हिमवालुकः।
घनसारश्चन्द्रसंज्ञः हिमनामापि सः स्मृतः ॥")
हिमवालुका, स्त्री,(हिमस्य वालुकेव।) कर्पूरः। इत्यमरः। २। ६। १३० ॥ (यथा,—
"प्रनीरनीरं हिमवालुका च
मित्रं नृणां स्यात् सति मूत्रकृच्छ्रे ॥"
इति वैद्यकपथ्यविधौ मूत्रकृच्छ्राधिकारे ॥)
हिमशर्करा, स्त्री, (हिमस्य शर्करेव।) यावनाली। इति राजनिर्घण्टः ॥
हिमशैलजा, स्त्री, (हिमशैलात् जायते इति। जन+डः।) दुर्गा। इति शब्दरत्नावली ॥ (हिमालयोद्भवे, त्रि। यथा, याज्ञवल्क्ये। २। १११
"एवमुक्ता विषं गार्द्धं भक्षयेत् हिमशैलजम्॥")

हिमसंहतिः, स्त्री, (हिमानां संहतिः ।) हिमसमूहः । बरफ् इति पारस्यभाषा । तत्पर्य्यायः । हिमानी २ । इत्यमरः । १ । ३ । १८ ॥ महहिमम् ३ । इति जटाधरः ॥

हिमहासकः, पुं, (हिममपि हसति शीलतत्वात् । हस+ण्वुल् । हिन्तालहृक्षः । इति शब्दरत्नावली ॥

हिमा, स्त्री, (हिम+अर्श आद्यच् । टाप् ।) सूक्ष्मैला । रेणुका । भद्रमुस्ता । नागरमुस्ता । पृक्का । वणिका । इति राजनिर्घण्टः ॥

हिमांशुः, पुं, (हिमा अंशवो यस्य ।) चन्द्रः । इत्यमरः । १ । ३ । १३ ॥ (यथा, रघु. ।५।१६।

"पर्य्यायपीतस्य सुरैर्हिमांशोः
कलाक्षयः श्लाघ्यतरो हि हृद्धेः ॥")

कर्पूरः । इति राजनिर्घण्टः ॥

हिमांशुभिख्यं, क्ली. (हिमांशोरिव अभिख्या शोभा यस्य ।) रौप्यम् । इति हेमचन्द्रः ॥

हिमागमः, पुं, (हिमस्य आगमो यत्र ।) हेमन्तः । इति राजनिर्घण्टः ॥ (यथा, महाभारते । ५ । ८३ । ७ ।

"कौमुदे मासि रेवत्यां शरदन्ते हिमागमे ।
स्फीतशस्यसुखे काले कल्यः सत्यवतां वरः ॥")

हिमाद्रिः, पुं, (हिमप्रधानोऽद्रिः ।) हिमालयपर्व्वतः । इति भूरिप्रयोगः ॥ (यथा, रघुः । ४ । ७९ ।

"परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥")

हिमाद्रिजा, स्त्री, (हिमाद्रौ जायते इति । जन+डः ।) चौरिणी । इति राजनिर्घण्टः ॥ पार्व्वती च ॥ (यथा, वक्रोक्तिपञ्चाशिकायाम् । १ ।

"मैवं वद्यसि किं वनं ननु जलं मूर्द्धा मयैवोह्यते
वक्रोक्त्येति हिमाद्रिजामवचसं कुर्व्वन् हरः
पातु वः ॥")

हिमाद्रितनया, स्त्री, (हिमाद्रेस्तनया ।) दुर्गा । इति वक्ष्यमाणशब्ददर्शनात् ॥

हिमाद्रितनयापतिः, स्त्री, (हिमाद्रितनयाया दुर्गायाः पतिः) शिवः । इति कविकल्पलता ॥

हिमानी, स्त्री, (महद्धिममिति । "हिमारण्ययोर्महत्त्वे ।" ४ । १ । ४९ । इत्यस्य वार्त्तिकोक्त्या ङीष् आनुक् च ।) हिमसंहतिः । इत्यमरः । १ ३ ।१८॥ (यथा, राजतरङ्गिण्याम् । १ ।१८० ।

"हिमान्यां बीडवाधाय पतन्त्यां प्रतिवत्सरम् ।
शीते दार्व्वाभिसारादौ षण्मासान् पार्थिवोऽवसत् ॥")

यावनालशर्करा । इति राजनिर्घण्टः ॥

हिमाब्जं, क्ली, (हिमे हेमन्ते जातं अब्जम् ।) उत्पलम् । इति राजनिर्घण्टः ॥

हिमारातिः, पुं, (हिमस्य अरातिः ।) अग्निः । सूर्य्यः । इति मेदिनी ॥ चित्रकवृक्षः । अर्कवृक्षः । इत्यमरे वह्निसंज्ञकार्काह्वशब्दयोर्दर्शनात् ॥

हिमालयः, पुं, (हिमस्य आलय इव शुक्लत्वात् ।) शुक्लखदिरः । इति शब्दचन्द्रिका ॥ (हिमानामालयः ।) स्वनामख्यातपर्व्वतः । तत्पर्य्यायः । नगपतिः २ मेनाधवः ३ उमागुरुः ४ । इति त्रिकाण्डशेषः ॥ हिमाद्रिः ५ नगाधिपः ६ । इति जटाधरः ॥ उदगद्रिः ७ अद्रिराट् ८ मेनकाप्राणेशः ९ हिमवान् १० हिमप्रस्थः ११ भवानीगुरुः १२ । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । १ ।

"अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्व्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥")

स तु लङ्कायाः उत्तरे वर्त्तते । भारतवर्षस्य सीमापर्व्वतोऽयम् । अस्य दीर्घं दशसहस्रयोजनानि । प्रस्थे द्विसहस्रयोजनानि । यथा,—

"एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालयः इति प्रागायता यथा नीलादयः । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम् ।" इति श्रीभागवते ५ स्कन्धे १६ अः ॥

हिमालयसुता, स्त्री, (हिमालयस्य सुता ।) उमा । इति कविकल्पलता ॥

हिमालया, स्त्री, (हिमस्य शीतस्य आलयो यत्र ।) भूम्यामलकी । इति राजनिर्घण्टः ॥

हिमावती, स्त्री स्वर्णचीरी । इत्यमरः । २ । ४ । १३८ ॥ (पर्य्यायो यथा,—

"कटुपर्णी हैमवती हैमचीरी हिमावती ।
हैमाह्वा पोतदुग्धा च तन्मूलश्लोकमुच्यते ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हिमाह्वः, पुं, (हिममपि आह्वयते स्पर्द्धते वर्णेनेति । ह्वे+कः ।) कर्पूरः । इति केचित् ॥ (वर्षविशेषः । यथा, मार्कण्डेये । ५३ । ४० ।

"हिमाह्वं दक्षिणं वर्षं तस्य नाम्ना महात्मनः ॥"

हिमाह्वयः, पुं, (हिममाह्वयते स्पर्द्धते वर्णेनेति । आ+ह्वे+अच् । हिमस्य आह्वा आह्वा यस्येति वा ।) कर्पूरः । इति त्रिकाण्डशेषः ॥ (वर्षविशेषः । यथा, मार्कण्डेये । ५३ । ३६ ।

"यानि किं पुरुषाख्यानि वर्ज्जयित्वा हिमाह्वयम् ।
तेषां स्वभावतः सिद्धिः सुखप्राया ह्ययत्नतः ॥")

हिमाश्रया, स्त्री, (हिमस्य शीतलस्य आश्रयो यस्याः ।) स्वर्णजीवन्ती । इति राजनिर्घण्टः ॥

हिमिका, स्त्री, तुषारपरि पतितहिमम् । इति केचित् ॥

हिमेलुः, त्रि, (हिमं न सहते इति । हिम+"तत्र सहते इति हिमाचेलुः ।" ५ । २ ।१२२ । इत्यस्य वार्त्तिकोक्त्या इलुः ।) हिमक्लेशितः । हिमार्त्तः । इति केचित् ॥

हिमोत्तरा, स्त्री, (हिमः उत्तरो यस्याः ।) कपिलद्राक्षा । इति राजनिर्घण्टः ॥

हिमोत्पन्ना, स्त्री, (हिमे हिमप्रधाने उत्पन्ना ।) यावनाली । इति राजनिर्घण्टः ॥

हिमोद्भवा, स्त्री, (हिमे हेमन्ते उद्भवो यस्याः ।) शटी । इति राजनिर्घण्टः ॥

हिम्यः, त्रि, हिमभवः । हिमशब्दात् यत्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी । ५।२।१२० ॥

हिरङ्गुः, पुं, राहुः । इति केचित् ॥

हिरण्यं, क्ली, रेतः । स्वर्णम् । वराटकः । इति मेदिनी ॥

हिरण्मय क्ली, (हिरण्यस्य विकारः । हिरण्य+मयट् । "दाण्डिनायनहास्तिनायनेति ।"६।४। १७४ । इति निपातितः ।) भारतवर्षादिनववर्षान्तर्गतनवविशेषः । इति त्रिकाण्डशेषः ॥ तद्विवरणं यथा । उत्तरोत्तरशैलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्ये एव कसन्ति । इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥

हिरण्मयः, पुं, (हिरण्य+मयट् ।) ब्रह्मा । सुवर्णमये, त्रि । इति मेदिनी ॥ (यथा, भट्टिः । २ । ४७ ।

"हिरण्मयी शालतेव जङ्गमा
च्युता दिवः स्वामुविराचिरप्रभा ॥")

हिरण्यं, क्ली, (हर्य्यति दीप्यते इति । हर्य्य गतिकान्त्योः+"हर्य्यतेः कन्यन् हिर च ।" उणा० ५ । ४४ । इति कन्यन् । हिरादेशश्च धातोः ।) सुवर्णम् । (यथा, मनुः । २ । २४६ ।

"क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमासनम् ।
धान्यं शाकञ्च वासांसि गुरवे प्रीतिमावहेत् ॥")

तद्वैदिकपर्य्यायाः । हेम १ चन्द्रम् २ रुक्मम् ३ अयः ४ हिरण्यम् ५ पेयः ६ क्षयनम् ७ लोहम् ८ कनकम् ९ काञ्चनम् १० भर्म्म ११ अमृतम् १२ मरुत् १३ दत्तम् १४ जातरूपम् १५ । इति पञ्चदश हिरण्यनामानि । इति वेदनिर्घण्टौ १ अध्यायः ॥ धुसूरम् । इत्यमरः । २ । ९ । ९४ ॥ रेतः । द्रव्यम् । वराटः । अक्षयम् । मानभेदः । अकुप्यम् । इति मेदिनी ॥ रजतम् । धनम् । इति शब्दरत्नावली ॥ (पुं, गुग्गुलुविशेषः । तत्प्रकारो यथा,—

"महिषाक्षो महानीलः कुमुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हिरण्यकशिपुः, पुं, दैत्यविशेषः । स तु कश्यपस्य दित्यां पञ्चमो जातः । तस्य सहोदरः हिरण्याक्षः । तस्य भार्य्या कयाधुः । तस्य पुत्राः संह्लादः १ अनुह्लादः २ ह्लादः ३ प्रह्लादः ४ । कन्या सिंहिका । इति श्रीभागवतम् ॥ अपि च ।

"त्वया यौ निहतौ देव ! दानवौ मधुकैटभौ ।
अवतीर्णौ पुनर्दैत्यौ भूत्वा कश्यपनन्दनौ ।
हिरण्यकशिपुश्चैव हिरण्याक्षो महासुरः ॥

सुदुर्जयोदती तौ तु पुनर्जातौ महाबलौ।
पुलस्त्यस्य कुले देव। राक्षसेन्द्रावरौ च तौ॥
तयोस्तु पादविन्यासमसहन्तो जनार्दन।।
तवान्तिकमनुप्राप्ता दग्धास्यकुम्भकर्णयोः॥"
इति वह्निपुराणे वैश्रवणवरप्रदाननामाध्यायः॥

तदुत्पत्त्यादि यथा,—
"दित्याः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतम्।
हिरण्याक्षश्च दुर्धर्षो हिरण्यकशिपुस्तथा॥
कश्यपस्याश्रमोऽप्यासीत् पुष्करे वै पुष्करे पुरा।
ऋषिभिर्देवताभिश्च गन्धर्वैरुपशोभितः॥
आसनान्युपकल्पानि काञ्चनानि तु पञ्च वै।
ऋषीणामृत्विजां ते वै उपविष्टा यथाक्रमात्॥
होतुस्तत्रासनं यत्तु हविस्तत्राथ जुह्वतः।
अन्तर्व्वत्नी दितिर्यैव पत्नी च समुपागता॥
दशवर्षसहस्राणि गर्भस्तस्यामवर्त्तत।
स तु गर्भो विनिःसृत्य मातुर्वै उदरात्तदा॥
नियसादासने गर्भः कश्यपस्यापि सन्निधौ।
तं दृष्ट्वा सुनयस्तस्य नामाकुर्व्वन्त तद्दितम्।
हिरण्यकशिपुस्तस्मात् कर्म्मणानेन स स्मृतः।
हिरण्याक्षोऽनुजस्तस्य सिंहिका च तथानुजा।
राहोः सा जननी देवी विप्रचित्तेः परिग्रहः।
हिरण्यकशिपुर्दैत्यश्चकार परमं तपः।
ततो वर्षसहस्राणि निराहारो ह्यधःशिराः॥
तं ब्रह्मा छन्दयामास देत्यं तुष्टो वरेण तु।
सर्व्वामरत्वं वव्रे स ब्रह्मास्त्रेण दिवा निशि॥
अहं सर्व्वं विनिर्जित्य सर्व्वदेवत्वमाश्रितः।
अणिमादिगुणैश्वर्य्यमेष मे दीयतां वरः॥
तेनैवमुक्तो ब्रह्मा तु तस्मै दत्त्वा यथेप्सितम्।
दत्त्वा चास्य सभां दिव्यां तत्रैवान्तरधीयत॥
हिरण्यकशिपुर्दैत्यः श्लोकैर्गीतः पुरातनः॥
राजा हिरण्यकशिपुर्दैत्यो यां यां निषेवते।
तस्यां तस्यां नमश्चक्रुर्देवता ऋषिभिः सह॥
एवं प्रभावो दैत्योऽभूत् हिरण्यकशिपुः पुरा॥
स्वयमग्निश्च सूर्य्यश्च वायुरिन्द्रो जलं स्वयम्।
भूत्वा चकार राज्यं स मन्वन्तरचतुर्दश॥
तस्यासीत् नरसिंहस्तु मृत्युर्विष्णुः पुरा किल।
नखैस्तेन विनिर्भिन्नो नार्द्रशुष्का नखाः स्मृताः॥
हिरण्याक्षसुताः पञ्च विक्रान्ताः सुमहाबलाः।
हिरण्यकशिपोः पुत्राश्चत्वारः सुमहाबलाः॥
प्रह्लादः पूर्व्वजस्तेषामनुह्लादस्तथैव च।
संह्लादश्चैव ह्लादश्च ह्लादपुत्रान् शृणुष्व तान्॥"
इति वह्निपुराणे कश्यपीयप्रजासर्गनामाध्यायः॥

हिरण्यकशिपुहा, [न्] पुं, (हिरण्यकशिपुं हतवानिति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥

हिरण्यकामधेनुः, स्त्री, (हिरण्यनिर्म्मिता कामधेनुर्यत्र।) षोड़शमहादानान्तर्गतमहादानविशेषः। यथा,—
मत्स्य उवाच।
"अथातः संप्रवक्ष्यामि कामधेनुविधिं परम्।
सर्व्वकामप्रदं नृणां महापातकनाशनम्॥
लोकेशगोवाहनं तद्वद्धोमकार्य्याधिवासनम्।
तुलापुरुषवत् कार्य्यं कुण्डमण्डपवेदिकम्॥
स्वल्पैश्चैकान्विवत् कुर्य्यादृगुरुरेकः समाहितः।
काञ्चनस्यातिशुद्धस्य धेनुं वत्सञ्च कारयेत्॥
उत्तमा पलसाहस्रा तदर्द्धेन तु मध्यमा।
कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता।
शर्करातिलपलादूर्द्धं अशक्तोऽपीह कारयेत्॥
वेद्यां कृष्णाजिनं न्यस्य गुड़प्रस्थसमन्वितम्।
न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम्॥
कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्।
तथाष्टादशधान्यानि समन्तात् परिकल्पयेत्॥
इक्षुदण्डाष्टकं तद्वत् नानाफलविभूषितम्।
भाजनासनं तद्वत्ताम्रदोहनकं तथा॥
कौशेयवस्त्रयुगंप्रयुक्तां
दीपातपत्राभरणाभिरामाम्।
सचामरां कुण्डलिनीं सघण्टां
मणिव्रिकां चन्द्रकरीष्यपादाम्॥
सरेच सर्व्वैः पुरतोऽभिजुष्टां
हरिद्रया पुष्पफलैरनेकैः।
अजाजिकुस्तुम्बुरुशर्करादि-
र्व्वितानकक्षोपरि पञ्चवर्णम्॥
स्नानं ततो मङ्गलवेदघोषैः
प्रदक्षिणीकृत्य स पुण्यहस्तः।
आवाहयेत् तां गुड़धेनुमन्त्रै-
र्द्विजाय दद्यादथ दर्भपाणिः॥
त्वं सर्व्वदेवगणमन्दिरमङ्गभूता
विश्वेश्वरत्रिपथगोदधिपर्व्वतानाम्।
त्वद्दानशस्त्रशकलीकृतपातकौघः
प्राप्तोऽस्मि निर्व्वृतिमतीव परां नमामि॥
लोके यथेप्सितफलार्थविधायिनीं त्वा-
मासाद्य को हि भवदुःखमुपैति मर्त्यः।
संसारदुःखशमनाय यतश्च कामं
त्वां कामधेनुमिति वेदविदो वदन्ति॥
आमन्त्र्य शीलकलरूपगुणान्विताय
विप्राय यः कनकधेनुमिमां प्रदद्यात्।
प्राप्नोति धाम स पुरन्दरदेहजुष्टं
कन्यागणैः परिवृतः पदमिन्दुमौलेः॥"
इति मात्स्ये हिरण्यकामधेनुप्रदानिको नाम २५३ अध्यायः॥

हिरण्यकोषः, पुं, (हिरण्यस्य कोष इव।) कृताकृतस्वर्णरूप्यम्। इति हेमचन्द्रः॥

हिरण्यगर्भः, (हिरण्य हेममयाण्डं गर्भ उत्पत्तिस्थानमस्य।) ब्रह्मा। इत्यमरः।१।१।१६॥
हिरण्य गर्भ उत्पत्तिस्थानमस्य हिरण्यस्य गर्भो भ्रूण इति वा हिरण्यगर्भः। एतस्याण्डं हिरण्यवर्णमभवत्। तथा च स्मृतिः।
"हिरण्यवर्णमभवत्तदण्डमुदकेशयम्।
तत्र जज्ञे स्वयं ब्रह्मा स्वयम्भुरिति विश्रुतः॥"
इति।
उपचारात् हिरण्यवर्णमण्डं हिरण्यम्। इति भरतः॥ अन्यच्च।
"हिरण्यगर्भोऽभूद्यस्मा तेन बुद्धिर्म्मता असौ।"
इति देवीपुराणे देवीनिरूपे ४५ अध्यायः॥
षोड़शमहादानान्तर्गतद्वितीयमहादानम्। यथा,
मत्स्य उवाच।
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम्।
नाम्ना हिरण्यगर्भाख्यं महापातकनाशनम्॥
पुण्यां तिथिं समासाद्य तुलापुरुषदानवत्।
ऋत्विग्भ्यश्च यथान्यायं भूषणाच्छादनादिकम्॥
कुर्य्यादुपाचितस्तद्वल्लोकेशगोवाहनं बुधः।
पुण्याहवाचनं कृत्वा तद्वत् कृत्वाधिवासनम्।
ब्राह्मणैरानयेत् कुम्भं तपनीयमयं शुभम्॥
हेमसत्यङ्गुलोच्छ्रायं हेमपङ्कजगर्भवत्।
त्रिभागहीनं विस्तारमाढ्यचोराभिपूरितम्॥
दशस्थानि सरत्नानि दात्रं सूत्रं तथैव च।
हैमनालं सपिटकं बहिरादित्यसंयुतम्॥
तथैवावरणं नाभेरुपवीतञ्च काञ्चनम्।
पार्श्वतः स्थापयेत्तद्वद्धेमदण्डं कमण्डलुम्॥
पद्माकारं पिधानं स्यात् समन्तादङ्गुलाधिकम्
मुक्तावलीसमोपेतं पद्मरागदलान्वितम्॥
तिलद्रोणोपरिगतं वेदमध्ये ततोऽर्च्चयेत्।
ततो मङ्गलशब्देन ब्रह्मघोषरवेण च॥
सर्व्वौषध्युदकं स्नानं स्नापितो वेदपुङ्गवैः।
शुक्लमाल्याम्बरधरः सर्व्वाभरणभूषितः।
हेममुष्टारयेन्मन्त्रं गृहीतकुसमाञ्जलिः॥
नमो हिरण्यगर्भाय हिरण्यकवचाय च।
सप्तलोकसुराध्यक्ष जगद्धात्रे नमो नमः॥
भूर्लोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः।
ब्रह्मादयस्तथा देवा नमस्ते विश्वधारिणे॥
नमस्ते भुवनाधार। नमस्ते भुतनाश्रय!।
नमो हिरण्यगर्भाय गर्भो यस्य पितामहः॥
यतस्त्वमेव भूतात्मा भूते भूते व्यवस्थितः।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात्॥
एवमामन्त्र्य तन्मध्यमाविश्याभ्य उदङ्मुखः।
मुष्टिभ्यां परिसंगृह्य धर्म्मराजचतुर्मुखौ।
जानुमध्ये शिरः कृत्वा तिष्ठेत श्वासपञ्चकम्॥
गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा।
कुर्य्युर्हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवाः॥
गीतमङ्गलघोषेण गुरुरत्यापयेत्ततः।
जातकर्म्मादिकाः कुर्य्यात् क्रियाः षोड़श चापराः॥
सूर्य्यादिकञ्च गुरवे दत्त्वा मन्त्रमिमं जपेत्॥
नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः।
चराचरस्य जगतो गृहभूताय वै नमः॥
मात्राहं जनितः पूर्व्वं मर्त्यधर्म्मा सुरोत्तम।
त्वद्गर्भसम्भवादेव दिव्यदेहो भवाम्यहम्॥
चतुर्भिः कलसैर्भूयस्ततस्ते द्विजपुङ्गवाः।
स्नानं कुर्य्युः प्रसन्नाङ्गाः सर्व्वाभरणभूषिताः॥
देवस्यत्वेति मन्त्रेण स्थितस्य कनकासने।
अद्य जातस्य तेऽङ्गानि अभिषेक्ष्यामहे वयम्॥
दिव्येनानेन वपुषा चिरं जीव सुखी भव।
ततो हिरण्यगर्भस्तु तेभ्यो दद्याद्विचक्षणः॥
ते पूज्याः सर्व्वभावेन बहुभ्यो वा तदाज्ञया।
तच्चोपकरणं सर्व्वं गुरवे विनिवेदयेत्॥

पादुकोपानहं छत्रं चामरासनभोजनम् ।
ग्रामं वा विषयं वापि यदन्यद्दयितं भवेत् ॥
अनेन विधिना यस्तु पुण्येऽह्नि विनिवेदयेत् ।
हिरण्यगर्भदानं स ब्रह्मलोके महीयते ॥
पुरेषु लोकपालानां प्रतिमन्वन्तरं वसेत् ।
कल्पकोटिशतं यावत् ब्रह्मलोके महीयते ॥
कलिकलुषविमुक्तः सेवितः सिद्धसंघै-
रमरचमरमालावीज्यमानोऽमरीभिः ।
पितृगतमथ बन्धून् पुत्रपौत्रप्रपौत्रा-
नपि नरकनिमग्नांस्तारयेदेक एव ॥
इति पठति य इदं यः शृणोतीह सम्यक्
मधुमुररिपुलोके पूज्यते सोऽपि सिद्धैः ।
मतिमपि च जनानां यो ददाति प्रियार्थं
विबुधपतिजनानां नायकः स्यादमोघम् ॥"
इति मात्स्ये २७५ अध्यायः ॥*॥
विष्णुः । इति तस्य सहस्रनामस्तोत्रम् ॥ सूक्ष्म-शरीरसमष्ट्युपहितचैतन्यम् । तत्पर्य्यायः । प्राणात्मा २ सूत्रात्मा ३ । इति वेदान्तसारः ॥
हिरण्यदः, पुं, (हिरण्यं ददातीति । दा + कः ।) समुद्रः । इति केचित् । हिरण्यदातरि, त्रि ॥ (यथा, मनुः । ४ । २३० ।
"भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः ।
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ॥)
हिरण्यदा, स्त्री, हिरण्यं ददातीति । दा + कः । टाप् ।) पृथिवी । इति केचित् ॥
हिरण्यनाभः, पुं, (हिरण्यं नाभौ यस्य ।) मैनाकपर्व्वतः । इति हेमचन्द्रः ॥ (मुनिविशेषः । यथा, भागवते । ६ । १५ । १५ ।
"हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः ।
एते परे च सिद्धेशाश्चरन्ति ज्ञानहेतवः ॥")
हिरण्यबाहुः, पुं, (हिरण्यवत् बाहुर्यस्य ।) शोणनदः । इत्यमरः । १ । १० । ३४ ॥ शिवः । इति केचित् ॥ (यथा, महाभारते ।१४।८।१८।
"हिरण्यबाहवे राजन्नुग्राय पतये दिशाम् ॥")
हिरण्यरेताः, [स्] पुं, (हिरण्यं रेतो यस्य ।) अग्निः । (यथा, महाभारते । १ । ५५ । १० ।
"विभावसुश्चित्रभानुर्महात्मा
हिरण्यरेता हुतभुक् क्षणवर्त्मा ॥")
चित्रकवृक्षः । इत्यमरः । १।१।५८ ॥ सूर्य्यः । इति मेदिनी ॥ शिवः । इति शब्दरत्नावली ॥*॥ अग्नेस्तन्नामकारणं यथा,—
"यत् पीतं घृतिहोत्रेण वीर्य्यं त्वक्तं पिनाकिनः ।
तेनाक्रान्तोऽभवद्ब्रह्मन् ! मन्दतेजा हुताशनः ॥
ततो जगाम देवानां सकाशममितद्युतिः ।
दैवतैः प्रहितस्तूर्णं ब्रह्मलोकं जगाम ह ॥
स गच्छन् कुटिलां देवीं ददर्श पथि पावकः ।
तां दृष्ट्वा प्राह चाधत्स्व तेजो यन्मम दुर्द्धरम् ॥
महेश्वरेण संत्यक्तं निर्दहेद्भुवनान्यपि ।
तद्वारणाच्च कुटिले ! पुत्रो धन्यो भविष्यति ॥
इत्यग्निना सा कुटिला श्रुत्वा सुतमनुत्तमम् ।
प्रक्षिप्तमात्रं जग्राह तेजः ऐशं महाप्रभा ।
ततस्त्वधारयद्देवो गार्ब्भं तेजः स्वपूषपत् ।
हुताशनोऽपि च भयादृषत्र तत्र परिभ्रमन् ॥
पञ्चवर्षसहस्राणि ह्यध्यास्ते हव्यभुक् ततः ।
मांसमस्रोणि रक्तानि मेदोमज्जत्वचस्तथा ॥
रोमाणि चाग्निकेशायाः सर्व्वे जाता हिरण्मयाः ।
हिरण्यरेता लोकेऽस्मिन् विख्यातः पावकस्तदा ॥"
इति वामने ५४ अध्यायः ॥
हिरण्यवः, पुं, (हिरण्यानि सन्त्यत्रेति । हिरण्य + "वप्रकरणेऽन्येभ्योऽपि दृश्यते इति वक्तव्यम् ।" ५ । २ । १०९ । इत्यस्य वार्त्तिकोक्त्या वः ।) दैवधनम् । देवस्वम् । इति केचित् ॥
हिरण्यवर्णा, स्त्री, (हिरण्यवत् वर्णो यस्याः ।) नदी । इति हेमचन्द्रः ॥
हिरण्यवाहः, पुं, (हिरण्यं वहतीति । वह + अण् ।) शोणनदः । इति शब्दरत्नावली भरतश्च ॥
हिरण्याक्षः, पुं, (हिरण्यवत् पीते अक्षिणी यस्य । अच् समासे ।) आद्यदैत्यविशेषः । स च दितिगर्भे कश्यपाज्जातः वराहरूपिविष्णुना हतः । यथा,—
"दितिस्तु भर्त्तुरादेशादपत्यपरिरक्षिणी ।
पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ ॥
प्रजापतिर्नाम तयोरकार्षीत्
यः प्राक् स्वदेहात् यमयोरजायत ।
तं वै हिरण्यकशिपुं विदुः प्रजा
यं तं हिरण्याक्षमसूत साग्रतः ॥"
इति श्रीभागवते ३ स्कन्धे १७ । २ ; १८ ॥
"हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा ।
हिरण्याक्षो धरोद्धारे बिभ्रता शौकरं वपुः ॥"
इति तत्रैव ७ स्कन्धे १ अध्याये ४० श्लोकः ॥
अपिच ।
"तेजस्वी नाम वै शक्रो हिरण्याक्षो रिपुः स्मृतः ।
हतो वराहरूपेण हिरण्याक्षोऽथ विष्णुना ॥"
इति गारुडे । ८७ । ३० ॥
(पीठस्थानविशेषः । यथा, देवीभागवते । ७ । ३० । ६४ ।
"उत्पलाक्षो सहस्राक्षे हिरण्याक्षे महोत्पला ॥")
हिरण्याक्षः, पुं, (हिरण्यस्य अक्षो यत्र ।) तुलापुरुषादि-षोड़शमहादानान्तर्गतमहादानविशेषः । यथा,—
मत्स्य उवाच ।
"अथातः संप्रवक्ष्यामि हिरण्याक्षविधिं परम् ।
यस्य प्रदानाद्भुवने आनन्त्यफलमश्नुते ॥
पुण्यां तिथिं समासाद्य कृत्वा ब्राह्मणवाचनम् ।
लोकेशावाहनं कुर्य्यात्तुलापुरुषदानवत् ॥
ऋत्विक्षण्डपसम्भारभूषणाच्छादनादिकम् ।
स्वल्पेष्वेकाग्निवत् कुर्य्याद्धेमवाजिमखं बुधः ॥
स्थापयेद्देहिमध्ये तु कृष्णाजिनतिलोपरि ।
कौशेयवस्त्रसंवीतं कारयेद्धेमवाजिनम् ॥
शक्तितस्त्रिपलादूर्द्धमाढकस्त्रपलाद्बुधः ।
पादुकोपानहच्छत्रचामरासनभाजनैः ॥
पूर्णकुम्भाष्टकोपेतं माल्येक्षुफलसंयुतम् ।
शय्यां सोपस्करां तद्वद्धेममार्त्तण्डसंयुताम् ॥
ततः सर्व्वौषधीस्नातः स्नापितो वेदपुङ्गवैः ।
इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ॥
नमस्ते सर्व्वदेवेश ! वेदाहरणलम्पट ! ।
वाजिरूपेण मामस्मात् पाहि संसारसागरात् ॥
त्वमेव सप्तधा भूत्वा छायारूपेण भास्करम् ।
यस्माद्भ्रमयसे लोकानतः पाहि सनातन ! ॥
एवमुच्चार्य्य गुरवे तमश्वं विनिवेदयेत् ।
दत्त्वा पापक्षयाद्ब्रह्मलोकमभ्येति श्वाश्वतम् ॥
गोभिर्विभवतः सर्व्वानृत्विजश्चापि पूजयेत् ।
सर्व्वधान्योपकरणं गुरवे विनिवेदयेत् ॥
सर्व्वशय्यादिकं दत्त्वा भुञ्जीतातैलमेव हि ।
पुराणश्रवणं तद्वत् कारयेद्भोजनादनु ॥
इमं हिरण्याश्वविधिं करोति यः
पुण्यं समासाद्य दिनं नरेन्द्र ! ।
विमुक्तपापः स पुरं मुरारेः
प्राप्नोति सिद्धैरभिपूजितः सन् ॥
इति पठति य इदं हेमवाजिप्रदानं
सकलकलुषमुक्तः सोऽश्वयुक्तेन भूयः ।
कनकमयविमानेनार्कलोकं प्रयाति
त्रिदशपतिवधूभिः पूज्यते योऽथ पश्येत् ॥
यो वा शृणोति पुरुषोऽल्पधनः स्मरेद्वा
हेमाश्वदानमभिनन्दयतीह लोके ।
सोऽपि प्रयाति हतकल्मषश्चदेहः
स्थानं पुरन्दरमहेश्वरलोकजुष्टम् ॥"
इति मात्स्ये हिरण्याश्वप्रदानिको नाम २८० अध्यायः ॥
हिरण्याश्वरथः, पुं, (हिरण्याश्वः सुवर्णघोटकयुक्तः रथो यत्र ।) षोड़शमहादानान्तर्गतमहादानविशेषः । यथा, मात्स्ये ।
"आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञितम् ।
हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम् ॥
कल्पपादपदानञ्च गोसहस्रञ्च पञ्चमम् ।
हिरण्यकामधेनुञ्च हिरण्याश्वस्तथैव च ॥
पञ्चलाङ्गलकञ्चैव धरादानं तथैव च ।
हिरण्याश्वरथस्तद्वत् हेमहस्तिरथस्तथा ॥
द्वादशं विष्णुचक्रञ्च ततः कल्पलतात्मकम् ।
सप्तसागरदानञ्च रत्नधेनुस्तथैव च ।
महाभूतघटस्तद्वत् षोड़शः परिकीर्त्तितः ॥"
इति मलमासतत्त्वम् ॥ * ॥
तद्विधिर्यथा,—
मत्स्य उवाच ।
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
हिरण्याश्वरथं नाम महापातकनाशनम् ॥
पुण्यन्दिनमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
लोकेशावाहनं कुर्य्यात्तुलापुरुषदानवत् ॥
ऋत्विक्षण्डपसम्भारभूषणाच्छादनादिकम् ।

कृष्णाजिने तिलान् कृत्वा काञ्चनं कारयेद्दृयम्।
सप्ताश्वं चतुरश्वं वा चतुश्चक्रं सकूवरम्।
ऐन्द्रनीलेन कुम्भेन ध्वजरूपेण संयुतम्।
लोकपालाष्टकोपेतं पद्मरागदलान्वितम्॥
चतुरः पूर्णकलसान् धान्यान्यष्टादशैव तु।
कौपेयवस्त्रसंयुक्तमुपरिष्टाहितानकम्॥
माक्षेक्षुफलसंयुक्तं पुरुषेण समन्वितम्।
यो यज्ञतः पुनः कुर्य्यात् स तन्नाम्नाधिवासनम्॥
छत्रचामरकौपेयवस्त्रोपानहपादुकाः।
गोभिर्विभवतः सार्द्धं दद्याच्च शयनादिकम्॥
अभावात् त्रिपलाद्यूर्द्धं शक्तितः कारयेच्छुभम्।
अश्वाष्टकेन संयुक्तं चतुर्भिरथ वाजिभिः।
द्वाभ्यामथ युतं दद्यादिमं मन्त्रमुदीरयेत्॥
नमो नमः पापविनाशनाय
विज्ञात्मने वेदतुरङ्गमाय।
धात्रामधीशाय भवाभवाय
पापौघदावानल देहि शान्तिम्॥
वसुष्टकादित्यमरुद्गणानां
त्वमेव धाता परमं विधानम्।
यतस्ततो मे हृदयं प्रयातु
धर्म्मैकनाम त्वमघौघनाशात्॥
इति तुरगरथप्रदानमेतत्
भवभयसूदनमत्र यः करोति।
स कलुषपटलैर्विमुक्तदेहः
परममुपैति पदं पिनाकपाणेः॥
देदीप्यमानवपुषा विजितप्रभाव-
माक्रम्य मण्डलमखण्डलचण्डभानोः।
सिद्धाङ्गनानयनपट्पदपीयमान-
वक्त्राम्बुजोऽम्बुजभवेन चिरं सहास्ते॥
इति पठति शृणोति वा य इत्थं
जनकरथतुरगप्रदानमस्मिन्।
न स नरकपुरं व्रजेत् कदाचित्
नरकरिपोर्भवनं प्रयाति भूप!॥"

इति मात्स्ये हिरण्याश्वरथप्रदानिको नाम २५५ अध्यायः॥

हिरुक्, व्य, विनार्थः। मध्यार्थः। सामीप्यार्थः। इत्यमरभरतौ॥ अधमार्थः। इति शब्दरत्नावली॥

हिल, ग. हावक्रीडे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) एकोऽर्थः। ग, हिलति तरुणा तरुणः। इति दुर्गादासः॥

हिलमोचिः, स्त्री, हिलमोचिका। इति शब्दरत्नावली॥

हिलमोचिका, स्त्री, शाकविशेषः। इत्यमरः। २। ४। १५७॥ हिंचा इति हिलञ्चा इति च बङ्गभाषा। हरहुच् इति हिन्दीभाषा। तत्पर्य्यायः। हिलमोचिः २ हिलमोची ३ रोची ४। इति शब्दरत्नावली॥ मन्वी ५ विपन्नी ६ मत्स्याक्षी ७ चक्राङ्गी ८। इति रत्नमाला॥ व्राह्मी ९ शङ्खधरा १० आचारी ११। तस्या गुणाः। यथा, भावप्रकाशे।

"योथं कुष्ठं कफं पित्तं हरते हिलमोचिका॥"

अपि च।

"हिलमोची सरा तिक्ता कुष्ठघ्नी कफवातजित्॥"

श्लेष्मपित्तजित् इति वा पाठः। इति राजवल्लभः॥

हिलमोची, स्त्री, (हिलमोचि + ङ्कदिकारादिति ङीष्।) हिलमोचिका। इति शब्दरत्नावली॥ (तथास्या गुणाः।

"हिलमोची सरा तिक्ता कुष्ठघ्नी कफपित्तजित्॥"

इति वैद्यकराजवल्लभे चतुर्थपरिच्छेदे॥)

हिल्लः, पुं, शरारिपक्षी। इति शब्दचन्द्रिका॥

हिल्लोल, त् क दोलने। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-अक०-सेट्।) अन्तःस्थतृतीयहयमध्यस्तदेकोपधायाम्। अजिहिल्लोलद्दायुर्लताम्। इति दुर्गादासः॥

हिल्लोलः, पुं, (हिल्लोलयति दोलयतीति। हिल्लोलत् क दोलने + अच्।) तरङ्गः। ढेउ इति भाषा। यथा,—

"श्राव्यं नीरसकाष्ठताड़नशतं श्राव्यः प्रचण्डातपः
क्लेशः श्राव्यतरः सुपङ्कनिचयः श्राव्योऽति-
दाहानलः।
यत्कान्ताकुचकुम्भबाहुलतिकाहिल्लोललीला-
सुखं
लब्धं कुम्भवर! त्वया न हि सुखं दुःखैर्विना
लभ्यते॥"

इति कालिदासकृतशृङ्गारतिलकः॥ *॥

रतिबन्धविशेषः। स च षोड़शबन्धान्तर्गताष्टमबन्धः। तस्य लक्षणं यथा,—

'हृदि कृत्वा स्त्रियाः पादौ कराभ्यां धारयेत्करौ।
यथेष्टं ताड़येद्योनिं बन्धो हिल्लोलसंज्ञकः॥"

इति रतिमञ्जरी॥

हिल्वला, स्त्री, मृगशिरोनक्षत्रशिरोदेशस्थाः पञ्च स्वल्पतारकाः। यथा,—

"मृगशीर्षशिरोदेशे तारका या वसन्ति हि।
हिल्वला इत्यकास्ताः स्युरिल्वला इति
कुत्रचित्॥"

इति शब्दरत्नावली॥

हिव, इ प्रीतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, हिव्यते। प्रीतिरिह प्रीतिकरणम्। हिम्बति लोकः पितरम्। इति दुर्गादासः॥

हिवुकं, क्ली, एकस्मान्नक्षत्रात्तुर्यलग्नम्। तत्पर्य्यायः।

"पातालं हिवुकञ्चैव सुहृदभ्यतुर्थकम्।"

अपि च।

"सपापात् भार्गवात् पापो हिवुके माहनागतात्॥"

इति ज्योतिस्तत्त्वम्॥

हिंस, इ ध कि हिंसे। इति कविकल्पद्रुमः॥ (रुधा०-चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) इ, हिंस्यते। ध, हिनस्ति। कि, हिंसयति हिंसति। हन्त्यर्थेनैव पाक्षिकचुरादित्वे सिद्धे णिकरणं भ्वादित्वार्थम्। इति दुर्गादासः॥

हिहि, व्य, आह्लादजनकानुकरणशब्दः। इति केचित्॥ दीर्घान्तहयमिति साधुपाठः॥

हो, व्य, विस्मयः। इत्यमरः। ३।४। ८॥ दुःखम्। हेतुः। विषादः। इति मेदिनी॥ शोकः। इति शब्दरत्नावली॥ (यथा, वक्रोक्तिपञ्चाशिकायाम्। ३१।

"ही नाहं भवतोऽतिवक्रवचसा दातुं
प्रवीणोत्तरं
का ते सुन्दरि! हीनता ननु नता सर्व्वा
त्रिलोक्येव ते॥")

हीनः, त्रि, (ओ हा क लि त्यागे + क्तः। "ओदितश्च।" ८। २। ४५। इति नत्वम्। "घुमास्थागापाजहातीति।" ६। ४। ६६। इति ईत्वम्।) ऊनः। (यथा, रघुः। १। ७०

"तया हीनं विधातर्मां कथं पश्यन्न दूयसे।
सिक्तं स्वयमिव स्नेहाद् वन्द्यमाश्यमपादपम्॥")

गर्ह्यः। इत्यमरः। ३। ३। १२७॥ अधमः। इति जटाधरः॥ (यथा, मनौ। ३। १०७।

"आसनावसथौ शय्यामनुव्रज्यामुपासनम्।
उत्तमेष्वेत्तमं कुर्य्यात् हीने हीनं समे समम्॥")

प्रतिवादिविशेषः। स च पञ्चविधः। यथा, नारदः।

"अन्यवादी क्रियादेषी नोपस्थायी निरुत्तरः।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः॥"

इति व्यवहारतत्त्वम्॥

हीनजातिः, त्रि, (हीना जातिर्यस्य।) नीचवर्णः। इति केचित्॥ (यथा, मनुः। ३। १५।

"हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम्॥")

हीनवर्णः, त्रि, (हीनो वर्णो यस्य।) नीचजातिः यथा,—

"हीनवर्णोपभुक्ता या त्याज्या वध्यापि या
भवेत्।"

इति प्रायश्चित्ततत्त्वम्॥

हीनवादी, [न्] त्रि, (हीनं वदतीति। वद + णिनिः।) वाक्यवर्जितः। वोवा इति भाषा। तत्पर्य्यायः। अधरः २। इति हेमचन्द्रः॥ विरुद्धार्थवादी। यथा, नारदः।

'पूर्ब्बवादं परित्यज्य योऽन्यमालम्बते पुनः।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः॥"

इति।

हीनवादी दण्ड्यो भवति न प्रकृतादर्थादीयते। इति च मिताक्षरा॥

हीनसख्यं, क्ली, (हीनेन सह सख्यम्।) नीचेन सह मित्रता। इति केचित्॥

हीनाङ्गः, त्रि, (हीनमङ्गं यस्य।) स्वभावतो न्यूनावयवविशिष्टः। तत्पर्य्यायः। षोगण्डः २ विकलाङ्गकः ३ व्यङ्गः ४ अपाङ्गः ५ अपोगण्डः ६। इति जटाधरः। तेन सह परीहासनिषेधो यथा,—

"जातिहीनं वित्तहीनं रूपहीनमदक्षिणम्।
हीनाङ्गमतिरिक्ताङ्गं तेन दोषेण नाक्षिपेत्॥

इति ब्रह्मा पुरा प्राह वेदीघार्थविनिश्चयम्। तच्चावमन्य भवता परीहासोऽप्यभाष्यत ॥"

इति कालिकापुराणे ४४ अध्यायः ॥

हीनाङ्गी, स्त्री, (हीनं क्षुद्रत्वात् अधमं अङ्गं यस्याः। ङीष्।) क्षुद्रपिपीलिका। इति हेमचन्द्रः ॥

हीन्तालः, पुं, हिन्तालवृक्षः। इत्यमरटीका ॥

हीरं, क्ली, (हरति मार्द्दवमिति। हृ+अच्। पृषोदरादित्वात् साधुः। यद्वा, ह्री विस्मयं रातीति। रा+कः।) वज्रम्। इति राजनिर्घण्टः ॥ (यथा, रसेन्द्रसारसंग्रहे।

"हीरं सुवर्णं सुस्रुतञ्च तार-
मेषां समं तीक्ष्णरजश्चतुर्णाम् ॥")

हीरः, पुं, (हरति सर्व्वं प्रलये इति। हृ+अच्। पृषोदरादित्वात् ईत्वम्।) शिवः। वज्रम्। इति मेदिनी ॥ सर्पः। इति हेमचन्द्रः ॥ हारः। इति जटाधरः ॥ सिंहः। इति केचित् ॥ श्रीहर्षपिता। यथा,—

"श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
ईतीयीकतया मितोऽयमगमत् तस्य प्रबन्धे महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥"

इति नैषधे २ सर्गः ॥

हीरकः, पुं, (हीर एव। स्वार्थे कन्।) रत्नविशेषः। अयं श्वेतवर्णः बहुमूल्यः शुक्रदेवताकश्च। तत्पर्य्यायः। वज्रः २ हीरः ३ दधीच्यस्थि ४ वज्रकम् ५। इति शब्दरत्नावली ॥ सूचीमुखम् ६ वरारकम् ७ रत्नमुख्यम् ८ वज्रपर्य्यायनाम ९। विराटदेशजहीरकपर्य्यायः॥ विराटजः १० राजपट्टः ११ राजावर्त्तः १२। इति हेमचन्द्रः ॥ अस्य गुणाः। सारकत्वम्। शीतत्वम्। कषायत्वम्। स्वादुत्वम्। वान्तिकारित्वम्। चक्षुर्हितकारित्वम्। धारणे पापालक्ष्मीनाशित्वञ्च। इति राजवल्लभः ॥ अन्यत् वज्रशब्दे द्रष्टव्यम् ॥ (यथास्य पर्य्यायादि।

"हीरकः पुंसि वज्रोऽस्त्री चन्द्रो मणिवरश्च सः।
स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्रियः स्मृतः॥
पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णात्मकश्च सः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हीरा, स्त्री, लक्ष्मीः। तैलाम्बुकः इति मेदिनी ॥ पिपीलिका। इति हेमचन्द्रः ॥ काश्मरी। इति राजनिघण्टः ॥ (पर्य्यायो यथा,—

"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका।
काश्मीरी काश्मरी हीरा कश्मर्य्यः पीतरोहिणी।
क्षुद्रफल्गा मधुरसा महाकुसुमिकापि च॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हीराङ्गः, पुं, (हीरस्येव कठिनं अङ्गं यस्य।) इन्द्रस्य वज्रम्। इति शब्दमाला ॥

हीलं, क्ली, (ह्री विस्मयं लातीति। ला+कः।) रेतः। इति केचित् ॥

हीलुकं, क्ली, गौड़ीमद्यम्। इति शब्दचन्द्रिका ॥

हीहीः, व्य, विस्मयः। हास्यम्। इति मेदिनी ॥

हु, लि होमे। अदने। इति कविकल्पद्रुमः ॥ (जुहो॰-परः॰सकः॰-अनिट्।) होमो देवतोद्देशेन द्रव्यत्यागः। तच्च देवतासम्प्रदानकत्वाद्यधिकरणकवस्तुत्यागः। लि, जुहोति घृतमग्नौ क्षणाय होता। प्रक्षेपेऽप्ययम्।

"चिराय सन्तर्प्य समिद्धिरग्निं
यो मन्त्रपूतां तनुमप्यहौषीत्।"

इति रघुः।

"जटाधरः सन् जुहुधीह पावकम्।"

इति किरातेऽपि प्रीणनार्थोऽपि। इति दुर्गादासः ॥

हुंकृतं क्ली, (हुं इत्यव्यक्तशब्दस्य कृतं करणम्।) हुङ्कारः। इति धरणिः ॥ (यथा, भागवते। ४। १४। ३४।

निजघ्नुर्हुंकृतैर्वेणं हतमच्युतनिन्दया॥")

वन्यवराहशब्दः। इति केचित्॥ हुँ इति मन्त्रोच्चरिते, त्रि॥ (हुं इत्यनेन तिरस्कृतः। यथा, महाभारते। १२। ११८। १।

"स त्वा प्रकृतिमापन्नः परं दैन्यमुपागतः।
ऋषिणा हुंकृतः पापस्तपोवनबहिष्कृतः॥"

हुङ्कृतमस्यास्तीति। अच्। हुङ्कारविशिष्टः। यथा बृहत्संहितायां। ४८। ११।

"अचिरप्रसूतहुङ्कृतवल्गितवत्सोत्सवे गोष्ठे॥")

हुड, इ ङ संहे। इति कविकल्पद्रुमः॥ (भ्वा॰-आत्म॰-सक॰-सेट्।) इ, हुण्डते। ङ, हुण्डते धनं लोकः। राशीकरोतीत्यर्थः। इति दुर्गादासः॥

हुड, ऋ ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा॰-आत्म॰-सक॰-सेट्।) ऋ, अजुहोड़त्। ङ, होड़ते। इति दुर्गादासः॥

हुड,शि मग्ने। संहे। इति कविकल्पद्रुमः॥ (तुदा॰-परः॰-मग्ने अक॰-संहे सक॰-सेट्।) शि, हुड़ति अहुड़ीत् जुहोड़। मग्नमिह मज्जनम्। इति दुर्गादासः॥

हुड़ः, पुं, (हुड़तीति। हुड़+कः।) मेषः। इति हेमचन्द्रः राजनिर्घण्टश्च॥ चौरादिनिवारणार्थभूमिनिहितलौहमयतीक्ष्णशङ्कुविशेषः॥ तस्य नामान्तरं गुड़ः। पाँजिकाटा इति भाषा। लगुड़ः। इति महाभारतम्॥ सैन्यास्त्रयस्थानम्। वुरुज् इति भाषा। रथोपरि विण्मूत्रत्यागशृङ्गम्। यथा,—

"पुरौ समन्ताद्विहिता सपताका सतोरणा।
सचक्रा सहुड़ा चैव सयन्त्रखनका तथा॥"

इति महाभारते वनपर्व्वणि सौभवधे १५ अध्यायः॥ पताका ध्वजाञ्चलः। तोरणानि बहिर्द्वाराणि। चक्राणि योधगणाः। हुड़ास्तदास्त्रयस्थानानि। भाषायां वरुजसंज्ञानि। अन्ये तु विण्मूत्रोत्सर्জ্জनशृङ्गाणि हुड़ा इत्याहुः। उदाहरन्ति च।

"कल्पान्ते हुड़शृङ्गाणि रथस्योपरि सूरिभिः।
विण्मूत्रसर्গशृङ्गार्थकरादिसर्গं उद्यते॥"

इति॥

यन्त्राणि आग्नेयौषधबलेन क्षेपणीयानि। महान्ति कामानसंज्ञानि क्षुद्राणि सोसगुलिकोत्क्षेपणानि बन्दुकसंज्ञानि। खनकाः सुरङ्गद्वारा गुप्तमार्गकर्त्तारः। इति तट्टीकायां नीलकण्ठः॥

हुडुक्कः, पुं, (हुडुक् इति शब्देन कायति शब्दायते इति। कै+कः।) वाद्यभेदः। दात्यूहपक्षी। मदमत्तः। इति मेदिनी॥ दण्डकः। हुड्का इति भाषा। इति शब्दरत्नावली॥ तत्र हड्ड क इति च पाठः॥

हुड़त्, क्ली, क्षेपशब्दः। इति काशीखण्डमिति केचित्॥

हुडुम्बः पुं, म्लेच्छविशेषः। हुड़म् इति भाषा। इति शब्दमाला॥

हुण्डः, पुं, व्याघ्रः। ग्राम्यशूकरः। मूर्खः। राक्षसः। इति केचित्॥

हुतं, त्रि, (हु+कः।) अग्नौ प्रक्षिप्तं घृतादि। तत्पर्य्यायः। वषट्कृतम् २। इत्यमरः॥ (यथा, गीतायाम्। ९। १६।

"अहमग्निरहं हुतम्॥"

तर्पितम्। यथा, रघुः। २। ७१।

"प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं भर्तुरुदश्रतोऽश्च॥")

होमे, क्ली॥

हुतभुक्, [ज्] पुं, (हुतं भुङ्क्ते इति। भुज्+क्विप्।) अग्निः। (यथा, भागवते। ३।१६।८।

"नाहं तथाद्मि यजमानहविर्विताने
शोतद्घृतप्लुतमदन् हुतभुङ्मुखेन॥")

चित्रकवृक्षः। इत्यमरः। १। १। ५८॥ (यथा, सुश्रुते। ६। ५३।

"पाठाविड़ङ्गोषविड़ङ्गसिन्धु-
विकण्टराम्लाहुतभुग्वलाभिः॥"

महादेवः। इति महाभारतम्। १३। १७। ८१॥ विष्णुः। इति च तत्रैव।१३।१४९।१०८॥)

हुतभुक्प्रिया, स्त्री, (हुतभुजो वह्नेः प्रिया।) अग्निभार्य्या। स्वाहा इत्यमरः। २। ७। २१॥

हुतवहः, पुं, (वहतीति। वह+अच्। हुतस्य वहः।) अग्निः। इति हेमचन्द्रः॥ (यथा, महाभारते। १। २२४। ५८।

"एतच्छ्रुत्वा हुतवहात् भगवान् सर्व्वलोककृत्।
हव्यवाहमिदं वाक्यमुवाच प्रहसन्निव॥")

हुताशः, पुं, (हुतं अश्नाति इति। अश+अण्।) अग्निः। इति शब्दरत्नावली॥ (यथा, भागवते। १। १२। २१।

"धन्विनामग्रणीरेषः तुल्यश्चार्জ্জुनयोर्द्वयोः।
हुताशः इव दुर्द्धर्षः समुद्र इव दुस्तरः॥")

भयम्। इति व्यवहारभिदम्॥ (मुनिविशेषः। स चायुर्व्वेदसंहिताकारः। अग्निवेश्यमुनेः। तद्यथा,—

"भग्नं समासादिविधं हुताश !
काण्डे च सन्धौ च हि तत्र सन्धौ ॥"
इति वैद्यकरत्नविनिश्चयसंग्रहे भग्नाधिकारे ॥
हुताश इति अग्निवेश्यसम्बोधनं चरके हुताशशब्देनाग्निवेशोऽभिधीयते पदैकदेशे पदप्रवृत्तेः।
इति तट्टीकायां श्रीकण्ठदत्तः ॥)
हुताशनः, पुं, (हुतं आहुतद्रव्यं अश्नमस्य ।) अग्निः । यथा, गोभिलपुत्रकृतगृह्यासंग्रहे ।
"लक्षहोमे तु वह्निः स्यात् कोटिहोमे हुताशनः ।
पूर्णाहुत्यां मृडो नाम शान्तिके वरदः सदा ॥"
इति तिथ्यादितत्त्वम् ॥
अपि च ।
"आरोग्यं भास्करादिच्छेज्ज्ञानमिच्छेद्धुताशनात् ।
ज्ञानन्तु शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्दनात् ॥"
इति गुणविष्णुधृतमत्स्यपुराणम् ।
शिवः । इति केचित् ॥ (वटिकौषधविशेषः ।)
तद्यथा,—
"एकद्विकद्वादशभागयुक्तं
योज्यं विषं टङ्कणमूषणञ्च ।
हुताशनो नाम हुताशनस्य
करोति हृद्दिं कफजिज्वराणाम् ॥"
इति हुताशनो रसः ॥*॥
इति वैद्यकरसेन्द्रसारसंग्रहेऽजीर्णाद्यधिकारे ॥)
हुतिः, स्त्री, हवनम् । हुधातोः क्तिप्रत्ययेन निष्पन्ना ॥
हुम्, व्य, (ह्वयते इति । हु+बाहुलकात् मः ।) स्मृतिः । अपाकृतिः । अर्थप्रश्नः । अभ्यनुज्ञा । इति मेदिनी ॥ तर्के वितर्के हूँ शब्दो दीर्घादिरुखादिरपीति केचित् । इत्यमरटीकायां भरतः ॥
हुर्च्छ, आ कौटिल्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) हुर्च्छी । क्विपि राल्लोपेऽपि हुः हुरौ हुरः । आ हुर्च्छितं हुर्णं तेन । हुर्च्छति खलः कुटिलः स्यादित्यर्थः । हुर्च्छति चौरः अपसरतीत्यर्थः । इति धातुप्रदीपः । इति दुर्गादासः ॥
हुल, ज, इतिसम्बरणयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ज, होलः हुलः । इति दुर्गादासः ॥
हुलहुली, स्त्री, (हुल+क । आभीक्ष्ण्ये द्वित्वं गौरादित्वात् ङीष् ।) स्त्रीणां मङ्गलजनकमुखशब्दः । उलु उलु इति भाषा । तत्पर्य्यायः । मुखघण्टा २ । इति त्रिकाण्डशेषः ॥
हुहुः, } पुं, (आह्वयतीति । हू+निपातनात्
हुहूः, } डुः डूय ।) गन्धर्व्वविशेषः । यथा,—
"हूहूर्हुहूश्च द्विविधो हुहूर्हूश्च कुत्रचित् ।"
इति शब्दरत्नावली ॥
(यथा, महाभारते । १३ । ८३ । ८ ।
"पर्य्युपासन्त कौरव्य ! कदाचिद् वै पितामहम् ।
नारदः पर्व्वतश्चैव विस्रावसुर्हहा हुहुः ॥")
हृ, व्य, (हृ+डुः । निपातनम् ।) आह्वानम् । अवज्ञा । अवज्ञार्थः । शोकः । इति केचित् ॥
हृं, व्य, मन्त्रविशेषः । तदुद्धारपर्य्यायो यथा,—
"हकारो वामकर्णाढ्यो नादबिन्दुविभूषितः ।
कूर्चं क्रोध उयदर्णो दीर्घञ्चङ्कार उच्यते ।
शब्दश्च दीर्घकवचं तारापणव इत्यपि ॥"
किञ्च ।
"शिखावषट् च कवचं क्रोधो वर्म्म हुमित्यपि ।
क्रोधाख्यो हृं तनुत्रञ्च अस्त्रादौ रिपुसंज्ञकः ॥"
अपि च ।
"व्योमस्थं तालजङ्घाख्यं नादबिन्दुविभूषितम् ।
कूर्चं कालो महाकालः क्रोधबीजं निरञ्जनम् ॥"
इति नानातन्त्रम् ॥
हृङ्कारः, पुं, (हृम्+क्व+भावे घञ् ।) हृमिति भयानकध्वनिः । यथा,—
"इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ।
हृङ्कारेणैव तं भस्म सा चकाराम्बिका ततः ॥"
इति मार्कण्डेये देवीमाहात्म्यम् ॥
हृड, ऋ ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ऋ, अनुहृड्त । ङ, हृड्ते । इति दुर्गादासः ॥
हृतं, त्रि, (हृ+क्त ।) आहृतम् । आहृतीकृतम् । हृ अ धातोः क्तप्रत्ययेन निष्पन्नम् ॥
हृतिः, स्त्री, (हृ+क्तिन्+सम्प्रसारणम् ।) आह्वानम् । इत्यमरः १ । ६ । ८ ।
हृनः, पुं, (हृ+नक् सम्प्रसारणञ्च ।) म्लेच्छजातिविशेषः । यथा,—
"खपाकश्च तुरुष्कस्तु हूनो यवन इत्यपि ।
लोकवाह्यस्तु यो वाजिगवाद्याचारवर्ज्जितः ।
म्लेच्छः किरातशवरपुलिन्दाद्यास्तु तद्भिदा ॥"
इति जटाधरः ॥
मादराजदेशीयस्वर्णमुद्राविशेषश्च ॥
हृम्, व्य, हृयते इति । बाहुलकात् मः । प्रश्नः । वितर्कः । इत्यमरः । ३ । ४ । १८ ॥ सम्मतिः । क्रोधः । भयम् । निन्दा । अवज्ञा । इत्यमरटीकायां नारायणचक्रवर्त्ती ॥ वितर्के हूं चैत्रोऽपि पण्डितः । प्रश्ने हूं को लङ्काधिपतिः । अनुमतौ च हूं कृतं हूम् । भये च हूं न गन्तव्यम् । इत्यमरटीकायां भरतः ॥ अन्यत् हुंशब्दे द्रष्टव्यम् ॥
हृरवः, पुं, (हृ इति रवोऽस्य ।] शृगालः । इति हेमचन्द्रः ॥
हृर्च्छनं, क्ली, (हृर्च्छ+भावे ल्युट् ।) कौटिल्यम् । इति केचित् ॥
हृहुः, } पुं, (आह्वयतीति । हू सर्द्दायाम् ।
हृहूः, } क्विप् । सम्प्रसारणम् । आभीक्ष्ण्ये द्वित्वं निपातनात् ह्रस्वः । पक्षे तु न ।) गन्धर्व्वविशेषः । इति शब्दरत्नावली ॥ (यथा, भागवते । ८ । ४ । ३ ।
"योऽसौ ग्राहः स वै सद्यः परमाश्चर्य्यरूपधृक् ।
मुक्तो देवलशापेन हूहूर्गन्धर्व्वसत्तमः ॥")
हृ. अ हृत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-द्विक०-अनिट् ।) हृतिर्देशाद्देशान्तरप्रापणे । अ, हरति हरते गां वनं गोपः । इति दुर्गादासः ॥
हृ, लि र प्रसह्यकृत्याम् । इति कविकल्पद्रुमः ॥ (जु०-पर०-सक०-अनिट् ।) प्रसह्यकृतिर्बलात्कारः । लि, जहर्त्ति धनं दस्युः । र वैदिकः । इति दुर्गादासः ॥
हृच्छयः, पुं, (हृदि शेते इति । शी+"अधिकरणे शेतेः ।" ३ । २ । १५ । इति अच् ।) कामदेवः । इति हलायुधः ॥ (यथा, महाभारते । ३ । ४६ । ४२ ।
"तत् प्रसीद न मामार्त्तां विसर्ज्जयितुमर्हसि ।
हृच्छयेन च सन्तप्तां भक्तां च भज मानद ! ॥")
हृदयशायिनि, त्रि ॥ (यथा, महाभारते । १३ । ८५ । १७ ।
"जगत्पतिरनिर्देश्यः सर्व्वगः सर्व्वभावनः ।
हृच्छयः सर्व्वभूतानां ज्येष्ठो रुद्रादपि प्रभुः ॥"
पुं, कामः । यथा, भागवते । १ । ६ । ७ ।
"सङ्कल्पयद्भिर्यदिदं रूपमेतत् कामाय तेऽनघ ! ।
मत्कामः शनकैः साधुः सर्व्वान् मुञ्चति हृच्छयान् ॥"
"हृच्छयान् कामान् ।"इति तट्टीकायां श्रीधरः ॥)
हृच्छूलं, क्ली, (हृदयजातं शूलमिति मध्यलोपी समासः ।) हृदयजातशूलरोगः । तदौषधं यथा, गारुडे १८८ अध्याये ।
"क्षथितोदकपानन्तु शम्बूका क्षारकं तथा ।
मृगशृङ्गं क्षुन्निदग्धं गव्याज्येन समन्वितम् ।
पीतं हृत्शूलशूलानां भवेन्नाशकरं शिव ! ॥"
अपि च ।
"विल्वाग्निमन्थश्योनाकपाटलायारिभद्रकम् ।
प्रसारणश्वगन्धा च बृहती कण्टकारिका ॥
वलाचातिवला रास्ना श्वदंष्ट्रा च पुनर्नवा ।
एरण्डशारिवा पर्णी गुडूची कपिकच्छुरा ॥
एषां दश पलिकान् भागान् क्वाथयेत् सलिलेऽमले ।
तेन पादावशेषेण तैलं पात्रे विपाचयेत् ॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ।
शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत् ॥
द्रव्याणि यानि पेयानि तानि वक्ष्यामि तत् शृणु ॥
शतपुष्पा देवदारु शालपर्णी वचागुरु ।
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्नवा ।
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ॥
हृच्छूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ।
अपस्मारं वातरक्तमायुर्मांश्च पुमान् भवेत् ॥"
इति च गारुडे १८८ अध्यायः ॥
हृणिया, स्त्री, (हृणीयते इति । हृणीङ्+कण्ड्वादित्वात् यक् । ततः अः । निपातनात् ह्रस्वः ।) हृणीया । इत्यमरटीकायां रायमुकुटः । ३ । २ । ३२ ॥
हृणीया, स्त्री, (हृणीङ्+कण्ड्वादित्वात् यक् । अः ।) निन्दा । इत्यमरः । ३ । २ । ३२ ॥
हृत्, [द्] क्ली, (हरति क्रियते वेति । हृ+"हृञो दुक् दुक् चेति ।" उणा० ४।१००। इतिबाहुलकात् केवलादपि दुक् ।) हृदयम् । तत्पर्य्यायः ।

"चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः।"
इत्यमरः। १। ४। ३१॥
(यथा, भावप्रकाशस्य मध्यखण्डे द्वितीये भागे।
"स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च।
हृदुन्दूकः फुस्फुसश्च कोष्ठ इत्यभिधीयते॥")
हृत्कम्पः, पुं, (हृदयस्य कम्पः। हृदादेशः।)
हृदयकम्पनम्। यथा,—
"हृत्कम्पो जायते तावत् यावत् तस्य कृपा
न चेत्॥"
इति समयाचारतन्त्रोक्तं भद्रकालीकवचम्॥
हृतं, त्रि, (हृ+क्तः।) अपहृतवस्तु। यथा,—
"पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः।
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात्॥"
इति देवीमाहात्म्ये ५ अध्यायः॥
हृद्, क्लो, (हृ+बाहुलकात् दुक्।) हृदयम्।
मनः। इत्यमरः। २। ६। ६४॥
हृदयं, क्लो, (क्रियते विषयैरिति। हृ+"हृञ्होः
युगुदुकौ च। उणा० ४। १००। इति कयन्
दुक् च।) वृक्कम्। वक्षः। मनः। यथा,—
"उरस्यपि च वृक्कायां हृदयं मानसेऽपि च॥"
इति त्रिकाण्डशेषः॥
वृक्कयमांसं हृदयं हृदिति। चत्वारि हृदये।
केचित्तु वृक्कात् पृथगेव हृदयान्तर्गते मांस-
विशेषे पद्माकारे हृदयाटिहयमाहुः। धातो-
रनेकार्थत्वात्। इत्यमरटीकायां भरतः।२।६।६४॥
अत्र अनाहतनामकहृदयदलपद्ममस्ति। यथा,
"आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले
ललाटे
द्वे पत्रे षोड़शारे द्विदशदशदले द्वादशार्द्धे
चतुष्के।
षासान्ते वादिलान्ते ड-फ-क-ठसहिते कण्ठदेशे
स्वराणां
हृत्पद्मे कोटिसंख्ये सकलदलगतं वर्णरूपं
नमामि॥"
इति षट्चक्रभेदः॥
किञ्च।
"तस्योर्द्धे हृदि पङ्कजं सुललितं वन्धूककान्त्युज्ज्वलं
कायैर्द्वादशवर्णकैरुपकृतं सिन्दूररागान्वितैः॥
नामानाहतसंज्ञकं सुरतरुं वाञ्छातिरिक्तप्रदं
वायोर्मण्डलमत्र धूमसदृशं षट्कोणसंभान्वितम्॥"
इति षट्चक्रक्रमः॥ * ॥
तस्य शुभाशुभलक्षणं यथा,—
"समोन्नतञ्च हृदयमकम्पं मांसलं पृथु।
नृपाणामधमानाञ्च खरलोमशिरालकम्॥"
इति गारुड़े ६६ अध्यायः॥
(तथास्य विवृतिः।
"अर्थे दश महामूलाः समासेना महाफलाः।
महत्त्वार्थञ्च हृदयं पर्य्यायैरुच्यते बुधैः॥
षड़ङ्गमक्षविज्ञानमिन्द्रियाक्षर्थपञ्चकम्।
आत्मा च सगुणश्चेतः चित्तञ्च हृदि संश्रितम्॥
प्रतिष्ठार्थं हि भावानामेषां हृदयमिष्यते।
गोपानसीनामागारकर्णिके वार्थचिन्तकैः।
तस्यापघातान्मूर्च्छायं भेदान्मरणमिच्छति॥
यद्धि तत् स्वर्गविज्ञानन्धारितन्तत्र संश्रितम्।
तत्परस्त्रोजसः स्थानन्तत्र चैतन्यसंग्रहः॥
हृदयं महदर्थञ्च तस्मादुक्ताधिकित्सकैः।
तेन मूलेन महता महामूला मता दश॥"
इति चरके सूत्रस्थाने त्रिंशेऽध्याये॥
"हृदयमिति कृतवीर्य्यो बुद्धेर्मनसश्च स्थानत्वात्॥"
इति सुश्रुते शारीरस्थाने दशमेऽध्याये॥
"शोणितकफप्रसादजं हृदयं तदाश्रया हि
धमन्यः प्राणवहाः। तस्माधो वामतः प्लीहा
फुस्फुसश्च दक्षिणतो यकृत् क्लोम च॥
तद्धृदयं विशेषेण चेतानास्थानमतस्तस्मिंस्तमसा-
वृते सर्व्वप्राणिनः स्वपन्ति। भवति चात्र।
पुष्करीकेण सदृशं हृदयं स्यादधोमुखम्।
जाग्रतस्तद्विकसति स्वपतश्च निमीलति॥"
इति च सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥)
हृदयग्रन्थिः, पुं, (हृदयस्य ग्रन्थिरिव अविद्या-
सम्बन्धेन दुर्भेद्यत्वात्।) हृद्ग्रन्थिः। यथा,—
"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः।
क्षीयन्ते चास्य कर्म्माणि दृष्ट एवात्मनीश्वरे॥"
इति श्रीभागवते। १। ३।२१॥
हृदयङ्गमं, क्लो, (हृदयं गच्छतीति। गम+खच्।
मुम् च।) युक्तियुक्तवाक्यम्। इति भरतः॥
तत्पर्य्यायः। सङ्गतम् २। इत्यमरः।१।६।१८॥
(मनोहरे, त्रि। यथा, कुमारे। २। १६।
"इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः॥"
"हृदयङ्गमाः मनोहराः।" इति तट्टीकायां
मल्लिनाथः॥)
हृदयवान्, [न्] त्रि, (हृदयमस्यास्तीति मतुप्।
मस्य वः।) हृदयालुः। इत्यमरटीकासार-
सुन्दरी॥
हृदयस्थानं, क्लो, (हृदयस्य स्थानम्।) वक्षः-
स्थलम्। तत्पर्य्यायः। क्रोड़म् २ उरः ३ वक्षः ४
वक्षम् ५ भुजान्तरम् ६। इति हेमचन्द्रः॥
हृदयात्मा, [न्] पुं, हृदयमेव आत्मा प्रधान-
देहभागो यस्य।) कङ्कपक्षी। इति शब्द-
चन्द्रिका॥
हृदयालुः, त्रि, (प्रशस्तहृदयमस्यास्तीति। हृदय+
उ। २।१२२। इत्यत्र "हृदयाद्यालुरन्यतर-
स्याम्।" इति काशिकोक्तेः आलुः।) प्रशस्त-
मनाः। तत्पर्य्यायः। सुहृदयः २। इत्यमरः।
३।१।३॥ सहृदयः ३। इति भरतः॥ हृदयी ४
हृदयिकः ५ हृदयवान् ६। इति टीकान्तरम्॥
चिद्रूपः ७। इति जटाधरः॥
हृदयिकः, त्रि, (प्रशस्तं हृदयमस्यास्तीति।
हृदय+ठन्।) हृदयालुः। इत्यमरटीकासार-
सुन्दरी॥
हृदयी, [न्] त्रि, (प्रशस्तं हृदयमस्यातीति।
इनिः।) हृदयालुः। इति जटाधरः॥
हृदयेशः, पुं, (हृदयस्य ईशः।) भर्त्ता। इति
त्रिकाण्डशेषः॥ तत्पर्य्यायः।
"प्रेयस्यायाः पुंसि पत्यौ भर्त्ता सेता पतिर्व्वरः।
विवोढ़ा रमणो भोक्ता रूढ्यो वरयिता धवः॥"
इति हेमचन्द्रः॥
हृदयेशा, स्त्री, (हृदयस्य ईशा।) भार्य्या। यथा,
"प्रेयसी दयिता कान्ता प्राणेशा वल्लभा
प्रिया।
हृदयेशा प्राणसमा प्रेष्ठा प्रणयिनी च सा॥"
इति हेमचन्द्रः॥
हृदावर्त्तः, पुं (हृदयस्थितः आवर्त्तः।) अस्र-
हृदयावर्त्तः। तत्पर्य्यायः। श्रीहट्टकः २। इति
त्रिकाण्डशेषः॥
हृदिस्पृक्, [ग्] त्रि, (हृदि हृदये स्पृशतीति।
स्पृश्+क्विन्। "हृदुभ्यां ङेः॥" ६। ३।
८। इत्यस्य वार्त्तिकात् अलुक्समासः।)
हृद्यः। इति केचित्॥ (यथा, भागवते। ६।
१४। ४३।
"यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं हृदि-
स्पृशः।
जहौ युवैव मलवदुत्तमश्लोकलालसः॥")
हृदयस्पर्शकर्त्ता च॥
हृद्गोलः, पुं, पर्व्वतविशेषः। इति केचित्॥
हृद्गोलीयः, त्रिः, (हृद्गोलोऽभिजनोऽस्येति। छः।)
हृद्गोलपर्व्वतोद्भवः। इति केचित्
हृद्ग्रन्थः, पुं, (हृत् हृदयं ग्रथ्नातीति। ग्रन्थ+
अच्।) हृद्ग्रणः। इति राजनिर्घण्टः॥
हृद्यं, क्लो, (हृदयस्य प्रियं मनोज्ञत्वात्। हृदय
+"हृदयस्य हृल्लेखयदण् लासेषु।" ५।३।५०।
इति यत् हृदादेशश्च।) गुड़त्वक्। इति शब्द-
रत्नावली॥
हृद्यः, पुं, (हृदय+यत्। हृदादेशः।) वंशलोचन-
वेदमन्त्रः। इति मेदिनी॥
हृद्यः, त्रि, (हृदयस्य प्रियमिति। हृदय+"हृद-
यस्य हृल्लेखयदण्लासेषु।" ६। ३। ५०।
इति यत् हृदादेशश्च।) मनोहरः। इत्यमरः।
३।१।५३॥ अस्य पर्य्यायः मनोज्ञशब्दे द्रष्टव्यः॥
हृद्याः। हृदितः। हृत्प्रियः। इति मेदिनी॥
(यथा, मनौ। ३। २२७।
"भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च॥
हृद्यानि चैव मांसानि पानानि सुरभीणि च॥")
हृद्यगन्धं, क्लो, (हृद्यो गन्धोऽस्य।) क्षुद्रजीरकम्।
इति शब्दचन्द्रिका॥ सौवर्च्चलम्। इति राज-
निर्घण्टः॥
हृद्यगन्धः, पुं, (हृद्यो मनोहरो गन्धोऽस्य। विल्व-
वृक्षः। इति जटाधरः।
हृद्यगन्धा, स्त्री, (हृद्यो गन्धोऽस्याः।) जातीः।
इति राजनिर्घण्टः॥
हृद्यगन्धि, क्लो, (हृद्यो गन्धोऽस्य। इत् समा-
सान्तः।) क्षुद्रजीरकम्। इति रत्नमाला॥
हृद्या, स्त्री, (हृद्+यत्। टाप्।) हरिद्रानामौषधिः।
इति मेदिनी॥

हृद्रोगः, पुं, कुम्भराशिः। इति शब्दरत्नावली॥
(हृदयस्य रोग इव।) कामः। यथा,—
"हृद्रोगमाशपहिनोत्यचिरेण धीरः।"
इति श्रीभागवतम्॥
हृदयस्य रोगः।) हृदयपीड़ा। तत्र हृद्रोगस्य विप्रकृष्टं निदानमाह।
"अत्युष्णगुर्व्वम्लकषायतिक्त-
श्रमाभिघाताध्ययनप्रसङ्गैः।
सञ्चिन्तनैर्व्वेगविधारणैश्च
हृदामयः पञ्चविधः प्रदिष्टः॥"
प्रसङ्गः सततं सेवा। सञ्चिन्तनमतिचिन्ता राजभयादिकमिति यावत्। पञ्चविधः वातिकः पैत्तिकः श्लैष्मिकः सान्निपातिकः क्रिमिजश्चेति॥ * ॥ तस्य संप्राप्तिपूर्व्वकं लक्षणमाह।
"दूषयित्वा रसं दोषा विगुणा हृदयङ्गताः।
हृदि बाधां प्रकुर्व्वन्ति हृद्रोगं तं प्रचक्षते॥"
विगुणाः दुष्टाः। बाधां दोषभेदे नानाविधां व्यथाम्। भङ्गवत् पीड़ामिति गयदासः॥ * ॥
वातिकं हृद्रोगमाह।
"आयम्यते मारुतजे हृदयं तुद्यते तथा।
निर्मथ्यते दीर्य्यते च स्फोट्यते पाट्यतेऽपि च॥"
मारुतजे हृद्रोगे इति शेषः। आयम्यते व्यथया विस्तार्य्यत इव। तुद्यते सूचीभिरिव। निर्मथ्यते मन्थानेनेव। दीर्य्यते करपत्रेण द्विधा क्रियत इव। स्फोट्यते आरयेव। पाट्यते कुठारेण बहुधा क्रियत इव॥ * ॥ पैत्तिकमाह।
"तृष्णोष्मदाहचोषाः स्युः पैत्तिके हृदये क्लमः।
धूमायनञ्च मूर्च्छा च क्लेदः शोषो मुखस्य च॥"
उष्मा शीतगात्रस्यैव शीतवाताभिलाषहेतु किञ्चिदन्तरीयम्। दाहः पार्श्वस्थेन वह्निनेव दुःखहेतुर्गात्रसन्तापः। चोषः चूषणेनेव पीड़ा। हृदये क्लमः हृदयाकुलत्वं ग्लानिरित्यर्थः। धूमायनं कण्ठाद्धूमनिर्गम इव। क्लेदः किञ्चिद्दुर्गन्धः सटित इव॥ * ॥ श्लैष्मिकमाह।
"गौरवं कफसंस्रावोऽरुचिस्तम्भोऽग्निमार्दवम्।
माधुर्य्यमपि चास्यस्य वलासा वर्त्तते हृदि॥"
वलासा वर्त्तते हृदि कुपितकफव्याप्तेः। गौरवं हृदयस्य। स्तम्भो जड़ता। मार्दवं जलप्लुतमिव। माधुर्य्यं मुखे॥ * ॥ त्रिदोषजमाह।
"विद्यात् त्रिदोषमप्येवं सर्व्वलिङ्गं हृदामयम्॥"
क्रमिजमाह। क्रमयो जायन्ते अस्मिन्निति क्रमिज इति निरुक्तिः॥ * ॥ तस्य निदानपूर्व्विकां संप्राप्तिमाह।
"त्रिदोषहेतुहृद्रोगी यो दुरात्मा निषेवते।
तिलक्षीरगुड़ादींश्च ग्रन्थिस्तस्योपजायते॥
मर्म्मैकदेशसंक्लेदं रसश्चाप्युपगच्छति।
सक्लेदात् क्रमयश्चास्य भवन्त्युपहतात्मनः॥"
मर्म्मैकदेशे हृदयैकदेशे संक्लेदं सटितत्वं रस उपगच्छति संक्लेदात्। रसस्य सटितत्वात्। उपहतात्मनः तिलाद्यहिताहारेण॥ * ॥ तस्य लक्षणमाह।
"उत्क्लेदः छर्द्दनं तोदः शूलं हृल्लासकस्तमः।
अरुचिः श्यावनेत्रत्वं शोषश्च क्रमिजे भवेत्॥"
उत्क्लेदः वमनमिवोपस्थितम्। शोषो यक्ष्मा॥
हृद्रोगस्योपद्रवानाह।
"क्लोमसादो भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः।
क्रमिजे तु क्रमीणां ये श्लैष्मिकाणां हि ते मताः॥"
क्लोम्नः पिपासास्थानस्य सादः शोषः। शोषो मुखस्य। तेषां हृद्रोगाणाम्। क्रमिजे तु हृद्रोगे श्लैष्मिकाणां क्रमीणां ये उपद्रवा हृल्लासात् प्रसेकान्ता विपाकादयस्ते मताः॥ * ॥ अथ हृद्रोगस्य चिकित्सा।
"घृतेन दुग्धेन गुड़ान्नसा वा
पिबन्ति चूर्णं ककुभत्वचो ये।
हृद्रोगजीर्णज्वररक्तपित्तं
हत्वा भवेयुश्चिरजीविनस्ते॥ १॥
हरीतकी वचा रास्ना पिप्पली नागरोद्भवम्।
यष्टी पुष्करमूलोत्थं चूर्णं हृद्रोगनाशनम्॥२॥
पुटदग्धहरिणशृङ्गपिष्टं गव्येन सर्पिषा पिबतः।
हृत्पृष्ठशूलमचिरादुपैति शान्तिं सुकष्टमपि॥३॥
तैलाज्यगुड़विपक्वं चूर्णं गोधूमपार्थ्यात्थम्।
पिबति पयोमुक् स भवति गतसकलहृदामयः पुरुषः॥
पार्थ्यः कौह इति लोके॥ ४॥
गोधूमककुभचूर्णं पक्वमजाक्षीरगव्यसर्पिर्भ्याम्।
मधुशर्करासमेतं शमयति हृद्रोगमुल्बणं पुंसाम्॥ ५॥
पार्थेन कल्केन रसेन सिद्धं
शस्तं घृतं सर्व्वहृदामयेषु॥
अर्জ্জুনघृतम्॥ ६॥
घृतं वला नागवलार्জ্জুनानां
क्वाथेन कल्केन च षष्टिकायाः।
सिद्धं निहन्याद्धृदयामयं हि
सवातरक्तक्षतरक्तपित्तम्॥"
वलादिघृतम्॥ ७॥ इति हृद्रोगाधिकारः।
इति भावप्रकाशः॥ * ॥ अपि च।
धन्वन्तरिरुवाच।
"हृद्रोगादिनिदानं ते वक्ष्येऽहं सुश्रुताधुना।
क्रमिहृद्रोगलिङ्गैश्च स्मृताः पञ्च तु हृद्गदाः॥
वातेन शूल्यतेऽत्यर्थं तुद्यता रुदतीति च।
भिद्यते ग्रथ्यते स्तब्धं हृदयं शून्यतादवः॥
अकस्माद्दीनता शोको भयं शब्दोऽसहिष्णुता।
वेपथुर्वेपनं मोहः श्वासरोधोऽल्पनिद्रता॥
पित्ताद्दाहो भ्रमो दाहः स्वेदोऽम्लः कफजः क्लमः।
छर्द्दनञ्चाम्लपित्तस्य धूमकम्पितता ज्वरः॥
श्लेष्मणा हृदयस्तब्धं भावितं चाश्मगर्भवत्।
कासाग्निसादनिष्ठेव निद्रालस्यारुचिर्ज्वरः॥
सर्व्वलिङ्गं त्रिभिर्दोषैः क्रिमिभिः श्यामनेत्रता।
तमःप्रवेशो हृल्लासः शोफः कण्डुः कफस्रुतिः॥
हृदयं प्रततञ्चाथ क्रकचेनेव दार्य्यते।
चिकित्सेदामयं घोरं तच्छीघ्रं शीघ्रकारणम्॥"
इति गारुड़े। १५८। १—७॥ * ॥
"शुण्ठीं सौवर्च्चलं हिङ्गु पीत्वा हृदयरोगनुत्।"
इति च गारुड़े। १८८। ४३॥
हृद्रोगवैरी, [न्] पुं, (हृद्रोगस्य वैरी।) अर्জ্জुनवृक्षः। इति शब्दचन्द्रिका॥
हृदण्टकः, पुं, (हृदो वण्टकः।) जठरम्। इति शब्दचन्द्रिका॥
हृल्लासः, पुं, (हृदयस्य लासोऽत्र। "हृदयस्य हृल्लेखयदण्लासेषु। ६। ३। ५। इति हृदादेशः।) हिक्का। यथा,—
"हिक्का हेक्का च हृल्लासः प्रतिश्यायस्तु पीनसः॥"
इति हेमचन्द्रः॥
(यथा, सुश्रुते सूत्रस्थाने २६ अध्याये। "धमनीस्थे सफेनं रक्तमीरयन्निलः सशब्दो निर्गच्छत्यङ्गमर्दैः पिपासा हृल्लासश्च॥") अस्य निदानादि हिक्काशब्दे द्रष्टव्यम्॥
हृल्लेखः, पुं, (हृदयं लिखतीति अण्। "हृदयस्य हृल्लेखेति।" ६। ३। ५०। इति हृदादेशः।) ज्ञानम्। इति राजनिर्घण्टः॥ तर्कः। इति त्रिकाण्डशेषः॥
हृल्लेखा, स्त्री, (हृल्लेख+अजादित्वात् टाप्।) औत्सुक्यम्। इति हलायुधः॥
हृष, उ हृष्टौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्। क्त्वावेट्।) हृष्टश्चित्तोत्साहः। उ, हर्षित्वा हृष्ट्वा। क्त्वा इमो वेट्त्वान्नेम डीश्लीत्वादिना इमे निषेधे निष्ठायां हृष्टः अस्मात् पृषादित्वान्नित्यं ङ इत्यन्ये। इति दुर्गादासः॥
हृष, उ ञि अलीके। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्त्वावेट्।) उ, हर्षित्वा हृष्ट्वा। ञि, हृष्टोऽस्ति। अलीकं मिथ्याकरणम्। हर्षति कथां नीचः मिथ्या करोति इत्यर्थः। इति दुर्गादासः॥
हृष, य ञि इर् हृष्टौ। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) य, हृष्यति लोकः सुखात्। ञि, हृष्टोऽस्ति। इर अहृषत् अहर्षीत्। अस्मात् पृषादित्वा न्नित्यं ङ, इत्यन्ये। इति दुर्गादासः॥
हृषित, त्रि, (हृष्+क्त। वा इट्।) विस्मृतम्। प्रीतम्। प्रहृतम्। हृष्टरोम। इति मेदिनी॥ प्रणतम्। वर्म्मितम्। इति धरणिः॥
हृषी, पुं, अग्निसोमौ। इति महाभारते मोक्षधर्म्मः॥
हृषीकं, क्ली, (हृष्यत्यनेनेति। हृष+"अनिहृषिभ्यां किच्च।" उणा०। ४। १७। इति ईकन्। स कित्।) इन्द्रियम्। इत्यमरः। १। ५। ८॥ (यथा भागवते। २। ६। ३२।
"न भारती मेऽङ्गमृषोपलक्ष्यते
न वै क्वचिन्मे मनसो मृषा गतिः।
न मे हृषीकाणि पतन्त्यसत्पथे
यन्मे हृदौत्कण्ठ्यवता धृतो हरिः॥")
हृषीकेशः, पुं, (हृषीकाणां ईशः।) विष्णुः। इत्यमरः। १।१।१८॥ हृषीकाणामिन्द्रियाणा-

मीशो हृषीकेशः क्षेत्रज्ञरूपकत्वात् परमात्मत्वाद्वा। इन्द्रियाणि यदवशे वर्त्तन्ते स परमात्मा। इति शङ्कराचार्य्यः। पौराणिकास्त्वाहुः। हृष्टा जगत् प्रीतकराः केशा रश्मयोऽस्य हृषीकेशः। पृषोदरादिः। अयं हि सूर्य्यरूपयन्नरूपश्च। तथा च मोक्षधर्म्मे।

"सूर्य्याचन्द्रमसोः शश्वत् अंशुभिः केशसंज्ञितैः।
बोधयत् खापयच्चैव जगदुद्भिद्यते पृथक्।
बोधनात् खापनाच्चैव जगतो हर्षणं भवेत्॥
अग्नीषोमक्रतैरेव कर्म्मभिः पाण्डुनन्दन!।
हृषीकेशोऽहमीशानो वरदो लोकभावनः॥"

इति भरतः॥

अपि च।

"हृषीकाणि नियम्याहं यतः प्रत्यक्षतां गतः।
हृषीकेश इति ख्यातो नाम्ना तत्रैव संस्थितः॥"

इति वाराहे कुरुक्षेत्रहृषीकेशमहिमानामाध्यायः॥ * ॥

"तथा धर्म्मं चरिष्यन्ति कलौ तस्मिन् युगान्तिमे॥
ये चान्यशापनिर्दग्धा गौतमस्य महात्मनः।
सर्व्वे ते ह भविष्यन्ति ब्राह्मण्यासु जातिषु॥
विनिन्दन्ति हृषीकेशं ब्राह्मणान् ब्रह्मवादिनः।
वेदवाक्या व्रताचारा दुराचारा दयाक्षमाः॥
मोहयन्ति जनान् सर्व्वान् दर्शयित्वा फलानि च।
तमसाविष्टमनसो वैडालव्रतिकाधमाः॥
कलौ रुद्रो महादेवो लोकानामीश्वरः परः॥
न देवता भवो नृणां देवतानाञ्च दैवतम्।
करिष्यत्यवतारांश्च शङ्करो नीललोहितः॥
श्रौतस्मार्त्तप्रतिष्ठार्थं भक्तानां हितकाम्यया।
उपदेक्ष्यन्ति तज्ज्ञानं शिष्याणां ब्रह्मसंहितम्॥"

इति कौर्म्मे २७ अध्यायः॥

हृष्टः, त्रि, (हृष्+क्त। वा इट्।) प्रीतः। जातहर्षः। इत्यमरः। ३। १। १०३॥ अस्य पर्य्यायः प्रीतशब्दे द्रष्टव्यः। रोमाञ्चितः। प्रहसितः। विस्मितः। इति विश्वमेदिन्यौ॥ प्रतिहतः। इति हेमचन्द्रः॥

हृष्टमानसः, त्रि, (हृष्टं मानसं यस्य। हृष्टचित्तः। तत्पर्य्यायः। हर्षमाणः २। विकुर्व्वाणः ३ प्रमनाः ४। इत्यमरः। ३। १। ७॥ प्रीतमानसः ५। इति शब्दरत्नावली॥

हृष्टरोमा, [न्] त्रि, (हृष्टानि रोमाण्यस्य।) रोमाञ्चितः। इति त्रिकाण्डशेषः॥ (यथा, रुग्विनिश्चये ज्वराधिकारे॥

"यो हृष्टरोमा रक्ताक्षो हृदि मक्षातशूलवान्।
वक्त्रेण चैवाक्षिपति तं ज्वरो हन्ति मानवम्॥")

हृष्टिः, स्त्री, (हृष्+क्तिन्।) आनन्दः। मानः। इति धरणिः॥

हे, व्य, (हिनोतीति। हि+बाहुलकात् डे।) सम्बोधनम्। (यथा, बृहत्संहितायाम्। ७४।११।

"जाया वा स्याज्जनित्री वा सम्भवः स्त्रीकृतो नृणाम्।
हे कृतघ्नास्त्रयोनिन्दां कुर्व्वतां वः कुतः सुखम्॥")

आह्वानम्। असूयादि। इति मेदिनी॥ आशयस्य पर्य्यायः। प्याट्२ पाट्३ अङ्ग४ है५ भोः६। इत्यमरः। ३। ४। ७॥ हुंहो ७ हुंहो ८ अरे ९ अये १० अयि ११। इति भरतः॥

हेका, स्त्री, (हेक् इति अव्यक्तं शब्दं कायतीति। कै+कः। टाप्।) हिक्का। इति हेमचन्द्रः॥

हेठ, वाधे। इति कविकल्पद्रुमः॥ भ्वा०-पर०-सक०-सेट्। हेठति। वाधो विहतिः। इति दुर्गादासः॥

हेठ, ऋ ङ वाधे। इति कविकल्पद्रुमः॥ (स्वा०-आत्म०-सक०-सेट्।) ऋ, अजिहेठत्। ङ, हेठते मत्सरः साधुम्। इति दुर्गादासः॥

हेठ, श खचे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-उत्पत्तौ अक०-पवित्रीकरणे सक०-सेट्।) खचो भूतिपूत्योरुत्पत्तिः। श, हेठती हेठन्ती। इति दुर्गादासः॥

हेठ, पुं, (हेठ+घञ्।) वाधा। विहेठः। इति मेदिनी॥

हेड, ङ ऋ अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, हेड़ते जिहेड़े। ऋ, अजिहेड़त्। इति दुर्गादासः॥

हेड, म वेष्टे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, हेड़यति अहिहिड़ि अहीहिड़ि हिड़ं हिड़ं हीड़ं हीड़म्। एकारस्य ह्रस्वविधाने कण्ठत्वेन समानोऽप्यकारो न स्यात् पचो युत्स्वमित्युक्तेरिकार एव स्यात्। इकारस्य दीर्घविधौ ईकार एव एकारस्य आंशिककण्ठत्वेन विरुद्धत्वात्। केचित्तु दीर्घत्वे गुणं विधाय अहिड़ि अहेड़ीत्यादि मन्यन्ते। इति दुर्गादासः॥

हेड़जः, पुं, (हेड़ादनादरादाज्जायत इति। जन+डः।) क्रोधः। इति केचित्॥

हेड़ावुकः, पुं, अश्वविक्रयकारी। इति त्रिकाण्डशेषः॥

हेतिः, स्त्री, (हन्यतेऽनयेति। हन+"ऋतियूतिजूतिसातिहेतिकीर्त्तयश्च।" ३। ३। ९७। इति क्तिन्। निपातितश्च।) अस्त्रम्। (यथा, रघुः। १०। १२।

"दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः।
हेतिभिर्येतनावद्भिरुदीरितजयस्वनम्॥"

हिनोति इति। हि+क्तिन्। निपातितश्च।) सूर्य्यकिरणः। अग्निशिखा। इत्यमरः। ३। ३। ७०॥ शिखा। तत्रैव। १। १। ६०॥ तेजोमात्रम्। इति भरतः॥ साधनम्। यथा,—

"सम्भृत्वनियम्य यतयो यमकर्त्तृहेतिं
जह्नुः स्वराड्विव निपानखनित्रमिन्द्रः॥"

इति श्रीभागवते। २। ७। ४७॥

कर्त्तृभेदः तन्निरासोऽकर्त्तृः तत्र हेतिं साधनं जह्नुः। इति श्रीधरस्वामी॥ पुं, असुरविशेषः। यथा, भागवते। ६। १०। २०।

"पुलोमा वृषपर्व्वा च प्रहेतिर्हेतिरुत्कलः।
दैत्येया दानवा यक्षा रक्षांसि च सहस्रशः॥")

हेतुः, पुं. (हिनोति व्याप्नोति कार्य्यमिति। हि+"कमिमनिजनिगाभायाहिभ्यश्च।" उणा० १। ७३। इति तुः।) कारणम्। इत्यमरः। १।४।२८॥ यथा, मनुः। ८। ३।

"प्रत्यक्षं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः।
अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक्॥")

न्यायमते व्यापकज्ञापकः। व्याप्य इति यावत्। तमेव लिङ्गमामनन्ति। तस्य लक्षणं यथा। हेतुत्वञ्च अनुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानकारणसाध्याविषयकशाब्दबोधजनकहेतुविभक्तिमच्छब्दत्वम्। हेतुत्वप्रतिपादकविभक्तिमत्त्वायावयवत्वं वा। उदाहरणप्रयोजकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा। साध्याविषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा। प्रतिज्ञावाक्यबोधजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभक्तिमद्वाक्यत्वं वा। पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं वा। इति गङ्गेशोपाध्यायकृतावयवचिन्तामणिः॥ (तथास्य लक्षणम्। "अथ हेतुः। हेतुर्नामोपलब्धिकारणम् तत्प्रत्यक्षमनुमानमैतिह्यमौपम्यमेभिर्हेतुभिर्यदुपलभ्यते तत्तत्त्वम्।" इति चरके विमानस्थाने अष्टमेऽध्याये॥ तथास्य पर्य्यायः। "इदं खलु हेतुर्निमित्तमायतनं कर्त्ता कारणं प्रत्ययः समुत्थानं निदानमित्यनर्थान्तरम्।" इति च चरके निदानस्थाने प्रथमेऽध्याये॥ तेजसधातुविशेषः। तत्पर्य्यायो यथा,—

"यत्सदं रङ्गसदृशं रौति हेतुश्च तन्मतम्।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हेतुकः, पुं, कारणम्। हेतुरेव स्वार्थे कः। तत्सम्बन्धिनि, त्रि। अत्र बहुव्रीह्यर्थे कप्रत्ययः। यथा प्रकृतसाध्यहेतुकानुमितिपरत्वमावश्यकम्। इति सामान्यनिरुक्तिगादाधरी॥

हेतुता, स्त्री, (हेतोर्भावः। हेतु+तल्।) कारणता। हेतुत्वम्। यथा,—

"सप्रसङ्गं उपोद्घातो हेतुतावसरस्तथा।
निर्व्वाहकैककार्य्यत्वे पोढ़ा सङ्गतिरिष्यते॥"

इत्यनुमितिजागदीशी॥

हेतुमान्, [न्] त्रि, (हेतुरस्यास्तीति। हेतु+मतुप्।) कारणवान्। यथा। हेतुहेतुमतोर्लिङ्। इति पाणिनिसूत्रम्॥

हेतौ, व्य, हेतुना। हेतोर्द्वारा। इति केचित्॥

हेत्वाभासः, पुं, (हेतुरिव आभासते। आ+भास+अच्। हेतोराभासो वेति। आ+भास+घञ्।) हेतुदोषः। स तु पञ्चविधः। व्यभिचारः १ विरुद्धः २ असिद्धः ३ सत्प्रतिपक्षः ४ बाधः ५। यथा,—

"अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा॥
आद्यः साधारणस्तु स्यात् स्यादसाधारणोऽपरः।
तथैवानुपसंहारी त्रिधानैकान्तिको भवेत्॥

यः सपक्षे विपक्षे च स तु साधारणो मतः।
यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः॥
तथैवानुपसंहारी केवलान्वयिपक्षकः।
यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः॥
व्याप्यवासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिस्त्रिधा॥
पक्षासिद्धिर्यत्र पक्षो भवेन्नभिमयो गिरिः।
प्रदीप द्रव्यं धूमवत्त्वादव्यासिद्धिरद्यापरा॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत्।
विरुद्धयोः परामर्शो हेत्वोः सत्प्रतिपक्षता॥
साध्यशून्ये यत्र पक्षत्वसौ बाध उदाहृतः।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते॥"

इति भाषापरिच्छेदः॥ * ॥

तस्य सामान्यलक्षणानि यथा। अनुमितिकारणीभूताभावप्रतियोगि यथार्थज्ञानविषयत्वम्। यद्विषयत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम्। ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तत्त्वं वा हेत्वाभासत्वम्॥ * ॥ तस्य विशेषलक्षणानि यथा। उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं तत्त्वम्। विरुद्धान्यपक्षवृत्तित्वे सति अनुमितिविरोधिसम्बन्धाव्याहृत्तिर्वा अनैकान्तिकः। विपक्षवृत्तित्वं साधारणत्वम्। सर्व्वसपक्षव्याहृत्तो हेतुरसाधारणः। व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावो यत्र स हेत्वभिमतोऽनुपसंहार्य्यः॥ * ॥ साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वम्॥ * ॥ साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्य्यलिङ्गत्वं तत्त्वं सत्प्रतिपक्षितत्वम्॥*॥ व्याप्तिपक्षधर्म्मतानिश्चयविरोधिरूपवत्त्वं असिद्धिः। पक्षनिष्ठ-प्रमाविषयत्व-प्रकाराभाव-प्रतियोगिसाध्यकत्वं बाधः। इति चिन्तामणिः॥

हेम, [न्] क्ली, (हिनोति वर्द्धते स्फुटति वेति। हि+मनिन्।) स्वर्णम्। यथा, रघौ।१।१०।
"हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥")
धुस्तूरम्। इत्यमरः। १।८।८४; ३।५।२३॥
केशरम्। इति राजनिर्घण्टः॥ हिमः। इति हेमन्तशब्दटीकायां भरतधृतमाधवी॥

हेमं, क्ली, (हि+मन्।) सुवर्णम्। इति कैचित्॥

हेमः, पुं, (हि+मन्।) मायकपरिमाणम्। इति वैद्यकपरिभाषा॥ कृष्णवर्णाश्वः। बुधः। इति कैचित्॥ (ययातिवंशजरुषद्रथपुत्रः। यथा, विष्णुपुराणे। ४। १८। १। "तितिक्षोरुषद्रथः पुत्रोऽभूत ततो हेमः हेमात् सुतपाः॥")

हेमकन्दलः, पुं, (हेमवर्णं कन्दलं नवाङ्कुरोऽस्य। यद्वा, हेमवर्णं कन्दं लातीति। ला+कः।) प्रवालः। इति हेमचन्द्रः॥

हेमकान्तिः, स्त्री, (हेमवत् कान्तिरस्याः।) दारुहरिद्रा। इति राजनिर्घण्टः॥ स्वर्णद्युतिमति, त्रि॥ (यथा, बृहत्संहितायाम्। ७। २०।
"हेमकान्तिरथवा शुकवर्णः
सस्यकेन मणिना सदृशो वा।
स्निग्धमूर्त्तिरलघुश्च हिताय
व्यत्ययेन गुणभक्च्छशिपुत्रः॥")

हेमकारः, पुं, (हेम हेममयं भूषणं करोतीति। कृ+अण्।) हेमकर्त्ता। स्वर्णकारः। यथा, "सर्व्वसङ्करपापिष्ठं हेमकारं नराधिपः।
अन्यायै वर्त्तमानञ्च छेदयेत्तस्करा क्षुरैः॥"

इति मत्स्यपुराणे। २२७। १८५॥

हेमकिञ्जल्कं, क्ली, (हेमवर्णं किञ्जल्कमस्य।) नागकेशरम्। इति राजनिर्घण्टः॥ (नागकेशरशब्दोऽस्य विषयो ज्ञातव्यः॥)

हेमकूटः, पुं, (हेममयः कूटो यस्य।) पर्व्वतविशेषः। इत्यमरः। २।३।३॥ स तु किंपुरुषवर्षस्य सीमापर्व्वतः। नवतिसहस्रयोजनदीर्घः। द्विसहस्रयोजनप्रस्थः। द्विसहस्रयोजनविस्तारः। हिमालयादुत्तरेस्थितः। इति श्रीभागवतमतम्॥ (यथा, महाभारते। ३। ११०। २।
"पर्व्वतं स समासाद्य हेमकूटमनामयम्।
अचिन्त्यानद्भुतान् भावान् ददर्श सुबहूनृपः॥")

हेमकेतकी, स्त्री, (हेमवर्णा केतकी।) स्वर्णकेतकी। इति राजनिर्घण्टः॥

हेमकेलिः, पुं, (हेमवर्णः केलिः कम्यनादिः यस्य।) अग्निः। इति शब्दमाला॥

हेमकेशः, पुं, (हेमवर्णः केशोऽस्य। जटाया पीतत्वात् तथात्वम्।) शिवः। इति कैचित्॥

हेमक्षीरी, स्त्री, (हेमेव पीतवर्णं क्षीरं निर्य्यासो यस्याः। ङीप्।) स्वर्णक्षीरी। इति राजनिर्घण्टः॥ पर्य्यायोऽस्या यथा,—
"हेमक्षीरी स्मृता प्रीता गौरी च कालदुग्धिका।"

इति गारुडे २०८ अध्यायः॥
"कटुपर्णी हेमवती हेमक्षीरी हिमावती।
हेमाह्वा पीतदुग्धा च तन्मूलश्लोकमुच्यते॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हेमगन्धिनी, स्त्री, (हेम्नः नागकेशरस्येव गन्धोऽस्ति अस्याः। इनिः।) रेणुकाख्यगन्धद्रव्यम्। इति रत्नमाला॥

हेमगौरः, पुं, (हेमवत् गौरः।) किङ्किरातवृक्षः। इति राजनिर्घण्टः॥ (यथास्य पर्य्यायः।
"किङ्किरातो हेमगौरः पीतकः पीतभद्रकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
स्वर्णवद्गौरवर्णयुक्ते, त्रि॥

हेमगौराङ्गः, त्रि, (हेमानीव गौराणि अङ्गान्यस्य।) स्वर्णतुल्यगौरवर्णाङ्गविशिष्टः। यथा,
"विषेणोत्तिष्ठमानेन कालानलसमत्विषा।
निर्दग्धहेमगौराङ्गः क्षतः कृष्णो जनार्द्दनः॥
तं दृष्ट्वा हेमगौराङ्गं क्षतं कृष्णं जनार्द्दनम्।
ततः सर्व्वे वयं भीतास्त्वामेव शरणं गताः॥"

इति स्कान्दे नीलकण्ठस्तोत्रम्॥

हेमचन्द्रः, पुं, अभिधानचिन्तामणिनामकोषकर्त्ता। यथा,—
"सानेकार्थनाममालात्मकः कोषवरः शुभः।
हेमचन्द्रप्रणीताभिधानचिन्तामणिर्मुनेः॥"

इति तस्य सूचीकारश्लोकः॥
स्वर्णमयश्मश्रुयुक्तो च। सोनार चाँद इति भाषा॥

हेमज्वालः, पुं, (हेमवर्णा ज्वाला अस्य।) अग्निः। इति शब्दमाला॥

हेमतारं, क्ली, (हेम तारयति उत्कर्षं नयति। तॄ+णिच्+अच्।) तुत्थम्। इति हेमचन्द्रः॥ (तुत्थशब्देऽस्य विवृतिर्ज्ञातव्या॥)

हेमदुग्धः, पुं, (हेमवर्णं दुग्धं निर्य्यासोऽस्य।) उडुम्बरवृक्षः। इति शब्दरत्नावली॥

हेमदुग्धकः, पुं, (हेमवर्णं दुग्धं निर्य्यासोऽस्य। कप्।) उडुम्बरवृक्षः। इत्यमरः। १।४।१२॥ (पर्य्यायो यथा,—
"उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
पीतवर्णक्षीरयुक्ते, त्रि॥

हेमदुग्धा, स्त्री, (हेमवर्णं दुग्धं निर्य्यासोऽस्याः।) स्वर्णक्षीरी। इति जटाधरः॥ (गुणादयोऽस्या स्वर्णक्षीरीशब्दे बोद्धव्याः॥)

हेमदुग्धी, [न्] पुं, (हेमवर्णं दुग्धं निर्य्यासोऽस्यास्तीति। इनिः।) यज्ञोडुम्बरवृक्षः। इति शब्दरत्नावली॥

हेमदुग्धी, स्त्री, (हेमवर्णं दुग्धं निर्य्यासोऽस्याः। ङीप्।) स्वर्णक्षीरी। इति राजनिर्घण्टः॥

हेमन्तः, पुं, क्ली, (हन्ति लोकान् शैत्येनेति। हन्+"हन्ते र्मुट् हि च।" उणा० ३। १२८। इति झच् हन्तेर्हि चेति हिरादेशः मुडागमो गुणश्च।) ऋतुविशेषः। स तु अग्रहायणपौषमासात्मकः। यथा। षड्भी ऋतवः पुंसि मार्गादीनां युगैः क्रमादिति वक्ष्यमाणैरन्वयः। ते के इत्याह हेमन्त इत्यादि मार्गपौषाभ्यां ऋतुर्हेमन्तः। हन्ति सन्तापमिति। हिमोऽस्त्यस्येति वा मनीषादित्वात् हेमन्तः। अर्हर्चादिरयमिति केचित्। तेन अस्मिन्यामित्यत्रानेनापि सम्बन्धः। हेमन्शब्दोऽप्यस्तीति माधवी। इति भरतः॥ तत्पर्य्यायः। हैमनः २। इति शब्दरत्नावली॥ उच्छ्वासः ३ शरदन्तः ४ हिमागमः ५। तत्कालोद्भवजलगुणाः।
"हैमन्तिकं जलं स्निग्धं हृद्यं बल्यं हितं गुरु।"

इति राजनिर्घण्टः॥*॥

तत्र लोकप्रतपनार्थमग्निप्रदानफलं यथा,—
"हेमन्ते गिरिरे चैव पुण्याग्निं यः प्रयच्छति।
सर्व्वलोकप्रतापार्थं स पुण्यां गतिमाप्नुयात्॥"

इति वह्निपुराणे कन्यादाननामाध्यायः॥

तत्र भगवत्सन्निधौ अग्निप्रक्षालनविधिः सेवाशब्दे द्रष्टव्यः॥*॥ तत्र वर्ज्जनीयानि।
"हेमन्ते दिनलघुता शीतयवस्तम्बमरुवकहिमानि।"

इति कविकल्पलता॥

हेमन्तनाथः, पुं, (हेमन्ते नाथ्यते याच्यते इति। नाथ+कर्म्मणि घञ्।) कपित्थः। इति शब्दचन्द्रिका॥ (कपित्थशब्देऽस्य विषयो ज्ञातव्यः।)

हैमवर्षत:, पुं (हैमवय: पर्व्वत:।) सुमेरुगिरि:। इति हलायुध:॥

हैमपुष्पं क्ली, (हैमवर्णं पुष्पम्।) अशोकपुष्पम्। जवापुष्पम्। इति मेदिनी॥

हैमपुष्प:, पु.।हैमवर्णं पुष्पं यस्य।) चम्पकवृक्ष:। इति शब्दचन्द्रिका॥ (अस्य पर्य्यायो यथा,—
"चाम्पेयश्चम्पक: प्रोक्तो हैमपुष्पश्च स स्मृत:॥"
अशोक:। अस्य पर्य्यायो यथा,—
अशोको हैमपुष्पश्च वञ्जुलस्ताम्रपल्लव:।
कङ्केलि: पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हैमपुष्पक:, पुं, (हैमवर्णं पुष्पं यस्य। कप्।) चम्पकवृक्ष:। इत्यमर:।२।४।६३॥ लोध्र:। इति राजनिर्घण्ट:॥

हैमपुष्पिका, स्त्री, हैमवर्णं पुष्पं यस्या:। कन्+टाप्। अत इत्त्वम्।) स्वर्णयूथिका। इत्यमर:।२।४।७१॥ (तथास्या: पर्य्याय:।
"यूथिका गणिकाम्बष्ठा सा पीता हैमपुष्पिका।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

हैमपुष्पी, स्त्री, (हैमवर्णं पुष्पमस्या:। गौरादित्वात् ङीष्।) मल्लिका। इति शब्दमाला॥ स्वर्णजीवन्ती। इन्द्रवारुणी। स्वर्णुली। सुपर्णी। कण्टकारी। इति राजनिर्घण्ट:॥

हैमफला, स्त्री, हैमवर्णानि फलान्यस्या:।) स्वर्णकदली। इति राजनिर्घण्ट:॥

हैममाला, स्त्री, यमपत्नी। इति केचित्। हैमनिर्म्मिता माला।) स्वर्णस्रक्॥

हैममाली, [न्] पुं, (हैमेव किरणानां मालास्यस्य। इनि:।) सूर्य्य:। यथा भविष्ये।
"या शुक्ला कुरुशार्दूल! वैशाखे मासि वै तिथि:।
तृतीया साक्षया लोके गौर्व्वाणैरभिवन्दिता॥
योऽस्यां ददाति कनकं वारिवाजसमन्वितान्।
स याति पुरुषो वीर! लोकान् वै हैममालिन:॥"
हैममालिन: सूर्य्यस्य। इति तिथ्यादितत्त्वम्॥ (स्वर्णमालाविशिष्टे, त्रि॥)

हैमयूथिका, स्त्री, (हैमवर्णा यूथिका।) स्वर्णयूथिका। इति राजनिर्घण्ट:॥

हैमरागिणी, स्त्री, (हैम इव रागोऽस्या अस्तीति। इनि:। ङीप्।) हरिद्रा। इति त्रिकाण्डशेष:॥

हैमल:, पुं, (हैमं तदंशं लाति गृह्णातीति। ला+क:।) स्वर्णकार:। स्फटिकाश:। प्रस्तरभेद:। स तु कषपाषाण:। इति मेदिनी॥

हैमलता, स्त्री, (हैमवर्णा लता।) स्वर्णजीवन्ती। इति राजनिर्घण्ट:॥ (स्वर्णजीवन्तीशब्देऽस्या विषयो ज्ञातव्य:॥)

हैमवलं, क्ली, (हैम्ना वलते शोभते इति। वल्+अच्।) मौक्तिकम्। इति राजनिर्घण्ट:॥ हिमवलमिति साधुपाठ:॥

हैमवङ्ग:, पुं. (हैमवर्ण: वङ्गोऽस्य।) विष्णु:। इति त्रिकाण्डशेष:॥

हैमशिखा, स्त्री, (हैमवर्णा शिखास्या:।) स्वर्णचौरी। इति शब्दरत्नावली॥

हैमसार, क्ली. (हैम सारयति निर्म्मलीकरोतीति। सृ+णिच्+अण्।) तुत्थम्। यथा—
"तुत्थके तु शिखिग्रीवं हैमसारं मयूरकम्।"
इति रसचन्द्रिका॥

हैमसूत्रकं, क्ली, (हैम्न: सूत्रमव। कप्।) हारविशेष:। इति धरणि:॥

हैमहस्तिरथ:, पुं, (हैमनिर्म्मितहस्तिविशिष्टो रथो यत्र। स तु दानार्थं कल्पित:।) महादानविशेष:। तद्विवरणं यथा.—
"अथात: संप्रवक्ष्यामि हैमहस्तिरथं शुभम्।
यस्य प्रदानात् भवनं वैष्णवं याति मानव:॥
पुष्यां तिथिं समासाद्य तुलापुरुषदानवत्।
विप्रवाचनकं कुर्य्यात् लोकेशावाहनं बुध:॥
ऋत्विग्भ्यश्चोपसम्भारभूषणाच्छादनादिकम्।
अवाप्युपोषितस्तद्वत् ब्राह्मणै: सह भोजनम्॥
कुर्य्यात् पुण्यरथाकारं काञ्चनं मणिमण्डितम्।
वलभीभिर्विचित्राभिश्चतुष्कक्षसमन्वितम्॥
लोकपालाष्टकोपेतं ब्रह्मार्कशिवसंयुतम्।
मध्ये नारायणोपेतं लक्ष्म्या चैव समन्वितम्॥
कृष्णाजिनतिलद्रोणं कृत्वा संस्थापयेद्रथम्।
तथाष्टादश धान्यानि भाजनानमनन्तरम्॥
दीपकोपानहच्छत्रदर्पणं पादुकान्वितम्।
ध्वजे तु गरुडं कुर्य्यात् कूबराग्रे विनायकम्॥
नानाफलसमायुक्तमुपरिष्टाद्विताननम्।
कौषेयपट्टवस्त्रैश्च भक्ष्यानकुसमान्वितम्॥
चतुर्भि: कलसै: सार्द्धं गोभिरष्टाभिरन्वितम्।
चतुर्भिर्हेममात्रैर्मुक्तादामविभूषितम्॥
स्वरूपत: करिभ्यान्तु युक्तं कृत्वा निवेदयेत्।
कुर्य्यात् पञ्चपलादूर्द्धमभावादपि शक्तित:॥
ततो मङ्गलशब्देन स्नापितो वेदपुङ्गवै:।
त्रि: प्रदक्षिणमाहृत्य गृहीतकुसमाञ्जलि:॥
इममुच्चारयन्मन्त्रं ब्राह्मणेभ्यो निवेदयेत्॥
नमो नम: शङ्करपद्मजार्क-
लोकेशविद्याधरवासुदेवै:।
त्वं मन्यसे वेद पुराण यज्ञ
तेजोमयस्यन्दन पाहि तस्मात्॥
यत्तत् पदं परमगुह्यतमं मुरारे-
रानन्दहेतु गुणरूपविमुक्तमन्त:।
योगैकमानसदृगो मुनय: समाधौ
पश्यन्ति तत्त्वमसि नाथ रथेऽधिरूढ:॥
यस्मात्त्वमेव भवसागरसंप्लुताना-
मानन्दभाक्षृतमध्वरपानपात्रम्।
तस्मादघौघशमनेन कुरुप्रसादं
चामीकरैरभरथमाधवसंप्रदानात्॥
इत्थं प्रणम्य कनकेभरथप्रदानं
य: कारयेत् सकलपापविमुक्तदेह:।
विद्याधरामरमुनीन्द्रगणाभिजुष्टं
प्राप्नोत्यसौ पदमतीन्द्रियमिन्दुमौले:॥
जनदुरितवितानादुग्रसङ्क्रिजाल-
व्यतिकरकृतदाहोद्वेगभाजोऽपि वन्यून्।
नयति च पितृपुत्रान् बान्धवानप्यशेषान्
कृतगजरथदान ग्राम्यतं सङ्ग विष्णो:॥"
इति मत्स्यपुराणे महादानानुकीर्त्तने हैमहस्तिरथप्रदानको नाम २८२ अध्याय:॥

हैमा, [न्] पुं, बुधग्रह:। इति त्रिकाण्डशेष:॥

हैमा, स्त्री, (हेम हेमवर्णमस्त्यस्या इति अच्। टाप्।) अप्सरस:। सुन्दरी स्त्री। इति केचित्॥

हैमाङ्ग:, पुं, (हैमेव पीतवर्णमङ्गं यस्य।) गरुड:। सिंह:। सुमेरु:। ब्रह्मा। इति मेदिनी॥ चम्पकवृक्ष:। इति शब्दरत्नावली॥ विष्णु:। इति तस्य सहस्रनामस्तोत्रम्॥ हेमवर्णशरीरे, क्ली। तद्युक्ते, त्रि॥

हैमाद्रि:, पुं, (हैममयोऽद्रि:।) सुमेरुपर्व्वत:। इत्यमर:।१।१।५२॥ चक्रवर्त्तिराजविशेष:॥ स च चिन्तामणिकामधेनुकल्पद्रुमनामकस्मृतिसंग्रहकारक:। यथा,—
"तस्यास्ति नाम हैमाद्रि: सर्व्वश्रीकरणप्रभु:।
निजोदारतया यस्य सर्व्वश्रीकरणप्रभु:॥
अनेन चिन्तामणिकामधेनु-
कल्पद्रुमानर्थिजनाय दत्तान्।
विलोक्य गृह्णे किमसुष्य सर्व्व-
गीर्व्वाणनाथोऽपि करप्रदोऽभूत्॥
अथासुना धर्म्मकथादरिद्रं
त्रैलोक्यमालोक्य कलेर्बलेन।
तस्योपकारे दधतानुचिन्तां
चिन्तामणि: प्रादुरकारि चारु:॥
पञ्चखण्डात्मके शास्त्रे व्रतखण्डादनन्तरम्।
दानखण्डमिदं तस्य द्वितीयमथ कथ्यते॥"
इति तत्कृतचतुर्व्वर्गचिन्तामणौ दानखण्डीयश्लोका:॥

हैमाद्रिजगध:, पुं, (हैमाद्रौ जीर्य्यतीति। जृ+क्षु:।) स्वर्णचौरी। इति रत्नमाला॥ (अस्य पर्य्यायविवरणादिकं स्वर्णचौरीशब्दे ज्ञातव्यम्॥)

हैमाङ्ग:, पुं, (हैम हैमवर्णमाङ्ग्यते स्वर्णेन अर्हते इति। आ+ङ्गे+क:।) धनचम्पक:। इति राजनिर्घण्ट:॥ (हैम्न आङ्गा आङ्गा यस्य।) धुस्तूर:। कनकाङ्गयशब्ददर्शनात्॥

हैमाङ्गा, स्त्री, (हैम्न आङ्गा आङ्गा आख्या यस्या:।) स्वर्णजीवन्ती। इति राजनिर्घण्ट:॥

हैम्ना, पुं, बुधग्रह:। यथा,—
"हैलि: सूर्य्यसुधांशुमार: शीतरश्मिरैम्ना विज्ञो बोधनश्चेन्द्रपुत्र:।"
इति ज्योतिस्तत्त्वम्॥

हेय:, त्रि, (हा+"अचो यत्।" ३।१।९७ इति यत्। "ईद्यति।" ६।४।६५। इति

आत ईत्। गुणः।) त्याज्यः। यथा,—
"ऊषरा वालुकाक्लिन्ना" इत्यादुपक्रम्य।
"वास्तुखण्डे महादोषा ह्येयास्तस्मादिचक्षणैः॥"
इति युक्तिकल्पतरुः॥
हेरं, त्रि, (हि+रन्।) मुकुटभेदः। हरिद्रा। आसुरी माया। इति केचित्॥
हेरम्बः, पु, (ह्रे रणे शिवसमीपे वा रम्बते इति। रबि शब्दे+पचाद्यच्।) गणेशः। इत्यमरः।१।१।४१॥ महिषः। गौर्य्यगर्व्वितः। इति मेदिनी॥ बुद्धविशेषः। तत्पर्य्यायः। हेरुकः २ चक्रसम्बरः ३ देवः ४ वज्रकपाली ५ निगुम्भो ६ गणिशेश्वरः ७ वज्रटीकः ८। इति त्रिकाण्डशेषः॥*॥ अथ हेरम्बमन्त्रः। स च ऊकारयुक्तो गकारः सबिन्दुः प्रणवादिनमोऽन्तश्चतुरक्षरः। निबन्धे।
"पञ्चान्तको बिन्दुयुक्तो वामकर्णविभूषितः।
तारादिहृदयान्तोऽयं हेरम्बमनुरीरितः।
चतुर्वर्णात्मको नृणां चतुर्वर्गफलप्रदः॥"
अस्य पूजाप्रयोगः। प्रातःकृत्यादिपीठन्यासान्तं विधाय गणेशोक्तपीठशक्तीः पीठमनुञ्च विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। अस्य गणक ऋषिर्गायत्री छन्दो हेरम्बा देवता गकारो बीजं बिन्दुः शक्तिश्चतुर्व्वर्गसिद्ध्यर्थे विनियोगः। शिरसि गणकऋषये नमः। इत्यादि। ततः कराङ्गन्यासौ। गां गीं गूं गैं गौं गः इत्येतैः षड़ङ्गानि कुर्य्यात्। तथा च।
"षड्दीर्घभाजा बीजेन षड़ङ्गानि प्रकल्पयेत्॥"
ततो ध्यानम्।
"मुक्ताकाञ्चननीलकुन्दघुसृणच्छायैस्त्रिनेत्रान्वितै-
र्नागास्यैहरिवाहनं शशिधरं हेरम्बमर्कप्रभम्।
दृप्तं दानमभीतिमोदकरदान् टङ्कं शिरोऽक्षालिकां
मालां सुन्दरमङ्कुशं त्रिशिखकं दोर्भिर्दधानं भजे॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्। ततो गणेशोक्तपीठपूजान्तं कृत्वा ॐ हुं हुं महासिंहाय गां हेरम्बासनाय नमः इत्यासनं पूजयेत्। तथा च निबन्धे।
"प्रणवं कवचहन्तं महासिंहाय गां ततः।
हेरम्बेति पदं पश्चात् आसनाय हृदन्ततः॥
अयमासनमन्तः स्यात् प्रदद्यादमुनासनम्॥"
इति॥
पीठन्यासोऽप्येवं मन्त्रः। तत ॐ गं मन्त्रेण मूर्त्तिं संकल्पयेत्। तथा च निबन्धे।
"तारादिविघ्नबीजेन मूर्त्तिं तस्य प्रकल्पयेत्।"
पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत्। यथा अग्न्यादिकोणे मध्ये दिक्षु च गां हृदयाय नमः इत्यादिना पूजयेत्। तद्बहिरिन्द्रादीन् वज्रादींश्च संपूज्य धूपादिविसर्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं त्रिलक्षजपः। तथा च।
"त्रिलक्षञ्च जपेन्मन्त्रं दशांशं जुहुयात्ततः।"
होमद्रव्यं यथा,—
"लक्षत्रयं जपेन्मन्त्रमिक्षुदण्डैर्दशांशतः।
अपूपैराज्ययुक्तैर्व्वा जुहुयान्मन्त्रसिद्धये॥"*॥
मन्त्रान्तरम्। गं त्रिप्रसादनाय हृत्। तथा च निबन्धे।
"सम्वर्त्तको नेत्रयुतः पार्श्वौ वङ्कासने स्थितः।
प्रसादनाय हृन्मन्त्रं स्ववीजाद्यो दशाक्षरः॥"
अस्य पूजा प्रातःकृत्यादिपीठन्यासान्तं कर्म्म विधाय ऋष्यादिन्यासं कुर्य्यात्। शिरसि गणकऋषये नमः। मुखे विराट्छन्दसे नमः। हृदि त्रिप्रसादनाय देवतायै नमः। तथा च निबन्धे।
"गणको मुनिराख्यातो विराट् छन्द उदीरितम्।
त्रिप्रसादनो विघ्नो देवतास्य प्रकीर्त्तिता।
दीर्घयुक्तेन बीजेन षड़ङ्गानि प्रकल्पयेत्॥"
एकाक्षरवत् कराङ्गन्यासौ कृत्वा ध्यायेत्।
"पाशाङ्कुशौ कल्पलतां विषाणं
दधत्सशुण्डाहितबीजपूरः।
रक्तस्त्रिनेत्रस्तरुणेन्दुमौलि-
र्हारोज्ज्वलो हस्तिमुखोऽवताद्वः॥"
इति ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कृत्वा पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत्। अग्न्यादिषु गां हृदयाय नमः इत्यादिना पूजयेत्। तथा च निबन्धे।
"अङ्गानि पूर्व्वमभ्यर्च्य विघ्नानष्टौ यजेत्ततः।
पत्राग्रे पूजयेदेता ब्राह्म्याद्यास्तदनन्तरम्॥"
पत्रेषु।
"विघ्नं विनायकं शूरं वीरं वरदसंज्ञकम्।
इभवक्त्रं चैकरदं लम्बोदरं प्रपूजयेत्॥"
पत्राग्रेषु ब्राह्म्याद्यास्त्रहरिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षजपः। तथा च।
"लक्षं जपेत्तदर्द्धान्ते जुहुयादयुतं तिलैः।
मधुरत्रितयैर्व्वापि द्रव्यैरष्टाभिरीरितैः॥"
इति कृष्णानन्दकृततन्त्रसारः॥
हेरम्बजननी, स्त्री, (हेरम्बस्य जननी।) दुर्गा। इति शब्दरत्नावली॥
हेरम्बहृद्, पुं, देशविशेषः। स च दक्षिणप्रदेशे वर्त्तते। इति शब्दरत्नावली॥
हेरिकः, पुं, (हि+इकन्। कुट् च।) चरः। इति हेमचन्द्रः॥
हेरुकः, पुं, (हि+उकन्। कुट् च।) बुद्धभेदः। महाकालगणः। इति मेदिनी॥ शिवलिङ्गविशेषः। यथा,—
"शिवलिङ्गञ्च तत्रास्ति शिलायां हेरुकाह्वयम्।
नदीदक्षिणपूर्व्वस्यां नायकं तन्तु पूजयेत्॥"
इति कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्यायः॥ गणेशः। इति तत्रैव॥
हेलञ्जी, स्त्री, (हेलं विनोतीति। वि+ड। ङीष्। पृषोदरात् साधुः।) हिलमोचिका। हेलञ्जा इति भाषा। इति शब्दचन्द्रिका॥ (हिलमोचिकाशब्देऽस्या गुणादयो ज्ञेयाः॥
हेलनं, क्लो, (हेड्+ल्युट्। डलयोरैक्यम्।) अवहेला। इति शब्दरत्नावली॥ (यथा, भागवते। ६। २। १४।
"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव च।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः॥")
हेलाः, स्त्री, (हिल्+घञ्। टाप्।) स्त्रीणां शृङ्गारभावजक्रियाविशेषः। इत्यमरः।१।७।३२। सुरते प्रौढ़ेच्छा हेला। यदाह।
"प्रौढ़ेच्छा याति रूढ़ानां नारीणां सुरतोत्सवे।
शृङ्गारशास्त्रतत्त्वज्ञैर्हेला सा परिकीर्त्तिता॥"
इति।
अन्ये तु।
"स एव हेला सुव्यक्तः शृङ्गाररससूचकः।"
इत्याहुः। अस्यार्थः। हाव एव स्फुटशृङ्गारानुभावो हेलेति। अन्ये त्वाहुः विलासादयो दश स्वाभाविकाः भावहावहेलास्त्रयोऽङ्गजाः शोभादयः सप्त प्रयत्नजाः। इति विंशतिरलङ्काराः। तेषु।
"देहात्मकं भवेत् सत्त्वं सत्त्वाद्भावः समुत्थितः।
भावात् समुत्थितो हावो हावाद्धेला समुत्थिता॥"
इति॥
हिल श्र हावक्रतौ घञ् स्त्रीत्वं लोकाश्रयात्।
हेलिरपि।
"हेलिः पुंसि रवौ हेलिर्हेलायामपि योषिति।"
इति हेमः। इति भरतः॥
अपि च।
"हाव एव भवेद्धेला व्यक्तः शृङ्गारसूचकः।"
इत्युज्ज्वलनीलमणिः॥*॥
अवज्ञा। इति मेदिनी॥ (यथा, मार्कण्डेयपुराणे। १४। २८।
"स्वल्पं पुष्पं शुभं गन्धं हेलया सम्प्रयच्छति।
सर्व्वं वाप्यथवा शब्द रसं रूपमथापि वा॥")
ज्योत्स्ना इति कश्चित्॥
हेलावुकः, पुं, अक्षविक्रयी। इति हारावली॥
हेलिः, पुं, (हिलति। हिल+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) सूर्य्यः। इति त्रिकाण्डशेषः॥ आलिङ्गनम्। इति केचित्॥
हेलिः, स्त्री, (हिल श्र हावक्रतौ+इन्।) हेला। इति हेमः। इत्यमरटीकायां भरतः॥
हेष, ऋ ङ अश्वानां स्वने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ङ, हेषते घोटकः। जिहेषे। ऋ, अजिहेषत्। इति दुर्गादासः॥
हेषा, स्त्री, (हेष+भावे अः।) अश्वानां स्वनः। (यथा, मार्कण्डेयपुराणे। २२। २०।
"कृतार्त्तहेषाशब्दो वै त्रस्तः साश्रुविलोचनः।
नीतः सोऽश्वस्य तेनैव दानवेन दुरात्मना॥")

तत्पर्य्यायः। क्ष्वेपा २। इत्यमरः। २।७।४७॥ क्ष्वेपा ३। इति तट्टीका॥

हेयी, [न्] पुं, (हेया इति शब्दोऽस्त्यस्य। इनिः।) अश्वः। इति त्रिकाण्डशेषः॥

हे है, व्य, (हे च है च।) सम्बोधनम्। ह्वेतिः। इति मेदिनी॥

हे, व्य, (हिनोतीति। हि गतौ वाहुलकात् डे।) सम्बोधनम्। आह्वानम्। इति मेदिनी॥

हैतुकः, पुं, (हेतुना चरतीति। हेतु+ठक्। मदयुक्तिव्यवहारी। यथा, मनुः।

"त्रैविद्यो हैतुकस्तर्की निरुक्तो धर्म्मपाठकः।
त्वयाग्निमः पूर्व्वं परिषत् स्याद्दशावरा॥"

त्रैविद्यः त्रिवेदपारगः। हैतुकः मदयुक्तिव्यवहारी। इति व्यवहारतत्त्वम्॥ हेतुद्वारा सत्कर्म्मसु सन्देहकर्त्ता। यथा,—

"पाषण्डिनो विकर्म्मस्थान् वैड़ालव्रतिकान् शठान्।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत्॥"

इति विष्णुपुराणे। ३। १८। ८८॥

पाषण्डादीनां लक्षणम्।

"भ्रष्टः स्वधर्म्मात् पाषण्डो विकर्म्मस्थो निगद्यते।
यस्य धर्म्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः।
प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम्॥"

तद्वान् वैड़ालव्रतिकः।

"प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते मृगम्।
व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः॥
सन्देहकृत् हेतुभिर्यः सत्कर्म्मसु स हैतुकः।
अव्यक्तदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः।
शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः॥"

इति तट्टीका॥

(फलाभिसन्धानयुक्ते, त्रि॥)

हैमं, क्ली, (हिमे भवम्। अण्।) प्रातर्हिमोद्भवजलम्। इति राजनिघण्टः॥ हिमभवे, त्रि॥ (यथा, रघौ। १६। ७।

"लब्धान्तरा सावरणेऽपि गेहे
योगप्रभावो न च लक्ष्यते ते।
बिभर्षि चाकारमनिर्वृतानां
मृणालिनी हैममिवोपरागम्॥")

हेमजाते च त्रि॥ इत्यमरः। २। ८। ३२॥ (यथा, रघौ। ६। १५।

"आकुञ्चिताग्राङ्गुलिना ततोऽन्यः
किञ्चित् समावर्ज्जितनेत्रशोभः।
तिर्य्यग् विसंसर्पिनखप्रभेण
पादेन हैमं विलिलेख पीठम्॥")

हैमः, पुं, भूनिम्बः। इति राजनिर्घण्टः॥ (हेम्नो विकारः। हेम+अण्।) हेम्नो विकारः। इति मुग्धबोधव्याकरणम्॥ (शिवः। यथा, महाभारते। १३। १७। ६३।

"हैमो हेमकरो यज्ञः सर्व्वधारी धरोत्तमः॥"

पर्व्वतविशेषः। यथा, महाभारते। १३। १९। ५४।

"कैलासं मन्दरं हैमं सर्व्वाननुचचार ह।
तानतोत्य महाशैलान् कैरातं स्थानमुत्तमम्॥")

हैमनं, क्ली, पुं, (हैमन्त एव इति। "सर्व्वत्राण् च तलोपश्च।" ४। ३। २२। इति स्वार्थे अण् तलोपश्च।) हेमन्त ऋतुः। यथा। हैमन्तहैमनावस्त्रौ। इति शब्दरत्नावली॥ (हैम इदमित्यण्। न टिलोपः।) स्वर्णजाते हिमजाते च त्रि॥ (हैमन्तभवे च त्रि। यथा, किरातार्জ্জुनीये। १७। १२।

"उमापतिं पाण्डुसुतप्रणुन्नाः
शिलीमुखानव्यथयाम्बभूवुः।
अभ्युत्थितस्याद्रिपतेर्नितम्ब-
मर्कस्य पादा इव हैमनस्य॥")

हैमनः, पुं, (हैमन्त एव अण्। तलोपश्च।) मार्गशीर्षमासः। इति राजनिर्घण्टः॥ (हैमन्ते जातः अण् तलोपश्च।) हिमकालोद्भवषष्टिकधान्यम्। अस्य गुणाः।

"हैमनास्तु हिमा ह्रस्वा मधुरा बहुवर्च्चसः।"

इति राजवल्लभः॥

हैमन्तं, क्ली, पुं, (हैमन्त+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।" ४।३।१६। इति अण्।) हेमन्त ऋतुः। हेमन्तसम्बन्धिनि, त्रि। इति हैमन्तशब्दात् स्वार्थे ष्णप्रत्ययेन निष्पन्नम्॥

हैमन्तिकं, क्ली, (हैमन्ते भवः। ठञ्।) शालिधान्यम्। आमन धान इति भाषा। यथा,—

"हैमन्तिकं सितास्त्रिन्नं धान्यं सुस्तास्तिला यवाः॥"

इति हविष्यान्नप्रकरणे तिथ्यादितत्त्वम्॥ हेमन्तकालजाते, त्रि॥ (यथा आश्वलायनीयश्रौतसूत्रे। ४। १२। १।

"बृहस्पतिः पांक्तस्त्रिणवः शाक्करो हैमन्तिकः॥")

हैममुद्रिकः, त्रि, स्वर्णमुद्रिकाविशिष्टः। हैमी मुद्रिका यस्य इति बहुव्रीहिसमासनिष्पन्नः॥ इति मुग्धबोधव्याकरणम्॥

हैमलः, पुं, क्ली, (हिमल+अण्।) हेमन्त ऋतुः। हिमलशब्दात् ष्णप्रत्ययेन निष्पन्नः। इति कश्चित् शब्दरत्नावली॥ हैमन इति साधुपाठः॥

हैमवतं, क्ली, (हिमवतोऽदूरभवो देशः हिमवत इदं वा। अण्।) भारतवर्षम्। इति त्रिकाण्डशेषः॥

हैमवतः, पुं, विषभेदः। इति हेमचन्द्रः॥ (हिमालयसम्बन्धिनि, तज्जाते च त्रि॥ देशविशेषः। यथा, महाभारते। २। ५०। २०।

"निषदान् पारसीकांश्च क्षणान् हैमवतांस्तथा॥")

हैमवतवर्षं, क्ली, भारतवर्षम्। यथा,—

"एतद्धैमवतं वर्षं भारती यत्र सन्ततिः।
हेमकूटं परं यत्र नत्वा किंपुरुषोत्तमः॥"

इति वाराहे रुद्रगीता॥

हैमवती, स्त्री, (हिमवतोऽपत्यं स्त्री। अण्। ङीप्।) पार्व्वती। (यथा, देवीभागवते। १२। ८। ५७।

"उमाभिधाना पुरतो देवी हैमवती शिवाम्॥")

हरीतकी। इत्यमरः। १।१।३८; २। ४। ५८॥ स्वर्णक्षीरी। (अस्याः पर्य्यायो यथा,—

"कटुपर्णी हैमवती हेमक्षीरी हिमावती।
हैमाह्वा पीतदुग्धा च तन्मूलघ्नोकमुच्यते॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) श्वेतवचा। इति मेदिनी॥ (अस्याः पर्य्यायो यथा, "षड्ग्रन्थोग्रा वचा श्वेया श्वेता हैमवतीति च।"

इति गारुड़े २०८ अध्याये॥

हिमवतः प्रभवति प्रकाशते प्रथमं दृश्यते इति। "प्रभवति।" ४। ३। ८३। इत्यण्।) गङ्गा। इति धरणिः॥ (यथा, महाभारते। ३। १०८। १६।

"एवमुक्तः प्रत्युवाच राजा हैमवतीं तदा।
पितामहा मे वरदे! कपिलेन महानदि!।
अन्वेषमाणासुरगं नीता वैवस्वतक्षयम्॥"

हिमवति भवा इति। अण्।) रेणुका। कपिलद्राक्षा। श्वेतवी। इति राजनिर्घण्टः॥

हैमा, } स्त्री, (हैम तदर्णोऽस्त्यस्याः इति अण्।
हैमी, } वा ङीप्।) पीतयूथिका। इति शब्दरत्नावली॥ (यूथिकाशब्दे अस्या विषयो ज्ञातव्यः॥

हैयङ्गवीनं, क्ली, (स्त्री गोर्दोहस्य विकारः इति। "हैयङ्गवीनं संज्ञायाम्।" ५। २। २१। इति खञ् हियङ्गादेशश्च।) सद्योगोदोहोद्भवं घृतम्। इत्यमरः। २। ९। ५२॥ नवनीतम्। इति रत्नमाला राजनिर्घण्टश्च॥ (यथा, हरिवंशे। भविष्यपर्व्वणि। ५८। १०।

"हैयङ्गवीनं क्षीराणि दधि वा किमजीजनन्।
गोधनं सर्व्वमेवेदं नीरोगं प्रतियद्यते॥")

तत्पर्य्यायः। मरजम् २ मन्यजम् ३ कलम्बुटम् ४। इति हारावली॥

हैरिकः, पुं, (हिनोतीति। रक्। हैरं मासुरी माया। तज्जानाति। ठक्।) चौरः। इति धरणिः॥

हैहयः, पुं, (हेह्या अपत्यम्। "स्त्रीभ्यो ढक्।" ४।१।१२०। इति ढक्। वृषोदरादित्वात् साधुः। यद्वा हेयशब्देन नामैकदेशग्रहणेन नामग्रहणात् हेयाशब्देन हेयाशब्दं कुर्व्वन् इयति गच्छतीति हेहयोऽर्थः तस्यायं "शिवादिभ्योऽण्।" ४। १। ११२। इत्यण्। यद्वा, हे भक्त हे भक्त इति वदन् इयति गच्छतीति हेहयो विष्णुः। तस्यायं हैहयः।) कार्त्तवीर्य्यः। इति हेमचन्द्रः॥ देशविशेषः। यथा,—

"पश्चिमे हैहयास्तालजङ्घेच्छवासगकादयः॥"

इति ज्योतिस्तत्त्वे कूर्म्मचक्रम्॥

हैहयः, पुं, (हैहयाः तद्देशवासिनः तेषां राजा अण्।) कार्त्तवीर्य्यराजः। इति शब्दरत्नावली॥ (यथा, रघौ। ११। ७४।

"बिभ्रतोऽस्त्रमचलेऽप्यकुण्ठितं
द्वौ रिपू मम मतौ समागसौ।
धेनुवत्सहरणाच्च हैहयः
त्वञ्च कीर्त्तिमपहर्त्तुमुद्यतः॥")

हो, व्य, (ह्रियते अनेनेति। ह्रे+डो। निपातनात् साधुः।) सम्बोधनम्। आह्वानम्। इति मेदिनी॥ (यथा, किरातार्জ্জुनीये। १५। २०।
"ननु हो मयनाराघो घोरानाय महीनु न।
तयदा तवदा भीमा माभोदावत दायत॥")
विस्मयः। इत्यमरः॥

होड, ऋ ङ गतौ। अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अशुहोड़त्। ङ, होड़ते। इति दुर्गादासः॥

होड़ः, पुं, (होड़ते गच्छतीति। होड़ गतौ+अच्।) नौकाविशेषः। हुड़ो इति भाषा। तत्पर्य्यायः। तरान्धुः २ वहनम्३ वहित्रम्४ वार्व्वटः ५। इति त्रिकाण्डशेषः। (होड्यते इति। होड् अनादरे+कर्म्मणि घञ्।) दक्षिणराढ़ीयमौलिककायस्थानां द्विसप्तत्यधिकशततमान्तर्गतपद्धतिविशेषः। इति कुलाचार्य्यग्रन्थः॥ गौड़देशीयश्रोत्रियब्राह्मणविशेषाणामुपाधिश्च। अस्य प्रमाणं भवदामङ्गलग्रन्थे ध्रुवानन्दमिश्रग्रन्थे च द्रष्टव्यम्॥

होड़ा, [ऋ] पुं, चोरः। इति केचित्॥

होता, [ऋ] पुं, (जुहोतीति। हु+"नप्तृनेष्टृत्वष्टृहोतृ इति।" उणा० २। ९६। इति ष्टन् निपातितश्च। यद्वा, हु+ष्टच्।) ऋग्वेदवेत्ता। इत्यमरः। २। ७। १७॥ होमकर्त्ता। यथा। विशिष्टदेशावच्छिन्नप्रदेशोपस्थितहविष्यागस्य होमत्वात् प्रदेशस्य तदभिधाननिमित्तमित्यर्थः। तेन हुधात्वर्थव्यवच्छेदकप्रदेशानुकूलव्यापारवति ऋत्विजि होता इत्यादिव्यपदेशः। इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः॥

होतृकारः, पुं, होतुर्ल्लकारः। होतुर्माता। इति मुग्धबोधव्याकरणम्॥

होत्रं, क्ली, (ह्रियते इति। हु+"हुयामाश्रुभसिभ्यस्त्रन्।" उणा० ४। १६७। इति त्रन्।) हविः। इति त्रिकाण्डशेषः॥ होमः। इति हेमचन्द्रः॥

होत्रा, स्त्री, (हु+त्रन्+टाप्।) स्तुतिः। इति केचित्॥ (आह्रयमाना देवता। यथा, ऋग्वेदे। १। १८। ८।
"आट्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरम्।
होत्रा देवेषु गच्छति ————॥"
'होत्रा ह्रयमाना देवता।' इति तद्भाष्ये सायनः॥)

होत्री, [न्] पुं, होता। होत्रं विद्यतेऽस्य इति होत्रशब्दात् इन्प्रत्ययेन निष्पन्नः॥

होत्री, स्त्री, (हु+ष्टच्+ङीप्।) यजमानरूपाग्नेरस्य मूर्त्तिः। यथा,—
"या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्व्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥"
इत्यभिज्ञानशकुन्तलाप्रथमश्लोकः॥

होत्रीयं, क्ली, (होत्राय हितम् होतुरिदं वेति। छः।) हविर्गेहम्। इति हेमचन्द्रः॥ होत्रसम्बन्धिनि, त्रि॥ (यथा, शतपथब्राह्मणे। ८। ४। ३। ७।
"एकविंशतिं होत्रीय उपदधाति॥")

होमः, पुं, (हवनमिति। हु+"अर्त्तिस्तुसुहुस्त्रिति।" उणा० १। १३८। इति मन्।) पञ्चमहायज्ञान्तर्गतयज्ञविशेषः। इत्यमरः। २। ७। १४॥ स तु देवयज्ञः। यथा,—
"अध्यापनं ब्रह्मयज्ञः पित्रयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥"
इति मनुः॥

तल्लक्षणं यथा,—
"विशिष्टदेशावच्छिन्नप्रदेशोपस्थितत्यागः॥"
इति श्रीकृष्णतर्कालङ्कारः॥ *॥

अथ नित्यहोमः। तदुक्तं सोमभुजगावस्थाम्।
"नाजसः सिद्धते मन्त्रो नाहुतय फलप्रदः।
नानिष्टो यच्छते कामान् तस्माच्चितयमर्च्चयेत्॥
पूजया लभते पूजां जपात् सिद्धिर्न संशयः।
विभूतिं चाग्निकार्य्येण सर्व्वसिद्धिञ्च विन्दति॥"
नीलतन्त्रेऽपि।
"नित्यहोमं प्रवक्ष्यामि सर्व्वार्थे येन विन्दति॥
सपर्य्यां सम्यगापाद्य बलिपूर्व्वं चरेद्विधिम्॥
ततो होमं तर्पणञ्च चरेत् साधकसत्तमः।
बलिवैश्वादिकं चैव ब्राह्मणः समुपाचरेत्॥
अर्घोदकेन संप्रोक्ष्य तिस्रो रेखाः समालिखेत्।
विधिवदग्निमानीय क्रव्यादेभ्यो नमस्तथा॥
मूलमन्त्रं समुच्चार्य्य कुण्डे वा स्थण्डिलेऽपि वा।
भूमौ वा संस्तरेद्वह्निं व्याहृतिव्रितयेन च।
स्वाहान्तेन विधा हुत्वा षड़ङ्गहवनं चरेत्॥"
तथा।
"ततो देवीं समावाह्य मूलेन षोड़शाहुतिम्।
हुत्वा स्तुत्वा नमस्कृत्य विसृजेदिन्दुमण्डले॥"
श्यामादौ विशेषः।
"भैरवांश हुनेदष्टौ आज्यान्वितैस्तिलैः शुभैः।
पूर्व्वादिदिक्क्रमेणैव ततो होमं समाचरेत्॥"
अथ संक्षेपहोमप्रयोगः।
"कुण्डे वा स्थण्डिले वापि वीक्षणादिभिः संस्कृते।
प्रागग्रा उदगग्राश्च तिस्रो रेखाः समालिखेत्॥"
तथा च।
"वीक्षणं मूलमन्त्रेण शरेण ताड़नं मतम्।
तेनैव प्रोक्षणं प्रोक्तं वर्म्मणाभ्युक्षणं मतम्॥"
ततो मूलमुच्चार्य्य कुण्डाय नमः इति संपूज्य प्रागग्रा उदगग्रास्तिस्रो रेखाः कर्त्तव्याः। प्रागग्रेषु मुकुन्देशपुरन्दरान् प्रादक्षिण्येन संपूज्य उदगग्रासु ब्रह्मवैवस्वतेन्दून् पूजयेत्। सन्दरीपक्षे तु सर्व्वत्र षट्तारो प्रयोगः षट्तारी च ऐं क्लीं श्रीं ऐं क्लीं सौः तत्रणे नमः एवं क्रमेण पूजयेत्। तथा ब्रह्मसंहितायां होमकुण्डे।
"ऐशान्यां वेदिकां हस्तविस्तारोन्नतिमालिखेत्।
नोम्।
कृत्वास्मिन् स्थापयेत् कुम्भं यथोक्तक्रमयोगतः॥
तत्र संपूजयेद्देवं यथाविभवोपचारकैः।
ततो होमं प्रकुर्व्वीत देवतासन्निधानतः॥"
ततः कुण्डमध्ये षटकोणवृत्तत्रिकोणं तद्बहिरष्टदलपद्मं तद्बहिश्चतुरस्रं चतुर्द्वारसमेतं लिखित्वा तदुपरि मूलेन पुष्पाञ्जलीन् दद्यात्। सन्दरीपक्षे तु बालया। ततः सर्व्वाणि प्रणवेनाभ्युक्ष्य वह्नेर्योगपीठमर्च्चयेत्। तद् यथा। कर्णिकोपर्य्याधारशक्त्यादीन् संपूज्य अग्न्यादिकोणचतुष्केषु ॐ धर्म्माय नमः ॐ ज्ञानाय वैराग्याय ऐश्वर्य्याय पूर्व्वादिदिक्षु अधर्म्माय अज्ञानाय अवैराग्याय अनैश्वर्य्याय मध्ये ॐ अनन्ताय नमः। एवं पद्माय सं अर्कमण्डलाय द्वादशकलात्मने नमः। उं सोममण्डलाय षोड़शकलात्मने नमः। मं वह्निमण्डलाय दशकलात्मने नमः। ततः केशरेषु पूर्व्वादिमध्ये च ॐ पीताय नमः। एवं श्वेतायै नमः कृष्णायै नमः। कृष्णायै धूम्रायै तीव्रायै स्फुलिङ्गिन्यै रुचिरायै ज्वालिन्यै ततो रं वह्नयासनाय नमः। ततः।
"वागीश्वरीमृतुस्नातां नीलेन्दीवरलोचनाम्।
वागीश्वरेण संयुक्तां क्रीड़ाभावसमन्विताम्॥"
इति ध्यात्वा ॐ ह्रीं वागीश्वराय नमः ॐ वागीश्वर्य्यै नमः। इति मन्त्रेण पञ्चोपचारैः संपूज्य सूर्य्यकान्तादिसम्भूतं श्रोत्रियगेहजं वा वह्निमानयेत्। सन्दरीपक्षे तु कामेश्वरं कामेश्वरीं पूजयेत्। गौतमीये।
"पाषाणभववह्निञ्च यदि वारणिसम्भवम्।
श्रोत्रियाणां गेहजञ्च वनस्थं वाथवा हरेत्॥
यदृच्छालाभसंयुक्तो श्रयोग्यो यागकर्म्मणि।
निरग्निब्राह्मणाल्लब्धो ह्यर्थलाभकरो भवेत्॥
चत्वार्य्येतानि वह्नीनां फलं दद्यादुताशनः।
वैश्यात् शूद्राच्च विफलं जायते होमकर्म्मणि।
तस्मात् सर्व्वप्रयत्नेन वह्निमुक्तं समाहरेत्॥"
तत्रान्तरे।
"द्विजातिभवनाद्वापि वह्निमानीय साधकः।
वौषड़न्तेन मूलेन मन्त्रितं तं विलोकयेत्॥
अग्निमावाहयेदस्त्रमन्त्रेण तदनन्तरम्।
ह्रूं फड़न्तेन मूलेन क्रव्यादांशं परित्यजेत्॥"
ततः ॐ वह्नेर्योगपीठाय नमः चतुर्दिक्षु ॐ वामायै नमः एवं ज्येष्ठायै रौद्र्यै अम्बिकायै। ततो मूलमुच्चार्य्य अमुकदेवताकुण्डाय नमः। इति कुण्डं संपूज्य तदधो वागीश्वरीं तत्तद्देवतारूपां ऋतुमतीं ध्यात्वा यथोक्तवह्निमानीय वीक्षणादिभिः संस्कृत्य रमिति तस्मात् वह्निमुद्धृत्य मूलमुच्चार्य्य ह्रूं फट् क्रव्यादेभ्यः स्वाहा इत्यस्त्रेण क्रव्यादांशं परित्यज्य वह्निमन्त्रेण संरक्ष्य ह्रूं इत्यवगुण्ठ्य धेनुमुद्रया अमृतीकृत्य बाहुभ्यां

समुद्धृत्य कुण्डोपरि त्रिः परिभ्राम्य जानुसृष्ट-महीतलः शिवबीजवुद्या आत्मनोऽभिमुखं देव्या योनौ एनं निधेत्। ततो क्रौं वह्निमूर्त्तये नमः इत्यभ्यर्च्य रं वह्निचैतन्याय नमः इति चैतन्यं तत्र संयोज्य ॐ चित् पिङ्गल हन हन दह दह पच पच सर्व्वं ज्ञापय ज्ञापय स्वाहा इति ज्वालयेत्। ततः।

"अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम्॥"

इत्युपतिष्ठेत्॥

ततो अग्ने त्वममुकनामासीति नाम कृत्वा ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्व्वकर्म्माणि साधय स्वाहा। अनेनार्घ्यादिभिः संपूज्य ॐ अग्नेर्हिरण्यादिसप्तजिह्वाभ्यो नमः। ॐ महस्वाचिषे हृदयाय नमः इत्यादि अग्नि-षड्ङ्गेभ्यो नमः। ॐ अग्नये जातवेदसे इत्याद्यष्टमूर्त्तिभ्यो नमः। तदग्रे ॐ ब्राह्म्याद्यष्ट-शक्तिभ्यो नमः। तदग्रे ॐ पद्माद्यष्टनिधिभ्यो नमः। तदग्रे ॐ इन्द्रादिलोकपालेभ्यो नमः। तदग्रे ॐ वज्राद्यस्त्रेभ्यो नमः। ततः प्रादेश-मात्रं कुशपत्रद्वयं घृतमध्ये निक्षिप्य सव्यासव्य-मध्यभागेषु स्रुचं पिङ्गलां सुषुम्नां ध्यात्वा होमं कुर्य्यात्। स्रुवेण दक्षिणभागादाज्यं गृहीत्वा ॐ अग्नये स्वाहा इति अग्नेर्दक्षिणनेत्रे जुहु-यात्। तथा वामभागादाज्यं गृहीत्वा ॐ सोमाय स्वाहा इति वामनेत्रे जुहुयात्। ततो मध्यभागादाज्यं गृहीत्वा ॐ अग्निसोमाभ्यां स्वाहा इत्यग्नेर्ललाटनेत्रे जुहुयात्। पुनर्दक्षि-णतः नम इति घृतं गृहीत्वा ॐ अग्नये स्विष्टिकृते स्वाहा इत्यग्निमुखे। ततो महा-व्याहृतिहोमः। ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्व्वकर्म्माणि साधय स्वाहा इत्यनेन त्रिवारं जुहुयात्। ततः अग्नौ मूलेन पीठ-पूर्व्वकं देवतां संपूज्य तन्मुखे घृतेन मूलमन्त्रेण पञ्चविंशतिवारं जुहुयात्। वह्निदेवतयोरा-त्मना सह ऐक्यं विभाव्य मूलमन्त्रेण एकादशा-हुतीर्जुहुयात्। ततो मूलमन्त्रस्य अङ्गदेव-ताभ्यः स्वाहा शक्त्यैक्यं प्रत्येकमेकैकाहुतिं जुहुयात्। ततः सङ्कल्पं विधाय तत्तत्कल्पोक्त-द्रव्येण होमं कुर्य्यात्। ततो मूलमन्त्रेण पूर्णाहुतिं दत्त्वा संहारमुद्रया स्वेष्टदेवतां हृदये समानीय क्षमस्वेति विसृज्य दक्षिणां दत्त्वा अच्छिद्रावधारणं कुर्य्यात्। इति तन्त्रसारः॥ बृहद्धोम-प्रयोगस्तु तत्रैव द्रष्टव्यः॥

होमकः, पुं, (होम+संज्ञायां कन्।) होता। यथा, मात्स्ये ८३। १२८—१२९ श्लोकौ।

"पूर्व्वद्वारे च संस्थाप्य ब्रह्मत्वं वेदपारगम्।
यजुर्व्विदं तथा याम्ये पश्चिमे सामवेदिनम्॥
अथर्व्ववेदिनं तद्वदुत्तरे स्थापयेद्बुधः॥
अष्टौ तु होमकाः कार्य्या वेदवेदाङ्गवेदिनः॥"

होमकुण्डं, क्ली. (होमार्थं कुण्डम्।) होमार्थ-कुण्डम्। तत्पर्य्यायः। हवनी २। इति त्रिकाण्ड-शेषः॥ अस्य विवरणं कुण्डशब्दे द्रष्टव्यम्॥

होमधान्यं, क्ली, (होमाय युक्तं धान्यम्।) तिलः। इति राजनिर्घण्टः॥

होमधूम, पुं, (होमजातः धूमः।) होमीयाग्नि-धूमः। तत्पर्य्यायः। निगमः २। इति हेमचन्द्रः॥

होमभस्म, [न्] क्ली, होमजातं भस्म। तत्-पर्य्यायः। वैष्टुतम् २। इति हेमचन्द्रः॥

होमाग्निः, पुं, (होमस्य अग्निः।) यज्ञवह्निः। तत्पर्य्यायः। महाज्वालः २ महावीरः ३ प्रवर्गः ४। इति हेमचन्द्रः॥

होमिः, पुं, (ह्रियते अस्मिन्निति। हु+इन्। मुट् च।) अग्निः। (ह्रियते अनेनेति। इन् मुट् च।) घृतम्। इति मेदिनी॥ जलम्। इति शब्दरत्नावली॥

होमी, [न्] पुं, (होमः अस्यातीति। इन्।) होमकर्त्ता। यथा, तिथ्यादितत्त्वे।

"तिलोदकी तिलस्नायी तिलहोमी तिलप्रदः।
तिलभुक् तिलवापी च षट्तिली नावसीदति॥"

(जुहोतीति। हु+"उल्मुकदर्विहोमिनः।" उणा० ३। ८४। इति मिनिः। निपातितश्च। यजमानः। इत्युणादिवृत्तौ उज्ज्वलदत्तः॥)

होम्यं, क्ली, (होमाय हितम्। यत्।) घृतम्। इति राजनिर्घण्टः॥ होमीयद्रव्यमात्रे, त्रि॥ (यथा, हरिवंशे भविष्यपर्व्वणि २५१ अध्याये।

"होता पोता हन्ता नेता मन्ता होम्यहोता-परात्परस्त्वम्॥")

होरा, स्त्री, (होलति हुल्यते वेति। हुल हिंसा-सम्वरणयोः+अच्। घञ् वा। रलयोरैक्यम् टाप्।) लग्नम्। राश्यर्द्धम्। रेखा। शास्त्र-भेदः। इति मेदिनी॥ द्वितीयार्थस्य विशेषो यथा, ज्योतिस्तत्त्वे।

"विषमर्क्षेषु प्रथमहोराः स्युश्चण्डरोचिषः।
द्वितीयाः शशिनो युक्तु व्यत्ययाद्गणयेत् सदा॥"

मार्कण्डेयपुराणे गणभेदाध्याये।

"चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्षते।
पञ्चमादर्द्धरात्रादिहोराणां विद्यते क्रमः॥"

होलकः, पुं, (हु+विच्। लक्ष्यते आस्वाद्यते इति। लक्+अप्।) क्षणाग्निभृष्टार्द्धपक्वशमीधान्यम्। होरा इति हिन्दी भाषा। यथा, भावप्रकाशे।

"अर्द्धपक्वैः शमीधान्यैस्तृणभृष्टैश्च होलकः।
होलकोऽल्पानिलो भेदःकफदोषश्रमापहः॥
भवेदयं होलको यस्य स च तत्तद्गुणो भवेत्॥"

होलाकः, पुं, स्त्रेदविशेषः। यथा, चरकसूत्रस्थाने।

"धौतौकान्तु करीषाणां यथोक्तानां प्रदीपयेत्।
शयनान्तःप्रमाणेन शय्यामुपरि तत्र च।
सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत्॥
स्वच्छिन्नः मृदुं तत्राभ्यक्तः स्विद्यति ना सुखम्।
होलाकस्वेद इत्येष सुखश्चोक्तो महर्षिणा॥"

धौतौका शुष्कगोमयकृतोऽग्निविशेषः॥

होलाका, स्त्री. (हु+विच्। तं लाति। ला+क संज्ञायां कन् टाप्।) वसन्तोत्सवः। होली इति भाषा। इति दायभागटीका॥ तदधि-करणन्यायो यथा। अथ होलाकाधिकरणम्। प्रतीच्यानां होलाकाचारदर्शनेन तदर्था होलाका आचरणीया इति सामान्यविधिः कल्प्यते। न तु प्राच्यानामनाचरणात् प्रतीच्येरिति तत्र पदं देयं सामान्यविधिनैव प्रतीच्याचारोपपत्तेः। प्राच्यानामनाचारस्य इच्छाविरहेणैव उपपत्तेः। इच्छाविरहस्य तद्देशीयपूर्व्वपूर्व्वनाचारदर्शनात्। प्रतीच्यानामुल्कादानाद्याचारविरहवत्। न ह्यनाचारार्थं वेदः कल्प्यते। तथा च यत्र सामान्यश्रुत्या उपपत्तिस्तत्र विशेषविधिर्न कल्प्यते गुरुरनुगन्तव्यः सदेतियत्। न हि कर्म्मकाले तदसम्भवात् तदन्यकाले इति विशेष-णीयम्। इति अधिकरणकौमुदी॥ अन्यच्च। यथा होलाकाधिकरणे प्राच्यकर्त्तृकहोलाकान-ष्ठानोपपत्तये होलाका कर्त्तव्येत्येव श्रुतिः कल्पिता। तावतैव तदुपपत्तेः न तु प्राच्यादिः पदवती कल्पनागौरवात् तद्वदत्रापि अज्ञको अंगद्वयं गृह्णीयादिति श्रुतिः कल्पनीया न तु पित्र्यादिपदवती तदयुक्तं तत्र प्राच्यकर्त्तृकानु-ष्ठानस्यावश्यकल्पनीयसामान्यश्रुत्येवोपपत्तेः। न चाप्राच्यानामननुष्ठानार्थं प्राच्यपदवती कल्पनी-मितिवाच्यम्। तेषामननुष्ठानस्यानाचारूपस्य श्रुतिकल्पनानिमित्तत्वानुपपत्तेः। इति दाय-भागः॥

ह्री, व्य, (ह्रियते अनेनेति। ह्री+डी।) सम्बो धनम्। आह्वानम्। इति मेदिनी॥

ह्रीड, ऋ ङ गतौ, अनादरे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) चतुर्थैकस्वरो। ऋ, अजुह्रीड़त्। ङ, ह्रीड़ते। इति दुर्गादासः॥

ह्रीतकः, त्रि, (ह्रीतुरागतम्। "ऋतहञ्।" ४॥ ३। ७८। इति ठञ्) ह्रीतसम्बन्धीयः। इति ह्रीतशब्दात् कण्प्रत्ययेन निष्पन्नः॥

ह्रीम्यं, क्ली, (ह्रीमाय हितं। यत्।) घृतम्। इति राजनिर्घण्टः॥ होमीयद्रव्ये, त्रि॥

ह्रीम्यधान्यं, क्ली, (ह्रीम्य इव तत् धान्यञ्च।) तिलः। इति राजनिर्घण्टः॥ इति केचित्॥

ह्रु, ङ लु चौर्य्ये। इति कविकल्पद्रुमः॥ (अदा०-आत्म०-सक०-अनिट्।) ङ लु, ह्रुते। इति दुर्गादासः॥

ह्वल, म चाले। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) म, प्रह्वलयति। मित्त्वेऽप्यस्य ह्री. ज्वलह्वलह्वल इत्यादिना केवलस्य ह्रस्वविकल्प-नात् सोपसर्गस्येव नित्यं ह्रस्वः। ह्वालयति ह्वलयति। चालयनम्। इति दुर्गादासः॥

ह्वः, [स्]ञ, (गतमहः। ह्वो निपातितः।) गत-दिनम्। इत्यमरः। ३। ४। २२॥ यथा, राजतरङ्गिण्याम्। ६। ४६।

"त्वयि राजनि निश्चेरैरध्वभिर्विधृतः सुखम्।
ह्वोऽभवन्नवणोत्से मे दिनान्ते श्राम्यतः स्थितिः॥"

ह्वस्तनं, त्रि, (ह्वो भवम्। ह्वस्+"ऐषमोह्यः-

यसोऽन्यतरस्याम्।" ४।२।१०५। इति यञे व्युत्पन्नौ।) ह्रौभवम्। गतदिवसोयम्। इति शब्दमाला॥ (यथा, महाभारते। ५।१८६।४। "ह्रस्वनेन च कोपेन शक्तिं वै प्राहिणोन्मयि॥")

ह्रस्यः त्रि, (ह्रौ भव इति। ह्रस्+"ऐषमोह्यः-श्वसोऽन्यतरस्याम्।" ४।२।१०५। इति त्यप्। ह्रस्वनम्। इति शब्दमाला॥

ह्रग, म ए संवरणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफमध्यः। म, ह्रगयति। ए, अह्रगीत्। इति दुर्गादासः॥

ह्रणिया, स्त्री, (ह्रिणोया। पृषोदरादित्वात् साधुः।) ह्रिणोया। इत्यमरटीकायां भरतः॥

ह्रदः, पुं, (ह्रादते इति ह्राद अव्यक्तशब्दे+घञ्। पृषोदरादित्वात् ह्रस्वः) अगाधजलाशयः। इत्यमरः। १। १०। २५॥ तज्जलगुणाः। ह्रदवारि वङ्क्रिजननं मधुरं कफवातहारि पथ्यञ्च। इति राजनिर्घण्टः॥ किरणः। इत्यमरटीकायां रामाश्रमः॥

ह्रदग्रहः, पुं, (ह्रदस्य ग्रहः।) कुम्भीरः।। इति चिकाण्डशेषः॥

ह्रदिनी, स्त्री, (ह्रदोऽस्यास्तीति। इनि। ङीप्।) नदी। इत्यमरः। १। १८। २५। (यथा, भागवते। २। ७। २८।

"तच्छ्रद्दधेति विपरीर्य्यविलीलजिह्म-सुद्वाटयिष्यदुरगं विहरन् ह्रदिन्याम्॥")

ह्रप, क भाषणे। (चुरा०-पर०-सक०-सेट्।) रेफयुक्तादिरित्येके। क, ह्रापयति। भाषणं कथनम्। इति कविकल्पद्रुमटीकायां ह्रपधातु-कथने दुर्गादासः॥

ह्रस, रवे। इति कविकल्पद्रुमः। (भ्वा०-पर०-अक०-सेट्।) रेफयुक्तः। ह्रसति। इति दुर्गादासः॥

ह्रसिमा, [न्] पुं, (ह्रस्वस्य भावः। "पृथ्वादिभ्य इमनिज् वा।" ५। १। १२१। इति इमनिज्। "स्थूलदूरयुवह्रस्वक्षिप्रेति।" ६। ४। १५६। इति ह्रसादेशः।) ह्रस्वता। ह्रस्वशब्दात् इमन्प्रत्ययेन निष्पन्नः॥

ह्रसिष्ठः, त्रि, (अतिशयेन ह्रस्वः। इष्ठन्। "स्थूलदूरयुवह्रस्वेति।" ६। ४। १५६। इति ह्रसादेशः।) अतिशयह्रस्वः। इत्यमरः। ३। १। ११२॥ ह्रस्वशब्दात् इष्ठप्रत्ययेन निष्पन्नः॥

ह्रसीयान्, [स्] त्रि, (ह्रस्व+ईयसुन्। ह्रसादेशश्च।) अतिशयह्रस्वः॥

ह्रस्व, क्ली, ("सर्व्वनिष्टथरिवेति।" उणा० १।१५३ इत्यत्र "ह्रसशब्दे बाहुलकात् ततोऽपि वन्।" इत्युज्ज्वलदत्तोक्तेर्वन्।) परिमाणविशेषः। यथा, "अनु दीर्घं महद्ह्रस्वमिति तद्वेद ईरितः।"

इति भाषापरिच्छेदः॥

गौरसुवर्णमाषकम्। पुष्पकासीसम् इति राजनिर्घण्टः॥

ह्रस्वः, पुं, स्त्री, (ह्रस+वन्।) प्राकृतपुरुषप्रमाणात्न्यूनमनुष्यः। वाउने इति भाषा। तत्पर्य्यायः। खर्व्वः २ वामनः ३ वामनी ४। इत्यमरभरतौ। २। ६। ४६॥ नीचकः ५ नीचः ६। इति शब्दरत्नावली॥ अकर्त्तनः ७। इति जटाधरः॥ एकमात्रवर्णे, पुं। यथा,—

"एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्॥"

इति मुग्धबोधटीकायां दुर्गादासः॥

मुग्धबोधमते अस्य ख-संज्ञा। यथा। आवत्खर्घप्रु। अ-आ-अ इति वर्णत्रयं क्रमेण ख-र्घप्र-संज्ञं स्यात्। वञ्छ्रह्लाद इ-ई द इत्यादिषु च। तन्मते अस्य घुसंज्ञापि। यथा। खर्घौ घुरू। खर्घुसंज्ञौ घौरुसंज्ञः स्यात्। इति बोधदेवः॥ मेषवृषकुम्भमीनराशयः। यथा। अस्तास्तिमिगोऽविघटाः। इति ज्योतिस्तत्त्वम्॥

ह्रस्वः, त्रि, (ह्रस+वन्) क्षुद्रवस्तुमात्रम्। तत्पर्य्यायः। वामनः २ न्यङ् ३ नीचः ४ खर्व्वः ५। इत्यमरः। ३। १। ७०। नीचैः ६। इति शब्दरत्नावली॥ अनुच्चः ७। इति जटाधरः॥ तद्वैदिकपर्य्यायः। ऋहन् १ ह्रस्वः २ निघृष्वः ३ मापुकः ४ प्रतिष्ठा ५ क्षुधु ६ वम्रकः ७ दभ्रम् ८ अर्भकः ९ क्षुल्लकः १० अल्पः ११। इत्येकादश ह्रस्वनामानि। इति वेदनिर्घण्टौ ३ अध्यायः॥

ह्रस्वकुशः पुं, (ह्रस्वश्चासौ कुशश्चेति। नित्यकर्म्मधारयः।) श्वेतकुशः। इति राजनिर्घण्टः॥

ह्रस्वगर्भः, पुं, (ह्रस्वो गर्भोऽस्य।) कुशः। इति रत्नमाला॥

ह्रस्वगवेधुका, स्त्री, (ह्रस्वा गवेधुका। नित्यकर्म्मधारयः।) गाङ्गेरुकी। इत्यमरः। ३। ४। ११७॥ अस्याः पर्य्यायगुणा नागबलाशब्दे द्रष्टव्याः॥

ह्रस्वजम्बुः, पुं, (ह्रस्वो जम्बुः।) क्षुद्रजम्बुः। इति रत्नमाला॥

ह्रस्वतण्डुलः, पुं, (ह्रस्वः तण्डुलः।) राजान्नम्। इति राजनिर्घण्टः॥

ह्रस्वदर्भः, पुं, (ह्रस्वो दर्भः।) श्वेतकुशः। इति राजनिर्घण्टे ह्रस्वकुशशब्ददर्शनात्॥

ह्रस्वदा, स्त्री, (ह्रस्वैरपि दीयते क्रियते इति। दो+कः।) शङ्खिनी। इति राजनिर्घण्टः॥

ह्रस्वपत्रकः, पुं, (ह्रस्वानि पत्राणि यस्य। कप्।) गिरिजमधूकवृक्षः। इति जटाधरः॥

ह्रस्वपत्रिका, स्त्री, (ह्रस्वानि पत्राण्यस्याः। कप्। टाप् अत इत्वम्) अश्वत्थी। इति राजनिर्घण्टः॥

ह्रस्वप्लक्षः, पुं, (ह्रस्वश्चासौ प्लक्षश्चेति।) क्षुद्रप्लक्षः। तत्पर्य्यायः। सुगीतः २ गीतवीर्य्यकः ३ पुष्कुः ४ महावरोहः ५ ह्रस्वपर्णः ६ पीपरिः ७ भिदुरः ८ मङ्गलच्छायः ९। अस्य गुणाः।

"प्लक्षः कटुः कषायश्च शिशिरो रक्तदोषजित्। मूर्च्छाभ्रमप्रलापघ्नो ह्रस्वप्लक्षो विशेषतः॥"

इति राजनिर्घण्टः॥

ह्रस्वफला, स्त्री, (ह्रस्वं फलं यस्याः।) भूमिजम्बुः। इति राजनिर्घण्टः॥

ह्रस्वमूलः, पुं, (ह्रस्वं मूलं यस्य।) रक्तेक्षुः। इति राजनिर्घण्टः॥

ह्रस्वशाखाशिफः, पुं, (शाखा च शिफा शाखाशिफे। ह्रस्वे शाखाशिफे यस्य।) क्षुपः। इत्यमरः॥

ह्रस्वा, स्त्री, मुद्गपर्णी। नागबला। भूमिजम्बूः। इति राजनिर्घण्टः॥ वामनी च॥

ह्रस्वाग्निः, पुं, (ह्रस्वोऽग्निरस्मात्।) अर्कवृक्षः। इति शब्दचन्द्रिका॥

ह्रस्वाङ्गः, पुं, (ह्रस्वमङ्गमस्य।) जीवकौषधम्। इत्यमरः। २। ४। १४२॥ वामनश्च॥

ह्राद, ङ शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) रेफयुक्तो द्वितीयस्वरौ। ङ, ह्रादते। इति दुर्गादासः॥

ह्रादः, पुं, (ह्राद+घञ्।) शब्दः। इति हेमचन्द्रः॥ (यथा, महाभारते। ७। ८०। २९।

"ह्रादेन गजघण्टानां शङ्खानां निनदेन च॥")

हिरण्यकशिपुपुत्रः। यथा,—

"हिरण्यकशिपोः पुत्राश्चत्वारः सुमहाबलाः। प्रह्लादः पूर्व्वजस्तेषामनुह्रादस्तथैव च॥ संह्लादश्चैव ह्रादश्च ह्रादपुत्रान् शृणुष्व तान्। ह्रादस्य पुत्रौ द्वावास्तां हिण्डिभो मूक एव च॥"

इति वह्निपुराणे कश्यपीयप्रजासर्गः॥

ह्रादिनी, स्त्री, (ह्रादते शब्दायते इति। ह्राद+णिनिः। ङीप्।) विद्युत्। (यथा, महाभारते। ८। ११। २६।

"ह्रादिन्य इव मेघेभ्यः शस्त्रस्य न्यपतन् शराः॥")

वज्रम्। इत्यमरः। १। ३। ८; १। १। ५१॥ नदी। इति भरतः राजनिर्घण्टश्च॥ शब्दकारी। इति शब्दरत्नावली॥

ह्रादी, [न्] त्रि, (ह्रादोऽस्यास्तीति। ह्राद+इनि।) शब्दविशिष्टः। (यथा, महाभारते। ८। ५१। ५१।

"रथाः पञ्चशताश्चान्ये ह्रादिनश्च सुवर्म्मिणः॥")

ह्रासः, पुं, (ह्रस रवे+घञ्।) शब्दः। इति चिकाण्डशेषः॥ क्षयः। यथा, तिथ्यादितत्त्वे।

"ह्रासवृद्धी च सततं दिनरात्र्योर्यथाक्रमम्। सन्ध्या मुहूर्त्तमाख्याता ह्रासे वृद्धौ समा स्मृता॥"

ह्रिणाया, स्त्री, लज्जा। इत्यमरटीकायां भरतः॥ अस्य रूपान्तरम्। ह्रणिया ह्रणीया च॥

ह्रित, त्रि, (ह्रीतः। पृषोदरादित्वात् साधुः।) लज्जितः। विभक्तः। नीतः। इति केचित्॥ अंशे, क्ली॥

ह्रितिः, स्त्री, (ह्रितिः। पृषोदरादित्वात् साधुः।) ह्रीतिः। हरणम्। इति केचित्॥

ह्रिवेरं, क्ली, (ह्रिये लज्जायै वेरमङ्गमस्य। पृषोदरादित्वात् ह्रस्वः।) ह्रीवेरम्। इति भरतहिरूपकोषः शब्दरत्नावली च॥

ह्री, लि लज्जे। इति कविकल्पद्रुमः॥ (ह्वा०-पर०-अक०-अनिट्।) लि, जिह्रेति नीचसङ्गत्या यः। इति दुर्गादासः॥

ह्री, स्त्री, (ह्री लज्जायां+सम्पदादित्वात् क्विप्) लज्जा। इत्यमरः। १। ७। २३॥ (यथा, मार्कण्डेयपुराणे। १२८। २२।

"नाहं तात! करिष्यामि पृथिव्याः परिपालनम्। नापैति ह्रीर्मे मनसो राज्येऽस्मिं त्वं नियोजय॥")

क्रीका, स्त्री, (क्री + "क्रियो रश्च लो वा।" उणा० २। ४८। इति कन्। टाप्।) त्रासः। इत्युणादिकोषः॥ लज्जा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

क्रीकुः, त्रि, (क्री + "क्रियः कुक् रश्च लो वा।" उणा० ३। ८५। इति कुक्।) लज्जितः। सलज्जः। इत्युणादिकोषः॥

क्रीकुः, पुं, (क्री + कुक्।) जतुकः। त्रपुः। इत्युणादिकोषः॥

क्रीच्छ, लज्जे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) रेफयुक्तादिचतुर्थस्वरी। क्रीच्छति वधूः। इति दुर्गादासः॥

क्रीजितः, त्रि, (क्रिया जितः।) लज्जाशीलः। इति जटाधरः॥

क्रीण, } त्रि, (क्री + क्तः। तस्य वा नः।)
क्रीतः } लज्जितः। इत्यमरः। ३। १। ८१॥

(यथा, महाभारते। ३। २३। ८।
"हा नाथ! हा धर्म्म इति ब्रुवाणा
क्रीताश्च सर्व्वेऽनुमुखाश्च राजन्!॥"
यथा च नैषधे। ३। ६७।
"इतीरिता पत्ररथेन तेन
क्रीणा च हृष्टा च बभाष भैमी॥")

क्रीवेरं, क्ली, (क्रियते लज्जायै वेरमङ्गमस्य। क्षुद्रत्वात्।) बालकम्। इत्यमरः। २। ४। १२२॥ वाला इति भाषा। अस्य गुणाः राजवल्लभे। "क्रीवेरं कफहृल्लासतृष्णातीसारनाशनम्।" अन्यत् कुवेरशब्दे द्रष्टव्यम्॥

क्रीवेलं, } क्ली, (क्रीवेर + पृषोदरादित्वात् रस्य
क्रीवेलकं, } लः। पक्षे क्रीवेल + स्वार्थे कन्।)
क्रीवेरम्। इत्यमरटीकायां भरतः॥

क्रुड़, } ऋ ङ गतौ। इति कविकल्पद्रुमः॥
क्रूड, } (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अज-क्रूड़त्। अजुक्रोड़त्। ङ, क्रूड़ते। क्रोड़ते। इति दुर्गादासः॥

क्रेप, ऋ ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अजिक्रेपत्। ङ, क्रेपते जिक्रेपे। इति दुर्गादासः॥

क्रेप, ऋ ङ सर्पणे। अव्यक्तशब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अव्यक्तशब्दे अक०-सर्पणे सक०-सेट्।) रेफयुक्तादयः। ऋ, अजिक्रेपत्। ङ, क्रेपते जिक्रेपे। ङ, क्रेपृ च स्वनेऽव्यक्ते नाम्। ङ, क्रेपते घोटकः जिक्रेपे। ऋ, अजिक्रेपत्। चकारात् क्रेपृ ङ च। मधुरमधुपं क्रेपन्त्येते।

इति गणकृतानित्यत्वात्। वस्तुतस्तु पचादित्वादनि क्रेपा इवाचरन्तीति क्रौ साध्यम्। इति दुर्गादासः॥

क्रेषा, स्त्री, (क्रुष + भावे घः।) अव्यक्तानां कण्ठादिनिर्गतशब्दः। इत्यमरः। २। ८। ४७॥

क्रोड, ऋ ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अजुक्रोड़त्। क्रोड़ते। इति दुर्गादासः॥

क्लग, म ए संवरणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, क्लगयति अक्लगीत्। इति दुर्गादासः॥

क्लप, क भाषणे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, क्लापयति। रेफयुक्तादित्येके। क्लृपयति। अन्तःस्थषष्ठतीययुक्तः कण्ठवर्गाद्यादिरिति दुर्गसिंहादयः। क्लापयति अचिक्लपत्। भाषणं कथनम्। इति दुर्गादासः॥

क्लम, रवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) क्लमति। इति दुर्गादासः॥

क्लाद, ई ङ मोदने। स्नेने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-मोदने सक०-सेट्। निष्ठायामनिट्।) मोदनं हृष्टीकरणं हृष्टीभावश्च। ई, क्लन्नः। ङ, क्लादते चन्दनो गात्रम्। बलात् प्रह्लादते मनः। इति किराते। इति दुर्गादासः

क्लाद, पुं, (क्लाद + घञ्।) आह्लादः। इति हेमचन्द्रः॥ (यथा, मार्कण्डेये। १५। ५३।
"ततस्तदुग्रसंसर्गी पवनो ह्लाददायकः।
पापकर्म्मकृतो राजन्! यातना न प्रबाधते॥"
हिरण्यकशिपोः पुत्रभेदः। यथा, विष्णुपुराणे। १। १५। १४२।
"अनुह्लादश्च ह्लादश्च प्रह्लादश्चैव बुद्धिमान्।
संह्लादश्च महावीर्य्या दैत्यवंशविवर्द्धनाः॥")

क्लादिनी, स्त्री, (क्लादिनी रलयोरैक्यात् रस्य लः।) विद्युत्। वज्रम्। इत्यमरः। २। ४। १२४॥ (क्लादयते इति। क्लाद + णिनि। ङीप्।) शक्तिविशेषः। यथा,—
"क्लादिन्या सन्विदाश्लिष्टः सच्चिदानन्द ईश्वरः।
स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः॥"
इति श्रीभागवते ७।१।७ टीकायां श्रीधरस्वामी॥

क्लीका, स्त्री, (क्ली लज्जायाम् + "क्रियोरच लो वा।" उणा० ३।४८। इति कन्। पक्षे रस्य लः।) लज्जा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

क्लीकुः, स्त्री, (क्ली + "क्रियः कुक् रश्च लो, वा।" इति कुक् पक्षे रस्य लः।) क्लाकुः। इत्युणादिकोषः॥

क्लीकुः, पुं, (क्ली + कुक्। रस्य लः।) जतु त्रपु। इत्युणादिकोषः॥

क्लेषा, स्त्री, (क्लेषा। रस्य लः।) क्लेषा। इत्यमरटीकायां नीलकण्ठः॥

क्लल, म चाले। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, प्रक्ललयति। मित्त्वेऽप्यस्य जौ ज्वलह्वल इत्यादिना केवलस्य क्लस्विकल्पनात् सोपसर्गस्य नित्यं क्लस्वः। क्ललयति क्लालयति। चालयतीत्यर्थः। इति दुर्गादासः॥

क्लृ, कौटिल्ये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) क्लरति लतां वायुः। इति दुर्गादासः॥

क्लृ, ञ ऐ शब्दे। शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-शब्दे अक०-स्तर्दे-सक०-अनिट्।) स्तर्दः पराभिभवेच्छा। इति बोपदेवः॥ ञ, क्लरयति क्लरयते मल्लो मल्लमभिभवितुमिच्छति॥ क्लरयति जनं लोकः। आह्वयतीत्यर्थः। ऐ क्लरयात्। गोविन्दभट्टस्तु स्तर्दविषये व्यक्तवाक्येऽयमित्याह। इति दुर्गादासः॥

ल्

ल, शेषलकारः। गौड़देशे अस्याकारोच्चारणयोर्भेदो नास्ति। किन्त्वस्याध एकबिन्दुमात्रचिह्नं क्रियते। वेदे अस्य उच्चारणस्थानं जिह्वामूलम्। देवनागरवर्णमालायां अस्याकारः एवं प्रकारः ल। अस्य प्रयोगः। अग्निमीळे। हे इन्द्र वोळु चित्। इत्यादि ऋग्वेदः॥ *॥ तन्त्रे वर्णमालाजपे अस्य प्रयोजनम्। यथा,—
"अनुलोमविलोमेन क्लृप्तया वर्णमालया।
आदिसान्तं सादि सान्तक्रमेण परमेश्वरि!।
चकारं मेरुरूपञ्च लङ्घयेन्न कदाचन॥"
इति मुण्डमालातन्त्रम्॥
मालकाङ्क्षायामेऽपि अस्य प्रयोजनम्। तत्प्रमाणं मालकाशब्दे द्रष्टव्यम्॥*॥ तस्य नामानि यथा,
"लः पृथ्वी विमला मेधो अनन्तोऽव्यवहासिता।
व्यापिनी शिवदा केतुर्जगत्सारतरं दृढः॥
लौर्भृङ्गी च वेदार्थसारो नारायणः स्वयम्।
जठरो नकुलिः पीता शिवेशोऽनङ्गमालिनी॥"
इति श्रीनन्दनभट्टाचार्य्यविरचितवर्णाभिधानम्॥
अपि च।
"लकारो विमलो जीवः शिवभूमिर्व्वरानने!॥"
इति श्रीरुद्रयामले ८ पटले मन्त्राभिधानम्॥

कोषः श्रीवरदाप्रसादवसुना श्रीशब्दकल्पद्रुमो यत्र श्रीहरिपूर्व्वकेण चरणेनाकल्पितो यत्नतः।
सोऽयं कोविदवारिदैर्हृगुणैः संसेचितः सन्ततं सन्तोषं नयतु चितो बुधगणान् पेयूषगर्भैः फलैः॥
रसेन्दनागोडुपतिप्रमाणे शाके शुभेऽस्मिन् भगवत्प्रसादात्।
नीतः समाप्तिं बहुलप्रयासैः स शब्दकल्पद्रुम एष कोषः॥

समाप्तोऽयं शब्दकल्पद्रुमः।

Reprinted by
Skylark Printers (photo-Offset), Delhi-6 (Phone : 266595)